DUE DATE SLIP

GOVT. COLLEGE, LIBRARY

KOTA (Raj.)

Students can retain library books only for two weeks at the most.

BORROWER'S No.	DUE DTATE	SIGNATURE

ज्योति विद्यालय, जयपुर

भारतीयाधिशासनसंरक्षकतायां प्रकाशितम्
Published under the auspices of Government of India



शब्दकल्पद्रुमः।

अर्थात्

एतद्देशस्थसमस्तकोषाशेषशास्त्रसङ्कलिताकारादिवर्णक्रमविन्यस्तशब्द-तल्लिङ्ग-नानार्थ-पर्य्याय-प्रमाण-प्रयोग-धातु-तदनुबन्धाभिधेय-सहित-तत्तच्छब्दप्रसङ्गोत्थित-वेद-वेदाङ्ग-वेदान्त-न्याय-पुराणेतिहास-सङ्गीत-शिल्प-सूपकारशास्त्र-ज्योतिष-तन्त्राख्यान-काव्यालङ्कार-च्छन्दःप्रभृति-नाम-लक्षणोदाहरण-द्रव्यगुण-रोगनिदानौषध-स्मृत्युक्तव्यवस्थादिसंयुक्त-सर्व्वदर्शनमतानुसारि-संङ्कलिताभिधानग्रन्थः।

स्यार-राजा-राधाकान्तदेव-बाहादुरेण

विरचितः।

पाणिनिमतानुसारि-प्रत्येकशब्दव्युत्पत्ति-मूलग्रन्थातिरिक्तबङ्गलशब्दार्थ-प्रमाण-प्रयोग-पर्य्याय-धातुपदोदाहरणादिभिः नूतनसङ्कलितबङ्गलशब्द-तदर्थ-तत्प्रमाण-प्रयोगादिसहित-सुप्रशस्तपरिशिष्टेन च सार्द्धम्।

श्रीवरदाप्रसादवसुना तदनुजेन श्रीहरिचरणवसुना च

अशेषशास्त्रविशारदकोविदवृन्दसाहाय्येन संपरिवर्द्धितः। नागराक्षरैः प्रकाशितश्च।

तृतीयः काण्डः।

व्यञ्जनवर्णः।

मोतीलाल बनारसीदास
दिल्ली :: वाराणसी :: पटना

प्रकाशक :
सुन्दरलाल जैन
मोतीलाल बनारसीदास
बंगलो रोड, जवाहरनगर
दिल्ली-६

मुद्रक :
शान्तिलाल जैन
श्री जैनेन्द्र प्रेस
बंगलो रोड, जवाहरनगर
दिल्ली-६

ग्रन्थोऽय भारतीयाधिशासन विनियोजितावश्यकालभ्यसस्कृतग्रन्थपुनर्मुद्रणयोजनायां प्रकाशित: ।
This book has been published under the Scheme
of reprinting of important out-of-print
Sanskrit books sponsored by the
Government of India.
Price Rs. 194-75 for Complete set

प्राप्ति स्थानम्
मोतीलाल बनारसीदास
१. बंगलो रोड, जवाहरनगर दिल्ली-६
२. नैपाली खपरा, वाराणसी
३. बांकीपुर, पटना

शब्दकल्पद्रुमः।

तृतीयकाण्डम्।

प, पकारः। स तु पञ्चमवर्गस्य प्रथमो व्यञ्जनस्यैकविंशतितमो वर्णः। अस्योच्चारणस्थानं ओष्ठः। इति शब्दरत्नम्॥ (तथा च शिक्षायाम्। "कण्ठ्यावहाविचुयशास्तालव्या ओष्ठजावुपू"॥ अस्योच्चारणे आभ्यन्तरप्रयत्नः। ओष्ठेन सह जिह्वाग्रस्य स्पर्शः॥) तत्पर्य्यायः। लोहितः २ पार्श्वः ३ शूरः ४। इति रुद्रयामले वर्णाभिधानम्॥ अस्य तन्त्रं यथा,—

"अतः परं प्रवक्ष्यामि पकाराक्षरमव्ययम्।
चतुर्व्वर्गप्रदं वर्णं शूरचन्द्रसमप्रभम्॥
पञ्चदेवमयं वर्णं स्वयं परमकुण्डली।
पञ्चप्राणमयं वर्णं त्रिशक्तिसहितं सदा॥
त्रिगुणासहितं वर्णमात्मादितत्त्वसंयुतम्।
महामोक्षप्रदं वर्णं हृदि भावय पार्व्वति!"॥

इति कामधेनुतन्त्रे ५ पटलः॥

(वङ्गभाषायां) अस्य लेखनक्रमो यथा,—

"कुक्षिता वामरेखाया कोणाद्दक्षिणतोऽपरा।
कुक्षिता सापि विज्ञेया मात्रा वामोन्नता तथा॥
शम्भुत्रह्मा भगवती क्रमशस्तासु तिष्ठति"॥

इति वर्णोद्धारतन्त्रम्॥

अस्योत्पत्तिप्रकारो यथा,—

"ऋटुरेषकारश्च सर्ज्जगो दन्तगस्तथा।
लृतवर्गलसानीष्ठानुपूपध्मानसंज्ञकान्"॥

इति प्रपञ्चसारः॥ तस्य ध्यानं यथा,—

"विचित्रवसनां देवीं द्विभुजां पङ्कजेक्षणाम्।
रक्तचन्दनलिप्ताङ्गीं पद्ममालाविभूषिताम्॥
मणिरत्नादिकेयूरहारभूषितविग्रहाम्।
चतुर्व्वर्गप्रदां नित्यां नित्यानन्दमयीं पराम्॥
एवं ध्यात्वा पकारन्तु तन्मन्त्रं दशधा जपेत्"॥

इति वर्णोद्धारतन्त्रम्॥* तस्य नामानि यथा।

"पः पूरप्रियता तोक्ष्णा लोहितः पञ्चमो रमा।
गुह्यकर्त्ता निधिः शेषः कालरात्रिः सुवाहिता॥
तपनः पालनः पाता पद्मरेणुर्निरञ्जनः।
सावित्री पातिनी पानं वीरतत्त्वो धनुर्द्धरः॥
दक्षपार्श्वश्च सेनानी मरीचिः पवनः शुनिः।
उद्दीप्तं नयिनी क्रमोत्तवं रेखा च मोहकः॥
मूला द्वितीयमिन्द्राणी लोकाक्षी मन आत्मनः"॥

इति नानातन्त्रशास्त्रम्॥

(अनुबन्धविशेषः। यथा कविकल्पद्रुमे।
'नः स्वादिः पो सुचादिर्मः शमादिर्म्भो झिचीसमोः'। तेन सुच लृ शू प औ मोक्ष इत्यस्य सटि सुचति॥)

पः, पुं, (पातयति वेगेन वृक्षादीन्। पत्+कर्त्तरि डः। अन्तर्णिच्।) पवनः। (पतति वृक्षात्। पत्+कर्त्तरि डः।) पर्णम्। (पीयते इति।) पानम। पाता। इत्येकाक्षरकोषः॥

(यथा, मनुः। २। १३६।
"राजस्नातकयोश्चैव स्नातको नृपमानभाक्"॥)

पक्कणः, पुं क्लीं, (पचति स्वादिनिकृष्टमांसमिति। पच्+क्विप्। पक् शूवरः तस्य कणः कलहशब्दः कोलाहलशब्दो वा यत्र।) शूवरालयः। इत्यमरः॥ २। २। २०॥ (यदुक्तम्।
"मध्येविन्ध्याटवि पुरा पक्कणस्यजनागणैः।
पल्लीपतिरभूद्राज्ञः पिङ्गाक्ष इति विश्रुतः"॥)

पक्कपौड़ः, पुं, वृक्षविशेषः। पखौड़ा इति हिन्दी भाषा। तत्पर्य्यायः। पञ्चक्षत्रः २ वर्द्धनः ३ पञ्चरक्तकः ४। अस्य गुणाः। व्रण्यञ्जनविषौ श्रेष्ठत्वम्। कटुत्वम्। जीर्णज्वरापहत्वञ्च। इति राजनिर्घण्टः॥

पक्वा, [क्व] त्रि, (पचतीति। पच पाके+"सुलटर्चौ"। ३। १। १३३। इति ल्वच्।) पाककर्त्ता।

(यथा ऋग्वेदे। १०। ६। ७।
"ये ते देवि! भ्रमितारः पक्वारो ये च ते जनाः"॥)

अग्नौ पुं। यथा। आग्नेये २ अध्यायः॥

"अन्नसद्मा च पक्वा च पचभोक्ता पचे नमः"॥

पक्तिः, स्त्री, (पच्यते परिणम्यते इति। भावे क्तिन्।) गौरवम्। पाकः। इति मेदिनी॥

(यथा, मनुः। ३। ६७।
"वैवाहिकेऽग्नौ कुर्व्वीत गृह्यं कर्म यथाविधि।
पञ्चयज्ञविधानञ्च पक्तिश्चान्वाहिकी गृही"॥)

पक्तिमूलं, क्लीं, (पक्तौ भक्तस्यान्नादिकस्य परिणामे जायते यत् मूलं रोगविशेषः।) परिणाममूलम्। तत्पर्य्यायः। पाकजम् २ परिणामजम् ३। इति राजनिर्घण्टः॥

पक्वं, क्लीं, (पच्यतेऽनेन। पच् "शृधृकीपचित्रचीति"। ऊणा ४। १६६। इति त्रः।) गार्हपत्याग्निः। इत्युणादिकोषः॥

पक्किमं, त्रि, (पाकेन निर्व्वृत्तम्। डु पच पाक+"ङितः क्त्रिः"। ३। ३। ८८। इति क्त्रिः। "क्त्रेर्मम् नित्यम्"। इति मम्।) पाकिमम्। पाकाज्जातम्। इति त्रिकाण्डशेषः॥

पक्वं, क्लीं, (पच्यते स्म। पच+क्त। "पचो वः"। ८। २। ५२। इति निष्ठातस्य वः।) स्विन्नतण्डुलादि। तत्र पाकस्य विधिनिषेधादिर्यथा,—

"पूर्व्वाशाभिमुखो भूत्वा उत्तराशामुखेन वा।
पचेदन्नञ्च मध्याह्ने सायाह्ने च विवर्ज्जयेत्॥
अग्न्याशाभिमुखे पक्वा अन्नताम्रं निवेद्य च।
पूर्व्वमुखो धर्म्मकामः श्रीकल्याणिश्च दक्षिणे॥
श्रीकामश्चोत्तरमुखो पतिकामश्च पश्चिमे।
ऐशान्याभिमुखे पक्वा दरिद्रो जायते नरः"॥*॥
"यदा तु आयसे पात्रे पक्वमन्नाति वै द्विजः।
स पापिष्ठोऽपि शुद्धात्मा रौरवे परिपच्यते॥
ताम्रे पक्वा चतुर्व्वर्गनिर्म्मलो भवति ध्रुवम्।
स्वर्णपात्रे तु यत् पक्वं अन्नतं तदपि स्मृतम्"॥*॥
"पित्तभ्यां पक्वमन्नञ्च पित्तघ्नेन यशस्विनि!।
पुण्डरीकस्य यज्ञस्य लभते फलमीप्सितम्॥
वातुलेन तु यत् पक्वं भगिन्या च कनिष्ठया।
असगोत्रेण यत पक्वं श्रोत्रियं तदपि स्मृतम्॥
अभक्तेन च यत् पक्वं स्त्रिया पक्वं तथैव च।
पक्वपात्रे च यत् पक्वं तत् सर्व्वं निष्फलं भवेत्"॥*॥
"उदुम्बरेण काष्ठेन कदम्बस्य दलेन च।
शालेन करमर्दस्य उदरावर्त्तकेन च॥
पक्वान्नं नैव भक्षीत शुक्ला रात्रिसुपावसेत्।
गर्हितान्नभवीरान्नं शुक्ला कृच्छ्रं समाचरेत्॥
अप्रजा धातु वनिता नाम्नीवाटैव तद्गृहे"॥
"शालकाष्ठस्य पक्वान्नं शिरीषकस्य चैव हि।
कलिचडातकस्यैव वचावारुणकस्य च।
भैरङ्गशाल्मलेर्व्वापि पक्वान्नं गर्हितं स्मृतम्॥*॥"

"यदा सुरक्षयपात्रे तु पक्वं वै सार्व्वकालिकम् ।
मासे पक्षे तथार्द्धे च तत् पात्रं विसृजेद्बुधः" ॥
"धनुःपाके तथा सिंहे मिथुने वा वरानने ।
यः कुर्य्याद्भोजनं देवि! कृच्छ्रैरेव विशुध्यति" ॥
"एकदा तु फलं दद्यात् द्विवारं न प्रदापयेत् ।
त्रिभागं पूरयेत् पात्रं पक्वाम्बोयं न दापयेत्" ॥
इति ॥ * ॥
"मोदकं कन्दुपक्वञ्च गव्याज्यं घृतसंयुतम् ।
पुनः पुनर्भोजने च पुनरन्नं न दुष्यति" ॥
इति च मत्स्यसूक्ते महातन्त्रे ४२ पटलः ॥

पक्वं, त्रि, (पचति स्म यत् इति । पच + कर्म्मणि क्तः । "पचो वः" । ८ । २ । ५२ । इति निष्ठातस्य वः ।) परिणतम् । पाका इति भाषा ॥ (यथा, मनुः । ६ । १७ ।
"अग्निपक्वाशनो वा स्यात् कालपक्वभुगेव वा" ॥) निर्ज्जरं प्राप्तम् । सुदृढ़मिति यावत् । यथा परिपक्वा बुद्धिः । विनाग्नौष्मुखम् । प्रत्यासन्नविनाशम् । अतिपक्वशब्दनदशूलसादौ निष्पक्वं कथितञ्च । क्षीराद्यपयसां पाके घृतम् । ईषत्पक्वं आमपक्वम् । इत्यमरभरतौ ॥ (भावे क्तः । पाकः । परिणामः ॥)

पक्वकृत्, पुं, (पक्वं करोति वदनान्वितस्यलं परिणमयति निष्पिण्डमत्वमादिभिरिति । कृ + क्विप् ततस्तुक् ।) निम्बवृक्षः । इति शब्दचन्द्रिका ॥ (पक्वं करोति पचत्यन्नादिकमित्यर्थः ।) पाककर्त्तरि त्रि ॥

पक्वरसः, पुं, (पक्वस्य गुड़ान्नादेः रसः ।) मद्यम् । इति शब्दरत्नावली ॥

पक्ववारि, क्ली, (पक्वस्यान्नादेर्वारि यद्वा, पक्वं वारि स्विन्नसलिलमिति यावत् ।) काञ्जिकम् । इति शब्दचन्द्रिका ॥ पक्वजारि इत्यपि पाठः । पक्वजलञ्च ॥

पक्वान्नं, त्रि, (पक्वमन्नम् ।) कृतपाकतण्डुलादि । यथा,
"श्यामं शूद्रस्य पक्वान्नं पक्वमुत्सृष्टमुच्यते" ।
इति तिथितत्त्वम् ॥
("यतौ च ब्रह्मचारी च पक्वान्नस्वामिनावुभौ" ।
इति सदाचारः ॥)

पक्वाशयः, पुं, (पक्वस्य आमादेराशयः आधानम् । यद्वा पक्वं आमादिकं आशेतेऽत्र । पक्व + आ + शीङ् + आधारे + अच् ।) नाभ्यधोभागः । इति राजनिर्घण्टः ॥
"पक्वाशयस्तयो र्नाभेरूर्द्धमामाशयः स्मृतः" ।
इति वैद्यकम् ॥

पक्ष, क परिग्रहे । इति कविकल्पद्रुमः । (चुरां-परं-सकं-सेट् ।) कः, पक्षयति । इति दुर्गादासः ॥

पक्ष, तृ क परिग्रहे । इति कविकल्पद्रुमः ॥ (अदन्त चुरां-परं-सकं-सेट् ।) पक्षयति पक्षापयति । इति दुर्गादासः ॥

पक्षः, पुं, (पक्ष्यते परिगृह्यते देवपित्रर्थं यः । यद्वा, पक्ष्यते चन्द्रस्य पञ्चदशभागं कलानामापूरणं क्षयो वा येन । पक्ष + घञ् । यद्वा, पक्ष्यते इति । पक्ष सुलादौ "अधिपक्षोर्दकौच" । उणां ३ । ६८ । इति मः कर्त्तरि घञ् ।) पक्षदशाधोरात्रः । स च द्विविधः । शुक्लपक्षः पूर्व्वसंज्ञः कृष्णपक्षोपरसंज्ञः । तद्भेदेन व्यवस्था यथा ।
"शुक्लपक्षे तिथिर्यस्यां यस्यामभ्युदितो रविः ।
कृष्णपक्षे तिथिर्यस्यां यस्यामस्तमितो रविः" ॥
अत्रामावास्यावत्तिथिक्षयवृद्धिभ्यां न व्यवस्था किन्तु रवेरुदयास्तमयसम्बन्धात्कृष्णशुक्लपक्षाभ्यां व्यवस्था वा च युग्मद्यनाघातितिथिकर्म्मपरा सामान्यविशेषन्यायात्" । इति तिथ्यादितत्त्वम् ॥ पक्षिणामवयवविशेषः । पाखा इति भाषा । तत्पर्य्यायः । गरुत् २ छदः ३ पत्रम् ४ पतत्रम् ५ तनूरुहम् ६ ॥ शुक्लपक्षः । तीरेर पाखा इति भाषा । तत्पर्य्यायः । बाजः २ । सहायः । कक्षात् परे सन्नहार्थः । यथा केशपक्षः । इत्यमरः ॥ (महाकालः शिवः । कालोपाधिनेदात् पक्षस्य तथात्वम् । यथा महाभारते । १३ । शिवसहस्रनामकीर्त्तने । १७ । १३६ ।
"ऋतुः संवत्सरो मासः पक्षः संख्या समापनः" ॥) पार्श्वः । गृहम् । साधम् । (सन्दिग्धसाधनवान् पदार्थः । यथा, भाषापरिच्छेदे । ७० । ७१ ।
"विपाधयिषया मूत्या सिद्धिर्यत्र न विद्यते ।
स पक्षस्तत्र वृत्तिज्ञानादनुमितिर्भवेत्" ॥) विरोधः । बलम् । (यथा, पञ्चतन्त्रे । ३ । ६६ ।
"यस्तीर्थानि निले पद्मे परपक्षे विशेषतः ।
गुणेश्वरेर्हरौ वेत्ति न स दुर्गतिमाप्नुयात्" ॥) सखा । चुल्लीरन्ध्रम् । राजकुञ्जरः । इति मेदिनी ॥ विहगः । वलयम् । शुद्धः । इति शब्दरत्नावली ॥ वर्गः । (सजातीयवृन्दम् । यथा, गोः रामायणे । २ । १८ । १३
"भरतस्यापि वा पक्षं यो गृह्णीयादचेतनः ।
तं पापमहमद्यैव प्रेषयामि यमक्षयम्" ॥) पिच्छम् । देहाङ्गम् । इति हेमचन्द्रः ॥

पक्षः, [स्] क्ली, (पचतीति । "पचिवचिभ्यां सुट् च" । उणां । ४ । २१६ । इति असुन् सुट् च ।) गरुत् । यथा । पक्षौ च स्मृतौ पक्षौ । इति भरतधृतशब्दभाङ्गः ॥

पक्षकः, पुं, (पक्ष इव प्रतिकृतिः । "इवे प्रतिकृतौ" । ५ । ३ । ९६ । इति कन् ।) पक्षद्वारम् । पार्श्वद्वारम् । इत्यमरः । २ । २ । १४ ॥ खड़कीद्वार इति भाषा । पार्श्वमात्रम् । इति मेदिनी ॥ सहायः । इति शब्दरत्नावली ॥

पक्षघातः, पुं, (पक्षस्य देहार्द्धस्य घातं विनाशं यत्नात् यत्र वा ।) स्नायुनामख्यातवातरोगविशेषः । तल्लक्षणादि यथा,—
"गृहीत्वार्द्धं ततो वायुः शिरास्नायू विशोष्य च ।
पक्षमन्यतमं हन्ति सन्धिबन्धान् विमोचयन् ॥
कृत्स्नोऽर्द्धकायस्तस्य स्यादकर्म्मण्यो विचेतनः ।
एकाङ्गवातं तं केचिदन्य पक्षवधं विदुः" ॥
अर्द्धं अर्द्धनारीश्वरवत् । पक्षं बाहुपार्श्वोरुजघनादिभागम् । अन्यतमं वामं दक्षिणं वा । विमोचयन् शिथिलीकुर्व्वन् । अकर्म्मण्यः कर्म्मासमर्थः । विचेतनः ईषत्संज्ञादिज्ञानयुक्तः ॥ अस्य साध्यासाध्यज्ञानार्थमाह ।
"दाहमन्तापमूर्च्छाः स्युर्व्वायौ पित्तसमन्वित ।
श्लेष्मण्युपगुरुत्वानि तन्निघ्नेव क्रमाद्दिशेत्" ॥
दाहो बाह्यः । सन्तापः आभ्यन्तरः । क्रमश्च लक्षणमन्यत्रापि वातव्याधौ बोद्धव्यम् । आमान्वितो वायाविति निर्द्दिष्टत्वात् ॥ * ॥
पक्षाघातस्य साध्यत्वादिकमाह ।
"शुद्धवातहतं पक्षं कृच्छ्रसाध्यतमं विदुः ।
साध्यमन्येन संयुक्तमसाध्यं क्षयहेतुकम्" ॥
शुद्धः केवलः । अन्येन पित्तेन कफेन वा । क्षयहेतुकं क्षयो धातुक्षयः । तत्कुपितं वातनिमित्तकम् ॥ * ॥ अपरमसाध्यलक्षणमाह ।
"गर्भिणीसूतिकावालवृद्धक्षीणेष्वसत्क्षये ।
पक्षाघातं परिहरेत् वेदनारहितो यदि" ॥
वेदनारहितो यदीति भिन्नमसाध्यलक्षणम् ॥ *
अथ तस्य चिकित्सा ।
"माषात्मगुप्तावातारिवाश्वालकचटाङ्कृतम् ।
हिङ्गुसैन्धवसंयुक्तं पक्षाघातं विनाशयेत् ।
माषिके हिङ्गुसिन्धूत्थे वरणाद्यास्तु शाखिकाः" ।
इति माषादिक्वाथः ॥ १ ॥
"ग्रन्थिकाग्निकणाशुण्ठीरास्नासैन्धवकल्कितम् ।
माषक्वाथयुतं तैलं पक्षाघातं व्यपोहति" ॥
इति ग्रन्थिकादितैलम् ॥ २ ॥
"माषात्मगुप्तातिविषारुवूक-
रास्नाशुताङ्कालवणैः सुपिष्टैः ।
चतुर्गुणे माषबलाकषाये
तैलं पृतं हन्ति हि पक्षघातम्" ॥
इति माषादितैलम् ॥ ३ ॥ इति भावप्रकाशः ॥ *
पक्षाघातस्तु जन्मान्तरीयमहापातकशेषपापचिह्नविशेषः । यथा,—
"पूर्व्वजन्मकृतं पापं नरकस्य परिक्षये ।
बाधते व्याधिरूपेण तस्य कृच्छ्रादिभिः शमः ।
कुष्ठञ्च राजयक्ष्मा च प्रमेहो ग्रहणी तथा ।
मूत्रकृच्छ्राश्मरीकाशा अतिसारभगन्दरौ ॥
दृष्टनष्टं गण्डमाला पक्षाघातोऽक्षिनाशनम् ।
इत्येवमादयो रोगा महापापोद्भवा गदाः" ॥ *
तत्प्रायश्चित्तं यथा,—
"लक्षसुक्षावकं पुण्यं प्रदद्यात् केशवार्च्चने ।
दद्यात् द्विजसहस्राय मिष्टान्नं द्विजभोजने" ॥
इति मलमासतत्त्वम् ॥ किञ्च ।
"क्षुनखी श्यावदन्तश्च द्वादशरात्रं कृच्छ्रं चरित्वा उद्धरेयातां तद्दन्तनखाविति । अत्र द्वादशरात्रं पराकरूपम् । तत्र षष्ठ धेनवः । न तु प्रायापत्यं तद्दाहकर्त्तुर्यतिचान्द्रायणेन विषमशिष्टत्वात् । अत्र बहूनामेकधर्म्माणामिति वचनादाकाङ्क्षातत्वात् कृष्णादीनामपि प्रायश्चित्तम् । अतएव प्रायश्चित्तविवेकेऽप्युक्तम् । एवं दुष्कर्म्मादिष्वूह्यम्" । इति शुद्धितत्त्वम् ॥

पक्षचरः, पुं, (पक्षे शुक्लपक्षे चरतीति । चर + टः ।) चन्द्रः । पृथक्चारिगणः । इति मेदिनी ॥

पक्षजः, पुं, (पक्षे शुक्लपक्षे जायते इति । पक्ष + जन् + ड ।) चन्द्रः । इति त्रिकाण्डशेषः ॥

पक्षजन्मा, [न्] पुं, (पक्षे शुक्लपक्षे जन्म उत्पत्तिः

र्यस्य ।) चन्द्रः । इति शब्दरत्नावली ॥ पक्ष-जाते त्रि ॥

पक्षता, स्त्री, (पक्षस्य भावः ।) अनुमित्याविरहविशिष्टसिद्धाभावः । इयमनुमितिकारणम् । तच्च पर्व्वते वह्न्यनुमितौ अनुमित्याविरहविशिष्ट-पर्व्वतधर्म्मिकवह्निनिश्चयाभावः । यथा,—

"सिसाधयिषया शून्या सिद्धिर्यत्र न विद्यते ।
स पक्षस्तत्र वृत्तित्वज्ञानादनुमितिर्भवेत्" ॥
इति भाषापरिच्छेदे । ७१ ॥

पक्षतिः, स्त्री, (पक्षस्य मूलम् । "पक्षात्तिः" । ५।२।२५ । इति तिः ।) प्रतिपत्तिथिः । (यदुक्तं तिथितत्त्वे ।

"पक्षत्याद्यास्तु तिथयः क्रमात्पञ्चदश स्मृताः"॥)
पक्षमूलम् । इत्यमरः । ३ । ३ । ७२ ॥ डानक इति भाषा ॥

पक्षद्वारं, क्ली. (पक्षे पार्श्वे स्थितं द्वारम् ।) पार्श्वद्वारम् । इत्यमरः । २ । २ । १४ ॥ खड़कीद्वार इति भाषा ॥

पक्षधरः, पुं, (पक्षं धरति धारयतीति वा । धृ + अच् ।) चन्द्रः । इति जटाधरः ॥ पक्षधारण-कर्त्तरि, त्रि ॥

पक्षपातः, पुं, (पक्षे अन्याय्यसाहाय्ये पातः अभिनिवेशः । स्नेहसम्बन्धादनुरोधत एकस्मिन्नेव वर्गे आनुकूल्यप्रयोगचिकीर्षेतिभावः ।) अन्याय्य-साहाय्यकरणम् । (यथा गोः रामायणे २ । १०६ । ५७ ।

"क्वचिद्विवदतोऽर्थेषु बलिनो दुर्ब्बलस्य च ।
अपक्षपातात् पश्यन्ति कार्य्येष्वधिकृता नराः" ॥)
गुरुतल्पकरणम् । यथा । "ईश्वरत्वविषये विप-क्षितां पक्षपातकरणे न कारणम्" । इत्युत्तर-मीमांसायां संक्षेपशारीरम् ॥ (पक्षाणां गरुतां पातः पतनं यत्र ।) पक्षिणां ज्वरः । यदुक्तं "पक्षपातः पतङ्गानाम्" । इति विजयरक्षित. ॥

पक्षपातिता, स्त्री, (पक्षपातिनः साहाय्यकारिणो भावः । पक्षपातिन् + तल् ।) सहायता । यथा,—

"न सुवर्णमयी तनुः परं
ननु किं वागपि तावकी तथा ।
न परं यदि पक्षपातिता
ऽनवलम्बे किमु माद्दशेऽपि सा" ॥
इति नैषधे । २ । ५२ ॥ (पक्षयोः पातो विद्यतेऽस्य इति पक्षपाती खगस्तस्य भावः । पक्षपातनञ्च ॥)

पक्षपालिः, पुं, (पक्षस्य गृहस्य पालिरिव ।) खड़किका । इति शब्दरत्नावली । खड़कीद्वार इति भाषा ॥

पक्षभागः, पुं, (पक्षस्य पार्श्वस्य पक्ष एव वा भागः ।) हस्तिपार्श्वभागः । इत्यमरः । २ । ८ । ४० ॥

पक्षमूलं, क्ली, (पक्षस्य मूलम् ।) पक्षतिः । इत्यमरः । २ । ५ । ३६ । डानक् इति भाषा ॥

पक्षवाहनः, पुं, (पक्षौ वाहनमिव यस्य ।) पक्षी । इति शब्दचन्द्रिका ॥

पक्षसुन्दरः, पुं, (पक्षे देहाङ्गे कुसुमे सुन्दरः ।) लोध्रः । इति हारावली ॥

पक्षान्तः, पुं, (पक्षस्य अन्तो यत्र काले ।) अमावस्या । पूर्णिमा । तत्पर्य्यायः । पञ्चदशी २ । इत्यमरः । १ । ४ । ७ ॥ अर्केन्दुविश्लेषः ३ पर्व्व ४ । इति राजनिर्घण्टः ॥ पक्षावसरः ५ । इति शब्दरत्नावली ॥ (अस्मिन् यात्रा निष्फला भवति । यदुक्तं ज्योतिस्तत्त्वे ।

'पक्षान्ते निष्फला यात्रा मासान्ते मरणं ध्रुवम्' ॥)
पक्षालुः, पुं, (पक्षौ विद्येते यस्य । पक्ष + अर्श्वादि-त्वात् अलुच् ।) पक्षी । इति शब्दचन्द्रिका ॥

पक्षावसरः, पुं, (पक्षस्यावसरोऽपसरणं यत्र काले ।) पूर्णिमा । अमावस्या । इति शब्द-रत्नावली ॥

पक्षिणी, स्त्री, (पक्षौ इव पूर्ब्बापरदिशे विद्येते यस्याः । पक्ष + इनि ङीप् च ।) आगामिवर्त्त-मानाहर्युक्ता रात्रिः । इत्यमरः । १ । ४ । ५ ॥ यथा, शुद्धितत्त्वे ।

"द्वावहावेकरात्रिश्च पक्षिणीत्यभिधीयते" ॥
पूर्णिमा ॥ (पक्षौ विद्येते यस्याः । इनि ङीप् ।) विहगी । शाकिनीभेदः । इति मेदिनी ॥

पक्षिपानीयशालिका, स्त्री, (पक्षिणां पानीयस्य पानार्थजलस्य शालिका शाला ।) चुल्लीदृतालवालम् । पक्षिजलपानस्थानम् । इति भूरि-प्रयोगः ॥

पक्षिलः, पुं. (पक्षयति तत्त्वज्ञानं परिगृह्णातीति । पक्ष + बाहुलकादिलच् ।) वात्स्यायनमुनिः । इति त्रिकाण्डशेषः ॥ (अयं हि गौतमसूत्रभाष्यं कृत-वान् ॥)

पक्षिशाला, स्त्री, (पक्षिणां शाला गृहम् ।) नीड़म् । तत्पर्य्यायः । कुलायिका २ । इति त्रिकाण्डशेषः ॥

पक्षिसिंहः, पुं, (पक्षी सिंह इव । उपमितसमासः । यद्वा, पक्षिषु सिंहः श्रेष्ठः । "सिंहशार्दूल-नागाद्याः पुंसि श्रेष्ठार्थवाचकाः" । इत्यमरोक्ते-स्तथात्वम् ।) गरुड़ः । इति त्रिकाण्डशेषः ॥

पक्षिस्वामी, [न्] पुं, (पक्षिणां स्वामी प्रभुः ।) गरुड़ः । इति हेमचन्द्रः ॥

पक्षी, [न्] पुं, (पक्षाः कङ्कादीनां पक्षाणि सन्त्यस्य । "अत इनिठनौ" । ५ । २ । ११५ । इति इनिः ।) वाणः । इति धरणिः ॥

पक्षी, [न्] पुं स्त्री, पक्षौ विद्येते यस्य । (पक्ष + इनिः ।) विहङ्गमः ॥ पाखी इति चिड़िया इति च भाषा ॥ तत्पर्य्यायः । खगः २ विहङ्गः ३ विहगः ४ विहङ्गमः ५ विहायाः ६ शकुन्तिः ७ शकुनिः ८ शकुन्तः ९ शकुनः १० द्विजः ११ पतत्री १२ पत्री १३ पतगः १४ पतन् १५ पत्ररथः १६ अण्डजः १७ नगौकाः १८ वाजी १९ विकिरः २० विः २१ विष्किरः २२ पतत्रिः २३ नीड़ोद्भवः २४ गरुत्मान् २५ पिच्छिन् २६ नभसङ्गमः २७ । इत्यमरः । २ । ५ । ३४ ॥ नाड़ीचरणः २८ कण्डाङ्गिः २९ पतङ्गः ३० अगौकाः ३१ चक्षुश्रवत् ३२ क्षुरण्डः ३३ सरण्डः ३४ । इति शब्द-रत्नावली ॥ पिपतिषुः ३५ यत्नवाहः ३६ द्युगः ३७ । इति राजनिर्घण्टः ॥* ॥ गुरुभक्तबहुभक्त-

स्थूलकायपक्षिणां पूर्ब्बार्द्धस्य [illegible]
"गुरुभक्ता बहुभुजो ये चोप[illegible] इहन
एकदेहेऽपि पूर्ब्बार्द्धं न गा[illegible] इतिर
पक्षिणामङ्गादीनामत्त[illegible] भाव
"सर्ब्बेषाञ्च शिरःस्व[illegible] पङ्कर्ब्बं
यादपुच्छान्त्रमस्तिष्क[illegible] युक्तं
धातवः श्रोणिताद्याश्च[illegible] "द

अस्याख[illegible]
"मत्स्यकूर्म्मखगाखानि [illegible]
कटुपाकानि रुच्यानि वात[illegible]
इति राजवल्लभः ॥ * ॥ ते[illegible]
"अरुणस्य भार्य्या श्येनी व[illegible]
सम्पातिश्च जटायुश्च प्रसूतौ [illegible]
सम्पातिर्जनयन् गृध्रान् काकाः[illegible]
भार्य्या गरुत्मतस्तापि भासी क्रौ[illegible]
धृतराष्ट्री गरुत्मांस्तु सुग्र्यां जज्ञे[illegible]
चिग्रिवश्च सुनेत्रश्च सुसुखं सुनस[illegible]
सुरूपन्तु सुपर्ब्बाणं तेषां पुत्रा अनन[illegible]
चतुर्दशसहस्राणि क्रूराणां पन्नगाशि[illegible]
सप्तद्वीपेष्विमे सन्ति गारुड़ास्ते महाव[illegible]
भासीपुत्रास्तथा भासा उलूकाः काककु[illegible]
मयूराः कलविङ्काश्च कपोतौ चैव [illegible]
क्रौञ्चां वाधीणसा आसन् कुररा: सारसा
धृतराष्ट्री कलहंसान् धार्त्तराष्ट्रांश्च भा[illegible]
चक्रवाकांश्च विहगान् सग्रेनानुदकान्[illegible]
अन्यानपि द्विजान् जज्ञे पुलमौ[illegible]
इत्यग्निपुराणे काश्यपीयवंशः ॥ (महादेवः ।
महाभारते १३ । शिवनामकीर्त्तने । १[illegible]
"पञ्चौ च पञ्चरूपञ्च अतिदीप्तो [illegible]

पक्ष्णुः, त्रि. पाककर्त्ता । पच् + [illegible] पचपरिष्टचः स्नुः" । इति स्नुप्रत्ययनि इति सुग्धबोधव्याकरणम् ॥

पक्ष्म, [न्] क्ली, (पक्ष्यते परिगृह्यते आत्म दिकमनेन । पक्ष + करणे मनिन् ।) अ[illegible] नेत्रच्छदरोम । (यथा, भागवते । ३ । १ ।

"यमादुत्स्वित् तनयौ पृथायाः
पार्थैर्वृतौ पक्ष्मभिरक्षिणीव" ॥)
किञ्जल्कः । केशरः । तन्त्वादेरणीयान् । रत्यल्पभागः । इत्यमरभरतौ ॥ गरुत् । इत्यमरमाला ॥

पङ्कः, पुं, क्ली, (पच्यते व्याप्यते क्लिद्यते व पच् + घञ् कुत्वं च ।) कर्द्दमः । [illegible] भाषा । (यथा, हितोपदेशे । १ । ६२ ।
"कङ्कणस्य तु लोभेन मग्नः पङ्के सुदुस्तरे ।
वृद्धव्याघ्रेण संप्राप्तः पथिकः संगतो यथा"
पच्यते व्यक्तीक्रियते दुःखमनेन । पचि वि व्यक्तीकरणे च । पचधातोरिदित्वात् नुम् । चेति" । ३ । ३ । १२१ । करणे घञ् कित्त्वात् चस्य कुत्वम् ।) पापम् । त्य १ । ४ । २३ ॥ (यथा, अमरुके । ६ । "करे वपुषि कङ्कादिरक्तपुषि [illegible] त्वं कामनामयसि किं कारय हृदय । ६७

पक्वः

"यदा न्यग्मयपात्रे तु पक्वं वै सार्व्वकालिकम् ।
मासे पक्षे तथार्थौ च तत् पात्रं विसृजेद्बुधौ" ॥*
"धनुःपाके तथा सिंहे मिथुने वा वरानने ।
यः कुर्य्यादोदनं देवि! कृच्छ्रेणैव विशुध्यति" ॥*॥
"एकदा तु बलं दद्यात् द्विवारं न प्रदापयेत् ।
त्रिभागं पूरयेत् पात्रं पश्चात्तोयं न दापयेत्" ॥
इति ॥ * ॥
"मोदकं कन्दुपक्वञ्च गव्याज्यं घृतसंयुतम् ।
पुनः पुनर्भोजने च पुनरन्नं न दुष्यति" ॥
इति च मत्स्यसूक्ते महातन्त्रे ४२ पटलः ॥

पक्वं, त्रि, (पच्यते स्म यत् इति । पच + कर्म्मणि क्तः । "पचो वः" । ८ । २ । ५२ । इति निष्ठातस्य वः ।) परिणतम् । पाका इति भाषा ॥ (यथा, मनुः । ६ । १७ ।
"अग्निपक्वाशनो वा स्यात् कालपक्वभुगेव वा" ॥)
निष्ठां प्राप्तम् । सुदृढ़मिति यावत् । यथा परिणता बुद्धिः । विनाग्नीष्मुखम् । प्रत्यासन्नविनाशम् । अतिपक्वयज्ञनदशूलादौ निष्पक्वं कथितञ्च । क्षीराज्यपयसां पाके घृतम् । ईषत्पक्वे व्यापक्वम् । इत्यमरभरतौ ॥ (भावे क्तः । पाकः । परिणामः ॥)

पक्वकृत्, पुं, (पक्वं करोति वेदनान्वितस्थलं परिणमयति निष्पिण्डपत्रत्वगादिभिरिति । कृ + क्विप् ततस्तुक् ।) निम्बवृक्षः । इति शब्दचन्द्रिका ॥ (पक्वं करोति पचत्यन्नादिकमित्यर्थः ।) पाककर्त्तरि त्रि ॥

पक्वरसः, पुं, (पक्वस्य गुड़ान्नादेः रसः ।) मद्यम् । इति शब्दरत्नावली ॥

पक्ववारि, क्ली, (पक्वस्यान्नादेर्वारि यद्वा, पक्वं वारि स्विन्नसलिलमिति यावत् ।) काञ्जिकम् । इति शब्दचन्द्रिका ॥ पक्कवारि इत्यपि पाठः ॥ पक्कजलञ्च ॥

पक्वान्न, त्रि, (पक्वमन्नम् ।) कृतपाकतण्डुलादि । यथा,
"श्यामं शूद्रस्य पक्वान्नं पक्वमुत्सृष्टमुच्यते" ।
इति तिथितत्त्वम् ॥
("यतौ च ब्रह्मचारी च पक्वान्नस्वामिनावुभौ" ।
इति सदाचारः ॥)

पक्वाशयः, पुं, (पक्वस्य श्यामादेराशयः आधानम् । यद्वा पक्वं श्यामादिकं आशेतेऽत्र । पक्व + आ + शीङ् + आधारे + अच् ।) नाभ्यधोभागः । इति राजनिर्घण्टः ॥
"पक्वाशयस्याधो नाभेरूर्द्धमामाशयः स्मृतः" ।
इति वैद्यकम् ॥

पक्ष, क परिग्रहे । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट् ।) क, पक्षयति । इति दुर्गादासः ॥

पक्ष, तृ क परिग्रहे । इति कविकल्पद्रुमः ॥ (अदन्त चुरां-परं-सकं-सेट् ।) पक्षयति पक्षापयति । इति दुर्गादासः ॥

पक्षः, पुं, (पक्ष्यते परिगृह्यते देवपितृकार्य्यार्थं यः । यद्वा, पक्ष्यते चन्द्रस्य षष्ठदशभागं कलानामापूरणं क्षयो वा येन । पक्ष + घञ् । यद्वा, पक्ष्यते इति । पक्ष क्षुत्यादौ "शकिपटिगदिपदिभ्यो वुन्" । उणां ३ । ६८ । इति सः कक्षान्तादेशः ।) पक्षदशाहोरात्रः । स च द्विविधः । शुक्लपक्षः पूर्व्वसंज्ञः कृष्णपक्षोऽपरसंज्ञः । तद्भेदेन व्यवस्था यथा ।
"शुक्लपक्षे तिथिर्यात्रा यस्यामभ्युदितो रविः ।
कृष्णपक्षे तिथिर्यात्रा यस्यामस्तमितो रविः" ॥
अत्रामावास्यावत्तिथित्वयदृद्धिभ्यां न व्यवस्था किन्तु रवेरुदयास्तमयसम्बन्धात्तुक्लकृष्णपक्षाभ्यां व्यवस्था सा च युग्मादिनाघातितिथिकर्म्मपरा सामान्यविशेषन्यायात्" । इति तिथ्यादितत्त्वम् ॥ पक्षिणामवयवविशेषः । पाखा इति भाषा । तत्पर्य्यायः । गरुत् २ छदः ३ पत्रम् ४ पतत्रम् ५ तनूरुहम् ६ ॥ शूरपक्षः । तीरेर पाखा इति भाषा । तत्पर्य्यायः । बाणः २ । सहायः । कत्वात् परे शब्दार्थः । यथा केशपक्षः । इत्यमरः ॥ (महाकालः शिवः । कालोपाधिभेदात् पक्षस्य तथात्वम् । यथा महाभारते । १३ । शिवसहस्रनामकीर्त्तने । १७ । १३६ ।
"ऋतुः संवत्सरो मासः पक्षः संख्या समापनः" ॥)
पार्श्वः । गृहम् । साध्यम् । (सन्दिग्धसाध्यवान् पदार्थः । यथा, भाषापरिच्छेदे । ७० । ७१ ।
"विषाधयिषया शून्या सिद्धिर्यत्र न विद्यते ।
स पक्षस्तत्र वृत्तिस्तज्ज्ञानादनुमितिर्भवेत्" ॥)
विरोधः । बलम् । (यथा, पञ्चतन्त्रे । ३ । ६६ ।
"यस्तीर्थानि निजे पक्षे परपक्षे विशेषतः ।
गुप्तेश्वरेर्तृपो वेत्ति न स दुर्गतिमाप्नुयात्" ॥)
सखा । चुल्लीरन्ध्रम् । राजकुञ्जरः । इति मेदिनी ॥ विहगः । वलयम् । शुद्धः । इति शब्दरत्नावली ॥ वर्गः । (सजातीयवृन्दम् । यथा, गोः रामायणे । २ । १८ । १३
"भरतस्यापि वा पक्षं यो गृह्णीयादचेतनः ।
तं पापमहमद्यैव प्रेषयामि यमक्षयम्" ॥)
पिच्छम् । देहाङ्गम् । इति हेमचन्द्रः ॥

पक्षः, [स्] क्ली, (पचतीति । "पचिवचिभ्यां सुट् च" । उणां । ४ । २१६ । इति असुन् सुट् च ।) गरुत् । यथा । पक्षौ च स्मृतौ पक्षौ । इति भरतधृतसुभाङ्कः ॥

पक्षकः, पुं, (पक्ष इव प्रतिकृतिः । "इवे प्रतिकृतौ" । ५ । ३ । ६६ । इति कन् ।) पक्षद्वारम् । पार्श्वद्वारम् । इत्यमरः । २ । २ । १४ ॥ खड़कीदार इति भाषा । पार्श्वमात्रम् । इति मेदिनी ॥ सहायः । इति शब्दरत्नावली ॥

पक्षघातः } पुं, (पक्षस्य देहार्द्धस्य घातं विना-
पक्षाघातः } भूतं यस्मात् यत्र वा ।) स्नायुमज्जाख्यातवातरोगविशेषः । तल्लक्षणादि यथा,—
"गृहीत्वार्द्धं ततो वायुः शिरास्नायू विशोष्य च ।
पक्षमन्यतमं हन्ति सन्धिस्तान् विमोचयन् ॥
कृत्स्नोऽर्द्धकायस्तस्य स्यादकर्म्मण्यो विचेतनः ।
एकाङ्गवातं तं केचिदन्य पक्षवधं विदुः" ॥
अर्द्धं अर्द्धनारीश्वरवत् । पक्षं बाहुपार्श्वोरुजङ्घादिभागम् । अन्यतमं वामं दक्षिणं वा । विमोचयन् शिथिलीकुर्व्वन् । अकर्म्मण्यः कर्म्मासमर्थः । विचेतनः ईषत्सुप्तादिज्ञानयुक्तः ॥*॥
अस्य साध्यासाध्यज्ञानार्थमाह ।

पक्षाघा

"दाहसन्तापमूर्च्छाः स्युर्व्यायौ पित्तसमन्वित ।
श्लेष्मण्योष्णगुरुत्वानि तस्मिन्नेव कफात्मके" ॥
दाहो बाह्यः । सन्तापः आभ्यन्तरः । एतच्च लक्षणमन्यत्रापि वातव्याधौ बोद्धव्यम् । धामान्यतो वायाविति निर्द्दिष्टत्वात् ॥ * ॥
पक्षाघातस्य साध्यत्वादिकमाह ।
"शुद्धवातहतं पक्षं कृच्छ्रसाध्यतमं विदुः ।
साध्यमन्येन संयुक्तमसाध्यं क्षयहेतुकम्" ॥
शुद्धः केवलः । अन्येन पित्तेन कफेन वा । क्षयहेतुकं क्षयो धातुक्षयः । तत्कुपितं वातनिमित्तकम् ॥ * ॥ अपरमसाध्यलक्षणमाह ।
"गर्भिणीसूतिकाबालवृद्धक्षीणेष्वसृक्क्षये ।
पक्षाघातं परिहरेत् वेदनारहितो यदि" ॥
वेदनारहितो यदीति भिन्नमसाध्यलक्षणम् ॥*॥

अथ तस्य चिकित्सा ।

"माषात्मगुप्तावातारिवाश्वालकजटाशृतम् ।
हिङ्गुसैन्धवसंयुक्तं पक्षाघातं विनाशयेत् ।
माषिके हिङ्गुसिन्धूत्थे जरणाद्यास्तु शाखिकाः" ।
इति माषादिक्वाथः ॥ १ ॥
"ग्रन्थिकाग्निकणाशुण्ठीरास्नासैन्धवकल्कितम् ।
माषक्वाथशृतं तैलं पक्षाघातं व्यपोहति" ॥
इति ग्रन्थिकादितैलम् ॥ २ ॥
"माषात्मगुप्तातिविषारुबूक-
रास्नाशृताङ्गालवणैः सुपिष्टैः ।
चतुर्गुणे माषबलाकषाये
तैलं शृतं हन्ति हि पक्षघातम्" ॥
इति माषादितैलम् ॥३॥ इति भावप्रकाशः ॥*॥
पक्षाघातस्तु जन्मान्तरीयमहापातकप्रभवपापचिह्नविशेषः । यथा,—
"पूर्व्वजन्मकृतं पापं नरकस्य परिक्षये ।
बाधते व्याधिरूपेण तस्य कृच्छ्रादिभिः शमः ।
कुष्ठञ्च राजयक्ष्मा च प्रमेहो ग्रहणी तथा ।
मूत्रकृच्छ्राश्मरीकाशा अतिसारभगन्दरौ ॥
इत्यत्रणं गण्डमाला पक्षाघातोऽचिनाशनम् ।
इत्येवमादयो रोगा महापापोद्भवा गदाः" ॥*॥
तत्प्रायश्चित्तं यथा,—
"लक्षसूचावचं पुण्यं प्रदद्यात् केशवार्चने ।
दद्यात् द्विजसहस्राय मिष्टान्नं द्विजभोजने" ॥
इति मलमासतत्त्वम् ॥ किञ्च ।
"कृतघ्नो श्यावदन्तश्च द्वादशरात्रं कृच्छ्रं चरित्वा उद्धरेयातां तद्दन्तनखाविति । अत्र द्वादशरात्रं पराकरूपम् । तत्र पञ्च धेनवः । न तु प्राजापत्यं तद्दाढ्यकर्त्तुर्यतिचान्द्रायणेन विषमशिष्टत्वात् । अत्र बहूनामेकधर्म्माणामिति वचनादाकाङ्क्षितत्वात् कृष्णादीनामपि प्रायश्चित्तम् । अतएव प्रायश्चित्तविवेकेऽप्युक्तम् । एवं दुश्चर्म्मादिष्वप्यूह्यम्" । इति शुद्धितत्त्वम् ॥

पक्षचरः, पुं, (पक्षे शुक्लपक्षे चरतीति । चर + टः ।) चन्द्रः । पृथक्चारिगणः । इति मेदिनी

पक्षजः, पुं, (पक्षे शुक्लपक्षे जायते इति । पक्ष + जन् + ड ।) चन्द्रः । इति त्रिकाण्डशेषः ॥

पक्षजन्मा, [न्] पुं, (पक्षे शुक्लपक्षे जन्म उत्पत्ति-

र्यस्य ।) चन्द्रः । इति शब्दरत्नावली ॥ पक्ष-ज्ञाने त्रि ॥

पक्षता, स्त्री, (पक्षस्य भावः ।) अनुमित्साविरह-विशिष्टसन्दिग्धभावः । इयमनुमितिकारणम् । तच्च पर्व्वते वह्न्यनुमितौ अनुमित्साविरहविशिष्ट-पर्व्वतधर्म्मिकवह्निनिश्चयाभावः । यथा,—

"निर्णयविषया मत्या सिद्धिर्यत्र न विद्यते ।
स पक्षस्तत्र वृत्तित्वज्ञानादनुमितिर्भवेत्" ॥

इति भाषापरिच्छेदे । ७१ ॥

पक्षतिः, स्त्री. (पक्षस्य सूत्रम् । "पक्षात्तिः" । ५।२।२५ । इति तिः ।) प्रतिपत्तिथिः । (यदुक्तं तिथितत्त्वे ।

"पक्षत्याद्यास्तु तिथयः क्रमात्पञ्चदश स्मृताः" ॥) पक्षसूत्रम् । इत्यमरः । ३ । ३ । ७२ ॥ डानक इति भाषा ॥

पक्षद्वारं, क्ली. (पक्षे पार्श्वे स्थितं द्वारम् ।) पार्श्व-द्वारम् । इत्यमरः । २ । २ । १४ ॥ खड़कीदार इति भाषा ॥

पक्षधरः, पुं, (पक्षं धरति धारयतीति वा । धृ + अच् ।) चन्द्रः । इति जटाधरः ॥ पक्षधारयति-कर्त्तरि, त्रि ॥

पक्षपातः, पुं, (पक्षे अन्याय्यसाहाय्ये पातः अभि-निवेशः । स्नेहसम्बन्धादनुरोधत एकस्मिन्नेव वर्गे आनुकूल्यप्रयोगाधिक्यैर्यतिभावः ।) अन्याय्य-साहाय्यकरणम् । (यथा गोः रामायणे २ । १०८ । ५० ।

"क्वचिद्विवदतोरर्थेषु बलिनो दुर्बलस्य च ।
अपक्षपातात् पश्यन्ति कार्य्येष्वधिकृता नराः" ॥) गुरुतरकरणम् । यथा । "ईश्वरत्वविषये त्रि-लिङ्गानां पक्षपातकरणे न कारणम्" । इत्युत्तर-मीमांसायां संक्षेपशारीरम् ॥ (पक्षाणां गरुतां पातः पतनं यत्र ।) पक्षिणां ज्वरः । यदुक्तं "पक्षपातः पतत्रिणाम्" । इति विश्वरक्षितः ॥

पक्षपातिता, स्त्री, (पक्षपातिनः साहाय्यकारिणो भावः । पक्षपातिन् + तल् ।) सहायता । यथा,—

"न सुवर्णमयी तनुः परं
नदु किं वागपि तावकी तथा ।
न परं पथि पक्षपातिता
ऽनवलम्बे किमु माद्दशेऽपि सा" ॥

इति नैषधे । २ । ५२ ॥ (पक्षयोः पातो विद्यतेऽस्य इति पक्षपाती खगसैन्यस्य भावः । पक्षपातत्व ॥)

पक्षपालिः, पुं, (पक्षस्य रक्षस्य पालिरिव ।) खड़-किका । इति शब्दरत्नावली । खड़कीदार इति भाषा ॥

पक्षभागः, पुं, (पक्षस्य पार्श्वस्य पक्ष एव वा भागः ।) एकपार्श्वभागः । इत्यमरः । २ । ७ । ८० ॥

पक्षरक्षं, क्ली, (पक्षस्य सूत्रम् ।) पक्षतिः । इत्य-मरः । २ । ४ । ३६ । डानक इति भाषा ॥

पक्षलाहः, पुं, (पक्षौ पार्श्वमिव यस्य ।) पक्षी । इति शब्दचन्द्रिका ॥

पक्षवृन्दः, पुं. (पक्षे केशाग्रे वृन्दमिव सुन्दरः ।) लोध्रः । इति धरणिः ॥

पक्षान्तः, पुं. (पक्षस्य अन्तो यत्र काले ।) अमा-वस्या । पूर्णिमा । तत्पर्य्यायः । पञ्चदशी २ । इत्यमरः । १ । ४ । ७ ॥ अर्केन्दुविशेषः ३ पर्व्व ४ । इति राजनिर्घण्टः ॥ पक्षावरः ५ । इति शब्दरत्नावली ॥ (यस्मिन् याचा निष्फला भवति । यदुक्तं ज्योतिस्तत्त्वे ।

'पक्षान्ते निष्फला याचा मासान्ते मरणं ध्रुवम्' ॥)

पक्षानुः, पुं, (पक्षौ विद्येते यस्य । पक्ष + अस्त्यर्थे आलुच् ।) पक्षी । इति शब्दचन्द्रिका ॥

पक्षावरः, पुं, (पक्षस्यावरोऽपसरणं यत्र काले ।) पूर्णिमा । अमावस्या । इति शब्द-रत्नावली ॥

पक्षिणी, स्त्री, (पक्षौ इव पूर्ब्बापरदिने विद्येते यस्याः । पक्ष + इनि ङीप् च ।) आगामिवर्त्त-मानाहर्युक्ता रात्रिः । इत्यमरः । १ । ४ । ५ ॥ यथा, शुद्धितत्त्वे ।

"द्वावहावेकरात्रिश्च पक्षिणीत्यभिधीयते" ॥

पूर्णिमा ॥ (पक्षौ विद्येते यस्याः । इनि ङीप् ।) विहगी । शाकिनीभेदः । इति मेदिनी ॥

पक्षिपानीयशालिका, स्त्री, (पक्षिणां पानीयस्य पानार्थजलस्य शालिका शाला ।) चुण्डीतड़ाग-वालम् । पक्षिजलपानस्थानम् । इति भूरि-प्रयोगः ॥

पक्षिलः, पुं. (पक्षयति तत्त्वज्ञानं परिग्रहातीति । पक्ष + बाहुलकादिलच् ।) वात्स्यायनमुनिः । इति त्रिकाण्डशेषः ॥ (अयं हि गौतमसूत्रभाष्यं कृत-वान् ।)

पक्षिशाला, स्त्री, (पक्षिणां शाला गृहम् ।) नीड़म् । तत्पर्य्यायः । कुलायिका २ । इति त्रिकाण्डशेषः ॥

पक्षिसिंहः, पुं, (पक्षी सिंह इव । उपमितसमासः । यद्वा, पक्षिषु सिंहः श्रेष्ठः । "सिंहशार्दूल-नागाद्याः पुंसि श्रेष्ठार्थवाचकाः" । इत्यमरोक्तेः सत्यत्वम् ।) गरुड़ः । इति त्रिकाण्डशेषः ॥

पक्षिस्वामी, [न्] पुं. (पक्षिणां स्वामी प्रभुः ।) गरुड़ः । इति हेमचन्द्रः ॥

पक्षी, [न्] पुं, (पक्षाः कङ्कादीनां पत्राणि सन्त्यस्य । "अत इनिठनौ" । ५ । २ । ११५ । इति इनिः ।) वायुः । इति धरणिः ॥

पक्षी, [न्] पुं स्त्री. पक्षौ विद्येते यस्य । (पक्ष + इनिः ।) विहङ्गमः ॥ पाखी इति चिड़िया इति च भाषा ॥ तत्पर्य्यायः । खगः २ विहङ्गः ३ विहगः ४ विहङ्गमः ५ विहायाः ६ शकुनिः ७ शकुनिः ८ शकुन्तः ९ शकुनः १० द्विजः ११ पतत्री १२ पत्री १३ पतगः १४ पतन् १५ पत्ररथः १६ वक्षजः १७ नगौकाः १८ वाजी १९ विकिरः २० विः २१ विष्किरः २२ पतत्रिः २३ नीडोद्भवः २४ गरुत्मान् २५ पिच्छिन् २६ नभ-सङ्गमः २७ । इत्यमरः । २ । ५ । ३४ । नाड़ीचरणः २८ कक्षाग्निः २९ पतङ्गः ३० अगौकाः ३१ उक्षु-मृत् ३२ छुरणः ३३ खरणः ३४ । इति शब्द-रत्नावली ॥ मिथुनिनुः ३५ पक्षवाहः ३६ छुगः ३७ । इति राजनिर्घण्टः ॥ गुरुभङ्गबहुभङ्ग-

स्थूलकायपक्षिणां पूर्ब्बार्द्धस्य श्रे[illegible]
"गुरुभङ्गा बहुभुजो ये चोप[illegible]
एकदेशेऽपि पूर्ब्बार्द्धे खगागा[illegible]
पक्षिगामङ्गादीनामत्त[illegible]
"सर्ब्बेषाञ्च शिरःस्क[illegible]
पादपुच्छान्तमस्तिष्क[illegible]
धातवः श्रोणिताद्याश्च [illegible]

अस्याञ्च

"मत्स्यकूर्म्मखगाखानि [illegible]
कटुपाकानि रुच्यानि वात[illegible]
इति राजवल्लभः ॥ * ॥ ते[illegible]
"अरुणस्य भार्य्या श्येनी वै[illegible]
सम्पातिश्च जटायुश्च प्रसूतौ [illegible]
सम्पातिर्बलवान् गृध्रान् काका:[illegible]
भार्य्या गरुत्मतश्चापि भासी क्रौ[illegible]
धृतराष्ट्री गरुत्मांस्तु सुग्रीवं सुनसं[illegible]
विभिग्रीवञ्च सुनेत्रञ्च सुमुखं सुनस[illegible]
सुरूपन्तु सुपर्ब्बाणं तेषां पुत्रा अनन[illegible]
चतुर्दशसहस्राणि क्रूराणां पन्नगाशि[illegible]
सप्तद्वीपेष्विमे सन्ति गारुड़ास्ते महाब[illegible]
भासीपुत्रास्तथा भासा उलूका: काकजु[illegible]
मयूरा: कलविङ्काश्च कपोतो चैव तित्तिरी।
क्रौञ्चां बाधीनसा श्यामन् कुररा: सारसा वका:॥
धृतराष्ट्री कलहंसान् धार्त्तराष्ट्रांश्च भामिनी।
चक्रवाकांश्च विहगान् सुग्रीवानूदकान् द्विजान्॥
अन्यानपि द्विजान् श्रेष्ठे पुत्रपौत्राननन्तकान्" ॥
इत्यग्निपुराणे काश्यपीयवंशः ॥ (महादेवः । यथा महाभारते १३ । शिवनामकीर्त्तने । १७।६६
"पक्षी च पक्षरूपस्य अतिदीप्तो विभाम्पतिः" ॥

पक्ष्णुः, त्रि. पाककर्त्ता । पच + "ग्लाजास्थाश्वि-पचपरिस्रुजः स्नुः" । इति स्नुप्रत्ययनिष्पन्नः । इति सुग्धबोधव्याकरणम् ॥

पक्ष्म, [न्] क्ली. (पक्ष्यते परिरक्ष्यते आतपतापा-दिकमनेन । पक्ष + करणे मनिन् ।) अक्षिलोम । नेत्रच्छदरोम । (यथा, भागवते । ३ । १ । ३८ ।

"यमादृतस्त्वित् तनयौ पृथायाः
पार्थैर्वृतौ पक्ष्मभिरक्षिणीव" ॥)

किञ्जल्कः । केशरः । तन्त्वाटेरकीयान् । छत्राटे-रत्यल्पभागः । इत्यमरभरतौ ॥ गरुत् । पक्षः । इत्यमरमाला ॥

पङ्कः, पुं, क्ली, (पच्यते याप्यते क्लिद्यते वाद्येन । पच् + घञ् कुत्वं च ।) कर्द्दमः । पाक इति भाषा । (यथा, हितोपदेशे । १ । ६२ ।

"कङ्कणस्य तु लोभेन मग्नः पङ्के सुदुस्तरे ।
वृद्धव्याघ्रेण संप्राप्तः पथिकः संस्तवे यथा" ॥

पच्यते व्यक्तीक्रियते दुःखमनेन । पचि विस्तारे व्यक्तीकरणे च । पचाद्यतोरिदित्वात् नुम् । "हल-ङ्यादि"। ६ । ३ । १२१ । करणे घञ् ततो विस्वात् चस्य कुत्वम् ।) पापम् । इत्यमरः । १ । ४ । २३ । (यथा, श्यामाष्टके । ६ । "व्यङ्गा-क्षरे यमुषि कङ्कादिरुक्षयुषि कङ्कादिपक्षिविषये त्वं श्यामनामयमि किं कारय हृदय । इङ्गारि-

पङ्क्वा

"यन्त्रारिष्टम् ॥") पूर्वस्य गन्धः । पित्तास-मार्गशित्वम् । भस्मक्षयत्वित्वम् । क्रिमित्वम् । "घातश्लेष्मः ॥ शोथघ्नत्वम् । मरुत्वम् । इति य: प्रकाशः ॥

"पङ्कः, पुं. (पङ्केषु कर्दमेषु मनोहरः ।) जल-चित्रम् । यथा.—

"पङ्को घनजम्बाले दलाढ्ये पङ्कलेऽपि च" ।

इति विकाण्डशेषः ॥

पङ्कः, पु, (पङ्कप्रियः कारः पक्षिविशेषः ।) वर्षिपक्षी । इति विकाण्डशेषः ॥ (कादा-मेंचा इति भाषा ।)

क्रीडः, पुं, (पङ्के पङ्केन वा क्रीडति यः । पङ्क + क्रीड + अच् ।) शूकरः । इति कश्चित् । कर्दमखेलके, त्रि ॥

पङ्गडकः, पुं, (पङ्के स्थितो गडकः ।) मत्स्य-विशेषः । पाँकान इति भाषा । तत्पर्य्यायः । ब्रह्मी २ । इति विकाण्डशेषः ॥

पङ्गतिः, स्त्री. (पङ्के गतिरस्य ।) पङ्गडक-मत्स्यः । इति शब्दमाला ॥

पङ्गुराहः, पुं. (पङ्के स्थितो ग्राहः जलजन्तुभेदः ।) मकरः । इति धरावली ॥

पङ्कजं, क्ली. (पङ्के पङ्कात् वा जायते इति । पङ्क + जन + कर्त्तरि + डः ।) पद्मम् । इति राज-निर्घण्टः ॥ (यथा रघुः । ३ । ८ ।

" तिरश्चकार भ्रमराभिलीनयोः
भुजान्तयोः पङ्कजकोषयोः श्रियम् " ॥

अयं हि योगरूढशब्दः । यदुक्तम् ।

"रूढा गवादयः प्रोक्ता यौगिकाः पाचकादयः ।
योगरूढास्तु विज्ञेयाः पङ्कजाद्या मनीषिभिः" ॥)

पङ्कजन्मन्, [न्] क्ली. (पङ्के जन्म यस्य ।) पद्मम् । इति विकाण्डशेषः ॥

पङ्कजिनी, स्त्री, (पङ्कजानि सन्त्यस्याम् । "पुष्क-रादिभ्यो देशे" । ५ । २ । १३५ । इति इनिः ।) पद्माकरः ।

(यथा, मार्कण्डेये । ७५ । २४ ।

"तस्यर्क्षस्य तु या कान्तिर्जाता पङ्कजिनीसरः" ॥)

पङ्कजमुखः । इति रत्नमाला हैमचन्द्रश्च ॥

पङ्कणः, पुं. (पङ्के मांसादिनिमित्तके पापाचार-कर्म्मणि कणः कलहो यस्य सः । एषोदरादित्वात् साधुः ।) पाकः । अघरायः । इति शब्द-रत्नावली ॥

पङ्कप्रभा, स्त्री. (पङ्कस्य प्रभा प्रकाशो यस्याम् ।) पङ्कसमुज्ज्वलत्वविशेषः । इति हैमचन्द्रः ॥

पङ्कमण्डूकः, पुं । पङ्के मण्डूक इव) ग्रामूकः । इति धरावली ॥

पङ्कष्ट, [ट्] क्ली. (पङ्के रोहतीति । पङ्क + रुह – क्विप् ।) पद्मम् । इति राजनिर्घण्टः ॥

पङ्कष्टं, क्ली. (पङ्के रोहतीति । पङ्क + रुह – "इषुपधात्कः" । ३ । २ । १३५ । इति कः ।) पद्मम् । इति राजनिर्घण्टः ॥

पङ्कसारः, पुं. (पङ्के सारो यस्य सः ।) कर्दमः । इति राजनिर्घण्टः । (अनुप्रासार्थमयं शब्दः ।)

पङ्क्तिः

पङ्क्तिः, स्त्री. (पङ्क्ति स्थिता या शुक्तिः ।) दुर्नामा । इति धरावली ॥ झिनुक् इति भाषा ॥

पङ्क्तुरगः, पुं, (पङ्के शूरग इव ।) शूलकः । इति त्रिकाण्डशेषः ॥

पङ्कारः, पुं, (पङ्कमृच्छति पङ्कं प्राप्य वर्द्धते इति यावत् । पङ्क + ऋ + उपपदे "कर्म्मण्यण्" । ३ । २ । १ । इति अण् ।) श्रेवलः । सेतुः । सोपानम् । जलकुलकः । इति मेदिनी ॥

पङ्किलः, त्रि. (पङ्कोऽस्त्यस्मिन् । "लोमादिपामादि-पिच्छादिभ्यः शनेलचः" । ५ । २ । १०० । इति इलच् ।) सकर्दमः । तत्पर्य्यायः । सजम्बालः २ । इत्यमरः । २ । १ । १० ॥ पङ्कयुक्तः ३ । इति शब्दरत्नावली ॥ कर्दमान्वितः ४ । इति जटाधरः ॥ (लक्षणया त्याज्यार्थेऽपि । यथा महाभारते ८ पर्व्वणि । "मांसमज्जास्थिपङ्किला मही" ॥)

पङ्क्तिनं, क्ली, (पङ्क्तौ जायते इति । "सप्तम्यां जनेर्डः" । ३ । २ । ९७ । इति डः । "तत्पुरुषे कृतीति" । ६ । ३ । १४ । इति सप्तम्या अलुक् ।) पद्मम् । इति विकाण्डशेषः ॥

पङ्क्तिरुहं, क्ली (पङ्क्तौ रोहतीति । पङ्क्ति + रुह + "इगुपधेति" । ३ । १ । १३५ । इति कः । "तत्-पुरुषे कृति बहुलम्" । ६ । ३ । १४ । इति सप्तम्या अलुक् ।) पद्मम् । इत्यमरः ॥ १ । १० । ४० ॥ (यथा, भागवते । ७ । १५ । ६८ । "यत्पादपङ्कजरुहसेवया भवानहारषीन्निर्जित-दिग्गजः क्रतून्" ॥) सारसपक्षिणि, पुं ॥

पङ्क्तिः, स्त्री. (पच्यते अक्लीक्रियते श्रेणीविशेषैः श्रेणीति यावत् । पचि + अक्लीकरणे + भावे + क्तिन् । इदित्वान्नुम् । यद्वा, पञ्चयति विस्तार-यति जातिसंस्थानविशेषमिति । पचि + विस्तारे + कर्त्तरि + क्तिच् ।) सजातीयसंस्थानविशेषः । श्रारि इति यौति इति च भाषा । तत्-पर्य्यायः । वीथी २ आलिः ३ आवलिः ४ श्रेणी ५ । इत्यमरः । २ । ४ । ४ ॥ वीथिः ६ आली ७ आवली ८ पङ्क्ती ९ श्रेणिः १० । इति भरतः ॥ श्रारणिः ११ सन्ततिः १२ । इति जटाधरः ॥ विश्रोली १३ पालिः १४ पाली १५ वीथिका १६ । इति शब्दरत्नावली ॥ (यथा, मार्कण्डेये । ४३ । ३६ ।

'विलोक्या विशदा चैषां फलपङ्क्तिः सुभोगदा' ॥)

पङ्क्तिपादच्छन्दोविशेषः । तस्य लक्षणं यथा ।

"भ्भौगिति पङ्क्तिः" ॥ १ ॥ उदाहरणं यथा,—

"कृष्णसनाथा तरंगपङ्क्तिः ।
यासनकक्षे चारु चकार" ॥

इति छन्दोमञ्जरी ॥ (पङ्क्तिच्छन्दस उत्पत्ति-स्थानं यथा. भागवते । ३ । १२ । ४६ ।

"मुखतोऽवर्त्तत तस्य पङ्क्तिरिन्द्रियदेवता" ।

पङ्क्तेरयं पाङ्क्तः । पङ्क्तिरिन्द्रियमस्य इति । "पङ्क्ति-विंशतित्रिंशद्भ्यां डण्" । ५ । १ । ५८ । निपातनात् प्राप्तेः अनुशब्दस्य द्वितीयः तिप्रत्ययश्च ।) इन्द्रियाधिष्ठातृदेवः । इन्द्रियसंख्या । इति मेदिनी । (यथा, ऋक् । १ । ६६ ।

पङ्क्ति

" तेन मन्त्रप्रयुक्तेन निमेषार्द्धादपातयत् ।
स राजशिरःपङ्क्तिमज्ञातव्रणवेदनाम् " ॥)

पृथिवी । इति शब्दमाला ॥ गौरवम् । पाकः । इति हैमचन्द्रः ॥ १ ॥

अथ पङ्क्तिसाङ्कर्य्यदोषाः यथा.—

"न संवसेच्च पतितैर्न चाण्डालैर्न पुक्कसैः ।
न मूर्खैर्नावलिप्तैश्च नान्त्यैर्नान्यावसायिभिः ॥
एकशय्यासनं पङ्क्तिर्भाण्डपक्वान्नमिश्रणम् ।
याजनाध्यापने योनिस्तथैव सह भोजनम् ॥
सहाध्यायस्तु दशमः सहयाजनमेव च ।
एकादश समुद्दिष्टा दोषाः साङ्कर्य्यसंज्ञिताः ॥
समीपे चाप्यवस्थानात् पापं संक्रमते नृणां ।
तस्मात् सर्व्वप्रयत्नेन साङ्कर्य्यपरिवर्ज्जयेत्" ॥ १ ॥

पङ्क्तिसाङ्कर्य्यदोषनिवारणोपाया यथा,—

"एकपङ्क्त्युपविष्टा ये न स्पृशन्ति परस्परम् ।
भस्मना क्रममर्य्यादा न तेषां सङ्करो भवेत् ॥
अग्निना भस्मना चैव षड्भिः पङ्क्तिर्विभिद्यते" ॥
इति कूर्म्मे १५ अध्यायः ॥

षड्क्तिग्रीवः, पुं, (षड्क्तिः दशषड्क्षिका ग्रीवा यस्य ।) रावणः । इति शब्दरत्नावली ॥

षड्क्तिचरः, पुं, (षड्क्त्या श्रेणीबद्धः सन् चरतीति । षड्क्ति + चर + टः ।) कुररपक्षी । इति राजनिर्घण्टः ॥

षड्क्तिदूषकः, पुं. (श्राद्धकाले भोजनार्थमुप-विष्टानां व्रतस्नातानां ब्राह्मणानां षड्क्तिं श्रेणीं दूषयति यः । षड्क्ति + दूष् + कर्त्तरि ण्वुल् ।) अपाङ्क्तेयः । श्राद्धभोजनानर्हब्राह्मणः । यथा.—

"अपाङ्क्तेयास्तु ये राजन् कीर्त्तयिष्यामि तान् शृणु ।
कितवो भ्रूणहा यक्ष्मी पशुपालो निराकृतिः ।
ग्रामप्रेष्यो वार्द्धुषिको गायनः सर्व्वविक्रयी ।
अगारदाही गरदः कुण्डाशी सोमविक्रयी ॥
सासूदिको राजभृतस्तैलिकः कूटकारकः ।
पित्रा विवदमानश्च यश्चोपपतिर्गृहे ॥
अभिशस्तस्तथा क्लीबः शिल्पं यश्चोपजीवति ।
पर्व्वकारश्च सूची च मित्रध्रुक् पारदारिकः ॥
अव्रतानामुपाध्यायः काण्डपृष्ठस्तथैव च ।
अभिशं यः परिक्रामेत् यः शुना दष्ट एव च ॥
पङ्क्तिदूषस्तु यश्च स्याद्दुर्म्मा गुरुतल्पगः ।
कुशीलवो देवलको नक्षत्रैर्यश्च जीवति ॥
दंशश्च ब्राह्मणश्च ये च अपाङ्क्तेयास्तु ते मताः ।
रक्षांसि भक्षते एषं यद्दत्तान्न प्रदीयते" ॥ २ ॥

"आद्धे भुक्ता महाराज ! दुर्धर्म्मा गुरुतल्पगः ।
आद्धं नाश्नन्ति तस्य पितरोऽपि न भुञ्जते ॥
सोमविक्रयिणे दत्तं विण्मूत्रसमं भवेन्नृप !
भिषजे शोणितसमं नष्टं देवलके तथा ॥
अप्रतिष्ठं वार्द्धुषिके निष्फलं परिकीर्त्तितम् ।
बहुवान्निजके दत्तं नैव तासुच तद्भवेत् ॥
भस्मन्येव हुतं एवं तथा यौनभवे द्विजे ।
ये तु धर्म्मध्वजेषु चरित्रापगतेषु च ॥
एवं कथं प्रयच्छन्ति तेषां तत् परिनश्यति ।
ज्ञानपूर्व्वन्तु ये तेभ्यः प्रयच्छन्त्यल्पबुद्धयः ॥
पुरीषं भुञ्जते तस्य पितरः प्रेत्य निश्चितम् ।

रतान्विद्धि महाबाहो अपाङ्क्तेयान् द्विजाधमान्।
भूदाशानुपदेशान्तु ये कुर्वन्त्यल्पबुद्धयः॥
यष्टिं काकः शनं खञ्जः श्वित्री यावत् प्रपश्यति।
पङ्क्तां समुपविष्टायां तावद्वधयते नृप!॥
यदोष्टशिरा भुङ्क्ते यद्वङ्क्ते दक्षिणामुखः।
सोपानत्कश्च यद्भुङ्क्ते सर्व्वं विद्यात्तदासुरम्॥
अस्रूयते च यद्दत्तं यच्च श्रद्धादिवर्ज्जितम्।
सर्व्वं तदसुरेन्द्राय ब्रह्मा भागमकल्पयत्॥
स्थानञ्च पङ्क्तिदूषास्तानावेदेरन् कथञ्चन॥"॥
"तस्मात् परिहृते दत्तात्तिलांस्तत्रे विकीरयेत्।
तिलैर्विरहितं श्राद्धं कृतं क्रोधवशेन च॥
यातुधानाः पिशाचाश्च विप्रलुम्पन्ति तद्धविः।
अपाङ्क्तेयानतः पङ्क्तां भुञ्जानो नतु पश्यति।
तावत् फलाद्भ्रंशयति दातारं तस्य वा निशम्॥"
इति पाद्मे स्वर्गखण्डे ३५ अध्यायः॥

पङ्क्तिपावनः, पुं. (पङ्क्तिं श्राद्धोपलक्षे भोजनायोपविष्टानां वेदविद्याविशारदानां ब्राह्मणानां श्रेणीं पुनाति भावयति वा स्वोपवेशनेनेति। पङ्क्ति+पावि+ल्युः।) श्रेणिपवित्रकर्त्ता। श्राद्धभोजनार्हब्राह्मणः। यथा,—
"इमे हि मनुजश्रेष्ठ! विज्ञेयाः पङ्क्तिपावनाः।
विद्यावेदव्रतस्नाता ब्राह्मणाः सर्व्व एव हि॥
सदाचारपराश्चैव विज्ञेयाः पङ्क्तिपावनाः।
मातापित्रोर्यश्च वश्यः श्रोत्रियो दश पूरुषः।
ऋतुकालाभिगामी च धर्म्मपत्नीषु यः सदा।
वेदविद्याव्रतस्नातो विप्रः पङ्क्तिं पुनात्युत॥
अथर्व्वशिरसोऽध्येता ब्रह्मचारी यतव्रतः।
सत्यवादी धर्म्मशीलः स्वकर्म्मनिरतश्च यः॥
ये च पुण्येषु तीर्थेषु अभिषेकाप्लुतश्रमाः।
मखेषु च समस्तेषु भवन्त्यवभृथप्लुताः॥
अक्रोधनाश्चपलाः क्षान्ता दान्ता जितेन्द्रियाः।
सर्व्वभूतहिता ये च श्राद्धेष्वेतान् निमन्त्रयेत्॥
ऋतेषु दत्तमक्षय्यमेते वै पङ्क्तिपावनाः।
यतयो मोक्षधर्म्मज्ञा योगाः सुचरितव्रताः॥
ये चेतिहासं प्रयताः श्रावयन्ति द्विजोत्तमान्।
ये च भाष्यविदः केचिद्ये च व्याकरणे रताः॥
अधीयते पुराणं ये धर्म्मशास्त्राणि चाप्युत।
अधीत्य च यथान्यायं विधिवत्तस्य कारिणः॥
उपपन्नो गुरुकुले सत्यवादी सहस्रदः।
अग्र्याः सर्व्वेषु वेदेषु सर्व्वप्रवचनेषु च॥
यावदेते प्रपश्यन्ति पङ्क्तां तावत् पुनन्ति च।
ततो हि पावनात् पङ्क्त्या उच्यन्ते पङ्क्तिपावनाः॥
अनृत्विगनुपाध्यायः स चेदध्यासनं व्रजेत्।
ऋत्विग्भिरनुज्ञातः पङ्क्त्या हरति दुष्कृतम्॥
अथ चेद्देवितं सर्व्वैः पङ्क्तिदोषैर्विवर्ज्जितः।
न च स्यात् पतितो राजन्! पङ्क्तिपावन उच्यते॥"
इति पाद्मे स्वर्गखण्डे ३५ अध्यायः॥
(पञ्चानन्यर्गहम्नः। यथाह हारीतः।
"भवनः पावनस्तेषां यस्य पञ्चाग्नयो गृहे।
सायं प्रातः प्रदीप्यन्ते स विप्रः पङ्क्तिपावनः॥")

पङ्क्तिरथः, पुं. (पङ्क्तिषु दशसु दिक्षु गतो रथो यस्य।) दशरथराजः। इति शब्दरत्नावली॥

तथा च।
"अयोध्यायां महाराजः पुरा पङ्क्तिरथो बली।
तस्यात्मजो रामचन्द्रः सर्व्वशूरशिरोमणिः॥"
इति पाद्मे पातालखण्डम्॥ (तथा, रघुः। १०।७४।
"नृपतेः प्रतिषिद्धमेव तत्
कृतवान् पङ्क्तिरथो विलज्ज्य यत्॥")

पङ्क्तिबीजः, पुं, (पङ्क्तिभूतानि बीजानि यस्य सः।) वर्ब्बूरवृक्षः। इति राजनिर्घण्टः॥

पङ्गुः, पुं, (खञ्जति गतिवैकल्यं प्राप्नोतीति। खञ्जि गतिवैकल्ये। "वाहुलकात् कुः। खञ्जयोः पगौ नुमागमश्च।" उणां। १।३७। इति पगौ नुमागमश्च। अस्य कक्षायां अत्युच्चतया बहुकालेन राशिभागादिभोगात् मन्दगतित्वादस्य तथात्वम्।) शनैश्चरः। इति शब्दमाला॥ (परिव्राट्। यथोक्तं चिन्तामणौ।
"भिक्षार्थं गमनं यस्य विण्मूत्रकरणाय च।
योजनान्न परं याति सर्व्वथा पङ्गुरेव सः॥")

पङ्गुः, त्रि, (खञ्जि गतिवैकल्ये। बाहुलकात् कुः। खस्य पत्वे जसञ गादेशः गुम् च। उणां १।३७।) जङ्घावैकल्येन चलनाक्षमः। तत्पर्य्यायः। श्रोणः २। इत्यमरः। २।६।४८॥ जङ्घाहीनः ३। इति शब्दरत्नावली॥ (यथा, महाभारते २।५।१२५।
"कञ्चिदन्धांश्च मूकांश्च पङ्गून् व्यङ्गानबान्धवान्।
पितेव पासि धर्म्मज्ञ! तथा प्रव्रजितानपि॥"
यानहरणेनैव लोकः पङ्गुर्भवति। यथा, मार्कण्डेये। १५।३१।
"पुष्पापहृद्दरिद्रश्च पङ्गुर्यानापहृन्नरः॥")
अस्य लक्षणं खञ्जशब्दे द्रष्टव्यम्॥

पङ्गुलः, पुं, सितकाचाभघोटकः। इति हेमचन्द्रः॥

पङ्गुल्यहारिणी, स्त्री, (सेवनेन पङ्गुत्वं पङ्गुत्वं हरति या। पङ्गुल्य+हृ+णिनि+ङीप्।) श्लिष्टड़ीचुपः। इति राजनिर्घण्टः॥

पच, इ क ततौ। इति कविकल्पद्रमः॥ (चुरां-परं-सकं-सेट्। इदित्।) ततिरिह विस्तारवचनम्। इ क, पक्षयति धीरो ग्रन्थार्थम्। इति दुर्गादासः॥ (यथा, गीतगोविन्दे। १०। १३।
"अथयति दृशा मौनं तन्वि! प्रपञ्चय पञ्चमम्।
तरुणि! मधुरालापैस्तापं विनोदय दृष्टिभिः॥")

पच, इ ड वक्तीकारे। (भ्वां-आत्मं-सकं-सेट्।) इ, कर्म्मणि पच्यते। ड, पचते स्वगुणं भिक्षुकः। इति दुर्गादासः॥

पच, ड औ वक्तीकारे। इति कविकल्पद्रमः॥ (भ्वां-आत्मं-सकं-अनिट्।) औ, पक्ता। ड, पचते स्वगुणं भिक्षुकः। इति दुर्गादासः॥

पच, डु भ औ ष पाके। इति कविकल्पद्रमः॥ (भ्वां-उभं-द्विकं-अनिट्।) पाको विक्लित्यनुकूलव्यापारः। डु, पक्तिमम्। भ, पचति पचते तण्डुलानोदनं लोकः। औ, पक्ता। ष, पचा। इति दुर्गादासः॥

पचः, त्रि, पचति यः। (पच्+"नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः।" ३।१।१३४। इति अच्।) पाककर्त्ता। इति व्याकरणम्॥ स्वार्थे कनि पचकश्च॥

पचतः, पुं, (पचतीति। "भ्रस्जदृशिग्रजिपर्ब्बिपथमितमिनमिहर्य्योऽतच्।" उणां। ३।११०। इति अतच्।) सूर्य्यः। अग्निः। इन्द्रः। इत्युणादिकोषः॥ (परिपक्वे, त्रि। यथा, ऋग्वेदे। १।६१।७। "पचतं सहीयान् विध्यद्वराहं तिरो अद्रिमस्ता॥")

पचतिकल्यं क्लीं, (ईषदूनं पचतीति तिङन्तात् कल्यप्।) ईषदूनस्य पाकस्य कर्त्ता। इति व्याकरणम्॥

पचत्पुटः, पुं, (पचत् पुटमस्य।) सूर्य्यमणिवृक्षः। इति शब्दचन्द्रिका॥

पचन्, [त्] त्रि, (पचति यः। "लटः शतृशानचौ।" २।२।१२४। इति शतृप्रत्ययः।) पाककर्त्ता। इति व्याकरणम्॥

पचनं, क्लीं, (पच्यते इति। पच्+भावे ल्युट्।) पाकः। (यथा, भागवते। ३।२६।४०।
"द्योतनं पचनं पानमदनं क्षिममर्द्दनम्॥"
पच्यतेऽनेन इति पचेः करणे ल्युट्। पाकसाधनम्। यथा, ऋग्वेदे। १।१६२।६। "ये चार्वते पचनं संभरन्त्युतो तेषामभिगूर्तिर्न इन्वतु॥")

पचनः, पुं, (पचत्यसौ इति। पच्+कर्त्तरि ल्युः।) अग्निः। इति शब्दचन्द्रिका॥ पाककर्त्तरि, त्रि॥

पचनी, स्त्री, (भुक्तमजीर्णादिकं पच्यतेऽनया। पच्+करणे ल्युट् स्त्रियां ङीप्।) वनबीजपूरकः। इति राजनिर्घण्टः॥

पचन्ती, स्त्री, (ओदनादीन् पचति या। पच्+शतृ+स्त्रियां ङीप्।) पाककर्त्री। इति व्याकरणम्॥

पचमानः, त्रि, (पचतेऽसौ इति। "लटः शतृशानचौ"। २।२।१२४। इति शानच्।) पाककर्त्ता। इति व्याकरणम्॥ (पुं, वह्निः॥)

पचम्पचा, स्त्री, (पचं पचं पचति। पचेः खश् ततो मुम्। स्त्रियां टाप्।) दारुहरिद्रा। इत्यमरः। २।४।१०२॥

पचा, स्त्री, (पच्यते इति पचेः घित्वादड् ततष्टाप्।) पाकः। इत्यमरः। ३।२।८॥ (पचत्यसौ इति पचाद्यच् स्त्रियां टाप्। पाककर्त्री॥)

पचिः, पुं, (पचतीति। पच्+"सर्व्वधातुभ्य इन्।" उणां। ४।११७। इति इन्।) अग्निः। इति त्रिकाण्डशेषः॥ पचनम्। इति संक्षिप्तसारव्याकरणम्॥

पचेलिमः, पुं, (पचत्यसौ इति। "पच शालमच्।" उणां। ४।३७। इति एलिमच्।) सूर्य्यः। अग्निः। इत्युणादिकोषः॥ कर्त्तुरनायासेन स्वयं पक्वे, त्रि। (स्वयमेव पच्यते पचेः कर्म्मकर्त्तरि केलिमप्रत्ययः।) यथा, पचेलिमाः सरघुलाः। इति मुग्धबोधव्याकरणम्। (यथा च

मनौ। ४।१७२। श्लोकस्य टीकायां कुल्लूकभट्टः। "यथा भूमिरप्रबीजमात्रा तदेव प्रचुरपर्चेलिमफलत्रीहिलवकसम्मिलिता न भवति॥")

पचेलुकः, पुं, (पचत्योदनादीन्। पचो वाहुलकादेलुकः।) सूदः। पाचकः। इति त्रिकाण्डशेषः॥

पच्छः, [स्] अ, (वीप्सार्थे पादं पादमिति पद्भावः ततः शस्। यद्वा पादं पादम्। इति संक्षिप्तसारव्याकरणम्॥

पच्यमानः, त्रि, (पच्यतेऽसौ इति। पच्+कर्म्मणि शानच्।) वर्त्तमानपचनकर्म्मताश्रयः। वर्त्तमानपाकविशिष्टतण्डुलादि। इति व्याकरणम्॥

पच्ल, इ रोधे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्-इदित्।) रोध आवरणम्। पञ्जरः। सौत्रधातुरयम्। इति दुर्गादासः॥

पञ्चः, पुं, (पद्भ्यां जातः। पद्+जन्+कर्त्तरि डः।) शूद्रः। इति हेमचन्द्रः॥ (शूद्रस्य पद्जातत्वसूक्तं श्रुतौ यथा,—

"ब्राह्मणोऽस्य मुखमासीत् बाहू राजन्यः कृतः। उरू तदस्य यद् वैश्यः पद्भ्यां शूद्रो अजायत॥")

पञ्चभटिका, स्त्री, छन्दोविशेषः। तल्लक्षणं यथा,

"प्रतिपदयमकितषोड़शमात्रा
नवमगुरुत्वविभूषितगात्रा।
पञ्चभटिका पुनरत्र विवेकः
क्वापि न मध्यगुरुर्गण एकः॥"

उदाहरणं यथा,—

"तरलवनंसाश्लिष्टस्कन्ध-
स्खलतरपञ्चभटिकाकटिबन्धः।
गौलिचपलश्रिग्धिचन्द्रकवृन्दः
कालियशिरसि नगर्त्त सुवृन्दः॥"

इति छन्दोमञ्जर्यां मात्रावृत्ताख्यः ५ स्तवकः॥

(तथा च भगवच्छङ्कराचार्य्यकृतमोहमुद्गरे ४।

"मा कुरु धनजनयौवनगर्व्वं
हरति निमेषात् कालः सर्व्वम्।
मायामयमिदमखिलं हित्वा
ब्रह्मपदं प्रविशाशु विदित्वा॥"४॥)

क्षुद्रघण्टिका। इति छन्दोमञ्जरीटीका॥

पञ्च, [न्] त्रि, संख्याविशेषः। पाँच इति भाषा। बहुवचनान्तोऽयम्। इत्युणादिकोषः॥ (यथा, मनुः। ११।१६५।

"पुण्यमूलफलानाञ्च पञ्चगव्यं विशोधनम्॥")

तद्वाचकानि यथा। पाण्डवः १ शिवास्त्रम् २ इन्द्रियम् ३ स्वर्गः ४ प्रकाण्डः ५ महाध्यायम् ६ महाभूतम् ७ महाकायम् ८ महाश्रमः ९ पुराकल्पकृतम् १० चक्रम् ११ प्राणाः १२ वर्गः १३ इन्द्रियार्थः १४ वाणः १५। इति कविकल्पलता॥ पञ्चसंख्याविशिष्टे, त्रि। यदुक्तम्। "संख्यासंज्ञेऽपि स्वादञ्च त्रिषु।" इत्यमरः। २।५।८३॥

पञ्चक, त्रि, (पञ्चैव इति स्वार्थे कन्।) पञ्च। यथा, भाषापरिच्छेदे। ३३। "संख्यादिपञ्चकं कालादिभ्योऽन्यत्र ते च ते।" इति। (पञ्च संख्यापरिमाणमस्य "तदस्य परिमाणम्।" ५।१।५७। इत्यनुवृत्तौ "संख्याया संज्ञा संघसूत्राध्ययनेषु।" ५।१।५८। इति पञ्चसञ्ज्ञापरिमिति संघार्थे कन् प्रत्ययः। धनिष्ठादि पञ्चलक्षणम्। यथाह चिन्तामणिः।

"अग्निचौरभयं रोगो राजपीड़ा धनच्युतिः।
संग्रहे तृणकाष्ठानां क्षते वस्त्रादिपञ्चके॥"

पञ्चभिः क्रीतम्। "संख्याया अतिशदन्तायाः कन्।" ५।१।२२। इति कन्। पञ्चभिः क्रीते द्रव्यविशेषे॥)

पञ्चकपालः, पुं, पञ्चसु कपालेषु संस्कृतः पुरोडाशः। ("संस्कृतं भक्षाः।" ४।२।१६। इत्यण् ततो "द्विगोर्लुगनपत्ये।" ४।१।८८। इत्यणो लुक्।) स तु यज्ञविशेषः। यथा। "परा वा एष यज्ञं पशून् वपति योऽग्निमुद्वासयते पञ्चकपालः पुरोडाशो भवति।" इत्यादि यजुर्वेदीयश्रुतिः॥ (पञ्चानां कपालानां समाहारः। परनिपातः।) कपालपञ्चके, क्ली॥

पञ्चकर्म्म, [न्] क्ली, (पञ्चानां कर्म्मणां समाहारः।) पञ्चप्रकारशारीरिकचिकित्साविशेषः। यथा,—

"वमनं रेचनं नस्यं निरूहश्चानुवासनम्।
पञ्चकर्म्मेदमन्यच्च कर उत्क्लेषणादिकम्॥"

इति शब्दचन्द्रिका॥ (भाषापरिच्छेदोक्तानि पञ्चकर्म्माणि। यथा, तत्रैव ६।

"उत्क्लेषणं ततोऽवक्लेषणमाकुञ्चनं तथा।
प्रसारणञ्च गमनं कर्म्माण्येतानि पञ्च च॥")

पञ्चकषायः, पुं, (पञ्चविधः कषायः। अथवा पञ्चानां वृक्षाणां कषायः वल्कलरसः। क्वचित्त्वयं बहुवचनान्तोऽपि दृश्यते। तत्र तु पञ्च च ते कषायाश्चेति कर्म्मधारयः।) महाखानीयपञ्चप्रकारकषायद्रव्यम्। यथा,—

"जम्बुशाल्मलिवाशालं वकुलं बदरं तथा।
कषायाः पञ्च विज्ञेया देवाः प्रीतिकराः शुभाः॥"

इति दुर्गोत्सवपद्धतिः॥

पञ्चकृत्यः, पुं, (पञ्च विस्तृतं कृत्यं शाखापल्लवादिकं यत्र।) पक्षपौड़वृक्षः। इति राजनिर्घण्टः॥ (क्ली, पञ्च प्रपञ्चितं कृत्यं कार्य्यं सृष्ट्यादिकम्। सृष्टिस्थितिध्वंसविधानानुग्रहात्मकं कार्य्यम् इति भावः। यथाह चिन्तामणिः।

"यस्मिन् सृष्टिस्थितिध्वंसविधानानुग्रहात्मकम्।
कृत्यं पञ्चविधं प्रभवद्भासते तं नुमः शिवम्॥")

पञ्चकोलं, क्ली, पाचनविशेषः। यथा,—

"पञ्चकोलं कणामूलं क्षाराजवयानिनागरैः।"
इति शब्दचन्द्रिका॥ अस्य गुणाः।
"पञ्चकोलं रसे पाके कटुकं रुचिरुन्मनम्।
तीक्ष्णोष्णं पाचनं श्रेष्ठं दीपनं कफवातनुत्।
गुल्मप्लीहोदरानाहशूलघ्नं पित्तकोपनम्॥"
इति भावप्रकाशः॥ अपि च।
"पिप्पली पिप्पलीमूलं चव्याचित्रकनागरम्।
दीपनीयः श्रुतो वर्गः कफानिलगदापहः॥"
इति चक्रपाणिदत्तः॥ (पञ्चकोलघृतसूक्तं चरके चिकित्सितस्थाने १८ अध्याये।

"पिप्पलीपिप्पलीमूलचव्यचित्रकनागरैः।
सचारैरर्द्धपलिकैर्दिः प्रस्थं सर्पिषः पचेत्॥
कल्कैर्द्विपञ्चमूलस्य तुलार्द्धस्य रसेन च।
दधिमस्ततोयेतं तत्सर्पिर्जठरापहम्।
श्वयथुं वातविष्टम्भं गुल्मार्शांसि च नाशयेत्॥")

पञ्चकोषाः, पुं, (पञ्च च ते कोषाश्चेति।) कोषा इवात्माच्छादकत्वेन कोषाः। ते च पञ्चविधाः। यथा। अन्नविकारत्वात् स्थूलशरीरं अन्नमयकोषः १॥ पञ्चकर्म्मेन्द्रियसहितप्राणपञ्चकं प्राणमयकोषः २॥ पञ्चज्ञानेन्द्रियसहितं मनः मनोमयकोषः ३॥ पञ्चज्ञानेन्द्रियसहिता बुद्धिः विज्ञानमयकोषः ४॥ अहङ्कारात्मकोऽविद्यात्मको वा आनन्दमयकोषः ५॥ इति श्रिव गीतासु ४॥ अपि च।

"पित्तशुक्लान्नजाद्वीर्य्याज्जातोऽन्नेनैव वर्द्धते।
देहः सोऽन्नमयो नात्मा प्राक् चोर्द्ध्वं तदभावतः॥
इत्यन्नमयकोषः १॥

"पूर्णो देहे बलं यच्चान्नाद्यानां यः प्रवर्त्तकः।
वायुः प्राणमयो नासावात्मा चैतन्यवर्জ্জनात्॥"
इति प्राणमयकोषः २॥

"अहन्तां ममतां देहे गृहादौ च करोति यः।
कामाद्यवस्थया भ्रान्तो नासावात्मा मनोमयः॥"
इति मनोमयकोषः ३॥

"लीना सुप्तौ वपुर्बोधे याभुयादानखाग्रगा।
चिच्छायोपेतधीर्नात्मा विज्ञानमयशब्दभाक्।
इति विज्ञानमयकोषः ४॥

"काचिदन्तर्मुखाकृत्तिरानन्दप्रतिबिम्बभाक्।
पुण्यभोगे भोगशान्तौ निद्रारूपेण लीयते॥
कादाचित्कत्वतो नात्मा स्यादानन्दमयोऽव्ययम्॥"
इत्यानन्दमयकोषः ५ इति पञ्चदशी॥

पञ्चचारगणः, पुं, (पञ्चाना चाराणां गणः। चारपञ्चकम्। पञ्चलवणम्। यथा,—

"चारैस्तु पञ्चभिः प्रोक्तः पञ्चचाराभिधो गणः।
काचसैन्धवसामुद्रविट्सौवर्चलकैः समैः॥
स्यात् पञ्चलवणं तच्च स्वल्पोपेतं षड़ङ्गयम्।
इति राजनिर्घण्टः॥

पञ्चखट्वं, क्ली स्त्री, (पञ्चानां खट्वानां समाहारः।) पञ्चखट्वाः समाहृताः। इति व्याकरणम्॥

पञ्चगणयोगः, पुं, (पञ्चानां गणो यत्र स एव योगः।) विदारी गन्धा वृहती वृश्चिकाली निदिग्धिका श्वदंष्ट्रा एता मिलिताः। इति राजनिर्घण्टः॥

पञ्चगवं, क्ली स्त्री, पञ्चानां गवां समाहारः॥ (समासे टच्।) पञ्चगवाः समाहृताः। इति व्याकरणम्॥

पञ्चगवधनः, त्रि, पञ्च गावो धनं यस्य। इति सुग्धबोधव्याकरणम्॥

पञ्चगव्य, क्ली, (गोर्विकारः गव्यम्। पञ्चगुणितं गव्यम्।) गोसम्बन्धिपञ्चप्रकारद्रव्यम्। (यथा मनुः। ११।१६५।

"भक्ष्यभोज्योपहरणे यानशय्यासनस्य च।
पुण्यमूलफलानाञ्च पञ्चगव्यं विशोधनम्॥")

पञ्चचू

नत्तु गोमयगोमूत्रदुग्धदधिघृतरूपम् । यथा,—
"पञ्चगव्यं दधिक्षीरघृतगोमूत्रगोमयैः ।". इति शब्दचन्द्रिका ॥ * ॥ तत्परिमाणं यथा,—
"पलमात्रं दुग्धभागं गोमूत्रं तावदिष्यते ।
घृतञ्च पलमात्रं स्यात् गोमयं तोलकत्रयम् ॥
दधि प्रस्थमात्रं स्यात् पञ्चगव्यमिदं स्मृतम् ।
अथवा पञ्चगव्यानां समानो भाग इष्यते ॥"
इति गौतमीयतन्त्रम् ॥ * ॥ अपि च ।
"गोशृङ्गद्विगुणं मूत्रं पयः स्यात्तच्चतुर्गुणम् ।
घृतं तद्द्विगुणं प्रोक्तं पञ्चगव्यं तथा दधि ॥" * ॥
तस्य पानफलं यथा,—
"पञ्चगव्येन पूतन्तु वाजिमेधफलं लभेत् ।
गव्यन्तु परमं मेध्यं गव्यादन्यन्न विद्यते ॥
सौम्ये मुहूर्त्ते संयुक्तं पञ्चगव्यन्तु यः पिबेत् ।
यावज्जीवकृतात् पापात् तत्क्षणादेव मुच्यते ॥"
गव्यानां देवप्रीतिकरत्वं यथा,—
"दधा हि चिदग्राः सर्व्वे क्षीरेण च महेश्वरः ।
घृतेन पावकः नित्यं पायसेन पितामहः ॥
मक्षद्दत्तेन प्रीयन्ते वर्षाणाञ्च त्रयोदश ।
तां दत्त्वा चैव पीत्वा च प्रेतो मेध्यस्तु जायते ॥"
इति वराहपुराणम् ॥ * ॥
तस्य विशेषो यथा,—
"पयः काञ्चनवर्णाया श्वेतवर्णोत्यगोमयम् ।
गोमूत्रं ताम्रवर्णाया नीलवर्णाभवं घृतम् ॥
दधि स्यात् कृष्णवर्णाया दर्भोदकसमायुतम् ।
गोमूत्रमाषकाग्र्यौ गोमयस्य चतुष्यम् ॥
क्षीरस्य द्वादश प्रोक्ता दधस्तु दश उच्यते ।
घृतस्य माषकाः पञ्च पञ्चगव्यं मलापहम् ॥"
इति गारुड़े प्रायश्चित्तप्रकरणम् ॥

पञ्चगुः, त्रि, पञ्चभिर्गोभिः क्रीतः । इति मुग्धबोधव्याकरणे द्विगुसमासः ॥

पञ्चगुप्तः, पुं, (पञ्चानामिन्द्रियाणां चापल्यं गुप्तं यत्र । यद्वा पञ्चानां पदार्थानां गुप्तः गोपनं यत्र ।) चार्व्वाकदर्शनम् । (करौ चरणौ शिरश्चेति पञ्चाङ्गानि गुप्तानि अस्य ।) कच्छपः । इति मेदिनी ॥

पञ्चगुप्तिरसा, स्त्री, (पञ्चधा गुप्तौ रसोऽस्याः ।) मक्का । इति राजनिर्घण्टः ॥

पञ्चचामरं, क्ली, षोडशाक्षरपादच्छन्दोविशेषः । यथा,—
"प्रमाणिकापदद्वयं वदन्ति पञ्चचामरम् ॥"
इति छन्दोमञ्जरी ॥४॥ (अस्योदाहरणमाह तत्रैव)
"सुरद्रुमूलमण्डपे विचित्ररत्ननिर्म्मिते
लसद्विताननभूमिते सलीलविभ्रमालसम् ॥
सुराङ्गनाभवक्त्रवीकरप्रपञ्चचामर-
स्फुरत्समीरवीजितं सदाच्युतं भजामि तम् ॥")

पञ्चचीरः, पुं, (पञ्च चीराण्यस्य । बौद्धधर्म्मावलम्बि-जिनभेदः । पञ्च चीराणि स्वरभेदा अस्य ।) मञ्जुघोषः । इति त्रिकाण्डशेषः ॥

पञ्चचूड़ा, स्त्री, (पञ्चमस्काः चूडाः शिरोरत्नानि यस्याः ।) अप्सरोविशेषः । इति पुराणम् ॥ यथा, रामायणे । ६ । ६२ । ७१ ।
"उर्व्वशी मेनका रम्भा पञ्चचूड़ा तिलोत्तमा ।
उपानृत्यंस्तु काकुत्स्थं प्रहृष्टा रक्षसो वधात् ॥")

पञ्चजनः, पुं, (पञ्चभिर्भूतैर्जन्यतेऽसौ । पञ्च + जन् + कर्म्मणि घञ् । "जनिवध्योश्च" ।७।३।३५। इति न वृद्धिः ।) पुरुषः । इत्यमरः । २ । ६ । १ ॥ (यथा, राजतरङ्गिण्याम् । ३ । ३५५ ।
"सङ्गावश्रादिका देवस्तेन श्रीशब्दलाञ्छिताः ।
पञ्च पञ्चजनेन्द्रेण पुरे तस्मिन् निवेशिताः ॥")
दैत्यविशेषः । स च संह्रादस्य कृतौ पत्न्यां जातः । (यथा, श्रीभागवते । ६ । १८ । १४ ।
"संह्रादस्य कृतिर्भार्य्याऽसूत पञ्चजनं ततः ॥"
अपरो दैत्यभेदः । श्रीकृष्णः एनं हत्वा सान्दीपनिसुनये अस्य मृतं पुत्रं गुरुदक्षिणास्वरूपं ददौ । यथा, भागवते । ३ । ३ । २ ।
"सान्दीपनेः सकृत् प्रोक्तं ब्रह्माधीत्य सविस्तरम् ।
तस्मै प्रादात् वरं पुत्रं मृतं पञ्चजनोदरात् ॥")
अस्यास्त्रा पाञ्चजन्यनामा शङ्खो जातः । स च श्रीकृष्णस्य । यथा,—
"पाञ्चजन्यं हृषीकेशो देवदत्तं धनञ्जयः ॥"
इत्यादि श्रीभगवद्गीतायाम् । १ । १५ ॥ (प्रजापतिः । यथा, भागवते । ६ । ४ । ५१ ।
"एषा पञ्चजनस्यास्त्र ! दुहिता वै प्रजापतेः ।
असिक्नी नाम पत्नीत्वे प्रजेश ! प्रतिगृह्यताम् ॥"
सगररराजपुत्रः । यथा, हरिवंशे । १५ । ६ ।
"यौशिन्यसूत सगरादसमञ्जसमात्मजम् ।
राजा पञ्चजनो नाम बभूव स महाबलः ॥"
गन्धर्व्वाः पितरो देवा असुरा रक्षांसि पञ्चजनपदवाच्यानि भवन्ति । इति चिन्तामणिः ॥)

पञ्चजनी, स्त्री, पञ्चानां जनानां समाहारः ततो ङीप् । इति व्याकरणम् ॥ (विश्वरूपकन्या । यथा, भागवते । ५ । ७ । १ । "तदनुप्रासनपरः पञ्चजनीं विश्वरूपदुहितरमुपयेमे ॥")

पञ्चजनीनः, पुं, (पञ्चसु जनेषु साधुः । दिक्संख्ये संज्ञायामिति समासः । पञ्चजने हितम् । पञ्चजनादुपसङ्ख्यानमिति खः । पां । ५ । १ । ६ । वार्त्तिके ।) भरतः । इति हलायुधः ॥ पञ्चजनसम्बन्धिनि पञ्चजन्यः प्रभौ च त्रि ॥

पञ्चज्ञानः, पुं, (पञ्चानां पदार्थानां ज्ञानमस्य ।) बुद्धः । इति हेमचन्द्रः ॥

पञ्चतत्त्वं, क्ली स्त्री, पञ्चानां तत्त्वानां समाहारः । इति व्याकरणम् ॥

पञ्चतत्त्वं, क्ली, (पञ्चानां तत्त्वानां समाहारः ।) पञ्चभूतम् । इति स्वरोदयः ॥ पञ्चमकारः । मद्यमांसमत्स्यमुद्रामैथुनरूपम् । यथा,—
"मद्यं मांसं तथा मत्स्यं मुद्रां मैथुनमेव च ।
पञ्चतत्त्वमिदं देवि ! निर्व्वाणमुक्तिहेतवे ॥
मकारपञ्चकं देवि ! देवानामपि दुर्लभम् ॥"
इति कैवल्यतन्त्रे प्रथमपटलः ॥ वैष्णवानां यथा,—
"तत्त्वज्ञानमिदं प्रोक्तं वैष्णवे शृणु यत्नतः ।
गुरुतत्त्वं मन्त्रतत्त्वं मनस्तत्त्वं सुरेश्वरि ! ॥
देवतत्त्वं ध्यानतत्त्वं पञ्चतत्त्वं वरानने ! ।
तत्रादौ श्रीगुरोस्तत्त्वं वक्ष्येहं शृणु पार्व्वति ! ॥

पञ्चतं

सतैलं वर्त्तिकायुक्तं देहस्थं ब्रह्मतेजसम् ।
गुरुणा मन्त्रदानेन तत्स्वरूपं दीपितं भवेत् ॥
देवतायाः शरीरं हि मन्त्रादुत्पद्यते ध्रुवम् ।
अत एव हि तस्यात्मा देवरूपो न संशयः ॥
ईश्वरस्य तु यद्वीर्य्यं तदेव अक्षयात्मकम् ।
तेन वर्णात्मकं देहं जन्तोरेव न संशयः ॥
मन्त्रवर्णे सर्व्ववर्णमयास्ते परमेश्वरि ! ।
वर्णतत्त्वमिदं देवि ! सर्व्वस्वं मम यद्भवेत् ॥
स्वयं देवो न चान्योऽस्मि निर्म्मलो देवरूपकः ।
सर्व्वत्र देवतां ध्यायेत् त्वगुल्मलतादिषु ॥
ध्यानेन लभते सर्व्वं ध्यानेन विष्णुरूपकः ।
ध्यानेन सिद्धिमाप्नोति विना ध्यानं न सिध्यति ॥
इति ते कथितं तत्त्वं वैष्णवस्य सुरेश्वरि ! ।
यज्ज्ञानादमरत्वञ्च विष्णुरूपो भवेन्नरः ॥
ते नरा नहि गच्छन्ति कदाचिद्यममन्दिरम् ॥"
इति निर्व्वाणतन्त्रे १२ पटलः ॥

पञ्चतपाः, [स्] त्रि, (अग्न्यादिभिः पञ्चभिस्तेजःपदार्थैस्तपति यः । पञ्च + तप् + असुन् ।) अग्निचतुष्टयसूर्य्यपञ्चकसाध्यतपोविशिष्टः । यथा,
"तेजस्विमध्ये तेजस्वी दवीयानपि गण्यते ।
पञ्चमः पञ्चतपसस्तपनो जातवेदसाम् ॥"
इति माघे । २ । ५१ ॥

पञ्चतयं, त्रि, (पञ्च अवयवा यस्य । अवयवे तयप् ।) पञ्चावयवम् । इति व्याकरणम् ॥

पञ्चतन्मात्रं, क्ली, (पञ्चगुणितं शब्दादिभूतसूक्ष्मात्मकं तन्मात्रम् ।) तामसाहङ्कारोत्पन्नमहाभूतोपादानकारणशब्दस्पर्शरूपरसगन्धाः। तदाश्रयद्रव्याणि च । इति सांख्यभाष्यम् ॥

पञ्चता, स्त्री, (पञ्चानां भूतानां भावः। पाञ्चभौतिकस्य शरीरस्य पञ्चधाभावे आरम्भकाणां भूतानां तद्भावापत्तौ सत्यां औपचारिकत्वात् ।) मृत्युः । इत्यमरः । २ । ८ । ११६ ॥ (यथा, भागवते । ७ । ८ । ५२ ।
"स तु जनपरितापं तत्कृतं जानता ते ! ।
नरहर उपनीतः पञ्चतां पञ्चविंश ॥")
देहारम्भकाणां पृथिव्यादिपञ्चमहाभूतानां स्वांशसंक्रमणात् पृथक्त्वम् । इति भरतः ॥ पञ्चभावः । इति मेदिनी ॥ (यथा, मनुः । ८ । १५१ ।
"धान्ये सदे लवे वाच्ये नातिक्रामति पञ्चताम् ॥")

पञ्चतिक्तं, क्ली, (पञ्चगुणितं तिक्तम् ।) तिक्तद्रव्यपञ्चकम् । यथा । निम्बाष्टांशत्रयपटोलनिदिग्धिकाः । इत्यादि चक्रपाणिदत्तः ॥

पञ्चतीर्थी, स्त्री, (पञ्चानां तीर्थानां समाहारः । ङीप् ।) तीर्थपञ्चकम् । यथा । "विषुवद्दिवसे प्राप्ते पञ्चतीर्थीविधानतः ।" इति तिथितत्त्वम् । पञ्चतीर्थान्याह । (तानि च भिन्नदेशे भिन्नरूपाणि, तत्र काशीस्थानि । यथा, काशीखण्डे । १०० । ३६—४० ।
"ज्ञानवापीसुपस्पृश्य नन्दिकेशं ततोऽर्च्चयेत् ।
तारकेशं ततोऽभ्यर्च्च्य महाकालेश्वरं ततः ॥
ततः पुनर्दण्डपाणिमित्येषा पञ्चतीर्थिका ॥")

पञ्चन

पुरुषोत्तमस्थानि यथा.—
"मार्कण्डेये वटे क्षये रोहिणीये महोदधौ।
इन्द्रद्युम्नसरः स्नात्वा पुनर्जन्म न विद्यते॥"
इति तीर्थतत्त्वम्॥ * ॥ अपि च। नाना-स्थानस्थानि यथा,—
"पृथिव्यां यानि तीर्थानि सर्व्वाण्येवाभिषेचनात्।
तत्पञ्चतीर्थस्नानेन समं नास्त्यत्र संशयः॥
एकादश्याञ्च विश्रान्तौ द्वादश्यां शौकरे तथा।
त्रयोदश्यां नैमिषे च प्रयागे च चतुर्द्दशी॥
कार्त्तिक्यां पुष्करे चैव कार्त्तिकस्य सितासिते।
कालेष्वेषु नरः स्नात्वा सर्व्वं पापं व्यपोहति॥"
इति वराहपुराणम्॥

पञ्चत्वं, क्ली, (पञ्चानां तिलादिभूतानां भावः।) मरणम्। पञ्चानां भावः। इति हेमचन्द्रः॥ ("प्रध्वांसमभूत् कायो यदि पञ्चत्वमागतः। पञ्चत्वम् स्वशरीरोल्लेखत्र का परिवेदना"॥ तथा, भागवते। १। १५। ४१।
"रत्नावपानं सोत्सर्गं तं पञ्चत्वे व्यजोहवीत्॥")

पञ्चदश्, त्रि, पञ्चदशानां पूरणः। (पूरणे डट्। पञ्चाधिका दश यत्र वा।) पौनर इत्यादि-भाषा। तत्संख्यामात्रवाचित्वे नान्तत्वबुवच नान्तोऽयम्। इति व्याकरणम्॥ तद्वाचकशब्दः। (यथा, अथर्ब्ववेदे। ११। १। १६। "पितामहाः पितरः प्रजोपजाश्च पक्षा पञ्चदशस्ते असि॥") तिथिः। इति कविकल्पलता॥

पञ्चदशी, स्त्री, (पञ्चदशानां पूरणी। डट्। ङीप्।) पूर्णिमा। अमावास्या। इति मेदिनी॥ (यथाह याज्ञवल्क्यः। १। १४६।
"पञ्चदश्यां चतुर्द्दश्यामष्टम्यां राहुसूतके।
अतुसन्धिषु स्नात्वा वा आह्निकं प्रतिपद्य च॥"
(पञ्चदशप्रकरणानि सन्त्यस्याम्।) श्रीमद्भारती-तीर्थविद्यारण्यमुनीश्वरकृतो वेदान्तग्रन्थविशेषः॥

पञ्चदीर्घ, क्ली, (शरीरस्य स्मृतिशास्त्रोक्तलक्षणकपञ्चसु दीर्घं पञ्चसु अवयवेषु दीर्घलक्षणकमित्यर्थः।) शरीरपञ्चावयवलक्षणविशेषः। यथा,—
"बाहू नेत्रद्वयं कुक्षिर्नं तु नासे तथैव च।
स्तनयोरन्तरञ्चैव पञ्चदीर्घं प्रशस्यते॥"
इति सामुद्रकम्॥

पञ्चधा, व्य, (पञ्चन्+"संख्यायाविधार्थे धा।" ५। ३। ४२। इति धा।) पञ्चप्रकारम्। इति व्याकरणम्॥ (यथा, भागवते। ८। १६। ३७।
"धर्म्माय यशसेऽर्थाय कामाय स्वजनाय च।
पञ्चधा विभजन् वित्तमिहामुत्र च मोदते॥")

पञ्चनखः, पुं, (पञ्च नखा यस्य।) एरण्डः। कूर्म्मः। इति हेमचन्द्रः॥ व्याघ्रः। इति राजनिर्घण्टः॥ * ॥
भक्ष्याभक्ष्यपञ्चनखा यथा,—
"शशकः शल्लकी गोधा खड्गी कूर्म्मश्च पञ्चमः॥"
इति स्मृतिः॥
(तथाच याज्ञवल्क्यः। १। १७७।
"भक्ष्याः पञ्चनखाः सेधागोधाकच्छपशल्लकाः।
शशः सत्यैरपि हि निषिद्धुरुदाहृताः।")

पञ्चप

"पञ्च पञ्चनखा भक्ष्या ये प्रोक्ताः क्षत्रजैर्द्विजैः।
कौशल्याज्ञ! शशादीनां तेषां नैकोऽप्यहं कपिः॥"
इति भट्टिः। ६। १३१॥

पञ्चनदः, पुं, (पञ्च पञ्चसङ्ख्याकाः नद्यः सन्त्यत्र। समासे टच्।) पञ्चनदीयुक्तदेशविशेषः। पञ्जाब इति पारस्यभाषा। तस्य नामान्तरम्। वाल्हीकः भद्रदेशश्च। ता नद्यो यथा। शतद्रुः १ विपाशा २ इरावती३ चन्द्रभागा ४ वितस्ता ५। इति पुराणम्॥
(यथा, राजतरङ्गिण्याम्। ४। २४८।
"रुद्धः पञ्चनदे जातु दुस्तरैः सिन्धुसङ्गमैः॥")
पञ्चानां नदीनां समाहारे क्ली॥ (यथा, रामायणे। ३। ४३। २१।
"ततः पञ्चनदं क्षिप्रं विचेलुर्वं समन्ततः॥"
तच्च काश्मीरस्थनदीपञ्चकरूपं तीर्थम्। यथा, काश्मीरखण्डे। ५६। ११३—११६।
"किरणाधूतपापे च तस्मिन् धर्म्मनदे शुभे।
सवन्त्यौ पापसंहर्त्र्यौ वाराणस्यां शुभप्रदे॥
ततो भागीरथी प्राप्ता तेन दैलीपिना सह।
भागीरथीं समायाता यमुना च सरस्वती॥
किरणाधूतपापा च पुण्यतोया सरस्वती।
गङ्गा च यमुना चैव पञ्चनद्योऽत्र कीर्त्तिताः।
अतः पञ्चनदं नाम तीर्थं त्रैलोक्यविश्रुतम्॥"
तीर्थविशेषः। यथा, महाभारते। ३। ८२। ७८।
"अथ पञ्चनदं गत्वा नियतो नियताशनः।
पञ्चयज्ञानवाप्नोति क्रमशो येनुकीर्त्तिताः॥"
असुरभेदः। यथा, हरिवंशे। १२०। ८८।
"हत्वा पञ्चनदं नाम नरकस्य महासुरम्॥")

पञ्चनिम्बं, क्ली, (पञ्चानां स्वीयपुष्पमूलादि-रूपाणां निम्बानां समाहारः।) निम्बवृक्षस्य-पत्रत्वक्पुष्पफलमूलानि। इति राजनिर्घण्टः॥
"पञ्चनिम्बन्तु तत्पुष्पमूलवल्कफलच्छदैः॥"
इति शब्दचन्द्रिका॥

पञ्चनी, स्त्री, (पञ्चते प्रपञ्चते पाशक्रीड़ा-नियमो यत्र। पचि विस्तारे+ल्युट् स्त्रियां ङीप्।) शारिश्चक्षला। इति शब्दरत्नावली॥ (पाशार छक् इति भाषा॥)

पञ्चनीराजनं, क्ली, पञ्चानां नीराजनानां समाहारः। पञ्चप्रकारानाञ्चिकम्। इति कालोत्तर-तन्त्रम्॥ अस्य विवरणं नीराजनशब्दे द्रष्टव्यम्॥

पञ्चपक्षी, [न्] पुं, (अकारादि-ओकारान्ताः अष्टौ स्वरोरूपाः पञ्चस्वराः पक्षिणः पक्षि-स्वरूपा यत्र।) पारिभाषिकपक्षिपञ्चकद्वारा त्रिकालबोधकग्रन्थग्रन्थः। यथा,—
"प्रणम्य श्रीमहादेवं सर्व्वशास्त्रविशारदम्।
भविष्यदर्थबोधाय पञ्चपक्षी मुनेर्मुखात्॥
तेषां वक्ष्यमाकर्ण्य निजगाद महेश्वरः।
त्रिकालज्ञानबोधार्थं पञ्चपक्षी प्रदर्श्यते॥
अनेन शास्त्रसारेण लोकैः कालत्रयं प्रति।
बलाबलानि दृश्यन्ते सर्व्वकार्य्येषु निश्चितः॥
आगतं पक्षकं दृष्ट्वा देवज्ञः सावधानतः।
यदयत् करोति कर्म्माणि तत्तत् सर्व्वं विचारयेत्॥

पञ्चप

ऊर्द्धावलोकने जीवस्वधोदृष्टा तु मूलकम्।
समदृष्टौ भवेद्धातुरेतान्चिन्ताप्रभेदतः॥"
तत्र।
"ललाटे पुत्रचिन्ता स्यात् कामचिन्ता च कण्ठके।
बाहुभ्यां वस्तुचिन्ता च व्याधिचिन्ता तथोदरे॥
कटौ विच्छेदचिन्ता च शत्रुचिन्ता च गुह्यके।
दुःखचिन्ता भवेत् पादे एते चिन्ताप्रभेदकाः॥" *॥
अपरञ्च।
"अक्षरं पक्षिभुक्तञ्च दिग्दैवतदिनानि च।
कालं वर्णं बलं मित्रं धातुमूलादिकं क्रमात्॥
आरूढप्रश्नलग्नेभ्यः प्रथमाच्चरतोऽपि वा।
प्रच्छकस्य वचः श्रुत्वा यावतो वर्णः स्वरस्तथा॥*॥
स्वरेण कल्पनेद्वारं वारात् पक्षी प्रजायते।
पक्षिणो जायते वाक्यं वाक्याच्च फलसम्भवः॥"*॥
"अकारादिरोकारान्ताः स्वराः पञ्च प्रकीर्त्तिताः।
भक्तार्थे कल्पयेद्रूपं स्वरास्ते पक्षिरूपिणः॥
अकारः श्येन आख्यात इकारः पिङ्गलस्तथा।
उकारो वायसश्चैव एकारस्तामशेखरः।
ओकारो नीलकण्ठश्च स्वरास्ते पक्षिसंज्ञकाः॥
अकारः पूर्व्वदिग्भागे इकारश्चैव दक्षिणे।
उकारः पश्चिमे ज्ञेय एकारश्चोत्तरे तथा॥
शेषस्थानेषु सर्व्वेषु ओकारस्तु प्रकीर्त्तितः।
शकुनानां क्रियागत्या त्यजे युद्धे जयाजयौ॥
श्याकश्येनः पिङ्गलो याम्ये पश्चिमे काक उच्यते।
उत्तरे ताम्रचूड़श्च कलापी मध्यगः स्मृतः॥
ऽक्षणाक्षरकैर्होनान् ककारादींस्तु तित्यसत्।
अकारादिषु ह्रान्तांस्तानेकैकं षट् परिक्रमात्॥
अक्षरे कक्षडा वर्गा धभवाश्च भवन्ति हि।
खजछा नमशा वर्गा इकारे परिकीर्त्तिताः।
गझता यषा वर्गा उक्षरे सूर्य्यषाक्रमम्॥
घटधा फरसा ऋते वर्गा एक्षरमाश्रगाः।
चटदा वलहा वर्गा ओक्षरे परिकीर्त्तिताः॥*॥
प्रथमे रविभौमौ च द्वितीये चन्द्रचन्द्रजौ।
तृतीये जीववारश्च चतुर्थे भृगुवासरः॥
पञ्चमे मन्दवारश्च पक्षिणां क्रमशो लिखेत्।
नन्दा भद्रा जया रिक्ता पूर्णा च तिथयः क्रमात्॥
अकारे मेषसिंहालिः इः कन्यायुगमकर्कटाः।
उकारे चापमीनौ च एकारे च तुलावयौ॥
ओकारे मृगकुम्भौ च एवं राशिश्च संलिखेत्।
स्वराधः स्थापयेत् खेटान् राशेर्यो यस्य नायकः॥
अकारे सप्त ऋक्षाणि रेवत्यादिक्रमेण च।
पञ्च पञ्च इकारादावेवमृक्षं स्वरोदये॥ *॥
प्रथमे चाश्विनी पूर्व्वं पञ्चनक्षत्रमुच्यते।
अतः क्रमात् द्वियट् चैव पञ्च पञ्च च तारकाः॥*
स्वराणाञ्च क्रमेणैव देवताः परिकीर्त्तिताः।
ईश्वरः पवनश्चैव इन्द्राकाशः सदाशिवः॥ * ॥
प्राच्यां पृथ्वी गुरुश्चैव याम्यां शुक्रो जलं तथा।
अङ्गारकः पश्चिमेऽग्निर्ध्रुवो वायुस्तथोत्तरे॥
सूर्य्यपुङ्खस्थाकाशे ऊर्द्धमेवं लिखेत्ततः।
क्षितौ ब्रह्मा जले विष्णुस्तथा रुद्रो हुताशने॥
ईश्वरः पवने चैव तथाकाशे सदाशिवः।
भूतौ मयूरः कुजश्च कुक्कुटो वर्त्तमानकः॥"

पञ्चप

वलिभुक्ध्येनकौ ख्यातौ भविष्यन्तौ सुनिश्चितम् ।
श्येनो हिरण्यवर्णश्च पिङ्गलः शुक्लवर्णकः ॥
काको रक्तोऽसितश्चित्रः कृकुटः श्यामलः शिखी ।
काको सर्वेभ्यस्तस्मात् श्येनो हि
दुर्बलः ॥
कृकुटो दुर्बलस्ताभ्यां पिङ्गलश्चैव कनकः ।
सर्वेभ्यो दुर्बलः पक्षी नीलकण्ठो न संशयः ॥
बली मयूरात् कृष्णश्च ताम्रचूडस्तयोर्बली ।
एतेभ्यो बलवान् श्येनस्ततुर्यो वायसो बली ॥*॥
सितं मयूरः श्येनस्य मयूरस्य च पिङ्गलः ।
पीतचूडस्य सुहृदौ मयूरपिङ्गलौ तथा ॥
पीतस्यापि सितं स्यात् शिखी भवति सर्वदा ।
सुहृदौ पिङ्गलश्येनौ मयूरपक्षशेखरौ ॥ ० ॥
काककृकुटश्येनाश्च पिङ्गलस्य च विद्विषः ।
मयूरस्य रिपू नित्यं सर्वदा श्येनवायसौ ॥
भवतः श्येनकाकौ द्वौ ताम्रचूडस्य विद्वियौ ।
काकस्य शत्रवो नित्यं पिङ्गलश्येनकृकुटाः ॥*॥
उर्ध्वदृष्टिर्भवेत् पीतो श्वेतोदृष्टिस्तु श्यामकम् ।
समदृष्टिर्भवेच्छ्वेतो रक्तो रक्तदृष्टिका ॥ ० ॥
श्येनो नरो वधूः कृष्णः पुरुषो वायसस्तथा ।
कृकुटः स्त्री पुमांश्चैव शिखी नपुंसकस्तथा ॥*॥
श्येनकृष्णौ द्विजश्रेष्ठौ मयूरस्तु वायसः ।
ताम्रचूडो वणिक् शूद्रो नीलकण्ठस्तथान्त्यजः ॥*॥
पतुष्पात् पिङ्गलो श्येनो द्विपदौ श्येनवायसौ ।
ताम्रचूडो नखी पक्षी शिखण्डी पक्षिजीवकः ॥*॥
श्येनो सुखं कण्ठवाक् कृष्णो वचस्तु वायसः ।
कृकुटः पृष्ठभागः स्यात् शिखी पादयुगं क्रमात् ॥*
श्येनो भूम्यां धनं श्येयं पिङ्गलो जलपङ्कयुक् ।
वायसस्तृणसङ्घाते कृकुटो भस्मनाश्रितम् ॥
श्येनः शिखी गृहारण्यं बन्धुस्थानेषु निश्चितम् ।
स्वग्रामे श्येनकृष्णौ तु वायसो बन्धुमाप्नुयात् ॥
कृकुटः परदेशे च परग्रामे तथा शिखी ।
कृष्णस्तु दशहस्ते च त्वर्द्धक्रोशे तु कृकुटः ॥
द्विक्रोशे तु तथा काकः श्येनः क्रोशे तु पूर्ववत् ।
मयूरो योजने चेति तथैव दूरनिश्चयः ॥ * ॥
सप्तौ च मासो गमने च पक्षो
राज्ये दिनानि त्वयनन्तु सद्मे ।
ऋते च वर्षं शकुनस्य चर्या
कालप्रमाणं मुनयो वदन्ति ॥
शुक्रे चन्द्रे गुरुभवनौ लताचान्द्रौ बुधे तथा ।
पक्षं गुरौ फलं सर्वं मूलञ्च रविजे कुजे ॥ * ॥
शुक्रे चन्द्रे भवेद्दोषं बुधे सर्वसुदाहृतम् ।
गुरौ रत्नयुतं हेम सूर्ये मौक्तिकमेव च ॥
भौमे ताम्रं शनौ लौहं राहावस्त्रीणि कीर्त्तयेत् ।
एतेषां धातुभेदश्च वाराणामुदयक्रमात् ॥ * ॥
शुक्रे चन्द्रे जलाधारो देवतावसतिर्गुरौ ।
रवौ चतुष्पदस्थानमिष्टकानिलयो बुधे ॥
दग्धस्थानं कुजे प्रोक्तं शनौ राहौ च वाह्यभूः ।
अमीभिर्दिवसे स्थाने नष्टभूमिं विलोकयेत् ॥*॥
रवौ भौमे च भैरुण्डो मयूरो वायसः शनौ ।

पञ्चप

पादायुधः शिखी शुक्रे काककृष्णौ गुरौ तथा ॥
कृष्णकृकुटाविन्दुर्क्षौ क्रमोऽयं शुक्लकृष्णयोः ।
यस्य वारस्य यः पक्षी तदादिं गणयेद्बुधः ॥
दिनपक्षौ कार्यरूपौ प्रश्नपक्षौ फलप्रदः ।
दिनेषु शुक्लपक्षे यत् कृष्णे रात्रिषु तत्तथा ॥
कृष्णे दिनेषु यद्यत्तत् शुक्ले रात्रिषु योजयेत् ।
बालः कुमारस्तरुणो वृद्धो मृत इति क्रमात् ॥
घटिका षट् वयश्चैवं हि फलमेवमुदीरितम् ।
किञ्चिल्लाभकरो बालः कुमारस्त्वर्द्धलाभदः ॥
तरुणो राज्यदो वृद्धो हानिदो मृत्युदो मृतः ।
भोजनं गमनं राज्यं निद्रा मरणमेव च ॥
एकान्तरे भवेत् कृष्णे शुक्ले स्यात् क्रमशो विदुः ।
पक्षिणां क्रमशो ज्ञात्वा फलं ब्रूयात् यथा तथा ॥
गणयेत् पक्षपक्षादौ जातभूतगणादपि ॥"

शुक्लपक्षे ॥ ० ॥ ततः कृष्णपक्षे ।

"भोजनं मरणञ्चैव निद्रा राज्यं तथैव च ।
गमनं पक्षपक्षाणां कृष्णपक्षे क्रमो दिवा ॥ * ॥
राज्यं सुभिक्षमक्षोभं नष्टलाभं सदा जयम् ।
रोगमृत्युं महालाभं पक्षिणां युक्तिलक्षणम् ॥*॥
अगायासेन दृष्टिः स्यादृष्टधनसञ्चयः ।
भूलाभो रोगनाशश्च याचाविद्वो रणे जयः ॥
दूरादागमनं योगः प्रयाणे पक्षिलक्षणम् ।
राज्योदये यदि प्रश्नो लाभार्थे स्वल्पलाभदः ॥
राज्ञां शिरोरोगः स्यात् याने हानिः क्षयो रणे ।
पुरग्रामप्रवेशश्च गमनं कलहं तथा ।
मनश्चञ्चलमारोग्यं गमनेषु विचारयेत् ॥ * ।
राज्यलाभो जयं सौख्यमक्षोभं रोगनाशनम् ।
सुभिक्षं बहुदृष्टिश्च पक्षिणां राज्यलक्षणम् ॥*॥
याचाघातिरनादृष्टिः कार्यहानिरदर्शनम् ।
व्याधिश्च दीर्घरोगश्च पक्षिणां सन्निलक्षणम् ॥
अपन्थत्वभयञ्चैव सर्वकार्यविनाशनम् ।
एतदेव फलं ब्रूयात् पक्षिणां मृत्युलक्षणम् ॥*॥
श्येने भोक्तरि काकस्तु पात्यो राजा भुजङ्गभुक् ।
स्वग्रावस्थां गतः कृष्णः परासुस्ताम्रशेखरः ॥ * ॥
काके भोक्तरि केकी तु पात्यः स्यात् पिङ्गलो नृपः ।
ताम्रचूडस्तथा स्वापी श्येनः कालवशं गतः ॥*॥
मयूरे भोक्तरि तथा कृष्णो याचावशं गतः ।
महीपः कृकुटः श्येनः स्वापी काको वशं गतः ॥
कृष्णे भोक्तरि पात्यस्तु कृकुटः श्येनको नृपः ।
काको निद्रावशं यातो मयूरो मरणं गतः ॥*॥
कृकुटे भोक्तरि श्येनः पात्यो राजा तु वायसः ।
शिखी निद्रावशं यातः पिङ्गलः कालमाप्नुयात् ॥"
इति कृष्णपक्षस्य दिवाक्रमः शुक्लपक्षस्य रात्रिक्रमश्च ॥ स्वरोदयेऽपि यथा । अनुमोदिते । उन्मोदितेन । व्योमियेवायुः । इत्येव चुहो । एवमुक्तोऽसि ॥*॥
"श्येने भोक्तरि कृष्णः स्यात् पात्यः काको महीपतिः ।
ताम्रचूडो निद्रितश्च शिखी कालवशं गतः ॥ * ॥
मयूरे भोक्तरि श्येनः पात्यः कृष्णो महीपतिः ।
स्वग्रावस्थां गतः काकस्ताम्रचूडो मृतस्तथा ॥*॥
कृकुटे भोक्तरि शिखी सदा गमनमाप्नुयात् ।
श्येनो महीपतिः कृष्णः स्वापी काको मृतिं गतः ॥*॥

पञ्चप्रा

काके भोक्तरि याचायां ताम्रचूड, शिखी नृपः ।
निद्रायां रमते श्येनः कृष्णः कालवशं गतः ॥ * ॥
कृष्णे भोक्तरि याचायां वायसः कृकुटो नृपः ।
नीलकण्ठस्तथा स्वापी श्येनो मृत्युवशं गतः ॥"
इति शुक्लपक्षस्य दिवाक्रमः कृष्णपक्षस्य रात्रिक्रमश्च ॥ * ॥ स्वरोदयेऽपि यथा । अग्निपुरेभोः । गोकरिपुरे । एकोनरिपुः । उपेन्द्रो हरिः । विष्णुस्ते लोकः ॥ * ॥
"इत्युक्तं पक्षिणां कार्यं लाभालाभं शुभाशुभम् ।
येन विज्ञानमात्रेण त्रिकालज्ञो भवेन्नरः ॥
तावन्नर्ज्जन्ति शास्त्राणि शकुनागामनेकशः ।
यावन्न श्रूयते पक्षिशकुनं शङ्करोदितम् ॥"
इति श्रीमद्देवविरचितं पक्षपाक्षशकुनं समाप्तम् ॥

पञ्चपर्णिका, स्त्री, (पञ्च पञ्च पर्णान्यस्याः । ततः कप् कापि अतः इत्वम् ।) गोरक्षीक्षुपः । इति राजनिर्घण्टः ॥

पञ्चपल्लवं, क्ली, (पञ्चानां पल्लवानां समाहारः ।) आम्रादिपञ्चपल्लवकम् । यथा,—
"आम्रजम्बूकपित्थानां बीजपूरकविल्वयोः ।
गन्धकर्म्मणि सर्व्वत्र पञ्चाङ्गि पञ्चपल्लवम् ॥"
इति शब्दचन्द्रिका ॥
वैदिककर्म्मणि घटोपरिदेयपञ्चपल्लवं यथा,—
आम्राश्वत्थवटपर्कटीयशोडुम्बराणि । तान्त्रिक-कर्म्मणि पञ्चपल्लवं यथा,—
"पनसाम्रं तथाश्वत्थं वटं बकुलमेव च ।
पञ्चपल्लवमुक्तञ्च मुनिभिस्तन्त्रवेदिभिः ॥"
इति तन्त्रसारः ॥

पञ्चपात्रं, क्ली, पञ्चानां पात्राणां समाहारः । इति व्याकरणम् ॥ पञ्चपात्रकरणकपार्व्वणविधिराह्निकम् । तत्तु अन्वष्टकाश्राद्धम् । अमावस्यान्तप्रेतपक्षान्तसामत्सरिकं सपिण्डीकरणञ्च इति लोकप्रसिद्धम् ॥

पञ्चपित्तं, क्ली, (पञ्चविधं पित्तम् ।) पित्तपञ्चकम् । यथा,—
"वराहच्छागमहिषमत्स्यमायूरपित्तकम् ।
पञ्चपित्तमिति ख्यातं सर्व्वेष्वेव हि कर्म्मसु ॥"
इति वैद्यकम् ॥

पञ्चप्रदीपः, पुं, (पञ्चसंख्काः प्रदीपा यत्र ।) पञ्चदीपयुक्तारात्रिकम् । यथा,—
"कुर्य्यात् सप्तप्रदीपेन शङ्खघण्टादिवाद्यकैः ।
हरेः पञ्चप्रदीपेन बहुभी भक्तितत्परः ॥"
इति पाद्मोत्तरखण्डे १०७ अध्यायः ॥

पञ्चप्रासादः, पुं, (प्रसीदन्ति मनांसि यत्र । प्र + सद + अधिकरणे घञ् । "उपसर्गस्य दीर्घत्वं क्विप्वचादौ क्वचिद्वचत् ।" इति वचनात् दीर्घः । पञ्चचूड़ान्वितः प्रासादः । मध्यपदलोपिकर्म्मधारयः ।) देवगृहविशेषः । पञ्चरत्न इति ख्यातः । यथा,—
"मध्येऽत्यचित्तं रम्यं पञ्चप्रासादसंयुतम् ।
कारयित्वा हरेर्धाम घृतपायी व्रजेद्दिवम् ॥"
इत्यग्निपुराणम् ॥

पञ्चवन्धः, पुं, (पञ्चमः वन्धः भागो यत्र।) गृहद्रव्यस्य पञ्चमांशग्रहणः। यथा,—
"आगमेनोपभोगेन गृहं भाग्यमतोऽन्यथा।
पञ्चवन्धो दमस्तस्य राज्ञे तेनाविभाविते॥"
आगमेन रिक्थग्रहणादिना। उपभोगेन च मदीयमिदं द्रव्यं तवैवं गृहमपहृतं वेत्यपि। भाग्यं साधनीयं तत् स्वामिना। अतोऽन्यथा तेन स्वामिना अविभाविते। पञ्चवन्धो गृहद्रव्यस्य पञ्चमांशो दमो नाम्निकेन राज्ञे देयः। इति सिताचरा॥

पञ्चभद्रः, पुं, (पञ्चसु अङ्गभेदेषु भद्रः शुभः पुष्टितत्वात्।) पञ्चस्थानेषु पुष्टितोऽश्वविशेषः। यथा,—
"पञ्चभद्रस्तु कृतपृष्ठसुखपार्श्वेषु पुष्टितः॥"
इति हेमचन्द्रः॥ पाठनविशेषः। यथा,—
"छिन्नोऽवापपटवारिवाह-
भूनिम्बगुडीजनितः कषायः।
समीरपित्तज्वरनर्क्करायां
करोति भद्रं खलु पञ्चभद्रः॥"
इति शार्ङ्गधरः॥

पञ्चभूतं, क्ली, पञ्चानां भूतानां क्षित्यप्तेजोमरुद्व्योम्नां समाहारः। (क्वचित्तु संज्ञाप्रयुक्तत्वात् पञ्च च तानि भूतानि चेति कर्म्मधारयसमासमाहुस्तन्न तु एकवचननिष्पन्नतायाम्।)
अस्योत्पत्तिर्यथा।
"अभूत्तस्मादहङ्कारस्त्रिविधः सृष्टिभेदतः।
वैकारिकादहङ्कारादेवा वैकारिका दश॥
दिग्वातार्कप्रचेतोऽश्विवह्नीन्द्रोपेन्द्रमित्रकाः।
तैजसादिन्द्रियाण्यासंस्तामसाच्चा क्रमयोगतः।
भूतादिकादहङ्कारात् पञ्चभूतानि जज्ञिरे॥"
इति शारदायां प्रथमपटलः॥ * ॥
"सोऽहङ्कारस्त्रिभेदः स्यात् सत्त्वादिगुणयोगतः।
वैकारः सात्त्विको नाम तैजसो राजसः स्मृतः॥
भूतादिस्तामसस्तस्मै च पृथक्तत्त्वाद्यवाप्तजन्।
वैकारिकाद्दिगादाच्च चन्द्रैकादश स्मृताः॥
इन्द्रियाणामधिष्ठातृदेवास्ते परिकीर्त्तिताः।
यच्चापरं मनस्तत्त्वं सङ्कल्पविकल्पकम्॥
तैजसादेव तच्ज्ञातमिन्द्रियाणि तथा दश।
भूतादेः पञ्चतन्मात्राण्यासन् भूतमतः परम्॥"
इति राघवभट्टधृतम्॥ * ॥
"शब्दाद्व्योमस्पर्शतस्तेन वायु-
स्ताभ्यां रूपाद्वह्निरेते रसाच्च।
अम्भांस्येतैर्गन्धतो भूर्धरादा
भूताः पञ्च स्वर्गुणोनाः क्रमेण॥"
इति प्रपञ्चसारे प्रथमपटलः॥ * ॥
"आकाशाज्जायते वायुर्वायोरुत्पद्यते रविः।
रवेरुत्पद्यते तोयं तोयादुत्पद्यते मही॥"
(तथा च श्रुतिः।
"तस्मादेतस्मादाकाशः सम्भूतः। आकाशाद्वायुः वायोरग्निरग्नेरापोऽद्भ्यः पृथ्वी समजायत॥"
एतच्छ्रुत्यनुसारेण मनुनाप्युक्तम्। १। २०।
यथा,—
"आदावादस्य गुणस्तेषामवाप्नोति परःपरः।
यो यो यावतिथश्चैषां स स तावद्गुणः स्मृतः॥"
अत्र कुल्लूकभट्टः।
"आद्यादस्याकाशादेर्गुणं शब्दादिकं वायुादिः परः परः प्राप्नोति। एतदेव स्पष्टयति यो यः इति येषां मध्ये यो यो यावतां पूरणो यावतियः वतेरिथुक् स स द्वितीयादिः द्वितीयो द्विगुणः तृतीयस्त्रिगुणः इत्येवमादिर्मन्वादिभिः स्मृतः। एतेनेतदुक्तं भवति। आकाशस्य शब्दो गुणः वायोः शब्दस्पर्शौ तेजसः शब्दस्पर्शरूपाणि अपां शब्दस्पर्शरूपरसवन्त्वा इति॥)
तस्य लयप्रकारो यथा,—
"महौ संलीयते तोये तोयं संलीयते रवौ।
रविः संलीयते वायौ वायुर्नभसि लीयते।
पञ्चतत्त्वाद्भवेत् सृष्टिस्तत्त्वं विलीयते॥"
इति ब्रह्मज्ञानतन्त्रनिर्व्वाणतन्त्रे॥ * ॥
तद्भवास्यादि यथा,—
"अस्थिमांसनखत्वक्चैव नाड़ी त्वक् चेति पञ्चमः।
पृथ्वीपञ्चगुणाः प्रोक्ता ब्रह्मज्ञानेन भाषितम्॥
मलं मूत्रं तथा शुक्रं श्लेष्मा शोणितमेव च।
तोयपञ्चगुणाः प्रोक्ता ब्रह्मज्ञानेन भाषितम्॥
क्षुधा तृष्णा निद्रा चैव भ्रान्तिरालस्यमेव च।
तेजःपञ्चगुणाः प्रोक्ता ब्रह्मज्ञानेनाभाषितम्॥
धारणं चालनं चैव सङ्कोचः प्रसरस्तथा।
वायुपञ्चगुणाः प्रोक्ता ब्रह्मज्ञानेन भाषितम्॥
कामक्रोधस्तथा लोभस्तथा मोहश्च पञ्चमः।
नभःपञ्चगुणाः प्रोक्ता ब्रह्मज्ञानेन भाषितम्॥"
इति ब्रह्मज्ञानतन्त्रे प्रथमपटलः॥ * ॥
पञ्चभूतनक्षत्राणि यथा,—
"धनिष्ठा रेवती ज्येष्ठानुराधा श्रवणा तथा।
अभिजिच्चोत्तराषाढ़ा पृथ्वीतत्त्वमुदाहृतम्॥
पूर्ब्बाषाढ़ा तथाश्लेषा मूलार्द्रा चैव रोहिणी।
उत्तरभाद्रपदा तोयं आपस्तत्त्वमभीरितम्॥
भरणी कृत्तिका पुष्या मघा पूर्ब्बा च फल्गुनी।
पूर्ब्बभाद्रपदा स्वाती तेजस्तत्त्वमिति प्रिये॥
विशाखोत्तरफल्गुन्यौ हस्ता चित्रा पुनर्ब्बसुः।
अश्विनी मृगशीर्षा च वायुस्तत्त्वमुदाहृतम्॥"
इति रुद्रयामलरोदयः॥

पञ्चमं, क्ली, मैथुनम्। यथा,—
"भगलिङ्गस्य योगेन मैथुनं यद्भवेत् प्रिये।
तस्य नाम भवेद्देवि पञ्चमं परिकीर्त्तितम्॥"
इति समयाचारतन्त्रे द्वितीयपटलः॥

पञ्चमः, त्रि, पञ्चानां पूरणः। (पूरणे डट्। ततः नान्तादिति मट्।) पाँच इत्यादि भाषा। इति मेदिनी॥ (यथा, मनुः। ८। १२५।
"उपस्थमुदरं जिह्वा हस्तौ पादौ च पञ्चमम्।
चक्षुर्नासा च कर्णौ च धनं देहस्तथैव च॥")
रुचिरः। दक्षः। इति हेमचन्द्रः॥

पञ्चमः, पुं, पञ्चानां स्वराणां पूरणः। तन्त्रीकण्ठोत्थितस्वरविशेषः। इत्यमरः॥ स तु षड्जादिसप्तस्वराणां पञ्चमः स्वरः। तस्योत्पत्तिर्यथा,—
"वायुः सञ्चरतो नाभेरुरोहृत्कण्ठमूर्द्धसु।
विचरन् पञ्चमस्थानप्राप्त्या पञ्चम उच्यते॥"
इति तद्टीकायां भरतः॥ अपि च।
"प्राणोदान समानश्च उदानो व्यान एव च।
एतेषां समवायेन जायते पञ्चमः स्वरः॥"
इति सङ्गीतदामोदरः॥ अस्य जातिः औडुवः। पञ्चस्वरमिलित इति यावत्। अस्य कूटतानाः विंशत्यधिकशतम् १२०। प्रत्येकतानै चत्वारिंशत् ४०। समुदायेन चतुःसहस्राष्टशतानि ४८००। तानाः भवन्ति। अस्योच्चारणजातिः पिकः। उच्चारणस्थानं उरः गलः शिरश्च। व्याकरणमते अधरः। अयं विप्रवर्णः। इति सङ्गीतविवेकलक्षणम्॥ अस्य रूपं इन्द्ररूपतुल्यम्। वर्णः श्यामः। स्थानं क्रौञ्चद्वीपम्। देवता महादेवः। वारो वृहस्पतेः। समयः चतुस्त्रिंशत्पलाधिकाशौ घटिकाः। श्रुतयश्चत्वारः धृतिः रक्ता चन्द्रीपनी व्यालापिनी च। मूर्च्छनाश्चित्रः वसनी निर्म्मली कोमली च। इति नादपुराणम्॥ * ॥ रागभेदः। इति मेदिनी॥ अयं कल्लिनाथमते सोमेश्वरमते च षड्रागाणां मध्ये तृतीयरागः। सोमेश्वरमते अस्य गानसमयः शरदृतुः प्रातःकालश्च। कल्लिनाथमते अस्य रागिण्यः षट्। यथा, त्रिवेणी १ जम्भतीर्या २ आभीरी ३ कुकुभ ४ वरारी ५ वावीरी ६। सोमेश्वरमते तु विभाषा १ भूपाली २ कार्णाटी ३ वङ्गसिंहिका ४ आलम्बी ५ पटमञ्जरी ६। अस्मिन्मते गान्धारस्वरश्रीवः। ऋषभपञ्चमौ स्वरौ स्नुषौ। षड्जस्वरः ग्रहांशन्यासः। स च हनुमन्मते भरतमते च भैरवरागस्याष्टमपुत्रः। इति सङ्गीतग्राह्यम्॥

पञ्चमकारं, क्ली, (पञ्चसंख्यकं मकारं तत्त्वं यत्र। मद्यं मांसमित्यादिषु आदौ मकारस्थितेरुक्तत्वात्।) मकारपञ्चकम्। पञ्चतत्त्वम्। तच्च सुरामैथुनमद्यमांसमत्स्यरूपम्। यथा,—
"मद्यं मांसं तथा मत्स्यो मुद्रा मैथुनमेव च।
पञ्चतत्त्वमिदं देवि! निर्व्वाणमुक्तिहेतवे।
मकारपञ्चकं देवि! देवानामपि दुर्लभम्॥"
इति गुप्तसाधनतन्त्रे ७ पटलः॥ * ॥
"मद्यैर्मांसैस्तथा मत्स्यैर्मुद्राभिर्मैथुनैरपि।
स्त्रीभिः सार्द्धं महाचार्यैर्यजेद्दुर्गामम्बिकाम्॥
अन्यथा च महाविद्या गीयते पण्डितैः सुरैः।
कायेन मनसा वाचा तस्मात्तत्त्वपरो भवेत्॥"
इति कामाख्यातन्त्रे ५ पटलः॥ * ॥
"या सुरा सर्व्वकार्य्येषु कथिता भुवि मुक्तिदा।
तस्या नाम भवेद्देवि! तीर्थं पानं सुदुर्लभम्॥
शूद्राणां भक्ष्ययोग्यानां यन्मांसं देवनिर्म्मितम्।
वेदमन्त्रैश्च विधिवत् प्रोक्षा सा शुद्धिरुत्तमा॥
भक्ष्ययोग्याश्च कथिता ये ये मत्स्या वरानने!।
ते रुद्रैस्ते मया प्रोक्ता मीनाः सिद्धिप्रदायकाः॥

पृथुकान्वितया भक्त्या मोदमोदकादयः।
तस्य नाम भवेद्देवि! सुदा मुक्तिप्रदायिनी॥
भगलिङ्गस्य योगेन मैथुनं यद्धृतं प्रिये!।
तस्य नाम भवेद्देवि! पञ्चमं परिकीर्त्तितम्।
प्रथमस्य भवेन्नाम तीर्थमेव द्वितीयकम्।
मत्स्यमेव तृतीयं स्यान्मुद्रा चैव चतुर्थिका॥
पञ्चमं पञ्चमं विद्यात् पञ्च ते नामतः स्मृताः॥"

इति समयाचारतन्त्रे २ पटलः॥ * ॥

अथ मत्स्यादिशुत्पत्तिः।

"मायामत्स्यादिशमनान्मोक्षमार्गनिरूपणात्।
मत्सरादिविरक्तान्मत्स्येति परिकीर्त्तितः॥
मा प्रत्यगात्मनाद्देवि! सच्चिदानन्ददागतः।
सर्व्वदेवप्रियत्वाच्च मांस इत्यभिधीयते॥
पञ्चमं देवि! सर्व्वेषु मम प्राणप्रियं भवेत्।
पञ्चमेन विना देवि! चण्डीमन्त्रं कथं जपेत्॥
यदि पञ्चमकारेषु भ्रान्तिमेत् कुरुते प्रिये!।
तस्य सिद्धिः कथं देवि! चण्डीमन्त्रं कथं जपेत्॥
आनन्दं परमं ब्रह्म मकारास्तस्य साधकाः॥"

इति कुलार्णवतन्त्रे पञ्चमसमुल्लासे १७ उल्लासः॥७॥

तेषां शोधनादिकं बाहुल्यभिया लोकमोह-भयाच्च नोक्तम्॥

पञ्चमहायज्ञाः, पुं, (पञ्चविधो महायज्ञाः।) गृहस्थकर्त्तव्यपञ्चप्रकारनित्यकर्म्माणि। यथा,—
"पाठो होमस्तथौषीनां सपर्य्या तर्पणं बलिः।
श्रुतेः पञ्च महायज्ञा ब्रह्मयज्ञादिनामकैः॥"

इत्यमरः। २। ७। १४॥

(तथा च मनुः। ३। ६८-७०।
"पञ्चसूना गृहस्थस्य चुल्लीपेषण्युपस्करः।
कण्डनी चोदकुम्भश्च वध्यते यास्तु वाहयन्॥
तासां क्रमेण सर्व्वासां निष्कृत्यर्थं महर्षिभिः।
पञ्चक्लृप्ता महायज्ञाः प्रत्यहं गृहमेधिनाम्॥
अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम्।
होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम्॥")

पञ्चमारः, पुं, (पञ्चसु इन्द्रियेषु म्रियते आसक्तो भवतीति। पञ्च + म + कर्त्तरि घञ्।) बलदेवपुत्रः। इति शब्दमाला॥

पञ्चमास्यः, पुं, (पञ्चमो रागः स्वरो वा आस्ये यस्य। "लोकिलो पञ्चमं वदेत्।" इत्युक्तेरस्य तथात्वम्।) कोकिलः। इति शब्दरत्नावली॥

पञ्चमी, स्त्री, (पञ्चानां पाठवानां इयम्। अथवा पञ्च वर्त्तान् मिनोति नेयादेशादिभिर्वेत्ति या। पञ्च + मी + क्विप्। मीधातुरत्र बन्धार्थः।) पारम्पर्य्या। दौम्री। इति मेदिनी॥ (पञ्चानां पूरणी ङट् ततो ङीप्।) शारिवाख्या। सारिवा इति भाषा। इति भूरिप्रयोगः॥ * ॥ तिथिविशेषः। सा च शुक्लस्य पञ्चमदिनियोगात्मा तदुपलक्षितकालश्च। अग्निपुराणकृत्येन शुक्लपक्षे ५ ग्रन्थपक्षे २० तत्तद्योगिता॥ ८॥ अथ पञ्चमीव्रतम्। सा च चतुर्थीयुता ग्राह्या दृश्यते।
"पञ्चमी च प्रकर्त्तव्या चतुर्थीसहिता विभो!॥"

इति स्कन्दपुराणात्॥ ९॥

अथ नागपञ्चमी। यथा,—देवीपुराणे।
"शुक्ले पञ्चदिने प्राप्ते पञ्चम्यां भवगाङ्गने।
पूजयेन्नागसाद्देवीं सुधीर्विटपसंस्थिताम्॥
पञ्चगन्धे गते ग्रस्यां देवैः सर्व्वैरनन्तरम्।
पञ्चम्यामसिते पक्षे समुत्तिष्ठति पन्नगी॥"

देवैरिति सप्तार्घे तृतीया। तथा,—
"देवीं संपूज्य गत्वा च न सर्पभयमाप्नुयात्।
पञ्चम्यामूर्जयेन्मासि नागानन्तादयान्क्षीरगान्।
क्षीरं सर्पिस्तथा नैवेद्यं देयं सर्व्वविषापहम्॥"

एवं गारुडे तत्रैव नागानाह।
"अनन्तं वासुकिं पद्मं महापद्मं च तक्षकम्।
तथा कर्कोटकं नागं धृतराष्ट्रञ्च शङ्खकम्॥
कालीयं नक्षकञ्चैव पिङ्गलं मणि भानि च।
यस्तेषामस्ति नागात् दष्टस्तो दिवं व्रजेत्॥"

पुराणान्तरेऽपि।
"अनन्तो वासुकिः पद्मो महापद्मश्च तक्षकः।
कुलिकः कर्कटः शङ्खो ह्यष्टौ नागाः प्रकीर्त्तिताः॥"

पुराणान्तरेऽपि।
"श्रेषः पद्मो महापद्मः कुलीरः शङ्खपालकः।
वासुकिस्तक्षकश्चैव कालीयो मणिभद्रकः।
ऐरावतो धृतराष्ट्रः कर्कोटकधनञ्जयौ॥"

अत्र च।
"योऽसौ चानन्तरूपेण ब्रह्माण्डं सचराचरम्।
पत्यवष्टभ्यतेमूर्त्ति तस्मै नित्यं नमो नमः॥"

इत्यनेन ओंकारपूर्व्वेण मत्स्यपुराणोक्तेनाग्नं पूजयेत्। रत्नाकरे।
"पिचुमर्दस्य पत्राणि स्नापयेद्भवनोदरे।
स्वयञ्चापि तदश्नीयाद्ब्राह्मणांश्चैव भोजयेत्॥"

अथ श्रीपञ्चमी। भविष्योत्तरे। माघशुक्लपञ्चमधिकृत्य,—
"चतुर्थी वरदा नाम तस्यां गौरी प्रपूजिता।
सौभाग्यमतुलं कुर्य्यात् पञ्चम्यां श्रीरपि स्त्रियम्॥"

सम्वत्सरप्रदीपे।
"पञ्चम्यां पूजयेल्लक्ष्मीं पुष्यधूपानुवासिताम्।
मस्याधारं लेखनीञ्च पूजयेच्च निवेदयेत्।
माघे मासि सिते पक्षे पञ्चमी या श्रियः प्रिया।
तस्याः पूर्व्वाह्ण एवेह कार्य्यः सारस्वतोत्सवः॥"

इत्युपादानात् श्रियः सरस्वत्याः। तथा च आदिः।
"लक्ष्मीसरस्वतीधीवित्तर्गौरस्वदितिशोभासु।
उपकरणवैशारद्यनिधासु च श्रीरिति प्रथिता॥"

ध्यानं यथा,—
"तरुणशकलमिन्दोर्बिभ्रती शुभ्रकान्तिः
कुचभरनमिताङ्गी सन्निषण्णा सिताब्जे।
निजकरकमलोद्यल्लेखनीपुस्तकश्रीः
सकलविभवसिद्ध्यै पातु वाग्देवता नः॥"

इति ध्यानादेकं ध्यात्वेत्। गन्धादिभिः प्रपूजिता।
"भद्रकाल्यै नमो नित्यं सरस्वत्यै नमो नमः।
वेदवेदाङ्गवेदान्तविद्यास्थानेभ्य एव च॥"

स्वाहेति मन्त्रमुच्चार्य्य विप्रः पूजयेत्। मन्त्रस्तु। वह्निजायान्तः श्रीयुक्तः सरस्वत्यै नमो दशवेत्। सरस्वतीं संपूज्य,—
"यथा न देवैः सकलात् त्यक्ता लोकपितामहः।
त्वां परित्यज्य नास्तिक्येत्या भव वरप्रदा॥
वेदाः शास्त्राणि सर्व्वाणि कृत्यगीतादिकाश्च यत्।
न विद्यानं त्वया देवि! तदा ते सन्तु सिद्धयः॥
लक्ष्मीर्मेधा धरा पुष्टिर्गौरी तुष्टिः प्रभा धृतिः।
एताभिः पाहि तनुभिरष्टाभिर्मां सरस्वति!॥"

इति मत्स्यपुराणोक्तैः प्रार्थयेत्॥ ८॥

अथ पञ्चमीव्रतम्।

तत्र शुक्लकाले माघशुक्लपञ्चमारभ्य यद्वर्षपर्य्यन्तं प्रतिमासीयशुक्लपञ्चम्यां कार्य्यम्। यथा,—
"क्षीरोदे च पुरा सुप्तं लक्ष्मीसहितं हरिम्।
प्रणम्य परिपप्रच्छ नारदो मुनिसत्तमः॥

नारद उवाच।

केनोपायेन देवेश! नारीणां सुखं भवेत्।
सौभाग्यमतुलं याति तन्मे त्वं वक्तुमर्हसि॥

श्रुत्वा तदुक्तं देवो नारदस्य महात्मनः।
संप्रेक्ष्य कमलां तत्र वृत्तिं देवि शुभानने!॥
इङ्गितं पतुरालोक्य प्रणम्य जगतां प्रभुम्।
वल्लभं तं पुरस्कृत्य प्रीता इत्युवाच ह॥

श्रीरुवाच।

शृणु श्रीपञ्चमीनाम व्रतं परमदुर्लभम्।
यत् कृत्वा प्राप्नुते लोकैः सुखं सौभाग्यसुत्तमम्॥
तत्र मां पूजयेद्भक्त्या माघकाले प्रयत्नतः।
गन्धैः पुष्पैश्च वस्त्रैश्च धूपैर्दीपादिभिः फलैः॥
अथवा पूजयेद्भक्त्या सायाह्ने पञ्चमीदिने।
इमां ब्रह्मपुराणोक्तां यः करोति च पञ्चमीम्॥
लक्ष्मीसमा भवेत्तस्मै इह लोके परत्र च।
विधानं शृणु धर्म्मज्ञ! यादृशी पञ्चमी मम॥
वर्षाणि षट् प्रकर्त्तव्या परमप्रीतिमानसा।
शुक्लकाले तु संप्राप्ते पञ्चमी या शुभा भवेत्॥
तस्यामारभ्य कर्त्तव्यं व्रतं पापप्रणाशनम्।
स्वयं यताहा भूत्वा च चारभेद्व्रतसुत्तमम्॥
आद्यद्वयमलक्ष्मीघ्नं हृद्विघ्नेशं द्वयं तथा।
फलनैवेद्यकं कर्त्तव्यमुपवासैः प्रतिष्ठयेत्॥
प्रतिष्ठाया विधिरयं कारयेत्स्य स्त्रियं हरिम्।
प्राङ्मण्डपञ्च सम्कृत्य पूर्व्वेन्दुरधिवासयेत्॥
पञ्चम्यान्तिलं विप्रमाचार्य्यञ्च द्विजोत्तमम्।
पूजा च विविधा कार्य्या शक्तमन्त्रेण भक्तितः॥
होमश्च तिलजानां स्यात् कुर्य्यात् पृथक् पृथक्।
नैवेद्यं विविधं कुर्य्यात् तद्भक्तं घृतसुत्तमम्॥
आसनं पाद्यमर्घ्यञ्च तथाचमनीयकम्।
वासो यज्ञोपवीतञ्च गन्धपुष्पफलं तथा॥
छत्रं धूपः प्रदीपश्च ताम्बूलं शक्तमेव च।
गौः शय्या कमलञ्चैव हिरण्यं रजतं तथा॥
ब्राह्मणेभ्यः प्रदेयानि दक्षिणासंयुतानि च।
यथोक्तेन विधानेन यः करोति व्रतं प्रिये!॥
व्यासप्रसादमुद्धृत्य त्रिपुरोत्सवमाप्नुयात्।
पुत्रवान् पुत्रकृत्यस्य स्त्रीणां सम्पत्स्य च॥
भद्रस्य यथा गौरी तथा भवति सा शुभा।
माघे मासि सिते पक्षे पञ्चमी या प्रकीर्त्तिता॥
तस्यां पूजा सदा देवी भक्तितः कमलोद्भवा।
तस्मीसमा भवेन्नारी नात्र कार्य्या विचारणा॥

श्रीपञ्चमीव्रतं रम्यं या करोति पतिव्रता ।
तस्याहं स्थिरतां यामि यथा नारायणे स्थिरा ॥
मत्प्रसादान्मुनिश्रेष्ठ ! सर्व्वसौभाग्यमाप्नुयात् ॥"
इति ब्रह्मपुराणोक्तषट्पञ्चमीव्रतकथा समाप्ता ॥

अथ पञ्चमीजातफलं यथा ।
"भूपालमान्यो मनुजः सुगात्रः
क्षमासमेतो विदुषां वरेण्यः ।
वाग्मी गुणी बन्धुजनैकमान्यः
प्रसूतिकाले यदि पञ्चमी स्यात् ॥"
इति कौष्ठीप्रदीपः ॥

विद्याविशेषः । तद्विवरणं यथा,—
"कामं विष्णुयुतं देवि ! शक्तिमायेन्द्रमेव च ।
महामायां ततः पश्चात् वाग्भवं बीजमुद्धरेत् ॥"
विष्णुयुतं वकाररयुक्तमित्यर्थः । शक्तिरेकारः । माया ईकारः ।
"वियच्चन्द्रयुतः पश्चात् कलौ नकुलिरेव च ।
मायास्वरेण संयुक्तं नादबिन्दुकलान्वितम् ॥
प्रथमं कामराजस्य बीजं परमदुर्लभम् ।
वियद्विष्णुयुतं कामौ हंसः शक्रयुतः परम् ॥
महामाया ततः पश्चात् खप्नावतीति कथ्यते ॥"
हंसो हकारः । एतद्वितीयं कामकूटम् ॥ * ॥
"मादनं शिववीजञ्च वायुबीजं ततः परम् ।
इन्द्रबीजं ततः पश्चात् महामायां समुद्धरेत् ॥"
इति तृतीयम् । इयं मधुमती ॥ * ॥
"शिववीजं तथा कामं इन्द्रं देवीं नियोजयेत् ।
महामायां ततः पश्चात् शक्तिकूटं समुद्धरेत् ॥"
देवीं सकारम् ।
"वाग्भवं प्रथमं कूटं शक्तिकूटन्तु पञ्चमम् ।
मध्यकूटत्रयं देवि ! कामराजं मनोहरम् ।
कथिता पञ्चमी विद्या त्रैलोक्यसुभगोदया ॥"*॥

ईश्वर उवाच ।
"शृणु देवि ! महाभागे शक्तिकूटं सुदुर्लभम् ।
वाग्भवं प्रथमं कूटं कामराजं त्रिकूटकम् ॥
शक्तिकूटं प्रवक्ष्यामि तव स्नेहात् विशेषतः ।
जीवप्राणौ महादेवि ! मादनं तदनन्तरम् ॥
इन्द्रबीजं ततः पश्चात् सुवनेशी तु पञ्चमम् ॥"
जीवः सकारः । प्राणो हकारः । इति वा शक्तिकूटम् ॥ * ॥
"अथवा देवदेवेशि ! सौभाग्यायाश्च वाग्भवम् ।
कूटत्रयं कामराजं शक्तिबीजञ्च पूर्ब्बवत् ।
एषा शक्ता महादेवि ! पञ्चमी परमेश्वरी ॥"
अस्या वाग्भवं कूटं हित्वा सौभाग्यायाः प्रथमकूटं वाग्भवं कूटमित्यर्थः । कामराजकूटत्रयं पञ्चम्या एव ।
"वामनेत्रादिकूटं वा भगादिकूटमेव वा ।
अरिष्टा सिद्धिदा विद्या सर्व्वदोषविवर्ज्जिता ॥"
भग एकारः । एतेनाद्या पञ्चमी वाग्भवशक्तिकूटभेदेन ॥ * ॥ यामले ।
"द्विविधा पञ्चमी विद्या पञ्चपञ्चाक्षरी परा ।
मध्ये षड्वरी चैव शक्तिश्च चतुरक्षरी ॥"
षड्विति कामराजविद्यायाः मध्यकूटमित्यर्थः । शक्तिरिति कामराजस्य शक्तिकूटमित्यर्थः ।
एषा चतुर्व्वर्णा वाग्भवकूटभेदात् । एतयोः कामराजस्य तृतीयकूटन्तु तत्रैव ॥ * ॥
"कामबीजं महेशानि ! शिवबीजं ततः परम् ।
तदधो हंसबीजन्तु इन्द्रबीजं विचिन्तयेत् ॥
महामायां ततः पश्चात् कूटं परमदुर्लभम् ॥"
एषा पूर्ब्ववदष्टधा । अन्या चतुर्व्वर्णा ॥ * ॥
तथा तत्रैव ।
"कामाकाशपरा शक्र संन्यानक्षतरूपिणी ॥"
परा सकारः । संन्यानक्षतरूपिणी महामायाः ॥ * ॥
तथा च तत्रैव ।
"कामबीजं महेशानि ! शम्भुबीजं ततः परम् ।
तदधस्त्वन्द्रबीजन्तु पृथ्वीबीजं ततो लिखेत् ।
तदन्ते च महामाया कूटं परमदुर्लभम् ॥"
एषा पूर्ब्ववदष्टधा । अन्या चतुर्व्वर्णा । तेन षट्त्रिंशदक्षरूपिणी पञ्चमी ॥ * ॥ हंसमाहेश्वरे ।
"वामकेश्वरविद्यायाः कूटं वाग्भवसुत्तमम् ।
एकारादि वाग्भवन्तु कूटं वाग्भवसुत्तमम् ॥
एकारादि वाग्भवन्तु सौभाग्यायाश्च वाग्भवम् ।
एषा च पञ्चमी विद्या त्रैलोक्यवशकारिणी॥"*॥

श्रीक्रमे ।
"एतासां चैव विद्यानां प्राणं शृणु वरानने ! ।
रमां मायां हंसबीजं वाग्भवाद्ये नियोजयेत् ॥
शक्त्यन्ते तु महादेवि ! हंसं मायां रमां तथा ।
एभिर्युक्तेन देवेशि ! विद्याजपनमाचरेत् ॥"
जपश्च सप्तवारमेव दीपन्यां तथा दर्शनात् ।
एतासां पूर्ब्वोक्तश्रीक्रमोक्तविद्यानाम् ॥ * ॥

पञ्चम्यान्तु विशेषो यथा ।
"रमां मायां हंसबीजं वाग्भवाद्ये नियोजयेत् ।
शक्त्यन्ते तु महेशानि ! हंसं मायां रमां तथा ॥
कामराजत्रये देवि ! ककारं शक्रसंयुतम् ।
मायाबिन्दीश्वरयुतं सूर्य्यकोटिसमप्रभम् ॥
प्रथमं कामकूटस्य पाद्ये नियोजयेदिदम् ॥
वान्तं वह्निसमायुक्तं वामनेत्रविभूषितम् ॥
नादबिन्दुसमायुक्तं श्रियो बीजमुदाहृतम् ।
द्वितीयं कामबीजन्तु जपेट्टक्का च सुन्दरि ! ।
गगनं वह्निसंयुक्तं वामनेत्रविभूषितम् ।
नादबिन्दुसमायुक्तं मायाबीजं प्रकीर्त्तितम् ॥
मधुमतीं जपेद्यापि सर्व्वकामफलप्रदाम् ॥"
इति तन्त्रसारः ॥ * ॥ * ॥ रागिणीविशेषः । सा च वसन्तरागस्य प्रिया । यथा,—
"वसन्ती पञ्चमी दौली बहारी रूपमञ्जरी ।
रागिण्य ऋतुराजस्य वसन्तस्य प्रिया इमाः ॥"
अस्या ध्यानं यथा,—
"सङ्गीतगोष्ठीषु गरिष्ठभावं
समाश्रिता गायननम्रदायैः ।
स्वर्णाङ्गिनी नूपुरपादपद्मा
सा पञ्चमी पञ्चमवेदवेत्री ॥"
इति सङ्गीतदर्पणः ।
(नदीविशेषः । यथा, महाभारते । ६।८।२६।
"वरां वीरकरालाञ्च पञ्चमीञ्च महानदीम् ॥")

पञ्चमीव्रतं, क्ली, (पञ्चम्यां माघशुक्लपञ्चमीमारभ्य षड्वर्षं यावत् प्रतिमासीयशुक्लपञ्चम्यां स्त्रिया कर्त्तव्यं व्रतम् नियमविशेषः ।) माघशुक्लपञ्चमीमारभ्य षड्वर्षपर्य्यन्तं प्रतिमासीयशुक्लपञ्चम्यां स्त्रीकर्त्तव्यनियमविशेषः । तत्प्रयोगो यथा, तत्रादौ कृतनित्यक्रिया यजमाना कृताचम्य स्वस्तिवाचनपूर्ब्वकं सङ्कल्पं कुर्य्यात् । विष्णुर्मोद्य माघे मासि शुक्ले पक्षे पञ्चम्यां तिथौ अमुकगोत्रा श्रीअमुकी पुत्रपौत्राद्यनवच्छिन्नसन्ततिसमृद्ध्यर्थं सौभाग्यारोग्यसौन्दर्य्यावैधव्यप्राप्तिपूर्ब्वकविष्णुलोकप्राप्तिकामा अद्यारभ्य षड्वर्षपर्य्यन्तं प्रतिमासीयशुक्लपञ्चम्यां गणपत्यादिनानादेवतासहलक्ष्मीवासुदेवपूजापूर्ब्वकभविष्यपुराणोक्तकथाश्रवणरूपषट्पञ्चमीव्रतमहं करिष्ये । इति सङ्कल्पं कृत्वा पाठयेत् । ततः सामान्यार्घ्यादि आसनशुद्धिभूतशुद्धिषाडङ्गन्यासकराङ्गन्यासान्तं कृत्वा गणेशादीन् संपूज्य लक्ष्मीं नारायणञ्च यथाशक्ति पूजयेत् । ततो भोज्योत्सर्गं कृत्वा प्रणमेत् ॥ * ॥

अथ कथा ।
"श्रीमद्भव्याश्रमासीनं लक्ष्मीधृतपदाम्बुजम् ।
योगनिद्रान्वितं कृष्णं नारदः परिपृच्छति ॥
केनोपायेन भगवन्नारी दुःखं न विन्दति ।
सौभाग्यारोग्यसौन्दर्य्यपुत्रपौत्रादिकं लभेत् ॥
इत्युक्तो माधवश्चक्रे लक्ष्मीसुखनिरीक्षणम् ।
इङ्गिताकारतत्त्वज्ञा पद्मा पद्माक्षवल्लभा ।
वल्लभाङ्गं पुरस्कृत्य प्रीता वचनमब्रवीत् ॥

श्रीरुवाच ।
षट्पञ्चमीव्रतं सम्यक् श्रूयतां पापनाशनम् ।
सौभाग्यारोग्यसौन्दर्य्यपुत्रपौत्रधनप्रदम् ॥
माघे मासि सिते पक्षे पञ्चमी या शुभा भवेत् ।
तस्यामारभ्य कर्त्तव्यं षड्वर्षं व्रतमुत्तमम् ॥
प्रतिमासि च पञ्चम्यां लक्ष्मीं संपूज्य केशवम् ।
पूजयेदन्नपुष्पाद्यैर्नैवेद्यैश्च पृथग्विधैः ॥
कुर्य्याद्धोमञ्च विधिवत् गणेशस्य ग्रहस्य च ।
विष्णोर्लक्ष्म्यास्य वाग्देव्या दुर्गायाः विभवक्रमात् ॥
अन्येषाञ्च यथाशक्ति तिलाज्यमधुरान्वकैः ।
ततोऽग्नेर्यादवणमादौ संवत्सरत्रयम् ॥
तृतीये च चतुर्थे च हविष्यान्नञ्च भोजयेत् ।
पञ्चमे फलमश्नीयात् षष्ठे कुर्य्याद्द्विजागमम् ।
षष्ठे प्रतिष्ठा कर्त्तव्या भोजयेद्दश द्विजान् ॥
तत्र योऽशक्तदानानि हेमशक्तीमलङ्कृताम् ।
दक्षिणासहितां दद्याद्दाचार्य्याय मुनीश्वर ! ॥
ततः षष्ठवर्षं दद्यात् सर्व्वालङ्कारभूषितम् ।
काञ्चनप्रतिमायुग्मलक्ष्मीनारायणान्वितम् ॥
विधिनानेन या कुर्य्यात् पञ्चमीव्रतमुत्तमम् ।
सर्व्वान्कामान् समुद्धृत्य विष्णुलोकमवाप्नुयात् ॥
एतत्ते कथितं विप्र ! सर्व्वलोके प्रकाशितम् ।
शोकसन्तापहानिश्च वृथादुःखं न जायते ॥
धर्म्मो यशस्यमायुष्यमैश्वर्य्यमपि वर्द्धयेत् ।
याश्च कुर्व्वन्ति भूलोके तासां सर्व्वं सुखावहम् ॥

श्रीरुवाच ।
शृणु सर्व्वं मुनिश्रेष्ठ ! देशा यत् कथितं मयि ।
तदनुष्ठानमस्त्वेतु प्रतिष्ठाञ्च द्विजोत्तम ! ॥
या करोति व्रतं साध्वी सर्व्वकामफलं लभेत् ।

पञ्चसु

तस्याः श्रीर्निश्चला मेहे सत्यं सत्यं हि नारद! ॥
यथेन्द्राणी महेन्द्रस्य लक्ष्मीर्लक्ष्मीपतेर्यथा।
शङ्करस्य यथा गौरी सापि भर्तुर्भवेत्तथा ॥
या पञ्चमीव्रतं कुर्य्यात् सा भवेत्र पतिव्रता।
यथोक्तविधिना या तु कुर्व्वीत व्रतमुत्तमम् ॥
पुत्रपौत्रधनैश्वर्य्यं पञ्चमीकरणादपि।
एतत्ते कथितं सर्व्वं तत्त्वं कमललोचन! ॥

नारद उवाच।

केनापि कथितं पूर्व्वं श्रुतं केनापि वा पुनः।
प्राप्तं कुत्र त्वया देवि! श्रोतुमिच्छामि तद्वद ॥

श्रीरुवाच।

माघे मासि सिते पक्षे पञ्चम्यां मघासुने!।
निशावसानसमये चन्द्रभागां महानदीम् ॥
हंसयुक्तैः समाकीर्णां नलिनीपुलिनोज्ज्वलाम्।
तत्र गौरी श्रुची मेधा सावित्री चोर्व्वशी परा ॥
नारायणं समाराध्य कुर्व्वन्ति व्रतमुत्तमम्।
कान्यव्रतमिदं पद्मे! लभते फलमुत्तमम् ॥
हर्षवतीष्व तां वीक्ष्य प्रोवाच कमलालया।
पुष्पञ्च देहि मे धूपं दीपं नैवेद्यमुत्तमम् ॥
मया तव प्रसादेन क्रियते व्रतमुत्तमम्।
ततस्तासां फलैः पुष्पैर्नैवेद्यैश्च व्रतं कृतम् ॥
ततस्तासां प्रसादेन यत्नमाद्यं चकार्द्दन!।
त्वयि देव जगन्नाथ! नरनारीगणेन च ॥
भक्त्या मया ते कथितं मर्त्यलोके प्रकाशितम्।
या करोति व्रतं श्रेष्ठं यथाविधिविधानतः ॥
इह लोके सुखं भुक्त्वा नारायणपुरं व्रजेत्।
श्रुत्वा व्रतस्य माहात्म्यं व्रतमेतत् चरन्ति याः ॥
न क्रियादुष्कृतं लोके तासां सत्यं वदाम्यहम्।
हरन्ति तासां पापानि याश्च श्रृण्वन्त्यहर्निशम् ॥
नारायणं नमस्कृत्य प्रपूज्य च विसर्ज्जयेत् ॥"

इति भविष्यपुराणोक्ता षट्पञ्चमीव्रतकथा समाप्ता ॥

पञ्चनखः, पुं (पञ्च विस्तृतं सुखं यस्य सः।) सिंहः। इति राजनिर्घण्टः ॥ (पञ्च सुखानि यस्य सः।) शिवः। इति ऐमपन्द्रः ॥ तस्य नामवर्णादि यथा, देवीपुराणे।

"शिवस्तत्र स्थितः साक्षात् सर्व्वपापहरः शुभः।
स तु पञ्चमुखः स्थानो लोके सर्व्वार्थसाधकः।
पञ्चकल्पतरुर्यस्मात्तेन पञ्चमुखः स्मृतः ॥
पश्चिमे तु सुखे सद्यो वामदेवस्तथोत्तरे।
पूर्व्वे तत्पुरुषं विद्यादघोरमपि दक्षिणे ॥
ईशानः परमो मध्ये सर्व्वेषामुपरि स्थितः।
एते पञ्च सुरा वत्स! पामरा वदनाश्रिताः ॥
सद्योजातं भवेच्छुक्लं वामदेवस्तु पीतकम्।
रक्तपुरुषो ज्ञेयोऽघोरः कृष्णः स एव च ॥
ईशानः परमिमस्तेषां सर्व्ववर्णसमन्वितः।
पञ्चमः पञ्चमुखी स्यात् ज्ञानागारः शिवात्मकः॥
(एकाक्षविशेषः। यस्य धारणात् शुभं भवति ॥
मद्य पुराणि यस्य इति विग्रहे बाह्यादित्वात्।
यथा, रामायणे १।६१।२६। [ततः।
"तत्र पञ्चाक्षसंज्ञोऽहं स्थितः पञ्चमुखात्
शिरसः पञ्चभावात् पुर्यैः संदर्शनात्।")

पञ्चमुखी, स्त्री. (पञ्चमुखानीव मुखान्यस्याः।) वासकः। इति राजनिर्घण्टः ॥ जवापुष्पविशेषश्च ॥ (पञ्च विस्तृतं मुखमस्याः। सिंहस्त्री ॥ रुद्रिकाले पञ्चमहाभूतान्येव पञ्चमुखानीव यस्याः शक्तेरित्यर्थः। शिवपत्नी। इति शब्दान्तुधिः ॥)

पञ्चमुद्रा, स्त्री, (पञ्चविधा मुद्रा।) पूजायां कर्त्तव्या पञ्चप्रकारमुद्रा। तस्या अनुष्ठानं यथा,—

"सम्यक् प्रपूरितः पुष्पैः करास्यां कल्पितोऽञ्जलिः।
आवाहनी समाख्याता मुद्रा देशिकसत्तमैः ॥१॥
अधोमुखौ विपर्य्यस्तौ स्थापनी मुद्रिका भवेत् ॥२॥
उच्छ्रिताङ्गुष्ठमुष्टी तु संयोगात् सन्निधापनी ॥३॥
अन्तःप्रवेशिताङ्गुष्ठा सैव सम्बोधनी मता। ४।
उत्तानमुष्टियुगला संमुखौ करयौ मता ॥"५॥

इति पूजाप्रदीपः ॥

पञ्चमूत्रं, क्ली, (पञ्चविधं मूत्रम्।) गवाजाभेषी-महिषीगर्द्दभीमूत्रम्। इति राजनिर्घण्टः ॥

पञ्चमूलं, क्ली. (पञ्चप्रकारं पञ्चसंख्यितं वा मूलम्।) स्वनामख्यातपाचनम्। तत् त्रिविधं बृहत् स्वल्पं लक्षणञ्च। आद्यं यथा,—

"बिल्वाग्निमन्थश्योनाकाग्निमन्थः पाटलातथा।
कण्टकारिका।
कण्टकारीं बृहतीं द्वे द्वे शालपर्णीं पृश्निपर्णीं द्वे द्वे गोक्षुरकं तथा ॥
एतत् पञ्चमूलं बृहत्पञ्चमूलमिति स्मृतम् ॥"

द्वितीयं यथा,—

"शालपर्णीं पृश्निपर्णीं बृहतीद्वयगोक्षुरम्।
वातपित्तहरं वृष्यं कनीयः पञ्चमूलकम् ॥"

तृतीयं यथा,—

"कुशः काशः शरो दर्भः शुरश्चेति तृणोद्भवः।"

इति चक्रपाणिदत्तः ॥

अपि च।

"बिल्वाग्निमन्थश्योनाकाग्निमन्थैः पाटलातथा।
ज्ञेयं बृहत् पञ्चमूलं पञ्चमूलमिति स्मृतम् ॥
शरेक्षुदर्भकाशानां मूलस्य मूलमेव च।
सौमुनशारकश्चैव तृणाख्यं पञ्चमूलकम् ॥"

इति शब्दचन्द्रिका ॥

(पञ्चानां मूलानां समाहारः। इति विग्रहे मूलपञ्चकम् ॥)

पञ्चमूली, स्त्री, (पञ्चानां मूलानां समाहारः। "द्विगोः।" ४।१।२१। इति ङीप्।) स्वल्पपञ्चमूलपाचनम्। यथा,—

"शालपर्णीं पृश्निपर्णीं बृहती कण्टकारिका।
तथा गोक्षुरकश्चैव पञ्चमूली कनीयसी ॥"

इति शब्दचन्द्रिका ॥

पञ्चयज्ञाः, पुं. (पञ्चविधा यज्ञाः।) गृहस्थकर्त्तव्य-पञ्चप्रकारयज्ञविशेषाः। यथा,—

"ब्रह्मयज्ञो नृयज्ञश्च देवयज्ञश्च सत्तम!।
पितृयज्ञो भूतयज्ञः पञ्चयज्ञाः प्रकीर्त्तिताः।"

इति माघे क्रियायोगसारे १६ अध्यायः ॥

अपरमधिकञ्च,—

"नमस्कारेण मन्त्रेण पञ्चयज्ञान् समाचरेत्।"

इति तिथ्यादितत्त्वम् ॥

अस्य विवरणं पञ्चमहायज्ञशब्दे द्रष्टव्यम् ॥

पञ्चरथः, पुं, (पञ्चभिस्तुल्या रथा इव कल्पा-

पञ्चला

कानि यस्मिन्।) पक्वमौडुम्बः। इति राजनिर्घण्टः ॥

पञ्चरत्नं, क्ली. पञ्चानां रत्नानां समाहारः। (यद्वा पञ्चविधं पञ्चगुणितं वा रत्नम्।) तद्यथा, कनकम् १ हीरकम् २ नीलमणिः ३ पद्मरागः ४ मुक्ता ५। यथा,—

"कनकं हीरकं नीलं पद्मरागश्च मौक्तिकम्।
पञ्चरत्नमिदं प्रोक्तमृषिभिः पूर्व्वदर्शिभिः ॥
रत्नानामप्यभावे तु स्वर्णं कार्य्यार्हमेव वा।
सुवर्णस्याप्यभावे तु ताम्रं ज्ञेयं विचक्षणैः ॥"

इति ऐमाद्रिः ॥

कनकरजतप्रवालमौक्तिकराजपट्टात्मकमिति गौड़ाः ॥

पञ्चरसा, स्त्री, (पञ्चः विस्तीर्णो रसोऽस्याम्।) आमलकी। इति हारावली शब्दमाला च ॥

पञ्चरात्रं, क्ली, (पञ्चविधानि रात्राणि ज्ञानानि यत्र। समासे अच्।) ग्रन्थविशेषः। यथा,—

"रात्रञ्च ज्ञानवचनं ज्ञानं पञ्चविधं स्मृतम्।
तेनेदं पञ्चरात्रञ्च प्रवदन्ति मनीषिणः ॥
प्रथमं सात्त्विकं ज्ञानं द्वितीयन्तु तदेव च।
नैर्गुण्यञ्च तृतीयञ्च ज्ञानञ्च सर्व्वतः परम् ॥
चतुर्थञ्च राजसिकं भक्तस्तत्राभिवाञ्छति।
पञ्चमं तामसं ज्ञानं विद्वांस्तत्राभिवाञ्छति ॥
ज्ञानं पञ्चविधं प्रोक्तं पञ्चरात्रं विदुर्बुधाः ॥"

तत्र सप्तविधं यथा,—

"पञ्चरात्रं सप्तविधं ज्ञानिनां ज्ञानदं परम्।
ब्राह्मं शैवञ्च कौमारं वाशिष्ठं कापिलं परम् ॥
गौतमीयं नारदीयमिदं सप्तविधं स्मृतम् ॥"

इति नारदपञ्चरात्रे प्रथमरात्रम् ॥

अपि च।

"पञ्चकं पञ्चरात्राणां लक्षणमाह्यतापूर्व्वकम्।
वाशिष्ठं नारदीयञ्च कापिलं गौतमीयकम्।
परं सनत्कुमारीयं पञ्चरात्रञ्च पञ्चकम् ॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १३२ अध्यायः ॥

शतदन्तिरिक्तानिहयशीर्षेषुधुवादिपञ्चरात्राणि-नन्ति ॥ (पञ्चानां रात्रीणां समाहारः।) पञ्च निशाः। यथाह चक्रपाणिदत्तः।

"त्रिरात्रं पञ्चरात्रं वा दशरात्रमथापि वा।
लङ्घनं नक्तियातेषु कुर्य्यादारोग्यदर्शनात् ॥"

पञ्चलक्षणं, क्ली, (सर्गादि पञ्चविधानि लक्षणानि यत्र।) पुराणम्। यथा,—

"सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च।
वंशानुचरितञ्चैव पुराणं पञ्चलक्षणम् ॥"

इत्यमरभरतौ ॥

(पञ्चानां लक्षणानां समाहारः। इति विग्रहे पञ्चलक्षणानि ॥)

पञ्चलवणं, क्ली, पञ्चानां लवणानां समाहारः (पञ्चगुणितं लवणमिति केचित्।) तद्यथा,—काचम्। सैन्धवम्। सामुद्रम्। बिड्म्। औद्भिदम्। इति राजनिर्घण्टः ॥

पञ्चलाङ्गलं, क्ली, (सुखादिनिर्भुक्तिदक्षत्व-

युक्तानि सारदारुनिर्म्मितानि पञ्च लाङ्गलकानि यस्मिन् ।) महादानभेदः । यथा,—
"अथातः संप्रवक्ष्यामि महादानमनुत्तमम् ।
पञ्चलाङ्गलकं नाम महापातकनाशनम् ॥
पुण्यां तिथिं समासाद्य युगादिग्रहणादिकम् ।
भूमिदानं ततो दद्यात् पञ्चलाङ्गलकान्वितम् ॥
कर्ब्बटं खेटकञ्चापि यामं वा शस्यशालिनम् ।
निवर्त्तनशतं वापि तदर्द्धं वापि शक्तितः ॥
सारदारुमयान् कृत्वा हलान् पञ्च विचक्षणः ।
सर्व्वोपकरणैर्युक्तान्यान् पञ्च च काञ्चनान् ॥
वृषलक्षणसंयुक्तान् दद्यैव तु धुरन्धरान् ।
सुवर्णशृङ्गाभरणान् मुक्तालाङ्गूलभूषितान् ॥
रौप्यपादाग्रतिलकान्रक्तकौशेयभूषणान् ।
सगन्धचन्दनयुतान् शालायामधिवासयेत् ॥
पर्জ্জन्यादित्यरुद्रेभ्यः पायसं निर्व्वपेत् चरुम् ।
एकस्मिन्नेव कुण्डे तु गुरुर्यस्मिन्निवेदयेत् ॥
पालाशाः समिधस्तद्वदाज्यं कृष्णतिलांस्तथा ।
तुलापुरुषवत् कुर्य्यात् लोकैश्वावाहनं बुधः ॥
ततो मङ्गलशब्देन युक्तमाल्याम्बरो बुधः ।
आहूय द्विजदाम्पत्यं हेमसूत्राङ्गुरीयकैः ॥
कौशेयवस्त्रकटकैर्मणिभिश्चापि पूजयेत् ।
शय्यां सोपस्करां तद्वद्धेनुमेकां पयस्विनीम् ॥
तथाष्टादश धान्यानि समन्तादधिवासयेत् ।
ततः प्रदक्षिणं कृत्वा गृहीतकुसुमाञ्जलिः ॥
इममुच्चारयेन्मन्त्रमथ सर्व्वं निवेदयेत् ।
यस्माद्देवगणाः सर्व्वे स्थावराणि चराणि च ॥
धुरन्धराङ्गे तिष्ठन्ति तस्माच्छक्तिः शिवेऽस्तु मे ।
यस्माच्च भूमिदानस्य कलां नार्हन्ति षोड़शीम् ॥
दानान्यन्यानि मे भक्तिर्धर्म्म एव दृढ़ो भवेत् ।
दण्डेन समहस्तेन त्रिशृङ्गाद्यान्निवर्त्तनम् ॥
त्रिभागहीनं गोचर्म्ममानमाह प्रजापतिः ।
मानेनानेन यो दद्यात् निवर्त्तनशतं बुधः ॥
विधिनानेन तस्याशु क्षीयते पापसंहतिः ।
तदर्द्धमथवा दद्यादपि गोचर्म्ममात्रकम् ।
भवनस्थानमात्रं वा सोऽपि पापैः प्रमुच्यते ॥
यावन्ति लाङ्गलकमार्गसुखानि भूमे-
स्तासां पतिर्दुहितुरङ्गजरोमकाणि ।
तावन्ति शुद्धरपुरे वर्षाणि तिष्ठे-
द्भूमिप्रदानमध यः कुरुते मनुष्यः ॥
गन्धर्व्वकिन्नरसुरासुरसिद्धसंघै-
राधूतचामरसुपेत्य महाद्रिमानम् ।
सम्पूज्यते पितृपितामहचन्धुयुक्तः
शुभ्रैः पुरं व्रजति चामरनायकः सन् ॥
इन्द्रत्वमप्यधिगतं क्षयमभ्युपैति
गोभूमिलाङ्गलधुरन्धरसंप्रदानात् ।
तस्मादधौघपटलक्षयकारिभूमे-
र्दानं विधेयमिति भूतिभवाभवाय ॥"
इति मात्स्ये २५७ अध्यायः ॥

पञ्चलोहं, क्ली, (पञ्च विस्तीर्णं लोहम् ।) सौराष्टक-लोहम् । इति हेमचन्द्रः ॥ (पञ्चगुणितं लोहम् । सुवर्णरजततान्त्रसीसकरङ्गाणि ॥)

पञ्चलोहकं, क्ली, पञ्चानां लोहकानां धातूनां समाहारः । तद्यथा । सुवर्णरजततामरङ्गनागानि । इति राजनिर्घण्टः ॥

पञ्चवक्त्रः, पुं, (पञ्च वक्त्राणि यस्य ।) शिवः । ("विश्वाद्यं विश्ववीजं निखिलभयहरं पञ्चवक्त्रं त्रिनेत्रम् ॥"
इति शिवध्यानम् ॥)
अस्य मन्त्रा यथा,—
"समस्तानां स्वराणान्तु दीर्घाः शेषाः सबिन्दुकाः ।
ऋलृकशून्याः सार्द्धचन्द्रा उपान्ते नाभिसंहिताः ॥
एभिः पञ्चाक्षरैर्मन्त्रं पञ्चवक्त्रस्य कीर्त्तितम् ।
क्रमात् सम्मदसन्दोहमादगौरवसंज्ञकाः ॥
प्रासादन्तु भवेत् शेषं पञ्चमन्त्राः प्रकीर्त्तिताः ।
एकैकेन तथैवैकं वक्त्रं मन्त्रेण पूजयेत् ॥
एकं समुदितं कृत्वा पञ्चभिर्वा प्रपूजयेत् ।
प्रासादेनाथवा पञ्चवक्त्रं देवं प्रपूजयेत् ॥
सम्मदादिषु मन्त्रेषु प्रासादन्तु प्रशस्यते ।
शम्भोः प्रसादनेनैव यस्मादुक्तस्तु मन्त्रकः ॥
तेन प्रासादसंज्ञोऽयं कथ्यते मुनिपुङ्गवैः ।
तस्मात् सर्व्वेषु मन्त्रेषु प्रासादः प्रीतिदः प्रभोः ॥
आमोदकारकः शम्भोर्म्मन्त्रः सम्मद उच्यते ।
मनःप्रपूरणश्चापि सन्दोहः परिकीर्त्तितः ॥
आकर्षको भवेन्मादो गुरुत्वाद्गौरवाह्वयः ।
एतद्वाक्यं समस्तञ्च मन्त्रं शम्भोः प्रकीर्त्तितम् ॥
पञ्चाक्षरञ्च यन्मन्त्रं पञ्चवक्त्रस्य कीर्त्तितम् ।
स्वयम्भुनैव मन्त्रेण चाराधयतमीश्वरम् ॥ * ॥
ध्यानञ्च शृणु वक्ष्यामि सम्यग्वेतालभैरवौ ।
पञ्चवक्त्रं महाकायं जटाजूटविभूषितम् ॥
चारुचन्द्रकलायुक्तं मूर्द्ध्नि चालौघसंगतम् ।
बाहुभिर्दशभिर्युक्तं व्याघ्रचर्म्माम्बरावरम् ॥
कालकूटधरं कण्ठे नागहारोपशोभितम् ।
कोटीरकुण्डलं बाहुभूषणञ्च भुजङ्गमाः ॥
विभूतिं सर्व्वगात्रेषु द्योतयन्तीर्पितस्वरोचिषम् ।
भूतिसंलिप्तसर्व्वाङ्गमेकैकञ्च त्रिभिस्त्रिभिः ॥
नेत्रैस्तु पञ्चदशभिर्ज्योतिश्चक्रैर्विभूषितम् ।
वृषभोपरि संस्थन्तु गजकृत्तिपरिच्छदम् ॥
सद्योजातं वामदेवमघोरञ्च ततः परम् ।
तत्पुरुषं यथेशानं पञ्चवक्त्रं प्रकीर्त्तितम् ॥
सद्योजातं भवेद्वक्त्रं मुक्तस्फाटिकसन्निभम् ।
पीतवर्णं तथा सौम्यं वामदेवं मनोहरम् ॥
नीलवर्णमघोरन्तु दंष्ट्राभीतिविवर्द्धनम् ।
रक्तं तत्पुरुषं देवं दिव्यमूर्त्तिं मनोहरम् ॥
श्यामलञ्च तथेशानं सर्व्वदेव शिवात्मकम् ।
चिन्तयेत् पश्चिमे त्वाद्यं द्वितीयञ्च तथोत्तरे ॥
अधोरं दक्षिणे देवं पूर्व्वे तत्पुरुषन्तथा ।
ईशानं मध्यतो ध्येयं चिन्तयेदुक्तितत्परः ॥
शक्तित्रिशूलवज्राङ्कवरदाभयदं शिवम् ।
दक्षिणेष्वथ हस्तेषु वामेष्वपि ततः शृणु ॥
अक्षसूत्रं वीजपूरं भुजगं डमरूत्पलम् ।
अष्टैश्वर्य्यसमायुक्तं ध्यायेत्तु कृतकं शिवम् ॥"
इति कालिकापुराणे ५० अध्यायः ॥ * ॥

पञ्चसुखरुद्राक्षः । यथा स्कान्दे,—
"पञ्चवक्त्रः स्वयं रुद्रः कालाग्निर्नाम नामतः ।
अगम्यागमनाद्येव अभक्ष्यस्य च भक्षणात् ।
मुच्यते सर्व्वपापेभ्यः पञ्चवक्त्रस्य धारणात् ॥"
इति तिथितत्त्वम् ॥
(पञ्च विस्तृतं वक्त्रं वदनं यस्य । इति विग्रहे सिंहः ॥)

पञ्चवटः, पुं, (पञ्चो विस्तीर्णो वटः ।) उरुवटः । तत्पर्य्यायः । जोटिङ्गः २ महाव्रती ३ वालयज्ञोपवीतकम् ४ । इति त्रिकाण्डशेषः ॥ (पञ्चसंख्यका वटा अश्वत्थविल्ववटधात्री शोकरूपा वृक्षा यस्मिन् । पञ्चवटीवनम् । यथा रामायणे । १ । ३ । १३ ।
"समागम्य विराधेन वासं पञ्चवटे तथा ॥")

पञ्चवटी, स्त्री, (पञ्चानां वटानां समाहारः । तद्धितार्थेति तत्पुरुषः संख्यापूर्व्वोद्विगुरिति द्विगुसंज्ञायां "द्विगोः" ।४।१।२१। इति ङीप् । द्विगुरेकवचनमिति एकवचनम् ।) पञ्चप्रकारवृक्षविशेषः । यथा,—
"अश्वत्थविल्ववृक्षश्च वटधात्रीशोकाकम् ।
वटीपञ्चकमित्युक्तं स्थापयेत् पञ्चदिक्षु च ॥
अश्वत्थं स्थापयेत् प्राचि विल्वमुत्तरभागतः ।
वटं पश्चिमभागे तु धात्रीं दक्षिणतस्तथा ॥
अशोकं वह्निदिक्स्थाप्यं तपस्यार्थं सुरेश्वरि ।
मध्ये वेदीं चतुर्हस्तां सुन्दरीं सुमनोहराम् ॥
प्रतिष्ठां कारयेत्तस्याः पञ्चवर्षोत्तरं शिवे ।
अग्रन्तफलदात्री सा तपस्याफलदायिनी ॥ * ॥
इयं पञ्चवटी प्रोक्ता दृष्टपञ्चवटी शृणु ।
विल्ववृक्षं मध्यभागे चतुर्दिक्षु चतुष्टयम् ॥
वटवृक्षं चतुष्कोणे वेदसंख्यं प्ररोपयेत् ।
अशोकं वर्त्तुलाकारं पञ्चविंशतिसम्मितम् ॥
दिग्विदिक्षामलकीञ्चैव एकैकं परमेश्वरि ।
अश्वत्थञ्च चतुर्दिक्षु दृष्टपञ्चवटी भवेत् ॥
यः करोति महेशानि साक्षादिन्द्रसमो भवेत् ।
इह लोके मन्त्रसिद्धिः परे च परमा गतिः ॥"
इति हैमाद्रीयव्रतखण्डधृतस्कन्दपुराणवचनानि ॥
(स्वनामख्यातः प्रदेशविशेषः । यथा, रामायणे । १ । १ । ४५ ।
"देशः पञ्चवटीनाम तत्र वासं स कल्पयत् ॥")

पञ्चवल्कलं, क्ली, (पञ्चानां वल्कलानां समाहारः ।) वल्कलपञ्चकम् । यथा,—
"न्यग्रोधोडुम्बराश्वत्थप्लक्षपेचुसवल्कलैः ।
सर्व्वैरेकत्र संयुक्तैः पञ्चवल्कलमुच्यते ॥"
अपि च ।
"न्यग्रोधोडुम्बराश्वत्थप्लक्षपिप्पलपीतनाः ।
क्षीरिवृक्षाच्च पञ्चैषां वल्कलं पञ्चवल्कलम् ॥"
इति शब्दचन्द्रिका ॥
अस्य गुणाः ।
"पञ्चैते क्षीरिणो वृक्षास्तेषां त्वक् पञ्चवल्कलम् ।
त्वक्पञ्चकं हिमं याहि व्रणशोथविसर्पजित् ॥"
इति राजनिर्घण्टः ॥

पञ्चवाणः, पुं. (पञ्च वाणाः शरा यस्य सः ।) कामदेवः । इति हेमचन्द्रः ॥ पञ्चानां वाणानां समाहारे क्ली । (कामस्य पञ्च वाणा यथा,—
"द्रवणं शोषणं वाणं तापनं मोहनाभिधम् ।

उन्मादनश्च तापश्च बाणाः पञ्च प्रकीर्त्तिताः ॥”
पञ्चपुष्पाणि यथा,—
“अरविन्दमशोकञ्च चूतञ्च नवमल्लिका ।
नीलोत्पलञ्च पञ्चैते पञ्चबाणस्य सायकाः ॥”)
पञ्चबाणविशिष्टे त्रि ॥

पञ्चशरः, पुं, (पञ्च शरा यस्य सः ।) कन्दर्पः । इत्यमरः । १ । १ । २६ ॥ तस्य पञ्च शराणि यथा, ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ३२ अध्याये ।
“सम्मोहनं मनुष्याणां स्तम्भनकारकम् ।
उन्मादनं शोषणं अस्त्रचेतनहारकम् ॥”
अपि च ।
“सम्मोहनोन्मादनौ च शोषणस्तापनस्तथा ।
स्तम्भनश्चेति कामस्य पञ्च बाणाः प्रकीर्त्तिताः ॥”
पञ्च इन्द्रियाणां शरा यस्येत्यन्ये । इति भरतः ॥
(यथा, कुमारे । ७ । ९२ ।
“मायापतङ्गे प्रतिमन्नमर्त्ते-
र्यंगाश्रिते पञ्चशरस्य सेवाम् ॥”)

पञ्चशस्यं, क्ली, (पञ्चानां शस्यानां समाहारः ।) शस्यपञ्चकम् । तत्तु धान्यमुद्गतिलयवश्वेतसर्षपरूपम् । सर्षपस्थाने माषोऽपि । इति दुर्गोत्सवपद्धतिः ॥

पञ्चशाखः, पुं, (पञ्च शाखा इवाङ्गुल्यो यस्य ।) हस्तः । इत्यमरः । २ । ६ । ८१ ॥ पञ्चानां शाखानां समाहारे क्ली । पञ्चशाखाविशिष्टे त्रि ॥

पञ्चशिखः, पुं, (पञ्च विस्तीर्णा शिखा केशपाशोऽस्य ।) सिंहः । इति हेमचन्द्रः ॥ धर्म्मस्य हिंसाभार्य्यायां जातो मुनिविशेषः । यथा,—
“धर्म्मस्य भार्य्या हिंसाख्या तस्यां पुत्रचतुष्टयम् ।
सम्प्राप्तं मुनिशार्दूल ! योगशास्त्रविचारकम् ॥
ज्येष्ठः सनत्कुमारोऽभूद्द्वितीयश्च सनातनः ।
तृतीयः सनको नाम चतुर्थश्च सनन्दनः ॥
सांख्यवेत्तारमपरं कपिलं वोढुमासुरिम् ।
दृष्ट्वा पञ्चशिखं श्रेष्ठं योगयुक्तं तपोनिधिम् ॥
ज्ञानयोगं न ते दद्युर्ज्यायांसोऽपि कनीयसाम् ॥”
इति वामने ५० अध्यायः ॥
(अस्य जन्मप्रकारोऽनुयायिवर्गानिदर्शितश्च उक्तो महाभारते । १२ । २१८ । ६—१६ ।
“तत्र पञ्चशिखो नाम कापिलेयो महामुनिः ।
परिधावन्महीं कृत्स्नां जगाम मिथिलामपि ॥
सर्व्वसंन्यासधर्म्माणां तत्त्वज्ञानविनिश्चये ।
सुपर्य्यवसितार्थश्च निर्द्वन्द्वो नष्टसंशयः ॥
ऋषीणामाहुरेकं यं कामादवसितं नृषु ।
शाश्वतं सुखमत्यन्तमन्विच्छन्तं सुदुर्लभम् ॥
यमाहुः कपिलं सांख्याः परमर्षिं प्रजापतिम् ।
स मन्ये तेन रूपेण विस्मापयति हि स्वयम् ॥
आसुरेः प्रथमं शिष्यं यमाहुश्चिरजीविनम् ।
पञ्चस्रोतसि यः सत्रमास्ते वर्षसहस्रिकम् ॥
तं समासीनमागम्य मण्डलं कापिलं महत् ।
पुरुषावस्थमव्यक्तं परमार्थं न्यवेदयत् ॥
इष्टिसत्रेण संसिद्धो भूयश्च तपसा मुनिः ।
क्षेत्रक्षेत्रज्ञयोर्व्यक्तिं बुबुधे देवदर्शनः ।
यत्तदेकाक्षरं ब्रह्म नानारूपं प्रदृश्यते ।
आसुरिर्म्मण्डले तस्मिन् प्रतिपेदे तदव्ययम् ॥
तस्य पञ्चशिखः शिष्यो मानुष्या पयसा भृतः ॥
ब्राह्मणी कपिला नाम काचिदासीत् कुटुम्बिनी ।
तस्याः पुत्त्रत्वमागम्य स्त्रियाः स पिबति स्तनौ ॥
ततः स कापिलेयत्वं लेभे बुद्धिञ्च नैष्ठिकीम् ।
एतन्मे भगवानाह कापिलेयस्य सम्भवम् ॥
तस्य तत् कापिलेयत्वं सर्व्ववित्त्वमनुत्तमम् ॥
सामान्यं जनकं ज्ञात्वा धर्म्मज्ञो ज्ञानमुत्तमम् ।
उपेत्य शतमाचार्य्यान् मोहयामास हेतुभिः ॥
जनकस्त्वभिसंरक्तः कापिलेयानुदर्शनात् ।
उत्सृज्य शतमाचार्य्यान् पृष्ठतोऽनुजगाम तम् ॥
पञ्चस्रोतसि निष्णातः पञ्चरात्रविशारदः ।
पञ्चज्ञः पञ्चकृत् पञ्चगुणः पञ्चशिखः स्मृतः ॥”
गायत्रीस्वरूपायां शक्त्यां स्त्री । यथा, देवीभागवते । १२ । ६ । १०५ ।
“पानप्रिया पञ्चशिखा पन्नगोपरिशायिनी ॥”)

पञ्चशूरणः, पुं, (पञ्च शूरणा यत्र ।) पञ्चप्रकारशूरणः । तद्यथा । अत्यम्लपर्णी काण्डीरः मालाकन्दः शूरणः श्वेतशूरणश्च । तथाहि ।
“अत्यम्लपर्णीकाण्डीरमालाकन्दद्विशूरणैः ।
कथितो भवति योगोऽयं पञ्चशूरणसंज्ञकः ॥”
इति राजनिर्घण्टः ॥

पञ्चशैरीषकं, क्ली, (शिरीषवृक्षस्य इदम् शैरीषकम् । पञ्चसंख्यकं शैरीषकम् ।) शिरीषवृक्षस्य कुसुममूलफलपत्रत्वचः । इति राजनिर्घण्टः ॥

पञ्चषाः, त्रि, पञ्च वा षड् वा परिमाणं येषां ते । बहुवचनान्तोऽयं शब्दः । इति मुग्धबोधव्याकरणम् ॥

पञ्चसिद्धौषधिः, पुं, (पञ्च सिद्धा ओषधयो यस्मिन् ।) पञ्चप्रकारौषधिविशेषः । यथा,—
“तैलकन्दसुधाकन्दक्रोडकन्दरुदन्तिकाः ।
सर्पनेत्रयुताः पञ्च सिद्धौषधिकसंज्ञकाः ॥”
इति राजनिर्घण्टः ॥

पञ्चसुगन्धकं, क्ली, (पञ्च सुगन्धा यत्र । ततः कप् ।) पञ्चप्रकारसुगन्धिद्रव्यम् । यथा,—
“कुसुमानि लवङ्गस्य तथा कक्कोलकाख्ययोः ।
जातीफलानि कर्पूरमेतत् पञ्चसुगन्धकम् ॥”
इति शब्दचन्द्रिका ॥
अपि च ।
“कर्पूरकक्कोललवङ्गपुष्प-
गुवाकजातीफलपञ्चकेन ।
समांशभागेन च योजितेन
मनोहरं पञ्चसुगन्धकं स्यात् ॥”
इति राजनिर्घण्टः ॥

पञ्चसूना, स्त्री, (पञ्चगुणिता सूना प्राणिवधस्थानम् ।) पञ्चप्रकारप्राणिवधस्थानम् । यथा,—
“पञ्चसूना गृहस्थस्य चुल्ली पेषण्युपस्करः ।
कण्डनी चोदकुम्भश्च बध्यते यास्तु वाहयन् ॥”
इति शुद्धितत्त्वम् ॥
तत्प्रशमनं गृहस्थस्य प्रतिदिनं भवति तच्च प्रायश्चित्तं वैश्वदेवः । यथा,—
“लौकिके वैदिके वापि हुतोच्छिष्टे जले क्षितौ ।
वैश्वदेवन्तु कुर्व्वीत पञ्चसूनापनुत्तये ॥”
इति आह्निकतत्त्वधृतशातातपवचनम् ॥
अशौचकालीनपञ्चसूनादिजन्यपापस्य दानादिनाश्यत्वं यथा,—
“दशाहात्तु परं सम्यक् विप्रोऽधीयीत धर्म्मवित् ।
दानञ्च विधिना देयमशुभात्तारकं हि तत् ॥”
इति शुद्धितत्त्वधृतसम्वर्त्तवचनम् ॥

पञ्चस्वरा, स्त्री, (पञ्च स्वरा यत्र ।) प्रजापतिदासवैद्यशतभिषुरिष्टमाल्यरिष्टमित्ररिष्टस्त्रीपुंनपुंसकज्ञानसुखदुःखरिष्टस्वेदादियोगध्रुवज्ञाननिर्णय इति नवाध्यायात्मकज्योतिर्ग्रन्थविशेषः । यथा । तत्रैव ।
“पञ्चस्वराभिधानञ्च ग्रन्थं गिरागमसारम् ।
किञ्चिदुद्देशगन्धश्च स्वरूपं वक्ष्यामि साम्प्रतम् ॥”

पञ्चस्वरोदयः, पुं, (पञ्चानां स्वराणामुदयो यत्र ।) ज्योतिःशास्त्रविशेषः । यथा,—
“कालं वक्ष्यामि संक्षिप्य रुद्र पञ्चस्वरोदयात् ।
राज्ञा माता उदासा च पीडा मृत्युस्तथैव च ॥
अ इ उ ए ओ स्वरांश्च लिखेत् पञ्चाग्निकोष्ठके ।
ऊर्द्धतिर्य्यग्गतैरेखैः षड्वह्निक्रमशो गतैः ॥
तिथौ रक्ताग्निकोष्ठेषु जयो राज्यञ्च मानया ।
उदासा पीडा मृत्युश्च भौमः सोमसुतः क्रमात् ॥
गुरुशुक्रशनैश्चरविपत्त्या यथोदितम् ।
रेवत्यादिशिवान्ताश्च नन्दाश्च प्रथमाः कलाः ॥
पञ्चपञ्चान्यत्र भानि चैत्राद्य उदयस्तथा ।
द्वादशाद्या द्वयो मासा नान्य आद्यपरं तथा ॥
कला तिष्ठेच्च या तिष्ठेत् पञ्चमस्तस्य वै स्थितिः ।
राका तिथिस्तथा वारनक्षत्रं मानमेव च ॥
नामोदयस्य पूर्व्वञ्च तथा भवति नान्यथा ॥”
इति गरुडपुराणम् ॥

पञ्चाग्नि, क्ली, पञ्चानामग्नीनां समाहारः । अस्य विवरणं पञ्चतपःशब्दे द्रष्टव्यम् ॥ शरीरस्थपञ्चाग्नयो यथा,—
“उदरे गार्हपत्याग्निर्मध्यदेशे तु दक्षिणः ।
आस्ये आहवनीयश्च सभ्यः पर्व्वा च मूर्द्धनि ;
यः पञ्चाग्नीनिमान् वेद आहिताग्निः स उच्यते ॥”
इति गरुडपुराणम् ॥
(पञ्चाग्नयो सन्ति यस्य । इति विग्रहे वाच्यलिङ्गत्वम् । यथा मनुः । ३ । १८५ ।
“त्रिणाचिकेतः पञ्चाग्निस्त्रिसुपर्णः षडङ्गवित् ॥”)

पञ्चाङ्गं, क्ली, पञ्चानां अङ्गानां एकवृक्षस्य त्वक्पत्रपुष्पमूलफलानां समाहारः । यथा,—
“त्वक्पत्रकुसुमं मूलं फलमेतच्च शाखिनः ।
एकत्र मिलितं चैतत् पञ्चाङ्गमिति संज्ञितम् ॥”
इति राजनिर्घण्टः ॥
पुरश्चरणविशेषः । यथा,—
“जपहोमौ तर्पणञ्चाभिषेको विप्रभोजनम् ।
पञ्चाङ्गोपासनं लोके पुरश्चरणमिष्यते ॥”
इति तन्त्रसारः ॥
वारतिथिनक्षत्रयोगकरणात्मकपञ्जिका । यथा,—

"तिथिर्वारश्च नक्षत्रं योगः करणमेव च ।
पञ्चाङ्गस्य फलं श्रुत्वा गङ्गास्नानफलं लभेत्" ॥
इति ज्योतिषम् ॥

पञ्चाङ्गः, पुं, (पञ्चाङ्गानि यस्य ।) कमठः । इति शब्दमाला ॥ अश्वविशेषः । तत्पर्य्यायः । पञ्चभद्रः२ पुष्पितपुरङ्गमः३ । इति शब्दरत्नावली ॥ प्रणामविशेषः । यथा,—
"बाहुभ्यामेव जानुभ्यां शिरसा वचसा दृशा ।
पञ्चाङ्गोऽयं प्रणामः स्यात् पूजासु प्रवरावितौ ॥"
इति तन्त्रसारः ॥
(राजनयः । यदुक्तम् ।
"सहायाः साधनोपाया विभागो देशकालयोः ।
विनिपातप्रतीकारः सिद्धिः पञ्चाङ्ग इष्यते ॥")

पञ्चाङ्गगुप्तः, पुं, (पञ्चसंख्यकानि अङ्गानि गुप्तानि यस्य ।) कच्छपः । इति त्रिकाण्डशेषः ॥

पञ्चाङ्गुलः, पुं, (पञ्च अङ्गुलय इव पत्राणि यस्य ।) एरण्डवृक्षः । इत्यमरः । २ । ४ । ५१ । पञ्चाङ्गुलपरिमाणयुक्ते त्रि ॥

पञ्चाङ्गुलिः, त्रि, पञ्चाङ्गुलयो यस्य सः । इति व्याकरणम् ॥

पञ्चाङ्गुली, स्त्री, तन्त्राक्षाक्षुपः । इति राजनिर्घण्टः ॥

पञ्चातपा, स्त्री, (पञ्चभिरग्निसूर्य्यैरातप्यते इति । आङ् + तप् + अच् । ततः टाप् ।) तपस्याविशेषः । यथा,—
"चर्य्या पञ्चातपाचिन्ता शाम्भवी शाम्भवो जपः ।
यज्ञियैर्दारुभिः शुष्कैश्चतुर्हिक्षु चतुष्कृतम् ॥
वह्निसंस्थापनं मध्ये तीव्रांशुस्तत्र पञ्चमः ।
हस्तान्तरे चतुर्व्वह्नीन् कृत्वा वैश्वानरेरिणा ॥
तत्प्रभाध्या सूर्य्यबिम्बं वीक्षन्ती बहुलांशुका ।"
इति कालिकापुराणे ४२ अध्यायः ॥

पञ्चानन, पुं, (पञ्च आननानि यस्य ।) शिवः । (पञ्चं विस्तृतं आननं यस्य ।) सिंहः । इति मेदिनी ॥ व्याघ्रः । इति शब्दरत्नावली ॥ (ज्योतिषोक्तसिंहराशिः । यथाह स्मृतिः ।
"पञ्चानने गते भानौ पक्षयोरुभयोरपि ।
चतुर्थ्यामुदितश्चन्द्रो नेक्षितव्यः कदाचन ॥"
रुद्राक्षविशेषः । तद्धारणे महच्छुभं भवति ॥)

पञ्चामरा, स्त्री, (पञ्च अमराः । संज्ञात्वात्कर्म्मधारयः ।) गन्धप्रकारामरलतादि । यथा,—
"एका तु अमरा दूर्व्वा तस्या यज्ञियं समानयेत् ।
अन्या तु विजया देवी सिद्धिरूपा सरस्वती ॥
अन्या तु बिल्वपत्रस्था शिवसन्तोषकारिणी ।
अन्या तु योगसिद्ध्यर्थे निर्गुण्डी चामरा लता ॥
अन्या तु कालतुलसी श्रीविष्णोः प्रियतोषिणी ।
एताः पञ्चामरा ज्ञेया योगसाधनकर्म्मणि ॥"
इति रुद्रयामलोत्तरखण्डे ३६ पटलः ॥

पञ्चान्दतं, क्ली, (पञ्चानामब्दतानां समाहारः गुडशर्कराद्युग्मघृतदधिमधुघटितम् । यथा,—
"दुग्धं सगुडशर्करञ्च घृतं दधि तथा मधु ।
पञ्चान्दतामिदं प्रोक्तं विधेयं सर्व्वकर्म्मसु ॥"
गर्भवतीभ्यस्तद्दानस्य दिनं यथा,—
"रेवत्यश्विपुनर्व्वसुहृदयमरुन्मूलानुराधासमा-
हस्तास्वातिरफल्गुनीषु भृगुजे जीवार्कवारे तथा ।
लग्नर्क्षोडुपशोभनेषु नियतं सत्यध्य रिक्तां तिथिं
देयं सप्तमि च पञ्चमेषु करणे पञ्चान्दतं योषिताम् ॥"
इति ज्योतिस्तत्त्वम् ॥

पञ्चान्दतयोगः, पुं, (पञ्चानामब्दतानां गुडघृतादीनां योगः ।) गुडघृतीगोधूरसशर्करीसुखिडकाघृतावरीणां संयोगः । यदुक्तं राजनिर्घण्टे ।
"गुडघृती गोधूरश्चैव सुशर्करी सुखिडका तथा ।
घृतावरीति पञ्चानां योगः पञ्चान्दताभिधः ॥"

पञ्चाम्नाय., पुं, (पञ्चसंख्यकः आम्नायः ।) शिवस्य पञ्चवक्त्रविनिर्गतस्तन्त्रशास्त्रविशेषः । यथा,—
"पूर्व्वाम्नायः पूर्व्वमुखः पश्चिमः पश्चिमामुखः ।
दक्षिणो दक्षिणस्यद्दङ्मुत्तरश्चोत्तरः परः ॥
निरुत्तरं तथा चोर्द्ध सिद्धान्तागमरूपिणम् ।
ऊर्द्धाम्नायपरिज्ञानं गाल्यस्य तपसः फलम् ॥"
अन्यत्र ।
"पूर्व्वाम्नायः शब्दरूपो दक्षिणः कर्णरूपकः ।
पश्चिमः प्रश्नरूपः स्यादुत्तरश्चोत्तरस्तथा ॥
ऊर्द्धाम्नायस्तत्त्वबोधः केवलाशुभवात्मकः ॥"
इत्यादि । इति भैरवतन्त्रम् ॥
मम पञ्चमुखेभ्यश्च पञ्चाम्नायाः समुद्गताः ।"
इति कुलार्णवतन्त्रम् ॥ * ॥
"विभाग्य सुखपञ्चं हि शिवस्य वरवर्णिनि ।
सद्योजातं वामदेवमघोरस्य ततः परम् ॥
तत्पुरुषं तथेशानं पञ्चवक्त्रं प्रकीर्त्तितम् ॥
सद्योजातस्य वै मुखं शुद्धस्फटिकसन्निभम् ।
पीतवर्णं तथा सौम्यं वामदेवं मनोहरम् ॥
कृष्णवर्णमघोरस्य खलं भीमविवर्द्धनम् ।
रक्तं तत्पुरुषं देवि ! दिव्यमूर्त्ति मनोहरम् ॥
श्यामलस्य तथेशानं सर्व्वदेवशिवात्मकम् ।
चिन्तयेत् पश्चिमे चाद्यं द्वितीयस्य तथोत्तरे ॥
अघोरं दक्षिणे देवं पूर्व्वे तत्पुरुषं तथा ।
ईशानं मध्यतो ज्ञेयं चिन्तयेद्भक्तितत्परः ॥"
इति निर्व्वाणतन्त्रे ६ पटलः ॥ * ॥
अन्यत् षड्आम्नायशब्दे द्रष्टव्यम् ॥

पञ्चाम्रं, क्ली, (अम्यन्ति रसानि प्राप्नुवन्तीति । अम गत्यादिषु + "अमिनस्योर्दीर्घश्च ।" उणां २ । १६ । इति रक् दीर्घश्चोपधायाः इति आम्रा दृक्षाः । पञ्चानां आम्राणामश्वत्थादिवृक्षाणां समाहारः ।) वृक्षविशेषाणां समाहारः । यथा,—
"अश्वत्थमेकं पिचुमर्दमेकं
न्यग्रोधमेकं दश पुष्पजातीः ।
द्वे द्वे तथा दाडिममातुलुङ्गे
पञ्चाम्रवापी नरकं न याति ॥"
इति वराहपुराणम् ॥
अपि च ।
"अश्वत्थ एकः पिचुमर्द एको
द्वौ चम्पकौ त्रीणि च केशराणि ।
सप्तापि तालाः नव नारिकेलाः
पञ्चाम्रवापीं नरकं न याति ॥"
इति तिथितत्त्वम् ॥

पञ्चाम्लं, क्ली, (पञ्चानामम्लानां कोलादीनां समाहारः ।) अम्लपञ्चकम् । यथा,—
"कोलदाड़िमदृक्षाम्लैरम्लवेतससंयुतैः ।
चतुरम्लश्च पञ्चाम्लं मातुलुङ्गसमन्वितम् ॥"
इति शब्दचन्द्रिका ॥

पञ्चारी, स्त्री, (पञ्चपञ्चसंख्याव्याप्नोतीति । ऋ गतौ "कर्म्मण्यण" । ३ । २ । १ । इति अण् । गौरादित्वात् ङीष् ।) शारिम्बशाला । इति शब्दमाला ॥ (पाचार छक इति भाषा ॥)

पञ्चार्चिः, [ष्] पुं, (पञ्च अर्चींषि यस्य सः ।) सुवर्णम् । इति त्रिकाण्डशेषः ॥

पञ्चाल., पुं (पचिविस्तारवचने + "सलिपचिमुचिकुचिभ्यो णिच्च कुलीति ।" उणां १ । ११७ । इति कालण् ।) देशविशेषः । इत्यादिकोषः ॥ तस्य व्युत्पत्तिर्यथा । "सूर्य्यस्यापुत्रलस्यसुतपञ्चकस्य पञ्चकाम्पिल्यसंज्ञाः । पञ्चागासेतेषां विषयाणां रक्षणायालमेते मत्पुत्रा इति पित्राभिहिता इति पञ्चालाः ।" इति विष्णुपुराणे ४ अंशे १६ अध्यायः ॥ (अस्य स्थितिनिर्णय उक्तजनपदशब्दे यथा,—
"कुरुश्चैवात् पश्चिमेषु तथाचोत्तरभागतः ।
इन्द्रप्रस्थान्महीयानि ! दशयोजनकन्यके ।
पञ्चालदेशो देवेशि ! सौन्दर्य्यगर्व्वभूषितः ॥")

पञ्चाला., पुं, (पञ्चालाः क्षत्रियास्तेषां निवासो जनपदः । निवासेऽण् जनपदे लुप् ।) जनपदविशेषः । बहुवचनान्तोऽयम् । इति मेदिनी ॥

पञ्चालिका, स्त्री, (पञ्चभिर्वर्णैरलति इति । आ + अल् भूषणे + ण्वुल् । टाप् स्वार्थे कन् इत्वञ्च ।) पुत्तली । इत्यमरटीकायां भरतः ॥

पञ्चाली, स्त्री, (पञ्चभिर्वर्णैरलति । आ + अल् भूषणे + अच् । गौरादित्वात् ङीष् ।) वस्त्रादिग्रथितपुत्रिका । कानिर पुतुल इति भाषा ॥ गीतविशेषः । इति मेदिनी ॥ पाँचाली इति भाषा ॥ (पञ्चारी रस्य लत्वे सिद्धम् ।) शारिम्बशाला । इति त्रिकाण्डशेषः ॥ छक इति भाषा ॥

पञ्चावटं, क्ली, (पञ्च विस्तृतसरःस्थलं आवटति वेष्टते इति । आ + वट् + अच् ।) उरस्पटम् । वालोपवीतम् । इति हारावली ॥ (पञ्चानां वटानां वटादिवृक्षाणां समाहारः । निपातनात् साधुः । पञ्चवटी । यथा, गोः रामायणे । ३ । २० । ३८ ।
"विवेश पञ्चावटमुग्रसेवितम्
रिपून् दिधक्षुः शलभानिवाग्न्यभुक् ॥")

पञ्चावस्थ., पुं, (पञ्चसु भूतेषु अवस्था यस्य । तस्य देहारम्भकस्वस्वकारणेषु लयत्वात्तथात्वम् ॥ शिवः । इति त्रिकाण्डशेषः ॥ पञ्चावस्थायुक्ते त्रि ॥

पञ्चाशत्, त्रि, (पञ्चदशतः परिमाणमस्य ।) "षड्त्रिंशद्भतिश्चिंशदिति ।" ५ । १ । ५६ । निपातनात् साधुः ।) संख्याविशेषः । इति ज्योतिषम् ॥ पञ्चाश इति भाषा ॥ (यथा, स्तुतिपञ्चाशति । ५१ ।

"पक्षाग्रक्षिपिभिः पुरा भगवति ! त्वत्या यदङ्गीकृतं तत्राहं सकलोऽधुनापि विमतिस्तत्पादपद्मस्मृतेः ॥")

पक्षास्यः, पुं, (पक्षं विकृतं आस्यं यस्य ।) सिंहः । इत्यमरः । २ । ५ । १० ॥ (पक्षाणि आस्यानि यस्य । शिवः ॥ पक्षमुखविंशिष्टे, त्रि । यथा, गोः रामायणे । ५ । ७१ । २३ ।

"लक्षितेयं विशालाक्षी मया शोकपरायणा ।
आदायैतां न जानीषे पक्षास्यामिव भोगिनीम् ॥")

पक्षीकरणं, क्ली, पञ्चभूतानां भागविशेषेण मिश्रीकरणम् । यथा । "पक्षीकरणन्तु आकाशादिपञ्चमेकैकं द्विधा समं विभज्य तेषु दशसु भागेषु मध्ये प्रायमिकान् पञ्चभागान् प्रत्येकं चतुर्द्धा समं विभज्य तेषां चतुर्णां भागानां स्वस्वद्वितीयार्द्धभागं परित्यज्य भागान्तरेषु संयोजनम् । तदुक्तम् ।

द्विधा विधाय चैकैकं चतुर्द्धा प्रथमं पुनः ।
स्वस्वेतरद्वितीयार्द्धयोजनात् पञ्च पञ्च ते ॥ इति ॥
अस्याप्रामाण्यं नाशङ्कनीयं चिदृतकरणश्रुतेः पञ्चीकरणस्याप्युपलक्षणार्थत्वात् । पञ्चानां पञ्चात्मकत्वे समानेऽपि तेषु च वैशिष्ट्यात्तु तद्वादस्तद्वाद इति न्यायेन आकाशादिशब्दैः सम्भवति । तदानीमाकाशे शब्दोऽभिव्यक्यते । वायौ शब्दस्पर्शौ । अग्नौ शब्दस्पर्शरूपाणि । अप्सु शब्दस्पर्शरूपरसाः । पृथिव्यां शब्दस्पर्शरूपरसगन्धाश्च । एतेभ्यः पञ्चीकृतेभ्यो भूतेभ्यः भूर्भुवः स्वर्महर्जनस्तपः सत्यमित्येतन्नामकानासूर्ध्वमधि विद्यमानानां अतलवितलसुतलरसातलतलातलमहातलपातालनामकानां अधोऽधो विद्यमानानां लोकानां ब्रह्माण्डस्य तदन्तर्गतचतुर्दशभूतस्थूलशरीराणामन्नपानादीनाञ्चोत्पत्तिर्भवति ॥" इति वेदान्तसारः । ३६-४२ ॥

पञ्चेन्द्रियं, क्ली, पञ्चानां ज्ञानेन्द्रियाणां समाहारः । यथा । "श्रोत्रत्वङ्नेत्ररसनघ्राणं पञ्चेन्द्रियाणि च ।" इति शब्दचन्द्रिका ॥ पञ्चकर्म्मेन्द्रियञ्च ॥

पञ्चेषुः, पुं, (पञ्च इषवो यस्य ।) कामदेवः । इति हलायुधः ॥

पञ्चोपविषं, क्ली, (पञ्चसंख्यकं उपविषम् ।) उपविषपञ्चकम् । यथा, राजनिर्घण्टे ।

"कुचकैकरवीराणि लाङ्गली विषमुष्टिका ।
एतान्युपविषाण्याहुः पञ्च माल्यिव्यशालिनः ॥"

पञ्चोष्माणः, पुं, (पञ्च उष्माणः ।) आहारपाचकशरीरस्थपञ्चाग्नयः । यथा, सारकौमुद्याम ।

"भौमाप्याग्नेयवायव्याः पञ्चोष्माणः सनाभसाः ।
पञ्चाहारगुणान्स्वान्स्वान् पार्थिवादीन् पचन्त्यनु ।
पार्थिवाः पार्थिवानेव शेषाः शेषांश्च देहगान् ॥"

पञ्जरं, क्ली, (पञ्जयते रुध्यते उदरयन्त्रमनेन । पञ्जि-रोधे + अरन् ।) कायास्थिवृन्दम् । शरीरास्थिपञ्जरम् । (यथा, पद्मपुराणे । ६ । १७३ ।

"देहादिपञ्जरं यन्त्रं तदारोहोऽभिमानिता ।
विहितप्रतिषिद्धेषु प्रवृत्तिर्भ्रमएव भवेत ॥"

III. 3

पञ्जयते रुध्यते पक्ष्यादिरत्र ।) पक्ष्यादेरन्नयन्त्रम् । इत्यमरभरतौ । पिंजरा इति भाषा । तत्पर्य्यायः । शालारम् २ । इति जटाधरः ॥ (यथा, हरेः रामायणे । २ । ६५ । ५ ।

"तेन शब्देन विहगाः प्रतिबुद्धाश्च सस्वनुः ।
शाखास्थाः पञ्जरस्थाश्च ये राजकुलगोचराः ॥")

पञ्जरः, पुं, (पञ्जयते रुध्यते आत्मा यस्मिन् । पञ्जि-रोधे + अरन् ।) शरीरम् । इति त्रिकाण्डशेषः ॥ (यथा, हठयोगदीपिकायाम् । ४ । १८ ।

"द्वासप्ततिसहस्राणि नाड़ीद्वाराणि पञ्जरे ।
सुषुम्ना शाम्भवी शक्तिः शैलास्त्वेव निरर्थकाः ॥"

"पञ्जरे पञ्जरवच्छिरास्थिभिर्बद्धे शरीरे ।" इति तट्टीका ॥) देहास्थिसमूहः । तत्पर्य्यायः । कङ्कालः २ देहबन्धास्थि ३ । इति जटाधरः ॥ कलियुगम् । गर्वा नीराजनाविधिः । इति सारस्वताभिधानम् ॥

पञ्जराखेटः, पुं, (पञ्जरेणैव यन्त्रेण आखेटो मृगया यस्मात् ।) मत्स्यमारणोपाययन्त्रम् । पोलो इति भाषा । तत्पर्य्यायः । भ्रवः २ प्लवः ३ । इति त्रिकाण्डशेषः ॥ [राजनिर्घण्टः ॥

पञ्जलः, पुं, (पञ्ज + अलच् ।) कोलकन्दः । इति

पञ्जिः, स्त्री, (पञ्ज + इन् ।) सूत्रनालिका । इति शब्दमाला । पाँइज इति भाषा । पञ्जिका च ॥

पञ्जिका, स्त्री, (पञ्जि + स्वार्थे कन् टाप् ।) तूलनालिका । इति हारावली ॥ पाँइज इति भाषा ॥ टीकाविशेषः । यथाह हेमचन्द्रः ।

"टीका निरन्तरव्याख्या पञ्जिका पदभञ्जिका ॥"

अमरसञ्जीवनी । इति त्रिकाण्डशेषः ॥ पञ्चाङ्गम् । पाँजि इति भाषा । तत्श्रवणफलं यथा,—

"वारो हरति दुःस्वप्नं नक्षत्रं पापनाशनम् ।
तिथिर्भवति गङ्गाया योगः सागरसङ्गमः ।
करणं सप्ततीर्थानि श्रूयते दिनपञ्जिका ॥"

इति देवज्ञाः ॥

अपि च ज्योतिस्तत्त्वे वराहवचनम् ।

"दुःस्वप्ननाशको वारो नक्षत्रं पापनाशनम् ।
तिथिरायुष्करी प्रोक्ता योगो बुद्धिविवर्द्धकः ॥
चन्द्रः करोति सौभाग्यमंशकः सुखदायकः ।
करणात्सभते लक्ष्मीं यः शृणोति दिने दिने ॥"

निःशेषपदव्याख्यात्री । तिथिवारादिज्ञापिका । आयव्ययलिखनार्थाच्च । इत्यमरटीकायां भरतः ॥

पञ्जिकारकः, पुं, (पञ्जिं करोतीति । कृ + ण्वुल् ।) कायस्थजातिः । यथाह जटाधरः ।

"अथ कायस्थः करणः पञ्जिकारकः ॥"

(अस्य पञ्जिकरणकथा कायस्थशब्दे द्रष्टव्या ॥) पञ्जिकाकारश्च ॥

पञ्जी, स्त्री, (पञ्जि + वा ङीप् ।) पञ्जिः । नालिका । इति शब्दमाला ॥ पञ्जिका । पाँजि इति भाषा । यथोक्तं देवज्ञैः ।

"देवज्ञवक्त्रेण शृणोति पञ्जीं-
मृतुचर्यां याति शृणोव लक्ष्मीं ॥"

अत्यविशेषः । यथाह धुवानन्दमिश्रः ।

"प्रणम्य विघ्नेश्वरपादपद्मौ
सरस्वतीं तां शूलदेवताञ्च ।
शिशुप्रबोधाय कुलस्य पञ्जी
विविच्यते श्रीयुतमिश्रकेण ॥"

पञ्जीकरः, पुं, (पञ्जीं पञ्जिकां करोतीति । कृ + टः ।) कायस्थः । यथा । "कायस्थे कूटकृत्पञ्जीकरौ ।" इति त्रिकाण्डशेषः ॥

पट, गतौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) पटति । इति दुर्गादासः ॥

पट, क त्विषि । इति कविकल्पद्रुमः ॥ (चुरां-परं-अकं-सेट् ।) क, पाटयति । त्विषि दीप्तौ । इति दुर्गादासः ॥

पट, तृ क वेष्टने । इति कविकल्पद्रुमः ॥ (अदन्त-चुरां-परं-सकं-सेट् ।) वस्त्रने । इत्यन्ये । पटयति मालां मालिकः । इति दुर्गादासः ॥

पटं, क्ली, पटतीति । पट् + पचाद्यच् ।) छदिः । चालम् । इति पटलशब्दटीकायां भरतः ॥

पटः, पुं, क्ली, (पटयत्यनेन । पट वेष्टने घञर्थे कः ।) शोभनवस्त्रम् । तत्पर्य्यायः । सूक्ष्मवेलकः २ । इत्यमरः । २ । ६ । ११६ ॥ (यथा, पद्मपुराणे । ६ । २ ।

"यथा धौतो घट्टितश्च क्षाञ्छितो रञ्जितः पटः ।
चिदन्तर्यामिसूत्राणि विराट् चात्मा तथार्च्यते ॥")

चित्रपटः । इति मेदिनी ॥ तस्य लक्षणं यथा,—

"पटस्य लक्षणं वक्ष्ये यथा सिध्यन्ति साधकाः ।
ग्रन्थिकैश्चविहीने तु अजीर्णे समतन्तुके ॥
अस्फाटिते अच्छिन्ने तु सूत्रेणैव समालिखेत् ।
योगिनी रूपिणी कार्या जयादेः परिवारिता ॥
दृष्टेन च भवेद्दृष्टो बाधिते बाधितो भवेत् ।
कुरूपेण कुरूपस्तु मूर्खेण तु न पूज्यते ॥
लेखकस्य तु यद्रूपं चित्रे भवति तादृशम् ॥"

इति देवीपुराणम् ॥

पटः, पुं, पियालवृक्षः । इति मेदिनी ॥ पुरस्कृतः । इति विश्वः ॥

पटकः, पुं, (पटेन छदनेन कायति प्रकाशते इति । कै + कः ।) शिबिरम् । इति शब्दमाला ॥

पटकारः, पुं, (पटं शोभनवस्त्रं चित्रं वा करोति यः । पट् + कृ + अण् ।) तन्तुवायः । चित्रकरः ॥

पटकुटी, स्त्री, (पटस्य पटनिर्म्मिता वा कुटी ।) वस्त्रवेश्म । ताँबु इति भाषा । तत्पर्य्यायः । केशिका २ गुप्तालयनिका ३ । इति हेमचन्द्रः ॥

पटचरं, क्ली, (भूतपूर्वं पटत् । भूतपूर्वे चरट । यद्वा पटदिव्यवस्त्रं शब्दं चरतीति । पटद् + चर + अच् ।) जीर्णवस्त्रम् । इत्यमरः । २ । ६ । ११५ ॥ (पटयते आवेष्टते इति । पट् + बाहुलकात् उत् । पटदिव चरति यः । चर् + अच् ।) चौरे पुं इत्यमरटीकायां रमानाथः ॥

पटजरुग्यः, पुं, (पटानां वस्त्राणां मरुपः ।) पटझाटी । इति शब्दचन्द्रिका ॥

पटमयं, क्ली, (पट + मयट् ।) वस्त्रसमूहम् । यथा,—

"पटवासः पटमयं दूष्यं वस्त्रसमूहं सलम् ॥"

इति त्रिकाण्डशेषः ॥

झाटी । यथा, शब्दरत्नावल्याम् ।

"पटवासः पटमयं झाटी झाटश्च झाषप ॥"

पटरकः, पुं, (पटर + स्वार्थे कन् ।) गुन्द्रवृक्षः । इति राजनिर्घण्टः ॥

पटलं, क्ली, (पटं विस्तृतं लाति । पट् + ला + "आतोनुपेति" ।३।२।३। कः । यद्वा पटतीति । पट + "ह्रस्वादिभ्यश्चित् ।" उणां ।१।१०८। इति कलच् ।) छदिः । चाल इति भाषा । नेत्ररोगः । इत्यमरः ।३।३। २०० ॥ पिटकः । परिच्छदः । तिलकः । (यथा, कलाविलासे । १ । २५ ।

"अस्तमिते दिवसकरे तिमिरभरविरदसंसक्ता ।
सिन्दूरपटलपाटलकान्तिरिवासे बभौ सन्ध्या ॥")

समूहे क्ली स्त्री । इति मेदिनी ॥ (यथा, भागवते । ३ । १४ । २६ ।

"यस्यानवद्याचरितं मनीषिणो
गृणन्त्यविद्यापटलं विभित्सवः ।
निरस्तसाम्यातिशयोऽपि यत् स्वयं
पिशाचचर्य्यामचरत् गतिः सताम् ॥")

दृष्टेरावरकम् । चक्षुर परदा इति भाषा । यथाह माधवकरः ।

"प्रथमे पटले दोषो यस्य दृष्ट्या व्यवस्थितः ।
अव्यक्तानि सरूपाणि कदाचिदपि पश्यति ॥"

दृष्ट्यां चत्वारि पटलानि । रसरक्ताश्रयं वाह्यं द्वितीयं मांससंश्रयं तृतीयं मेदःसंश्रितं चतुर्थं कालकाख्यसंश्रितम् । तथा च सुश्रुतः ।

"तेजोजलाश्रितं वाह्यं तेष्वन्यत् पिण्डितास्रितम् ।
मेदस्तृतीयं पटलमाश्रितं लक्ष्म चापरम् ।
पक्ष्माश्रयसमं दृष्टेः स्त्रीवां वाहुल्यमिष्यते ॥"

इति । अत्र तेजःशब्देन रक्तं जलशब्देन रसो व्याख्यातः । तेषु पटलेषु वाह्यादिभेदेनाधिष्ठानविशेषप्रभावात् दोषाणां लिङ्गविशेषमाह प्रथमे पटले इत्यादि । प्रथमे पटले सर्व्वाभ्यन्तरे न तु वाह्ये । इति विजयरक्षितः ॥

पटलः, पुं, क्ली, (पाटयति दीर्य्यते यः । पट् + कलच् ।) ग्रन्थः । वृत्तः । इति शब्दरत्नावली ॥ वृत्तस्थाने वृन्तोऽपि पाठः ॥

पटलप्रान्तं, क्ली, (पटलस्य छदिसः प्रान्तम् ।) गृहचालिकान्तभागः । छाँचि इति भाषा । तत्पर्य्यायः । वलीकम् २ नीव्रम् ३ । इत्यमरः । २ । २ । १४ ॥

पटली, स्त्री, (पटल + ङीष् ।) छदिः । इति भरतहेमचन्द्रौ ॥ चाल इति भाषा ॥

पटवासः, पुं, (पट उप्यते प्राचुर्य्येण दीयते यत्र । पट + वप् + घञ् ।) वस्त्रगृहम् । इति त्रिकाण्डशेषः ॥

पटवासः, पुं, (पटस्य पटनिर्म्मितो वा वासः गृहम् ।) वस्त्रगृहम् । आटी । इति शब्दरत्नावली ॥

पटवासकः, पुं, पटो वास्यतेऽनेनेति घञि पटवासः ततः स्वार्थे कन् । पटवासचूर्णम् । तत्पर्य्यायः । पिष्टातः २ । पिष्टेन कुङ्कुमचूर्णादिना व्यततीति पिष्टातः पचाद्यच् । इत्यमरभरतौ ॥

पटहं, क्ली पुं, (पटेन हन्यते इति । पट + हन् + ड ।) पटवाद्यं जहाति पटहः ड: निपातनात् तलोपः । इति भरतः ॥ आनकवाद्यम् । इत्यमरः । १ । ७ । ६ ॥

पटहः, पुं, (पट इत्यव्यक्तं शब्दं जहाति त्यजतीति । पट + हा + ड ।) पाटयति गमयति योधान् युद्धाय उत्साहवर्द्धकत्वात पट गतौ नान्नीति अहः । इति भरतः ॥ युद्धे वाद्यमानढक्का । तत्पर्य्यायः । आडम्बरः २ । इत्यमरः । २ । ८ । १०८ ॥ वसारम्भः । हिंसनम् । इति शब्दरत्नावली ॥

पटाकः, पुं, (पटति गच्छतीति । पट् + निपातनात् आकः ।) पक्षिविशेषः । इत्युणादिकोषः ॥

पटाका, स्त्री, (पटाक + टाप् ।) पताका । इति शब्दरत्नावली ॥

पटालुका, स्त्री, (पट इव अलतीति । पट् + वाहुलकात् उकः ततष्टाप् ।) जलौका । इति त्रिकाण्डशेषः ॥

पटिः, स्त्री, (पट + इन् ।) पटभेदः । वागुलिः । कुम्भिकाद्रुमः । इति मेदिनी ॥

पटिका, स्त्री, (पटि + स्वार्थे कन् ततः टाप् ।) पटिः । वस्त्रम् । यथा, लीलावती । [चे-

"विस्तारे त्रिकरा: कराष्टकमिता दैर्घ्ये विचित्राच्च दूपैरुत्कटपट्टसूत्रपटिका अर्धौ लभन्ते शतम् ।
दैर्घ्ये सार्द्धकरत्रया परपटी हस्तार्द्धविस्तारिणी तादृक् किं लभते द्वितं वद वणिक् वाणिज्यकं वेत्सि चेत् ॥"

पटिष्ठः, त्रि, (अयमेषामतिशयेन पटुः । पट + "अतिशायने तमविष्ठनौ ।" ५ । ३ । ५५ । इति इष्ठन् ।) अतिशयपटुः । इति व्याकरणम् ॥

पटी, स्त्री, (पट + इन् । वा ङीप् ।) वस्त्रभेदः । इति शब्दरत्नावली । यवनिका । इति त्रिकाण्डशेषः ॥

पटीयान्, [स] त्रि, (अयमेषामतिशयेन पटुः । पटु + "द्विवचनविभज्योपपदे तरवियसुनौ ।" ५ । ३ । ५७ । इति इयसुन् ।) अतिशयपटुः । इति व्याकरणम् ॥

पटीरं, क्ली, (पटतीति । पट गतौ । "वृ वृकटिपटिग्रौटिभ्य ईरन् ।" उणां । ४ । ३० । इति ईरन् ।) तितउः । तुङ्गम् । नलकम् । केदारः । वारिदः । वेणुचारः । वातिकः । चन्दनम् । इति शब्दरत्नावली ॥ खदिरम् । उदरम् । कन्दर्पः । हरणीयम् । इति संक्षिप्तसारोणादिवृत्तिः ॥

पटु, क्ली, (पाटयति । पट गतौ णयन्तः । "कलिपाटीति ।" उणां । १ । १६ । इति उः पटादेश्चः ।) छत्रा । लवणम् । इति मेदिनी ॥ पांसुलवणम् । इति रत्नमाला ॥

पटुः, पुं, (पाटयतीति । पट् + विच् + "कलिपाटीति ।" उणां । १ । १६ । इति उः पटादेश्च ।) पटोलः । इत्यमरः । २ । ४ । १५५ ॥ पटोलपत्रम् । इति विश्वः ॥ काण्डीरलता । कारवेल्लः । चोरकः । इति राजनिर्घण्टः ॥

पटुः, त्रि, (पाटयतीति । पट गतौ । णयन्तः । "कलिपाटीति ।" उणां । १ । १६ । इति उः पटादेश्च ।) दक्षः । (यथा, रघुः । ६ । ४६ ।

"अनुभवन् नवदोलन्तूत्सवं
पटुरपि प्रियकण्ठनिषक्तया ।
अनयदासनरज्जुपरिग्रहे
भुजलतां जडतामवलोचनः ॥")

नीरोगः । चतुरः । इति मेदिनी ॥ (मधुरः । यथा, रघुः । ६ । ७३ ।

"कुम्भप्रणवभः पटुरुच्चै-
रुच्चचार निनदोऽभसि तस्याः ॥")

तीक्ष्णः । स्फुटः । इति हेमचन्द्रः ॥ निपुणः । इति जटाधरः ॥ धूर्त्तः । इति त्रिकाण्डशेषः ॥

पटुकः, पुं, (पटु + स्वार्थे कन् ।) पटोलः । इति शब्दरत्नावली ॥

पटुकल्पः, त्रि, ईषदूनः पटुः । (पटु + कल्पप् ।) इति व्याकरणम् ॥

पटुजातीयः, त्रि, पटुप्रकारः । (पटु + जातीयर् ।) इति व्याकरणम् ॥

पटुलवणकं, क्ली, (पटु लवणं तत्प्रचुरं लवणम् । ततः कन् ।) लवणलवणम् । इति राजनिर्घण्टः ॥

पटुपक्षिका, स्त्री, (पटु पक्षमस्याः कप् । टापि अत इत्वम् ।) क्षुद्रचक्षुश्चुपः । इति राजनिर्घण्टः ॥

पटुपर्णिका, स्त्री, (पटु पर्णमस्याः । कप् टाप् अत इत्वञ्च ।) क्षीरिणीवृक्षः । इति राजनिघण्टः ॥

पटुपर्णी, स्त्री, (पटुपर्ण + "पाकल्कर्णपर्णपुष्पफलेति ।" ४ । १ । ६४ । इति ङीष् ।) स्वर्णक्षीरी । इत्यमरः । २ । ४ । १३८ ॥

पटरूपः, त्रि, (प्रशस्तः पटुः । पटु + रूपप् ।) अतिशयपटुः । इति व्याकरणम् ॥

पटोटजं, क्ली, (पटस्य छदिसः उटे लवादौ जायते यत् । "सप्तम्यां जनेर्डः ।" ३ । २ । ६७ । इति डः ।) छत्राकः । इति शब्दरत्नावली ॥

पटोलं, क्ली, (पट गतौ + "कपिगडिगण्डीति ।" उणां । १ । ६७ । इति ओलच् ।) वस्त्रभेदः । इति मेदिनी ॥ तन्तु गुच्छरदेशीयविचित्रपट्टवस्त्रम् ॥

पटोलः, पुं, (पटति वहुगुणान् प्राप्नोतीति । पट गतौ + "कपिगडिगण्डीति ।" उणां । १ । ६७ । इति ओलच् ।) स्वनामप्रसिद्धलतिकाफलम् । पलवल् इति हिन्दी भाषा ॥ (यथा, पञ्चतन्त्रे १ । ३०६ ।

"सान्नेव यत्र सिद्धिर्न तत्र दण्डो बुधेन विनियोज्यः ।
पित्तं यदि शर्करया शाम्यति कोऽर्थः पटोलेन ॥")

तत्पर्य्यायः । कुलकम् २ तिक्तकः ३ पटुः ४ । इत्यमरः । २ । ४ । १५५ ॥ कर्कशदलः ५ कुलजः ६ वालिमान् ७ लताफलः ८ राजफलः ९ वरतिक्तः १० अन्डताफलः ११ । इति रत्नमाला ॥ कटुफलः १२ कटुकः १३ कर्कशच्छदः १४ राजनामा १५ अन्डतफलः १६ पाण्डुः १७ पाण्डुफलः १८ वीजगर्भः १९ नागफलः २० कुलारिः २१ कासमर्द्दनः २२ पञ्चरः २३ आलीफलः २४ व्योत्स्नी २५ कक्कुन्नी २६ । अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । सारकत्वम् । पित्तवलाश्मकफकरः तिक्तुलारुग्व्रणदाहार्शोनाशित्वञ्च । इति राजनिर्घण्टः ॥ आम च ।

पाचनत्वम्। हृद्यत्वम्। दृष्यत्वम्। लघुत्वम्। अग्निदीपनत्वम्। स्निग्धत्वम्। कासदोषत्रय-क्रिमिनाशित्वञ्च। तस्य मूलादिगुणाः।
"पटोलस्य भवेन्मूलं विरेचनकरं सुखात्।
नालं श्लेष्महरं पत्रं पित्तघ्नि फलं पुनः॥
दोषत्रयहरं प्रोक्तं तद्वत्त्वक् पटोलिका॥"
इति भावप्रकाशः॥
अपि च राजवल्लभः।
"पटोलं कफपित्तास्रगरुचिव्रणनाशनम्।
विसर्पनयनव्याधिचिरदोषज्वरनाशनौ।
पटोलपल्लवश्चेति किञ्चिद्गुणान्तरान्वितौ॥"
पटोलकः, पुं, (पटोल इव कायति प्रकाशते इति कै+कः।) शुक्तिः। इति शब्दमाला॥
पटोलिका, स्त्री, (पटोल+कन्+टाप्+अत इत्वञ्च।) फलविशेषः। झिङ्गा इति भाषा। पोरल इति ख्याता। इति केचित्। इति भरतः॥ तत्पर्य्यायः। द्योतस्त्री २ जाली ३। इत्यमरः। २। ४। ११८॥ द्योतस्वा ४। इति स्वामी॥
टोली, स्त्री, (पटोल+जातित्वात् ङीष्।) द्योतस्त्री। इति मेदिनी॥ (झिङ्गा इति भाषा॥ यथा, गारुडे १६८ अध्याये।
"पटोलीसुरसाभ्याञ्च वासकेन च नाशयेत्॥")
पट्टं, क्ली, (पट् गतौ+क्तः। नेट्।) नगरम्। इति शब्दरत्नावली॥
पट्टः, पुं, (पट्+क्तः। नेट्।) पेषणपाषाणः। शिल् इति भाषा॥ (यथा, रघुः। १८। १७।
"तस्याभवत् स्तनुरदारशीलः
शिलः शिलापट्टविशालवक्षाः॥")
वस्त्रादीनां वन्धनम्। पटी इति भाषा॥ चतुष्पथः। चौमाता रास्ता इति भाषा॥ राजादि-आसनान्तरम्। पाटा इति भाषा॥ (यथा, मार्कण्डेये। ३६। ८।
"तदाकात्य पुत्र! निष्कृष्य महत्तादङ्गुलीयकात्।
वाचयन्ते शासनं पट्टे लक्ष्याचरनिवेशितम्॥")
मेटः। इति मेदिनी॥ पिड़ि इति भाषा॥ फलकः। इति त्रिकाण्डशेषः॥ ढाल इति भाषा॥ उष्णीषादिः। इति स्वामी॥ पाग् इत्यादि भाषा॥ उत्तरीयादिः। इति भूमिः॥ रेशम पाटा इति भाषा॥ (यथा, भट्टिः। १०। ६०।
"गलितमिव सुवो विलोक्य रामं
धरणिधरस्तनशुक्लपट्टचीनम्॥")
कौशेयः। इति मुकुटः॥ पाट् रेशम् इति च भाषा। लोहितकौशेयशुक्लीयादि। इति भरतः॥ राज्ञा रेशमी पाग् इत्यादि भाषा॥ (नृपादीनां किरीटविशेषस्वरूपपट्टलक्षणं हरिवंशीयायां ४६ अध्याये उक्तम्। तद्यथा,—
'विस्तरतो निर्दिष्टं पट्टानां लक्षणं यदाचार्यैः।
तत् संक्षेपः क्रियते सर्वाव सकलार्थसम्पन्नः॥
पट्टः शुभदो राज्ञां मध्येऽष्टाङ्गुलानि विस्तीर्णः।
सप्तनरेन्द्रमहिष्याः षड्युवराजस्य निर्दिष्टः॥
पञ्चरङ्गलविस्तारः पट्टः सेनापतेर्भवति मध्ये।
ते च प्रसादपट्टाः पञ्च ते कीर्त्तिताः पट्टाः॥
सर्व्वे द्विगुणायामा मध्यादर्द्धेन पार्श्वविस्तीर्णाः।
सर्व्वे च शुद्धकाञ्चनविनिर्म्मिताः श्रेयसो दृष्ट्वै॥
पञ्चशिखो भूमिपतेस्त्रिशिखो युवराजपार्थिव-महिष्योः।
एकशिखः सैन्यपतेः प्रसादपट्टो विना शिखया॥
क्रियमाणं यदि पत्रं सुखेन विस्तारमेति पट्टस्य।
दृढिनयौ भूमिपतेस्तथा प्रजानाथ सुखसम्पत्॥
जीवितराज्यविनाशं करोति मध्ये व्रणः सनुत्पन्नः।
मध्ये स्फुटितस्याज्यो विप्रकरः पार्श्वयोः स्फुटितः॥
अशुभनिमित्तोत्पत्तौ शान्तिमादिशेद्राज्ञः।
शस्तनिमित्तः पट्टो नृपराष्ट्रविवृद्धये भवति॥")
पट्टकः, पुं, पट्ट एव स्वार्थे कन्। पट्टः॥
पट्टजं, क्ली, (पट्टात् कौशेयात् जायते इति। पट्ट+जन्+ड।) वस्त्रभेदः। पट्टवस्त्रम्। इति चटाधरः॥ (यथा, महाभारते। २। ५०। २३।
"कौर्सञ्च राङ्कवञ्चैव पट्टजं कीटजन्तथा।
कुटीसतं तथैवान्यत् कमलाभं सहस्रशः॥")
पट्टदेवी, स्त्री, (पट्टा सिंहासनार्हा देवी।) महादेवी। इति राजनिर्घण्टः॥ पाटराणी इति भाषा॥
पट्टनं, क्ली, (पटन्ति गच्छन्ति वणिजो यत्र। पट गतौ+वाहुलकात् तनन्।) पत्तनम्। इति द्विरूपकोषः॥
पट्टनी, स्त्री, (पट्टन+गौरादित्वात् ङीष्।) पत्तनम्। इति द्विरूपकोषः॥
पट्टरङ्गं, क्ली, (पट्टं वस्त्रं रज्यतेऽनेन। पट्ट+रञ्ज+घञ्।) पत्तरङ्गम्। इति राजनिर्घण्टः॥ वकम् इति भाषा॥
पट्टरञ्जनकं, क्ली, (पट्टानां वस्त्राणां रञ्जनम्। ततः कन्।) पत्तरङ्गम्। इति राजनिर्घण्टः॥
पट्टशाकं, क्ली पुं, (पट्टस्य पट्टवृक्षस्य शाकम्।) नालिताशाकम्। इति शब्दमाला भावप्रकाशश्च॥ अस्य गुणाः गाड़ीचशब्दे द्रष्टव्याः॥
पट्टार्हा, स्त्री, (पट्टे नृपासने अर्हा योग्या।) महादेवी। इति राजनिर्घण्टः॥ पाटराणी इति भाषा॥
पट्टिका, स्त्री, (पट्टिरिव कायति प्रकाशते इति। पट्टि+कै+कः। स्त्रियां टाप्।) पट्टिकाख्य-लोध्रः। इत्यमरटीकायां वाचस्पतिः॥ (चुदः पट्टः। वृत्तार्थे कन्। स्त्रियां टाप् इत्वञ्च। वितस्तिविस्तारं वस्त्रम्। इति चिन्तामणिः॥ पट्टः। पाटा इति भाषा। यथा, नैषधे। १। ८। ६१।
"सर्व्वं विलुप्तदेवात् स्तुति-
नुपसि गतां दोषवत् यो घसंज्ञां
प्राक् संस्कारेण सन्यूत्यपि धुवति
शिरः पट्टिकापाटनेन॥")
पट्टिकाख्यः, पुं, (पट्टिका आख्या यस्य।) रक्त-लोध्रः। पाटियालोध इति भाषा। तत्पर्य्यायः। क्रमुकः २ पट्टी ३ लाक्षाप्रसादनः ४। इत्यमरः। २। ४। ४१॥
पट्टिकालोध्रः, पुं, (पट्टिका एव लोध्रः।) रक्त-लोध्रः। पाटिया लोध इति भाषा। तत्पर्य्यायः। क्रमुकः २ वल्कलोध्रः ३ दृढत्वक्ः ४ जीर्णपुष्पः ५ दृढत्वल्कः ६ जीर्णपत्रः ७ व्यक्तिभेषजः ८ शावरः ९ श्वेतलोध्रः १० गालवः ११ दृढत्वचः १२ पट्टी १३ लाक्षाप्रसादः १४ वल्कः १५। इति राजनिर्घण्टः॥ स्थूलवल्कलः १६ जीर्णपत्रः १७ दृढत्पत्रः १८। इति भावप्रकाशः॥ लोध्रद्वय-गुणाः। कषायत्वम्। शीतत्वम्। वातकफास्र-विषनाशित्वम्। चक्षुष्यत्वम्। तत्र वल्कलोध्रको-विशिष्टः। इति राजनिर्घण्टः॥ ग्राहित्वम्। लघुत्वम्। पित्तरक्तकफातीसारशोथनाशित्वञ्च। इति भावप्रकाशः॥
पट्टिलः, पुं, (पट्टो विद्यतेऽस्य। पट्ट+अस्त्यर्थे इलच्।) पूतिकरञ्जः। इति शब्दरत्नावली॥
पट्टिलोध्रः, पुं, (पट्टिरेव लोध्रः।) पट्टिकालोध्रः। इति शब्दरत्नावली॥
पट्टिलोध्रकः, पुं, (पट्टिलोध्र+स्वार्थे कन्।) पट्टिका-लोध्रः। इति शब्दरत्नावली॥
पट्टिशः, पुं, (पट्+शतरी+वाहुलकात् टिशच्(स) च्।) अस्त्रविशेषः। यथा,—
"परशुः पट्टिशो नाम स एव च परश्वधः॥"
इत्यमरटीकायां भरतः॥
(यथा, भागवते। ८। १०। ३६।
"भुशुण्डिभिश्चक्रगदाऽर्ष्टिपट्टिशैः
शक्त्युल्मुकैः प्रासपरश्वधैरपि।
निस्त्रिंशभल्लैः परिघैः सशक्तिभिः
सभिन्दिपालैश्च शिरांसि चिच्छिदुः॥")
पट्टी, स्त्री, (पट्टि+वा ङीष्।) पट्टिकालोध्रः। इति राजनिर्घण्टः॥ ललाटभूषा। इति विश्वः॥ तलसारकम्। अश्ववक्षःस्थलवन्धनरज्जुः। इति शब्दमाला॥
पट्टी, [न्] पुं, (पट्टोऽस्यास्तीति। इनिः।) रक्त-लोध्रः। इति स्वामी॥ इत्यमरटीकायां भरतः॥
पट्टोलिका, स्त्री (पट्टं पट्टाख्यं उलति प्राप्नोतीति। उल गतौ+ण्वुल् टापि इत्वम्।) कुलप्रकीला। व्यवस्थापत्रं इति केचित्। पाट्टा। इति च केचित्। इति त्रिकाण्डशेषः॥
पठ, वाचि। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) पठति ओकं धीरः। इति दुर्गादासः॥
पठनं, क्ली, (पठ्+भावे ल्युट्।) वाचनम्। पड़न् इति भाषा। यथा, मार्कण्डेये। ६२। १८।
"भूतप्रेतपिशाचानां पठनादेव नाशनम्॥"
पटमञ्जरी, स्त्री, श्रीरागस्य चतुर्थरागिणी। तस्या न्यासांशग्रहाः षड्जः। गानसमयस्तु एकप्रहर-दिवसोत्तरम्। इति सङ्गीतदर्पणः॥ लक्षणं यथा, सङ्गीतदामोदरे।
"वियोगिनी कान्तवितीर्णपुष्पां
सजं वहन्ती वपुषातिसुभ्रूः।
आबास्यमाना प्रियया च सख्या
विभूषराङ्गी पटमञ्जरीयम्॥"
पटमञ्जरी, स्त्री, रागिणीविशेषः। इति हलायुधः॥

पठिः, स्त्री, (पठ्+"सर्व्वधातुभ्य इन्।" उणां। ४।११७। इति इन्।) पठनम्। पाठः। इति शब्दरत्नावली॥

पठितः, त्रि, (पठ्+क्त।) वाचितः। श्रुतपाठः। अधीतः। उच्चरितः। यथा, हास्यार्णवे।
"मया न पठिता चण्डी त्वया नापि चिकित्सितम्।
अकस्मान्नगरोपान्ते कथं धूमायते चिता॥"

पठितव्यं, त्रि, (पठ्+"तव्यत्तव्यानीयरः।" ३।१।९६। इति तव्य।) पठनीयम्। पाठ्यम्। यथा, मार्कण्डेये देवीमाहात्म्ये। ९२।६।
"तस्मान्ममैतन्माहात्म्यं पठितव्यं समाहितैः॥"

पड, इ क् संहतौ। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्। इदित्।) इ क्, पण्डयति। संहतौ राशीकरणम्। इति दुर्गादासः॥

पड, इ ड गत्याम्। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सकं-सेट्। इदित्।) इ, पण्डते। ड, पण्डते। इति दुर्गादासः॥

पण, ड व्यवहृतौ। स्तुतौ। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सकं-सेट्।) व्यवहृतौ व्यवहारे। ड, पण्यते। पणायति पणायते आयान्तत्वादुभयपदमिति बोपदेवः। प्राणानामपणिष्टासौ अत्र कर्म्मणि षष्ठी। स्तुतौ तु पणायति पणायते विष्णुं धीरः। अरे तु द्वयोरर्थयोरेव आयस्याप्राप्तिपक्षे आत्मनेपदमेव। अपणिष्ट पेणे पणिता पणिषीष्ट पणिष्यते अपणिष्यत। इति दुर्गादासः॥

पण्ः, पुं, (पण्यतेऽनेन। पण व्यवहारे+"नित्यं पणः परिमाणे।" ३।३।६६। इति अप्।) कार्षिकताम्रिकः। स तु पञ्चकृष्णलमाषकारब्धताम्रकर्षकृतव्यवहारद्रव्यम्। पूर्व्वं हि ताम्ररक्तिकायाः कपर्दक एको मूल्यमिति अग्नीतिवराटमूल्यः। लोके तूपचारात् कार्षापणवत् पणव्यपदेशो मूल्य एव। निर्व्वेशः। भृतिः। (पणो ग्लहोऽस्यस्मिन्। पण+"अर्च्च आदिभ्यो ऽच्।" ५।२।१२७। इत्यच्।) द्यूतम्। ग्लहः। आड् इति होड् इति वाजि इति च भाषा। (यथा, आर्य्यासप्तशती। ३५४।
"प्रतिभूः सुकृतो विपत्ते दण्डः शङ्कारसंकथा गुरुषु।
पुरुषायितं पणस्त्रद्वाले परिभावतां दायः॥"
पण्यते व्यवह्रियते इति। "पुंसि संज्ञायां घः प्रायेण।" ३।३।११८। इति घः।) मूल्यम्। धनम्। इत्यमरभरतौ॥ कार्षापणः। (यथा, मनुः। ८।२२४।
"यस्तु दोषवतीं कन्यामनाख्याय प्रयच्छति।
तस्य कुर्य्यान्नृपो दण्डं स्वयं षण्णवतिं पणान्॥")
क्रयग्राकाङ्क्षिका। व्यवहारः। इति मेदिनी॥ विंशतिगण्डकः। इति हेमचन्द्रः॥ गौण्डिकः। इति जटाधरः॥ गृहम्। इति शब्दमाला॥ (पण्यते अधिकारिभेदेन सुखभोगादिकं व्यवहरति साधकस्य सुकृत्यनुसारेण वैकुण्ठवासादिफलं प्रददातीत्यर्थः। पचाद्यच्। यद्वा, पण्यते स्तूयते यः। अय स्तुतौ "पुंसीति संज्ञायां घः प्रायेण।" ३।३।११८। इति घः। विष्णुः। यथा, महाभारते। १३।१४६।११५।
"ऊर्द्धगः सत्पथाचारः प्राग्वदः प्रणवः पणः॥")

पणग्रन्थिः, पुं, (पणस्य विक्रयादेर्ग्रन्थिर्यत्र।) द्यूतः। इति शब्दरत्नावली॥

पणनं, क्ली, (पण व्यवहारे+भावे ल्युट्।) विक्रयः। इति शब्दरत्नावली॥

पणफरं, क्ली, लग्नात् द्वितीयपञ्चमाष्टमैकादशलग्नम्। यथा, ज्योतिस्तत्त्वे।
"पणफरं द्वितीयाष्टपञ्चमैकादशं विदुः॥"

पणवः, पुं, (पणं स्तुतिं वातीति। पण+वा+कः।) गायनपटहः। (यथा, गीतायाम्। १।१३।
"ततः शङ्खाश्च भेर्य्यश्च पणवानकगोमुखाः।
सहसैवाभ्यहन्यन्त स शब्दस्तुमुलोऽभवत्॥")
प्रणव इति केचित्। इत्यमरभरतौ॥

पणवा, स्त्री, (पणव+टाप्।) पणवः। यथा,—
"पणवः पणवा च स्यात् प्रणवोऽप्यत्र वर्णते॥"
इति भरतद्विरूपकोषः॥

पणसः, पुं, (पणायते इति। पण+"अत्यविचमीति।" उणां। ३।११७। इति असच्।) पण्यद्रव्यम्। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

पणाङ्गना, स्त्री, (पणेन धनेन लभ्या अङ्गना। धनेन वश्यत्वात् तथात्वम्।) वेश्या। इति हेमचन्द्रः॥

पणाया, स्त्री, (पणायते व्यवह्रियते इति। पण व्यवहारे स्तुतौ च+स्वार्थे आय+ततो भावे अप्। ततष्टाप्।) क्रयविक्रयव्यवहारः। इति जटाधरः॥ (स्तुतिः। द्यूतम्। इति धात्वर्थलब्धोऽर्थः॥)

पणायितः, त्रि, (पणायते स्म इति। पण व्यवहारे स्तुतौ च। "आयादय आर्द्धधातुके वा।" ३।१।३१। इति स्वार्थे आयस्ततः क्तः।) स्तुतः। इत्यमरः। ३।२।१०६॥ (व्यवह्रतम्। क्रीतम्। विक्रीतम्। इति धात्वर्थलब्धोऽर्थः॥)

पणास्थि, क्ली, (पणस्य पणाय वा यदस्थि।) कपर्दकम्। वराटकः। इति चिकाण्डशेषः॥

पणास्थिकं, क्ली, (पणास्थि+स्वार्थे कन्।) वराटकः। इति हेमचन्द्रः॥

पणितं, त्रि, (पण्यते स्म इति। पण+क्त। अयाभावपक्षे सिद्धम्।) स्तुतम्। इत्यमरः।३।२।१०६॥ व्यवह्रतम्। इति पणधात्वर्थदर्शनात्॥ (ग्लहे, क्ली। वाजि इति भाषा। यथा, महाभारते १। सौपर्णे। २२।४।
"ततस्ते पणितं कृत्वा भगिन्यौ द्विजसत्तम!।
जग्मतुः परया प्रीत्या परं पारं महोदधेः॥")

पणितव्यं, त्रि, (पण्यते इति। पण ड व्यवहारे स्तुतौ च। "तव्यत्तव्यानीयरः।" ३।१।९६। इति तव्य।) विक्रेयद्रव्यम्। इत्यमरः। २।९।८२॥ स्तोतव्यम्। व्यवहार्य्यम्। इति पणधात्वर्थदर्शनात्॥

पण्डः, पुं, (पण्डते निष्फलत्वं प्राप्नोतीति। पण्ड्+गतौ+पचाद्यच्। यद्वा पण ड व्यवहारे। "अमन्मात् डः।" उणां। १।११३। इति डः।) क्लीवम्। नपुंसकम्। इत्यमरः। २।६।३६॥ निष्फले, त्रि, ॥

पण्डा, स्त्री, (पण ड व्यवहारे। "अमन्मात् डः।" उणां। १।११३। इति डः। ततष्टाप्।) बुद्धिः। इति मेदिनी॥ तत्त्वानुगा बुद्धिः। इति हेमचन्द्रः॥

पण्डापूर्व्वं, क्ली, (पण्डं निष्फलं अपूर्व्वं अदृष्टम्।) फलाजनकादृष्टम्। तद्विशिष्टे त्रि। यथा, "यद्यपि पण्डापूर्व्वं फलमिति तदपि न कामनाभावे अकरणापत्तेस्तौल्यात्।" इति सिद्धान्तमुक्तावली॥

पण्डितः, पुं, (पण्डा वेदोक्त्वला तत्त्वविषयिणी वा बुद्धिः। सा जाता अस्य। "तदस्य संजातं तारकादिभ्य इतच्।" ५।२।३६। इति इतच्। यद्वा, पण्डते तत्त्वज्ञानं प्राप्यतेऽनात्। गत्यर्थेति क्तः।) शास्त्रज्ञः। अस्य लक्षणं यथा,—
("निषेवते प्रशस्तानि निन्दितानि न सेवते।
अ-नास्तिकः श्रद्दधान एतत् पण्डितलक्षणम्॥"
इति चिन्तामणिः॥)
"पठकाः पाठकाश्चैव ये चान्ये शास्त्रचिन्तकाः।
सर्व्वे व्यसनिनो मूर्खा यः क्रियावान् स पण्डितः॥"
इति महाभारते वनपर्व्व॥
अपि च श्रीभगवद्गीतायाम्। ५।१७।
"विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि।
शुनि चैव श्वपाके च पण्डिताः समदर्शिनः॥"
तत्पर्य्यायः। विद्वान् २ विपश्चित्३ दीधक्षः४ सनुः५ सुधीः६ कोविदः७ बुधः८ धीरः९ मनीषी१० क्षः११ प्राज्ञः१२ संख्यावान्१३ कविः१४ धीमान्१५ सूरिः१६ क्षती१७ क्षत्रिः१८ लब्धवर्णः१९ विचक्षणः२० दूरदर्शी२१ दीर्घदर्शी२२। इत्यमरः। २।७।५-६॥ विप्रारदः२३। कवी२४ सूरी२५। इति भरतः॥ विदग्धः२६ दूरदृक्२७ वेदी२८ दृङ्ः२९ बुधः३० विधानगः३१ प्रज्ञिलः३२ क्षत्रिः३३। इति शब्दरत्नावली॥ विज्ञः३४ मेधावी३५। इति राजनिर्घण्टः॥ सिद्धकः। इति मेदिनी॥ (सर्व्वज्ञत्वात् महादेवः। यथा, महाभारते। १३।१७।१२४।
"न्यायनिर्व्वपणः पादः पण्डितो ह्यचलोपमः॥")

पण्डितम्मन्यः, त्रि, (आत्मानं पण्डितमन्यते यः सः। "आत्ममाने खश्च।" ३।२।८३। इति खश्।) पण्डिताभिमानी। इति व्याकरणम्॥

पण्डितमानी, [न्] त्रि, (आत्मानं पण्डितं मन्यते इति। मन+इनिः।) पण्डिताभिमानी। यथा "मूर्खाः पण्डितमानिनः।" इति प्राचीनाः॥

पण्यं, त्रि, (पण्यते इति। पण ड व्यवहारे स्तुतौ च। "अवद्यपण्यवर्य्यागर्ह्यैति।" ३।१।१०१। निपातनात् साधु।) पणितव्यम्। विक्रेयद्रव्यम्। इत्यमरः। २।९।८२। (यथा, हेः रामायणे। २।४८।४।
"न चाच्छिद्यन् गवामोघा वणिजो न प्रसार्य्यन्।

न चाग्नीमन्त पण्यानि नापचन् गृहमेधिनः ॥") व्यवहार्यम्। क्रीतव्यम्। इति पणव्यावर्धदर्शनात् ॥ (क्ली, पण्यते व्यवह्रियतेऽत्र। पण्+यत्। विपणिः। यथा, मनुः। ५। १२६।
"नित्यं शुद्धः कारुहस्तः पण्ये यच्च प्रसारितम् ॥"
"पण्ये पण्यवीथिकायाम्।" इति कुल्लूकभट्टः ॥)

पण्यवीथिका, स्त्री, (पण्यानां विक्रेयद्रव्याणां वीथिका गृहम्।) विपणिः। इत्यमरः। २।२।२॥
पण्यविक्रयशाला। इति हलायुधः ॥ हट्टः। इत्यन्ये ॥ विक्रयार्थप्रसारितनानाद्रव्याणां वणिग्वीथी। वाणियाविही इति बाजार इति च ख्यातः। इति केचित्। हट्टमध्यः। इति केचित्। हट्टमध्यस्थपण्यविक्रयवीथी। इति केचित्। इति तट्टीकायां भरतः ॥
"आपणः पण्यवीथी च द्वयं वीथीति संज्ञितम्॥"
इति शाश्वतः ॥

पण्यवीथी, स्त्री, (पण्यानां वीथी विक्रयगृहम्।) क्रयविक्रयस्थानम्। इति शब्दमाला ॥
पण्यशाला, स्त्री, (पण्यानां विक्रेयद्रव्याणां शाला गृहम्।) हट्टः। इति हेमचन्द्रः ॥ विक्रयगृहञ्च ॥
पण्यस्त्री, स्त्री, (पण्या मूल्येन लभ्या या स्त्री। यद्वा पण्ये हट्टादिस्थले स्थिता स्त्री।) वेश्या। इति कोषान्तरम् ॥
पण्या, स्त्री, (पण्यते स्तूयते रोगहन्तृत्वात्। पण ड व्यवहारे स्तुतौ च+कर्म्मणि यत् ततष्टाप्।) पिण्या। इति द्विरूपकोषः ॥
पण्याङ्गना, स्त्री, (पण्या पण्येन मूल्येन लभ्या या अङ्गना।) वेश्या। इति हेमचन्द्रः ॥
पण्याजीवः, पुं, (पण्यैः क्रयविक्रयद्रव्यैराजीवति प्राणिति। आ+जीव+कः।) क्रयविक्रयिकः। वणिक्। इत्यमरः। २। ६। ७८ ॥
पण्याजीवकं, क्ली, (पण्यैः क्रयविक्रयद्रव्यैराजीवतितिष्ठतीति। पण्याजीवस्ततः स्वार्थे कन्। अभिधानात् क्लीवत्वम्। यद्वा, पण्याजीवैर्वणिग्भिः कायति शब्दायते इति। कै+कः।) हट्टः। इति त्रिकाण्डशेषः ॥ पण्यजीवकमित्यपि पाठः ॥
पण्यान्वा, स्त्री, (पण्यं अन्वयति स्वगुणेन या। अन्व+अच्।) द्रव्यविशेषः। तत्पर्य्यायः। कट्फलीपत्रा २ पण्यधा ३ पण्या ४। अस्या गुणाः। समवीर्यत्वम्। तिक्तत्वम्। चारत्वम्। चारकत्वम्। ततःकालशूलघातव्रणसंरोपणत्वञ्च।
"दीर्घा मध्या तथा ह्रस्वा पण्यान्वा त्रिविधा स्मृता।
रसवीर्य्यविपाकेषु मध्यमा गुणदायिका ॥"
इति राजनिर्घण्टः ॥
पण्यन्वा इत्यपि पाठः ॥

पत् [द्] पुं, (पद्यते गच्छत्यनेन। पदौ ङ गतौ+करणे क्विप्।) पादः। इत्यमरः। २।६।७१॥ (यथा, मनुः। ४। २०७।
"मत्तक्षुद्वातुरायाञ्च न शङ्कीत कदाचन।
केशकीटावपन्नञ्च पक्षसृक्च कामतः ॥"
केचित्तु पादशब्दस्य पद् इत्यादेशो भवतीति वदन्ति। अन्यैस्तत् न मन्यन्ते अतः "पदादयः पृथक्शब्दा इत्येके।" इति सुग्धबोधे बोपदेवेनोक्तम् ॥)

पत, ल ज गतौ। ऐश्वर्य्ये। इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट्।) ल, अपतत्। च, पातः। पतः। गतिरिह पतनम्। पतति पत्रं वृक्षात्। इति दुर्गादासः ॥

पत, तृ क गतौ। ऐश्वर्य्ये। इति कविकल्पद्रुमः ॥ (अदन्तचुरां-परं-अकं-सेट्।) ऐश्वर्य्यमिश्वरीभावः। गतिरिह पतनम्। पतयति पत्रं वृक्षात्। इति दुर्गादासः ॥

पत, य ड ऐश्वर्य्ये। इति कविकल्पद्रुमः ॥ (दिवां-आत्मं-अकं-सेट्।) य ड, पत्यते। ऐश्वर्य्यमैश्वर्य्यमिश्वरीभावः। इति दुर्गादासः ॥

पतं, क्लि, (पततीति। पत्+अच्।) पुष्पम्। इति जटाधरः ॥ (पतनकर्त्तरि च, त्रि ॥)

पतगः, पुं, (पत उत्पतितः सन् गच्छति। यद्वा पतेन पक्षेण गच्छतीति। गम्+डः।) पक्षी। इत्यमरः। २। ५। ३३ ॥ (यथा, मनुः। ७।२३।
"देवदानवगन्धर्व्वा रक्षांसि पतगोरगाः।
तेऽपि भोगाय कल्पन्ते दण्डेनैव निपीड़िताः ॥")

पतङ्गं, क्ली, (पत् ल गत्यैश्वर्य्ययोः। बाहुलकात् अङ्गच्।) सुतम्। पारदम्। इति मेदिनी ॥ चन्दनभेदः। इति शब्दचन्द्रिका ॥

पतङ्गः, पुं, (पतति गच्छतीति। "पतेरङ्गच् पच्चिगि।" उणां। १। ११८। इति अङ्गच्।) पक्षी। (यथा, मार्कण्डेये। १०। ८६।
"ततः सर्व्वेषु निस्तीर्णेषु पापी तिर्य्यक्त्वमेत्युत।
कृमिकीटपतङ्गेषु स्थावरे मशकादिषु ॥")
सूर्य्यः। (यथा, माघे। १। १२।
"पतत्पतङ्गप्रतिमस्तपोनिधिः
पुरोऽस्य यावन्न भुवि बलीयते ॥"
"कथं पतङ्गः सूर्य्यः। खगत्वसामान्योपचारात्।
'पतङ्गः शलभे सूर्य्ये पतङ्गः पक्षिणि स्मृतः ॥'
इति कोषान्तरम्॥" इत्युज्ज्वलदत्तः ॥)
शलभः। इत्यमरः। ३। ३। २०॥ शालिप्रभेदः। इति मेदिनी ॥ जलमधूकवृक्षः। इति राजनिर्घण्टः ॥

पतङ्गमः, पुं, (पत उत्पतितः सन् गच्छतीति। गम्+खच्। मुम् च।) पक्षी। इति व्याकरणम् ॥ (शलभः। यथा, भागवते। ७। ८।२४।
"अलक्षितोऽग्नौ पतितः पतङ्गमो
यथा तृषिं हौजसि सोऽसुरस्तदा ॥")

पतङ्गिका, स्त्री, (पतङ्ग+स्वार्थे संज्ञायां वा कन्। स्त्रियां टाप् अत इत्वञ्च।) मधुमक्षिकाविशेषः। तत्पर्य्यायः। पुत्तिका २। इत्यमरः। २। ५। २७॥ (यथा, महाभारते। १। १०८। १०।
"पतङ्गिकानां पुच्छेषु त्वयेयीका प्रवेशिता।
कर्म्मणस्तस्य ते प्राप्तं फलमेतत्तपोधन! ॥")

पतञ्जिका, स्त्री, (पतमभिगतं शत्रुमित्यर्थः। निकृणति पीड़यति खारोपितशरैरेति यावत्। पृषोदरात् साधुः।) धनुर्य्या। इति शब्दरत्नावली ॥

पतञ्जलिः, पुं, (पतः पतन् वा अञ्जलिः नमस्कार्य्यतया यस्मिन्। शकन्ध्वादित्वात् साधुः।) मुनिविशेषः। स तु पातञ्जलदर्शनमाख्यनिटीकामहाभाष्यादिग्रन्थकर्त्ता। तत्पर्य्यायः। गोनर्दीयः २। इति हेमचन्द्रः ॥ चूर्णिकृत् ३ भाष्यकारः ४। इति त्रिकाण्डशेषः ॥ वररुचिः ५। इति शब्दरत्नावली ॥ (केषाञ्चिन्मते योगसूत्रकारकपतञ्जलेर्भाष्यकृत् पतञ्जलिर्भिन्न एव। अनयोरभेदतान्तु निर्द्दिशन्ति प्राच्याचार्य्याः ॥ पातञ्जलयोगशास्त्रन्तु पादचतुष्टयात्मकं तत्र प्रथमे पादे "अथ योगानुशासनम्।" इति योगशास्त्रारम्भप्रतिज्ञां विधाय "योगश्चित्तवृत्तिनिरोधः।" इत्यादिना योगलक्षणमुक्त्वा सप्रपञ्चसमाधिनिर्द्देशं कृतवान् भगवान् पतञ्जलिः। द्वितीये तु "तपः स्वाध्यायेश्वरप्रणिधानानि क्रियायोगः।" इत्यादिना व्युत्थितचित्तस्य क्रियायोगं यमादीनि पञ्च बहिरङ्गाणि साधनानि च निरदिशत्। तृतीये "देशबन्धश्चित्तस्य धारणा।" इत्यादिना धारणाध्यानसमाधित्रयरूपमन्तरङ्गं संयमपदवाच्यं तत्र अवान्तरफलं विभूतिजातञ्च उपदिदेश। चतुर्थे पादे तु "जन्मौषधिमन्त्रतपः समाधिजाः सिद्धयः।" इत्यादिना सप्तविधमप्यकं सुखं प्रयोजनं कैवल्यं प्रधानादीनि पञ्चविंशतितत्त्वानि क्लेशकर्म्मविपाकाशयैरसंश्लिष्टं पुरुषं स्वेच्छया निर्म्माणकायमधिष्ठाय लौकिकादिसम्प्रदायप्रवर्त्तकं संसारदहने दग्धानां जीवानां निस्तारकञ्च उपदिष्टवान् ॥).

पतत्रं, क्ली, (पतन्तं त्रायते इति। पतत्+त्रै+कः।) पक्षः। पाखा इति भाषा। इत्यमरः। २। ५। ३६। (यथा, भागवते। ८। ११। ३४।
"येन मे पूर्व्वमद्रीणां पक्षच्छेदः प्रजात्यये।
कृतो निविशतां भारैः पतत्रैः पततां भुवि ॥"
(त्रं) पत ल गतौ। "अमिनक्षियजिवधिपतिभ्योऽत्रन्।" उणां। ३। १०५। इति अत्रन्। वाहनम्। इत्युज्ज्वलदत्तः ॥)

पतत्री, [न्] पुं, (पतत्रं पक्षो विद्यतेऽस्य। पतत्र+इनिः।) पक्षी। इत्यमरः। २। ५। ३३॥ (यथा, कुमारे। ५। ४।
"पदं सहेत भ्रमरस्य पेलवं
शिरीषपुष्पं न पुनः पतत्रिणः ॥")

पतत्रिः, पुं, (पतति उत्पततीति। "पतेरत्रिन्।" उणां। ४। ६६। इति अत्रिन्।) पक्षी। इत्यमरः। २। ५। ३३ ॥

पतद्ग्रहः, पुं, (पतत् सुखादिभ्यः स्खलत् जलादि गृह्णातीति। पतत्+ग्रह्+अच्।) प्रतिग्राहः। इत्यमरः। २। ३। १३६ ॥ पिण्दानी इति भाषा ॥

पतङ्गीरः, पुं, (पतन् पक्षी भीरुर्यस्मात्।) श्येनः। इति शब्दरत्नावली ॥

पतन् [त्] पुं, (पततीति। पत्+शतृ।) पक्षी। (यथा, महाभारते। २। ३८। २८।
"नक्षत्राणां सुखं चन्द्र आदित्यस्त्वेचसां सुखम्

पर्व्वतानां सुखं मेरुर्गोरुड़: पततां सुखम् ॥") पतनशीले त्रि। इति मेदिनी ॥

पतनं, क्ली, (पत्+भावे ल्युट्।) पात:। पड़न् इति भाषा। यथा,— [इ:सहन् ॥"

"अग्ने: पतने न वेदना पतनज्ञानमतीव इत्युद्भट: ॥

"द्विजातिकर्म्मभ्यो हानि: पतनं परत्र चासिद्धिस्तमेके नरकम्।" इति हारीतसूत्रम् ॥ पापम्। यथा, प्रायश्चित्तविवेके।

"विहितस्याननुष्ठानान्निन्दितस्य च सेवनात्। अनिग्रहाच्चेन्द्रियाणां नर: पतनमृच्छति ॥"

पतम:, पुं, (पतति कर्म्मचये यस्मात्। पत्+अम। स्त्रीणपुण्यानां चन्द्रलोकात् पतनं ग्राह्ये प्रसिद्धम्।) चन्द्र:। (पततीति। पत्+अम।) पक्षी। पतङ्ग:। इति संक्षिप्तसारोणादिवृत्ति: ॥

पतयालु:, त्रि, (पत्+"सृहृपतिदयीति।" उ।२।१५८। इति आलच्।) पतनशील:। तत्पर्य्याय: । पातुक: २। इत्यमर: ।३।२।२७ ॥

पतस:, पुं, (पततीति। "अत्यविच्यमीति।" उणा ३।११७। इति असच्।) पक्षी। इत्युणादिवृत्ति: ॥ चन्द्र:। पतङ्ग:। इति संक्षिप्तसारोणादिवृत्ति: ॥

पताका, स्त्री, पत्यते ज्ञायते कस्यचित् भेदोऽनया। (पत्+"वलाकादयश्च।" उणा ४।१४। इति आक प्रत्ययेन साधु:।) ध्वजम्। निशान् इति भाषा। (यथा, महाभारते ।६।१७।१५।

"श्वेतैरश्वै: पताकाभिर्ध्वजवारणवाजिभि:। तान्यनीकान्यशोभन्त राजन्नृषभदातिभि: ॥") तत्पर्य्याय:। वैजयन्ती २ केतनम् ३ ध्वजम् ४। इत्यमर: ।२।८।६६ ॥ पटाका ५ जयन्ती ६ वैजयन्तिका ७ कदली ८ कन्दुली ९ केतु: १० कदलिका ११ व्योममण्डलम् १२। इति शब्दरत्नावली ॥ चिह्नम् १३। इति जटाधर: ॥ केतनं ध्वजं एतद्वयं पताकादण्डे। इति भरत: ॥ सौभाग्यम्। नाटकाङ्गम्। इति मेदिनी ॥ (यथा, साहित्यदर्पणे। ६। २७।

"पताकास्थानकं योज्यं सुविचार्य्यैव वस्तुनि ॥" इह नाट्टे ॥ तल्लक्षणं यथा तत्रैव। ६। २८।

"यत्रार्थे चिन्तितेऽन्यस्मिंस्तल्लिङ्गोऽन्य: प्रयुज्यते। आगन्तुकेन भावेन पताकास्थानकन्तु तत् ॥" तद्भेदानाह तत्रैव। ६। २९—३२।

"सहसैवार्थसम्पत्तिर्गुणवत्त्वप्रचारत:। पताकास्थानकमिदं प्रथमं परिकीर्त्तितम् ॥ यथा, रत्नावल्यां 'वासवदत्तेयमिति' राजा यदा तत्कण्ठमाशं मोचयति तदा तद्दृष्ट्वा 'सागरिकेयमिति' प्रत्यभिज्ञाय 'कथं प्रिया मे सागरिका चलमलमतिमात्रम्' इत्यादि फलरूपार्थसम्पत्ति: पूर्व्वापेक्षया उपचारातिशयात् गुणवती उत्कृष्टा।१।

वच: सातिशयश्लिष्टं नानावस्त्वसमाश्रयम्। पताकास्थानकमिदं द्वितीयं परिकीर्त्तितम् ॥ यथा, वेणीसंहारे छत्रधार:।

'रक्तप्रसादितसव: क्षतविग्रहाश्च स्वस्था भवन्तु कुरुराजसुता: सभृत्या:।'

अत्र रक्तादीनां रुधिरशरीरार्थहेतुकश्लेषवशेन बीजार्थप्रतिपादनात् नेष्टमङ्गलप्रतिपत्तौ सत्यां द्वितीयं पताकास्थानम्। २।

अर्थोपक्षेपकं यत्तु लीनं सविनयं भवेत्। श्लिष्टप्रत्युत्तरोपेतं तृतीयमिदमुच्यते ॥

लीनं अप्रकाशं श्लिष्टेन तत्तत्प्रयोगयोग्येनाभिप्रायान्तरप्रयुक्तेन प्रत्युत्तरेणोपेतं सविनयं विश्लेषनिश्चयप्राप्त्या सहितं सम्पद्यते यत् तत् तृतीयं पताकास्थानम्। यथा, वेणीसंहारे २ अङ्के। कञ्चुकी। 'देव! भग्नं भग्नम्।' राजा। 'केन।' कञ्चुकी। 'भीमेन।' राजा। 'कस्य।' कञ्चुकी। 'भवत:।' राजा। 'आ:! किं प्रलपसि?' कञ्चुकी। (सभयम्) 'देव! ननु ब्रवीमि। भग्नं भीमेन भवत:।' राजा। 'धिक् वृद्धापसद! कोऽयमद्य ते व्यामोह:।' कञ्चुकी। 'देव! न व्यामोह: सत्यमेव। भग्नं भीमेन भवतो मरुता रथकेतनम्। पतितं किङ्किणीकाणवद्वाक्रन्दमिवत्यितौ ॥'


अत्र दुर्य्योधनोरुभङ्गरूपप्रस्तुतसङ्क्रान्तमर्थोपक्षेपणम्। ३।

द्व्यर्थो वचनविन्यास: सुश्लिष्ट: काव्ययोजित:। प्रधानार्थान्तरापेक्षी पताकास्थानकं परम्॥"४॥) अङ्क:। केतु:। इति हेमचन्द्र: ॥ अस्य विवरणं ध्वजशब्दे द्रष्टव्यम् ॥

पताकी, [न्] त्रि, (पताका विद्यतेऽस्य। पताका+इनि:।) वैजयन्तिक:। पताकाधारी। इत्यमर:। २। ८। ७१ ॥ (यथा, महाभारते। ६। १७। २०।

"स तु गोवासन: शैव्य: सहित: सर्व्वराजभि:। ययौ मातङ्गराजेन राजार्हेण पताकिना ॥") रिष्टारिष्टबोधकचक्रविशेष:। तस्य लिखनक्रमो यथा,—

"तिर्य्यग्रूर्द्धगता रेखास्तिस्रो देया: पताकया। युता: कार्य्या वेधविदा सर्व्वसङ्गतरेखया ॥ दक्षस्योत्तररेखातो वामं मेषाद्यराशय:। पञ्चाश्वयुग्मविंशाच्च शून्यदृग्नेत्राग्निसागरा:। कर्कटान्मीनपर्य्यन्तमङ्का देया यथाक्रमम् ॥



बालस्य जन्मकालीनयहलग्नसमादिश। विन्यस्य चिन्तयेत् प्राज्ञ: शुभाशुभं यथाग्रहात्॥"

तत्र शुभाशुभज्ञानं यथा,—

"शुभदण्डयोगवेधैर्बलाबलस्य शोभनम्। पापदण्डयोगवेधैराप्यङ्गान्निष्टिकालवित्। बले धिष्ण्ये दिनं मध्ये मासो हीने च क्षयणम्॥"

वेधज्ञानं यथा,—

"कर्कोमीनधनुर्भ्यांच हरे: कीटघटेन च। स्त्रियास्तौलिन्दगाभ्यांच घटे मीनेन कन्यया ॥ धनुषो मृगकर्किभ्यां मकरे धनुषा स्त्रिया। मीने कर्कितुलाभ्यांच मीनस्त्रीधनुषात्वचे ॥ तुलाकर्किन्दृगैर्द्वन्द्वे कीटकुम्भहरेषु च। सिंहवृश्चे रतेषु वामदक्षिणसंमुखे: ॥ राहुकेत्वर्कसौरारे: पापैर्विद्धो युतोऽशुभ:। तदन्यैर्युतविद्धस्तु लग्नराशि: शुभप्रद: ॥"

रिष्टिकालो यथा,—

"एकोनविंशति: कर्के सिंहे सप्तदशैव तु। षट्त्रिंशद्बलायाश्च षड्विंशतिस्तुलाधरे ॥ वृश्चिके सिंहवज्ज्ञेयमूनत्रिंशच्छरासने। षड्विंशं मकरे ज्ञेयं कुम्भे सप्तदश स्मृता: ॥ नव युग्मे तथा मीने मेषे षड्दशभिस्तथा। वृषभे च तथा सिंहे युग्मेऽक्षहरलोचने ॥ चित्रयाङ्कादियं संख्या दिनमासाब्दनिर्णये। एकाङ्काद्विगुणाङ्काद्वा क्वचिद्विद्वैश्च सम्भव: ॥"

अथ यामार्द्धाधिपज्ञानम्।

"वारेशाद्दर्शयामेषु राज्यर्क्षो: षष्ठषट् क्रमात्। अधिपा: सूर्य्यहारुच यथाकांर्हे भवन्ति ते। रवीज्येन्दुभृगुक्षाजभूनिशरवयो निशि ॥ रविशुक्रशरात्रीशभूनीज्यकुजभास्करा:। दिने ऊह्या: परेष्वेवं तत्राध्यक्षाश्चतुर्यहा:॥"

अथ दण्डाधिपज्ञानम्।

"यामदण्डे भवेद्विघ्नि: शुभदण्डे शुभं भवेत्। शुभग्रहस्य दण्डे तु कर्म्मारम्भाक्षुभं भवेत् ॥ यस्यार्द्धयामस्तस्यैव प्राग्दण्ड: सर्व्वदा तत:। षट् षट् परीत्य दण्डाश्च त्रयो रात्रौ सता यथा ॥ आदित्येभृगुजो बुधोऽपि च शुक्रो शनौ सोमेऽनौज्यो भौमेऽर्क: सितसोमजौ च शुक्रिजे सोम: शनिर्व्वाक्पति:। जीवेऽङ्गारकरवी भृगुश्च गुरुते सौम्येन्दुमार्गद्यजा: काले जीवमहीजतिग्मकिरणा रात्रौ च दण्डाधिपा: ॥

यामार्द्धाधिपसंख्यातो द्वितीयस्तु तदर्द्धक:। तदर्द्धात्तु तृतीय: स्यात्तदर्द्धात्तु तुरीयक: ॥ अङ्काभावे तु राहु: स्यात् तदङ्को वसुसंज्ञक:। भयाङ्कस्य परित्यागाद्दिवादण्डाधिपा यथा ॥

रविदनुजबुधस्त्रीश्वरक्षरासुरज्ञा: क्षजरविदनुजज्ञाश्चेन्दुरक्षासुराश्च। गुरुशुक्रशिरविदैत्या: शुक्रभौमार्कदैत्या: शनिक्षजरविदैत्या दण्डपास्त्वर्द्धयामे ॥"

शुभाशुभदण्डज्ञानं यथा,—

"शेषावर्कस्य दण्डा सततशुभकरावादधर्वो तथेन्दो: शेषो दक्ष: क्षजस्याप्यथ गुरुबुधयोरादमर्द्धं प्रशस्तम्। आदिर्दण्डस्त्रयेको भृगुकुजतृपते: सर्व्वकार्य्येषु शस्तो दण्डाश्चत्वार एते क्वचिदपि समये नैव शौरे: प्रशस्ता: ॥"

पतव्रतायाः यथा,—
"प्रतिदत्तं पतत्रीणां छाया वार्यं पतिच्छदम् ॥
दर्शी च वेला वसवः सुधांशौ
सूते च वामाः प्रभिदे तथाङ्काः ।
प्रजाहरादिषु च दृष्टपातो त्या-
साधौ तृजन्ता अगुणे च कक्षाः ॥"
बालस्य शुभाशुभफलं यथा,—
"व्यशुभे दशमांशेऽपि सर्वेषां पुण्यवर्धिनी ।
बालस्य मरणं द्यौर्घं यदि पापैः समन्वितम् ॥
व्यशुभग्रहदृष्टे तु सर्वेषां पापवर्धिनी ।
बालस्य कृष्णां सर्वां शुभैर्यदि समन्वितम् ॥
व्यशुभो दशमांशो हि किञ्चैवेह लभ्यते ।
मरणं तत्र बालस्य जानीया भवेत् ॥
पापस्य दृष्टमात्रे तु सद्योऽनर्थविवर्धिनी ।
बालस्य कृष्णां तत्र शुभैर्यदि समन्वितम् ॥"
इति ज्योतिषतत्त्वे पतत्रीविधिः ॥
(क्षिप्या द्यौप् । सेना । यथा, रघुः । ४ । ८८ ।
"न धनुर्भिर्न कवचैर्नाधारावपदुर्दिनम् ।
रथवर्त्मरजोऽप्यस्य जगत्र पतत्रिणीम् ॥")

पतिः, पुं, (पाति रक्षतीति । पा + रक्षणे + इतिः ।) ब्रह्मम् । शनिः । इति विश्वः ॥ पाणिग्रहीता । भास्करः इति भाषा । तत्पर्य्यायः । धवः २ प्रियः ३ भर्त्ता ४ । अत्यमरः । २ । ६ । ३५ ॥ कान्तः ५ प्राणनाथः ६ गुरुः ७ दृष्टदेवः ८ जीवितेशः ९ भागधेयः १० सुखोत्सुकः ११ सर्वसहः १२ दृष्टगुरुः १३ स्वामी १४ रमणः १५ । इति शब्दरत्नावली ॥ वरः १६ परिणेता १७ गृही १८ । इति राजनिर्घण्टः ॥ तस्य लक्षणम् । विधिवत्पाणिग्राहकः । व्यतुकूलदक्षिणा-ष्टप्राप्तभेदात् पतिस्तुर्धा । सर्वकालिकफला-ज्ञानपरोक्षसुखले सति सर्वकालमनुरक्तोऽनु-कूलः । १ । सकलनायिकाविषयसमभावदक्षानु-रागो दक्षिणः । २ । भूयो निःप्राङ्कः क्षतदोषोऽपि भूयः प्रत्ययपरायणो धृष्टः । ३ । कामिनीविषयकपटपटुः शठः । ४ । इति रसमञ्जरी ॥ * ॥ पतिसेवादिफलं यथा,—
"कथं मे सुव्रते ! साध्वि ! निर्दयः क्षतलक्षया ।
यथैं त्यक्त्वा सदा या भर्तुरुपपत्तिकामिनी ॥
सपत्नीजनसम्पर्के यां दानादिकया यजु ।
भर्तुरप्रियकारिण्याः सर्वं भवति निष्फलम् ॥
यया प्रियः पूजितश्च श्रीकृष्णः पूजितस्तया ।
पतिव्रतावतार्थेन पतिरूपी हरिः स्वयम् ॥
सर्वदानं सर्वयज्ञः सर्वतीर्थनिषेवणम् ।
सर्वं व्रतं तपः सर्वमुपवासादिकाश्च यत् ॥
सर्वधर्मेषु सत्यश्च सर्वेषामप्युपोषणम् ।
तत् सर्वं स्वामिसेवायाः कलां नार्हन्ति षोडशीम् ॥
सुपुत्रे भारते वर्षे पतिसेवां करोति या ।
वैकुण्ठे स्वामिना सार्द्धं सा याति ब्रह्मणः पुरम् ॥
विप्रियं कुरुते भर्तुर्विप्रियं वदति प्रियम् ।
अतृतुकूलप्रकाशा या ततुफलं भूयतो यति ! ॥
कृतीपाकं व्रजेत् सा च यावच्चन्द्रदिवाकरौ ।
तावो भवति चाक्षन्ती पतिपुत्रविवर्जिता ॥"
इति ब्रह्मवैवर्ते प्रकृतिखण्डे ४६ अध्यायः ॥*॥
अपि च ।
"सकान्तश्च परो बन्धुरिह लोके परत्र च ।
नहि कान्तात् परः श्रेयान् कुलस्त्रीणां परो गुरुः ॥
देवपूजा व्रतं दानं तपस्तानञ्च यत् ।
स्नानञ्च सर्वतीर्थेषु दीक्षा सर्वमखेषु च ॥
प्रदक्षिणां पृथिव्याश्च ब्राह्मणातिथिसेवनम् ।
सर्वाणि पतिसेवायाः कलां नार्हन्ति षोडशीम् ॥
किमतः पतिभक्तायाः अभक्तायाश्च भारते ।
यथा दुःखी सुखारूढो बालकापुत्रः प्रथमो भवेत् ॥
पतिसेवापरो धर्मो नहि स्त्रीणां श्रुतौ श्रुतम् ।
स्वर्गे लोके च सततं कान्तं नारायणाधिकम् ।
इत्वा तत्सदृशाभोगं सेवां निर्वं करिष्यसि ॥
पतिहीनेन दीनेन असेवायाश्च सुते ! ।
कटूक्तिं स्वामिनः साक्षात् परोक्षात्र करिष्यसि ॥
क्षिप्या यान्तीनिदुष्टायाः कामतो भारते सति ।
प्रायश्चित्तं श्रुतौ नास्ति नरकं प्रलयावधि ॥
सर्वधर्मपरीता या कटूक्तिं कुरुते पतिम् ।
प्रलयान्धकारं युगयं तस्या नश्यति निश्चितम् ॥
दत्त्वा कन्यां वीर्यशिल्का जलाम मुनिपुङ्गवः ।"
इति ब्रह्मवैवर्ते श्रीकृष्णजन्मखण्डे ७ अध्यायः ॥
अपि च ।
"या स्त्री भर्तुरभीभाषा साधीभाषा च सर्वतः ।
प्रायो भोजनं तस्या न सुखं जीवनं तथा ॥
यस्या नास्ति प्रियप्रेम तस्या जन्म निरर्थकम् ।
तत् किं पुत्रैः धर्म कर्मैः सत्यैर्वा यज्ञयज्ञया ॥
यद्भक्तिर्नास्ति कान्ते च सर्वप्रियतमे परे ।
सा स्त्रीचर्मभरीता च सर्वकर्मविवर्जिता ॥
पतिर्बन्धुर्गतिर्भर्ता देवतं गुरुरेव च ।
सर्वस्माच्च परः स्वामी न गुरुः स्वामिनः परः ॥
पिता माता सुतो भ्राता क्षिप्रो दत्त्वा गतं धनम् ।
सर्वत्रदाता स्वामी च कदाचां योषितां सुताः ॥
कामिनीव हि भागति मधुमाधौ च स्वामिनम् ।
अतिमङ्गलयुक्ता या सुपौला कुलपालिका ॥
व्यसङ्गप्रवहता या दुःखौघा धर्मसंयुक्ता ।
सुखदुःखा योनिदुष्टा पतिं निन्दति कोपतः ॥
या स्त्री देहि सर्वत्रं पतिं विष्णुसमं गुरुम् ।
क्षणोपार्के पतति सा यावदिन्द्राश्चतुर्दश ॥
अतस्तत्पूजनं दानं सर्वं पुण्यं तपश्चिरम् ।
पतिभक्तिविहीनाया भस्मीभूतं निरर्थकम् ॥"
इति ब्रह्मवैवर्ते श्रीकृष्णजन्मखण्डे ५० अध्यायः ॥
अपि च ।
"साध्वयाः सर्वसाध्यायाश्च व्रतपूजाधिकः पतिः ।
व्यसङ्गप्रवहता या दुःखौघा ज्ञानसंयुक्ता ॥
स्वामिनं सर्वतो भागी विप्रीहिंसेव कुत्सिता ।
कुलटिनां पतिं त्यक्त्वा दक्षिणं योगिनं भजेत् ॥
कुलटा विष्णुतुल्यञ्च कान्तं पश्यति सन्ततम् ॥
कुलाङ्गनां या कन्यां या सर्वतीर्थमयीं परः ।
पतिव्रतातिरूपश्च कलां नार्हन्ति षोडशीम् ॥
महादानानि पुण्यानि व्रतान्यनशनानि च ।
सर्वाणि पतिसेवायाः कलां नार्हन्ति षोडशीम् ॥
पुत्रो यापि पिता यापि भ्राता वा सहोदरः ।
योगिनां कुलजातानां न कश्चित् स्वामिनः परः ॥"
इति ब्रह्मवैवर्ते प्रकृतिखण्डे ४४ अध्यायः ॥*॥
पतिव्रतिलक्षणादि यथा,—
"निरन्तरितस्य वेदेषु स्वाध्यायो यत्र शाश्वतः ।
तदृश्यस्वामीति च स्वामी वेदज्ञः प्रभु मङ्गलः ॥
तस्य छाया सदा स्वामी न च कर्मं स्वामिनी भवेत् ।
यद्यो यथया भवति विज्ञानमयीधताम् ॥
गर्भ उवाच ।
यदि विभो न "ं साध्वि! स्वामिनं ज्ञानसञ्चयम्।
दम्पती भुवमेकाङ्गौ तयोर्हीना न द्वौ यथौ ॥
निरन्तरिता पुरुषके न यदि स्वामी न दम्पिका ।
सूतौ सूतौ यः स्वधर्मो विपरीतो त्यधर्मकः ॥"
इति ब्रह्मवैवर्ते गर्भखण्डे ७ अध्यायः ॥
पतिः, त्रि, (पाति रक्षति पालयतीति वा । "पतिः स्वामिनि ।" उणा० । ४ । १७० । इति इतिः ।) अधिपतिः । तत्पर्य्यायः । स्वामी २ ईश्वरः ३ ईशिता ४ अधिभूः ५ नायकः ६ नेता ७ प्रभुः ८ परिवृढः ९ अधिपः १० । अत्यमरः । ३ । १ । ११ । १२ ॥ (यथा, मनुः । ७ । १५५ ।
"सामन्याधिपतिं कुर्यात् दशग्रामपतिं तथा ।
विंशतीशं शतेशञ्च सहस्रपतिमेव च ॥")

पतिंवरा, स्त्री, (पतिं वृणोति या सा । वृ + वरणे + अच् । "सोऽनायां भूतेऽपि वृणोति ।" ३ । २ । ४६ । इति सप् ।) स्वयंवरा । सा कन्यया पत्यर्थिभिर्यो । (यथा, रघौ । ६ । २ ।
"अनुष्यवाहो वपुरन्वयेन
सभाव्य कन्या परिवारशोभि ।
विवेश सम्पान्तरमाश्रयार्थं
पतिंवरा क्षत्रियविश्वपेया ॥")
ज्ञानार्थोक्तः । इति शब्दचन्द्रिका ।

पतिंशी, स्त्री, (पतिं शेते इति । "सर्वधातुभ्यः इन्।" ४ । ४ । ११७ । इति इन् । ङीप् ।) पतिनाम्नाकाश्यपेक्षाविशेषः । यथा, "कश्यपो मायायामतिभ्याम् । मायायां सुतः । पतिंशी पतिदेवता ।" इति मैत्रिमहाभारतस्य प्रथमांशे । (विवाहात् प्राक् शैवादिदत्तपतिकस्य कुमार्यां परोक्षार्थं दत्ते सति प्रमादात्तस्यान्यत्र दत्तस्य कुमार्यामन्यस्याः पतिजनकत्वप्रकारो यथा, आश्वलायनगृह्यसूत्रे १ । ५ । ८ । "अथो पितृन् छन्दया पितृनामभिमन्त्र्य कुमारीं ब्रूयात् यस्मै त्वं कृधामीति ।" इति नियोजिता कुमारी यदि प्रमादादन्यं वरं गच्छति तदा पतिंशीति सा विद्यात् ॥)

पतितः, त्रि, (पतति स्म अधो भवति स्वधर्मात् भ्रष्ट-विहितकर्मणः सदाचाराद्वियो वा यः । पत् + कर्तरि क्तः । पतितः । पतनाश्रयः । पदा इति भाषा । तत्पर्य्यायः । प्रस्कन्नः २ । इति हेमचन्द्रः ॥ पातित्यधिक्कृतः । स्वधर्मच्युतः ॥ तस्य लक्षणं यथा, मार्कण्डेयपुराणे ;
"स्वधर्मं यः परित्यज्य परधर्मं समाश्रयेत् ।
अनापदि न विद्वान् पतितः परिकीर्तितः ॥"

पातित्यकारणं यथा, मात्स्ये २०१ अध्याये ।
"चाण्डालान्त्यस्त्रियो गत्वा भुक्त्वा च प्रतिगृह्य च ।
पतत्यज्ञानतो विप्रो ज्ञानात् साम्यन्तु गच्छति ॥"
पतिता यथा,—
"गराग्निविषदात्रैव पापण्डाः क्रूरबुद्धयः ।
क्रोधात् प्रायं विषं वह्निं भुक्त्वमुद्बन्धनं जलम् ॥
शिरिवृक्षप्रपातञ्च ये कुर्व्वन्ति नराधमाः ।
कुक्षिच्छेदनकैवर्त्तस्नालङ्कारकारिणः ॥"
तथा,—
"ब्रह्महत्रता ये च ये च वै ब्राह्मणैर्हताः ।
महापातकिनो ये च पतितास्ते प्रकीर्त्तिताः ॥"
तेषां दाहादिनिषेधो यथा,—
"पतितानां न दाहः स्यान्नान्त्येष्टिर्नास्थिसञ्चयः ।
न चाम्बुपातः पिण्डो वा कार्य्यश्चाब्दादिकं क्वचित्॥"
इति सुद्धितत्त्वे ब्रह्मपुराणम् ॥ * ॥
तेषां संसर्गनिषेधो यथा, वराहपुराणे ।
"आसनाशयनाचैनं भोजनात् कथनादिषु ।
सम्वत्सरेण पतति पतितेन सहाचरन् ॥"
प्रायश्चित्तेतरवैदिककर्म्मानधिकारी सन् नरकभागी । यथा,—
"पतितैः संप्रयुक्तानामिमां शृणुत निष्कृतिम् ।
सम्वत्सरेण पतति पतितेन सहाचरन् ॥
याजनाध्यापनाद्यौनाच्छ्वासनाश्नानासनात् ।
यो येन पतितेनैव संसर्गं याति मानवः ।
स तस्यैव व्रतं कुर्य्यात् संसर्गस्य विशुद्धये ॥"
तेषामुदककार्य्यं यथा,—
"पतितस्यौदकं कार्य्यं सपिण्डैर्ब्राह्मणैः सह ।
निन्दितेऽहनि सायाह्ने ज्ञातिभिर्गुरुसन्निधौ ॥
दासीघटमयं पूर्णं पर्य्यस्येत् प्रेतवत् सदा ।
अहोरात्रमुपासीनं नाशौचं ब्राह्मणैः सह ॥
निवर्त्तेरंस्ततस्तात्तु सम्भाषणसहासनम् ॥"
इति मात्से २०१ अध्यायः ॥
अत्याज्या पतिता यथा, मत्स्यपुराणे ।
"पतिता गुरवस्त्याज्या न तु माता कदाचन ।
गर्भधारणपोषाभ्यां तेन माता गरीयसी ॥"
द्वादशवार्षिकव्रतनाश्यपापयुक्तः । तस्य और्द्ध्वदेहिकविधिर्यथा, "पूर्व्वोक्तश्चात्महाटेः दाहाशौचादिनिषेधस्तदानीमेव । वत्सरान्ते तु सर्व्वमौर्द्ध्वदेहिकं कुर्य्यात् ॥
गोब्राह्मणहतानाञ्च पतितानां तथैव च ।
और्द्ध्वं संवत्सरात् कुर्य्यात् सर्व्वमेवौर्द्ध्वदेहिकम् ॥"
इति हेमाद्रौ षट्त्रिंशन्मतात् ॥
एवं म्लेच्छीकृतानामपि। यथाश्राद्धमपि कार्य्यम्।
"ब्रह्महा च कृतघ्नश्च गोघाती पक्षपातकी ।
सर्व्वे ते निष्कृतिं यान्ति गयायां पिण्डपातनात् ॥"
इत्यग्निपुराणात् ॥ * ॥
एवं ब्राह्मेऽपि ।
"क्रियते पतितानान्तु गते संवत्सरे क्वचित् ।
देशधर्म्मप्रमाणत्वात् गयाकूपे स्वबन्धुभिः ॥
मार्गेऽब्दपादमूले वा श्राद्धं हरिहरौ स्मरन् ॥"
सर्व्वपदं इत्यर्थः ॥ * ॥ तत्र वर्षमध्ये मृत्यूक्तमपरार्के वायुपुराणे ।
"शुक्लपक्षे तु द्वादश्यां कुर्य्यात् श्राद्धन्तु वत्सरम् ।
द्वादशाहानि वा कुर्य्यात् शुक्ले च प्रथमेऽहनि ॥"
छागलेयः ।
"नारायणबलिः कार्य्यो लोकगर्हाभयान्नरैः ।
तथा तेषां भवेच्छौचं नान्यथेत्यब्रवीदृषिः ॥"
व्यासः ।
"नारायणं समुद्दिश्य घृतं वा यत् प्रदीयते ।
तस्य शुद्धिकरं कर्म्म तद्भवेन्नेतदन्यथा ॥"
स चात्मघातादिप्रायश्चित्तं कृत्वा कार्य्यः । तदुक्तं हेमाद्रौ षट्त्रिंशन्मते ।
"कृत्वा चान्द्रायणं पूर्व्वं क्रिया कार्य्या यथाविधि ।
नारायणबलिः कार्य्यो लोकगर्हाभयात् नरैः ॥
पिण्डोदकक्रियाः पश्चात् दृषोत्सर्गादिकञ्च यत् ।
एकोद्दिष्टानि कुर्व्वीत सपिण्डीकरणं तथा ॥"
दिवोदासीये वृद्धशातातपस्तु इत्याह ।
"पतिते च मृते भ्रात्रे प्राजापत्यांस्तु षोड़श ।
मृते चापत्यरहिते कृच्छ्राणां नवतिं चरेत् ॥"
इदं प्रायश्चित्तार्हपित्रादिविषयम् ।
"इन्द्रियैरपरित्यक्ता ये च म्लेच्छा विषादिनः ।
घातयन्ति स्वमात्मानं चाण्डालादिहताश्च ये ॥
तेषां पुत्राश्च पौत्राश्च दयया वसमिच्छुताः ।
यथाश्राद्धं प्रतन्वन्ति विष्णुनाभप्रतिष्ठितम् ॥
तथा ते संप्रवक्ष्यामि नमस्कृत्य स्वयम्भुवे ॥"
इति हेमाद्रौ तेनैवोक्तेः ॥ * ॥
तत्रैव वौधायनोऽपि । नारायणबलिं व्याख्यास्यामोऽभिभूतपतितसुरापात्मत्यागिनां ब्राह्मणहतानाञ्च द्वादशवर्षाणि त्रीणि वा वारिमरणं यत्र यस्य तत्र तत्र कुर्व्वीतेति ॥ * ॥ गृह्यपरिशिष्टे तु चण्डालादिव्याघ्रोक्ता,—
"दग्ध्वा शरीरं प्रेतस्य संस्थाप्यास्थीनि यत्नतः ।
प्रायश्चित्तन्तु कर्त्तव्यं पुत्रैश्चान्द्रायणत्रयम् ॥"
इत्युक्तम् ॥ * ॥ मदनरत्ने ।
"ब्राह्मणहतानाञ्च द्वादशवर्षाणि त्रीणि वा कुर्व्वीतेति ॥" * ॥ मदनरत्ने ब्राह्मे ।
"प्रमादादपि निःशङ्कस्त्वक्सारादिविचोदितः ।
चण्डालैर्ब्राह्मणैर्गौरैर्निहतो यत्र कुत्रचित् ॥
तस्य दाहादिकं कार्य्यं यस्मात्र पतितस्तु सः ।
चान्द्रायणं तप्तकृच्छ्रद्वयं तस्य विशुद्धये ॥
यद्वा कृच्छ्रान् पञ्चदश कृत्वा तु विधिना दहेत् ।
बुद्धिपूर्व्वन्तानान्तु त्रिंशत्कृच्छ्रं समाचरेत् ॥"
इत्युक्तम् । स्मृतिरत्नावल्यां तद्द्विगुणं प्रायश्चित्तं कृत्वा अब्दागण्यत्वात् सर्व्वं कार्य्यं इत्युक्तम् ।
"आत्मनो घातशुद्ध्यर्थं चरेच्चान्द्रायणद्वयम् ।
तप्तकृच्छ्रचतुष्कञ्च त्रिंशत्कृच्छ्राणि वा पुनः ॥
अर्व्वाक् संवत्सरात् कुर्य्यात् दहनादि यथोदितम् ।
कृत्वा नारायणबलिमनित्यत्वात्तदायुषः ॥" इति ॥
इदञ्चात्मवधनिमित्तं तज्जातिवधप्रायश्चित्तेन समुच्चितं कार्य्यम् । अतएव वौधायनेनोक्तम् । द्वादशवर्षाणि त्रीणि वेति । मदनपारिजाते स्मृत्यर्थसारे च ब्रह्महादीनां तद्योग्यं प्रायश्चित्तं कृत्वा नारायणबलिः कार्य्य इत्युक्तम् । एवं म्लेच्छीकृतानामपि ॥ * ॥ यत्तु कश्चिदाह । पुत्रकृतेन प्रायश्चित्तेन पितुः पापनाशे मानाभावः । आत्मघाते तु वचनादस्तु । महापातके तु कथं स्यादिति । स स्वयमेव आत्मवधप्रायश्चित्तस्य जातिवधनिमित्तेन समुच्चयं वदन् हृदयशून्य एव । नहि जातिवधनिमित्तं पुत्रैः कार्य्यमिति वचनमस्ति पुत्रकर्तृकसर्व्वप्रायश्चित्तादिविधानात्तेः । प्रागुक्तबौधायनवचनाच्चेति दिक् । इदं प्रायश्चित्तार्हाणामेव । प्रायश्चित्तानर्हाणान्तु पतितौदकमात्रं कार्य्यमिति केचित् । मदनपारिजातादिस्वरसोऽप्येवम् । वस्तुतस्तु तदर्हानर्हयोर्व्वचनेऽनुपादानात् अविशेषात् तत्रापि नारायणबलिर्गयाश्राद्धञ्चेति युक्तम् ॥ * ॥ पतितौदकविधिस्तु मित्राद्यतिरिक्तविषय इत्यपरे । स यथा। हेमाद्रौ ब्राह्मे ।
"पतितस्य तु कारुण्यात् यस्तूप्तिं कर्त्तुमिच्छति ।
स हि दासीं समाकृष्य सर्व्वगां दत्तवेतनाम् ॥
अशुद्धघटहस्तान्तां यथाद्यत्तं ब्रवीत्यपि ।
हे दासि ! गच्छ म्लेच्छेन तिलानानय सत्वरम् ॥
तोयपूर्णं घटञ्चेमं सतिलं दक्षिणासुखी ।
उपविश्य तु वामेन चरणेन ततः क्षिप ॥
कौन्तेयैः पातकिसंज्ञां त्वं पिवेति मुहुर्ब्रुवन् ।
निमज्य तस्य वाक्यं सा लब्धमूल्या करोति तत् ॥
एवं कृते भवेत्तृप्तिः पतितानां न चान्यथा ॥"
इति ।
इदञ्च मृताहे कार्य्यम् । पतितस्य दासी मृताह्नि पदा घटमपवर्त्तयेदेतावतायसुपचरितो भवतीति मदनरत्ने विष्णुक्तेः । इदञ्चात्मत्यागिविषयम् । आत्मत्यागिनः पतितास्तेनाशौचोदकभाजः स्मृत्यिुपक्रम्य विष्णुना एतस्याभिधानादिति गौड़ाः । उपलक्षणत्वात् सर्व्वेषामिति तु युक्तम् । इति निर्णयसिन्धौ ५ परिच्छेदः ॥
पतिवत्नी, स्त्री, (पतिर्विद्यते यस्याः । पति + मतुप् । "अन्तर्वत्पतिवतोर्नुक् ।" ४ । १ । ३२ । इति निपातनात् वत्वं नुगागमश्च । ततः । "ऋन्नेभ्यो ङीप् ।" ४ । १ । ५ । इति ङीप् ।) सभर्तृका । सधवा । इत्यमरः । २ । ६ । १२ ॥ (यथा, रघुः । १५ । ३५ ।
"इतरेऽपि रघोर्वंश्यास्तयस्तेजसि तेजसः ।
तद्योगात् पतिवत्नीषु पत्नीष्वासन् द्विरूपवः ॥")
पतिव्रता, स्त्री, (पतिव्रतमिव धर्म्मार्थकामेषु कायवाङ्मनोभिः यदोपास्योऽस्याः ।) स्वाम्यनुरक्ता । तत्पर्य्यायः । सुचरित्रा २ सती ३ साध्वी ४ । इत्यमरः । २ । ६ । ६ ॥ एकपत्नी ५ । इति शब्दरत्नावली ॥ तस्या लक्षणं यथा,—
"आर्त्ताऽर्त्ते मुदिता हृष्टे प्रोषिते मलिना क्षमा ।
मृते म्रियेत या पत्यौ सा स्त्री ज्ञेया पतिव्रता ॥"
इति सुद्धितत्त्वम् ॥ * ॥
तस्या माहात्म्यं यथा,—
नारद उवाच ।
"कर्म्मणा केन राजेन्द्र ! तपसा वा तपोधन ! ।
उत्तमाञ्च गतिं याति क्षणमात्रः प्रशंस मे ॥
एवमुक्तस्तु धर्म्मात्मा नारदेनात्रवीत्तदा ।

यम उवाच ।
न मया नियमो विप्र ! तपो नैव च सुव्रत ! ।
उपवासो न दानञ्च न दमो वा भवेदिति ! ॥
वाढमेवं तु भवेद्विप्र ! शृणु सत्यं ब्रवीमि तत् ।
प्रसूते वा प्रसवति विक्रुद्धे जायति स्वयम् ।
भुङ्क्ते तु भोजिते विप्र ! सा खलुद्यति पुत्रम् ।
सौम्ये सौम्या भवेदेवा तुष्टिते तुष्टिता स्वयम् ।
सा खलुप्रयते विप्र ! नान्यत् पश्यामि किञ्चन ॥
एकदृष्टिरनन्या भर्तुश्चैवानुकारिणी ।
तस्या निर्भासते सर्व्वं ये तपार्थे तपोधन ! ॥
देवतागारमपि सा साध्वी पूज्या परमशोभना ।
भर्त्रा नाभिहिता वापि प्रत्याख्यायिनी भवेत् ॥
वर्त्तमानापि विप्रेन्द्र ! प्रत्याख्यातापि सा यदा ।
तदैव तं संत्यजति पतिं नान्यं कदाचन ।
भर्त्तुर्मुखमुदारं ब्रह्मन् ! या पश्यति वराङ्गना ।
एवं यानि भवेत्तिर्य्यं भर्त्तुः प्रियहिते रता ॥
अनुविष्टेन भावेन भर्त्तारमनुगच्छति ।
सा तु खलुप्रहारं न गच्छेद्ब्रह्मसम्भव ! ॥
एष माता पिता बन्धुरेष मे दैवतं परम् ।
एवं शुश्रूषते यां तु सा मां विन्दते सदा ।
पतिव्रता तु या साध्वी तस्याचारं शृणुष्व मे ॥
भर्त्तारमनुधावन्ती भर्त्तारमनुगच्छति ।
भर्त्तारमनुशोचन्ती खलुद्वारं न पश्यति ॥
नीलवादित्रवृत्यानि प्रेक्षणीयान्यनेकशः ।
न शृणोति न पश्येन खलुद्वारं न पश्यति ॥
शयनी तिष्ठती वापि कुर्व्वन्ती वा प्रसाधनम् ।
नान्यत्र मनसा ध्यायेत् कदाचिदपि सुव्रता ॥
देवता पूजयन्ती वा भोजयेदथ वा द्विजान् ।
पतिं न त्यजते चित्तात् खलुद्वारं न पश्यति ॥
भर्त्ता चानुदिते वा तु उत्थाय च तपोधन ! ।
एवं चारभते नित्यं खलुद्वारं न पश्यति ।
पतुर्हि : सभावश्च यस्या नित्यं सुसंस्कृतम् ।
शौचाचारसमायुक्ता सापि खलुं न पश्यति ॥
भर्त्तुर्नित्यं प्रयच्छन्ती भर्त्तुश्चित्तानुसारिणी ।
वर्त्तते च हिते भर्त्तुर्मृलुद्वारं न पश्यति ।
एवं संचिन्तिता लोके इयन्ते दिवि देवताः ।
साधुभावात्मा भार्य्या वै तत्र देहे तु दृश्यते ॥
संक्षिप्तेन पुरा विप्र ! व्याख्यिन पतिव्रता ।
एवं तस्मात्तु विप्रर्षे ! यथावृत्तं यथाश्रुतम् ।
मुच्येऽहञ्चो इहं पृच्छामि पतिव्रताम् ।"

इति नारदीये पतिव्रताचरित्रम् ॥ ७ ॥

पतिव्रतानामी यथा,—
"पतिव्रतानां धर्म्मं तन्निबोध व्रजेश्वर ! ।
नित्यं भर्त्तुर्मुखाब्जं तत्पादोदकमीक्षितम् ।
भोजनेन सदा भोज्यं तदुच्छिष्टा ।
एवं नान्यं देवतां परिवारं प्रयत्नतः ।
पूजोपकरणं नाम स्वप्नं परितोषणम् ।
स्नानादिकं तथा धर्म्मं न कुर्य्यादेवतः सती ।
नान्यत्र मनसा ध्यायेत् सदा सती ।
यस्मात् तस्मात् पुरुषं पुण्यं परम् ।
न नमस्कारपूर्वं किञ्चित् कार्य्यं नान्यं व्रज ।
सदा [illegible] एवं सती एवता ।

यद्दत्तं स्वामिना नित्यं तद्देवमपि दीक्षितम् ।
रुचिं लक्षयेत् तत्सर्व्वं चरन्नेव च सुव्रता ।
उत्तरे नोत्तरं दद्यात् स्वामिनश्च पतिव्रता ।
न कोपं कुरुते युद्धा तादृगाकारपि योषितः ।
तुष्टितं भोजयेत् कान्तं दद्यात् यानञ्च तोषणे ।
न बोधयेत् निद्रानं प्रेम्णैव कर्म्मसु ।
पुत्रागाञ्च शतगुणं स्नेहं कुर्य्यात् पतिं सती ।
पतिर्बन्धुर्गतिर्भर्त्ता दैवतं कुलयोषितः ।
शुभं इष्टा सुधातुल्यं कान्तं पश्यति सुन्दरी ।
नम्रितं वदनं कृत्वा भक्तिभावेन यत्नतः ॥
पुरुषाणां सहस्रञ्च सती स्त्री च समुद्धरेत् ।
पतिः पतिव्रतानाञ्च मुच्यते सर्व्वपातकात् ॥
नास्ति तेषां कर्म्मभोगः सतीनां व्रततेजसा ।
तथा सार्द्धञ्च निष्कर्म्मा मोदते हरिमन्दिरे ।
पृथिव्यां यानि तीर्थानि सतीपादेषु तान्यपि ।
तेजश्च सर्व्वदेवानां मुनीनाञ्च सतीषु च ॥
तपस्विनां तपः सर्व्वं व्रतिनां व्रत मेव च ।
दानं फलं यज्ञानां तत् सर्व्वं तासु सन्ततम् ॥
स्वयं नारायणः शम्भुर्विधाता जगतामपि ।
सुराः सर्व्वे मुनयो भीतास्ताभ्यश्च सन्ततम् ॥
सतीनां पादरजसा शुद्धः पूता वसुन्धरा ।
पतिव्रतां नमस्कृत्य मुच्यते पातकान्नरः ॥
त्रैलोक्यं भस्मसात् कर्त्तुं क्षणेनैव पतिव्रता ।
स्वतेजसा समर्था सा महापुण्यवती सदा ॥
सतीनाञ्च पतिः साध्वीपुत्रो निःशङ्क एव च ।
नहि तस्य भयं किञ्चिद्दैवेभ्यश्च यमादपि ॥
शतजन्मपुण्यवतां गृहे जाता पतिव्रता ।
पतिव्रताप्रसूः पूता जीवन्मुक्तः पिता तथा ।
सती स्त्री प्रातरुत्थाय स्नात्वा च रात्रिवाससम् ।
भर्त्तारञ्च नमस्कृत्य करोति स्वगृहं सुदा ॥
गृहकार्य्यं ततः कृत्वा स्नात्वा धौते च वाससी ।
गृहीत्वा शुद्धपुष्पञ्च भक्तितः पूजयेत् पतिम् ॥
स्नापयित्वा सुपूतेन जलेन निर्म्मलेन च ।
तस्मै दत्त्वा धौतवस्त्रं तत्पादौ क्षालयेत्ततः ॥
आसने वासयित्वा च दत्त्वा माल्यं च चन्दनम् ।
सर्व्वाङ्गलेपनं कृत्वा दत्त्वा माल्यं गलेऽपि च ॥
सामवेदोक्तमन्त्रेण भोगद्रव्यैः सुधोपमैः ।
संपूज्य भक्तितः कान्तं स्तुत्वा च प्रणमेन्मुदा ॥
'ॐ नमः कान्ताय शान्ताय सर्व्वदेवात्मने स्वाहा ॥'
इत्यनेनैव मन्त्रेण दत्त्वा पुष्पञ्च चन्दनम् ।
पाद्यार्घ्यधूपदीपांश्च दत्त्वा नैवेद्यमुत्तमम् ॥
जलं सुवासितं शुद्धं ताम्बूलञ्च सुसंस्कृतम् ।
दत्त्वा स्तोत्रञ्च प्रपठेत् यत् कृतं पादयोश्च ।
ॐ नमः कान्ताय शान्ताय सर्व्वदेवात्मने च ।
नमो ब्रह्मस्वरूपाय सतीनाम्परमात्मने च ।
नमस्याय च पूज्याय सुखाधाराय ते नमः ॥
यज्ञानामधिदेवाय चतुर्व्वर्गप्रदाय च ।
ज्ञानाधाराय पत्नीनां परमानन्दरूपिणे ।
पतिर्देवता पतिर्बन्धुः पतिरेव सहीश्वरः ।
पतिना निर्वृताधारो ब्रह्मरूप ! नमोऽस्तु ते ।

जन्मस्व भगवन् ! दोषं ज्ञानाज्ञानकृतञ्च यत् ।
प्रसीदन्तु ! क्षमन्तु ! मामीदीशं नमश्च ते ।
इदं स्तोत्रं महापुण्यं सर्व्वाद्यं पद्मया कृतम् ।
सरस्वत्या च धरया गङ्गया च पुरा प्रभो ॥
सावित्र्या च कृतं पूर्व्वं ब्रह्मणे चापि नित्यशः ।
पार्व्वत्या च कृतं भक्त्या कैलासे शङ्कराय च ॥
मुनीनाञ्च सुराणाञ्च मनवे मानवैरपि कृतं पुरा ।
पतिव्रतानां सर्व्वासां स्तोत्रमेतत् शुभावहम् ॥
इदं स्तोत्रं महापुण्यं यो शृणोति पतिव्रता ।
नरोऽन्योऽपि नारी वा लभते सर्व्ववाञ्छितम् ॥
अपुत्रो लभते पुत्रं निर्धनो लभते धनम् ।
रोगी च मुच्यते रोगात् बद्धो मुच्येत बन्धनात् ॥
पतिव्रता च स्तुत्वा च तीर्थस्नानफलं लभेत् ।
फलञ्च सर्व्वतपसां व्रतानाञ्च व्रजेश्वर ! ।
इदं स्तुत्वा नमस्कृत्य भुङ्क्ते सा तदनुज्ञया ।
उक्तः पतिव्रताधर्म्मो गृहिणां शृण्वतां व्रज ।"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ३८ अध्यायः ॥ ८ ॥

पतिव्रतानामानि यथा,—
सूर्य्यस्य सुवर्चला १ शक्रस्य शची २ वशिष्ठस्य अरुन्धती ३ चन्द्रस्य रोहिणी ४ गौतमस्य लोपामुद्रा ५ अत्रेश्च अनसूया ६ सत्यवतः सावित्री ७ कपिलस्य श्रीमती ८ सौदासस्य मदयन्ती ९ सगरस्य केशिनी १० नलस्य दमयन्ती ११ रामस्य सीता १२ शिवस्य सती १३ नारायणस्य लक्ष्मीः १४ ब्रह्मणः सावित्री १५ रावणस्य मन्दोदरी १६ । इति पुराणान्तरम् ॥
(गायत्रीस्वरूपा भगवती । यथा, देवीभागवते ।
१२ । ६ । ६६ ।
"पतिव्रता पवित्राङ्गी पद्मवासपरायणा ।
प्रज्ञावती सुता पौत्री पुत्रपूज्या पयस्विनी ।")

पतेरः, पुंस्त्री, (पतति गच्छतीति । पत्लृ गतौ + "पतिकटिकुटिगाडिदेशिभ्य एरक्।" उणा १।५६। इति कर्त्तरि एरक्।) पक्षी। गन्तरि त्रि। शब्दरत्नावली ॥

पतेरः, पुं, (पतत्यस्मिन्निति । "पति कटीति ।" उणा १।५६। इति अधिकरणे एरक्।) गात्रम्। गर्त्तः। इति संक्षिप्तसारोणादिवृत्तिः ॥

पतङ्गं, क्ली, (पत्रमिव अङ्गं यस्य । पृषोदरात्साधु ।) रक्तचन्दनम्। इति शब्दरत्नावली ।
वृक्षविशेषः। वकम् इति भाषा। तत्पर्य्यायः। पत्राङ्गम् २ रक्तकाष्ठम् ३ सुरद्रुमम् ४ पत्राख्यम् ५ पट्टरङ्गम् ६ भार्य्याहृत् ७ रक्तः ८ लोहितम् ९ रक्तकाष्ठम् १० रोगकाष्ठम् ११ कुचन्दनम् १२ पट्टरञ्जनकम् १३ सुरङ्गम् १४ अस्य गुणाः। कटुत्वम्। रूक्षत्वम्। अम्लत्वम्। शीतत्वम्। मोलत्वम्। वातपित्तकफविषीटोन्मादभूतगणाशित्वञ्च। इति राजनिर्घण्टः ॥
अपि च भावप्रकाशे ।
"पतङ्गस्तु रक्तसारं सुरङ्गं रक्तचन्दनम् ।
पट्टरङ्गमागधं पत्तूरञ्च कुचन्दनम् ।
पतङ्गं मधुरं शीतं पित्तशोणितनाशनम् ।
हरिचन्दनवत्तुल्यं किन्त्वेतद्गुरुशीतलम् ।"

पत्तनं, क्ली, (पतन्ति गच्छन्ति जना यस्मिन्। पत ल्ल गतौ + "वीपतिभ्यां तनन्।" उणां ३।१५०। इति तनन्।) नगरम्। इत्यमरः। २।२।१०॥ (यथा, भागवते। ७। २। १४।

"पुरग्रामव्रजोद्यानक्षेत्रारामाश्रमाकरान्।
खेटखर्वटघोषांश्च ददृहुः पत्तनानि च॥")

महती पुरी। इति श्रीधरस्वामी॥ मदङ्गः। इति हारावली॥

पत्तनवणिक्, [ज्] पुं, (पत्तनस्य नगरस्य वणिक्।) नगरवणिक्। तत्पर्य्यायः। स्वाध्यायी २। इति त्रिकाण्डशेषः॥

पत्ति:, पुं, (पद्यते विपक्षसनां प्रति पद्भ्यां गच्छतीति। पद्यौ ङ गतौ + "पदिप्रथिभ्यां नित्।" उणां ४। १८२। इति तिः स च नित्।) पदातिकः। इत्यमरः। २।८।६६। (यथा, रघुः। ७।३७।

"पत्तिः पदातिं रथिनं रथेशः
स्तुरङ्गसादी तुरगाधिरूढम्।
वन्ता गजस्थाभ्यपतद्गजस्थं
तुल्यप्रतिद्वन्द्वि बभूव युद्धम्॥" *॥

पद्यते विपक्षं प्राप्नोतीति। पद् + तिन्।) वीरः। इति विश्वः॥

पत्तिः, स्त्री, (पत ल्ल गतौ + भावे क्तिन्।) गतिः। (पत्यते विपक्षो यया। पत् + करणे क्तिन्।) सेनाविशेषः। यदुक्तं अमरे। २।८।८०।

"एकैकेभरथा चाश्वा पत्तिः पञ्चपदातिका॥"

पत्तिसंहतिः, स्त्री, (पत्तीनां पदातीनां संहतिः।) पदातिसमूहः। तत्पर्य्यायः। पादातम् २। इत्यमरः। २।८।६७॥

पत्तूरः, पुं, (पत गतौ + वाहुलकादूरः। निपातनात् तस्य द्वित्वम्।) शालिञ्चशाकः। इति त्रिकाण्डशेषः॥ पत्तङ्गे, क्ली। इति भावप्रकाशः॥

पत्नी, स्त्री, (पत्यर्थज्ञे सम्बन्धो यया। "पत्युर्नो यज्ञसंयोगे।" ४।१।३२। इति नकारादेशः ङीप् च।) वेदविधानेनोढ़ा। अन्यत्रोपचारात्। पत्या उदाहविहितमन्त्रादिना ऊढ़ा। इति भरतः॥ तत्पर्य्यायः। पाणिगृहीती २ द्वितीया ३ सहधर्म्मिणी ४ भार्य्या ५ जाया ६ दारा: ७ सधर्म्मिणी ८ धर्म्मचारिणी ९ दारः १० गृहिणी ११। इति शब्दरत्नावली॥ सहचरी १२ गृहः १३ क्षेत्रम् १४ वधूः १५ जनी १६ परिग्रहः १७ ऊढ़ा १८ कलत्रम् १९। इति हेमचन्द्रः॥ (पत्नीगुणेनैव हि पुरुषाः सुखिनो भवन्ति। यस्य पत्नी वशानुगा स भूस्थोऽपि स्वर्गस्थः। गृहाश्रमतुल्यं किञ्चिदपि नास्ति यदि तत्र हितकामा पत्नी वर्त्तते। सपत्नीक एव सर्व्वधर्म्मेकरणार्हः। यदुक्तं दक्षसंहितायाम्।

"पत्नीमूलं गृहं पुंसां यदि छन्दोनुवर्त्तिनी।
गृहाश्रमसमं नास्ति यदि भार्य्या वशानुगा॥
तया धर्म्मार्थकामानां त्रिवर्गफलमश्नुते।
प्राकाम्ये वर्त्तमाना तु स्नेहान्नतु निवारिता॥
व्यवस्था सा भवेत् पश्चात् यथा व्याधिरुपेक्षितः।
स्वजनस्था न वाग्दुष्टा दक्षा साध्वी प्रियंवदा॥
आत्मगुप्ता स्वामिभक्ता देवता सा न मानुषी।
अनुकूलकलत्रो यस्तस्य स्वर्ग इहैव हि॥
प्रतिकूलकलत्रस्य नरको नात्र संशयः।
स्वर्गेऽपि दुर्लभं ह्येतदनुरागं परस्परम्॥
रक्त एको विरक्तोऽन्यस्तस्मात् कष्टतरं नु किम्॥
गृहवासः सुखार्थाय पत्नीमूलं गृहे सुखम्।
सा पत्नी या विनीता स्याच्चित्तज्ञा वशवर्त्तिनी॥
दुःखदान्या सदा खिन्ना चित्तभेदात् परस्परम्।
प्रतिकूलकलत्रस्य द्विदारस्य विशेषतः॥
योषित् सर्व्वा जलौकेव भूयश्चाच्छादनाग्नेः।
सुभृत्यापि कृता नित्यं पुरुषं क्षपकर्षति॥
जलौका रक्तमादत्ते केवलं सा तपस्विनी।
इतरा तु धनं वित्तं मांसं वीर्य्यं बलं सुखम्॥
सप्रङ्का बालभावे तु यौवने विमुखी भवेत्।
क्षणवन्नश्यते पश्चाद्वृद्धभावे स्वकं पतिम्॥
अनुकूला न वाग्दुष्टा दक्षा साध्वी पतिव्रता।
एभिरेव गुणैर्युक्ता श्रीरेव स्त्री न संशयः॥
या हृष्टमनसा नित्यं स्थानमानविचक्षणा।
भर्त्तुः प्रीतिकरी नित्यं सा पत्नी ह्यितरा ज्वरा॥")

पत्नाटः, पुं, (अटति सुखं विहरति अत्र इति अटो गृहम्। ततः पत्न्या अटः।) पत्नीगृहम्। यदुक्तं त्रिकाण्डशेषे।

"वासागारं भोगगृहं कन्यापत्नाटनिष्कुटाः॥"

पत्र(त्र)क्तं, क्ली, (पतति वृक्षात्। पत ल्ल गतौ + "सर्व्वधातुभ्यः ष्ट्रन्।" उणां ४।१५८। इति ष्ट्रन्।) वृक्षावयवविशेषः। पाता इति भाषा। तत्पर्य्यायः। पलाशम् २ छदनम् ३ दलम् ४ पर्णम् ५ छदः ६। इत्यमरः। २। ४। १४॥ पात्रम् ७ छादनम् ८ वर्हम् ९ वर्हणम् १० पत्रकम् ११। इति शब्दरत्नावली॥ * ॥ विष्णवे पत्रविशेषदानफलं यथा नारसिंहे ५२ अध्याये।

"पत्राण्यपि सपुण्यानि हरेः प्रीतिकराणि च।
प्रवक्ष्यामि नृपश्रेष्ठ! शृणुष्व गदतो मम॥
अपामार्गपत्रं प्रथमं तस्माद्भृङ्गारकं परम्।
तस्मात्तु खादिरं श्रेष्ठं ततश्च शमिपत्रकम्॥
दूर्व्वापत्रं ततः श्रेष्ठं ततोऽपि कुशपत्रकम्।
पत्रं तस्माद्दमनकं ततो विल्वस्य पत्रकम्॥
विल्वपत्रादपि हरेस्तुलसीपत्रमुत्तमम्।
एतेषाञ्च यथालब्धैः पत्रैर्वा योऽर्चयेद्धरिम्॥
सर्व्वपापविनिर्मुक्तो विष्णुलोके महीयते॥"

देवीप्रीतिकरपत्राणि यथा,—

"अपामार्गस्य पत्रन्तु ततो भृङ्गारपत्रकम्।
ततोऽपि गन्धिनीपत्रं बलाष्टकमतः परम्॥
तस्मात् खदिरपत्रन्तु वञ्जुलस्तवकस्तथा।
आम्रन्तु वकपुष्पञ्च जम्बूपत्रं ततः परम्॥
बीजपूरस्य पत्रन्तु ततोऽपि कुशपत्रकम्।
दूर्व्वाङ्कुरं ततः प्रोक्तं शमीपत्रमतः परम्॥
पत्रमामलकं तस्मादामपत्रमतः परम्।
सर्व्वतो विल्वपत्रन्तु देव्याः प्रीतिकरं मतम्॥"

इति कालिकापुराणे ६८ अध्यायः॥*॥

तेजपत्रम्। तत्पर्य्यायः। तमालपत्रम् १ पत्रकम् २ छदनम् ३ दलम् ४ पालाशम् ५ अंशुकम् ६ वासः ७ तापसम् ८ सुकुमारकम् ९ वस्त्रम् १० तमालकम् ११ रामम् १२ गोपनम् १३ वसनम् १४ तमालम् १५ सुरनिर्गन्धम् १६। अस्य गुणाः। कटुत्वम्। तिक्तत्वम्। उष्णत्वम्। कफवातविषवस्तिकण्डूतिदोषनाशित्वम्। सुखमस्तकप्रोधनत्वञ्च। इति राजनिर्घण्टः॥ अपि च। भावप्रकाशे।

"पत्रकं मधुरं किञ्चित्तीक्ष्णोष्णं पित्तिलं लघु।
निहन्ति कफवातार्शोहृल्लासारुचिपीनसान्॥"

(पत्यते स्थानात् स्थानान्तरे अनेन। पत + "हाक्रीभ्रसयुयुजस्तुदसिसिचमिहपतदशनहः करणे।" ३। २। १८२। इति करणे ष्ट्रन्।) वाहनम्। शरपक्षः। पक्षिपक्षः। इति मेदिनी॥ * ॥ (पत्यते पात्यते शास्त्रबोधायवर्णनिचयोऽनेन। पत् + करणे ष्ट्रन्। अन्तर्निवन्तत्वात् तथात्वम्। (लिखनाधारः। पात् इति भाषा। यथा, ज्योतिस्तत्त्वे।

"षण्मासिके तु सम्प्राप्ते भ्रान्तिः सञ्जायते यतः।
धात्राक्षराणि स्थानानि पत्रारूढ़ान्यतः पुरा॥"

धातुमयपत्राकृतिद्वयम्। पतर् इति तवक् इति च भाषा। यथा, तुलापुरुषदाने दानसागरे।

"सुवर्णपत्राभरणा च कार्य्या
सुलोहपार्श्वद्वयशृङ्खलाभिः॥" * ॥

(पात्यते स्थानात् स्थानान्तरं समाचारोऽनेन।) पत्री। लिपिः। तस्य रञ्जनं यथा,—

"सुवर्णरूप्यरङ्गाद्यै रञ्जयेत् पत्रमुत्तमम्।
सामान्योत्तममध्यानां पत्ररञ्जनमीरितम्॥" * ॥

अथ पत्रप्रमाणम्।

"षड़ङ्गुलाधिकं हस्तं पत्रमुत्तममीरितम्।
मध्यमं हस्तमात्रं स्यात् सामान्यमुदितं हस्तकम्॥"

अथ पत्रभङ्गप्रकारः।

"पत्रन्तु त्रिगुणीकृत्य ऊर्द्धं तु द्विगुणं त्यजेत्।
शेषभागे लिखेद्वर्णान् गद्यपद्यादिसंयुतान्॥"*॥

अथ पत्रस्य रचनक्रमः।

"राजलेखकमाहूय नृपो ब्रूयात् प्रयत्नतः।
पत्रं कुरु यथायोग्यं गद्यपद्यादिसंयुतम्॥
पण्डितद्वयमानीय लेखको रहसि स्थितः।
यथायोग्यानुसारेण पत्रं कुर्य्यान्मनोरमम्॥
दिनद्वयं त्रयं वापि विचार्य्य पण्डितेन वै।
स्वश्चान्तेर्दूषणं ज्ञात्वा विलिखेत् पत्रपुस्तके॥
सामान्यपत्रे संलिख्य रहसि श्रावयेन्नृपम्।
नृपाज्ञया शुभे पत्रे विलिखेद्राजलेखकः॥" * ॥

अथ लेखनप्रकारः।

"अङ्कुशं प्रथमं दद्यात् सङ्गलार्थं विचक्षणः।
मध्ये विन्दुसमायुक्तमधः सप्ताङ्कसंयुतम्॥ ९॥
तदधः स्वस्ति विन्यस्य ततो गद्यं सुशोभनम्।
ततः श्रीशब्दरूपाणि पद्यान्यासक्रमं लिखेत्॥
भाषया संस्कृतेनैव कुशलं विलिखेत् सुधीः।
ततः शुभाशुभां वार्त्तां संस्कृतैः प्राकृतैस्तथा॥
ततः प्रमाणसन्देशं ततो वार्त्तां नियोजयेत्।
कीर्त्तिप्रीतियुतं पद्यं ततः किमधिकादिकम्॥
पत्रप्रेषणशोकञ्च अङ्गमासादिसंयुतम्।

पत्रं

मर्च्छेषामेव पत्रेषु लिखनञ्चैवमीरितम् ॥
सर्व्वेषामेव पत्राणां विधिं ज्ञात्वा लिखेत्तु यः ।
स्वदेशे कीर्त्तिमाप्नोति तथा देशान्तरेष्वपि ॥
एवं शास्त्रक्रमं ज्ञात्वा यो लिखेद्राजपत्रकम् ।
स राजमन्त्रिभिः सार्द्धं यशः प्राप्नोत्यनुत्तमम् ॥
शास्त्रमन्दर्भसज्ञात्वा यो लिखेद्राजपत्रकम् ।
स राजमन्त्रिभिः सार्द्धं दुर्य्यशो महदाप्नुयात्॥"*॥

अथ पत्रनयनक्रमः ।

"राजपत्रं नयेन्मूर्द्ध्नि ललाटे पात्रमन्त्रिणाम् ।
गुरुपत्रं नयेन्मूर्द्ध्नि ब्राह्मणानान्तथैव च ॥
यतिनञ्चासिनाञ्चैव स्वामिनश्च तथैव च ।
सादरेणैव यत्नेन तथा मूर्द्धनि धारयेत् ॥
भार्य्यायाः पुत्रस्य मित्रस्य हृदये धारयेत् सुधीः ।
प्रवीराणां कण्ठदेशे पत्रधारणमीरितम् ॥
एतेषाञ्चैव पत्राणामुक्तं धारणलक्षणम् ।
अन्येषामपि पत्राणां नियमो नाच दर्शितः ॥"

अथ पत्रपठनप्रकारः ।

"पत्रं धृत्वा नमस्कृत्य पूर्व्वाग्रं स्थापयेत् सुधीः ।
दक्षिणाग्रेण सदसि नृपाग्रे राजलेखकः ॥
पत्रं वितत्य सदसि द्विवारं मनसा पठेत् ।
स्फुटं पश्चात् प्रवक्तव्यमत्रोमो राजलेखकः ॥
रहसि श्रावयेत् पत्रं शुभं वा यदि वाशुभम् ।
पत्रं श्रुत्वा विदित्वार्थं सभायां श्रावयेत्ततः ॥
रहस्य-पत्रं रहसि नृपाग्रे श्रावयेद्बुधः ।
अशुभं नैव सदसि शुभं पत्रं नृपाज्ञया ॥
एवं क्रमेण पत्रार्थं श्रावयित्वा द्विजोत्तमः ।
नृपतेः सन्निधौ स्थित्वा नृपाज्ञामनुवर्त्तते ॥"

अथ पत्रचिह्नानि ।

"ऊर्द्धं षड़ङ्गुलं त्यक्त्वा वर्त्तुलं चन्द्रबिम्बवत् ।
कस्तूरीकुङ्कुमैः कुर्य्याद्राजपत्रं सुचिह्नितम् ॥
मन्त्रिणां कुङ्कुमेनैव पण्डितस्यैव चन्दनैः ।
क्षत्रियाणां चन्दनेनैव सिन्दूरेणैव स्वामिनः ॥
भार्य्यायाश्चाप्यलक्तेन चन्दनैः पितृपुत्रयोः ।
सन्न्यासिनां चन्दनेन यतीनां कुङ्कुमेन च ॥
रक्तचन्दनपङ्केन भृत्यस्य समुदीरितम् ।
शोणितेनैव शूद्राणां पत्रचिह्नं प्रकल्पयेत् ॥
एतेषाञ्चैव सर्व्वेषां यथायोग्यानुसारतः ।
पत्रस्योर्द्धे तु मतिमान् कुर्य्यात् चिह्नं सुवर्त्तुलम्॥"

अथ राजपत्रस्य कोणच्छेदनप्रकारः ।

"दक्षिणे पत्रकोणस्य अधस्तात् छेदयेत् सुधीः ।
एकाङ्गुलप्रमाणेन राजपत्रस्य चैव हि ॥"

अथ राजपत्रादेः पदन्यासः ।

"महाराजाधिराजश्च दानशौण्डं तथैव च ।
तथा सच्चरितं योज्यं कल्पवृक्षादिकं न्यसेत् ॥
यथायोग्यानुसारेण तथैव गुणभेदतः ।
राजपत्रेषु सर्व्वेषु पदन्यासक्रमं विदुः ॥"

अथ मन्त्रिपत्रस्य ।

"प्रवरं गुणभेदेन तथा सच्चरितादिकम् ।
विन्यस्य विलिखेत् प्राज्ञो मन्त्रिपत्रे पदक्रमम् ॥"

अथ पण्डितस्य ।

"संख्यावद्वन्दितपदं शास्त्रार्थनिपुणादिकम् ।
पण्डितायाञ्च पत्रेषु विलिखेद्वै पदक्रमम् ॥"

पत्रं

अथ गुरुपत्रस्य ।

"सांख्यसिद्धान्तनिपुणं सनमस्कारकं पदम् ।
विन्यस्य विलिखेत् प्राज्ञो गुरुपत्रपदक्रमम् ॥"

अथ स्वामिपत्रस्य ।

"प्रवर्य्यं सनमस्कारं प्रागप्रियादिकं पदम् ।
विन्यस्य विलिखेद्धीमान् स्वामिपत्रपदक्रमम् ॥"

अथ भार्य्यापत्रस्य ।

"प्राणप्रियापदं साध्वीं तथा सच्चरितादिकम् ।
भार्य्यापत्रं लिखेद्विद्वान् पदक्रममनुत्तमम् ॥"

अथ पुत्रस्य ।

"प्राणपुत्रपदं तद्वत्तथा सच्चरितादिकम् ।
आशीर्व्वचनसंयुक्तं पुत्रपत्रपदक्रमम् ॥"

अथ पितृपत्रस्य ।

"प्रभुवर्य्यं नमस्कारं तथा सच्चरितादिकम् ।
विन्यस्य विलिखेत् पुत्रः पितृपत्रपदक्रमम् ॥"

अथ सन्न्यासियतिपत्रस्य ।

"सर्व्ववाञ्छाविनिर्मुक्तं सर्व्वशास्त्रार्थपारगम् ।
सन्न्यासियतिपत्रेषु विलिखेच्च पदक्रमम् ॥"

सामान्यस्य ।

"सामान्यभृत्यशूद्राणां विनियोज्यासुकं प्रति ।
शूद्रावशेषितपदं छागतुल्यादिकं तथा ॥
एतेषामेव पत्रेषु यथायोग्यानुसारतः ।
विन्यस्य विलिखेत् प्राज्ञः पदक्रममनुत्तमम् ॥"

श्रीशब्दविन्याससंख्या यथा,—

"षड् गुरोः स्वामिनः पञ्च दे भृत्ये चतुरो रिपौ ।
श्रीशब्दानां त्रयं मित्रे एकैकं पुत्रभार्य्ययोः ॥"*॥

अथ राज्ञः प्रशस्तिः ।

स्वस्तिगीर्व्वाणचयचूड़ारत्नराजिरोचिश्चुम्बित-चन्द्रचूड़चरणनखेन्दुवृन्दचन्द्रिकासन्दोहाह्लाद-चतुरचेतस्कैरवरविषमसमरसङ्करत्प्रबलतर-तुरगखुरपुटपटलदलितभूपृष्ठोत्तिष्ठद्रजोविष्ठधूलि-धाराधूसरितसकलहरिदन्तरप्रचण्डभुजदण्ड-भ्राजमानखरतरासिविचासितप्रत्यर्थिपृथ्वीपति-सार्थप्रार्थितानुकम्पासुधासम्पातानवरतविद्वद्दा-रिद्र्यविद्रावणव्रतिवरराशिविश्राणनसमुपार्ज्जितो-र्ज्जितयशोमरालावलिकवलितवलिदधीचिसञ्चित-यशोण्डगालजालभूपालकुलतिलकश्रीयुतमहा-राजाधिराजेषु ॥ १ ॥

स्वस्तिप्रचण्डदोर्दण्डखण्डखण्डितारिमण्डल-सुखोन्मुक्तसुक्तावलीमण्डितसंग्रामाङ्गनरिङ्गमा-णानेकवारणवाहादिकायकाण्डवक्रतरनक्रचक्र-चक्रमणक्षुरतिक्रमणीयागमापतिप्रभृतयशश्चन्द्र-चन्द्रिकाद्योतविद्योतिताखिलनभश्चण्डलविविध-द्रविणार्पणसन्तोषितसूरिसन्दोहस्तूयमानावदात-कीर्त्तिनर्त्तकीनर्त्तनलीलालोलपलितगीतिधुरीणो-र्व्वश्यादिवेश्याजनसविलासगीयमानगुणश्रवणा-न्दोलिताखण्डश्रवणकुण्डलपरिस्फुरत्प्रसर्पितप्रताप-तपनोत्तापितारातितिसमध्यासितनिकुञ्जकुञ्ज-प्रस्तुतसौन्दर्य्यगाथाप्रमुदितश्रीमन्नारायणचरण-किङ्करश्रीयुतमहाराजदानशौण्डेषु ॥ २ ॥ *॥

अथ मन्त्रिप्रशस्तिः ।

स्वस्तिश्रीमत्समस्तसामन्तसेवकनिर्व्वाहकेषु।

पत्रं

कोषगोक्षविक्षपीवलगजवाजिगृहपरिवारहर्ष-हेतुनीतिसेतुरक्षणनिपुणेषु । अस्मद्विश्वासैक निकेतनेषु श्रीश्रीमन्त्रिप्रवीरेषु आशीराग्निर्वि दनकोऽयं वर्णभृतोऽत्रत्यं भद्यमावेदयन् तत्रत्यं भद्यमभ्याहतमनुदिनमनुचरणं पृच्छति स्म ॥ *॥

अथ गुरुप्रशस्तिः ।

स्वस्तिश्रीनारायणपदपाथोरुहनिःसरन्मक-रन्दमधुपायमानमानसेषु । विविधविद्याविद्योति-ताखिलगुणगणालङ्कृतवेदवेदाङ्गपारगस्वाश्रमो-चिताचारसम्पन्नपरमहंसपरिव्राजकाचार्य्यसेव्य-मानश्रीगोविन्दस्वरूपगुरुचरणारविन्देषु कोटि शः प्रणामाः ॥ * ॥

अथ भार्य्यायाः स्वामिप्रशस्तिः ।

स्वस्तिश्रीमदुद्दामप्रेमहेमभूषिलास्मदादिभक्त-जनेषु । कर्ण्णयोरधिष्ठानेषु । नेत्रयोरधिदेवतेषु । कामस्य परिणामेषु । चतुर्व्वर्गप्रदायकेषु । ममा-परूपेषु । श्रीमत्स्वामिचरणारविन्देषु । गोविन्द इवेन्दिरायाः शङ्कर इव गिरिजायाः महेन्द्र इव पुलोमजायाः प्रतिदिनं वर्द्धमाना समाराधना प्रणामपूर्व्वमास्ताम् ॥ * ॥

अथ भर्त्तुर्भार्य्याप्रशस्तिः ।

स्वस्तिश्रीमत्समरूपप्रेमपारलावण्यमूर्त्तौ प्रिय-तमायां नेत्रयुगस्य कनीनिकायामिव चन्द्रस्य चण्डरायामिव कमलाकरस्य कमलिन्यामिव पथिकस्य छायायामिव ग्रीष्मातुरस्य शीतलाम्बत-धारायामिव मम सप्रेम निवेदयन्ती पत्नी शुभाशीराशीन्निवेदयतु सर्व्वदा ॥ * ॥

अथ पुत्रस्य पितरं प्रति प्रशस्तिः ।

स्वस्तिश्रीमदभिनवशम्भवदचित्तचिन्तितस्वी-यानुरागानुरञ्जितानुग्रहीतस्वगुरुवर्गेषु । निज-चरणसरोज-रञ्जितपरागसंरक्तास्मदादिभाल-स्थलविशालभाग्यसम्भावुकेषु । श्रीयुतपितृचरण-सरोरुहेषु । अकिञ्चित्करकिङ्करस्य मम बहु-करसम्पुटस्यावनीपृष्ठलग्नाः साष्टाङ्गप्रणतयः सहस्रमनसं विज्ञाप्यञ्च ॥ * ॥

अथ पितुः पुत्रं प्रति प्रशस्तिः ।

स्वस्तिश्रीविश्वेश्वरचरणसरोरुहानुग्रहसमा-सादितातिविततानवद्यविद्याविलासपीयूषपर-म्परापराभावुकानुपममाधुरीधुरीणविविधगुणा-लङ्कृतनिजवंशावतंसकलविश्वासनिधानानिज-कुलपवित्रीकृतात्मप्रायेषु । श्रीयुतसुहृदाचारपरि-पूरितपुत्रेषु शुभाशिषां राशयः सन्तु विज्ञाप्यञ्च ॥ * ॥

अथ सन्न्यासियतिप्रशस्तिः ।

स्वस्तिश्रीमत्परमहंसपरिव्राजकाचार्य्यकरण-निपुणतापराङ्मुखेषु । विषमविषयदोषदर्शन-दूषितप्रपञ्चरचनाविभावेषु । वेदवेदान्तसांख्य-सिद्धान्तबद्धदेवप्रकृतिपुरुषविवेकज्ञानशीलेषु । संख्यावन्मुखवन्दितचरणारविन्दस्वाश्रमोचिता-चारपरिपालनपवित्रीकृतधरित्रीतलेषु । सकल-भूदेव-पूजित-श्रीयुत-गोस्वामि-चरणारविन्देषु ।

समावनीसंलग्नः साष्टाङ्गप्रणामसहस्रसमजसं त्वां नमो नारायणायेति मन्त्रेणाकलितमस्तु ॥ * ॥

अथ भृत्यप्रश्नस्तिः ।

ॐस्तस्तिभगवच्चरणपरायणसकलद्रविणाधिरक्तकगोमहिष्यादिप्रतिपालकनिखिलवंशानुसेवकवंशंवदासुकभृत्यं प्रति ॥ * ॥

अथारिप्रश्नस्तिः ।

स्तस्तिसमराङ्गनश्रुप्रतिभटवशःपरिपूरितसकलसामन्तराजधानीविनुम्भितवीरशब्दावधूर्णितनिजवंशानुरक्तकसततपरिचस्तशस्त्रणागतानुकं प्रति ॥ * ॥

अथ विवेकिनां प्रश्नस्तिः ।

स्तस्तिश्रीभगवत्पदपङ्कजपूजनोपचितपुण्यपुञ्जपवित्रीकृतान्तःकरणादिनिखिलासिनीविसरङ्गलिलनिलाक्लीमालाकलापशीलानुवन्धिनिरवधिवसुविश्राणनाधरीकृतसुरपुरभूसीरध्रेषु ।

स्तस्तिश्रीमत्परमेश्वरपादपाथोरुहाराधनचतुरचित्तासुरीकभूतेन्द्रारकवृन्दावनजनितासितयशःपटीरपङ्कपटलालङ्कृतदिगङ्गनागणस्तनतटप्रवलग्नतामौर्व्वेखर्व्वीकृतप्रत्यर्थिसार्थगर्व्वांकुरारारेषु ।" इति वररुचिकृतपत्रकौमुदी ॥

पत्रकं, क्ली, (पत्रमेव । पत्र + स्वार्थे कन् ।) वृक्षस्य पत्रम् । पत्रावली । इति शब्दरत्नावली । तेजपत्रम् । अस्य गुणः । कफवायुर्शोहलावारुचिनाशित्वम् । इति राजवल्लभः । शाखिशाखके पुं । इति रत्नमाला ॥

पत्रकाहला, स्त्री, (पत्रकाणां आहला शब्दः ।) पिञ्जोला । पत्रशब्दः । इति हारावली ॥

पत्रकृच्छ्रः, पुं, (पत्रैः पत्रक्वाथैः साध्यः कृच्छ्रोव्रतविशेषः ।) पर्णकृच्छ्रव्रतम् । यथा,—

"पर्णोदुम्बरराजीवविल्वपत्रकुशोदकैः ।
प्रत्येकं प्रत्यहं पीतैः पर्णकृच्छ्र उदाहृतः ॥"
इति याज्ञवल्क्यः ॥

"पलाशोदुम्बरारविन्द-श्रीवृक्ष-पर्णानामेकैकेन कल्पितमुष्णं प्रत्यहं पिबेत् कुशोदकञ्च एकत्रिंशदहानीति यत्राहसाध्यः पर्णकृच्छ्रः ।" इति मिताक्षरा ॥

पत्रगुणः, पुं, (पत्राणि गुणानि अस्य ।) त्रिकण्टः । इति शब्दचन्द्रिका । तेकाँटा सिज् इति भाषा ॥

पत्रघना, स्त्री, (पत्रमेव घनं यस्याः । पत्रशाकत्वात्तथात्वम् ।) सातलाशाकः । इति राजनिर्घण्टः ॥

पत्रङ्गं, क्ली, (पत्रमञ्च्यतेऽनेन । अञ्च + करणे घञ् । यद्वा पत्रवत् अङ्गं यस्य । शकन्ध्वादित्वात् साधु । पत्राङ्गम् । रक्तचन्दनम् । इति शब्दरत्नावली ।

पत्रभक्तारः, पुं, (पत्रेषु भक्तारस्तद्वत् शब्दो यस्य ।) पुरोटिः । इति त्रिकाण्डशेषः । रायभाटी इति भाषा ॥

पत्रभङ्गः, क्ली, (अग्रं प्राप्ते + अप् अग्रः । रूक्षं प्रतिगमनाय । पत्रैः अग्रे जीवनमिव यत्र ।) शूरपत्ररचना । यथाह हारावली ।

"शूराणां पत्ररचना पत्रभङ्गः परिकीर्त्तिता ॥"

पत्रतण्डुली, स्त्री, (पत्रेषु तण्डुलवत् विद्यतेऽस्याः । अर्श-आदित्वादच् । गौरादित्वात् ङीष् ।) वयतिक्ता । इति राजनिर्घण्टः ॥

पत्रतरुः, पुं, (पत्रप्रधानस्तरुः । शाकपार्थिववत् समासः ।) वृक्षखदिरः । इति राजनिर्घण्टः ॥

पत्रदारकः, पुं. (पत्रवत् दारयति वृक्षाणि इति । दृ + णिच् + ण्वुल् ।) क्रकचः । इति त्रिकाण्डशेषः । करात् इति भाषा ॥

पत्रनाड़िका. स्त्री, (पत्रस्य नाड़िका ।) पत्रशिरा । इति जटाधरः ।

पत्रपरशुः, पुं, (पत्रे धातुनिर्म्मितपत्राकारे परशुरिव । तच्छेदकत्वात्तथात्वम् ।) स्वर्णकारादीनां स्वर्णादिच्छेदिका । छेनी इति भाषा । तत्पर्य्यायः । व्रश्चनः २ । इत्यमरः । २।१०।३३॥

पत्रपर्णी ३ । इति शब्दरत्नावली ॥

पत्रपा, स्त्री, (अपत्रपणमिति । अप + त्रप् + अच् । निपातनात् अकारलोपः ।) अपत्रपा । लज्जा । इति शब्दरत्नावली ॥

पत्रपालः, पुं, (पत्रवत् पल्यते प्राप्यतेऽसौ । पत्र + पल गतौ + घञ् ।) आयता छुरिका । इति हेमचन्द्रः । ३ । ४४८ ॥

पत्रपाली, स्त्री, (पत्रवत् पालिरग्रभागो यस्याः । ङीप् ।) कर्त्तनी । इति हलायुधः ॥ काँची इति भाषा ।

पत्रपाशः, स्त्री. (पाशानां समूहः पाश्या । पत्रमिव पाश्या ।) स्वर्णादिरचितललाटाभरणम् । इत्यमरः । २।६।१०३ ॥ टीका इति भाषा ॥

पत्रपिण्याचिका, स्त्री, (पत्रैः पत्रेण वा पिण्याचीव । इवार्थे कन् ।) जलजा । टोका इति भाषा । तत्पर्य्यायः । खर्परः २ वारिजा ३ नड्डीखोलम् ४ । इति त्रिकाण्डशेषः ॥ मस्तके पलाशपत्रबन्धनम् । यदुक्तं

"बन्धः पलाशपत्राणां शीर्षे पत्रपिण्याचिका ॥"
इति हारावली॥

पत्रपुष्पः, पुं, (पत्रं पुष्पमिव यस्य ।) रक्ततुलसी । इति शब्दचन्द्रिका ॥

पत्रपुष्पकः, पुं, (पत्रपुष्प इव कायति प्रकाशते इति । कै + कः ।) भूर्जपत्रम् । इति शब्दमाला ॥

पत्रपुष्पा, स्त्री, (पत्रपुष्प + स्त्रियां टाप् ।) तुलसी । इति शब्दमाला ॥ क्षुद्रपत्रतुलसी । इति रत्नमाला ॥

पत्रबन्धः, पुं, (पत्राणां बन्धो बन्धनं यस्मिन् । पुष्परचनाकाले हि पत्राणां ग्रन्थनं स्यादतस्तथात्वम् ।) पुष्परचना । यथा, शब्दरत्नावल्याम् ।

"रचना च परिबन्धः पत्रबन्ध इति त्रयम् ।
पत्रभङ्गप्रसूनादिरचनायां निगद्यते ॥"

पत्रवालः, पुं, (पत्रवत् वल्यते वीयतेऽस्मिन् । वल रक्षणे + अधिकरणे घञ् । अग्रभागे पत्राक्षतेस्तथात्वम् ।) तुलाघटः । इति त्रिकाण्डशेषः । दाँड़ इति भाषा ॥

पत्रभङ्गः, पुं, (पत्राणां लिखितपत्राक्षतीनां भङ्गो विचिन्तता यत्र ।) स्तनकपोलादौ कस्तूरिकादिरचितपत्रावली । तत्पर्य्यायः । पत्रलेखा २ पत्रवल्ली ३ पत्रलता ४ पत्राङ्गुली ५ । इति हेमचन्द्रः ॥ पत्राङ्गुलिः ६ पत्रभङ्गी ७ पत्रकर्म ८ पत्रभङ्गिः ९ पत्रावली १० । इति शब्दरत्नावली ॥

पत्रभङ्गी, स्त्री, (पत्रभङ्ग + गौरादित्वात् ङीष् ।) पत्रभङ्गः । इति शब्दरत्नावली ॥

पत्रयौवनं, क्ली, (पत्राणां यौवनं यत्र ।) पल्लवम् । नूतनपत्रम् । यथा, जटाधरः ।

"नवोद्गते किशलयं किशलं पत्रयौवनम् ॥"

पत्ररथः, पुं,क्ली, (पत्रं पक्षो रथो यानमिव यस्य ।) पक्षी । इत्यमरः । २ । ५ । ३३ ॥ (यथा, भागवते । १ । ६ । १३ ।

"चिक्षेप चक्रं मधुकैटभाय
हतो मया तावपि कर्णमूले ।
विस्फूर्जथुर्यौ बलवत्सुरारी
सुपर्णपक्षानिलविक्षिप्तौ ॥")

पत्रलं, क्ली, द्रप्सम् । अग्रनदधि । इति हेमचन्द्रः ॥

पत्रलेखा, स्त्री, (पत्राणां कस्तूरिकादिरचितपत्राक्षतीनां लेखा रचना ।) पत्रभङ्गः । इत्यमरः ॥ २ । ६ । १२२ ॥ (यथा, रघुः ६ । ७२ ।

"महेन्द्रमास्थाय सहोत्तरूपं
यः संयति प्राप्तपिनाकलीलः ।
चकार बाणैरसुराङ्गनानां
गण्डस्थलीः प्रोषितपत्रलेखाः ॥")

पत्रवल्ली, स्त्री, (पत्राणां रचितपत्राक्षतीनां वल्ली लतेव ।) पत्रभङ्गः । इति हेमचन्द्रः ।३।३१६॥ (यथा. माघे । ८ । ५६ ।

"गण्डेषु स्फुटरत्नगर्भपत्रवल्ली
पर्य्याप्तं पवसि विभूषणं वधूनाम् ॥")

रुद्रजटा । पलाशी लता । इति राजनिर्घण्टः ॥ पर्णलता च ॥

पत्रवाहः, पुं, (पत्रेण पक्षच्छदेन उह्यते इति । वह + घञ् ।) बाणः । इति जटाधरः ॥ (पत्रं लिपिं वहतीति । वह + अण् ।) लिपिवाहके त्रि ॥

पत्रशाकः, पुं, (पत्रप्रधानः शाकः । शाकपार्थिववत् समासः ।) षड्विधशाकान्तर्गतपत्रजशाकः । यथाह राजवल्लभः ।

"पत्रं पुष्पं फलं नालं कन्दं संक्षेदजं तथा ।
शाकं षड्विधमुद्दिष्टं गुरु विद्याद्यथोत्तरम् ॥"

पत्रशिरा, स्त्री, (पत्रस्य शिरेव ।) पत्रभङ्गः । तत्पर्य्यायः । माटिः २ । इति धान्यवर्गः ॥ गर्भनाड़ी च ॥

पत्रश्रेणी, स्त्री, (पत्राणां श्रेणीव ।) द्रवन्ती । इति राजनिर्घण्टः ॥ पर्णपंक्तिश्च ॥

पत्रश्रेष्ठः, पुं, (पत्रं श्रेष्ठं यस्य ।) बिल्वः । इति राजनिर्घण्टः ॥

पत्रषट्पिः, पुं, (पत्राणां षट्पिरिव ।) कण्टकारी । इति त्रिकाण्डशेषः ॥

पत्रसिमं, क्ली, (पत्रेषु सिमं यस्मिन् दिने ।) सिम-दुर्दिनम् । इति त्रिकाण्डशेषः ॥

पत्राख्यं, क्ली, (पत्रमेव आख्या यस्य ।) तेजपत्रम् । इति शब्दचन्द्रिका ॥ तालीशपत्रम् । इति राजनिर्घण्टः ॥

पत्राङ्गं, क्ली, (पत्रमिव अङ्गं यस्य । यद्वा पत्रेषु अङ्गतीति । अगि गतौ + अच् ।) रक्तचन्दनम् । रक्तचन्दनवृक्षकाष्ठविशेषः । वकम् इति भाषा । इत्यमरः । २ । ६ । १३२ ॥ भूर्जेम् । मञ्जकम् । इति मेदिनी ॥

पत्राङ्गुलिः, स्त्री, (पत्रं अङ्गुलिरिव यत्र । यद्वा अङ्गुलिभिर्लिखितं रचितं पत्रं पत्राङ्गुलिरत्र इति परनिपातत्वात्तथात्वम् ।) पत्रभङ्गः । लवङ्गपोलादौ कस्तूरिकादिरचितपत्रावली । इत्यमरः । २ । ६ । १२२ ॥

पत्राङ्कनं, क्ली, (पत्रं लेखनपत्रमञ्च्यतेऽनेन । पत्र + अञ्च + करणे ल्युट् ।) मसी । इति शब्दरत्नावली ॥

पत्राढ्यं, क्ली, (पत्रैराढ्यम् ।) पिण्डतीनृलम् । पर्व्वतटजम् । इति राजनिर्घण्टः ॥

पत्राह्वं, क्ली, पत्रङ्गम् । इति राजनिर्घण्टः ॥

पत्रालुः, पुं, (पत्र + अस्त्यर्थे आलुः ।) कासालुः । इक्षुदर्भा । इति राजनिर्घण्टः ॥

पत्रावलिः, स्त्री, (पत्राणां पत्रान्तराणां आवलिः पङ्क्तिरिव रचना यस्याः ।) गैरिकम् । इति शब्दचन्द्रिका ॥ (पत्राणां आवलिः श्रेणी शाखिनां ।) पत्रश्रेणी च ॥

पत्रावली, स्त्री, (पत्रावलि + वा ङीप् ।) पत्रभङ्गः । इति शब्दरत्नावली ॥ नवदूर्वासम्पुटानकमधुलिप्तितयवचूर्णयुक्तनवात्वत्यपत्रादि । यथा,—
"चमायां निशि संधे तु मद्ये चाश्वत्थसंज्ञके ।
क्रमात् पत्रावली देयं मधुना यवचूर्णकम् ॥"
इति कैवल्यतन्त्रम् ॥
देवादिसन्निधौ वन्दिस्तवस्तुतिगीरेकतरावधारणार्थैकवाक्यतयालकोलीतिततत्तत्सन्दैकोटिलिखितपत्रसमूहश्च ॥

पत्रिका, स्त्री, (पत्री एव । स्वार्थे कन् ततो ह्रस्वः ।) पत्री । लिपिः । यथा, ज्योतिषे ।
"आदित्यादिग्रहाः सर्व्वे नक्षत्राणि च राशयः ।
दीर्घमायुः प्रकुर्व्वन्तु यस्येयं जन्मपत्रिका ॥"
(प्रशस्तपत्रं विद्यते यस्याः । पत्र + विद्यमानार्थे ठन् । कदल्यादिनवपत्रिका । यथा, दुर्गोत्सवपद्धतौ ।
"कदली दाड़िमी धान्यं हरिद्रा मानकं कचु ।
विल्वाशोकौ जयन्ती च विज्ञेया नवपत्रिका ॥")

पत्रिकाख्यः, पुं, (पत्रिका आख्या यस्य ।) कर्पूरभेदः । इति राजनिर्घण्टः ॥ पत्रिकानामके त्रि ॥

पत्रिणी, स्त्री, (पत्राणि सन्त्यस्याः । पत्र + इनिः । स्त्रियां ङीप् ।) मद्यम् । इति शब्दचन्द्रिका ॥

पत्री, [न्] पुं, (पत्रं पक्षो विद्यतेऽस्य । पत्र + इनिः ।) वायुः । (यथा, रघुः । ११ । ८३ ।
"इदं किं गतिमनेन पत्रिणा
क्षन्तिं लोकगुरुर्न ते मखार्त्थितम् ॥")
पक्षी । इत्यमरः । २ । ३ । १०५ ॥ (यथा, रघुः । ११ । २६ ।
"तं क्षुरप्रशकलीकृतं क्षती
पत्रिणां चमनदात्रमाददे ॥")

श्येनः । (यथा, नैषधे । १६ । १२ ।
"नभसि महसां क्षान्तक्षाङ्क्षप्रमापणपक्षिणा-
मिह विहरणैः श्येनस्यातां रवेरवधारयन् ॥"
"पक्षिणां श्येनाख्यपक्षिरूपाणाम् ।" इति तट्टीकायां नारायणः ॥ पत्राणि च्छदानि सन्त्यस्य । अत इनिः ।) वृक्षः । रथी । पर्व्वतः । इति मेदिनी ॥ तालः । श्वेतकिंशुकौ । गङ्गापत्री । पाची । इति राजनिर्घण्टः ॥ पत्रविशिष्टे, त्रि ॥

पत्री, स्त्री, (पत्र + स्त्रियां ङीप् ।) लिपिः । पत्रम् । यथा, ज्ञातके ।
"श्रीमत्पङ्कजिनीपतिः कुसुदिनीप्राणेश्वरो भूभवः
क्षाक्षाङ्किः सुरराजवन्दितपदो दैत्येन्द्रमन्त्री शुनिः ।
स्वर्भानुः शिखिनां गणो गणपतिर्व्वेश्मूलक्ष्मीधरा-
स्वां रचन्तु सदैव यस्य विमला पत्री मया लिख्यते ॥"

पत्रोपस्करः, पुं, (पत्रमेव उपस्कर उपकरणं यस्य ।) कासमर्दः । इति हारावली ॥

पत्रोर्णं, क्ली, (पत्रजा ऊर्णा साधनत्वेनास्त्यस्य । "अर्श आदिभ्योऽच् ।" ५ । २ । १२७ । इति अच् ।) वटलक्षचादिपत्रेषु क्रिमिभिरुर्णावाः क्षतत्वात् पत्रसम्बन्धिनी ऊर्णा अत्रेति । इति भरतः ॥ क्षौतकौषेयम् । इत्यमरः । २ । ६ । ११३ ॥ (यथा, महाभारते । १३ । १११ । १०३ ।
"पत्रोर्णं चोरयित्वा तु क्रकरत्वं नियच्छति ॥")

पत्रोर्ण्यः, पुं, (पत्रेषु ऊर्णा यस्य ।) श्योणाकवृक्षः । इत्यमरः । २ । ४ । ५६ ॥

पत्सलं, क्ली, (पतति गच्छति अस्मिन् । पत लृ गतौ + "पतेः रुच्च लः ।" उणां । ३ । ७४ । इति सरन् रस्य लच्च ।) पत्याः । इत्युणादिवृत्तिः ॥

पथ, इ क गत्याम् । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट् । इदित् ।) इ क, मन्थयति । इति दुर्गादासः ॥

पथ, इ ञ गत्याम् । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् । ञ्वलादिः ।) इ, अपधीत् । ञ, पाथः प्रथः । इति दुर्गादासः ॥

पथः, पुं, (पथति गच्छति अत्र । पथ गतौ + घञर्थे क । अधिकरणे कः ।) पन्थाः । इति त्रिकाण्डशेषः ॥

पथन्, [त्] पुं, पथः । इत्यमरटीकायां ॥ (पथति गच्छति । पथ गतौ + अदि ।) गमनकर्त्ता च ॥

पथिकः, त्रि, पन्थानं गच्छति यः । (पथिन् + "पथः ष्कन् ।" ५ । १ । ७५ । इति ष्कन् सो डीषर्थः ।) पथगन्ता । (यथा, भोः रामायणे । १ । ५ । १० ।
"नानापथिकदूतैश्च वणिग्भिश्चोपशोभिताम् ।
दैवतायतनैश्चैव विमानैरिव शोभिताम् ॥")
तत्पर्य्यायः । अध्वनीनः २ अध्वगः ३ अध्वन्यः ४ पान्थः ५ । इत्यमरः । २ । ८ । १० ॥ गन्तुः ६ यातुः ७ पथकः ८ याचिकः ९ यात्रिकः १० । इति शब्दरत्नावली ॥ पथिकः ११ । इत्युणादिकोषः ॥

पथिकवल्लतिः, स्त्री, (पथिकानां वल्लतिः समूहः ।) पथिकवल्लः । तत्पर्य्यायः । हारिः २ । इति त्रिकाण्डशेषः ॥ पथिकसंहतिः ३ । इति हारावली ॥

पथिका, स्त्री, (पथिक + टाप् ।) कपिलद्राक्षा । इति राजनिर्घण्टः ॥

पथिद्रुमः, पुं, (पथिः प्राप्तगुणो द्रुमः । बहुगुणवत्त्वात्तथात्वम् ।) खदिरवृक्षः । इति जटाधरः ॥ श्वेतखदिरः । इति राजनिर्घण्टः ॥

पथिलः, त्रि, (पथति गच्छतीति । पथ गतौ + "भिथिलादयश्च ।" उणां । १ । ५८ । इति निपातनात् साधुः ।) पथिकः । इत्युणादिकोषः ॥

पथिवाहकः, त्रि, (पन्थानं वाहयतीति । वह + णिच् + ण्वुल् ।) शाकुनिकः । निष्ठुरः । इति शब्दमाला ॥ भारवाहकश्च ॥

पथ्यं, त्रि, (पथिन् + "धर्म्मपथ्यर्थन्यायादनपेते ।" ४ । ४ । ९२ । इति यत् ।) चिकित्सादौ हितकारकम् । तत्पर्य्यायः । करणम् २ हितम् ३ । इति शब्दचन्द्रिका ॥ आत्मीयम् ४ आयुष्यम् ५ । सैन्धवे क्ली । इति राजनिर्घण्टः ॥

पथ्यः, पुं, (पथि साधुः । दिगादित्वात् यत् इनोलोपः ।) हरीतकीवृक्षः । यथा,—
"शिवायां वनतिक्तः स्यात् पथ्यः सुन्दरमालकौ ।"
इति शब्दमाला ॥

पथ्यशाकः, पुं, (पथ्यं हितकरं शाकं यस्य ।) तण्डुलीयशाकः । इति राजनिर्घण्टः ॥

पथ्या, स्त्री, (पथ्य + टाप् ।) हरीतकी । (यथा, हठयोगदीपिकायाम् । ३ । ३५ ।
"ततः सैन्धवपथ्याभ्यां चूर्णिताभ्यां प्रकर्षयेत् ।
पुनः सप्तदिने प्राप्ते रोममात्रं समुच्छिनेत् ॥")
क्षुद्रेलीका । चिर्भिटा । वन्ध्या कर्कोटकी । इति राजनिर्घण्टः ॥ (संसाररोगस्य पथ्यस्वरूपत्वात् गङ्गापि पथ्यस्वरूपा । यथा, काशीखण्डे २६ । ११२ ।
"पद्मनाभपदार्घेण प्रकृता पद्ममालिनी ।
परर्द्धिदा पुष्टिकरी पथ्या पूर्त्तिः प्रभावती ॥")

पथ्यादिगुग्गुलुः, पुं, (पथ्या आदिर्यस्य तथाविधो गुग्गुलुः ।) औषधविशेषः । यथा,—
"पथ्या विभीतामलकीफलानां
शतं क्रमेण द्विगुणाभिवृद्धम् ।
प्रस्थेन युक्तञ्च पलङ्कषायां
द्रोणे जले संस्थितमेकरात्रम् ॥
अर्द्धावशेषं क्षपितं कषायं
भाण्डे पचेत्तत् पुनरेव लोहे ।
अस्मिन् वङ्गेरवतार्य्य दद्यात्
द्रव्याणि चूर्ण्यं पलार्द्धकानि ॥
विड़ङ्गदन्तीत्रिफलागुड़ूची-
क्षव्याक्षित्रन्नागरकोषणानि ।
यष्टेश्चतुर्थस्य नरस्य शीघ्रं
हिमाम्बुपानानि च भोजनानि ॥
निषेव्यमाणो विनिहन्ति रोगान्
सप्तप्रसौ नूतनखञ्जताञ्च ।
क्षीणानतुल्यं जटराक्तिगुल्मं
पाण्डुत्वकण्डूत्वविवातरक्तम् ॥

पथ्यादिको गुग्गुलुरेष नाम्ना
ख्यातः क्षितावप्रमितप्रभावः।
बलेन नागेन समं मनुष्यं
जवेन कुर्यात्तुरगेण तुल्यम् ॥
आयुःप्रकर्षं विदधाति चक्षु-
र्बलं तथा पुष्टिकरो विषघ्नः।
क्षतस्य सन्धानकरो विशेषा-
द्रोगेषु शस्तः सकलेषु तज्ज्ञैः ॥"

इति भावप्रकाशः ॥

पथ्यापथ्यं, क्ली, (पथ्यं रोगिणां हितकरं अपथ्यं अशुभकरं द्वयोः समाहारः।) रोगाणां हिताहितकारकद्रव्याणि।

तत्र तरुणज्वरे पथ्यं यथा।

वमनम्। लङ्घनम्। कालोऽहः। यवागुः। स्वेदनम्। कटुतिक्तरसौ। एतानि पाचनानि ॥*॥

नवज्वरे अपथ्यं यथा।

स्नानम्। विरेकः। सुरतम्। कषायः। व्यायामः। अभ्यञ्जनम्। दिवानिद्रा। दुग्धम्। घृतम्। वेदलम्। आमिषम्। तक्रम्। सुरा। स्वादुगुरुद्रवद्रव्याणि। अन्नम्। प्रवातः। भ्रमणम्। कोपः ॥*॥

मध्यज्वरे पथ्यं यथा।

पुरातनषष्टिकः। पुरातनशालिः। वार्त्ताकुः। शोभाञ्जनम्। कारवेल्लः। वेत्राग्रम्। आषाढफलम्। पटोलम्। कर्कोटकम्। शूलकपोतिका। सुन्नसूरचणककुलत्थमुकुष्टकानां यूषः। पाठा। घण्टता। वास्तूकम्। तण्डुलीयः। जीवन्ती। काकमाची। सुपक्वानि द्राक्षाकपित्थदाडिमबेकङ्कतफलानि। लघूनि सात्म्यानि च भेषजानि ॥*॥

अथ पुराणज्वरे पथ्यम्।

विरेचनम्। छर्दनम्। अञ्जनम्। नस्यम्। धूमः। अनुवासनम्। सिराव्यधः। संशमनम्। प्रदेहः। अभ्यङ्गः। अवगाहः। शिशिरोपचारः। एणः। कुलिङ्गः। हरिणः। मयूरः। लावः। शशः। तित्तिरिः। कुक्कुटः। क्रौञ्चः। कुरङ्गः। पृषतः। चकोरः। कपिञ्जलः। वर्त्तकः। कालपुच्छः। गोक्षीरम्। अजाक्षीरम्। गोघृतम्। अजाघृतम्। हरीतकी। पर्वतनिर्झराम्भः। एरण्डतैलम्। सितचन्दनम्। ज्योत्स्ना। प्रियालिङ्गनम् ॥*॥

व्यायामञ्च अवायञ्च स्नानं चंक्रमणं तथा।
ज्वरमुक्तो न सेवेत यावन्नो बलवान् भवेत् ॥*॥

अथातिसाररोगे पथ्यम्।

वमनम्। लङ्घनम्। निद्रा। पुराणाः शालिषष्टिकाः। विलेपी। लाजमण्डः। मसूरगुवरीशूकशिमीबलाहरिणकपिञ्जलभवयूषः। सर्व्वे क्षुद्रमत्स्याः। शङ्खौ। खुड्डीशः। मधुरालिका। तैलम्। छागघृतक्षीरे। गोदधिघृते। गवाजयोर्दधिजं पयोजं वा नवनीतम्। नवरम्भापुष्पम्। नवरम्भाफलम्। क्षौद्रम्। जम्बुफलम्। भव्यम्। महार्द्रकम्। निम्बम्। शालुकम्। विकङ्कतम्। कपित्थम्। बकुलम्। विल्वम्। तिन्दुकम्। दाडिमद्वयम्। तिलकम्। कच्चटदलम्। चाङ्गेरी। विजया। अरुणा। जातीफलम्। अहिफेनम्। जीरकः। गिरिमल्लिका। कुसुम्बुरु। महानिम्बम्। सकलकषायरसः। दीपनानि लघून्यन्नपानानि। नाभेर्द्व्यङ्गुलतोऽधस्तात् तथा वंक्षास्थिमूले शस्त्रेण अर्द्धचन्द्रवदाहः ॥*॥

अतीसारे अपथ्यं यथा।

स्वेदः। अञ्जनम्। रुधिरमोक्षणम्। अम्बुपानम्। स्नानम्। अवायः। जागरणम्। धूमः। नस्यम्। अभ्यञ्जनम्। सकलवेगधारणम्। रूक्षाणि। असात्म्यभोजनम्। विरुद्धान्नम्। गोधूमः। माषः। यवः। वास्तूकम्। काकमाची। निष्पावः। कन्दः। मधुशिग्रुः। रसालम्। पूगम्। कुष्माण्डम्। तुम्बी। बदरम्। गुर्व्वन्नम्। गुरुपानम्। ताम्बूलम्। इक्षुः। गुडः। मद्यम्। उपोदिका। द्राक्षा। अम्लवेतसफलम्। लशुनम्। धात्री। दुग्धाम्बु। मस्तु। गृहवारि। नारिकेलम्। स्नेहनम्। शृङ्गमदः। अखिलपत्रशाकम्। क्षारः। सर्व्वाणि सराणि। पुनर्नवा। इर्वारुकम्। लवणम्। अम्लम् ॥*॥

अथ ग्रहणीरोगे पथ्यम्।

निद्रा। छर्दनम्। लङ्घनम्। पुरातनशालयः। पुरातनषष्टिकाः। लाजमण्डः। मसूरतुवरीमुद्गभवयूषः। निःस्नेहोद्धृतसारगव्यदधि। गवां छाग्या वा पयोजं नवनीतम्। छागघृतपयोदधीनि। तिलतैलम्। सुरा। माक्षिकम्। शृङ्गालूकम्। बकुलम्। दाडिमयुगम्। नव्यं भव्यम्। रम्भापुष्पम्। रम्भाफलम्। तरुणविल्वम्। शृङ्गाटकम्। चाङ्गेरी। विजया। कपित्थम्। कुटजम्। अजाजी। कर्कोटः। तक्रम्। कच्चटपल्लवम्। तिलकम्। जातीफलम्। जाम्बवम्। धन्याकम्। तिन्दुकम्। महानिम्बम्। अरुणा। अफेनम्। क्षौद्रात्। लावशूकतित्तिरिमांसयूषः। सर्व्वे क्षुद्रमत्स्याः। खड्डीशः। मधुरालिकामत्स्यः। खलिशः। सर्व्वकषायरसः। नाभेर्द्व्यङ्गुलतोऽधस्तात् तथा वंक्षास्थिमूले प्रज्वलितायसार्द्धचन्द्रवदाहः ॥*॥

अग्रहण्यामपथ्यं यथा।

रक्तसुतिः। जागरः। अम्बुपानम्। स्नानम्। स्त्री। वेगविधारणम्। नस्यम्। अञ्जनम्। स्वेदनम्। धूमपानम्। श्रमः। विरुद्धाशनम्। आतपः। गोधूमः। निष्पावः। कलायः। माषः। यवः। आर्द्रकम्। क्षुत्कम्। राजमाषः। उपोदिका। वास्तूकः। काकमाची। कुष्माण्डः। तुम्बी। मधुशिग्रुः। कन्दः। ताम्बूलम्। इक्षुः। बदरम्। रसालम्। इर्वारुकम्। पूगफलम्। रसोनम्। धान्याम्लम्। सौवीरम्। तुषोदकम्। दुग्धम्। गुडः। मस्तु। नारिकेलम्। पुनर्नवा। वार्ताकम्। वैशवम्। सर्व्वाणि पत्रशाकानि। दुग्धाम्बु। गोभूत्रम्। शृङ्गगवीभिः। क्षारम्। समस्तानि सराणि। द्राक्षा।

अम्लम्। लवणरसः। गुर्व्वन्नम्। गुरुपाकम्। सर्व्वे पूपाः ॥*॥

अथार्शसि पथ्यम्।

विरेचनम्। लेपनम्। अग्निमोक्षः। क्षारः। अग्निकर्म्म। शस्त्रकर्म्म। पुरातनलोहितशालयः। पुरातनषष्टिकाः। यवाः। कुलत्थाः। गोधाखड्गजोष्ट्रकूर्म्माविकलिङ्गाजखरैतुकीशूतरक्षुद्राशमृगालकाकानां मांसानि। स्वल्पमांसाः प्रसहाः। पटोलम्। पत्तूरः। रसोनकम्। वह्निः। पुनर्नवा। शूरणः। वास्तूकम्। जीवन्तिका। दन्तशठः। सुरा। चुटिः। वयःस्थाः। नवनीतम्। तक्रम्। कक्कोलम। धात्री। रुचकम्। कपित्थम्। औदुम्बराद्यपर्यायाणि। भल्लातकम्। सर्षपतैलम्। गोमूत्रम्। नीवीरम्। तुषोदकम्। वातापहान्नपानम्। अग्निवर्द्धकान्नपानम् ॥*॥

अर्शसि अपथ्यं यथा।

आनूपमामिषम्। मत्स्यः। पिण्याकः। दधि। पिष्टकम्। माषः। करीरम्। निष्पावः। बिल्वम्। तुम्बी। उपोदिका। पक्वान्नम। सर्व्वशालूकम्। विष्टम्भीनि। गुरूणि। आतपः। जलपानम्। वमनम्। वस्तिकर्म्म। नदीनां सलिलम्। विरुद्धानि सर्व्वाणि। पूर्व्वदिग्भववायुः। वेगरोधः। स्त्रियः। पृष्ठयानम्। उत्कटकासनम्। यथास्वं दोषलं द्रव्यम्। रक्तपित्तिनां यद्यत् पथ्यापथ्यं तत्तदपि रक्तार्शोरोगिणां विशेषतो विद्यात् ॥*॥

अथाग्निमान्द्याजीर्णादौ पथ्यम्।

शैत्यिके पूर्व्वं वमनम्। पैत्तिके मृदुरेचनम्। वातिके स्वेदनम्। यथावस्थं हितवस्तूनि। नानाप्रकारव्यायामः। दीप्तानि। लघूनि। बहुकालसमुत्पन्ना सुन्नलोहितशालयः। विलेपी। लाजमण्डः। सुन्नभव्यमण्डः। सुरा। एणः। वर्हीं। शशः। लावः। सर्व्वे क्षुद्रमत्स्याः। शालिषष्टिकम्। वेत्राग्रम्। वास्तूकम्। वास्तुशूलम्। लशुनम्। वृहत्कुष्माण्डम्। नवीनकदलीफलम्। शोभाञ्जनम्। पटोलम्। वार्त्ताकुः। नलदाम्बु। कर्कोटकम्। कारवेल्लम्। वार्ताकम्। महार्द्रकम्। प्रसारणी। काकमाची। चाङ्गेरी। सुनिषण्णकम्। धात्रीफलम्। मातुलुङ्गम्। दाडिमम्। यवः। पर्पटः। अम्लवेतसम्। जम्बीरम्। नागरङ्गम्। माक्षिकम्। नवनीतम्। घृतम्। तक्रम्। सौवीरकम्। तुषोदकम्। धान्याम्लम्। कटुतैलम्। रासठम्। लवणार्द्रकम्। यमानी। मरिचम्। मेथी। धान्यकम्। जीरकम्। दधि। ताम्बूलम्। तप्तसलिलम्। कटुरसः। तिक्तरसः ॥*॥

अग्निमान्द्याजीर्णादौ अपथ्यं यथा।

विरेचनम्। विण्मूत्रवायूनां वेगधारणम्। अतिरिक्ताशनम्। अध्यशनम्। जागरणम्। दिवसाशनम्। रक्तसुतिः। शयीथानम्। मत्स्यः। मांसम्। उपोदिका। जलपानम्। पिण्डकम्।

पथ्याप

शालिकम् । गव्यं माहिषम् । कौलिकम् । मौरटम् । सौरभम् । सैन्धवम् । विड्लवणम् । प्रयानकम् । तालाम्बिकम् । धान्याम्लम् । वेशवनम् । दुग्धारि । विल्वपानीयम् । अमलकापानीयम् । विष्कीरि । शर्करि ।

पञ्चमूलं बलां रास्नां स्थलजं वाप्यतर्पणम् ।
विल्वोत्पलकं पृश्निपर्णिहस्त्यामलिसारवत् ॥ ७ ॥

अथ त्रिदोषरोगे पथ्यम् ।

आलोचनम् । कायविरेचनम् । शिरोविरेचनम् । शुभ्रम् । कण्डूनानि द्रव्याणि । शरीरसर्वस्वा । पुरातनसैन्धवरक्तशालयः । षष्टीकम् । वेत्राग्रम् । रम्भोलम् । वास्तुकम् । कुलाग्रः । मन्दारकम् । सर्षपाः । नवीनमोचम् । कुष्ठतीक्ष्णम् । तिक्तानि शालीचदलानि । मौक्तिकसंज्ञम् । विल्वम् । पिचुमर्दपल्लवम् । पथ्या । तिलतैलम् । सर्षपतैलम् । सौवीरम् । सुक्तम् । सुषोदकम् । मद्य । पर्पेलिमलालम् । अरुष्करम् । नीलोत्पलम् । ताम्बूलम् । सुरा । रक्तशालयः । कौशुम्भधान्यपर्णानि । रामठम् । शाकः । अजमोदा । खदिरः । वल्गुलकम् । धर्मोष्णोदम् । सुरभी । यमानिका । सुराङ्गुरुनिम्बपर्वोद्भवाधारः । तिक्तकटुकषायरसाः ॥ ८ ॥

त्रिदोषरोगे अपथ्यं यथा ।

छर्दिः । तदुद्गविधारणम् । विरुद्धपानाशनम् । दिवानिद्रा । द्रवदध्यम् । पिष्टान्नम् । व्यतीर्णभोजनम् । कृतम् । माषः । दधि । पत्रशाकम् । सोम्यम् । पयः । व्यायः । मधुरस्नः ॥ ९ ॥

अथ वातरोगे पथ्यम् ।

छर्दिः । विरेचनम् । पुरातनयवगोधूमशालयः । सुशाकूर्मोमत्स्यानां वसाः । आर्द्रलवणम् । षष्टीकम् । शाल्यन्नम् । तरुणकदलीफलम् । शोभाञ्जनः । शूरः । मत्स्याण्डी । गुडूची । तण्डुलीयकम् । पुनर्नवा । द्रोणपुष्पी । वार्ताकः । रक्तपुनर्नवम् । पलाशम् । अभया । विल्वं । शिग्रुः । सर्षपः । मोरटम् । घार्वी । तक्रम् । घृतम् । तैलम् । सौवीरकम् । सुषोदकम् । नवनीतम् । मद्यसारः । एरण्डी । नागकेशरम् । यवक्षारः । [illegible] । दधिमण्डम् । कुटुम्बम् । चरण्डी । [illegible] मस्तके [illegible] । यथादोषमिदं पथ्यं वातरोगेषु भवेत् ॥ १० ॥

वातरोगे अपथ्यं यथा ।

रूक्षमुष्णः । धूमपानम् । वमिः । वेगधारणम् । रौक्षम् । मैथुनम् । शिग्रुः । मद्यशाकानि । रामठम् । माषः । क्षम्बुपानम् । विरेचारः । ताम्बूलम् । कर्पटः । सुरा । रूक्षान्नम् । दिवास्वप्नः । नीलपत्राणि । लवणानि । निशुण्ठिव्याघ्रीसर्षपाणां चूर्णम् । सर्वोत्कटानि । दुष्टाम्भः । विरुद्धाशनानि । गुर्वन्नम् । विदाहीनि ॥ ११ ॥

अथ रक्तपित्ते पथ्यम् ।

सर्वोत्तमे रक्तपित्ते छर्दिनाशे विरेचनम् । [illegible] । पुरातनाः षष्टिकशालिगोधूम-

प्रियङ्गुनीवारयवपटोलानि । मुद्गः । मसूरः । चणकः । तुवरी । सुकुरुकः । चिङ्गटः । वल्लिमत्स्यः । शशः । कपोतः । एरिः । रासः । लावः । शराणि । शरावतः । वर्तकः । वकः । उरभ्रः । कालपुच्छः । कपिञ्जलः । कषायवर्गः । गोदुग्धघृतम् । अजादुग्धघृतम् । महिषीघृतम् । पनसम् । पियालम् । रम्भाफलम् । कच्चटम् । तालीयः । पटोलम् । देवाह्वम् । महाद्रुकम् । पुराणकुष्माण्डफलम् । पक्वनालम् । तद्बीजशलम् । वार्ताकम् । त्रिवृत् । दाडिमम् । खर्जूरम् । द्राक्षा । मिसिः । नारिकेलम् । कर्कोटः । भल्लाटकम् । पौष्करम् । कपित्थम् । शालूकम् । पद्मोत्पलम् । भल्लिकाक्षम् । पिचुमर्दपत्रम् । तुम्बी । कलिङ्गम् । लाजशक्तवः । द्राक्षा । सिता । मालिकम् । रैवतकम् । शीतोदकम् । औद्भिदवारि । सेकः । अवगाहः । घृतधौतसर्पिः । अभ्यङ्गः । शिशिरप्रदेहः । हिमानिलः । चन्दनम् । इन्दुपादाः । मनोज्ञकूलविचित्रकथा । धारागृहम् । सुशीतं भूमिगृहम् । वैदूर्यमुक्तास्फटिकानां धारणम् । रम्भोत्पलाम्भोरुहपत्राणां शय्या । चौमाम्बरम् । सुशीतोपवनम् । प्रियङ्गुः । चन्दनरूषितानां वराङ्गनानामालिङ्गनम् । पद्माकरसरित्कूलचन्द्रोदयहिमवद्वरीसुशीतलगिरिनिर्झराणामालिङ्गनम् । श्रुतिप्रशस्तकीर्तनम् । प्रवीरवीरम् । हिमवालुका ॥ १२ ॥

रक्तपित्ते अपथ्यं यथा ।

आयासः । अध्वनिषेवणम् । रविकरः । तीक्ष्णानि कर्माणि । क्षौमः । वेगधारणम् । चपलता । रूक्षव्यायामानि । स्वेदः । अवसुतिः । धूमपानम् । सुरा । क्रोधः । कुलत्थः । गुडः । वार्ताकुः । तिलः । माषः । सर्षपः । दधि । क्षारः । लौहपात्रः । ताम्बूलम् । नलदाम्बु । मद्यम् । लवणम् । शिग्रुः । विरुद्धाशनम् । कटु । अम्लम् । लवणम् । विदाहिक्रियम् ॥ १३ ॥

अथ राजयक्ष्मणि पथ्यम् ।

घृतपक्वमरिचशर्करासंस्कृतलावतित्तिरिजरसः । दीप्ताग्निस्य चिरगोत्थे रक्तक्षुतिः । गोधूमः । मुद्गः । चणकः । अरुक्शालयः । छागानि मांसनवनीतघृतोद्धृतानि । क्रव्याद्मांसम् । वाह्लवा रसाः । मार्जारचटककिरलंपरिशोषितसुचूर्णितपक्वफलं नैल्वम् । रागाः । कास्वलिकः । गाढ्यः । वेशवारः । रक्तशालयः । मधुरस्नः । सौम्यगणोक्तानां फलानि । धात्री । गव्यूतम् । पौष्करम् । एरण्डम् । नारिकेलम् । शोभाञ्जनम् । वटजम् । नवनालफलम् । द्राक्षा । सिसिः । सान्द्रमद्यम् । सिताक्षौद्रघृतम् । छागौरभ्रमहिषीक्षीरम् । छागक्षयः । छागरक्तरसस्त्रीषु । मत्स्यविल्वा । विरविल्वी । सदिरा । रम्भा । तर्पणम् । शालसरः । सितक्षीरम् । क्षयघ्नानि । सुरभीरक्तपित्तघ्नानि । खाण्डम् । वेशवरघृतम् । क्षय-

गाढ्यम् । घृतम् । मद्यः । मारकक्षया । रक्तगन्धवाहः । गीतानि । लास्यम् । चन्द्रसखिः । विषर्षी । रक्तदर्शी सन्दर्शनम् । हिमदर्शनम् । मुक्तामणिप्रचुरभूषणधारणम् । सौमः । प्रदानम् । अमरपूजा । द्विजपूजा । वृद्धान्नपानम् ॥ १४ ॥

राजयक्ष्मणि अपथ्यं यथा ।

विरेचनम् । वेगधारणम् । श्रमः । स्त्री । स्वेदः । अञ्जनम् । प्रजागरः । माक्षिकमैरेयम् । रूक्षान्नपानम् । विषमाशनम् । ताम्बूलम् । कालिङ्गम् । कुलत्थम् । माषः । रसोनम् । वंशाङ्कुरः । रामठम् । अम्लम् । तिक्तम् । कषायः । सर्वकटु । पञ्चशाकः । क्षारः । विरुद्धाशनम् । शिग्रुः । कर्कोटकम् । विदाहिक्रियम् । क्षारकटिल्लकम् ॥ १५ ॥

अथ कासे पथ्यम् ।

स्वेदः । विरेचनम् । छर्दिः । धूमपानम् । रसाञ्जनम् । शालिः । यष्टिकः । गोधूमः । प्रियालः । यवः । कोद्रवः । व्याघ्रगुप्ता । मांसमूलकुलत्थानां रसाः । आम्बोदकम् । अनूपधन्वटैणभविविधमांसानि । सुरा । पुरातनसर्पिः । छागदुग्धम् । छागघृतम् । वास्तूकम् । वायसीशाकम् । वार्ताकुः । वालमूलकम् । कारवेल्लः । जाम्बवः । जीवन्ती । सुनिषण्णकम् । द्राक्षा । बिसी । मातुलुङ्गम् । पौष्करम् । वासकः । चुटिः । गोक्षुरम् । लशुनम् । पथ्या । ओषम् । उष्णोदकम् । मधु । लाजाः । दिवसनिद्रा । लघून्यन्नानि ॥ १६ ॥

कासे अपथ्यं यथा ।

वमिः । नस्यम् । अरुग्मोक्षः । आयासः । दन्तधर्षणम् । व्यातपः । दुष्टपवनः । रजः । मार्गनिषेवणम् । विष्मीनि । विदाहीनि । विरुद्धरूक्षाणि । शुष्कमूलोच्चावचशाकसमिश्रविधारणम् । मत्स्याः । कन्दः । सर्षपः । तर्पी । उर्णोदिका । दुग्धम् । दध्यन्नपानम् । विरुद्धाशनम् । गुरुशीताल्पभोजनम् ॥ १७ ॥

अथ श्वासे पथ्यम् ।

विरेचनम् । स्वेदनम् । धूमपानम् । प्रकाङ्क्षणम् । दिवास्वपनम् । पुरातनाः षष्टिकशालिगोधूमयवाः । प्रियः । अतिभुक् । तित्तिरिः । लावः । दकः । गजादयः । धन्वजाः । पर्पटिकः । पुरातनसर्पिः । अजादुग्धघृतम् । सुरा । मधु । तिदिण्डिका । वास्तूकम् । तण्डुलीयः । जीवन्तिका । सल्लकीशिखा । मद्यानम् । वार्ताकुः । रसोनम् । द्राक्षा । जम्बीरम् । बिल्वीफलम् । मातुलुङ्गम् । द्राक्षा । चुटिः । पौष्करम् । उष्णवारि । कटुत्रयम् । गोक्षुरम् । कफानिलघ्नान्यन्नपानभेषजानि । पथ्यः प्रदेहाः पार्श्वस्थाः [illegible] । यथादोषमिदं पथ्यं श्वासरोगेषु भवेत् ॥ १८ ॥

अथ कासे अपथ्यं यथा ।

सूर्योदयास्तमितकालयोः शीतः । दन्तम् ।

वस्तिः । दन्तकाष्ठम् । श्रमः । अध्वा । भारः । रेणुः । सूर्यकिरणः । विरुग्भीनि । ग्राम्यधर्म्माः । विदाहीनि । आनूपमामिषम् । निष्पावः । श्लेष्मकारीणि । माषः । रक्तस्रावः । पूर्ववातान्नपानम् । मेषीघृतदुग्धम् । दुष्टजलम् । मत्स्यः । कन्दः । सर्षपः । रूक्षशीतगुर्व्वन्नपानम् ॥ * ॥

अथ हिक्कायां पथ्यम् ।

स्वेदनम् । वमनम् । नस्यम् । धूमपानम् । विरेचनम् । निद्रा । स्निग्धानि लघून्यन्नानि । लवणानि । जीर्णकुलत्थगोधूमशालिषष्टिकयवाः । एणतित्तिरिलावाद्या जांङ्गला मृगपक्षिणः । पञ्चकपित्थम् । लशुनम् । पटोलम् । बालमूलकम् । पौष्करम् । कृष्णतुलसी । मदिरा । नलदाम्बु । उष्णोदकम् । मातुलुङ्गम् । माक्षिकम् । सुरभिजलम् । वातश्लेष्महराण्यन्नपानानि । शीतानुसेकः । सहसा त्रासः । विस्मापनम् । भयम् । क्रोधः । हर्षः । प्रियोद्वेगः । प्राणायामनिषेवणम् । दग्धसिक्तस्नेहान्नाशनम् । कूर्चे धाराजलार्पणम् । नाभ्यूर्द्धपीड़नम् । पायूपस्थनाभेर्व्रणेङ्गुलादूर्द्ध्वं च दीपदग्धहरिद्रया दाहः ॥ * ॥

हिक्कायां अपथ्यं यथा ।

वातमूत्रोच्चारकासशुक्रवेगधारणम् । रजः । अनिलः । आतपः । विरुद्धान्नम् । विरुग्भीनि । विदाहीनि । रूक्षाणि । कफदानि । निष्पावः । पिण्याकः । माषः । पिण्याकः । आनूपमामिषम् । अविदग्धम् । दन्तकाष्ठम् । वस्तिः । मत्स्यः । नस्यम् । अम्लम् । तुम्बी । कन्दः । तैलभृष्टम् । उपोदिका । गुरुशीतान्नपानम् ॥ * ॥

अथ स्वरभेदे पथ्यम् ।

स्वेदः । वस्तिः । धूमपानम् । विरेकः । कवलग्रहः । नस्यम् । भालसिरावेधः । यवः । लोहितशालिः । हंसाण्डी । ताम्रचूड़कैकिनां मांसरसाः । सुरा । गोकण्टकः । काकमाची । जीवन्ती । बालमूलकम् । द्राक्षा । पथ्या । मातुलुङ्गम् । लशुनम् । लवणार्द्रकम् । ताम्बूलम् । मरिचम् । सर्षपः ॥ * ॥

स्वरभेदे अपथ्यम् ।

आमकपित्थम् । वल्लुलम् । शालूकम् । जाम्बवम् । तिन्दुकम् । कषायः । वमिः । स्वप्नः । व्यजस्थनम् । अनुपानम् ॥ * ॥

अथोरुस्तंभे पथ्यम् ।

वस्तिः । विरेकः । यथाबलं वमनम् । धूमोपसेवा । कवड़ग्रहः । तिक्तकाष्ठेन दन्तधावनम् । चित्रान्नपानम् । गोधूमः । मुद्गाः । लोहितशालयः । षष्टिकाः । वराहच्छागशशैणानां मांसम् । चैत्रः । भल्लातकम् । मधुरालिका । इक्षिशः । प्रोष्ठी । खलेशयः । कवची । रोहितः । कर्कारुः । वेत्राग्रम् । नवीनमूलकम् । वार्त्ताकुः । शोभाञ्जनम् । मोचम् । दाड़िमम् । भव्यम् । पटोलम् । रुचकम् । घृतम् । पयः । बालतालम् । रसोनम् । शूरणम् । द्राक्षा । रसालकम् । नलदाम्बु । काञ्जिकम् । मद्यम् । रसाला ।

दधि । तक्रम् । आर्द्रकम् । कक्कोलम् । खर्ज्जूरम् । पियालम् । तिन्दुकम् । पक्वकपित्थम् । बदरम् । विकङ्कतम् । तालास्थिमज्जा । हिमवालुका । सिता । पथ्या । यमानी । मरिचम् । रामठम् । स्वादुम्लतिक्तानि । देहमार्জ্জना ॥ * ॥

अरोचके अपथ्यम् ।

कासोद्गारक्षुधानिद्रावमीनां वेगधारणम् । अच्छान्नम् । अरुड्मोक्षः । क्रोधः । लोभः । भयम् । शोकः । दुर्गन्धः । सूर्य्यसेवा ॥ *

अथ छर्द्दौ पथ्यम् ।

विरेचनम् । छर्द्दनम् । लङ्घनम् । स्वागम् । मन्थाः । लाजमण्डः । पुरातनाः षष्टिकशालिमुद्गाः । कलायः । गोधूमः । यवः । मधु । मृगाद्विसक्तित्तिरिलावकाद्याः । जाङ्गलमृगपक्षिणः । मनोज्ञनानारसगन्धरूपा रसाः । षाड़वा यूषाः । रागाः । खड़ाः । काम्बलिकाः । सुरा । वैचारयम् । कुसुम्भरु । नारिकेलम् । पञ्चेलिमानि जम्बीरधात्रीमरिचकोलद्राक्षाकपित्थानि । हरीतकी । दाड़िमम् । बीजपूरम् । जातीफलम् । बालकम् । निम्बम् । वासा । सिता । घृताक्ता । करिकेशरम् । हितमनःप्रीतिकरभक्ष्याः । भुक्तस्य वक्त्रे शिशिरान्वसेकः । कस्तूरिका । चन्दनम् । इन्दुकिरणः । मनोज्ञगन्धान्यनुलेपनानि । सुगन्धिपुष्पयानफलानि । स्वमनोऽनुकूलरूपरसगन्धस्पर्शशब्दाः । नाभेरधियोपरिष्टाद्दाहः ॥ *

छर्द्दौ अपथ्यम् ।

नस्यम् । वस्तिः । स्वेदनम् । स्नेहपानम् । रक्तस्रावः । दन्तकाष्ठम् । द्रवान्नम् । बीभत्सदर्शनम् । भीतिः । उद्वेगः । उष्णस्निग्धासात्म्याहृद्यवैरोधिकान्नम् । रम्भा । शिग्रुः । कोविदारी । मधूकम् । चिञ्चा । स्वभ्रेला । सर्षपः । देवताली । व्यायामः । क्षुत्क्षिका । अञ्जनम् ॥ *॥

अथ तृष्णायां पथ्यम् ।

शोधनम् । वमनम् । निद्रा । स्नानम् । कवलधारणम् । दीपदग्धहरिद्रया जिह्वाधःशिरोर्द्दाहः । कोद्रवाः । शालयः । पेयाः । विलेपी । लाजमुक्तवः । अन्नमण्डः । धन्वरसः । शर्करा । रागः । षाड़वः । भृष्टमुद्गमसूरचणकतरसः । रम्भापुष्पम् । तैलभृष्टम् । द्राक्षा । पर्पटपल्लवः । कपित्थम् । कोलम् । लाजिका । कृष्णाखण्डकम् । उपोदिका । खर्ज्जूरम् । दाड़िमम् । धात्री । कर्कटी । नलदाम्बु । जम्बीरम् । कारमर्द्दम् । बीजपूरम् । गवां पयः । मधूकपुष्पम् । क्षीवेरम् । तिक्तानि । मधुराणि । बालतालान्वु । शीतास्बु । पयःपेटी । प्रपानकम् । माक्षिकम् । सरसीतोयम् । घृताक्ता । नागकेशरम् । वला । जातीफलम् । पथ्या । कुसुम्भरु । टङ्कणम् । घनसारः । गन्धसारः । कौसुदी । शिशिरानिलः । चन्दनार्द्रप्रियाश्लेषः । रत्नाभरणधारणम् । हिमानुलेपनम् ॥ * ॥

तृष्णायां अपथ्यम् ।

स्नेहः । अञ्जनम् । स्वेदः । धूमपानम् । व्यायामः । नस्यम् । आतपः । दन्तकाष्ठम् । गुर्व्वन्नम् ।

अम्लम् । लवणम् । कषायः । कटुः । क्षिप्रः । दुष्टजलम् । तीक्ष्णम् ॥ * ॥

अथ मूर्च्छायां पथ्यम् ।

सेकः । अवगाहः । मणिः । हारः । शीताः । प्रदेहाः । व्यजनानिलः । शीतानि गन्धवन्ति पानानि । धाराग्रहम् । शीतमरीचिरोचिः । धूमः । अञ्जनम् । लावणम् । असृग्मोक्षः । दाहः । स्त्रीपरितोदनम् । लोष्ठां कक्षानाञ्च लुञ्चनम् । नखान्तपीड़ा । दशनोपदंशः । नासासुखद्वारमरुन्निरोधः । विरेचनम् । छर्द्दनम् । लङ्घनम् । क्रोधः । भयम् । दुःखकरी शय्या । विचित्रा मनोहराः कथाः । छाया । नभोऽम्भः । घृतधौतसर्पिः । मृदूनि । तिक्तानि । लाजमण्डः । जीर्णयवलोहितशालयः । कौम्भं हविः । मुद्गयूषः । सतीनयूषः । घन्वोद्भवा मांसरसाः । रागाः । षाड़वाः । गव्यपयः । सिता । पुराणकुष्माण्डम् । पटोलम् । मोचम् । हरीतकी । दाड़िमम् । नारिकेलम् । मधूकपुष्पम् । तण्डुलीयः । तुण्डीकम् । लघून्यन्नानि । प्रनीरनीरम् । सितचन्दनम् । कर्पूरनीरम् । हिमवालुका । अलुप्तशब्दः । अक्षुतदर्शनम् । उत्कटगीतम् । उत्कटवाद्यम् । श्रमः । स्तुतिः । चिन्तनम् । आत्मबोधः । धैर्य्यम् ॥ * ॥

मूर्च्छायामपथ्यं यथा ।

ताम्बूलम् । पत्रशाकम् । अवायः । स्वेदनम् । कटुः । लङ्घनद्रव्यैर्वैगरोधः । तक्रम् ॥ * ॥

अथ मदात्यये पथ्यम् ।

संशोधनम् । संशमनम् । स्वपनम् । लङ्घनम् । श्रमः । सुरासम्भूतपन्नशालिषष्टिकयवमुद्गमाषगोधूमसतीलाः । रागः । षाड़वः । एणतित्तिरिलावाजदक्षवर्हिशशानामामिषम् । वेशवारः । विचित्रान्नम् । हृद्यमद्यम् । पयः । सिता । तण्डुलीयः । पटोलम् । मातुलुङ्गम् । परूषकम् । खर्ज्जूरम् । दाड़िमम् । धात्री । नारिकेलम् । गोस्तनी । पुराणसर्पिः । कर्पूरम् । प्रनीरम् । शिशिरानिलः । धाराग्रहम् । चन्द्रपादाः । मद्यपाः । मित्रसङ्गमः । चौमाम्बरम् । प्रियाश्लेषः । उद्गतगीतवादित्रम् । शीताम्बु । चन्दनम् । स्नानम् ॥ * ॥

मदात्यये अपथ्यं यथा ।

स्वेदः । अञ्जनम् । धूमपानम् । लावणम् । दन्तघर्षणम् । ताम्बूलम् ॥ * ॥

अथ दाहे पथ्यम् ।

शालयः । षष्टिकाः । मुद्गाः । मसूराः । चणकाः । यवाः । घन्वमांसरसाः । लाजमण्डः । लाजमुक्तवः । सिता । घृतधौतघृतम् । दुग्धम् । पयोभवनवनीतम् । कुष्माण्डम् । कर्कटी । मोचम् । प्रगल्भम् । स्वादुदाड़िमम् । पटोलम् । पर्पटम् । द्राक्षा । धात्रीफलम् । परूषकम् । शिग्रुः । तुण्डी । पयःपेटी । खर्ज्जूरम् । धान्यकम् । सिसिः । बालतालम् । प्रियालम् । कुष्माण्डकम् । कपित्थकम् । मधूकपुष्पम् । क्षीवेरम् ।

पथ्यापथ्य

पथ्या। नवान्नानि तिक्तानि। शीताः प्रदेहाः। भूवेश्म। सेकः। अभ्यङ्गः। अवगाहनम्। पद्मोत्पलदलशीतानां शय्या। शीतलकाननम्। विचित्रा कथा। गीतानि। शिशिरः। मधुभाषणम्। उशीरचन्दनालेपः। शीतांशु। शिशिरानिलः। धाराग्रहम्। प्रियास्पर्शः। प्रनीरम्। हिमवालुका। सुधांशुरश्मयः। स्नानम्। मणयः। मधुररसः॥ * ॥

दाहे अपथ्यम्।

विरुद्धान्नपानानि। क्रोधः। वेगधारणम्। शस्त्राभ्यासनम्। अध्वा। क्षारम्। पित्तकराणि। व्यायामः। आतपः। तक्रम्। ताम्बूलम्। मधु। रामठम्। अवायः। कटुः। तिक्तः। लवणः॥ * ॥

अधोमादे भूतोन्मादे च पथ्यम्।

मदात्यये पूर्वं स्वेदः। पित्तोद्भवे पूर्वं विरेकः। कफोद्भवे पूर्वं वमनम्। ततःपरं यथास्वविधिः। नस्यम्। अन्तर्वनम्। ताडनम्। अञ्जनम्। आश्वासनम्। त्रासनम्। बन्धनम्। भयम्। हर्षयत्। दानम्। धूपः। दमः। विस्मरणम्। प्रदेहः। शिरावधः। संभ्रमनम्। सेकः। आश्चर्यकर्माणि। धूमपानम्। धैर्यम्। सत्यम्। आत्मनिवेदनम्। अभ्यङ्गनम्। स्वापनम्। व्यासनम्। निद्रा। सुशीतान्यनुलेपनानि। गोधूमः। मुद्गः। अरण्यशालयः। धारोष्णदुग्धम्। घृतधौतसर्पिः। नवीनघृतम्। पुरातनघृतम्। कूर्मामिषम्। धन्वरसः। रसालम्। पुराणकूष्माण्डफलम्। पटोलम्। ब्रह्मीदलम्। वास्तूकम्। तण्डुलीयः। खराश्वमूत्रम्। गोगोमांसु। पथ्या। सुवर्णचूर्णम्। नारिकेलम्। द्राक्षा। कपित्थम्। पनसम्॥ * ॥

उन्मादे अपथ्यम्।

मद्यम्। विरुद्धाशनम्। उष्णभोजनम्। निद्रानुरूपाङ्गसंवाधारणम्। अवायः। व्यायामः। कठिलकम्। पद्मशाकम्। तिक्तानि। बिल्वं॥ * ॥

व्यापस्मारे पथ्यम्।

वातोद्भवे पूर्वं वस्तिः। पैत्तिके विरेचनम्। श्लैष्मिके वमनम्। परं धूमनम्। अञ्जनम्। नस्यम्। शिरावधः। दानम्। त्रासनम्। बन्धनम्। भयम्। तर्जनम्। ताडनम्। हर्षः। धूमपानम्। विस्मयः। धैर्यम्। आत्मादिविज्ञानम्। स्नानम्। अभ्यङ्गनम्। लोहितशालयः। मुद्गाः। गोधूमाः। प्रतनं घृतम्। कूर्मामिषम्। धन्वरसः। दुग्धम्। ब्रह्मीदलम्। वचा। पटोलम्। कृष्णकूष्माण्डम्। वास्तूकम्। स्वादुदाडिमम्। गोमांसम्। पयःपेटी। द्राक्षा। धात्री। पद्मकम्। तैलम्। खराश्वमूत्रम्। गोगोमांसु। हरीतकी॥ * ॥

व्यपस्मारे अपथ्यम्।

चिन्ता। शोकभयम्। क्रोधः। अशुचीन्यन्नपानानि। मद्यम्। मत्स्यः। विरुद्धान्नम्। तीक्ष्णोष्णगुरुभोजनम्। व्यतिव्यवायः। व्यायामः। पूजाव्यतिक्रमः। पद्मशाकानि। बिल्वं। व्याघाटफलम्। दुष्टानिद्राक्षुधावेगाः॥ * ॥

अथ वातरोगे पथ्यम्।

अभ्यङ्गः। मर्दनम्। वस्तिः। स्नेहः। स्वेदः। अवगाहनम्। संवाहनम्। संभ्रमनम्। प्रावृतिः। वातवर्षनम्। अग्निकर्म। उपनाहः। भूशय्या। स्नानम्। आसनम्। तैलद्रोणी। शिरोवस्तिः। शयनम्। नस्यम्। आतपः। सन्तपनम्। दंशनम्। किलाटः। दधि। कूर्चिका। सर्पिः। तैलम्। वसा। मज्जा। स्वाद्वम्लवर्गो रसाः। नवीनतिलगोधूममाषाः। सम्यक्संरोधितशालिषष्टिकाः। कुलत्थरसः। सुरा। छाग्या गोरश्वतरोष्ट्रराजभल्लागलादयः। आनूपाः कोलमहिषवराहखड्गिगवादयः। औदका हंसकादम्बचक्रमद्गुरकादयः। विलेशया भेकगोधानकूर्मशशविदादयः। जाङ्गलाः चटककुक्कुटवर्हितित्तिरयः। शिलिन्द्रः। पर्वतः। नक्रः। गर्गरः। कवयी। इल्लिशः। एरण्डः। चुलुकी। कूर्मः। शिशुमारः। तिमिङ्गिलः। रोहितः। मद्गुरः। शङ्खी। वल्मीं। खड्गोशः। एते भक्षाः। घटोलम्। शिग्रु। वार्ताकुः। लशुनम्। दाडिमद्वयम्। पक्वतालम्। रसालम्। नलदाम्बु। मस्त्यकम्। जम्बीरम्। बदरम्। द्राक्षा। नागरङ्गम्। मधूकजम्। प्रसारणी। गोक्षुरकः। शुक्राची। पारिभद्रकः। पेयांसि। पयःपेटी। रक्ततैलम्। गवां चलम्। मत्स्यण्डिका। ताम्बूलम्। धान्याम्लम्। निम्बिडीफलम्। स्निग्धोष्णभोज्यानि। स्निग्धोष्णानुलेपनम्। आमाशयसुपागते विरेचनम्। पक्वाशयस्थे तथा मांसस्थे स्निग्धविरेचनम्। प्रत्याधानाभ्यानसङ्गे वर्तिः। लङ्घनं दीपनम्। अष्ठीलास्थे गुल्मविधिः। शुक्रस्थे क्षयचिकित्सा। त्वङ्मांसासृक्क्षिराप्राप्ते रक्तमोक्षणम्॥ * ॥

वातरोगे अपथ्यम्।

चिन्ता। प्रजागरः। वेगधारणम्। क्षुद्दिः। श्रमः। व्यवायः। चणकः। कलायः। नीवारकङ्गुवरकोरदूषश्यामाकचूर्णम्। कुरुविन्दः। क्षुद्धान्यानि। राजमाषः। मुद्गः। तडागसरिदम्बु। करीरम्। कण्टु। कर्कोटः। तलकम्। कसुकम्। कण्डालम्। निष्पावबीजम्। तालफलास्थिमज्जा। शालूकम्। तिन्दुकम्। कठिल्लकम्। बालतालम्। बिल्वं। पद्मशाकम्। उडुम्बरम्। शीतांशु। रासभपयः। विरुद्धमन्नम्। क्षारः। शुष्कपललम्। क्षतजमुतिः। क्षौद्रम्। कषायकटुतिक्तरसाः। अवायः। हस्त्यश्वयानम्। चंक्रमणम्। खड्गः। व्यायामनिरोहितवतोऽपि विशेषात् स्नानम्। प्रदुष्टसलिलम्। दन्तधावनम्॥ * ॥

अथ वाते गुग्गुलुसेविनां पथ्यम्।

क्षीरम्। मांसरसाः। यूषाः। कलमादिशालयः। यवगोधूममाषाः॥ * ॥

पथ्यापथ्य

गुग्गुलावपथ्यम्।

व्यायामः। व्यातपः। रूक्षम्। स्नानम्। वह्निभाषणम्। प्रवातः। मैथुनम्। यानम्॥ * ॥

अथ वातरक्ते पथ्यम्।

उत्तानेऽभ्यङ्गनम् सेकः सोपनाहः प्रलेपनम्। गम्भीरे स्नेहपानं आस्थापनं विरेचनम्। सर्वत्र रूक्षीजलौकोऽग्न्यालाबुभिरनुमतः। घृतधौतघृताभ्यङ्गः। मेषीदुग्धावसेचनम्। यवः। षष्टिकः। नीवारः। कलमः। अरण्यशालिः। गोधूमः। चणकः। मुद्गः। तुवरी। सुकुलकः। अजाजामहिषीगवां पयः। लावः। तित्तिरिः। सर्पद्विट्। ताम्रचूडादिः। एते विष्किराः। प्रतुदाः शुकदात्यूहकपोतचटकादयः। उपोदिका। काकमाची। वेत्राग्रम्। सुनिषण्णकम्। वास्तूकम्। कारवेल्लम्। तण्डुलीयः। प्रसारणी। पत्तूरः। वृन्ताकुष्माण्डम्। सर्पिः। नन्याकपालवम्। पटोलम्। रक्ततैलम्। यष्टीका। श्वेतशर्करा। नवनीतम्। सोमवल्ली। कस्तूरी। सितचन्दनम्। शिंशपागुरुदेवदारुसरलस्नेहमर्दनम। तिक्तम्॥ * ॥

वातरक्ते अपथ्यम्।

दिवास्वप्नः। अग्निसन्तापः। व्यायामः। व्यातपः। मैथुनम्। माषः। कुलत्थः। निष्पावः। कलायः। क्षारसेवनम्। अक्षुद्यानूपमांसानि। विरुद्धानि। दध्नीनि। इक्षुः। मूलकम्। मद्यम्। पिण्याकम्। अम्लम। काञ्जिकम्। कटु। उष्णम्। गुरु। अभिष्यन्दि। लवणम्। शुक्तवः॥ * ॥

व्यायोरक्तस्रवे पथ्यम्।

सर्वो रूक्षविधिः। स्वेदः। कोद्रवः। रक्तशालिः। यवः। कुलत्थः। श्यामाकः। पुरातनोद्दालाः। शीताङ्गनम्। कारवेल्लम्। पटोलम्। लशुनम्। सुनिषण्णम्। काकमाची। वेत्राग्रम्। निम्बपल्लवम्। पत्तूरः। वास्तूकम्। पथ्या। वार्ताकुः। तप्तवारि। सम्यक्शृतकम्। पिण्याकम्। तक्रम्। अरिष्टम्। मधु। कटुः। तिक्तः। कषायः। क्षीरसेवा। गवां चलम्। यथाशक्तिव्यायामः। स्थूलस्थाक्रमयम्। अक्षुद्यदे सन्तरणम्। नदीषु प्रतिस्रोतः सन्तरणम्। श्लेष्मावहरणम्। अमारुतकोपनम्॥ * ॥

अरक्तस्रवे अपथ्यम्।

गुरुशीतद्रवस्निग्धविरुद्धासात्म्यभोजनम्। विरेचनम्। स्नेहनम्। वमनम्। रक्तमोक्षणम्। वस्तिः॥ * ॥

व्यायामवाते पथ्यम्।

रूक्षस्वेदः। लङ्घनम्। स्नेहपानम्। वस्तिः। लेपः। रेचनम्। मायुवर्त्तिः। व्यक्तोत्पन्नशालिकुलत्थाः। क्षीरं मद्यम्। व्यात्मानं रसः। वातघ्नान्नानि सर्वाणि। तक्रम्। यवाभ्रः। एरण्डतैलम्। रसोनम्। पटोलम्। पत्तूरम्। कारवेल्लम्। वार्ताकुः। शिग्रु। तप्तनीरम्। मन्दारः। गोकण्टकः। देवदारः। भल्लातकम्।

पथ्याप

गोजलम्। आर्द्रकम्। कटूनि। तिक्तानि। दीपनानि ॥ * ॥

आमवाते अपथ्यम्।

दधि:। मत्स्य:। गुड:। क्षीरम्। उपोदिका। माष:। पिष्टान्नम्। दुष्टनीरम्। पूर्ववात:। विरुद्धाशनम्। असात्म्यम्। वेगरोध:। जागर:। विषमाशनम् ॥ * ॥

अथ शूले पथ्यम्।

छर्दि:। स्वेद:। लङ्घनम्। पाचनवर्त्ति:। वस्ति:। निद्रा। रेचनम्। पाचनम्। अम्लोत्पन्ना:। शूलय:। वाट्यमण्ड:। तप्तक्षीरम्। जाङ्गलानां रस:। पटोलम्। शोभाञ्जनम्। कारवेल्लम्। वार्त्ताकु:। पक्वान्नम्। द्राक्षा। कपित्थम्। रुचकम्। पियालम्। पालिक्यपत्राणि। वास्तूकम्। साम्रुद्रम्। सौवर्चलम्। हिङ्। विश्वम्। विड्म्। घृतभृष्टा। लशुनम्। लवङ्गम्। एरण्डतैलम्। सुरभीजलम्। तप्ताम्बु। जम्बीररस:। कुष्ठम्। लघूनि। क्षाररजांसि ॥ * ॥

शूले अपथ्यम्।

विरुद्धान्नपानम्। जागर:। विषमाशनम्। रूक्षतिक्तकषायाणि। शीतलानि। गुरूणि। व्यायाम:। मैथुनम्। मद्यम्। वैदलम्। लवणम्। कटु। वेगरोध:। शोक:। क्रोध: ॥ * ॥

अपोदावर्त्तानाह्योः पथ्यम्

नारिकेलपुष्पमिश्रितशीतलोदकपानम्। स्नेहस्वेद:। विरेक:। वस्ति:। फलवर्त्ति:। अभ्यङ्ग:। यव:। स्रष्टविण्मूत्रमारुत:। आम्योदकम्। आनूपरस:। रुचितैलम्। वारुणी। बालमूलकम्। सम्याक:। चिरुत्। तिल:। सुधादलम्। शृङ्गवेरम्। मातुलुङ्गम्। यवक्षार:। हरीतकी। लवङ्गम्। रामठम्। द्राक्षा। गोमूत्रम्। लवणानि। अधोवातसङ्गत्यै तु। स्नेह:। स्वेद:। वर्त्ति:। वस्ति:। समीरणहरान्नपानम्। तथा पुरीषजे। वस्ति:। स्वेद:। अभ्यङ्ग:। अवगाहनम्। फलवर्त्ति:। विड्भेदाशनपानम्

मूत्रवेगसमुत्पन्ने। त्रिविधं वस्तिकर्म। स्वेद:। अभ्यङ्ग:। अवगाह:। साधयावपीडनम्। उन्नारोत्थे हिक्कान्नविधि:। कासजे कासजिद्विधि:। क्षवजे। स्वेदनम्। धूम:। औत्तरभक्तिकघृतम्। क्षवप्रवर्त्तननस्यम्। ऊर्द्धजत्रुकाभ्यङ्ग:। तृष्णोत्थे शीतान्नपानम्। जृम्भोत्थे वातजित्क्रिया। निद्रावेगोत्थिते क्षीरम्। स्वप्नसंवाहनम्। वमथुजोत्थे स्निग्धाल्पोष्णलघुभोजनम्। वासजे वासस्संमोक्ष:। स्वप्न:। मद्यम्। प्रियकथा। श्रमश्वाससमुत्पन्ने विश्राम:। वातहारिद्रयम्। शुक्रोत्थे वस्ति:। अभ्यङ्ग:। अवगाह:। चरणायुध:। शालि:। मदिरा। क्षौरम्। यौवनगर्व्वितप्रिया। छर्द्युत्थे लङ्घनम्। धूम:। सुक्ता प्रच्छर्दनम्। श्रम:। रूक्षान्नपानम्। विरेक:। रक्तमोक्षणम् ॥ * ॥

उदावर्त्तानाह्योरपथ्यम।

वमनम्। वेगरोध:। श्रमौषधान्यम्। कोद्रव:। नालीचशाकम्। शालूकम्। जाम्बवम्। कर्कटीफलम्। पिण्याकम्। सर्व्वमालुकम्। करीर:। पिष्टवेष्टितम्। विष्टम्भीनि। विरुद्धानि। कषायाणि। गुरूणि ॥ * ॥

अथ गुल्मे पथ्यम्।

स्नेहस्वेद:। विरेक:। वस्ति:। वाहुसरावयव:। लङ्घनम्। वर्त्ति:। अभ्यङ्ग:। स्नेह:। पक्वे तु भाटनम्। सम्वत्सरसमुत्पन्नकलायरक्तशालय:। खड:। कुलत्थयूष:। धन्वमांसरस:। सुरा। गवाजयी: पय:। स्नुहीक्षा। पटुषकम्। खर्ज्जूरम्। दाडिमम्। धात्री। नागरङ्गम्। अम्लवेतसम् तक्रम्। एरण्डतैलम्। लशुनम्। बालमूलकम्। पत्तूर:। वास्तूकम। शिग्रु। यवक्षार:। हरीतकी। रामठम्। मातुलुङ्गम्। चूषणम्। सुरभीजलम। स्निग्धोष्णदीपनलघुदीपनान्नानि। वातानुलोमनम् ॥ * ॥

गुल्मे अपथ्यम्।

सर्व्वं वातकारि। विरुद्धान्नपानम। रूक्षूरम्। मूलकम्। मत्स्य:। मधुरफलम्। शुष्कशाकम्। श्यामीधान्यम्। विष्टम्भीन। गुरूणि। अधोवातशकृन्मूत्रश्रमश्वासासृग्धारणम्। वमनम्। जलपानम् ॥ * ॥

अथ हृद्रोगे पथ्यम्।

स्वेद:। विरेक:। वमनम्। लङ्घनम्। वस्ति:। विलेपी। पुरातनरक्तशालय:। जाङ्गलमृगपक्षियूषा:। शुद्धकुलत्थरसा:। रागा:। खड:। काम्बलिका:। पाडवा:। भक्ष्यम्। पटोलम्। कदलीफलम्। पुराणकुष्माण्डम्। रसालम्। दाडिमम्। सम्यक्शाकम्। नवमूलकम्। एरण्डतैलम्। गगनाम्बु। सैन्धवम्। द्राक्षा। तक्रम्। पुरातनगुड:। शुण्ठी। यमानी। लशुनम्। हरीतकी। कुष्ठम्। कुस्तुम्बरु। कृष्णम्। आर्द्रकम्। सौवीरम्। शुक्तम्। मधु। वारुणीरस:। कस्तूरिका। चन्दनम्। प्रपानकम्। ताम्बूलम ॥ * ॥

हृद्रोगे अपथ्यम्।

वेगविधारणम्। अतिविष्टम्भिविदाहिगुरुशीतरूक्षान्नपानम्। अतिस्निग्धोष्णदीपनलघुभोजनम्। अजीर्णभोजनम्। विषमाशनम्। अतिव्यवायम्। अतिस्वप्नम्। अतिजागरम्। अतिव्यायामम्। अतिमद्यपानम्। अतिमैथुनम्। अतिक्रोधम्। अतिशोकम्। अतिभयम्। अतिचिन्तनम्। अतिरुक्षान्नपानम्। अतिवेगधारणम्। अतिवमनम्। अतिविरेचनम्। अतिरक्तमोक्षणम्। अतिवस्तिकर्म। अतिधूमपानम्। अतिलङ्घनम्। अतिरूक्षस्नेहनम्। अतिस्वेदनम्। अतिरूक्षाभ्यङ्गम्। अतिरूक्षोद्वर्त्तनम्। अतिरूक्षावगाहनम्। अतिरूक्षशिरोवस्तिम्। अतिरूक्षनस्यम्। अतिरूक्षाञ्जनम्। अतिरूक्षधूमपानम्। अतिरूक्षगण्डूषम्। अतिरूक्षकवलम्। अतिरूक्षतर्पणम्। अतिरूक्षपुटपाकम्। अतिरूक्षशिरोभ्यङ्गम्। अतिरूक्षकर्णपूरणम्। अतिरूक्षपादाभ्यङ्गम्। अतिरूक्षपादावगाहनम्। अतिरूक्षपादोद्वर्त्तनम्। अतिरूक्षपादलेपनम्। अतिरूक्षपादपूरणम्। अतिरूक्षपादधूपनम्। अतिरूक्षपादाभ्यङ्गम्। अतिरूक्षपादावगाहनम्। अतिरूक्षपादोद्वर्त्तनम्। अतिरूक्षपादलेपनम्। अतिरूक्षपादपूरणम्। अतिरूक्षपादधूपनम्।

पथ्याप

कुमारी। गुवाकखर्ज्जूरनारिकेलतालद्रुमाणां शिरांसि। पथ्या। तालास्थिमज्जा। चणपम्। चुटि:। शीतपानम्। शीताशनम्। पनीरनीरम्। हिमवालुका ॥ * ॥

नूत्रक्षये अपथ्यम्।

मद्यम्। श्रम:। निधुवनम्। गजवाजियानम्। सर्व्वं विरुद्धाशनम्। विषमाशनम्। ताम्बूलम्। मत्स्य:। लवणम्। आर्द्रकम्। तैलभृष्टम्। पिण्याकम्। हिङ्गु। तिल:। सर्षप:। वेगरोध:। माष:। करीर:। अतितीक्ष्णम्। विदाहि। रूक्षम्। अन्न: ॥ * ॥

अथ मूत्राघाते पथ्यम्।

अभ्यङ्गनम्। स्नेह:। विरेक:। वस्ति:। स्वेद:। अवगाह:। उत्तरवस्ति:। पुरातनलोहितशालि:। धन्वभवमांसम्। मद्यम्। तक्रम्। पय:। दधि। माषयूष:। पुराणकुष्माण्डफलम्। पटोलम्। मधूर्द्रकम्। तालफलास्थिमज्जा। हरीतकी। कोमलनारिकेलम्। गुवाकखर्ज्जूरनारिकेलतालद्रुमाणां मस्तकानि ॥ * ॥

मूत्राघाते अपथ्यम्।

सर्व्वाणि विरुद्धानि। व्यायाम:। मार्ग:। शीतलम्। रूक्षम्। विदाहि। विष्टम्भि। व्यवाय:। वेगधारणम्। करीरम्। वमनम् ॥ * ॥

अधाशर्य्यां पथ्यम्।

वस्ति:। विरेक:। वमनम्। लङ्घनम्। स्वेद:। अवगाह:। वारिसेचनम्। यवा:। कुलत्था:। प्रपुराणशालय:। मद्यम्। धन्वाखजसम्भवरस:। पुराणकुष्माण्डफलम्। कर्कोटकम्। गोकण्टक:। वारुणशाकम्। आर्द्रकम्। पाषाणभेदी। यवशूक:। रेणु:। छिन्ना। अर्शसां समाकर्षणम् ॥

अर्शस्यां अपथ्यम्।

मूत्रस्य शुक्रस्य च वेगधारणम्। अन्न:। विष्टम्भि। रूक्षम्। गुर्व्वन्नपानम्। विरुद्धपानाशनम् ॥ * ॥

अथ प्रमेहे पथ्यम्।

पूर्व्वं लङ्घनम्। वमनम्। विरचनम्। शोद्धर्णनम्। शमनम्। दीपनम्। नीवार:। कङ्गु:। यव:। वेणव:। कोरदूष:। श्यामाक:। चूर्ण:। कुरुविन्द:। सुकुष्टक:। गोधूम:। शालि:। कलम:। पुरातनकुलत्थ:। मुद्गाढ़कीचणकयूषरसा:। तिला:। लाजा:। पुरातनसुरा। मधु। वाट्यमण्ड:। तक्रम्। रासभजलम। महिषीजलम। कङ्क:। जाङ्गला: कपोतशशतित्तिरिलाववर्त्तिभल्लैणवर्त्तकमृगादय:। शोभाञ्जनम्। कुलकम्। कठिल्लकम्। कर्कोटकम्। तलकम्। वार्ह्तम्। औड्म्बरम्। लशुनम्। नवीनमोचम्। पत्तूरम्। गोचुरकम्। मूषिकपर्णिशाकम्। मन्दारिमत्रम्। चन्दना। त्रिफला। कपित्थम्। जम्बू:। कशेरु। कमलोत्पलकन्दबीजम्। खर्ज्जूरलाङ्गलिकतालतरुणां मस्तकम्। शोधम्। तिन्दुकफलम्। खदिर:। कलिङ्ग:।

पथ्यापथ्य

हितः। कषायः। हस्त्यश्ववाहनम्। व्यतिभ्रमणम्। रविकिरणः। व्यायामः॥ ७॥

प्रमेहे पथ्यम्।

मूत्रवेगः। धूमपानम्। स्वेदः। रक्तमोक्षणम्। गुडान्नम्। दिवानिद्रा। नवान्नम्। दधि। आनूपमांसम्। निष्पावम्। पिष्टान्नम्। मैथुनम्। सौवीरकम्। सुरा। सुक्तम्। तैलम्। चीनम्। घृतम्। गुडः। तुवरी। तालास्थिमज्जा। विरुद्धान्नम्। कुशाग्रम्। इक्षुः। दुग्धासु। स्नाट्। व्यक्तः। लवणम्। अभिष्यन्दि॥ ८॥

अथ मेदसि पथ्यम्।

चिन्ता। श्रमः। जागरणम्। व्यवायः। प्रोद्वर्त्तनम्। लङ्घनम्। व्यातपः। हस्त्यश्वयानम्। भ्रमणम्। विरेकः। प्रच्छर्दनम्। अपतर्पणम्। पुरातना वैणवकोरदूषश्यामाकनीवारप्रियङ्गुजूर्णाः। यवः। कुलत्थः। चणकः। मसूरः। मुद्गः। तुवरी। मधु। लाजाः। कटुतिक्तकषायाणि। तक्रम्। सुरा। चिञ्चटमत्स्यः। दग्धवार्त्ताकुः। फलत्रयम्। यवासकम्। शिरीषलोध्रहरीतकीनां चूर्णेन गात्रविलेपनम्। कटुत्रयम्। सर्षपतैलम्। एला। सर्वाणि रूक्षाणि। शुष्कतैलम्। पत्रशाकः। अगुरुलेपनम्। प्रतप्तनीराणि। शिलाजतूनि। भोजनात् प्राक् वारिपानम्॥ ९॥

मेदसि अपथ्यम्।

शाकम्। रसायनम्। शालिः। गोधूमः। सुखशीलता। क्षीरम्। इक्षुविकृतिः। माषः। गौडिकम्। स्वेदनानि। मत्स्यः। मांसम्। दिवानिद्रा। सक्। गन्धः। मधुराणि। समग्रभोजनस्य पश्चात् जलपानम्। अतिमात्रोपचिते विशेषाद्गमनक्रिया॥ ९॥

अथोदररोगे पथ्यम्।

विरेचनम्। लङ्घनम्। अब्दसम्भवकुलत्थसुद्गारक्तशालियवाः। जाङ्गलशृगपक्षिणः। सिता। सुरा। माक्षिकम्। क्षौद्रः। माध्वीकम्। पार्श्वः। तक्रम्। रसोनम्। रघुतैलम्। आर्द्रकम्। शालिषशाकम्। कुलकम्। कटिलकम्। पुनर्नवा। शिग्रुफलम्। हरीतकी। ताम्बूलम्। एला। यवशूकम्। आयसम्। अजागवीर्ष्टीमहिषीणां पयः सक्षौद्रम्। लवणानि। तिक्तानि। दीपनानि। वस्तेश्च सम्वेष्टनम्। स्वेदकर्म। विषप्रयोगः। विशेषतः शोफसमुद्भवे नाभौ व्यधयेत्। पार्श्वयोर्वा धमनीव्यधः। वङ्क्षणयोः स्रवतोऽतिवेगं नाभेरधः यथाविधिशस्त्रविधिः। वर्मारुणोत्थे जातेऽपि घृतपानम्। व्यधलङ्घनम्। अनुवासनम्॥ ९॥

उदररोगे अपथ्यम्।

स्वप्नः। धूमपानम्। जलपानम्। सिराव्यधः। दधि। यानम्। दिवानिद्रा। व्यायामः। पिण्याकः। यवान्नमांसम्। पत्रशाकम्। तिलः। उडदानि। विदाहीनि। नवान्नम्। सर्षपतैलम्। पिण्याकान्नम्। दुग्धक्षीरम्। गुरूणि।

मधूष्णगिरिजातानां गदानां जलम्। विष्टम्भीनि। छिद्रसमुद्भवे विशेषतः स्वेदः॥ ९॥

अथ शोथे पथ्यम्।

संशोधनम्। लङ्घनम्। अवमोक्षः। स्वेदः। प्रलेपः। परिषेचनम्। पुरातनशालियवकुलत्थसुद्गाः। गौधा। शल्लकः। सुजङ्गभुक्तित्तिरितान्त्रचूडलावादयो जाङ्गलविष्किराः। कूर्म्मः। खड्गी। प्रपुराणनर्पः। तक्रम्। सुरा। माक्षिकम्। आसवः। निष्पावः। कटिलकम्। रक्तशिग्रु। रसोनम्। कर्कोटकम्। मानसत्वम्। सुवर्चला। गृञ्जनकः। पटोलम्। वेत्राग्रम्। वाडृङ्गम्। मूलकम्। पुनर्नवा। चित्रकम्। पारिभद्रः। शीपर्णम्। निम्बः। क्षुरपत्रवम्। एरण्डतैलम्। कटुका। हरिद्रा। हरीतकी। चारनिषेवणम्। भल्लातकम्। गुग्गुलुः। व्यायसम्। कटूनि। तिक्तानि। दीपनानि। गोऽजामहिषीभवस्त्राणि। कस्तूरिका। शिलाजतु। पाण्डुरोगोक्तवह्निकर्म्म॥ ९॥

श्वयथौ अपथ्यम्।

पवनसलिलम्। वेगरोधः। विरुद्धपानाशनम्। विषमाशनम्। लङ्घनम्। व्यायामानूप पिशितलवणं। शुष्कशाकम्। नवान्नम्। गौड़म्। पिष्टान्नम्। दधि। क्षीरम्। विष्टम्भम्। मद्यम्। वल्लम्। धानाः। वल्लूरम्। गुरु। असात्म्यम्। विदाहि। चरात्रौ स्वप्नः। मैथुनम्॥ ९॥

अथ दृष्टिव्रणाधिकारे पथ्यम्।

संशोधनम्। वस्तिः। अवृष्विमोक्षः। स्वेदः। प्रलेपः। अरण्यशालयः। एरण्डतैलम्। सुरभीक्षीरम्। धन्वामियम्। शिग्रुफलम्। पटोलम्। पुनर्नवा। गोचरः। अभिमन्थः। ताम्बूलम्। पथ्या। सरला। रसोनम्। वाडृङ्गम्। गृञ्जनकम्। मधूनि। कौम्भं घृतम्। तप्तजलम्। तक्रम्। व्यामवातापहमधिकारि चान्नपानम्। पुराणसुरा। अर्द्धेन्दुवर्द्धचन्द्रयोर्दाहः। आमाशये वाहुशिराव्यधः॥ ९॥

व्रणशोथपथ्यम्।

विरुद्धपानान्नम्। असात्म्यसेवा। संक्षोभणम्। क्षुत्क्षियादियानम्। आनूपमांसानि। दधीनि। माषाः। दुग्धानि। पिष्टान्नम्। उपोदिका। गुरूणि। शुक्रोत्थितवेगरोधः॥ ९॥

अथ गलगण्डादौ पथ्यम्।

छर्द्दिः। विरेचनम्। नस्यम्। स्वेदः। धूमः। शिराव्यधः। अग्निकर्म्म। क्षारयोगः। प्रलेपः। लङ्घनम्। पुराणघृतपानम्। जीर्णलोहितशालयः। यवाः। सुद्गाः। पटोलम्। रक्तशिग्रु। कटिलकम्। शालिषशाकम्। वेत्राग्रम्। कटूनि। सर्वाणि दीपनानि। गुग्गुलुः। शिलाजतु। विशेषतः शिरातलस्थसिराव्यधश्चेदः। मणिबन्धौ व्यङ्गुलान्तरात्तिस्रो रेखाः कार्य्याः। गलगण्डगण्डमालार्ब्बुदार्शोग्रन्थ्यर्ब्बुदातुरे यथादोषं यथावस्थं एतत् सर्व्वं पथ्यम्॥ ९॥

पथ्यापथ्य

गलगण्डे अपथ्यम्।

सर्व्वक्षीरेक्षुविकृतिः। आनूपमांसम्। पिण्याकम्। अम्लम्। मधुरम्। गुरुद्रव्यम्। अभिष्यन्दिद्रव्यम्॥ ९॥

अथ श्लीपदे पथ्यम्।

प्रच्छर्दनम्। लङ्घनम्। अवमोक्षः। स्वेदः। विरेकः। परिलेपनम्। पुरातनयवगोधूमशालयः। यवाः। कुलत्थाः। लशुनम्। पटोलम्। वार्त्ताकुः। शोभाञ्जनम्। कारवेल्लम्। पुनर्नवा। शुष्कम्। पूतिका। एरण्डतैलम्। सुरभीजलम्। कटूनि। तिक्तानि। दीपनानि। वातोद्भवे गुल्फोपरिष्टात् चतुरङ्गुले सिराव्यधः। पैत्तिके गुल्फस्तले शिराव्यधः। कफजे अङ्गुष्ठमूले सिराव्यधः॥ ९॥

श्लीपदे अपथ्यम्।

पिष्टान्नम्। दुग्धविकृतम्। गुरु। आनूपमांसम्। स्वादुरसः। अतिपाचनशुक्तविन्ध्यनदीजलम्। पिच्छिलम्। गुरुद्रव्यम्। अभिष्यन्दिद्रव्यम्॥ ९॥

अथ विद्रधौ पथ्यम्।

आमावस्थे रेचनलेपस्वेदासृग्मोक्षणानि। जीर्णश्यामाककलसौ। कुलत्थः। लशुनम्। रक्तशिग्रु। निष्पावः। कारवेल्लः। पुनर्नवा। श्रीपर्णी। चित्रकम्। क्षौद्रम्। श्लीपोक्तानि सर्व्वाणि। पक्वावस्थे शस्त्रकर्म्म। पुराणरक्तशालिः। घृतम्। तैलम्। सुरसः। पिलेपी। धन्वजरसाः। शालिषशाकम्। कुलम्। पटोलम्। हिमवालुका। चन्दनम्। तप्तम्। शीतम्। त्रयोदित सक्तम्॥ ९॥

विद्रधावपथ्यम्।

आमावस्थे श्लीपोक्तान्यपथ्यानि। पक्वावस्थे व्रणोक्तान्यपथ्यानि॥ ९॥

अथ व्रणशोथव्रणमध्यव्रणनाड़ीव्रणेषु पथ्यम्।

विरेचनम्। रक्तमुक्तिः। उपनाहः विमार्ज्जनम्। शोधनम्। रोपणम्। पुराणगोधूमशालयः। यवः। षष्टिकः। गोधूमः। जाङ्गलशृगपक्षिणः। पिलेपी। लाजसक्तुः। कटुतैलम्। घृतम्। मधु। तैलम्। मधुरम्। तुवरी। मुद्गयूषः। शर्करा। आयाङ्गलम् वार्त्ताकुः। कर्कोटकम्। पटोलम्। कारवेल्लम्। निम्बपत्रम्। वेत्राग्रम्। वालमूलकम्। सुनिषण्णकम्। शालिषशाकम्। तण्डुलीयः। वास्तूकम्। त्रिफला। पनसम्। चोचम्। हरितम्। कटुकाफलम्। जीवन्ती। सैन्धवम्। द्राक्षा। स्वादुतिक्तकषायाणां। स्निग्धोष्णद्रव्योत्तरान्नम्। व्रणरक्षम्। शमनम्। दाहः। स्नेहनम्। बन्धनक्रिया। व्रणवस्त्रबन्धनम्। स्नेहः। धूपनम्। पत्रधारणम्। उत्क्लेदनम्। व्रणक्षालनम्। चन्दनम्। तिलतैलमधु। तप्तशीतासु। कर्पूरम्। पक्वतः परा वैकृताः॥ ९॥

व्रणशोथव्रणमध्यव्रणनाड़ीव्रणेषु अपथ्यम्।

नवधान्यम्। तिलः। मद्यानि। माषः। दुग्धानि।

पथ्यापथ्य

क्षारः। हिमाम्भः। विविधक्षीरेक्षुविकारः। अम्लानि। पत्रशाकम्। अजाङ्गलमांसम्। अत्यम्लासन्नम्। विदाहि। विष्टम्भि। गुरूणि। कटु। अम्लम्। शीतम्। लवणम्। व्यवायः। व्यायामः। उच्चैः परिभाषणम्। प्रियासमालोकनम्। अक्ष्णि निद्रा। प्रजागरम्। नितान्तचंक्रमणम्। यथास्थितं प्रागधिरोपणम्। नस्यम्। ताम्बूलम्। अजीर्णता। प्रचण्डवातः। आतपः। घर्मः। वृष्टिः। रजः। भयम्। क्रोधः। वह्निः। प्रहर्षः। शोकः। विरुद्धाशनम्। अम्बुपानम्। तीक्ष्णम्। उष्णम्। रूक्षम्। विषदूषणम्। कण्डूयनम्। काष्ठनखादितोदः। निरन्नभावः। विषमोपचारः॥ ॥

अथ भग्ने पथ्यम्।

शीताम्बु। चन्दनम्। पङ्कप्रदेहः। बन्धनक्रिया। शालिः। प्रियङ्गुः। गोधूमः। मुद्गसतीलयोर्यूषः। नवनीतम्। घृतम्। क्षीरम्। तैलम्। मांसरसः। मधु। पटोलम्। लशुनम्। शिग्रु। पल्लूरम्। बालमूलकम्। द्राक्षा। धात्री। बब्बूली। जाक्षा। इक्षुरसम्॥ ॥

भग्ने अपथ्यम्।

लवणम्। कटुकम्। क्षारः। अम्लः। मैथुनम्। आतपः। व्यायामः। रूक्षान्नम्॥ ॥

अथ भगन्दरे पथ्यम्।

आमे संशोधनम्। लेपः। लङ्घनम्। रक्तमोक्षणम्। पक्वे यथाविधिशस्त्रक्षारकर्म्माणि। सर्षपः। शालिः। मुद्गः। विलेपी। जाङ्गलरसः। पटोलम्। शिग्रु। वेत्राग्रम्। पल्लूरम्। बालमूलकम्। तिलसर्षपयोस्तैलम्। तिक्तवर्गः। घृतम्। मधु॥ ॥

भगन्दरे अपथ्यम्।

विरुद्धान्यन्नपानानि। विषमाशनम्। आतपः। व्यायामः। मैथुनम्। युद्धम्। पृष्ठयानम्। गुरूणि। रूक्षान्नभोजिनोऽपि नरः सप्तसप्तरं घृतं सर्व्वं परिहरेत्॥ ॥

अथोपदंशे पथ्यम्।

दृष्टिः। विरेकः। ध्वजमध्यनाड़ीवेधः। जलौका। परिषातनम्। सेकः। प्रलेपः। यवः। शालयः। धन्वामिषम्। सुद्गरसः। घृतम्। कठिल्लकम्। शिग्रुफलम्। पटोलम्। शालिषष्टिकम्। नवमूलकम्। तिक्तम्। कषायम्। मधु। कूपवारि। तैलम्॥ ॥

उपदंशे अपथ्यम्।

दिवानिद्रा। मूत्रवेगः। गुर्व्वन्नम्। मैथुनम्। गुड़ः। व्यायामः। अन्नम्। तक्रम्॥ ॥

अथ शूकदोषे पथ्यम्।

लेपः। विरेकः। रक्तमोक्षः। सर्पिःपानम्। शालिः। यवः। जाङ्गलमांसम्। मुद्गयूषः। कठिल्लकम्। पटोलम्। शिग्रु। कर्कोटम्। पल्लूरम्। बालमूलकम्। वेत्राग्रम्। व्याघाड़फलम्। दाड़िमम्। सैन्धवम्। द्राक्षा। कूपोदकम्। गन्धसारः। कस्तूरी। हिमवालुका। तक्रम्। कषायम्। तैलम्॥ ॥

शूकदोषे अपथ्यम्।

मूत्रवेगः। दिवानिद्रा। व्यायामः। मैथुनम्। गुड़ः। विदाहि। गुरुद्वयम्। तक्रम्॥ ॥

अथ क्षुद्ररोगे पथ्यम्।

पश्चात् पश्चात् क्षुद्दैनम्। मासात् मासाद्विरेचनम्। त्र्यहात् त्र्यहात् नस्यम्। षष्ठे षष्ठे मासि रक्तमोक्षणम्। सर्पिर्लेपः। पुराणाः यवगोधूमशालिमुद्गाढ़कीमसूराः। माक्षिकम्। जाङ्गलामिषम्। व्याघाड़फलम्। वेत्राग्रम्। पटोलम्। वृहतीफलम्। काकमाची। निम्बपत्रम्। लशुनम्। छिलमोचिका। पुनर्नवा। मेषशृङ्गम्। चक्रमर्द्दफलम्। भल्लातकम्। पक्वतालम्। खदिरः। चिचकः। वरा। जातीफलम्। नागपुष्पम्। कुङ्कुमम्। प्रतनुत्वचिः। कोषातकी। करञ्जोमातिलसर्षपनिम्बेङ्गुदीभवतैलम्। लघूनि अन्नानि। सरलदेवाङ्गग्निशिग्रुगुरुसम्भवस्नेहः। गोखरोष्ट्राश्वमहिषीणां मूत्राणि। कस्तूरिका। गन्धसारः। तिक्तानि। क्षारकर्म्म॥ ॥

क्षुद्ररोगे अपथ्यम्।

पापकर्म्म। कृतघ्नभावः। गुरुनिन्दा। गुरुधर्षणम्। विरुद्धपानाशनम्। दिवानिद्रा। चण्डांशुतापः। विषमाशनम्। खेदः। रतम्। वेगरोधः। इक्षुः। व्यायामः। अन्नम्। तिलः। माषः। द्रवगुरुनवान्नानां भोजनम्। विदाहि। विष्टम्भि। मूलकम्। सह्याद्रिविन्ध्याद्रिसमुद्भवनदीजलम्। आनूपमांसम्। दधि। दुग्धम्। मद्यम्। गुड़ः॥ ॥

अथ शीतपित्तोदर्दकोठरोगेषु पथ्यम्।

छर्द्दिः। विरेचनम्। लेपः। रक्तमोक्षः। पुराणशालिः। जाङ्गलामिषमुद्गकुलत्थानां यूषः। कर्कोटकम्। कारवेल्लम्। शिग्रु। मूलकपोतिका। शालिषष्टिकशाकम्। वेत्राग्रम्। दाड़िमम्। त्रिफला। मधु। कटुतैलम्। तप्तनीरम्। पित्तश्लेष्महरद्रव्यम्। सर्व्वकटुतिक्तकषायाणि॥ ॥

शीतपित्तादावपथ्यम्।

विविधक्षीरेक्षुविकारः। मत्स्यः। उदकानूपभवामिषम्। नवीनमद्यम्। वमिवेगरोधः। प्राग्दक्षिणाशापवनः। अक्ष्णि निद्रा। स्नानम्। विरुद्धाशनम्। आतपः। स्निग्धम्। अम्लम्। मधुरम्। कषायः। गुर्व्वन्नपानानि॥ ॥

अथाम्लपित्ते पथ्यम्।

ऊर्द्ध्वगे पूर्व्वं वमनम्। अधोगे पूर्व्वं विरेचनम्। पश्चादन्नाशनम्। निरूहः। शालिः। यवः। गोधूमः। मुद्गः। जाङ्गलरसः। तप्तशीतजलानि। शर्करा। मधु। शुक्तः। कर्कोटकम्। कारवेल्लम्। पटोलम्। छिलमोचिका। वेत्राग्रम्। वृहत्क्षुद्राम्लम्। रम्भापुष्पम्। बालूकम्। कपित्थम्। दाड़िमम्। धात्री। तिक्तानि। कफपित्तहरपानान्नम्॥ ॥

पथ्यापथ्य

अम्लपित्ते अपथ्यम्।

नवान्नम्। विरुद्धद्रव्यम्। पित्तकोपकरद्रव्यम्। वेगरोधः। तिलः। माषः। कुलत्थः। तैलभक्ष्यम्। अविदुग्धम्। धान्यान्नम्। लवणम्। अम्लम्। कटु। गुर्व्वन्नम्। दधि। मत्स्यः॥ ॥

अथ विसर्पे पथ्यम्।

विरेकः। वमनम्। लेपः। लङ्घनम्। रक्तमोक्षणम्। पुराणा यवगोधूमकङ्गुषष्टिकशालयः। मुद्गः। मसूरः। चणकः। तुवरी। जाङ्गलजरसः। नवनीतम्। घृतम्। द्राक्षा। दाड़िमम्। कारवेल्लकम्। वेत्राग्रम्। कुलकम्। धात्री। खदिरः। नागकेशरम्। लाक्षा। शिरीषः। कर्पूरम्। चन्दनम्। तिललेपनम्। ह्रीवेरकम्। मुस्तकम्। सकलानि तिक्तानि॥

विसर्पे अपथ्यम्।

व्यायामः। अक्ष्णि शयनम्। सुरतम्। प्रवातः। क्रोधः। शोकः। वमनम्। वेगः। अम्बुपानम्। शाकम्। विरुद्धाशनम्। दधि। कूर्च्चिका। सौवीरकादि। अनेकविधकिलाटः। गुर्व्वन्नपानम्। लशुनम्। कुलत्थः। माषः। तिलः। सकलमजाङ्गलमांसम्। स्वेदः। विदाहि। लवणम्। अम्लम्। कटु। मद्यम्। अर्कप्रभा॥ ॥

अथ विस्फोटे पथ्यम्।

विरेचनम्। छर्द्दनम्। लेपः। लङ्घनम्। पुरातनयष्टिकशालयः। यवः। मुद्गः। मसूरः। चणकः। मुङ्गष्टकः। धन्वामिषम्। गव्यघृतम्। कटिल्लकम्। वेत्राग्रम्। व्याघाड़फलम्। पटोलम्। ज्योतिष्मती। निम्बदलम्। चन्दनम्। तैलम्। सिताभ्रः। तिललेपः। लङ्घनम्। बालम्॥ ॥

विस्फोटे अपथ्यम्।

स्वेदः। व्यवायः। व्यायामः। क्रोधः। गुर्व्वन्नम्। आतपः। वमिवेगः। पत्रशाकम्। प्रवातः। दिवास्वप्नः। ग्राम्योदकम्। आनूपमांसम्। विरुद्धान्यन्नानि। तिलः। माषः। कुलत्थः। लवणाम्लकटूनि। विदाहि। रूक्षम्। उष्णम्॥ ॥

अथ मसूर्य्यां पथ्यम्।

पूर्व्वं लङ्घनवान्तिरेचनशिरावेधाः। प्रग्राह्यो-ज्वलजीर्णयष्टिकशालयः। चणकः। मुद्गः। मसूरः। यवः। कपोतचटकदात्यूहक्रौञ्चजीवञ्जीवशुकादयः पक्षिणः। नङ्गलः। काठिल्लम्। व्याघाड़कम्। कर्कोटम्। कदलम्। शिग्रु। रुचकम्। द्राक्षा। दाड़िमम्। मेथ्यदूध्यान्नपानम्। कोलम्। मांसरसः। अक्ष्णोः सेकविधौ गवेधुमधुकोड्डुतसुशीतोदकम्। शुम्बूकोदरकोषनीरम्। कर्पूरचूर्णम्। पक्वे मुद्गरसः। जाङ्गलरसः। शालिषष्टिकशाकम्। घृतम्। निर्गुण्डीजलम्। यत्नधूपविहितो धूपः। शुष्कगोमयभस्मगुण्डनम्। उष्णे शिलापिष्टयोः पिचुमर्द्दपत्रनिशयोरालेपः। शेषे व्रणोक्तक्रिया॥ ॥

उपोदिका। कालशाकम्। लशुनम्। दाड़िमम्। विकङ्कतम्। प्राचीनामलकम्। पथ्या। कपित्थम्। नागकेशरम्। गोच्छागनरमूत्राणि। तक्रम्। शीताम्बु। शर्करा। अविदाहीन्यन्नानि। सैन्धवम्। मधु। कुङ्कुमम्। पश्चिमोत्तरवातः। हरिद्रा। सितचन्दनम्। मुक्तम्। शिरीषः। कस्तूरी। तिक्तानि। मधुराणि। हेमचूर्णम्॥ * ॥

विषरोगे अपथ्यम्।

क्रोधः। विरुद्धाशनम्। अध्यशनम्। व्यवायः। ताम्बूलम्। व्यायामः। प्रवातः। सर्व्वान्नम्। सर्व्वलवणम्। नानाविधसंस्वेदनम्। निद्रा। भयम्। धूमविधिः। क्षुधा॥ * ॥

अथ रोगसङ्करे पथ्यम्।

एवां गदानां यदि सङ्करः स्या-
त्तत्र प्रयत्नेन भिषङ्मनीषी।
उक्तेषु पथ्येषु विरोधि यद्य-
त्तत्तत् प्रयुञ्जीत चिकित्सितेषु॥ * ॥

रोगसङ्करे अपथ्यम्।

अपथ्यानि च सर्व्वाणि तत्तद्रोगोचितानि च।
रोगबलाबलविदेद्यो वर्ज्जयेद्व्याधिसङ्करे॥ * ॥

अथ वातिकरोगे पथ्यम्।

अभ्यङ्गः। परिमर्द्दनम्। भ्रमनम्। संस्वेदनम्। दृंहणम्। स्नेहः। स्वेदनम्। आसना। शयनम्। संवाहनम्। वस्तिः। नस्यम्। प्रावरणम्। समीरणपरित्यागः। अवगाहः। शिरोवस्तिः। विस्मरणम्। दिवाकरकरः। स्नानम्। विस्रापनम्। तैलद्रोणी। सरसता। गाढ़ोपनाहः। सुरा। भूशय्या। सुखशीलता। स्वाद्वम्ला रसाः। मज्जा। तैलम्। वसा। घृतम्। नवमाषः। कुलत्थः। तिलः। गोधूमः। मुद्गः। कलमः। शालिः। षष्टिकः। पेया। धान्यशलम्। पयः। क्षीरः। मस्तु। सुखोष्णोदकम्। गोमूत्रम्। नलदाम्बु। दधि। पयःपेटी। यवः। कूर्च्चिका। आनूपारण्यखड्गिकोलमहिषाः। एरण्डः। धन्वोद्भवाः सर्पदृष्टिलकवाकुतित्तिरिकुलिङ्गाः। कुम्भीरः। तिमिङ्गिलः। मकरः। गण्डूपदः। कच्छपः। रोहितमत्स्याः। वर्म्मिः। मद्गुरः। सिलिन्धः। एरङ्गः। शृङ्गी। इक्षिशुः। प्रोष्ठी। गर्गरः। पर्व्वतः। अन्ये जलजन्तवः। वार्त्ताकुः। कुलकम्। शिग्रु। लशुनम्। द्राक्षा। आम्रम्। आम्रातकम्। धात्री। दाड़िमम्। अम्लवेतसफलम्। कोलम्। कपित्थम्। शिवा। पक्वतालम्। वकुलम्। गोकण्टकः। वास्तूकम्। शुक्लाची। गणिका। सरसा। मन्दारपत्रम्। ताम्बूलम्। सितशर्करा। लवणः। लोध्रः। तुरुष्कः। अगुरु। श्रीवासः। सुरदारु। गुग्गुलुः। गन्धाङ्गः। कुङ्कुमम्। स्निग्धोष्णविधिः। सम्पूर्णितं हेम रजतं सीसकञ्च। जात्युत्पाटनमल्लिकापुष्पाणां विशाला माला॥ ८ ॥

वातिकरोगे अपथ्यम्।

चिन्ता। जागरणम्। अस्रङ्मोक्षः। वमिः। लङ्घनम्। व्यायामः। गजवाजिवाहनविधिः। सन्धारणम्। मैथुनम्। आघातः। अपतर्पणम्। प्रपतनम्। धातुक्षयः। क्षोभणम्। शोकः। चंक्रमणम्। विरुद्धाशनम्। सम्यक्सुक्तक्रमः। दृढत्वम्। जलदागमः। रजनीशेषः। अपराह्णः। भयम्। रूक्षात्यल्पकषायतिक्तकटुकक्षारातिशीतानामशनम्। तृणधान्यम्। उद्रिका। आढ़की। कङ्गुः। उद्दालः। सुकुष्टकः। कोद्रवः। यवः। श्यामाकः। जूर्णादयः। शिग्रुः। जम्बु। रुजमाषः। चणकः। मुद्गः। कुलत्थः। विषम्। शालूकम्। क्रमुकम्। कशेरु। तलकम्। कठिल्लकम्। तिन्दुकम्। कर्कोटम्। नवतालशस्यम्। तालास्थिमज्जा। नदीतड़ागजलम्। करका। निचारवीजम्। पिण्याकः। शिग्रुरास्नु। रासभयः। मत्स्यशाकम्। चिरुत्। भूनिम्बम्। कटुका। करीरम्। अखिलशुष्कामिषम्। माक्षिकम्। धूमः। बह्वमरुत्। रजः। परिभवः। खड्गा॥ * ॥

अथ पैत्तिके पथ्यम्।

सर्पिःपानविधिः। विरेचनम्। अस्रङ्मोक्षः। सितशालिः। गोधूमः। आढ़किः। धान्यकम्। चणकः। मुद्गः। मसूरः। यवः। पर्य्युषितमद्यः। पयः। पयःपेटी। वरा। माक्षिकम्। लाजाः। धन्वरसः। घृतानि। सिता। शीतोदकम्। उद्विदः। कर्कोटम्। कदलम्। कण्टकिफलम्। वेत्राग्रम्। आषाढ़कम्। वृन्ताकी। कोमलकुलकम्। कुष्माण्डम्। इर्व्वारुः। तुम्बी। पर्पटकः। अल्पमारिषदलम्। कठिल्लकम्। दाड़िमम्। धात्री। कोमलतालशस्यम्। अभया। खर्जूरम्। औड़ुम्बरम्। विल्वम्। कषायः। तिक्तः। मधुरः। मधूकम्। वरी। कांस्यम्। अयः। रजतम्। हेम। कटुका। निम्बः। चिरुत्। चन्दनम्। हर्म्म्यम्। भूमिगृहम्। सुशीतलवनम्। धारागृहम्। चन्द्रिका। रम्भाभीरुहनद्यपत्रशयनम्। शीताः प्रदेहाः। भूशय्या। मणिः। प्रदोषसमयः। शीतम्। प्रियालिङ्गनम्। स्नानम्। मित्रसमागमः। प्रियकथा। मन्दानिलः। अभ्युद्गमम्। वादित्रश्रवणम्। मनोरमतरभावाः। शुलास्वेद्यगणम्। पुन्नागोत्पलपाटलालसुमनःकह्लारपुष्पाणि। कर्पूरम्। प्रनीरनीरम्। शीतक्रिया॥ * ॥

पैत्तिके अपथ्यम्।

घूमः। स्वेदनम्। आतपः। निधुवनम्। उच्चारणम्। क्रोधः। क्षारः। अम्ला। गजवाजिवाहनविधिः। तीक्ष्णकर्म्म। व्यायामः। अन्नविदाहकारिसमयः। सौम्यः। विरुद्धाशनम्। मध्याह्नः। जलदात्ययः। रजनीमध्यम्। मध्यवयः। व्रीहिः। वेणुफलम्। तिलः। लशुनम्। गायः। कुलत्थः। गुड़ः। निष्पावः। मदिरा। घृतम्। प्रहीणवम्। धान्याम्लम्। उष्णोदकम्।

जम्बीरम्। नलदाम्बु। हिङ्गु। लकुचम्। नक्रम्। भल्लातकम्। ताम्बूलम्। दधि। सर्षपः। बदरम्। तैलाशनम्। तिन्तिड़ी। कट। अम्लम्। लवणम्। विदाहि॥ * ॥

अथ श्लैष्मिके पथ्यम्।

छर्द्दिः। लङ्घनम्। अञ्जनम्। निधुवनम् प्रोद्वर्त्तनम्। स्वेदनम्। चिन्ता। जागरणम्। श्रमः। अतिगमनम्। लड्वेगधारणम्। गण्डूषः। प्रतिसारणम्। प्रधमनम्। हस्त्यश्वयानम्। धूमः। प्रावरणम्। निधुद्वम्। अतिसंक्षोभः। नस्यम्। भयम्। रूक्षोष्णविधिः। पुरातनशालिः। षष्टिका। निव्यावः। तृणधान्यम्। चणकः। मुद्गः। कुलत्थरसः। क्षारः। सर्षपतैलम्। उष्णजलम्। धन्वामिषम्। राजिका। वेत्राग्रम्। कुलकम्। कठिल्लकम्। वार्त्ताकुः। औड़ुम्बरम्। कर्कोटम्। लशुनम्। मोचकुसुमम्। शुक्राशनम्। शूरणः। निम्बम्। मूलकपोतिका। वरुणः। तिक्ता। चिरुत्। माक्षिकम्। ताम्बूलम्। नलदाम्बु। जीर्णमदिरा। क्षौमम्। वरा। गोजलम्। लाजाः। सुभृष्टतण्डुलभवम्। तिक्तम्। सुखोष्णालयः। कांस्यम्। व्ययः। अञ्जनम्। मौक्तिकम्। कटुः। कषायरसः॥ * ॥

श्लैष्मिके अपथ्यम्।

स्नेहः। अभ्यञ्जनम्। आसनम्। अद्रि शयनम्। स्नानम्। विरुद्धाशनम्। पूर्व्वाह्णः। शिशिरः। वसन्तसमयः। राज्यादिः। आद्यवयः। सुक्तमाक्षसमयः। अन्नमागकरणम्। माषः। नवतण्डुलः। मनुष्यः। मांसम्। इक्षुविकृतिः। दुग्धविकृतिः। तालास्थिमज्जा। द्रवः। पेया। भक्ष्यम्। उपोदिका। पनसम्। क्षुद्राकम्। आमाड़कम्। खर्जूरम्। अनुलेपनम्। पयःपेटी। पयः। गावसः। स्वादु। अम्लम्। लवणम्। गुरूणि। तुहिनम। सन्तर्पणम्॥ * ॥

अथ वसन्तर्त्तौ पथ्यम्।

व्यसनम्। व्यवायः। व्यायामः। भेदः। भ्रमणम्। अग्निसेवा। कटुः। तिक्तः। विदाहि। तीक्ष्णम्। कषायः। मध्वोदनम्॥ * ॥

वसन्तर्त्तावपथ्यम्।

दिवानिद्रा। सन्तर्पणम्। आलस्यम्। मृद्वांसेवा। पिण्डालुकम्। स्वादु। गुरूदकान्नम्। पिष्टम्। दधि। क्षीरम्। घृतम्॥ * ॥

अथ ग्रीष्मर्त्तौ पथ्यम्।

चन्दनम्। शीतवातः। छाया। अम्बु। कक्षाग्रथनम्। प्रच्छनम्। सद्यःपवोभावितशीतभक्तम्। विश्रिष्टद्रव्यम्। प्रियभोजनम्॥ * ॥

ग्रीष्मर्त्तावपथ्यम्।

कटु। तिक्तम्। उष्णम्। क्षारम्। अम्लम्। रौद्रम्। श्रमणम्। अग्निसेवा। उद्विद्रता। भास्करतप्ततोयस्नानम्। अतिमानम्। दधि। तक्रम्। तैलम्॥ * ॥

पथ्यापथ्य

अथ वर्षासु पथ्यम् ।
लवणम् । अम्लम् । मिष्टम् । सारम् । प्रियम् । स्निग्धम् । गुरु । उष्णम् । बल्यम् । अभ्यङ्गः । उद्वर्त्तनम् । अग्निसेवा । तप्तान्नपानम् । दाघ ।

वर्षास्वपथ्यम् ।
पूर्व्वपवनः । वृष्टिः । घर्म्मः । हिमः । श्रमः । नदीनीरम् । दिवास्वप्नः । रूक्षम् । नित्यमैथुनम् ॥ * ॥

शरदि पथ्यम् ।
शीतरसाम्बुपानम् । तरुच्छाया । चन्दनम् । इन्दुसेवा । सिता । मुद्गः । मसूरम् । गव्यघृतम् । इक्षुः । शाल्योदनम् ॥ * ॥

शरद्यपथ्यम् ।
लवणम् । अम्लम् । तीक्ष्णम् । कटु । पिष्टम् । आतपी । विदाहि । सुरा । नारिकेलम् । दधि । तक्रम् । तैलम् । क्रोधः । उपवासः । आतपः । मैथुनम् ॥ * ॥

अथ हिमर्त्तौ पथ्यम ।
तप्तबलम् । उपगाहः । पयः । अम्रम् । पानम् । घृतम् । स्त्रीसेवा । वह्निसेवा । गुरूणि । यथेष्टभुक्तम् ॥ * ॥

हिमर्त्तावपथ्यम् ।
दिवानिद्रा । कुभोजनम् । अभोजनम् । लङ्घनम् । पुरातनान्नम् । लघुपाकि । शैत्यम् । बार्य्योदनम् । शीतजलावगाहः ॥ * ॥

शिशिरे पथ्यम् ।
स्त्री । वह्निसेवा । मत्स्यः । अधर्मांसम् । दधि । दुग्धम् । सर्पिः ॥ * ॥

शिशिरेऽपथ्यम् ।
तीक्ष्णोष्णकट्वम्लकषायतिक्तानि । वासुश्रकम् । आर्द्रभोजनम् । दिवानिद्रा । चन्दनम् । चन्द्रसेवा । शीतजलस्नानादि ॥ * ॥

माघे विशेषो यथा ।
माघे च शीतद्रवमिष्टपिष्टं
कन्दः कदल्या गुरुशालिभक्तम् ।
इति षड्ऋतुपथ्यापथ्याधिकारः ॥ * ॥

आगन्तुकज्वरादौ पथ्यापथ्यं ज्वराधिकारे न लिखितमतोऽत्र लिख्यते ।
"अभिघातश्रमक्रोधे पानाभ्यङ्गौ च सर्पिषः ।
क्षतक्षये व्रणे चापि क्षतव्रणचिकित्सितम् ॥
शोषधीमन्थविषये विषपित्तप्रसाधनम् ।
अभिचाराभिशापोत्थे जपहोमादिभेषजम् ॥
उत्पातस्वप्नपीड़ोत्थे दानस्वस्ययनादयः ।
क्रोधोत्थिते पित्तहरं कामजे कामजित्क्रिया ॥
कामशोकभयोद्भूते सर्व्वा वातहरी क्रिया ।
श्वाश्रासनखेश्लाभो हर्षदायीनि यानि च ॥
विशेषतः पुंस्त्वाच्च कामक्रोधश्रमुत्थिते ।
भयशोकश्रमुद्भूते कामक्रोधोक्तमौषधम् ॥
भूताभिषङ्गजे भूतबन्धावेशनताड़नम् ।
मनःक्षोभश्रमुत्पन्ने मनसः शान्तनानि च ॥
इत्यागन्तुज्वरे पूर्व्वैर्भिषग्भिः पथ्यमिष्यते ।
विप्रयोगांसदृशस्य पाठगं श्रवणं श्रुतेः ॥

पदकः

देवानां ब्राह्मणानाञ्च गुरूणामपि पूजनम् ।
ब्रह्मचर्य्यं तपो होमः प्रदानं नियमो जपः ॥
साधूनां दर्शनं सत्यं रत्नौषधिविधारणम् ।
मङ्गलाचरणञ्चेति वर्गः सर्व्वान् ज्वरान् जयेत् ॥"

आगन्तुकज्वरे अपथ्यम् ।
"अधिवासनकर्म्मोक्ति रक्तस्रवश्चधारणम् ।
वमियेगं दन्तकाष्ठमसात्म्यमपि भोजनम् ॥
विरुद्धान्नपानानि विदाहीनि गुरूणि च ।
दृष्टाम्बुचारमद्यानि पञ्चशाकं विरूढ़कम् ॥
नलदाम्बु च ताम्बूलं कलिङ्गं लकुचं फलम् ।
आड़ीमत्स्यश्च पिण्याकं छत्राकं पिण्डेक्षुतम् ॥
अभिष्यन्दीनि चैतानि ज्वरितः परिवर्ज्जयेत् ॥"

इति पथ्यापथ्यविनिश्चयः समाप्तः ॥

पद, स्थैर्य्ये । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट् ।) पदति । इति दुर्गादासः ॥

पद, तृ क ड गतौ । इति कविकल्पद्रुमः ॥ (अदन्त-चुरां-आत्मं-सकं-सेट् ।) क ड, पदयते । इति दुर्गादासः ॥

पद, य ड औ गत्याम् । इति कविकल्पद्रुमः ॥ (दिवां-आत्मं-सकं-अनिट् ।) य ड, पद्यते । औ, पत्ता । इति दुर्गादासः ॥

पदं, क्ली, (पद + 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः ।' ३ । १ । १३४ । इति अच् ।) व्यवसायः । त्राणम् । स्थानम् । (यथा, मनुः । १२ । १२५ ।
"एवं यः सर्व्वभूतेषु पश्यत्यात्मानमात्मना ।
स सर्व्वसमतामेत्य ब्रह्माभ्येति परं पदम् ॥")
चिह्नम् । पादः । वस्तु । इत्यमरः । ३ । ३ । ६३ ॥ श्लोकः । वाक्यम् । प्रदेशः । पादचिह्नम् । श्लोकपादः । (यथा, हैः रामायणे । १ । २ । १८ ।
"पादबद्धोऽक्षरसमस्तन्त्रीलयसमन्वितः ।
शोकार्त्तस्य प्रवृत्तो मे श्लोको भवतु नान्यथा ॥")
किरणे पुं । इति मेदिनी ॥ पदलक्षणं यथा,—
"वर्णाः पदं प्रयोगार्हानन्विते कार्थबोधकाः ।"
इति साहित्यदर्पणे । २ । ४ ॥

श्रीकृष्णपदचिह्नं यथा,—
"सौवर्णीं राजतीं वापि पाषाणनिर्म्मितामपि ।
पादयोश्चाङ्कितां कृत्वा पूजाञ्चैव समाचरेत् ॥
दक्षिणस्य पदाङ्गुष्ठमूले चक्रं विसर्ज्जयः ।
तत्र नम्रजनस्तोमसंसारच्छेदनाय सः ॥
मध्यमाङ्गुलिमूले तु धत्ते कमलमच्युतः ।
धातुचित्तहरिद्राणां लोभमायाति शोभनम् ॥
पद्मस्याधो ध्वजं धत्ते सर्व्वानर्थजयध्वजम् ।
कनिष्ठामूलतो वज्रं भक्तपापाद्रिभेदनम् ॥
पार्ष्णिमध्येऽङ्कुशं भक्तचित्तेभवशकारणम् ।
भोगसम्पत्तयं धत्ते यवमङ्गुलपर्व्वणि ।
तथा वामाङ्गुष्ठमूले पाञ्चजन्यस्य लक्षणम् ।
सर्व्वविद्याप्रकाशाय धत्ते च भगवानजः ॥"

इति पाद्मे पातालखण्डे १२ अध्यायः ॥

पदकः, पुं, पदं वेत्ति यः ("कृसादिभ्यो युन् ।" ४।२।६१ । इति इन् ।) पदज्ञाता । इति शाकरः ॥ यथा, रघुतरङ्गिण्याम् । ५ । ४६ ।

पद्धती

"रामजाख्यमुपाध्यायं ख्यातव्याकरणश्रमम् ।
व्याख्यातपदकञ्चक्रे स तस्मिन् सुरमन्दिरे ॥")
स्वनामख्यातकण्ठभूषणञ्च । देवपदचिह्नादियुक्तत्वात् ॥ (पदमेव इति स्वार्थे के कृते, क्ली । पदम् । यथा, महाभारते अनुशासनपर्व्वणि ।
"इतःप्रभृति यातव्यं पदकं पदकं मुनेः ॥")
पदगः, पुं, (पदाभ्यां गच्छतीति । गम लृगतौ + "अन्येभ्योऽपि ।" इति डः ।) पदातिकः । इत्यमरः । २ । ८ । ६६ ॥ पद्भ्यां गमनकर्त्तरि त्रि ॥
पदन्यासः, पुं, (पदस्य गोपदस्येव न्यासो यत्र । यद्वा पदस्य न्यासः ।) गोचुरः । इति शब्दचन्द्रिका ॥ पदस्य विन्यासः । यथा, रसमञ्जरी ।
"पदन्यासो गेहाद्बहिरहिफणारोहसमः
खगेहादन्यत् स्याद्भवनमपरद्वीपतुलितम् ।
वचो लोकालभ्यं नृपधनतुल्यं नटगणः
पुमानन्यः कान्ताद्विधुरिव चतुर्थीसमुदितः ॥"
(तन्त्रोक्तान्नपूर्णामन्त्रस्यपदानां तत्तदङ्गेषु न्यासः । यदुक्तं तन्त्रसारज्ञानार्णवे ।
"एकमेकं पुनस्त्वेकं पुनरेकं द्वयन्ततः ।
चतुश्चतुस्तया ह्यन्यां पदान्यङ्गानि पार्व्वति ! ॥
पदान्येतानि देवेशि ! नवद्वारेषु न्यसेत् ।
मूर्द्धादिगुह्यपर्य्यन्तं पुनस्तेषु वरानने ! ॥
गुह्यादिब्रह्मरन्ध्रान्तं पदानां नवकं न्यसेत् ॥")
पदभङ्गः, क्ली, (विभक्तियुक्तानां पदानां भङ्गनं विश्लेषो यत्र । यद्वा, पदानि भज्यन्तेऽनेन । भञ्ज + करणे ल्युट् ।) निरुक्तम् । गूढ़ार्थशब्दव्याख्या । इति हेमचन्द्रः ॥
पदभञ्जिका, स्त्री, (पदानां भञ्जिका विश्लेषिका ।) पञ्जिका । टिप्पनी । इति हेमचन्द्रः ॥
पदमाला, स्त्री, (पदानां माला विस्तृतिर्यस्याम् ।) मोहनशीला विद्या । यथा,—
"पदमालां महाविद्यां सर्व्वदेवनमस्कृताम् ।
याचयामि सुरेशानसमादेहार्द्धधारिणम् ॥"
इति देवीपुराणे ६ अध्यायः ॥
अस्या विवरणं तत्रैव द्रष्टव्यम् । पदश्रेणी च ॥
पदवि: स्त्री, (पद्यते गम्यतेऽनया । पद गतौ + "पद्यटिभ्यामविः ।" इति अविः । ङीष् ।) पद्धतिः । पन्थाः । इत्यमरः । २ । १ । १५ ॥
पदवी, स्त्री, (पदवि + "ऋहिकारात्तादृक्तिनः ।" इति पक्षे ङीष् ।) पन्थाः । इत्यमरः । २ । १ । १५ ॥ (यथा, रघुः । ७ । ७ ।
"उत्सृष्टलीलागतिरागवाचा-
दलक्तकाङ्कां पदवीं ततान ॥")
पद्धतिः । यथा, तत्रैव । ३ । ५० ।
"बलं गजेन तवात्र मा निधाः
पदं पदव्यां सगरस्य सन्ततेः ॥"
पदम् । यथा, पञ्चतन्त्रे । १ । २५८ । "अथ सेनां विहाय अमात्यपदवीं प्रदत्ता याग्राय मुख्यापालत्वमिति ॥")
पदष्टीवं, क्ली, (पादौ च अष्टीवन्तौ च तयोः समाहारः । "अष्टनो दीर्घात्टीवन्निति ।" ५।४।७७। इति

निपातनात् सिद्धम् ।) युगपदुपस्थितचरण-जानुनी । इति व्याकरणम् ॥

पदाङ्कः, पुं, (पदस्य अङ्कश्चिह्नम् ।) क्रमाङ्कः । पाद-चिह्नम् । यथा,—

"श्राके शायकवेदयोऽग्निमिते श्रीदेवाग्नर्म्मार्पय-
ज्ञानन्दप्रदनन्दनन्दनपदद्वन्द्वारविन्दं हृदि ।
तत्रे क्षणपदाङ्कदूतमतुलं प्रीतिप्रदं श्रण्वतां
धीरः श्रीरघुरामरायनृपतेराज्ञां गृहीत्वादरात्॥

इति पदाङ्कदूतकाव्यम् ॥

पदाङ्गी, स्त्री, (हंसस्य पदमिव अङ्गं यस्याः। स्त्रियां ङीष् ।) हंसपदी । इति राजनिर्घण्टः ॥

पदाजिः, पुं, (पादाभ्यामजतीति । अज गतौ+ "पादे च ।" उणां । ४।१३१ । इति पादे चोपपदे अजेरिण् । "पादस्य पदाज्यातिगोपहतेषु ।" ६।३।५२ । इति पदादेशः । बहुलवचनात् अजेर्यभावः ।) पदातिकः । इत्यमरः । २ । ८ । ६६ ॥

पदातः, पुं, (पदाभ्यामततीति । पद्+अत्+अच् ।) पादातिकः । इति शब्दरत्नावली ॥

पदातिः, पुं, (पादाभ्यामतति गच्छतीति "पादे च ।" उणां ४।१३१ । इति पाद्+अति+इण् । "पादस्य पदाज्यातिगोपहतेषु ।" ६।३।५२ । इति पदादेशः ।) पदातिकः । पेयादा इति भाषा । तत्पर्य्यायः । पत्तिः २ पतगः ३ पादातिकः ४ पदाजिः ५ पद्गः ६ पदिकः ७ । इत्यमरः । २ । ८ । ६६ ॥ पदातिकः ८ पादात् ९ पादाविकः १० पदात् ११ पायिकः १२ शुवराजिः १३ । इति शब्दरत्नावली ॥ (यथा, महाभारते । १ । १३६ । ३१ ।

"गजानश्वान् रथांश्चैव पातयामास माधवः ।
पदातींश्च रथांश्चैव व्यधमद्दर्व्वनाशजः ॥")

पदातिकः, पुं, (पदाति+स्वार्थे कन् ।) पदातिः । इति शब्दरत्नावली ॥

पदारः, पुं, (पदं शब्दं शृणोतीति । शृ+अण् ।) पादधूलिः । पादालिन्दः । इति मेदिनी ॥

पदार्थः, पुं, पदानां घटपटादीनां अर्थोऽभिधेयः । तत्पर्य्यायः । भावः २ धर्म्मः ३ तत्त्वम् ४ सत्त्वम् ५ वस्तु ६ । इति जटाधरः ॥ * ॥ (पदार्था हि दर्शनमतभेदेन नानाविधाः । तत्र वैशेषिकाणां मते ।) सप्त पदार्थाः । यथा,—

"द्रव्यं गुणास्तथा कर्म्म सामान्यं सविशेषकम् ।
समवायस्तथाभावः पदार्थाः सप्त कीर्त्तिताः ॥"
"सप्तानामपि साधर्म्म्यं ज्ञेयत्वादिकमिष्यते ।
द्रव्यादयः पञ्च भावा अनेके समवायिनः ॥
सत्तावन्तस्त्रयस्त्वाद्या गुणादिर्निर्गुणक्रियः ॥"

इति भाषापरिच्छेदे । २, १४ ॥

"इति पदार्था वैशेषिकप्रसिद्धाः । नैयायिकानामप्यविरुद्धाः ।" इति सिद्धान्तमुक्तावली ॥ गौतमोक्तषोड़शपदार्थास्तु न्यायशब्दे द्रष्टव्याः ॥ (कपिलमते प्रकृत्यादयः पञ्चविंशतिः। पातञ्जलमते तु ईश्वरेण सह षड्विंशतिः। वेदान्तमते जीवात्मानात्मभेदात् द्विविधः। तत्र जीवात्मापि द्विविधः ईश्वरजीवाद्युपाधिभेदात्। एतावपि विद्याविद्याभेदेन द्विविधौ। केवलमविद्योपहितत्वाद्भेदव्यवहारः। अनात्मापि कारणकार्य्यसूक्ष्मस्थूलभेदात् त्रिविधः इति ॥)

पदासनं, क्ली, (पदः पादस्य वा आसनम् ।) पादपीठम् । इति हेमचन्द्रः ॥ पा राखा टुल् । इति भाषा ॥

पदिकः, पुं, (पादेन चरतीति । पाद+"पर्पादिभ्यः ठन् ।" ४।४।१०। इति ठन् । ततः पदादेशश्च ।) पदातिः । इत्यमरः । २ । ८ । ६७ ॥

पद्गः, पुं, (पद्भ्यां गच्छतीति । पद्+गम्+अन्येभ्योऽपीति डः ।) पदातिकः । इत्यमरः । २।८।६७॥

पद्धतिः, } स्त्री, (पद्भ्यां हन्ति गच्छतीति । पद
पद्धती, } गतौ+क्तिन् । "हिमकाषिहतिषु च।" ६।३।५४। इति पद्भावः। "वश्चादिभ्यश्च।" ४।१।४५ । इति वा ङीष् ।) वर्त्म । (यथा, रघुः ३।४६ ।

"पथः श्रुतेर्दर्शयितार ईश्वराः
स्खलीमसामादृते न पद्धतिम् ॥")

पंक्तिः । इति मेदिनी ॥ ग्रन्थार्थबोधकग्रन्थः । इति हेमचन्द्रः ॥ पदवी । सा च घोषवसुसिचादिरूपा । यथा । "षष्ठेऽन्नप्राशनं मासि यदेष्टं मङ्गलं कुले इति मनुवचनात् चूड़ाकार्य्या यथाकुलमिति याज्ञवल्क्यवचनात् देशाद्युक्तं कुलधर्म्ममुखं सगोत्रधर्म्मं नहि संत्यजेच्च इति वामनपुराणाच्च संस्कारमात्रे कुलधर्म्मानुरोधेन कालान्तरे मङ्गलविशेषाचरणवत् शूद्राणां नामकरणे वसुबोधादिरूपपद्धतियुक्तनामत्वञ्च बोध्यम् । एवमेव कुल्लूकभट्टः ।" इत्युद्धाहतत्त्वम् ॥

पद्मिमं, क्ली, (पादस्य हिमम् । "हिमकाषिहतिषु च ।" ६।३।५४ । इति पद्भावः ।) पदस्य शीतलता । इति संक्षिप्तसारव्याकरणम् ॥

पद्मं, क्ली पुं, (पद्यते इति । पद गतौ+"अर्त्तिस्तुसुहुसृधृभ्य इति ।" उणां । १ । १३६ । इति मन् । यद्वा, पद्मा तल्लीरस्यस्मिन् । "अर्शं आदिभ्योऽच् ।" ५।२।१२३ । इति अच् ।) स्वनामख्यातपुष्पविशेषः । तत्पर्य्यायः । नलिनम् २ अरविन्दम् ३ महोत्पलम् ४ सहस्रपत्रम् ५ कमलम् ६ शतपत्रम् ७ कुशेशयम् ८ पङ्केरुहम् ९ तामरसम् १० सारसम् ११ सरसीरुहम् १२ विसप्रसूनम् १३ राजीवम् १४ पुष्करम् १५ अम्भोरुहम् १६ । इत्यमरः । १ । १० । ३६-४० ॥ पङ्कजम् १७ अम्भोजम् १८ अम्बुजम् १९ सरसिजम् २० श्रीवासम् २१ श्रीपर्णम् २२ इन्दिरालयम् २३ जलेजातम् २४ अजम् २५ कञ्जम् २६ जलम् २७ नालीकम् २८ नालिकम् २९ वनजम् ३० अम्बुजम् ३१ पुटकम् ३२ अब्जः ३३ । इति शब्दरत्नावली ॥ अस्य गुणाः । कषायत्वम् । मधुरत्वम् । शीतलत्वम् । पित्तकफासनाशित्वञ्च । इति राजवल्लभः ॥ अवशिष्टम् कमलशब्दे द्रष्टव्यम् ॥ * ॥ पद्मकम् । तच्च गजस्य सुखादिस्थो बिन्दुसमूहः । यूहविशेषः । (यथा, मनुः ७ । १८८ ।

"यतश्च भयमाशङ्केत्ततो विस्तारयेद्बलम् ।
पद्मेन चैव यूहेन निविशेत सदा स्वयम्" ॥)

निधिभेदः । (यथा, महाभारते ।२।१०।३६ ।

"निधिप्रवरमुख्यौ च शङ्खपद्मौ धनेश्वरौ ।
सर्व्वान्निधीन् प्रगृह्याथ उपास्तां वै धनेश्वरम्"॥)

संख्यान्तरम् । तच्च दशार्बुदम् । (यथा, महाभारते ।

"अयुतम् प्रयुतञ्चैव पद्मम् खर्व्वमथार्ब्बुदम्" ॥)

दशशतञ्च इति मेदिनी ॥ पद्मकाष्ठौषधिः । इति धरणिः ॥ पुष्करमूलम् । सीसकम् । इति राजनिर्घण्टः (कल्पविशेषः । यथा, मार्कण्डेये ७७।३॥

"पद्मावसाने प्रलये निशासमोत्थितः प्रभुः ।
सत्त्वोद्रिक्तस्तदा ब्रह्मा शून्यं लोकमवैक्षत" ॥)

शरीरस्थषट्पद्मानि यथा,—

"मूलाधारे त्रिकोणाख्ये इच्छाज्ञानक्रियात्मके ।
मध्ये स्वयम्भुलिङ्गन्तु कोटिसूर्य्यसमप्रभम् ॥
तदूर्द्धे कामबीजन्तु कलशान्दुनादकम् ।
तदूर्द्धे तु शिखाकारा कुण्डली ब्रह्मविग्रहा ॥
तद्वह्नौ हेमवर्णाभम् व स-वर्णचतुर्दलम् ।
द्युतहेमसमप्रख्यं पद्मं तत्र विभावयेत् ॥
तदूर्द्धेऽग्निसमप्रख्यं षड्दलं हीरकप्रभम् ।
वादिलान्तषड्वर्णैन युक्ताधिष्ठानसंज्ञकम् ॥
मूलमाधारषट्कानां मूलाधारं ततो विदुः ॥१॥
स्वशब्देन परं लिङ्गं स्वाधिष्ठानं ततो विदुः ॥२॥
तदूर्द्धे नाभिदेशे तु मणिपूरं महत्प्रभम् ।
मेघाभं विद्युदाभञ्च बहुतेजोमयं ततः ॥
मणिवद्भिन्नं तत् पद्मं मणिपूरं तथोच्यते ।
दशभिश्च दलैर्युक्तं डादिफान्ताक्षरान्वितम् ॥
शिवेनाधिष्ठितं पद्मं विश्वालोकैककारणम् ॥३॥
तदूर्द्धेऽनाहतं पद्मसुद्यदादित्यसन्निभम् ।
कादिठान्ताक्षरैरर्कपत्रैश्च समधिष्ठितम् ॥
तन्मध्ये बाणलिङ्गन्तु सूर्य्यायुतसमप्रभम् ।
शब्दब्रह्ममयं शब्दोऽनाहतस्तत्र दृश्यते ॥
तेनाहताख्यं पद्मं तत्मुनिभिः परिकीर्त्यते ।
आनन्दसदनं तत्तु पुरुषाधिष्ठितं परम् ॥४॥
तदूर्द्धन्तु विशुद्धाख्यं दलषोड़शपङ्कजम् ।
स्वरैः षोड़शकैर्युक्तं धूम्रवर्णं महत्प्रभम् ॥
विशुद्धं तनुते यस्मात् जीवस्य हंसलोकनात् ।
विशुद्धं पद्ममाख्यातमाकाशाख्यं महत् परम् ॥५॥
आज्ञाचक्रं तदूर्द्धे तु आत्मनाधिष्ठितं परम् ।
आज्ञा चक्रमयं तत्र गुरोराज्ञेति कीर्त्तितम् ॥६॥
कैलासाख्यं तदूर्द्धे तु बोधनीन्तु तदूर्द्धतः ।
एवञ्च शिवचक्राणि प्रोक्तानि तव सुव्रत ! ।
सहस्रारासुजं बिन्दुस्थानं तदूर्द्धमीरितम् ॥"

इति तन्त्रसारः ॥

पद्मः, पुं, (पद्यते इति । पद गतौ+"अर्त्तिस्तुसुहुसृधृभ्य इति ।" उणां । १।१३६ । इति मन् ।) दाशरथिः । नागविशेषः । इति धरणिः ॥ (यथा, महाभारते ।२।६।८ ।

"शङ्खश्च लोहितश्चैव पद्मश्चिन्त्यश्च वीर्य्यवान् ॥"

पद्मोत्तरालयः । मनु ह्रादग्रन्थिनषट्कवक्त्रान्तर्गतकर्णिकिविशेषः । वलेवः । इति हेमचन्द्रः । गौडपुरनिवासान्तर्गतप्रथमवनः । यथा,—
"इत्याख्याय समाश्लिष्य नारी पद्मासनोपरि ।
रमेद्यावत् समाप्तिः स्यात् तावत्पद्मं कुरुः ।"
इति रतिमञ्जरी ॥

पद्मकं, क्ली. (पद्ममिव कायतीति । पद्म + कै + कः । पद्मप्रतिकृतिनिरूपणत्वात् तथात्वम् ।) विष्णुनाभम् । यथास्य मुखादिम्बो विष्णुनाभः । इत्यमरभरतौ ॥ (यथा, कुमारे । १ । ७ श्लोकटीकायां मल्लिनाथः । "अतएव कुक्षेरस्य ये बिन्दवः काये क्वोविशेषभाविनः पद्मकाया:।) पद्मकाश्रम् । इति मेदिनीधरणौ ॥ (यथा भारते १८८ अध्याये ।
"कर्णिकः पद्मकस्य एतैस्तैलं प्रसाधितम् ।
एभिर्दमनदौर्गन्ध्यकण्डुकुष्ठहरं परम् ॥"
अस्य गुणा यथा, भावप्रकाशे ।
"पद्मकं तुवरं तिक्तं शीतलं वातलं लघु ।
विसर्पदाहविस्फोटकुष्ठश्लेष्मपित्तहृत् ।
गर्भसंस्थापनं रक्षां वमिव्रणविषापहम् ॥")
कुष्ठम् । इति राजनिर्घण्टः ॥

पद्मकन्दः, पुं, (पद्मस्य कन्दः ।) कमलकन्दः । तत्पर्य्यायः । आलुकम् २ पद्ममूलम् ३ कटाक्षम् ४ आलुकम् ५ मृणालकम् ६ । अस्य गुणाः । कटुत्वम् । विष्टम्भित्वम् । रूक्षत्वम् । रक्तत्वम् । कषायत्वम् । कफपित्तकाश्मर्य्यादाह विनाशित्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
"पद्माधिकन्दः आलुकं करहाटश्च कथ्यते ।
मृणालमूलं भिस्साख्यं मृणालकश्च कथ्यते ॥
आलुकं शीतलं हृद्यं पित्तदाहास्रनुद्गुरु ।
दुर्जरं स्वादुपाकञ्च सृष्टानिलकफप्रदम् ॥
संस्कृतं मधुरं रूक्षं भिस्साख्यमपि तद्गुरु ॥"
इति भावप्रकाशः ॥

पद्मकाष्ठं, क्ली (पद्ममिव गन्धवत् काष्ठम् ।) ओषधिविशेषः । तत्पर्य्यायः । पद्मकम् २ पीतकम् ३ पीतम् ४ मालयम् ५ शीतलम् ६ हिमम् ७ शुभम् ८ केदारजम् ९ रक्तम् १० पाटलापुष्पसन्निभम् ११ पद्मकाष्ठम् १२ । अस्य गुणाः । शीतत्वम् । तिक्तत्वम् । रक्तपित्तविनाशित्वम् । मोहदाहज्वरभ्रान्तिकुष्ठविस्फोटनाशित्वञ्च । इति राजनिर्घण्टः ॥
अपि च भावप्रकाशे ।
"पद्मकं पद्मगन्धि स्यात्तथा पद्माख्यं स्मृतम् ।
पद्मकं तुवरं तिक्तं शीतलं वातलं लघु ॥
विसर्पदाहविस्फोटकुष्ठश्लेष्मपित्तहृत् ।
गर्भसंस्थापनं रक्षां वमिव्रणविषापहम् ॥"
इति भावप्रकाशः ॥

पद्मकी [न.] पुं. (पद्मकं बिन्दुरूपमस्यास्य । इनिः ।) भृङ्गराजः । इति शब्दमाला ॥

पद्मकेशरः, पुं क्ली. (पद्मस्य केशरः ।) किञ्जल्कः । इति राजनिर्घण्टः । (यथा, हरिवंशे ।
"सौवर्णैः किङ्किणीजालैः पद्मकेशरसन्निभैः ॥")

पद्मगर्भं, पद्मगर्भि, क्ली, त्रि, (पद्मस्येव गर्भोऽस्य । "उपमानाच्च ।" ५।३।१३६ । इति इन् । मुग्धबोधमते तु वातूपमानादित्युक्तेर्विभाषा ।) पद्मस्येव गर्भो यस्य तत् । इति मुग्धबोधव्याकरणम् ॥

पद्मगर्भः, पुं, (पद्मं गर्भः कुक्षिरिव यस्य । विष्णुनाभिकमलवासत्वात् तथात्वम् ।) ब्रह्मा । इति शब्दरत्नावली ॥ (पद्मस्य हृदयस्थपद्मस्य गर्भ आसनत्वेन कल्पितो यस्य उपासकैरितिशेषः । विष्णुः । यथा, महाभारते । १३।१४८।५२ ।
"पद्मनाभोऽरविन्दाक्षः पद्मगर्भः शरीरभृत् ॥"
"पद्मस्य हृदयाख्यस्य मध्ये उपास्यत्वात् पद्मगर्भः।"
इति भाष्यम् ॥
शिवः । यथा, तत्रैव १३।१७।१३२ ।
"पद्मगर्भो महागर्भो ब्रह्मगर्भो जलोद्भवः ॥")

पद्मचारिणी, स्त्री (पद्ममिव चरतीति । चर + णिनिः स्त्रियां ङीप् ॥) उत्तरापथभवस्वनामख्यातवृक्षविशेषः। (मूलकमलिनी इति ख्याता ॥' तत्पर्य्यायः । अजघा २ अतिचरा ३ पद्मा ४ चारुटी ५ । इत्यमरः । २ । ४ । १४६ ॥ अस्याः पर्य्यायान्तरं गुणाश्च मूलपद्मिनीशब्दे द्रष्टव्याः ॥

पद्मतनुः, पुं. (पद्मस्य तनुः ।) मृणालम् । इति राजनिर्घण्टः ॥

पद्मदर्शनः, पुं, (पद्मस्येव दर्शनमस्य ।) श्रीवासः । इति शब्दचन्द्रिका ॥ सीवान् इति भाषा ॥

पद्मनाभः, पुं. (पद्मं नाभौ यस्य । "अच्प्रत्यन्वय पूर्व्वात् सामलोम्नः ।" ५ । ४ । ७५ । इत्यत्र "अच्" इति योगविभागादच् । ब्रह्मोत्पत्तिकारणीभूतपद्मस्य नाभिजातत्वादस्य तथात्वम् ।) विष्णुः । इत्यमरः । १ । १ । १० ॥ (यथा, महाभारते । १३ । १४६ । १६ ॥
"अप्रमेयो हृषीकेशः पद्मनाभोऽमरप्रभुः ॥")
स्मरणे तस्य स्मरणीयत्वं यथा,—
"श्रीपथे चिन्तयेद्विष्णुं भोजने च जनार्द्दनम् ।
शयने पद्मनाभञ्च विवाहे च प्रजापतिम् ॥"
इत्यादि वृहन्नन्दिकेश्वरपुराणम् ॥
(हृदयपद्मस्यनाभौ नाभेरोषदुपरिभागे प्रकाशनात् महादेवः । यथा, महाभारते । १३ । १७ । १०५ ।
"पद्मनाभो महागर्भश्चन्द्रवक्त्रोऽनिलोऽनलः ॥"
पद्ममिव वर्त्तुलाकृतिः नाभिर्यस्य । धृतराष्ट्रपुत्रासामन्यतमः । यथा, महाभारते ।१।६७।८५ ।
"उर्णनाभः पद्मनाभस्तथा नन्दोपनन्दकौ ॥"
नागविशेषः । यथा, तत्रैव । १७ । ३५५ । ४ ।
"कृताधिवासो धर्म्मात्मा तत्र चक्षुःश्रवा महान् ।
पद्मनाभो महानाभः पद्म इत्येव विश्रुतः ॥")
भाविजिनविशेषः । इति हेमचन्द्रः ॥ (क्षत्रियकुलविशेषः । यथा, गौः रामायणे १ ।३१।२ ।
"पद्मनाभो महानाभः सुनाभो दुन्दुभिस्वनः ॥")

पद्मनाभिः, पुं. (पद्मं नाभौ यस्य । अत्रेति योगविभागस्य फलाकैचित्वात् न अच् ।) पद्मनाभः । इति त्रिरूपकोषः ॥

पद्मनाल, क्ली, (पद्मस्य नालम् ।) मृणालम् । यथा, "कर्णिका पद्मनालन्तु मृणालं तन्तुलं विसम् ॥"
इति हेमचन्द्रः । ४ । २६१ ॥

पद्मपत्रं, क्ली, (पद्मस्य पत्रमिव । पद्मपर्णसादृश्यादस्य तथात्वम् ।) पुष्करमूलम् । इत्यमरः । २ । ४ । १४५ ॥ (यथा, सुश्रुते चिकित्सितस्थाने ५ अध्याये । "श्वेतोत्पलपद्मकपद्मपत्रप्रभृतिभिः ॥" ॥ पद्मस्य पत्रम् ।) कमलदलम् ॥ (यथा, हठयोगदीपिकायाम् । २ । ७० ।
"अन्तः प्रवर्त्तितोदारमारुतापूरितोदरः ।
पद्मपत्रगतोऽपि सुखात् भ्रवते पद्मपत्रवत् ॥")

पद्मपर्णं, क्ली, (पद्मस्य पर्णं पत्रम् ।) पद्मपत्रम् । पुष्करमूलम् । इत्यमरटीका ॥

पद्मपलाशलोचनः, पुं, (पद्मस्य पलाशे पत्रे इव लोचने यस्य । पद्मपुष्पदलाकारचक्षुर्विशिष्टत्वात्तथात्वम् ।) विष्णुः । । यथा,—
"नान्यं ततः पद्मपलाशलोचनाद्-
दुःखच्छिदन्ते शरणायामि कञ्चन् ।
यो मृग्यते ह्यलभतीतपद्मया-
श्रियेतरैरङ्ग ! विमृग्यमायया ॥'
इति श्रीभागवते ४ स्कन्धः ॥


पद्मपाणिः, पुं, (पद्मं पाणौ यस्य ।) ब्रह्मा । इति शब्दरत्नावली ॥ बुधः । सूर्य्यः । इति विकाण्डशेषः ॥ (पद्महस्तके त्रि ॥)

पद्मपुष्पः, पुं, (पद्ममिव पुष्पमस्य ।) कर्णिकारवृक्षः । पिकाङ्गपक्षी । इति शब्दचन्द्रिका ॥

पद्मप्रभः, पुं, (पद्मस्येव प्रभा दीप्तिर्यस्य ।) चतुर्विंशतितीर्थङ्कारेषु अन्तर्गतषष्ठार्हन् । इति हेमचन्द्रः ॥ पद्मतुल्यप्रभायुक्ते त्रि ॥

पद्मप्रिया, स्त्री, (पद्मानि प्रियाणि यस्याः ।) भरतकारुसुनिपत्नी । मनसादेवी । इति शब्दरत्नावली ॥ (गायत्रीरूपा महादेवी । यथा, देवीभागवते । १२ । ६ । ६४ ।
"पद्मप्रिया पद्मसंस्था पद्माक्षी पद्मसम्भवा ॥")

पद्मबन्धः, पुं, (पद्मस्येव बन्धो रचना यस्य ।) चित्रकाव्यविशेषः । शब्दालङ्कारप्रभेदः । यथा,
"पद्माद्याकारहेतुत्वे वर्णानां चित्रमुच्यते ।"
अस्य च तथाविधमनिर्देशवशेन चमत्कारविधायिनामपि वर्णानां तथाविधश्लोकाकारसमवायविशेषवशेन च चमत्कारविधायिभिर्वर्णैरभेदेनोपचारत्वाच्छब्दालङ्कारत्वम् । उदाहरणं यथा, साहित्यदर्पणे ॥
"सारसा सुरसा चारु रुचा सार वपुष्मता ।
मात्त घूर्णतमा वामा सा यामा मेसु सा रमा ॥"
अस्य पद्मदलेषु वर्णविन्यासक्रमः ॥



पद्मबन्धुः, पुं, (पद्मस्य कमलस्य बन्धुः । सूर्य्योदये पद्मस्य प्रफुल्लितया तथात्वम् ।) सूर्य्यः । इति शब्दरत्नावली ॥ (पद्मेन वर्धते वृध्यते असौ निशायां मधुलोभात् इति भावः । वर्ध + उन् ।) भ्रमरः । इति शब्दचन्द्रिका ॥

पद्मभूः, पुं, (पद्मं विष्णुनाभिभवकमलं भूरुत्पत्तिस्थानं यस्य । (यद्वा, पद्मात् भवतीति । भू + क्विप् ।) ब्रह्मा । इति हलायुधः ॥ (अस्योत्पत्तिकथा यथा भागवते । ६ । १ । ८—६ ।

"परावरेषां भूतानामात्मा यः पुरुषः परः ।
स एवासीदिदं विश्वं कल्पान्तेऽन्यन्न किञ्चन ॥
तस्य नाभेः समभवत् पद्मकोशो हिरण्मयः ।
तस्मिन् जज्ञे महाराज ! स्वयम्भूश्चतुराननः ॥")

पद्मसखी, स्त्री, (पद्मस्य सखमिव सुखं उत्पत्तिप्रारम्भो यस्याः । स्त्रियां ङीप् ।) दुरालभा । इति शब्दचन्द्रिका ॥ (पद्मस्य सुखमिव सुखं वदनं यस्य ।) पद्मसदृशसुखविशिष्टे त्रि ॥

पद्मयोनिः, पुं, (पद्मं विष्णुनाभिकमलं योनिरुत्पत्तिस्थानं यस्य ।) ब्रह्मा । यथा,—

"अस्माच्च कारणाद्ब्रह्मन् ! पुत्रो भवतु मे भवान् ।
पद्मयोनिरिति ख्यातो सत्प्रियार्थं जगत्पतेः ॥"

इति कौर्म्मे ६ अध्यायः ॥

पद्मरागः, पुं, (पद्मस्येव रागो यस्य ।) रक्तवर्णमणिविशेषः । माणिक इति भाषा । तत्पर्य्यायः । शोणरत्नम् २ । लोहितकः ३ । इत्यमरः । २।६।६२ ॥ लोहितम् ४ । कुरुविन्दकम् ५ । इति शब्दरत्नावली ॥ (बृहत्संहितायां ८२ अध्याये अस्य परीक्षादिकं यथा,—

"सौगन्धिककुरुविन्दस्फटिकैभ्यः पद्मरागसम्भूतिः ।
सौगन्धिकजा भ्रमराङ्गनाञ्जनस्वरसद्युतयः ॥
कुरुविन्दभवाः शबला मन्दद्युतयश्च धातुभिर्विद्धाः ।
स्फटिकभवा द्युतिमन्तो नानावर्णा विशुद्धाश्च ॥
स्निग्धः प्रभानुलेपी स्वच्छोऽर्च्चिष्मान् गुरुः सुसंस्थानः ।
अन्तःप्रभोऽतिरागी मणिरत्नगुणाः समस्तानाम् ॥
कलुषा मन्दद्युतयो लेखाकीर्णाः सधातवः खरजाः ।
दुर्विद्धा न मनोज्ञाः सशर्कराश्चेति मणिदोषाः ॥
भ्रमरशिखिकण्ठवर्णा
दीपशिखासमप्रभो भुजङ्गानाम् ।
भवति मणिः किल सर्व्वेषु योनिषु यः स विज्ञेयः ।
यस्तं बिभर्त्ति मनुजाधिपतिर्न तस्य
दोषा भवन्ति विधरोगकृताः कदाचित् ।
राष्ट्रे च नित्यमभिवर्षति तस्य देवः
शत्रूंश्च नाशयति तस्य मणेः प्रभावात् ॥
षड्विंशतिः सहस्राण्येकस्य मणेः पलप्रमाणस्य ।
कर्षत्रयस्य विंशतिरुद्दिष्टा पद्मरागस्य ॥
अर्द्धपलस्य द्वादशकर्षस्यैकस्य षट् सहस्राणि ।
यद्वाष्टमाषकधृतं तस्य सहस्रत्रयं मूल्यम् ॥
माषकचतुष्टयं दशशतकयं
द्वौ तु पञ्चशतमूल्यौ ॥
परिकल्प्यमन्तराले
मूल्यं हीनाधिकगुणानाम् ॥
वर्णघृनस्यार्द्धं तेजोहीनस्य मूल्यमर्धांशः ।
अल्पगुणो बहुदोषो मूल्यात् प्राप्नोति विंशांशम् ॥
आधूम्रं व्रणबहुलं स्वल्पगुणञ्चाप्नुयाद्विंशतिभागम् ।
इति पद्मरागमूल्यं पूर्व्वाचार्य्यैः समुद्दिष्टम् ॥")

राजनिर्घण्टोक्तपर्य्यायगुणौ माणिक्यशब्दे द्रष्टव्यौ तस्य वर्णो यथा,—

"सिंहले तु भवेद्रक्तं पद्मरागमनुत्तमम् ।
पीतं काणपुरोद्भूतं कुरुविन्दमिति स्मृतम् ॥
अशोकपल्लवच्छायमसुं सौगन्धिकं विदुः ।
तुम्बुरे छायया नीलं नीलगन्धि प्रकीर्त्तितम् ॥
उत्तमं सिंहलोद्भूतं निकषं तुम्बुरोद्भवम् ।
मध्यमं मध्यमं ज्ञेयं माणिक्यं क्षेत्रभेदतः ॥*॥

तथा च ।

वन्धूकगुञ्जासकलेन्द्रगोप-
जवासनाशुक्समवर्णशोभाः ।
माणिक्यवो दाडिमबीजवर्णा-
स्तथापरे किंशुकपुष्पभासः ॥
सिन्दूरशोणोत्पलकुङ्कुमानां
लाक्षारसस्यापि समानवर्णाः ।
सान्द्रे निरागे प्रभया स्वयैव
भान्ति स्वलक्ष्मा स्फुटमध्यशोभाः ॥
भानोश्च भासामनुवेधयोग-
मासाद्य रश्मिप्रकरेण दूरम् ।
पार्श्वानि सर्व्वाण्यनुरञ्जयन्ति
गुणोपपन्नाः स्फटिकप्रसूताः ॥
कुसुम्भनीलीशुकतिमिश्ररागं
प्रत्यग्ररक्ताम्बरतुल्यभासः ।
तथापरेऽरुष्करकण्टकारी-
पुष्पत्विषो हिङ्गुलकत्विषोऽन्ये ॥
चकोरपुंस्कोकिलसारसानां
नेत्रावभासश्च भवन्ति कैश्चित् ।
अन्ये पुनर्नातिविशुद्धितानां
तुल्यत्विषः कोकनदोदराणाम् ॥
प्रभावकाठिन्यगुरुत्वयोगैः
प्रायः समानाः स्फटिकोद्भवानाम् ।
आनीलरक्तोत्पलचारुभासः
सौगन्धिकाख्या मणयो भवन्ति ॥
यो मन्दराजः कुरुविन्दजेषु
स एव जातः स्फटिकोद्भवेषु ।
निरर्च्चियोऽन्तर्मलकुलीभवन्ति
प्रभाववन्तोऽपि न तत्समानाः ॥
ये तु रावणगङ्गायां जायन्ते कुरुविन्दकाः ।
पद्मरागा घनं रागं बिभ्राणाः स्वस्फुटार्चिषः ॥
वर्णानुयायिनस्तेषामन्तर्देशे तथापरे ।
न जायन्ते तु ये कैश्चित् मलरेशमवाप्नुयुः ॥
तथैव स्फटिकोत्थानां देशे तुम्बुरसंज्ञके ।
सधर्म्माणः प्रजायन्ते स्वल्पमलाहितेतराः ॥"*

अथ जात्यादि ।

"माणिक्यस्य प्रवक्ष्यामि यथा जातिचतुष्टयम् ।
ब्रह्मक्षत्रियवैश्याश्च शूद्रश्चाथ यथाक्रमम् ॥
रक्तश्वेतो भवेद्विप्रस्तिरक्तस्तु क्षत्रियः ।
रक्तपीतो भवेद्वैश्यो रक्तनीलस्तथान्त्यजः ।
पद्मरागो भवेद्विप्रः कुरुविन्दस्तु बाहुजः ।
सौगन्धिको भवेद्वैश्यो मांसखण्डस्तथान्त्यजः ॥
शोणपद्मसमाकारः खदिराङ्गारसप्रभः ।
पद्मरागो द्विजः प्रोक्तश्छायाभेदेन सर्व्वदा
गुञ्जासिन्दूरवन्धूकनागरङ्गसमप्रभः ।
दाडिमीकुसुमाभासः कुरुविन्दस्तु बाहुजः ॥
हिङ्गुलाभाशोकपुष्पाभमीषत्पीतलोहितम् ।
जवालाक्षारसप्रायं वैश्यं सौगन्धिकं विदुः ॥
अरक्तः कान्तिहीनश्च चिक्कणश्च विशेषतः ।
मांसखण्डसमाभासो ह्यन्त्यजः पापनाशनः ॥"
मांसखण्डस्य नीलगन्धेः संज्ञा ॥ * ॥

अथ दोषाः ।

"माणिक्यस्य समाख्याता अष्टौ दोषा सुनीश्वरैः ।
द्विच्छायश्च द्विरूपश्च सम्भेदः कर्करस्तथा ॥
अशोभनं कोकिलश्च जलं धूम्राभिधश्च वै ।
गुणाश्चत्वार आख्याताश्छायाः षोड़श कीर्त्तिताः ॥
छायास्तु पूर्व्वोक्ता एव ।

"छायाद्वितयसम्बन्धाद्द्विच्छायं वन्धुनाशनम् ।
द्विरूपं द्विपदन्तेन माणिक्येन पराभवः ॥
सम्भेदो भिन्नमित्युक्तं शुक्लघानविनायकः ।
कर्करं कर्करायुक्तं पशुबन्धुविनाशकृत् ॥
दुग्धेनेव समालिप्तमघनीपुटमुच्यते ।
अशोभनं समुद्दिष्टं माणिक्यं बन्धुदुःखकृत् ॥
मधुबिन्दुसमच्छायं कोकिलं परिकीर्त्तितम् ।
आयुर्लक्ष्मीयशो हन्ति सदोषं तन्न धारयेत् ॥
रागहीनं जलं प्रोक्तं धनधान्यापवादकृत् ।
धूम्रं धूमसमाकारं वैद्युतं भयमावहेत् ॥
तथा,—

"शोभाद्वितयवन्तो ये मणयः घातकारकाः ।
उभयत्र पदं येषां तेन च स्यात् पराभवः ॥
भिन्नेन युद्धे नृपतेः स्यात् कर्करबन्धनाशकृत् ।
दुग्धेनेव समालिप्तः पुटके वस्तु सम्भवेत् ॥
दुःखकृत् स समाख्यातो न नृपे रत्नशोभकः ।
मधुबिन्दुसमा शोभा कोकिलानां प्रकीर्त्तिता ॥
तेषाञ्च बहुभेदाः सुपरीक्ष्ये धार्य्याः कदाचन ॥"

अथ गुणाः ।

"गुरुत्वं स्निग्धता चैव वैमल्यमतिरक्तता ॥"

तथा च ।

"वर्णाधिकं गुरुत्वञ्च स्निग्धता समताच्छता ।
अर्च्चिष्मत्ता महत्ता च मणीनां गुणसंग्रहः ॥"*॥

फलम् ।

"ये कर्कराश्छिद्रमलोपदिग्धाः
प्रभाविमुक्ताः परुषा विवर्णाः ।
न ते प्रशस्ता मणयो भवन्ति
समानतो जातिगुणैः समस्तैः ॥
दोषोपरुष्टं मणिमप्रबोधाद्-
बिभर्त्ति यः कञ्चन कञ्चिदेकम् ।

पद्मराग

नं यस्तुदः खाय सवस्तुवित्त-
नाशादयो दोषगणा भजन्ते ॥
सपद्मरागस्य महागुणस्य
भर्त्तारमाप्तन समुपैति काचित् ॥
दोषोपसर्गप्रभवाश्च ये ते
नोपद्रवास्तं समभिद्रवन्ति ।
गुणैः समस्तैः सकलैरुपेतं
यः पद्मरागं प्रयतो बिभर्त्ति ॥" * ॥

अस्य परीक्षा यथा,—

"बालार्ककरसंस्पर्शात् यः स्निग्धां लोहितां
वमेत् ।
रञ्जयेदाश्मं वापि स महागुण उच्यते ॥
दृषि घृतगुणे क्षिप्तो रञ्जयेद्यः समन्ततः ।
वमेच्छिखां लोहितां वा पद्मरागः स उत्तमः ॥
अन्धकारे महाघोरे यो न्यस्तः सन् महामणिः ।
प्रकाशयति सूर्य्याभः स श्रेष्ठः पद्मरागकः ॥
पद्मकोषे तु यो न्यस्तो विकाशयति तत्क्षणात् ।
पद्मरागवरो ह्येष देवानामपि दुर्लभः ॥
सर्व्वारिष्टप्रशमनः सर्व्वसम्पत्तिदायकः ।
चत्वारस्तु मयोद्दिष्टा गुणिनश्च यथोत्तरम् ॥
यो मणिर्दृश्यते दूराज्ज्वलदग्निसमच्छविः ।
वंशकान्तिः स विज्ञेयः सर्व्वसम्पत्तिकारकः ॥
पद्मरागः समं नव विभर्त्ति रागः
स्निग्धं स एव सकलः खलु वर्च्चसे ।
वर्च्चयेद्यमति वा करजाल-
मुत्तरोत्तरमहागुणिनस्ते ॥
नीलं रसं दुग्धरसं जलं वा
ये रञ्जयन्ति द्विगुणप्रमाणम् ।
ते ते यथापूर्व्वमतिप्रशस्ताः
सौभाग्यसम्पत्तिविधानदायकाः ॥" * ॥

परिमाणम् ।

"गुञ्जाफलप्रमाणस्तु दशसप्तत्रिगुञ्जकान् ।
पद्मरागस्तुलयति यथापूर्व्वं महागुणः ॥
क्रोष्टुकोलफलाकारो द्वादशाष्टाब्धिगुञ्जकान् ।
पद्मरागस्तुलयति यथापूर्व्वं महागुणः ॥
बदरीफलतुल्यो यः खरदिग्वसुमाषकः ।
तथा धात्रीफलत्रिंशद्गुञ्जाष्टमाषकः ॥
तथाम्रफलतुल्यो यो बल्वजैकमाषकः ।
ताम्बूलफलमानो यश्चतुस्त्रिंशत्तिकतोलकः ॥
बिल्वीफलसमाकारो वसुषड्दशतोलकः ।
अतःपरं प्रमाणेन मानेन च न लभ्यते ।
यदि लभ्येत पुण्येन तदा सिद्धिमवाप्नुयात् ॥
केचिच्चारुतराः सन्ति जातीनां प्रतिरूपकाः ।
विजातयः प्रयत्नेन विद्वांस्तानुपलक्षयेत् ॥
कलसपुरोद्भवसिंहलतुम्बुरदेशोत्थलुक्तमालीयाः ।
श्रीपर्णिकाश्च षड्भा विजातयः पद्मरागाणाम् ॥
तुषोपसर्गात् कलसाभिधान-
मातास्रभावादपि तुम्बुरुत्थम् ।
कार्ष्णात्तथा सिंहलदेशजातं
सुक्ताभिधानं नभसः स्वभावात् ।

पद्मराग

श्रीपर्णकं दीप्तिनिराकृतित्वा-
द्विजातिलिङ्गाश्रय एष भेदः ॥"

तथा च ।

"स्नेहप्रदेहो मृदुता लघुत्वं
विजातिलिङ्गं खलु सार्व्वजन्यम् ।
यः श्यामिकां पुष्यति पद्मरागो
यो वा तुषाग्नामिव चूर्णमध्यः ॥
स्नेहप्रदिग्धो न च यो विभाति
यो वा प्रनष्टः प्रजहाति दीप्तिम् ।
आक्रान्तमूर्त्ता च तथाङ्गुलिभ्यां
यः कालिकां पार्श्वगतां बिभर्त्ति ॥
सम्प्राप्य चोत्क्षेपपथानुवृत्तिं
बिभर्त्ति यः सर्व्वगुणानतीव ।
तुल्यप्रमाणस्य च तुल्यजातें-
र्यो वा गुरुत्वेन भवेन्न तुल्यः ॥
प्राप्यापि रत्नाकरजां स्वजातिं
लघुत्वरूक्षेण गुणेन विद्वान् ॥
अप्रणश्यति सन्दीप्ते श्लिलायां परिवर्षयेत् ।
दृष्टो योऽत्यन्तशोभावान् गरिमाणं न मुञ्चति ।
स ज्ञेयः शुद्धजातिस्तु ज्ञेयाश्चान्ये विजातयः ॥
स्वजातकं समुत्सृज्य विलिखेद्वा परस्परम् ।
वज्रं वा कुरुविन्दं वा विमुञ्चान्योन्यकेनचित् ।
न शक्यं लेखनं कर्त्तुं पद्मरागेन्द्रनीलयोः ॥
जातस्य सर्व्वोऽपि मणेर्न जातु
विजातयः कान्तिसमानवर्णाः ।
तथापि नानाकरणार्थभेदं
भेदप्रकारः परमः प्रदिष्टः ॥
गुणोपपन्नेन सहाववद्धो
मणिस्तु धार्य्यो विगुणेन जात्यः ।
न कौसुम्भेनापि सहाववद्धं
विद्वान् विजातिं विभृयात् कदाचित् ॥
चण्डाल एकोऽपि यथा द्विजानीन्
समेत्य भूरीनपकृत्यबन्धात् ।
तथा मणीन् भूरिगुणोपपन्नान्
अक्लोति विद्रावयितुं विजातः ॥" * ॥

अथ मूल्यम् ।

बालार्काभिमुखं स्थित्वा दर्पणे धारयेन्मणिम् ।
तत्र कान्तिविभागेन छायाभागं विनिर्द्दिशेत् ॥
वज्रस्य यत्तण्डुलसंख्ययोक्तं
मूल्यं समुन्मापितगौरवस्य ।
तत्पद्मरागस्य गुणान्वितस्य
स्याम्मायकाख्या तुलितस्य मूल्यम् ॥
यन्मूल्यं पद्मरागस्य सगुणस्य प्रकीर्त्तितम् ।
तावन्मूल्यं तथाशुद्धे कुरुविन्दे विधीयते ॥
सगुणे कुरुविन्दे च यावन्मूल्यं प्रकीर्त्तितम् ।
तावन्मूल्यचतुर्थांशग्रहीनं स्याद्वे सुगन्धिके ॥
यावन्मूल्यं समाख्यातं वैश्यवर्णे च सूरिभिः ।
तावन्मूल्यचतुर्थांशं हीयते शूद्रचक्रनि ॥
पद्मरागः पणं यस्तु धत्ते लाजारसप्रभः ।
कार्षापणसहस्राणि त्रिंशन्मूल्यं लभेत सः ॥
इन्द्रगोपकसङ्काशः कर्षत्रयधृतो मणिः ।
द्वाविंशतिं सहस्राणां तस्य मूल्यं विनिर्द्दिशेत् ॥

पद्मवी

एकोनो गूयते यस्तु जवाकुसुमसन्निभः ।
कार्षापणसहस्राणि तस्य मूल्यं चतुर्द्दश ॥
बालादित्यद्युतिनिभः कर्षं यस्तु प्रतुल्यते ।
कार्षापणशतानान्तु मूल्यं सद्भिः प्रकीर्त्तितम् ॥
यस्तु दाड़िमपुष्पाभः कर्षार्द्धेन तु सम्मितः ।
कार्षापणशतानान्तु विंशतिं मूल्यमादिशेत् ॥
चत्वारो माषका यस्तु रक्तोत्पलदलप्रभः ।
मूल्यं तस्य विधातव्यं सूरिभिः शतपञ्चकम् ॥
द्विमाषको यस्तु गुणैः सर्व्वैरेव समन्वितः ।
तस्य मूल्यं विधातव्यं द्विशतं तत्त्ववेदिभिः ॥
माषकैकमितो यस्तु पद्मरागो गुणान्वितः ।
प्रतैकसम्मितं वाच्यं मूल्यं रत्नविचक्षणैः ॥
अतोऽन्यूनप्रमाणास्तु पद्मरागा गुणोत्तराः ।
स्वर्णद्विगुणमूल्येन मूल्यं तेषां प्रकल्पयेत् ॥
कार्षापणः समाख्यातः पुराणद्वयसम्मितः ।
अन्ये कुसुम्भपानीयमञ्जिष्ठोदकसन्निभाः ॥
काषाया इति विख्याताः स्फटिकप्रभवाश्च ते ।
तेषां दोषान् गुणान् वापि पद्मरागवदादिशेत् ॥
मूल्यमल्पन्तु विज्ञेयं धारणेऽल्पफलं तथा ।
ब्रह्मक्षत्रियवैश्यान्त्यास्चतुर्धा ये प्रकीर्त्तिताः ॥
चतुर्विधैर्नृपतिभिर्धार्य्या सम्पत्तिहेतवे ।
अतोऽन्यथा धृतः कुर्य्याद्रोगशोकभयत्रयम् ॥"

इति युक्तिकल्पतरौ पद्मरागपरीक्षा ॥

पद्मलाञ्छनः, पुं, (पद्मवत् लाञ्छनं पद्माकारलक्षणं चिह्नमितिशेषः यस्य ।) ब्रह्मा । सूर्य्यः । कुबेरः । राजा । इति मेदिनी ॥ (बुद्धविशेषः । इति शब्दचिन्तामणिः ॥)

पद्मलाञ्छना, स्त्री, (पद्मं लाञ्छनं यस्याः ।) तारा । लक्ष्मीः । सरस्वती । इति मेदिनी ॥

पद्मवर्णकं, क्ली, (पद्मस्येव वर्णोऽस्य । कप् ।) पुष्करमूलम् । इति जटाधरः ॥ पद्मतुल्यवर्णयुक्ते त्रि ॥

पद्मवासा, स्त्री, (पद्मे वासो यस्याः ।) लक्ष्मीः । इति हेमचन्द्रः ॥

पद्मबीजं, क्लीं, (पद्मस्य बीजम् ।) कमलबीजम् । तत्पर्य्यायः । पद्माक्षम् २ भालोबम् ३ कन्दली ४ भेरुडा ५ क्रौञ्चादनी ६ क्रौञ्चा ७ श्यामा ८ पद्मपर्कटी ९ । अस्य गुणाः । कटुत्वम् । स्वादुत्वम् । पित्तच्छर्द्दिदाहास्रशोषनाशित्वम् । पाचनत्वम् । रुचिकारित्वञ्च । इति राजनिर्घण्टः ॥

"पद्मबीजं हिमं स्वादु कषायं तिक्तकं गुरु ।
विष्टम्भि वृष्यं रूक्षञ्च गर्भसंस्थापकं परम् ॥
कफवातकरं वल्यं ग्राहि पित्तास्रदाहजुत् ॥"

इति भावप्रकाशः ॥

(पद्मबीजमालाजपेनापि साधकः सिद्धिमाप्नुयात् । इति तन्त्रशास्त्रे प्रसिद्धिः ॥ तदुक्तं यथा,—

"भक्त्या यो जपते नित्यं पद्मबीजैः सुदीक्षितः ।
अचिरान्नभते सिद्धिं सत्यं सत्यं न संशयः ॥")

पद्मबीजाभं, क्ली, (पद्मबीजस्य आभा इव आभा यस्य । पद्मबीजवत् आभातीति वा । आ+भा+कः ।) माखानम् । इति राजनिर्घण्टः । माखाना इति भाषा ॥

पद्माल

पद्मा. स्त्री, (पद्मं वासस्थलत्वेनास्त्यस्याः। "अर्श आदिभ्योऽच्।" ५। २। १२७। इति अच् टाप् च।) लक्ष्मीः। (यथा, रघुः। ४। ५।
"छायामण्डललक्ष्येण तमद्राक्षा किल स्वयम्।
पद्मा पद्मातपत्रेण भेजे साम्राज्यदीक्षितम्॥")
लवङ्गम्। पद्मचारिणी। इत्यमरः॥ (पद्यते इति। "अर्त्तिसुस्विति।" उणां। १। १४०। इति मन् टाप् च।) पन्नगी। सा तु मनसा। फञ्जिका। इति मेदिनीशब्दरत्नावल्यौ॥ वृत्ताढ्यभाता। इति हेमचन्द्रः॥ क्षुसुम्भपुष्पम्। इति रत्नमाला॥ वृहद्रथराजकन्या कल्किदेवेन विवाहिता। यथा, कल्किपुराणे १०। अध्यायः॥
"हरेरागमनं श्रुत्वा सहर्षोऽभूद्वृहद्रथः।
पुरोधसा ब्राह्मणैश्च पात्रैर्मित्रैः समङ्गलैः॥
वाद्यताण्डवगीतैश्च पूजायोजनपाणिभिः।
जगामानयितुं कल्किं सार्द्धं निजजनैः प्रभुः॥
ततो जलाशयाभ्यासं गत्वा विष्णुयशःसुतम्।
मणिवेदिकमासीनं भुवमेकगतिं पतिम्॥
ददर्श पुरतो राजा रूपशीलगुणाकरम्।
साश्रुः सपुलकः श्रीमान् दृष्ट्वा साधु तमर्चयत॥
ज्ञानागोचरमेतन्मे तवागमनमीश्वर!।
यथा मान्धातृपुत्रस्य यदुनाथेन कानने॥
इत्यूक्त्वा तं पूजयित्वा समानीय निजाश्रमे।
हर्म्यप्रासादसंबाधे स्थापयित्वा ददौ सुताम्॥
पद्मां पद्मविशालाक्षीं पद्मनेत्राय पद्मिनीम्।
पद्मजादेग्रितः पद्मनाभायादाद्यथा श्रियम्॥
कल्किर्लब्ध्वा प्रियां भार्य्यां सिंहले साधु सत्कृतः।
ससुवास विशेषज्ञः समीक्ष्य द्वीपमुत्तमम्॥"

पद्माकरः, पुं, (पद्मस्य आकरः।) पद्मजनकजलाशयः। तत्पर्य्यायः। तड़ागः २ कासारः ३ सरसी ४ सरः ५। इत्यमरः। १। १०। २८॥ सरोजिनी ६। इति जटाधरः॥ सरोवरः ७ तड़ाकः ८ तटाकः ९ सरसम् १० सरम् ११ सरकम् १२। इति शब्दरत्नावली॥ पद्मं सदैवागाधे महाजलाशये सपद्मे योग्यतया नित्यञ्च। पद्मैव सरोमात्रे। इति पञ्जिकाकोङ्कटादयोऽपि। पद्माकरादित्रयं सपद्मागाधजलाशये। कासारादित्रयं कृत्रिमपद्माकरे। इति स्वाम्यादयः। पद्माकरादित्रयं पद्मयुक्तजलाशयमात्रे। कासारादित्रयं सरोवरमात्रे। इत्यन्ये। पद्मानामाकर उत्पत्तिस्थानं. पद्माकरः क्वचित् पद्मशून्येऽपि योग्यतयेति सुभूतिः। इति भरतः॥

पद्माक्षं, क्ली, (पद्मस्य अक्षीव। समासे षच्।) पद्मबीजम्। इति हारावली॥ (पद्मे इव पद्मयुगलवत् अक्षिणी यस्य।) पद्मतुल्याक्षे त्रि॥

पद्माटः, पुं, (पद्मं पद्मसाटश्यं अटति गच्छति पत्रेणेति अट गतौ + "कर्म्मण्यण्।" ३। २। १। इति अण्।) चक्रमर्दः। इत्यमरः। २। ४। ९४७॥

पद्मालया, स्त्री, (पद्ममेव आलयो वासस्थानं यस्याः।) लक्ष्मीः। लवङ्गम्। इत्यमरः॥ (लक्ष्मीस्वरूपत्वात् गङ्गापि। यथा, काशीखण्डे गङ्गासहस्रनामकीर्त्तने। २६। १०५।
"पद्मालया पराशक्तिः पुरजित्परमप्रिया॥")

पद्मावती, स्त्री, (पद्म + अस्त्यर्थे मतुप् मस्य वत्वम्। संज्ञायां दीर्घः।) मनसादेवी। नदीविशेषः। पद्मा इति ख्याता। इति शब्दरत्नावली॥ पद्मचारिणी। इति जटाधरः॥ जयदेवपत्नी। यथा,—
"जयति पद्मावतीरमणजयदेव-
कविभारतीभणितमतिशयातम्।"
इति गीतगोविन्दः॥

पद्मावतीप्रियः, पुं, (पद्मावत्याः प्रियः स्वामी।) जरत्कारुमुनिः। इति शब्दरत्नावली॥ जयदेवश्च॥

पद्मासनं. क्ली, (पद्ममिव पद्माकारेण यद्यमित्यर्थः। आसनम्।) योगासनविशेषः। यथा,—
"वामोरूपरि दक्षिणं नियमतः संस्थाप्य वामं तथा
दक्षोरूपरि पश्चिमेन विधिना धृत्वा कराभ्यां धृतम्।
अङ्गुष्ठं हृदये निधाय चिबुकं नासाग्रमालोकये-
देतद्व्याधिविकारनाशनकरं पद्मासनं प्रोच्यते॥"
अन्यदप्यत्र।
"वामोरूपरि दक्षिणं हि चरणं संस्थाप्य वामं तथा-
प्यन्योरूपरि तस्य बन्धनविधौ धृत्वा कराभ्यां दृढ़म्।
अङ्गुष्ठं हृदये निधाय चिबुकं नासाग्रमालोकये-
देतद्व्याधिविनाशकारि यमिनां पद्मासनं प्रोच्यते॥"
इति गोरक्षसंहिता॥
(मत्स्येन्द्रनाथाभिमतं पद्मासनं यथा, हठयोगदीपिकायाम्। १। ४४-४७।
"वामोरूपरि दक्षिणं च चरणं संस्थाप्य वामं तथा
दक्षोरूपरि पश्चिमेन विधिना धृत्वा कराभ्यां दृढ़ं।
अङ्गुष्ठौ हृदये निधाय चिबुकं नासाग्र-
मालोकये देतद्व्याधिविनाशकारि यमिनां
पद्मासनं प्रोच्यते॥
उत्तानौ चरणौ कृत्वा ऊरुसंस्थौ प्रयत्नतः।
ऊरुमध्ये तथोत्तानौ पाणी कृत्वा ततोऽङ्गुलौ॥
नासाग्रे विन्यसेद्राजदन्तमूले तु जिह्वया।
उत्तम्भ्य चिबुकं वक्षस्युत्थाप्य पवनं शनैः।
इदं पद्मासनं प्रोक्तं सर्व्वव्याधिविनाशनम्।
दुर्लभं येन केनापि धीमता लभ्यते भुवि॥")
पूजार्थं धातुमयपद्माकारासनञ्च।
(रतिविषयकपद्मासनम् यथा, रतिमञ्जर्य्याम् ४०
"पद्मासनो नागपाशो लतावेष्टोऽर्द्धसंपुटः॥"
लक्षणं यथा, तत्रैव ४२।
"हस्ताभ्याञ्च समालिङ्ग्य नारीं पद्मासनोपरि।
रमेद्गाढ़ं समाकृष्य बन्धोऽयं पद्मसंज्ञकः॥")

पद्मासनः, पुं, (पद्मं विष्णुनाभिकमलं आसनं यस्य।) ब्रह्मा। कमलासनः। इत्यमरदर्शनात्॥

पद्मास

पद्मिनी

पद्माक्षा. स्त्री, (पद्मस्य आक्षा आख्या यस्याः।) पद्मचारिणी। इति राजनिर्घण्टः।

पद्मिनी, स्त्री, (पद्मानि सन्त्यस्याम्। पुष्करादित्वादिनिः।) पद्मयुक्तदेशः। पद्मसमूहः। पद्मलता। इति भरतः॥ तत्पर्य्यायः। नलिनी २ विसिनी ३। इत्यमरः। १।१०।३६॥ मृणालिनी ४ कमलिनी ५ पुटकिनी ६ पङ्कजिनी ७ सरोजिनी ८। इति माधवः॥ नालिकिनी ९ नालीकिनी १० अरविन्दिनी ११। इति कोषान्तरम्॥ अम्भोजिनी १२ पुष्करिणी १३ जम्बालिनी १४। इति शब्दरत्नावली॥ अलिनी १५। तस्या लक्षणं यथा,—
"मूलनालदलोत्पुल्लफलैः समुदिता पुनः।
पद्मिनी प्रोच्यते प्राज्ञैर्विस्तीर्णादिस्व साकृता॥"
तस्या गुणाः।
"पद्मिनी मधुरा तिक्ता कषाया स्निग्धिरा परा।
पित्तक्रिमिश्लेष्मवान्तिभ्रान्तिसन्तापदोषहृत्॥"
इति राजनिर्घण्टः॥ *॥
(पद्मं पद्मगन्धोऽस्त्यस्याः पद्मस्य गन्ध इव गन्धो विद्यते शरीरे यस्या इति तात्पर्य्यार्थः। अत्रतु पद्मगन्धयोस्तादात्म्यमङ्गीकृत्यैव समासः कल्पितः।) चतुर्विंधस्त्रीमध्ये स्त्रीविशेषः। तस्या लक्षणं यथा,—
"भवति कमलनेत्रा नासिकात्तुङ्गरन्ध्रा
अविरलकुचयुग्मा दीर्घकेशी कृशाङ्गी।
मृदुवचनसुशीला गीतयोतानुरक्ता
सकलतनुसुवेशा पद्मिनी पद्मगन्धा॥"
इति रतिमञ्जरी। ४॥* ॥
(अस्या रतिप्रकारः यदुक्तः तत्रैव। २८।
"कुर्य्यं करेण संमर्द्य पौड़्रवेदधरं दृढ़म्।
रमणं पद्मबन्धेन पद्मिनीरतिमादिशेत्॥")
सरोवरम्। पद्मम्। इति विश्वः॥ (यथा, कुमारे। ३। ७६।
"सुरगज इव विभ्रत् पद्मिनीं हस्तलग्नां
प्रतिपथगतिरासीद् वेगदीर्घीकृताङ्गः॥")
मृणालम्। इति शब्दमाला॥ हस्तिनी। इति धरणिः॥

पद्मिनीकण्टकः, पुं, (पद्मिनीकण्टक इव आकृतिर्विद्यतेऽस्य।) क्षुद्ररोगविशेषः। पद्मकाँटा इति भाषा। तल्लक्षणं यथा,—
"कण्टकैराचितं वृत्तं कण्डूमत्पाण्डुमण्डलम्।
पद्मिनी कण्टकप्रख्यैस्तदाख्यं कफवातजम्॥"
आचितं व्याप्तम्। पद्मिनीकण्टकप्रख्यैः पद्मिनीनालकण्टकसदृशैः। तदाख्यं पद्मिनीकण्टकनामकम्॥ *॥
तच्चिकित्सा यथा,—
"पद्मिनीकण्टके रोगे छर्द्दयेन्निम्बवारिणा।
तेनैव सिद्धं सक्षौद्रं सर्पिः प्रातः प्रदापयेत्॥
निम्बारग्वधकल्केन सुदुःस्पृष्टेन चितम्।
चतुर्गुणेन निम्बोत्थपत्रक्वाथेन गोघृतम्॥
पचेत्तत्तु निम्बस्य कृतमालस्य पत्रजैः।
कल्कैर्भूयः पचेत् सिद्धं तत् पिबेत् पलसंमितम्॥

पद्मिनीकण्टकाद्रोगान्मुक्तो भवति नान्यथा ॥"
इति निघण्टादिदृष्टम्। इति भावप्रकाश: ॥

पद्मिनीकान्त:, पुं, (पद्मिन्या: कान्त:। पद्मपुष्पप्रकाशकत्वादस्य तथात्वम्।) सूर्य्य:। इति जटाधर: ॥

पद्मिनीवल्लभ:, पुं. (पद्मिन्या नलिन्या वल्लभ: प्रिय:। पद्मिनी वल्लभाऽस्येति वा।) सूर्य्य:। इति शब्दरत्नावली ॥

पद्मी, [न्] पुं, (पद्मं विद्युज्जालकमस्त्यस्य। पद्म + इनि:।) हस्ती। इत्यमर:। २। ८। ३५ ॥ (यथा, महाभारते। १२। २६। ६६।
"सर्व्वे ऽथगता: कन्या रथा: सर्व्वे चतुर्युज:।
शतं शतं रथे नागा: पद्मिनो हैममालिन:॥"
नाभिकमले हस्ते वा पद्ममस्यास्तीति। विष्णु:। यथा, महाभारते। १३। १४६। ५०।
"अनुकूल: शतावर्त्त: पद्मी पद्मनिभेक्षण:।
पद्मनाभोऽरविन्दाक्ष: पद्मगर्भ: शरीरभृत्॥")

पद्मेशय:, पुं, (पद्मे शेते इति। शी ड ल शयने + "अधिकरणे शेते:।" ३। २। १५। इति अच्। "शयवासवासिष्विति।" ६। ३। १८। इत्यलुक्।) विष्णु:। इति हेमचन्द्र: ॥

पद्मोत्तर:, पुं, (पद्मादुत्तर: वर्णतः श्रेष्ठ:।) कुसुम्भ:। इति राजनिर्घण्ट: ॥

पद्मोत्तरात्मज:, पुं, (पद्मोत्तरस्य आत्मज: पुत्र:।) जिनचक्रवर्त्तिविशेष:। इति हेमचन्द्र: ॥

पद्मोद्भव:, पुं, (पद्मं उद्भव उत्पत्तिस्थानं यद्वा पद्मे पद्माद्वा उद्भवो यस्य।) ब्रह्मा। अब्जयोनिरित्यमरशब्दार्णवात् ॥ (यथा, महाभारते। १३।६।४।
"तत: पद्मोद्भवो राजन्! देवदेव: पितामह:।
उवाच मधुरं वाक्यमर्थवद्धेतुभूषितम्॥")

पद्मोद्भवा, स्त्री, (पद्मे पद्माद्वा उद्भवो यस्या:।) मनसा देवी। यथास्या: पौराणिकाख्यानम्।
"कान्त्या काञ्चनसन्निभां सुवदनां पद्मासनां शोभनां
नागेन्द्रै: कृतशेखरां विषहरीं पद्मोद्भवां जाङ्गलीम्॥"

पद्म, क्लो, (पदं चरणमर्हतीति। पद + यत्।) कविकृति:। श्लोक:। इत्यमर:। ३। ५। ३१ ॥ तस्य लक्षणं यथा, छन्दोमञ्जर्य्याम्।
"पद्यं चतुष्पदी तच्च वृत्तं जातिरिति द्विधा।
वृत्तमक्षरसंख्यातं जातिर्मात्राकृता भवेत्॥"
(तत्तु अन्वयगतिवशात् मुक्तकयुग्मकसन्दानितककलापककुलकभेदात् षड्विधम्। यदुक्तं साहित्यदर्पणे। ६। २८७।
"छन्दोबद्धपदं पद्यं तेनैकेन च मुक्तकम्।
द्वाभ्यान्तु युग्मकं सन्दानितकं त्रिभिरिष्यते॥
कलापकं चतुर्भिश्च पञ्चभि: कुलकं मतम्॥"
"तद्भूर्द्धं कुलकं स्मृतम्।" इति क्वचित् पाठ:॥) प्राथम्। इति जटाधर: ॥ ("पदमस्मिन् दृश्यम्।" ४। ४। ८७। इति यत्। जाति-मुष्ककर्दम:। इति सिद्धान्तकौमुदी ॥)

पद्य:, पुं, (पद्मां जात:। पद + यत्।) भूद:। इति मेदिनी ॥ (यदुक्तं यजुषि।
"ब्राह्मणोऽस्य मुखमासीत् बाहू राजन्य: कृत:।
ऊरू तदस्य यद्वैश्य: पद्भ्यां शूद्रो अजायत॥")

पद्या, स्त्री, (पादाय हिता। शरीरावयवात् यत्।) "पद्यत्यतदर्थे।" ६। ३। ५२। इति पद्भाव:।) स्तुति:। इति विश्व:॥ पन्था:। इत्यमर:। २। १। १५ ॥ (यथा, ऋग्वेदे। २।३१।२।
"यदाशव: पद्याभिस्तितउतो रज: पृथिव्या: सानौ जघ्नन्त पाणिभि:॥" पादौ विधन्ति पद्या: शर्करा:। इति सिद्धान्तकौमुदी। "विध्यत्यधशुधा।" ४। ४। ८३। इति यत्। "पद्यत्यतदर्थे।" ६।३।५२। इति पदादेश:॥)

पद्र:, पुं, (पद्यतेऽस्मिन्निति। पद गतौ। "स्फायितञ्चीति।" उणां। २। १३। इति रक्।) ग्राम:। इति सिद्धान्तकौमुद्यामुणादिवृत्ति: ॥ ग्रामपथ:। इत्युणादिकोष: ॥ भूलोक:। देशभेद:। इति संक्षिप्तसारोणादिवृत्ति: ॥

पद्व:, पुं, (पद्यते गम्यतेऽस्मिन्नेन वा। पद गतौ "सर्व्वनिष्टृच्वरिच्वेति।" उणां। १। १५३। इति निपातनात् सिद्धम्।) भूलोक:। रथ:। इति संक्षिप्तसारोणादिवृत्ति: ॥ पन्था:। इत्युणादिकोष: ॥

पद्वा, [न्] पुं, (पद्यते गम्यते यच्च। पद गतौ + "स्नामदिपदीति।" उणां। ४। ११२। इति वनिप्।) पन्था:। इति संक्षिप्तसारोणादिवृत्ति: ॥

पन, ङ ईङ्। इति कविकल्पद्रुम: ॥ (भ्वा-आत्मं-सकं-सेट्।) ईड्: स्तुति:। पनायति पनायते विष्णुं धीर:। आयान्तत्वादुभयपदमिति वोपदेव:। अरे तु आयस्याप्राप्तिपक्षे आत्मनेपदमेव। ङ, अपनिष्ट पेने पनिता पनिष्यते पनिष्यति अपनिष्यत। इति दुर्गादास:॥

पनस:, पुं, (पनाय्यते स्तूयतेऽनेन देव: मनुष्यादिर्वेति। यद्वा पनायति स्तौति सन्तोषयतीत्यर्थ: देवमनुष्यादीन् इति। पन स्तुतौ + "अत्यविचमितमीति।" उणां। ३। ११७। इति असच्।) फलवृक्षविशेष:। काँटाल इति भाषा ॥ (यथा भागवते। ८। २। १०।
"चूतै: प्रियालै: पनसैराम्रैराम्रातकैरपि॥")
तत्पर्य्याय:। कण्टकिफल: २। इत्यमर:। २।४।६१॥ महासर्ज्ज: ३ फलिन: ४ फलवृक्ष: ५ स्थूल: ६ कण्टफल: ७ स्थूलफलद: ८ अपुष्पफलद: ९ पूतफल:१० चम्पकोष:११ चम्पालु:१२ कण्टकीफल: १३ रसाल: १४ वृन्दारुफल: १५ पानस: १६। इति शब्दरत्नावली ॥ अस्य फलगुणा:। मधुरत्वम्। सुपिच्छिलत्वम्। गुरुत्वम्। हृद्यत्वम्। बलवीर्य्यवृद्धिदत्वम्। श्रमदाहविशोषनाशित्वम्। रुचिकारित्वम्। ग्राहित्वम्। परमदुर्ज्जरत्वञ्च। तद्बीजगुणा:। ईषत्कषायत्वम्। मधुरत्वम्। वातलत्वम्। गुरुत्वम्। रुच्यत्वम्। तत्फलविकारत्वगदोषनाशित्वञ्च।
"वालन्तु नीरसं हृद्यं मध्यं पक्वन्तु दीपनम्।
रुचिदं लवणाभ्यक्तं पनसस्य फलं स्मृतम्॥"
इति राजनिर्घण्ट: ॥ *॥

"पनस: कण्टकिफल: फणाशोऽतिवृहत्फल:।
पनसं शीतलं पक्वं स्निग्धं पित्तानिलापहम्॥
तर्पणं वृंहणं स्वादु मांसलं श्लेष्मलं शुभ्रम्।
वल्यं शुक्रप्रदं हन्ति रक्तपित्तक्षतक्षयान्॥
आमन्तदेव विष्टम्भि वातलं तुवरं गुरु।
दाहकृन्मधुरं वल्यं कफमेदोविमर्द्दनम्॥
पनसोद्भूतबीजानि वृष्याणि मधुराणि च।
गुरूणि बहुवर्च्चांसि कृच्छ्रोच्चाराणि संवदेत॥"
अन्यच्च।
"मज्जा: पनसजो वृष्यो वातपित्तकफापह:।
विशेषात् पनसं वल्यं गुल्मिभिर्मन्दवह्निभि:॥
अलं पनसपाकाय फलं कदलसम्भवम्॥"
इति भावप्रकाश: ॥ *॥
"कण्टाफलं सुमधुरं वृंहणं स्निग्धशीतलम्।
दुर्ज्जरं वातपित्तघ्नं श्लेष्मशुक्रबलप्रदम्॥
तदेव सर्पिषा युक्तं स्निग्धं हृद्यं बलप्रदम्।
कृद्दिघ्नं न च चक्षुष्यं वृष्यञ्च वातपित्तजुत्॥
कण्टाफलमपक्वन्तु कषायं स्वादु वातलम्।
रक्तपित्तहरं स्वादु तत्फलास्थ्यपि तद्गुणम्॥"
इति राजवल्लभ: ॥

पनसतालिका, स्त्री, (पनसं दीर्घत्वेन स्तुत्यं यत्तालम्। तद्वत् फलमस्त्यस्या:। कन्।) कण्टकिफलम्। इति शब्दमाला ॥

पनसिका, स्त्री, (पनसवत् कण्टकमयाकृतिर्विद्यते यस्या:। पनस + ठन्।) क्षुद्ररोगविशेष:। स च कर्णमध्यजातव्रण:। तल्लक्षणं यथा,—
"कर्णस्याभ्यन्तरे जातां पिड़कानुग्रवेदनाम्।
स्थिरां पनसिकां तान्तु विद्याद्दारुणकोत्थिताम्॥"
तच्चिकित्सा यथा,—
"भिषक् पनसिकां पूर्व्वं खेदयेदथ लेपयेत्।
कल्कैर्म्मन:शिलाक्षुण्णनिशातालकदारुजै:॥
पक्वां विज्ञाय तां भित्त्वा व्रणवत् समुपाचरेत्॥"
इति भावप्रकाश: ॥

पन्था:, [इन्] पुं, पतन्ति यान्यनेन। (पत लृ गतौ + "पतेस्थ च।" उणां। ४। १२। इति इनि: थस्यान्तादेश:।) रथ्या। रास्ता इति भाषा ॥ (यथा, मनु:। ४। ४५।
"न मूत्रं पथि कुर्व्वीत न भस्मनि न गोव्रजे॥")
तत्पर्य्याय:। अयनम् २ वर्त्म ३ मार्ग: ४ अध्वा ५ पदवी ६ सृति: ७ सरणि:८ पद्धति: ९ पद्या १० वर्त्मनी ११ एकपदी १२। इत्यमर:। २।१।१५॥ पथ:१३ पदवि: १४ पदवी १५ सरणी १६ शरणि: १७ पद्धती १८ वर्त्मनि: १९। इति भरत:॥ शरणी २० वाट: २१ धर्म्मवर्त्मनम् २२ माध: २३ विवध: २४ वीवध:२५। इति शब्दरत्नावली ॥ *॥

तस्य लक्षणम्।
"त्रिंशद्धनूंषि विस्तीर्णो देशमार्गस्तु तै: कृत:।
विंशद्धनुर्ग्राममार्ग: सीमामार्गो दशैव तु॥
धनूंषि दश विस्तीर्ण: श्रीमान् राजपथ: कृत:।
वृषानिरघनागानामसम्बाध: सुसञ्चर:॥
धनूंषि चैव चत्वारि शाखारथ्यास्तु निर्म्मिता:।

चक्रराज्ञोपरथास्तु द्विकराण्युपरक्षका ॥
चतुष्पथच्चतुष्यादस्त्रिपादस्य गृहान्तरम् ।
इतीपादस्त्रर्द्धपादः प्राग्वंशः पादकः स्मृतः ॥
अवकरः परीवारः पादमात्रः समन्ततः ॥"
इति देवीपुराणे गोपुरद्वारलक्षणाध्यायः ॥ * ॥
चतुष्पथलक्षणादि यथा,—
"एकलिङ्गे श्मशाने वा शून्यागारे चतुष्पथे ।
तत्रस्थः साधयेद्योगी विद्यां त्रिभुवनेश्वरीम् ॥
चतुष्पथन्तु तत् प्रोक्तं त्रिकोणं यत्र वर्त्तते ॥"
इति नीलतन्त्रम् ॥ * ॥
पथगमनगुणाः ।
"व्यायो मेदःकफस्थौल्यसौकुमार्य्यविनाशनः ।
यत्तु चङ्क्रमणं नातिदेहपीड़ाकरं भवेत् ॥
तदायुर्बलमेधाग्निप्रदमिन्द्रियशोधनम् ॥"
इति राजवल्लभः ॥ * ॥
ब्राह्मणादिभ्यः पथावकाशो देयो यथा,—
"पन्था देयो ब्राह्मणाय स्त्रियै राज्ञे वृद्धाय मारवृत्ताय रोगिणे दुर्ब्बलाय च ॥
इति कौर्म्मे उपविभागे ११ अध्यायः ॥ * ॥
गोपथदानफलं यथा,—
गोमार्गस्य तथा कर्त्ता गोलोके क्रीड़ते चिरम् ।"
इति प्रतिष्ठातत्त्वे हयशीर्षपञ्चरात्रम् ॥ * ॥
अस्याचारादावुपचारो यथा,—
"तर्कोऽप्रतिष्ठः श्रुतयो विभिन्ना
नैको मुनिर्यस्य मतं प्रमाणम् ।
धर्म्मस्य तत्त्वं निहितं गुहायां
महाजनो येन गतः स पन्थाः ॥"
इति महाभारते ।३।३१२।११२। धर्म्मवकप्रश्ने युधिष्ठिरोत्तरम् ॥ * ॥ नरकविशेषः । यत्रा-टाच्यते । इति मनौ ४ अध्यायः ॥
पन्न, त्रि, (पद्यौ ऽ गतौ + "गत्यर्थेति ।" ३ । ४ । ७२ । इति कर्त्तरि क्तः ।) च्युतम् । गलितम् । इत्यमरः । ३ । १ । १०४ ॥
पन्नः, पुं, (पन स्तुतौ + "कृदृजृ सिदृपनीति ।" उणां । ३ । १० । इति नः स च नित् ।) अधोः-गमनम् । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥
पन्नग, पुं, ('पन्नं अधोगमनं पतितं वा गच्छ-तीति । गम ल गतौ + "सर्व्वत्र पन्नगोरगसंज्ञा-नम् ।" ३ । २ । ४८ । इत्यस्य वार्त्तिं इति डः । पद्भ्यां न गच्छतीति वा विग्रहः ।) सर्पः । इत्यमरः । १ । ८ । ८ ॥ (यथा, विष्णुपुराणे । १ । १७ । ७ ।
"नागासक्तं महात्मानं शिरस्यक्ष्मिपुं तदा ।
उपासाञ्चक्रिरे सर्व्वे सिद्धगन्धर्व्वपन्नगाः ॥")
व्योषधीभेदः । पद्मकाष्ठम् । इति मेदिनी ॥
पन्नगकेशरः, पुं, (पन्नगवत् केशरो यस्य ।) नाग-केशरपुष्पम् । इति राजनिर्घण्टः ॥
पन्नगाशनः, पुं, (पन्नगं सर्पं अत्तीति । अद गं भोजने + ल्युः । पन्नगः अशनं भक्ष्यो यस्येति वा ।) गरुड़ः । इत्यमरः । १ । १ । ३१ ॥
पन्नगी, स्त्री, (पन्नग + जातौ ङीष् ।) पन्नग-पत्नी । (यथा, भागवते । ३ । १६ । ११ ।
"तां स आपततीं वीक्ष्य भगवान् समवास्थतः ।
जग्राह लीलया प्राप्तां गरुत्मानिव पन्नगीम् ॥")
मनसा देवी । यथा, तिथितत्त्वे ।
"पञ्चम्यामसिते पक्षे समुत्तिष्ठति पन्नगी ॥"
सर्पिणीक्षुपः । इति राजनिर्घण्टः ॥
पन्नद्धा, स्त्री, (पदि नद्धा बद्धा ।) चर्म्मपादुका । इति हेमचन्द्रः ॥
पन्नद्धी, स्त्री, (पदोच्चरणयोर्नद्धी ।) चर्म्मपादुका । इति त्रिकाण्डशेषः ॥
पपिः, पुं, (पाति लोकम् । पिबति वा । पा + "आदृगमहनजनः किकिनौ लिट् च ।" ३ । २ । १७१ । इति किः द्वित्वञ्च ।) चन्द्रः । पानकर्त्तरि त्रि । इति संक्षिप्तसारव्याकरणम् ॥ (यथा, ऋग्वेदे । ६ । २३ । ४ । "पपिः सोमं दिवेदिवे ॥")
पपीः, पुं, (पाति लोकम् । पा रक्षणे + "यापोः कित् ईः च ।" उणां । ३ । १५६ । इति ईक् द्वित्वञ्च ।) सूर्य्यः । चन्द्रः । इत्युणादिकोषः ॥
पपुः, पुं, (पाति रक्षतीति । "कुर्भ्रुवेति ।" उणां । १ । २३ । इति चकारात् अन्यतोऽपि कुर्द्वित्वञ्च ।) पालकः । धात्र्यां स्त्री । इत्युणादि-कोषः ॥
पमरा, स्त्री, गन्धद्रव्यविशेषः । सल्लकी इति ख्याता । अस्यागुलेपनगुणः । परमालक्ष्मीरुच्चोच्चर-नाम्नित्वम् । इति राजवल्लभः ॥
पम्पा, स्त्री, (पाति रक्षति महर्य्यादीन् स्वीय-पवित्रसलिलदानादिभिरिति शेषः । पा पालने + "खष्य-म्लिल्प-म्लष्य-व्राव्य-रूप-पम्पा-तल्पाः ।" उणां । ३ । २८ । इति निपातनात् दृश्यते सुड़ा-गमश्च साधुः ।) ओड्रदेशस्थनदीविशेषः । इत्युणादिकोषः ॥ (यथा, रघुः । १३ । ३० ।
"दूरावतीर्णा पिबतीव खेदा-
दस्मिन् पम्पासलिलानि दृष्टिः ॥"
इयं हि ऋष्यमूकपर्व्वतसन्निकटस्था । इति रामायणम् ॥)
पम्स, गतौ । (भ्वां-परं-सकं-सेट् ।) ओष्ठ्यवर्ण-शेषोपधः । पम्सति । इति दुर्गादासः ॥
पय, ड गतौ । इति कविकल्पद्रुमः ॥ (भ्वां आत्मं-सकं सेट् ।) ड, पयते । इति दुर्गादासः ॥
पयः [सु] क्लीं, (पय्यते पीयते वा पय गतौ पी ड पाने वा + "सर्व्वधातुभ्योऽसुन् ।" उणां । ४ । १८८ । इत्यसुन् ।) जलम् । (यथा, रघुः । १ । ६७ ।
"पयः पूर्व्वं सन्निधातुं कवोष्णमुपसुञ्यते ॥")
दुग्धम् । इति मेदिनी ॥ (यथा, मनुः । ३ । ८८ ।
"कुर्य्यादहरहः श्राद्धमन्नाद्येनोदकेन वा ।
पयोमूलफलैर्व्वापि पितृभ्यः प्रीतिमावहन् ॥")
पयःकन्दा, स्त्री, (पयः कन्दे यस्याः ।) क्षीर-विदारी । इति राजनिर्घण्टः ॥
पयःफेनी, स्त्री, (पयो दुग्धमिव फेनमस्याः । गौरा-दित्वात् ङीष् ।) दुग्धफेनीक्षुपः । इति राज-निर्घण्टः ॥
पयश्चयः, पुं, (पयसां चयः समूहः ।) जलसमूहः । तत्पर्य्यायः । पूरः२ वेल्लिः ३ । इति जटाधरः ॥
पयस्यं, त्रि, (पयसो विकारस्तत्र हितं वा । पयस् + "गोपयसोर्यत् ।" ४ । ३ । १६० । इति यत् ।) पयोविकारः । घृतदध्यादि । इत्यमरः । २ । ६ । ५१ ॥ पयोहितम् । इति मेदिनी ॥
पयस्यः, पुं, (पयः पिबतीति ।) विड़ालः । इति शब्दचन्द्रिका ॥
पयस्या, स्त्री (पयस्य + टाप् ।) दुग्धिका । क्षीर-काकोली । स्वर्णक्षीरी । इति मेदिनी ॥ अर्क-पुष्पिका । इति रत्नमाला ॥ क्षुद्रपुत्रिणीक्षुपः इति राजनिर्घण्टः ॥ आमिक्षा । इति हेम-चन्द्रः ॥
पयस्वलः, पुं (पयोऽस्त्यस्य । पयस् + "अन्येभ्यो-ऽपीति ।" वलच् ।) छागः । इति राज-निर्घण्टः ॥
पयस्विनी, स्त्री, (पयो विद्यतेऽस्याः । "अस्माया-मेधास्रजो विनिः ।" ५ । २ । १२१ । इति विनिः ततो ङीष् ।) नदी । (प्रशस्तजल-वत्त्वात्तथा पुण्यसलिलत्वाद् गङ्गा । यथा, काशी खण्डे गङ्गासहस्रनामकीर्त्तने । २६ । १०६ ।
"परापरफलप्राप्तिः पाचनी च पयस्विनी ॥")
धेनुः । (यथा, रघुः । २ । २१ ।
"प्रदक्षिणीकृत्य पयस्विनीन्तां
सदक्षिणा साक्षतपात्रहस्ता ॥")
रात्रिः । इति मेदिनी ॥ काकोली । क्षीर-काकोली । दुग्धफेनी । क्षीरविदारी । छागी । इति राजनिर्घण्टः ॥ जीवन्ती इति भावप्रकाशः ॥ (गायत्रीस्वरूपा महादेवी । यथा, देवीभाग-वते । १२ । ६ । ६६ ।
"अङ्गावती सुता पौत्री पुत्रपूज्या पयस्विनी ॥")
पयोगड़ः, पुं, (पयसो गड़ इव ।) घनोपलः । द्वीपः । इति शब्दमाला ॥
पयोघनः, पुं, (पयोभिर्घनः सान्द्रः ।) घनोपलः । इति हारावली ॥
पयोजन्मा, [न्] पुं, (पयसो जलस्य जन्म यस्मात् ।) मेघः । इति शब्दमाला ॥
पयोधरः, पुं, (धरतीति धरः । धृ + अच् । पयसो दुग्धस्य जलस्य वा धरः ।) स्तनः । (यथा, रघुः । १४ । २२ ।
"षड़ाननापीतपयोधरासु
नेता च सूनामिव कृत्तिकासु ॥")
मेघः । इत्यमरः । ३ । ३ । १६३ ॥ कोकिलः । नारिकेलम् । कपोरु । इति मेदिनी ॥
पयोधाः, [स्] पुं, (पयो जलं दधातीति । डुधा धारणे + "पयसि च ।" उणां । ४ । २२६ । इति असि: ।) समुद्रः । जलाधारः । इत्युणादि-कोषः ॥
पयोधिः, पुं, (पयांसि धीयन्तेऽस्मिन् । डुधा धृ + "कर्म्मण्यधिकरणे च ।" ३ । ३ । ६३ । इति किः ।) समुद्रः । इति राजनिर्घण्टः ॥
पयोधिकं, क्लीं, (पयोधौ समुद्रे कायति प्रका-शते इति । कै + कः ।) समुद्रफेनः । इति राजनिर्घण्टः ॥

पयोनिधि:, पुं, (पयांसि निधीयन्तेऽस्मिन् । धा आधारे + अधिकरणे कि: ।) समुद्र: । यथा,—
"न गणितं यदि जन्म पयोनिधौ
एरणिर:स्थितिभूरपि विस्मृता ।"
इति नैषधे । ४ । ५० ॥ (पय इव शुक्ल: सत्त्वगुण: निधीयतेऽत्र इति विग्रहे । शिव: । यथा, महाभारते । १३ । १७ । ८७ ।
"अस्मनो लम्बितोऽत्र महामाय: पयोनिधि: ॥")

पयोर:, पुं, (पयो जलं राती[ति] । रा + क: ।) खदिर: । इति शब्दचन्द्रिका ॥

पयोलता, स्त्री, (पय: क्षीरं तेनाढ्या लता ।) क्षीरविदारी । इति राजनिर्घण्ट: ॥

पयोव्रत:, पुं, (पयोमात्रपानसाध्यो व्रत: ।) पयोमात्रपानरूपव्रतविशेष: । यथा,—
"पुण्यां तिथिं समासाद्य युगमन्वन्तरादिकम् ।
पयोव्रतनिशाचारं स्यादेकरात्रमथापि वा ॥"
इति मात्स्ये १५२ अध्याय: ॥ ० ॥

द्वादशाहमाधविष्णुव्रतविशेष: । यथा,—
कश्यप उवाच ।
"शृणुष्वे भगवान् पृष्ट: प्रजाकामस्य पद्मज: ।
यदाह ते प्रवक्ष्यामि व्रतं केशवतोषणम् ॥
फाल्गुनस्यामले पक्षे द्वादशाहं पयोव्रत: ।
अर्चयेदरविन्दाक्षं भक्त्या परमयान्वित: ॥
मिनीवाल्यां स्पृशालिप्य स्नायात् क्रोडविदीर्णया ।
यदि लभ्येत वै सोतस्तेनाम्भसुदीरयेत् ॥
त्वं देवादिवराद्वेण रसाया: स्थानमिच्छता ।
उद्धृतासि नमस्तुभ्यं पाद्यं मे प्रणाशय ॥
निर्चलितात्मनियमो देवमर्चेत् समाहित: ।
अग्न्यां स्थण्डिले सूर्ये जले वह्नौ गुरावपि ॥
नमस्तुभ्यं भगवते पुरुषाय महीयसे ।
सर्वभूतनिवासाय वासुदेवाय साक्षिणे ॥
नमोऽव्यक्ताय सूक्ष्माय प्रधानपुरुषाय च ।
चतुर्विंशद्गुणज्ञाय गुणसंख्यानहेतवे ॥
नमो द्विशीर्ष्णे त्रिपदे चतु:शृङ्गाय तन्तवे ।
सप्तहस्ताय यज्ञाय त्रयीविद्यात्मने नम: ॥
नम: शिवाय रुद्राय नम: शक्तिधराय च ।
सर्वविद्याधिपतये भूतानां पतये नम: ॥
नमो हिरण्यगर्भाय प्राणाय जगदात्मने ।
योगैश्वर्यशरीराय नमस्ते योगहेतवे ॥
नमस्ते आदिदेवाय साक्षिभूताय ते नम: ।
नारायणाय ऋषये नराय हरये नम: ॥
नमो मरकतश्यामवपुषेऽधिगतश्रिये ।
केशवाय नमस्तुभ्यं नमस्ते पीतवाससे ॥
त्वं सर्ववरद: पुंसां वरेण्य वरदर्षभ ! ।
यतस्ते श्रेयसे धीरा: पादरेणुमुपासते ॥
अन्वर्चन्ति यं देवा: श्रीश्च तत्पादपद्मयो: ।
प्रीयतां स्वामोदं भगवान्मे प्रसीदताम् ॥
ततोमन्त्रैर्नीवेद्यमावाहनपुरस्कृतम् ।
अर्घयेच्छ्रुचा युक्त: पाद्योपस्पर्शनादिभि: ॥
अर्चित्वा गन्धमाल्याद्यै: पयसा स्नापयेद्विभुम् ।
वस्त्रोपवीताभरणपाद्योपस्पर्शनेन्नत: ॥
ग्रन्थपादविभागेन दृढादशाक्षरविद्यया ।
स्नातं पयसि नैवेद्यं शालान्नं विभवे सति ॥
समर्पि: समुद्धृत्य जुहुयान्मूलविद्यया ।
निवेदितं तदुभक्ताय दद्याद्भुञ्जीत वा स्वयम् ॥
दत्त्वाचमनमर्चित्वा ताम्बूलञ्च निवेदयेत् ।
जपेदशोत्तरशतं स्तुवीत स्तुतिभि: प्रभुम् ॥
कृत्वा प्रदक्षिणं भूमौ प्रणमेद्दण्डवन्मुदा ।
कृत्वा शिरसि तच्चैवं देवसुद्वासयेत्तत: ॥
द्वावरान् भोजयेद्विप्रान् पायसेन यथोचितम् ।
सुस्नीत तैरनुज्ञात: शेषं सेष्टै: समाजितै: ॥
ब्रह्मचार्यथ तद्रात्र्यां श्वोभूते प्रथमेऽहनि ।
स्नात: शुचिर्यथोक्तेन विधिना सुसमाहित: ।
पयसा स्नापयित्वार्चेद्यावद्व्रतसमापनम् ।
पयोभक्ष्यो व्रतमिदं चरेद्विष्णुचैनाहत: ॥
पूर्ववच्चहुयादग्निं ब्राह्मणांश्चापि भोजयेत् ।
एवन्त्वहरह: कुर्य्याद्द्वादशाहं पयोव्रतम् ॥
हरेराराधनं होममर्हणं द्विजतर्पणम् ।
प्रतिपद्दिनमारभ्य यावत् शुक्लत्रयोदशीम् ॥
ब्रह्मचर्य्यमध:स्वप्नं स्नानं त्रिसवनञ्चरेत् ।
वर्ज्ययेदसदालापं भोगानुच्चावचांस्तथा ॥
अहिंस: सर्वभूतानां वासुदेवपरायण: ।
त्रयोदश्यामथो विष्णो: स्नपनं पञ्चकैर्विभो: ॥
कारयेच्छास्त्रदृष्टेन विधिना विधिकोविदै: ।
पूजाञ्च महतीं कुर्य्यादुवित्तशाठ्यविवर्जित: ॥
चरुं निरूप्य पयसि श्रपित्वा विष्णवे ।
सूक्तेन तेन पुरुषं यजेत सुसमाहित: ॥
नैवेद्यञ्चातिगुणवद्दद्यात् पुरुषतुष्टिदम् ।
आचार्य्यं ज्ञानसम्पन्नं वस्त्राभरणधेनुभि: ॥
तोषयेदृत्विजञ्चैव तदविघ्नाराधनं हरे: ।
भोजयेत्तान् गुणवता सदन्नेन शुचिस्मिते ॥
अन्यांश्च ब्राह्मणान् शक्त्या ये च तत्र समागता: ।
दक्षिणां गुरवे दद्यादृत्विग्भ्यश्च यथार्हत: ॥
अन्नाद्येनाश्वपाकांश्च प्रीणयेत् समुपागतान् ।
भुक्तवत्सु च सर्व्वेषु दीनान्धकृपणेषु च ॥
विष्णोस्तत् प्रीणनं विद्वान् भुञ्जीत सह बन्धुभि: ।
नृत्यवादित्रगीतैश्च स्तुतिभि: स्वस्तिवाचनै: ॥
कारयेत्तत्कथाभिश्च पूजां भगवतोऽन्वहम् ।
एतत् पयोव्रतं नाम पुरुषाराधनं परम् ॥
पितामहेनाभिहितं मया ते समुदाहृतम् ।
त्वञ्चानेन महाभागे ! सम्यक् चीर्णेन केशवम् ॥
आत्मना शुद्धभावेन नियतात्मा भजाव्ययम् ।
अयं वै सर्वयज्ञाख्य: सर्व्वव्रतमिति स्मृतम् ॥
तप:सारमिदं भद्रे दानसेश्वरतर्पणम् ।
त एव नियमा: साक्षात्त एव च यमोत्तमा: ॥
तपो दानं व्रतं यज्ञो येन तुष्यत्यधोक्षज: ।
तस्मादेतद्व्रतं भद्रे प्रयता श्रद्धया चर ॥
भगवान् परितुष्टस्ते वरान्नानु विधास्यति ॥"
इति श्रीभागवते ८ स्कन्धे १६ अध्याय: ॥

पयोष्णिजाता, स्त्री, (पयोष्णी नाम्नी नदी जाता अस्या: । पृषोदरात् साध: ।) सरस्वती नदी । इति राजनिर्घण्ट: ॥

पयोष्णी, स्त्री, (पय: लिलं उष्णं उष्णगुणं वा अस्या: ।) नदीविशेष: । सा विन्ध्याचलदक्षिणे प्रसिद्धा । अस्या जलगुण: ।
"पयोष्णीसलिलं रुच्यं पवित्रं पापनाशनम् ।
सर्व्वामयहरं सौख्यबलकान्तिप्रदं लघु ॥"
इति राजनिर्घण्ट: ।

परं, क्ली, (पॄ + "ऋदोरप् ।" ३ । ३ । ५७ । इति अप् ।) कैवलम् । इति मेदिनी ॥ मोक्ष: । यथा । कैवल्यमस्तं परम् । इति मुक्तिपर्य्याये रत्नावली ॥ (ब्रह्म ब्रह्मा च । यदुक्तं श्रुतौ ।
"द्वे ब्रह्मणी वेदितव्ये परञ्चापरमेव च ।"
विष्णु: । यथा, महाभारते । १३ । १४८ । २० ।
"प्रभूतस्त्रिककुद्धाम पवित्रं मङ्गलं परम् ॥"
ब्रह्मण आयु: । यथा, मार्कण्डेये । ४६ । ४७ ।
"एवन्तु ब्रह्मणो वर्षमेकं वर्षशतन्तु तत् ।
शतं हि तस्य वर्षाणां परमित्यभिधीयते ।
पञ्चाशद्विगतावर्षै: परार्द्धमिति कीर्त्यते ॥")

परं, [म्] व्य, नियोग: । क्षेप: । इति मेदिनी ॥

पर:, पुं, (पॄ + अच् ।) शत्रु: । इत्यमर: ॥ (यथा, रघु: । ७ । ६७ ।
"इत: परानर्भकहार्य्यमश्वान्
वैदर्भि ! पश्यानुमता मयासि ॥")
ब्रह्मण आयु: । यथा,—
"कालसंख्यां समासेन पूर्व्वार्द्धस्य प्रकल्पिताम् ।
स एव स्यात् पर: कालस्तदन्ते परिपूज्यते ॥
निजेन तस्य मानेन चायुर्व्वर्षशतं स्मृतम् ।
तत् पराख्यं तदर्द्धञ्च परार्द्धमभिधीयते ॥"
अपि च ।
"त्रीणि कल्पशतानि स्युस्तथा षष्टिर्द्विजोत्तमा: ।
ब्रह्मण: कथितं वर्षं पराख्यं तच्च तत् पदम् ॥"
इति कौर्म्मे ५ अध्याय: ॥
(शिव: । यथा, तत्रैव । १३ । १७ । ६७ ।
"कपिल: कपिश: शुक्ल आयुश्चैव परोऽपर: ॥")

पर:, त्रि, श्रेष्ठ: । (यथा, आर्य्यासप्तशत्याम् । ३५५ ।
"परमोहनाय सुक्लो निष्करुणो
तरुणि ! तव कटाक्षोऽयम् ।
विशिख इव कलितवर्ण:
प्रविशति हृदयं नि:सरति ॥")
अरि: । दूर: । अन्य: । उत्तर: । इति मेदिनी ॥ *॥
न्यायमते द्रव्यगुणकर्म्मवृत्तिमत्ता । इयं व्यापक जाति: । यथा,—
"सामान्यं द्विविधं प्रोक्तं परञ्चापरमेव च ।
द्रव्यादित्रिकवृत्तिस्तु सत्ता परतयोच्यते ॥
परभिन्ना तु या जाति: सैवापरतयोच्यते ।
द्रव्यत्वादिकजातिस्तु परापरतयोच्यते ॥
व्यापकत्वात् परापि स्यात् व्याप्यत्वादपरापि च ॥"
इति भाषापरिच्छेदे । ८—६ ॥ ० ॥

परान्नादिभक्षणादे: प्रायश्चित्तं यथा,—
"परान्नञ्च परस्वञ्च परशय्या परस्त्रिय: ।
परद्वेषमनि वासश्च शक्रादपि हरेच्छ्रियम् ॥"
इति गरुडपुराणम् ॥ ० ॥

श्रेष्ठवाचकपरशब्दप्रयोगा: । यथा,—
"अन्नदातु: शतगुणोऽभीष्टदेव: पर: स्मृत: ।
गुरुस्तस्माच्छतगुणो विद्यामन्त्रप्रदायक: ॥

अज्ञानतिमिराच्छन्नं ज्ञानदीपेन चक्षुषा ।
यः सर्व्वार्थं दर्शयति तत्परः कोऽपि बान्धवः ॥
गुरुदत्तेन मन्त्रेण तपसेष्टसुरं लभेत् ।
सर्व्वज्ञत्वं सर्व्वसिद्धिं तत्परः कोऽपि बान्धवः ॥
पितरं मातरं भार्य्यां गुरुपत्नीं गुरुं परम् ।
यो न पुष्णाति कामघ्नात् स महापातकी शिव ! ॥
नास्ति वेदात् परं शास्त्रं न हि कृष्णात् परः सुरः ।
नास्ति गङ्गासमं तीर्थं न पुण्यं तुलसीपरम् ॥
क्षमावती भूपरा न पुत्रान्नास्ति परः प्रियः ।
न च देवात् परः शक्तो व्रतं नैकादशीं विना ॥
शालग्रामात् परो यन्त्रो न चैत्रं भारतात् परम् ।
परं पुण्यस्थलानाञ्च पुण्यं वृन्दावनं यथा ॥
मोक्षदानां यथा काशी वैष्णवानां यथा शिवः ।
न पार्व्वत्याः परा साध्वी न गणेशात् परो वशी ॥
न च विद्यासमो बन्धुर्नास्ति कश्चिद्गुरोः परः ॥"
इति ब्रह्मवैवर्त्तपुराणे गणपतिखण्डे ४४ अध्यायः ॥

परःशतं, त्रि, शतात् परम् । शताधिकसंख्या । इत्यमरः । ३ । १ । ६४ ॥

परःश्वः, [स्] व, श्वो दिनात् परमहः परःश्वः परः सहस्रवत् पारस्करादित्वात् सुट् परःश्व इति मधुः । सुटं नेच्छन्त्यन्ये परश्व इत्याहुः । अतिक्रान्ते पूर्व्वतरे दिने परश्वो जात इति प्रयोगो गौणः तत्र परश्च तत् श्वश्चेति कर्म्मधारयः । इति भरतः ॥ श्वः पराह्णः । इत्यमरः । ३ । ४ । २२ ॥ परश्व । इति भाषा ॥

परःसहस्रं, त्रि, सहस्रात् परम । सहस्राधिकसंख्या । इत्यमरटीका ॥

परकीयं, त्रि, (परस्येदम् । "गह्वादिभ्यश्च ।" ४ । २ । १३८ । इति छः । "कुगजनस्य परस्य च ।" इति कुक् ।) परसम्बन्धि । (यथा, मनुः । ४ । २०१ ।
"परकीयनिषानेषु न स्वाया च कदाचन ॥")

परकीया, स्त्री, (परकीय + टाप् ।) नायिकाभेदः । अस्या लक्षणं यथा । अप्रकटपरपुरुषानुरागा । सा च द्विविधा । परोढ़ा १ कन्यका च २ । कन्यायाः पित्राद्यधीनतया परकीयत्वम् । अस्या गुणैव सकला चेष्टा ॥*॥
परोढ़ा यथा,—
"अयं रेवाकुञ्जः कुसुमशरसेवासमुचितः
समीरोऽयं वेलादरविलसदेलापरिमलः ।
इयं शारद्धन्या नवजलदविन्यासचतुरा
पराधीनं चेतः सखि ! किमपि कर्त्तुं नटायते ॥"*
गुप्ताविदग्धालक्षिताकुलटानुशयानासुदिताप्रभृतीनां परकीयायां एवान्तर्भावः । गुप्ता त्रिविधा । दत्तसुरतगोपना १ वर्त्तिष्यमाणसुरतगोपना २ वर्त्तमानसुरतगोपना च ३ । त्रिविधा यथा,—
"श्वश्रूः क्रुध्यतु विद्विषन्तु सुहृदो निन्दन्तु वा यातरस्त्वयि किन्तु न मन्दिरे सखि ! पुनः स्थातुं विधेयो मया ।
आखोराक्रमणाय कोणकुहरादुत्फालमात्मन्वती मार्ज्जारी नखरैः खरैः क्षतवती कां कां न मे दुर्दशाम् ॥" * ॥

विदग्धा द्विविधा । वाग्विदग्धा १ क्रियाविदग्धा चेति २ । प्रथमा,—
"निविड़तमतमालश्लिष्टवल्ली-
वित्तकिलराजिविराजितोपकण्ठे ।
पथिकसमुचितस्तवाद्यतीरे
सवितरि तत्र सरित्तटे निवासः ॥"
द्वितीया यथा,—
"दासाय भवनाग्रे बदरीमर्पयितुमादिशति ।
हेमन्ते हरिणाक्षी पयसि कुठारं विनिक्षिपति ॥" * ॥
लक्षिता यथा,—
"यद्भूतं तद्भूतं यद्भूयात्तदपि वा भूयात् ।
यद्भवतु तद्भवतु वा विफलस्तव गोपनायासः ॥"*
कुलटा यथा,—
"रन्ते वारिकणान् किरन्ति पुरुषान् वर्षन्ति नाम्भोधराः
शैलाः शाद्वलसङ्गमन्ति न स्रवन्त्येते पुनर्नायकान् ।
त्रैलोक्ये तरवः फलानि सुवते नैवारभन्ते जनान्
घातः ! कातरमालपामि कुलटाहेतोस्त्वया किं कृतम् ॥"
अपि च ।
"पृथ्वी तावत्तिकोणा विपुलनदनदीग्रावरुद्धं तदर्द्धं
तस्यामेवास्ति शैलो विपिनमपि तथा क्षेत्रकासारकूपाः ।
लोकानामर्द्धनारी शिशुरपि जरसः कोऽपि रोगी विवेकी
मिथ्यावादी ममायं मुखरमुखवरः पुंश्चली पुंश्चलीति ॥" * ॥
अनुशयाना त्रिविधा ।
वर्त्तमानस्थानविघट्टनेन भाविस्थानाभावशङ्कया स्वानधिष्ठितसङ्केतस्थले भर्त्तृगमनानुमानेन प्रत्येकं उदाहरणानि ।
"समुपागतवति चैत्रे निपतति पत्रे लवङ्गलतिकायाः ।
सुदृशः कपोलपाली शिव शिव तालीदलद्युतिं लेभे ॥"*॥
"निद्रालुकेकिमिथुनानि कपोतपोत-
व्याधूतनूतनमहीरुहपल्लवानि ।
तत्रापि तन्वि ! न वनानि कियन्ति सन्ति
खिद्यस्व न प्रियतमस्य गृहं प्रयाहि ॥
कर्णेकल्पितरसालमञ्जरी-
पिञ्जरीकृतकपोलमण्डलः ।
निर्यतन्नयनवारिधारया
राधया मधुरिपुर्निरीक्ष्यते ॥" * ॥
मुदिता यथा,—
"गोष्ठेषु तिष्ठति पतिर्बधिरा ननन्दा
नेत्रद्वयस्य न च पाटवमस्ति यातुः ।
इत्थं निगद्य सुतनुः कुचकुम्भसीमि
रोमाञ्चकञ्चुकमुदञ्चितमातताम ॥" * ॥
कन्यका यथा,—

'किञ्चिन्नुञ्चितहारयष्टिसरलभ्रूवल्लिसाचिस्मितं
प्रान्तभ्रान्तविलोचनद्युतिभुजा पर्य्यस्तकर्णोत्पलम् ।
अङ्गुल्या स्फुरदङ्गुलीयकरुचा कर्णस्य कण्डूयनं
कुर्व्वाणा नृपकन्यका सुकृतिनं सव्याजमालोकते ॥"
इति रतिमञ्जरी ॥

परक्षेत्रं, क्ली, (परस्य क्षेत्रं पत्न्यादि ।) परपत्नी । (यथा, मनुः । ३ । १७५ ।
"तौ तु जातौ परक्षेत्रे प्राणिनौ प्रेत्य चेह च ।
दत्तानि हव्यकव्यानि नाशयेते प्रदायिनाम् ॥")
परशरीरम् । परभूमिः । यथा,—
"दृशार्पेहि परक्षेत्रादायाति क्षेत्रचक्रः ।"
इति चन्द्रालोकः ॥
(तथा च मनुः । ८ । ३४१ ।
"द्विजोऽध्वगः क्षीणवृत्तिर्द्वाविच्छू द्रे च सूलके ।
आददानः परक्षेत्रान्न दण्डं दातुमर्हति ॥")

परग्रन्थिः, पुं, (परेण ग्रन्थिर्यत्र ।) पर्व्वावधिः अङ्गुलिपर्व्व । इति हारावली ॥

परच्छन्दः, त्रि, (परस्य छन्दो यत्र ।) पराधीनः । इति हेमचन्द्रः ॥

परच्छिद्रं, क्ली, (परस्य छिद्रम् ।) परदोषः । यथा,
"नीचः सर्षपमात्राणि परच्छिद्राणि पश्यति ।
आत्मनो बिल्वमात्राणि पश्यन्नपि न पश्यति ॥"
इति गरुड़पुराणम् ॥

परजातः, त्रि, (परेण जातः । परपुत्त्वात्तथात्वम् ।) परैधितः । औदासीन्येन परपुष्टः । परपोषितत्वात् । परस्माज्जातः । इत्यमरभरतौ ॥ अन्येनोत्पन्नश्च ॥ (कोकिले पुं । एष हि काकेन पुष्टो भवतीति प्रसिद्धिः ॥)

परजितः, त्रि, (परेण जितः ।) परपुष्टः । शुचुणा पराजितः । इति केचित् ॥

परञ्जः, पुं, (परं जयतीति । जि जये + बाहुलकात् डः ।) तैलयन्त्रम् । क्षुरिकाफलः । फेनः । इति मेदिनी ॥

परञ्जनः, पुं, (परायाः पश्चिमस्या दिशो जनः स्वामी । निपातनात् साधुः ।) वरुणः । इति हेमचन्द्रः ॥

परञ्जयः, पुं, (परां पश्चिमां दिशं जयति स्वामित्वेन । जि + अच् । सर्व्वनाम्नः वृत्तौ पुंवद्भावः सुम् च ।) वरुणः । इति त्रिकाण्डशेषः ॥ शत्रुजयकर्त्ता । परान् जयतीति खशप्रत्ययनिष्पन्नः ॥

परतन्त्रः, त्रि, (परस्तन्त्रं प्रधानं यस्य ।) पराधीनः । इत्यमरः ॥ (यथा, महाभारते । १३ । १ । १५ ।
"परतन्त्रं कथं हेतुमात्मानमनुपश्यसि ।
कर्म्मणां हि महाभाग ! सूक्ष्मं ज्ञेयमतीन्द्रियम् ॥"
परस्य तन्त्रं इति विग्रहे क्ली । परकीयशास्त्रम् । परं श्रेष्ठं तन्त्रमिति विग्रहे । उत्कृष्टशास्त्रम् । उत्तमपरिच्छदम् ॥)

परत्रभीरुः, त्रि, (परत्र परलोकान्तरघटनाविषये भीरुः ।) धार्म्मिकः । परकालभयभीतः । यथा,—

परश्चभौगं प्रस्तिष्ठमुदृष्टं क्रोधवर्जितम् ।"
इति मिताक्षरायां कालाधनः ॥

परत्वं, क्ली परस्य भावः । परता । व्याख्यते तद्-द्विविधम् । दैशिकम् १ । तत्तु यद्धनरसूर्य-संयोगज्ञानजन्यगुणः । कालिकम् २ तच्च यद्-तत्समानाधिकरणज्ञानजन्यगुणः । एतद्द्वयं सर्वत्रैवार्थगुणः । दैशिकपरत्वस्यासमवायि-कारणं दिक्सूर्यसंयोगः । कालपरत्वस्यासम-वायिकारणं कालविशेषसंयोगः । ते अपेक्षा-बुद्धिजन्ये । तन्त्रभाषायां च । यथा,—
"परत्वमपरत्वञ्च द्विविधं परिकीर्तितम् ।
दैशिकं कालिकञ्चापि तत्रैव तु दैशिकम् ॥
परत्वं सर्वसंयोगभूयस्त्वज्ञानतो भवेत् ।
अपरत्वं तदल्पत्वबुद्धितः स्यादितीरितम् ॥
तयोरसमवायी तु दिक्संयोगस्तदाश्रये ।
दिवाकरपरिस्पन्दपूर्वोत्पन्नत्वबुद्धितः ॥
परत्वमपरत्वन्तु तदनन्तरबुद्धितः ।
अत्र त्वसमवायी तु संयोगः कालविण्डयोः ॥
अपेक्षा बुद्धिनाम्नास्य तन्त्रेषां निरूपितः ।"
इति भाषापरिच्छेदः ॥

परदारः, (परस्य दाराः ।) परभार्य्या । तद्गमने दोषो यथा, कर्म्मलोचनम् ॥
"परदारस्तथैव परद्रव्यञ्च ये ।
अधोऽधो नरके यान्ति मोक्षन्ते यमकिङ्करैः ॥"
"ब्राह्मणः क्षत्रियो वैश्यो यो रतः परयोषिति ।
याति तस्यापूजितस्य कृत्वा लक्ष्मीगृहादपि ॥
इहातिनिन्द्यः सर्व्वत्र नाधिकारी स्वकर्म्मसु ।
परत्रैवान्धकूपे च यातनार्थञ्च तं वसेत् ॥
अपि च ।
"किमत्रबहुना तपसा मौनेन च व्रतेन च ।
सुरार्चनेन तीर्थेन स्त्रीभिर्यस्य मनो हृतम् ॥
सर्व्वमायाकरस्यैव धर्म्ममार्गार्गलं दृढम् ।
अवधार्य्य तमसां दोषाणामाद्यं परम् ॥
कर्म्मब्रह्मनिरूपाणां निगडं दृढिनं नृप ! ।
प्रदीप्तपूर्यं कीटानां मीनानां बडिशं यथा ॥
विषकुम्भं दुरन्तस्य मारस्य मधुरोपमम् ।
परिणामे दुःखबीजं सेवानं नरकस्य च ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ६० । ६१ अध्यायः । ४ ॥
"यस्तु परस्त्रियं गत्वा स्त्रियाश्चैवोपपतिं व्रजेत् ।
स्त्रीसङ्गमागमं तस्य मद्यो नरकसागरम् ॥
नित्यं नैमित्तिकं कार्य्यं यागयोग्यव्रतादिकम् ।
चैत्रवैशाखयोर्मध्ये यस्तु धर्म्मक्रियादिकम् ॥
स्वाध्यायादि सदा दैवं पैत्र्यं कर्म्म यजामहे ! ।
यातीतिजन्मनि सर्व्वं परस्त्रीसङ्गसङ्गतम् ॥
परदारागमनात् कोटि गुणादुत्तमितम् ।
अपरं किन्तु परत्वं नित्यं निरये स्थितिः ॥
सर्व्वं सर्व्वं पुनः सर्व्वं सङ्कल्पेन प्रजायते ।
परस्त्रीतो भवेत् किन्तु कोटिजन्मं विनाशयेत् ॥"
इति ब्रह्मोत्तरखण्डे ७५ अध्यायः । ३ ॥
अपि च ।
"कार्य्यं धर्म्मोचितैर्नित्यं परदारोपसेवनम् ।
नयन्ति परदारा हि नरकानर्व्विशङ्कितम् ॥
सर्व्वेषामेव वर्णानामेष धर्म्मो ध्रुवोत्तमः ! ॥
एवं पुरा सुरपते ! देवर्षिरमितोऽब्रवः ।
प्राह धर्म्मव्यवस्थानं खगेन्द्रायारुणाय हि ।
तस्मात् सुदूरतो वर्ज्जेत् परदारान् विचक्षणः ।
नयन्ति निरृतिप्रज्ञं परदाराः पराभवम् ॥"
इति वामने ६३ अध्यायः ॥

परदुःखं, क्ली, (परेषां दुःखम् ।) अन्यजनपीड़ा । यथा,—
"त्यक्तात्मसुखभोगेच्छा सर्व्वसत्त्वसुखैषिणः ।
भवन्ति परदुःखेन साधवो निजदुःखिताः ॥
परदुःखातुरा नित्यं स्वसुखानि महान्त्यपि ।
नापेक्षन्ते महात्मानः सर्व्वभूतहिते रताः ॥"
इत्यग्निपुराणम् ॥

परदेषी, [न्] क्ली, (परेभ्योदेषीति । पर + द्विष् + णिनिः ।) विद्वेषकः । परदेषा । इति शब्द-माला ॥

परध्यानं, क्ली, (परं श्रेष्ठं ध्यानम् ।) ध्यान-विशेषः । यथा,—
"ध्येये मनो निश्चलतां याति ध्येयं विचिन्तयन् ॥
यत्तद्ध्यानं परं प्रोक्तं मुनिभिर्ध्यानचिन्तकैः ॥"
इति गरुड़पुराणम् ॥
(परस्य ब्रह्मणोध्यानं यद्वा परं ब्रह्मविषयकं-ध्यानमिति । ब्रह्मचिन्तनम् ॥ परेषां ध्यानमिति-विग्रहे । परानिष्टचिन्तनम् ॥)

परन्तपः, त्रि, (परान् शत्रून् तापयतीति । तप सन्ताये "शिवतृपरयोस्तापेः ।" ३ । २ । ३६ । इति खच् । "खचि ह्रस्वः ।" ६ । ४ । ६४ । इति उपधाया ह्रस्वस्ततो सुम् ।) परतापी । (यथा, भट्टिः । १ । १ ।
"अभूद्भूपो विबुधसखः परन्तपः
श्रुताग्निहो दशरथ इत्युदाहृतः ॥")
(जितेन्द्रियः । इति चिन्तामणिः ॥ तामस-मनोः पुत्रभेदः । यथा, हरिवंशे । ७ । २४ ।
"द्युतिमत्पमुखास्तस्योमत्सखस्योशनः ।
तयोरतिरकल्माषस्तत्वोर्ध्वो परन्तपः ।
तामसस्य मनोरेते दशपुत्रा महाबलाः ॥"
इत्यभिधेयः । असौ हि मगधेश्वरः । यदुक्तं रघौ । ६ । २१ ।
"असौ शरण्यः शरणोन्मुखानां
मगधस्त्रियो मगधप्रतिष्ठः ।
राजा प्रजारञ्जनलब्धवर्णः
परन्तपो नाम यथार्थनामा ॥")

परपदं, क्ली, (परं श्रेष्ठं पदम् ।) श्रेष्ठस्थानम् । मुक्तिः । यथा,—
"कल्याणानां निदानं कलिमलमथनं पावनं पावनानां
पाथेयं यन्मुमुक्षोः सपदि परपदप्राप्तये प्रस्थि-तस्य ।"
इति महानाटकम् ॥
(परस्य परेषां वा पदं स्थानमितिविग्रहे-परापदम् ।)

परमाकनिष्टत्तः, पुं, (परार्थात् पाकात् निष्टत्तः ।) परे ऽहन्यकमाकरहितः । पञ्चयज्ञाकर्त्ता । यथा,—
"गृहीत्वाग्निं समारोप्य पञ्चयज्ञान् निर्व्वपेत् ।
परपाकनिष्टत्तोऽसौ मुनिभिः परिकीर्त्तितः ॥"
इति मिताक्षरायां प्रायश्चित्ताध्यायः ॥

परपाकरतः, पुं, (परस्य पाके रतः ।) परपाक-रुचिः । प्रातः पञ्चयज्ञानिर्व्वर्त्य परान्नभोजी । यथा,—मिताक्षरायां प्रायश्चित्ताध्याये ।
"पञ्चयज्ञान् स्वयं हुत्वा परान्नमुपजीवति ।
सततं प्रातरुत्थाय परपाकरतस्तु सः ॥"
परपाकनिष्टत्तपरपाकरतयोरन्नभोजने दोषो यथा,—
"परपाकनिष्टत्तस्य परपाकरतस्य च ।
अपक्वस्य च भुक्तान्नं द्विजश्चान्द्रायणं चरेत् ॥"
इति मिताक्षरायां प्रायश्चित्ताध्यायः ॥

परपिण्डादः, त्रि, (परस्य पिण्डं अन्नादिकं अत्तीति । अद् लौ भक्षणे + "कर्म्मण्यण् ।" ३ । २ । १ । इति अण् ।) परान्नोपजीवी । इत्यमरः । ३ । १ । २० ॥

परपुरुषः, पुं, (परः श्रेष्ठः पुरुषः ।) विष्णुः । इति त्रिकाण्डशेषः ॥ (परोऽन्यः पुरुषः ।) अन्यपुमान् । उपनायकः । यथा,—
"राजन् जीवावधानं क्रुध मुधु निभृतं प्रेक्ष-सीनां कुचेष्टा
एका ते कीर्त्तिकान्ता जगदटनपरा विश्वभोग्या-परा श्रीः ।
या वा पाणौ गृहीता विधिवदखिलता मुद्ध-धारेति मत्वा
सोत्कण्ठं सापि नित्यं परपुरुषयुतं मारभावा-दुपैति ॥"
इति कर्णाटराजस्मृति कालिदासः ॥

परपुष्टः, पुं, (परेण काकेन पुष्टः पालितः । छिद्र-स्फोटनाद्यमया कोकिलया हि नीडस्थं काकशिशुमपसार्य्य स्वशिशौ तत्र स्थापिते काकया निजशिशुबुद्ध्या तत्परिपाल्यते इति प्रसिद्धेरस्य तथात्वम् ।) कोकिलः । इति मेदिनी ॥ परेण पोषिते त्रि । इति धरणिः ॥

परपुष्टमहोत्सवः, पुं, (परपुष्टानां कोकिलानां महोत्सवो यत्र । चाम्रसकुलोद्गमे हि कोकि-लानां चानन्दो जायते ।) चाम्रः । इति शब्द-माला ॥

परपुष्टा, स्त्री, (परेण परपुरुषेण पुष्टा पालिता ।) वेश्या । इति मेदिनी ॥ पराश्रया । इति शब्द-चन्द्रिका ॥ परसाड़ा इति भाषा ॥

परपूर्व्वा, स्त्री, परोऽन्यः पूर्व्वो भर्त्ता यस्याः सा मतल्लक्षणत्वात् प्राग्वत्तेन गृहीतासीदित्यर्थः । अस्या लक्षणं यथा, मानवे ५ अध्यायः ॥
"पतिं हित्वापकृष्टं स्वमुत्कृष्टं या निषेवते ।
नैवैव सा भवेल्लोके परपूर्व्वेति चोच्यते ॥"
अस्याः प्रकारो यथा,—
"परपूर्व्वाः स्त्रियस्तस्या नव प्रोक्ता द्यथाऽनघे ।
पुनर्भूश्चविधा तासां शैरिणी तु चतुर्थिका ॥"
इति मिताक्षरायां नारदः ॥

परप्रातनप्ता, [तृ] पुं, (प्रतिनप्तुः परः) परप्रपौत्रः पुं, (प्रतिनप्तुः परः अन्तरः।) वृद्धप्रपौत्रः। इति हेमचन्द्रः॥

परभागः, पुं, (परस्य श्रेष्ठस्य भागः।) गुणोत्कर्षः। इति हेमचन्द्रः॥ (यथा, रघुः। ५।७०॥
"आभाति लब्धपरभागतयाऽधरोष्ठे
लीलासितं सदृशनार्चिरिव त्वदीयम्॥")
सुसम्पत्। इति चिकाण्डशेषः॥ श्रेष्ठांशश्च॥

परभुक्ता, स्त्री, (परेण परपुरुषेण भुक्ता।) अन्यपुरुषसम्भोगविशिष्टा। यथा,—
"परभुक्ताञ्च कान्ताञ्च यो भुङ्क्ते च नराधमः।
स पच्यते कालसूत्रे यावच्चन्द्रदिवाकरौ॥
न सा देवे न सा पित्रे पाकार्हा यापसंयुता।
तस्या आलिङ्गने भर्त्ता अष्टश्रीस्त्रीवसा हृतः॥
देवताः पितरस्तस्य हव्यदाने च तर्पणे।
सुखिनो न भवन्त्येवमित्याह कमलोद्भवः॥
तस्माद्यत्नेन भार्य्याञ्च रक्षणं कुरुते सुधीः।
अन्यथा पापिनीभर्त्ता निश्चितं नरकं व्रजेत्॥
पदे पदे सावधानः कान्तां रक्षति पण्डितः।
न प्रतीतिस्थली योषा दोषाणाञ्च करण्डिका॥
कलत्रं पाकपात्रञ्च सदा रक्षितुमर्हति।
परस्वर्गादमुद्धृत्य सुतां स्वस्मिन्नियं सदा॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १०७अध्यायः॥*॥
अन्येन भक्षिते त्रि॥

परभृत्, पुं, (परान् कोकिलान् बिभर्त्तीति। डुभृञ् धारणपोषणयोः + क्विप्। परेषां भृदिति केचित्।) काकः। इत्यमरः। २। ५। २०॥ (परजनपोषके, त्रि। यथा, भागवते। २। २। ५।
"चीराणि किं पथि न सन्ति दिशन्ति भिक्षां
नैवाङ्घ्रिपाः परभृतः सरितोऽप्यशुष्यन्॥")

परभृतः, पुं, (परेण काकेन भृतः पुष्टः।) कोकिलः। इत्यमरः। २। ५। १६॥ (यथा, मृच्छकटिके।
"परभृत इव नीडे रक्षितो वायसीभिः॥"
स्त्रियां टाप्। यथा, रघौ। ९। ४७।
"परभृताभिरितीव निवेदिते
स्मरमते रमते स्म वधूजनः॥"
तथाच कुमारे। ६। २।
"पूतयष्टिरिवाभ्यासे मधौ परभृतोन्मुखी॥"
अत्र मल्लिनाथः। "परभृतया कोकिलया उन्मुखी सुस्वरा। परभृतेति क्रियाशब्दविवक्षायां 'जातेरस्त्री' इति ङीप् प्रत्ययो न भवति। अथवा भृञ्धरणं सम्पदादित्वात् क्विप्। परैः भृतयस्त्रास्तया परभृता इति व्यासेन व्याख्यातम्। पदमञ्जरीकारस्तु परैः म्रियते इति कर्म्मणि क्विपमाह॥") परपोषिते त्रि॥

परम्, व्य, (पॄ पूर्त्तौ + अम्।) नियोगः। शेषः। इति मेदिनी॥ पश्चात्॥ (किन्त्वर्थे। यथा, पञ्चतन्त्रे।
"वेत्ति सर्व्वं शास्त्रपारगः परं बुद्धिरहिता॥"
अधिकम्। यथा, रघुः। १। १७।
"रेखामात्रमपि क्षुण्णादामनोर्व्वर्त्मनः परम्॥"
अनन्तरम्। यथा, तत्रैव। १। ६६।
"नूनं मत्तःपरं वेद्या न विच्छेददर्शिनः॥")

परम, व, अनुज्ञा। इति मेदिनी॥ हाँ इति भाषा। तथा च। ओमेवं परमं मते। इत्यमरः। ३। ४। १२॥ त्रीणि मते अनुमतौ। ओं कुरु ओमित्युक्तवतः। एवं वाढ़ एवं यदाह भगवान्। परमन्ते आवसं समेदं परसम्। त्रयं प्रकारेऽपि। इति भरतः॥

परमः, त्रि, (परं उत्कृष्टं मातीति। "आतोऽनुपसर्गे कः।" ३। २। ४। इति कः।) परः। उत्कृष्टः। इति मेदिनी॥ (यथा, मनुः। ८।३१८।
"सर्व्वथा ब्राह्मणाः पूज्याः परमं दैवतं हि तत्॥")
प्रधानम्। (यथा, मनुः। ६। ६६।
"एवं सन्न्यस्य कर्म्माणि स्वकार्य्यपरमोऽमुहः॥")
आद्यः। ओङ्कारः। इति विश्वः॥ (यथा कुमारे। ६। ३५।
"ततः परमिति युक्ता प्रतस्थे मुनिमण्डलम्॥")
अग्रेसरः। इति हेमचन्द्रः॥ (महादेवः। यथा, महाभारते। १३। १७। ५१।
मन्त्रवित् परमोमन्त्रः सर्व्वभावकरो हरः॥")

परमगतिः, स्त्री, (परमा गतिः।) मुक्तिः। मोक्षहेतौ त्रि। यथा। गुणातीतोऽपीश्वरिगुणसचिवस्त्वाचरमयस्त्रिमूर्त्तिर्यः सृष्टिस्थितिविलयकर्म्माणि कुरुते। कृपापारावारः परमगतिरेष त्रिजगतां नमस्तस्मै कस्मैचिदमितमहिम्ने पुरभिदे॥ इति मङ्गलवादः॥ तस्या लक्षणं यथा,—
"यां विप्राः सर्व्वतः प्राप्ता विशुद्धा ज्ञाननिश्चयाः।
गतिं गच्छन्ति सन्तुष्टास्तामाहुः परमां गतिम्॥"
इति महाभारते मोक्षधर्म्मः॥

परमगवः, पुं, स्त्री, परमश्चासौ गौश्चेति श्रेष्ठगौः।

परमपदः, पुं, क्ली, (पद्यते ज्ञानिभिः प्राप्यते इति पदम्। ततः कर्म्मधारयः।) श्रेष्ठस्थानम्। परदेवताचरणः। यथा। स्वपुष्पैराकीर्णं कुसुमधनुषो मन्दिरमहो पुरो ध्यायन् ध्यायन् यदि जपति भक्तस्तव मनुम्। स गन्धर्व्वश्रेणीपतिरपि कवित्वाम्बुतनदीनदीनः पर्य्यन्ते परमपदलीनः प्रभवति॥ इति कर्पूराख्यस्तोत्रम्॥

परमब्रह्म, [न्] क्ली, (परमं ब्रह्म।) परमेश्वरः। नारायणः। यथा।
सत्यतपा उवाच।
"यदेतत् परमं ब्रह्म त्वया प्रोक्तं महामुने!।
तस्य रूपं न जानन्ति योगिनोऽपि महात्मनः॥
अनामगोत्ररहितमरूपं मूर्त्तिवर्ज्जितम्।
कथं तज्ज्ञायते ब्रह्म संज्ञानामविवर्ज्जितम्॥
तत्तस्य संज्ञां कथय येन जानाम्यहं गुरो!॥"
दुर्व्वासा उवाच।
"यदेतत् परमं ब्रह्म वेदवादेषु पठ्यते।
स देवः पुरुषाकाशः स्वयं नारायणः परः॥
स ब्रह्मेर्विविधैरिष्टैर्दानैर्दैवैश्च सत्तम!।
प्राप्यते परमो देवः स्वयं नारायणो हरिः॥"
इति वराहपुराणम्॥

परमर्षिः, पुं, (परमश्चासौ ऋषिश्चेति।) अस्य व्युत्पत्तिर्यथा,—
"ऋषिर्हिंसागतौ धातुर्विद्यासत्यतपःश्रुतेः।
एष सन्निचयो यस्मात् ब्रह्मणश्च ततस्त्वृषिः॥
विवृत्तिसमकालन्तु बुद्ध्या चक्तिर्ह्रषिस्वयम्।
ऋषते परमं यस्मात् परमर्षिस्ततः स्मृतः॥
गत्यर्थाद्ऋषतेर्धातोर्नामानि वृत्तिकारणम्।
यस्मादेष स्वयं भूतस्तस्माच्च ऋषिता मता॥"
इति मात्स्ये १२० अध्यायः॥
मेलादिऋषिविशेषः। इति चिकाण्डशेषः॥
(वेदव्यासो हि परमर्षिः। यथा, महाभारते। १। १। १७।
"द्वैपायनेन यत् प्रोक्तं पुराणं परमर्षिणा॥")

परमस्वधर्म्मा, [न्] त्रि, परमस्वो धर्म्मो यस्य। इति कर्म्मधारयपूर्व्वपदबहुव्रीहौ सिद्धान्तकौमुदी॥

परमहंसः, पुं, (परमः श्रेष्ठः हंसः सोऽहं आत्मा यस्य।) सन्न्यासिविशेषः। अस्य लक्षणं यथा।
जातरूपधरो निर्द्वन्द्वो निरग्रहस्तत्त्वब्रह्ममार्गे सम्यक् सम्पन्नः शुद्धमानसः प्राणसंधारणार्थं यथोक्तकाले भैक्षमाचरन् लाभालाभौ समौ कृत्वा शून्यागारदेवगृहतृणकूटवल्मीकवृक्षमूलकुलालशालाग्निहोत्रनदीपुलिनगिरिकुहरकन्दरकोटरनिकरस्थण्डिलेष्वनिकेतवासी निष्प्रयत्नो निर्म्ममः शुक्लध्यानपरायणः अध्यात्मनिष्ठः शुभाशुभकर्म्मनिर्म्मूलनाय सन्न्यासेन देहत्यागं करोति यः स एव परमहंसो नामेति जीवन्मुक्तिविवेकः॥
(अयं हि चतुर्व्विधावधूतेषु श्रेष्ठः। यदुक्तं महानिर्व्वाणतन्त्रे।
"चतुर्णामवधूतानां तुरीयो हंस उच्यते।
त्रयोऽन्ये भोगयोगाढ्या मुक्ताः सर्व्वे शिवोपमाः॥"
परमहंसेन हि यज्ञोपवीतादिचिह्नानि परित्यज्य कौपीनादिकं धारणीयम्। यदुक्तं सूतसंहितायां ज्ञानयोगे।
"परमहंसस्त्रिदण्डञ्च रज्जुं गोवालमिश्रितम्।
शिक्यं जलपवित्रञ्च पवित्रञ्च कमण्डलुम्॥
पक्षिणीमजिनं रूचीं सूत्रं खनित्रीं कृपाणिकाम्
शिखां यज्ञोपवीतञ्च नित्यकर्म्म परित्यजेत्॥
कौपीनं छादनं वस्त्रं कन्थां शीतनिवारिकाम्।
योगपट्टं बहिर्वस्त्रं पादुकां छत्रमद्भुतम्॥
अक्षमालाञ्च गृह्णीयात् वैष्णवं दण्डमव्रणम्।
अग्निरित्यादिभिर्मन्त्रैः कुर्य्याद्दण्डमनं सुदा॥
आमितिच त्रिभिः प्रोक्ष्य परमहंसस्त्रिपुण्डकम्॥"
अविदुषा परमहंसेन एकदण्डेन भाव्यम्। विदुषा तु दण्डादिकं किमपि न धारणीयम्॥ यदुक्तं निर्णयसिन्धौ। "परमहंसस्त्वेकदण्ड एव सोऽप्यविदुषः। विदुषान्तु सोऽपि नास्ति। न दण्डं न शिखां नाच्छादनं धरति परमहंसः॥" परमहंसास्तु केवलं प्रणवजपतत्परा एव भवन्ति। यदुक्तं सूतसंहितायाम्।
"प्रणवाद्याश्चयोवेदाः प्रणवे पर्य्यवस्थिताः।
तस्मात् प्रणवमेवैकं परमहंसः सदा जपेत्॥
विविक्तदेशमाश्रित्य सुखासीनः समाहितः।
यथाशक्ति समाधिस्थो भवेत् सन्न्यासिनां वरः॥"
परमहंसास्तु "तत्त्वमसि" इत्यादि महावाक्यार्थ

लम्बनेन आत्मज्ञानानुशीलिनो भवन्ति "सोऽहं" शिवोऽहं" इत्यादि वदन्तस्तत्त्वज्ञानावलम्बनस्य परिचयं प्रयच्छन्ति च। एषामध्वो हि स्वामीत्याख्यया प्रसिद्धः। एते हि तीर्थभ्रमण-निपुणास्तीर्थस्थानस्याच्च। मतस्य परमहंसस्य शरीरं भूमौ निखातत्वम्। यदुक्तं वायु-संहितायाम्।

"मृते न दहनं कार्यं परमहंसस्य सर्व्वदा।
कर्त्तव्यं खननं तस्य नाग्नौचं नोदकक्रिया॥"

परमहंसस्तु दण्डिपरमहंसावधूतपरमहंसभेदेन त्रिविधः। ये तु दण्डं परित्यज्य पारमहंस्य-व्रतावलम्बनं कुर्व्वन्ति ते दण्डिपरमहंसाः। ये चावधूतवृत्त्यानुष्ठानेन परमहंसास्ते एवा-वधूतपरमहंसाः। परं सर्व्वे एव प्रणवोपासकाः इति॥ ✻॥

शुक्लयजुर्व्वेदगत उपनिषद्विशेषः। इति सन्न्यासोपनिषत्॥)

परमाणुः, पुं, (परमः सर्व्वचरमकोऽणुः।) पृथिव्यादिभूतचतुष्टयानां द्व्यणुकानामवयवः। स च नित्यः निरवयवः ततः किमपिरूक्षं नास्ति। यथा,—

"नित्यानित्या च सा द्वेधा नित्या स्यादणुलक्षणा।
अनित्या तु तदन्या स्यात् सावयवत्वयोगिनी॥"

पारिमाण्डल्यनामकतत्परिमाणन्तु न कस्यापि कारणम्। यथा,

"पारिमाण्डल्यभिन्नानां कारणत्वमुदाहृतम्॥"

जलादिपरमाणुरूपस्य नित्यत्वम्। पार्थिवपर-माणुरूपस्यानित्यत्वम्। पार्थिवपरमाणुरूप-स्यानित्यत्वम्। यथा, भाषापरिच्छेदे॥

"जलादिपरमाणौ तन्नित्यमन्यत् सहेतुकम्।"

तैरेव परमाणुभिरारब्धुपादानैर्द्व्यणुकत्रसरेणवादि-क्रमेण स्थूलचित्तिजलतेजोमरुतः सृजति परमे-श्वरः। यथा आयोजनं परमाणुकर्म्म तथा च सर्गाद्यकालीनं द्व्यणुकारम्भकपरमाणुकर्म्म यत्नजन्यं गत्वत्वादात्मसंयोगजन्यं वा कर्म्मत्वात् अस्मदादिशरीरकर्म्मवत् इति कुसुमाञ्जलिः॥ प्रलयेऽतिस्थूलस्थूलनाशानन्तरं परमाणुक्रिया-विभागपूर्व्वसंयोगनाशादिक्रमेण द्व्यणुकनाशा-त्तिष्ठन्ति परमाणव एवेति। यथा,—

"दोधूयमानास्तिष्ठन्ति प्रलये परमाणवः।"

इति प्राचीनकारिका॥

तस्य महत्त्वाभावादतीन्द्रियत्वम्। यथा। महत्त्वं षड्विधे हेतुरिति भाषापरिच्छेदः॥ ✻॥

कालविशेषः। यथा, श्रीभागवते ३।११।४-५॥

"स कालः परमाणुर्वै यो भुङ्क्ते परमाणुताम्।
सतो विशेषसंज्ञः यस्तु कालः स परमो महान्॥
अणवो परमाणु स्यात्तरेणुस्त्रय स्मृतः।
जालार्करश्मिगतः खमेवानुपतन्नगात्॥"

अस्यार्थः। एतदेव प्रपञ्चयति स इत्यादिना। सतः प्रपञ्चस्य परमाणुतां परमाण्ववस्थां यो भुङ्क्ते स कालः परमाणुः तस्यैवाविशेषं साकल्यं यो भुङ्क्ते स परममहान्। अयमर्थः अहर्च्चतारात्रक्रस्य इत्यादिना यत् सूर्य्यपर्य्यटनं वक्ष्यति तत्र सूर्य्यो यावता परमाणुदेशमति-क्रामति तावान् कालः परमाणुः। यावता च द्वादशराश्यात्मकं सर्व्वं भुवनकोषमतिक्रामति स परममहान् संवत्सरात्मकः तस्यैवाद्यत्रा युगमन्वन्तरादिक्रमेण दिपरार्द्धान्तत्वमिति। तथा च पञ्चमे सूर्य्यगत्यैव कालादिविभागं वक्ष्यति।५। इदानीं द्व्यणुकादिलक्षणपूर्व्वकं मध्यमकालावस्थां कथयति द्वौ परमाणू अणुः स्यात् त्रयोऽणव-स्त्रसरेणुः स तु प्रथम इत्याह बालार्केति गवाक्षप्रविष्टैर्व्वकरश्मिव्यवगतः कोऽसौ योऽति-लघुत्वेन खमेवानुपतन् अगात् गतः। न गामिति पाठे खमेवानुपतन्नवगतः न तु गां पृथ्वीम्। इति श्रीधरस्वामी॥

परमाण्वङ्कः, पुं, (परमाणुरङ्के यस्य। कप्।) विष्णुः। इति शब्दमाला॥

परमात्मा, [न्] पुं, (परमः केवलः चात्मा।) परं ब्रह्म। तत्पर्य्यायः। व्याप्योज्योतिः २ चिदात्मा ३। यथा,—

"परमात्मा परं ब्रह्म निर्गुणः प्रकृतेः परः।
कारणं कारणानाञ्च श्रीकृष्णो भगवान् स्वयम्॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २३ अध्यायः॥

(विष्णुः। यथा, महाभारते। १३। १४६।१५।

"भूतात्मा परमात्मा च सूक्ष्मानां परमा गतिः॥"

महादेवः। यथा, तत्रैव। १३। १७। १३७।

"भूतात्मा परमात्मा च प्रयतात्मा प्रधानधृक्॥")

परमाद्वैतः, पुं, (परमः अद्वैतः द्वैतवर्ज्जितः।) विष्णुः। यथा,—

"नमस्ते ज्ञानसद्भाव नमस्ते ज्ञानदायक।
नमस्ते परमाद्वैत नमस्ते पुरुषोत्तम!॥"

इति गरुड़पुराणम्॥

परमान्नं, क्ली, देवपित्रन्नत्वात् परमसुतृप्तिजमन्नम्। परमाणासुतृप्तिजानां देवादीनामन्नमिति वा। इति भरतः॥ तत्पर्य्यायः। पायसः २। इत्य-मरः। २। ७। २४॥ चौरिका ३। तस्य पाकप्रकारो यथा,—

"शुद्धेऽर्द्धपक्वे दुग्धे तु घृताक्तांस्तण्डुलान् क्षिपेत्।
ते सिद्धाः चौरिका ज्ञाता सा सिताव्ययुतो-त्तमा॥"

अस्य गुणाः।

"चौरिका दुर्ज्जरा वल्या धातुपुष्टिप्रदा गुरुः।
विष्टम्भिनी हरेत् पित्तरक्तपित्ताग्निमारुतान्॥"

इति भावप्रकाशः॥

परमायुः, [स्] क्ली, (परमं आयुः।) जीवित-कालः। यथा,—

"शतं वर्षाणि विंशत्या निशाभिः पञ्चभिः सह।
परमायुरिदं प्रोक्तं नराणां करिणामिह॥
अब्दा हात्रिंशदब्दानां शुनां द्वादशवत्सराः।
पञ्चविंशतिवर्षाणि खरस्य करभस्य च॥
चतुर्व्विंशतिरब्दानां वृषस्य महिषस्य च।
शूकरस्योष्ट्रवस्त्रादिपशूनां षड्दशान्विताः॥"

इति शब्दमाला॥ ✻॥

अथायुरानयनम्।

"अज्ञानादाद्युः सर्व्वं विफलं कीर्त्तितञ्च यत्।
तस्मादानयनं तस्य स्फुटार्थमभिधीयते॥
नीचान्तरस्य खेटस्य भागस्तुङ्गगुणो भवेत्।
चेष्टा केन्द्रस्तु चेत् षड्भादधिकं चक्रशोधितम्॥
नान्यथा तस्य भागादि चेष्टा गुणक उच्यते।
गुणश्चेत् षष्टिहृतो न्यूनं तदा द्व्याप्तं सखा-नलः ३०॥
एवं तुङ्गगुणश्चेष्टा गुणो यत् स्यात् तयोर्वधात्।
मूलं कलादिकं तत् स्यादायुष्कस्फुट उच्यते॥
अथाभ्ययगुणं वक्ष्ये चेत्रादिसप्तवर्गजम्।
वर्गे चेत्रादिके स्वर्च्चे आद्यस्त्रिंशत्३० कलागुणः॥
अधिमित्रगृहे तत्त्वम् २५ मित्रे विंशत्यजातयः।
२१। ४०।
समे पञ्चदश ज्ञात्राः शत्रौ स्वल्पाश्च कोरगाः ८।२०
पञ्चाक्षरौ ५ तदैक्यं यत् चेत्रोत्यगुणयुक् पुनः।
स्वर्च्चे वर्गोत्तमे स्वांशे स्वल्पांशे स्यादयं गुणः॥
अधीष्टर्च्चे युगांशोनस्वांशोनो मित्रवेश्मनि।
समे द्व्याप्तो रिपौ त्र्याप्तो युगांशस्त्रिंशत्तुभे॥
एवं स्यादाश्रयगुणो विशेषो यः स उच्यते।
स्वल्पांशकः स्वांशको वा वर्गोत्तमगतोऽपि वा॥
यदि स्यादधिमित्रर्क्षे तदा तत्राश्रये गुणे।
गजनेत्रे ससुरादौ २८।३४ कलाद्यं मिश्रयेद्बुधः।
एवं मित्रगृहे तद्वद्रूपलिप्तांशहिमिश्रयेत् १६।३०।
शत्रुश्चेत्रे तु षड्लिप्ता शून्यत्रिकलां त्यजेत्॥६।२१
अधिशत्रुगृहे वाणखत्र्यब्धी ५। ४३ लिप्तादिकं त्यजेत्।
आश्रयस्य गुणस्यास्य वधः स्फुटगुणस्य यः॥
तन्मूलं कर्म्मयोग्यः स्यादायुर्व्विधौ स्मृतः।
खेटानाञ्च तनोर्भागाः खाब्धि ४० शिष्टाः कलीकृताः॥
पुनः शून्यरसा ६० भक्ताः क्रमात् स्यादायुषः पलम्।
जन्मलग्नं ग्रहैर्योगं न्यूनं चक्रार्द्धतो यदि॥
तल्लग्नात् स्यात्तदाहारो नायं षड्भाधिके विधिः।
खखधृत्या १८०० खखाङ्केन ६०० गुणितं पल-मायुषः॥
क्रमतः पापसौम्यानां हारान्तं शोधनं भवेत्।
खखधृत्यूनहारस्त्रैहारो हारदलं क्रमात्॥
आयुः पलन्तु शून्याब्धं धृत्याप्तं शोधनं तथा।
आयुःपलं शोधनोनमेवं चक्रार्द्धशोधनम्॥
चक्रार्द्धशोधने त्रैकराशौ द्व्यादिग्रहे सति।
एकस्याधिकवीर्य्यस्य हानिं सत्यः प्रभासते॥
आयुःप्राणं हतं स्त्रीभैर्गुणैर्योग्यैः कलादिभिः।
षष्ट्याप्तम् ६० तत् पुनः सूर्य्यसङ्ख्याप्ताः १२००० मध्यादयः।
तनोरायुः पलं सूर्य्यः सङ्ख्याप्ताः समादयः।
त्रैलग्नं बलवद्योज्या राशितुल्याः समास्तथा॥
द्वादशाहतभागाद्यैर्दिनाद्यैश्चापि संयुताः।
एवं सूर्य्यादिलग्नानामंशायुः प्रस्फुटं भवेत्।
स्वचान्तरितखेटस्य कला आयुःपलं भवेत्।
तत्रेत् षड्भः कलान्यूनं तदा तां द्विगुणाङ्गतम्॥

तान्त्रवस्त्रो चित्रवर्णां कान्तारी रक्तयष्टिका ।"
इति रत्नमाला ।)
अस्या गुणाः । मधुरत्वम् । कषायत्वम् । उष्णत्वम् । गुरुत्वम् । व्रणमेहज्वरश्लेष्मविषनेत्रामयनाशित्वञ्च । सा चतुर्विधा । चोलः१ योजनीर२ कौन्ती ३ सिंहली च ४ । इति राजनिर्घण्टः ॥ कण्ठस्वरभङ्गशोथनाशित्वम् । वर्णाग्निकारित्वञ्च । इति राजवल्लभः ॥ अपि च ।
"मञ्जिष्ठा मधुरा तिक्ता कषाया स्वर्णवर्णकृत् ।
गुरुष्णा विषश्लेष्मघ्नी शोथयोन्यक्षिकर्णरुक् ।
रक्तातिसारकुष्ठासाविसर्पव्रणमेहनुत् ॥"
इति भावप्रकाशः ॥

मञ्जी, स्त्री, (मञ्जयति दीप्यते इति । मञ्जि + इन् । ऋदिकारादिति ङीष् ।) मञ्जरी । इति हेमचन्द्रः चिकाण्डशेषश्च ॥

मञ्जीरः, पुं, क्ली, (मञ्जति मधुरं शब्दायते । इति मनुञ् ध्वनौ सौत्रधातुः + बाहुलकात् ईरन् ।) नूपुरः । इत्यमरः । २ । १०६ ॥ मञ्जीरोऽस्त्री च नूपुरः । इति रभसः ॥ (यथा, गीतगोविन्दे । ५ । ११ ।
"सुखरमधीरं त्यज मञ्जीरं
रिपुमिव केलिषु लोलम् ॥")

मञ्जीरः, पुं, (मञ्ज + ईरन् ।) मन्थानदण्डरज्जुबन्धनार्थस्तम्भः । तत्पर्य्यायः । विष्कम्भः २ कुटरः २ । इति हेमचन्द्रः ॥

मञ्जु, त्रि, (मञ्जतीति । मञ्ज ध्वनौ सौत्रधातुः । "रुगयादयश्च ।" उणा० । १ । ३८ । इति कुः ।) मनोज्ञम् । इत्यमरः । ३ । १ । ५२ ॥ (यथा, पदाङ्कदूते । १ ।
"व्यक्ता मेघं झटिति यत्नामञ्जुझङ्कं जगाम ॥")

मञ्जुकेशी, [न्] पुं, (मञ्जवो मनोहराः केशाः सन्त्यस्य । इनि ।) श्रीकृष्णः । इति हलायुधः ॥ सुन्दरकेशविशिष्टे त्रि ॥

मञ्जुगमना, स्त्री, (मञ्जु मनोहरं गमनं यस्याः । स्त्रियां टाप् ।) हंसी । इति राजनिर्घण्टः ॥ सुन्दरगामिनि त्रि ॥

मञ्जुघोषः, पुं, (मञ्जुर्मनोहरो घोषः शब्दोऽस्य ।) पूर्व्वजिनभेदः । इति चिकाण्डशेषः ॥ उक्तस्य देवताविशेषः । अस्य मन्त्रादि यथा,—
"त्र्यौषतिमिरध्वंसी संसारार्णवतारकः ।
श्रीमञ्जुघोषो वयतां साधकानां सुखावहः ॥"
तन्त्रागमोत्तरे ।
"माटकादि समुद्धृत्य पद्मबीजं समुद्धरेत् ।
वामांसं कूर्म्मसंयुक्तं ततो मेषमसुद्धरेत् ॥
मीनेशयुक्तं ततः कुर्य्यात् वामनेत्रेन्दुसंयुतम् ।
षड्क्षरी मनुः प्रोक्तो मञ्जुघोषस्य धीमतः ॥
इयन्तु दीपनी प्रोक्ता सकलमन्त्रस्य कथ्यते ।
अङ्कुशं शक्तिबीजञ्च रमाबीजं ततः प्रिये ! ॥
शोषत्रयान्तको मन्त्रो त्र्यौषधान्तानाशनः ।
शक्तिबीजं रमाबीजं कामबीजं तथा प्रिये ! ॥
त्रिधा स्तुतिधरी प्रोक्ता एषा वर्णत्रयात्मिका ।
एकारो वह्निमारूढो वामनेत्रेन्दुभूषितः ।
प्रोक्ता सर्व्वज्ञविद्येयं एकवर्णात्मिका प्रिये ! ॥
सिद्धः साध्यः सुसिद्धो वा साधकस्य रिपुश्च वा ।
तदा मन्त्रो भवेद्वश्या शुभदो बुद्धिदो भवेत् ॥
मध्याह्ने बलिले चैव भोजने भाजने तथा ।
गोमये तु बहिर्देशे मैथुने रमणीकुचे ॥
गोष्ठे च निशि गोसुप्ते यन्त्रं डमरुसन्निभम् ।
विलिख्य मन्त्रवर्णाञ्च त्रिधा ऊर्द्ध्वं अधस्तथा ।
लिखेच्चन्दनलेखन्या प्रयत्नात् साधकोत्तमः ।
उच्चाटने लिखेद्यन्त्रं गोचर्म्मणि विशेषतः ।
सलिले विजयी नित्यं भजने च महेश्वरः ॥
गोमये वावटूकः स्याद्गोष्ठे सर्व्वज्ञतां व्रजेत् ।
कुचे कृतिधरो नित्यं गोसुप्ते च महाकविः ॥
गोरोचनं वदरीमूलं चन्दनं पांशुमेव च ।
एकीकृत्याष्टधा जप्त्वा तिलकं धारयेत् सदा ॥
नमस्कृत्य वरं श्रेष्ठं प्रार्थयेदुक्तितत्परः ।
वरं प्राप्य च तस्माद्वै विहरेत्तु यथासुखम् ॥
नान्यदेवार्च्चनं स्नानं प्रणवोच्चारणं न तु ।
वस्त्राञ्चलेन दन्तानां शोधनं लवणेन वा ॥
रात्रिवासो न सुप्तेत न शुचिः स्यात् कदाचन ।
एवं ज्ञात्वा प्रयत्नेन ज्ञात्वा गुरुमुखात् सुधीः ॥
मासैकेन कवीन्द्रः स्यात् द्विमासेनैव ईश्वरः ।
त्रिभिर्मासैर्भवेन्मर्त्यः सर्व्वशास्त्रविशारदः ॥
पुत्रार्थी लभते पुत्रं धनार्थी विपुलं धनम् ।
आयुरारोग्यकामस्तु सर्व्वान् कामानवाप्नुयात् ॥
ततः करान्न्यासौ ।
ह्रां ह्रीं अङ्कुशाभ्यां नमः । इत्यादि एवं हृदयादिषु । तथा च तन्त्रे ।
"समर्णको वक्त्रयुग्मं द्वौ वर्णौ कथितौ प्रिये ! ।
षड्दीर्घभाग्भ्यामेताभ्यां षड्ङ्गानि समाचरेत् ॥
समर्णः चकारः वक्त्रेशः प्रकारः ॥*॥ ध्यानम् ।
"शुभ्रधरमिव शुभ्रं खड्गपुस्ताङ्कपाणिं
सुरुचिरमतिशान्तं पञ्चचूडं कुमारम् ।
पृथुतरवरसुखं पद्मपत्रायताक्षं
कुमतिदहनदक्षं मञ्जुघोषं नमामि ॥
पीठपूजां ततः कुर्य्यादाधाराद्यादिशक्तितः ।
भूतप्रेतादिभिः कुर्य्यात् पीठासनमनन्तरम् ॥
ज्ञानदात्रे नमः पाद्यं बुद्धिकर्त्रे तथार्घ्यम् ।
आयनाशाय गन्धः स्यादर्घ्यं स्याद् यशप्राय वै ॥
सर्व्वसिद्धिप्रदायेति पुष्पं दद्याद्विचक्षणः ।
कुन्दपुष्पं समादाय भैरवान् पूजयेत्ततः ॥
असिताङ्गो रुरुश्चण्डः क्रोध उन्मत्तसंज्ञकः ।
कपाली भीषणश्चैव संहारश्चाष्टमः स्मृतः ॥
ततो धूपादिकं दत्त्वा प्रणमानि विसर्जयेत् ।
तैः पुष्पैः पूजयेद्देवीं यथिच्छीच्च विशेषतः ॥
त्रिपुरारिसुन्दरी चैव मनोहारिणस्तथा ।
कनकावती तथा कामेश्वरी च रतिरूपिणी ॥
पद्मिनी च गतीं चैव अनुरागिणस्तथा ।
पूज्या एताश्च योगिन्यो दलेष्वाग्नेयपूर्व्विकाः ॥
एवं संपूज्य देवेशं लक्षजप्तं समाचरेत् ।
एतास्तु कुन्दपुष्पेण एकादशशतानि च ॥
कुङ्कुमादेधिते पद्मे कान्तारे पिटवेष्टनि ।
एवं सिद्धमनुर्मन्त्री महायोगीश्वरो भवेत् ॥"
इति तन्त्रसारः ॥
प्रकारान्तरं कुक्कुटादितन्त्रे द्रष्टव्यम् ॥

मञ्जुपाटकः, पुं, (मञ्जु मनोहरं पठतीति पठ + ण्वुल् ।) शुकपक्षी । इति राजनिर्घण्टः ॥ सुन्दरपाठकर्त्तरि त्रि ॥

मञ्जुप्राणः, पुं, (मञ्जवः प्राणाः यस्य । सर्व्वव्यापकतया महाप्राणत्वादस्य तथात्वम् ।) ब्रह्मा । इति जटाधरः ॥

मञ्जुभद्रः, पुं, (मञ्जु मनोहरं भद्रं मङ्गलं यस्य ।) जिनविशेषः । तत्पर्य्यायः । मञ्जुश्रीः २ ज्ञानदर्पणः ३ मञ्जुघोषः ४ कुमारः ५ अशोरचक्रवान् ६ स्थिरचक्रः ७ वज्रधरः ८ प्रज्ञाकायः ९ वादिराट् १० नीलोत्पली ११ महाराजः १२ नीलः १३ शार्दूलवाहनः १४ धियाम्पतिः १५ पूर्व्वजिनः १६ खड्गी १७ दण्डी १८ विभूषणः १९ बालव्रतः २० पञ्चचीरः २१ सिंहकेलिः २२ शिखाधरः २३ वागीश्वरः २४ । इति चिकाण्डशेषः ॥

मञ्जुलं, क्ली, (मञ्जु मञ्जुत्वमस्त्यस्येति । "सिध्मादिभ्यश्च ।" ५ । २ । ९७ । इति मञ्जुशब्दात् लच् ।) जलाञ्चलम् । निष्कुञ्जम् । इति मेदिनी । ले, २ । २२ । ॥ शुचलः । इति त्रिकः ॥

मञ्जुलः, पुं, (मञ्जु मञ्जुत्वमस्त्यस्मिन्निति । मञ्जु + सिध्मादित्वात् लच् ।) जलरङ्कपक्षी । इति मेदिनी । १ । २२ ॥ सुन्दरे त्रि । इत्यमरः । ३ । १ । ५२ ॥ (यथा, कालिकापुराणे ४०अध्याये ।
"मञ्जुलं यौवनोद्भेदं प्राप श्रीरिव माधवे ।"
नदीभेदे स्त्री । यथा, महाभारते । ६ । ६ । ३४ ।
"चित्रोपलां चित्रघण्टां मञ्जुलां वाहिनीं तथा ।")

मञ्जुश्रीः, पुं, (सुष्ठु मञ्जुर्मनोहरा श्रीः शोभा यस्य ।) मञ्जुघोषः । इति चिकाण्डशेषः ॥

मञ्जुषा, स्त्री, (मञ्जूयते । ऋषोदरादित्वात् डस्वः ।) मञ्जूषा । पेटरा इति भाषा । यथा,—
"मञ्जुषापि च मञ्जूषा पेटा च पेटिकेत्यपि ।"
इति शब्दरत्नावली ॥

मञ्जूषा, स्त्री. (मज्जति द्रव्यमस्मिन् । "मसूचेर्नुम् च ।" उणा० । ४ । ७७ । इति मस्ज् + ऊषन् । नुम् च स चाचोऽन्त्यात् परः । ततो जश्त्वचुत्वे मध्यमस्य लोपात् साधुः ।) पिटकः । इत्यमरः । २ । १० । ३० ॥ (यथा, देवीभागवते । २ । ६ । ३६ ।
"मञ्जूषायां सुतं कृत्वा सुप्तायां वाक्यमब्रवीत् ॥")
पाषाणः । इत्युणादिकोषः ॥ मञ्जिष्ठा । इति राजनिर्घण्टः ॥ (मञ्जिष्ठार्थे पर्य्यायो यथा,—
"मञ्जिष्ठा विकसा निड्गी समङ्गा कालमेषिका ।
मण्डूकपर्णी भण्डीरी भण्डी योजनवल्लिपि ॥
रक्तायन्यरुया कासा रक्ताङ्गी रक्तयष्टिका ।
भण्डीरसञ्ज्ञी च गण्डीरी मञ्जूषा वस्त्ररञ्जिनी ।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

मट, सादे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट् ।) सौत्रधातुरयम् । अस्य प्रयोगः ।
मटयः । इति दुर्गादासः ॥

मठकी, स्त्री, (मठनं मठः। मठ् अवसादे + भावे अप् मठः। चीयते प्रचीयते शुभिरिति। मठ + चि + बाहुलकात् डिः। मठचिः। ततः ह्रस्वादिकारादिति प्रत्ये ङीप्।) सर्वेषामवसादकत्वा दस्यात्तथात्वम्।) रक्तवर्णक्षुद्रपक्षिविशेषः। पर्य्यायशब्दः। यथा, गोविन्दभाष्यधृत-छान्दोग्ये। १। १०। १॥ ("मटचीहतेषु कुरुष्वाटिषायं मह आययौयत्किर्हि चाजायथ एतद्ग्रामे प्रवाजक उवास॥ इति॥)

मठस्फटिः, पुं, (मठं अवसादं स्फटति निरा करोति। स्फट् + इः।) दर्पारम्भः। इति जटा धरः॥

मठ्कं, क्ली, (मठति पलत्वेति। मठ + बाप्। पृषोदरादित्वात् टागमे साधुः। मठ्ः। मठ्स्य कं शिरः।) मठस्य शिरोभागः। इति केचित्। मट्का इति भाषा॥

मठ, वासमर्य्ययोः। इति कविकल्पद्रुमः॥ (भ्वा० पर०-वासे सक०-सहने सक०-सेट्।) मठति। वासो निवासः। सर्द्दः केचिन्न मन्यते। इति दुर्गादासः॥

मठ, ड ड आध्याने। इति कविकल्पद्रुमः॥ (भ्वा० आत्म०-सक०-सेट्।) ड मठ्यते। आध्यानं स्म मौतृके इत्यत्र आख्यातम्। इति दुर्गादासः॥

मठः, पुं, (छात्रादिनिलयः। इत्यमरः। २। २। ८॥ मठन्ति वसन्ति छात्रादयोऽत्र मठः। मठ वासमर्य्ययोः घञ्। छत्रशीला विद्यार्थिनश्छात्राः। छत्रेण गुरुसेवा लभ्यते गुरुदोषच्छादनात् छत्रं तच्छीलत्वात् छात्रः विकारसंज्ञेति णः। आदिना परिव्राजकयतियत्यादीनां ग्रहः। छात्रादीनां निलयो गृहं छात्रादिनिलयः। अर्थकथनमेतत्। नामाप्येतदिति केचित्। छात्रशाला प्रतिश्रय-शालेव। इति भरतः॥ गन्धीरथः। इति धारावली॥ ४॥ अथ मठादिप्रतिष्ठाप्रयोगः।

यदि तद्दिने प्रतिमादिप्रतिष्ठा क्रियते तदा तत्पूर्वेण वृद्धिश्राद्धादिकं विधाय देवप्रतिष्ठातन्त्रोक्त-विधिना देवप्रतिष्ठां विधायमठप्रतिष्ठा कर्त्तव्या। यदि मठप्रतिष्ठामात्रं तदा प्रातः स्नाननित्यक्रियः प्रक्षालितपाणिपाद आचान्तः प्राङ्मुख उदङ्-मुखो वा कुशयुक्तपाणौ उपविश्य ब्राह्मणत्रयं गन्धादिना परिपूज्य तस्मिन् विष्णुवेश्मप्रतिष्ठा-कर्म्मणि ॐ पुण्याहं भवन्तोऽधिब्रुवन्तु इति त्रिः आवयेत्। ॐ पुण्याहमिति त्रिरुक्ते तस्मिन् विष्णुवेश्मप्रतिष्ठाकर्म्मणि ॐ स्वस्ति भवन्तोऽधि-ब्रुवन्तु इति त्रिः आवयेत्। ॐ स्वस्तीति त्रिरुक्ते तस्मिन् विष्णुवेश्मप्रतिष्ठाकर्म्मणि ॐ ऋद्धिं भवन्तोऽधिब्रुवन्तु इति त्रिः आवयेत्। ॐ ऋद्धा मिति त्रिरुक्ते ऋग्वेदिनः ॐ स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः स्वस्ति नस्तार्क्ष्योऽरिष्टनेमिः स्वस्ति नो बृहस्पति-र्दधातु। इत्यनेनाशीर्वादान् गृह्णीयुः। सामगानान्तु। ॐ अस्ति सोमोऽयं सुतः। पिबन्तस्य मरुतः। उतस्वराजो अधिगा। अस्ति सोमोऽयं सुतः। पिबन्तस्य मरुतो घाऽउतस्वराजो वा घाऽ नो घाऽ। इति गीयमानेनाशीर्वादान् गृह्णीयात्। गानाशक्तौ त्रिधा ऋचं वाचयेत्। ततः।

"सूर्य्यः सोमो यमः कालः सन्ध्ये भूतान्यहः क्षपा। पवनो दिक्पतिर्भूमिराकाशं खचरामराः। ब्राह्मं शासनमास्थाय कल्पध्वमिह सन्निधिम्॥"

इति पठित्वा। ततः ॐ तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः। दिवीव चक्षुराततम्। इति विष्णुं स्तुत्वा नारायणं नमस्कृत्य ॐ तत् सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात्। इति गायत्र्या कुशचन्दनफलपुष्पाण्यादाय ॐ अद्यामुके मासि अमुकपक्षेऽमुकतिथौ अमुकगोत्रः श्रीअमुकदेवशर्म्मा एतत्तृणकाष्ठादिमयवेश्मपर-माणुसमसंख्यवर्षसहस्रावच्छिन्नस्वर्गलोकमहित-तत्कामः श्रीविष्णुप्रीतिकामो विष्णुलोकप्राप्ति-कामो वा विष्णुवेश्मप्रतिष्ठामहं करिष्ये। इति संकल्पयेत् इष्टकादिमये तु एतदिष्टकादिमय वेश्मपरमाणुसमसंख्यवर्षसहस्रावच्छिन्नस्वर्गलोकमहित-तत्काम इति विशेषः। पाषाणवेश्मनि तु तद्गुणकालावच्छिन्नस्वर्ग लोकेति विशेषः। देवतान्तरगृहप्रतिष्ठायान्तु तद्देव प्रयोगः॥ ५॥ ततः संकल्पसूक्तं पठेत्। सामवेदोक्तं तद्यथा ॐ देवो वो द्रविणोदाः पूर्णां विवष्ट्यासिचम्। उद्वासिञ्चध्वमुपवा पृणध्वमादिद्वो देव ओहते॥ यजुर्वेदोक्तं यथा,—

"ॐ यज्जाग्रतो दूरमुदैतु दैवं
तदुसुप्तस्य तथैवैति।
दूरङ्गमं ज्योतिषां ज्योतिरेकं
तन्मे मनः शिवसङ्कल्पमस्तु॥"

ततः सप्ताधिपर्गोग्र्यादियोढ्वमालकापूजा-वसोर्धारासप्तघृतनायुष्यमन्त्रजपाभ्युदयिकश्रा-द्धानि कर्त्तव्यानि॥ ६॥ आयुष्यमन्त्रो यथा। ॐ आयुर्विश्वायुर्धिं विश्वमायुरसि। मह्यं प्रजान्त्व दाराधिनिधे त्वमसे मृतं जीवेम शरदो वयन्ते॥ ॐ आयुषो मे पवस्व वर्चसो मे पवस्व विदुः पृथिव्या दिवो जनित्रा ह्यसन्त्यामोषधः। चरन्ती सोमोषीदृशाय ममायुषे मम प्रजावर्च-साय यजमानस्यहृदा असुकस्य राय्याय॥ ७॥ तत्र विष्णुवेश्मप्रतिष्ठाभ्युदयार्थमिति वाक्ये विशेषः। एवमन्यवेश्मनि। ततः उत्तराभि-मुखं ब्राह्मणमुपवेश्य ततसमीपे आसनमादाय प्राङ्मुखो यजमानः प्राञ्जलिर्वदेत्। ॐ साधु भवानास्ताम्। ॐ साध्वहमासे इति प्रतिवचनं श्रुत्वा तदासने उदङ्मुख उपविशति। ततो यजमानः ॐ अर्च्चयिष्यामो भवन्तं इति वदेत्। ॐ अर्च्चयेति प्रतिवचनम्। ततो गन्धपुष्पताम्बूला-लङ्कारैरभ्यर्च्च दक्षिणं जानु स्पृशन् ॐ अद्येत्यादि अमुकगोत्रममुकप्रवरममुकदेवशर्म्माणं भवन्तं अस्मिन् सम्पत्स्यविष्णुवेश्मप्रतिष्ठा-कर्म्माङ्गभूतहोमकर्म्मणि ब्रह्मकर्म्मकरणाय गन्ध-पुष्पताम्बूलालङ्कारवस्त्रैरहं वृणे। ॐ वृतोऽस्मीति प्रतिवचनम्। यथाविहितं ब्रह्मकर्म्म कुरु। ॐ यथाज्ञानं करवाणीति प्रतिवचनम्। स्वयं होमासामर्थ्ये होतुर्वरणमपि तथैव कार्य्यम्। तन्त्रधारकत्वेन आचार्य्यस्यापि तथैव कार्य्यम्। ब्रह्मत्वेन सदस्यस्यापि। गुरोर्वरणे तु संकल्पितेऽस्मिन् विष्णुवेश्मप्रतिष्ठाकर्म्मणीति वक्तव्यम्॥ *॥ ततो यजमानः गुरोः पादौ धृत्वा पठेत्।

"नारायणस्वरूपस्त्वं संसाराब्धेर्हि मां प्रभो!। त्वत्प्रसादात् गुरो! यज्ञं प्राप्नोमि यन्मयोदितम्॥
त्राहि नाथ! प्रपन्नं मां भीतं संसारसागरात्। देवतास्थापने त्वञ्च मम शान्तिं कुरु प्रभो!॥"

ततो गुरुः।

ॐ उत्तिष्ठ वत्स भद्रन्ते मत्प्रसादात्त्वयानघ! प्राप्तव्यं धर्म्मकामार्थं दुष्प्रापं यत् सुरासुरैः॥*

ततो गुरुः।

ॐ पावमानीः स्वस्त्ययनीः सुदुघा हि घृत स्नुतः। ऋषिभिः सम्भृतो रसो ब्राह्मणे स्वस्तं हितम्॥

इति पावमानीसूक्तम्॥

"अपसर्पन्तु ते भूता ये भूता भुवि संस्थिताः॥
विनायका विघ्नकरा महोग्रा
यज्ञद्विषो ये पितृमातृभक्ष्याः।
सिद्धार्थकैर्वञ्चसमानकल्पै-
र्सर्षा गिरक्षा विदिशः प्रयान्तु॥"

इति श्वेतसर्षपान् विकीर्य्य स्वैः स्वैर्मन्त्रैः पञ्च-गव्यं शोधयेत्॥ ८॥ तच्छोधनमन्त्रा यथा।

ॐ तत् सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात्।

इति गोसूक्तम्।

ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्। ईश्वरीं सर्व्वभूतानां तामिहोपह्वये श्रियम्॥

इति गोमयम्।

ॐ आप्यायस्व स मे तु ते विश्वतः सोमवृष्ण्यं भवावाजस्य सङ्गथे।

इति दुग्धम्।

ॐ दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः। सुरभिनो मुखाकरत् प्रणआयूंषि तारिषत्॥

इति दधि।

पराकः

परस्परां विस्मयवन्ति लक्ष्मी-
मालोकयाञ्चक्रुरिवादरेण ॥"
इति भट्टिः । २ । ५ ॥

परस्मैपदं, क्ली, (परस्मै परार्थं परबोधकं पदम् ।) दृग्लकाराणां प्रत्येकं पूर्व्वनवविभक्तयः । यथा, "लड़ादिषु पूर्व्वे नव परस्मैपदं परे नव आत्मनेपदं परिभाष्यन्ते । इति संक्षिप्तसारव्याकरणम् ॥ (ताञ्च पाणिनिमते । तिप् तस् झि । सिप् थस् थ । मिप् वस् मस् ॥) वोपदेवेनास्य परसंज्ञा कृता । यथा । "नवयः परमे त्रितोऽन्यडिङ्यां धे ।" इति मुग्धबोधव्याकरणम् ॥

परस्वधः, पुं, (परस्वध + निपातनात् सत्वम् ।) परश्वधः । कुठारः । इत्यमरटीकायां रायमुकुटः ॥

परा, व, विमोचः । प्राधान्यम् । प्रातिलोम्यम् । धर्षणम् । आभिमुख्यम् । मृग्यार्थम् । विक्रमः । गतिः । वधः । इति मेदिनी ॥ * ॥ उपसर्गविशेषः । अस्यार्थः । भङ्गः । अनादरः । प्रत्यावृत्तिः । न्यग्भावः । इति मुग्धबोधटीकायां दुर्गादासः ॥

परा, स्त्री, (पॄ + अच् + तत, टाप् ।) वन्ध्याकर्कोटकी । इति राजनिर्घण्टः ॥ (अस्याः गुणा यथा,—

"वन्ध्याकर्कोटकी लघ्वी कफगुद्व्रणशोधिनी ।
सर्पदर्पहरी तीक्ष्णा विसर्पविषहारिणी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
नाभिरूपमूलाधारात प्रथमोदितनादस्वरूपवर्णः । यथा,—

"मूलाधारात् प्रथमसुदितो यस्तु भावः पराख्यः ॥"
इत्यलङ्कारकौस्तुभे प्रथमकिरणः ॥
(पूरयति सागरं भक्तमनोरथेति व्युत्पत्त्या गङ्गा । यथा, काशीखण्डे । २६ । १०६ ।
"परानन्दा प्रकृष्टार्था प्रतिष्ठा पालनी परा ॥"
गायत्री । यथा, देवीभागवते । १२ । ६ । ६० ।
"पार्व्वती परमोदारा परब्रह्मात्मिका परा ॥")

पराकः, पुं, (परं अत्यन्तं अकं दुःखं उपवासादिजन्यशारीरिकादिक्लेशो यत्र यस्मादृवा ।) व्रतविशेषः । खड्गः । इति मेदिनी ॥ क्षुद्रः । रोगविशेषः । चन्तुविशेषः । इति विश्वः ॥ * ॥ पराकव्रतमाह मनुः । ११ । २१५ ।

"यतात्मनोऽप्रमत्तस्य द्वादशाहमभोजनम् ।
पराको नाम कृच्छ्रोऽयं सर्व्वपापापनोदनः ॥"
पराके पञ्च धेनवः पराकस्य प्राजापत्यपञ्चकतुल्यत्वात् । यथा अङ्गिराः ।

"षड्भिर्व्वर्षैः कृच्छ्रचारी ब्रह्महा तु विशुध्यति ।
मासि मासि पराकेण त्रिभिर्व्वर्षैर्व्यपोहति ॥"
अत्र षड्भिर्व्वर्षैः साशीतिशतप्राजापत्यानि पूर्व्वसूक्तानि तथा प्रतिमास्येकैकपराकेण वर्षे द्वादश पराकाः वर्षत्रये षट्त्रिंशत् पराकाः । ततश्च षट्त्रिंशत् पराकाशीत्युत्तरप्राजापत्यशतयोः प्रत्येकं ब्रह्मवधपापक्षयैककार्य्यकरत्वात् तुल्यत्वं षट्त्रिंशतश्च पञ्चगुणमशीत्युत्तरशतं भवतीति । अतः प्राजापत्यपञ्चकतुल्यः पराकः । इति प्रायश्चित्ततत्त्वम् ॥ * ॥

"द्वादशाहोपवासेन पराकः सर्व्वपापहा ॥"
इति गरुड़पुराणे प्रायश्चित्तप्रकरणम् ॥

पराक्, [च्] त्रि, परा अञ्चतीति । (परा + अञ्च + क्विप् ।) प्रतिलोमगमनाश्रयः ॥

पराक्पुष्पी, स्त्री, (पराक् पुष्पं यस्याः ।) अपामार्गः । इति राजनिर्घण्टः ॥ (अपामार्गशब्देऽस्या विवृतिरुक्ता ॥)

पराक्रमः, पुं, पराक्रन्यतेऽनेन । (क्रम + "हलश्च ।" ३ । ३ । १२१ । इति घञ् । "नोदात्तोपदेशस्य ।" ७ । ३ । ३४ । इति न वृद्धिः ।) तत्पर्य्यायः । द्रविणम् २ तरः ३ सहः ४ बलम् ५ शौर्य्यम् ६ स्थाम ७ शुष्मम् ८ शक्तिः ९ प्राणः १० । इत्यमरः । २ । ८ । १०२ ॥ महः ११ शूष्म १२ सामर्थ्यम् १३ । इति शब्दरत्नावली ॥ (यथा, मार्कण्डेये देवीमाहात्म्ये । ६२ । १३ ।
"पराक्रमश्च युद्धेषु जायते निर्भयः पुमान् ॥")
विक्रमः ॥ (यथा, मार्कण्डेये । २० । २५ ।
"यस्य मित्रगुणान् मित्रान्यमित्राञ्च पराक्रमम् ।
कथयन्ति सदा सत्सु पुत्रवांस्तेन वै पिता ॥")
उद्योगः । इति मेदिनी ॥ निष्क्रान्तिः । इति शब्दरत्नावली ॥ (विष्णुः । यथा, महाभारते । १३ । १४६ । ४१ ।
"औषधं जगतः सेतुः सत्यधर्म्मः पराक्रमः ॥")

परागः, पुं, (परागच्छतीति । गम + अन्येभ्योपीति डः ।) पुष्पधूलिः । तत्पर्य्यायः । सुमनोरजः २ कौसुमरेणुः ३ । इत्यमरः । २ । ४ । १७ ॥ पुष्परेणुः ४ । इति शब्दरत्नावली ॥ (यथा, आर्य्यासप्तशती । ५०६ ॥ [गेय ।
"लिप्तं न सुखं नाङ्गं न पश्यती न चरणाः परावस्तृणतेव नलिन्या विद्रुमधमधुपेन मधुपीतम् ॥")
धूलिः ॥ (यथा, रघुः । ४ । ३० ।
"प्रतापोष्मे तत शुष्कः परागस्तदनन्तरम् ।
ययौ पश्चाद्रथादीति चतुष्कत्वेव सा चक्रे ॥")
स्त्रानीयद्वयम् ॥ गिरिप्रभेदः ॥ विख्यातिः ॥ उपरागः ॥ चन्दनम् । इति मेदिनी ॥ स्वच्छन्दगमनम् । इति शब्दरत्नावली ॥

पराङ्गदः, पुं, (परं अङ्गं कान्तिमत्त्वौ शिवत्वं ददातीति । दा + कः ।) शिवः । इति शब्दमाला ॥

पराङ्गवः, पुं, (पराङ्गं जलदङ्गा प्रचुरशरीरं वाति प्राप्नोतीति । वा + कः ।) समुद्रः । इति त्रिकाण्डशेषः ॥

पराङ्मुखः, त्रि, (पराक् प्रतिलोमगामि मुखं यस्य ।) विमुखः । तत्पर्य्यायः । प्राचीनः २ । इत्यमरः । ३ । १ । ३३ ॥ (यथा, मनुः । १० । ११६ ।
"स्वधर्म्मो विजयस्तस्य नाहवे स्यात् पराङ्मुखः ॥"
तन्त्रोक्तमन्त्रविशेषे, पुं । यथा, तन्त्रसारे ।
"कामबीजं सुखे माया शिरस्यङ्कुशमेव च ।
असौ पराङ्मुखः प्रोक्तो मध्ये तु विन्दुलाञ्छितः ॥")

पराङ्मुख

परार्ध्य

पराचितः, त्रि, (परया आचितः पालितः ।) परपुष्टः । परद्वारा प्रतिपालितः । तत्पर्य्यायः । परिस्कन्दः २ परजातः ३ परैधितः ४ । इत्यमरः । २ । १० । १८ ॥ परिष्कन्दः ५ । इति भरतः ॥

पराचीनः, त्रि, (पराञ्चति अनभिमुखीभवतीति । अञ्चु + "ऋत्विग्दधृक् ।" ३ । २ । ५९ । इति क्विन् ततः खार्थे "विभाषाञ्चेरदिक् स्त्रियाम् ।" ५ । ४ । ८ । इति खः ।) पराङ्मुखः । इत्यमरः । ३ । १ । ३३ ॥ (यथा, भागवते । ३ । ३२ । २८ ।
"ज्ञानमेकं पराचीनैरिन्द्रियैर्ब्रह्म निर्गुणम् ।
अवभात्यर्थरूपेण भ्रान्त्या शब्दादिधर्म्मिणा ॥")

पराजयः, पुं, (परा + जि + अप् ।) रणे भङ्गः । इत्यमरः । २ । ८ । १११ ॥ (अत्र रण इत्युपलक्षणं वस्तुतस्तु विद्यावादादावपीतिबोद्धव्यम् ।) तत्पर्य्यायः । भङ्गः २ हारी ३ हारिः ४ पराभवः ५ । इति शब्दरत्नावली ॥ (यथा, मनुः । ७ । १६६ ।
"अनिर्व्वो विजयो यस्माद्दृश्यते युध्यमानयोः ।
पराजयस्तु संग्रामे तस्माद्युद्धं विवर्ज्जयेत् ॥")

पराजितः, त्रि, (परा + जि + कर्म्मणि क्तः ।) हृतपराजयः । हारितः । तत्पर्य्यायः । पराभूतः २ विजितः ३ निर्जितः ४ जितः ५ । इति शब्दरत्नावली ॥ "इदं वाच्यमिदमवाच्यमेवं खलु पराजितो भवतीति इमानि खलु पदानि भिषग्वादमार्गज्ञानार्थमधिगम्यानि भवन्ति ।" इति चरके विमानस्थानेऽष्टमेऽध्याये ॥)

पराञ्जः, पुं, (परान् अनक्तीति । अञ्जु क्षाप्नौ + अच् ।) तैलयन्त्रः । फेनः । क्षुरिकादलम् । इति शब्दरत्नावली ॥

परात्परः, पुं, परात् श्रेष्ठादपि परः श्रेष्ठः । स च श्रीकृष्णः । यथा,—

"देवाः कालस्य कालोऽहं विधातुर्विधिरेव च ।
संहारकर्त्तुः संहर्त्ता पातुः पाता परात्परः ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ६ अध्यायः ॥

परात्प्रियः, पुं, (परादपि प्रियः ।) लगविशेषः । इति शब्दचन्द्रिका । उलु इति भाषा ॥

परादनः, पुं, (परसुत्कृष्टं अदनं यस्य यद्वा परान् शत्रून् अत्ति भक्षयति नाशयतीत्यर्थः आदयति विनाशयति खारोहिणं संग्रामे इति वा अद लुः णिच् ल्युर्वा ।) पारसीघोटकः । इति त्रिकाण्डशेषः ॥

पराधीनः, त्रि, (परस्य परेषां वा अधीनः ।) परवशः । तत्पर्य्यायः । परतन्त्रः २ परवान् ३ नाथवान् । इत्यमरः । ३ । १ । १६ ॥ तस्य जीवन्मृतत्वं यथा,—

"स्वाधीनवृत्तेः साफल्यं न पराधीनवृत्तिता ।
ये पराधीनकर्म्माणो जीवन्मृतोऽपि च ते मृताः ॥"
इति गरुड़पुराणे ११३ अध्यायः ॥

परानसा, स्त्री, चिकित्सा । इति शब्दचन्द्रिका ॥

परान्नं, क्ली, (परस्य अन्नम् ।) अन्यस्वामिकभक्तपिष्टकादि ॥ परकर्त्तृकशस्यपाकजद्रव्यमात्रम् । परसृष्टान्नम् । तस्य त्याज्यत्वं यथा,—

"परान्नं परवासश्च नित्यं धर्म्मरतस्त्यजेत्।"
इति स्मृतिः॥

संयमदिने तस्य त्याज्यत्वं यथा —
"कांस्यं मांसं मसूरञ्च चणकं कोरदूषकम्।
शाकं मधु परान्नञ्च त्यजेदुपवसन् स्त्रियम्॥"*॥
पारणदिने तस्य त्याज्यत्वं यथा,—
"अभ्यङ्गञ्च परान्नञ्च तैलं निर्म्माललङ्घनम्।
तुलसीशयनं दृष्टं प्रजभोजनमेव वा॥
यन्नपीतं तथा चारं द्वादश्यां वर्ज्जयेद्बुधः॥"*॥
तद्दोषस्यागादेर्विफलत्वं यथा,—
"परपाकेन जुष्टस्य द्विजस्य गृहमेधिनः।
इष्टं दत्तं तपोऽधीतं यस्यान्नं तस्य तद्भवेत्॥"*॥
तद्भुक्ता पुत्रोत्पादने दोषो यथा,—
"यस्यान्नेन तु भुक्तेन भार्य्या समधिगच्छति।
यस्यान्नं तस्य ते पुत्रा अन्नादेनः प्रयान्ति ते॥"*॥
ब्राह्मणादिस्वामिकान्नभोजने दोषो यथा,—
"ब्राह्मणान्नेन दारिद्र्यं क्षत्रियान्नेन प्रेष्यताम्।
वैश्यान्नेन तु शूद्रत्वं शूद्रान्नेनेरकं व्रजेत्॥"
इत्येकादशीतत्त्वम्॥*॥
परान्नभोजनेन तीर्थगमने फलस्याल्पत्वं यथा,—
"षोड़शांशं स लभते यः परान्नेन गच्छति।
अर्द्धं तीर्थफलं तस्य यः प्रसङ्गेन गच्छति॥"
इति प्रायश्चित्ततत्त्वम्॥*॥
महागुरुनिपाते तस्य त्याज्यत्वं यथा,—
"अन्यत्राहं परान्नञ्च गन्धं माल्यञ्च मैथुनम्।
वर्ज्जयेद्गुरुपाते तु यावत् पूर्णो न वत्सरः॥"
इति शुद्धितत्त्वम्॥*॥
तद्दोषोक्तर्मन्त्रसिद्धिहानिर्यथा,—
"जिह्वा दग्धा परान्नेन करौ दग्धौ प्रतिग्रहात्।
मनो दग्धं परस्त्रीभिः कथं सिद्धिर्वरानने!॥"
इति तन्त्रम्॥*॥
तद्भोजने प्रतिप्रसवो यथा,—
"गुरुन्नं मातुलान्नं वा श्वशुरान्नं तथैव च।
पितुः पुत्रस्य चैवान्नं न परान्नमिति स्मृतिः॥"
इत्येकादशीतत्त्वम्॥
परान्नः, त्रि, (परान्नं नित्यमस्यास्य। "अन्ने व्यादिभ्योऽच।" ५। २। १२७। इति अच्।) परान्नभोजनशीलः। तत्पर्य्यायः। परपिण्डादः २। उदरम्भरः ३। १। १०॥
परापरं, त्रि (परागतो व्याप्तो यस्मात्। "अवर्णान्नाद्वा।" ६। ३। ६७। इत्यस्य वार्त्तिक इत्यनेन पदे अपस्य ईदभावः।) पदे ईदृशे परेषम्। इति सिद्धान्तकौमुदी॥
परापरं, क्ली, (परमापिपर्त्ति। आ + पॄ + अच्।) परब्रह्मकम्। इति भावप्रकाशः॥ (अस्य विवरणं परब्रह्मशब्दे द्रष्टव्यम्॥ परञ्चापरञ्च द्वयोः समाहारः।) परमपरञ्च॥ (यथा, विष्णुपुराणे। १।६।७७।
"एतावान् सकलो ब्रह्मन् प्रधानं कारणं परम्।
परापरविदः प्राज्ञास्ततो यज्ञान् वितन्वते॥")
परापरगुरुः, पुं, (परश्चादपि परः श्रेष्ठः परापरः। पृषोदरादित्वात् साधुः ततः कर्म्मधारयः।) गुरुविशेषः। स तु भगवान्। (यथा,—
"आदौ सर्व्वत्र देवेशि! मन्त्रदः परमो गुरुः।
परापरगुरुत्वं हि परमेष्ठी त्वहं गुरुः॥"
इति हरहृन्नीलतन्त्रे २ पटलः॥
(तत्रान्तरे च यथा,—
"मन्त्रदाता गुरुः प्रोक्तो मन्त्रस्तु परमो गुरुः।
परापरगुरुत्वं हि परमेष्ठिगुरुत्वकम्॥")
पराभवः, पुं, (पराभूयते इति पराभवनमित्यर्थः। परा + भू + भावे अप्।) तिरस्कारः। (यथा, मार्कण्डेये। १८। २८।
"मद्यासक्तोऽहमुच्छिष्टो नचैवार्द्धं जितेन्द्रियः।
कथमिच्छथ मत्तोऽपि देवाः शत्रुपराभवम्॥")
अस्य पर्य्यायः। व्यत्ययः २ तिरस्क्रिया ३ परिभावः ४ विप्रकारः ५ परिभवः ६ अभिभवः ७ अत्याकारः ८ निकारः ९। इति हेमचन्द्रः॥ विनाशः। इति मेदिनी॥
पराभूतः, त्रि, (पराभूयते स्म। परा + भू + क्त।) पराजितः। इत्यमरः। २। ८। ११२॥
परामर्शः, पुं (पराऽवृश्यते इति। परामर्शनमित्यर्थः। परा + स्पृश् + भावे घञ्।) युक्तिः। विवेचनम्। तत्पर्य्यायः। वितर्कः २ उन्नयनम् ३ विमर्शनम् ४ अध्याहारः ५ तर्कः ६ ऊहः ७। इति हेमचन्द्रः॥ तर्कशास्त्रे तु व्याप्तिविशिष्टपक्षधर्म्मताज्ञानम्। यथा,—
"व्याप्यस्य पक्षधर्म्मत्वधीः परामर्श उच्यते॥"
इति भाषापरिच्छेदः॥
अस्यार्थः। "व्याप्तिविशिष्टस्य पक्षस्य सह वैशिष्ट्यावगाहिज्ञानमनुमितिजनकम्। तच्च व्याप्यः पक्षे इति ज्ञानं पक्षो व्याप्यवान् इति ज्ञानं वा।" इति सिद्धान्तमुक्तावली॥ स चानुमितिव्यापारः। यथा,—
"व्यापारस्तु परामर्शः करणं व्याप्तिधीर्भवेत्॥"
इति भाषापरिच्छेदः॥
अस्यार्थः। "अनुमायामनुमितौ व्याप्तिज्ञानं कारणं परामर्शो व्यापारः। तथा हि। येन पुरुषेण महानसादौ धूमे वह्नेर्व्याप्तिर्गृहीता पश्चाच्च स एव पुरुषः क्वचित् पर्व्वतादौ व्यविच्छिन्नमूलां धूमरेखां पश्यति तदनन्तरं धूमो वह्निव्याप्य इत्येवं रूपं व्याप्तिस्मरणं तस्य पुरुषस्य भवति पश्चाच्च वह्निव्याप्यधूमवान् पर्व्वत इति ज्ञानं भवति स एव परामर्श इत्युच्यते।" इति सिद्धान्तमुक्तावली॥
परार्ण्णवं, क्ली (परमर्ण्णवं वारि यस्मात्।) वर्षम्। इति त्रिकाण्डशेषः॥ (परमर्ण्णवं क्षमारूपधर्म्मकं ब्रह्मात्मभूतं यस्य। इति विग्रहे वाक्यमिश्रः। यथा, मुक्तकोपनिषदि। ३। २। ६।
"वेदान्तविज्ञानसुनिश्चितार्थाः
संन्यासयोगात् यतयः शुद्धसत्त्वाः।
ते ब्रह्मलोकेषु परान्तकाले
परामृताः परिमुच्यन्ति सर्व्वे॥")
परार्थ्यः, त्रि, (परार्थाय हितः। परा + स्वार्थ + कर्म्मणि यत्।) सम्पत्तिः। सम्बन्धयुक्तः। यथा,—
"क्षेत्रकर्म्मविपाकाप्तैरपरार्थ्यः। इति दुरु-

मालिकारिकायामुक्ते रामभद्रः॥ (यथा परार्थ्यः। विवेचितः॥
परायणं, त्रि, (आसङ्गवचनम्। इत्यमरः। ३। २। २॥ परं केवलमयनमासक्तिस्थानमिति परायणम्। यथा धर्म्मपरायणो धर्म्मासक्तः। इति भरतः॥ आश्रयः। (यथा, मनुः। ४। १०।
"वर्षयंश्च शिलोञ्छाभ्यामग्निहोत्रपरायणः॥
तत्परम्। अभीष्टम्। इति मेदिनी॥ (नित्यप्रतिष्ठा। यथा, रामायणे। २। ४८। १७।
"पादच्छायासुखं भर्त्तुस्तादृशस्य महात्मनः।
स हि नाथोऽनुरक्तस्य स गतिः स परायणम्॥"
"परायणं शाश्वतप्रतिष्ठा।" इति रामानुजः॥)
परायत्तं, त्रि, (परस्यै परेषां वा आयत्तम्।) पराधीनम्। यथा,—
"तत्रायत्तवशाधीनच्छन्दवन्तः परात्परे॥"
इति हेमचन्द्रः॥
परारि, य (पूर्व्वतरे वत्सरे इत्यर्थे "अद्यः परुत्परारीति।" ५। ३। २२। इति पूर्व्वतरस्य परभावः अरिः च संवत्सरे।) पूर्व्वतरवत्सरे। गतत्तृतीयवर्षे। इत्यमरभरतौ॥ (परस्य अरिः।) परशत्रौ त्रि॥
परारिक्तः, त्रि, (परारि भवः। "चिरपरुत्परारिभ्यस्त्रो वक्तव्यः।" ४। ३। २३। इत्यस्य वार्त्तिके इत्यनेन त्रः।) पूर्व्वतरवत्सरसम्बन्धी। इति व्याकरणम्॥
परार्घः, पुं, (परार्घ्यतीति। परा + अर्घ + उन्।) कारवेल्लः। इति त्रिकाण्डशेषः॥ (कारवेल्लशब्देऽस्य गुणादयो ज्ञातव्याः॥)
परार्घकः, पुं, (परार्घ्यतीति। परा + अर्घ + उकः।) प्रस्तरः। इति त्रिकाण्डशेषः॥
परार्द्धं क्ली, (परार्द्धयति सङ्ख्यातया वर्द्धते इति। ऋधधर वृद्धौ + अच्।) दशसङ्ख्यासङ्ख्या। लक्षलक्षकोटिः। १००,०००,०००,०००,०००,००० इदं चरमसङ्ख्या व्यवहारपर्य्यन्तम्। इति हेमचन्द्रः ज्योतिषञ्च॥ (यथा, नैषधे। ३। ८०।
"यदि त्रिलोकीगणनापरा स्यात्
तस्याः क्षमाभिर्यदि नायुषः स्यात्।
पारे परार्द्धं गणितं यदि स्यात्
गणेयनिःशेषगुणोऽपि स स्यात्॥")
ब्रह्मण आयुषोऽर्द्धम्। यथा,—
"निजेन तस्य मानेन शतायुर्व्वर्षशतं स्मृतम्।
तत् परार्द्धं तदर्द्धञ्च परार्द्धमभिधीयते॥"
इति कौर्म्मे ५ अध्यायः॥
(तथा, मार्कण्डेये। ४६। ४२—४३।
"शतं हि तस्य (ब्रह्मणः) वर्षाणां परमित्यभिधीयते।
यस्माद्द्विसप्तधावर्षैः परार्द्धमिति कीर्त्यते॥
एवमस्य परार्द्धन्तु गतोनं द्विपमत्तम!।
यस्मात्तेऽभूत्सहाकल्पः पाद्म इत्यभिविश्रुतः॥")
परार्द्ध्यः, त्रि, (परार्द्धं परार्द्धसङ्ख्यावत् प्रधानत्वमर्हतीति। परार्द्ध + यत्। वृद्धा परस्मिन्नर्हे भवः।
"परावराधमोत्तमपूर्व्वाच्च।" ४। ३। ५। इति

यत् ।) प्रधानः । श्रेष्ठः । इत्यमरः ।३ । १ ।५८ । (यथा, रघुः । १० । ६४ ।
"तामथस्तुधाविधान् स्वप्नान् श्रुत्वा प्रीतो हि पार्थिवः ।
मेने परार्द्ध्यमात्मानं गुरुत्वेन जगद्गुरोः ॥")

परावर्तं, क्ली, (परावर्ततीति । परा + अव + वाहुलकात् अतच् ।) परूषकम् । इति राजनिर्घण्टः ॥

परावर्त्तः, पुं, (परा वर्त्तते इति । परा + वृत् + अप् ।) परिवर्त्तः । विनिमयः । इति हेमचन्द्रः ॥

परावहः, पुं, (परा वहतीति । वह् + अच् ।) सप्तवायुन्तर्गतसप्तमवायुः । स तु परिवहवायोरूर्द्ध्वस्थितः । इति सिद्धान्तशिरोमणिः ॥ (यथा, हरिवंशे २३६ अध्याये ।
"आवहः प्रवहश्चैव विवहश्च समीरणः ।
परावहः संवहश्च उद्वहश्च महाबलः ॥")

पराविद्धः, पुं, (परा + व्यध + क्तः ।) कुबेरः । इति शब्दमाला ॥

परावेदी, स्त्री, (परसुत्कर्षमाविन्दतीति । विद् + अण् । स्त्रियां ङीप् ।) दूहती । इति कैचित् ॥

पराशरः, पुं, (अस्य निरुक्तिरुक्ता यथा, महाभारते । १ । १७६ । ३ ।
"परासुः स यतस्तेन वसिष्ठः स्यापितो सुनिः ।
गर्भस्थेन ततो लोके पराशर इति स्मृतः ॥"
"परासोराशासनमवस्थानं येन स पराशरः । आङ्पूर्व्वाच्छासतेर्डरन् ।" इति नीलकण्ठः ॥) व्यासपिता । शक्तिसुनिपुत्रः । यथा,—
"सुतं लक्षनवच्छक्तेरदृश्यन्ती पराशरम् ।
काली प्रजाशरात् जज्ञे कृष्णद्वैपायनं सुनिम् ॥"
इत्यग्निपुराणम् ॥
(अयं हि द्वादशाध्यायात्मिकां धर्म्मसंहितां कृतवान् । सा च कलिकर्त्तव्यधर्म्मविषया । यदुक्तं तत्रैव ।
"कृते तु मानवो धर्म्मस्त्रेतायां गौतमः स्मृतः ।
द्वापरे शङ्खलिखितः कलौ पाराशरः स्मृतः ॥"
तत्र संहितायां १मे अध्याये युगभेदे धर्म्मभेदादिकथनम् । २अः आचारधर्म्मगृहधर्म्मादिकथनम् । ३अः अशौचव्यवस्था आत्महरणादिदोषाः । ४अः प्रायश्चित्तमतान्येष्टिक्रियाकृच्छ्रपुत्रलिङ्गादिकथनम् । ५अः प्राणिदृष्टप्रायश्चित्तव्यवस्था । ६अः प्राणिवधप्रायश्चित्तकथनम् । ७अः द्रव्यशुद्ध्यादि । ८अः गोवधादिप्रायश्चित्तम् । ९अः गोवधापवादादि । १०अः अगम्यागमनादिप्रायश्चित्तम् । ११अः अभक्ष्यभक्षणादि प्रायश्चित्तम् । १२अः प्रायश्चित्ताङ्गस्नानभेदादि ॥ * ॥
अयं खलु मत्स्यगन्धायां सत्यवत्यां वदव्यासमुत्पादितवान् । एतद्विवरणमुक्तं यथा देवीभागवते । २ स्कन्धे । २अध्याये द्रष्टव्यम् ॥
पराम् आशृणाति छिनत्तीति । शॄ गि हिंसे + अच् ।" नागभेदः । यथा, महाभारते । १ । ५७ । १८ । "वराहको वीरणकः सुचित्रश्चित्रवेगिकः । पराशरस्तरुणको मणिस्कन्धस्थाराणिः ॥")

पराशरी, [न्] पुं, पराशरेण प्रोक्तं भिक्षुसूत्रं पाराशरं तद्विद्यतेऽस्याध्ययनायेति षष्ठः इन् च । पराशरीति ङीषादिच । इत्यमरटीकायां भरतः॥ पाराशरी । चतुर्थाश्रमी ॥

पराश्रया, स्त्री, (पर आश्रयो यस्याः ।) वृक्षोपरिजातलताविशेषः । परसाड़ा इति भाषा । तत्पर्य्यायः । वन्ध्या २ वृक्षादनी ३ वृक्षरुहा ४ जीवन्तिका ५ वह्निनी ६ पुत्रिणी ७ वन्ध्या ८ परपुष्टा ९ । इति शब्दचन्द्रिका ॥ (अन्याश्रिते, त्रि ॥)

परासनं, क्ली, (परा + अस् + भावे ल्युट् ।) मारणम् । वधः । इत्यमरः । २ । ८ । ११३ ॥

परासुः, त्रि, (परागताः प्रस्थिता असवः प्राणा यस्य ।) मृतः । इत्यमरः । २ । ८ । ११७ ॥ (यथा, रघौ । ९ । ७८ ।
"तौ दम्पती वहु विलप्य शिशोः प्रहर्त्तुं
शूल्यं निखातमुदहारयतासुरक्तः ।
सोऽभूत् परासुरथ भूमिपतिं शशाप
हस्तार्पितैर्नयनवारिभिरेव दृष्टः ॥"
परासुपरीक्षा वैद्यके यथा,—
"तस्य चेत् परिदृश्यमानं पृथक्त्वेन पादजङ्घोरुश्रिगुदरपार्श्व-पृष्ठेषिका-पाणिग्रीवा-तालुकण्ठललाटं स्विन्नं शीतं प्रस्तब्धं दारुणं वीतमांसशोणितं वा स्यात् । परासुरयं पुरुषो न चिरात् कालं करिष्यतीति विद्यात् । तस्य चेत् परिदृश्यमानानि पृथक्त्वेन गुल्फजानुवङ्क्षण-गुदवृषण-मेढ्रनाभ्यंशस्तनमणिकहनुपर्शुका नासिका कर्णाक्षिभ्रूललाटादीनि स्रस्तानि व्यस्तानि च्युतानि स्थानेभ्यः स्युः परासुरयं पुरुषो न चिरात् कालं करिष्यतीति विद्यात् ।"
"तस्य चेदुच्छ्वासोऽतिदीर्घोऽतिह्रस्वो वा स्यात् परासुरिति विद्यात् । तस्य चेन्मन्ये परिदृश्यमानेन न सन्देयातां परासुरिति विद्यात् । तस्य चेद्दन्ताः प्रतिकीर्णाः श्वेता जातपूकराः स्युः परासुरिति विद्यात् । तस्य चेत् पक्ष्माणि जटावद्धानि स्युः परासुरिति विद्यात् । तस्य चेच्चक्षुषी प्रकृतिहीने विकृतियुक्ते अत्युत्पिण्डिते अतिप्रविष्टे अतिनिष्क्रे अतिविषमे अतिप्रसृते अतिविसृक्तवन्धने सततोन्मिषिते सततनिमिषिते निमेषोन्मेषातिप्रवृत्ते विभ्रान्तदृष्टिके विपरीतदृष्टिके हीनदृष्टिके वस्तदृष्टिके नकुलाभे कपोताभे अङ्गारवर्णे कृष्णनीलधौतश्यावताम्रहरितहारिद्रशुक्लवैकारिकाणां वर्णानामन्यतमेनाभिसंसृते वा स्यातां परासुरिति विद्यात् । तथास्य केशलोमान्यायच्छेत् । तस्य चेत् केशलोमान्यायस्यमानानि प्रलुचेरन् नचेत् वेदयत् परासुरिति विद्यात् ।
तस्य चेदुदरे शिराः प्रदृश्येरन् । श्यावताम्रनील-हारिद्रशुक्ला वा स्युः परासुरिति विद्यात् ।
तस्य चेन्नखा वीतमांसशोणिताः पक्वजाम्बवर्णाः स्युः परासुरिति विद्यात् ।
यथास्याङ्गुलीरायच्छेत्तस्य चेदङ्गुलय आयस्यमाना नचेत् स्फुटेयुः परासुरिति विद्यात् ॥"
इति चरकेणेन्द्रियस्थाने चतुर्थेऽध्याय उक्तम् ॥
"वाताष्ठीला तु हृदये यस्योर्द्धमनुधायिनी ।
रुजान्नविद्वेषकरी स परासुरसंशयम् ॥"
इति सुश्रुते सूत्रस्थाने एकत्रिंशत्तमेऽध्याये ॥)

परासुता, स्त्री, (परासोर्भृतस्य भावः । परासु + तल् स्त्रियां टाप् ।) मृतत्वम । निद्रापरवशता । इति पुराणम् ॥

परास्कन्दी, [न्] पुं, (परान् आस्कन्दितुं शीलमस्य । आ + स्कन्द् + णिनिः ।) चौरः । इत्यमरः । २ । १० । २५ ॥

परास्तं, त्रि (परास्यते स्म । परा + अस् + क्तः ।) निरस्तम् । पराजितम् । यथा.—
"स्त्रीर्गिरास्तु वरमस्तु पुनर्म्मा
स्त्रीकृतैव परवागपरास्ता ॥"
इति नैषधे ५ सर्गः ॥

पराह्णः, पुं, (परसुत्तरवर्त्ति अह्नः । "राजाहःसखिभ्यष्टच् ।" ५ । ४ । ९१ । इति टच् ।) परदिनम् । यथा । पूर्व्वाह्णे तद्विधत्वेऽपि पराह्णे त्रिसन्ध्याव्यापित्वं पराह्ण एव । इति सावित्रीव्रते तिथितत्त्वम् ॥

पराह्णः, पुं, (परश्च तदह्नश्चेति कर्म्मधारयः । "अह्नोऽह्न एतेभ्यः ।" ५ । ४ । ८८ । इति अह्नादेशः । ततः नस्य णः ।) अपराह्णः । विकालः । (केषाञ्चिन्मते अयं पराह्णोऽपि ॥)

परि, व्य, सर्व्वतोभावः । वर्ज्जनम् । व्याधिः । क्षेपः । इत्यमृतः । आख्यानम् । भागः । वीप्सा । आलिङ्गनम् । लक्षणम् । दीक्षाख्यानम् । निरसनम् । पूजा । व्याप्तिः । भूषणम् । इति मेदिनी॥ उपरमः । शोकः । इति हेमचन्द्रः ॥ सन्तोषभाषणम् । इति शब्दरत्नावली॥ उपसर्गविशेषः । अस्यार्थः । सर्व्वतोभावः । अतिशयः । वीप्सा । इत्यभावः । चिह्नम् । भागः । त्यागः । नियमः । इति मुग्धबोधटीकायां दुर्गादासः ॥

परिकथा, स्त्री, (परितः कथा ।) वाङ्मयभेदः । यथा,
"अथ वाङ्मयभेदाः सुरुचम्बुः खण्डकथा कथा ।
आख्यायिका परिकथा कलापकविशेषकौ ॥"
इति त्रिकाण्डशेषः ॥

परिकम्पः, पुं, (परितः कम्पो यस्मात् ।) भयम् । कम्पः । इति मेदिनी ॥

परिकरः, पुं, (परिकीर्य्यते इति । कॄ अविक्षेपे + "कॄदोरप् ।" ३ । ३ । ५७ । इति अप् । यद्वा परिक्रियतेऽनेनेति पुंसीति घः ।) पर्य्यङ्कः । परिवारः । इत्यमरः । ३ । ३ । १६५ ॥ समारम्भः । द्वन्द्वः । इति शब्दरत्नावली ॥ प्रगाढ़गात्रिकावन्धः । (यथा, मार्कण्डेये । १६ । २५ । "गाढ़ं परिकरं बद्ध्वा शुक्लमादाय चाधिकम् ।
स्कन्धे भर्त्तारमादाय जगाम दृढ़गामिनी ॥")
विवेकः । इति विश्वः । सहकारी । यथा,—

"परिकरः सहकारी स च आग्निपचधर्म्मित्वादिः।"
इति सामान्यनिरुक्तौ जगदीशः॥
(व्यलङ्कारविशेषः। यथा, साहित्यदर्पणे।१०।७५।
"उक्तिविशेषणैः साभिप्रायैः परिकरो मतः॥"
उदाहरणं यथा तत्रैव। "अङ्गराज! सेनापते! द्रोणोपध्यायिन्! कर्ण! रथेनं भीमाद्दुःशासनम्॥")

परिकर्त्ता, [र्त्तृ] पुं, (परिकरोतीति। परि+कृ+तृच्।) अनूढ्यज्येष्ठे कनिष्ठविवाहस्य याजकः। इत्युद्वाहतत्त्वम्॥

परिकर्म्म, [न्] क्ली, (परिक्रियते इति। परि+कृ+मनिन्।) कुङ्कुमादिना शरीरशोभाधानरूपसंस्कारः। इति भरतः॥ स्नानोद्वर्त्तनादि। इति स्वामी॥ शरीरसंस्कारमात्रम्। इत्यन्ये॥ तत्पर्य्यायः। अङ्गसंस्कारः २। इत्यमरः। २। ६। १२१॥ प्रतिकर्म्म ३। इति शब्दरत्नावली॥
(यथा. कुमारे। ४। १६।
"विबुधैरसि यस्य दारुणैः
व्यसनार्त्ते परिकर्म्मणि स्मृतः।
तमिमं कुरु दक्षिणेतरं
चरणं निर्म्मितरागमेहि मे॥")

परिकर्म्मा, [न्] पुं, (परितः कर्म्म यस्य।) परिचारकः। सेवकः। इति रत्नमाला॥

परिकर्म्मी, [न्] त्रि, (परिकर्म्म विद्यतेऽस्य। परिकर्म्म+णिनिः।) परिकर्म्मा। इति हैमचन्द्रः॥

परिकाङ्क्षितः, त्रि, (परित्यक्तं काङ्क्षितं अभिलाषो येन।) तपस्वी। इति शब्दरत्नावली॥

परिकूटं, क्ली, (परि सर्व्वतो भूयितं कूटम्।) पुरद्वारकूटकम्। तत्पर्य्यायः। हस्तिनखः २ नगरद्वारकूटकम् ३। इति हैमचन्द्रः॥

परिक्रमः, पुं, (परिक्रमणम्। क्रमु पादविक्षेपे+भावे घञ्। "नोदात्तोपदेशस्येति।" ७।३।३४। इति उपधाया न वृद्धिः।) क्रीड़ार्थं पद्भ्यां गमनम्। तत्पर्य्यायः। विहारः २। इत्यमरः। ३। २। १६॥ प्रदक्षिणम्। यथा,—
वराह उवाच।
"शृणु भद्रे! महापुण्यं पृथिव्यां सर्व्वतो दिशम्।
परिक्रम्य यथाध्वानं प्रमाणगणितं शुभम्॥
भूम्याः परिक्रमे सम्यक् प्रमाणं योजनानि च।
षष्टिकोटिसहस्राणि षष्टिकोटिशतानि च॥
तीर्थान्येतानि देवाश्च तारकाश्च नभस्तले।
गणितानि समस्तानि वायुना जगदायुषा॥
ब्रह्मणा लोमशेनैव नारदेन ध्रुवेण च।
जाम्बवता सुषेणेन रावणेन हनूमता॥
एतैरनेकधा लोकैः ससागरवना मही।
क्रमिता कालिना चैव बाह्यमण्डलरेखया॥
अन्तरा भ्रमणेनैव सुग्रीवेण महात्मना।
तथा च पूर्व्वटेवेन्द्रैः पञ्चभिः पाण्डुनन्दनैः॥
योगनिद्रैस्तथा कैश्चिन्मार्कण्डेयसुरैरपि।
क्रमिता न क्रमिष्यन्ति न पूर्व्वे नापरे जनाः॥
अल्पसत्त्वबलोपेतैः प्राणिभिश्चाल्पबुद्धिभिः।
मनसापि न शक्यन्ते गमनस्य च का कथा॥
सप्तद्वीपे तु तीर्थानि भ्रमणाद् यत् फलं भवेत्।
प्राप्यते चाधिकं तस्मान्मथुरायाः परिक्रमे॥
मथुरां समनुप्राप्य यस्तु कुर्य्यात् प्रदक्षिणम्।
प्रदक्षिणीकृता तेन सप्तद्वीपा वसुन्धरा॥
तस्मात् सर्व्वप्रयत्नेन सर्व्वकामानभीप्सुभिः।
कर्त्तव्या मथुरां प्राप्य नरैः सम्यक् प्रदक्षिणा॥"
इति वराहपुराणम्॥

परिक्रमसहः, पुं, (परिक्रमं विहारं सहते इति। सह+पचाद्यच्।) छागलः। इति त्रिकाण्डशेषः॥

परिक्रिया, स्त्री, (परिकरणम्। परि+कृ+भावे क्यच्। "रिङ् शयग्लिङ्क्षु।" ७। ४। २८। इति रिङ्।) परिखाजलादिना वेष्टनम्। तत्पर्य्यायः। परिसर्यः २। इत्यमरः। ३। २। २०॥ (एकाहयागविशेषः। यदुक्तं आश्वलायनश्रौते।६।५।१२।
"सत्यक्रिया अनुक्रिया परिक्रिया वा स्वर्गकामः॥" "परिक्रियाप्येकाहा भवति एषामन्यतमेन स्वर्गकामो यजेत॥" इति नारायणी॥)

परिक्षित्, पुं, (परि सर्व्वतोभावेन क्षीयते हन्यते दुरितं येन। परि+क्षि+क्विप्। कलिग्रासनकर्त्तृत्वादस्य तथात्वम्। यद्वा, परिक्षीणेषु कुरुषु क्षियति ईष्टे इति। तथा चोक्तं महाभारते। १०। १६। २—३॥
"विराटस्य सुतां पूर्व्वं स्नुषां गाण्डीवधन्वनः।
उपयम्य गतां दृष्ट्वा व्रतवान् ब्राह्मणोऽब्रवीत्॥
परिक्षीणेषु कुरुषु पुत्रस्तव भविष्यति।
एतदस्य परिक्षित्त्वं गर्भस्थस्य भविष्यति॥")
अभिमन्युपुत्रः। तत्पर्य्यायः। परीक्षित् २ पारिक्षीतः ३ परिक्षितः ४। इति शब्दरत्नावली॥
(अयं पुनर्युधिष्ठिरादनन्तरं कलियुगस्यारम्भे राजचक्रवर्त्ती आसीत्। कुरुक्षेत्रयुद्धे परिक्षीणे कुरुकुले अभिमन्युपत्न्या उत्तरायां गर्भाज्जातः। अयमेव गर्भस्थः कुरुवाश्वत्थामप्रयुक्तेन ब्रह्मास्त्रेण निहतोऽपि पुनर्भगवतः कृष्णस्य प्रभावात् जीवितं लब्धवान्। अयमेव दुष्टरूपिणं धर्म्मं निगृह्णन्तं कलिं प्रशशास। ततो गच्छति काले एकदाऽसौ मृगयां विहरन् क्षुधार्त्तः पीड़ितः मौनव्रतावलम्बिनः शमीकस्य मुनेराश्रमं गत्वा प्रत्युत्तरदानपराङ्मुखस्य तस्य स्कन्धे धनुष्कोट्या मृतं सर्पमासज्जयामास। अनेनापराधेनैनं राजानं शमीकस्य पुत्रः शृङ्गी नामा तपस्वी इतः सप्तमेऽहनि तक्षकदष्टोऽयं मृतो भविष्यतीत्यभिशप्तवान्। एतदाकर्ण्यायं गङ्गातीरे मुनिप्रभृतिभिरीश्वरनामकीर्त्तनादिकमालोचयन् प्रायोपवेशने स्थितस्तक्षकदष्टो मृतश्च। इत्थं तत्कथा महाभारते विस्तरतो द्रष्टव्या॥)
(कुरुपुत्रविशेषः। यथा, हरिवंशे। ३२। ६०।
"कुरोस्तु पुत्राश्चत्वारः सुधन्वा सुधनुस्तथा।
परिक्षित्तु महाबाहुः प्रवरश्चारिमेजयः॥")
अविक्षित-पुत्रः। यथा, महाभारते। १।६४।५०।
"अविक्षितः परिक्षिच्च शूरश्चाश्वश्च वीर्य्यवान्॥")

परिक्षिप्तं, त्रि, (परितः क्षिप्यते स्म इति। क्षिप्+क्त।) परिखादिना वेष्टितम्। तत्पर्य्यायः। निवृतम् २। इत्यमरः। ३। १। ८८॥ सर्व्वतोभावेन क्षेपयुक्तञ्च॥

परिखा, स्त्री, (परितः खन्यते इति। खन्+"अन्येभ्योऽपीति।" ३। २। १०१। ड।) राजधान्यादिवेष्टनखातम्। इति भरतः॥ गड्खाइ इति खाना इति च यस्याः प्रसिद्धिः। तत्पर्य्यायः॥ खेयम्। इत्यमरः। १। १०। २६॥
(यथा, मनुः। ७। १६६।
"भिन्द्याच्चैव तड़ागानि प्राकारपरिखास्तथा।
समवस्कन्दयेच्चैनं रात्रौ वित्रासयेत्तथा॥")
तस्या मानं यथा,—
"प्रस्थे च परिखामानं शतहस्तं प्रशस्तकम्।
परितः शिविराणाञ्च गम्भीरं दण्डहस्तकम्॥"
सङ्केतपूर्व्वकञ्चैव परिखाद्वारमीप्सितम्।
शूरैरगम्यं मित्रस्य गम्यमेव सुखेन च॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे २०२ अध्यायः॥

परिख्यातः, त्रि, परिसर्व्वतोभावेन ख्यातः प्रथितः। इति परिपूर्व्वख्याधातोः कर्त्तरि क्तप्रत्ययनिष्पन्नः॥ विख्यातः॥

परिगणितः, त्रि, (परिसर्व्वतोभावेन गण्यते स्म। परि+गण+क्त।) सर्व्वतोभावेन गणनायुक्तः। यथा। "परिगणितव्यतिरिक्तेषु संसर्गकृतविशेषो नादरणीयः परिगणनानर्थक्यात्।" इति जीमूतवाहनः॥

परिगतः, त्रि, (परि+गम्+क्त।) प्राप्तः। विस्तृतः। ज्ञातः। चेष्टितः। इति मेदिनी॥ गतः। इति हैमचन्द्रः॥ वेष्टितः। यथा,—
"अथ सवल्कद्रुकूलकुथादिभिः
परिगतोज्ज्वलदुह्नतवालधिः।"
इति भट्टिकाव्ये। १०। १॥

परिगृह्या, स्त्री, (परि सर्व्वतोभावेन गृह्यते वा परि+ग्रह+कर्म्मणि क्यप्।) नारी। इति शब्दचन्द्रिका॥

परिग्रहः, पुं, (परिग्रहणमिति। परि+ग्रह+"ग्रह वृदृनिश्चिगमश्च।" ३। ३। ५८। इति अप्।) प्रतिग्रहः। (यथा, पञ्चतन्त्रे। ४। ७।
"कण्ठाश्लेषपरिग्रहे शिथिलता यावादराच्चुम्बने
तत्ते धूर्त्त! हृदि स्थिता प्रियतमा काचिन्ममेवापरा॥")
सैन्यमश्वाङ्गम्। पत्नी। भार्य्या। (यथ रघुः। ६। १४।
"समुत्कस्यां सपत्नपरिग्रहानलकानलकाननवासं पुरीम्॥")
परिजनः। परिवारः। आदानम्। (यथा. रघुः। ६। ६६।
"अनुभवन्नवरोधनभूतसवं
मदुरपि प्रियकण्ठनिवृत्तया।
अनयदासनरज्जुपरिग्रहे
भुजलताजलतामवलोजनः॥")
स्वीकारः। (यथा, रघुः। १८। ३८।

परिघः

"लोकेन भावी पितुरेव तुल्यः
स्वभावितो मौलिपरिग्रहान् सः ॥")
मूलम् । कन्दः । शापः । अघः । इत्यमरभरतौ ॥ राहुवक्त्रस्थभास्करः । इत्यजयः ॥ (युक्तदारादि-भर्त्तव्यपरिमाणम् । यथा, मनुः । १० । १२४ ।
"प्रकल्पा तस्य तैर्वृत्तिः स्वकुटुम्बात् यथार्हतः ।
शक्तिञ्चावेक्ष्य दाक्ष्यञ्च भृत्यानाञ्च परिग्रहम् ॥"
परिगृह्यतेऽनेनेति विग्रहे हस्तः ॥ विष्णुः । यथा, महाभारते । १३ । १४६ । ५८ ।
"ऋतुः सुदर्शनः कालः परमेष्ठी परिग्रहः ॥"
"शरणार्थिभिः परितो गृह्यते सर्व्वगतत्वात् परितो ज्ञायत इति वा । पुण्यादिभिर्भक्तैरर्चितं परिगृह्णाति इति वा परिग्रहः ॥" इति शाङ्करभाष्यम् ॥ साधनम् । यथा, रघुः । ६ । २१ ।
"अजिनदण्डभृतं कुशमेखलां
वृतगिरं मृगशृङ्गपरिग्रहाम् ॥"
"मृगशृङ्गं परिग्रहः कण्डूयनसाधनं यस्यास्ताम् ॥"
इति तट्टीकायां मल्लिनाथः ॥)
परिग्राहः, पुं, (परि + ग्रह् + "परौ घञ्ञे ।" ३ । ३ । ४७ । इति घञ् ।) यज्ञवेदविशेषः । इति कैचित् ॥
परिघः, पुं, (परि हन्यतेऽनेनेति । परि + हन् + "परौ घः ।" ३ । ३ । ८४ । इति घञ् वादेशश्च ।) लोहदण्डलगुडः । लोहमयलगुडः लोहमुसलगुडः । तत्पर्य्यायः । परिघातनः २ । इत्यमरः । २ । ८ । ६१ ॥ परिघातकः ३ । इति शब्दरत्नावली ॥ (यथा, महाभारते । ६ । ६७ । २४ ।
"बाहूनामुत्तमाङ्गानां कार्ष्मुकाणाञ्च भारत ! ।
गदानां परिघाणाञ्च हस्तानाञ्चोरुभिः सह ॥")
परिघातः । परितो हननम् । इत्यमरभरतौ ॥ विष्कम्भादिसप्तविंशतियोगान्तर्गत ऊनविंशतियोगः । (यथा, ज्योतिषे ।
"वज्रोल्कञ्च व्यतीपातो वरीयान् परिघस्तथा ॥"
अस्य अर्द्धांशं परित्यज्य शुभं कर्म्म कुर्य्यात् । यदुक्तं तत्रैव ।
"परिघस्य त्यजेदर्द्धं शुभकर्म्म ततः परम् ॥")
अथ परिघयोगजातफलम् ।
"उत्पत्तिकाले परिघो यदि स्या-
न्नरस्तदा वंशकुठारकल्पः ।
असत्यसाक्षी छलया विहीनः
स्वल्पाशुभोक्ता विजितारिपक्षः ॥"
इति कोष्ठीप्रदीपः ॥
अर्गलः । इति मेदिनी ॥ मुद्गरः । शूलः । इत्यजयः ॥ कलसः । काचघटः । गोपुरम् । सङ्घः । इति शब्दरत्नावली ॥ ॥ (कार्त्तिकानुचरविशेषः । यथा, महाभारते । ६ । ४५ । ३३ ।
"परिघञ्च वटञ्चैव भीमञ्च सुमहाबलम् ।
दहतिं दहनञ्चैव प्रचण्डौ वीर्य्यनन्दनौ ॥
अंशोऽप्यनुचरान् यच्च दर्शं स्कन्दाय धीमते ॥"
चण्डालविशेषः । यथा, महाभारते । १२ । १३८ । ११४ ।

परिच

"लम्बकर्णो महावक्त्रो मलिनो घोरदर्शनः ।
परिघो नाम चण्डालः शूलपाणिरदृश्यत ॥")
परिघातः, पुं, (परिहन्यतेऽनेन । परि + हन् + घञ् । "हनस्तोऽचिण्णलोः ।" इति तः ।) अस्त्रम् । हननम् । इति धरणिः ॥
परिघातनः, पुं, (परितो घातनं यस्मात् ।) परिघास्त्रम् । इत्यमरः । २ । ८ । ६१ ॥ सर्व्वतोभावेन हनने क्ली ॥
परिघोषः, पुं, (परितो घोषो यस्मिन् ।) मेघशब्दः । शब्दः । अवाद्यः । इति मेदिनी ॥
परिचयः, पुं, (परि समन्तात् चयनं बोधो ज्ञानमित्यर्थः । परि + चि + अप् ।) विशेषेण ज्ञानम् । चेना इति भाषा । तत्पर्य्यायः । संस्तवः २ । इत्यमरः ।३।२।२३॥ प्रणयः ३ । इति भरतः ॥ (यथा, माघे । ७ । ६१ ।
"न परिचयो मलिनात्मनां प्रसाधनम् ॥"
अभ्यासः । यथा, माघे । २ । ७५ ।
"हेतुः परिचयस्यैर्ये वक्त्रगुणनिकैव सा ॥"
नाट्यस्य अवस्थाविशेषः । यथा, हटयोगदीपिकायाम् । ४ । ६६ ।
"आरम्भश्च घटश्चैव तथा पारचयोऽपि च ।
निष्पत्तिः सर्व्वयोगेषु स्यादवस्थाचतुष्टयम् ॥")
परिचरः, पुं, (परितश्चरतीति । परि + चर + अचाद्यच् ।) युद्धकाले परप्रहारात् स्वरक्षकः । प्रजासामन्तव्यवस्थापनकारी । इति कैचित् ॥ सेनायां राज्ञो दक्षनायकः । इत्यन्ये । इति भरतः ॥ तत्पर्य्यायः । परिधिस्थः २ । इत्यमरः । २ । ८ । ६२ ॥ सहायः ३ । इति रत्नमाला ॥ (परिचर्य्याकारकः । यथा वैद्यके,—
"उपचारज्ञता दाक्ष्यमनुरागश्च भर्त्तरि ।
शौचञ्चेति चतुर्योऽयं गुणः परिचरे जने ॥"
इति चरके सूत्रस्थाने नवमेऽध्याये ॥
"स्निग्धोऽनुगुप्तुर्बलवान् युक्तो व्याधितरक्षणे ।
वैद्यवाक्यकृदक्लान्तः पादः परिचरः स्मृतः ॥"
इति सुश्रुते सूत्रस्थाने चतुस्त्रिंशेऽध्याये ॥)
परिचरणकर्म्मन्, [न्] क्ली, (परिचरणं सेवैव कर्म्म ।) परिचर्य्या । तद्वैदिकपर्य्यायाः । इरस्यति १ विधेम २ सपर्य्यति ३ नमस्यति ४ दुरस्यति ५ ऋभोति ६ ऋणहि ७ ऋच्छति ८ सपति ९ विवासति १० । इति दश परिचरणकर्म्माणः । इति वेदनिघण्टौ ३ अध्याये ॥
परिचर्य्या, स्त्री, (परिचर्य्यते परिचरणमित्यर्थः । परि + चर् + "परिचर्य्यापरिसर्य्येति ।" ३ । ३ । १०१ । अस्य वार्त्तिं इति ण्यौ यक् च निपात्यते ।) सेवा । (यथा, देवीभागवते । १ । ४ । ११ ।
"अथवा वार्द्धके प्राप्ते परिचर्य्यां करिष्यति ।
पुत्रः परमधर्म्मिष्ठः पुण्यार्थं कुलविद्धयोः ॥")
तत्पर्य्यायः । वरिवस्या २ शुश्रूषा ३ उपासनम् ४ । इत्यमरः । २ । ७ । ३५ ॥ परिसर्य्या ५ उपासना ६ उपासितिः ७ । इति भरतः ॥ शुश्रूषणा ८ । इति शब्दरत्नावली ॥

परिच्छ

परिचार्य्यः, पुं, (परिचीयते इति । चिञ् चित्याम् + "अर्म्मौ परिचार्य्योपचार्य्यसम्मृज्याः ।" ३ । १ । १३१ । इत्यनेन साधुः ।) यज्ञाग्निः । तत्पर्य्यायः । सम्मृज्यः २ उपचार्य्यः ३ । इत्यमरः । २ । ७ । २० ॥ (अग्निरिह न वह्निः किन्त्वग्निधारणार्थस्थलविशेषः । इति सिद्धान्तकौमुदी ॥)
परिचारकः, त्रि, (परिचरतीति । परि + चर् + ण्वुल् ।) सेवकः । चाकर इति भाषा ॥ (यथा. मनुः । ७ । २१७ ।
"तत्रात्मभूतैः कालज्ञैरहार्य्यैः परिचारकैः ।
सुपरीक्षितमन्नाद्यमाश्वस्यैर्विषभेषजैः ॥")
तत्पर्य्यायः । भृत्यः २ दासेरः ३ दासेयः ४ दासः ५ गोप्यकः ६ चेटकः ७ नियोज्यः ८ किङ्करः ९ प्रेष्यः १० भुजिष्यः ११ । इत्यमरः । २ । १० । १७ ॥ डिङ्गरः १२ चेटः १३ गोप्यः १४ पराचितः १५ परिष्कन्दः १६ परिकर्म्मी १७ । इति हेमचन्द्रः । ३ । २४ ॥
परिचार्य्यः, त्रि, परिचर्य्यतेऽसौ इति । परि + चर + कर्म्मणि ण्यत् । सेव्यः ॥
परिचितः, त्रि, (परि + चि + कर्म्मणि क्तः ।) परिचर्य्याविशिष्टः । ज्ञातः । यथा,—
"त्यक्तव्येयं चिरपरिचिता जन्मभूमीति बुद्ध्या
मा खिद्यस्व त्रिभुवनजनत्राणहेतोः क्रमाङ्गः ।
किन्न त्याज्यं भवति सहनां चेत् परस्योपकारी ।
वाराणस्या सुनिरपि गतो दक्षिणाशामगस्त्यः ॥"
इति पदाङ्कदूतः ॥
परिचेयं, त्रि, परि पूर्ब्बचिधातोः कर्म्मणि यप्रत्ययेन निष्पन्नम् ॥ परिचययोग्यम् । परिचयनीयम् । परिचेतव्यम् ॥
परिच्छदः, पुं. (परिच्छाद्यतेऽनेनेति । परि + छद + णिच् + "पुंसि संज्ञायाम् ।" ३ । ३ । ११८ । इति घञ् । "छादेर्घेऽद्व्युपसर्गस्य ।" ६ । ४ । ९६ । इति उपधाह्रस्वः ।) परिवारः । इति हेमचन्द्रः ॥ (यथा, आर्य्यासप्तशत्याम् । ६७३ ।
"सहधर्म्मचारिणी मम परिच्छदः सुतनु ! नेह सन्देहः ।
न तु सुखयति तुहिनदिनच्छत्रच्छाया इव स्रज्यन्ती ॥")
हस्त्यश्ववस्त्रकम्बलाद्युपकरणम् । यथा,—
"परिच्छदं नृपार्हं मे परिवर्हो यथा परे ॥"
इत्यस्य टीकायां भरतः ॥
(यथा, रघुः । १ । १६ ।
"सेना परिच्छदस्तस्य द्वयमेवार्थसाधनम् ।
शास्त्रेष्वकुण्ठिता बुद्धिर्मौर्व्वी धनुषि चातता ॥")
आच्छादनम् । यथा,—
"पवःफेननिभा शय्या दान्ता रुक्मपरिच्छदा ।"
इति श्रीभागवतम् ॥
परिच्छन्दः, पुं, (परिच्छन्द्यतेऽनेन । परि + छदि संवरणे + घञ् ।) परिच्छदः । इति हेमचन्द्रः ॥
परिच्छन्नः, त्रि, परिपूर्ब्बच्छदधातोः कर्त्तरि कर्म्मणि च क्तप्रत्ययनिष्पन्नः ॥ परिच्छदविशिष्टः । सर्व्वतोभावेनाच्छादितः । संवृतः ॥

परिच्छिन्नः, त्रि, (परि + छिद् + कर्त्तरि क्तः ।) परिच्छेदविशिष्टः । अवधिप्राप्तः । यथा,—
"परिच्छिन्नामेवं त्वयि परिणता बिभ्रति गिरं
न विद्मस्तत्तत्त्वं वयमिह हि यत्त्वं न भवसि ।"
इति महिम्नः स्तोत्रम् ॥
सर्व्वतोभावेन छेदविशिष्टश्च ॥

परिच्छेदः, पुं, (परि + छिद् + भावे करणादौ च घञ् ।) ग्रन्थविच्छेदः । यथा, चिकाण्डशेषे ॥
"सर्गवर्गपरिच्छेदोद्घाताध्यायाङ्कसंग्रहाः ।
उच्छ्वासः परिवर्त्तश्च पटलः काण्डमस्त्रियाम् ॥
स्थानं प्रकरणं पर्व्वाह्निकञ्च ग्रन्थसन्धयः ॥"
(तत्र कार्य्ये सर्गः । कोषे वर्गः । अलङ्कारे परिच्छेदोच्छ्वासौ । कथायामुद्घातः । पुराणसंहितादौ अध्यायः । नाटके अङ्कः । तन्त्रे पटलः । ब्राह्मणी काण्डम् । संगीते प्रकरणम् । इतिहासे पर्व्व । भाष्ये आह्निकम् । एवमन्येऽपि पादान्तरङ्गस्तवकप्रपाठकस्कन्धमञ्जरीलहरीशाखादयो ग्रन्थसन्धयो ग्रन्थभेदे यथायथं ज्ञेयाः ॥*॥)
सीमा । अवधिः । यथा, मालतीमाधवे ।
"परिच्छेदातीतः सकलवचनानामविषयः
पुनर्जन्मन्यस्मिन्ननुभवपथं यो न गतवान् ।
विवेकप्रध्वंसादुपचितमहामोहगहनो
विकारः कोऽप्यन्तर्जृम्भति च तापञ्च कुरुते ॥"

परिजनः, पुं, (परिगतो जनः ।) परिवारः । पोष्यवर्गः । यथा, महिम्नः स्तोत्रे ।
"यदृद्धिं सूत्राम्नो वरद परमोच्चैरपि सतीं
अधश्चक्रे बाणः परिजनविधेयत्रिभुवनः ॥"
नियतसन्निधिवर्त्तिपरिचारकः । यथा, आनन्दलहर्य्याम् । ३० ।
"किरीटं वैरिञ्चं परिहर पुरः कैटभभिदः
कठोरे कोटीरे स्खलसि जहि जम्भारिमुकुटम् ।
प्रणम्रेष्वेतेषु प्रसभमभियातस्य भवनं
हरस्याभ्युत्थाने तव परिजनोक्तिर्विजयते ॥"
" परिजनः नियतसन्निधिवर्त्तिपरिचारकः । "
इत्यस्य श्लोकस्य व्याख्यायां गोपीरमणतर्कपञ्चाननः ॥

परिजल्पितं, क्ली, (परि + जल्प + भावे क्तः ।) दशाङ्गचित्रजल्पान्तर्गतद्वितीयजल्पनम् । यथा,
"प्रभोर्निर्देश्यताग्राह्यचापलाद्युपपादनात् ।
स्वविचक्षणतायुक्तिर्भङ्ग्या स्यात् परिजल्पितम् ॥"
इत्युज्ज्वलनीलमणिः ॥

परिज्मा, [न्] पुं, (परिजायते इति । परि + जन् + मन् । निपातनात् साधुः ।) चन्द्रः । अग्निः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (पर्य्यजतीति । अन्ये : परिपूर्ब्बस्य अञ्चुञ्चतीत्यादिना मनुप्रत्ययोऽकारलोपः आद्युदात्तत्वञ्च निपात्यते । परिज्मन्ता । इति वेदभाष्यम् ॥)

परिज्वा, [न्] पुं, (परि + ज्वु सौत्रधातुः + "अनुज्वन् पूषन्निति ।" उणां । १ । १५८ । इति कनिन् । इदन्तु उज्ज्वलदत्तमतम् ।) इन्द्रः । अग्निः । इति संक्षिप्तसारोणादिवृत्तिः ॥

परिडीनकं, क्ली, (परि + डी + क्तः । ततः स्वार्थे कन् ।) पक्षिगतिविशेषः । यथा,—
"हीनं प्रडीनमुड्डीनं संडीनं परिडीनकम् ।"
इति जटाधरः ॥
(तथाच महाभारते । ८ । ४१ । २७ ।
"अतिडीनं महाडीनं खडीनं परिडीनकम् ॥")

परिणतं, त्रि, (परिणमति स्म । परि + नम् + क्तः ।) पक्वम् । इत्यमरः । ३ । १ । ६६ ॥ तिर्य्यग्घातिगतः । इति हेमचन्द्रः ॥ (यथा, माघे । ४ । २६ ।
"सततमसुमतामगम्यरूपाः
परिणतदिक्करिकास्तटीर्विभर्त्ति ॥")
सर्व्वतोभावेन गतञ्च ॥

परिणयः, पुं, (परिणयनम् । परि + नी + अप् ।) विवाहः । इत्यमरः । २ । ७ । ५७ ॥

परिणामः, पुं, (परिणमनम् । परि + नम् + घञ् ।) विकारः । प्रकृतेरन्यथाभावः । यथा । सुखस्य विकारः क्रीधरक्तता । केचित्तु । प्रकृतिध्वंसजन्यविकारः । यथा कालस्य विकारो भस्म । न्तृपिण्डस्य घटः । इत्यमरभरतौ ॥ चरमः । प्रौढः । यथा,—
"परिणामसुखे गरीयसि
व्ययकैरस्मिन् वयसि चतौजसाम् ।
अतिवीर्य्यवतीव मेधसे
बहुरत्नोदयसि दृश्यते गुणः ॥"
इति भारवौ । २ । ४ ॥
(निदानभेदेन यथा,—
"असात्म्येन्द्रियार्थसंयोगप्रज्ञापराधपरिणामभेदात्त्रिविधो वा ॥" "परिणामोऽयोगादिदुक्तो ऋतुस्वभावजो शीतादयः । अधर्म्मस्य च रोगहेतोरत्रैवान्तर्भाव इति भट्टारहरिश्चन्द्रः ॥"
इति माधवकरकृतरुग्विनिश्चयस्य पञ्चनिदानव्याख्याने विजयेनोक्तम् ॥
"कालस्य परिणामेन जराव्याध्यनिमित्तजाः ।
रोगाः स्वाभाविका दृष्टाः स्वभावो नियतिक्रियः ॥"
इति चरके शारीरस्थाने प्रथमेऽध्याये ॥
अर्थालङ्कारभेदः । तल्लक्षणं यथा,—
"परिणामः क्रियार्थत्वेद्विषयी विषयात्मना ॥")

परिणामदर्शी, [न्] त्रि, (परिणामं चरमं पश्यतीति । दृश् + णिनि ।) चरमकालप्रेक्षी । पश्चादृशी । विषयादेः प्रौढदृष्टा । इति भारतम् ॥

परिणामशूलः, पुं, (परिणामे चरमावस्थायां शूलं यस्य । यद्वा परिणामे भुक्तान्नादेः परिपाके उत्पद्यते शूलं यस्मात् ।) रोगविशेषः । तस्योत्पत्तिर्यथा,—
"स्वैर्निदानैः प्रकुपितो वायुः सन्निहिते यदा ।
कफपित्ते समाहत्य शूलकारी भवेद्बली ॥"
तस्य लक्षणं यथा,—
"भुक्ते जीर्य्यति यच्छूलं तदेव परिणामजम् ।
तस्य लक्षणमप्येतत् समासेनाभिधीयते ॥"
वातिकस्य तस्य लक्षणं यथा,—
"आध्मानाटोपविष्मूत्रविबन्धारतिवेपनैः ।
स्निग्धोष्णोपशमप्रायं वातिकं तद्विदेद्भिषक् ॥"
पैत्तिकस्य तस्य लक्षणं यथा,—
"लवणाद्याहारतिखेदकट्वम्लवल्लोत्तरम् ।
शूलं शीतशमप्रायं पैत्तिकं लक्षयेद्भिषक् ॥"
श्लैष्मिकस्य तस्य लक्षणं यथा,—
"कृद्दिच्छर्द्यासस्यमोहं स्वल्परुग्दीर्घसन्तति ।
कटुतिक्तोपशान्तौ च तद्विद्यं कफात्मकम् ॥"
त्रिदोषजस्य तस्य लक्षणं यथा,—
"संसृष्टलक्षणं बुद्ध्वा त्रिदोषं परिकल्पयेत् ।
त्रिदोषजमसाध्यन्तु क्षीणमांसपलानलम् ॥"
इति माधवकरः ।
तस्यौषधं यथा, गरुड़पुराणे ।
"लौहचूर्णसमायुक्तं त्रिफराचूर्णमेव वा ।
मधुना खादितं शत्रु ! परिणामाख्यशूलनुत् ॥"
(चिकित्सा यथा,—
"वमनं तिक्तमधुरैर्विरेकश्चापि शस्यते ।
बस्तयश्च हिताः शूले परिणामसमुद्भवे ॥
विड्ङ्गतण्डुलचूर्णैः त्रिवृद्दन्तीसचित्रकम् ।
सर्व्वाण्येतानि संचूर्य्य श्लक्ष्णचूर्णानि कारयेत् ॥
गुड़ेन मोदकं कृत्वा भक्षयेत् प्रातरुत्थितः ।
उष्णोदकानुपानन्तु दद्यादग्निविवर्द्धनम् ॥
जयेत्त्रिदोषजं शूलं परिणामसमुद्भवम् ॥
नागरगुड़तिलकल्कं पयसा संसाध्य यः पुमान्नद्यात् ।
उग्रं परिणामशूलं तस्यापैति सप्तरात्रेण ॥"
"तिलनागरपथ्यानां भागं शृङ्गवेरभस्मनाम् ।
द्विभागगुड़संयुक्तं गुड़ीं कृत्वाक्षभागिकाम् ॥
शीतानुपानं पूर्व्वाह्णे भक्षयेत् क्षीरभोजनः ।
सायाह्णे रसकं पीत्वा नरो सुस्थेत दुर्ज्जयात् ॥
परिणामसमुत्थानशूलाच्चिरभवादपि ।
शृङ्गवेरं चूर्णखण्डं पञ्चैव लवणानि च ॥
समांशां गुड़िकां कृत्वा कलञ्जीकरसेन वा ।
प्रातर्भोजनकाले वा भक्षयेत्तु यथाबलम् ॥
शूलादविसुच्यते जन्तुः सहसा परिणामजात् ॥
यः पिबति समरात्रं शृङ्गवेरान् कलाययूषेण ।
स जयति परिणामरुजं चिरजामपि किमुत नूतनजाम् ॥
लौहचूर्णं वरायुक्तं विलीढ़ं मधुसर्पिषा ।
परिणामशूलं शमयेत्तण्डुलं वा प्रयोजितम् ॥
सामुद्रं सैन्धवं चारो रुचकं रौमकं विड्मम् ।
दन्ती लौहरजः किट्टं चित्रकश्चूरणकं समम् ॥
दधिगोमूत्रपयसा सन्दग्धावकपाचितम् ।
तद्यथाग्निबलं चूर्णं पिबेदुष्णेन वारिणा ॥
जीर्णाजीर्णे तु भुञ्जीत मांसादिहृतसाधितम् ।
नाभिशूलं प्लीहशूलं यकृद्गुल्मकृतञ्च यत् ॥
विदध्यष्ठीलिकं हन्ति कफवातोद्भवन्तथा ।
शूलानामपि सर्व्वेषामौषधं नास्ति तत् परम् ॥
परिणामसमुत्थस्य विशेषेणान्तशूलजम् ॥"
इति समुद्राद्यं चूर्णम् ॥ ३ ॥
"सर्पिष्पलीगुड़ं सर्पिः पचेत् क्षीरे चतुर्गुणे ।
विनिहन्त्यचिरात्तच्च शूलञ्च परिणामजम् ॥"
इति गुड़पिप्पलीघृतम् ॥ * ॥
"कार्षेण कल्केन च पिप्पलीनां
सिद्धं घृतं माक्षिकसंप्रयुक्तम् ।

क्षीरानुपानं विनिहन्त्यवश्यं
मूलं प्रवृद्धं परिणामसंज्ञम् ॥"
इति पिप्पलीघृतम् ॥ * ॥

"मण्डूरं शोधितं पञ्चौ लौहनां वा गुडेन तु ।
भक्षयन्मुच्यते मूलात् परिणामसमुद्भवात् ॥
संशोध्य चूर्णितं कृत्वा मण्डूरस्य पलाष्टकम् ।
घृतावरीरसस्याथौ दद्यात्तु पयसस्तथा ॥
पलान्यादाय चत्वारि तथा गव्यस्य सर्पिषः ।
विपचेत् सर्व्वमेकैध्यं यावत् पिण्डत्वमागतम् ॥
विड्डन्तु भक्षयेन्मध्ये भोजनस्याग्रतोऽपि वा ।
वातात्मकं पित्तभवं मूलञ्च परिणामजम् ॥
निहन्त्येव हि योगोऽयं मण्डूरस्य न संशयः ॥"
इति घृतावरीमण्डूरम् ॥ * ॥

इति वैद्यकचक्रपाणिसंग्रहे मूलाधिकारे ॥

"अजीर्णान्नरसः प्रोक्तो दशमः परिणामजः ।"
"जीर्णेऽन्ने च भवेद्दुयस्तु स ज्ञेयः परिणामजः ॥"
"लङ्घनं वमनञ्चैव विरेकश्चानुवासनम् ॥
निरूहो वस्ति कर्म्माणि परिणामे त्रिदोषजे ।
चित्रकं त्रिवृता दन्ती विड्डङ्गं कटुकत्रयम् ॥
समं चूर्णं गुडेनाथ क्षारयेद्वोदकान् सुधीः ।
भक्षयेत् प्रातरुत्थाय पश्चादुष्णोदकं पिबेत् ॥
परिणामोद्भवं मूलं हन्ति शीघ्रं नरस्य च ।
यवानीहिङ्गु सिन्धूत्थक्षारं सौवर्चलाभया ।
सुरामण्डेन पातव्या परिणामे त्रिदोषजे ॥
हिङ्गुयोषवचाजमोदहबुषा पथ्यावबानी शटी
जातीपिप्पलीदाड़िमवृक्षीतिन्तीड़िचव्याग्नि-
कम् ।
तस्मादन्नसुवर्चला च यवजक्षारं तथा सर्ज्जिका
सिन्धूत्थं विड्चूर्णकं समकृतं स्याद्बीजपूरे रसे ॥
संभाव्यं सुकृतात्वनेन गुड़िका चाक्षप्रमाणा तथा
कल्क्यो वातविकारिणां प्रवदतः मूलार्शसः
शीघ्रकान् ॥"
"एष हिङ्ग्वादिको नाम सर्व्वशूलार्त्तिनाशनः ।
सर्व्ववातविकारघ्नः सर्व्वत्रवनिवारणः ।
परिणामोद्भवं शूलं वारयत्याश्वसंशयम् ॥"
इति हारीते चिकित्सितस्थाने नवमोऽध्याये ॥

परिणायः, पुं, (परितो वामदक्षिणतो नयनम् । परि + नी + "परिण्योर्नीनोद्यूताक्षेषयोः ।" ३ । ३ । ३७ । इति घञ् ।) शारीणां समन्तान्नयनम् । इत्यमरः । २ । १० । ४६ ॥ परेरितौ दीर्घत्वे परीणायश्च । इति भरतः ॥

परिणाहः, पुं, (परिणह्यतेऽनेन इति । परि + नह + घञ् ।) विस्तारः । तत्पर्य्यायः । विशालता २ । इत्यमरः । २ । ६ । ११४ ॥ ओसार इति चौड़ा इति च भाषा ॥ (यथा, महाभारते । ६ । ७ । २२ ।

"अरत्नीनां सहस्रञ्च शतानि दश पञ्च च ।
परिणाहस्तु वृक्षस्य फलानां रसभेदिनाम् ॥")

परिणेता, [तृ] पुं, (परिणयतीति । परि + नी + तृच् ।) वोढ़ा । भर्त्ता २ । इति राजनिर्घण्टः ॥ (यथा,—

"स्थित्यै दण्डयतो दण्ड्यान् परिनेतुः प्रसूतये

अप्यर्थकामौ तस्यास्तां धर्म्म एव मनीषिणः ॥"
इति रघुः । १ । २५ ।)

परितः [स्] अ, (परि + "पर्य्यभिभ्याञ्च ।" ५ । ३ । ६ । इति तसिल् ।) सर्व्वतः । चतुर्दिगभिधायी । इत्यमरः ।३।४।१३ ॥ (यथा, रघुः । ६।६।

"पुरोपकण्ठो पवनाश्रयाणां
कलापिनासुद्धतनृत्यहेतौ ।
प्रभातशृङ्खे परितो दिगन्तान्
तूर्य्यस्वने मूर्च्छति मङ्गलार्थे ॥")

परितापः, पुं, (परिसर्व्वतोभावेन तप्यतेऽनेन । परि + तप् + घञ् ।) दुःखम् । (यथा, भागवते । ७ । ८ । ५२ ।

"स तु जनपरितापं तत्कृतं जानता ते
नरहर उपनीतः पञ्चतां पञ्चभिः स्वैः ॥")

नरकान्तरम् । इति मेदिनी ॥ शोकः । इति शब्दरत्नावली ॥ (यथा, रामायणे ।२।२२।२५।

"इतया तत्त्वया बुद्ध्या संस्तभ्यात्मानमात्मना ।
त्यक्तेऽप्यभिषेके मे परितापो न विद्यते ॥")
भयम् । कम्पः । इति विश्वः ॥ अत्युष्णता च ॥ (यथा, मार्कण्डेये । १५ । ४६ ।

"परितापश्च गात्रेभ्यः पीड़ावाधाश्च कृत्स्नशः ।
अपहन्ति नरव्याघ्र ! दयां कुरु महीपते ! ॥")

परितुष्टः, त्रि, (परि + तुष् + क्तः ।) परितोषयुक्तः । सन्तुष्टः । यथा,—

"यत् प्रार्थ्यते त्वया भूप ! त्वया च कुलनन्दन !।
मत्तस्तत् प्राप्यतां सर्व्वं परितुष्टा ददामि तत् ॥"
इति मार्कण्डेये देवीमाहात्म्ये । ६३ । १० ॥

परितोषः, पुं, (परितोषणमिति । परि + तुष् + घञ् ।) सर्व्वतोभावेन तुष्टिः । सन्तोषः । यथा,—

"त्वामुदर ! साधुमन्ये शाकै-
रपि यदसि लब्धपरितोषम् ।
कृतहृदयं ह्यधिकाधिक-
वाञ्छाशतदुर्भरं न पुनः ॥"
इति शान्तिशतके ॥

परित्यागः, पुं, (परित्यजनमिति । परि + त्यज् + घञ् ।) सर्व्वतोभावेन वर्জ্জनम् । तत्पर्य्यायः । क्षोरणम् २ । इति त्रिकाण्डशेषः ॥ * ॥

"गुरोरप्यवलिप्तस्य कार्य्याकार्य्यमजानतः ।
उत्पथप्रतिपन्नस्य परित्यागो विधीयते ॥"
इति मत्स्यसूक्तम् ॥

परित्राणं, क्ली, (परित्रायते इति । परि + त्रै + ल्युट् ।) मारणोद्यतस्य निवारणम् । तत्पर्य्यायः । पर्य्याप्तिः २ हत्यवारणम् ३ । इत्यमरः । ३ । २ । ५ ॥ रक्षणम् । यथा,—

"परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।
धर्म्मसंस्थापनार्थाय सम्भवामि युगे युगे ॥"
इति श्रीभगवद्गीतायाम् । ४ । ८ ॥

परिदानं, क्ली, (परिदीयते इति । परि + दा + भावे ल्युट् ।) परीवर्त्तः । विनिमयः । इत्यमरः । २ । ६ । ८० ॥

परिदायी, [न्] पुं, (परित्यज्य शास्त्रधर्म्मं ददातीति । परि + दा + णिनिः ।) अनूढ़ज्येष्ठे

तत्कनिष्ठाय कन्यादाता । "यथा हारीतः । ज्येष्ठेऽनिर्व्विशे कनीयान् निर्व्विशन् परिवेत्ता भवति परिविन्नो ज्येष्ठः परिवेदनीया कन्या परिदायी दाता परिकर्त्ता याजकस्ते सर्व्वे पतिताः ।" इत्युद्वाहतत्त्वम् ॥

परिदेवनं, क्ली, (परि + दिव + ल्युट् ।) अनुशोचनोक्तिः । विलापः । इत्यमरः । १ । ६ । १६ ॥ (यथा, महाभारते । १ । २ । १४६ ।

"परिदेवनञ्च पाञ्चाल्या वासुदेवस्य सन्निधौ ।
आश्वासनञ्च कृष्णस्य दुःखार्त्तायाः प्रकीर्त्तितम् ॥")

परिदेवना, स्त्री, (परिदेवयतीति । परि + दिव + "ण्यासश्रन्थो युच् ।" ३।३।१०७ । इति युच् । ततष्टाप् ।) शोकनिमित्तो विलापः । यथा,—

"अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत !।
अव्यक्तनिधनान्येव तत्र का परिदेवना ॥"
इति श्रीभगवद्गीताद्वितीयाध्यायश्लोकव्याख्याने श्रीधरस्वामी ॥ अपि च ।

"न मन्त्रबलवीर्य्येण प्रज्ञया पौरुषेण च ।
अलभ्यं लभते मर्त्यस्तत्र का परिदेवना ॥
अव्यक्तादीनि भूतानि व्यक्तमध्यानि शौनक !।
अव्यक्तनिधनान्येव तत्र का परिदेवना ॥
अयाचितो मया लब्धस्तत्प्रेषितः पुनः कृतः ।
यत्रागतस्तत्र गतस्तत्र का परिदेवना ॥
एकवृक्षे यदा रात्रौ नानापक्षिसमागमः ।
प्रभाते दश दिशो यान्ति तत्र का परिदेवना ॥
एकसार्थप्रयातानां सर्व्वेषान्तत्र गामिनाम् ।
यद्येकस्खलितो याति का तत्र परिदेवना ॥"
इति गरुड़पुराणे १११ अध्यायः ॥

परिधानं, क्ली, (परिधीयते यत् । परि + धा + कर्म्मणि ल्युट् ।) परिधेयवस्त्रम् । तत्पर्य्यायः । अन्तरीयम् २ उपसंव्यानम् ३ अधोंऽशुकम् ४ । इत्यमरः । २ । ६ । ११७ ॥ (यथा, पञ्चतन्त्रे । ५ । २३ ।

"वरं वनं व्याघ्रगजादिसेवितं
जलेन हीनं बहुकण्टकावृतम् ।
तृणानि शय्या परिधानवल्कलं
न बन्धुमध्ये धनहीनजीवितम् ॥")

परिधायः, पुं, (परिधीयतेऽत्र । परि + धा + घञ् ।) जनस्थानम् । परिच्छेदः । नितम्बः । इति मेदिनी ॥ (जनस्थानमित्यत्र जलस्थानमिति केचित् ॥)

परिधिः, पुं, (परिधीयतेऽनेन । परि + धा + "उपसर्गे धोः किः ।" ३ । ३ । ९२ । इति किः ।) परिवेषः । चन्द्रसूर्य्यसमीपमण्डलम् । (यथा, रघुः । ८ । ३० ।

"अदृश्यतरुपेयिवान् कभौ
परिधेर्मुक्त इवोष्णदीधितिः ॥")

यज्ञियतरुशाखा । यज्ञियतरोः पलाशादेर्यज्ञ पशुबन्धनार्थं या शाखा निखायते तस्याम् । इत्यमरभरतौ ॥ (यथाह आपस्तम्बः । "खादिरं पालाशं वैकविंशतिदारुकमिध्मं करोति त्रयः

परिधयः पालाशकाष्ठकाः खादिरौदुम्बरबिल्वरोहितकविकङ्कतानां वे वा यज्ञिया वृक्षा ज्ञातव्याः शुष्करसत्वच्काः ॥" इति ॥ * ॥)
भूगोलादेर्वेष्टनम्। यथा,—
"यासेभनन्दाग्निहते विभक्ते
खवाणसूर्य्यैः परिधिस्तु सूक्ष्मः ॥"
इति लीलावती ॥
(क्लो, परिधीयते यदिति। परि+धा+कर्म्मणि किः। परिधेयवस्त्रम्। यथा, भागवते। ८। ७। १७।
"मेघश्यामः कनकपरिधिः कर्णविद्योतविद्युन्मूर्द्धि भ्राजिष्णुलसितकचः सग्धरो रक्तनेत्रः ॥"
"कनकं सुवर्णमिव पीतं परिधि वस्त्रं यस्य" इति तट्टीका ॥)
परिधिस्थः, पुं, (परिधौ ।तिष्ठतीति। परिधि+स्था+कः।) परिचरः। इत्यमरः। २। ८।६२ ॥ युद्धकाले परप्रहारात् दूरस्थके। प्रजासामन्तव्यवस्थापनकारिणीति केचित्। सेनायां राज्ञो दक्षनायकः। इत्यन्ये। इति भरतः ॥
परिधेयं, त्रि, (परिधातुं योग्यम्। परि+धा+"अचो यत्।" ३। १। ९७। इति यत् "ईद्यति।" ६। ४। ६५। इति घात ईत् ततो गुणः।) परिधानीयम्। परिधातव्यम्। परिधानोपयुक्तवस्त्रादि। यथा,—
"न तु स्वभोग्यतयापि प्राप्ते परिधेयादौ स्तुतेरदृष्टार्थत्वापत्तेः।" इति विवादचिन्तामणिः ॥
परिपणं, क्लो, (परिपण्यते व्यवह्रियतेऽनेन। परि+पण्+"पुंसि संज्ञायां घः प्रायेण।" ३। ३। ११८। इति घः।) मूलधनम्। इत्यमरः। २। ९। ८०। पुँजि इति भाषा ॥
परिपन्थकः, पुं, (परिपन्थयति दोषादिकं प्राप्नोतीति। परि+पथि क गतौ+खुल्।) शत्रुः। इति हेमचन्द्रः। ३। ३९३ ॥ (यथा, महाभारते। १०। १६। ३१।
"एतौ दुर्योधनः पापो राज्यस्य परिपन्थकः॥")
परिपन्थी, [न्] त्रि, (परिसर्व्वतो भावेन दोषाख्यानं पन्थयितुं शीलमस्य। परि+पन्थ+णिनिः।) शत्रुः। इत्यमरः। २। ८। ११। (यथा, गीतायाम्। ३। ३४।
"इन्द्रियस्येन्द्रियस्यार्थे रागद्वेषौ व्यवस्थितौ।
तयोर्न वशमागच्छेत्तौ ह्यस्य परिपन्थिनौ ॥"
प्रतिकूलाचारी। यथाह कश्चित्।
"अपराधिनि चेत् क्रोधः क्रोधे क्रोधः कथं नहि।
धर्म्मार्थकाममोक्षाणां चतुर्णां परिपन्थिनि ॥")
परिपाकः, पुं, (परिपच्यते इति। परि+पच्+घञ्।) परिपक्वता। यथा, भावप्रकाशे।
"इत्युद्धृतं केवलवह्निपक्व-
मांसेन मत्स्यैः परिपाकमेति।"
नैषधम्। यथा,—
"वीक्ष्य तस्य विनये परिपाकं
पाकशासनपदं स्पृहयतोऽपि।"
इति नैषधचरितसर्गः ॥
परिपाकिनी, स्त्री, (परिपाकः परिपाकशक्तिर्विद्यतेऽस्याः। परिपाक+इनि+ङीप्।) चित्रता। इति शब्दचन्द्रिका ॥
परिपाटिः, स्त्री, (परिपाटनम्। परि+पट्+स्वार्थे णिच्+अच इः। यद्वा परि भागे भागेन पाटिः पाटनं गतिर्यस्याम्।) पारिपाट्यविशिष्टः। तत्पर्य्यायः। आनुपूर्व्वी २ आवृत् ३ अनुक्रमः ४ पर्य्यायः ५। इत्यमरः। २।७। ३७ ॥ आनुपूर्व्वम् ६ परिपाटी ७। इति भरतः ॥ आनुपूर्व्वम् ८ आनुपूर्व्यकम् ९। इति टीकान्तरम् ॥ क्रमः १०। इति जटाधरशब्दरत्नावल्यौ ॥
परिपिण्टकं, क्लो, (परि+पिष्+क्त+संज्ञायां कन्।) सीसकम्। इति राजनिर्घण्टः ॥
परिपुष्करा, स्त्री, (परितः पुष्करं सुखं यस्याः।) गोडुम्बा। इति शब्दचन्द्रिका ॥ राजगोमक् इति भाषा ॥
परिपूतं, क्लो, (परि+पू+क्तः।) अपास्ततुषधान्यम्। यथा, मनुः।
"परिपूतेषु धान्येषु शाकमूलफलेषु च।
निरन्वये शतं दण्डः सान्वयेऽर्द्धशतं दमः ॥"
त्रि, सर्व्वतोभावेन पवित्रम्॥ (यथा,माघे।२।१६।
"घूर्णयन् मदिरास्वादमदपाटलितद्युतिः।
रेवतीवदनोच्छ्वासपरिपूतपुटो हरौ ॥")
परिपूर्णता, स्त्री, (परिपूर्णस्य भावः। परिपूर्ण+"तस्य भावस्त्वतलौ।" ५। १। ११९। इति तल् ततः "स्त्रान्नं क्लीवन्तलन्तं स्त्रियाम्।" इति वार्त्तिकोक्तत्वात् स्त्रियां टाप्।) परिपूर्णत्वम्। सम्पूर्णता। तत्पर्य्यायः। आभोगः२। इत्यमरः। २। ६। १३७ ॥
परिपूर्णत्वं, क्लो, (परिपूर्णस्य भावः। "तस्य भावस्त्वतलौ।" ५। १। ११९। इति त्व। ततः क्लीवत्वम्।) परिपूर्णता। सम्पूर्णत्वम्। इति जटाधरः ॥ (यथा,—
"दृश्यते परिपूर्णत्वं सुखचन्द्रस्य ते सखि!।
न जाने कञ्चकोरं हि विधाता पालयिष्यति ॥"
इत्युद्भटः ॥)
परिपेलं, क्लो, (परिपेलति स्पृहयतां गच्छतीति। पेल गतौ+अच्।) परिपेलवम्। कैवर्त्तीमुस्तकम्। इति शब्दमाला॥ तन्नान्तरे यथा,—
'परिपेलं ध्रुवं वल्यं तत्कुटन्नटसंज्ञकम्।
जायते मुस्तकाकारं गोवालकुलसन्निभे ॥"
इत्यमरटीकायां भरतः ॥
परिपेलवं, क्लो, (परि सर्व्वतः पेलवं स्पृहा यस्य।) कैवर्त्तीमुस्तकम्। इत्यमरः। २। ४। १३१ ॥ (अत्यन्तकोमले, त्रि। यथा, बृहत्संहितायाम्। ६४। ८।
"स्फीतमध्यपरिपेलवं फलं
स्निग्धमध्यचिरकालसम्भवम् ॥"
गुणादयोऽस्य कैवर्त्तीमुस्तकशब्दे ज्ञेयाः ॥)
परिप्लवं, त्रि, (परिप्लवते इति। प्लु+अच्।) चपलम्। इत्यमरः। ३। १। ३५।
परिभवः, पुं, (परि+भू+अप्।) अनादरः। इत्यमरः। १। ७। २२ ॥ (यथा, रघुः। १२।३७।
"फलमस्योपघातस्य सद्यः प्राप्स्यसि पश्य माम्।
मृगया परिभवो यान्नामित्यवेहि त्वया हतम्॥")
परिभावः, पुं, (परि+भू+"परौ सुवोऽवज्ञाने।" ३। ३। ५५। इति घञ्।) परिभवः। इत्यमरः। १। ७। २२ ॥
परिभाषणं, क्लो, (परि+भाष्+ल्युट्।) सनिन्द उपालम्भः। इत्यमरः। १। ६। १४ ॥ उपालम्भो दुर्व्वादः। निन्द्यया सह वर्त्तमानो य उपालम्भस्तत्र सनिन्दे परिभाषणम्। उपालम्भो गुणाविष्करणेन स्तुतिपूर्व्वकोऽपि भवति। यथा महाकुलस्य भवतः किमिदमुचितं भवति। अत्र तु सस्तुतौ न परिभाषणम्। टीकान्तरेऽपि बन्धुलस्य तवागम्यागमनं योग्यमिति निन्दापूर्व्वः। महाकुलस्य तव कथं विप्रियम्। इति स्तुतिपूर्व्वश्च उपालम्भः। इति भरतः ॥ नियमः। इति मेदिनी ॥ व्यालापः। इति विश्वः ॥

परिभाषा, स्त्री, (परि+भाष्+अच्। ततष्टाप्। परिष्कृतं भाषणम्। पदार्थविवेचकाचार्य्याणां युक्तियुक्ता वाक्। इति काव्यप्रकाशटीकायां चण्डीदासः॥ तत्पर्य्यायः। प्रज्ञप्तिः २ प्रोक्ती ३ सङ्केतः ४ समयकारः ५। इति त्रिकाण्डशेषः॥ (सूत्रलक्षणविशेषः। सूत्रं षड्विधम्। यथा,—
"संज्ञा च परिभाषा च विधिर्नियम एव च।
अतिदेशोऽधिकारश्च षड्विधं सूत्रलक्षणम्॥")
"ग्रन्थस्य संक्षेपनिर्व्वाहार्थसङ्केतविशेषः। यथा चपोदितेत्यादि।" इति सुग्धबोधटीकायां दुर्गादासः॥ यथा माघे। १६। ८०।
"न खलु प्रतिहन्यते कृतश्चित्
परिभाषेव गरीयसी यदाज्ञा॥"
("अयुक्तानुक्तदोषोक्तसन्दिग्धार्थप्रकाशिकाः।
परिभाषाः प्रवक्ष्यन्ते दीपीभूताः मुनिच्छिताः॥"
इति वैद्यकपरिभाषाया लक्षणम्॥
"प्रथमं परिभाषा स्याद्वेदव्याख्यानकन्तथा।"
इति श्राद्धघरे पूर्व्वखण्डे प्रथमेऽध्याये॥)

परिभूत, त्रि, (परिभूयते स्म। परि+भू+क्तः।) अनादृतम्। तत्पर्य्यायः। अवगणितम् २ अवमतम् ३ अवज्ञातम्४ अवमानितम् ५। इत्यमरः। ३। १। १०६। अभिभूतम् ६। इति जटाधरः॥ अप्रस्तुतम् ७। इति शब्दरत्नावली॥ (यथा, सारावल्यां विंशाध्याये।
"परिभूतं सुखरहितं क्रूरटापुत्रमतिपापरतञ्च।
जनयति नचचपतिः चितिसुतदृष्टो भवि शूरम्॥")

परिभ्रमः, पुं, (परि+भ्रम्+अच्।) सर्व्वतोभ्रमणम्। परिपूर्ब्बभ्रमधातोर्भावे अल्प्रत्ययनिष्पन्नः॥

परिमण्डलं, त्रि, (परि सर्व्वतो मण्डलम्।) वर्त्तुलम्। इति हेमचन्द्रः॥ (यथा, भागवते। ५। २२। १६।
"लक्षोत्तरं सार्द्धनवकोटियोजनपरिमण्डलं भूवलयस्य चषेण समयूत्युत्तरं द्विसहस्रयोजनानि स भुङ्क्ते॥" परमाणुपरिमाणम्। परिमाणविशिष्टः परमाणुः। इति वैशेषिकसूत्रवृत्तिः॥ शब्दोऽयं न्यग्रोधशब्देन युक्तः अर्थान्तरं प्रकाशयति। पुं, पुरुषविशेषः। तस्य लक्षणं यथा, मात्स्ये ११८ अध्याये।
"न्यग्रोधौ तु स्फुटौ बाहू बाहौ न्यग्रोध उच्यते।
बाहुभ्यां उच्छ्रयो यस्य अध उर्द्ध्वञ्च देहिनः।
समोच्छ्रयपरीणाही न्यग्रोधपरिमण्डलः॥"
स्त्री, लक्षणान्वितरमणीविशेषः। यथा, शब्दरत्नावल्याम्।
"स्तनौ सुकठिनौ यस्या नितम्बे च विशालता।
मध्ये क्षीणा भवेद् या च न्यग्रोधपरिमण्डला॥"
पर्व्वतविशेषः। यथा महाभारते ६। ६। ११।
"परिमण्डलस्तयोर्म्मध्ये मेरुः कनकपर्व्वतः।
आदित्यतरुणाभासो विधूम इव पावकः॥")

परिमलः, पुं, (परिमलते सुगन्धिपार्थिवकणां धरतीति। मल ङ् धारणे+अच्। "क्षितावेव गन्धः।" इति न्यायात्तस्य तथात्वम्।) विमर्द्दनम्। कुङ्कुमादिमर्द्दनम्। विमर्द्दोत्थजनमनोहरगन्धः। सुरतादिविमर्द्दोत्थविलेपनकुङ्कुमादिगन्धः। इत्यमरभरतौ॥ सुरभिमाल्यगन्धादिधारणेनोत्पन्नो हृद्यो गन्धः। इति स्वामी॥ (यथा, कलाविलासे। १। ५।
"रतिलुलितललितललनाङ्गमजललववाहिनो मुहुर्यत्र।
अधकेशकुसुमपरिमलवासितदेहा वहन्त्यनिलाः॥")
तत्पर्य्यायः। आमोदः २ गन्धः ३ सौरभ्यम् ४ सौरभम् ५। इति राजनिर्घण्टः॥ पण्डितसमूहः। इति शब्दरत्नावली॥

परिमार्ण, क्ली, परिमीयतेऽनेन। (परि+मा+करणे ल्युट्।) परिमितव्यवहारासाधारणकारणम्। इति सिद्धान्तमुक्तावली॥ माप इति भाषा। (यथा, मनुः। ८। १३३।
"त्रसरेणवोऽष्टौ विज्ञेया लिक्षैका परिमाणतः॥")
तत्पर्य्यायप्रकारा यथा,—
"यौतवं द्रव्यं पाय्यमिति मानार्थकं त्रयम्।
मानं तुलाङ्गुलिप्रस्थैर्गुञ्जाः षष्ट्याद्यमाषकः॥
ते षोड्शाद्यः कर्षोऽक्षौ पलं कर्षचतुष्टयम्।
सुवर्णविल्वौ हैन्नोऽक्षे कुडवस्तैस्तु तत्पले॥
तुला स्त्रियां पलशतं भारः स्यादिंशतिस्तुलाः।
आचितं दशभारास्तु शकटो भार आचितः॥
कार्षापणः कार्षिकश्च तान्त्रिके कार्षिके पणः।
अक्षिया वाढ़कद्रौणौ खारी वाहो निकुञ्चकः॥
कुडवः प्रस्थ इत्याद्याः परिमाणार्थकाः पृथक्।"
इत्यमरः। २। ६। ८५—८६॥ *॥
न्यायमते तद्यथा,—
"परिमाणं भवेज्ज्ञानव्यवहारस्य कारणम्।
अणु दीर्घं महद्ह्रस्वमिति तद्भेद ईरितः॥
अनित्ये तदनित्यं स्यान्नित्ये नित्यमुदाहृतम्।
संख्यातः परिमाणाच्च प्रचयादपि जायते॥
अनित्यं द्व्यणुकादौ तु संख्याजन्यमुदाहृतम्।
परिमाणं घटादौ तु परिमाणजमुच्यते॥
प्रचयः शिथिलाख्यो यः संयोगस्तेन जन्यते।
परिमाणन्तूलकादौ नाशूत्थाश्रयनाशतः॥"
इति भाषापरिच्छेदे। ११०—११३॥
(परिमाणं निरूपयति। परिमाणमिति। परिमितव्यवहारासाधारणं कारणं परिमाणमित्यर्थः। तच्चतुर्व्विधं अणु महद्दीर्घं ह्रस्वञ्च इदं चातुर्व्विध्यं प्रत्यक्षसिद्धं तत्राणुत्वह्रस्वत्वे महत्त्वदीर्घत्वे च समनियते तत्परिमाणं नित्यमित्यत्रपरिमाणमित्यनुषज्यते नायते इत्यत्रापि परिमाणमित्यनुवर्त्तते। अनित्यमिति पूर्व्वेणान्वितं तथाचानित्यं परिमाणं संख्याजन्यं परिमाणजन्यं प्रचयजन्यञ्चेत्यर्थः। तत्र संख्याजन्यमुदाहरति द्व्यणुकादाविति। द्व्यणुकस्य त्रसरेणोश्च परिमाणं प्रति परमाणुपरिमाणं द्व्यणुकादिपरिमाणं वा न कारणं परिमाणस्य स्वसमानजातीयोत्कृष्टपरिमाणजनकत्वात् द्व्यणुकादिपरिमाणन्तु परमाणुत्वापेक्षया नोत्कृष्टं त्रसरेणुपरिमाणन्तु न सजातीयं अतः परमाणौ द्वित्वसंख्या द्व्यणुकपरिमाणस्य द्व्यणुके त्रित्वसंख्या च त्रसरेणुपरिमाणस्यास्समवायिकारणमित्यर्थः। परिमाणजन्यमुदाहरति परिमाणं घटादाविति परिमाणजं कपालादि परिमाणजन्यम्। प्रचयजन्यमुदाहर्त्तुं प्रचयं निर्व्वक्ति प्रचय इति अर्थात् प्रचयस्य नचावयविनाशः कथं परिमाणनाशकः असत्यप्यवयविनि त्रिचतुरपरमाणुविश्लेषे तदुपचये चावयविनः प्रत्यभिज्ञानेऽपि परिमाणान्तरस्य प्रत्यक्षसिद्धत्वादिति वाच्यम्। परमाणुविश्लेषे द्व्यणुकस्य नाशोऽवश्यमभ्युपेयस्तन्नाशे च द्व्यणुकनाशः एवं क्रमेण महावयविनो नाशस्यावश्यकत्वात् अति च नाशकेऽनभ्युपगममात्रेण नाशस्य अपवदितुमशक्यत्वात् शरीरादावयवोपचये असमवायिकारणनाशस्यावश्यकत्वादवयविनाशः आवश्यकः न च पटविनाशेऽपि तन्त्वन्तरसंयोगात् परिमाणाधिक्यं स्यादिति वाच्यं तत्रापि वेमाद्यभिघातेन समवायिकारणतन्तुसंयोगनाशात् पटनाशस्यावश्यकत्वात् किञ्च तन्त्वन्तरस्य तत्पटावयवत्वे पूर्व्वं तत्पट एव न स्यात् तत्तन्तुरूपकारणाभावात् तत्तन्तोरवयवत्वाभावे च न तेन परिमाणाधिक्यं संयुक्तद्रव्यान्तरवत् तस्मात्तत्र तन्त्वन्तरसंयोगे सति पूर्व्वपटनाशस्ततः पटान्तरोत्पत्तिरित्यवश्यं स्वीकार्य्यम्। अवयविनः प्रत्यभिज्ञानन्तु सादृश्येन दीपकलिकादिवत् न च पूर्व्वतन्तव एव तन्त्वन्तरसङ्कारात् पूर्व्वपटे सत्येव पटान्तरारम्भमिति वाच्यम् मूर्त्तयोः समानदेशवृत्तिविरोधात् एकदा नानाद्रव्यस्य तत्रानुपलम्भ बाधितत्वाच्च पूर्व्वद्रव्यस्य प्रतिबन्धकस्य विनाशे द्रव्यान्तरोत्पत्तिरित्यवश्यमभ्युपेयत्वात्॥" इति सिद्धान्तमुक्तावली॥)

परिमार्ग्य, त्रि, (परि+मृज्+ण्यत्। "चजोः कु घिण्ण्यतोः।" ७। ३। ५२। इति जस्यगः। "मृजेर्वृद्धिः।" ७। २। ११४। इति वृद्धिः।) परिशोधनीयम्॥

परिमार्जनं, क्ली, (परि+मृज्+ल्युट् ततो वृद्धिः।) खाद्यभेदः। मधुमस्तकम्। यथा, शब्दचन्द्रिका।
"मधुतैलघृतैर्म्मध्ये वेष्टिताः समिताश्च ये।
मधुमस्तकमुद्दिष्टं तस्याख्या परिमार्ज्जनम्॥"
परिशोधनञ्च॥

परिमित, त्रि, (परि+मा+क्तः। परितो मितं वा।) युक्तम्। इति त्रिकाण्डशेषः॥ परिमाणविशिष्टम्। यथा, उद्भटः।
"द्रविणं परिमितमधिक-
व्ययिनं जनमाकुलीं कुरुते।
क्षीणाम्बुलमिव पीन-
स्तनजघनायाः कुलीनायाः॥"

परिमेय, त्रि, (परिमीयते इति। परि+मा+"अचो यत्।" ३। १। ९७। इति यत्। "ईद्यति।" ६। ४। ६५। इति ईत् ततो गुणः।) परि-

मागविशिष्टम्। परिमाणयम्। परिमाणोचयम्। (यथा, रघुः। १। ६७।
"माभूदाश्रमपीडेति परिमेयगुरुःनरौ।
अनुभावविशेषान्तु संभावयितुमीश्वरौ॥")
परिमोक्षः, पुं. (परितो मोक्षः परित्यागः।) मलत्यागः। यथा, श्रीभागवते २। ६। १०।
"पाषण्डमस्य भिक्षस्य परिमोक्षस्य नारद!।
हिंसाया निर्ऋतेर्मृत्योर्निरयस्य मुखं स्मृतम्॥"
"परिमोक्षस्य मलत्यागस्य। पायुरिन्द्रियं मुखं स्थानम्। निर्ऋतेरलक्ष्म्याः।" इति तट्टीकायां श्रीधरस्वामी॥ * ॥ परिवाणम्। यथा, विष्णुधर्म्मोत्तरे।
"सर्व्वाद्भुतानां परिमोचकारि
संपूजनं देववरस्य विष्णोः।"
इति तिथ्यादितत्त्वम्॥
(विमुक्तिः। यथा, महाभारते। १। २। १६०।
"कर्णस्य परिमोक्षोऽत्र कुण्डलाभ्यां पुरन्दरात्॥")
परिमोषी, [न्] त्रि, (परिमुष्णातीति। परि+मुष्+णिनिः।) परिमोषणशीलः। चौरः। (इति हेमचन्द्रः। ३। ४६॥)
परिरम्भः, पुं, (परिरम्भते इति। परि+रभि+घञ्। "रभेरशब्लिटोः।" ७। १। ६३। इति नुम्।) आलिङ्गनम्। इत्यमरः। ३। २। ३०॥ (यथा, गीतगोविन्दे। ५। ७।
"ध्यायंस्त्वामनिशं जपन्नपि तवैवालापमन्त्रावलीं
मय्यस्त्वत्कुचकुम्भनिर्भरपरीरम्भोत्सवं वाञ्छति॥")
परिवत्सरः, पुं. वत्सरः। इति जटाधरः॥ वत्सरविशेषः। यथा, मत्स्यपुराणे।
"षष्ट्यब्दान् पञ्चभिः शेषान् समाद्यादिषु वत्सराः।
सम्यग्रीत्यानुपूर्व्याच्च तथोदापूर्व्वका मताः॥"
"परिपूर्व्वे तथादानं यवानाच्च द्विजोत्तमाः॥"
इति विष्णुधर्म्मोत्तरम्॥
परिवर्ज्जनं, क्ली, (परिवर्ज्यते.परित्यज्यते प्राणैर्येन। परि+वृज्+णिच्+ल्युट्।) मारणम्। इत्यमरः। २।८।११४॥ (भावे ल्युट्।) परित्यागः। यथा, उद्भटः।
"गोष्ठी न दोषो मथुराङ्गनानां
धर्म्मस्य कार्य्यस्य हि रीतिरेषा।
विपर्य्ययो येन कृतः स्वपित्रो-
स्तस्योपपत्नीपरिवर्ज्जनं किम्॥"
परिवर्ज्जनीया यथा, कौर्म्मे उपरिभागे १५ अः।
"एकशय्यासनं पंक्तिभाण्डपक्वान्नमिश्रणम्।
याजनाध्ययने योनिस्तथैव सहभोजनम्॥
सहाध्यायस्तु दशमः सहयाजनमेव च।
एकादश समुद्दिष्टा दोषाः साङ्कर्य्यसङ्गिताः॥
समीपे चाप्यवस्थानात् पापं संक्रमते दृशाम्।
तस्मात् सर्व्वप्रयत्नेन सांकर्य्यं परिवर्ज्जयेत्॥"
"यस्मिन्देशे न सम्मानो न प्रीतिर्न च बान्धवाः।
न च विद्यागमः कश्चित्तं देशं परिवर्ज्जयेत्॥"
इति चाणक्यम्॥
"नाकृत्यं वालिशं चक्रमयोद्वारं विषं जटम्।
शूलमक्षरसंयुक्तं दूरतः परिवर्ज्जयेत्॥
कुभार्य्याञ्च कुमित्रञ्च कुराजानं कुवान्धवम्।
कुवस्तुञ्च कुदेशञ्च दूरतः परिवर्ज्जयेत्॥"
इति गरुडपुराणे ११३ अध्यायः॥
("यस्य वै भोयमाणस्य रुजत्यूर्द्धमुरोऽग्रगम्।
अन्नञ्च वमते भुक्तं स्थितवापि न जीर्य्यति॥
बलञ्च हीयते यस्य क्षणा चाभिप्रवर्द्धते।
जायते हृदि शूलञ्च तं भिषक् परिवर्ज्जयेत्॥"
इति चरकेणेन्द्रियस्थाने षष्ठेऽध्याय उक्तम्॥)
परिवर्त्तः, पुं, (परिवर्त्तनमिति। परि+वृत्+भावे घञ्।) विनिमयः। (यथा, रामायणे। २। १०५। २५।
"क्षय्यन्तामुत्सवं दृष्ट्वा नवं नवमिवागतम्।
ऋणानां परिवर्त्तेन प्राणिनां प्रागसंचयः॥")
कूर्म्मराजः। अपवर्त्तनम्। इति मेदिनी॥ युगान्तः। इति हेमचन्द्रः॥ ग्रन्थविच्छेदः। इति जटाधरः॥ स्वपुत्रस्य दुःसहस्योरसेन कलिकत्यानिर्म्माणिगर्भजाताऽपुत्रान्तर्गतद्वितीयपुत्रः। (यथा, मार्कण्डेये। ५१। २।
"अष्टौ कुमाराः कन्याश्च तथाष्टावतिभीषणाः।
दन्ताक्षिस्तयोक्तिश्च परिवर्त्तस्तथापरः॥"
तन्नामनिरुक्तिर्यथा तत्रैव १४ श्लोके।
"अन्यगर्भे परान् गर्भान् सदैव परिवर्त्तयन्।
गतिमाप्नोति वाक्यञ्च विवत्सोरन्यदेव यत्॥
परिवर्त्तकसंज्ञोऽयं तस्यापि सितसर्षपैः।
रक्षोघ्नमन्त्रजप्यैश्च रक्षां कुर्व्वीत तत्त्ववित्॥")
तस्य पुत्रयोः कर्म्मादि यथा.—
"परिवर्त्तसुतौ द्वौ तु विरूपाक्षितौ द्विज!।
तौ तु वृक्षाद्रिपरिखाप्राकाराम्भोधिसंश्रयौ॥
गुञ्जिन्नया परिवर्त्तन्तौ कुरुतः पादपादिषु।
क्रोष्टुके। परिवर्त्तः स्यान्नर्भस्यान्योदरात्ततः॥
न वृक्षञ्चैव नैवाद्रिं न प्राकारं पयोनिधिम्।
परिखां न समाक्रामेदबला गर्भधारिणी॥"
इति मार्कण्डेयपुराणे। ५१। ६२—६४॥
परिवर्त्तनं, क्ली. (परि+वृत्+ल्युट्।) परिवर्त्तः। तत्पर्य्यायः। परिदानम् २ विनिमयः ३ नैमेयः ४ व्यतिहारः ५ परावर्त्तः ६ वैमेयः ७ विमयः ८। इति हेमचन्द्रः॥ (यथा, रघुः। १६। १३।
"अङ्कमङ्कपरिवर्त्तनोचिते
तस्य नित्यतरुणत्वतासुमे।
वल्कली च वृद्धयङ्गमन्वना
वल्गुवागपि च वामलोचना॥")
परिवर्त्तिका, स्त्री, मेढ्रजातक्षुद्ररोगविशेषः। तल्लक्षणमाह।
"मर्द्दनात् पीड़नाद्वापि तथैवाप्यभिघातनात्।
मेढ्रचर्म्म यदा वायुर्भजते सर्व्वतश्चरन्॥
तदा वातोपसृष्टन्तु तच्चर्म्म परिवर्त्तते।
सवेदनं तदाहञ्च पाकञ्च व्रजति क्वचित्॥
मर्म्मरुग्घात् कोषस्तु ग्रन्थिरूपेण लम्बते।
मारुतागन्तुसम्भूतां विद्यात्तां परिवर्त्तिकाम्।
सकण्डुः कठिना वापि सैव श्लेष्मसमन्विता॥"
अस्यां वातजायामपि पित्तानुबन्धो वोद्दयो दाहपाकभावात्। कोषः चर्म्मकोषः॥ * ॥
अथ तस्याश्चिकित्सा।
"परिवृत्तं घृताभ्यक्तं सुस्विन्नमुपनाहयेत्।
चिराबं पक्वराबं वा वातघ्नैः शाल्वणादिभिः।
ततोऽभ्यज्य घृतैश्चर्म्म पाटयेत् पीड़येन्मणिम्
प्रविष्टे चर्म्मणि मणौ स्वेदयेदुपनाहयेत्॥
दद्याद्धातहरान् वस्तीन स्निग्धान्यन्नानि भोजयेत्।"
इति भावप्रकाशः॥
परिवसथः, पुं, (परितो वसन्त्यत्र। परि+वस+उपसर्गे वसेरिति अथच्।) ग्रामः। इति हेमचन्द्रः। ४। २७॥
परिवहः, पुं, (परि सर्व्वतोभावेन वहतीति। परि+वह्+अच्।) सप्तवायुन्तर्गतषष्ठवायुः। स तु सुवहवायोरुपरिस्थितः। (यथा, सिद्धान्तशिरोमणौ।
"भूवायुरावह इह प्रवहस्तदूर्द्ध्वः
स्याद्वृहत्तदनुसंवहसंज्ञकश्च।
अन्यस्ततोऽपि सुवहः परिपूर्व्वकाख्यात
वाहः परावह इमे पवनाः प्रसिद्धाः॥")
परिवादः, पुं, (परिसर्व्वतो दोषोल्लेखेन वादः कथनम्। परि+वद्+भावे घञ्।) अपवादः। (यथा, महानिर्व्वाणतन्त्रे। १। ४२।
"नीचसंसर्गनिरताः परवित्तापहारकाः।
परनिन्दापरद्रोह-परिवादपरा खलाः॥"
परि+वद्+णिच्+करणे घञ्।) वीणावादनवस्तु। इति मेदिनी॥
परिवादकः, त्रि, (परिवदतीति। परि+वद्+ण्वुल्।) परिवादकर्त्ता। इति शब्दरत्नम्॥
परिवादिनी, स्त्री, (परिवदति स्वरानिति। परि+वद्+"सुपि जातौ णिनिस्ताच्छील्ये।" ३। २। ७८। इति णिनिः स्त्रियां ङीप्।) सप्ततन्त्रीयुक्तवीणा। इत्यमरः॥ (यथा, माघे। ६। ८।
"कलतया वचसः परिवादिनी
स्वरजिता रजितावशमाययुः॥")
परिवादविशिष्टा च॥
परिवादी, [न्] त्रि, (परिवदतीति परिवद्+णिनिः शीलमस्य वा। परि+वद्+शीलार्थे कर्त्तरि णिनिः।) परिवादकर्त्ता। (यथा, महाभारते। ७। ७१। २६।
"साधूनहत्यतां ये च ये चापि परिवादिनाम्॥"
परिवादो निन्दा विद्यतेऽस्य।) परिवादविशिष्टः। इति परिवादशब्दादस्त्यर्थे इनिः॥
परिवापः, पुं, (परिसर्व्वतः उप्यते इति। परि-वप्+घञ्।) पर्य्युप्तिः। वपनम्। जलस्थानम्। परिच्छदः। इति मेदिनी। पे २५॥
परिवापनं, क्ली, (परि+वप्+णिच्+ल्युट्।) मुण्डनम्। इति हेमचन्द्रः॥
परिवापितं, त्रि, (परिवाप्यते स्म। परि+वप्+णिच्+क्त।) मुण्डितम्। इत्यमरः। ३। १। ८५॥
परिवारः, पुं, (परिवियतेऽनेन। परि+वृ+करणे घञ्।) परिजनः। (यथा, रघुः। ६। १०।
"मनुष्यवाह्यं चतुरश्यान-
मध्यास्य कन्या परिवारशोभि।

विवेश मध्यान्तरराजमार्गं
पतिंवरा कृष्णविवाहवेषा ॥")
खड्गकोषः। परिच्छदः। इति मेदिनी। रे। २८० ॥

परिवाहः, पुं, (पर्य्यह्यते लग्नादिकं येन। परि+वह्+घञ्।) परीवाहः। जलोच्छ्वासः। इत्यमरटीकायां रमानाथः॥ (यथा, रघुः। ८।७४।
"स विवेश पुरीं तया विना
जलदापायशशाङ्कदर्शनः।
परिवाहमिवावलोकयन्
स्वसुचः पौरवधूसुखास्रुषु ॥")

परिविक्तः, पुं, (परि+विच्+क्तः।) परिवित्तिः। यथा, उद्वाहतत्त्वे।
"ज्येष्ठेऽनिर्विष्टे कनीयान् निर्विशन् परिवेत्ता भवति परिविन्नो ज्येष्ठः परिवेदनीया कन्या परिदायी दाता परिकर्त्ता याजकः ते सर्व्वे पतिताः॥"

परिवित्तिः, पुं, (परिवर्জ্জनं विन्दति लभते इति। परि+विद्+क्तिच्।) परिवेत्तृज्येष्ठः। क्षतविवाहस्यानूढ़ज्येष्ठभ्राता। इत्यमरः।२।७।५६॥ (यथा, मनुः। ३। १७१।
"दाराग्निहोत्रसंयोगं कुरुते योऽग्रजे स्थिते।
परिवेत्ता स विज्ञेयः परिवित्तिस्तु पूर्व्वजः॥")

परिविन्दन्, [त्] पुं, (परित्यज्य ज्येष्ठं भ्रातरं विन्दति अग्न्याधानभार्य्यादिकं लभते इति। विद्+शतृ।) परिवेदनकर्त्ता। यथा,—
"देशान्तरस्थस्त्रीवैकल्यज्ञानसहोदरान्।
वेश्याभिसक्तपतितमूढ़तुल्यातिरोगिणः॥
जड़मूकान्धबधिरकुब्जवामनकुष्ठकान्।
अतिवृद्धानभार्य्यांश्च क्षयिसक्तान् नृपस्य च॥
धनवृद्धिप्रसक्तांश्च कामतः कारिणस्तथा।
कुलटोन्मत्तचौरांश्च परिविन्दन् न दुष्यति॥"
इत्युद्वाहतत्त्वे छन्दोगपरिशिष्टम्॥

परिविष्णु, क्ली, सर्व्वतो विष्णुः। विष्णुं विष्णुं परि इत्यव्ययीभावसमासे दुर्गादासः॥

परिवृंहितं, त्रि, वृहिधातोः कर्म्मणि क्तः। (ततः परितो वृंहितमिति।) सर्व्वतोभावेन दीप्तिविशिष्टम्। सर्व्वतोभावेन करिगर्জ্জितम्। सर्व्वतोभावेन वृद्धिविशिष्टम्। सर्व्वतोभावेन ध्वनिविशिष्टम्॥

परिवृढ़ः, त्रि, (परिसर्व्वतोभावेन वृंहति वर्द्धते इति। वृहि वृद्धौ+कर्त्तरि क्तः। निपातनात् हकारलोपो निष्ठातस्य ढ़त्वञ्च।) अधिपः। प्रभुः। इत्यमरः। ३। १। ११॥ (यथा, राजतरङ्गिण्याम्। ३। २८२।
"जगत्परिवृढ़ः प्रौढ़प्रीतिस्तं स फलार्थिनम्।
ज्ञात्वा प्रादुष्कृतवपुस्ततो भूयोऽप्यभाषत॥")

परिवृतः, त्रि, (परिसर्व्वतोभावेन वृतः।) आवृतः। वेष्टितः। यथा,—
"अवहारान् नृपः पश्येत् सभ्यैः परिवृतोऽन्वहम्।"
इति मिताक्षरा॥

परिवृत्तिः, पुं, (परिवर्জ্জने वर्त्तते इति। परि+वृत्+क्तिच्।) परिवित्तिः। इति हेमः॥ (परि+वृत्+भावे क्तिन्। परिवर्त्तनम्। यथा, महाभारते। १४। १८। २६।
"तस्य कालपरीमाणमकरोत् स पितामहः।
भूतेषु परिवृत्तिञ्च पुनरावृत्तिमेव च॥"
अर्थालङ्कारविशेषः। यथा, साहित्यदर्पणे। १०। १०५।
"परिवृत्तिर्विनिमयः समन्यूनाधिकैर्भवेत्॥"
क्रमेणोदाहरणं यथा,—
"दत्त्वा कटाक्षमेणाक्षी जग्राह हृदयं मम।
मया तु हृदयं दत्त्वा गृहीतो मदनज्वरः॥"
अत्र प्रथमेऽर्द्धे समेन द्वितीयेऽर्द्धे न्यूनेन॥)

परिवृढ़ितं, त्रि, सर्व्वतोभावेन वृद्धिविशिष्टम्। सर्व्वतोभावेनोद्यमविशिष्टम्। इति वृहधातोः कर्म्मणि क्तप्रत्ययनिष्पन्नम्॥

परिवेत्ता, [तृ] पुं, (परित्यज्य ज्येष्ठं भ्रातरं विन्दति भार्य्यामग्न्यादिकं वा लभते इति। विद् लाभे+"खुलृचौ।" ३। १। १३३। इति तृच्।) अनूढ़ज्येष्ठे क्षतविवाहकनिष्ठः। इत्युद्वाहतत्त्वम्॥ (यथा, मनुः। ३। १७१।
"दाराग्निहोत्रसंयोगं कुरुते योऽग्रजे स्थिते।
परिवेत्ता स विज्ञेयः परिवित्तिस्तु पूर्व्वजः॥")

परिवेदनं, क्ली, (परि+विद्+ल्युट्।) विवाहः। अग्न्याधानम्। यथा,—
"क्लीवे देशान्तरगते पतिते भिक्षुकेऽपि वा।
योगशास्त्राभियुक्ते च न दोषः परिवेदने॥"
इत्युद्वाहतत्त्वे ज्ञातातपः॥
सर्व्वतोभावेन ज्ञानम्। (यथा, मत्स्यपुराणे। १४। १६। १२।
"स हि धर्म्मः सुपर्य्याप्तो ब्रह्मणः परिवेदने।
न शक्यं तत्त्वतो भूयस्तथा वक्तुमशेषतः॥")
सर्व्वतोभावेन विचारणम्। सर्व्वतोभावेन विद्यमानत्वम्। सर्व्वतोभावेन लाभः॥

परिवेदिनी, स्त्री, (परिवेदोऽस्त्यस्यामिति। इनि ङीप् च।) परिवेत्तुः स्त्री। इति हेमचन्द्रः॥

परिवेदनीया, स्त्री, (परिविद्यते या। परि+विद् अनीयर्।) अनूढ़ज्येष्ठे तत्कनिष्ठेन विवाहिता कन्या। अस्य प्रमाणं परिदायिशब्दे द्रष्टव्यम्॥

परिवेषः, पुं, (परितो विश्यतीति। परि+विश्+घञ्।) वेष्टनम्। परिधिः। इति मेदिनी। षे। ३७॥
"वातेन मण्डलीभूताः सूर्य्याचन्द्रमसोः कराः।
मालाभा व्योम्नि तनुते परिवेषः प्रकीर्त्तितः॥"
इति भरतधृतसाहसाङ्कः॥

परिवेषः, पुं, (परितो विश्यते व्याप्यतेऽनेन। विशिरौ व्यापने+घञ्।) परिवृतिः। परिधिः। (बृहत्संहितायां ३४ अध्याये तल्लक्षणादिकमुक्तम्। तद्यथा,—
"सम्मूर्च्छिता रवीन्दोः किरणाः पवनेन मण्डलीभूताः।
नानावर्णाकृतयस्तन्वन्ते व्योम्नि परिवेषाः॥
ते रक्तनीलपाण्डुरकापोताभाभश्चलहरिसुक्लाः।

इन्द्रयमवरुणनिर्ऋतित्विषसनेशूपितामहाग्नि-
क्षताः॥
घनदं करोति मेचकमन्योन्यगुणाश्रयेण
चापन्ये।
प्रविलीयते मुहुर्मुहुरल्पफलः सोपि वायुकृतः॥
चापग्निखिरजततैलक्षीरजलाभः स्वकाल-
सम्भूतः।
अविकलवृत्तः स्निग्धः परिवेषः शिवमभिवदति॥
सकलगगनानुचारी नैकाभः घृतजसन्निभो
रूक्षः।
असकलशकटशरासनशृङ्गाटकवत्स्थितः पापः॥
शिखिगलसमेऽतिवर्षं बहुवर्णे नृपवधो भयं धूम्रे।
हरिचापनिभे युद्धान्यशोकसुमप्रभे चापि॥
वर्णैनैकेन यदा बहुलः स्निग्धः चिरात्रैकाकीर्णैः।
स्वर्त्ता सद्यो वर्षं करोति पीतश्च दीप्तार्कः॥
दीप्तविहङ्गस्तनितः कलुषः सन्ध्याश्रयोत्थितो-
ऽतिमहान्।
भयशस्त्रक्षुद्दुल्काद्यैर्हतो नृपं हन्ति शस्त्रेण॥
प्रतिदिनमर्कोहिमांशोरहर्निशं रक्तयोर्नरेन्द्रवधः।
परिविष्टयोरभीक्ष्णं लग्नास्तनभःस्थयोस्तद्वत्॥
सेनापतेर्भयकरो द्विमण्डलो नातिशस्त्रकोप-
करः।
त्रिप्रभृतिशस्त्रकोपं युवराजभयं नगररोधम्॥
वृष्टिस्त्रिभेन मासेन विग्रहो वा ग्रहेन्दुभानिरोधे।
होराजन्माधिपयोर्जन्मर्क्षे वासुभो राज्ञः॥
परिवेषमण्डलगतो रवितनयः क्षुद्रधान्यनाश-
करः।
जनयति च वातवृष्टिं स्थावरकृमिक्षत्रिहन्ता च॥
भौमे क्षुमारबलप्रतिसैन्यानां विग्रहोऽग्निशस्त्र-
भयम्।
सौम्ये परिवेषगते पुरोहितामात्यनृपपीड़ा॥
मन्त्रिस्थावरलेखकपरिवृद्धिश्चन्द्रजे सुवृष्टिश्च।
शुक्रे याचित्रक्षत्रियराज्ञां पीड़ा प्रियं चान्नम्॥
क्षुद्रनलघ्वल्पनराधिपशस्त्रेभ्यो जायते भयं कैतौ।
परिविष्टे गर्भभयं राहौ व्याधिर्नृपभयञ्च॥
युद्धानि विज्ञानीयात् परिवेषाभ्यन्तरे द्वयो-
र्नृपयोः।
दिवसकृतः शुक्लिनो वा क्षुद्वृष्टिभयं त्रिषु
प्रोक्तम्।
याति चतुर्षु नरेन्द्रः सामात्यपुरोहितो वशं
नृपतेः।
प्रलयमिव विद्धि जगतः पश्चादिषु मण्डलस्थेषु॥
ताराग्रहस्य कुर्य्यात् पृथगेव समुत्थितो नरेन्द्र-
वधम्।
नक्षत्राणामथवा यदि केतोर्नोदयो भवति॥
विप्रक्षत्रियविट्शूद्रहा भवेत् प्रतिपदादिषु
क्रमशः।
श्रेणीपुरकोशानां पञ्चम्यादिष्वशुभकारी॥
युवराजस्याष्टम्यां परतस्त्रिषु पार्थिवस्य दोष-
करः।
पुररोधो द्वादश्यां सैन्यक्षोभस्त्रयोदश्याम्॥
नरपतिपत्नीपीड़ां परिवेषोऽभ्युत्थितश्चतुर्दश्याम्।

कूष्माण्डं व्यञ्जनार्थं पौरं मनुजाधिपस्येव ॥
नागरकानामम्लसमिता यामिनाथ वाडव्या।
परिवेषमधरेद्या जिह्वेद्या छन्दसारालाम् ॥
रक्तः श्यामो रुक्षश्च भवति येषां परादेय-
स्नेयाम्।
स्निग्धः श्वेतो दुर्लभमान् येषां भागो जय-
स्नेयान्॥")

परिवेषणम्। इति हेमचन्द्रः॥

परिवेषकः, पुं, (परिवेषयतीति। परि+विष्+ण्वुल्।) परिवेष्टा। परिवेषणकर्त्ता। तस्य लक्षणं यथा,—

"श्वेतस्वच्छनखोर्ध्वितः सुवसनः स्रग्वी प्रसन्नाननः
सद्वाक्यः सुभगः प्रसन्नहृदयः श्रीकान्तपूजारतः।
सम्मिश्रेश्वरः सकार्य्यनिपुणः प्रौढ़ो वदान्यः शुचि-
र्विप्रो वा परिवेषकस्तु कुलजश्चान्योऽपि वा
भवेत्॥"

इति पाकरात्नेश्वरः॥

परिवेषणं, क्ली, (परि+विष्+ल्युट्।) वेष्टनम्। भोजनार्थं भोजनपात्रे व्यञ्जनादेर्दानम्। अत्र श्राद्धे परिवेषणं मनुः।

"पात्रिभ्यामूपसंगृह्य स्वयमन्नस्य वर्द्धितम्।
विप्राणामेके पितृन् ध्यायन् शनकैरुपनिक्षिपेत्॥
अन्नस्येति तृतीयार्थे षष्ठी वर्द्धितं प्रवर्द्धितं पात्रमिति शेषः। उपनिक्षिपेत् परिवेषणार्थम्। तथा च पाकस्थाल्या आकृष्य प्रथमं भोजनपात्रे न देयं किन्तु स्थान्यादिकं पात्रिभ्यां पात्रसमीपे भूमौ संस्थाप्य पश्चात् पात्रिभ्यां पात्रान्तरिताभ्यां श्राद्धे परिवेषयेत्। उभाभ्यामपि हस्ताभ्यामाकृष्य परिवेषयेदिति मत्स्यपुराणात्। यत्तु श्राद्धे परिवेषणन्तु दक्षिणपाणिभ्यामेवेत्यानभिधानादिति मैथिलोक्तं तन्न। रूक्षेण पाणिना दत्तं श्रद्दासं न भक्षयेदित्यादि पुराणोक्तेन रूक्षपाणिदत्तश्रद्धादत्तभक्षणनिषेधेन तस्यापरिवेषकस्यापि निषिद्धत्वात् पात्रिभ्यामपि पात्रान्तरितं कृत्वा देयम्।
एकहस्तात् वै स्नेहा लवणं चञ्चलानि च।
दातारं नोपतिष्ठन्ते भोक्ता भुङ्क्ते च किल्बिषम्॥
तस्मादुभाभ्यां देयं पर्णेनाथ दर्भेण वा।
श्रद्दासं तु दक्षेण पाणिना कदाचन॥
इति वचनेऽपि सामान्यतोऽभिधानात्। विष्टभ्नितरदक्षिणाभ्यामेवेयम्। मनुः।
गुडांश्च सूपशाकांश्च पयो दधि घृतं मधु।
निर्णेजेदुक्षतः सम्यग्भूमावेव समाहितः॥
आसनं पात्रयोश्चैव भोक्तुर्दक्षिणतो न्यसेत्।
अन्नं भोज्यञ्च विविधं फलानि च वनानि च॥
एतानि चैव सर्वाणि पात्राणि सुरभीणि च।
उपस्पृश्य च तत्र सर्वं प्रयतः सुसमाहितः॥
परिवेषयेत पश्चात् सुधान् सर्वान् प्रयोदयन्।
गुणान् उपस्कुरुतानि भूमावेव न तु यज्ञवाटि-
यागादि श्राद्धादि आचारादि निर्दिशेत्।" इति मलमासतत्त्वम्।

परिवेष्टिका, स्त्री, (परि+विष्+ण्वुल्+टाप्। अत इत्वम्।) परिवेषकर्त्री। तस्या लक्षणं यथा,—

"स्नाता विशुद्धवसना नवधूपिताङ्गी
कर्पूरसौरभसुरभी नयनाभिरामा।
बिम्बाधरा शिरसि वसुसुगन्धिपुष्पा
मन्दस्मिता जिनिरुक्तां परिवेष्टिका स्यात्॥"

इति पाकरात्नेश्वरः॥

परिवेष्टितं, त्रि, सर्व्वतोभावेन वेष्टितम्। तत्पर्य्यायः। परिक्षिप्तम् २ वलयितम् ३ निवृतम् ४ परिष्कृतम् ५ परीतम् ६। इति हेमचन्द्रः॥

परिव्याधः, पुं, (परि सर्व्वतोभावेन विध्यतीति। परि-व्यध्+घञ्+"व्यादयधेति।" ३। १। १२१। इति सः।) व्यम्बुवेतसः। इत्यमरः। २। ४। ६०,६०॥

परिव्रज्या, स्त्री, (परि+व्रज+भावे क्यप्। स्त्रियां टाप्।) तपस्या। इति हेमचन्द्रः। २। ८१। (इतस्ततो भ्रमणम्। यथा, मनुः। १०। ५२।

"वासांसि मलचेलानि भिन्नभाण्डेषु भोजनम्।
कार्ष्णायसमलङ्कारः परिव्रज्या च नित्यशः॥"

"लौहवलयादि चालङ्करणं सर्व्वदा च भ्रमण-शीलत्वम्॥" इति कुल्लूकभट्टः॥)

परिव्राजः, पुं, (परित्यज्य सर्व्वान् विषयभोगान् गृहाश्रमाद् व्रजतीति। परि+व्रज्+संज्ञायां कर्त्तरि घञ्।) परिव्राट्। इत्यमरटीकायां रमानाथः॥

परिव्राजकः, पुं, (परिव्राज+स्वार्थे कन्। परिव्रजतीति। परि+व्रज्+ण्वुल् वा।) परिव्राट्॥ (यथा, गोः रामायणे। ३। ५५। २।

"स परिव्राजकच्छद्मा महाकायशिरोधरः।
प्रतिवेदे स्वकं रूपं राक्षसो राक्षसाधिपः॥")

परिव्राजिः, स्त्री, (परि+व्रज+क्विप्+ङीप्।) श्रावणी। इति राजनिर्घण्टः॥ चुलुकुडी इति भाषा॥ (श्रावणीमण्डूकपर्णीगुडूच्योरस्या विशेषो ज्ञेयः॥)

परिव्राट्, [ज्] पुं, (परित्यज्य सर्व्वं विषय-भोगं गृहस्थाश्रमाद् व्रजति गच्छतीति। परि+व्रज्+क्विप् टीत्वञ्च।) चतुर्थाश्रमी। तत्पर्य्यायः। भिक्षुः २ कर्म्मन्दी ३ पाराशरी ४ मस्करी ५। इत्यमरः। २। ७। ४२। सन्न्यासी ६ अमरः ७। इति जटाधरः॥ परिव्राजकः ८ पराशरी ९ व्रजकः १०। इति शब्द-रत्नावली॥ तस्य लक्षणं यथा, गरुडपुराणे।

"सर्व्वारम्भपरित्यागो भैक्ष्याशं प्रथमलता।
नित्यमेकाकितादीनसमता सर्व्वजन्तुषु॥
प्रियाप्रियपरित्यक्तं सुखदुःखविवर्जितम्।
संत्यक्ताभ्यन्तरं शौचं सुखदुःखविवर्जितम्॥
सर्व्वेन्द्रियसमाधानं धारणा ध्यानलिप्सता।
भावसंशुद्धिरित्येष परिव्राड्वर्य उच्यते॥"

परिव्रीतः, त्रि, (परिव्रियतेऽसौ। परि+व्रि+कर्त्तरि क्तः।) सर्व्वतोभावेन वृतः। यथा,

"मुक्तं मुखेस्मितमपि प्रतिचिन्तनीय-
मालापितोऽपि दुरितः परिव्रीतः।

व्यङ्गे स्थितापि युवतिः परिरक्षणीया
शास्त्रे नृपे च युवतौ च कुतो वञ्चित्वम्॥"

रघुवटः॥

परिशिष्टं, क्ली, (परितः शिष्टः। शिष्+क्तः।) परिशेषविशिष्टम्। अवशिष्टार्थबोधकग्रन्थः। इति हेमचन्द्रः। २। १७१॥ (यथा, छान्दोग-परिशिष्टम्। गृह्यपरिशिष्टमित्यादि॥)

परिशुष्कं, क्ली, (परितः शुष्कम्। शुष्+क्तः।) मांसभक्षणभेदः। यथा,—

"मांसं बहुघृतैर्भृष्टं सिक्तक्षेत्रासुना सह।
क्षीरकाद्यैः समायुक्तं परिशुष्कं तदुच्यते॥"

इति शब्दचन्द्रिका॥

सर्व्वतोनीरसे त्रि॥ (यथा, वैः रामायणे। २। ५६। ५।

"उपतप्तोदका नद्यः पल्वलानि सरांसि च।
परिशुष्कपलाशानि वनान्युपवनानि च॥")

परिशोधः, पुं, (परि+शुध्+भावे घञ्।) परि-शोधनम्। सर्व्वतोभावेन शुद्धिः॥

परिशोषः, पुं, (परि+शुष्+भावे घञ्।) सर्व्वतोभावेन शुष्कता। (यथा, गोः रामा-यणे। ४। १५। ३४।

"वायुर्कपरिपीतास्तुविषन्मानपङ्कजाः।
तड़ाग इव कालेन परिशोषं गमिष्यति॥")

परिश्रमः, पुं, (परि+श्रम्+घञ्। न वृद्धिः।) परिश्रान्तिः। तत्पर्य्यायः। श्रमः २ क्लमः ३ क्लेशः ४ प्रयासः ५ आयासः ६ आयामः ७। इति हेमचन्द्रः। २। २३३॥ (यथा, रघुः। १। ५८।

"तमानिष्यक्रियायान्त-रथक्षोभपरिश्रमम्।
पप्रच्छ कुशलं राज्ये राष्ट्याश्रमसुनिं सुनिः॥")

परिश्रयः, पुं, (परिश्रयत्यस्मिन् इति। परि+श्रि+"गरच्।" ३। ३। ५६। इति अच्।) सभा। (भावे अच्।) आश्रयः। इति मेदिनी। ये। १२२॥

परिश्रान्तः, त्रि, (परि+श्रम+कर्त्तरि क्तः।) सर्व्वतोभावेन श्रान्तियुक्तः। (यथा, भट्टि-भारते। १। ४६। २६।

"परिश्रान्तो वयःस्थश्च परिक्षीणो जरान्वितः।
क्षुधितः स महारण्ये तदर्थं मनिमत्तमम्॥")

स्त्री। गायत्रीस्वरूपा भगवती। यथा, देवी-भागवते। १२। ६। ८३।

"पावनी पादसंस्पृष्टा पवनाशिनी।
प्रज्ञायति परिश्रान्ता पर्व्वतस्तमसंवृता॥")

परिश्रुतः, त्रि, (परि+श्रु+क्तः।) सर्व्वतोभावेन श्रवणविशिष्टः॥

परिश्रेणः, पुं, (परि+श्रिष्+भावे घञ्।) आश्लेषः॥

परिषत्, [द्] स्त्री, (परिसीदन्त्यस्याम्। परि+सद्+अधिकरणे क्विप्। "सदिरप्रतेः।" ८। ३। ६६। इति षत्वम्।) सभा। इत्य-मरः। २। ७। १५॥ (यथा, गोः रामा-यणे। ७। १३। १६।

"यादृशी परिषत् सीते ! दृतच्चायं तथाविधः ।
ध्रुवमद्यैव राजा मां यौवराज्येऽभिषेक्ष्यति ॥"
परिषच्च खलु द्विविधा, ज्ञानवती मूढ़परिषच्च, सैव द्विविधा सती त्रिविधा पुनरनेन कारणविभागेन सुहृत्परिषत्, उदासीनपरिषत्, प्रतिनिविष्टपरिषच्चेति । तत्र प्रतिनिविष्टायां परिषदि ज्ञानविज्ञानवचनप्रतिवचनशक्ति सम्पन्नायां मूढ़ायां वा न कथञ्चित् केनचित् सह जल्पो विधीयते । मूढ़ायान्तु सुहृत्परिषदि उदासीनायां वा ज्ञानविज्ञानमन्तरेणाप्यदीप्तयशसा महाजनबहिष्टेन सह जल्पो विधीयते । तद्विधेन च सह कथयता व्याविद्धदीर्घसूत्रसङ्कलैर्वाक्यदण्डकैः कथयितव्यम् । अतिहृष्टं सुहृर्मुहुरुपहसता परं रूपयता च परिषदमाकारैर्ब्रुवतश्चास्य वाक्यावकाशो न देयः । कष्टशब्दञ्च ब्रुवन् वक्तव्यो नोद्यत इति । अथवा पुनर्हीनो ते प्रतिज्ञेति पुनश्चाक्रयमाणः प्रतिवक्तव्यः । परिसंवत्सरोभव ग्रिच्चख तावत् । पर्य्याप्तमेतावत्ते । सकृदपि हि पारिप्लविकं निहतं निहतमाहुरिति । नास्य योगः कर्त्तव्यः कथञ्चिदप्येवं श्रेयसा सह विग्रह्य वक्तव्यमित्याहुरित्येके । नत्वेवं व्यायसा सह विग्रहं प्रशंसन्ति कुशलाः । प्रत्यवरेण तु सह समानाभिमतेन वा विग्रह्य जल्पता सुहृत्परिषदि कथयितव्यम् । अथवाप्युदासीनपरिषदि अनवधानश्रवणज्ञानविज्ञानोपधारणवचनशक्तिसम्पन्नायां कथयता चावहितेन परस्य सादृगुण्यदोषवत्समवेक्षितव्यम् । समवेक्ष्य च यत्नेनं श्रेष्ठं मन्येत नास्य तत्र जल्पं योजयेत् अनाविज्ञतमयोगं कुर्व्वन् । यत्र त्वेनमवरं मन्येत तत्रैवैनमासु निगृह्णीयात् ।"
इति चरके विमानस्थानेऽष्टमेऽध्याये ॥)
परिषत्त्वं यथा, प्रायश्चित्तविवेके ।
"एकविंशतिसंख्याकैर्मीमांसान्यायपारगैः ।
वेदाङ्गकुशलैश्चैव परिषत्त्वं प्रकल्पयेत् ॥"
परिषद्, पुं, (परितः सीदतीति । परि + सद् + क्विप् । "सदिरप्रतेः ।" ८ । ३ । ६६ । इति षत्वम् ।) पारिषदः । अनुचरः । इति भरतमल्लिकरूपकोषः ॥
परिषद्यः, पुं, (परिषदमर्हतीति । परिषद् + यत् ।) परिषद्बलः । इति भरतमल्लिकरूपकोषः
परिषद्बलः, पुं. (परिषदस्यास्तीति । परिषद् + "रज्ञःकृञ्यासुतिपरिषदो वलच् ।" ५ । २ । ११९ । इति वलच् ।) सभासदः । पारिषदः । इति शब्दरत्नावली ॥ (यथा, भट्टिः । ४ । १२ ।
"प्रातीनव्यालदीप्राक्षः सुतनः परिपूजयन् ।
परिषद्बलाच्चहावक्षेराट नैकटिकायमान् ॥")
परिष्कन्दः, त्रि, (परिष्कन्दतीति । परि + स्कन्दिरौ गतिशोषणयोः + पचाद्यच् । "परेश्च ।" ८ । ३ । ७४ । इति षत्वम् ।) परिस्कन्दः । परपुष्टः । इत्यमरटीकायां रमानाथः ॥
परिष्कृतः, त्रि, (परि + स्कन्द + क्तः । दस्य तस्य च गः । "परेश्च ।" ८ । ३ । ७४ । इति षत्वे णत्वञ्च ।) परिस्कन्दः । इत्यमरटीकायां रायमुकुटः ॥
परिष्कारः, पुं, (परिष्क्रियतेऽनेन । परि + कृ + "सन्परिभ्यां करोतौ भूषणे ।" ६ । १ । १३७ । इति सुट् । "परिनिवीति ।" ८ । ३ । ७० । इति षत्वम् ।) अलङ्कारः । इत्यमरः । २ । ६ । १०१ ॥ संस्कारः । शुद्धिः ॥
परिष्कृतः, त्रि, (परिष्क्रियते स्म इति । परि + कृ + क्तः । "सन्परिभ्यामिति ।" सुट् । "परिनिवीति ।" ८ । ३ । ७० । इति षत्वम् ।) भूषितः । अलङ्कृतः । इत्यमरः । २ । ६ । १०० ॥ वेष्टितः । इति हेमचन्द्रः ॥ व्याहितसंस्कारः । इति वैद्यशब्दटीकायां भरतः ॥
परिष्कृतभूमिः, स्त्री, वेदिः । परिष्कृता यज्ञार्थं पशुबन्धनाय यज्ञपात्रासादनाय चाहितसंस्कारा भूमिः । इत्यमरभरतौ ॥
परिष्टोमः, पुं, (परितः स्तूयते नानावर्णवत्त्वादिति । स्तु + मन् । ततः षत्वम् । केचित्तु "परेः स्तोमं प्रति अनुपसर्गत्वात् न षः ।" इत्युक्ता परिस्तोम इति कथयन्ति ।) परिस्तोमः । इत्यमरटीकायां स्वामी ॥
परिष्वङ्गः, पुं, (परिष्वञ्जनम् । परि + स्वञ्ज + घञ् । "परिनिवीति ।" ८ । ३ । ७० । इति षत्वम् ।) आलिङ्गनम् । इत्यमरः । ३ । २ । ३० ॥ (यथा, गीतः रासायणे । १ । ४ । ८८ ।
"अङ्गदप्रमुखानाञ्च हरीणां रामदर्शनम् ।
हनूमतः परिष्वङ्गो रावणेश महात्मना ॥")
परिसभ्यः, पुं, सर्व्वतोभावेन सभायां साधुः इत्यर्थे यत् प्रत्ययः ॥ परिषद्यः । सभासदः ॥
परिसरः, पुं, (परिसरत्यत्र । परि + सृ + "पुंसीति ।" ३ । ३ । ११८ । इति घः ।) पर्य्यन्तभूः । नदीनगरपर्व्वतादेरुपान्तभूमिः । इत्यमरभरतौ ॥ (यथा, मेघदूते । ६६ ।
"मुक्ताजालैः स्तनपरिसरच्छिन्नसूत्रेच हारैर्नैशो मार्गः सवितुरुदये सूच्यते कामिनीनाम् ॥")
परिसर्पः, पुं. (परि समन्तात् सर्पणम् । परि + सृप् + घञ् ।) परिक्रिया । परिजनादिना वेष्टनम् । समन्तात् सर्पणम् । इत्यमरभरतौ ॥ (सर्पविशेषः । यथा, सुश्रुते कल्पस्थाने ४ अध्याये । तत्र दर्व्वीकराः । "गवेधुकः परिसर्पः खरुडफणः ककुदः पद्मो महापद्मः ॥" इति। कुष्ठविशेषः । यथा, तत्रैव निदानस्थाने ५म अध्याये । "क्षुद्रकुष्ठान्यपि स्थूलारुष्कं महाकुष्ठमेककुष्ठञ्चर्म्मदलं विसर्पः परिसर्पः सिध्म विचर्चिका किटिभं पामा रकसा चेति ॥")
परिसर्य्या, स्त्री, (परिसरणमिति । सृ गतौ + "परिचर्य्या परिसर्य्येति ।" ३ । ३ । १०१ । इत्यस्य वार्त्तिं इति निपातनात् सिद्धम् ।) परीसारः । सर्व्वतोगमनम् । भूमौ सर्व्वतोभ्रमणम् । इति सर्व्वस्वम् ॥ अन्तसरणम् । इति केचित् । इत्यमरभरतौ ॥
परिस्कन्दः, पुं, (परिस्कन्दतीति । परि + स्कन्द + अच् । "परेश्च ।" ८ । ३ । ७४ । इति षत्वे षत्वाभावः ।) परपुष्टः । परेण प्रतिपालितः । इत्यमरः । २ । १० । १८ ॥
परिस्कन्नः, पुं, (परि + स्कन्द + क्त । "परेश्च ।" ८ । ३ । ७४ । इति पक्षे षत्वाभावः ।) परिस्कन्दः । इत्यमरटीकायां रायमुकुटः ॥
परिस्तोमः, पुं, (परि स्तूयते प्रशस्यते नानावर्णवत्त्वात् । परि + स्तु + "अर्त्तिस्तुसुहीति ।" मन् । यद्वा परिगतः स्तोमोऽत्र वर्णस्तोमत्वात् ।) गजपृष्ठस्थचित्रकम्बलः । इत्यमरः । २ । ८ । ४२ ॥ हातीर पिठेर झुल इति भाषा ॥
परिस्पन्दः, पुं, (परि + स्पन्द + अधिकरणे घञ् ।) कुसुमप्रकरादेः पत्रावल्यादेश्च रचना । इत्यमरः । २ । ६ । १३७ ॥ परिकरः । परिवारः । इति हेमचन्द्रः । ३ । ३७६ ॥ (भावे + घञ् ।) सर्व्वतोभावेन स्पन्दनञ्च ॥ (सर्हनम् । यथा, महाभारते । १ । १५४ । ८ ।
"अहमेनं हनिष्यामि प्रेषयन्वास्तं सुमध्यमे ! ।
नायं प्रतिबलो भीरु ! राक्षसापसदो मम ।
सोढुं युधि परिस्पन्दमपवा सर्व्वराक्षसाः ॥")
परिस्पन्दनं, क्ली, (परि सर्व्वतोभावेन स्पन्दते इति । परि + स्पन्द + ल्युट् ।) सर्व्वतोभावेन कम्पनम् । यथा । कोऽपि परिस्पन्दनसाधनसाध्यः । यथा गमनादिः । कोऽप्यपरिस्पन्दनसाधनसाध्यः । यथा अवस्थानादिः । इति गोयीचन्द्रः
परिस्पन्दमानः, त्रि, (परिस्पन्दते इति । परि + स्पन्द + शानच् ।) सर्व्वतोभावेन कम्पमानः । यथा । "अनवरतपरिस्पन्दमाना परिमितपवनादिपरमाणुचेतनसंयोगसन्तानान्तःपातिथस्त्रीणामविरतमेवोपरमात् ।" इति सामान्यलक्षणायां शिरोमणिः ॥
परिस्पन्दः, पुं, (परि + स्पन्द + भावे घञ् । अप्राणिकर्तृकत्वे वा षत्वम् ।) परिस्पन्दः । इत्यमरटीकायां भरतः ॥
परिसुत्, स्त्री. (परिस्रवतीति । परि + सु + क्विप् तुक् च ।) वरुणात्मजा । मदिरा । इत्यमरः । २ । १० । ३६ ॥ (यथा, अथर्ब्ववेदे । ३ । १२ । ७ ।
"इमां परिसुतः कुम्भ आदधः कलशैरयुः ॥")
सर्व्वतोभावेन क्षरिते च । यथा, ऋग्वेदे । ८ । ३६ । १० ।
"त्वामापः परिसुतः परियन्ति स्वसेतवो नभन्ता-
मन्यके समे ॥")
परिसुतः, त्रि, (परितः सूयते स्म । सु सवणे + "गत्यर्थेति ।" ३ । ४ । ७२ । इति क्तः ।) सर्व्वयुक्तः । सर्व्वतोभावेन क्षरितः । इति मेदिनी । ते । २०६ ॥ (वारुणीशब्देऽस्या विवृतिर्ज्ञातव्या । यथा, यजुर्व्वेदे । २ । ३४ ।
"ऊर्ज्जं वहन्तीरमृतं घृतं पयः कीलालं परिसुतम् ॥")
परिसुता, स्त्री, (परितः सूयते स्मेति । परि + सु + क्तः । स्त्रियां टाप् । अन्नादिभ्यः घरणेन जात-

त्वात् तथात्वम्।) वारुणी। मदिरा इति मेदिनी। ते। २०६ ॥

परीहारः, पुं, (परिह्रियतेऽनेनेति। परि + हृ + घञ्।) अवज्ञा। अनादरः। इति शब्दरत्नावली ॥ ("परिहारो नाम तस्यैव दोषवचनस्य परिहरणं यथा नित्यमात्मनि शरीरस्थे जीवलिङ्गान्युपलभ्यन्ते तस्य चापगमान्नोपलभ्यन्ते तस्मान्न्यः शरीरादात्मा नित्यः शरीराच्चेति।" इति चरके विमानस्थानेऽष्टमेऽध्याये ॥ त्यागः। परिवर्ज्जनम्। यथा, राजतरङ्गिण्याम्। ४। ६७६।

"दृष्टं शास्य प्रभोरश्वत परिहारान् न भेषजम् ॥"

गोपनम्। यथा, शकुन्तलायां १ म अङ्के।

"कथमिदानीमात्मानं निवेदयामि कथं वा आत्मनः परिहारं करोमि ॥" विजितद्रव्यादिकम्। यथा, मनुः। ७। २०१।

"जित्वा सम्पूजयेत् देवान् ब्राह्मणांश्चैव धार्म्मिकान्।
प्रदद्यात परिहारांश्च ख्यापयेदभयानि च ॥"

स्थानविशेषः। यथा, मनुः। ८। २३७।

"धनुःशतं परीहारो ग्रामस्य स्यात् समन्ततः॥"

अत्र कुल्लूकभट्टः। "चतुर्हस्तो धनुः शम्या यष्टिक्षेपाः पातः प्रक्षेपो ग्रामसमीपे सर्व्वासु दिक्षु चत्वारि हस्तशतानि त्रीन् वा यष्टिप्रक्षेपान् यावत् पशुप्रचारार्थं शस्यवपनादिसंरोधपरिहारः कार्य्यः ॥")

परीहार्य्यः, पुं, (परि + हृ + ण्यत्।) पारिहार्य्यः। वलयः। इति भरतद्विरूपकोषः ॥ परिहरणीये त्रि ॥ (यथा, शकुन्तलायाम् १ मे अङ्के।

"न परिहार्य्ये वस्तुनि पौरवाणां मनः प्रवर्त्तते।")

परीहासः, पुं, (परि + हस + भावे घञ्।) परिहसनम्। ठाट्टा इति भाषा। परीहासः। यथा।"परिहासः केलिमुखः केलिर्द्रवनर्म्मणी।" इति त्रिकाण्डशेषः ॥ तत्पर्य्यायः। क्रीडा २ द्रवता ३। इति शब्दरत्नावली ॥ वर्करा ४। इति जटाधरः ॥ (यथा, शकुन्तलायाम् २ ये अङ्के।

"परिहासविजल्पितं सखे! परमार्थेन न गृह्यतां वचः।")

परीक्षकः, त्रि, (परि + ईक्ष + ण्वुल्।) निरूपकः। (यथा, पञ्चतन्त्रे। १। ८४।

"परीक्षका यत्र न सन्ति देशे
नार्घन्ति रत्नानि समुद्रजानि।
आभीरदेशे किल चन्द्रकान्तं
त्रिभिर्वराटैर्विपणन्ति गोपाः।")

तत्पर्य्यायः। कारणिकः २। इत्यमरः ।३।१।७।
परीक्षां साधयन्ति परीक्षकाः इति भरतः ॥

परीक्षणं, क्ली, (परि + ईक्ष + ल्युट्।) परीक्षा। ... इति भरतः। यथा,—

"भेदोपशामावुपधाधर्म्माद्यैर्यत् परीक्षणम्।"

इत्यमरः। २। ८। २१ ॥

सर्व्वतोभावेन दर्शनञ्च ॥

परीक्षा, स्त्री, (परित ईक्ष्यतेऽनया। परि + ईक्ष + "गुरोश्च हलः।"३। ३। १०३। इति अः। ततष्टाप्।) दिव्यम्। अथ दिव्यानि। तत्र बृहस्पतिः।

"घटोऽग्निरुदकञ्चैव विषं कोषश्च पञ्चमम्।
षष्ठञ्च तण्डुलाः प्रोक्तं सप्तमं तप्तमाषकम् ॥
अष्टमं फालमित्युक्तं नवमं धर्म्मजं स्मृतम्।
दिव्यान्येतानि सर्व्वाणि निर्द्दिष्टानि स्वयम्भुवा ॥"

अथ किन्तद्दिव्यम्।

तत्र मानुषप्रमाणानिर्णयस्यापि निर्णायकं यत्तद्दिव्यमिति लोकप्रसिद्धम्। एतद्द्वयमपि शपथानामस्ति तथापि कालान्तरनिर्णायकत्वेन तेषां भेदात्। अपिना मानुषप्रमाणसत्त्वेऽपि यत्र घटादीनामङ्गीकारस्तत्रापि तद्भवति इति सूचितम्। अतएव लिखितसाक्षिभुक्तिलक्षणत्रिविधमानुषप्रमाणाभिन्नप्रमाणं यत्तद्दिव्यं प्रमाणं तत प्रमाणं न भावैकगोचरं किन्तु भावाभावाविशेषेण गोचरयतीति। तत्र महाभियोगेषु दिव्यान्याह याज्ञवल्क्यः।

"तुलाग्न्यापो विषं कोषो दिव्यानीह विशुद्धये।
महाभियोगेष्वेतानि शीर्षकस्थेऽभियोक्तरि ॥"

विशुद्धये सन्दिग्धार्थस्य सन्देहनिवृत्तये। महाभियोगेषु महापातकादिगुरुतराभियोगेषु। शीर्षकस्य इति शीर्षकं प्रधानं व्यवहारस्य चतुर्थपादो जयपराजयलक्षणः। तेन दण्डो लक्ष्यते तत्र तिष्ठतीति शीर्षकस्थः तत्प्रयुक्तदण्डभागीत्यर्थः। महाभियोगान् स्पष्टयति कालिकापुराणम्।

"परदाराभिशापे च चौर्य्यागम्यागमेषु च।
महापातकशस्तेषु स्याद्दिव्यं नृपमाहवे ॥
प्रतिपत्तौ विवादे च पणस्य स्थापने कृते।
तत्रैव स्थापयेद्दिव्यं शिरःपूर्व्वं महीपतिः ॥
परदाराभिशापे च बहवो यत्र वादिनः।
शिरोहीनं भवेद्दिव्यमात्मनः शुद्धिकारणात् ॥"

पितामहः।

"शिरःस्थायिविहीनानि दिव्यानि परिवर्ज्जयेत्।
चत्वारि तु घटादीनि कोषसंज्ञाशिराः स्मृताः ॥"

महाभियोगेतरेऽपि कोषमाह स्मृतिः। कोषमल्पे च दापयेत्। याज्ञवल्क्येनाभियोक्तुर्वादिनः शिरोवर्त्तित्वाभिधानादभियोज्यस्य दिव्यकर्तृत्वं प्रतिपादितम्। यत्तमाह कात्यायनः।

"न कश्चिदभियोक्तारं दिव्येषु विनियोजयेत्।
अभियुक्ताय दातव्यं दिव्यं दिव्यविशारदैः ॥"

प्रत्यर्थिस्वीकारेणार्थिनोऽपि दिव्यमाह याज्ञवल्क्यः।

"रुच्या वान्यतरः कुर्य्यादितरो वर्त्तयेच्छिरः।
विनापि शीर्षकात् कुर्य्यान्नृपद्रोहेऽथ पातके ॥"

इतरोऽभियुक्तः शिरः शारीरदण्डमर्थदण्डं वा वर्त्तयेत् स्वीकुर्य्यात्। बृहस्पतिः।

"देशकालबलाभ्यावा भेदसायान्ति साक्षिणः।
त्रिविष्टपस्य दिव्यस्य न भेदो जायते क्वचित् ॥"

भेदः मत्यादैपरीत्यम्। यत्तु कात्यायनवचनम्।

"क्रिया न दैविकी प्रोक्ता विद्यमानेषु साक्षिषु।
लेख्ये च सति वादेषु न स्याद्दिव्यं न साक्षिणः ॥"

इति तद्गुणान्वितसाक्षिसत्त्वे। यथा व्यासः।

"मणिमन्त्रौषधिबलात् प्रदत्तं वा विधानतः।
विसंवदेद्दिव्यमपि न तु साक्षी गुणान्वितः ॥"

अतएव नारदः।

"युक्तिष्वप्यवसन्नासु शपथैरेनमर्द्दयेत् ॥"

एनं विपर्य्ययमागमर्थं मर्द्दयेत् पीडयेत्। निर्द्धारयेदिति यावत् ॥ * ॥ शपथानाह नारदः।

"सत्यवाहनशस्त्राणि गोबीजकनकानि च।
देवतापितृपादांश्च दत्तानि सुकृतानि च ॥
स्पृशेच्छिरांसि पुत्राणां दाराणां सुहृदान्तथा।
अभियोगेषु सर्व्वेषु कोषपानमथापि वा ॥
इत्येते शपथाः प्रोक्ता मनुना स्वल्पकारणात् ॥"

बृहस्पतिः।

"यथोक्तविधिना देयं दिव्यं दिव्यविशारदैः।
अयथोक्तप्रदत्तन्तु न शक्तं साध्यसाधने ॥
अदेशकालदत्तानि वहिर्वादिकृतानि च।
व्यभिचारं सदा त्वेवं कुर्व्वन्तीह न संशयः ॥"

वहिर्वादिकृतमभियोक्तारं विना कृतम्। एतच्च प्रायिकं आत्मशुद्धिपराणामभियोक्तारं विनापि दिव्यविधानात्।

तथा च नारदः।

"राजभिः शङ्कितानाञ्च निर्द्दिष्टानाञ्च दस्युभिः।
आत्मशुद्धिपराणाञ्च देयं दिव्यं शिरो विना ॥ * ॥"

अथ दिव्यदेशाः। कात्यायनः।

"इन्द्रस्थानेऽभिशस्तानां महापातकिनां नृणाम्।
नृपद्रोहप्रवृत्तानां राजद्वारे प्रयोजयेत् ॥
प्रातिलोम्यप्रसूतानां दिव्यं देयं चतुष्पथे।
अतोऽन्येषु च कार्य्येषु सभामध्ये विदुर्बुधाः ॥"

इन्द्रस्थान इन्द्रध्वजस्थाने ॥ * ॥

अथ दिव्यकालाः। पितामहः।

"चैत्रो मार्गशिराश्चैव वैशाखश्च तथैव हि।
एते साधारणा मासा दिव्यानामविरोधिनः ॥
घटः सर्व्वर्त्तुकः प्रोक्तो वाते वाति विवर्ज्जयेत्।
अग्निः शिशिरहेमन्तवर्षासु परिकीर्त्तितः ॥
शरद्ग्रीष्मे तु सलिलं हेमन्ते शिशिरे विषम्।
कोषस्तु सर्व्वदा देयस्तुला स्यात् सार्व्वकालिकी ॥"

मिताक्षरायां नारदः।

"न शीते तोयशुद्धिः स्यान्नोष्णकालेऽग्निशोधनम्।
न प्रावृषि विषं दद्यात् प्रवाते न तुलां नृप! ॥"

नारदः।

"पूर्व्वाह्णे सर्व्वदिव्यानां प्रदानं परिकीर्त्तितम्।
नापराह्णे न सन्ध्यायां न मध्याह्ने कदाचन ॥"

शीते हेमन्तशिशिरवर्षासु। उष्णकाले ग्रीष्मशरदोः। वर्षासु विषनिषेधश्चतुर्थमासनिषेधकः। वर्षाश्चतुर्थमासा इति ...वचनात् तण्डुलादीनान्तु निषेधाभिधानात् सार्व्वकालि-

कत्वम् । अत्र विवे विशेषतो वर्षानिषेधात् वक्ष्यमाणवचने सिंहस्थरवावेव परीक्षामात्रनिषेधाच्च दिव्यान्तरं सिंहेतरत्र वर्षास्वपि कुर्वीत ।

अतोयाम्यायने हरौ सुप्ते सर्व्वकर्म्माणि वर्ज्जयेदित्यस्य न विषयः । ज्योतिषे ।

सिंहस्थे मकरस्थे च जीवे चास्तमिते तथा ।
मलमासे न कर्त्तव्या परीक्षा जयकाङ्क्षिणा ॥
रविशुद्धौ गुरौ चैव न शुक्रेऽस्तङ्गते पुनः ।
"सिंहस्थे च रवौ नैव परीक्षा शस्यते बुधैः ॥
नाष्टम्यां न चतुर्दश्यां प्रायश्चित्तपरीक्षणे ।
न परीक्षा विवाहश्च ग्रहणभौमदिने तथा ॥
रविशुद्धौ गुरौ चैवेत्यत्र शस्यत इति शेषः ॥

तथा च दीपिकायाम् ।

"नो शक्रास्तेऽष्टमेऽर्के गुरुसहितरवौ जन्ममासेऽष्टमेन्दौ
विष्टौ मासे मलाख्ये क्षुजशनिदिवसे जन्मतारासु नाध ।
नाड़ीनक्षत्रहीने गुरुरविरजनीनाथतारा विशुद्धौ
प्रायः कार्य्या परीक्षा हितनुचरणहांघ्रीदये शुक्तलग्ने ॥" * ॥

पितामहः ।

"प्रत्यक्षं दापयेद्दिव्यं राजा वाधिकृतोऽपि वा ।
ब्राह्मणानां श्रुतवतां प्रकृतीनान्तथैव च ॥"
ब्राह्मणानां प्रकृतीनाञ्च प्रत्यक्षं दिव्यं दापयेदित्यन्वयः । प्रकृतयस्तु ।
"स्वाम्यमात्यः सुहृत् कोषो राष्ट्रदुर्गबलानि च ।
राज्याङ्गानि प्रकृतयः पौराणां श्रेणयोऽपि चेति अमरसिंहोक्ताः ॥ * ॥

अथ दिव्यविशेषाधिकारिणः । नारदः ।

"ब्राह्मणस्य घटो देयः क्षत्रियस्य हुताशनः ।
वैश्यस्य सलिलं देयं शूद्रस्य विषमेव तु ॥
साधारणः समस्तानां कोषः प्रोक्तो मनीषिभिः ।
विषवर्ज्जं ब्राह्मणस्य सर्व्वेषान्तु तुला स्मृता ॥"

यत् पुनरनेन ।

"व्रतानां भग्नार्त्तानां व्याधितानां तपस्विनाम् ।
स्त्रीणाञ्च न भवेद्दिव्यं यदि धर्म्मस्त्वपेक्षितः ॥"

इति स्त्र्यादीनां दिव्यं निषिद्धं तत्तुलेतरविषयकमिति मूलपाणिः ॥ मिताक्षरायान्तु ।

स्त्रीपुंसयोर्विवादेन स्त्रीणां दिव्यमिति रूढ्या वान्यतरः कुर्य्यादिति विकल्पनिषेधार्थमेतदुक्तं भवति । अवश्याभियोगेषु स्त्र्यादीनामभियोक्तृत्वे अभियोज्यानामेव दिव्यं एतेषामभियोगे योज्यत्वेऽपि अभियोक्तृणामेव दिव्यं परस्य चाभियोगे तु विकल्प एव तत्रापि तुलैवेति नियम्यते । तथा महापातकादिशङ्काभियोगे तु स्त्र्यादीनां तुलैव । यथा याज्ञवल्क्यः ।

"तुला स्त्रीबालवृद्धान्धपङ्गुब्राह्मणरोगिणाम् ।
अग्निर्जलं वा शूद्रस्य यवाः सप्त विषञ्च वा ॥"

स्त्रीमात्रं जातिवयोऽवस्थाविशेषानादरेण बालव्याधोऽग्राह्यजात्यतिविशेषानादरेण वृद्धोऽशीतिगरगः । एतच्च वचनं सर्व्वदिव्यसाधारणेषु मार्गशिरशैवेशाखेषु स्त्र्यादीनां सर्व्वदिव्यसमवधानविधाने नियमार्थकतयार्थवत् । न च सर्व्वकालं स्त्रीणान्तुलैवेति ।

"स्त्रीणान्तु न विषं प्रोक्तं न चापि सलिलं स्मृतम् ।
घटकोषादिभिस्तासामन्तस्तत्त्वं विचारयेत् ॥"

इति विषसलिलव्यतिरिक्तघटकोषादिभिः शुद्धिविधानात् । एवं बालादिष्वपि योजनीयम् । तथा ब्राह्मणादीनामपि न सार्व्वकालिकस्तुलादिनियमः ।

"सर्व्वेषामेव वर्णानां कोषाच्छुद्धिर्विधीयते ।
सर्व्वाण्येतानि सर्व्वेषां ब्राह्मणस्य विषं विना ॥"

इति पितामहस्मरणात् ।

तस्मात् साधारणे काले बहुदिव्यसमवधाने तुलादिनियमार्थमेवेदं वचनम् । कालान्तरे तु तत्तत्कालविहितं सर्व्वेषाम् । तथा हि वर्षा शरदेव सर्व्वेषां हेमन्तशिशिरयोस्तु क्षत्रियादीनां त्रयाणां अग्निविषयोर्विकल्पः ब्राह्मणस्य तु अग्निरेव न कदाचिद्विषं ब्राह्मणस्य विषं विनेति निषेधात् । ग्रीष्मशरदोस्तु सलिलमेव । येषां कुलाद्याचारेण तुलाग्न्यादिनिषेधः ।

"कुष्ठिनां वर्ज्जयेदग्निं सलिलं श्वासकासिनाम् ।
पित्तश्लेष्मवतां नित्यं विषन्तु परिवर्ज्जयेदिति वचनात्तेषामग्न्यादिकालेऽपि साधारणं तुलाद्यं दिव्यं भवति । यथा । तोयमग्निर्विषञ्चैव दातव्यं बलिनां नृणामिति स्मरणात् । दुर्ब्बलानामपि सर्व्वथा विषनिषेधात् तत्तत्कालानतिक्रमेण जातिवयोऽवस्थाश्रितानि दिव्यानि देयानि । अत्र च यस्य यानि विशेषसामान्यपर्य्युदस्तेतरविहितानि तानि मुख्यकल्पानुकल्परूपाणि वेदितव्यानि । यथा, ब्राह्मणस्य घटो मुख्यः कोषस्त्वनुकल्पः । जलाग्नी आपत्कल्पौ प्रागुक्तनारदवचने एवकारश्रुतेर्मुख्यकल्पादित्वं न तु अप्रशस्ततमादित्वमिति । एवञ्चात्रापि व्ययोक्तप्रदत्तन्तु न प्रशस्तं साध्यसाधने इति प्रागुक्तं बोध्यम् । स्मृतिः ।

"अवश्याभियुक्तानां घटोदीनि विनिर्दिशेत् ।
तण्डुलस्त्वेव कोषश्च शङ्कास्त्वेव न संशयः ॥"

अवश्याभोऽत्र निश्चयः । शिरोवर्त्तितेति केचित् ।

इति व्यवहारदीपिका ॥ कात्यायनः ।

"अस्पृश्याधमदासानां म्लेच्छानां पापकारिणाम् ।
प्रतिलोमप्रसूतानां निश्चयो न तु राजनि ॥
तत्प्रसिद्धानि दिव्यानि समये तेषु निर्दिशेत् ॥"

तत्प्रसिद्धानि सर्व्वघटादीनि । तथा,—

देशकालाविरोधे तु यथायुक्तं प्रकल्पयेत् ।
अन्येन हारयेद्दिव्यं विधिरेष विपर्य्यये ॥"

अन्येन प्रतिनिधिना हारयेत् कारयेत् ; विपर्य्यये अभियुक्तस्यासामर्थ्ये ।

अतएव महापातक्यादीनामन्यद्वारा दिव्यमाह स एव ।

"मातापितृद्विजगुरुबालस्त्रीराजघातिनाम् ।
महापातकयुक्तानां नास्तिकानां विशेषतः ॥
लिङ्गिनां प्रमदानाञ्च मत्तयोगक्रियावताम् ।
वर्णसङ्करजातानां पाषण्डाश्रमवर्त्तिनाम् ॥

एतेष्वेवाभियोगेषु निर्न्दोषेष्वेव प्रयत्नतः ।
इत्याद्यभिधाय ।
दिव्यं प्रकल्पयेन्नैव राजा धर्म्मपरायणः ।
एतैरेव प्रयुक्तानां साधूनां दिव्यमर्हति ॥"

कात्यायनः ।

"न लौहग्नित्यिनामग्निं सलिलं नाम्बुसेविनाम् ।
तण्डुलैर्न नियुञ्जीत ब्राह्मणं सत्यरोगिणम् ॥"

नारदः ।

"क्लीवातुरान् सत्त्वहीनान् परितापार्द्दितान्नरान् ।
बालवृद्धातुरादींश्च परीक्षेत घटे सदा ॥
नार्त्तानां तोयशुद्धिः स्यान्न विषं पित्तरोगिणाम् ।
श्वित्रान्यकुनखादीनां नाग्निकर्म्म विधीयते ॥"

न मज्जनं स्त्रीबालयोर्धर्म्मशास्त्रविशारदैः ।
निरुत्साहान् व्याधिक्षुत्रार्त्तांस्तोये निमज्जयेत् ॥
न चापि हारयेदग्निं न विषेण विशोधयेत् ॥

यत्तु,—

स्थावरेषु विवादेषु दिव्यानि परिवर्ज्जयेदिति पितामहवचनं तल्लिखितसामन्तादिसत्त्वे दिव्यनिषेधकम् । यद्यपि व्यलेख्यसाक्षिके दिव्यं व्यवहारे विनिर्दिशेदिति स्मृतेर्विवादान्तरेऽपि लेख्यादिसत्त्वे दिव्यानादरस्तथापि ऋणादानादिविवादे साक्ष्युपन्यासे कृतेऽपि प्रत्यर्थी यदि दण्डाङ्गीकारेण दिव्यमङ्गीकरोति तदा दिव्यमपि भवति साक्षिणां दीर्घसम्भवादिव्यस्य तु निर्दोषत्वेन वस्तुतत्त्वविषयत्वात् तल्लक्षणत्वाच्च धर्म्मस्य यथाह नारदः ।

"तत्र सत्ये स्थितो धर्म्मो व्यवहारस्तु साक्षिणि ।
दैवसाध्ये पौरुषन्तु न लेख्यन्तु प्रयोजयेत् ॥"

स्थावरविवादे तु प्रत्यर्थिना दण्डाङ्गीकारेण दिव्यावलम्बने कृते सामन्तादिदृष्टप्रमाणसद्भावेऽपि दिव्यं ग्राह्यमिति विकल्पनिवारणाय स्थावरेष्वित्यादि पितामहवचनं नात्यन्तिकदिव्यं निराकरणाय लिखितादभावे स्थावरादिषु निर्णयाप्रसक्तेः ॥ * ॥

अथ द्रव्यसंख्यया दिव्यविशेषाः । विष्णुः ।

अथ समयक्रियाराजद्रोहसाहसेषु यथाकामं निःशेषपर्णस्त्रेयेष्वर्थप्रमाणादिति । समयो दिव्यं राजद्रोहादिषु यथाकामं राजेच्छानुरोधादिव्यं निःशेषादिषु तु धनप्रमाणतारतम्यादित्यर्थः । दक्षस्मृतिः ।

"संख्या रश्मिरजोमूला मनुना समुदाहृता ।
कार्षापणान्ता सा दिव्ये नियोज्या विनये तथा ॥
विषं सहस्रेऽपहृते पादोने च हुताशनः ।
त्रिभागोने च सलिलमर्द्धे देयो घटः सदा ॥
चतुःशतावियोगे तु दातव्यस्त्रप्रमायकः ।
त्रिशति तण्डुला देयाः कोषश्चैव तदर्द्धके ॥
शते हृतेऽपहृते च दातव्यं धर्म्मशोधनम् ।
गोचौरस्य प्रदातव्यं सभ्यैः फालं प्रयत्नतः ॥
एषा संख्या निकृष्टानां मध्यानां द्विगुणा स्मृता ।
चतुर्गुणोत्तमानान्तु कल्पनीया परीक्षकैः ॥"

रश्मिरजः ।

प्राणान्तरगते भावौ यत् स्थां दृश्यते रजः।
प्रथमं तत्प्रमाणानां वर्णैरेतत् प्रचक्षते॥"
इति मनूक्तम्।
"कार्षापणस्तु पणस्तु कार्षापण: पण इति पर्य्यायदर्शनात्। विषये दृष्टे। एवञ्च सप्तम इत्यादौ पण इति स्त्रियं उपक्रमात् निरूपणानां जातिरभिप्रेते:। नासप्तमाद्वरेदग्निं न तुलां न विषन्त्यजेत् याज्ञवल्क्यवचनं मध्यमोत्तमविषयतया दृश्यनिरूपणेकवाक्यत्वादविरुद्धम्।
"सप्तसेषु घटं दद्यात् सप्तमार्द्धं तथायसम्।
अर्द्धस्यार्द्धं तु सलिलं तस्यार्द्धं तिलं स्मृतम्॥"
इति वचनं यत्किञ्चिदपराधे प्राप्तिपरं तद्विषयमिति। एतत् सर्वं स्त्रियमाश्रित्यविषयम्। अपरञ्च तु कात्यायन:।
"दण्डस्यापहरो यत्र प्रमाणं तत्र कारयेत्।
स्त्रियमाश्रित्य तद्दण्डं स्वल्पेऽप्यर्थे प्रदापयेत्॥
सर्वद्रव्यप्रमाणज्ञ: ज्ञात्वा चैव प्रकल्पयेत्।
हेमप्रमाणयुक्तन्तु तदा दण्डं प्रदापयेत्॥
ज्ञात्वा संख्यां सुवर्णानां शतनाशे विधं स्मृतम्।
अशीतेश्च विनाशे तु दद्यादेव हुताशनम्॥
यष्टा नाशे शतं दद्यं चत्वारिंशति वै घटम्।
विंशद्द्रव्यविनाशे तु कोशपानं विधीयते॥
षष्ठाधिकस्य वा नाशे ततोऽर्द्धार्द्धस्य तण्डुला:।
ततोऽर्द्धार्द्धविनाशे तु शूद्रात् पञ्चादिमस्तकान्॥
ततोऽर्द्धार्द्धविनाशे तु लौकिकस्य क्रिया: स्मृता:।
एवं विचारयन्राजा धर्म्मार्थाभ्यां न हीयते॥"
सुवर्णानां पञ्च कृष्णलको माषस्ते सुवर्णस्तु षोड़श इत्युक्तार्शीतिरक्तिकापरिमितद्रव्यनाशे वधदण्डे वा दण्डाधिकस्य षष्ठाधिकस्य वा विंशस्य नाशे कोशपानमित्यर्थ:। तण्डुला: पुनरत्यर्थौर्य्याभिप्रायेण न तु साधारणे। धौर्य्ये च तण्डुला देया नान्यथेति विनिश्चय इति पितामहस्मृते:। तन्मानन्तु महाधौर्य्याभिप्रायम्।
महाधौर्य्याभियुक्तानां तन्मानो विधीयते।
इति स्मृते:॥
व्यवहारमात्रकायाम्।
"समत्वं साक्षिणां यत्र दिवैकमपि शोधयेत्।
प्रामाणिकविवादेषु सिद्धमानेषु साक्षिषु॥
द्वियमात्मसते वादौ न दृष्टेश्च साक्षिय:॥"
इति दिवतत्त्वम्॥ ७॥
षष्टादिनवविधपरीक्षा तत्तद्ग्रन्थे द्रष्टव्या॥
("दृष्टि: प्रकृति या भावात् बहुकारणयोगतात्।
युक्तिश्चिरतरा सा स्यात् विवर्त्त: साध्यते यया॥
क्रया परीक्षा नास्त्यन्या यया सर्वं परीक्ष्यते।
परीक्षं सदृशेष्वेव तया शक्ति पुनर्भव:॥"
इति वरके एकस्थाने एकादशोध्याये॥
"तत्र पैक्षिकमभिप्राया भिन्नं दृष्टेऽनुमानिरेषणात्मानमनुमानं-शिरोविरेषणानि प्रयोक्तुरुक्तेन भिन्ना -तिविधा परीक्षा कृति विधं परीक्षं कथान परीक्षविधि: यत्र सर्वेषामेषां स्त्रियोक्ता च परीक्षा न च

यमनादीनां प्रवृत्ति: न च निवृत्ति: प्रवृत्तिनिवृत्तिज्ञान-संयोगे च किं नैष्ठिकं कानि च यमनादीनां भेषजद्रव्याणि उपयोगं गच्छन्तीति। स एवं दृष्टो यदि मोक्षयितुमिच्छेत् ब्रूयादेनं बहुविधा परीक्षा तथा परीक्षविधिभेद: कतमेन विधिभेदप्रकल्पान्तरेण परीक्षस्या भिन्नभेदायं भवान् पृच्छत्याख्यायमानं नेदानीं भवतोऽन्येन वा विधिभेदप्रकल्पान्तरेण परीक्षस्य भिन्नस्याभिलषितमर्थं श्रोतुमहमनेन परीक्षा विधिभेदप्रकल्पान्तरेण परीक्षं भित्त्वार्थमाचक्षाण इच्छां पूरयेयमिति।
द्विविधा परीक्षा ज्ञानदर्शनं प्रत्यक्षमनुमानञ्च एतत्तु द्वयमुपदेक्ष्यञ्च परीक्षात्रयमेवमेषा द्विविधा परीक्षा त्रिविधा वा महोपदेशेन।
दशविधं परीक्षं कारणादि यदुक्तमग्रे तद्दृष्टभिषगादिषु संसार्य्य सन्दर्शयिष्याम: इह कार्य्यप्राप्ते: कारणं भिषक्करणं पुनर्भेषजं कार्य्ययोनिर्धातुवैषम्यं कार्यं धातुसाम्यं कार्य्यफलं सुखावाप्ति: व्यनुबन्ध आयु: देशो भूमिरातुरश्च काल: संवत्सरर्तुरावस्था च प्रवृत्ति: प्रतिकर्म्मसमारम्भ: उपायो भिषगादीनां सौष्ठवमभिविधानञ्च सम्यगिष्टाप्तस्योपायस्य विषय: पूर्व्वेणैवोपायविशेषेण व्याख्यात इति कारणादीनि दृश्य दशसु भिषगादिषु संसार्य्य सन्दर्शितानि तथैवानुपूर्व्व्या एतद्दृशविधपरीक्षसक्तम्।
तस्य योया विशेषो यथा यथा च परीक्षितव्य: स स तया तया व्याख्यास्यते कारणं भिषगित्युक्तमग्रे तस्य परीक्षा भिषड्नाम यो भिषज्यति य: स्वार्थप्रयोगकुशल: यस्य चायु: सर्व्वथाविदितम्। यथावत् सर्व्वधातुसाम्यं चिकीर्षन्नात्मानमेवादित: परीक्षेत गुणेषु गुणत: कार्य्याभिनिर्वृत्तिं पश्यन् कश्चिदृश्यस्य कार्य्यस्याभिनिर्वर्त्तने समर्थो नचेति।" इति चरके विमानस्थाने ८मेऽध्याये॥)
परीक्षित्, पुं, (परि सर्व्वतोभावेन क्षीयते हन्यते दुरितं येन। परि+क्षि वधे+क्विप्। कलिग्रासनादस्य तथात्वम्। यद्वा, परिक्षीयेषु कुरुषु क्षियति ईष्टे इति। क्षि ञ्नि ऐश्वर्य्ये+क्विप्। "उपसर्गस्य दीर्घत्वं क्विप्यन्तादौ क्वचिद्भवेत्।" इति वाक्यात् उपसर्गस्य दीर्घत्वम्। अस्य निरुक्तिरुक्ता महाभारते। १। ६५। ८४।
"स भगवता वासुदेवेनानंजानबलवीर्य्यपराक्रमोऽकालजातोऽस्त्राग्निना दग्धस्तेजसा स्वेन संजीवित:। संजीवयित्वा चैनमुवाच। परिक्षीणे कुले जातो भवत्वं परीक्षिन्नामेति।")
अभिमन्युपुत्र:। स दुर्धिष्ठिराद्यनन्तरं कलियुगस्यारम्भे राजचक्रवर्त्ती आसीत्। यथा,—
"अभिमन्योरुत्तरायां परिक्षीणेषु कुरुष्वत्थाम प्रयुक्तब्रह्मशिरसा गर्भ एव भगवत: सकलसुरासुरवन्दितचरणयुगलस्य श्रीकृष्णस्य शारदमातुरदर्शनकारणानुभावात् पुनर्लोकेश-

मरांश्च परीक्षिष्यन्ते। योऽयं साम्प्रतमेतद्भूमण्डलमखण्डितायति धर्म्मेण पालयति।" इति विष्णुपुराणे ४ अंशे २० अध्याय:॥
"विपरीतानि दृष्ट्वा च निमित्तानि स पार्थिव:।
याते कृष्णे चकाराथ सोऽभिषेकं परीक्षित:॥
प्रयास्यन्ति यदा चैते पूर्व्वाषाढ़ां महर्षय:।
तदा नन्दात् प्रभृत्येष कलिर्वृद्धिं गमिष्यति॥
यस्मिन् कृष्णो दिवं यातस्तस्मिन्नेव तदाहनि।
प्रतिपन्नं कलियुगं तस्य संख्यां निबोध मे॥"
इति तत्रैव २४ अ:। ३८—४०॥
(अनश्वपुत्र:। यथा, महाभारते। १। ६५। ४०।
"अनश्वा खलु मागधीमुपयेमे अश्वतां नाम तस्यामस्य जज्ञे परीक्षित्॥")
परीक्षित:, पुं, (परिक्षीणे कुरुकुले क्षियति स इष्टे स इति। परि+क्षि+क्त:। उपसर्गस्य दीर्घत्वम्।) अभिमन्युपुत्र:। (यथा, देवीभागवते। २। ७। ६।
"परिक्षीणेषु वंशेषु जातो यस्मात् वर: सुत:।
तस्मात् परीक्षितो नाम विख्यात: पृथिवीतले॥"७॥
परीक्षा सञ्जाता अस्य। परीक्षा इतच्। ऋतपरीक्षे, त्रि। यथा, गो: रामायणे। २।४३।६।
"स हि राजगुणैर्युक्तो युवराज: परीक्षित:॥")
परीणाय:, पुं, (परितो नयनम्। परि+नी+घञ्। "उपसर्गस्य दीर्घत्वं क्विप्यन्तादौ क्वचिद्भवेत्।" इति वाक्यात् दीर्घ:।) परिणाय:। शारीणां समन्तान्नयनम्। इत्यमरटीकायां भरत:॥
परीत, त्रि, (परि+इ+क्त:।) परिवेष्टितम्। इति हेमचन्द्र:॥ (यथा, महाभारते। १। ११२। ७।
"तत: कामपरीताङ्गी सकृत्प्रचलमानसा।
व्रीड़माना सकं कृत्वा राज्ञ: स्कन्धे समासजत्॥")
परीतत्, त्रि, (परि+तन+क्विप्+"नष्टाशृतिवृषिव्यधीति।" ६। ३। ११६। इति पूर्व्वपदस्य दीर्घ:।) सर्व्वतोभावेन विस्तृतम्। इति मुग्धबोधव्याकरणम्॥
परीभाव:, पुं, (परिभावयति इति। परि+भावि+घञ् वैकल्पिकदीर्घश्च।) परिभाव:। अनादर:। इत्यमरटीकायां भरत:॥
परीर, क्ली, (पृणन्तेऽनेनेति। पृ+"कृपृ कटीति।" उणा। ४। ३०। इति ईरन्।) फलम्। इत्युणादिकोष:॥
परीरम्भ:, पुं, (परिरभ्यते इति। परि+रभ+घञ् भावे वैकल्पिकदीर्घत्वम्।) परिरम्भ:, आलिङ्गनम्। इति भरतश्लिष्टपर्य्याय:॥
परीवर्त्त:, पुं, (परि+वृत+घञ्। "उपसर्गस्य घञीति।" ६। ३। १२२। इति दीर्घ:।) परिवर्त्तनम्। तत्पर्य्याय:। प्रतिदानम् २ नैमेय: ३ निमय: ४। इत्यमर:। २। ६। ७४। ५ परिवर्त: ६ नैमेय: ७ निमय: ८ परिदानम् ९। इति हेमचन्द्र:। पूर्व्वपक्षत:। इति भरत:॥

परीवादः, पुं, (परि+वद्+भावे घञ्। "उपसर्गस्य घञीति।" ६।३।१२२। इति दीर्घः।) दोषोल्लासः। तत्पर्य्यायः। कुत्सा २ निन्दा ३ जुगुप्सा ४ गर्हा ५ गर्हणम् ६ निन्दनम् ७ कुत्सनम् ८ परिवादः ९ जुगुप्सनम् १० आक्षेपः ११ अवर्णः १२ निर्वादः १३ अपक्रोशः १४ भर्त्सनम् १५ उपक्रोशः १६ अपवादः १७ अववादः १८। इति शब्दरत्नावली॥ (यथा, "परीवादस्तथ्यो भवति वितथो वापि महतां तथाप्युच्चैर्धान्यां हरति महिमानं जनरवः। तुलोत्तीर्णस्यापि प्रकटितहताशेषतमसो रवेस्ताद्दक्तेजो नहि भवति कन्यां गतवतः॥") वीणादिवादनम्। येन काष्ठविशेषादिना वीणादिर्वाद्यते सः। इति जटाधरः।

परीवारः, पुं, (परिवियतेऽनेनेति। परि+वृ+घञ्। उपसर्गस्य दीर्घः।) खड्गकोषः। जङ्गमः। (यथा, रघुः। १५। १६।
"धूमधूम्रो वसागन्धी ज्वालावभ्रुशिरोरुहः। क्रव्याङ्गणपरीवारश्चिताग्निरिव जङ्गमः॥")
परिच्छदः। इत्यमरः। ३। ३। १६८॥
'रीवारः परिजने खड्गकोषे परिच्छदे। इत्यनेकत्र दर्शनात्। जङ्गमो जङ्गमविशेषः परिजन इत्यर्थः। खड्गकोषोऽसिवायकः मेयान् इति ख्यातः। परिच्छदः स्त्रीभाजनकसुपकरणं छत्रचामरादिः सभ्यजनादिश्च एषु परीवारः। इति तट्टीकायां भरतः॥

परीवाहः, पुं, (परितो वह्यतेऽनेनेति। परि+वह+"हलश्च।" ३।३।१२१। इति घञ्। "उपसर्गस्य घञीति।" ६।३।१२२। इति दीर्घः।) जलोच्छ्वासः। इत्यमरः। १।१०।१०॥ (अत्र जलशब्द उपलक्षणमात्रं ज्ञेयम्। द्रवद्रव्यस्य प्रवाहोऽप्यस्यार्थो बोद्धव्यः। यथा च महाभारते। ७। ६८। १३।
"रुधिरस्य परीवाहान् पूरयित्वा सरांसि च॥"
परित उह्यते इति।) राजयोग्यवस्तु। इति मेदिनी॥ हे, ३३॥

परीक्षिः, स्त्री, (परि+इष्+"परे र्वा।" ३।३। १०७। इत्यस्य वार्त्तिं इति भावे क्तिन्।) अन्वेषणा। इत्यमरः। २। ७। ३२॥ परिचर्य्या। प्राकाम्यम्। इति मेदिनी। टे, ४६॥

परीसारः, पुं, (परिसरणम्। परि+सृ+घञ्। "उपसर्गस्य घञीति।" ६।३।१२२। इति दीर्घः।) परिचर्य्या। सर्व्वतोगमनम्। इत्यमरः। ३। २। २१॥

परीहारः, पुं, (परिहरणम्। परि+हृञ् हरणे+घञ्। "उपसर्गस्य घञीति।" ६।३। १२२। इति दीर्घः।) अवज्ञा। इति शब्दरत्नावली॥

परीहासः, पुं, (परि+हस+घञ्। उपसर्गस्य दीर्घः।) परीहसनम्। (यथा, मार्कण्डेये। २४।८४।
"परीवादं न कुर्व्वीत परीहासञ्च पुत्रक!॥")
तत्पर्य्यायः। क्रवः २ केलिः ३ क्रीड़ा ४ लीला ५ नर्म्म ६। इत्यमरः। १। ७। ३२॥ परिहासः ७ केलिसुखम् ८ देवनम् ९। इति चिक्काण्डशेषः॥

परुः, पुं, (पिपर्त्तीति। पॄ लि पूर्त्तौ+बाहुलकादुः।) समुद्रः। स्वर्गलोकः। ग्रन्थिः। पर्व्वतः। इति संक्षिप्तसारोणादिवृत्तिः॥

परुः, [स्] क्ली, (पॄ+"अर्त्तिपॄवपियजितनीति।" उणां। २। ११८। इति उस्।) ग्रन्थिः। इत्यमरः। २। ४। १६२॥ (यथा, वाजसनेयसंहितायाम्। १३।२०। [परुषस्परि॥")
"काण्डात् काण्डात् प्ररोहन्ति परुषः (सः)
परुत्, व्य, (पूर्व्वस्मिन् वत्सरे इति। "सद्यः परुदिति।" ५। ३। २२। इति पूर्व्वस्य परभावः उत् च।) गतवत्सरः। इत्यमरः। २। ४। २०॥

परुत्तन, त्रि, (परुत् गतवत्सरे भवः। परुत्+"चिरपरुत्परारिभ्यस्तनो वक्तव्यः।" ४। ३। २३। इत्यस्य वार्त्तिं इति तनः।) इति व्याकरणम्॥

परुद्वारः, पुं, (परुः समुद्रः पर्व्वतो वा द्वारमिव यस्य।) वोटकः। इति शब्दमाला॥

परुषं, क्ली, (पिपर्त्ति अलं वृद्धिं करोतीति। पॄ+"पॄनहिकलिभ्य उषच्।" उणां। ४। ७५। इति उषच्।) निष्ठुरवाक्यम्। इत्यमरः। १। ६। १६॥ (परमां देशजातिकुलविद्याशिल्परूपवृत्ताचारपरिच्छदशरीरकर्म्मजीविनां प्रत्यक्षदोषवचनं परुषमिति वदन्ति॥ यथा, हैः रामायणे। १। १ ८२।
"तासुवाच ततो रामः परुषं जनसंसदि।
अमृष्यमाणा सा सीता विवेश ज्वलनं सती॥")
नीलझिण्टी। इति शब्दचन्द्रिका॥ परुषफलम्। इति भावप्रकाशः॥ (नीलझिण्टीशब्दस्यास्य गुणादयो ज्ञातव्याः॥)

परुषं, त्रि, (पिपर्त्तीति। पॄ लि पूर्त्तौ+"पॄनहिकलिभ्य उषच्।" उणां। ४। ७५। इति उषच्।) कर्व्वूरः। (यथा, हृदृत्संहितायाम्। ३। ३६।
"असितविचित्रनीलपरुषो जनघातदरः।
खगमृगभैरवखररुतैश्च निशादुमुखे॥")
रूक्षः। (यथा, हैः रामायणे। १। ५८।१०।
"अथ रात्र्यां व्यतीतायां राजा चण्डालतां गतः।
नीलवस्त्रधरो नीलः परुषो ध्वस्तमूर्द्धजः॥")
निष्ठुरोक्तिः। इति मेदिनी। षे, ४०॥ (मलिनः। यथा, चार्य्यासप्तशत्याम्। ४१६।
"भस्मपरुषेऽपि गिरिशे स्नेहमयी त्वमुचितेन सुभगासि।"
"भस्ममलिनेऽपि गिरिशे।" इति तट्टीका॥)

परुषोक्तिकः, त्रि, (परुषमेव उक्तिर्यस्य। ततः स्वार्थे कन् कप् वा।) निष्ठुरवक्ता। इति जटाधरः॥

परूषं, क्ली, (पॄ+ऊषन्।) फलवृक्षभेदः। परुषफल इति वङ्गभाषा। फरूसा इति फलूदे इति च हिन्दीभाषा। तत्पर्य्यायः। परूषकम् २ नागदन्तोपमम् ३। इति रत्नमाला॥ परुषम् ४ अल्पास्थि ५ परापरम् ६। इति भावप्रकाशः॥ नीलचर्म्म ७ गिरिपीलु ८ परावतम् ९ नीलमण्डलम् १० परुः ११। अस्य गुणाः। अम्लत्वम्। कटुत्वम्। कफकार्शिवातनाशित्वञ्च। तदाम्फलगुणाः। पित्तदत्वम् उष्णत्वञ्च। तत्पक्वफलगुणाः। मधुरत्वम्। रुचिप्रदत्वम्। पित्तश्लेष्महरत्वम्। तर्पणत्वञ्च। इति राजनिर्घण्टः॥
"परूषकं कषायाम्लमामं पित्तकरं लघु।
तत् पक्वं मधुरं पाके शीतं विष्टम्भि दुर्हणम्॥
हृद्यं रक्तपित्तदाहामज्वरक्षयसमीरहृत्॥"
इति भावप्रकाशः॥
("परूषकैर्दयकपीलुकानां
पियालसिंह्री करमर्दकानाम्।
फलानि चैतानि निहन्ति पित्तं
हन्याच्च सर्व्वातुरसन्निपातम्॥"
इति हारीते प्रथमस्थाने दशमेऽध्याये॥)

परूषकं, क्ली, (परूष+स्वार्थे कन्।) परूषम्। इति राजनिर्घण्टः॥ (अस्य पर्य्यायाः यथा,—
"परूषकं परूषं स्यात् क्वचिन्नागदलोपमम्।"
इति वैद्यकरत्नमालायाम्॥
यथास्य गुणाः चरके सूत्रस्थाने २७ अध्याये।
"अम्लं परूषकं द्राक्षा वर्द्धयन्त्याशु रुक्षाणि च।
पित्तश्लेष्मप्रकोपीनि कर्कन्धुलकुचान्यपि॥"
"अत्यम्लमीषन्मधुरं कषायानुरसं लघु।
वातघ्नं पित्तजननमामं विद्यात् परूषकम्॥
तदेव पक्वं मधुरं वातपित्तनिबर्हणम्।
विपाके मधुरं शीतं रक्तपित्तप्रसादनम्॥"
इति सुश्रुते सूत्रस्थाने ४६ अध्याये॥)

परेतः, त्रि, (परं लोकमितः।) मृतः। इत्यमरः। २। ८। ११७॥ (यथा, कुमारे। ५।६८।
"अलक्तकाङ्कानि पदानि पादयोर्विकीर्णकेशासु परेतभूमिषु॥")
भूतान्तरे पुं, । इति मेदिनी। ते, १२६॥

परेतराट्, [ज्] पुं, (परेतेषु मृतेषु राजते इति। राजृ क्विप् दीप्तौ+"सत्सूद्विषेति।" ३।२।६१। इति क्विप्। यद्वा, परेतानां प्रेतानां राट्।) प्रेतराजः। यमः। इत्यमरः। १। १। ६१॥

परेद्यवि, व्य, परस्मिन्नहनि। ("सद्यःपरुदिति।" ५। ३। २२। इति निपातनात् साधुः।) परदिनम्। इति सुग्धबोधव्याकरणम्॥ यथा,—
"परेद्यवद्यपूर्व्वेद्युरन्येद्युश्चापि चिन्तयन्।
दृढिच्चयौ सुनीन्द्राणां प्रियम्भावुकतामगात्॥"
इति भट्टिः। ४। १३॥

परेद्युः, [स्] व्य, (पर+एद्युस्।) परदिनम्। इति सुग्धबोधव्याकरणम्॥

परेपं, त्रि, परा गता आपो यत्र। ("द्व्यन्तरुपसर्गेभ्योऽप ईत्।" ६। ३। ९७। इत्यस्य वार्त्तिं "अवर्णान्ताद्वा।" इति ईत्। परापम्।) इति सिद्धान्तकौमुदी॥

परेष्टुका, स्त्री, (परैरिष्यते इति। इष+बाहुलकात् तु। स्वार्थे कन्। स्त्रियां टाप्।) बहुस्तुतिः। बहुप्रस्तुता गौः। इत्यमरः। २। ९। ७०॥

परेधित:, त्रि, (परैरेधित: समन्तात् ।) औदासीन्येन परदृष्ट: । परेण संवर्द्धित: । तत्पर्य्याय: । परादित: २ परिच्छन्द: ३ परज्ञात: ४ । इत्यमर: । २ । १० । १८ ॥ कोकिले पुं । इति शब्दमाला ॥

परोक्षं, क्ली, (अक्ष्णो: परम् ।) अप्रत्यक्षम् । व्यवधानम् । यथा, साहित्यदर्पणे ।

"परोक्षे कार्य्यहन्तारं प्रत्यक्षे प्रियवादिनम् ।
वर्জ্জयेत्तादृशं मित्रं विषकुम्भं पयोमुखम् ॥"

(परोक्षं परोक्षत्वमित्यर्थ: । विद्यतेऽस्य । "अर्शआदिभ्योऽच् ।" ५ । २ । १२७ । इति अच् ।) तद्विशिष्टे त्रि ॥ (स्तुत्याप्रकल्पादिज्ञानविशेष: । यथा, पञ्चदश्याम् । ७ । ३१ ।

"अस्ति कूटस्थ इत्यादौ परोक्षं वेत्ति वार्त्तया ॥")

परोक्ष:, पुं, (परोक्षमश्नातीति । स्तुत्याप्रवाक्यव्यवहारार्थाद्वेति बोध्यम् ।) तपस्वी । इति शब्दमाला ॥ ययातिपुत्रभेदानो: पुत्रविशेष: । यथा, भागवते । ९ । २३ । १ ।

"अनो: सभानरश्चक्षु: परोक्षश्च सुताश्रय: ॥")

परोपकार:, पुं, (परेषामुपकार: ।) परेषामुपकृति: । यत्नवत्त्वन्विहितम् । यथा,—

"एव ते प्रवरो भाति सुहृद्धर्म्मप्रदो विधि: ।
परोपकरणादन्यत् सर्व्वमल्पं स्मृतं बुधै: ॥
परोपकारिभिर्दत्ता स्वप्राणा ऋषिभि: पुरा ।
यद्वि: प्रेतोपकार: स्यात् किम्न सर्व्वं मया पुन: ॥
दधीचिना पुरा गीत: श्लोकश्च श्रूयते भुवि ।
सर्व्वधर्म्ममय: सार: सर्व्वधर्म्मश्रुतस्तत: ॥
परोपकार: कर्त्तव्य: प्राज्ञै: कृष्णगतेरपि ।
परोपकारं पुण्यं तुलां क्रतुशतैरपि ॥"

इति पद्मोत्तरखण्डे ९२ अध्याय: ॥

परोवरीय:, त्रि, परांश्चावरांश्चानुभवति । ("परोवरपरम्परपुत्रपौत्रमनुभवति ।" ५ । २ । १० । इति ।) अवरस्रोत्यं निपात्यते । श्रेष्ठाश्रेष्ठपुत्र: । इति विश्वकोषतट्टी ॥

परोष्णी, स्त्री, (परा: प्रकृष्टा उष्णा यस्या: ।) तैलपायिका । इत्यमर: । २ । ५ । २६ ॥ (काश्मीरदेशस्थनदीविशेष: । यथा, राजतरङ्गिण्याम् । ८ । २००७ ।

"कौरकोमलकोराद्यैर्मिलितैर्युल्लोपि सादिभि: ।
तीर्त्वा परोष्णीं ततसेना निर्ममाथाग्रमाधिनीम् ॥")

पर्कटि:, } स्त्री, (पृष्ठ् धी ष् वर्म्मणे + वाहुपर्कटी, } लकादृष्टि: । "वञ्चादिभ्यश्च ।" ४ । १ । ४५ इति वा ङीष् ।) प्लक्षवृक्ष: । इत्यमरटीकायां भरत: ॥ पाङ्ड इति भाषा ॥ (यथा, हितोपदेशे । "अस्ति तत्र महान् पर्कटीवृक्ष: ॥") तस्य गुणा: भावप्रकाशे ।

"प्लक्ष: कषाय: शिशिरो व्रणयोनिरुदाहृत: ।
दाहपित्तकफास्रघ्न: शोथघ्नो रक्तपित्तजित् ॥"

पर्कटी, [न्] पुं, वृक्षविशेष: । पाङ्ड इति भाषा ॥ तत्पर्य्याय: । प्लक्ष: २ पर्कटी ३ । इत्यमर: । २ । ४ । ३२ ॥ क्रमरज्जुतरु: ४ । इति रत्नमाला ॥ कपीतन: ५ चीरी ६ सुपार्श्व: ७ कमण्डलु: ८ जटी ९ जटरोह: १० शाखी ११ गर्दभाण्ड: १२ पीतन: १३ वटप्ररोह: १४ प्लक्ष: १५ प्लवङ्ग: १६ महावल: १७ । अस्य गुणा: कटुत्वम् । कषायत्वम् । शिशिरत्वम् । रक्तदोषमूर्च्छाभ्रमप्रलापनाशित्वञ्च । विशेषतो वृक्षकक्षस्थस्य गुणा: । इति राजनिर्घण्ट: ॥

पर्ज्जनी, स्त्री, (परं स्वास्थ्यं जनयतीति । पर + जन + णिच् । "कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् । स्त्रियां ङीप् ।) दारुहरिद्रा । इत्यमर: । २ । ४ । १०२ ॥

पर्জ্জন्य:, पुं, (पर्वति सिञ्चति वृष्टिं ददातीति । पृषु सेचने + "पर्জ্জन्य: ।" उणां । ३ । १०३ । इति निपातनात् वकारस्य जकारत्वं साधु: ।) इन्द्र: । (यथा, ऋग्वेदे । ६ । ५२ । ११ । [तुष्टुवांसं न: ॥")

"अस्मेपर्জ্জन्यावतं धियं मेऽस्मिन् हवे हुवा
ग्रन्थायमानमेव: । इत्यमर: । १ । ३ । १४६ ॥
मेघशब्द: । इति विश्व: ॥ अगर्ब्भेऽपि मेघ: ।
इति भरत: ॥ यथा, श्रीभगवद्गीतायाम् ।

"यज्ञाद्भवति पर्জ্जन्य: पर्জ্जन्यादन्नसम्भव: ॥"

(कश्यपमन्त्रा सुने: पुत्रविशेष: । स तु गन्धर्व्वविशेष: । यथा, महाभारते । १ । ६५ । ४४ ।

"तथा शालिशिरा राजन्! पर्জ্जन्यश्च चतुर्दश ।
कलि: पञ्चदशस्त्वेषां नारदश्चैव षोडश: ॥"

पर्জ্जन्य इव सर्व्वकामप्रदानात् विष्णु: । यथा, महाभारते । १३ । १४८ । १०० ।

"कुसुद: कुन्दर: कुन्द: पर्জ्जन्य: पावनोऽनिल: ॥"

"पर्জ্जन्यवदाध्यात्मिकादितापत्रयं शमयति सर्व्वान् कामानभिवर्षतीति पर्জ্जन्य: ।" इति शाङ्करभाष्यम् ॥)

पर्জ্जन्या, स्त्री, (पर्জ্जन्य + टाप् ।) दारुहरिद्रा । इति राजनिर्घण्ट: ॥

पर्ण, तृ क धारित्रे । इति कविकल्पद्रुम: ॥ (अदन्तपुरां-परं-चर्ण-सेट् ।) धरित् पीतवर्णस्य भाव: धारित्वम् । पर्णयति पर्णायति चम्बकम् । इति दुर्गादास: ॥

पर्ण, क्ली, (पिपर्त्तीति । पृ + "धापृवस्यतिभ्यो न: ।" उणां । ३ । ६ । इति न: । यद्वा, पर्णयतीति । पर्ण तृ क धारित्रे + अच् ।) पत्रम् । इत्यमर: । २ । ४ । १४ । (यथा, कुमारे । ५ । २८ ।

"स्वयं विशीर्णद्रुमपर्णवृत्तिता
परा हि काष्ठा तपसस्तया पुन: ।
तदध्यपाकीर्यत: प्रियंवदां
वदन्त्यपर्णेति च तां पुराविद: ॥")

ताम्बूलम् । यथा, राजनिर्घण्टे ।

"अनिधाय मुखे पर्णं पूगं स्वादयते नर: ।
मतिभंशो दरिद्र: स्यादन्ते न स्मरते हरिम् ॥"

ताम्बूलधारिलक्षणं यथा,—

"अगाधार्य्यो नृशंसश्च दृढभक्तिश्च पार्थिव ।
ताम्बूलधारी भवति नारी वाप्यथ तद्गुणा ॥"

इति मात्स्ये १९८ अध्याय: ॥

(पिपर्त्ति पालयति गगनपातादिति । पृ + न । पत्र: । यथा, महाभारते । १ । ३३ । २४ ।

"तदतुल्यमभिप्रेक्ष्य तस्य पर्णमनुत्तमम् ।
कृतानि सर्व्वभूतानि नाम चक्रुर्मनुत्तमम् ॥
सुरूपं पत्रमालक्ष्य तस्य पर्णमनुत्तमम् ॥")

पर्ण:, पुं, (पिपर्त्तीति । पृ पालने + "धापृवस्यतिभ्यो न: । उणां । ३ । ६ । इति न: । पलाशवृक्ष: । इत्यमर: । २ । ४ । २६ ॥ (यथा, ऋग्वेदे । १० । ६७ । ५ ।

"अश्वत्थे वो निषदनं पर्णे वो वसतिष्कृता ॥")

पर्णकार:, पुं, (पर्णं ताम्बूलम् । करोति उत्पादयतीति । पर्ण + कृ + अण् ।) वारजीवी । बारुइ इति भाषा ॥ इति केचित् ॥

पर्णकृच्छ्र:, पुं, (पर्णै: साध्यं कृच्छ्रं व्रतं यत्र । पत्रकृच्छ्रव्रतम् । यथा, याज्ञवल्क्ये । ३ । ३१६ ।

"पर्णोदुम्बरराजीवबिल्वपत्रकुशोदकै: ।
प्रत्येकं प्रत्यहाभ्यस्तै: पर्णकृच्छ्र उदाहृत: ॥"

पर्णखण्ड:, पुं, (पर्णमेव खण्डो यस्य । पुष्पादिहीनत्वात्तथात्वम् ।) वनस्पति: । इति शब्दचन्द्रिका ॥ (पर्णस्य ताम्बूलस्य खण्ड: ।) ताम्बूलैकांशश्च ॥

पर्णचोरक:, पुं, (पर्णं चोरयतीति । पर्ण + चोरि + ण्वुल् ।) चोरकनामगन्धद्रव्यम् । इति राजनिर्घण्ट: ॥

पर्णघ्न, [सु] त्रि, पर्ण + हन्सु + कर्त्तरि क्विप् । पत्रध्वंसकर्त्ता । इति व्याकरणम् ॥

पर्णनर:, पुं, (पर्णै: पलाशपत्रैर्निर्म्मितो नर: नराकार: पुत्तलक:।) पित्रादिश्राद्धास्यालाभे दाहार्थं तत्प्रतिनिधीभूतशरपलाशपत्ररचितोर्ध्वातन्तुवेष्टितयवपिष्टलिप्तनराकारपुत्तलक: । यथा,

"आश्वलायनगृह्यपरिशिष्टम् । अस्थिनाशे पलाशवृन्तानां त्रीणि वेष्टितानि पुरुषप्रतिकृतिं कृत्वा, अधोऽर्ध्वन्तु शिरसि ग्रीवायां दर्भ योजयेत् ।
'उरसि चिंशतं दद्यात् विंशतिं जठरे तथा ॥
बाहुभ्याञ्च शतं दद्यात् दद्याद्दशभिरङ्गुलिभिर्दर्भ ।
द्वादशार्द्धं दृषयोरर्द्धं शिश्न एव च ॥
ऊरुभ्यान्तु शतं दद्यात् चिंशतं जानुजङ्घयो: ।
पादाङ्गुलीषु च दर्भ एतत् प्रेतस्य लक्षणम् ।
ऊर्णासूत्रेण संवेष्ट्य यवपिष्टेन लेपयेत् ॥'
आदिपुराणम् ।
'तदलाभे पलाशोत्थै: पत्रै: कार्य्य: पुमानपि ।
प्रतेस्त्रिभिस्तया यद्वा शरमत्रैर्विधानत: ॥
तदलाभे अस्यालाभे । अत्र पलाशपत्रशरपत्रयो: तुल्यत्वेनोपादानात् आश्वलायनसूत्रेऽपि प्रतिकृतौ शरपत्रस्य ताम्र: । अत्राचाराद्यायोग्यत्वाच्च शरपत्रै: पुत्तलकं कृत्वा शिरःप्रभृतिषु पलाशपत्राणि देयानि । ततो वेष्टनं ऊर्णासूत्रेण लेपनं यवपिष्टेनेति । अस्थीनामभ्यन्तरदाहे शेषाहेनुद्धि: । तदुत्तरमर्पणनरदाहे तु चिराचम् । एवं पर्णनरं दग्ध्वा चिरात्रमशुचिर्भवेदित्यादि पुराणात् । यज्ञपार्श्व: ।
'पुत्राद्यैर्दुर्लभैरेतत् तदस्थीनि कदाचन ।
तदलाभे पलाशस्य यस्मादे हि पुन: क्रिया ॥

हि यस्मात्तदलाभे अस्थ्नामप्राप्तौ पलाशस्य तनूकृतपुत्तलकस्य दाहक्रिया। पुनरपि सम्भवे अस्थिलाभे पुनरपि अस्थिदाहक्रिया विहिता तस्मादृद्धि पुनरस्थीनि प्राप्यन्ते तदा पुनर्दाहश्चिराचाशौचे कर्त्तव्ये न पुनः पिण्डादिदानं वक्ष्यमाणयुक्तेः। विष्णुः।

"चिपत्ते तु गते पर्णनरं दद्यादनग्निकः।
चिपत्ताभ्यन्तरे राजन्नेव पर्णनरं दहेत्॥
तदूर्द्धमष्टमीं प्राप्य दर्शं वापि विचक्षणः॥"

दहेदिति शेषः। अस्यार्थः। अग्नौचाभ्यन्तरे यदि पर्णनरदाहं न कुर्य्यात्तदा मरणदिनावधिचिपत्ताभ्यन्तरं दाहः कार्य्य इत्यर्थः। इति हरिदासतर्कालङ्कारभट्टाचार्य्याः॥ वादवभट्टोऽप्येवम्। अवहारोऽपि ईदृश एव।

'पर्णनरं दहेन्नैव विना दर्शं कदाचन।
अस्थ्नामलाभे दर्शे तु ततः पर्णनरं दहेदिति॥'

दीपालिकायां सुमन्तुवचनात् दर्शे पर्णनरदाहः। दर्शमित्यत्राष्टमीमिति क्वचित् पाठः। अत्राष्टमी कृष्णा पिण्डकर्म्मणि कृष्णपक्षस्य प्राशस्त्योक्तेः।" इति शुद्धितत्त्वम्॥

पर्णभेदिनी, स्त्री, (पर्णानि भिनत्तीति। पर्ण+भिद्+णिनिः स्त्रियां ङीप्।) प्रियङ्गुः। इति राजनिर्घण्टः॥

पर्णभोजनः, पुं, (पर्णान्येव भोजनं यस्य। पर्णानि भुङ्क्ते इति वा। भुज्+कर्त्तरि ल्युः।) छागलः। इति शब्दरत्नावली॥

पर्णमाचालः, पुं, (पर्णमाचालयतीति। पर्ण+आ+चल+णिच्+अण्। निपातनात् विभक्तेर्लोपाभावः। बाहुलकात् सुम् वा।) कर्म्मरङ्गवृक्षः। इति शब्दमाला॥

पर्णमृगः, पुं, (पर्णचरो मृगः पशुः।) मृगगणविशेषः। यथा,—

"वनौकोवृक्षमार्ज्जारवृक्षमर्कटिकादयः।
एते पर्णमृगाः प्रोक्ताः सुश्रुतादिभिर्महर्षिभिः॥
वनौका वानरो वृक्षमार्ज्जारो वृक्षविड़ालः।
वृक्षमर्कटिका रुधी इति लोके। एतेषां मांसगुणाः। [हिताः।
"स्मृताः पर्णमृगा वृष्याश्चक्षुष्याः श्लेष्मिणो श्वासार्शःकासश्रमनाः सृष्टमूत्रपुरीषकाः॥"

इति भावप्रकाशः॥

पर्णलता, स्त्री, (पर्णप्रधाना लता।) नागवल्ली। इति राजनिर्घण्टः॥

पर्णवल्ली, स्त्री, (पर्णप्रधाना वल्ली।) पलाशी लता। इति राजनिर्घण्टः॥

पर्णशाला, स्त्री, (पर्णैः पत्रादिभिः राचिता शाला। मध्यपदलोपिसमासः।) मुनीनां पत्ररचितगृहम्। तत्पर्य्यायः। उटजम् २। इत्यमरः। २। २। ६॥ पर्णोटजम् ३। इति शब्दरत्नावली॥ पर्णवती शाला। पर्णप्रधाना शाला वा। इति भरतः॥ (यथा, रघुः। १। ६५।

"निर्हृत्य कुलपतिना च पर्णशाला-
मध्यास्य प्रयतपरिग्रहद्वितीयः।

तच्छिष्याध्ययननिवेदितावसानां
संविशः कुशशयने निशां निनाय॥"

मध्यदेशस्थग्रामविशेषः। यथा महाभारते। १३। ६८। ३।

"मध्यदेशे महान् ग्रामो ब्राह्मणानां बभूव ह।
गङ्गायमुनयोर्मध्ये यामुनस्य गिरेरधः॥
पर्णशालेति विख्यातो रमणीयो नराधिप!॥")

पर्णसिः, पुं, (पॄ पूरणे+"सानसिवर्णसिपर्णसीति।" उणां। ४। १०७। इति असिर्नुक् च।) पद्मम्। इत्युणादिकोषः॥ जलगृहम्। जलटुङ्गी इति भाषा॥ इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ शाकम्। आभरणक्रिया। इति संक्षिप्तसारोणादिवृत्तिः॥

पर्णाशनः, पुं, (पर्णं अश्नाति भक्षयतीति। अश्+ल्युः। पर्णानामशनः।) मेघः। इति शब्दमाला॥

पर्णासः, पुं, (पर्णैरसति दीप्यति शोभते इति यावत्। अस दीप्तौ+अच्।) तुलसी। इत्यमरः। २। ४। ७६॥

पर्णिनी, स्त्री, (पर्णानि सन्त्यस्याः। पर्ण+इनिः।) माषपर्णी। इति रत्नमाला॥ (यथा, सुश्रुते उत्तरतन्त्रे ६२ अध्याये।

"वर्हिष्करजनीकुष्ठ पर्णिनीशारिवाद्वये॥"

अम्बरीषविशेषः। यथा, हरिवंशे। २१८। ४६।

"मेनकासहजन्या च पर्णिनी पुञ्जिकास्थला॥")

पर्णी, [न्] पुं, (पर्णानि सन्त्यस्य। पर्ण+इनिः।) वृक्षः। इति हेमचन्द्रः। ४। १८०॥

पर्णोटजं, क्ली, (पर्णैर्निर्म्मितं उटजम्।) पर्णशाला। इति शब्दरत्नावली॥

पर्ह, ड अपानोत्सर्गे। इति क्विकल्पद्रुमः॥ (भ्वां-आत्मं-अकं-सेट्।) ड, पर्हते वृद्धः। इति दुर्गादासः॥

पर्हः, पुं, (पॄ+बाहुलकात् दः।) केशसमूहः। इत्युणादिकोषः॥ (पर्ह अपानोत्सर्गे+अच्।) अपानोत्सर्गश्च॥

पर्हणं, क्ली, (पर्ह+ल्युट्।) अपानोत्सर्गः। इति हेमचन्द्रः। ६। ३६॥ पाद इति भाषा॥

पर्षं, क्ली, (पॄ पालनादौ+"खर्ष्यशिल्पशुष्यव्याख्यरूपपर्षतल्पाः।" उणां। ३। २८। इति निपातनात् सिद्धम्।) नवतृणम्। गृहम्। इत्युणादिकोषः॥ खड्गवाद्यमुकुटम्। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

पर्पटः, पुं, (पर्प+अटन्।) वृक्षविशेषः। क्षेतपापड़ा इति वङ्गभाषा। दवनपापर इति हिन्दीभाषा। तत्पर्य्यायः। त्रिवृष्टिः २ तिक्तः ३। इति रत्नमाला॥ चरकः ४ रेगुः ५ क्षणारिः ६ वरकः ७ व्रणकः ८ प्रीतः ९ प्रीतप्रियः १० पांशुः ११ कल्पाङ्गः १२ कर्म्मकण्टकः १३ क्षुद्रघ्राखः १४ प्रगन्धः १५ सुतिक्तः १६ रक्तपुष्पकः १७ पित्तारिः १८ कटुपत्रः १९ वक्रः २०। अस्य गुणाः। शीतलत्वम्। तिक्तत्वम्। पित्तश्लेष्मज्वररक्तदाहारुचिग्लानिमदभ्रमनाशित्वञ्च। इति राजनिर्घण्टः॥ ॥

"पर्पटो वरतिक्तश्च स्वादुः पर्पटकश्च सः।
कथितः पांशुपर्य्यायस्तथा क्वचनामकः॥
पर्पटो हन्ति पित्तास्रभ्रमतृष्णाकफज्वरान्।
संग्राही शीतलस्तिक्तो दाहनुद्वातलो लघुः॥"

इति भावप्रकाशः॥ * ॥

पिष्टकभेदः। पापर इति भाषा॥ तस्य गुणः। लघुत्वम्। रूक्षत्वञ्च। इति राजवल्लभः॥

"धूमसीरचिता हिङ्गुहरिद्रालवणैर्युताः।
जीरकस्वर्जिकाभ्याञ्च तनूं कृत्वा च वेल्लिताः॥
दीपनाः पाचना रूक्षा गुरवः किञ्चिदीरिताः॥
मौद्गाश्च तद्गुणाः प्रोक्ता विशेषाल्लघवो हिताः।
चणकस्य गुणैर्युक्ताः पर्पटाश्चणकोद्भवाः॥
स्नेहे भृष्टासु ते सर्व्वे भवेयुर्मध्यमा गुणैः॥"

इति भावप्रकाशे पूर्व्वखण्डे द्वितीयभागे॥

पर्पटद्रुमः, पुं, (पर्पट एव द्रुमः।) कुम्भीवृक्षः। इति राजनिर्घण्टः॥

पर्पटी, स्त्री, (पर्पट+ङीप्।) सौराष्ट्रमृत्तिका। इति रत्नमाला॥ पिष्टकभेदः। इत्युणादिकोषः॥ उत्तरदेशभवसुगन्धिद्रव्यम्। पपरीति प्रसिद्धम्। पद्मावतीति च। तत्पर्य्यायः। रङ्गिनी २ कृष्णा ३ जतुका ४ जननी ५ जनी ६ जतुकृष्णा ७ संस्पर्शा ८ जतुकृत् ९ चक्रवर्त्तिनी १०। अस्या गुणाः। तुवरत्वम्। तिक्तत्वम्। शिशिरत्वम्। वर्णकृत्त्वम्। लघुत्वम्। विषव्रणकण्डूकफपित्तासकुष्ठनाशित्वञ्च। इति भावप्रकाशः॥

पर्परीकः, पुं, (पिपर्त्तीति। पॄ+"शॄपॄकृभ्यः कित्।" उणां। ४। १२६। इति ईकन् द्वित्वं अभ्यासस्य रुगागमश्च।) सूर्य्यः। इत्युणादिकोषः॥ वह्निः। इति त्रिकाण्डशेषः। जलाशयः। इति संक्षिप्तसारोणादिवृत्तिः॥

पर्पिकः, पुं स्त्री, पर्पेण गच्छतीति। (पर्प+ठन्। खड्गः। इति सिद्धान्तकौमुदी॥ [सेट्।)

पर्ब्ब, गतौ। इति क्विकल्पद्रुमः॥ (भ्वां परं-सकं-

पर्य्यङ्कः, पुं, (परितोऽङ्क्यते इति। परि+अकि-लक्षणे+घञ्।) खट्वा। पालङ्ग इति भाषा॥ इत्यमरः। २। ६। १३८॥ तत्पर्य्यायः। (मञ्चः मञ्चकः ३ पल्यङ्कः ४। इति हेमचन्द्रः। ३। ३४७॥) पर्य्यस्तिका ५ परिकरः ६ अवसक्थिका ७) इति च तत्रैव। ३। ३४३॥ (यथा, महाभारते। ३। २४६। ८।

"अधोपविष्टं राजानं पर्य्यङ्के ज्वलनप्रभे।
उपप्लुतं यथा सोमं राहुणा रात्रिसंक्षये।
उपगम्याब्रवीत् कर्णो दुर्य्योधनमिदं तदा॥"

योगपट्टः। यथा, कुमारे। ३। ४५।

पर्य्यङ्कबन्धस्थिरपूर्व्वकायं
दृष्ट्वायतं सन्नमितोभयांसम्॥")

पर्य्यङ्कपादिका, स्त्री, (पर्य्यङ्कस्येव पादोऽस्याः। ठन् टाप् च।) कोलशिम्बी। इति राजनिर्घण्टः॥

पर्य्यङ्कबन्धनं, क्ली, (पर्य्यङ्कवत् यद्बन्धनम्।) वस्त्रादिना पृष्ठजानुजङ्घाबन्धनम्। फाड्‌बाँधा इति भाषा॥ यथा,—

"प्राप्तप्रसारणाग्नौ तथा पर्य्यवदातवचनम् ।"
इत्यपराधगणनायां धरिभक्तिविलासः ॥

पर्य्यटनं, क्ली, (परितोऽटनं भ्रमणम् । परि+अट+भावे ल्युट् ।) सर्व्वतोभावेनाटनम् । पुनः पुनर्गमनम् । भ्रमणम् । तत्पर्य्यायः । व्रज्या २ अटाट्या ३ । इत्यमरः । २ । ७ । ३८ ॥ (यथा, भागवते । ८ । ७ । १८ ।
"भूमेः पर्य्यटनं पुण्यं तीर्थक्षेत्रावगाहनैः ॥")

पर्य्यनुयोगः, पुं, (परितोऽनुयोगः पृच्छा । परि+अनु+युज्+भावे घञ् ।) जिज्ञासा । इति हलायुधः ॥ ("इतेनास्यापि पर्य्यनुयोगस्यानवकाशः ।" इति व्यवहारभागः ॥)

पर्य्यन्तः, पुं, (परिगतोऽन्तम् । प्रादिसमासः ।) सीमा । इति दुर्गादासः ॥ (यथा, पञ्चतन्त्रे । १ । १४१ ।
"पर्य्यन्तो लभ्यते भूमेः समुद्रस्य गिरेरपि ।
न कथञ्चित् मनीषायाः चित्तान्तः केनचित् क्वचित् ॥"
समीपम् । यथा, हरिवंशे । १२२ । ५३ ।
"पर्य्यन्तदेशं सरसेन देवी
लिलेप सा लोहितचन्दनेन ॥"
पार्श्वः । यथा, रघौ । १८ । ४३ ।
"पर्य्यन्तसंस्थारितचामरस्त्रं
कपोलसंलोभयकाकपक्षात् ।
तस्यानगादुत्तरतो विवादः
चरणात् वेलास्वपि नार्णवानाम् ॥")

पर्य्यन्तभूः, स्त्री, (पर्य्यन्तस्य शेषसीमाया भूः पृथिवी ।) नदीनगरपर्व्वतादेरप्रान्तभूमिः । तत्पर्य्यायः । परिसरः २ । इत्यमरः । २ । १ । १२ ॥

पर्य्यन्तिका, स्त्री, (परितः सर्व्वतो भावेन अन्तिका गुणादीनां नाशिका ।) गुणभङ्गः । इति धरणी । २१० ॥

पर्य्यन्यः, पुं, (पर्जन्य+पृषोदरादित्वात् साधुः ।) इन्द्रः । शब्दायमानमेघः । मेघशब्दः । इत्युणादिकोषः ॥ (यथा, गीः रामायणे । ६ । ३१ । ३२ ।
"ततो दुन्दुभिनिर्घोषः पर्य्यन्यनिनदोपमः ॥")

पर्य्यये, पुं, (परि क्रमशः अयो गमनम् ।) क्रमोल्लङ्घनम् । (परि शास्त्रलोकाचारमर्य्यादां परित्यज्य अयो गमनमुल्लङ्घनमित्यर्थः ।) अतिक्रमः । शास्त्रतो लोकव्यवहाराच्च प्राप्तस्यार्थस्य परित्यागः । तत्पर्य्यायः । अतिपातः २ उपात्ययः ३ । इत्यमरभरतौ । विपर्य्ययः ४ व्यत्ययः ५ । व्यतिपतनम् ६ व्यत्ययः ७ अतिक्रमः ८ । इति शब्दरत्नावली ॥ (यथा, महाभारते । ३ । ४८ । १२ ।
"अशास्त्रार्थादृते चार्थं यथा कुरुरुरूधा ।
क्रमं धारयते लोकं प्रतीक्षन् कालपर्य्ययम् ॥")

पर्य्यवदानं, क्ली, (परितोऽवदानं गच्छत्यनेन । परि+अव+ल्युट् ।) लक्षणम् । इति शब्दमाला ॥ (ऋद् इति भाषा ॥

पर्य्यवसानं, क्ली, (परितोऽवसानम् । परि+अव+सो+"आतश्चोपसर्गे ।" ३ । ३ । १०६ । ल्युट् ।) निरोधनम् । इत्यमरः । ३ । २ । २१ ॥

पर्य्यवस्थाता, [तृ] त्रि, (पर्य्यवतिष्ठते इति । परि+अव+स्था+तृच् ।) पर्य्यवस्थाकर्त्ता । विरोधी । इति हलायुधः ॥ (यथा, किरा-तार्জ্জुनीये । ११ । १६ ।
"अन्तकः पर्य्यवस्थाता कस्मिन् सन्तापदः ।
इति त्याज्ये भवे भयो मुक्तापुत्रिष्ठते जनः ॥")

पर्य्यवस्थानं, क्ली, (परितोऽवतिष्ठतेऽनेन । परि+अव+स्था+करणे ल्युट् ।) विरोधः । इति शब्दार्थः ॥ सर्व्वतोभावेनावस्थितिश्च ॥

पर्य्यस्तः, त्रि, (परितोऽस्तः क्षिप्तः । अस्तु इर क्षेपे+क्तः ।) पतितः । एतः । इति मेदिनी । ते, १२१ ॥ (सर्व्वतः प्रस्तः । विस्तृतः । यथा, हरिवंशे । १५६ । ९० । [राम ॥")
"पर्य्यस्तां पृथिवीं कृत्स्नां साश्वां सरथकुञ्जराम्

पर्य्यस्तिका, स्त्री, (परितः अस्यते क्षिप्यते शरीरमत्र । परि+अस क्षेपे+अधिकरणे क्तिन् । ततः स्वार्थे कन् ।) खट्वा । इति हेमचन्द्रः । ३ । ३४३ ॥

पर्य्यागं, क्ली, (परितो याति गच्छत्यनेनेति । परि+या+ल्युट् । पृषोदरादित्वात् साधुः । अश्वमल्लयनम् । इति हेमचन्द्रः । ४ । ३१८ ॥ (यथा, हृहत्संहितायाम् । ६३ । ६ ।
"आरोहणमन्यवाजिनां
पर्य्यागादियुतस्य वाजिनः ।
उपवाह्य तुरङ्गमस्य वा
कल्यस्येव विपन्नशोभना ॥")

पर्य्याप्तं, क्ली, (परि+आप्+भावे क्तः ।) यथेष्टम् । लब्धम् । शक्तिः । निवारणम् । इति मेदिनी । ते, १२७ ॥ त्रि, प्राप्तम् ॥ (शक्तिसम्पन्नः । यथा, भगवद्गीतायाम् । १ । १० ।
"पर्य्याप्तन्त्विदमेतेषां बलं भीमाभिरक्षितम् ।"
"पर्य्याप्तं समर्थं भाति इति ।" श्रीधरस्वामी ॥)

पर्य्याप्तिः, स्त्री, (परि+आप+क्तिन् ।) परित्यागम् । मरणोद्यतस्य निवारणम् । इत्यमरभरतौ ॥ प्रकाशः । प्राप्तिः । इति शब्दरत्नावली ॥ (लब्धिः । यथा, कथासरित्सागरे । २६ । १६६ ।
"नास्ति व्यसनिनां वत्स ! सुखे पर्य्याप्तये धनम् ॥"
शक्तिः । यथा, तत्रैव । २६ । ४७ ।
"प्रविष्टः सोऽप्यपश्यत्तां तत्र नेत्रोत्सवप्रदाम् ।
धातुरद्भुतनिर्म्माणपर्य्याप्तिमिव रूपिणीम् ॥")
स्वरूपसम्बन्धविशेषः । स च सर्व्वेषामेव पदार्थानां विशिष्टबुद्धिनियामकः । पदार्थभेदेन नाना । यथा । पर्य्याप्तिसम्बन्धेनैको घट इमौ द्वौ इत्यादि प्रतीतिनिरूपकः स्वरूपसम्बन्धविशेषः । इति दीधितिः ॥ समवायेन गुणे गुणत्वासत्त्वेऽपि चत्वारो गुणा इत्यादि प्रतीत्या गुणादिषु संख्यादिमत्त्वनियामकोऽपि तादृशसम्बन्धः । इति सामान्यनिर्व्वाचे जगदीशः ॥ द्वितीयमुत्पत्तिवादे गदाधरभट्टाचार्य्यश्च ॥

पर्य्यायः, पुं, (परि+इण् गतौ+"गुरोश्चहलः ।" ३ । ३ । १०३ । इति घञ् । क्रमप्राप्तस्यानतिपातोऽनुपात्ययः ।) पर्य्ययम् । क्रमः । (यथा, कुमारे । २ । ३६ ।
"पर्य्यायसेवानुतृप्तस्य पुष्पसम्भारतत्परा ।
उद्यानपालसामान्यस्तत्रवस्तनुपामते ॥")
तत्पर्य्यायः । आनुपूर्व्वी २ आवृत् ३ परिपाटी ४ अनुक्रमः ५ । इत्यमरः । २ । ७ । ३७ ॥ आनुपूर्व्यम् ६ आनुपूर्व्वम् ७ आनुपूर्व्वकम् ८ परिपाटिः ९ । इति भरतादयः ॥ प्रकारः । अवसरः । इति मेदिनी । ये, ९६ ॥ निर्म्माणम् । द्रव्यधर्म्मः । इति हेमचन्द्रः ॥ ६ । १३६ । क्रमैकार्थवाचकाः शब्दाः पर्य्यायाः । इति विश्वप्रकाशः ॥ सम्पर्कविशेषः । येन सह यत्सम्पर्कः समन्वस्तेन सह तत्पर्य्यायः । यथा,—
"समानं कुलभावञ्च दानादानञ्चथैव च ।
तयोर्वैशसमानं हि पर्य्यायञ्च प्रचक्षते ॥"
इति कुलदीपिका ॥
(अर्थालङ्कारविशेषः । यथा, साहित्यदर्पणे १० । १०४ ।
"क्वचिदेकमनेकस्मिन्ननेकञ्चैकगं क्रमात् ।
भवति क्रियते वा चेत् तदा पर्य्याय इष्यते ॥"
उदाहरणं क्रमेण यथा,—
"स्खलिताः चक्रं पक्ष्मसु ताडिताधराः
पयोधरोत्सेधनिपातचूर्णिताः ।
वलीषु तस्याः स्खलिताः प्रपेदिरे
क्रमेण नाभिं प्रथमोदबिन्दवः ॥
विचरन्ति विलासिन्यो यत्र श्रोणिभरालसाः ।
इककाकश्चिवास्तत्र धावन्त्यरिपुरे तव ॥
विस्फुरागादधरान्निवर्त्तित-
स्तनाङ्गरागादरुणाच्च कन्दुकात् ।
कुशाङ्कुरादानपरिक्षताङ्गुलिः
क्षतोक्षरुग्वप्रयथी तया करः ॥
ययोरारोपितस्तारो हारस्तोरिवधूनने ।
निधीयन्ते तयोः स्थूलाः स्तनयोरन्तरिन्दवः ॥
क्वचिच्च क्वचिदाधारः संघृतरूपोऽसंघृतरूपश्च ।
क्वचिदाधेयमपि । यथा, 'स्खलिताः चक्रं पक्ष्मसु' इत्यत्र उदबिन्दवः पक्ष्मादावसंघृतरूप आधारे क्रमेणाभवन् । 'विचरन्ति' इत्यत्राधेयभूता इककादयः संघृतरूपारिपुरे क्रमेणाभवन् । एवमन्यत् । अत्र चैकस्यानेकत्र क्रमेणैव वृत्तेर्विशेषालङ्कारोऽयम् । विनिमयाभावात् परिवृत्तेः ॥")

पर्य्यायाध्ययनं, क्ली, (पर्य्यायेण क्रमेण अध्ययनम् ।) प्रश्नरिष्टादीनां क्रमेण अध्ययनम् । तत्पर्य्यायः । उपाध्यायः २ विधायः ३ । इत्यमरभरतौ ॥

पर्य्यासः, पुं, (पर्य्यस्यते इति । परि+अस्+घञ् ।) पतनम् । क्षेपणम् । इति पर्य्यन्तशब्दार्थदर्शनात् ॥ (परिवर्त्तः । यथा, मार्कण्डेयपुराणे । ५४ । २ ।
"महाभूतप्रमाणञ्च लोकालोकस्तथैव च ।
पर्य्यासं परिमाणञ्च गतिञ्चन्द्रार्कयोरपि ।")

पर्य्युदस्तं, क्ली, (पर्य्युदस्यते इति । परि+उत्+अस्+"क्तस्युटौ बहुलम् ।" ३ । ३ । ११७ । इति ल्युट् ।) अस्तम् । इत्यमरः । २ । ६ । ३ ॥

पर्य्युदस्तः, त्रि, (परि+उत्+अस+क्तः।) पर्य्युदासविशिष्टः। विधिनवि-भेदात्मकनञर्थयुक्तः। यथा। यद्यपि पर्य्युदस्त-रात्र्यादिषु श्राद्धादिकरणे विधेरौदासीन्यान्न फलं न वा प्रत्यवाय इति सिद्धान्तः॥ इति मल-मासतत्त्वम्॥ (परित उत्क्षिप्ते त्रि॥)

पर्य्युदासः, पुं, परि सर्व्वतोभावेन उदास्यते विधि-र्यत्र सः। (परि+उत्+अस+घञ्।) तस्य लक्षणम् आह्निकविवेके।

"सामान्यशास्त्रप्राप्तनिषेधस्यैव पर्य्युदासत्वम्॥" अपि च मूलमासतत्त्वे।

"प्राधान्यन्तु विधेर्यत्र प्रतिषेधेऽप्रधानता। पर्य्युदासः स विज्ञेयो यत्रोत्तरपदेन नञ्॥" अस्योदाहरणम्। अमावस्यायां पित्रभ्यो दद्यात् रात्रौ श्राद्धं न कुर्व्वीत। अत्र श्राद्धकरणे रात्रेः पर्य्युदासः॥ (यथा च साहित्यदर्पणे। ७। ३।

"गुणोपात्मानमत्रस्तो भेजे धर्म्ममनातुरः। अगृध्नुराददे सोऽर्थानसक्तः सुखमन्वभूत्॥ अत्राऽत्रस्तामनूद्यात्मगोपनाद्येवविधेयमिति नञः पर्य्युदासतया गुणभावो युक्तः॥")

पर्य्युषितं, त्रि, (परित्यज्य स्वकालमुषितम्। वस+क्तः।) बुसम्। वासि इति भाषा। तस्या-भक्षणीयत्वं यथा,—

"भक्तं पर्य्युषितोच्छिष्टं स्रस्तं पतितेक्षितम्। उदक्यास्पृष्टसंसृष्टं पर्य्यायान्नञ्च वर्ज्जयेत्॥"

इति गरुडपुराणम्॥

"यातयामं गतरसं पूतिपर्य्युषितञ्च यत्। उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम्॥"

इति भगवद्गीता॥ *॥

तस्य भक्ष्यत्वं यथा,—

"मन्त्राभिमन्त्रितं शुष्कं न च पर्य्युषितं नृप!। अन्यत्र फलमांसेभ्यः शुष्कशाकादिकात्तथा॥ तद्वद्वादरिकेभ्यश्च गुडपक्वेभ्य एव च॥"

इत्याह्निकतत्त्वम्॥

तुलसीमुक्तपुष्पे पर्य्युषितदोषाभावो यथा,—

"तुलसीलग्नपुष्पाणि पद्मं गङ्गोदकं कुशाः। न पर्य्युषितदोषोऽत्र छिन्नभिन्नं न दुष्यति॥"

इति पुराणम्॥

पर्य्युषितभोजी, [न्] त्रि, (पर्य्युषितं बुसं भुङ्क्ते इति। भुज+णिनिः।) बुसभक्षकः। इति कलापव्याकरणम्॥

पर्य्येषणा, स्त्री, (इष्+युच्+टाप्। ततः परित एषणा।) अन्वेषणा। इत्यमरः। २। ७। ३२॥ तर्कादिना यथावोधितधर्म्माद्यन्वेषणे। अन्वे-षणमात्रेऽपि। इति भरतः॥ (क्ली, अन्वे षणम्। यथा, महाभारते। ३। २६। १८।

"ब्राह्मणेष्वेव मेधावी बुद्धिपर्य्येषणञ्चरेत्॥")

पर्व्व, गतौ। (भ्वां-परं-सकं-सेट्।) पर्व्वति। इति दुर्गादासः॥

पर्व्व, पूर्त्तौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) पर्व्वति प्रयसा कृष्णं चेष्टौ। इति दुर्गादासः॥

पर्व्व, [न्] क्ली, (पर्व्वतीति। पर्व्व गतौ+बाहु-लकात् कनिन्। यद्वा, पिपर्त्तीति। पॄ+"स्रा-मदिपदयर्त्तिपॄशकिभ्यो वनिप्।" उणां। ४। ११२। इति वनिप्।) ग्रहः। ग्रन्थिः। (यथा, भागवते। ५। २१। १७। "तथा वालखिल्या ऋषयोऽङ्गुष्ठपर्व्वमात्राः षष्टिसहस्राणि पुरतः सूर्य्यं सूक्तवाकाय नियुक्ताः संस्तुवन्ति॥") प्रस्तावः। लक्षणाक्षरम्। दर्शप्रतिपदोः सन्धिः। (पूर्णिमाप्रतिपदोःसन्धिश्च। यथा, साहित्यदर्पणे। "व्यकालजलदावली किरतु नाम मुक्तावली-रपर्व्वणि विधुन्तुदस्तुदतु नाम शीतद्युतिम्॥") विषुवत्प्रभृति। इति मेदिनी। ने, ८८॥ ग्रन्थ-विच्छेदः। इति त्रिकाण्डशेषः॥ (यथा, महा-भारते अष्टादशपर्व्वाणि। तानि उक्तानि यथा तट्टीकायाम्।

"आदिः सभावनविराटमधोद्यमश्च भीष्मो गुरू रविजमद्रकसौप्तिकश्च। स्त्रीपर्व्व शान्तिरनुशासनमश्वमेध-वासाश्रमो सुयलयानदिवावरोहः॥")

पर्व्वणः। इति शब्दचन्द्रिका॥ (भङ्गी। यथा, रघुवंशे। १६। ४६।

दिने दिने शैवलवन्त्यधस्तात् सोपानपर्व्वाणि विसृष्टदम्भः॥")

पञ्चपर्व्वाणि यथा। विष्णुपुराणम्।

"चतुर्दश्यष्टमी चैव अमावास्या च पूर्णिमा। पर्व्वाण्येतानि राजेन्द्र! रविसंक्रान्तिरेव च॥ स्त्रीतैलमांससम्भोगी पर्व्वस्वेतेषु वै पुमान्। विण्मूत्रभोजनं नाम प्रयाति नरकं नृतः॥"

पर्व्वसु कर्त्तव्याकर्त्तव्यानि यथा। ब्रह्मपुराणे।

"नित्यं हयोरयनयोर्नित्यं विषुवतोर्दयोः। चन्द्रार्कयोर्ग्रहणयोर्व्यतीपातेषु पर्व्वसु॥ अहोरात्रोषितः स्नानं श्राद्धं दानं तथा जपम्। यः करोति प्रसन्नात्मा तस्य स्यादक्षयञ्च तत्॥"

पराशरभाष्ये कूर्म्मपुराणम्।

"अनध्यायस्तु नाङ्गेषु नेतिहासपुराणयोः। न धर्म्मशास्त्रेष्वन्येषु पर्व्वस्वेतानि वर्ज्जयेत्॥"

पैठीनसिः। न पर्व्वसु तैलं चौरं मांसमभ्यु-पेयात् नामावास्यां हरितमपि छिन्द्यात्। इति तिथ्यादितत्त्वम्॥

पर्व्वकं, क्ली, (पर्व्वणा ग्रन्थिना कायतीति। कै+कः।) ऊरुपर्व्व। इति शब्दचन्द्रिका॥ आँटु इति भाषा॥

पर्व्वकारी, [न्] पुं, (पर्व्व करोतीति। पर्व्व+क+णिनिः।) घनादिलोभेनापर्व्वसु अमावास्याक्रिया-प्रवर्त्तकः। यथा, विष्णुपुराणे द्वितीयांशे ६ अः।

"शूची माहिषकश्चैव पर्व्वकारी च यो द्विजः॥"

पर्व्वगामी, [न्] पुं, (पर्व्वसु चतुर्दश्यष्टम्यादिषु गच्छति स्त्रियमिति। पर्व्व+गम+णिनिः।) पर्व्वसु स्त्रीगामी। इति पूर्व्वोक्तश्लोके पर्व-कारीत्यत्र पर्व्वगामीति पाठद्वैधे स्वामी॥

पर्व्वतः, पुं, (पर्व्वति पूरयतीति। पर्व्व पूरणे+"भृञ्जिधारिसर्जिदंशिभ्यश्चित्।" उणां। ३। ११०। इति अतच्। चित्त्वात् टिलोपः।) यद्वा, पर्व्वाणि भागाः सन्त्यत्र। पाहाड़ इति भाषा॥ तत्पर्य्यायः। महीधः २ शिखरी ३ च्यावनः ४ अहार्य्यः ५ धरः ६ अद्रिः ७ गोत्रः ८ गिरिः ९ गावा १० अचलः ११ शैलः १२ शिलोच्चयः १३। इत्य-मरः। २। ३। १॥ स्थावरः १४ सानुमान् १५ पृथुशेखरः १६ धरणीकीलकः १७ कुट्टारः १८ जीमूतः १९ धातुभृत् २० भूधरः २१ स्थिरः २२ कुलीरः २३ कटकी २४ शृङ्गी २५ निर्झरी २६ अगः २७ नगः २८ दन्ती २९। इति शब्द-रत्नावली॥ धरणीधरः ३० भूभृत् ३१ क्षिति-भृत् ३२ अवनीधरः ३३ क्षुधरः ३४ धराधरः ३५ प्रस्थवान् ३६ वृक्षवान् ३७। इति राज-निर्घण्टः॥ *॥ सुमेरोः पूर्व्वे पर्व्वता यथा,—

"शीतान्तश्चक्रमुञ्जश्च कुलीरोऽथ च कञ्चवान्। मणिशैलोऽथ वृषवान् महानीलो भवाचलः॥ सुविद्रुमन्दरो वेणुः सुमेधो निमिषस्तथा। देवशैलस्य पूर्व्वेण मन्दरस्य महाचलाः॥"*॥

सुमेरोर्दक्षिणे पर्व्वता यथा,—

"त्रिकूटः शिखरादित्रि कलिङ्गोऽथ पतङ्गकः। रुचकः सानुमांश्चैव ताम्रकोऽथ विशाखवान्॥ श्वेतोदरः समलश्च वसुधारश्च रत्नवान्। एकशृङ्गो महाशैलो गजशैलः पिशाचकः॥ पञ्चशैलोऽथ कैलासो हिमवांश्चाचलोत्तमः। इत्येते दक्षिणे पार्श्वे मेरोः प्रोक्ता महाचलाः॥

सुमेरोः पश्चिमे पर्व्वता यथा,—

"सुचक्षुः शिशिरश्चैव वैदूर्य्यः पिङ्गलस्तथा। पिञ्जरोऽथ तथा भद्रः सुरसः कपिलो मधुः॥ अञ्जनः कुकुटः कृष्णः पाण्डुरश्चाचलोत्तमः। सहस्रशिखरश्चाद्रिः पारिपात्रः स शृङ्गवान्॥ पश्चिमेन तथा मेरोर्विख्यातात् पश्चिमाद्बहिः। एतेऽचलाः समाख्याताः शृणुष्वातस्त्वतो-ऽपरान्॥"

सुमेरोरुत्तरे पर्व्वता यथा,—

"शृङ्गकूटोऽथ ऋषभो हंसनाभौ तथाचलौ। कपिलेन्द्रस्तथा शैलः सानुमान्नील एव च॥ शुतशृङ्गः स्वर्णशृङ्गः तुन्नाको मेघपर्व्वतः। विराजाख्यो वराहाद्रिर्मयूरो रुचिरस्तथा॥ इत्येते कथिता ब्रह्मन्मेरोरुत्तरतो नगाः॥"

इति मार्कण्डेयपुराणम्॥ *॥

सप्तकुलपर्व्वतादि यथा,—

"सप्त येऽस्मिन् महापर्व्वा विश्रुताः कुलपर्व्वताः। महेन्द्रो मलयः सह्यः शुक्तिमानृक्षवानपि॥ विन्ध्यश्च पारिपात्रश्च इत्येते कुलपर्व्वताः। तेषां सहस्रशश्चान्ये पर्व्वतास्तु समीपतः॥ अविज्ञाताः पर्व्ववन्तो विपुलाश्चित्रसानवः। अन्ये तेभ्योऽपरिज्ञाता ह्रस्वाः स्वल्पोपजीविनः॥ तैर्विमिश्रा जनपदा आर्य्या म्लेच्छाश्च सर्व्वशः॥"

इति मात्स्ये ६५ अध्यायः॥ *॥

विंशतिः श्रेष्ठपर्व्वता यथा,—

"हिमवान् हेमकूटश्च निषधो नीलपर्व्वतः। श्वेतश्च शृङ्गवान् मेरुर्माल्यवान् गन्धमादनः॥

[illegible] मन्दरः सप्त सुरिमान्यवानपि ।
निषधश्च पारियात्रश्च कैलासो मन्दरस्तथा ॥
सौवर्णाश्चैव मर्यादा मर्यादाश्चारमानसः ।
एते सिद्धनिषेविताः पर्वताश्चम्पुवां वराः ॥"
तथा हेमपर्वतविभागश्चर्वतो यथा,—
"मन्दरेऽहिनसन्निभिरुद्धं हेमकूटश्च तस्मा-
त्पश्चाशानो निषध इति ते सिद्धपर्वन्दैर्व्याः ।
तस्य सिद्धाद्रयति प्रभाषद्भवत्कन्दरौघा
[illegible]र्यं प्रभुस्थि यथा अन्तरे दोग्धिदेशान् ॥"
इति सिद्धान्तशिरोमणिः । ॥ ॥
पर्वतानां वर्णोत्पत्तिर्यथा,—
"सर्वः सर्वो जायतां सिद्धीवेव तु मायया ।
पश्चिमा मेदिनीं यत्ता यथापूर्वं निवेशिताः ॥
तत्र ब्राह्मणसुरान्तान् धात्रादिष्टं यजार्थये ।
प्रतीच्यां पर्वताः सर्वे निर्ममस्पर्धया गताः ॥
तत्रानुरेभ्यः शंभुस्ते याचिषत्तं सुरात्ययम् ।
तत्पतिश्रासुराः सर्वे चक्रुरुद्योगमुत्तमम् ॥"
मृत्युध्यानमार्गं तेषां मर्यादाकरो यथा,—
"धरण्यान्तं गिरीन् स्थाप्य सेतु स्थानेषु गोःपतिः ।
निर्मिते पर्वता पश्चान्मर्यादां भुवि चारिताम् ॥
एतः सप्तो मेनाद्रः सुरैस्तत्समये कृतः ।"
इत्यग्निपुराणम् ॥ ॥
पर्वतानां स्थावरजङ्गमत्वं यथा,—
"सप्तैव पर्वताः सर्वे स्थिरत्वाच्च स्वभावतः ।
शेषं सर्वेषां कायस्तु शरीरमयरूपया ॥
स्थावरं पर्वतानान्तु रूपं कायस्वयावरः ।
नखोमास्य कस्तूरी तथैवान्तर्गता तनूः ॥
यद्विस्मिन्सरत्नम् सर्वदेव प्रवर्तते ।
एवं सर्वं स्थावरस्य नदीपर्वतयोरपि ॥
गच्छत्येवं कायस्तु सततं नोपपद्यते ।
स्थाप्यते स्थावरेण शरीरं पर्वतस्य तु ॥
तथा नदीनां कायस्तु तोयेनाप्यायते सदा ।
नदीनां कामरूपित्वं पर्वतानामतैव च ॥
एतस्मिन्नरौ पुरा विष्णुः कल्पयामास यत्नतः ।
तोयदानां नदीदुःखजायते सततेप्सिता ॥
विशीर्णे स्थावरे दुःखं जायते गिरिकायजम् ॥"
इति कालिकापुराणे ३२ अध्यायः ॥ ॥
एषां पर्वतेषु देवानामवस्थाना वर्ण्यन्ते ।
तत्र मेरौ ब्रह्मलोकः पर्वतस्योपरि मरे-
रस्य शीतलाग्रं तत्र देवराजस्य पारिजातक-
रक्षणम् । तस्य पूर्वभागे कुञ्जरो नाम गिरिः
तस्योपरि शतशतानामष्टौ पुराणि च । तथा
पश्चिमपर्वते राक्षसानामनेकानि पुराणि तेषु
सदा घोराः कामरूपिणः मद्यमांसेषु च
नैर्ऋते पुराणि पञ्चसप्तसप्तति किङ्कराणां
सहस्राणि तत्र वैश्रवणस्यानुचरा राक्षसाः मद्य-
पाः किङ्कराणां सहिताः सन्ति सौम्यदिशि पि-
शाचानां च पुराणि सप्तैवेषु च पर्वतेषु
पञ्चसप्तसंख्यानि [illegible]
[illegible]
[illegible]

उत्तरेऽमममहाबलांदयश्च गन्धर्वा विद्या-
धराश्च तिष्ठन्ति च हैमवतानि सर्वमेव मरुदी
वर्तयन्ति । कुञ्जरे तु पर्वतवरे नित्यं पशुपति:
स्थित: वृषभाङ्को महादेव: शङ्करो योगिनां
प्रभु: अनेकगणसहस्रकोटिसहस्रपरिवारो भग-
वानादिपुरुषो वर्तयति: । वसुधारे चानुग्रहां
वसुनाथ समावास: वसुधारस्वधारयोर्मध्ये
सप्तौ सप्त च संख्या पुराणि वसुसमर्थांगाय ।
एकस्मिन्नरे च पर्वतोत्तमे प्रजानां: स्थानं चतु-
र्वक्त्रस्य ब्रह्मण: । गन्धपर्वते च महाभूतपरि-
वृता स्वयमेव भगवती तिष्ठति । वसुधारे च
पर्वतवरे मुनिसिद्धविद्याधरानामायतनं चतु-
र्दशोत्तरपुरुषां महाप्राकारतोरणा: तत्र
यानेरुपन्नता नाम गन्धर्वा गुह्यशालिनो वसन्ति
तेषामाधिपतिर्देवो राजराजेश्वरिश्रुत: । सुर-
राक्षसा: पञ्चकूटे दानवा: शतशृङ्गे यक्षाणां
पुरश्चत्तम् । प्रमेदकस्य पश्चिमेन देवदानवसिद्धा-
दीनां पुराणि तस्य गिरेर्मूर्ध्नि महती सोमशिला
तिष्ठति तस्याश्च पर्वतेन पर्वतेन सोम: स्वयमेवा-
वतरति । तस्योत्तरपार्श्वे त्रिकूटं नाम तत्र
ब्रह्मा तिष्ठति क्वचित्तत्र च वह्न्यायतनं तत्र
सूर्यिमान् वह्निरुपास्यते देवै: । उत्तरे च ब्रह्मणे
पर्वतवरे देवतानामायतनानि पूर्वेण नारा-
यणस्यायतनं मध्ये ब्रह्मण: शङ्करस्य च पश्चिमे
तत्र यक्षादीनां कानिचित् पुराणि । तस्य
चोत्तरतीरे जातुरुक्षमहापर्वते त्रिंशद्योजन-
मण्डलं नन्दनं नाम सरश्चत्र नन्दो नाम नाग-
राजो वसति शतशीर्षमहाप्रभ इति । एतेतेऽष्टौ
हेमपर्वता विज्ञेया: तेनानुक्रमेण हैमरजतरत्न-
वैदूर्यमन:शिलादिवर्णा: । एषश्च पृथ्वी लक्ष-
कोटिशतानेकसंख्याता पूर्वा-तेषु च सिद्धविद्या-
धराद्या निलया: । तदयथा मेरो: पार्श्वत:
केशरवलयालकालं सिद्धलोकेति कीर्त्यते एषश्च
पृथ्वी पद्माकारेण वर्तयिता एष सर्वपुराणेषु
क्रम: सामान्य: प्रतिपाद्यते । इति वराहपुरा-
णम् । ॥ हिमालयादिपर्वतवासिनो यथा,—
"रक्ष:पिशाचा यक्षाश्च सर्वे हैमवतास्तु ते ।
हैमकूटे तु गन्धर्वा विज्ञेयास्तामसोगणा: ॥
सर्वे नागाश्च निषधे सेवन्तेसुकितचका: ।
महामेरौ वर्तयिंशन्तु क्रीडन्ते याज्ञिका: सुरा: ॥
नीले तु वैदूर्यमये सिद्धा ब्रह्मर्षयोऽवसन् ।
हैलासो दानवागार श्वेतपर्वत उच्यते ॥
शृङ्गवान् पर्वतश्रेष्ठ: पितृणां प्रतिमाघर: ।
एतेतानि मयोक्तानि नव वर्षाणि भागश: ॥"
इति मात्स्ये ८५ अध्यायः ॥ ॥
एष पर्वतनदीसमुद्गता: ।
"हिमवत्प्रभवा याश्च सर्वे तामरसोपमम् ।
पारियात्रभवा याश्च विन्ध्यसंप्रभवाश्च या: ॥
ऋक्षोद्भवाश्च ये केचिन्ये च पारियात्रात्मजा: ।
सह्यप्रभवनिर्यातां ता वेणु: प्रोदकश्च ॥
सह्यात्तेरसंभूतं वाकुलान्यालिनी मुनि: ।
पर्वतोपरि यद्वारि सर्वं पौरस्त्यगं तत् ।
तत्सर्वमुत्तमं हैमं हैमवतोदकम् ॥

केसरं दीपनं रुच्यं किंचिद्वातप्रकोपनम् ॥"
इति राजवल्लभः ॥ ॥
पर्वतेषु वनस्पतयो यथा,—
"शैले मेरौषधीधातुर्वंशकिंशरनिर्झरा: ।
शृङ्गप्रपातगह्वरशबरीधातुपत्यका: ॥"
इति कविकल्पलता ॥ ॥
अथ कैलासपर्वतवर्णनम् ।
"मध्ये हिमवत: पृष्ठे कैलासो नाम पर्वत: ।
तस्मिन्निधिपति: श्रीमान् कुबेर: सह राक्षसै: ॥
अमर:सहितो राजा मोदते शुलकाधिप: ।
कैलासपादसम्भूतं पुण्यं श्रीतजलं शुभम् ॥
मन्दोदकं नाम सर: पयस्तु दधिसन्निभम् ।
तस्मात् प्रभवते दिशा नदी मन्दाकिनी शुभा ॥
दिशश्च चन्दनस्तत्र तस्यास्तीरे महद्वनम् ।
प्राग्मुत्तरेण कैलासं दिव्यं सौगन्धिकं गिरिम् ॥
सर्वधातुमयं दिव्यं शुक्लं पर्वतं प्रति ।
चन्द्रप्रभो नाम गिरि: स तु रूप्य रत्नसन्निभ: ॥
तत्समीपे सरो दिव्यमक्षोदसम विद्युतम् ।
तस्मात् प्रभवते दिशा नदी शुक्लोदका शुभा ॥
तस्यास्तीरे वनं दिव्यं महदैश्वरथं शुभम् ।
तस्मिन् गिरौ निवसति मणिभद्र: सहानुग: ॥
यक्षसेनापति: क्रूरैर्गुह्यकै: परिवारित: ।
पुण्या मन्दाकिनी चैव नदी शुक्लोदका शुभा ॥
मही[illegible]मध्ये तु प्रविष्टा तु महीदधिम् ।
कैलासादक्षिणपार्श्वां शिवं सर्वौषधिं गिरिम् ।
मन:शिलामयं दिव्यं शुक्लं पर्वतं प्रति ।
लोहितो हैमशृङ्गस्तु गिरि: सूर्यप्रभो महान् ।
तस्य पादे महद्दिव्यं लोहितं सुमहत् सर: ॥
तस्मात् प्रभवते पुण्यो लोहितश्च नदी महान् ।
देवारण्यं विशोकश्च तस्य तीरे महद्वनम् ॥
तस्मिन् गिरौ निवसति यक्षो मणिधरो बली ।
सौम्यै: स धार्मिकैश्चैव गुह्यकै: परिवारित: ॥
कैलासात् पश्चिमोदीच्यां ककुद्मानोषधीगिरि: ॥
ककुद्मति च रुद्रस्य शीतपत्तिश्चिककुद्मिन: ।
तदवनं चैककुदं शैलं चिककुदं प्रति ॥
सर्वधातुमयश्चैव सुमहद्देदुतो गिरि: ।
तस्य पादे महद्दिव्यं मानसं सिद्धसेवितम् ॥
तस्मात् प्रभवते पुण्या सरयूर्लोकपावनी ।
तस्यास्तीरे वनं दिव्यं वैभ्राजसम विद्युतम् ॥
कुबेरानुचरस्तस्मिन् प्रहेतिर्नाम यक्षो बली ।
नाम्ना वै ब्रह्मधामेति राक्षसोऽमिततेजसः ॥
कैलासात् पश्चिमाभागे दिव्य: सर्वौषधिर्गिरि: ।
शरण्य: पर्वतश्रेष्ठो रत्नधातुविभूषित: ॥
भवस्य दयित: श्रीमान् पर्वतो हैमसन्निभ: ।
शातकौम्भमयैर्दिव्यै: शिखरालै: समन्तत:
शतसंस्थैस्तथाभाति: सर्वैर्दिव्यमिवोल्लिखन् ।
शुक्लात् सुमहद्दिव्यं मैनेयो मणीप्रिय: ॥
तस्मिन् गिरौ निवसति मिहीरो यक्षसेनिप: ।
तस्य पादे महद्दिव्यं सर: काञ्चनवालुकम् ॥
तस्य पादात् प्रभवति मैनेयं नाम तत् सर: ।
तस्मात् प्रभवते पुण्या नदी मैनेयजा शुभा ॥
स च प्रहस्तोऽनुचरस्तस्मिन् वसति पर्वतेऽमितौजसि ।

पर्व्वतः

अभ्युत्तरेण कैलासं शिवं सर्व्वौषधिं गिरिम् ।
गौरन्तु पर्व्वतश्रेष्ठं हरितालमयं प्रति ।
हिरण्यशृङ्गः सुमहान् दिव्यौषधिमयो गिरिः ॥
तस्य पादे महद्दिव्यं सरः काञ्चनवालुकम् ।
रम्यं बिन्दुसरो नाम यत्र राजा भगीरथः ॥
गङ्गार्थे स तु राजर्षिरुवास बहुलाः समाः ।
दिवं यास्यन्ति मे पूर्व्वे गङ्गातोयपरिप्लुताः ॥
तत्र त्रिपथगा देवी प्रथमन्तु प्रतिष्ठिता ॥"

इति मात्स्ये १०१ अध्यायः ॥

अथ दशधा कृत्रिमपर्व्वतदानम् ।

"प्रथमो धान्यशैलः स्याद्द्वितीयो लवणाचलः ।
गुड़ाचलस्तृतीयस्तु चतुर्थो हेमपर्व्वतः ॥
पञ्चमस्तिलशैलः स्यात् षष्ठः कार्पासपर्व्वतः ।
सप्तमो घृतशैलश्च रत्नशैलस्तथाष्टमः ॥
राजतो नवमस्तद्वद्दशमः शर्कराचलः ।
वक्ष्ये विधानमेतेषां यथावदनुपूर्व्वशः ॥
अयने विषुवे पुण्ये यतीपाते दिनक्षये ।
सुरूपक्षे तृतीयायामुपरागे शशिक्षये ॥
विवाहोत्सवयज्ञेषु द्वादश्यामथवा पुनः ।
शुक्लायां पञ्चदश्यां वा पुष्यर्क्षे वा विधानतः ॥
धान्यशैलादयो देया यथाशास्त्रं विजानता ।
तीर्थे वायतने वापि गोष्ठे वा भवनाङ्गने ॥
मण्डपं कारयेद्भक्त्या चतुरस्रसुदृश्यम् ।
प्राग्दक्षवनञ्चैव प्राङ्मुखं वा विधानतः ॥
गोमयेनानुलिप्तायां भूमावास्तीर्य्य वै कुशान् ।
तत्मध्ये पर्व्वतं कुर्य्याद्विष्कम्भपर्व्वतान्वितम् ॥
धान्यद्रोणसहस्रेण भवेद्धिरिरिहोत्तमः ।
मध्यमः पञ्चशतिकः कनिष्ठः स्यात्त्रिभिः शतैः ॥
मेरुर्मन्दारहिमयस्तुमध्ये
सुवर्णशृङ्गोच्चयसंयुतः स्यात् ।
पूर्व्वेण सक्ताफलवज्रयुक्तो
याम्येन गोमेदकपुष्यरागैः ॥
पश्चाच्च गारुत्मतनीलरत्नैः
सौम्येन वैदूर्य्यसरोजरागैः ।
श्रीखण्डखण्डैरभितः प्रवाल-
लतान्वितः शुक्तिशिलातलः स्यात् ॥
ब्रह्मा च विष्णुर्भगवान् मुरारि-
र्दिवाकरोऽप्यत्र हिरण्मयः स्यात् ।
मूर्द्धन्यवस्थानममत्सरेण
कार्य्यन्त्वनेके च पुनर्दिशासु ॥
चत्वारि शृङ्गाणि च राजतानि
नितम्बभागेऽपि च राजतः स्यात् ।
तथेक्षुवंशावृतकन्दरस्तु
घृतोदकप्रस्रवणश्च दिक्षु ॥
शुक्लाम्बराढ्यस्तु धरावलौ स्यात्
पूर्व्वेण नीलानि च दक्षिणेन ।
वासांसि पश्चादथ कर्व्बराणि
रक्तानि चोत्तरतो घनाली ॥
रौप्याभ्रदेन्द्रप्रमुखानधाष्टौ
संस्थाप्य लोकाधिपतीन् क्रमेण ।
नागाफलाली च समन्ततः स्या-
न्नागेरसं साज्यविशेषनञ्च ॥

पर्व्वतः

वितानकञ्चोपरि पञ्चवर्ण-
मम्लानपुष्पाभरणं सितं वा ।
इत्थं निवेश्यामरशैलमग्र्या-
मतस्तु विष्कम्भगिरीन् क्रमेण ॥
तुरीयभागेण चतुर्दिशञ्च
संस्थापयेत् पुष्पविलेपनाढ्यान् ॥
पूर्व्वेण मन्दरमनेकफलावलीभि-
र्युक्तं यवैः कनकभद्रकदम्बचित्रम् ।
कामेन काञ्चनमयेन विराजमान-
माकारयेत् कुसुमवस्त्रविलेपनाढ्यम् ॥
क्षीरारुणोदसरसाय वनेन चैव
रौप्येण शुक्तिघटितेन विराजमानम् ।
याम्येन गन्धमदनञ्च निवेशनीयो
गोधूमसक्तुमयः कनकौतवो वा ॥
हैमेन यज्ञपतिना घृतमानसेन
वस्त्रेण राजतवनेन च संयुतः स्यात्
पश्चात्तिलाचलमनेकसुगन्धिपुष्पं
सौवर्णपिप्पलहिरण्मयहंसयुक्तम् ॥
आकारयेद्घृतपुष्पवनेन तद्व-
द्वस्त्रान्वितं दधिसितोदसरस्तथाग्र्यं ।
संस्थाप्य तं विपुलशैलमथोत्तरेण
शैलं सुपार्श्वमपि ताम्रमयं सुवस्त्रम् ॥
पुष्पेण हेमवटपादपशेखरन्त-
माकारयेत् कनकधेनुविराजमानम् ।
माक्षीकभद्रसरसा च वनेन तद्व-
द्रौप्येण भास्वरवता च युतं विधाय ॥
होमश्चतुर्भिरथ वेदपुराणविद्भि-
र्दान्तैरनिन्द्यचरितालतिभिर्द्विजेन्द्रैः ।
पूर्व्वेण हस्तमितमत्र विधाय कुण्डं
कार्य्यन्तिलैर्यवघृतेन समित्कुशैश्च ॥
रात्रौ च जागरमनुद्धतगीततूर्य्यै-
रावाहनञ्च कथयामि शिलोच्चयानाम् ।
त्वं सर्व्वदेवगणधामनिधे ! विरुद्ध-
मस्मद्गृहेष्वमरपर्व्वत ! नाप्नुयास्त्र ॥
क्षेमं विधत्स्व कुरु शान्तिमनुत्तमां नः
संपूजितः परमभक्तिमता मया हि ॥
त्वमेव भगवानीशो ब्रह्मा विष्णुर्दिवाकरः ।
मूर्त्तामूर्त्तजगद्बीजस्त्वं नः पाहि सनातन ॥
यस्मात्त्वं लोकपालानां विश्वमूर्त्तेश्च मन्दिरम् ।
रुद्रादित्यवसूनाञ्च तस्माच्छान्तिं प्रयच्छ मे ॥
यस्मादशून्यममरैर्नारीभिश्च शिरस्तव ।
तस्मान्मामुद्धराशेषदुःखसंसारसागरात् ॥
एवमभ्यर्च्च्य तं मेरुं मन्दरञ्चाभिपूजयेत् ।
यस्माच्चेश्वरयेन त्वं भद्राश्वे च विशेषतः ।
शोभसे मन्दर ! क्षिप्रमतस्तुष्टिकरो भव ॥
यस्माच्चूड़ामणिर्जम्बुद्वीपे त्वं गन्धमादन ! ।
गन्धर्व्ववनशोभाढ्यस्ततः कीर्त्तिं प्रयासु मे ॥
यस्मात्त्वं केतुमालेन वैभ्राजेन वनेन च ।
हिरण्मयश्च शिखरस्तस्मात् पुष्टिं धुवास्तु मे ॥
उत्तरैः कुरुभिर्यस्मात् सावित्रेण वनेन च ।
सुपार्श्व ! राजसे नित्यमतः श्रीरुदयास्तु मे ॥
एवमामन्त्र्य तान् सर्व्वान् प्रभाते विमले पुनः ।

पर्व्वतः

स्नात्वाथ गुरवे दद्यान्मध्यमं पर्व्वतोत्तमम् ॥
विष्कम्भान् पर्व्वतान्द्वादत्विग्भ्यः क्रमशो मुने ! ॥
गावो देयाश्चतुर्विंशदथवा दश नारद ! ॥
शुक्तितः सप्त चाष्टौ वा षष्ठ दद्यादशक्तिमान् ।
एकापि गुरवे देया कपिलाथ पयस्विनी ।
पर्व्वतानामशेषाणामेष एव विधिः स्मृतः ॥
त एव पूजने मन्त्रास्त एवोपस्करः स्मृताः ।
अष्टानां लोकपालानां ब्रह्मादीनाञ्च सर्व्वदा ॥
स्वमन्त्रेणैव सर्व्वेषु होमः शैलेषु पठ्यते ।
उपवासी भवेन्नित्यमशक्तौ नक्तमिष्यते ॥
विधानं सर्व्वशैलानां क्रमशः शृणु नारद ! ।
दानकाले च ये मन्त्राः पर्व्वतेषु च यत् फलम् ॥
अन्नं ब्रह्म यतः प्रोक्तमन्ने प्राणाः प्रकीर्त्तिताः ।
अन्नाद्भवन्ति भूतानि जगदन्नेन वर्त्तते ॥
अन्नमेव यतो लक्ष्मीरन्नमेव जनार्द्दनः ।
धान्यपर्व्वतरूपेण पाहि तस्मान्नगोत्तम ! ॥
अनेन विधिना यस्तु दद्याद्धान्यमयं गिरिम् ।
मन्वन्तरशतं साग्रं देवलोके महीयते ॥
अप्सरोगणगन्धर्व्वैराकीर्णेन विराजितः ।
विमानेन दिवः पृष्ठमायाति सुरसेवितम् ॥
ततः कल्पक्षये राज्यमाप्नोतीह न संशयः ॥१॥
अथातः संप्रवक्ष्यामि लवणाचलमुत्तमम् ।
यत्प्रदाता नरो लोकं प्राप्नोति शिवसंयुतम् ॥
उत्तमः षोड़शद्रोणः कर्त्तव्यो लवणाचलः ।
मध्यमः स्यात्तदर्द्धेन चतुर्भिरधमः स्मृतः ॥
वित्तहीनो यथाशक्त्या द्रोणादूर्द्धन्तु कारयेत् ।
चतुर्थांशेन विष्कम्भान् पर्व्वतान् कारयेत् पृथक् ॥
विधानं पूर्व्ववत् कुर्य्यात् ब्रह्मादीनाञ्च सर्व्वदा ।
तद्वद्धेमतनून् सर्व्वान् लोकपालान्निवेशयेत् ॥
सरांसि कामदेवादींस्तद्वच्चाग्र निवेशयेत् ।
कुर्य्याज्जागरमत्रापि दानमन्त्रं निबोधत ॥
सौभाग्यरससंभूतो यतोऽयं लवणो रसः ।
तथात्मकत्वेन च मां पाहि पापान्नगोत्तम ! ॥
यस्मादम्बरसाः सर्व्वे सोत्कटा लवणं विना ।
प्रियश्च शिवयोर्नित्यं तस्माच्छान्तिप्रदो भव ॥
विष्णुदेहसमुद्भूतो यस्मादारोग्यवर्द्धनः ।
तस्मात् पर्व्वतरूपेण पाहि संसारसागरात् ॥
अनेन विधिना यस्तु दद्याल्लवणपर्व्वतम् ।
उमालोके वसेत् कल्पं ततो याति परां गतिम् ॥२॥
अतः परं प्रवक्ष्यामि गुड़पर्व्वतमुत्तमम् ।
यत्प्रदानान्नरः स्वर्गमाप्नोति सुरपूजितः ॥
उत्तमो दशभिर्भारैर्मध्यमः पञ्चभिर्मतः ।
त्रिभिर्भारैः कनिष्ठः स्यात् तदर्द्धान्यवित्तवान् ॥
तद्वद्दामन्नवं पूजां हैमवच्चासुरार्चनम् ।
विष्कम्भपर्व्वतास्तद्वत् सरांसि वनदेवताः ॥
होमशागरशय्यान्तद्वत् लोकपालाधिवासनम् ।
धान्यपर्व्वतवत् कुर्य्यादिमं मन्त्रमुदीरयेत् ॥
यथा देवेषु विष्वात्मा प्रवरोऽयं जनार्द्दनः ।
सामवेदश्च वेदानां महादेवश्च योगिनाम् ॥
प्रणवः सर्व्वमन्त्राणां नारीणां पार्व्वती यथा ।
तथा रसानां प्रवरः सदैवेक्षुरसो मतः ॥
मम तस्मात् परां लक्ष्मीं गुड़पर्व्वत ! देहि वै ।

यस्मात् सौभाग्यदात्रिया ख्याता त्वं गुरुपर्व्वत ! ॥
त्रिधानार्हं हि पार्व्वत्यास्तस्मान्मां पाहि सर्व्वदा ।
अनेन विधिना यस्तु दद्याद्धेमयं गिरिम् ॥
पूज्यमानः समन्यैर्गीर्वाणैर्लोके महीयते ।
पुनः कल्पशतान्ते तु सप्तद्वीपाधिपो भवेत् ॥
आयुरारोग्यसम्पन्नः शत्रुभिश्चापराजितः ॥ ३ ॥
अथ मायूरं वक्ष्ये सुवर्णाचलमुत्तमम् ।
यस्य प्रदानाद्ध्रुवं वैरिष्णं याति मानवः ॥
उत्तमः पलसाहस्रो मध्यमः पञ्चभिः शतैः ।
तदर्द्धेनाधमस्तद्वदल्पवित्तोऽपि शक्तितः ॥
दद्यादेकपलाद्यूर्द्धं यथाशक्त्या विमत्सरः ।
धान्यपर्व्वतवत् सर्व्वं विदध्यान्मुनिपुङ्गव ! ॥
विष्कम्भशैलांस्तदच्च ऋत्विग्भ्यः प्रतिपादयेत् ।
नमस्ते ब्रह्मबीजाय ब्रह्मगर्भाय वै नमः ॥
यस्मादनन्तफलदस्तस्मात् पाहि शिलीमय ! ।
यस्मादमेरुपत्यं त्वं तस्मात्पाहि जगत्पते ! ॥
हैमपर्व्वतरूपेण तस्मात् पाहि नगोत्तम ! ।
अनेन विधिना यस्तु दद्यात् कनकपर्व्वतम् ॥
स याति परमं ब्रह्मलोकमानन्दकारकम् ।
तत्र कल्पशतन्तिष्ठेत्ततो याति परां गतिम् ॥४॥
अतः परं प्रवक्ष्यामि तिलशैलं विधानतः ।
यत्प्रदानान्नरो याति विष्णुलोकमनुत्तमम् ॥
उत्तमो दशभिर्द्रोणैः पञ्चभिर्मध्यमो मतः ।
त्रिभिः कनिष्ठो विप्रेन्द्र ! तिलशैलः प्रकीर्त्तितः ॥
पूर्व्ववच्चापरं सर्व्वं विष्कम्भपर्व्वतादिकम् ।
दानमन्त्रं प्रवक्ष्यामि यथावन्मुनिसत्तम ! ॥
यस्मात्त्वयुग्मे विष्णोर्देहात् स्वेदसमुद्भवाः ।
तिलाः कृष्णाश्च समिग्धस्तस्मात्त्वन्ये भवन्तिह ॥
हव्यकव्येषु यस्माच्च तिला एवाभिरक्षणम् ।
भवाद्दुद्धर शैलेन्द्र ! तिलाचल ! नमोऽस्तु ते ॥
इत्यामन्त्र्य च यो दद्यात्तिलाचलमनुत्तमम् ।
स वैष्णवं पदं याति पुनरावृत्तिदुर्लभम् ॥
दीर्घायुष्मत्वमाप्नोति पुत्रपौत्रैश्च मानवः ।
पितृभिर्देवगन्धर्व्वैः पूज्यमानो दिवं व्रजेत् ॥५॥
अथातः संप्रवक्ष्यामि कार्पासाचलमुत्तमम् ।
यत्प्रदानान्नरो नित्यमाप्नोति परमं पदम् ॥
कार्पासपर्व्वतस्तद्वद्विष्कम्भारैरिहोत्तमः ।
दशभिर्म्मध्यमः प्रोक्तः कनिष्ठः पञ्चभिर्म्मतः ॥
भारेणाप्यधमो दद्यादित्याह मुनिपुङ्गव ! ।
धान्यपर्व्वतवत् सर्व्वमाचार्य्य मुनिपुङ्गव ! ॥
प्रभातायान्तु शर्व्वर्य्यां गुरवे च निवेदयेत् ।
त्वमेवाक्षरं यस्मात्तोकानामिह सर्व्वदा ॥
कार्पासाद्रे नमस्तस्माद्घोषध्वंसनो भव ।
इति कार्पासशैलेन्द्रं यो दद्यात् शर्व्वसन्निधौ ॥
रुद्रलोके वसेत् कल्पं ततो राजा भवेदिह ॥६॥
अथातः संप्रवक्ष्यामि घृताचलमनुत्तमम् ।
तेजोऽन्धतमसं दिव्यं महापातकनाशनम् ॥
विधाय घृतदानानामुत्तमः स्याद्घृताचलः ।
दशभिर्मध्यमः प्रोक्तः पञ्चभिरावरः स्मृतः ॥
अल्पवित्तोऽपि कुर्व्वीत ह्याभ्यामिह विधानतः ।
विष्कम्भान् पर्व्वतांस्तद्वत्तुर्भागेन कल्पयेत् ॥
कार्पासपट्टमाच्छाद्य कुम्भोपरि निवेशयेत् ।
कारयेत् संहतानूनान् यथाशोभं विधानतः ॥
वेष्टयेत् सूक्ष्मवासोभिरिक्षुदण्डफलादिकैः ।
धान्यपर्व्वतवत् सर्व्वं विधानमिह मन्यते ॥
अधिवासनपूर्व्वन्तु तद्वद्धोमसुरार्चनम् ।
प्रभातायान्तु शर्व्वर्य्यां गुरवे च निवेदयेत् ॥
विष्कम्भपर्व्वतांस्तद्वदृत्विग्भ्यः शान्तमानसः ।
संयोगाद्घृतसम्पन्नं यस्मादस्ततेजसोः ॥
तस्माद्घृताचिर्विश्वात्मा प्रीयतामत्र शङ्करः ।
यस्मात्त्वेजोमयं ब्रह्म घृते तच्च व्यवस्थितम् ॥
घृतपर्व्वतरूपेण तस्मान्मां पाहि भूधर ! ।
अनेन विधिना दद्याद्घृताचलमनुत्तमम् ॥
महापातकयुक्तोऽपि लोकमायाति शाङ्करम् ।
हंससारसयुक्तेन किङ्किणीजालमालिना ॥
विमानेनाप्सरोभिश्च सिद्धविद्याधरैर्वृतः ।
विहरेत् पितृभिः सार्द्धं यावदाभूतसंप्लवम् ॥७॥
अतः परं प्रवक्ष्यामि रत्नाचलमनुत्तमम् ।
सुवर्णफलसङ्घेन पर्व्वतः स्यादनुत्तमः ॥
मध्यमः पञ्चभिर्द्रोणैस्तदर्द्धेनावरः स्मृतः ।
चतुर्भागेन विष्कम्भाः पर्व्वताः स्युः समन्ततः ॥
पूर्व्वेण वज्रगोमेदैरिन्द्रनीलकैः ।
पुष्परागयुतैः कार्य्या विद्रुद्भिर्गन्धमादनः ॥
वैदूर्य्यविद्रुमैः पश्चात् संमिश्रो विपुलोऽचलः ।
पद्मरागैः ससौवर्णैरुत्तरेण तु विन्यसेत् ॥
धान्यपर्व्वतवत् सर्व्वमत्रापि परिकल्पयेत् ।
तदर्द्धावाहनं कृत्वा दृक्षान् देवांश्च काञ्चनान् ॥
पूजयेद्वै पुष्पपाणौये प्रभाते चाथ पूर्व्ववत् ।
पूर्व्ववद्गुरु-ऋत्विग्भ्यः फलमन्त्रानुदीरयेत् ॥
यथा देवगणाः सर्व्वे सर्व्वसंपत्समन्विताः ।
त्वञ्च रत्नमयो नित्यमतः पाहि महाचल ! ॥
यस्माद्रत्नप्रदानेन तुष्टिं प्रकुरुते हरेः ।
सदानन्दप्रदानेन तस्मान्मां पाहि पर्व्वत ! ॥
अनेन विधिना यस्तु दद्याद्रत्नमहागिरिम् ।
स याति वैष्णवं लोकममरेश्वरपूजितः ॥
यावत् कल्पशतं साग्रं वासञ्चेह नराधिप ! ।
रूपारोग्यगुणोपेतः सप्तद्वीपाधिपो भवेत् ॥
ब्रह्महत्यादिकं किञ्चिद्दुष्कृतञ्चामुत्र वा कृतम् ।
तत् सर्व्वं नाशमायाति गिरिर्वज्रहतो यथा ॥८॥
अतः परं प्रवक्ष्यामि रौप्याचलमनुत्तमम् ।
यत्प्रदानान्नरो याति सोमलोकं द्विजोत्तम ! ॥
दशभिः पलसाहस्रैरुत्तमो रजताचलः ।
पञ्चभिर्मध्यमः प्रोक्तस्तदर्द्धेनावरः स्मृतः ॥
अशक्तौ विंशतेरूर्द्धं कारयेत् शक्तितः सदा ।
विष्कम्भपर्व्वतांस्तद्वत्तुरीयांशेन कल्पयेत् ॥
पूर्व्ववद्रजतान् कुर्य्यान्नन्दरादीन् विधानतः ।
कलधौतमयांश्चत्र लोकेशान् रचयेद्बुधः ॥
ब्रह्मविष्णुवत् कार्य्यौ नितम्बोच्च हिरण्मयः ।
राजतं स्याद्दयदन्तौ सर्व्वमत्रादि काञ्चनम् ॥
शैलेषु पूर्व्ववत् कुर्य्यात्तोमजागरणादिकम् ।
प्रदद्यात् प्रभाते तु गुरवे रौप्यपर्व्वतम् ॥
विष्कम्भशैलानृत्विग्भ्यः पूज्यवस्त्रविभूषणैः ।
इमं मन्त्रं पठन् दद्याद्दक्षिणामपि विभवतः ॥
पितृणां वल्लभं यस्माद्विष्णोर्व्वा शङ्करस्य च ।
रजतं पाहि तस्मान्मां शोकसंसारसागरात् ।
इत्थं निवेद्य यो दद्याद्रजताचलमुत्तमम् ।
गवामयुतदानस्य फलं प्राप्नोति मानवः ॥
सोमलोके स गन्धर्व्वैः किन्नरामरसङ्घशैः ।
पूज्यमानो वसेद्विद्वान् यावदाभूतसंप्लवम् ॥ ९ ॥
अथातः संप्रवक्ष्यामि शर्करशैलमुत्तमम् ।
यस्य प्रदानाद्विष्णुर्हरत्रासुष्यन्ति सर्व्वदा ॥
अष्टाभिः शर्कराभारैरुत्तमः स्यान्महाचलः ।
चतुर्भिर्मध्यमः प्रोक्तो भाराभ्यामधमः स्मृतः ॥
सार्द्धभारेण शैलन्तु यः कुर्य्यात् स्वल्पवित्तवान् ।
विष्कम्भपर्व्वतान् कुर्य्यात्तुरीयांशेन मानवः ॥
धान्यपर्व्वतवत् सर्व्वमाचार्य्य मेरुसंयुतम् ।
मेरोरुपरि तद्वच्च स्थाप्यं हैमतरुत्रयम् ॥
मन्दारः पारिजातश्च तृतीयः कल्पपादपः ।
एतद्वृक्षत्रयं सर्व्वं सर्व्वेष्वपि निवेशयेत् ॥
हरिचन्दनसन्तानौ पूर्व्वपश्चिमभागयोः ।
निवेश्यौ सर्व्वशैलेषु विशेषाच्छर्कराचले ॥
मन्दरे कामदेवस्तु प्रत्यग्वक्त्रः सदा भवेत् ।
गन्धमादनशृङ्गेषु धनदः स्यादुदङ्मुखः ॥
प्राङ्मुखो वेदशृङ्गेषु हंसः स्याद्विपुलाचले ।
हैमी सुपार्श्वसुरभी दक्षिणाभिमुखी भवेत् ॥
धान्यपर्व्वतवत् सर्व्वमावाहनमुखादिकम् ।
कृत्वाथ गुरवे दद्यान्मध्यमं पर्व्वतोत्तमम् ।
ऋत्विग्भ्यश्च नरः शैलानिमान्मन्त्रानुदीरयेत् ॥
सौभाग्यान्ततरोऽयं परमः शर्करायुतः ।
तत् सदानन्दकारी त्वं भव शैलेन्द्र ! सर्व्वदा ॥
अक्षतं पियतां ये तु निपेतुर्भुवि शीकराः ।
देवानान्तत्समत्योऽयं पाहि नः शर्करागल ! ॥
मनोभवधनुर्मध्याद्भूता शर्करा यतः ।
तस्मात्त्वमपि मद्दाशैल ! पाहि संसारसागरात् ॥
यो दद्यात् शर्कराशैलमनेन विधिना नरः ।
सर्व्वपापविनिर्म्मुक्तः प्रयाति शिवमन्दिरम् ॥
चन्द्रादित्यप्रतीकाशमधिरुह्यानुकोटिभिः ।
सहैव यानमातिष्ठेत् स तु विष्णुप्रचोदितः ॥
ततः कल्पशतान्ते तु सप्तद्वीपाधिपो भवेत् ।
आयुरारोग्यसम्पन्नो यावच्चन्द्रार्कतारकम् ॥
भोजनं शक्तितः कुर्य्यात् सर्व्वशैलेष्वमत्सरः ।
सर्व्वाचारसवयसमर्थायाप्तदक्षिणया ।
पर्व्वतोपस्करान् सर्व्वान् प्रापयेत् ब्राह्मणालयम् ॥१०॥

इति मात्स्ये ७७ अध्यायः ॥

देवर्षिविशेषः । यथा,—
"कश्यपान्नारदश्चैव पर्व्वतोऽरुन्धती तथा ॥"
इत्यग्निपुराणम् ॥

(यथाच, महाभारते । ३ । ८३ । २५ ।
"लोमशश्चोपलंगश्च पादौ वेधायनस्य च ।
नारदस्य च राजेन्द्र ! देवर्षेः पर्व्वतस्य च ॥")
मनुष्यविशेषः । भावुका इति भाषा । अस्य गुणाः । वायुनाशित्वम् । चित्तभ्रमकारित्वञ्च । इति राजनिर्घण्टः ॥ वृक्षः । शाकभेदः । इति मेदिनी । ते, १२८ ॥ (सन्यासिविशेषः । स तु शङ्कराचार्य्यशिष्यस्य मण्डनमिश्रस्य

शिष्यविशेषः। यथा, "प्राणतोषिण्यां व्यवधूतप्रकरणे।
"वसेत् पर्व्वतमूलेषु प्रौढ़ो यो ध्यानधारणात्।
सारात्सारं विजानाति पर्व्वतः परिकीर्त्तितः॥")
पर्व्वतकाकः, पुं, (पर्व्वते जातः काकः। प्रायशः पर्व्वतजातत्वात्तथात्वम्।) द्रोणकाकः। इति हेमचन्द्रः। ४। ३। ८६॥
पर्व्वतजा, स्त्री, (पर्व्वताज्जायते या। पर्व्वत+जन्+"पञ्चम्यामजातौ।" ३। २। ६८। इति डः।) नदी। इति हैमचन्द्रः। ४। १४६॥ (हिमगिरिजातत्वात गौरी।) गिरिभववस्तुनि त्रि॥
पर्व्वतटणं, क्ली, (पर्व्वतभवं टणम्। प्राकपार्थिववत् समासः।) टणभेदः। सरड इति हिन्दी भाषा। तत्पर्य्यायः। टणाट्यम् २ पत्राढ्यम् ३ टगप्रियम् ४। अस्य गुणाः। बलपुष्टिकरत्वम्। पशूनां सर्व्वदा प्रियत्वञ्च। इति राजनिर्घण्टः॥
पर्व्वतमोचा, स्त्री, (पर्व्वतोद्भवा मोचा कदलीत्यर्थः।) गिरिकदली। इति राजनिर्घण्टः॥
पर्व्वतराजः, पुं, (पर्व्वतानां राजा। "राजाहःसखिभ्यष्टच्।" ५। ४। ९१। इति टच्।) हिमालयगिरिः। अस्य प्रमाणं वक्ष्यमाणग्रन्थे द्रष्टव्यम्॥
पर्व्वतराजपुत्री, स्त्री, (पर्व्वतराजस्य हिमालयस्य पुत्री।) दुर्गा। यथा, निकषधनञ्जयसंग्रहयोः।
"शुक्लध्वजात् पञ्चयुते दशाहे
मूलर्क्षयुक्ता सितसप्तमी या।
आरभ्य तस्यां दशमीञ्च यावत्
प्रपूजयेत् पर्व्वतराजपुत्रीम्॥"
इति तिथ्यादितत्त्वम्॥
पर्व्वतवासिनी, स्त्री, (पर्व्वते वसतीति। पर्व्वत+वस+णिनि+ङीप्।) आकाशमांसी। इति राजनिर्घण्टः॥ गायत्री। यथा,—
"उत्तरे शिखरे देवि! भूम्यां पर्व्वतवासिनि!।
ब्रह्मयोनिसमुत्पन्ने! गच्छ देवि! यथासुखम्॥"
इति यजुर्व्वेदीयगायत्रीविसर्জ্জनमन्त्रः।
कालौ। यथा, श्यामापूजायां विसर्জ্জनमन्त्रः॥
"उत्तरे शिखरे देवि! भूम्यां पर्व्वतवासिनि!।
ब्रह्मयोनिसमुत्पन्ने गच्छ देवि! ममान्तरम्॥"
पर्व्वताधारा, स्त्री, (पर्व्वतः आधारो यस्याः। अष्टकुलाचलैः पृथिवी ध्रियते इति पुराणप्रसिद्धेस्तथात्वम्।) पृथिवी। इति हेमचन्द्रः। ४। ६॥
पर्व्वतारिः, पुं, (पर्व्वतानामरिः शत्रुः। पक्षच्छेदनादस्य तथात्वम्।) इन्द्रः। इति शब्दरत्नावली॥
पर्व्वताशयः, पुं, (पर्व्वते आशेते इति। आ+शीङ् शयने+अच्।) मेघः। इति शब्दचन्द्रिका॥
पर्व्वताश्रयः, पुं, (पर्व्वत आश्रयो वासस्थानं यस्य।) शरभः। इति राजनिर्घण्टः॥ पर्व्वतवासिनि त्रि॥
पर्व्वतीयः, त्रि, (पर्व्वते भवः। पर्व्वत+"विभाषामनुष्ये।" ४। २। १३३। इति छः।) पर्व्वतसम्बन्धी। पर्व्वतभवः। पाहाड़िया इति भाषा। पर्व्वतशब्दात् भवार्थे ईयप्रत्ययनिष्पन्नः। (मनुष्ये तु पार्व्वतीयः। इति सिद्धान्तकौमुदी॥ यथा, रघुः। ४। ७७।
"तत्र जन्यं रघोर्घोरं पार्व्वतीयैर्गणैरभूत्।
नाराचक्षेपणीयाश्मनिर्य्येषोत्पतितानलम्॥")
पर्व्वतोर्म्मिः, पुं, मत्स्यविशेषः। इति कस्मिन् भूरिप्रयोगे प्रमादलिखनं, पर्व्वतोर्व्मिरिति मत्स्यद्वयबोधकपाठः साधुः॥
पर्व्वधिः, पुं, (पर्व्वणि अमावस्यापूर्णिमयोः ह्रासवृद्धिं दधातीति। पर्व्व+धा+किः।) चन्द्रः। इति त्रिकाण्डशेषः॥
पर्व्वपुष्पी, स्त्री, (पर्व्वसु ग्रन्थिषु पुष्पं यस्याः। स्त्रियां ङीष्।) रामदूतीवृक्षः। नागदन्ती। इति शब्दचन्द्रिका रत्नमाला च॥
पर्व्वपूर्णता, स्त्री, (पर्व्वणः पूर्णता।) सम्भारः। आयोजनम्। इति भूरिप्रयोगः॥ पर्व्वणः पूर्णत्वञ्च॥
पर्व्वमूला, स्त्री, (पर्व्वणि पर्व्वणि मूलं यस्याः। यद्वा, पर्व्व ग्रन्थिरेव मूलं यस्याः।) श्वेता। इति राजनिर्घण्टः॥
पर्व्वयोनिः, पुं, (पर्व्व ग्रन्थिरेव योनिरुत्पत्तिकारणं यस्य।) इक्षुादि। इति हेमचन्द्रः। ४। २६६॥
पर्व्वरीर्णं, क्ली, पर्व्व। इति शब्दरत्नावली॥
पर्व्वरीषः, पुं, पर्णवृन्तरसः। गर्व्वः। आरुतः। पर्णशिरा। वृतकम्। दूतकम्बलः। पत्रचूर्णरसः। इति शब्दरत्नावली॥ पर्परीष इति मेदिन्यां पाठः॥
पर्व्वरुट् [ह्], पुं, (पर्व्वसु ग्रन्थिषु रोहतीति। रुह+क्विप्।) दाड़िमः। इति त्रिकाण्डशेषः॥
पर्व्ववल्ली, स्त्री, (पर्व्वप्रधाना ग्रन्थिबहुला वल्ली लता।) माषाढूर्व्वा। इति राजनिर्घण्टः॥
पर्व्वसन्धिः, पुं, (पर्व्वणोः सन्धिः) प्रतिपत्पक्षदशीरन्तरम्। इत्यमरः। १। ४। ७॥ "प्रतिपत्पक्षदशीर्योर्मध्यं स पर्व्वसन्धिः। किंवा स सन्धिः पर्व्वैत्यन्वयः। पक्षदशानां पूरणी पक्षदशी संख्याया डड़िति डट् टित्त्वादीप्। पक्षदशीशब्देन पूर्णिमामावास्ययोर्द्वयोर्ग्रहणम्। अतएव पौर्णमास्या अमावास्या वा शेषसार्द्धदण्डचतुष्टयं प्रतिपदश्च प्रथमसार्द्धदण्डचतुष्टयं पर्व्वसन्धिरिति दृढ़ाः॥ सैंहिकेयो यदा राहुर्ग्रसते पर्व्वसन्धिष्विति यमः॥ पर्व्वणोः सन्धिः पर्व्वसन्धिः पृषोदरादित्वात् तथात्वम्। पर्व्वाद्य दिक् ककुविति स्वामी॥ दर्शप्रतिपदोः सन्धौ ग्रन्थिप्रस्तावयोरपि। पर्व्वशब्दो हि विप्लवप्रभृतिष्वपि दृश्यते। इति रत्नः।" इति भरतः॥
पर्व्वित, पुं, (पर्व्व ग्रन्थिर्जातमस्य। पर्व्व+इतच्।) पर्व्वतमत्स्यः। इति शब्दरत्नावली॥
पर्शुः, पुं, (परं शत्रुं शृणातीति। शृङि हिंसे+"आङ्परयोः खनिशृभ्यां डिच्च।" उणां। १।३४। इति कुः स च डित्। पृषोदरादित्वात् दलोपः। यद्वा, सृपति शत्रूनिति। सृप्ल संसर्गे+"सृपेः स्वण् शुनौ पृ च।" उणां ५।२७। इति शुन् धातोश्च पृ-आदेशः।) परशुः। इति हेमचन्द्रः। ३।४५०॥ (यथा, रामायणे। ३। २८। २४।
"भिन्दिपालान् सुतीक्ष्णाग्रान् पाषाणांश्च महोपलान्।
प्रासान् पाशांस्तथा पर्शून् क्षुरान्तांश्च क्षुरानपि तथा॥")
पर्शुका, स्त्री, (पर्शुरिव प्रतिकृतिः। "इवे प्रतिकृतौ।" ५।३।९६। इति कन्। स्त्रियां टाप्।) पार्श्वास्थि। इत्यमरः। २।६।९६॥
पर्शुपाणिः, पुं, (पर्शुः परशुः पाणौ यस्य।) गणेशः। इति हेमचन्द्रः। २।१२१॥ (परशुरामः। इति व्युत्पत्तिलब्धोऽर्थः॥)
पर्शुरामः, पुं, (पर्शुधारी रामः। प्राकपार्थिववादिवत् समासः। परशुना सह जातत्वादस्य तथात्वम्। यदुक्तं कालिकापुराणे ७८ अध्याये।
"भारावतरणार्थाय जातः परशुना सह।
सहजः परशुस्तस्य न जहाति कदाचन॥")
परशुरामः। इति शब्दरत्नावली॥
पर्श्वधः, पुं, (परश्वं दधातीति। परश्व+धा+"आतोऽनुपसर्गे कः।" ३। २। ३। इति कः। पृषोदरात् साधुः।) कुठारः। इति जटाधरः॥
पर्ष, ऽ स्नेहे। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-अकं-सेट्।) रेफोपधः। स्नेह इह आर्द्रीभावः। ऽ, पर्षते पयसा पटः। स्पर्ष इति चतुर्भुजः। स्पर्षते मस्पर्षे। इति दुर्गादासः॥
पर्षत्, [द्] स्त्री, (परिसीदन्त्यस्याम्। परि+सद्+"सत्सूद्विषेति।" ३। २। ६१। इति क्विप्। "सदिरप्रतेः।" ८। ३। ६६। इति षत्वम्। बाहुलकात् इकारलोपः। यद्वा, "शृदृभसोदिः।" उणां १।१२६। इति बहुलवचनात् पर्ष स्नेहने इत्यस्मादपि अदिः।) सभा। इत्युणादिकोषः॥ (यथा, याज्ञवल्क्ये। १। ६।
"चत्वारो वेदधर्म्मज्ञाः पर्षत्तैर्विद्यमेव वा।
सा त्रयी यं स धर्म्मः स्यादेको वाध्यात्मवित्तमः॥")
पर्षद्वलः, त्रि, (पर्षत् सभा विद्यते यस्य। पर्षत्+"रजःकृतीति।" ५।२।११२। इति वलच्।) पारिषदः। इति शब्दरत्नावली॥ (यथा, भट्टिः। ४। १२।
"ब्रातीनवालदीप्राक्षः सुत्वनः परिपूजयन्।
पर्षद्वलान् महाव्रह्मराट नैकटिकाश्रमान्॥")
पल, क रचे। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) क, पालयति। इक्षवते-वेशसिद्धे दीर्घणोऽपि पाठः कानुबन्धानामिदनुबन्धवत् नेरनित्यतां बोधयति। तेन पालति पलति इत्यपि सिद्धम्। इति दुर्गादासः॥
पल, ज गतौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) ज, पालः पलः। इति दुर्गादासः॥

पलं, क्ली, (पलतीति। पल+अच्।) आमिषम्। कर्षचतुष्टयम्। इत्यमरः। ३।३।२०१॥२।८।८६॥ तच्च प्राच्ये तोलकचतुष्टयम्। वैद्यके अष्टतोलकम्। लौकिके साष्टरक्तिद्विमाषकतोलकत्रितयम्। तत्पर्य्यायः। मुष्टिः २ प्रकुञ्चः ३ चतुर्थिका ४ विल्वम् ५ षोडशिकाम्रम् ६। इति वैद्यकपरिभाषा॥ यथा, तिथ्यादितत्त्वे।

"पलन्तु लौकिकैर्मानैः साष्टरक्तिद्विमाषकम्। तोलकत्रितयं ज्ञेयं ज्योतिर्विद्भिः स्मृतिसम्मतम्॥" घटिका। इति राजनिर्घण्टः॥ सा तु घटिकायष्टिभागैकभागः। षष्टिपलञ्च। पलदण्डयोः प्रमाणम्।

"दृगुन्मेषसमयकालः प्राणः षड्भात्मकैः। तैः पलं स्यात्तु तत्षष्ट्या दण्ड इत्यभिधीयते॥" तेन च।

"मा कान्ते पक्षस्यान्ते पर्य्याकाशे देशे स्वामीः कान्तं वक्त्रं वृत्तं पूर्णं चन्द्रं मत्वा रात्रौ चेत्। चुनुधामः प्राट्यं तत्रैतो राहुः क्रूरः प्राद्यासमाद्यान्ते घर्मास्यान्ते शय्यैकान्ते कर्त्तव्या॥" अस्यैकपाटात् पलं षष्टिपाठाद्दण्डः। इति ज्योतिस्तत्त्वम्॥

पलः, पुं, (पलतीति। पल+अच्।) पलालः। इति हेमचन्द्रः। ४।२४८॥ (यथा, महाभारते। ३।२३३।११।

"षष्ठान्नञ्च यवान्नञ्च मधुमांसञ्च पौरस। दुग्धञ्च पलान्नञ्च वर्ज्जयेत्॥")

पलङ्का, स्त्री, (पलङ्कं मांसं तद्वृद्धये हितम्। पलङ्क+यत्। स्त्रियां टाप्।) पालङ्कशाकः। इति राजनिर्घण्टः॥

पलगण्डः, पुं, (पलं मांसं तद्वृद्धं गण्डति भित्त्वा स्रवतीव। गण्ड+अच्।) श्लेपकः। इत्यमरः। २।१०।६॥ राज इति भाषा॥

पलघ्नः, त्रि, (पलं मांसं कटति व्याकुर्वन्निव करोतीति। पल+कट+व्याकुलकात् क्यच् सुम् च।) भयशीलः। भीरुः। इति त्रिकाण्डशेषः॥

पलङ्करः, पुं, (पलं मांसं करोतीति। पल+कृ+अच्। "तत्पुरुषे कृतीति।" ६।३।१४। इति द्वितीयायाः अलुक्।) पित्तम्। इति त्रिकाण्डशेषः॥

पलङ्कषः, पुं, (पलं कषतीति। कष हिंसायाम्+अच्। "तत्पुरुषे कृतीति।" ६।३।१४। इति द्वितीयायाः अलुक्।) राक्षसः। इति मेदिनी। षे, ५३॥ कणगुग्गुलुः। इति राजनिर्घण्टः॥

पलङ्कषा, स्त्री, (पलङ्कष+टाप्।) गोचुरकः। रास्ना। गुग्गुलुः। किंशुकः। सल्लकी। लाक्षा। इति मेदिनी॥ चक्रगोचुरकः। महाश्रावणी। (यथा, सुश्रुते उत्तरतन्त्रे ३८ अध्याये।

"महाश्रावणिकीमाहुः पयस्यां पलङ्कषां॥") मेदिका। इति राजनिर्घण्टः॥

पलप्रियः, पुं, (पलमामिषं प्रियं यस्य।) द्रोणकाकः। इति राजनिर्घण्टः॥ मांसाशिनि, त्रि॥

पलभा, स्त्री, (पलस्य भा छविर्यत्र।) मेषसंक्रमणादर्वाक् सपादाष्टदिने मध्याह्ने द्वादशाङ्गुलशङ्कुजा छाया। तत्पर्य्यायः। पलविभा २ विषुवत्प्रभा ३। यथा, ग्रहलाघवे।

"मेषादिगे मायनभागसङ्ख्ये दिनार्द्धजा भा पलभा भवेत् सा॥"

पलभयोद्धृतचरखण्डकैः क्रमोत्क्रमस्थैरैनान्तितैर्लङ्कोदयैः स्वदेशीयोदया भवन्ति। अन्यत्रग्रहाधिकारेऽपि चरसंस्कृता ग्रहाः स्वदृग्भवन्तीति प्रयोजनम्॥ यथा, सिद्धान्तशिरोमणौ॥

"क्रियतुलाधरसंक्रमपूर्व्वतोऽयनलवोत्थदिनैर्विषुवद्दिनम्। मकरकर्कटसंक्रमतोऽयनं दलभा विषुवद्दिवसेऽप्रभा॥"

"एवं विषुवती छाया स्वदेशे या दिनार्द्धजा। दक्षिणोत्तररेखायां सा तत्र विषुवत्प्रभा॥" इति सूर्य्यसिद्धान्तः॥

"अजतुलादिगतस्य रवेर्दिने द्युदलभार्कमिताङ्गुलशङ्कुजा। पलविभाद्य— ॥" इति बृहद्वशिष्ठसिद्धान्तः॥

पलल, क्ली, (पलति पल्यतेऽनेन वा। पल गतौ+"वृषादिभ्यश्चित्।" उणा। १।१०८। इति कलच्।) मांसम्। इत्यमरः। २।६।३३॥ (यथा, गारुडे। १८१ अध्याये।

"मार्ज्जारपललं पिष्ट्वा हरितालस्य भावितम्। छागमूत्रेण तिलिप्तो मूषिको मूषिकान् हरेत्॥") पङ्कम्। (यथा, गोः रामायणे।५।८७।२६।

"दोषपङ्कनिमग्नं त्वामयग्नः पललाशनम्। सर्व्वथा मानुषो रामस्त्वामनुप्तमेष्यति॥") तिलचूर्णम्। इति मेदिनी। ले, १०४। "पललं तिलकल्कं स्यात्तिलचूर्णञ्च पिण्डकः। पललं मधुरं रुच्यं पित्तासवलपुष्टिदम्॥" इति राजनिर्घण्टः॥

सैन्धवतिलचूर्णम्। तिलकुटा इति भाषा। यथा, वैद्यके।

"पललन्तु समाख्यातं सैन्धवं तिलपिण्डकम्। पललं मलकृद् वृष्यं वातघ्नं कफपित्तकृत्॥ हृद्यं गुरु वृष्यञ्च स्निग्धं स्नेहनिवर्द्धकम्॥"

पलल, पुं, (पलतीति। पल गतौ+"वृषादिभ्यश्चित्।" उणा। १।१०८। इति कलच्। यद्वा, पलं मांसं लातीति। ला+कः।) राक्षसः। इति मेदिनी। ले, १०४॥

पललज्वरः, पुं, (पललस्य मांसस्य ज्वर इव।) पित्तम्। इति धारावली। १४१॥

पललाशयः, पुं, (पललं आशेते इति। आ+शीङ् शये+अच्।) गलरोगः। इति शब्दरत्नावली।

पलव, पुं, (पलं प्लावयति क्षिपति नाशयतीति। पल+प्लु गमनशैथिल्ययोः+"वातो-

ऽनुपसर्गे कः।" ३।२।३। इति कः।) मत्स्यधारणोपायः। पोलो इति भाषा। तत्पर्य्यायः। ह्रदः २ पङ्करालेटः ३। इति त्रिकाण्डशेषः॥

पलाग्निः, पुं, (पलस्य मांसस्य अग्निः। मांसपाकशक्तिवत्त्वात्तस्य तथात्वम्।) पित्तम्। इति धारावली। १४१॥

पलाङ्गः, पुं, (पलं मांसं तत्प्रधानं अङ्गं यस्य।) शिशुमारः। इति धारावली। ७७॥

पलाण्डुः, पुं, (पलस्य मांसस्य अण्डमिवाचरतीति। "दृगयुदाद्यच्च।" उणा। १।३८। इति कुप्रत्ययात् साधुः।) मूलविशेषः। पेयाज इति भाषा। तत्पर्य्यायः। मुकन्दकः २। इत्यमरः। २।४।१४७॥ लोहितकन्दः ३। इति रत्नमाला॥ तीक्ष्णकन्दः ४ उग्रगन्धः ५ सुरभूषणः ६ भूतप्रियः ७ क्षमिघ्नः ८ दीपनः ९ सुखगन्धकः १० बहुपत्रः ११ विश्वगन्धः १२ रोचनः १३ पलाण्डूः १४ मुकुन्दकः १५। इति शब्दरत्नावली॥ अस्य गुणाः। कटुत्वम्। वह्न्यत्वम्। कफपित्तवान्तिदोषनाशित्वम्। गुरुत्वम्। वृष्यत्वम्। रोचनत्वम्। स्निग्धत्वञ्च। इति राजनिर्घण्टः॥ यथा, भावप्रकाशे।

"पलाण्डुर्वनेऽश्च दुर्गन्धो सुरभूषकः। पलाण्डुस्तु गुणैर्न्यूनो रसोनसदृशो गुणैः॥ स्वादुपाकरसोऽगुणाः कफक्षतानिपित्तलः। हरते केवलं वातं बलवीर्य्यकरो गुरुः॥"

पलाण्डुभक्षणे दोषो यथा,—

"पलाण्डुं विड्वराहञ्च छत्राकं ग्रामकुक्कुटम्। लशुनं गृञ्जनञ्चैव जग्ध्वा चान्द्रायणञ्चरेत्॥"

इति प्रायश्चित्तविवेके याज्ञवल्क्यः॥

पलाद, पुं स्त्री, (पलं मांसमत्तीति। अद् भक्षणे+"कर्म्मण्यण्।" ३।२।१ इत्यण्।) राक्षसः। इति जटाधरः॥ (मांसभक्षके, त्रि॥)

पलादनः, पुं स्त्री, (पलं मांसमत्तीति। पल+अद्+ल्युः।) राक्षसः। इति हेमचन्द्रः॥ मांसभक्षणशीले, त्रि॥

पलान्नं, क्ली, (पलं मांसं तेन सह यत् अन्नम्। शाकपार्थिवादित्वात् समासः।) मांसादियुक्तसिद्धभक्तम्। पोलाओ इति भाषा। तस्य पाकप्रकारो द्रव्याणि च यथा। छागमांसं १ शरावः। घृतं १० शरावपादः। लवङ्गं ३ माषकम्। लवङ्गं ३ माषकम्। एला ३ माषकम्। तण्डुलं १ शरावः। मरिचं २ तोलकम्। तेजपत्रं २ तोलकम्। कुङ्कुमं १ माषकम्। आर्द्रकं २ तोलकम्। लवणं ६ तोलकम्। धन्याकं २ तोलकम्। द्राक्षा ४० शरावषोडशार्द्धम्। छागमांसं सूक्ष्मं चीरयित्वा शुष्कप्रलेपाकरणानन्तरं पात्रान्तरे तेजपत्रोपरि अल्पावशेषगन्धद्रव्येण सह प्रथमं सन्धीकरणीयम्। ततस्तण्डुलं जलेनार्द्धसिक्तं कृत्वा मध्यमालनपूर्व्वकमल्पावशेषगन्धद्रव्येण सह तन्मांसोपरि सन्धीकरणीयम्। एवं प्रकारेण वारं वारं सन्धीकृत्य तदुपरि अवशिष्टघृत-

क्षेपणीन दण्डद्वयं तन्नाङ्गारोपरि रक्षेत्। इति पाकराजेश्वरः ॥ * ॥ अत्र मांसस्थाने तत्स्थलाभिषिक्तं गन्धद्रव्येण सह दधियोगः घृतपरिमाणस्याधिक्यञ्च भवितुमर्हति ॥

पलाप, पुं, (पलं मांसं आप्यते प्राप्यते बाहुल्येन अत्र। पल+आप्+घञ्।) कण्टपाशकः। हस्तिकर्णोलः। इति शब्दमाला ॥

पलायनं, क्ली, (पलायते इति। पलाय+भावे ल्युट्।) भयादिना स्थानान्तरगमनम्। पालान इति गौड देशीय इति च भाषा ॥ (यथा, रघुः। १८।३१।

"मित्र क्षत्रमपदिश्य पार्थिवः
प्रस्थितं तमनवस्थितं प्रियाः।
विघ्न हे शठ! पलायनच्छला-
न्मुञ्चसीति,रुरुधुः कचग्रहैः ॥")

तत्पर्य्यायः। अपयानम् २ संदावः ३ द्रवः ४ विद्रवः ५ उपक्रमः ६ संद्रावः ७ उद्द्रावः ८ प्रद्रावः ९। इति हैमचन्द्रः। ३। ४६६ ॥ निद्रावः १० उद्द्रवः ११ सन्त्रासः १२ द्रावः १३ मृगालिका १४ अपक्रमः १५ चंक्रमः १६। इति शब्दरत्नावली ॥

पलायितः, त्रि, (पलाय+क्त।) पलायनविशिष्टः। तत्पर्य्यायः। नष्टः २ गृहीतदिक् ३ तिरोहितः ४। इति हैमचन्द्रः ॥

पलालः, पुं क्ली, (पलति गच्छत्यूर्द्ध्वं प्राप्नोतीति। पल+"तमिविशिविडीति।" उणां १।११७। इति कालन्। यद्वा, पलं अलतीति। अल+"कर्म्मण्यण्।" ३।२।१। इति अण्।) निष्फलकाण्डः। गत्यत्यूर्द्ध्वधान्यनालः। इत्यमरः। २।४।२२ ॥ पोयाल इति भाषा ॥ (यथा, मनुः। ५।१२२।

"प्रोक्षणात् त्वक्काण्डञ्च पलालञ्चैव शुध्यति ॥"

क्ली, स्कन्दस्य मातृविशेषः। यथा, महाभारते। ३।२२७।१०।

"काकी च हलिमा चैव मालिनी हंसिका तथा।
आर्य्या पलाला वैमित्रा सप्तैताः स्त्रियमातरः ॥")

पलालदोहदः, पुं, (पलालं दोहदं यस्य।) आम्रवृक्षः। इति शब्दमाला ॥

पलाशं, क्ली, (पलं गतिं कम्पनमित्यर्थः। अश्नुते आप्नोतीति। पल+अश्+"कर्म्मण्यण्।" ३।२।१। इत्यण्।) पत्रम्। इत्यमरः। २।४।१४ ॥ (यथा, महाभारते। ३।३५।२५।

"वृक्षच्छाल इवानूपे शाखापुष्पपलाशवान् ॥"

पलाशस्य पलाशवृक्षस्य इदम्। पलाशपुष्पादि। यथा कुमारे। ३।२६।

"बालेन्दुवक्राण्यविकाशभावात्
वसुः पलाशान्यतिलोहितानि।
सद्यो वसन्तेन समागतानां
नखक्षतानीव वनस्थलीनाम् ॥")

पलाशः, पुं, (पलाशानि पर्णानि सन्त्यस्य। "अर्श आदिभ्योऽच्।" ५।२।१२७। इत्यच्।) खनामख्यातवृक्षः। स तु ब्रह्मणः स्वरूपः। यथा,—

सूत उवाच।

"अश्वत्थरूपो भगवान् विष्णुरेव न संशयः।
रुद्ररूपो वटस्तद्वत् पलाशो ब्रह्मरूपधृक् ॥
दर्शनस्पर्शसेवासु ते वै पापहराः स्मृताः।
दुःखापद्व्याधिदुष्टानां विनाशकारिणो ध्रुवम् ॥

ऋषय ऊचुः।

कथं वृक्षत्वमापन्ना ब्रह्मविष्णुमहेश्वराः।
एतत् कथय सर्व्वज्ञ! संशयोऽत्र महान् हि नः ॥

सूत उवाच।

पार्व्वतीशिवयोर्देवैः सुरतं कुर्व्वतोः किल।
अग्निं ब्राह्मणवेषेण प्रेष्य विघ्नं कृतं पुरा ॥
ततस्तु पार्व्वती क्रुद्धा शशाप त्रिदिवौकसः।
रेतःसेकसुखभ्रंशक्रम्यमाणा तदा रुषा ॥

पार्व्वत्युवाच।

क्रिमिकीटादयोऽप्येवं जानन्ति सुरते सुखम्।
तस्मान्मम सुखभ्रंशादूयूयं वृक्षत्वमाप्नुथ ॥

सूत उवाच।

एवं सा पार्व्वती देवी अशपत् क्रुद्धमानसा।
तस्माद्वृक्षत्वमापन्ना ब्रह्मविष्णुमहेश्वराः ॥"

इति पाद्मोत्तरखण्डे १६० अध्यायः ॥

तत्पर्य्यायः। किंशुकः २ पर्णः ३ वातपोथः ४। इत्यमरः। २।१।२६॥ याज्ञिकः ५ त्रिपर्णः ६ वक्रपुष्पः ७ पूतद्रुः ८ ब्रह्मवृक्षकः ९ ब्रह्मोपनेता १० काष्ठद्रुः ११। अस्य गुणाः। कषायत्वम्। उष्णत्वम्। क्रिमिदोषविनाशित्वञ्च ॥ तद्बीजगुणः। पामकण्डूतिदद्रुत्वग्दोषनाशित्वम् ॥ तत्पुष्पगुणः। उष्णत्वम्। कण्डूकुष्ठनाशित्वञ्च ॥ तत्पुष्पं चतुर्विधं यथा, राजनिर्घण्टे।

"रक्तः पीतः सितो नीलः कुसुमेषु विभाव्यते।
किंशुकैर्गुणसाम्येऽपि सितो विज्ञानदः स्मृतः ॥"
"पलाशः किंशुकः पर्णो याज्ञिको रक्तपुष्पकः।
क्षारश्रेष्ठो वातपोथो ब्रह्मवृक्षः समिद्वरः ॥
पलाशो दीपनो हृद्यः सरोष्णो व्रणगुल्मजित्।
कषायः कटुकस्तिक्तः स्निग्धो गुदजरोगजित् ॥
भग्नसन्धानकृद्दोषघ्नश्चर्म्मदोषकृमीन् हरेत्।
तत्पुष्पं स्वादु पाके तु कटु तिक्तं कषायकम् ॥
वातलं कफपित्तास्रकृच्छ्रविद्ध्याहि शीतलम्।
लड्दाहभ्रमनं वातरक्तकुष्ठहरं परम् ॥
फलं लघूष्णं मेहार्शःक्रिमिवातकफापहम्।
विपाके कटुकं रूक्षं कुष्ठगुल्मोदरप्रणुत् ॥"

इति भावप्रकाशः ॥

पलाशभेदा। यथा,—

"तद्भेदे स्यात् किंशुलुकः किंशुलो हस्तिकर्णकः ॥"

इति शब्दरत्नावली ॥

(पलाशस्य फलपुष्पादौ क्ली ॥) शटी। (पलं मांसं अश्नातीति। पल+अश्+अण्। यद्वा, पले मांसे आशा यस्य।) राक्षसः। इति मेदिनी। शे, २४ ॥ हरितः। मगधदेशः। इति शब्दरत्नावली ॥

पलाशः, त्रि, (पलवद्धरिद्वर्णेन अश्यते आप्यते इति। अश्+घञ्।) हरिद्वर्णविशिष्टः। इति मेदिनी। शे, २४ ॥ निर्दयः। इति धरणिः ॥

पलाशकः, पुं, (पलाश+संज्ञायां कन्।) शटी। इति जटाधरः ॥ पलाशवृक्षः। इति शब्दरत्नावली ॥

पलाशपर्णी, स्त्री, (पलाशस्य पर्णमिव पर्णमस्याः। गौरादित्वात् ङीष्।) अश्वगन्धा। इति राजनिर्घण्टः ॥

पलाशाख्यः, पुं, (पलाशस्य आख्या आख्या यस्य। यद्वा, पलाशं पलाशगन्धमाख्यातीति। आ+ख्या+कः।) नाड़ीहिङ्गु। इति राजनिर्घण्टः ॥

पलाशान्ता, स्त्री, (पलाशं अन्ते यस्याः। यद्वा, पलाशानां पत्राणां अन्तो गन्धवान् यस्याः।) गन्धपत्रा। इति राजनिर्घण्टः ॥

पलाशी, [न्] पुं, (पलाशं विद्यतेऽस्य। पलाश+इनिः।) वृक्षः। इत्यमरः। २।४।५ ॥ (पलं मांसं अश्नातीति अश्+णिनिः।) राक्षसः। इति मेदिनी। ने, १६३ ॥ चौरिवृक्षः। इति रत्नमाला ॥ (पत्रविशिष्टे वाच्यलिङ्गः। यथा,—

"ततः स भगवान् विद्वान् काश्यपो द्विजसत्तमः।
भस्मराशीकृतं वृक्षं विद्यया समजीवयत् ॥
अङ्कुरं कृतवांस्तत्र ततः पर्णद्वयान्वितम्।
पलाशिनं शाखिनञ्च तथा विटपिनं पुनः ॥"

इति महाभारते। १।४३।६—१० ॥

स्त्री, नदीविशेषः। इयन्तु शुक्तिमत्पर्व्वतसम्भूता। यथा, मार्कण्डेये। ५७।३०।

"कृपा पलाशिनी चैव शुक्तिमत्प्रभवा स्मृता ॥")

पलाशी, स्त्री, (पलाश+गौरादित्वात् ङीष्।) लाक्षा। लताविशेषः। तत्पर्य्यायः। पत्रस्रवी २ पर्णवल्ली ३ पत्राङ्गिका ४ सुपर्णी ५ सुपर्णी ६ दीर्घवल्ली ७ विषादनी ८ अन्नपत्री ९ दीर्घपत्री १० रसाढ्या ११ अम्बिका १२ अम्लातकी १३ काञ्जिका १४। अस्या गुणाः। मधुरत्वम्। अम्लत्वम्। सुखदोषारोचकनाशित्वम्। पथ्यत्वम्। पित्तकोपकारित्वञ्च। इति राजनिर्घण्टः ॥

पलिक्नी, स्त्री, (पलितमस्या अस्तीति। "अर्श आदिभ्योऽच्।" इत्यच्। "अस्तिपलितयोर्नः।" वार्त्तिं। "छन्दसि क्नमेके।" इत्येकोक्तिर्भाषायामपि तस्य क्न इत्यादेशो भवति। ततो नान्तत्वात् ङीप्।) वृद्धा। इत्यमरः। २।६।१२ ॥ बालगर्भिणी गौः। इति हैमचन्द्रः ॥

पलिघः, पुं, (परिहन्यतेऽनेनेति। परि+हन+"परौ घः।" ८।२।२२। इति अप् घादेशश्च। ततः "परेश्च घाङ्कयोः।" ८।२।२२। इति रस्य लः।) काचकलसः। घटः। प्राकारः। गोपुरम्। इति मेदिनी। घे, ६ ॥

पलितं, क्ली, (पलि+भावे क्तः। यद्वा, फलनमिति। फल+"फलेरितनादेश्च पः।" उणां। ५। ३४। इति इतच् फस्य पत्वम्।) जरसा केशादौ शौक्ल्यम्। केशपाकः। इत्यमरः। २। ६। ४१ ॥ (यथा, मनुः। ६। २।

"गृहस्थस्तु यदा पश्येद्वलीपलितमात्मनः।
अपत्यस्यैव चापत्यं तदारण्यं समाश्रयेत् ॥")

तस्य निदानं यथाह माधवकरः।
"क्रोधशोकश्रमक्षतः शरीरोष्मा शिरोगतः।
पित्तश्च स्वेदान् पचति पलितं तेन जायते॥"
तच्चिकित्सा यथा,—
"लौहचूर्णस्य कर्षन्तु दशार्द्धेक्षुतमञ्जतः।
घाटीपलद्वयं पथ्ये द्वे तथैकं विभीतकम्॥
पिष्ट्वा लोहमये भाण्डे न्यायसेन्निशि वासयेत्।
तैलोऽयमचिराद्धन्ति पलितं नेह संशयः॥
दशार्द्धं पञ्चमूलानि।
कार्ष्ण्यं मूलमादौ सहचरकुसुमं केतकस्यापि मूलं
लौहं चूर्णं समस्तं त्रिफलपलयुतं तैलमेभिः
पचेयुः।
क्षुत्वा लौहस्य भाण्डे त्रितितलनिहितं स्थापये-
न्मासमेकं
नेत्राः काशप्रकाशा अपि मधुपनिभा अस्य
योगादुभवन्ति॥
त्रिफला नीलिकाण्डं भृङ्गराजोऽयसी रजः।
अर्कोमत्तेन संपिष्टं लेपात् कृष्णीकरं परम्॥"
इति भावप्रकाशे मध्यखण्डे क्षुद्ररोगाधिकारे॥
पलितम्। तापः। कर्दमः। इति मेदिनी। ते, १२२॥ (पल गतौ + "लोष्टपलितौ।" उणा०। ३। ६२। इति क्तप्रत्ययेन निपातनात् सिद्धम्।)
केशपाशः। इति हेमचन्द्रः उज्ज्वलदत्तश्च॥

पलितः, पुं, (पलति वृद्धावस्थायां केशश्मश्रादिकं प्राप्नोतीति। पल + "पलेरितच्चादेश्च पः।" उणा०। ५। ३४। इति इतच् पस्य च पः।) वृद्धः। इति जटाधरः॥

पलिता, स्त्री, (पलित + टाप्।) वृद्धा। इति जटाधरः॥

पल्वलः, पुं, (परितोऽक्षतेश्च इति। परि + अकि लक्षणे + घञ्। "परेश्च घाङ्कयोः।" ८।२।२२। इति रस्य लः।) पर्य्यङ्कः। इत्यमरः। २। ७। १३८॥ (यथा, रामायणे। २। ३२। ६
"पल्वलप्रस्तरं नानारत्नविभूषितम्।
तमध्यास्यति वैदेही प्रतिष्ठापयितुं त्वयि॥")

पल्ययनं, क्ली, (परितः अयति गच्छति अनेन। परि + अय गतौ + करणे ल्युट्। रस्य लत्वम्।) पर्य्यायनम्। इति हेमचन्द्रः। ४।३१८। घोड़ार जिन् इति भाषा॥

पल्यूल, तृ क लूनिपूर्योः। इति कविकल्पद्रुमः। (अदन्तपुरां-परं-सर्कं-सेट्।) यकारयुक्तैकलकारमध्यः ह्रस्वमध्यश्च। लूनिस्नेहः। पूतिः पवित्रीकरणम्। अपपल्यूलत् इदं लोकः। पल्यूलयति जलं गङ्गा। इति दुर्गादासः॥

पल्यूल, तृ क लूनिपूर्योः। इति कविकल्पद्रुमः॥ (अदन्तपुरां-परं-सर्कं-सेट्।) यकारयुक्तैकलकारमध्यः दीर्घमध्यश्च। लूनिस्नेहः। पूतिः पवित्रीकरणम्। अपपल्यूलत् इदं लोकः। पल्यूलयति जलं गङ्गा। इति दुर्गादासः॥

पल्, गतौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-सर्कं-सेट्।) पल्लति। इति दुर्गादासः॥

पल्लः, पुं, (पल्लति ग्रस्यादप्राचुर्य्ये गच्छतीति। पल्ल + पचाद्यच्।) स्थलकुसुलकम्। इति मेदिनी। ले, ३०॥ पालुइ इति मराइ इति च भाषा॥ (यथा, सुश्रुते चिकित्सितस्थाने १३ अध्याये।
"सुपिधानन्तु तं कृत्वा यवपल्ले निधापयेत्॥")

पल्लवः, पुं, क्ली, (पल्यते इति पल्। पल् + क्विप्। लूयते इति लवः। लू + "ऋदोरप्।" ३।३।५७। इति अप्। ततः पल् चासौ लवश्चेति।) नवपत्रादियुक्तशाखाग्रमर्त्य। इति भरतः॥ नवपत्रस्तवकः। "इति मधुः॥ पर्त्रपत्रादिसंघाते शाखायाः पल्लवो मतः।" इति कोषान्तरम्॥ (यथा, रघुः। ६। ३३।
"अभिनयान् परिचेतुमिवोद्यता
मलयमारुतकम्पितपल्लवा।
अमदयत् सहकारलता मनः
सकलिकाकलिकामजितामपि॥")
तत्पर्य्यायः। किसलयम् २। इत्यमरः। २। ४। १४॥ प्रवालम् ३ नवपत्रम् ४। इति राजनिर्घण्टः॥ वलम् ५ किसलम् ६ किशलम् ७ किशलयम् ८ विटपः ९। इति शब्दरत्नावली॥ पल्ययौवनम् १०। इति जटाधरः॥ विस्तरः। वलम्। झङ्कारः। अलक्तरागः। इति विश्वमेदिन्यौ॥ वलमित्यत्र वनमिति क्वचित् पाठः॥ वलयः। चापलः। इति शब्दरत्नावली॥ (देशविशेषः। तद्देशवासिषु पुं भूम्नि। यथा, मार्कण्डेये। ५७। ३६।
"अपरान्ताश्च सूद्राश्च पल्लवाश्चर्म्मखण्डिकाः।
गान्धारा गवलाश्चैव सिन्धुसौवीरमद्रकाः॥")

पल्लवकः, पुं, (पल्लवेन झङ्कारेण कायतीति। पल्लव + कै + कः।) वेश्यापतिः। (पल्लव इव कायतीति।) मत्स्यविशेषः। इति हलायुधः॥ (पल्लवः किसलयैः कायतीति। अशोकवृक्षः। इति कश्चित्॥)

पल्लवद्रुः, पुं, (पल्लवप्रधानो द्रुर्वृक्षः।) अशोकवृक्षः। इति राजनिर्घण्टः॥

पल्लवाधारः, पुं, (पल्लवस्य आधारः।) शाखा। इति शब्दचन्द्रिका॥

पल्लविकः, त्रि, (पल्लवः झङ्कारोऽस्यास्तीति वा। पल्लव + ठन्।) कामुकः। इति हेमचन्द्रः। २। २४५॥

पल्लवितं, क्ली, (पल्लवोऽलक्तरागः सञ्जातोऽस्य। तारकादिभ्य इतच्।) लाक्षारक्तः। इति मेदिनी। ते, २०४॥

पल्लवितः, त्रि, (पल्लवः सञ्जातोऽस्य। पल्लव + इतच्।) सपल्लवः। पल्लवयुक्तः। ततम्। विस्तृतम्। इति मेदिनी। ते, २०४॥

पल्लवी, [न्] पुं, (पल्लवाः सन्त्यस्य। पल्लव + इनिः।) वृक्षः। इति शब्दमाला॥ (पल्लवविशिष्टे, त्रि। यथा, कुमारे। ३। ५४।
"पर्य्याप्तपुष्पस्तवकावनम्रा
सञ्चारिणी पल्लविनी लतेव।")

पल्लिः, स्त्री, (पल्लतीति। पल्ल + "सर्व्वधातुभ्य इन्।" इति इन्।) यामकः। कुटी। इति हेमचन्द्रः॥ कुटीसमुदायः। ग्रामः। इत्यन्ये॥ गृहमिति भट्टः॥ कुटीग्रामकयोः पल्लीति शाश्वतः॥ स्थानमिति स्वामी॥ पतन्ति भरणेन भ्रमणेन च जीवन्तीति क्विप पतो गावः। लीयन्तेऽत्र पल्लिः नान्नीति ङिः पाल्योगादीति ईपि पल्ली च गोपपक्षीप्रभृति च। इत्यमरभरतपल्लिशब्दटीकायां भरतः॥ (गृहगोधिका। इति हेमचन्द्रे पल्लीशब्ददर्शनात्॥)

पल्लिका, स्त्री, (पल्लि + स्वार्थे कन् ततष्टाप्।) गृहगोधिका। इति राजनिर्घण्टः॥

पल्लिवाहः, पुं, (पल्लिं कुटीं वाहयति निर्व्वाहयतीति। पल्लि + वह + णिच् + अण्।) लग्नभेदः। यथाह राजनिर्घण्टः।
"पल्लिवाहो दीर्घलग्नः सुपत्रस्नाय्ववर्गकः।
वृद्धः शाकपत्रादिः पशूनामबलप्रदः॥"

पल्ली, स्त्री, (पल्लि + "ऋदिकारादिति।" वा ङीष्।) क्षुद्रग्रामः। (यथा, कथासरित्सागरे। १०। १३५।
"इतस्त्वं गच्छ मत्पल्लीं यावत् सा तत्र ते गता।
अहं तत्रैव यास्यामि दास्याम्यस्मिन्निमित्तमेव ते॥")
कुटी। इति विश्वमेदिन्यौ॥ नगरभेदः। स तु दक्षिणदेशे प्रसिद्धः। चिचनापल्लयादिः। इति शब्दरत्नावली॥ क्षुद्रजन्तुविशेषः। टिकटिकी इति भाषा। तत्पर्य्यायः। सुखली २ गृहगोधा ३ विश्वम्भरा ४ व्येष्ठा ५ कृष्णमत्स्यः ६ पल्लिका ७ गृहगोधिका ८। इति राजनिर्घण्टः॥ गृहगोलिका ९ मालिका १० भित्तिका ११ गृहोलिका १२। इति हेमचन्द्रः। ४। ३६३॥ अवशिष्टं व्येलीशब्दे द्रष्टव्यम्॥ (अस्याः पतनफलमुक्तं यथा, ज्योतिषशास्त्रे।
"निपतति यदि पल्ली दक्षिणाङ्गे नराणां
स्वजनधनवियोगो लाभदा वामभागे।
उरसि शिरसि पृष्ठे कण्ठदेशे च राज्यं
करचरणकृदिस्था सर्व्वसौख्यं ददाति॥")

पल्वलं, क्ली, पुं, (पलति गच्छति पिबत्यस्मिन् वा। पल गतौ वा पाने वा + "सानसिवर्त्तिपर्णीसीति।" उणा०। ४। १०७। इति निपातनात् वलच् प्रत्ययेन सिद्धम्।) अल्पसरः। इत्यमरः। १। १०। २८॥ (यथा, महाभारते। ७। ५१। ६।
"पल्वलानि च सर्व्वाणि सर्व्व चैव तडागजाः।
स्थावरं जङ्गमञ्चैव निःशेषं कुरुते जगत्॥")
तस्य लक्षणं यथा,—
"अल्पं नरः पल्वलं स्याद्यत्र चन्द्रार्कौ रवी।
न तिष्ठतः जलं किञ्चित्तच्चलं वारि पाल्वलम्॥
तच्चलगुणाः।
पाल्वलं वार्य्यभिष्यन्दि गुरु स्वादु त्रिदोषकृत्।"
इति भावप्रकाशः॥
"पाल्वलं गुरुभिष्यन्दि विष्टम्भि दोषलं परम्॥"
इति राजवल्लभः॥

पवं, क्ली, (पूयतेऽनेन। पूञ् शोधने + "ऋदोरप्।" ३। ३। ५७। इति अप्।) गोमयम्। इति शब्दचन्द्रिका॥ (गोमयशब्दे विवरणमस्य ज्ञातव्यम्॥)

पवः, पुं, (पवनमिति। पूञ् शोधने + भावे अप्। यद्वा, पुनातीति। पू + अच्।) निर्व्यावः। स च धान्यादीनां निर्वुषीकरणम्। शाल्यादेः शोधनं बहुलीकरणम्। इत्यमरभरतौ॥ (पू + करणे अप्। यद्वा पुनातीति कर्त्तरि अच्।) वायुः। इति शब्दचन्द्रिका॥

पवनं, क्ली, (पूयते अग्निसंयोगेन यस्मिन्। पू + आधारे ल्युट्।) कुम्भकारस्य आमघटादिपाकस्थानम्। पोयान् इति भाषा। इति मेदिनी। ने, ८४॥ (यथा,—

"यः कुम्भकारपवनोपरिषङ्कलेप-
स्तापाय केवलमसौ न तु तापशान्त्यै॥")

इत्युद्भटः॥)

पयनमिति प्रमादपाठः। जलम्। इति शब्दमाला॥ प्रयते त्रि। इति शब्दरत्नावली। (भावे ल्युट्।) पवित्रीकरणञ्च॥

पवनः, पुं, (पुनातीति। पू + बहुलमन्यत्रापीति युच्।) निर्व्यावः। वायुः। इति मेदिनी। ने, ८४॥ (यथा, गीतायाम्। १०। ३१।

"पवनः पवतामस्मि रामः शस्त्रभृतामहम्॥")

अष्टौ बाह्यपवना यथा, सिद्धान्तशिरोमणौ।

"भूवायुरावह इह प्रवहस्तदूर्द्ध्वः
स्याद्बृहस्तदनु संवहसंज्ञकश्च।
अन्यः परोऽपि सुवहः परिपूर्व्वकोऽसा-
द्वाह्याः परावह इमे पवनाः प्रसिद्धाः॥'

सप्त पवनाधिपा यथा, ज्योतिस्तत्त्वे।

"शाकः शराब्धिसंयुक्तो मुनिभिर्भागहारितः।
आवहादिक्रमेणैव सप्त वाताः प्रकीर्त्तिताः॥
आवहः प्रवहश्चैव सम्वहो निवहस्तथा।
उद्वहो विवहो वायुः सप्त वाताः प्रकीर्त्तिताः॥"

अन्यद्वायुशब्दे द्रष्टव्यम्॥ (प्राणवायुः। यथा, हठयोगदीपिकायाम्। ३। ७५।

"अनेनैव विधानेन प्रयाति पवनो लयम्।
ततो न जायते मृत्युर्व्वारोगादिकं तथा॥"

उत्तममनुपुत्रविशेषः। यथा, भागवते। ८।१।२३।

"तृतीय उत्तमो नाम प्रियव्रतसुतो मनुः।
पवनः सृञ्जयो यज्ञहोत्राद्यास्तत्सुता नृप!॥")

पवनविजयः, पुं, (पवनं श्वासवायुं विजयतेऽनेन। वि + जि + करणे अप्। यद्वा, पवनस्य विजयो यत्र।) शुभाशुभसूचकश्वासवायुजयोपायकग्रन्थविशेषः। यथा—

सूत उवाच

"हरेः श्रुत्वा हरो गौरीं देहस्थं ज्ञानमब्रवीत्।
ऋजो वह्नी रविः पृथ्वी गौरिराप्रः प्रकीर्त्तिताः॥
वायुसंस्थास्थितो राहुर्दक्षचन्द्रावभाश्वकः।
गुरुः शुक्रस्तथा सौम्यचन्द्रश्चैव चतुर्थकः॥
वामनाड्यान्तु मध्यस्थान् कारयेदात्मनस्तथा।
यदाचार इडायुक्तस्तदा कर्म्म समाचरेत्॥
स्नानसेवां तथा ध्यानं वाणिज्यं राजदर्शनम्।
अन्यानि शुभकर्म्माणि कारयेत प्रयत्नतः॥
दक्षनाड़ीप्रवाहे तु शनिर्भौमश्च सैंहिकः।
इनश्चैव तथाग्नेय पापानामुदयो भवेत्॥
शुभाशुभविवेको हि ज्ञायते तु खरोदयात्।
देहमध्ये स्थिता नाड्यो बहुरूपाः सुविस्तराः॥
नाभेरधस्तादुदयः कन्दो अङ्कुरास्तत्र निर्गताः।
द्वासप्ततिसहस्राणि नाभिमध्ये व्यवस्थिताः॥
चक्रवच्च स्थितास्तासु सर्व्वाः प्राणहराः स्मृताः।
तासां मध्ये त्रयः श्रेष्ठा वामदक्षिणमध्यमाः॥
वामा सोमात्मिका प्रोक्ता दक्षिणा रविसन्निभा।
मध्यमा च भवेदग्निः फलती कालरूपिणी॥
वामा ह्युग्रतरूपा च जगदाप्यायने स्थिता।
दक्षिणा रौद्रभागेन जगच्छोषयते सदा॥
इयोर्वाहे तु स्नुग्रः स्यात् सर्व्वकार्य्यविनाशिनी।
निर्गमे च भवेद्वामा प्रवेशे दक्षिणा स्मृता॥
कारयेत् क्रूरकर्म्माणि प्राणे पिङ्गलसंस्थिते।
इड़ाचारे तथा सौम्यं चन्द्रसूर्य्यगतस्तथा॥
यात्रायां सर्व्वकार्य्येषु विषापहरणे इड़ा।
भोजने मैथुने युद्धे पिङ्गला सिद्धिदायिका॥
उच्चाटमारणादेषु कर्म्मस्वेतेषु पिङ्गला।
मैथुने चैव संग्रामे भोजने सिद्धिदायिका॥
शोभनेषु च कार्य्येषु यात्रायां विषकर्म्मणि।
शान्तिसुक्तार्थसिद्धौ च इड़ा योज्या नराधिपैः॥
द्वाभ्यां चैव प्रवाहे च क्रूरसौम्यविवर्ज्जने।
विषुवतीन्तु जानीयात् संसरेत्तु विचक्षणः॥
सौम्यादिशुभकार्य्येषु लाभादिजयजीविते।
गमनागमने चैव वामा सर्व्वत्र पूजिता।
युद्धादिभोजने घाते क्षीणश्चैव तु सङ्गमे।
प्रशस्ता दक्षिणा नाड़ी प्रवेशे क्षुद्रकर्म्मणि॥
शुभाशुभानि कार्य्याणि लाभालाभौ जयाजयौ।
जीवाजीवाय यत् पृच्छेन्न सिध्यति च मध्यमा॥
वामाचारेऽथवा दक्षे प्रलये यत्र नायकः।
तत्रस्थः पृच्छते यस्तु तत्र सिद्धिर्न संशयः॥
वैच्छन्दो वामदेवस्तु यदा वहति चात्मनि।
तत्र भागे स्थितः पृच्छेत् सिद्धिर्भवति निश्चला॥
वामे वा दक्षिणे वापि यत्र संक्रमते शिरा।
घोरे घोराणि कर्म्माणि सौम्ये वै मध्यमानि च॥
प्रस्थिते भागतो हंसे द्वाभ्यां वै सर्व्ववाहिनि।
तदा स्नुग्रं विजानीयाद्योगी योगविशारदः॥
यत्र यत्र स्थितः पृच्छेद्वामदक्षिणसंमुखः।
तत्र तत्र समं दिश्याद्वातस्योदयनं सदा॥
अग्रतो वामिका श्रेष्ठा पृष्ठतो दक्षिणा शुभा।
वामेन वामिका प्रोक्ता दक्षिणे दक्षिणा शुभा॥
जीवो जीवति जीवेन यच्छून्यं तत् खरो भवेत्।
यत्किञ्चित् कार्य्यमुद्दिष्टं जयादिशुभलक्षणम्॥
तत् सर्व्वं पूर्णनाड्यान्तु जायते निर्व्विकल्पकम्।
अन्यनाड्यादिपर्य्यन्तप्रपञ्चश्चयमुदाहृतम्॥
यावत् षष्ठीन्तु पृच्छायां पूर्य्यायां प्रथमो जयेत्।
रिक्तायान्तु द्वितीयन्तु कथयेत्तदशङ्कितः॥
वामाचारः समं वायुर्जायते कर्म्मसिद्धिदम्।
प्रवृत्ते दक्षिणे मार्गे विषमे विषमाचरम्॥
अन्यत्र वामवाहे तु नाम वै विषमाचरम्।
तदासौ जयमाप्नोति योधः संग्राममस्तकः॥
दक्षवातप्रवाहे तु यदि नाम समाचरम्।
जायते नात्र सन्देहो नाड़ीमध्ये तु लक्षयेत्॥
पिङ्गलान्तर्गते प्राणे समानीयाच्चवञ्चयेत्।
यावन्नाड्योदयं चारस्तां दिशं यावदाजयेत्।
न जातु जयते सोऽपि नात्र कार्य्या विचारणा॥
अथ संग्राममध्ये तु यत्र नाड़ी सदा वहेत्।
सा दिशा जयमाप्नोति सूच्ये भङ्गं विनिर्द्दिशेत्॥
जातचारे जयं विद्यान्मृतके मृतमादिशेत्।
जयं पराजयञ्चैव यो जानाति स पण्डितः॥
वामे वा दक्षिणे वापि यत्र सञ्चरते शिरा।
कृत्वा तत्पदमादौ तु यात्रां नयति शोभनाम्॥
शशिसूर्य्यप्रवाहे तु सति युद्धं समाचरेत्।
तत्रस्थः पृच्छते यस्तु स साधुर्जयति ध्रुवम्॥
यां दिशं वहते वायुस्तां दिशं यावदाजयेत्।
जयते नात्र सन्देह इन्द्रो यद्यग्रतः स्थितः॥
मेषाद्या दश या नाड्यो दक्षिणा वामसंस्थिताः।
चरस्थिरद्विमार्गे तास्ताड्ये ताड्यः क्रमात्॥
निर्गमे निर्गमं याति संग्रहे संग्रहं विदुः।
पृच्छकस्य वचः श्रुत्वा घण्टाकारेण लक्षयेत्॥
वामे वा दक्षिणे वापि पश्चतत्त्वस्थितः शिवे।
ऊर्द्धोऽग्निरध आपश्च तिर्य्यक्संस्थः प्रभञ्जनः।
मध्ये तु पृथिवी ज्ञेया नभः सर्व्वत्र सर्व्वदा॥
ऊर्द्धे स्नुग्ररुधः शान्तिस्तिर्य्यक् चोद्घाटयेत् सुधीः।
मध्ये ह्यस्तं विजानीयान्मोचः सर्व्वत्र सर्व्वगे॥"

इति गारुड़े पवनविजयादि ६७ अध्यायः॥

पवनव्याधिः, पुं, (पवनः वायुरोग एव व्याधिरस्य।) उद्धवः। श्रीकृष्णस्य सखा। इति त्रिकाण्डशेषः॥ (यथा,—

"विवक्षितामर्थविदस्ततक्षणप्रतिसंहृताम्।
प्रापयन् पवनव्याधिर्गिरमुत्तरपक्षताम्॥"

इति माघे। २। १५॥

पवनात् प्रकुपितवायोरुद्भवो व्याधिः।) वायुरोगश्च॥

पवनात्मजः, पुं, (पवनस्य आत्मजः पुत्रः।) हनूमान्। इति शब्दरत्नावली॥ (पवनस्य वायोरात्मजः। "वायोरग्निः।" इति श्रुतेर्वायुजन्यतयास्य तथात्वम्।) हयवाहनः। इति मत्स्यपुराणम्॥ (भीमसेनः। इति महाभारतम्॥ यथा, राजतरङ्गिण्याम्। ८।२८०।

"वाहिनीरुद्वमार्गौ तौ पदवीमनुससृतुः।
मार्गे घनञ्जयस्येव शैनेयपवनात्मजौ॥")

पवनालः, पुं, (पवनाय निर्व्यावाय अलति पर्य्याप्नोतीति। अल पर्य्याप्तौ + अच्।) धान्यविशेषः। देधान इति गोनरी इति च भाषा। तत्पर्य्यायः। देवधान्यम् २ चूर्णाङ्गः ३ जुङ्गुलः ४ जुङ्गलः ५ बीजपुष्पः ६ पुष्पगन्धः ७। अस्य गुणाः। हितत्वम्। स्वादुत्वम्। लोहितत्वम्। श्लेष्मपित्तनाशित्वम्। अपथ्यत्वम्। तुवरत्वम्। रूक्षत्वम्। क्लेदकारित्वम्। लघुत्वञ्च। इति भावप्रकाशः॥

पवनाशः, पु, (पवनं वायुं अश्नाति भक्षयतीति। अश् भोजने+"कर्म्मण्यण्।" ३।२।१। इति अण्।) सर्पः। इति हलायुधः॥

पवनाशनः, पुं, (पवनो वायुरशनं भक्ष्यं यस्य।) सर्पः। इत्यमरः। १। ८। ८॥

पवनाशनाशः, पुं, (पवनाशस्य सर्पस्य नाशो यस्मात्। यद्वा, पवनाशनं सर्पमत्तीति। अश्+अण्।) गरुड़ः। इति हलायुधः॥ मयूरः। यथा, उत्तरचोरपञ्चाशिकायाम्।

"स्वयोनिभक्षध्वजसम्भवानां
श्रुत्वा निनादं गिरिगह्वरेषु।
तमोऽरिबिम्बप्रतिबिम्बधारी
रुराव कान्ते! पवनाशनाशः॥"

पवनेष्टः, पुं, (पवने वायुरोगे इष्टः।) महानिम्बः। इति रत्नमाला॥ (महानिम्बशब्देऽस्य गुणादिकं ज्ञेयम्॥)

पवनोत्सुचं, क्ली, परूषम्। इति शब्दचन्द्रिका॥

पवमानः, पुं, (पवते शोधयतीति। पूङ् शोधने+"पूङ्यजोः शानच्।" ३।२।१२८। इति शानच्। "आने मुक्।" ७।२।८२। इति मुमागमः।) वायुः। इत्यमरः। १।१।६६॥ (यथा, रघुः। ८।६।

"न खरो न च भूयसा मृदुः
पवमानः पृथिवीरुहानिव।
स पुरस्कृतमध्यमक्रमो
नमयामास नृपानमुद्धरन्॥"

अग्नेः स्वाहायां जातः पुत्रः। यथा, मार्कण्डेये। ५२। २७-२८॥

"वोसावग्निरभीमानी ब्रह्मणस्तनयोऽभवत्।
तस्मात् स्वाहा सुतान् लेभे चीनुदारौजसो द्विज!॥
पावकं पवमानञ्च शुचिञ्चापि जलाग्निनम्।
तेषान्तु सन्ततावेते चत्वारिंशच्च पञ्च च॥")

निर्मथ्याग्निः। स च गार्हपत्याग्निः। यथा,—

"अथ यः पवमानस्तु निर्म्मथ्योऽग्निः स उच्यते।
स च वै गार्हपत्योऽग्निः प्रथमो ब्रह्मणः स्मृतः॥"

इति मात्स्ये ४८ अध्यायः॥

पवमानात्मजः, पुं, (पवमानस्य वायोरात्मजः। "वायोरग्निः।" इति श्रुतेर्वायुजन्यतयास्य तथात्वम्। यद्वा, पवमानस्य अग्निविशेषस्य आत्मजः।) हव्यवाहनः। यथा,—

"पवमानात्मजो ह्यग्निर्हव्यवाहन उच्यते॥"

इति मात्स्ये ४८ अध्यायः॥

पवाका, स्त्री, (पुनातीति। पूञ् गि शोधने+"वलाकादयश्च।" उणां ४। १४। इति आकप्रत्ययेन निपातनात् साधुः।) वाला। चक्रवातः। इत्युणादिकोषः॥

पविः, पुं, (पुनातीति। पूञ् शोधने+"अच इः।" उणां ४। १३८। इति इः।) वज्रम। इत्यमरः। १। १। ५०॥

पवितः, त्रि, (पूयते स्म। पूङ् शोधे+क्तः। "पूङश्च।" ७।२।५१। इति इट्। "पूङः क्त्वा च।" १।२।२२। इति न कित्त्वम्।) पूतः। इति सुग्धबोधव्याकरणम्॥ मरीचे, स्त्री। इति राजनिर्घण्टः॥

पवित्र [ऋ], त्रि, (पुनातीति। पू+इत्रच्।) पवित्रताकारकः। यथा, नैषधे।

"तनुश्रिया यस्य तृणं स मन्मथः
कुलश्रिया यः पवितास्मदन्वयम्॥"

पवित्रं, क्ली, (पूयतेऽनेनेति। पू+"पुवः संज्ञायाम्।" ३। २। १८५। इति इत्रः।) वर्षणम्। कुशमूलम्। (यथा, मनुः। २। ७५।

"प्राक्कूलान् पर्य्युपासीनः पवित्रैश्चैव पावितः॥")

ताम्रम्। पयः। इति मेदिनी। रे, १७७॥ घर्षणम्। इति विश्वः॥ अघोषकरणम्। इति हेमचन्द्रः॥ यज्ञोपवीतम्। इति त्रिकाण्डशेषः॥ घृतम्। मधु। इति राजनिर्घण्टः॥ पार्व्वणश्राद्धादावर्थार्थं होमादावाज्यसंस्कारार्थञ्च साग्निर्गर्भकुशान्तरवेष्टितप्रादेशमात्रकुशपत्रद्वयम्। यथा,—

"अनन्तर्गर्भितं साग्रं कौशं द्विदलमेव च।
प्रादेशमात्रं विज्ञेयं पवित्रं यत्र कुत्रचित्॥"

इति श्राद्धतत्त्वम्॥

(विष्णुः। यथा, महाभारते। १२।१४६।२०।

"प्रभूतस्त्रिककुद्धाम पवित्रं मङ्गलं परम्॥"

महादेवः। यथा तत्रैव। १२।१७।३५।

"पवित्रञ्च महांश्चैव नियमो नियमाश्रितः॥")

पवित्रः, त्रि, (पू+इत्रच्।) व्रतादिना शुद्धः। (यथा, गीतायाम्। ४। ३८।

"नहि ज्ञानेन सदृशं पवित्रमिह विद्यते॥")

तत्पर्य्यायः। प्रयतः २ पूतः ३। एतत्त्रयं प्राणिविषयमात्रम्। शुचिः ४ शुद्धः ५ पवित्रितः ६। इति शब्दरत्नावली॥ पुण्यः ७ पावनः ८। इति जटाधरः॥ (पूयतेऽनेन। पूङ्+"पुवः संज्ञायाम्।" ३।२।१८५। इति इत्रः।) शुद्धद्रव्यम्। तत्पर्य्यायः। पूतम् २ मेध्यम् ३। एतत्त्रयं अप्राणिद्रव्यविषयम्। इति ब्रह्मवर्गे विशेष्यनिघ्ने च अमरभरतौ॥ शुद्धम् ४ शुचि ५ पुण्यम् ६ पूतिवत् ७। इति जटाधरः॥ यथा,—

"वल्यं पवित्रमायुष्यं सुमङ्गल्यं रसायनम्।
एतत्तु गव्यघृतगुणपरम्॥"

इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे॥)

पवित्रः, पुं, (पुनातीति। पू+कर्त्तरि इत्रः।) तिलवृक्षः। पुत्रजीववृक्षः। इति राजनिर्घण्टः॥ (तिलपुत्रजीवशब्दयोरस्य विवृतिर्ज्ञेया॥) कार्त्तिकेयस्य नामान्तरम्। यथा, महाभारते। ३। २३१। ६।

"षष्ठीप्रियश्च धर्म्मात्मा पवित्रो मातृवत्सलः॥")

पवित्रकं, क्ली, (पवित्र+कन्। यद्वा, पवित्रे पयसि कायतीति। कै+कः।) जालम्। इति शब्दरत्नावली॥ व्रणसूत्रजालम्। इत्यमरः। १। १०। १६॥ क्षत्रियस्य यज्ञोपवीतम्। यथा,

"कार्पासमुपवीतं स्याद्विप्रस्योर्द्धवृतं त्रिवृत्।
शणसूत्रमयं राज्ञो वैश्यस्याविकसौत्रिकम्॥"

इति मनुवचनात् पवित्रकमपि तदुच्यते। इत्यमरटीकायां भरतः॥

पवित्रकः, पुं, (पवित्र+स्वार्थे कन्।) कुशः। दमनकः। अश्वत्थः। उदुम्बरः। इति राजनिर्घण्टः॥

पवित्रधान्यं, क्ली, (पवित्रं धान्यम्। नित्यकर्म्मधारयः।) यवः। इति राजनिर्घण्टः॥ (यवशब्देऽस्य गुणादयो वक्तव्याः॥)

पवित्रा, स्त्री, (पवित्र+टाप्।) तुलसी। इति शब्दमाला॥ नदीभेदः। इति हेमचन्द्रः॥ हरिद्रा। अश्वत्थीवृक्षः। इति राजनिर्घण्टः॥

पवित्रारोपणं, क्ली, (पवित्रस्य यज्ञोपवीतस्य आरोपणं प्रदानं यत्र।) श्रीकृष्णसम्प्रदानकोपवीतदानरूपोत्सवविशेषः। यथा,—

"श्रावणस्य सिते पक्षे द्वादश्यां वैष्णवैर्मुदा।
कर्त्तव्यः क्षणदेवस्य पवित्रारोपणोत्सवः॥"

अथ तन्नित्यता वक्ष्यपरिशिष्टे।

"च स्नातः सर्व्वतीर्थेषु सर्व्वयज्ञेषु दीक्षितः।
हरिञ्च प्रीतिमाप्नोति यः पवित्रं समाचरेत्॥
विधिना शास्त्रदृष्टेन यो न कुर्य्यात् पवित्रकम्।
हरन्ति राक्षसास्तस्य वर्षपूजादिकं फलम्॥"

योगसारे च पवित्रोत्पत्तिप्रकाशनेन नागराजं पवित्रं प्रति श्रीरुद्रेण वरदानम्। यथा,—

"ये त्वां न बहुमन्यन्ते यथा सम्भावितो मया।
जपहोमादिकं तेषां फलं त्वामेतु निश्चयात्॥"

विष्णुरहस्ये।

न करोति विधानेन पवित्रारोपणन्तु यः।
तस्य सांवत्सरी पूजा निष्फला मुनिसत्तम!॥
तस्माद्भक्तिसमायुक्तैर्नरैर्विष्णुपरायणैः।
वर्षे वर्षे तु कर्त्तव्यं पवित्रारोपणं हरेः॥"

अथ पवित्रारोपणमाहात्म्यम्।

तत्र बौधायनः।

"यावांस्तन्तुः पवित्रस्य तावत् स्वर्गे महीयते।
आयुरारोग्यमैश्वर्य्यं विपुलं तस्य वर्द्धते॥"

महासंहितायाम्।

सम्वत्सरेण या पूजा कृता वै मन्त्रिणा द्विज!।
पवित्रदानात् पूर्णा स्यादित्याह भगवान् हरिः॥

विष्णुरहस्ये।

पवित्रारोपणं विष्णोर्भुवि मुक्तिप्रदायकम्।
स्त्रीपुंकीर्त्तिप्रदं पुण्यं सुखसम्पद्विवर्द्धनम्॥
पुण्यानान्तु तथा पुण्यं सर्व्वपापहरन्तु वै।
पवित्रारोपणं तस्मात् पवित्रं परमं स्मृतम्॥
सम्वत्सरे नरो भक्त्या समभ्यर्च्च्य जनार्द्दनम्।
यत् फलं समवाप्नोति पवित्रारोपणेन तत्॥

किञ्च।

पापबद्धेनसो नित्यं त्रायते भवबन्धनात्।
पवित्रं तेन विख्यातं ब्राह्मं तेजोऽभिधीयते॥
विष्ण्वाख्यया तु विख्यातं तदा लोके विधीयते।
स एव सूत्ररूपेण यज्ञेशः कर्म्मणां प्रभुः॥
तदेव त्रिगुणीसूत्रं ततं नारायणाख्यया।
त्रिदेवात्मा त्रिवेदात्मा त्रयीरूपः प्रणवः स्मृतः॥"

अथ पवित्रारोपणविधिः।

"सौवर्णै राजतैस्ताम्रैः रौमैः सूत्रैस्तु पाञ्चकैः।
कार्पासैर्वा पवित्राणीष्यते काशैः कुशैरपि॥

तत्र कार्पासिकं सूत्रं ब्राह्मणौकर्त्तितं शुभम् ।
आनीय त्रिगुणीकृत्य पुनस्त्रिगुणयेच्छुचिः ॥
पञ्चगव्येन तत् प्रोक्ष्य प्रक्षाल्य शुचिनाम्बुना ।
मूलेनाष्टोत्तरशतं मन्त्रेणाधाभिमन्त्रयेत् ॥
त्रीणि साप्तशतेनास्य तस्यार्द्धेनास्य चार्हतः ।
जानूरुनाभिहृन्नानि पवित्राण्याचरेत् प्रभोः ॥
षट्त्रिंशद्ग्रन्थयस्त्वेषामाद्ये कार्य्यास्तु मध्यमे ।
चतुर्विंशतिरन्ते च हादशग्रन्थयो बुधैः ॥
अङ्गुष्ठपर्व्वमात्रन्तु कुर्य्यादग्रन्थिमधोत्तमे ।
तदर्द्धं मध्यमे कुर्य्यात्तदर्द्धेच कनीयसि ॥
ग्रन्थीन् कुर्व्वीत सर्व्वत्र सुवृत्तान् सुमनोहरान् ।
न वै विषमसंख्याकान् ग्रन्थीन् कुर्व्वीत क्वचित्॥
अष्टोत्तरसहस्रेण तत्सूत्रस्य पवित्रकम् ।
अष्टोत्तरशतं ग्रन्थिं वनमालाक्षमाचरेत् ॥
आरभ्य सुकुटं या तु सूत्रैर्विरचिता शुभा ।
आपादलम्बिनी माला वनमाला प्रकीर्त्तिता ॥
कुर्य्यान्नवपवित्राणि सूत्रैर्हादशभिः शुभैः ।
अरत्निप्रमितं तच्च हादशग्रन्थिकं क्षती ॥
पवित्राणि परीवारदेवतानां समाचरेत् ।
सूत्रैस्तैरुडुसंख्याकैः कलासंख्यार्कसंख्यकैः ॥
तेषु ग्रन्थीन् यथाशोभं ब्रह्मा ब्रह्मर्षयोऽपि ।
सप्तविंशतिभिः सूत्रैः षड्विंशतिभिरात्मनः ॥
यथास्वमात्मनश्चैषां पवित्राणि च कारयेत् ।
सम्पादयेच्च सर्व्वाणि शोभनान्येव यत्नतः ॥
तथा चोक्तम् ।
विशोभसूत्रदानेन कर्त्तुः स्यादशुभं फलम् ।
पवित्रं परया भक्त्या तस्मात् कुर्व्वीत शोभनम् ॥
रक्षयित्वाथ क्षाम्नीरागुरुगोरोचनादिना ।
वस्त्रेणाच्छाद्य पटले स्थापयेत्तानि वैष्णवे ॥"

इति पवित्रविनिर्म्माणम् ॥ * ॥

"कृत्वा कार्य्यं दशम्याद्य पवित्रारोपणाय हि ।
कृष्णं विज्ञाप्य तत्राग्निं यथा प्राग्लिखितं नयेत् ॥
एकादश्यां प्रभाते च नित्यकृत्यं समाप्य हि ।
देवालयमुपस्कृत्य मण्डलं रचयेत् शुभम् ॥
कृत्वा कृष्णस्य नित्यार्चां पवित्रारोपणाधकाम्
पूजां विशेषतः कृत्वा कृष्णं विज्ञापयेदिदम् ॥
क्रियालोपविघातार्थं यत्त्वया विहितं प्रभो ! ।
मयेतत् क्रियते देव ! भवत्तुष्ट्यै पवित्रकम् ॥
न मे विघ्नो भवत्वत्र कुरु नाथ ! दयां मयि ।
सर्व्वथा सर्व्वदा विष्णो ! मम त्वं परमा गतिः ॥
देवस्य सर्व्वतो न्यस्येदन्नकाष्ठं जलं क्षुधान् ।
मृत्तिकाश्च हरिद्राश्च कुङ्कुमं रोचनादि च ॥
उपानहौ सितं छत्रं चामरं व्यजनं तथा ।
यवा व्रीह्यादिधान्यानि यथास्थानं पृथक् पृथक् ॥
कुम्भं शुद्धाम्बुनापूर्य्य सर्व्वतोभद्रमण्डले ।
देवाग्रतो निधायास्मिन् परिचार्य्याधिवासयेत्॥"

अथ पवित्राधिवासनम् ।

"भगवत्पुरतस्तानि पटलस्थानि पूजयन् ।
आदायावाहयेन्मूलयुता तन्मनुना बुधः ॥
तन्मन्त्रस्यायम् ।
ओँ संवत्सरस्य यागस्य परिचीकरणाय भोः ।
विष्णुलोकात् परिवाद्य यागस्थेह नमोऽस्तु ते ॥
तेष्वावाह्य यथास्थानं ब्रह्माद्या देवतास्ततः ।
तत्तन्मन्त्रैः सन्निधाप्याच्चतगन्धादिनार्चयेत् ॥
तत्र तत्र ता देवताश्चोक्ताः ।
ब्रह्मविष्णुमहादेवाखिरुद्रौदेवताः स्मृताः ।
प्रणवः सोमवह्नी च ब्रह्मा नागः प्रभौ रविः ॥
शिवश्च विश्वदेवाश्च नवसूत्राधिदेवताः ।
क्रिया च पौरुषी वीरा चतुर्थी चापराजिता ॥
जया च विनया चैव सुक्तिदा च सदाशिवा ।
मनोमयी तु नवमी दशमी सर्व्वतोमुखी ।
ग्रन्थीनां देवताश्चेतास्तासाञ्च विनिवेशयेत् ॥
तन्मन्त्राश्चैते ।
ओँ सर्व्वाभरणचित्राङ्ग ! सर्व्वदेवनमस्कृत ! ।
लावण्यरूपविश्वात्मन् ! ब्रह्मसूत्रं समाश्रय ।
ओँ सर्व्वलक्ष्मीकर ! श्रीश ! सर्व्वज्ञानरसात्म ! ।
निवृत्तरूपविश्वात्मन् ! मधुसूत्रं समाश्रय ॥
ओँ अतिवेगमरुद्रूपोन्मे ! पुरुषात्मन् ! दिवस्पते ! ।
कनीयो हि प्रभो ! देव ! तेजसा सूत्रमाश्रय ॥
यत्र मन्त्रो न वर्त्तेत तत्रैतामेव तत्र च ।
नमोऽन्तं सचतुर्थीकमस्त्रः प्राग्लिखनाम्बुगः ॥*॥
अथ क्षाराकराम्भोजे पट्टसूत्रेण निर्म्मितम् ।
वितस्तिमात्रं वप्नीयात् क्षौरकं मङ्गलाह्वयम् ॥
तत्र मन्त्रः ।
ओँ संवत्सरकृतार्चायाः सम्पूर्णफलदायि यत् ।
पवित्रीकरणायैतत् कौतुकं धरते नमः ॥
ततो गन्धपवित्रञ्च गृहीत्वा धूपितं बुधः ।
भगवन्तं नमस्कृत्य भक्त्या संप्रार्थयेदिदम् ।
आमन्त्रितोऽसि देवेश ! सार्द्धं देवगणेश्वरैः ।
मन्त्रैर्लोकपालैश्च सहितः पारवारकैः ॥
आगच्छ भगवन्नीश ! विधिसंपूर्त्तिकारक ! ।
प्रातस्त्वां पूजयिष्यामि सान्निध्यं कुरु केशव ! ॥
ततश्च ।
विष्णुतेजोद्भवं रम्यं सर्व्वपातकनाशनम् ।
सर्व्वकामप्रदं देव तवाङ्गे धारयाम्यहम् ॥
अनेन मनुना विद्वान् मूलसंपुटितेन हि ।
दद्यात् गन्धपवित्रं तच्छ्रीकृष्णचरणालयोः ॥
नीराज्य देवं स्तुत्वा च दत्त्वा पुष्पाञ्जलिं ततः ।
तत्पवित्राणि ततकुम्भमभ्यर्च्यमनुनाथवा ॥
नृसिंहमनुना रक्षेत् कवचेनावगुण्ठयेत् ।
गीतनृत्यादिना कुर्य्याद्विधिवज्जागरं निशि ॥"

अथ पवित्रार्पणम् ।

"प्रातःकृत्यानि निर्व्वृत्य नित्यपूजां विधाय च ।
विशेषतोऽर्चयेद्देवं पवित्राणि च पूजयेत् ॥
महाभिषेकघोषेण नामसंकीर्त्तनोत्सवैः ।
मूलसंपुटितेनैव पवित्राण्यर्पयेत् क्रमात् ॥
वक्ष्यमाणेन मन्त्रेण भक्त्या कृष्णाय वैष्णवः ।
पूजां कृत्वा परीवारदेवानां तान्यथार्पयेत् ॥
अर्पणमन्त्रः ।
कृष्ण ! कृष्ण ! नमस्तुभ्यं गृहाणेदं पवित्रकम् ।
पवित्रकरणार्थाय वर्षपूजाफलप्रदम् ॥
पवित्रकं कृतञ्चाद्य यन्मया दुष्कृतं कृतम् ।
शुद्धो भवाम्यहं देव ! तत्प्रसादाज्जनार्द्दन ! ॥
सम्पूजां ततः कृत्वा स्तुत्वा नत्वार्घयेत् प्रभुम् ।
वनमालां यथा देव ! कौस्तुभं सततं हृदि ॥
तद्वत् पवित्रतन्नूंच्च पूजार्घं हृदये वह ।
जानताजानता वापि न कृतं यत्तवार्च्चनम् ॥
केनचिद्विघ्नदोषेण परिपूर्णन्तदस्तु मे ॥
अथाग्निं विधिनाभ्यर्च्च्य पवित्रं तस्य चार्पयेत् ।
कृष्णे निवेदयेन्नन्तहीन इत्यादिना कृतम् ॥
गुरुञ्च पूजया संपूज्य पवित्रं गुरवेऽर्पयेत् ।
वैष्णवेभ्यः पवित्राणि दत्त्वैकं धारयेत् स्वयम् ॥
संपूज्य वैष्णवान् विप्रान् भुक्त्वा सम्भोज्य बन्धुभिः ।
समं महाप्रसादान्नं सुखं भुञ्जीत वैष्णवः ॥"

अथ पवित्रविसर्জ্জनविधिः । तत्र ।

"मासं पक्षमहोरात्रं त्रिरात्रं धारयेत्तथा ।
देवं तं सूत्रसम्भूतं देशकालानुसारतः ॥
प्रत्यहं स्नानकर्म्मादि सूत्राण्युत्तार्य्य कारयेत् ।
अभिषिच्याथ तोयेन पुनर्देवे निवेदयेत् ॥
तथान्ते देवमभ्यर्च्च्य विशेषात् पुष्पचन्दनैः ।
नैवेद्यं विविधं दत्त्वा ततः सूत्रं विसर्জ্জयेत् ॥
ओँ सांवत्सरीं शुभां पूजां सम्पाद्य विधिवत्तम ।
व्रजेदानीं पवित्र ! त्वं विष्णुलोकं विसर्জ्जितम् ॥
यावद्देवे पवित्राणि तावत्तिष्ठेत् समाहितः ।
ब्रह्मचारी हविष्याशी देवपूजापरायणः ॥
तत्फलञ्चोक्तं धौम्यायनेन ।
एवं यः कुरुते विद्वान् वर्षे वर्षे न संशयः ।
स याति परमं स्थानं यत्र देवो हृषीकेशरी ॥"

अथ तत्र मुख्यगौणकालनिर्णयः ।

"मुख्यकालस्य चैवास्य विघ्नतोपगमे सति ।
भाद्रादावपि कर्त्तव्यं पवित्रारोपणं प्रभोः ॥
तथा च विष्णुरहस्ये ।
श्रावणस्य सिते पक्षे कर्कटस्थे दिवाकरे ।
हादश्यां वासुदेवाय पवित्रारोपणं स्मृतम् ॥
सिंहस्थे वा रवौ कार्य्यं कन्यायाञ्च गतेऽथवा
तस्यामेव तिथौ सम्यक् तुलासंस्थे कथञ्चन ॥
मन्त्रतन्त्रप्रकाशे च ।
कर्कटञ्च गते सूर्य्ये तथा सिंहगतेऽपि वा ।
हादश्यां शुक्लपक्षस्य हरेर्देयात् पवित्रकम् ॥
अथ चेद्विघ्नपातेन मुख्यकालो न लभ्यते ।
कन्यागतेऽपि कुर्व्वीत यावन्नोत्तिष्ठते हरिः ॥"

इति हरिभक्तिविलासः ॥

पवित्रारोहणं, क्ली, (पवित्रस्य यज्ञोपवीतस्य आरोहणं सम्प्रदानं यत्र ।) पवित्रारोपणम् । यथा,—

"आषाढ़शुक्लपक्षस्य याष्टमी श्रावणस्य च ।
पवित्रारोहणं कुर्य्याद्देयाः प्रीतिकरं परम् ॥
दुर्गातन्त्रेण मन्त्रेण दुर्गाबीजेन भैरव ! ।
वैष्णवैस्तन्त्रमन्त्रेण पवित्रारोहणञ्चरेत् ॥
विशेषात् श्रावणादेव देव्याः कुर्य्यात् पवित्रकम् ।
सर्व्वेषामपि देवानां पवित्रारोहणञ्चरेत् ॥
आषाढ़े श्रावणे वापि संवत्सरफलप्रदम् ।
प्रतिपद्वनदस्योक्ता पवित्रारोहणे तिथिः ॥
त्रिया देया द्वितीया तु तिथीनामुत्तमा तिथिः ।
तृतीया भवभाविन्याश्चतुर्थी तत्सुतस्य च ॥
पञ्चमी सोमराजस्य षष्ठी प्रोक्ता गुहस्य च ।

सप्तमी भास्करस्योक्ता दुर्गायाश्च तथाष्टमी ॥
मातॄणां नवमी प्रोक्ता वासुकेर्दशमी स्मृता ।
एकादशी ऋषीणाञ्च द्वादशी चक्रपाणिनः ॥
त्रयोदशी त्वनङ्गस्य मम चैव चतुर्दशी ।
ब्रह्मणो दिक्पतीनाञ्च पौर्णमासी तिथिर्मता ॥
पवित्रारोहणं यो वै देवानां न समाचरेत् ।
तस्य संवत्सरीपूजाफलं हरति केशवः ॥
तस्मादयत्नेन कर्त्तव्यं पवित्रारोहणं परम् ।
कृते बहुफलप्राप्तिस्तत्पूजा सफला भवेत् ॥
पवित्रं येन सूत्रेण यथा कार्य्यं विजानता ।
तत् शृणुष्व प्रमाणञ्च रचनासु च भैरव ! ॥
प्रथमं दर्भसूत्रञ्च पद्मसूत्रं ततः परम् ।
ततः चौमं सुपुण्यं स्यात् कार्पासकमतः परम् ॥
पट्टसूत्रं तथान्येन पवित्राणि न कारयेत् ।
पवित्राणि विचित्राणि कर्त्तव्यानि प्रयत्नतः ॥
गन्धमाल्यैः सुरभिभिरर्चितानि यथोदितम् ॥
कन्या च कर्त्तयेत् सूत्रं प्रमदा वा पतिव्रता ॥
विधवा शास्त्रशीला च दुःशीला नहि कर्त्तयेत् ।
यत् सूचिभिर्न दग्धञ्च भस्मधूमाभिगुण्ठितम् ॥
तद्वर्ज्जयेत यत्नेन सूत्रमस्मिन् पवित्रके ।
उपयुक्तञ्चाक्षुदृष्टं मद्यरक्तादिदूषितम् ॥
मलिनं बीजरक्तञ्च यत्नेन परिवर्ज्जयेत् ।
सूत्रैः पवित्रं कुर्व्वीत कनिष्ठोत्तममध्यमम् ॥
कनिष्ठकं पवित्रन्तु सप्तविंशतितन्तुभिः ।
सर्व्वलोके यशःकीर्त्तिसुखसौभाग्यवर्द्धनम् ॥
चतुःपञ्चाशता प्रोक्तं तन्तूनां मध्यमं परम् ।
दिव्यभोगावहं पुण्यं स्वर्गसौख्यप्रदायकम् ॥
उत्तमञ्चैव तन्तूनामष्टोत्तरशतेन वै ।
तद्धृत्वा तु महादेवे शिवस्य पुण्यमाप्नुयात् ॥
उत्तमं वासुदेवाय दद्यादृषि पवित्रकम् ।
तदा याति हरेर्लोकं साधको नात्र संशयः ॥
अष्टोत्तरसहस्रन्तु रत्नमालेति गीयते ।
पवित्रन्तु महादेव्या मुक्तिमुक्तिप्रदायकम् ॥
रत्नमालान्तु यो दद्यान्महादेवे पवित्रकम् ।
कल्पकोटिसहस्राणि स्वर्गे स्थित्वा शिवो भवेत् ॥
एतत्तु नागहाराख्यं शङ्करस्य पवित्रकम् ।
अष्टोत्तरसहस्रेण तन्तूनां सुमनोहरम् ॥
यः प्रयच्छति मन्त्रज्ञ स यावान् तन्तुसञ्चयः ।
तावत्कल्पसहस्राणि मम लोके प्रमोदते ॥
अष्टोत्तरसहस्रेण वनमाला हरेः स्मृता ।
तन्तूनां तस्य दानेन विष्णुसायुज्यमाप्नुयात् ॥
यत् कनिष्ठं पवित्रन्तु नाभिमात्रं भवेत्तु तत् ।
द्वादशग्रन्थिसंयुक्तमात्ममानेन योजयेत् ॥
ऊरुप्रमाणं मध्यं स्यात् ग्रन्थीनां तत्र योजयेत् ।
चतुर्विंशतिमप्यस्य मालामात्मन एव च ॥
पवित्रसूत्तमं प्रोक्तं जानुमात्रञ्च भैरव ! ।
षट्त्रिंशत्तन्तुग्रन्थीनां योजयेदात्ममानतः ॥
शतमष्टोत्तरं कार्य्यं ग्रन्थीनां स्वविधानतः ।
नागहाराख्यं तद्वदर्घेषु च विधानतः ॥
पवित्रं क्रियते येन सूत्रेण ग्रन्थयः पुनः ।
तद्ग्रन्थिसूत्रेण कर्त्तव्या लक्षणान्विताः ॥
ग्रन्थिन्तु सप्तभिः कुर्य्यादुवेष्टनेन्तु कनिष्ठके ।

द्विगुणैर्मध्यमे कुर्य्यात्त्रिगुणैरुत्तमे तथा ॥
अधिवासः पवित्राणि पूर्व्वस्मिन्दिवसे पुनः ।
मन्त्रन्यासं पवित्रेषु कुर्य्यात्तत्र परेऽहनि ॥
दुर्गाबीजेन मन्त्रेण मन्त्रन्यासं द्विजश्चरेत् ।
वैष्णवीतन्त्रमन्त्रेण कुर्य्युरन्ये च भैरव ! ॥
प्रतिगृह्य स्वयं कुर्य्यान्मन्त्रन्यासं विचक्षणः ॥
अङ्गुष्ठाद्येन जप्यन्तु मालायामिह भैरव ! ।
यावन्तो ग्रन्थयश्चात्र तावन्त्येव च संन्यसेत् ।
मन्त्राणि तस्य तेन स्यात् देवाङ्गोपनियोजनम् ॥
दुर्गातन्त्रेण मन्त्रेण तत्तन्न्यासन्तु कारयेत् ।
एकत्र न्यस्य सकलं यज्ञमात्रं पवित्रकम् ॥
तस्मिन्निधाय पुण्यानि गन्धादि च सुशोभनम् ॥
तत्तन्न्यासं ततः कुर्य्यादङ्गुल्यग्रेण भैरव ! ॥
विष्णोस्तु मूलमन्त्रेण तत्तन्न्यासन्तु कारयेत् ।
इदं विष्णुरिति प्रोक्तं मन्त्रन्यासे द्विजस्य हि ॥
शूद्राणां मन्त्रविन्यासे मन्त्रो वै द्वादशाक्षरः ।
प्रासादेन तु मन्त्रेण मन्त्रन्यासो मम स्मृतः ॥
अनेन मन्त्रन्यासन्तु दानञ्चानेन कारयेत् ।
कुङ्कुमोशीरकर्पूरैश्चन्दनादिविलेपनैः ॥
पवित्राणि विलिप्याथ तत्तन्न्यासन्तु योजयेत् ।
सम्पूज्य विधिवद्देवीं मण्डले प्रयतो नरः ॥
वैष्णवीतन्त्रमन्त्रेण दुर्गामन्त्रेण भैरव ! ।
दुर्गाबीजेन दद्यात्तु देव्या मूर्द्ध्नि पवित्रकम् ॥
यस्य देवस्य या पूजा तस्य तस्यैव मण्डलम् ।
यस्य यस्य तु यो मन्त्रो यथाध्यानादिपूजनम् ॥
तं देवं तेन भावेन पूजयित्वा प्रयत्नतः ।
तस्यैव बीजमन्त्राभ्यां मूर्द्ध्नि दद्यात् पवित्रकम् ॥
पवित्रं समवे दद्याद्देवेभ्यश्च पवित्रकम् ।
सर्व्वेषामेव वेदानां सम्पूर्णार्थेषु भैरव ! ॥
अग्निर्ब्रह्मा भवानी च गणवक्त्रो महोरगः ।
स्कन्दो भानुर्मालगणो दिक्पालाश्च नव ग्रहाः ॥
एषां घटेषु प्रत्येकं पूजयित्वा यथाविधि ।
मूर्द्ध्नि पवित्रमेकैकं दद्यादेभ्यः समाहितः ।
पञ्चगव्यचरुं हुत्वा देव्यै दत्त्वाहुतित्रयम् ।
तेनैव वह्नये दत्त्वा ग्रामवे च यथाविधि ॥
व्याहृतीरुत्तरशतं तिलैराज्यैस्तथैव च ।
अष्टोत्तरशतं दद्यान्महादेवे च साधकः ॥
एवमेवं विधानेन विष्णादीनाञ्च वैष्णवः ।
पवित्रारोपणं कुर्य्याद्धर्म्मकामार्थसिद्धये ॥
नैवेद्यैर्विविधैः पेयैर्वटपिष्टकमोदकैः ।
कुष्माण्डैर्नारिकेलैश्च खर्ज्जूरैः पनसैस्तथा ॥
आम्रदाड़िमकर्कारुद्राक्षादिविविधैः फलैः ।
भक्ष्यभोज्यादिभिः सर्व्वैर्मद्यैर्मांसैस्तथोदनैः ॥
गन्धैः पुष्पैस्तथा धूपैर्दीपैश्च सुमनोहरैः ।
वासोभिर्भूषणैश्चैव भवानीं साधको यजेत् ॥
नटनर्त्तकसंघैश्च वेश्याभिरपि भैरव ! ।
वृत्यगीतैः ससुदितो जागरं कारयेन्निशि ॥
भोजयेद्ब्राह्मणांश्चापि ज्ञातीनपि द्विजोत्तमैः ।
पवित्रारोहणे वृत्ते दक्षिणामुपदापयेत् ॥
हिरण्यं गां तिलं वासो घृतं वा शाकमेव वा ।
इमं मन्त्रं ततः पश्चात् साधकः ससुदीरयेत् ॥
मणिविद्रुममालाभिर्मन्दारकुसुमादिभिः ।

इयं सांवत्सरी पूजा तवास्तु परमेश्वरि ! ॥
ततो विसर्ज्जयेद्देवीं पूर्व्वभिः प्रतिपत्तिभिः ।
एवं कृते पवित्राणां दाने देवा यथाविधि ॥
संवत्सरस्य या पूजा सम्पूर्णा वत्स ! जायते ।
कल्पकोटिशतं यावद्देवीलोके वसेन्नरः
अत्रापि सुखसौभाग्यसन्तुष्टिरतुला भवेत् ॥"
इति कालिकापुराणे ५८ अध्यायः ॥
गरुड़पुराणे ४२ । ४३ अध्याययोरप्येतद्दृष्टव्यम् ॥

पवित्रितः, त्रि, पवित्रमस्य जात इत्यर्थे तारकादित्वात् इतच्प्रत्ययनिष्पन्नः । तत्पर्य्यायः । पवित्रः २ प्रयतः ३ पूतः ४ शुचिः ५ शुद्धः ६ । इति शब्दरत्नावली ॥

पश्, क वन्धे । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट् ।) क, पाशयति । इति दुर्गादासः ॥

पश्, च वाधे । अन्धे । इति कविकल्पद्रुमः ॥ (भ्वां-उभं-सकं-सेट् ।) च, पश्यति, पश्यते । बाधो विहतिः । अन्धो अन्धनम् । अन्धस्थाने सार्व्वनं पठन्ति केचित् । इति दुर्गादासः ॥

पश्, तृ क अनुपसर्गाद्बन्धबाधयोः । सार्व्वगत्योः । इति कविकल्पद्रुमः ॥ (अदन्तचुरां-परं-सकं-सेट् ।) तालव्योपधः । पशयति । अनुपसर्गादिति सोपसर्गस्य प्रयोगो निषिध्यते । बाधो विहतिः । इति दुर्गादासः ॥

पशव्य, त्रि, (पशोरिदं पशवे हितं वा । पशु-यत् ।) पशुसम्बन्धि । इति संक्षिप्तसारव्याकरणम् ॥ (पशुहितकरम् । यथा, याज्ञवल्क्यः १ । ३२१ ।
"रम्यं पशव्यमाजीवं जाङ्गलं देशमावसेत् ॥")

पशुः, पुं, (अविशेषेण सर्व्वं पश्यतीति । दृशिरौ प्रेक्षणे + "अर्च्चिदृशिकम्यमिपंसीति ।" उणां । १ । २८ । इति कुः पश्यादेशश्च ।) अन्या युत्पत्तिर्यथा, "पशूयन्ति पश्यन्ति पार्श्वदृक्षाभ्यां हिताहितम् ।" इति भरतः ॥ जन्तुविशेषः । तस्य लक्षणम् । क्षीरवक्षाङ्गलवत्त्वम् । इति भाषारत्ने कणादः ॥ तद्भेदा यथा । सिंहः १ व्याघ्रः २ तरक्षुः ३ वराहः ४ कपिः ५ भल्लूकः ६ खड्गी ७ महिषः ८ शृगालः ९ विड़ालः १० गोधा ११ श्वावित् १२ हरिणः १३ कृष्णसारः १४ रुरुः १५ न्यङ्कुः १६ रङ्कुः १७ शम्बरः १८ रोहिषः १९ गोकर्णः २० पृषतः २१ एणः २२ ऋष्यः २३ रोहितः २४ चमरः २५ गन्धर्व्वः २६ शरभः २७ रामः २८ स्मरः २९ गवयः ३० शशः ३१ खड्गाशः ३२ गौः ३३ उष्ट्रः ३४ छागः ३५ मेषः ३६ खरः ३७ हस्ती ३८ अश्वः ३९ । इत्यमरः ॥ * ॥ (यथा, ("पशुः पशूनां दीर्घत्वात् कश्चिदर्थे प्रकाश्यते ।
सत्त्वं प्रकृतिमासाद्य प्रकृतिं भजते पशुः ॥
तद्वदज्ञो भ्रमध्यस्थः कश्चिन्मौख्यसाधनः ।
स्वापत्यत्वात्मनात्मानमात्मन्वासाद्य भिद्यते ॥"
इति चरके सूत्रस्थाने त्रिंशेऽध्याये ॥)
तत्र आरण्यभेदेन चतुर्दशविधाः पशवो यथा,

"गौरविरजोऽश्वोऽश्वतरा गर्द्दभो मनुष्यश्चेति सप्त ग्राम्याः पशवः। महिषवानरऋक्षसरीसृपरुरुशृमतद्गाश्चेति सप्तारण्याः पशवः॥" इति दुर्गोत्सवतन्त्रे पेठीनसिः॥ * ॥ वैद्यके भूशयचाङ्गलमेदेन स द्विविधः। तत्र विलशायित्वात् भूशया नकुलगोधादयः। तेषां मांसगुणाः।

"ग्रहसा भूशयानूपवारिजा वारिचारिणः।
गुरूष्णमधुराः स्निग्धा वातघ्नाः शुक्रवर्द्धनाः॥
स्थलजा जाङ्गलाः प्रोक्ता मृगा जङ्गलचारिणः।
जाङ्गला हरिणच्छागादयः। तेषां मांसगुणाः।
लघवः शीतमधुराः सकषाया हिता नृणाम्॥
तेषामवयवादीनां गुणः।
गुरुभक्षा बहुभुजो ये चोपचितमेदसः।
एकदेहोऽपि पूर्व्वार्द्धं मृगाणां पक्षिणां परम्॥
सर्व्वेषाञ्च शिरःस्कन्धग्रीहृच्चर्म्मयकृद्गुदम्।
पादपुच्छान्त्रमस्तिष्कमुष्कक्रोड़ाः समेहनाः।
धातवः शोणिताद्याश्च गुरवः स्युः परस्परम्॥"

इति राजवल्लभः॥ * ॥

("तत्र गजगवयमहिषरुरुचमरऋमररोहितवराहखड्गिगोकर्णकालपुच्छ-कोन्नयङ्कुरण्यगवयप्रभृतयः कूलचराः पशवः।" एषां गुणा यथा,—

"वातपित्तहरा वृष्या मधुरा रसपाकयोः।
शीतला बलिनः स्निग्धा मूत्रलाः कफवर्द्धनाः॥"

इति सुश्रुते सूत्रस्थाने ४६ अध्यायः॥

"उष्ट्रा गजा वाजिनश्च महिषाः सौरभाजकाः।
खरशूकरमेषाश्च श्वा च मार्জ্জারमूषकाः।
इत्यते पशवो ज्ञेया ग्रामवासनिवासिनः॥"

इति हारीते प्रथमस्थाने एकादशेऽध्याये॥)

छागादौ पशुप्रदप्रयोगमाह यज्ञपार्श्वः।

"उष्ट्रो वा यदि वा मेषश्छागो वा यदि वा हयः।
पशुस्थाने नियुक्तानां पशुशब्दोऽभिधीयते॥"

इति बलिदानप्रकरणे तिथितत्त्वम्॥ * ॥

अवैधपशुहनने दोषो यथा,—

"वसेत् स नरके घोरे दिनानि पशुरोमभिः।
सम्मितानि दुराचारो यो हन्त्यविधिना पशून्॥"

इति गारुड़े ६५ अध्यायः॥ * ॥

पशुधिष्ठात्री देवता यथा,—

"सिंहे वसति दुर्गा च भूरमे च प्रजापतिः।
अग्नौ च वसते वायुर्मेषे चैव च चन्द्रमाः॥
नक्षत्राणि च शूकरे कृष्णसारे हरिः स्वयम्।
घृतक्रतुगवां पृष्ठे गवये भुवनानि च॥
शूकरे मङ्गलाद्यौ गजे विष्णुर्गणेश्वरः।
अश्वे तु द्वादशादित्या ब्राह्मणे सर्व्वदेवताः॥
ब्रह्मा तु चामरे चैव छागले तु तथानलः।
एतस्मात् कारणादेते पूज्या वन्द्याः प्रयत्नतः॥"

इति भूतडामरतन्त्रे ३६ पटलः॥ * ॥

प्रमथः। देवः। प्राणिमात्रम्। इति शब्दरत्नावली॥ कृमिः। यज्ञः। संसारिणामात्मा। इति धरणिः॥ यज्ञोड़ुम्बरः। इति शब्दचन्द्रिका॥ * ॥ * ॥ साधकानां भावत्रयाणां प्रथमो भावः। तस्य निर्णयो यथा, षष्ठपटले।

"पशुभावस्थितां नाथ! देवतां शृणु विस्तरात्।
दुर्गापूजां विष्णुपूजां शिवपूजाञ्च नित्यशः॥
अवश्यं हि यः करोति स पशुरुत्तमः स्मृतः।
केवलं शिवपूजाञ्च यः करोति च साधकः॥
पशूनां मध्यतः श्रीमान् शिवया सह चोत्तमः।
केवलं वैष्णवो धीरः पशूनां मध्यमः स्मृतः॥
भूतानां देवतानाञ्च सेवां कुर्व्वन्ति सर्व्वदा।
पशूनामधमाः प्रोक्ता नरकस्था न संशयः॥
त्वत्सेवां मम सेवाञ्च ब्रह्मविष्ण्वादिसेवनम्।
कृत्वान्यसर्व्वभूतानां नायिकानां महाप्रभो!॥
यक्षिणीनां भूतिनीनां ततः सेवां शुभप्रदाम्।
यः पशुर्ब्रह्मकृष्णादिसेवाञ्च कुरुते सदा॥
तथा श्रीतारकब्रह्मसेवां ये वा नरोत्तमाः।
तेषामसाध्या भूतादिदेवता सर्व्वकामदा॥
वर्ज्जयेत् पशुमार्गेण विष्णुसेवापरो जनः॥"

द्वितीयपटले।

"नित्यश्राद्धं तथा सन्ध्यावन्दनं पितृतर्पणम्।
देवतादर्शनं पीठदर्शनं तीर्थदर्शनम्॥
गुरोराज्ञापालनञ्च देवतानित्यपूजनम्।
पशुभावस्थितो मन्त्री महासिद्धिं लभेद्ध्रुवम्॥"

षष्ठपटले।

"पुनर्भावं पशोरेव शृणुष्वादरपूर्व्वकम्।
अकस्मात् सिद्धिमाप्नोति पशुर्नारायणोपमः॥
वैकुण्ठनगरे याति चतुर्भुजकलेवरः।
शङ्खचक्रगदापद्महस्तो गरुड़वाहनः॥
महाधर्म्मस्वरूपोऽसौ महाविद्याप्रसादतः।
पशुभावं महाभावं भावानां सिद्धिदं परम्॥
आदौ भावं पशोः कृत्वा पश्चात् कुर्य्यादवश्यकम्।
वीरभावं महाभावं सर्व्वभावोत्तमोत्तमम्।
तत्पश्चादतिसौन्दर्य्यं दिव्यभावं महाफलम्॥

इति रुद्रयामले उत्तरखण्डम्॥ * ॥

तस्य कालो यथा,—

"आदौ दृश्यमदण्डेन पशुभावमथापि वा॥"

इति तत्रैव।

"जन्ममात्रं पशुभावं वर्षमेकं त्वकावधि॥"

इति वामकेश्वरे ५१ पटलः॥ * ॥

पशुभावकर्त्तव्याकर्त्तव्यगर्भतद्भावनिन्दामाह।

"पशुभावरता ये च केवलं पशुरूपिणः।
रात्रौ यत्नञ्च मन्त्रञ्च न स्पृशेत् न जपेत् क्वचित्॥
संशयो बलिदाने च तन्त्रे च संशयः सदा।
मन्त्रे चाचरबुद्धिश्च अविश्वासो गुरौ सदा॥
प्रतिमासु शिलाबुद्धिर्भेदको देवते पुनः।
निरामिषेण देवेशि! देवताया: प्रपूजनम्॥
अज्ञानेन सदा स्नानं प्रत्यहं देहताड़नम्।
सर्व्वेषाञ्चैव निन्दासु यः कुर्य्याच्च महेश्वरि!।
स एव पशुभावेन अधमः परिकीर्त्तितः॥"

इति रुद्रयामले उत्तरखण्डे ६ पटलः॥ * ॥

"रात्रौ नैव यजेद्देवीं सन्ध्यायां वा पराङ्गके।
ऋतुकालं विना देवि! रमणं परिवर्ज्जयेत्॥
मांसादिकं महेशानि! त्यजेत् पक्षसु पर्व्वसु।
यदन्यद्वेदविहितं कुर्य्यान्नियमतत्परः॥"

इति नित्यातन्त्रे १ पटलः॥ * ॥

पशूनां व्रतभङ्गप्रायश्चित्तं यथा,—

"पशूनां व्रतभङ्गादौ विधिं प्रथमतः शृणु।
व्रतभङ्गे नित्यभङ्गे नित्यपूजादिकर्म्मणि।
सहस्रं प्रजपेन्मन्त्री व्रतदोषोपशान्तये॥"

इति रुद्रयामले उत्तरखण्डे २ पटलः॥

पशु, य, (दृश्यते इति। दृश+"अर्च्चिदृशीति।" उणां।१।२८। इति भावे कुः पशि-आदेशश्च।) दर्शनम्। इति मेदिनी। शे, १०॥

पशुक्रिया, स्त्री, (पशोरिव क्रिया कार्य्यम्।) मैथुनम्। इति हेमचन्द्रः। ३।२०१॥ (पशुना छागादिजन्तुना क्रिया इति विग्रहे छागादि पशुबलिदानकार्य्यम्। यथा, हरिवंशे।५७।५२।

"कृताशुयात्रा भूतेशं नित्यं मांसबलिप्रिया।
तिथौ नवम्यां पूजाञ्च प्राप्यासे सपशुक्रियाम्॥")

पशुगायत्री, स्त्री, (पशुकर्णजप्या गायत्री।) बलिदानीयपशुकर्णजप्यमन्त्रविशेषः। यथा,—

पशुकर्णे पशुगायत्रीं जपेत्। सा यथा। "पशुपाशाय विद्महे शिरश्छेदाय धीमहि तन्नः पशुः प्रचोदयात्।" इति दुर्गोत्सवप्रयोगः॥

पशुपतिः, पुं, (पशूनां स्थावरजङ्गमानां पतिः।) शिवः। इत्यमरः। १। १। २२॥ (यथा, महाभारते। १३। १७। १३४।

"ऊर्द्धगात्मा पशुपतिर्व्वातरंहा मनोजवः॥"

तस्य निरुक्तिर्यथा चिन्तामणिधृतवचने,—

"ब्रह्माद्याः स्थावरान्ताश्च पशवः परिकीर्त्तिताः।
तेषां पतिर्महादेवः स्मृतः पशुपतिः श्रुतौ॥")

अपरा निरुक्तिर्यथा, वराहपुराणे।

"अहञ्च सर्व्वविद्यानां पतिराद्यः सनातनः।
अहं वै पतिभावेन पशुमध्ये व्यवस्थितः।
अतः पशुपतिर्नाम लं लोके ख्यातिमेष्यसि॥"

अयं यजमानमूर्त्तिः। यथा। पशुपतये यजमानमूर्त्तये नमः। इत्यष्टमूर्त्तिपूजायां भविष्यपुराणम्॥ (महादेवो हि नेपाले पीठस्थाने पशुपतिरित्याख्यया विराजते। यदुक्तं महालिङ्गेश्वरतन्त्रे शिवस्य शतनामस्तोत्रे,—

"नेपाले च पशुपतिः कैदारे परमेश्वरः॥")

पशुपल्वलं, क्ली, (पशुप्रियं पल्वलं क्षुद्रजलाशय उत्पत्तिस्थानत्वेनास्त्यस्य। अच्। पशुप्रियं पल्वलमिवेति केचित्।) कैवर्त्तीमुस्तकम्। इति शब्दचन्द्रिका॥

पशुपाशकः, पुं, (पशूनामिव पाशो बन्धनं यत्र। ततः कप्।) रतिबन्धविशेषः। यथा,—

"स्त्रियमानतपूर्व्वाङ्गीं स्वपादान्तःपदद्वयम्।
ऊर्द्ध्वेन रमेत कामी बन्धोऽयं पशुपाशकः॥"

इति रतिमञ्जरी॥

पशुप्रेरणं, क्ली, (पशूनां प्रेरणम्।) गवादीनां चालनम्। तत्पर्य्यायः। उदञ्जः २। इत्यमरः। ३। २। ३६॥

पशुमोहनिका, स्त्री, (मुह्यतेऽनया। मुह+ल्युट्। स्वार्थे कन् टापि अत इत्वम्। ततः पशूनां मोहनिका।) कड़ीलता। इति राजनिर्घण्टः॥ (कड़ीशब्देऽस्या विशेषो ज्ञेयः॥)

पशुरज्जुः, स्त्री, पशूनामश्वादीनां बन्धनाय रज्जुः। तत्पर्य्यायः। दामनी २। इत्यमरः। २।६।७३॥ बन्धनी ३। इति शब्दरत्नावली॥

पशुराजः, पुं, (पशूनां राजा। "राजाहःसखिभ्यष्टच्।" ५। ४। ९१। इति समासान्तटच्।) सिंहः। इति शब्दचन्द्रिका॥

पशुहरीतकी, स्त्री, (पशूनां हरीतकीव हितकारित्वात्।) आम्रातकफलम्। इति चिकाण्डशेषः॥

पश्चात्, अ, (अपरस्मिन् अपरस्मात् अपरो वा वर्त्तते आगतो रमर्य्यो यं वा। "पश्चात्।" ५। ३। ३२। इति अपरस्य पश्चभाव आतिच प्रत्ययोऽस्तातेर्विषये।) प्रतीची। चरमम्। इत्यमरः। ३। ३। २४२॥ (यथा, रघुः। ४।३०।

"प्रतापोऽग्रे ततः शब्दः परागस्तदनन्तरम्।
ययौ पश्चाद्यथादीप्ति चतुरस्त्रेव वा गजः॥")

अधिकारः। इति मेदिनी। ते, ३१॥

पश्चात्तापः, [न्] (पश्चात् अग्रतोऽकार्य्ये कृते चरमे तापः।) अनुशोचनम्। चरमे शोकः। पस्ताव इति भाषा। तत्पर्य्यायः। अनुतापः २ विप्रतीसारः ३। इत्यमरः। १। ७। २५॥ (यथा, रामायणे। ३। ५८। ३९।

"उक्तेति परुषं वाक्यं पश्चात्तापसमन्वितः॥"

केचित्तु पश्चात् ताप इति पदद्वयमिच्छन्ति॥)

पश्चार्द्धः, त्रि, (अपरस्यार्द्धस्य पश्चभावश्च वक्तव्यः।" २। २। ५८। इत्यस्य वार्त्तिं इति पश्चभावः।) शेषार्द्धः। अपरार्द्धः। यथा, शकुन्तलायाम्। १अङ्के।

"ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने बद्धदृष्टिः
पश्चार्द्धेन प्रविष्टैः शरपतनभयाद्भूयसा पूर्व्वकायम्॥"

पश्चिमं, त्रि, (पश्चाद्भवम्। "अग्रादिपश्चात् डिमच्।" ४। ३। २३। इत्यस्य वार्त्तिं इति डिमच्।) पश्चाद्भवम्। इत्यमरः। ३। १।८२॥ (यथा, रघुः। १७। ८।

"तदात्मसम्भवं राज्ये मन्त्रिवृद्धाः समादधुः।
स्मरन्तः पश्चिमामाज्ञां भर्त्तुः संग्रामयायिनः॥")

पश्चिमा, स्त्री, (पश्चिम+टाप्।) अस्ताचलावच्छिन्नदिक्। तत्पर्य्यायः। प्रतीची२ वारुणी३ प्रत्यक् ४। तद्दिग्भववायुगुणाः।

"पश्चिमो मारुतस्तीक्ष्णः कफमेहविशोषणः।
सद्यः प्राणहरो दुष्टः शोषकारी शरीरिणाम्॥"

इति राजनिर्घण्टः॥

अपिच। राजवल्लभः।

"पश्चिमोऽग्निपुरस्तोबलारोग्यविवर्द्धनः।
कषायः शोषणः स्वर्य्यो रोचनो विशदो लघुः॥
अपां लघुत्वेशैत्यश्लैष्मिकत्वैमन्यकारकः।
सर्व्वदोषेष्वभियुक्तप्रभावस्तवीर्य्यकृत्॥
व्रणसंरोपणस्त्वग्यो दाहश्लोथबलापहः॥"

तद्दिग्धिपतिर्वरुणः। यथा, अमरे। १।३।१।

"इन्द्रो वह्निः पितृपतिर्नैर्ऋतो वरुणो मरुत्।
कुबेर ईशः पतयः पूर्व्वादीनां दिशां क्रमात्॥"

तद्दिक्पतयो मिथुनतुलाकुम्भराशयश्च। यथा,

"प्रागादिकक्षुभान्नाधा यधासंख्यं प्रदक्षिणम्।
मेषाद्या राशयो ज्ञेयास्तिराहुत्ति परिभ्रमात्॥"

इति ज्योतिस्तत्त्वम्॥

पश्च, य, प्रश्नश्च। विस्मयः। इति शब्दरत्नावली॥ (पश्यतीति व्युत्पत्त्या "पाघ्राध्माधेट्दृशः शः।" ३। १। १३७। इति शप्रत्ययेन पश्यो वाच्यलिङ्गः। दर्शकः। यथा, सुश्रुतोपनिषदि। ३। १। ३।

"यदा पश्यः पश्यते रुक्मवर्णं
कर्त्तारमीशं पुरुषं ब्रह्मयोनिम्।
तदा विद्वान् पुण्यपापे विधूय
निरञ्जनः परमं साम्यमुपैति॥")

पश्यतिकर्म्मा, [न्] पुं, (पश्यतिर्दर्शनमेव कर्म्म यस्य।) दर्शनकर्म्मा। तद्वैदिकपर्य्यायाः। चिक्यात् १ चाकशत् २ अचीचच्च ३ चष्टे ४ विचष्टे ५ विचर्षणिः ६ विश्वचर्षणिः ७ अवचाकशत् ८। इत्यष्टौ पश्यतिकर्म्माणः। इति वेदनिघण्टौ ३ अध्यायः॥

पश्यतोहरः, त्रि, (पश्यन्तं जनमनादृत्य हरतीति। कृञ् हरणे+अच्। "षष्ठी चानादरे।" २। ३। ३८। इति अनादरे षष्ठी। "वाग्दिक्पश्यक्षुधो युक्तिदण्डहरेषु।" ६। ३। २१। इत्यस्य वार्त्तिं इति षष्ठ्या अलुक्।) चौरः। यथा, हेमचन्द्रे। ३।४६।

"यः पश्यतो हरेदर्थं स चौरः पश्यतोहरः॥"

पश्यन् [त्], त्रि, (पश्यतीति। दृशिरौ प्रेक्षणे+"लटः शतृशानचावप्रथमासमानाधिकरणे।" २।२।१२४। इति शतृ।) ईक्षणकर्त्ता। इति व्याकरणम्॥ (यथा, मार्कण्डेये। ८२। २६।

"इत्युक्त्वा सा भगवती चण्डिका चण्डविक्रमा।
पश्यतामेव देवानां तत्रैवान्तरधीयत॥")

पश्यन्ती, स्त्री, (पश्यति या दृश्+शतृ+ङीप्। ततः "अपृपृश्यनोर्नित्यम्।" ७।१।८१। इति नुम्।) मूलाधारोत्थितहृदयगतनादरूपवर्णः। यथा,—

"मूलाधारात् प्रथमसुदितो वह्नितारः परात्मः
पश्चात् पश्यन्नथ हृदयगो बुद्धियुङ्मध्यभाग्यः॥"

इत्यलङ्कारकौस्तुभः॥

(यथाच,—

"वैखरीशक्तिनिष्पत्तिर्मध्यमा श्रुतिगोचरा।
द्योतितार्था तु पश्यन्ती सूक्ष्मा वागनपायिनी॥"

इति मल्लिनाथधृतवाक्यम्॥

ईक्षणकर्त्री। इति व्याकरणम्॥)

पश्वाचारः, पुं, (पशूनां तन्त्रोक्ताधिकारिविशेषाणामाचारः।) आचारविशेषः। यथा,—

"वेदोक्तेन यजेद्देवीं कामसङ्कल्पपूर्व्वकम्।
स एव वैदिकाचारः पश्वाचारः स उच्यते॥"

इत्याचारभेदतत्त्वम्॥

पष, क वन्धे। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) क, पाषयति। तालव्यान्त एवायमिति बहवः। दन्त्यान्त इति केचित्। मूर्द्धन्यान्तपाठस्तु कस्यचिदनुरोधात्। इति दुर्गादासः॥

पष, अ वाधे। ग्रन्थे। इति कविकल्पद्रुमः॥ (भ्वां-उभं-सकं-सेट्।) अ, पषति पषते। बाधो विहतिः। ग्रन्थो ग्रन्थनम्। ग्रन्थनस्थाने सर्ज्जनं केचित् पठन्ति। इति दुर्गादासः॥

पष, तृ क अनुपसर्गाद्बन्धबाधयोः। सर्ज्जगल्भोः। इति कविकल्पद्रुमः॥ (अदन्तचुरां-परं-सकं-सेट्।) सृर्ज्जनोपघः। क, पषयति। अनुपसर्गादिति सोपसर्गस्य प्रयोगो निषिध्यते। बाधो विहतिः। इति दुर्गादासः॥

पस, इ क नाशे। इति कविकल्पद्रुमः। (चुरां-परं-सकं-सेट्।) नाश इह नष्टीकरणम्। इ क, पंसयति पापं गङ्गा। इति दुर्गादासः॥

पस, क वन्धे। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं सेट्।) क, पासयति। पृथक्पाठादयं न नित्। अन्यथा पस कि अ इत्यनेनैवेष्टसिद्धे पृथक्पाठोऽनर्थकः स्यात्। इति दुर्गादासः॥

पस, अ वाधे। ग्रन्थे। इति कविकल्पद्रुमः। (भ्वां-उभं-सकं-सेट्।) अ, पसति पसते। इति दुर्गादासः॥

पस्त्यं, क्ली, (अपस्त्यायन्ति सङ्घीभूय तिष्ठन्ति जीवा यत्र। अप+स्त्यै सङ्घातशब्दयोः+"आतश्चोपसर्गे।" ३। १। १३६। इति कः। उपसर्गस्याकारलोपो निपातनात्।) गृहम्। इति हेमचन्द्रः। ४। ५६॥ (यथा, ऋग्वेदे। १०। ६६। ११। [सूर्य्याय॥"]

प्र पस्त्यमसुर हर्य्यतं गोरविष्कृधि हरये

पङ्कवः, पुं, प्रसन्नधारिस्वेच्छजातिविशेषः। तस्य विवरणं यथा, हरिवंशे। १४। १५—१६।

"सगरस्तां प्रतिज्ञाय गुरोर्वाक्यं निशम्य च।
धर्म्मं जघान तेषां वै वेषान्यत्वं चकार ह॥
अर्द्धं शकानां शिरसो मुण्डयित्वा व्यसर्ज्जयत्।
यवनानां शिरः सर्व्वं काम्बोजानान्तथैव च॥
पारदा मुक्तकेशाश्च पह्लवाः प्रसन्नधारिणः।
निःस्वाध्यायवषट्काराः कृतास्तेन महात्मना॥
शका यवनकाम्बोजाः पारदाः पह्लवास्तथा।
कोलाः सर्पाः समहिषा दार्व्वाचोलाः सकेरलाः॥
सर्व्वे ते क्षत्रियास्तात! धर्म्मस्तेषां निराकृतः।
वशिष्ठवचनाद्राजन्! सगरेण महात्मना॥"

(क्वचित् पह्लवः पाठोऽपि दृश्यते। यथा, गोः रामायणे। १। ५५। १८।

"तस्या हम्भारवोत्सृष्टाः पह्लवाः शतशो नृप!।
अनाशयन् बलं सर्व्वं विश्वामित्रस्य पश्यतः॥")

पङ्किका, स्त्री, वारिप्रस्थी। इति शब्दमाला॥

पा, पाने। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-अनिट्।) अस्यैव पिबादेशः। पिबति पयः मान्यः। इति दुर्गादासः॥

पा, त्र रक्षणे। इति कविकल्पद्रुमः॥ (अदां-परं-सकं-अनिट्।) त्र, पाति। इति दुर्गादासः॥

पाः, त्रि, (पिबतीति । पा पाने + क्विप् ।) पानकर्त्ता ॥ (पाति रक्षतीति । पा रक्षणे + क्विप् ।) रक्षणकर्त्ता । ("विश्वं पातीति विश्वपाः ।" इति मुग्धबोधव्याकरणम् ॥)

पांशवः, पुं, (पांशोरेवेयमिति विशेषस्य विकारः । पांशु + अण् ।) लवणविशेषः । पाङ्गा लोन इति भाषा ॥ तत्पर्य्यायः । रोमकम् २ औद्भिज्जम् ३ वसुकम् ४ वसुपांसुः ५ ऊषरजम् ६ औषरम् ७ रेरिणम् ८ और्व्वम् ९ सहम् १० । अस्य गुणाः । तीक्ष्णत्वम् । अत्युष्णत्वम् । कटुत्वम् । तिक्तत्वम् । दीपनत्वम् । दाहशीघ्रकरत्वम् । ग्राहित्वम् । पित्तकोपकरत्वञ्च । इति राजनिर्घण्टः ॥

"औद्भिदं पांशुलवणं यज्जातं भूमितः स्वयम् ।
क्षारं गुरु कटु स्निग्धं श्लेष्मलं वातनाशनम् ॥"
इति भावप्रकाशः ॥

पांसुः, पुं, (पंसयति नाशयति आत्मानमिति । पंसि नाशने + "अर्ज्जिदृशिकमीति ।" उणां । १ । २८ । इति कुः दीर्घश्च ।) धूलिः । इत्यमरः । २ । ८ । ६८ ॥ (यथा, मनुः । ४ । १०२ ।
"कर्णश्रवेऽनिले रात्रौ दिवा पांसुसमूहने ।
एतौ वर्षासु नाध्यायाध्यायज्ञाः प्रचक्षते ॥")
शुष्कार्द्धचिरसञ्चितगोमयः । सार इति भाषा ॥ इति मेदिनी । शे, ११ ॥ पर्पटः । कर्पूरविशेषः । इति राजनिर्घण्टः ॥ (दन्त्यसकारान्तोऽपि दृश्यते ॥)

पांसुकासीसं, क्ली, (पांसुरिव कासीसम् ।) कासीसम् । इति राजनिर्घण्टः ॥

पांसुकूली, स्त्री, (पांसुना कोलति आकुलीभवतीति । कुल + कः । ततः स्त्रियां ङीष् ।) राजमार्गः । यथा । "रथ्या पांसुकुली भवेत् ।" इति हारावली । ११२ ॥

पांसुकूलं, क्ली, (पांशोः कूलामव ।) अनामपट्टोलिका । यथा, चिकाण्डशेषे ।
"शवासनं धर्म्मकीलः स्यात्सुकृतिः शूद्रशासनम् ।
पट्टोलिका कुलत्थकीला पांसुकूलं न कस्यचित् ॥"

पांसुचत्वरः, पुं, (पांसुभिश्चत्वर इव ।) घनोपलः । इति शब्दमाला ॥

पांसुचन्दनः, पुं, (पांसुश्चितासरजश्चन्दनमिव यस्य ।) शिवः । इति चिकाण्डशेषः ॥

पांसुचामरः, पुं, (पांसुर्धूलिश्चामर इव यस्य ।) पटवासः । इति जटाधरः ॥ ताँबु इति भाषा ॥ (पांशौ दूर्व्वा चामर इव यस्य ।) दूर्व्वाश्चिततटी भूमिः । वर्द्धापकः । प्रशंसा । पुरोटिः । धूलिगुच्छकः । इति मेदिनी । रे, ३०५ ॥

पांशुजं, क्ली, (पांशोर्जायते इति । पांशु + जन् + डः ।) पांसुलवणम् । पाङ्गा लोन इति भाषा ॥ तत्पर्य्यायः । जयम् २ औद्भिदम् ३ । भाव्यम् ४ लवणम् ५ मृदु ६ । इति रत्नमाला ॥ अस्य गुणाः । भेदकत्वम् । पाचनत्वम् । पित्तकारित्वम् । इति राजवल्लभः ॥

पांशुपत्रं, क्ली, (पांसुः कर्पूर इव सुगन्धि पत्रमस्य ।) वास्तूकम् । इति शब्दमाला ॥

पांशुमर्द्दनः, पुं, (मृद्यतेऽसाविति । मृद् + ल्युट् । मर्द्दनः । ततः पांशुः मर्द्दनो यत्र । यद्वा पांशोर्मर्द्दनं यत्र ।) केदारः । इति चिकाण्डशेषः ॥

पांशुरः, पुं, (पांशुं चिरसञ्चितगोमयादिकमुत्पत्तित्वेन राततीति । पांशु + रा + कः ।) दंशकः । डाँश इति भाषा ॥ पीठसर्पी । खड्गः । इति हारावली । १२३ ॥ (पांशुरस्यास्तीति । "नगपांसुपाण्डुभ्यश्च ।" ५ । २ । १०७ । इत्यस्य वार्त्तिं इति रः । पांशुविशिष्टे, त्रि ॥ यथा, ऋग्वेदे । १ । २२ । १७ ।
"इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् ।
समूढमस्य पांशु(सु)रे ॥")

पांशुरागिणी, स्त्री, (पांशुरागो विद्यतेऽस्याः । इनिः स्त्रियां ङीप् च ।) महामेदा । इति राजनिर्घण्टः ॥

पांशुलः, पुं, (पांशुर्विद्यतेऽस्य । पांशु + "सिध्मादिभ्यश्च ।" ५ । २ । ९७ । इति लच् ।) हरः । पापी । इति शब्दरत्नावली ॥ पुंश्चलः । भ्रमीः खड्गाङ्गम् । इति मेदिनी । ले, १०८ ॥ पूतिकः । काँटाकरञ्জ इति भाषा ॥ इति शब्दचन्द्रिका ॥ पांशुयुक्ते त्रि । इति धरणिः ॥ (पांशुर्दोषः पापञ्च तद्युक्ते च त्रि । यथा, रघुः । २२ ।
"तस्याः खुरन्यासपवित्रपांशु
मपांशुलानां धुरि कीर्त्तनीया ।
मार्गं मनुष्येश्वरधर्म्मपत्नी
श्रुतेरिवार्थं स्मृतिरन्वगच्छत् ॥")

पांशुला, स्त्री, (पांशुल + टाप् ।) कुलटा । भूमिः । इति शब्दरत्नावली ॥ केतकी । रजस्वला । इति राजनिर्घण्टः ॥

पांसनः, त्रि, (पंसयति गुणादिकं नाशयतीति । पंसि + ल्युः । बाहुलकात् दीर्घः ।) दूषकः । इति चिकाण्डशेषः ॥ (यथा, महाभारते । १ । १५४ । ३३ ॥
"निरावाधास्त्वयि हते मया राक्षसपांसन ! ।
वनमेतच्चरिष्यन्ति पुरुषा वनचारिणः ॥")

पांसुः, पुं, (पंसयतीति । पंसि नाशने + "अर्ज्जिदृशिकमीति ।" उणां । १ । २८ । इति कुदीर्घश्च ।) धूलिः । (यथा, हेः रामायणे । २ । ८० । ६ ।
"अपरे पूरयन् कूपान् पांसुभिः शुभ्रमायतम् ।
निम्नभागांस्तथैवाशु समांश्चक्रुः समन्ततः ॥")
चिरसञ्चितगोमयम् । इत्युणादिकोषः भरतश्च ॥ सार इति भाषा ॥

पाकः, पुं, (पच् + भावे घञ् ।) पचनम् । क्लेदनम् । तत्पर्य्यायः । पचा २ । इत्यमरः । ३ । २ । ८ ॥ रन्धनम् । स तु सप्तप्रकारो यथा,—
"भर्ज्जनं तलनं स्वेदः पचनं क्वथनं तथा ।
तान्दूरं पुटपाकश्च पाकः सप्तविधो मतः ॥"
भर्ज्जनं केवलपात्रे । तलनं स्नेहद्रव्ये । स्वेदनं अयुक्तापे । पचनं जले । क्वथनं सिद्धद्रव्यरसग्रहणे । तान्दूरं द्वारवद्वृतप्रयत्ने । पुटपाकः अधोर्द्धाग्नितापे ज्ञेयः । इति पाकराजेश्वरः ॥

स्थालीमार्জ্জনाद्योदनपरीक्षान्तो व्यापारनिचयः पाकः । इति स्मृतिः ॥ * ॥ पाकभाण्डस्य त्याज्यत्वं यथा,—
"नित्यं नूतनभाण्डेन कर्त्तव्यः पाक एव च ।
अथवा पक्वपर्य्यन्तं ततस्त्याज्यं मनीषिभिः ॥"
इति ब्रह्मवैवर्त्तपुराणम् ॥ * ॥
पाककाले शूद्रायाग्निदाननिषेधो यथा,—
"शूद्रायाग्निञ्च यो दद्यात् पाककाले विशेषतः ।
शूद्रापक्वं भवेदन्नं ब्राह्मणः शूद्रतामियात् ॥"
इति कर्म्मलोचनम् ॥ * ॥
एकोद्दिष्टश्राद्धे तस्य नित्यत्वं यथा,—
"एकोद्दिष्टन्तु कर्त्तव्यं पाकेनैव सदा स्वयम् ।
अभावे पाकपात्राणां तदहः समुपोषणम् ॥"
इति श्राद्धतत्त्वम् ॥ * ॥
तस्य विधिर्यथा,—
"पूर्व्वाशाभिमुखो भूत्वा उत्तराशामुखेन वा ।
पक्वेदन्तु मध्याह्ने सायाह्ने च विवर्ज्जयेत् ॥
अग्न्याशाभिमुखे पक्वमन्नतान्नं विजानता ।
पूर्व्वास्यो धर्म्मकामः स्यात् शोकहानिन्तु दक्षिणे ॥
श्रीकामश्चोत्तरमुखे पतिकामश्च पश्चिमे ।
ऐशान्याभिमुखे पक्वा दरिद्रो जायते नरः ॥
यदा तु आयसे पात्रे पक्वमश्नाति वै द्विजः ।
स पापिष्ठोऽपि भुङ्क्तेऽन्नं रौरवे परिपच्यते ॥
ताम्रे पक्वा चक्षुहानिर्मरणं भवति ध्रुवम् ॥
पित्तभ्यां पक्वमन्नञ्च पित्तरोगं यशस्विनि ! ।
पुण्डरीकस्य यज्ञस्य लभते फलमीप्सितम् ॥
वातुलेन तु यत् पक्वं भगिन्या च कनिष्ठया ।
असगोत्रेण यत् पक्वं श्रोत्रियं तदपि स्मृतम् ॥
अभक्तेन च यत् पक्वं स्त्रिया पक्वान्नयैव च ।
पक्वपात्रे च यत् पक्वं तत् सर्व्वं निष्फलं भवेत् ॥
उडुम्बरेण काष्ठेन कदम्बस्य दलेन च ।
शालेन करमर्द्देन उदरावर्त्तकेन च ॥
पक्वान्नं नैव भुञ्जीत मुक्त्वा रात्रिमुपावसेत् ।
गर्हितान्नमवीरान्नं मुक्त्वा छर्द्दिं समाचरेत् ।
अप्रजा या तु वनिता नाम्नीयादेव तद्गृहे ॥
शालकाष्ठस्य पक्वान्नं शिरीषकस्य चैव हि ।
कलिञ्चशातकस्यैव वचावारुणकस्य च ।
भेरण्डशाल्मलेर्वापि पक्वान्नं गर्हितं स्मृतम् ॥
यदा च्छन्नयपात्रे तु पक्वं वै सार्व्वकालिकम् ।
मासे पक्षे तथाष्टौ च तत्पाकं विवर्জ্জयेत् गृही ॥
धनुः पाके तथा सिंहे मिथुने वा वरानने ! ।
यः कुर्य्याद्भोजनं देवि ! छर्द्दिस्तेन विशुध्यति ॥
एकदा तु जलं दद्याद् द्विवारं न प्रदापयेत् ।
त्रिभागं पूरयेत् पात्रं पश्चात्तोयं न दापयेत् ॥"
इति मत्स्यसूक्ते ४२ पटलः ॥ * ॥
परिणतिः । (यथा, मार्कण्डेये । ७० । ३४ ।
"स्वकर्म्मफलपाकेन भर्त्तुस्तस्य महात्मनः ।
वियोजिताहं तद्वैतुरथमासीन् निशाचरः ॥"
पिबति स्नात्यादिकं इति । पा पाने + "इषुभीकापाशल्यतिमर्च्चिभ्यः कन् ।" उणां । ३ । ४३ । इति कन् ।) शिग्रुः । जरसा केशस्य शौक्ल्यम् । स्याल्यादि । इति मेदिनी । के, २६ ॥

पेचक:। राग्यादि। भङ्ग:। भीति:। इति शब्द-रत्नावली॥ देव:। इति हेमचन्द्र:। २।८८॥ (यथा, भागवते। ७। २। ४।
भो भो दानवदैतेया! द्विमूर्द्धन्! त्रयच! शम्बर!। शतबाहो! हयग्रीव! नमुचे! पाक! इल्वल!॥"
पिबतीति। पा+"इगुपधज्ञाकिरीकः।" उणां ३। ४३। इति कन्।) पानकर्त्तरि त्रि॥

पाकक्षय:, पुं, (पाके क्षयं फले यस्य।) क्षय-फलपाक:। पानी आमला। इति शब्द-चन्द्रिका॥

पाकक्षयफल:, पुं, (पाके क्षयं फलं यस्य।) पाकक्षय:। इति शब्दमाला॥

पाकजं, क्ली, (पाकात् जायते इति। पाक+जन्+ड।) कांचलवणम्। परिणामशूलम्। इति राजनिर्घण्ट:॥ (पाकजाते त्रि। यथा, भाषापरिच्छेदे। ३६।
"सर्गस्तस्यास्तु विज्ञेयो ऋतुष्वाशीतपाकज:॥")

पाकपुटी, स्त्री, (पाकाय पुटी।) कुम्भशाला। इति हेमचन्द्र:।४।६६६॥ पोयान् इति भाषा॥

पाकफल:, पुं, (पाकक्षयं फलमस्य।) फलपाक:। इति शब्दचन्द्रिका॥ पानी आमला इति भाषा॥

पाकभाण्डं, क्ली, (पाकाय पाकस्य वा भाण्डम्।) पाकपात्रम्। यथा,—
"यस्य यस्य तु वर्णस्य यद्यत् स्यात्
पञ्चमन्तद:।
स तत्र गृहशुद्धिञ्च वस्त्रशुद्धिं करोत्यपि॥
पञ्चमन्तद: अग्नौचान्तादि। गृहशुद्धिं प्राक्तनपाकभाण्डत्यागोल्लेपनादिना।" इति शुद्धि-तत्त्वम्॥

पाकमत्स्य:, पुं, (पाक: पाकयुक्तो मत्स्यो यत्र।) मत्स्यभक्षणम्। तत्पर्य्याय:। मत्स्यलम् २। इति शब्दचन्द्रिका॥ (यदुवंशजातमत्स्य-विशेष:। यथा, सुश्रुते सूत्रस्थाने। ४६ अध्याये। "तिमितिमिङ्गिलकुलिशपाकमत्स्य-निरालकनन्दिवारलकमकरगर्गरकचन्द्रकमहा-मीनराजीवप्रभृतय: सानुप्रा:॥" कीटविशेष:। यथा, सुश्रुते कल्पस्थाने ८ अध्याये।
"पञ्चकीटो दुन्दुभिको मकर: शतपादक:।
पञ्चानक: पाकमत्स्य: कल्पतुण्डोऽथ नर्हभी॥")

पाकयज्ञ:, पुं, (पाकसाध्यो यज्ञ:। शाकपार्थिव-वत् समास:।) त्रयोत्सर्गगृहप्रतिष्ठादीनां होम:। चरुहोमाङ्गकर्म्म। यथा,—
"प्रायश्चित्ते विवाहे च पाकयज्ञे तु साहस:॥"
इति तिथितत्त्वम्॥
(ब्रह्मयज्ञादन्ये पञ्चमहायज्ञान्तर्गता वैश्वदेव-होमबलिकर्म्मनित्यश्राद्धातिथिभोजनात्मका-श्चत्वार: पाकयज्ञा:। यथा, मनु:। २। ८६।
"ये पाकयज्ञाश्चत्वारो विधियज्ञसमन्विता:।
सर्व्वे ते जपयज्ञस्य कलां नार्हन्ति षोड़शीम्॥"
अष्टकादयोऽपि पाकयज्ञा:। यथा, तत्रैव। २। १४६।

"अथाग्नेयं पाकयज्ञानग्निष्टोमादिकान् मखान्। य: करोति हुतो यस्य स तस्यर्त्विगिहोच्यते॥"
"अष्टकादीन् पाकयज्ञान्।" इति तट्टीकायां कुल्लुकभट्ट:॥)

पाकयज्ञिक:, पुं, (पाकयज्ञं करोतीति। पाकयज्ञ+ठक्।) पाकयज्ञकर्त्ता। (पाकयज्ञस्य याख्यान-स्तत्र भवो वा। "क्रतुयज्ञेभ्यश्च।" ४। ३। ६८। इति ठक्। पाकयज्ञयाख्यानग्रन्थ:। पाकयज्ञभवश्च। इति याकरणम्॥)

पाकरञ्जनं, क्ली, (पाकं पच्यमानं रञ्जयतीति। रञ्ज+णिच्+ल्यु:।) तेजपत्रम्। इति शब्द-चन्द्रिका॥

पाकलं, क्ली, (पाकं लातीति। ला+"आतो-ऽनुपसर्गे कः।"३। २। ३। इति कः।) कुष्ठौ-षधि:। इत्यमर:। २। ४। १२६॥

पाकल:, पुं, (पाक+ला+कः।) कुक्कुरज्वर:। इति मेदिनी। ले, १०८॥ बोधनद्वयम्। अनिल:। अनल:। इति विश्व:॥ व्रणादि-कारिणि, त्रि॥

पाकलि:, स्त्री, (पाक+ला+इन्।) वृक्ष-विशेष:। इति रत्नमाला। रोहिणीति कैचित्॥

पाकली, स्त्री, (पाकलि+ङीष्।) कर्कटी। इति शब्दमाला॥

पाकशाला, स्त्री, (पाकस्य शाला गृहम्।) रन्धनगृहम्। तत्पर्य्याय:। रसवती २। इति जटाधर:॥ पाकस्थानम्३ महानसम् ४। इत्य-मर:। २। ६। २७॥ अग्निकोणे तस्या: कर्त्तव्यता। यथा,—
"प्राच्यां दिशि स्नानगृहमाग्नेय्यां पचनालयम्।
शयनं याम्यदिग्भागे नैर्ऋत्यां शस्त्रमन्दिरम्॥
प्रतीच्यां भोजनगृहं वायुभागे सभागृहम्।
भाण्डारसदनं सौम्ये ऐशान्यां देवतालयम्॥"
इति सुकूर्त्तचिन्तामणिटीकायां पीयूषधारायां कश्यपवचनम्॥

पाकशासन:, पुं, (शास्तीति। शास+ल्यु:। तत: पाकस्य तदाख्यया प्रसिद्धस्य असुरस्य शासन: शास्ता।) इन्द्र:। इत्यमर:। १।१।४४॥ तन्नाम-कारणं यथा, वामनपुराणे।
"पाकं जघान तीक्ष्णाग्रैर्मार्गणै: कङ्कवाससै:।
तत नाम विभुर्लेभे शासनत्वाच्छरैर्द्रुतै:।
पाकशासनतां शक्र: सर्व्वामरपतिर्विभु:॥"

पाकशासनि:, पुं, (पाकशासनस्यापत्यम्। "अत इञ्।" ४। १। ६५। इति इञ्।) इन्द्रपुत्र:। जयन्त:। इत्यमर:। १। १। ४६॥ (अर्জ্জुन:। यथा, महाभारते। १। १३७। ८।
"सौभद्रवीन्मेघगम्भीरस्वरेण वदतांवर:।
भ्राता भ्रातरमज्ञातं सावित्र: पाकशासनिम्॥")

पाकशुक्ला, स्त्री, (पाके परिणामे शुक्ला।) खड़ी। यथा, शब्दचन्द्रिकायाम्।
"पाकशुक्ला श्लिलाधातु: कटिनी कक्खटी खड़ी॥"

पाकस्थानं, क्ली, (पाकस्य स्थानम्।) महानसम्। इत्यमर:। २। ६। २७॥

पाकला, स्त्री, (पाक + अजादित्वात् टाप्।) बालिका। इति जटाधर:॥

पाकारि:, पुं, (पाकं ऋच्छतीति। ऋ गतौ+इन्।) श्वेतकाञ्चनम्। इति रत्नमाला॥

पाकिमं, क्ली, (पाकेन निर्वृत्तम्। पाक+भाव-प्रत्ययान्तादिमप्।) पक्वत्वम्। पाकेन निष्प-न्नम्। इति चिकाण्डशेष:॥ (यथा, सुश्रुते। सूत्रस्थाने। ४६ अध्याये।
"मेदोन्न: पाकिम: क्षारो व्रणवस्तिविशोधन:॥")

पाकुक:, पुं, (पचतीति। पच पाके+"पचि-नश्योर्गुकन्कनुमौ च।" उणां। २। ३०। इति गुकन् कादेशश्च।) सूपकार:। इत्यु-णादिकोष:॥

पाक्यं, क्ली, (पच्यतेऽनेन। पच्+"ऋहलोर्ण्यत्।" ३।१।१२४। इति ण्यत्। "चजो: कुघिण्यतो:।" ७।३।५२। इति कुत्वम्।) विड्लवणम्। इत्यमर:। २। ६। ४२॥ पांशुलवणम्। इति रत्नमाला॥ (यथा, सुश्रुते।१।४२।
"शैलवसौवर्चलविड्पाक्यरोमकसामुद्रकयवक्षार-यवक्षारोषग्रस्तसुवर्चिकाप्रभृतीनि समासेन लवणो वर्ग:॥" पचनीये, त्रि। यथा, चक्रपाणि-संग्रहे ज्वराधिकारे पित्तज्वरचिकित्सायाम्।
"अवश्यायस्थितं पाक्यमेतत् पित्तज्वरापहम्॥")

पाक्य:, पुं, (पच्+ण्यत् कुत्वञ्च।) यवक्षार:। इत्यमर:। २। ६। १०६॥

पाक्षायण:, त्रि, (पक्षस्यायं पक्षे भव: पक्षेण निर्वृत्त इति वा। पक्ष+"वुञ्छण्कठजिति:" ४। २। ८०। इति फक्।) पक्षसम्बन्धी। पक्षे भव:। इति सिद्धान्तकौमुदी॥

पाक्षिक:, त्रि, (पक्षे तिष्ठतीति। पक्ष+ठक्।) पक्षपाती। यथा,— [पाक्षिक:॥"
"स को राजा न शास्ता य: प्रजावध्यश्च
इति ब्रह्मवैवर्त्ते गणपतिखण्डे १४ अध्याय:॥
पक्षिणो हन्तीति। "पक्षिमत्स्यमृगान् हन्ति।" ५। ४। ३५। इति ठक्।) पक्षिघातक:॥
(पक्षे पक्षान्तरे भवतीति। पक्षकालभव:॥ पक्षेण निर्वृत्त इति। पक्ष+ठञ्। पक्षसाध्य:। इति व्युत्पत्तिलब्धोऽर्थ:॥)

पाखण्ड:, पुं, (पातीति। पा+क्विप्। पाक्षयी-धर्म्मस्तं खण्डयतीति। खडि भेदने+अच्। षत्वञ्च। यदुक्तम्।
"पालनाच्च त्रयीधर्म्म: पाशब्देन निगद्यते।
तं खण्डयन्ति ते यस्मात् पाखण्डास्तेन हेतुना।
नानाव्रतधरा नानावेशा: पाखण्डिनो मता:॥")
पाषण्ड:। इत्यमरटीकायां भानुदीक्षित:॥

पागल:, पुं, (पा रक्षणं तस्मात् गलति आत्म-रक्षणात् च्युतो भवतीति। गल्+अच्।) उन्मत्त:। बातुल:। यथा,—
"पागलायाङ्गहीनाय चान्धाय बधिराय च।
जड़ाय चैव मूर्खाय क्लीवतुल्याय पापिने।
ब्रह्महत्यां लभेत् सोऽपि य: स्वकन्यां ददाति च॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे १४ अध्याय:॥

पाचकं, क्ली, (पचतीति। पच्+ण्वुल्। पित्त-रसेन भुक्तद्रव्यपचनादस्य तथात्वम्।) पित्त-विशेषः। यथा,—
"पाचकं भ्राजकञ्चैव रञ्जकालोचके तथा।
साधकञ्चैव षष्ठेति पित्तनामान्यनुक्रमात्॥"
इति शब्दचन्द्रिका॥
पाचकादीनां स्थानान्याह।
"अग्न्याशये यकृत्प्लीह्नोर्हृदये लोचनद्वये।
त्वचि सर्व्वशरीरेषु पित्तं निवसति क्रमात्॥"
अथ तेषां कर्म्माण्याह।
"पाचकं पचते भुक्तं शेषाग्निबलवर्द्धनम्।
रसमूत्रपुरीषाणि विरेचयति नित्यशः॥"
इति भावप्रकाशः॥
("पित्तं पञ्चात्मकं तत्र पक्वामाशयमध्यगम्।
पञ्चभूतात्मकत्वेऽपि यत्तेजसगुणोदयात्॥
व्यक्तद्रवत्वं पाकादिकर्म्मणानलशब्दितम्।
पचत्यन्नं विभजते सारकिट्टौ पृथक् तथा॥
तत्रस्थमेव पित्तानां शेषाणामप्यनुग्रहम्।
करोति बलदानेन पाचकं नाम तत् स्मृतम्॥"
इति वाभटे सूत्रस्थाने द्वादशाध्याये॥)
पाचकः, पुं, (पचतीति। पच्+ण्वुल्।) अग्निः।
इति हलायुधः॥ ("तत्राहारहेतुकेन विशेषेण पक्वामाशयमध्यस्थं पित्तं चतुर्व्विधमन्नपानं पचति विरेचयति च रसदोषमूत्रपुरीषाणि तत्रस्थमेव चात्मशक्त्या शेषाणां पित्तस्थानानां शरीरस्य चाग्नेयकर्म्मणानुग्रहं करोति तस्मिन् पित्ते पाचकोऽग्निरिति संज्ञा।" इति सुश्रुते सूत्रस्थाने एकविंशेऽध्याये॥) त्रि, रूपकारः। पाककर्त्ता। यथा,—
"पुत्रपौत्रगुणोपेतः शास्त्रज्ञो मिष्टपाचकः।
शूरश्च कठिनश्चैव सूपकारः स उच्यते॥"
इति चाणक्यम्॥
अन्नादिपाककारकौषधादिच्च॥
पाचनं, क्ली, (पाच्यतेऽनेनेति। पच्+णिच्+करणे ल्युट्।) प्रायश्चित्तम्। इति मेदिनी। ने, ६०॥ दोषपाचकक्काथौषधम्। तस्य दान-कालः। यथा, सारकौमुद्याम्।
"ज्वरितं षड्हेऽतीते लघुन्नप्रतिभोजितम्।
समाहात् परतोऽस्वेदे सामे स्यात् पाचनं ज्वरे॥"
सर्व्वेषां पाचनद्रव्याणां परिमाणं यथा,—
"दशरत्तिकमाक्षेण गृहीत्वा तोलकद्वयम्।
दत्त्वाम्भः षोड़शगुणं ग्राह्यं पादावशेषितम्॥"
इति परिभाषा॥
अथ सर्व्वज्वरे पाचनम्।
"नागरं देवकाष्ठञ्च धान्याकं दृषतीद्वयम्।
दद्यात् पाचनकं पूर्व्वं ज्वरिताय ज्वरापहम्॥"
इति नागरादि॥ १॥
अथ वातिकज्वरे।
"बिल्वादिपञ्चमूलस्य क्वाथः स्याद्वातिकज्वरे॥"
इति बिल्वादिपञ्चमूली॥ २॥
"पाचनं पिप्पलीमूलगुडूची विश्वभोऽथवा॥"
इति पिप्पलीमूलादि॥ ३॥
"किराताब्दाब्दतोदीच्यदृषतीद्वयगोक्षुरैः।
सस्थिराकलसीबिल्वैः क्वाथो वातज्वरापहः॥"
इति किरातादि॥ ४॥
"राम्ना वृक्षादनी दारु सरलं सैलवालुकम्।
कषायः शर्करायौद्रयुक्तो वातज्वरापहः॥"
इति रास्नादि॥ ५॥
"बिल्वादिपञ्चमूली च गुडूच्यामलके तथा।
कुस्तुम्बुरुसमो ह्येष कषायो वातिके ज्वरे॥"
इति बिल्वादिपञ्चमूल्यादि॥ ६॥
"पिप्पलीशारिवाद्राक्षाशतपुष्पाहरेणुभिः।
कृतः कषायः सगुडो हन्याच्छसनजं ज्वरम्॥"
इति पिप्पल्यादि॥ ७॥
"गुडूची शारिवा द्राक्षा शतपुष्पा पुनर्नवा।
सगुडोऽयं कषायः स्याद्वातज्वरविनाशनः॥"
इति गुडूच्यादि॥ ८॥
"द्राक्षागुडूचीकाश्मर्य्यचायमाणाः सशारिवाः।
निःक्वाथ्य सगुडं क्वाथं पिबेद्वातज्वरापहम्॥"
इति द्राक्षादि॥ ९॥ *॥
अथ पैत्तिकज्वरे।
"कलिङ्गं कटफलं मुस्तं पाठातिक्तकरोहिणी।
पक्वं सशर्करं पीतं पाचनं पैत्तिके ज्वरे॥"
इति कलिङ्गादि॥ १०॥
"सक्षौद्रं पाचनं पैत्ते तिक्ताब्दैन्द्रयवैः शृतम्॥"
इति तिक्तादि॥ ११॥
"लोध्रोत्पलाब्दतापद्मशारिवाणां सशर्करः।
क्वाथः पित्तज्वरं हन्यादथवा पर्पटोद्भवः॥"
इति लोध्रादि॥ १२॥ १३॥
"पटोलयवनिःक्वाथो मधुना मधुरीकृतः।
तीव्रपित्तज्वरामर्द्दी पानात्तृड्दाहनाशनः॥"
इति पटोलम्॥ १४॥
"दुरालभापर्पटकप्रियङ्गु-
भूनिम्बवासाकटुरोहिणीनाम्।
जलं पिबेच्छर्करयावगाढं
तृष्णासपित्तज्वरदाहयुक्तः॥"
इति दुरालभादि॥१५॥
"त्रायमाणा च मधुकं पिप्पलीमूलमेव च।
किराततिक्तकं मुस्तं मधुकं सविभीतकम्॥
सशर्करं पीतमेतत् पित्तज्वरनिबर्हणम्॥"
इति त्रायमाणादि॥ १६॥
"नन्दीका मधुकं निम्बं कटुकारोहिणीसमाः।
चतुश्चायस्थितं पाक्यमेतत् पित्तज्वरापहम्॥"
इति नन्दीकादि॥ १७॥
"एकः पर्पटकः श्रेष्ठः पित्तज्वरविनाशनः।
किं पुनर्यदि युज्येत चन्दनोदीच्यनागरैः॥"
इति पर्पटकादि॥ १८॥
"विश्वाम्बुपर्पटोशीरवनचन्दनसाधितम्।
दद्यात् सुशीतलं वारि वट्कृद्दिग्वरदाहजित्॥"
इति विश्वादि॥ १९॥
"पर्पटाम्बुतधान्यौषां क्वाथः पित्तज्वरं जयेत्॥"
इति पर्पटादि॥ २०॥
"द्राक्षारसमधूच्चापि॥ २१॥ काश्मर्य्यस्यापवा पुनः॥ २२॥

द्राक्षाभयापर्पटकाब्दतिक्ता-
क्वाथं ससंपाकफलं विदध्यात्।
प्रलापमूर्च्छाभ्रमदाहशोष-
तृष्णान्विते पित्तभवे ज्वरे तु॥"
इति द्राक्षादि॥ २३॥
"युषितं धान्याकजलं प्रातः पीतं सशर्करं पुंसाम्।
अन्तर्दाहं भ्रमयत्यचिराद्दूरप्ररूढ़मपि॥"२४॥
अथ कफज्वरे।
"मातुलुङ्गशिफाविश्वब्रह्मीग्रन्थिकसंयुतम्।
कफज्वरेऽम्बु सक्षारं पाचनं वा कणादिकम्॥'
इति मातुलुङ्गादि॥ २५॥
"कटुकं चित्रकं निम्बं हरिद्रेतिविषे वचाम्।
कुष्ठमिन्द्रयवं मुस्तं पटोलञ्चापि साधितम्॥
पिबेन्मरिचसंयुक्तं सक्षौद्रं श्लैष्मिके ज्वरे॥"
इति कटुकादि॥ २६॥
"निम्बविश्वाब्दतादारुशटीभूनिम्बपौष्करम्।
पिप्पल्यौ वृहती चेति क्वाथो हन्ति कफज्वरम्॥"
इति निम्बादि॥ २७॥
"सिन्धुवारदलक्वाथं श्लोषणं कफजे ज्वरे।
जङ्घयोश्च वले क्षौमे कर्णे वा पिहिते पिबेत्॥"
इति सिन्धुवारादि॥ २८॥
"आमलक्यभया कृष्णा चित्रकश्चेत्ययं गणः।
सर्व्वज्वरकफातङ्कभेदी दीपनपाचनः॥"
इति आमलक्यादि॥ २९॥
"त्रिफलापटोलवासाच्छिन्नरुहातिक्तरोहिणी-
षड्ग्रन्थाः॥"
इति त्रिफलादि॥ ३०॥
"मधुनाश्लेष्मसंसृत्यै दशमूली वासकस्य वा
क्वाथः॥"३१॥
"मुस्तं वत्सकबीजानि त्रिफला कटुरोहिणी।
परूषकाणि च क्वाथः कफज्वरविनाशनः॥"
इति मुस्तादि॥ ३२॥ *॥
अथ वातपैत्तिकज्वरे।
"संसृष्टदोषेषु हितं संसृष्टमथ पाचनम्॥
विश्वाब्दताब्दभूनिम्बैः पञ्चमूलीसमन्वितैः।
कृतः कषायो हन्त्याशु वातपित्तोद्भवं ज्वरम्॥"
इति नवाङ्गम्॥ ३३॥
"त्रिफलाशाल्मलीरास्नाराजवृक्षाट-रूषकैः।
शृतमम्बु हरेत्तूर्णं वातपित्तोद्भवं ज्वरम्॥"
इति त्रिफलादि॥ ३४॥
"किराततिक्तकं मुस्तं द्राक्षामामलकीं शटीम्।
निष्क्वाथ्य पित्तानिलजे क्षौद्रं सगुड़ं पिबेत्॥"
इति किराततिक्तकादि॥ ३५॥
"निदिग्धिकावलारास्नाक्वाथमाब्दतायुतैः।
मक्षरविदलैः क्वाथो वातपित्तज्वरं जयेत्॥"
इति निदिग्धिकादि॥ ३६॥
"गुडूची पर्पटं मुस्तं किरातं विश्वभेषजम्।
वातपित्तज्वरे देयं पञ्चभद्रमिदं शुभम्॥"
इति पञ्चभद्रम्॥ ३७॥
"मधुकं शारिवे द्राक्षा मधूकं चन्दनोत्पलम्।
काश्मरी पद्मकं लोध्रं त्रिफलां पद्मकेशरम्॥
परूषकं वृषालञ्च न्यसेदुत्तमवारिणि।

पाचन

मधुलाजसितायुक्तं तत् पीतं श्वयितं निशि ॥
वातपित्तज्वरदाहं छर्व्यास्यक्लांतमिश्रमान् ।
शमयेदरुक्पित्तघ्नं वीक्षतानिव मारुतः ॥"

इति मधुकादि ॥ ३८ ॥ * ॥

अथ पित्तश्लैष्मिकज्वरे ।

"पटोलं चन्दनं मुस्तं तिक्तापाटान्वितागणः ।
पित्तश्लेष्मानिलच्छर्दिज्वरकण्ठविषापहः ॥"

इति पटोलादि ॥ ३९ ॥

"गुडूचीनिम्बधन्याकं पद्मकं रक्तचन्दनम् ।
एष सर्वज्वरान् हन्ति गुडूच्यादिस्तु दीपनः ॥
कृच्छ्रासारोचकच्छर्दिपिपासादाहनाशनः ॥"

इति गुडूच्यादि ॥ ४० ॥

"किरातं नागरं मुस्तं गुडूचीञ्च कणाधिके ।
पाटोदीच्यान्वितैस्तु सह पित्ताधिके पिबेत् ॥"

इति चातुर्भद्रकपाटासप्तकौ ॥ ४१ ॥ ४२ ॥

"गुडूची चन्दनं पद्मं नागरेन्द्रयवासकम् ।
अभयारग्वधोशीरं पाटा धान्याब्दरोहिणी ॥
कषायं पाययेदेतत् पिप्पलीचूर्णसंयुतम् ।
पित्तश्लेष्महरं तन्द्रापिपासादाहनाशनम् ॥
विशूचिकानिलविषमविदोषप्रभवस्य च ।
गुडूच्यादिगणो ह्येष पाचनो दीपनः परः ॥"

इति गुडूच्यादिगणः ॥ ४३ ॥

"कण्टकार्य्यब्दताभार्गी नागरेन्द्रयवासकम् ।
भूनिम्बं चन्दनं मुस्तं पटोलं कटुरोहिणी ॥
कषायं पाययेदेतत् पित्तश्लेष्मज्वरापहम् ।
दाहतृष्णारुचिच्छर्दिकासकृत्पार्श्वशूलनुत् ॥"

इति कण्टकार्य्यादि ॥ ४४ ॥

"सपत्रपुष्पवासाया रसः क्षौद्रसितायुतः ।
कफपित्तज्वरं हन्ति सामपित्तं सकामलम् ॥"

इति वासादि ॥ ४५ ॥

"पटोलं त्रिफलमर्दश्च त्रिफला मधुकं बला ।
साधितोऽयं कषायः स्यात् पित्तश्लेष्मभवे ज्वरे ॥"

इति पटोलादि ॥ ४६ ॥

"गुडूचीन्द्रयवारिष्टं पटोलं कटुरोहिणी ।
नागरं चन्दनं मुस्तं पिप्पलीचूर्णसंयुतम् ॥
अष्टनाएक इत्येष पित्तश्लेष्मज्वरापहः ।
कृच्छ्रासारोचकच्छर्दितृष्णादाहनिवारणः ॥"

इति अष्टनाएकम् ॥ ४७ ॥

"पटोलयवधान्याकमुद्गामलकचन्दनम् ।"
पैत्तिके श्लेष्मपित्तोत्थे ज्वरस्तृच्छर्दिदाहनुत् ॥"

इति पटोलादि ॥ ४८ ॥

चुद्राब्दनाम्यां सह नागरेण
सपुष्करैर्वेति किराततिक्तम् ।
पिबेत् कषायं त्रिफ पञ्चतिक्तं
ज्वरं निहन्त्यष्टविधं समग्रम् ॥"

इति चुद्रादि ॥ ४९ ॥

इति पित्तश्लैष्मिकज्वराधिकारः ॥ * ॥

अथ वातश्लैष्मिकज्वरे ।

"दीपनं कफपित्तघ्नं वातपित्तानुलोमनम् ।
ज्वरघ्नं पाचनं भेदि ह्रस्वं धान्यपटोलयोः ॥"

इति धान्यपटोलम् ॥ ५० ॥

"मुस्तनागरभूनिम्बं चतुर्भेदत्रिकाधिकम् ।

पाचनं

कफवातप्रशमनं पाचनं ज्वरनाशनम् ॥"५१ ॥
पिप्पली पिप्पलीमूलं चव्यं चित्रकनागरम् ।
दीपनीयः श्रुतो वर्गः कफानिलगदापहः ॥"

इति पञ्चकोलम् ॥ ५२ ॥

"पिप्पलीभिः श्रृतं तोयमनभिष्यन्दि दीपनम् ।
वातश्लेष्मविकारघ्नं श्लीहज्वरविनाशनम् ॥"

इति पिप्पलीक्वाथः ॥ ५३ ॥

"आरग्वधग्रन्थिकमुस्तत्रिफा-
हरीतकीभिः क्वथितः कषायः ।
सामे सशूले कफवातयुक्ते
ज्वरे हितो दीपनपाचनश्च ॥"

इति आरग्वधादि ॥ ५४ ॥

"क्षुद्राब्दतानागरपुष्कराह्वयैः
कृतः कषायः कफमारुतोत्तरे ।
सश्वासकासारुचिपार्श्वरुक्करे
ज्वरे त्रिदोषप्रभवे च शस्यते ॥"

इति क्षुद्रादि ॥ ५५ ॥

"दशमूलीरसः पेयः कणायुक्तः कफानिले ।
अविपाकेऽतितन्द्रायां पार्श्वरुक्श्वासकासके ॥"

इति दशमूलम् ॥ ५६ ॥

"मुस्तं पर्पटकं शुण्ठी गुडूची सदुरालभा ।
कफवातरुचिच्छर्दिदाहश्वासज्वरापहा ॥"

इति मुस्तादि ॥ ५७ ॥

"दारुपर्पटभार्ग्यब्दवचाधान्याककट्फलैः ।
सामयाविषपूतीकैः क्वाथो हिङ्गुमधूत्कटः ॥
कफवातज्वरं पीनो हिक्काश्वासगलग्रहान् ।
कासशोषप्रसेकांश्च हन्यात् तरुमिवाग्निः ॥"

इति दार्व्वादि ॥ ५८ ॥ * ॥

अथ त्रिदोषज्वरे ।

"पञ्चमूलीकिरातादिर्गणो योज्यस्त्रिदोषजे ।
पित्तोत्कटे च मधुना कणया च कफोत्कटे ॥"

इति चतुर्भद्रपञ्चमूलम् ॥ ५९ ॥

"बिल्वश्योणाकगाम्भारीपाटलागणिकारिकाः ।
दीपनं कफवातघ्नं पञ्चमूलमिदं महत् ॥"

इति बृहत्पञ्चमूली ॥ ६० ॥

"शालपर्णीं पृश्निपर्णीं बृहतीद्वयगोक्षुरम् ।
वातपित्तज्वरहरं कनीयः पञ्चमूलकम् ॥"

इति स्वल्पपञ्चमूली ॥ ६१ ॥

"उभयं दशमूलञ्च सन्निपातज्वरापहम् ।
कासे श्वासे च तन्द्रायां पार्श्वशूले च शस्यते ।
पिप्पलीचूर्णसंयुक्तं कण्ठहृद्ग्रहनाशनम् ॥"

इति दशमूलम् ॥ ६२ ॥

"चिरज्वरे वातकफोल्बणे वा
त्रिदोषजे वा दशमूलसंज्ञः ।
किराततिक्तादिगणः प्रयोज्यः
शुद्धार्द्रिने वा त्रिफला विमिश्रः ॥"

इति चतुर्दशाङ्गम् ॥ ६३ ॥

"दशमूलं शुण्ठी शृङ्गी पौष्करं सदुरालभम् ।
भार्गीं कुटजबीजञ्च पटोलं कटुरोहिणी ॥
अष्टादशाङ्ग इत्येष सन्निपातज्वरापहः ।
कासकृच्छ्रास्रपार्श्वार्तिश्वासहिक्काबलाहरः ॥"

इति वातश्लेष्महरोऽष्टादशाङ्गः ॥ ६४ ॥

पाचनं

"भूनिम्बादशमूलमहौषधाब्द-
तिक्तेन्द्रवीवधनिकैर्भकणाकषायः ।
तन्द्रीप्रलापकसनारुचिदाहमोह-
श्वासादियुक्तमखिलं ज्वरमाशु हन्ति ॥"

इति अष्टादशाङ्गम् ॥ ६५ ॥

मस्तपर्पटकोशीरदेवदारुमहौषधम् ।
त्रिफला धन्वयासञ्च नीली कम्पिल्लकं त्रिवृत् ॥
किरातातिक्तकं पाटा बला कटुकरोहिणी ।
मधुकं पिप्पलीमूलं मुस्ताद्यो गण उच्यते ॥
अष्टादशाङ्गमुदितमेतद्धा सन्निपातनुत् ।
पित्तोत्तरे सन्निपाते हितश्चोक्तं मनीषिभिः ॥
शस्यालम्ब उरोवात उरःपार्श्वशिरोग्रहे ॥
६६ ॥

क्षुद्राब्दता शुण्ठी शृङ्गी मुस्तकं रक्तचन्दनम् ।
नागरं कटुकं पाटा भूनिम्बं सदुरालभम् ॥
उशीरं पद्मकं धान्यं बालकं कण्टकारिका ।
पुष्करं पित्तमर्दश्च दशाष्टाङ्गमिदं शुभम् ॥
जीर्णज्वरारुचिश्वासकासश्वयथुनाशनम् ॥"

इति अपराष्टादशाङ्गम् ॥ ६७ ॥

"शुण्ठी पुष्करमूलञ्च शाली शृङ्गी दुरालभा ।
गुडूची नागरं पाठा किरातं कटुरोहिणी ॥
एष शृङ्गादिको वर्गः सन्निपातज्वरापहः ।
कासकृच्छ्रव्यथापार्श्वार्तिश्वासे तन्द्राश्च शस्यते ॥"

इति शृङ्गादि ॥ ६८ ॥

"बृहत्यौ पुष्करं भार्गी शुण्ठी शृङ्गी दुरालभा ।
वत्सकस्य च बीजानि पटोलं कटुरोहिणी ॥
बृहत्यादिर्गणः प्रोक्तः सन्निपातज्वरापहः ।
कासादिषु च सर्व्वेषु हितः सोपद्रवेषु च ॥"

इति बृहत्यादिगणः ॥ ६९ ॥

"भार्गीं पुष्करमूलञ्च राज्ञाविल्वयमानिकाः ।
नागरं दशमूलञ्च पिप्पलीश्चाशु साधयेत् ॥
सन्निपातज्वरे देयं कृत्वार्श्वानाहशूलिनाम् ।
कासश्वासाग्निमान्द्यञ्च तन्द्राञ्च विनिवर्त्तयेत् ॥"

इति भार्ग्यादि ॥ ७० ॥

"द्विपञ्चमूली षड्ग्रन्था विश्वभ्रमनखीद्वयम् ।
कफवातहरः क्वाथः सन्निपातहरः परः ॥"

इति द्विपञ्चमूल्यादि ॥ ७१ ॥

"कारवीपुष्करैरण्डचायन्तीनागरास्रताः
दशमूलीशुण्ठीशृङ्गीयासभार्गीपुनर्नवाः ॥
तुल्या मूलेन निष्क्वाथ्य पीतश्चेतोविशोधनः ।
अभिन्यासं ज्वरं घोरमाशु हन्ति समुद्भवम् ॥"

इति दशमूलादि ॥ ७२ ॥

"मातुलुङ्गास्रभिद्विल्वयाव्रीपाटोरुबूकजः ।
क्वाथो लवणसंयुक्तोऽभिन्यासानाहशूलनुत् ॥"

इति मातुलुङ्गादि ॥ ७३ ॥

"कण्टरोधकफश्वासहिक्कासंन्यासपीडितः ।
मातुलुङ्गार्द्रकरसं दशमूलाम्भसा पिबेत् ॥"

इति मातुलुङ्गार्द्रकरसयुक्तदशमूलम् ॥ ७४ ॥

"योवाब्दत्रिफलातिक्तापटोलारिष्टवासकैः ।
भूनिम्बान्तयवैश्च त्रिदोषज्वरनुज् जलम् ॥"

इति योवादि ॥ ७५ ॥

"त्रिवृद्विशालात्रिफलाकटुकारग्वधैः कृतः ।

सत्तारो भेदनः क्वाथः पेयः सर्व्वज्वरापहः ॥"
इति पित्तज्वरादि ॥ ७६ ॥

अथ जीर्णज्वरे ।
"निदिग्धिकानागरकाम्बुतानां
क्वाथं पिबेन्मिश्रितपिप्पलीकम् ।
जीर्णज्वरारोचककासशूल
श्वासाग्निमान्द्यार्दितपीनसेषु ॥
हन्तूर्द्धगामयं प्रायः सायं तेनायमिष्यते ॥"
इति निदिग्धादि ॥ ७७ ॥
"पिप्पलीचूर्णसंयुक्तः क्वाथश्छिन्नरुहोद्भवः ।
जीर्णज्वरक्रफध्वंसी पञ्चमूलीकृतोऽथवा ॥
कासाजीर्णारुचिश्वासहृत् पाण्डुक्रिमिरोगनुत्
॥ ७८ ॥
इति जीर्णज्वराधिकारः ॥ * ॥

अथ सन्तताद्विज्वरे ·
"मधुकं चन्दनं मुस्तं धात्री धान्यमुशीरकम् ।
छिन्नोद्भवा पटोलश्च क्वाथं समधुशर्करम् ॥
ज्वरं पञ्चविधं हन्यात् सन्तताद्यं सुदारुणम् ।
वातिकं पैत्तिकञ्चैव श्लैष्मिकं सान्निपातिकम् ॥
त्र्यहं विपाचयत्यासु निरामं शमयत्यपि ॥"
इति मधुकाद्यम् ॥७९॥
"कलिङ्गकाः पटोलस्य पत्रं कटुकरोहिणी ॥८०॥
पटोलं शारिवामुस्तं पाठा कटुकरोहिणी ॥८१॥
निम्बं पटोलं त्रिफलां गुडूचीकां मुस्तवत्सकौ ॥
॥ ८२ ॥
किराततिक्तमन्तां चन्दनं विश्वभेषजम् ॥८३॥
गुडूच्यामलकं मुस्तम् ८४ अर्द्धश्लोकसमापनाः ।
कषायाः शमयन्त्याशु पञ्च पञ्चविधान् ज्वरान् ॥
सन्ततं सततान्येद्युस्तृतीयकचतुर्थकान् ।
गुडूचीमुस्तधात्रीणां कषायंवा समाक्षिकम् ॥
मुस्तामलकगुडूचीविश्वौषधकराटकारिकाक्वाथः।
पीतः सकणाचूर्णः समधुर्विषमज्वरं हन्ति ॥"
इति मुस्तादि ॥ ८५ ॥ * ॥

अथ तृतीयकज्वरे ।
"महौषधाम्बुतामुस्तचन्दनोशीरधान्यकैः ।
क्वाथस्तृतीयकं हन्ति शर्करामधुयोजितः ॥"
इति महौषधादि ॥ ८६ ॥

अथ चातुर्थिकज्वरे ।
"वासाधात्रीस्थिरादारुपथ्यानागरसाधितः ।
सितामधुयुतः क्वाथश्चातुर्थिकनिवारणः ॥"८७ ॥
इति ज्वराधिकारः ॥ * ॥

अथ ज्वरातीसारे ।
"पाठेन्द्रयवभूनिम्बमुस्तपर्पटकाम्बुताः ।
जयन्त्याममतीसारं सज्वरं समहौषधाः ॥"
इति पाठादि ॥ ८८ ॥
"नागरातिविषामुस्तभूनिम्बाम्बुतवत्सकैः ।
सर्व्वज्वरहरः क्वाथः सर्व्वातीसारनाशनः ॥"
इति नागरादि ॥ ८९ ॥
"श्रीवेरातिविषामुस्तविल्वधान्यकनागरैः ।
पिबेत् पिच्छाविबन्धघ्नं शूलदोषामपाचनम् ॥
सरक्तं श्लेष्मतीसारं सज्वरं वाथ विव्वरम् ॥"
इति श्रीवेरादि ॥ ९० ॥

"गुडूच्यतिविषाधान्यमुण्ठीबिल्वाब्दवालकैः ।
पाठाभूनिम्बकुटजचन्दनोशीरपद्मकैः ॥
कषायः शीतलः पेयो ज्वरातीसारशान्तये ।
हृल्लासारोचकच्छर्द्दितृषापासादाहनाशनः ॥"
इति हृल्लासादि ॥ ९१ ॥
"उशीरं वालकं मुस्तं धान्यकं विश्वभेषजम् ।
समङ्गा धातकी लोध्रं बिल्वं दीपनपाचनम् ॥
हन्त्यरोचकपिच्छामं विबन्धं सातिवेदनम् ।
सशोणितमतीसारं सज्वरं वाथ विव्वरम् ॥"
इति उशीरादि ॥ ९२ ॥
"पञ्चमूलीबलाबिल्वगुडूचीमुस्तनागरैः ।
पाठाभूनिम्बकीवेरकुटजत्वक्फलैः शृतम् ॥
हन्ति सर्व्वानतीसारान् ज्वरदोषं वमिं तथा ।
सशूलोपद्रवं श्वासं कासं हन्यात् सुदारुणम् ॥"
इति पञ्चमूल्यादि ॥ ९३ ॥
"कलिङ्गातिविषामुण्ठीकिरातास्त्रयवासकम् ।
ज्वरातिसारसन्तापं नाशयेदविकल्पतः ॥"
इति कलिङ्गादि ॥ ९४ ॥
"वत्सकस्य फलं दारु रोहिणी गजपिप्पली ॥"
इति वत्सकादि ॥ ९५ ॥
"श्वदंष्ट्रा पिप्पलीधान्यं बिल्वं पाठायमानिका॥"
इति श्वदंष्ट्रादि ॥ ९६ ॥
"द्वावपेतौ सिद्धियोगौ श्लोकार्द्धेनाभिधास्यितौ ।
ज्वरातीसारशमनौ विशेषाद्दाहनाशनौ ॥
नागराम्बुतभूनिम्बविल्ववालकवत्सकैः ।
समुस्तातिविषोशीरैर्ज्वरातीसारनुच्चलम् ॥"
इति नागरादि ॥ ९७ ॥
"मुस्तकबिल्वातिविषापाठाभूनिम्ब-
वत्सकैः क्वाथः ।
मकरन्दगर्भयुतो ज्वरातिसारौ जयेद्घोरौ ॥"
इति मुस्तकादि ॥ ९८ ॥
"भृङ्गजलपाठातिविषापथ्योत्पलधान्य-
रोहिणीबिल्वैः ।
सेन्द्रयवैः शृतममः सातीसारं ज्वरं जयति ॥"
इति घनादि ॥ ९९ ॥
"दशमूलीकषायेण बिल्वमज्जसमं पिबेत् ।
ज्वरे चैवातिसारे च सशोथे ग्रहणीगदे ॥"
इति दशमूलसुण्ठी ॥ १०० ॥
"किराताम्बुतताबिल्वचन्दनोदीच्यवत्सकैः ।
शोथातीसारशमनं विशेषात् ज्वरनाशनम् ॥"
इति किरातादि ॥ १०१ ॥
इति ज्वरातीसाराधिकारः ॥ * ॥

अथातीसारे ।
"धान्यकं नागरं मुस्तं वालकं बिल्वमेव च ।
आमशूलविबन्धघ्नं पाचनं वह्निदीपनम् ॥"
इति धान्यपञ्चकम् ॥ १०२ ॥
"इदं धान्यचतुष्कं स्यात् पेचे सुण्ठीं विना पुनः ॥"
इति धान्यचतुष्कम् ॥ १०३ ॥
"कच्चटदाडिमजम्बुमज्जाटकपत्रबिल्वश्रीवेरम् ।
जलधरनागरसहितं गङ्गामपि वेगिनीं रुन्ध्यात्॥
इति कच्चटादि ॥ १०४ ॥
"किराततिक्तकं मुस्तं वत्सकं चरसाञ्जनम् ।
पिबेत् पित्तातिसारघ्नं सक्षौद्रं वेदनापहम् ॥"
इति किराततिक्तकादि ॥ १०५ ॥
"कुटजत्वक्फलं मुस्तं क्वाथयित्वा जलं पिबेत् ।
अतीसारं जयेदाशु शर्करामधुयोजितम् ॥"
इति कुटजादि ॥ १०६ ॥
"बिल्वचूताम्बिनार्यूहः पीतः सक्षौद्रशर्करः ।
निहन्याच्छर्द्दितीसारं वैश्वानर इवाहुतिम् ॥"
इति बिल्वादिक्वाथः ॥ १०७ ॥
"पटोलयवधान्याकक्वाथः पेयः सुशीतलः ।
शर्करामधुसंमिश्रश्छर्द्दितीसारनाशनः ॥"
इति पटोलादिक्वाथः ॥ १०८ ॥
"कुटजं दाडिमं मुस्तं धातकी बिल्ववालकम् ।
लोध्रचन्दनपाठाश्च कषायं मधुना पिबेत् ॥
सामे सशूले रक्ते च पिच्छास्रावे च शस्यते ।
कुटजादिरिति ख्यातः सर्व्वातीसारनाशनः ॥"
इति कुटजादि ॥ १०९ ॥
"समङ्गातिविषा मुस्तं बिल्वं श्रीवेरधातकी ।
कुटजत्वक् फलं बिल्वं क्वाथः सर्व्वातिसारजुत्॥"
इति समङ्गादि ॥ ११० ॥
"कुटजत्वक्कृतक्वाथो घनीभूतः सुशोभनः ।
लोहितोऽतिविषायुक्तः सर्व्वातीसारनाशनः ॥"
इति कुटजक्वाथः ॥ १११ ॥
"सवत्सकः सातिविषः सबिल्वः
सौदीच्यमुस्तैश्च कृतः कषायः ।
सामे सशूले सह शोणिते च
चिरप्रवृत्तेऽपि हितोऽतिसारे ॥"
इति वत्सकादि ॥ ११२ ॥
"कषायो मधुना पीतस्त्वचो दाडिमवत्सकात् ।
सद्यो जयेदतीसारं सरक्तं दुर्निवारणम् ॥"
इति कुटजदाडिमम् ॥ ११३ ॥ * ॥

अथ ग्रहण्याम् ।
"ग्रहणीमाश्रितं दोषमतीसारवदाचरेत् ।
अतीसारोक्तविधिना तस्यामञ्च विपाचयेत् ॥
नागरातिविषामुस्तक्वाथः स्यादामपाचनः ॥"
इति नागरादि ॥ ११४ ॥ * ॥

अथाग्निमान्द्ये ।
"बिल्वाभयागुडूचीनां कषायेण षडूषणम् ।
पिबेत् श्लैष्मिके मन्देऽग्नौ त्वक्पत्रसुरभीकृतम् ॥
पञ्चकोलं समरिचं षडूषणमुदाहृतम् ॥"
इति षडूषणबिल्वादि ॥ ११५ ॥ * ॥

अथामाजीर्णे ।
"धान्यनागरसंसिद्धं तोयं दद्याद्विचक्षणः ।
आमाजीर्णप्रशमनं दीपनं वह्निशोधनम् ॥"
इति धान्यसुण्ठी ॥ ११६ ॥ * ॥

अथ पाण्डुरोगे ।
"फलत्रिकाम्बुतावासातिक्ताभूनिम्बनिम्बजः ।
क्वाथः क्षौद्रयुतो हन्यात् पाण्डुरोगं सकामलम्॥"
इति फलत्रिकादि ॥ ११७ ॥ * ॥

अथ रक्तपित्ते ।
"जलं खर्ज्जूरमृद्वीकामधुकैः सपरूषकैः ।
शृतशीतं प्रयोक्तव्यं तर्पणार्थं सशर्करम् ॥'
इति खर्ज्जूरादिजलम् ॥ ११८ ॥ * ॥

अथ राजयक्ष्मणि ।
"पुनर्नवाभिषुण्ठीशुण्ठीबलाकषायं पिबेत् ।
पार्श्वशूलज्वरश्वासपीनसादिनिवृत्तये ॥"
इति पुनर्नवादि ॥ ११८ ॥
"अश्वगन्धाबलाभीरुदशमूलीबलाक्वथाः ।
पुष्करादिपिप्पलीक्षीरं क्षीरसर्पिषः ॥"
इति अश्वगन्धादि ॥ १२० ॥
दशमूलबलारास्नापुष्करसुरदारुनागरैः क्वथितम् ।
पेयं पार्श्वशिरोरुक्तकासादिशान्तये
सलिलम् ॥"
इति दशमूलादि ॥ १२१ ॥
इति राजयक्ष्माधिकारः ॥ * ॥
अथ कासे ।
"पञ्चमूलीकृतः क्वाथः पिप्पलीचूर्णसंयुतः ।
रसाग्रमग्नो निर्लं वातकासमुदस्यति ॥"
इति पिप्पलीचूर्णयुक्तपञ्चमूली ॥ १२२ ॥
"पौष्करं कटुकं भार्गी पिप्पलीबिल्वसाधितम् ।
पिबेत् क्वाथं कफोद्रेके कासे श्वासे च दुर्जये ॥"
इति पौष्करादि ॥ १२३ ॥
"पिप्पलीचूर्णसंयुक्तं दशमूलीजलं पिबेत् ॥"
इति पिप्पलीचूर्णयुक्तदशमूली ॥ १२४ ॥
"कटुकं कचूरं भार्गी सुरसं धान्यं वचाभया ।
मुद्गो पर्पटकं मुस्ता सुराजश्च जले हुतम् ॥
मधुशिग्रुयुतं पेयं कासे वातकफात्मके ।
स्वरभेदे सुखे शूले श्वासहिक्काज्वरेषु च ॥"
इति कटुकादि ॥ १२५ ॥
"कण्टकारीकृतः क्वाथः सक्षयः सर्वकासहा ॥"
इति कण्टकारीक्वाथः ॥ १२६ ॥
इति कासाधिकारः ॥ * ॥
अथ हिक्कायाम् ।
"अश्वत्थनागरक्षारयवशृङ्गीसमन्वितक्वाथः ।
पीतः सकणचूर्णः कासश्वासौ जयत्याशु ॥"
इति अश्वत्थादि ॥ १२७ ॥
"दशमूलीकषायस्तु पुष्करेणावचूर्णितः ।
कासश्वासप्रशमनः पार्श्वरुक्शूलनाशनः ॥"
इति दुरालभापुष्करयुक्तदशमूली ॥ १२८ ॥
'कुलत्थनागरक्षारयवाम्लैः क्वथितं जलम् ।
पीतं पुष्करसंयुक्तं हिक्काश्वासनिवारणम् ॥"
इति कुलत्थादि ॥ १२९ ॥
"शृङ्गीसदौषधकणापौष्करान्तं
चूर्णं शटीसरिषपूर्वरया विमिश्रम् ।
क्षौद्रेण पीतमसतात्मपरम्परया
श्वासं जयेच्च विनिहन्त्यतिदोषमुग्रम् ॥"
इति शृङ्ग्यादि ॥ १३० ॥
इति हिक्काश्वासाधिकारः ॥ * ॥
अथ ज्वरे ।
"क्वाथो भद्रदारुसुरासमधुपूर्वैः ।
ज्वरकासश्वासहरं वैश्वानर इवाहुतिम् ॥"
इति भद्रदारुक्वाथः ॥ १३१ ॥
"पाठौषधिकाभिरिष्टाभिः क्वथितं पिबेत् ।
पीनसं सिरोरुजं दुर्दिनं विषमज्वरम्माम् ॥"
इति पाठादि ॥ १३२ ॥
"क्वाथः पर्पटजः पीतः सक्षौद्रश्छर्दिनाशनः ॥"
इति पर्पटक्वाथः ॥ १३३ ॥
"क्वथं गुडूच्या विधिवत् क्वाथं क्षिप्तसंचितम् ।
निरन्नमपि भवेत् पथ्यं मात्रिकेण समायुतम् ॥
त्रयादोषोपितात्तोये प्रतप्ते निशि संस्थितात् ।
कषायो योऽभिनिर्याति स पीतः सगुडाद्भुतः ॥"
इति गुडूचीपीतकषायः ॥ १३४ ॥
"श्रीफलस्य गुडूच्या वा कषायो मधुसंयुतः ।
पेयश्छर्दिचये पीतो दूर्वा वा तण्डुलाम्बुना ॥"
इति बिल्वमूलगुडूचीकषायौ ॥ १३५ ॥
"जम्ब्वाम्रपल्लवग्रन्थिकवान्यसेव्य-
क्षौद्रैरपि पिबतो मधुनाल्पमल्पम् ।
छर्दिः प्रयाति शमनं बिसतन्तियुक्ता
लीढ्वा निहन्ति मधुनाथ दुरालभा वा ॥"
इति जम्ब्वादिवारि ॥ १३६ ॥
इति छर्द्यधिकारः ॥ * ॥
अथ मूर्च्छायाम् ।
"महौषधाम्लताचौद्रं पौष्करं ग्रन्थिकोद्भवम् ।
पिबेत् कषायुतं क्वाथं मूर्च्छा वेषु गदेषु च ॥"
इति महौषधादि ॥ १३७ ॥
"पिबेद्दुरालभाक्वाथं सक्षौद्रं भ्रमशान्तये ॥"
इति दुरालभाक्वाथः ॥ १३८ ॥
इति मूर्च्छाधिकारः ॥ * ॥
अथोन्मादे ।
"दशमूलाम्बु सक्षौद्रं युक्तं मांसरसेन वा ।
सनिष्टार्थकचूर्णं वा पुराणं वैकृतं घृतम् ॥"
इति घृतादियुक्तदशमूलम् ॥ १३९ ॥ * ॥
अथापस्मारे ।
"घृतकम्बोरिरुवा यस्य स्वेदो घ्राणादि-
प्रीतता ।
दशमूलीजलं तस्य कल्याणाद्यघृतं योजयेत् ॥"
इति दशमूलीकल्याणघृतौ ॥१४०॥ * ॥
अथ वातरोगे ।
"पञ्चमूलीकृतः क्वाथो दशमूलीकृतोऽथवा ।
रुग्णः स्वेदरसघा नस्यं मन्यास्तम्भे प्रशस्यते ॥"
इति पञ्चमूली-दशमूलीक्वाथौ ॥ १४१ ॥
"अर्दिते नकुलीतैलं खादेन्मांसरसौदनम् ।
क्षीरमांसरसैर्भुञ्जा दशमूली बलं पिबेत् ॥"
इति दशमूली ॥ १४२ ॥
"माषपर्णानुकल्पिकाकृत्यरासास्नगन्धो-
रुबूकानाम् ।
क्वाथो नस्यनिपीतो रामठलवणान्वितः कोष्णः ॥
अपहरति पक्षवातं मन्यास्तम्भं सकर्ण-
नादरुजम् ।
दुर्जयमर्दितवातं समाधास्यति धावथम् ॥"
इति माषपर्णादि ॥ १४३ ॥
"दशमूलीबलामाषक्वाथं तैलाज्यमिश्रितम् ।
सार्धं सुरा पिबेन्नस्यं विषमास्यवधूर्के ॥"
इति दशमूल्यादि ॥ १४४ ॥
"माषाकृत्तैरण्डपाषाणभेदान्वितं पिबेत् ।
शिग्रुमूलयुतं पक्षघातनिवारणम् ॥"
इति माषादि ॥ १४५ ॥
"वातघ्नैर्दशमूल्या च नरं कुलत्थपाचरेत् ॥"
इति वातघ्नदशमूलीकषायौ ॥ १४६ ॥
"दशमूली बला रास्ना गुडूची विश्वभेषजम् ।
पिबेदेरण्डतैलेन गृध्रसीखञ्जपङ्गुषु ॥"
इति एरण्डतैलयुक्तदशमूलादि १४७ ॥
"श्लेष्मालिकादलक्वाथो रुग्णभिषरिसाधितः ।
दुर्धारं गृध्रसीरोगं पीतमाशु समुद्धरेत् ॥"
इति श्लेष्मालीकाथः ॥ १४८ ॥
"पञ्चमूलीकषायेण रुग्णतैलविमिश्रितम् ।
चिरतैलं बाधवा युक्तं गृध्रसीगुल्मशूलनुत् ॥"
इति एरण्डतैलयुक्तपञ्चमूली ॥ १४९ ॥
"दशमूलीकषायेण पिबेद्वा नागराम्भसा ।
कटीशूलेषु सर्वेषु तैलमैरण्डसम्भवम् ॥"
इति एरण्डतैलयुक्तदशमूलीत्रुटीक्वाथौ ॥१५०॥
"गुग्गुलुं क्रोष्टुशीर्षे तु गुडूची त्रिफलाम्भसा ।
क्षीरैरैरण्डतैलं वा पिबेद्वा बद्धदारुकम् ॥"
इति गुग्गुलुयुक्तगुडूचीत्रिफलाक्वाथः ॥१५१॥
इति वातव्याध्यधिकारः ॥ * ॥
अथ वातरक्ते ।
'अश्वत्थानागरधन्याकवर्षाभूवेण्वनकं सिद्धम् ।
जयति सरक्तं वातं सामं कुलत्थशेषाणि ॥"
इति अश्वत्थादि ॥ १५२ ॥
"वत्सादनीकषायः पीतो गुग्गुलुसंयुतः ।
समीरणसमायुक्तं श्रोणितं संप्रधावयेत् ॥"
इति वत्सादनीक्वाथः ॥ १५३ ॥
"वासागुडूचीं चतुरङ्गुलानां-
मैरण्डतैलेन पिबेत् कषायम् ।
क्रमेण सर्वाङ्गमपाश्रितं
जयेदलसातभवं विकारम् ॥"
इति वासादि ॥ १५४ ॥
"लीढ्वा सुरितिकाचूर्णं मधुसर्पिःसमन्वितम् ।
छिन्नाक्वाथं पिबन् हन्ति वातरक्तं सुदुस्तरम् ॥"
इति गुडूचीक्वाथः ॥ १५५ ॥
"तिलोऽथवा पञ्चगुडेन पथ्या
जग्ध्वा पिबेच्छिन्नरुहाकषायम् ।
सवातरक्तं शमयत्युदीर्ण-
मामानुसंस्रंसि निहन्त्यवश्यम् ॥"
इति गुडूचीकषायः ॥ १५६ ॥
इति वातरक्ताधिकारः ॥ * ॥
अथोरुस्तम्भे ।
"शिलाजतुं गुग्गुलुं वा पिप्पलीमथ नागरम् ।
उरुस्तम्भे पिबेन्मूत्रैरण्डस्नेहैरसेन वा ॥"
इति शिलाजत्वादियुक्तदशमूली ॥ १५७ ॥
"भल्लातकास्थितापुष्करादारुपथ्यापुनर्नवाः ।
पञ्चमूलीद्वयोन्मिश्रा उरुस्तम्भनिवारणाः ॥"
इति भल्लातकादि ॥ १५८ ॥
"पिप्पली पौष्करीमूलं भल्लातकाथ एव वा ।
क्वथ्यो वा समधुर्हन्ति उरुस्तम्भनिवारणः ॥"
इति पिप्पल्यादि ॥ १५९ ॥
इत्युरुस्तम्भाधिकारः ॥ * ॥
अथामवाते ।
"शुण्ठीशुण्ठ्भया पौष्या देवदारुनिशोत्पला

कषायमामवातस्य पाचनं रूक्षभोजनम् ।"
इति शूत्यादि ॥ १६० ॥
"शुंठी विषौषधं कल्कं वर्षाभूकाथसंयुतम् ।
सप्तरात्रं पिबेच्चानुरामवातविपाचनम् ॥"
इति पुनर्नवाकाथः ॥ १६१ ॥
"दशमूलास्तैरण्डरास्नानागरदारुभिः ।
काथोरुबूकतैलेन सामं हन्त्यनिलं गुरुम् ॥"
इति रास्नादशमूलम् ॥ १६२ ॥
"दशमूलीकषायेण पिबेद्वा नागराम्भसा ।
कृच्छ्रवस्तिकटीशूले तैलमेरण्डसम्भवम् ॥"
इति एरण्डतैलयुक्तदशमूलशुण्ठीकाथौ ॥१६३॥
"रास्नां गुडूचीमेरण्डं देवदारु महौषधम् ।
पिबेत् सर्व्वाङ्गवाते च सामे सन्ध्यस्थिमज्जगे ॥"
इति रास्नापञ्चकम् ॥ १६४ ॥
"रास्नास्तारग्वधदेवदारु-
त्रिकण्टकैरण्डपुनर्नवानाम् ।
काथं पिबेन्नागरचूर्णमिश्रं
जङ्घोरुपृष्ठत्रिकपार्श्वशूली ॥"
इति रास्नासप्तकम् ॥ १६५ ॥
"शुण्ठीगोक्षुरकक्काथः प्रातः प्रातर्निषेवितः ।
सामे वाते कटीशूले पाचनो रुक्प्रणाशनः ॥"
इति गोक्षुरशुण्ठी ॥ १६६ ॥
"आमवात कषायुक्तं दशमूलीजलं पिबेत् ॥"
इति कषायुक्तदशमूली ॥ १६७ ॥
इत्यामवाताधिकारः ॥ * ॥

अथ शूले ।
"बलापुनर्नवैरण्डबृहतीद्वयगोक्षुरैः ।
सहिङ्गु लवणं पीतं सद्यो वातरुजापहम् ॥"
इति बलादि ॥ १६८ ॥
"विश्वमेरण्डजं मूलं क्वाथं पीत्वा जलं पिबेत् ।
हिङ्गुसौवर्चलोपेतं सद्यः शूलनिवारणम् ॥"
इति विश्वादि ॥ १६९ ॥
"हिङ्गुपुष्करमूलाभ्यां हिङ्गुसौवर्चलेन वा ।
विश्वैरण्डयवक्काथः सद्यः शूलनिवारणः ॥"
इति हिङ्गुपुष्करमूलयुक्तविश्वैरण्डयवक्काथः ॥
१७० ॥
"तद्वद्वृषयवक्काथो हिङ्गुसौवर्चलान्वितः ॥"
इति वृष्यादि ॥ १७१ ॥
"बृहत्यौ गोक्षुरैरण्डकुशकाशेक्षुरालिकाः ।
पीताः पित्तभवं शूलं सद्यो हन्ति सुदारुणम् ॥"
इति बृहत्यादि ॥ १७२ ॥
"शृतावरीसयष्ट्याह्वव्याघ्रीकुशगोक्षुरैः ।
शृतशीतं पिबेत्तोयं सगुडक्षौद्रशर्करम् ॥
पित्तास्रदाहशूलघ्नं सद्यो दाहज्वरापहम् ॥"
इति शृतावर्य्यादि ॥ १७३ ॥
"त्रिफलानिम्बयष्ट्याह्वकटुकारग्वधैः शृतम् ।
पाययेन्मधुसंमिश्रं दाहशूलोपशान्तये ॥"
इति त्रिफलादि ॥ १७४ ॥
"तैलमेरण्डजं वापि मधुककाथसंयुतम् ।
शूलं पित्तोद्भवं हन्याद्गुल्मं पैत्तिकमेव च ॥"
इति मधुककाथः ॥ १७५ ॥
"त्रिफलारग्वधक्काथं सक्षौद्रं शर्करान्वितम् ।
पाययेदक्तपित्तघ्नं दाहशूलनिवारणम् ॥"
इति त्रिफलारग्वधक्काथः ॥ १७६ ॥
"बिल्वमूलमधेरण्डं चित्रकं विश्वभेषजम् ।
हिङ्गुसैन्धवसंयुक्तं सद्यः शूलनिवारणम् ॥"
इति बिल्वमूलादि ॥ १७७ ॥
"सक्षारं वा पिबेत् काथं बिल्वादेः कफशूलवान्॥"
इति बिल्वादिक्काथः ॥ १७८ ॥
"मातुलुङ्गरसो वापि शिग्रुकाथस्तथाधरः ।
सक्षारो मधुना पीतः पार्श्वहृद्बस्तिशूलनुत् ॥"
इति शिग्रुकाथः ॥ १७९ ॥
"आमशूले क्रिया कार्य्या कफशूल-
विनाशिनी ।
सैन्धवामहरं सद्य यदन्यदग्निवर्द्धनम् ॥
पटोलत्रिफलारिष्टकाथं समधुकं पिबेत् ।
पित्तश्लेष्मज्वरच्छर्दिदाहशूलोपशान्तये ॥"
इति पटोलादि ॥ १८० ॥
"विश्वोरुबूकदशमूलयवाम्भसा तु
द्विक्षारहिङ्गुलवणत्रयपुष्कराणाम् ।
चूर्णं पिबेद्धृदयपार्श्वकटीग्रहाम-
पक्वाशयांशभशूरुगुल्वरगुल्मशूली ॥"
इति विश्वादि ॥ १८१ ॥
"क्वाथेन चूर्णपानं यत्तच्च काथप्रधानता ।
प्रवर्त्तते न तेनाच्च चूर्णापेक्षी चतुर्द्रवः ॥
चूर्णं समं रुचकहिङ्गुमहौषधानां
शुण्ठ्याम्बुना कफसमीरणपित्तजेषु ।
हृत्पार्श्वपृष्ठजठरार्त्तिविसूचिकासु
पेयं तथा यवरसेन तु विड्विबन्धे ॥"१८२ ॥
"समं शुण्ठ्याम्बुनेत्येवं योजना क्रियते बुधैः ।
तेनाल्यमानमेवात्र हिङ्गु संपरिदीयते ॥"
इति रुचकादि ॥ १८३ ॥
"हिङ्गु सौवर्चलं पथ्या विड्सैन्धवतुम्बरु ।
पौष्करञ्च पिबेच्चूर्णं दशमूलयवाम्भसा ॥
पार्श्वहृत्कटिपृष्ठांशशूले तन्नामतानके ।
श्वोषश्लेष्मश्वासके च कर्णरोगे च शस्यते ॥"
इति हिङ्ग्वादिचूर्णयुक्तदशमूलीयक्काथः ॥१८४॥
"एरण्डबिल्वबृहतीद्वयमातुलुङ्ग-
पाषाणभिद्विकटमूलकृतः कषायः ।
सक्षारहिङ्गुलवणो रुचितैलमिश्रः
श्रोणिगुदमेढ्रहृदयस्तनवङ्क्षसि यः ॥"
इति एरण्डसप्तकः ॥ १८५ ॥
"एरण्डफलमूलानि बृहतीद्वयगोक्षुरम् ।
पर्णिन्यः सहदेवा च सिंहपुच्छीक्षुरालिका ॥
तुल्यैरेतैः शृतं तोयं यवक्षारयुतं पिबेत् ।
पृथग्दोषभवं शूलं हन्यात् सर्व्वमवश्यधा ॥"
इति एरण्डादिशृतकः ॥ १८६ ॥
इति शूलाधिकारः ॥ * ॥

अथोदावर्त्ते ।
"श्यामा दन्ती द्रवन्ती वृक् महाश्यामा सुही
चित्रकः ।
सप्तला शङ्खिनी श्वेता राजवृक्षः सतिन्दुकः ॥
कम्पिल्लकः करञ्जश्च हेमक्षीरीत्ययं गणः ।
सर्पिस्तैलरजःक्षारकल्केष्वन्यतमेन च ॥

उदावर्त्तोदरानाहविषगुल्मादिनाशनः ॥"
इति प्रत्येकं श्यामादिगणक्वाथः ॥ १८७ ॥
इत्युदावर्त्ताधिकारः । आनाहेऽपि ॥ * ॥
अथ हृद्रोगे ।
"वातोपसृष्टे हृदये वामयेत् स्निग्धमातुरम् ।
द्विपञ्चमूलीक्वाथेन सक्षेहलवणेन च ॥"
इति स्नेहलवणयुक्तदशमूली ॥ १८८ ॥
"नागरं वा पिबेद्वृक्षं कषायक्षाग्निवर्द्धनम् ।
कासश्वासानिलहरं शूलहृद्रोगनाशनम् ॥"
इति नागरक्वाथः ॥ १८९ ॥
"यवानिम्बकषायाभ्यां वान्तं हृदि कफोत्थिते ।
वातहृद्रोगहृच्चूर्णं पिप्पल्यादिषु पाचयेत् ॥"
इति यवानिम्बकषायौ ॥ १९० ॥
"हिङ्गुगन्धाविडविश्वकृष्णा-
कुष्ठाभयाचित्रकयावशूकम् ।
पिबेत् ससौवर्चलपुष्कराणि
यवाम्भसा शूलहृदामयघ्नम् ॥"
इति हिङ्ग्वादिचूर्णयुक्तयवक्काथः ॥ १९१ ॥
"दशमूलकषायन्तु लवणक्षारसंयुतम् ।
कासं श्वासञ्च हृद्रोगं गुल्मशूलञ्च नाशयेत् ।"
इति लवणक्षारयुक्तदशमूली ॥ १९२ ॥
इति हृद्रोगाधिकारः ॥ * ॥

अथ मूत्रकृच्छ्रे ।
"अश्वत्था नागरं धात्री वाजिगन्धा त्रिकण्टकम् ।
प्रपिबेद्वानरोगार्त्तः सशूलो मूत्रकृच्छ्रवान् ॥"
इति अश्वत्थादि ॥ १९३ ॥
"कुशः काशः शरो दर्भ इक्षुश्चेति तृणोद्भवम् ।
पित्तकृच्छ्रहरं पञ्चमूलं वस्तिविशोधनम् ॥"
इति तृणपञ्चमूलम् ॥ १९४ ॥
"एतत् सिद्धं पयः पीत्वा मेढ्रगं हन्ति शोणितम् ॥
शृतावरीकाशकुशश्वदंष्ट्रा-
विदारिशालीक्षुकशेरुकाणाम् ।
क्वाथं सुशीतं मधुशर्करार्क्तं
पिबन् जयेत् पैत्तिकमूत्रकृच्छ्रम् ॥"
इति शृतावर्य्यादि ॥ १९५ ॥
"हरीतकीगोक्षुरराजवृक्ष-
पाषाणभिन्नवपवासकानाम् ।
क्वाथं पिबेन्माक्षिकसंप्रयुक्तं
कृच्छ्रे सदाहे सरुजे विबन्धे ॥"
इति हरीतक्यादि ॥ १९६ ॥
"श्वदंष्ट्रा बिम्बतोयं वा कफकृच्छ्रविनाशनम् ॥"
इति श्वदंष्ट्राबिम्बकषायौ ॥ १९७ ॥
"बृहतीधावनीपाठायष्टीमधुकपिप्पलाः ।
पाचनीयो बृहत्यादिः कृच्छ्रदोषत्रयापहः ॥"
१९८ ॥
"क्वाथं गोक्षुरबीजस्य यवक्षारयुतं पिबेत् ।
मूत्रकृच्छ्रं शुक्रकृच्छ्रञ्च पीतः शीघ्रं निवारयेत् ॥"
इति यवक्षारयुक्तगोक्षुरबीजक्वाथः ॥ १९९ ॥
"क्रिया हिता बस्तिरिशुर्करायां
या मूत्रकृच्छ्रे कफमारुतोत्थे ।
यन्मूत्रकृच्छ्रे विहितन्तु पैत्ते
तत् कारयेच्छोणितमूत्रकृच्छ्रे

त्रिकण्टकारग्वधदर्भकाश्म-
दुरालभापर्व्वतभेदपथ्याः ।
निघ्नन्ति पीता मधुनाश्मरीञ्च
संप्राप्तस्योरपि मूत्रकृच्छ्रम् ॥"
इति त्रिकण्टकादि ॥ २०० ॥
"कषायोऽतिबलामूलसाधितोऽग्नेयशर्करजित् ॥"
इति अतिबलाकषायः ॥ २०१ ॥
इति मूत्रकृच्छ्राधिकारः ॥ * ॥
अथ मूत्राघाते ।
"मूत्राघातान् यथादोषं मूत्रकृच्छ्रहरैर्जयेत् ।
पिबेच्छिलाजतुक्वाथे गवां वीरतरादिके ॥"
इति शिलाजतुयुक्तवीरतरादिक्वाथः ॥२०२॥
"रसं दुरालभाया वा कषायं वासकस्य वा ॥"
इति दुरालभारग्ववासाकषायौ ॥ २०३ ॥
इति मूत्राघाताधिकारः ॥ * ॥
अथाश्मर्य्याम् ।
"वरुणस्य त्वचं श्रेष्ठां शुण्ठीगोक्षुरसंयुताम् ।
यवक्षारगुडं दत्त्वा क्वाथयित्वा पिबेद्धिताम् ॥
अश्मरीं वातजां हन्ति चिरकालानुबन्धिनीम् ॥"
इति वरुणत्वगादि ॥ २०४ ॥
"वीरतरः सहचरौ दर्भौ वृक्षादनी नलः ।
गुन्द्रा काशकुशावश्मभेदमोरटटुण्टुकाः ॥
कुरण्टकोऽथ वशिरो वसुकः साग्निमन्थकः ।
इन्दीवरी श्वदंष्ट्रा च तथा कापोतवल्लकः ॥
वीरतरादिरित्येष गणो वातविकारनुत् ।
अश्मरीशर्करामूत्रकृच्छ्राघातरुजापहः ॥"
इति वीरतरादिगणक्वाथः ॥२०५॥
"शुण्ठ्यग्निमन्थपाषाणशिग्रुवरुणगोक्षुरैः ।
अभयारग्वधफलैः क्वाथं क्षार्य्याद्विचक्षणः ॥
सामटक्षारलवणचूर्णं दत्त्वा पिबेन्नरः ।
अश्मरीमूत्रकृच्छ्रघ्नं पाचनं दीपनं परम् ॥
हन्यात् कोष्ठाश्रितं वातं कट्वरगुदमेढ्रगम् ॥"
इति शुण्ठ्यादि ॥ २०६ ॥
"वरुणत्वक्कषायन्तु पीतन्तु गुडसंयुतम् ।
अश्मरीं पातयत्याशु वस्तिशूलविनाशनम् ॥"
इति वरुणक्वाथः ॥ २०७ ॥
"पिबेद्वरुणमूलत्वक्क्वाथं तत्कल्कसंयुतम् ॥"
इति वरुणकल्कयुक्तवरुणत्वक्कषायः ॥२०८॥
"क्वाथञ्च शिग्रुमूलोत्थः कटुष्णोऽश्मरिघातगः ॥"
इति शिग्रुक्वाथः ॥ २०९ ॥
"नागरवरुणकगोक्षुरपाषाणभित्कपोतवल्लजः
क्वाथः ।
गुडयावशूकमिश्रः पीतो हन्त्यश्मरीमुग्राम् ॥"
इति नागरादि ॥ २१० ॥
"वरुणत्वक्शिलाभेदशुण्ठीगोक्षुरकैः कृतः ।
कषायः क्षारसंयुक्तः शर्करास्तु भिनत्त्यपि ॥"
इति वरुणत्वगादि ॥ २११ ॥
"श्वदंष्ट्रैरण्डपत्राणि नागरं वरुणत्वचम् ।
एतत्क्वाथवरं प्रातः पिबेदश्मरिभेदनम् ॥"
इति श्वदंष्ट्रादि ॥ २१२ ॥
"एलोपकुल्यामधुकाश्मभेद-
कौन्तीश्वदंष्ट्रात्रयकोरुवूकैः ।
क्वाथं पिबेदश्मजतुप्रगाढ़ं
सशर्करं साश्मरिमूत्रकृच्छ्रे ॥"
इति एलादि ॥२१३॥
"शुक्राश्मर्य्यान्तु सामान्यो विधिरश्मरिनाशनः ॥"
इत्यश्मरीशर्कराधिकारः ॥ * ॥
अथ मेहे ।
"दूर्व्वाकाशेरुपूतीककुभीकाम्रवेतसम् ।
जले निःक्वथितं पीतं शुक्रमेहहरं परम् ॥"
इति दूर्व्वादि ॥ २१४ ॥
"त्रिफलारग्वधद्राक्षाकषायो मधुना युतः ।
प्रीतो निहन्ति फेनाख्यं प्रमेहं नियतं नृणाम् ॥"
इति त्रिफलादि ॥ २१५ ॥
"लोध्राभयाकटफलमुस्तकानां
त्रिदङ्गपाठार्জ্জुनधन्वनानाम् ।
कदम्बशालार्জ্জুनदीप्यकानां
विदङ्गदार्व्वीधवशल्यकानाम् ॥
चत्वार एते मधुना कषायाः
कफप्रमेहेषु निषेवणीयाः ॥
अश्वत्थाद्यतुरङ्गुल्या न्यग्रोधादेः फलत्रयात् ।
सजिह्विरक्तसाराच्च क्वाथाः पञ्च समाक्षिकाः ॥
नीलहारिद्रशुक्लाख्यान् चारमाक्षिकसाङ्कयान् ।
मेहान् हन्युः क्रमादेते सक्षौद्रो रक्तमेह-
जित् ॥
क्वाथः खर्জ্জूरकाश्मर्य्यतिन्दुकास्थ्याम्रताक्षतः ॥"
इति खर्জ্জूरादि ॥ २१६ ॥
"लोध्रार्জ্জुनोशीरकुचन्दनानाम् २१७
अरिष्टसेव्यामलकाभयानाम् । २१८ ।
धात्रार्জ্জुनारिष्टकवत्सकानां २१९
नीलोत्पलेलातिनिशार्জ্জुनानाम् ॥ २२० ॥
चत्वार एते विहिताः कषायाः
पित्तप्रमेहे मधुसंप्रयुक्ताः ॥"
इति कषायचतुष्टयम् ॥ २२१ ॥
"छिन्नावल्लिकषायेण पाठाकुटजरामठम् ।
तिक्तां कुष्ठञ्च सक्षौद्रं सर्पिर्मेहे पिबेन्नरः ॥"
इति छिन्नावल्लिकषायः ॥ २२२ ॥
"कदरखदिरपूगक्वाथं क्षौद्राढ्यं पिबेत् ॥"
इति कदरादि ॥ २२३ ॥
"अग्निमन्थकषायन्तु वसामेहे प्रयोजयेत् ॥"
इति अग्निमन्थकषायः ॥२२४॥
"पाठाशिरीषदुस्पर्शसुव्वाः किंशुकतिन्दुकौ ।
कपित्थानां भिषक् क्वाथं हस्तिमेहे प्रयोजयेत् ॥"
इति पाठादि ॥ २२५ ॥
"कषायस्त्रिफलादारुसुस्तकैरथवा कृतः ॥"
इति त्रिफलादि ॥ २२६ ॥
"फलत्रिकं दारु निशां विशालां
सुस्तञ्च निष्काथ्य निशांशकल्कम् ।
पिबेत् कषायं मधुसंप्रयुक्तं
सर्व्वप्रमेहेषु ससुस्थितेषु ॥"
इति फलत्रिकादि ॥ २२७ ॥
"कटङ्कटेरीमधुकत्रिफलाचित्रकैः समैः ।
सिद्धः कषायः प्रातव्यः प्रमेहाणां विनोत्थितः ॥"
इति कटङ्कटेर्य्यादि ॥ २२८ ॥
"त्रिफलादारुदार्व्यब्दकाथः क्षौद्रेण मेहहृत् ॥"
इति त्रिफलादि ॥ २२९ ॥
"कुटजासनदार्व्यब्दफलत्रयभवोऽथवा ॥"
इति कुटजादि ॥ २३० ॥
इति प्रमेहाधिकारः ॥ * ॥
अथोदरे ।
"पयसा सत्रिवृत्कल्केनोरुवूकरसेन वा ।
सप्तलात्रायमाणाभ्यां रसेनारग्वधेन वा ॥"
इति त्रिवृत्कल्कक्वाथारग्वधक्वाथौ ॥
२३१ ॥
"सन्निपातोदरे सर्व्वां यथोक्तां कारयेत् क्रियाम् ।
पीतः क्षीरोदरं हन्यात् पिप्पलीमरिचान्वितः ॥
अन्वेतसंयुक्तः शिग्रुक्वाथः ससैन्धवः ॥"
इति शिग्रुक्वाथः ॥ २३२ ॥
"दग्धमूलदारुनागरच्छिन्नरुहापुनर्नवाक्वाथः ।
जयति जलोदरशोथक्षीपदगलगण्डवात-
रोगांश्च ॥"
इति दग्धमूलादि ॥ २३३ ॥
"हरीतकीनागरदेवदारु
पुनर्नवाच्छिन्नरुहाकषायः ।
सगुग्गुलुर्मूत्रयुतश्च पेयः
शोथोदराणां प्रवरः प्रयोगः ॥"
इति हरीतक्यादि ॥ २३४ ॥
"एरण्डतैलं दग्धमूलमिश्रं
गोमूत्रयुक्तक्षिफलारसो वा ।
निहन्ति वातोदरशोथशूलं
क्वाथः समूत्रो दग्धमूलजश्च ॥"
इति एरण्डतैलेन गोमूत्रेण वा युक्ता दग्धमूली ॥
२३५ ॥
"पुनर्नवानिम्बपटोलशुण्ठी-
तिक्ताग्न्यतादार्व्यभयाकषायः ।
सर्व्वाङ्गशोथोदरकाश्यशूल-
श्वासान्वितं पाण्डुगदं निहन्ति ॥"
इति पुनर्नवाष्टकम् ॥ २३६ ॥
"पुनर्नवादार्व्यभयागुडूचीं
पिबेत् समूत्रां महिषाक्षयुक्ताम् ।
त्वग्दोषशोथोदरपाण्डुरोग-
स्त्रैल्यप्रसेकोर्द्धकफामयेषु ॥"
इति पुनर्नवाचतुष्कम् ॥ २३७ ॥
इति उदराधिकारः ॥ * ॥
अथ शोथे ।
"शुण्ठीपुनर्नवैरण्डपञ्चमूलहृतं जलम् ।
वातिके व्यथिते पीतं पानाहारपरिग्रहे ॥"
इति शुण्ठ्यादि ॥ २३८ ॥
"दग्धमूलं सर्व्वधा च पीतं वाते विशेषतः ॥"
इति दग्धमूलम् ॥ २३९ ॥
"चीराशनः पित्तकृतेऽथ शोथे
चित्रद्रुगुडूचीत्रिफलाकषायम् ।
पिबेन्नवां मूत्रविमिश्रितं वा
फलत्रिकाचूर्णमथाचमात्रम् ॥"
इति चित्रतादि ॥ २४० ॥
"अभया दारु मधुकं तिक्ता दन्ती सपिप्पली ।

पटोलं चन्दनं दार्व्वी चायमाणेन्द्रवारुणी ॥
एषां क्वाथः सर्पिष्कः क्षयगुल्मरदाहहृत्।
वीसर्पतृष्णासन्तापसन्निपातविषापहः ॥"
इति अभयादि ॥ २४१ ॥

"पुनर्नवाविश्वत्रिवृद्गुडूची-
सम्याकपथ्यामरदारुकल्कम् ।
शोथे कफोत्थे महिषाच्चमूत्र-
युक्तं पिबेद्वा सलिलं तथैषाम् ॥"
इति पुनर्नवासप्तकम् ॥ २४२ ॥

"पुनर्नवादारुमुष्टीक्वाथे मूत्रेऽथ कैवले ।
दशमूलजले वापि गुग्गुलुः शोथनाशनः ॥"
इति गुग्गुलुयुक्तपुनर्नवादिदशमूलक्वाथौ॥२४३॥

"सिंहास्याम्रतभण्टाकीक्वाथं कृत्वा समाक्षिकम् ।
पीत्वा शोथं जयेज्जन्तुः कासं श्वासं ज्वरं
वमिम् ॥"
इति सिंहास्यादि ॥ २४४ ॥

"भूनिम्बविश्वकल्कं जग्ध्वा पेयः पुनर्नवाक्वाथः ।
अपहरति नियतमाशु शोथं सर्व्वाङ्गगं नराणाम् ॥"
इति पुनर्नवाक्वाथः ॥ २४५ ॥
इति शोथाधिकारः ॥ * ॥

अथान्तर्द्वौ ।
"पुनर्नवायास्तैलं वा तैलं नारायणन्तथा ।
पाने वस्तौ रुजौ तैलं पेयं वा दशकाभ्यसा ॥"
इति रुग्रुतैलयुक्तदशमूलम् ॥ २४६ ॥

"राज्ञायष्ट्यन्तैरण्डबलागोक्षुरसाधितः ।
क्वाथोऽन्तर्द्विं हन्त्याशु रुग्रुतैलेन मिश्रितः ॥"
इति राज्नादि ॥ २४७ ॥
इति ब्रध्नस्तर्द्व्यधिकारः ॥ * ॥

अथ विद्रधौ ।
"पुनर्नवादारुविश्वदशमूलाभयाम्भसा ।
गुग्गुलुं रुग्रुतैलं वा पिबेद्वातरुतविद्रधौ ॥"
इति पुनर्नवादि ॥ २४८ ॥

"पिबेद्वा त्रिफलाक्वाथं त्रिवृत्कल्काक्षसंयुतम् ॥"
इति त्रिवृत्कल्कयुक्तत्रिफलाक्वाथः ॥२४९॥

"दशमूलीकषायेण सन्दोहनरसेन वा ।
शोथं व्रणं वा कोष्णेन सक्षूलं परिषेचयेत् ॥"
इति दशमूलीकषायः ॥ २५० ॥

"क्वाथो वंशत्वगेरण्डस्वर्दन्त्याक्षभिदा कृतः ।
सह्लिङ्गसैन्धवः पीतः कोष्ठस्थं स्रावयेद्दृढम् ॥"
इति वंशत्वगादिक्वाथः ॥ २५१ ॥*॥

अधोपदंशे ।
"पटोलनिम्बत्रिफलागुडूची-
क्वाथं पिबेद्वा खदिराक्षनाभ्याम् ।
सगुग्गुलुं वा त्रिफलायुतं वा
सर्व्वोपदंशापहरः प्रयोगः ॥"
इति पटोलादि ॥ २५२ ॥

"त्रिफलायाः कषायेण भृङ्गराजरसेन वा ।
व्रणप्रक्षालनं कुर्य्यादुपदंशप्रशान्तये ॥"
इति त्रिफलाक्वाथः ॥ २५३ ॥

"जयाजात्यम्बमारार्कैरम्याकानां दलैः पृथक् ।
कृतं प्रक्षालने क्वाथं मेढ्रपाके प्रयोजयेत् ॥"
इति जयादिक्वाथः ॥ २५४ ॥ * ॥

अथ भग्ने ।
"न्यग्रोधादिकषायन्तु सुशीतं परिषेचने ॥"
इति न्यग्रोधादि ॥ २५५ ॥ * ॥

अथ कुष्ठे ।
"त्रिफलापटोलरजनीमञ्जिष्ठारोहिणीवचा-
निम्बैः ।
एष कषायोऽभ्यस्तो निहन्ति कफपित्तजं
कुष्ठम् ॥"
इति नवकषायः ॥ २५६ ॥

"पटोलखदिरारिष्टत्रिफलाक्वाथवेचनम् ।
तिक्ताशनः पिबेत् क्वाथं कुष्ठी कुष्ठं व्यपोहति ॥"
इति पटोलादि ॥ २५७ ॥

"धात्रीखदिरयोः क्वाथं पीत्वा वल्गुजसंयुतम् ।
शूलेन्द्रवलं क्षिप्रं तूर्णं हन्ति न संशयः ॥"
इति धात्रीखदिरक्वाथः ॥ २५८ ॥ * ॥

अथ शीतपित्ते ।
"उदर्दे वमनं कार्य्यं पटोलारिष्टवारिणा ॥"
इति पटोलारिष्टजलम् ॥ २५९ ॥ * ॥

अथास्रपित्ते ।
"निम्बपर्पटधात्रीक्वाथस्त्रिसुगन्धियुतः पीतः ।
अपनयति चास्रपित्तं यदि भुङ्क्ते मुद्गयूषेण ॥"
इति निम्बपर्पटादि ॥ २६० ॥

"कफपित्तवमीकण्डूज्वरविस्फोटदाहहृत् ।
पाचनो दीपनः क्वाथः शृङ्गवेरपटोलयोः ॥"
इति शृङ्गवेरपटोलक्वाथः ॥ २६१ ॥

"पटोलं नागरं धान्यं क्वाथयित्वा जलं पिबेत् ।
कण्डूयामार्त्तिशूलघ्नं कफपित्ताग्निमान्द्यजित् ॥"
इति पटोलादि ॥ २६२ ॥

"पटोलविश्वान्तरोहिणीकृतं
जलं पिबेत् पित्तकफोच्छ्राये च ।
शूलभ्रमारोचकवह्निमान्द्य-
कासज्वरच्छर्द्दिनिवारणन्तत् ॥"
इति पटोलादि ॥ २६३ ॥

"यवक्षणापटोलानां क्वाथं क्षौद्रयुतं पिबेत् ।
नाशयेदस्रपित्तञ्च अरुचिञ्च वमिन्तथा ॥"
इति यवादि ॥ २६४ ॥

"वासान्तापर्पटकभूनिम्बनिम्बमार्कवैः ।
त्रिफलाकुलकैः क्वाथः सक्षौद्रश्चास्रपित्तहा ॥"
इति दशाङ्गम् ॥ २६५ ॥

"फलत्रिकं पटोलञ्च तिक्ताक्वाथः सितायुतः ।
पीतः क्षीतकमध्यक्तो ज्वरच्छर्द्यस्रपित्तजित् ॥"
इति फलत्रिकादि ॥ २६६ ॥

"पटोलधन्याकमहौषधाख्यैः
कृतः कषायो विनिहन्ति शीघ्रम् ।
मन्दानलं पित्तबलासदाह-
च्छर्द्दिज्वरामानिलशूलरोगान् ॥"
इति पटोलादि ॥ २६७ ॥

"छिन्नोद्भवानिम्बपटोलपत्रं
फलत्रयं सुक्वथितं सुशीतम् ।
क्षौद्रान्वितं पीतमनेकरूपं
सुदारुणं हन्ति तदस्रपित्तम् ॥"
इति छिन्नोद्भवादि ॥ २६८ ॥

"पटोलत्रिफलानिम्बशृतं मधुयुतं पिबेत् ।
पित्तश्लेष्मज्वरच्छर्द्दिदाहशूलोपशान्तये ॥"
इति पटोलादि ॥ २६९ ॥

"सिंहास्याम्रतभण्टाकीक्वाथं कृत्वा समाक्षिकम् ।
अस्रपित्तं जयेज्जन्तुः कासं श्वासं ज्वरं वमिम् ॥"
इति सिंहास्यादि ॥ २७० ॥
इति अस्रपित्ताधिकारः ॥ * ॥

अथ विसर्पे ।
"क्षणवर्च्चं प्रयोक्तव्यं पञ्चमूलत्रितृष्णयम् ॥"
इति पञ्चमूलत्रयम् ॥ २७१ ॥

"सुस्तारिष्टपटोलानां क्वाथः सर्व्वविसर्पजुत् ॥"
इति सुस्तादि ॥ २७२ ॥

"धात्रीपटोलसुक्षानामथवा घृतसंयुतः ॥"
इति धात्र्यादि ॥ २७३ ॥

"अन्तर्तृषपटोलं निम्बपर्पैरुपेतं
त्रिफलखदिरसारं व्याधिघातश्च तुल्यम् ।
क्वथितमिदमशेषं गुग्गुलोर्भागयुक्तं
जयति विषविसर्पान् कुष्ठमष्टादशाख्यम् ॥"
इति नवकषायः ॥ २७४ ॥

"अन्तर्तृषपटोलं सुस्तकं सपर्पटं
खदिरसमितवेत्रं निम्बपत्रं हरिद्रे ।
विविधविषविसर्पान् कुष्ठविस्फोटकण्डू-
रपनयति मरुद्भिं शीतपित्तं ज्वरञ्च ॥"
इति अन्तर्तृषादि ॥ २७५ ॥

"पटोलाम्रतभूनिम्बवासकारिष्टपर्पटैः ।
खदिराब्दयुतैः क्वाथो विस्फोटार्त्तिज्वरापहः ॥"
इति पटोलादि ॥ २७६ ॥

"पटोलत्रिफलारिष्टगुडूचीसुस्तचन्दनैः ।
समुस्तां रोहिणी पाठां रजनीं सदुरालभाम् ॥
कषायं पाचयेदेतन् पित्तश्लेष्मज्वरापहम् ।
कण्डूत्वगदोषविस्फोटविषवीसर्पनाशनम् ॥"
इति पटोलादि ॥ २७७ ॥

"भूनिम्बवासाकटुकापटोल-
फलत्रिकाचन्दननिम्बसिद्धः ।
विसर्पदाहज्वररक्तशोष-
विस्फोटतृष्णावमिजुत् कषायः ॥"
इति भूनिम्बादि ॥ २७८ ॥

"सकफे पित्तयुक्ते तु त्रिफलां योजयेन्नरः ।
दुरालभां पर्पटकं पटोलं कटुकान्वया ।
कोष्णं गुग्गुलुसंयुक्तं पिबेद्वा खदिराष्टकम् ॥"
इति दुरालभादि ॥ २७९ ॥

"कुरुण्टी पिचुमर्द्दाम्बु खदिरेन्द्रयवाम्बु वा ।
विस्फोटान्नाशयत्याशु वायुर्जलधरानिव ॥"
इति कुरुण्ट्यादि ॥ २८० ॥ * ॥

अथ मसूर्य्याम् ।
"दुरालभां पर्पटकं भूनिम्बं कटुरोहिणीम् ।
श्लैष्मिक्यां पित्तजायां वा पाने निःक्वाथ्य दापयेत्॥"
इति दुरालभादि ॥ २८१ ॥

"निम्बं पर्पटकं पाठां पटोलं कटुरोहिणीम् ।
वासां दुरालभां धात्रीमुशीरं चन्दनद्वयम् ॥
एष निम्बादिकः क्वाथः पीतः शर्करया युतः ।
हन्ति त्रिदोषमसूरीं क्षयवीसर्पसम्भवाम् ॥

उत्थिता प्रविशेद्या तु पुनस्तां वाह्यतो नयेत् ॥"
इति निम्बादि ॥ २८२ ॥
"पटोलकुण्डलीसुस्तवृषधन्वयवासकैः ।
भूनिम्बनिम्बकटुकापर्पटैश्च हृतं जलम् ॥
मसूरीं शमयेदामां पक्वाश्चैव विशोधयेत् ।
नातः परतरं किञ्चिदिस्फोटज्वरशान्तये ॥"
इति पटोलादि ॥ २८३ ॥
"पटोलमूलारुष्यतण्डूलीयकं
पिबेद्धरिद्रामलकल्कसंयुतम् ।
मसूरिविस्फोटविदाहशान्तये
तदेव पित्तासवमिज्वरापहम् ॥"
इति पटोलादि ॥ २८४ ॥
"पटोलमूलारुष्यतण्डूलीयकं
तथैव धात्रीखदिरेण संयुतम् ।
पिबेज्जलं सुक्वथितं सुशीतं
मसूरिकारोगविनाशनं परम् ॥"
इति पटोलमूलादि ॥ २८५ ॥
"खदिरत्रिफलारिष्टपटोलाम्बष्ठवासकैः ।
क्वाथोऽष्टकाङ्गो जयति रोमान्तीश्च मसूरिकाम् ॥
वीसर्पकुष्ठविस्फोटकण्डूदीनपि पानतः ॥"
इति खदिराष्टकम् ॥ २८६ ॥
"अम्बतादिकषायस्तु जयेत् पित्तकफात्मिकाः ॥"
इति अम्बतादि ॥ २८७ ॥
"जातीपत्रं समञ्जिष्ठं दार्व्वी पूगफलं शमीम् ।
धात्रीफलं समधुकं क्वथितं मधुसंयुतम् ॥
मुखरोगे कण्ठरोगे गण्डूषार्थं प्रशस्यते ॥"
इति जातीपत्रादि ॥ २८८ ॥
"अक्ष्णोः सेकं प्रशंसन्ति गवेधुमधुकाम्बुना ॥"
इति गवेधुमधुककाथः ॥ २८९ ॥
"वेदनादाहशान्त्यर्थं स्वराणाञ्च विशुद्धये ।
सगुग्गुलं वराक्वाथं युञ्जाद्वा खदिराष्टकम् ॥"
इति वराक्वाथखदिराष्टकौ ॥ २९० ॥
"निम्बातिमुक्तकाम्बोकन्यग्रोधेतसपल्लवैः ।
निष्पाण्यर्थुयितः क्वाथो मसूरीभयनाशनः ॥"
इति निम्बादि ॥ २९१ ॥ इति मसूर्यधिकारः ॥ ❋ ॥

अथ मुखरोगे ।

"दृढत्वचीभूमिकदम्बकरञ्जकार्य्याः क्वाथः ।
गण्डूषतैलयुक्तः क्रिमिदन्तस्य वेदनाशमनः ॥"
इति दृढत्वादि ॥ २९२ ॥
"क्वाथपानन्तु दार्व्वीत्वड्निम्बतार्क्ष्यकलिङ्गजम् ।
हरीतकीकषायो वा पेयो माक्षिकसंयुतः ॥"
इति दार्व्यादिहरीतकीकषायौ ॥ २९३ ॥
"कटुकातिविषारुष्पाठामुस्तकलिङ्गकाः ।
गोमूत्रक्वथिताः पेयाः कण्ठरोगविनाशनाः ॥"
इति कटुकादि ॥ २९४ ॥ ❋ ॥

मुखपाके ।

"जातीपत्राम्बताम्राचायासदार्व्यीफलत्रिकैः ।
क्वाथः क्षौद्रयुतः पीतो गण्डूषो मुखपाकनुत् ॥"
इति जातीपत्रादि ॥ २९५ ॥
"पटोलनिम्बजम्ब्राम्रमालतीनवपल्लवाः ।
पञ्चपल्लवकः श्रेष्ठः कषायो मुखधावने ॥"
इति पटोलादि ॥ २९६ ॥
"पञ्चवल्ककषायो वा त्रिफलाक्वाथ एव वा ।
मुखपाकेषु सक्षौद्रः प्रयोज्यो मुखधावने ॥"
इति पञ्चवल्कत्रिफलाकषायौ ॥ २९७ ॥
"खरसः क्वथितो दार्व्या घनीभूतो रसक्रिया ।
सक्षौद्रा मुखरोगास्रगदोषनाड़ीव्रणापहा ॥"
इति दार्व्यीक्वाथः ॥ २९८ ॥
"सप्तच्छदोशीरपटोलमुस्त-
हरीतकीतिक्तकरोहिणीभिः ।
पञ्चाङ्गराजद्रुमचन्दनञ्च
क्वाथं पिबेत् पाकहरं मुखस्य ॥"
इति सप्तच्छदपञ्चाङ्गादिकषायौ ॥ २९९ ॥
"पटोलमुस्तोत्रिफलाविशाला-
चायन्तितिक्तात्रितान्ततानाम् ।
पीतः कषायो मधुना निहन्ति
मुखे स्थितस्तस्य गदानशेषान् ॥"
इति पटोलादि ॥ ३०० ॥
"क्वथितास्त्रिफलापाठाम्बष्ठीकाजातिपल्लवाः ।
निषेव्या भक्षयेद्वा वा त्रिफला मुखपाकहा ॥"
इति त्रिफलादि ॥ ३०१ ॥
इति मुखरोगाधिकारः ॥ ❋ ॥

अथ प्रदरे ।

"दार्व्यीरसाञ्जनवृषाम्बष्ठकिरातविल्व-
भल्लातकैरवल्कतो मधुना कषायः ।
पीतो जयत्यतिबलं प्रदरं सशूलं
पीतासितारुणविलोहितनीलवर्णम् ॥"
इति दार्व्यादि ॥ ३०२ ॥ ❋ ॥

अथ योनिव्यापदि ।

"गुडूचीत्रिफलादन्तीक्वाथेश्च परिषेचनम् ॥"
इति गुडूचीत्रिफलादन्तीक्वाथाः ॥ ३०३ ॥

अथ गर्भिण्याम् ।

"चन्दनं प्रियालोध्रम्बष्कीकाशर्करान्वितम् ।
एष क्वाथः सातयो गर्भिण्या ज्वरशान्तये ॥"
इति चन्दनादि ॥ ३०४ ॥
"क्षीरैरारग्वधरक्तचन्दनबलाधन्याकवत्सादनी-
मुस्तोशीरयवासपर्पटविषाक्वाथं पिबेन्नर्भिणी ।
नानावर्णरजातिसारकगदे गर्भाश्रिते वा ज्वरे
योगोऽयं मुनिभिः पुरा निगदितः क्षत्वामये-
भूत्तमः ॥"
इति दृढत्वचीरादि ॥ ३०५ ॥ ❋ ॥

अथ स्तनरोगे ।

"हरिद्रादिं वचादिं वा प्रपिबेत् स्तन्यशुद्धये ॥"
इति हरिद्रादिवचादिक्वाथौ ॥ ३०६ ॥
"तत्र वातात्मके स्तन्ये दशमूलीजलं पिबेत् ॥"
इति दशमूलक्वाथः ॥ ३०७ ॥
"पित्तदुष्टेऽम्बताभीरुपटोलं निम्बचन्दनम् ।
धात्री कुमारश्च पिबेत् क्वाथयित्वा सशारिवम् ॥"
इति अम्बतादि ॥ ३०८ ॥
"कफे वा त्रिफलाचव्यभूनिम्बकटुरोहिणी ॥"
इति त्रिफलादि ॥ ३०९ ॥
"धात्री स्तन्यविशुद्ध्यर्थं सुक्षीरैकरसाशना ।
भार्गीदारुवचापाठाः पिबेत् सातिविषाः शृताः ॥"
इति भार्ग्यादि ॥ ३१० ॥
"सघृतं त्रिफलाक्वाथं स्तनरोगहरं पिबेत् ॥"
इति सघृतत्रिफलाक्वाथः ॥ ३११ ॥ ❋ ॥

अथ स्तुतिकारोगे ।

"अम्बतानागरसहचरभद्रौत्कटपञ्च-मूलजलद-
जलम् ॥
घृतशीतं मधुयुतं निवारयति स्तुतिकातङ्कम् ॥"
इति स्तुतिकादशमूलम् ॥ ३१२ ॥
"सहचरपुष्करवेतसमूलं वैकङ्कतदारुकुलत्थ-
समम् ।
जलमत्र ससैन्धवहिङ्गुयुतं सद्यो ज्वरस्तुतिक-
शूलहरम् ॥"
इति सहचरादि ॥ ३१३ ॥
"दशमूलीशृतः क्वाथः सद्यः स्तुतिरुजापहः ॥"
इति दशमूली ॥ ३१४ ॥ ❋ ॥

अथ मक्कल्लमूले ।

"स्तुतायाः वृश्चिरोवस्तिमूलं मक्कल्लसंज्ञितम् ।
एवचारं पिबेत्तच्च मस्तुनोष्णोदकेन वा ॥
पिप्पल्यादिगणक्वाथं पिबेद्वा लवणान्वितम् ॥"
इति पिप्पल्यादिगणक्वाथः ॥ ३१५ ॥
इति स्त्रीरोगाधिकारः ॥ ❋ ॥

अथ बालरोगे ।

"भेषज्यं पूर्व्वमुद्दिष्टं नराणां यज्ज्वरादिषु ।
कार्य्यन्तदेव बालानां मात्रा त्वस्य कनीयसी ॥
हरिद्रादयपञ्चाङ्गसिंहीशृक्वयवैः कृतः ।
शिशोर्ज्वरातिसारघ्नः कषायः स्तन्यदोषजित् ॥"
इति हरिद्रादि ॥ ३१६ ॥
"विल्वस्य पुष्पाणि च धातकीनां
जलं सलोध्रं गजपिप्पली च ।
क्वाथावलेहौ मधुना विमिश्रौ
बालेषु योज्यावतिसारितेषु ॥"
इति विल्वादिक्वाथः ॥ ३१७ ॥
"समङ्गाधातकीलोध्रशारिवाभिः शृतं जलम् ।
दुर्ज्वारेऽपि शिशोर्दयमतीसारे समाचिकम् ॥"
इति समङ्गादि ॥ ३१८ ॥
"नागरातिविषामुस्तबालकैरन्ध्रवैः शृतम् ।
कुमारं पाययेत् प्रातः सर्व्वातीसारनाशनम् ॥"
इति नागरादि ॥ ३१९ ॥
"विल्वमूलकषायेण लाजाञ्चैव सशर्करान् ।
आलोड्य पाययेद्बालं छर्द्यतीसारनाशिनीः ॥"
इति सशर्करलाजयुक्तविल्वमूलकषायः ॥ ३२० ॥
"पटोलत्रिफलारिष्टहरिद्राक्वथितं पिबेत् ।
क्षतविस्फोटवीसर्पज्वराणां शान्तये शिशुः ॥"
इति पटोलादि ॥ ३२१ ॥ ❋ ॥

अथ विषे ।

"कटभ्यर्जुनशौरीयग्रेलुचीरिहसल्लकैः ।
कषायकल्कचूर्णाः स्युः कीटलूतास्रशापहाः ॥"
इति कटभ्यादि ॥ ३२२ ॥ इति चक्रपाणिदत्तः ॥

पाचनं, त्रि, पाचयिता । इति मेदिनी । ने, ६१ ॥

अथ त्रिशिष्टद्रव्याधीर्द्धे विशिष्टं पाचनद्रव्यमाह ।
"अलं घनसपाकाय फलं कदलसम्भवम् ।
कदलस्य तु पाकाय बुधैरभिहितं घृतम् ॥
घृतस्य परिपाकाय जम्बीरस्य रसो हितः ॥

नारिकेलफलतालबीजयोः
पाचकं सपदि तद्गुरुं विदुः ।
क्षीरमाशु बहुकारपाचनं
चारमच्यनि हरीतकी हिता ॥
मधूकमालूरकृपाद्रनानां
परूषखर्ज्जूरकपित्थकानाम् ।
पाकाय पेयं पिचुमर्द्दबीजं
घृतेऽपि तक्रेऽपि तदेव देयम् ॥
खर्ज्जूरशृङ्गाटकयोः प्रशस्तं
विल्वौषधं कुच्च च भद्रमुस्तम् ।
यच्चाङ्गवोधिद्रफलेषु प्रीतं
क्लेदे तथा वार्युषितं प्रशीतम् ॥
तद्गुलेषु पयसः पयो हितं
दीप्यकन्तु चिपिटे कणायुतम् ।
यष्टिका दधिजलेन जीर्य्यते
कर्कटी च सुमनेषु गौर्य्यते ॥"

सुमनेषु गोधूमेषु । गौर्य्यते कथ्यते ।

गोधूममाषहरिमन्थसतीलमुद्ग-
पाकी भवेज्झटिति मातुलपुत्रकेण ।
खण्डश्च खण्डयति सावभवन्तजीर्णं
तैलं क्षुलत्यथवा विदधाति जीर्णम् ॥

मातुलपुत्रकः धुत्तूरफलम् ॥

कङ्गूश्यामाकनीवाराः क्षुलत्यक्षाविलम्बितम् ।
दध्नो जलेन जीर्य्यन्ति वैदला: काञ्जिकेन तु ॥
पिष्टान्नं घृतलं वारि क्षुधरां सैन्धवं पचेत् ।
माषेक्षुरीनिम्बमूलं पायसं मुद्गयूषकैः ॥
वटो वेणुवारान्तवल्लेन फेनी-
शूर्णं पर्पटः शिग्रुबीजेन याति ।
कणान्तलतो लड्डुकापूपशष्कुली-
विपाको भवेच्छ्क्तुलीभक्षणेच्छ ॥

वेसवारः वेसर इति लोके । तद्यथा,—

स्नेहो निशाहिङ्गुलवङ्गकैला-
धन्याकजीरार्द्रकनागराणि ।
व्यल्लोषणं सैन्धवपर्णमम्लं
यथोचितं संस्कृतये प्रशीतमिति ॥

शष्कुली शष्कुलः पाकविशेषः । मण्डः माण्ड इति लोके ।

किमत्र चित्रं यदुमस्तुल्यमांस-
भोजी सुखी काञ्जिकपानतः स्यात् ।
इत्यद्भुतं केवलवह्निपक्व-
मांसेन मत्स्यः परिपाकमेति ॥

आममान्नफलं मौनं तद्बीजं पिण्डिते हितम् ।
शूर्म्मसांसं यवचारात्क्षीरं पाकमुपेति हि ॥
कपोतपारावतनीलकण्ठ-
कपिञ्जलानां पिशितानि सुक्ष्मा ।
कासस्य मूलं परिपीय पिष्टं
सुखी भवेन्नात्र बहुक्षो हि दृष्टम् ॥
कपोतो धवलपाण्डुः ।
शाकानि सर्व्वाण्यपि यान्ति पाकं
चारेण सद्यस्तिलनालजेन ।
चञ्चूकचिञ्चार्द्धलनास्तुकानां
शायत्तिनारक्षाधितेन पाकः ॥
चञ्चूक चेचु इति लोके । शायत्री खदिरः ॥

प्रलङ्किकाकेसुककारवेल्ली-
वार्त्ताकुवंशाङ्कुरमूलकानाम् ।
उपोदिकालाबुपटोलकानां
सिद्धार्थको मेथरवस्य पक्ता ॥

मेथरवः चवराई इति लोके ।

विपच्यते शूरणकं गुड़ेन
तथालुकं तण्डुलचोदकेन ।
पिण्डालुकं जीर्य्यति कोरदूषात्
कशेरुपाकः किल नागरेण ॥
अवणस्तण्डुलतोयात् सर्पिर्जलीरकाद्यस्तात् ।
मरिचादपि तच्छीघ्रं पाकं यात्येव काञ्जिका-
त्तैलम् ॥
क्षीरं जीर्य्यति तक्रेण तद्गर्यं कोष्णमण्डकात् ।
माहिषं माणिमन्थेन शुक्लचूर्णेन तद्धि ॥

मण्डकः माण्डे इति लोके ।

रसाला जीर्य्यति क्षीरात् खण्डं नागरभक्षणात् ।
सिता नागरसङ्गेन तथेक्षुचाद्विकारसात् ॥
जरामिरा गैरिकचन्दनाभ्या-
मभ्येति शीघ्रं सुनिभिः प्रशीतम् ।
उष्णेन शीतं शिशिरेण चोष्णं
जीर्णो भवेत् चारगणस्तथाक्षैः ॥
इरा मदिरा ।
तप्तं तप्तं हेम वा तारमम्भो
तोये क्षिप्तं सप्तकृत्वस्तदम्भः ।
पीत्वाजीर्णं तोयजातं निहन्या-
त्तत्र क्षौद्रं भद्रमुस्तं विशेषात् ॥

तत्र तोयाजीर्णे । इति भावप्रकाशे जठराग्निविकाराजीर्णविसूचिकालसकविलम्बिका-चिकित्सा ॥

पाचनः, पुं, (पाचयतीति । पच् + णिच् + "नन्दि-ग्रहीति ।" ३।१।१३४ । इति ल्युः ।) अग्निः । इति मेदिनी । ने, ६० ॥ अम्लरसः । इति हेमचन्द्रः । ६ । २४ ॥ रक्तैरण्डः । इति राज-निर्घण्टः ॥

पाचनकः, पुं, (पाच्यतेऽनेनेति । पच् + णिच् + करणे ल्युट् । ततः संज्ञायां कन् ।) टङ्कणः । इति हेमचन्द्रः । ४ । १० ॥

पाचनी, स्त्री, (पाच्यते सुक्तद्रव्यादिकं यया । पच् + णिच् + ल्युट् । स्त्रियां ङीप् ।) हरीतकी । इति मेदिनी । ने, ६१ ॥ (पाचयतीति व्युत्पत्त्या परिपाचके वाच्यलिङ्गः । यथा, भावप्रकाशे पूर्व्वखण्डे १ भागे ।

"कण्टकारी सरा तिक्ता कटुका दीपनी लघुः । रूक्षोष्णा पाचनी कासश्वासज्वरकफानिलान् ॥")

पाचलं, क्ली, (पाचयतीति । पच् + णिच् + बाहुलकात् कलन् । यद्वा, पाचं पाचनं लातीति । ला + कः ।) पाचनम् । इति मेदिनी । ले, १०६ ॥

पाचलः, पुं, (पाचयतीति । पच् + णिच् + बाहुल-कात् कलन् ।) पाचकः । अग्निः । राघन-द्रयम् । वायुः । इति शब्दरत्नावली ॥

पाची, स्त्री, (पाचयति खपचरसादिप्रलेपादिना परिपक्वयति व्रणानिति । पच् + णिच् + "सर्व्व-धातुभ्य इन् ।" उणां ४ । ११७ । इति इन् । "ह्रस्वादिकारादक्षिनः ।" ४ । १ । ४५ । इत्यस्य वार्त्तिकोक्त्या ङीष् ।) लताविशेषः । पाचि इति पचे इति च हिन्दी भाषा । तत्पर्य्यायः । मर-कतपत्री २ हरितलता ३ हरितपत्रिका ४ पत्री ५ सुरभिः ६ माञ्जरिष्टा ७ गारुत्मत-पत्रिका ८ । अस्या गुणाः । कटुत्वम् । तिक्त-त्वम् । उष्णत्वम् । कषायत्वम् । वातदोषग्रह-भूतविकारनाशित्वम् । खर्ज्जदोषप्रशमनत्वम् । व्रणेषु हितत्वञ्च । इति राजनिर्घण्टः ॥

पाचः, [स्] क्ली, (पाति रक्षतीति पात्यनेनेति वा । पा रक्षणे + "पातेर्वसे च्युट् च ।" उणां ४ । २०२ । इति असुन् च्युड़ागमश्च ।) बलम् । इत्युणादिकोषः ॥ (यथा, ऋग्वेदे । ८।४६।२५।

"आ नो वायो महे तने याहि मखाय पाजसे ॥")

पाचकपालः, त्रि, (पचकपालस्यायमिति । "तस्ये-दम् ।" ४ । ३ । १२० । इत्यण् ।) पचकपाल-यागसम्बन्धी ॥ इति व्याकरणम् ॥

पाञ्चजन्यः, पुं, (पञ्चजने दैत्यविशेषे भवः । "पञ्च-जनादुपसंख्यानम् ।" ४ । ३ । ५८ । इत्यस्य वार्त्तिकोक्त्या ञ्यः ।) विष्णुशङ्खः । इत्यमरः । १।१।२६ ॥ "पञ्चजनो नाम दैत्यः समुद्रे तिमि-रूप आसीत् तदस्थिजत्वात् ।" इति भरतः ॥ (यथा, गीतायाम् । १ । १५ ।

"पाञ्चजन्यं हृषीकेशो देवदत्तं धनञ्जयः ।
पौण्ड्रं दध्मौ महाशङ्खं भीमकर्म्मा वृकोदरः ॥"

अस्य विवरणम् यथा, हरिवंशे । ८।१५—१७।

"समुद्रः प्रत्युवाचेदं दैत्यः पञ्चजनो महान् ।
तिमिरूपेण तं बालं अस्तवानिति माधव ! ॥
स पञ्चजनमाखाद्य जघान पुरुषोत्तमः ।
न चास्वाद तं बालं गुरुपुत्रं तदाच्युतः ॥
स तु पञ्चजनं हत्वा शङ्खं लेभे जनार्द्दनः ।
यः स देवमनुष्येषु पाञ्चजन्य इति श्रुतः ॥"

पञ्चभिः काश्यपवशिष्ठप्राणाङ्गिरसच्यवनैर्जने-र्निर्वृत्तः । इति व्यण् ।) अग्निः । इति मेदिनी । ये, १२२ ॥ (यथा, महाभारते । ३।२१६।१-५।

"काश्यपो ह्यथ वाशिष्ठः प्राणश्च प्राणपुत्रकः ।
अग्निराङ्गिरसश्चैव च्यवनश्चिसुवर्चकः ॥
अचरत् स तपस्तीव्रं पुत्रार्थे बहुवार्षिकम् ।
पुत्रं लभेयं धर्म्मिष्ठं यशसा ब्रह्मणा समम् ॥
महाव्याहृतिभिर्धीतः पञ्चभिस्त्रैलदा त्वघ ।
जज्ञे तेजो महार्चिष्मान् पञ्चवर्णः प्रभावनः ॥
समिद्धोऽग्निः शिरस्तस्य बाहू सूर्य्यनिभौ तथा ।
खड्गनेत्रे च सुवर्णाभे कक्षे जङ्घे च भारत ! ॥
पञ्चवर्णः सुतपसा कृतस्त्रैः पञ्चभिर्जनैः ।
पाञ्चजन्यः श्रुतो देवः पञ्चवंशकरस्तु यः ॥"

हारीतसनिवंशीयस्य दीर्घवृत्तेः पुत्रः । इति स्कन्दपुराणे सह्याद्रिखण्डम् । १ । २७ । ४२ ॥)

पाञ्चजन्यधरः, पुं, (पाञ्चजन्यं तदाख्यं प्रसिद्धशङ्खं धरतीति । धृ + अच् ।) विष्णुः । इति हारावली ॥

पाञ्चलिका, स्त्री, (पञ्चाली + स्वार्थे कन् । ततः कन् ततोऽपि अत इत्वञ्च ।) पञ्चालिका । इति भरतहिरूपकोषः ॥

पाञ्चशब्दिकं, क्ली, (पञ्चभिः शब्दैर्निर्वृत्तम् । "तेन निर्वृत्तम्" ५ । १ । ७९ । इति ठक् ।) पञ्चप्रकारवाद्यम् । यथा, स्कान्दे रेवाखण्डे ।

"अङ्गं चर्मनखैश्चैव तन्त्रकं कांस्यकं तथा ।
फुत्कृतश्चेति मुनिभिः कथितं पाञ्चशब्दिकम् ॥"

पाञ्चार्धिकः, पुं, (पञ्चार्धाः सन्त्यत्र । "अत इनिठनौ ।" ५ । २ । ११५ । इति ठन् ।) पाशुपतः । यथा,—

"पाञ्चार्धिकः पाशुपतश्चिह्नरूपः स्फूर्त्तिमान्मतः ॥"
इति चिकाण्डशेषः ॥

पाञ्चालं, क्ली, (पञ्चाल एव । पञ्चाल + स्वार्थे अण् ।) शास्त्रम् । यथा,—

"पिङ्गकूर्नृपपुत्र्या द्वार्हत्तिचित्तेन पुरञ्जनः ।
राष्ट्रं दक्षिणपञ्चालं याति श्रुतधरान्वितः ॥
इति श्रीभागवते ।४। पुरञ्जनोपाख्याने ।२५।५०॥
"पञ्चानां विषयाणामन्यतोऽनवगतानां प्रकाशनायालमिति पञ्चालं शास्त्रम् ।" इति ।
"प्रवृत्तञ्च निवृत्तञ्च शास्त्रं पञ्चालसंज्ञकम् ।"
इति च तट्टीकायां श्रीधरस्वामी ॥

अत्र पञ्चालमिति पाठः किन्तु स्वार्थे ष्णप्रत्यये पाञ्चालमपि भवति ॥

पाञ्चालः, त्रि, (पञ्चाले तदाख्यया प्रसिद्धे प्रदेशे भवः । "तत्र भवः ।" ४ । ३ । ५३ । इत्यण् ।) पञ्चालदेशोद्भवः ॥

पाञ्चालः, पुं, (पञ्चभिः प्रधानाभिर्नदीभिरलति पर्य्याप्नोतीति पञ्चालः । ततः स्वार्थे अण् ।) देशविशेषः । स तु द्रुपदराजनगरम् । अधुना फरक्कावाद इति ख्यातः ॥ (यथा, महाभारते । १ । १३८ । ३ ।

"पाञ्चालराजं द्रुपदं गृहीत्वा रणमूर्द्धनि ।
पर्य्यानयत भद्रं वः सा स्यात् परमदक्षिणा ॥"

तद्देशवासिषु पुंसु भूम्नि ।) यथा,—

"पाञ्चालाश्चेदिमत्स्याश्च शूरसेनाः पटच्चराः ।"
इत्यादि विराटपर्व्व ॥

(वसुदत्तस्य सहचरविशेषः । यथा, हरिवंशे । २३ । २२ ।

"पाञ्चालकण्डरीकाभ्यां तस्य सख्यमभूत्तदा ॥")

पाञ्चालिका, स्त्री, (पाञ्चाली + स्वार्थे कन् । ततो ह्रस्वश्च । वस्त्रदन्तादिकृतपुत्तलिका । तत्पर्य्यायः । पुत्तिका २ । इत्यमरः ॥ पञ्चालिका ३ । इति भरतः ॥ शालभञ्जी ४ । इति हेमचन्द्रः ॥ पाञ्चाली ५ शालभञ्जिका ६ । इति जटाधरः ॥ (रीतिविशेषः । तल्लक्षणं यथा, साहित्यदर्पणे । ६ । ५ ।

"————वर्णैः पोषैः पुनर्द्वयोः ।
समस्तपञ्चपदी वन्यः पाञ्चालिका मता ॥")

पाञ्चाली, स्त्री, (पञ्चभिर्वर्णैरलतीति । अल + अच् । गौरादित्वात् ङीष् ।) पाञ्चालिका । (यथा, देवीभागवते । ४ । १६ । ४ ।

"यस्याया मोहितश्चाहं सदावर्त्ते परात्मगः ।
परवान् दारुयाञ्चाली मायिकस्य यथा वशे ॥")

(पाञ्चाले भवा । पाञ्चाल + अण् । स्त्रियां ङीप् ।) पाण्डवपत्नी । तत्पर्य्यायः । कृष्णा २ पाण्डुपुत्रिका ३ पार्व्वती ४ द्रौपदी ५ याज्ञसेनी ६ वेदिजा ७ । इति जटाधरः ॥ सैरन्ध्री ८ नित्ययौवना ९ । इति हेमचन्द्रः ॥ (यथा, महाभारते । १ । १६८ । ४१ ।

"कुमारी चापि पाञ्चाली वेदीमध्यात् समुत्थिता ॥"

अस्य जन्मादिविवरणं द्रौपदीशब्दे द्रष्टव्यम् ॥ रीतिविशेषः । पाञ्चालानां प्रियत्वादेवास्तत्त्वात् । यथा, साहित्यदर्पणे । ९ । २ ।

"वैदर्भी चाथ गौड़ी च पाञ्चाली लाटिका तथा ॥"

एतल्लक्षणं यदाह भोजः ।

"समस्तपञ्चपदामोजःकान्तिसमन्विताम् ।
मधुरां सुकुमारार्थां पाञ्चालीं कवयो विदुः ॥")

पाट्, व, (पाटयति कार्य्यान्तरप्रेरणात् पूर्व्वकार्य्यं क्षेप्स्यतीति । पट + णिच् + क्विप् ।) सम्बोधनम् । इत्यमरः । ३ । ४ । ७ ॥

पाटकः, पुं, (पाटयति दीप्यतीति । पाट + ण्वुल् ।) महाकिङ्कुः । कटकान्तरम् । वाद्यम् । अचादिचालनम् । मूलप्रत्ययपचयः । रोधः । इति मेदिनी ॥ ग्रामैकदेशः । इति हेमचन्द्रः ॥ (पाटयति छिनत्तीति । छेदके । भेदके, त्रि । यथा, हरिवंशे । १७१ । १४ ।

"अहं तमो घनीभूतमहमेव च पाटकः ॥")

पाटचरः, पुं, (पाटयन् छिन्दन् चरतीति । चर + पचाद्यच् । पृषोदरादित्वात् साधुः ।) चौरः । इत्यमरः ॥ (यथा, प्रद्युम्नविजये । ७ अङ्के ।

"मन्त्रिन् ! कुलिङ्गवाहश्चिकत्सं किलैतस्य पापपाटचरस्य ॥")

पाटनं, क्ली, (पट + णिच् + भावे ल्युट् ।) छेदनम् । यथा,—

"अस्थिभङ्गं गवां कृत्वा लाङ्गूलच्छेदनं तथा ।
पाटने कर्णरन्ध्राणां मासार्द्धन्तु यवान् पिबेत् ॥"
इति प्रायश्चित्ततत्त्वे यमः ॥

पाटलं, क्ली, (पाटलो वर्णोऽस्यास्तीति । पाटल + अर्श आदित्वादच् ।) पाटलीपुष्पम् । इत्यमरः ॥ गोलावाख्यपुष्पमिति केचित् ॥ (यथा, भागवते । ४ । ६ । १४ ।

"पाटलाशोकवकुलैः कुन्दैः कुरवकैरपि ॥"

पाटलेति केचित् ॥)

पाटलः, पुं, (पाटयतीति । पट + णिच् + कृषादित्वात् कलच् ।) श्वेतरक्तवर्णः । गोलाविरङ्ग इति भाषा । शालुधान्यम् । इत्यमरः ॥ अस्य गुणाः । अतुष्यत्वम् । वह्निनिष्यन्दित्वम् । त्रिदोषकारित्वञ्च । इति राजवल्लभः ॥ तद्वर्णयुक्ते, त्रि ॥ (यथा, रघौ । २ । २६ ।

"स पाटलायां गवि तस्थिवांसं
धनुर्द्धरः केसरिणं ददर्श ।

अधित्यकायामिव धातुमत्यां
लोध्रद्रुमं सानुमतः प्रफुल्लम् ॥")

पाटलद्रुमः, पुं, (पाटलस्य पाटलपुष्पस्य द्रुमो वृक्षः । यद्वा, पाटलो द्रुमः इति नित्यकर्म्मधारयः ।) पुन्नागवृक्षः । इति राजनिर्घण्टः ॥

पाटला, स्त्री, (पाटलो वर्णोऽस्त्यस्याः । पाटलवर्णत्वादेवास्यास्तथात्वम् ।) दुर्गा । यथा,—

"अपर्णैकपर्णा च पाटला पाटलावती ॥"

इति तन्त्रसारे तस्याः शतनामस्तोत्रम् ॥ पुष्पवृक्षविशेषः । पारुल इति भाषा ॥ तत्पर्य्यायः । पाटलिः २ अमोघा ३ काचस्थाली ४ फलेरुहा ५ कुबेराक्षी ६ सुभगा ७ । इत्यमरः ॥ ताम्रपुष्पी ८ कुक्षिला ९ सुपुष्पिका १० वसन्तदूती ११ स्थाली १२ स्थिरगन्धा १३ अम्बुवासी १४ कालदूती १५ । इति राजनिर्घण्टः ॥ मधुदूती १६ कालास्थली १७ अलिवल्लभा १८ । इति भावप्रकाशः ॥ कामदूती १९ कुक्षी २० तोयाधिवासिनी २१ । इति रत्नमाला ॥ अस्या गुणाः । तिक्तत्वम् । कटुत्वम् । उष्णत्वम् । कफवातशोषाध्मानवमिथासन्निपातनाशित्वञ्च । इति राजनिर्घण्टः ॥ लघुत्वम् । अरुक्षत्वम् । दोषत्रयारुचिहिक्काश्वासनाशित्वञ्च ॥ तत्पुष्पगुणाः । कषायत्वम् । मधुरत्वम् । हिमत्वम् । लघुत्वम् । कफपित्तनाशित्वञ्च । तत्फलगुणाः । पित्तातिसारदाहनाशित्वम् । हिक्कासम्पित्तकारित्वञ्च । इति भावप्रकाशः ॥ * ॥ तदुत्पत्तिर्यथा,—

"गते ब्रह्मणि सर्व्वोऽपि तपः संहृत्य तं तदा ।
लिङ्गं चिन्तयने लग्नां प्रतिष्ठाप्य चचार ह ॥
विचरन्तं तदा भूयो महेशं कुसुमायुधः ।
आरात् स्थित्वाग्रतो धन्वी सन्तापयितुमुद्यतः ॥
ततस्तमग्रतो दृष्ट्वा क्रोधाभरतदृग्धरः ।
स्मरमालोकयामास शिखाग्राक्षरणाग्निकम् ॥
आलोकितस्त्रिनेत्रेण मदनो द्युतिमानपि ।
प्रादह्यत तदा ब्रह्मन् पादादारभ्य कृत्स्नवत् ॥
प्रदह्यमानौ चरणौ दृष्ट्वासौ कुसुमायुधः ।
उत्ससर्ज्ज धनुः श्रेष्ठं तच्चकामाथ पञ्चधा ॥
यदासीन्मुष्टिवन्यस्तु रुक्मग्रन्थो महाप्रभः ।
स चम्पकतरुर्जातः सगन्धाढ्यो गुणाकृतिः ॥
नाहस्यानं शुभाकारं यदासीद्वृक्षभूषितम् ।
तज्जातं केशरारण्यं वकुलं नामतो नगैः ॥
या च कोटी शुभा ह्यासीदिन्द्रनीलविभूषिता ।
जाता सा पाटला रम्या भृङ्गराजिविभूषिता ॥"
इति वामने ६ अध्यायः ॥

रक्तलोध्रः । इति शब्दचन्द्रिका ॥

पाटलापुष्पसन्निभं, क्ली, (पाटलापुष्पस्य सन्निभा सादृश्यं यत्र ।) पद्मकाष्ठम् । इति राजनिर्घण्टः ॥

पाटलिः, स्त्री, (पाटि + भावे वन् । पाटो दीप्तिर्न्तं लातीति । ला + "अच इः ।" उणां ४ । १३८ । इति इः । पाटलिपुष्पायां व्रतिश्रीकतायैवास्यास्तथात्वम् ।) पाटलापुष्पवृक्षः । इत्यमरः ॥

(यथा, महाभारते । ७ । २२ । १५ ।
"तन्तु पाटलिपुष्पाणां समवर्णा हयोत्तमाः ।
वहमाना वराजन्त मत्स्यस्यामित्रघातिनः ॥")

पाटलिपुत्रं, क्ली, (पाटलिः पुत्र इव यस्य । बहु-पाटलिवृक्षोत्पत्तिस्थानत्वेनास्य तथात्वम् ।) नगरविशेषः । पाटना इति ख्यातः । तत्पर्य्यायः । कुसुमपुरम् २ । इति हेमचन्द्रः । ४ । ४२ ॥ पुष्पपुरम् ३ पाटलिपुत्रकम् ४ । इति त्रिकाण्ड-शेषः ॥ (इदन्तु गङ्गातीरस्थम् । यथा हितोप-देशे । "अस्ति भागीरथीतीरे पाटलीपुत्रनाम-धेयं नगरम् ॥"
इदमेव पुरा मगधानां राजधानी आसीत् । अत्यद्भुतदर्शननागो भूपतेः पुत्राणां नीति-विद्याधिगमाय विदत्कुलचूड़ामणिना विष्णु-शर्म्मणा पञ्चतन्त्रहितोपदेशादयो ग्रन्था विर-चिताः ॥)

पाटली, स्त्री, (पाटं दीप्तिं लातीति । ला + कः । स्त्रियां ङीप् ।) कटभीवृक्षः । सुष्ककवृक्षः । इति राजनिर्घण्टः ॥ (यथा, इन्द्रजाले १ अध्याये ।
"पुष्पे वृक्षजटामूलं मुखस्थं कारयेद्बुधः ।
ताम्बूलादौ प्रदातव्यं वश्या भवति निश्चितम् ।
तथैव पाटलीमूलं ताम्बूलेन तु वश्यकृत् ॥")

पाटवं, क्ली, (पटोर्भावः कर्म्म वा । पटु + "इग-न्ताच्च लघुपूर्ब्बात् ।" ५ । १ । १३१ । इत्यण् ।) पटुता । यथा । "पाटवं संस्कृतोक्तिषु ।" इति हितोपदेशः ॥ (दार्ढ्यम् । यथा, पञ्चतन्त्रे ।३।६४।
"विचिन्त्यते कदाचित् धीः कर्म्मणा भोग-दायिना ।
पुनः समाहिता सा स्यात् तदैवाभ्यासपाट-वात् ॥")
आरोग्यम् । इति राजनिर्घण्टः ॥ (पटोः भावः पाटवः । इति सिद्धान्तकौमुदी ॥)

पाटविकः, त्रि, (पाटवं पटुत्वमस्यास्य । पाटव + ठन् ।) पटुः । धूर्त्तः । इति त्रिकाण्डशेषः ॥

पाटहिका, स्त्री, (पाटहं पटहावयवः तद्वदा-कृतिरस्यस्याः । पाटह + ठन् । टकारवाद्या-कृतिसदृशत्वादेवास्यास्तथात्वम् ।) गुञ्जा । इति हारावली । १४५ ॥

पाटितं, त्रि, (पाट्यते स्म इति । पट + णिच् + क्तः ।) कृतपाटनम् । तत्पर्य्यायः । दारितम् २ भिन्नम् ३ । इति हेमचन्द्रः ॥ (यथा, सुश्रुते । २ । १६ ।
"पाटितमशु बहुविदारितं वेदनावच्च ॥")

पाटी, स्त्री, (पाटयतीति । पाटि + "सर्व्वधातुभ्य इन् ।" उणां ४ । ११७ । इति इन् । स्त्रियां वा ङीष् ।) वलाशुपः । इति राजनिर्घण्टः ॥ परि-पाटी । अनुक्रमः । यथा, "पाटीं सङ्गणितस्य वक्ष्मि चतुरप्रीतिप्रदां प्रस्फुटाम् ।" इत्यादि लीलावती ॥

पाटीरः, पुं, पटीरः । इति विश्वः । (यथा, सुश्रुन्दमालायाम् । ३२ ।
"लाटीनेत्रपुटीपयोधरघटीरेवातटीदुष्कुटी
पाटीरद्रुमवर्णनेन कविभिर्मूढैर्दिनं नीयते ।
गोविन्देति जनार्द्दनेति जगतां नाथेति कृष्णेति च
व्याहारैः समयस्तदेकमनसां पुंसामतिक्रामति ॥")

पाठ्यं, क्ली, (पठ्यस्य इदम् । "तस्येदम् ।" ४ । ३ । १२० । इत्यण् ।) पठ्यशाकम् । यथा,—
"पाठ्यशाकन्तु मधुरं दुर्जरं गुरुपाकि च ॥"
इति राजवल्लभः ॥
(पाटि + यत् । पाटनीये । क्ली, त्रि ॥)

पाठः, पुं, (पठनमिति । पठ + भावे घञ् ।) विधिना वेदस्याभ्यसनम् । (पठ + णिच् + भावे घञ् ।) शिष्याणामध्यापनम् । तत्पर्य्यायः । महायज्ञः २ ब्रह्मयज्ञः ३ पठनम् ४ पाठना ५ पाठनम् ६ अध्ययनम् ७ अध्यापनम् ८ अध्या-पना ९ अभ्यसनम् १० । इत्यमरभरतौ ॥ निपाठः ११ निपठः १२ । इति सङ्कीर्णवर्गे अमरः ॥ * ॥ माहात्म्यादिपाठे तु ॐ नारा-यणाय नमः ॐ नराय नमः ॐ नरोत्तमाय नमः ॐ देव्यै नमः ॐ सरस्वत्यै नमः ॐ व्यासाय नमः । इति नत्वा पाठ्यम् ।
"नारायणं नमस्कृत्य नरञ्चैव नरोत्तमम् ।
देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥"
इति विधिः ॥

एवञ्च भागवतीयस्तुतौ उदीरयेत् इत्यस्य स्वयन्तथा उदीरयन्तान्यान् पौराणिकानुपशिक्ष-यतीति श्रीधरस्वामिव्याख्यानमनुशासनविरुद्धम् । चैवेति भारतपाठाचकारेण व्यासो लभ्यः । भागवते चैवेत्यत्र व्यास इति साचाल्लिखितम् । जयपदार्थमाह ब्रह्मचारिकाण्डे भविष्यपुराणम् ॥
"अष्टादशपुराणानि रामस्य चरितन्तथा ।
विष्णुधर्म्मादिशास्त्राणि शिवधर्म्माश्च भारत ! ॥
कार्ष्णञ्च पञ्चमो वेदो यन्महाभारतं स्मृतम् ॥"
कार्ष्णं कृष्णद्वैपायनप्रणीतम् ।
"सौराश्च धर्म्मा राजेन्द्र मानवोक्ता महीपते ।
जयेति नाम एतेषां प्रवदन्ति मनीषिणः ॥"
जयत्यनेन संसारमिति जयस्तत्तद्ग्रन्थः । एव-मर्थागवलोकनात् व्याचाराद्वा स्त्रीत्वादेव श्लोकः पठ्यते । मत्स्यसूक्ते वाराहीतन्त्रे च ।
"प्रणवस्यादौ जप्यश्च श्लोकं वा संहितां पठेत् ।
अन्ते च प्रणवं दद्यादित्युवाचादिपूरुषः ॥
सर्व्वत्र पाठे विज्ञेयो ह्यन्यथा विफलं भवेत् ।
सुद्वैतानन्यचित्तेन पठितव्यं प्रयत्नतः ॥
न कार्य्यासक्तमनसा कार्य्यं श्लोकस्य वाचनम् ।
व्याधारे स्थापयित्वा तु पुस्तकं वाचयेत् सुधीः ॥
हस्तसंस्थापनादेव वस्त्रादल्पफलं भवेत् ।
स्वयञ्च लिखितं यत्तु ह्यतिना लिखितन्न यत् ॥
अब्राह्मणेन लिखितं तच्चापि विफलं भवेत् ।
ऋषिच्छन्दादिकं नास्य पठेत् श्लोकं विचक्षणः ॥
श्लोके न दृश्यते यत्र प्रणवन्नासमाचरेत् ।
सङ्कलिते श्लोकपाठे संख्यां कृत्वा पठेत् सुधीः ॥
अर्द्धार्द्धं प्राप्य विरमेन्न तु मध्ये कदाचन ।
कृते विरामे मध्ये तु अध्यायादिं पठेन्नरः ॥"

ततश्च मार्कण्डेयपुराणीयदेवीमाहात्म्यादौ ऋषिच्छन्दादिकं पठेत् । तद्यथा । प्रथम-चरितस्य ब्रह्म ऋषिर्म्महाकाली देवता गायत्री छन्दो नन्दा शक्तिः रक्तदन्तिकाबीजमग्निस्तत्त्वं महाकालीप्रीत्यर्थं जपे विनियोगः । मध्यम चरितस्य विष्णुर्ऋषिर्म्महालक्ष्मीर्देवतानुष्टुप् छन्दः शाकम्भरी शक्तिर्दुर्गा बीजं सूर्य्यस्तत्त्वं महालक्ष्मीप्रीत्यर्थं जपे विनियोगः । उत्तरचरि-तस्य रुद्र ऋषिः सरस्वती देवता उष्णिक् छन्दो भीमा शक्तिर्भ्रामरीबीजं वायुस्तत्त्वं सरस्वती-प्रीत्यर्थं जपे विनियोगः ॥ नैयतकालिककल्प-तरौ भविष्यपुराणम् ॥
"इतिहासपुराणानि श्रुत्वा भक्त्या महीपते ।
मुच्यते सर्व्वपापेभ्यो ब्रह्महत्यादिभिर्विभो ॥
ब्राह्मणं वाचकं विद्यान्नान्यवर्णञ्चमादरात् ।
श्रुत्वान्यवर्णजाद्राजन् ! वाचकान्नरकं व्रजेत् ॥"
तथा ।
"देवार्च्चामग्रतः कृत्वा ब्राह्मणानां विशेषतः ।
ग्रन्थिञ्च शिथिलं कुर्य्यादाचकः क्षुरनन्दन ॥
पुनर्ब्बध्नीत तन्नूत्रं न मुक्त्वा धारयेत् क्वचित् ।
हिरण्यं रजतं गाञ्च तथा कांस्योपदोहनाः ॥
दत्त्वा तु वाचकायेह श्रुतस्याप्नोति यत् फलम् ।"
कांस्योपदोहनाः कांस्यक्रोड़ाः ।
"वाचकः पूजितो येन प्रसन्नस्तस्य देवताः ॥"
तथा ।
"ज्ञात्वा सर्व्वसमाप्तिञ्च पूजयेद्वाचकं बुधः ।
आत्मानमपि विक्रीय य इच्छेत् सफलं क्रतुम् ॥"
तथा ।
"विस्वरमहतं ग्राम्यं सस्वराक्षरपदन्तथा ।
कलस्वरसमायुक्तं रसभावसमन्वितम् ॥
बुध्यमानः सदर्थं वै ग्रन्थार्थं कृत्स्नशो नृप ।
ब्राह्मणादिषु सर्व्वेषु ग्रन्थार्थञ्चार्पयेन्नृप ॥
य एवं वाचयेद्ब्रह्मन् स विप्रो व्यास उच्यते ॥"
तथा ।
"सप्तस्वरसमायुक्तं काले काले विशाम्पते ।
प्रदर्शयन्नृणान् सर्व्वान् वाचयेद्वाचको नृप ॥"
इति तिथ्यादितत्त्वम् ॥ * ॥

पाठस्याष्टादशदोषा यथा,-
"मूकिलं भीतमुद्बुद्धमत्यक्तमनुनासिकम् ।
विस्वरं विरसञ्चैव विश्लिष्टं विषमाहतम् ॥
काकस्वरं शिरस्तिं तथा स्यानविवर्ज्जितम् ।
आकुलं तालहीनञ्च पाठदोषाश्चतुर्दश ॥
संगीतं शिरसः कम्पमस्पष्टकण्ठमनर्थकम् ॥"
इति मार्कण्डेयपुराणम् ॥ * ॥

अध्ययनक्रमो यथा,—
"आचम्य प्रयतो नित्यमधीयीत उदङ्मुखः ।
उपसंगृह्य तत्पादौ वीक्ष्यमाणो गुरोर्मुखम् ॥"
अध्यापनक्रमो यथा,—
"अधीष्व भो इति ब्रूयादिरामोऽस्तिति चाचमेत् ।
प्राक् कूलान् पर्य्युपासीन पवित्रैश्चैव पावित्रः ॥
प्राणायामैस्त्रिभिः पूतस्तत ओङ्कारमर्हति ।
ब्राह्मणः प्रणवं कुर्य्यादन्ते च विधिवद्द्विजाः ॥

कुर्य्यादध्यापनं नित्यं स ब्रह्मादीनि पूर्व्वतः ।
सर्व्वेषामेव भूतानां वेदश्चक्षुः सनातनः ॥
अधीयीताध्ययन्नित्यं ब्राह्मण्याद्वीयतेऽन्यथा ॥"
इति कौर्म्मे उपविभागे १२ अध्यायः ॥ * ॥
पाठनिषेधकालो यथा । अहर्गेऽनध्यायो न हृष्टोपरागमात्रविषयः ।
"ब्राह्मं नक्षत्रमैन्द्रञ्च राज्ञो राष्ट्रस्य च क्षतके ।"
इति मनुवचनेन सामान्यतो निषेधात् ॥
एष ब्राह्मानध्यायो ग्रस्तास्तविषय इति मिताक्षरा अन्यत्र त्वहोरात्रमनध्यायो याज्ञवल्क्यात् । यथा,—
"सन्ध्यागर्জ্জितनिर्घातभूकम्पोल्कानिपातने ।
समाप्य वेदं युनिश्चमारण्यकमधीत्य च ॥
मध्यदिने चतुर्दश्यामष्टम्यां राहुदर्शने ।
ऋतुसन्धिषु सुप्ता वा आह्निकं प्रतिगृह्य च ॥"
द्युनिशमहोरात्रम् । चैत्रश्रावणमार्गशीर्षाणामादिप्रतिपदो नित्याः इति ब्रह्मचारिकाण्डधृतहारीतवचने एतासामनध्याये नित्यत्वाभिधानादनासां काम्यत्वम् । आदिप्रतिपदः शुक्लप्रतिपदः ॥
"सा च यौधिष्ठिरी सेना गर्জ্জेयग्रस्तताडिता ।
प्रतिपत्पाठशीलानां विद्येव तनुतां गता ॥"
इति व्यासवचनमपि तावन्मात्रपरम् ॥ * ॥
गोत्पातोल्काकालिकानध्याया यथा,—
आकालिकनिर्घातभूकम्पराहुदर्शनोल्का इति आकालिका इति । निमित्तकालमारभ्य परेद्युर्यावत् स एव कालस्तावत्कालस्तच्च भवाः ॥ तथा,—
"विद्युत्स्तनितवर्ज्जेषु महोल्कागाश्च संप्लवे ।
आकालिकमनध्यायमेतेषु मनुरब्रवीत् ॥" * ॥
उल्कादिषु प्रतिप्रसवमाह मनुः ।
"वेदोपकरणे चैव स्वाध्याये चैव नित्यके ।
नानुरोधोऽस्त्यनध्याये होममन्त्रेषु चैव हि ॥"
पराशरभाष्ये कूर्म्मपुराणम् ।
"अनध्यायस्तु नाङ्गेषु नेतिहासपुराणयोः ।
न धर्म्मशास्त्रेष्वन्येषु पर्व्वस्वेतानि वर्জ্জयेत् ॥"
नारदः ।
"अयने विषुवे चैव अयने बोधने हरेः ।
अनध्यायस्तु कर्त्तव्यो मन्वादिषु युगादिषु ॥"* ॥
सन्ध्यागर्জ্জने श्राद्धचिन्तानिन्दामाह छत्रचिन्तामणौ दुर्व्वासाः
"सन्ध्यायां गर्জ্জिते मेघे श्राद्धचिन्तां करोति यः ।
चत्वारि तस्य नश्यन्ति आयुर्विद्या यशो बलम् ॥
प्रादुष्कृतेष्वग्निषु तु विद्युत्स्तनितनिस्वने ।
सन्ध्योतिः स्नादनध्याय इत्याह भगवान् मनुः ॥"
इति मनुवचनं वर्षाविषयम् ॥*॥
अश्मन्यादिषु विशेषमाह हेमाद्रिधृतापस्तम्बः ।
"उदयास्तमिते वापि सुकूर्म्मश्वयगामि यत् ।
तद्दिनं तदहोरात्रमनध्यायविदो विदुः ॥
केचिदाहुः क्वचिद्देशे यावत्तु दिननाड़िकाः ।
तावदेव त्वनध्यायो न तन्निम्ने दिनान्तरे ॥"
तद्दिनं तां तिथिं प्राप्येत्यर्थः । दिनान्तरे तिथ्यन्तरे । अत्र पूर्व्ववचनमुत्तरमीमांसाध्यायिभिः परिगृहीतम् । परवचनन्तु अन्यग्रन्थपरम् । यत्तु निर्णयामृतधृतम् ।
"प्रतिपच्छ्रमात्रेण कलामात्रेण चाष्टमी ।
दिनं दूषयते सर्व्वं सुरा गोमद्यं यथा ॥"
तद्दूषयत इत्यभिधानात् पूर्व्ववर्त्तितामात्रेण सर्व्वदिनदूषणाय । राजमार्त्तण्डे ।
"प्रे को चे चा द्वितीयास्ताः प्रेतपक्षे गते तु याः ।
या तु कोजागरे जाते चैत्रावस्थाः परेऽपि याः ॥
चातुर्मास्ये समाप्ते च द्वितीया या भवेत्तिथिः ।
सर्व्वास्वेतास्वनध्यायः पुराणैः परिकीर्त्तितः ॥"
इति तिथ्यादितत्त्वम् ॥
पाठकः, त्रि, (पाठयति अध्यापयतीति । पठ+णिच्+ण्वुल् ।) उपाध्यायः । इति हेमचन्द्रः । १ । ७८ ॥ (यथा, महाभारते । ३ । ३१२ । १०५ ।
"पैठकाः पाठकाश्चैव ये चान्ये शास्त्रचिन्तकाः ।
सर्व्वे व्यसनिनो मूर्खा यः क्रियावान् स पण्डितः ॥")
धर्म्मभाणकः । इति त्रिकाण्डशेषः ॥ (पठतीति । पठ+ण्वुल् । वाचकः । अर्थेता ।
"चर्व्वणं गिलनञ्चापि कासितं श्वासितन्तथा ।
नीचोच्चश्चैव गम्भीरं वर्জ্জयेत् पाठकः सुधीः ॥"
इति हारीते प्रथमस्थाने प्रथमेऽध्याये ॥)
पाठभूः, स्त्री, (पाठस्य भूर्भूमिः स्थानमित्यर्थः ।) ब्रह्मारण्यम् । वेदादिपाठस्थानम् । इति त्रिकाण्डशेषः ॥
पाठमञ्जरी, स्त्री, (मञ्जु सुन्दरं यथा तथा रायति शब्दायते इति । मञ्जु+रै+कः । स्त्रियां ङीप् । पृषोदरादित्वात् लोपः । ततः पाठस्य मञ्जरी वाचिकेव ।) शारी पक्षिणी । इति शब्दमाला ॥
पाठशाला, स्त्री, अध्ययनगृहम् । पाठस्य अध्ययनस्य शाला गृहम् । इति षष्ठीतत्पुरुषसमासनिष्पन्ना ॥
पाठशालिनी, स्त्री, (पाठेन शास्त्रेण शालते भ्राजते इति । शाल+णिनिः+ङीप् ।) शारी पक्षिणी । इति शब्दमाला ॥
पाठा, स्त्री, (पठ्यते बहुगुणवत्तया कथ्यते इति । पठ+कर्म्मणि घञ् । अजादित्वात् टाप् ।) लताविशेषः । आकनादि इति भाषा । तत्पर्य्यायः । अम्बष्ठा २ अम्बष्ठिका ३ प्राचीना ४ पारपेलिका ५ यूथिका ६ स्थापनी ७ श्रेयसी ८ विह्वकर्णिका ९ एकाष्ठीला १० क्षुद्रचेली ११ दीपनी १२ वनतिक्तिका १३ तिक्तपुष्पा १४ दृष्टसित्ता १५ शिम्बिरा १६ दृकी १७ मालती १८ वरा १९ देवी २० वृत्तपर्णी २१ । अस्या गुणाः । तिक्तत्वम् । गुरुत्वम् । उष्णत्वम् । वातपित्तज्वरपित्तदाहातीसारशूलनाशित्वम् । भग्नसन्धानकारित्वञ्च । इति वैद्यकम् ॥ * ॥
"अम्बष्ठा वालिका बाला शटाम्बा वालिकाम्बिका ।
अम्बा च मालिका चैव हृद्यवल्का मयूरिका ॥
गन्धपर्णी चित्रपुष्पी श्रेयसी सुखवाचिका ।
छिन्नपत्री भूरिमल्लिर्विज्ञेया षोड़शाह्वया ॥
अम्बष्ठा सकषायाम्ला कफकण्ठरुजापहा ।
धातामयबलासघ्नी रुचिकृद्दीपनी परा ॥"
इति राजनिर्घण्टः ॥
"पाठाम्बष्ठाम्बष्ठकौ च प्राचीना पारपेलिका ।
एकाष्ठीला रसा प्रोक्ता पाठिका वरतिक्तिका ॥
पाठोष्णा कटुका तीक्ष्णा वातश्लेष्महरी लघुः ।
हन्ति शूलज्वरच्छर्दिकृच्छ्रातीसारहृद्रुजः ॥
दाहकण्डूविषश्वासकृमिगुल्मगलव्रणान् ॥"
इति भावप्रकाशः ॥
पाठिका, स्त्री, (पाठा+स्वार्थे कन् । टापि अत इत्वञ्च ।) पाठा । इति भावप्रकाशः ॥
पाठी, [न्] पुं, (पाठेव आकृतिर्विद्यते यस्य । पाठा+इनिः ।) चित्रकवृक्षः । इत्यमरः ॥ (पाठोऽस्यस्येति । "अत इनिठनौ ।"५।२।११५। इति इनिः ।) पाठविशिष्टः ॥ (कर्म्मोपयोगेनास्य प्रमाणं यथा, मार्कण्डेये । ६८ । २६ ।
"बन्दिनामथ सूतानां विटानां लास्यपाठिनाम् ॥")
पाठीकुटः, पुं, (पाठीं कुटतीति । कुट+"इगुपधज्ञेति ।" ३ । १ । १३५ । इति कः ।) चित्रकवृक्षः । इति राजनिर्घण्टः ॥
पाठीनः, पुं, (पाठिं पृष्ठं नमयतीति । पाठि+नम+णिच्+"अन्येभ्योऽपीति ।"ड । "अन्येषामपि दृश्यते ।" ६ । ३ । १३७ । इति दीर्घः ।) मत्स्यविशेषः । बोयालि इति भाषा । तत्पर्य्यायः । सहस्रदंष्ट्रः २ । इत्यमरः ॥ सहस्रदंष्ट्री ३ बोदालः ४ बदालकः ५ । इति शब्दरत्नावली ॥ (यथा, मनुः । ५ । १६ ।
"पाठीनरोहितावाद्यौ नियुक्तौ हव्यकव्ययोः ॥")
अस्य गुणाः । श्लेष्मलत्वम् । स्निग्धत्वम् । मधुरत्वम् । कषायत्वम् । बल्यत्वम् । हृद्यत्वम् । पाके कटुत्वम् । रोचनत्वम् । वातपित्तनित्त्वञ्च । इति राजवल्लभः ॥ (यथा च ।
"पाठीनः श्लेष्मलो हृद्यो निद्रालुः पित्तिताधृनः ।
दूषयेदस्रपित्तन्तु कुष्ठरोगं करोत्यसौ ॥"
इति सुश्रुते सूत्रस्थाने ४६ अध्यायः ॥)
पाठकः । गुग्गुलुद्रुमः । इति मेदिनी । के, ८८ ॥
पाठ्यं, त्रि, (पठ्यते इति । पठ+"ऋहलोर्ण्यत् ।" ३ । १ । १२४ । इति ण्यत् ।) पठनीयम् । पठितव्यम् । यथा,—
"तिष्ठ रे तिष्ठ कत्थोऽहं कुक्षयामि शठाधमम् ।
अपठ्यं पठतः पाठ्यमधिगोष्ठि शठस्य ते ॥"
इति नैषधे १७ सर्गः ॥
पाणः, पुं, (पण्यते व्यवह्रियतेऽनेनेति । पण+करणे घञ् ।) पाणिः । इति शब्दचन्द्रिका ॥ (पण+भावे घञ् । पणनम् । समयः । यथा, महाभारते । २ । ५७ । ८ ।
"दीयामहे पार्थिव ! मा विशङ्का
कुरुष्व पाणस्य चिरस्य मा क्षयाः ॥")

पाणिः, स्त्री, (पण्यायन्ते व्यवहरन्त्यस्यामिति। पण्य+"अग्निपण्याद्यो रुड़ायलुकौ च।" उणां ४। १३२। इति इण् आयप्रत्ययस्य लुक् च।) पण्यवीथी। इत्युणादिकोषः॥

पाणिः, पुं, (पण्यायन्ते व्यवहरन्त्यनेन। पण्य ड व्यवहारे+ "अग्निपण्याद्यो रुड़ायलुकौ च।" उणां ४। १३२। इति इण् आयप्रत्ययस्य लुक् च।) सं च मणिबन्धानध्यङ्गुलिपर्य्यन्तभागः। स तु गर्भस्थबालकस्य मासद्वयेन भवति॥ इति मुग्धबोधः॥ तत्पर्य्यायः। पञ्चशाखः २ शुभः ३ समः ४ हस्तः ५ करः ६। इत्यमरभरतौ॥ भुजः ७। इति जटाधरः॥ कुलिः ८। इति शब्दरत्नावली॥ सुनादसः ९। इति त्रिकाण्डशेषः॥ (यथा, देवीभागवते। २। २। १९।

"स्तनद्वाभिसुगन्धां तां दृष्ट्वा कान्तां मनोरमाम्।
जग्राह दक्षिणे पाणौ सुनिर्मेध्यथपीड़ितः॥")

कुलिकश्चः। इति रत्नमाला॥ कुलियाकड़ा इति भाषा॥

पाणिकच्छपिका, स्त्री, (कच्छपः कूर्म्मस्तदाकारोऽस्यस्याः। कच्छप+ठन्। टापि अत इत्वञ। पाणिभ्यां कृता कच्छपिका कूर्म्माकृतिमुद्रा।) कूर्म्ममुद्रा। यथा,—

"पाणिकच्छपिकां कुर्य्यात् कूर्म्ममन्त्रेण साधकः।
तत्र संस्कृतपुष्पेण पूजयेदात्मनो वपुः॥
पूजितं तेन पुष्पेण देवत्वं स्वस्य जायते॥"

कूर्म्ममन्त्रो यथा,—

"द्वितीयं वेधवोतन्तं बीजं बिन्दुसंयुतम्
षष्ठस्वरो परिचरं कूर्म्मबीजं प्रकीर्त्तितम्॥"

इति कालिकापुराणे ५६ अध्यायः॥

पाणिगृहीती, स्त्री, (पाणिर्गृहीतो यस्याः। "पाणिग्रहीती भार्य्यायाम्।" ४। १। ५२। इत्यस्य वार्त्तिकोक्त्या ङीष्।) विधानेनोढ़ा। इत्यमरः। २। ६। ५॥

पाणिग्रहणं, क्ली, (पाणेर्ग्रहणं यत्र।) विवाहः। इति हेमचन्द्रः। ३। १८२॥ (यथा, रघुः। ७। २६।

"इति स्वसुर्भोगकुलप्रदीपः
सम्यक्स पाणिग्रहणं स राजा।
महीपतीनां पृथगर्हणार्थं
समादिदेशाधिकृतानधिज्ञः॥")

पाणिघः, पुं, (पाणिं पाणिना वा हन्तीति। हन+"पाणिघताड़घौ शिल्पिनि।" ३। २। ५५। इति टक् टिलोपो घत्वञ्च निपात्यते।) पाणिवादः। पाणिना मृदङ्गादिवाद्यम्। पाणिं वा हन्ति यः। यः पाणिनैव मृदङ्गादिवाद्यमुत्पादयति तत्र। यः पाणिना मृदङ्गमिव पाणिं वादयति तत्र च। इत्यमरभरतौ॥

पाणिघातः, पुं, (पाणिना हन्तीति। हन+ अग्निशिखित्वात् अण्।) पाणितालकः। इति सिद्धान्तकौमुदी॥ (हन+भावे घञ्। पाणिना घातो हननमिति। पाणिहननम्॥)

पाणिजः, पुं, (पाणौ जायते इति। पाणि+जन्+"सप्तम्यां जनेर्डः।" ३। २। ९७। इति डः।) नखः। इति हलायुधः॥

पाणितलं, क्ली, (पाणितलमिव परिमाणमस्येति। अण्।) कर्षपरिमाणम्। तोलकद्वयम्। इति वैद्यकपरिभाषा॥ (पर्य्यायोऽस्या यथा,—

"कोलद्वयञ्च कर्षः स्यात् स प्रोक्ता पाणिमालिका।
अर्द्धं पिचुः पाणितलं किञ्चित् पाणिश्च तिन्दुकम्॥
विड़ालपदकञ्चैव सुवर्णं कवलग्रहः।
उदुम्बरश्च पर्य्यायैः कर्ष एव निगद्यते॥"

इति भावप्रकाशे पूर्व्वखण्डे प्रथमोऽध्याये॥

पर्य्यायान्तरं यथा,—

"विधारौ द्वंचणौ कर्षे सुवर्णाक्षमेव च।
विड़ालपदकन्तच्च पिचुस्पाणितलन्तथा॥
तिन्दुकञ्च विजानीयात् कवड़ग्रहमेव च॥"

इति चरके कल्पस्थाने द्वादशेऽध्याये॥ पाणितलम्।) हस्ताधोभागः॥ (यथा, मनौ। ४। १४२।

"मृष्टैतानमुचिर्नित्यमद्भिः प्राणानुपस्पृशेत्।
गात्राणि चैव सर्व्वाणि नाभिं पाणितलेन तु॥")

पाणिजः, पुं, (पणिनो सुनेर्गोत्रापत्यम्। पणिन्+ अण्। "गाधिविदधिकेशिगणिपणिनश्च।" ६। ४। १६५। इति न टिलोपः।) पाणिनिमुनिः। इति त्रिकाण्डशेषः॥

पाणिनिः, पुं, (पणिनो सुनेर्युवापत्यम्। पणिन्+ इञ्। न टिलोपः।) मुनिविशेषः। तत्पर्य्यायः। आहिकः २ दाक्षीपुत्रः ३ शालङ्की ४ पाणिनः ५ शालातुरीयः ६। इति त्रिकाण्डशेषः॥ * ॥ (अयं हि पणिन्-वंशसम्भूतः प्रसिद्धो वैयाकरणकर्त्ता। अस्य माता दाक्षी इत्याख्यया विश्रुता। यथा, प्रायश्चित्तकारिकायाम्। १। १। २०।

"सर्व्वे सर्व्वपदादेशा दाक्षीपुत्रस्य पाणिनेः॥"

तथाच शिक्षायाम्। ५६।

"शङ्करः शाङ्करीं प्रादाद्दाक्षीपुत्राय धीमते।
वाङ्मयेभ्यः समाहृत्य देवीं वाचमिति स्थितिः॥"

अस्य शालातुरीय इत्याख्यापि दृश्यते। यथा, अभिधानचिन्तामणौ। ३। ५१५।

"————————अथ पाणिनौ।
शालातुरीयदाक्षेयौ————————॥"

"गान्धारप्रदेशविशेषशलातुरग्रामजातत्वादेवास्य तथा नाम।" इति चिन्तामणिटीका॥ परे तु शलातुरग्रामोऽस्य जन्मस्थानमिति न स्वीकुर्व्वन्ति। यतः शलातुरोऽभिजनोऽस्य इति युक्तपत्त्या शालातुरशब्देन शलातुरदेशोद्भवे जने एवार्थो गम्यते। अष्टाध्यायीसूत्रपाठस्य "तूदीशलातुरवर्म्मतीकूचवाराट् ठक् छण् छ यक्।" ४। ३। ९४। सूत्रात् अभिजनार्थे एव छण्प्रत्ययः। वृत्तिकारभट्टोजीदीक्षितेन तु "अभिजनश्च।" ४। ३। ९०। इति सूत्रे "यत्र स्वयं वसति स निवासः। यत्र पूर्व्वैरुषितं सोऽभिजनः।" इत्यभिजनशब्दस्यार्थः प्रदर्शितः। अतः सप्तः शलातुरप्रदेशः शालनः पूर्व्वपुरुषाणां वासस्थानमित्येव बोधगम्यते नतु तस्मिन्नेव।

पुरा किल कात्यायननामा मुनिः सप्तलक्षश्लोकात्मकं बृहत्कथाभिधानं ग्रन्थं विरचय्य कालभूतये आवयामास। सोमदेवभट्टस्तु ततः सारांशं समुद्धृत्य कथासरित्सागर इत्याख्यया प्रसिद्धं ग्रन्थं निर्म्मितवान् तस्मादेषाख्यायिका समधिगम्यते। यथा, तत्रैव। ४। २०—६५।

"अथ कालेन वर्षस्य शिष्यवर्गो महानभूत्।
तत्रैकः पाणिनिर्नाम जड़बुद्धितरोऽभवत्॥
स गुरूपपरिक्लेशः प्रेषितो वर्षमात्रया।
अगच्छत् तपसे खिन्नो विद्याकामो हिमालयम्॥
तत्र तीव्रेण तपसा तोषितादिन्द्रशेखरात्।
सर्व्वविद्यासुखं तेन प्राप्तं व्याकरणं नवम्॥
ततश्चागत्य मामेव वादायाह्वयते स्म सः।
प्रवृत्ते चावयोर्वादे प्रयाताः सप्तवासराः॥
अहमेवह्यि मया तस्मिन् जिते ततक्षमनन्तरम्।
नभःस्थेन महाघोरो हूङ्कारः शम्भुना कृतः॥
तेन प्रणष्टमैन्द्रन्तदसद्व्याकरणं भुवि।
जिताः पाणिनिना सर्व्वे सूखोंभूता वयं पुनः॥
अथ संजातनिर्व्वेदः स्वगृहस्थितये धनम्।
हस्ते हिरण्यदत्तस्य विधाय वणिजो निजम्॥
उक्त्वा तच्चोपकोशाये गतवानस्मि शङ्करम्।
तपोभिराराधयितुं निराहारो हिमाचलम्॥"

* * * *

"अत्रान्तरे तुषाराद्रौ कृत्वा तीव्रतरं तपः।
आराधितो मया देवो वरदः पार्व्वतीपतिः॥
तदैव तेन शास्त्रं मे पाणिनीयं प्रकाशितम्।
तदिच्छानुग्रहादेव मया पूर्णीकृतञ्च तत्॥"

* * * *

"वर्षोऽथ सम्मुखादैक्षत् श्रोतुं व्याकरणं नवम्।
ततः प्रकाशितं स्वामिञ्छमारेणैव तस्य तत्॥
ततो याड़ीन्द्रदत्ताभ्यां विघ्नो दक्षिणां प्रति।
गुरुर्वर्षोऽब्रवीत् सर्व्वकोटिर्मे दीयतामिति॥
अङ्गीकृत्य गुरोर्वाक्यं तौ च सामित्यवोचताम्।
यहि राज्ञः सखे! गन्त्वा याचितुं गुरुदक्षिणाम्
गच्छामो नान्यतोऽस्माभिरियत् काञ्चनमाप्यते।
नवाधिकाया नवतेः कोटीनामधिपो हि सः॥"

इत्युपाख्यानेन पाणिनिः कात्यायनस्य राज्ञोगन्धस्य च समसामयिक इत्येवायाति। परं कात्यायनपाणिन्योः शब्दशास्त्रपाठेन पाणिनिः कात्यायनात् पूर्व्वतन इत्यनायासेनैव विज्ञायते। यतः कात्यायन एव पाणिनिकृतव्याकरणस्य वार्त्तिककारः। स च स्वकृतग्रन्थे विदुषां वरं पाणिनिं आचार्य्यत्वेन स्वीकृतवान्। [६। ४। १०४। सूत्रस्य वार्त्तिं।] पाणिनिस्तु स्वीयव्याकरणे पूर्व्वतनानां वह्वृचां विदुषां नामोल्लेखं कृतवान् परं कुत्रापि कात्यायनस्य नाम नाभिहितवानतः सप्ततोऽवगम्यते पाणिनिः कात्यायनात् बृहत्तर इति।

अनेन महात्मना पाणिना रचितं व्याकरणं पाणिनीयाष्टकमित्याख्यया प्रसिद्धम्। कात्यायन

एवास्य वार्त्तिकं विधाय तीव्रसमालोचनाकार। परं पतञ्जलिः सूत्रपाठस्य वार्त्तिकस्य च महाभाष्यं विधाय सर्व्वतः प्रमादपरिशून्योऽयं पाणिनीयाष्टाध्यायीग्रन्थ इति प्रदर्शयन् कात्यायनतीव्रदृष्टेः रक्षणं समादरणीयं अन्यसूत्तमम्। अष्टाध्यायीप्रारम्भे तु चतुर्दशसूत्राणि सन्ति तानि तु प्रत्याहारसूत्राणि।

अष्टाध्यायीसूत्रपाठे, आपिशलिः।६।२।६२। गालवः।६।३।६१। चाक्रवर्म्मणः।६।१।१३०। स्फोटायनः।६।१।१२३। काश्यपः।८।४।६७। गार्ग्यः।८।४।६७। भारद्वाजः।७।२।६३। सैनकः५।४।११२। शाकटायनः।३।४।१११। शाकल्यः।१।१।१६। एतेषां पूर्व्वतनवैयाकरणानां नामानि सन्ति। अत्र ३६६ संख्यकानि सूत्राणि विद्यन्ते। काश्मीरराजस्य जयापीड़स्य राजत्वसमये पाणिनिव्याकरणं वार्त्तिकेन महाभाष्येण च सह विशेषविद्यार्थिसुधीवरविद्वज्जनमिश्चार्थं प्रचलितमासीत्। यथा, राजतरङ्गिण्याम्। ४। ६३८—६४०।

"नितान्तं कृतकृत्यस्य गुणवृद्धिविधायिनः।
जैत्रयात्रोद्यतस्यास्य पाणिनेश्च किमन्तरम्॥
भाष्यव्याख्याचणे शीलैर्व्वैलक्षण्यदूषितैः कृतः।
सोऽयं तस्य विपर्य्यासो बुधैरिव विवर्त्तितः॥
कृतविप्रोषसर्गस्य भूतनिष्ठाविधायिनः।
जैत्रयात्रोद्यतस्यास्य पाणिनेश्च किमन्तरम्॥"

कात्यायनकृतवार्त्तिकात् पतञ्जलिकृतमहाभाष्याच्च अन्या अपि अष्टाध्यायीसूत्रपाठस्य उल्लिखितमहाभाष्यस्य च दश्यटीकाः सन्ति बाहुल्यभिया तासां नामानि न प्रदत्तानि॥*॥)

पाणिनीयं, त्रि, (पाणिनिना प्रोक्तं उपदिष्टं वा। पाणिनि+"वृद्धाच्छः।" ४।२।११४। इति छः।) पाणिनिना कृतं ग्रन्थादि। इति सुग्धबोधव्याकरणम्॥

पाणिन्धमः, त्रि, (पाणिं धमतीति। धा शब्दाग्निसंयोगयोः+"उपपदेऽमन्ताड्डः।" ३।२।३७। इति खश् मुम् च।) हस्तकर्म्मताकाग्निसंयोगकर्त्ता। एवं शब्दकर्त्ता च। इति सुग्धबोधव्याकरणम्॥ ("पाणयो धायन्तेऽस्मिन्निति पाणिन्धमोऽग्निः। अन्धकारात्तृतः इत्यर्थः। तत्र हि सर्पाद्यपनोदनाय पाणयः शब्दान्ते।" इति सिद्धान्तकौमुदी॥)

पाणिन्धयः, त्रि, (पाणिभ्यां धयति पिबतीति। धेट पाने+"नाड़ीस्तनीस्तनकरसृष्टिपाणिनासिकात् भ्रच्।" इति सूत्रात् खश्प्रत्ययेन साधुः।) पाणिद्वारा पानकर्त्ता। इति सुग्धबोधव्याकरणम्॥

पादं, क्ली, पाणिश्च पादश्च द्वयोः समाहारः। पाणिपादयोः समाहारः। इति व्याकरणम्॥

पाणिपीड़नं, क्ली, (पाणेः पीड़नं ग्रहणं यत्र।) पाणिग्रहणम्। विवाहः। इत्यमरः॥ (पाणिभ्यां पीड़नमिति विग्रहे क्रीत्यादिना दुक्लमर्द्दनम्॥)

पाणिभुक्, [ज्] पुं, (पाणिनैव भुज्यते दीयतेऽनेन चर्व्वादिद्रव्यं यद्वा, पाणिरिव भुज्यते यज्ञादिस्थले यवद्रियते इति। भुज्+क्विप्।) उड़म्बरवृक्षः। इति शब्दचन्द्रिका॥ (पाणिना भुङ्क्ते इति। भुज्+क्विप्।) पाणिकरणकभोक्तरि, त्रि॥

पाणिमर्द्दः, पुं, (पाणिं मृद्नातीति। पाणि+मृद्+"कर्म्मण्यण्।" ३।२।१। इत्यण्।) करमर्द्दकः। इति राजनिर्घण्टः॥

पाणिसूत्रं, क्ली, (पाणिभ्यां सूत्रं परिमाणमस्य।) अङ्गुलम्। इति हलायुधः॥

पाणिरुहः, पुं, (पाणौ रोहतीति। रुह+"इगुपधज्ञेति।" ३।१।१३५। इति कः।) नखः। इति राजनिर्घण्टः॥

पाणिवादः, त्रि, (पाणिं पाणिना वा वादयतीति। वद्+णिच्+अण्।) पाणिघः। मृदङ्गादिवादकः। इत्यमरः॥ (पाणिना वाद्यते इति। वद्+णिच्+कर्म्मणि घञ्। मृदङ्गादौ, क्ली। यथा, रामायणे। २।६५।४।

"अपदानान्युदाहृत्य पाणिवादान्यवादयन्॥")

पाणिवादकः, त्रि, (पाणिं पाणिना वा वादयतीति। वद्+णिच्+ण्वुल्।) पाणिवादः। इति हेमचन्द्रः। ३।५८॥ (यथा, रामायणे। २।६५।४।

"ततस्तु स्तुवतां तेषां स्तुतानां पाणिवादकाः।
अपदानानुदाहृत्य पाणिवादान्यवादयन्॥")

पाणिसर्ज्या, स्त्री, (पाणिभ्यां सृज्यतेऽसौ। सृज्+"ग्रसिसृजिदृशिधारिधर्षिपृच्छिभ्यः क्यन्।" उणा० ४।१३८। इति क्युन्। "चजोः कुः घिण्ण्यतोः।" ७।३।५२। इति कुत्वम्।) रज्जुः। इति मुग्धबोधव्याकरणम्॥

पाणीतलं, क्ली, (पाणितलं निपातनात् दीर्घः।) तोलकद्रव्यम्। यथा,—

"विड़ालपदकर्षौ च पाणीतलसुवुम्बरम्॥"

इति शब्दमाला॥

पाणौकरणं, क्ली, (पाणौ क्रियतेऽनेनास्मिन् वा। कृ+ल्युट्। षष्ठ्याः अलुक्।) विवाहः। इति जटाधरः॥

पाण्डरं, क्ली, (पाण्डरो वर्णोऽस्यास्येति। अच्।) क्षुद्रपुष्पम्। गैरिकम्। इति शब्दचन्द्रिका॥

पाण्डरः, पुं, (पाण्डरः शुक्लवर्णोऽस्यास्येति। अच्।) मरुवकवृक्षः। (पड़ि+अर+दीर्घश्च।) श्वेतवर्णः। (पर्व्वतविशेषः। स तु मेरोः पश्चिमे वर्त्तते। यथा, मार्कण्डेये। ५५।१०।

"अञ्जनः कुक्कुटः क्षेमः पाण्डरश्चाचलोत्तमः॥"
"पश्चिमेन तथा मेरोर्विस्तृतात् पश्चिमाद्दिशः।
एतेऽचलाः समाख्याताः——————॥"

ऐरावतकुलोत्पन्ननागविशेषः। यथा, महाभारते। १।५७।११—१२।

"पारावतः पारिजातः पाण्डरो हरिणः कृशः।
विहङ्गः शरभो भेदः प्रमोदः संहतापनः॥
ऐरावतकुलादेते प्रविष्टा हयवाहनम्॥"

पक्षिविशेषः। यथा, ज्योतिस्तत्त्वधृतवचनम्।

"गृध्रः कङ्कः कपोतश्च उलूकः श्येन एव च।
चिल्लश्च धर्म्मचिल्लश्च भासः पाण्डर एव च।
गृहे यस्य पतन्त्येते गेहं तस्य विपद्यते॥")

तद्वर्णविशिष्टे, त्रि। इत्युणादिकोषः॥ (यथा, हरिवंशे। ८२।५०।

"असिताम्बरसंवीतं पाण्डरं पाण्डरासनम्॥")

पाण्डरपुष्पिका, स्त्री, (पाण्डरं शुक्लवर्णं पुष्पमस्याः। कप्+ततः कापि अत इत्वम्।) श्वेतलाङ्गलिः। इति शब्दचन्द्रिका॥

पाण्डवः, पुं, (पाण्डोरपत्यस्येयं प्रसिद्धस्य राज्ञोऽपत्यम्। पाण्डु+"ञ्योरञ्।" ४।२।७१। इत्यण्।) पाण्डुनन्दनः। पञ्चपाण्डवोत्पत्तिर्यथा,—

वैशम्पायन उवाच।

"संवत्सरधृते गर्भे गान्धार्य्या जनमेजय!।
आजघ्यामास वै कुन्ती गर्भार्थं धर्म्ममच्युतम्॥
सा बलिं चरिता देवी धर्म्मायोपजहार ह।
जजाप मन्त्रं विधिवद्दत्तं दुर्व्वाससा पुरा॥
संगम्य सा तु धर्म्मेण योगमूर्त्तिधरेण ह।
लेभे पुत्रं वरारोहा सर्व्वप्राणिहितं वरम्॥
ऐन्द्रे चन्द्रसमायुक्ते मुहूर्त्तेऽभिजितेऽह्नि मे।
दिवामध्यगते सूर्य्ये तिथौ पुण्येऽभिपूजिते॥
सन्दधे यशसं कुन्ती सुषुवे प्रवरं सुतम्।
जातमात्रे सुते तस्मिन् वागुवाचाशरीरिणी॥
एष धर्म्मभृतां श्रेष्ठो भविष्यति नरोत्तमः।
विक्रान्तः सत्यवाक् चैव राजा पृथ्व्यां भविष्यति॥
युधिष्ठिर इति ख्यातः पाण्डोः प्रथमजः सुतः।
भविता प्रथितो राजा त्रिषु लोकेषु विश्रुतः।
यशसा तेजसा चैव वृत्तेन च समन्वितः॥१॥*॥
धार्म्मिकं तं सुतं लब्ध्वा पाण्डुस्तां पुनरब्रवीत्।
प्राहुः क्षात्रं बलं ज्येष्ठं बलज्येष्ठं सुतं वृणु॥
ततश्चोक्ता भर्त्रा तु वायुमेवाजुहाव सा।
तस्माच्चक्रे महाबाहुर्भीमो भीमपराक्रमः॥
तमायतिबलं जातं वागुवाचाशरीरिणी।
सर्व्वेषां बलिनां श्रेष्ठो जातोऽयमिति भारत!॥
इदमत्यद्भुतप्रख्यं जातमात्रे वृकोदरे।
यदङ्गात् पतितो मातुः शिलां गात्रैरचूर्णयत्॥
कुन्ती व्याघ्रभयोद्विग्ना सहसोत्पतिता किल।
नान्वबुध्यत तं सुप्तसुतसङ्गे स्वे वृकोदरम्॥
वज्रसंहनन: सोऽथ कुमारो न्यपतद्गिरौ।
पतता तेन शतधा शिला गात्रैर्विचूर्णिता॥
तां शिलां चूर्णितां दृष्ट्वा पाण्डुर्विस्मयमागतः।
यस्मिन्नहनि भीमस्तु जज्ञे भरतसत्तम!॥
दुर्य्योधनोऽपि तत्रैव प्रजज्ञे वसुधाधिप!॥२॥०॥
जाते वृकोदरे पाण्डुरिदं भूयोऽन्वचिन्तयत्।
कथन्नु मे वरः पुत्रो लोकश्रेष्ठो भवेदिति॥
दैवे पुरुषकारे च लोकोऽयं संप्रतिष्ठितः।
तत्र दैवन्तु विधिना कालयुक्तेन लभ्यते॥
इन्द्रो हि राजा देवानां प्रधान इति नः श्रुतम्।
अप्रमेयबलोत्साहो वीर्य्यवानमितद्युतिः॥
तं तोषयित्वा तपसा पुत्रं लप्से महाबलम्।
यं दास्यति स मे पुत्रं स वरीयान् भविष्यति॥

कर्म्मणा मनसा वाचा तस्मात्तप्स्ये महत्तपः ।
ततः पाण्डुर्महाराजो मन्त्रयित्वा महर्षिभिः ॥
दिदेश कुन्त्याः कौरव्यो व्रतं सांवत्सरं शुभम् ।
आत्मना च महाबाहुरेकपादस्थितोऽभवत् ॥
उग्रं स तप आतस्थे परमेण समाधिना ।
आराधयिषुर्देवं चिदग्न्यानां तमीश्वरम् ॥
सूर्य्येण सह धर्म्मात्मा पर्य्यवर्त्तत भारत ! ।
तन्तु कालेन महता वासवः प्रत्यपद्यत ॥
शक्र उवाच ।
पुत्रं तव प्रदास्यामि त्रिषु लोकेषु विश्रुतम् ।
ब्राह्मणानां गवाञ्चैव सुहृदाञ्चार्थसाधकम् ॥
दुर्हृदां शोकजननं सर्व्वबान्धवनन्दनम् ।
सुतं तेऽहं प्रदास्यामि सर्व्वामित्रविनाशनम् ॥
इत्युक्तः कौरवो राजा वासवेन महात्मना ।
उवाच कुन्तीं धर्म्मात्मा देवराजवचः स्मरन् ॥
उदर्कस्तव कल्याणि तुष्टो देवगणेश्वरः ।
दातुमिच्छति मे पुत्रं यथासङ्कल्पितं हृदा ॥
अतिमानुषकर्म्माणं यशस्विनमरिन्दमम् ।
नीतिमन्तं महात्मानमादित्यसमतेजसम् ॥
दुराधर्षं क्रियावन्तमतीवाद्भुतदर्शनम् ।
पुत्रं जनय सुश्रोणि ! धाम क्षत्रियतेजसाम् ॥
लब्धः प्रसादो देवेन्द्रात् तमाशय शुभानने ! ॥
एवमुक्ता ततः शक्रमाजुहाव यशस्विनी ।
अथाजगाम देवेन्द्रो जनयामास चार्জ্জुनम् ॥
जातमात्रे कुमारे तु वागुवाचाशरीरिणी ।
महागम्भीरनिर्घोषा नभो नादयती तदा ॥
शृण्वतां सर्व्वभूतानां तेषाञ्चाश्रमवासिनाम् ।
कुन्तीमाभाष्य विबुधस्तुवाचेदं शुचिस्मिताम् ॥
कार्त्तवीर्य्यसमः कुन्ति ! शिवितुल्यपराक्रमः ।
एष शक्र इवाजेयो यशस्ते प्रथयिष्यति ॥
आदित्या विष्णुना प्रीतिर्यथाभूदभिवर्द्धिता ।
तथा विष्णुसमः प्रीतिंवर्द्धयिष्यति ते सुतः ॥
एष मद्रान् वशे कृत्वा कुरूंश्च सह सोमकैः ।
चेदिकाशिकरूषांश्च कुरुराज्यं वहिष्यति ॥
एतस्य भुजवीर्य्येण खाण्डवे हव्यवाहनः ।
मेदसा सर्व्वभूतानां तृप्तिं यास्यति वै पराम् ॥
रामणीयं महीपालान् एष जित्वा महाबलः ।
भ्रातृभिः सहितो वीरस्त्रीन् मेधानाहरिष्यति ॥
जामदग्न्यसमः कुन्ति ! वायुवेगपराक्रमः ।
एष वीर्य्यवतां श्रेष्ठो भविष्यति महायशाः ॥
तथा दिव्यानि चास्त्राणि निखिलेनाहरिष्यति ।
विप्रनष्टां श्रियञ्चायमाहर्त्ता पुरुषर्षभः ॥
एतामद्भुतां वाचं कुन्ती शुश्राव भारत ! ।
वाचञ्चरितासुचेस्तां निशम्य तपस्विनाम् ॥
बभूव परमो हर्षः घृतराष्ट्रनिवासिनाम् ।
तथा देवगणानाञ्च सेन्द्राणाञ्च दिवौकसाम् ॥
आकाशे दुन्दुभीनाञ्च बभूव तुमुलः स्वनः ।
उदतिष्ठत्सहाघोषः पुष्पवृष्टिभिरावृतः ॥"३॥*॥
वैशम्पायन उवाच ।
कुन्तीपुत्रेषु जातेषु धृतराष्ट्रात्मजेषु च ।
मद्रराजसुता पाण्डुं रहो वचनमब्रवीत् ॥
न मेऽस्ति त्वयि सन्तापो विगुणेऽपि परन्तप ।
नावरत्वे वराङ्गीयाः स्थित्वा चानघ ! नित्यदा ॥
गान्धार्य्याश्चैव नृपते ! जातं पुत्रशतन्तथा ।
श्रुत्वा न मे तथा दुःखमभवत् कुरुनन्दन ! ॥
इदन्तु मे महद्दुःखं तुल्यतायामपुत्रता ।
दिष्ट्या त्विदानीं भर्त्तुर्मे कुन्त्यामप्यस्ति सन्ततिः ॥
यदि चापत्यसन्तानं कुन्तिराजसुता मयि ।
कुर्य्यादनुग्रहो मे स्यात्तव चापि हितं भवेत् ॥
संस्तम्भो मे सपत्नीत्वात् वक्तुं कुन्तिसुतां प्रति ।
यदि तु त्वं प्रसन्नो मे स्वयमेनां प्रचोदय ॥
पाण्डुरुवाच ।
ममाप्येष सदा मान्ये ! हृद्यर्थः परिवर्त्तते ।
न तु तां प्रसहे वक्तुमिष्टानिष्टविवक्षया ॥
तव त्विदं मतं मत्वा प्रयतिष्याम्यतःपरम् ।
मन्ये ध्रुवं मयोक्ता सा वचनं प्रतिपत्स्यते ।
वैशम्पायन उवाच ।
ततः कुन्तीं पुनः पाण्डुर्विविक्त इदमब्रवीत् ।
कुलस्य मम सन्तानं लोकस्य च कुरु प्रियम् ॥
मम चापिण्डनाशाय पूर्व्वेषामपि चात्मनः ।
मत्प्रियार्थञ्च कल्याणि ! कुरु कल्याणमुत्तमम् ।
यशसेऽर्थाय चैव त्वं कुरु कर्म्म सुदुष्करम् ॥
एवमुक्तान्ववीन्माद्रीं सङ्गच्चिन्तय दैवतम् ।
तस्मात्ते भवितापत्यमनुरूपमसंशयम् ॥
ततो माद्री विचार्य्यैवं जगाम मनसाश्विनौ ।
तावागत्य सुतौ तस्यां जनयामासतुर्यमौ ॥
नकुलं सहदेवञ्च रूपेणाप्रतिमौ भुवि ।
तथैव तावपि यमौ वागुवाचाशरीरिणी ॥
रूपसत्त्वगुणोपेतावेतावत्यश्विनावपि ।
भासतस्तेजसात्यर्थं रूपद्रविणसम्पदा ॥
नामानि चक्रिरे तेषां शृतशृङ्गनिवासिनः ।
भक्त्या च कर्म्मणा चैव तथाग्नीभिर्विशाम्पते ॥
ज्येष्ठं युधिष्ठिरेत्येवं भीमसेनेति मध्यमम् ।
अर्জ্জुनेति तृतीयञ्च कुन्तीपुत्रानकल्पयन् ॥
पूर्व्वजं नकुलेत्येवं सहदेवेति चापरम् ।
माद्रीपुत्रावकथयंस्ते विप्राः प्रीतमानसाः ॥"
इति महाभारते १ । १२३—१२४ ॥
तेषां पुत्रा यथा,—
"प्रतिविन्ध्यः सुतः सोमः श्रुतकीर्त्तिस्तु चार्জ্জुनात् ।
शृतानीकः श्रुतकर्म्मा नौपद्याः पञ्च विक्रमात् ॥"
तेषां भार्य्या यथा, गारुड़े १३६ अध्याये ।
"यौधेयी च हिड़िम्बा च काशी चैव सुभद्रिका ।
विजया वै वेणुमती पञ्चभ्यस्तु सुताः क्रमात् ॥
देवको घटोत्कचश्च अभिमन्युश्च सर्व्वगः ।
अहोत्रो निरमित्रश्च परिक्षिदभिमन्युजः ॥"
पाण्डवेयः, त्रि, (पाण्डोरियं इत्यण् ङीप् च पाण्डवी कुन्ती माद्री च तयोरपत्यम् इति । ढक् ।) पाण्डोरपत्यम् । इति सुग्धबोधव्याकरणम् ॥ (युधिष्ठिरप्रभृतयः पञ्च भ्रातरः । यथा, महाभारते । १ । २०३ । १५ ।
"यावन्नायाति वार्ष्णेयः कर्षन् यादववाहिनीम् ।
राज्यार्थे पाण्डवेयानां पाञ्चाल्यसदनं प्रति ॥"
अभिमन्युपुत्रो नरपतिः परीक्षित् । यथा, भागवते । १ । ४ । ७ ।
"कथं वा पाण्डवेयस्य राजर्षेर्मुनिना सह ।
संवादः समभूत्तात ! यत्रैषा सात्वती श्रुतिः ॥")
पाण्डवाभीलः, पुं, (अभीः अभयं लातीति । ला + कः । पाण्डवोऽभीलो यस्मात् । पाण्डवानामभियमभयं लातीति वा ।) क्षत्रः । इति त्रिकाण्डशेषः ॥
पाण्डवायनः, पुं, (पाण्डवानामयनं रक्षणं यस्मात् ।) क्षत्रः । इति हेमचन्द्रः । २ । १३१ ॥
पाण्डित्यं क्ली, (पण्डितस्य भावः कर्म्म वा । इति "वर्णदृढ़ादिभ्यः ष्यञ् च ।" ५ । १ । १२३ । इति ष्यञ् ।) पण्डितधर्म्मकर्म्मणी । यथा,—
"रसज्ञा पाण्डित्यच्छिदुरशुचिधामभ्रमभरान् ॥"
इति मुरारिः ॥
(यथा, च महाभारते । ५ । ३१ । २ ।
"उत बालाय पाण्डित्यं पण्डितायोत बालताम् ।
ददाति सर्व्वमीशानः पुरस्ताच्छुक्रमुच्चरन् ॥")
पाण्डुः, पुं, (पडि़ गतौ + "गदमदचर्य्यादयश्च ।" उणां । १ । ३८ । इति कुप्रत्ययः निपातनात् धातोर्दीर्घश्च ।) पाण्डुरफलोत्तुपः । पटोलः । इति राजनिर्घण्टः ॥ शुक्लपीतमिश्रितवर्णः । तत्पर्य्यायः । हरिणः २ । पाण्डुरः ३ । इत्यमरः ॥ पाण्डरः ४ । इति हेमचन्द्रः ॥
"सितपीतसमायुक्तः पाण्डुवर्णः प्रकीर्त्तितः ॥"
इति सुश्रुतिः ॥
भेदोऽपि दृश्यते यथा,—
"पाण्डुरस्तु रक्तपीतभागी प्रत्यूषचन्द्रवत् ।
पाण्डुस्तु पीतभागार्द्धः केतकीधूलिसन्निभः ॥"
इति भरतः ॥
तद्वति, त्रि । इत्यमरः ॥ (यथा रघुः । ३ । २ ।
"शरीरसादादसमग्रभूषणा
सुखेन सालक्ष्यत लोध्रपाण्डुना ॥"
नृपतिविशेषः । स तु शन्तनुपुत्रविचित्रवीर्य्यस्य क्षेत्रे व्यासाज्जातः । (यथा, महाभारते । १ । ११८ । ५ ।
"राजा पाण्डुर्महारण्ये मृगव्यालनिषेवितेः ।
चरन् मैथुनधर्म्मस्थं ददर्श मृगयूथपम् ॥"
अस्य देहपाण्डुताकारणं नामनिरुक्त्यादिकं च यथा, महाभारते । १ । १०६ । १५-१८ ।
"अम्बालिकामथाभ्यागादृषिं दृष्ट्वा च सापि तम् ।
विवर्णा पाण्डुसङ्काशा समपद्यत भारत ! ।
तां भीतां पाण्डुसङ्काशां विवर्णां प्रेक्ष्य भारत ! ॥
व्यासः सत्यवतीपुत्र इदं वचनमब्रवीत् ।
यस्मात् पाण्डुत्वमापन्ना विरूपं प्रेक्ष्य मामिह ॥
अस्मादेष सुतस्ते वै पाण्डुरेव भविष्यति ।
नाम चास्येतदेवेह भविष्यति शुभानने ! ॥")
नागभेदः । श्वेतहस्ती । सितवर्णः । रोगविशेषः । इति शब्दरत्नावली ॥ * ॥
पाण्डुरोगनिदानम् । यथा,—
"पाण्डुरोगाः स्मृताः पञ्च वातपित्तकफैस्त्रयः ।
चतुर्थः सन्निपातेन पञ्चमो भक्षणान्मृदः ॥
व्यायाममम्लं लवणानि मद्यं
स्त्रीं दिवास्वप्नमतीवतीक्ष्णम् ।

निद्रामाप्नुत्य समेत्य रक्तं
दोषत्वं पाण्डरतां नयन्ति ॥ * ॥

तस्य पूर्वरूपाणि यथा,—

त्वक्स्फोटनष्ठीवनगात्रसाद-
स्तृड्भक्तगर्हेक्षणकूटशोथाः ।
विण्मूत्रगौरत्वमथाविपाकौ
भविष्यतस्तस्य पुरःसराणि ॥ * ॥

वातिकस्य तस्य लक्षणं यथा,—

त्वङ्नखनयनारीनां रूक्षकृष्णारुणाभताः ।
वातपाण्डामये कम्पतोदानाहभ्रमादयः ॥ * ॥

पैत्तिकस्य लक्षणं यथा,—

पीतसंज्ञाक्षिनेत्रो दाहरुग्ज्वरान्वितः ।
भिन्नविट्कोऽतिपीताभः पित्तपाण्डामयी नरः ॥

श्लैष्मिकस्य लक्षणं यथा,—

कण्डूप्रसेकक्षयथुतन्द्रालस्यातिगौरवैः ।
पाण्डुरोगी कफाच्छुक्लैस्त्वङ्नखनयनाननैः ॥ * ॥

त्रिदोषजस्य लक्षणं यथा,—

ज्वरारोचकहृल्लासच्छर्दितृष्णाक्लमान्वितः ।
पाण्डुरोगी त्रिभिर्दोषैर्ज्ञेयः क्षीणो हतेन्द्रियः ॥

रक्तस्य संप्राप्तिर्यथा,—

दुष्टिकादग्धशीलस्य कुप्यत्यन्यतमो मलः ।
कषाया भाजनं पित्तमधुरा मधुरा कफम् ॥
क्रोधवेगमुदादींश्च रौक्ष्यादुक्तांश्च रूक्षयेत् ।
पूरयत्यविपक्वैव सोतांसि विगुणोऽपि ॥
इन्द्रियाणां बलं हत्वा तेजो वीर्यौजसी तथा ।
पाण्डुरोगं करोत्याशु वर्णवर्गाग्निनाशनम् ॥ * ॥

दुष्टिकाभक्षणजन्यपाण्डुलक्षणं यथा,—

दुष्टभक्षणाद्वेत् पाण्डुरुन्नालस्यनिपीडितः ।
सकामश्वासमूलार्शःप्रदरुचिसमन्वितः ॥
श्लक्ष्णाक्षिकूटगण्डभ्रूः श्लक्ष्णपाण्ड्याभिमेहनः ।
कृमिकोष्ठोऽतिसार्द्येन मलं सास्रकफान्वितम् ॥

तस्य असाध्यलक्षणं यथा,—

ज्वरारोचकहृल्लासच्छर्दितृष्णाक्लमान्वितः ।
पाण्डुरोगी त्रिभिर्दोषैर्ज्ञेयाः क्षीणो हतेन्द्रियः ॥
पाण्डुरोगविरोत्पन्नः खरीभूतो न सिध्यति
कालप्रकर्षाच्छ्वानां यो वा पीतानि पश्यति ॥
बद्धाल्पविट् महरितं सकफं योऽतिसार्यते ।
दीनः श्वेतातिदिग्धाङ्गस्त्वर्हिमच्छ्लीपदान्वितः ॥
स नाम्नैवाक्षयाद्यश्च पाण्डुः श्वेतत्वमाप्नुयात् ॥
पाण्डुदन्तनखो यस्तु पाण्डुनेत्रश्च यो भवेत् ।
पाण्डुसंघातदर्शी च पाण्डुरोगी विनश्यति ॥

अन्नेषु मूनं परिहीणमध्यं
स्यानं तथान्नेषु च मध्यमूनम् ।
गुदे च शैफस्यथ मुष्कयोश्च
मूनं प्रतान्यन्तमसंज्ञकस्यम् ॥
विवर्जयेत् पाण्डुकिनं यशोऽर्थी
तथातिसारज्वरपीडितञ्च ॥"

इति माधवकरः ॥

(यथा च,—

"पित्तप्रधानाः कुपिता यथोक्तैः क्रोधनैर्मलाः ।
तत्राश्रितेन बलिना शिरां पित्तं हृदि स्थितम् ॥
धमनीर्दश सम्प्राप्य आपूरयन सकलां तनुम् ।

श्लैष्मत्वरक्तमांसानि प्रदूष्यान्तरमाश्रितम् ॥
त्वङ्मांसयोस्तत् कुरुते त्वचि वर्णान् पृथग्-
विधान् ।
पाण्डुहारिद्रहरितान् पाण्डुत्वं तेषु चाधिकम् ॥
यतोऽतः पाण्डुरित्युक्तः स रोगस्तेन गौरवम् ॥
धातूनां स्याच्च शैथिल्यमोजसश्च गुणक्षयः ॥
ततोऽपरक्तमेदस्को निःसारः स्यात् अथेन्द्रियः ।
स्तभ्यमानैरिवाङ्गैर्नो द्रवता हृदये न च ॥
शूनाक्षिकूटसदनः कोपनः क्षीवनोऽल्पवाक् ।
अमद्दिट् श्लिश्लिरश्वेषी क्षीर्णरोमा हतानलः ॥
सशब्दसक्थ्योच्चरी श्वासी कर्णक्ष्वेड्यी भ्रमी श्रमी ।
स पञ्चधा पृथग्दोषैः समस्तैर्मृत्तिकादनात् ॥
प्राग्रूपमस्य हृदयस्पन्दनं रूक्षता त्वचि ।
अरुचिः पीतमूत्रत्वं स्वेदाभावोऽल्पचेष्टता ॥
सादः श्रमोऽनिलात्तत्र गात्ररुक्तोदकम्पनम् ।
क्षणरुक्षारुणसिरानखविण्मूत्रनेत्रता ॥
शोफानाहास्यवैरस्यविट्शोथाः पार्श्वमर्दरुक् ।
पित्तात्तरितपीताभसिरादित्वं ज्वरस्तमः ॥
तृट्स्वेदमूर्च्छाग्लपितेच्छादौर्गन्ध्यं कटुवक्तता ।
वर्चोभिदोऽम्लको दाहः कफात् शुक्लसिरादिता ॥
तन्द्रालवणवक्त्रत्वं रोमहर्षः स्वरक्षयः ।
कासः श्वासोऽग्निनिचयाश्लिष्टोऽतिदुःसहः ॥
स्तृत्कषायानिलं पित्तमधुरा मधुराकफम् ।
दूषयित्वा रसादींश्च रौक्ष्याद्युक्तं विरूक्ष्य च ॥
सोतांस्यपक्वैवापूर्य कुर्याद्वा च पूर्ववत् ।
पाण्डुरोगं ततः शूननाभिपादास्यमेहनः ॥
पुरीषं कृमिमन्मुष्णिन्नं सास्रकफं नरः ॥"

इति वाभटे निदानस्थाने । १३ । १—१३ ॥)

तस्यौषधं यथा,—

"लोहचूर्णं तक्रपीतं पाण्डुरोगहरं भवेत् ॥"

इति गारुडे १८० अध्यायः ॥

अपि च ।

"सप्तरात्रं गवां मूत्रे भावितं चायसी रजः ।
पाण्डुरोगप्रशान्त्यर्थं पयसा प्रपिबेन्नरः ॥ १ ॥
गोमूत्रसिद्धं मण्डूरचूर्णं सगुडमक्षतः ।
पाण्डुरोगः क्षयं याति पङ्क्तिशूलञ्च दारुणम् ॥२॥
अयोमलं सुसन्तप्तं भूयो गोमूत्रसाधितम् ।
मधुसर्पिर्युतं लीढ्वा पाण्डुरोगी सुखी भवेत् ॥३॥
पुनर्नवात्रिवृद्घोषविडङ्गं दारु चित्रकम् ।
कृष्णं हरिद्रे त्रिफला दन्ती चव्यं कलिङ्गकम् ॥
कटुका पिप्पलीमूलं सुस्तं शृङ्गी च कारवी ।
यमानी कट्फलेति पृथक्पलमितं मतम् ॥"४॥

इति भावप्रकाशः ॥ * ॥

(अस्य सकारणलक्षणचिकित्सादीनि यथा,—

"शृणु पुत्र! प्रवक्ष्यामि पाण्डुरोगं महागदम् ।
पञ्चैव पाण्डुरोगास्ते सम्भवन्तीह मानुषे ॥
वातिकः पैत्तिकश्चैव श्लैष्मिकः सान्निपातिकः ।
पञ्चमो रूक्षजः प्रोक्तो वक्ष्ये चैषान् सम्भवम् ॥

दीर्घाध्वना पीडितो वा ज्वरेण
रक्तस्रावी पीडितो वा व्रणेन ।
चिन्तायासाद्रोषनाद्वे मनुष्यं
यायं पाण्डुर्जायते सेवते यः ॥

द्वारस्थाग्नं कल्यमेरेयसेवा
व्यायामान्मैथुनात्यमेव ।
निद्रानाशे नातिनिद्रा दिवापि
योगैरेतैर्दुष्टिकाभक्षणेन ॥
अतिश्लथिलशरीरे रोगसम्पीडिते वा
लवणकटुकषाया सेवनाग्नेन दृष्टिः ।
अतिसुरतमजस्रं सेवनातिक्रमेण
नयति रुधिरशोषं तेन वै पाण्डुरोगम् ॥
तेनाक्षिकूटे श्वयथुः शरीरे
पाण्डुत्वमायाति सपीतमूत्रः ।
निष्ठीवते त्वक् प्रविदीर्यते च
संजायते तस्य पुरःसराणि ॥
तोदः परुष्यलशिरोगुरुत्वं
त्वङ्मूत्रनेत्रे नखकालिमा स्यात् ।
वातात्मकं तन्मनुजस्य विद्धि
लिङ्गैरुपेतोऽनिलपाण्डुरोगः ॥
आमत्वपीतत्वकरो हि लोके
त्रिभर्ति शोथं कटुकास्यता च ।
मन्दज्वरो वै भृशशोथमोहः
पीतक्षविः पीतभवो हि पाण्डुः ॥
तन्द्रालुताशोफकफेन युक्तः
आलस्यकण्डूगुरुत्वमेव ।
संजायते तस्य कफात्मकोऽसौ
नरस्य पाण्डुत्वभवो विकारः ॥
तन्द्रालस्यं श्वयथुवमथुः कासश्लेष्मशोथा
विड्भेदः स्यात् परुषनयने सज्वरो वै क्षुधार्तः ।
मोहस्तृष्णाक्लममथ मनुजस्याशु पश्येत् सुदूरं
त्याज्यो वैद्यैर्निपुणमतिभिः सन्निपातोत्थपाण्डुः ॥
दृष्टिकाभक्षणेनाथ शृणु पुत्र! गदो महान् ।
पाण्डुरोगो गरिष्ठोऽपि भवेद्धातुक्षयङ्करः ॥
श्लक्ष्णत्वगाक्षेव मलं प्रकीर्य
स्रोतांसि रुन्धन्ति च दृष्टिकायाः ।
तेनैव नाड्यः परिवर्तयन्ति
न तर्पयन्ते वपुषं रसेन ॥
क्षारात् कषायान्मधुरस्य पानात्
स कोपयत्याशु नरस्य दृष्टिका ।
श्लेष्मप्रकोपान्मधुरान् करोति
दृष्ट्वा न जग्धा हितकारिणी स्यात् ॥
विक्षतिसुपगतास्ते मारुताद्याश्चयस्तु
बलवदनरूपौनां नाशयन्त्याशु दोषाः ।
भवति विकलमेवं पाण्डुरोगे शरीरं
भवति जठरपाण्डू रोग आशुप्रवीणः ॥"

"गोमूत्रमध्ये मतिमान् क्षारयेत् सप्तरात्रि-
कम् ।
तस्मात् चूर्णन्तु मधुना देयं पाण्डामयापहम् ॥
चूर्णयेत् त्रिफला सुस्तां विडङ्गं चित्रकं
समम् ।
भागमेकं लौहचूर्णमित्युद्धावे विभावयेत् ॥
सप्ताहमथ लौहमक्षितं
पुनरपि भूर्यं प्रवरं स्यात् ।
शीलितन्तु मधुनापि घृतेन
पाण्डुरोगहृदयामयापहम् ॥

पाण्डुः

कामलार्शो हलीमकहारि
कथितं सुमतिभिश्च पण्डितैः ॥
इति लौहचूर्णषटकम् ॥ ६ ॥
त्रयूषणं त्रिफलया सह चित्रकं
मेघचयसुरदारुसमाक्षिकम् ।
ग्रन्थिकश्च शिखिभृङ्गराजकं
योजयेत् पलिकभागिकानिमान् ॥
वर्धितान्द्विगुणमेव योजयेत्
लौहचूर्णमपि कज्जलप्रभम् ।
अष्टभागवमलूनकल्पितं
पाचितं पुनरभवद्वरप्रदम् ।
सेवयेद्बलसुपक्वमं तथा
तक्रसंयुतमिहाश्नतो भयम् ।
नाशयेच्च कफकामलान् क्रिमीन्
पाण्डुकुष्ठगुदनान् हलीमकम् ॥
इति मण्डूरवटकम् ॥"॥

पथ्यापथ्यान्यस्य यथा,—
"गोधूमशालियवषष्टिकमुद्गकानां
श्यामाढकीघृतयुतं सपयःसतक्रम् ।
गाङ्गीववास्तुकमधो घृतपुष्पवर्त्ता
पथ्यं हितं निगदितं मनुजस्य पाण्डौ ॥
शाल्यन्नमुद्गगोधूममसूराश्चाढकी यवाः ।
जाङ्गलानि च मांसानि भोजने च प्रशस्यते ॥
तिक्तानि रूक्षाणि कषायकाणि
तीव्राणि दाहीन्यपि क्षाञ्जिकानि ।
सुरान्वसौवीरकजोन्पूरान्
तैलानि वर्ज्यानि च पाण्डुरोगे ॥"
इति हारीते चिकित्सितस्थाने नवमोऽध्याये ॥*॥

अस्य चिकित्सान्तरं यथा,—
"पाण्डासयी पिबेत् सर्पिरादौ कल्याणकाह्वयम् ।
पञ्चगव्यं महातिक्तं घृतं वारग्वधादिना ॥
दाडिमात् क्षुद्रवो धान्यात् कुडवार्द्धं पलं पलम् ।
चित्रकात् पञ्चवेराच्च पिप्पल्यर्द्धपलञ्च तैः ॥
काङ्क्षतैर्विंशतिपलं घृतस्य चतिलाढके ।
सिद्धं हृत्पाण्डुगुल्मार्शःश्लीहवातकफार्त्तिनुत् ।
दीपनं श्वासकासघ्नं रूढ्वातानुलोमनम् ॥
दुःखप्रसविनीनाञ्च वन्ध्यानाञ्च प्रशस्यते ।
खेहितं वामयेत्तीक्ष्णैः पुनः स्निग्धञ्च शोधयेत् ।
पयसा सूत्रयुक्तेन बहुशः केवलेन वा ॥
दन्तीफलरसे कोष्णे काम्पिल्याञ्जलिमाप्लुतम् ।
द्राक्षाञ्जलिं वा क्वथितं ततः पिबेत् पाण्डुरोग-
जित् ॥
मूत्रेण पिष्टां पथ्यां वा ततसिद्धं वा फलत्रयम् ।
खर्जूरीरी त्रिवृच्छ्यामा भद्रदारु महौषधम् ॥
गोमूत्राञ्जलिना पिष्टं घृतं तैनैव वा पिबेत् ।
बाधितं क्षीरमेभिर्वा पिबेद्दोषानुलोमनम् ॥
मूत्रे स्थितं वा सप्ताहं पयसा यो रसः पिबेत् ।
जीर्णे क्षीरेण भुञ्जीत रसेन मधुरेण वा ॥
मुद्गयूषभवतो लिह्यात् पथ्यां मधुघृतप्लुताम् ।
विश्वाला कटुका मुस्ता कुष्ठं दारुकलिङ्गकः ॥
द्वाविंशाद्विपिचुर्ज्ञेया कर्षार्द्धांशाद्गुणक्रिया ।
पीत्वा तच्चूर्णमम्भोभिः सुखैर्लिह्यात्ततो मधु ॥

पाण्डुः

पाण्डुरोगं ज्वरं दाहं कासं श्वासमरोचकम् ।
गुल्मानाहामवातांश्च रक्तपित्तञ्च तज्जयेत् ॥
वासागुडूचीत्रिफला कटुकीभूनिम्बनिम्बजः ।
क्वाथः क्षौद्रयुतो हन्ति पाण्डुपित्तासकामलाः ॥"
"गुडनागरमण्डूरतिलांश्चान्नानतः समान् ।
पिप्पलीद्विगुणान् दद्यात् गुटिकां पाण्डुरोगिणे ॥
ताप्यं दार्व्याख्यं चव्यं ग्रन्थिकं देवदारु च ॥
क्षौद्रादि नरकाक्षेतचूर्णेद्विगुणं ततः ।
मण्डूरक्षाञ्जननिभं सर्व्वतोऽगुणेऽथ तत् ॥
घृतप्रविष्टे गोमूत्रे वटकीकरणक्षमे ।
प्रक्षिप्य वटकान् कुर्य्यात् तान् खादेत्तक्रभोजनः ॥
इते मण्डूरवटकाः प्रागुक्ता पाण्डुरोगिणाम् ।
कुष्ठान्यजरकं मेहं श्लीपदं श्वासमरोचकम् ॥
अर्शांसि कामलां मेहान् श्लीहानं शमयन्ति च ।
ताप्यान्निजतुरीप्यायोमलाः पञ्चपलाः पृथक् ॥
चित्रकत्रिफला योषविड्भैः पालिकैः सह ।
शर्करार्धपलोन्मिश्राचूर्णिता मधुना हृता ॥
पाण्डुरोगं विषं कासं यक्ष्माणं विषमं ज्वरम् ।
कुष्ठान्यजरकं मेहं श्लीपदं श्वासमरोचकम् ॥
विषूचिकाहृन्यपस्मारं कामलां गुदजानि च ।
कोटजत्रिफलानिम्बपटोलवननागरैः ॥
भावितानि दशाहानि रवेर्द्विगुणानि वा ।
शिलाजतुपलानष्टौ तावती सितशर्करा ॥
त्वक्क्षीरी पिप्पली धात्री कर्कटाख्याः पलोन्मिताः ।
निर्दग्धाः फलमूलार्द्धं पलं युक्त्या त्रिजातकम् ॥
मधुत्रिपलसंयुक्तं कुर्य्याद्दध्यसमान् गुडान् ।
दाडिमाम्बुपयःपित्तरसतोयसुरासवान् ॥
तान् भक्षयित्वानुपिबेन्निरन्नो भुक्त एव वा ।
पाण्डुकुष्ठज्वरश्लीहतमकार्शो भगन्दरम् ॥
कृमिमूत्रपूतीमुक्तास्थिदोषगोधगरोदरम् ।
कासाष्ठगुदरपित्तास्रक् श्लीपगुल्मगलामयान् ॥
मेहवर्ध्मभ्रमान् हनुः सर्व्वदोषहराः शिराः ॥"
इति वाभटे चिकित्सास्थाने षोड़शोऽध्याये ॥*॥

"अवायमस्त्रं लवणानि मद्यं
नष्टं दिवास्वप्नमतीवतीक्ष्णम् ।
निषेवमाणस्य प्रदूष्य रक्तं
कुर्व्वन्ति दोषास्त्वचि पाण्डुभावम् ॥
पाण्डामयोऽष्टादशविधः प्रदिष्टः
पृथक्समस्तैर्युगपच्च दोषैः ।
सर्व्वेषु चैवेष्विह पाण्डुभावो
यतोऽधिकोक्तः खलु पाण्डुरोगः ॥"
"कृष्णेक्षणं कृष्णसिरावनद्धं
तद्वर्णविण्मूत्रनखाननञ्च ।
वातेन पाण्डुं मनुजं वदेच्च
दुष्टं तथान्नैस्तदुपद्रवैश्च ॥
पीतेक्षणं पीतसिरावनद्धं
तद्वर्णविण्मूत्रनखाननञ्च ।
पित्तेन पाण्डुं मनुजं वदेच्च
युक्तं तथान्नैस्तदुपद्रवैश्च ॥
शुक्लेक्षणं शुक्लसिरावनद्धं
तद्वर्णविण्मूत्रनखाननञ्च ।

पाण्डुः

कफेन पाण्डुं मनुजं वदेच्च
युक्तं तथान्नैस्तदुपद्रवैश्च ॥
सर्व्वात्मके सर्व्वमिदं वदेच्च
वक्ष्यामि लिङ्गान्यथ कामलायाः ॥"
चिकित्सान्तरं यथा,—
"साध्यन्तु पाण्डामयिनं समीक्ष्य
स्निग्धं घृतेनोर्द्धमधश्च शुद्धम् ॥
सन्नादयेत् तीव्रघृतप्रगाढै-
र्हरीतकीचूर्णयुतैः प्रयोगैः ।
पिबेद्घृतं वा रजनीविपक्वं
यत्तैफलं तैक्तकमेव वापि ॥
विरेचनद्रव्यकृतं पिबेद्वि
योगांश्च वैरेचनिकान् घृतेन ॥"
"उभे हरिद्रे रजनीं सुकाख्यां
सुकादनीञ्चापि सकाकमाचीम् ।
आदारिवित्वीं सकदम्बपुष्पीं
विपाच्य सर्पिर्विपचेत् कषाये ॥
तत् पाण्डुतां हन्त्युपयुज्यमानं
घीरेण वा मार्गधिकां बयांसि ।
हितञ्च यष्टीमधुकं कषायं
चूर्णं समं वा मधुनावलिह्यात् ॥
गोमूत्रयुक्तं त्रिफलादनानां
दत्त्वायसञ्चूर्णमनल्पकालम् ।
प्रवालमुक्ताञ्जनशङ्खचूर्णं
लिह्यात्तथा काञ्चनगैरिकोत्थम् ॥
आजं शृङ्गद्वा कुडवप्रमाणं
विड्ं हरिद्रा लवणोत्तमञ्च ।
पृथक् पलांशानि समग्रमेत-
च्चूर्णं हिताग्नौ मधुनावलिह्यात् ॥
मण्डूरलोहाभिविड्भपर्थ्या
बोषांशकैः सर्व्वसमानताप्यैः ।
मूत्रासवोऽयं मधुनावलेहः
पाण्डामयं हन्त्यचिरेण घोरम् ॥"
इत्युत्तरतन्त्रे चतुश्चत्वारिंशत्तमोऽध्याये सुश्रुतेनोक्तम् ॥*॥ चिकित्सार्थमस्य वटिकौषधं यथा,
"लौहचूर्णं निशायुग्मं त्रिफला कटुरोहिणी ।
प्रलिह्यान्मधुसर्पिर्भ्यां कामला पाण्डुरोगनुत् ॥"
इति निशालौहम् ॥
"शुद्धसूतं तथा गन्धं सूतहेमाभ्रगुग्गुलु ।
जैपालबीजं तुल्यञ्च घृतेन गुडकीकृतम् ॥
भक्षयेद्वरदाभान्ताक्षोषपाण्डुप्रशान्तये ।
पञ्चाननवटी ख्याता अनुपानञ्च पूर्ब्ववत् ॥"
इति पञ्चाननवटी ॥
"पलं सूतं पलं गन्धं वाङ्गपत्रा पलं पलम् ।
मुस्तैलापत्रकाणाञ्च प्रतिसार्द्धपलं क्षिपेत् ॥
चूर्णयेत् पिप्पलीमूलं विषञ्चापि पलं पलम् ।
नागकेशरतः कर्षमेरण्डस्य पलन्तथा ॥
पुरातनगुडेनैव तुल्येनैव विमिश्रयेत् ।
मर्द्दयेत् कनकद्रावैरेकैकं वा घृतान्वितम्
गुडेन वदराभाभान् कारयेद्वटकेन्द्रियि ।
पाण्डुरोगहरः सोऽयं रसः कामेश्वरः स्वयम् ॥"
इति कामेश्वरो रसः ॥

इति वैद्यकरत्नेन्द्रसारसंग्रहे पाण्डुरोगाधिकारे ॥ * ॥ * ॥)

पाण्डुः, स्त्री, (पण्ड + कुः । निपातनात् दीर्घत्वम् ।) माषपर्णी। इति शब्दचन्द्रिका ॥ माषाणी इति भाषा ॥ पाण्डुवर्णश्च। इति मुग्धबोधव्याकरणम् ॥

पाण्डुकः, पुं. (पाण्डु + संज्ञायां कन् ।) पाण्डुरोगः । पाण्डुराजा । इति शब्दरत्नावली ॥ पाण्डुवर्णः । इति हलायुधः ॥

पाण्डुकण्टकः, पुं, (पाण्डुवर्णानि कण्टकान्यस्येति।) अपामार्गः । इति राजनिर्घण्टः ॥

पाण्डुकमलः, पुं, (पाण्डुवर्णः कमलः नित्यकर्म्मधारयः ।) श्वेतप्रावारः । प्रस्तरभेदः । इति मेदिनी। वे,१७०॥ पाण्डुवर्णकमलः। इति भरतः॥

पाण्डुकम्बली, [न्] पुं, (पाण्डुवर्णकम्बलेन परिवृतः । पाण्डुकम्बल + "पाण्डुकम्बलादिनिः ।"४। २ । ११ । इति इनिः ।) पाण्डुवर्णकम्बलावृतरथः । इत्यमरः । २ । ८ । ५४ ॥ पाण्डुकम्बलयुक्ते, त्रि ॥

पाण्डुतरुः, पुं, (पाण्डुवर्णस्तरुरिति कर्म्मधारयः ।) धववृक्षः । इति राजनिर्घण्टः ॥

पाण्डुनागः, पुं, (पाण्डुवर्णो नाग इव । यद्वा, नाग इव पाण्डुरिति राजदन्तादिवत् समासः ।) पुन्नागवृक्षः । इति शब्दरत्नावली ॥ (पाण्डुवर्णो नाग इति विग्रहे ।) श्वेतहस्ती श्वेतवर्णश्च ॥

पाण्डुपर्णी, स्त्री, (पाण्डु पत्रमस्या इति जातित्वात् ङीष् ।) रेणुका । इति राजनिर्घण्टः ॥ (पर्य्यायोऽस्या यथा.—

"रेणुका राजपुत्री च नन्दिनी कपिला हिता । भस्मगन्धा पाण्डुपर्णी सुता कौन्ती हरेणुका ॥

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

पाण्डुपृष्ठः, त्रि, (पाण्डु पृष्ठं यस्य ।) पाण्डुवर्णपृष्ठयुतः । चलचञ्चः । इति त्रिकाण्डशेषः ॥

पाण्डुफलः, पुं, (पाण्डूनि फलानि यस्य ।) पटोलः । इति राजनिर्घण्टः ॥

पाण्डुफला, स्त्री, (पाण्डु फलमस्या इति टाप् ।) त्रिर्भिटा । इति राजनिर्घण्टः ॥

पाण्डुभूमः, त्रि, (पाण्डुर्भूमिरत्र इति । "क्षयोदकपाण्डुशुक्लापूर्ब्बाया भूमेरिष्यते ।" ५ । ४ । ७५ । इत्यस्य सूत्रस्य वार्त्तिकोक्त्या अच् समासे ।) पाण्डुवर्णभूमियुक्तदेशः । यथा,—

"पाण्डूदक् क्षयतो भूमिः पाण्डूदक् क्षय नत्तिका ॥"

इति हेमचन्द्रः ॥

पाण्डुमृत्, स्त्री, (पाण्डुः पाण्डुवर्णा मृत् मृत्तिका यत्र ।) पाण्डुभूमिः । पाण्डुर्मृत् इति कर्म्मधारये ।) खटी । इति राजनिर्घण्टः ॥

पाण्डुरः, पुं, (पाण्डु रस्यास्तीति । पाण्डु + "नगांडुपाण्डुभ्यश्च ।" ५ । २ । १०७ । इत्यस्य सूत्रस्य वार्त्तिकोक्त्या रः ।) श्वेतपीतमिश्रितवर्णः । तद्वति, त्रि । इत्यमरः । १ । ५ । १७ ॥ (यथा, भागवते । ८ । ८ । ३ ।

"तत उच्चैःश्रवा नाम हयोऽभूच्चन्द्रपाण्डुरः । तस्मिन् बलिः समारुरुक्षन्नेन्द्रैश्वर्यमिच्छया ॥")

कामलारोगः । इति शब्दरत्नावली ॥ त्रिचरोगे, क्लीं । इति हलायुधः ॥

पाण्डुरङ्गः, पुं, (पाण्डुरागि अङ्गान्यस्येति ।) फलशाकविशेषः । पाटराङ्गा इति भाषा ॥ अस्य गुणाः । क्रिमिदोषपित्तनाशित्वम् । तिक्तत्वम् । लघुत्वञ्च । इति राजवल्लभः ॥

पाण्डुरद्रुमः, पुं, (पाण्डुरः श्वेतः श्वेतपीतमिश्रितवर्णो वा द्रुमो वृक्षः ।) कुटजवृक्षः । इति त्रिकाण्डशेषः ॥ (अस्य पर्य्यायो यथा, भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥

"कुटजः कूटजः कौटो वत्सको गिरिमल्लिका । कालिङ्गः शक्रशाखी च मल्लिका पुष्प इत्यपि । इन्द्रो यवफलः प्रोक्तो वृक्षकः पाण्डुरद्रुमः ॥")

पाण्डुरपृष्ठः, त्रि, (पाण्डुरं पृष्ठमस्य ।) लक्षणहीनः । इति हेमचन्द्रः ॥ पाण्डुवर्णपृष्ठयुक्तश्च ॥

पाण्डुरफली, स्त्री, (पाण्डुरं पाण्डुवर्णं फलं अस्याः । जातित्वात् ङीष् ।) क्षुद्रक्षुपविशेषः । तत्पर्य्यायः । पाण्डुः २ धूसरा ३ वृक्षबीजका ४ भूरिफलितदा ५ पाण्डुफली ६ । अस्या गुणाः । शिशिरत्वम् । गौरुत्वम् । क्षुद्रामदोषपित्तनाशित्वम् । वल्यत्वम् । वृष्यत्वञ्च । इति राजनिर्घण्टः ॥

पाण्डुरा, स्त्री, (पाण्डुरस्यस्या इति तलष्टाप् च ।) माषपर्णी। इति राजनिर्घण्टः ॥ पाण्डुरवर्णा च ॥

पाण्डुरागः, पुं, (पाण्डुरं पाण्डुरत्वं आ समन्तात् रूपेण गच्छतीति । गम + डः । यद्वा, पाण्डुः रागोऽस्येति ।) दमनकवृक्षः । इति राजनिर्घण्टः ॥ पाण्डुवर्णयुक्ते, त्रि ॥

पाण्डुरेक्षुः, पुं, (पाण्डुरः श्वेतवर्ण इक्षुः ।) श्वेतेक्षुः । इति राजनिर्घण्टः ॥

पाण्डुलेखः, पुं, (पाण्डुर्लेखः ।) पाण्डुलिपिः । सुबविदा इति पारस्यभाषा ॥ यथाह यास्कः ।

"पाण्डुलेखेन फलके भूमौ वा प्रथमं लिखेत् । न्यूनाधिकन्तु संशोध्य पश्चात् पत्रे निवेशयेत् ॥ फलकं काष्ठादिपट्टकम् ।" इति व्यवहारतत्त्वम् ॥

पाण्डुलोमशा, स्त्री, (पाण्डूनि लोमानीवाङ्गान्यस्याः ।) माषपर्णी ॥ इति रत्नमाला ॥ पाण्डुवर्णलोमयुक्ता च ॥

पाण्डुलोमा, स्त्री, (पाण्डु लोम यस्याः ।) माषपर्णी। इति शब्दार्णवः ॥ पाण्डुवर्णलोमयुक्ते, त्रि ॥

पाण्डुशर्करा, स्त्री, (पाण्डुः शर्करा इव यस्यां रोगावस्थायामित्यर्थः ।) रोगविशेषः । यथा, गारुडे १८२ अध्याये ।

"पिष्टं वै मासतीमूलं ग्रीष्मकाले समाहृतम् । साधितं छागदुग्धेन पीतं शर्करयान्वितम् ॥ हरेच्छूलनिरोधञ्च हरेत् पाण्डुशर्करान् ॥"

पाण्डुसुन्निता, स्त्री, द्रौपदी। इति त्रिकाण्डशेषः ॥

पाण्डुसोपाकः, पुं, वर्णसङ्करविशेषः । स तु चण्डालात् वैदेह्यां जातः ॥ (उत्पत्तिविवरणम् । यथा, मनौ । १० । ३७ ।

"चण्डालात् पाण्डुसोपाकस्त्वक्सारव्यवहारवान् । आहिण्डिको नियादेन वैदेह्यामेव जायते ॥"

"वैदेह्यां चण्डालात् पाण्डुसोपाकाख्यो वेणुव्यवहारजीवी जायते ।" इति तट्टीकायां कुल्लूकभट्टः ॥ क्वचित् पाण्डुसोपाकोऽपि पाठो दृश्यते । यथा, महाभारते । १६ । ४८ । २६ ।

"चण्डालात् पाण्डुसोपाकस्त्वक्सारव्यवहारवान् ॥")

पाण्यः, त्रि, (पण व्यवहारस्तुत्योः + ण्यत् ।) स्तुत्यः । स्तवनीयः । ("पण्या गौः व्यवहर्त्तव्येत्यर्थः । पाण्यमन्यत् स्तुत्यर्हमित्यर्थः ।" इति "सिद्धान्तकौमुद्याम् । ३ । ९ । १०२ । इत्यस्य सूत्रस्य वृत्तौ भाष्यातम् ॥)

पातः, पुं, (पत + घञ् ।) पतनम् । (यथा, महाभारते । ३ । १३३ । २६ ।

"वड़वे इव संयुक्ते श्येनपाते दिवौकसाम् । कस्यचिर्गर्भमाधत्ते गर्भं सुषुवतुश्च कम् ॥")

घाते, त्रि । इति मेदिनी ॥ (पातयति चन्द्रसूर्य्यौ ह्रादयतीति । पत + णिच् + अच् ।) राहुः । यथा,—

"ताडितः खड्गघातैर्हि तस्य शिरः षट्कषट्कशरक्षुण्णफलमांसाः । रुरुदुर्वै कुलस्त्रीणामतिमात्रो राहुमाहुरिह कैऽपि तदेव ॥"

इति सिद्धान्तशिरोमणिः ॥

पातकं, क्लीं, (पातयति अधो गमयति दुष्क्रियाकारियमिति । पत + णिच् + ण्वुल् ।) नरकसाधनमिति यावत् । तत्पर्य्यायः । अशुभम् २ दुष्कृतम् ३ दुरितम् ४ पापम् ५ एनः ६ पाप्मा ७ किल्बिषम् ८ कलुषम् ९ किल्बिषम् १० कल्मषम् ११ दुरितम् १२ तमः १३ अंहः १४ कल्कम् १५ अघम् १६ पङ्कम् १७ । इति हेमचन्द्रः ॥ तच्च नवविधं यथा । अतिमातकम् १ महापातकम् २ अनुपातकम् ३ उपपातकम् ४ सङ्करीकरणम् ५ अपात्रीकरणम् ६ जातिभ्रंशकरम् ७ मलावहम् ८ प्रकीर्णकम् ९ । इति प्रायश्चित्तविवेकः ॥ एषां विवरणं तत्तच्छब्दे द्रष्टव्यम् ॥ कायवाङ्मनःकृतानि दशविधपापानि यथा,—

"अदत्तानामुपादानं हिंसा चैवाविधानतः । परदारोपसेवा च कायिकं त्रिविधं स्मृतम् ॥ पारुष्यमनृतञ्चैव पैशुन्यञ्चापि सर्व्वशः । असम्बद्धप्रलापश्च वाङ्मयं स्याच्चतुर्विधम् ॥ परद्रव्येष्वभिध्यानं मनसानिष्टचिन्तनम् । वितथाभिनिवेशश्च त्रिविधं कर्म्म मानसम् ॥"

इति तिथ्यादितत्त्वम् ॥

पातञ्जिः, पुं, (पतञ्जस्य सूर्य्यस्यापत्यमिति । पतञ्ज + "अत इञ् ।" ४ । १ । १५ । इति इञ् ।) शनैश्चरः । इति शब्दरत्नावली ॥

पातञ्जलं, क्ली, (पतञ्जलिना स्वनामविश्रुतमहर्षिणा प्रणीतं प्रोक्तं वा इति अण्।) पतञ्जलिमुनिप्रणीतपादचतुष्टयात्मकयोगकाण्डनिरूपकदर्शनशास्त्रविशेषः॥ तत्र प्रथमे पादे अथ योगानुशासनमिति योगशास्त्रारम्भे प्रतिज्ञां विधाय योगश्चित्तवृत्तिनिरोध इत्यादिना योगलक्षणमभिधाय समाधिं सप्रपञ्चं निरदिक्षद्भगवान् पतञ्जलिः॥ १॥ द्वितीये तपःस्वाध्यायेश्वरप्रणिधानानि क्रियायोग इत्यादिना व्युत्थितचित्तस्य क्रियायोगं यमादीनि पञ्च बहिरङ्गानि साधनानि॥ २॥ तृतीये। देशबन्धश्चित्तस्य धारणेत्यादिना धारणाध्यानसमाधित्रयमन्तरङ्गं संयमपदवाच्यं तत्रावान्तरफलं विभूतिजातम्॥३॥ चतुर्थे जन्मौषधिमन्त्रतपःसमाधिजाः सिद्धय इत्यादिना सिद्धिप्रपञ्चनपुरःसरं परमं प्रयोजनं कैवल्यम्॥ ४॥ प्रधानादीनि पञ्चविंशतितत्त्वानि साङ्ख्योक्तान्येवाचापि। षड्विंशस्तु परमेश्वरोऽधिकः। इति सर्व्वदर्शनसंग्रहः॥

पातनं, क्ली, (पत+णिच्+भावे ल्युट्।) अधोनयनम्। यथा "ऊर्द्धाधस्तिर्य्यक्पातनादिभी रसस्य नानाविधा शुद्धिरुक्ता।" इति रत्नावली॥

पाता, [तृ] त्रि, (पाति रक्षतीति। पा रक्षणे+तृच्।) रक्षिता। यथा,—
"संहारकर्त्तुः संहर्त्ता पातुः पाता परात्परः।
ममाज्ञयायं संहर्त्ता नाम्ना तेन हरः स्मृतः॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ६ अध्यायः॥
गन्धपत्रः। इति शब्दचन्द्रिका॥ वायड इति भाषा॥

पातालं, क्ली, (पतन्त्यस्मिन् दुष्क्रियावन्त इति। पत+"पतिचरिडिभ्यामालच्।" उणा। १। ११६। इति आलच्। पादस्य तले वर्त्तते इति पृषोदरात् साधुरित्येके।) विवरम्। वड़वानलः। इति मेदिनी॥ लग्नाच्चतुर्थस्थानम्। यथा,—
"पातालं चिबुकस्थैव सुहृदम्बन्धुचतुथकम्॥"
इति ज्योतिस्तत्त्वम्॥
स्वनामख्यातभुवनविशेषः। तत्पर्य्यायः। अधोभुवनम् २ बलिसद्म ३ रसातलम् ४ नागलोकः ५। इत्यमरः॥ अधः ६ उरगस्थानम् ७॥ * ॥
सप्तपातालानि यथा,—
"अतलं नितलञ्चैव वितलञ्च गभस्तिमत्।
तलं सुतलपाताले पातालानि तु सप्त वै॥"
इति शब्दरत्नावली॥
शेष उवाच।
"कथयामि महाभाग! पातालस्य विनिर्णयम्।
क्रमादेव निबोधैतत् सावधानो द्विजर्षभ!॥
पातालानि च सप्तैव शृणुष्व संप्रचक्षते।
अतलं वितलञ्चैव सुतलञ्च तलातलम्॥
महातलञ्च विख्यातं ततो ज्ञेयं रसातलम्।
ततः पातालमित्येवं सप्त पातालसंज्ञकाः॥
एते स्वर्गाधिकसुखा विलस्वर्गाः प्रकीर्त्तिताः।
सन्मुहुर्भवनोद्यानविहाराक्रीड़चत्वराः॥
या च सा मेदिनी ब्रह्मन्! धत्ते स्थावरजङ्गमान्।
अधस्तस्या यदतलं योजनायुततो द्विज!॥
मयपुत्रो महामायो वसत्यत्र महासुरः।
येन सृष्टाः पुरा माया षड्भिर्नवतिः किल॥१॥
तदधो वितलं नाम योजनानां ततोऽयुते।
हरो विहरते तत्र भगवान् हाटकेश्वरः॥
सुपार्श्वैर्भूतगणैर्भवान्या च सह प्रभुः।
प्रवृत्ता च सरित् तत्र हाटकी नाम विश्रुता॥२॥
अधः सुतलमित्येतत् योजनानां ततोऽयुते।
तत्रोदारश्रवाः पुण्यश्लोको वैरोचनिर्बलिः॥३॥
तलातलं ततोऽधस्तात् सुतलादूयोजनायुते।
मयो नाम दानवेन्द्रस्त्रिपुराधिपतिर्महान्।
निवसत्यत्र सुचिरं मायानां परमाश्रयः॥ ४॥
महातले ततोऽधस्तादूयोजनानामथायुते।
सर्पाणां काद्रवेयाणां गणः क्रोधवशाश्रयः॥
गरुड़ात् सर्व्वदा भीतः सकुटुम्बः सुहृद्वृतः।
निवसत्यनभिज्ञातः पन्नगराजेन गह्वरे॥ ५॥
रसातले ततोऽधस्तादूयोजनानामथायुते।
निवसन्ति दानवाश्च शक्राद्भीता निरन्तरम्॥६॥
पाताले तु ततोऽधस्तादूयोजनानां द्विजायुते।
नागलोकेश्वराः शूरा निवसन्ति महाबलाः॥"७
इति पाद्मे पातालखण्डे १। २। ३ अध्यायाः॥*
अपि च अग्निपुराणे।
"अतलं सुतलञ्चैव वितलञ्च गभस्तिमत्।
महातलं रसातलं पातालं सप्तमं स्मृतम्॥
कृष्णशौक्लं शिलाभौमं पातालं नीलवृत्तिकम्।
रक्तपीतश्वेतलक्षणभौमानि च भवन्त्यपि॥
पातालानाञ्च सप्तानां लोकानाञ्च यदन्तरम्।
सुषिरं तानि कथ्यन्ते भुवनानि चतुर्दश॥
अष्टाविंशतिविख्यातास्ततो नरककोटयः।
नरकाणामधस्तात्तु धूमः कालाग्निसम्भवः॥
तस्याधस्तादनन्ताख्यो रुद्रः सर्व्वमयो महान्।
तदधो धर्म्मचक्रन्तु येनेदं धार्य्यते जगत्॥" * ॥
अन्यच्च।
"दशसाहस्रमेकैकं पातालं मुनिसत्तम!।
अतलं वितलञ्चैव नितलञ्च गभस्तिमत्॥
महाख्यं सुतलञ्चाग्र्यं पातालञ्चापि सप्तमम्।
कृष्णशुक्लारुणापीताश्चर्कराशैलकाञ्चनाः॥
भूमयो यत्र मैत्रेय! वरप्रासादशोभिताः।
तेषु दानवदैतेयजातयः सुतसंयुताः॥
निवसन्ति महाभागा अहयश्च महासुने!।
स्वर्लोकादपि रम्याणि पातालानीति नारद!॥
दिवाकररश्मयो यत्र प्रभां तन्वन्ति नातपम्।
शशिनश्च न शीताय निशि द्योताय केवलम्॥
पातालानामधस्तात्ते विष्णोर्या तामसी तनुः।
शेषाख्या यद्गुणान् वक्तुं न शक्ता दैत्यदानवाः॥
योऽनन्तः पठ्यते सिद्धैर्देवर्षिपूजितः।
यस्येषा सकला पृथ्वी फणामणिशिखारुणा।
आस्ते कुसुममालेव कस्तद्वीर्य्यं वदिष्यति॥
यदा विजृम्भतेऽनन्तो मदाघूर्णितलोचनः।
तदा चलति भूरेषा सार्द्रितोयाब्धिकानना॥"
इति विष्णुपुराणे। २। ५। अध्यायः॥

पातालः, पुं, (पतति जारणाद्यर्थं पारदादिकं यत्र। पत+आलच्।) औषधपाकार्थयन्त्रविशेषः। इति शब्दचन्द्रिका॥ तत्प्रकारो यथा, वैद्यके।
"ऊर्द्धमाषस्तले बह्निर्मध्ये तु रससंग्रहः।
पातालयन्त्रमेतद्धि औषधेयत् मृतकादिकम्॥"

पातालगरुड़ी, स्त्री, (पातालाख्या गरुड़ी।) लताविशेषः। छिउड़ा इति हिन्दीभाषा॥ तत्पर्य्यायः। वत्सादनी २ सोमवल्ली तिक्ताङ्गा ४ मेचकाभिधा ५ ताक्षी ६ सौपर्णी ७ गारुड़ी ८ दीर्घकाण्डा ९ दृढ़काण्डा १० महाबला ११ दीर्घवल्ली १२ दृढ़लता १३। अस्या गुणाः। मधुरत्वम्। पित्तदाहास्रदोषविषदोषनाशित्वम्। हृद्यत्वम्। सन्तर्पणत्वम्। रुच्यत्वञ्च। इति राजनिर्घण्टः॥
अपि च।
"छिलिछिण्डो महास्नुः पातालगरुड़ाह्वयः।
छिलिछिण्डः परं हृद्यः कफघ्नः पवनापहः॥"
इति भावप्रकाशः॥

पातालनिलयः, पुं, (पाताले पातालं वा निलयो यस्य।) दैत्यः। इति हलायुधः॥ सर्पः। इति राजनिर्घण्टः॥

पातालौकाः, [स्] पुं, (पातालमोकः स्थानमस्येति।) दैत्यः। इति हेमचन्द्रः॥ पातालवासिनि, त्रि॥

पातिः, पुं, (पाति रक्षतीति। पा+"पातेरतिः।" उणा। ५। ५। इति अतिप्रत्ययः।) प्रभुः। स्वामी। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

पातिकः, पुं, (पातः पतनं जले निमज्जनोन्मज्जनमेवास्यास्येति। पात+ठन्।) शिशुमारः। इति शब्दमाला॥

पातिली, स्त्री, (पातः सम्पातः पक्षियूथं लीयतेऽत्र। ली+डः। ङीष् च।) वागुरा। (पातिः स्वामी लीयतेऽस्याम्।) नारी। मृत्पात्रभेदः। इति मेदिनी॥ पातिल् इति भाषा॥

पातुकः, त्रि, (पत+"लषपतपदस्थेति।" ३। २। १५४। इति उकञ्।) पतयालुः। पतनशीलः। इत्यमरः॥ (यथा, महाभारते। १२। ६१। ४२।
"यमो राजा धार्म्मिकाणां मान्यानां परमेश्वरः।
संयच्छन् भवति प्राणानसंयच्छंस्तु पातुकः॥")
प्रपाते जलहस्तिनि च पुं। इति मेदिनी॥

पात्रः, त्रि, (नानागुणालङ्कृतो जनः।
"अपात्रः पात्रतां याति यत्र पात्रो न विद्यते॥"
इत्युणादिवृत्तिधृतोज्ज्वलदत्तः॥
तथा च महाभारते। १३। ६६। २२।
"शुभे पात्रे ये गुणा गोप्रदाने
तावान् दोषो ब्राह्मणस्यापहारे॥")
पाधातोस्त्रप्रत्ययनिष्पन्नत्वादेकतकारवानयम्॥

पात्रं, क्ली, पाति रक्षति क्रियामाधेयं वा। पिबन्त्यनेनेति वा। पा रक्षणे पा पाने वा+"सर्व्वधातुभ्यः ष्ट्रन्।" उणा ४। १५८। इति ष्ट्रन्।)

नाधिपतिसंज्ञाः स्मृताः। तत्पर्य्यायः। अमत्रम् २ भाजनम् ३। इत्यमरः। २। ९। ३३॥ भाण्डम् ४ कोषः ५ कोशः ६ पात्री ७ कौशी ८ कोषी ९ कोशिका १० कोषिका ११। इति शब्दरत्नावली॥ (यथा, देवीभागवते। १। २। ४०।

"सकलानुगमस्तानामेकपात्रे पवित्र-
समितिर्मुदमतातुल्तास्ति यदुदितिविचम्॥")
योग्यम्। सुपादि। राजमन्त्री। तीरद्वयान्तरम्। इति मेदिनी॥ पानार इति भाषा॥ पर्णम्। तालानुकम्पा। इति हेमचन्द्रः॥ स्माढ़कपरिमाणम्। इति वैद्यकपरिभाषा॥ (यथा, चरके कल्पस्थाने १२ अध्याये।

"—————पत्तः प्रस्थमथाढ़कम्।
पात्रं तदेव विज्ञेयं—————॥")
पात्राणां विधिर्यथा,—
"हेमपात्रेण सर्वाणि लभते चेति तान्मुने!।
कार्ष्णं रूप्येण तु रौप्येण व्यायुराज्यसुतान् लभेत्॥
ताम्रपात्रेण सौभाग्यं धर्म्मं स्फाटिकमभवे।
पार्थिवपात्राणि रम्याणि नैष्ठिकादिषु कारयेत्॥
शैलानि स्तम्भनीनां रक्तानि धर्म्मकामिनाम्।
धातुसमानि पात्राणि दृष्टरागविवृद्धये॥
शङ्खशुक्तिकलौहानि यन्त्रयन्त्रादिषु कारयेत्।
विनायकसक्त्यादिषु प्रतिष्ठासु विशेषतः॥
पात्राणामादरः कार्य्यः पात्राण्येषोत्तमानि च।
पात्रेषु पृथिवीं दृष्ट्वा सुधा पात्रेषु धार्य्यते॥
देवाः सोमः क्रतुर्यज्ञो पात्राण्येव विदुर्बुधाः।
अग्निहोत्रक्रियादीनि विना पात्रेण सिध्यति॥
तस्माद्यत्नात् प्रसेवेत पात्रधार्य्यं महामने॥"
तत्परिमाणादिर्यथा,—
"षट्त्रिंशदङ्गुलं मानयोत्तमं परिकीर्त्तितम्।
मध्यमं तत्त्रिभागेन भागं कन्यसमीरितम्॥
यमङ्गुलप्रमाणन्तु तत् पात्रं कारयेत् क्वचित्।
नानाविचित्ररूपाणि पौण्डरीकाकृतीनि च॥
घटनानि सम्यकाकारपत्राणि परिकल्पयेत्।
रत्नादिरचितान् कुर्य्यात् कार्य्यांस्तत्समर्पितान्।
यथालाभं यथालाभं तथा पात्राणि कारयेत्।
विना पात्रेण यः कुर्य्यात् प्रतिष्ठायाज्ञिकीं क्रियाम्।
विफला भवति सर्वा वाङ्मनादिधनायथा॥"
इति देवीपुराणम्॥

भोजनपात्राणि भोजनशब्दे द्रष्टव्यानि॥
पात्रटः, पुं, (पात्रा इव विवरमिव वा स्पटतीति। पट्+अण्।) कर्पटकः। कृशे, त्रि। इति शब्दरत्नावली॥
पात्रटीरः, पुं, (पात्रेव रन्ध्रमिव विवरमिव वा स्पटतीति। स्पट+बाहुलकात् ईरन्।) पुत्तलामारमात्रः। लौहपात्रम्। कांस्यपात्रम्। रजतपात्रम्। श्येनम्। भारः। इति शब्दमाला। श्वेतो च। वे, ८५१। मिश्रकः। वायसः। कड्कः। इति शब्दरत्नावली॥
पात्रपालः, पुं, (पात्रं पालयतीति। पाल+अण्।) ... । इत्यमरः। ...

घटः। इति जटाधरः॥ पातलीयार इति भाषा॥
पात्रसंस्कारः, पुं, (संस्क्रियते इति। सम्+कृ+घञ्। पात्रस्य संस्कारः शुद्धिः।) भाजनशुद्धिः। सुरोटिः। इति शब्दचन्द्रिका॥ रायभाटी इति भाषा॥
पात्री, स्त्री, (पा+ष्ट्रन्। षित्वात् ङीप्।) पात्रम्। इति विविक्तसंग्रहे अमरः। ३। ५। ४२॥ (यथा, मात्स्ये दशविधकर्णे तडागविधिप्रकरणे।

"पात्रीमादाय सौवर्णीं पञ्चरत्नसमन्विताम्।
तत्र निःक्षिप्य मकरं मत्स्यादींश्चैव सर्व्वशः॥")
पात्रीयं, क्ली, (पात्रे साधु। पात्र+वाहुलकात् छः।) यज्ञपात्रम्। इति त्रिकाण्डशेषः॥
पात्रीरः, पुं, (पात्रेव राति पात्रीं रातीति वा। रा+कः।) यज्ञद्रव्यम्। इति भूरिप्रयोगः॥
पात्रेसमितः, त्रि, (पात्रे भोजनसमये एव समितः सङ्गतः। भोजनादन्यत्र यो न मिलितः सः। भोजनेष्वेव दक्षः। यथा,—

"स पात्रेसमितोऽन्यत्र भोजनाद्बिमितो न यः॥"
इति त्रिकाण्डशेषः॥

पापविशेषः। यथा,—
"निधाय हृदये पापं यः परं शंसति स्वयम्।
स पात्रेसमितोऽयं स्यात्॥" इति शब्दमाला॥
पात्रोपकरणं, क्ली, (पात्रस्य पात्राणां वा उपकरणम् उपभूषणम्।) उपभूषणम्। यथा,—
"रीतिवर्गादिसंजातं पात्रोपकरणादिकम्।
दद्यादायसवर्ज्जन्तु भूषणं न कदाचन॥
घण्टाचामरकुम्भादिपात्रोपकरणादिकम्।
तद्भूषणान्तरे दद्यादयमात्मदुपभूषणम्॥"
इति कालिकापुराणे ६९ अध्यायः॥
पात्र्यं, क्ली, (पततीति। पत+क्विप्। पतं अधःपतन्तं जनं त्रायते। त्रै+कः। ततः स्वार्थे प्रज्ञाद्यण्। निर्णेरस्य निरुक्तिश्च दर्शनीया।) मापिताता। यथा, भविष्यपुराणे।
"सर्व्वेषामेव पात्राणां परं पात्रं महेश्वरः।
पतन्तं त्रायते यस्मात्तीव्रनरकार्णवात्॥"
महेश्वर इति प्रदर्शकं हेतोरविशेषात्।
तथा नन्दिपुराणम्।
"पात्राण्याध्यात्मिका तस्मा विद्वांसामिशेषिणः।
देवताय तथा तुष्यं गोदानं क्लेनदुत्तमम्॥"
इति प्रायश्चित्ततत्त्वम्॥
पात्रता, स्त्री, (पात्रस्य भावः।) पात्रत्वम्। विद्यातपस्याधारयुक्तता। यथा,—
"न विद्यया केवलया तपसा वापि पात्रता।
यत्र वृत्तमिमे चोभे तद्धि पात्रं प्रचक्षते॥"
इति शुद्धितत्त्वम्॥
पाथं, क्ली, जलम्। इति मेदिनी। थे, ८॥
पाथः, पुं, (पातीति। पा+थुट् निपातनात्।) सूर्य्यः। अग्निः। इति मेदिनी। थे, ८॥
पाथः, [स्] क्ली, (पाति रक्षति जीवानिति। पा+"उदके थुट् च।" उणां। ४। २०४। इति असुन् थुट् च। "पातीरेवोदके पाथोऽसुन् तस्य थुडागम इत्युणादिवृत्तिः।) पयः। अन्नम्। इत्यमरः॥ (यथा, काशीखण्डे। २८। ४६।

"शरत्सन्तापशमनी खनिः पीयूषपाथसाम्॥")
पाथिः, [स्] पुं, (पिबति नद्यादिजलमार्णवीतीति। "पिबतेस्थुक् च।" उणां। २। ११५। इति इसिन् थुगागमश्च।) समुद्रः। इत्युणादिकोषः॥ चक्षुः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ (पीयते इति। पा+इसिन् थुगागमश्च।) कीलालं, क्ली। इत्युणादिकोषः॥
पाथेयं, क्ली, (पथि साधुरिति। "पथ्यतिथिवसतिस्वपतेर्ढञ्।" ४। ४। १०४। इति ढञ्।) पथि शयितद्रव्यम्। इति हेमचन्द्रः॥ पथखरच इति भाषा॥ तत्पर्य्यायः। शम्बलम् २। इत्यमरः॥ सम्बलम् ३। इति भरतः॥ (यथा, देवीभागवते। ३। २५। १२।

"लुण्ठिता तस्करैर्मार्गे वस्त्रमात्रा तथा हृता।
पाथेयश्च हृतं सर्व्वं बालपुत्रा निराश्रया॥")
कन्याराशिः। यथा,—
"क्रियतावुरिजितुमकुलीरलेयपाथेयवृक्कौ-पोखाः।
तौक्षिक आकोकेरो हृद्रोगश्चान्त्यभं चेत्थम्॥"
इति ज्योतिस्तत्त्वम्॥
पाथोजं, क्ली, (पाथसि जले जायते इति। जन+डः।) कमलम्। इति राजनिर्घण्टः॥ (यथा, नैषधे। १९। २०।

"अनतिशिथिले पुम्भावेन प्रगल्भवला खलु प्रनभमनयः पाथोजास्ये निविश्य निरित्वरा॥"
कमलशब्दे विवरणं सविस्तरं ज्ञेयम्॥)
पाथोदः, पुं, (पाथो जलं ददातीति। दा+कः।) मेघः। इति त्रिकाण्डशेषः॥
पाथोधरः, पुं, (धरति धारयतीति वा। धृ+अच्। पाथसो धरः। पाथो धारयतीति। धारि+अच् इत्यस्मे इत्येके।) मेघः। इति हलायुधः॥ (यथा, राजतरङ्गिण्याम्। ३। २४०।

"अन्तर्यो मतनं लुठन्ति गणितास्तानिव पाथोधरे-रार्त्तानापतितांस्तरङ्गवलयैरालिङ्ग्य रत्नाकरैः॥")
पाथोधिः, पुं, (पाथांसि धीयन्तेऽत्र। धा+कि।) समुद्रः। इति त्रिकाण्डशेषः॥ (यथा, राजतरङ्गिण्याम्। ३। ६९।

"वर्षीकृतेयं पृथिवी सनूना भवद्भ्रमात्।
केनु दीपान् कथ्यनागा यत्तिः पाथोधिलङ्घने॥")
पाथोनिधिः, पुं, (पाथांसि जलानि निधीयन्तेऽस्मिन् इति। नि+धा+किः।) समुद्रः। इति शब्दरत्नावली॥
पाद, पुं, (पद+णिच्+क्विप्।) पादः। इति जटाधरः॥
पादः, पुं, (पद+करणे घञ्।) इति गन्धेऽपि। पा इति भाषा। स तु गर्भस्थस्य मातृहृदयेन भवति। यथा,—
"मासेन तु शिरो द्वाभ्यां बाहवङ्घ्र्याद्यवयवः॥"
इति प्रायश्चित्ततत्त्वम्॥

तत्पर्य्यायः । पत् २ अङ्घ्रिः ३ चरणः ४ । इत्यमरः ॥ अंघ्रिः ५ । इति शब्दरत्नावली ॥ * ॥ ऋग्वेदीयमन्त्रचतुर्थांशः । श्लोकचतुर्थांशः । यथा, पादाक्षेपोपे सत्येव पूर्य्येत । इह ऋक्पाद एव गृह्यते । इति वामनः ॥ अविशेषात् श्लोकपादोऽपि । इत्यपरे । इति सिद्धान्तकौमुदी ॥ * ॥

पादद्वारा पादाक्रमणादिनिषेधो यथा,—
"पादेन नाक्रमेत् पादमुच्छिष्टं नैव लङ्घयेत् ।
न संहताभ्यां पाणिभ्यां कण्डूयेदात्मनः शिरः ॥"
इति कर्म्मलोचनम् ॥ * ॥

पादप्रक्षालनादिनिषेधो यथा,—
"न पादप्रक्षालनं कुर्य्यात् पादेन वा कदाचन ।
गामौ प्रतापयेत् पादौ न काष्ठे धावयेद्बुधः ॥
नातिप्रसारयेद्देवं ब्राह्मणान् गामथापि वा ।
वायुमिन्दुपविप्राणां सूर्य्यं वा मूढधीर्न प्रति ॥"
इति कौर्म्मे उपविभागे १५ अध्यायः ॥ * ॥

पादेन्द्रियस्याध्यात्मत्वं तस्मिन्नधिभूतमधिदैवतञ्च यथा, महाभारते आश्वमेधिकपर्व्वणि ४२ अध्याये ।
"अतः परं प्रवक्ष्यामि सर्व्वं विविधमिन्द्रियम् ।
पादावध्यात्ममित्याहुर्ब्राह्मणास्तत्त्वदर्शिनः ॥
अधिभूतन्तु गन्तव्यं विष्णुस्तत्राधिदैवतम् ॥"
बुधः । वृत्तमूलम् । तुरीयांशः । चतुर्थभागः । शैलप्रत्यन्तपर्व्वतः । महीद्रिसमीपे क्षुद्रपर्व्वतः । (यथा, हरिवंशे ६४ । २० ।
"उभयोर्विन्ध्यचर्य्योः पादे नगयोस्तां महापुरीम् ॥")
मयूखः । किरणः । इति मेदिनी ॥ (शिवः । यथा, महाभारते । १३ । १७ । १२४ ।
"न्यायनिर्व्वपणः पादः पण्डितो ह्यचलोपमः ॥"
चिकित्साचतुष्पादचतुष्टयं यथा,—
"वैद्यो व्याधुपसृष्टस्तु भेषजं परिचारकः ।
एते पादाश्चिकित्साया कर्म्मसाधनहेतवः ॥
गुणवच्छिक्षिभिः पादैश्चतुर्भी गुणवान् भिषक् ।
व्याधिमल्पेन कालेन महान्तमपि साधयेत् ॥
वैद्यहीनास्त्रयः पादा गुणवन्तोऽप्यपार्थकाः ।
उन्नालघोलब्रह्माणो यथाध्वर्य्युं विनाध्वरे ॥
तत्त्वाधिगतशास्त्रार्थो दृष्टकर्म्मा स्वयं कृती ।
लघुहस्तः शुचिः शूरः सज्जोपस्करभेषजः ॥
प्रत्युत्पन्नमतिर्धीमान् व्यवसायी विशारदः ।
सत्यधर्म्मपरो यश्च स भिषक् पाद उच्यते ॥
आयुष्मान् सत्त्ववान् साध्यो द्रव्यवानात्मवानपि ।
आस्तिको वैद्यवाक्यस्थो व्याधितः पाद उच्यते ॥
प्रशस्तदेशसम्भूतं प्रशस्तेऽहनि चोद्धृतम् ।
युक्तमात्रं मनस्कान्तं गन्धवर्णरसान्वितम् ॥
दोषघ्नमग्लानिकरमविकारि विपर्य्यये ।
समीक्ष्य दत्तं काले च भेषजं पाद उच्यते ॥
स्निग्धोऽनुगुणबलवान् युक्तो व्याधितरक्षणे ।
वैद्यवाक्यक्रियारक्तः पादः परिचरः स्मृतः ॥"
इति च सुश्रुते सूत्रस्थाने ३४ अध्यायः ॥
"कारणं षोड़शगुणं सिद्धौ पादचतुष्टयम् ॥"
इति चरके सूत्रस्थाने नवमेऽध्याये ॥

अस्य शुभलक्षणं यथा,—
"अस्वेदनौ मृदुतलौ कमलोदराभौ
श्लिष्टाङ्गुली रुचिरताम्रनखौ सुपार्ष्णी ।
उच्चौ शिरारविरहितौ च निगूढगुल्फौ
कूर्म्मोन्नतौ च चरणौ मनुजेश्वरस्य ॥"
अशुभलक्षणञ्च यथा,—
"शूर्पाकारविरूक्षपाण्डुरनखौ वक्रौ शिरासन्ततौ
संशुष्कौ विरलाङ्गुली च चरणौ दारिद्र-
दुःखप्रदौ ॥")

पादकटकः, पुं, (पादस्य कटक इवेति ।) नूपुरः । रवशून्यहंसाकृतिचरणभूषणम् । वेंक मल इति भाषा । तत्पर्य्यायः । हंसकः २ । इत्यमरभरतौ ॥

पादकच्छूः, पुं, व्रतविशेषः । यथा,—
"एकभक्तेन नक्तेन तथैवायाचितेन च ।
उपवासेन चैकेन पादकच्छ्रू उदाहृतः ॥"
इति गारुड़े १०३ अध्यायः ॥

पादगण्डिरः, पुं, (गण्यते चर्य्यते पूयरक्तादि यस्मात् यत्र वा पादे इत्यर्थः । गड़ + किरच् इति गण्डिरः पदः ततो राजदन्तादित्वात् परनिपातनात् साधुः । गण्डीर इति पाठोऽपि दृश्यते तत्र गड़ + ईरन्प्रत्ययेन साधुरिति ।) श्लीपदम् । इति त्रिकाण्डशेषः ॥ गोद इति भाषा ॥ (श्लीपदशब्देऽस्य विवृतिर्विज्ञेया ॥)

पादग्रहणं, क्ली, (पादयोर्ग्रहणम् इति । ग्रह + भावे ल्युट् ।) अभिवादनम् । पादस्पर्शपूर्व्वकप्रणामः । इत्यमरः ॥ तन्निषेधो यथा, "समिद्वार्य्युदकुम्भपुष्पान्नहस्तो नाभिवादयेत् यच्चान्यैवं युक्तम् ।" इति बौधायनः ॥
"जपयज्ञजलस्थञ्च समित्पुष्पकुशानलान् ।
दन्तकाष्ठञ्च भक्ष्यञ्च वहन्तं नाभिवादयेत् ॥"
इति लघुहारीतः ॥
न पुण्याहतपाणिर्नाशुचिर्न जपन् न देवपित्रकार्य्यं कुर्व्वन् । अभिवादयेदित्यनुवृत्तौ शुद्धितत्त्वम् ॥ * ॥ तद्विधिः ।
"लौकिकं वैदिकं वापि तथाध्यात्मिकमेव वा ।
आददीत यतो ज्ञानं तं पूर्व्वमभिवादयेत् ॥
ऊर्द्धं प्राणा ह्युत्क्रामन्ति यूनः स्थविर आयति ।
प्रत्युत्थानाभिवादाभ्यां पुनस्तान् प्रतिपद्यते ॥"* ॥
तत्प्रकारः ।
"अभिवादात् परं विप्रो ज्यायांसमभिवादयन् ।
असौ नामाहमस्मीति स्वं नाम परिकीर्त्तयेत् ॥
नामधेयस्य ये केचिदभिवादं न जानते ।
तान् प्राज्ञोऽहमिति ब्रूयात् स्त्रियः सर्व्वास्तथैव च ॥
भोः शब्दं कीर्त्तयेदन्ते स्वस्य नाम्नोऽभिवादने ।
नाम्नां स्वरूपभावो हि भो भाव ऋषिभिः स्मृतः ॥"
इति मनुः । २ । १२२—१२४ ॥

पादचतुरः, पुं, (पादे पदव्यापारे गमनादौ चतुरः ।) छागः । सैकतम् । पिप्पलः । करकः । परदोषैकप्रवक्ता । इति मेदिनी । रे, २०४ ॥

पादचारी, [न्] पुं, (पद्भ्यां चरतीति । चर गतौ + णिनिः) पदातिः । इति हेमचन्द्रः । ३ । १६२ ॥ पद्भ्यां गमनशीले, त्रि ॥ (यथा, भागवते । ६ । १२ । २६ ।
"गिरिराट् पादचारीव पद्भ्यां निर्द्भरयन् महीम् ।
जगाम स समासाद्य वह्निनं सुहृदाहृतम् ॥")

पादजः, पुं, (पद्भ्यां जायते इति । जन + डः । "पद्भ्यां भूमेरजायत ।" इति श्रुतेर्ब्रह्मणः पद्भ्यां जातत्वात्तथात्वम् ।) शूद्रः । इति त्रिकाण्डशेषः ॥ (यथा, हरिवंशे भविष्यपर्व्वणि, ३६ । ६३ ।
"न विप्रा न च राजानो न वैश्या न च पादजाः ॥")
पादोद्भवमात्रे, त्रि ॥)

पादत्राणं, क्ली, (पादयोस्त्राणं यस्मात् ।) पादुका इति जटाधरः ॥ (यथा, सुश्रुते चिकित्सितस्थाने ११ अध्याये । "अधनस्त्रवान्वयो वा पादत्राणातपत्रविरहितो भैक्ष्याशी ग्रामैकरात्रानुवासी मुनिरिव संयतात्मा योजनशतमधिकं वा गच्छेत् ॥" शीतऋतूपचारेऽस्य व्यवहारो यथा,—
"उष्णत्वभावैर्लेखुभिः प्रावृतः शयनस्थलम् ।
युक्त्यार्कैकिरणान् खेदं पादत्राणञ्च सर्व्वदा ॥")

पादपः, पुं, (पादेन मूलेन पिबति रसानिति । पा + कः ।) वृक्षः । इत्यमरः ॥ (यथा, हितोपदेशे । १ । ६३ ।
"यत्र विद्वज्जनो नास्ति श्लाघ्यस्तत्राल्पधीरपि ।
निरस्तपादपे देशे एरण्डोऽपि द्रुमायते ॥"
पादौ पाति रक्षतीति । पा + रक्षणे + कः ।)
पादपीठः । इति मेदिनी । पे, २१ ॥

पादपरुहा, स्त्री, (पादपे वृक्षे रोहतीति । रुह + कः ।) वन्दाकः । इति राजनिर्घण्टः ॥

पादपा, स्त्री, (पादौ पाति रक्षतीति । पा + कः + टाप् ।) पादुका । इति मेदिनी । पे, २१ ॥

पादपाशः, पुं, (पादस्य पाशः ।) अश्वपादरज्जुः । तत्पर्य्यायः । दामाबन्धनम् २ । इति हेमचन्द्रः । ४ । २६५ ॥

पादपाशी, स्त्री, (पादपाश + स्त्रियां गौरादित्वात् ङीष् ।) खड्डुका । खेड़ुया इति भाषा ॥ झड़झड़ा । झिकली इति भाषा ॥ इति मेदिनी ॥

पादपीठं, क्ली, (पादस्य पीठम् ।) पादस्थापनासनम् । पा राखा टुल इति भाषा ॥ तत्पर्य्यायः । पदासनम् २ । इति हेमचन्द्रः । ३ । ३८२ ॥ (यथा, रघुः । १७ । २८ ।
"वितानसहितं तत्र भेजे पैतृकमासनम् ।
चूड़ामणिभिरुद्दृष्टपादपीठं महीक्षिताम् ॥")

पादपीठिका, स्त्री, (पादपीठं साधनत्वेनास्त्यस्या इति । पादपीठ + ठन् ।) नापितादिशिल्पम् । यथा,—
"नापितादिकशिल्पे तु कारिका पादपीठिका ॥"
इति शब्दमाला ॥

पादप्रक्षालनं, क्ली, (पादयोः प्रक्षालनम्।) चरणधौतम्। पा धोओया इति भाषा॥ अस्य गुणाः। मेधाजनकत्वम्। पवित्रत्वम्। आयुष्यत्वम्। अलक्ष्मीकलिनाशुकत्वञ्च। इति राजवल्लभः॥ (यथा च,—
"पादप्रक्षालनं पादमलरागश्रमापहम्।
चक्षुःप्रसादनं वृष्यं रक्षोघ्नं प्रीतिवर्द्धनम्॥"
इति चिकित्सितस्थाने चतुर्विंशेऽध्याये सुश्रुतेनोक्तम्॥)

पादप्रधारणं, क्ली, (पादौ प्रधार्य्येते कण्टकादिभ्यो रक्ष्येतेऽनेनेति। प्र+धृ+णिच्+ल्युट्।) पादुका। इति केचित्॥

पादप्रहारः, पुं, (पादस्य पादेन वा प्रहारः।) पदाघातः। लाति इति भाषा॥ यथा।
"नायिकापादप्रहारादिना नायकस्य कोपादिवर्णनम्।" इति काव्यप्रकाशे सप्तमोल्लासः॥
(यथा च साहित्यदर्पणे। १०। १६।
"दासे कृतागसि भवत्युचितः प्रभूणां
पादप्रहार इति सुन्दरि! नाऽत्र दूये।
उन्मृत्कठोरपुलकाङ्कुरकण्टकाये-
र्यच्छिद्यते मृदु पदं ननु सा यथा मे॥")

पादबन्धनं, क्ली, (पादयोर्गोमहिष्यादीनामित्यर्थः। बन्धनम्।) गोमहिष्यादिबन्धनम्। इति जटाधरः॥ पादबन्धशब्दटीकायां भरतश्च॥ (बध्नात्यनेनेति। बन्ध+करणे ल्युट्। पादयोर्बन्धनं तत्साधनवस्तु। गोमहिष्यादीनां पादबन्धनद्रव्यम्। यथा, हेमचन्द्रः। ४। ३२१।
"स तु शृङ्खलकः काष्ठमयैः स्यात् पादबन्धनैः॥")
चरणोद्बन्धश्च।

पादमूलं, क्ली, (पादयोर्मूलम्।) चरणाधोभागः। यथा, हेमचन्द्रः।
"पादमूलं गोहिरं स्यात् पार्ष्णस्तु द्वयोरधः॥"
(यथा, रामायणे। २। ७८। २५।
"सा पादमूले कैकेय्या मन्थरा निपपात ह॥"
प्रत्यन्तपर्व्वताधोभागः। यथा, कथासरित्सागरे। १। २७।
"महीं भ्रमन्तौ हिमवत्पादमूलमवापतुः॥")

पादरक्षणं, क्ली, (पादयो रक्षणं यस्मात्।) पादुका। इति हेमचन्द्रः। ३। ५७८॥

पादरज्जुः, स्त्री, (पादबन्धनार्था रज्जुः।) हस्तिपादबन्धनरज्जुः। तत्पर्य्यायः। पारी २। इति जटाधरः॥ चरणबन्धनदाममात्रञ्च।

पादरथी, स्त्री, (पादस्य रथी क्षुद्रो रथ इव।) पादुका। इति चिकाण्डशेषः॥

पादरोहणः, पुं, (पादेमूले रोहतीति। रुह+ल्युः।) वटवृक्षः। इति राजनिर्घण्टः॥

पादवल्मीकः, पुं, (पादे वल्मीक इव।) श्लीपदम्। इति हेमचन्द्रः। ३। १९६॥ (श्लीपदरोगशब्देऽस्य विवरणं ज्ञातव्यम्॥)

पादविकः, पुं, (पदवीं धावतीति। पदवी+"माथोत्तरपदपदव्यनुपदं धावति।" ४। ४। ३७। इति ठक्।) पथिकः। इति सिद्धान्तकौमुदी॥

पादविरजाः, [स्] स्त्री, (पादौ विरजा धूलिविहीनो यस्याः।) पादुका। इति हारावली। ७४॥

पादशः, [स्] अ, पादं पादम्। पादशब्दात् वीप्सायां चशस्प्रत्ययनिष्पन्नम्। इति व्याकरणम्॥ (यथा, मनुः। १। ८२।
"अरोगाः सर्व्वसिद्धार्थाश्चतुर्व्वर्षशतायुषः।
कृते त्रेतादिषु ह्येषामायुर्ह्रसति पादशः॥")

पादशैलः, पुं, (पादः महाद्रिसमीपस्थः क्षुद्रपर्व्वतः स एव शैलः।) प्रत्यन्तपर्व्वतः। इति शब्दरत्नावली॥

पादशोथः, पुं, (पादोद्भवः शोथः। शाकपार्थिवादित्वात् समासः।) पादगतशोफः। यथा,—
"अन्नन्योपद्रवकृतः शोथः पादसमुत्थितः।
पुरुषं हन्ति नारीन्तु सुखजो गुह्यजो द्वयम्॥"
इति माधवकरः॥
(यथा च हारीते चिकित्सितस्थाने २६ अः॥
"शोथो भवेच्च विकलेन्द्रियरोममार्गः
क्षीणे बले वपुषि चाम्लकटूष्णसेवया।
शैत्यात्तथा विशदपिच्छलसेवनेन
रूक्षाभिघातपतनेन च धारणाद्वा॥
आमाशये गतिरतोऽपि नरस्य यस्य
अन्ने प्रधावति ततोऽपि च दोष एषः।
करोति पाणिचरणे च पृथक् प्रदुष्टो
द्वन्द्वेन वा भवति शोथविकारचारः॥
नरस्य चान्तःप्रभवाश्च शोथाः
साध्या भवेयुर्विनता सुखेषु।
असाध्यकाः सर्व्वशरीरगाश्च
पादे स्त्रिया वा वदने नरस्य॥")

पादस्फोटः, पुं, (पादस्य स्फोटः। पादं स्फोटयतीति वा। स्फुट्+"कर्म्मण्यण्।" ३। २। १। इत्यण्।) रोगविशेषः। तत्पर्य्यायः। विपादिका २। इत्यमरः॥ स्फुटी ३ स्फुटिः ४ पादस्फोटिः ५। इति शब्दरत्नावली॥ सा तु एका दशक्षुद्रकुष्ठान्तर्गतचतुर्थकुष्ठम्। यथा,—
"वैपादिकं पाणिपादस्फुटनं तीव्रवेदनम्।
पाणिपादस्फुटनं पाण्योः पादयोश्च स्फुटनं विदारणं येन तत्। इति माधवकरः॥ अस्य चिकित्सा कुष्ठशब्दे द्रष्टव्या॥

पादहारकः, त्रि, पादाभ्यां ह्रियतेऽसौ। पादपूर्ब्बात् निपातनात् कर्म्मणि ण्वुलप्रत्ययान्तः। इति मुग्धबोधव्याकरणम्॥ ("ह्रत्यल्युटौ बहुलम्।" ३।३।११३। इति कर्म्मणि ल्युट्। इति सिद्धान्तकौमुदी।) चरणद्वारा हरणकर्त्ता॥

पादाग्रं, क्ली, (पादयोरग्रम्।) चरणाग्रभागः। तत्पर्य्यायः। प्रपदम् २। इत्यमरः॥

पादाङ्गदं, क्ली, (पादस्य अङ्गदमिव।) नूपुरम्। इत्यमरः॥

पादात्, पुं, (पादाभ्यामतति गच्छतीति। अत+क्विप्।) पादातिः। इति शब्दरत्नावली॥ (पादाभ्यामत्तीति। अद्+क्विप्। दृच्चः। इति व्युत्पत्तिलब्धोऽर्थः॥)

पादातं, क्ली, (पदातीनां समूहः। पदाति+"भिक्षादिभ्योऽण्।" ४। २। ३८। इत्यण्।) पत्तिसंहतिः। पदातिसमूहः। इत्यमरः॥ (यथा, महाभारते। १२। ६६।
"सादिनामन्तरे स्थाप्यं पादातमपि दंशितम्॥")

पादातः, पुं, (पादाभ्यामततीति। अत+अच्।) पादातिः। यथा,—
"पदातिपत्तिपादातपादातिकपदाजयः॥"
इत्यमरमाला॥
(यथा, महाभारते। २। ५१। ४३।
"अयुतं त्रीणि पद्मानि गजारोहाः सचादिनः।
रथानामर्व्बुदं चापि पादाता बहवस्तथा॥")

पादातिः, पुं, (पादाभ्यामततीति। अत+इन्।) पदातिः। इति हेमचन्द्रः॥

पादातिकः, पुं, (पादातिरेव। पादाति+स्वार्थे कन्।) पदातिः। इति हेमचन्द्रः। ३। १६२॥

पादारकः, पुं, (पाद इव ऋच्छतीति। ऋ+ण्वुल्।) मोलिन्दः। इति चिकाण्डशेषः॥

पादालिन्दी, स्त्री, (पाद इव अलिन्दो यत्र। गौरादित्वात् ङीष्।) नौका। इति हारावली। ५६।

पादावर्त्तः, पुं, (पाद इव आवर्त्तते इति। आ+वृत+अच्।) अरघट्टकः। इति हेमचन्द्रः। ४। १५६॥ रहट् इति हिन्दीभाषा॥

पादाविकः, पुं, (अव रक्षणे+भावे घञ्। पादेन अवः रक्षणम्। तत्र पादावे पादेन शरीरादिरक्षणे नियुक्तः। पादाव+"तत्र नियुक्तः।" ४। ४। ६९। इति ठक्।) पदातिः। इति शब्दरत्नावली॥

पादी, [न्] पुं, (पादोऽस्त्यस्येति। पाद+इनिः।) पादविशिष्टजलजन्तुगणः। अस्य गणना गुणाश्च यथा, भावप्रकाशे।
"कुम्भीरकूर्म्मनक्राश्च गोधाकरभटङ्कवः।
घण्डकः शिंशुमारश्चेत्यादयः पादिनः स्मृताः॥
पादिनोऽपि च ये ते तु कोष्ठस्थानां गुणैः समाः॥"
चतुर्थांशभागी। यथा, मनुः। ८। २१०।
"सर्व्वेषामहिनो मुख्यास्तद्दंष्टार्त्तिनोऽपरे।
तृतीयिनस्तृतीयांशाच्चतुर्थांशाच्च पादिनः॥"

पादुकः, त्रि, (पद्यते गच्छतीति। पद्+"लषपतपदेति।" ३। २। १५४। इति उकञ्।) गमनशीलः। पदधातोः कर्त्तरि ण्वुक्प्रत्ययनिष्पन्नः। इति मुग्धबोधव्याकरणम्॥

पादुका, स्त्री, (पादूरेव। पादू+स्वार्थे कन् ततो टाप्।) चर्म्मादिनिर्म्मितपादाच्छादनम्। जुता इति भाषा॥ तत्पर्य्यायः। पादूः २ उपानत्३। इत्यमरः॥ पन्नद्धा ४ पादरक्षिका ५ प्राणिहिता ६। इति हेमचन्द्रः॥ पन्नद्धी ७ पादरथी ८। इति चिकाण्डशेषः॥ कौषी ९। इति शब्दरत्नावली॥ *॥ तस्या धारणविधिर्यथा,—
"वर्षातपादिके छत्री दण्डी राजपटावृते च।
शरीरत्राणकामो वै सोपानत्कः सदा व्रजेत्॥"
इति ज्योतिस्तत्त्वम्॥

अस्या धारणगुणाः ।
"पादप्रधारणं दृष्ट्वा मोक्षस्य चक्षुषोर्हितम् ।
सुखप्रचारमायुष्यं वल्यं पादरुजापहम् ॥"*॥
अस्या अधारणे दोषा यथा,—
"पादाभ्यामनुपानद्भ्यां नृणां चंक्रमणं सदा ।
अनारोग्यमनायुष्यमिन्द्रियघ्नमदृष्टिकृत् ॥"
इति राजवल्लभः ॥ * ॥
तस्या दानफलं यथा,—
"दह्यमानाय विप्राय यः प्रयच्छत्युपानहौ ।
न तस्य मानसो दाहः कदाचिदपि जायते ॥
यानञ्चाश्वतरीयुक्तं तस्य हैममयं शुभम् ।
उपतिष्ठति विप्रर्षे सर्व्वरत्नविभूषितम् ॥
दानमत्र यथोत्पन्नं तत्ते वक्ष्यामि पार्थिव ।
शृणुष्वैकमना भूप ! लोकं सर्व्वसुखप्रदम् ॥
जमदग्निर्मुनिः पूर्व्वं तपःस्वाध्यायकर्शितः ।
बाणखड्गधरो धन्वी बभूव ततोद्यतः ॥
धनुर्व्वेदे तथा वेदे सर्व्वास्त्रपारगोऽभवत् ।
क्षिपन् बाणांस्तथा शत्रून् भार्य्ययानुगतो हि सः ॥
कदा निदाघकाले तु क्षिपन् बाणान् सहस्रशः ।
तस्यौ स्थाणुरिवासन्नः प्रतिलक्षं महामुनिः ॥
निदाघतीव्रसन्तापाच्छ्रान्त्या; सततं भयात् ।
भर्त्तुः स्नेहात्तथा यान्त्यास्तस्याश्चड्डायते रविः ॥
क्षुत्तृष्णाश्रमतापार्त्ता तथा यातुं न शक्नुवत् ।
सुतापाद्देशविभ्रष्टा रेणुका च तपस्विनी ॥
तां दृष्ट्वा च मुनिः प्राह भार्य्यां किन्ते भवेच्चिरम् ।
कोपार्त्तमाह भर्त्तारं न कोपं कर्त्तुमर्हसि ॥
निदाघतीव्रसन्तापाद् भ्रष्टपादा क्षयार्दिता ।
धृतिमद्भृगुशिष्यः; स्रष्टा न शक्नोमीह सार्थि-
तुम् ॥
इत्युक्ते च क्षुधाविष्टः प्राह सत्राय कार्मुके ।
धृतकं मां न जानाति सूर्य्यो विभ्रंशमीयिवान् ॥
यः सन्तपति मे भार्य्यां साध्वीं धर्म्मपरायणाम् ।
साध्वसाधु अजानन् वै फलमाप्नोतु तस्य हि ॥
इत्युक्ता स्नानमात्रस्यार्कविभ्रंशहेतवे ।
प्रतीच्य हि सुघोरेण क्रूररूपधरो मुनिः ॥
तं विज्ञाय मुनिं सूर्य्यो द्विजोऽभूच्छिदमब्रवीत् ।
किमालोकयसे सूर्य्य पुनः पुनरतीव हि ॥
सुबाणाङ्कितपाणिस्त्वं कथयस्वाखिलं मुने ! ।
इत्युक्तः स तमाहेदं पातयिष्यामहं रविम् ॥
द्विजस्तु तमुवाचाथ मुने चित्रं विभाति मे ।
मातुरङ्गतो यद्बालश्चन्द्रं जिघृक्षति ॥
योजनानां सहस्राणि निमेषाद्याति यो दृश्यः ।
विप्र ! मुक्तेन बाणेन तं कथं पातयिष्यसि ॥
तच्छ्रुत्वा जमदग्निस्तं प्राह शृणु द्विजोत्तम ! ।
पातयिष्यामहं यद्यदिसं सूर्य्यं नभःस्थलात् ॥
दिव्यशरो यदा सूर्य्यो मर्त्यलोके ततन्द्रितः ।
मध्याह्ने स्थिरतामेति सर्व्वलोकान्ददर्शिवान् ॥
तत्काले नुमरुक्षत्रं भविष्यति दिवाकरः ।
एवं तं पातयिष्यामि पश्यतस्ते द्विजोत्तम ! ॥
तच्छ्रुत्वा सहसोदियस्तस्य प्रत्यक्षतां ययौ ।
सूर्य्यस्तं चमयामास दत्त्वा छत्रमुपानहौ ॥
ततःप्रभृति तच्छत्रं द्विजानां परिगीयते ।

दत्तं तेर्थार्य्यतेऽन्येषां क्षत्रियाणां द्विजोत्तम ! ॥
यो ददाति द्विजेभ्यस्तु तृतीयायासुपानहौ ।
वैशाखे शुक्लपक्षे तु सच्छत्रं कनकान्वितम् ॥
न तस्य मानसो दाहो दह्यलोकेऽभिजायते ।
सर्व्वव्याधिविनिर्मुक्तः श्रियं पुत्रांश्च विन्दति ॥
कालादिह यदा याति मम लोकं द्विजोत्तम ! ।
यानं वाश्वतरीयुक्तं सर्व्वहेममयं शुभम् ॥
दिव्याङ्गनाभिराकीर्णं सर्व्वरत्नविभूषितम् ।
उपतिष्ठति विप्रेन्द्र ! सर्व्वकामफलप्रदम् ॥"
इत्यग्निपुराणम् ॥ * ॥
विष्णुगृहे सपादुकगमने दोषो यथा,—
वराह उवाच ।
"सहानुपानहौ पद्भ्यां यस्तु गच्छत्यमेत्य ।
चर्म्मकारस्तु जायेत वर्षाणान्तु त्रयोदश ॥
तत्र जन्मपरिभ्रष्टः शूकरो जायते पुनः ।
शूकराच्च परिभ्रष्टः श्वा च तत्रैव जायते ॥
ततः श्वजात् परिभ्रष्टो मानुषश्चैव जायते ।
मद्भक्तश्च विनीतश्च अपराधविवर्जितः ॥
मुक्ता तु सर्व्वसंसारं मम लोकाय गच्छति ।
य इतेन विधानेन वसुधे ! कर्म्म कारयेत् ।
न स लिप्यति पापेन एवमेतन्न संशयः ॥"
इति वराहपुराणे उपानद्दानापराधप्रायश्चित्तम् ॥
अथ देवतापादुकानिर्म्माणपूजनविधिः । यथा,—
"मणिरत्नमयी कार्य्या हेमरूप्यमयी पि वा ।
चन्दनेनापि कर्त्तव्या पादुकाप्रतिमापि वा ॥
श्रीपर्णी श्रीद्रुमा चापि देवदारुमयी पि वा ।
षड्भुजा च सा कार्य्या पादुके पूजयेत् सदा ॥"
इति देवीपुराणम् ॥ * ॥
गुरुपादुकास्तोत्रं यथा,—
"ब्रह्मरन्ध्रसरोरुहोदरे
निर्व्रणमवदातमद्भुतम् ।
कुण्डलीविवरकाण्डमण्डितं
वादशार्णसरसीरुहं भजे ॥ १ ॥
तस्य कन्दलितकर्णिकापुटे
कूटपत्ररेखमकथादिरेखया ।
कोपलक्षितहलक्षसट्टली-
भावलक्ष्यमवलालयं भजे ॥ २ ॥
तत्पुटे पटुतडित्कडारिम-
स्पर्द्धमानमणिपाटलप्रभम् ।
चिन्तयामि हृदि चिन्मयं वपु-
र्विघ्ननादमणिपीठमण्डलम् ॥ ३ ॥
कर्ण्णिकस्य हुतभुक्शिखासखं
तद्विलासपरिवेष्टणक्षमम् ।
विश्ववत्सरमहोतुसंज्ञितं
वाग्भवादियुगमादिहंचयोः ॥ ४ ॥
तत्र नाथचरणारविन्दयोः
कुङ्कुमाक्तवभरीमरन्दयोः ।
ब्रह्मविष्णुमकरन्दशीतलं
मानसं स्मरति मङ्गलास्पदम् ॥ ५ ॥
पादुकापञ्चकस्तोत्रं पञ्चवक्त्रादिनिर्गतम् ।
यः पठेन्नरयत्नेतं प्रपञ्चे चातिदुर्लभम् ॥"
इति रुद्रयामलः ॥

पादुकाकारः, पुं, (पादुकां करोतीति । कृ + "कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् ।) चर्म्मकारः । इति हलायुधः ॥
पादुकाकृत्, पुं, (पादुकां करोतीति । कृ + क्विप् ।) चर्म्मकारः । इति हेमचन्द्रः । ३ । ५७८ ॥
पादूः, स्त्री, (पद्यते गम्यते सुखेन ययेति । पद् + "शित्कक्षिपद्यर्त्तेः ।" उणां १ । ८७ । इति ऊः स च शित् ।) पादुका । इत्यमरः ॥
पादूकृत्, पुं, (पादूं पादुकां करोतीति । कृ + क्विप् । तुक् ।) चर्म्मकारः । इत्यमरः ॥
पादोदकं, क्ली, (पादप्रक्षालनजातं उदकम् । शाकपार्थिवादित्वात् समासः ।) चरणधौतजलम् । चरणामृतम् । यथा,—
"हृदि रूपं मुखे नाम नैवेद्यमुदरे हरेः ।
पादोदकञ्च निर्म्माल्यं मस्तके यस्य सोऽच्युतः ॥
नैवेद्यमन्नं तुलसीविमिश्र
विशेषतः पादजलं पिबेच ।
योऽश्नाति नित्यं प्रयतो मुरारेः
प्राप्नोति सुप्रेमयुतां च भक्तिम् ॥
हत्यां हन्ति यदङ्घिसङ्गतुलसीस्पर्शेच पादोदकं
नैवेद्यं बहुमद्यपानदुरितं गुर्व्वङ्गनासङ्गमम् ।
भक्त्याधीनमतिः स्मिनिर्हरिजने तत्संगतिः सङ्गजा
शालग्रामशिलादिमूर्त्तिमहितां जानन्ति के वै
हरेः ॥"
इति पाद्मोत्तरखण्डे १०० अध्यायः ॥ * ॥
अथ श्रीचरणोदकाभिषेकमाहात्म्यं पद्मपुराणे
"स स्नातः सर्व्वतीर्थेषु सर्व्वयज्ञेषु दीक्षितः ।
शालग्रामशिलातोयैर्योऽभिषेकं समाचरेत् ॥
गङ्गागोदावरीरेवानद्यो मुक्तिप्रदास्तु याः ।
निवसन्ति सतीर्थास्ता; शालग्रामशिलाजले ॥
कोटितीर्थसहस्रैस्तु सेवितैः किं प्रयोजनम् ।
तीर्थं यदि भवेत् पुण्यं शालग्रामशिलोद्भवम् ॥"
तत्रैव गौतमाम्बरीषसंवादे ।
"येषां धौतानि गात्राणि हरेः पादोदकेन वै ।
अम्बरीष ! कुले तेषां दासोऽस्मि वशगः सदा ॥
राजन्नेतानि तावच्च तीर्थानि भुवनत्रये ।
यावन्न प्राप्यते तोयं शालग्रामाभिषेकजम् ॥"
स्कान्दे कार्त्तिकमाहात्म्ये ।
"गृहेऽपि वसतस्तस्य गङ्गास्नानं दिने दिने ।
शालग्रामशिलातोयैर्योऽभिषिञ्चति मानवः ॥"
तत्रैवान्यत्र ।
"यानि कानि च तीर्थानि ब्रह्माद्या देवतास्तथा ।
विष्णुपादोदकस्यैते कलां नार्हन्ति षोड़शीम् ॥
शालग्रामोद्भवो देवो देवो द्वारवतीभवः ।
उभयोः स्नानतोयेन ब्रह्महत्या निवर्त्तते ॥"
किञ्च ।
"स वै चावभृतस्नातः स च गङ्गाजलाप्लुतः ।
विष्णुपादोदकं क्षुत्वा शूद्रो यः स्नाति मानवः ॥"
श्रीनृसिंहपुराणे ।
"गङ्गाप्रयागगयनैमिषपुष्कराणि
पुण्यानि यानि जलजाङ्गलयाहनानि ।

कालेन तीर्थसलिलानि पुनन्ति पापं
पादोदकं भगवतः प्रपुनाति सद्यः ॥"
स्मृतौ च ।
"त्रिरात्रिफलदा नद्यो याः काश्चिदसमुद्रगाः ।
समुद्रगाश्च पञ्चस्य मासस्य सरितां पतिः ॥
षण्मासफलदा गोदा वत्सरस्य तु जाह्नवी ।
पादोदकं भगवतो द्वादशाब्दफलप्रदम् ॥"
तन्नित्यता च गरुड़पुराणे ।
"जलञ्च येषां तुलसीविमिश्रितं
पादोदकं चक्रशिलासमुद्भवम् ।
नित्यं त्रिसन्ध्यं प्रवते न गात्रं
खगेन्द्र ! ते धर्मबहिष्कृता नराः ॥"
अथ श्रीचरणोदकपार्णमाहात्म्यम् । पाद्मे गौतमाम्बरीषसंवादे ।
"हरेः स्नानावशेषन्तु जलं यस्योदरे स्थितम् ।
अम्बरीष ! प्रणम्योचैः पादपांसुः प्रगृह्यताम् ॥"
तत्रैव देवदूतविष्णुबलसंवादे ।
"ये पिबन्ति नरा नित्यं शालग्रामशिलाजलम् ।
पञ्चगव्यसहस्रैस्तु सेवितैः किं प्रयोजनम् ॥
कोटितीर्थसहस्रैस्तु सेवितैः किं प्रयोजनम् ।
नित्यं यदि पिबेत् पुण्यं शालग्रामशिलाजलम् ॥
शालग्रामशिलातोयं यः पिबेद्विष्णुना समम् ।
मातुः स्तन्यं पुनर्नैव स पिबेन्मुक्तिभाग्नरः ॥"
किञ्च ।
"दहन्ति नरकान् सर्वान् गर्भवासञ्च दारुणम् ।
पीतं यैस्तु सदा नित्यं शालग्रामशिलाजलम् ॥"
तत्रैव श्रीमधूत्रकेतुसंवादे ।
"शालग्रामशिलातोयं विन्दुमात्रं तु यः पिबेत् ।
सर्वपापैः प्रमुच्येत मुक्तिमार्गे कृतोद्यमः ॥"
तत्रैव पुलस्त्यभगीरथसंवादे ।
"पादोदकस्य माहात्म्यं भगीरथ ! वदामि ते ।
पावनं सर्वतीर्थेभ्यो हत्याकोटिविनाशनम् ॥
धृते शिरसि पीते च सर्वास्तुष्यन्ति देवताः ।
प्रायश्चित्तन्तु पापानां कलौ पादोदकं हरेः ॥"
किञ्च ।
"त्रिभिः सारस्वतं तोयं सप्ताहेन तु यामुनम् ।
सद्यः पुनाति गाङ्गेयं दर्शनादेव वासुनम् ॥
पुनन्त्येतानि तोयानि स्नानदर्शनकीर्त्तनैः ।
पुनाति स्मरणादेव कलौ पादोदकं हरेः ॥
अर्चितैः कोटिभिर्लिङ्गैर्नित्यं यत् क्रियते फलम् ।
तत् फलं शतसाहस्रं पीतैः पादोदकैर्हरेः ॥
अशुचिर्वा दुराचारो महापातकसंयुतः ।
स्पृष्ट्वा पादोदकं विष्णोः सदा शुद्धयति मानवः ॥
पापकोटियुतो यस्तु मृत्युकाले शिरे सुखे ।
देहे पादोदकं यस्य न प्रयाति यमालयम् ॥
न दानं न हविर्येषां स्वाध्यायो न सुरार्चनम् ।
तैरपि पादोदकं पीत्वा प्रयान्ति परमां गतिम् ॥
विप्राखाक्षत्रसंयुक्ता वैश्याखी किं करिष्यति ।
पित्रारके महातीर्थे उज्जयिन्यां भगीरथ ! ॥
माघमासे प्रयागे तु स्नानं वै किं करिष्यति ।
प्रयागं सततं तस्य यस्य पादोदकं हरेः ॥
कार्त्तिके कार्त्तिकीयोगे किं करिष्यति पुष्करे ।
नित्यन्तु पुष्करं तस्य यस्य पादोदकं हरेः ॥
प्रबोधवासरे प्राप्ते मथुरायाञ्च तस्य किम् ।
नित्यञ्च यासुनं स्नानं यस्य पादोदकं हरेः ॥
काश्यासुत्तरवाहिन्यां गङ्गायान्तु मृतस्य किम् ।
यस्य पादोदकं विष्णोर्मुखे चैवावतिष्ठते ॥"
किञ्च ।
"हित्वा पादोदकं विष्णोर्योऽन्यतीर्थानि गच्छति ।
अनर्घ्यरत्नसृष्ट्वा लोष्ट्रं वाञ्छति दुर्म्मतिः ॥
कुरुक्षेत्रसमो देशो विन्दुपादोदकं मतः ।
यत्तोद् यत्राचयं पुण्यं नित्यं भवति तद्गृहे ॥
गयापिण्डसमं पुण्यं पुत्राणामपि जायते ।
पादोदकेन देवस्य ये कुर्य्युः पितृतर्पणम् ॥
नासुराणां भयं तस्य प्रेतजन्यं न राक्षसम् ।
न रोगस्य भयं चैव नास्ति विघ्नकृतं भयम् ॥
न दुष्टा नैव घोराद्याश्चापदोत्थभयं नहि ।
ग्रहाः पीड़ां न कुर्व्वन्ति वैरा नश्यन्ति दारुणाः ॥
किं तस्य तीर्थगमने देवर्षीणाञ्च दर्शने ।
यस्य पादोदकं मूर्द्ध्नि शालग्रामशिलोद्भवम् ॥
प्रीतो भवति मार्त्तण्डः प्रीतो भवति केशवः ।
ब्रह्मा भवति सुप्रीतः प्रीतो भवति शङ्करः ॥
पादोदकस्य माहात्म्यं यः पठेत् केशवाग्रतः ।
स याति परमं स्थानं यत्र देवो जनार्द्दनः ॥"
ब्रह्माण्डपुराणे श्रीब्रह्मनारदसंवादे ।
"प्रायश्चित्तं यदि प्राप्तं कृच्छ्रं वा त्वघमर्षणम् ।
सोऽपि पादोदकं पीत्वा शुद्धिं प्राप्नोति तत्क्षणात् ॥
अशौचं नैव विद्येत सूतके मृतकेऽपि च ।
येषां पादोदकं मूर्द्ध्नि प्राशनं ये प्रकुर्व्वते ॥
अन्तकालेऽपि यस्येह दीयते पाद्ययोर्जलम् ।
सोऽपि सद्गतिमाप्नोति सदाचारैर्बहिष्कृतः ॥
अपेयं पिबते यस्तु भुङ्क्ते यश्चाप्यभोजनम् ।
अगम्यागमना ये वै पापाचाराश्च ये नराः ।
तेऽपि पूता भवन्त्याशु सद्यः पादाम्बुसेवनात् ॥"
किञ्च ।
"अपवित्रं यदन्नं स्यात् पानीयं चापि पापिनाम् ।
भुक्त्वा पीत्वा विशुद्धः स्यात् पीत्वा पादोदकं हरेः ॥
तप्तकृच्छ्रात् पञ्चगव्यात् महाकृच्छ्रादिहिष्यते ।
चान्द्रायणात् पादकृच्छ्रात् पराकादपि सुव्रत ।
कायशुद्धिर्भवेदाशु पीत्वा पादोदकं हरेः ॥
अगुरुं कुङ्कुमं चापि कर्पूरं चानुलेपनम् ।
विष्णुपादाम्बुसंसर्गं तद्धि पावनपावनम् ॥
दृष्टिपूतन्तु यत्तोयं विष्णुना प्रभविष्णुना ।
तद्धि पापहरं पुत्र ! किं पुनः पादयोर्जलम् ॥
एतदर्थमहं पुत्र ! शिरसा विष्णुतत्परः ।
धारयामि पिबाम्यद्य माहात्म्यं विदितं मम ॥
प्रियस्त्वमग्रजः पुत्र त्वदर्थे गदितं मया ।
रहस्यं मे त्वनर्हस्य न वक्तव्यं कदाचन ॥
धारयस्व सदा मूर्द्ध्नि प्राशनं कुरु नित्यशः ।
जन्ममृत्युजराद्दुःखैर्मोक्षं यास्यसि पुत्रक ! ॥"
विष्णुधर्म्मोत्तरे ।
"सद्यः फलप्रदं पुण्यं सर्व्वपापविनाशनम् ।
सर्व्वमङ्गलमङ्गल्यं सर्व्वदुःखविनाशनम् ।
दुःस्वप्ननाशनं पुण्यं विष्णुपादोदकं शुभम् ॥
सर्व्वोपद्रवहन्तारं सर्व्वव्याधिविनाशनम् ।
सर्व्वोत्पातप्रशमनं सर्व्वतापनिवारणम् ॥
सर्व्वकल्याणसुखदं सर्व्वकामफलप्रदम् ।
सर्व्वसिद्धिप्रदं धन्यं सर्व्वधर्म्मविवर्द्धनम् ॥
सर्व्वशत्रुप्रशमनं सर्व्वभोगप्रदायकम् ।
सर्व्वतीर्थस्य फलदं मूर्द्ध्नि पादाम्बुधारणम् ॥
प्रयागस्य प्रभासस्य पुष्करस्य च सेवने ।
पृथूदकस्य तीर्थस्य आचान्तो लभते फलम् ॥
चक्रतीर्थे फलं यादृक् तादृक् पादाम्बुधारणात् ॥
सरस्वत्यां गयायाञ्च गत्वा यत् प्राप्नुयात् फलम् ।
तत् फलं लभते श्रेष्ठं मूर्द्ध्नि पादाम्बुधारणात् ॥"
स्कान्दे ।
"पादोदकस्य माहात्म्यं देवो जानाति शङ्करः ।
विष्णुपादच्युता गङ्गा शिरसा येन धारिता ॥
स्थानं नैवास्ति पापस्य देहिनां देहमध्यतः ।
सबाह्याभ्यन्तरं यस्य व्याप्तं पादोदकेन वै ॥
पादोदं विष्णुनैवेद्यसुदरे यस्य तिष्ठति ।
नाश्रयं लभते पापं स्वयमेव विनश्यति ॥
महापापग्रहग्रस्तो व्याधो रोगशतैरपि ।
हरेः पादोदकं पीत्वा सुच्यते नात्र संशयः ॥
शिरसा तिष्ठते येषां नित्यं पादोदकं हरेः ।
किं करिष्यन्ति ते लोके तीर्थकोटिमनोरथैः ॥
अयमेव परो धर्म्म इदमेव परं तपः ।
इदमेव परं तीर्थं विष्णुपादाम्बु यत् पिबेत् ॥"
तत्रैव शिवोमासंवादे ।
"विलयं यान्ति पापानि पीते पादोदके हरेः ।
किं पुनर्विष्णुपादोदं शालग्रामशिलाप्लुतम् ॥
विशेषेण हरेत् पापं ब्रह्महत्यादिकं प्रिये ॥
पीते पादोदके विष्णोर्यदि प्राणैर्विमुच्यते ।
हत्वा यमभटान् सर्व्वान् वैष्णवं लोकमाप्नुयात् ।
तत्रैव शिवकार्त्तिकेयसंवादे शालग्रामशिलामाहात्म्ये ।
"कृष्णेन महासेन । गर्भवासः सुदारुणः ।
पीतं येन सदा विष्णोः शालग्रामशिलाजलम् ॥
ये पिबन्ति नरा नित्यं शालग्रामशिलाजलम् ।
पञ्चगव्यसहस्रैस्तु प्राशितैः किं प्रयोजनम् ॥
प्रायश्चित्ते समुत्पन्ने किं दानैः किमुपोषणैः ।
चान्द्रायणैश्च तीर्थैश्च पीत्वा पादोदकं शुचिः ॥
दृष्ट्वा नारदीये तु लुब्धकोपाख्यानारम्भे ।
हरिपादोदकं यस्तु क्षणमात्रञ्च धारयेत् ।
स स्नातः सर्व्वतीर्थेषु विष्णोः प्रियतरस्तथा ॥
अकालमृत्युशमनं सर्व्वव्याधिविनाशनम् ।
सर्व्वदुःखोपशमनं हरिपादोदकं शुभम् ॥"
तत्रैव तदुपाख्यानान्ते ।
"हरिपादोदकस्पर्शाल्लुब्धको वीतकल्मषः ।
दिव्यं विमानमारुह्य सुनिभेनमयान्नीत ॥
हरिपादोदकं यस्मान्मयि त्वं क्षिप्तवान् मुने ।
प्रापितोऽस्मि त्वया तस्मात्तद्विष्णोः परमं पदम् ॥"
हरिभक्तिसुधोदये ।
"यादं पूर्व्वं किल सृष्ट्वा गङ्गाभूत् स्वर्गमोक्षदा ।
विष्णोः सद्यस्तु तत्सङ्गि पादाम्बु कथमीर्य्यते ?

तापत्रयानलो योऽयौ न शाम्येत् सकलाब्धिभिः।
इतं शाम्यति सोऽल्पेन श्रीमद्विष्णुपदाम्बुना ॥
अघाख्यामेद्यकवचं भवाम्भिल्लम्बनौषधम्।
सर्व्वाङ्गैः सर्व्वथा धार्य्यं पाद्यं शुचिसदः सदा ॥
अम्लतत्वावहं नित्यं विष्णुपादाम्बु यः पिबेत्।
स पिबत्यन्दतं नित्यं मासे मासे तु देवताः ॥
माहात्म्यमियदित्यस्य यो वक्ता सोऽपि निर्भयः।
न त्वनर्घ्यमणेर्मूल्यं कलयन्नघमश्नुते ॥"
अन्यत्रापि।
"स ब्रह्मचारी स व्रती वाश्रमी च सदा शुचिः।
विष्णुपादोदकं यस्य सुखे शिरसि विग्रहे ॥
जन्मप्रभृतिपापानां प्रायश्चित्तं यदीच्छति।
शालग्रामशिलावारि पापहारि निषेव्यताम् ॥"
अतएव तैलोद्धृतविष्णुपक्षराजे श्रीब्रह्मोक्तम्।
"पीठप्रक्षालजादकं पृथगादाय पुत्रक!।
विष्वक्सेनमूर्द्ध्नि भक्तानां सर्व्वतीर्थमयं हि तत् ॥"
इति।
"पादोदकस्य माहात्म्यं विख्यातं सर्व्वशास्त्रतः।
लेखितुं शक्नुयात् को हि जिह्वमौनं गणयन्नपि ॥
विशेषतश्च पादोदं तुलसीदलसंयुतम्।
शुद्धे क्षत्वा वैष्णवेभ्यो दत्त्वा प्राश्नन् पिबेत्सुखम् ॥"
अथ शुद्धकृतपादोदकमाहात्म्यं स्कान्दे ब्रह्मनारदसंवादे।
"कृत्वा पादोदकं शुद्धे वैष्णवानां महात्मनाम्।
यो दद्यात्तुलसीमिश्रं चान्द्रायणशतं लभेत् ॥
गृहीत्वा क्षणपादाम्बु शुद्धे कृत्वा तु वैष्णवः।
यो वहेत् शिरसा नित्यं स मुनिस्नापसोत्तमः ॥"
पाद्मे देवदूतविष्णुदूतसंवादे।
"शालग्रामशिलातोयं यदि शूद्रस्तु पिबेत्।
हत्याकोटिविनाशं तु कुरुते नात्र संशयः ॥"
अगस्त्यसंहितायाञ्च।
"शालग्रामशिलातोयं तुलसीदलवासितम्।
ये पिबन्ति पुनस्तेषां स्तन्यपानं न विद्यते ॥
श्रीविष्णोर्वैष्णवानाञ्च पावनघरणोदकम्।
सर्व्वतीर्थमयं पीत्वा कुर्य्यादाचमनं न हि ॥"
तदुक्तं स्कान्दे श्रीशिवेन।
"विष्णोः पादोदकं पीत्वा पश्चादशुचिभक्षया।
आचामति च यो मोहाद्ब्रह्महा स निगद्यते ॥"
श्रुतिश्च। "भगवान् पवित्रो भगवत्पादौ पवित्रौ पादोदकं पवित्रं न तत्पान आचमनीयं यथा हि सोम इति।" सौपर्णे च।
"विष्णुपादोदकं पीत्वा भक्तपादोदकं तथा।
य आचामति संमोहात् ब्रह्महा स निगद्यते ॥"
इति श्रीहरिभक्तिविलासः ॥

पाद्यं, क्ली, (पादार्घहृदकम्। पाद+"पादार्घाभ्याञ्च।" ५। ४। २५। इति यत्।) पादाय वारि। पादप्रक्षालनार्घजलम्। इत्यमरः॥ तल्लक्षणं यथा,—
"पादावनेजनजलमर्हणं पाद्यमद्भुतम्।
लौहजं वा दरीजातं हैमं राजतमेव वा॥
ताम्रमुत्तरमप्याहुरेनं सतामिति ॥"
इति वैद्यकशब्दरत्नावलिः॥

"षड्डुलं प्रविस्तारसप्तसेधचतुरङ्गुलम्।
औडुमेकाङ्गुलं कुर्य्यान्नाविकां चतुरङ्गुलाम् ॥
पृष्ठे पादसमायुक्तं चतुरङ्गुलमानतः।
पाद्यपात्रमिति ख्यातं सर्व्वदेवप्रपूजने ॥"
इति सिद्धान्तशेखरः॥

पानं, क्ली, (पा पाने+भावे ल्युट्।) पीतिः। द्रवद्रव्यस्य गलाधःकरणम्। (यथा, हितोपदेशे। "पयःपानं भुजङ्गानां केवलं विषवर्द्धनम्॥") भाजनम्। (पाल रक्षणे+भावे ल्युट्।) रक्षणम्। इति मेदिनी॥ (पीयते खगादिभिर्यत्र। पा+अधिकरणे ल्युट्। कृत्या। इति हेमचन्द्रः। ४। १५५॥ पीयते यदिति। कर्म्मणि ल्युट्। जलम्। इति युत्पत्तिलब्धोऽर्थः॥ * ॥ पाति रक्षतीति। पा+ल्युः। रक्षाकर्त्तरि, त्रि। यथा, ऋग्वेदे। ६। ७०। ४।
"व्रतानि पानो अमृतस्य चारुण
उभे नृचक्षा अनु पश्यते विशौ॥"
पायनम्। अक्षशूक्ष्माणां तीक्ष्णाग्रतासन्धानयोपारभेदः। पान् इति भाषा॥ वृद्धं दृहत्संहितायाम्।
"वड़वोष्ट्रकरेणुदुग्धपानं
यदि पानेन समीहतेऽर्धसिद्धिम्।
भवपित्तरुगत्र वल्गुदुग्धैः
करिहस्तच्छिदये सतालगर्भैः॥
व्यर्कं पयोऽहुविषाणमवीक्षसेतं
पारावताखुशुकता च युतं प्रलेपः।
शुक्लस्य तैलमधितस्य ततोऽस्य पानं
पश्चाच्छितस्य न शिलासु भवेद्विघातः॥
क्षारे कदल्या मथितेन युक्ते,
दिनोषिते पाचितमायसं यत्।
सम्यक् शितं चाञ्जनि नेति भङ्गं
न चान्यलौहैरपि तस्य कौण्ठ्यम्॥"
तथाच शुक्रनीत्याम्।
"इदमौषधसञ्च शुक्लपानं
रुधिरेण श्रियमिच्छतः प्रदीप्ताम्।
हविषा गुरुवत् सुताभिलिप्सोः
सलिलेनाचयमिच्छतश्च वित्तम्॥")

पानः, पुं, (पीयते यस्मादिति। पा+अपादाने ल्युट्।) औष्ठिकः। इति शब्दाक्षरः॥ निःश्वासः। इति हेमचन्द्रः। ६। ४॥

पानकं, क्ली, (पानाय कायतीति। के+कः।) पानद्रव्यविशेषः। तत्प्रकारो यथा, "यथोक्तपरिमितशर्करानिम्बूरसयुक्तोऽथवान्याम्लयुक्तः शर्करस्तः। इति पाकराजेश्वरः॥ (यथा, सुश्रुते। १। ४६।
"पानीयं पानकं मद्यं लवणेषु प्रदापयेत्।"
क्वचित् पुंस्यपि दृश्यते। यथा, तत्रैव। १। ३६।
"एभिर्लवणैश्च कषायांश्च तैलं सर्पींषि पानकान्॥"
तत्रान्यफलपानकम्। यथा,—
"आम्रजामं जलक्लिन्नं मर्दितं दृढ़पाणिना।
सिताशीतानुसंयुक्तं कर्पूरमरिचान्वितम्॥
प्रधानकमिदं श्रेष्ठं भीमसेनेन निर्मितम्।
सद्यो रुचिकरं वल्यं शीघ्रमिन्द्रियतर्पणम्॥
अपक्वान्तरसीकृतपानकं वातनाशनम्।
कफपित्तकरं किञ्चित् प्रत्यहं यदि सेवितम्॥"
पक्वान्तस्य तु।
"सुपक्वमाम्रस्य फलं सुमुष्टिना
सम्मर्दितं शर्करया समन्वितम्।
सुवासितं वेल्लजभृङ्गपत्रे
रुचिं विधत्ते विरुचौ जनानाम्॥
जम्बूफलभवं रुच्यं पानकं कफनाशनम्।
कषायं वातकृत् स्तोकं स्वादुम्लं ग्राहकं परम्॥"
बीजपूरपानकम्।
"मातुलुङ्गरसे योज्यं त्रिगुणं शार्करं जलम्।
कर्पूरमरिचोन्मिश्रं पानकं स्वादिदं वरम्॥
मातुलुङ्गभवं पानं शूलानाह विनाशनम्।
श्वासे कासेऽरुचौ वातविड्बन्धेषु च पूजितम्॥"
हेमकिरणस्तु।
"शर्करागालितैलञ्च बीजपूररसप्लुतम्।
षट्पुटं भवेद्धेमकिरणं नामपानकम्॥
पानकं हेमकिरणं रुच्यं दृष्यं बलप्रदम्।
सुस्निग्धं वातदृक्छुभ्रं किञ्चित् कफकरं गुरु॥"
करमर्दपानकं यथा,—
"सबङ्गाद्रकसंयुक्तं सुपिष्टं वारिणा युतम्।
करमर्दं करेमर्दं सप्तभागसितान्वितम्॥
वातदृद्दृचिदं भव्यं हृद्यमन्तरं स्मृतम्।
रक्तपित्तकरश्चोष्णमाकण्ठं कारमर्दितम्॥"
नारङ्गपानकं यथा,—
"सुपक्वनारङ्गफलं निपीड़ितं
संयोजितं शर्करयाति शुभ्रया।
सहार्द्रकं चेन्दुकपेन वासितं
पानेच्छया केन न संस्तुतञ्चरम्॥

नारङ्गफलसम्भूतं पानकं वातनाशनम् ।
मधुरं विशदं रुच्यं सुस्निग्धं पित्तहृद्बलम् ॥"
चारस्य तु ।
"चारवृक्षफलजं सशर्करं
मर्दितं शिशिरवारिणा दृढम् ।
ऐलमार्द्रकयुतेन सुवासं
भक्तसिक्थमिलितं कृतहासम् ॥
चारस्य फलजं पानं गुरु वृष्यं रुचिप्रदम् ।
कफपित्तहरं श्रेष्ठं हृद्यं मधुरपाकि च ॥
परूषजीरचुक्रादिद्राक्षादाडिमजं तथा ।
एकैकं सम्भवं भिन्नं पानकं क्रियते बुधैः ॥
एवमन्यस्य पुष्पस्य फलस्यान्यस्य वा तथा ।
शर्करामरिचोन्मिश्रं रस्यं स्यात् पानकं वरम् ॥
एवं हि पानकं कार्य्यं सुधिया सुष्ठु यत्कृतम् ।
गुणा द्रव्यानुसारेण ज्ञातव्याः पानकेषु च ॥"
यथास्य गुणाः,—
"श्रमनुत्तृट्क्रमहरं पानकं प्रीणनं गुरु ।
विष्टम्भि मूत्रलं हृद्यं यथाद्रव्यगुणञ्च तत् ॥"
इति वाभटे सूत्रस्थाने षष्ठेऽध्याये ॥
"गौड़मन्यमनन्नं वा पानकं गुरु मूत्रलम् ।
तदेव खण्डभृष्टौकाशर्करासहितं पुनः ॥
मार्द्वं सुतीक्ष्णं सुहिमं पानकं स्यान्निरत्ययम् ।
"प्रदद्याणि.रसांश्चैव पानीयं पानकं पयः ।
खड़ान् यूषांश्च पेयांश्च सर्वे पार्श्वे प्रदापयेत् ॥"
इति सुश्रुते सूत्रस्थाने ४६ अध्याये ॥"

पानगोष्ठिका, स्त्री, (पानस्य पानाय वा गोष्ठिका ।) यत्र सम्भूय पीयते । मद्यपानचक्रम् । तत्पर्य्यायः । व्यापानम् २ । इत्यमरः ।२।१०।४३॥ चक्रानुष्ठानं यथा श्यामारहस्यधृतम् । चक्राकारेण पंक्त्याकारेण वा भिन्नभिन्नासने स्वशक्तियुक्तश्चेत् युग्मयुग्मक्रमेण पद्मासनेनोपविश्य सामयिकललाटे चन्दनं दत्त्वा शिवशक्तिबुद्ध्या पुष्पञ्च दद्यात् । ततो यदि गुरुस्तत्र तिष्ठति तदादौ गन्धादिना तं पूजयित्वा तत्पात्रे पुष्पं दत्त्वा शुद्धिसहितं तस्मै समर्प्य प्रणमेत् । गुरोरभावे तत् पात्रं जले क्षिपेत् । ततः शक्तिपात्रं शुद्धिसहितं शक्त्यै दत्त्वा सामयिकेभ्योऽपि ज्येष्ठानुक्रमेण वीरपात्रान् परान्नं शुद्धिसहितं दद्यात् । ततः सामयिकोऽपि भक्त्या हस्तद्वयेन संगृह्य तदुपरि मूलमन्त्रमष्टधा जप्त्वा पूर्ववदानन्दभैरवं भैरवीञ्च सन्तर्प्य गुरून् देवताश्च सन्तर्पयेत् । स्वस्वकल्पोक्तविधिना भूतशुद्धिं कुर्य्यात् । ततश्चक्रनायकस्तैः सह पात्रवन्दनं कुर्य्यात् । यथा,
"श्रीमद्भैरवशैखरप्रविलसच्चन्द्राम्रतज्ञावितं
चैतार्धीश्वरयोगिनीसुरगणैः सिद्धैः समाराधितम् ।
व्यानन्दार्णवकं महात्मकमिदं साक्षात्त्रिखण्डास्तृतं
वन्दे श्रीप्रथमं कराम्बुजगतं पात्रं विशुद्धिप्रदम् ॥"
इत्यभिमन्त्र्य वामहस्तेन पात्रमुत्थाप्य अन्योन्यवन्दनं कृत्वा गृह्णामीति गुरुशक्तिसाधकेश्वराणामाज्ञां गृह्णीयात् । ते तु यच्छेति ब्रूयुः । ततो मूलाधारात् कुण्डलिनीं इष्टदेवतास्वरूपां व्याप्तिक्रान्तां विभाव्य गुरुपादुकां स्मृत्वा शिवोऽहमिति विचिन्त्य हस्ताभ्यां पात्रं धृत्वा मूलमुच्चरन् कुण्डलिनीमुखे देवीं तर्पयेत् । एतदुक्तमुदयाकरपद्धत्याम् ।
"कृत्वा मन्त्रतनुं स्मरेत् गुरुपदं देवीं बलां चिन्मयीं
पश्चात् वारत्रयं सदासवकृतं दीपेयुतं कज्जलैः ।
पुष्पाद्यैरभिमन्त्रितञ्च निविड़ं सम्मोहकध्वंसकं
ये सञ्चिन्त्य पिबन्ति यान्ति खलु ते मुक्तिञ्च
मुक्तिं पराम् ॥"
तत्रान्तरे च ।
"सिन्दूरतिलकं भालें पाणौ च मदिरासवम् ।
कृत्वा पिबेद्गुरुं ध्यायंस्तथा देवीञ्च चिन्मयीम्॥"
ततः पात्रमाधारोपरि संस्थाप्य पुनस्तेन क्रमेण परान्नं गृहीत्वा पात्रवन्दनं कुर्य्यात् । यथा,—
"मद्यं मीनरसावहं यदि तथा दत्तञ्च पेयादिभिः
किञ्चिच्चषलरक्तपङ्कजदृशा तस्मै समावेदितम् ।
वामे स्वात्मविशुद्धिशुद्धिकमलं पाणौ विधायात्मके
वन्दे पात्रमहं द्वितीयमधुनानन्दैकसंवर्द्धनम् ॥"
ततः पूर्ववत् पात्रं स्वीकृत्य अन्यत् पात्रवन्दनं कुर्य्यात् । यथा,—
"सर्व्वाम्नायकलाकलापकलितं कौतूहलद्योतनं
चन्द्रोपेन्द्रमहेन्द्रमुख्यवरुणब्रह्मादिभिः सेवितम् ।
ध्यातं देवगणैः परं मुनिगणैर्म्मोक्षार्थिभिः
सर्व्वदा
वन्दे पात्रमहं तृतीयमधुना चात्मावबोधक्षमम्॥"
तृतीयपात्राभिवन्दनं कृत्वान्यत् पात्रवन्दनं कुर्य्यात् । यथा,—
"हैमं मीनरसावहं हरिहरब्रह्मादिभिः सेवितं
सुग्रामैथुनधर्म्मकर्म्मनिरतं चारास्वतिक्ताश्रयम् ।
आचार्य्याष्टकसिद्धिभैरवकलासांसेन संशोधितं
पायात् पञ्चमकारतत्त्वसहितं पात्रं चतुर्थं नमः॥"
इति चतुर्थपात्रवन्दनं कृत्वान्यतपात्रवन्दनं कुर्य्यात् । यथा,—
"आधारे भुजगाधिराजवलये पात्रं महीमण्डलं
मद्यं सप्तसमुद्रवारि पिशितं चाष्टौ च दिग्-
दन्तिनः ।
सोऽहञ्चैव विभावयन् प्रतिदिनं तारागणे रचितो
ऽप्यादित्यप्रमुखैः सुरासुरगणैराज्ञाकरैः
किङ्करैः ॥"
इति पञ्चमपात्रं स्वीकुर्य्यात् । ततो यावद्दृश्यादिकं न चलति तावत् पानादिकं कार्य्यम् । अथास्य प्रमाणं यथा रुद्रयामले ।
"साधकेभ्यश्च शक्तिभ्यो दद्यान्निर्म्माल्यचन्दनम् ।
सामयिकैः समं कुर्य्याद्देवि! पानादिभक्षणम् ॥"
अन्यत्रापि ।
"निविशेषञ्चक्ररूपेण पंक्त्याकारेण वा यथा ।
शक्तियुक्तो वसेद्वापि युग्मयुग्मविधानतः ।
शिवशक्तिधिया सर्व्वं चक्रमध्ये समर्पयेत् ॥"
तत्रान्तरे च ।
"ततः पुष्पं समादाय गुरोः पात्रे निवेदयेत् ।
गुरवे च निवेदाय शक्त्यै दत्त्वा स्वयं हरेत् ॥"
भावचूड़ामणौ च ।
"साक्षाद्यदि गुरुर्न स्यात्तदातोये विचर्जयेत्॥"
एतत् सर्व्वं कौलोत्तरपरम् ।
"दिव्यवीरमयो भावः कलौ नास्ति कदाचन ॥"
इति कालीविलासवचनात् ॥

पानपात्रं, क्ली, (पानस्य पेयमद्यादेः पात्रम् ।) मद्यपानपात्रम् । मद्यपानस्य भाजनम् । तत्पर्य्यायः । चषकः २ सरकः ३ अनुतर्षणम् ४ । इत्यमरः ॥ पूर्वोक्तं मद्यपानपात्रे पेयोक्तं मद्यपरिवेषणपात्रे । इति भरतः ॥ चषकम् ५ अनुतर्षः ६ पारी ७ पारीकम् ८ । इति शब्दरत्नावली ॥ ८ ॥ (यथा, मार्कण्डेये ।८२।२६।
"इत्याकर्ण्य सुरा पानपात्रं धनाधिपः ॥")
अथ पानपात्रपरिमाणादि यथा कुलसारे ।
"नयनाग्निबाणसंख्यकर्षेषु परमेश्वरि ! ।
पात्रं प्रकल्पयेत्यमित्युक्तं कुलसाधने ॥
इतोऽप्यधिकपात्रन्तु न कर्त्तव्यञ्च साधकैः ॥"
कर्षं लौकिकतोलकमित्यर्थः । तदुक्तं कुलोत्तमे ।
"गुञ्जादादश माषः स्यात्तदष्टौ कर्ष उच्यते ॥"
अथोत्तरतन्त्रे ।
"अनुज्ञां पुरतो लब्ध्वा गृह्णामीति स्वयं वदेत् ।
ॐ यच्छेत्यभ्यनुज्ञातो गुरुणा वा कुलीनकैः ॥
गृह्णीयाच्च स्वयं शिष्टो यद्यप्यासनः सुधीः ॥"
कुलार्णवे ।
"एकासने निविष्टा ये शूद्रैरेव भाजने ।
एकपात्रे पिबेद्द्रव्यं ते यान्ति नरकाधमे ॥"
एकपात्रमिति सर्व्वैर्म्मिलित्वा नैकपात्रे पिबेत् । न तु प्रतिवारं द्रव्यपाने भिन्नभिन्नपात्रं कार्य्यं अननुष्ठानलक्षणापत्तेः सम्प्रदायविरोधाच्च ॥

पानवणिक्, [ज] पुं, (पानाय पेयसुरादेर्विक्रयार्थं वणिक् पानस्य वणिक् वा ।) शौण्डिकः । इति हेमचन्द्रः ॥

पानभाजनं, क्ली, (पानाय पानस्य वा भाजनं पात्रम् ।) पानपात्रम् । तत्पर्य्यायः । कंसः २ । इत्यमरः । २ । ६ । ३२ ॥ "काम्यतेऽसौ कंसः कसुकड्सृहि नाम्नीति सः दन्त्यान्तः । स्वार्थे ण्यः कांस्यञ्च । स्वर्णरजतादिनिर्म्मिते पात्रमात्रेऽपि कंसः । 'कंसः स्यात् तैजसे द्रव्ये पानपात्रेऽपि कांस्यवत् ।' इति शाश्वतः ॥
'पात्रान्तरे पानपात्रे कांस्यं कंसे च तैजसे ।
इति रभसः ॥
पीयते पानं मद्यादि तस्य भाजनं पानभाजनम् ।" इति भरतः ॥

पानसं, क्ली, (पनसस्य इदं पनसफले भवं तत्फलस्य विकार इति वा अण् ।) पनसभवमद्यम् । इति जटाधरः ॥ पनससम्बन्धिनि, त्रि ॥

पानाह्वयः, पुं, (पानाह्वेतोः जातो योऽह्वयः रोगविशेषः ।) मद्यात्ययरोगः । इति राजनिर्घण्टः ।

पानिलं, क्ली, (पानमाधारत्वेनास्त्यत्र इति इलच् ।) पानपात्रम् । इति शब्दचन्द्रिका ।

पानीयं, क्ली, (पीयते इति । पा + अनीयर् ।) जलम् । इत्यमरः । १ । १० । ४ । पानत्वे रस-

शीये च त्रि ॥ पानार्हद्रव्यविशेषः । पाना इति वङ्गभाषा । शरवत् इति पारस्यभाषा । तत्र अम्बिकापानीयं पित्तवमिनाशकम् । मिष्टदाड़िमीपानीयं प्रतिश्यायकाशनाशकम् । अम्लदाड़िमीपानीयं उदरविकारे धारकं क्षुधाहृद्विकारकच्च । निम्बूपानीयं क्षर्दिहृल्लासपित्तज्वरनिवारकं सकलाहारपाचकच्च । नागरङ्गपानीयं कासपित्तविनाशकं अन्तःकरणप्राशस्त्यजनकच्च । सेवचन्दनपानीयं बलकारकं उन्मादमूर्च्छारोगशान्तिकारकं रतिशक्तिवर्द्धकं उदरविकारोपकारकच्च । इति पाकराजेश्वरः ॥ (अन्यत् पानकशब्दे द्रष्टव्यम् ॥ * ॥) जलदानविधिर्यथा,—

यम उवाच ।

"एतत्तं कथितं विप्र ! मम लोके तु दुर्लभम् ।
पानीयं सन्ततन्तस्माद्दातव्यं सुखमिच्छता ॥
अतोऽर्द्धं कारयेत् कूपं वापीं वा बहुपल्वलम् ।
बहुलोकाङ्गले देशे सर्व्वसत्त्वोपजीवितम् ॥"

इत्यग्निपुराणम् ॥

तद्दानानन्तरं पाद्यमन्त्रो यथा,—

"पानीयं प्राणिनः प्राणाः पानीयं पावनं महत् ।
पानीयस्य प्रदानेन तृप्तिर्भवति शाश्वती ॥"

इति स्मृतिः ॥

तत्पर्य्यायः ।

"पानीयजीवनवनाम्बुतपुष्करााम्भः-
स्वघोऽम्बुशुभ्रसरपयःसलिलोदकानि ।
आपः कवारुणकबन्धजलानि नीरं
कीलालवारिकमलानि विषार्णसी च ।
सुवनं दहनारातिर्वास्तोयं सर्व्वतोसुखम् ।
क्षीरं घनरसं निम्नगं मेघप्रसवो रसः ॥"

अस्य साधारणगुणाः ।

"पानीयं मधुरं हिमच्च रुचिदं तृष्णाविशोषापहं
मोहभ्रान्तिमपाकरोति कुरुते भुक्तान्नपक्तिं
पराम् ।
निद्रालस्यनिरासनं विषहरं श्रान्तार्त्तिसन्तर्पणं
नृणां धीबलवीर्य्यदृद्विजननं नष्टाङ्गपुष्टिप्रदम् ॥"
सद्यो दृष्टाम्बु भूमिस्थं कलुषं दोषदायकम् ।
चिरस्थितं लघु स्वच्छं पथ्यं स्वादु सुखावहम् ॥"
देशभूमिविशेषजलगुणाः ।
"जातं ताम्रभाजनदत्तदेव सलिलं वातादिदोषप्रदं
देशाच्छाधकरच्च दुर्जरतरं दोषावहं धूसरात् ।
वातघ्नच्च शिलाशिरोत्थममलं पथ्यं लघु स्वादुकं
श्रेष्ठं श्यामभृदस्थिदोषशमनं सर्व्वामयघ्नं
जलम् ॥"

इति राजनिर्घण्टः ॥

"पिच्छिलं क्षमिलं क्लिन्नं पर्णशैवालकर्द्दमैः ।
विवर्णं विरसं सान्द्रं दुर्गन्धि न हितं जलम् ॥
चन्द्रार्कार्करसंजुष्टं वायुना स्फालितं मुहुः ।
पर्व्वतोपरि यद्वारि तत्पौरन्दरेयं तत् ॥
तस्यानुगुणमुद्दिष्टं शैलप्रस्रवणोद्भवम् ।
वेधनं दीपनं रुच्यं किञ्चिद्वातप्रकोपणम् ॥"

इति राजवल्लभः ॥

पानीयनकुलः, पुं, (पानीये जले नकुल इव ।) उद्रः । उद्विड़ाल इति भाषा । यथा,—

"उद्रस्तु जलमार्जारः पानीयनकुलो वसी ॥"

इति हेमचन्द्रः ॥

पानीयपृष्ठजः, पुं, (पानीयपृष्ठे जलोपरि जायते इति । जन + डः ।) कुम्भी । इति रत्नमाला ॥ पाना इति भाषा ॥

पानीयफलं, क्लीं, (पानीयजातं फलमिति मध्यपदलोपी समासः ।) मखान्नम् । इति भावप्रकाशः ॥ माखाना इति भाषा ।

पानीयमूलकं, क्लीं, (पानीयमेव मूलमस्य । ततः कप् ।) सोमराजी । इति शब्दचन्द्रिका ॥

पानीयवर्णिका, स्त्री, (पानीयं वर्णयति प्रकाशयतीति । वर्णि + ण्वुल् । टाप् अत इत्वच्च ।) वालुका । इति राजनिर्घण्टः ॥

पानीयशालिका, स्त्री, (पानीयस्य जलस्य वितरणार्थं शालिका शालागृहमित्यर्थः ।) जलावस्थानगृहम् । पानिशाला इति जलछत्र इति च भाषा । तत्पर्य्यायः । प्रपा २ । इत्यमरः ॥ तत्कर्त्तृफलं यथा,—

"कूपारामप्रपाकारी तथा वृक्षादिरोपकः ।
कन्याप्रदः सेतुकारी स्वर्गमाप्नोत्यसंशयम् ॥"

इत्युद्वाहतत्त्वे यमः ॥

पानीयामलकं, क्लीं, (पानीयमामलकं पानीयाख्यं आमलकं वा ।) प्राचीनामलकम् । पानि आमला इति भाषा । अस्य गुणाः । दोषत्रयज्वरनाशित्वम् । इति भावप्रकाशः ॥ सुखमुद्विमलवह्निकारित्वम् । अम्लत्वम् । स्वादुत्वच्च । इति राजवल्लभः ॥

पानीयालुः, पुं, (पानीयसम्भूत आलुः ।) कन्दविशेषः । पनियालु इति हिन्दीभाषा । तत्पर्य्यायः । जलालुः २ क्षुपालुः ३ वालुकः ४ । अस्य गुणः । त्रिदोषनाशित्वम् । सन्तर्पणकारित्वच्च । इति राजनिर्घण्टः ॥

पानीयाम्ना, स्त्री, (पानीयं जलं अम्नातीति । अम्ल गत्यादिषु + वाहुलकात् नः ततष्टाप् ।) वल्लजा । इति राजनिर्घण्टः ॥

पान्थः, त्रि, (पथि कुशलः पन्थानं नित्यं गच्छतीति वा । "पथो ण नित्यम् ।" ५ । १ । ७६ । पथः पन्थ च इत्यनेन पन्थादेशे कृते णः । पथिकः । इत्यमरः । २ । ८ । १७ ॥ (यथा, हरिवंशे । ४२ । २ ।

"यथा निदाघसमये सूर्य्यांशुपरिपीड़ितः ।
पान्थो याति जलं दृष्ट्वा त्वरितं तृषिपासया ॥")

पापं, क्लीं, (पाति रक्षति अस्मादात्मानमिति । पा + "पानीविषिभ्यः पः ।" उणां । ३ । २३ । इति पः ।) अधर्म्मम् । दुरदृष्टम् । तत्पर्य्यायः । पङ्कम् १ पाप्मा २ पापम् ३ किल्बिषम् ४ कल्मषम् ५ कलुषम् ६ दृजिनम् ७ एनः ८ अघम् ९ अहः १० दुरितम् ११ दुष्कृतम् १२ । इत्यमरः ॥ पातकम् १३ तूस्तम् १४ कण्वम् १५ शल्यम् १६ पापकम् १७ । इति शब्दरत्नावली (निषिद्धकर्म्मानुष्ठानविहितकर्म्माननुष्ठानाभ्यां पापोत्पत्तिं सविशेषमाह श्रीसदाशिवः ।

"अनुष्ठानं निषिद्धस्य त्यागो विहितकर्म्मणः ।
नृणां जनयतः पापं क्लेशशोकामयप्रदम् ॥
स्वानिष्टमात्रजननात् परानिष्टोपपादनात् ।
तदेव पापं द्विविधं जानीहि कुलनायिके ! ॥
परानिष्टकरात् पापात् मुच्यते राजशासनात् ।
अन्यस्मान्मुच्यते मर्त्त्यः प्रायश्चित्तात् समाधिना ॥
प्रायश्चित्ताद्यथा दग्धैर्न पूता ये कृतांहसः ।
नरकान् न निवर्त्तन्ते इहामुत्र निगर्हिताः ॥"

इति श्रीमहानिर्व्वाणतन्त्रे ॥)

तद्भेदविधं यथा,—

"प्राणाभिपातनं स्तेयं परदारमथापि च ।
त्रीणि पापानि कायेन सर्व्वतः परिवर्ज्जयेत् ॥
असत्प्रलापं पारुष्यं पैशुन्यमनृतन्तथा ।
चत्वारि वाचा राजेन्द्र ! न जल्पेत न चिन्तयेत् ॥
अनभिध्या परस्वेषु सर्व्वसत्त्वेषु सौहृदम् ।
कर्म्मणां फलमस्तीति त्रिविधं मनसा चरेत् ॥

इति शान्तिपर्व्वणि दानधर्म्मः ॥

स्मृत्युक्तान्येतानि पातकशब्दे लिखितानि ॥ * ॥

पापस्य पुरुषत्रयानुवर्त्तित्वं यथा,—

"नाधर्म्मश्चरितो राजन् ! सद्यः फलति गौरिव ।
शनैरावर्त्तमानस्तु मूलान्यपि निकृन्तति ॥
यदि नात्मनि मित्रेषु न चेत् पुत्रेषु नप्तृषु ।
पापमाचरितं कर्म्म त्रिवर्गमनुवर्त्तते ॥
फलत्येवं ध्रुवं पापं गुरुभुक्तमिवोदरे ॥"

इति मात्स्ये २८ अध्यायः ॥ * ॥

तीर्थस्य पापनाशकत्वं तत्र कृतपापस्य वज्रलेपत्वच्च । यथा,—

"अन्यत्र हि कृतं पापं तीर्थमासाद्य गच्छति ।
तीर्थे तु यत् कृतं पापं वज्रलेपो भविष्यति ॥
मथुरायां कृतं पापं तत्रैव च विनश्यति ।
एषा पुरी महापुण्या यस्यां पापं न विद्यते ॥"

इति वाराहे मथुरामाहात्म्यम् ॥ * ॥

शेषपापलक्षणं यथा,—

"अतः परं प्रवक्ष्यामि शेषपापस्य लक्षणम् ।
ऋणं देवर्षिभूतानां मनुष्याणां विशेषतः ॥
पितॄणाच्च द्विजश्रेष्ठ ! सर्व्ववर्णेषु चैकतः ।
ओंकारादिनिवृत्तिच्च पापकार्य्यकृतिच्च या ॥
हत्यादिकं महापापं त्वगम्यागमनं तथा ।
घृतादिविक्रयं घोरं चाण्डालादिप्रतिग्रहम् ॥
स्वदोषगोपनं पापं परदोषप्रकाशनम् ।
ईर्षाविद्वं वाक्यदुष्टं निष्ठुरत्वं षड़क्षरम् ॥
ढाकित्वं तालवादित्वं नास्त्रां वाचाप्यधर्म्मजः ।
मारणत्वमधार्म्मिकत्वं नरकाद्वृक्षमुच्यते ॥
एतैः पापैस्तु संयुक्तः पच्यते यदि मङ्कुरः ॥"

इति वामने ५८ अध्यायः ॥

साङ्कर्य्यनामकपापानि यथा,—

"एकशय्याशनं पंक्तिभाण्डपक्वान्नमिश्रणम् ।
याजनाध्यापने योनिस्तथैव सहभोजनम् ॥
सहाध्यायस्तु दशमः सहयाजनमेव च ।

एकादश समुद्दिष्टा दोषाः गार्हस्थ्यसंज्ञिताः ॥
समीपे चाप्यवस्थानात् पापं संक्रमते नृणाम् ।
तस्मात् सर्वप्रयत्नेन सान्निध्यं परिवर्जयेत् ॥"
इति कौर्मे उपविभागे १५ अध्यायः ॥
"आलापाद्गात्रसंस्पर्शात् संवासात्सहभोजनात् ।
याजनाध्यापनाद्यानात् पापं संक्रमते नृणाम् ॥
आसनाद्देकशय्याया भोजनात् पंक्तिसङ्करात् ।
ततः संक्रमते पापं घटाद्घट इवोदकम् ॥"
इति गारुडे नीतिसारे १११ अध्यायः ॥
राष्ट्रादिकृतपापेन राजादीनां परस्परं पापित्वं यथा,—
"राज्ञा राष्ट्रकृतात् पापात् पापी भवति वै हरे ! ।
तथैव राज्ञः पापेन तद्राज्यस्थास्तु ये जनाः ॥
वर्णाश्रमादयः सर्वे पापिनो नात्र संशयः ।
भार्य्याऽदुष्कृती स्वामी दूषिनात् स्वामिनोऽबला ॥
तथा देशिकपापात्तु शिष्यः स्यात्पातकी सदा ।
शिष्याद्धि पापिनो नित्यं गुरुर्भवति दुष्कृती ॥
पातकी यजमानः स्यात् पापिनोऽङ्ग ! पुरोधसः ।
पुरोधितस्तथा पापी यजमानाद्धरो ध्रुवम् ॥"
अदत्तपुण्यपापभागित्वं यथा,—
"अदत्तानि च पुण्यानि पापानि च यथा प्रिये ! ।
प्राप्नोति कर्म्मणा येन तद्यथावन्निशामय ॥
देशग्रामकुलानि स्युर्भागभाञ्जि कृतादिषु ।
कलौ तु केवलं कर्त्ता फलभुक् पुण्यपापयोः ॥
व्यवहारेऽपि च संसर्गे अवश्येयमुदाहृता ।
संसर्गात् पुण्यपापानि यथा यान्ति निबोध तत् ॥
एकत्र मैथुनाद्यानादेकपात्रस्थभोजनात् ।
फलार्द्धं प्राप्नुयात्कर्त्रोर्यथावत् पुण्यपापयोः ॥
स्पर्शनाद्गात्रसंस्पर्शादपि परस्य स्रवणादपि ।
दर्शनाच्च पुण्यपापानां नित्यं प्राप्नोति मानवः ॥
दर्शनश्रवणाभ्याञ्च मनोध्यानात्तथैव च ।
परस्य पुण्यपापानां शतांशं प्राप्नुयान्नरः ॥
परस्य निन्दापैशुन्यं धिक्कारञ्च करोति यः ।
तत्कृतं पातकं प्राप्य स्वपुण्यं प्रददाति सः ॥
कुर्वतः पुण्यकर्म्माणि सेवां यः कुरुते नरः ।
पत्नी भृत्योऽथ शिष्यो वा स्वजातीयोऽपि मानवः ।
तस्य सेवानुरूपेण तस्य तत्पुण्यभाग्भवेत् ॥
एकपंक्तेस्तु यस्तु लुप्त्यन्नं परिवेषयेत् ।
तस्य पापशतांशन्तु लभते परिवेषकः ॥
स्नानसन्ध्यादिकं कुर्वन् संशृण्वेद्यः प्रभाषते ।
स पुण्यकर्म्मषष्ठांशं दत्त्वान्यस्तु सुनिश्चितम् ॥
धर्म्मोद्देशेन यो द्रव्यं परं याचयते नरः ।
तत् पुण्यं कर्म्मणस्तस्य धनं दत्तान्नुयात् फलम् ॥
स्वयमुक्त्वा परत्रार्थं पुण्यकर्म्म करोति यः ।
कर्म्मकृत् पापभोक्तृत्वे धनिनस्तद्भवेत् फलम् ॥
नापयुक्त्वा क्वचिद्यस्तु परस्य म्रियते नरः ।
पत्नी तत् पुण्यमाप्नोति मधुस्रस्यादृतस्रवः ॥
कृतिरन्वमता च यज्ञोपकरणस्रुचः ।
दक्षस्यापि यज्ञांशं प्राप्नुयात् पुण्यपापयोः ॥
प्रजाभ्यः पुण्यपापानां राजा षष्ठांशमुद्धरेत् ।
शिष्याद्गुरुः स्त्रिया भर्त्ता पिता पुत्रात्तथैव च ।
स्वपतेरपि पुण्यस्य भार्य्यार्द्धं समवाप्नुयात् ॥
परद्वेषेण दानादि कुर्वतः पुण्यकर्म्मणः ।
विना भृतकशिष्याभ्यां कर्त्ता षष्ठांशमाहरेत् ।
आत्मनो वा परस्यापि यदि सेवां न कारयेत् ॥
श्रीकृष्ण उवाच ।
इत्थं ह्यदत्तान्यपि पुण्यपापा-
न्यायान्ति नित्यं परसञ्चितानि ।
श्रृणुष्व चास्मिन्नितिहासमग्र्यं
पुराभवं पुण्यमतिप्रियञ्च ॥"
इति पाद्मोत्तरखण्डे । २१।१५७ अध्यायः ॥
क्षुद्रजन्तुप्रभृतीनां वधे पापं तत्प्रायश्चित्तञ्च यथा,—
"वधे च क्षुद्रजन्तूनां हिंसकानाञ्च पण्डितः ।
कार्यापणं समुत्सृज्य स्नात्वुकाले प्रसुप्यते ॥
अहिंसकानां क्षुद्राणां वधे शूतगुणं ध्रुवम् ।
प्रायश्चित्तं स्नात्वुकाले कथितं पद्मयोनिना ॥
वधे विहिंसजन्तूनां पक्षादीनाञ्च कामतः ।
ततः शूतगुणं पापं निश्चितं मनुरब्रवीत् ॥
नराणां म्लेच्छजातीनां वधे शूतगुणं ततः ॥
म्लेच्छानाञ्च शूतानाञ्च यत् पापं लभते वधे ।
सच्छूद्रैकस्य च वधे तत् पापं लभते पुमान् ॥
सच्छूद्राणां शूतानाञ्च यत् पापं लभते वधे ।
तत् पापं लभते नूनं गोवधेनैव निश्चितम् ॥
गवां दशगुणं पापं ब्राह्मणस्य वधे भवेत् ।
विप्रहत्यासमं पापं स्त्रीवधे लभते नरः ॥" * ॥
पापिदर्शनजन्यपापं यथा,—
"पापं यद्दृश्ये तात ! कथयामि निशामय ।
दुःस्वप्नं पापबीजञ्च केवलं विघ्नकारणम् ॥
गोघ्नञ्च ब्रह्मघ्नं वापि क्षत्रघ्नं कुटिलं तथा ।
देवघ्नं पितृमातृघ्नं पापं विश्वासघातिनम् ॥
मिथ्यासाक्ष्यप्रदातारं पक्षपातिन्यविवेचकम् ।
ग्रामयाजिनमेवेति देवविप्रस्वहारिणम् ॥
अश्वत्थघातिनं दुष्टं शिवविष्णुविनिन्दकम् ।
अदीक्षितमनाचारं सन्ध्याहीनं द्विजन्तथा ॥
देवलं वृषवाहञ्च शूद्रायां शूद्रकारकम् ।
शूद्रदाहीं च शूद्रायां शूद्रान्नान्नभोजिनम् ॥
अवीरां छिन्ननासाञ्च देवब्राह्मणनिन्दकम् ।
पतिभक्तिविहीनाञ्च विष्णुभक्तिविहीनकम् ॥
शूद्रायां विधवायाञ्च चण्डालं अभिचारिणीम् ।
शूद्रञ्च कोपयुतं दुष्टस्त्रीगमनञ्च जारजम् ॥
चौरं मिथ्यावादिनञ्च परस्वागतघातिनम् ।
मांसापहारिणञ्चैव ब्राह्मणं वृषलीपतिम् ॥
ब्राह्मणीगामिनं शूद्रं द्विजं वार्द्धुषिकन्तथा ।
अगम्यागामिनं दुष्टं चतुर्वर्णं नराधमम् ॥
मातासपत्नी माता च स्वस्रश्च भगिनी सुता ।
गुरुपत्नी पुत्रपत्नी सोदरस्य प्रिया सती ॥
मातृष्वसा पितृष्वसा भागिनेयप्रिया तथा ।
मातुलानी स्नुषा च पितृष्वस्री रजस्वला ॥
पितृमातृप्रसूश्चैव चागम्याश्चादश स्मृताः ।
कीर्त्तिता धर्म्मवेदे च परिमाल्पाः शतां वर्ष ! ॥
एतान् दृष्ट्वा च स्पृष्ट्वा च ब्रह्महत्यां समश्नुते ।
तस्माद्देवादिमान् दृष्ट्वा सूर्य्यं दृष्ट्वा हरिं स्मरेत् ।
कामतो यदि पश्यन्ति तत्तुल्यास्ते भवन्ति वै ।
तस्मात् सन्तो न पश्यन्ति पापभीता ह्यनेकशः ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ७।७८ अध्यायः ॥
(अनिष्टम् । वधः । इति राजानुजः ॥ यथा, रामायणे । २ । ८ । ३२
"तस्मात न लक्ष्मणो रामः पापं किञ्चित् करिष्यति ।
रामस्तु भरते पापं कुर्य्यादेव न संशयः ॥"
तद्वति, त्रि । इत्यमरः ॥ यथा, महाभारते । १ । ६० । १६ ।
"पुण्यां योनिं पुण्यकृतो व्रजन्ति
पापां योनिं पापकृतो व्रजन्ति ।
कीटाः पतङ्गाश्च भवन्ति पापा
न मे विवक्षास्ति महानुभाव ! ॥")
पापकं, क्ली, (पापमेव । स्वार्थे कन् ।) पापम् । इति शब्दरत्नावली ॥ (यथा, महाभारते । १ । ७४ । २७ ।
"मन्यते पापकं कृत्वा न कश्चिदिह मामिति ।
विदन्ति चैनं देवाश्च यश्चैवान्तरपूरुषः ॥"
पापेन कायतीति । कै + कः । पापवति, त्रि । यथा, महाभारते । १ । ७४ । २६ ।
"एकोऽहमस्मीति च मन्यसे त्वं
न ह्यक्षयं वेत्सि मुनिं पुराणम् ।
यो वेदिता कर्म्मणः पापकस्य
यस्यान्तिके त्वं वृजिनं करोषि ॥")
पापकृत्, त्रि, (पापं कृतवानिति । पाप + कृ + "सुकर्म्मपापमन्त्रपुण्येषु कृञः ।" ३ । २ । ८६ । इति क्विप् ।) पापकर्त्ता । यथा,—
"स्नापनेनानुतापेन तपसाध्ययनेन च ।
पापकृन्मुच्यते पापाद्दानेन च दमेन च ॥"
इति प्रायश्चित्ततत्त्वम् ॥
(यथा च महाभारते । १ । ६० । १६ ।
"पुण्यां योनिं पुण्यकृतो व्रजन्ति
पापां योनिं पापकृतो व्रजन्ति ॥")
पापग्रहः, पुं, (पापोऽशुभकारी ग्रहः ।) सूर्य्यो-चन्द्रः । कुजः । राहुः । शनिः । ऋतेर्युक्तो बुधः । रविः । यथा, ज्योतिःसारसंग्रहे ।
"सूर्य्येन्दुः कुजो राहुः शनिस्तैर्युत इन्दुजः ।
रविः पापा भवन्त्येते शुभाश्चान्ये प्रकीर्त्तिताः ॥"
पापघ्नः, पुं, (पापं हन्तीति । पाप + हन + "अमनुष्यकर्त्तृके च ।" ३ । २ । ५३ । इति टक् ।) तिलः । इति राजनिर्घण्टः ॥ पापनाशके, त्रि इति मुग्धबोधव्याकरणम् ॥
पापचेलिका, स्त्री, (पापमशुभं चेलति गच्छतीति । चेल + ण्वुल् + टाप् । कापि अत इत्वम् ।) पाटा । इति रत्नमाला ॥ व्याकरणादि इति भाषा ॥
पापचेली, स्त्री, (पापं चेलतीति । चेल + अच् + गौरादित्वात् ङीष् ।) पाटा । इत्यमरः । २ । ६ । ८५ ॥
पापनाशितः, पुं, (पापो नाशितः ।) धूर्त्तनाशितः । इति संक्षिप्तसारव्याकरणम् ॥

पापपतिः, पुं, (पापोत्पादकः पतिः।) उपपतिः। इति त्रिकाण्डशेषः॥

पापपुरुषः, पुं, (पापः पापमयः पुरुषः।) पापमयाङ्गनरः। यथा,—

"वामपार्श्वस्थितं पापपुरुषं कज्जलप्रभम्।
ब्रह्महत्याशिरस्कञ्च सुवर्णस्तेयभुजद्वयम्॥
सुरापानहृदा युक्तं गुरुतल्पकटिद्वयम्।
तत्संसर्गि पदद्वन्द्वमङ्गप्रत्यङ्गपातकम्॥
उपपातकरोमाणं रक्तश्मश्रुविलोचनम्।
खड्गचर्म्मधरं क्षुद्रमेवं कृत्वा विचिन्तयेत्॥"

इति भूतशुद्धिप्रकरणे तन्त्रसारः॥ ❀॥

"दृष्ट्वादौ पुरुषश्रेष्ठः संसारं सचराचरम्।
सर्व्वेषां दमनार्थाय सृष्टवान् पापपूरुषम्॥
द्विजातिहत्याम्बुर्द्धानं मदिरापानलोचनम्।
सुवर्णस्तेयवदनं गुरुतल्पगतिश्रुतिम्॥
स्त्रीहत्यानासिकञ्चैव गोहत्यादोषबाहुकम्।
न्यासापहरणग्रीवं भ्रूणहत्यागलन्तथा॥
परस्त्रीगतिवृक्कालं सृक्कलोकवधोदरम्।
भ्रूणपन्नहत्यादिनाभिं गर्व्वकथाकटिम्॥
गुरुनिन्दासक्थिभागं कन्याविक्रयशेफसम्।
विश्वासवाक्यकथनपायुं पिशुनवधाङ्घ्रिकम्॥
उपपातकरोमाणं महाकायं भयङ्करम्।
कृष्णवर्णं पिङ्गनेत्रं खाश्रयात्यन्तदुःखदम्॥"

इति पाद्मे क्रियायोगसारे २१ अध्यायः॥

पापमुक्तः, त्रि, पापान्मुक्तः। निष्पापः। इति संक्षिप्तसारव्याकरणम्॥ स च यथा,—

"यः समः सर्व्वभूतेषु जितात्मा शान्तमानसः।
स पापेभ्यो विमुच्येत ज्ञानवान् स च वेदवित्॥
गुणागुणपरिज्ञाता ह्यक्षयस्य क्षयस्य च।
ध्यानेनैव ह्यसंमूढः स पापेभ्यः प्रमुच्यते॥
स्वदेहे परदेहे च सुखदुःखेन नित्यशः।
विचारको भवेद्यस्तु स मुच्येतेनसो ध्रुवम्॥
अहिंसः सर्व्वभूतेषु क्षमाक्रोधविवर्जितः।
शुभव्रतः सदा यश्च स पापेभ्यः प्रमुच्यते॥
प्राणायामेन च निर्दग्धं अधःसप्तारणानि च।
अवस्थितमना यस्तु स पापेभ्यः प्रमुच्यते॥
निराशीः सर्व्वतस्त्यक्तेष्टिपूर्त्तेषु न लोलुपः।
परीतात्मा त्यजेत् प्राणान् सर्व्वपापात् प्रमुच्यते॥
श्रद्दधानो जितक्रोधः परदारविवर्जितः।
अनसूयश्च यो मर्त्यः स पापेभ्यः प्रमुच्यते॥
गुरुशुश्रूषया युक्तो ह्यहिंसानिरतश्च यः।
क्षुद्रञ्च क्षुद्रशीलञ्च स पापेभ्यः प्रमुच्यते॥
प्रशस्तानि च यः कुर्य्यादप्रशस्तानि वर्जयेत्।
योऽभिगच्छति तीर्थानि विमुक्तेनान्तरात्मना।
पापाद्दुपरतो नित्यं च पापेभ्यः प्रमुच्यते॥
उत्थाय ब्राह्मणं गच्छेन्नरो भक्त्या समन्वितः।
अभिगम्य प्रयत्नेन स पापेभ्यः प्रमुच्यते॥"

इति वराहपुराणम्॥

पापरोगः, पुं, (पापोद्भवो रोगः।) महारोगः। इति शब्दरत्नावली॥ (यथा, मनुः। ५।१६४।

"अभिचाराच्च भर्त्तुः स्त्री लोके प्राप्नोति निन्द्यताम्।
शृगालयोनिं प्राप्नोति पापरोगैश्च पीड्यते॥"

यत्पानजन्यो यद्रोगो भवति तत् सर्व्वं कर्म्मविपाकशब्दे द्रष्टव्यम्॥)

पापर्द्धिः, स्त्री, (पापानां ऋद्धिर्द्धिर्यत्र।) मृगया। इति हेमचन्द्रः। ३। ५६१॥ (यथा, पद्मतन्त्रे। २। ७८।

"व्यक्तं कस्मिंश्चिदन्वेषे कचित् पुलिन्दः।
स च पापर्द्धिं कर्त्तुं वनं प्रस्थितः॥")

पापलं, क्ली, परिमाणविशेषः। इति संक्षिप्तसारोणादिवृत्तिः॥ (पापं लातीति। ला+कः।) पापग्राहके, त्रि॥

पापशमनी, स्त्री, (पापं शाम्यतेऽनयेति। शम+णिच्+करणे ल्युट्। स्त्रियां ङीप्।) शमीवृक्षः। इति राजनिर्घण्टः॥ पातकनाशिका च॥

पापात्मा, [न्] पुं, (पापः पापविशिष्ट आत्मा यस्य। पापे अधर्म्मे आत्मा बुद्धिर्यस्येति वा।) पापी। यथा,—

"पापात्मनां शृणु गतिं विस्तरेण वदाम्यहम्।
षड्शीतिसहस्राणि योजनानि दुरात्मनाम्॥
प्रोक्तो मार्गस्य विस्तारः सर्व्वदुःखान्वितस्य च।
क्वचित्क्वचित् ज्वलद्वह्निः सन्तप्तः कर्दमः क्वचित्।
क्वचित् क्वचित् द्विजश्रेष्ठ! सन्तप्तं ताम्रवालुकम्॥
क्वचित् क्वचित्तीक्ष्णशिलाः क्वचित्तप्तशिलास्तथा॥
क्वचित् क्वचिच्छस्त्रवृष्टिः क्वचिदङ्गारवर्षणम्।
कुत्रचिद्वह्निवृष्टिश्च कुत्रचित् पङ्कवर्षणम्॥
उल्काम्बुवर्षणं क्वापि क्वचित् पाषाणवर्षणम्।
ज्वलदग्निरिव क्वापि सन्तप्तो वाति मारुतः॥
गभीरा अन्धकूपाश्च क्षुत्तृष्णासुखा द्विज!।
क्वापि कण्टकवृक्षाश्च नाराचसमकण्टकाः॥
पाषाणश्रेण्यः क्वापि दुरारोहाः सपन्नगाः।
क्वचिन्नाढ्यान्धकाराश्च क्वचित् शोणितकन्दराः॥
क्वचिद्वीरणवृक्षाश्च क्वचित् काशाः क्वचित्शराः।
क्वचित् क्वचित् शर्करा च लोष्टश्च क्वचित् क्वचित्॥
क्वचिदस्थ्यां राशयश्च दुर्गन्धा मांसराशयः।
क्वचित् कण्टकराशिश्च शैवालानि क्वचित् क्वचित्॥
कीलका वलयः क्वापि क्वचिद्व्याघ्रास्तथा शिवाः।
खड्गिनः करिणः क्वापि क्वचिद्वृक्षा भयङ्कराः॥
एवं बहुविधक्लेशैः क्षीयाजलविवर्जिते।
तस्मिन्मार्गे द्विजश्रेष्ठ! पापिनो यान्ति दुःखिनः॥
नग्ना विमुक्तकेशाश्च प्रेताकारभयङ्कराः।
गच्छन्ति पापिनस्तत्र शुष्ककण्ठौष्ठतालुकाः॥"

इति क्रियायोगसारे २२ अध्यायः॥

पापान्तं, क्ली, (पापं अन्तयतीति। अन्त+"कर्म्मण्यण्।" ३।२।१। इत्यण्।) तीर्थविशेषः। तस्य नामान्तरम् पृथूदकं अंशुकीर्णञ्च। यथा,—

"पृथूदकं महातीर्थं त्वंशुकीर्णेति नामतः।
जुहाव पृतराष्ट्रस्य राज्यं नरपतेस्तदा॥
वृध्यमाने तदा राज्ये प्रवृत्ते यज्ञकर्म्मणि।
अर्चयित्वा ततो राज्यं नृपतेर्दुष्कृतेन वै॥
तत्र स चिन्तयामास ब्राह्मणस्य विचेष्टितम्।
पुरोहितेन संयुक्तो रक्षान्यादाय सर्व्वशः॥
प्रसादनार्थं विप्रस्य अंशुकीर्णं ययौ तदा।
प्रसादितः स राज्ञा च तुष्टः प्रोवाच तं नृपम्॥
ब्राह्मणा नावमन्तव्याः पुरुषेण विजानता।
ब्राह्मणश्चेदवज्ञातो नयेच्चिपुरुषं कुलम्॥
एवमुक्त्वा स नृपतिमाघ्नेन पयसा पुनः।
उत्थापयामास मृतांस्तस्य राज्ञो हिते स्थितः॥
तस्मिंस्तीर्थे तु यः स्नाति श्रद्दधानो जितेन्द्रियः।
स प्राप्नोति नरो नित्यं मनसा चिन्तितं फलम्॥
तत्तु तीर्थं सुविख्यातं पापान्तं नाम नामतः।
यस्येह यज्ञशत्रुघ्नस्य मधु सुस्राव वै नदी॥
तस्मिन् स्नातोऽथ भक्त्या च मुच्यते सर्व्वपातकैः।
फलं प्राप्नोति यज्ञस्य अश्वमेधस्य मानवः॥
पापान्तमिति विख्यातं तीर्थं पुण्यतमं द्विजाः॥"

इति वामनपुराणे ३८ अध्यायः॥

पापी, [न्] पुं. (पापमस्यस्येति। इनिः।) पापयुक्तः। यथा,—

"रुधिरौघप्लुताः केचित् केचिन् कर्दमभूषिताः।
केचित् केचित् क्षुधाक्रान्ताश्च पथि गच्छन्ति पापिनः॥
क्रन्दन्तो यययां केचित् सवदूवाक्याकुलेक्षणाः।
शोचन्तः स्वानि कर्म्माणि केचिच्छन्ति पापिनः॥
कस्यचिच्चर्म्मपाशस्य बन्धनं पापिनो गले।
कङ्काले कस्यचिद्बन्धः कस्यचिच्च भुजद्वये॥
कस्यचिन्नासिकारन्ध्रे निर्द्दयैर्यमकिङ्करैः।
अङ्कुशाग्रं विनिक्षिप्य क्रोधेनाकृष्यते द्विज॥
ग्रीवे रुचिरसूत्रकीर्णे पाशं दत्त्वा दृढं रुषा।
आकृष्यते यमप्रेष्यैः केषाञ्चित् सचिवैनसाम्॥
शिलास्थान् गुरुपाषाणान् वहन्तः कर्णरन्ध्रकैः।
आयोभारांश्च शिलाग्रैर्व्रजन्ति पथि पापिनः॥
कांश्चिद्गृहीत्वा केशेषु कांश्चित् कर्णेषु पापिनः।
कांश्चिद्गुदेषु पादेषु नयन्ति यमकिङ्कराः॥
ग्रीवासु पापिनः कांश्चित् करप्रहरणैर्दृढैः।
क्षिप्रा क्षिप्रा यमप्रेष्या नयन्ति यममन्दिरम्॥
यान्यधःशिरसः केचिदूर्द्ध्वपादास्तथा परे।
गच्छन्ति वायुभिः केचिदेकपादाश्च केचन॥
इत्येवं विकृताकारा आर्त्तरावविराविणः।
यमदूतैस्ताड्यमानाः पापिनोऽपि च तत्पथि॥"

इति पाद्मे क्रियायोगसारे २२ अध्यायः॥

पाप्मा, [न्] पुं, (पा+"नामन् सीमन्निति।" उणां। ४।१५०। इति मनिन्। पुरागमे नियातनात् साधुः।) पापम्। इत्यमरः। १। ४। २३॥ (यथा, मनुः। ६। ५५।

"अनेन क्रमयोगेन परिव्रजति यो द्विजः।
स विधूयेह पाप्मानं परं ब्रह्माधिगच्छति॥")

पाम, [न्] क्ली, (पा+मनिन्।) विचर्चिका। इत्यमरः। २। ६। ५३॥ (यथा, माघवकरः।

"स्वप्ना वक्त्राः पौंड्रराः श्यावलाः
पामेल्लुप्ताः कण्डूकाः सदाहाः॥")

पामघ्नः, पुं, (पाम हन्तीति। हन्+टक्।) गन्धकः। इति जटाधरः॥

पामघ्नी, स्त्री, (पाम हन्तीति। हन्+टक्। टित्वात् ङीप्।) फटुका। इति राजनिर्घण्टः॥
पामन्, न, (पामास्यस्य इति। "लोमादि-पामादिपिच्छादिभ्यः शनेलचः।" ५।२।१००। इत्यस्य वार्त्तिकोक्त्या "पामादिभ्यो नः।" इति नः।) पामरोगविशिष्टः। तत्पर्य्यायः। कच्छुरः २। इति हेमचन्द्रः॥
पामरः, त्रि, (पाम पापादिदौरात्म्यमस्यास्येति। पामन्+"अश्मादिभ्यो रः।" ४।२।८०। इत्यस्य वार्त्तिकोक्त्या रः। ततो न लोपे साधुः।) खलः। नीचः। इति मेदिनी। रे, १८२॥ (यथा, राजतरङ्गिण्याम्। १।३७८।
"दूरात् पामरधूतस्य श्रुतिपथप्राप्तैः प्रबुद्धस्वभू-दृष्टो निर्झरवारिभिः सहमनाः स्नातुं निमज्ज-न्निव॥"
मूर्खः। इति हेमचन्द्रः॥
पामरोद्धारा, स्त्री, (पामरं उद्धरतीति। उत्+धृ+अण्। ततो अजादित्वात् टाप्।) गुडूची। इति शब्दचन्द्रिका॥
पामा, [न्] स्त्री, (पामन्+"मनः।" ४।१।११। इति न ङीप्।) कच्छूः। इत्यमरः। २।६।५३॥ पाँचड़ा इति भाषा॥ अस्या औषधं यथा,—
"हरिद्रा हरितालञ्च दूर्व्वागोमूत्रसैन्धवम्।
अयं लेपो हन्ति दद्रुं पामानं वै गरं तथा॥"
अपि च।
"माक्षिकं नवनीतञ्च सिन्दूरञ्च मरीचकम्।
पामा विलेपिता नश्येत् बहुलापि दृषध्वज!॥"
अन्यच्च।
"मरीचं त्रिवृतं कुष्ठं हरितालं मनःशिला।
देवदारु हरिद्रे द्वे कुष्ठं मांसी च चन्दनम्॥
विशाला करवीरञ्च अर्कक्षीरं सकृत् पलम्।
एषाञ्च कार्षिको भागो विषस्यार्द्धपलं भवेत्॥
प्रस्थं कटुकतैलस्य गोमूत्रेऽष्टगुणे पचेत्।
मृत्पात्रे लौहपात्रे वा मृनैर्व्वह्निना पचेत्॥
पामा विचर्चिका चैव दद्रुविस्फोटकानि च।
अभ्यङ्गेन प्रणश्यन्ति कोमलत्वञ्च जायते॥
प्रहृतान्यपि क्षितानि तैलेनानेन लेपयेत्।
चिरोत्थितमपि क्षिप्रं विवर्णं तत्क्षणाद्भवेत्॥"
इति गारुड़े १६४। १६८ अध्याययोः॥
पामारः, पुं, (पामाया अरिर्नाशकः।) गन्धकः। इति हेमचन्द्रः॥
पायसः, पुं क्ली, (श्रीवासः॥ टारपिन् इति भाषा। पयसा संस्कृतः। (पयसो विकार इत्यण्।) परमान्नम्। इत्यमरभेदिनीकरौ। अस्य पाक-प्रकारो गुणाश्च।
"अतप्ततण्डुलो धौतः परिभृष्टो घृतेन च।
सप्तयुक्तेन दुग्धेन पाचितः पायसो भवेत्॥
पायसः कफलश्लेष्मी विष्टम्भी मधुरो गुरुः॥"
तस्य पितृदेहेन गङ्गाम्भसि निःक्षेपे फलं यथा,—
"पितृदिने यो भक्त्या पायसं मधुसंयुतम्।
गुड़सर्पिस्तिलैः सार्द्धं गङ्गाम्भसि विनिःक्षिपेत्॥
तृप्ता भवन्ति पितरस्तस्य वर्षशतं ध्रुवं!।
यच्छन्ति विविधान् कामान् पतितुष्टाः पिता-महाः॥"
इति स्कान्दे काशीखण्डे २९ अध्यायः॥
चन्द्रप्रभायसो यथा,—
"भृष्टजीरचतुर्जातसचन्द्रकान्तः सरोचनः॥"
इति राजवल्लभः॥
पयोविकारे, त्रि। यथा,—
"कन्दूपक्वानि तैलेन पायसं दधि शुक्तवः।
द्विजैरेतानि भोज्यानि शूद्रगेहकृतान्यपि॥"
इति तिथितत्त्वे वराहपुराणम्॥
पायिकः, पुं, पदातिकः। इति शब्दरत्नावली॥
पायुः, पुं, (पाति रक्षति शरीरं मलनिस्सारणे-नेति। यद्वा, पिबति वस्त्यौषधमनेनेति। पा+"कृवापाजीति।" उणां १।१। इत्युण्।) "आतो युक् चिण्कृतोः।" ७।३।३३। इति युक्।) मलद्वारम्। स तु गर्भस्थस्य सप्त-भिर्मासैर्भवति। इति सुखबोधः॥ तत्पर्य्यायः। व्ययानम् २ गुदम् ३ च्युतिः ४ अधोमर्म्म ५ शुक्रद्वारम् ६ त्रिवलीकम् ७ वलिः ८। इति हेमचन्द्रः। ३।२७६॥ (यथा, पद्मपुराणे। १।२१।
"रजोऽग्नेः पञ्चभिस्तेषां क्रमात् कर्म्मेन्द्रियाणि तु।
वाक्पाणिपादपायूपस्थाभिधानानि जज्ञिरे॥")
तस्याधात्मादि यथा,—
"अवाग्गतिरपानश्च पायुरध्यात्ममुच्यते।
अधिभूतं विसर्गश्च मित्रस्तत्राधिदेवतम्॥"
इति महाभारते आश्वमेधिकपर्व्व॥
(स्वनामख्यातो भरद्वाजपुत्रः। यथा, ऋग्वेदे। ६।४७।२४। "अश्वघः पायवेऽदात्॥"
"पायवे भरद्वाजपुत्रायेतत्संज्ञायासदृभ्राय चाश्वघोऽश्ववानेतत्संज्ञः प्रस्तोकोऽदात् दत्त-वान्।" इति तद्भाष्ये सायणः॥ पालके, त्रि। यथा, ऋग्वेदे। २।१।७।
"त्वं पायुर्दमे यस्तेऽविधत्॥")
पाय्यं, क्ली, (भीयतेऽनेनेति। भा भाने+"पाय्य-सांनाय्येति।" ३।१।१२६। इति निपातनात् ण्यद्वाल्वादेः पत्वं युगागमश्च।) परिमाणम्। इत्यमरः। २।६।८५॥ पानम्। इति संक्षिप्तसारोणादिवृत्तिः॥ जलम्। निन्दनीये, त्रि। इति विश्वः॥ (पा पाने+णिच्+ण्यत्। पाययितव्ये। यथा, सुश्रुते। १।१६।
"घृतञ्च पाय्यः स नरः सुजीर्णे
स्निग्धो विरेच्यः स यथोपदेशम्॥")
पार, तृ क कर्म्मसमाप्तौ। इति कविकल्पद्रुमः॥ (अदन्त चुरां-परं-सकं-सेट्।) अपपारत्। इति दुर्गादासः॥
पारं, क्ली, (पारयतीति। पार+घञ्चाल्यच्।) परतीरम्। नदीलङ्घनाद्यन्तयतीरम्। इत्य-मरः। १।१०।८॥ (यथा, सङ्गीतदर्पणे।
"नादाब्धेस्तु परं पारं न जानाति सरस्वती।
अद्यापि मज्जनभयात् तूष्णीं वहति वक्षसि॥")

पारः, पुं, (पूर्य्यतेऽनेनेति। पॄ+घञ्।) पारदः इत्यमरटीकायां भारतसुन्दरी॥ प्रान्तभागे, क्ली। इति मेदिनी। रे, ५६॥
पारकः, त्रि, (पॄ पूर्त्तौ पालने प्रीतौ व्यायामे च+ण्वुल्।) पूर्त्तिकारकः। पालनकारकः। प्रीति-कारकः। व्यायामकारकः। एष्वर्थेषु पृधातोः कर्त्तरि णकप्रत्ययनिष्पन्नः॥
पारक्, [ज्] पुं, (पारयतीति। पार कर्म्म-समाप्तौ+णिच्+"पारेरचिः।" उणां १।१३५। इति अचिः। णिलोपः।) सुवर्णम्। इत्युणादिकोषः॥
पारक्यं, क्ली, (परस्मै लोकाय हितम्। पर+ष्यञ् कुक् च।) परलोकहितकर्म्म। यथा,—
"पादेन तस्य पारक्यं कुर्य्यात् सञ्चयमात्मवान्।
व्यर्द्धेन चात्मभरणं नित्यनैमित्तिकन्तथा॥
पादस्यार्द्धार्द्धमर्थस्य मूलभूतं विवर्द्धयेत्।
एवमाचरतः पुंसो ह्यर्थः साफल्यमृच्छति॥"
इति मार्कण्डेयपुराणम्॥
(परस्य इदमिति। परकीये, त्रि। यथा, मनुः। १०। ६७।
"वरं स्वधर्म्मो विगुणो न पारक्यः स्वनुष्ठितः।
परधर्म्मेण जीवन् हि सद्यः पतति जातितः॥")
पारगः, त्रि, (पारं गच्छतीति। पार+गम+"अन्तात्यन्ताध्वदूरपारसर्व्वानन्तेषु डः।" ३।२।४८। इति डः।) पारगामी। तत्पर्य्यायः। कर्त्तरीकः २। इति शब्दमाला॥ (यथा, महा-भारते। ४।१४।२१।
"उदतिष्ठन्मुदा क्षत्तो गाध लब्धेव पारगः॥"
तथा च तत्रैव। १।१४०।१६।
"पारगश्च धनुर्युद्धे बभूवाथ धनञ्जयः॥")
पारगतः, पुं, (शास्त्रादेः अविद्यायां वा पारं गतः।) जिनः। इति हेमचन्द्रः॥ पारगे, त्रि॥
पारजायिकः, पुं, (परजायां गच्छतीति। पर-जाया+ठक्।) पारदारिकः। (यथा, महा-भारते। १२।६०।१८।
"वाक्शूरो दण्डपरुषो यश्च स्यात् पारजायिकः।
यः परस्वमधादन्यात् त्याज्या नस्तादृशा इति॥")
पारटीटः, पुं, प्रस्तरः। इति त्रिकाण्डशेषः॥
पारणः, पुं, (पारयतीति। पार+णिच्+ल्युः।) मेघः। इति शब्दमाला॥
पारणं, क्ली, (पार+भावे ल्युट्।) उपवास-व्रतान्तरदिवसकर्त्तव्यप्राथमिकभोजनम्। विव-रणमस्य पारणाशब्दे द्रष्टव्यम्॥
पारणा, स्त्री, (पार+युच्+टाप्।) उपवासव्रता-नन्तरदिवसकर्त्तव्यप्राथमिकभोजनम्। यथा,—
"पारणं पावनं पुंसां सर्व्वपापप्रणाशनम्।
उपवासाङ्गभूतञ्च फलदं शुद्धिकारणम्॥
सर्व्वेष्वेवोपवासेषु दिवापारणमिष्यते।
अन्यथा फलहानिः स्यादते धारणपारणम्॥
न रात्रौ पारणं कुर्य्यादृते वै रोहिणीव्रतात्।
निशायां पारणं कुर्य्याद्भक्त्वा मध्यनिशाम्॥
पूर्व्वाह्णे पारणं शस्तं कृत्वा विप्र! हरार्चनम्।

सर्व्वेषां सम्मत कुर्य्याद्दते वै रोहिणीव्रतम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्माखण्डे ८ अध्यायः ॥

अथ श्रीकृष्णजन्माष्टमीव्रतपारणकालः ।

"अष्टम्यामथ रोहिण्यां न कुर्य्यात्पारणं क्वचित् ।
हन्यात् पुराकृतं कर्म्म उपवासार्जितं फलम् ॥
तिथिरष्टगुणं हन्ति नक्षत्रञ्च चतुर्गुणम् ।
तस्मात् प्रयत्नतः कुर्य्यात्तिथिभान्ते च पारणम्॥"

अत्रोभयवियोगे पारणसूक्तम् । "यदा सार्द्ध-प्रहरनिशाभ्यन्तरे एकस्यैव वियोगस्तदैकतर-वियोगेऽपि पारणम् ॥ तथा च नारदीये ।

"तिथिनक्षत्रसंयोगे उपवासो यदा भवेत् ।
पारणन्तु न कर्त्तव्यं यावन्नैकस्य संक्षयः ॥
सांयोगिके व्रते प्राप्ते यद्यप्येको वियुज्यते ।
तत्रैव पारणं कुर्य्यादेवं वेदविदो विदुः ॥
यद्येकस्यापि सार्द्धप्रहरनिशाभ्यन्तरे न वियोग-स्तदा तयोरवियोगेऽपि प्रातरुत्सवान्ते पार-णम् । तिथ्यन्ते चोत्सवान्ते वा व्रती कुर्व्वीत पारणम् । इत्युक्तत्वात् ॥ * ॥ महाष्टम्युपवास-पारणं मत्स्यमांसोपहारेण कर्त्तव्यम् । यथा,—

"अष्टम्यां सम्पोष्यैव नवम्यामपरेऽहनि ।
मत्स्यमांसोपहारेण दद्यान्नैवेद्यमुत्तमम् ॥
तेनैव विधिनान्नन्तु स्वयं भुञ्जीत नान्यथा ॥"

स्त्रियास्तु पशुमांसभक्षणनिन्द्या न तेन पारणं किन्तु मत्स्येन । अष्टम्युपवासपारणे रविवारादौ मांसनिषेधः । एवं मांसाशनत्यागकृतनियमेन नियोगादिष्वपि मांसं वर्ज्जनीयम् ॥ * ॥

अथ श्रीरामनवमीव्रतपारणकालः ।

"नवमी चाष्टमीविद्धा त्याज्या विष्णुपरायणैः ।
उपोषणं नवम्यां वै दशम्यामेव पारणम् ॥"

अथैकादशीव्रतपारणकालः ।

"मन्त्रं जपित्वा हरये निवेद्योपोषणं व्रती ।
द्वादश्यां पारणं कुर्य्याद्वर्ज्जयित्वा द्युपोदकीम् ॥"

द्वादशीलङ्घने दोषमाह नारदीयम् ।

"महाहानिकरी ह्येषा द्वादशी लङ्घिता नृणाम् ॥"

विष्णुधर्म्मोत्तरे ।

"द्वादश्याः प्रथमः पादो हरिवासरसंज्ञितः ।
तमतिक्रम्य कुर्व्वीत पारणं विष्णुतत्परः ॥"

अथ श्रवणद्वादश्युपवासपारणकालः ।

"तिथिनक्षत्रसंयोगे उपवासो यदा भवेत् ।
तावत्तेन न भोक्तव्यं यावन्नैकस्य संक्षयः ॥
विशेषेण महीपाल श्रवणं वर्द्धते यदि ।
तिथिक्षयेण भोक्तव्यं द्वादशीं नैव लङ्घयेत् ॥"

तिथिक्षयेण एकादशीक्षयेण भोक्तव्यं द्वादश्यां पारयेदित्यर्थः ॥ * ॥ अथ शिवरात्र्युपवास-पारणकालः ।

"जयन्ती शिवरात्रिश्च कार्य्ये भद्रजयान्विते ।
कृतोपवासं तिथ्यन्ते तदा कुर्य्याच्च पारणम् ॥"

तिथ्यन्ते पारयेत्तु जयन्तीमात्रपरम् । अत्र चतुर्दश्यामेव तत् ।

"ब्रह्माण्डोदरमध्ये तु यानि तीर्थानि सन्ति वै ।
पुष्कलानि भवन्तीह भूतादे पारणे कृते ॥"

पारणदिने वर्ज्यानि यथा, ब्रह्माण्डपुराणम् ।

"कांस्यं मांसं सुरां क्षौद्रं लोभं वितथभाषणम् ।
व्यायामञ्च व्यवायञ्च दिवास्वप्नं तथाञ्जनम् ॥
श्लिलापिष्टं मसूरांश्च द्वादशैतानि वैष्णवः ।
द्वादश्यां वर्ज्जयेन्नित्यं सर्व्वपापैः प्रमुच्यते ॥"

स्मृरिसन्तोषे ।

"कांस्यं मांसं मसूरञ्च चणकं कोरदूषकम् ।
शाकं मधु परान्नञ्च त्यजेदुपवसन् स्त्रियम् ॥"

अत्रोपवसन्निति तद्दिने भोजनासम्भवात् सामीप्यात् पूर्व्वापरयोर्ग्रहणम् । इति तिथ्यादि-तत्त्वम् ॥

पारतः, पुं, (विविधव्याधिसङ्कटादिभ्यः पारं तनोतीति । तन + अन्येभ्योपीति डः ।) पारदः । इति हेमचन्द्रः । १ । ११६ ॥

पारतन्त्र्यं, क्ली, (परतन्त्रस्य भावः । परतन्त्र + ष्यञ् ।) परतन्त्रता । पराधीनत्वम् । अन्यायत्तता । यथा, माघवकरः ।

"दोषाणां समवेतानां विकल्पेऽंशांशकल्पना ।
स्वातन्त्र्यपारतन्त्र्याभ्यां बाधेः प्राधान्यमादिशेत् ॥"

पारत्रिकं, त्रि, (परत्र भवम् । परत्र + ठक् ।) पारलौकिकम् । परत्र भवमित्यर्थे ष्ठिकप्रत्यय-निष्पन्नम् ॥

पारदः, पुं, (जरामरणसङ्कटादिभ्यः पारं ददा-तीति । दा + कः ।) धातुविशेषः । पारा इति भाषा । तत्पर्य्यायः । रसराजः २ रसनाथः ३ महारसः ४ रसः ५ महातेजः ६ रसेन्द्रः ७ रसोत्तमः ८ सूतराट् ९ चपलः १० नैत्यः ११ शिववीजम् १२ शिवः १३ अच्युतम् १४ रसेन्द्रः १५ लोकेशः १६ दुर्द्धरः १७ प्रभुः १८ रुद्रजः १९ हरतेजः २० रसधातुः २१ अचिन्त्यजः २२ खेचरः २३ अमरः २४ देहदः २५ मृत्युनाशकः २६ सूतः २७ स्कन्दः २८ स्कन्दांशकः २९ देवः ३० दिव्यरसः ३१ रसायनश्रेष्ठः ३२ यशोदः ३३ । इति राजनिर्घण्टः ॥ सूतकः ३४ सिद्धधातुः ३५ पारतः ३६ । इति शब्दरत्नावली ॥ हरबीजम् ३७ रजखलः ३८ । इति हेमचन्द्रः ॥ शिववीर्य्यम् ३९ शिवाब्धयः ४० । इति भावप्रकाशः ॥ अस्य गुणाः । क्रिमिकुष्ठ-नाशित्वम् । चक्षुष्यत्वम् । रसायनत्वञ्च । इति राजवल्लभः ॥ अस्य भक्षणः पूर्णवीर्य्ये मासत्रय-पर्य्यन्तं तिष्ठति । इति परिभाषा ॥ * ॥ अपि च ।

"पारदः सकलरोगनाशकः
षड्रसो निखिलयोगवाहकः ।
पञ्चभूतमय एष कीर्त्तितो
देहलोहहरसिद्धिकारकः ॥
मूर्च्छितो हरति व्याधीन् बद्धः खेचरसिद्धिदः ।
सर्व्वसिद्धिकरो लीनो निरुत्थो देहसिद्धिदः ॥
विविधव्याधिभयोदयमरणजरासङ्कटेऽपि मर्त्तेभ्यः ।
पारं ददाति यस्मात्तस्मादयं पारदः कथितः ॥"

इति राजनिर्घण्टः ॥

तस्योत्पत्तिलक्षणं यथा,—

"शिवाङ्गात् प्रच्युतं रेतः पतितं धरणीतले ।
तद्देहसारजातत्वात्तुल्यमच्छमभूच्च तत् ॥
अत्र भेदेन विज्ञेयं शिववीर्य्यं चतुर्विधम् ।
श्वेतं रक्तं तथा पीतं कृष्णं तत्तु भवेत् क्रमात् ।
ब्राह्मणः क्षत्रियो वैश्यः शूद्रश्च खलु जातितः ।
श्वेतं शुक्लं रुजां नाशे रक्तं किल रसायने ॥
धातुवादे तु तत् पीतं खे गतौ कृष्णमेव च ।
पारदः षड्रसः स्निग्धस्त्रिदोषघ्नो रसायनः ।
योगवाही महावृष्यः सदा दृष्टिबलप्रदः ॥
सर्व्वामयहरः प्रोक्तो विशेषात् सर्व्वकुष्ठनुत् ।
स्वस्थो रसो भवेद्ब्रह्मा बद्धो ज्ञेयो जनार्द्दनः ।
रञ्जितः क्रामितश्चापि साक्षाद्देवो महेश्वरः ॥
मूर्च्छित्वा हरति रुजं बन्धनमनुभूय खे गतिं कुरुते ।
अजरीकरोति हि सूतः कोऽन्यः करुणाकरः सूतात् ॥"

रसार्णवे ।

"यस्य रोगस्य यो योगस्तेनैव सह योजितः ।
रसेन्द्रो हन्ति तं रोगं नरकुञ्जरवाजिनाम् ॥"

तस्य दोषा यथा,—

"मलं विषं वह्निगिरित्वचापलं
नैसर्गिकं दोषमुशन्ति पारदे ।
उपाधिजौ द्वौ त्रिपुनागयोगजौ
दोषौ रसेन्द्रे कथितौ मुनीश्वरैः ॥
मलेन मूर्च्छा मरणं विषेण
दाहोऽग्निना कष्टतरः शरीरे ।
देहस्य जाड्यं गिरिणा सदा स्या-
च्चाञ्चल्यतो वीर्य्यहतिश्च पुंसाम् ॥
वह्निन कुष्ठं भुजगेन गण्डो
भवेदतोऽसौ परिशोधनीयः ॥

वह्निर्विषं मलश्चेति सूता दोषाश्चयो रसे ।
एते कुर्व्वन्ति सन्तापं मृतिं मूर्च्छां नृणां क्रमात् ॥
अन्येऽपि दोषाः कथिता भिषग्भिः पारदे यदि ।
तथाप्येते त्रयो दोषा हरबीया विशेषतः ॥

संस्कारहीनं खलु सूतराजं
यः सेवते तस्य करोति बाधाम् ।
देहस्य नाशं विदधाति नूनं
कष्टांश्च रोगान् जनयेन्नराणाम् ॥"

मारितस्य मूर्च्छितस्य तस्य गुणाः ।

"पारदः क्रमिकुष्ठघ्नो जयदो दृष्टिदः सरः ।
मृत्युघ्नश्च महावीर्य्यो योगवाही जराहरः ॥
स्वल्पोजोरूपदो दृष्यो दृढिकृद्धातुवर्द्धनः ।
षण्ढत्वनाशनः शूरः खेचरः सिद्धिदः परः ॥

पारदः सकलरोगहा स्मृतः
षड्रसो निखिलयोगवाहकः ।
पञ्चभूतमय एव कीर्त्तित-
स्तेन तद्गुणगणैर्विराजते ॥" * ॥

अथ रसस्य शोधनविधिः । तत्र स्वेदनम् ।

"नानाधान्यैर्वेष्टया प्राप्तेस्तुषवर्जैर्जलान्वितैः ।
स्वाङ्गाङ्गं पूरितं रन्ध्रैर्यावदन्तत्वमाप्नुयात् ॥
तन्मध्ये भृङ्गराजस्य षड्डी विष्णुक्रान्ता पुनर्नवा

मीनाक्षी चैव सर्पाक्षी मण्डूकी शतावरी ॥
त्रिफला गिरिकर्णी च हंसपादी च चित्रकः ।
मर्दनं कृत्वा तु यथालाभं विनिःक्षिपेत् ॥
पूर्वोक्तभाण्डमध्ये तु धान्याम्लकमिदं स्थितम् ।
स्वेदनादि सर्वत्र रसराजस्य योजयेत् ॥"
त्रिपुलान्ता गिरिकर्णी च अपराजितैव श्वेत-
नीलपुष्पभेदात् । अलम्बसारनालं वा तदभावे
प्रयोजयेत् । तदभावे धान्याम्लाभावे ।
"चुक्रं लवणं राजी रजनी चिञ्चलार्द्रकम् ।
मण्डूपर्णी नागवल्ली मेषशृङ्गी पुनर्नवा ॥
मेषशृङ्गी चित्रकस्य नवसारं समं समम् ।
एतत् समस्तं यस्तं वा पूर्वाम्लेनैव पेषयेत् ॥
प्रस्थमेकेन कल्केन पस्थमङ्गुलमात्रकम् ।
तत्सर्वं निःक्षिपेत् स्तं वस्त्रे तत्त्रिदिनं पचेत् ॥
दोलायन्त्रेऽम्लसंयुक्ते जायते स्वेदितो रसः ॥"
मेषशृङ्गी मेषशृङ्गाकविशेषः । मेषशृङ्गी मेढ़ा-
शृङ्गी । तदभावे कर्कटशृङ्गी ग्राह्या । नवसारं
सौभाग्यर । अन्यच ।
"लवणानलनिम्बूत्थचुक्रपञ्चाङ्गकराजिकाः ।
रसस्य षोडशांशेन द्रव्यं शुक्लात् पृथक् पृथक् ॥
द्रव्येष्वेकतमानेषु मतं मानमिदं बुधैः ।
षट्पादेषु चैतेषु स्तं प्रक्षिप्य काञ्जिके ॥
स्वेदयेद्दिनमेकञ्च दोलायन्त्रेण बुद्धिमान् ।
स्वेदान्तोग्रो भवेत् स्तो मर्दनाय सुनिर्मलः ॥"
लवणं सुरङ्ग । पञ्चलवणचूर्णम् । चुक्रवं त्रिकटु ।
राजिका राइ ॥ * ॥ अथ मर्दनम् ।
"इष्टिकाचूर्णसंयुक्तामादौ मर्द्यो रसस्ततः ।
दृषा गुडेन सिन्धूत्थराजिकायष्टधूमकैः ॥"
अन्यच ।
"कुमारिकाचित्रकरक्तसर्षपैः
स्तैः कषायैर्वृहतीविमिश्रितैः ।
फलत्रिकेणापि विमर्दितो रसो
दिनत्रयं सर्वमलैर्विमुच्यते ॥" * ॥
अथ मूर्च्छनम् ।
"चुक्रवं त्रिफलाक्षारकन्दैः क्षुद्राह्वयान्वितैः ।
चित्रकोन्मत्तनिर्गुण्डीकन्याकेकनकद्रवैः ॥
स्तं स्तेन यमेन वारान् सप्तभिर्मूर्च्छयेत् ।
रसं संमूर्च्छितः सूतस्त्यजेत् सप्तापि कल्मषान् ॥"
क्षुद्राक्षारः क्षाभ्रकारयवक्षाराः । क्षुद्राह्वयं क्षोटी-
कटैया वड़ोकटैया । ऊर्णा ऊनामेषका । निर्गु-
ण्डिका । क्षारः यवक्षारः । कन्या कुमारिका ।
स्वर्कः स्वर्कपत्ररसः । कनकः धतूरपत्ररसः ॥
अथोड्डीपातनम् ।
"मयूरशोक्तताभ्यां मर्दपिष्टीकृतस्य च ।
यन्त्रे विद्याधरे कुर्यादूर्ध्वपातनमुत्तमम् ॥
स्तः स्यादूर्ध्वपातेन सर्वदोषविवर्जितः ॥"
मयूरशोक्ता तुतिया । ताप्यः सुवर्णमाक्षी । मर्द-
पिष्टीकृतस्य कुमारिकास्वयोगेन तावन्मर्दनं
यावत् पारदः एकदा द्रवते द्रवर्थः ।
विद्याधरयन्त्रे रसरयन्त्रे ॥ * ॥
अथ पातनम् ।
"त्रिफलाचित्रिमुण्डिकाभिर्वज्रवाराहिमूलतः ।
गण्डपिष्टं रसं कृत्वा लेपयेद्धूर्णभाजनम् ॥
ततो दीप्तैरधःपातसुपलैस्तस्य कारयेत् ।
यन्त्रे भूधरसंज्ञे तु ततः स्तो विमुच्यति ॥
स्वेदनादिक्रियाभिस्तु शोधितोऽसौ यदा भवेत् ।
तदा कार्य्याणि कुरुते प्रयोक्ष्यः सर्वकर्मसु ॥"
अथ सुग्यदोषहरशोधनविधिः ।
"गृहकन्या हरति मलं त्रिफलायां चित्रको
विषं हन्ति ।
तस्मादेभिर्मन्त्रैर्वारान् संमूर्च्छयेत् सप्त ॥"* ॥
अथ सर्वदोषहरः संक्षिप्तः शोधनविधिः ।
"कुमारिकाचित्रकरक्तसर्षपैः
स्तैः कषायैर्वृहतीविमिश्रितैः ।
फलत्रिकेणापि विमर्दितो रसो
दिनत्रयं सर्वमलैर्विमुच्यते ॥
एवं कदर्थितः स्तः षण्ढो भवति निश्चितम् ।
वन्ध्यौषधीकषायेण स्वेदितः स बली भवेत् ॥
सर्पाक्षीचिञ्चिकाबन्ध्याभृङ्गाद्यैः स्वेदितो बली ।
ततः स पारकद्रावैः स्निग्धः स्यादतिदीप्तिमान् ॥"
सर्पाक्षी नागफणी । चिञ्चिका अम्बिली । वन्ध्या
वाँझखखसा । भृङ्गः भृङ्गराजः । अन्यो सुस्ता ।
पावकः चित्रकः ॥ * ॥
अथ रसस्य मारणविधिः ।
"धूमसारं रसं तोरं गन्धकं नवसादरम् ।
यामैकं मर्दयेदम्लैर्भागं कृत्वा समं समम् ॥
काचकूप्यां विनिःक्षिप्य ताप्य स्टढरुद्धमुद्रया ।
विलिप्य परितो वक्त्रं मुद्रां दत्त्वा विशोषयेत् ॥
अधःसच्छिद्रपिटरीमध्ये कूपीं निवेशयेत् ।
पिटरीं वालुकापूरैर्भृत्वा वा कूपिकागलम् ॥
निवेश्य चुल्ल्यां तदधो वह्निं कुर्याच्छनैः शनैः ।
तस्मादप्यधिकं किञ्चित् पावकं ज्वालयेत् क्रमात् ॥
एवं द्वादशभिर्यामैर्म्रियते रस उत्तमः ।
स्फोटयेत् स्वाङ्गशीतं तन्मर्दनं गन्धकं त्यजेत् ॥
अधःस्थं स्तं स्तं गृह्णीयात्तत्तु मात्रया ।
यथोचितानुपानेन सर्वकर्मसु योजयेत् ॥" * ॥
अथान्यप्रकारः ।
"अपामार्गस्य बीजानां सपायुग्मं प्रकल्पयेत् ।
तत् संपुटे क्षिपेत् स्तं मलपूदुग्धमिश्रितम् ॥"
मलपूः काठोदुम्बरिका ।
"द्रोणपुष्पीप्रकन्दानि विड्भङ्गमिरिमेदकः ।
स्तगुग्गुलमधूच्छिष्टैर्दत्त्वा मुद्रां प्रदीपयेत् ॥
तद्गोलमाधमेत् सम्यक् स्टन्मृषासंपुटे सुधीः ।
मुद्रां दत्त्वा शोषयित्वा ततो गजपुटे पचेत् ॥
एकेनैव पुटेनैव स्तकं भस्म जायते ।
तत् प्रयोज्यं यथास्थाने यथामात्रं यथाविधि ॥"
अथान्यप्रकारः ।
"काठोदुम्बरिकादुग्धे रसं किञ्चिद्विमर्दयेत् ।
तदुग्धशुष्कशिलोच्च सपायुग्मं प्रकल्पयेत् ॥
क्षिप्त्वा तन्मंपुटे स्तं तच्च मुद्रां प्रदीपयेत् ।
धृत्वा तल्लोकं प्राज्ञो स्टन्मृषासंपुटेऽधिके ॥
पचेद्गजपुटे तेन स्तकं याति भस्मताम् ॥"
अन्यः प्रकारः ।
"नागवल्लीरसैर्भृष्टः कर्कटीकन्दगर्भितः ।
स्टन्मृषासंपुटे पक्वः स्तो यात्येव भस्मताम् ॥"
इति भावप्रकाशे पूर्वखण्डे २ भागे ॥

अथ पारदशिवलिङ्गनिर्म्माणविधिः ।
"पारदे शिवनिर्म्माणे नानाविघ्नं यतः प्रिये ! ।
अतएव महेशानि ! शान्तिस्वस्ययनं चरेत् ॥
पारदं शिवबीजं हि ताडनं नहि कारयेत् ।
ताडनाद्धितनाशः स्यात्ताडनाद्धितहीनता ॥
ताडनादोगयुक्तत्वं ताडनान्मरणं भवेत् ।
द्वादशं पार्थिवं लिङ्गमुपचारैस्तु षोड़शैः ।
षट्पादिस्तत्रनिर्म्माणरचितं शुक्लमेव वा ॥
पुरुषस्य यथायोग्यं युग्मवस्त्रं निवेदयेत् ॥
भोगयोग्यं प्रदातव्यं मधुपर्कं कुलेश्वरि ! ।
अलङ्कारं यथाशक्ति दद्यात् कल्याणहेतवे ॥
पूजयेद्धुतयत्नेन विल्वपत्रैश्च पार्व्वति ! ।
तोड़लोक्तेन विधिना प्रत्येकेनायुतं जपेत् ॥
आदौ पञ्चाक्षरं मन्त्रमशेषोत्तरशतं जपेत् ।
पूजान्ते प्रजपेत् पश्चात् प्रासादाख्यं महामनुम् ॥
दक्षिणान्तं समाचर्य्य हविष्याशी जितेन्द्रियः ।
ताम्बूलञ्च तथा मत्स्यं वर्जयेन्न कदाचन ।
अस्मिंस्तन्त्रे हविष्यान्नं ताम्बूलं मीनमुत्तमम् ॥
होमयेत् परमेशानि ! दशांशं वा शतांशकम् ।
होमस्य दक्षिणा कार्य्या तदा विघ्नैर्न लिप्यते ॥
ततः परस्मिन् दिवसे पारदं आनयेत् सुधीः ।
तस्योपरि जपेन्मन्त्रं सर्ववर्त्म नवात्मकम् ॥
व्योमबीजं शिवार्गेण वर्णाद्यं विन्दुमस्तकम् ।
वायुबीजं चेन्दुयुतं त्रितयं चाग्नकं प्रिये ! ॥
इमं मन्त्रं महेशानि ! प्रजपेदौषधोपरि ॥
पारदे प्रजपेन्मन्त्रमशोत्तरशतं यदि ।
तदैवौषधयोगेन वह्नो भवति नान्यथा ॥
ततः परस्मिन् दिवसे शृणु यत् प्राग्वत्क्षमे ! ।
वरयेत् सर्वकर्त्तारं यथोक्तविभवावधि ॥
सुवर्णं चम्पकाकारं कर्णयुग्मे निवेशयेत् ।
चतुष्कोणयुतं स्वर्णं ग्रीवायां सुमनोहरम् ॥
हस्तद्वये महेशानि ! दद्यादलययुग्मकम् ।
वलयं शुक्लवर्णञ्च अङ्गुरीयं तथैव च ॥
ऊर्म्मीं दद्यात् पीतवर्णां चौमवस्त्रयुगं शिवे ! ।
एवं कृत्वा महेशानि ! शिवरूपं विचिन्तयेत् ॥
अथातः संप्रवक्ष्यामि विधानं शृणु पार्व्वति ! ।
प्रस्तरे चैव संस्थाप्य भिण्डीपत्ररसेन च ।
प्रणवेन समालोड्य कुर्य्यात् कर्दमवत् प्रिये ! ॥
निर्म्माणयोग्यं तद्द्रव्यं यदि स्यात् सुरसुन्दरि ! ।
तदा निर्म्माय तल्लिङ्गं पुनर्दृढतरं चरेत् ॥
सपुष्पसंयुते वह्नौ अङ्गारे च करीषके ।
किञ्चिदूर्ध्वं प्रकर्त्तव्यं यतो दृढतरं भवेत् ॥"
इति मालतीमेदतन्त्रे ५ पटलः ॥ ० ॥
सगररामकृततुलकेशखेचरानिविशेषः ॥
(यथा, महाभारते । २ । ५२ । १६ ।
"कैराता दरदा दर्व्वाः शूरा वैयामकास्तथा ।
द्यौदुम्बरादुर्विभागा पारदाः सह बाह्लिकैः ॥")
अस्य विवरणं पदशब्दे द्रष्टव्यम् ॥
पारदखण्डः, पुं, देशविशेषः । इति शब्दरत्ना-
वली । स तु षोड्दैर्घ्यैकभाग इति मेदिनि ॥

पारदारिकः, पुं, (परेषां अन्येषां दारान् गच्छतीति। परदार + "गच्छतौ परदारादिभ्यः।"७।३।७। इत्यस्य वार्त्तिकोक्त्या ठक्।) पारदायिकः। परदाररतः। (यथा, महाभारते। २।३१।२५।
"तत्र माहिष्मतीवासी भगवान् हव्यवाहनः।
श्रूयते हि गृहीतो वै पुरस्तात् पारदारिकः॥")
"पुण्यवाक्यजयङ्खिडमाथितं
यत्र गोतमकलत्रकामिनः।
पारदारिकविलासमाहसं
देवभर्त्तुंवदटङ्कि भित्तिषु॥"
इति च नैषधे १८ सर्गः॥
अस्य दोषा यथा,—
"यः परस्त्रीषु निरतस्तस्य श्रीर्वा कुतो यशः।
स च निन्द्यः पापयुक्तः श्वभ्रगत् सर्व्वसभासु च॥"
इति ब्रह्मवैवर्त्ते गणेशखण्डे २१ अध्यायः॥

पारदार्य्यं, क्ली, (परदारा दारा यस्य स परदारस्तस्य कर्म्मेति ष्यञ्।) परदारगमनम्। यथा,
"भृताद्ध्ययनादानं भृतकाध्यापनन्तथा।
पारदार्य्यं पारिवित्तं वार्धुष्यं लवणक्रिया॥"
इत्युपपातकगणने याज्ञवल्क्यः॥

पारदेश्यः, त्रि, प्रेषितः। पारदेशिकः। पथिकः। परदेशं गत इत्यर्थे ण्यप्रत्ययनिष्पन्नः॥ (परदेशे भव इति ष्यञ्। परदेशज्ञातः। यथा, याज्ञवल्क्ये। २। २५५।
"स्वदेशपण्ये तु शतं वणिग्गृह्णीत पञ्चकम्।
दशकं पारदेश्ये तु व्ययः सद्यः क्रयविक्रयौ॥")

पारमहंस्यं, त्रि, (परमहंसैर्गन्तव्यं परमहंसस्य भावः परमहंसेन ज्ञेयं यत् प्राप्यमिति वा। परमहंस + ष्यञ्।) परमहंससम्बन्धि। यथा,
"श्रीमद्भागवतं पुराणममलं यद्वैष्णवानां प्रियं
यस्मिन् पारमहंस्यमेकममलं ज्ञानं परं गीयते।
यत्र ज्ञानविरागभक्तिसहितं नैष्कर्म्म्यमाविष्कृतं
तच्छृण्वन् सुपठन् विचारणपरो भक्त्या विमुच्येन्नरः॥"
इति श्रीमद्भागवते। १२। १३। १८॥
"पारमहंस्यं परमहंस्यैः प्राप्यम्।" इति तट्टीकायां श्रीधरस्वामी॥ (परब्रह्मधाम। यथा, भागवते। १। १८। २२।
"यत्राद्यन्तौ सहैवेह धीरा
व्यपोह्य देहादिषु सङ्गजन्यम्।
ब्रजन्ति तत्पारमहंस्यमन्त्यं
यस्मिन्नहिंसोपशमः स्वधर्म्मः॥"
प्रत्यक्निष्ठारूपम्। यथा, तत्रैव। २। ४। १२।
"पुंसां पुनः पारमहंस्य आश्रमे॥
वसन्ति तानामनुशृण्वतां शुचे॥"
ज्ञानस्वरूपम्। यथा, तत्रैव। ४। २१। ४१।
"न वै तथा चेतनया बहिष्कृते
हुताशने पारमहंस्यपर्य्यगः॥")

पारमार्थिकः, त्रि, (परमार्थाय परमपुरुषार्थाय हित इति। ठक्।) परमार्थयुक्तः। यथा,—
"गतानुगतिको लोको न लोकः पारमार्थिकः॥"
इति पुराणम्॥

पारश्व, क्ली, (पार्श्वे भवम्। पार्श्व + अण्।) सूक्ष्मम्। यथा,—
"त्रिचतुःपञ्चसप्ताष्टनवहादश एव च।
क्रमेण घटिका श्वेतास्तत्पृथ्यं पारमार्थिकम्॥"
इति तिथ्यादितत्त्वम्॥
(यथाघः। यथा, मनौ ६। ६२ श्लोकटीकायां कुल्लूकभट्टः। "तेषां प्रकाशाप्रकाशतस्करागां स्वकर्म्मणि चौर्य्यादौ ये पारमार्थिका दोषा इति।" परस्परविभक्तः। यथा, भागवते। ३। २६। १।
"लक्षणं महदादीनां प्रकृतेः पुरुषस्य च।
स्वरूपं लक्ष्यतेऽमीषां येन तत् पारमार्थिकम्॥"
"पारमार्थिकं परस्परविभक्तमित्यर्थः।" इति तट्टीकायां श्रीधरस्वामी॥)

पारम्पर्य्यं, क्ली, (परम्परायाः आगतम्। तत आगत इत्यण्। चतुर्वर्णादित्वात् ष्यञ्। परम्परा + स्वार्थे ष्यञ् वा।) आम्नायः। कुलक्रमः। इति हेमचन्द्रः॥ तथा च।
"यस्मिन् देशे य आचारः पारम्पर्य्यक्रमागतः।
तत्र तं नावमन्येत धर्म्मस्तत्रैव तादृशः॥"
इति विवादभङ्गार्णवः॥
परम्परायाः भावश्च॥ (यथा, महाभारते। ६। ११७। २७।
"निवृत्तेषु च सैन्येषु पारम्पर्य्येण सर्व्वशः।
विसृष्टकवचाः सर्व्वे भीष्ममीयुर्नराधिपाः॥")

पारम्पर्य्योपदेशः, पुं, (पारम्पर्य्येण गुरुपरम्परया प्राप्त उपदेशः।) उपदेशपरम्परा। तत्पर्य्यायः। ऐतिह्यम् २ इतिह ३। इत्यमरः। २। ७। १२॥ परम्परैव पारम्पर्य्यं स्वार्थे ष्यञ्। पारम्पर्य्येणोपदेशः पारम्पर्य्योपदेशः तत्र इतिहशब्दोऽव्ययः। यथा। इतिह वृद्धैरुक्तं इह वटे यक्षः प्रतिवसतीति। इति एवं रूपं हन्ति गच्छति इतिह हनजनादिति डः। इतिह शब्दात् स्वार्थे ष्ण्ये ऐतिह्यम्। इति भरतः॥

पारलौकिकः, त्रि, (परलोके भवः परलोकाय हित इति वा। परलोक + ठञ्। "अनुगवादीनाञ्च।"७।३।२०। इति त्रित्वादुभयपदवृद्धेः।) परलोकसम्बन्धी। यथा,—
"दानपात्रमधमर्णमिहैक-
ग्राहि कोटिगुणितं दिवि दायि।
साधुरेति सुकृतैर्वदि कर्त्तुं
पारलौकिककुसीदमसीदत्॥"
इति नैषधे। ५। ६२॥
(तथा च महाभारते। १३। १११। १६।
"तस्मात्न्यायागतैरर्थैर्धर्म्मं सेवेत पण्डितः।
धर्म्म एको मनुष्याणां सहायः पारलौकिकः॥")

पारवतः, पुं, पारावतः। इति द्विरूपकोषः॥

पारश्वः, पुं, शूद्रायां विप्रतनयः। इत्यमरः। ३। ३। २०६॥ स तु निषादजातिः। यथा,—
"ब्राह्मणादैश्यकन्यायाममष्ठो नाम जायते।
निषादः शूद्रकन्यायां यः पारश्व उच्यते॥
शूद्रकन्यायामुग्रायां निषाद उत्पद्यते यतः

संज्ञान्तरेण पारश्ववच्चोच्यते। तस्योपनयनसंस्कारनिषेधमाह।
स पारयन्नेव श्ववत्तस्मात् पारश्वः स्मृतः॥
स जीवन्नेव शववत्तुल्यः।" इति मनुकुल्लूकभट्टौ॥
पारस्त्रीतनयः। (परस्त्रीरेव स्वार्थे अण्।) श्वभ्रम्। तत्तु लौहम्। इति मेदिनी। रे, ६०॥
पारस्त्रैणः, त्रि॥
पारस्त्रैणेयः, त्रि, (परस्त्रियां जातः।" कल्याण्यादीनामिनङ्।" ४। १। १२६। इति ढक् इनङादेशश्च। तत उभयपदवृद्धिः।) परस्त्रियाः सुतः। इत्यमरः। २। ६। २४॥

पारा, स्त्री, (पारोऽस्त्यस्या इत्यच् ततष्टाप्।) नदीविशेषः। सा तु पारिपात्रपर्व्वतोद्भवा। इति मेदिनी। रे, ५६॥ (यथा, मात्स्ये। ११३। २२।
"पारा चर्म्मखती रूपा विदुषा वेणुमत्यपि॥")

पारापतः, पुं, (पारे त्रिरिनद्यादिपरपारे पतति, पारादप्यापतति लोभादिति। पत + अच्।) पारावतः। इत्यमरटीकायां रमानाथः॥

पारापारः, पुं, (पारश्चापारश्चास्येति। "अर्थ आदिभ्योऽच्।" ५। २। १२७। इत्यच्।) पारावारः। इति द्विरूपकोषः॥

पारायणं, क्ली, साकल्यवचनम्। इत्यमरः। ३। २। २॥ "पारं समाप्तिं अयते गच्छति प्राप्नोति पारायणं नन्द्यादित्वादनः। आविष्टलिङ्गत्वाद्विभलिङ्गेन सामानाधिकरण्येऽपि क्लीवमेव पारायणम्। यथा धातुपारायणम्। रत्न-

प्रसादस्तुलसीमाला श्रोतव्यश्चाथ दीयताम् ।
स्मृदङ्गतालललितं कीर्त्तनं कीर्त्यतां ततः ॥
जयशब्दो नमःशब्दः शङ्खशब्दश्च गीयताम् ।
विप्रेभ्यो याचकेभ्यश्च वित्तमन्नञ्च दीयताम् ॥
विरक्तश्चेद्भवेत् श्रोता गीता वाच्या परेऽहनि ।
गृहस्थश्चेत्तदा होमः कर्त्तव्यः कर्म्मशान्तये ॥
प्रतिश्लोकञ्च जुहुयाद्विधिना दशमस्य च ।
पायसं दधि सर्पिश्च तिलादिमधुसंयुतम् ॥
अथवा हवनं कुर्य्याद्गायत्र्या सुसमाहितः ।
तत्त्वयत्वात् पुराणस्य परमस्यास्य तत्त्वतः ॥
होमाशक्तौ बुधो हौम्यं दद्यात्तत्फलसिद्धये ।
नानाच्छिद्रनिरोधार्थं न्यूनताधिक्यताक्षयोः ॥
दोषयोः प्रशमार्थन्तु पठेन्नामसहस्रकम् ।
तेन स्यात् सफलं सर्व्वं नास्त्यस्मादधिकं यतः ॥
द्वादश ब्राह्मणान् पश्चाद्भोजयेच्छ्रुतिपारगान् ।
दद्यात् सुवर्णं धेनुञ्च व्रतपूर्णत्वसिद्धये ॥
शक्तौ पलत्रयमितं स्वर्णसिंहं विधाय च ।
तत्रास्य पुस्तकं स्थाप्य लिखितं स्खलिताक्षरम् ॥
संपूज्यावाहनाद्यैस्तदुपचारैः सदक्षिणम् ।
वस्त्रभूषणगन्धाद्यैः पूजिताय यतात्मने ॥
आचार्य्याय सुधीर्दद्या सुरूपः स्याद्भवन्मनैः ।
एवं कृते विधाने च सर्व्वपापनिवारणे ।
फलदं स्यात् पुराणन्तु श्रीमद्भागवतं शुभम् ॥
धर्म्मार्थकाममोक्षाणां साधनं नात्रसंशयः ।
इति ते कथितं सर्व्वं किं भूयः श्रोतुमिच्छसि ॥
श्रीमद्भागवतेनैव भक्तिमुक्तिः प्रकाशिता ॥"
इति पाद्मोत्तरखण्डे श्रीभागवतमाहात्म्ये ६ अध्यायः ॥

पारायणिकः, पुं, (पारायणं वर्त्तयतीति । पारायण + "पारायणतुरायणचान्द्रायणं वर्त्तयति ।" ५ । १ । ७२ । इति ठक् ।) पाठकः । क्षात्रः । इति सिद्धान्तकौमुदी ॥

पारावकः, पुं, (पॄ पूर्त्तौ + वन् । पारं पूर्त्तिं व्रजतीति । व्रज गतौ + उकञ् ।) प्रस्तरः । इति शब्दरत्नावली ॥

पारावतः, पुं, (पारे गिरिदुर्गनद्यादिपरपारे आपततीति । पार + आ + पत + अच् । पृषोदरादित्वात् पस्य वः । उड्डीयने सुदक्षत्वादेवास्य तथात्वम् । यद्वा, परावद्दूरदेशं गच्छन्ति अन्तरीक्षादिदूरदेशे भवः उड्डीयमानः सन् स्थित इत्यर्थः । परावत् + अण् ।) पक्षिविशेषः । पायरा इति भाषा ॥ तत्पर्य्यायः । छेदकण्ठः २ कपोतः ३ रक्तलोचनः ४ । इति रभसः ॥ पारापतः ५ कलरवः ६ अरुणलोचनः ७ मदनकाङ्कुरवः ८ कामी ९ रक्तीक्षणः १० मदनमोहनवाञ्छिलाशी ११ कण्ठीरवः १२ गृहकपोतकः १३ ॥ (यथा,—
"सिंहो बली द्विरदकुञ्जरमांसभोजी
संवत्सरेण कुरुते रतिमेकवारम् ।
पारावतः खलु शिलाकणमात्रभोजी
कामी भवेदनुदिनं वद कोऽत्र हेतुः ॥"
इत्यङ्कटः ॥)

अस्य मांसगुणाः । स्निग्धत्वम् । मधुरत्वम् । गुरुत्वम् । शीतलत्वम् । पित्तासृदाहनाशित्वम् । दृढत्वम् । वीर्य्यवृद्धिदीप्तत्वम् । इति राजनिर्घण्टः ॥ रसे पाके स्वादुत्वम् । कषायत्वम् । विशदत्वञ्च । इति राजवल्लभः ॥ तद्भेदो यथा,—
"पारावतोऽन्यो वङ्गदेशी कासुको घुलघुलारवः ।
पारावताङ्घ्रिपिच्छश्च ज्ञेयो गलरवश्च सः ॥"
इति राजनिर्घण्टः ॥
मर्कटः । तिन्दुकः । इति मेदिनी । ते, २१२ ॥
गिरिः । इति हेमचन्द्रः ॥ (नागविशेषः । यथा, महाभारते । १ । ५७ । ११ ।
"पारावतः पारिजातः पाण्डरो हरिणः कृशः ।
विहङ्गः शरभो मेदः प्रमोदः संहतापनः ।
ऐरावतकुलादेते प्रविष्टा हयवाहनम् ॥"
अम्बष्ठवर्णानामन्यतमः । यथा, सुश्रुते । १ । ४२ ।
"दाड़िमामलकमातुलुङ्गास्नातककपित्थकरमर्दबदरकोलप्राचीनामलकतिन्तिड़ीककोशाम्रभव्यपारावतवेत्रफलजम्बूचाम्रवेतसदन्तशठतक्रसुराशुक्तसौवीरकतुषोदकधान्याम्लप्रभृतीनि समासेनाम्लो वर्गः ॥" * ॥ परात् शत्रोरहङ्कारात् अवति रक्षतीति । अव रक्षणे + शतृ । ततः पारावते इदमिति । तस्येदमित्यण् । इत्यात्रेयस्य गुरुः । इति चिन्तामणिः ॥)

पारावतपदी, स्त्री, (पारावतस्येव पादो मूलं यस्याः । ङीप् । पद्भावः ।) पारावताङ्घ्रिः । नयाफट्की इति भाषा ॥ इति रत्नमाला ॥ काकजङ्घा । इति राजनिर्घण्टः ॥ (यथा, सुश्रुते चिकित्सितस्थाने । ६ अध्याये ।
"पारावतपदीदन्तीवाकुचीकैरण्डयोः ।
कण्टकार्य्या च तत् पक्वं घृतं कुष्ठिषु योजयेत् ॥")

पारावताङ्घ्रिः, स्त्री, (पारावतस्य अङ्घ्रिरिव अङ्घ्रिर्मूलं यस्याः ।) ज्योतिष्मती । इत्यमरः । २ । ४ । १५० ॥

पारावताङ्घ्रिपिच्छः, पुं, (पारावताङ्घ्रिरिव पिच्छः पक्षात्प्रदेशो यस्य ।) वङ्गदेशीयपारावतः । इति राजनिर्घण्टः ॥

पारावती, स्त्री, (पारावतस्येव ध्वनिरस्त्यस्या इति । अच् । ततो ङीष् ।) गोपगीतम् । नदीभेदः । (यथा, हारीते प्रथमस्थाने ७ अध्याये ।
"तथा चर्म्मवती वेत्रवती पारावती तथा ॥")
लवलीफलम् । इति मेदिनी । ते, २१२ ॥

पारावारं, क्ली, (पारं नद्यादिपरपारं आवृणोतीति । आ + वृ + "कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् ।) तटद्वयम् । इति मेदिनी । रे, २८१ ॥

पारावारः, पुं, (पारावारं तटद्वयं पारं अवारश्च वा अस्त्यस्येति । अर्च् ।) समुद्रः । इत्यमरः । १ । १० । १ ॥ (यथा, देवीभागवते । १ । ५ । ५६ ।
"यदक्ष्णं कीलालं कलयितुमशक्तः स तु नरः
कथं पारावाराकलनचतुरः स्याद्दृढमतिः ॥")

पारावारीयः, त्रि, (पारावारं गच्छतीति । पारावार + "राष्ट्रावारपाराद्घखौ ।" ४ । २ । ६३ । इत्यत्र "अवारपारादिगृहीतादपि विपरीतादिति वक्तव्यम् ।" इति वार्त्तिकोक्त्या खः ।) पारावारे गच्छति यः । पारावारशब्दात् गोनृप्रत्ययनिष्पन्नः ॥

पाराशरं, क्ली, (पराशरेण कृतमिति । पराशर + अण् ।) पराशरोक्तभिक्षुसूत्रम् । इति पाराशरिभाष्यटीकायां भरतः ॥ (उपपुराणविशेषः । इति पुराणम् ॥ वृत्तविशेषः । यथाह चक्रदत्तः ।
"यष्टीबलागुडुच्यल्पपक्वमलीतुलां पचेत् ।
शूर्पेऽपामष्टभागस्थे तत्र पात्रे पचेद्घृतम् ॥
धात्रीविदारीक्षुरसे क्षिपात्रे पयसोर्म्मले ।
सर्पिष्टैलीवनीयेन्च पाराशरमिदं घृतम् ॥")

पाराशरः, पुं, (पराशरस्यापत्यं पुमान् । पराशर + "ऋष्यन्धकेति ।"४ । १ । ११४ । इत्यण् ।) व्यासदेवः । इति शब्दरत्नावली ॥ (पराशरकृतस्मृतिसंहिताविशेषः । यथा,—
"कृते तु मानवो धर्म्मस्त्रेतायां गौतमः स्मृतः ।
द्वापरे शङ्खलिखितः कलौ पाराशरः स्मृतः ॥"
अस्य विशेषविवरणन्तु पराशरशब्दे द्रष्टव्यम् ॥)
पराशरसम्बन्धिनि, त्रि ॥

पाराशरकल्पिकः, पुं, (पाराशरः पराशरकृतः कल्पस्तं वेत्त्यधीते वा । "विद्यालक्षणकल्पाभ्यामिति वक्तव्यम् ।" ४ । २ । ६० । इत्यस्य वार्त्तिकोक्त्या ठक् ।) पाराशरकल्पाध्यायी । पाराशरकल्पवेत्ता । इति सिद्धान्तकौमुदी ॥

पाराशरिः, पुं, (पराशरस्यापत्यम् । "अत इञ् ।" ४ । १ । ९५ । इतीञ् ।) वेदव्यासः । इति भूरिप्रयोगः ॥

पाराशरी, [न्] पुं, (पाराशर्य्येण प्रोक्तं भिक्षुमधीते इति । पाराशर्य्य + "पाराशर्य्यशिलालिभ्यां भिक्षुनटसूत्रयोः ।" ४ । ३ । ११० । इति णिनिः ।) मस्करी । चतुर्थाश्रमी । पराशरेण प्रोक्तं भिक्षुसूत्रं इत्यर्थे णे पाराशरं तद्धीतेऽस्याध्ययनायेति नैकाजादिति इन् । इत्यमरभरतौ ॥

पाराशर्य्यः, पुं, (पराशरस्यापत्यम् । पराशर + "गर्गादिभ्यो यञ् ।" ४ । १ । १०५ । इति यञ् ।) व्यासः । इति शब्दरत्नावली ॥ (यथा, देवीभागवते । १ । ४ । ३२ ।
"पाराशर्य्य ! महाभाग ! यत्त्वं पृच्छसि मामिह ॥")

पारिकाङ्क्षी, [न] पुं, (पारमत्यन्तीति । इनिः । पारि ब्रह्मज्ञानं तत् काङ्क्षतीति । काङ्क्ष + णिनिः ।) तपस्वी । इत्यमरः । २ । ७ । ४२२ ॥ मस्करी । इति हेमचन्द्रः । ३ । ४७४ ॥

पारिजातः, पुं, (पारमस्यास्तीति पारी समुद्रस्तस्मात् जातः । समुद्रमन्थनकाले तद्गर्भजातत्वात् तथात्वम् । पारिणोऽद्रेर्जातः इति कश्चित् ।) पारिभद्रवृक्षः । सुरतरुः । इति मेदिनी । ते, २११ ॥ (समुद्रमन्थनकालेऽस्योत्पत्तिकथा यथा, भागवते । ८ । ८ । ६ ।

"ततोऽभवत् पारिजातः सुरलोकविभूषणम् ।
पूरयत्यर्थिनो योऽर्थैः शब्दः भुवि यथा भवान् ॥")
अस्योत्पत्तिहरिणा यथा,—
"अदित्यानुमतानुज्ञो देवराजो जनार्दनम् ।
यथावत् पूजयामास बहुमानपुरःसरम् ॥
ततो ददर्श कृष्णोऽपि सत्यभामासहायवान् ।
देवोद्यानानि सर्वाणि नन्दनादीनि सत्तम ! ॥
ददर्श च सुगन्धाढ्यं मञ्जरीपुञ्जधारिणम् ।
शैत्याज्ञादकरं दिव्यं बालपल्लवशोभितम् ॥
मथ्यमानेऽम्बुधौ जातं जातरूपमयत्वचम् ।
पारिजातं जगन्नाथः केशवः केशिसूदनः ॥
तं दृष्ट्वा प्राह गोविन्दं सत्यभामा द्विजोत्तम ! ।
कस्मान्न द्वारकामेष नीयते कृष्ण ! पादपः ॥
इत्युक्तः स प्रहस्येनं पारिजातं गरुत्मति ।
आरोपयामास हरिस्तत्पुर्व्वनचारिणः ॥
भोः शचीं देवराजस्य महिषीं तत्परिग्रहम् ।
पारिजातं न गोविन्द ! हर्त्तुमर्हसि पादपम् ।
शचीविभूषणार्थाय देवैरुद्यतमत्यने ।
उत्पादितोऽयं न चेमौ गृहीत्वैनं गमिष्यसि ॥
अवश्यमस्य देवेन्द्रो निष्कृतिं कृष्ण ! यास्यति ।
वज्रोद्यतकरं शक्रमनुयास्यन्ति चामराः ॥
तदलं सकलैर्देवैर्विग्रहेण तवाच्युत ! ।
विपाककटु यत् कर्म्म न तच्छंसन्ति पण्डिताः ॥
इत्युक्ते तेऽवदत्तेतान् सत्यभामातिकोपिनी ।
का शचीं पारिजातस्य कोऽयं शक्रः सुराधिपः ॥
सामान्यः सर्व्वलोकानां यदीयोऽम्बुतमन्थने ।
समुत्पन्नः सुराः कस्मादेको गृह्णाति वासवः ॥
यथा सुधा यथैवेन्दुर्यथा श्रीर्वनरश्चिगः ! ।
सामान्यः सर्व्वलोकस्य पारिजातस्तथा तरुः ॥
भर्तृबाहुमहागर्व्वा रणश्लाघ्नं यथा शची ।
तत् कथ्यतामलं चान्या सत्याहारयति द्रुमम् ॥
कथ्यतां वै द्रुतं गत्वा पौलम्यां वचनं मम ।
सत्यभामा वदत्येतदिति गर्व्वोद्धताक्षरम् ॥
यदि त्वं दयिता भर्त्तुर्यदि वश्यः पतिस्तव ।
मद्गृहोपरतो वृक्षं तत् कारय निवारणम् ॥
जानामि ते पतिं शक्रं जानामि त्रिदशेश्वरम् ।
पारिजातं तथाप्येनं मानुषी हारयामि ते ॥
श्रीपराशर उवाच ।
इत्युक्ता रक्षिणो गत्वा शच्या ऊचुर्यथोदितम् ।
शची चोत्साहयामास सुतार्था त्रिदशाधिपम् ॥
ततः समस्तदेवानां सैन्यैः परिवृतो हरिः ।
प्रययौ पारिजातार्थमिन्द्रो योधयितुं द्विज ! ॥
ततः परिघनिस्त्रिंशगदाशूलवरायुधाः ।
बभूवुस्त्रिदशाः सज्जाः शक्रे वज्रकरे स्थिते ॥
ततो निरीक्ष्य गोविन्दो नागराजोपरिस्थितम् ।
शक्रं देवपरीवारं युद्धाय समुपस्थितम् ॥
चकार शङ्खनिर्घोषं दिशः शब्देन पूरयन् ।
सुमोच च शरव्रातं सहसायुतसम्मितम् ॥
छिन्नेष्वश्वेषवर्णेषु शक्रोत्सृष्टेषु सत्वरम् ।
जग्राह वासवो वज्रं कृष्णश्चक्रं सुदर्शनम् ॥
ततो हाहाकृतं सर्व्वं त्रैलोक्यं द्विजसत्तम ! ।
वज्रचक्रधरौ दृष्ट्वा देवराजजनार्दनौ ॥
क्षिप्तं वज्रमथेन्द्रेण जग्राह भगवान् हरिः ।
न सुमोच तथा चक्रं शक्र ! तिष्ठेति चाब्रवीत् ।
प्रनष्टवज्रं देवेशं गरुडोत्तवाहनम् ।
सत्यभामाब्रवीद्वीरं पलायनपरायणम् ॥
त्रैलोक्येश्वर ! गो युक्तं शचीभर्त्तुः पलायनम् ।
पारिजातसगाभोगा त्वामुपस्थास्यते शची ॥
श्रीपराशर उवाच ।
इत्युक्तो वै निवर्त्तते देवराजस्तया द्विज ! ।
प्राह चैनामलं चक्षि ! सख्युः खेदातिविस्तरैः ॥
न चापि सर्गसंहारस्थितिकर्त्ताखिलस्य यः ।
जितस्य तेन मे व्रीड़ा जायते विश्वरूपिणा ॥
यस्मिन् जगत् सकलमेतदनादिमध्ये
यस्मादृयतश्च न भविष्यति सर्व्वभूतात् ।
तेनोद्भवप्रलयपालनकारणेन
व्रीड़ा कथं भवति देवि ! निराकृतस्य ॥
संस्तुतो भगवानित्थं देवराजेन केशवः ।
प्रहस्य भावगम्भीरमुवाचेन्द्रं द्विजोत्तम ! ॥
देवराजो भवानिन्द्रो वयं मर्त्त्या जगत्पते ! ।
क्षन्तव्यं भवतैवेतदपराधं कृतं मया ॥
पारिजाततरुश्चायं नीयतामुचितास्पदम् ।
गृहीतोऽयं मया शक्र ! सत्या वचनकारणात् ॥
श्रीशक्र उवाच ।
विमोहयसि मामीश ! मर्त्योऽहमिति किं वदन् ।
जानीमस्त्वां भगवतो न तु सूक्ष्मविदो वयम् ॥
नीयतां पारिजातोऽयं कृष्ण ! द्वारवतीं पुरीम् ।
मर्त्यलोके त्वया मुक्ते नायं वै स्थास्यते भुवि ॥
तथेत्युक्त्वा च देवेन्द्रमाजगाम भुवं हरिः ।
हर्षमुत्पादयामास द्वारकावासिनां द्विज ! ॥
अवतीर्य्याथ गरुडात् सत्यभामासहायवान् ।
निष्कुटे स्थापयामास पारिजातं महातरुम् ॥
यमभ्येत्य जनः सर्व्वो जातिं स्मरति पौर्व्विकीम् ।
वास्यते यस्य पुष्पाणां गन्धेनोर्वीं त्रियोजना ॥
ततस्ते यादवाः सर्व्वे देवद्रुवन्धानमानुषान् ।
ददृशुः पादपे तस्मिन् कुर्व्वन्तो सुखदर्शनम् ॥"
इति विष्णुपुराणे पञ्चमेंऽशे पारिजाताहरणे ३० । ३१ अध्यायौ ॥ (ऐरावतकुलजातनागविशेषः । यथा, महाभारते । १ । ५७ । ११ ।
"पारावतः पारिजातः पाण्डरो हरिणः कृशः ॥"
ऋषिविशेषः । यथा तत्रैव । २ । ५ । ११ ।
"पारिजातेन राजेन्द्र ! देवर्षेण च धीमता ।
सुसुखेन च सौम्येन देवर्षिरमितद्युतिः ॥"
तन्त्रशास्त्रविशेषः । यथा, आगमतत्त्वविलासे ।
"भुवनेश्वरीं पारिजातं प्रयोगसारसुत्तमम् ॥")
पारिजातकः, पुं, पारिजोद्भेर्जातः पारिजात स्वार्थे कः । 'पारे जातो विष्णुपद्याः पारिजातेति शब्दितः ।' इत्यागमः ॥ देवतरुः । तत्पर्य्यायः । मन्दारः २ । इत्यमरः । २ । ४ । २६ ॥ पारिभद्रवृक्षः । पालितामादार इति भाषा ॥
"पारि पारं प्राप्तं जातं जन्म यस्य । 'पारिभद्रे तु मन्दारमन्दारः पारिजातकः ।' इति हलायुधः ॥" इत्यमरटीकायां भरतः ॥

पारिणाय्यं, त्रि, (परिणये विवाहकाले लब्धम् परिणय + ष्यञ् ।) परिणयलब्धं धनादिकम् । यथा,—
"मातुः पारिणाय्यं स्त्रियो विभजेरन् ॥"
इति दायभागधृतवशिष्ठवचनम् ॥
पारिणाह्यं, त्रि, (परिणाहमर्हतीति । परिणाह + ष्यञ् ।) गृहोपकरणशय्यासनकुण्डकटाहादि । यथा, मनुः । ८ । ११ ।
"अर्थस्य संग्रहे चैनां व्यये चैव नियोजयेत् ।
शौचे धर्म्मेऽन्नपक्त्यां च पारिणाह्यस्य चैश्वरीं ॥"
"पारिणाह्यस्य गृहोपकरणस्य शय्यासनकुण्डकटाहादेरैश्वरीं एनां नियोजयेत् ॥" इति तट्टीकायां कुल्लूकभट्टः ।
पारितथ्या, स्त्री, (परितस्तथाभूता परितथा । ततः स्वार्थे ष्यञ् ।) सीमन्तिकाभूषितस्वर्णादिरचितपट्टिका । सिँती इति भाषा ॥ तत्पर्य्यायः । बालपाट्या २ । इत्यमरः । २ । ६ । १०३ ॥
पारितोषिकं, त्रि, (परितोषेण लब्धं परितोषादागतं वा । परितोष + ठञ्ठिकञ् ।) आनतिकरम् । परितोषजनकद्रव्यम् । यथा,—
"ममापि चन्द्रशेखर-शरासनारोपणप्रथमवादिनः पारितोषिकं धारयसि ।" इति मुरारिः ॥
पारिन्द्रः, पुं, (पारीन्द्र + पृषोदरादित्वात् ह्रस्वः ।) सिंहः । इति हेमचन्द्रः । ४ । ३५० ॥
पारिपन्थिकः, पुं, (परिपन्थं पन्थानं वर्ज्जयित्वा याप्य वा तिष्ठति परिपन्थं हन्तीति वा । "परिपन्थञ्च तिष्ठति ।" ४ । ४ । ३६ । इति ठक् ।) चौरः । इति हेमचन्द्रः । ३ । ४५ ॥
पारिपाट्यं, क्ली, (परिपाटी + ष्यञ् ।) परिपाट्या भावः । परिपाटीशब्दात् भावे ष्यञ्प्रत्ययः ।
पारिपात्रः, पुं, पर्व्वतविशेषः । तत्पर्य्यायः । पारियात्रः २ । इति शब्दरत्नावली ॥ स तु विन्ध्यस्य पश्चिमे मालवदेशस्य सीमापर्व्वतः ॥ (अयं हि भारतस्यास्य वर्षस्य कुलपर्व्वतानामन्यतमः । यथा, मार्कण्डेये । ५७ । ११ ।
"महेन्द्रो मलयः सह्यः शुक्तिमानृक्षपर्व्वतः ।
विन्ध्यश्च पारिपात्रश्च सप्तैवात्र कुलाचलाः ॥"
अस्मादुद्भूतनदो यथा, तत्रैव । ५७ । १६—२० ।
"वेदस्मृतिर्व्वेदवती वृत्रघ्नी सिन्धुरेव च ।
वेणा सानन्दिनी चैव महानीरा महो तथा ।
पारा चर्म्मण्वती नृपो विदिशा वेत्रवत्यपि ।
शिप्रा ह्यवर्णी च तथा पारिपात्राश्रयाः
स्मृताः ॥")
पारिपात्रिकः, पुं, (पारिपात्र + स्वार्थे कन् ।) पारिपात्रपर्व्वतः । इत्यमरः । २ । ३ । ३ ॥
पारिपार्श्विकः, पुं, (परिपार्श्वं नयति इति । परिपार्श्व + "परिमुखाद्य ।" ४ । ४ । २८ । इति चकारात् ठक् ।) भृत्याः पार्श्वस्थः । इति हेमचन्द्रः ॥ त्रि, पार्श्ववर्त्ती । यथा, अमरकोषे । २ । ३ । ३१ ।
"भाटः प्रिङ्गलो दण्डधरोऽग्रणीः पारिपार्श्विकाः ॥"

पारिप्लवं, त्रि, (परि+प्लु+अच्। ततः प्रज्ञाद्यण्।) चञ्चलम्। इत्यमरः।३।१।७५॥ (यथा, रघुः। ३। ११।
"तयोपचाराञ्जलिलिखितहस्तया
ननन्द पारिप्लवनेत्रया नृपः॥")
आकुलः। इति मेदिनी। वे, ६०॥ (क्लो, तीर्थविशेषः। यथा, महाभारते। ३। ८३। १२।
"ततः पारिप्लवं गच्छेत्तीर्थं त्रैलोक्यविश्रुतम्।
अग्निष्टोमातिरात्राभ्यां फलं प्राप्नोति भारत॥"
पुं, जलपक्षी। इति रामानुजः॥ यथा, रामायणे। ४। २७। २३।
"पारिप्लवशुतैर्जुष्टा वर्हिक्रौञ्चनिनादिता।
रमणीया नदी सौम्या सुनिसङ्कनिषेविता॥"
षष्ठमन्वन्तरीयप्रकृतिविशेषः। यथा, हरिवंशे। ७। २७।
"देवाश्चाभूतरजसस्तथा प्रकृतयोऽपरे।
पारिप्लवश्च रैभ्यश्च मनोरन्तरमुच्यते॥")

पारिभद्रः, पुं, (परितो भद्रमस्मात्। परिभद्रस्तः प्रज्ञाद्यण्।) वृक्षविशेषः। पालिभादार इति भाषा॥ तत्पर्य्यायः। निम्बतरुः २ मन्दारः३ पारिजातकः ४। इत्यमरः।२।४।२६॥ रक्तकुसुमः५ क्षमिप्रः६ बहुपुष्पः७ रक्तकेसरः८। इति राजनिर्घण्टः॥ अस्य गुणः। अनिलश्लेष्मशोथमेदःकृमिनाशित्वम्। अस्य पुष्पगुणः। पित्तरोगकर्णव्याधिनाशित्वम्। इति भावप्रकाशः॥ देवदारु। इति मेदिनी॥ सरलवृक्षः। इति शब्दचन्द्रिका॥ (यज्ञबाहस्य पुत्रविशेषः। प्लक्षद्वीपस्य वर्षविशेषः। यथा, भागवते। ५। २०। ६।
"तटदीपाधिपतिः प्रियव्रतात्मजो यज्ञबाहः
सुतेभ्यस्तन्नामानि सप्त वर्षाणि व्यभजत्।
सुरोचनं सौमनस्यं रमणकं देववर्षं पारिभद्रमाप्यायनमभिज्ञातमिति॥");

पारिभद्रकः, पुं, (पारिभद्र एव। स्वार्थे कन्।) देवदारुवृक्षः। इत्यमरः॥ (यथा, महाभारते। १। १२५। ३।
"पलाशैस्तिलकैश्चूतैश्चम्पकैः पारिभद्रकैः॥")
निम्बवृक्षः। कुष्ठौषधे, क्लो। इति राजनिर्घण्टः॥

पारिभाव्यं, क्लो, (परिभवाय रोगादिनाशाय हितम्। परिभव+ष्यञ्।) कुष्ठौषधम्। इत्यमरः।२।४।१२६॥ परिभुवो भावः। जामिनी इति भाषा॥ यथा,—
"साक्षित्वं पारिभाव्यञ्च दानं ग्रहणमेव च।
विभक्ता भ्रातरः कुर्य्युर्नाविभक्ताः परस्परम्॥"
इति दायभागः॥

पारिभाषिकं, क्लो, (परिभाषात आगतम्। परिभाषा+ठञ्।) परिभाषयार्थबोधकं पदम्। यथा; तन्त्राधुनिकसङ्केतैः परिभाषा तथा यत्। अर्थबोधकं पदं पारिभाषिकम्। यथा शाब्दिकादिसङ्केतितनदीवृद्धादिपदम्। इति शक्तिवादे गदाधरः॥

पारिमाण्डल्यं, क्लो, (परिमण्डलस्य परमाणोर्भावः। परिमण्डल+ष्यञ्।) परमाणुपरिमाणम्। यथा, भाषापरिच्छेदे। १५।
"पारिमाण्डल्यभिन्नानां कारणत्वमुदाहृतम्॥"

पारिमुखिकः, त्रि, (परिमुखं वर्त्तते इति। "परिमुखञ्च।" ४। ४। २६। इति ठक्।) परिमुखेन तिष्ठति यः। सम्मुखवर्त्ती। परिमुखशब्दात् णिकप्रत्ययनिष्पन्नः॥

पारियात्रः, पुं, (परितो यात्रया दृश्यते। "शैवे।" ४।३।६२। इत्यण्।) पारियात्रपर्व्वतः। इति शब्दरत्नावली॥ (यथा, गोलाध्याये। ३। ४२।
"माहेन्द्रशुक्तिमलयर्क्षकपारियात्राः
सह्याः सविन्ध्य इह सप्तकुलाचालाख्याः॥")

पारियात्रिकः, पुं, (पारियात्र एव। स्वार्थे ठक्।) पारियात्रः। इति हेमचन्द्रः। ४। ६७॥

पारियानिकः, पुं, (परियानं प्रयोजनमस्य। परियान+ठञ्।) अध्वरथः। इति हेमचन्द्रः। ३। ४१६॥ परियातिकोऽपि पाठः॥

पारिरक्षकः, पुं, (परिरक्षति आत्मानमिति। परि+रक्ष+ण्वुल्। ततः प्रज्ञाद्यण्।) मस्करी। तापसः। इति हेमचन्द्रः। ३। ४७४॥

पारिषः, पुं, वृक्षविशेषः। पलाशपिपुल इति गजहण्ड इति च भाषा॥ तत्पर्य्यायः। फलीशः २ कपिचूतः ३ कमण्डलुः ४ गर्दभाण्डः ५ कन्दरालः ६ कपीतनः ७ सुपार्श्वकः ८। अस्य गुणाः। दुर्जरत्वम्। स्निग्धत्वम्। क्रिमिशुक्रकफप्रदत्वम्। फले अम्लत्वम्। मूले मधुरत्वम्। कषायत्वम्। स्वादुमज्जकत्वञ्च। इति भावप्रकाशः॥

पारिषदः, पुं, परिषदि तिष्ठति यः। (परिषदि साधुः। परिषदो ण्यः इत्यत्र योगविभागात् ण्यः।) सभ्यः। तत्पर्य्यायः। सभ्यः २ सभास्तारः ३ सभासत् ४ परिषद्वलः ५ पर्षद्वलः ६ पारिषद्यः ७ पार्षदः ८। इति शब्दरत्नावली॥ (यथा, महाभारते। २। १०। ३२।
"शुक्लकर्णसखाः सर्व्वे दिवाः पारिषदास्तथा॥"
परिषद इदम्। "पत्राध्वर्य्वपरिषदश्च।" ४। ३।१२३। इति अञ्।) परिषत्सम्बन्धिनि, त्रि॥

पारिषद्यः, पुं, (परिषदं समवैति। "परिषदो ण्यः।" ४। ४। ४४। इति ण्यः।) पारिषदः। इति शब्दरत्नावली॥

पारिहारिकः, त्रि, (परिहारे साधुः। परिहार+ठञ्।) परिहारकर्त्ता। परिहारं करोति यः इत्यर्थे णिकप्रत्ययनिष्पन्नः॥

पारिहार्य्यः, पुं, (परिह्रियते इति। परि+हृ+ण्यत्। ततः प्रज्ञाद्यण्।) बलयः। इत्यमरः॥ परिहारत्वे, क्लो॥

पारिहास्यं, क्लो, (परिहास+ष्यञ्।) परिहासस्य भावः। परिहासद्वारा कृतम्। यथा, श्रीभागवते। ६। अजामिलोपाख्याने। २।१७।
"साङ्केत्यं पारिहास्यं वा स्तोभं हेलनमेव वा।
वैकुण्ठनामग्रहणमशेषाघहरं विदुः॥"
"नन्वयं पुत्रनामाग्रहीत् न भगवन्नामतत्त्वाहुः। साङ्केत्यं पुत्रादौ सङ्केतितम्। पारिहास्यं परिहासेन कृतम्। स्तोभं गीतालापपूरणार्थं कृतम्। हेलनं किं विष्णुनेति सावज्ञमपि च वैकुण्ठनामोच्चारणम्।" इति तट्टीकायां श्रीधरस्वामी॥

पारी, स्त्री, (पारयत्यनयेति। पॄ पूर्त्तौ+णिच्+घञ्। ततो ङीष्।) पूरः। जलसमूहः। कर्करी। हस्तिपादरज्जुः। इति मेदिनी। रे, ५६॥ पात्री। परागः। इति विश्वः॥ (पीयतेऽत्रेति। पा+क्किप्। तन्नातीति। त्रा+कः। ङीष्।) पानपात्रम्। इति त्रिकाण्डशेषः॥ (यथा, राजतरङ्गिण्याम्। ४। ३७३।
"कर्पूरपारीपतितं मौरेयमिव हारितम्॥")
दोहनपात्रम्। इति जटाधरः॥

पारीक्षितः, पुं, परीक्षितराजः। इति शब्दरत्नावली॥ जनमेजयः। परीक्षितोऽपत्यं इत्यर्थे ण्यप्रत्ययनिष्पन्नः॥ (यथा, देवीभागवते। २। ११। १२।
"ततः सुवर्णवर्म्माद्यो राजा काञ्चीपतिः किल।
वसुष्ठमां सुभां कन्यां ददौ पारीक्षिताय च॥")

पारीण्यः, त्रि, (पारं गामीति। पार+"अवारपारत्यन्तानुकामं गामी।" ५। २। ११। इति खः।) पारगमनकर्त्ता। पारं गच्छति इत्यर्थे खीनप्रत्ययनिष्पन्नः॥ (यथा, भट्टिः। २। ४६।
"त्रिवर्गपारीणमसौ भवन्त-
मध्यासयन्नासनमेकमिन्द्रः॥")

पारीन्द्रः, पुं, (पॄ पालने+कर्म्मणि इन्। पारिः पशुस्तस्य इन्द्रः।) सिंहः। अजगरसर्पः। इति हेमचन्द्रः॥

पारीरण्यः, पुं, (पार्य्यां जलपूरे रणं यस्य।) कमठः। दण्डः। पटगाटकः। इति विश्वः॥

पारुः, पुं, (पिबति रसानिति। पा+"वाहुलकात् पिबतेश्च।" ४। १०१। इत्यत्र उज्ज्वलदत्तोक्त्या रुः।) वह्निः। सूर्य्यः। इत्युणादिकोषः॥

पारुष्यं, क्लो, (परुषस्य भावः। परुष+ष्यञ्।) अप्रियभाषणम्। तत्पर्य्यायः। अभिवादः २। इत्यमरः। १। ६। १४॥ तच्च चतुर्व्विधवाङ्मयपापान्तर्गतपापविशेषः। यथा,—
"पारुष्यमनृतञ्चैव पैशुन्यञ्चापि सर्व्वशः।
असम्बद्धप्रलापश्च वाङ्मयं स्याच्चतुर्व्विधम्॥"
इति तिथ्यादितत्त्वम्॥
परुषत्वम्। दुर्व्वाक्यम्। इति मेदिनी। ये, ६४॥ इन्द्रस्य वनम्। इति विश्वः॥ अगुरु। इति शब्दचन्द्रिका॥

पारुष्यः, पुं, (परुषस्य भावः पारुष्यं दुर्व्वाक्यं तदिव नीतिवाक्यमस्ति अस्यास्मिन् वा इत्यच्।) वृहस्पतिः। इति मेदिनी। ये, ६४।

पारेरकः, पुं, (वधादेः पारमीर्त्ते गच्छतीति। ईर+ण्वुल्।) खड्गः। इति शब्दमाला॥

पार्वटं, क्ली, (पादे घटते इति अच्। ततः पृषोदरादित्वात् साधुः।) पांसु। इति हारावली। १६२॥

पार्थः, पुं, पृथिवीपालः। (पृथायाः अपत्यं पुमान्। शिवादित्वादण्।) पृथापुत्रः। (यथा, महाभारते। ३। २३५। १।

"सरस्तदासाद्य वनञ्च पुण्यं
ततः परं किमकुर्व्वन्त पार्थाः॥"

अर्জ্জुनः। यथा, भगवद्गीतायाम्। १। २५।

"उवाच पार्थ! पश्यैतान् समवेतान् कुरूनिति॥")

अर्জ্জुनवृक्षः। इति शब्दचन्द्रिका॥

पार्थक्यं, क्ली, (पृथक्+भावे ष्यञ्।) पृथक्त्वम्। पृथक् इत्यस्य भाव इत्यर्थे ष्ण्यप्रत्ययनिष्पन्नम्॥ ("घटप्रदीपवद् व्यञ्जयञ्जकयोः पार्थक्यमेव॥" इति साहित्यदर्पणम्॥)

पार्थवं, क्ली, (पृथोर्भावः। पृथु+अण्।) पृथुता। पृथोर्भावः इति भावार्थे ष्णप्रत्ययनिष्पन्नम्॥ (पृथनामा राजा तस्येदमित्यण्। पृथुराजसम्बन्धिनि, त्रि। यथा, भागवते।१। ३। १४। "ऋषिभिर्योचितो भेजे नवमं पार्थवं वपुः॥")

पार्थिवं, क्ली, (पृथिव्या विकारः पृथिव्यां भवमिति वा अञ्।) तगरपुष्पम्। इति राजनिर्घण्टः॥

पार्थिवः, पुं, (पृथिव्या ईश्वरः।) पृथिवी+"तस्येश्वरः।" ५। १। ४२। इति अण्।) राजा। इत्यमरः॥ (यथा, मनुः। २। १३६।

"तेषान्तु समवेतानां मान्यौ स्नातकपार्थिवौ।
राजस्नातकयोश्चैव स्नातको नृपमानभाक्॥"

उत्तमरविशेषः। यथा,—

"बहुपुण्यानि जायन्ते सर्व्वदेशे सुलोचने।
सौराष्ट्रलाटदेशे च पार्थिवे नात्र संशयः॥"

इति चिन्तामणिधृतवचनम्॥

पृथिव्या अयं इत्यण्।) शूद्रावः। इति चिकाण्डशेषः॥ (पृथिव्या विकार इति। "सर्व्वभूमिपृथिवीभ्यामणञौ।" ५। १। ४२। इत्यञ्।) पृथिवीविकृतौ, त्रि। इति मेदिनी॥ (यथा, भागवते। १। २। २४।

"पार्थिवाद्दारुणो धूमस्तस्मादग्निस्त्रयीमयः॥"

पृथिव्या निमित्तं संयोग उत्पातो वा॥ पृथिवीसम्बन्धिनि, त्रि। यदुक्तम्।

"मधुमत् पार्थिवं रजः॥")

पार्थिवी, स्त्री, (पृथिव्यां भवा। "दिक्पृथिवीति।" ४। १। ८५। इत्यस्य सूत्रस्य वार्त्तिके "पृथिव्या जातौ।" इत्युक्तेरञ्। ततो ङीप्।) सीता। इति मेदिनी। वे, ३३॥

पार्परः, पुं, यमः। इति जटाधरः॥

पार्व्वणः, पुं, (पर्व्वणि श्राद्धयोग्यः इत्यण्।) श्राद्धविशेषः। इति शब्दचन्द्रिका॥ (पर्व्वणि क्रियते यत् तत्।) अमावस्यापर्व्वसामान्ययोः कर्म्मशब्दम्। यथा,—

"अमावस्यां यत् क्रियते तत् पार्व्वणमुदाहृतम्।
क्रियते पर्व्वणि वा यत्तत् पार्व्वणमुदाहृतम्॥"

इति भविष्यपुराणम्॥

पर्व्वणि यत् क्रियते इत्यनेनामावास्यायाः पर्व्वत्वात्तच्छ्राद्धस्य वैदिकप्रयोगाधीनयौगिकत्वेन पार्व्वणत्वप्राप्तौ अमावास्यायां पृथगभिधानं तदमावास्याश्राद्धस्य रूढित्वार्थं तेन पार्व्वणेन विधानेनेत्यादौ यौगिकनानाव्यवशूक्तपेक्षया एकस्याः समुदायशक्तेर्लघुत्वात् अमावास्यापार्व्वणातिदेशो लभ्यते न तु पूपाष्टकादिपार्व्वणधर्म्मातिदेशः।" इति श्राद्धतत्त्वम्॥ *॥

सामगानां तस्य प्रयोगो यथा,—

"विप्राप्राप्त्या श्राद्धकर्त्तुः सुखार्थं क्रमसूचनम्।
श्राद्धपूर्व्वदिने मांसस्त्रीत्यागश्चैकभोजनम्॥
श्राद्धाहे दन्तकाष्ठस्य त्यागः स्नानं तथौषधि।
याम्यास्यत्वं पादशौचे वास्त्वर्चा विष्णुचिन्तनम्॥
तस्मै पूजा मूल्यदानं परभूस्वामिनेऽथवा।
तत् पित्रभ्यश्चाग्रदानं रत्नादीपकुशद्विजाः॥
श्राद्धानुज्ञा च गायत्री देवताभ्य इति त्रिधा।
स्तम्बलप्रोक्षणं रत्नाजलस्थापनमेकतः॥
पूर्व्वं विप्रकरे तोयं कुशासनमनन्तरम्।
दक्षिणे देवविप्रस्य पित्रविप्रस्य वामतः॥
आवाहनार्घ्ये न्युब्जञ्च ततो गन्धादिपञ्चकम्।
ऐशानीक्रमतो रेखा अग्राग्रा देवमण्डले॥
नैर्ऋतीक्रमतो रेखा दक्षाग्रा पित्रमण्डले।
पात्राणां तेषु विन्यासो होमप्रक्षोऽग्निहोमकः॥
हुतशेषप्रदानञ्च पात्रालम्भोऽन्नवेक्षणम्।
इदमित्यङ्गुलेः क्षेपस्तूष्णीं देवे यवस्य च॥
पित्रे मन्त्रेण निःक्षेपस्तिलस्यापहता इति।
मधुनोऽन्ने च निःक्षेपो गायत्र्याश्चर्च्चपस्तृतः॥
मधुवाता ऋचा चैव मधुशब्दत्रयेण च।
अन्नाभिमन्त्रणं तस्य दानं जलनिवेदनम्॥
गायत्र्यादित्रिकजपोऽप्यन्नहीनजपस्तथा।
द्विजाभावेऽपि तत्प्रार्थ्य गायत्र्यादित्रिकस्य च॥
पुण्याख्यानस्य च जपः सतिलप्रोक्षिते कुशे।
अग्निदग्धेतिमन्त्राभ्यां सतिलान्ननिवेदनम्॥
हस्तक्षालस्याचमनं हरिस्मृतिर्जलस्य च।
पित्रादिक्रमतो दानं गायत्र्यादिजपः पुनः॥
शेषान्नपिण्डयोः प्रश्नो निहन्मीति च मण्डले।
अपहतानिहन्मिभ्यां रेखायुग्मं पित्रक्रमात्॥
आसुरी देवतास्यस्य जप आवाहनं तिलैः।
अवनेजनदानञ्च मधुवाता मधुत्रयम्॥
अन्नमौ पिण्डदानं दर्भलेपापघर्षणम्।
आचमनं स्मृतित्रिण्णोः पात्रक्षालावनेजनम्॥
अन्वेत्यादिजपो वामावर्त्तनोदङ्मुखस्थतः।
आदृत्यामीजपश्चैव श्वासः प्रत्यवनेजनम्॥
नम इत्यादिकजपो वासोदानञ्च पूजनम्।
असन्नाय जपश्चैव द्विजाग्रभूमिसेचनम्॥
देवादित्राह्मणे दानं जलादित्रितयस्य च।
शिवा इत्यादिनाव्ययमघोरा गोत्रमित्यपि॥
सपवित्रकुशाः पिण्डे स्वधावाचननर्জ্জनम्।
न्युब्जोत्थानं पितुः पक्षे दक्षिणादानमग्रतः॥
विश्वेदेवाश्च दातारो देवतेतिजपस्त्रिधा।
विसर्জ্জनं वाज इति व्यामावेति प्रदक्षिणम्॥
अन्नाद प्रतिपत्तिश्च वामदेव्यजपस्त्रिधा।
दीपप्रच्छादनं हस्तक्षालमाचमने तथा॥
अच्छिद्रवाचनं विष्णुस्मरणं शेषभोजनम्।
उपवासदिने श्राद्धं मांसेतराशितात्रते॥
तद्दिने मैथुनत्यागः श्राद्धकृच्छ्राद्धभोजिनोः॥"*॥

यजुषां विशेषो यथा,—

"आसुरो देवताभ्यश्च तिलपुण्यजलेक्षतः।
अवनेजनपिण्डौ च हस्तक्षालेपापघर्षणम्॥
हस्तक्षालश्चाचमनं विष्णोः संस्मरणाय वै।
अन्वेत्यादिजपो वामावर्त्तनोदङ्मुखस्थतः॥
आदृत्यामीजपश्चैव श्वासः प्रत्यवनेजनम्।
नीवीविसंसनञ्चैव तथैवाचमनद्वयम्॥
नमो वः पितरः सुम्नायेत्यादिकषड्ङ्गलिः।
ऋतुनत्यर्थमेवायं वासः पिण्डप्रपूजनम्॥
देवादित्राह्मणे दानं जलादित्रितयस्य च।
शिवा इत्यादिनाव्ययमघोरा गोत्रमित्यपि॥
दातारोऽन्नक्षनञ्चैव एता सत्याग्निधोऽब्रुवन्ति।
सपवित्रकुशाः पिण्डे स्वधावाचनमर्জ্জनम्॥
आघ्राणञ्चैव पिण्डानां तेषामुत्तोलनन्ततः।
न्युब्जोत्थानं पितुः पक्षे दक्षिणादानमग्रतः॥
विश्वे देवाश्च प्रीयन्तां देवे वा जलमित्यपि।
विसर्জ্জनं वाज इति व्यामावेति प्रदक्षिणम्॥
अन्यत् सर्व्वं समानम्।" इति श्राद्धप्रयोगतत्त्वम्॥

पार्व्वतः, पुं, (पर्व्वते भवः। "विभाषा मनुष्ये।" ४। २। १४४। इति पक्षे अण्।) महानिम्बः। इति रत्नमाला॥ घोड़ानिम् इति भाषा॥ (अस्त्रविशेषः। यथा, महाभारते। १। १३६। २०।

"भौमेन प्राविशद्भूमिं पार्व्वतेनाभवद्गिरिः॥")

पर्व्वतसम्बन्धिनि, त्रि॥ (यथा, महाभारते। १। ६०। १०।

"यावत् पृथिव्यां विहित गवाश्वं
सहारण्यैः पशुभिः पार्व्वतैश्च॥")

पार्व्वती, स्त्री, (पर्व्वतो हिमाचलस्तस्य तदधिष्ठातृदेवस्येति भावः अपत्यमिति। अण् ङीप् च।) दुर्गा। इत्यमरः॥ तस्या व्युत्पत्तिर्यथा,—

"तिथिभेदे कल्पभेदे पर्व्वभेदप्रभेदतः।
ख्यातौ तेषु च विख्याता पार्व्वती तेन कीर्त्तिता॥
महोत्सवविशेषेषु पर्व्वस्विति प्रकीर्त्तितम्।
तस्याधिदेवी या सा पार्व्वती परिकीर्त्तिता॥
पर्व्वतस्य सुता देवी साविर्भूता च पर्व्वते।
पर्व्वताधिष्ठातृदेवी पार्व्वती तेन कीर्त्तिता॥"

इति प्रकृतिखण्डे दुर्गोपाख्याने ५४ अध्यायः॥ शुक्लकी। गोपालपुत्रिका। इति मेदिनी॥ द्रौपदी। जीवनी। इति विश्वः॥ सौराष्ट्रमृत्तिका। इति रत्नमाला॥ क्षुद्रपाषाणभेदः। धातकी। सैंहली। इति राजनिर्घण्टः॥

पार्व्वतीनन्दनः, पुं, (पार्व्वत्या नन्दनः।) कार्त्तिकेयः। इत्यमरः। १। १। ४२॥

पार्व्वतीयकुमारः, पुं, (पार्व्वतीयः पार्व्वतीजातः कुमारः।) पार्व्वतीपुत्रः। यथा,—

"स्वानुशाखविशाखाश्च नैगमेयस्तथैव च।
पार्व्वतीयाः कुमाराश्च चत्वारः परिकीर्त्तिताः॥
इत्यग्निपुराणम्॥

पार्व्वतेयं, क्ली, (पर्व्वते भवम्। पर्व्वत+ष्ठक्।) सौवीराञ्जनम्। इति शब्दचन्द्रिका॥
पार्व्वतेयः, पुं, (पर्व्वते भवः। पर्व्वत+ष्ठक्।) सूर्य्यावर्त्तवृक्षः। इति रत्नमाला॥ सूलचिया इति भाषा। पर्व्वतजाते, त्रि॥
पार्ष्णवः, पुं, (पर्ष्णुना आयुधेन जीवतीति। पर्ष्णु+"पर्ष्वादिभ्योऽणञौ।" ५।३।११७। इति अण्।) पर्ष्णुधारियोद्धा। पर्ष्णुना युध्यते इत्यर्थे णप्रत्ययनिष्पन्नः॥
पार्श्व, क्ली, पुं, (स्पृश्यते इति। स्पृश+"स्पृशेः श्वणश्चनौ पृ च।" उणां ५।२७। इति श्वण् पृ-आदेशश्च।) कक्षाधोभागः। इत्यमरः। २।६। ७६॥ पाश इति भाषा॥ (यथा, सुश्रुते चिकित्सितस्थाने। ३६ अध्याये।
"तिर्यक् प्रणिहिते नेत्रे तथा पार्श्वावपीड़िते॥"
यथा, प्रकुन्तलायाम् १ अङ्के।
"न मे दूरे किञ्चित क्षणमपि न पार्श्वे रथ-
जवात्॥")
पार्श्व, क्ली, (स्पृश+श्वण् धातोः पृ-आदेशश्च।) चक्रोपान्तम्। (पर्ष्णीनां समूहः। अण्।) पर्ष्णुगणः। पार्श्वास्थिसमूहः। इति मेदिनी॥ (अपृञ्जरुपायः। इति सिद्धान्तकौमुदी॥)
पार्श्वः, पुं, जिनः। (अयमेव जैनागमोक्तचतुर्विंशतीर्थङ्करः। अस्य पिता विश्वसेनः माता च ब्रह्मी। यदुक्तं पार्श्वनाथचरित्रे। १०। ७१।
"श्रीलश्रीपार्श्वतीर्थेशो विश्वसेननृपालये।
ब्रह्मीगर्भे जगन्नाथोऽवतरिष्यति सुक्तये॥"
तथा च तत्रैव। ११। ३६।
"विश्वसेनपतेर्ब्रह्मा सद्गर्भेऽवतरिष्यति।
श्रीपार्श्वनाथ एवाद्यतीर्थकर्त्ता जगद्गुरुः॥"
हेमचन्द्राचार्य्यादिमते तु अस्य पितृनाम अश्वसेनः मातृनाम वामा॥*॥
अस्य जन्मकालादिर्यथा तत्रैव। ११।४५—४६, ६६—६७।
"वैशाखकृष्णपक्षस्य द्वितीयायां निशात्यये।
विशाखर्क्षे शुभलग्नादौ सुमुहूर्त्ते सुरेश्वरः॥
अवतीर्णे दिवश्च्युत्वा शुक्रो भोगान् सुनिर्म्मले।
राज्ञो गर्भे निशीथिन्यां शुद्धस्फाटिकसन्निभे॥"
"नवमे मासि संपूर्णे पौषे मासि त्रयोदशीम्।
कृष्णपक्षेनिले योगे शुभे एकादशीतिथौ॥
३ लग्नमुच्चैर्ग्रहैर्दत्तौ सुतवेऽतिसुखेन सा।
सती देवकुमारीभिः सेव्या तीर्थङ्करं सुतम्॥"
बाल्यकाले एवास्य वैराग्योत्पत्तिर्जाता। ततोऽसौ संसारासक्तिं तुच्छीकृत्य गृहादिकं विहाय वनं प्रस्थितवान्। एतत्प्रचलितमतं यथा, तत्रैव। १४। ७८—६०।
"मिथ्यात्वेनाविरत्या च प्रमादेन कषायतः।
दुष्टयोगेन मूढ़ानां महापापं प्रजायते॥
पञ्चाग्निसाधनेनैव पृथिव्यादिशरीरिणः।
म्रियते षड्विधः सर्व्वदिक्षु तत्तापसो भृशम्।
जीवघातेन घोराघं तस्य पाकेन दुर्गतिः।
जायते च महद्दुःखं तापसानां जड़ात्मनाम्॥
ज्ञानहीनो वपुःक्लेशो व्यर्थः पापाश्रवादृणाम्।
दयां विना तपो धर्म्मः सर्व्वमस्ति निरर्थकम्॥
तुषखण्डनयोगेन लभ्यन्ते तण्डुला यथा।
न तथा ज्ञानकष्टेन मोक्षमार्गादयः क्वचित्॥
यथाम्बुमथनान्नैवोत्पद्यते जातुचिद्घृतम्।
तथा हिंसाकरेणैव तपसाच्च सुखादि च॥
अचान्वाश्चाद्यथा स्वर्णं गोश्रृङ्गाच्च पयो न हि।
जायते जातु धर्म्मो वा सुखं पञ्चाग्निसाधनात्॥
दावभीत्या यथान्धो धावन्नपि म्रियते यथा।
कुर्व्वन्नपि तपो ज्ञानी मज्जत्येव भवार्णवे॥
हेयाहेयविचारश्च पुण्यपापं हिताहितम्।
देवादेवं भवं मोक्षं स्वाश्रवं संवरं शुभम्॥
निर्ज्जरा तत्त्वविज्ञानं गुरुं चक्रुर्गुरुं शुभम्।
कुज्ञानस्थं वेत्ति नज्ञानी जात्यन्ध इव दन्तिनम्॥
अतो जैनमतं तथ्यं धर्म्मंजीवदयावहम्।
तपोनाथं गृहाण त्वं त्यक्त्वेमञ्च दुराग्रहम्॥
नैयन्त्र्यतपसा मोक्षः सुखं वाचामगोचरम्।
अज्ञानं तपसा दुःखं भ्रमणञ्च भवाटवौ॥
भवत्खेदेन तथ्यंते हितञ्च धर्म्मसाधनम्।
वचः प्रोक्तं मयेति त्वां हीच्छता शुभमञ्जसा॥"
तत्प्रचलितानुप्रेक्षादिमतं तत्रैव १५ अध्याये विशेषतो द्रष्टव्यम्॥*॥
जैनशास्त्रोक्ततत्त्वादीनि यथा, तत्रैव २० अध्याये।
"शृणु तत्त्वं गणाधीश! सार्द्धं द्वादशभिर्गणैः।
तत्त्वादीनि प्रवक्ष्येऽहं स्वैकचित्तेन संप्रति॥
जीवादिसत्पदार्थानां याथार्थ्यं तत्त्वमिष्यते।
सम्यग् जैनागमे तत्त्वं विद्धि नान्यत् कुशासने॥
जीवाजीवाश्रवबन्धः संवरो निर्ज्जरा शिवः।
इत्युक्तानि जिनाधीशैः सप्त तत्त्वानि चागमे॥
संसारिमुक्तभेदेन द्विधा जीवा ध्रुवन्त्वहो।
मुक्ता भेदविनिष्क्रान्ता अनन्तगुणभाजनाः॥
भव्याभव्यप्रभेदेन द्विधा संसारिणोऽङ्गिनः।
त्रसस्थावरभेदेन वा मुक्तिभवे गामिनः॥
एकाक्षा विकलाक्षाः पञ्चाक्षास्त्रेधेति ते मताः।
देवनारकतिर्य्यग्नृभेदा इति चतुर्व्विधाः॥
एकद्वित्रिचतुःपञ्चेन्द्रियभेदोऽपञ्चधा।
पृथ्वप्तेजोमरुद्वृक्षत्रसभेदात् षड़ङ्गिनः॥
संज्ञिनोऽसंज्ञिनोद्यक्षाक्षाश्च हि चतुरिन्द्रियाः।
एकाक्षा बादराः सूक्ष्माः सप्तधैत्यङ्गिराशयः॥
पर्य्याप्तेतरभेदेन ताः सप्त जीवयोनयः।
गुणिता अखिला जीवसमासाः स्युश्चतुर्दश॥
अष्टधा धातवो बादरसूक्ष्मेण चतुर्व्विधा।
नित्येतरनिकोता हि विकलत्रयदेहिनः॥
संज्ञिनोऽसंज्ञिनः सुप्रतिष्ठिताः अप्रतिष्ठिताः।
इति संसारिणो जीवभेदा एकोनविंशतिः॥
ते पर्य्याप्तेतरालब्धिपर्य्याप्तैर्वर्गिता भुवि।
सर्व्वे जीवसमासाः सप्तपञ्चाशदुत्तमा मताः॥
स्थावराश्च द्विचत्वारिंशद्भेदाः सुरनारकाः।
द्विधापञ्चाशत्तिर्य्यञ्चश्चतुस्त्रिंशदुत्तमाः स्मृताः॥
नवधा मानवाश्चैव नवधा विकलाङ्गिनः।
इति जीवसमासाः स्युरष्टानवतिसंख्यकाः॥
पृथ्वप्तेजःसमीरा अष्टधा बादरसूक्ष्मता।
नित्येतरनिकोताश्चतुर्द्धा बादरसूक्ष्मतः॥
निकोतसहितास्त्रद्रहिताः प्रत्येककायिनः।
एकत्र मेलिता एते सर्व्वे भेदाश्चतुर्दश॥
एकाक्षा गुणितास्ते द्विचत्वारिंशदुत्तमाः स्फुटम्।
पर्य्याप्तकेतरालब्धिपर्य्याप्तैः स्युर्ज्जिनागमे॥
द्विप्रकाराः सुराः स्युः पर्य्याप्तापर्य्याप्तभेदतः।
तथा च नारको ज्ञेयो द्विधा दुःखाब्धिमध्यगः॥
जलस्थलनभश्चारिणं संज्ञासंज्ञिभेदतः।
षड़्विधा गर्भजा जीवाः पञ्चेन्द्रियसमाह्वयाः॥
भोगभूमिभवा जीवा द्विधा स्थलखगामिनः।
ते सर्व्वे मेलिता अष्टभेदाश्च गुणिताः पुनः॥
पर्य्याप्तेतरभेदाभ्यां षोड़शैव भवन्त्यपि।
संज्ञ्यसंज्ञित्वभेदाभ्यां जलस्थलखचारिणः॥
षड़्वासन्मूर्च्छितास्ते पर्य्याप्तियुक्तास्तथेतराः।
भवन्त्यलब्धिपर्य्याप्तकाः प्रत्येकं किलाङ्गिनः॥
कृता एकत्र ते सर्व्वे भेदा अष्टादशप्रमाः।
गर्भसन्मूर्च्छिताः सर्व्वे सुश्चतुस्त्रिंशदङ्गिनः॥
आर्य्यम्लेच्छभवा भोगकुभोगभूमिजा नराः।
अष्टभेदा मता वै पर्य्याप्तापर्य्याप्तभेदतः॥
सन्मूर्च्छिनो मनुष्या अलब्धिपर्य्याप्तसंज्ञकाः।
इति विश्वे भवन्त्यत्र नव भेदा नृयोनिजाः॥
पर्य्याप्तादित्रिभेदेन गुणिता विकलाङ्गिनः।
नवधा श्रीजिनैः प्रोक्ता ज्ञाननेत्रैरवारगमे॥
अष्टानवतिरेते जीवसमासा विचक्षणैः।
विज्ञेया यत्नतस्तेषां दया कार्य्या सुसुज्ञुभिः॥
भूरोदकाग्निवाताख्या नित्येतरनिकोतकाः।
सप्तसप्तपृथग्लक्षाश्च वनस्पतयो दश॥
द्वित्रितुर्य्येन्द्रिया द्वौ द्वौ लक्षौ देवाश्च नारकाः।
पशवो हि चतुर्लक्षाश्चतुर्दशनृजातयः॥
चतुरशीतिलक्षा इमा जीवजातयोऽखिलाः।
रक्षणीया प्रयत्नेन ज्ञात्वा दक्षैः स्वमुक्तये॥
कोटीकोटेकानवनवतिलक्षाश्च कोटयः।
सत्पञ्चाशत्सहस्रा इत्यखिलाङ्गिकुलान्यपि॥
जीवितः प्रागनादौ हि जीविष्यति पुनः सदा।
जीवत्वयं ततस्तज्ज्ञो जीवद्रव्यं किलोच्यते॥
अक्षजाः पञ्च च प्राणा मनोवाक्कायतस्त्रयः।
आयुरुच्छ्वासनिश्वासौ दशेति संज्ञिनां मताः॥
असंज्ञिनां नवस्युस्ते विनाक्ष मनसाखिलाः।
चतुरेन्द्रियजीवानां त्वष्टौ कर्णैर्विना स्मृताः॥
त्रीन्द्रियाणां विना चक्षुः सप्त प्राणाः प्रकीर्त्तिताः।
द्वीन्द्रियाणां हि षट्प्राणाः कथिता नासिकां विना॥
सुखवाग्भ्यां विनैकाक्षाणां प्राणाः स्युश्चतुःप्रमाः।
यथायोग्यमपर्य्याप्तानां ज्ञेयास्ते जिनागमे॥
आहारेन्द्रियोच्छ्वासनिश्वासवाक्चेतसः।
षड्वा पर्य्याप्तयश्चेति विज्ञेया संज्ञिदेहिनाम्॥
विकला संज्ञिनां पञ्चपर्य्याप्तयो मनो विना।
चतुःपर्य्याप्तयो ज्ञेया एकाक्षाणां वचो विना॥
निश्चयेन भवेत् केवलज्ञानदृग्मयोऽसुमान्।

अनन्तसुखवीर्याद्यैरसिद्धसादृश्य एव हि ॥
व्यवहारेण मिथ्यादिविभावगुणसंयुतः ।
नेत्रादिदर्शनैर्युक्तः प्राणी कर्मकृतैः कलौ ॥
मूर्तपुद्गलसंयोगान्मूर्त्तो गौर्यवहारतः ।
अमूर्त्तो निष्कलः शुद्धो ज्ञानमूर्त्तिश्च निश्चयात् ॥
व्यवहारे नयेनाङ्गमुपचारान्त्यथात्मना ।
कर्मणो कर्मणां कर्त्ता भोक्ता तत्फलमञ्जसा ॥
उपचारान्त्यनात्मा नयेन प्राणभृद्भुवि ।
कटवस्त्रगृहादीनां कर्त्ता च शिल्पिकर्मणाम् ॥
अशुद्धनिश्चयेनाङ्गी कर्त्ता च भावकर्मणाम् ।
रागद्वेषमदोन्मादशोकादिविषयात्मनाम् ॥
प्राग्पुण्यजनान्मृत्युः प्रादुर्भावाद्यसम्भवः ।
द्रव्यरूपेण नित्यत्वं चतुर्गतिषु देहिनाम् ॥
जायतेऽतो गणाधीशैरुत्पादव्यय एव च ।
ध्रौव्यभावोऽत्र संप्रोक्तः सर्वेषां व्यवहारतः ॥
कायप्रमाण आत्मायं पर्यायनयतः क्वचित् ।
युक्तः प्रदेशसंहारविसर्पाभ्यां प्रदीपवत् ॥
विना सप्तसमुद्घातैर्निश्चयेन भवेत् पुनः ।
कर्मोत्पन्नाङ्गहीनाङ्गी ह्यसंख्यातप्रदेशमः ॥
वेदनाख्यः कषायाख्यो विक्रियाख्यसमाह्वयः ।
मारणान्तिकसंज्ञस्तैजसाहारकसंज्ञकौ ॥
केवलाख्यः समुद्घाताः सप्तेति श्रीजिनैर्मताः ।
कैवल्यतैजसाहारायोगिनां स्युः परेऽङ्गिनाम् ॥
पुण्यपापफलानां हि विविधानां चतुर्गतौ ॥
धर्माधर्मकराणां प्राणी भोक्ता व्यवहारतः ॥
स्वस्वरूपस्य कर्त्ता शुद्धनिश्चयनयादसौ ।
जन्ममृत्युजरातीतो न कर्त्ता बन्धमोक्षयोः ॥
अतोऽत्रात्माश्रयो ध्येयो निर्विकल्पपदाश्रितैः ।
गुणैः सिद्धेन सादृश्यो ज्ञानमूर्त्तिरमूर्त्तिमान् ॥
यथाग्निकणिकेनात्र दह्यन्ते काष्ठराशयः ।
अनन्तकर्मकाष्ठानि तथाध्यानलवह्निना ॥
दन्तभग्नो यथा नागो दंष्ट्राभग्नोक्षमो हरिः ।
स्वकार्ये च तथा ध्यानहीनः कर्मारिघातने ॥
चिन्तामणिश्च रत्नानां कल्पवृक्षोऽत्र शाखिनाम् ।
त्रिदशानां यथा शक्रो नृणां मध्ये परो जिनः ॥
आत्मतत्त्वश्च तत्त्वानां पदार्थानां तथा महान् ।
स्वकीयात्मपदार्थो द्रव्याणां स्वद्रव्य एव हि ॥
इति मत्वा स्वसंसिद्ध्यै मनः कृत्वातिनिश्चलम् ।
विषयेभ्यो विनिष्क्रान्तं संवेगादिगुणाङ्कितम् ॥
सर्वद्रव्यबहिर्भूतोऽप्यनन्तगुणसागरः ।
सर्वावस्थासु सर्वत्र स्वात्मा ध्येयो मुमुक्षुभिः ॥
इत्यात्मतत्त्वमाख्याय तीर्थनाथो गणान् प्रति ।
मार्गणादिकमाख्यातुं प्रारेभे मार्गसिद्धये ॥
गतिरिन्द्रियकायौ हि योगवेदकषायकः ।
ज्ञानसंयमदर्शनलेश्याभव्यसम्यक्त्वसंज्ञिनः ॥
आहारे मार्गणश्चेति चतुर्दश निरूपिताः ।
जिनैस्तासु बुधैर्मृग्यो जीवतत्त्वो महांश्चिदे ॥
मिथ्यात्वासादनो मिश्रो विरताव्रतुर्थकः ।
देशविरताख्यः प्रमत्तोऽप्रमत्तसंज्ञकः ॥
अपूर्वकरणो नाम्ना निवृत्तिकरणाभिधः ।
सूक्ष्मसाम्परायोपशान्तक्षीणकषायकाः ॥
सयोग्ययोगिनामानौ सद्गुणाश्रयणादिमे ।
चतुर्दश जिनैः प्रोक्ता गुणस्थानगुणाकराः ॥
सूक्तैः सोपानमाला इते भव्यानां जिनोदिताः ।
अभव्यानां किलैको मिथ्यागुणस्थानश्चयतः ॥
हीनाधिकगुणैर्युक्ता अन्येष्वास्तेषु धीयुतैः ।
गुणानां स्थानकेष्वङ्गिन् परीक्ष्य गुणव्रजैः ॥
इत्यादिवाक्सुधापूरैराप्ताश निखिलां सभाम् ।
अजीवतत्त्वमाख्यातुं पुनरारब्धवान् प्रभुः ॥
पुद्गलो बहुधा धर्माधर्मौ व्याकाश एव हि ।
कालश्चेति जिनैः प्रोक्तो जीवद्रव्यैश्च षड्धा ॥
पूरणाद्गलनाद्यैः पुद्गलोऽयं निरूपितः ।
मूर्त्तोऽनेकविधः सार्थनामकः कर्मदेहकृत् ॥
अष्टौ स्पर्शा रसाः पञ्च वर्णाः पञ्च गन्धौ द्विधा ।
इति विंशतिरस्यैव गुणाः प्रोक्ता द्विधात्मकाः ॥
शुद्धागौर्ये गुणाः शुद्धा मताः स्वाभाविकाश्च ते ।
गुणाः स्कन्धेषु ये शुद्धा विभवाख्या हि ते बुधैः ॥
अणुस्कन्धविभेदेन पुद्गलस्य द्विधा स्थितिः ।
स्निग्धरूक्षमयाणूनां सङ्घातः स्कन्ध उच्यते ॥
अणवः कार्यलिङ्गाः स्युरन्त्यैकैकतयाखिलाः ।
नित्या द्रव्यार्थिकेनानित्याः पर्यार्थिकेन च ॥
सूक्ष्मसूक्ष्मास्तथा सूक्ष्माः सूक्ष्मस्थूलाभिधाः परे ।
स्थूलसूक्ष्मात्मकाः स्थूलाः स्थूलस्थूलाश्च पुद्गलाः ॥
एकोऽणुः सूक्ष्मसूक्ष्मः स्यादृश्यो नयनैर्नृणाम् ।
सूक्ष्मास्तेऽपि मताः सङ्ख्यैः कर्ममयपुद्गलाः ॥
रसनस्पर्शनघ्राणश्रोत्रैर्ये यान्ति पुद्गलाः ।
यक्तान्ते समुद्दिष्टाः सूक्ष्मस्थूला जिनागमे ॥
स्थूलसूक्ष्मा जिनैर्ज्ञेयाश्छायाद्योतसातपादयः ।
जलज्वालादयः स्थूला उच्यन्ते पुद्गला बुधैः ॥
भूकायाद्विमानाद्याः स्थूलस्थूलपुद्गलाः ।
षड्भेदा इति तीर्थेशैः पुद्गला हि निरूपिताः ॥
शब्दो बन्धस्तथा सूक्ष्मः स्थूलः संस्थानसंज्ञकः ।
भेदस्तमस्तथाच्छायाद्युद्योतश्चातपादयः ॥
एते पुद्गलपर्यायाः विभावाख्या मता जिनैः ।
स्वाभाविकाश्च पर्यायाः अणुरूपाः पृथक्
पृथक् ॥
शरीरवाङ्मनःप्राणापानदुःखसुखादिकान् ।
कुर्वन्ति पुद्गला जीवानां नृत्यजीवितादिकान् ॥
जीवपुद्गलयोः साद्यकर्त्तारौ जिनैर्मतौ गतौ ।
अमूर्त्तो निष्क्रियो धर्मो मत्स्यानाञ्च यथा जलम् ।
सहकारी मतो धर्मः स्थितौ पुद्गलजीवयोः ।
अमूर्त्तो निष्क्रियो नित्यो यथा छायाध्वगामिनाम् ॥
लोकालोकविभेदेन द्विधाकाशस्त्रिमूर्त्तिमान् ।
अवकाशप्रदः सर्वद्रव्याणां निष्क्रियोऽव्ययः ॥
पदार्था यत्र लोक्यन्ते लोकाकाशो मतो हि सः ।
तस्माद्बहिरनन्तोऽप्यलोकाकाशोऽस्ति केवलः ॥
धर्माधर्मैकजीवानां लोकाकाशस्य सन्ति च ।
असंख्याताः प्रदेशा हि पुद्गलानामनेकधा ॥
निश्चयव्यवहारेण द्विधा कालोऽतिनिष्क्रियः ।
द्रव्याणां सहकारी परिणतौ मूर्त्तिवर्जितः ॥
समयादिमयः कालो व्यवहारोऽत्र लक्ष्यते ।
गोदोहादिक्रियाद्यैः परत्वापरत्वयोगतः ॥
भिन्नाभिन्नाश्रयो येऽत्र लोकाकाशे समंस्थिताः ।
राशयश्चैव रत्नानां स कालो निश्चयाभिधः ॥
एकत्र सह जीवेन षड्द्रव्या मुनिभिः स्मृताः ।
ते कालेन विना ज्ञेयाः पञ्चास्तिकायसंज्ञकाः ।
पुद्गलौघो य आयाति कर्मरूपोऽत्र योगिनः ।
द्रव्यभावविभेदेन द्विधा स आश्रवो भवेत् ॥
रागद्वेषादियुक्तेन परिणामेन येन हि ।
आश्रवन्त्यत्र कर्माणि स स्याद्भावाश्रवोऽङ्गिनाम् ।
मिथ्यात्वपञ्चकं द्वादशधा विरतयोऽशुभाः ।
प्रमादा हि चयश्चैव योगाः पञ्चदशात्मकाः ॥
सर्वदुःखाकरीभूताः कषायाः पञ्चविंशतिः ।
एतेऽत्र प्रत्यया ज्ञेया भावाश्रवनिबन्धनाः ॥
आयाति कर्मरूपेण पुद्गलौघोऽत्र योगिनः ।
द्रव्याश्रवः स विज्ञेयोऽप्यनन्तभवकारकः ॥
ध्यानाद्यैराश्रवो रुद्धो यैस्ते स्युर्मुक्तिवल्लभाः ।
अन्यथा विफलक्लेशस्तपोदत्तादितः सताम् ॥
संश्लेषो जीवकर्मणोर्यः सम्बन्धो द्विधा मतः ।
भावद्रव्यप्रभेदेन विश्वाशर्माकरोऽशुभः ॥
बध्यन्ते येन भावेन रागादिदूषितेन हि ।
कर्माणि भाववन्धोऽत्र सोऽनन्तसंसृतिप्रदः ॥
प्रकृतिस्थितिबन्धानुभागप्रदेशतोऽङ्गिनाम् ।
चतुर्धा बन्ध आम्नातोऽनेकविक्रियाकरः ॥
प्रकृतिः स्वभावः स्याच्च स्थितिः कालावधारणम् ॥
रसतुल्योऽनुभागः प्रदेशो जीवप्रदेशयुक् ॥
सप्रकृतिप्रदेशाख्यौ बन्धौ च योगतो सताम् ।
स्थित्यनुभागबन्धौ कषायैर्भवनिबन्धनौ ॥
यथा बन्धनबद्धोऽङ्गी लभते दुःखमनेकधा ।
कर्मश्रृङ्खलबद्धोऽङ्गी तथा भ्रमति दुर्गतौ ॥
सर्वाश्रवनिरोधो यो ध्यानाद्यैर्द्रव्यभावतः ।
स द्विधा संवरः प्रोक्तः स्वर्गमुक्त्यादिकारकः ॥
चैतन्यपरिणामो य एकीभूतो निजात्मकः ।
निर्विकल्पमयो ज्ञेयो भावसंवर एव सः ।
त्रयोदशविधं वृत्तं परो धर्मो दशात्मकः ।
द्विषड्भेदा अनुप्रेक्षाः परीषहजयोखिलः ॥
पञ्चधा संयमो ध्यानश्रुताख्यसंयमादयः ।
भवन्त्यमी सतां सर्वे भावसंवरकारणम् ।
निरोधः क्रियते योऽत्र कर्मणां यत्नतो बुधैः ।
सद्रव्यसंवरः प्रोक्तोऽप्यनन्तगुणसागरः ॥
संवरेण स्वयं ज्ञेयं दृश्यं चालिङ्गं सुखं ।
सतां स्वर्मोक्ष सुक्तिश्रीर्नान्यथा क्लेशकोटिभिः ॥
प्राक्तनः कर्मबन्धो यः कालेन तपसाथवा ।
क्षीयते निर्जरासाधविपाकेन सता द्विधा ॥
कर्मपाकेन या जाता सविपाकाखिलात्मगुप्तः ।
सायभाजनिता हेया परकर्मनिबन्धना ॥
संवरेण समायात्र निर्जरा क्रियते बुधैः ।
तपोभिः साविपाका प्रादेयानेकसुखाकरा ॥
निर्जराकर्मणामत्र जायतेऽपि यथा यथा ।
आयाति निकटं मुक्तिस्तत्कारिणां तथा तथा ॥
आत्मनं योऽत्र विश्लेषः कर्मात्मनो स्वयोगिनाम् ।
काललब्ध्या स मोक्षः स्याद् द्रव्यभावद्विधात्मकः ॥
क्षये हेतुर्वरो यः परिणामोऽखिलकर्मणाम् ।

भावमोचः स विज्ञेयः कर्ममोचनहेतुकृत् ॥
ममस्तकर्म्मदेहाद्यदेवात्मा जायते पृथक् ।
तदैव द्रव्यमोचः स्यादनन्तगुणदायकः ॥
आपादमस्तकान्तं यथा वह्नौ वन्धनेर्द्रढ़ैः ।
मोचनाल्लभते सौख्यं तथा मुक्तो विधेः क्षयात् ॥
तस्मात् कर्म्मातिगो जीव एरण्डादिकबीजवत् ।
समयेन व्रजेदूर्द्धं यावल्लोकाग्रमस्तकम् ॥
तत्रैवास्यानिरावाधः सोऽयं गमनवर्जितः ।
सिद्धो धर्म्मोऽस्ति कायाभावादनन्तसुखाश्रिगः ॥
तत्र भुक्ते निरावाधं स्वात्मजं विषयातिगम् ।
वृद्धिह्रासक्षयैर्यत्तं स सिद्धः सुखी महान् सुखम् ॥
दुःखातीतं निरौपम्यं शाश्वतं सुखसम्भवम् ।
अनन्तं परमं ज्ञानदृग्ज्ञानप्रेक्षमेव हि ॥
यद्देवमनुजैः सर्व्वैः सुखं त्रैलोक्यगोचरम् ।
भुक्तं तस्मादनन्तं तत्क्षायते परमेष्ठिनाम् ॥
एकेन समयेनैव भूषितानां गुणाष्टकैः ।
नित्यानामशरीराणां सर्व्वोत्कृष्टं क्षयच्युतम् ॥
इति विविधविभागैः सम्प्रतत्त्वानि सूक्ष्मै-
रुपगमसुबीजानि प्रज्ञया त्मवान् यः ।
परमुदमपि भव्यानाष्टकार स्वबीजै-
रुत्तपरमतुल्यैर्मैत्र दद्यात् स्वशक्तिम् ॥
पार्श्वः सर्व्वसुखाकरोऽसुखहरः पार्श्वं श्रिता धर्म्मिणः
पार्श्वेणाशु समाप्यतेऽमरपदं पार्श्वाय मूर्द्धा नमः ।
पार्श्वान्नास्ति हितङ्करो भवभृतां पार्श्वस्य मुक्तिः प्रिया
पार्श्वे चित्तमहं दधेऽखिलविदे मां पार्श्व ! पार्श्वं नय ॥"
इति श्रीपार्श्वनाथचरित्रे २० सर्गः ॥*॥)
सन्निकृष्टे, त्रि । इति हेमचन्द्रः ॥

पार्श्वकः, त्रि, (अन्यदुरुपायः पार्श्वं तेन अन्विच्छति अर्थानिति । "पार्श्वेनान्विच्छति ।" ५ । २ । ७५ । इति कन् ।) आलोक विभवान्वेषी । यथा,—
"कृत्वा विभवान्वेषी पार्श्वकः सन्धिजीवकः ॥"
इति हेमचन्द्रः ॥
न्वर्थे के पार्श्वार्थोऽपि । (यथा, याज्ञवल्क्ये । ३ । ८९ ।
"तन्मूले दे ललाटाक्षिगण्डे नासाधनास्थिका ।
पार्श्वकास्याककेः सार्द्धमङ्गुदेश द्विचत्रिंतिः ॥")

पार्श्वतः, [स्] य, (पार्श्व + "स्याद्यादिभ्य उपसंख्यानम् ।" ५ । ३ । ४४ । इत्यस्य वार्त्तिकोक्त्या तसिः ।) पार्श्वात् । पार्श्वे । इत्यादि । इति संक्षिप्तसारव्याकरणम् ॥ (यथा, रघुः । १६ । ३१ ।
"मिचदात्यमपहिय पार्श्वतः
प्रस्थितं तमनवस्थितं प्रियाः ।")

पार्श्वतीयः, त्रि, (पार्श्वतो भवः । पार्श्व + "सुखपार्श्वसमीपस्य ।" ४ । २ । १३८ । इत्यस्य वार्त्तिकोक्त्या छः ।) पार्श्वसम्बन्धी । पार्श्वतो भवः । इति सिद्धान्तकौमुदी ॥

पार्श्वपरिवर्त्तनं, क्ली, (पार्श्वस्य पार्श्वेन वा परिवर्त्तनम् ।) कटिदानम् । कर्णिकापरिवृत्तिः । पाशफेराव इति भाषा । श्रीहरेः पार्श्वपरिवर्त्तनोत्सवो यथा,—
"भाद्रस्य शुक्लैकादश्यां शयनोत्सववत् प्रभोः ।
कटिदानोत्सवं कुर्य्याद्वैष्णवैः सह वैष्णवः ॥"
तथा च भविष्योत्तरे ।
"प्राप्ते भाद्रपदे मासि एकादश्यां सितेऽहनि ।
कटिदानं भवेद्विष्णोर्महापातकनाशनम् ॥
जलाशयान्तिकं नीत्वा संपूज्याभ्यर्च्च च प्रभुम् ।
कर्णिकापरिवृत्तिञ्च दक्षिणाङ्गे प्रकल्पयेत् ॥"
अस्य व्याख्या । शयनोत्सवात् कथञ्चिद्विशेषमनुवादपूर्व्वकं लिखति । जलेति त्रिभिः कर्णिकायाः कथ्याः परिवृत्तिं दक्षिणाङ्गे प्रकल्पयेदिति पूर्व्वं वामाङ्गेन शयनस्याधुना दक्षिणाङ्गेन शाययेदित्यर्थः । तत्कालविशेषश्च पूर्व्वमेव निर्णीतोऽस्ति । अभ्यर्घनामन्त्रः ।
"देवदेव ! जगन्नाथ योगिगम्य ! निरञ्जन ! ।
कटिदानं कुरुष्वाद्य मासि भाद्रपदे शुभे ॥
महापूजां ततः कृत्वा वैष्णवान् परितोष्य च ।
देवं स्वमन्दिरे नीत्वा यथापूर्व्वं निवेशयेत् ॥"
इति श्रीहरिभक्तिविलासे १५ विलासः ॥

पार्श्वपिप्पलं, क्ली, (पार्श्वे पिप्पलमिव ।) हरीतकीविशेषः । इति भावप्रकाशः ॥ गजहड़ इति हिन्दीभाषा ॥

पार्श्वभागः, पुं, (पार्श्वस्य भागः ।) पक्षभागः । हस्त्यादेः पार्श्वदेशः । इत्यमरः । २ । ८ । ४० ॥

पार्श्वशूलः, पुं, क्ली, (पार्श्वे जातः शूलः ।) शूलरोगविशेषः । तस्यौषधम् । यथा,—
"घृतपुष्पा देवदारु शालपर्णी वचागुरु ।
कुष्ठं मांसी सैन्धवञ्च पलमेकं पुनर्नवा ॥
पाने नस्ये तथाभ्यङ्गे तैलमेतत् प्रदापयेत् ।
हृच्छूलं पार्श्वशूलञ्च गण्डमालाञ्च नाशयेत् ॥"
इति गारुड़े १८६ अध्यायः ॥
(अस्य सम्प्राप्तिपूर्व्वकलक्षणचिकित्सितानि यथा, सुश्रुते उत्तरतन्त्रे ४२ अध्याये ।
"रुणद्धि मारुतं श्लेष्मा कुक्षिपार्श्वावस्थितः ।
स संरुद्धः करोत्यास्य मानं गुड़गुड़ायनम् ॥
सूचीभिरिव निस्तोदः क्षुत्क्षोच्छ्वासौ तदा नरः ।
नाम्नं वाञ्छति नो निद्रामुपैत्यत्तिनिपीड़ितः ॥
पार्श्वशूलः स विज्ञेयः कफानिलसमुद्भवः ।
तत्र पुष्करमूलानि हिङ्गुसौवर्चलं विड़म् ॥
सैन्धवं तुम्बुरूपक्ष्यचूर्णं क्षौद्रेण तु पाययेत् ।
पार्श्वहृद्बस्तिशूलेषु यवक्षारेण संयुतम् ॥
सर्पिःक्षीरोदरोक्तं वा घृतं वा हिङ्गुसंयुतम् ।
बीजपूरकसारं वा पयसा सह साधितम् ॥
एरण्डतैलमथवा मद्यमस्तुपयोरसैः ।
भक्षयेत्पापि पयसा चाक्षतेन रसेन वा ॥"

पार्श्वस्थः, पुं, (पार्श्वे तिष्ठतीति । पार्श्व + स्था + कः ।) पार्श्वस्थितनटः । इति हेमचन्द्रः ॥ समीपस्थिते, त्रि । (यथा, महाभारते । ६ । २०० । १४८ ।

"यस्य मन्त्री च गोप्ता च पार्श्वस्थो हि जनार्द्दनः ॥")

पार्श्वास्थि, क्ली, (पार्श्वस्य अस्थि ।) शरीरपार्श्वस्थितास्थि । पाँजरा इति भाषा । तत्पर्य्यायः । पर्शुका २ । इत्यमरः । २ । ६ । ६६ ॥

पार्श्विकं, त्रि, (पार्श्व + ठक् ।) पार्श्वस्थेदम् । पार्श्वजातम् । पार्श्वशब्दात् ष्ठिकप्रत्ययनिष्पन्नम् ॥

पार्श्वैकादशी, स्त्री, (पार्श्वसम्बन्धिनी हरेः पार्श्वपरिवर्त्तनजन्या एकादशी ।) भाद्रशुक्लैकादशी । तद्विवरणं पार्श्वपरिवर्त्तनशब्दे द्रष्टव्यम् ॥

पार्श्वोदरप्रियः, पुं, (पार्श्वसुदरस्य ताभ्यां प्रीणाति भोक्तारमिति । प्री + कः ।) कर्कटः । इति हेमचन्द्रः । ४ । ४१८ ॥

पार्षती, स्त्री, (पृषतस्यापत्यमिति । पृषत + अण् + स्त्रियां ङीप् ।) द्रौपदी । इति त्रिकाण्डशेषः ॥ (यथा, महाभारते । ३ । ३ । ८५ ।
"युधिष्ठिरं भोजयित्वा शेषमश्नाति पार्षती ।
द्रौपद्यां भुज्यमानायां तदन्नं क्षयमेति च ॥")

पार्षदः, त्रि, (पारिषद + पृषोदरादित्वात् साधुः । यद्वा, पर्षदि साधुः पर्षदो ण्यः इत्यत्र योगविभागात् ण इति कश्चित् ।) पारिषदः । इति शब्दरत्नावली ॥ (यथा, भागवते । ३ । १६ । २ ।
"एतौ द्वौ पार्षदौ मह्यं जयो विजय एव च ॥")

पार्षद्यः, त्रि, (पर्षदि साधुः । पर्षद् + "पर्षदो ण्यः ।" इति ण्यः ।) पार्षदः । इति भरतः ॥

पार्ष्णिः, पुं, स्त्री, (पृष्यते भूम्यादिकमनेनेति । पृष् + "पृषिपृञ्जिपार्ष्णिचूर्णिभूर्णि ।" उणां ४ । ५२ । इति निप्रत्ययेन निपातनात् साधुः ।) गुल्फस्याधोभागः । पादग्रन्थ्यधरः । इत्यमरः । २ । ६ । ७२ ॥ गोड़सुड़ा इति गोड़ारि इति च भाषा । स तु गर्भस्थस्य मासद्वयेन भवति । इति सुश्रुतबोधः ॥ (यथा, कुमारे । १ । ११ ।
"उद्देजयत्यङ्गुलिपार्ष्णिभागान्
मार्गे शिलीभूतहिमेऽपि यत्र ॥")
सैन्यपृष्ठम् । इति मेदिनी । णी, २० ॥ (यथा, हरिवंशे । २५ । ३२ ।
"उज्झना तस्य जग्राह पार्ष्णिमाङ्गिरसस्तदा ॥")
पृष्ठम् । इति हलायुधः ॥ निगीर्य्या । यथा,—
"सैन्यपृष्ठे पुमान् पार्ष्णिः पश्चात्पदनिगीर्ययोः ॥"
इति रत्नकोषः ॥

पार्ष्णिः, स्त्री, उम्मदस्त्री । इति मेदिनी । णी, २० ॥ कुन्ती । इति धरणिः ॥

पार्ष्णिग्राहः, पुं, (पार्ष्णिं सैन्यपृष्ठं गृह्णातीति । ग्रह + ण्वुल् ।) पृष्ठतः शत्रुः । शत्रुनयोद्यतस्य विजिगीषोस्तच्छत्रुपक्षपातेन पार्ष्णिं पश्चात् पदं गृह्णाति याति यः । इत्यमरभरतौ ॥ (यथा, मनुः । ७ । २०७ ।
"पार्ष्णिग्राहञ्च संप्रेक्ष्य तथाक्रन्दञ्च मण्डले ॥")

पार्ष्णित्रं, क्ली, (पार्ष्णिं त्रायते इति । त्रै + "आतोऽनुपसर्गे कः ।" ३ । २ । ३ । इति कः ।) मधुमक्षिकसेना । इति सिद्धान्तकौमुदी ॥

पाल, क रक्षे । इति कविकल्पद्रुमः (चुरां-पर-सकं-सेट् ।) क, पालयति । इम्यतेर्वेष्टनेऽपि दीर्घिमोऽपि पाठः । वास्तुवन्यानामिदमुवन्यवत् सेरनित्यत्वं बोधयति । तेन पालति पयति इत्यपि सिद्धम् । इति दुर्गादासः ॥

पाल:, पुं, (पालयतीव निष्ठीवनादिकमिति । पालि + अच् ।) यतदृग्यः । इति हेमचन्द्रः ॥ भिक्षून् इति भाषा ॥ पालके, त्रि । यथा,—

"दिवावक्तव्यता पाले राजौ स्वामिनि तद्गृहे ।
योगक्षेमेऽन्यथा चैषु पालो वक्तव्यतामियात् ॥"
इति मनुः ॥

पालकः, पुं, (पालयतीति । पालि + ण्वुल् ।) घोटकरक्षकः । तत्पर्य्यायः । अश्वरक्षः २ वाजी ३ । इति शब्दरत्नावलिः ॥ चित्रकवृक्षः । इति राजनिर्घण्टः ॥ पालकर्कोरि, त्रि । यथा, प्रायश्चित्ततत्त्वे ।

"गोपालको गवां गोष्ठे यस्तु धूमं न कारयेत् ।
मक्षिकाभिर्ननरके मक्षिकाभिः स भक्ष्यते ॥"

पालकाव्यः, पुं, मुनिविशेषः । तत्पर्य्यायः । करेणुः २ । इति हेमचन्द्रः ॥ धन्वन्तरिः । इति शब्दरत्नावलिः ॥

पालङ्कः, पुं, (पालं शैवं लुनातीति । लू + टक् ।) दत्रा । इत्यमरः । २ । ५ । १६ ॥

पालङ्गः, पुं, (पाल रक्षणे + सम्यदादिभ्यः कित् । तेन अञ्चति इति । अञ्च + घञ् ।) शाकवी । शाकभेदः । पालङ् इति भाषा । शाकिपक्षी । इति मेदिनी । के, ११७ ॥ वाज इति भाषा ॥

पालङ्गी, स्त्री, (पालङ्ग + गौरादित्वात् ङीष् ।) कुक्कुरनामगन्धद्रव्यम् । इत्यमरः । २ । ९ । १२१ ॥ शाकभेदः । पालङ् इति भाषा ॥ (यथा, सुश्रुते चिकित्सितस्थाने ६ अध्याये ।

"यवाद्योषशाकैर्वास्तूकतण्डुलीयककौवल्लपोदिकाम्बष्ठलवाबास्फोतकपालङ्क्यमत्स्यचिल्लीपुष्पुकसाद्यपत्रीभिरन्यैश्च ॥") अस्या गुणाः । कफपित्तवातविबन्धनाशित्वम् । रूक्षत्वञ्च । इति राजवल्लभः ॥

पालङ्क्या, स्त्री, (पालङ्ग + स्वार्थे यञ् ।) शाकभेदः । पालङ् इति भाषा ॥ तत्पर्य्यायः । पालङ्का २ मधुरा ३ सुरपत्रिका ४ सुपत्रा ५ स्निग्धपत्रा ६ मार्गोत्था ७ गान्धवल्लभा ८ । अस्या गुणाः । रेचनत्वं कटुत्वम् । मधुरत्वम् । पथ्यत्वम् । शीतलत्वम् । रक्तपित्तहरत्वम् । मोहित्वम् । परमसंग्रहत्वञ्च । इति राजनिर्घण्टः ॥

पालङ्क्षा, स्त्री, (पालङ्ग + स्त्रियां अजादित्वात् टाप् ।) कुक्कुरः । इत्यमरः ॥ कुक्कुरगोटी इति भाषा । पालङ्गशाकः । तत्पर्य्यायः । वास्तुशाकारा २ कुक्षिला ३ चीरिपत्रिका ४ । (यथा, सुश्रुते । १ । ४६ ।

"शाकानां पूतिवल्कीवल्लीचिल्लीपालङ्क्यादीनि तिक्तकषायाणि लघूनि शीतानि रोचनानि वातपित्तशमनानि च शाकानां गुणाः ।") अस्या गुणाः । वातनत्वम् । शीतत्वम् । रोचनत्वम् । मेदनत्वम् । गुरुत्वम् । विष्टम्भित्वम् । मदघ्नत्व-पित्तरक्तविषापहत्वञ्च । इति भावप्रकाशः ॥

पालनं, क्ली, (पालयतेरनेनेति । पालि + "करणाधिकरणयोश्च ।" ३ । ३ । ११७ । इति ल्युट् ।) सद्यःप्रसूतायाः गोः क्षीरम् । इति शब्दचन्द्रिका ॥ (पाल रक्षणे + भावे ल्युट् ।) रक्षणम् । यथा, "अभिषेकादिगुणयुक्तस्य राज्ञः प्रजापालनं परमो धर्म्मः ।" इति मिताक्षरा ॥

पालाशं, क्ली, (पलाशस्येदमिति । अण् ।) तमालपत्रम् । इति राजनिर्घण्टः ॥ तेजपात इति भाषा ॥ (यथा, वाभटे शुल्लचिकित्सितायाम् ।

"पालाशं दहनाभुग्नं शुष्ठिशयापामार्गकुशाश्मकम् ॥")

पालाशः, पुं, (पालाशस्य वर्ण इव वर्णोऽस्येति । अच् ।) हरिद्वर्णः । (यथा, हरिवंशे । ८३ । ४ ।

"पालाशशताश्वासितकर्बुरागाम् ॥")

तद्वर्णविशिष्टे पलाशवृक्षसम्बन्धिनि च, त्रि । इत्यमरः ॥ (यथा, मनुः । २ । ४५ ।

"ब्राह्मणो वैल्वपालाशौ क्षत्रियो वट-खादिरौ ॥")

पालाशवटः, पुं, (पालाशानां पलाशवृक्षाणां वटो यत्र ।) मगधदेशः । इति शब्दरत्नावली ॥ पलाशसमूहश्च ॥

पालिः, स्त्री, (पलते पाल्यते इति । पल पालने + "वाहुलकात् शृलतिपलतिभ्याञ्च ।" ४ । १२६ । इत्युज्ज्वलदत्तोक्त्या इन् ।) कर्णलतायम् । (यथा, "यस्य पालिद्वयमपि कर्णस्य न भवेदिह ।
कर्णपीठं समे मध्ये तस्य विद्या विवर्द्धयेत् ॥
बाह्यायामिह दीर्घायां सन्धिराभ्यन्तरो भवेत् ।
आभ्यन्तरायां दीर्घायां बाह्यसन्धिरुदाहृतः ॥
एकैव तु भवेत् पालिः सूक्ष्मा पृथ्वी स्थिरा च या ।
तां द्विधा पाटयित्वा तु छित्त्वा चोपरि सन्त्यजेत् ॥
गलादुत्पाद्य मांसेन वायुवन्येन जीवता ।
कर्णपालिमपाचेत् तु दुर्व्याग्निर्विनिवर्त्तयेत् ॥"
"कर्णपाल्यामयानूत्थां पुनर्वक्ष्यामि सुश्रुत ! ।
कर्णपाल्यां प्रकुपिता वातपित्तकफास्त्रयः ॥
द्विधा वाप्यथ संरब्धाः कुर्वन्ति विविधा रुजः ।
विस्फोटः सम्भवेत् तासां शोफः पाल्यां द्वयेऽपि तु वातिके ॥
दाहविस्फोटजननं शोफः पाकश्च पैत्तिके ।
कण्डूः सम्भवेत् तस्मिं गुरुत्वञ्च कफात्मके ॥
यथादोषञ्च संशोध्य कर्णपालिं चिकित्सितम् ।
स्निग्धाभ्यङ्गपरीषेकैः प्रतिपादयिमोक्षणैः ॥
सर्व्वां क्रियां तु कर्णोक्तेर्व्वैद्यस्तासां भिषक्तमः ।
य एवं वेत्ति दोषाणां चिकित्सां कर्त्तुमर्हति ॥
अत ऊर्द्धं नासिकाक्षिवैद्ये पाल्यामुपदेक्ष्यते ।
उत्पाटकस्तीव्रतुदः स्रावः कण्डूयनो भ्रमः ॥
अधिमन्थः सशूलश्च सन्धिजो बहुलक्षणः ।
सार्द्धं च दाहपाकाभ्यां क्रमशः क्रियाम् ॥
अपामार्गः सर्ज्जरसः पाटलाक्षुद्रचव्यौ ।
उत्पाटके प्रलेपः स्यात् तैलमेभिश्च पाचयेत् ॥
शृग्याकाग्निगुडूचीकमोधामेदोश्च तद्रसः ।
वाराहं गव्यमेतैर्वा पित्तं सर्पिश्च संसृजेत् ॥
वैसर्पतुल्यटके दद्यात्तैलमेभिश्च साधितम् ।
गौरीं सुगन्धां सक्षामामगन्धां तद्गुणीयकम् ॥
स्रावे प्रलेपनं दद्यात्तैलमेभिश्च साधितम् ।
पाठां रसाञ्जनं चौद्रं तथान्याङ्गवाकाङ्क्षिकम् ॥
दद्यात्तैलं सकण्डूके तैलमेभिश्च साधितम् ।
ब्रह्मीभृतस्य दैत्यस्य स्यादिदं तैलं विज्ञानता ॥
मधुकं शीरुकाकोली जीवकाद्यैर्विपाचितम् ।
गोधावराक्षसर्पाक्षी वसाः स्युः क्षतहृद्धिते ॥
प्रलेपनमिदं दद्यात्पलिघ्नाद्यमन्थके ।
प्रपौण्डरीकं मधुकं समङ्गां यवमेव च ॥
तैलमेभिश्च सम्यक्तं भग्ने कर्कटकस्तः क्रियाम् ।
सहदेवा विश्वदेवा ब्राह्मीरं सनैन्धवम् ॥
एतैराश्वेषनं दद्यात् तैलमेभिश्च साधितम् ।
यन्त्रिते गुटिकां पूर्व्वं साधयेदवपाल्यतु ॥
ततः सैन्धवचूर्णन्तु दृष्ट्वा क्षेपं प्रदापयेत् ।
लिखित्वा तत् सुतं दृष्ट्वा चूर्णं रोधस्य शमुणे ॥
क्षीरेण प्रतिसार्य्यैनं शुद्धं संरोपयेत्ततः ।
मधुपर्णीं सधूकञ्च मधुकं मधुना सह ॥
क्षेपः साधित दातव्यस्तैलमेभिश्च साधितम् ।
पञ्चकल्कैः समधुकैः पिष्टैश्चैव घृतान्वितैः ॥
जीवकाद्यैः सदर्भिष्कैर्व्रणमांसं प्रलेपयेत् ॥"
इति सुश्रुते उत्तरस्थाने षोडशोऽध्याये ॥)
अक्षिः । पक्ष्मणि । (यथा, गीतगोविन्दे । ६ । १० ।
"विपुलपुलकपालिः स्फीतसीत्कारमन्त-र्जनितजल्पिमकाकुव्याकुलं व्याहरन्ती ॥")
अङ्गभेदः । छाद्यादिदेयम् । इति मेदिनी । ले ३० ॥ यूका । जातसन्धुक्षी । प्राप्तः । (यथा गीतगोविन्दे । ६ । १३ ।
"भूपालवंशतरुसम्भवकारणानि
वाणा गुणाः श्रवणपालिरिति स्मरेयुः ।
तस्यामनङ्गजयजङ्गमदेवतायाः
मन्त्राणि निर्दिशतु मन्त्रिवरः किमर्पितानि ॥")
सेतुः । कल्पितभोजनम् । प्रशंसा । उत्तङ्गः । प्रस्थः । इति हेमचन्द्रः ॥

पालिका, स्त्री, (पालिरेव । स्वार्थे कन् टाप् च ।) अक्षिः । इति शब्दरत्नावली ॥ कर्णपत्रम् । इति शब्दचन्द्रिका । दध्यादिक्षेदनी । तत्पर्य्यायः । कुन्तलिका २ । इति हारावली ॥

पालितः, त्रि, (पाल + क्त ।) रक्षितः । यथा,—

"चित्ररेखा तमाज्ञाय पौत्रं कृष्णस्य योगिनी ।
ययौ विहायसा राजन् द्वारकां रक्षपालिताम् ॥"
इति श्रीभागवतीयदशमस्कन्धे ६२ अध्याये ॥
कायस्थस्य पदविशेषः ॥

पालिन्दः, पुं, (पालयतीति । पालि + वाहुलकात् किन्दच् ।) कुक्कुरः । इति राजनिर्घण्टः ॥

पालिन्दी, स्त्री, (पालिन्द + गौरादित्वात् ङीष् ।) रासनावल्ली । इति रत्नमाला ॥ (यथा, सुश्रुते रत्नमालायां १ अध्याये ।

पावनं

"कृष्णपित्तघृतश्यामा पालिन्दीतण्डुलीयके: ॥") पालिन्दी। चित्रता। इति द्विरूपकोष: ॥ (अस्या: पर्य्यायो यथा,—

"चित्रतु श्यामार्ङ्कचन्द्रा च पालिन्दी च सुवेशिका।
मस्तरविदलाकोलकैथिका कालमेथिका॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

पालिन्वी, स्त्री, कृष्णचित्रता। इत्यमर:।२।४।१०८॥

पाली, स्त्री, (पालि+कृदिकारादिति वा ङीष्।) धात्री। सप्तसुयोषित्। इति मेदिनी। ले, ३०। श्रेणी। इति शब्दरत्नावली॥ स्थाली। इति शब्दचन्द्रिका॥

पावक:, पुं, (पुनातीति। पू ष्ण गि शोधे+ण्वुल्।) अग्नि:। इत्यमर:।१।१।५७॥ (यथा, काशीखण्डे ६ अध्याये।

"अपावनानि सर्व्वाणि वह्निसंसर्गत: क्वचित्।
पावनानि भवन्त्येव तस्मात् स पावक: स्मृत:॥")

वैद्युताग्नि:। यथा,—

"पावक: पवमानश्च शुचिरग्निश्च ते त्रय:।
निर्म्मथ्य: पवमान: स्याद्वैद्युत: पावक: स्मृत:॥
यस्मात्सौ तपते सूर्य्य: शुचिरग्निस्ततौ स्मृत:॥"

इति कौर्म्मे १२ अध्याय:॥

ब्रह्मणो मानसपुत्रादभिमानिनामकाग्ने: स्वाहायां जात:। यथा,—

"योऽसावग्निरभीमानी सुत: स्वायम्भुवेऽन्तरे।
ब्रह्मणो मानस: पुत्रस्तस्मात् स्वाहा व्यजीजनत्॥
पावकं पवमानञ्च शुचिरग्निञ्च य: स्मृत:॥"

इति मात्स्ये ४८ अध्याय:॥

सदाचार:। वह्निमन्थ:। (अस्य पर्य्यायो यथा,

"तेजोमन्थो हविर्मन्थो ज्योतिष्को पावकोऽरणि:।
वह्निमन्थोऽग्निमन्थश्च मथनो गणिकारिका॥"

इति वैद्यकरत्नमालायाम्॥)

चित्रक:। भल्लातक:। विडङ्ग:। इति मेदिनी। के, ११८॥ श्रोधविशेषनर:। इति हेमचन्द्र:॥ रक्तचित्रक:। कुसुम्भ:। इति राजनिर्घण्ट:॥ (पवित्रकारके, त्रि। यथा, ऋग्वेदे। ३। ३१। २०।

"मिह: पावका: प्रतता अभूवन्॥")

पावकारणि:, पुं, (पावकाय वह्न्युत्पादनार्थं अरणिरिव।) अग्निमन्थ:। इति शब्दमाला॥

पावकि:, (पावकस्यापत्यम्। पावक+इञ्।) कार्त्तिकेय:। यथा,—

"कथं तं कृत्तिकापुत्रमुक्तवान् तं सुरं गुरुम्।
कथञ्च पावकिरसौ कथं वा मालतन्दन:॥"

इति वराहपुराणम्॥

पावनं, क्ली. (पावयत्यनेनेति। पू+णिच्+ल्युट्।) जलम्। कृच्छ्रम्। इति मेदिनी। ने, ६०॥ गोमयम्॥ इति शब्दचन्द्रिका॥ रक्तान्नम्। क्षुरम्। इति राजनिर्घण्ट:॥ चित्रकम्। अध्यास:। प्रायश्चित्तम्। इति विश्व:॥ (यथा, मनु:। ११। १७८।

"सा चेत् पुन: प्रदुष्येत्तु सप्तरात्रोपयन्त्रिता।
कृच्छ्रं चान्द्रायणञ्चैव तदस्या: पावनं स्मृतम्॥")

पाशः

पावन:, पुं, (पावयतीति। पू+णिच्+ल्यु:।) व्यास:। पावक:। ईति मेदिनी। ने, ६०॥ (यथा, ३।१८५। मनुश्लोकटीकायां कुल्लूकभट्ट:।

"पावन: सभ्योऽग्नियं: शीतापनोदनार्थं बहुषु देशेष्वपि विधीयते॥") सिद्धक:। इति विश्व:॥ पीतभृङ्गराज:। इति राजनिर्घण्ट:॥ (विष्णु:। यथा, महाभारते। १३। १४६। ४५।

"भूतभव्यभवन्नाथ: पवन: पावनोऽनल:॥"

"पावयतीति पावन:। भीषास्माद्वात: पवत इति श्रुते:।" इति श्राङ्करभाष्यम्॥) सिद्ध:। पवित्रे पावयितरि च, त्रि। इति हेमचन्द्र:॥ (यथा, रघु:। १६। ५३।

"स त्वनेकवनिता सखोऽपि सन्
पावनीमनवलोक्य सन्ततिम्।
वैद्यवत्तपरिभाविनं गदं
न प्रदीप इव वायुमत्यगात्॥")

पावनध्वनि:, पुं, (पावन: पवित्रजनको ध्वनिर्यस्य।) शूद्र:। इति राजनिर्घण्ट:॥ (पावनोध्वनिरिति विग्रहे।) पवित्रशब्द:॥

पावनी, स्त्री, (पावयत्यनयेति। पू+णिच्+ल्युट्+ङीप्।) हरीतकी। इति विश्व:॥ तुलसी। गौ:। इति राजनिर्घण्ट:। गङ्गा। यथा, शङ्कराचार्य्यकृतगङ्गाष्टके।

"ब्रह्माण्डं खण्डयन्ती हरशिरसि जटावल्लिमुल्लासयन्ती
स्वर्लोकादापतन्ती कनकगिरिगुहागण्डशैलात् स्खलन्ती।
क्षौणीपृष्ठे लुठन्ती दुरितचयचमूर्निर्भरं भर्त्सयन्ती
पाथोधिं पूरयन्ती सुरनगरसरित्पावनी न: पुनातु॥"

(इयन्तु गङ्गाया अंशविशेष:। यथा, मात्स्ये। १२०। ३६—४१।

"ततो विसर्ज्जयामास संरुद्धां स्वेन तेजसा।
नदीं भगीरथस्यार्थे तपसोग्रेण तोषित:।
ततो विसर्ज्जयामास सप्त स्रोतांसि गङ्गाया:॥
त्रीणि प्राचीमभिमुखं प्रतीचीं त्रीण्यधश्चैव तु।
स्रोतांसि त्रिपथगायास्तु प्रत्यपद्यन्त सप्तधा॥
नलिनी ह्लादिनी चैव पावनी चैव प्राच्यगा।
सीता चक्षुश्च सिन्धुश्च तिसस्रो वै प्रतीच्यगा:॥
सप्तमी त्वनुगा तासां दक्षिणेन भगीरथम्।
तस्माद् भागीरथी सा वै प्रविष्टा दक्षिणोदधिम्॥"

शाकद्वीपस्य नदीविशेष:। यथा, मत्स्यपुराणे। १२१। ३१।

"नन्दा च पावनी चैव तृतीया परिकीर्त्तिता॥")

पाश:, पुं, (पश्यते बध्यतेऽनेनेति। पश+घञ्।) शस्त्रभेद:। इति शब्दरत्नावली॥ (वैद्यशास्त्रधनुर्व्वेदोक्तपाशलक्षणं यथा,—

"पाश: सुरुच्यावयवो लौहधातुस्त्रिकोणवान्।
प्रादेशपरिधि: सीसगुलिकाभरणान्वित:॥"

आग्नेयधनुर्व्वेदोक्तलक्षणं यथा,—

पाशकः

"दण्डहस्तो भवेत् पाशो दृप्त: करसखस्तथा
गुणकार्पासमुञ्जानामर्कस्नायवचर्म्मणाम्॥
अन्येषां सुदृढ़ानाञ्च सुकृतं परिवेष्टितम्।
तथा चिंशत्समं पाशं बुध: कुर्य्यात्सुवर्त्तितम्॥"

अस्य क्रियादिकं यथा,—

"कर्त्तव्यं शिक्षकैस्तस्य स्थानं कक्षासु वै सदा।
वामहस्तेन संगृह्य दक्षिणेनोद्धरेत्तत:॥
कुण्डलस्याकृतिं कृत्वा भ्राम्यैकं मस्तकोपरि।
क्षिपेत्————————॥"

"वल्गिते च प्लुते चैव तथा प्रव्रजितेषु च।
समयोगविधिं ज्ञात्वा प्रयुञ्जीत सुशिक्षित:॥
विजित्वा तु यथान्यायं ततो वध्यं समाचरेत्।
कक्ष्यां बद्ध्वा तत: खड्गं वामपार्श्वावलम्बितम्॥
दृढ़ं विगृह्य वामेन निष्कर्षेद्दक्षिणेन च॥"

अन्यच्च।

"परावृत्तमपावृत्तं गृहीतं लघुसंज्ञितम्।
ऊर्द्धक्षिप्तमध:क्षिप्तं सन्धारितविधारितम्॥
श्येनपातं गजपातं ग्राहग्राह्यं तथैव च।
एवमेकादशविधा ज्ञेया: पाशविधारणा:॥"

वैद्यशास्त्रोक्तक्रिया यथा,—

"प्रसारणं वेष्टनञ्च कर्त्तनञ्चेति ते त्रय:।
योगा: पाशाश्रिता लोके पाशा: क्षुद्रसमाश्रिता:॥"

अन्यच्च।

"ऋज्वायतं विशालञ्च तिर्य्यक्श्लक्ष्णमितमेव च।
पञ्च कर्म्मविनिर्द्दिष्टं यस्मिन् पाशे महात्मभि:॥")

कक्षान्ते समूहार्थ:। (यथा, माघे। ७। ६२।

"अथशिरसिजंपाशपातभारा-
दिव नितरां नतिमद्भिरंसभागै:॥")

कर्णान्ते शोभनार्थ:। क्षान्तान्ते निन्दार्थ:। पक्ष्यादिबन्धनरज्ज्वादि। इति विश्व:॥ (यथा, महाभारते। ५। ६४। १।

"शकुनीनामिहार्थाय पाशं भूमावयोजयत्।
कक्षिच्छाकुनिकस्यात पूर्व्वेषामिति शुश्रुम॥"

योगविशेष:। यथा, ज्योतिषे।

"यदा राशिपञ्चके सर्व्व ग्रहा भवन्ति तदा पाशाख्योयोगो भवति॥" पारिभाषिकपाशो यथा, कुलार्णवे १ उल्लासे।

"घृणा शङ्का भयं लज्जा जुगुप्सा चेति पञ्चमी।
कुलं शीलं तथा जातिरष्टौ पाशा: प्रकीर्त्तिता:॥"

खड्गेऽस्य दर्शनफलं यथा,—

"कार्पासभस्मास्थिकपालशूलं
चक्रञ्च पाशन्त्वथवा प्रपश्येत्।
तस्यापदं रोगधनक्षयं वा
रोगी मृतिं वा तनुतेऽतिकष्टम्॥"

इति हारीते द्वितीये स्थाने द्वितीयेऽध्याये॥).

पाशक:, पुं, (पाशयति पीड़यतीति। पश+णिच्+ण्वुल्।) द्यूतविशेष:। पाशा इति भाषा। तत्पर्य्यायः। अक्ष: २ देवन: ३। इत्यमर:। २। १०। ४५॥ सारि. ४ शारि: ५ सार: ६ शार: ७ पाश: ८। इति शब्दरत्नावली॥

पाशुपाणिः, पुं, (पाशः पाणौ यस्य ।) वरुणः । इति हलायुधः ॥

पाशुपालनं, क्ली, (पाशुवं पशुसंघं पालयतीति । पालि + ल्युः ।) पाशः । इति शब्दचन्द्रिका ॥

पाशितः, त्रि, (पाश + क्त ।) पाशयुक्तः । बद्धः । इति धरणिः ॥

पाशी, [न्] पुं, (पाशोऽस्यास्तीति । पाश + इनिः ।) वरुणः । इत्यमरः । १ । १ । ६४ ॥ (यथा, हरिवंशे भविष्यपर्व्वणि । ३ । ८ ।
"यदि शक्रं यमं वापि कुबेरमपि पाशिनम् ॥")
व्याधः । इति मेदिनी । ने, ६१ ॥ यमः । इति कश्चित् ॥ पाशधरे, त्रि । इति विश्वः ॥

पाशीकृतः, त्रि, पाशवद्धः । अभूततद्भावे च्वि-प्रत्ययनिष्पन्नः ॥

पाशुपतः, पुं, (पशुपतिर्देवतास्येति । "तस्य देवता ।" ४ । २ । २४ । इति अण् ।) वक-पुष्पम् । (अस्य पर्य्यायो यथा, भावप्रकाशे ।१।१।
"शिवमल्ली पाशुपत एकाष्ठीलो वृको वसुः ॥")
पशुपत्यधिदेवतः । तद्भक्तः । इति मेदिनी । ते, २११ ॥ (क्ली, तन्त्रशास्त्रविशेषः । यथा, कूर्म्म-पुराणे १४ अध्याये ।
"एवं सम्बोधितो रुद्रो माधवेन मुरारिणा ।
चकार मोहशास्त्राणि केशवोऽपि शिवेरितः ॥
कापालं नाकुलं वामं भैरवं पूर्व्वपश्चिमम् ।
पञ्चरात्रं पाशुपतं तथान्यानि सहस्रशः ॥"
अथर्ववेदान्तर्गतोपनिषद्विशेषः । यथा, मुक्ति-कोपनिषदि ।
"सावित्र्यात्मा पाशुपतं परब्रह्मावधूतकम् ॥")

पाशुपतव्रतं, क्ली, (पाशुपतं पशुपतिसम्बन्धि व्रतम् ।) पशुपतिव्रतविशेषः । यथा,—
"यथा पशुपतिर्नित्यं कृत्वा सर्व्वमिदं जगत् ।
न लिप्यते पुनः सोऽपि यो नित्यं व्रतमाचरेत् ॥
इहजन्मकृतं पापं पूर्व्वजन्मकृतञ्च यत् ।
व्रतं पाशुपतं नाम कृत्वा हन्ति द्विजोत्तम ! ॥
द्वादश्यामेकभक्ताशी त्रयोदश्यामयाचितम् ।
चतुर्दश्यां तथा नक्तमुपवासं परेऽहनि ॥
गोवृषञ्चैव हैरण्यं रौप्यं ताम्रमथन्तथा ।
सौवर्णं कारयेत् पत्रं गृह्णीयात्तेषु पृथक् पृथक् ॥
तत्रैवोल्लेखयेन्मूर्त्तिं शिवायाश्च शिवस्य च ।
तत्प्रमाणं वृषं कुर्य्याद्रौप्यं हैमञ्चतुर्गुणैः ॥
रौप्यादष्टगुणं ताम्रं तद्वर्णं वापि कारयेत् ।
चारपत्रे समारोप्य वस्त्रोत्तमयुतन्तथा ॥
त्रयोदश्यामेकभक्तं रिक्तायां नक्तमाचरेत् ।
कुर्य्यादयाचितं दर्शे पादकृच्छ्रव्रतञ्चरेत् ॥
गन्धपुष्पैः सुनैवेद्यैर्व्वस्त्राभरणदीपकैः ।
गङ्गाधरं समभ्यर्च्च्य प्रार्थयेत् प्रवरं वरम् ॥
गङ्गाधर ! महादेव ! सर्व्वलोकचराचर ! ।
जहि मे सर्व्वपापानि पूजितस्त्वञ्च शङ्कर ! ॥
शङ्कराय नमस्तुभ्यं सर्व्वपापहराय च ।
यथा यमं न पश्यामि तथा मे कुरु शङ्कर ! ॥
यममार्गं यथा शम्भो ! न पश्यामि कदाचन ।
संपूजितो मया भक्त्या तथा मे कुरु शङ्कर ! ॥
गङ्गाधर ! धराधीश ! परात्परतर प्रद ! ।
श्रीकण्ठ ! नीलकण्ठस्त्वसुसाकान्त ! नमोऽस्तु ते ॥
संपूज्यैवंविधानेन प्रतिपद्युदिते रवौ ।
हैरण्यादीन् गोवृषांश्च ब्राह्मणेभ्यो निवेदयेत् ॥
यथा त्वं सर्व्वगः सर्व्वः सर्व्ववासस्तु सर्व्वहृत् ।
न लिप्यसे विकुर्व्वाणस्तथा मां कुरु शङ्कर ! ॥
एवं स्तुत्वा नमस्कृत्य वृषादींश्च यथोदितान् ।
गुर्व्वादिभ्यो द्विजेभ्यश्च शङ्करः प्रीयतामिति ॥
एवं व्रतमिदं कृत्वा वृषं दद्याद्द्विजातये ।
यममार्गं महाघोरं न पश्यति कदाचन ॥
यः करोति व्रतैनेव सर्व्वपापप्रणाशनम् ।
न स लिप्येत पापेन पद्मपत्रमिवाम्भसा ।
ब्रह्महत्यादिभिः पापैरगम्यागमनादिभिः ।
मुच्यते पातकेभ्योऽथ ह्यभक्ष्यापेयजैः पुमान् ॥
यः करोति महाभाग ! दानं सर्व्वसुखावहम् ।
हत्वा पापान्यघोराणि स्वर्गलोकं स गच्छति ॥"
इति वह्निपुराणे पाशुपतव्रतदानाध्यायः ॥
(यथा च शिवपुराणे वायुसंहितायां पूर्व्वभागे २६ अध्याये ।
ऋषय ऊचुः ।
"भगवन् ! श्रोतुमिच्छामो व्रतं पाशुपतं परम् ।
ब्रह्मादयोऽपि यत् श्रुत्वा सर्व्वे पाशुपताः स्मृताः ॥
वायुरुवाच ।
रहस्यं वः प्रवक्ष्यामि सर्व्वपापविकृन्तनम् ।
व्रतं पाशुपतं श्रौतमथर्व्वशिरसि श्रुतम् ॥
कालश्चित्रापौर्णमासी देयः शिवपरिग्रहः ।
क्षेत्रारामादिरन्यो वा प्रशस्तः शुभलक्षणः ॥
तत्र पूर्व्वं त्रयोदश्यां सुस्नातः सुकृताह्निकः ।
अनुज्ञाप्य क्षमाचार्य्यं संपूज्य प्रणिपत्य च ॥
पूजां वस्त्रैर्घृतैः कृत्वा शुक्लाम्बरधरः स्वयम् ।
शुक्लयज्ञोपवीती च शुक्लमाल्यानुलेपनः ॥
दर्भासने समासीनो दर्भमुष्टिं प्रगृह्य च ।
प्राणायामत्रयं कृत्वा प्राङ्मुखो वाप्युदङ्मुखः ॥
ध्यात्वा देवञ्च देवीञ्च तद्विज्ञापनवर्त्मना ।
व्रतमेतत् करोमीति भवेत् संकल्प्य दीक्षितः ॥
यावच्छरीरपातं वा द्वादशाब्दमथापि वा ।
तदर्द्धं वा तदर्द्धं वा मासद्वादशकन्तु वा ॥
तदर्द्धं वा तदर्द्धं वा मासमेकमथापि वा ।
दिनद्वादशकं वाथ दिनषट्कमथापि वा ॥
तदर्द्धं दिनमेकं वा व्रतसंकल्पनावधि ।
अग्निमाधाय विधिवद्विरजा होमकारणात् ॥
हुत्वाज्येन समिद्भिश्च चरुणा च यथाक्रमम् ।
पूर्णाद्याः पुरतो भूयस्तत्वानां शुद्धिमुद्दिशन् ॥
जुहुयान्मूलमन्त्रेण तैरेव समिदादिभिः ।
तत्तान्येतानि मद्देहे शुध्यन्तामित्यनुस्मरन् ॥
पञ्च भूतानि तन्मात्राः पञ्च कर्म्मेन्द्रियाणि च ।
ज्ञानकर्म्मविभेदेन पञ्च पञ्च विभागशः ॥
त्वगादिधातवः सप्त पञ्च प्राणादिवायवः ।
मनोबुद्धिरहंख्यातिर्गुणाः प्रकृतिपूरुषौ ॥
रागो विद्या कला चैव नियतिः काल एव च ।
माया च शुद्धविद्या च महेश्वरसदाशिवौ ॥
शक्तिश्च शिवतत्वञ्च तत्तानि क्रमशो विदुः ।
सन्तेषु विरजैर्हुत्वा होतासौ विरजो भवेत् ॥
अथ गोमयमादाय पिण्डीकृत्याभिमन्त्र्य च ।
न्यस्याग्नौ तच्च संरक्ष्य दिने तस्मिन् हविष्य-भुक् ॥
प्रभाते तु चतुर्दश्यां स्नात्वा सर्व्वं पुरोदितम् ।
दिने तस्मिन्मिताहारः कालशेषं समापयेत् ॥
प्रातःपर्व्वणि चाप्येवं कृत्वा होमावसानतः ।
उपसंहृत्य तदग्निं गृह्णीयाद्वह्नि यत्नतः ॥
ततस्तु जटिलो मुण्डः शिखैकजट एव वा ।
भूत्वा स्नात्वा पुनर्वीतलक्षश्चेत् स्याद्विगम्बरः ॥
अन्यः काषायवसनश्चर्म्मचीराम्बरोऽथवा ।
एकाम्बरो वल्कली वा भवेद्दण्डी च मेखली ॥
प्रक्षाल्य चरणौ पश्चाद्विराचम्यात्मनस्तनुम् ।
संकलीकृत्य तद्वह्नि विरजानलसम्भवम् ॥
अग्निरित्याभिमन्त्रैः षड्भिराद्यर्व्वर्णैः क्रमात् ।
विन्यस्याङ्गानि मूर्द्धादिचरणान्तञ्च संस्पृशेत् ॥
ततस्तेन क्रमेणैव समुद्धृत्य च भस्मना ।
सर्व्वाङ्गोद्धूलनं कुर्य्यात् प्रणवेन शिवेन वा ॥
ततस्त्रिपुण्ड्रं रचरेत्त्रियायुषसमाक्षयम् ।
शिवभावं समाप्तस्य शिवयोगं समाचरेत् ॥
कुर्य्यात्त्रिसन्ध्यमप्येवमेतत् पाशुपतं व्रतम् ।
पूजनीयो महादेवो लिङ्गमूर्त्तिः सनातनः ।
पद्ममष्टदलं हैमं नवरत्नैरलङ्कृतम् ।
कर्णिकाकेसरोपेतमासनं परिकल्पयेत् ॥
विभवे तदभावे तु रक्तं सितमथापि वा ।
पद्मं तस्याप्यभावे तु केवलं भावनामयम् ॥
ततपद्मकर्णिकामध्ये कृत्वा लिङ्गं कनीयसम् ।
स्फाटिकं पीठिकोपेतं पूजयेद्धि ततःक्रमात् ॥
प्रतिष्ठाप्य विधानेन तल्लिङ्गं कृतशोधनम् ।
परिकल्प्यासनं मूर्त्तिं पञ्चवक्त्रप्रकारतः ॥
पञ्चगव्यादिभिः पूर्य्यैर्यथाविभवविस्तरैः ।
स्नापयेत् कलशैः पूर्णैः सहस्रादिषु सम्भवैः ॥
गन्धद्रव्यैः सकर्पूरैश्चन्दनाद्यैः सकुङ्कुमैः ।
सवेदिकं समालिप्य लिङ्गं भूषणभूषितम् ॥
बिल्वपत्रैश्च पद्मैश्च रक्तश्वेतैस्तथोत्पलैः ।
नीलोत्पलैस्तथान्यैश्च पुष्पैस्तैस्तैः सुगन्धिभिः ॥
पुण्यैश्च श्रुतपत्रैश्च चित्रैर्दूर्व्वाक्षतादिभिः ।
समभ्यर्च्च्य यथालाभं महापूजाविधानतः ॥
धूपं दीपं तथाचार्घ्यं नैवेद्यञ्च समादिशेत् ।
निवेदयित्वा विभवे कल्याणञ्च समाचरेत् ॥
इष्टानि च विशिष्टानि न्यायेनोपार्जितानि च ।
सर्व्वद्रव्याणि देयानि व्रते तस्मिन् विशेषतः ॥
शीघ्रोत्पलपद्मानां संख्या साहस्रिकी मता ।
प्रत्येकममरा संख्या शतमष्टोत्तरं द्विजाः ॥
तत्रापि च विशेषेण न त्यजेद्बिल्वपत्रकम् ।
हैममेकं परं प्राहुः पद्मं पद्मसहस्रकात् ।
नीलोत्पलादिष्वप्येतत्समानं बिल्वपत्रकैः ।
पुष्पान्तरान्यनियमादृयथालाभं निवेदयेत् ॥
अष्टाङ्गमर्घ्यमुद्दिष्टं धूपोऽतोपौ विशेषतः ।
क्षणागुरुनखोराख्ये वक्त्रे सर्व्ये मनःशिलाम् ॥
चन्दनं वामदेवाख्ये हरितालञ्च पौरुषे ।
ईशाने भवितं केचिदालेपनमितीदृशम् ॥

न धूप इति मन्यन्ते धूपान्तरविधानतः ।
सितागुरुमघोराख्ये सुखे कृष्णागुरुं पुनः ॥
पौरुषे गुग्गुलुं सद्मे सौम्ये सौगन्धिकं सुखे ।
ईशानेऽपि उशीरादि दद्याद्धूपं विशेषतः ॥
शर्करामधुकर्पूरकर्पिजाघृतसंयुतम् ।
चन्दनागुरुकाष्ठाद्यं सामान्यं संप्रचक्षते ॥
कर्पूरवर्तिराख्याता दीपावली ततः ।
अर्घ्यमाचमनं देयं प्रतिवक्त्रमतःपरम् ॥
प्रथमावरणे पूज्यौ क्रमाद्वेरम्बषण्मुखौ ।
ब्रह्माङ्गानि ततश्चैवं प्रथमावरणेऽर्चिते ॥
द्वितीयावरणे पूज्या विघ्नेशाश्चक्रवर्त्तिनः ।
तृतीयावरणे पूज्या भवाद्याश्चाष्टमूर्तयः ॥
महादेवाश्चयस्तच तथैकादशमूर्तयः ।
चतुर्थावरणे पूज्याः सर्व्व एव गणेश्वराः ॥
बहिरेव तु पद्मस्य पष्ठमावरणे क्रमात् ।
दश दिक्पतयः पूज्याः सास्त्राः सानुचरास्तथा ॥
ब्रह्मणो मानसाः पुत्राः सर्व्वेऽपि ज्योतिषाङ्गणाः ।
सर्व्वे देवाश्च देवश्च सर्व्वाः सर्व्वेऽपि खेचराः ॥
पातालवासिनश्चान्ये सर्व्वे मुनिगणा अपि ।
योगिनो मुख्यतः सर्व्वे पष्ठमे मातरस्तथा ॥
क्षेत्रपालश्च सगणः सर्व्वे चेतश्चराचरम् ।
अथावरणपूजान्ते सम्पूज्य परमेश्वरम् ॥
साङ्गं सयज्ञनं हृद्यं हविर्भक्ष्या निवेदयेत् ।
मुखवासादिकं दत्त्वा ताम्बूलं सोपदंशकम् ॥
अलङ्कृत्य च भूयोऽपि नानापुष्पविभूषणैः ।
नीराजनान्ते विस्तीर्णं पूजाशेषं समापयेत् ॥
चन्द्रसङ्गाग्रहारञ्च शयनीये समर्पयेत् ।
आद्यं नृपोचितं हृद्यं तत्सर्व्वमनुरूपतः ॥
हुत्वा च कारयित्वा च हुत्वा च प्रतिपूजनम् ।
स्तोत्रं यथोक्तं जप्त्वा विद्यां पञ्चाक्षरीं जपेत् ॥
प्रदक्षिणां प्रणामञ्च कृत्वात्मानं समर्पयेत् ।
ततः पुरस्तादेवस्य गुरुविप्रे च पूजयेत् ॥
दत्त्वार्घ्यमष्टौ पुष्पाणि देवसङ्गस्य लिङ्गतः ।
अग्नेयाग्निं समुत्सृज्य उद्वास्य च तमद्भुत ॥
प्रत्यहं जप इत्येवं कुर्य्यात्सर्व्वं पुरोदितम् ।
ततस्तत्पाशुपं लिङ्गं सर्व्वोपकरणान्वितम् ॥
समर्पयेत् स्वगुरवे स्थापयेद् वा शिवालये ।
संपूज्य च गुरून्नत्वा व्रतिनश्च विशेषतः ॥
भक्तान् द्विजांश्च शक्त्येदीनानाथांश्च तोषयेत् ।
स्वयं चानशनायः फलमूलाशनोऽथवा ॥
पयोव्रती वा भिक्षाशी भवेदेकाशनस्तथा ।
नक्तं भुक्ताशनो नित्यं भूशय्यानिरतः शुचिः ॥
भस्मशायी क्षये शायी चीरालिनशयोऽथवा ।
ब्रह्मचर्य्यरतो नित्यं व्रतमेतत् समाचरेत् ॥
अर्कवारे तथार्द्रायां षष्ठ्यष्टम्योश्च पक्षयोः ।
चतुर्दश्यां शुक्लपक्षे उपवसेदपि ॥
पाषण्डपतितोदक्यासूतिकान्त्यजपूर्व्वकान् ।
वर्ज्जयेत्सर्व्वयत्नेन मनसा कर्म्मणा गिरा ॥
क्षमादानदयासत्याहिंसाशीलः सदा भवेत् ।
सन्तुष्टश्च प्रशान्तश्च तपोध्यानरतः सदा ॥
कुर्य्यात्त्रिषवणस्नानं भस्मस्नानमथापि वा ।
पूजां वैशेषिकीञ्चैव मनसा कर्म्मणा गिरा ॥
बहुनात्र किमुक्तेन नाचरेदशिवं व्रती ।
प्रमादात्तु तथाचारे निरूप्य गुरुलाघवम् ॥
उचितां निष्कृतिं कुर्य्यात् पूजाहोमजपादिभिः ।
आसमाप्तेर्व्रतस्थेवमाचरेन्न प्रमादतः ॥
गोदानञ्च वृषोत्सर्गं कुर्य्यात् पूजां जपं सदा ।
सामान्यमेतत् कथितं व्रतस्यास्य समासतः ॥
प्रतिमासं विशेषञ्च प्रवक्ष्यामि यथाक्रमम् ।
वैशाखे वज्रलिङ्गन्तु ज्येष्ठे मारकतं शुभम् ॥
आषाढे मौक्तिकं विद्याच्छ्रावणे नीलनिर्म्मितम् ।
भाद्रे भाद्रपदे चैव पद्मरागमयं परम् ॥
आश्वयुज्याञ्च विधिवल्लोमेदकमयं शुभम् ।
कार्त्तिक्यां वै इमं लिङ्गं वैदूर्य्यं मार्गशीर्षके ॥
पुष्यरागमयं पौषे माघे द्युमणिजं तथा ।
फाल्गुन्यां चन्द्रकान्तोत्थं चैत्रे तद्वत्प्रयोऽथवा ॥
सर्व्वमासेषु रत्नागमलाभे हैममेव वा ।
हैमाभावे राजतं वा ताम्रं श्रेयस्करमेव वा ॥
स्फटिकं वा यथालाभं चणिकं चान्यदेव वा ।
सर्व्वगन्धमयं वाथ लिङ्गं कुर्य्याद्यथारुचि ॥
व्रतावसानसमये समाचरितनैत्यकः ।
कृत्वा वैशेषिकीं पूजां हुत्वा चैव यथा पुरा ॥
संपूज्य च सदाचार्य्यं व्रतिनश्च विशेषतः ।
दैक्षिकेणाभ्यनुज्ञातः प्राङ्मुखो वाप्युदङ्मुखः ॥
दर्भासनो दर्भपाणिः प्राणायामौ नियम्य च ।
जपित्वा शक्तितो मूलं ध्यात्वा शास्त्रं क्षिपेत्क्रमम् ॥
अनुज्ञाप्य यथापूर्व्वं नमस्कृत्य कृताञ्जलिः ।
संसृतिरुजामि भगवन् ! व्रतमेतत्त्वदाज्ञया ॥
इत्युक्त्वा लिङ्गमूलन्तु दर्भानुत्तरतस्त्यजेत् ।
ततो दण्डजटाचीरमेखलाद्यपि मोक्षयेत् ॥
पुनराचम्य विधिवत् पञ्चाक्षरमुदीरयेत् ।
यः कृत्वात्यन्तिकीं दीक्षामादेहान्तमनाकुलः ॥
व्रतमेतत् प्रकुर्वीत स तु वै नैष्ठिकः स्मृतः ।
सोऽग्न्याश्रमी च विज्ञेयो महापाशुपतस्तथा ॥
स एव तपसां श्रेष्ठः स एव च महाव्रती ।
न तेन सदृशः कश्चित् कृतकृत्यो सुसत्तम ॥
यतियों नैष्ठिको ज्ञातस्तमाहुर्नैष्ठिकोत्तमम् ।
योऽनशनादशक्तं वा व्रतमेतत् समाचरेत् ॥
सोऽपि नैष्ठिकतुल्यः स्यात्तीव्रव्रतसमन्वयात् ।
पूतात्मा यश्चरेदेतद्व्रतं व्रतपरायणः ॥
दिनैकादिवसं वापि स च कश्चन नैष्ठिकः ।
कृत्यमित्येव निष्कामो यश्चरेद् व्रतमुत्तमम् ॥
शिवार्पितात्मा सततं न तेन सदृशः क्वचित् ।
भस्मच्छन्नो द्विजो विद्वान् महापातकसम्भवैः ॥
पापैर्विमुच्यते सद्यो मुच्यते नात्र संशयः ।
रुद्राग्नेर्यत्परं वीर्य्यं तद्भस्म परिकीर्त्तितम् ॥
तस्मात्सर्व्वेषु कालेषु वीर्य्यवान् भस्मसंयुतः ।
भस्मनिष्ठस्य दह्यन्ते दोषा भस्माग्निसङ्गमात् ॥
भस्मस्नानविशुद्धात्मा भस्मनिष्ठ इति स्मृतः ।
अङ्गानि दिग्वस्त्रसर्व्वाङ्गो भस्मदीप्तत्रिपुण्ड्रकः ॥
भस्मशायी च पुरुषो भस्मकल्मषभक्षणात् ।
भूतिर्भूतिकरी पुंसां रक्षा रक्षाकरी परम् ॥
किमन्यदिह वक्तव्यं भस्माचारात्मकारणम् ।
व्रती च भस्मना स्नातः स्वयं देवो महेश्वरः ॥
परमास्त्रञ्च शैवानां भस्मैतत्पारमेश्वरम् ।
द्यौभ्यागस्त्य तपसि स्नापदी यमिवारिता ॥
तस्मात्सर्व्वप्रयत्नेन लब्ध्वा पाशुपतं व्रतम् ।
धनवद्भस्म संगृह्य भस्मस्नायरतो भवेत् ॥"

इति श्रीशिवपुराणे वायुसंहितायां पूर्व्वभागे एकोनविंशोऽध्यायः ॥ * ॥)

पाशुपतास्त्र, क्ली, (पाशुपतं पशुपतिसम्बन्धि अस्त्रम् ।) पशुपतेः शूलास्त्रम् । तस्य स्वरूपं यथा,—

"मशानगोऽपि सन्धित्य यत्तत् पाशुपतं परम् ।
सहस्रशीर्षं महाकायं युगान्तानिलसमप्रभम् ॥
पञ्चवक्त्रं महाघोरं दशबाहुं त्रिलोचनम् ।
सौम्यं घोरं सुघोराख्यदुर्द्धर्षं भयोत्कटम् ॥
जटाभारेन्दुगङ्गाहिप्रियमाणं शिवाङ्कजम् ।
वेणुवीणाशङ्खघण्टं डमरुकारावसंकुलम् ॥
शिवाराव भयात्रासि शत्रुवायसचेष्टितम् ।
उल्कादण्डज्वलज्वालं गोनाशुक्षतभूषणम् ।
ललन्मेखलनागेन्द्रं गजचर्म्मार्द्रवाससम् ।
कैकरं तर्ज्जमानन्तु शूलखट्वाङ्गधारणम् ॥
असमानं समस्तिदं त्रैलोक्यं सचराचरम् ।
पुरतो विघ्ननाशस्य त्रिशिखानं व्यवस्थितम् ॥"

इति देवीपुराणम् ॥

पाशुपाल्य, क्ली, (पशुपालस्य भावः कर्म्म वा । पशुपाल + ष्यञ् ।) वैश्यवृत्तिः । पशून् गोमहिष्यादीन् पालयति पशुपालः छात् यञ् । पशुपालस्य भावः कर्म्म वा इत्यर्थे ष्यञ्प्रत्ययनिष्पन्नम् । इत्यमरभरतौ ॥ (यथा, मार्कण्डेये । २७ । ६ ।
"दानमध्ययनं यज्ञो वैश्यस्यापि विधेव यः ।
वाणिज्यं पाशुपाल्यञ्च कृषिश्चैवास्य जीविका ॥")

पाश्चात्य, त्रि, (पश्चात् + "दक्षिणापश्चात्पुरसस्त्यक् ।" ४ । २ । ६८ । इति त्यक् ।) पश्चाद्भवः । (यथा, देवीभागवते । १ । १७ । ६६ ।
"पाश्चात्यं यामिनीयामं ध्यानमेवान्वपद्यत ।
स्नात्वा प्रातः क्रियाः कृत्वा पुनरीक्षे समाविशत् ॥")

पश्चिमदेशजातः । इति सुग्धबोधव्याकरणम् ॥ (यथा, महाभारते । १ । १२१ । ११ ।
"स विनित्य गृहीत्वा च भूपतीन् राजसत्तमः ।
प्राच्यानुदीच्यान् पाश्चात्यान् दाक्षिणात्यानकाशयत् ॥")

पाश्चात्याकारस्वभाव, क्ली, (पाश्चात्ये पश्चिमदिग्भवे आकारे स्वभाव उत्पत्तिर्यस्य ।) बालस्त्रीस्वभावम् । तत्पर्य्यायः । रोमशम् २ रासभस्वभावम् ३ । इति रत्नमाला ॥

पाश्या, स्त्री, (पाशानां समूहः । पाश + "पाशादिभ्यो यः ।" ४ । २ । ४८ । इति यः ।) पाशसमूहः । इत्यमरः । ३ । २ । ४३ ॥

पावकः, पुं, (पवति वह्नातीव चरत्यौ । पव बन्धे + ण्वुल् ।) पादाभरणविशेषः । पाशुली इति भाषा ॥ यथा,—

"रत्नपायकषट्कैश्च विराजितपदाङ्गुलेः ॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ४ अध्यायः ॥

पाषण्डः, पुं, (पापं वनोति दर्शनसंसर्गादिना ददातीति। पण व दाने + पमन्तात् डः। पृषोदरादित्वात् साधुः। यद्वा, पाति रक्षति दुष्कृतेभ्य इति। पा + किप्। पा वेदधर्म्मस्तं षण्डयति खण्डयतीति। यद्वुक्तम्।
"पालनाच्च त्रयीधर्म्मः पाशब्देन निगद्यते।
तं यः(ख)ण्डयति ते वस्मात् पाषण्डास्तेन हेतुना॥
नानावेषधरा नानादेशाः पाषण्डिनो मताः॥")
वेदविरुद्धाचारवान् सर्ब्बवर्णेषिद्धधारी। बौद्धजैनादिः। इति भरतः॥ तत्पर्य्यायः। सर्ब्बलिङ्गी २। इत्यमरः। २।७।४५॥ कौलिकः ३ पाषण्डिकः ४। इति शब्दरत्नावली॥ * ॥ पाषण्डादिसमासादौ दोषो यथा,—
"वस्मात् पाषण्डिभिः पापैरालापं स्पर्शनं त्यजेत्।
विशुद्धतः क्रियाकाले यज्ञादौ चापि दीक्षितः॥
क्रियाहानिर्भवेद्यस्य सालमेकं प्रजायते।
तस्यावलोकनात् सूर्य्यं पश्येत् मतिमान् नरः॥
किं पुनर्य्येतु सम्भाषा त्रयी सर्ब्बात्मना द्विज!।
पाषण्डभोजिभिः पापैर्ब्बेदबाह्यविरोधिभिः॥
पाषण्डिनो विकर्म्मस्थान् वैड़ालव्रतिकान् शठान्।
हैतुकान् वकवृत्तींश्च वाङ्मात्रेणापि नार्च्चयेत्॥
दूरापास्तस्तु संसर्गः सङ्गात्या वापि पापिभिः।
पाषण्डिभिर्दुराचारैस्तस्मात्तान् परिवर्ज्जयेत्॥
एते नग्नास्तवाख्याता दृष्ट्या ह्याद्योपघातकाः।
येषां सम्भाषणात् पुंसां दिनपुण्यं प्रणश्यति॥
एते पाषण्डिनामानो लोकतान्न आलपेद्बुधः।
पुण्यं नश्यति सम्भाषादेतेषां तद्दिनोद्भवम्॥
पुंसां जटाधरत्वमौण्ड्यवतां वृथैव
मौघाग्निनामखिलशौचनिराकृतानाम्।
तोयप्रदानपिलपिण्डबहिष्कृतानां
सम्भाषणादपि नरा नरकं प्रयान्ति॥"
इति विष्णुपुराणे ३ अंशे १८ अध्यायः॥ * ॥
पाषण्डादीनां लक्षणं यथा,—
"भवः स्वार्थात् पाषण्डो विकर्म्मस्थो निगद्यते।
वदा धर्म्मध्वजी नित्यं मुरध्वज इवोत्थितः॥
प्रकाशयति च पापानि वैड़ालं नाम तद्व्रतम्॥
तद्वान् वैड़ालकस्तिलः॥
शिवं वक्ति परोऽन्यच्च विपरीतं करोति यत्।
यत्तामसाधमैश्चेष्टं शठोऽयं कथितो बुधैः॥
सन्दिग्धहेतुभिर्यः सत्कर्म्मस्थ सहेतुकः।
अन्धागदृष्टिर्नैतिकः स्वार्थसाधनतत्परः॥
शठो मिथ्याविनीतश्च वकवृत्तिरुदाहृतः॥" इति।
एतट्टीकायां स्वामी॥ * ॥ अपि च।
सदाशिव उवाच।
"वेदान्यदेवं परत्वेन वदन्यज्ञानमोहिताः।
नारायणाङ्गहन्तारं ते वै पाषण्डिनस्तथा॥
कपालभस्मास्थिधरा ये ह्यवैदिकलिङ्गिनः।
अते वनस्थाश्रमास्य जटावल्कलधारिणः।
अवैदिकक्रियोपेतास्ते वै पाषण्डिनस्तथा॥
शङ्खचक्रोर्द्धपुण्ड्रादिचिह्नैः प्रियतमैर्हरेः।
रहिता ये द्विजा देवि! ते वै पाषण्डिनो मताः॥
श्रुतिस्मृत्युक्तमाचारं यस्तु नाचरति द्विजः।
स पाषण्डीति विज्ञेयः सर्ब्बलोकेषु गर्हितः॥
समस्तयज्ञभोक्तारं विष्णुं ब्रह्मण्यदेवतम्॥
उद्दिश्य देवताश्चैव जुहोति च ददाति च।
स पाषण्डीति विज्ञेयः स्वतन्त्रो वापि कर्म्मसु॥
स्वातन्त्र्यात् क्रियते यैस्तु कर्म्म वेदोदितं सदृत्।
विना वै भगवत्प्रीत्या ते वै पाषण्डिनः स्मृताः॥
यस्तु नारायणं देवं ब्रह्मरुद्रादिदेवतैः।
समत्वेनैव वीक्षेत स पाषण्डी भवेत् सदा॥
अनास्था क्रियते यैस्तु मनोवाक्कायकर्म्मभिः।
वासुदेवं न जानाति स पाषण्डी भवेत् द्विजः॥
हरेर्नामैकमन्त्राभ्यां लोकाः सङ्क्षिप्तविस्तृताः।
यदि वर्णाश्रमाद्या ये ते वै पाषण्डिनः स्मृताः॥
वर्णानां गुरवो नित्यं शिवे यद्यप्यवैष्णवाः।
भगवद्धर्म्मरहिता वैष्णवादिविनिन्दकाः॥
रजस्तमोमया जीवहिंसका जीवभक्षकाः।
असत्प्रतिग्रहरता देवला ग्रामयाजकाः॥
भ्रष्टाचारास्तथा ब्रात्या नानाविद्युधपूजकाः।
देवतोच्छिष्टभोक्तारो मूढवत्क्रियाः॥
विविधासत्कर्म्मरता भक्ष्याद्यविचारिणः।
लोभमोहमदक्रोधकामाहङ्कारिणः सदा॥
एवंविधाः पारदारिकाद्या येऽत्र शुभानने!।
अन्येषां का कथा तत्र पाषण्डा ब्राह्मणाः स्मृताः॥
वर्णाश्रमाद्या ये मर्त्याः स्वस्वधर्म्मविवर्ज्जिताः।
ते वै पाषण्डिनो देवि! नारायणबहिर्मुखाः॥
सर्ब्बाग्निगो द्विजा येऽपि सर्ब्बविक्रयिणस्तथा।
षड्वेदाचाररहितास्ते वै पाषण्डिनो मताः॥
ये त्वसङ्कल्पपाकादिरता लोका निरन्तरम्।
शिवे! पाषण्डिनो ज्ञेया इह ते नात्र संशयः॥
विष्णुवैष्णवगोभूमिदेवादिषु विशेषतः।
अश्वत्थतुलसीतीर्थक्षेत्रादिषु सहागुरौ॥
लक्ष्मीसरस्वतीगङ्गायसुनासु वरानने!।
स्मृताः पाषण्डिनस्तेऽपि ये न सेवापरायणाः॥
रुद्राक्षेन्द्राक्षभद्राक्षस्फाटिकाक्षादिधारिणः।
जटिला भस्मलिप्ताङ्गास्ते वै पाषण्डिनः प्रिये!॥
असिजीवी मसीजीवी धावनः पाचकस्तथा।
एते पाषण्डिनो विप्रा मादकद्रव्यभोजिनः॥
देवि! कार्ष्णादयो भक्ता अनन्यशरणास्तु ये।
पाषण्डसङ्गं न कुर्य्युस्तेऽन्ने पानभोजने॥
यदि देववशालोभान्मोहात्तस्यान्नभोजनम्।
तत्क्षणं जलपानञ्च चक्षुस्तत्सङ्गमादिकम्॥
तत्पानभोजनालापसङ्गालिङ्गनतोऽचिरात्।
पाषण्डिनो वैष्णवाः स्युरन्येषामपि का कथा॥
किमत्र बहुनोक्तेन ब्राह्मणा ये ह्यवैष्णवाः।
असदाचरणाच्चैव स्युस्तदा पाषण्डिनः स्मृताः॥
एतद्भोजनपानादिकर्म्मभिर्वैष्णवा जनाः।
पाषण्डिनस्तथा सूर्व्वे जटाभस्मादिधारिणः॥"
इति पाद्मोत्तरखण्डे पाषण्डाचरणं नाम ४२ अध्यायः॥
तस्य त्याज्यत्वं यथा,—
"त्यज पाषण्डसंसर्गं सङ्गं भज सतां सदा।
कामं क्रोधञ्च लोभञ्च मोहञ्च मदमत्सरौ॥"
इति पाद्मे क्रियायोगसारे १६ अध्यायः॥ * ॥
तस्य राष्ट्राद्बहिष्कर्त्तव्यता यथा,—
"कितवान् कुशीलवान् क्रूरान् पाषण्डस्थांश्च मानवान्।
विकर्म्मस्थान् शौण्डिकांश्च चिप्रं निर्ब्बासयेत् पुरात्॥
एते राष्ट्रे वर्त्तमाना राज्ञः प्रच्छन्नतस्कराः।
विकर्म्मक्रियया नित्यं बाधन्ते भद्रिका प्रजाः॥"
इति मानवे ९ अध्यायः॥
अपि च।
"आक्रुष्टांश्च तथा लुब्धान् दृष्टार्थांस्तत्त्वभाषिणः।
पाषण्डिनस्तापसादीन् परराष्ट्रेषु योजयेत्॥"
इति युक्तिकल्पतरुः॥
पाषण्डकः, पुं, (पाषण्ड एव। स्वार्थे कन्।) पाषण्डः। इति शब्दरत्नावली॥
पाषण्डी, [न्] पुं (पां त्रयीधर्म्मं षण्डयतीति। पा + षण्ड + णिनिः।) पाषण्डः। इति जटाधरः॥ (यथा, मनुः। ४। ३०।
"पाषण्डिनो विकर्म्मस्थान् वैड़ालव्रतिकान् शठान्।
हैतुकान् वकवृत्तींश्च वाङ्मात्रेणापि नार्च्चयेत्॥")
पाषाणः, पुं, (पषति पीड्यतेऽनेनेति। पष पीड़ने + बाहुलकात् आनच्। "पर्व्वर्त्तिच।" २। ६०। इत्युज्ज्वलदत्तोक्त्या स च णित्।) प्रस्तरः। तत्पर्य्यायः। शावः २ उपलः ३ अश्मा ४ शिला ५ दृषत् ६। इत्यमरः। २।३।४॥ दृषत् ७। इति भरतः॥ प्रस्तरः ८ पाराडुकः ९ पारटीटः १० शल्लरः ११ काचकः १२। इति शब्दरत्नावली॥ (यथा, देवीभागवते। ४। २१। ५४।
"गते ऽथ नारदे कंसः समाकूयाथ वासकम्।
पाषाणे षोधयामास सुखं प्राप च मन्दधीः॥"
पाषाणादिनिर्म्मितत्वात देवताप्रतिमादि। यथा, व्यार्य्यासप्तशत्याम्। ३८६।
"पूजां विना प्रतिष्ठां नास्ति न मन्त्रं विना प्रतिष्ठा च।
तदुभयविप्रतिपन्नः पश्यतु गीर्व्वाणपाषाणम्॥")
पाषाणगर्भः, पुं, दुष्टसन्धिबन्धनरोगविशेषः। तल्लक्षणमाह।
"वातश्लेष्मनसूद्भूतः श्वयथुर्दृढसन्धिजः।
स्थिरो मन्दरुजः स्निग्धो ज्ञेयः पाषाणगर्भकः॥"
स्थिरः कठिनः॥ * ॥ तच्चिकित्सा यथा,—
"पाषाणगर्भं पूर्व्वं स्वेदयेत् कुशलो भिषक्।
ततः पनसिकाप्रोक्तैः कल्कैरुष्णैः प्रलेपयेत्॥
वातश्लेष्मिकशोथघ्नैः कल्कैरन्यैश्च लेपयेत्।
परिपाकगतं भित्त्वा व्रणवत्तमुपाचरेत्॥
जलौकाभिर्हृते रक्ते स शाम्यति विशोषधम्।
एतत्सर्व्वेषु बहुशु प्रेक्षितं लिखितं ततः॥"
इति भावप्रकाशः॥
पाषाणचतुर्दशी, स्त्री, (पाषाणसाध्या पाषाणवत्पिष्टकभोजनसाध्या चतुर्दशी।) दीपिकाश्रिस्यरविकरयुक्तफाल्गुनीयचतुर्दशी। यथा, भविष्ये।

"वृश्चिके शुक्लपक्षे तु या पाषाणचतुर्दशी।
तस्यामाराधयेद्गौरीं नक्तं पाषाणभोजनैः॥
पाषाणभोजनैः पाषाणाकारपिष्टकभोजनैः।"
इति तिथ्यादितत्त्वम्॥

पाषाणदारकः, पुं, (दारयति विदारयतीति। दृ+णिच्+ण्वुल्। पाषाणस्य दारकः।) टङ्कः। इति हेमचन्द्रः। ३। ५८३॥

पाषाणदारणः, पुं, (दारयतीति। दृ+णिच्+ल्युः। पाषाणस्य दारणो विदारकः।) टङ्कः। इत्यमरः। २। १०। ३४॥

पाषाणभेदनः, पुं, (पाषाणं अश्मरीं भिनत्तीति। भिद्+ल्युः।) वृक्षविशेषः। छाड़ुर्जुड़ी इति भाषा। तत्पर्य्यायः। अश्मघ्नः २ शिलाभेदः ३ अश्मभेदकः ४ श्वेता ५ उपलभेदी ६ पलभित् ७ शिलगर्भजः ८। अस्य गुणाः। मधुरत्वम्। तिक्तत्वम्। मेहहृद्दाहमूत्रकृच्छ्राश्मरीनाशित्वम्। शीतलत्वञ्च। इति राजनिर्घण्टः॥ अपि च।
"पाषाणभेदकोऽश्मघ्नो गिरिभिद्विन्नयोजनी।
अश्मभेदी हिमस्तिक्तः कषायो वस्तिशोधनः॥
भेदनो हन्ति दोषार्शोगुल्मकृच्छ्राश्महृद्रुजः।
योनिरोगान् प्रमेहांश्च क्षीहाशूलव्रणानि च॥"
इति भावप्रकाशः॥

पाषाणभेदी, [न्] पुं, (पाषाणं अश्मरीं भिनत्तीति। भिद्+णिनिः।) वृक्षविशेषः। पाथरचुर इति भाषा। तत्पर्य्यायः। अश्मभेदः २ शिलाभेदः ३ अश्मभित् ४। इति रत्नमाला॥ (अश्मभेदशब्दे ज्ञातव्यमस्य विवरणम्॥)

पाषाणी, स्त्री, (पाषाण+अल्पार्थे ङीष्।) क्षुद्रपाषाणः। स तु परिमापकविशेषः। वाट्खारा इति भाषा। तत्पर्य्यायः। पृषाकरा २। इति शब्दचन्द्रिका॥

पाहानः, पुं, (पाति रक्षति दुष्कृतेभ्य इति। पा+क्विप्। पां त्रयीधर्म्मं हन्ति गच्छतीति। हन् गतौ+डः। पाहं ब्रह्मार्थं अनतीति। अच्।) ब्रह्मदारुवृक्षः। इति शब्दचन्द्रिका॥

पि, भू गतौ। इति कविकल्पद्रुमः॥ (तुदां-परं-सकं-अनिट्।) भू, पियति। इति दुर्गादासः॥

पिक, पुं, (अपि कायति शब्दायते इति। अपि+कै+"आतश्चोपसर्गे।" ३। १। १३६। इति कः। अपेरकारलोपः।) कोकिलः। इत्यमरः। २। ५। १६। (यथा,—
"पिक! विधुस्तव हन्ति समं तम-
स्त्वमपि चन्द्रविरोधिकुहूरवः।
इति तयोर्गणितं हि विरोधिता
कथमहो ममता मम तापने॥"
इत्युद्भटः॥)

पिकप्रिया, स्त्री, (पिकानां प्रिया।) महाजम्बूः। इति राजनिर्घण्टः॥

पिकबन्धुः, पुं, (पिकानां बन्धुरिव।) आम्रवृक्षः। इति त्रिकाण्डशेषः॥

पिकरागः, पुं, (पिकानां रागोऽनुरागो यत्र।) आम्रवृक्षः। इति राजनिर्घण्टः।

पिकवल्लभः, पुं, (पिकानां वल्लभः।) आम्रवृक्षः। इति भावप्रकाशः॥ (गुणाश्चास्य आम्रशब्दे ज्ञातव्याः॥)

पिकाक्षः, पुं, (पिकस्य अक्षि लोचनं तद्वत् वर्णो यस्य। समासे षच्।) रोचनी। इति शब्दचन्द्रिका॥

पिकाङ्गः, पुं, (पिकस्याङ्गमिव अङ्गं यस्य।) पक्षिविशेषः। इति शब्दचन्द्रिका॥

पिकानन्दः, पुं, (पिकानामानन्दो यस्मिन्।) वसन्तकालः। इति राजनिर्घण्टः॥

पिकी, स्त्री, (पिक+स्त्रियां ङीष्।) कोकिला। इति राजनिर्घण्टः॥

पिकेक्षणा, स्त्री, (पिकस्य ईक्षणं लोचनं तद्वत् वर्णो यस्याः।) कोकिलाक्षः। इति राजनिर्घण्टः॥ कोकिलचक्षुस्तुल्यचक्षुर्युक्ता च॥

पिक्कः, पुं, (पिक् इत्यव्यक्तशब्देन कायति शब्दायते इति। कै+कः। पिक इव कायतीति। पृषोदरादित्वात् साधुरित्येके।) हस्तिशावकः। इति शब्दमाला॥

पिङ्गं, क्ली, (पिङ्गतीति। पिङ्गि वर्णे+अच्। न्यङ्क्वादित्वात् कुत्वम्।) बालकः। इति मेदिनी। गे, १२॥ हरितालम्। इति राजनिर्घण्टः॥

पिङ्गः, पुं, (पिङ्गि वर्णे+अच्। कुत्वञ्च।) पिङ्गलवर्णः। तद्वति, त्रि। इत्यमरः। १। ५। १६॥ (यथा, महाभारते। १। १२३। ३२।
"पद्मपत्राननः पिङ्गलैजसा प्रज्वलन्निव॥")
मूषकः। इति राजनिर्घण्टः॥

पिङ्गकपिप्पा, स्त्री, (पिङ्गा कपिप्पा च। वर्णो वर्णेनेति समासः।) तैलपायिका। इति हेमचन्द्रः। ४। २७३॥

पिङ्गचक्षुः, [स्] पुं, (पिङ्गे चक्षुषी यस्य।) कुम्भीरः। इति हेमचन्द्रः। ४। ४१८॥

पिङ्गजटः, पुं. (पिङ्गा पिङ्गलवर्णा जटा यस्य।) शिवः। इति हेमचन्द्रः। २। ११३॥

पिङ्गलं, क्ली, (पिङ्गं लातीति। ला+कः।) रीतिः। इति राजनिर्घण्टः॥

पिङ्गलः, पुं, (पिङ्गो वर्णोऽस्यास्तीति। पिङ्ग+"सिध्मादिभ्यश्च।" ५। २। ९७। इति लच्।) नीलपीतसम्मिश्रितवर्णः। तत्पर्य्यायः। कडारः २ कपिलः ३ पिङ्गः ४ पिङ्गजः ५ कदः ६। तद्वति, त्रि। इत्यमरः। १। ५। १६॥ केचित् द्वयं द्वयं पर्य्यायमाहुः। अत्र नीलपीतः कपिलः। रोचनाभः पिङ्गजः। कनकपिङ्गलः कदः। इति सुभूतिः॥
"पिङ्गजो रोचना पाण्डुः कदः कनकपिङ्गलः॥"
इति नाममाला॥
"पिङ्गदीप्तशिखाभः स्यात् पिङ्गजः पद्ममूलिवत्।
पीतनीलहरिद्रक्तः कडारस्तृणवद्भिवत्॥
अयस्तूद्रिक्तः पीताङ्गः कपिलो रोचनाच्छविः॥
इत्यत्र भेदोऽपि दृश्यते। अश्वभेदत्वादिहासौ नाहृतः।" इति तट्टीकायां भरतः॥ * ॥ नागभेदः। (यथा, महाभारते। १। ३५। ६।
"निष्ठानको हेमगुहो नहुषः पिङ्गलस्तथा॥")
रुद्रः। चण्डांशुपारिभाषिकः। निधिभेदः। कपिः। अग्निः। इति मेदिनी। ले, ११३॥ मुनिविशेषः। (यथा, महाभारते। १। ५३। ६।
"ब्रह्मात्मभवन् साङ्गरहो अध्वर्युश्चापि पिङ्गलः॥")
नकुलः। स्थावरविषविशेषः। इति हेमचन्द्रः। ४। १६५॥ चुद्रोलूकः। इति राजनिर्घण्टः॥ (यक्षविशेषः। यथा, महाभारते। ३। २३०। ५१।
"पिङ्गलो नाम यक्षेन्द्रो लोकख्यातनरुद्रायकः॥")
पर्व्वतविशेषः। इति ब्रह्माण्डपुराणम्॥) प्रभवादिषष्टिवर्षान्तर्गतैकषष्ट्युत्तमवर्षः। यथा,
"देशभङ्गोऽथ दुर्भिक्षं समासात् कथयाम्यहम्।
पिङ्गले चारुपद्माक्षि! दुर्भिक्षं नर्म्मदातटे॥"
इति ज्योतिस्तत्त्वम्॥ * ॥
पिङ्गलाचार्य्यकृतच्छन्दोग्रन्थविशेषः। यथा,—
"जो विविहमत्तसायरपारं पत्तो विविमलसद्देलम्।
पढमं भासतरण्डो नाओसो पिङ्गलो जयइ॥"
अस्य व्याख्या।
"अथ छन्दःशास्त्रकर्त्तुः पिङ्गलाचार्य्यस्य स्तुतिरूपं मङ्गलं निर्विघ्नग्रन्थपरिसमाप्तये ग्रन्थकृत् करोति। विविधा नानाप्रकारकविन्यासविशिष्टा मात्रा यत्र तद्विविधमात्रं छन्दःकदम्बं तदेव सागरः अतिदुर्गमत्वात् भाषा एव तरण्डा नौर्यस्य। प्राकृते कृतवता तेन भाषयैव छन्दःशास्त्रसूत्राणीत्यवगम्यते। केचित्तु लघुगुरुरूपा या विविधा मात्रा सैव सागरः तत्पारं प्राप्तः अपरिवधारणी। विमलया मत्या हेला यत्र तदूयथा स्यात् निर्म्मलबुद्ध्या हेलयैव पारं गत इत्यर्थः। प्रथममित्यनेन छन्दःशास्त्रस्य प्रथमप्रणेतायमित्यवगम्यते। अर्थान्तरमप्यनेनैव लभ्यते यो विविधमात्राभिः सागरपारं प्राप्तः विः पक्षी अर्थाज्गरुड़ः तस्य विमलमतौ हेला यत्र तत् यथा स्यात् भाषा अनुगयवाक् सैव नौर्यस्य ईदृशो नागो जयति। एवं हि श्रूयते भोक्तुमुद्यतं गरुड़ं दृष्ट्वा सर्व्वौशूलं सविनयं तमुवाच भो गरुड़ ममेदं कौशलं मद्य यदेकधारलिखितं मया लिख्यते तदा त्वं भद्र इत्युक्ता सागरतीरं षड्विंशत्यक्षरपर्य्यन्तं प्रस्तारं प्रदर्श्य ससुतं प्रविवेश गरुड़ोऽपि बलेन गुरुत्वेन तत्र मत्वा तद्दृष्ट्वाद्विरराम एतावद्भं बुद्धिगौरवं यस्य अतएव जयति उत्कर्षेण वर्त्तते तं प्रति प्रणतोऽस्मीति वाच्यते अथवा गाथायां भगणोपन्यासो मङ्गलार्थः प्रथमं शब्दादौ नयोर्भगणजगणयोर्योगोऽप्यतोऽपि कथमित्यवहितैर्भाव्यम्।" इति पिङ्गलग्रन्थस्यटीका च॥

पिङ्गललोहं, क्ली, (पिङ्गलं लोहमिति नित्यकर्म्मधारयः।) पित्तलम्। इति राजनिर्घण्टः॥

पिङ्गला, स्त्री, (पिङ्गल+टाप्।) वामनाखदक्षिणदिग्गजस्य स्त्री। इत्यमरः। १। ३। ४॥ कुञ्जरस्य करिणी। वेश्याविशेषः। इति मेदिनी। ले, ११३॥ तस्या उपाख्यानं यथा,—

"पिङ्गला नाम वेश्यासीद्विदेहनगरे पुरा।
तस्या मे शिक्षितं किञ्चिन्नियोध नृपनन्दन ! ॥
सा चैरिण्येकदा कामं सङ्केत उपनेष्यती।
अभूत् काले बहिर्द्वारि बिभ्रती रूपमुत्तमम् ॥
मार्ग आगच्छतो वीक्ष्य पुरुषान् पुरुषर्षभ ! ।
तान् गुरूदान् वित्तवतः कान्तान् मेनेऽर्थ-
कामुका ॥
आयतेष्वपयातेषु सा सङ्केतोपजीविनी।
अन्यस्तु वित्तवान् कोऽपि मामुपैष्यति भूरिदः ॥
एवं दुराशया ध्वस्तनिद्रा दार्व्यवतिष्ठती।
निर्गच्छन्ती प्रविशती निशीथं समपद्यत ॥
तस्या वित्ताशया शुष्यद्वक्त्राया दीनचेतसः।
निर्वेदः परमो जज्ञे चिन्ताहेतुः सुखावहः ॥
तस्या निर्विण्णचित्तायाः गीतं शृणु यथा मम ॥
निर्वेद आशापाशानां पुरुषस्य यथा ह्यसिः।
तृष्णाक्षयसुखस्यैहो देहश्चक्रं जिहासति ॥
पिङ्गलोवाच।
अहो मे मोहविलसितं पश्यतां विचितात्मनः।
या ह्यात्मदयितः कामं कामयेऽनेन बालिशा ॥
क्वचं समीपे रमणं रतिप्रदं
वित्तप्रदं नित्यमिमं विहाय।
अकामदं दुःखभयाधिशोक-
मोहप्रदं तुच्छमहं भजेऽज्ञा ॥
अहो मयात्मा परितापितो वृथा
सात्वैरवृत्त्यातिविगर्ह्यं वार्त्तया।
स्वैरागतादर्थघटोपयोगात्
प्रीतेन वित्तं रतिमात्मनेच्छती ॥
यदस्थिभिर्निर्मितवंशवंश्य-
स्नायुं त्वचा रोमनखैः पिनद्धम्।
क्षरन्नवद्वारमगारमेतद्-
विण्मूत्रपूर्णं मदुपैति कान्या ॥
विदेहानां पुरे ह्यस्मिन्नहमेकैव मूढधीः।
यान्यमिच्छत्यसत्यस्मादात्मदात् काममच्युतात् ॥
सुहृत् प्रेष्ठतमो नाथ आत्मा चायं शरीरिणाम्।
तं विक्रीयात्मनैवाहं रमेऽनेन यथा रमा ॥
क्षिपन् प्रियन्ते ममजन् कामा ये कामदा नराः।
आद्यन्तवन्तो भार्य्याया देवा वा कालविद्रुताः।
नूनं मे भगवान् प्रीतो विष्णुः केनापि कर्मणा।
निर्वेदोऽयं दुराशाया यन्मे जातः सुखावहः ॥
मैवं स्युर्मन्दभाग्यायाः क्लेशा निर्वेदहेतवः।
येनानुबन्धं निर्हृत्य पुरुषः शममृच्छति ॥
तेनोपकृतमादाय शिरसा ग्राम्यसङ्गताः।
स्वाहा दुराशाः शरणं प्रपद्ये तमधीश्वरम् ॥
सन्तुष्ट आत्मन्यवरुद्धसर्वस्तत्तेजसा नित्यविवृद्धबोधः।
पित्र्यप्रदत्तेन चिरं यथाऽलं रमेऽनुकामेन बृहद्गृहेण वै ॥
संसारकूपे पतितं विषयैर्मुषितेक्षणम्।
ग्रस्तं कालाहिनात्मानं कोऽन्यस्त्रातुमधीश्वरः ॥
आत्मैव ह्यात्मनो गोप्ता निर्विद्येत यदाखिलात्।
अप्रमत्त इदं पश्येद्ग्रस्तं कालाहिना जगत् ॥
ब्राह्मण उवाच।
इत्यखण्डितमन्तीद्रार्या व्यवसितमात्मनाम्।

पिङ्गा, स्त्री, (पिङ्गो वर्णोऽस्त्यस्या इति। अच् टाप् च।) गोरोचना। पिङ्गुः। नाडिका। चण्डिका। इति मेदिनी। गे, ११॥ हरिद्रा। इति शब्दचन्द्रिका। वंशरोचना। इति राजनिर्घण्टः। (यत्नामख्याता तपस्विनी। अस्या आश्रमस्तु तीर्थस्थानत्वेन प्रसिद्धः। यथा, महाभारते। ३। ८२। ५५।
"पिङ्गातीर्थं उपस्पृश्य ब्रह्मचारी नराधिप
कपिलानां नरश्रेष्ठ ! शतस्य फलमश्नुते
तथा च तत्रैव। १३। २५। ५३।
"उद्दालक उपस्पृश्य आर्ष्टिषेणस्य चाश्रमे।
पिङ्गायाश्चाश्रमे स्नात्वा सर्वपापैः प्रमुच्यते ॥")
पिङ्गाक्षः, पुं, (पिङ्गं अक्षि यस्य। यद्वा समासे।) शिवः। इति त्रिकाण्डशेषः॥ (कुम्भीरः। पिङ्गचक्षुःशब्ददर्शनात्॥ द्रोणपुष्पखगविशेषः। यथा मार्कण्डेये। १। २१।
"पिङ्गाक्षश्च विबोधश्च सुपुत्रः सुमुखस्तथा।
द्रोणपुत्राः खगश्रेष्ठास्तत्त्वज्ञाः शास्त्रचिन्तकाः॥")
पिङ्गलनेत्रे, त्रि। यथा, तत्रैव। ६६। ४५।
"नमस्तेऽनल ! पिङ्गाक्ष ! नमस्तेऽस्तु हुताशन ! ॥")
पिङ्गाशः, पुं, (पिङ्गं वर्णमश्नुते इति। अश + अण्।) पक्षीपतिः। मत्स्यभेदः। पाङ्गाश इति भाषा॥ जात्यस्वर्णे, क्ली। इति मेदिनी। शे, २५॥
पिङ्गाशी, स्त्री, (पिङ्गं वर्णमश्नुते इति। अश + अण्। स्त्रियां ङीप्।) नीलिका। इति मेदिनी। शे, २५॥
पिङ्गास्यः, पुं, (पिङ्गमास्यं वदनं यस्य।) पिङ्गाशमत्स्यः। इति शब्दरत्नावली॥
पिङ्गी, स्त्री, (पिङ्गो वर्णोऽस्त्यस्या इति। अच्। ततो गौरादित्वात् ङीष्।) शमीवृक्षः। इति मेदिनी। गे, १२॥
पिङ्गेक्षणः, पुं, (पिङ्गानि पिङ्गलवर्णानि ईक्षणानि यस्य।) शिवः। इति हेमचन्द्रः। २। ११०॥ (कुम्भीरः। पिङ्गचक्षुःशब्ददर्शनात्॥ पिङ्गलनेत्रे, त्रि॥)
पिचण्डः, पुं, (अपिचण्ड्यतेऽनेनेति। अपि + चडि कोपे + घञ्। अपेरुपः।) पक्षीरवयवः। उदरम्। इति हेमचन्द्रः। ३। २९८॥
पिचण्डिलः, त्रि, (अतिशयितं पिचण्डमुदरमस्य। पिचण्ड + तुन्दादित्वात् इलच्।) तुन्दिलः। इति हेमचन्द्रः। ३। ११४॥ (यथा, काशीखण्डे। ८७। १०२।
"स्वाहाकारैर्वषट्कारैः सुरा जाताः पिचण्डिलाः।
रक्षिता गिरयस्तेन सदाना यत्र यत्र॥")
पिचयः, पुं, (पिचवे तूलाय साधुः। पिचु + यत्।) कार्पासः। इति हेमचन्द्रः। ४। २०५॥
पिचिण्डः, पुं, उदरम्। इत्यमरः। २। ६। ७७॥ तस्य लक्षणं यथा,—
"भोगाढ्याः समवर्तुलाः स्निग्धाः स्युर्घटसन्निभाः।
सर्वोदरा दरिद्राः स्युः——— ——॥"
इति गारुडे ६३ अध्यायः॥
पक्षीरवयवः। इति मेदिनी। डे, ३२॥

पिचिण्डिका, स्त्री, (पिचिण्ड इव पिण्डाकृतिरस्त्यस्येति। पिचिण्ड+ठन्।) पिण्डिका। इति हेमचन्द्रः। ३।२७६॥ प्यार डिम् इति भाषा॥

पिचिण्डिलः, पुं, (अतिशयितः पिचिण्ड उदरमस्य। पिचिण्ड+तुन्दादिलात् इलच्।) वृहदुदरयुक्तः। इत्यमरः। २। ६। ४४॥ तत्पर्य्यायः। पिचण्डिलः २ वृहत्तुङ्गिः ३ तुन्दी४ तुन्दिकः ५ तुन्दिलः ६ उदरी ७ उदरिलः ८। इति हेमचन्द्रः। ३। ११४॥ (यथा, काशीखण्डे शिवशर्म्मणो वैकुण्ठलोकगमने विष्णुगरुडसंवादे।

"पिचिण्डिलैः स्थूलवक्त्रैर्मेघगम्भीरनिस्वनैः॥")

पिचुः, पुं. (पेचतीति। पिच अर्दने+इगयाजादिलात् कुः।) कार्पासतूलः। इत्यमरः। २। ६। १०६॥ (यथा, सुश्रुते। ४। ६

"अग्नौ वीक्ष्य शलाकयोत्पीड्य पिचुवक्त्रयोरन्यतरेण प्रन्थ्यं च्छादं पातयेत्॥") कुष्ठभेदः। कर्षः। असुरविशेषः। इति मेदिनी। चे, ७॥ भैरवः। शस्त्रभेदः। इति विश्वः॥ (चिकित्सोपयोगिपञ्चकर्म्मान्तर्गतक्रियाविशेषः। यथा,—

"कामिन्यां पूतियोन्याञ्च कर्त्तव्यः स्नेहनो विधिः। क्रमः कार्य्यस्ततः स्नेहपिचुभिस्तर्पणं भवेत्॥ शुल्कीजिङ्गिनीलम्बुधवत्वक्पत्रवल्कलैः। कषायैः साधितैः स्नेहः पिचुः स्याद्विद्युतापहः॥" इति वैद्यकचक्रपाणिसंग्रहे योनिव्यापच्चिकित्सायाम्॥)

पिचुकः, पुं, (पिचुरिव कायतीति। के+कः।) मदनवृक्षः। इति रत्नमाला॥ मयना इति भाषा॥

पिचुतूलं, क्ली, (पिचोस्तूलम्।) तूलः। इति त्रिकाण्डशेषः॥

पिचुमन्दः, पुं, (पिचुं कुष्ठविशेषं मन्दयति नाशयतीति। मन्द+अण्।) निम्बवृक्षः। इति हेमचन्द्रः। ४। २०५॥ (यथा, आर्य्यासप्तशत्याम्। ३४६।

"पश्यानुरूपमिन्दिन्दिरेण माकन्दशेखरो मुखरः।
अपि च पिचुमन्दमुकुले मौकुलिकुलमाकुलं मिलति॥")

पिचुमर्दः, पुं, (पिचुं कुष्ठविशेषं मर्दयति नष्टं करोतीति वा। मृद्+अण्।) निम्बवृक्षः। इत्यमरः। २। ४। ६२॥ (यथा, देवीभागवते। ३। १०। १२।

"असतामुपकाराय दुर्जनानां विभूतयः।
पिचुमर्दः फलाढ्योऽपि काकैरेवोपसुज्यते॥"

पर्य्यायोऽस्य यथा, वैद्यकरत्नमालायाम्।

"कैटर्य्यः पिचुमर्दश्च निम्बोऽरिष्टो वरत्वचा।
दर्भुरो हिङ्गुनिर्य्यासः सर्व्वतोभद्र इत्यपि॥")

पिचुलः, पुं, (पिचुं लातीति। ला+कः।) भागुकः। इक्वलः। जलवायसः। इति मेदिनी। ले, ११२॥ तृणः। इत्यमरटीकायां भरतसुन्दरी॥

पिच्च, क छेदे। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) क, पिच्चयति। इति दुर्गादासः॥

पिच्चटं, क्ली, (पिच्चयतीति। पिच्च छेदने+अटन्।) सीसकम्। रङ्गम्। (अस्य पर्य्यायो यथा, वैद्यकरत्नमालायाम्।

"रङ्गं वङ्गञ्च कस्तीरं नन्दङ्गं पुत्र पिच्चटम्॥") नेत्ररोगे, पुं। इति मेदिनी। टे, ५०॥

पिच्छ, शृ वाधे। इति कविकल्पद्रुमः॥ (तुदां-परं-सकं-सेट्।) शृ, पिच्छती पिच्छन्ती। बाधो विधितिः। इति दुर्गादासः॥

पिच्छं, क्ली, (पिच्छतीति। पिच्छ+अच्।) मयूरपुच्छम्। तत्पर्य्यायः। शिखण्डः२ बर्हम्३। इत्यमरः। २। ६। ३१॥ शिखिपुच्छम् ४ शिखण्डकम् ५। इति शब्दरत्नावली॥ (यथा, अनर्घराघवे। ६। ६५।

"तस्यारिवनभीमस्य धनदण्डस्य लाञ्छनम्।
दर्पदीप्तः क्षुरप्रेण मायूरं पिच्छमच्छिनत्॥") चूड़ा। इति मेदिनी। छे, ५॥

पिच्छः, पुं, (पिच्छतीति। पिच्छ+अच्।) लाङ्गूलम्। इति मेदिनी। छे, ५॥

पिच्छलदला, स्त्री, (पिच्छलं दलं पत्रं यस्याः।) वदरीवृक्षः। इति त्रिकाण्डशेषः॥

पिच्छवाशः, पुं, (पिच्छं वाश इव यस्य।) श्येनपक्षी। इति राजनिर्घण्टः॥

पिच्छा, स्त्री, (पिच्छ+अजादिलात् टाप्।) शाल्मलीवेष्टः। इत्यमरः। २। ४। ४७॥ (अस्याः पर्य्यायो यथा,—

"निर्य्यासः शाल्मले: पिच्छा शाल्मली वेष्टकोऽपि च।
मोचासावो मोचरसो मोचनिर्य्यास इत्यपि॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥) पूगः। छटा। कोषः। मोचा। भक्तसम्भूतमण्डम्। पङ्क्तिः। अश्वपदामयः। इति मेदिनी। छे, ४॥ चोलिका। फणिलाला। इति हारावली। २३०॥ शिंशपावृक्षः। इति शब्दचन्द्रिका॥

पिच्छिका, स्त्री, (पिच्छं मयूरबर्हं अस्त्यस्येति। पिच्छ+ठन्।) चामरविशेषः। यथा। "पिच्छिकां भ्रामयित्वा बहुविधं हास्यं कृत्वा पलमहं दास्ये चरणे इदं अलिं अपिधा कृपामस्य।" इति रत्नावलीनाटके ४ अङ्कः॥

पिच्छितिका, स्त्री, शिंशपा। इति शब्दचन्द्रिका॥ (विवृतिरस्याः शिंशपाशब्दे ज्ञातव्या॥)

पिच्छिलं, त्रि, (पिच्छा भक्तसम्भूतमण्डं अस्त्यस्येति। पिच्छादिलात् इलच्।) भक्तमण्डयुक्तम्। इति रायमुकुटः॥ सरसत्वञ्जनादि। इति भरतः॥ रूपादि। इति रमानाथः। स्निग्धरूपादि। इति भानुदीक्षितः॥ मण्डयुक्तभक्तम्। जलयुक्तत्वञ्जनम्। इति नीलकण्ठः॥ तत्पर्य्यायः। विजिलम् २। इत्यमरः। २। ६। ४६॥ विलयिनम् ३ विजिनम्४ विच्छलम् ५ इज्वलम् ६ लालसीकम् ७। इति वाचस्पतिः॥ (यथा, छन्दोमञ्जर्य्याम्।

"तरुणं सर्षपशाकं नवौदनानि पिच्छिलानि च दधीनि।
अल्पव्ययेन सुन्दरि! ग्राम्यजनो मिष्टमश्नाति॥")

पिच्छयुक्तः॥ (स्निग्धसरसपदार्थविशेषः। पेचल इति भाषा॥ यथा, साहित्यदर्पणे १०। ५५।

"काले वारिधराणामपतितया नैव शक्यते स्थातुम्।
उत्कण्ठितासि तरले! गहि नहि सखि! पिच्छिलः पन्थाः॥")

पिच्छिलः, पुं, (पिच्छं चूड़ास्त्यस्येति। पिच्छादिलात् इलच्।) श्वेतान्तकवृक्षः। इति राजनिर्घण्टः॥

पिच्छिलकः, पुं, (पिच्छिलः सन् कायतीति। के+कः।) धन्वनवृक्षः। इति राजनिर्घण्टः॥

पिच्छिलच्छदा, स्त्री, (पिच्छिलश्छदो यस्याः।) उपोदकी। इति राजनिर्घण्टः॥

पिच्छिलत्वक्, [च्] पुं, (पिच्छिला त्वग् यस्य।) नागरङ्गवृक्षः। इति त्रिकाण्डशेषः॥ धन्वनवृक्षः। इति रत्नमाला॥

पिच्छिलसारः, पुं, (पिच्छिलः सारो यस्य।) मोचरसः। इति राजनिर्घण्टः॥

पिच्छिला, स्त्री, (पिच्छा+इलच्। ततष्टाप्।) मोतिका। शिंशपा। (अस्याः पर्य्यायो यथा, वैद्यकरत्नमालायाम्।

"पिङ्गला पिच्छिला वीरा क्षणसारा च शिंशपा॥")

शाल्मलिः। (अस्याः पर्य्यायो यथा,—

"शाल्मलिस्तु भवेन्मोचा पिच्छिलो पूगगीतिच।
रक्तपुष्पा स्थिरायुश्च कण्टकाढ्या च तूलिनी॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥) सिन्धुभेदः। इति मेदिनी। ले, १२५। कोकिलाक्षः। इक्षिकाशुपः। शूलीलशुनम्। अतसी। इति राजनिर्घण्टः॥ कच्ची। इति शब्दचन्द्रिका॥

पिञ्ज, इ क भाषार्थे। इति कविकल्पद्रुमः॥ (चुरां-परं-अकं-सकं च-सेट्।) इ क, पिञ्जयति। भाः दीप्तिः। षट्त्रार्थो निकेतनहिंसावलदानानि। इति दुर्गादासः॥

पिञ्ज, इ ल ड वर्णपूजयोः। इति कविकल्पद्रुमः॥ (अदां-आत्मं-अकं-सकं च-सेट्।) इ, पिञ्जते। ल ड, पिञ्जिते। इति दुर्गादासः॥

पिञ्जं, क्ली, (पिञ्ज वधे+भावे घञ्।) बलम्। आकुले, त्रि। इति मेदिनी। जे, १६॥

पिञ्जः, पुं, (पिञ्ज वधे+भावे घञ्।) वधः। इत्यमरः। २। ८। ११५॥ कर्पूरभेदः। इति राजनिर्घण्टः॥

पिञ्जटः, पुं, (पिञ्जयति नेत्रं दूषयतीति। पिञ्जि+अटन्।) नेत्रमलम्। पिँचुटि इति भाषा॥ यथा, शब्दरत्नावल्याम्।

"दूषीका दूषिका दूषिः पिञ्जेटपिञ्जटावपि॥"

पिच्छेटः

पिच्छनं, क्ली, (पिच्छतेऽनेनेति । पिच्छि स्फोटने + करणे ल्युट् ।) कायांसस्फोटनधनुः । तत्पर्य्यायः । पिच्छनम् २ तूलस्फोटनकार्मुकम् ३ । इति हेमचन्द्रः । ३ । ५१६ ॥

पिच्छरं, क्ली, (पिच्छि दीप्तौ वर्णे वा + बाहुलकात् अरः । इदुपधत्वाभावश्च ।) हरितालम् । इत्यमरः । २ । ६ । १०३ ॥ स्वर्णम् । इति मेदिनी । रे, १८५ ॥ नागकेशरम् । इति राजनिर्घण्टः ॥ पद्मादिवन्नपुंसकम् । कायान्वितत्वम् । इत्यमरटीकायां रामाश्रमः ॥

पिच्छरः, पुं, (पिच्छि + अरः ।) धान्यभेदः । पीतरक्तवर्णः । इति हेमचन्द्रः ॥ (सुमेरुपश्चिमपार्श्वस्थपर्वतविशेषः । यथा, मार्कण्डेये । ५५ । ६ ।
"पिच्छरोऽथ महाभद्रः सरसः कपिलो मधुः ॥") पीते, त्रि । इति मेदिनी । रे, ११५ ॥ (यथा, ऋग्वेदभाष्यभूमिकायाम् । ३६१ ।
"प्रियया क्षुद्रमपिच्छरमाधिह्रयवागाहितं वासः ।
प्रहितं मां यावयाङ्गालसङ्गसाऽकरुणाय ग्रिच्छयति ॥")

पिच्छरकं, क्ली, (पिच्छरमेव । स्वार्थे कन् ।) हरितालम् । इति राजनिर्घण्टः ॥ (पुं, नागविशेषः । यथा, महाभारते । १ । ३५ । ६ ।
"नागस्तथा पिच्छरक एलापत्रोऽथ वामनः ॥")

पिच्छलं, क्ली, (पिच्छि च्छिदायां वर्णे च + कलच् ।) शुक्लपत्रम् । हरितालम् । इति धरणिः ॥

पिच्छलः, पुं, (पिच्छि + कलच् ।) अत्यन्तव्याकुलनेत्रादिः । इत्यमरः । २ । ८ । ६६ ॥

पिच्छलो, स्त्री, (पिच्छल + स्त्रियां ङीष् ।) कुशान्तरवेष्टितप्रादेशमात्रमाद्यकुशपत्रद्वयम् । अस्या नामान्तरं पवित्रम् । यथा,—
"अनन्तर्गर्भिणं मात्रं कौशं द्विदलमेव च ।
प्रादेशमात्रं विज्ञेयं पवित्रं यच्च कुत्रचित् ।
एतदेव हि पिच्छला राक्षसं मलदाहृतम् ॥"
इति छन्दोगपरिशिष्टम् ॥

पिच्छा, स्त्री (पिच्छ्यते स्पृश्यते इति । पिच्छ + कुर्च्छिस्त्यः । अजादाप् ।) तूलम् । हरिद्रा । इति त्रिकाण्डशेषः ॥ छड़ी । छड़ा इति भाषा ॥ यथा चान्दमालायाम् । [च ॥"
"श्रोतपत्रः सिंहला स्यागस्थड़ी पिच्छा छटापि

पिच्छानं, क्ली, मद्यम् । इति राजनिर्घण्टः ॥

पिच्छिका स्त्री, (पिच्छयतीति । पिच्छि + ण्वुल् । टापि अत इत्वम् ।) तूलनालिका । इति त्रिकाण्डशेषः ॥ पाँरज इति भाषा ॥

पिच्छिलं, क्ली (पिच्छयतीति । पिच्छि + "सर्जि-पिच्छादिभ्य इलचौ ।" उणा० ४ । ६० । इति इलच् ।) वर्षिका । इत्युणादिकोषः ॥

पिच्छुः, पुं, (पिच्छयति क्लिनत्ति कर्णौ इति । पिच्छि + बाहुलकात् कुन् ।) कर्णमलम् । इति हेमचन्द्रः । ३ । ७६१ ॥

पिच्छेटः, पुं. (पिच्छः । इषोदरादित्वात् साधुः ।) श्लेष्मलम् । इति शब्दरत्नावली ॥

पिटकः

पिच्छोला, स्त्री. (पिच्छयतीति । पिच्छि + बाहुलकात् ओलः ।) पत्रकाण्डम् । पत्रशब्दः । इति हारावली । २०७ ॥

पिट, संघातौ । धनौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-अकंच-सेट् ।) पेटति घनः किञ्चिन्नाशीकरोति शब्दायते वा । इति दुर्गादासः ॥

पिटं, क्ली, (पेटति संघातो भवतीति । पिट + कः ।) चालः । इति त्रिकाण्डशेषः ॥

पिटः, पुं, (पेटति प्रत्यन्तरैः संघातो भवतीति । पिट संघातौ + कः ।) पेटः । इति धरणिः ॥ पेटारा इति भाषा ॥

पिटकः, पुं, क्ली, (पेटतीति । पिट् + कुन् ।) वंशवेत्रादिमयसङ्घातकः । पेटारी इति पेटा इति पेड़ा इति च ख्यातः । तत्पर्य्यायः । पेटकः २ पेड़ा ३ मञ्जूषा ४ । इत्यमरः । २ । १० । ३० ॥ अल्पे स्वल्पपेटिकायाम् । इति स्वामी ॥ पेटः ५ पेटिका ६ तरिः ७ तरीच मञ्जूषाच पेडिका १० । इति शब्दरत्नावली ॥ (यथा, मार्कण्डेये । ५० । ८६ ।
"कृष्णसर्पान्वितपिटकासङ्गतं स्याद्यादिभाजनम् ॥")

विस्फोटे, त्रि । इति मेदिनी । के, १२० ॥ (देहेस्थानभेदेन जातस्यास्य शुभाशुभसूक्तम् । यथा, बृहत्संहितायाम् । ५२ । १—१० ।
"सितरक्तपीतकृष्णा विप्रादीनां क्रमेण पिटकाये ।
ते क्रमशः प्रोक्तफला वर्णानामप्यधादीनाम् ॥
सस्निग्धवक्त्रशोभाः शिरसि घनचयं सहन्ति-सौभाग्यभाराढ्
दौर्भाग्यं भ्रूयुगोत्थाः प्रियधनवटगामास्तु दुःखीलताश्च ।
सन्ध्योत्थाश्च श्लोकं नयनपुटगता नेत्रयोरिष्टदृष्टिं
प्रभ्रंश्यां गण्डदेशेऽशुजलनिपतनस्थानगाश्चाति पिन्नाम् ॥
घ्राणाग्रे वसनसुतदाश्चोष्ठयोरप्यभावं
कर्णुस्तद्धिवुकतलगा भूरि वित्तं ललाटे ।
इत्थं रूपं गलकृतपदा भूवलान्यत्रपाने
श्रोत्रे तद्वत्पुरगगगमपि ज्ञानमात्मस्वरूपम् ॥
शिरःसन्धिग्रीवाहृदयकुचपार्श्वेरिषि गता
अधोघातं घातं सुततनयलाभं सुचमपि ।
प्रियप्राप्तिं स्त्रीणामपटनमथ भिक्षार्थमसकृद्-
विनाशं कक्षोत्था विदधति धनानां बहु सुखम् ॥
दुःखप्रचुनिचयस्य विघातं
दृष्ट्वाहुयुगला रचयन्ति ।
संयमथ मणिबन्धनधाता
भूयगादसुपबाहुयुगोत्थाः ॥
धनाप्तिं सौभाग्यं सुचमपि करास्तुन्दरगताः
सुपानाप्तं नाभौ तदध इव चौरैर्धनचुतिम् ।
धनं धान्यं वस्त्रौ युवतिमथ मेढ्रे सुतनयान्
धनं सौभाग्यं वा गुदहृयस्थाता विदधति ॥

पिठकः

उर्वोर्यानाग्नलाभं जान्वोः शत्रुजनात् धनिम् ।
शुल्फेन चरणयोर्गुल्फेऽधवन्धक्लेशदायिनः ॥
स्फिक्पार्श्वपादजाता
धनधान्यागमनगमनाधानम् ।
वन्धनमङ्गुलिनिचये-
ष्वङ्गुष्ठे च ज्ञातिलोकतः पृथाम् ॥
उत्तानगतपिटका
दक्षिणतो वामतस्तु नीलाताः ।
धन्या भवन्ति पुंसां
तद्विपरीतास्तु नारीणाम् ॥
इति पिटकविभागः प्रोक्त्या मयेतोऽयं
अगतिलकविभागोऽप्येवमेव प्रकल्प्यः ।
भवति मशकलक्ष्मावर्कजन्मापि तद्-
निगदितफलकारि प्राणिनां देहसंस्थम् ॥")

पिटङ्गाक्षः, पुं. पर्वतोन्निमत्स्यः । इति भूरिप्रयोगः ॥

पिटङ्गोकी, स्त्री, इन्द्रवारुणी । इति रत्नमाला ॥

पिटाकः, पुं, मुनिविशेषः । इत्युणादिकोषः ॥

पिट्टकं, क्ली. (किट्टकं पृषोदरादित्वात् कस्य पः ।) दन्तकिट्टकम् । इति शब्दरत्नावली ॥

पिट, क्षिप्तौ । वधे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-वधे सकं-सेट् ।) चोष्ठवर्गाद्यादिः । पेटति । पिपिटतुः । क्षिप्तौ दुःखानुभवे । इति दुर्गादासः ॥

पिटरं, क्ली, (पिटं रातीति । रा + कः ।) सस्या । मन्यानदण्डः । इति मेदिनी । रे, १८४ ॥

पिटरः पुं, (पिट्यते क्षिप्यतेऽनेनेति । पिट + करणे ।) गृहभेदः ॥ तत्पर्य्यायः । कुम्भकुः २ उद्घाटः ३ । इति त्रिकाण्डशेषः ॥ (यथा, वर्ष्यासप्रश्नत्यायाम् । ५५२ । [यान्ति ॥")
"विद्युज्ज्वालावलयितजलधरपिटरोदराद्विनिस्यासौ । इत्यमरः । २ । ८ । ३१ ॥ (यथा, महाभारते । ३ । ३ । ७२ ।
"गृहीत्वा पिटरं ताम्रं मया दत्तं नराधिप ! ।
यावत् वर्तुस्यति याचाञ्ची याचियानेन सुव्रत ! ॥"
अग्निविशेषः । यथा, हरिवंशे । १७८ । ६३ ।
"पिटरः पतगः स्वर्गत्यागाधो भाज एव च ।
सुधाकाराश्रयाः पञ्च अयुधंस्तेऽपि दानवाः ॥"
दानवविशेषः । यथा, महाभारते । २ । ६ । १६ ।
"घटोदरो महापार्श्वः क्रथनः पिटरस्तथा ।")

पिटरी, स्त्री, (पिटर + स्त्रियां ङीष् ।) स्थाली । इत्यमरटीकायां रायमुकुटः ॥

पिठ, ड ज संघातौ । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट् ।) ड क, पिठयति । संघातिः राशीकरणम् । इति दुर्गादासः ॥

पिठ, ड ज संघातौ । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं-सेट् । सकं इति केचित् ।) ड, पिठ्यते ज, पिठते । इति दुर्गादासः ॥

पिठरः पुं, (पीठयतीति । पीठ + कुन् । निपातनात् साधुः ।) स्फोटकः । इति हेमचन्द्रः । ३ । १६० ॥

पिड़का, स्त्री, (पीड़यतीति। पीड़ + खुल् + टाप्। निपातनात् साधुः।) स्फोटकविशेषः। प्रमेजहा सा दशविधा। यथा,—

"ग्रराविका कच्छपिका जालिनी विनतालजी।
मसूरिका सर्षपिका पुत्रिणी च विदारिका।
विद्रधिश्चेति पिड़काः प्रमेहोपेक्षया दश॥"

तासां प्रत्येकलक्षणं यथा,—

"सन्धिमर्म्मसु जायन्ते मांसलेषु च धामसु।
अन्तोन्नता च तद्रूपा निम्नमध्या ग्रराविका॥१॥
सदाहा कूर्म्मसंस्थाना ज्ञेया कच्छपिका बुधैः॥२॥
जालिनी तीव्रदाहार्त्तिमांसजालसमावृता॥३॥
अवगाढरुजा क्लेदा पृष्ठे वाप्युदरेऽपि वा।
महती पिड़का नीला विनता नाम सा स्मृता॥४॥
रक्तासिता स्फोटचिता दारुणा त्वलजी भवेत्॥५॥
मसूरफलसंस्थाना विज्ञेया सा मसूरिका॥६॥
गौरसर्षपसंस्थाना तत्प्रमाणा च सर्षपी॥७॥
महत्यल्पचिता ज्ञेया पिड़का चापि पुत्रिणी॥८॥
विदारी कन्दवद्वृत्ता कठिना च विदारिका॥९॥
विद्रधेर्लक्षणैर्युक्ता ज्ञेया विद्रधिका तु सा॥"१०॥

कुष्ठपिड़का यथा,—

"कण्डूर्विपूयकत्वेव कुष्ठे श्लोणितसंश्रिते।
वाहुल्यं वक्त्रशोषश्च कार्कश्यं पिड़कोद्गमः॥"*॥

पिड़काविशेषो यथा,—

"यवाकारा सुकठिना ग्रथिता मांससंश्रिता।
पिड़का श्लेष्मवाताभ्यां यवप्रख्येति सोच्यते॥
वनामवक्त्रां पिड़कासुन्नतां परिमण्डलाम्।
अन्तर्जालौघपूर्यां तां विद्यात् कफवातजाम्॥१
विवृतास्यां महादाहां पक्वोडुम्बरसन्निभाम्।
परिमण्डलां पित्तकृतां विवृतां नाम तां विदुः॥२॥
ग्रथिताः पञ्च वा षड् वा दारुणाः कच्छपोपमाः।
कफानिलाभ्यां पिड़का ज्ञेयाः कच्छपिका बुधैः॥३॥

ग्रीवांसकक्षाकरपाददेशे
सन्धौ गले वा त्रिभिरेव दोषैः।
ग्रन्थिः सवल्मीकवदक्रियाणां
जातः क्रमेणैव गतः प्रवृद्धिम्॥
सुखैरनेकैः सुतितोदवद्भि-
र्विसर्पवत् सर्पति चोन्नताग्रैः।
वल्मीकमाहुर्भिषजो विकारं
निग्रह्यनीकं चिरजं विशेषात्॥४॥

पद्मकर्णिकवन्मध्ये पिड़काभिः समाचिताम्।
इन्द्रवृद्धान्तु तां विद्याद्वातपित्तोत्थितां भिषक्॥५॥
मण्डलं वृत्तसुतसं सरक्तं पिड़काचितम्।
रुजाकरीं गर्द्दभिकां तां विद्याद्वातपित्तजाम्॥६॥
वातश्लेष्मसमुद्भूतः श्वयथुर्हेतुसन्निजः।
स्थिरो मन्दरुजः स्निग्धो ज्ञेयः पाषाणगर्द्दभः॥७॥
कर्णस्याभ्यन्तरे जातां पिड़कामुग्रवेदनाम्।
स्थिरां पनसिकान्तान्तु विद्यादन्तःप्रपाकिनीम्॥८॥

विसर्पवत् सर्पति यः श्लोथस्तनुरपाकवान्।
दाहज्वरकरः पित्तात् स ज्ञेयो जालगर्द्दभः॥९॥
पिड़कामुत्तमाङ्गस्थां वृत्तामल्पुरुगुज्वराम्।
सर्व्वात्मिकां सर्व्वलिङ्गां जानीयादिरिवेल्लिकाम्॥१०॥
बाहुपार्श्वांसकक्षेषु क्षुण्णस्फोटां सवेदनाम्।
पित्तप्रकोपसम्भूतां कक्षामित्यभिनिर्द्दिशेत्॥११॥
एकामेताद्दशीं दृष्ट्वा पिड़कां स्फोटसन्निभाम्।
त्वग्गतां पित्तकोपेन गन्धनामां प्रचक्षते॥१२॥
कक्षभागेषु ये स्फोटा जायन्ते मांसदारुणाः।
अन्तर्दाहज्वरकरा दीप्तपावकसन्निभाः॥
सप्ताहाद्वादशाहाद्वा पक्षाद्वा म्रन्ति मानवम्।
तामग्निरोहिणीं विद्यादसाध्यां सन्निपातजाम्॥१३॥
नखमांसमधिष्ठाय वातः पित्तञ्च देहिनाम्।
कुरुते दाहपाकौ च व्याधिन्तं चिप्यमादिशेत्॥
तदेवाल्पतरैर्दोषैः कुनखं परुषं वदेत्॥१४॥
गम्भीरामल्पसंरम्भां सवर्णामुपरिस्थिताम्।
मादस्यानुशयीं तान्तु विद्यादन्तःप्रपाकिनीम्॥१५
विदारीकन्दवद्वृत्तां कक्षावङ्क्षणसन्धिषु।
विदारीति च तां विद्यात् सर्व्वजां सर्व्वलक्षणाम्॥"१६॥

इति माधवकरः॥

पिण्डं, क्ली, पुं, (पिण्डते संहतो भवतीति। पिडि संहतौ + अच्। पिण्ड्यते राशीक्रियते इति। कर्म्मणि घञ् वा।) आजीवनम्। अयः। इति मेदिनी। डे, १६॥ आद्धप्रेषद्रव्यनिर्म्मितविल्वफलाकारपित्रुद्देश्यकदेयान्नम्। यजुर्व्वेदिनां पिण्डशब्दो नपुंसकलिङ्गेन प्रयुज्यते। यथा,—

"अवनिक्तं पिण्डं दद्यादसावेतत्त इति आद्धविवेकधृतपिण्डपितृयज्ञीयकात्यायनवचने पिण्डविशेषणे एतदिति नपुंसकनिर्द्देशात् भाषेतैतच्च वै पिण्डं यन्नदत्तस्य पूरकमिति ऋग्यजुश्छन्दवचनेऽपि तथा दर्शनाच्च। छन्दोगानां पिण्डशब्दः पुंलिङ्गेन प्रयुज्यते। दर्भेषु मधु मधु मधित्यच्चन्नमो मदन्त इति जपित्वा त्रींस्त्रीन् पिण्डान् दद्यादिति गोभिलसूत्रे पिण्डानिति पुंलिङ्गनिर्द्देशात्।" इति आद्धतत्त्वम्॥ * ॥ गयादावात्मपिण्डदानविधिर्यथा,—

"गयान्तं पिण्डदानञ्च गयान्तं तीर्थमेव च।
पञ्चक्रान्तं कामरूपं पिच्छिलान्तं सरित् शुभे॥
जनार्द्दनस्य हस्ते तु पिण्डं दद्यात् स्वकं नरः।
विरले च तथा चाश्वकर्णे रामे च सोमके॥
जीवत्पितृपिण्डप्रदानेन अस्त्यायुर्जायते नरः।
यत्रागत्य महाक्षेत्रे स्वकं पिण्डं ददेत्तु यः।
मासद्वयाधिकं वर्षमायुषो वर्द्धते क्रमात्॥"
इति योगिनीयन्त्रे प्रथमतमे २ भागे ५ पटलः॥
अन्यत् गयाशब्दे द्रष्टव्यम्॥

पिण्डः, पुं, (पिडि संहतौ + अच्।) गोलः। (अस्य पर्य्यायो यथा, वैद्यकरत्नमालायाम्।

"विद्वान् गोलः पिण्डकश्च पिण्डो वोलो रसोरसः॥)

बलम्। सान्द्रम्। देहैकदेशः। (यथा, महाभारते। ३। १५२। ३।

"द्वौ चास्य पिण्डावधरेण कण्ठा-
दजातरोमौ सुमनोहरौ च॥")

अगारैकदेशः। देहमात्रम्। (यथा, रघुः। २। ५७।

"एकान्तविध्वंसिषु मद्विधानां
पिण्डेष्वनास्था खलु भौतिकेषु॥")

निवापः। (यथा, मनुः। ३। २१५।

"चोंस्तु तस्माद्विधिवत्प्राप्तान् पिण्डान् कृत्वा समाहितः।
औदकेनैव विधिना निर्व्वपेदक्षिणासुखः॥")

गोलः। सिक्थकः। ओड्रपुष्पम्। इति मेदिनी। डे, १६॥ वृन्दम्। कवलः। इति हेमचन्द्रः॥ (यथा, मनुः। ११। २१७।

"एकैकं ह्रासयेत् पिण्डं कृष्णे शुक्ले च वर्द्धयेत्॥")

गजकुम्भः। इत्यमरः। २।८।३७॥ मदनवृक्षः। इति राजनिर्घण्टः॥ (यथा, भावप्रकाशे पूर्व्वखण्डे प्रथमे भागे।

"मदनश्चर्द्दनः पिण्डो नटः पिण्डीतकस्तथा।
करहाटो मरुवकः शल्यको विषपुष्पकः॥"

किलाटः। यथा, वैद्यकरत्नमालायाम्।

"किलाटः कुर्च्चिका पिण्डः————॥",

निवापस्य पिण्डदेयस्य विधिर्यथा,—

"यावदन्नमुपादाय हविषोऽर्भकमर्भकम्।
चरुणा सह सन्नीय पिण्डदानमुपक्रमेत्॥
आद्धार्थाद्धविषोऽन्नादेः सकाशात् यावदभ्यमोदनयञ्जनादि ततोऽल्पाल्पं गृहीत्वा यदग्नौ करणप्रेषेण सह सन्नीय मिश्रीकृत्य पिण्डदानमारभेतेत्यर्थः।
मध्वाज्यतिलसंयुक्तं सर्व्वयञ्जनसंयुतम्।
उष्णमादाय पिण्डन्तु कृत्वा विल्वफलोपमम्।
दद्यात् पितामहादिभ्यो दर्भमूलादृयथाक्रमम्॥
अत्र पितामहपदं पितृपरं वचनान्तरैकवाक्यत्वात्।
सपित्रे प्रथमं पिण्डं दद्यादुच्छिष्टसन्निधौ।
पितामहाय चैवाथ ततपित्रे च ततः परम्॥
दर्भमूले लेपभुजस्तर्पयेल्लेपभुजस्तथा।
पिण्डैर्मातामहांस्तद्वदन्नमाल्यादिसंयुतैः॥
प्रीणयित्वा द्विजाग्र्याणां दद्यादाचमनन्ततः॥"

इति आद्धतत्त्वम्॥ * ॥

अन्नाद्यभावे फलादिनापि तस्य कर्त्तव्यत्वं यथा,—

"शेक्षुदं वदरोन्मिश्रं पिण्याकं दर्भसंस्तरे।
न्यूप्य पिण्डं ततो राम इदं वचनमब्रवीत्॥
इदं भुङ्क्ष्व महाराज! प्रीतो यदशना वयम्।
यदन्नाः पुरुषा राजंस्तदन्नाः पितृदेवताः॥"

इत्ययोध्याकाण्डम्॥ * ॥

पूरकपिण्डविधिर्यथा,—

"ततश्चोत्तरपूर्व्वस्यामग्निं प्रज्वालयेद्विधि।
तण्डुलप्रसृतिं तत्र प्रचाल्य द्विः प्रचेत् स्वयम्॥
सपवित्रैस्तिलैर्मिश्रां केशकीटविवर्जिताम्।
द्वारोपान्ते ततः क्षिप्त्वा सुद्वां वा गौरमृत्तिकाम्॥
ततपृष्ठे पञ्चरेदर्भान् याम्याग्रान् देशसम्भवान्।

ततोऽवनेजनन्दद्यात् संस्परन् गोत्रनामनी ॥
तिलसर्पिर्मधुक्षीरैः सक्षितं तन्नमेव हि ।
दद्यात् प्रेताय पिण्डन्तु दक्षिणाभिमुखस्थितः ॥
फलमूलगुडक्षीरतिलमिश्रन्तु कुत्रचित् ।
अर्घैः पुष्पैस्तथा दीपैर्धूपैस्तोयैः सुशीतलैः ॥
ऊर्णातन्तुमयैः सुद्वैर्वासोभिः पिण्डमर्चयेत् ।
प्रयाति यावदाकाशं पिण्डाद्धूमयी शिखा ॥
तावत्तु संमुखस्तिष्ठेत् सर्व्वं तोये ततः क्षिपेत् ।
दिवसे दिवसे देयः पिण्ड एवं क्रमेण तु ॥
सद्यःशौचेऽपि दातव्याः सर्व्वेऽपि युगपत्तथा ।
त्र्याहाशौचे प्रदातव्याः प्रथमे त्वेक एव हि ॥
द्वितीयेऽहनि चत्वारस्तृतीये पञ्च चैव हि ।
एकस्तोयाञ्जलिस्त्वेवं पात्रमेकञ्च दीयते ॥
द्वितीये द्वौ तृतीये त्रीन् चतुर्थे चतुरस्तथा ।
पञ्चमे पञ्च षष्ठे षट् सप्तमे सप्त एव च ॥
अष्टमेऽष्टौ च नवमे नवैव दशमे दश ।
येन स्युः पञ्चपञ्चाशत्तोयस्याञ्जलयः क्रमात् ॥
तोयपात्राणि तावन्ति संयुक्तानि जलादिभिः ॥"
इति शुद्धितत्त्वम् ॥ * ॥

गयायामात्मपिण्डदानप्रमाणं यथा,—
"स्वकर्म्मधर्म्मयोगेन धनमुच्चावचं वहु ।
उपार्जयित्वा प्रययौ गयातीर्थमनुत्तमम् ॥
पिण्डनिर्व्वपणं तत्र प्रेतानामनुपूर्व्वशः ।
चकार स्वपितॄणाञ्च दायादानामनन्तरम् ॥
आत्मनञ्च महाबुद्धिर्महावेद्यां तिलैर्विना ।
पिण्डनिर्व्वपणं चक्रे तथान्येषाञ्च गोत्रिणाम् ॥
एवं प्रदत्तेष्वथ वै पिण्डेषु प्रेतभावतः ।
विमुक्तास्ते द्विज प्रेता ब्रह्मलोकं ततो गताः ॥"
इति वामने ७६ अध्यायः ॥

पिण्डकं, क्ली, (पिण्ड इव कायतीति । के + कः ।) वोलम् । पिण्डमूलम् । इति राजनिर्घण्टः ॥ (गोलः । यथा, सुश्रुते शारीरस्थाने ३ अध्याये । "तृतीये (मासि) हस्तपादशिरसां पञ्च पिण्डकानि वर्त्तन्तेऽङ्गप्रत्यङ्गविभागश्च स्पष्टो भवति ॥")

पिण्डकः, पुं, (पिण्ड इव कायतीति । के + कः ।) सिद्धनामगन्धद्रव्यम् । इत्यमरः । १ । ६ । १२८ ॥ (गोलः । अस्य पर्य्यायो यथा,—
"विद्वान् गोलः पिण्डकश्च पिण्डोवोलो रसोरसः ॥"
इति वैद्यकरत्नमालायाम् ॥)
पिण्डाचः । इति त्रिकाण्डशेषः ॥ पिण्डालुः । इति राजनिर्घण्टः ॥ (अस्य गुणा यथा,—
"पिण्डको वातलः श्लेष्मी ग्राही दृष्यो महागुरुः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
पिण्ड + स्वार्थे कन् । कवलः । यथा, हरिवंशे । भविष्यपर्व्वणि । १०० । २१ ।
"पयःपानं तथा कुर्व्वन् भक्षयन् दधिपिण्डकम् ॥")

पिण्डकन्दः, पुं, (पिण्डाकारः कन्दः ।) पिण्डालुः । इति राजनिर्घण्टः ॥ (पिण्डालुशब्दोऽस्य विशेषो ज्ञातव्यः ।)

पिण्डखर्ज्जूरः पुं, (पिण्डवत् खर्ज्जूरः ।) खनामख्यातखर्ज्जूरः । तत्पर्य्यायः । राजजम्बूः २ पिण्डी ३ । इति जटाधरः ॥
पिण्डखर्ज्जूरी, स्त्री, (पिण्डखर्ज्जूर + स्त्रियां ङीष् ।) पिण्डखर्ज्जूरः । तत्पर्य्यायः । दीप्या २ खपिण्डा ३ मधुरश्रवा ४ फलपुष्पा ५ स्वादुपिण्डा ६ हयभक्षा ७ पिण्डखर्ज्जूरिका ८ । अस्या गुणाः । गौरुत्वम् । हिमत्वम् । पित्तदाहार्त्तिश्वासभ्रमनाशित्वम् । वीर्य्यवृद्धिदत्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
"पिण्डखर्ज्जूरिका त्वन्या सा देशे पश्चिमे भवेत् ।
खर्ज्जूरी गोस्तनाकारा परादृक्षीयादिहागता ॥
जायते पश्चिमे देशे सा क्षौद्रोरिति कीर्त्यते ।
खर्ज्जूरीत्रितयं शीतं मधुरं रसपाकयोः ॥
स्निग्धं रुचिकरं हृद्यं चतुष्टयहरं गुरु ।
तर्पणं रक्तपित्तघ्नं पुष्टिविष्टम्भिशुक्रदम् ॥
कोष्ठमारुतशूलघ्नं वान्तिवातकफापहम् ।
ज्वराभिघातक्षुत्तृष्णाकासश्वासनिवारकम् ॥
मदमूर्च्छामरुत्पित्तमद्योद्भूतगदान्तकृत् ।
मृद्वग्निच्च गुणैरल्पा स्वल्पखर्ज्जूरिका स्मृता ॥
खर्ज्जूरीतरुतोयन्तु मदपित्तकरं भवेत् ।
वातश्लेष्महरं रुच्यं दीपनं वलशुक्रकृत् ॥"
अथ पिण्डखर्ज्जूरीभेदः ।
"सुनेपाली तु मृदुला दलहीनफला च सा ।
सुनेपाली श्रमभ्रान्तिदाहमूर्च्छासपित्तहृत् ॥"
इति भावप्रकाशे पूर्व्वखण्डे १ भागे ॥

पिण्डगोसः, पुं, (पिण्डवत् संहतो गोसः ।) गव्यरसः । इत्यमरटीकायां रमानाथः ॥
पिण्डतैलकः, पुं, (पिण्डवत् तैलं यस्य । कप् ।) तुरुष्कः । इति राजनिर्घण्टः ॥
पिण्डदः, पुं, (पिण्डं ददातीति । दा + कः ।) पिण्डदानकर्त्ता । यथा,—
"लेपभाजश्चतुर्थाद्याः पित्राद्याः पिण्डभागिनः ।
पिण्डदः सप्तमस्तेषां सापिण्ड्यं सप्तपौरुषम् ॥"
इति शुद्धितत्त्वम् ॥
अपि च ।
"गाङ्गेनेह मरां सिद्धिं प्राप्नुवन्ति वारिणा नराः ।
पैत्र्याः पश्चात् क्रियाः कार्य्याः सर्व्वाश्चैवौर्द्ध्वदेहिकाः ॥
क्रियां करोति यः पूर्व्वां पितॄणां यश्च पिण्डदः ।
प्रायश्चित्तमचीर्णं तत् प्रायश्चित्ती भवेत्तु सः ॥"
इत्यग्निपुराणम् ॥

पिण्डपदं, क्ली, (पिण्डस्य संहतस्य पदम् ।) व्यङ्गविशेषः । यथा,—
"रूपाष्टकैर्विनिहतो भवनस्य वन्यः
कर्त्तुः स्वन्तमिह युग्मशरैकनिघ्नम् ।
एकीकृतं रसनिशाकरयुग्मभक्त-
पैषं ततो भवति पिण्डपदं गृहस्य ॥
रूपाष्टकैरेकाशीत्या विनिहतः पूरितः भवनस्य वन्यः दीर्घप्रस्तारमिलितहस्ताः स्वन्तं तत्संख्यानं युग्मशरैकनिघ्नं द्विपञ्चाशदुत्तरशतपूरितं एकीकृतं पूर्व्वाङ्केन मिलितं रसनिशाकरयुग्मभक्तपैषं षोड़शाधिकद्विशतहृतावशिष्टं तत् संख्यानं पिण्डपदसंज्ञं गृहस्य भवति ॥"
इति ज्योतिस्तत्त्वम् ॥
पिण्डपादः, पुं, (पिण्ड इव पादो यस्य ।) हस्ती । इति त्रिकाण्डशेषः ॥
पिण्डपुष्पं, क्ली, (पिण्ड इव पुष्पं पुष्पगुच्छो यस्य ।) अशोकपुष्पम् । (क्वचित् पुं । यथा,—
"अशोको हेमपुष्पश्च वञ्जुलस्ताम्रपल्लवः ।
कङ्केलिः पिण्डपुष्पश्च गन्धपुष्पो नटस्तथा ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
जवापुष्पम् । पद्मपुष्पम् । इति मेदिनी । पे, २७॥
तगरपुष्पम् । इति शब्दरत्नावली ॥
पिण्डपुष्पकः, पुं, (पिण्डपुष्पमिव प्रतिकृतिः । "इवे प्रतिकृतौ ।" ५ । ३ । ९६ । इति कन् ।) वास्तूकम् । इति शब्दमाला ॥ (वास्तूकशब्दोऽस्य गुणादयो ज्ञातव्याः ॥)
पिण्डफला, स्त्री, (पिण्ड इव फलं यस्याः ।) कटुतुम्बी । इति जटाधरः ॥ (यथा,—
"खिन्नस्य विस्रावनमेव कुर्य्या-
दङ्गुष्ठलोष्टोपलवेणुदण्डैः ॥
विकङ्कतारग्वधकाकनन्ती
काकादनीतापसवृक्षमूलैः ।
आलेपयेत् पिण्डफलार्कभार्गी
करञ्जकालामदनैश्च विद्वान् ॥"
इति सुश्रुते चिकित्सितस्थानेऽष्टादशेऽध्याये ॥)
पिण्डबीजकः, पुं, (पिण्डवत् बीजानि यस्य । कप् ।) कर्णिकारवृक्षः । इति राजनिर्घण्टः ॥ (कर्णिकारशब्दे विवृतिरस्य ज्ञातव्या ॥)
पिण्डमुस्ता, स्त्री, (पिण्डवत् स्थूला मुस्ता ।) नागरमुस्ता । इति राजनिर्घण्टः ॥
पिण्डमूलं, क्ली, (पिण्डमिव मूलमस्य ।) गर्जरम् । मूलकभेदः । तत्पर्य्यायः । गजाण्डम् २ पिण्डकम् ३ पिण्डमूलकम् ४ । अस्य गुणाः । कटुत्वम् । उष्णत्वम् । गुल्मवातादिदोषनाशित्वञ्च । इति राजनिर्घण्टः ॥
पिण्डलः, पुं, (पिडि संहतौ + वाहुलकात् कलच् ।) सेतुः । इति हारावली । १२६ ॥
पिण्डसः, पुं, (पिण्डेन परदत्तग्रासेन सनोति जीवतीति । सन + डः ।) भिक्षाशी । भिक्षोपजीवी । इति शब्दमाला ॥
पिण्डा, स्त्री, (पिण्ड + टाप् ।) पिण्डायसम् । कस्तूरीभेदः । सा क्षुलत्यिकाः कियत्स्थूला । इति राजनिर्घण्टः ॥ वंशपत्री । इति भावप्रकाशः ॥
पिण्डातः, पुं, (पिण्ड इव अतति सादृश्यमनुकरोतीति । अत + अच् ।) सिक्थकः । इति रत्नमाला ॥
पिण्डाभ्रं, क्ली, (पिण्डवत् आभ्रं मेघजलसम्बन्धित्वम् ।) घनोपलः । इति शब्दमाला ॥
पिण्डायसं, क्ली, (पिण्डं संहतमायसम् ।) तीक्ष्णायसम् । इति राजनिर्घण्टः ॥
पिण्डारं, क्ली, (पिण्डं संहतमृच्छतीति । ऋ + "कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् ।) फल-

प्राकविशेषः। पिण्डारा इति हिन्दीभाषा। अस्य गुणाः। शीतलत्वम्। वल्यत्वम्। पित्तनाशित्वम्। रुचिकारित्वम्। पाके लघुत्वम्। विशेषेण विषशान्तिकरत्वञ्च। इति भावप्रकाशः॥

पिण्डारः, पुं, (पिण्डं ऋच्छतीति। ऋ + अण्।) क्षपणकः। गोपः। महिषीरक्षकः। द्रुमभेदः। इति मेदिनी। रे, १८५॥ विकङ्कतरुक्षः। इति राजनिर्घण्टः॥

पिण्डालुः, पुं, (पिण्डवत् स्थूल आलुः।) कन्दगुड़ूची। कन्दभेदः। पेंड़ालु इति हिन्दीभाषा। चुवड़ि आलु इति बङ्गभाषा। तत्पर्य्यायः। ग्रन्थिलः २ पिण्डकन्दः ३ ग्रन्थिः ४ रोमशः ५ रोमकन्दः ६ रोमालुः ७ ताम्बूलपत्रः ८ नागकन्दः ९ पिण्डकः १०। अस्य गुणाः। मधुरत्वम्। शीतत्वम्। मूत्रकृच्छ्रदाहश्लेष्मपित्तनाशित्वम्। वृष्यत्वम्। सन्तर्पणत्वम्। गुरुत्वञ्च। इति राजनिर्घण्टः॥

पिण्डालुकं, क्ली, (पिण्डालुरिव प्रतिकृतिः। इवार्थे कन्।) आलुविशेषः। गोल आलु इति गुड़ आलु इति चुवड़ि आलु इति च भाषा। अस्य गुणाः। कफहरत्वम्। गुरुत्वम्। वातप्रकोपणत्वञ्च। इति राजवल्लभः॥ (यथा, सुश्रुते। १। ४६।

"विदारीकन्दशतावरीविसभृङ्गालशृङ्गाटककर्कोरुकपिण्डालुकमध्वालुकहस्त्यालुककाष्ठालुकशृङ्गालुकरक्तालुकेन्दीवरोत्पलकन्दप्रभृतीनि॥")

पिण्डाह्वा, स्त्री, (पिण्डां कस्तूरीविशेषमाह्वयते स्वईते स्वगन्धेनेति। ह्वे + कः।) नाड़ीहिङ्गु। इति राजनिर्घण्टः॥

पिण्डिः, स्त्री, (पिडि संहतौ + इन्।) पिण्डिका। इत्यमरटीकायां रमानाथः॥

पिण्डिका, स्त्री, (पिण्डन्ते संहतानि भवन्ति पिण्डान्ते राशीक्रियन्ते वा अराणि यस्याम्। पिण्ड + घञ्। गौरादित्वात् ङीष्। ततः कन्। ह्रस्वश्च।) रथनाभिः। इत्यमरः। २। ८। ५६॥ ना रथचक्रमध्ये मण्डलाकारा यस्यां सर्व्वाणि काष्ठान्यासज्यन्ते। इति रायमुकुटः॥ (पिण्डम्। यथा, हारीते प्रथमस्थाने सप्तमेऽध्याये।

"कांस्यपात्रे समुद्धृत्य परीक्षेत भिषग्वरः।
शुद्धकर्म्मा च तल्लब्धा श्वेतशाल्योदनस्य वा॥
पिण्डिका तत्र संक्षिप्ता नान्यथा भातिसा पुनः॥")

पिच्चिण्डिका। सा जानुनोऽधोमांसलप्रदेशः। इति हेमचन्द्रः॥ पायेर डिम् इति भाषा॥ (यथा, चरके सूत्रस्थाने ७ अध्याये।

"पक्वाशयशिरःशूलं वातवर्च्चो निरोधनम्।
पिण्डिकोद्वेष्टनाध्मानं पुरीषे स्यादिधारिते॥")

श्वेताब्जिः। इति राजनिर्घण्टः॥ पीठः। यथा, रघुवंशे उवाच।

"पिण्डिकालक्षणं वक्ष्ये यथावदनुपूर्व्वशः।
पीठोक्तायं यथावच्च भागान् षोड़श कारयेत्॥
भूमावेकः प्रतिष्ठः स्याच्चतुर्भिर्जंगती मता।
एको भागस्त्रिधैकः स्यात् वृत्तपट्टस्य भागतः॥
भागैस्त्रिभिस्त्रिधा कण्ठं कण्ठपट्टस्तु भागतः।
भागेन वृत्तपट्टस्तु ग्रैवभागेन पट्टिकौ॥
प्रविन्यसं भागमेकैकं जगती यावदेव तु।
निर्गमस्तु पुरस्तस्या यावद्वं विशेषपट्टिकाः॥
पीठिकानान्तु सर्व्वासामेतत् सामान्यलक्षणम्।
निःश्रेयार्हैवतामेतात् शृणुध्वं द्विजसत्तमाः॥
स्थण्डिला वाथ वापी च यज्ञी वेदी च मण्डला।
पूर्णचन्द्रा च वज्री च पद्मा वार्द्धशशिस्तथा॥
त्रिकोणा दशमी तासां संस्थानञ्च निबोधत।
स्थण्डिला चतुरस्रा तु वर्णिता मेखलादिभिः॥
वापी द्विमेखला ज्ञेया यज्ञी चैव त्रिमेखला।
चतुरस्रायतां वेदीं न तां लिङ्गेषु योजयेत्॥
मण्डला वर्त्तुला या तु मेखलाभिर्गुणप्रिया।
रिक्ता द्विमेखला मध्ये पूर्णचन्द्रा तु सा भवेत्॥
मेखलात्रयसंयुक्ता षड़स्रा वज्रिका भवेत्।
षोड़शास्रा भवेत् पद्मा किञ्चिद्वृत्ता च मूलतः॥
तथैव धनुराकारा सार्द्धचन्द्रा प्रशस्यते।
त्रिशूलसदृशा तद्वत् त्रिकोणानूर्द्धतो मता॥
प्रागुदक्प्रवणा तद्वत्प्रशस्ता लक्षणान्विता।
परिवेषस्त्रिभागेन निर्द्देशन्तत्र कारयेत्॥
विस्तारन्तत्प्रमाणन्तु मूले चाग्रे तदूर्द्धतः।
चलवाहस्य कर्त्तव्यस्त्रिभागेन सुशोभनः॥
लिङ्गस्यार्द्धत्रिभागेन स्त्रीलिङ्गेन समधिष्ठिता।
मेखला तु त्रिभागेन ज्ञातं वै तन्मयाग्रतः॥
अथवा पादहीनन्तु शोभनं कारयेत् सदा।
उत्तरस्यं प्रमाणन्तु प्रमाणादधिकं भवेत्॥
स्थण्डिलायामधारोग्यं धनधान्यञ्च पुष्कलम्।
गोप्रदा तु भवेत् यज्ञी वेदी सम्यत्प्रदा भवेत्॥
मण्डलायां भवेत् कीर्त्तिर्व्वरदा पूर्णचन्द्रिका।
आयुःप्रदा भवेद्वज्री पद्मा सौभाग्यदायिनी॥
पुत्रप्रदार्द्धचन्द्रा स्यात् त्रिकोणा शत्रुनाशिनी।
देवस्य यजनार्थन्तु पिण्डिका दश कीर्त्तिताः॥
शैले शैलमयीं दद्यात् पार्थिवे पार्थिवीन्तथा।
दारुजे दारुजां कुर्य्यान्मिश्रे मिश्रान्तथैव च॥
नान्ययोनिस्तु कर्त्तव्या सदा शुभफलैप्सुभिः॥
अर्च्चायामसमं दैर्घ्यं लिङ्गायामसमं तथा।
यस्य देवस्य या पत्नी तां पीठे परिकल्पयेत्॥
एवमेतत् समाख्यातं समासात् पीठलक्षणम्॥"

इति मत्स्यपुराणे पीठिकाशुकीर्त्तनं २३६ अः॥ (लिङ्गपीठम्। गौरीपट्टः। यथा, काशीखण्डे वायुसंहितायामुत्तरखण्डे। २८। ६।

"लिङ्गं पिण्डिकया सार्द्धं पञ्चगव्येन शोधयेत्॥")

पिण्डितं, त्रि, (पिण्ड + क्तः।) गणितम्। घनम्। इति विश्वमेदिन्यौ॥ (संहतः। यथा, वायुपुराणे।

"अर्च्चिष्मान् पिण्डितशिखः सर्पिः काञ्चनसन्निभः।
स्निग्धः प्रदक्षिणश्चैव वह्निः स्यात् कार्य्य-
खिद्धये॥")

गुणितम्। इति हेमचन्द्रः॥ तुरुष्के, पुं। इति राजनिर्घण्टः॥

पिण्डिलः, पुं, (पिण्डवदाकृतिरस्यस्येति। पिण्ड + इलच्।) सेतुः। इति त्रिकाण्डशेषः॥ शल्कः। इत्युणादिकोषः॥

पिण्डिला, स्त्री, (पिण्डिल + टाप्।) गोडुम्बा। इति शब्दचन्द्रिका॥

पिण्डी, [न्] त्रि, (पिण्डोऽस्त्यस्येति। इनिः।) शरीरी। यथा,—

"यथा स्वर्थं विना भूमिर्गेहं दीपविवर्ज्जितम्।
लिङ्गहीनो यथा पिण्डी जयश्रीस्त्वां विना तथा॥"

इति जैमिनिभारते आश्वमेधिकपर्व्वणि ३८ अध्याये॥

पिण्डी, स्त्री, (पिण्डाकारोऽस्त्यस्या इति। अच्। ततो ङीष्।) पिण्डीतगरः। अलाबुः। खर्ज्जूरविशेषः। इति मेदिनी। डे, २०॥ ज्ञाननिरूपणार्थकोपन्यासः। इति धरणिः॥ (पिण्ड + ह्रस्वादिकारादिति वा ङीष्।) पिण्डिका। इत्यमरटीकायां रायमुकुटः॥ पिण्डम्। यथा,—

"नीताय तुरगायाशु भक्तपिण्डीं सुगन्धिनीम्।
दद्यात् पुरोहितस्तस्य संमन्त्र्य शान्तिमन्त्रकैः॥"

इति कालिकापुराणे ८६ अध्यायः॥

पिण्डीतकः, पुं, (पिण्डीं खल्वपिण्डं तनोतीति। तन + अनेभ्योऽपीति डः। ततः संज्ञायां कन्।) मदनवृक्षः। इत्यमरः। २। ४। ५२॥ (अस्य पर्य्यायो यथा, वैद्यकरत्नमालायाम्।

"मदनः श्वसनोराचो गोलः पिण्डीतकः फलम्।
छर्द्दालो विम्बपुष्पा च हरछाटस्तु शल्यकः॥"

यथा च।

"पिण्डीतकस्य तु वराहविभावितस्य
मूलेषु कन्दशकलेषु च सौवर्च्चलेषु।
तैलं क्षतं गतिमपोहति शीघ्रमेतत्
कन्देषु चामरवराम्बुधसाङ्गयेषु॥"

इति सुश्रुते चिकित्सितस्थाने सप्तदशेऽध्याये॥) तगरः। फणिज्झकः। इति विश्वः॥

पिण्डीतगरः, पुं, (पिण्डया पुष्पावच्छेदे खल्वपिण्डेन उपलक्षितस्तगरः।) तगरविशेषः। तत्पर्य्यायः। कफवर्द्धनः २। इति त्रिकाण्डशेषः॥

पिण्डीतगरकः, पुं, (पिण्डीतगर + स्वार्थे संज्ञायां वा कन्।) तगरम्। इति राजनिर्घण्टः॥

पिण्डीतरुः, पुं, (पिण्डया उपलक्षितस्तरुः।) महापिण्डीतरुः। इति राजनिर्घण्टः॥

पिण्डीपुष्पः, पुं, (पिण्डीवत् वर्त्तं पुष्पमस्यको यस्य।) अशोकवृक्षः। इति राजनिर्घण्टः॥ (अशोकशब्देऽस्य विशेषो ज्ञेयः॥)

पिण्डीरः, पुं, (पिण्डीवत् पिण्डाकारात्मीत्यर्थः फलानि ईरयतीति। ईर + णिच् + अच्।) दाड़िमवृक्षः। इति त्रिकाण्डशेषः॥ पिण्डीरः। इत्यमरटीकायां रायमुकुटः॥ नीरडे, त्रि। इति हारावली। १६६॥

पिण्डीशूरः, पुं, (पिण्डया पिण्डव्यापारे भोजने एव शूरः अतिनिपुणः नान्यत्र कार्य्यादाविति भावः।) खगेहमात्रे वसन् पक्षदेषी। तत्पर्य्यायः। गेहेनदी २ गेहेशूरः ३। इति हेमचन्द्रः। ३। ४८१॥ (यथा, भट्टौ। ५। ८५।

"राजवान् वटुयज्ञेषु पिण्डीशूरान्निरस्तवान्।
यद्यसौ कूपमारुक्षि। तवैतावीत कः भयः॥")

पिण्डोलिः, स्त्री, शुक्लयजुर्भेदः। इति हेमचन्द्रः। ३। ८१॥

पिण्या, स्त्री, पण्यते क्रयते रोगैरभृतान् पण्या पण्य ङ यवक्षनौ स्तुतौ सर्वत्र्यान्तः तथानीयया इति यः निपातनादत् इत्। पण्येति पठति स्वामी। इति भरतः॥ ज्योतिष्मती॥ इत्यमरः॥ (ज्योतिष्मतीशब्देऽस्या विवृतिर्विज्ञेया॥)

पिण्याकः, पुं, क्ली, (पिनष्टीति। पिष्लृ संचूर्णने + "पिनाकादयश्च।" उणा। ४। १५। इति आकप्रत्ययेन निपातनात् साधुः।) तिलकल्कः। (अस्य गुणाः यथा,—

"पिण्याको रसपाकौ रूक्षो विष्टम्भी दृष्टिदूषणः॥"

इति वाभटे सूत्रस्थाने षष्ठेऽध्याये॥

यथा, महाभारते। १२। १६७। ३६।

"नवनीतं यथा दध्नस्तथा कामोऽर्थधर्मतः।
स्त्रियस्तैलं हि पिण्याकात् क्षुतं स्त्रीय उदाहृतः॥")

अस्य भक्षणे दोषो यथा,—

"पिण्याकं भक्षयित्वा तु यो वै मानुषमश्नाति।
तस्य वै प्रथमं श्राद्धं त्रयोदशं तु शोभनम्॥
उल्लूको दशवर्षाणि काकस्तु समाश्वयः।
जायते मानवस्तत्र मम कर्म्मपरायणः॥"

इति वराहपुराणम्॥

पिण्डु। पाण्डीकम्। विल्वकः। इति मेदिनी॥ (सरलरसः। अस्य पर्य्यायो यथा,—

"तैलपर्णी दधित्थाख्यः पिण्याकी रक्तशीर्षकः।
वेणी रसाढ्यः श्रीवासः श्रीपिण्डरसगन्धौ॥"

इति वैद्यकरत्नमालायाम्॥)

पितरौ, पुं, जनकजनयित्र्यौ। माता च पिता चेति विग्रहे विकल्पादेकशेषे पितराविति प्राच्यः। इति भरतः॥ तत्पर्य्यायः। माता-पितरौ २ मातरपितरौ ३ तातजनयित्र्यौ ४। इत्यमरः। २। ६। ३०॥ (यथा, रघुः। १।१।

"जगतः पितरौ वन्दे पार्व्वतीपरमेश्वरौ॥")

तयोरभक्त्या पालने दोषो यथा,—

"पितृमातृगुरूंश्चापि भक्तिहीनेन पालयेत्।
बाधा च तादृशेत्तं स्वामिनं दुखटा च या॥
सा कृतघ्नीति विख्याता पापिनां भारते नरः।
वसिष्ठं सप्तघोरं च च सा च प्रयाति च॥
तावत् पूर्वौ दलत्येव यावच्चन्द्रदिवाकरौ।
ततो भवेत्तलौकी च जन्म सप्त ततः शुचिः॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ४८ अध्यायः॥

पिता, [तृ] पुं, माति रक्षत्यपत्यं यः। (पा रक्षणे + "नप्तृनेष्टृत्वष्टृहोतृपोतृप्रशास्तृमातृपितृदुहितृ।" उणा। २। ९९। इति तृप्रत्ययेन निपातनात् साधुः।) उत्पादकः। बाप् इति भाषा। तत्पर्य्यायः। तातः २ जनकः ३। इत्यमरः। २।६। २८॥ प्रसविता ४ वप्ता ५ जनयिता ६ गुरुः ७ जन्मदः ८ जन्यः ९ जनिता १०। इति शब्दरत्नावली॥ वीणी ११ वप्रः १२। इति हेमचन्द्रः॥ * ॥ तस्य माहात्म्यं तत्पूजया च यथा,—

"माता पूज्या च सर्व्वेभ्यः सर्व्वेषां जनदो भवेत्।
यशो यस्य प्रसादेन सर्व्वान् पश्यति मानवः॥
जनको जन्मदाता च रक्षणाच्च पिता गुरुः।
तातो विस्तीर्णकरणात् कृपया वा प्रजापतिः॥"

इति ब्रह्मवैवर्त्ते गणपतिखण्डे ४४ अध्यायः॥

स च गुरुः। यथा,—

"उपाध्यायः पिता ज्येष्ठो भ्राता चैव महीपतिः।
मातुलः श्वशुरश्चाता मातामहपितामहौ॥
बन्धुर्ज्येष्ठपितृव्यश्च पुंस्येते गुरवः स्मृताः॥"

इति कौर्म्मे उपविभागे ११ अध्यायः॥

(ज्येष्ठपितृशब्दे पितृशब्दप्रयोगो यथा, महाभारते। ६। ५३। ३।

"गरुडस्य स्वयं तुण्डे पिता देवव्रतस्तव॥")

स हि महागुरुः। यथा, "महागुरुश्च विष्णुः। त्रयः पुरुषस्यातिगुरवो भवन्ति माता पिताचार्य्यश्चेति॥" इति स्मृतितत्त्वम्॥

कामासक्तस्य पितुर्वचनमग्राह्यं यथा,—

"पितुर्वचो हि मा कार्षीः कामद्यासक्तचेतसः।
चात्मानञ्चाभिधिषञ्च तदर्थं चाप्रियो भवि॥"

इत्यग्नेये श्रीरामं प्रति कौशल्यावाक्यम्॥

तस्य पुत्रकृतधर्म्मार्थधर्म्मभागित्वं यथा,—

"यः पिता स तु पुत्रोऽयमिति वै वैदिकी श्रुतिः।
निगद्यते पुराणे तु तां शृणुष्व यथातथम्॥
न्यग्रोधस्य सुशाखायाः शटाशास्तु गता भुवि।
प्ररोहानुपपद्यन्ते मूलमंशाश्रयात्तथा सुताः॥
तद्विधानुपपद्यन्ते तथान्ये ते च तादृशाः।
तेभ्यश्चान्ये प्ररोहन्ति व्रीहिभ्योऽपि यथा तथा॥
एवं पुत्रैः सुतो धर्म्मस्तथाधर्म्मश्च भूपते।
पिता संलिप्यते तेन मा च त्वं संशयं कृथाः॥
न धर्म्मिणां नराणान्तु वीक्षणाद्यो भवेदिह।
सर्व्वथा शुध्यते लोके बीजात् पुनः वसुक्षयः॥"

इत्यग्नेये पापनाशनदृष्टदानाधायः॥ ८॥

तस्मिन् जीवति याच्ञोल्लिखनिषेधो यथा,—

"न याच्ञोल्लिखनं कुर्य्यात् यस्य जीवन् पिता स्थितः।
तथा ज्येष्ठः सोदरश्च यस्य जीवति च तथा॥"

इति दक्षधर्म्मपुराणम्॥ *॥

उत्पादकपित्रपेक्षया मन्त्रदातृपितुर्गुरुतरत्वं यथा, तन्त्रसारे।

"उत्पादकब्रह्मदात्रोर्गरीयान् ब्रह्मदः पिता।
तस्मान्मन्त्रेण दत्तं पितुरप्यधिकं गुरुम्॥"

सप्त पितरो यथा, वायवीये।

"अन्नदाता भयत्राता यस्य कन्या विवाहिता।
जनयिता पोषनेता च पञ्चैते पितरः स्मृताः॥"

सप्त पितरो यथा,—

"कन्यादाताभयदाता च ज्ञानदाताभयप्रदः।
जन्मदो मन्त्रदो ज्येष्ठभ्राता च पितरः स्मृताः॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ३५ अध्यायः॥

एकविंशतिपितृगणा यथा,—

"विश्वे विश्वसुगाराध्या धर्म्मो धन्यः शुभानन्दः।
भूमिदो भूमिकृद्भूतिः पितृणां ये गणा नव॥
कव्यगः कव्यदः कव्यतरः कव्यतराश्रयः।
कव्यगतेतुरनघः पञ्चिमे ते गणाः स्मृताः॥
वरो वरेण्यो वरदो भूतिदः पृथिदस्तथा।
विश्वधाता तथा धाता सप्तैते च गणाः स्मृताः॥
महान् महात्मा महितो महिमावान्महाबलः।
गणाः पञ्च तथैवैते पितृणां पावनाद्गणाः॥
सुखदो धनदश्चान्यो धर्म्मदोऽन्यश्च भूतिदः।
पितृणां कथ्यते चैतत्तथा गणचतुष्टयम्॥
एकविंशत्पितृगणा येषामाप्यायितं जगत्।
ते मेऽत्र लप्स्यन्त्वखिलं दिशन्तु च सदा हितम्॥"

इति गारुडे पिण्डोत्थं ९८ अध्यायः॥

(पितृणां स्तुतिपूर्व्वकं नामसंख्यादिकथनम् यथा मार्कण्डेये। ८६। १३—३९।

रुचिरुवाच।

"नमस्येऽहं पितॄन् आद्धे ये वसव्यधिदेवताः।
दैवैरपि हि तर्प्यन्ते ये च आद्धे स्वधोत्तरैः॥
नमस्येऽहं पितॄन् स्वर्गे ये तर्प्यन्ते महर्षिभिः।
आद्धैर्मनोमयैर्भक्त्या मुक्तिमुक्तिप्रभोगुभिः॥
नमस्येऽहं पितॄन् स्वर्गे सिद्धाः सन्तर्पयन्ति यान्।
आद्धेषु दिव्यैः सकलैरुपहारैरनुत्तमैः॥
नमस्येऽहं पितॄन् भक्त्या ये चार्च्यन्ते गुह्यकैरपि।
तत्प्रयत्नेन वाञ्छद्भिर्दिव्यामात्मसिद्धिं परां॥
नमस्येऽहं पितॄन्मर्त्तैरर्च्यन्ते भुवि ये सदा।
आद्धेषु अक्षयाभीष्टलोकप्राप्तिप्रदायिनः॥
नमस्येऽहं पितॄन् विप्रैरर्च्यन्ते भुवि ये सदा।
वाञ्छितानीष्टलाभाय प्राणामाद्यप्रदायिनः॥
नमस्येऽहं पितॄन् ये वै तर्प्यन्तेऽरण्यवासिभिः।
वन्यैः आद्धैर्यताहारैस्तन्निर्धृतविकिल्बिषैः॥
नमस्येऽहं पितॄन् विप्रैर्नैष्ठिकव्रतचारिभिः।
ये संयतात्मभिर्नित्यं सन्तर्प्यन्ते समाधिभिः॥
नमस्येऽहं पितॄन् आद्धे राजन्यास्तर्पयन्ति यान्।
कव्यैरन्यैर्विधिबलोकक्षयफलप्रदान्॥
नमस्येऽहं पितॄन् वैश्यैरर्च्यन्ते भुवि ये सदा।
स्वकर्म्माभिरतैर्नित्यं पुण्यधुर्यान्नवासिभिः॥
नमस्येऽहं पितॄन् आद्धैर्ये शूद्रैरपि भक्तितः।
सन्तर्प्यन्ते जगत्यत्र गान्धा ख्याताः सुकालिनः॥
नमस्येऽहं पितॄन् आद्धैः पाताले ये महासुरैः।
सन्तर्प्यन्ते सुधाधाराख्यतृप्तमनसैः सदा॥
नमस्येऽहं पितॄन् आद्धैरर्च्यन्ते ये रसातले।
भोगैरत्यन्तविविधवन्नागैः कामनाभोगुभिः॥
नमस्येऽहं पितॄन् आद्धैः सर्वैः सन्तर्पितान् सदा।
तत्रैव विविधवस्तुभोगसम्पत्समन्वितैः॥

पितृनमस्ये निवसन्ति साक्षात्
ये देवलोके च तथान्तरीक्षे।
मर्त्यत्वे ये च सुरादिपूज्या-
स्ते मे प्रतीच्छन्तु मयोपनीतम्॥
पितृनमस्ये परमात्मभूता
ये वै विमाने निवसन्ति सर्व्वाः।
यजन्ति यान्तत्त्वमलैर्मनोभि-
र्योगीश्वराः शैलविमुक्तिहेतून्॥
पितृनमस्ये दिवि ये च सूर्य्याः
सधामगाः कामदुघाभिधानाः।
प्रधानभूताः सकलेप्सितानां
पितृक्रिया वेदमभिर्धृतेषु॥

तृप्यन्तु तेऽस्मिन् पितरः समस्ता
दृच्छावतां ये प्रदिशन्ति कामान् ।
सुरत्वमिन्द्रत्वमतोऽधिकं वा
सुतान् पशून् स्वानि बलं गृहाणि ॥
सोमस्य ये रश्मिषु येऽर्कबिम्बे
शुक्ले विमाने च सदा वसन्ति ।
तृप्यन्तु तेऽस्मिन् पितरोऽम्बुतोयै-
र्गन्धादिना पुष्टिमितो व्रजन्तु ॥
येषां हुतेऽग्नौ हविषा च तृप्ति-
र्ये भुञ्जते विप्रशरीरसंस्थाः ।
ये पिण्डदानेन सुदं प्रयान्ति
तृप्यन्तु तेऽस्मिन् पितरोऽम्बुतोयैः ॥
ये खड्गिमांसेन सुरैरभीष्टैः
क्षौद्रैस्तिलैर्दैवमनोहरैश्च ।
कालेन शाकेन महर्षिवर्यैः
संप्रीणितास्ते सुदमत्र यान्तु ॥
कव्यान्यशेषाणि च यान्यभीष्टा-
न्यतीव येषाममरार्चितानाम् ।
तेषान्तु सान्निध्यमिहास्तु पुष्प-
गन्धान्नभोज्येषु मया कृतेषु ॥
दिने दिने ये प्रतिगृह्णतेऽर्चां
मासान्तपूज्या भुवि येऽष्टकासु ।
ये वत्सरान्तेऽभ्युदये च पूज्याः
प्रयान्तु ते मे पितरोऽत्र तृप्तिम् ॥
पूज्या द्विजानां कुसुदेन्दुभासो
ये क्षत्रियाणाञ्च नवार्कवर्णाः ।
तथा विशां ये कनकावदाता
नीलीनिभाः शूद्रजनस्य ये च ॥
तेऽस्मिन् समस्ता मम पुण्यगन्ध-
धूपान्नतोयादिनिवेदनेन ।
तथाग्निहोमेन च यान्तु तृप्तिं
सदा पितृभ्यः प्रणतोऽस्मि तेभ्यः ॥
ये देवपूर्व्यन्यतितृप्तिहेतो-
रश्नन्ति कव्यानि शुभाहुतानि ।
तृप्ताश्च ये भूतिकरो भवन्ति
तृप्यन्तु तेऽस्मिन् प्रणतोऽस्मि तेभ्यः ॥
रक्षांसि भूतान्यसुरांस्तथोग्रान्
निर्नाशयन्तस्त्रशिवं प्रजानाम् ।
आद्याः सुराणाममरेशपूज्या-
स्तृप्यन्तु तेऽस्मिन् प्रणतोऽस्मि तेभ्यः ॥
अग्निष्वात्ता बर्हिषद आज्यपाः सोमपास्तथा ।
व्रजन्तु तृप्तिं आद्धेऽस्मिन् पितरस्तर्पिता मया ॥
अग्निष्वात्ताः पितृगणाः प्राचीं रक्षन्तु मे दिशम् ।
तथा बर्हिषदः पान्तु याम्यां ये पितरः स्मृताः ॥
प्रतीचीमाज्यपास्तद्वदुदीचीमपि सोमपाः ।
रक्षोभूतपिशाचेभ्यस्तथैवासुरदोषतः ॥
सर्वतश्चाधिपस्तेषां यमो रक्षां करोतु मे ।
विश्वो विश्वभुगाराध्यो धर्म्मो धन्यः शुभाननः ॥
भूतिदो भूतिकृद्भूतिः पितॄणां ये गणा नव ।
कल्याणः कल्यताः कल्यां कल्यः कल्यतराश्रयः ॥
कल्यताहेतुरनघः यऽमे ते गणाः स्मृताः ।
वरो वरेण्यो वरदः पुष्टिदस्तुष्टिदस्तथा ॥
विश्वपाता तथा धाता चत्वारैते तथा गणाः ।
महान्महात्मा महितो महिमावान्महाबलः ॥
गणाः पञ्च तथैवैते पितॄणां पापनाशनाः ।
सुखदो धनदश्चान्यो धर्म्मदोऽन्यश्च भूतिदः ॥
पितॄणां कथ्यते चैतत्तथा गणचतुष्टयम् ।
एकविंशतिपित्रगणा येषांप्रमखिलं जगत् ॥
ते मेऽनुतृप्तास्तृप्यन्तु यच्छन्तु च सदा हितम् ॥”
शिवः । यथा, महाभारते ।१३ । १७ । १४१ ।
“सदसद्व्यक्तमव्यक्तं पिता माता पितामहः ॥”)

पितामहः, पुं, (पितुः पितेति । “पितृव्यमातुल-मातामहपितामहाः ।” ४ । २ । ३६ । इत्यत्र “मातृपितृभ्यां पितरि डामहच् ।” इति वार्त्तिकोक्त्या डामहच् । ब्रह्मणि तु पितुः पिता जनकस्यापि जनकः । पितॄणां मरीच्यादीनां पितृगणानां पिता वा ।) ब्रह्मा । (यथा, महाभारते । १ । १ । ३२ ।
“यस्मात् पितामहो यज्ञे प्रसुरेकः प्रजापतिः ।
ब्रह्मा सुरगुरुः स्थाणुर्मनुः कः परमेष्ठ्यथ ॥”
शिवः । यथा, महाभारते । १३ । १७ । १४१ ।
“सदसद्व्यक्तमव्यक्तं पिता माता पितामहः ॥”)
पितृपिता । इत्यमरः । २।६ । ३३ ॥ ठाकुरदादा इति भाषा ॥ अस्य पर्य्यायः । आर्य्यकः २ । इति शब्दमाला ॥ (यथा, मनौ । ३ । २२१ ।
“पिता यस्य तु वृत्तः स्याद् जीवेद्वापि पितामहः ।
पितुः स नाम संकीर्त्य कीर्त्तयेत् प्रपितामहम् ॥”)

पितामही, स्त्री, (पितुर्मातेति । पितृव्यमातुलेत्यत्र “मातृपितृभ्यां पितरि डामहच् ।” इति डामहच् । ततः “मातरि पित्रेति ।” पितृकार्य्यं ततः पित्वात् ङीप् ।) पितामहपत्नी । इति जटाधरः ॥ ठाकुरमा इति भाषा ॥ (यथा, कौर्म्मे उपविभागे ११ अध्याये ।
“मातामही मातुलानी तथा मातुश्च सोदराः ।
श्वश्रूः पितामही ज्येष्ठा धात्री च गुरवः स्त्रीषु ॥”)
पौत्रैः पितामहधनविभागकरणे पितामह्यै मातृवद्भागो देयः । यथा,—
“असुताश्च पितुः पत्न्यः समानांशाः प्रकीर्त्तिताः ।
पितामह्यश्च सर्व्वास्ता मातृतुल्याः प्रकीर्त्तिताः ॥”
इति दायभागे व्यासः ॥

पितृक, त्रि, (पितुः सम्बन्धि पितुरागतं वेति । पितृ + कन् । यद्वा, पैतृक + पृषोदरादित्वात् साधुः ।) पितृसम्बन्धि । यथा,—
“पैतृकञ्च पितृकञ्चापि पित्र्यञ्च पितुरागतम् ॥”
इति शब्दमाला ॥

पितृकानन, क्ली, (पितॄणां काननमिव ।) श्मशानम् । इति जटाधरः ॥ (यथा, महानिर्व्वाणतन्त्रे । १० । ७६ ।
“पञ्चवर्षाधिकान् मर्त्यान् दाहयेत् पितृकानने ।
भर्त्रा सह कुलेनापि न दहेत् कुलकामिनीम् ॥”)

पितृगृह, क्ली, (पितॄणां गृहम् ।) श्मशानम् । इति हेमचन्द्रः ॥ (पितुर्गृहम् ।) पितृवेश्म च ॥

पितृतर्पण, क्ली, (तृप्यन्त्यनेनेति । तृप् + करणे ल्युट् । पितॄणां तर्पणमिति । यद्वा, तृप + भावे ल्युट् । पितॄणां तर्पणं तृप्तिर्यस्मात् ।) पितृतीर्थम् । तत्तु तर्जन्यङ्गुष्ठयोर्म्मध्यम् । इति शब्दचन्द्रिका ॥ निवापः । इति हेमचन्द्रः ॥ तिलः । इति राजनिर्घण्टः ॥ पितृतीर्थेन पितृदेवीयकजलदानम् । तस्यानुष्ठानं तर्पणशब्दे द्रष्टव्यम् ॥ पितॄणां तृप्तिमाचष्ट ॥

पितृतिथिः, स्त्री, (पितृप्रिया तिथिरिति मध्यलोपी समासः ।) अमावास्या । यथा,—
“अमावास्यादिनं वोऽस्तु तस्यां कुशतिलोदकैः ।
तर्पिता मानुषैस्तृप्तिं परां गच्छत नान्यथा ॥”
इति वाराहे पितृसर्गस्थितिवर्णनम् ॥

पितृतीर्थ, क्ली, (पितृप्रियं तीर्थम् ।) गया । इति जटाधरः ॥ (गयादि-२२२ पितृवल्लभतीर्थानि मत्स्यपुराणे श्राद्धकल्पे २२ अध्याये उक्तानि । यथा,—
“तीर्थानि कानि शस्तानि पितॄणां वल्लभानि च ।
नामतस्तानि वक्ष्यामि संक्षेपेण द्विजोत्तमाः ! ।
पितृतीर्थं गया नाम सर्व्वतीर्थवरं शुभम् ॥
यत्रास्ते देवदेवेशः स्वयमेव पितामहः ।
तत्रैषा पितृभिर्गीता गाथा भागमभीप्सुभिः ॥
दृष्ट्वा बहवः पुत्रा यद्येकोऽपि गयां व्रजेत् ।
यजेत वाश्वमेधेन नीलं वा वृषमुत्सृजेत् ॥
तथा वाराणसी पुण्या पितॄणां वल्लभा सदा ।
तत्राविमुक्तसान्निध्यं मुक्तिमुक्तिफलप्रदम् ॥
पितॄणां वल्लभं तद्वत् पुण्यञ्च विमलेश्वरम् ।
पितृतीर्थं प्रयागन्तु सर्व्वकामफलप्रदम् ॥
वटेश्वरस्तु भगवान् माधवेन समन्वितः ।
योगनिद्राश्रयस्तद्वत् सदा वसति केशवः ॥
दृष्ट्वाश्वमेधिकं पुण्यं गङ्गाद्वारं तथैव च ।
नन्दाख्य ललिता तद्वत्तीर्थं मायापुरी शुभा ॥
तथा मित्रपदं नाम ततः केदारमुत्तमम् ।
गङ्गासागरमित्याहुः सर्व्वतीर्थमयं शुभम् ॥
तीर्थं ब्रह्मसरस्तद्वच्छतद्रुसलिले हृदे ।
तीर्थन्तु नैमिषं नाम सर्व्वतीर्थफलप्रदम् ॥
गङ्गोद्भेदस्तु गोमत्यां यत्रोद्भूतः सनातनः ।
तथा यज्ञवराहस्तु देवदेवश्च शूलभृत् ॥
यत्र तत्काञ्चनं द्वारमददाद्वसुजो हरः ।
नैमिषस्तु हरिश्चक्रस्य शीर्णा यत्राभवत् पुरा ॥
तदेतन्नैमिषारण्यं सर्व्वतीर्थनिषेवितम् ।
देवदेवस्य तत्रापि वाराहस्य तु दर्शनम् ॥
यः प्रयाति स पूतात्मा नारायणपदं व्रजेत् ।
कृतशौचं महापुण्यं सर्व्वपापविनाशनम् ॥
यत्रास्ते नारसिंहस्तु स्वयमेव जनार्द्दनः ।
तीर्थमिक्षुमती नाम पितॄणां वल्लभं सदा ॥
सङ्गमे यत्र तिष्ठन्ति गङ्गाद्याः पितरः सदा ।
कुरुक्षेत्रं महापुण्यं सर्व्वतीर्थसमन्वितम् ॥
तथा च सरयूः पुण्या सर्व्वदेवनमस्कृता ।
इरावती नदी तद्वत् पितृतीर्थाधिवासिनी ॥
यमुना देविका काली चन्द्रभागा दृषद्वती ।
नदी वेणुमती पुण्या परा वेत्रवती तथा ॥

पितृणां वल्भा लोका: आद्धे कोटिगुणा मता: ।
कामगामं महापुण्यं यत्र मार्गो हि तक्षते ॥
तदापि पित्रतीर्थं तत् सर्वकामफलप्रदम् ।
गोप्रक्षुल्लमिति ख्यातं पित्रतीर्थं त्रिलोचना: ॥
तथा रुद्रसर: पुण्यं सरो मानसमेव च ।
मन्दाकिनी तथाक्षोदा विपाशाच्य सरस्वती ॥
पूर्वेभिवसदत्तद्वैवताद्यं महाफलम् ।
शिप्रा नदी महाकालसंज्ञाकालक्षरं शुभम् ॥
वंशोद्भेदं परोद्भेदं गङ्गोद्भेदं महाफलम् ।
भद्रेश्वरं विष्णुपदं नर्मदाद्वारमेव च ॥
तथापिण्डप्रदानेन समाचाप्नोमहर्षय: ।
एतानि पित्रतीर्थानि सर्वपापहराणि च ॥
स्वर्गादपि लोकानां किन्तु आद्धकृतां गृहात् ।
गोद्वारं पित्रतीर्थं च कावेरी कपिलोदकम् ॥
गयादित्यत्रयोगायास्तथैवामरकण्टकम् ।
कुरुक्षेत्राच्छतगुणं तस्मिन् आगादिकं भवेत् ॥
शुक्रतीर्थं च विख्यातं तीर्थं सोमेश्वरं परम् ।
सर्वमाधिकरं पुण्यं शतकोटिफलाधिकम् ॥
आद्धे दाने तथा होमे स्वाध्याये जपसन्निधौ ।
कायावरोहणं नाम तथा चर्मण्वती नदी ॥
गोमती वरुणा तद्वत्तीर्थमौशनसं परम् ।
भैरवं भृगुतुङ्गं च गौरीतीर्थमनुत्तमम् ॥
तीर्थं वैनायकं नाम भद्रेश्वरत: परम् ।
तथा पापहरं नाम पुण्याच तपती नदी ॥
सूतताप्री पयोष्णी च पयोष्णीसङ्गमस्तथा ।
महाबोधि: पाटला च नागतीर्थमवन्तिका ॥
तथा वेणा नदी पुण्या महाह्रदं तथैव च ।
महाह्रदं महाग्निं दशार्णा च नदी शुभा ॥
शतरुद्रा शताक्षा च तथा विष्णुपदं परम् ।
अङ्गारवाहिका तद्वन्नदौ तौ शोणवर्षरौ ॥
कान्तिका च नदी पुण्या वितस्ता च नदी तथा ।
एतानि पित्रतीर्थानि श्रूयन्ते स्नानदानयो: ॥
आद्धमेतेषु यत्प्रोक्तदनन्तफलं स्मृतम् ।
शोणी पाटनदी वाराणसी क्षीरनदी तथा ॥
गोकर्णं गवकर्णं च तथा च पुरुषोत्तम: ।
द्वारका शङ्खतीर्थं च तथाबुंदसरस्वती ॥
नदी मन्दिमती नाम तथा च गिरिकर्णिका ।
घृतपापं तथा तीर्थं वसुधा दक्षिणस्तथा ॥
एतेषु पित्रतीर्थेषु श्राद्धमानन्त्यमश्नुते ।
तीर्थं मेघङ्करं नाम स्वयमेव जनार्दन: ॥
यत्र श्राद्धेश्वरो विष्णुर्मेखलायामवस्थित: ।
तथा मन्दोदरी तीर्थं तीर्थं चम्पा नदी शुभा ॥
तथा वामनकाश्च महाह्रादनदी तथा ।
धनुषाकं धर्मकोटं तथा धर्मेश्वरं महत् ॥
सप्तर्षिं विदुरं चैव सिद्धेश्वरत: परम् ।
त्रिशूलं श्राद्धरं तीर्थं नारसिंहत: परम् ॥
मरीचेश्च तथा पुण्यमथ क्षीरसरस्तथा ।
एतेष्वपि सदा श्राद्धमनन्तफलदं स्मृतम् ॥
एतस्मादपि चैतानि सद: पापहराणि वै ।
तुङ्गभद्रा नदी पुण्या तथा भीमरथी सरित् ।
भीमेश्वरं कृष्णवेणा कावेरी कुङ्कुमा नदी ।
नदी गोदावरी नाम त्रिषन्ध्या तीर्थमुत्तमम् ॥
तीर्थं वैद्यसरं नाम सर्वतीर्थनमस्कृतम् ।
यत्राप्ते भगवानीश: स्वयमेव त्रिलोचन: ॥
श्राद्धमेतेषु सर्वेषु कोटिकोटिगुणं भवेत् ।
नारसादपि यामानि नश्यन्ति शतधा द्विजा: ॥
श्रीपर्वतं ताम्रपर्णी च जयातीर्थमनुत्तमम् ।
तथा सत्यनदी पुण्या शिवधारं तथैव च ॥
भद्रतीर्थं च विख्यातं पम्पातीर्थं च शाश्वतम् ।
पुण्यं रामेश्वरं तद्वदैलापुरमलं परम् ॥
अङ्गभूतं च विख्यातमानन्दकमलं बुधम् ।
शातातपेश्वरं तद्वदैकाम्रकमन: परम् ॥
गोवर्धनं परिचन्द्रं क्षुपचन्द्रं पृथूदकम् ।
सहस्राक्षं शिरण्याक्षं तथा च कदली नदी ॥
रामाधिवासस्तत्रापि तथा सौमित्रिसङ्गम: ।
इन्द्रकीलं महादानं तथा च प्रियमेलकम् ॥
एतान्यपि सदा श्राद्धे प्रशस्तान्यधिकानि तु ।
एतेषु सर्वदेवानां सान्निध्यं दृश्यते यत: ॥
दानमेतेषु सर्वेषु दत्तं कोटिशताधिकम् ।
वाहुदा च नदी पुण्या तथा सिद्धवनं शुभम् ॥
तीर्थं पाशुपतं नाम नदी पार्वतिका शुभा ।
श्राद्धमेतेषु सर्वेषु दत्तं कोटिशतोत्तरम् ॥
तथैव पित्रतीर्थन्तु यत्र गोदावरी नदी ।
युतालिङ्गसहस्रेण सर्वान्तरजलावहा ॥
जामदग्न्यस्य तत्तीर्थं क्रमादायातमुत्तमम् ।
प्रतीकस्य भयाद्विप्र यत्र गोदावरी नदी ॥
तत्तीर्थं दृषकस्थानामप्सरोयुगसंज्ञितम् ।
श्राद्धाधिकार्यदानेषु तथा कोटिशताधिकम् ॥
तथा सहस्रलिङ्गश्च राघवेश्वरमुत्तमम् ।
सेन्द्रेण नदी पुण्या यत्रेन्द्र: पतित: पुरा ॥
निहत्य नमुचिं शक्रस्तपसा स्वर्गमाप्तवान् ।
तत्र दत्तं नरै: श्राद्धमनन्तफलदं भवेत् ॥
तीर्थन्तु पुष्करं नाम शालग्रामं तथैव च ।
सोमपानश्च विख्यातं यत्र वैश्वानरालयम् ॥
तीर्थं सारस्वतं नाम स्वामितीर्थं तथैव च ।
मलन्दरा नदी पुण्या कौशिकी चन्द्रिका तथा ॥
वैदर्भा वाथ वेरा च पयोष्णी शाङ्खुखा परा ।
कावेरी चोत्तरा पुण्या तथा जालन्धरी गिरि: ॥
एतेषु श्राद्धतीर्थेषु श्राद्धमानन्त्यमश्नुते ।
सोदरं तथा तीर्थं चित्रकूटस्तथैव च ॥
विन्ध्ययोगश्च गङ्गायास्तथा नदीतटं शुभम् ।
कुलाम्बन्तु तथा तीर्थं उर्वशीपुलिनं तथा ॥
संसारमोचनं तीर्थं तथैव ऋणमोचनम् ।
एतेषु पित्रतीर्थेषु श्राद्धमानन्त्यमश्नुते ॥
अदृहासं तथा तीर्थं गौतमेश्वरमेव च ।
तथा वह्निष्ठं तीर्थन्तु चारितं तु ततः परम् ॥
ब्रह्मावर्तं कुशावर्तं श्रयतीर्थं तथैव च ।
पिप्पलकश्च विख्यातं ऋणोद्धारं तथैव च ॥
घण्टेश्वरं विल्वकश्च नीलपर्वतमेव च ।
तथा च धरणीतीर्थं रामतीर्थं तथैव च ॥
कुशतीर्थश्च विख्यातमनन्तं श्राद्धदायकं ।
तीर्थं वेदशिरो नाम तथैवाघवती नदी ॥
तीर्थं वसुपदं नाम द्वारकाख्यं तथैव च ।
एतेषु श्राद्धदातार: प्रयान्ति परमं परम् ॥
तथा च वदरीतीर्थं मणितीर्थं तथैव च ।
श्रयन्तं विष्णुपदं शुक्लतीर्थं तथैव च ॥
श्रीपर्वते तथा तीर्थं तीर्थं रैवतकं तथा ।
तथैव भारद्वाजतीर्थं भद्रकालीश्वरं तथा ॥
वैकुण्ठतीर्थमेव परं भीमेश्वरमथापि वा ।
एतेषु श्राद्धदातार: प्रयान्ति परमां गतिम् ॥
तीर्थं माढरकं नाम करवीरपुरं तथा ।
कुशेश्वरञ्च विख्यातं गौरीशिखरमेव च ॥
नकुलेशस्य तीर्थेषु कर्दमालं तथैव च ।
दक्षिणपुण्यकरं तद्वत् पुष्करीश्वरं तथा ॥
सप्त गोदावरीतीर्थं सर्वतीर्थेश्वरेश्वरम् ।
तत्र श्राद्धं प्रदातव्यमनन्तफलमीप्सुभि: ॥
एष तूद्देशत: प्रोक्तस्तीर्थानां संग्रहो मया ।
वागीशोऽपि न शक्नोति विस्तरात् किमु ।
मानुष: ॥
सत्यं तीर्थं दया तीर्थं तीर्थमिन्द्रियनिग्रह: ।
सर्वाश्रमाणां गेहेऽपि तीर्थन्तु मनुदाहृतम् ॥
एतत्तीर्थेषु यच्छ्राद्धं तत् कोटिगुणमिष्यते ।
यस्मात् तस्मात् प्रयत्नेन तीर्थं श्राद्धं समाचरेत् ॥"**)

तर्ज्जन्यङ्गुष्ठयोर्मध्यम् । इत्यमर: ॥
"अन्तराङ्गुष्ठदेशिन्यो: पितृणां तीर्थमुत्तमम् ॥"
इति कौर्म्मे उपविभागे ११ अध्याय: ॥

पित्रदानं, क्ली, (पितरि पित्रे वा दानम् ।) पित्राद्युद्देशेनान्नवस्त्रादिदानम् । पित्रर्पणं श्राद्धं तेन मात्रादेरपि श्रेष्ठत्वम् । तत्पर्य्यायः । निवाप: २ । इत्यमर: । २।७।३१ ॥ निवपनम् ३ पित्रदानकम् ४ । इति शब्दरत्नावली ॥

पित्रदानकं, क्ली, (पित्रदान + स्वार्थे कन् ।) पित्रुद्देश्यकदानम् । इति शब्दरत्नावली ॥

पित्रपक्ष:, पुं, (पित्रप्रिय: पक्ष: ।) गौणाश्विनकृष्णपक्ष: । स तु प्रेतपक्ष: । तत्र श्राद्धकर्त्तव्यता यथा, श्रीमाद्रिमाधवसंग्रहयोर्नागरखण्डम् ।
"आषाढ्या: पञ्चमे पक्षे कन्यासंस्थे दिवाकरे ।
यो वै श्राद्धं नर: कुर्य्यादैकस्मिन्नपि वासरे ।
तस्य संवत्सरं यावत् तृप्ता: स्यु: पितरो ध्रुवम् ॥
नभा वाथ नभस्यो वा मलमासो यदा भवेत् ।
सप्तम: पित्रपक्ष: स्यादन्यत्रैव तु षण्मस: ॥"
इति मलमासतत्त्वम् ॥

पित्रपति:, पुं, (पितॄणां पति: ।) यम: । इत्यमर: ।१।१।६१ । (यथा, मार्कण्डेये ।१०१।३७
"त्वं ब्रह्मा हरिरुद्रसंज्ञिततनुस्त्रिमूर्त्ति-
र्विश्वेश: पित्रपतिस्त्वमुग्रपति: शर्व: ।
सोमोऽग्निर्गगनमहीधरोऽम्बिबन्धु:
किं स्तौमि त्वां सकलात्मरूपधाम: ॥")

पित्रपिता, [त्र्] पुं, (पितु: पिता ।) पितामह: । इत्यमर: । २ । ६ । ३३ ॥

पित्रप्रसः, स्त्री, (पितॄणां प्रसूरिव । पित्रादीनां सख्यावक्तिव्याक्तिवेषोक्तिवाक्यादाम्यां प्रसृतत्वात् कर्त्तरि घञ्लोपः ।) सन्ध्या । इत्यमरः ।१।८।३६ ॥ (यथा, आर्य्यासप्तशत्याम् । ५०१ ।
"रजनीमियतपतेर्नु पित्रप्रसः प्रथमसुषमसी ।

रञ्जयति स्वयमिन्द्रं ऋनायकं दुष्टदूतीव ॥"
पितुः प्रकृर्जनयित्री ।) पितामही ॥
पितृप्रियः, पुं, (पितॄणां प्रियः ।) भृङ्गराजः । इति राजनिर्घण्टः ॥ (गुणादयोऽस्य भृङ्गराजशब्दे ज्ञातव्याः ॥)
पितृबन्धुः, पुं, (पितुर्बन्धुः ।) पितामहभगिनीपुत्रः । पितामहीभगिनीपुत्रः । पितुर्मातुलपुत्रः । इत्युद्वाहतत्त्वम् ॥
पितृबान्धवः, पुं, (पितुर्बान्धवः ।) पितृबन्धुः । यथा, उद्वाहतत्त्वे ।
"पितुः पितुःस्वसुः पुत्राः पितुर्मातुःस्वसुः सुताः । पितुर्मातुलपुत्राश्च विज्ञेयाः पितृबान्धवाः ॥"
पितृभोजनः, पुं. (पितृभिर्भुज्यते इति । भुज + कर्म्मणि ल्युट् । पित्रुद्देश्यकदानेऽस्य प्रशस्ततया तथात्वम् ।) माषः । इति राजनिर्घण्टः ॥ (भुज + भावे ल्युट् । पितॄणां भोजनमिति ।) पितॄणां भक्षणे, क्ली ॥
पितृभ्राता, [तृ] पुं, (पितुर्भ्राता ।) पितृव्यः । इत्यमरः । २ । ६ । ३१ ॥
पितृयज्ञः, पुं, (पितृभ्यः पितॄनुद्दिश्येत्यर्थः यो यज्ञः ।) तर्पणम् । यथा, मनुः । ३ । ७० ।
"अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम् । होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम् ॥"
पितृलोकः, पुं, (पितॄणां लोकः ।) पितॄणां भुवनम् । (यथा, महाभारते । १ । ६२ । १० ।
"कथञ्च बहुलाः सेनाः पाण्डवः कृष्णसारथिः । अस्यन्निकोऽनयत् सर्व्वाः पितृलोकं धनञ्जयः ॥")
अस्य विवरणं यथा,—
मार्कण्डेय उवाच ।
"सर्व्वेषामेव देवानामाद्यो नारायणो गुरुः । तस्माद्ब्रह्मा समुत्पन्नः सोऽपि सप्तान्यजन्मुनीन् ॥
मा यजध्वेति तेनोक्तास्तदा ते परमेष्ठिनः । आत्मनात्मानमेवाग्रे अयजन्त इति श्रुतिः ॥
तेषां वै ब्रह्मजातानां महावैकारिकर्म्मणाम् । अपश्यद्भाभिचारेण महानेष कृतो यतः ।
प्रभवज्ञानिनः सर्व्वे भविष्यथ न संशयः ॥
एवं प्रभास्तनस्तेऽपि ब्रह्मणात्मसमुद्भवाः । सद्योऽपत्यकरान् पुत्रानुत्पाद्य त्रिदिवं ययुः ॥
ततस्तेषु प्रयातेषु त्रिदिवं ब्रह्मवादिषु । तत्पुत्राः श्राद्धदानेन तर्पयामासुरञ्जसा ॥
ते च वैमानिकाः सर्व्वे ब्रह्मणः सप्त मानसाः । तत्पिण्डदानमन्त्रोक्तं प्रपश्यन्तो व्यवस्थिताः ॥
गौरमुख उवाच ।
ये च ते पितरो ब्रह्मन् स्वश्च कालं समासते । कियन्तो वै पितृगणास्तस्मिन् लोके व्यवस्थिताः ॥
मार्कण्डेय उवाच ।
प्रवर्त्तन्ते वराः केचिद्देवानां सोमवर्द्धनाः । ते मरीच्यादयः सप्त स्वर्गे ते पितरः स्मृताः ॥
चत्वारो मूर्त्तिमन्तो वै त्रयस्त्वन्ये ह्यमूर्त्तयः । तेषां लोकनिसर्गश्च कीर्त्तयिष्यामि तच्छृणु ॥
प्रभावश्च महर्षे त्वं विस्तरेण निबोध मे । धर्म्मसूर्त्तिधरास्तेषां त्रयोऽन्ये परमा गणाः ॥
तेषां नामानि लोकांश्च कीर्त्तयिष्यामि तच्छृणु ॥
लोकाः सन्तानकामाय यत्र तिष्ठन्ति भास्वराः । अमूर्त्तयः पितृगणास्ते वै पुत्राः प्रजापतेः ॥
विराजस्य प्रजाः श्रेष्ठास्ते वैराजा इति स्मृताः । देवानां पितरस्ते हि तान् यजन्तीह देवताः ॥
एते वै लोकविभ्रष्टा लोकान् प्राप्य सनातनान् । पुनर्यत्नगृहीतान्तेषु जायन्ते ब्रह्मवादिनः ॥
ते प्राप्य तां स्मृतिं भूयः सिद्धियोगमनुत्तमम् । चिन्त्य योगगतिं शुद्धां पुनरावृत्तिदुर्लभाः ॥
एतेऽस्मिन् पितरः श्राद्धे योगिनां योगवर्द्धनाः । आप्यायितास्तु ते पूर्व्वं वेऽपि योगबले रताः ॥
तस्मात् श्राद्धानि देयानि योगिनां योगसत्तमैः । एष वै प्रथमः सर्गः सोमपानामनुत्तमः ॥
एते त एकतनवो वर्त्तन्ते द्विजसत्तमाः । भूर्लोकवासिना याज्या भुवर्लोकनिवासिनः ॥
स्वर्गलोका मरीच्याद्यास्तेषां याज्या महर्गताः । कल्पवासिकसंज्ञानां तेषामपि जने स्थिताः ॥
सनकाद्यास्ततस्तेषां वैराजास्तपसि स्थिताः । तेषां सत्यगताः प्रोक्ता इत्येषा पितृसन्ततिः ॥
सप्तधा सप्तलोकेषु आदिमन्वन्तरक्रिया । अन्येषां वसवः साध्या रुद्रादित्याश्विनाविति ॥
अग्रतः सर्व्ववर्णानां साधारण्येन संस्थिताः । ऋषयश्च तदुत्पन्ना इति सप्तविधा गणाः ॥
तेषां कल्यासु संजाता महती पितृसन्ततिः । आग्निस्वात्ताश्च मारीचा वैराजा बर्हिसंज्ञिताः ॥
सुकाला नाम पितरो वशिष्ठस्य प्रजापतेः । तेऽपि याज्यास्त्रिभिर्वर्णैर्न शूद्रेण पृथक् कृतम् ॥
वर्णत्रयाभ्यनुज्ञातः शूद्रः सर्व्वान् पितॄन् यजेत् । न तु तस्य पृथक् सन्ति पितरः शूद्रजातयः ॥
सुक्तचेतनका ब्रह्मन् ! न दृश्यन्ते पितृष्वपि । विशेषश्चास्तदृष्ट्या तु पुराणानाञ्च दर्शनात् ॥
एवं ऋषिसुतैः शास्त्रेर्ज्ञात्वा याजकसम्भवान् । स्वयं दृष्ट्वा स्मृतिर्लब्धा पुत्राणां ब्रह्मणा ततः ॥
परं निर्व्वाणमापन्नास्तेऽपि ज्ञानिन एव च । वैश्यादीनां कश्यपाद्या वर्णानां वसवादयः ॥
अविशेषेण विज्ञेया गन्धर्व्वाद्या अपि ध्रुवम् । एष ते पैतृकः सर्गः उद्देशेन महामुने ! ।
कथितो नान्त एवास्य वर्षकोट्या हि दृश्यते ॥"
इति वाराहे श्राद्धकल्पः ॥ * ॥
अपि च ।
"पितॄणां सम्भवं राजन् ! कथ्यमानं निबोध मे । पूर्व्वं प्रजापतिर्ब्रह्मा सिसृक्षुर्विविधाः प्रजाः ॥
एकाग्रमानसः सर्व्वास्तन्मात्रा मनसो बहिः । कृत्वा परमकं ब्रह्म ध्यायन् सर्व्वेषु रूपकैः ॥
तस्यात्मनि तदा योगं गतस्य परमेष्ठिनः । तन्मात्रा निर्ययुर्देहाद्धूमवर्णकृतत्विषः ॥
पिबाम इति भाषन्तः सुरां सोममितोऽसकृत् । ऊर्द्धं जिगमिषन्तो वै अधःसंस्थास्तपस्विनः ॥
तान् दृष्ट्वा सहसा ब्रह्मा तिर्य्यक्संस्थांस्तदोन्मुखान् ।
भवन्तः पितरः सन्तु सर्व्वेषां गृहमेधिनाम् ॥
ऊर्द्ध्ववक्त्रासु ये तत्र ते नान्दीमुखसंज्ञिताः ॥
इत्युक्त्वा तु तदा ब्रह्मा तेषां पत्न्यानमाकरोत् । दक्षिणायनसंज्ञन्तु पितॄणान्तु पितामहः ॥
तूष्णीं ससर्ज्ज भूतानि तमसः पितरस्ततः । तृप्तिं नो देहि भगवन् यथा विन्दामहे सुखम् ॥
ब्रह्मोवाच ।
अमावास्यादिनं वोऽस्तु तस्यां कुशतिलोदकैः । तर्पिता मानुषेस्तृप्तिं परां गच्छत नान्यथा ॥
तिला देयास्तथैतस्यामुपोष्य पितृभक्तितः । परमं तस्य सन्तुष्टाः परं यच्छत मा चिरम् ॥"
इति वाराहे पितृसर्गस्थितिवर्णनम् ॥ * ॥
पितृश्राद्धविशेषे देवताविशेषाः पितृगणाश्च यथा,
"क्रतुर्दक्षो वसुः सत्यः कामः कालस्तथा ध्वनिः । रोचकश्चार्द्रवास्तेव तथा चान्यः पुरूरवाः ॥
विश्वेदेवा भवन्त्येते दश सर्व्वत्र पूजिताः । विश्वेदेवौ क्रतुदक्षौ सर्व्वास्विष्टिषु विश्रुतौ ॥
नित्यं नान्दीमुखश्राद्धे वसुसत्यौ च पैतृके । नवान्नालम्भने देवौ कामकालौ सदैव हि ॥
अपि कन्यागते सूर्य्ये श्राद्धे च ध्वनिरोचकौ । पुरूरवाश्चार्द्रवाश्च विश्वदेवौ च पर्व्वणि ॥
सुभास्वरा बर्हिषदो ह्यग्निस्वात्तास्तथैव च । आज्यपाश्चोपहूताश्च क्रव्यादाश्च सुकालिनः । एते पितृगणाः सप्त पौराणाः कैश्चिदेव हि ॥"
इत्यग्निपुराणम् ॥ * ॥
अग्निस्वात्तादेरुत्पत्तिर्यथा,—
"ततो निगृह्येन्द्रियकं विकारं चतुराननः । जिघृक्षुरपि तत्याज तां सन्ध्यां कामरूपिणीम् ॥
तत्शरीरात्तु घर्म्माम्भो यत् प्रपात द्विजोत्तमाः । अग्निस्वात्ता बर्हिषदो जाताः पितृगणास्ततः ॥
भिन्नाञ्जननिभाः सर्व्वे फुल्लराजीवलोचनाः । नितान्तसंयताः पुण्याः संसारविमुखाः परे ॥
सहस्राणां चतुःषष्टिरग्निस्वात्ताः प्रकीर्त्तिताः । षड़शीतिसहस्राणि तथा बर्हिषदो द्विजाः ॥"
इति कालिकापुराणे २ अध्यायः ॥ * ॥
तेषां तर्पणविधिर्यथा,—
"अपसव्यं ततः कृत्वा सव्यं जानु च भूतले । अग्निस्वात्तांस्तथा सौम्यान् हविष्मतस्तथोष्मपान् ॥
सुकालिनो बर्हिषदस्तथा चैवाज्यपान् पुनः । तर्पयेत्तु पितॄन् भक्त्या सतिलोदकचन्दनैः ॥
दर्भपाणिस्तु विधिवत् प्रेतांस्तांस्तर्पयेत्ततः । पित्रादीन्नामगोत्रेण तथा मातामहानपि ।
सन्तर्प्य विधिवद्भक्त्या इमं मन्त्रमुदीरयेत् ॥
ये बान्धवाबान्धवा वा येऽन्यजन्मनि बान्धवाः । ते गृह्णन्त्वखिलां यान्तु यच्चास्त्तोऽभिवाञ्छति ॥"
इति मात्स्ये स्नानविधौ ८४ अध्यायः ॥
पितृवनं, क्ली, (पितॄणां वनमिव ।) श्मशानम् । इत्यमरः । २ । ८ । ११८ ॥ (यथा, महाभारते । १३ । ४ । १५ ।
"सर्व्वे पितृवनं प्राप्ता स्वपन्ति विगतज्वराः । निर्म्मांसैरस्थिभूयिष्ठैर्गात्रैः स्नायुनिबन्धनैः ॥")
पितृवनेचरः, पुं, (पितृवने श्मशाने चरतीति । चर + "चरेष्टः ।" ३ । २ । १६ । इति टः । अलुक्समासः ।) शिवः । इति केचित् ॥

"रञ्जकं नाम यत् पित्तं तदसं शोषणतां नयेत्।
यत्तु साधकसंज्ञं तत् कुर्य्याद्बुद्धिं धृतिं स्मृतिम्॥"
धृतिं मेधाम्।
"यदालोचकसंज्ञं तद्रूपग्रहणकारणम्।
भ्राजकं कान्तिकारि स्यात्क्षेपाभ्यङ्गादिपाचकम्॥
पित्तप्रकृतिको यथा,—
"पित्तप्रकृतिको यादृक् तादृशोऽथ निगद्यते।
अकालपलितो गौरः क्रोधी खेदी च बुद्धिमान्॥
बहुभुक् ताम्रनेत्रश्च स्वप्ने ज्योतींषि पश्यति।
श्यामकेशः क्षमी स्थूलो बहुवीर्य्यो महाबलः॥
पित्तं वह्निर्वह्निजं वा तदस्मात्
पित्तोद्रिक्तस्तीव्रतरुणो बुभुक्षुः।
गौरोष्णाङ्गस्ताम्रहस्तोऽङ्गिरक्तः
शूरो मानी पिङ्गकेशोऽल्पलोमा॥"
पित्तप्रकृतिकन्यगा यथा,—
"शाम्रवर्णकपिमार्जारशशोलूकाश्च पैत्तिकाः॥"
पित्तस्रोपशमहेतुमाह।
"तिक्तस्वादुकषायशीतपवनच्छायानिशावीजन-
व्योम्नाभ्यूषहयस्तवारिजलदस्त्रीगात्रसंस्पर्शनम्।
सर्पिःक्षीरविरेकसेकरुधिरस्रावप्रदेहादिकं
पानाहारविहारभेषजमिदं पित्तं प्रशान्तिं नयेत्॥"
अथ पित्तप्रकोपकारणानि।
"कटूष्णक्षाराविदाहितीक्ष्णलवणक्रोधोपवासातप-
स्त्रीसंभोगलघ्वाशुधाभिहननव्यायाममद्यादिभिः।
भुक्तेऽजीर्य्यति भोजने च शरदि ग्रीष्मे तथा
प्राणिनां
मध्याह्ने च तथार्द्धरात्रसमये पित्तप्रकोपो भवेत्॥"
इति भावप्रकाशे पूर्व्वखण्डे २ भागे॥
(यथा च।
"अत्युष्णरूक्षाम्लकटुप्रदाहैः
सौधौ सुरासेवनेनातिधर्म्मे।
क्रोधादपि स्वेदने च व्यवाये
अभोजने याति कोपञ्च पित्तम्॥
कुलत्थमाषकोद्रवमूलेषु शिग्रु
तिलातसीराजिकाशाकवृन्दे।
निशाजागरे योधने च श्रमे वा
वनान्ते शरत्सु प्रकोपः प्रदिष्टः।
भुक्तं वासरे मध्यगेऽर्के निशीथे
ऽप्यजीर्य्यत्प्रभुक्ते प्रकोपः प्रदिष्टः॥"
इति हारीते प्रथमस्थाने पञ्चमेऽध्याये॥)
मन्दज्वरजनकमन्दाग्निजनकः।
"मन्दाग्निस्तस्य जनको मन्दाग्नेर्जनकास्त्रयः।
पित्तश्लेष्ममीराश्च प्राणिनां दुःखदायकाः॥"
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे १६ अध्यायः॥*॥
(यथा च।
"पित्तं पञ्चात्मकं तत्र पक्वामाशयमध्यगम्।
पञ्चभूतात्मकत्वेऽपि यत्तेजसगुणोदयात्॥
तत्रस्थमेव पित्तानां शेषाणामप्यनुग्रहम्।
करोति बलदानेन पाचकं नाम तत् स्मृतम्॥
आमाशयाश्रयं पित्तं रञ्जकं रसरञ्जनात्।
बुद्धिमेधाभिमानार्थैरभिप्रेतार्थसाधनात्॥
साधकं हृदुगतं पित्तं रूपालोचनतः स्मृतम्।
दृक्स्थमालोचकं त्वक्स्थं भ्राजकं भ्राजनात्त्वचः॥"
इति वाभटे सूत्रस्थाने द्वादशेऽध्याये॥
"पित्तविकाराश्चत्वारिंशदत ऊर्द्धं व्याख्यास्यन्ते।
तद्यथा, ओषश्च क्षोषश्च दाहश्च दवथुश्च धूमकश्चाम्लकश्च विदाहश्च अन्तर्दाहश्चांसदाहश्चोष्माधिक्यञ्चातिस्वेदश्चाङ्गगन्धश्चाङ्गावयवदरणञ्च शोणितक्लेदश्च मांसक्लेदश्च त्वग्दाहश्च मांसदाहश्च त्वङ्मांसदरणञ्च रक्तकोठाश्च रक्तविस्फोटाश्च रक्तपित्तञ्च रक्तमण्डलानि च हरितत्वञ्च हरिद्रत्वञ्च नीलिका च कक्षा च कामला च तिक्तास्यता च पूतिमुखता चलज्जाया आधिक्यञ्चाटनिश्चास्यपाकश्च गलपाकश्चाक्षिपाकश्च गुदपाकश्च मेढ्रपाकश्च जीवादानञ्च तमःप्रवेशश्च हरितहारिद्रमूत्रनेत्रवर्चस्त्वेतिचत्वारिंशत् पित्तविकाराः। पित्तविकाराणामपरिसंख्येयानामाविष्कृततमा व्याख्याता भवन्ति। सर्व्वेष्वपि खल्वेतेषु पित्तविकारेष्वन्येषु चाशुक्लेषु पित्तस्येदमात्मरूपमपरिणामिकर्म्मगुणश्च स्वलक्षणं यत्तदुपलभ्य तद्व्यवस्यं वा विमुक्तसन्देहाः पित्तविकारमेवाध्यवस्यन्ति कुशलाः। तद्यथा,—
औष्ण्यं तैक्ष्ण्यं लाघवमनतिस्नेहो वर्णश्च शुक्लारुणवर्ण्यो गन्धश्च विस्रो रसौ च कटुकाम्लौ पित्तस्यात्मरूपाण्येवंविधत्वाच्च कर्म्मणः स्वलक्षणमिदमस्य भवति। तं तं शरीरावयवमाविशतो दाहोष्मपाकस्वेदक्लेदकोथस्रावरागाः। यथास्वञ्च गन्धवर्णरसाभिनिर्व्वर्त्तनं पित्तस्य कर्म्माणि तैरन्वितं पित्तविकारमेवाध्यवस्येत्। तं मधुरतिक्तकषायशीतैरुपक्रमैरुपक्रमेत। स्नेहविवेकप्रदेहपरिषेकाभ्यङ्गावगाहादिभिः पित्तहरैर्मात्रां कालञ्च प्रमाणीकृत्य विरेचनन्तु सर्व्वोपक्रमेभ्यः पित्ते प्रधानतमं मन्यन्ते भिषजः। तद्ग्रादित एवामाशयमनुप्रविश्य केवलं वैकारिकं पित्तमूलञ्चापकर्षति। तत्रावजिते पित्तेऽपि शरीरान्तर्गताः पित्तविकाराः प्रशान्तिमापद्यन्ते। यथाग्नौ समिद्धे केवलमग्निगुणश्च शीतं भवति तद्वत्॥" इति चरके सूत्रस्थाने विंशेऽध्याये॥*॥
"पित्तमुष्णन्तीक्ष्णं द्रवं विस्रमम्लञ्चटुकञ्च। तस्योष्णात्वात् पित्तला भवन्त्युष्णासहाः सुकुमारावदातगात्राः प्रभूतपिप्रुव्यङ्गतिलकपिड़काः क्षुत्पिपासावन्तः क्षिप्रवलीपलितखालित्यदोषाः प्रायोऽल्पश्लक्ष्णपिलप्रश्नुलोमकेशाः तैक्ष्ण्यात्तीक्ष्णपराक्रमाः तीक्ष्णाग्नयः प्रभूताशनपानाः क्लेशासहिष्णवो दन्दशूका द्रवत्वात् शिथिलबद्धसन्धिमांसाः प्रभूतसृक्स्वेदमूत्रपुरीषाश्च विस्रत्वात् प्रभूतपूतिवर्चःकक्षास्यशिरःशरीरगन्धाः कटूष्णत्वादल्पशुक्रव्यवायाश्च। त एवं गुणयोगात् पित्तला मध्यबला मध्यायुषो ज्ञानविज्ञानवित्तोपकरणवन्तश्च।" इति चरके विमानस्थानेऽष्टमेऽध्याये॥)

पित्तघ्नी, स्त्री, (पित्तं हन्तीति। हन+"अमनुष्यकर्त्तृके च।" ३।२।५३। इति टक्। ततो ङीप्।) गुडूची। इति शब्दचन्द्रिका॥ (पित्तनाशके, त्रि। यथा, भावप्रकाशे। १।१।
"मधुली शीतला स्निग्धा पित्तघ्नी मधुरा लघुः॥")

पित्तज्वरः, पुं, (पित्तनिमित्तको ज्वरः।) पैत्तिक ज्वरः। यथा,—
"विल्वेषतः कोमलनारिकेलं
निहन्ति पित्तज्वरमूत्रदोषान्॥"
इति राजनिर्घण्टः॥
अस्य लक्षणं ज्वरशब्दे द्रष्टव्यम्॥*॥
अथ पित्तज्वरचिकित्सा।
"आमाशयस्थो हत्वाग्निं सामो मार्गान् पिधापयन्।
विदधाति ज्वरं दोषस्तस्मात्तत्रुनमाचरेत्॥"
इति वचनात् सामान्यतो ज्वरिमात्रस्य यावदारोग्यदर्शनं लङ्घनाभिधाने पित्तज्वरिणो लङ्घनविधाने विशेषमाह सुश्रुतः। पैत्तिके दशरात्रेण ज्वरे युञ्जीत भेषजमिति। दशरात्रेण लङ्घनवता यतीतेनेत्यर्थः। किन्तद्भेषजं तदाह।
"तिक्तास्रस्तायवैः पाठाकटुफलाभ्यां सचोदकम्।
पक्वं सशर्करं पीतं पाचनं पैत्तिके ज्वरे॥"
इति तिक्तादिक्वाथः॥
"पर्पटो वासकस्तिक्ता केरातो धन्वयासकः।
प्रियङ्गुश्च शृतः क्वाथ एष शर्करया युतः॥
पिपासादाहपित्तास्रयुक्तं पित्तज्वरं हरेत्॥"
इति पर्पटादिक्वाथः॥
"द्राक्षा हरीतकी मुस्ता कटुका शृतमालकः।
पर्पटश्च शृतः क्वाथः एष पित्तज्वरापहः॥
सुखशीघ्रप्रलापान्तर्दाहमूर्च्छाभ्रमप्रणुत्।
पिपासारक्तपित्तानां शमनो भेदनो मतः॥"
इति द्राक्षादिक्वाथः॥
"पटोलमध धन्याकं मधुकं मधुसंयुतम्।
हन्ति पित्तज्वरं दाहं तृष्णाश्वासप्रमाथिनीम्॥"
इति पटोलादिक्वाथः॥
"गुडूच्यामलकीयुक्तः केवलो वापि पर्पटः।
पित्तज्वरं हरेत्तूर्णं दाहशोषभ्रमान्वितम्॥"
इति गुडूच्यादिक्वाथः॥
"एकः पर्पटकः श्रेष्ठः पित्तज्वरविनाशनः।
किं पुनर्यदि युष्येत चन्दनोशीरवालकैः॥
वीरवेरचन्दनोशीरवनपर्पटसाधितम्।
दद्यात् सुशीतलं वारि तृट्छर्द्दिज्वरदाहनुत्॥"
इति वीरवेरादिक्वाथः॥
"भूनिम्बातिविषालोधसुस्तकेन्द्रयवाटजाः।
वालकं धान्यकं बिल्वं कषायो माक्षिकान्वितः॥
विड्भेदश्वासकासांश्च रक्तपित्तज्वरं हरेत्॥"
इति भूनिम्बादिक्वाथः॥

"द्राक्षाचन्दनपद्मानि सुस्ता तिक्तास्तथापि च।
धात्री बालसुधीरश्च लोध्रेन्द्रयवपर्पटाः॥
परूषकं प्रियङ्गुश्च यवासो वासकस्तथा।
मधुकं कुलकं वापि किरातो धान्यकं तथा॥
एषां क्वाथो निहन्त्येव ज्वरं पित्तसमुत्थितम्।
तृषां दाहं प्रलापञ्च रक्तपित्तं भ्रमं क्लमम्॥
मूर्च्छां छर्दिं तथा शूलं सुखशीघ्रमरोचकम्।
कासं श्वासञ्च हिक्कासं नाशयेन्नात्र संशयः॥"
इति महाद्राक्षादिक्वाथः॥

"सक्तितो निशि पर्य्युषितः प्रातर्धान्याकतण्डुल-
क्वाथः।
पीतः शमयत्यचिरादन्तर्दाहं ज्वरं पैत्तम्॥"
इति धान्यकक्वाथः॥

"व्यष्टतायाः क्षिमः प्रातः सक्तितः पैत्तिकज्वरम्।
वासायाश्च तथा क्वाथः रक्तपित्तज्वरान् जयेत्॥"
इति व्यष्टावासाक्वाथौ॥

"गुडूची भूमिनिम्बश्च बालं वीरणमूलकम्।
लघुसुस्तं त्रिवृद्द्राक्षा द्राक्षा वासा च पर्पटः॥
एषां क्वाथो हरत्येव ज्वरं पित्तकृतं द्रुतम्।
सोपद्रवमपि प्रातर्निपीतो मधुना सह॥"
इति गुडूच्यादिक्वाथः॥

"पलाशस्य वदर्य्या वा निम्बस्य मृदुपल्लवैः।
अम्लपिष्टैः प्रलेपोऽयं हन्याद्दाहयुतं ज्वरम्॥
उत्तानसुप्तस्य गभीरताम्र-
कांस्यादिपात्रे निहिते च नाभौ।
शीतास्रुधारा बहुला पतन्ती
निहन्ति दाहं त्वरितं ज्वरञ्च॥
पथ्यां तैलघृतक्षौद्रैर्लिहन् दाहज्वरापहा।
कासास्रकृपित्तवीसर्पश्वासान् हन्ति वमीनपि॥"
तैलघृतक्षौद्रैरित्यत्र न समुच्चयः तेन केवलेन
क्षौद्रेणापि लिह्यात्।
"काक्षिकार्द्रपटेनावगुण्ठनं दाहनाशनम्।
अथ गोतक्रसुस्निग्धशीतलीकृतवाससा॥
द्राक्षामलककल्केन कवलोऽत्र हितो मतः।
पक्वदाड़िमबीजैर्वा धान्याकल्केन च क्वचित्॥"
इति कवलः॥ धान्यात्र धान्याकम्॥ * ॥
अथान्नमाह।
"दाहवन्त्यर्दितं चामं निरन्नं ज्वरयान्वितम्।
शर्करामधुसंयुक्तं पाययेल्लाजतर्पणम्॥"
लाजतर्पणं लाजशक्तुरूपतर्पणम्। सन्तर्पण-
स्वरूपमुक्तं सामान्यज्वरचिकित्सायाम्।
"मुद्गयूषौदनो देयः सितया पैत्तिके ज्वरे॥
हर्म्ये शुभ्राम्बरच्छन्ने शुभ्राङ्गकरशीतले।
मलयोदकसंसिक्ते शुभ्यात् पित्तज्वरी नरः॥
हारावलीचन्दनशीतलानां
सुगन्धपुष्पाम्बरभूषितानाम्।
नितम्बिनीनां सुपयोधराणा-
मालिङ्गनाद्यासु हरन्ति दाहम्॥
आद्राद्यास्य विज्ञाय तास्च स्त्री रमयेत् पुनः।
स्निग्धञ्च भोजयेदन्नं न हितं सुरतं महत्॥
वाप्यः कमलहारिण्यो जलयन्त्रगृहाः शुभाः।
गार्ग्यश्चन्दनदिग्धाङ्गो दाहदैन्यहरा मताः॥
इति पित्तज्वराधिकारः।" इति भावप्रकाशे
मध्यखण्डे प्रथमभागः॥ * ॥
पित्तश्लेष्मज्वरनाशकौषधं यथा,—
"गुडूचीपद्मकारिष्टधन्याकं रक्तचन्दनम्।
पित्तश्लेष्मज्वरच्छर्दिदाहतृष्णाश्रमक्लिक्लत्॥"
इति गारुड़े १८८ अध्यायः॥
(अस्य सलक्षणचिकित्सितान्यपराणि यथा,—
"मूर्च्छा दाहो भ्रममदतृषावेगतीक्ष्णोऽतिसार-
स्तन्द्रालस्यं प्रलपनवमिः पाकताम्रोष्ठवक्त्रे।
स्वेदः श्वासो भवति कटुकं विक्लवत्वं क्षुधा वा
एतैर्लिङ्गैर्भवति मनुजे पैत्तिको वै ज्वरस्तु॥
रोध्रोत्पलाम्बुतलता कमलं सिताढ्यं
तत्सारिवासहितमेव हि पाचनेषु।
निःक्वाथ पानमति चाशु निहन्ति पित्तं
पित्तज्वरप्रशमनं प्रकरोति पुंसाम्॥
क्वथितं तण्डुलपयसा शृङ्गाङ्गकटुरोहिणीसहि-
तम्।
क्वाथं यष्टीमधुना विनाशनं पित्तज्वराणान्तु।
दुरालभावासकपर्पटानां
प्रियङ्गुनिम्बैः कटुरोहिणीनाम्।
किराततिक्तं क्वथितं कषायं
सशर्कराढ्यं क्वथितञ्च पाचनम्॥
सदाहपित्तज्वरमाशु हन्ति
तृष्णाश्रमं शोषविकारयुक्तम्।
एकोऽपि वै पर्पटको वरिष्ठः
पित्तज्वराणां शमनाय योग्यः।
तस्मात् पुनर्नागरवालकाभ्यः
सिंहो यथा कङ्कटकं प्रवृत्तः॥
नागरोशीरसुस्ता च चन्दनं कटुरोहिणी।
धान्यकानां क्वाथ एव पित्तज्वरविनाशनः॥
व्यष्टापर्पटोधात्री क्वाथः पित्तज्वरं हरेत्।
सितारत्नवधोर्वापि काश्मर्य्याश्चाथ वा पुनः॥
द्राक्षापर्पटकं तिक्ता पथ्यारत्नवधसुस्तकैः।
क्वाथस्तृष्णाश्रमदाहयुक्तपित्तज्वापहः॥
विदारिका रोध्रदधित्थकानां
स्याम्नातुलुङ्गस्य च दाड़िमानाम्।
यथानुलाभेन च मूलपत्रं
निहन्ति तृड्दाहसमूर्च्छनञ्च॥
उत्तानस्य प्रसुप्तस्य कांस्यं वा ताम्रभाजनम्।
नाभौ निधाय धाराम्बुशीतदाहनिवारणम्॥
रम्यारामाङ्कशयनमितालिङ्गनं चेष्टसङ्गं
व्यथायामं मुनिवरगदितं शीतलं सेवनं स्यात्।
शुभ्राभोजं मलयजसलिलासिक्तसंशीतवासो
मुक्ताहारो विशदमतुहिनं कौमुदी या सुखाय॥
एभिर्हन्ति द्रुततरनिभं मानुषाणान्तु पित्तं
दाहं शोषं क्लमममपि तथा तद्भ्रमं मूर्च्छनञ्च।
एतैर्योगैर्भवति नितरां पित्तदाहस्य शान्ति-
र्योग्या चैव प्रभवति सदा सत्क्रिया श्रीमताञ्च॥
यदि जिह्वा गलतालुशोषो वै मनुजस्य च।
केशरं मातुलुङ्गस्य मधुसैन्धवसंयुतम्।
पेष्यमाणं तालुलेपः सद्यः पित्तज्वरापहः।"
इति पित्तज्वरचिकित्सा॥ * ॥

पित्तद्रावी, [न्] पुं, (पित्तं द्रावयतीति। द्रु+णिच्+णिनिः।) मधुरजम्बीरः। इति राजनिर्घण्टः॥

पित्तरक्तं, क्ली, (पित्तसंसृष्टं रक्तमिति मध्यपद-लोपी समासः।) रोगविशेषः। तत्पर्य्यायः। रक्तपित्तम् २ पित्तासम् ३ पित्तशोणि मृ ४। इति राजनिर्घण्टः॥ अस्य विवरणं रक्तपित्त-शब्दे द्रष्टव्यम्॥

पित्तलं, क्ली, (पित्तं तद्वर्णं लातीति। ला+कः।) धातुविशेषः। पितल इति भाषा॥ (यथा, वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधिकारे।
"पित्तलञ्च तथा कांस्यं ताम्रवत्कारयेद्भिषक्।
ताम्रवच्छोधनं तेषां ताम्रवद्गुणकारकम्॥")
तत्पर्य्यायः। आरकूटम् २ रीतिः ३ प्रतिकावेरम् ४ द्रव्यदारु ५। इति जटाधरः॥ रीती ६। इति शब्दरत्नावली॥ मिश्रम् ७। इति रत्नमाला॥ आरः ८ राजरीतिः ९ ब्रह्मरीतिः १० कपिला ११ पिङ्गला १२। इति भाव-प्रकाशः॥ क्षुद्रसुवर्णः १३ सिंहलम् १४ पिङ्गलकम् १५ पीतलकम् १६ लोहितकम् १७ पिङ्गललोहम् १८ पीतकम् १९। रीतिका-युगलगुणाः। तिक्तत्वम्। शीतलत्वम्। रसे लवणत्वम्। शोधनत्वम्। पाण्डुवातकृमिप्लीह-पित्तनाशित्वञ्च।
"शुक्ला स्निग्धा लघुः शीता सुरङ्गा रूक्षपच्छिला।
हेमोपमा शुभा स्वच्छा ज्ञात्वा रीतिः प्रकी-
र्त्तिता॥"
इति राजनिर्घण्टः॥
"रीतिरप्युपधातुः स्यात् ताम्रस्य यशदस्य च।
पित्तलस्य गुणा ज्ञेया स्वयोनिसदृशा जनैः॥
संयोगस्य प्रभावेण तस्यान्येऽपि गुणाः स्मृताः।
रीतिकायुगलं रूक्षं तिक्तञ्च लवणं रसे।
शोधनं पाण्डुरोगघ्नं कृमिघ्नं नातिलेखनम्॥"
इति भावप्रकाशः॥ * ॥
भूर्जपत्रम्। इति शब्दमाला॥ (बाहुल्येन पित्तमस्त्यस्येति। पित्त+"सिध्मादिभ्यश्च।" ५। २। १७। इति लच्। पित्तयुक्ते, त्रि। इति मेदिनी। ले, ११४॥ (पित्तदूषिकरे च। यथा, सुश्रुते सूत्रस्थाने। ४५ अध्याये।
"सक्षारं पित्तलं कौपं श्लेष्मघ्नं दीपनं लघु॥"
यथा च माधवकरधृतरुग्विनिश्चयसंग्रहे पाण्डुधि-कारे।
"पाण्डुरोगी तु योऽत्यर्थं पित्तलानि निषेवते।
तस्य पित्तमदूष्यांसं दग्ध्वा रोगाय कल्पते॥")

पित्तला, स्त्री, (पित्तल+टाप्।) तोयपिप्पली। इति मेदिनी। ले, ११४॥

पित्तारिः, पुं, (पित्तानामरिर्नाशकः।) पर्पटः। लाक्षा। वर्त्तरम्। इति राजनिर्घण्टः॥

पित्र्य, क्ली,(पितरो देवता अस्येति। पितृ+"वाय-वृतुपितृभ्यो यत्।" ४। २। ३१। इति यत्। "रीदृतः।" ७। ४। २७। इति रीआदेशश्च। पितृदेवताकदानीयत्वादस्य तथात्वम्।) मधु।

इति राजनिर्घण्टः ॥ पिप्पलीपर्णम्। तच्च तर्ज्जन्यङ्गुष्ठान्तः। इति हेमचन्द्रः। ३। ५०४ ॥ (पितुरिदं पितुरागतं वेति। पितृ+"पितुर्यत्।" ४। ३। ७६। इति यत्। ततो रीङादेशः।) पितृसम्बन्धिनि, त्रि। यथा,—

"ज्येष्ठ एव तु गृह्णीयात् पित्र्यं धनमशेषतः।
शेषास्तमुपजीवेयुर्यथैव पितरन्तथा ॥"

इति दायभागः ॥

(पितृप्रियत्वात् श्राद्धार्हे च त्रि। यथा, सुश्रुते। २। ४६।

"कफघ्नं खड्गिपित्तघ्नं कषायमनिलापहम्।
पित्र्यं पवित्रमायुष्यं वह्निसूत्रं विरूक्षणम् ॥")

पित्र्यः, पुं, (पितुस्तुल्य इति। वाहुलकात् यत्। ततो रीङादेशः।) ज्येष्ठभ्राता। इति हेमचन्द्रः। ३। २१५ ॥ (पितॄणां प्रिय इति यत्।) माषः। इति शब्दमाला ॥

पित्र्या, स्त्री, (पितरो देवता अस्या इति। पितृ+यत्। पितृदेवतत्वादेव तथात्वम्।) मघानक्षत्रम्। इति हेमचन्द्रः। २। २५ ॥ पौर्णमासी। इति शब्दमाला ॥

पिपतिषन्, [त्] पुं, (पतितुमिच्छतीति। पत्+सन्+"सनि मीमाघुरभलभशकपतपदामच इस्।" ७। ४। ५४। इति इस्। अभ्यासस्य लोपश्च। ततः पितृस+शतृ।) पक्षी। इत्यमरः। २। ५। ३४ ॥ प्रतिपन्ने पतनेच्छौ च त्रि। इति विश्वः ॥

पिप्पलं, क्ली, (पतत्यत्रेति। पत्+"सलः प्रतेरदिश्च।" २। २६२। इति उणादिकोषधृतसूत्रात् अधिकरणे सलः। अकारस्य इत्वं।) पन्थाः। इत्युणादिकोषः। २। २६२ ॥

पिधानं, क्ली, (अपि+धा+ल्युट्। अपेरलोपः।) छदनम्। इत्यमरः। १। ३। १३ ॥ (यथा, आर्य्यासप्तशत्याम्। ४८१।

"युगपच्चघनोरःस्तनपिधानमधुरे! त्वयाश्लिता-
र्द्रसखि!।
लोलाक्षि! नैष पवनो विरमति तव वसनपरि-
वर्त्तनी ॥")

उदञ्चनम्। इति हेमचन्द्रः। ४। ६२ ॥

पिनद्धः, त्रि, (अपि नह्यते स्मेति। अपि+नह्+क्तः। अपेरलोपः।) परिहितवस्त्रादिः। तत्पर्य्यायः। आमुक्तः २ प्रतिमुक्तः ३ अपिनद्धः ४। इत्यमरः। २। ८। ६५ ॥ (आच्छादितः। यथा, भागवते। ११। ८। ३३।

"यदस्थिभिर्निर्म्मितवंशवंश्य-
स्त्वचा रोमनखैः पिनद्धम् ॥")

पिनाकः, पुं क्ली, (पाति रक्षति पनायते स्तूयते वा। पाल रक्षणे, पन स्तुतौ वा+"पिनाकोदयच्च।" उणा ४।१५। इति आकप्रत्ययेन निपातनात् साधुः।) शिवधनुः। तत्पर्य्यायः। अजगवम् २। (यथा, महाभारते। ६। ६०। १८।

"पिनाकमिव रुद्रस्य क्रुद्धस्याभिनदः परान्॥")

शूलम्। इत्यमरः। १। १। ३७ ॥ शूलमपि शृङ्गारमिहेति केचित्। इति भरतः ॥ मांसुवर्षणम्। इति मेदिनी। के, ११६ ॥

पिनाकी, [न्] पुं, (पिनाकोऽस्त्यस्येति। इनिः।) शिवः। इत्यमरः। १। १। ३३ ॥ (यथा, हरिवंशे। ३५। २०।

"क्षत्वा च निश्चयं सर्व्वे पलायनपरायणाः।
विहाय मथुरां रम्यां मानयन्तः पिनाकिनम् ॥"

रुद्रभेदः। यथा, माल्ये। ५। २६—३०।

"अजैकपादहिर्ब्रध्नो विरूपाक्षोऽथ रैवतः।
हरश्च बहुरूपश्च त्र्यम्बकश्च सुरेश्वरः ॥
सावित्रश्च जयन्तश्च पिनाकी चापराजितः ॥")

पिन्यासं, क्ली, (अपिगतो विन्यासो यत्तद्गन्त्वात् न्यासो यस्य। अपेरलोपः।) हिङ्गु। इति जटाधरः ॥

पिपतिषन्, [त्] त्रि, (पतितुमिच्छतीति। पत्+सन्। ततः शतृ।) पतनेच्छुः। विहङ्गमे, पुं। इति मेदिनी। ते, २३१ ॥

पिपतिषुः, पुं, (पतितुमिच्छतीति। पत्+सन्। पिपतिस+"सनाशंसभिक्ष उः।" ३।२।१६८। इति उः।) पक्षी। इति राजनिर्घण्टः ॥ (पतनेच्छौ, त्रि ॥)

पिपासा, स्त्री, (पातुमिच्छेति। पा+सन्+अः। ततष्टाप्।) पानेच्छा। तत्पर्य्यायः। तृष्णा २ तर्षः ३ उपलालिका ४ तृट् ५ तृषा ६ उदन्या ७। इति हेमचन्द्रः। ३। ५८ ॥ (यथा, सुश्रुते सूत्रस्थाने १ अध्याये। "स्वाभाविकाः क्षुत्पिपासाजराश्रमक्लमनिद्राप्रभृतयः ॥")

पिपासितः, त्रि, (पिपासा जातास्येति। पिपासा+इतच्।) पिपासायुक्तः। तृषितः। इति हलायुधः ॥ (यथा, मनौ। ८। ६३।

"नग्नो मुण्डः कपालेन भिक्षार्थी क्षुत्पिपासितः।
अन्धः शत्रुकुलं गच्छेद्यः साक्ष्यमृतं वदेत् ॥")

पिपासुः, त्रि, (पातुमिच्छुः। पा+सन्+उः।) पानेच्छुः। तत्पर्य्यायः। तृषितः २ तृष्णक् ३। इति हेमचन्द्रः। ३। ५७ ॥ (यथा, महाभारते। ३। २२३। २५।

"भागार्थं तपसो धातुं तेषां सोमं तथाध्वरे।
पिपासवो ययुर्देवाः शतक्रतुपुरोगमाः ॥")

पिपीतकः, पुं, ब्राह्मणविशेषः। अस्य प्रमाणं पिप्पीतकीशब्दे द्रष्टव्यम् ॥

पिपीतकी, स्त्री, (पिपीतको ब्राह्मणविशेषः प्रवर्त्तकतयास्त्यत्रेति। अच्। गौरादित्वात् ङीष्।) वैशाखशुक्लद्वादशी। तत्र कर्त्तव्यव्रतं यथा,—

शतानीक उवाच।

"जलदानस्य माहात्म्यं त्वत्तया परिकीर्त्तितम्।
तदहं श्रोतुमिच्छामि पिप्पीतकीकथां शुभाम् ॥
पुरा केन कृतञ्चैतत् केन चैतत् प्रकाशितम्।
कथं पिप्पीतकीनाम विधानञ्चैव कीदृशम् ॥
तत् सर्व्वं ब्रूहि देवर्षे! यदि तुष्टो मयि प्रभो! ॥

नारद उवाच।

शृणु राजन्! प्रवक्ष्यामि द्वादशीं तां पिप्पीतकीम्।

यां कृत्वा यमलोकाद्वै प्राप्यते वैष्णवं पदम् ॥
पिपीतक इति ख्यातो ब्राह्मणः संशितव्रतः।
तपःस्वाध्यायनिरतः सर्व्वप्राणिहिते रतः ॥
शान्तो दान्तः क्षमायुक्तो बलिहोमपरायणः।
निवसन् निर्जनेऽरण्ये बहून् कालान् द्विजोत्तमः॥
चिरं कृत्वा तपोऽरण्ये काले मृत्युमुपेयिवान् ॥
ततः कालेन कियता यमदूतैर्महाबलैः।
नीयमानः स विप्रेन्द्रो यमलोकं भयावहम् ॥
ददर्श बहुशस्तत्र नरान्निरयसंस्थितान् ॥
असिपत्रावनेकेषु कुम्भीपाकेषु संस्थितान्।
कृतार्त्तरावांस्तान् दृष्ट्वा विषादमगमद्विजः।
क्षुत्पिपासाकुलो भूत्वा प्रेतराजवशं गतः ॥
बहून् वृक्षादृतान् कुम्भान् ददर्शोऽतिमनोहरान्।
प्रदेशानीप्सितांस्तत्र प्रासादैरुपशोभितान् ॥
गीतवाद्यादिवृत्तैश्च सेव्यमानः समन्ततः।
क्वचित् प्रहरमाणांश्च किङ्करैर्यमशासनैः ॥
नीयमानांस्ततः प्रेतान् वध्यमानान् स्वकर्म्मभिः।
शोकसन्तापसंयुक्तान् क्षुधया परिपीड़ितः ॥
संपश्यमानो राजेन्द्र! ययाचे किङ्करान् जलम्।
बहुशो याच्यमानेन्च किङ्करैरभिताड़ितः ॥
स नीयमानो ददृशे बहुशाखं द्रुमोत्तमम्।
सुच्छायं शीतलं रम्यं महान्तं पिप्पलद्रुमम् ॥
तत्रैव सजलान् कुम्भान् माल्यग्रीवान् सुशोभितान्।
ददर्श वस्त्रावृतमुखान् सुवासितसुशीतलान् ॥
रक्षन्ति बहवस्तत्र किङ्करा यत्नपाणयः।
तोयदर्शनमात्रेण साह्लादो ब्राह्मणोऽभवत् ॥
विनयावनतो भूत्वा ययाचे किङ्करांस्तदा।

ब्राह्मण उवाच।

यमदूता महाभागास्तोयं मे दीयतामिति।
अप्राप्य तोयं प्राणानां विनाशो जायते ध्रुवम् ॥
तस्मात्तोयप्रदानेन प्राणान्रक्षत मेऽधुना।
श्रुत्वा विप्रस्य तद्वाक्यं तन्दूतुर्यमकिङ्कराः ॥
न कृतं कर्म्म तद्विप्र! येन तोयञ्च लभ्यते ॥
प्रार्थयानः पुनस्तोयं यमदूतैः स ताड़ितः ॥
क्षुत्तर्षवचनं श्रुत्वा यमः प्रोवाच तं द्विजम्।
ब्रूहि त्वं विप्र! मा रोदीः का ते पीड़ास्ति
श्वेतसि ॥
पुनर्ययाचे तत्तोयं क्षुधाद्याकुलचेतनः।
श्रुत्वा विप्रस्य तद्वाक्यं तमुवाच स धर्म्मराट् ॥
त्वया तन्न कृतं कर्म्म येन वै लभ्यते जलम् ॥

ब्राह्मण उवाच।

त्वयि प्रसन्ने दिक्पाल! तत्तोयं दुर्लभं न मे।
तस्मात्तोयप्रदानेन प्राणरक्षां कुरु प्रभो! ॥
इत्थं बहुविधैर्वाक्यैर्यमः प्रीतोऽभवत्तदा ॥

यम उवाच।

वरं वरय विप्रेन्द्र! यत्ते मनसि वर्त्तते ॥

ब्राह्मण उवाच।

यदि तुष्टोऽसि मे देव! येन प्राप्तोऽस्मि तज्जलम्।
तत् कुरुष्व धर्म्मराज! सर्व्वप्राणेश्वर! प्रभो! ॥

यम उवाच ।
वैष्णवं तद्व्रतं विप्र ! कुरु गत्वा निजालयम् ।
विधानं शृणु विप्रेन्द्र ! द्वादशी यादृशी भवेत् ॥
वैशाखे शुक्लपक्षस्य द्वादशी वैष्णवी तिथिः ।
तस्यां सुस्नातजन्तुः स्नापयेत् केशवं प्रभुम् ॥
पूजयेत्तन्मयुष्पाद्यैर्धूपदीपैर्विधानतः ॥
नैवेद्यैर्विविधैश्चैव ताम्बूलैरथ वाससा ॥
जप्त्वा तु वैष्णवं मन्त्रं दण्डवत् प्रणमेत्ततः ।
दद्याद्विप्रेभ्यो विधिवत् कुम्भांल्लोयसमन्वितान् ।
प्रथमेऽब्दे चतुःकुम्भान् दद्यात्सवयसंयुतान् ॥
शुक्लवस्त्रावृतसुखाशुपवीतसुसंयुतान् ।
धनुर्बाणसमायुक्तान् सभोज्यदक्षिणान्वितान् ॥
द्वितीयेऽष्टौ घटान्दद्याद्घृतशर्करसंयुतान् ।
तृतीये द्वादश घटान् तिलमोदकसंयुतान् ॥
चतुर्थे षोड़शघटान् दुग्धलड्डुकसंयुतान् ।
दद्यात् संपूज्य देवेशं द्विजातिभ्यः प्रयत्नतः ॥
दक्षिणां शक्तितो दद्यात् भोज्यश्चैव विशेषतः ।
यत्र क्वापि संगच्छेन्न कुत्रापि लभान्वितः ॥
ततो द्विजो गृहं गत्वा चकार द्वादशीव्रतम् ॥
अन्ते जगाम स्वर्लोकं वैष्णवं पदमुत्तमम् ॥
पिपीतकीति नाम्नातो विख्यातो वैष्णवी तिथिः ।
नरो यः कुरुते भक्त्या नारी वा भक्तिसंयुता ।
इह पुत्रादिसम्पन्ना धनधान्यसुतान्विता ॥"
इति भविष्यपुराणे पिपीतकीव्रतकथा समाप्ता ॥

पिपीलकः, पुं, (अपिपीलतीति । अपि + पील स्नेहने + ण्वुल् । अपेर्लोपः ।) पीलकः । इति हेमचन्द्रः । ४ । २७२ ॥ हिंडया पिंपीड़ा इति भाषा ॥

पिपीलिका, स्त्री, (पिपीलक + टापि अत इत्वम् ।) क्षीनाङ्गी । इति हेमचन्द्रः । ४ । २७३ ॥ चुंदे पिंपीड़ा इति भाषा ॥ तत्पर्य्यायः । पिपीलिकः २ पिपीलः ३ पीलकः ४ । इति शब्दरत्नावली ॥ पिपीली ५ पिपिली ६ स्त्रीसंज्ञा ७ । इति राजनिर्घण्टः ॥ क्षीरा ८ । इति त्रिकाण्डशेषः ॥ (यथा, हरिवंशे । २४ । ४ ।
"शुत्वा तु याच्यमानां तां कुद्धां सूक्ष्मपिपीलिकाम् ।
ब्रह्मदत्तो महाघासकक्षादेव चाहसत् ॥")

पिपीलिनी, स्त्री, (अपिपीलतीति । पील् + अच् । अपेर्लोपः । ततो गौरादित्वात् ङीष् ।) पिपीलिका । इति राजनिर्घण्टः ॥

पिप्पटा, स्त्री, खाद्यद्रव्यविशेषः । तत्पर्य्यायः । गुड़शर्करा २ । इति त्रिकाण्डशेषः ॥

पिप्पलं, क्ली, (पीयते इति । पा + क्वलच् । पृषोदरादित्वात् वाधुः ।) जलम् । वज्रकीटभेदः । इति मेदिनी । ले, १११ ॥

पिप्पलः, पुं, (पिप्पलं जलं सिच्यमानत्वेनास्त्यस्य मत्वर्थीयाच्छेदे इति । पिप्पल + "अर्शआदिभ्योऽच् ।" ५ । २ । १२७ । इत्यच् ।) अश्वत्थवृक्षः । (यथा, महाभारते । २ । २१ । ८ ।
"यवराजीस्तु पश्येमाः पिप्पलानां मनोरमाः ।
लोभयन्ति शुभाः पार्थ ! गौतमौकःसमीमताः ॥")

निरंशुकः । पक्षिभेदः । इति मेदिनी । ले, ११२ ॥ * ॥ अश्वत्थस्वरूपं यथा,—
नारद उवाच ।
"अनायासेन यन्मर्त्यः सर्व्वान् कामानवाप्नुयात् ।
सर्व्वदेवात्मकश्चैव तन्मे ब्रूहि पितामह ! ॥
ब्रह्मोवाच ।
शृणु नारद ! यत्नेन गुह्यं सर्व्वात्मकं गुरुम् ।
प्रदक्षिणीकृत्य नित्यं नराणां सर्व्वकामदम् ॥
पूजयेत् परया भक्त्या सर्व्वसिद्धियुतो भवेत् ।
अश्वत्थं पूजयेद्विप्र ! सर्व्वसिद्धिविधायकम् ॥*॥
अश्वत्थदक्षिणे रुद्रः पश्चिमे विष्णुरेव च ।
ब्रह्मा चोत्तरतस्तस्य पूर्व्वे चैन्द्रादिदेवताः ॥
स्कन्धे स्कन्धे च पत्रेषु ब्राह्मणा ऋषयः स्मृताः ।
तस्य मूले सर्व्वदेवाः शृङ्गा तस्य हृमाश्रिता ॥
नदीनदाः सागराद्याः पूर्व्वस्यान्दिशि संस्थिताः ।
लोकधर्म्मान् समाश्रित्य तस्मात्तं सेवयेन्नरः ॥
पुराणस्मृतिमन्त्रेभ्यः सारमुद्धृत्य संस्थितम् ।
निष्ठाप्रतिष्ठितं सम्यगश्वत्थं सेवयेन्नरः ॥
त्वं क्षीरी फलितश्चैव शीतलश्च वनस्पते ! ।
त्वामाराध्य नरो हन्यात् देहिकाधिष्ठितं मलम् ॥
अश्वत्थ ! यस्मात् त्वयि वृक्षराज !
नारायणस्तिष्ठति सर्व्वकारणम् ।
अतः शुचित्वं सततं तरूणां
विशेषतोऽरिष्टविनाशनोऽसि ॥
क्षीरोदमथने चैव यथा श्रीस्त्वामुपाश्रिते ।
सत्येन तेन वृक्षेन्द्र ! आशीर्मयि निधेहि वै ॥
एकादशोऽसि रुद्राणां वसूनाञ्चाष्टमस्तथा ।
नारायणोऽसि देवानां वृक्षाणामसि पिप्पलः ॥
अग्निगर्भस्त्वमश्वत्थ ! देवगर्भः प्रजापतिः ।
हरिर्यथैव श्रीगर्भो ब्रह्मगर्भ ! नमोऽस्तु ते ॥
अरातेरग्निरश्वत्थ ! परापर ! नमोऽस्तु ते ।
निर्वाते लभिवर्त्तन्तु स्वस्ति तेऽस्तु नमोऽस्तु ते ॥
अक्षिस्पन्दं भुजस्पन्दं दुःस्वप्नं दुर्निरीक्षितम् ।
शत्रूणाञ्च समुत्थानमश्वत्थ ! शमयाशु मे ॥
यं स्मृत्वा मुच्यते रोगैः सर्व्वपापैः प्रमुच्यते ।
समाश्रित्य च दीर्घायुस्तमश्वत्थं नमाम्यहम् ॥
अश्वत्थ ! त्वमहाभाग ! सर्व्वदा प्रियदर्शन ! ।
दिश्यान्नभोजनं देहि शत्रूणाञ्च पराजयम् ॥
आयुः प्रजां धनं धान्यं सौभाग्यं सर्व्वदा सुखम् ।
देहि देव महावृक्ष ! त्वामहञ्चाभिवादये ॥
अश्वत्थ ! देवसदनस्त्वमिषिः प्रोच्यते सदा ॥
ब्रह्महा गुरुहा चैव दरिद्रो व्याधिपीड़ितः ।
आवृत्य दशसप्तानु शुद्धः पापातिगो भवेत् ॥
ब्रह्मचारी हविष्याशी अधःशायी जितेन्द्रियः ।
पापापहन्ता मर्त्यस्तु व्रतमेतत् समाचरेत् ॥
एकरात्रं द्विरात्रं वा कुर्य्याद्गोमयलेपनम् ।
अश्वत्थे स्थापिते यस्तु मूले स्नपनमाचरेत् ॥
धनायुःसन्ततैर्हृष्टो नरकात्तारयेत् पितॄन् ॥
अश्वत्थमूलमासाद्य शाकेनाप्योदकेन वा ।
एकं वा भोजयेद्विप्रं कोटि कोटि फलं भवेत् ॥
अश्वत्थमूलमासाद्य तपो होमः सुरार्चनम् ।
अक्षयं मुनिशार्दूल ! ब्रह्मणो वचनं यथा ॥
एवं सम्पूजितोऽश्वत्थः सर्व्वसौख्यप्रदो भवेत् ।
यस्मार्घं छेदितोऽश्वत्थः सर्व्वारोग्यप्रदो भवेत् ॥
अश्वत्थः पूजितो येन पूजिताः सर्व्वदेवताः ।
अश्वत्थश्छेदितो येन छेदिताः सर्व्वदेवताः ॥
अन्तःशुद्धः सुवृत्तोऽश्वत्थो देवमयो गुरुः ।
स सेव्यः पूजनीयश्च गुणत्रयविनाशकः ॥
भृगुवारे भौमे च मध्याह्ने निशि सन्ध्ययोः ।
अश्वत्थदर्शनं कार्य्यं कुलत्रयभयात्मभिः ॥ * ॥
अश्वत्थस्य जले यस्य छाया तिष्ठति कुत्रचित् ।
तत् प्रयागसमं तीर्थं तत्र सन्निहितो हरिः ॥
तस्मात् कार्त्तिकमासेऽत्र पूर्व्वोक्तविधिना सुने ! ।
अश्वत्थं सेचयेद्विद्वान् संप्रदक्षिणमादिशेत् ॥
यागोपहतमर्त्यानां यागनाशो भवेद्ध्रुवम् ।
सकामो लभते कामं निष्कामो मोक्षमाप्नुयात् ॥
यः पठेत् शृणुयाद्वापि अश्वत्थस्य समीपतः ।
सर्व्वान् कामानवाप्नोति विष्णुसायुज्यमाप्नुयात् ॥"
इति पाद्मोत्तरखण्डे १२६ अध्यायः ॥
ऋषय ऊचुः ।
"कथं त्वयाश्वत्थवटौ गोब्राह्मणसमौ कृतौ ।
सर्व्वेभ्योऽपि तरुभ्यस्तौ कथं पूज्यतमौ कृतौ ॥
सूत उवाच ।
अश्वत्थरूपो भगवान् विष्णुरेव न संशयः ।
रुद्ररूपो वटस्तद्वत् पलाशो ब्रह्मरूपधृक् ॥
दर्शनस्पर्शसेवासु ते वै पापहराः स्मृताः ।
दुःखापद्व्याधिदुष्टानां विनाशकारिणो ध्रुवम् ॥
ऋषय ऊचुः ।
कथं वृक्षत्वमापन्ना ब्रह्मविष्णुमहेश्वराः ।
एतत् कथय सर्व्वज्ञ ! संशयोऽत्र महान् हि नः ॥
सूत उवाच ।
पार्व्वतीश्वियोर्हेवैः सुरतं कुर्व्वतोः किल ।
अग्निं ब्राह्मणवेषेण प्रेष्य विघ्नः कृतः पुरा ॥
ततस्तु पार्व्वती क्रुद्धा शशाप त्रिदिवौकसः ।
रेतःसेकसुखभंशकल्पमाना तदा रुषा ॥
पार्व्वत्युवाच ।
क्रिमिकीटादयोऽप्येते जानन्ति सुरते सुखम् ।
तस्माच्चम सुखभंशाद्यूयं वृक्षत्वमाप्स्थ ॥
सूत उवाच ।
एवं सा पार्व्वती देवी शशपत् क्रुद्धमानसा ।
तस्माद्वृक्षत्वमापन्ना ब्रह्मविष्णुमहेश्वराः ॥
तस्मादिमौ विष्णुमहेश्वरायुभौ
बभूवतुर्ब्बोधिवटौ सुनीश्वराः ! ।
बोधिस्वयं चार्कदिनं विनैव
नसृप्यतामर्कजवारयोगात् ॥
ऋषय ऊचुः ।
कथसृप्यत्वं कथं यातः सूत ! बोधितरुः स्वयम् ।
सृप्यत्वञ्च कथं प्राप्तस्तथायं शनिवासरे ॥
सूत उवाच ।
समुद्रमथनाद्यानि रत्नान्यापुः सुरोत्तमाः ।
त्रिदशैश्च कौस्तुभं तेषु विष्णवे प्रदुः सुराः ॥
यावद्भगीरथकारार्थो लक्ष्मीं भार्य्यामलान्नः ।
तावत् विज्ञापयामास लक्ष्मीस्तं चक्रपाणिनम् ॥

पिप्पलः

लक्ष्मीरुवाच।
असंस्कृत्य कथं ज्येष्ठां कनिष्ठां परिणीयते।
तस्मात्त्वमग्रजामेतामलक्ष्मीं मधुसूदन ! ॥
विवाह्योदह मां पश्चादेष धर्म्मः सनातनः।
तस्माद्धर्म्मव्यतिक्रामं न कुर्य्या मधुसूदन ! ॥
सूत उवाच।
इति तद्वचनं श्रुत्वा स विष्णुर्लोकभावनः।
उद्दालकाय मुनये सुदीर्घतपसे तदा।
आम्नवाक्यानुरोधेन तामलक्ष्मीं ददौ किल ॥
श्मश्रुलोष्ठीं शुष्कवदनां विरूपां बिभ्रतीं तनुम्।
सवदारक्तनयनां रूक्षपिङ्गशिरोरुहाम् ॥
स मुनिर्विष्णुवाक्यात्तामङ्गीकृत्य स्वमाश्रमम्।
वेदध्वनिसमायुक्तमानयामास धर्म्मवित् ॥
होमधूमसुगन्धाढ्यं वेदघोषेण नादितम्।
आश्रमन्तं विलोक्याथ अधिता साब्रवीदिदम् ॥
ज्येष्ठोवाच।
नहि वासोऽनुरूपोऽयं वेदध्वनियुतो मम।
नात्रागमिष्ये भो ब्रह्मन् ! नयस्वान्यत्र मां ध्रुवम् ॥
उद्दालक उवाच।
कथं नायासि किञ्चात्र वर्त्तते क्षमतं तव।
तव योग्या च वसतिः का भवेत्तदत्र मां ॥
ज्येष्ठोवाच।
वेदध्वनिर्भवेद्यत्रिन्नतिथीनाञ्च पूजनम्।
यज्ञदानादिकं यत्र नैव तत्र वसाम्यहम् ॥
परस्परानुरागेण दाम्पत्यं यत्र विद्यते।
पितृदेवार्चनं यत्र तत्र नैव वसाम्यहम् ॥
दानशौचे न विद्येते परद्रव्यापहारिणः।
परदारस्था यत्र तत्र स्थाने रतिर्मम ॥
वृद्धसज्जनविप्राणां यत्र स्यादपमाननम्।
निष्ठुरं भाषणं यत्र तत्र सन्यवसाम्यहम् ॥
सूत उवाच।
इति तद्वचनं श्रुत्वा विषण्णवदनोऽभवत्।
उद्दालकस्ततो वाक्यं तामलक्ष्मीमुवाच ह ॥
उद्दालक उवाच।
अश्वत्थवृक्षमूलेऽस्मिन्नलक्ष्मि ! आस्यतां क्षणम्।
आश्रमस्थानमालोक्य यावदायाम्यहं पुनः ॥
सूत उवाच।
इति तां तत्र संस्थाप्य जगामोद्दालको मुनिः।
प्रतीक्षन्ती चिरं तत्र यदा तं न ददर्श सा ॥
तदा रुरोद करुणं भर्त्तुस्त्यागेन दुःखिता ॥
तत्रस्थाः क्रन्दितं लक्ष्मीर्वैकुण्ठभवनेऽश्रुणोत्।
तदा विज्ञापयामास विष्णुमुद्दिश्य मारिषा ॥
लक्ष्मीरुवाच।
स्वामिन् ! मद्भगिनी ज्येष्ठा स्वामित्यागेन दुःखिता।
तामाश्वासयितुं याहि कृपालो ! यद्यहं प्रिया ॥
सूत उवाच।
लक्ष्म्या सह ततो विष्णुस्तत्रागात् कृपयान्वितः।
आश्वासयन्नलक्ष्मीं तामिदं वाक्यमथाब्रवीत् ॥
विष्णुरुवाच।
अश्वत्थवृक्षमासाद्य सदालक्ष्मि ! स्थिरा भव।
ममांशसम्भवो रोषं त्यागासङ्गे मया कृतः ॥

पिप्पली

मन्दवारे सदा नूनं लक्ष्मीरत्रागमिष्यति।
असृश्योऽसौ भवेत्तस्मान्मन्दवारं विना किल ॥
प्रत्यब्दमर्चयिष्यन्ति त्वां ज्येष्ठां गृहधर्म्मिणः।
तेष्वियं श्रीः कनिष्ठा ते सदा तिष्ठत्वनामया ॥"
इति पाद्मोत्तरखण्डे। १६०—१६१। अथायौ ॥
(रेवत्यां जातो मित्रस्य पुत्रविशेषः। यथा, भागवते। ६। १८। ६।
"रेतः सिषिचतुः कुम्भे उर्व्वश्याः सन्निधौ द्रुतम्।
रेवत्यां मित्र उत्सर्गमरिष्टं पिप्पलं बधात् ॥")
पिप्पलकं, क्ली, (पीयते इति। पा+अलच्। पृषोदरादित्वात् साधुः। ततः संज्ञायां कन्।) लगडवृक्षम्। जीवनवृक्षम्। इति मेदिनी। के, १६८ ॥
पिप्पलिः, स्त्री, (पिपर्त्तीति। पॄ लि पूर्त्तौ+बाहुलकात् अलच्। गौरादित्वात् ङीष्। ह्रस्वः। पृषोदरादित्वात् साधुः।) पिप्पली। इति शब्दरत्नावली ॥
पिप्पली, स्त्री, (पिपर्त्तीति+पॄ+बाहुलकात् अलच्। पृषोदरादित्वात् साधुः। गौरादित्वात् ङीष्।) वृक्षविशेषः। पिँपुल इति भाषा ॥ तत्पर्य्यायः। क्षुद्रा २ उपकुल्या ३ वैदेही ४ मागधी ५ चपला ६ कृष्णा ७ उषणा ८ श्रौषधी ९ कोला १०। इत्यमरः। २। ४। ६७ ॥ ऊषणा ११ पिप्पलिः १२। इति भरतः ॥ कृकला १३ कटुवीरा १४ कोरङ्गी १५ तिक्तशुण्डा १६ श्यामा १७ दन्तफला १८ मगधोद्भवा १९। अस्या गुणाः। ज्वरनाशित्वम्। वृष्यत्वम्। स्निग्धत्वम्। उष्णत्वम्। कटुत्वम्। तिक्तत्वम्। दीपनत्वम्। मारुतश्वासकासश्लेष्मक्षयापहत्वञ्च। इति राजनिर्घण्टः ॥ स्वादुपाकत्वम्। रसायनत्वम्। लघुत्वम्। पित्तलत्वम्। रेचकत्वम्। कुष्ठप्रमेहगुल्मार्शःश्लीहशूलामनाशित्वञ्च ॥ आर्द्रायास्तस्या गुणाः। कफप्रदत्वम्। स्निग्धत्वम्। शीतलत्वम्। मधुरत्वम्। गुरुत्वम्। पित्तप्रशमनत्वञ्च। राजवल्लभे तु कफापहत्वम्। मधुयुक्तायास्तस्या गुणाः। मेदःकफश्वासकासज्वरहरत्वम्। वृष्यत्वम्। मेधाग्निवर्द्धनत्वञ्च। गुडपिप्पलीगुणाः। जीर्णज्वरे अग्निमान्द्ये च श्रेष्ठत्वम्। कासाजीर्णारुचिश्वासहृत्पाण्डुकृमिनाशित्वञ्च। द्विगुणात् पिप्पलीचूर्णाद्गुडोऽत्र भिषजां मतः। इति भावप्रकाशः ॥ (ऋष्यवन्तपर्व्वतान्निःसृतो नदीविशेषः। यथा, मात्स्ये। ११३। २५।
"तमसा पिप्पली श्येनी तथा चित्रोत्पलापि च ॥")
पिप्पलीका, स्त्री, अश्वत्थीवृक्षः। इति राजनिर्घण्टः ॥
पिप्पलीमूलं, क्ली, (पिप्पल्या मूलमिव मूलमस्य।) खगमस्थातमूलम्। पिँपुलमूल इति भाषा। तत्पर्य्यायः। ग्रन्थिकम् २ चटिकाशिरः ३। इत्यमरः। २। ६। ११० ॥ षड्ग्रन्थि २। इति रत्नमाला ॥ मूलम् ५ कोलमूलम् ६ कटुग्रन्थि७

पिल्लः

कटुमूलम् ८ कटूषणम् ९ सर्व्वग्रन्थि १० पत्राढ्यम् ११ विरूपम् १२ शीघ्रसम्भवम् १३ सुगन्धि १४ ग्रन्थिलम् १५। इति राजनिर्घण्टः ॥ उषणम् १६। अस्य गुणाः। दीपनत्वम्। कटुत्वम्। पाचनत्वम्। लघुत्वम्। रूक्षत्वम्। पित्तकरत्वम्। भेदकत्वम्। कफवातोदरागुल्मश्लीहगुल्मकृमिश्वासक्षयापहत्वञ्च। इति भावप्रकाशः ॥ उष्णत्वम्। रोचनत्वम्। इति राजनिर्घण्टः ॥
पिप्पिका, स्त्री, दन्तमलम्। इति हेमचन्द्रः। ३। २६६ ॥
पिप्लुः, पुं, (अपि श्नवते देहोपरि इति। अपि+श्नु+डुः। अपेरलोपः।) जटुलः। इत्यमरः। २। ६। ४६ ॥
पियालः, पुं, (पीयति तर्पयतीति। पीय+"पीयुक्षमिभ्यां कालन् ह्रस्वः सन्प्रसारणञ्च।" उणा ३। ७६। इति कालन् ह्रस्वश्च।) वृक्षविशेषः। अस्येव बीजं चिरौञ्जीति ख्यातम्। तत्पर्य्यायः। राजादनम् २ सन्नकद्रुः ३ धनुष्पटः ४। इत्यमरः। २। ४। ३५ ॥ राजालनम् ५ राजातनः ६ प्रियालः ७ सन्नः ८ कद्रुः ९ धनुः १० पटः ११। इति तट्टीका ॥ ह्रसन्नकः १२ धन्वपटः १३ पियालकः १४। इति शब्दरत्नावली ॥ खरस्कन्धः १५ चारः १६ बहुजवल्कलः १७ तापसेष्टः १८ ॥ (यथा, भागवते। ८। २। १०।
"चूतैः पियालैः पनसैरास्रैराम्रातकैरपि ॥")
तस्य गुणाः। पित्तकफासनाशित्वम्। इति भावप्रकाशः ॥ अस्य फलगुणाः। मधुरत्वम्। स्निग्धत्वम्। दृंहणत्वम्। वातपित्तनाशित्वञ्च। इति राजवल्लभः ॥ गुरुत्वम्। वरत्वम्। दाहज्वरक्षयापहत्वञ्च। तस्य मज्जगुणाः। मधुरत्वम्। वृष्यत्वम्। पित्तानिलापहत्वम्। हृद्यत्वम्। अतिदुर्जरत्वम्। स्निग्धत्वम्। विष्टम्भित्वम्। आमवर्द्धनत्वञ्च। इति भावप्रकाशे पूर्व्वखण्डे प्रथमो भागः ॥
पिल, क गतौ। इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट्।) क, पेलयति। गुदि प्रेरणे। इति दुर्गादासः ॥
पिलुकः, पुं, (अपिलातीति। अपि+ला+बाहुलकात् डुः। अपेरलोपः। ततः कन्।) पीलुवृक्षः। इति शब्दरत्नावली ॥
पिलुपर्णी, स्त्री, (पिलोरिव पर्णमस्याः। ङीष्।) मोरटा। इति रत्नमाला ॥
पिल्लः, पुं, (क्लिन्ने चक्षुषी यस्येति। "इनच्पिटच्चिकचि च।" ५। २। ३३। इत्यत्र "क्लिन्नस्य पिल्लिलाश्वास्र चक्षुषी।" इति वार्त्तिकोक्त्या पिल्लादेशः।) क्लेदयुक्तचक्षुः। (अस्य चिकित्सा यथा,—
"ताम्रपात्रे गुडान्मूलं निधूत्यमरिचान्वितम्।
आरनालेन संघृष्टमञ्जनं पिल्लनाशनम् ॥"
इति वैद्यकचक्रपाणिसंग्रहे नेत्ररोगाधिकारे ॥)
तद्युक्ते, त्रि। इत्यमरः। २। ६। ६० ॥

पिल्लका, स्त्री. (पिल्लेन क्रेदयुक्तचक्षुषा कायतीति। कै+कः। टाप्।) हस्तिनी। इति शब्दमाला॥

पिव, ट्, ष्वे सेचने। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) ट्, पिन्वते। इति दुर्गादासः॥

पिश, श् प अवयवे। इति कविकल्पद्रुमः॥ (तुदां-सुचां-परं-अकं-सेट्।) श् प, पिंशति पटः अवयवी स्यादित्यर्थः। इति दुर्गादासः॥

पिशङ्गः, पुं, (पिंशतीति। पिश+"विड़ादिभ्यः कित्।" उणां।२।१२०। इत्यङ्गच् च कित्।) पिङ्गलवर्णः। तद्वति, त्रि। इत्यमरः। १। १। ५। १६—१७॥ (यथा, ऋग्वेदे। १। ८८। २।

"तेऽत्यैभिर्वरमा पिशङ्गैः सुभे कं यान्ति रथतूर्भिरश्वैः॥"

यथा च माघे। १। ६।

"पिशङ्गमौञ्जीयुगमर्ज्जुनच्छविं
वसानमेणाजिनमञ्जनद्युति।
सुवर्णसूत्राकलिताधराम्बरं
विडम्बयन्तं शितिवाससस्तनुम्॥"

नागभेदः। यथा, महाभारते। १। ५७। १६।

"भैरवो रुरुवेदाङ्गः पिशङ्गस्त्रोत्रपारगः॥")

पिशाचः, पुं, (पिशितं मांसमत्तीति। पिशित+अद्+"कर्म्मण्यण्।" ३। २। १। इति अण्। ततः "पृषोदरादीनि यथोपदिष्टम्।" ६। ३। १०९। इति शितभागस्य लोपः अद्यभागस्य आत्वादेशः।) देवयोनिविशेषः। इत्यमरः। १। १। ११॥ पिचाश इति भाषा॥ (यथा, मनौ। १। ३७।

"यक्षरक्षःपिशाचांश्च गन्धर्व्वाप्सरसोऽसुरान्॥"

"यक्षो वैश्रवणस्तद्भुचराश्च। रक्षांसि रावणादीनि। पिशाचास्त्वेषोऽपक्रष्टा अशुचिमरुदेशनिवासिनः।" इति तट्टीकायां कुल्लूकभट्टः॥) तस्य लोको यथा,—

"अन्तरीक्षचरा ये च भूतप्रेतपिशाचकाः।
वर्जयित्वा रक्षगणांस्ते तत्रैव चरन्ति हि॥
नोर्द्ध्वं विक्रमते शक्तिस्तेषां सम्भृतपाप्मनाम्।
न्यत ऊर्द्धं हि विप्रेन्द्र! राक्षसा ये क्षतेनसः।
ते तु सर्व्वादधः सर्व्वे विहरन्त्यूर्द्धवर्जिताः॥"

इति पाद्मे स्वर्गखण्डे १५ अध्यायः॥

प्रेतः। यथा, सुश्रुतसूत्रे।

"अशौचाप्तादितीयेऽह्नि यस्य नोत्तिष्ठते दृषः।
पिशाचत्वं भवेत्तस्य दत्तेः आदृश्यतेरपि॥"

पिशाचकी, [ङ्] पुं, (पिशाचाः सन्त्यस्येति। "वातातीसाराभ्यां कुक् च।" ५। २। १२६। इत्यत्र "पिशाचाच्च।" इति वार्त्तिकोक्त्या इनिः कुक् च।) कुबेरः। इति हेमचन्द्रः। २।१०।३॥

पिशाचद्रुः, पुं, (पिशाचानां द्रुः पिशाचप्रियो द्रुर्वा निर्व्वड़त्वादन्वकारवत्त्वादशुचित्वागजातत्वाच्च।) शाखोटवृक्षः। इति विकाण्डशेषः॥ (शाखोटशब्देऽस्य विवृतिर्ज्ञातव्या॥)

पिशाचद्रुः, पुं, (पिशाचानां द्रुः पिशाचप्रियो द्रुर्वा।) शाखोटवृक्षः। इति रत्नमाला॥

पिशाचसभं, क्ली. पिशाचानां सभा। इति नपुंसकलिङ्गसंग्रहटीकायां भरतः॥

पिशाची, स्त्री, (पिशाच+ङीष्।) पिशाचिका। स्त्री पिशाची। इति शब्दमाला॥ (पिशाचवन्मोऽस्त्यस्या इति। अच् ततो ङीष्। तद्दृगन्धयुक्तत्वात् तथात्वम्।) गन्धमांसी। इति राजनिर्घण्टः॥

पिशितं, क्ली, (पिंशति अवयवीभवतीति। पिश+"पिशेः किच्च।" उणां। ३। ६५। इति इतन् स च कित्। यद्वा, पिश्यते स्मेति। क्तः।) मांसम्। इत्यमरः। २। ६। ६३॥ (यथा, मार्कण्डेयपुराणे। २५। १७।

"हासोल्लिखन्दर्शनमच्युतस्य
मत्युच्चकैस्तर्ज्जनमङ्गनायाः.
कुचादि पीनं पिशितं घनं तत्
स्यानं रतेः किं नरकं न योषित्॥")

पिशिता, स्त्री, (पिशितवन्मोऽस्त्यस्या इति। अच् ततष्टाप्।) जटामांसी। इति मेदिनी। ते, ३३॥

पिशिताशी, [न्] त्रि, (पिशितं अत्तीति। अद्+णिनिः।) शाष्कुलः। मांसभक्षकः। इति हेमचन्द्रः। ३। ६३॥ (यथा, महाभारते। १। ८४। १४।

"सङ्कीर्णाचारधर्म्मेषु प्रतिलोमचरेषु च।
पिशिताशिषु चान्येषु मूढ! राजा भविष्यसि॥")

पिशी, स्त्री, (पिंशतीति। पिश+कः। गौरादित्वात् ङीष्।) जटामांसी। इति राजनिर्घण्टः॥ (जटामांसीशब्देऽस्या गुणादयो ज्ञातव्याः॥)

पिशुनं, क्ली, (पिंशतीति। पिश+"क्षुधिपिशिमिथः कित्।" उणां ३। ५५। इति उनन्। स च कित्।) कुङ्कुमम्। इत्यमरः। २। ६। १२४॥ (पर्य्यायोऽस्य यथा,—

"कुङ्कुमं क्षुण्णं रक्तं काश्मीरं पीतकं वरम्।
सङ्कोचं पिशुनं धीरं वाह्लीकं श्रोणितामिधम्॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

पिशुनः, पुं, (पिश+उनन्। स च कित्।) कपिवक्त्रः। नारदः। काकः। इति मेदिनी। ने, ६२॥ (अङ्गिरसः पुत्रः। यथा, मार्कण्डेये। ५१। ६५।

"अङ्गिरुक् तनयं लेभे पिशुनं नाम नामतः॥"

कौशिकस्य पुत्रभेदः। यथा, हरिवंशे। २१५-६।

"वाग्दुष्टः क्रोधनो हिंस्रः पिशुनः कविरेव च।
खलश्च पिटवर्त्ती च नामभिस्तस्य कर्म्मभिस्तथा॥
कौशिकस्य सुतास्तात! शिष्या गार्ग्यस्य भारत!।
पितर्य्युपरते सर्व्वे व्रतवन्तस्तदाभवन्॥")

पिशुनः, त्रि, (पिश+उनन्। स च कित्।) अप्रकाशेनानुचितप्रबोधकः। परस्परभेदशीलः। इत्यमरटीकायां भरतः॥ तत्पर्य्यायः।

"दिग्धिङ्मः सूचकः कर्त्तेजपः पिशुन इत्यपि।
दुर्जनो दुर्विधो विश्वकद्रुश्च पिशुनः खलः॥"

इति जटाधरः॥*॥

"कर्त्तेजपः सूचकः स्यादनौचित्यप्रबोधके।
परस्परं भेदशीले पिशुनो दुर्जनः खलः॥"

इति शब्दरत्नावली॥

(यथा, आर्य्यासप्तशत्याम्। ५६।

"अनुग्रहेण न तथा व्यथयति कटुकूजितैर्यथा पिशुनः।
रुधिरादानादधिकं दुनोति कर्त्तेव करुणं मशकः॥")

क्रूरः। इति मेदिनी। ने, ६२॥ (यथा, मनौ। ३। १६१।

"भामरी गण्डमाली च श्वित्र्याघो पिशुनस्तथा॥")

पिशुना, स्त्री, (पिशुन+टाप्।) पृक्का। इति मेदिनी। ने, ६२॥ पिड़िंशाक इति भाषा॥ (पृक्काशब्देऽस्या गुणादयो ज्ञातव्याः॥)

पिष, ष श्चौ ल चूर्णने। इति कविकल्पद्रुमः॥ (रुधां-परं-सकं-अनिट्।) ध, पिनष्टि लोको गोधूमम्। श्चौ, पेष्टा। ल, अपिषत्। इति दुर्गादासः॥

पिष्टं, क्ली, (पिष्यते स्मेति। पिष+क्तः।) सीसकम्। इति रत्नमाला॥ पिष्टकः। यथा,—

"अन्नादष्टगुणं पिष्टं पिष्टादष्टगुणं पयः।
पयसोऽष्टगुणं मांसं मांसादष्टगुणं घृतम्।
घृतादष्टगुणं तैलं मद्यान्न च भक्षणात्॥"*॥

अस्य गुणाः।

"पिष्टं प्राणकरं रूक्षं विद्याद्धि गुरु दुर्ज्जरम्॥
शालिपिष्टमया भक्ष्याः कफपित्तविनाशनाः।
वैदला गुरवो भक्ष्या विष्टम्भिरुक्षमारुताः॥
सगुड़ाः सतिलाश्चैव सक्षौद्रक्षारगर्करा।
भक्ष्या बल्याश्च हृद्याश्च गुरवो बृंहणाः परम्॥
सस्नेहाः स्नेहसिक्ताश्च भक्ष्या गोधूमसम्भवाः।
गुरवस्तर्पणा हृद्या बलोपचयवर्द्धनाः॥
मर्द्दितां समितां क्षीरनारिकेलघृतादिभिः।
अवगाह्य घृते पक्वा घृतपूरोऽयमुच्यते॥
घृतपूरो गुरुर्वृष्यः कफशुक्रकृन्मांसदः।
रक्तपित्तहरो हृद्यः स्वादुः पित्तहरोऽग्निदः॥"

गोधूमचूर्णं समिता।

"समिता मधुदुग्धेन खण्डेलामरिचादिभिः।
घृते पक्वा क्षिपेत् खण्डे संयावो बृंहणो गुरुः॥
समितां वेष्टितां मध्ये मधु दत्त्वा घृते श्रृता।
मधुमस्तकमुद्दिष्टं तद्दृष्यं गुरु दुर्ज्जरम्॥"

इति राघवल्लभः॥

पर्पटशुष्कुलीकेनकवटलद्रुकानां गुणास्तच्छब्दे द्रष्टव्याः॥*॥ चूर्णोक्ते, त्रि॥ (यथा, कथासरित्सागरे। ६। ४१।

"कृत्वा तांश्चणकान् पिष्टान् गृहीत्वा जलकुम्भिकाम्।
अतिष्ठं चत्वरे गत्वा छायायां नगराद्बहिः॥")

पिष्टकं, क्ली, (पिष्टमिव प्रतिकृतिः। इवार्थे कन्।) तिलचूर्णम्। इति राजनिर्घण्टः॥

पिष्टकः, पुं, (पिष्टानां विकार इति। "संज्ञायाम्।" ४। ३। १४७। इति कन्।) पिष्टानां तण्डुलादीनां विकारः। पिटा इति भाषा॥

तत्पर्य्यायः। पूपः २ अपूपः ३। इत्यमरः। २।६।४८॥ आपूपः ४ पिष्टः ५। इति शब्दरत्नावली॥ अस्य गुणाः पिष्टशब्दे द्रष्टव्याः। नेत्ररोगविशेषः। इति मेदिनी। के, १२०॥ तस्य लक्षणम्। यथा,—

"श्लेष्मा मारुतकोपेन शुक्ले पिष्टसमुन्नतम्।
पिष्टवत् पिष्टकं विद्धि मलाक्तादर्शसन्निभम्॥"

इति माधवकरः॥

(अस्य चिकित्सा यथा—

"वैदेही सितमरिचं सैन्धवं नागरं समम्।
मातुलुङ्गरसैः पिष्टमञ्जनं पिष्टकापहम्॥"

इति वैद्यकचक्रपाणिसंग्रहे नेत्ररोगाधिकारे॥)

पिष्टम्, क्ली, पुं, (विश्रन्त्यत्र सुकृतिन इति। "विटपपिष्टपविशिपीलपाः।" उणा०। ३।१४५। इति कपप्रत्ययेन निपातनात् साधुः।) भुवनम्। इत्यमररत्नकोषौ॥ (यथा, मनौ। ४। २३१।

"अनड्वुहः श्रियं पुष्टां गोदो ब्रह्मस्व पिष्टपम्॥")

पिष्टपचनं, क्ली, (पच्यते अत्रेति। पच+आधारे ल्युट्। पिष्टस्य पचनम्।) पिष्टपाकपात्रम्। तेलानी इति ख्यातम्। इति भूमिः॥ तत्पर्य्यायः। ऋजीषम् २। इत्यमरः। २।६।३२॥ ऋचीषम् ३। इति स्वामी॥ पिष्टपाकभृत् ४। इति हेमचन्द्रः॥ (यथा, सुश्रुते चिकित्सितस्थाने सप्तविंशाध्याये।

"विड्भृतण्डुलानां दोषं पिष्टपचने पिष्टवदुत्खेदेति॥")

पिष्टपाकभृत्, क्ली, (पिष्टपाकं लक्षभिहितो भावो द्रव्यवत् प्रकाशते इति न्यायात् पच्यमानपिष्टं बिभर्त्ति धारयतीति। भृ+क्विप् तुगागमश्च।) पिष्टकपाकपात्रम्। इति हेमचन्द्रः। ३। ८६॥

पिष्टपूरः, पुं, (पिष्टैः पूर्य्यते इति। पूरि+कर्म्मणि अप्।) वटकः। इति भूरिप्रयोगः। पिष्टकविशेषः। तत्पर्य्यायः। घृतपूरः २ घृतवरः ३ घार्षिकः ४। इति हेमचन्द्रः। ३। ६४॥

पिष्टवर्त्तिः, पुं, (पिष्टं वर्त्तयतीति। वर्त्ति+इन्।) सूक्ष्मसक्तुरादिपिष्टम्। तत्पर्य्यायः। चमसिः २। इति हेमचन्द्रः। ३। ६४॥

पिष्टसौरभं, क्ली, (पिष्टेन पेषणेन सौरभं यस्य।) चन्दनम्। इति हारावली। १०३॥

पिष्टादः, पुं, (पिष्टं अत्तीति गच्छतीति। अद+अण्।) पटवासचूर्णम्। इति भरतः॥ वस्त्रादिवासनार्थमेकीकृतगन्धद्रव्यचूर्णम्। इति सारसुन्दरी॥ हक्का। इति भानुदीक्षितः॥ आवीर इति ख्यातः। इति रमानाथनीलकण्ठौ॥ तत्पर्य्यायः। पटवासकः २। इत्यमरः। २। ७। १३६॥ धूलिगुच्छकः ३। इति चिकाण्डशेषः॥

पिष्टिकं, क्ली, (पिष्टमुत्पत्तिकारणत्वेनास्त्यस्येति। ठन्।) तण्डुलोद्भवतवक्षीरम्। इति राजनिर्घण्टः॥

पिष्टिका, स्त्री, (पिष्टं पेषणं साधनतया अस्त्यस्या इति। पिष्ट+ठन्। ततष्टाप्।) पिष्टद्विदलः। पिठी इति हिन्दीभाषा॥ यथा,—

"दालिः संस्थापिता तोये ततोऽपहृतकञ्चुका।
श्लिलायां साधु संपिष्टा पिष्टिका कथिता बुधैः॥"

इति भावप्रकाशः॥

पिष्टोड़ी, स्त्री, श्वेताग्निः। इति राजनिर्घण्टः॥

पिस, इ कि क्षुतौ। इति कविकल्पद्रुमः॥ (चुरां-पक्षे भ्वां-परं-अकं-सेट्। इदित्।) इ, पिंस्यते। कि, पिंसयति पिंसति। द्युतिर्दीप्तिः। इति दुर्गादासः॥

पिस, ऋ गत्याम्। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) ऋ, अपिपेसत् अपिपिसत्। पिपेसतुः पिपिसतुः। इति दुर्गादासः॥

पिस, क गत्यर्थे। गत्याम्। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) क, पेसयति। मूर्द्धन्यान्तोऽयमिति केचित्। गत्यर्थो निकेतनहिंसावलदानानि। इति दुर्गादासः॥

पिहितं, त्रि, (अपि धीयते स्मेति। धा+क्तः।) "दधातेर्हिः।" ७। ४। ४२। इति ह्यादेशः। अपेरल्लोपः।) आच्छादितम्। तत्पर्य्यायः। संवीतम् २ रुद्धम् ३ आवृतम् ४ संवृतम् ५ छन्नम् ६ स्थगितम् ७ अपवारितम् ८ अन्तर्हितम् ९ तिरोधानम् १०। इति हेमचन्द्रः॥ (यथा, महाभारते। ४। ४४। १८।

"ध्वजेन पिहिता सर्व्वा दिशो न प्रतिभान्ति मे।
गाण्डीवस्य च शब्देन कर्णौ मे बधिरीकृतौ॥")

पी, ङ य पाने। इति कविकल्पद्रुमः॥ (दिवां-आत्मं-सकं-अनिट्।) ङ य, पीयते। इति दुर्गादासः॥

पीठं, त्रि, (पेठन्त्युपविशन्त्यस्मिन्निति। पिठ+"हलश्च।" ३। ३। १२१। इति घञ्। वाहुलकादिदारस्य दीर्घः। यद्वा, पीयतेऽत्रेति। पी ङ मानं+वाहुलकात् ठक्।) उपवेशनाधारः। इत्यमरः। २।६।१३८॥ पिड़ी चौकी इत्यादि भाषा। तत्पर्य्यायः। आसनम् २ उपासनम् ३ पीठी ४ विष्टरः ५। इति शब्दरत्नावली। प्रतिनामासनम्। तत्तु कुशासनादि। तत्पर्य्यायः। विष्टरः २। इति चिकाण्डशेषः॥ वृषी ३। इति हेमचन्द्रः॥ (यथा, महाभारते। ५। ३८। २।

"पीठं दत्त्वा सत्त्ववेऽभ्यागताय
आनीयापः परिनिर्णिज्य पादौ।
सुखं पृष्ट्वा प्रतिवेद्यात्मसंस्थां
ततो दद्यादन्नमवेक्ष्य धीरः॥")

अथ पीठोद्देशः।

"धातुपाषाणकाष्ठैश्च पीठस्त्रिविध उच्यते।
धातवश्च श्लिलाश्चैव काष्ठानि विविधानि च॥
तदत्र संप्रवक्ष्यामि यदुचैवासपयुज्यते॥"

अथ मानम्।

"हस्तद्वयस्तु दैर्घ्येण तदर्द्धं परिणाहतः।
तदर्द्धोन्नत पीठः सुख इत्यभिधीयते॥
हस्तद्वयद्व्याधिक्यात् पञ्च पीठा भवन्ति हि।
सुखं जयः शुभः सिद्धिः सम्पदेति यथाक्रमम्॥
धनभोगसुखैश्वर्य्यवाञ्छितार्थप्रदायकः।
समदीर्घसुखावाप्तिर्विषमे विषमापदः॥
आयामपरिणाहाभ्यां हस्तद्वयमितो हि यः।
अर्द्धहस्तोन्नतः पीठो जारको नाम विश्रुतः॥
दैर्घ्योन्नतिपरीणाहैश्चतुर्हस्तमितो हि यः।
राजपीठ इति ज्ञेयः सकलार्थप्रसाधकः।
अत्राभिषेकमिच्छन्ति क्षितिपस्य पुराविदः॥
दैर्घ्योन्नतिपरीणाहैः षड्हस्तमितो हि यः।
राज्ञां चित्तप्रसादार्थं केलिपीठाभिधानकः॥
दैर्घ्योन्नतिपरीणाहैरष्टहस्तमितो हि यः।
अङ्गपीठो ह्ययं नाम्ना भवेत् पञ्चसुखप्रदः॥
कानको राजपीठः स्याज्ज्यो वा राजतः सुखः।
राज्ञामेवोपयोक्तव्यो लक्षवर्णोत्तरोत्तरम्॥
राजपीठे चिरायुः स्याज्जये सर्व्वां महीं जयेत्।
जारको जारयेच्छत्रून् सुखे सुखमवाप्नुयात्॥
राजतः कीर्त्तिजननो धनवृद्धिकरः परः।
ताम्रः प्रतापजननो विपक्षक्षयकारकः॥
लौहस्तूच्चाटने सार्व्वः सर्व्वकर्म्मसु युज्यते।
त्रपुसीसकरङ्गाद्याः शत्रुक्षयफलप्रदाः॥"

इति धातुपीठाः।

अथ श्लिलापीठाः।

"राजपीठो वज्रपार्श्वेरेव नान्यस्य दृश्यते।
पद्मरागो दिनेशस्य चान्द्रकान्तो विधोरपि॥
राहोर्मारकतः पीठः शनेर्नीलसमुद्भवः।
गोमेदकस्तु सौम्यस्य स्फाटिकस्तु दृहस्पतेः॥
शुक्रस्य वैदूर्य्यभवः प्रावालो मङ्गलस्य हि॥"

इत्थं पुराणवार्त्ता॥ * ॥

"यो यस्य हि दशाजातः पीठस्तस्य हि तन्मयः।
स्फाटिकस्तु महीन्द्राणां सर्व्वेषामेव युज्यते॥
अभिषेके च यात्रायामुत्सवे जयकर्म्मणि।
अयस्कान्तोपचटितः संग्रामे पीठ इष्यते॥
गरुड़ोद्गारसंचिते वर्षासु नृपतिर्विशेत्।
सुहरन्मयं पीठं भजते धनगर्व्वितः॥
सामान्यः प्रस्तरः पीठो विलासाय महीभुजाम्।
एषां मानं गुणाश्चापि विज्ञेया धातुपीठवत्॥"

अथ काष्ठपीठाः।

तदुक्तयथा, मानं पूर्व्ववदेव।

"सम्पत्तिसुखवृद्ध्यर्थं गाम्भारीजनितो जयः।
जारको रोगनाशाय सुखः शत्रुविनाशनः॥
सिद्धिः सर्व्वार्थसंसिद्धेः विजयाय च वैरिणाम्।
शुभः स्यादभिषेके च सम्पदेरिनिवारणः॥
मानको राजकः पीठः सुखसम्पत्तिकारकः।
जयः स्यादभिषेके च शुभः शत्रुविनाशनः॥
सुखो रोगविनाशाय सिद्धिः सर्व्वार्थदायिका।
सम्पदुच्चाटनविधौ विज्ञेयं पीठलक्षणम्॥
चान्दनस्तु सुखः पीठो अभिषेके महीभुजाम्।
जयः स्याद्रोगनाशाय शुभः सौख्यं प्रयच्छति॥
जारको यज्ञतुर्य्यार्थं अन्ये तु रतिदुष्कराः।
यज्ञतो निर्म्मितास्ते तु साम्राज्यफलदायकाः॥
काश्मीरको यावको हि भूसुजामभिषेचने।
पीठानगुरुकादीनामन्ये चन्दनवद्विदुः॥
वाञ्छलस्तु शुभः पीठो भूसुजामभिषेचने।

जयो रोगविनाशाय सुखसम्पत्तिकारकः ॥
निद्धिः सिद्धिप्रदा सम्यत् संग्रामे विजयप्रदः ।
जारको जारणाय स्यादिति भोजस्य तन्मतम् ॥
एवं सुगन्धिकुसुमाः ससारा ये च पादपाः ।
वाकुलेन समः कार्य्य एवं पीठस्य निर्णयः ॥
ये शुष्ककाष्ठा वृक्षास्तु त्वदवो लघवोऽथवा ।
गान्धारीसदृशः पीठस्तेषां कार्य्यस्तथा गुणः ॥
फलिनश्च ससाराश्च रक्तसाराश्च ये नगाः ।
तेषां पानसवत् पीठस्तथैव गुणभावहेत् ॥"*॥

अथ निषेधः ।

"विज्ञेयो निन्दितः पीठो लौहोत्थः सर्व्वधातुजे ।
शिलोत्थः शार्करो वर्ज्यः कर्करश्च विशेषतः ॥
काष्ठेषु च पीठेषु नासारा नातिसारिणः ॥"
तथाहि ।
"आम्रजम्बुकदम्बानामासनं वंशनाशनम् ॥"
भोजस्त्वाह ।
"गुरुः पीठो गौरवाय लघुर्लाघवकारकः ॥"
पराशरस्तु ।
"नाग्रन्थिर्नातिग्रन्थिश्च नागुरुर्नासमाकृतिः ।
पीठः स्यात् सुखसम्पत्तेर्नातिदीर्घो न वामनः ॥
ये चान्ये पीठसदृशा दृश्याः शिल्पिविनिर्म्मिताः ।
गुणान्दोषांश्च मानञ्च तेषां पीठवदादिशेत् ॥
विचार्य्यानेन विधिना यः शुद्धं पीठमाचरेत् ।
तस्य लक्ष्मीरियं वेश्म कदाचिन्न विमुञ्चति ॥
अज्ञानादथवा मोहादुथोऽन्यथा पीठमाचरेत् ।
एतानि तस्य नश्यन्ति लक्ष्मीरायुर्व्बलं कुलम् ॥"

इति युक्तिकल्पतरौ पीठोद्देशः ॥ ✕ ॥

कृतयुगे दक्षक्रतौ शिवनिन्दां श्रुत्वा प्राणांस्त्यक्तवत्या; सत्या; शरीरं शिरसि धृत्वा भ्रमति शिवे विष्णुना चक्रेण छिन्नास्तस्या अवयवा यत्र यत्र पतितास्त एव देशा एकपञ्चाशन्महापीठा अभवन् ॥ इति पौराणिकी वार्त्ता ॥ * ॥

तेषां निरूपणं यथा,—

ईश्वर उवाच ।

"मातः परापरे ! देवि ! सर्व्वज्ञानमयीश्वरि ! ।
कथ्यतां मे सर्व्वपीठं शक्तिभैरवदेवता ॥

देव्युवाच ।

शृणु वत्स ! प्रवक्ष्यामि दयालो ! भक्तवत्सल ! ।
याभिर्विना न सिध्यन्ति जपसाधनतत्क्रियाः ॥
पञ्चाशदेकपीठानि एवं भैरवदेवताः ।
अङ्गप्रत्यङ्गपातेन विष्णुचक्रक्षतेन च ॥
ममान्यवपुषो देव ! हिताय त्वयि कथ्यते ।
ब्रह्मरन्ध्रं हिङ्गुलायां भैरवो भीमलोचनः ॥
कोट्टरीसा महामाया त्रिगुणा या दिगम्बरी ॥१
शुर्कराये त्रिनेत्रं मे देवी महिषमर्द्दिनी ।
क्रोधीशो भैरवस्तत्र सर्व्वसिद्धिप्रदायकः ॥ २ ॥
सुगन्धायां नासिका मे देवस्त्र्यम्बकभैरवः ।
सुन्दरी सा महादेवी सुनन्दा तत्र देवता ॥३॥
काश्मीरे कण्ठदेशश्च त्रिसन्ध्येश्वरभैरवः ।
महामाया भगवती गुणातीता वरप्रदा ॥ ४ ॥
ज्वालायुक्तायां महाजिह्वा देव उन्मत्तभैरवः ।
अम्बिका सिद्धिदागान्धी ५ स्तनं जालन्धरे मम ।
भीषणो भैरवस्तत्र देवी त्रिपुरमालिनी ॥ ६ ॥
हार्दपीठं वैद्यनाथे वैद्यनाथस्तु भैरवः ।
देवता जयदुर्गाख्या ७ नेपाले जानुनी मम ।
कपाली भैरवः श्रीमान् महामाया च देवता ॥८॥
मानसे दक्षहस्तो मे देवी दाक्षायणी हर ।
अमरो भैरवस्तत्र सर्व्वसिद्धिप्रदायकः ॥ ९ ॥
उत्कले नाभिदेशश्च विरजाक्षेत्रमुच्यते ।
विमला सा महादेवी जगन्नाथस्तु भैरवः ॥१०॥
गण्डक्यां गण्डपातश्च तत्र सिद्धिर्न संशयः ।
तत्र सा गण्डकी चण्डी चक्रपाणिस्तु भैरवः॥११॥
बहुलायां वामबाहुर्ब्बहुलाख्या च देवता ।
भीरुको भैरवो देवः सर्व्वसिद्धिप्रदायकः ॥१२॥
उज्जयिन्यां कूर्परश्च माङ्गल्यः कपिलाम्बरः ।
भैरवः सिद्धिदः साक्षाद्देवी मङ्गलचण्डिका ॥१३॥
चट्टले दक्षबाहुर्मे भैरवश्चन्द्रशेखरः ।
वक्त्ररूपा भगवती भवानी तत्र देवता ॥
विशेषतः कलियुगे वसामि चन्द्रशेखरे ॥ १४ ॥
त्रिपुरायां दक्षपादो देवता त्रिपुरा मता ।
भैरवत्रिपुरेशश्च सर्व्वाभीष्टफलप्रदः ॥ १५ ॥
त्रिस्रोतायां वामपादो भ्रामरी भैरवोऽम्बरः॥१६॥
योनिपीठं कामगिरौ कामाख्या तत्र देवता ।
यत्रास्ते त्रिगुणातीता रक्तपाषाणरूपिणी ।
यत्रास्ते माधवः साक्षादुमानन्दोऽथ भैरवः ॥
सर्व्वदा विहरेद्देवी तत्र मुक्तिर्न संशयः ।
तत्र श्रीभैरवी देवी तत्र नित्यं वसेच्छिवः ॥
प्रचण्डचण्डिका तत्र मातङ्गी त्रिपुराम्बिका ।
बगला कमला तत्र भुवनेशी सुधूमिनी ॥
एतानि वरपीठानि शंसन्ति वरभैरव ! ।
एवं ता देवताः सर्व्वा एवन्ते दश भैरवाः ॥
सर्व्वत्र विरला चाहं कामरूपे गृहे गृहे ।
गौरीशिखरमारुह्य पुनर्जन्म न विद्यते ॥१७॥
करतोयां समासाद्य यावत् शिखरवासिनीम् ।
शतयोजनविस्तीर्णं त्रिकोणं सर्व्वसिद्धिदम् ॥
देवा मनुष्यमिच्छन्ति किं पुनर्म्मानवादयः ।
भूतधात्री महामाया भैरवः क्षीरखण्डकः ॥
युगाद्यायां महादेव ! दक्षाङ्गुष्ठं पदो मम ॥१८॥
नकुलीशः कालिपीठे दक्षपादाङ्गुलीषु च ।
सर्व्वसिद्धिकरी देवी कालिका तत्र देवता ॥१९॥
अङ्गुलीषु च हस्तस्य प्रयागे ललिता भवः॥२०॥
जयन्त्यां वामजङ्घा च जयन्ती क्रमदीश्वरः ॥२१॥
भुवनेशी सिद्धिरूपा किरीटस्था किरीटतः ।
देवता विमला नाम्नी सम्वर्त्तो भैरवस्तथा ॥२२॥
वाराणस्यां विशालाक्षी देवता कालभैरवः ।
मणिकर्णीति विख्याता कुण्डलञ्च मम श्रुतेः॥२३॥
कन्याश्रमे च पृष्ठं मे निमिषो भैरवस्तथा ।
सर्व्वाणी देवता तत्र २४ कुरुक्षेत्रे च गुल्फतः ।
स्थाणुर्नाम्ना च सावित्री देवता २५ मणिबन्धके ।
मणिबन्धे च गायत्री सर्व्वानन्दस्तु भैरवः ॥२६॥
श्रीशैले च मम ग्रीवा महालक्ष्मीस्तु देवता ।
भैरवः भ्रमरानन्दो देशे देशे व्यवस्थितः॥२७॥
कार्षीदेशे च कङ्कालो भैरवो रुरुनामकः ।
देवता देवगर्भाख्या २८ नितम्बः कालमाधवे ॥
भैरवश्चासिताङ्गश्च देवी काली च सुक्तिदा ।
दृष्ट्वा दृष्ट्वा महादेव ! मन्त्रसिद्धिमवाप्नुयात् ॥
कुजवारे भूततिथौ निशार्द्धे यस्तु साधकः ।
नत्वा प्रदक्षिणीकृत्य मन्त्रसिद्धिमवाप्नुयात् ॥२९॥
शोणाख्या भद्रसेनस्तु नर्म्मदाख्ये नितम्बकः ॥३०॥
रामगिरौ स्तनान्यश्च शिवानी चण्डभैरवः ॥३१॥
वृन्दावने केशजाले उमानाम्नी च देवता ।
भूतेशो भैरवस्तत्र सर्व्वसिद्धिप्रदायकः ॥३२॥
संहाराख्य जर्द्धदन्ते देवी नारायणी शुचौ ।
अधोदन्ते महारुद्रो वाराही पञ्चसागरे ॥३३॥
करतोयातटे तल्पं वामे वामनभैरवः ।
अपर्णा देवता तत्र ब्रह्मरूपा करोद्भवा ॥३४॥
श्रीपर्व्वते दक्षतल्पं तत्र श्रीसुन्दरी परा ।
सर्व्वसिद्धिकरी सर्व्वा सुन्दरानन्दभैरवः ॥ ३५ ॥
कपालिनी भीमरूपा वामगुल्फो विभाषके ॥३६॥
उदरञ्च प्रभासे मे चन्द्रभागा यशस्विनी ।
वक्त्रतुण्डो भैरव-३७ स्त्वोड्डीशो भैरवपर्व्वते ।
अवन्ती च महादेवी लम्बकर्णस्तु भैरवः ॥३८॥
त्रिपुरे श्रामरी देवी विक्रताक्षो जले स्थले॥३९॥
गण्डो गोदावरीतीरे विश्वेशी विश्वसाक्षिका ।
दक्षपार्श्वभैरवस्तु वामगण्डे तु राकिणी ॥
अमाधो भैरवो वत्स ! सर्व्वशैलात्मकोपरि ॥४०॥
रत्नावल्यां दक्षस्कन्धः कुमारी भैरवः शिवः ॥४१॥
मिथिलायां उमा देवी वामस्कन्धो महोदरः॥४२॥
नलाहाख्यां नलापातो योगेशो भैरवस्तथा ।
तत्र सा कालिका देवी सर्व्वसिद्धिप्रदायिका॥४३॥
कर्णाटे चैव कर्णे मे अभीरुर्नाम भैरवः ।
देवता जयदुर्गाख्या नानाभोगप्रदायिनी ॥ ४४ ॥
वक्रेश्वरे मनःपातो वक्रनाथस्तु भैरवः ।
नदी पापहरा तत्र देवी महिषमर्द्दिनी ॥ ४५ ॥
यशोरे पाणिपद्मञ्च देवता यशरेश्वरी ।
चण्डश्च भैरवो यत्र तत्र सिद्धिमवाप्नुयात् ॥४६॥
अट्टहासे चोष्ठपातो देवी सा फुल्लरा स्मृता ।
विश्वेशो भैरवस्तत्र सर्व्वाभीष्टप्रदायकः ॥ ४७ ॥
हारपातो नन्दिपुरे भैरवो नन्दिकेश्वरः ।
नन्दिनी सा महादेवी तत्र सिद्धिर्न संशयः ॥४८॥
लङ्कायां नूपुरश्चैव भैरवो राक्षसेश्वरः ।
इन्द्राक्षी देवता तत्र इन्द्रेणोपासिता पुरा ॥४९॥
विराटदेशमध्ये तु पादाङ्गुलिनिपातनम् ।
भैरवश्चाम्बराक्षश्च देवी तत्राम्बिका स्मृता ॥५०
मागधे दक्षजङ्घा मे व्योमकेशस्तु भैरवः ।
सर्व्वानन्दकरी देवी सर्व्वकामफलप्रदा ॥ ५१ ॥
एतास्ते कथिताः पुत्र ! पीठनाथाधिदेवताः ॥
क्षेत्राधीशं विना देवं पूजयेत् पीठदेवताम् ।
भैरवैर्द्दीयते सर्व्वं जपपूजादिसाधनम् ॥
अज्ञात्वा भैरवं पीठं पीठशक्तिञ्च शङ्कर ! ।
प्राणनाथ ! न सिध्येत कल्पकोटिशतादिभिः ॥
न देयं परशिष्येभ्यो निन्दकाय दुरात्मने ।
शठाय वञ्चकायेदं दत्त्वा स्वल्पमवाप्नुयात् ॥
दद्यात् शान्ताय शिष्याय नैष्ठिकाय शुचौ प्रिये
साधकाय कुलीनाय मन्त्री मन्त्रार्थसिद्धये ॥")

इति तन्त्रचूड़ामणौ शिवपार्व्वतीसंवादे एकप्रञ्चाशद्विद्योत्पत्तौ पीठनिर्णयः समाप्तः ॥ * ॥
(देवीभागवतोक्ताष्टाधिकशतपीठनामानि यथा, तत्रैव । ७ । ३० । ४४—६५ ।
"अपश्यत्तां सतीं वह्नौ दह्यमानान्तु चित्कलाम् ।
रुरोदोच्चारयामास हा ! सतीति वदन् मुहुः ॥
बभ्राम भ्रान्तचित्तः सन्नानादेशेषु शङ्करः ।
तदा ब्रह्मादयो देवाश्चिन्तामापुरनुत्तमाम् ॥
विष्णुस्तु त्वरया तत्र धनुरुद्यम्य मार्गणैः ।
चिच्छेदावयवान् सत्यास्तत्तत्स्थानेषु तैरपतन् ॥
तत्तत् स्थानेषु तत्रासीन्नानामूर्त्तिधरो हरः ।
उवाच च ततो देवान् स्थानेष्वेतेषु वै शिवाम् ॥
भजन्ति परया भक्त्या तेषां किञ्चिन्न दुर्लभम् ।
नित्यं सन्निहिता यत्र निजाङ्गेषु पराम्बिका ॥
स्थानेष्वेतेषु ये मर्त्याः पुरश्चरणकर्म्मिणः ।
तेषां मन्त्राः प्रसिध्यन्ति मायाबीजं विशेषतः ॥
इत्युक्त्वा शङ्करस्तेषु स्थानेषु विरहातुरः ।
कालं निन्ये नृपश्रेष्ठ ! जपध्यानसमाधिभिः ॥
जनमेजय उवाच ।
कानि स्थानानि तानि स्युः सिद्धपीठानि चानघ ! ।
कतिसंख्यानि नामानि कानि तेषाञ्च मे वद ॥
तत्र स्थितानां देवीनां नामानि च कृपाकर ! ।
कृतार्थोऽहं भवे येन तद्वदाशु महामुने ! ॥
व्यास उवाच ।
शृणु राजन् ! प्रवक्ष्यामि देवीपीठानि सांप्रतम् ।
येषां श्रवणमात्रेण पापहीनो भवेन्नरः ॥
येषु येषु च पीठेषूपास्येयं सिद्धिकाङ्क्षिभिः ।
भूतिकामैरभिध्येया तानि वक्ष्यामि तत्त्वतः ॥
वाराणस्यां विशालाक्षी गौरीमुखनिवासिनी ।
क्षेत्रे वै नैमिषारण्ये प्रोक्ता सा लिङ्गधारिणी ॥
प्रयागे ललिता प्रोक्ता कामुकी गन्धमादने ।
मानसे कुमुदा प्रोक्ता दक्षिणे चोत्तरे तथा ॥
विश्वकामा भगवती विश्वकामप्रपूरिणी ।
गोमन्ते गोमती देवी मन्दरे कामचारिणी ॥
मदोत्कटा चैत्ररथे जयन्ती हस्तिनापुरे ।
गौरी प्रोक्ता कान्यकुब्जे रम्भा तु मलयाचले ॥
एकाम्रपीठे संप्रोक्ता देवी सा कीर्त्तिमत्यपि ।
विश्वे विश्वेश्वरी प्राहुः पुरुहूताच्च पुष्करे ॥
केदारपीठे संप्रोक्ता देवी सन्मार्गदायिनी ।
मन्दा हिमवतः पृष्ठे गोकर्णे भद्रकर्णिका ॥
स्थानेश्वरी भवानी तु विल्वके विल्वपत्रिका ।
श्रीशैले माधवी प्रोक्ता भद्रा भद्रेश्वरे तथा ॥
वराहशैले तु जया कमला कमलालये ।
रुद्राणी रुद्रकोट्यान्तु काली कालञ्जरे तथा ॥
शालग्रामे महादेवी शिवलिङ्गे जलप्रिया ।
महालिङ्गे तु कपिला माकोटे मुकुटेश्वरी ॥
मायापुर्य्यां कुमारी स्यात्मन्ताने ललिताम्बिका ।
गयायां मङ्गला प्रोक्ता विमला पुरुषोत्तमे ॥
उत्पलाक्षी सहस्राक्षे हिरण्याक्षे महोत्पला ।
विपाशायामभोघाक्षी पाटला पुरुषर्वहने ॥
नारायणी सुपार्श्वे तु त्रिकूटे रुद्रसुन्दरी ।
विपुले विपुला देवी कल्याणी मलयाचले ॥
सह्याद्रावेकवीरा तु हरिश्चन्द्रे तु चन्द्रिका ।
रमणा रामतीर्थे तु यमुनायां मृगावती ॥
कोटवी कोटतीर्थे तु सुगन्धा माधवे वने ।
गोदावर्य्यां त्रिसन्ध्या तु गङ्गाद्वारे रतिप्रिया ॥
शिवकुण्डे शुभानन्दा नन्दिनी देविकातटे ।
रुक्मिणी द्वारवत्यान्तु राधा वृन्दावने वने ॥
देवकी मथुरायान्तु पाताले परमेश्वरी ।
चित्रकूटे तथा सीता विन्ध्ये विन्ध्याधिवासिनी ॥
करवीरे महालक्ष्मीरुमादेवी विनायके ।
आरोग्या वैद्यनाथे तु महाकाले महेश्वरी ॥
अभयेत्युग्रतीर्थेषु नित्या विन्ध्यपर्व्वते ।
माण्डव्ये माण्डवी नाम खाहा माहेश्वरीपुरे ॥
कुमुदे प्रचण्डा तु चण्डिकामरकण्टके ।
सोमेश्वरे वरारोहा प्रभासे पुष्करावती ॥
देवमाता सरस्वत्यां पारावारा तटे स्थिता ।
महालये महाभागा पयोष्ण्यां पिङ्गलेश्वरी ॥
सिंहिका कृतशौचे तु कार्त्तिके त्वतिशाङ्करी ।
उत्पलावर्त्तके लोला सुभद्रा शोणसङ्गमे ॥
माता सिद्धवने लक्ष्मीरनङ्गा भरताश्रमे ।
जालन्धरे विश्वमुखी तारा किष्किन्धपर्व्वते ॥
देवदारुवने पुष्टिर्मेधा काश्मीरमण्डले ।
भीमादेवी हिमाद्रौ तु तुष्टिश्चित्रेश्वरे तथा ॥
कपालमोचने शुद्धिर्मार्गदा कायावरोहणे ।
शङ्खोद्धारे धरा नाम धृतिः पिण्डारके तथा ॥
कला तु चन्द्रभागायामच्छोदे शिवधारिणी ।
वेणायामम्बिका नाम वदर्य्यामूर्ध्वकेशी तथा ॥
ओषधिश्चोत्तरकुरौ कुशद्वीपे कुशोदका ।
मन्मथा हेमकूटे तु कुमुदे सत्यवादिनी ॥
अश्वत्थे वन्दनीया तु निधिर्वैश्रवणालये ।
गायत्री वेदवदने पार्व्वती शिवसन्निधौ ॥
देवलोके तथेन्द्राणी ब्रह्मास्येषु सरस्वती ।
सूर्य्यबिम्बे प्रभा नाम मातृणां वैष्णवी मता ॥
अरुन्धती सतीनान्तु रामासु च तिलोत्तमा ।
चित्ते ब्रह्मकला नाम शक्तिः सर्व्वशरीरिणाम् ॥
इमान्यष्टशतानि स्युः पीठानि जनमेजय ! ।
तत्संख्याकास्तदीशाख्यो देवश्च परिकीर्त्तिताः ॥
सतीदेहाङ्गभूतानि पीठानि कथितानि च ।
अन्यान्यपि प्रसङ्गेन यानि स्थानानि भूतले ॥
यः स्मरेच्छृणुयाद्वापि नामाष्टशतमुत्तमम् ।
सर्व्वपापविनिर्म्मुक्तो देवीलोकं परं व्रजेत् ॥
एतेषु सर्व्वपीठेषु गच्छेद्वै यात्राविधानतः ।
तत्तत्पर्य्येत्य पित्रादीन् श्राद्धादीनि विधाय च ॥
कृत्वाच महतीं पूजां भगवत्या विधानतः ।
क्षमापयेज्जगद्धात्रीं जगदम्बां मुहुर्मुहुः ॥
कृतकृत्यं स्वमात्मानं जानीयाज्जनमेजय ! ।
भक्ष्यभोज्यादिभिः सर्व्वान् ब्राह्मणान् भोजयेत्ततः ॥
सुवासिनीः कुमारीश्च वटुकादींस्तथा नृप ! ।
तस्मिन् क्षेत्रे स्थिता ये तु चाण्डालाद्या अपि प्रभो ! ॥
देवीरूपाः स्मृताः सर्व्वे पूजनीयास्ततो हि ते ।
प्रतिग्रहादिकं सर्व्वं तेषु क्षेत्रेषु वर्ज्जयेत् ॥
यथाशक्तिपुरस्कर्य्यां कुर्य्यान्मन्त्रस्य सत्तमः ।
मायाबीजेन देवेशीं तत्तत्पीठाधिवासिनीम् ॥
पूजयेदनिशं राजन् ! पुरश्चरणकञ्चवेत् ।
वित्तशाठ्यं न कुर्व्वीत देवीभक्तिपरो नरः ॥
य एवं कुरुते यात्रां श्रीदेयाः प्रीतमानसः ।
सहस्रकल्पपर्य्यन्तं ब्रह्मलोके महत्तरे ॥
वसन्ति पितरस्तस्य सोऽपि देवीपुरे तथा ।
अन्ते लब्ध्वा परं ज्ञानं भवेन्मुक्तो भवाम्बुधेः ॥")
अन्यानि पीठादीनि कालीपुराणे १८।५०।६१ अध्यायेषु द्रष्टव्यानि ॥ * ॥ पीठन्यासस्तु न्यासशब्दे द्रष्टव्यः । पीठदेवतापूजनं न्यासक्रमेणैव ॥

पीठकेलिः, पुं, (पीठे आसने केलिर्नर्म्मादिरस्य ।) पीठमर्द्दनायकः । यथा,—
"विदूषको वलीकः षट्प्रश्नः कामकेलिर्विदूषकः ।
पीठकेलिः पीठमर्द्दो भविलश्छिद्दुरो विटः ॥"
इति त्रिकाण्डशेषः ॥

पीठमर्द्दः, पुं, (मृद्नातीति । मृद्+अच् । पिठस्यासनस्य मर्द्दः ।) नायकविशेषः । तस्य लक्षणम् । कुपितस्त्रीप्रसादकः । उदाहरणं यथा,—
"कोऽयं कोपविधिः प्रयच्छ करुणागर्भं वचो जायतां
पीयूषद्रवदीर्घकापरिमलैरामोदिता मेदिनी ।
आस्यं वा सृज दृग्युगं वा लोचनमिदं यावर्त्तयन्ती-मुहुर्
यस्मै कुप्यसि तस्य सुन्दरि ! तपोवृद्धानि वन्दामहे ॥
नर्म्मसचिवोऽप्ययमेव ।" इति रसमञ्जरी ॥ (अयं हि नायकस्य उत्तमसहायानामन्यतमः । इति साहित्यदर्पणम् ।३।५३ ॥ नायकप्रियः । अतिधृष्टः । यथा, मेदिनी । दे, ५० ।
"पीठमर्द्दोऽति धृष्टे स्यात् नायकस्य प्रियेऽपि च॥" यथा, महाभारते । ४ । २० । ३३ ।
"प्रेक्षते स्म विराटस्तु कङ्कञ्च बहवो जनाः ।
रथिनः पीठमर्द्दाश्च हृष्यारोहाश्च नैगमाः ॥")

पीठसर्पी, [न्] त्रि, (पीठेन सर्पतीति । सृप्+णिनिः ।) खञ्जः । तत्पर्य्यायः । पांसुरः २ । इति हारावली ॥

पीठी, स्त्री, (पीठ+स्वार्थे ङीष् ।) आसनम् । इति शब्दरत्नावली ॥ पीँड़ी इति भाषा ॥

पीड, क्र क वाधे । गाहे । इति कविकल्पद्रुमः ॥ (चुरां परं सकं-सेट् ।) बाधो विहृतिः । गाहो विलोड़नम् । क्र, अपीपिड़त् अपिपीड़त् । क, पीड़यति शत्रुं लोकः । पीड़यति स्नानं कामी । इति दुर्गादासः ॥

पीड़नं, क्ली, (पीड़ बाधे अवगाहे वा+भावे ल्युट् ।) शस्त्रादिसम्पन्नदेशस्य परचक्रेण पीड़नम् । शत्रुकृतगाढ़प्रहारः । इति केचित् । पदाक्रमणम् । इति केचित् । इति भरतः ॥ तत्पर्य्यायः । अवमर्द्दः २ । इत्यमरः ।२।८।२०६ ॥ (यथा, देवीभागवते । ३ । १२ । १३ ।
"पीड़नञ्चैव पाषाल्या स्तथा द्यूते पराजयः ॥")

पीतकद्रुमः, पुं, (पीतको द्रुम इति नित्यकर्म्मधारयः।) हरिद्रवृक्षः। इति राजनिर्घण्टः॥ (हरिद्रशब्दैरस्य विवरणं विज्ञेयम्॥)

पीतकन्दं, क्ली, (पीतः कन्दोऽस्य।) गर्जरम्। इति राजनिर्घण्टः॥

पीतकरवीरकः, पुं, (पीतः करवीर इति नित्यकर्म्मधारयः। ततः स्वार्थे कन्।) पीतवर्णकरवीरपुष्यवृक्षः। तत्पर्य्यायः। पीतप्रसवः २ सुगन्धिकुसुमः ३। अस्य गुणाः। सामान्यकरवीरगुणतुल्याः। इति राजनिर्घण्टः॥

पीतकावेरं, क्ली, (कुत्सितं वेरं शरीरं कावेरम्। पीतं कावेरं कुत्सितशरीरमपि यस्मात्।) कुङ्कुमम्। पित्तलम्। इति मेदिनी। रे, ३०५॥ (विवृतिरस्य कुङ्कुमपित्तलशब्दयोर्द्रष्टव्या॥)

पीतकाष्ठं, क्ली, (पीतं काष्ठमिति नित्यकर्म्मधारयः।) पीतचन्दनम्। इति राजनिर्घण्टः॥

पीतकीला, स्त्री, (पीता कीला कीलतुल्या लतेति नित्यकर्म्मधारयः।) आवर्त्तकीलता। इति राजनिर्घण्टः॥

पीतघोषा, स्त्री, (पीतानि पुष्पाणि सन्त्यस्या इति पीता पीतपुष्पेत्यर्थः। ततः पीता घोषेति कर्म्मधारयः।) पीतपुष्पघोषालता। इति रत्नमाला॥ अस्याः पर्य्यायः घोषकशब्दे द्रष्टव्यः॥

पीतचन्दनं, क्ली, (पीतं चन्दनमिति नित्यकर्म्मधारयः।) पीतवर्णचन्दनम्। तत्तु द्रविड़देशे प्रसिद्धम्। कलम्बक इति ख्यातम्। तत्पर्य्यायः। पीतगन्धम् २ कालेयम् ३ पीतकम् ४ माधवप्रियम् ५ कालेयकम् ६ पीतकाष्ठम् ७ वर्ब्बरम् ८। इति राजनिर्घण्टः॥ कालीयकम् ९ कालीयम् १० पीताभम् ११ हरिचन्दनम् १२ हरिप्रियम् १३ कालसारम् १४ कालानुसार्य्यकम् १५। अस्य गुणाः। रक्तचन्दनगुणतुल्यगुणत्वम्। यङ्गनाशित्वञ्च। इति भावप्रकाशः॥ शीतलत्वम्। तिक्तत्वम्। कुष्ठश्लेष्मकण्डूविचर्च्चिकादद्रुक्रिमिनाशित्वम्। कान्तिकरत्वञ्च। इति राजनिर्घण्टः॥

पीतचम्पकः, पुं, (पीतं चम्पकमिव शिखा यस्य।) प्रदीपः। इति जटाधरः॥ (पीतं चम्पकं तत्पुष्पमस्य।) पीतवर्णचम्पकपुष्पवृक्षश्च॥

पीतनखुलः, पुं, (पीतस्तखुलोऽस्य।) कङ्कुनी। इति राजनिर्घण्टः॥

पीतनखुला, स्त्री, (पीतस्तखुलोऽस्याः।) चर्चिकावृक्षः। इति राजनिर्घण्टः॥

पीतनुण्डः, पुं, (पीतं तुण्डं यस्य।) कारण्डवपक्षी। तत्पर्य्यायः। चक्षुरुचिः २ सुगृहः ३। इति त्रिकाण्डशेषः॥

पीतना, स्त्री, (पीत+तल्+टाप्।) हरिद्राभना। पीतत्वम्। पीतशब्दात् भावार्थे तप्रत्ययनिष्पन्ना। इति व्याकरणम्॥ (यथा, महाभारते। ३। १४८। २९।
"द्वापरेऽपि युगे धर्म्मो द्विभागो नः प्रवर्त्तते।
विष्णुवै पीतता यानि चतुर्थो वेद एव च॥")

पीततैला, स्त्री, (पीतं तैलमस्याः।) ज्योतिष्मती लता। इति जटाधरः॥ महाज्योतिष्मती। इति राजनिर्घण्टः॥

पीतदारु, क्ली, (पीतञ्च तत् दारु चेति।) देवदारु। इत्यमरः। २।४।५३॥ (पर्य्यायोऽस्य यथा,—
"सुरदारु ट्टकिलिमं सुराङ्गं भद्रदारु च।
देवकाष्ठम्पीतदारु देवदारु च दारु च॥"
इति वैद्यकरत्नमालायाम्॥)
सरलः। इति रत्नमाला॥ हरिद्रुः। इति राजनिर्घण्टः॥ (पर्य्यायोऽस्य यथा,—
"दार्व्वी दारुहरिद्रा च पर्ज्जन्या पर्ज्जनीति च।
कटङ्कटेरी पीता च भवेत् सैव पचम्पचा।
सैव कालीयकः प्रोक्तस्तथा कालेयकोऽपि च॥
पीतद्रुश्च हरिद्रुश्च पीतदारुकपीतकम्॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

पीतदुग्धा, स्त्री, पीतं दुग्धं यस्या यया वा। धेनुष्या। दुग्धवत्त्वकैः संस्थिता गौः। इति हेमचन्द्रः॥ (पीतं पीतवर्णं दुग्धं क्षीरमस्याः। कटुपर्णी। चोक इति भाषा॥ यथास्याः पर्य्यायः।
"कटुपर्णी हैमवती हैमक्षीरी हिमावती।
हैमाह्वा पीतदुग्धा च तन्मूलञ्चोकसुच्यते॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

पीतद्रुः, पुं, (पीतो द्रुरिति नित्यकर्म्मधारयः।) सरलवृक्षः। दारुहरिद्रा। इत्यमरः। २।४।६०, २।४।९०१॥ (यथास्य पर्य्यायः।
"दार्व्वी दारुहरिद्रा च पर्ज्जन्या पर्ज्जनीति च।
कटङ्कटेरी पीता च भवेत् सैव पचम्पचा॥
सैव कालीयकः प्रोक्तस्तथा कालेयकोऽपि च।
पीतद्रुश्च हरिद्रुश्च पीतदारुकपीतकम्॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

पीतनं, क्ली, (पीतं करोतीति। तत्करोतीति णिच्। ततो ल्युः। यद्वा, पीतं पीतवर्णं नयतीति। नी+डः।) कुङ्कुमम्। (यथा, श्रीकण्डचरिते। ६। ३४।
"अपहृत्य पीतनमणेर्घ-
ममरसुहृदां शरीरतः।
भीत इव गहनमाभिगुहां
प्रपलाय्य तूर्णमविशत् पयोभरः॥")
हरितालम्। पीतदारु। इत्यमरमेदिन्यौ॥

पीतनः, पुं, (पीतं करोतीति। णिच्। ततो ल्युः।) द्रुचः। इति राजनिर्घण्टः॥ आम्रातकः। इति मेदिनी। ने, ६२॥ (नन्दीवृक्षः। तत्पर्य्यायो यथा, वैद्यकरत्नमालायाम्।
"नन्दीवृक्षस्ताम्रपाकी फलपाकी च पीतनः।
गन्धभाण्डो गन्धसुण्डो द्वितीयः क्षिप्रगन्धसौ॥")

पीतनकः, पुं, (पीतन एव। पीतन+स्वार्थे कन्।) आम्रातकः। इति राजनिर्घण्टः॥

पीतपर्णी, स्त्री, (पीतानि पीतवर्णानि पर्णानि यस्याः। ङीष्।) क्षितन्नी। इति शब्दचन्द्रिका॥ विक्रिटि इति भाषा॥

पीतपादा, स्त्री, (पीतौ पादौ यस्याः।) शारिकापक्षी। इति हेमचन्द्रः॥ पीतचरणयुक्ते, त्रि।

पीतपुष्पं, क्ली, (पीतानि पुष्पाणि यस्य।) आकुलवृक्षः। इति राजनिर्घण्टः॥ (कुष्माण्डम्। तत्पर्य्यायो यथा भावप्रकाशे।
"कुष्माण्डं स्यात् पुष्पफलं पीतपुष्पं बृहत्फलम्॥")
हरिद्राभकुसुमञ्च॥

पीतपुष्पः, पुं, (पीतानि पीतवर्णानि पुष्पाणि यस्य।) कर्णिकारवृक्षः। इति शब्दचन्द्रिका॥ चम्पकवृक्षः। इति राजनिर्घण्टः॥ पीतझिण्टी। पिण्डीतकभेदः। इति रत्नमाला॥ (इङ्गुदीवृक्षः। यथा, वैद्यकरत्नमालायाम्।
"पीतपुष्पोऽङ्गारपुष्प इङ्गुदी तापसप्रियः॥"
राजकोशातकी। तत्पर्य्यायो यथा, भावप्रकाशे।
"धामार्गवः पीतपुष्पो जालिनी क्षतबोधना।
राजकोशातकी चेति तथोक्ता राजिमत्फलाः॥")

पीतपुष्पा, स्त्री, (पीतं पुष्पं यस्याः।) इन्द्रवारुणी। भिक्षुरिष्टाक्षुपः। आढ़की। इति राजनिर्घण्टः॥ (महाबला। तत्पर्य्यायो यथा, वैद्यकरत्नमालायाम्।
"ऋष्यप्रोक्ता त्वतिबला पीतपुष्पा महाबला॥")

पीतपुष्पी, स्त्री, (पीतं पुष्पं यस्याः। जातित्वात् ङीष्।) शुक्लपुष्पी। सहदेवी। महाकोशातकी। चपुषी। इति राजनिर्घण्टः॥

पीतफलः, पुं, (पीतानि फलानि यस्य।) शाखोटवृक्षः। इति त्रिकाण्डशेषः॥ कर्म्मारवृक्षः। इति राजनिर्घण्टः॥

पीतफलकः, पुं, (पीतफल एव। स्वार्थे कन्।) शाखोटवृक्षः। इति भावप्रकाशः॥

पीतबालुका, स्त्री, (पीता बालुकेव चूर्णगौरी यस्याः।) हरिद्रा। इति त्रिकाण्डशेषः॥ पीतवर्णसिकता च॥

पीतबीजा, स्त्री, (पीतं बीजं यस्याः।) मेथिका। इति राजनिर्घण्टः॥ पीतवर्णबीजयुक्ते, त्रि॥

पीतभृङ्गराजः, पुं, (पीतो भृङ्गराजः।) पीतभृङ्गराजः। पीत कैसुरिया इति भाषा। तत्पर्य्यायः। स्वर्णभृङ्गारः २ हरिप्रियः ३ देवप्रियः ४ वन्दनीयः ५ पावनः ६। अस्य गुणाः। तिक्तत्वम्। उष्णत्वम्। चक्षुष्यत्वम्। केशरञ्जनत्वम्। कफामशोफनाशित्वम्। तच्च नीतौ रसायनः। इति राजनिर्घण्टः॥

पीतमणिः, पुं, (पीतो मणिरिति नित्यकर्म्मधारयः।) पुष्परागः। इति राजनिर्घण्टः॥ (पुष्परागशब्दैरस्य विवरणं ज्ञातव्यम्॥)

पीतमाक्षिकं, क्ली, (पीतं माक्षिकम्।) माक्षिकम्। इति राजनिर्घण्टः॥

पीतमृगः, पुं, (पीतः पीतवर्णो मृगः।) मृगविशेषः। सोना मृग इति भाषा। तत्पर्य्यायः। वसुः २ खड्गीरः ३ प्रवेलः ४ जयः ५ शारदः ६। इति हेमचन्द्रः। ४। २३८॥

पीतमूलकं, क्ली, (पीतं मूलमस्य । कप् ।) गर्जरम् । इति राजनिर्घण्टः ॥

पीतयूथी, स्त्री, (पीता यूथी ।) स्वर्णयूथी । इति राजनिर्घण्टः ॥ (स्वर्णयूथीशब्देऽस्या विवृतिर्विज्ञेया ॥)

पीतरक्तं, क्ली, (पीतं रक्तञ्च । वर्णो वर्णेनेति समासः ।) पुष्यरागमणिः । इति राजनिर्घण्टः ॥

पीतरागं, क्ली, (पीतो रागो वर्णो यस्य ।) किञ्जल्कम् । शिक्थकम् । इति राजनिर्घण्टः ॥ पीतवर्णे, पुं । तद्वति, त्रि ॥

पीतरोहिणी, स्त्री, (पीता सती रोहतीति । रुह + णिनिः + ङीप् ।) काञ्चरी । इति भावप्रकाशः ॥ (यथा, भावप्रकाशे पूर्व्वखण्डे प्रथमे भागे ।

"काञ्चीरी काञ्चरी क्षीरा काञ्चर्य्यः पीतरोहिणी ॥")

पीतलः, पुं, (पीतं लातीति । ला + कः ।) पीतवर्णः । इति हेमचन्द्रः ।६।३०॥ तद्युक्ते, त्रि ॥

पीतलकं, क्ली, (पीतलेन पीतेन वर्णेन कायति प्रकाशते इति । कै + कः ।) पित्तलम् । इति राजनिर्घण्टः ॥

पीतलोहं, क्ली, (पीतं लोहमिति नित्यकर्म्मधारयः ।) पित्तलभेदः । इति हेमचन्द्रः ।४।११४॥

पीतवासाः, [स्] पुं, (पीतं वासो वस्त्रं यस्य ।) श्रीकृष्णः । इति हलायुधः ॥ पीतवस्त्रयुक्ते, त्रि ॥ (यथा, महाभारते । १ । ६४ । ५३ ।

"वः सचक्रगदाभाणिः पीतवासाः स्मितप्रभः ॥")

पीतवृक्षः, पुं, (पीतो वृक्षः ।) श्लेष्मातकप्रभेदः । सरलवृक्षः । इति राजनिर्घण्टः ॥ (यथास्य पर्य्यायः ।

"सरलः पीतवृक्षः स्यात्तथा सुरभिदारुकः ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

पीतशाल(सा)लः, पुं, (पीतः शालो वृक्षविशेषः ।) असनवृक्षः । इति शब्दचन्द्रिका ॥ (यथा, कालिकापुराणे ६८ अध्याये ।

"पीतशालः परिमलो विमर्द्दोऽसनस्तथा ॥")

पीतसारं, क्ली, (पीतः सारो यस्य ।) पीतवर्णचन्दनकाष्ठम् । हरिचन्दनम् । इति शब्दचन्द्रिका ॥ (पर्य्यायोऽस्य यथा, वैद्यकरत्नमालायाम् ।

"पीतसारं सुपीतञ्च तत्पीतं हरिचन्दनम् ॥")

पीतसारः, पुं, (पीतः पीतवर्णः सारो यस्य ।) खलयवः । गोवेदकमणिः । इति मेदिनी । रे, २८३ ॥ अक्षोठवृक्षः । इति जटाधरः ॥ तुरुष्कः । वीजकः । इति राजनिर्घण्टः ॥ (अस्य पर्य्यायो यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।

"वीजकः पीतसारश्च पीतशालक इत्यपि ।
वल्लूकपुष्पः प्रियकः सर्ज्जकश्चासनः स्मृतः ॥")

पीतसारकः, पुं, (पीतः सारो यस्य । कप् ।) निम्बवृक्षः । अक्षोठवृक्षः । इति राजनिर्घण्टः ॥

पीतसारि, क्ली, (पीतं पीतवर्णं सरति प्राप्नोतीति । सृ + णिनिः ।) स्रोतोऽञ्जनम् । इति शब्दचन्द्रिका ॥

पीतसालकः, पुं, (पीतः सालकः सालवृक्षः ।) पीतवर्णसालवृक्षः । पेया साल इति भाषा । तत्पर्य्यायः । सर्ज्जकः २ असनः ३ वल्लूकपुष्पः ४ प्रियकः ५ जीवकः ६ । इत्यमरः । २ । ४ । ४३ ॥ अस्य पर्य्यायान्तरं गुणाश्च असनशब्दे द्रष्टव्याः ॥

पीतस्फटिकः, पुं, (पीतः स्फटिक इति नित्यकर्म्मधारयः ।) पुष्यरागमणिः । इति राजनिर्घण्टः ॥

पीता, स्त्री, (पीतो वर्णोऽस्यस्या इति । अच् । टाप् ।) हरिद्रा । इत्यमरः । २ । ६ । ४१ ॥ (पर्य्यायोऽस्या यथा, वैद्यकरत्नमालायाम् ।

"हरिद्रा पीतका गौरी काञ्चनी रजनी निशा ।
मेहघ्नी रजनी पीता वर्णिनी रात्रिनामिका ॥")

दारुहरिद्रा । महाज्योतिष्मती ॥ कपिलशिंशपा । प्रियङ्गुः । गोरोचना । इति राजनिर्घण्टः ॥ अतिविषा । इति शब्दचन्द्रिका ॥ (पीतवर्णयुक्ते, त्रि । यथा, विश्वकर्म्मप्रकाशे । १ । २४ ।

"श्वेता रक्ता तथा पीता कृष्णा वर्णानुपूर्व्वशः ॥")

पीताङ्गः, पुं, (पीतं अङ्गं यस्य ।) श्येनाकप्रभेदः । इति राजनिर्घण्टः ॥

पीताब्धिः, पुं, (पीतः अब्धिः समुद्रो येन ।) अगस्त्यमुनिः । इति हेमचन्द्रः । २ । ३६ ॥ (अगस्त्यमुनेः समुद्रपानकथा यथा, महाभारते । ३ । १०५ । १—६ ।

"समुद्रं स समासाद्य वारुणिर्भगवानृषिः ।
उवाच सहितान् देवानृषींश्चैव समागतान् ॥
अहं लोकहितार्थं वै पिबामि वरुणालयम् ।
भवद्भिर्यदनुष्ठेयं तच्छीघ्रं संविधीयताम् ॥
एतावदुक्त्वा वचनं मैत्रावरुणिरच्युतः ।
समुद्रमपिबत् क्रुद्धः सर्व्वलोकस्य पश्यतः ॥
पीयमानं समुद्रन्तु दृष्ट्वा सेन्द्रास्तदामराः ।
विस्मयं परमं जग्मुः स्तुतिभिश्चाप्यपूजयन् ॥
त्वं नस्त्राता विधाता च लोकानां लोकभावन ! ।
तत्प्रसादात् समुच्छेदं न गच्छेत् सामरं जगत् ॥
संपूज्यमानस्त्रिदशैर्महात्मा
गन्धर्व्वतूर्य्येषु नदत्सु सर्व्वशः ।
दीर्घेण पुण्येरवकीर्य्यमाणो
महार्णवं निःसलिलं चकार ॥")

पीताम्बरः, पुं, (पीतं अम्बरं वस्त्रं यस्य ।) विष्णुः । इत्यमरः । १ । १ । १६ ॥ (यथा, विष्णुस्तोत्रे । २१ ।

"एतत्पातित्यदानो जघनमतिघनादेनसो मानवीयं ।
सातत्येनैव पैतोविषयमवतरत् पातु पीताम्बरस्य ॥")

श्लैलूषः । इति मेदिनी । रे, २८३ ॥ पीतवस्त्रयुक्ते, त्रि । हरिद्राभवसने, क्ली ॥ (यथा,—

"पीताम्बरधरः सग्वी वनमालाविभूषितः ॥"

इति पुराणम् ॥)

पीताश्मा, [न्] पुं, (पीतः अश्मा ।) पुष्यरागमणिः । इति राजनिर्घण्टः ॥ (विवृतिरस्य पुष्यरागशब्दे ज्ञातव्या ॥)

पीतिः, पुं, (पिबतीति । पा + क्तिच् । "घुमास्थागापेति ।" ६ । ४ । ६६ । इतीत्वम् ।) घोटकः । इत्यमरः । २ । ८ । ४३ ॥

पीतिः, स्त्री, (पा + भावे क्तिन् ।) पानम् । इति मेदिनी । ते, ३३ ॥ (पीयतेऽनयेति । करणे क्तिन्) सुरा । इति शब्दचन्द्रिका ॥

पीतिका, स्त्री, (पीतो वर्णोऽस्यस्या इति । टन् ।) हरिद्रा । इति रत्नमाला ॥ दारुहरिद्रा । इति राजनिर्घण्टः ॥ स्वर्णयूथी । इति जटाधरः ॥

पीती, [न्] पुं, (पीतं पानं प्राचुर्य्येणास्त्यस्येति । इनिः ।) पीतिः । घोटकः । इत्यमरटीकायां रायमुकुटः ॥

पीतुः, पुं, (पिबति रसादीनिति । पा + "पः कित्च ।" उणां १।७१। इति क्तुन् । स च कित् । कित्त्वात् ईत्वम् ।) सूर्य्यः । अग्निः । इत्युणादिकोषः । यूथपतिः । इति संक्षिप्तसारोणादिवृत्तिः ॥

पीथं, क्ली, (पीयते इति । पा + "पातृतुदीति ।" उणां २ । ७ । इति थक् ।) जलम् । इति हेमचन्द्रः ॥ घृतम् । इत्युणादिकोषः ॥ (पिबति रसादीनिति । पा + कर्त्तरि थक् ।) सूर्य्यः । अग्निः । कालः । इति त्रिकाण्डशेषः ॥

पीथिः, पुं, (पीति + पृषोदरादित्वात् तस्य धः ।) पीतिः । घोटकः । इत्यमरटीकायां स्वामी ॥

पीनः, त्रि, (ओ प्या यी ङ इद्धौ + क्तः । "ओदितश्च ।"८।२।४५। इति निष्ठातस्य नः ।) स्थूलः । इत्यमरः । ३ । १ । ६१ ॥ (यथा, आर्य्यासप्तशत्याम् । ५६१ ।

"वक्षःस्थलसुप्ते मम सुखसुप्तधातुं न मौलिमालभसे ।
पीनोत्तुङ्गस्तनभरदूरीभूतं रतश्रान्तौ ॥")

पीनसः, पुं, (पीनं स्थूलमपि जनं स्रवति नाशयतीति । सो + कः ।) नासिकारोगविशेषः । पीनास इति भाषा । तत्पर्य्यायः । प्रतिश्यायः २ । इत्यमरः । २ । ६ । ५१ ॥ अपीनसः ३ प्रतिश्यायः ४ । इति भरतः ॥ नासिकामयः ५ । इति शब्दरत्नावली ॥ तस्य निदानं यथा,—

"घ्राणस्रुते यस्य विशुष्यते च
प्रक्लिद्यते धूप्यति चैव नासा ।
न वेत्ति यो गन्धरसांश्च जन्तुर्जुष्टं यवस्येत् खलु पीनसेन ॥
तच्चानिलश्लेष्मभवं विकारं
ब्रूयात् प्रतिश्यायसमानलिङ्गम् ॥"

इति माधवकरः ॥

आमपीनसलक्षणं यथा,—

"शिरोगुरुत्वमरुचिर्नासास्रावस्तनुस्वरः ।
क्षामः क्षीवति चाभीक्ष्णमामपीनसलक्षणम् ॥"

पक्वपीनसलक्षणं यथा,—

"आमलिङ्गान्वितः श्लेष्मा घनः खेषु निमज्जति ।
स्वरवर्णविशुद्धिञ्च पक्वपीनसलक्षणम् ॥"

तस्यौषधानि यथा,—

"सर्व्वेषु सर्व्वकालं पीनसरोगेषु जातमात्रेषु ।
मरिचं गुडेन दत्त्वा भुञ्जीत नरः सुखं लभते ॥१

पीनसी

कट्फलं पौष्करं मूलौ योषं यासञ्च कारवी।
एषां चूर्णं कषायं वा दद्यादाद्रेकजे रसे: ॥
पीनसे स्वरभेदे च नासास्रावे हलीमके।
सन्निपाते कफे वाते कासे श्वासे च शस्यते ॥२॥
योषचित्रकतालीशत्रिन्तिड़ीकाम्लवेतसम्।
सचव्याजाजितुल्यांशमेलात्वक्पत्रपादिकम् ॥
चूर्णादिकमिदं चूर्णं पुराणगुड़मिश्रितम्।
पीनसश्वासकासघ्नं रुचिस्वरकरं परम् ॥" ३ ॥
इति भावप्रकाश: ॥*॥

"पिप्पलीत्रिफलाचूर्णं मधुसैन्धवसंयुतम्।
सर्व्वरोगव्वरश्वासशोथपीनसहृद्धवेत् ॥"
इति गारुड़े १८६ अध्याय: ॥

(अस्य चिकित्सान्तरं यथा,—
"वातात् सकासवैस्वर्य्यं सचारं पीनसे घृतम्।
पिबेद्रसं पयश्चोष्णं स्नेहिकं धूममेव वा ॥"
"दशमूलस्य निष्क्वाथे रास्नामधुककल्कवत्।
सिद्धं ससैन्धवं तैलं दशमूलो गुणा: स्मृतम्।
स्निग्धस्यास्यापनेदोषं निर्हरेद्वातपीनसे ॥
स्निग्धाम्लोष्णैश्च लघ्वन्नं ग्राम्यादीनां रसैर्हितम्।
उष्णाम्बुना स्नानपानन्निवातोष्णप्रतिश्रय:।
चिन्ताव्यायामवाक्चेष्टाव्यवायविरतो भवेत्।
पैत्ते सर्पि: पिबेत् सिद्धं मूलैर्वेरघृतन्नयेत् ॥
याचनार्थं पिबेन् पक्वे कार्य्यमूर्ध्वविरेचनम्।
पाटादिरजनीमूर्व्वापिप्पलीजातिपल्लवै: ॥
दत्त्वा च साधितं तैलं नस्यं सम्यक्पीनसे।
पूयासृग्दरपित्तघ्ना: कषायो लवणानि च ॥
पाकदाहाद्यरुचिषु शीता वेया: ससेचना:।
क्षैवनस्योपचारश्च कषायस्वादुतिक्तका: ॥"
"गौरवारोचकेष्वादौ लङ्घनं कफपीनसे।
स्वेदा: सेकाश्च पाकार्थं जिघ्रे घ्रिरसि सर्पिषा ॥
लशुनं सूक्ष्मचूर्णेन शोषक्षारसमायुतम्।
देयं कफघ्नं वमनमूर्ध्वक्लेशेषु हितम् ॥
अपीनसे पूतिनस्ये प्राणस्रावसकण्डुके।
धूम: प्रशस्तोऽवपीड़श्च कटुभि: कफपीनसे ॥
मन:शिला वचाशोषं विड़ङ्गं हिङ्गु गुग्गुलु:।
चूर्णो ध्रेय: प्रधमन: कटुभिश्च फलैस्तथा।"
"स्निग्धस्य व्याहते वेगे कृच्छ्रेनं कफपीनसे।
वमनीयशृतक्षीरतिलमाषयवागुभि: ॥"
"सर्व्वजित् पीनसे दुष्टे कार्य्यं शोफे च शोफजित्।
चारोर्ध्वदाधिमांसेषु क्रिया सर्व्वेष्वदेश्च च ॥"
इति चरके चिकित्सास्थाने २६ अध्याये ॥
"सर्व्व एव प्रतिश्याया नरस्याप्रतिकारिण:।
कालेन रोगजनना जायन्ते दुष्टपीनसा:।
बाधिर्य्यमान्ध्यमघ्राणं घोरांश्च नयनामयान्।
कासाग्निसादशोफांश्च कृच्छ्रा: कुर्व्वन्ति पीनसा:॥"
इत्युत्तरतन्त्रे चतुस्त्रिंशेऽध्याये सुश्रुतेनोक्तम् ॥)

पीनसा, स्त्री, (पीनं स्यतीति। सो+कः। टाप्।) कर्कटी। इति राजनिर्घण्टः ॥ (कर्कटीशब्देऽस्या गुणादयो ज्ञातव्या: ॥)

पीनसी, [न्] त्रि, पीनसरोगी। 'पीनसशब्दादस्त्यर्थे इनिप्रत्ययनिष्पन्न: ॥ (यथा, सुश्रुते उत्तरतन्त्रे २४ अध्याये।

पीलु

"विलङ्घने: पाचनदीपनीयै-
रुपाचरेत् पीनसिनं यथावत्।
बहुद्रवैर्वातकफोपसृष्टं
प्रच्छर्दयेत् पीनसिनं वय:स्थम् ॥")

पीनोन्नी, स्त्री, (पीनं स्थूलमुन्नोऽस्या:। "बहुव्रीहेरूधसो ङीष्।"४।१।२५। इति ङीष्। "उधसोऽनङ्।" ५।४।१३१। इति उधोऽन्तस्य बहुव्रीहेरनङादेश:।) पीवरस्तनी गौ:। इत्यमर:। २।६।७१।

पीपरि:, पुं, (अपि पिपर्त्तीति। पॄ+इन्। अपेरलोप:। दीर्घश्च।) ह्रस्वनख:। इति राजनिर्घण्टः ॥

पीय, प्रीणने। इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट्।) पीयूषं सौत्रधातुरयम्। इति दुर्गादासः ॥

पीयु:, पुं, (पिबतीति। पा+"खरुशुङ्कुपीयुनीलङ्गुलिषु।" उणां। १।३७। इति कु:। निपातनात् युगागम ईत्वं चान्तादेश:।) काल:। रवि:। चूक:। इति मेदिनी। ये, ३७ ॥ काक:। इति संक्षिप्तसारोणादिवृत्ति:॥ (हिंसके प्रतिकूले च त्रि। यथा, ऋग्वेदे।१।१७४।८।
"अभिनत्पुरो न भिदो अदेवीर्ननमो वधरदेवस्य पीयो:॥"
"पीयो: प्रतिकूलस्य वृत्रस्य।" इति तद्भाष्ये सायण:॥)

पीयूषं, क्ली, (पीयते इति। पीय सौत्रधातु:+"पीयेरूषन्।" उणां। ४।७६। इति ऊषन्।) अमृतम्। इत्यमर:। १।१।५१ ॥ (यथा, काशीखण्डे। २६। ४६।
"खरसन्तापशमनो खनि: पीयूषपाथसाम्॥")
दुग्धम्। इति राजनिर्घण्टः ॥ (यथा,—
"पानीयं क्लमनाशनं श्रमहरं मूर्च्छापिपासापहं तन्द्राच्छर्द्दिविबन्धकृद्बलकरं निद्राहरं तर्पणम्।
कृद्यं गुप्तरसं त्र्यजीर्णशमकं नित्यं हितं शीतलं लघ्वच्छं रसकारणन्तु निगदे पीयूषवच्चो-
दितम्॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे॥)

पीयूष:, पुं, क्ली, (पीय+ऊषन्।) अभिनवं पय:। नवप्रसूताया गो: सप्तदिनाभ्यन्तरीयदुग्धम्। इत्यमरभरतौ ॥
"अथ पीयूषपेयूषे नवं सप्तदिनावधि।"
इति शब्दार्णवः ॥
"आसप्तरात्रप्रभवं क्षीरं पेयूष उच्यते॥"
इति हारावली ॥

पीयूषभद्रा:, [स्] पुं, (पीयूषमन्ततमयं भद्र: किरणं यस्य। यद्वा, पीयूषमिव भद्रो यस्य।) चन्द्र:। इति शब्दरत्नावली ॥

पीयूषरुचि:, पुं, (पीयूषं पीयूषमयी रुचिश्छड़् यस्य।) चन्द्र:। इति हलायुधः ॥ (पीयूषे अन्ततेऽरुचिर्यस्य।) अन्ततप्रियश्च ॥

पील, रोधे। इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट्।) दीर्घो। रोध: क्रियानिरोध:

पीवर:

जड़ीभाव: इत्यर्थ:। पीलति अस्य। इति दुर्गादास: ॥

पीलक:, पुं, (पीलति स्नेहमातीति। पील+स्वुल्।) पिपीलिका। इति हेमचन्द्रः ॥ (कायस्थानां पद्धतिकरविशेष:। यथा, वङ्गजकुलाचार्य्यकारिकायाम्।
"आदित्या विष्णुगुप्ताश्च खिलश्च पीलकस्तथा॥")

पीलु:, पुं, (पीलति प्रतिष्टम्भातीति। पील+"दृगयादयश्च।"उणां। १।३७। इति कु:।) प्रक्षुन्नम्। परमाणु:। मतङ्गज:। अस्थिखण्डम्। तालकाष्ठ:। इति मेदिनी। ले, ३२ ॥ वाद्य:। कृमि:। इति धरणि:॥ कोङ्कणादिदेशे प्रसिद्ध: फलवृक्षविशेष:। पील इति भाषा। तत्पर्य्यायः। गुड़फल: २ अंसी ३। इत्यमर:।२।४।२८॥ शीतसह: ४ धानी ५ विरेचन: ६ फलशाखी ७ श्याम: ८ करभवल्लभ: ९॥ (यथा, महाभारते। २।५०।४।
"उष्ट्रवामीक्षिप्रतरा पुष्टा: पीलुगमीक्षुदै:॥")
अस्य फलगुणा:। श्लेष्मवायुशुक्लनाशित्वम्। पित्तदत्वम्। भेदकत्वम्। यत् स्वादु तिक्तं तत् गात्रुण्यं त्रिदोषघ्नत्वञ्च। इति राजनिर्घण्टः ॥

पीलुनी, स्त्री, (पीलु+वाहुलकात् उङ। गौरादित्वात् ङीष्।) मूर्व्वा। इति रत्नमाला ॥

पीलुपर्ण:, पुं, (पीलोरिव पर्णान्यस्या:। यद्वा, पीलुयुक्तानि पर्णान्यस्या:। "पाकजर्णपर्णपुष्पफलमूलवालोत्पलादाच्।" ४।१।६४। इति ङीष्।) मूर्व्वा। विम्बिका। ओषधिभेद:। इति मेदिनी। णे, १०३ ॥

पीव, स्थौल्ये। इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट्।) पीवति लोक: स्थूल: स्यादित्यर्थः। इति दुर्गादासः ॥

पीव, [न्] त्रि, (प्यायते इति। ष्यैङ् वृद्धौ+"ष्यायो: सम्प्रसारणञ्च।" उणां। ४।११४। इति क्तनिप् सम्प्रसारणञ्च। "हलः।" ६।४।२। इति दीर्घः।) स्थूलम्। इत्यमर:। ३।१।६१॥ (यथा, भागवते। ६। १६। ६।
"पीवानं श्मश्रुलं प्रेष्ठं मीढ्वांसं याजकोविदम्।
स एकोऽजदृशस्तासां वह्नीनां रतिवर्द्धन:॥")

पीवर:, त्रि, (प्यायते वर्द्धते इति। ष्यैङ्+"क्ष्विल्वरच्छत्वरधीवरपीवरमीवरचीवरतीवरनीवरगह्वरकट्वरसंयद्वराः।" उणां। ३।१। वरच्। सम्प्रसारणं दीर्घश्च।) उपचितावयवः। मोटा इति भाषा। तत्पर्य्यायः। पीन: २ पीवा ३ स्थूल: ४। इत्यमर:।३।१।६१॥ (यथा, आर्य्यासप्तशत्याम्। ४२०।
"भयपिहितं बालायां पीवरमरुहृदयं सरोनिद्रः।
निद्रायां प्रेमार्द्र: पश्यति नि:श्वस्य नि:श्वस्य॥"
पुं, तामसमन्वन्तरीयसप्तर्षिभेद:। यथा, मार्कण्डेये। ७४। ५६।

"ज्योतिर्ग्रामा पृथुः वाग्यतेऽतोऽग्निर्वसुकस्तथा।
पीवरस्य तथा ब्रह्मन्! सप्त सप्तर्षयोऽभवन्॥")

पीवरस्तनी, स्त्री. (पीवरौ स्तनौ यस्याः।
"नाङ्योमनर्शआदिनि।" ४।१।५४। इति ङीप्।) पीनोन्नी। इत्यमरः।२।६।१२॥ स्थूलस्तनयुक्ता नारी॥ (यथा, भारते। ८।१६।

"यथोचितं भोजनतो सुखानिशे-
रपारयन्तं किल पुष्पकं रथः।
पयोधरेणोरसि कांचिदुन्नता:
पिबन्प्रपानोन्नतपीवरस्तनी॥")

पीवा, [न्] पुं, (प्यायते इति। पै ड वृद्धौ+
"प्याय्योः सम्प्रसारणम्।" उणा० ४।१४।
इति कनिप् सम्प्रसारणञ्च। "बलः।" ६।४।
२। इति दीर्घः।) बलवान्। वायुः। इति संक्षिप्तसारोणादिवृत्तिः॥

पीवा, स्त्री, (पीयते इति। पी ड्य पाने+वाहुलकात् वः। ततष्टाप्।) उदकम्। इति संक्षिप्तसारोणादिवृत्तिः॥

पीवरा, स्त्री, (पीवर+टाप्।) अश्वगन्धा। शतावरी। इति राजनिर्घण्टः॥ स्थूला च॥

पीवरी, स्त्री, (प्यायते इति। पै+क्वरप्। सम्प्रसारणं दीर्घः ङीप् च।) शतमूली। इति रत्नमाला॥ शतावरी। इति भावप्रकाशे।२।२॥ तरणी। गौः। इति संक्षिप्तसारोणादिवृत्तिः॥ (वर्हिषद्नामकपितॄणां मानसीकन्यानामन्यतमा। सा तु शुकदेवस्य पत्नी। यथा, हरिवंशे। १८। ४६—५२।

"एतेषां मानसी कन्या पिवरी नाम विश्रुता।
योगा च योगिपत्नी च योगिमाता तथैव च॥
भविष्यो द्वापरं प्राप्य युगं धर्मभृतां वरः।
पराशरकुलीभूतं सुखो नाम महातपाः॥
भविष्यति युगे तस्मिन् महायोगी द्विजर्षभः।
वाराणस्यां समाधौ विधमाग्निरिवोज्ज्वलन्॥
स तस्यां पिङ्गकन्यायां पीवर्यां जनयिष्यति।
शुकं गौरं प्रभुं शम्भुं शान्तीं कन्यां तथैव च॥")

पुंश्चिह्नं, क्ली, (पुंसो लिङ्गं चिह्नम्।) पुंचिह्नम्। शिश्नः। (यथा, महाभारते। ५।१।१८४। ३।
"किञ्चित् कालान्तरं दास्ये पुंश्चिह्नं स्वमिदं तव।
यावन्मासं तया काले बलवेव वदस्व मे॥")
अस्त्रीलिङ्गतायाम्. पुं। इति शब्दरत्नावली॥ (पुंसो लिङ्गमस्येति। पुंलिङ्गविशिष्टे, त्रि। यथा, महाभारते। ८।५८।५०।
"पुंश्चिह्ना एव नार्यस्तु स्त्रीलिङ्गाः पुरुषाभवन्।
दुर्योधने तदा राजन्! पतिते तनये तव॥")

पुंश्चलः, पुं. (पुमानिव चरतीति। चर+कः।) गन्धर्वभेदः। इति शब्दमाला। पुंश्चा इति भाषा॥ (पुमान् नौः।) पुंस्त्वम्॥

पुंश्चलः, पुं. (पुंश्चलीव। उपचारात् पुंस्त्वम्।) कुलटापतिः। यथा, भारते ११ अध्याये।
"लम्पटोवस्त्रलङ्कारी नेता: स्युः कुलपांसनाः।
दृश्यन्ते स्त्रीस्वभावेन पुरुषत्वेन च॥
स्त्रीलोलाः पुरुषवतिश्चित्तासिद्ध पुंश्चलाः।"

पुंश्चली, स्त्री, (पुंसो भर्तुः सकाशात् चलति पुरुषान्तरं गच्छतीति। चल+अच्। गौरादित्वात् ङीप्।) असती। इत्यमरः।२।६।१०॥ अस्या अमरोक्तपर्य्यायः कुलटाशब्दे लिखितः। तद्व्यतिरिक्तपर्य्यायो यथा, धृष्टा १ दुष्टा २ धर्षिता ३। इति शब्दरत्नावली॥ लक्षा.४ निशाचरी ५ वपारण्डा ६। इति शटाधरः॥ तस्याश्चरित्रदोषादि यथा,—

"अहो! को वेद भुवने दुर्ज्ञेयं पुंश्चलीमनः।
पुंश्चल्यां यो हि विश्वस्तो विधिना स विडम्बितः।
बहिष्कृतस्य यशसा धर्म्मेण सुकुलेन च॥
वाञ्छितं नूतनं प्राप्य विनश्यति पुरातनम्।
सदा स्वकर्म्मसाध्या सा को वा तस्याः प्रियोऽप्रियः॥
देवे कर्म्मणि पित्रे च पुत्रे बन्धौ च भर्त्तरि।
दारुणं पुंश्चलीचित्तं सदा सङ्कल्पकर्म्मणि॥
प्राणाधिकं रतिञ्च साऽतदर्थ्या हि पुंश्चली।
रत्नप्रदं रत्नविज्ञं विपदर्थ्या हि पश्यति॥
सर्व्वेषां स्खलनस्थेव पुंश्चलीनां न कुत्रचित्।
दारुणा पुंश्चलीजातिर्नरजातिभ्य एव च॥
निष्कृतिः कर्म्मभोगान्ते सर्व्वेषामस्ति निश्चितम्।
न पुंश्चलीनां विप्रेन्द्र! यावच्चन्द्रदिवाकरौ॥
अन्यासां कामिनीनाञ्च कीर्त्तं पुण्यं यशो दया।
सा नास्ति पुंश्चलीनान्तु कान्तं पुण्यं पुरातनम्॥
रतिञ्च नूतनं प्राप्य विपत्तुल्यं पुरातनम्।
कान्तं दृष्ट्वा हिनस्त्येव सोपायेनावलीलया॥*॥
पृथिव्यां यानि पापानि पुंश्चलीष्वेव भारते।
निवसन्ति तास्यो न परा: पापिष्ठा: सन्ति केचन॥
पुंश्चलीपरिपक्वान्नं सर्व्वपातकमिश्रितम्।
देवे कर्म्मणि पित्रे च देयं न च तया जलम्॥
अन्नं विष्ठा जलो मूत्रं पुंश्चलीनाञ्च निश्चितम्।
दत्त्वा पितृभ्यो देवेभ्यो भुक्त्वा च नरकं व्रजेत्॥
शतवर्षं कालसूत्रे पच्यतेव सुदारुणे।
घोरान्धकारे क्रमयन्ति दशन्ति दिवानिशम्॥
पुंश्चल्यन्नञ्च यो भुङ्क्ते देवाद्यदि नराधमः।
सप्तजन्मकृतं पुण्यं तस्य नश्यति निश्चितम्॥
आयुःश्रीयशसां हानिरिह लोके परत्र च।
तस्मादयत्नाद्भक्तव्यं पाकपात्रं कलत्रकम्॥
पुंश्चलीदर्शने पुण्यं यात्रासिद्धिर्भवेद्ध्रुवम्।
स्पर्शने च महापापं तीर्थस्नानादिशुध्यति॥
दानं दानं व्रतञ्चैव जपश्च देवपूजनम्।
निष्फलं पुंश्चलीनाञ्च भारते जीवनं वृथा॥"

उपस्थितसकामपुंश्चलीत्यागे दोषो यथा,—

"रहस्युपस्थितां कामात् पुंश्चलीमिन्द्रियः।
परित्यजेदधर्म्मभयादधर्म्मान्नरकं व्रजेत्॥"

सर्व्वदैव तस्यास्त्यक्तव्यत्वं गर्हितत्वञ्च यथा,

"उपस्थिता च या योषिदन्याप्या रागिणामपि।
श्रुतौ स्मृतिमिति त्याज्या सर्व्वदैव तपस्विनाम्॥
अहो सर्व्वैः परित्याज्या पुंश्चली च विशेषतः।
धनायुःप्राज्ञयशसां नाशिनी दुःखदायिनी॥
सकामैस्तनुपरा शश्वत् परकामविधायिनी।
निर्दया नरघातिन्य: सर्व्वसङ्कीर्णकर्म्मिणी॥
विद्युद्दीप्तिर्यथैवेह रेखा लोभान्मेघी यथा भवेत्।
परद्रोहादृथा सम्पत् कुलटाग्रेसमत्वरम्॥
सर्व्वेभ्यो हिंसकेभ्यो विपद्बीजा सदैव सा।
यो विश्वसेत्तां संमूढो विपत्तस्य पदे पदे॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे। २३। २४। ३२ अध्यायाः॥

पुंश्चिह्नं, क्ली, (पुंसः पुरुषस्य चिह्नम्।) शिश्नः। इति हेमचन्द्रः। ३। २७४।

पुंस, क मर्दे। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) ओष्ठ्यवर्गशेषोपधः। संयोगादनुस्वारः। तेन क्विपि पुंसोऽसुक्तालव्यसुडि पुमान्। मर्दोऽभिमर्दनम्। क, पुंसयति खलं राजा। इति दुर्गादासः॥

पुंसवनं, क्ली, (पुमांसमिव सूते बलप्रदानेन पुरुषवत् जनयत्यनेनेति। सू+करणे ल्युट्।) दुग्धम्। इति हेमचन्द्रः। ३। ४०४॥ (पुमांसं सूतेऽनेनेति। सू ड ल+करणे ल्युट्।) संस्कारविशेषः। इति त्रिकाण्डशेषः॥ (यथा, रघुवंशे। ३। १०।

"यथाक्रमं पुंसवनादिकाः क्रियाः
धृतेश्च धीरः सदृशीर्व्यधत्त सः॥")

अस्येतिकर्त्तव्यता यथा। "गर्भस्य तृतीयमासोपक्रमे यज्ञकुटुम्बिनं तस्मिन् पतिः कृतनित्यक्रियः कृतदृद्धिश्राद्धः चन्द्रनामानमग्निं संस्थाप्य विरूपाचलपान्तां कुशग्रन्थिकां समाप्य कृतस्नानां वधूमग्नेः पश्चिमायां दिशि स्वदक्षिणतः कृष्णेषु प्राङ्मुखीमुपवेश्य प्रकृतकर्म्मारम्भे प्रादेशप्रमाणां घृताक्तां समिधं तूष्णीमग्नौ हुत्वा महाव्याहृतिहोमं कुर्य्यात्। यथा। प्रजापतिर्ऋषिर्गायत्री छन्दोऽग्निर्देवता महाव्याहृतिहोमे विनियोगः ॐ भूः स्वाहा। प्रजापतिर्ऋषिरुष्णिक् छन्दो वायुर्देवता महाव्याहृतिहोमे विनियोगः ॐ भुवः स्वाहा। प्रजापतिर्ऋषिरनुष्टुप् छन्दः सूर्य्यो देवता महाव्याहृतिहोमे विनियोगः ॐ स्वः स्वाहा। ततः पतिरुत्थाय वधूपृष्ठदेशे स्थितो वधूदक्षिणस्कन्धं सृष्ट्वा अवनीर्य्येन दक्षिणहस्तेन अग्रथचितं वधूनाभिदेशं स्पृशन् जपति। प्रजापतिर्ऋषिरनुष्टुप् छन्दो मित्रावरुणाग्निवायवो देवताः पुंसवने विनियोगः।

ॐ पुमांसौ मित्रावरुणौ पुमांसावश्विनावुभौ।
पुमानग्निश्च वायुश्च पुमान् गर्भस्तवोदरे॥

इत्येकं पुंसवनम्।*॥

अपरपुंसवनकर्म्मोपक्रमे वटवृक्षस्य पूर्व्वोत्तरशाखायां कृतयुगलशाखिनीं कृमिभिरदूषितां वटयुग्मां यवानां माषाणां वा त्रिभिस्त्रिभिर्गुच्छैः सह वारान् सप्तभिर्मन्त्रैः क्षौमीयात्। सप्तानां मन्त्राणामृष्यादयः साधारणाः। प्रजापतिर्ऋषिः सोमवरुणसुरादित्यमरुद्विश्वेदेवा देवता न्यग्रोधवृक्षावरिरुध्यन्द विनियोगः ॐ यद्वन्ति सौमो सोमायत्वा राज्ञे परिद्दोषामि। इति गुदकल्पेऽयं क्रमः।१॥

ॐ यद्यसि वारुणी वरुणाग्रत्वा राज्ञे परिक्रीणामि। इति गुड़कत्रयेण द्वितीयं क्रयणम् ॥ २ ॥ ॐ यद्यसि वसुभ्यो वसुभ्यस्त्वा परिक्रीणामि। इति गुड़कत्रयेण तृतीयं क्रयणम् ॥ ३ ॥ ॐ यद्यसि रुद्रेभ्यो रुद्रेभ्यस्त्वा परिक्रीणामि। इति गुड़कत्रयेण चतुर्थं क्रयणम् ॥४॥ ॐ यद्यसि आदित्येभ्य आदित्येभ्यस्त्वा परिक्रीणामि। इति गुड़कत्रयेण पञ्चमं क्रयणम् ॥५॥ ॐ यद्यसि मरुद्भ्यो मरुद्भ्यस्त्वा परिक्रीणामि। इति गुड़कत्रयेण षष्ठं क्रयणम् ॥६॥ ॐ यद्यसि विश्वेभ्यो देवेभ्यो विश्वेभ्यो देवेभ्यस्त्वा परिक्रीणामि। इति गुड़कत्रयेण सप्तमं क्रयणम् ॥ ७ ॥ ततः क्रीतां वटशुङ्गां अनेन मन्त्रेण वृक्षादाहरेत्। प्रजापतिर्ऋषिरोषध्यो देवता न्यग्रोधशुङ्गाच्छेदने विनियोगः। ॐ ओषधयः सुमनसो भूत्वा अस्यां वीर्यं समाधत्त इयं कर्म्म करिष्यति। ततस्तां लक्षवेष्टितामन्तरीक्षेणानीय अन्तरीक्षे स्थापयेत्। ततः शुभनक्षत्रोऽग्नेरुत्तरतः प्रज्वालितग्निलायां ब्रह्मचारी गर्भवती वा श्रुतस्वाध्यायहीनो वा ब्राह्मणः प्राङ्मुख आचारतो नीहारजलेन अनाहृत्तलोष्टेन पुनः पुनः प्रोक्षयेत्। ततोऽग्नेः पश्चिमत उत्तरायेषु कुशेषु पश्चिमाभिमुखीं वधूं पूर्व्वदिगानतमस्तकां कृत्वा तत्पृष्ठदेशे स्थितः पतिर्दक्षिणपाणेरङ्गुष्ठानामिकाभ्यां वस्त्रबद्धां प्रोक्षितवटशुङ्गां गृहीत्वा गर्भदक्षा दक्षिणनासाविवरे शुङ्गारसं निःक्षिपति। प्रजापतिर्ऋषिरनुष्टुप् छन्दोऽग्नीन्द्रदेवतयो देवता न्यग्रोधशुङ्गारसस्य दाने विनियोगः।

ॐ पुमानग्निः पुमानिन्द्रः पुमान् देवो बृहस्पतिः। पुमांसं पुत्रं विन्दस्व तं पुमाननुजायताम् ॥

ततो महाव्याहृतिहोमं कृत्वा तूष्णीं प्रादेशप्रमाणां घृताक्तां समिधमग्नौ हुत्वा प्रकृतं कर्म्म समाप्य उदीचं गार्ह्यायनहोमादिवामदेवगानान्तं कर्म्म कृत्वा कर्म्मकारयितृब्राह्मणाय दक्षिणां दद्यादिति पुंसवनम्।" इति दशकर्म्मपद्धतौ भवदेवभट्टः ॥*॥ अथ पुंसवनोक्तवाराः। रविमङ्गलबृहस्पतयः। नक्षत्राणि। पूर्व्वाषाढोत्तराषाढापूर्व्वभाद्रपदोत्तरभाद्रपदपुष्यपुनर्व्वसुमूलार्द्रारेवतीहस्तात्रवणाश्वगिरश्चः। तिथयः। नन्दा भद्राः। लग्नानि। कुम्भसिंहधनुर्मीनमिथुनानि। स्त्रियाश्चन्द्रादित्यबृहतां दृग्योगभङ्गविष्टिभद्राक्षयक्षयार्द्रादीन् परित्यज्य गर्भधारणदिनावधिदशमीयमासे कर्त्तव्यम्। इति ज्योतिषम् ॥ * ॥ स्त्रीकर्त्तव्यव्रतविशेषः। यथा,—

श्रीराजोवाच।

"व्रतं पुंसवनं ब्रह्मन्! भवता यदुदीरितम्।
तस्य वेदितुमिच्छामि येन विष्णुः प्रसीदति ॥

श्रीशुक उवाच।

शुक्ले मार्गशिरे पक्षे योषिद्भर्त्तुरनुज्ञया।
चारभेत व्रतमिदं सर्व्वकामिकमादितः ॥
निशम्य मरुतां जन्म ब्राह्मणानुमतेन च।
स्नात्वा शुक्लवती शुक्ले वसीतालङ्कृताम्बरे।
पूजयेत् प्रातराशात् प्राक् भगवन्तं श्रिया सह ॥
बलं ते निरपेक्षाय पूर्णकाम! नमोऽस्तु ते।
महाविभूतिपतये नमः सकलसिद्धये ॥
यथा त्वं तपसा धृत्या तेजसा महिमौजसा।
जुष्ट ईशगुणैः सर्व्वैस्ततोऽसि भगवान् प्रभुः ॥
विष्णुपत्नि! महामाये महापुरुषलक्षणे।
प्रीयेथा मे महाभागे लोकमातर्नमोऽस्तु ते ॥
ॐ नमो भगवते महापुरुषाय महानुभावाय महाविभूतिपतये सह महाविभूतिभिर्म्बलिमुपहरामीति। अनेनाहरहर्म्मन्त्रेण विष्णोरावाहनार्घ्यपाद्योपस्पर्शन-स्नान-वासोपवीत-भूषणगन्धपुष्पधूपदीपोपहारादुपचारान् सुसमाहितोपाहरेत्।
हविःशेषञ्च जुहुयादनले द्वादशाहुतीः।
ॐ नमो भगवते महापुरुषाय महाविभूतिपतये स्वाहेति।
श्रियं विष्णुञ्च वरदावग्निषां प्रभवायुभौ।
भक्त्या संपूजयेन्नित्यं यदीच्छेत् सर्व्वसम्पदः ॥
प्रणमेद्दण्डवद्भूमौ भक्तिप्रह्वेण चेतसा।
दशवारं जपेन्मन्त्रं ततः स्तोत्रमुदीरयेत् ॥
युवान्तु विश्वस्य विभू जगतः कारणं परम्।
इयं हि प्रकृतिः सूक्ष्मा मायाशक्तिर्दुरत्यया।
तस्या अधीश्वरः साक्षात् त्वमेव पुरुषः परः ॥
त्वं सर्व्वयज्ञ इज्येयं क्रियेयं फलभुग्भवान्।
गुणशक्तिरियं देवी यज्ञको गुणभुग्भवान् ॥
त्वं हि सर्व्वशरीर्य्यात्मा श्रीः शरीरेन्द्रियासवः।
नामरूपे भगवती प्रत्ययस्यमपाश्रयः ॥
यथा युवां त्रिलोकस्य वरदौ परमेष्ठिनौ।
तथा म उत्तमश्लोक! सन्तु सत्या महाशिषः ॥
इत्यभिष्टूय वरदं श्रीनिवासं श्रिया सह।
तन्निसार्य्योपहरणं दत्त्वाचमनमर्च्चयेत् ॥
ततः स्तुवीत स्तोत्रेण भक्तिप्रह्वेण चेतसा।
यज्ञोच्छिष्टमवघ्राय पुनरभ्यर्च्चयेद्धरिम् ॥
पतिञ्च परया भक्त्या महापुरुषचेतसा।
प्रियैस्तैस्तैरुपनमेत् प्रेमशीलः स्वयं पतिः ॥
विभूयात् सर्व्वकर्म्माणि पत्न्या उच्चावचानि च।
क्षतमेकतरेणापि दम्पत्योरुभयोरपि ॥
पत्न्यां कुर्य्यादनर्हायां पतिरेतत् समाहितः।
विष्णोर्व्रतमिदं विभ्रन्न विहन्यात् कथञ्चन ॥
विप्रान् स्त्रियो वीरवतीः सगन्धबलिमर्हणैः।
अर्च्चेदहरहर्भक्त्या देवं नियममास्थिता ॥
उद्वास्य देवं स्वे धाम्नि तन्निवेदितमग्नतः।
अद्यादात्मविशुद्ध्यर्थं सर्व्वकामसमृद्धये ॥
एतेन पूजाविधिना मासान् द्वादशहायनम्।
नीत्वाथोपरमेत् साध्वी कार्त्तिके चरमेऽहनि ॥
स्नपितेऽभ्यर्च्य उमया लक्ष्म्यभ्यर्च्य पूर्व्ववत्।
पयःस्नुतेन जुहुयाच्चरुणा सह सर्पिषा।
पाकयज्ञविधानेन द्वादशैवाहुतीः यतिः ॥
आशिषः शिरसादाय द्विजैः प्रीतैः समीरिताः।
प्रणम्य शिरसा भक्त्या सुभुञ्जीत तदनुज्ञया ॥
आचार्य्यमग्नयः स्वाम्यं वागयतः सह बन्धुभिः।
दद्यात् पत्न्यै चरोः शेषं सुप्रजस्त्वं सुसौभगम् ॥
एतच्चरित्वा विधिवद्व्रतं विभोरभीप्सितार्थं लभते पुमानिह।
स्त्री चैतदास्थाय लभेत सौभगं
श्रियं प्रजां जीवपतिं यशो गृहम् ॥
कन्या च विन्देत समग्रलक्षणं
पतिं त्ववीरा धृतकिल्बिषाङ्गतिम्।
मृतप्रजा जीवसुता धनेश्वरी
सुदुर्भगा सुभगा रूपमग्र्यम् ॥
विन्देद्विरूपा विरुजा विमुच्यते
य आमयावीन्द्रियकल्पदेहम्।
एतत् षडब्दभ्युदये च कर्म्म-
ण्यनन्तहृद्मिः पितृदेवतानाम् ॥
तुष्टाः प्रयच्छन्ति समस्तकामान्
हौमावसाने हुतभुक् श्रीर्हरिश्च।
राजन्नहन्यरुतां जन्मपुण्यं
दितेर्व्रतस्थाभिहितं मयत्ते ॥"

इति श्रीभागवते ६ स्कन्धे पुंसवनव्रतकथनं १६ अध्यायः ॥ (पुंवत् ह्यते इति। कर्म्मणि ल्युट्। गर्भः। इति श्रीधरस्वामी ॥ यथा, भागवते। ५। २४। २५। "यस्मिन् प्रविष्टेऽसुरवध्वनां प्रायः पुंसवनानि भयादेव स्रवन्ति पतन्ति च ॥"* ॥ पुत्रोत्पादके, त्रि। यथा, भागवते। ६। ६। २८। "अप्रच्छत् कस्य कर्म्मेदं पीतं पुंसवनं जलम्।" तथा च तत्रैव। ४। १३। ३७—३८।
"स विप्रानुमतो राजा गृहीत्वाञ्जलिनौदनम्।
अवघ्राय सदा युक्तः प्रादात् पत्न्या उदारधीः ॥
सा तत् पुंसवनं राज्ञी प्राश्य वै पत्युरादधे।
गर्भं काल उपावृत्ते कुमारं सुषुवे प्रजाः ॥")

पुंस्कोकिलः, पुं, (पुमान् कोकिलः।) पुरुषपिकपक्षी। पुमृसुशब्देन कोकिलशब्दस्य कर्म्मधारयसमासे तस्यान्तलोपे पुंसः सन्निति मस्य सनि हते मस्यानुस्वारे निष्पन्नः। इति सुग्धबोधव्याकरणम् ॥ (यथा, कुमारे। ३। ३२।

"चूताङ्कुराखादकषायकण्ठः
पुंस्कोकिलो यन्मधुरं चुकूज ॥")

पुंस्त्वं, क्ली, (पुंसः पुरुषस्य भावः। पुमृसु+त्व।) शुक्रम्। इति हेमचन्द्रः। ३। २६३ ॥ पुरुषत्वञ्च ॥ (यथा, मार्कण्डेये। ५०। १२।

"सौम्यासौम्यैस्तथा शान्तैः पुंस्त्वं स्त्रीत्वञ्च स प्रभुः।
विभेद बहुधा देवः पुरुषैरसितैः सितैः ॥")

पुंस्त्वविग्रहः, पुं, (पुंस्त्वस्य शुक्रस्येव विग्रहो यस्य।) भूस्तृणम्। इति राजनिर्घण्टः ॥

पुक्कशः, पुं, (पुक् कुत्सितं कशति गच्छतीति। कश गतौ+अच्।) चण्डालः। इत्यमरः। २। १०। २० ॥ (यथा, मार्कण्डेये। १५। १८।

"अकृतज्ञोऽधमः पुंसां विमुक्तो नरकान्नरः।
मनुष्यस्तु वायसः कूर्म्मः पुक्कशो जायते ततः ॥"

स तु निषादात् शूद्रायां जातो जातिविशेषः। यथा, मनुः। १०। ७६।

"न संवसेच्च पतितैर्नचाण्डालैर्न पुक्कशैः ॥")

पुच्छः, पुं, (पुच्छ् पुनःपुनश्चिनं कषतीति । कष गतौ + अच् ।) पक्षालः । इत्यमरटीकायां भरतः ॥
पुञ्जः, पुं, (एकत्र पुनःपुनश्चिनं कषतीति । कष गतौ + अच् ।) पक्षालः । (स तु निषादात् शूद्रायां जातः । यथा, मनुः । १० । १८ ।
"जातो निषादात् शूद्रायां जात्या भवति पुक्कसः ।")
अधमे, त्रि । इति मेदिनीशब्दरत्नावल्यौ ॥
पुक्कसी, स्त्री, कालिका । नीली । इति मेदिनीशब्दरत्नावल्यौ ॥ (पुक्कस + जातौ ङीष् । पुक्कसस्त्रीजातिः । यथा, मनुः । १० । ३८ ।
"पक्षालेन तु सोमाको मृत्यवसनदक्षिणः ।
पुक्कस्यां जायते पापः सदा सज्जनगर्हितः ॥")
पुक्वः, पुं, (प्रमांसं खनतीति । खन + डः ।) काष्ठमूलम् । इत्यमरः । ३ । ५ । १७ ॥ पुक्कल इति ख्यातम् ॥ (अर्दुरादित्वात् क्वीवलिङ्गोऽपि ॥ यथा, रघुः । २ । ३१ ।
"सक्ताङ्गुलिः सायकपुङ्ख एव
चित्रार्पितारम्भ इवावतस्थे ॥"
मल्लिनाथः । इति हेमचन्द्रटीका ॥)
पुङ्गः, पुं, क्वी, (पुङ्ग + पृषोदरादित्वात् साधुः ।) समूहः । इति शब्दचन्द्रिका ॥
पुङ्गवः, पुं, (पुङ्गं हेमसमूहं लाति आदत्ते इति । पुङ्ग + ला + कः ।) आत्मा । इति भूरिप्रयोगः ॥
पुङ्गवः, पुं, (पुमान् गौः । "गोरतद्धितलुकि ।" ५ । ४ । ९२ । इति टच् ।) वृषः । (यथा, हरिवंशे । ७५ । ४१ ।
"भवता रक्षिता लोका गोलोकश्च महालयम् ।
यद्वयं पुङ्गवैः सार्द्धं वत्सामः प्रसवेस्तधा ॥")
औषधभेदः । (पुमान् गौरिव मदबलाद्यातिशय्यादियुपमितसमासः ।) उत्तमपदस्थः श्रेष्ठवाचकः । इति मेदिनी । वे, ४४ ॥ (यथा, भागवते । १ । ६ । ३२ ।
"इति मतिरुपकल्पिता वितृष्णा
भगवति सात्वतपुङ्गवे विभूम्नि ॥")
वृषभौषधम् । मधूकः । इति राजनिर्घण्टः ॥
पुञ्च, प्रसादे । इत्यमरटीकायां रायमुकुटधृतधातुः ॥ (भां-परं-अकं सेट् ॥)
पुञ्छः, पुं, क्वी, (पुञ्छतीति । पुञ्छ प्रसादे + अच् ।) लाङ्गूलम् । इत्यमरः ।२।८।५०। (यथा, देवीभागवते । ५ । ७ । १६ ।
"सुरधातेरथा देवान् पुच्छस्य भ्रमणेन च ।
स चधान रथाश्विनौ सहितः परमाद्भुतः ॥")
पक्षाङ्गम्, पुं । इति मेदिनी । छे, ५ ॥ (यथा, महाभारते । ७ । ६ । ८८ ।
"उल्का स्थलनी संगामे पुच्छेनाहत्य सर्व्वशः ।")
लोमवलाङ्गुले क्लीबे च, क्वी । इत्युणादिकोषः ॥
पुञ्छटि, क्वी, (पुञ्छ प्रसादे + भावे क्तिन् । पुञ्छं प्रसादं अटतीति । अट गतौ + इन् ।) अङ्गुलिमोटनम् । इति त्रिकाण्डशेषः ॥ आङ्गुलमट्टान इति भाषा ।
पुञ्छदा, स्त्री, (पुञ्छमिव ददातीति । दा + कः ।) लक्ष्मणाकन्दः । इति राजनिर्घण्टः ॥
पुञ्छी, [न्] पुं, (पुञ्छोऽस्यास्तीति । पुञ्छ + इनिः ।) अर्कवृक्षः । इति राजनिर्घण्टः ॥
पुञ्जुटः । इति शब्दचन्द्रिका ॥ लाङ्गूलयुक्ते, त्रि ॥
पुञ्जः, पुं, (पिञ्जयते पिञ्जयतीति वा । पिञ्जि + अच् । पृषोदरादित्वात् साधुः ।) समूहः । राशिः । इत्यमरः । २ । ५ । ४२ ॥ (यथा, मार्कण्डेये । ८ । ८२ ।
"गृहीतपक्षिपुञ्जश्च शवमालैरलङ्कृतः ॥")
पुट, क चूर्णे । भासि । इति कविकल्पद्रुमः ॥ (चुरां-परं-चूर्णे सकं-भासि अकं-सेट् ।) क, पोटयति । भासि दीप्तौ । इति दुर्गादासः ॥
पुट, तृ क संश्लेषे । इति कविकल्पद्रुमः ॥ (अदन्त-चुरां परं-सकं-सेट् ।) पुटयति पुष्पं सूत्रेण घनः संहतीत्यर्थः । इति दुर्गादासः ॥
पुट, शि श्लेषे । इति कविकल्पद्रुमः ॥ (तुदां-कुटां-परं-अकं-सेट् ।) शि, पुटति अपुटीत् पुपोट । श्लेषः सम्बन्धीभावः । इति दुर्गादासः ॥
पुटं, क्वी, (पुटतीति । पुट संश्लेषे + कः ।) जातीफलम् । इति राजनिर्घण्टः ॥ उपर्य्यधोभावापन्नसंयुक्तखण्डादिकपालद्वयरूपौषधपाकपात्रम् । धात्वादिमारणोपयुक्तान् पुटप्रकारानाह रसप्रदीपे ।
"लोहादेरपुनर्भावस्तद्गुणत्वं गुणाढ्यता ।
सलिले तरणश्चापि तत्सिद्धिः पुटनाद्भवेत् ॥
गम्भीरे विस्तृते कुण्डे द्विहस्ते चतुरस्रके ।
वनोपलसहस्रेण पूरिते पुटगौषधम् ॥
कोष्ठे गर्त्ते प्रयत्नेन गोविष्ठोपरि धारयेत् ।
वनोपलसहस्रार्द्धं कोष्ठिकोपरि निःक्षिपेत् ॥
वह्निं विनिःक्षिपेत्तत्र महापुटमिति स्मृतम् ॥१॥
कोष्ठं मूत्वा। गोविष्ठा गोष्ठा । इति महापुटम् ॥
सपादहस्तमानेन कुण्डे निम्ने तथायते ।
वनोपलसहस्रेण पूर्णमध्ये विधारयेत् ॥
पुटनद्वयसंयुक्तां कोष्ठिकां सुदृतां सुखे ।
अधोर्द्धानि करणानि अङ्गान्युपरि निःक्षिपेत् ॥
एतद्गजपुटं प्रोक्तं स्वातं सर्व्वपुटोत्तमम् ॥
हस्तचतुर्विंशत्यङ्गुलप्रमाणः स सपादः- तेन त्रिंशदङ्गुलप्रमाणेनलभ्यः । अतएवोक्तम् ।
साधारणो नराङ्गुल्या त्रिंशदङ्गुलको गजः ॥
इति गजपुटम् ॥ २ ॥
अरत्निमात्रके कुण्डे पुटं वाराहमुच्यते ॥ ३ ॥
वितस्तिमात्रके खाते कथितं कौक्कुटं पुटम् ।
'अरत्निस्तु निष्कनिष्ठेन मुष्टिना' इत्यमरः । २ । ६ । ८६ ॥ निःस्तुतकनिष्ठया मुष्ट्योपलक्षितो हस्तोऽरत्निरित्यर्थः ।
षोड़शाङ्गुलके खाते कस्यचित् कौक्कुटं पुटम् ॥ ४ ॥
यत् पुटं दीयते खाते ह्यष्टसंख्यैर्वनोपलैः ।
कपोतपुटमेतत्तु कथितं पुटपण्डितैः ॥ ५ ॥
गोछागगोरवक्षुण्ण-शुष्कचूर्णितगोमयम् ।
गोवरं तत् समाख्यातं वरिष्ठं रससाधने ॥
दृष्टभाण्डस्थितैर्यत्नैर्गोवरैर्दीयते पुटम् ।
तन्नोवरपुटं प्रोक्तं भिषग्भिः सत्वमस्मृतम् ॥६॥
दृष्टद्वारे तुषैः पूर्णे मध्ये रुद्धां विधारयेत् ।
चित्राग्निं सूत्रवेष्टाढ्यं तद्वारपुटमुच्यते ॥"॥
इति भावप्रकाशे पूर्व्वखण्डे २ भागः ॥
पुटः, पुं क्वी, (पुटतीति । पुट श्लेषे + कः ।) अश्वखुरः । इति शब्दरत्नावली ॥
पुटः, त्रि, (पुट् + कः ।) आच्छादनम् । पत्रादिरचितः पुष्पाद्याधारः । यथा, रघुः । २ । ६५ ।
"दुग्धा पयः पत्रपुटे मदीयं
पुत्रोपभुङ्क्ष्वेति तमादिदेश ॥"
(यथा च मनौ । ६ । २८ ।
"ग्रामादाहृत्य वाप्योषधीर्गोसान् वने वसन् ।
प्रतिगृह्य पटेनैव पाणिना सकलेन वा ॥")
मिथःसंश्लेषः । इति सुकृटः ॥ इत्यमरटीकायां भरतः ॥
पुटकं, क्वी, (पुटवत् कायतीति । कै + कः ।) पद्मम् । इति शब्दरत्नावली ॥ स्वार्थे कप्रत्यये पुटशब्दार्थोऽप्यत्र ॥
पुटकन्दः, पुं, (पुटमिव कन्दो यस्य ।) कोलकन्दः । इति राजनिर्घण्टः ॥
पुटकिनी, स्त्री, (पुटकानि सन्त्यस्येति । पुटक + "पुष्करादिभ्यो देशे ।" ५ । २ । १३५ । इति इनिः । स्त्रियां ङीप् ।) पद्मिनी । पद्मयुक्तदेशः । पद्मसमूहः पद्मलता च । इति हेमचन्द्रः ॥
पुटग्रीवः, पुं, (पुटमिव ग्रीवा यस्य ।) गर्गरी । ताम्रकुम्भः । इति मेदिनी । वे, ६१ ॥
पुटपाकः, पुं, (पुटेन पाकः ।) पुटाभ्यन्तरितौषधपचनम् । अथ पुटपाकविधिः ।
"पुटपक्वस्य कल्कस्य स्वरसो गृह्यते यतः ।
अतस्तु पुटपाकानां युक्तिरत्रोच्यते मया ॥
पुटपाकस्य पाकोऽयं लेपस्याङ्गारवर्णता ।
लेपश्च द्व्याङ्गुलं स्थूलं कुर्य्याद्व्याङ्गुलमात्रकम् ॥
काश्मरीवटजम्बादिपत्रैर्वेष्टनमुत्तमम् ।
पलमात्रो रसो ग्राह्यः कर्षमात्रं मधु क्षिपेत् ॥
कल्कचूर्णद्रवाद्यास्तु देयाः कोलमिता बुधैः ॥
अपि च ।
द्वे विल्वे स्निग्धमांसस्य परं द्रव्यं पलं मतम् ।
द्रव्यस्य कुड़वोन्मानं सर्व्वमेकत्र पेषयेत् ॥
तदेकत्र समालोड्य पत्रैः सपरिवेष्टितम् ॥
पुटपाकविधानेन तेन पक्त्वा तदग्नं बुधः ।
तर्पणोक्तेन विधिना यथावद्वचारयेत् ॥
दृष्टिमध्ये निवेश्यः स्यान्नित्यमुत्तानशायिनः ।
छेदनो लेखनश्चैव रोपणश्चेति स त्रिधा ॥
हितः स्निग्धो विरूक्षस्य स्निग्धस्य स तु लेखनः ।
दृष्टेर्बलार्थमितरः पित्तास्रग्व्रणवातनुत् ॥
इतरो रोपणः ।
स्नेहमोक्षवमाक्षमेद्यः स्याद्दोषधेः क्रमः ।
स्नेहनः पुटपाकः स्याद्व्याध्यादौ वाक्षुते तु सः ॥
वाक्षुतं क्षोटिकाशतम् ।
आर्द्राणां यवमाषैर्लवणत्रयसंयुतैः ।
क्षण्णोषरजलात्रशुक्तविद्रुमसम्भवैः ॥
क्षुद्रफेनकलोसस्रोतोजदधिमस्तुभिः ।

लेखनी वाक्शतं तस्य परं धारणमिष्यते ॥
स्तन्यजाङ्गलमध्वाप्यतिक्तकद्वयभावितः ।
लेखनात्तिगुणो धार्य्यः पुटपाकस्तु रोपणः ॥
तिक्तकद्वयाख्याह ।
निम्बान्दतार्षपटोलनिदिग्धिकाभिः
स्यात् पञ्चतिक्तक इति प्रथितो गणोऽयम् ॥
आचरेत्तर्पणोक्तान्तु क्रियां यापत्तिदर्शने ॥
यापत्तिदर्शने मिथ्याक्षतपुटपाकजनितव्याधिदर्शने ।
तेजांस्यनिलमाकाशमादर्शं भास्कराणि च ।
नेत्रेत तर्पिते नेत्रे यच्च वा पुटपाकवान् ॥"
इति भावप्रकाशः ॥

पुटभेदः, पुं, (पुटं संश्लिष्टं भिनत्तीति । भिद + "कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् ।) नदीवक्रम् । (नदीचक्रम् । इत्यमरः । १ । १० । ७ ॥ यथा, आर्य्यासप्तशत्याम् । ३६८ ।
"प्रायेणैव हि मलिना मलिनानामाश्रयत्वमुपयान्ति ।
कालिन्दीपुटभेदः कालियपुटभेदनं भवति ॥")
पत्तनम् । आतोद्यम् । इति मेदिनी । दे, ५० ॥

पुटभेदनं, क्ली, (पुटैरश्वखुरैर्भिद्यते इति । भिद + कर्म्मणि ल्युट् ।) नगरम् । इत्यमरः । २ । २ । १ ॥ (यथा, महाभारते । १ । १०० । १२ ॥
"स हास्तिनपुरे रम्ये कुरूणां पुटभेदने ।
वसन् सागरपर्य्यन्तामन्वशासद्वसुन्धराम् ॥")

पुटालुः, पुं, (पुटः संश्लिष्ट आलुः ।) कोलकन्दः । इति राजनिर्घण्टः ॥

पुटिका, स्त्री, (पुटं अस्त्यस्या इति । पुट + टन् + टाप् ।) एला । इति हारावली । ६७ ॥

पुटितं, क्ली, (पुटं जातमस्येति । पुट + इतच् । पुट + क्त वा ।) हस्तपुटम् । पाटितम् । स्यूते, त्रि । इति मेदिनी । ते, १३४ ॥ आद्यन्तप्रणवादिवृत्तमन्त्रादौ पुटप्राप्ते च त्रि ॥

पुटी, स्त्री, (पुटतीति । पुट + कः । गौरादित्वात् ङीष् ।) कौपीनम् । इति जटाधरः ॥ आच्छादनम् । पत्रादिरचितः पुष्पाद्याधारः । इत्यमरभरतौ ॥ (यथा, आर्य्यासप्तशत्याम् । १४६ ।
"एरण्डपत्रशयना जनयन्ती स्वेदमलघुजघनतटा ।
धूलिपुटीव मिलन्ती सरज्वरं हरति हलिकवधूः ॥")

पुटोटजं, क्ली, (पुटं संश्लिष्टमुटजमिव ।) श्वेतच्छत्रम् । इति त्रिकाण्डशेषः ॥

पुटोदकः, पुं, (पुटे अन्तर्नुन्नपात्रमध्ये उदकं यस्य ।) नारिकेलः । इति हारावली । १०० ॥

पुट्ट, क तौक्ष्ण्ये । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट् ।) पद्मम्बरी । टहयान्तः । एकटकार इति रामः । क, पुट्टयति । तौक्ष्ण्यमल्पीभावः । इति दुर्गादासः ॥

पुड, ड मर्द्दे । इति कविकल्पद्रुमः ॥ (भ्वां परं-सकं-सेट् ।) पद्मम्बरी । ड, पुण्डयते । मर्द्दश्चूर्णीकरणम् । इति दुर्गादासः ॥

पुण, ण धर्म्मे । इति कविकल्पद्रुमः ॥ (तुदां-परं-सकं-सेट् ।) शुभक्रियायामित्यन्ये । ण, पुणति शुभं लोकः । पोणिता । इति दुर्गादासः ॥

पुण्डः, पुं, (पुण्डयते इति । पुडि मर्द्दे + घञ् ।) तिलकः । इति जटाधरः ॥

पुण्डरी, [न्] पुं, हस्तिनां मनुष्याणाञ्च चक्षुषः क्षुद्रविटपः । शालपर्णीपत्रतुल्यपत्रः । पुण्डरिया इति ख्यातः । तत्पर्य्यायः । पौण्डरीकम् २ पुण्डरीकम् ३ पुण्डरीयकम् ४ प्रपौण्डरीकम् ५ चक्षुष्यम् ६ पौण्डर्य्यम् ७ तालपुष्पकम् ८ तालपुष्पम् ९ दृष्टिप्रतम् १० स्थलपद्मम् ११ मालकम् १२ । केचित्तु पूर्व्वोदाहृतं पद्मकाष्ठे प्रचक्षते ॥ इति शब्दरत्नावली ॥

पुण्डरीकं, क्ली, (पुण्डति अन्यपुष्पाणां गर्व्वं चूर्णीकरोतीति । पुण्ड मर्द्दे + "फण्डरीकादयश्च ।" उणां । ४ । २० । इति ईकन्प्रत्ययेन निपातनात् साधुः । "पुण्डेः पुण्डरीकम् ।" इत्युज्ज्वलदत्तः ।) शुक्लपद्मम् । तत्पर्य्यायः । सिताम्भोजम् २ । इत्यमरः । १ । १० । ४१ ॥ श्वेतपद्मम् ३ महापद्मम् ४ सिताम्बुजम् ५ । इति रत्नमाला ॥ अस्य पर्य्यायान्तरं गुणाश्च श्वेतपद्मशब्दे द्रष्टव्याः ॥ (यथा, रघुः । ४ । १७ ।
"पुण्डरीकातपत्रस्य विकसत्काशचामरः ।
ऋतुर्विड्म्बयामास न पुनः प्राप तच्छ्रियम् ॥")
पद्ममात्रम् । इति भरतधृतयाडिः ॥ श्वेतच्छत्रम् । मेघजभेदः । इति मेदिनी । के, १६६ ॥ सप्तमहाकुष्ठानामन्यतमः । तल्लक्षणं यथाह माधवकरः ।
"सर्व्वेतं रक्तपर्य्यन्तं पुण्डरीकदलोपमम् ।
सोत्सेधञ्च सरागञ्च पुण्डरीकं तदुच्यते ॥"

पुण्डरीकः, पुं, (पुण्डरीकवद्वर्णोऽस्यस्येति । अच् ।) अग्निकोणस्थदिग्गजः । व्याघ्रः । इत्यमरः । ३ । ३ । ११ ॥ कोषकारभेदः । इति मेदिनी ॥ सर्पकारः । गणधरः । राजिलसर्पः । गजज्वरः । इति हेमचन्द्रः ॥ दमनकवृक्षः । इति राजनिर्घण्टः ॥ (धान्यविशेषः । तद्यथा,—
"पुण्ड्राण्डकः पुण्डरीकस्तथा महिषमस्तकः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) कमण्डलुः । श्वेतवर्णः । इत्यनेकार्थकोषः ॥ (क्रौञ्चद्वीपस्थपर्व्वतविशेषः । यथा, मात्स्ये । १२१ । ८ ।
"देवावृतः परेणापि पुण्डरीको महान् गिरिः ।
एते रक्तमयाः सप्त क्रौञ्चद्वीपस्य पर्व्वताः ॥"
तीर्थविशेषः । यथा, महाभारते । ३ । ८३ । ७६ ।
"शुक्लपक्षे दशम्याञ्च पुण्डरीकं समाविशत् ।
तत्र स्नात्वा नरो राजन् ! पुण्डरीकफलं लभेत् ॥"
यज्ञविशेषः । यथा, तत्रैव । ३ । ३० । १७ ।
"अश्वमेधो राजसूयः पुण्डरीकोऽथ गोसवः ।
एतैरपि महायज्ञैरिष्टं ते भूरिदक्षिणैः ॥"
नागविशेषः । यथा, तत्रैव । ५ । १०३ । १३ ।
"नागानामेकवक्त्राणां यथाश्रेष्ठन्तु मे शृणु ।
द्वौ पद्मौ पुण्डरीकश्च पुष्पो मुद्गरपर्णकः ॥"
रामचन्द्रवंशीयनृपविशेषः । यथा, रघुः । १८ । ८ ।
"तेन द्विपानामिव पुण्डरीको
राज्ञामजय्योऽजनि पुण्डरीकः ।
शान्ते पितर्य्याहृतपुण्डरीका
यं पुण्डरीकाक्षमिव श्रिता श्रीः ॥"
पुण्डरीकाः सन्त्यत्रेति । अच् । पुण्डरीकविशिष्टे, त्रि । यथा, मात्स्ये । १२० । ६८ ।
"पयोदस्तु ह्रदो नीलः स शुभः पुण्डरीकवान् ।
पुण्डरीकात् पयोदाच्च तस्मात् ह्रे सम्प्रसूयताम् ॥")

पुण्डरीकाक्षं, क्ली, (पुण्डरीकवदक्षिणी यस्मात् । षच् समासे ।) पुण्डर्य्यम् । इति शब्दचन्द्रिका ॥

पुण्डरीकाक्षः, पुं, (पुण्डरीकवदक्षिणी नेत्रे यस्य । षच् समासे ।) विष्णुः । इत्यमरः । १ । १ । १६ ॥ (यथा, महाभारते । ५ । ७० । ६ ।
"पुण्डरीकं परं धाम निर्ममं चरमव्ययम् ।
तद्भावात् पुण्डरीकाक्षो दस्युत्रासाच्च नार्द्दनः ॥"
"हृदयाख्यपुण्डरीकमश्नुते व्याप्नोति तत्रोपलभ्यत इति पुण्डरीकाक्षः । यत् पुण्डरीकाक्षस्तत्पुण्डरीकं परममध्यमन्त इति श्रुतेः । अक्षिणी पुण्डरीकाभे यस्येति वा ।" इति शाङ्करभाष्यम् ॥) तस्य स्मरणे बाह्याभ्यन्तरशुचित्वं यथा,
"अपवित्रः पवित्रो वा सर्व्वावस्थां गतोऽपि वा ।
यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ॥"
इति वामने ३३ अध्यायः ॥
(जलचरपक्षिविशेषः । तद्यथा,—
"उत्क्रोशः पुण्डरीकाक्षो मेघरावोऽम्बुकुक्कुटौ ॥"
इति चरके सूत्रस्थाने २७ अध्याये ॥)

पुण्डरीयकं, क्ली, स्थलपद्मम् । इति शब्दमाला ॥ प्रपौण्डरीकम् । इति राजनिर्घण्टः ॥

पुण्डर्य्यं, क्ली, (पुण्डतीति । पुडि + अच् । तस्यार्य्यं प्रधानम् । शाकन्धादित्वात् साधुः ।) प्रपौण्डरीकम् । इत्यमरः । २ । ४ । १२७ ॥ "हे हस्तिनां मनुष्याणाञ्च चक्षुषे क्षुद्रविटपे शालपर्णीपत्रतुल्यपत्रे । पुण्डरिया इति ख्याते । प्रकृष्टं पुण्डरीकमिव दाहहरणात् प्रपौण्डरीकं ण्यः शुभ्रादित्वादन्तपदस्यादौ वृद्धिः । पुण्डयति खण्डयति दोषान् पुण्डर्य्यं पुडि मर्द्दे नाम्नीति अर्य्यः पौण्डर्य्यमिति पाठे स्वार्थे ण्यः वृद्धिः पुण्डरीकादिरप्यत्र ।
'स्थलपद्मं साधुपुष्पं दृष्टिप्रतं पुण्डरीयकम् ॥'
इति रभसः ।" इत्यमरटीकायां भरतः ॥

पुण्ड्रः, पुं, (पुण्ड्यन्ते गुड़शर्करार्थं चूर्णीक्रियते इति । पुडि मर्द्दे + "स्फायितञ्चीति ।" उणां । २ । १३ । इति रक् ।) इक्षुभेदः । पुँड्रिआक् इति भाषा । इत्यमरः । २ । ४ । १६३ । देशविशेषः । अतिसृक्कः । चित्रम् । क्रिमिः । पुण्डरीकम् । देशविशेषे, पुं भूम्नि । इति मेदिनी । रे, ५६ । (यथा, मात्स्ये । ११३ । ४५ ।
"प्राग्ज्योतिषाश्च पुण्ड्राश्च विदेहास्ताम्रलिप्तकाः ।
शाल्वमागधगोनर्द्दाः प्राच्या जनपदाः स्मृताः ॥")
तिलकवृक्षः । इति हेमचन्द्रः ॥ कुरुभक्षः ।

इति राजनिर्घण्टः ॥ (अश्वदेहस्यचिह्नविशेषः । अस्य लक्षणादिकं पुण्ड्रकशब्दे द्रष्टव्यम् ॥ बलिराजस्य दैत्यस्य पुत्रविशेषः । यज्ञाग्नेर्व पुण्ड्रदेशो विख्यातः । यथा, महाभारते । १ । १०४ । ४७—५१ ।

"बलिः सुदेष्णां भार्य्यां स्वां तस्मै तां प्रादिशोत् पुनः ।
तां स दीर्घतमाग्नेयु स्मृत्वा देवीमयाचत ॥
भविष्यन्ति कुमारास्ते तेजसादित्यवर्चसः ।
अङ्गो वङ्गः कलिङ्गश्च पुण्ड्रः सुह्मश्च ते सुताः ॥
तेषां देशाः समाख्याताः स्वनामप्रथिता भुवि ।
अङ्गस्याङ्गोऽभवद्देशो वङ्गो वङ्गस्य च स्मृतः ॥
कलिङ्गविषयश्चैव कलिङ्गस्य च स स्मृतः ।
पुण्ड्रस्य पुण्ड्राः प्रख्याताः सुह्मा: सुह्मस्य च स्मृताः ॥
एवं बलेः पुरा वंशः प्रख्यातो वै महर्षिभिः ॥")

पुण्ड्रकः, पुं, (पुण्ड्र इव प्रतिकृतिः । "इवे प्रतिकृतौ ।" ४ । ३ । ९६ । इति कन् ।) माधवीलता । इत्यमरः । २ । ४ । ७२ ॥ (पर्य्यायोऽस्य यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।

"माधवी स्यात्तु वासन्ती पुण्ड्रको मल्लकोऽपिच ।
अतिमुक्तो विमुक्तश्च कामुकी भ्रमरोत्सवः ॥") तिलकवृक्षः । (पुण्ड्र + स्वार्थे कन् ।) इक्षुभेदः । पुंड्रि आक् इति भाषा । तत्पर्य्यायः । रसालः २ इक्षुवाटी ३ योनिः ४ इक्षुयोनिः ५ रसाली ६ रसदायिका ७ करभ्राणिः ८ । अस्य गुणाः । मधुरत्वम् । शीतलत्वम् । रुचिकारित्वम् । स्वादुत्वम् । पित्तदाहहरत्वम् । वृष्यत्वम् । तेजोबलविवर्द्धनत्वञ्च । इति राजनिर्घण्टः ॥ (अश्वशरीरस्यचिह्नविशेषे, पुं, क्ली । यथा, अश्ववैद्यके । ३ । ७३—८१ ।

"अत ऊर्द्धं प्रवक्ष्यामि पुण्ड्राणां लक्षणं शुभम् ।
आनुपूर्व्व्या यथादृष्टं मुनिभिस्तर्घवेदिभिः ॥
शुक्तिशङ्खगदाखड्गपद्मचक्राङ्कुशोपमाः ।
शरावसदृशाकाराः प्रशस्ताः पुण्ड्रकाः स्मृताः ॥
मत्स्यभृङ्गारप्रासादसदृशेदीपसन्निभाः ।
श्रीवृक्षदर्पणाकाराः शुभदाः परिकीर्त्तिताः ॥
शिरोललाटवदनं यः पुण्ड्रो व्याप्य तिष्ठति ।
स धन्यः पूजितो नित्यस्त्वकस्थैव यो भवेत् ॥
धर्म्मतेजःपताकाभा ये च सद्दामसन्निभाः ।
ते सर्व्वे पूजिताः पुण्ड्रा धनधान्यफलप्रदाः ॥
इति पुण्ड्राः शुभाः प्रोक्ताः पूर्व्वशास्त्रानुसारतः ।
अशुभांस्तेषु वक्ष्यामि यथायोगं समासतः ॥
वायसकङ्कगृध्राहिशृगालानुसन्निभाः ।
खण्डिताः पीडकाः रक्ताः पुण्ड्रका नैव पूजिताः ॥
निर्व्वंशगामिनश्चैव विच्छिन्नाः शस्त्रसन्निभाः ।
न्यूनाधिकाङ्गदेशस्थाः पुण्ड्रका न शुभाः स्मृताः ॥
निष्प्राकल्यस्वरूपाणि भग्नवर्णनिभानि च ।
पुण्ड्राणि न प्रशस्यन्ते भिन्नस्थानि यानिच ॥"

पुण्ड्रेक्षुरपि । यथा, महाभारते । १ । ६ । २६ ।

"तथाऽन्यत्रो यद्द पुण्ड्रेक्षु
मार्कण्डेयपुराणो च स्थानान्तरेण ।")

पुण्ड्रेक्षिः, पुं, (पुण्ड्रे इक्षुविशेषे केलिर्यस्य ।) हरः । इति शब्दमाला ॥

पुण्यं, क्ली, (पूयतेऽनेनेति । पू + "पूङो यक्सुक् हस्वश्च ।" उणा० ५ । १५ । इति यत् सुगागमो हस्वश्च ।) शुभादृष्टम् । तत्पर्य्यायः । धर्म्मम् २ श्रेयः ३ सुकृतम् ४ वृषः ५ । इत्यमरः । १ । ४ । २४ ॥ पुण्यभारोद्वहमङ्गस्य पण्डितस्य निन्दा यथा, अग्निपुराणे ।

"पण्डितेनापि किन्तेन समर्थेन च देहिनाम् ।
यन् पुण्यं भारसंहोढुमशक्तं पारलौकिकम् ॥"

आत्मकृतपुण्यकथननिषेधो यथा,—

"इष्टं दत्तमधीतं वा विनश्यत्यनुकीर्त्तनात् ।
आयुरप्योघनाभ्याञ्च भयतेजो विभिद्यते ॥
तस्मादात्मकृतं पुण्यं वृथा न परिकीर्त्तयेत् ॥"

इति शुद्धितत्त्वे देवलः ॥ * ॥

अदत्तपुण्यभागित्वं पापशब्दे द्रष्टव्यम् ॥ * ॥ शोभनकर्म्म । पावनम् । सुन्दरे, त्रि । इति हेमचन्द्रः ॥ सुगन्धि । इति चटाधरः ॥

पुण्यकं, क्ली, (पुण्याय कायतीति । कै + कः ।) व्रतम् । तच्च उपवासादि । शास्त्रे पुण्यत्वेन प्रसिद्धत्वात्तेन यद्दोधितमुपवासादि तदेव व्रतं न तु यः कोऽपि नियमः । आदिना नक्तं भोजनाचारलवणादिपरिग्रहः । इत्यमरभरतौ ॥

पुण्यकव्रतं, क्ली, (पुण्यकं व्रतमिति ।) पतिसौभाग्यस्य श्रीकृष्णतुल्यपुत्रस्य च जनकः स्त्रीकर्त्तव्यनियमविशेषः । तस्य विधिर्यथा,—

महादेव उवाच ।

"हरेराराधनं कृत्वा व्रतं कुरु वरानने ! ।
व्रतञ्च पुण्यकं नाम वर्षमेकं करिष्यसि ॥
देवि ! शुद्धे च कालेऽत्र परं नियमपूर्व्वकम् ।
माघशुक्लत्रयोदश्यां व्रतारम्भः शुभः प्रिये ! ॥
स्नात्वं सुनिर्म्मलं कृत्वा शिरःसंस्कारपूर्व्वकम् ।
उपोष्य पूर्व्वदिवसे वस्त्रं प्रक्षाल्य यत्नतः ॥
धौते च वाससी धृत्वा उपविश्यासने शुचौ ।
आचम्य तिलकं कृत्वा निर्व्वाप्य श्राद्धिकं पुरः ॥
घटस्यारोपयं कृत्वा स्वस्तिवाचनपूर्व्वकम् ॥
पुरोहितस्य वरणं पुरः कृत्वा प्रयत्नतः ।
संकल्प्य वेदविहितं व्रतमेतत् समाचरेत् ॥
व्रते तथास्मिन् नित्यानि चोपहाराणि षोड़श ।
देयानि नित्यं देवेशि ! कृष्णाय परमात्मने ।
आसनं स्वागतं पाद्यमर्घ्यमाचमनीयकम् ॥
मधुपर्कञ्च स्नानीयं वस्त्राभरणानि च ।
सुगन्धिपुष्पं धूपञ्च दीपनैवेद्यवन्दनम् ॥
पुनश्चाचमनं ताम्बूलं कर्पूरादिसुवासितम् ।
इत्युपचारैस्तानि पूजायाञ्चोपचारिणि सुन्दरि ! ॥
देवि ! किमिहहीनेनैवाङ्गहीनानि प्रजायते ।
अङ्गहीनञ्च यत् कर्म्म याङ्गहीनो यथा नरः ॥
अङ्गहीने च कार्य्ये च फलहानिः प्रजायते ।
अष्टोत्तरशतं पुष्पं पारिजातस्य विष्णवे ।
देयं प्रतिदिनं दुर्गे ! भक्तितो रूपहेतवे ॥
शेफालिकापुष्पाणां सप्तसप्ततिमीरितम् ।
प्रदेयं हरये भक्त्या सुकुमारत्वहेतवे ॥
नीलोत्पलानां लक्षञ्च देयं कृष्णाय भक्तितः ।
व्रताङ्गभूतं देवेशि ! चक्षुषो रूपहेतवे ॥
हिमालयोद्भवं लक्षं रुचिरं श्वेतचामरम् ।
प्रदद्यात् केशवायैव केशसौन्दर्य्यहेतवे ॥
अमूल्यरत्नरचितं दर्पणानां सहस्रकम् ।
देयं नारायणायैव नासिकासौन्दर्य्यहेतवे ॥
अमूल्यरत्नरचितं पुटकानां सहस्रकम् ।
प्रदेयं गोपिकेशाय नासिकारूपहेतवे ॥
बन्धूकपुष्पलक्षञ्च देयं राधेश्वराय च ।
स्वर्णाधरयोश्चैव बन्धुसौन्दर्य्यहेतवे ॥
मुक्ताफलानां लक्षञ्च दन्तसौन्दर्य्यहेतवे ।
देयं गोलोकनाथाय शैलजे ! भक्तिपूर्व्वकम् ॥
रत्नगेण्डूकलक्षञ्च गण्डसौन्दर्य्यहेतवे ।
महीश्वराय दातव्यं व्रते शैलेन्द्रकन्यके ! ॥
रत्नपायसलक्षञ्च देयं ब्रह्मेश्वराय च ।
ओष्ठाधःस्थलरूपाय प्राणेशि ! भक्तितो व्रते ॥
कर्णभूषणलक्षञ्च रत्नसारविनिर्म्मितम् ।
देयं सर्व्वेश्वरायैव कर्णसौन्दर्य्यहेतवे ॥
माध्वीकफलसानाञ्च लक्षं रत्नविनिर्म्मितम् ।
देयं विश्वेश्वरायैव स्वरसौन्दर्य्यहेतवे ॥
सुधापूर्णञ्च कुम्भानां सहस्रं रत्ननिर्म्मितम् ।
देयं कृष्णाय देवेशि ! वाक्यसौन्दर्य्यहेतवे ॥
रत्नप्रदीपलक्षञ्च गोपवेशविधायिने ।
देयं किशोरवेशाय दृष्टिसौन्दर्य्यहेतवे ॥
धुस्तूरकुसुमाकारं रत्नपात्रसहस्रकम् ।
देयं गोरक्षकायैव गलसौन्दर्य्यहेतवे ॥
सद्रत्नसाररचितं पद्मनालसहस्रकम् ।
देयं तन्तुकपालाय बाहुसौन्दर्य्यहेतवे ॥
लक्षञ्च रक्तपद्मानां करसौन्दर्य्यहेतवे ।
देयं गोपाङ्गनेशाय नारायणि ! परिव्रते ॥
अङ्गुरीयकलक्षञ्च रत्नसारविनिर्म्मितम् ।
अङ्गुलीनाञ्च रूपार्थं देयं देवेश्वराय च ॥
मणीन्द्रसारलक्षञ्च श्वेतवर्णं मनोहरम् ।
देयं मुनीन्द्रनाथाय नखसौन्दर्य्यहेतवे ॥
सद्रत्नसारहाराणां लक्षञ्चातिमनोहरम् ।
देयं मदनमोहाय वक्षःसौन्दर्य्यहेतवे ॥
सुपक्वश्रीफलानाञ्च लक्षञ्च सुमनोहरम् ।
देयं सिद्धेन्द्रनाथाय स्तनसौन्दर्य्यहेतवे ॥
सद्रत्नवर्त्तुलाकारं लक्षपात्रं मनोहरम् ।
देयं पद्मालयेशाय देहस्य रूपहेतवे ॥
सद्रत्नसाररचितनाभीनालसहस्रकम् ।
प्रदेयं पद्मनाभाय नाभिसौन्दर्य्यहेतवे ॥
सद्रत्नसाररचितरत्नपुङ्खसहस्रकम् ।
नितम्बसौन्दर्य्यार्थञ्च प्रदेयञ्चक्रपाणये ॥
तप्तकाञ्चनरत्नानां लक्षञ्च सुमनोहरम् ।
प्रदेयं श्रीनिवासाय श्रोणिसौन्दर्य्यहेतवे ॥
प्रतप्तस्वर्णलक्षाणां लक्षमञ्जीरमञ्जसम् ।
प्रदेयं पद्मनेत्राय पादसौन्दर्य्यहेतवे ॥
सुवर्णरचितानाञ्च रत्नानां सहस्रकम् ।
गतिसौन्दर्य्यहेतोर्थं देयं सर्व्वेश्वराय च ॥
रागरत्नसहस्रञ्च गजेन्द्राणां सहस्रकम् ।
सुवर्णपद्मलक्षञ्च देयं नारायणाय च ॥

पुण्यक

विचित्रं रत्नसारेण मूर्द्ध्नः सौन्दर्य्यहेतवे ॥
मालतीनाञ्च कुसुममक्षतं लक्ष्मीश्वरि ! ।
देयं वृन्दावनेशाय हास्यसौन्दर्य्यहेतवे ॥
अमूल्यरत्नलक्षञ्च देयं नारायणाय वै ।
सुव्रते ! व्रतपूर्णार्थं शीलसौन्दर्य्यहेतवे ॥
शुद्धस्फटिकसङ्काशं मणीन्द्रसारलक्षकम् ।
देयं मुनीन्द्रनाथाय मनःसौन्दर्य्यहेतवे ॥
प्रवालसारसङ्काशं मणिसारसहस्रकम् ।
देयं कृष्णाय भक्त्या च प्रियानुरागवृद्धये ॥
माणिक्यसारलक्षञ्च देयं कृष्णाय यत्नतः ।
जन्मनः कोटिपर्य्यन्तं स्वामिसौभाग्यहेतवे ॥
कुष्माण्डं नारिकेलञ्च जम्बीरं श्रीफलं तथा ।
फलान्येतानि देयानि हरये पुत्रहेतवे ॥
रत्नेन्द्रसारलक्षञ्च देयं कृष्णाय यत्नतः ।
असंख्यजन्मपर्य्यन्तं स्वात्मनो धनवृद्धये ॥
वाद्यं नानाप्रकारञ्च कांस्यतालादिकं परम् ।
व्रते सम्पत्तिवृद्ध्यर्थं श्रीहरिं श्रावयेद्व्रती ॥
पायसं पिष्टकं सर्पिःशर्करायुक्तं मनोहरम् ।
प्रदेयं हरये भक्त्या स्वात्मनो भोगवृद्धये ॥
सुगन्धिपुष्पमाल्यानां लक्षमक्षतमीप्सितम् ।
प्रदेयं हरये भक्त्या हरिभक्तिविवृद्धये ॥
नैवेद्यानि प्रदेयानि स्वादूनि मधुराणि च ।
श्रीकृष्णप्रीतिप्राप्त्यर्थं दुर्गे ! नानाविधानि च ॥
नानाविधानि पुष्पाणि तुलसीसंयुतानि च ।
श्रीकृष्णप्रीतये भक्त्या व्रते देयानि सुव्रते ! ॥
ब्राह्मणानां सहस्रञ्च प्रत्यहं भोजयेद्व्रती ।
स्वात्मनः पुत्रवृद्ध्यर्थं व्रते जन्मनि जन्मनि ॥
पुष्पाञ्जलिशतं देयं नित्यं पूर्णञ्च पूजने ।
प्रणामशतकं देवि ! कर्त्तव्यं भक्तिवृद्धये ॥
षण्मासांश्च हविष्यान्नं मासान् पञ्च फलादिकम् ।
हविः पक्वं जलं पक्वं व्रते पक्वे च सुव्रते ! ॥
रत्नप्रदीपशतकं वह्निं दद्याद्विनिशम् ।
रात्रौ हुताशनं कृत्वा नित्यं जागरणं व्रते ॥
स्मरणं कीर्त्तनं केलिः प्रेक्षणं गुह्यभाषणम् ।
सङ्कल्पोऽध्यवसायश्च क्रियानिष्पत्तिरेव च ॥
मैथुनं विविधं त्याज्यं व्रते क्रीड़ाविवृद्धये ।
ज्ञानवृद्धिर्जागरणे सुवृद्धिर्मितभोजने ॥
लोभमोहकामक्रोधभयशोकविवादकम् ।
कलहञ्च परित्याज्यं व्रते वन्धुविवृद्धये ॥
संपूर्णे च व्रते देवि ! प्रतिष्ठा तदनन्तरम् ॥
त्रिगुणञ्च षष्ट्यधिकं दुग्धकं वस्त्रसंयुतम् ।
सभोज्यं सोपवीतञ्च सोपहारं मनोहरम् ॥
त्रिगुणञ्च षष्ट्यधिकं सहस्रं विप्रभोजनम् ।
त्रिगुणञ्च षष्ट्यधिकं सहस्रं निलहोमकम् ॥
त्रिगुणञ्च षष्ट्यधिकं सहस्रं स्वर्णमेव च ।
देया व्रतसमाप्तौ च दक्षिणा विविधेरिता ।
अन्यां समाप्तिदिवसे कथयिष्यामि दक्षिणाम् ॥
एतद्व्रतफलं देवि ! दृढ़ा भक्तिर्हरौ भवेत् ।
दक्षिणुल्यौ भवेत् पुत्रौ विख्यातौ भुवनत्रये ॥
सौन्दर्य्यं स्वामिसौभाग्यमैश्वर्य्यं विपुलं धनम् ।
सर्व्ववाञ्छितसिद्धीनां बीजं जन्मनि जन्मनि ॥
इत्येवं कथितं देवि ! व्रतं कृष्णमहेश्वरि ! ।

पुण्यभू

पुत्रस्ते भविता साध्वीत्युक्त्वा च विरराम ह ॥"
इति ब्रह्मवैवर्त्ते गणपतिखण्डे ।३-४। अध्यायौ ॥
पुण्यकृत्, त्रि, (पुण्यं करोति सेवति । कृ + "सुकर्म्मपापमन्त्रपुण्येषु कृञः ।" ३।२।८६। इति क्विप् । "कृञस्य तुक् पिति क्ति ।" ६।१।७१। इति तुगागमश्च ।) पुण्यकर्त्ता । धार्म्मिकः । यथा,
"पुण्यकृच्चाटुकारस्ते किङ्करः सुरतेषु कः ॥"
इति भट्टिः । ५ । ६८ ॥
पुण्यगन्धः, पुं, (पुण्यः पवित्रो गन्धश्च गन्धोऽस्य ।) चम्पकः । इति त्रिकाण्डशेषः ॥
पुण्यजनः, पुं, (पुण्यः विरुद्धलक्षणया पापी चासौ जनश्चेति ।) राक्षसः । इत्यमरः । १।१।६३॥ यक्षः । (यथा, हरिवंशे । २ । २६ ।
"सर्पैः पुण्यजनैश्चैव वीरुद्भिः पर्व्वतैस्तथा ॥"
पुण्याश्रितो जनः ।) सज्जनः । इति मेदिनी । ने, १६८ ॥
पुण्यजनेश्वरः, पुं, (पुण्यजनानां यक्षाणामीश्वरः ।) कुबेरः । इत्यमरः । १ । १ । ७३ ॥ (यथा, रघुः । ६ । ६ ।
"समतया वसुवृष्टिविसर्जनैः
नियमनादसताञ्च नराधिपः ।
अनुययौ यमपुण्यजनेश्वरौ
सवरुणावरुणाग्रसरं रुचा ॥")
पुण्यतृणं, क्ली, (पुण्यं पवित्रं तृणम् ।) श्वेतकुशम् । इति राजनिर्घण्टः ॥
पुण्यदर्शनः, पुं, (पुण्यं शुभजनकं दर्शनं यस्य ।) चाषपक्षी । इति राजनिर्घण्टः ॥ (यद्दर्शनेन पुण्यं भवति तत्र, त्रि । यथा, रघुः । १ । ८६ ।
"तां पुण्यदर्शनां दृष्ट्वा निमित्तज्ञस्तपोनिधिः ।
याच्यमाशंसितावन्ध्यप्रार्थनं पुनरब्रवीत् ॥")
पुण्यफलः, पुं, (पुण्यानि शुभानि फलानि यस्य ।) वनभेदः । तत्पर्य्यायः । लक्ष्मणाराम्रः २ । इति शब्दमाला ॥ (पुण्यस्य फलं पुण्यजन्यं फलमिति वा ।) धर्म्मजन्यफले, क्ली ॥ (यथा, मनुः । ५ । ५३ ।
"वर्षे वर्षेऽश्वमेधेन यो यजेत शतं समाः ।
मांसानि च न खादेद्यस्तयोः पुण्यफलं समम् ॥")
पुण्यभाक्, [ज्] त्रि, (पुण्यं भजतीति । भज + क्विप् ।) पुण्यविशिष्टः । यथा, पञ्चशायके ।
"क्रीड़ावन्तो विनीता लघुसुरतरताः पुण्यभाजः प्रभूताः स्युः ॥"
पुण्यभूः, स्त्री, (पुण्यस्य पुण्योत्पादिका वा भूर्भूमिः ।) आर्य्यावर्त्तदेशः । यथा, हेमचन्द्रे ।४।१४।
"आर्य्यावर्त्तो जन्मभूमिर्जिनचक्रार्हचक्रिणाम् ।
पुण्यभूराचारवेदी मध्यं विन्ध्यहिमालयोः ॥"
पुण्यभूमिः, स्त्री, (पुण्यस्य पुण्योत्पादिका वा भूमिः ।) आर्य्यावर्त्तदेशः । इत्यमरः ।२।१।८। स तु विन्ध्यहिमालयावधिमध्यदेशः । यथा,—
"आसमुद्रात्तु पूर्व्वस्मादासमुद्रात्तु पश्चिमात् ।
तयोरेवान्तरं गिर्य्योरार्य्यावर्त्तं विदुर्बुधाः ॥"
इति भरतधृतमनुः ॥
पुत्रस्तः । इति शब्दरत्नावली ॥

पुण्यात्मा

पुण्यवान्, [त्] त्रि, (पुण्यमस्यास्तीति । पुण्य + मतुप् । मस्य वः ।) पुण्ययुक्तः । तत्पर्य्यायः । सुकृती २ धन्यः ३ । इत्यमरः ।३।१।३॥ सुकृत् ४ पुण्यकृत् ५ । इति जटाधरः ॥ धर्म्मवान् ६ श्रेयस्वान् ७ वृषवान् ८ । इते पुण्यपर्य्यायकशब्दोत्तरवतुप्रत्ययेन निष्पन्नाः ॥ (यथा, महाभारते । १२ । २६७ । २८ ।
"ऊर्द्धं भित्त्वा प्रतिष्ठन्ते प्राणाः पुण्यवतां नृप ! ।
मध्यतो मध्यपुण्यानामधो दुष्कृतकर्म्मणाम् ॥")
पुण्यश्लोकः, पुं, (पुण्यः पुण्यदायकः श्लोको यशश्चरित्रं वा यस्य ।) विष्णुः । इति श्रीभागवतम् ॥ युधिष्ठिरः । इति महाभारतम् ॥ नलराजः । इति त्रिकाण्डशेषः ॥ (यथा, महाभारते । ३ । ७४ । ११ ।
"पुण्यश्लोकस्य वै कृतो वार्ष्णेय इति विश्रुतः ॥")
पुण्यचरित्रे, त्रि ॥ (यथा, भागवते ।२।१४।१।
"संप्रस्थिते द्वारकायां जिष्णौ बन्धुदिदृक्षया ।
ज्ञातुञ्च पुण्यश्लोकस्य कृष्णस्य च विचेष्टितम् ॥")
पुण्यश्लोका, स्त्री, (पुण्यः पुण्यजनकः श्लोको यशश्चरित्रं वा यस्याः ।) द्रौपदी । इति शब्दमाला ॥ सीता । यथा,—
"पुण्यश्लोको नलो राजा पुण्यश्लोको युधिष्ठिरः ।
पुण्यश्लोका च वैदेही पुण्यश्लोको जनार्द्दनः ॥"
इति पुराणम् ॥
पुण्या, स्त्री, (पुण्यति या पूयतेऽनयेति वा । पू + "पूङो यसुक् हस्वश्च ।" उणा० ५ । १५ । इति यत् णुक् ह्रस्वश्च धातोः । तत्तडाप् ।) तुलसी । इति शब्दमाला ॥ पुण्यजनिका च ॥
पुण्यात्मा, त्रि, (पुण्यः आत्मा स्वभावो यस्य ।) पुण्यस्वभावः । तस्य गत्यादिर्यथा,—
सुप्रज्ञोवाच ।
"शृणु विप्र ! प्रवक्ष्यामि यत्त्वया श्रोतुमिच्छते ।
पुण्यात्मनां पापिनाञ्च पन्थानं सुखदुःखदम् ॥
आदौ ब्रवीमि पन्थानं नृणां पुण्यवतामहम् ।
शृणुष्व द्विजशार्दूल ! शृण्वतां प्रीतिवर्द्धनम् ॥
प्रस्तरैरिष्टकैर्बद्धो दिव्यवृक्षैः समावृतः ।
भाति पुण्यात्मनां पन्थाः सर्व्वोपद्रववर्ज्जितः ॥
क्वचिन्नन्दर्व्वकन्याभिर्गीयते गानमुत्तमम् ।
क्वचिन्मञ्जुशरीराभिरप्सरोभिश्च नृत्यते ॥
क्वचिच्च वीणाक्वणनं नानावाद्यं मनोहरम् ।
क्वचित् कुसुमवृष्टिश्च क्वचिद्वायुः सुशीतलः ॥
क्वचित् पुण्याः शीततोयाः क्वचित् भक्तशालिकाः ।
क्वचिद्देवाश्च गन्धर्व्वाः पठन्ति स्तवमुत्तमम् ॥
क्वचित् क्वचिद्दीर्घिकाश्च कुवलयसमुद्भासिताः ।
सुच्छायाः पादपाः क्वापि पुष्पिता वल्लुलादयः ॥
समस्तसुखसम्पन्ने पथि गच्छन्ति मानवाः ।
पुण्यात्मानो द्विजश्रेष्ठ ! सुखन्तुमवाप्य च ॥
केचित्तुरङ्गमारूढ़ा नानालङ्कारभूषिताः ।
उद्दण्डधवलच्छत्रैर्गच्छन्त्यावृतमस्तकाः ॥
केचिद्यान्ति गजारूढ़ा रथारूढ़ाश्च केचन ।
यानारूढ़ा घनाः केचित् सुखेन यममन्दिरम् ॥

पुत्तल पुत्तः पुत्रः

केचिदेवाग्नाहुतान्यत्तचामरवायुभिः ।
गच्छन्ति पीडिता मर्त्याः क्षयमाना सुरर्षिभिः ॥
केचिद्दिव्याङ्गवरधराः सुगन्धविभूषिताः ।
भुञ्जतो यान्ति तामूर्ध्वं पुण्यात्मानो यमालयम् ॥
विश्वगाप्लविता केचिद्व्यालयन्तो दिशो दश ।
व्रजन्ति भवनाभारं पतद्गृहनिवासिनः ॥
केचित्र पायसं दिव्यं भुञ्जतो यान्ति सत्तमाः ।
सुधापानं प्रकुर्वन्तः पथि गच्छन्ति केचन ॥
केचिद्दुग्धं पिबन्तश्च केचिद्दधिरसं तथा ।
केचित्तक्रं पिबन्तश्च गच्छन्ति यममन्दिरम् ॥
केचिद्धानि खादन्तः केचिन्नागफलानि च ।
केचिन्मधु पिबन्तश्च पुण्यवन्तो व्रजन्ति वै ॥
नानामार्गांस्ततो दृष्ट्वा चरतः धर्मतपरायणान् ।
भास्करिः प्रीतिमाप्याथ स्वयं नारायणो भवेत् ॥
चतुर्बाहुः श्यामवर्णः प्रफुल्लकमलेक्षणः ।
शङ्खचक्रगदापद्मधारी गरुडवाहनः ॥
स्वर्णयज्ञोपवीती च क्षीरचारुतरानतः ।
किरीटी कुण्डली चैव वनमालाविभूषितः ॥
चित्रगुप्तो महाप्राज्ञश्चत्वारो यमकिङ्कराः ।
सर्वे नारायणाकारा बभूवुर्मधुरोक्तयः ॥
ततः स्वयं धर्मराजस्तान् सर्वान्मनुजोत्तमान् ।
परमां प्रीतिमाप्याथ मित्रवत् पूजयेद्द्विज ! ॥
दिव्यैर्वस्त्रैः फलैश्चैव तेषां पुण्यवतां नृणाम् ।
भोजनं कारयित्वा तु तानुवाचाथ भास्करिः ॥

यम उवाच ।

यूयं सर्वे महात्मानो नरकक्लेशभीरवः ।
निजपुण्यप्रभावेन गम्यतां परमं पदम् ॥
संसारे जन्म संप्राप्य पुण्यं यः कुरुते नरः ।
स मे पिता स मे भ्राता स मे बन्धुः स मे सुहृत् ॥
इत्युक्त्वा धर्मराजेन ते सर्वे द्विजसत्तम ! ।
दिव्यं रथं समारुह्य नारायणपुरं ययुः ॥"

इति माहेश्वरे क्रियायोगसारे २२ अध्यायः ॥

पुण्याहं, क्ली, (पुण्यश्च तदहश्चेति । "राजाहः-सखिभ्यष्टच्" ५ । ४ । ९१ । इति टच् । "उत्तमैकाभ्याम्" ५ । ३ । ६० । इति अह्नादेशो न ।) पुण्यदिनम् । इत्यमरः ॥ (यथा, रघुवंशस्य । ९ । ६१ ।

"पुण्याहं वत्समङ्गलं सुदिवसं प्रातः प्रयातस्य ते
यत्तैरेषोचितमीहितं प्रियतम ! त्वं निर्गतः
श्रोष्यसि ॥")

पुण्याहवाचनं, क्ली, (पुण्याहस्य वाचनम् ।) दैवादिकर्मादौ मङ्गलार्थं पुण्याहमितिशब्दस्य वारत्रयकथनम् । यथा,—

"पुण्याहवाचनं दैवे ब्राह्मणस्य विधीयते ।
एतदेव निरोङ्कारं कुर्य्यात् क्षत्रियवैश्ययोः ॥
सोङ्कारं ब्राह्मणे ब्रूयात् निरोङ्कारं महीपतौ ।
उपोद्घातस्तथा वैश्ये सर्वत्रापि प्रयोजयेत् ॥"

इत्युद्वाहतत्त्वे यमः ॥

पुत्त, गतौ । (भ्वां-परं-सकं-सेट् । तदयान्तः । पुत्तिका । सौत्रधातुरयम् । इति दुर्गादासः ॥

पुत्तलकः, पुं, (पुत्त गतौ + भावे घञ् । पुत्तं गमनं लाति गच्छतीति । ला + कः । ततः संज्ञायां कन् । अथवा यत्नाद्यत्नेन हि गमनादिक्रियावत्त्वादस्य तथात्वम् ।) पत्त्रादिनिर्म्मितप्रतिमूर्त्तिः । पुतुल इति भाषा । यथा, "आधारात् योगयत्वाच्च शरीरे पुत्तलकं स्मृत्वा शिरःप्रभृतिषु पलाशपत्त्राणि देयानि ।" इति शुद्धितत्त्वम् ॥

पुत्तलिका, स्त्री, लवणकाष्ठदन्तधातुरत्नादिनिर्म्मितप्रतिमूर्त्तिः । पुत्तली एवेति स्वार्थे कनि ईकारस्य ह्रस्वे टापि निष्पन्ना ।

पुत्तली, स्त्री, (पुत्तं गमनं लाति आत्माश्रयेणेति । ला + कः । ततो ङीष् ।) मृदादिनिर्म्मितप्रतिमूर्त्तिः । यथा, उत्तरकामाख्यातन्त्रे ॥

"अमावास्यां समासाद्य मध्यरात्रौ विचक्षणः ।
मृन्मयीं पुत्तलीं कृत्वा दीपादिभिरलङ्कृताम् ॥"

पुत्तिका, स्त्री, (पुत्तं इतस्ततो भ्रमणमस्त्यस्या इति । पुत्त + ठन् । ततष्टाप् ।) मधुमक्षिकाविशेषः । तत्पर्य्यायः । पतङ्गिका २ । इत्यमरः । २ । ५ । २० ॥ (पिपीलिकाभेदः । यथा, मनुः । ४ । २३८ ।

"धर्म्मं शनैः सञ्चिनुयात् वल्मीकमिव पुत्तिकाः ।
परलोकसहायार्थं सर्वभूतान्यपीडयन् ॥")

पु(त्र)त्तः, पुं, तस्मात् पक्षमस्थानम् । यथा,—

"पुत्तस्त्रैकै नरोऽसौ प्रथमसुतवतः सिंहराशौ सुपुत्रः ॥"

इत्यादि ज्योतिस्तत्त्वम् ॥

(पुनाति पित्रादीनिति । पू + "पुवो ह्रस्वश्च ।" उणा० ४ । १६४ । इति त्रः धातोर्ह्रस्वत्वञ्च । तकारश्चैवं तु पुन्नामनरकात् त्रायते इति । पुत् + त्रै + डः । पितॄन् पातीति व्युत्पत्त्या ऋणोदरादित्वात् साधुः । इति रामायणे ।२।१०७।१२। श्रीकटीकायां रामानुजः।) पुंसन्तानः । पुन्नामनरकत्राता । पुत्र इति वेदा इति च भाषा । तत्पर्य्यायः । आत्मजः २ तनयः ३ सूनुः ४ सुतः ५ । इत्यमरः । २ । ६ । २७ ॥ तनूजः ६ अपत्यम् ७ दायादः ८ कुलाधारकः ९ नन्दनः १० आत्मजन्मा ११ द्वितीयः १२ प्रकृतिः १३ स्वजः १४ । इति शब्दरत्नावली ॥ अस्य निरुक्तिर्यथा,—

"पुन्नाम्नो नरकादस्मात् पितरं त्रायते सुतः ।
तस्मात् पुत्र इति प्रोक्तः स्वयमेव स्वयम्भुवा ॥"

इति महाभारते । १ । ७४ । ३७ ॥

(यथा च रामायणे । २ । १०७ । १२ ।

"पुन्नाम्नो नरकात् यस्मात् पितरं त्रायते सुतः ।
तस्मात् पुत्र इति प्रोक्तः पितॄन् यः पाति सर्व्वतः ॥")

स च द्वादशविधः यथा,—

"औरसः क्षेत्रजश्चैव दत्तः कृत्रिम एव च ।
गूढोत्पन्नोऽपविद्धश्च दायादो बान्धवश्च षट् ॥
कानीनश्च सहोढश्च क्रीतः पौनर्भवस्तथा ।
स्वयन्दत्तश्च शौद्रश्च षडदायादबान्धवाः ॥"

तेषां लक्षणानि यथा,—

"स्वे क्षेत्रे संस्कृतायान्तु स्वयमुत्पादयेत् यम् ।
तमौरसं विजानीयात् पुत्रमग्र्यमकल्पितम् ॥

यस्त्वप्तः प्रमीतस्य क्लीबस्य व्याधितस्य वा ।
स्वधर्म्मेण नियुक्तायां स पुत्रः क्षेत्रजः स्मृतः ॥
माता पिता वा दद्यातां यमद्भिः पुत्रमापदि ।
सदृशं प्रीतिसंयुक्तं स ज्ञेयो दत्तिमः सुतः ॥
सदृशन्तु प्रकुर्य्यादयं गुणदोषविचक्षणम् ।
पुत्रं पुत्रगुणैर्युक्तं स विज्ञेयस्तु कृत्रिमः ॥
उत्पद्यते गृहे यस्य न च ज्ञायेत कस्य सः ।
स गृहे गूढ उत्पन्नस्तस्य स्यादयं तदपत्यः ॥
मातापित्रभ्यामुत्सृष्टस्तयोरन्यतरेण वा ।
यं पुत्रं परिगृह्णीयादपविद्धः स उच्यते ॥
पित्रोर्विवदमानयोर्यं पुत्रमनुमन्यते ।
तं कानीनं वदेन्नाम्ना वोढुः कन्यासमुद्भवम् ॥
या गर्भिणी संक्रियते ज्ञाताज्ञातापि वासती ।
वोढुः स गर्भो भवति सहोढ इति चोच्यते ॥
क्रीणीयादयस्तत्पत्न्यार्थे मातापित्रोर्यमन्तिकात् ।
स क्रीतकः सुतस्तस्य सदृशोऽसदृशोऽपि वा ॥
या पत्या वा परित्यक्ता विधवा वा स्वयेच्छया ।
उत्पादयेत् पुनर्भूत्वा स पौनर्भव उच्यते ॥
मातापित्रविहीनो यस्त्यक्तो वा स्यादकारणात् ।
आत्मानं स्वयमर्पयेत्तस्मै स्वयं दत्तस्तु स स्मृतः ॥
यं ब्राह्मणस्तु शूद्रायां कामादुत्पादयेत् सुतम् ।
स पारयन्नेव शवस्तस्मात् पारशवः स्मृतः ॥
चौरजादीन् सुतानेवानेकादश यथोदितान् ।
पुत्रप्रतिनिधीनाहुः क्रियालोपान्मनीषिणः ॥"

इति मानवे ९ अध्यायः ॥

चतुर्व्विधपुत्रा यथा,—

सुमना उवाच ।

"त्रयस्समन्विताः केचित् केचिन्नामापहारकाः ।
रिपवश्च प्रियाश्चेति स्वकर्म्मवशवर्त्तिनः ॥
भवेच्चतुर्भिर्जायन्ते पुत्रा मित्राः स्त्रियस्त्रयः ।
भार्य्या पिता च माता च भ्रत्याः सज्जनबान्धवाः ॥
स्वेन स्वेन हि जायन्ते समन्वेन महीतले ।
न्यासापहारभावेन यस्य यस्य सुतं क्षिति ॥
न्यासस्वामी भवेत् पुत्रो गुणवान् रूपवान् सुधीः ।
येन चापहृतं न्यासं तस्यैवोरसि न संशयः ॥
न्यासापहरणाद्दुःखं स दत्त्वा दारुणं मृतः ।
न्यासस्वामी स पुत्रोऽभून्न्यासापहारकस्य च ॥
गुणवान् रूपवांश्चैव सर्व्वलक्षणसंयुतः ।
भक्तिञ्च दर्शयेत्तस्य पुत्रो भूत्वा दिने दिने ॥
प्रियवाक्यधरो वापि बहुरत्नं प्रदर्शयेत् ।
स्वीयं द्रव्यं समुद्धार्य्य प्रीतिमुत्पाद्य चात्मनाम् ॥
शक्त्या तु पोषयित्वैनं तदादाय पुनर्व्रजेत् ।
यथा तेन प्रदत्तं तन्न्यासापहरणात् पुरा ॥
दुःखमेवं महत् कृत्वा दारुणं प्राणनाशनम् ।
ताटस्थं तस्य दद्यात् स पुत्रो भूत्वा महागुणैः ॥
अल्पायुरसुखा भूत्वा मरणं यान्ति ते तथा ।
दुःखं दत्त्वा प्रयान्त्येवं प्रकृत्यैव पुनः पुनः ॥
यदाह पुत्र पुत्रेति प्रलापं हि करोति सः ।
तदा ह्यस्य करोत्येव कः स पुत्रो हि कस्य च ॥
अनेनापि हृतं न्यासं मदीयं परिचारिता ।
न्यासापहारोऽपि पिता पूर्व्वमत्रैव तस्य च ॥
विश्वासार्थं मया दत्तमत्रैव हि दुरात्मनः ।

द्रव्यापहरणेनापि मम प्राणा गताः किल ॥
दुःखेन महता चैव यदाहं पीड़ितः पुरा।
तथा दुःखं प्रदत्त्वाहं द्रव्यं सुप्राप्यमुत्तमम् ॥
भोगेन सर्व्वमादाय चिराद्दित्वास्य सौम्यवत्।
गतोऽस्मि स्वगृहत्वाद्य कस्याहं सुत इष्टभृः ॥
न चेषोऽपि पिता पूर्व्वमद्यैव न च कस्यचित्।
पित्राचत्तं मया दत्तमद्यैव च दुरात्मनः ॥
एवमुक्त्वा प्रयात्येव तं प्रहस्य पुनः पुनः।
प्रयात्यनेन मार्गेण दुःखं दत्त्वा सुदारुणम् ॥
एवं न्यासस्य सम्बन्धात् पुत्राः किन्ते भवन्ति वै।
संसारे दुःखबहुला दृश्यन्ते यत्र तत्र हि ॥१॥
ऋणसम्बन्धिनः पुत्रान् प्रवक्ष्यामि तवाग्रतः।
ऋणं यस्य गृहीत्वा यः प्रयाति मरणं किल ॥
अन्नदाता सुतो भूत्वा भ्राता वाथ पिता प्रियः।
मित्ररूपेण वर्त्तेत अन्तर्द्वेष्टः सदैव सः ॥
गुणं नैव प्रपश्येत स क्रूरो निष्ठुराकृतिः।
जल्पते निष्ठुरं वाक्यं सदैव स्वजनेषु च ॥
नित्यं मिष्टं समश्नाति भोगान् भुङ्क्ते नित्यशः।
द्यूतकर्म्मरतो नित्यं चौरकर्म्मणि नित्यशः ॥
गृहाद्द्रव्यं बलाद्धृत्वा वार्य्यमाणः प्रकुप्यति।
पितरं मातरञ्चैव कुत्सते च दिने दिने ॥
द्रावकस्त्रासकश्चैव बहुनिष्ठुरजल्पकः।
वध्यवित्तैव सुभ्राच्च हृत्वा सुखेन तिष्ठति ॥
जातकर्म्मादिभिर्व्वाल्ये द्रव्यं गृह्णाति दारुणः।
पुनर्व्विवाहसंयोगान्नानाभेदैरनेकधा ॥
एवं संचीयते द्रव्यं नैवमेतद्दात्यपि।
गृहक्षेत्रादिकं सर्व्वं ममैव हि न संशयः ॥
पितरं मातरञ्चैव वदत्येवं दिने दिने।
सुदण्डैर्मुष्कलैश्चैव कषाघातैस्तु दारुणैः ॥
मृते तु तस्मिन् पितरि तथा मातरि निष्ठुरम्।
निःस्नेहो निर्घृणश्चैव जायते नात्र संशयः ॥
श्राद्धकार्य्याणि दानानि न करोति कदाचन।
एवंविधास्तयः पुत्रा भवन्ति च महीतले ॥ २ ॥
रिपुपुत्रं प्रवक्ष्यामि तवाग्रे द्विजपुङ्गव !।
बाल्ये वयसि संग्राम्ये रिपुवद्वर्त्तते सदा ॥
पितरं मातरञ्चैव क्रीड़मानो हि ताड़येत्।
ताड़यित्वा प्रयात्येवं प्रहस्यैव पुनः पुनः ॥
पुनरायाति तं तत्र पितरं मातरं पुनः।
सक्रोधो वर्त्तते नित्यं वैरकर्म्मणि सर्व्वदा ॥
पितरं मारयित्वा तु मातरञ्च पुनः पुनः।
प्रयात्येवं स दुष्टात्मा पूर्व्ववैरानुभावतः ॥ ३ ॥*॥
अथातः संप्रवक्ष्यामि यस्माज्ज्ञो भवेत् प्रियः।
जातमात्रः प्रियं कुर्य्याद्बाल्ये नटनक्रीड़नैः ॥
वयः प्राप्य प्रियं कुर्य्यान्मातापित्रोरनन्तरम्।
भक्त्या संतोषयेन्नित्यं तावुभौ परिपालयेत् ॥
स्नेहेन वचसा चैव प्रियसम्भाषणेन च।
मृतौ गुरू समाज्ञाय स्नेहेन रुदते पुनः ॥
श्राद्धकर्म्माणि सर्व्वाणि पिण्डदानादिकां क्रियाम्।
करोत्येवं सुदुःखार्त्तस्तेभ्यो याचां प्रयच्छति ॥
ऋणत्रयान्वितः स्नेहान्निर्य्यापयति निश्चितः।
यस्माज्ज्ञभ्यं भवेत् कान्त प्रयच्छति न संशयः।
पुत्रो भूत्वा महाप्राज्ञः अनेन विधिना किल ॥४॥

उदासीनं प्रवक्ष्यामि तवाग्रे प्रिय ! साम्प्रतम् ॥
उदासीनेन भावेन सदैव परिवर्त्तते।
ददाति नैव गृह्णाति न क्रुध्यति न तुष्यति ॥
नैवोपयाति संत्यज्य उदासीनो द्विजोत्तम !।
तवाग्रे कथितं सर्व्वं पुत्राणां गतिरीदृशी ॥
यथा पुत्रास्तथा भार्य्या पिता माताथ बान्धवाः।
भृत्याश्चान्ये समाख्याताः पशवस्तुरगास्तथा।
गजा महिष्यो दासश्च ऋणसम्बन्धिनस्त्वमी ॥"*
सुपुत्रलक्षणं यथा,—
वशिष्ठ उवाच।
"पुत्रस्य लक्षणं पुण्यं तवाग्रे प्रवदाम्यहम्।
पुण्यप्रसक्तो यस्यात्मा सत्यधर्म्मरतः सदा।
बुद्धिमान् ज्ञानसम्पन्नस्त्वपक्षी वाग्विदांवरः ॥
सर्व्वकर्म्मसु सन् धीरो वेदाध्ययनतत्परः।
सर्व्वशास्त्रप्रवक्ता च देवब्राह्मणपूजकः ॥
याजकः सर्व्वयज्ञानां दाता त्यागी प्रियंवदः।
विष्णुध्यानपरो नित्यं शान्तो दान्तः सुचेतसदा ॥
पितृमातृपरो नित्यं सर्व्वस्वजनवत्सलः।
कुलस्य तारको विद्वान् कुलस्य परिपोषकः ॥
एवं गुणैः सुसंयुक्तः सुपुत्रः सुखदायकः ॥"*॥
पुत्रस्य जङ्गमतीर्थत्वं यथा,—
"सर्व्वतीर्थाहृतं तीर्थं पुत्रतीर्थमुदाहृतम्।
यद्वेणो वेणवदेषो सर्व्वधर्म्मविहिष्कृतः ॥
पृथुना पुत्रतीर्थेन पवित्रोऽगात् परं पदम् ॥
सत्पुत्रं परमं तीर्थं प्राप्य तुष्यन्ति पूर्व्वजाः।
पितापि ऋणमुक्तः स्याज्जाते पुत्रे महात्मनि ॥"
वैणवपुत्रस्य पूर्व्वपुरुषत्राणत्वं यथा,—
"वैणवो यदि पुत्रः स्यात् स तारयति पूर्व्वजान्।
पितृनधस्तना वंशास्तारयन्त्यतिपावनाः ॥"*॥
कुपुत्रजननेन पितॄणां नरकगमनं यथा,—
"तथा यदि कुपुत्रः स्यात्तेन मज्जन्ति पूर्व्वजाः।
सुघोरे नरके दीनाः शपन्ति च मुहुर्मुहुः ॥
यथा जलं कुम्भेन तरन्मज्जति मूढ़धीः।
तथा पिता कुपुत्रेण तमस्यन्धे निमज्जति ॥
जातमात्रे कुले चन्तौ संशेरते पितामहाः।
किमेषोऽधो नयेदस्मानूर्द्धं वा वैणवो भवन् ॥"
इति प्राज्ञे भूमिखण्डे ११।१२।१८।१२०।
अध्यायाः ॥ * ॥
सप्तविधपुत्रा यथा,—
"वरजो वीर्य्यजश्चैव क्षेत्रजः पालकस्तथा।
विद्यामन्त्रसुतानाथ गृहीता सप्तमः सुतः ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५६ अध्यायः ॥*॥
पुत्रसुखदर्शने पुण्यं यथा,—
पार्व्वत्युवाच।
"गृहमागत्य प्राणेश ! तपसां फलदायकम्।
कल्पे कल्पे ध्यासते यं तं पश्यागत्य मन्दिरम् ॥
शीघ्रं पुत्रसुखं पश्य पुण्यबीजं महोत्सवम्।
पुन्नामनरकत्राणकारणं भवसारणम् ॥
स्नातश्च सर्व्वतीर्थेषु सर्व्वयज्ञेषु दक्षिणा।
पुत्रस्य दर्शनस्यास्य कलां नार्हन्ति षोड़शीम् ॥
सर्व्वदानेन यत् पुण्यं यत् पृथिव्याः प्रदक्षिणम्।
पुत्रदर्शनपुण्यस्य कलां नार्हन्ति षोड़शीम् ॥

सर्व्वैस्तपोभिर्यत् पुण्यं यदेवानशनैर्व्रतैः।
सत्पुत्रोऽवपुण्यस्य कलां नार्हन्ति षोड़शीम् ॥
यद्विप्रभोजनैः पुण्यं यदेव सुरसेवनैः।
सत्पुत्रप्राप्तिपुण्यस्य कलां नार्हन्ति षोड़शीम् ॥"
इति ब्रह्मवैवर्त्ते गणपतिखण्डे ६ अध्यायः ॥*॥
पुत्रोत्सवविधिर्यथा,—
"परं पुत्रोत्सवं नन्दश्चकार परमादरात्।
ददौ यशोदा गोपीभ्यो ब्राह्मणेभ्यो ददौ मुदा।
धनानि नानावस्तूनि तैलसिन्दूरमेव च ॥"
अपि च।
"नन्दः सचेलः स्नात्वा च हृत्वा धौते च वाससी।
पारम्पर्य्यविधं तत्र चकार हृष्टमानसः ॥
ब्राह्मणान् भोजयामास कारयामास मङ्गलम्।
वाद्यानि वादयामास वन्दिभ्यश्च ददौ धनम् ॥
ततो नन्दश्च सानन्दं ब्राह्मणेभ्यो ददौ धनम्।
सद्रत्नानि प्रवालानि हीरकाणि च सादरम् ॥
तिलानां पर्व्वतान् सप्त सुवर्णं काञ्चनं मुने !।
रौप्यं धान्याचलं वस्त्रं गोसहस्रं मनोहरम् ॥
दधि दुग्धं शर्करांश्च नवनीतं घृतं मधु।
मिष्टान्नं लड्डुकौघांश्च स्वादूनि मोदकानि च ॥
भूमिञ्च सर्व्वशस्याढ्यां वायुवेगांस्तुरङ्गमान्।
ताम्बूलानि च तैलानि दत्त्वा हृष्टो बभूव ह ॥"
पुत्रप्रशंसा यथा,—
"धनं धान्यञ्च रत्नं वा तत् सर्व्वं पुत्रहेतुकम्।
न भक्षितं यत् पुत्रेण तद्द्रव्यं निष्फलं भुवि ॥
घृतकूपाधिका वापी घृतवापीसमं सरः।
सरःघृताधिको यज्ञः पुत्रो यज्ञघृताहरः ॥
तपोदानोद्भवं पुण्यं जन्मान्तरसुखप्रदम्।
सुखप्रदोऽपि सत्पुत्रः प्राणेभ्योऽपि सुनिश्चितम्।
पुत्रादपि परो बन्धुर्न भूतो न भविष्यति ॥"
पुत्रात् पराजये आनन्दयुक्तत्वं यथा,—
"नन्दः सपुलको हृष्टः सभार्यां साश्रुलोचनः।
आनन्दयुक्ता मनुजा यदि पुत्रैः पराजिताः ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ६।१४।२१
अध्यायाः ॥ * ॥
बहवः पुत्राः काम्याः। यथा,—
"एकस्या बहवः पुत्रा यद्येकोऽपि गयां व्रजेत्।
यजेद्वा चाश्वमेधेन नीलं वा वृषमुत्सृजेत् ॥"
मातापित्रोराज्ञाकारिकनिष्ठपुत्रस्यापि राज्यभागित्वं यथा,—
ययातिरुवाच।
"पुत्रो यस्त्वनुवर्त्तेत स राजा पृथिवीपतिः।
भवन्तः प्रतिजानन्तु पुरू राज्येऽभिषिच्यताम् ॥
प्रकृतय ऊचुः।
यः पुत्रो गुणसम्पन्नो मातापित्रोर्हितः सदा।
सर्व्वं सोऽर्हति कल्याणं कनीयानपि स प्रभुः ॥"
इति मात्स्ये २२।१६ अध्यायौ ॥ ० ॥
सत्पुत्रोत्पत्तिमात्रेण पुन्नामनरकत्राणं स्वर्गगमनञ्च। यथा,—
"सत्पुत्रेण सुनिश्रेष्ठाः समुत्पन्नेन दुर्म्मतेः।
उत्तारयति यात् स्वर्गं पुन्नामनरकाद्दृढम् ॥"
इत्यग्निपुराणम् ॥

अपि च।
"मनुष्यत्वेन च जातेन येनोत्पि त्रिदिवं गयौ।
पुन्नामनरकात्तातः स तेन सुमहात्मना॥"
इति विष्णुपुराणे। २। १३। ४१॥ ७॥
विद्यादिरहितस्य पुत्रस्य निन्दा यथा,—
"तया गवा किं क्रियते या न दोग्ध्री न गर्भिणी।
कोऽर्थः पुत्रेण जातेन यो न विद्वान् धार्मिकः॥
एकेनापि सुवृक्षेण विद्यापुष्पितेन धीमता।
वासितं तद्वनं सर्वं सुपुत्रेण कुलं यथा॥
एकोऽपि गुणवान् पुत्रो निर्गुणेन शतेन किम्।
एकश्चन्द्रस्तमोहन्ति न च तारागणोऽपि च॥
लालयेत् पञ्च वर्षाणि दश वर्षाणि ताडयेत्।
प्राप्ते तु षोड़शे वर्षे पुत्रं मित्रवदाचरेत्॥
जायमानो हरेद्दारान् वर्द्धमानो हरेद्धनम्।
नियमानो हरेत् प्राणान् नास्ति पुत्रसमो रिपुः॥
शौर्य्ये तपसि दाने वा यस्य न प्रथितं यशः।
विद्यायामर्थलाभे वा मातुरुच्चार एव सः॥"
इति गारुड़े ११८।१२५ अध्यायौ॥ ७॥
स च मध्यमोत्तमाधमभेदेन त्रिविधः। यथा,—
"यदुपात्तं यशः पित्रा धनं वीर्य्यमथापि वा।
तत्र ह्रापयते यस्तु स नरो मध्यमः स्मृतः॥
तद्वीर्य्याभ्यधिकं यस्तु पुनरन्यत् स्वशक्तितः।
निष्पादयति तं प्राज्ञा वदन्ति नरसत्तमम्॥
यः पित्रा समुपात्तानि धनवीर्य्ययशांसि च।
न्यूनतां नयति प्राज्ञास्तमाहुः पुरुषाधमम्॥"
इति मार्कण्डेयपुराणम्॥ ७॥
अपि च।
"उत्तमश्चिन्तितं कुर्य्यात् प्रोक्तकारी च मध्यमः।
अधमोऽश्रद्धया कुर्य्यादकर्त्तोच्चरितं पितुः॥"
इति महाभारतम्॥
(व्यवरूढपुत्रप्रानुग्रायो यथा,—
"ततः समाप्ते कर्म्मणि पूर्व्वं दक्षिणपादमभिहरन्तो प्रदक्षिणमग्निमुपरिक्रामेत् ततो ब्राह्मणान् स्वस्ति वाचयित्वा सह भर्त्राभ्येयं प्राक्रोयात्। पूर्व्वं पुमान् पश्चात् स्त्री गच्छेच्छिष्टमग्नेरेनेत्। ततस्तौ सह संवसेतामहरहः तथाविधपरिच्छदावेव तथैतं पुत्रं जनयेताम्। या तु स्त्री श्यामं लोहिताक्षं वृषोरस्कं महाबाहुं पुत्रमाजनयेत्। या वा हस्वं लम्बोष्ठदीर्घकेशं ऊर्द्ध्वदन्तं सुलक्षणं तेजस्विनमात्मवन्तम्। एष एवानयोरपि होमविधिः किन्तु परिवर्त्तदर्शवर्षं स्यात् पुत्रवन्तानुरूपस्तु यथाशीरेव तयोः परिवर्त्तोऽन्तः कार्य्यः स्यात्। द्विजेभ्यः सूता तु गमस्कारमेव कुर्य्यात् देवगुरुतपस्विसिद्धेभ्यश्च। या या च यमर्थिनं पुत्रमाजनयेत् तस्यास्तस्यास्तां पुत्रार्थिनमनुनिशम्य तांस्तान् जनपदान् मनसानुपरिक्रामयेत्। ततो या या येषां येषां जनपदानां मनुष्याणामनुरूपं पुत्रमाजनयेत् सा सा तत्तं तेषां जनपदानामाधारविधारोपचारपरिच्छदानुविधीयतेति

वाच्या स्यात्। एतेन सर्व्वं पुत्राग्निधां सप्तदिकरं कर्म्म व्याख्यातम्।"
"तथा च कुर्व्वती अग्नेः अग्नेः पूर्व्वे प्रवाहेत ततोऽनन्तरं वसवक्तरमिति तस्याश्च प्रवाहमाणायां स्त्रियः शब्दं कुर्य्युः प्रजाताः प्रजाता धन्यं धन्यं पुत्रमिति तथास्या हर्षमाणायन्ते प्राणाः।" इति चरके शारीरस्थानेऽष्टमेऽध्याये॥)
पुत्रकः, पुं, (पुत्र+स्वार्थे संज्ञायामनुकम्पायां वा कन्।) पुत्रः। (यथा, विष्णुपुराणे। १।११।२१।
तथापि दुःखं न भवान् कर्त्तुमर्हति पुत्रक!।
यस्य यावत् स तेनैव खेन तुष्यति बुद्धिमान्॥")
शरभः। धूर्त्तः। शैलविशेषः। वृक्षभेदः। इति मेदिनी। के, १२४॥ पतङ्गकः। अनुकम्पान्वितजनः। इति शब्दरत्नावली॥
पुत्रकन्दा, स्त्री, (पुत्रप्रदो कन्दोऽस्याः। अस्याः कन्दस्य गर्भदोषनाशेन पुत्रदात्वात् तथात्वम्।) लक्ष्मणाकन्दः। इति राजनिर्घण्टः॥
पुत्रका, स्त्री, (पुत्र+स्वार्थे संज्ञायां वा कन्। टाप्। "न यासयोः।" ७। ३। ४५। इत्यस्य "क्षतकापुत्रिकाकाष्ठन्यारकानां वेति वक्तव्यम्।" इति वार्त्तिकोक्त्या ङीन इत्वस्य पत्वेऽकारः।) पुत्रिका। इति शब्दरत्नावली॥
पुत्रजीवः, पुं, (पुत्रं गर्भं जीवयतीति। जीवि+अच्।) वृक्षविशेषः। जियापुता इति भाषा। तत्पर्य्यायः। क्षीपदापहः २। इति त्रिकाण्डशेषः॥ कुमारजीवः ३ पुत्रञ्जीवकः ४। इति रत्नमाला॥ पवित्रः ५ गर्भदः ६ सुतजीवकः ७॥ अस्य गुणाः। हिमत्वम्। वृष्यत्वम्। श्लेष्मगर्भजीवदाढत्वम्। चक्षुष्यत्वम्। पित्तघ्नमनत्वम्। दाहदृष्टानिवारणत्वञ्च। इति राजनिर्घण्टः॥ गुरुत्वम्। वातकारित्वम्। दुष्टमूत्रमलत्वम्। स्वादुत्वम्। पटुत्वम्। कटुत्वम्। इति भावप्रकाशः॥
पुत्रजीवकः, पुं, (पुत्रं गर्भं जीवयतीति। जीवि+ण्वुल्। द्वितीयाया अलुक्।) पुत्रजीवकवृक्षः। इति रत्नमाला॥ (यथा, सुश्रुते चिकित्सितस्थाने १८ अध्याये।
"अनेनैव विधानेन पुत्रञ्जीवकजं रसम्।
प्रयुञ्जीत भिषक् प्राज्ञः कालसात्म्यविभागवित्॥")
पुत्रस्य जीवके, त्रि॥
पुत्रदा, स्त्री, (पुत्रं गर्भं ददाति सेवनेनेति। दा+कः।) वन्ध्याकर्कोटकी। लक्ष्मणाकन्दः। गर्भदात्रीवृक्षः। इति राजनिर्घण्टः॥
पुत्रदात्री, स्त्री, (पुत्रं ददाति सेवनेनेति। दा+तृच्+ङीप्। वन्ध्यादोषनाशित्वादस्यास्तथात्वम्।) मालवे प्रसिद्धो लताविशेषः। तत्पर्य्यायः। वातारिः २ भ्रमरी ३ श्वेतपुष्पिका ४ वृत्तपत्रा ५ अतिगन्धातुः ६ वैश्रीजाता ७ शुक्लारी ८। अस्या गुणाः। वातकटूष्णकफनाशित्वम्। सुरभित्वम्। सर्व्वदा पथ्यत्वम्। वन्ध्यादोषनाशित्वञ्च। इति राजनिर्घण्टः॥

पुत्रप्रदा, स्त्री, (पुत्रं प्रददाति सेवनेनेति। प्र+दा+कः। टाप्।) वचिका। इति राजनिर्घण्टः॥
पुत्रभद्रा, स्त्री, (पुत्रस्य भद्रमस्या इति।) वृद्धजीवन्ती। इति राजनिर्घण्टः॥
पुत्रशृङ्गी, स्त्री, (पुत्रं पवित्रं शृङ्गमिव पुष्पमस्याः। गौरादित्वात् ङीष्।) अजशृङ्गी। इति राजनिर्घण्टः॥
पुत्रश्रेणी, स्त्री, (पुत्राणां तत्सन्तानानां श्रेणिरत्र। ङीप्।) मल्लिकपर्णी। इति रत्नमाला॥ (यथा, सुश्रुते सूत्रस्थाने ३८ अध्याये।
"श्यामा महाश्यामा लक्ष्मणा शक्तिनी तिलकाकमिल्लकरम्यकक्रमुकपुत्रश्रेणीगवाक्षी राजवृक्षकरञ्जहयगुह्यचीसप्तलाच्छगलान्त्रीसुधाः सुवर्णक्षीरी चेति॥")
पुत्रसः, स्त्री, (पुत्रं सूते इति। सू+क्विप्।) पुत्रजनिका। यथा,—
"पुत्रसूः पुण्यभूमिः स्याद्गरसूः पुत्रिकाप्रसूः॥"
इति शब्दरत्नावली॥
पुत्रान्नादः, त्रि, (पुत्रस्य अन्नं तदुपहृतमन्नमत्तीति। अद्+अण्।) पुत्रान्नभोजी। तत्पर्य्यायः। कुटीचकः २। इति त्रिकाण्डशेषः॥
पुत्रिका, स्त्री, (पुत्री+स्वार्थे कन् टाप्। "केऽणः।" ७। ४। १३। इति ह्रस्वः।) कन्या। तत्पर्य्यायः। आत्मजा २ दुहिता ३ पुत्री ४ तनुजा ५ सुता ६ अपत्यम् ७ पुत्रका ८ स्वजा ९ तनया १० नन्दिनी ११। इति शब्दरत्नावली॥ (यथा, पञ्चतन्त्रे। ३। २२१।
"पुत्रिकाव्रवीत्। तात! अनिदृष्टनामकोऽयं नाहमेनमभिलषामि॥" पुत्रीव प्रतिकृतिरस्या इति। पुत्री+"इवे प्रतिकृतौ।" ५। ३। ९६। इति कन् ह्रस्वश्च।) पुत्तलिका। यावतूलकः। इति मेदिनी। के, १२७॥ (यथा, सुश्रुते सूत्रस्थाने। १६ अध्याये।
"पीठोपमपालिरुभयतः क्षीरपुत्रिकाश्रितो निर्व्विधिमः स्थूलाग्रसमविषमपालिर्या योनिमः॥"
पुत्रस्वरूपत्वेन कृता कन्या। तत्कर्म्मजातः पुत्रस्तु कन्यादातुः पुत्रो भवतीति। यथा, मनौ। ९। १२७–१२८।
"अपुत्रोऽनेन विधिना सुतां कुर्व्वीत पुत्रिकाम्।
यदपत्यं भवेदस्यां तन्मम स्यात् स्वधाकरम्॥"
यथा च महाभारते। १। ६६। १२।
"ताः सर्व्वाः सुनवद्याङ्ग्यः कन्याः कमललोचनाः।
पुत्रिकाः स्थापयामास नरपुत्रः प्रजापतिः॥")
पुत्रिकापुत्रः, पुं, (पुत्रिकायाः जातोऽस्याः पूर्व्वे स हि मदीयः पुत्रो भविष्यतीति पुत्रस्वरूपत्वेन कृतायाः सुतायाः पुत्रः।) पुत्रिकायाः सुतः। स च औरससमः। यथाह पराशरः।
"अमाहकां प्रदास्यामि तवं कन्यामलङ्कृताम्।
अस्यां यो जायते पुत्रः स मे पुत्रो भवेदिति॥"
अथवा पुत्रिकैव सुतः पुत्रिकासुतः। सोऽप्यौरससम एव पित्रवयवानामस्पष्टत्वान्मात्रवयवानां

वांछुल्याच्च। यथाह वशिष्ठः। द्वितीयः पुत्रिकैवेति। द्वितीयः पुत्रः कन्यैवेत्यर्थः।" इति मिताक्षरा॥

पुत्रिकाप्रसूः, स्त्री, (पुत्रिकायाः कन्यायाः प्रसूर्जननी।) पुत्रिकाजननी। तत्पर्य्यायः धनसूः २। इति शब्दरत्नावली॥

पुत्रिकासुतः, पुं, (पुत्रिकायाः सुतः।) पुत्रिकायाः पुत्रः। पुत्रिकैव पुत्रः। अस्य प्रमाणं पुत्रिकापुत्रशब्दे द्रष्टव्यम्॥

पुत्रिणी, स्त्री, (पुत्रोऽस्या अस्तीति। पुत्र+इनिः+ङीप्।) पुत्रवती। यथा,—
"सर्व्वासामेकपत्नीनामेका चेत् पुत्रिणी भवेत्।
सर्व्वास्तास्तेन पुत्रेण प्राह पुत्रवतीर्मनुः॥"
इति दायभागधृतमनुवचनम्॥

पुत्री, [न्] पुं, (पुत्रोऽस्यास्तीति। पुत्र+इनिः।) पुत्रयुक्तः। पुत्रशब्दादर्थे इनिप्रत्ययनिष्पन्नः॥ यथा,—
"ज्येष्ठेन जातमात्रेण पुत्री भवति मानवः।
पितॄणामनृणश्चैव स तस्मात्तत्समर्हति॥"
इति मनुः॥

पुत्री, स्त्री, (पुत्र+"प्राङ्गेरवाद्यर्थो ङीन्। ४। १। ७३।" इति ङीन्। यद्वा, गौरादित्वात् ङीष्।) सुता। इति हलायुधः॥ अस्याः पर्य्यायः पुत्रिकाशब्दे द्रष्टव्यः। वृत्तविशेषः। इति शब्दचन्द्रिका॥

पुत्रीयं, त्रि, (पुत्रस्य निमित्तं संयोग उत्पातो वेति। पुत्र+"पुत्राच्छ च।" ५। १। ४०। इति छः।) पुत्रार्थम्। (यथा, महाभारते १। ६७। १६३।
"धन्यं यशस्यं पुत्रीयमायुष्यं विजयावहम्।
इदमंशावतरणं श्रोतव्यमनसूयता॥"
यथा च रघौ। १०। ४।
"ऋण्यग्रङ्गाद्यस्तस्य सन्तः सन्तानकाङ्क्षिणः।
आरेभिरे जितात्मानः पुत्रीयामिष्टिमृत्विजः॥"
"पुत्रीयां पुत्रनिमित्ताम्।" इति तट्टीकायां मल्लिनाथः॥") पुत्रसम्बन्धि। पुत्रस्येदमित्यर्थे ईयप्रत्ययनिष्पन्नम्। इति व्याकरणम्॥

पुत्रेष्टिः, स्त्री, (पुत्रनिमित्तिका इष्टिरिति मध्यपदलोपी समासः।) पुत्रनिमित्तकयागविशेषः। इति जटाधरः॥ यथा,—
"गृहीत्वा पञ्चवर्ण्यायं पुत्रेष्टिं प्रथमश्चरेत्॥"
इति स्मृतिः॥
(अस्याः क्रियाविशेषो यथा,—
"ततः पुत्रकामा पश्चिमतोऽग्निं दक्षिणतो ब्राह्मणमुपवेश्यान्वारब्धेन सह भर्त्रा यष्टेष्टं पुत्रमाज्ञासाना। ततस्तस्या आज्ञासानाया ऋत्विक् प्रजापतिमभिनिर्दिश्य वौषट् तस्याः कामपरिपूरणार्थं काम्यामिष्टिं निर्व्वपेदिष्णुर्योनिं कल्पयत्विति व्याचक्षाणो ब्राह्मणो घृतीकृतमुदपात्रं तस्यै ब्रूयात् सर्व्वेदेवकार्यान् क्रुरुष्वेति। ततः समाप्ते कर्म्मणि पूर्व्वं दक्षिणपादमभिहरन्ती प्रदक्षिणमग्निमनुपरिक्रामेत् ततो ब्राह्मणान् स्वस्ति वाचयित्वा सह भर्त्राभ्यक्षेयं प्राश्नीयात्। पूर्व्वं पुमान् पश्चात् स्त्री नचोच्छिष्टमवशेषयेत् ततस्तौ सहसंवसेतामहरात्रं तथाविधपरिच्छदावेव सर्व्वेष्टपुत्रं जनयेताम्। या तु स्त्रीभ्यामं जोहितार्द्धं वृढोरस्कं महाबाहुं पुत्रमाज्ञासीत। या वा लक्षणं लक्षणदुदीर्घकेशं शुक्लार्द्धं शुक्लदन्तं तेजस्विनमात्मवन्तम्। एष एवानयोरपि होमविधिः किन्तु परिवर्हवर्णवर्ज्यं स्यात् पुत्रवर्णापुरूपस्तु यथाग्नीरेव तयोः परिवर्होऽन्यः कार्य्यः स्यात्।" इति चरके शारीरस्थानेऽष्टमेऽध्याये॥)

पुत्रेष्टिका, स्त्री, (पुत्रेष्टि+स्वार्थे कन् टाप् च।) पुत्रनिमित्तकयागविशेषः। इति जटाधरः॥

पुत्रौ, पुं, (दुहिता च पुत्रश्च पुत्रौ इत्येकशेषः।) पुत्रदुहितरौ। इत्यमरः। २। ६। ३७॥ द्विवचनान्तोऽयम्॥

पुत्र्यं, त्रि, (पुत्रस्य निमित्तं संयोग उत्पातो वेति। पुत्र+"पुत्राच्छ च।" ५। १। ४०। चकाराद्यत्।) पुत्रीयम्। पुत्रनिमित्तसंयोगः पुत्रनिमित्तोत्पातो वा। इति पाणिनिः॥

पुथ, इ कुत्सने। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) पञ्चमस्वरी। इ, पुन्थ्यते। अन्तःस्थप्रथमादिरयमित्यन्ये। पुन्थति। इति दुर्गादासः॥

पुथ, क त्विषि। इति कविकल्पद्रुमः॥ (चुरा०-पर०-अक०-सेट्।) क, पोथयति। त्विषि दीप्तौ। इति दुर्गादासः॥

पुथ, य हिंसे। इति कविकल्पद्रुमः॥ (दिवा०-पर०-सक०-सेट्।) य, पुथ्यति पुपोथ। इति दुर्गादासः॥

पुद्गलः, पुं (पूरणात् पुद् गलनात् गलः। ततः कर्म्मधारयः। वृद्धिह्रासवत्त्वाद्देहस्य तथात्वम्।) देहः। (यथा, पार्श्वनाथचरिते। १२। ११०।
"चक्षुः शिरसि भाले च नेत्रे सर्व्वाङ्गपुद्गले॥")
आत्मा। इति शब्दरत्नावली॥ परमाणुः। यथा,—
"स्थूला मथास्तथा सूक्ष्माः सूक्ष्मात् सूक्ष्मतराश्च ये।
देहभेदा भवान् सर्व्वे ते केचित् पुद्गलाश्रयाः॥"
इति विष्णुपुराणे ५ अंशे २० अध्यायः॥
"पूर्य्यन्ते गलन्ति चेति पुद्गलाः। वृद्ध्यपचयभाजो वेऽवयवास्तदाश्रया देहभेदाः। यदाहुः। पूरणाद्गलनाद्देहे पुद्गलाः परमाणव इति।"
इति तट्टीकायां श्रीधरस्वामी॥

पुद्गलः, त्रि, (पुद् वर्द्धनशीलः गलो ह्रासवांश्चेति कर्म्मधारयः।) सुन्दराकारः। इति शब्दरत्नावली॥ रूपादिमद्द्रव्यम्। इति हेमचन्द्रः॥

पुनः, [र्] अ, (पुनाति स्तूयते इति। पून+बाहुलकात् अर् अस्य उत्वञ्च।) अप्रथमः। (यथा, मनुः। २। १२०।
"ऊर्द्धं प्राणा ह्युत्क्रामन्ति यूनः स्थविर आयति।
प्रत्युत्थानाभिवादाभ्यां पुनस्तान् प्रतिपद्यते॥")
भेदः। अवधारणम्। इत्यमरः। ३। ४। १५॥ अधिकारः। पश्चान्तरम्। इति मेदिनी॥ रे, ७२॥ (यथा, रघुः। २। ४८।
"भूतानुकम्पा तव चेदियं गौ-
रेका भवेत् खलिमति लदन्ते।
जीवन् पुनः शश्वदुपप्लवेभ्यः
प्रजाः प्रजानाथ! पितेव पासि॥")

पुनःपुनः, [र्] अ, (पुनर्+वीप्सायां द्वित्वम्।) वारंवारम्। तत्पर्य्यायः। सकृत् २ अभीक्ष्णम् ३ असकृत् ४। इत्यमरः। ३। ४। १॥ वारंवारेण ६ पौनःपुन्यम् ७ प्रतिक्षणम् ८। इति शब्दरत्नावली॥ (यथा, चाणक्ये।
"अतिथिर्बालकश्चैव राजा भार्य्या तथैव च।
अस्ति नास्ति न जानन्ति देहि देहि पुनः-पुनः॥")

पुनःपुनव, स्त्री, नदीविशेषः। पनपुना इति भाषा। यथा,—
"कीकटेषु गया पुण्या पुण्यं राजगृहे वनम्।
च्यवनस्याश्रमः पुण्यो नदी पुण्या पुनःपुना॥"
इति वायुपुराणे गयामाहात्म्यम्॥

पुनःसंस्कारः, पुं, (पुनः पुनर्वारव्रतः संस्कारः।) द्वितीयवारोपनयनादिसंस्कारः। यथा,—
"पुनर्व्रतौ कृतौ विप्रः पुनःसंस्कारमर्हति॥"
इति ज्योतिस्तत्त्वम्॥

पुनरागमनं, क्ली, (पुनः पुनर्व्वारमागमनम्।) द्वितीयवारागमनम्। फिरे आसा इति भाषा॥ यथा—
"संवत्सरव्यतीते तु पुनरागमनाय च॥"
इति दुर्गोत्सवपद्धतिः॥

पुनरुक्तं, क्ली, (वच+भावे क्तः। पुनः पुनर्व्वारमुक्तम्।) पुनर्व्वारकथनम्। यथा,—
"आपाततो यदर्थस्य पौनरुक्त्येव भाषणम्।
पुनरुक्तवदाभासः स भिन्नाकारशब्दगः।"
इति साहित्यदर्पणम्॥
(यथाह गौतमः। ५। ५७—५८।
"शब्दार्थयोः पुनर्व्वचनं पुनरुक्तमन्यत्रानुवादात्॥"
"पुनर्व्वचनं पुनरुक्तं तस्य विभागार्थं शब्दार्थयोरिति। तेन शब्दपुनरुक्तमर्थपुनरुक्तञ्च लभ्यते। अनुवादेऽतियाभिधारणाय अन्यत्रानुवादादिति अनुवादान्यत्वे सतीत्यर्थः। निर्य्युयोजनं पुनरभिधानं हि पुनरुक्तं अनुवादस्तु व्याख्यारूपः सप्रयोजनक एवेति भावः। तथाच समानार्थकपूर्व्वानुपूर्व्वीकशब्दप्रयोगः शब्दपुनरुक्तम्। समानार्थकभिन्नानुपूर्व्वीकशब्दस्य निर्य्युयोजनं पुनरभिधानमर्थपुनरुक्तम्। आद्यं यथा घटो घट इति। द्वितीयं यथा, घटः कलस इति। एतस्य प्रमादादिना सम्भवः॥"६॥
पुनरुक्तभेदान्तरमाह।
"अर्थादापन्नस्य स्वशब्देन पुनरभिधानम्।"

"पुनरुक्तामवदूषणे। वक्तिमुक्ते यस्यार्थस्यौत्सर्गिको प्रतिपत्तिर्भवति तस्य तेन रूपेण पुनरभिधानं पुनरुक्तम्। इदमेव च वर्यपुनरुक्तमिति गीयते। यथा बहिरुष्ट इति पूर्व्वप्रदार्शिनोक्तिरियम्। उष्ट्रो बहिरिति उत्तरप्रदार्शिनोक्तिः। एवं बहिरस्ति गेहे नास्तीति विधानिषेधोक्तिः। जीवन् गेहे नास्ति बहिरस्तीति निषेधानिषेधोक्तिः। पुनरुक्तेर्विधयश्चेदं भाष्यादि सम्मतम्। तस्यैव शब्दस्य पुनरभिधानं पर्य्यायेणाभिधानम् अन्यत् पुनरर्थपुनरुक्तमित्याहुः।"* २ पुनर् + वच + कर्म्मणि क्तः। पुनः कथिते, त्रि। यथा, महाभारते। १।१।३। "ब्रूहि सञ्जय! तत्त्वेन पुनरुक्तां कथामिमाम्॥")

पुनरुक्तवन्मा, [न्] पुं, (पुनरुक्तं वन्म यस्य। "द्वितीयं मौञ्जीबन्धने।" इति मनुक्तेरस्य तथात्वम्।) ब्राह्मणः। इति त्रिकाण्डशेषः॥

पुनर्जन्मन्, [न्] क्ली, (पुनर्भूयो जन्म।) पुनर्व्वारोत्पत्तिः। यथा,—

"आब्रह्मभुवनाल्लोकाः पुनरावर्त्तिनोऽर्জ্জুন!।
मामुपेत्य तु कौन्तेय! पुनर्जन्म न विद्यते॥"

इति श्रीभगवद्गीतायाम्। ८। १६॥

पुनर्नवः, पुं, (पुनरपि छिन्ने भूयोऽपि नवः।) नवः। इति हेमचन्द्रः॥

पुनर्नवा, स्त्री, (छिन्नायां पुनरपि नवा। यद्वा, पुनर्भूयोभूयः नूयते स्तूयते इति। णु स्तुतौ + "ऋदोरप्।"३। ३। ५७। इत्यप्। ततष्टाप्। चुम्बादित्वात् न णत्वम्।) शाकविशेषः। तत्पर्य्यायः। शोथघ्नी २ वर्षाभूः ३ शारदा ४ कठिल्लकः ५। अस्या गुणाः॥ श्वेतायाः पर्य्यायः। वृक्षीरा २ शिरोटिका ३। इति रत्नमाला॥ विशाखः ४ कठिल्लः ५ अग्निवाटिका ६ छत्री ७ सितवर्षाभूः ८ वनपत्रः ९ कठिल्लकः १०। अस्या गुणाः। उष्णत्वम्। तिक्तत्वम्। कफकासकृच्छ्रोगशूलानाहपाण्डुशोफानिलनाशित्वञ्च। इति राजनिर्घण्टः॥ मेदकत्वम्। रसायनत्वम्। आमदूर्नामव्रणोदरनाशित्वञ्च। इति राजवल्लभः॥*॥

"पुनर्नवा त्वेवमुक्ता शोथघ्नी दीर्घपत्रिका।
कटुः कषाया रूक्षोष्णा पाण्डुकृद्दीपनी परा॥
शोफानिलगरश्लेष्महरी व्रणोदरप्रणुत्॥*॥
पुनर्नवा परा रक्ता रक्तपुष्पानिलाटिका।
शोथघ्नी क्षुद्रवर्षाभूर्वर्षेतुः कठिल्लकः॥
पुनर्नवारुणा तिक्ता कटुपाका हिमा लघुः।
वातला श्लेष्मपित्तरक्तविनाशिनी॥"

इति भावप्रकाशः॥

पुनर्भवः, पुं, (छिन्नोऽपि पुनर्भवतीति। भू + अच्।) नवः। इत्यमरः। २। ६। ८३॥ रक्तपुनर्नवा। इति राजनिर्घण्टः॥ (पुनर् + भू + भावे अप्। पुनरुत्पत्तिः। यथा, महाभारते। १। १। २५५।

"सन्तश्च प्रकृतिश्च जन्मस्वपुनर्भवाः॥"*॥

पुनर्भवतीति। भू + अच्।) पुनर्व्वारजाते, त्रि॥

पुनर्भवी, [न्] पुं, (पुनर्भवः पुनः पुनरुत्पत्तिरस्यास्तीति। पुनर्भव + इनिः।) आत्मा। इति हेमचन्द्रः। ६। २॥

पुनर्भूः, स्त्री, (पुनर्भवतीति यायावरेतेति। भू + क्विप्।) विरूढा। तत्पर्य्यायः। दिधिषूः २। इत्यमरः। २। ६। २३॥ "अक्षतयोनिर्भर्त्रा पुनरुह्यते। इत्यवधावन्यस्य भूत्वा अन्यस्य पुनर्भवतीति क्विपि पुनर्भूः। धिष्यते निन्दितत्वेन शब्द्यते द्विधिषूः धिष शब्दे नास्तीति कूः निपातनाद्दित्वम्।" इति तट्टीकायां भरतः॥ सा त्रिविधा। यथा,—

"वरपूर्व्वाक्षितवन्ध्या सप्त प्रोक्ता यथाक्रमम्।
पुनर्भूस्त्रिविधा तासां स्वैरिणी तु चतुर्व्विधा॥
कन्यैवाक्षतयोनिर्या पाणिग्रहणदूषिता।
पुनर्भूः प्रथमा प्रोक्ता पुनःसंस्कारकर्म्मणा॥
देवधर्म्मानवेक्ष्य स्त्री गुरुभिर्या प्रदीयते।
उत्पन्नसाहसान्यस्मै सा द्वितीया प्रकीर्त्तिता॥
उत्पन्नसाहसा उत्पन्नव्यभिचारा।
असतस्तु देवरेषु स्त्री बान्धवैर्या प्रदीयते।
सवर्णायै सपिण्डाय सा तृतीया प्रकीर्त्तिता॥"

इति मिताक्षरा॥*॥

पुनर्व्वारजाते, त्रि॥

पुनर्याचा, स्त्री, (पुनरप्रथमा याचा।) निषेकयाचा। सा तु आषाढशुक्लपक्षीयरथद्वितीयानन्तरं तन्नवमदिवसविहिता श्रीजगन्नाथदेवस्य दक्षिणसुखयात्रा। फिरे रथ इति उल्टा रथ इति च भाषा। अस्या इतिकर्त्तव्यता यात्राशब्दे द्रष्टव्या॥

पुनर्व्वसुः, पुं, (पुनः पुनः शरीरेषु वसति जीवत्तत्त्वेनेति। पुनर् + वस + उः।) विष्णुः। (यथा महाभारते। १३। १४६। ३६।

"अग्निर्वो विजयो जेता विश्वयोनिः पुनर्व्वसुः॥")

शिवः। कात्यायनमुनिः। लोकभेदः। धनारम्भः। इति शब्दरत्नावली॥ नक्षत्रविशेषः। स च धनुराकृतिपञ्चतारात्मकः। यथा,—

"मध्यवर्त्तिनि शरासनाकृता-
वक्षरस्य नुरमालमे गताः।
लिम्पिकाः सुतनु! पञ्चतारके
मत्तभावकलिता घटोदयात्॥"

इति कालिदासकृतराविलग्ननिरूपणम्॥ तस्याधिष्ठात्री देवता अदितिः। इति जातकः॥ तत्र जातफलम्। यथा, कोष्ठीप्रदीपे।

"प्रभूतमित्रः कृतशास्त्रवक्तः
सद्रत्नकामी वरभूषणाढ्यः।
दाता प्रतापी वसुधाधिपत्नी-
पुनर्व्वसौ यस्य भवेत् प्रसूतिः॥"

पुनर्व्वस्, पुं, अश्विन्यादिसप्तविंशतिनक्षत्रान्तर्गतसप्तमनक्षत्रम्। तत्पर्य्यायः। यामकौ २ आदितौ ३। इति हेमचन्द्रः॥ द्विवचनान्तोऽयम्॥

पुन्नागः, पुं, (पुमान् नाग इव श्रेष्ठत्वात्।) स्वनामख्यातवृक्षपुष्पवृक्षविशेषः। तत्पर्य्यायः। पुरुषः २ तुङ्गः ३ केशरः ४ देववल्लभः ५। इत्यमरः।

पुंनाम २। ४। २५॥ कृष्णोकः ६ रक्तकेशरः ७। इति रत्नमाला॥ पुन्नामा च पाटलद्रुमः ८ रक्तपुष्पः १० रक्तकेशः ११ सुरसः १२। अस्य पुष्पगुणाः। मधुरत्वम्। शीतत्वम्। सुगन्धित्वम्। पित्तनाशित्वम्। भ्रमितो भ्रान्तत्वम्। देवताप्रमादनत्वञ्च। इति राजनिर्घण्टः॥ कषायत्वम्। कफरक्तनाशित्वञ्च। इति राजवल्लभः॥*॥ सितोत्पलः। जातीफलः। नरश्रेष्ठः। पाण्डुनागः। इति मेदिनी। गे, ३६॥

पुन्नाटः, पुं, (पुन्नाड + पृषोदरादित्वात् डस्य टः।) चक्रमर्दः। इति राजनिर्घण्टः॥ (पर्य्यायोऽस्य यथा, भावप्रकाशे पूर्व्वखण्डे प्रथमे भागे।

"चक्रमर्दः प्रपुन्नाटो दद्रुघो मेघलोचनः।
पुन्नाटः स्यादेड़गजचक्री पुन्नाट इत्यपि॥")

पुन्नाड़ः, पुं, (पुमांसं नाड़यतीति। नड़ बंधे + "कर्म्मण्यण्।"३। २। १। इत्यण्।) चक्रमर्दः। इति राजनिर्घण्टः॥

पुन्नामनरकः, पुं, (पुरिति नाम यस्य स पुन्नामा। पुन्नामा चासौ नरकश्चेति कर्म्मधारयः।) पुत्रइतिनामकनरकविशेषः। तत्र षोड़शविधपापैः पतति। यथा,—

ब्रह्मोवाच।

"परदारामिगमनं प्राणानाञ्चोपसेवनम्।
पापत्वं सर्व्वभूतानां प्रथमं नरकं स्मृतम्॥
कलत्रैर्यं सहायार्थं कलार्हस्य च पाटनम्।
पाटनं दृष्टजातीनां द्वितीयं परिकीर्त्तितम्॥
वर्ज्यादानं तथा दिष्टमृषभबधबन्धनम्।
विषादित्वमहैशून्यं तृतीयं नरकं स्मृतम्॥
भयदं सर्व्वसत्त्वानां नरभूतिविनाशनम्।
भंशनं निजधर्म्माणां चतुर्थं नरकं स्मृतम्॥
मारणं मित्रकोटिनां मिथ्याभिशपनञ्च यत्।
मिष्टैकाशनमित्युक्तं पञ्चमञ्च विपाचनम्॥
परीक्षणं यन्त्रकरं यमनं योगनाशनम्।
धानसूत्रस्य हरणं यज्ञसक्तं नृपाचनम्॥
राज्यभागस्य हरणं राजजायानिषेवणम्।
राज्ये लक्षितकारित्वं षष्ठमं नरकं स्मृतम्॥
स्तब्धत्वं लोलुपत्वञ्च लब्धधर्म्मार्थनाशनम्।
नानाकर्म्मकरं प्रोक्तमष्टमं नरकं स्मृतम्॥
ब्रह्मस्वहरणञ्चैव ब्राह्मणानां विनिन्दनम्।
विरोधो ब्राह्मणैश्चोक्तो नवमो नरकस्त्वयम्॥
शिष्टाचारविनाशञ्च मित्रद्वेषं शिशोर्व्वधम्।
प्राप्तस्त्रैयं धर्म्मशून्यो दशमं परिकीर्त्तितम्॥
षड़ङ्गनिधनं घोरं षाड़गुण्यप्रतिषेधनम्
एकादशमभेवोक्तं नरकं सद्भिरुत्तमं!॥
सद्भिरुक्तं सदा चैवमनाचारमसत्क्रिया।
संस्कारपरिहीनत्वमिदं द्वादशमं स्मृतम्॥
धानिर्धर्म्मार्थकामानामपवर्गस्य चारणम्।
खर्गेच्छुश्च मतिदं त्रयोदशमनुत्थते॥
समतं धर्म्महीनञ्च यद्वर्ज्यं यच्च दोषजम्।
चतुर्दशमकमेवोक्तं नरकं सद्भिरर्हितम्॥
अज्ञानञ्चाप्यनिष्टत्वमशौचमनुभावहम्।
गर्ह्यं तत् पञ्चदशकमसत्यवचनानि च॥

आलस्यं वै योऽग्रकमाक्रोशश्च विशेषतः ।
सर्वस्य चाततायित्वमगारेष्वग्निदापनम् ॥
इच्छा च परदारेषु नरकाय निगद्यते ।
ईर्ष्याभावश्च सभ्येषु औद्धत्यन्तु विगर्हितम् ॥
एतेषु पापेषु पुरुषः पुन्नामनरके पतेत् ।
पुन्नामनरकं घोरं विनाग्निं प्राह सर्व्वतः ॥
एतस्मात् कारणात् साध्वस्तः पुत्रो निगद्यते ॥"

इति वामने ५८ अध्यायः ॥

पुप्फुलः, पुं, (पुप्फुस् । पृषोदरादित्वात् सस्य लत्वम् । उदरस्थवायुः । इति भूरिप्रयोगः ॥

पुप्फुसः, पुं, (पुप्फुसवत् आकृतिरस्यास्तीति । अच् ।) पद्मबीजाधारः । तत्पर्य्यायः । बीजकोषः २ वराटकः ३ । (पुप्फुस इति शब्दोऽस्यास्तेति ।) वामपार्श्वस्थमलाशयः । फोँफड़ा इति फुलघरा इति च भाषा । तत्पर्य्यायः । कोष्ठः २ । इति शब्दचन्द्रिका ॥ रक्तफेनजः ३ । इति हेमचन्द्रः ॥ तिलकम् ४ क्षोम ५ । इत्यमरः ॥ क्षोमम् ६ । इति भरतः ॥ फुप्फुसोऽपि पाठः ॥ (फुप्फुसशब्दोऽस्य विषयो ज्ञातव्यः ॥)

पुमान् [स्] पुं, (पाति रक्षतीति । पा + "पातेर्डुमुसुन् ।" उणा० । ४ । १७७ । इति डुमुसुन् । डित्त्वात् टिलोपः ।) मनुष्यजातिपुरुषः । तत्पर्य्यायः । पञ्चजनः २ पुरुषः ३ पूरुषः ४ ना ५ । इत्यमरः । २ । ६ । १ ॥ (यथा,—

"स्वदेशजातस्य जनस्य लोके
गुणाधिके पुंसि भवत्यवज्ञा ।
निजाङ्गना यद्यपि रूपराशि-
स्तथापि पुंसां परदारचेष्टा ॥"

इत्यूढटः ॥)

मनुष्यजातिः । इति केचिदिति भरतः ॥ पुंलिङ्गमात्रञ्च ॥ (कूटस्थपुरुषः । यथा, विष्णुपुराणे । १ । १ । २ ।

"सदक्षरं ब्रह्म य ईश्वरः पुमान्
गुणोर्म्मिरूपस्थितिकालसंज्ञयः ।
प्रधानबुद्ध्यादिजगत्प्रपञ्चकः
स नोऽस्तु विष्णुर्गतिभूतिमुक्तिदः ॥"

"अक्षरमिति विकारं निराकरोति पुमान् कूटस्थः ।" इति तट्टीकायां श्रीधरस्वामी ॥)

पुर, ग्र अग्रगत्वाम् । इति कविकल्पद्रुमः ॥ (तुदा०-पर०-सक०-सेट् ।) ग्र, पुरति अग्रेष्ठः कनिष्ठस्य अग्रे गच्छतीत्यर्थः । पोरिता । इति दुर्गादासः ॥

पुरं, क्ली (प्रियते पूर्य्यते इति । पॄ भॄ पूर्त्तौ + कः ।) गेहः । देहः । पाटलिपुत्रः । पुष्पादीनां दलावृत्तिः । इति मेदिनी । रे, ५८—५६ ॥ नागरमुस्ता । इति रत्नमाला ॥ चर्म्म इति शब्दरत्नावली ॥ गृहोपरिगृहम् । इति विश्वः ॥

पुरं, क्ली स्त्री, (पिपर्त्तीति । पॄ + मूलविभुजादित्वात् कः । यद्वा, पुरति अग्रं गच्छतीति । पुर + "रुगपधज्ञाधीकिरः कः ।" ३ । २ । १७५ । इति कः ।) दृढादिविशिष्टस्थानम् । इति श्रीधरस्वामी ॥ बहुग्रामीयव्यवहारस्थानम् । इत्यमरटीकायां भरतः ॥ तत्पर्य्यायः । पूः २ पुरी ३ नगरम् ४ पत्तनम् ५ स्थानीयम् ६ कटकम् ७ पट्टम् ८ निगमः ९ पुटभेदनम् १० । इति शब्दरत्नावली ॥ तस्य लक्षणादि यथा,—

मत्स्य उवाच ।

"राजा सहायसंयुक्तः प्रभूतयवसेन्धनम् ।
रम्यमाणन्तु सामन्तं मध्यमन्देशमावसेत् ॥
वैश्यशूद्रजनप्रायमनाहार्य्यन्तथा परैः ।
किञ्चिद्ब्राह्मणसंयुक्तं बहुकर्म्मकरन्तथा ॥
अदेवमातृकं रम्यमगुरुक्षजनान्वितम् ।
करैरपीड़ितं वापि बहुपुष्यफलन्तथा ॥
अगम्यं परचक्राणां तद्वासगृहमादिशेत् ।
समदुःखसुखं राज्ञः सततं प्रियमास्थितम् ॥
सरीसृपविहीनञ्च याड़तस्करवर्ज्जितम् ।
एवंविधं यथालाभं राजा विषयमावसेत् ॥
एतद्दुर्गं नृपः कुर्य्यात् वक्ष्यामेकतमं बुधः ।
वनदुर्गं महीदुर्गं नरदुर्गन्तथैव च ॥
वार्क्षञ्चैवाम्बुदुर्गञ्च गिरिदुर्गं पार्थिव ! ।
सर्व्वेषामेव दुर्गाणां गिरिदुर्गं प्रशस्यते ॥
दुर्गञ्च परिखोपेतं चयाट्टालकसंयुतम् ।
शतघ्नीयन्त्रसञ्छन्नं शतशश्च समावृतम् ॥
गोपुरं सकवाटञ्च तत्र स्यात् सुमनोहरम् ।
सपताकं गजारूढो येन राजा विशेत् पुरम् ॥
चतस्रश्च तथा कार्य्या वीथयः सर्व्वतोसुखाः ।
एकस्मिंस्तत्र वीथ्यग्रे देववेश्म भवेद्दृढम् ॥
द्वितीये वापि वीथ्यग्रे राजवेश्म विधीयते ।
धर्म्माधिकरणं कार्य्यं वीथ्यग्रे च तृतीयके ।
चतुर्थे चैव वीथ्यग्रे गोपुरन्तु विधीयते ॥
आयतं चतुरस्रं वा वृत्तं वा कारयेत् पुरम् ।
सुक्तिहीनं त्रिकोणञ्च यवमध्यन्तथैव च ॥
अर्द्धचन्द्रप्रकारञ्च वज्राकारञ्च कारयेत् ॥
अर्द्धचन्द्रं प्रशंसन्ति नदीतीरेषु तद्वसेत् ।
अन्यत्र तन्न कर्त्तव्यं प्रयत्नेन विजानता ॥
राज्ञा कारागृहं कार्य्यं दक्षिणे राजवेश्मनः ।
तस्यापि दक्षिणे भागे गजस्थानं विधीयते ॥
गजानां प्राङ्मुखा शाला कर्त्तव्या वाप्युदङ्मुखा ।
आग्नेये च तथा भागे आयुधागारमिष्यते ॥
महानसञ्च धर्म्मज्ञ ! कर्म्मशालास्तथापराः ।
गृहं पुरोधसः कार्य्यं वामतो राजवेश्मनः ॥
मन्त्रिवैद्यविदाञ्चैव चिकित्सार्त्तस्य चैव च ।
तत्रैव च तथा भागे कोष्ठागारं विधीयते ॥
गवां स्थानं तथैवाच्च तुरगाणान्तथैव च ।
उत्तराभिमुखा श्रेणी तुरगाणां विधीयते ॥
दक्षिणाभिमुखा वाथ परिशिष्टास्तु गर्हिताः ।
तुरगास्तु तथा धार्य्याः प्रदीपैः सार्व्वरात्रिकैः ॥
कुक्कुटान् वानरांश्चैव मर्कटांश्च नराधिप ! ।
धारवेदश्वशालायां सवत्सां धेनुमेव च ॥
व्रजाश्च धार्य्या यत्नेन तुरगाणां हितैषिणा ।
गोगजाश्वादिशालासु ततपुरीषस्य निर्गमम् ।
अस्तं गते न कर्त्तव्यं देवदेवे दिवाकरे ॥
ततस्तत्र यथास्थानं राजा विज्ञाय सारथिम् ।
दद्यादावसथान् दुर्गे मन्त्रकालविदां शुभान् ॥
गोवैद्यानश्ववैद्यांश्च गजवैद्यांस्तथैव च ।
आहरेत भृशं राजा दुर्गे परबलारुजः ॥
कुशीलवानां विप्राणां दुर्गे स्थानं विधीयते ।
न बहूनामतो दुर्गे विना कार्य्यं तथा भवेत् ॥
सर्व्वं निरर्थकं कार्य्यं विना दुर्गे महीपते ! ।
दुर्गे यन्त्राः प्रकर्त्तव्या नानाप्रहरणान्विताः ।
सहस्रघातिनो राजंस्तेषु रक्षा विधीयते ॥
दुर्गद्वाराणि गुप्तानि कार्य्याण्यपि च भूभुजा ।
सञ्चयश्चात्र सर्व्वेषामायुधानां विधीयते ॥
धनुषां चैव शक्तीयानां तोमराणाञ्च भार्गव ! ।
शराणामथ खड्गानां कवचानान्तथैव च ॥
शतघ्नीनाञ्च कुन्तानां परिघैः सह पार्थिव ! ।
अश्मनाञ्च प्रभूतानां सुशराणान्तथैव च ॥
त्रिशूलानां पट्टिशानां कृपाणानाञ्च पार्थिव ! ।
प्रासानाञ्च सशूलानां शक्तीनाञ्च नरोत्तम ! ॥
परश्वधानां चक्राणां वर्म्मणाञ्चर्म्मभिः सह ।
कुद्दालरज्जुवेत्राणां पिटकानान्तथैव च ॥
इक्षुकाणाञ्च दात्राणामङ्गारस्य च सञ्चयः ।
सर्व्वेषां शिल्पभाण्डानां सञ्चयश्चात्र इष्यते ॥
वादित्राणाञ्च सर्व्वेषामौषधीनान्तथैव च ।
यवसानां प्रभूतानामिन्धनस्य च सञ्चयः ॥
गुड़ानां सुव्रतेलानां घीरसानान्तथैव च ।
वसानामथ मज्जानां स्नायूनामस्थिभिः सह ॥
गोचर्म्मपटहानाञ्च धान्यानां सर्व्वतस्तथा ।
तथैव पर्पटानाञ्च यवगोधूमयोरपि ॥
रत्नानां सर्व्ववस्त्राणां लोहानाञ्चाप्यशेषतः ।
कलायमुद्गमाषाणां चणकानां तिलैः सह ॥
तथा च सर्व्वशस्त्राणां पांशुगोमययोरपि ।
शुण्ठसर्व्वरसं भूर्जतुलाञ्चाच्च टङ्कणम् ॥
राजा सञ्चिनुयाद्दुर्गे यच्चान्यदपि किञ्चन ॥*॥
कुम्भाञ्चाशीविषाः कार्य्या व्यालसिंहादयस्तथा ।
नगाञ्च पक्षिणश्चैव विरुद्धा ये परस्परम् ॥
स्थानानि च विरुद्धानां सुगुप्तानि पृथक् पृथक् ।
कर्त्तव्यानि महाभाग ! यत्नेन पृथिवीक्षिता ॥
उक्तानि चाप्यनुक्तानि राजव्यायाशेषतः ।
सुगुप्तानि पुरे कुर्य्याच्चनानां हितकाम्यया ॥
जीवकर्षभकाकोलीक्षीरामलवयः परूषकम् ।
शालपर्णीं पृश्निपर्णीं सुद्गपर्णीं तथैव च ॥
माषपर्णीं च मेदे द्वे शारिवे द्वे बलाद्वयम् ।
वीरा चक्रान्ता दृष्टीरा दृश्यती कण्टकारिका ॥
भङ्गी शृङ्गाटकौ द्रोणी वर्षाभूर्भरणुका ।
मधुपर्णी विदार्य्यौ द्वे महाच्छत्रा महातपा ॥
धन्वना सह देवाह्वा कटुकैरण्डकं विषम् ।
पर्णाशुनाकगण्डीका फलशुष्कर्ष्यजशृङ्गिका ॥
शुक्रातिशुक्रकाश्मर्य्यच्छत्राच्छत्रवीरणाः ॥
इक्षुरिक्षुविकाराश्च क्षणिनाद्याश्च सत्तम ! ।
सिंही च सहदेवी च विश्वदेवाटरूषकम् ॥
मधुकं पुष्यकं साक्षा घृतपुष्पा मधूलिका ।
घृतावरीमधूके च पियालन्तालमेव च ॥
आत्मगुप्ता कट्फलाख्या दारदा राजशीर्षिका ।
राजसर्षपबन्धाकन्द्यप्रोक्ता तथोत्कटा ॥

कालशाकं पद्मबीजं गोवल्ली मधुवल्लिका ।
क्षीतपाकी कृष्णच्छाली काकजिङ्घोरुपत्रिका ॥
इक्षुरत्नपुरौ चोभौ गुञ्जारकपुनर्नवे ।
कट्फलका तु काश्मीरी विषशालूककेशरम् ॥
शूकधान्यानि सर्व्वाणि शमीधान्यानि यानि च ।
क्षीरं क्षौद्रं तथा शुक्रं मज्जा तैलं वसा घृतम् ॥
निकोचाभिशुकाम्लोटं वातामाराग्रमालकम् ।
एवमादीनि चान्यानि विज्ञेयो मधुरो गणः ॥
राजा सञ्चिनुयात् सर्व्वं पुरे निरवशेषतः ।
दाडिमाम्रातकाम्लाच्च निम्बिडीकाम्लवेतसम् ॥
भव्यं कर्कन्धु लकुचं करमर्दैकरूपकम् ।
बीजपूरककाश्मीरं मालती राजबन्धुकम् ॥
कौटकट्यपर्णानि द्वयोरम्लिकयोरपि ।
पारेवतं नागरङ्गं प्राचीनारुकमेव च ॥
कपित्थामलकौ चुक्रं फलं दन्तशठस्य च ।
लक्षीरं नवनीतञ्च सौवीरकतुषोदके ॥
सुरारसञ्च मद्यानि मरुत्तक्रदधीनि च ।
शुक्तानि चैव सर्व्वाणि ज्ञेयान्यम्लगणं द्विजाः ॥
एवमादीनि सर्व्वाणि राजा सञ्चिनुयात् पुरे ।
सैन्धवोद्भिदपाटेयपाक्यसाम्बुदरोमकम् ॥
कृष्णसौवर्चलविटं बालकेयं यवाह्वयम् ॥
औषसारं कालभसं विज्ञेयो लवणो गणः ।
एवमादीनि सर्व्वाणि राजा सञ्चिनुयात् पुरे ॥
पिप्पली पिप्पलीमूलं चव्यचित्रकनागरम् ।
कुटेरकं समरिचं शिग्रुभल्लातसर्षपाः ॥
कुलाजमोदा किणिही हिङ्गुसूलकधान्यकम् ।
कारवी कुञ्चिकाजाज्यः सुसवः कालमालिका ॥
फणिज्झकोऽथ लशुनं भूस्तृणं सुरसस्तथा ।
कायस्था च वयःस्था च हरितालं मनःशिला ॥
अगस्तिश्च रुदन्ती च रोहिषं कुङ्कुमं तथा ।
वचा सरलकाश्मीरं शल्लकी कुपुरा तथा ॥
सर्व्वपित्तानि सूत्राणि प्रायो हरितकानि च ।
सङ्कराणि च मूलानि पत्रिशाकविधानि च ॥
फलानि चैव च तथा सर्व्वेला हिङ्गुपत्रिका ।
एवमादीनि चान्यानि गणः कटुकसंज्ञकः ।
राजा सञ्चिनुयाद्दुर्गे प्रयत्नेन नृपोत्तम ! ॥
सुरुक्चन्दनदारेरकृतमालकदारवः ।
हरिद्रामलकोशीरं रक्तमालकवस्तुकम् ॥
दूर्व्वापटोलकटुकादन्तित्वक्पत्रकच्छुराः ।
किरातततिक्तकं निम्बं विषा चातिविषा तथा ॥
तालीशपत्रं नगरं सप्तपर्व्विकटुजाः ।
काकोदुम्बरकोदीच्यसुरसाः किणिही तथा ॥
यष्ट्यह्वा रोहिणी मांसी पर्पटं मदयन्तिका ।
रसाञ्जनं भृङ्गराजं पत्री परिपेलवम् ॥
द्रव्याणां गुरवो रामा श्यामाकं गन्धनाकुली ।
चतुष्पदां शालिनवमन्नका चतुरङ्गुला ॥
रम्भा चैव कृष्णपुष्पी तारास्फोता हरेणुका ।
वेत्राग्रो वेतसस्तुम्बी विषाणी लोहमञ्जनम् ॥
मालती करवितक्तास्था विषाणी शिखिका तथा ।
पर्पटश्च गुरुश्चैव गन्धस्तिक्तकसंज्ञकः ॥
एवमादीनि चान्यानि राजा सञ्चिनुयात् पुरे ।
क्षमायामम्बुदे शीते तथैव च विभीतकम् ॥
प्रियङ्गुधातकीपुष्पं मोचलोध्रार्জ্জुनासनाः ।
वनस्थान्नी सुरागङ्गा श्योनाकं कपिलं तथा ॥
भूर्जपत्रं शिलोद्भेदं पाटलापत्रलोमकम् ।
समङ्गा त्रिवृतामूलं कार्पासा गैरिकाञ्जनम् ॥
विदुमं समधूच्छिष्टं कुम्भीकाकुसुदोत्पलम् ।
न्यग्रोधोदुम्बराश्वत्थकिंशुका प्लक्षिपा शमी ॥
पियालपिप्पुका शालशिरीषं पद्मकन्तथा ।
विल्वोऽग्निमन्थः श्वेतश्च श्यामाकयवकोद्रवम् ॥
राजादनं करीरश्च धान्यकप्रियकौ तथा ।
शाकोटाशोकवदराः कदम्बखदिरद्वयम् ॥
एषां पत्राणि सारांणि मूलानि कुसुमानि च ।
एवमादीनि चान्यानि कषायाख्यो गणो मतः ॥
प्रयत्नेन नृपश्रेष्ठ ! राजा सञ्चिनुयात् पुरे ।
कीटाश्च मारणे योग्या अङ्गतायान्तथैव च ॥
वातधूमाम्बुमार्गाणां दूषणानि तथैव च ।
धार्य्याणि पार्थिवैर्दुर्गे तानि वक्ष्यामि भारत ! ॥
विधायान्वारणं कार्य्यं प्रयत्नेन महीभुजा ।
विचित्राश्च गदा धार्य्या विषघ्नमनास्तथा ॥
रक्षोभूतपिशाचघ्नाः पापघ्नाः पुष्टिवर्द्धनाः ।
कलाविदश्च पुरुषाः पुरे धार्य्याः प्रयत्नतः ॥
भीतान् प्रमत्तान् कुपितान् तथैव च विमानितान् ।
कृच्छ्रत्यान् प्रापशीलांश्च न राजा वासयेत् पुरे ॥
यन्त्रायुधाष्टालचयोपपन्नं
समग्रधान्यौषधिसंप्रयुक्तम् ।
वणिग्जनैश्चान्वितमावसेत
दुर्गं सुगुप्तं नृपतिः सदैव ॥"

इति मात्स्ये राजधर्म्मे दुर्गसम्पत्तिर्नाम १६१ अध्यायः ॥ * ॥ पुरे वर्জ্জनीयानि यथा,—
"पुरे कूपप्रतोली च परिखातोरणध्वजाः ।
प्रासादाश्चप्रपारामवापीवेश्याः सती त्वरी ॥"

इति कविकल्पलता ॥

अवशिष्टं नगरशब्दे द्रष्टव्यम् ॥

पुरः, पुं. (पिपर्त्तीति । पॄ + कः ।) गुग्गुलुः । इत्यमरः । २ । ४ । ३६ । (अस्य पर्य्यायो यथा,—
"गुग्गुलुर्देवधूपश्च षटायुः कौशिकः पुरः ।
कुम्भोलूखलकः क्लीवे महिषाक्षः पलङ्कषः ॥"
"अस्त्रं तीक्ष्णमजीर्णञ्च वातार्यं श्रममातपम् ।
मद्यं रोषन्तथैत् सम्यग्गुग्गुलार्थौ पुरोवकः ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
पीतभिक्षुटी । इति शब्दचन्द्रिका ॥

पुरः, [स्] अ, (पूर्व्वस्मिन् पूर्व्वस्मात् पूर्व्वौ वा एवं पूर्व्वस्याः पूर्व्वस्मायेत्यादि । पूर्व्व + "पूर्व्वाधरावराणामसि पुरधवश्चैषाम् ।" ५ । ३ । ३९ । इति असि तद्योगेन पुर् इत्यादेशश्च ।) अग्रतः । इत्यमरः । ३ । ४ । ७ । (यथा, कुमारे । ५ । ३ ।
"अयि जीवितनाथ ! जीवसी-
त्यभिधायोत्थितया तया पुरः ।
दृढमुरुभुजपञ्जरे कृतौ
हरकोपानलभस्म केवलम् ॥")

प्राच्यां दिशि । प्रथमे काले । (यथा, अभिज्ञानशाकुन्तले । ७ अङ्के ।

"उदेति पूर्व्वं कुसुमं ततः फलं
घनोदयः प्राक् तदनन्तरं पयः ।
निमित्तनैमित्तिकयोरयं विधि-
स्तव प्रसादस्य पुरस्तु सम्पदः ॥")

पुरार्थे । व्यतीते । इति त्रिकाण्डशेषः ॥
पुरःसर, त्रि, (पुरोऽग्रे सरति गच्छतीति । सृ + "पुरोऽव्ययोऽग्रेषु सर्व्से ।" ३ । २ । ११८ । इति टः ।) अग्रगामी । इत्यमरः । २ । ८ । ७२ ॥ (यथा, महाभारते । ४ । १६ । २२ ।
"यस्याः पुरःसरा ह्यासन् दृष्टयश्चानुयायिनः ।
साहमद्य सुदेष्णायाः पुरःपश्चाच्च गामिनी ॥")

अस्य पर्य्यायः अग्रसरशब्दे द्रष्टव्यः ॥
पुरञ्जन, पुं, (पुरं देहचैत्यं जनयतीति । जनि + बाहुलकात् डः ।) जीवः । यथा,—
"पुरुषं पुरञ्जनं विद्यात् यदुपनक्यात्मनः पुरम् ।
एकद्वित्रिचतुष्पादं बहुपादमपादकम् ॥"

इति श्रीभागवते । ४ । २६ । २ ॥
पुरञ्जनी, स्त्री, (पुरञ्जन + गौरादित्वात् ङीष् ।) बुद्धिः । यथा,—
"न विदाम वयं सम्यक् कर्त्तारं पुरुषर्षभ ! ।
आत्मनश्च परस्यापि गोत्रं नाम च यत्कृतम् ॥
राजन् ! मदीयाः सर्व्वे ते मामाहुश्च पुरञ्जनीम् ॥"
"बुद्धिन्तु प्रमदां विद्यान्ममाहमिति यत् कृतम् ।
यामधिष्ठाय देहेऽस्मिन् पुमान् भुङ्क्तेऽविभिर्गुणान् ॥"

इति श्रीभागवते । ४ स्कन्धे । २५ । २६ अध्यायौ ॥
पुरञ्जयः, पुं. (पुरं शत्रुपुरं जयतीति । जि + खच् ।) सूर्य्यवंशीयराजविशेषः । तत्पर्य्यायः । काकुत्स्थः २ । इति त्रिकाण्डशेषः ॥ (यथा, भागवते । ९ । ६ । १२ ।
"पितर्य्यूरुतेऽभवत् विकुक्षिः पृथिवीमिमाम् ।
शशादौ हरिं यज्ञैः शशाद इति विश्रुतः ॥
पुरञ्जयस्तस्य सुत इन्द्रवाह इतीरितः ।
ककुत्स्थ इति चाप्युक्तः शृणु नामानि कर्म्मभिः ॥")

पूरुवंशीयः पुरञ्जयपुत्रः । यथ हरिवंशे । ३१ । १८ ।
"पुरञ्जयस्याभवत् पुत्रो वीरो राजा पुरञ्जयः ।
जनमेजयो महाराज ! पुरञ्जयसुतोऽभवत् ॥")

पुरं जयतीति । पुर + जि + खच् ।) पुरञ्जय-कर्त्तरि, त्रि ॥ (यथा, महाभारते । १ । १०२ । ४५ ।
"खाण्डवे तेऽपि राष्ट्राणि भक्षयुः परपुरञ्जय ! ।")

पुरट, क्ली, (पुरति अग्रे गच्छतीति । पुर + बाहुलकात् अटन् ।) सुवर्णम् । यथा,—
"हरिः पुरटसुन्दरद्युतिकदम्बसन्दीपितः
सदा हृदयकन्दरे स्फुरतु वः श्रियीनन्दनः ॥"

इति विद्धशालभञ्जिकायाम् ॥
पुरण, पुं, (पिपर्त्ति पूर्य्यते वेति । पॄ पालनादौ + "कृञ्चृदृशिमन्दिनिधाञः क्युः ।" उणा० २७८ । इति क्युः । उकारश्चकारश्च ।) रसुनः । रसुनादिकोषः ॥

पुरतः, [स्] अ, (पुरति अग्रे गच्छतीति। पुर्+वाहुलकात् अतसुच्।) अग्रतः। इत्यमरः।३।४।७॥ (यथा, राजतरङ्गिण्याम्। १। १०७।
"निर्गते मञ्जरीकुञ्जादपश्यत् पुरतस्ततः।
कन्ये नीलनिचोलिन्यौ स केचिच्चारुलोचने॥")

पुरतटी, स्त्री, (पुरस्थिता तटीव।) हट्टी। क्षुद्रहट्टः। इति हारावली। १६४॥

पुरद्वारं, क्ली, (पुरस्य द्वारम्।) नगरद्वारम्। तत्पर्य्यायः। गोपुरम् २। इत्यमरः।२।२।१६॥ (यथा, मनुः। ५। ६२।
"इन्द्रियेण हृतं शूद्रं पुरद्वारेण निर्हरेत्।
पश्चिमोत्तरपूर्व्वेषु यथायोगं द्विजन्मनः॥")

पुरद्विट्, [ष्] पुं, (पुरं द्वेष्टीति। द्विष्+क्विप्। मयनिर्म्मितानां पुरविशेषाणां दाहकत्वादस्य तथात्वम्।) शिवः। इति जटाधरः॥ (यथा, भागवते। ४। ६। ७।
"स इत्थमादिश्य सुरानजस्तु तैः
समन्वितः पितृभिः सप्रजेशैः।
ययौ सधिष्ण्याग्निलयं पुरद्विषः
कैलासमद्रिप्रवरं प्रियं प्रभोः॥")

पुरन्दरं, क्ली, (पुर्+दारि+खच्।) चविकम्। इति शब्दचन्द्रिका॥

पुरन्दरः, पुं, (अरीणां पुरो दारयतीति। दृ+णिच्+"पूःसर्व्वयोर्दारिसहोः।" ३।२।४१। इति खच्। "वाचं यमपुरन्दरौ च।" ६।३।६१। इति निपातितः।) इन्द्रः। इत्यमरः।१।१।४४॥ (यथा, महाभारते। ३। १०१। ६।
"कालेयभयसन्त्रस्तो देवः साक्षात् पुरन्दरः।
जगाम शरणं शीघ्रं तन्तु नारायणं प्रभुम्॥"
पुरं गेहं दारयतीति। दारि+खच्। निपातितः।) चौरः। यथा,—
"समांसमीना यदि पाकशाला
समांसमीना दश धेनवः स्युः।
पुरन्दरस्यापि विषयं यदि स्यात्
पुरन्दरस्यापि पुरं न याचे॥"
इत्युद्भटः॥

पुरन्दरा, स्त्री, (पुरं दारयति प्रवाहैरिति। दारि+खच्। निपातनात् साधुः। ततष्टाप्।) गङ्गा। इति हारावली॥

पुरन्ध्रिः, स्त्री, (स्वजनसहितं पुरं धारयतीति। धृञ्+खच्। गौरादित्वात् ङीष्। पृषोदरादित्वात् ह्रस्वो वा।) पतिपुत्रदुहित्रादिमती। इति भरतः॥ तत्पर्य्यायः। कुटुम्बिनी। इत्यमरः।२।६।६॥ (यथा, रघुः।७।२८।
"तौ स्नातकैर्बन्धुमता च राज्ञा
पुरन्ध्रिभिश्च क्रमशः प्रयुक्तम्।
कन्याकुमारौ कनकासनस्थौ
आर्द्राचतारोपणमन्वभूताम्॥")
स्त्रीमात्रम्। इति राजनिर्घण्टः॥

पुरश्चरणं, क्ली, (पुरोऽग्रतश्चरणं मन्त्रजपादिपञ्चाङ्गकर्म्माचरणमिति।) पुरस्क्रिया। सा तु स्वेष्टदेवतामन्त्रसिद्ध्यर्थं तद्देवतापूजापूर्व्वकं तन्मन्त्रजपहोमतर्पणाभिषेकब्राह्मणभोजनरूपपञ्चाङ्गकसाधना। यथा, योगिनीहृदये।
"गुरोराज्ञां समादाय शुद्धान्तःकरणो नरः।
ततः पुरस्क्रियां कुर्य्यान्मन्त्रसंसिद्धिकाम्यया॥
जीवहीनो यथा देही सर्व्वकर्म्मसु न क्षमः।
पुरश्चरणहीनोऽपि तथा मन्त्रः प्रकीर्त्तितः॥
तस्मादादौ स्वयं कुर्य्यात् गुरुं वा कारयेद्बुधः।
गुरोरभावे विप्रं वा सर्व्वप्राणिहिते रतम्॥
स्निग्धं शास्त्रविदं मित्रं नानागुणसमन्वितम्॥
स्त्रियं वा सद्गुणोपेतां सपुत्रां विनियोजयेत्॥
आदौ पुरस्क्रियां कर्त्तुं स्थाननिर्णय उच्यते॥"
योगिनीहृदये।
"पुण्यक्षेत्रं नदीतीरं गुहापर्व्वतमस्तकम्।
तीर्थप्रदेशाः सिन्धूनां सङ्गमः पावनं वनम्॥
उद्यानानि विविक्तानि विल्वमूलं तटं गिरेः॥
तुलसीकाननं गोष्ठं वृषशून्यं शिवालयम्॥
अश्वत्थामलकीमूलं गोशालाजलमध्यतः।
देवतायतनं कूलं समुद्रस्य निजं गृहम्॥
साधनेषु प्रशस्तानि स्थानान्येतानि मन्त्रिणाम्।
अथवा निवसेत्तत्र यत्र चित्तं प्रसीदति॥"* ॥
तथा।
"गृहे जपगुणं विद्यान्नद्यां लक्षगुणं भवेत्।
कोटिर्देवालये पुण्यमनन्तं शिवसन्निधौ॥
म्लेच्छदुष्टगवालशङ्कातङ्कविवर्ज्जिते।
एकान्तभावने निन्दारहिते भक्तिसंयुते॥
सुदेशे धार्म्मिके देशे सुभिक्षे निरुपद्रवे।
रम्ये भक्तजनस्थाने निवसेत् तापसः प्रिये!॥
गुरूणां सन्निधाने च चित्तैकाग्र्यस्थले तथा।
एषामन्यतमस्थानमाश्रित्य जपमाचरेत्॥
यत्र ग्रामे जपेन्मन्त्री तत्र कूर्म्मं विचिन्तयेत्॥"
गौतमीये।
"पर्व्वते सिन्धुतीरे वा पुण्यारण्ये नदीतटे।
यदि कुर्य्यात् पुरश्चर्य्यां तत्र कूर्म्मं न चिन्तयेत्॥"
विल्वमूलादावपि कूर्म्मचिन्ता नास्ति तदुक्तं वैश्वम्यायनसंहितायाम्।
"पुण्यक्षेत्रं गृहे तीर्थं देवतायतनं शुभम्।
नदीतीरं तथा सिन्धुसङ्गमोऽतिमनोहरः॥
पर्व्वतस्य गुहायाश्च तथा पर्व्वतमस्तकम्।
विल्वमूलं समुद्रस्य वनमुद्यानमेव च॥
एषु स्थानेषु विप्रेन्द्र! कूर्म्मचक्रं न चिन्तयेत्।
ग्रामे वा यदि वा वास्तौ गृहे तत्र विचिन्तयेत्॥"

अथ पुरश्चरणे भक्ष्यादिनियमः।
गौतमीये।
"पुरश्चरणकर्त्ता तु भक्ष्याभक्ष्यं विचारयेत्।
अन्यथा भोजनाद्दोषात् सिद्धिहानिः प्रजायते॥
शुद्धान्नञ्च समश्नीयात् मन्त्रसिद्धिसमीहया।
तस्मान्नित्यं प्रयत्नेन शुद्धान्नाशी भवेन्नरः॥"
अगस्त्यसंहितायाम्।
"दधि क्षीरं घृतं गव्यं ऐक्षवं गुडवर्ज्जितम्।
तिलाश्चैव सिता शुद्धाः कन्दः केसुकवर्ज्जितः॥
नारिकेलफलञ्चैव कदली लवली तथा।
आम्रमामलकञ्चैव पनसञ्च हरीतकी॥
व्रतान्तरे प्रशस्तञ्च हविष्यं मन्यते बुधैः॥"
व्रतान्तर इति।
"हैमन्तिकं सिताक्लिन्नं धान्यं शुद्धास्तिला यवाः।
कलायकङ्गुनीवारा वास्तूकं हिलमोचिका॥
षष्टिका कालशाकञ्च मूलकं केसुकेतरत्।
लवणे सैन्धवसाम्रे गव्ये च दधिसर्पिषी॥
पयोऽनुद्धृतसारञ्च पनसाम्रहरीतकी।
पिप्पली जीरकञ्चैव नागरङ्गञ्च तिन्तिड़ी॥
कदलीलवलीधात्रीफलानिगुड़मैक्षवम्।
व्रतेऽपक्वं सुनयो हविष्यान्नं प्रचक्षते॥
शुद्धानो वा हविष्यान्नं शाकं यावकमेव वा।
पयो मूलं फलं वापि यत्र यत्रोपलभ्यते॥
रम्भाफलं तिन्तिड़ीकं कमला नागरङ्गकम्।
फलान्येतानि भोज्यानि एभ्योऽन्यानि विवर्ज्जयेत्॥"
यत्तु योगिनीतन्त्रे।
"चिञ्चाञ्च नालिकाशाकं कलावं लकुचं तथा।
कदम्बं नारिकेलञ्च व्रते कुष्माण्डकं त्यजेत्॥"
तत्तु व्रतान्तरे बोध्यम्। चिञ्चा तिन्तिड़ी॥ * ॥

अथ वर्ज्यानि।
"विवर्ज्जयेन्मधु चारलवणं तैलमेव च।
ताम्बूलं कांस्यपात्रञ्च दिवाभोजनमेव च॥"
तथा।
"चारञ्च लवणं मांसं गञ्जनं कांस्यभोजनम्।
माषाढ़कीमसूरांश्च कोद्रवांश्चणकानपि॥
अन्नं पर्य्युषितञ्चैव निःस्नेहं कीटदूषितम्॥"
रामार्च्चनचन्द्रिकायाम्।
"मैथुनं तल्पशयनं तन्नेष्टीः परिवर्ज्जयेत्।
ऋतुकालं विना मन्त्री स्त्रियं नैव गच्छति॥
लवणञ्च पलञ्चैव क्षारं क्षौद्रं रसान्तरम्।
कौटिल्यं चौरमभ्यङ्गमनिवेदितभोजनम्॥
असङ्कल्पितकृत्यञ्च वर्ज्जयेन्मर्दनादिकम्।
स्नायाच्च पञ्चगव्येन केवलामलकेन वा॥
मन्त्रजप्तान्नपानीयैः स्नानाचमनभोजनम्।
कुर्य्यादुभयोक्तविधिना त्रिसन्ध्यं देवतार्च्चनम्॥
अपवित्रकरो नग्नः शिरसि प्रावृतोऽपि वा।
प्रलपन् प्रजपेद्यावत्तावत् निष्फलमुच्यते॥"
नारदीये।
"स्नेहं सोष्मं सुपक्वञ्च कुर्य्याह्ने लघु भोजनम्।
नेन्द्रियाणां यथा वृद्धिस्तथा भुञ्जीत साधकः॥"
कुलार्णवेऽपि।
"यस्यान्नपानपुष्टाङ्गः कुरुते धर्म्मसञ्चयम्।
अन्नदातुः फलस्यार्द्धं कर्त्तुरर्द्धं न संशयः॥
तस्मात् सर्व्वप्रयत्नेन परान्नं वर्ज्जयेत् सुधीः।
पुरश्चरणकालेषु सर्व्वकर्म्मसु शाम्भवि!॥
जिह्वा दग्धा परान्नेन करौ दग्धौ प्रतिग्रहात्।
परस्त्रीभिर्म्मनो दग्धं कथं सिद्धिर्व्वरानने!॥"
परान्नं भिक्षितेतरविषयम्। भिक्षायां तस्य स्वत्वोत्पादात्। तथा च।
"वैदिकाचारयुक्तानां शुचीनां श्रीमतां सताम्।
सत्कुलस्थानजातानां भिक्षाशी चाग्रजन्मनाम्॥

विहाय वह्निं नहि वस्तु किञ्चित्
स्वार्थं परेभ्यः सति सम्भवे च।
अस्मिन्नये नीर्थमधिक्षिपन्तान्
पर्यायनिष्ठे प्रतिलक्ष्य शप्तान्॥
तत्रासमर्थोऽहृदिदं विचिन्त्य
यावेन यावद्दिनमावभेत्स्यम्।
मुञ्चानि रागादधिकं न सिद्धिः
प्रजायते कल्पशतेरपि स्म॥ * ॥

सकृदुच्चरिते ग्रन्थे प्रणवं सप्तधोरयेत्।
प्रोक्ते पारणवे ग्रन्थे प्राणायामं सकृद्धरेत्॥
वह्निप्रायौ व्याचम्य तस्मात्स्नानं ततो जपेत्।
च्युतोष्ठैवं तथास्नुवन्यानानां सर्पणेन च॥
एवमादौच नियमान् पुरश्चरणकृद्धरेत्॥
किन्तूक्तोत्तरगङ्गादियुक्तः कर्म करोति यत्।
तथार्चनादिकं सर्वमयविघ्नं भवेत्प्रिये!॥
मलिनाम्बरकेशादिसुरदौर्मन्यसंयुतः।
यो जपेत्तं दहत्याशु देवता गुप्तिसंस्थिता॥
व्यालस्यं घूर्णनं निद्रां च्युतं निष्ठीवनं भयम्।
नीचाङ्गस्पर्शनं कोपं जपकाले विवर्जयेत्॥ * ॥
एवमुक्तविधानेन विलम्बं त्वरितं विना।
उक्तसंख्यं जपं कुर्यात् पुरश्चरणसिद्धये॥
देवतागुरुमन्त्राणामैक्यं सम्भावयन् धिया।
जपेदेकमनाः प्रातःकालं मध्यन्दिनावधि॥
यत्मङ्ख्या समारब्धं तत् कर्तव्यं दिने दिने।
यदि न्यूनाधिकं कुर्यात् व्रतभ्रष्टो भवेन्नरः॥"
सुप्तमालायाम्।
"यत्सङ्ख्या समारब्धं तत् जप्तव्यं दिने दिने।
न्यूनाधिकं न कर्तव्यमानमात्रं सदा जपेत्॥
प्रजपेदुक्तसङ्ख्यायाश्चतुर्गुणजपं कलौ॥"
अन्यत्रापि।
"कृते जपस्तु कथितस्तेतायां हिगुणो मतः।
द्वापरे त्रिगुणः प्रोक्तश्चतुर्गुणजपः कलौ॥"
कुलार्णवेऽपि।
"न्यूनातिरिक्तकर्माणि न फलन्ति कदाचन।
यथाविधिकृतान्येव सत्कर्माणि फलन्ति हि॥
भूम्यां शय्याचरित्वं मौनमाचार्यसेविता।
नित्यपूजा नित्यदानं देवतास्तुतिकीर्तनम्॥
नित्यं विजयनं स्नानं क्षुद्रकर्मविवर्जनम्।
नैमित्तिकार्थनत्वेव विश्वासो गुरुदेवयोः॥
जपनिष्ठा दशैतेते धर्माः स्युर्मन्त्रसिद्धिदाः॥
स्त्रीशूद्रपतितान्यैर्नास्तिकोच्छिष्टभाषणम्।
असत्यभाषणं नित्यभाषणं परिवर्जयेत्॥
सर्वेष्वपि न भाषेत जपहोमार्चनादिषु।
अन्यथानुचितं सर्वं भवत्येव निरर्थकम्॥
पुरश्चरणकाले तु यदि स्यान्मूत्रमूलकम्।
तथा च क्षुतमूत्रस्तो व्रतं नैव परित्यजेत्॥"
योगिनीहृदये।
"सूर्योदयास्तमध्यायां सुचिरक्षणरः सदा।
प्रजपेत् सान्त्वयेत् शत्रूनेकाकी निर्भयः सदा॥
असत्यभाषणं पापं दुष्टानां परिवर्जयेत्।
वर्जयेत्तीर्थयात्रादिव्रतं दुष्टदर्शनम्॥
आर्द्रं वस्त्रमधौतञ्च पुष्पाद्यारुहणेन च।
तत्तैर्दुग्धोदकस्नानमन्यदेवप्रपूजनम्॥"
तत्रैव।
"नैकवासा जपेन्मन्त्रं बहुवासाश्चलोऽपि वा॥"
वैश्म्पायनसंहितायाम्।
"विघ्नांसं न कुर्याच्च कदाचिदपि मोहतः।
उपस्थो वह्निरंस्ये पुरश्चरणक्षतरः॥
पतितानामन्त्यजानां दर्शने भाषणे श्रुते।
च्युतेऽधोवायुगमने नृमत्रौ जपमुत्सृजेत्॥
तथा तस्य च तन्मात्रौ प्राणायामं षडङ्गकम्।
कृत्वा सम्यक् जपेत् शेषं यदा सूर्योदिदर्शनम्॥"
आदिशब्दाद्वह्निं आत्मनश्च॥ * ॥ तन्मान्तरे।
"मनःसंहरणं शौचं मौनं मन्त्रार्थचिन्तनम्।
अक्षयत्वमनिर्वेदो जपसम्पत्तिहेतवः॥ * ॥
उष्णीषी कञ्चुकी नग्नो मुक्तकेशो गणाहतः।
अपवित्रकरोऽशुद्धः प्रलपन्न जपेत् क्वचित्॥
अनामनः अध्वानौ वा गच्छन् भुञ्जान एव वा।
अप्राहृतौ करौ कृत्वा शिरसा प्राहृतोऽपि वा॥
चिन्तायाकुलचित्तो वा क्षुधो मान्तः क्षुधान्वितः।
रथ्यायामश्वस्थाने न जपेत्तिमिरालये॥
उपानद्गूढपादो वा यानशय्यागतोऽपि वा।
प्रसार्य न जपेत् पादावुत्कटासन एव च।
न यज्ञकाष्ठे पाषाणे न भूमौ नासने स्थितः॥"
तथा।
"मार्ज्जारं कुक्कुटं क्रौञ्चं श्वानं गृध्रं कपिं खरम्।
दृष्ट्वाचम्य जपेत् शेषं स्पृष्ट्वा स्नानं विधीयते॥"
सर्वत्र जपे त्वयं नियमः॥ मानसे तु नियमो नास्त्येव। तथा च।
"अशुचिर्वा शुचिर्वापि गच्छंस्तिष्ठन् स्वपन्नपि।
मन्त्रैकशरणो विद्वान् मनसैव सदाभ्यसेत्॥
न दोषो मानसे जाप्ये सर्वदेशेऽपि सर्वदा॥"
श्यामादिजपे तु तत्तन्मन्त्रे विशेषो वक्तव्यः॥
जपफलमाह शिवधर्मे।
"जपनिष्ठो द्विजश्रेष्ठोऽखिलयज्ञफलं लभेत्।
सर्वेषामेव यज्ञानां जायतेऽसौ महाफलः॥
जपेन देवता नित्यं स्तूयमाना प्रसीदति।
प्रसन्ना विपुलान् कामान् दद्यान्मुक्तिञ्च शाश्वतीम्॥"
पाद्मे।
"यक्षरक्षःपिशाचाश्च सर्पाश्च भीषणाः।
जापिनं नोपसर्पन्ति भयभीताः समन्ततः॥"
पाद्मनारदीययोः।
"यावन्तः कर्मयज्ञाः स्युः प्रदिष्टानि तपांसि च।
सर्वे ते जपयज्ञस्य कलां नार्हन्ति षोडशीम्॥
माहात्म्यं वाचिकस्तेत्यजपयज्ञस्य कीर्तितम्।
तस्माच्छतगुणोपांशुः सहस्रो मानसः स्मृतः॥"
तथा तत्रै।
"मानसः सिद्धिकामानां पुष्टिकामैरुपांशुकः।
वाचिको मारणे चैव प्रशस्तो जप ईरितः॥"
गौतमीये।
"श्रद्धया विजयनं स्नानमन्यथा दिः सकृच्च वा।
विजयं प्रजपेन्मन्त्रं पूजनं तत्समं भवेत्॥"
मन्त्रार्थचये पूजाङ्गत्वाज्जपमशीत्युत्तरशतमित्यर्थः॥
"एकदा वा भवेत् पूजा न जपेत् पूजनं विना।
जपान्ते वा भवेत् पूजा पूजान्ते वा जपेन्मनुम्॥
प्रातःकालं समारभ्य जपेन्मध्यन्दिनावधि॥"
मध्यन्दिनावधीति न नियमपरं किन्त्वधिककालव्यवच्छेदपरम्। अन्यथा तन्मयजपनियमे कदाचित् जिह्वाया आध्माजाद्योन वा प्रतिनियतदिवसीयजपसङ्ख्याया अपूर्णत्वे अधिकत्वे वा नियमभङ्गः स्यात्॥ * ॥
"मनः संहृत्य विषयान्मन्त्रार्थगतमानसः।
न द्रुतं न विलम्बञ्च जपेन्नौक्तिकपंक्तिवत्॥ * ॥
जपः स्यादक्षरावृत्तिर्मानसोपांशुवाचिकैः।
धिया यदक्षरश्रेणीं वर्णस्वरपदात्मिकाम्॥
उच्चरेदर्थमुद्दिश्य मानसः स जपः स्मृतः॥"
मन्त्रनिर्णये।
"मानसं मन्त्रवर्णस्य चिन्तनं मानसः स्मृतः।
जिह्वोष्ठौ चालयेत् किञ्चिद्देवतागतमानसः॥
किञ्चित् श्रवणयोग्यः स्यात् उपांशुः स जपः स्मृतः।
मन्त्रसुच्चारयेद्वाचा वाचिकः स जपः स्मृतः॥
उच्चैर्जपाद्विशिष्टः स्यादुपांशुर्दशभिर्गुणैः।
जिह्वाजपः शतगुणः सहस्रो मानसः स्मृतः॥"
प्रकारान्तरम्।
"निजकर्णागोचरो यो मानसः स जपः स्मृतः।
उपांशुर्निजकर्णस्य गोचरः स प्रकीर्तितः॥
निगदस्तु जनैर्यस्त्रिविधोऽयं जपः स्मृतः॥"
तत्रान्तरे।
"उच्चैर्जपोऽधमः प्रोक्त उपांशुर्मध्यमः स्मृतः।
उत्तमो मानसो देवि! त्रिविधः कथितो जपः॥"
जिह्वाजपस्तु।
"जिह्वाजपः न विज्ञेयः केवलं जिह्वया बुधैरिति॥"
अतिविलम्बातिशीघ्रजपे दोषमाह।
"अतिह्रस्वो व्याधिहेतुरतिदीर्घो वसुक्षयः।
अक्षराक्षरसंयुक्तं जपेन्नौक्तिकहारवत्॥
मनसा यः स्मरेत् स्तोत्रं वचसा वा मनुं जपेत्।
उभयं निष्फलं याति भिन्नभाण्डोदकं यथा॥"
गौतमीये।
"प्रभुभावे स्थिता मन्त्राः केवला वर्णरूपिणः।
सौख्यध्वन्युचरिताः प्रभुत्वं प्राप्नुवन्ति ते॥"
पाद्मनारदीययोः।
"मन्त्राक्षराणि चिच्छक्तौ प्रोतानि परिभावयेत्।
तामेव परमव्योमि परमाख्यतरंहिते॥
दर्शयत्यात्मसद्भावं पूजाहोमादिभिर्विनेति।"
गौतमीये दशाक्षरपटले।
"मूलमन्त्रं प्राणबुद्ध्या समुच्चार्यमूलदेशगैः।
मन्त्रार्थं तस्य चैतन्यं भावं ध्यात्वा पुनः पुनः॥
कुलार्णवेऽपि।
"मनोऽन्यत्र शिवोऽन्यत्र शक्तिरन्यत्र मारुतः।
न सिद्ध्यति वरारोहे! कल्पकोटिशतैरपि॥
शतसहस्रकमादौ स्यादन्ते च शतसहस्रकम्।
सहस्रद्वयसंयुक्तो यो मन्त्रः स न सिद्ध्यति॥
गुरोस्तद्दत्तं कृत्वा मन्त्रं यावच्चमेद्विधा।

स्तकद्वयनिर्मुक्तः स मन्त्रः सर्व्वसिद्धिदः ॥
जातस्तकमादौ स्याच्छृतस्तकमन्ततः ।
स्तकद्वयनिर्मुक्तो मन्त्रः सिद्ध्यति नान्यथा ॥"
तत्रैव ।
"तस्माद्देवि ! प्रयत्नेन ध्रुवेण पुटितं मनुम् ।
अष्टोत्तरशतं वापि सप्तवारं जपादितः ॥
जपान्ते च तथा जप्यात् चतुर्व्वर्गफलाप्तये ॥"
तत्रैव ।
"ब्रह्मबीजं मनोर्द्धृत्वा चाद्यन्ते परमेश्वरि ! ।
सप्तवारं जपेन्मन्त्रं स्तकद्वयशुद्धये ॥ * ॥
मन्त्रार्थं मन्त्रचैतन्यं योनिमुद्रां न वेत्ति यः ।
शतकोटिजपेनापि तस्य सिद्धिर्न जायते ॥
लुप्तबीजाश्च ये मन्त्रा न दास्यन्ति फलं प्रिये ! ।
मन्त्राश्चैतन्यसहिताः सर्व्वसिद्धिकराः स्मृताः ॥
चैतन्यरहिता मन्त्राः प्रोक्ता वर्णास्तु केवलम् ।
फलं नैव प्रयच्छन्ति लक्षकोटिजपैरपि ॥
मन्त्रोच्चारे कृते यादृक् स्वरूपं प्रथमं भवेत् ।
शते सहस्रे लक्षे वा कोटिजापे न तत्फलम् ॥
हृदये ग्रन्थिभेदश्च सर्व्वावयवबर्द्धनम् ।
आनन्दाश्रुणि पुलको देहावेशः कुलेश्वरि ! ॥
गद्गदोक्तिश्च सहसा जायते नात्र संशयः ।
सकृदुच्चरितेऽप्येवं मन्त्रे चैतन्यसंयुते ॥
दृश्यन्ते प्रत्यया यत्र पारम्पर्य्ये तदुच्यते ॥ * ॥
मासमात्रं जपेन्मन्त्रं भूतलिप्या तु संपुटम् ।
क्रमोत्क्रमात् सहस्रञ्च तस्य सिद्धो भवेन्मनुः ॥"
तत्र भूतलिपिः ।
"पञ्च हृस्वाः सन्धिवर्णा ओंकाराग्निजलन्धराः ।
अन्त्यमाद्यं द्वितीयञ्च चतुर्थं मध्यमं क्रमात् ॥
पञ्चवर्गाश्चराश्च स्युर्व्वान्तश्चेतेन्दुभिः सह ।
एषा भूतलिपिः प्रोक्ता द्विचत्वारिंशदक्षरैः ॥
मन्त्रस्तु ।
अ इ उ ऋ ऌ ए ऐ ओ औ ह य र व ल ङ
क ख घ ग अ च छ झ ज ण ट ठ ड न त
थ ध द म प फ भ व ष ष सः ।
अतः परं मन्त्रसुद्धार्य्य पुनः क्रमेणोल्लेखम् ॥ * ॥
गौतमीये ।
"एवं जपं पुरा कृत्वा तेजोरूपं समर्पयेत् ।
देवस्य दक्षिणे हस्ते कुशपुष्पार्घ्यवारिभिः ॥
सफलं तदिहार्थायैवं प्राणायामं समाचरेत् ।
जपस्यादौ जपान्ते च चिन्तयं चिन्तयं चरेत् ॥" * ॥
शक्तिविषये देया वामहस्ते । तथा च ।
"एवं जपं पुरा कृत्वा गत्वाचमनकुशोदके ।
जपं समर्पयेद्देव्या वामहस्ते विचक्षणः ॥ * ॥
जपान्ते प्रत्यहं मन्त्री होमयेत्तद्दशांशतः ।
तर्पणाद्यभिषेकस्य तत्तद्दशांशतो सुने ! ॥
प्रत्यहं भोजयेद्विप्रान् न्यूनाधिकपशान्तये ।
अथवा सर्व्वपूर्त्तौ च होमादिकमथाचरेत् ॥
सम्पूर्णायां प्रतिज्ञायां तर्पणादिकमाचरेत् ॥"
सुरूढमालायाम् ।
"यस्य यावान् जपः प्रोक्तस्तद्दशांशमनुक्रमात् ।
तत्तद्दैवेऽपयस्यान्ते होमं कुर्य्यादिने दिने ॥"
जपसङ्ख्यायां विशेषमाह सुरूढमालायाम् ।
नाचतेर्हस्तपर्व्वैर्वा न धान्येन च पुष्पकैः ।
न चन्दनैर्मृत्तिकया जपसङ्ख्यान्तु कारयेत् ॥
लाक्षाकुशोदसिन्दूरं गोमयञ्च करीषकम् ।
विलोड्य गुटिकां कृत्वा जपसङ्ख्यान्तु कारयेत् ॥"
पुरश्चरणचन्द्रिकायाञ्च ।
"ततो जपदशांशेन होमं कुर्य्याद्दिने दिने ।
अथवा लक्षसङ्ख्यायां पूर्णायां होममाचरेत् ॥"
तथा । होमाद्यशक्तौ च सनत्कुमारीये ।
"यद्यदङ्गं भवेद्धीनं तत्तत्सङ्ख्यादिगुणो जपः ।
होमाभावे जपः कार्य्यो होमसङ्ख्यात्तुगुणः ॥
विप्राणां क्षत्रियाणाञ्च रससङ्ख्यागुणः स्मृतः ।
वैश्यानां वसुसङ्ख्याकमेषां स्त्रीणामयं विधिः ॥
यं वर्णमाश्रितः शूद्रः स च तस्य विधिश्चरेत् ।
अनाश्रितस्य शूद्रस्य दिक्सङ्ख्याकः समीरितः ।
शूद्रस्य विप्रभृत्यस्य तत्पत्न्याः सदृशो जपः ॥"
अत्राप्यशक्तश्चेत् योगिनीहृदये ।
"होमकर्म्मण्यशक्तानां विप्राणां द्विगुणो जपः ।
इतरेषान्तु वर्णानां त्रिगुणादिः समीरितः ॥"
त्रिगुणादिः होमसङ्ख्यात्रिगुणजपः क्षत्रियेण कार्य्यः । वैश्येन चतुर्गुणः । शूद्रेण पञ्चगुणः ।
तदुक्तं कुलार्णवे ।
"यद्यदङ्गं विहीनं स्यात् तत्तत्सङ्ख्यादिगुणो जपः ।
कुर्व्वीत त्रिचतुःपञ्च यथासङ्ख्यं द्विजादयः ॥"
एतेन स्त्रीशूद्राणां होमाधिकारः । तथा च ।
"वह्निनामर्द्धशशाङ्ककोणं चास्रं भवति शूद्राणाम् ।"
इति नागभट्टनिबन्धे ॥
शूद्राणां चास्रमिति कुब्जिकाप्रकरणे सारदायाम् ॥
स्त्रीणां होमाधिकारश्च तत्र ।
"लाजैस्त्रिमधुरोपेतैर्होमः कन्यां प्रयच्छति ।
अनेन विधिना कन्या वरमाप्नोति वाञ्छितम् ॥"
अतः स्त्रीणां होमाधिकारः । तच्च ब्राह्मणद्वारा । तथा च तन्त्रे ।
"ओङ्कारोच्चारणाद्धोमात् शालग्रामाग्निलाभैनात् ।
ब्राह्मणीगमनाच्चैव शूद्रत्वाच्छालतां व्रजेत् ॥"
इति साक्षान्निषेधात् ।
तथा स्त्रीणामपि सर्व्ववैदिककर्म्मसु शूद्रतुल्यत्वप्रतिपादनात् ।
स्त्रीशूद्रकरसंस्पर्शो वज्रपातसमो मम ॥
इति भगवद्वचनाच्च ॥ तथा च नारायणकल्पे ।
"अष्टाक्षरो महामन्त्रः सप्तार्णः शूद्रयोषितोः ।
प्रणवादिश्च यो मन्त्रो न स्त्रीशूद्रे प्रशस्यते ॥"
इति सर्व्वत्र स्त्रीणां शूद्रवदाचारः ॥ * ॥
शूद्रस्यापि स्वकर्त्तृकहोमः । तथा च वाराहीतन्त्रे ।
"यदि कामी भवत्येव शूद्रोऽपि होमकर्म्मणि ।
वह्निजायां परित्यज्य हृदयान्तेन होमयेत् ॥"
सर्व्वेषां वा द्विगुणो जपः । तथा च वाग्भिदे ।
"यद्यदङ्गं विहीयेत तत्तत्सङ्ख्यादिगुणो जपः ।
कर्त्तव्यश्चाङ्गसिद्ध्यर्थं तदशक्तेन भक्तितः ॥
न चेदङ्गं विहीयेत तद्विशिष्टमवाप्नुयात् ।
विप्रभोजनमात्रेण यज्ञं साङ्गं भवेत् ध्रुवम् ॥
यत्र सूक्ते द्विजस्तस्मात्तत्र सूक्ते हरिः स्वयम् ॥"
तथा अगस्त्यसंहितायाम् ।
"यदि होमेऽप्यशक्तः स्यात् पूजायां तर्पणेऽपि वा ।
तावत्सङ्ख्याजपेनैव ब्राह्मणाराधनेन च ॥
भवेदङ्गहवेनैव पुरश्चरणमार्य्य वै ॥" * ॥
वीरतन्त्रे ।
"नियमः पुरुषे ज्ञेयो न योषित्सु कथञ्चन ।
न न्यासो योषितामत्र न ध्यानं न च पूजनम् ॥
केवलं जपमात्रेण मन्त्राः सिद्ध्यन्ति योषिताम् ॥"
ततश्च ।
"गुरवे दक्षिणां दद्यात् भोजनाच्छादनादिभिः ।
गुरुसन्तोषमात्रेण मन्त्रसिद्धिर्भवेत् ध्रुवम् ॥" * ॥
तथा च योगिनीहृदये ।
"गुरोरभावे पुत्राय तत्पत्न्यै वा निवेदयेत् ।
तयोरभावे देवेशि ! ब्राह्मणेभ्यो निवेदयेत् ॥
सम्यक्सिद्धिकमन्त्रस्य षडङ्गोपासनेन च ।
सर्व्वे मन्त्राश्च सिद्ध्यन्ति तत्प्रसादात् कुलेश्वरि ! ॥
गुरुरूपमिदं सर्व्वमित्याहुस्तन्त्रवेदिनः ।
एकग्रामे स्थितो नित्यं गत्वा वन्देत वै गुरुम् ॥
गुरुरेव परं ब्रह्म तस्मादादौ तमर्चयेत् ।
तदन्ते महतीं पूजां कुर्य्यात् साधकसत्तमः ॥
सुभाषिणीं कुमारीञ्च भूषणैरपि भूषयेत् ।
मिष्टान्नं बहुशः कार्य्यं भुञ्जीत बन्धुभिः सह ॥
एवं सिद्धमतुर्म्मन्त्री साधयेत् सकलेप्सितान् ॥" * ॥

अथ ग्रहणपुरश्चरणम् ।

तन्त्रे ।
"अथवान्यप्रकारेण पुरश्चरणमुच्यते ।
ग्रहणेऽर्कस्य चेन्दोर्व्वा शुचिः पूर्व्वमुपोषितः ॥
नद्यां समुद्रगामिन्यां नाभिमात्रेऽथ स्थितः ।
स्पर्शादिमुक्तिपर्य्यन्तं जपेन्मन्त्रमनन्यधीः ॥" * ॥
यदि नक्रादिदूषिता नदी भवति तदा यत्कर्त्तव्यं तदाह रुद्रयामले ।
"अपि शुद्धोदके स्नात्वा शुचौ देशे समाहितः ।
ग्रासादिमुक्तिपर्य्यन्तं जपेन्मन्त्रमनन्यधीः ॥
इति कृत्वा न सन्देहो जपस्य फलभाग्भवेत् ॥"
नद्यभावे ।
"यद्वा पुण्योदके स्नात्वा शुचिः पूर्व्वमुपोषितः ।
ग्रहणादिविमोक्षान्तं जपेन्मन्त्रमनन्यधीः ॥" * ॥
उपवासासमर्थे तु तत्रैव ।
अथवान्यप्रकारेण पौरश्चारणिको विधिः ।
चन्द्रसूर्य्योपरागे च स्नात्वा प्रयतमानसः ॥
स्पर्शनादिविमोक्षान्तं जपेन्मन्त्रं समाहितः ।
जपाद्दशांशतो होमं तथा होमात्तु तर्पणम् ।
एवं कृत्वा तु मन्त्रस्य जायते सिद्धिरुत्तमा ॥" * ॥
गोपालमन्त्रतर्पणे तु होमसमसङ्ख्यत्वं यथा,—
"इह गोपालमन्त्रस्य तर्पणं होमसङ्ख्यया ।
वर्णानामिह सर्व्वेषामित्यागमविदो विदुः ॥
दृष्ट्वा स्नात्वा सुसङ्कल्प्य विमोक्षान्तं जपेच्चरेत् ।
तावद्यज्ञादिकं कुर्य्याद्ग्रहणान्ते शुचिः सुमान् ॥
एवं जपान्मन्त्रसिद्धिर्भवत्येव न संशयः ॥" * ॥

ग्रहणे जपस्य आवश्यकत्वम् ।
"आद्यादिरगुरोर्यत्र यदि जप्यं त्यजेन्नरः ।
स भवेद्देवताद्रोही पितॄन् सप्त नयत्यधः ॥"
इति सनत्कुमारीयवचनात् ॥
वस्तुतस्तु आरब्धपुरश्चरणविषयमिदम् ।
तथाहि ।
"आरब्धे पुरश्चरणे यदि च ग्रहणं भवेत्
तदा आद्यादिगुरोर्यत्र जपं न त्यजेत् । एवं
राज्ञापि पुरश्चरणविघ्ने बोद्धव्यम् ।" इति
सर्व्वसम्मतम् ॥ ७ ॥ योगिनीहृदये ।
"कल्पोक्तविधिना मन्त्री कुर्य्याद्धोमादिकन्ततः ।
अथवा तद्दशांशेन होमादींश्च समाचरेत् ॥"
तथा ।
"अनन्तरं दशांशेन क्रमाद्धोमादिकञ्चरेत् ।
तदन्ते महतीं पूजां कुर्य्याद्ब्राह्मणभोजनम् ॥ ।
ततो मन्त्रस्य सिद्ध्यर्थं गुरुं सन्पूज्य तोषयत् ।
एवञ्च मन्त्रसिद्धिः स्यात् देवता च प्रसीदति ॥"
अत्र ब्राह्मणभोजनमावश्यकमेव ।
"सर्व्वथा भोजयेद्विप्रान् कृतसाङ्गत्वसिद्धये ।
विप्राराधनमात्रेण यङ्गं साङ्गं भवेद्ध्रुवम् ॥"
क्रियासारे ।
"दीक्षाहीनान् पशून् यस्तु भोजयेद्वा स्वमन्दिरे ।
स याति परमेशानि ! नरकानेकविंशतिम् ॥
एवं यः कुरुते देवि ! पुरश्चरणकं प्रिये ! ।
सर्व्वपापविनिर्म्मुक्तो देवीसायुज्यमाप्नुयात् ॥"
यद्यपि पुरश्चरणपदं पञ्चाङ्गपरम् । तथा च ।
"जपहोमौ तर्पणञ्चाभिषेको विप्रभोजनम् ।
पञ्चाङ्गोपासनं लोके पुरश्चरणमुच्यते ॥
तथापि ग्रहणादौ पुरश्चरणपदं गौणं जपमात्रपरम् ।
"सूर्य्योदयं समारभ्य यावत् सूर्य्योदयान्तरम् ॥"
इत्यादौ तथादर्शनात् तत्र होमादेरभावात् ।
नन्वेवं ग्रहणपुरश्चरणे होमादि इति चेत् वचनादेव । न च पुरश्चरणस्य पञ्चाङ्गत्वात् सर्व्वत्र तदेव स्यादिति वाच्यम् । ग्रहणे पुनस्तद्विधानमनर्थकं स्यात् । किञ्च ग्रहणे होमादिनियमात् नान्यत्र होमादिः । ग्रहणपुरश्चरणे होमादिविधानन्तु प्रकृतीभूतपञ्चाङ्गपुरश्चरणतुल्यताबोधनाय । अतएव ग्रहणे पञ्चाङ्गस्वरूपपुरश्चरणे कृते सुखप्रयोगेऽप्यधिकार इति प्रकटीकृतम् । तदकरणे पुनः केवलजपमात्रपुरश्चरणे कृते नाधिकार इति सर्व्वसम्मतमिति ।
पुरश्चरणकालस्तु वाराहीये ।
"चन्द्रतारानुकूले च शुक्ले पक्षे शुभेऽहनि ।
आरभेत पुरश्चर्य्यां गुरौ सप्ते न चाचरेत् ॥"
प्रतिप्रसवः । स्मृत्यन्तरे ।
"कार्त्तिकाश्विनवैशाखमाघेषु मार्गशीर्षके ।
फाल्गुने श्रावणे दीक्षा पुरश्चर्य्या प्रशस्यते ॥"
यत्तु ग्रस्ते ग्रस्तोदये च दीक्षापुरश्चरणयोर्निषेधमाह तत्रान्तरे ।
"ग्रस्तास्ते क्षुदिते नैव कुर्य्याद्दीक्षां जपं प्रिये ! ।
कृते नाशो भवेदाशु व्याधिश्चैतत्समग्रहाम् ॥"

अथ पुरश्चरणप्रयोगः ।
तत्र तावत् भूमेः परिग्रहं कृत्वा पुरश्चरणप्राक्तनीयदिवसे चौरादिकं विधाय वेदिकायाश्चतुर्दिक्षु क्रोशं क्रोशद्वयं वा क्षेत्रं चतुरस्रम् आहारादिविहारार्थं परिकल्प्य तत्र कूर्म्मचक्रानुरूपं मण्डलं विधाय एकभक्तं कुर्य्यात् । ततः परदिने स्नानादिकं विधाय शुद्धः सन् वेदिकायाश्चतुर्दिक्षु अश्वत्थोडुम्बरप्लक्षाम्रान्यतमस्य वितस्तिमात्रान् दश कीलकान्, ॐ नमः सुदर्शनाय अस्त्राय फट्टिति मन्त्रेणाष्टोत्तरशताभिमन्त्रितान् वेदिकाया दशदिक्षु.
ॐ ये चात्र विघ्नकर्त्तारो भुवि दिक्षन्तरीक्षगाः ।
विघ्नभूताश्च ये चान्ये मम मन्त्रस्य सिद्धिषु ॥
मयेतत् कीलितं क्षेत्रं परित्यज्य विदूरतः ।
अपसर्पन्तु ते सर्व्वे निर्व्विघ्नं सिद्धिरस्तु मे ॥
इत्यनेन निखन्य तेषु ॐ नमः सुदर्शनाय अस्त्राय फट्टिति मन्त्रेणाक्षं संपूज्य पूर्व्वादिक्रमेण इन्द्रादिलोकपालान् पूजयेत् । तद्यथा ।
ॐ भूर्भुवःस्वरिन्द्रलोकपाल इहागच्छ इत्यावाह्य पञ्चोपचारैरभ्यर्च्च पूजयेत् । तथा च सुखमालावाम् ।
"पुण्यक्षेत्रादिकं गत्वा कुर्य्याद्भूमेः परिग्रहम् ।
तथा त्वमकमन्त्रस्य पुरश्चरणसिद्धये ।
मयेयं गृह्यते भूमिर्मन्त्रोऽयं सिध्यतामिति ॥"
तथा ।
"ग्रामे क्रोशमितं स्थानं नद्यादौ स्वेच्छया मतम् ।
नगरादावपि क्रोशं क्रोशयुग्ममथापि वा ॥
क्षेत्रं वा यावदिष्टन्तु विहारार्थं प्रकल्पयेत् ।
आहारादिविहारार्थं तावतीं भूमिमाक्रमेत् ॥
क्षीरिवृक्षोद्भवान् कीलान् अस्त्रमन्त्राभिमन्त्रितान् ।
निखनेद्दशदिग्भागे तेष्वस्त्रञ्च प्रपूजयेत् ॥
लोकपालान् पुनस्तेषु गन्धाद्यैः पूजयेत् सुधीः ।
ततो मध्यस्थाने चैत्यपालं वास्तोश्च संपूज्य सर्व्वविघ्नविनाशार्थं गणपतिं पूजयेत् । ॐ अद्येत्यादि अमुकगोत्रः श्रीअमुकदेवशर्म्मा मन्त्रकर्त्तुरमुकमन्त्रपुरश्चरणकर्म्मणि सर्व्वविघ्नविनाशार्थं गणेशपूजामहं करिष्ये । इति सङ्कल्प्य वेदिकामध्ये पञ्चोपचारैर्गणेशं पूजयेत् । तदुक्तम् ।
"क्षेत्रपालादिकं तत्र पूजयेत् विधिवत्ततः ।
क्षेत्रेशं वास्तुनामानं विघ्नराजं समर्च्चयेत् ॥
दिक्पालेभ्यो बलिं दद्यात् ततः क्षेत्रं समाविशेत् ॥"
ततो मानभक्तादिना पूजितदेवताभ्यो बलिं दद्यात् । ततः ।
"ॐ ये रौद्रा रौद्रकर्म्माणो रौद्रस्थाननिवासिनः ।
मातरोऽणुरूपाश्च गणाधिपतयश्च ये ॥
विघ्नभूताश्च ये चान्ये दिक्षिदिक्षु समाश्रिताः ।
सर्व्वे ते प्रीतमनसः प्रतिगृह्णन्त्विमं बलिम् ॥"
इत्यनेन दशदिक्षु भूतेभ्यो बलिं दद्यात् । ततो गायत्रीं जपेत् । तथा च ।

"प्रातः स्नात्वा तु गायत्र्याः सहस्रं प्रयतो जपेत् ।
ज्ञाताज्ञानस्य पापस्य क्षयार्थं प्रथमं ततः ॥"
इति विद्याधराचार्य्यः ॥ ८ ॥
यत्तु प्रातः स्नात्वा तु गायत्र्या अयुतं प्रयतो जपेत् इति । तत् पुनरत्यन्तपापशङ्कया । ॐ अद्येत्यादि अमुकगोत्रः श्रीअमुकदेवशर्म्मा ज्ञाताज्ञातपापक्षयकामोऽष्टोत्तरसहस्रगायत्रीजपमयुतगायत्रीजपं वा अहं करिष्ये । इति सङ्कल्प्य जपेत् । तत उपवासं हविष्यं वा कुर्य्यात् ॥ ९ ॥
तत्परदिने उषसि स्नानादिकं कृत्वा स्वस्तिवाचनपूर्व्वकं सङ्कल्पं कुर्य्यात् । यथा विष्णुः ओम् अद्येत्यादि अमुकगोत्रः श्रीअमुकदेवशर्म्मा अमुकदेवतायाः अमुकमन्त्रसिद्धिप्रतिबन्धकतापापदुरितक्षयपूर्व्वकतन्मन्त्रसिद्धिकाम एभ्य यावता कालेन सेत्स्यति तावत्कालमसुकदेवतायाः अमुकमन्त्रस्य इयत्संख्यजपतद्दशांशहोमतद्दशांशतर्पण-तद्दशांशाभिषेक-तद्दशांशब्राह्मणभोजनरूपपुरश्चरणमहं करिष्ये । इति सङ्कल्प्य भूतशुद्धिप्राणायामादिकं कृत्वा स्वस्तिपुण्याहं वाचयित्वा स्वस्वपूजापद्धत्युक्तक्रमेण देवतां संपूज्य दीपे प्रज्वलिते देवतां हृदये प्रातःकालं समारभ्य मध्यंदिनं यावत् जपं कुर्य्यात् । ततस्तद्दशांशहोम-तद्दशांश-तर्पण-तद्दशांशाभिषेक-तद्दशांशब्राह्मणभोजनकुर्य्यात् । तथा च । सनत्कुमारतन्त्रे ।
"प्रणवं तत्सदद्येति मासपक्षतिथावपि ।
अमुकामुकगोत्रोऽहं मूलमुच्चार्य्य तत्परम् ॥
सिद्धिकामोऽस्य मन्त्रस्य इयत्सङ्ख्यं जपन्ततः ।
दशांशं हवनं होमाद्दशांशं तर्पणं ततः ॥
दशांशं मार्ज्जनं तस्माद्दशांशं विप्रभोजनम् ।
पुरश्चरणमेवं हि करिष्ये प्रागुदङ्मुखः ॥"
तथा ।
"दीपस्य ज्वलितस्याथ जपकर्म्म प्रशस्यते ।
तद्दीपस्थानमाश्रित्य वातातपसहां कुटिम् ॥
निर्म्माय विधिवत् कुर्य्यात् जपं तत्र शुभे दिने ॥"
ततो होमस्तत्तर्पणम् ॥ ७ ॥
तन्त्रान्तरे ।
"तर्पणन्तु ततः कुर्य्यात्तीर्थोदैश्चन्दनमिश्रितैः ।
जले देवं समावाह्य पाद्याद्यैरुदकात्मकैः ॥
सम्पूज्य विधिवद्भक्त्या परिवारसमन्वितम् ।
एकैकमञ्जलिं तोयं परिवारान् प्रतर्पयेत् ॥
ततो होमदशांशेन तर्पयेत् परदेवताम् ।
संपूर्णायान्तु सङ्ख्यायां पुनरेकैकमञ्जलिम्
अङ्गादिपरिवारेभ्यो दत्त्वा देवं विसर्ज्जयेत् ॥"७॥
तर्पणवाक्यन्तु मूलमुच्चार्य्य श्रीअमुकं तर्पयामि नमः । इति विष्णुविषयम् । तथा च गौतमीये ।
"आदौ मन्त्रं समुच्चार्य्य श्रीपूर्व्वं कृष्णमित्यपि ।
तर्पयामि पदञ्चोक्त्वा नमोऽन्तं तर्पयेन्नरः ॥"
अन्यत्र मूलमुच्चार्य्य अमुकदेवतां तर्पयामीति ।

तथा च ।
"तर्पयामि पदश्चोक्त्वा मन्त्रान्ते स्वेषु नामसु ।
द्वितीयान्तेषु चैवेवं तर्पणस्य मनुर्मतः ॥"
भक्तिविषये पुनर्मूलमुच्चार्य्य अमुकीं तर्पयामि स्वाहा । होमतर्पणयोः स्वाहेति तत्तत्तन्त्रवचनात् । नीलतन्त्रे ।
"मन्त्रान्ते नाम चोच्चार्य्य तर्पयामि ततः परम् ।
कुर्य्याच्चैव वरारोहे ! स्वाहान्तं तर्पणे मतम् ॥"
इत्यादि ॥ विश्वेश्वरतन्त्रे ।
"विद्यां पूर्व्वं समुच्चार्य्य तदन्ते देवताभिधाम् ।
तर्पयामीति सम्प्रोक्त्वा स्वाहान्तस्तर्पणो मतः ॥"
अभिषेकवाक्यन्तु । नमोऽन्तं मूलमुच्चार्य्य अमुकदेवतामहमभिषिञ्चामि इति कलसमुद्रया स्वमूर्द्धि अभिषिञ्चेत् । तथा च । गौतमीये ।
"नमोऽन्तं मूलमुच्चार्य्य तदन्ते देवताभिधाम् ।
द्वितीयान्तामहं पश्चादभिषिञ्चान्यनेन तु ॥
अभिषिञ्चेत् स्वमूर्द्धानं तोयैः कुम्भाख्यमुद्रया ॥"
भक्तिविषये नीलतन्त्रे ।
"मन्त्रान्ते नाम चोच्चार्य्य सिञ्चामीति नमः पदम् ॥"
इति । ततो ब्राह्मणान् भोजयित्वा पूजां कुर्य्यात् ॥ * ॥ ततो दक्षिणा । अद्येत्यादि कृतैतदमुकमन्त्रपुरश्चरणकर्म्मणः साङ्गतार्थं दक्षिणामिदं काञ्चनं वह्निदैवतं अमुकगोत्राय गुरवे तुभ्यमहं सम्प्रददे । ततोऽच्छिद्रावधारणं कुर्य्यात् ॥

अथ ग्रहणपुरश्चरणसङ्कल्पः ।

तद्यथा,—
ओम् अद्येत्यादि राहुग्रस्ते निशाकरे दिवाकरे वा अमुकगोत्रः श्रीअमुकदेवशर्म्मा अमुकदेवतायाः अमुकमन्त्रसिद्धिकामो ग्रासाद्विमुक्तिपर्य्यन्तं अमुकदेवतायाः अमुकमन्त्रजपरूपपुरश्चरणमहं करिष्ये । इति सङ्कल्प्य जपेत् । ततस्तद्दिने तत्परदिने वा स्नानादिकं विधाय ॐ अद्येत्यादि अमुकदेवतायाः अमुकमन्त्रस्य कृतैतत् ग्रहणकालीन-इयत्सङ्ख्यजपतद्दशांशहोमतद्दशांशतर्पण-तद्दशांशाभिषेक-तद्दशांशब्राह्मण-भोजनकर्म्माख्यं करिष्ये । इति सङ्कल्प्य होमादिकं कुर्य्यात् । दक्षिणादिकन्तु पूर्ब्ववत् ।"
इति कृष्णानन्दकृततन्त्रसारः ॥ * ॥

(अथ रहस्य पुरश्चरणम् ।

श्रीपार्व्वत्युवाच ।
"कथयस्व महादेव ! सिद्धिकारणमुत्तमम् ।
येन सिद्धिं समायान्ति सर्व्वतन्त्राश्च सिद्धिदाः ॥
यासु येषु च कालेषु पुरश्चर्य्या भवेद्ध्रुवम् ॥

श्रीशिव उवाच ।
कथयामि समासेन श्रूयतां पर्व्वतात्मजे ! ।
मेषराशौ दशगुणं जपेन्मन्त्रमुत्तमम् ॥
पुरश्चरणमेतद्धि श्रूयतां सुरवन्दिते ! ॥
वृषराशौ यदा मन्त्री द्वयुतं जपेत् सुधीः ।
तेनैव तत्र सुसिद्धिः स्यान् नात्र कार्य्या विचारणा ॥
मिथुने च यदा मन्त्री त्रयुतं मन्त्रमुत्तमम् ।
जपेत् प्रयतो नित्यं पुरश्चरणमुच्यते ॥
कर्कटे च यदा मन्त्री सहस्रं प्रत्यहं जपेत् ।
तेन सर्व्वार्थसिद्धिः स्यात् पुरश्चरणमुच्यते ॥
सिंहे च सर्व्वमन्त्राणामयुतानां हयं जपेत् ।
धर्म्मार्थकाममोक्षाणां फलभाग्भवति ध्रुवम् ॥
कन्यायाञ्च यदा मन्त्री मन्त्रं मन्त्रपरायणः ।
सहस्रं द्वादशञ्चैव जपेन्नियतमानसः ॥
पुरश्चरणमेतद्धि सर्व्वकामार्थसाधनम् ।
इह लोके सुखं भुक्त्वा चान्ते देवीपदं व्रजेत् ॥
तुलायां प्रत्यहं मन्त्री सहस्रं साधको जपेत् ।
अनेन विधिना देवि ! पुरश्चरणमुच्यते ॥
वृश्चिके चायुतं मन्त्रं शून्यायां प्रजपेत् सुधीः ।
तेन सर्व्वार्थसिद्धिः स्यात् पुरश्चर्य्याफलं भवेत् ॥
धनुषि च यदा मन्त्रं जपेदयुतमादरात् ।
वृहैव कन्दर्पसमो धनवान् बलवान् सुखी ॥
मकरे च यदा मन्त्रं जपेत् साधकसत्तमः ।
चतुर्णामयुतं देवि ! प्रत्यहं यतमानसः ॥
धर्म्मार्थं भावयेन्नित्यं पुरश्चरणमुच्यते ॥
कुम्भे चैव यदा मन्त्रं जपेदयुतमादरात् ।
तेन सर्व्वार्थसिद्धिः स्यात् पुरश्चरणकृद् भवेत् ॥
मीने चैव यदा देवि ! प्रजपेदयुतं द्वयम् ।
तेन पुरश्चरणमित्याहुः सर्व्वागमविशारदाः ॥
सर्व्वत्र जपनं ज्ञेयं रात्रौ वा मैथुनेऽपि वा ।
शून्यायान्तु विशेषेण परयोषित्समागमे ॥
हविष्याशी तदा देवि ! जपेन्नियतमानसः ।
एवंविधं जपं कृत्वा दशांशञ्च तदाचरेत् ॥
दक्षिणां गुरवे दत्त्वा सिद्धिभाग् भवति ध्रुवम् ।
अथवान्यप्रकारेण पुरश्चरणमुच्यते ॥
रविवारादिसर्व्वेषु वारसंख्यासहस्रकम् ।
जप्त्वा मन्त्रं सदा देवि ! साधकः सिद्धिभाग् भवेत् ॥
पुरश्चरणमेतद्धि नात्र कार्य्या विचारणा ॥
एवंविधं समाचर्य्य दशांशञ्च तदाचरेत् ।
गुरवे दक्षिणां दत्त्वा सर्व्वकाममवाप्नुयात् ॥
केवलं जपमात्रेण पुरश्चरणमुच्यते ।
येषु येषु च नक्षत्रेषु जायते सिद्धिरुत्तमा ॥
कथयामि समासेन शृणुतां पर्व्वतात्मजे ! ।
अश्विन्यां जप्यते मन्त्रं साधकैश्च सहस्रकम् ॥
तेन सिद्धिमवाप्नोति साधको नात्र संशयः ।
द्विसहस्र जपेन्मन्त्रं भरण्याञ्च यदा सुधीः ॥
यमलोकं परित्यज्य धनेन च धनाधिपः ।
कृत्तिकायां जपेन्मन्त्रं त्रिसहस्रञ्च साधकः ॥
रोहिण्याञ्च यदा मन्त्रं जपेत् साधकसत्तमः ।
सहस्रं वा शतं वापि सर्व्वकामार्थमाप्नुयात् ॥
मृगशीर्षे यदा मन्त्रं नियतं प्रजपेत् सुधीः ।
सहस्रपञ्चकञ्चैव बृहस्पतिसमो भवेत् ॥
आर्द्रायां जप्यते मन्त्रं साधकैः सुसमाहितैः ।
षट्सहस्रं यदा देवि ! सर्व्वकामार्थसिद्धये ॥
पुनर्व्वसुसमायोगे यदा सहस्रमुत्तमम् ।
जप्यते साधको नित्यं लभते च सुरोत्तमम् ॥
पुष्यायाञ्च जपेन्मन्त्रं सप्तानाञ्च सहस्रकम् ।
तेन सर्व्वसुसिद्धिः स्यात् पुरश्चर्य्याधिको विधिः ॥
अश्लेषायां यदा देवि ! मन्त्री मन्त्रं समाहितः ।
सहस्रषट्कञ्चैव जपेत् सर्व्वार्थसिद्धये ॥
दशसहस्रं मघायाञ्च जप्त्वा मन्त्रं समाहितः ।
पुरन्दरसमो भूत्वा साधको विचरेत् भुवि ॥
एकादशसहस्रन्तु पूर्व्वफल्गुन्यां जपेत् सुधीः ।
कुबेर इव वित्ताढ्यो जायते नात्र संशयः ॥
उत्तरफल्गुनीये देवि ! सहस्रं द्वादशं तथा ।
जप्यते साधकैर्नित्यं सर्व्वकामार्थसिद्धये ॥
हस्तायाञ्च जपेद्देवि ! सहस्रञ्च त्रयोदश ।
सूर्य्यस्यैव समो भूत्वा विचरेत् भुवि साधकः ॥
चित्रायाञ्च जपेन्मन्त्रं द्विसहस्रञ्च साधकैः ।
नानाभोगसमायुक्तो भवेद् भुवि पुरन्दरः ॥
स्मृत्वा सर्व्वार्थसिद्धिः स्यात् द्विसहस्रस्य जापनात् ।
साधकोऽाहतगतिर्जायते नात्र संशयः ॥
विशाखायां यदा मन्त्रं चतुःसहस्रकं प्रिये ! ।
जपेच्च साधको नित्यं सोमवत् प्रियदर्शनः ॥
अनुराधायां यदा देवि ! मन्त्री मन्त्रं सदा जपेत् ।
पुत्रपौत्रसमायुक्तः खेचरो जायते ध्रुवम् ॥
ज्येष्ठायाञ्च यदा मन्त्रं द्विसहस्रं विचक्षणः ।
प्रजपन् लभते सिद्धिं नात्र कार्य्या विचारणा ॥
मूलायाञ्च जपेन्मन्त्रं सहस्रं पञ्चकं प्रिये ! ।
नानासिद्धिमवाप्नोति साधको नात्र संशयः ॥
वरुणेन समो भूत्वा जायते साधको भुवि ।
शतभिषायां यदा मन्त्रं द्विःसहस्रं जपेत् सुधीः ॥
महापातकान्मुच्येत फलभाग्भवति ध्रुवम् ।
रेवत्याञ्च यदा मन्त्रं चत्वारि सहस्रकं तथा ॥
जप्त्वा स्तुत्वा सदा देवि ! सोमलोकमवाप्नुयात् ।
रात्रौ वा मैथुने वापि शून्यायाञ्च व्यवस्थितः ॥
प्रजपेत् साधको नित्यं साधयेदात्मनो हितम् ।
सर्व्वदा प्रजपेन्मन्त्रं हविष्याशी दिवा शुचिः ॥
दक्षिणां गुरवे दद्यात् यथा विभवविस्तरम् ।
अथवान्यप्रकारेण पुरश्चरणमुच्यते ॥
आदित्यादिवारयोगे नन्दातिथियोगतः ।
ततस्तञ्च जपेन्मन्त्रं सहस्रपञ्चकं प्रिये ! ॥
तेन सर्व्वार्थसिद्धिः स्यात् पुरश्चरणकृद् भवेत् ।
प्रतिपत्तिथिमारभ्य कुर्य्यात्तावत् भवेत् प्रिये ! ॥
तिथिसंख्यां समासाद्य वर्द्धयेच्च सहस्रकम् ।
जप्त्वा मन्त्रं सदा मन्त्री सर्व्वकाममवाप्नुयात् ॥
पुरश्चरणमेतद्धि कथितं ते वरानने ! ।
प्रतिपत्तिथिमारभ्य राका यावद् भवेत् प्रिये ! ॥
तावन्मन्त्रं प्रजपेत तिथिसंख्याक्रमेण तु ।
सर्व्वभावसमायुक्तो जायते भावसाधकः ॥
एतेनैव सुसिद्धिः स्यात् नात्र कार्य्या विचारणा ।
अथवान्यप्रकारेण पुरश्चरणमुच्यते ॥
वर्णादिकरणे देवि ! जप्त्वा विद्यामनन्यधीः ।
करणानुसारेणैव वर्द्धयेच्च सहस्रकम् ॥
पुरश्चरणमेतद्धि सर्व्वतन्त्रे च गोपितम् ।
साधकस्य हितार्थाय कथितं तव सुव्रते ! ॥
वान्यप्रकारेण पुरश्चरणमुच्यते ।
विष्कुम्भादिषु योगेषु यो जपेत् योगसंख्यया ॥

महत्तं माधवो नित्यं सर्व्वमिद्धिपरायणः।
पुरश्चरणमेतद्धि तन्त्रे तन्त्रे निरूपितम्॥
संक्रान्त्यादिषु सर्व्वासु विषुवादिषु पार्व्वति!।
संक्रान्त्यनुसारेणैव वर्द्धयेच सहस्रकम्॥
पूर्व्वमुक्तो जपेन्मन्त्रं धनार्थी सर्व्वदा प्रिये!।
शुचुनाशाय सततं दक्षिणाभिमुखो जपेत्॥"
इति स्वतन्त्रे तन्त्रे हरगौरीसंवादे रहस्यपुरश्चरणविधिः॥ ४॥) अत्र आगमकल्पद्रुमोक्तकुलचूडामणितन्त्रशब्दे दृश्यम्। हरिभक्तिविलासीयपुरश्चरणन्तु तद्ग्रन्थे मन्त्रदीक्षाविलासे दर्शनीयम्॥

पुरश्छदः, पुं, (पुरश्छदति छादयतीति। छद्+अच्। यद्वा, पुरोऽयतन्यदाः पत्राण्यस्य।) लक्षविशेषः। उलु इति भाषा। तत्पर्य्यायः। दर्भः २ शमः ३ सोमपवः ४ परातृप्रियः ५। इति शब्दचन्द्रिका॥

पुरस्कारः, पुं, (पुरस्करणमिति+पुरस्+कृ+भावे घञ्।) पुरस्क्रिया। अभिप्रायः। अग्रिमहणम्। अग्रकरणम्। (पुरः क्रियतेऽनेनेति।) पूजनम्। ("तस्य बहुमानपुरस्कारं कृत्वा।" इति हितोपदेशः॥) स्वीकारः। सेक्तः। इति पुरस्कृतशब्दार्थदर्शनात्॥

पुरस्कृतः, त्रि, (पुरः क्रियते स्मेति। पुरस्+कृ+क्तः।) अभिप्रस्तः। अग्रिमस्तः। अग्रकृतः। पूजितः। इति मेदिनी। ते, २१३॥ स्वीकृतः। सिक्तः। इति हेमचन्द्रः॥

पुरस्तात्, अ, (पूर्व्वस्मिन् पूर्व्वस्यां पूर्व्वस्मात् पूर्व्वस्याः वा पूर्व्वः पूर्व्वा वेति। पूर्व्व+"दिक्शब्देभ्यः सप्तमीपञ्चमीप्रथमाभ्यो दिग्देशकालेष्वस्तातिः।" ५।३।२७। इति अस्तातिः। "अस्तातिच।" ५।३।४०। इति पूर्व्वस्य पुरादेशः।) प्राच्यां दिशि। यथा, पुरस्तात् सूर्य्य उदेति। प्रथमे काले। यथा, पुरस्ताद्विमुक्ते। पुरार्धे। अतीते। यथा, पुरस्तादासीदमृतं। अग्रतः अग्रे देशे। यथा, पुरस्तादायाति। इत्यमरभरतौ॥ (यथा च रघौ। २।४४।

"मान्यः स मे स्थावरजङ्गमानां
सर्गस्थितिप्रत्यवहारहेतुः।
गुरोरपीदं धनमाहितग्नेः
नैश्यन् पुरस्तादनुपेक्षणीयम्॥")

पुरा, अ, (पुरति अग्रे गच्छतीति। पुर+बाहुलकात् कः।) प्रबन्धः। बाक्यरचना पुराणादिः। यथा, पुरावृत्तः। चिरम्। चिरन्तनम्। पुराणमित्यर्थान्तरम्। अतीतम्। भूतम्। चिरातीतमित्येकम्। यथा इतिहासः पुराबृत्तमिति केचित्। निकटः। सन्निहितः। आगामिकम्। अनागतम्। निकटागामिकः। भविष्यदासन्नः। इति केचित्। इत्यमरभरतौ॥ भीरुः। इति शब्दरत्नावली॥ (प्राक्। इति हेमचन्द्रः। ६।१७१॥ यथा, पञ्चदश्याम्। २।१४।

"इदं सर्व्वं पुरा दृष्टैरेकमेवाद्वितीयकम्।
तदेवासीन्नामरूपे नास्तामित्यादयैर्वचः॥")

पुरा, स्त्री, (पुरतीति। पुर+क+टाप्।) पूर्व्वदिक्। मुनिभिरयविशेषः। तत्पर्य्यायः। गन्धवती २ दिशा ३ गन्धाढ्या ४ गन्धमादिनी ५ सुरभिः ६ भूरिगन्धा ७ कुटी ८ गन्धकुटी ९। अस्या गुणाः। तिक्तत्वम्। कटुत्वम्। शीतत्वम्। कषायत्वम्। कफपित्तश्वासास्रविषदाहार्त्तिभ्रमसन्तापतृष्णानाशित्वञ्च। इति राजनिर्घण्टः॥

पुराकृतं, त्रि, (पुरा पूर्व्वं पूर्व्वस्मिन् काले वा कृतम्।) प्रारब्धकर्म्म। पूर्व्वकालकृतपुण्यादि। यथा,—

"अकाले दर्शनं विष्णोर्हन्ति पुण्यं पुराकृतम्॥"
इति स्मृतिः॥

पुराणं, क्ली, (पुरा भवमिति। पुरा+"सायंचिरंप्राह्णेप्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् च।"४।३।२३। इति ट्युः।"पूर्व्वकालैकसर्व्वजरत्पुराणनवकेवलाः समानाधिकरणेन।"२।१।६९। इति निपातनात् तुडभावः। यद्वा, "पुराणप्रोक्तेषु ब्राह्मणकल्पेषु।" ४।३।१०५। इति निपातितः। यद्वा, पुरा नीयते इति। नी+ड। णत्वञ्च।) व्यासादिमुनिप्रणीतवेदार्थवर्णितपञ्चलक्षणान्वितग्रन्थम्। तत्पर्य्यायः। पञ्चलक्षणम् २। इत्यमरः। १।६।५॥ पञ्चलक्षणानि यथा, सर्गः १ प्रतिसर्गः २ वंशः ३ मन्वन्तरम् ४ वंशानुचरितम् ५॥ महापुराणस्य दश लक्षणानि। यथा, सर्गः १ विसर्गः २ वृत्तिः ३ रक्षा ४ अन्तरम् ५ वंशः ६ वंशानुचरितम् ७ संस्था ८ हेतुः ९ अपाश्रयः १०॥ अथाष्टादशमहापुराणानि तेषां श्लोकसंख्यानि च तथा। ब्राह्मं दशसहस्रम् १ पाद्मं पञ्चपञ्चाशत्सहस्रम् २ वैष्णवं त्रयोविंशतिसहस्रम् ३ शैवं चतुर्व्विंशतिसहस्रम् ४ भागवतम् अष्टादशसहस्रम् ५ नारदीयं पञ्चविंशतिसहस्रम् ६ मार्कण्डेयं नवसहस्रम् ७ आग्नेयं चतुःशताधिकपञ्चदशसहस्रम् ८ भविष्यं पञ्चशताधिकचतुर्दशसहस्रम् ९ ब्रह्मवैवर्त्तम् अष्टादशसहस्रम् १० लैङ्गं एकादशसहस्रम् ११ वाराहं चतुर्व्विंशतिसहस्रम् १२ स्कान्दं शताधिकैकाशीतिसहस्रम् १३ वामनं दशसहस्रम् १४ कौर्म्मं सप्तदशसहस्रम् १५ मात्स्यं चतुर्दशसहस्रम् १६ गारुडं ऊनविंशतिसहस्रम् १७ ब्रह्माण्डं द्वादशसहस्रम् १८। समुदायेन चतुर्लक्षश्लोकाः। इति श्रीभागवतीयद्वादशस्कन्धः॥ (अपि च देवीभागवते १ स्कन्धे ३ अध्याये तथा मत्स्यपुराणे ५३ अध्याये एतद्विवरणं द्रष्टव्यम्॥) अपि च।

सूत उवाच।

"विस्तराणि पुराणानि चेतिहासाश्च शौनक!।
संहितां पञ्चरात्राणि कथयामि यथाक्रमम्॥
सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च।
वंशानुचरितं विप्र! पुराणं पञ्चलक्षणम्॥
एतद्विपुराणानां लक्षणं कथयामि ते॥
महतान्तु पुराणानां लक्षणं कथयामि ते॥

सृष्टिश्चापि विसृष्टिश्च स्थितिस्तेषाञ्च पालनम्।
कर्म्मणां वासना वार्त्ता मन्वन्तराञ्च क्रमेण च॥
वर्णनं प्रलयानाञ्च मोक्षस्य च निरूपणम्।
उत्कीर्त्तनं हरेरेव देवानाञ्च पृथक् पृथक्॥
दशाधिकं लक्षणञ्च महतां परिकीर्त्तितम्।
संख्यानञ्च पुराणानां निबोध कथयामि ते॥
परं ब्रह्मपुराणञ्च सप्तसाहस्रमेव च।
पञ्चोनयष्टिसाहस्रं पाद्ममेव प्रकीर्त्तितम्॥
चयोविंशतिसाहस्रं वैष्णवञ्च विदुर्बुधाः।
चतुर्विंशतिसाहस्रं शैवमेव निरूपितम्॥
अष्टादशसाहस्रं श्रीमद्भागवतं विदुः।
पञ्चविंशतिसाहस्रं नारदीयं प्रकीर्त्तितम्॥
सार्द्धं नवसाहस्रं पुराणं मार्कण्डिना विदुः।
चतुःशताधिकं पञ्चदशसाहस्रमेव च॥
परमग्निपुराणञ्च रुचिरं परिकीर्त्तितम्।
चतुर्दशसहस्राणि परं पञ्चशताधिकम्॥
पुराणप्रवरञ्चैव भविष्यं परिकीर्त्तितम्।
अष्टादशसहस्रञ्च ब्रह्मवैवर्त्तमीरितम्॥
सर्व्वेषाञ्च पुराणानां सारमेव विदुर्बुधाः।
एकादशसहस्रञ्च परं लिङ्गपुराणकम्॥
चतुर्व्विंशतिसाहस्रं वाराहं परिकीर्त्तितम्।
एकाशीतिसहस्रञ्च परमेव शताधिकम्॥
वरं स्कन्दपुराणञ्च सद्भिरेवं निरूपितम्।
वामनं दशसाहस्रं कौर्म्मं सप्तदशैव तु॥
मात्स्यं चतुर्दशं प्रोक्तं पुराणं पण्डितैस्तथा।
ऊनविंशतिसाहस्रं गारुडं परिकीर्त्तितम्॥
परं द्वादशसाहस्रं ब्रह्माण्डं परिकीर्त्तितम्।
एवं पुराणसंख्यानं चतुर्लक्षमुदाहृतम्॥
अष्टादशपुराणानामेवमेव विदुर्बुधाः।
एवमेवोपपुराणानामष्टादश प्रकीर्त्तिताः॥
इतिहासो भारतञ्च वाल्मीकं काव्यमेव च।
पञ्चकं पञ्चरात्राणां लक्षणमाहात्म्यपूर्व्वकम्॥
वाशिष्ठं नारदीयञ्च कापिलं गौतमीयकम्।
परं सनत्कुमारीयं पञ्चरात्रञ्च पञ्चकम्॥
पञ्चस्वः संहितानाञ्च लक्षभक्तिसमन्विताः।
ब्रह्मणश्च शिवस्यापि प्रह्लादस्य तथैव च॥
गौतमस्य कुमारस्य संहिताः परिकीर्त्तिताः।
इति ते कथितं सर्व्वं क्रमेण च पृथक् पृथक्॥
अस्त्येवं विपुलं शास्त्रं ममापि च यथागमम्॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १३२ अः॥

पद्मपुराणमते तु।

"निस्तारार्थं तु लोकानां स्वयं नारायणः प्रभुः।
व्यासरूपेण कृतवान् पुराणानि महीतले॥
पठनाच्छ्रवणाद्यस्य हृत्यं पापक्षयो भवेत्।
धर्म्माधर्म्मपरिज्ञानं सदाचारप्रवर्त्तनम्॥
गतिश्च परमा तद्वद्भक्तिर्भगवति प्रभौ।
तानि ते कथयिष्यामि सप्तमानानि भूतले॥"

पुराणसंख्यान्तरमाह।

"पुराणानि चतुर्लक्षाण्येतानि धरणीतले।
तथा महाभारतस्य लक्षसंख्यं प्रकीर्त्तितम्॥
पञ्चलक्षमिदं राजन्! कथितं ब्रह्मकेवलम्।
वेदः सञ्चमनामैव लोकनिस्तारकः परः॥

तत्र पद्मपुराणञ्च प्रथमं स प्रणीतवान्।
ततोऽन्यानि पुराणानि कृत्वा षोड़श तु क्रमात् ॥
अष्टादशं भागवतं सारमाकृष्य सर्व्वतः।
कृतवान् भगवान् व्यासः शुकञ्चाध्यापयत् सुतम्॥"
इति पातालखण्डे ७१ अध्यायः ॥ * ॥
आख्यानादिभिः सह व्यासः पुराणं चक्रे।
यथा,—
"आख्यानैश्चाप्युपाख्यानैर्गाथाभिः कल्पशुद्धिभिः।
पुराणसंहितां चक्रे पुराणार्थविशारदः ॥
प्रख्यातो व्यासशिष्योऽभूत् सूतो वै लोमहर्षणः।
पुराणसंहितां तस्मै ददौ व्यासो महामुनिः ॥"
अस्य टीका यथा,—
आख्यानादिभिः सह पुराणं चक्रे व्यास इत्यन्वयः। तत्र च।
स्वयं दृष्टार्थकथनं प्राहुराख्यानकं बुधाः।
श्रुतस्यार्थस्य कथनमुपाख्यानं प्रचक्षते ॥
गाथास्तु पित्रादिस्तुतिप्रभृतिगीतयः। कल्पशुद्धिः
श्राद्धकल्पादिनिर्णयः ॥ * ॥
"सुमतिश्चाग्निवर्चाश्चमित्रायुः शांशपायनः।
अकृतव्रणोऽथ सावर्णिः षट् शिष्यास्तस्य चाभवन् ॥"
टीका। सुमत्यादयस्तु रोमहर्षणस्य षट्शिष्यास्तत्कृताः षट् संहिता जगदुः ॥ * ॥
"काश्यपः संहिताकर्त्ता सावर्णिः शांशपायनः।
लौमहर्षणिका चान्या तिस्रणां मूलसंहिता ॥"
टीका। अकृतव्रण एव काश्यपः काश्यपो ह्यकृतव्रण इति वायूक्तेः। रौमहर्षणिका चान्या रोमहर्षणेन पुनः संक्षेपेण प्रोक्ता ॥ * ॥
"चतुष्टयेनापीतेन संहितानामिदं मुने!।"
टीका। एतासां काश्यपादिकृतानां संहितानामर्थचतुष्टयेनापि मूलभूतेन तत्सारोद्धारात्मकं इदं श्रीविष्णुपुराणं मुने! मैत्रेय! मया कृतमिति शेषः ॥ * ॥
"आद्यं सर्व्वपुराणानां पुराणं ब्राह्ममुच्यते।
अष्टादशपुराणानि पुराणज्ञाः प्रचक्षते ॥"
इति विष्णुपुराणे ३ अंशे ६ अध्यायः ॥*॥
तेषां नामोच्चारणादिमाहात्म्यं यथा,—
"अष्टादशपुराणानां नामधेयानि यः पठेत्।
विसत्यं जपते नित्यं सोऽश्वमेधफलं लभेत् ॥"
इति मार्कण्डेयपुराणम् ॥ * ॥
तामसपुराणानि यथा,—
"मात्स्यं कौर्म्मं तथा लैङ्गं शैवं स्कान्दं तथैव च।
आग्नेयञ्च षड़ेतानि तामसानि निबोधत ॥"
सात्त्विकपुराणानि यथा,—
"वैष्णवं नारदीयञ्च तथा भागवतं शुभम्।
गारुड़ञ्च तथा पाद्मं वाराहं शुभदर्शने!।
सात्त्विकानि पुराणानि विज्ञेयानि शुभानि वै ॥"
राजसपुराणानि यथा,—
"ब्रह्माण्डं ब्रह्मवैवर्त्तं मार्कण्डेयं तथैव च।
भविष्यं वामनं ब्राह्मं राजसानि निबोधत ॥
सात्त्विका मोक्षदाः प्रोक्ता राजसाः स्वर्गदाः शुभाः।
तथैव तामसा देवि! निरयप्राप्तिहेतवः ॥"
इति ब्राह्मोत्तरखण्डे ४३ अध्यायः ॥ * ॥
अष्टादशोपपुराणानि यथा,—
"आद्यं सनत्कुमारोक्तं नारसिंहमथापरम्।
तृतीयं स्कान्दमुद्दिष्टं कुमारेण तु भाषितम् ॥
चतुर्थं शिवधर्म्माख्यं साक्षान्नन्दीशभाषितम्।
दुर्व्वाससोक्तमाश्चर्य्यं नारदोक्तमतः परम् ॥
कापिलं वामनञ्चैव तथैवोशनसेरितम्।
ब्रह्माण्डं वारुणञ्चाथ कालिकाह्वयमेव च ॥
माहेश्वरं तथा साम्बं सौरं सर्व्वार्थसञ्चयम्।
पराशरोक्तमपरं मारीचं भार्गवाह्वयम् ॥"
इति गारुड़े २२७ अध्यायः ॥ * ॥
कौर्म्मोक्तान्येतानि उपपुराणशब्दे द्रष्टव्यानि ॥
पुराणपाठक्रमस्तु पारायणशब्दे पाठशब्दे च द्रष्टव्यः ॥ अथाष्टादशमहापुराणानामनुक्रमणिका अर्थात् तेषां श्लोकपर्व्वखण्डभागोपाख्यानश्रवणदानफलानि लिख्यन्ते।
सूत उवाच।
"एतच्छ्रुत्वा नारदस्तु कुमारस्य वचो मुदा।
पुनरप्याह सुप्रीतो जिज्ञासुः श्रेय उत्तमम् ॥
नारद उवाच।
साधु साधु महाभाग! सर्व्वलोकोपकारकम्।
महातन्त्रं त्वया प्रोक्तं सर्व्वतन्त्रोत्तमोत्तमम् ॥
अधुना श्रोतुमिच्छामि पुराणाख्यानमुत्तमम्।
यस्मिन् यस्मिन् पुराणे तु यद्यदाख्यानकं मुने!।
तत्तत् सर्व्वं समाचक्ष्व सर्व्वज्ञस्त्वं यतो मतः ॥
तच्छ्रुत्वा वचनं विप्रा नारदस्य शुभावहम्।
पुराणाख्यानसंप्रश्नं कुमारः प्रत्युवाच ह ॥
सनत्कुमार उवाच।
पुराणाख्यानकं विप्र! नानाकल्पसमुद्भवम्।
नानाकथासमायुक्तमद्भुतं बहुविस्तरम् ॥
ऋषिः सनातनश्चायं यथा वेद तथापरः।
न वेद तस्मात् पृच्छ त्वं बहुकल्पविदांवरम् ॥
श्रुत्वेत्थं नारदो वाक्यं कुमारस्य महात्मनः।
प्रणम्य विनयोपेतः सनातनमथाब्रवीत् ॥
ब्रह्मन्! पुराणविच्छ्रेष्ठ! ज्ञानविज्ञाततत्पर!।
पुराणानां विभागं मे साकल्येनानुकीर्त्तय ॥
यस्मिन् श्रुते श्रुतं सर्व्वं ज्ञाते ज्ञातं कृते कृतम्।
वर्णाश्रमाचारधर्म्मं साक्षात्कारत्वमेष्यति ॥
कियन्ति च पुराणानि कियत् सङ्ख्यानि मानतः।
किं किमाख्यानयुक्तानि तद्वदस्व मम प्रभो!॥
चातुर्वर्ण्याश्रया नाना व्रतादीनां कथास्तथा।
सृष्टिक्रमेण वंशानां कथाः सम्यक् प्रकाशय ॥
त्वत्तोऽधिको न चान्योऽस्ति पुराणाख्यानवित् प्रभो!।
तस्मादाख्याहि मह्यं त्वं सर्व्वसन्देहभञ्जनम् ॥
ततः सनातनो विप्राः श्रुत्वा नारदभाषितम्।
नारायणं चरणं ध्यात्वा प्रोवाचाथ विदांवरः ॥
सनातन उवाच।
साधु साधु मुनिश्रेष्ठ! सर्व्वलोकोपकारक!।
पुराणाख्यानविज्ञाने यज्ज्ञाता नैष्ठिकी मतिः ॥
तुभ्यं सम्भिधास्यामि यत् प्रोक्तं ब्रह्मणा पुरा।
मरीच्यादिऋषिभ्यस्तु पुत्रस्नेहाद्दतात्मना ॥
एकदा ब्रह्मणः पुत्रो मरीचिर्नाम विश्रुतः।
स्वाध्यायश्रुतसम्पन्नो वेदवेदाङ्गपारगः ॥
उपेत्य स्वपितरं ब्रह्माणं लोकभावनम्।
प्रणम्य भक्त्या पप्रच्छ इदमेव मुनीश्वर!।
पुराणाख्यानमुत्तमं यत्त्वं पृच्छसि मानद!॥
मरीचिरुवाच।
भगवन्! देवदेवेश! लोकानां प्रभवाव्यय!।
सर्व्वज्ञ! सर्व्वकल्याण सर्व्वाधार नमोऽस्तु ते ॥
पुराणबीजमाख्याहि मह्यं शुश्रूषते पितः!।
लक्षणञ्च प्रमाणञ्च वक्तारं पृच्छकं तथा ॥
ब्रह्मोवाच।
शृणु वत्स! प्रवक्ष्यामि पुराणानां समुच्चये।
यस्मिन् ज्ञाते भवेज्ज्ञातं वाङ्मयं सचराचरम् ॥
पुराणमेकमेवासीत् सर्व्वकल्पेषु मानद!।
चतुर्व्वर्गस्य बीजञ्च शतकोटिप्रविस्तरम् ॥
प्रवृत्तिः सर्व्वशास्त्राणां पुराणादभवत्ततः ॥
कालेनाग्रहणं दृष्ट्वा पुराणस्य महामतिः।
हरिर्व्यासस्वरूपेण जायते च युगे युगे ॥
चतुर्लक्षप्रमाणेन द्वापरे द्वापरे सदा।
तदष्टादशधा कृत्वा भूर्लोके निर्दिशत्यपि ॥
अद्यापि देवलोके तु शतकोटि प्रविस्तरम्।
अस्त्येव तस्य सारस्तु चतुर्लक्षेण वर्ण्यते ॥*॥
ब्राह्मम् १ पाद्मम् २ वैष्णवञ्च ३ शैवीयम् ४ तथैव च।
भागवतम् ५ नारदीयम् ६ मार्कण्डेयञ्च ७ कीर्त्तितम् ॥
आग्नेयञ्च ८ भविष्यञ्च ९ ब्रह्मवैवर्त्त-१० लिङ्गके ११।
वाराहञ्च १२ तथा स्कान्दम् १३ वामनम् १४ कूर्म्म-१५ संज्ञकम्।
मात्स्यञ्च१६ गारुड़म्१७ तद्वद्ब्रह्माण्डाख्य-१८ मिति त्रिषट् ॥
एकं कथानकं सूत्रं वक्तुः श्रोतुः समाशयम्।
प्रवक्ष्यामि समासेन निशामय समाहितः ॥"*॥
तत्र प्रथमं ब्रह्मपुराणम्।
"ब्राह्मं पुराणं तत्रादौ सर्व्वलोकहिताय च।
व्यासेन वेदविदुषा समाख्यातं महात्मना ॥
तद्वै सर्व्वपुराणाग्र्यं धर्म्मकामार्थमोक्षदम्।
नानाख्यानेतिहासाढ्यं दशसाहस्रमुच्यते ॥*॥
तत्पूर्व्वभागे।
"देवानामसुराणाञ्च यत्रोत्पत्तिः प्रकीर्त्तिता।
प्रजापतीनाञ्च तथा दक्षादीनां मुनीश्वर!॥
ततो लोकेश्वरस्यात्र सूर्य्यस्य परमात्मनः।
वंशानुकीर्त्तनं पुण्यं महापातकनाशनम् ॥
यत्रावतारः कथितः परमानन्दरूपिणः।
श्रीमतो रामचन्द्रस्य चतुर्व्यूहावतारिणः ॥
ततश्च सोमवंशस्य कीर्त्तनं यत्र वर्णितम्।
कृष्णस्य जगदीशस्य चरितं कल्मषापहम् ॥
द्वीपानाञ्चैव सिन्धूनां वर्षाणां चाप्यशेषतः।
वर्णनं यत्र पातालस्वर्गाणाञ्च प्रदृश्यते ॥
नरकाणां समाख्यानं सूर्य्यस्य क्रतिकथानकम्।

पार्वतीयात् तदा तस्य विवाहस्य निगद्यते ।
इत्याख्यानं ततः प्रोक्तमेकत्रिंशत्सहस्रकम् ।
पूर्वभागोऽयमुदितः पराख्यस्य मानद ! ।"*
तदुत्तरभागे ।
"अस्मोत्सर्गे विभागे तु पुराणोक्तमवर्णनम् ।
विस्तरेण समाख्यानं नीर्थयात्राविधानतः ।
अथैव ब्रह्मचरितं विस्तरात् समुदीरितम् ।
वर्णनं यमलोकस्य चित्रगुप्तविधिस्तथा ।
वर्णाश्रमाणां धर्माश्च कीर्तिता यत्र विस्तरात् ।
त्रिपुरधर्मसंयुक्तानां प्रलयस्य च वर्णनम् ।
योगानाथ समाख्यानं सांख्यानामपि वर्णनम् ।
प्रश्नयोत्तमसंदोहः पुराणस्य च संमतम् ।
एतद्ब्रह्मपुराणात् भागद्वयसमाचितम् ।
दलितं सर्वपापघ्नं सर्वसौख्यप्रदायकम् ।"*
तदुत्तरखण्डे ।
"शतयोनिकसंवादं मुक्तिमुक्तिप्रदायकम् ।
लिखित्वेतत् पुराणं यो वैशाख्यां दैवसंयुतम् ।
अलंधेनुशतस्यापि भक्त्या दद्यादिजातये ।
पौराणिकाय सम्पूज्य वस्त्रभोज्यविभूषणैः ।
स याति ब्रह्मणो लोके यावच्चन्द्रार्कतारकम् ।
यः पठेच्छृणुयाद्वापि ब्राह्मणाद्युत्तमां द्विज ! ।
सोऽपि सर्वपुराणस्य श्रोतुर्वक्तुः फलं लभेत् ।
शृणोति यः पुराणन्तु ब्रह्मं सर्वं जितेन्द्रियः ।
दत्त्वाग्रहे च नियमात् स लभेद् ब्रह्मणः
परम् ॥
किमत्र बहुनोक्तेन यद्यदिच्छति मानवः ।
तत् सर्वं लभते वत्स ! पुराणस्यास्य कीर्तनात् ।"
इति श्रीनारदीयपुराणे पूर्वभागे हरिहरपुराणे चतुर्थपादे ६२ अध्यायः ॥१॥

द्वितीयं पद्मपुराणम् ।

श्रीब्रह्मोवाच ।
"शृणु पुत्र ! प्रवक्ष्यामि पुराणं पद्मसंज्ञितम् ।
सर्वपुण्यप्रदं नृणां शृण्वतां पठतां सदा ।
यथा पवित्रितः सर्वः शरीरीति निगद्यते ।
तथैतं पठभिः सर्वैरिदं पापनाशनम् ।"*
तत्र प्रथमे सृष्टिखण्डे ।
"पुलस्त्येन तु भीष्माय यत्पूर्वमतो द्विज ! ।
नानाख्यानैर्निगदितं वेदार्थैश्चोत्तो धर्मविस्तरः ।
पुष्करस्य च माहात्म्यं विस्तरेण प्रकीर्तितम् ।
ब्रह्मयज्ञविधानञ्च वेदमाहात्म्यमेव च ।
दानानां कीर्तनं यत्र स्नानानाञ्च पृथक् पृथक् ।
विवाहः श्रीसखायाश्च नारदाख्यानकं महत् ।
माहात्म्यञ्च नदीनां कीर्तनं सर्वपुण्यदम् ।
पत्न्यादिदेवतानां पर्वो यत्र पृथक् पृथक् ।
सप्तानामपि दानं यत्र प्रोक्तं द्विजोत्तम ! ।
नानाविधानसुदितं यत्रेदं सुमहात्मना ।"*
द्वितीये भूमिखण्डे ।
"त्रिपुराख्यादिदैत्यानां विनाशकर्मकथा पुरा ।
शुक्रस्य तथा प्रह्लादस्य च प्रभवस्तथा ।
पृथोर्वैन्यस्य चाख्यानं धर्माख्यानं ततः परम् ।
विष्णुपुष्करक्षेत्रं तत्पुण्यस्य कथा ततः ।
प्रयागादिसमस्तानां तीर्थानां वर्णनं परम् ।

राज्ञा चैमिनिसंवादो यज्ञाख्यश्चैकचाकुतः ।
कथा च शशीकसुन्द्र्याः कुण्डलेनाधिता ।
कार्तीदाख्यानकं तत्र विष्णुधर्मसंयुतः ।
कुन्तलस्य च संवादस्तथैव महात्मना ।
सिद्धाख्यानं ततः प्रोक्तं सगरस्यास्य फलीश्वरम् ।
शतयोनिकसंवादं भूमिखण्डमिदं स्मृतम् ।"*
तृतीये स्वर्गखण्डे ।
"ब्रह्मणोत्पत्तिरदिता यज्ञविघ्नेन नौतिना ।
सप्तभूमिलोकसंस्थानं तीर्थाख्यानं ततः परम् ।
नर्मदोत्पत्तिकथनं तत्तीर्थानां कथा पृथक् ।
कुरुक्षेत्रादितीर्थानां कथाः पुण्याः प्रकीर्तिताः ।
कालिन्दीपुण्यकथनं कार्तीमाहात्म्यवर्णनम् ।
गयायाश्चैव माहात्म्यं प्रयागस्य च पुण्यकम् ।
वर्णाश्रमानुरोधेन कर्मयोगनिरूपणम् ।
व्यासचैमिनिसंवादः पुण्यकर्मकथाचितः ।
समुद्रमथनाख्यानं व्रताख्यानं ततः परम् ।
ऊर्जव्रताख्यमाहात्म्यं स्तोत्रं सर्वापराधघ्नम् ।
एतत्स्वर्गाभिधं विप्र ! सर्वपातकनाशनम् ।"
चतुर्थे पातालखण्डे ।
"रामाश्वमेधं प्रथमं रामराज्याभिषेचनम् ।
अगस्त्याद्यागमश्चैव पौलस्त्याश्रयकीर्तनम् ।
अश्वमेधोपदेशश्च हयचर्या ततः परम् ।
नानाराजकथाः पुण्या जगन्नाथानुवर्णनम् ।
वृन्दावनस्य माहात्म्यं सर्वपापप्रणाशनम् ।
नित्यलीलानुकथनं यत्र कृष्णावतारिणः ।
माधवस्थानमाहात्म्यं स्नानदानार्चने फलम् ।
धरावराहसंवादो यमब्राह्मणयोः कथा ।
संवादो राजदूतानां कृष्णस्तोत्रनिरूपणम् ।
शिवसम्भुसमायोगो दधीच्याख्यानकन्ततः ।
भस्ममाहात्म्यमतुलं शिवमाहात्म्यमुत्तमम् ।
देवरातसुतस्यापि पुराणज्ञप्रशंसनम् ।
गौतमाख्यानकञ्चैव त्रिवर्गीता ततः स्मृता ।
कल्पान्तरी रामकथा भरद्वाजसमन्विता ।
पातालखण्डमेतद्धि शृण्वतां ज्ञानिनां सदा ।
सर्वपापप्रशमनं सर्वाभीष्टफलप्रदम् ।"
पञ्चमे उत्तरखण्डे ।
"पर्वतीयाख्यानकं पूर्वं गौर्यै प्रोक्तं शिवेन वै ।
जालन्धरकथा पश्चात्तीर्थैलाद्भुतकीर्तनम् ।
नगरस्य कथा पुण्या ततः परमुदीरितम् ।
गङ्गाप्रयागकाशीनां गयायाश्चाधिपुण्यकम् ।
व्यासादिदानमाहात्म्यं तत्तत्पात्रादशीव्रतम् ।
चतुर्विंशैकादशीनां माहात्म्यं पृथगीरितम् ।
विष्णुधर्मसमाख्यानं विष्णुनामसहस्रकम् ।
कार्तिकव्रतमाहात्म्यं माघस्नानफलन्ततः ।
जम्बुद्वीपस्य तीर्थानां माहात्म्यं पापनाशनम् ।
सप्तमल्याश्च माहात्म्यं दक्षिणोत्पत्तिवर्णनम् ।
देवशर्मादिदानस्थानं गौतमाश्रमवर्णनम् ।
भक्तस्थानस्य माहात्म्यं श्रीमद्भागवतस्य च ।
ब्रह्मप्रश्नस्य माहात्म्यं चतुर्वीरोपचर्चितम् ।
नरकाभिधानञ्च विष्णुलक्षणवर्णनम् ।
अवतारकथा पुण्या मन्वादीनामतः परम् ।
रामनामाक्षरं दिव्यं ब्रह्मणाख्यञ्च नारद ! ।

परीक्षितश्च मृत्युश्च श्रीविष्णोर्नैभवस्य च ।
दक्षिणदुत्तरं स्वर्गं पञ्चमं सर्वपुण्यदम् ।" *
तदुत्तरखण्डे ।
"पञ्चमस्तुतिं पार्थ्यः शृणोति नरोत्तमः ।
स लभेद्वैष्णवं धाम भुक्त्वा भोगानभीप्सितान् ॥
एतत् पञ्चपदाख्यानं पद्मसंज्ञकम् ।
पुराणं लिखयित्वा वै ज्येष्ठायां स्वर्णसंयुतम् ॥
यः प्रदद्यात् सुवस्त्राद्यं पुराणज्ञाय मानद ! ।
स याति वैष्णवं नाम सर्वदेवनमस्कृतः ॥
पञ्चानुक्रमणीमेतां यः पठेत् शृणुयात् तथा ।
सोऽपि पद्मपुराणस्य लभेत् अवश्यं फलम् ।"
इति श्रीनारदीयपुराणे पूर्वभागे हरिहरपाख्याने चतुर्थपादे ६३ अध्यायः ॥ २ ॥

तृतीयं विष्णुपुराणम् ।

श्रीब्रह्मोवाच ।
"शृणु वत्स ! प्रवक्ष्यामि पुराणं वैष्णवं महत् ।
त्रयोविंशतिसाहस्रं सर्वपातकनाशनम् ॥
यत्रादिभागे निर्दिष्टाः षट्शाः शक्तुजेन च ।
मैत्रेयाद्यास्तथा तत्र पुराणस्यावतारिकाः ॥"
तत्र प्रथमभागस्य प्रथमांशे ।
"आदिकारणसर्गश्च देवादीनाञ्च सम्भवः ।
समुद्रमथनाख्यानं ध्रुवादीनां ततोद्भवाः ॥
ध्रुवस्य चरितं चैव पृथोश्चरितमेव च ।
प्राचेतसं तथाख्यानं प्रह्लादस्य कथानकम् ।
पृथग्राज्याधिकाराख्या प्रथमोंऽश इतीरितः ।"
प्रथमभागस्य द्वितीयांशे ।
"प्रियव्रताद्यवाख्यानं द्वीपवर्षनिरूपणम् ।
पातालनरकाख्यानं सप्तस्वर्गनिरूपणम् ।
सूर्यादिचारकथनं पृथग्राशिक्रमंयुतम् ।
चरितं भरतस्याथ मुक्तिमार्गनिदर्शनम् ।
निदाघऋभुसंवादो द्वितीयोंऽश उदाहृतः ।"
प्रथमभागस्य तृतीयांशे ।
"मन्वन्तरसमाख्यानं वेदशाखावतारकम् ।
नरकोद्धारकं कर्म गदितञ्च ततः परम् ।
सगरस्यौर्वसंवादे सर्वधर्मनिरूपणम् ।
आद्यकल्पं तथोद्दिष्टं वर्णाश्रमनिबन्धनम् ।
सदाचारश्च कथितो मायामोहकथा ततः ।
तृतीयोंऽशोऽयमुदितः सर्वपापप्रणाशनः ।"
प्रथमभागस्य चतुर्थांशे ।
"सूर्यवंशकथा पुण्या सोमवंशानुकीर्तनम् ।
चतुर्थोंऽशे मुनिश्रेष्ठ ! नानाराजकथाचितम् ।"
प्रथमभागस्य पञ्चमांशे ।
"कृष्णावतारसंग्रामो गोकुलोद्या कथा ततः ।
पूतनादिवधो बाल्ये गोपीरासादिकीर्तनम् ।
कैशोरे कंसहननं माथुरं चरितं तथा ।
ततस्तु यौवने प्राप्ते सीता द्वारवतीभवा ।
सर्वदैत्यवधो यत्र विवाहाश्च पृथक्स्थिताः ।
यत्र स्थित्वा जगन्नाथः हरिर्वीरेश्वरः ।
भूभारहरणं चक्रे परस्परकृतादिभिः ।
अष्टावक्रीयमाख्यानं पञ्चमोंऽश इतीरितः ।"

प्रथमभागस्य षष्ठांशे ।
"कलिजं चरितं प्रोक्तं चातुर्विध्यं लयस्य च ।
ब्रह्मज्ञानसमुद्देशः खाण्डिक्यस्य निरूपितः ॥
कैशिध्वजेन चैत्येन षष्ठोंशः परिकीर्त्तितः ॥"
तस्य द्वितीयभागे ।
"अतःपरन्तु सूतेन शौनकादिभिरादरात् ।
पृष्टेन चोदितः शश्वद्विष्णुधर्म्मोत्तराङ्गयाः ॥
नानाधर्म्मकथाः पुण्या व्रतानि नियमा यमाः ।
धर्म्मशास्त्रं चार्थशास्त्रं वेदान्तं ज्योतिषं तथा ॥
वंशाख्यानं प्रकरणात् श्लोकाश्च मनवस्तथा ॥
नानाविद्याश्रयाः प्रोक्ताः सर्व्वलोकोपकारकाः ।
एतद्विष्णुपुराणं वै सर्व्वशास्त्रार्थसंग्रहम् ॥"*॥
तत्फलश्रुतिः ।
"वाराहकल्पवृत्तान्तं व्यासेन कथितं त्विह ।
यो नरः पठते भक्त्या यः शृणोति च सादरम् ।
तावुभौ विष्णुलोकं हि व्रजेतां भुक्तभोगकौ ॥
तल्लिखित्वा च यो दद्यादाषाढ्यां घृतधेनुना ।
सहितं विष्णुभक्ताय पुराणार्थविदे द्विज ! ।
स याति वैष्णवं धाम विमानेनार्कवर्चसा ॥
यश्च विष्णुपुराणस्य समनुक्रमणीं द्विज ! ।
कथयेच्छृणुयाद्वापि स पुराणफलं लभेत् ॥"
इति श्रीनारदीयपुराणे पूर्व्वभागे हरिहरपाख्याने चतुर्थपादे ६४ अध्यायः ॥ ३ ॥
चतुर्थं वायुपुराणम् ।
ब्रह्मोवाच ।
"शृणु विप्र ! प्रवक्ष्यामि पुराणं वायवीयकम् ।
यस्मिन् श्रुते लभेद्ब्रह्म रुद्रस्य परमात्मनः ॥
चतुर्व्विंशतिसाहस्रं तत् पुराणं प्रकीर्त्तितम् ।
श्वेतकल्पप्रसङ्गेन धर्म्माख्यश्चाह मारुतः ॥
तदायवीयमुदितं भागद्वयसमाचितम् ॥" * ॥
तस्य पूर्व्वभागे ।
"स्वर्गादिलक्षणं यत्र प्रोक्तं विप्र ! सविस्तरम् ॥
मन्वन्तरेषु वंशाश्च राज्ञां ये यत्र कीर्त्तिताः ।
गयासुरस्य हननं विस्तराद्यत्र कीर्त्तितम् ॥
मासानाञ्चैव माहात्म्यं मासस्तोत्रं फलाधिकम् ।
दानधर्म्मा राजधर्म्मा विस्तरेणोदितास्तथा ॥
भूपातालककुब्योमचारिणां यत्र निर्णयः ।
व्रतादीनाञ्च पूर्व्वोयं विभागः समुदाहृतः ॥"
तदुत्तरभागे ।
"उत्तरे तस्य भागे तु नर्म्मदातीर्थवर्णनम् ।
शिवस्य संहिताख्या वै विस्तरेण मुनीश्वर ! ॥
यो देवः सर्व्वदेवानां दुर्व्विज्ञेयः सनातनः ।
स तु सर्व्वात्मना यस्यास्तीरे तिष्ठति सन्ततम् ॥
इदं ब्रह्मा हरिरिदं साक्षाच्चेदं परो हरः ।
इदं ब्रह्म निराकारं कैवल्यं नर्म्मदाजलम् ॥
ध्रुवं लोकहितार्थाय शिवेन स्वशरीरतः ।
शक्तिः काचि त्वरिद्रूपा रेवेयमवतारिता ॥
ये वसन्त्युत्तरे कूले रुद्रस्यानुचरा हि ते ।
वसन्ति याम्यतीरे ये लोकं ते यान्ति वैष्णवम् ॥
ओंकारेश्वरमारभ्य यावत् पश्चिमसागरम् ।
सङ्गमाः पञ्च च त्रिंशन्नदीनां पापनाशनाः ॥
दक्षैकमुत्तरे तीरे त्रयोविंशतिदक्षिणे ।
पञ्चविंशत्तमः प्रोक्तो रेवासागरसङ्गमः ॥
सङ्गमैः सहितान्येवं रेवातीरह्रदेऽपि च ।
चतुःशतानि तीर्थानि प्रसिद्धानि च सन्ति हि ।
षष्टितीर्थसहस्राणि षष्टिकोट्यो मुनीश्वर ! ।
सन्ति चान्यानि रेवायास्तीरयुग्मे पदे पदे ॥
संहितेयं महापुण्या शिवस्य परमात्मनः ।
नर्म्मदाचरितं यत्र वायुना परिकीर्त्तितम् ॥"
तत्फलश्रुतिः ।
"लिखित्वेदं पुराणन्तु गुडधेनुसमाचितम् ।
श्रावण्यां यो ददेद्भक्त्या ब्राह्मणाय कुटुम्बिने ॥
रुद्रलोके वसेत् सोऽपि यावदिन्द्राश्चतुर्दश ।
यः श्रावयेद्वा शृणुयाद्वायवीयमिदं नरः ।
नियमेन हरिष्याशी स रुद्रो नात्र संशयः ॥
यश्चानुक्रमणीमेतां शृणोति श्रावयेत वा ।
सोऽपि सर्व्वपुराणस्य फलं श्रवणजं लभेत् ॥"
इति श्रीनारदीयपुराणे पूर्व्वभागे हरिहरपाख्याने चतुर्थपादे ६५ अध्यायः ॥ ४ ॥
पञ्चमं श्रीभागवतपुराणम् ।
ब्रह्मोवाच ।
"मरीचे ! शृणु वक्ष्यामि वेदव्यासेन यत् कृतम् ।
श्रीमद्भागवतं नाम पुराणं ब्रह्मसम्मितम् ॥
तदष्टादशसाहस्रसङ्ख्यातं पापनाशनम् ।
सुरूपादशरूपोऽयं स्कन्धैर्द्वादशभिर्युतः ॥
भगवानेव विप्रेन्द्र ! विश्वरूपी च मीरितः ॥"
तस्य प्रथमस्कन्धे ।
"तत्र तु प्रथमे स्कन्धे सूतशौनकयोः समागमः ।
व्यासस्य चरितं पुण्यं पाण्डवानां तथैव च ॥
पारीक्षितमुपाख्यानमितीदं समुदाहृतम् ॥"
द्वितीयस्कन्धे ।
"परीक्षित्शुकसंवादे स्थितित्रयनिरूपणम् ।
ब्रह्मनारदसंवादेऽवतारचरितान्वितम् ॥
पुराणलक्षणञ्चैव सृष्टिकारणसम्भवः ।
द्वितीयोऽयं समुदितः स्कन्धो व्यासेन धीमता ॥"
तृतीयस्कन्धे ।
"चरितं विदुरस्याथ मैत्रेयेणास्य सङ्गमः ।
सृष्टिप्रकरणं पश्चाद्ब्रह्मणः परमात्मनः ॥
कापिलं साङ्ख्यमप्यत्र तृतीयोऽयमुदाहृतः ॥"
चतुर्थस्कन्धे ।
"सत्याच्चरितमादौ तु ध्रुवस्य चरितं ततः ।
पृथोः पुण्यसमाख्यानं ततः प्राचीनवर्हिषः ।
इत्येष तुर्य्यो गदितो विसर्गे स्कन्ध उत्तमः ॥"
पञ्चमस्कन्धे ।
"प्रियव्रतस्य चरितं नदंश्यानाञ्च पुण्यदम् ।
ब्रह्माण्डान्तर्गतानाञ्च लोकानां वर्णनन्ततः ॥
नरकस्थितिरित्येष संस्थाने पञ्चमो मतः ॥"
षष्ठस्कन्धे ।
"अजामिलस्य चरितं दक्षसृष्टिनिरूपणम् ॥
वृत्राख्यानं ततः पश्चान्मरुतां जन्म पुण्यदम् ।
षष्ठोऽयमुदितः स्कन्धो व्यासेन परिपोषणे ॥"
सप्तमस्कन्धे ।
"प्रह्लादचरितं पुण्यं वर्णाश्रमनिरूपणम् ।
सप्तमो गदितो वत्स वासनाकर्म्मकीर्त्तने ॥"
अष्टमस्कन्धे ।
"गजेन्द्रमोक्षणाख्यानं मन्वन्तरनिरूपणम् ।
समुद्रमथनञ्चैव बलिबन्धवर्णनम् ॥
मत्स्यावतारचरितमष्टमोऽयं प्रकीर्त्तितः ॥"*॥
नवमस्कन्धे ।
"सूर्य्यवंशसमाख्यानं सोमवंशनिरूपणम् ।
वंश्यानुचरिते प्रोक्तो नवमोऽयं महामते ! ॥"
दशमस्कन्धे ।
"कृष्णस्य बालचरितं कौमारञ्च व्रजस्थितिः ॥
कैशोरं मधुराख्यानं यौवनं द्वारकास्थितिः ।
भूभारहरणञ्चात्र निरोधे दशमः स्मृतः ॥"
एकादशस्कन्धे ।
"नारदेन तु संवादो वसुदेवस्य कीर्त्तितः ।
यदोश्च दत्तात्रेयेण श्रीकृष्णोद्धवस्य च ॥
यादवानां मिथोऽन्तश्च सूक्तावेकादशः स्मृतः ॥"
द्वादशस्कन्धे ।
"भविष्यकलिनिर्देशो मोक्षो राज्ञः परीक्षितः ॥
वेदशाखाप्रणयनं मार्कण्डेयतपः स्मृतम् ।
सौरी विभूतिरुदिता सात्वती च ततः परम् ॥
पुराणसङ्ख्याकथनमाश्रयैर्द्वादशैर्युतम् ।
इत्येवं कथितं वत्स ! श्रीमद्भागवतं तव ॥" * ॥
तत्फलश्रुतिः ।
"वक्तुः श्रोतुश्चोपदेष्टुरनुमोदितुरेव च ।
साहाय्यकर्त्तुर्गदितं भक्तिमुक्तिविमुक्तिदम् ॥
प्रौष्ठपद्यां पूर्णिमायां हैमसिंहसमाचितम् ।
दैवं भागवताख्यं द्विजाय प्रीतिपूर्व्वकम् ॥
संपूज्य वस्त्रहेमाद्यैर्भगवद्भक्तिमिच्छता ।
योऽप्यनुक्रमणीमेतां श्रावयेच्छृणुयात्तथा ।
स पुराणश्रवणजं प्राप्नोति फलमुत्तमम् ॥"*॥
इति श्रीनारदीयपुराणे पूर्व्वभागे हरिहरपाख्याने चतुर्थपादे ६६ अध्यायः ॥ ५ ॥
षष्ठं नारदीयपुराणम् ।
श्रीब्रह्मोवाच ।
"शृणु विप्र ! प्रवक्ष्यामि पुराणं नारदीयकम् ।
पञ्चविंशतिसाहस्रं हरिचरितकथाश्रयम् ॥" * ॥
तत्र पूर्व्वभागे प्रथमपादे ।
"सूतशौनकसंवादः सृष्टिसंक्षेपवर्णनम् ।
नानाधर्म्मकथाः पुण्याः प्रवृत्ते समुदाहृताः ॥
प्राग्भागे प्रथमे पादे सनर्केण महात्मना ॥"
पूर्व्वभागे द्वितीयपादे ।
"द्वितीये मोक्षधर्म्माख्ये मोक्षोपायनिरूपणम् ।
वेदाङ्गानाञ्च कथनं शुकोत्पत्तिश्च विस्तरात् ।
सनन्दनेन गदिता नारदाय महात्मने ॥" * ॥
पूर्व्वभागे तृतीयपादे ।
"महातन्त्रे समुद्दिष्टं पञ्चपाशविमोचणम् ।
मन्त्राणां शोधनं दीक्षा मन्त्रोद्धारश्च पूजनम् ॥
प्रयोगाः कवचं नामसहस्रं स्तोत्रमेव च ।
गणेशसूर्य्यविष्णूनां शिवशक्त्योरनुक्रमात् ॥
सनत्कुमारमुनिना नारदाय तृतीयके ॥"
पूर्व्वभागे चतुर्थपादे ।
"पुराणलक्षणञ्चैव प्रमाणं दानमेव च ॥
पृथक् पृथक् समुद्दिष्टं दानकालपुरःसरम्

चैत्रादिनवमासेषु तिथीनाञ्च पृथक् पृथक् ॥
प्रोक्तं व्रतियदादीनां व्रतं सर्व्वाघनाशनम् ।
सनातनेन मुनिना नारदाय चतुर्थके ॥
पूर्व्वभागोऽयमुदितो दृढदाख्यानसंज्ञितः ॥"
तदुत्तरभागे ।
"अस्योत्तरे विभागे तु ब्रह्म एकादशीव्रते ॥
वशिष्ठेनाथ संवादो मान्धातुः परिकीर्त्तितः ।
रुक्माङ्गदकथा पुण्या मोहिन्युत्पत्तिकर्म्म च ॥
वसुशापश्च मोहिन्यै पश्चाद्दुरगक्रिया ।
गङ्गाकथा पुण्यतमा गयायाश्चानुकीर्त्तनम् ॥
काश्या माहात्म्यमतुलं पुरुषोत्तमवर्णनम् ।
यात्राविधानं क्षेत्रस्य वक्राख्यानसमन्वितम् ॥
प्रयागस्याथ माहात्म्यं कुरुक्षेत्रस्य तत्परम् ।
हरिद्वारस्य चाख्यानं कामोद्धारानकं तथा ॥
बदरीनीर्घमाहात्म्यं कामाख्यायास्तथैव च ।
प्रभासस्य च माहात्म्यं पराख्यानकं ततः ॥
गौतमाख्यानकं पश्चादेदपादस्खलस्ततः ।
गोकर्णक्षेत्रमाहात्म्यं लक्ष्मणाख्यानकं तथा ॥
सेतुमाहात्म्यकथनं नर्म्मदातीर्थवर्णनम् ।
अवन्त्याश्चैव माहात्म्यं मथुरायास्ततः परम् ॥
वृन्दावनस्य महिमा वमोर्व्रह्मान्तिके गतिः ।
मोहिनीचरितं पश्चादेवं वै नारदीयकम् ॥"*॥
तत्फलश्रुतिः ।
"यः श्रृणोति नरो भक्त्या आदवेदा समाहृतः ।
स याति ब्रह्मणो धाम नात्र कार्य्या विचारणा ॥
यस्त्वेतदिषपूर्णाया धेनूनां सप्तकाञ्चितम् ।
प्रदद्याद्विजवर्य्याय स लभेत्कोत्तमेव च ॥
यश्चानुक्रमणीमेतां नारदीयस्य वर्णयेत् ।
श्रृणुयादेकचित्तेन सोऽपि स्वर्गगतिं लभेत् ॥"
इति श्रीनारदीयपुराणे पूर्व्वभागे दृढदुपाख्याने
चतुर्थपादे ६७ अध्यायः ॥ ६ ॥
सप्तमं मार्कण्डेयपुराणम् ।
श्रीब्रह्मोवाच ।
"अथ ते संप्रवक्ष्यामि मार्कण्डेयाभिधं मुने ! ।
पुराणं सुमहत् पुण्यं पठतां श्रृखतां वदा ॥
यत्राधिकृत्य शकुनीन् सर्व्वधर्म्मनिरूपणम् ।
मार्कण्डेयेन मुनिना जैमिनेः प्राक् समीरितम् ॥
पक्षिणां धर्म्मसंज्ञानां ततो जन्मनिरूपणम् ।
पूर्व्वजन्मकथा चैषां क्रिया च दिवसस्य ॥
तीर्थयात्रा बलस्यातो द्रौपदेयकथानकम् ।
हरिश्चन्द्रकथा पुण्या युद्धमाङ्गीवकाभिधम् ॥
पितापुत्रसमाख्यानं दत्तात्रेयकथा ततः ।
हैहयस्याथ चरितं महाख्यानसमाचितम् ॥
मदालसाकथाचोक्ता खलर्कचरिताचिता ।
सृष्टिसंकीर्त्तनं पुण्यं नवधा परिकीर्त्तितम् ॥
कल्पान्तकालनिर्द्देशो यत्रसृष्टिनिरूपणम् ।
रुद्रादिसृष्टिरुक्ता द्रौपदेयानुकीर्त्तनम् ॥
मनूनाञ्च कथा नाना कीर्त्तिताः पापहारिकाः ।
तासु दुर्गाकथाख्यातं पुण्यदा चाष्टमेऽन्तरे ॥
तत्पश्चात् प्रलयोत्पत्तिस्त्रयीतेजःसमुद्भवः ।
मार्कण्डेयस्य च जन्माख्या तन्माहात्म्यसमाचिता ॥
वैवस्वतोदयश्चापि वसुसप्तचरितं ततः ॥"
वसुसप्तीत्यानं वसुसप्ती च पाठः ।
"खनित्रस्य ततः प्रोक्ता कथा पुण्या महात्मनः ॥
अविचिचरितं चैव किमिच्छव्रतकीर्त्तनम् ।
नरिष्यन्तस्य चरितं इक्ष्वाकुचरितं ततः ॥
तुलस्याश्चरितं पश्चाद्रामचन्द्रस्य सत्कथा ।
कुशवंशसमाख्यानं सोमवंशानुकीर्त्तनम् ॥
पुरूरवःकथा पुण्या नहुषस्य कथाद्भुता ।
ययातिचरितं पुण्यं यदुवंशानुकीर्त्तनम् ॥
श्रीकृष्णबालचरितं माथुरं चरितं ततः ।
द्वारकाचरितञ्चाथ कथा सर्व्वावतारजा ॥
ततः साम्बसमुद्देशः प्रपञ्चासत्यकीर्त्तनम् ।
मार्कण्डेयस्य चरितं पुराणश्रवणे फलम् ॥"*॥
तत्फलश्रुतिः ।
"यः श्रृणोति नरो भक्त्या पुराणमिदमादरात् ।
मार्कण्डेयाभिधं वत्स! स लभेत् परमां गतिम् ॥
यस्तु व्याकुरुते चैतच्छ्रैवं स लभते पदम् ॥
तत् प्रयच्छेल्लिखित्वा यः सौवर्णकरिसंयुतम् ।
कार्त्तिक्यां द्विजवर्य्याय स लभेद्ब्रह्मणः पदम् ॥
श्रृणोति श्रावयेद्वापि यश्चानुक्रमणीमिमाम् ।
मार्कण्डेयपुराणस्य स लभेद्वाञ्छितं फलम् ॥"
इति श्रीनारदीयपुराणे पूर्व्वभागे दृढदुपाख्याने
चतुर्थपादे ६८ अध्यायः ॥ ७ ॥
अष्टमं अग्निपुराणम् ।
श्रीब्रह्मोवाच ।
"अथातः संप्रवक्ष्यामि तवाग्नेयपुराणकम् ।
ईशानकल्पवृत्तान्तं वशिष्ठायाब्रवीत् ॥
तत् पञ्चदशसाहस्रं नाम्ना चरितमद्भुतम् ।
पठतां श्रृखतामेव सर्व्वपापहरं नृणाम् ॥
प्रश्नपूर्व्वं पुराणस्य कथा सर्व्वावतारजा ।
सृष्टिप्रकरणं चाथ विष्णुपूजादिकं ततः ॥
अग्निकार्य्यं ततः पश्चान्मण्डलमुद्रादिलक्षणम् ।
सर्व्वदीक्षाविधानञ्च अभिषेकनिरूपणम् ॥
लक्षणं मण्डलादीनां कृष्णाया मार्ज्जनं ततः ।
पवित्रारोपणविधिर्द्देवालयविधिस्ततः ॥
शालग्रामादिपूजा च मूर्त्तिलक्ष्म पृथक् पृथक् ।
न्यासादीनां विधानञ्च प्रतिष्ठा पूर्त्तिका ततः ॥
विनायकादिदीक्षाणां विधिर्ज्ञेयस्ततः परम् ।
प्रतिष्ठा सर्व्वदेवानां ब्रह्माण्डस्य निरूपणम् ॥
गङ्गादितीर्थमाहात्म्यं जम्बादिद्वीपवर्णनम् ।
ऊर्द्धाधोलोककरचना ज्योतिश्चक्रनिरूपणम् ॥
ज्योतिषञ्च ततः प्रोक्तं श्राद्धं युद्धजयार्थवम् ।
षट्कर्म्म च ततः प्रोक्तं मन्त्रयन्त्रौषधीगणः ॥
कुञ्जिकादिसमर्च्चा च योड़ान्यासविधिस्तथा ।
कोटिहोमविधानञ्च तदन्तरनिरूपणम् ॥
ब्रह्मचर्य्यादिधर्म्माश्च आह्निकल्पविधिस्ततः ।
गृहयज्ञस्ततः प्रोक्तो वैदिकस्मार्त्तकर्म्म च ॥
प्रायश्चित्तानुकथनं तिथीनाञ्च व्रतादिकम् ।
वारव्रतानुकथनं नक्षत्रव्रतकीर्त्तनम् ॥
मासिकव्रतनिर्द्देशो दीपदानविधिस्तथा ।
नवग्रहार्च्चनं प्रोक्तं नरकाणां निरूपणम् ॥
व्रतानाञ्चापि दानानां निरूपणमिहोदितम् ।
नाड़ीचक्रसमुद्देशः सन्ध्याविधिरनुत्तमः ॥
गायत्र्यर्थस्य निर्द्देशो लिङ्गस्योक्तं ततः परम् ।
राजाभिषेकमन्त्रोक्तिर्धर्म्मकृत्यञ्च भूभुजाम् ॥
स्वप्नाध्यायस्ततः प्रोक्तः शकुनादिनिरूपणम् ।
मण्डलादिकनिर्द्देशो रत्नदीक्षाविधिस्ततः ॥
रामोक्तनीतिनिर्द्देशो रत्नानां लक्षणं ततः ।
धनुर्विद्या ततः प्रोक्ता व्यवहारप्रदर्शनम् ॥
देवासुरविमर्द्दाख्या व्यायुर्व्वेदनिरूपणम् ।
गजादीनां चिकित्सा च तेषां शान्तिस्ततः परम् ॥
गोनसादिचिकित्सा च नानापूजास्ततः परम् ।
शान्तयश्चापि विविधा छन्दःशास्त्रमतः परम् ॥
साहित्यञ्च ततः पश्चादैकार्थादिसमाख्याः ।
सिद्धशिष्टानुशिष्टिश्च कोषः स्वर्गादिवर्गके ॥
प्रलयानां लक्षणञ्च शारीरकनिरूपणम् ।
वर्णनं नरकाणाञ्च योगशास्त्रमतः परम् ॥
ब्रह्मज्ञानं ततः पश्चात् पुराणश्रवणे फलम् ।
एतदाग्नेयकं विप्र! पुराणं परिकीर्त्तितम् ॥"
तत्फलश्रुतिः ।
"तल्लिखित्वा तु यो दद्यात् सुवर्णकमलाञ्चितम् ।
तिलधेनुयुतं वापि मार्गशीर्ष्यां विधानतः ।
पुराणार्थविदे सोऽथ स्वर्गलोके महीयते ॥
एषानुक्रमणी प्रोक्ता तवाग्नेयस्य भक्तिदा ।
श्रृखतां पठतामेव नृणामिह परत्र च ॥"*॥
इति श्रीनारदीयपुराणे पूर्व्वभागे दृढदुपाख्याने
चतुर्थपादे ६६ अध्यायः ॥ ८ ॥
नवमं भविष्यपुराणम् ।
श्रीब्रह्मोवाच ।
"अथ ते संप्रवक्ष्यामि पुराणं सर्व्वसिद्धिदम् ।
भविष्यं भरतः सर्व्वलोकानीष्टप्रदायकम् ॥
यत्राहं सर्व्वदेवानामादिकर्त्ता समुद्यतः ।
सृष्ट्यर्थं तत्र सञ्जातो मनुः स्वायम्भुवः पुरा ॥
स मां प्रणम्य पप्रच्छ धर्म्मं सर्व्वार्थसाधकम् ।
अहं तस्मै तदा प्रीतः प्रोवाचं धर्म्मसंहिताम् ॥
पुराणानां यदा व्यासो व्यातवत्के महामतिः ।
तदा तां संहितां सर्व्वां पञ्चधा व्यभजन्मुनिः ॥
अथोरकल्पवृत्तान्तनानाचर्य्यकथाञ्चिताम् ॥"
तत्र प्रथमपर्व्वणि ।
"तत्रादिमं स्मृतं पर्व्व ब्राह्मं यत्रास्युपक्रमः ।
सूतशौनकसंवादे पुराणप्रश्नसंक्रमः ।
आदित्यचरितः प्रायः सर्व्वाख्यानसमाचितः ॥
सृष्ट्यादिलक्षणोपेतः शास्त्रसर्व्वस्वरूपकः ।
प्रश्नलेखकलेखानां लक्षणञ्च ततः परम् ॥
संस्काराणाञ्च सर्व्वेषां लक्षणाच्च कीर्त्तितम् ।
पञ्चत्वादिनिधीनाञ्च कल्पाः सप्त च कीर्त्तिताः ॥
अन्यत्राद्याः श्रेयकल्पा वैष्णवे पर्व्वणि स्मृताः ।
शैवे च कामतो भिन्नाः सौरे चान्यकथाचयः ॥
प्रतिसर्गाश्रयं पञ्चाद्राज्ञाख्यानसमाचितम् ।
पुराणस्योपसंहारसहितं पर्व्व पञ्चमम् ॥
एषु पञ्चसु पूर्व्वेषु ब्रह्मणो महिमाधिकः ॥"
द्वितीयखतीयचतुर्थपञ्चमपर्व्वसु ।
"धर्म्मे कामे च मोक्षे तु विष्णोश्चापि शिवस्य च ।
द्वितीये च तृतीये च सौरो वर्गचतुष्टये ॥
प्रतिसर्गाश्रयं त्वन्यं प्रोक्तं सर्व्वकथाचितम् ।

सभविष्यं विनिर्दिष्टं पर्व्व व्यासेन धीमता ।
चतुर्दशसहस्रन्तु पुराणं परिकीर्त्तितम् ।
भविष्यं सर्व्वदेवानां सान्यं यत्र प्रकीर्त्तितम् ॥
गुणानां तारतम्येन समं ब्रह्मेति हि श्रुतिः ॥"
तत्फलश्रुतिः ।
"तल्लिखित्वा तु यो दद्यात् पौष्यां विद्वान् विमत्सरः ।
गुडधेनुयुतं हैमवत्सामाल्यविभूषणैः ॥
वाचकं पुस्तकञ्चापि पूजयित्वा विधानतः ।
गन्धाद्यैर्भाष्यभक्ष्यैश्च कृत्वा नीराजनादिकम् ।
यो वै जितेन्द्रियो भूत्वा सोपवासः समाहितः ॥
अथ वै यो नरो भक्त्या कीर्त्तयेच्छृणुयादपि ।
स मुक्तः पातकैर्घोरैः प्रयाति ब्रह्मणः पदम् ॥
योऽप्यनुक्रमणीमेतां भविष्यस्य निरूपिताम् ।
पठेद्वा श्रृणुयाच्चैनौ मुक्तिं मुक्तिञ्च विन्दतः ॥"
इति श्रीनारदीयपुराणे पूर्व्वभागे हरिहरपाख्याने चतुर्थपादे १०० अध्यायः ॥ ९ ॥

दशमं ब्रह्मवैवर्त्तपुराणम् ।

श्रीब्रह्मोवाच ।

"शृणु वत्स ! प्रवक्ष्यामि पुराणं दशमं तव ।
ब्रह्मवैवर्त्तकं नाम वेदमार्गानुदर्शकम् ॥
सावर्णिर्यत्र भगवान् साक्षाद्देवर्षयेऽर्थितः ।
नारदाय पुराणार्थं प्राह सर्व्वमलौकिकम् ॥
धर्म्मार्थकाममोक्षाणां सारः प्रीतिर्हरौ हरे ।
तयोरभेदसिद्ध्यर्थं ब्रह्मवैवर्त्तमुत्तमम् ॥
मन्वन्तरस्य कल्पस्य वृत्तान्तं यत्रयोदितम् ।
शतकोटिपुराणे तत् संक्षिप्य प्राह वेदवित् ॥
व्यासश्चतुर्द्धा संव्यस्य ब्रह्मवैवर्त्तसंज्ञितम् ।
अष्टादशसहस्रन्तत् पुराणं परिकीर्त्तितम् ॥
ब्रह्मप्रकृतिविघ्नेशकृष्णखण्डसमाचितम् ।
तत्र सूतर्षिसंवादे पुराणीयक्रमो मतः ॥"
तत्र प्रथमे ब्रह्मखण्डे ।
"सृष्टिप्रकरणं त्वाद्यं ततो नारदवेधसोः ।
विवादः सुमहान् यत्र द्वयोरासीत् पराभवः ॥
शिवलोकगतिः पश्चाज्ज्ञानलाभः शिवात्मनः ।
शिववाक्येन तत्पश्चान् मरीचेः नारदस्य च ॥
मननञ्चैव सावर्णेर्ज्ञानार्थं सिद्धसंविदे ।
आश्रमे सुमहत्पुण्ये त्रैलोक्याश्चर्य्यकारिणि ।
एतद्धि ब्रह्मखण्डं हि श्रुतं पापविनाशनम् ॥"
द्वितीये प्रकृतिखण्डे ।
"ततः सावर्णिसंवादो नारदस्य समीरितः ।
कृष्णमाहात्म्यसंयुक्तो नानाख्यानकथोत्तरः ॥
प्रकृतेरंशभूतानां कलानाञ्चापि वर्णितम् ।
माहात्म्यं पूजनाद्यञ्च विस्तरेण यथास्थितम् ॥
एतत्प्रकृतिखण्डं हि श्रुतं भूतिविधायकम् ॥"
तृतीये गणेशखण्डे ।
"गणेशजन्मसंप्रश्नः सपुण्यकमहाव्रतम् ।
पार्व्वत्याः कार्त्तिकेयेन सह विघ्नेशसम्भवः ॥
चरितं कार्त्तवीर्य्यस्य रामदर्पस्य चाद्भुतम् ।
विवादः सुमहान् पश्चाच्चामदग्न्यगणेशयोः ॥
एतद्विघ्नेशखण्डं हि सर्व्वविघ्नविनाशनम् ॥"
चतुर्थे श्रीकृष्णजन्मखण्डे ।
"श्रीकृष्णजन्मसंप्रश्नो जन्माख्यानं ततोऽद्भुतम् ।
गोकुले गमनं पश्चात् पूतनादिवधोऽद्भुतः ॥
बाल्यकौमारजा लीला विविधास्तत्र वर्णिताः ।
रासक्रीड़ा च गोपीभिः शारदी समुदाहृता ।
रहस्ये राधया क्रीड़ा वर्णिता बहुविस्तरा ॥
सहाक्रूरेण तत्पश्चान्मधुरागमनं हरेः ।
कंसादीनां वधे वृत्ते साद्यस्य द्विजसंस्कृतिः ॥
काश्यसान्दीपनेः पश्चाद्विद्योपादानमद्भुतम् ।
यवनस्य वधः पश्चाद्द्वारकागमनं हरेः ॥
नरकादिवधस्तत्र क्षणेन विहितोऽद्भुतः ।
कृष्णखण्डमिदं विप्र ! नृणां संसारखण्डनम् ॥"
तत्फलश्रुतिः ।
"पठितञ्च श्रुतं ध्यातं पूजितं चाभिवर्णितम् ।
इत्येतद्ब्रह्मवैवर्त्तं पुराणं चात्यलौकिकम् ॥
व्यासोक्तं चादिसम्भूतं पठन् शृण्वन् विमुच्यते ।
विज्ञानज्ञानशमनात् घोरात् संसारसागरात् ॥
लिखित्वेदञ्च यो दद्यान्माघ्यां धेनुसमन्वितम् ।
ब्रह्मलोकमवाप्नोति स मुक्तोऽज्ञानबन्धनात् ॥
यश्चानुक्रमणीं वापि पठेद्वा शृणुयादपि ।
सोऽपि कृष्णप्रसादेन लभते वाञ्छितं फलम् ॥"
इति श्रीनारदीयपुराणे पूर्व्वभागे हरिहरपाख्याने चतुर्थपादे १०१ अध्यायः ॥ १० ॥

एकादशं लिङ्गपुराणम् ।

श्रीब्रह्मोवाच ।

"शृणु पुत्र ! प्रवक्ष्यामि पुराणं लिङ्गसंज्ञितम् ।
पठतां शृण्वतान्चैव भक्तिमुक्तिप्रदायकम् ॥
यच्च लिङ्गाभिधं तिष्ठन् वह्निलिङ्गे हरोऽध्यधात् ।
मह्यं धर्म्मादिसिद्ध्यर्थं अग्निकल्पकथाश्रयम् ॥
तदेव व्यासदेवेन भागद्वयसमाचितम् ।
पुराणं लिङ्गसुदितं वक्त्राख्यानविचित्रितम् ॥
तदेकादशसाहस्रं हरमाहात्म्यसूचकम् ।
परं सर्व्वपुराणानां सारभूतं जगत्त्रये ॥
पुराणोपक्रमे प्रश्नः सृष्टिसंज्ञे मतः पुरा ॥"
तत्र पूर्व्वभागे ।
"योगाख्यानं ततः प्रोक्तं कल्पाख्यानं ततःपरम् ॥
लिङ्गोद्भवस्तदर्च्चा च कीर्त्तिता हि ततः परम् ।
सनत्कुमारशैलादिसंवादश्चाथ पावनः ॥
ततो दधीचिचरितं युगधर्म्मनिरूपणम् ।
ततो भुवनकोषाख्या सूर्य्यसोमान्वयस्ततः ॥
ततश्च विस्तरात् सर्गस्त्रिपुराख्यानकं तथा ।
लिङ्गप्रतिष्ठा च ततः पशुपाशविमोचनम् ॥
शिवव्रतानि च तथा सदाचारनिरूपणम् ।
प्रायश्चित्तान्यरिष्टानि काशीश्रीशैलवर्णनम् ॥
अन्धकाख्यानकं पश्चाद्धिरण्याक्षचरितं पुनः ।
वृत्रेन्द्रचरितं पश्चाच्चलन्धरवधस्ततः ॥
शैवं सहस्रनामाथ दत्तयज्ञविनाशनम् ।
कामस्य दहनं पश्चात् गिरिजायाः करग्रहः ॥
ततो विनायकाख्यानं वृत्राख्यानं शिवस्य च ।
उपमन्युकथा चापि पूर्व्वभाग इतीरितः ॥"*॥
तदुत्तरभागे ।
"विष्णुमाहात्म्यकथनमम्बरीषकथा तथा ।
सनत्कुमारनन्दीशसंवादश्च पुनर्मुने ! ॥
शिवमाहात्म्यसंयुक्तज्ञानयोगादिकं ततः ।
सूर्य्यपूजाविधिश्चैव शिवपूजा च मुक्तिदा ॥
दानानि बहुधोक्तानि श्राद्धप्रकरणन्ततः ।
प्रतिष्ठा तत्र गदिता ततोऽघोरस्य कीर्त्तनम् ॥
व्रजेश्वरी महाविद्या गायत्रीमहिमा ततः ।
त्र्यम्बकस्य च माहात्म्यं पुराणश्रवणस्य च ॥
एतत्सोपरिभागस्ते लैङ्गस्य कथितो मया ।
व्यासेन हि निबद्धस्य रुद्रमाहात्म्यरुचिना ॥"
तत्फलश्रुतिः ।
"लिखित्वैतत् पुराणन्तु तिलधेनुसमान्वितम् ।
फाल्गुन्यां पूर्णिमायां यो दद्याद्भक्त्या द्विजातये ।
स लभेच्छिवसायुज्यं जरामरणवर्ज्जितः ॥
यः पठेच्छृणुयादापि लैङ्गं पापापहं नरः ।
स भुक्तभोगो लोकेऽस्मिन्नन्ते शिवपुरं व्रजेत् ॥
लिङ्गानुक्रमणीमेतां पठेद्यः शृणुयात् तथा ।
तावुभौ शिवभक्तौ तु लोकद्वितयभोगिनौ ।
जायेतां गिरिजाभर्त्तुः प्रसादान्नात्र संशयः ॥"
इति श्रीनारदीयपुराणे पूर्व्वभागे हरिहरपाख्याने चतुर्थपादे १०२ अध्यायः ॥ ११ ॥

द्वादशं वराहपुराणम् ।

श्रीब्रह्मोवाच ।

"शृणु वत्स ! प्रवक्ष्यामि वाराहं वै पुराणकम् ।
भागद्वययुतं शश्वद्विष्णुमाहात्म्यसूचकम् ॥
मानवस्य तु कल्पस्य प्रसङ्गं मत्कृतं पुरा ।
निबद्धं पुराणेऽस्मिंश्चतुर्विंशसहस्रके ॥
व्यासो हि विदुषां श्रेष्ठः साक्षान्नारायणो भुवि ।
तत्रादौ शुभसंवादः सूत्र्यो भूमिवराहयोः ॥"
तत्र पूर्व्वभागे ।
"अथादिकृतवृत्तान्ते रम्यस्य चरितं ततः ।
दुर्ज्जयाय च तत्पश्चाच्छ्राद्धकल्पः उदीरितः ॥
महातपस आख्यानं गौर्य्युत्पत्तिस्ततः परम् ।
विनायकस्य नागानां सेनान्यादित्ययोरपि ॥
गणानाञ्च तथा देव्या धनदस्य वृषस्य च ।
आख्यानं सत्यतपसो व्रताख्यानसमन्वितम् ॥
अगस्त्यगीता तत्पश्चाद्वगीता प्रकीर्त्तिता ।
महिषासुरविध्वंसे माहात्म्यञ्च त्रिशक्तिजम् ॥
पर्व्वाध्यायस्ततः श्वेतोपाख्यानं गोप्रदानिकम् ।
इत्यादिकृतवृत्तान्तं प्रथमोद्देशनामकम् ॥
भगवद्धर्म्मके पश्चाद्व्रततीर्थकथानकम् ।
दानचिन्द्रदपराधानां प्रायश्चित्तं शरीरकम् ॥
तीर्थानाञ्चापि सर्व्वेषां माहात्म्यं पृथगीरितम् ।
मथुराया विशेषेण श्राद्धादीनां विधिस्ततः ॥
वर्णनं यमलोकस्य ऋषिपुत्रप्रसङ्गतः ।
विपाकः कर्म्मणाञ्चैव विष्णुव्रतनिरूपणम् ॥
गोकर्णस्य च माहात्म्यं कीर्त्तितं पापनाशनम् ।
इत्येष पूर्व्वभागोऽस्य पुराणस्य निरूपितः ॥"
उत्तरभागे ।
"उत्तरे विभागे तु पुलस्त्यकुरुराजयोः ।
संवादे सर्व्वतीर्थानां माहात्म्यं विस्तरात्पृथक् ॥
अशेषधर्म्माख्याताः पौष्करं पुण्यपर्व्व च ।
एतत्ते तव वाराहं प्रोक्तं पापविनाशनम् ॥"

तत्फलश्रुतिः ।
"पठनां श्रवणताश्चैव भगवद्भक्तिवर्द्धनम् ।
काञ्चनं गरुडं कृत्वा तिलद्रोणसमाचितम् ॥
लिखित्वैतच्च यो दद्याद्वेद्यां विप्राय भक्तितः ।
स गच्छेद्वैष्णवं धाम देवर्षिगणवन्दितः ॥
यो वाऽनुक्रमणीमेतां श्रद्धयाऽपि पठत्यपि ।
सोऽपि भक्तिं समेष्यन्ती संसारोच्छेदकारिणीम् ॥" * ॥
इति श्रीनारदीयपुराणे पूर्वभागे हरिद्वारोपाख्याने चतुर्थपादे १०३ अध्यायः ॥ १२ ॥
त्रयोदशं स्कन्दपुराणम् ।
श्रीब्रह्मोवाच ।
"शृणु वक्ष्ये मरीचे ! च पुराणं स्कन्दसंज्ञितम् ।
यस्मिन् प्रतिपदं साक्षान्महादेवो व्यवस्थितः ॥
पुराणे श्रुतकोटौ तु यच्चैवं वर्णितं मया ।
लक्षितस्तार्थजातस्य चारो व्यासेन कीर्तितः ॥
स्कन्दाख्यस्तत्र खण्डाः षडेव परिकल्पिताः ।
एकाशीतिसहस्राणि स्कान्दं सर्वाघभञ्जनम् ॥
यः शृणोति पठेद्वापि स तु साक्षाच्छिवः स्थितः ।
यत्र माहेश्वरा धर्माः सप्तमुखेन प्रकाशिताः ॥
कल्पे तत्पुरुषे वृत्ता सर्वसिद्धिविधायकाः ॥"
तत्र प्रथमे माहेश्वरखण्डे ।
"तस्य माहेश्वराद्यः खण्डः पापप्रणाशनः ॥
किञ्चिन्यूनार्कसाहस्रो बहुपुण्यो दृष्टकथः ।
सुचरित्रश्रुतेर्युक्तः स्कन्दमाहात्म्यसूचकः ॥
यत्र केदारमाहात्म्ये पुराणोपक्रमः पुरा ।
दक्षयज्ञकथा पश्चाच्छिवलिङ्गार्चने फलम् ॥
वसुद्रमधनाख्यानं देवेन्द्रचरितं ततः ।
पार्वत्याः श्रुतपाख्यानं विवाहस्तदनन्तरम् ॥
कुमारोत्पत्तिकथनं ततस्तारकसङ्करः ।
ततः प्रभुप्रताख्यानं चण्डाख्यानसमाचितम् ॥
वृषप्रवर्त्तनाख्यानं नारदेन समागमः ।
ततः कुमारमाहात्म्ये पञ्चतीर्थकथानकम् ॥
धर्मवर्म्मनृपाख्यानं गदीसागरकीर्तनम् ।
इन्द्रद्युम्नकथा दक्षान्नाड़ीजङ्घकथान्विता ॥
प्रादुर्भावस्ततो मह्याः कथा दमनकस्य च ।
महीसागरसंयोगः कुमारेशकथा ततः ॥
ततस्तारकयुद्धं च नानाख्यानसमाचितम् ।
वधश्च तारकस्याथ पञ्चलिङ्गनिवेशनम् ॥
द्वीपाख्यानं ततः पुण्यं स्वर्गलोकव्यवस्थितः ।
ब्रह्मखण्डस्थितिमानं च वर्करेशकथानकम् ॥
महाकालवनोद्भूतिः कथा चास्य महाद्भुता ।
वासुदेवस्य माहात्म्यं कोरितीर्थं ततः परम् ॥
नानातीर्थसमाख्यानं गुप्तक्षेत्रे प्रकीर्त्तितम् ।
पाण्डवानां कथा पुण्या महाविद्याप्रसाधनम् ॥
तीर्थयात्राक्रमाच्चित्रं कौमारमिदमद्भुतम् ।
अरुणाचलमाहात्म्ये वनकन्यकसंकथा ॥
गौरीतपःसमाख्यानं तत्तत्तीर्थनिरूपणम् ।
महिषासुरचाख्यानं वधश्चास्य महाद्भुतः ॥
शोणाचले शिवाख्यानं नित्यदा परिकीर्त्तितम् ।
इत्येष कथितः स्कान्दे खण्डो माहेश्वरोद्भुतः ॥"
द्वितीये वैष्णवखण्डे ।
"द्वितीयो वैष्णवः खण्डस्तस्याख्यानानि मे शृणु ।
प्रथमं भूमिवाराहं समाख्यानं प्रकीर्त्तितम् ॥
यत्र वोत्तङ्कशुभस्य माहात्म्यं पापनाशनम् ।
कमलायाः कथा पुण्या श्रीनिवासस्थितिस्ततः ॥
कुलाख्यानकं चात्र सुवर्णमुखरीकथा ।
नानाख्यानसमायुक्ता भारद्वाजकथाद्भुता ॥
मतङ्गाङ्गनसंवादः कीर्त्तितः पापनाशनः ।
पुरुषोत्तममाहात्म्यं कीर्त्तितं चोत्कले ततः ॥
सार्वरूप्येसमाख्यानमम्बरीषस्य भूपतेः ।
इन्द्रद्युम्नस्य चाख्यानं विद्यापतिकथा शुभा ॥
जैमिनेः सप्तपाख्यानं नारदस्यापि वाडव ! ।
नीलकण्ठसमाख्यानं नारसिंहोपवर्णनम् ॥
अश्वमेधकथा राज्ञो ब्रह्मलोकगतिस्तथा ।
रथयात्राविधिः पश्चाच्छ्रीक्षेत्रविधिरुक्तया ॥
दक्षिणाम्नुंपाख्यानं गुण्डिचाख्यानकं ततः ।
रथरूपविधानञ्च शयनोत्सवकीर्त्तनम् ॥
श्वेतोपाख्यानमुक्तं बहुलोत्सवनिरूपणम् ।
दोलोत्सवो भगवतो व्रतं सांवत्सराभिधम् ॥
पूजा च कामिभिर्विष्णोरुद्दालकनियोगकः ।
मोक्षसाधनमुक्तं नानायोगनिरूपणम् ॥
दशावतारकथनं स्नानादिपरिकीर्त्तनम् ।
ततो बदरिकायाश्च माहात्म्यं पापनाशनम् ॥
अग्न्यादितीर्थमाहात्म्यं वैनतेयशिलाभवम् ।
कारणं भगवद्वासे तीर्थं कापालमोचनम् ॥
पञ्चधाराभिधं तीर्थं मेरुसंस्थापनं तथा ।
ततः कार्त्तिकमाहात्म्ये माहात्म्यं मदनालसम् ॥
धूम्रकोशसमाख्यानं दिनकृत्यानि कार्त्तिके ।
पञ्चभीष्मव्रताख्यानं कीर्त्तितं मुक्तिमुक्तिदम् ॥
तद्व्रतस्य च माहात्म्यं विधानं स्नानजं तथा ।
पुरुषादिकीर्त्तनं चात्र मालाधारणपुण्यकम् ॥
पश्चाच्छतस्नानपुण्यं वस्त्रदानादिजं फलम् ।
नानापुष्पार्चनफलं तुलसीदलजं फलम् ॥
नैवेद्यस्य च माहात्म्यं हरिवासरकीर्त्तनम् ।
अखण्डैकादशीपुण्यं तथा जागरणस्य च ॥
मतस्योत्सवविधानञ्च नाममाहात्म्यकीर्त्तनम् ।
ध्यानादिपुण्यकथनं माहात्म्यं मधुराभवम् ॥
मधुरातीर्थमाहात्म्यं पृथगुक्तं ततः परम् ।
वनानां द्वादशानाञ्च माहात्म्यं कीर्त्तितं ततः ॥
श्रीमद्भागवतस्याथ माहात्म्यं कीर्त्तितं परम् ।
वज्रशाण्डिल्यसंवादं अन्तर्लीलाप्रकाशकम् ॥
ततो माघस्य माहात्म्यं स्नानदानजयोद्भवम् ।
नानाख्यानसमायुक्तं दशाध्यायैः निरूपितम् ॥
ततो वैशाखमाहात्म्ये मुख्यादानादिजं फलम् ।
जलदानादिविषयः कामाख्यानमतः परम् ॥
शुतदेवस्य चरितं व्याधोपाख्यानमद्भुतम् ।
तथाच्युतशतीयादेर्विशेषात् पुण्यकीर्त्तनम् ॥
ततस्त्वयोध्यामाहात्म्ये चक्रतीर्थाङ्कतीर्थके ।
कृष्णपापविमोक्षाख्ये तथाधारसहस्रकम् ॥
स्वर्गद्वारं चन्द्रहरिधर्म्मैर्ध्युपवर्णनम् ।
स्वर्गद्वारेशपाख्यानं तिलोदा सरयूस्तुतिः ॥
सीताकुण्डं गुप्तहरिः सरयूर्घर्घराश्रयः ।
गोप्रचारश्च दुग्धोदं गुरुकुण्डादिपञ्चकम् ॥
घोषार्कादीनि तीर्थानि त्रयोदश्य ततः परम् ।
गयाकूपस्य माहात्म्यं सर्वाघविनिवर्त्तकम् ॥
माण्डव्याश्रमपूर्व्वाणि तीर्थानि तदनन्तरम् ।
अजिनादिमानसादितीर्थानि गदितानि च ॥
इत्येष वैष्णवः खण्डो द्वितीयः परिकीर्त्तितः ॥"
तृतीये ब्रह्मखण्डे ।
"अतःपरं ब्रह्मखण्डं मरीचे ! शृणु पुण्यदम् ।
यत्र वै सेतुमाहात्म्यं फलं स्नानेज्यजं वसु ॥
गालवस्य तपश्चर्य्या राघसाख्यानकं ततः ।
चक्रतीर्थादिमाहात्म्यं देवीपतनसंयुतम् ॥
वेतालतीर्थमहिमा पापनाशादिकीर्त्तनम् ।
मङ्गलादिकमाहात्म्यं ब्रह्मकुण्डादिवर्णनम् ।
हनूमत्कुण्डमहिमागस्त्यतीर्थभवं फलम् ॥
रामतीर्थादिकथनं लक्ष्मीतीर्थनिरूपणम् ।
शृङ्गादितीर्थमहिमा तथा साध्यान्तकादिजः ॥
धनुष्कोट्यादिमाहात्म्यं क्षीरकुण्डादिकं तथा ।
गायत्र्यादिकतीर्थानां माहात्म्यं चात्र कीर्त्तितम् ॥
रामनाथस्य महिमा तत्त्वज्ञानोपदेशनम् ।
यात्राविधानकथनं सेतौ मुक्तिप्रदं नृणाम् ॥
धर्म्मारण्यस्य माहात्म्यं ततः परमुदीरितम् ।
स्थाणुः स्कन्दाय भगवान् यत्र तत्त्वमुपादिशत् ॥
धर्म्मारण्यसमुद्भूतिस्तत्पुण्यपरिकीर्त्तनम् ।
कर्म्मसिद्धेः समाख्यानं ऋषिवंशनिरूपणम् ॥
अमरातीर्थसख्यानां माहात्म्यं यत्र कीर्त्तितम् ।
वर्णानामाश्रमानाञ्च धर्म्मतत्त्वनिरूपणम् ॥
देवस्थानविभागश्च वकुलार्ककथा शुभा ।
छत्रा नन्दा तथा शान्ता श्रीमाता च मतङ्गिनी ॥
पुण्यदाद्याः समाख्याता यत्र देव्यः समास्थिताः ।
इन्द्रेश्वरादिमाहात्म्यं द्वारकादिनिरूपणम् ॥
लोहासुरसमाख्यानं गङ्गाकूपनिरूपणम् ।
श्रीरामचरितञ्चैव सप्तसन्दिरवर्णनम् ॥
शौर्योद्धारस्य कथनं शासनप्रतिपादनम् ।
जातिभेदप्रकथनं स्मृतिधर्म्मनिरूपणम् ॥
ततस्तु वैष्णवा धर्म्मा नानाख्यानैरुदीरिताः ।
चातुर्म्मास्ये ततः पुण्ये सर्वधर्म्मनिरूपणम् ॥
दानप्रशंसा तत्पश्चाद्व्रतस्य महिमा ततः ।
तपसश्चैव पूजायाः सच्छिद्रकथनं ततः ॥
प्रकृतीनां भिदाख्यानं शालग्रामनिरूपणम् ।
तारकस्य वधोपायो व्यासार्च्चा महिमा तथा ॥
विष्णोः शापश्च दृषत्वं पार्वत्यनुनयस्ततः ।
हरस्य ताण्डवं वृत्यं रामनामनिरूपणम् ॥
हरस्य लिङ्गपतनं कथायै जवनस्य च ।
पार्वतीजन्मचरितं तारकस्य वधोद्भुतः ॥
प्रभवैश्वर्य्यकथनं तारकाचरितं पुनः ।
दक्षयज्ञसमाप्तिश्च द्वादशाक्षररूपणम् ॥
ज्ञानयोगसमाख्यानं महिमा द्वादशार्णजः ।
अवगादिकपुरुषश्च कीर्त्तितं धर्म्मदं नृणाम् ॥"
तृतीये ब्रह्मखण्डोत्तरभागे ।
"ततो ब्रह्मोत्तरे भागे शिवस्य महिमाद्भुत...

प्रभाचरस्य महिमा गोकर्णमहिमा ततः ॥
शिवरात्रेश्च महिमा प्रदोषव्रतकीर्त्तनम् ।
सोमवारव्रतस्यापि सीमन्तिन्याः कथानकम् ॥
भद्रायुत्पत्तिकथनं सदाचारनिरूपणम् ।
शिववर्म्मसमुद्देशो भद्रायुद्वाहवर्णनम् ॥
भद्रायुमहिमा चापि भक्तमाहात्म्यकीर्त्तनम् ।
शृवराख्यानकञ्चैव उमामाहेश्वरव्रतम् ॥
रुद्राक्षस्य च माहात्म्यं रुद्राध्यायस्य पुण्यकम् ।
अघमार्षादिकथनञ्च ब्रह्मखण्डोऽयमीरितः ॥"* ॥
चतुर्थे काशीखण्डे ।
"अतः परं चतुर्थन्तु काशीखण्डमनुत्तमम् ।
विन्ध्यनारदयोर्यत्र संवादः परिकीर्त्तितः ॥
सत्यलोकप्रभावच्चागस्त्यावासे सुरागमः ।
पतिव्रताचरित्रञ्च तीर्थचर्य्याप्रशंसनम् ॥
ततश्च सप्तपुर्य्याख्या संवर्त्तिन्या निरूपणम् ।
ब्रह्मस्य च तथेन्द्रस्योर्लोकाप्तिः शिवधर्म्मणः ॥
अग्नेः समुद्भवश्चैव क्रमाद्दक्षसम्भवः ।
गन्धवत्यलकापुर्य्योरीश्वर्य्याच्च समुद्भवः ॥
चन्द्रोडुबुधलोकानां कुजेज्यार्कसुवां क्रमात् ।
सप्तर्षीणां ध्रुवस्यापि तपोलोकस्य वर्णनम् ॥
ध्रुवलोककथा पुण्या सत्यलोकनिरीक्षणम् ।
स्कन्दागस्त्यसंलापो मणिकर्णीसमुद्भवः ॥
प्रभावश्चापि गङ्गाया गङ्गानामसहस्रकम् ।
वाराणसीप्रशंसा च भैरवाविर्भवस्ततः ॥
दण्डपाणिज्ञानवाप्योरुद्भवः समनन्तरम् ।
ततः कलावत्याख्यानं सदाचारनिरूपणम् ॥
ब्रह्मचारिसमाख्यानं ततः स्त्रीलक्षणानि च ।
कृत्याकृत्यविनिर्देशो ह्यविमुक्तेश्वरवर्णनम् ॥
गृहस्थयोगिनोर्धर्म्माः कालज्ञानं ततः परम् ।
दिवोदासकथा पुण्या काशीवर्णनमेव च ॥
योगिचर्चा च लोलार्कोत्तरगाम्यार्कजा कथा ।
द्रुपदार्कस्य तार्क्ष्याख्यारुणार्कस्योदयस्ततः ॥
दक्षाश्वमेधतीर्थाख्या मन्दराच्च गणागमः ।
पिप्पलाचमोचनाख्यानं गणेशप्रेषणन्ततः ॥
मायागणपतेश्चाथ भुवि प्रादुर्भवस्ततः ।
विष्णुमायाप्रपञ्चोऽथ दिवोदासविमोक्षणम् ॥
ततः पञ्चनदोत्पत्तिर्विन्दुमाधवसम्भवः ।
ततो वेणावतीर्थाख्या शूलिनः काशिकागमः ॥
जैगीषव्येण संवादो व्येडेशाख्या महेशितुः ।
चैत्राख्यानं कन्दुकेशाख्याश्चेश्वरसमुद्भवः ॥
शैलेशपूर्वेश्वरयोः क्षत्तिवासस्य चोद्भवः ।
देवनामधिष्ठानं दुर्गासुरपराक्रमः ॥
दुर्गाया विजयश्चाथ ओङ्कारेशस्य वर्णनम् ।
पुनरोङ्कारमाहात्म्यं त्रिलोचनसमुद्भवः ॥
केदाराख्या च धर्म्मशकथा विश्वभुजोद्भवा ।
वीरेश्वरसमाख्यानं गङ्गामाहात्म्यकीर्त्तनम् ॥
विश्वकर्म्मेशमहिमा दक्षयज्ञोद्भवस्तथा ।
सतीशस्यास्तेशादेर्भञ्जस्तम्भः पराशरेः ॥
चैत्रतीर्थैकदश्चैव मुक्तिमण्डपसंकथा ।
विश्वेशविभवश्चाथ ततो यात्रापरिक्रमः ॥" * ॥
पञ्चमे अवन्तीखण्डे ।
"अतः परं लवण्यायाः शृणु खण्डस्य पञ्चकम् ।

महाकालवनाख्यानं ब्रह्मशीर्षच्छिदा ततः ॥
प्रायश्चित्तविधिश्चाग्नेरुत्पत्तिश्च सुरागमः ।
देवदीक्षा शिवस्तोत्रं नानापातकनाशनम् ॥
कपालमोचनाख्यानं महाकालवनस्थितिः ।
तीर्थं कालकलेशस्य सर्व्वपापप्रणाशनम् ॥
कुण्डमञ्जरसंज्ञञ्च सर्गे रुद्रस्य पुण्यदम् ।
कुटुम्बेशश्च विद्याभ्रमर्कटेश्वरतीर्थकम् ॥
स्वर्गद्वारं चतुःसिन्धुतीर्थं शृङ्गवापिका ।
सकराकेगन्धवतीतीर्थम्यापप्रणाशनम् ॥
दक्षाश्वमेधैकानंशातीर्थं च हरिसिद्धिदम् ।
पिप्पलाचकादियात्रा च हनूमत्कयमेश्वरौ ॥
महाकालेशयात्रा च वल्मीकेश्वरतीर्थकम् ॥
शुक्रेशमेधीपाख्यानं कुशस्थल्याः प्रदक्षिणम् ।
अक्रूरमन्दाकिन्यङ्गपादचन्द्राकवैभवम् ॥
करभेशङ्कुकुटेशजङ्घुकेशादितीर्थकम् ।
मार्कण्डेशं यज्ञवापी सोमेशं नरकान्तकम् ॥
केदारेश्वररामेशसौभाग्येशनरार्कम् ।
केशार्कं शक्तिभेदश्च खगचरसुखानि च ॥
ओङ्कारेशादितीर्थानि अन्वकस्तुतिकीर्त्तनम् ।
कालारण्ये लिङ्गसङ्ख्या स्वर्णशृङ्गाभिधानकम् ॥
कुशस्थल्या अवन्त्याश्चोज्जयिन्या अभिधानकम् ।
मन्नावती कुशवृत्यमरावतीतिनामकम् ॥
विशालाप्रतिकल्पाभिधाने च ज्वरशान्तिकम् ।
शिप्राख्यादिकफलं नागोन्मीता शिवस्तुतिः ॥
हिरण्याद्यवधाख्यानं तीर्थं सुन्दरकुण्डकम् ।
नीलगङ्गा पुष्कराख्यं विन्ध्यावासनतीर्थकम् ॥
पूरुषोत्तमाधिमासं तत्तीर्थस्नानमाहात्म्यम् ।
गोमतीवासने कुण्डे विष्णोर्नामसहस्रकम् ॥
वीरेश्वरसरः कालभैरवस्य च तीर्थके ।
महिमा नागपत्न्यां वृसिंहस्य जयन्तिका ॥
कुटुम्बेश्वरयात्रा च देवसाधककीर्त्तनम् ।
कर्कराजाख्यातीर्थञ्च विघ्नेशादिसरोहणम् ॥
रुद्रकुण्डप्रभृतिषु बहुतीर्थनिरूपणम् ।
याज्ञाष्टतीर्थजा पुण्या रेवामाहात्म्यमुच्यते ॥
धर्म्मपुण्यस्य वैराग्ये मार्कण्डेयेन सङ्गमः ।
प्राग्भवानुभवाख्यानं अष्टतापरिकीर्त्तनम् ॥
कल्पे कल्पे पृथक् नाम नर्म्मदायाः प्रकीर्त्तितम् ।
स्तवमार्घं नार्म्मदस्य कालरात्रिकथा ततः ॥
महादेवस्तुतिः पश्चात् पृथक्कल्पकथादृता ।
विघ्नेश्वराख्यानकं पञ्चाप्यालेश्वरकथा तथा ॥
गौरीव्रतसमाख्यानं त्रिपुरज्वालनन्ततः ।
देहपातविधानञ्च कावेरीसङ्गमस्ततः ॥
दारुतीर्थं ब्रह्मवर्च्चं यत्रेश्वरकथानकम् ।
व्यासतीर्थं रवितीर्थं मेघनादं दिदारुकम् ॥
देवतीर्थं नर्म्मदेशं कपिलाखंड करञ्जकम् ।
कुण्डलेशं पिप्पलादं विमलेशञ्च शूलभित् ॥
शचीहरणमाख्यातमन्धकस्य वधस्ततः ।
शूलभेदोद्भवो यत्र दानधर्म्माः पृथग्विधाः ॥
आख्यानं दीर्घतपस ऋष्यशृङ्गकथा ततः ।
चित्रसेनकथा पुण्या काशिराजस्य मोचनम् ॥
ततो देवशिलाख्यानं ध्रुवरीचरिताचितम् ।
व्याघाख्यानं ततः पुण्यं पुष्करिण्यर्कतीर्थकम् ॥

आपित्येश्वरतीर्थञ्च शुक्रतीर्थं करोटिकम् ।
कुमारेशमगस्त्येशं श्वपनेशञ्च माढजम् ॥
लोकेशं धनदेशञ्च मङ्गलेशञ्च कामजम् ।
नागेशञ्चापि गोपारं गौतमं शुक्लचूडकम् ॥
नारदेशं नन्दिकेशं वरणेश्वरतीर्थकम् ।
दधिस्कन्दादितीर्थानि हनूमत्तेश्वरन्ततः ॥
रामेश्वरादितीर्थानि सोमेशं पिङ्गलेश्वरम् ।
ऋणमोचं कपिलेशं पूतिकेशं जलेशयम् ॥
चण्डार्कयमतीर्थञ्च कङ्कोड़ेशञ्च नान्दिकम् ।
नारायणञ्च कोटीशं व्यासतीर्थं प्रभासिकम् ॥
नागेशं सङ्कर्षणकं मन्धर्षेश्वरतीर्थकम् ।
एरण्डीसङ्गमं पुण्यं सुवर्णाग्निलतीर्थकम् ॥
करञ्जं कामदं तीर्थं भाण्डीरं रोहिणीभवम् ।
चक्रतीर्थं धौतपापं स्कान्दमाङ्गिरसाङ्गयम् ॥
कोटितीर्थमयोन्याख्यमङ्गारारवं त्रिलोचनम् ।
इन्द्रेशं कम्बुकेशञ्च सोमेशं कोहनेशकम् ॥
नर्म्मदं चार्कमाग्नेयं भार्गवेश्वरसप्तमम् ।
ब्राह्मं दैवञ्च भागेशमादिवाराहणं कवे ॥
रामेशमथ सिद्धेशमाहल्यं कपटेश्वरम् ।
प्राक्रं सौम्यञ्च नान्दीशं तापेशं रुक्मिणीभवम् ॥
योजनेशं वराहेशं द्वादशीशिवतीर्थके ।
सिद्धेशं मङ्गलेशञ्च लिङ्गवाराहतीर्थकम् ॥
कुण्डेशं श्वेतवाराहं भार्गवेशं रवीश्वरम् ।
शुक्लादीनि च तीर्थानि हूँकारस्वामितीर्थकम् ॥
सङ्गमेशं नारकेशं मोक्षं सार्पञ्च गोपकम् ।
नागं ग्रामस्य सिद्धेशं मार्कण्डाक्रूरतीर्थके ॥
कामोदशूलारोपाख्यं माण्डव्यं गोपकेश्वरम् ।
कपिलेशं पिङ्गलेशं भूतेशं गाङ्गगौतमे ॥
आश्वमेधं भृगुकच्छं केदारेशञ्च पापनुत् ।
खनखलेशं जालेशं शालग्रामं वराहकम् ॥
चन्द्रप्रभासमादित्यं श्रीपत्याख्यञ्च हंसकम् ।
मूलस्थानञ्च मूलेशमामायाचित्रदेवकम् ॥
शिखीशं कोटितीर्थञ्च दशकन्यं सुवर्णकम् ।
ऋणमोचं भारभूतिरत्नाख्यं पुंखसुण्डिमम् ॥
आमलेशं कपालेशं भद्रकेरण्डीभवन्ततः ।
कोटितीर्थं लोटनेशं फलस्तुतिरतः परम् ॥
इमिलङ्गलमाहात्म्ये रोहिताश्वकथा ततः ।
धुन्धुमारसमाख्यानं वधोपायस्ततोऽस्य च ॥
वधो धुन्धोस्ततः पश्चात् ततश्चित्रवहोद्भवः ।
महिमास्य ततश्चण्डीशप्रभावो रवीश्वरः ॥
केदारेशो लक्षतीर्थं ततो विष्णुपदीभवम् ।
सुखारं श्वपनाख्यानं ब्रह्मणश्च सरस्ततः ॥
पञ्चाख्यं ललिताख्यानं तीर्थञ्च बहुगोमथम् ।
रुद्रावर्त्तञ्च मार्कण्डं तीर्थं पापप्रणाशनम् ॥
रावणेशं शुक्लपटं देवान्वितीर्थकम् ।
जिह्वोदतीर्थसम्भूतिः शिवोद्भेदं फलस्तुतिः ॥
एष खण्डो ह्यवन्त्याख्यः शृङ्खलां पापनाशनः ॥
षष्ठे नागरखण्डे ।
"अतः परं नागराख्यः खण्डः षष्ठोऽभिधीयते ॥
लिङ्गोत्पत्तिसमाख्यानं हरिश्चन्द्रकथा शुभा ।
विश्वामित्रस्य माहात्म्यं त्रिशङ्कुस्वर्गतिस्तथा ॥
हाटकेश्वरमाहात्म्ये हत्वासुरवधस्तथा ।

रामतीर्थं प्रभासं च पिण्डारकमनुत्तमम् ।
चमत्कारपुरं रम्यं चमत्कारेश्वरं परम् ।
गयातीर्थं वाराणस्यां दानमत्यं समाश्रयम् ।
विष्णुपादस्य गोकर्णं चमत्कारं समाश्रयः ।
सिद्धेशं नागरः सप्तसिंधुं नागस्थकम् ।
भृगुतीर्थं नर्मदायां भीमं दुर्गेश्वरं कदम् ।
सोमेशं सोमनाथस्य सोमेशानं कैलेश्वरम् ।
चमत्कारिप्रभासाख्यं नैः:क्षत्रियकथानकम् ।
रामह्रदं नागह्रदं मत्स्यतीर्थस्य वल्लभः ।
मत्स्योदादित्यतीर्थं च मत्स्योदर्यस्य वल्लभः ।
वालखिल्यस्य यागेशं वालखिल्यस्य गारुडम् ।
सप्तगोत्राः सप्तविंशः सोमप्रासादमेव च ।
चमत्कारं पादकाण्डमाग्नेयं ब्रह्मकुण्डकम् ।
सोमुखं सोदपानाख्यमक्षयाष्टेश्वरी तथा ।
शालेश्वरं राजवापी रामेशो लक्षतीर्थेश्वरः ।
कुलेशाख्यं सर्वेशाख्यं सिद्धं सर्वाशिसोत्तमम् ।
चरुपर्णिसमाख्यानं दमयन्त्याश्चिकातकम् ।
तपोरम्या रेवती चाच्च भद्रिकातीर्थसंभवम् ।
धौम्यतीर्थं च केदारं शुक्रतीर्थं सुसारकम् ।
शतमन्योश्वराख्यानं तथा सर्वोत्पलाकथा ।
अष्टेश्वरं याज्ञवल्क्यं गौर्यं गायेशमेव च ।
ततो वासुपदाख्यानसंगमह्रदधानकम् ।
सौभाग्यानुकथं पुण्यं धर्मराजकथानकम् ।
मिश्रासप्टेश्वराख्यानं मातृसत्वत्रयं ततः ।
चाक्षतिथिस्तिथेश्चैव सन्देशकथा ततः ।
कार्तिकेयसरःस्थानं कुरुमाभरसंकथा ।
पुण्यादित्यं रोहितासं नागरोत्पत्तिकीर्तनम् ।
भार्गवं चन्द्रितं रैवं वैशाखेशं ततः परम् ।
सारस्वतं वेणुवादं कंसारीशस्य वैष्टिकम् ।
लक्ष्मणो यज्ञचरितं सावित्र्याख्यानसंयुतम् ।
रैवतं भद्रियाख्यं सुरत्नातीर्थनिरीक्षणम् ।
कौमारं दारुकाख्यं प्रभासं शैवकत्रयम् ।
पौष्करं नैमिषं धार्मसरण्यवितयं स्मृतम् ।
धामाख्यो द्वारकाख्यामाख्येयति पुरोत्तमम् ।
द्वन्द्वावनं स्वर्गद्वारमार्कंडेयं वनत्रयम् ।
दक्षः शाम्भवी नन्दी श्यामत्रयमनुत्तमम् ।
श्वेतमुक्तिप्रदं तीर्थत्रयमुद्दालकृतम् ।
श्वेतार्कौ रैवतश्चैव यज्ञतीर्थत्रयमुत्तमम् ।
नदीनां चित्रयं पुण्या नर्मदा च सरस्वती ।
सार्धकोटित्रयस्थानमेकैकस्यैव कीर्तनम् ।
दृषिता मत्स्यतीर्थाख्यं वाराहस्थानम् ।
पाटेश्वरं शैलपादं प्रोक्तं चतुष्टयम् ।
शमीवृक्षं चाहवनं यौधिष्ठिरमथाश्वत्थम् ।
वाग्द्वारि चतुर्मास्यमनन्यशयनव्रतम् ।
सङ्गमेशं शिवरात्रिं तुलापुरुषदानकम् ।
दुर्गोत्पत्तिं चाम्बेशं कपालमोचनेश्वरम् ।
मातृतीर्थं गङ्गातीर्थं कुलमातृतिर्थकीर्तनम् ।
शिवरात्रिमहात्म्यं च दक्षयज्ञविनाशनम् ।
शम्भोश्चाण्डालरूपत्वं शम्भोर्दिगम्बरत्वकीर्तनम् ।
इत्येष शम्भुः प्रोक्तः स्वयं प्रभासक्षेत्रे ।"
स्कन्द उवाच ।
"सोमेशो यत्र विधिवत्पूजनं पुरुषं महत् ।
सिद्धेश्वरादिलिङ्गानां पूजनस्य फलं तथा ।
स्वर्गतीर्थं कपर्दीशं केदारेशं गतिप्रदम् ।
भीममेश्वरचण्डीशभास्कराद्यास्तथेश्वराः ।
दुर्गेशभृगुसोमेन्द्रविष्णवीशा हरसिद्धयः ।
सिद्धेश्वराद्याः पञ्चाब्दं रुद्रास्तत्र व्यवस्थिताः ।
वराहरोहा ललामाख्या मङ्गला सलितेश्वरी ।
लक्ष्मीशो वाडवेशश्चार्घीशः कामेश्वरस्तथा ।
गौरीशश्चण्डरुद्राख्यस्तुर्योशश्च गणेश्वरम् ।
कुमारेशस्य शाकल्यं शुक्रतीर्थस्य गौतमम् ।
दैत्यजेशं चक्रतीर्थं सन्निध्याख्यं तथा ।
भूतेशाद्यानि लिङ्गानि व्याघ्रेश्वराख्यमेव च ।
तत्तच्चक्रधराख्यानं शाम्बादित्यस्थानकम् ।
कथा कण्टकशोधिन्या महिषस्यास्तत्तः परम् ।
कपालीश्वरकोटीशाख्यानलक्षाष्टसप्तकथा ।
नरकेशनवर्षेशनिधीश्वरकथा ततः ।
बलभद्रेश्वरस्याथ सङ्गमस्य च ।
शाम्बस्यास्याख्यानमरितः शारदूकूपस्य सप्तकथा ।
घृतमेधलक्षमेधकोटिमेधकथा तथा ।
दुर्वासार्कस्य दुःस्थानहिरण्याक्षस्य मोक्षकथा ।
नगरार्कस्य क्षयस्य सङ्गमेशचतुष्टयोः ।
कुमार्याः चैत्रयात्रस्य ब्रह्मेशस्य कथा पृथक् ।
पिङ्गलाक्षनमेशस्य शङ्खरार्कघटेशयोः ।
ऋषितीर्थस्य नन्दार्कचित्रकूपस्य कीर्तनम् ।
शशोपानस्य पर्णार्कोल्लूकमल्योः कथाद्भुता ।
वाराहस्वामिदृष्टानां द्वादशादित्यानुगुह्यकयोः ।
कथा कनकनन्दायाः कुन्तीगङ्गेशयोस्तथा ।
चमसोद्भेदविटङ्कचिलोकेशकथा ततः ।
सङ्गमेश्वरेणुरेणुकतीर्थकथा तथा ।
सर्वमार्धोर्वोत्तमयोगमायाधकथा तथा ।
भूतारशूलस्थलयोश्चवनार्केशयोस्तथा कथा ।
अक्षमालेशवासार्कदुर्वासस्थलथा कथा ।
ऋषितीर्थाकथा पुण्या सङ्गतेश्वरकीर्तनम् ।
नारदादित्यचरितं नारायणनिरूपणम् ।
तप्तकुण्डस्य माहात्म्यं सप्तचण्डीशवर्णनम् ।
चतुर्लक्षगणाध्यक्षस्तम्भेश्वरयोः कथा ।
गोपालस्वामिवटुस्वामिनोर्मरुतीकथा ।
क्षेमार्कोत्रतविघ्नेशकलस्वामिकथा ततः ।
कालमेघस्य शक्तिगण्या सर्वेशीश्वरभद्रयोः ।
शङ्खावर्तमोक्षतीर्थगोप्यदाणुतक्षनाम् ।
घण्टेश्वरस्य हुँकारकूपचण्डीशयोः कथा ।
आशापूरस्यविघ्नेशकलाकुण्डकथाद्भुता ।
कपिलेशस्य च कथा चरकस्यशिवस्य च ।
सप्तकोटेश्वरयोर्घण्टेश्वरस्था कथा ।
नारदेशमरणभया दुर्गाकूटगणेशजा ।
सुपर्णेशाख्यमेरुर्गोमन्तीर्थभवा कथा ।
कीर्तनं कर्दमाख्य गुप्तसोमेश्वरस्य च ।
चतुर्मुखेशशङ्खेशकोटीश्वरकथा ततः ।
मार्कण्डेश्वरकोटीशदामोदरघोनकथा ।
सर्वेशा शङ्खकुण्डं कुन्तीभीमेश्वरौ तथा ।
लक्ष्मीकुण्डस्य सर्वस्य वैष्णवाख्यं स्तुतम् ।
दुर्वासिन्द्रेशगङ्गेशवेलानां कथाद्भुता ।
तपोभद्रं चक्रकथा चक्रेश्वरकीर्तनम् ।
मागतीर्थस्य च कथा चक्रिणश्चक्रकीर्तनम् ।
भद्रेश्वरस्य माहात्म्यं त्रिविक्रमस्ततः परम् ।
वेणासरस्य च माहात्म्यं तीर्थानामुत्तमं तनम् ।
कोटीश्वरकुशस्थलीकुशेशेशकथा ततः ।
सिद्धेशगङ्गेश्वरयोर्लक्ष्मीकुण्डस्य कीर्तनम् ।
मधुतीर्थस्य मन्दारेशस्य कीर्तनम् ।
चन्द्रप्रभासविष्णोश्च माहात्म्यं तीर्थमुत्तमम् ।
दानाधिकाच्च माहात्म्यं ततः पिण्डारकस्य च ।
ततः कनखलस्याथ प्रभासस्य तीर्थयोः ।
कपिलाग्नितीर्थयोश्च तथा रत्नाकरस्य च ।
गङ्गेश्वरार्कसूर्यार्कयोर्माहात्म्यमतः परम् ।
षष्टीस्थानं रामसप्तर्षिसंज्ञं सप्तसंज्ञकम् ।
कामेश्वरस्य मार्कण्डेयेश्वरी च कथा ततः ।
उद्दालकेशसिद्धेशमातृतीर्थस्य पृथक् ।
श्रीदेवमातृतीर्थस्य याज्ञवल्क्यतीर्थयोः ।
कुलस्तम्भारुणाख्यं रामकोटीशतीर्थयोः ।
चन्द्रोद्भेदेशानदक्षयज्ञस्थलाख्यमीक्षणम् ।
त्रिपुष्करह्रदरुद्रेशगङ्गेशा शुभा ।
अविमुक्तस्य माहात्म्यमुमामाहेश्वरस्य च ।
मधूकस्य प्रभावश्च चतुर्मूर्तेश्च वर्णनम् ।
गङ्गाधरमिश्रकथयोः कथा पाशुपतस्तुतिः ।
द्वारकायाश्च माहात्म्यं चन्द्रशर्मकथानकम् ।
नागराधास्यव्रतस्य व्रतस्यैकादशीभवम् ।
महादादशिकाख्यानं प्रभासेतिसमागमः ।
दुर्वासस उपाख्यानं यादवीध्वंसकीर्तनम् ।
सोमस्योत्पत्तिचरितं तस्य सामादिकं फलम् ।
चक्रतीर्थस्य माहात्म्यं सोमस्यृद्धिसङ्गमः ।
मनसादित्यदारस्थानं स्वर्गारोहकथा ततः ।
सोमद्वारकथा परमा सोमानां द्वारकागमः ।
सोमेश्वरःसमाख्यानं प्रभासेतीर्थकीर्तनम् ।
पञ्चसङ्गमसंख्यानं नानास्थानसमाश्रितम् ।
शिवतिक्तसरातीर्थशङ्खोद्धारादिकीर्तनम् ।
त्रिविक्रमस्य सर्वेशाख्या दुर्वासःशङ्खसंकथा ।
कुशस्थलीवधीर्घोषा विधिमार्गेनघं फलम् ।
सोमस्यां द्वारकायाश्च तीर्थागमनकीर्तनम् ।
शङ्खमन्दिरसंप्रेक्षा द्वारवत्यभिषेचनम् ।
तत्र तीर्थावासकथा द्वारकापुण्यकीर्तनम् ।
इत्येष सप्तमः प्रोक्तः खण्डः प्राभासिको द्विज ! ।
स्कन्दे सर्वोत्तरखण्डे शिवमाहात्म्यसंज्ञे ।"
समुद्धरणिः ।
"त्रिविक्रमस्तु यो देवो दक्षयज्ञविनाशिनम् ।
माधवं सङ्कर्षणं विष्णुं यो वेत्ति स वेत्ति वेदं ।"
इति श्रीनारदीयमहापुराणे पूर्वभागे द्वितीयपादे
चतुर्थपादे १०१ अध्यायः ११२ ।
चतुर्दशं प्रभासखण्डम् ।
श्रीशङ्कर उवाच ।
"शृणु षण्मुख ! प्रवक्ष्यामि तवाग्रे प्रभासाभिधम् ।
त्रिविक्रमसमाख्यानं सर्वपापप्रणाशनम् ।
दुर्वासस्यसमाख्यानं सर्वपापप्रणाशनम् ।
भागवतसमाख्यानं वसुदेवप्रमोदनम् ।" १ ।
तत्र पूर्वभागे ।
"पुराकल्पे प्रथमं ब्रह्मतीर्थमिदं ततः ।

कपालमोचनाख्यानं दक्षयज्ञविहिंसनम् ॥
हरस्य कालरूपाख्या कामस्य दहनं ततः ।
प्रह्लादनारायणयोर्युद्धं देवासुराद्भयम् ॥
सुकेश्यर्कसमाख्यानं ततो भुवनकोषकम् ।
ततः कान्यव्रताख्यानं श्रीदुर्गाचरितं ततः ॥
तपतीचरितं पश्चात् कुरुचैत्रस्य वर्णनम् ।
सरोमाहात्म्यमतुलं पार्वतीजन्मकीर्त्तनम् ॥
तपस्तप्त्वा विवाहश्च गौर्य्याख्यानकं ततः ।
ततः कौशिक्युपाख्यानं कुमारचरितं ततः ॥
ततोऽन्धकवधाख्यानं साध्योपाख्यानकं ततः ।
जाबालिचरितं पश्चादरुजायाः कथाद्भुता ॥
अन्धकेश्वरयोर्युद्धं गणत्वं चान्धकस्य च ।
मरुतां जन्मकथनं बलेश्च चरितं ततः ॥
ततस्तु लक्ष्म्याश्चरितं त्रैविक्रममतः परम् ।
प्रह्लादतीर्थयात्रायां प्रोच्यन्ते तत्कथाः शुभाः ॥
ततश्च ध्रुवचरितं प्रेतोपाख्यानकं ततः ।
नक्षत्रपुरुषाख्यानं श्रीदामचरितं ततः ॥
त्रिविक्रमचरित्रान्ते ब्रह्मप्रोक्तः स्रवोत्तमः ।
प्रह्लादबलिसंवादे सुतले हरिशंसनम् ॥
इत्येष पूर्व्वभागोऽस्य पुराणस्य तवोदितः ॥"
तदुत्तरे भागे वृहद्वामनाख्ये ।
"शृणु तस्योत्तरं भागं वृहद्वामनसंज्ञकम् ॥
माहेश्वरी भागवती सौरी गाणेश्वरी तथा ।
चतस्रः संहिताश्चात्र पृथक् साहस्रसङ्ख्यया ॥
माहेश्वर्य्यान्तु ब्रह्मस्य तद्भक्तानाञ्च कीर्त्तनम् ।
भागवत्यां जगन्नाथावतारकथाद्भुता ॥
सौर्य्यां सूर्य्यस्य महिमा गदितः पापनाशनः ।
गाणेश्वर्य्यां गणेशस्य चरितञ्च महौजितुः ॥
इत्येतद्वामनं नाम पुराणं सुविचित्रकम् ।
पुलस्त्येन समाख्यातं नारदाय महात्मने ॥
ततो नारदतः प्राप्तं व्यासेन सुमहात्मना ।
व्यासात्तु लब्धवान् वत्स! तच्छिष्यो रोमहर्षणः ॥
स चाध्यास्यति विप्रेभ्यो नैमिषीयेभ्य एव च ।
एवं परम्पराप्राप्तं पुराणं वामनं शुभम् ॥" * ॥
तत्फलश्रुतिः ।
"ये पठन्ति च शृण्वन्ति तेऽपि यान्ति परां गतिम् ।
लिखित्वैतत् पुराणन्तु यः शृणुयाद्वापयेत् ॥
विप्राय वेदविदुषे धेनुमुत्तमाचितम् ।
स समुद्धृत्य नरकान्नयेत् स्वर्गं पितॄन् स्वकान् ।
देहान्ते मुक्तभोगोऽसौ याति विष्णोः परं पदम् ॥"
इति श्रीनारदीयपुराणे पूर्व्वभागे वृहद्वामनाख्याने चतुर्थपादे १०५ अध्यायः ॥ १४ ॥
पञ्चदशं कूर्म्मपुराणम् ।
श्रीब्रह्मोवाच ।
"शृणु वत्स! मरीचेश्च पुराणं कूर्म्मसंज्ञितम् ।
लक्ष्मीकल्पानुचरितं यत्र कूर्म्मवपुर्हरिः ॥
धर्म्मार्थकाममोक्षाणां माहात्म्यञ्च पृथक् पृथक् ।
इन्द्रद्युम्नप्रसङ्गेन प्राहर्षिभ्यो दयानिधिः ॥
तत्सप्तदशसाहस्रं सुचतुःसंहितं शुभम् ।
यत्र प्राक्तनाः पुरा प्रोक्ता धर्म्मा नानाविधा सुने! ॥
नानाकथाप्रसङ्गेन नृणां सद्गतिदायकाः ॥" ॥

तत्पूर्व्वभागे ।
"तत्र पूर्व्वविभागे तु पुराणोपक्रमः पुरा ।
लक्ष्मीप्रद्युम्नसंवादः कूर्म्मर्षिगणसङ्कथा ॥
वर्णाश्रमाचारकथा जगदुत्पत्तिकीर्त्तनम् ।
कालसङ्ख्या समासेन लयान्ते स्रवनं विभोः ॥
ततः सङ्क्षेपतः सर्गः प्राकृतं चरितं तथा ।
सहस्रनाम पार्व्वत्या योगस्य च निरूपणम् ॥
भृगुवंशसमाख्यानं ततः स्वायम्भुवस्य च ।
देवादीनां समुत्पत्तिर्दक्षयज्ञाहितस्ततः ॥
दक्षस्रष्टिकथा पश्चात् कश्यपान्वयकीर्त्तनम् ।
आत्रेयवंशकथनं ब्रह्मणस्य चरितं शुभम् ॥
मार्कण्डब्रह्मसंवादो व्यासपाण्डवसंकथा ।
युगधर्म्मानुकथनं व्यासजैमिनिकी कथा ॥
वाराणस्याश्च माहात्म्यं प्रयागस्य ततः परम् ।
त्रैलोक्यवर्णनञ्चैव वेदशाखानिरूपणम् ॥"* ॥
तदुत्तरभागे ।
"उत्तरेऽस्य विभागे तु पुरा गौतेश्वरी ततः ।
व्यासगीता ततः प्रोक्ता नानाधर्म्मप्रबोधनी ॥
नानाविधानां तीर्थानां माहात्म्यञ्च पृथक् ततः ।
नानाधर्म्मप्रकथनं ब्राह्मीयं संहिता स्मृता ॥
यतः परं भगवती संहितार्थनिरूपणे ।
कथिता यत्र वर्णानां पृथग्वृत्तिरुदाहृता ॥"
तदुत्तरभागीयभगवत्याख्यद्वितीयसंहितायाः पञ्चपादेषु ।
"पादेऽस्याः प्रथमे प्रोक्ता ब्राह्मणानां व्यवस्थितिः ।
सदाचारात्मिका वत्स! भोगसौख्यविवर्द्धनी ॥
द्वितीये क्षत्रियाणान्तु वृत्तिः सम्यक् प्रकीर्त्तिता ।
यया त्वाश्रितया पापं विधूयेह व्रजेद्दिवम् ॥
तृतीये वैश्यजातीनां वृत्तिरुक्ता चतुर्विधा ।
यया चरितया सम्यक् लभते गतिमुत्तमाम् ॥
चतुर्थेऽस्यास्तथा पादे शूद्रवृत्तिरुदाहृता ।
यया सन्तुष्यति श्रीशो नृणां श्रेयोविवर्द्धनः ॥
पञ्चमेऽस्याश्रितः पादे वृत्तिः सङ्करजोदिता ।
यया चरितयाप्नोति भाविनीमुत्तमां जनिम् ॥
इत्येषा पञ्चपद्युक्ता द्वितीया संहिता शुने! ।
तृतीयात्रोदिता सौरी नृणां कामविधायिनी ॥
षोढा षट्कर्म्मविहिं सा बोधयन्ती च कामिनाम् ।
चतुर्थी वैष्णवी नाम मोक्षदा परिकीर्त्तिता ॥
चतुष्पदी द्विजादीनां साक्षाद्ब्रह्मस्वरूपिणी ।
ताः क्रमात् षट्चतुर्द्वीपुसाहस्राः परिकीर्त्तिताः ॥"
तत्फलश्रुतिः ।
"एतत्कूर्म्मपुराणन्तु चतुर्व्वर्गफलप्रदम् ।
पठतां शृण्वतां नृणां सर्व्वोत्तमगतिप्रदम् ॥
लिखित्वैतत्तु यो भक्त्या हैमकूर्म्मसमन्वितम् ।
ब्राह्मणायार्पयेत् दद्यात्स याति परमां गतिम् ॥"
इति श्रीनारदीयपुराणे पूर्व्वभागे वृहद्वामनाख्याने चतुर्थपादे १०६ अध्यायः ॥ १५ ॥

षोड़शं मात्स्यपुराणम् ।
श्रीब्रह्मोवाच ।
"अथ मात्स्यं पुराणं ते प्रवक्ष्ये द्विजसत्तम! ।
यत्रोक्तं सत्यकल्पानां वृत्तं सङ्क्षिप्य भूतले ॥
व्यासेन वेदविदुषा नरसिंहोपवर्णनम् ।
उपक्रम्य तदुद्दिष्टं चतुर्दशसहस्रकम् ॥
मनुमत्स्यसुसंवादो ब्रह्माण्डवर्णनन्ततः ।
ब्रह्मदेवासुरोत्पत्तिर्मरुतोत्पत्तिरेव च ॥
मदनद्वादशी तद्वत् लोकपालाभिभूजनम् ।
मन्वन्तरसमुद्देशो वैश्याराज्याभिवर्णनम् ॥
सूर्य्यवैवस्वतोत्पत्तिर्व्वंशसङ्गमनं तथा ।
पितृवंशानुकथनं श्राद्धकालस्तथैव च ॥
पितृतीर्थप्रचारश्च सोमोत्पत्तिस्तथैव च ।
कीर्त्तनं सोमवंशस्य ययातिचरितं तथा ॥
कार्त्तवीर्य्यस्य चरितं स्रष्टं वंशानुकीर्त्तनम् ।
ऋगुशापस्तथा विष्णोर्दशधा जन्म च क्षितौ ॥
कीर्त्तनं पुरुवंशस्य वंशो हैहयाशनः परः ।
क्रियायोगस्ततः पश्चात् पुराणं परिकीर्त्तितम् ॥
व्रतं नक्षत्रपुरुषं मार्त्तण्डशयनं तथा ।
क्षमाष्टमीव्रतं तद्वद्रोहिणीचन्द्रसंज्ञितम् ॥
तड़ागविधिमाहात्म्यं पादपोत्सर्ग एव च ।
सौभाग्यशयनं तद्वदगस्त्यव्रतमेव च ॥
तथानन्ततृतीयाया रसकल्याणिनीव्रतम् ।
तथैवानन्दकर्य्याश्च व्रतं सारस्वतं पुनः ॥
उपरागाभिषेकश्च सप्तमीशयनं तथा ।
भीमाख्या द्वादशी तद्वदनङ्गशयनं तथा ॥
अशून्यशयनं तद्वत् तथैवाङ्गारकव्रतम् ।
सप्तमीसप्तकं तद्वद्विशोकद्वादशीव्रतम् ॥
मेरुप्रदानं दशधा ग्रहशान्तिस्तथैव च ।
ग्रहस्वरूपकथनं तथा शिवचतुर्दशी ॥
तथा सर्व्वफलत्यागः सूर्य्यवारव्रतं तथा ।
संक्रान्तिस्नपनं तद्वद्विभूतिद्वादशीव्रतम् ॥
षष्टिव्रतानां माहात्म्यं तथा स्नानविधिक्रमः ।
प्रयागस्य तु माहात्म्यं द्वीपलोकानुवर्णनम् ॥
तथान्तरीक्षचारश्च ध्रुवमाहात्म्यमेव च ।
भवनानि सुरेन्द्राणां त्रिपुरोद्योतनं तथा ॥
पितृप्रवरमाहात्म्यं मन्वन्तरविनिर्णयः ।
चतुर्युगस्य सम्भूतिर्युगधर्म्मनिरूपणम् ॥
वर्णाङ्गस्य तु सम्भूतिस्तारकोत्पत्तिरेव च ।
तारकासुरमाहात्म्यं ब्रह्मदेवानुकीर्त्तनम् ॥
पार्व्वतीसम्भवस्तद्वत्तथा शिवतपोवनम् ।
अनङ्गदेहदाहश्च रतिशोकस्तथैव च ॥
गौरीतपोवनं तद्वच्छिवेनाथ प्रसादनम् ।
पार्व्वतीऋषिसंवादस्तथैवोद्वाहमङ्गलम् ॥
कुमारसम्भवस्तद्वत् कुमारविजयस्तथा ।
तारकस्य वधो घोरो नरसिंहोपवर्णनम् ॥
पद्मोद्भवविसर्गस्तु तथैवान्धकघातनम् ।
वाराणस्यास्तु माहात्म्यं नर्म्मदायास्तथैव च ॥
प्रवराणुक्रमस्तद्वत् पितृगाथानुकीर्त्तनम् ।
तथोभयमुखीदानं दानं क्षमाजिनस्य च ॥
ततः सावित्र्युपाख्यानं राजधर्म्मास्तथैव च ।
विविधोत्पातकथनं ग्रहशान्तिस्तथैव च ॥

क्षेदेव यस्य गदितमष्टादशधा पृथक् ।
पौराण्यर्थेण मुनिना सर्व्वेषामपि मानद! ॥
वस्तुदृष्ट्वाथ तेनैव मुनीनां भावितात्मनाम् ।
मत्तः श्रुत्वा पुराणानि लोकेभ्यः प्रचकाशिरे ॥
मुनयो धर्म्मशीलास्ते दीनानुग्रहकारिणः ।
मया चेदं पुराणन्तु वशिष्ठाय पुरोदितम् ॥
तेन शक्तिसुतायोक्तं जातूकर्णाय तेन च ।
व्यासो लब्ध्वा ततश्चैतत् प्रभञ्जनसुखोद्गतम् ॥
प्रमाणीकृत्य लोकेऽस्मिन् प्रावर्त्तयदनुत्तमम् ॥"
तत्फलश्रुतिः ।
"य इदं कीर्त्तयेद्वत्स ! शृणोति च समाहितः ।
स विधूयेह पापानि याति लोकमनामयम् ॥
लिखित्वैतत् पुराणन्तु स्वर्णसिंहासनस्थितम् ।
पत्रैगाच्छादितं यस्तु ब्राह्मणाय प्रयच्छति ॥
स याति ब्रह्मणो लोकं नात्र कार्य्या विचारणा ॥
मरीचेऽष्टादशैतानि मया प्रोक्तानि यानि ते ।
पुराणानि तु सङ्क्षेपाच्छ्रोतव्यानि च विस्तरात् ॥
अष्टादशपुराणानि यः शृणोति नरोत्तमः ।
कथयेदा विधानेन नेह भूयः स जायते ॥
सूत्रमेतत् पुराणानां यन्मयोक्तं तवाधुना ।
तन्नित्यं श्रीलनायं हि पुराणफलमिच्छता ॥
न दाम्भिकाय पापाय देवगुर्व्वनुसूयवे ।
देयं कदापि साधूनां द्वेषिणे न शठाय च ॥
शान्ताय रामचित्ताय शुश्रूषाभिरताय च ।
निर्म्मत्सराय शुचये देयं सद्भावाय च ॥"
इति श्रीनारदीयपुराणे पूर्व्वभागे हरिहरादिमाहात्म्ये चतुर्थपादे १०६ अध्यायः ॥ १८ ॥ * ॥
इत्यष्टादशमहापुराणानुक्रमणिका समाप्ता ॥*॥
(अष्टादशमहापुराणानां निरुक्तिर्यथा शिवपुराणे उत्तरखण्डे मध्यमेश्वरमाहात्म्ये ।
"यत्र वक्ता स्वयं ब्रह्मा ब्रह्मा साक्षात् चतुर्म्मुखः ।
तस्मादुब्राह्मं समाख्यातं पुराणं प्रथमं मुने ! ॥" १ ॥
तत्रेति सुनिसम्बोधनम् ।
"पद्मकल्पस्य माहात्म्यं तत्र यस्मादुदाहृतम् ।
तस्मात् पाद्मं समाख्यातं पुराणञ्च द्वितीयकम् ॥ २ ॥
पराशरकृतं यत्तु पुराणं विष्णुबोधकम् ।
तदेव व्यासकथितं पुत्रमित्रोरभेदतः ॥ ३ ॥
यत्र पूर्व्वोत्तरे खण्डे शिवस्य चरितं बहु ।
शैवमेतत् पुराणं हि पुराणज्ञा वदन्ति च ॥४॥
भगवत्याश्च दुर्गायाश्चरितं यत्र विद्यते ।
तत्तु भागवतं प्रोक्तं नतु देवीपुराणकम् ॥५॥
नारदोक्तं पुराणन्तु नारदीयं प्रचक्षते ॥ ६ ॥
यत्र वक्ताभवत्तत्र ! मार्कण्डेयो महामुनिः ।
मार्कण्डेयपुराणं हि तदाख्यानञ्च सप्तमम् ॥७॥
अग्नियोगात्तदाग्नेयं ८ भविष्योक्तैर्भविष्यकम् ।९।
विष्णुनैनात् ब्रह्मणस्तु ब्रह्मवैवर्त्तमुच्यते ॥१०॥
लिङ्गस्य चरितोक्तत्वात् पुराणं लिङ्गमुच्यते ।११।
वराहस्य च वाराहं पुराणं दशमं मुने ! ॥१२॥
यत्र रुद्रः स्वयं श्रौता वक्ता साक्षात् महेश्वरः ।
तत्तु स्कान्दं समाख्यातम् १३ वामनस्य तु वामनम् ॥ १४ ॥
कौर्म्मं कूर्म्मस्य चरितम् १५ मात्स्यं मत्स्यस्य कीर्त्तितम् । १६ ।
गारुड़न्तु स्वयं वक्ता यत्तद् गारुड़संज्ञकम् ॥ १७ ॥
ब्रह्माण्डचरितोक्तत्वात् ब्रह्माण्डं परिकीर्त्तितम् ॥" १८ ॥
पुराभवः वेदः । ऋग्यजुरादिप्रतिपादको ग्रन्थः । यथा, शतपथब्राह्मणे । १४ । ६ । १० । ६ ।
"ऋग्वेदो यजुर्व्वेदः सामवेदोऽथर्व्वाङ्गिरस इतिहासः पुराणं विद्या उपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्यानानि ॥"
तथा च बृहदारण्यकोपनिषदि ।
"अस्य महतो भूतस्य निश्वसितमेतद् यदृग्वेदो यजुर्व्वेदः सामवेदोऽथर्व्वाङ्गिरस इतिहासः पुराणम् ॥"
"इदं वा अग्रेनैव किञ्चिदासीदित्यादिकं जगतः प्रागवस्थासुपक्रम्य सर्गप्रतिपादकं वाक्यजातं पुराणम् ।" इति ऋग्वेदोपोद्घाते ॥ * ॥)
पुराण:, पुं, (पुरा पूर्व्वस्मिन् काले भव इति । पुरा + "सायंचिरंप्राह्णेप्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट्च ।"४ । ३ । २३ । इति ष्ट्युः निपातनात् तुड़भावः ।) पद्यः । (शिवः । यथा, महाभारते । १३ । १७ । १०६ ।
"वसवांश्चोपशान्तश्च पुराणः पुण्यचञ्चुरी ॥")
पुरातने, त्रि । (यथा, मनुः । ५ । २३ ।
"बभूवुर्हि पुरोडाशा भक्ष्याणां शष्कुलिणाम् ।
पुराणेष्वपि यज्ञेषु ब्रह्मक्षत्रसवेषु च ॥")
कार्षापणे, पुं क्लीं । इति शब्दरत्नावली ॥ (यथा, मनुः । ८ । १३६ ।
"ते षोड़श स्याद्धरणं पुराणश्चैव राजतः ।
कार्षापणस्तु विज्ञेयस्ताम्रिकः कार्षिकः पणः ॥")
पुराणगः, पुं, (पुराणेगीयते इति । गै + घञर्थे कः । यद्वा, पुराणं वेदं गायतीति । गै + "आतोऽनुपसर्गे कः ।" ३ । २ । ३ । इति कः ।) ब्रह्मा । इति हेमचन्द्रः । २ । १२६ ॥ पुराणगायके, त्रि ॥
पुराणपुरुषः, पुं, (पुराणैर्वेदादिभिरुपस्तुतः पुरुषः इति मध्यपदलोपिसमासः । यद्वा, पुराणः पुरुषः इति कर्म्मधारयः ।) विष्णुः । इति इति हेमचन्द्रः । २ । १२८ ॥ (यथा, पाद्मोत्तरखण्डे १११ अध्याये विष्णोरष्टोत्तरशतनामकीर्त्तने ।
"पुराणपुरुषो नन्दात्मजः श्रीवत्सलाञ्छनः ॥")
पुरातनः, पुं, (पुरा भवः । पुरा + ष्ट्युट्सुट् च ।) पुराणः । तद्वैदिकपर्य्यायः । प्रत्नम् १ प्रदिवः २ प्रवयाः ३ सनेमि ४ पूर्व्वम् ५ अह्नाय ६ । इति षट्पुराणनामानि । इति वैद्यनिघण्टौ ३ अध्यायः ॥ (विष्णुः । यथा, महाभारते । १३ । १४६ । ६६ ।
"उत्तरो गोपतिर्गोप्ता ज्ञानगम्यः पुरातनः ॥")
पुरातनः, त्रि, (पुरा पूर्व्वस्मिन् काले भवः । पुरा + "सायंचिरेति ।"४ । ३ । २३ । इति ष्ट्युट्सुट् च ।) पूर्व्वकालभवः । पुराण इति भाषा । तत्पर्य्यायः । पुराणः २ प्रतनः ३ प्रत्नः ४ चिरन्तनः ५ । इत्यमरः । ३ । १ । ७७ ॥ चिरत्नः ६ । इति जटाधरः ॥ (यदुक्तं नीतिशास्त्रे ।
"नवं वस्त्रं नवं क्षत्रं नवा स्त्री नूतनं गृहम् ।
सर्व्वत्र नूतनं प्रस्तं सेवकान्नं पुरातनं ॥")
पुराध्यक्षः, त्रि, (पुरस्य पुराधिकृतो वा अध्यक्षः ।) नगराधिकृतः । (यथा, महाभारते । १३ । १३५ । ११ ।
"चिकित्सकः कान्तदृष्टः पुराध्यक्षः पुरोहितः ।
सांवत्सरो दृथाध्यायी सर्व्वे ते भूभृदन्तिताः ॥")
अन्तःपुराध्यक्षलक्षणम् । यथा,—
"दृष्टः कुलोद्गतः शक्तः पितृपैतामहः शुचिः ।
राज्ञामन्तःपुराध्यक्षो विनीतश्च तथेष्यते ॥"
इति युक्तिकल्पतरुः ॥
पुरारिः, पुं, (पुरस्य त्रिपुरस्य अरिः शत्रुः ।) शिवः । इति त्रिकाण्डशेषः ॥ (यथा, अध्यात्मरामायणे । १ । १ । ५ ।
"पुरारिगिरिसम्भूता श्रीरामार्णवसङ्गता ।
अध्यात्मरामगङ्गेयं पुनातु भुवनत्रयम् ॥")
पुरार्द्धविस्तरः, पुं, (पुरार्द्धे पूर्व्वार्द्धे विस्तरो विस्तृतिरस्येति ।) खेटः । इति हेमचन्द्रः । ४ । ३८ ॥
पुरावसुः, पुं, (पुरा पूर्व्वकाले उत्पन्नः प्राग्जन्मनि वसुः ।) भौमः । इति त्रिकाण्डशेषः ॥
पुरावृत्तं, क्लीं, (पुरा पुराणं वृत्तं चरित्रं यत्र ।) पूर्व्ववृत्तान्तनिबन्धनम् । तत्पर्य्यायः । इतिहासः २ । इत्यमरः । २ । ६ । ४ ॥ पूर्व्वचरितम् ३ । इति स्वामी ॥ (यथा, महाभारते । ७ । २८ । २४ ।
"शृणु गुह्यमिदं पार्थ ! पुरावृत्तं यथानघ ! ॥")
पुरासिनी, स्त्री, (पुरं नगरमस्यति त्यजतीति । अस + णिनिः + ङीप् ।) सहदेवीलता । इति राजनिर्घण्टः ॥
पुरासुहृत्, [द्] पुं, (पुरस्य त्रिपुरस्य असुहृत् शत्रुः ।) शिवः । इति हेमचन्द्रः । २ । ११४ ॥
पुरिः, स्त्री, (पूर्य्यते इति । पॄ + "कृगॄशॄदॄकटीति ।" उणा० ४ । १४२ । इति इः । स च कित् ।) पुरी । इत्यमरटीकायां भरतः ॥ नदी । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (शरीरम् । इति पुरीतत्-शब्दटीकायां भरतः ॥)
पुरिः, पुं, (पूर्य्यते वंशजादिभिरिति । पॄ + इः । स च कित् ।) राजा । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (सन्न्यासिविशेषः । शङ्कराचार्य्यशिष्यतोटकस्य शिष्येषु अन्यतमशिष्यासाम्प्रदायिकविशेषः । इति केचित् ॥ तल्लक्षणं यथा, प्राणतोषिण्यामवधूतप्रकरणे ।
"ज्ञानतत्त्वेन संपूर्णः पूर्णतत्त्वपदे स्थितः ।
परब्रह्मरतो नित्यं पुरिनामा स उच्यते ॥"
तथा च सुखमालातन्त्रे २ पटले ।
"देवताया: सदा ध्यानं श्रीगुरोः पूजनं तथा ।
अन्तर्यागेषु यो निष्ठः स वीरः पुरिरेव च ॥")

पुरी, स्त्री, (पॄ + बा ङीष् ।) नगरी । इत्यमरः । २ । २ । १ ॥ (यथा, श्रीधरस्वामिधृत-भृगुवचनम् ।
"शुभाङ्गः पुरी प्रोक्ता त्रिभां पुरमपीष्यते ॥") अस्या लक्षणादि पुरशब्दे नगरशब्दे च लिखितम् । तन्नगरं यथा, महाभारते । २ । १५ । ५—८ ।
"पुरं समन्ताद्विहिता गुप्तताका गतोरगा ।
सप्ताङ्गा सप्तकक्षा च सप्तद्वारनिकाता तथा ॥
सोपप्लवप्रतोलीका साट्टाट्टालकगोपुरा ।
सर्वशस्त्रास्त्रसंपन्ना सोल्कागातायसोपिका ॥
गोपिता भरतश्रेष्ठ ! समैरीपगवानका ।
गतोरगाङ्कुशा राजन् ! सप्तनीकसकाङ्क्षका ॥
सप्तकुण्डाग्निसंकाशा सायुधा सपरम्बधा ।
गोपुरर्क्षमयी चापि सामिः सप्तकृष्टङ्किका ॥"
"पताकाध्वजाकुलः । तोरणानि बहिर्द्वाराणि । अट्टाश्च योधमञ्चाः । कूटाकारदारुमयानानि भाषायां तुरुपमंज्ञानि । अन्ये तु विष्णुचोत-सर्जनप्रहाणि कूटा इत्याहुः उदाहरन्ति च । 'कल्पन्ते कूटप्रहाणि रथस्योपरि सर्वतः । विष्णुचक्रमुसलार्थं करादिसार्थं उच्यते ।'
इति ॥
यन्त्राणि आग्नेयौषधबलेन क्षेपणिक्षोत्क्षेपणानि महान्ति भाषायां कामानुसंज्ञकानि । क्षुद्राणि तीक्ष्णशिलोत्क्षेपणयन्त्राणि षण्डकुसंज्ञकानि । शतघ्नीः सुरङ्गद्वारा गुप्तमार्गकर्त्तारः ॥ उपप्लव्याः प्रतोल्यो रथ्यामार्गा यस्यां सा । अट्टालकाः उभरिपृष्ठाः । गोपुराणि पुरद्वाराणि । साट्टानि अट्टेन अग्रेन सहितानि अट्टालकादीनि यस्यां सा । साट्टेति विशेषणं उपप्लव्यस्य ग्रामान्तस्य रथ्यायाश्चा-प्यत्र सम्बध्यते । चक्रयन्त्रगो सेन्यनिर्याहिका गोर्त्ता इति खेचरप्रसिद्धा । सोल्कायातायसोपिका सोल्कभ्रमातं ज्वालायष्टितसुषुम्कं यस्यां सा सोल्कायातेति पाठे । व्यवसाः सोपिताः सन्नद्धाः कालपाशागदयो रिपूणा-मुपरिक्षिप्तनाय यन्त्रामिति शेषः । उल्केवोल्का प्रज्वलन्ती यष्टिः सोल्कयष्टिः सोल्का । अयातं सर्वतोभद्रसंज्ञकं शरदानं शाग इति भाषायां प्रसिद्धम् । तयोरयस्कान्तेयमलोहमि सोपिता मानविचाः मन्त्रमयाः शक्तयः कर्षा-मिहरणशक्तिमद्दण्डा तद्युक्ताः सोल्कायाता-यसोपिकाः ॥ * ॥ उद्धिका शस्त्रास्त्रमयानि भाण्डानि । सर्द्धिकेति पाठे शस्त्र आयुध-विशेषाः ॥ * ॥ शस्त्रयष्टिकाः वर्षुसीलताः शलाकाः । सोपस्थानि धर्मस्थानि कमठपृष्ठा-कारानि शरवारणकानि ढाल इति प्रसि-द्धानि । साग्निः साग्नेयौषधसहिता गुडाः सोल्काः । अष्टिकाखड्गुपेशकयन्त्राणि । शुल्बानामुपरि यातनाय तप्तो गुडो द्रवीभूतो यत्र क्षिप्यते स्माद्यो तद्यष्टिसैन्यन्दे ॥" इति श्रीभरतसेनभारतभावदीपनामटीका ॥

पुरीतत्, पुं क्ली, (पुरीं शरीरं ततोतीति । तन दुण् विस्तारे + क्विप् । "गमः कौ ।" ६।४।४०। इत्यत्र "गमादीनामिति वक्तव्यम् ।" इति वार्त्तिकोक्त्या अनुनासिकलोपः । तुगागमश्च । पुरीं ततोतीति वाक्ये "नहिवृतिवृषिव्यधि-रुचिसहितनिषु क्वौ ।" ६ । ३ । ११६ । इति पूर्वपदस्य दीर्घः ।) अन्तम् । ओत इति ख्यातम् । अन्तति वध्नाति कालमवस्थादि अन्तं व्यतिषन्धे नाभीतिरः । पुरिः शरीरं ततोतीति पुरीतत् क्विप् वनततनाद्यनिमामिति नलोपे स्वस्य तनिति तन् निपातनादिकारस्य दीर्घः । अन्त-शब्दत्वात् क्लीवत्वम् । पुरीतदस्त्रियामिति वाचस्पतिः । इत्यमरभरतौ ॥

पुरीषोष्टः, पुं, (पुरीं शरीरं शोषयतीति । शुष + क्विप् + "कर्म्मण्यण् ।" ३।२।१। इत्यण् ।) धुस्तूरः । इति शब्दमाला ॥

पुरीषं, क्ली, (पिपर्त्ति शरीरमिति । पॄ + "शॄ-पॄभ्यां किच ।" उणा० ४।२७।इति ईषन् । स च किन् ।) विष्ठा । इत्यमरः । २ । ६ । ६६ ॥
तदुत्सर्गविधिर्यथा,—
"सङ्कर्त्ते ब्राह्म उत्थाय राचिवासं परित्यजेत् ।
परिधायापरं वस्त्रं शयनस्थानतोऽन्यतम् ॥
सुसाङ्गिपृष्ठतान् प्रक्षाल्य दिराचम्य ततो द्विजः ।
क्षणं क्षणं स्तुतिं कृत्वा खनित्वा नैर्ऋतीं दिशम् ॥
खनित्रखननेनैव द्वादशाङ्गुल्यधोत्सृजम् ।
गृहीत्वोदकपात्रञ्च मितं गच्छेदनुद्धतम् ॥
ग्रामाद्वा शरविक्षेपमात्रमुदिते रवौ ।
मैत्रभावश्यकं कर्त्तुं नगराच्च चतुर्गुणम् ॥
तत्रिमुष्टायतं गर्त्तं तथा कृत्वा गभीरकम् ।
कृत्वा खनित्रैः खनित्रेण कृष्णैराच्छाद्य तत्पुनः ॥
शुष्कैः काष्ठैरयज्ञीयैर्भूमौ गर्त्तं सवुण्ठितः ।
संवीताङ्गो वेगदलैः पत्रैर्वेणुमयभाजनैः ॥
कृत्वं खनित्रं संन्याप्य वारिपात्रमुपानहौ ।
ततो द्विजस्तूपविक्षेपदूरेणाच्छाद्य मस्तकम् ॥
यज्ञोपवीतं कर्णेऽथ कृत्वा मौनी च दक्षिणे ।
आगतो द्विगमनं गोपश्यन् मनसा भास्करम् ॥
गुरुं समीपगं सर्वदेवतामूर्त्तिमेव च ।
मातरं पितरं चन्द्रं सर्वं गुरुजनं स्त्रियम् ॥
उदङ्मुखश्चिसन्ध्यासु दिवसे च यदा निशि ।
दक्षिणासुख उत्सर्गं कुर्य्यान्मूत्रपुरीषयोः ॥
पूर्व्वाह्णे तु द्विजः कुर्य्यात् पश्चिमाभिमुखोऽथवा ।
अपराह्णे पूर्व्वमुखो न्यग्वपुर्विसर्जनम् ॥
मध्याह्ने प्रयतः कुर्य्यादुत्तराभिमुखः ।
दक्षिणाभिमुखो रात्रौ द्विजो मैत्रं प्रयत्नतः ॥
निशायामन्धकारे तु छायायां दिवसे तथा ।
यज्ञोपवीतसंसक्तो भूत्वा मैत्रं कुर्य्यात् द्विजो भयात् ॥
दिग्भ्रमाच्च मनोदुःखाद्विघ्नस्य विसर्जनम् ।
मोक्षादाधोमुखः कुर्य्यादुत्तराक्षः प्रयतो द्विजः ॥
सन्यासी ब्रह्मचारी च वानप्रस्थो गृही द्विजः ।
ग्रामसंधायी च देशानां सर्व्वत्रैषु दीक्षितः ॥
मुनिश्च सर्व्वधर्म्मज्ञो दान्तः शान्त उदारधीः ।
यतीश्वरश्च कुर्य्यादेवमन्यो नान्य एव च ॥
ग्रामस्य नैर्ऋतं भागमाश्रित्य दक्षिणाभिमुखो विशेत् ।
योगिनान्तु यथा स्त्रीणां ब्रह्मादीनामयं क्रमः ॥
न देवायतने वृक्षमूले च न जले नदे ।
न नदीकूपमार्गेषु न वर्त्मगोष्ठभस्मसु ॥
न चितामिश्रशानेषु गोगरे न द्विजालये ।
नाम्भःसमीपे न पुरे नाकाशे न च शाद्वले ॥
न समुद्रे न कार्य्ये च न तीर्थे न हिमालये ।
न यज्ञवृक्षमूलेषु गोप्रहारे चतुष्पथे ॥
न शस्यक्षेत्रे न खले पुष्पोद्याने न चत्वरे ।
सोपानत्को न गच्छेच्च न रथ्यासेवभूतले ॥
न वेश्मवालये गोत्रे न सूर्य्याभिमुखस्तथा ।
न फालकृष्टकेदारे न तिष्ठेच्च कदाचन ॥
न गच्छन्न च वल्मीके न च पर्व्वतमस्तके ।
न शस्त्रं न दिशो भागान्नाकाशमवलोकयन् ॥
न गोव्रजे नदीतीरे नित्यस्थाने न गोमये ।
न यज्ञभूमौ न गृहे न पवित्रीकृतस्थले ॥
दिवो न देवच्छायायां ब्रह्मभूमविसर्जनम् ।
कुर्य्यादुद्यच्छेत्काकूटे न च सम्राजिगर्त्तके ॥
उद्वतास्मोत्पत्तिकाभ्यामित्यं नारद ! यतनः ।
कृत्वोत्सर्गं ततः कुर्य्यात् शौचं सप्तपुरीषयोः ॥
शुष्ककाष्ठेन लोष्ट्रेण यज्ञीयेन दलेन वा ।
प्रमार्ष्य गुह्यमुत्तिष्ठेत् शिश्नमेव विशेषतः ॥
विधृत्य वामहस्तेन शिश्नमूषविशोधिनि ।
चेद्दक्षिणासुखः सन्ध्यां दिवोत्तरमुखस्तदा ॥
पूतिगन्धिजलं दुष्टं सफेनञ्च सबुद्बुदम् ।
तीर्थोदकं मलवतां गाधो वर्णान्तरन्तथा ॥
सप्तद्रगानदीवारः सानुक्रम्य सकर्दमम् ।
यथगन्यत्रशतातास्मः समुद्रगगोदकम् ॥
धान्यचेलस्य सलिलं सकोटञ्च परित्यजेत् ।
मानवो देवयातास्मः सकले शौचकर्म्मणि ॥*॥
गृहः सकीटास्थीर्घानां देवायतनगोष्ठयोः ।
नदीदधिनदीदेवमानतीरस्य मृत्तिकाः ॥
मधीतलोद्भवाः क्षेत्रभूम्ययोः सिकताश्च याः ।
अन्तर्जला धूलिगृहो वल्मीकस्य च कर्दमाः ॥
ऊषराश्च पलोन्मिश्रा मृत्तिका भवनस्य च ।
अन्यत्यन्तसमीधाधीमूलकादीनाञ्च या गृहः ॥
श्मशानभूमेः शैलस्य तथा पूतस्यलस्य च ।
शौचावशिष्टमार्गस्य चातुर्वर्णासाश्च मृत्तिकाः ॥
यज्ञस्थानस्य विप्राणां साधूनामालयस्य च ।
मृत्तिका वर्णयेद्विज्ञा देवर्षे ! शौचकर्म्मणि ॥
पवित्रस्थानतो ग्राह्या ब्रह्मगाङ्गुल्यधोगृहः ।
द्विजैः सकलशौचार्थं शर्करादिविवर्जिताः ॥*॥
प्रथमेऽङ्गिनरः शौचं कुर्य्यान्मृद्भिरतः परम् ।
पुनर्जले पुरीषस्य यथा गन्धक्षयो भवेत् ॥
मृत्तिका प्रथमा शौचे तद्वं प्रस्तिमन्मिता ।
पूर्णप्रस्तिमात्रा तु द्वितीया मगधा तथा ॥
तृतीया प्रमिता शौचे सार्द्धप्रस्तिमृत्तिका ।
चतुर्थ्यादा क्रमादेवमर्द्धप्रस्तिवर्द्धिता ॥
यया मृत्तिकया पूर्वं विप्रस्य शौचकारिणः ।
तद्वं प्रस्तिमात्रा सा मुनिभिः परिकीर्त्तिता ॥
गुदे दृष्टाग्रहस्तिमः पञ्च वा सप्त वा त्रयः ।
गुदमेकं तथा लिङ्गे तिस्रो वा मृत्तिका इयम् ॥

पुरीष

सप्त वामकरे दद्यान्मृदस्तिस्रश्चतुर्दश ।
तिस्रो वा हस्तयोः सप्त चतुर्दश च षोड़श ॥
पाण्योरेकां मृदं पृष्ठे षड्वा तिस्रश्च मृत्तिकाः ।
हस्तद्वयनखेष्वेकां तिस्रश्च षड्मृदस्तथा ॥ * ॥
मैथुने रेतःस्खलने मूत्रोत्सर्गे च मृद्वयम् ।
दद्यात्तिस्रश्च गुह्येकां तिस्रो वामकरे मृदः ॥
हस्ते च मृद्वयं स्वच्चेत्तिस्रो वा शुद्धितत्परः ।
पदेकैके द्विजस्तिस्रो गृह्णीयं शौचमाचरेत् ॥
गृहिणो द्विगुणं शौचं यतेश्च ब्रह्मचारिणाम् ।
गृहस्थवानप्रस्थानां प्रोक्तं त्रिगुणमेव च ॥
सन्न्यासिनां वैखवानां शौचं सेयं चतुर्गुणम् ।
हस्तपाद्गारिपात्रस्तु मृद्भिरद्भिश्च गोमयैः ॥
दिवा यद्विहितं शौचं निशायामर्द्धकं भवेत् ।
मृतदर्द्धमशौचे तु जातके मृतकेऽपि च ॥
चौरादिबाधिते मार्गे शौचमस्यार्द्धमाचरेत् ।
योषितामेतदर्द्धन्तु शूद्रादीनाञ्च नारद ! ॥
व्याधिभिश्चातुरो मर्त्य आर्त्तो यदि यथाबलम् ।
शौचं कुर्य्यात् कृतं यत्र तत् स्थानं शोधयेज्जलैः ॥
वेदस्मृतिपुराणानि धर्मशास्त्राणि नैत्यिकम् ।
नैत्यादिकर्म्म यः कुर्य्यादिहाय मन्दधीर्द्विजः ॥
प्रतिप्रज्ञानमायुञ्च प्रज्ञां हन्ति यशः श्रियम् ।
बलमाचारहीनस्य सदा तस्यापवित्रता ॥ * ॥
सात्वताच्चेद्विजा भूपा वैश्यशूद्रान्त्यजाः स्त्रियः ।
कुर्व्वन्ति शौचं यत्नेन यावच्चेतःपवित्रता ॥
येषां कृष्णस्य मननं तथा नामप्रकल्पनम् ।
सदैव स्मरणं भागवतानां साधुसेवनम् ॥
भक्तिप्रधौतमनसां गोविन्दार्पितकर्म्मणाम् ।
बाह्यान्तःकृष्णचित्तानां शुचिता तदहर्निशम् ॥
मृद्गोमयजलैः शौचमनेकैः कुरुते यदि ।
मनोऽपवित्रता यस्य कदाचिद्वै न शुध्यति ॥
गोविन्दहृदया नास्ति यस्य लोकस्य जन्मनि ।
सोऽपि देहाशुचिः ज्ञात्वा शौचं नैत्यादिकर्म्मसु ॥
शतधा यदि देवर्षे शौचं कुर्य्यात् सहस्रधा ।
मृद्वारिगोमयैर्लोको भावदुष्टो न शुध्यति ॥
सदा चित्तापवित्रत्वमकार्य्यो सुवि यो नरः ।
तस्य तु स्यान्न मैत्रादिशौचेनैव स शुध्यति ॥
पर्व्वताकारकूटेन गोविट्सर्व्वनदीजलैः ।
शौचं ज्ञात्वा न शुध्येत दुश्चित्तो भवेद्यदि ॥"
इति पाद्मोत्तरखण्डे १०६ अध्यायः ॥
(उदकम् । इति निघण्टुः । १ । १२ ॥ "पूरयति जगत् प्रलयकाले पूर्य्यते अनेन तृड़ाकादि पालकं वा जगतः शस्योत्पत्तिहेतुत्वात् । प्रीणातेर्वा बाहुलकात् कीषन्प्रत्ययः ईकारस्योकारादेशः स च पकारात् परो द्रष्टव्यः ।" इति तट्ट देवराजयज्वा ॥ यथा, ऋग्वेदे । १ । १६३ । १ ।
"यदक्रन्दः प्रथमं जायमान
उद्यन्त्समुद्रादुत वा पुरीषात् ॥"
"पुरीषात् सर्व्वकामानां पूरकादुदकात् ॥"
इति तद्भाष्ये सायनः ॥)

पुरीषजः, पुं, (पुर्य्या देहात् द्रव्यते त्यज्यते इति । पुरी + द्रव + कर्म्मणि क्विप् ।) पुरीषम् । इति त्रिकाण्डशेषः ॥

पुरुषः

पुरीषमः, पुं, (पुरीषं मिमीते इति । मा + कः ।) माषः । इति त्रिकाण्डशेषः ॥

पुरुः, पुं, (पिपर्त्ति पूर्य्यते वेति । पॄ + "पृभिदिव्यधिगृधिधृषिदृशिभ्यः ।" उणा० १ । २४ । इति कुः । "उदोष्ठ्यपूर्व्वस्य ।" ७ । १ । १०२ । इति उत्वम् । "उरण्रपरः ।" १ । १ । ५१ । इति रपरत्वम् ।) देवलोकः । नृपभेदः । स च ययातेः कनिष्ठपुत्रः । (आद्यूदन्तोऽपि पाठः ।) परागः । इति मेदिनी । रे, ५८ ॥ दैत्यः । इत्युणादिकोषः ॥ नदीभेदे, त्रि । इति शब्दरत्नावली ॥ (राजविशेषः । यथा, महाभारते : २ । ४ । २७ ।
"सुकर्म्मा चैकितानश्च पुरुश्चाभिमन्युकर्षणः ॥"
चाक्षुषमनोः पुत्रभेदः । यथा, मार्कण्डेये । ७६ । ५५ ।
"उरुपुरुषशतद्युम्नप्रसुखाः सुमहाबलाः ।
चाक्षुषस्य मनोः पुत्राः पृथिवीपतयोऽभवन् ॥"
पर्व्वतभेदः । यथा, महाभारते । ३ । ६० । २२ ।
"पर्व्वतश्च पुरुर्नाम यत्र जातः पुरूरवाः ।
भृगुर्यत्र तपस्तेपे महर्षिगणसेविते ॥"
शरीरम् । यथा, शुक्लयजुर्विजये । १३ अध्याये ।
"पुरुषसंज्ञे शरीरेऽस्मिन् शयनात् पुरुषो हरिः ।
शकारस्य षकारोऽयं बाहुल्येन प्रयुज्यते ॥")
प्रभुरे, त्रि । इत्यमरः । ३ । १ । ६३ ॥ (यथा, नैषधे । १६ । ५ ।
"स्फुरति तिमिरस्तोमः पक्ष्मप्रपञ्च इवोच्चकैः
पुरुसितगरुच्चच्चञ्चूपुटस्फुटचुम्बितः ॥")

पुरुक्षुत्सवः, पुं, इन्द्ररिपुविशेषः । यथा,—
"इन्द्रो विपक्षिद्वेषानां तद्रिपुः पुरुक्षुत्सवः ।
जघान हस्तिरूपेण भगवान्बधुसूदनः ॥"
इति गारुड़े ८७ अध्यायः ॥

पुरुदंशकः, पुं, (पुरु बहुलं यथा स्यात्तथा दंशतीति । दंशृ + ण्वुल् ।) हंसः । इति त्रिकाण्डशेषः ॥

पुरुदंशाः, [स्] पुं, (पुरुं दैत्यविशेषं दंशति हिनस्तीति । दंशृ + असुन् ।) इन्द्रः । इति जटाधरः ॥

पुरुषः, पुं, (पुरति अग्रे गच्छतीति । पुर + "पुरः कुषन् ।" उणा० ४ । ७४ । इति कुषन् ।) पिपर्त्ति पूरयति वर्त्मं यः पुरुं श्रेते य इति वा । पुमान् । (यथा, मनौ । १ । ३२ ।
"द्विधा कृत्वात्मनो देहमर्द्धेन पुरुषोऽभवत् ।
अर्द्धेन नारी तस्यां स विराजमसृजत् प्रभुः ॥")
तत्पर्य्यायः । पूरुषः २ नाः ३ नरः ४ पञ्चजनः ५ पुमान् ६ अर्थाश्रयः ७ अधिकारी ८ कर्म्मार्हः ९ जनः १० अर्थवान् ११ । इति राजनिर्घण्टः ॥ मनुष्यः १२ मानवः १३ मर्त्यः १४ मानुषः १५ मनुः १६ । इति शब्दरत्नावली ॥ रसिकराजः १७ घनकामधामा १८ मदनशायकाङ्कः १९ मन्मथशायकलक्ष्यः २० । इति कविकल्पलता ॥ स चतुर्विधः । यथा,—
"शूद्रो म्लेच्छस्तथाश्वाद्यो गृध्यो जातिचतुष्टयम् ॥"
शूद्रादीनां लक्षणं यथा,—

पुरुषः

"मृदुवचनसुशीलः कोमलाङ्गः सुकेशः
सकलगुणनिधानः सत्यवादी शुशोऽयम् ।१।
वदति मधुरवाणीं दीर्घनेत्रोऽतिभीरु-
श्चपलमतिसुदेहः शीघ्रवेगो मृगोऽयम् ॥२॥
बहुगुणबहुबन्धुः शीघ्रकामो नताङ्गः
सकलरुचिरदेहः सत्यवादी वृषोऽयम् ।३।
उदरकटिशुभ्रः स्वादुमद्यकण्ठाधरौष्ठो
दशनवदननासाश्रोत्रदीर्घो हि वाजी ॥"४॥
इति रतिमञ्जरी ॥ * ॥

तस्य पञ्चलक्षणत्वं यथा,—
"पात्रे त्यागी गुणे रागी भोगी परिजने सदा ।
शास्त्रे बोद्धा रणे योद्धा पुरुषः पञ्चलक्षणः ॥"
इति प्राचीनाः ॥

जितेन्द्रियस्य पुरुषत्वं यथा,—
"सा श्रीर्या न मदं कुर्य्यात् स सुखी तृष्णयो
ज्झितः ।
तच्चित्तं यत्र विश्वासः पुरुषः स जितेन्द्रियः ॥"
इति गारुड़े १६ अध्यायः ॥ * ॥

(अस्य लक्षणादिकं यथा,—
"उत्तानमानगतिसंहतिसारवर्ण-
स्नेहस्वरप्रकृतिसत्त्वमनूकमादौ ।
क्षेत्रं मृजाञ्च विधिवत् कुशलोऽवलोक्य
सामुद्रविद्वदति यातमनागतञ्च ॥
अस्वेदनौ मृदुतलौ कमलोदराभौ
श्लिष्टाङ्गुली रुचिरताम्रनखौ सुपार्ष्णी ।
उष्णौ शिराविरहितौ सुनिगूढगुल्फौ
कूर्म्मोन्नतौ च चरणौ मनुजेश्वरस्य ॥
भूपाकारविरूक्षपाण्डुरनखौ वक्रौ शिराव्याततौ
संशुष्कौ विरलाङ्गुली च चरणौ दारिद्र्यदुःखप्रदौ ।
मार्गायोत्कटकौ कषायसदृशौ वंशस्य विच्छित्तिदौ
ब्रह्मघ्नौ परिपक्वदाडिमतलौ पीतावगम्यारतौ ॥
प्रविरलतनुरोमदृत्तजङ्घा
द्विरदकरप्रतिमैर्वरोरुभिश्च ।
उपचितसमजानुवच्च भूपा
धनरहिताः श्वशृगालतुल्यजङ्घाः ॥
रोमैकैकं कूपके पार्थिवानां
द्वे द्वे ज्ञेये पण्डितश्रोत्रियाणाम् ।
चाण्डालैर्निःस्वा मानवा दुःखभाजः
केशास्त्वेवं निन्दिताः पूजिताश्च ॥
निर्मांसजानुर्म्रियते प्रवासे
सौभाग्यमल्पैर्विकटैर्दरिद्राः ।
स्त्रीनिर्जिताश्चापि भवन्ति निम्ने
राज्यं समांसेच्च महद्भिरायुः ॥
लिङ्गेऽल्पे धनवानपत्यरहितः स्थूले विहीनो धनै-
र्मेढ्रे वामनते सुतार्थरहितो वक्रेऽन्यथा पुत्रवान् ।
दारिद्र्यं विनते ह्रस्वोऽल्पतनयो लिङ्गे शिरासन्ततेः ।
स्थूलग्रन्थियुते सुखी बहुकरोत्पन्नः समेहादिभिः ॥

पुरुषः

कोशनिगूढैर्भूपा दीर्घैर्भग्नैश्च वित्तपरिहीनाः ।
ऋजुवृत्तप्रेक्षको लघुशिरालशिश्नाश्च धनवन्तः ॥
जलबुद्बुदरेकदृषणो विषमैः स्त्रीचञ्चलः समैः
चितिपः ।
दृक्षायुश्चोद्वृद्धैः प्रलम्बदृषणस्य मृतमायुः ॥
रक्तैराढ्या मणिभिर्निर्द्रव्याः पाण्डुरैश्च मलिनैश्च ।
सुखिनः सशब्दमूत्रा निःस्वा निःशब्दधाराश्च ॥
द्विश्चिचतुर्धाराभिः प्रदक्षिणावर्तवलितमूत्राभिः ।
पृथ्वीपतयो ज्ञेया विकीर्णमूत्राश्च धनहीनाः ॥
एकैव मूत्रधारा वलिता रूपप्रधानसुतदात्री ।
स्निग्धोन्नतसममण्डो धनवनितारत्नभोक्तारः ॥
मणिभिश्च मधुनिम्नैः कन्यापितरो भवन्ति
निःस्वाश्च ।
बहुपशुभागो मध्योन्नतैश्च नाभुलवर्णैर्धनिनः ॥
परिशुष्कवल्लिशीर्णैर्धनरहिता दुर्भगाश्च
विज्ञेयाः ।
कुसुमसमगन्धशुक्रा विज्ञातव्या महीपुत्राः ॥
मधुगन्धे बहुवित्ता मत्स्यसगन्धे बहून्यपत्यानि ।
तनुशुक्रः स्त्रीजनको मांसगन्धो महाभोगी ॥
मदिरागन्धे यज्वा चारगन्धे च रेतसि दरिद्रः ।
शीघ्रं मैथुनगामी दीर्घायुरनोऽन्यथाल्पायुः ॥
निःस्वोऽतिस्थूलस्फिक् समांसलस्फिक् सुखा-
न्वितो भवति ।
व्याघ्रान्तोऽध्यर्धस्फिग्मण्डूकस्फिग्नराधिपतिः ॥
सिंहकटिर्मनुजेन्द्रः कपिकरभकटिर्धनैः परि-
त्यक्तः ।
समनउरा भोगयुता घटपिठरनिभोदरा
निःस्वाः ॥
अविकलपार्श्वा धनिनो निम्नैर्वक्रैश्च भोगस-
न्त्यक्ताः ।
समकुक्षा भोगाढ्या निम्नाभिर्भोगपरिहीनाः ॥
उन्नतकुक्षाः क्षितिपाः कुटिलाः शुर्मानवा
विषमकुक्षाः ।
सर्पोदरा दरिद्रा भवन्ति वक्राग्निनश्चैव ॥
परिमण्डलोन्नताभिर्विस्तीर्णाभिश्च नाभिभिः
सुखिनः ।
खल्वा त्वदृश्यनिम्ना नाभिः क्लेशावहा भवति ॥
वलिमध्यगता विषमा शूलाबाधं करोति
नैःस्वाय ।
आवर्तो वामावर्त्तो करोति मेधां प्रदक्षिणगतः ॥
पार्श्वायता चिरायुषमुपरिष्टाच्चेश्वरं गवा-
ढ्यमधः ।
शुतपत्रकर्णिकाभा नाभिर्मनुजेश्वरं कुरुते ॥
शुष्कान्तं स्त्रीभोगिनमाचार्यं बहुसुतं यथा-
सङ्ख्यम् ।
एकादिचित्रचतुर्भिर्वलिभिर्विद्यान्नृपं त्रिवलिम् ॥
विषमवलयो मनुष्या भवन्त्यगम्याभिगामिनः
पापाः ।
ऋजुवलयः सुखभाजः परदारद्वेषिणश्चैव ॥
मांसलदृढभिः पार्श्वैः प्रदक्षिणावर्तरोमभि-
र्भूपाः ।
विपरीतैर्निर्द्रव्याः सुखपरिहीनाः परप्रेष्याः ॥

पुरुषः

सुभगा भवन्त्यनुद्वृत्तचूचुका निर्धना विषमदीर्घैः ।
पीनोपचितनिमग्नैः चितिपतयश्चूचुकैः सुखिनः ॥
हृदयं सुनतं पृथु न वेपनं मांसलं च नृप-
तीनाम् ।
अधमानां विपरीतं खररोमचितं शिरालञ्च ॥
समवक्षसोऽर्धवन्तः पीनैः शूराश्चकिञ्चना-
स्तनुभिः ।
विषमं वक्षो येषां ते निःस्वाः शस्त्रनिधनाश्च ॥
विषमैर्विषमो चक्षुभिरर्थविहीनोऽस्थिसन्धि-
परिगूढैः ।
उन्नतललाटभागी निम्नैर्निःस्वोऽर्थवान् पीनैः ॥
चिपिटग्रीवो निःस्वः शुष्का सशिरा च यस्य
वा ग्रीवा ।
महिषग्रीवः शूरः शास्त्रान्तो वृषसमग्रीवः ॥
कम्बुग्रीवो राजा प्रलम्बकण्ठः प्रभक्षणो भवति ।
पृष्ठमभग्नमरोमशमर्थवतामशुभदमतोऽन्यत् ॥
अखेदनपीनोन्नतसुगन्धिसमरोमसङ्कुलाः
कक्षाः ।
विज्ञातव्या धनिनामतोऽन्यथार्थैर्विहीनानाम् ॥
निर्मांसौ रोमचितौ भग्नावल्पौ च निर्धन-
स्यांसौ ।
विपुलावसुच्छिन्नौ सुश्लिष्टौ सौख्यवीर्य्यवताम् ॥
करिकरसदृशौ वृत्तावाजान्वबलम्बिनौ समौ
पीनौ ।
बाहू पृथिवीशानामधमानां रोमशौ ह्रस्वौ ॥
ह्रस्वाङ्गुलयो दीर्घाश्चिराशुषामवलिताश्च
सुभगानाम् ।
मेधाविनाश्च सूक्ष्माश्चिपिटाः परकर्म्मनिरता-
नाम् ॥
स्थूलाभिर्धनरहिता बहिर्नताभिश्च शस्त्र-
निर्याणाः ।
कपिसदृशकरा धनिनो व्याघ्रोपमपाणयः
पापाः ॥
मणिबन्धनैर्निगूढैर्दृढैश्च सुश्लिष्टसन्धिभिर्भूपाः ।
हीनैर्हस्तच्छेदः स्यात् सशब्दैश्च निर्द्रव्याः ॥
पित्तवित्तेन विहीना भवन्ति निम्नेन करतलेन
नराः ।
संवृतनिम्नैर्धनिनः प्रोत्तानकराश्च दातारः ॥
विषमैर्विषमा निःस्वाश्च करतलैरीश्वरास्तु
लाक्षाभैः ।
पीतैरगम्यवनिताभिगामिनो निर्धना रूक्षैः ॥
तुषसदृशनखाः क्लीवाश्चिपिटैः स्फुटितैश्च
वित्तसन्त्यक्ताः ।
कृष्णखविवर्णैः परतर्कुकाश्च ताम्रैश्च भूपतयः ॥
अङ्गुष्ठयवैराढ्याः सुतवन्तोऽङ्गुष्ठमूलगैश्च यवैः ।
दीर्घाङ्गुलिपर्वाणः सुभगा दीर्घायुषश्चैव ॥
स्निग्धा निम्ना रेखा धनिनां तद्वत्यत्येन
निःस्वानाम् ।
विरलाङ्गुलयो निःस्वा धनसञ्चयिनो घना-
ङ्गुलयः ॥
तिस्रो रेखा मणिबन्धनोत्थिताः करतलोपगा
नृपतेः ।

पुरुषः

मीनयुगाङ्कितपाणिर्नित्यं सत्रप्रदो भवति ॥
वज्राकारा धनिनां विद्याभाजान्तु मीनपुच्छ-
निभाः ।
शुभ्रातपत्रशिविकागजाश्वपद्मोपमा नृपतेः ॥
कलशध्वजालपताकाङ्कुशोपमाभिर्भवन्ति निधि-
पालाः ।
दामनिभाभिश्चाढ्याः स्वस्तिकरूपाभिरैश्वर्यम् ॥
चक्रासिपरशुतोमरशक्तिधनुःकुन्तसन्निभा
रेखाः ।
कुर्वन्ति चमूनाथं यज्वानमुलूखलाकाराः ॥
मकरध्वजकोष्ठागारसन्निभाभिर्महाधनोपेताः ।
वेदीनिभेन चैवाग्निहोत्रिणो ब्रह्मतीर्थेन ॥
वापीदेवकुलाद्यैर्धर्मं कुर्वन्ति च त्रिकोणाभिः ।
अङ्गुष्ठमूलरेखाः पुत्राः स्युर्दारिकाः सूक्ष्माः ॥
रेखाः प्रदक्षिणगाः शुतायुषां कल्पनीय-
मूनाभिः ।
छिन्नाभिर्दुर्मपतनं बहुरेखारेखिणो निःस्वाः ॥
अतिलम्बदीर्घैश्चिबुकैर्निर्द्रव्या मांसलेधनोपेताः ।
बिम्बोपमैरवक्रैरधरैर्भूपास्तनुभिरस्वाः ॥
ओष्ठैः स्फुटितविखण्डितविवर्णरूक्षैश्च धन-
परित्यक्ताः ।
स्निग्धा घनाश्च दशनाः सुतीक्ष्णदंष्ट्राः समाश्च
शुभाः ॥
जिह्वा रक्ता दीर्घा श्लक्ष्णा सुसमा च भोगिनां
ज्ञेया ।
श्वेता कृष्णा परुषा निर्द्रव्याणां तथा तालु ॥
वक्त्रं सौम्यं संवृतममलं श्लक्ष्णं समञ्च भूपानाम् ।
विपरीतं क्लेशसुजां महासुखं दुर्भगायाश्च ॥
स्त्रीसुखमनपत्यानां शास्त्रवतां मण्डलं परि-
ज्ञेयम् ।
दीर्घैर्निर्द्रव्याणां भीरुसुखाः पापकर्मणः ॥
चतुरस्रं धूर्तानां निम्नं वक्त्रञ्च तनयरहिता-
नाम् ।
कृपणानामतिह्रस्वं सम्पूर्णं भोगिनां कान्तम् ॥
अस्फुटिताग्रं स्निग्धं श्मश्रु शुभं मृदु च सन्न-
तञ्चैव ।
रक्तैः परुषैश्चौराः श्मश्रुभिरल्पैश्च विज्ञेयाः ॥
निर्मांसैः कर्णैः प्रापण्डत्यवञ्चपटैः सुबहुभोगाः ।
कृपणाश्च ह्रस्वकर्णाः शुष्कुश्रवणाश्च भूपतयः ॥
रोमशकर्णा दीर्घायुषस्तु धनभागिनो विपुल-
कर्णाः ।
क्रूराः शिरावनद्धैर्वालसमैर्मांसलैः सुखिनः ॥
भोगी त्वनिम्नगण्डो मन्त्री सम्पूर्णमांसगण्डो यः ।
सुखभाक् शुकसमनासश्चिरजीवी शुष्कनासश्च ॥
छिन्नानुरूपयागन्यगामिनो दीर्घया तु सौभा-
ग्यम् ।
आकुञ्चितया चौरः स्त्रीन्वयुः स्याच्चिपिट-
नासः ॥
धनिनोऽग्रवक्रनासा दक्षिणवक्राः प्रभक्षणाः
क्रूराः ।
ऋज्वी स्वल्पच्छिद्रा सुपुटा नासा सभाग्या-
नाम् ॥

पुरुषः

धनिनां च्युतं सङ्घाटु द्विजिह्वितं क्वादि सान-
नादश्च ।
दीर्घायुषां प्रसुप्तं विज्ञेयं संहतश्चैव ॥
पद्मदलाभैर्धनिनो रक्तान्तविलोचनाः श्रियो-
भाजः । मधुपिङ्गलैर्महाधा मार्जारविलोचनाः पापाः ॥
हरिणाक्षा मण्डललोचनाश्च सिंहेक्षणा लोचने-
चौराः । क्रूराः केकरनेत्रा गजवद्घृष्टघृष्टाश्च भूपतयः ॥
रैश्वर्यं गम्भीरैर्नीलोत्पलकान्तिभिश्च विद्वांसः ।
अतिकृष्णतारकाणामल्पासुत्वाटनं भवति ॥
मन्दित्वं स्थूलदृशां श्यावाद्याक्षाश्च भवति
सौभाग्यम् । दीना दक्षिःस्रावां स्निग्धा विपुलार्थभोगव-
ताम् ॥
अभ्युन्नताभिरल्पायुषो विशालोन्नताभिरति-
सुखिनः । विषमभ्रुवो दरिद्रा वालेन्दूनतभ्रुवः सधनाः ॥
दीर्घासंसक्ताभिर्धनिनः खण्डाभिरर्थपरिहीनाः ।
मध्यविनतभ्रुवो ये ते सक्ताः स्त्रीष्वगच्यासु ॥
उन्नतविपुलैः श्लक्ष्णैर्धन्या निम्नैः सुतार्थसन्यक्ताः ।
विषमललाटा विधना धनवन्तोऽर्धेन्दुसदृशेन ॥
शुक्तिविशालैराचार्यता शिरावन्ततैरधर्मि-
रता: । उन्नतशिराभिराढ्याः स्वस्तिकवत्संस्थिताभिश्च ॥
निम्नललाटा वधबन्धभागिनः क्रूरकर्म्मनिर-
ताश्च । अभ्युन्नतेश्च भूपाः क्षपणाः स्युः सङ्कटललाटाः ॥
रुदितमदीनमनन्यं स्निग्धश्च शुभावहं मनुष्या-
णाम् । रूक्षं दीनं प्रचुरास्रं चैव न शुभप्रदं पुंसाम् ॥
हसितं शुभदमकस्मं सनिमीलितलोचनश्च
पापस्य । हसतस्य हसितमसकृत् सोच्छ्वासस्यासकृच्चान्ते ॥
तिस्रो रेखाः शुक्लयोर्विनां ललाटावटाः स्थिता
यदि ताः । धनरुग्भिरवनीशत्वं नवतिश्चायुः सपञ्चाब्दा ॥
विच्छिन्नाभिश्चाग्न्यगामिनो नवतिरप्यरेखेण ।
केशान्तोपगताभी रेखाभिरशीतिवर्षायुः ॥
पञ्चभिरायुः सप्ततिरेकायावस्थिताभिरपि यष्टिः ।
बहुरेखेण शतार्धं चत्वारिंशच्च वक्राभिः ॥
त्रिंशद्भ्रूलताभिर्विंशतिकयैव वामवक्राभिः ।
क्षुद्राभिः खल्वायुर्न्यूनाभिश्चान्तरे कल्प्यम् ॥
परिमण्डलैर्गवाढ्याश्चक्राकारैः शिरोभिरव-
नीशाः । चिपिटैः पिलसाढ्याः करोटिशिरसां चिरा-
युषः ॥
घटसर्षा ध्वाङ्गरुचिर्विमस्तकः पापशब्दनैरुक्तः ।
निम्नः शिरो मनुष्यं बहुनिम्नमनर्थदं भवति ॥
एकैकभवैः स्निग्धैः क्षणैरायुश्चिरेणाभिजायते ।
बहुभिर्न चातिबहुभिः नैर्ग्रैः सुखभाग् नरेन्द्रो
वा ॥

पुरुषः

बहुन्यूनविषमकपिलाः स्थूलस्फुटिताग्रपर्व-
रूक्षाश्च ।
अतिकुटिलाश्चातिघनाश्च नार्धना वित्तहीना-
नाम् ॥
यद्यन्नाद्यं रूक्षं मांसविहीनं शिरावनद्धं च ।
तत्तद्दरिद्रं प्रोक्तं विपरीतमतः शुभं सर्व्वम् ॥
त्रिषु विपुलो गम्भीरस्त्रिष्वेव षड्न्नतश्चतुर्ह्रस्वः ।
षट्सु रक्तो राजा पञ्चसु दीर्घश्च रूक्षश्च ॥
नाभिः स्वरः सत्त्वमिति प्रदिष्टं
गम्भीरमेतत्त्रितयं नराणाम् ।
उरो ललाटं वदनञ्च पुंसां
विस्तीर्णमेतत्त्रितयं प्रशस्तम् ॥
वक्षोऽथ कक्षा नखनासिकास्यं
हनुललाटिका चेति षडुन्नतानि ।
ह्रस्वानि चत्वारि च लिङ्गपृष्ठं
ग्रीवा च जङ्घे च हितप्रदानि ॥
नेत्रान्तपादकरतालुधरोष्ठजिह्वा
रक्ता नखाश्च खलु षट्सु सुखावहानि ।
रूक्ष्माणि पञ्च दशनाङ्गुलिपर्वकेशाः
सार्कं त्वचा करुरुहाश्च न दुःखितानाम् ॥
हनुलोचनबाहुनासिकाः
स्तनयोरन्तरमत्र पञ्चमम् ।
इति दैर्घमिदं तु पञ्चकं
न भवत्येव कृशामभूभृताम् ॥
इति चैचनम् ॥

छाया शुभाशुभफलानि निवेदयन्ती
लक्ष्मा मनुष्यपशुपक्षिषु लक्षणज्ञैः ।
तेजोगुणान् बहिरपि प्रविकाशयन्ती
दीपप्रभा स्फटिकरत्नघटस्थितेव ॥
स्निग्धद्विजत्वक्खरोमकेश-
छाया सुगन्धा च महीसुतस्य ।
तुष्यर्थलाभाभ्युदयान् करोति
धर्म्मस्य चाहन्यहनि प्रवृत्तिम् ॥
स्निग्धा सिताच्छहरिता नयनाभिरामा
सौभाग्यमार्दवसुखाभ्युदयान् करोति ।
सर्व्वार्थसिद्धिजननी जननीव चाप्या
छाया फलं तनुभृतां शुभमादधाति ॥
चण्डाधृष्या पद्महेमाग्निवर्णा
युक्ता तेजोविक्रमैः सप्रतापैः ।
आर्य्यैर्योनि प्राणिनां स्याज्जयाय
क्षिप्रं सिद्धिं वाञ्छितार्थस्य धत्ते ॥
मलिनपरुषकृष्णा पापगन्धानिलोत्था
जनयति वधबन्धव्याधनार्थार्थनाशान् ।
स्फटिकसदृशरूपा भाग्ययुक्तानुदारा
निधिरिव गगनोत्था श्रेयसां खल्ववर्णा ॥
छायाः क्रमेण कुजलाङ्गल्यनिलाखरोत्थाः
केचिद्दशन्ति दश ताश्च यथानुपूर्व्या ।
रूक्ष्यार्जनाभपुरुषकृतयमोडुपानां
तुल्यास्तु लक्षणफलैरिति तत्त्वमासः ॥
इति रूक्षा ॥

करिवरघौघमरीन्द्रदृसिंहाद्दनिःस्वना
भूपाः ।

पुरुषः

गर्दभनर्जरूक्षस्वराश्च धनसौख्यसन्त्यक्ताः ॥
इति स्वरः ॥
सप्त भवन्ति च सारा मेदोमज्जात्वगस्थि-
शुक्राणि ।
रुधिरं मांसं चेति प्राणभृतां तत्त्वमासफलम् ॥
ताम्बोष्ठदन्तपालीजिह्वानेत्रान्तपायुकरचरणैः ।
रक्तेषु रक्तसारा बहुसुखवनितार्थपुत्रयुताः ॥
स्निग्धत्वक्का धनिनो दृष्टभिः सुभगा विच-
क्षणास्तनुभिः ।
मज्जामेदःसाराः सुशरीराः पुत्रवित्तयुक्ताः ॥
स्थूलास्थिरस्थिसारो बलवान् विद्यान्तगः सुरू-
पश्च ।
बहुगुरुशुक्राः सुभगा विद्वांसो रूपवन्तश्च ॥
उपचितदेहो विद्वान् धनी सुरूपश्च मांस-
सारो यः ।
इति सारः ॥
सङ्गत इति च सुश्लिष्टसन्धिता सुखसुजो ज्ञेया ॥
इति संहतिः ॥
कोहः पञ्चसु लक्ष्यो वाग्जिह्वादन्तनेत्रनखवंश्यः ।
सुतधनसौभाग्ययुताः स्निग्धैस्तैर्निर्धना रूक्षैः ॥
इति स्नेहः ॥
द्युतिमान्वर्ण्यः स्निग्धः क्षितिपानां सध्यमः सुतार्थ-
वताम् ।
रूक्षो धनहीनानां मुखः सुभद्रो न सङ्कीर्ण्यः ॥
इति वर्णः ॥
साध्यमनूकं वक्त्राज्ज्ञेयमशीर्षोल्लिखिंहगरुड़सुखाः ।
अप्रतिहतप्रतापा जितरिपवो मानवेन्द्राश्च ॥
वानरमहिषवराहाजतुल्यवदनाः सुतार्थसुख-
भाजः ।
गर्दभकरभप्रतिमेर्मुखैः शरीरैश्च निःस्वसुखाः ॥
इत्यनूकम् ॥
अष्टशतं वसवतिः परिमाण्यं चतुरशीतिरिति
पुंसाम् ।
उत्तमसत्त्वहीनानामङ्गुलसङ्ख्यास्वमानेन ॥
इत्युन्मानम् ॥
भारार्धतनुः सुखभाक् तुलितोऽतो दुःखभाग्
भवत्यूनः ।
भारोऽतीवाढ्यानामथार्धः सर्व्वधरणीशः ॥
विंशतिवर्षा नारी पुरुषः खलु पञ्चविंशतिभि-
रब्दैः ।
अर्हति मानोन्मानं जीवितभागे चतुर्थे वा ॥
इति मानम् ॥

भूजलशिखनिलाम्बर-
सुरनररत्नःपिशाचकृतिरत्नाम् ।
सत्त्वेन भवति पुरुषो
लक्षणमेतद्भवत्येषाम् ॥
महीसुखभावः शुभपण्यगन्धः
सम्भोगवान् मृष्टसनः स्थिरश्च ।
तोयस्वभावो बहुतोयपायी
प्रियाभिलाषी रसभोजनश्च ॥
अग्निप्रकृत्या चपलोऽतितीक्ष्ण-
क्रोधः क्षुधालुर्बहुभोजनश्च ।

"उत्कर्षेषु कारो प्रति नो जुषस्व
मा नो नि कः पुरुषत्रा नमस्ते ॥"
"पुरुषत्रा पुरुषेषु।" इति तद्भाष्ये सायनः ॥)
पुरुषत्वं, क्ली, पुरुषस्य भावः। पुरुषवृत्तिरसाधारणधर्म्मः। पुरुषशब्दात् भावार्थे त्वप्रत्ययः। (यथा, महाभारते। ५। १९६। १३।
"हनिष्यसि रणे विप्रं पुरुषत्वञ्च लप्स्यसे ॥")
पुंस्त्वञ्च ॥
पुरुषदन्तः, त्रि, पुरुषपरिमाणः। पुरुषशब्दात् परिमाणार्थे दन्तट्प्रत्ययः। इति व्याकरणम् ॥
पुरुषदन्तिका, स्त्री, (पुरुषस्य दन्त इव आकृतिर्यस्याः। कप्। कापि अत इत्वम्।) मेदा। इति राजनिर्घण्टः ॥ (मेदाशब्देऽस्या विवरणं ज्ञातव्यम् ॥)
पुरुषद्वयसः, त्रि, पुरुषपरिमाणः। पुरुषशब्दात् परिमाणार्थे द्वयसट्प्रत्ययनिष्पन्नः। इति व्याकरणम् ॥
पुरुषद्वेषी, [न्] त्रि, पुरुषद्वेषशीलः। पुरुषशब्दोपपदाद्विषधातोर्णिन्प्रत्ययनिष्पन्नः। इति व्याकरणम् ॥
पुरुषधनागः, पुं, (पुरुषो नाग इव।) पुरुषश्रेष्ठः। इत्यमरः। ३। १। ५६ ॥
पुरुषपुङ्गवः, पुं, (पुरुषः पुङ्गव इव।) पुरुषश्रेष्ठः। इत्यमरः। ३। १। ५६ ॥
पुरुषपुण्डरीकः, पुं, (पुरुषेषु पुण्डरीकः श्रेष्ठ इत्यर्थः। यद्वा, पुरुषः पुण्डरीको व्याघ्र इवेत्युपमितसमासः।) पुरुषव्याघ्रः। नरश्रेष्ठः। इत्यमरः। ३। १। ५६ ॥ जिनराजविशेषः। इति हेमचन्द्रः। ३। ३६० ॥
पुरुषमात्रः, त्रि, पुरुषपरिमाणः। पुरुषशब्दात् परिमाणार्थे मात्रट्प्रत्ययः। इति व्याकरणम् ॥ (यथा, तैत्तिरीयसंहितायाम्। ५। २। ५। १।
"पुरुषमात्रेण वि मीमिते यज्ञेन वै पुरुषः सम्मितः ॥")
पुरुषर्षभः, पुं, (पुरुष ऋषभ इव।) पुरुषश्रेष्ठः। इत्यमरः। ३। १। ५६ ॥
पुरुषव्याघ्रः, पुं, (पुरुषो व्याघ्र इव।) पुरुषश्रेष्ठः। इत्यमरः। ३। १। ५६ ॥ (यथा, महाभारते। ६। १६। ४३।
"एवन्ते पुरुषव्याघ्राः पाण्डवा युद्धनन्दिनः ॥")
पुरुषशार्दूलः, पुं, (पुरुषः शार्दूल इव।) पुरुषश्रेष्ठः। इत्यमरः। ३। १। ५६ ॥ (यथा, महाभारते। ३। ६१। ६ ॥
"तव च भ्रातरं वीरमप्रमेयं सव्यसाचिनम्।
शक्रस्यार्द्धासनगतं तत्र मे विस्मयो महान्।
व्यासेन पुरुषशार्दूल! दृष्ट्वा पार्थं तथागतम् ॥")
पुरुषसिंहः, पुं, (पुरुषः सिंह इव पुरुषेषु सिंहः श्रेष्ठो वा।) पुरुषश्रेष्ठः। इत्यमरः। ३। १। ५६ ॥ जिनराजविशेषः। तत्पर्य्यायः। श्रेयिः २। इति हेमचन्द्रः। ३। ३६० ॥
पुरुषाद्यः, पुं, (पुरुषाणां जिनपुरुषाणामाद्यः प्रथमः।) आदिनाथनामा जिनविशेषः। इति धनञ्जयः ॥ (पुरुषेषु जीवेषु आद्यः प्रथमः। पुरुषाणामाद्य इति वा।) विष्णुः ॥
पुरुषाधमः, पुं, (पुरुषेषु अधमोऽतिनिकृष्टः।) निकृष्टनरः। यथा, शान्तिशतके।
"नार्घे श्रीपुरुषोत्तमे त्रिजगतामेकाधिपे चेतसा
सेवे स्वस्य पदस्य दातरि सुरे नारायणे तिष्ठति।
यं कञ्चित् पुरुषाधमं कतिपयग्रामेशमल्पार्थदं
सेवायै मृगयामहे नरमहो मूढ़ा वराका वयम् ॥"
पुरुषार्थः, पुं, (पुरुषस्य अर्थः।) पुरुषस्य प्रयोजनम्। स च चतुर्विधः। यथा, अग्निपुराणे।
"धर्म्मार्थकाममोक्षाश्च पुरुषार्था उदाहृताः ॥"
(यथा, मनुः। ७। १००।
"एतच्चतुर्विधं विद्यात् पुरुषार्थप्रयोजनम् ॥")
गोस्वामिमते भक्तिः पञ्चमपुरुषार्थः ॥ (पुरुषकारः। यथा, महाभारते। ३। १७६। २७।
"दैवं पुरुषकारेण को वञ्चयितुमर्हति।
दैवमेव परं मन्ये पुरुषार्थो निरर्थकः ॥")
पुरुषास्थिमाली, [न्] पुं, (पुरुषाणामस्थीनि तेषां मालास्त्यस्येति। पुरुषास्थिमाला+व्रीह्यादित्वात् इनिः।) शिवः। इति हेमचन्द्रः। २। ६११ ॥
पुरुषोत्तमः, पुं, (पुरुषेषु उत्तमः।) विष्णुः। इत्यमरः। १।१।२१॥ (यथा, रघुः। ३। ४६।
"हरिर्यथैकः पुरुषोत्तमः स्मृतः
महेश्वरस्त्र्यक्ष एव नापरः।
तथा विदुर्म्मां मुनयः श्रुतक्रतुं
द्वितीयगामी न हि शब्द एष नः ॥"
एतन्निरुक्तिर्यथा, महाभारते। ५। ७०। १०।
"पुराणात् सदनाद्यापि ततोऽसौ पुरुषोत्तमः ॥")
जिनराजविशेषः। तत्पर्य्यायः। सोमभूः २। इति हेमचन्द्रः। ३। ३५६ ॥ पुरुषेषु मध्ये उत्तमः। यथा, धर्म्मपुराणे।
"विशेषसमभावस्य पुरुषस्यानघस्य च।
अरिमित्रेष्वुदासीने समो यस्य समं व्रजेत् ॥
समो धर्म्मः समः स्वर्गः समो हि परमं तपः।
यस्यैवं मानसं नित्यं स नरः पुरुषोत्तमः ॥"
(पुरुषोत्तमो जगन्नाथोऽस्यत्रेति। अच्। उत्कलखण्डैकदेशः। स तु पीठस्थाननामन्यतमः। तत्र भगवती विमलारूपेण विराजते। यथा, देवीभागवते। ७। ३०। ६३।
"गयायां मङ्गला प्रोक्ता विमला पुरुषोत्तमे।")
ग्रन्थकर्तृविशेषः। स तु प्रयोगरत्नमालाव्याकरणस्य हिरूपैकाक्षरहारावलीकोषाणां ग्रन्थानाञ्च कतिपयग्रन्थानां प्रणेता ॥)
पुरुहूं, त्रि, (पुरुं प्रचुरं हन्ति गच्छतीति। पुरु+हन गतौ+अन्येभ्योऽपीति डः।) प्रचुरम्। इत्यमरः। ३। १। ६३ ॥
पुरुहु, त्रि, (पुरुं प्रचुरं हन्ति गच्छतीति। हन गतौ+बाहुलकात् डुः।) प्रचुरम्। इत्यमरटीकायां स्वामी ॥ (पुरुहूरित्यपि पाठः ॥)

पुरुहूतः, पुं, (पुरु प्रचुरं हूतमाह्वानं यज्ञेषु यस्य। पुरु यथा स्यात्तथा हूयते यज्ञेष्विति वा। यद्वा, पुरूणि बहूनि हूतानि नामानि यस्य।) इन्द्रः। इत्यमरः। १।१।४४॥ (यथा, महाभारते। १। १२६। २५।
"पुरुहूतादयं जज्ञे कुन्त्यामेव धनञ्जयः ॥"
प्रचुरनामविशिष्टे, त्रि। यथा, भागवते। ८। १। १३।
"स विश्वकायः पुरुहूत ईशः
सत्यः स्वयंज्योतिरजः पुराणः ॥"
स्त्री, भगवती। सा तु पुष्करे पीठस्थाने विराजते। यथा, देवीभागवते। ७। ३०। ५६।
"विश्वे विश्वेश्वरीं प्राहुः पुरुहूताञ्च पुष्करे ॥")
पुरूरवाः, [स्] पुं, (पुरु प्रचुरं यथा स्यात्तथा रौतीति। "पर्व्वतञ्च पुरुनाम यत्र यज्ञे पुरूरवाः।"३।६०।२२। इति महाभारतोक्तवचनात् पुरौ पर्व्वते रौतीति वा। पुरु+रु+"पुरूरवाः।" उणा० ४। २३१। इति असिप्रत्ययेन निपातनात् साधुः।) बुधस्य पुत्रः। स तु चन्द्रवंशीयादिराजः। तत्पर्य्यायः। बौधः २ ऐलः ३ उर्व्वशीरमणः ४। इति हेमचन्द्रः ॥ यथा, अग्निपुराणे।
"ततो बुधाश्रमं प्रायादिड़ा रूपाश्रिता सती।
बुधेनान्तरमासाद्य मैथुनायोपमन्त्रिता ॥
सोमपुत्राद्बुधाज्जज्ञे! तस्या जज्ञे पुरूरवाः।
जनयित्वा ततः सा तं पुनः सुद्युम्नतां गता ॥"
अपि च।
"इलोदरे च धर्म्मिष्ठं बुधः पुत्रमजीजनत्।
अश्वमेधशतं साग्रमकरोद्यः क्षतेजसा ॥
पुरूरवा इति ख्यातः सर्व्वलोकनमस्कृतः।
हिमवच्छिखरे रम्ये आराध्य स जनार्द्दनम्।
लोकैश्वर्य्यमगाद्राजा सप्तद्वीपपतिस्तदा ॥
केशिप्रभृतयो दैत्यास्तस्य भृत्यत्वमागताः।
उर्व्वशी यस्य पत्नीत्वमगात् सद्रूपमोहिता ॥
सप्तद्वीपा वसुमती सप्तैलवनकानना।
धर्म्मेण पालिता तेन सर्व्वलोकहितैषिणा ॥
चामरग्राहिणी कीर्त्तिः सप्तद्वीपाङ्गवाहिका।
विष्णुप्रसादाद्देवेन्द्रो ददावर्द्धासनन्तदा ॥
धर्म्मार्थकामान्धर्म्मेण समभेवाभ्यपालयत्।
धर्म्मार्थकामास्तं दृष्ट्वा जग्मुः कौतुकात् पुरा ॥"
इति मात्स्ये २४ अध्यायः ॥
(अस्य विशेषविवरणन्तु हरिवंशे २६ अध्याये द्रष्टव्यम् ॥ * ॥) विश्वदेवः। इति घटाधरः ॥ पार्व्वणश्राद्धदेवः। यथा,—
"पुरूरवा माद्रवाश्च पार्व्वणे वसुदाहृतौ ॥"
इति श्राद्धतत्त्वे रघुनन्दनः ॥
पुरोगः, त्रि, (पुरोऽग्रे गच्छतीति। पुरस्+गम+डः।) अग्रगामी। इत्यमरः। २। ८। ७२ ॥ (यथा, रघुः। ६। ५५।
"व्याघातरेखे सुभुजौ भुजाभ्यां
बिभर्त्ति यश्चापभृतां पुरोगः ॥")
प्रधानः। इति हेमचन्द्रः। ६। ७३ ॥

पुरोगतिः, पुं, (पुरोऽग्रे गतिर्गमनमस्य।) कुक्कुरः। इति धरणिः॥ अग्रगे, त्रि॥

पुरोगमः, त्रि, (पुरोऽग्रे गच्छतीति। गम+अच्।) अग्रगामी। इत्यमरः। २। ८। ७२॥ (यथा, महाभारते। ६। १६। १०।
"तं दृष्ट्वा पार्थिवाः सर्व्वे दुर्य्योधनपुरोगमाः।
निवर्त्तिष्यन्ति संत्रस्ताः सिंहं क्षुद्रमृगा यथा॥"
कुक्कुरे, पुं। इति हेमचन्द्रटीका॥)

पुरोगामी, [न्] त्रि, (पुरोऽग्रे गच्छतीति। गम+णिनिः।) अग्रगामी। तत्पर्य्यायः। पुरोगः २ अग्रेसरः ३ अग्रः ४ अग्रतःसरः ५ पुरःसरः ६ पुरोगमः ७। इत्यमरः। २।८।७२॥ नासीरः ८ प्रसरः ९। इति शब्दरत्नावली॥

पुरोटिः, पुं, (पुरोऽटतीति। अट+इन्।) पत्रभक्षकः। इति त्रिकाण्डशेषः॥ रायभाटि इति भाषा॥ (पुरस्कारः। इति हारावली।१६४॥)

पुरोडाः, [श्] पुं, (पुर आदौ दाश्यते दीयते इति। पुरस्+दाश् दाने+क्विप्। निपातनात् दस्य डः।) हविः। इति सुग्धबोधव्याकरणम्॥

पुरोडाश्यः, पुं, (पुरोऽग्रे दाश्यते दीयते इति। दाश्+कर्म्मणि यक्। निपातनात् दस्य डः।) हविर्भेदः। स तु यवचूर्णनिर्म्मितरोटिकाविशेषः। (यथा, मनुः। ६। ११।
"वासन्तशारदैर्मेध्यैर्मुन्यन्नैः स्वयमाहृतैः।
पुरोडाशांश्चरुंश्चैव विधिवन्निर्वपेत् पृथक्॥")
पिष्टकचमसौ। हुतशेषः। इति मेदिनी। शे, २८॥ सोमरसः। इति हेमचन्द्रः॥

पुरोडाश्य, त्रि, (पुरोडाशाय हितमिति। पुरोडाश+यत्।) पुरोडाशीयम्। हविर्योग्यम्। पुरोडाशाय हितम्। यथा, भट्टिः। ५। १२।
"आमिक्षायं दधि क्षीरं पुरोडाश्यं तथौषधम्।
हविर्द्वैयङ्गवीनञ्च नाप्युपन्नन्ति राघवाः॥"

पुरोडाशा, स्त्री, (पुरे उच्छ्रयो यस्याः।) महामेदा। इति रत्नमाला॥

पुरोधाः, [स्] पुं, (पुरोऽग्रे दधाति मङ्गलमिति। पुरस्+धा+"पुरसि च।" उणा० ४। २३०। इति असिः। स च डित्।) पुरोहितः। इत्यमरः। २।८। ५॥ (यथा, रघुः। ३। १८।
"स घातकर्म्मण्यखिले तपस्विना
तपोवनादेत्य पुरोधसा कृते॥")

पुरोभागी, [न्] त्रि, (पुरः पूर्ब्बमेव भजते इति। पुरस्+भज+घिनिः।) दोषमात्रदर्शी। इत्यमरः। ३। १। ४६॥ (यथा, राजतरङ्गिण्याम्। ६। ८३।
"कुमितोरपि स यत्नेन व्यधीक्षागमोचितः।
तेनेयमगात् पुरोभागितिकांतङ्कमाकताम्॥")
अग्रंशी च॥

पुरोहितः, पुं, पुरो दधातेऽनेन कर्म्मसु धीयते स्मारोप्यते यः। (यथा, पुर आदावेव हितं मङ्गलं यस्मात्।) ब्राह्मणादिकर्त्ता। तत्पर्य्यायः। पुरोधाः २। इत्यमरः। २। ८। ५। धर्म्मकर्म्मादिकारकः ३। इति शब्दरत्नावली॥ तस्य लक्षणं यथा, भागवते।
"वेदवेदाङ्गतत्त्वज्ञो जपहोमपरायणः।
आशीर्व्वादवचोयुक्त एष राजपुरोहितः॥"
तस्य वर्জ্জनीयलक्षणं यथा,—
"कामं यज्ञमपुत्रं वानभिज्ञमजितेन्द्रियम्।
न दुःखं व्याधितं वापि नृपः कुर्य्यात् पुरोहितम्॥"
इति कालिकापुराणम्॥ * ॥
पुरोहिते वर्জ্জनीयानि यथा,—
"पुरोहितो हितो वेदस्मृतिज्ञः सत्यवाक् शुचिः।
ब्रह्मण्यो विमलाचारः प्रतिकर्त्तापदाञ्च्युतः॥"
इति कविकल्पलता॥
(यथा च।
"दोषागन्तुजगत्यभ्यो रक्षमन्त्रविशारदौ।
रक्षेतां नृपतिं नित्यं यत्नाद्वैद्यपुरोहितौ॥
ब्रह्मा वेदाङ्गमष्टाङ्गमायुर्व्वेदमभाषत।
पुरोहितमते तस्माद्वर्त्तेत भिषगात्मवान्॥"
इति सुश्रुते सूत्रस्थाने चतुस्त्रिंशेऽध्याये॥)

पुर्व्व, पूर्त्तौ। पूर्णीकरणे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) पपूरमत्करी। पूः पुरौ पुरः। पुर्व्वति पपरत् क्षुभ्नां चेटीं। इति दुर्गादासः॥

पुल, क उच्छ्रितौ। इति कविकल्पद्रुमः॥ (चुरा०-पर०-अक०-सेट्।) उच्छ्रितिरुच्चीभावः। क, पोलयति पर्व्वतः। इति दुर्गादासः॥

पुल, च महत्त्वे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) च, पोलः पुलः। पोलति। इति दुर्गादासः॥

पुल, श्र महत्त्वे। इति कविकल्पद्रुमः॥ (तुदा०-पर०-अक०-सेट्।) श्र, पुलति पुलिनं श्ररदि महत् स्यादित्यर्थः। पोलिता। इति दुर्गादासः॥

पुलः, पुं, (पोलति उच्छ्रितो भवतीति। पुल+क।) पुलकः। विपुले, त्रि। इति मेदिनी। ले, २५॥

पुलकं, क्ली, (पुलतीति। पुल+कः। ततः संज्ञायां कन्।) कङ्कुष्ठम्। तच्च पर्व्वतीयन्तिक्तातिशेषः। इति राजनिर्घण्टः॥

पुलकः, पुं, (पुल+स्वार्थे कन्।) रोमाञ्चः। तत्पर्य्यायः। रोमोद्भेदः २ त्वक्पुष्पम् ३ त्वग्दुरः ४। इति त्रिकाण्डशेषः॥ (यथा, आर्य्यासप्तशत्याम्। ३७६।
"प्रेमलघूकृतकेशवबोभरविपुलपुलककुचकलसा।
गोवर्द्धनगिरिगुरुतां सुग्धवधूर्निभृतमुपगच्छति॥")
शरीरान्तर्व्वहिर्भवकीटः। इति हेमचन्द्रः॥ (तुच्छधान्यम्। यथा, मनुः। ३। ६६।
"पुलका इव धान्येषु पूतिका इव पक्षिषु।
मशका इव मर्त्येषु जायन्ते पापकारिणः॥")
प्रस्तरविशेषः। तस्य परीक्षा यथा,—
"पुण्येषु पर्व्वतवरेषु च निम्नगासु
स्थानान्तरेषु च तथोत्तरदेशगत्वात्।
संस्थापिताश्च नखरा भुजगैः प्रकाशं
संपूज्य दानवपतिं प्रथिते प्रदेशे॥
दाक्षायणीवागदवमेकलकालगादौ
गुञ्जाञ्जनत्रपुरलालवर्णाः।
गन्धर्व्वबह्निकदलीसदृशाभासा
एते प्रशस्ताः पुलकाः प्रदृष्टाः॥
शुक्लाभशङ्खार्कविचित्रभङ्गा
मूद्रैरुपेताः परमाः पवित्राः।
मङ्गल्ययुक्ता बहुभक्तिचित्रा
दृष्टिप्रदास्ते पुलका भवन्ति॥
काकाश्वरासभशृगालदृकोग्ररूपै-
र्गृध्रैः समांसरुधिरार्द्रसुरैरुपेताः॥
रुग्मृत्युदारुविदुषा परिवर्জ্जनीया
मूल्यं पलस्य कथितस्य शतानि पञ्च॥"
इति गारुडे ७७ अध्यायः॥
मणिदोषविशेषः। हरितालम्। गजान्नपिण्डः। गन्धर्व्वविशेषः। इति मेदिनी। के, १२१॥ असुराजौ। गन्धर्व्वः। इति हेमचन्द्रः॥

पुलकी, [न्] पुं, (पुलकोऽस्यस्येति। पुलक+इनिः।) धाराकदम्बः। इति राजनिर्घण्टः॥

पुलस्तिः, पुं, (पुलं महत्त्वं+क्विप्। पुलं महत्त्वं वसते गच्छतीति। वस्+तिः। इत्युज्ज्वलदत्तः। ४। १७६।) पुलस्त्यमुनिः। इत्युणादिकोषः॥

पुलस्त्यः, पुं, सप्तर्षीणां मध्ये ऋषिविशेषः। इति शब्दरत्नावली॥ स च ब्रह्मणः कर्णाभ्यां जातः। तस्य भार्य्या हविर्भूः कर्দ্দमकन्या। तस्य पुत्रः अगस्त्यः विश्रवाश्च। इति श्रीभागवतम्॥ यथा, हरिवंशे। ७। ८।
"मरीचिरत्रिर्भगवानङ्गिराः पुलहः क्रतुः।
पुलस्त्यश्च वशिष्ठश्च सप्तैते ब्रह्मणः सुताः॥"

पुलहः, पुं, सप्तर्षीणां मध्ये ऋषिविशेषः। इति शब्दरत्नावली॥ स च ब्रह्मणो नाभितो जातः तस्य भार्य्या कर्দ্दमसुनिकन्या गतिः। तस्य पुत्राः कर्म्मश्रेष्ठः यवीयान् सहिष्णुश्च। इति श्रीभागवतम्॥

पुलाकः, पुं, (पोलति उच्छ्रितो भवतीति। पुल+"बलाकादयश्च।" इति आकारप्रत्ययेन निपातनात् साधुः।) तुच्छधान्यम्। आगड़ा इति ख्यातम्॥ (यथा, मनुः। १०। १२५।
"पुलाकांश्चैव धान्यानां जीर्णांश्चैव परिच्छदान्।")
संक्षेपः। अल्पत्वम्। भक्तसिक्थकम्। भक्तगुलिका। इत्यमरभरतौ। त्रिप्रम्। यथा पुलाकारी। इति स्वामी॥

पुलाकी, [न्] पुं, (पुलाकः त्रिप्रता ऽस्त्यस्मिन् विषये अस्यस्येति। पुलाक+इनिः।) वृषः। इति हेमचन्द्रः। ४। १८०॥

पुलादितं, क्ली, (पुल+आदृ+क्तः।) अल्पगतिः। तत्पर्य्यायः। विक्रान्तिः २। इति त्रिकाण्डशेषः॥

पुलिनं, क्ली, (पोलतीति। पुल महत्त्वे+"तलिपुलिभ्यां।" उणा० २। ५३। इति इनन्। स च डित्।) नदीसंलग्नतटम्। इत्यमरः। १। १०। ६॥ चर इति चढ़ा इति च भाषा॥

पुलिन्दः

(यथा, रामायणे । २ । ६५ । ६ ।
"क्वचिन्मणिनिकाशोदां क्वचित् पुलिनशालिनीम्।
क्वचित् सिद्धजनाकीर्णां पश्य मन्दाकिनीं
नदीम् ॥")
जलादचिरोत्थितं तटम् । इति भरतः ॥ तत्-क्षणतोयमुक्तद्वीपम् । इति सुभूतिः ॥ क्रमेणोत्थितं तटम् । इति स्वामी ॥ जलमध्यस्थमुत्थितं तटम् । इति पञ्जिका ॥ द्वीपम् । इति त्रिकाण्ड-शेषः ॥ (यत्तविशेषे, पुं । यथा, महाभारते । १ । ३२ । १६ ।
"उलूकश्वसनाभ्याञ्च निमिषेण च पक्षिराट् ।
प्रहसेन च संग्रामं चकार पुलिनेन च ॥")
पुलिन्दः, पुं, (पुल महत्त्वे + "कृषिपुल्योः किन्दच्।" उणा० ४ । ८५ । इति किन्दच् ।) चण्डाल-भेदः । स च म्लेच्छशब्दवाच्यः । इत्यमरभरतौ ॥
तस्योत्पत्तिर्यथा,—

पुलस्त्य उवाच ।

"एवं गतेषु त्रैलोक्यं दानवेषु पुरन्दरः ।
जगाम ब्रह्मसदनं सह देवैः शचीपतिः ॥
तत्रापश्यत् स देवेशं ब्रह्माणं कमलोद्भवम् ।
ऋषिभिः सार्द्धमासीनं पितरं स्वञ्च कश्यपम् ॥
ततो ननाम शिरसा शक्रः सुरगणैः सह ।
ब्रह्माणं कश्यपञ्चैव तांश्च सर्व्वांस्तपोधनान् ॥
प्रोवाचेन्द्रः सुरैः सार्द्धं देवनाथं पितामहम् ।
पितामह ! हृतं राज्यं बलिना बलिना मम ॥
ब्रह्मा प्रोवाच शक्रैतत् भुज्यते स्वकृतं फलम् ।
शक्रः पप्रच्छ भो ब्रूहि किं मया दुष्कृतं कृतम् ॥
कश्यपोऽप्याह देवेश ! भ्रूणहत्या कृता त्वया ।
दितुरुदरात्त्वया गर्भः क्षतो वै बहुधा बलात् ॥
पितरं प्राह देवेन्द्रो मातुर्दूषणतो विभो ! ।
कर्त्तनं प्राप्तवान् गर्भो यदशौचा हि साभवत् ॥
ततोऽब्रवीत् कश्यपस्तु मातुर्दोषे सदासताम् ।
गतस्तनो विनिहतो दीर्घोऽपि कुलिशेन भोः ॥
तच्छ्रुत्वा कश्यपवचः प्राह शक्रः पितामहम् ।
विनाशं पापनो ब्रूहि प्रायश्चित्तं विभो ! मम ॥
ब्रह्मा प्रोवाच देवेशं वशिष्ठः कश्यपस्तथा ।
हितं सर्व्वस्य जगतः शक्रस्यापि विशेषतः ॥
शङ्खचक्रगदापाणिर्माधवः पुरुषोत्तमः ॥
तं प्रपद्यस्व शरणं स ते श्रेयो विधास्यति ॥
सहस्राक्षोऽपि वचनं गुरूणां स निशम्य वै ।
प्रोवाच स्वल्पकालेन कस्मिन् प्राप्तो वसूदयः ॥
ता ऊचुर्देवता मर्त्ये स्वल्पकाले वसूदयः ॥

इत्येवमुक्तः सुरराड्विरिञ्चिना
मरीचिपुत्रेण च कश्यपेन ।
तथैव मित्रावरुणात्मजेन
वेगान्महीपृष्ठमवाप्य तस्थौ ॥
कालञ्जरस्योत्तरतः सुपुण्य-
सुधा हिमाद्रेरपि दक्षिणस्याम् ।
कृशस्यलात् पूर्व्वत एव विश्रुतो
वसोः पुरात् पश्चिमतोऽवतस्थे ॥
यत्राथ चक्रे भगवान् मुरारि-
र्वास्तव्यमथक्षतसुस्वरूपः ।

पुलोमा

ख्यातिं जगामाथ गदाधरेति
महाघवृन्दस्य भिदः कुठारः ॥
यस्मिन् द्विजेन्द्राः श्रुतिशास्त्रसंयुताः
समागतां यान्ति पितामहेन ।
मरुत्पितॄन् यत्र च संप्रपूज्य
भक्त्या जनन्ये नहि चेतसैव ।
फलन्महामेधमखस्य मानवा
लभन्त्यनन्तं भगवत्प्रसादात् ॥
महानदी यत्र सुरर्षिकन्या
बालापदेशाद्विमशैलमेत्य ।
चक्रे जगत् पापविनष्टसंघं
सन्दर्शनप्राशनमज्जनेन ॥
तत्र शक्रः समभ्येत्य महानद्यास्तटेऽभुते ।
आराधनाय देवस्य कृत्वाश्रममवस्थितः ॥
प्रातःस्नायी लघुःशायी एकभक्तोर्घ्यार्चितः ।
तपस्तेपे सहस्राक्षः स्तुवन् देवं गदाधरम् ॥
तस्यैवं तप्यतः सम्यक् जितसर्व्वेन्द्रियस्य च ।
कामक्रोधविहीनस्य साग्रः संवत्सरो गतः ॥
ततो गदाधरः प्रीतो वासवं प्राह नारद ! ।
शक्र प्रीतोऽस्मि भवतो सुकृतापोऽसि साम्प्र-
तम् ॥
निजं राज्यञ्च देवेश ! प्राप्स्यसि त्वचिराद्दिवः ।
यतिष्यामि यथा शक्र ! भाविश्रेयो यथा तव ॥

इत्येवमुक्तोऽथ गदाधरेण
विसर्जितः स्नाप्य मनोहरायाम् ।
स्नातस्य देवस्य ततः पुरस्तात्
संप्रोत्थुरस्माननुशासयञ्च ॥
प्रोवाच तान् भीषणकर्म्मकारान्
नाम्ना पुलिन्दा मम पापसम्भवाः ।
वसध्वमेवान्तरमद्रिशख्यो-
र्हिमाद्रिकालाञ्जरयोः पुलिन्दाः ॥
इत्येवमुक्ता सुरराट् पुलिन्दान्
विमुक्तपापः सुरविह्वलत्वैः ।
संपूज्यमानोऽनुजगाम चाश्रमं
मातुस्सदा धर्म्मनिवासमाद्यम् ॥"
इति वामने ७३ अध्यायः ॥
पुलोमजा, स्त्री, (पुलोम्नो दैत्यात् जायते इति । जन + डः ।) शची । इत्यमरः । १ । १ । ४८ ॥ (यथा, काशीखण्डे १० अध्याये ।
"निम्नत्वेहं क्रतुशतं यः कश्चित् कुरुतेऽवनौ ।
जितेन्द्रियोऽमरावत्यां स प्राप्नोति पुलोमजाम् ॥")
पुलोमजित्, पुं, (पुलोमानं जयतीति । जि + क्विप् तुगागमश्च ।) इन्द्रः । इति केचित् ॥
पुलोमद्विट्, [ष्] पुं, (पुलोम्नो दैत्यविशेषस्य द्विट् शत्रुः ।) इन्द्रः । इति हेमचन्द्रः । २ । ८८ ॥
पुलोमभित्, [द्] पुं, (पुलोमानं भिनत्तीति । भिद् + क्विप् ।) इन्द्रः । इति भूरिप्रयोगः ॥
पुलोमा, [न्] पुं, असुरविशेषः । स इन्द्रस्य श्वशुरः । इति पुलोमजाशब्दटीकायां भरतः ॥ (अयं खल्विन्द्रेण निपातितः । यथा, हरिवंशे । २० । १३४ ।
"हत्वा सबन्धकं चापि विप्रसेच्छचुना नहि ।

पुष्करं

पुलोमानं जघानाजौ जामाता वज्र शत-
क्रतुः ॥")
पुलोमारिः, पुं, (पुलोम्नोऽरिः शत्रुः ।) इन्द्रः । इति त्रिकाण्डशेषः ॥
पुष, पुष्टौ । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) पोषति तातः पुत्रम् । इति दुर्गादासः ॥
पुष, ल्ल य यौ पुष्टौ । पोषणे । इति कविकल्प-द्रुमः ॥ (दिवा०-पर०-सक०-अनिट् ।) ल्ल, अपुषत् । य, पुष्यति । यौ, पोष्टा । इति दुर्गादासः ॥
पुष, क धृतौ । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) क, पोषयति । इति दुर्गादासः ॥
पुष, ग पुष्टौ । इति कविकल्पद्रुमः ॥ (क्रया०-पर०-सक०-सेट् ।) ग, पुष्णाति पुपोष । इति दुर्गादासः ॥
पुष्पा, स्त्री, (पुष्णातीति । पुष पुष्टौ + कः । तत-टाप् ।) लाङ्गलिकीवृक्षः । इति शब्दचन्द्रिका ॥
पुषितं, त्रि, (पुष्यते स्मेति । पुष + क्तः । स्वादि-गणीयत्वात् इट् ।) पुष्टम् । ज्ञातपोषणपक्षि-मृगादि । इत्यमरः । ३ । १ । ६७ ॥
पुष्करं, क्ली, (पुष्णातीति । पुष पुष्टौ + "पुषः कित् ।" उणा० ४ । ४ । इति करन् । स च कित् ।) हस्तिशुण्डाग्रम् । (यथा, माघे । ५ । ३० ।
"आलोलपुष्करसुखोल्लसितैरभीक्ष्ण-
सुच्चाम्भभूवुरभितो वपुरूषवर्षैः ॥")
वाद्यभाण्डमुखम् । (यथा, रघुः । १७ । ११ ।
"नदद्भिः स्निग्धगम्भीरं तूर्य्यैराहतपुष्करैः ॥"७॥
"पुष पुष्टौ । पुषः कित् । इति करन्प्रत्ययः । पुषिरत्रान्तर्नीतण्यर्थः । पोषयति भूतान्यवकाश-प्रदानेन उदकदानाद्युपकारेण च । पुष्कं वारि रातीति पुष्करं इति क्षीरस्वामी । पुषेरनर्थ्यर्थात् स्फन्दश्रुविधुधिभ्यः कित् । इति विहितः करन्प्रत्ययो बाहुलकात् भवति । स्फटक्षरुष्टवीचीपुषिसुषिस्फूर्ज्यः कित् । इति करु इति श्रीभोजदेवः । पोषयति भूतानीति । पुष्कोपपदादातेः क्यातोऽनुपसर्गे कः । यद्वा, वपुरित्युदकनाम तत् कर्त्तुं शीलमस्येति । क्रमो हेतुताच्छील्यानुलोम्येषु । इति टः । वपुष्करं सत् वकारलोपेन पुष्करम् । पृषोदरादिः ।" इति निवण्टौ देवराजयज्वा ॥) जलम् । (यथा, शत-पथब्राह्मणे । ६ । ४ । २ । २ ।
"आपो वै पुष्करं प्राणोऽथर्वा प्राणो वा ॥")
ओम । (यथा, हारीते प्रथमस्थाने चतुर्थेऽध्याये ।
"मेघाः सूर्य्यांशुलासमानरुचयो ह्यल्पस्रवाल्प-
स्रवा
हंसालीकमलालिमण्डितजलः पद्माकरः
शोभनः ।
तीव्रस्निग्धमयूखचन्द्रविमला स्वानन्दिनी
कौमुदी
चित्रा वर्म्मविपक्वतोयसुरसा स्वान्निर्मलं
पुष्करम् ॥")

खड्गफलम्। पद्मम्। (यथा, रामायणे। २। ६५। १४।
"सखीवच्च विगाहस्व सीते! मन्दाकिनीं नदीम्।
कमलान्यवमज्जन्ती पुष्कराणि च भामिनि!॥")
तीर्थभेदः। (यथा, महाभारते। १। ३६। ३।
"गोकर्णे पुष्करारण्ये तथा हिमवतस्तटे॥"
अस्य अन्यद्विवरणं पुंलिङ्गान्तपुष्करशब्दे द्रष्टव्यम्।) क्षुद्रौषधम्। इत्यमरः। ३। ३। १८५॥ (यथास्य पर्य्यायः।
"उक्तं पुष्करमूलन्तु पौष्करं पुष्करञ्च तत्।
पद्मपत्रञ्च काश्मीरं कुष्ठभेदमिमं जगुः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
खड्गकोषः। इत्यमरटीकायां मधुरेशः॥
काण्डम्। द्वीपभेदः। इति मेदिनी। रे, १८७॥
(अस्य विवरणं पुंलिङ्गान्तपुष्करशब्दे द्रष्टव्यम्॥)
मुखम्। इति नानार्थरत्नमाला॥ *॥

पुष्करः, पुं, (पुष्क + "पुषः कित्।" उणा० ४। ४। इति करन्। स च कित्।) रोगविशेषः। नागविशेषः। वारसदृशी। तृणभेदः। स तु नलराजभ्राता। (यथा, महाभारते। ३। ५६। ४।
"स समाविश्य च नलं समीपं पुष्करस्य च।
शत्वा पुष्करमाहेदमेहि द्यूतं नलेन वै॥"
अयं हि कलिसाहाय्येन अक्षद्यूते नलं विजित्य निषधाधिपोऽभवत्। एतद्वृत्तान्तं महाभारते वनपर्व्वणि ५६ अध्याये द्रष्टव्यम्॥) वरुणपुत्रः। इति मेदिनी। रे, १८७॥ (वाद्यविशेषः। यथा, मार्कण्डेये। १०६। ६१।
"प्रावादयन्त ततस्तत्र वेणुवीणादिदर्दुराः।
यवाः पुष्कराश्चैव नटङ्गाः पटहानकाः॥")
पर्व्वतविशेषः। इति शब्दरत्नावली॥ *॥
सप्तद्वीपानां मध्ये द्वीपविशेषः। पुष्करद्वीपवर्णनं यथा,—
सूत उवाच।
"शाकद्वीपस्य विस्तारादिगुणेन समन्ततः।
क्षीरार्णवं समावृत्य द्वीपः पुष्करसंज्ञितः॥
तत्र स्वयम्भुविप्रेन्द्राः पर्व्वतो मानसोत्तरः।
योजनानां सहस्राणि षोडशोच्छ्रित उच्छ्रितः॥
तावदेव च विस्तीर्णः सर्व्वतः परिमण्डलः।
स च सर्व्व एवायं महावीतः स्वयम्प्रभः॥
एक एव महाबाहुः सन्निवेशाद्विधातृतः।
तस्मिन्द्वीपे स्मृतौ तु द्वौ पुण्यौ जनपदौ शुभौ॥
अपरौ मानवस्याथ पर्व्वतस्यानुमण्डलौ।
महावीतं स्मृतं वर्षं धातकीखण्डमेव च॥
स्वादूदकेनोदधिना पुष्करः परिभावितः।
तस्मिन्द्वीपे महाद्रौ च न्यग्रोधोऽमरपूजितः॥
तस्मिन्निवसति ब्रह्मा विधात्मा विश्वभावनः।
तत्रैव तस्मिन्नगरे शिवनारायणालयम्॥
वसत्यत्र महादेवो हराहौ हरिरव्ययः।
संपूज्यमानो ब्रह्मादेः कुमारादैश्च योगिभिः॥
गन्धर्व्वैः किन्नरैर्यक्षैरीश्वरः क्षणपिङ्गलैः।
सुखासक्तश्च मनाः सर्व्वा ब्राह्मण्याः सहशक्तिभिः॥

निरामया विशोकाश्च रागद्वेषविवर्जिताः।
सत्याहृते न तत्रास्तां नीचमाधममध्यमाः॥
न वर्णाश्रमधर्म्माश्च न नद्यो न च पर्व्वताः।
परेण पुष्करस्याथ समावृत्य स्थितो महान्॥
स्वादूदकः समुद्रस्तु समन्ताद्विजसत्तमाः।
परेण तस्य महती दृश्यते लोकसंस्थितिः॥"
इति कौर्म्मे ४७ अध्यायः॥ *॥
पुष्करद्वीपस्यराजा। तस्य वर्षः। यथा,—
"लोकेश्वरः सोऽपि नृभिर्मुनीन्द्रै-
र्देवैः सहेन्द्रैरघ ब्रह्मचारी।
द्वीपे शुभे पुण्यजनैरुपेते
उवास राजा च तु पुष्करस्यः॥
तेनैव नाम्ना च तु पुष्करोऽपि
सदोच्यते देवगणैः सविद्वैः।
तेनैव यानेन तथाम्बुजेन
बभूव नाम्ना तमथाङ्गयन्ति॥"
इत्यग्निपुराणम्॥ *॥
ब्रह्मक्षत्रतीर्थविशेषः। तस्य नामान्तरम्। रूपतीर्थम् २ सुखदर्शनम् ३। तत्र ज्येष्ठपुष्करमध्यमपुष्करकनिष्ठपुष्करनामकाह्रदयो ह्रदाः। तस्य परिमाणं शतयोजनमण्डलम्। इति पद्मपुराणम्॥ *॥ योगविशेषे गङ्गादीनां पुष्करत्वं यथा,—
"मकरस्थो यदा भानुस्तदा देवगुरुर्यदि।
पूर्णिमायां भानुवारे गङ्गा पुष्कर ईरितः॥
गङ्गोत्तर्य्यां प्रयागे च कोटिसूर्य्यग्रहैः समः।
सिंहसंस्थे दिनकरे तथा जीवेन संयुते॥
पूर्णिमायां गुरोर्वारे गोदावर्य्यासु पुष्करः।
तत्र स्नानञ्च दानञ्च सर्व्वं कोटिगुणं भवेत्॥
मेषसंस्थे दिवानाथे देवानाञ्च पुरोहिते।
सोमवारे सिताष्टम्यां कावेरी पुष्करो मतः॥
कर्कटस्थे दिवानाथे तथा जीवेन्दुवासरे।
अमायां पूर्णिमायां वा क्षणा पुष्कर उच्यते॥"
इति स्कन्दपुराणे पुष्करखण्डे श्रीशैलमाहात्म्यम्॥
मेघनायकविशेषः। तत्परिज्ञानं यथा,—
"त्रियुते शाकवर्षे तु चतुर्भिः श्रेयिते क्रमात्।
आवर्त्ते विद्धि सम्वर्त्ते पुष्करं द्रोणसम्बुदम्॥"
इति ज्योतिस्तत्त्वम्॥
तस्य फलम्। यथा,—
"पुष्करे दुष्करं वारि शस्यहीना वसुन्धरा।
विघ्नहोमहता लोकाः पुष्करे जलदाधिपे॥"
इति ज्योतिषम्॥ *॥
क्रूरवार-भद्रातिथि-भयपादनक्षत्र-घटितानुभजनकयोगविशेषः। यथा,—
"पुनर्व्वसूत्तराषाढ़ा कृत्तिकोत्तरफल्गुनी।
पूर्व्वभाद्रं विशाखा च रविभौमशनैश्चराः॥
द्वितीया सप्तमी चैव द्वादशी तिथिरेव च।
एतेषामेकदा योगे भवतीति त्रिपुष्करः॥ *॥
जाते तु चारजे योगे मृते भवति पुष्करः।
त्रिगुणं फलदो दृष्टो नष्टे नष्टे तथा॥
पृथमे मासि वर्षे वा कुटुम्बमपि पीड़येत्।
देवोऽपि यदि वा रचेत् तस्य पुत्रो न जीवति॥

अतस्तद्दोषशान्त्यर्थं होमयेद्घृतं बुधः।
अशक्तश्च सुवर्णादिदानं कुर्य्याद्यथाविधि॥"
समर्थश्चेद् वराहसंहितोक्तं अयुतहोमादिकं कुर्य्यात्। वाक्यं यथा,—
श्रीविष्णुरोम् तत् सदद्यासुके मास्यसुकपक्षेऽसुकतिथौ अमुकगोत्रः श्रीअमुकदेवशर्म्मा अमुकगोत्रस्य प्रेतस्यासुकदेवशर्म्मणऽस्त्रिपुष्करयोगकालीनमरणजन्यदोषशमनकामः इदं काञ्चनं श्रीविष्णुदैवतं यथासम्भवगोत्राय ब्राह्मणायाहं ददे। ततो दक्षिणां दद्यात्। अन्यच्च पूजाहोमकर्म्माणी करिष्ये। इति विशेषः। एतत् सर्व्वमशौचेऽपि कर्त्तव्यम्। यथा दक्षः।
सूत्यकाले क्रियं सर्व्वं सूतकं परिकीर्त्तितम्।
यावद्गतस्य सर्व्वस्य सूतकेऽपि न सूतकम्॥"
इति शुद्धिकारिका॥ *॥
अपि च।
"पुनर्व्वसूत्तराषाढ़ा कृत्तिकोत्तरफल्गुनी।
पूर्व्वभाद्रं विशाखा च षड़ेते वै त्रिपुष्कराः॥
द्वितीया सप्तमी चैव द्वादशी तिथिरेव च।
शनिभौमौ रविश्चैव वाराश्चैते त्रिपुष्कराः॥
एते त्रिपुष्करा ज्ञेयास्तथा द्वादशमासिके।
द्विमासे च तथा प्राप्ते षण्मासे च चतुर्थके॥
षोड़शे मासि संपूर्णे कुटुम्बं पीड़येद्ध्रुवम्।
अन्तेऽप्युपान्ते मध्ये च पुष्करो हन्ति नान्यथा॥
तद्दोषप्रशमार्थन्तु होमयेद्घृतं बुधः।
तिलव्रीहियवांश्चैव क्षत्वाज्येन समन्तथा॥
क्षीरेणैव तथाचार्य्यो जुहुयाद्भक्तिभावतः।
चरुञ्च अपयेत्तत्र प्राप्ते कुर्य्याद्बलिन्तथा॥
वैकङ्कोडुम्बराश्वत्थैः प्रत्येकाष्टोत्तरं शतम्।
एकैकं चित्रिसंयुक्तं दर्भेण परिवेष्टितम्॥
यमाय वकङ्कतेन धर्म्मायोडुम्बरेण च।
अश्वत्थेचित्रगुप्ताय जुहुयात् क्रमशस्तथा॥
तद्वद् घृततिलांश्चैव तथा समिधमेव च।
एकीकृत्य समं सर्व्वं चरुमाश्रित्य होमयेत्॥
यवव्रीहितिलैर्युक्तं तण्डुलं अपयेच्चरुम्।
दधिमध्याज्यसंयुक्तं होमः सहस्रसंख्यया॥
वैकङ्कोडुम्बराश्वत्थैर्होमयेद्विधिपूर्व्वकम्।
यमं धर्म्मं चित्रगुप्तं पुष्करं पुरुषं तथा॥
तिथिं वारं तथा ऋक्षं पूजयित्वा तु होमयेत्।
पञ्चवर्णेन चूर्णेन कुर्य्याद्वि पद्ममण्डलम्॥
यमं धर्म्मं चित्रगुप्तं स्थापयेत् क्रमशस्ततः।
तिलप्रपूरिते पात्रे लौहे च क्षणवाससा॥
वेष्टयित्वा यमं तत्र स्थापयेल्लौहनिर्म्मितम्।
घृतप्रपूरिते पात्रे कांस्यपात्रे निरञ्जनम्॥
रौप्याक्षतिं शुक्लवस्त्रवेष्टितं तत्र पूजयेत्।
गुड़प्रपूरिते पात्रे ताम्रपात्रे च मन्त्रिणम्॥
स्वर्णाक्षतिं रक्तवस्त्रवेष्टितं तत्र पूजयेत्।
क्षीरप्रपूरिते पात्रे प्रस्तरपात्रे च पुष्करम्॥
क्षणाक्षतिं क्षणवस्त्रवेष्टितं तत्र पूजयेत्।
सुवर्णतुल्यमर्हं वा अथवा शक्तिभावतः॥
प्रतिमाश्च समाः सर्व्वाः क्रमात्तत्र नियोजिताः।
व्रीहौ यवे तथा धान्ये क्रमात् पात्राणि विन्यसेत्॥

नूतने च क्रमात् पीठे स्थापयेद्विधिपूर्व्वकम् ।
मण्डलस्य चतुर्द्दिक्षु चतुःकुम्भांश्च स्थापयेत् ॥
दधिगुड़क्षीरपूर्णान् प्रकल्प्य संयुतेऽन्ततः ।
अथवा तन्मूलदेशे सचूतपल्लवांस्तथा ॥
पीतवस्त्रेण संयुक्तं कुर्य्याद्दृढचतुष्टयम् ।
चन्द्रातपं तदुपरि विचित्रं परिकल्पितम् ॥
कुम्भानाश्च चतुःपार्श्वे यवतिलैर्युक्तवण्डुलान् ।
स्थापयेयुः क्रमात्तत्र पूजाकार्य्ये द्विजोत्तमाः ॥
मण्डलस्य तथा पूर्व्वे वारुणं घटमर्पयेत् ।
नानादेवान् गणेशादीन् ग्रहादींश्च समर्चयेत् ॥
हुत्वा यथाक्रमं तत्र बलिं दद्याद्विचक्षणः ।
पयोदृतेन क्षीरेण स्नापयित्वा यथाक्रमम् ॥
स्वेन स्वेनैव मन्त्रेण पूजयित्वा च होमयेत् ॥
एवं विधिप्रकारेण यः प्रेतं न तु होमयेत् ।
पुष्कारारिष्टदोषस्तु चतुर्थ्यास्तस्य सम्भवेत् ॥
संवत्सरे तथा पूर्णे षोड़शे मासि वै तथा ।
षण्मासाभ्यन्तरे तस्य सुतहानिं विनिर्द्दिशेत् ॥
अथवा स्वामिनं हन्ति द्वितीयं भ्रातरन्तथा ।
तृतीयं सर्व्वहानिः स्यात् सुतवित्तविनाशनम् ॥
प्रेतारिष्टविनाशाय यमादीन् यो न होमयेत् ।
सर्व्वाणि तस्य नश्यन्ति गोमहिष्यादीनि सर्व्वतः ॥
एवंविधिकृतं होमं यः कर्त्तुमक्षमो भवेत् ।
होमं कृत्वा यथाशक्त्या धेनुमेकां प्रदापयेत् ॥
अस्मिन् कृते न सन्देहः प्रेतारिष्टं न पीड़येत् ।
न विघ्नो यजमानस्य न चारिष्टं प्रजायते ॥
एतद्धोमं विनिर्द्दिष्टं यत्नतो न करोति यः ।
न रक्षति यमस्तस्य अभिमांसैश्च वंशजम् ॥
सुतो भ्राता तथा जाया पतिः श्वशुर एव च ।
माता पिता स्वसा वापि पितृव्यो भगिनीपतिः ॥
ज्येष्ठभ्राता पतिश्चापि स्वामी चापत्यमेव च ।
एकैकं वर्षसंपूर्णे कुटुम्बं पीड़येद्ध्रुवम् ॥
षोड़शे मासि संपूर्णे बान्धवान् परिपीड़येत् ॥
बान्धवानामभावे च वास्तुवृक्षो न जीवति ॥
त्रिपूष्करं तथा दोषे यः प्रेतं न तु होमयेत् ।
देवता यदि वा रुष्टेत् तस्य पुत्रो न जीवति ॥
यत्किञ्चिद्दानमुत्सृज्य सुखी भवति मानवः ।
न रक्षति यमस्तस्य यदि होमं न कारयेत् ॥
तस्मात् विधिप्रकारेण पुष्कारारिष्टशान्तये ।
यमं धर्म्मं चित्रगुप्तं पूजयित्वा च होमयेत् ॥
मण्डले घटमारोप्य पूजयित्वा यथाक्रमम् ।
विधिपूर्व्वं तथा हुत्वा प्रान्ते दद्याद्बलिं बुधः ॥
प्रभाते च तथा रात्रावशौचान्तदिने तथा ।
आचार्य्यञ्च प्रकुर्व्वीत अपवेद्य चरुं ततः ॥
विप्रक्षत्रियवर्य्याणां पिष्टैर्वैश्यस्य निर्म्मितम् ।
शूद्रस्य गोमयेनापि प्रतिमां दापयेत्ततः ॥
दत्त्वा मधुघृताक्तञ्च चरुं पश्चाच्च दापयेत् ।
ततोऽरिष्टः प्रशान्तः स्यात्ततो होमं समापयेत् ॥
संकल्प्य विधिना पूर्व्वं वस्त्रयुग्मेन यत्नतः ।
आचार्य्यं वरयेत्तत्र पश्चाद्विजमेव च ॥"
इति वराहसंहितोक्तपुष्कारशान्तिप्रमाणम् ॥

पुष्करकणिका, स्त्री, (पुष्करं पद्मं करोति साद्दश्येन प्राप्नोतीति । कर्त्तृ + खुल् । टापि अत इत्वम् ।) स्थलपद्मिनी । इति राजनिर्घण्टः ॥ (स्थलपद्मिनीशब्देऽस्या गुणादयो ज्ञातव्याः ॥)

पुष्करनाड़ी, स्त्री, (पुष्करं पद्मं नाड़यति सौन्दर्य्येण भंग्नयतीति । नाड़ + अच् । ततो ङीष् ।) स्थलपद्मिनी । इति राजनिर्घण्टः ॥

पुष्करमूलं, क्ली, (पुष्करस्य मूलमिव मूलमस्य । पुष्करजातं मूलं वा ।) पुष्करदेशप्रसिद्धौषधिविशेषः । अस्य स्थाने कुष्ठं योजयन्ति । तस्यपर्य्यायः । मूलम् २ पुष्करम् ३ पद्मपत्रकम् ४ पुष्करिणी ५ वीरम् ६ पौष्करम् ७ पुष्कराह्वयम् ८ काश्मीरम् ९ ब्रह्मतीर्थम् १० श्वासारिः ११ मूलपुष्करम् १२ पुष्करजटा १३ पुष्करग्रिफा १४ । अस्य गुणाः । कटुत्वम् । उष्णत्वम् । कफवातज्वरश्वासारोचककासग्रहीफपाण्डुनाशित्वञ्च । इति राजनिर्घण्टः ॥ "विशेषात् पार्श्वशूलघ्नम् ।" इति भावप्रकाशः ॥ (व्यवहारोऽस्य यथा,—

"भार्गीं पुष्करमूलञ्च राखां विल्वं यमानिकाम् ।
नागरं दशमूलञ्च पिप्पलीश्चाप्सु साधयेत् ॥"
इति वैद्यकचक्रपाणिसंग्रहे ज्वराधिकारे भार्ग्यादिक्वाथे ॥)

पुष्करमूलकं, क्ली, (पुष्करस्य कुष्ठस्य मूलम् । ततः संज्ञायां कन् ।) कुष्ठवृक्षस्य मूलम् । इति चिकित्साशब्देऽस्य विवरणं ज्ञातव्यम् ॥ (कुष्ठशब्देऽस्य विवरणं ज्ञातव्यम् ॥)

पुष्करग्रिफा, स्त्री, (पुष्करस्य ग्रिफा जटेव ।) पुष्करमूलम् । इति राजनिर्घण्टः ॥

पुष्करसजौ, पुं, (पुष्करस्य पद्मस्य सक् ययोरिति ।) अश्विनीकुमारौ । द्विवचान्तोऽयम् । इति शब्दरत्नावली ॥ (अश्विनीकुमारतुल्ये, त्रि । यथा, वाजसनेयसंहितायाम् । २ । ३३ ।

"आधत्त पितरो गर्भं कुमारं पुष्करस्रजम् ।
यथेह पुरुषोऽसत् ॥"
"किम्भूतं कुमारं पुष्करस्रजं पुष्कराणां पद्मानां स्रक् माला ययोस्तौ पुष्करस्रजौ अश्विनौ अश्विनीकुमारौ पुष्करस्रजौ पद्ममालिनौ देवानां भिषजौ । तत्तुल्यः कुमारः पुष्करस्रक् तम् । अश्विसाम्यकथनेन रोगहीनं सुन्दरञ्च पुत्रमधत्तेति सूचितम् ॥" इति तत्र वेददीपः ॥)

पुष्कराक्षः, पुं, (पुष्करवदक्षिणी यस्य । "अक्ष्णोऽदर्शनात् ।" ५ । ४ । ७६ । इति अच् ।) विष्णुः । यथा, तिथ्यादितत्त्वे ।

"पुष्कराक्ष ! नमस्तेऽहं मायाविज्ञानसागरे ।
त्राहि मां देवदेवेश लक्ष्मीनाथोऽसि रक्षिता ॥"
(श्रीकृष्णः । यथा, महाभारते । १ । २२० । १६ ।

"अथाब्रवीत् पुष्कराक्षः प्रहसन्निव भारत ! ॥")

पुष्कराङ्गः, पुं, (पुष्करस्य आङ्गा आङ्गा यस्य ।) सारसपक्षी । इत्यमरः । २ । ५ । २२ ॥ (पुष्करं आङ्गा यस्य । पुष्करमूलम् । यथा, सुश्रुते चिकित्सितस्थाने ५ अध्याये ।

"तुम्बुरुपुष्कराङ्गहिङ्गवनसपथ्यासवणत्रयं यवक्वाथेन पातुं प्रयच्छेत् ॥")

पुष्कराङ्कयं, क्ली, (पुष्करं आङ्कयो यस्य ।) पुष्करमूलम् । इति राजनिर्घण्टः ॥ (यथा,—

"क्षुद्रान्यता नागरपुष्कराङ्कये-
क्षतः कषायः कफमारुतोद्भवे ।
सश्वासकासारुचिपार्श्वरुक्करे
ज्वरे त्रिदोषप्रभवे च शस्यते ॥"
इति वैद्यकचक्रपाणिसंग्रहे ज्वराधिकारे ॥)

पुष्करिणी, स्त्री, (पुष्करवत् आकृतिरस्त्यस्या इति । पुष्कर + इनिः । ततो ङीप् ।) स्थलपद्मिनी । पुष्करमूलम् । इति राजनिर्घण्टः ॥ (पुष्करं शुण्डादण्डस्तदस्त्यस्या इति । इनिः ।) हस्तिनी । सरोजिनी । (पुष्कराणि पद्मानि सन्त्यत्रेति ।) जलाशयः । इति मेदिनी । णी, १०४ ॥ शतधनुःपरिमितसमचतुरस्रजलाधारः । पुकुर इति पुखरि इति च भाषा । तत्पर्य्यायः । खातम् २ । इत्यमरः । १ । १० । २७ ॥ जलकूपी ३ । इति जटाधरः ॥ पौष्करिणी ४ । इति शब्दरत्नावली ॥*॥ सा तु दक्षियोत्तरायता कार्य्या ।

यथा,—

"कूपवापीपुष्करिणीर्दीर्घिका द्रोण एव च ।
तड़ागः सरसी चैव सागरश्चाष्टमो मतः ॥
सज्जिर्जलाशयः कार्य्यो यत्नाद्यान्योत्तरायतः ॥"
इति कल्पतरौ वायुपुराणम् ॥*॥

तस्या लक्षणं यथा । "पुष्करिणीतड़ागावाह वशिष्ठसंहितायाम् ।

'चतुर्विंशाङ्गुलो हस्तो धनुस्तच्चतुरुत्तरः ।
शतधन्वन्तरश्चैव तावत् पुष्करिणी मता ।
एतत्पञ्चगुणः प्रोक्तस्तड़ाग इति निश्चयः ॥'

तेन चतुर्द्दिक्षु विंशतिहस्तान्यूनतायां चतुःशतहस्तान्यूनाभ्यन्तरत्वेन पुष्करिणी । एतच्चलाशयाधारपरं न तु उपरितटम् । शतेन धनुर्भिः पुष्करिणी । इति नयवर्द्धमानधृतो वशिष्ठः ॥*॥ तत्करणे वास्तुयागः कर्त्तव्यः । महाकपिलपञ्चरात्रम् ।

'जलाधारगृहार्थञ्च यज्ञेद्वास्तुं विशेषतः ।
ब्रह्माद्यदितिपर्य्यन्ता पञ्चाशत्पदसंयुता ।
सर्व्वेषां किल वास्तूनां नायका परिकीर्त्तिता ॥
असंपूज्य हि तान् सर्व्वान् प्रासादादीन्न कारयेत् ।
अनिष्पत्तिर्विनाशः स्याद्रुभयोर्धर्म्मधर्म्मिणोः ॥'

ब्रह्माद्यदितिपर्य्यन्ता इति कल्पान्तरम् । देवीपुराणोक्त ईशाद्यिकस्य एव व्यवस्थियते । धर्म्मधर्म्मिणोस्तड़ागादितत्कर्त्रोः । आरम्भदिने तदकरणे उत्सर्गादिनेऽपि आदौ तत्करणम् । यथा,—

'प्रासादभवनोद्यानप्रारम्भे परिवर्त्तने ।
पुरवेश्मप्रवेशेषु सर्व्वदोषापनुत्तये ॥
वास्तूपशमनं कृत्वा ततः सूत्रेण वेष्टयेत् ।
वास्तुपूजामकुर्व्वाणस्तद्वाहारो भविष्यति ॥'

इति मनुष्यपुराणे पुरवेश्मप्रवेशे वास्तुयागप्राप्तेः पूर्व्वोक्तवचने प्रासादधर्म्मातिदेशादत्र वाप्यादिप्रतिष्ठादिनेऽपि वास्तुयागकरणम् ॥*॥

मधारम्भे मन्त्रमाह दीक्षितायाम् ।
'पुष्यामित्रश्चोत्तरस्यां दक्षस्यामनुराधिकाः पुनर्वसौ शुभौमवारान्विते चन्द्रेज्यौ वा ।
रविन्दौ स्थाराश्विने दशम्यां सदे शुभांशोदये मघरा: सौम्यवारान्विते शुभदौ दीक्ष्यपुष्टीदये'
पुष्यादयश्चत्वारो दक्षोत्तरासप्त-धनिष्ठा अनभिषा-दोदितौ-पूर्वफाल्गुना-मघा-रुक्षशिरोभिर्भैः ।
मात्स्ये ।
'यत्रादित्यवारौ सन्ध्या दर्शं शुभनिरीक्षितम् ।
सामावास्यादि पूर्वेद्यमन्यत्र परिवर्जयेत् ।
पश्चिमो रोहिणी मृगशिरोनक्षत्रमैन्द्रम् ।
स्वातौ दक्षाश्वयुजा च मघारम्भे प्रशस्यते ।
चन्द्रमाधातकर्मे च सौम्यवारान्वितेऽहनि ।
सिद्धसाध्यमहत्पर्वसु योगेषु कारयेत् ।
पादित्यसौम्यवर्जं सर्वे वारा: शुभावहा: ।
मासादौ पौर्वमेव स्यात् कृष्णमासेषु सैव हि ।'
पौर्णमासे । गुरुभृगुरविवारेषु इत्यभिधाय प्रतिहारमाह वैखानसाचार्यैर्वर्जयन्ति हि ।
इत्यग्नेयपुराणे । अग्निमथनादौ ।
'संक्षेपेषु प्रवक्ष्यामि यज्ञदानव्रतं शुभम् ।
पुष्यस्त्रिपूर्वादित्यैर्न विष्णु, प्रीणाति विश्वभृत् ।'
यज्ञाङ्गयज्ञकरणार्थमग्निमथनमाह विष्णुधर्मे: ।
'यज्ञाङ्गयार्थं यो दद्यात् वास्तुं लोकमाप्नुयात् ।'
भूमिमिति शेष: । तत्प्रतिष्ठाकालमाह ।
मत्स्यपुराणम् ।
'भद्रे राधे ! मघाशाखे ! तत्रारम्भादि यो विधि: ।
चैत्रे वा फाल्गुने वापि ज्येष्ठे वा माधवे तथा ।
माघे वा सर्वदेवानां प्रतिष्ठा शुभदा भवेत् ।
प्राण यज्ञं शुभं शुक्रमर्चति चौशनायनौ ।
पुष्येऽपि विप्रक्षत्रिये स्त्रियां ज्ञानवाधनम् ।'
अर्चति प्रतिष्ठां । तथा च प्रतिष्ठासुधायै ।
'माघेऽथ फाल्गुने वापि चैत्रे वैशाखयोरपि ।
शैत्रमाङ्गल्यौत्तमि प्रतिष्ठे चौशनायनौ ।'
प्रासादमानं पुष्यादिनक्षत्रविधायकम् ।
'पञ्चमी च द्वितीया च तृतीया सप्तमी तथा ।
दशमी चौत्तमा प्रोक्ता त्रयोदशी ।
आसु प्रतिष्ठा विधिवत् कृता सद्भक्षदा भवेत् ।
आषाढे हे तथा सप्तमुक्तरात्रयमेव च ।
रोहिणात्रयरोहिण्य: पूर्वभाद्रपदा तथा ।
एतासिथौ रेवती च पुष्यो रुद्राग्निरेवती ।
अनुराधा तथा स्वाती प्रतिष्ठादिषु शस्यते ।
दुर्गो हस्तश्च: पुष्यश्च एते शुभावहा: ।
प्रासादस्य तु सर्वं सप्तस्वप्यहस्सु प्रशस्यते ।
सदृक्षवारे' नक्षत्रं सदृक्षं विधाय च ।
इत्यत्र सर्वं पूर्वोक्तं पुष्यादित्यादिकम् ।
शुभयोगे शुभदृष्टे लग्नहोरादिके ।
सर्वे वर्गे च दृष्टीशे प्रतिष्ठादिशुभप्रदम् ।
सर्वे स्थिरे सदा शस्यं स्थिरदैवं तथा ।
क्रूरैश्च सर्वं क्रूरे स्थिरदैवं न शोभनम् ।'
भविष्ये ।
'प्रतिपत् द्वितीया च तृतीया पञ्चमी तथा ।
दशमी त्रयोदशी चैव पौर्णमासी च शोभिना ।
सोमो रुद्राग्नितिश्चैव शुक्रश्चैव तथा गुरु: ।
एते सौम्यवरा: प्रोक्ता: प्रतिष्ठायामनुत्तमा: ।'
प्रतिष्ठाधिकारे व्यवहारसमुच्चय: ।
'रुक्षवर्क्षे च वक्ष्यामस्तथाचैव मृगस्थे ।'
दीपिकायाम् ।
'पुष्याश्विमूलभमघैत्यवास्वैत्र
सौम्याग्निभेषमघरोहिणिरुद्रदक्षे ।
पौष्णाहिराधधरिणे पुनर्वसौ च
कार्याभिषेकतरभूतपतिप्रतिष्ठा ।'
मागधं धनिष्ठा । ऐत्र आर्द्रा । आर्द्रायामेव सौम्यमिति प्रतिष्ठाधारसुधायात् ॥ ८ ॥
वार्षीत्यादीनां पूर्णत्वाभिधानात् मृगस्याधिकारसाह पातुर्ण: ।
'वार्णकूपतडागादि देवतायतनादि च ।
सप्तप्रधानमारामा: पूर्णमित्यभिधीयते ॥
सप्तिदीनं तप: सर्वं वेदानामनुशासनम् ।
सप्तर्षयं वैष्णवेषु इत्यमित्यभिधीयते ॥
यज्ञोपरागे यद्दानं पूर्णमित्यभिधीयते ।
इष्टापूर्तं द्विजातीनां धर्म: सामान्य उच्यते ॥
अधिकारी भवेत् सद्य: पूर्ते धर्मे न वैदिके ।'
वैदिके वेदाध्ययनसाध्ये अग्निहोत्रादाविति रत्नाकर: ॥ सर्वं स्त्रीणामपि पूर्ताधिकार: । यथा, नारीत्यनुष्ठानं इत्यनति: ।
'पितृश्वशुरदीक्षितान् भर्तु: सखीयमातृणाम् ।
पूजयेत् कथपूर्तार्थं इष्टागार्थातिथीन् स्त्रिय: ।'
अस्य पूर्तत्वात् इष्टिग्राह्यमध्यादौ कर्तव्यम् ।
यथा, गोभिल: । 'इष्टि: पूर्वेषु यज्ञेषु नाम्नयेन प्रदक्षिणमुपचार: । यवैश्चिताग्नि इति ।' ९ ॥
इत्यग्नेयपुराणे ।
'वार्णीकूपतडागानां पश्चिमे यागमण्डपम् ।
कुर्यादुदग्गजमेनैव कन्यसं मध्यमुत्तमम् ॥
कन्यसं दशहस्तन्तु कूपे भ्रमं तथाग्नय: ।
त्रिषट्कं कारयेत्तत्र पुष्करिण्यां चतुर्दश ।
हिरण्यदानं दुर्व्योत्ति तडागे नवमं शुभम् ।
कन्यसं कनीयांसम् ॥ ९ ॥ वृक्षविधिमाह भविष्ये ।
'अश्वत्थोदुम्बरं मात्यं वारिपूर्णं गुणान्वितम् ।
एभ्यश्चयं सायरणं कापुण्यमनिलम् ॥
यज्ञाङ्गयारामकूपे मण्डपे पूर्वदिङ्मुख: ।
साधारणे चौशनस रेवत्यां निधिपेत् मय: ।'
मात्यपुराणे ।
'प्राग्वदुत्प्रवणे देशे तडागस्य समीपत: ।
चतुरस्रां शुभां वेदीं चतुरस्रां चतुर्मुखीम् ॥'
कारयेदिति: । तथा,—
'मध्यत: रुमवर्णा: स्यु: प्रसादा भद्रसंयुता: ॥'
रुमवर्णं वस्त्रमाच्छोभ्यमण्डपं: ।
'अग्नेयीदुम्बरस्तम्भपट्टशालासुशोभितम् ॥
मण्डपस्य प्रतिदिशं द्वारमेवमिति कारयेत् ।'
तथा,
'पुष्करिण्यास्तटे: स्थाप्य: शालिशोभम: ॥'
स्थापक स्थापयेत् इति रत्नाकर: । ९ ॥

दध्योदनन्तु जीवाय शुक्राय च घृतोदनम्।
शनैश्चराय क्षपरमाणमांसञ्च राहवे
चित्रोदनन्तु केतुभ्यः सर्व्वभद्रैः समर्पयेत्॥'
स्कन्दपुराणम्।
'जम्बूगोत्रमेतेषां वर्णस्थानमुखानि च।
योऽज्ञात्वा कुरुते शान्तिं अघास्तेनावमानिताः॥
उत्पन्नोऽर्कः कलिङ्गेषु वसुनायाश्च चन्द्रमाः।
अङ्गारकस्त्ववन्त्यान्तु मगधे तु हिमांशुजः॥
सैन्धवेषु गुरुर्ज्ञातः शुक्रो भोजकटे तथा।
शनैश्चरस्तु सौराष्ट्रे राहुर्वैराटिकापुरे।
अन्तर्वेद्यां तथा केतुरित्येता ग्रहभूमयः॥
आदित्यः काश्यपो गोत्र आत्रेयश्चन्द्रमा
भवेत्।
भारद्वाजो भवेद्भौमस्तथात्रेयश्च सोमजः॥
सुरपूज्योऽङ्गिरोगोत्रः शुक्रो वै भार्गवस्तथा।
शनिः काश्यप एवायं राहुः पैठीनसिस्तथा।
केतवो जैमिनेयाश्च ग्रहा लोकहिते रताः॥'
कात्यायनः।
'तद्गोत्रजातो यज्ञात्वा होमं यः कुरुते नरः।
न तस्य फलमाप्नोति न सन्तुष्यन्ति देवताः॥
न हुतं न च संस्कारो न च यज्ञफलं लभेत्।
ग्राहणौ भार्गवाचार्यौ क्षत्रियावर्कलोहितौ॥
वैश्यौ सोमबुधौ चैव शूद्रान् शूद्रान् विनि-
र्दिशेत्॥'
शान्तिदीपिकायाम्।'
'शुक्रार्कौ प्राङ्मुखौ स्याप्यौ शशाङ्कारौ च
दक्षिणौ।
उत्तरास्यौ गुरुबुधौ पश्चिमास्यास्तथापरे॥'
अग्निप्रणयनानन्तरं ग्रहावाहनमाह वैश्वस्याय-
नः।
'अग्निप्रणयनं कृत्वा पश्चादावाहयेत् सुरान्।
मध्ये तु भास्करं विद्यात्लोहितं दक्षिणेन तु॥'
यद्यपि ग्रहादीनां वहव: शब्दा वाचका: सन्ति
शब्दोपहितचार्थोऽर्थोपहित: शब्दो वा देवता
उभयथापि शब्दनियमात् अविनिगमक: स्यात्
तथापि बहुषु दृष्टत्वात् सूर्य्यादिशब्देन ग्रहार्णां
देवतात्वम्। तेन सूर्य्यसोमकुजबुधबृहस्पतिशुक्र-
शनैश्चरराहुकेतुपदैर्देवतात्वम्। अधिदेवता-
नान्तु त्र्यम्बकोमास्कन्दविष्णुब्रह्मेन्द्रयमकाल-
चित्रगुप्तानामेभिरेव पदै:। तथा प्रत्यधिदेव-
तानाञ्च अम्भपृथिवीविष्णुशक्रशचीप्रजापति-
ब्रह्मणामेभिरेव पदै:। तथा विनायकदुर्गावा-
युकाशाग्निनामेभिरेव। इति कल्पदीप:॥*॥
शान्तिदीपिकोक्तध्यानानि प्रयोगे वक्ष्यन्ते।
लोकपालमन्त्रानाह भविष्ये।
'न्यसमन्त्रानहं वक्ष्ये लोकपालात्मकानिह।
इन्द्रस्तु सहस्रा दीप्त: सर्व्वदेवाधिपो महान्।
वज्रहस्तो महासत्त्वस्तस्मै नित्यं नमो नम:॥
आग्नेय: पुरुषो रक्त: सर्व्वदेवमयोऽव्यय:।
धूमकेतुरनाधृष्यस्तस्मै नित्यं नमो नम:॥
यमश्चोत्पलवर्णाभ: किरीटी दण्डधृक् सदा।
धर्मेणाधो जगत्पाता तस्मै नित्यं नमो नम:॥
निर्ऋतिस्तु पुमान् क्षत्रा: सर्व्वरत्नोऽधिपो
महान्।
खड्गहस्तो महासत्त्वस्तस्मै नित्यं नमो नम:॥
वरुणो धवलो विष्णु: पुरुषो निम्नगाधिप:।
पाशहस्तो महाबाहुस्तस्मै नित्यं नमो नम:॥
वायुश्च सर्व्ववर्णोऽयं सर्व्वगन्धवह: शुभ:।
पुरुषो ध्वजहस्तश्च तस्मै नित्यं नमो नम:॥
गौरो यस्तु पुमान् सौम्य: सर्व्वौषधिसमन्वित:।
नक्षत्राधिपति: सोमस्तस्मै नित्यं नमो नम:॥
ईशान: पुरुष: शुक्ल: सर्व्वविद्याधिपो महान्।
शूलहस्तो विरूपाक्षस्तस्मै नित्यं नमो नम:॥
ब्रह्मयोनिश्चतुर्व्वक्त्रस्त्रिदेहवासा: पितामह:।
यज्ञाध्यक्षश्चतुर्व्वक्त्रस्तस्मै नित्यं नमो नम:॥
योऽसावनन्तरूपेण ब्रह्माण्डं सचराचरम्॥
पुष्यवद्धारयेन्नूद्धिं तस्मै नित्यं नमो नम:।
ओंकारपूर्व्वका ह्येते न्यासे बलिनिवेदने।
मन्त्रा: स्यु: सर्व्वकार्य्याणां इह्लिपुष्टिफलप्रदा:॥'
हयशीर्षपञ्चरात्रे।
'अथवा कामत: कुर्य्यात् सुस्मरत्नादिनिर्म्मितम्।
द्विभुजं हंसपृष्ठस्थं दक्षिणेनाभयप्रदम्॥
वामेन नागपाशन्तु धारयन्तं सुभोगिनम्।
मौलिनं वा महाभागं कारयेदृषभध्वजं पतिम्॥
वामे तु कारयेद्दृद्धिं दक्षिणे पुष्करं शुभम्।
नागैर्नदीभिर्यादोभि: वसुद्रैः परिवारितम्॥
इत्येवं वरुणं देवं प्रतिष्ठाविधिमाचरेत्॥'
पुष्करं तत्पुत्रम्। तथा प्रसन्नवदनमिति ध्यानं
वक्ष्यते। वरुणमन्त्रोद्धारस्तु तत्रैव।
'अष्टाविंशान्तबीजेन चतुर्थस्वरयुतेन च।
अर्द्धेन्दुबिन्दुयुक्तेन प्रणवादीपितेन च॥'
तेन ॐ वौं इति मन्त्र:।
'प्रतिमायां स्थितिं कृत्वा प्रणवेन निरोधयेत्।
पूजयेत् गन्धपुष्पाद्यै: सान्निध्यं पाशमुद्रया॥'
स्थितिं प्राणप्रतिष्ठाम्। निरोधयेत् अन्तर्गत-
कुम्भसन्निध्यं निरोधमुद्रां दर्शयेत्। दानकल्प-
तरुरत्नाकरयोर्ब्रह्मवैवर्त्तपरिशिष्टम्॥ अथातो
वरुणविधिं वापीकूपतड़ागयज्ञं व्याख्यास्याम:।
पुण्ये तिथिकरणे शुभे नक्षत्रे प्रतीचीं दिश-
मास्थाय प्राक्प्रवणे उदक्प्रवणे वा उदक्-
समीपे अग्निमुपसमाधाय वारुणं अपवित्रा
आज्यभागान्तं हुत्वा चतस्र आज्याहुतीर्जुहु-
यात्। वसुद्रब्येष्ठा इति प्रत्यृचं ततो हविषा
अष्टभिर्जुहुयात्। तद्वायामि ब्राह्मणा वक्ष्य-
माण इति पञ्च। त्वन्नोऽग्ने वरुणस्य विद्वा-
नितिद्वे इमं मे वरुणं सप्तदी हवेति च स्विष्ट-
कृतश्च नवसं नव वै प्राणा: प्राण एव आप-
स्तस्मादापो नवभिर्जुहोति॥*॥ मार्जनान्ते
धेनुमवतारयेत्। अवतार्य्यमाणान्तामनुमन्त्र-
येत्। इदं सलिलं पवित्रं कुरुष्व शुद्धः पूतो
ह्यत: सन्तु नित्यं तारयन्तो सर्व्वतीर्थाभिषिक्तं
लोकालोकं तरसे तीर्यसे च। इत्यनेन पृच्छ्यं
यजमान: स्वयं तस्य आचार्य्येणान्वारब्ध उत्तीर्य
आपोऽश्नाम्यन्तर: शुन्धयन्तिति ऐशान्यां दिश्य
उत्थापयेत्। सुयवसा भगवतीह भूया इति
हिं कृत्वेत् तदा हिं कृण्वती वसुपत्नी वसूनामि-
ति यजेत्। तां सवत्सकृष्णां कपिलवर्णां
दुग्धप्रदां रूप्यखुरां कांस्योपदोहां विप्राय सामा-
गाय दद्यात् इतरां वा। यथाशक्ति दक्षिणा च
देया इति। तत उत्सर्गं कुर्य्यात्। देवर्षिपि-
तृमनुष्या: प्रीयन्तां इत्याह शौनक:। यजमानो
ब्राह्मणान् भोजयित्वा स्वस्ति वाचयीतेति।
अस्यार्थ:। तिथ्यादीनां शुभत्वं पूर्व्ववचनेभ्यो
ज्ञेयम्। एष एव विधिर्गोमिलमारद्वाजयज्ञोक्त-
कर्म्माशुद्धाल्पांशुद्धीयते।
'यन्नाम्ना तं स्वशाखायां परोक्षमविरोधि च।
विदध्यिस्तदशुद्धेयमग्निहोत्रादि कर्म्मवत्॥'
इति छन्दोगपरिशिष्टात्॥
ततश्च अग्निमुपसमाधायेति स्वसूत्रोक्तविधि-
नाग्निं संस्थाप्य वारुणं वरुणदेवताकं
घृतं निर्वाप्य आज्यभागान्तं हुत्वा इति
छन्दोगैरपरम्। न तु विरूपाक्षपर्य्यन्तं
कृशरिकां समाप्य महाव्याहृतीर्हुत्वा प्रकृतं
कर्म्म कुर्य्यात्। तत्र प्रथमत: पिङ्गभूक्षस्तु
इत्यादि पुराणीयं ध्यात्वा धर्म्मं त्वं वरुणगासा-
वीति नाम कुर्य्यात्।
'प्रतिष्ठायां रोहितश्च वास्तुयागे प्रजापति:।
जलाशयप्रतिष्ठायां वरुण: वसुधाधृत:।'
इति स्मृते:।
तत आवाह्य पूजयित्वा समित्प्रक्षेपानन्तरं
महाव्याहृतिहोमं हुत्वा वसुद्रा ज्येष्ठा इत्यादि
चतुर्भिर्मन्त्रैश्चतस्र आहुतीर्जुहुयात्। ॐ तद्वा-
यामीति ॐ तद्विष्णुमन्त्रमिति ॐ शुन:शेपो-
ह्वीति ॐ त्वयते ह्वौ वरुण इति ॐ उदु-
त्तममिति पञ्चभि: ॐ त्वन्नोऽग्ने इति द्वाभ्यां
ॐ इमां वरुण श्रुत्येकेन एवं स्थानत्रयोक्तैर्ब्रह्म-
घोषोक्तै: प्रत्येकमष्टभिर्मन्त्रैश्चरुं चतुरावर्त्तं जुहु-
योत्तो मार्गवमूवरश्च पश्चावद्यं सुचा जुहुयात्।
अन्वये खिष्टिकृते च। तत: कृशरिकोक्त-
विधिना शेषं समापयेत्। नव वै प्राणा इति
नवाहुतिस्तुति:। मार्जनान्त इति यजमानाभि-
षेक:। तद्विधानन्तु मत्स्यपुराणे।
'गजाश्वरथ्यावल्मीकसङ्गमात् ह्रदगोकुलात्।
मृदमादाय कुम्भेषु प्रक्षिपेच्चतुरात्तथा॥
गोरोचनांश्च सिद्धार्थान् गन्धान् गुग्गुलुमेव च।
स्नपनं तस्य कर्त्तव्यं पञ्चभङ्गसमन्वितम्।
पूर्णकुम्भैर्महामन्त्रैरेवं कृत्वा विधानत:॥'
पञ्चभङ्गाश्च शान्तिकौशिककल्पतरुक्ता:।
'अश्वत्थोदुम्बरप्लक्षवटचूतस्य पल्लवा:॥'
महामन्त्रै:। सुरास्त्वामभिषिञ्चन्त्वित्यादिभि:।
एतत्पर्य्यन्तं कूपेऽपि। कामिके।
'ऐशान्यां स्थापयेद्यूपं खातात् पञ्चकरान्तरम्।
यूपयष्टेस्तिमन्त्रेण सपीठारं सुशोभनम्।
पूजयित्वा तु वस्त्राद्यैस्तत: यष्टिं प्रवाजयेत्॥'
मात्स्ये।
'आदित्यमाकृति: स्यात् षोडशाश्रयविनिर्म्मित:।

यजमानपत्नीयो वा संज्ञाप्यो भूमिमिच्छता ।'
क्षीरिण्योऽन्याः । तत्ते धेनुं सचैलकण्ठां
वांस्यादुत्तरविधेयमयुक्तां प्रजाप्रयोऽवतारयेत् ।
तथा श्रयशीर्षपराशरे ।
'गां सवत्सां समानीय सुशीलाश्च पयस्विनीम् ।
कांस्योपदोहां पट्टादिरक्तपुष्पोपशोभिताम् ।
सर्वालङ्कारसंयुक्तां रौप्यशृङ्गां सुशीलाम् ।
ब्राह्मणक्षत्रियश्रेष्ठो यजमानः सबान्धवः ।
शुचेः सन्तारयित्वा तामाचार्याय निवेदयेत् ।'
कांस्योपदोहां कांस्यक्षीरामिति यावत् ।
कापिले ।
'अजले जलतृप्ताय यजमानः सभार्यकः ।
तरेद् प्राङ्मुखो भूत्वा क्षतगोदानदुष्कृतः ।'
इदं क्षतिलं पवित्रं इतिमन्त्रेणावतार्यमाणा-
मनुमन्त्रयेत् । ततः प्राङ्मुखः सन्नवतारयेत् ।
ना च गौः पश्चिमतोऽवतार्या । ततः कूल-
समीपं गत्वा तर्पयेत् । यथा कापिलम् ।
'पुनः पुष्पोदकेनाथ क्षतिलेन कुशेन तु ।
सुवर्णेन वाप्यथवा मिश्रतीर्थेन तर्पयेत् ।
गताश्चागमिष्यन्ति ये कुले मम बान्धवाः ।
ते सर्वे तृप्तिमायान्तु मया दत्तेन वै ।
ततो सुखानि मन्त्रेण तृप्तिं वत्सतुतां ।'
आचार्यस्तान्नारद्य उत्तीर्य आपोऽशान्तरः
कुर्यात्तिलमन्त्रेण ऐरीण्यासत्यापयेत् । सुय-
दमा भगवतीरूपा भूया इति प्रयात् । सा यदि
हिंकारं करोति तदा हिं क्षन्तीत्यादि वपेत् ।
तत्र उक्तविशेषयुक्तां धेनुमाचार्याय सामगाय
दद्यात् । ततो यथाशक्ति दक्षिणाश्च दद्यात् ।
एतत्पर्यन्तं च कृषे अवक्षियतेऽसम्भवात् ॥०॥
तथा उत्सर्गं कुर्यात् । अत्र विशेषमाह रघा-
करधृतमत्स्यपुराणम् ।
'प्रमाणाचिन्त्य मनसा विविधानि शुभानि च ।
प्रदद्यात् सर्वभूतेभ्यो जलपूर्णं घटाश्रयम् ।'
कापिलम् ।
'ततस्तत्पश्चिमं तीरं गत्वा पूर्वाननस्थितः ।
घटोत्सर्गं प्रकुर्वीत सर्वसन्तापनाशनं ।'
सर्वसन्तापनं सर्वभूतप्रयोजनकम् । सर्वभूतेभ्य
इत्यनेनेत्यर्थः । देवर्षिमानुष्याः प्रीयन्ता-
मिति पठेदिति शेषः । उत्तरस्य यजमानो
ब्राह्मणान् स्वस्ति वाचयीतेति दक्षिणाभिरिति
शेषः । एतत्पर्यन्तं कूपेऽपि । घटाश्रयोत्सर्गस्य
सर्वभूतोद्देश्यकत्वेन यमलक्षचेतनोद्देश्यकत्वेऽपि
आगन्तुत्वम् । ततश्च कीटादेर्मेदमिति स्वीका-
रायोग्यत्वेन वेदमेधोद्देश्यतत्साधनकत्वागन्तु-
त्वात् अस्य नागत्वम् । अतएव जलाश्रयोत्-
सर्गतत्फलत्वं मत्स्यपुराणेऽपि । प्राप्नोति तद्-
नागत्वेन भूय इति नागलेनाभिहितम् । ततश्च
शक्तं 'नागतदूरीरत्वेन नवादिपत् बाधा-
रहीतम् । अतएव
'नामानं सर्वभूतेभ्यो मया एतमिदं जलम् ।
रमन्तु सर्वभूतानि स्नानपानावगाहनैः ।'
इति मत्स्यपुराणेन उपादानं दिशा दत्तापि न
न्यतमिति । ततश्चास्य नागवदुत्तराप्रतिग्रहेर-
धृतत्वात् साधारणधनस्य परिग्रहमात्रेण गोत-
मोक्तेन स्वामित्वधृतेर्यजमानस्यापि तथात्वेन
स्वामित्वात् तत्र नागदावदोष इति तत्त्वम् ।
यथा गोतमः । स्वामी रिक्थक्रयसम्भिभाग-
परिग्रहाधिगमेषु ब्राह्मणस्याधिकं लब्धं क्षत्रि-
यस्य विद्यितं निर्दिष्टं वैश्यशूद्रयोरिति । परि-
ग्रहोऽन्यपूर्वस्य धनस्यागकाष्ठादेः स्वीकार
इति मिताक्षरा । अक्षाधिकारे यक्तमाचा-
पस्तम्बः । दायादं शिलोञ्छौ चान्यत्रापरि-
गृहीतमिति । अपरिगृहीतमन्यस्वीकृतमस्वा-
मिकमिति यावत् । निर्दिष्टं वेतनलब्धं निर्देशो
भृतिभोगयोरित्यमरकौस्तुभकाण्डशेषयोः ।
इयशीर्षे ।
'आपोहिष्ठेति तिसृभिः पञ्चगव्यं विनिःक्षिपेत् ।
तीर्थतोयं तथा पुण्यं शान्तितोयं द्विजैः क्षतम् ।
गोकुलं पावयेत् पश्चात् द्विजान् वेदविदस्तथा ।
ततोऽन्नं भोजयेद्विप्रान् दद्याद्गोभ्यश्च दक्षिणाम् ।'
एतत्पर्यन्तं कूपेऽपि । * । कापिले ।
'नागानामष्ट नामानि लिखितानि पृथक् पृथक् ।
ततः कुम्भे च निःक्षिप्य गायत्र्या च विलोप्य वै ।
उद्धरेत् पत्रिकामेकां तत्रैव नागमोचयेत् ।
यस्य नामोद्धरेत्तस्य स वै जलाधिपः स्मृतः ।
तस्य संपूज्य गन्धाद्यैर्दद्यात् क्षीरञ्च धावलम् ।'
पद्मारण्यात्मस्य योगीश्वरधृतवचनादयथा ।
'अष्टौ नामान्यात्मपत्रे क्षत्वा चैव प्रयत्नतः ।'
तानि च गारुडे ।
'अनन्तो वासुकिः पद्मो महापद्मोऽथ तक्षकः ।
कुलीरः कर्कटः शङ्खो कुलौ नागाः प्रकीर्तिताः ।'
एतानि नामानि पात्रपत्रे लिखित्वा कलस-
मध्ये निःक्षिप्य गायत्र्या इन्दसा मन्त्रेण इति
रघुनाथधृतमत्स्यपुराणे लोप्य यस्य नामोद्धरति तं
यथा समावाहनेन नागेनास्य जलस्य रक्षा
कर्तव्या इति ब्राह्मणान् आवयेत् । इयशीर्षे ।
'वैश्यकं वापयेच्चैव पुन्नागं नागकेशरम् ।
बकुलं चम्पकञ्चैव निम्बञ्चैवाथ खादिरम् ।
एतेषामेव दारूणां नागयष्टिः प्रकीर्तिता ।
सवक्त्रकोटरं कृत्वा तस्यां कृष्णं दृषं लिखेत् ।'
तथा च हरिस्मृतिः ।
'मूलपत्राङ्कितां कृत्वा स्थापयित्वा घटाश्रये ।
द्वादशाङ्गुलमानन्तु वामीपत्रं प्रकल्पयेत् ।
पोडशं पुष्करिण्यान्तु विंशतिञ्च सरोवरे ।
सागरे एकमात्रन्तु सौवं ताम्रन्तु पैत्तिकम् ।
चक्रस्य विविधं प्रोक्तं कृष्णांशेषां यथोचितम् ।
अनेनैव भवेद्धामी दिगुणा पुष्करिण्यपि ।
त्रिगुणन्तु सरोयागमत कर्तुं तु सागरः ।'
ततो द्वादशपलद्वयविंशतिकर्षविंशत्यन्यतमकति-
पाङ्गुलवृत्तिमत्तप्रमाणां यष्टिं पञ्चमाच-
मन्त्रेण स्थापयेत् । ॐ गन्धद्वारेति गन्धद्वारिण्या
ॐ भद्रं कर्णेभिरिति तैत्तिरीयया ॐ काण्डात्
काण्डादिति कूष्माण्डैः ॐ इमादित्य इत्यादिना
शुक्लयजुर्वाजिभिः ॐ मनुर्वाहेति ऋग्भ्यन्तेन
या: फलिनीरिति फलोदकेन ॐ सुवानुवाका
इति पञ्चषष्टिकाण्डैः पलाशं यष्टां यवीयात् ।
ॐ यष्टे नमः इतिमन्त्रेण पूजयेत् । पुष्पाक्षत-
पूतां यष्टिं कन्दरसमीपं नयेत् । पुनस्तु शुक्लादि-
निःस्रवे शालतन्तुरूपप्रतिमां उत्क्षिपेति मन्त्रेण
प्रदक्षिणत्रयं कृत्वा यामोद्दिष्ट इत्यादिना
मन्त्रेण वरणसूत्रमन्त्रमपि इतिमन्त्रेण च
यष्टौ क्षिपेत् । ततश्चैव स्वाति ब्राह्मणगोमय-
मधिमधुकुशमूलपञ्चपल्लवानि ॐ येते-
वायो रोचने दिव इतिमन्त्रेण क्षिपेत् । ॐ ध्रुवं
ध्रुवेण मनसा इतिमन्त्रेण यष्टिमभिमन्त्र्य ॐ
यूपव्रतेतिमन्त्रेण घटमध्ये आरोपयेत् । ततो
घटमाकृः पूरयेत् । यथा द्यौं पूर्वस्यात् ।
दिवं नाकस्याम् । शर्यां दक्षिणस्याम् । मेधां
नैर्ऋत्याम् । अद्यां पश्चिमायाम् । विद्यां वाय-
व्याम् । तर्प्यां उत्तरस्याम् । धरणीं ऐशा-
न्याम् । अधो विद्याम् । ऊर्ध्वं सर्व्याम् । पाद्या-
दिभिः संपूज्य यष्टिं प्रदक्षिणीकृत्य सर्व्यादि-
द्वात्रिंशद्देवताः पूजयेत् । घमस्तेति वस्त्रं
दापयेत् । कापिलम् ।
'शङ्खतूर्यादिनिनदैस्तथा वै क्षीरधारया ।'
जलाशयं प्रवेशयेदिति शेषः । प्रतिष्ठागतं
मात्स्ये ।
ततः सहस्रं विप्राणामासनानां शतत्रया ।
भोजयेत् यथाशक्त्या यथाशक्त्या विसृजेत्तिम् ॥"
इति जलाशयोत्सर्गतत्त्वम् ॥

पुष्करी, [ण्] पुं, (पुष्करमस्यास्तीति । पुष्कर+
इनिः ।) हस्ती । इति त्रिकाण्डशेषः ॥

पुष्कलं, क्ली, (पुष्यति पुष्टिं गच्छत्यनेनेति । पुष+
"कलंष ।" उणा० ४ । ५ । इति कलन् च
कित् ।) आसचतुष्टयात्मकभिक्षा । यथा,—
"भिक्षामाहुर्यतिसमाचमनं तत्राष्टमुष्टियम् ।
पुष्कलं षोडशकारन्तु तच्चतुर्मुष्टिमुच्यते ॥"
इति कौर्मे उपविभागे १७ अध्यायः ॥
अष्टकुडवपरिमाणम् । यथा, प्रायश्चित्ततत्त्वे ।
"अष्टकुडवैर्भवेत् प्रस्थः प्रस्थयोश्चौ च पुष्कलम् ।
पुष्कलानि च चत्वारि आढकः परिकीर्तितः ॥"
(नगरविशेषः । यथा, रामायणे ।७।११७।११।
"एतेषु तेषु सर्वेषु भरतः कैकयीसुतः ।
निवेशयामास तदा सम्यक् दे पुरोत्तमे ॥
तक्षं तक्षशिलायान्तु पुष्करं पुष्कलावते ।
गन्धर्वदेशे रुचिरे गान्धारविषये च सः ॥")

पुष्करः, क्ली, (पुष्कं मङ्गलं सार्तीति । सा+कः ।
यद्वा, पुष्कं पुष्टिमंदत्तमिति यावत् तदस्य-
स्तीति । पुष्क+"सिध्मादिभ्यश्च ।"५।२।९७।
इति मत्वर्थः ।) अम्बरः । इत्यमरः । ३ । १ । ४८ ॥
वस्त्रः । इति हेमचन्द्रः ॥ (यथा, महा-
भारते । ३ । ३ । १० ।
"राजानो हि महाभागा योगिनश्चैव विद्वांसो
ब्रह्मिताः ।
उदरति प्रजाः सर्वास्तस्य आसाय पुष्करम् ।")
उपरिस्थः । इति जटाधरः ॥

पुष्टं, त्रि, (पुष+क्तः।) कृतपोषणम्। तत्पर्य्यायः। पुषितम् २। इत्यमरः। ३।१।६७॥ मतम् ३। इति जटाधरः॥ (यथा, मनुः। ७। १७१।
"यदा सन्नेत भावेन हृष्टं पुष्टं बलं स्वकम्। परस्य विपरीतञ्च तदा यायादरिं प्रति॥")

पुष्टिः, स्त्री, (पुष+भावे क्तिन्।) पोषणम्। वृद्धिः। इति मेदिनी। टे, २३॥ (यथा, मार्कण्डेये। २२। ११।
"वेदविद्भिर्वरैर्मन्त्रैः प्रजानां पुष्टिहेतुकैः॥")
अश्वगन्धा। इति राजनिर्घण्टः॥ गौड़श्रीमाढकान्तर्गतदेवताविशेषः। इति श्राद्धतत्त्वम्॥ (सा तु दक्षकन्यागासम्भवसा। यथा, मार्कण्डेये।
"प्रख्याता च तथा दक्षदुहिता विश्रुतिस्तथा। असर्व्वा कन्यास्तासाञ्च शृण्वन्नामानि मे शृणु॥ श्रद्धा लक्ष्मीर्धृतिस्तुष्टिः पुष्टिर्मेधा क्रिया तथा॥"
गणपतेः पत्नी। यथा, ब्रह्मवैवर्त्तपुराणे। २। १। ६६।
"पुष्टिर्गणपतेः पत्नी पूजिता जगतीतले। यया विना परिक्षीणाः पुमांसो योषितोऽपि च॥"
खड्गविशेषः। यथाह भोजः।
"मङ्गला विजया पुष्टिः क्षमा तुष्टिः सुखासनम्। प्रचण्डा सर्व्वतोभद्रा खड्गानामाष्टकं विदुः॥"
तन्त्रोक्तचन्द्रकलाया नामान्तरम्। यथा, रुद्रयामले।
"अन्दता मानदा पूषा पुष्टिस्तुष्टी रतिर्धृतिः। शशिनी चन्द्रिका कान्तिर्ज्योत्स्ना श्रीः प्रीतिरङ्गदा। पूर्णापूर्णामृताकामदायिन्यः शशिनः कलाः॥")

पुष्टिका, स्त्री, (पुष्टेः कं जलं यस्याः।) जलशुक्तिः। इति राजनिर्घण्टः॥

पुष्टिकान्तः, पुं, (पुष्टेः कान्तः।) गन्धशुः। इति शब्दरत्नावली॥

पुष्टिदा, स्त्री, (पुष्टिं ददातीति। दा+कः।) अश्वगन्धा। वृद्धिः। इति राजनिर्घण्टः॥ पुष्टिदात्री च॥

पुष्प, य पुष्पने। इति कविकल्पद्रुमः॥ (दिवा०-पर०-अक०-सेट्।) पञ्चमस्वरी। अर्द्धन्योपधः। पुष्पनं विकसनम्। य, पुष्पति शब्दार्थकम्। इति दुर्गादासः॥

पुष्पं, क्ली, पुष्पति विकसति यः। (पुष्प पुष्पने+अच्।) तरुलतादीनां प्रसवः। फुल इति भाषा। तत्पर्य्यायः। प्रसूनम् २। सुमनम् ३ सुमनसः ४। इत्यमरः। २।४।१७॥ सूनम् ५ प्रसवः ६ सुमनः ७। इति शब्दरत्नावली॥ स्वहस्तपुष्पचयनफलं यथा,—
"उपहार्य्याणि पुष्पाणि मम कर्म्मपरायणः। यो मानुपानयेद्भक्त्या मम कर्म्मपरे स्थितः॥ पुष्पाणि तत्र यावन्ति मम मूर्द्धनि धारयेत्। स शत्रा पुष्कलं कर्म्म मम लोकाय गच्छति॥"
अकस्मात्पुष्पदाने दोषो यथा,—
वराह उवाच।
"अकस्मात्पुष्पेण यो मामर्च्चयते भुवि। पातनं तस्य वक्ष्यामि तच्छृणु त्वं वसुन्धरे!॥ नार्हं तत् प्रतिगृह्णामि न च ते वै मम प्रियाः। मूर्खैर्भागवतैर्दत्तं मम विप्रियकारिणः॥ पतन्ति नरके घोरे रौरवे तदनन्तरम्। अज्ञातस्य च दोषेण दुःखान्यनुभवन्ति च॥ वानरो दश वर्षाणि मार्जारश्च चतोदश। मूषकः पञ्च वर्षाणि बलीवर्द्दश्च द्वादश॥ छागश्चैवाष्ट वर्षाणि मांसं वै ग्रामकुक्कुटः। त्रीणि वर्षाणि महिषो भवत्येव न संशयः॥ एतत्ते कथितं भद्रे! पुष्पं यत्ने न रोचते। अकस्मैरण्यं विघ्नाशात्ति! पुष्पं ये न ददन्ति वै॥"
इति वराहपुराणम्॥ ७॥
देवीप्रियपुष्पाणि यथा,—
"पुष्पाणि देया वेणायाः प्रियाणि शृणु संप्रति। वञ्जुलैश्चैव मन्दारैः कुन्दपुष्पकुरण्टकैः॥ करवीरार्कपुष्पैश्च शाल्मलैश्चापराजितैः। दमनैः सिन्दुवारैश्च सुरभीमल्लकैस्तथा॥ लताभिर्व्रश्चटैश्चैव दूर्व्वाङ्कुरैश्च कोमलैः। मञ्जरीभिः कृष्णानाञ्च विल्वपत्रैः सुशोभनैः॥ पूजयेद्देवीं देवीं कामाख्यां त्रिपुरां तथा। अन्याश्च याः शिवाप्रीत्यै जायन्ते पुष्पजातयः॥ ता इमाः शृणु कौशान्ते मया वेतालभैरव!। मालती मल्लिका जाती यूथिका माधवीलता॥ पाटला करवीरश्च जवा तर्कारिका तथा। कुब्जकं तगरश्चैव कर्णिकारोऽथ रोचनः॥ चम्पकाम्रातकौ बाणो वर्व्वरा मल्लिका तथा। अशोको नोग्रतिलकौ वटस्वश्मरीयकौ॥ शमीपुष्पञ्च द्रोणञ्च पद्मोत्पलवकाकराः। श्वेतारुणे चिसन्धे च पलाशः खदिरस्तथा॥ वनमालाश्च सेवन्ती कुसुदोऽथ कदम्बकः। चक्रं कोकनदश्चैव मल्लिको गिरिकर्णिका॥ नागकेशरपुन्नागौ केतक्यञ्जलिका तथा। दोहदा बीजपूरश्च नमेरुः शालमेव च॥ चतुर्थी पञ्चविन्यश्च भिरण्टी पञ्चविधा तथा। एवमाद्युक्तकुसुमैः पूजयेत् वरदां शिवाम्॥"७॥
वर्জ্জनीयपुष्पं यथा,—
"पुष्पञ्च हासिसम्भिन्नं विशीर्णं भग्नसूत्रतम्। अकेशं मूषिकाधूतं यत्नेन परिवर्জ্জयेत्॥ याचितं परकीयञ्च तथा पर्য্যुषितञ्च यत्। अन्यपुष्पं परित्यज्य यत्नेन परिवर्জ্জयेत्॥"
इति कालिकापुराणे। ६८। ५४। अध्यायौ॥
केशवपूजने प्रशस्तपुष्पाणि यथा,—
"मालती मल्लिका चैव यूथिका जातिसुक्तकः। पाटला करवीरश्च जया सेवन्तिरेव च॥ कुब्जकस्तगरश्चैव कर्णिकारः कुरुण्टकः। चम्पकस्तगरः कुन्दो बाणो वर्व्वरमल्लिका॥ अशोकस्त्रिलकश्चम्पस्तथा चैवाटरूषकः। चमी पुष्पप्रकाराश्च शुक्लाः केशवपूजने॥ केतकीपत्रपुष्पञ्च पुष्पं भृङ्गारकस्य च। तुलस्यामलकी चैव सर्व्वसुष्टिकरं हरेः॥
पद्मान्यम्बुसमुत्थानि रक्तनीले तथोत्पले। सितोत्पलञ्च शक्रस्य दयितानि सदा नृप!। तानि पुष्पाणि देयानि विष्णवे प्रभविष्णवे॥"
इत्यग्निपुराणम्॥ ८॥
अपि च।
"जाती शतावा सुमना कुन्दं बहुपुटं तथा। वाणञ्च पङ्कजाशोकं करवीरञ्च यूथिका॥ पारिभद्रं पाटला च वकुलं गिरिशालिनी। तिलकं वनजञ्चैव पीतकं तगरन्तथा॥ एतानि हि प्रशस्तानि कुसुमान्यच्युतार्চने। सुरभीणि तथान्यानि वर्জ্জयित्वा तु केतकीम्॥ येषामपि हि पुष्पाणि प्रशस्तान्यच्युतार्চने। पल्लवान्यपि तेषां स्युः प्रशस्तानि महासुर!॥ वीरुधानां प्रधानेन वर्हिषाप्यर्চयेत्तथा। नानारूपेक्षुसम्भवैः कमलेन्दीवरादिभिः॥ प्रवालैः शुचिभिः शुद्धैर्जलप्रक्षालितैर्वरैः!। वनस्पतीनामर्চेत तथा दूर्व्वाग्रपल्लवैः॥"
इति वामने ६१ अध्यायः॥ ७॥
विष्णौ पुष्पविशेषदानस्य फलं यथा,—
"आरामप्रभवैः पुष्पैरच्छिद्रैः कीटवर्জितैः। तथापर्য্युषितैस्त्यक्तैः कार्त्तिके विष्णुमर्চयेत्॥ वर्षाणां हि यथा विप्रस्त्रीर्थानां जाह्नवी यथा। देवानाञ्च यथा विष्णुः पुष्पाणां मालती तथा॥ मालतीमालया देवं योऽर्চयेन्नरवाहनम्। जन्मदुःखजरारोगैः कर्म्मभिर्मुक्तिमाप्नुयात्॥ मालतीमालया येन पूजितः कार्त्तिके हरिः। पापलक्षायुतं तस्य क्षणेन शौरिः प्रमार्জति॥ मालतीपुष्पमालाभिः कार्त्तिके पुष्पमण्डपम्। विष्णोर्गृहे कृतं यैस्तु ते यान्ति परमां गतिम्॥ जातिपुष्पैर्विरचितां मालां यः संप्रयच्छति। विष्णवे विधिवद्भक्त्या तस्य पुण्यफलं शृणु॥ कल्पकोटिसहस्राणि कल्पकोटिशतानि च। वसेद्विष्णुपुरे श्रीमान् विष्णुतुल्यपराक्रमः॥ यः स्वर्णकेतकीपुष्पैः पूजयेन्नरवाहनम्। चन्द्रकोटिशतं यावत्तुष्टः स्यात्तस्य वै हरिः॥ रामोदरं पूजयेद्यः कुसुमैः केतकोद्भवैः। स वसेद्विष्णुनिलये देवेन सह मोदते॥ मल्लिकाकुसुमैर्देवं योऽर्চयेच्चिदधीश्वरम्। कार्त्तिके परया भक्त्या दहेत् पापं त्रिधार्জितम्॥ सुगन्धैर्मल्लिकापुष्पैरच्युतं योऽर्চयेन्नरः। स सर्व्वपापनिर्मुक्तो विष्णुलोके महीयते॥ वेदधर्म्मेण केनापि संग्रामे मधुसूदने। योऽर्চयेत् स मुनिश्रेष्ठ! लभते वैष्णवं पदम्॥ यः पुनः पाटलापुष्पैरर्চयेन्नरवाहनम्। सुपुण्यात्मा परं स्थानं न प्रयाति हरेर्गृहे!॥ अगस्त्यपुष्पैर्देवेशं योऽर्চयन्ति जनार्দनम्। देवर्षे! दर्शनात्तेषां नरकाग्निः प्रणश्यति॥ न तत् करोति विप्रेन्द्र! तपसा तोषितो हरिः। यत् करोति हृषीकेशो मुनिपुष्पैरलङ्कृतः॥ विहाय सर्व्वपुष्पाणि मुनिपुष्पेण केशवम्। कार्त्तिके योऽर्চयेद्भक्त्या वाजिमेधफलं लभेत्॥ मुनिपुष्पकृतां माणां ये यच्छन्ति जनार्দনे।

शक्रोऽपि तैः समं वत्स ! कुरुते ऽभिभाषणम् ॥
दत्वात्मभक्तितान् कामान् दृष्ट्वाचिन्तामणिर्यथा ।
कार्त्तिके मुनिपुष्पेण पूजितो गरुडध्वजः ॥
गवामयुतदानेन यत्फलं कार्त्तिके मुने ! ।
मुनिपुष्पेण चैकेन कार्त्तिक्यां तत् फलं स्मृतम् ॥
येऽर्चयन्ति नराश्चक्रं करवीरैः सितासितैः ।
तेषां वर्षशतं यावत् प्रसन्नभवति केशवः ॥
वकुलाशोककुसुमैर्येऽर्चयन्ति जगत्पतिम् ।
निःशत्रुकास्ते भवन्तीह यावच्चन्द्रदिवाकरौ ॥
अशोककुसुमैः रम्यैर्जन्मशोकभयापहम् ।
पूजयित्वा हरिं याति पदं विष्णोरनामयम् ॥
सुभगत्वैः सितैर्वत्स ! कुसुमैः पङ्कजोद्भवैः ।
अधोक्षजं समभ्यर्च्य नरो याति हरेः पदम् ॥
अभ्यर्च्य कौसुमैः पुष्पैः केशवं क्लेशनाशनम् ।
प्रयाति भवनं विष्णोर्वन्दितं त्रिदशैरपि ॥
अटरूषकपुष्पेण पूजयेद्यो जगत्पतिम् ।
स पुण्यवान्नरो याति तद्विष्णोः परमं पदम् ॥
कार्त्तिके योऽर्चयेद्विष्णुं तुलसीविल्वपङ्कजैः ।
त्रिदशैरपि पूज्यः स न शक्यो यमकिङ्करैः ॥
माधवे योऽर्चयेद्विष्णुं तुलसीविल्वपङ्कजैः ।
त्रिदशैरपि पूज्यः स वक्तुं शक्यो न किङ्करैः ॥
माधवे योऽर्चयेद्विष्णुं सुपुष्पैस्तिलकोद्भवैः ।
धूतपापो निरातङ्कः स विष्णोर्याति तत् पदम् ॥
समित्पुष्पकुशादीनि श्रोत्रियः स्वयमाहरेत् ।
मूलोपनीतैश्च हरेः पूजां कुर्वन् व्रजत्यधः ॥
तस्माद्विप्रो मुनिश्रेष्ठ ! शिष्येण स्वयमेव वा ।
पुष्पादीनि समाहृत्य पूजयेत् परमेश्वरम् ॥
विप्रो दूर्वामयैः पुष्पैस्तथा काशकुशोद्भवैः ।
तुलसीविल्वपद्मैश्च पूजयेद्देवताः पितॄन् ॥
आर्चयेत्तगरैः सूर्यं घृतपुष्पेण केशवम् ।
देवीं लक्षचपुष्पेण शङ्करं नागकेशरैः ॥
कालविशेषे तस्य पर्युषितत्वं यथा,—
"प्रहरं तिलते जाती प्रहरार्द्धन्तु मल्लिका ।
त्रियामं मुनिपुष्पञ्च करवीरमहर्निशम् ॥"
आम्रमञ्जरीविल्वपत्रदानफलं यथा,—
"मञ्जरीं सहकारस्य ये प्रयच्छन्ति वैष्णवाः ।
कार्त्तिके सप्तजन्मानि स्वर्गलोकेऽवसन्ति ते ॥
कार्त्तिके योऽर्चयेद्भक्त्या विल्वपत्रैश्च केशवम् ।
दद्यादयुतसाहस्रं केशवस्तस्य वै मुने ! ॥
विल्वपत्रैश्च ये शुक्लं कार्त्तिके कलिमर्द्दनम् ।
पूजयन्ति महाभक्त्या मुक्तिस्तेषां करे स्थिता ॥
नागकेसरपुष्पैर्यः पूजयेद्गरुडध्वजम् ।
स याति वैष्णवं स्थानं यत्र गत्वा न शोचते ॥
कदम्बकुसुमैर्यो वै पूजयेन्मधुसूदनम् ।
पञ्चायुतार्जितं पापं स्फोटितं तेन नारद ! ॥
न तथा केतकीपुष्पैर्मालतीकुसुमैस्तथा ।
तोषमायाति देवेशः कदम्बकुसुमैर्यथा ॥
दत्त्वा कदम्बपुष्पाणि तोषमायाति माधवः ।
किं पुनः पूजितो देवः सर्वज्ञानप्रदो हरिः ॥
हरिं किंशुकपुष्पैर्यः पूजयेच्चिदमाधिपम् ।
देहान्ते रमते शश्वत् विष्णुना सह वैष्णवः ॥
सर्षपादे च देवेशं कुशपैलङ्गशालिभिः ।
योऽर्चयेत् परमं विष्णुं संसारे न पुनर्विशेत् ॥
कुन्दपुष्पेण विप्रर्षे ! योऽर्चयेद्गरुडध्वजम् ।
कोटिजन्मार्जितं पापं तत्क्षणादेव नश्यति ॥
शमीपुष्पेण देवेशं पूजयेदसुरद्विषम् ।
यमं न पश्येद्विप्रर्षे ! न याति दुर्गतिं नरः ॥"

इति पाद्मोत्तरखण्डे २३१ अध्यायः ॥ ० ॥

लक्ष्मीतुल्यप्रियपुष्पाणि यथा, नारदीयसप्तमसहस्रे ।
"मालतीवकुलाशोकशेफालिनवमालिकाः ।
अस्तानगराशोकमल्लिकामधुयूथिकाः ॥
यूथिमरुआपदं कुन्दं कदम्बं मधुपिप्पलम् ।
पाटला चम्पकं कुब्जं लवङ्गमतिमुक्तकम् ॥
केतकं कुरुवकं विल्वं कल्हारकरकं द्विजम् ।
पञ्चविंशतिपुष्पाणि लक्ष्मीतुल्यप्रियाणि मे ॥"
केशवार्चने निषिद्धपुष्पाणि यथा, विष्णुधर्म्मोत्तरे ।
"उग्रगन्धीन्यगन्धीनि कुसुमानि न दापयेत् ।
अन्यायतनजातानि कण्टकीनि तथैव च ॥
रक्तानि यानि धर्म्मज्ञ ! चैत्यवृक्षोद्भवानि च ।
श्मशानजातान्यन्यानि यानि चाकालजानि च ॥"
तथा ।
"कुटजं शाल्मलीपुष्पं शिरीषञ्च विनार्हणे ।
निवेदितं भयं रोगं निःस्वत्वञ्च प्रयच्छति ॥
वन्धूकपुष्पाणि रक्तान्यपि च दापयेत् ।
अकुलरक्तकुसुमदानात् दौर्भाग्यमाप्नुयात् ॥"
परारोपितवृक्षस्य पुष्पग्रहणे दोषः । अग्रस्थः ।
"परारोपितवृक्षेभ्यः पुष्पाण्यानीय योऽर्चयेत् ।
अविज्ञाप्य च तस्यैव निष्फलं तस्य पूजितम् ॥"
एतद्विशेषेतरपरम् ।
"द्विजकृत्येषु पुष्पाणि वर्ज्जयेत् स्वयमाहरेत् ॥"
इति याज्ञवल्क्यात् ॥
"देवार्थन्तु कुसुमस्तेयं मनुरब्रवीत् ॥"
इति वचनात् ॥
"गोभ्यर्थे ह्यमेध्यांश्च वीरुधस्तरवोनाम् ।
पुष्पाणि स्वयमादद्यात् फलानि चापरिदंदितानि ॥"
इति गौतमवचनाच्च ।
द्विजेतरस्य दत्तोऽपि ।
"हृतं वा यदि वा काष्ठं पुष्पं वा यदि वा फलम् ।
अप्रयच्छन्नियच्छानो हरत्यहरहनमर्हति ॥"
इति स्मृतेः ॥०॥
देवोपरि धृतं मस्तकोपरि धृतं अधोवस्त्रधृतं अन्तर्जलस्थालितञ्च पुष्पं दुष्टमिति हरिभक्तिनामके ग्रन्थे । अभिवाद्याभिवादककरस्थपुष्पं प्रोक्षयात् कर्म्मण्यम् । इति केचित् ॥०॥
याचितादिपुष्पदानस्य निष्फलत्वम् । याचितं निष्फलं पुष्पं क्रयक्रीतञ्च निष्फलमिति वदन्ति ।
वामहस्तधृतादिपुष्पस्यादेयत्वं यथा,—
"न पुष्पच्छेदनं कार्य्यं देवार्थे वामहस्ततः ।
न दद्यात्तानि देवेभ्यः संस्थाप्य वामहस्ततः ॥"
समित्पुष्पादीनां स्वयमाहरणीयत्वं हारीतः ।
"समित्पुष्पकुशादीनि श्रोत्रियः स्वयमाहरेत् ।
मूलानीतैः क्रयक्रीतैः कर्म्म कुर्व्वन् पतत्यधः ॥"
क्रये प्रतिप्रसवमाह ब्रह्मपुराणम् ।
"पुष्पैर्धूपैश्च नैवेद्यैर्वीरक्रयक्रियाकृतैः ॥"
वीरक्रयो वीरवत् याच्ञामूल्येन विक्रेतुरपण्यस्य मूल्येन क्रयः ॥ ० ॥ पुष्पदानप्रकारो ज्ञानमालायाम् ।
"पुष्पं वा यदि वा पत्रं फलं नैवेद्यमेव च ।
पुष्पाञ्जलिविधिं हित्वा यथोत्पन्नं तथार्पयेत् ॥"
मध्याह्नस्नानानन्तरं पुष्पचयनस्य दोषो यथा,—
"स्नानं कृत्वा तु ये केचित् पुष्पं गृह्णन्ति वै द्विजाः ।
देवतास्तन्न गृह्णन्ति भस्मीभवति दारुवत् ॥"
इतत्तु द्वितीयस्नानाभिप्रायम् । इति रत्नाकरः ॥
अन्यत्र मत्स्यसूक्ते ।
"स्नात्वा मध्याह्नसमये न छिन्द्यात् कुसुमं नरः ।
तत्पुण्यस्यार्चने देवि ! सौरवे परिपच्यते ॥"
पुष्पाभावे देयानि यथा, विष्णुधर्म्मोत्तरे ।
"पुष्पाभावेऽपि देयानि पत्राणि च फलानि च ।
पत्राभावे जलं दद्यात्तेन पुण्यमवाप्यते ॥" ० ॥
पुष्पदानमाहात्म्यं यथा,—
"न रत्नैर्न सुवर्णेन न वित्तेन च भूरिणा ।
तथा प्रसादमायाति यथा पुष्पैर्जनार्दनः ॥ ० ॥
देवताविशेषे वर्ज्जनीयपुष्पं यथा, भ्रातातपः ।
"शिवे विवर्ज्जयेत् कुन्दशमीपत्रं हरेस्तथा ।
देवीनामर्कमन्दारौ सूर्य्यस्य तगरन्तथा ॥" ० ॥
पुष्पविशेषाणां कालिकपर्य्युषितत्वम् । भविष्ये ।
"पद्मानि सितरक्तानि कुमुदान्युत्पलानि च ।
एषां पर्य्युषिताशङ्का कार्य्या पञ्चदिनोत्तरम् ॥"
पुष्पविशेषस्यापर्य्युषितत्वं यथा,—
"तुलस्यगस्त्यविल्वानां न च पर्य्युषितास्मृता ॥"
योगिनीतन्त्रे ।
"विल्वपत्रञ्च माघञ्च तमालामलकीदलम् ।
कल्हारं तुलसीञ्चैव पद्मञ्च मुनिपुष्पकम् ।
एतत् पर्य्युषितं न स्यात् यच्चान्यत् कलिकात्मकम् ॥"
कलिकात्मकं प्रस्फुटनयोग्यम् । इत्येवाक्षीतत्त्वम् ॥ राघवभट्टमते पुष्पविशेषाणां कालिकपर्य्युषितत्वं यथा,—
"विल्वामामार्गकातीतुलसिशमिशतार्कतोयभृङ्गपूर्व्वा
मन्दाभोजाहिदर्भा मुनितिलतगरब्रह्मकल्हारमल्ली ।
पद्माम्भोजातिकुम्भोदमगजकपिला विल्वतो ऽन्यानि ग्राह्या-
ण्यत्रैतत्पैत्र्यकार्य्यं परिणिगदितं वह्नि-वह्नि-भू-भू-यमाभूय एतत् ॥"
अस्यार्थः । ग्राह्या ग्राह्यावरी । मन्दः मन्दारः । अहिर्नागकेशरः । मुनिरगस्त्यः । अम्भोजातिः करवीरः । कुम्भी पाटला । विल्वमारभ्य अहिपर्य्यन्तं गणयित्वा दर्भमारभ्य पुनरिंशगरादि गणयेत् । एतद्दिनोत्तरं पर्य्युषितानीत्यर्थः । इति पदार्थादर्शः ॥ ० ॥ पुष्पकीटायां वर्ज्जनीयानि यथा,

पुष्पचयनम् १ पुष्पार्पणे दयितार्थिता २ माला ३ गोचस्खलनेर्ष्या ४ वक्रोक्तिः ५ सम्भ्रमाक्षेपः ६ । इति कविकल्पलता ॥ (त्रोटकलक्षणविशेषः । यथा, अश्ववैद्यके । ३ । ८२—९२ ।

"आगन्तवस्तुरङ्गस्य ये भवन्त्यन्यवर्णगाः । विन्दवः पुष्पसंज्ञास्तु ते हिताहितसंज्ञकाः ॥ तेषां प्रदेशभेदेन लक्षणं यद् व्यवस्थितम् । तत्तथैव समासेन विस्पष्टं कीर्त्यतेऽधुना ॥ अपाने च ललाटे च भ्रुवोर्मर्द्धनि कर्णयोः । निगाले चैव केशान्ते पुष्पं धन्यतमं स्मृतम् ॥ स्कन्धे वक्षसि कक्षे च सुव्यक्तयोर्बाहुकेशयोः । हन्वोः पृष्ठे च वाजानां पुष्पं स्वामिहितप्रदम् ॥ नाभौ केशे तथा कण्ठ दन्ते चैव हि वाजिनाम् । पुष्पं धन्यतमं प्रोक्तं भर्त्तुः सर्व्वार्थसाधकम् ॥ अप्रशस्तानि दृष्टानि मुनिभिर्यानि वाजिनाम् । तानि सम्यक् प्रवक्ष्यामि पुष्पाण्यागमदर्शनात् ॥ अधरोष्ठे कटे प्रोथे उत्तरोष्ठे तथैव च । घोणायां गण्डयोश्चैव ग्रहयोश्च तथा भ्रुवोः ॥ ग्रीवायाश्च वहे चैव स्कन्धयोः स्फूरके स्फिचि । पार्श्वौ क्रोडे च पुष्पाणि निन्दितानीति निश्चयः ॥ रक्तं पीतं तथा श्वेतं पुष्पं सर्व्वत्र नेष्यते । शुभप्रदेशसञ्जातं भवेत् साधारणं ततः ॥ पुत्रलाभं धनप्राप्तिमारोग्यं विजयं तथा । विन्द्यात् पुष्पैः शुभैर्भर्त्तुरशुभैश्च विपर्य्ययम् ॥ सर्व्वाङ्गपुष्पितो वाजी परिलाभ्यो न संशयः ॥") क्षीरजः । (यथा, मार्कण्डेये । ५१ । ४२ ।

"क्षीरां पुष्पं हरत्यन्या प्रदत्तं सा तु कन्यका ॥") विकाशः । इति मेदिनी । पे, ८ ॥ वणदस्य विमानम् । नेत्ररोगविशेषः । इति हेमचन्द्रः ॥ फुली इति भाषा ॥ अस्यौषधं यथा,—

"हरीतकी वचा कुष्ठं पिप्पली मरिचानि च । विभीतकस्य मज्जा च श्लक्ष्णाभिर्मनःशिला । सर्व्वमेतत् समं कृत्वा छागीक्षीरेण पेषयेत् ॥ नाशयेत्तिमिरं कृष्णं पटलान्यर्ब्बुदानि च । अधिकानि च मांसानि यच्च रात्रौ न पश्यति ॥ अपि द्विवार्षिकं पुष्पं मासेनैकेन साधयेत् । वर्त्तिश्चन्द्रोदयो नाम नृणां दृष्टिप्रसादनी ॥"

इति चक्रपाणिदत्तः ॥

(अस्य चिकित्सान्तरं यथा,—

"पूर्व्वाहारविहारेषु नेत्रे पुष्पञ्च जायते । प्रथमं सुखसाध्यं स्यात् द्वितीयं कष्टसाध्यकम् ॥ तृतीयं श्लक्ष्णसाध्यन्तु चतुर्थन्तदसाध्यकम् । श्वेतपुष्पं तथा रौद्रं श्लक्ष्णाभिर्मनःशिला ॥ काङ्क्षिकेन तु संपेष्य छायाशुष्का भिषग्वर ! ॥ वातिके काङ्क्षिकेनापि पैत्तिके मधुसर्पिषा हिता ॥ श्लैष्मिके मधुसंयुक्ता पुष्पस्याञ्जनतो हिता ।" इति हारीते चिकित्सितस्थाने चतुश्चत्वारिंशत्तमेऽध्याये ॥)

पुष्पकं, क्ली, (पुष्पमिव पुष्पेवा कायति प्रकाशते इति । कै + कः । पुष्प + संज्ञायां कन् वा ।) रीतिपुष्पम् । (पुष्पमिव प्रतिकृतिः । पुष्प + "इवे प्रतिकृतौ ।" ५ । ३ । ९६ । इति कन् ।) धनदस्य विमानम् । (कालपर्य्ययेण धनदं विजित्य रावणेन हृतेऽस्मिन् रावणस्येव जातम् । यथा, रघौ । १० । ४६ ।

"वैमानिकाः पुण्यकृतः त्यजन्तु मरुतां पथि । पुष्पकालोकसंक्षोभं मेघावरणतत्पराः ॥") नेत्ररोगः । रक्तकङ्कणम् । रक्ताञ्जनम् । लोहकांस्यम् । रुदङ्गारशकटी । इति मेदिनी ॥ कासीसम् । इति हेमचन्द्रः ॥ (पुष्प + स्वार्थे कन् । पुष्पम् । यथा, गारुडे १८२ अध्याये ।

"सप्ताभिमन्त्रितं कृत्वा करवीरस्य पुष्पकम् । क्षौणामग्रे भ्रामयेच्च क्षणादेव सा वशा भवेत् ॥" पुं, निर्व्विषसर्पजातिभेदः । यथा, सुश्रुते कल्पस्थाने । ४ अध्याये ।

"निर्व्विषासु गलगोली मूकपत्रोऽजगरो दिव्यको वर्षाहिकः पुष्पशकली ज्योतीरथः क्षीरिकः पुष्पकोऽतियताकोऽन्याहिको गौराहिको दृष्टैश्चय इति ॥" * ॥ पर्व्वतभेदः । यथा, मार्कण्डेये । ५५ । १३ ।

"स्वर्णशृङ्गी शातशृङ्गी पुष्पको मेघपर्व्वतः ॥" प्रासादस्य मण्डपभेदः । यथा विश्वकर्म्मप्रकाशे । ६ अध्याये ।

"अथातः संप्रवक्ष्यामि मण्डपानाञ्च लक्षणम् । मण्डपान् प्रवरान् वक्ष्ये प्रासादस्यानुरूपतः ॥ विविधा मण्डपाः कार्य्याः श्रेष्ठमध्यकनीयसः । नामतस्तान् प्रवक्ष्यामि शृणुध्वं द्विजसत्तमाः ॥ पुष्पकः पुष्पभद्रश्च सुव्रतो नन्दनन्दनः । कौशल्यो बुद्धिसंकीर्णो गजभद्रो जयावहाः ॥") पुष्पकरण्डकं, क्ली, (पुष्पाधार करण्ड इव कायतीति । कै + कः । बहुतरमनोरमपुष्पाधारकत्वादस्य तथात्वम् ।) उज्जयन्यां शिवस्य उद्यानम् । यथा, शब्दमाला ।

"महाकालस्योज्जयनी विशालावन्तिका तथा । तस्य उद्यानकं ज्ञेयं नाम्ना पुष्पकरण्डकम् ॥"

पुष्पकरण्डिनी, स्त्री, (पुष्पकरण्डकं शिवोद्यानमस्त्यस्या इति । इनिः । स्त्रियां ङीप् ।) उज्जयिनी । यथा, हेमचन्द्रः । ४ । ४१ ॥

"उज्जयिनी स्यादिशालावन्ती पुष्पकरण्डिनी ॥"

पुष्पकासीसं, क्ली, (पुष्पमिव कासीसम् ।) पीतवर्णकासीसम् । यथा, भावप्रकाशे ।

"अथ कासीसं भस्मवन्मृत्तिकाभम् । कासीसं धातुकासीसं पांशुकासीसमित्यपि । तदेव किञ्चित् पीतन्तु पुष्पकासीसमुच्यते ॥ कासीसमम्लमुष्णञ्च तिक्तञ्च तुवरं तथा । वातश्लेष्महरं केश्यं नेत्र्यं कण्डूविषव्रणुत् । मूत्रकृच्छ्राश्मरीश्वित्रनाशनं परिकीर्त्तितम् ॥" तत्पर्य्यायः । कंसकम् २ नेत्रौषधम् ३ । इति हेमचन्द्रः ॥ वत्सकम् ४ मलीमसम् ५ मृक्षम् ६ विषदम् ७ गोजन्मत्तिका ८ । अस्य गुणाः । तिक्तत्वम् । शीतत्वम् । नेत्रामयापहत्वम् । लेपेन श्यामाकुष्ठादिनानात्वग्दोषनाशित्वञ्च । इति राजनिर्घण्टः ॥

पुष्पकीटः, पुं, (पुष्पप्रियः कीटः ।) भ्रमरः । इति त्रिकाण्डशेषः ॥ कुसुमलक्षिमात्रेऽपि ॥

पुष्पकेतनः, पुं, (पुष्पं केतनं ध्वजो यस्य ।) कामदेवः । इति हेमचन्द्रः । २ । १४२ ॥

पुष्पकेतु, क्ली, (पुष्पस्य नेत्ररोगविशेषस्य केतुरिव विनाशकत्वात् ।) कुसुमाञ्जनम् । इत्यमरः । २ । ६ । १०३ ॥

पुष्पघातकः, पुं, (हन्तीति । हन + खुल् । घातकः । पुष्पाणां पुष्पवृक्षाणां घातकः नाशकः ।) वंशः । इति शब्दमाला ॥

पुष्पचापः, पुं, (पुष्पमेव पुष्पमयो वा चापोऽस्य ।) कामदेवः । इति हेमचन्द्रः । २ । १४१ ॥ (यथा, कथासरित्सागरे । १४ । २६ ।

"सा संमोहनवाद्यवादनाख्यैर्निरन्तरैः । विद्धेव पुष्पचापेन तत्क्षणं समजृम्भत ॥"

पुष्पाणां चापः । पुष्पधनुः । यथा, रघौ । ११ । ४५ ।

"आततज्यमकरोत् स संसदा विस्मयस्तिमितनेत्रमीक्षितः । शैलसारमपि नातियत्नतः पुष्पचापमिव पेशलं स्मरः ॥")

पुष्पचामरः, पुं, (पुष्पं चामर इवास्य ।) दमनवृक्षः । इति त्रिकाण्डशेषः ॥ केतकवृक्षः । इति शब्दमाला ॥

पुष्पदः, पुं, (पुष्पं ददातीति । दा + कः ।) वृक्षः । इति हेमचन्द्रः । ८ । १८० ॥ पुष्पदासरि, त्रि ॥

पुष्पदन्तः, पुं, (पुष्पमिव शुक्लो दन्तोऽस्य ।) वायुकोणस्थदिग्गजः । इत्यमरः । १ । ३ । ४ ॥ विद्याधरविशेषः । इति मेदिनी । ते, २१३ ॥ जिनभेदः । इति हेमचन्द्रः ॥ नागभेदः । इति धरणिः ॥ (यथा, महाभारते । ७ । २०० । ७० ,

"अर्णौ क्षत्रेक्षणक्षुण्ण पुष्पदन्तस्य चात्मजः ॥" पार्व्वतीप्रदत्तः कार्त्तिकेयस्यानुचरविशेषः । यथा, महाभारते । ९ । ४५ । ४६ ।

"उल्काहं पुष्पदन्तस्य शृङ्गकर्णं तथैव च । प्रददावग्निपुत्राय पार्व्वती शुभदर्शना ॥" विष्णोरनुचरविशेषः । यथा, भागवते । ८ । २१ । १७ ।

"जयन्तः श्रुतदेवश्च पुष्पदन्तोऽथ सात्वतः ॥" शिवगणभेदः । यथा, कथासरित्सागरे । १ । ४६ ।

"प्रसादवित्तकः शर्म्मा पुष्पदन्तो गणोत्तमः । न्यवेधि च ग्रंथेशोऽस्य नन्दिना द्वारि तिष्ठता ॥") पुष्पदन्तकः, पुं, गन्धर्व्वविशेषः । स च महिम्नः स्तवकर्त्ता । इति शब्दरत्नावली ॥

पुष्पधनः, पुं, (पुष्पाढ्यो धनः ।) पुष्पराजः । तत्पर्य्यायः । पुष्पसारः २ पुष्पखेदः ३ पुष्पसः ४ पुष्पनिर्य्यासकः ५ पुष्पाम्बुजः ६ । अस्य गुणाः । सरभित्वम् । शीतत्वम् । कषायत्वम् । गौरत्वम् । दाहश्रमार्त्तिवमिमोहसुखासमत्वक्षयार्त्तिपित्तकफदोषविषारोचकनाशित्वम् । सरत्वम् सन्तर्पणत्वञ्च । इति राजनिर्घण्टः ।

पुष्पधन्वा, [न्] पुं, (पुष्पं धनुरस्येति । "धनुषश्च ।" ५ । ४ । १३२ । इति समासादेशः ।)

कामदेवः । इत्यमरः । १ । १ । २७ ॥ (यथा, कुमारसम्भवे । २ । ६४ ।
"चतुश्चरणमधुव्रतस्वनयवृताङ्कुरास्रः
श्रुतस्तवमपत्रपे प्राञ्जलिः पुष्पधन्वा ॥")

पुष्पनिधः, पुं, (पुष्पं निधत्ते धुनोतीति । पुष्प+निध+"कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् ।) भ्रमरः । इति शब्दचन्द्रिका ॥

पुष्पपयः, पुं, (पुष्पं पयतीति । पैट पाने+खश् । "अरुर्द्विषदजन्तस्य मुम् ।" ६ । ३ । ६७ । इति मुम् ।) भ्रमरः । इति राजनिर्घण्टः ॥ पुष्परसपाककर्त्तरि, त्रि । पुष्पशब्दाद्धेटधातोः कर्त्तरि खश्प्रत्ययनिष्पन्नत्वात् । इति सुग्धबोधव्याकरणम् ॥

पुष्पपयः, पुं, (पुष्पस्य क्षीरवत् पयः सारः ।) योनिः । इति त्रिकाण्डशेषः ॥

पुष्पपुरं, क्ली, (पुष्पवत् पाटलिपुष्पयुक्तं तद्वत् शोभाजनकं वा पुरम् ।) पाटलिपुत्रनगरम् । इति भूरिप्रयोगः ॥ (यथा, रघौ । ६ । २१ ।
"अनेन यैर्दृश्यसि गन्तुमाशां
मार्गं वरेण्येन कुरु प्रवेशं ।
प्रासादवातायनसंश्रितानां
नेत्रोत्सवं पुष्पपुराङ्गनानाम् ॥"
"पुष्पपुराङ्गनानां पाटलिपुराङ्गनानाम् ।" इति तट्टीकायां मल्लिनाथः ॥)

पुष्पफलः, पुं, (पुष्पयुक्तं फलं यस्य ।) डुम्बरः । इति शब्दमाला ॥ कपित्थः । इत्यमरः । २ । ४ । २१ ॥

पुष्पमासः, पुं, (पुष्पाणां मासः पुष्पप्रधानो मासो वा ।) वसन्तः । इति राजनिर्घण्टः ॥ (यथा, हरिवंशे । ५६ । ४ ।
"मासान् वै पुष्पमासादीन् गच्छन्तु मम स्त्रियः ।
परिणामे तु गर्भस्य शैघ्र्यं ज्ञास्यामहे वयम् ॥")

पुष्परक्तः, पुं, (पुष्पे पुष्पावच्छेदे रक्तं रक्तवर्णमस्य । यद्वा, पुष्पं रक्तमस्य ।) द्रुमभेदः । इति शब्दचन्द्रिका ॥

पुष्परसः, पुं, (पुष्पाणां रसः ।) मकरन्दः । इत्यमरः । २ । ४ । २७ ॥ (यथा, भावप्रकाशे शालाधिकारे ।
"मरं मधूपमि कटुकषण
उषा चतुर्जातफलं त्रिचूर्णं ।
मलानि षट् पुष्परसस्य चापि
विनिःक्षिपेत्तत्र विमिश्रयेच्च ॥")

पुष्परवाख्यः, क्ली, (पुष्परस इत्याख्या यस्य ।) मधु । इति राजनिर्घण्टः ॥

पुष्परागः, पुं, (पुष्पस्येव रागो वर्णोऽस्य ।) मणिविशेषः । पुखराज इति भाषा । तत्पर्य्यायः । मञ्जुमणिः २ वाचस्पतिवल्लभः ३ । इति भावप्रकाशः ॥ पीतः ४ पीतस्फटिकः ५ पीतरत्नः ६ पीताङ्गः ७ गुरुरत्नम् ८ पीतमणिः ९ पुष्परागः १० ॥ (यथा, रघौ । १७ । ३२ ।
"तस्य प्रभा निर्व्वर्तितपुष्परागां
पौष्पायणीमौ पुष्पमस्त मत्वा ॥"
"प्रभया निर्व्वर्तितः पुष्परागो मणिविशेषो येन ।" इति तट्टीकायां मल्लिनाथः ॥) तस्य गुणाः । अम्लत्वम् । शीतत्वम् । वातनाशित्वम् । दीपनत्वञ्च ॥ * ॥ तस्य धारणगुणः । आयुःश्रीप्रज्ञाकारित्वम् ॥ * ॥ तस्य लक्षणं यथा,—
"स्निग्धच्छायमतिगुरुगात्रसरङ्गयुक्तं
स्निग्धञ्च निर्म्मलमतीव वृत्तञ्च शीतम् ।
यः पुष्परागवलयं वलयेदनस्य
पुष्णाति कीर्त्तिमतिशौर्य्यसुखाम्बरर्द्धान् ॥"* ॥
तस्य कृत्रिमत्वं यथा,—
"क्षणविद्धद्विधं रूक्षं धवलं मलिनं लघु ।
विच्छायं शर्करागारं पुष्परागं सदोषकम् ॥"
तस्य परीक्षालक्षणं यथा, राजनिर्घण्टे ।
"दृष्टो विकाशयेत् पुष्परागमधिकमात्मीयम् ।
न खलु पुष्परागो जात्यतया परीक्षकैरुक्तः ॥"
तस्योत्पत्तिप्रादि यथा,—
सूत उवाच ।
"पतिता या हिमाद्रौ हि त्वचस्तस्य सुरद्विषः ।
प्रादुर्भवन्ति ताभ्यस्तु पुष्परागा महागुणाः ॥
आपीतपाण्डुरुचिरः प्रायशः पुष्परागसंज्ञस्तु ।
कौरण्टकनामा स्यात् स एव यदि लोहितापीतः ॥
आलोहितस्तु पीतः स्वच्छः कषायकः स एवोक्तः ।
आनीलशुक्लवर्णः स्निग्धः सौमालकः खगुणैः ॥
अत्यन्तलोहितो यः स एव खलु पद्मरागसंज्ञः स्यात् ।
अपि चेन्नीलसंज्ञः स एव कथितः सुनीलः स्यात् ॥
रूक्षं वैदूर्य्यमणेरिव गदितं तस्य रत्नशास्त्रविदा ।
धारणफलञ्च तद्वत् किन्तु स्त्रीणां सुतप्रदो भवति ॥"
इति गारुडे ७५ अध्यायः ॥ * ॥
प्रकारान्तरम् ।
"शुभ्रपुष्पसमः कान्त्या स्वच्छभावस्तु चिक्कणः ।
पुत्रदो धनदः पुण्यः पुष्परागमणिर्भवेत् ॥
दैत्यधातुसमुद्भूतः पुष्परागमणिर्द्विधा ।
पद्मरागाकरे कश्चित् कश्चित्तार्क्ष्योपलाकरे ॥
ईषत्पीतच्छविच्छायास्वच्छं कान्त्या मनोहरम् ॥
पुष्परागमिति प्रोक्तं रक्तसोममहीभुवा ॥
ब्रह्मादिजातिभेदेन तद्विज्ञेयं चतुर्विधम् ।
छाया चतुर्विधा तस्य सिता पीता सितासिता ॥"
इति युक्तिकल्पतरुः ॥

पुष्परेणुः, पुं, (पुष्पाणां रेणुः ।) परागः । इति शब्दरत्नावली ॥ (यथा, रघौ । १ । ३८ ।
"दृश्यमानौ सुखस्पर्शैः शालनिर्य्यासगन्धिभिः ।
पुष्परेणूत्किरैर्वातैराधूतवनराजिभिः ॥")

पुष्परोचनः, पुं, (पुष्पं रोचनेवास्य । पुष्पेषु रोचनः रुचिप्रदो वा ।) नागकेशरः । इति त्रिकाण्डशेषः ॥

पुष्पलावः, पुं, (पुष्पं लुनाति अवचिनोति मालादार्थमिति । पुष्प+लू+"कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् ।) मालाकारः । इति जटाधरः ॥ (स्त्रियां ङीष् । मालाकारपत्नी । यथा, मेघदूते । २८ ।
"गण्डस्वेदापनयनरुजा क्लान्तकर्णोत्पलानां
छायादानक्षणपरिचितः पुष्पलावीमुखानाम् ॥")

पुष्पलावी, [न्] पुं, (पुष्पं लुनातीति । लूञ्छिदि+णिनिः ।) मालाकारः । इति हेमचन्द्रः । ३ । ५६८ ॥

पुष्पलिट्, [ह्] पुं, (पुष्पं लेढीति । लिह+क्विप् ।) भ्रमरः । इत्यमरः । २ । ५ । २६ ॥

पुष्पवती, स्त्री, (पुष्पमस्त्यस्या इति । पुष्प+मतुप् । मस्य वः । ततो ङीप् ।) रजस्वला । इत्यमरः । २ । ६ । २० ॥ (यदुक्तं,—
"कालमेघो भवेत् सोऽपि पुष्पवत्याञ्च वर्षणात् ॥"
तीर्थविशेषः । यथा, महाभारते । ३ । ८५ । १२ ।
"पुष्पवत्यामुपस्पृश्य चिराञ्चोपवितो नरः ।
गोसहस्रफलं लब्ध्वा पुनाति खकुलं नृप ! ॥")
पुष्पविशिष्टे, त्रि ॥ (यथा, रामायणे । २ । ६४ । १० ।
"पुष्पवद्भिः फलोपेतैश्छायावद्भिर्मनोरमैः ॥")

पुष्पवन्तौ, पुं, (पुष्प विकासे+भावे क्वप् । पुष्पो विकासोऽस्यनयोरिति । पुष्प+मतुप् । मस्य वः ।) एकयोक्त्या चन्द्रसूर्य्यौ । इत्यमरः । १ । ४ । १० ॥
"एकया उक्त्या व्यपदेशवचनेन चन्द्रार्कौ पुष्पवच्छब्दवाच्यौ न तु पुष्पवानिन्दुः सूर्य्यो वेत्यभिधीयते । साङ्के । एकयोक्तेति भिन्नप्रयोगे नैवेत्यर्थः । अतएव द्व्यवकत्वात् सदा द्विवचनमित्यर्थः । पुष्पो विकाशश्चन्द्रयोगाद्यतुः । पुष्पवन्तशब्दोऽन्तो रूढ्योऽपि रविशशिनौ पुष्पवन्ताख्याविति नाममाला ।" इति तट्टीकायां भरतः ॥

पुष्पवाटी, स्त्री, (पुष्पाणां वाटी ।) पुष्पोद्यानम् । फुलबागान इति भाषा ॥ यथा, हेमचन्द्रः । ४ । १७६ ॥ [विका ॥"
"वाटी पुष्पादृक्षवाचाद्यौ शुद्धारामः प्रसे-

पुष्पवाहनः, पुं, (पुष्पं पुष्करं वाहनमिव यस्य ।) पुष्करराजः । यथा, अग्निपुराणे ।
"राजा यधोक्तञ्च पुनरकरोत् पुष्पवाहनः ।
विभूतिद्वादशीं ज्ञात्वा स गतः परमां गतिम् ॥"

पुष्पशकटी, स्त्री, आकाशगङ्गा । यथा,—
"चित्रोक्तिः पुष्पशकटी देवप्रय उपप्लुतिः ॥"
इति त्रिकाण्डशेषः ॥

पुष्पशरः, पुं, (पुष्पाणि शरा यस्य ।) कन्दर्पः । कुसुमेषुदर्शनात् ॥

पुष्पशरासनः, पुं, (पुष्पं शरासनं धनुर्यस्य ।) कन्दर्पः । पुष्पधनुर्दर्शनात् ॥

पुष्पशून्यः, पुं, (पुष्पेण शून्यः ।) उदुम्बरः । इति राजनिर्घण्टः ॥ कुसुमरहिते, त्रि ॥

पुष्पसमयः, पुं, (पुष्पाणां समयः ।) वसन्तः । इत्यमरः ॥

पुष्पसारः, पुं, (पुष्पस्य सारः ।) पुष्पकरः । इति राजनिर्घण्टः ॥ (पुष्पश्रेष्ठे, त्रि । यथा, ब्रह्मवैवर्त्ते प्रकृतिखण्डे ।
"पुष्पसारां नन्दिनीञ्च तुलसीं जीवनीमहं ।")

पुष्पसौरभा, स्त्री, (पुष्पे सौरभं यस्याः। तीव्रगन्धत्वादेव तथात्वम्।) कलिकारीवृक्षः। इति राजनिर्घण्टः॥

पुष्पस्वेदः, पुं, (पुष्पाणां स्वेदः।) पुष्पद्रवः। इति राजनिर्घण्टः॥

पुष्पहासा, स्त्री, (पुष्पं स्त्रीरजः हास इव यस्याः।) रजस्वला। इति शब्दरत्नावली॥

पुष्पहीना, स्त्री, (पुष्पेण हीना।) उडुम्बरवृक्षः। इति शब्दचन्द्रिका॥ निष्फला। रजःशून्या। इति हेमचन्द्रः॥

पुष्पा, स्त्री, (पुष्पं अभिधेयत्वेनास्त्यस्या इति। अच्। टाप्।) कर्णपुरी। अधुना भागलपुर इति ख्याता। तत्पर्य्यायः। चम्पा२ मालिनी३। इति त्रिकाण्डशेषः॥

पुष्पाजीवः, पुं, (पुष्पैराजीवति जीविकां निर्व्वाहयतीति। आ+जीव+अच्।) मालाकारः। इति हेमचन्द्रः। ३। ५६४॥

पुष्पाजीवी, [न्] पुं, (पुष्पैराजीवतीति। आ+जीव+णिनिः।) मालाकारः। इति जटाधरः॥

पुष्पाञ्जनं, क्ली, (पुष्पस्य नेत्ररोगविशेषस्य अञ्जनम्।) अञ्जनभेदः। तत्पर्य्यायः। पुष्पकेतु २ कौसुम्भम् ३ कुसुमाञ्जनम् ४ रीतिकम् ५ रीतिपुष्पम् ६ पौष्पकम् ७। तस्य गुणाः। हिमत्वम्। पित्तश्लेष्मास्रदाहविषकासार्शिसर्व्वनेत्रामयनाशित्वञ्च। इति राजनिर्घण्टः॥

पुष्पाञ्जलिः, पुं, (पुष्पाणामञ्जलिः।) कुसुमाञ्जलिः। प्रस्तराञ्जलिः। यथा,—
"पश्च पुष्पाञ्जलीन्दत्त्वा परिवारार्च्चनञ्चरेत्॥"
इति तन्त्रसारधृतभट्टः॥

पुष्पावचायी, [न्] पुं, (पुष्पं अवचिनोतीति। अव+चि+णिनिः।) मालाकारः। इति हेमचन्द्रः। ३। ५६४॥

पुष्पासवं, क्ली, (पुष्पस्य आसवम्।) मधु। इति राजनिर्घण्टः॥ (यथा, ऋतुसंहारे। ५। ५।
"सुरीतताम्बूलविलेपनस्रजः
पुष्पासवामोदितवक्त्रपङ्कजाः॥")

पुष्पाह्वः, पुं, (पुष्पमह्वमस्य।) कन्दर्पः। इति शब्दरत्नावली॥

पुष्पाह्वा, स्त्री, (पुष्पैराह्वयते सह्वते इति। आ+ह्वे+कः। ततष्टाप्।) शतपुष्पा। इति राजनिर्घण्टः॥

पुष्पिका, स्त्री, (पुष्पाति विकसतीवेति। पुष्प+ण्वुल्। टापि अत इत्वम्।) एलवालुकम्। इति शब्दरत्नावली। १६५॥ लिङ्गमलम्। इति हेमचन्द्रः। ३। २८८॥ अध्यायान्ते तत्प्रतिपाद्योक्तिः॥

पुष्पितः, त्रि, (पुष्प+क्तः। पुष्पं जातमस्येति। पुष्प+तारकादित्वात् इतच् वा।) जातपुष्पः। पुष्पविशिष्टः। कुसुमितः। यथा,—
"एकेनापि सुवृक्षेण पुष्पितेन सुगन्धिना।
वासितं तद्वनं सर्व्वं सुपुत्रेण कुलं यथा॥"
इति चाणक्यः॥

पुष्पिताग्रा, स्त्री, (पुष्पितं विकसितमिवाग्रं यस्याः।) छन्दोविशेषः। तस्य लक्षणम्। यथा,—
"अयुजि नयुगरेफतो यकारो
युजि च नजौ जरगाश्च पुष्पिताग्रा॥"
उदाहरणम्।
"करकिसलयशोभया विभान्ती
कुचफलभारविनम्रदेहयष्टिः।
सितरुचिरविलासपुष्पिताग्रा
ब्रजयुवतिव्रततौ हरेर्मुदेऽभूत्॥"
इति छन्दोमञ्जरी॥

पुष्पेषुः, पुं, (पुष्पं इषुर्यस्य।) कामदेवः। इति हेमचन्द्रः। २। १४१॥ (यथा, कथासरित्सागरे। ७। १६।
"तुल्याभिलाषामालोक्य च चैकां सुनिकन्यकाम्।
ययावकस्मात् पुष्पेषुशराघातरसज्जताम्॥")

पुष्यः, पुं, (पुष्यन्त्यस्मिन्नर्था इति। पुष+"पुष्यसिद्धौ नक्षत्रे।" ३। १। ११६। इति क्यप्।) अश्विन्यादिसप्तविंशतिनक्षत्रान्तर्गताष्टमनक्षत्रम्। तत्तु बाणाकारैकतारात्मकम्। इति ज्योतिषम्॥ तत्पर्य्यायः। सिध्यः २ तिष्यः ३। इत्यमरः। १। ३। २२॥ पुष्या ४। इति भरतः॥ (यथा, मनुः। ४। ६६।
"पुष्ये तु छन्दसां कुर्य्याद्बहिरुत्सर्ज्जनं द्विजः॥")
तस्य स्वरूपं यथा,—
"बालप्रौढकटिनीरजःप्रभे
मध्यमाश्रितविहायसे गुरौ।
तौलिकात् पृषतशावलोचने
लोचनाद्रिकुमितागताः कलाः॥"२।५२॥
इति कालिदासकृतराशिलग्ननिरूपणम्॥*॥
तत्र जातस्य फलम्।
"प्रसन्नभाजः मितभाष्टभक्तः
सधर्म्मयुक्तोऽभिनयाभियुक्तः।
भवेन्नरः खलु पुष्यजन्मा
समानधामीकरवाहनाढ्यः॥"
इति कोष्ठीप्रदीपः॥
तस्याधर्च्चे गङ्गास्नानफलं यथा,—
"संक्रान्तिषु व्यतीपाते ग्रहणे चन्द्रसूर्य्ययोः।
पुष्ये स्नात्वा तु जाह्नव्यां कुलकोटीः समुद्धरेत्॥"
इति ब्रह्मवैवर्त्तपुराणम्॥*॥
पौषमासः। कलियुगः। इति मेदिनी। षे, ३८॥
(सूर्य्यवंशीयनृपविशेषः। यथा, रघुः।१८।३२।
"तस्य प्रभानिर्ज्जितपुष्यरागं
पौष्णं तिथौ पुष्यमसक्तपत्री।
लक्ष्मिन्नपुष्यमुदिते समस्थां
पुष्टिं जगाः पुष्य इव द्वितीये॥"
पुष+भावे क्यप्। पुष्टिः। यथा, ऋग्वेदे। १। १६१। १२।
"त्रिः सप्त विष्फुलिङ्गका विषस्य पुष्यमक्षन्॥"
"विषस्यासदावरकस्य पुष्यं पोषमक्षन्।" इति तद्भाष्ये सायणः॥)

पुष्यरथः, पुं, (पुष्य इव रथः। पुष्ये यात्रोत्सवादौ रथो वा।) यत्र यात्रायां तुरार्थं न भवति किन्तु यात्रोत्सवादौ वः। तत्पर्य्यायः। पत्त्रयानम् २। इत्यमरः। २। ८। ५१॥ (यथा, माघे। ३। २२।
"महारथः पुष्यरथं रथाङ्गी
क्षिप्रं चपानाथ इवाधिरूढः॥")

पुष्पलकः, पुं, (पुष्पं पुष्टिं लाकयति वा। लक+अच्।) गन्धद्रव्यम्। (यथा,—
"केशेषु चमरीं हन्ति दीप्तिं पुष्पलको हृतः॥"
इति व्याकरणम्॥)
चपलकः। कीलः। इति मेदिनी। के, १६६॥

पुष्यस्नानं, क्ली, (पुष्ये पुष्यनक्षत्रकाले स्नानम्।) पुष्याभिषेकः। तस्य विधिर्यथा,—
चौर्व्व उवाच।
"शृणु राजन्! प्रवक्ष्यामि पुष्यस्नानविधिक्रमम्।
येन विज्ञातमात्रेण विघ्ना नश्यन्ति सन्ततम्॥
पौषे पुष्यर्क्षगे चन्द्रे पुष्यस्नानं नृपश्चरेत्।
सौभाग्यकल्याणकरं दुर्भिक्षमरकापहम्॥
विष्टादिदुष्टकरणे व्यतीपाते च वैधृतौ।
वज्रे शूले हर्षणादौ योगे यदि न लभ्यते॥
तृतीययुक्तपुष्यर्क्षं रविसौरिजुषेऽहनि।
तदा समस्तदोषाणां तत्स्नानं हारिकारकम्॥
ग्रहदोषान् जायन्ते यदि राज्येषु चेतयः।
तदा पुष्यर्क्षमात्रे तु स्नानं दानान्तरेऽपि तत्॥
इयन्तु ब्रह्मणा शान्तिरुद्दिष्टा गुरवे पुरा।
शक्रार्थे सर्व्वदेवानां शान्त्यर्थञ्च जगत्पते!॥०॥
तुषकेशास्थिवल्मीककीटदेशादिवर्ज्जिते।
शर्करालोष्टमिश्रादिदोषेण परिवर्ज्जिते॥
काकोलूककङ्कक्षेत्रे काकोलैर्गृध्रश्येनकैः।
वर्ज्जिते कण्टकिनृभिर्भीतकविवर्ज्जिते॥
शिग्रुश्लेष्मातकाम्बाष्ठ जलौकालोर्विवर्ज्जिते।
सुस्थाने चम्पकाशोकवञ्जुलादिविभूषिते॥
हंसकारण्डवाकीर्णे सरस्तीरेऽथवा शुचौ।
पुण्यस्नानाय नृपतिर्गृह्णीयात् स्नानसुत्तमम्॥
ततः पुरोहितो राजा नानावाद्यनिःस्वनैः।
प्रदोषसमये गच्छेत्तत्स्थानं पूर्व्ववासरे॥
तस्य स्थानस्य कौबेर्य्यां दिशि स्थित्वा पुरोहितः।
सुगन्धचन्दनैः पानैः कर्पूराद्यधिवासितैः॥
गोरोचनाभिः सिद्धार्थैरक्षतैश्च फलादिभिः।
गन्धद्वारेत्यादिभिस्तु मन्त्रैः सर्व्वाधिवासितैः।
अधिवास्य तु तत् स्थानं पूजयेत्तत्र देवताः॥
गणेशं केशवं शक्रं ब्रह्माणञ्चापि शङ्करम्।
उमया सहितं देवं सर्व्वाश्च गणदेवताः।
मातृश्च पूजयेत्तत्र नृपतिः सपुरोहितः॥
मङ्गलान् सकलान् कृत्वा नागानैवेद्यसञ्चयम्।
प्रदद्यात् पायसं खाद्यं फलं मोदकपायकौ॥
अधिवास्य तु तत् स्थानं दूर्व्वासिद्धार्थकाक्षतैः।
तस्मात् स्थानात्तु भूतानिःसारयेन्मन्त्रमीरयन्॥
अपसर्पन्तु ते भूता ये भूता भूमिपालकाः।
भूतानामविरोधेन स्नानमेतत् करोम्यहम्॥
ततः करौ पुटीकृत्य मन्त्रेणानेन पार्थिवः।
स्नानवाद्येदिमान्देवान् पूज्यान् पुष्याभिषेकतः॥
स्नानञ्चन्तु सुराः सर्व्वे येऽत्र पूजाभिलाषिणः।

दिग्पालभियालस्थाः सर्वे ये चानलोष्ठभागिनः ।
ततः पुष्पाक्षतिं दत्वा पुनर्मन्त्रं पठेदिमम् ॥
अद्य सिद्धन्तु सिद्धाः स्थानमाद्य भामकम् ।
यः पूजां प्राप्य यातारो दत्वा शान्तिं मही-
सुरे ॥

तत्र तां रजनीं रात्रिं नयेत् सपुरोहितः ।
स्वप्ने शुभाशुभं विद्याद्गुरुं सपुरोहितः ॥
हुत्वा पूजान्तु देवानां रात्रौ स्याने नृपः स्वपेत् ।
शुभाशुभकरं स्वप्ने शेषं दोषशमन्ततः ॥
दुःस्वप्नदर्शनं चेत् स्यात्तदा पुण्याभिषेचने ।
क्षीरं घृतं दधि कुशोदकाद्यापि गवां शतम् ॥
गोवाधिकुञ्जरारोहाः प्रासादस्य गिरेस्तरोः ।
वारोहणं शुभकरं राज्यस्यैवाधिकारकम् ॥
दधिदेवसुतानां सुखस्य च दर्शनम् ।
वीणापूर्णाक्षतफलपुष्पच्छदविलेपनम् ॥
शितोपुष्पत्रयाणां मद्यस्य सुहृदां तथा ।
रामाः शयकरः शत्रोरलङ्कारस्य भूषणः ॥
दुर्जनस्योग्रगात्रस्य निगडैर्नास्य बन्धनम् ।
मांसस्य भोजनञ्चैव पर्वतस्य विवर्णनम् ॥
नाभिमध्ये तरुत्पत्तिर्गर्भे प्रलपुरोदनम् ।
काम्यागमनं कूपषट्पङ्क्तावतीर्णता ॥
पर्वतस्य तथा नद्याः प्रोत्तारः शत्रुकर्षणम् ।
शुष्कस्मरणञ्चैव पानं रुधिरमद्ययोः ॥
भोजनं पायसस्यापि मधुस्यारोहणं तथा ।
कन्याद्यसुतसौभाग्यराज्यशत्रुक्षयांसया ।
एते स्वप्नाश्च दुर्वन्ति शुभस्य शुभसत्तम ! ॥
तरोरुन्मूलिशाखानु आरोहो राज्यलाभकः ।
शुक्लं मांसं तथा शस्यं पाटशाश्वशुभप्रदः ॥
रक्तवस्त्रधरोधानं रक्तमाल्यानुलेपनम् ।
रक्तां कन्यां स्त्रियञ्चैव कामयन् लभमाप्नुयात् ॥
कूपान्तरे प्रवेशश्च दक्षिणाशागतिस्तथा ।
पङ्के निमज्जनं स्नानं भार्यापुत्रविनाशनम् ॥
नाभौ यस्य भवेत् स्वप्ने तरुत्पत्तिर्नृपस्य च ।
आदाय गर्भनाड़ीन्तु शत्रुणो यानि वै हृतम् ।
न तु राज्यान्तरं प्राप्य महाकल्याणमाप्नुयात् ॥
दीर्घं विंशतिहस्तन्तु हस्तपोडशविस्तृतम् ।
कुर्यात्तु लक्षणोपेतं यज्ञमण्डलमुत्तमम् ॥
क्षणोपरिष्टि पूर्वाह्णे मासृत्वं पूजनक्षरेत् ।
कुम्भाश्च वर्णधारां हरिद्राञ्च तथैव च ॥
चन्दनागुरुकस्तूरीयूषकर्पूरकुङ्कुमैः ।
सम्पूज्य मण्डलस्थानं तस्मिन् पौ शम्भवे नमः ॥
अस्त्राय हुं पदित्येवं विलेप्यन्तदयं बुधः ।
मन्त्रविन्मण्डलस्थश्च रत्नैः कमलसम्भवैः ॥
कौशिकेनो लिखेत्कार्यं प्रथमं मण्डलं लिखेत् ।
चतुरस्रं भवेत्तु मण्डलं विलिखेत्ततः ॥
हस्तप्रमाणं पद्मन्तु मण्डलस्य प्रकीर्तितम् ।
द्वारादि साष्टहस्तानि कर्णिकाकेसरोज्ज्वलम् ॥
सितं रक्तञ्च पीतञ्च कृष्णं हरितमेव च ।
द्वारादिकेषु कोणेषु दिक्षु दिक्षु क्रमेण च ॥
कुर्यात्तथाक्षतैर्वर्णैः सर्वं तत्र मण्डलकृते ।
पद्मान्तः समारभ्य रत्नं पश्चिमगामिनीम् ॥
पश्चिमद्वारमध्येन मण्डलन्तु विलेखेत् ।

प्रतिद्वारमध्ये तु पञ्चवेवाष्टपञ्चकम् ॥
कुर्यान्मण्डलभागे तु पूर्वादेव पृथक् पृथक् ।
पूर्वेणैव मण्डलं कृत्वा सचागुत्तमारवेत्ततः ॥
उत्तार्यं रत्नं प्रथमं मण्डलं पूजयेत्ततः ।
भवनाय नम इति ततो रत्नं वियोजयेत् ॥
सधावत्तण्डुलस्तस्तु रत्नःपानं समारभेत् ।
मध्यमानामिकाङ्गुष्ठैरपरिरादृधयेच्छया ॥
यथोसुखाकृतिं कृत्वा पातयेत् सुविचक्षणः ।
तमरेखा तु कर्तव्या विच्छिन्ना पुद्गवर्जिता ।
अङ्गुष्ठपर्वनेपुण्यात् समा कार्या विजानता ॥
संयुक्तं विषमं स्थूलं विच्छिन्नं क्षुद्रराहतम् ।
पर्यन्तमर्पितं क्रूरमालिखेन्न कदाचन ।
संसक्तं कलुषं विद्याद्दूरेरेखे तु विग्रहम् ॥
अतिस्पृष्टे भवेद्व्याधिर्निष्पीड़ा विभिन्नते ॥
विच्छिन्नभिन्नमाप्नोति क्षुद्रपक्षान्न संशयः ।
क्षयायां धार्यधानिः स्याच्छिन्नायां मरणं
भ्रुवम् ॥

वियोगो वा भवेत्तस्य इष्टव्यसुतस्य वा ॥
व्यविदित्वा लिखेद्यस्तु मण्डलन्तु यथेच्छया ।
सर्वदोषागवाप्नोति ये दोषाः पूर्वभाषिताः ॥
सितसर्षपपूर्वाभ्यां रेखाः कार्याः प्रमाणतः ।
विमलं विजयं भद्रं विमानं शुभदं शिवम् ॥
वर्द्धमानञ्च देवेश रतास्यं कामदायकम् ।
रुचकं स्वस्तिकाख्यञ्च द्वादशैते तु मण्डलाः ॥
यथास्थानं यथायत्नं योजनीया विचक्षणैः ॥
सागरे मथ्यमाने तु पीयूषार्थं सुरासुरैः ।
पीयूषधारणार्थाय निर्मिता विश्वकर्मणा ॥
कलां कलान्तु देवानामस्त्रिवा ते पृथक् पृथक् ।
यतः कृतास्तु कलसास्ततस्ते परिकीर्तिताः ॥
नवैव कलसाः प्रोक्ता नामतस्तान्निबोधत ।
गोप्तोपगोप्तौ मरुतो मयूखश्च तथापरः ॥
मनोहा त्वभिधश्च विरजस्तनुशोषकः ।
इन्द्रियाणोश्च विजयो नवमः परिकीर्तितः ॥
तेषामेव क्रमाद्भूप ! नव नामानि यानि तु ।
तदा तान्यपराण्येव शान्तिदानि सदैव हि ॥
धितीन्द्रः प्रथमः प्रोक्तो द्वितीयो कलसम्भवः ।
पवनाशी ततो हौ तु यज्ञमानस्ततः परः ॥
कीर्तनस्त्रवनामा तु षष्ठः स परिकीर्तितः ।
सोमस्तु सप्तमः प्रोक्तस्तादित्यस्तु तथाष्टमः ।
विजयो नाम कलसो योऽसौ नवम उच्यते ।
स तु पञ्चसरः प्रोक्तो महादेवस्वरूपधृक् ॥
घटस्य पञ्चवक्त्रेषु पञ्चवक्त्रः स्वयन्तथा ।
यथाकालान्वितः सम्यक् वामदेवादिनामतः ।
मण्डलस्य च मध्यान्तः पञ्चवर्णं घटं न्यसेत् ॥
धितीन्द्रं पूर्वतो न्यस्य पश्चिमे कलसम्भवम् ।
पायसे पायसं न्यस्य आग्नेये कलिसम्भवम् ॥
नैर्ऋत्यां यज्ञमानन्तु रेशान्यां सोमसम्भवम् ।
सोमसूत्रतो न्यस्य सौरं दक्षिणतो न्यसेत् ॥
कलशैवं कलसांश्चैव तेषु पत्तान् विनिन्यसेत् ।
कलसानां मुखे ब्रह्मा गीवायां शङ्कर स्थितः ।
मूले तु संस्थितो विष्णुर्मध्ये मातृगणाः स्थिताः ॥
दिक्पाला देवताः सर्वा वेष्टयन्ति दिशो दश ॥

कुशौ तु सागराः सप्त सप्तद्वीपाश्च संस्थिताः ।
नक्षत्राणि ग्रहाः सर्वे तथैव कुलपर्वताः ॥
गङ्गाद्याः सरितः सर्वा वेदाश्चत्वार एव च ।
कलसेषु स्थिताः सर्वे तेषु तानपि चिन्तयेत् ॥
रत्नानि सर्वबीजानि पुष्पाण्यपि च फलानि च ।
वस्त्रमौक्तिकवैदूर्यमहापद्मशङ्खाटकैः ॥
सर्वधाममयं विल्वं नागरोडुम्बरं तथा ।
दीनपूरकलवीरकाश्मारोम्रातदाडिमान् ॥
यवं शालिञ्च गोधूमं सितसर्षपम् ।
कुङ्कुमागुरुकस्तूरीमदनं रोचनं तथा ॥
चन्दनञ्च तथा मांसीमेलां कुष्ठं तथैव च ।
कर्पूरं पत्रचोरञ्च जलं निर्यासकामुदम् ॥
शैलेयं वदरं जातीपत्रपुष्पे तथैव च ।
कालशाकं तथा एला देवौ पूर्णकमेव च ॥
वचां धात्रीं समञ्जिष्ठां तुरुष्कं मङ्गलाष्टकम् ।
दूर्वां मोदनिकां भद्रां शतमूलीं शतावरीम् ॥
पर्णानां सकलां क्षुद्रां सहदेवीं गजाह्वयाम् ।
पूर्णकोषां सितां पाठां गुडूचीं शिरसिकानलौ ॥
श्यामकं गजदन्तञ्च शतपुष्पां पुनर्नवाम् ।
ब्राह्मीं देवीं शिवां रुद्रां सर्वसत्यानिकां तथा ।
समाहृत्य शुभानेतान् कलसेषु निधापयेत् ॥
कलसस्य यथादेशं विधिं शमं गदाधरम् ।
यथाक्रमं पूजयित्वा शमं तुल्यतया यजेत् ॥
प्राचादेन तु मन्त्रेण शम्भुतत्त्वेन शङ्करम् ।
प्रथमं पूजयेन्मध्ये नानावैदेवदेवैः ।
दिक्पालानां घटेष्वेव दिक्पालानपि पूजयेत् ॥
पूर्वं बहिःस्थापितेषु ग्रहाणां कलसेषु च ।
नवग्रहान् पूजयेत्तु मातर्मालघटेषु च ॥
सर्वे देवा घटे पूज्या घटस्तेषां पृथक् पृथक् ।
नवैव तत्र पूर्वोक्ताः सदा सत्यतमा नृप ! ॥
भक्ष्यैर्भोज्यैश्च पेयैश्च पुष्पैर्नानाविधैः फलैः ।
यावकैः पायसैश्चापि यथासम्भवयोजितैः ।
पुण्याहवाचनाय नृपतिः पूजयेत् सकलान् सुरान् ॥
दक्षिणे मण्डलस्याथ कुण्डं निर्माय पायसैः ।
समिद्भिः शालिसिद्धार्थैस्तैर्वाप्यतैलेन वा ।
केवलेन तथैवाज्यैः पूजयेत सकलान् सुरान् ॥
होमान्ते तोषयेद्दृष्ट्वैनृपः सार्द्धं पुरोहितम् ।
होमान्ते मण्डलोदीच्यां वेदिकायां नवदृकम् ।
रोचनाद्यमलङ्कारान् तथा सर्व्वान्नियोजयेत् ॥
दद्याद्य क्षुल्लमक्षुद्रं दिर्द्याद्याकुलमावधि ।
हस्तं वा चतुरस्रं वा पद्मकर्णिकसंस्थितम् ।
रत्नैश्चान् पद्ममध्ये तु गोमासकविनायकैः ॥
श्रीः श्रीवृक्षो वरारोहा स्वामी देवो शुभान्वितो ।
रत्नैः सर्वैरलङ्कारैः पट्टं कार्यं द्विहस्तकम् ॥
हस्तविस्तारमुच्छ्रायं कर्णयन्त्र दशाङ्गुलम् ।
यानार्थं साष्टहस्तन्तु पट्टं हस्तायतान्वितम् ।
कृत्वा चतुर्गुणा दीर्घा धनुर्मानन्तु पीठकम् ॥
गजसिंहकृताटोपं हैमरत्नविभूषितम् ।
सिंहासनं साष्टविस्ताराहस्तायतमथापि वा ।
वास्तुविच्चकपट्टेषु उपधानानि कारयेत् ।
चन्दनैर्वा निर्मितैश्चर्मरुतूलकपूरितान् ।
पूजा देवीं विसीर्षां चतुर्हस्ता सुखप्रदा

वितस्त्यधिकमिच्छन्ति नृपस्य गुरुविद्यया ॥
अर्द्धचन्द्रसमं कुर्य्यादासनं चतुरस्रकम् ।
उपधानानि शय्यायाः कर्णादिमूलदेशतः ॥
षोड़शैवात्र कार्य्याणि वर्णचित्रयुतानि च ।
यानं सिंहासनं मञ्चं शय्योपकरणादिकम् ॥
राज्ञो नूतनयोग्यं तद्वेद्या उत्तरतो न्यसेत् ।
तेषान्तु पश्चिमे स्वर्णरत्नौघनिचिते वरे ॥
पर्य्यङ्के यज्ञदार्व्वौघनिर्म्मिते महदासने ।
अर्द्धाच्छादनसंयुक्त चर्म्माष्टत्या चतुष्टयम् ॥
वृषभस्य तथोर्णायाः सिंहशार्दूलयोरपि ।
पादपीठे रत्नयुते पादावारोप्य पार्थिवः ॥
तस्मिन् पर्य्यङ्कपृष्ठस्थे चर्म्मखण्डचतुष्टये ।
नानालङ्कारभूषाढ्यं नृपतिं रत्नमालिनम् ॥
स्नापयेद्दन्त्राक्षैर्ये: सार्द्धं राजानं सुखसङ्गतम् ।
संवीतकम्बलं कृत्वा रत्नवस्त्रावशोभितम् ॥
कलसैर्व्वलिपुष्पाद्यैः शालिचूर्णैश्च स्नापयेत् ॥
अष्टौ षोड़शविंशाष्टशतमष्टाधिकन्त्र वा ।
कलसानां समाख्याता अधिकस्योत्तरोत्तरम् ॥
जयकल्याणदैर्मन्त्रैर्मङ्गलोत्थैश्च शाम्भवैः ।
वैष्णवैरथ दिक्पालैर्ग्रहमन्त्रैश्च मातृकैः ॥
आर्य्यं तेजः समुद्दिष्टमार्य्यं पापहरं परम् ।
आर्य्यं सुराणामाहारमार्य्ये लोकाः प्रतिष्ठिताः ॥
भौमान्तरीक्षं दिव्यं वा यत्ते कल्मषमागतम् ।
सर्व्वं तदाप्यसंस्पर्शात् प्रणाशमुपगच्छतु ॥
ततोऽपनीय गात्रात्तं कम्बलं वस्त्रमेव च ।
कलसैः स्नापयेद्रूपं पुण्यस्नानार्थपूरितैः ।
एभिर्मन्त्रैर्नरश्रेष्ठ ! तत्तत्तत्त्वार्थसाधकैः ॥ * ॥
सुरास्त्वामभिषिञ्चन्तु ये च सिद्धाः पुरातनाः ।
ब्रह्मा विष्णुश्च रुद्रश्च साध्याश्च समरुद्गणाः ॥
आदित्या वसवो रुद्रा आश्विनेयौ भिषग्वरौ ।
अदितिर्दैवमाता च स्वाहा लक्ष्मीः सरस्वती ॥
कीर्त्तिर्लक्ष्मीर्धृतिः श्रीश्च सिनीवाली कुहूस्तथा ।
दितिश्च सुरसा चैव विनता कद्रुरेव च ॥
देवपत्न्यश्च याः प्रोक्ता देवमातर एव च ।
सर्व्वास्त्वामभिषिञ्चन्तु सर्व्वे चाप्सरसां गणाः ॥
नक्षत्राणि मुहूर्त्ताश्च पक्षाहोरात्रसन्धयः ।
संवत्सरो दिवा रात्रिः कलाः काष्ठाः क्षणा लवाः ॥
सर्व्वे त्वामभिषिञ्चन्तु कालस्यावयवाश्च ये ।
वैमानिकाः सुरगणा मनवः सागरैः सह ॥
सरितश्च सहानागा यक्षाः किंपुरुषास्तथा ।
वैखानसा महाभागा द्विजा वैहायसास्तथा ॥
सप्तर्षयः सदाराश्च ध्रुवस्थानानि यानि तु ।
मरीचिरत्रिः पुलहः पुलस्त्यो भृगुरङ्गिराः ॥
क्रतुः सनत्कुमारश्च सनकोऽथ सनन्दकः ।
सनातनश्च दक्षश्च लोकेशयोऽथ नन्दनः ॥
एकतश्च द्वितश्चैव त्रितो जावालिकाश्यपौ ।
दुर्व्वासा दुर्विनीतश्च वाल्मीकात्रायनस्तथा ॥
मार्कण्डेयो दीर्घतपाः गुनःशेपो विदूरथः ।
और्व्वः सम्वर्त्तकश्चैव धवनोऽत्रिः पराशरः ॥
द्वैपायनो यवक्रीतो देवरातः सहानुजः ।
एते चान्ये च बहवो दिव्यसंतरायया ॥
सप्तर्षयोऽभिषिञ्चन्तु सदाराश्च तपोधनाः ॥
पर्व्वतास्सरितो नद्यः पुण्यान्यायतनानि च ।
प्रजापतिः क्षितिश्चैव गावो विश्वस्य मातरः ॥
वाहनानि च दिव्यानि सर्व्वे लोकाश्चराचराः ।
अग्नयः पितरस्तारा नीहृताः खं दिशो जलम् ॥
एते चान्ये च बहवः पुण्यसंकीर्त्तनाः शुभाः ।
तोयैस्त्वामभिषिञ्चन्तु सर्व्वोत्पातनिवर्हणाः ॥
इत्येवं शुभदैर्वाक्यैर्मन्त्रैर्दिव्यैस्तथापरैः ।
शैवैर्नारायणैः रौद्रैर्ब्रह्मशक्रसमुद्भवैः ॥
आपोहिष्ठा हिरण्येति सम्भवेति सुरेति च ।
मानस्तोकेतिमन्त्रेण गन्धद्वारेत्यनेन च ॥
सर्व्वमङ्गलमङ्गल्यैः श्रीश्च ते ह्रीश्च योगिभिः ।
इत्येवं स्नानमासाद्य गात्रमार्द्रय कम्बलैः ॥
सर्व्वमङ्गलमन्त्रेण वस्त्रं कार्पासकं क्षिपेत् ॥
आचम्य च ततो देवान् गुरुं विप्रांश्च पूजयेत् ॥
ध्वजं छत्रं चामरञ्च घण्टामश्वान् गजांस्तथा ।
मन्त्रं जप्त्वा धारयेत्तु ततो गच्छेत्तुताग्नगम् ॥
तत्र गत्वा वह्निमध्ये वह्निश्रीर्वीक्ष्य पार्थिवः ।
अनिमित्तनिमित्तानि लक्षयेत्तत्र विन्दुभिः ॥
देवज्ञकञ्चुकामात्यवन्दिपौरजनैर्वृतः ।
वादित्रघोषैस्तुमुलैस्तथा तौर्य्यत्रिकैः शुभैः ॥
कृत्वा प्रेषे पुनः शान्तिमाशीर्व्वाच्य च वै द्विजान् ।
पूर्णां विधाय विधिवद्वह्निणां कनकाप्लुत ॥
धान्यानि चाथ वासांसि दत्त्वा कुर्य्याद्विसर्ज्जनम् ।
ततः प्रेषजलैः सर्व्वानमात्यादीन् पुरोहितः ।
सेचयेच्चतुरङ्गञ्च बलञ्चापि सराष्ट्रकम् ॥
एवं कृत्वा नृपः पश्चात्तिरात्रं संयतो भवेत् ।
मांसमैथुनहीनञ्च कुर्य्याब्भङ्गल्यसेवनम् ॥
पुष्यनक्षत्रयुक्ता तु तृतीया यदि लभ्यते ।
तस्यां पूज्या सदा देवी चण्डिका शङ्करेण ह ॥
पश्चालिकाविवाहाद्यैः शिशूनां कौतुकैस्तथा ।
वैवाहिकेन विधिना मोदयेच्चण्डिकां शिवाम् ॥
चतुष्पथेषु सर्व्वेषु देवदेवीगृहेषु च ।
पताकाभिरलङ्कुर्य्यादेवं कुर्व्वन्न सीदति ॥
एवं कृत्वा शान्तियागं तथा पुष्याभिषेचनम् ।
चतुरङ्गैः समं राजा भार्य्याभिस्तनयैः सह ।
राज्यमण्डलसंयुक्तः परत्रेह न सीदति ॥
नातः परतरो यज्ञो नातः परतरोत्सवः ।
नातः परतरा शान्तिर्नातः परतरं शिवम् ॥
अनेनैव विधानेन नृपतेरभिषेचनम् ।
युवराज्याभिषेकञ्च कुर्य्याद्राजपुरोहितः ॥
नृपाभिषेककरणमाद्यौ यदि समाचरेत् ।
अनेनैव विधानेन स्थिरः स्यान्नृपतिस्तदा ॥
अयं यज्ञः समुद्दिष्टः शक्राद्यैर्ब्रह्मणा पुरा ।
एवं यज्ञं नृपो दृष्ट्वा परत्रेह न सीदति ॥"

इति कालिकापुराणे पुष्याभिषेकः ८६ अध्यायः ॥

पुष्या, स्त्री, (पुष्णाति कार्य्याणीति । पुष्+क्यप् यत् वा । निपातनात् साधुः । ततष्टाप् ।) पुष्यनक्षत्रम् । इति शब्दरत्नावली ॥ (यथा, इन्द्रजालतन्त्रसंग्रहे ।

"अग्निनीरुद्गमूलाश्च पुष्या पुनर्वसुस्तथा ।
यज्ञाकर्षश्च कर्त्तव्यं कारयेच्च सदा बुधः ॥")

पुस्त, क, बन्धे । इति कविकल्पद्रुमः ॥ (चुरा०-उभ०-सक०-सेट् ।) पञ्चमस्वरी । दन्त्योपधः । क, पुस्तयति । इति दुर्गादासः ॥

पुस्तं, क्ली, (पुस्त्यते इति । पुस्त बन्धादरादौ+घञ् ।) लेप्यादिशिल्पकर्म्म । आदिना काष्ठपुत्तलिकाखगिचखगनादि कर्म्म गृह्यते । इति सुभूत्यादयः ॥

मृदा वा दारुणा वाथ वस्त्रेणाप्यथ चर्म्मणा ।
लोहरत्नैः कृतं वापि पुस्तमित्यभिधीयते ॥"

इत्यमरटीकायां भरतः ॥

(यथा, वाभटे सूत्रस्थाने । ३ ।

"पुस्तस्त्रीस्तनहस्ताक्षप्रहर्त्तृशीरवारिणि ॥"

पुस्त्यते बध्यते ग्रथ्यते इत्यर्थैः आदियते वेति+पुस्त+घञ् ।) पुस्तकम् । इति मेदिनी ॥ (पुस्त+गौरादित्वात् ङीष् ।) स्त्रियां पुस्ती ॥

पुस्तकम्, क्ली, स्त्री, (पुस्त+स्वार्थे कन् ।) पुस्तम् । पुस्ति इति भाषा । (यथा, हरिवंशे । २५६ । ७६ ।

"शुक्लाम्बरधरः श्रीमान् शुचिर्भूत्वा स्वलङ्कृतः ।
अर्च्चयेत यथान्यायं गन्धमालैः पृथक् पृथक् ॥
संहितापुस्तकान् राजन् ! प्रयतः शिष्टसम्मतः ॥")

तस्य परिमाणं यथा,—

"मानं वक्ष्ये पुस्तकस्य शृणु देवि ! समासतः ।
मानेनापि फलं विन्द्यादमाने श्रीर्हृता भवेत् ॥
हस्तमात्रं सुष्टिमात्रमावाहुदग्राङ्गुलम् ।
दग्राङ्गुलं तथाष्टौ च ततो हीनं न कारयेत् ॥"

तस्य वेधो यथा,—

"वेधद्वयं सुष्टिहस्तं बाहुमात्रे चिरन्तकम् ।
समभागे महेशानि ! हस्तादौ रूपरन्ध्रकम् ॥
अष्टाङ्गुलं परित्यज्य मध्ये वेधं न कारयेत् ।
प्रादेशादौ भवेद्रन्ध्रो द्व्यङ्गुले वा समाचरेत् ॥
पुस्तकस्य च आदन्ते यत्नवेधं विकल्पयेत् ।
भार्य्याहानिर्भवेदाद्ये धनानां वा क्षयो भवेत् ॥
दग्धरन्ध्रे भवेत् पीड़ा वर्त्तुलं शुभदं भवेत् ।"
चतुष्कोणे विनश्वस्तु त्रिकोणे मरणं भवेत् ॥

पुस्तककरणपत्रं यथा,—

"भूर्जे वा तेजपत्रे वा तालै वा ताड़िपत्रके ।
अगुरुणापि देवेशि ! पुस्तकं कारयेत् प्रिये ! ॥
सम्भवे स्वर्णपत्रे च ताम्रपत्रे च शङ्करि ! ।
अन्यदृश्यलभ्यि देवि ! तथा केतकिपत्रके ॥
मार्त्तण्डपत्रे रौप्ये वा वटपत्रे वरानने ! ।
अन्यपात्रे वसुदले लिखित्वा यः समभ्यसेत् ।
स दुर्गतिमवाप्नोति धनहानिर्भवेद्ध्रुवम् ॥"

पुस्तके वेदलिखननिषेधो यथा,—

"वेदस्य लिखनं कृत्वा यः पठेद्ब्रह्महा भवेत् ।
पुस्तकंवा गृहे स्थाप्यं वज्रपातो भवेद्ध्रुवम् ॥"

युगभेदे पुस्तकाधारस्यदेवा यथा,—

"सत्ये चरे स्थितः शम्भुः शूलपाणिस्त्रिलोचनः ।
प्रजापतिर्द्वापरे च त्रेतायां सूर्य्य एव च ।
कृते युगे पिनाकी च कलौ लिख्यहरिः ॥"

नलिनपूजाफलं यथा,—
"द्वारमेकं च समाधौ च वेश्मकं प्रतिपूजयेत्।
एकस्य गन्धपुष्पार्घ्यैर्वसेच्च सुमनोहरे॥
यावद्धरणिसंस्थानं प्रतिपद्मे च सुन्दरि!।
तावद्युगसहस्राणि शक्रलोके वसेच्चिरम्॥"
देवनगरादौ लेखकस्य दोषो यथा,—
"देवनं वस्तु यो हन्यात् लिखित्वा पुस्तकं च तु।
यावदक्षरसंख्यानं तावच्च नरके वसेत्॥"
भूमौ पुस्तकलेखनस्थापननिषेधो यथा,—
"न भूमौ विधिखेद्वर्णं मलं न पुस्तकं लिखेत्।
न सुप्ता पुस्तकं स्याप्यं न सूक्ष्माक्षरेत्तु वत्॥
भूस्थमक्षरपद्मे चैव यत्रयत्र च पुस्तकम्।
भूमौ तिष्ठति देवेशि! ग्रसत्यन्तस्तु सर्वता।
तदा भवति देवेशि! तस्मात्तत् परिवर्जयेत्॥"
इति योगिनीतन्त्रे तृतीयभागे सप्तमपटलः॥*॥
तस्य दानफलं यथा,—
विप्राय पुस्तकं दत्त्वा धर्म्मशास्त्रस्य च द्विज!।
पुराणस्य च यो दद्यात् स देवत्वमवाप्नुयात्॥
शास्त्रदत्त्वा जगत् सर्व्वं सुश्रुतस्य शुभाशुभम्।
तस्मात् शास्त्रं प्रयत्नेन दद्याद्विप्राय कार्त्तिके॥
वेदविद्याञ्च यो दद्यात् स्वर्गे कल्पत्रयं वसेत्।
ज्यौतिषविद्याञ्च यो दद्यात्तस्य संख्या न विद्यते॥
त्रीणि तुल्यप्रदानानि त्रीणि तुल्यफलानि च।
शास्त्रं कामदुघा धेनुः पृथिवी चैव शाश्वती॥"
इति पाद्मोत्तरखण्डे ११७ अध्यायः॥*॥
वेदशास्त्रादिदानफलं यथा,—
"वेदार्थयज्ञशास्त्राणि धर्म्मशास्त्राणि चैव हि।
स्वर्णेन लेखयित्वा यो दद्याद्ददाति स वैदिकम्॥
इतिहासपुराणानि लिखित्वा यः प्रयच्छति।
ब्रह्मदानसमं पुण्यं प्राप्नोति द्विगुणीकृतम्॥"
इति गारुड़े २१५ अध्यायः॥*॥
भागवतदानविधानं तु पाद्मोत्तरखण्डे द्रष्टव्यम्॥
पुस्तकर्त्ता, त्रि, (पुस्तं लिखनादिकं कर्म्म यस्य।) लेखादिक्रियाकर्म्मकर्त्ता। इति हलायुधः॥
पू, ङ क्षौरे। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) क्षौर एव शुद्धीकरणम्। ङ, पवते पापिनं गङ्गा। इति दुर्गादासः॥
पू, ङ य क्षौरे। इति कविकल्पद्रुमः॥ (दिवा०-आत्म०-सक०-सेट्।) क्षयं केचिन्न मन्यते। ङ य, पूयते। इति दुर्गादासः॥
पू, ञ गि क्षौरे। इति कविकल्पद्रुमः॥ (क्र्या०-पर०-उभ०-सक०-सेट्।) ञ गि, पाद्मवी नः पुनातु। पुनीते। क्वचित् क्याप्रत्ययस्यापि श्नादित्वात् श्नस्य इति परस्मैपदिः। तेन।
"सस्नात् पुनते वापं धारस्तात् पूर्व्वसंचितम्।
पूर्णमाभते सोमस्तेनैवोक्तं तदग्रजम्॥"
इति दुर्गादासः॥
पूर्, क्ली. (पूर्यते सुखमनेनेति। पृ च भावे+"आदृगमहनजनः किन्।" उणा०। १। १२३। इति क्यप् किन्।) पुगाख्यद्रव्यम्। इत्यमरटीकायां भरतः॥ (यथा, सविष्यपुराणे। तालफलमीदृशस्वरूपम्।
"पिण्डखर्जूरं जातिञ्च एला चैव हरीतकी।
नारिकेलं तथा पूगं रम्भाफलचतुष्टयम्।
तत्र सुखं प्रदातव्यं तालस्य फलमुत्तमम्॥")
पूगः, पुं, (पूयतेऽनेनेति। पूञ्+"क्षापूर्वविभ्यः कित्।" उणा०। १। १२३। इति गन्। स च कित्।) गुवाकः। करुकः। इत्यमरः। (यथा, महाभारते। ६। २१। १४।
"अनन्ततेजा गोविन्दः शत्रुपूगेषु निर्व्यथः।
पुरुषः सनातनतमो यतः क्षयस्ततो भयः॥")
छन्दः। भावः। कण्टकिवृक्षः। इति शब्दरत्नावली॥
पूगपात्रं, क्ली, (पूगस्य दत्तचर्व्वितपूगरसस्य आधारभूतं पात्रम्।) पूगपीठम्। पिकदानी। इति भाषा। तत्पर्य्यायः। फलकम् २। इति हारावली॥
पूगपीठं, क्ली, (पूगस्य दत्तचर्व्वितपूगरसस्य पीठमाधारपात्रम्।) पूगपात्रम्। तत्पर्य्यायः। कंटकोलः २ पतद्ग्रहः ३। इति त्रिकाण्डशेषः॥
पूगपुष्पिका, स्त्री, (पूगवर्द्धितं पुष्पमत्रेति। पूग-पुष्प+कप्। कापि अत इत्वम्।) विवाहसम्बन्धिपुण्यताम्बूलम्। तत्पर्य्यायः। कुक्षलिः २। इति त्रिकाण्डशेषः॥
पूगफलं, क्ली, (पूगस्य गुवाकस्य फलम्।) गुवाकफलम्। तत्पर्य्यायः। पूगम् २ चिक्कणी ३ चिक्का ४ चिक्कणम् ५ सोमाकम् ६ उद्वेगम् ७ क्रमुकफलम् ८। इति राजनिर्घण्टः॥ (यथा, सुश्रुते सूत्रस्थाने ४६ अध्याये।
"कषायमीषन्मधुरं किञ्चित् पूगफलं गुरु॥")
पूगरोटः, पुं, (पूगवृक्ष इव रोटयति दीप्यते प्रकाशते इति। रुट्+अच्।) छिन्नालवृक्षः। इति त्रिकाण्डशेषः॥
पूज, क पूजे। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) षष्ठस्वरी। क, पूजयति गुरुं लोकः। इति दुर्गादासः॥
पूजकः, त्रि. (पूजयतीति। पूज+ण्वुल्।) पूजाकर्त्ता। यथा, तिथ्यादितत्त्वे।
"यत्रैव भानुस्तु वियत्युदेति
प्रार्चीति तां वेदविदो वदन्ति।
तथा पुरः पूजकपूज्ययोश्च
तदागमज्ञाः प्रवदन्ति तान्तु॥"
पूजनं, क्ली. (पूज+भावे ल्युट्।) पूजा। अर्च्चनम्। यथा,—
"क्षुद्रेण न च कर्त्तव्यं लोभेन तरसा न च।
मनुपूजनं विधानेन यदीच्छेत् परमां गतिम्॥"
इति पराशरपुराणम्॥
पूजनी, स्त्री, (पूज्यते इति। पूज+कर्म्मणि ल्युट्। ङीम्।) षट्का। इति भरतः॥ (ब्रह्मदत्तग्रहनियन्त्रणनिवारणमन्त्रोद्धारः। यथा, महाभारते।१२। २३६। ७—१०।
"इदञ्च राजन्! यदुक्तं ब्रह्मदत्तनिवेशने।
पूजन्या सह संवादं ब्रह्मदत्तस्य भूमदेः॥
कान्पिल्ये ब्रह्मदत्तस्य अन्तःपुरनिवासिनी।
पूजनी नाम शकुनिर्दीर्घकालं सहोषिता॥
रतज्ञा सर्व्वभूतानां यथा वै जीवजीवकः।
सर्व्वज्ञा सर्व्वतत्त्वज्ञा तिर्य्यग्योनिं गतापि सा॥
अभिप्रजाता सा तत्र पुत्रमेकं सुवर्च्चसम्।
समकालञ्च राज्ञोपि देव्यां पुत्रो व्यजायत॥
तयोर्द्वे ज्ञतज्ञा सा खेचरी पूजनी सदा।
समुद्रतीरं सा गत्वा स्वालहारं फलद्वयम्॥
पुष्टार्थञ्च स्वपुत्रस्य राजपुत्रस्य चैव ह॥
फलमेकं सुतायादात्फलपुत्राय चापरम्।
अन्तर्धानाद्गतं बलेर्जीवितस्य बलम्॥
आदायादाय सैवाशु तयोः प्राणान् पुनःपुनः।
ततोऽगच्छत् परां दृष्टिं राजपुत्रः फलाप्रणात्॥"
इत्यादि तत्रैवाध्याये विस्तरश्चो द्रष्टव्यम्॥)
पूजा, स्त्री. (पूजनमिति। पूज+"सिन्निपूजिकथिकुम्बिचर्च्चश्च।" ३। ३। १०५। इति अङ्। ततष्टाप्।) पूजनम्। तत्पर्य्यायः। नमस्या २ अपचितिः ३ सपर्य्या ४ अर्च्या ५ अर्हणा ६। इत्यमरः। २। ७। ३५॥ मुनिः ७। इति शब्दरत्नावली॥ (यथा, रामायणे।१।५१।५।
"अपि रामे महाभागा मम माता यशस्विनी।
वन्देरमाहरत् पूजां पूजार्हे सर्व्वदेहिनाम्॥")
तस्याः सामान्यानुष्ठानं यथा,—
"आदाद्यन्तिकस्थानः करन्यासस्ततः परम्।
अङ्गुलिन्यासकन्यासौ हृदादिन्यास एव च॥
तालत्रयञ्च दिग्बन्धः पात्रासादनतः परम्।
ध्यानं पूजा जपश्चैव सर्व्वतन्त्रेष्वयं विधिः॥"
इति तन्त्रसारे यामलः॥
भक्तिविषये चतुःषष्टिप्रकारा यथा,—
आसनादीयम् १ मुखनिर्म्मलाभ्यङ्गः २ मज्जनशालाप्रवेशनम् ३ मज्जनमणिपीठोपवेशनम् ४ दिव्यस्नानीयम् ५ उद्वर्त्तनम् ६ उष्णोदकस्नानम् ७ कनककलसस्थितसकलतीर्थाभिषेकः ८ धौतवस्त्रपरिमार्জ্জনम् ९ अरुणदुकूलपरिधानम् १० अरुणदुकूलोत्तरीयम् ११ आवेषमण्डपप्रवेशनम् १२ आवेषमणिपीठोपवेशनम् १३ चन्दनागरुकुङ्कुमकर्पूरकस्तूरीरोचनादिदिव्यसर्व्वाङ्गानुलेपनम् १४ केशभारस्य कालागुरुधूपमल्लिकामालतीजातीचम्पकाशोकशतपत्रपूगकङ्कोलीपुन्नागकञ्जारबृहीसर्व्वर्तुकुसुममालाभूषणम् १५ भूषणमण्डपप्रवेशनम् १६ भूषणमणिपीठोपवेशनम् १७ नवमणिमुकुटम् १८ चन्द्रशकलम् १९ सीमन्तसिन्दूरम् २० तिलकरत्नम् २१ कालाञ्जनम् २२ कर्णयोर्युगलम् २३ नासाभरणम् २४ अधररागकः २५ वचनभूषणम् २६ कनकचित्रवलयम् २७ मणिवलयम् २८ मुक्तावलिः २९ एकावलिः ३० देवच्छन्दकः ३१ त्रिसरयुगलचतुष्टयम् ३२ वक्षोवलिः ३३ कञ्चिकावलिः ३४ कार्पीदाम ३५ कटिसूत्रम् ३६ शोभाभरणम् ३७ माङ्गल्यसूत्रम् ३८ रत्नमूपुरम् ३९ मणिमूपुरीयकम् ४० रत्नकरी

प्राग्रः ४१ अन्यकरेऽङ्कुशम् ४२ इतरकरे पुष्पेक्षुचापः ४३ अपरकरे पुष्पबाणाः ४४ श्रीमन्माणिक्यपादुका ४५ स्वसमानवेशास्त्रावरणदेवताभिः सह सिंहासनारोहणम् ४६ कामेश्वरपर्यङ्कोपवेशनम् ४७ अष्टताम्बूलचषकम् ४८ आचमनीयम् ४९ कर्पूरवटिका ५० आनन्दोल्लासविलासहासम् ५१ मङ्गलारात्रिकम् ५२ श्वेतच्छत्रम् ५३ चामरयुगलम् ५४ दर्पणः ५५ तालवृन्तम् ५६ गन्धः ५७ पुष्पम् ५८ धूपः ५९ दीपः ६० नैवेद्यम् ६१ पुनराचमनीयम् ६२ ताम्बूलम् ६३ वन्दनञ्च ६४। इति तन्त्रसारे सिद्धयामलः॥ * ॥ षट्त्रिंशदुपचारा यथा,—

"आसनाभ्यञ्जने तद्वदुद्वर्त्तननिरूक्षणे।
सम्मार्जनं सर्पिरादिस्नपनावाहने तथा॥
पाद्यार्घ्याचमनीयञ्च स्नानीयमधुपर्ककौ।
पुनराचमनीयञ्च वस्त्रयज्ञोपवीतके॥
अलङ्कारो गन्धपुष्पधूपदीपास्तथैव च।
ताम्बूलादिकनैवेद्यं पुष्पमाला तथैव च॥
अनुलेपनञ्च मुद्रया च चामरव्यजनन्तथा।
आदर्शदर्शनञ्चैव नमस्कारोऽथ नर्त्तनम्॥
गीतवाद्ये च गानानि स्तुतिहोमप्रदक्षिणम्।
दन्तकाष्ठप्रदानञ्च ततो देवविसर्जनम्।
उपचारा इमे ज्ञेयाः षट्त्रिंशत् सुरपूजने॥"

इत्येकादशीतत्त्वम्॥

अष्टादशोपचारा यथा,—

"आसनं स्वागतं पाद्यमर्घ्यमाचमनीयकम्।
स्नानं वस्त्रोपवीतञ्च भूषणानि च सर्व्वशः॥
गन्धं पुष्पं तथा धूपं दीपमन्नञ्च दर्पणम्।
माल्यानुलेपनञ्चैव नमस्कारविसर्जने॥
अष्टादशोपचारैस्तु मन्त्री पूजां समाचरेत्॥"

अथ षोड़शोपचाराः।

"पाद्यमर्घ्यं तथाचामं स्नानं वसनभूषणे।
गन्धपुष्पधूपदीपनैवेद्याचमनन्ततः॥
ताम्बूलमर्चनं स्तोत्रं तर्पणञ्च नमस्क्रिया।
प्रपूजयेत् प्रपूजायां उपचारांस्तु षोड़श॥"

(अन्यप्रकारषोड़शोपचारा यथा,—

"आसनं स्वागतं पाद्यमर्घ्यमाचमनीयकम्।
मधुपर्काचमनीस्नानं वसनाभरणानिच।
गन्धपुष्पधूपदीपनैवेद्यं वन्दनन्तथा॥")

अथ दशोपचाराः।

"पाद्यमर्घ्यं तथाचामं मधुपर्काचमनन्तथा।
गन्धादयो नैवेद्यान्ता उपचारा दश क्रमात्॥"

अथ पञ्चोपचाराः।

"गन्धादयो नैवेद्यान्ताः पूजाः पञ्चोपचारिकाः॥"

इति तन्त्रसारः॥

अनुष्ठानादेः पूजानिषेधमाह।

"अनुष्ठितिर्न महामायां पूजयेत्तु कदाचन।
अवश्यन्तु स्मरेन्नित्यं सोऽतिभक्तियुतो नरः॥
दन्तरक्ते सशुल्पन्ने स्मरणञ्च न विद्यते।
सर्व्वेषामेव मन्त्राणां स्मरणान्नरकं व्रजेत्॥
जानूर्द्ध्वं यदि जाते नित्यकर्म्म न चाचरेत्।
नैमित्तिकञ्च तदधःस्रवस्रावो न चाचरेत्॥

लोतके च शवोत्पन्ने क्षुरकर्म्मणि मैथुने।
धूमोद्गारे तथा वान्तौ नित्यकर्म्माणि संत्यजेत्॥
श्रद्धे भुक्ते त्वजीर्णे च नैव भुक्ता च किञ्चन।
कर्म्म कुर्य्यान्नरो नित्यं सूतके मृतके तथा॥
पत्रं पुष्पञ्च ताम्बूलं भेषजत्वेन कल्पितम्।
कणादिपिण्याकान्तञ्च फलं भुक्ता न चाचरेत्॥
जलस्थापि नरश्रेष्ठ! भोजनाद्भेषजादृते।
नित्यक्रिया निवर्त्तेत सह नैमित्तिकैः सदा॥
जलौकां गूढ़पादञ्च क्रमिगण्डूपदादिकम्।
कामाद्भक्षेन संस्पृश्य नित्यकर्म्माणि संत्यजेत्॥
विशेषतः शिवापूजां प्रमीतपितृको नरः।
यावदत्सरपर्य्यन्तं मनसापि न चाचरेत्॥
महागुरुनिपाते तु काम्यं किञ्चिन्न चाचरेत्।
आर्त्विज्यं ब्रह्मयज्ञञ्च आद्धं दैवयुतञ्च यत्॥
गुरुमाचम्य विप्रञ्च प्रक्षाल्यैव च पाणिना।
न कुर्य्यान्नित्यकर्म्मेाणि रेतःपाते च भैरव!॥
आसनञ्चार्घ्यपात्रञ्च भग्नमासादयेन्न यत्।
ऊषरे क्रमिसंयुक्ते स्थाने दृष्टेऽपि नार्च्चयेत्॥
नीचैरासाद्य तत्स्थानं शुचिः प्रयतमानसः।
अर्च्चयेच्चण्डिकां देवीं देवमन्यञ्च भैरव!॥
दिग्विभागे तु कौबेरी दिक् शिवाप्रीतिकारिणी।
तस्मात्तन्मुखमासीनः पूजयेच्चण्डिकां सदा॥"

पूजास्थानानि यथा,—

"लिङ्गस्थां पूजयेद्देवीं पुस्तकस्थां तथैव च।
स्थण्डिलस्थां महामायां पादुके प्रतिमासु च॥
चित्रे च चिह्निते खड्गे जलस्थां वापि पूजयेत्।
पद्माग्रदक्षुलं खड्गं चिह्नितञ्च चिन्मूलकम्॥
शिलायां पर्व्वतस्याग्रे गङ्गायामपि तत्समा।
आर्य्यावर्त्ते मध्यदेशे तथा पर्व्वतगह्वरे॥
देवीं संपूजयेन्नित्यं भक्तिश्रद्धासमन्वितः।
वाराणस्यां सदा पूजा सम्पूर्णफलदायिनी॥
ततस्तु द्विगुणा प्रोक्ता पुरुषोत्तमसन्निधौ।
ततोऽपि द्विगुणा प्रोक्ता द्वारवत्यां विशेषतः॥
सर्व्वत्रैवेषु तीर्थेषु पूजा द्वारवतीसमा।
विन्ध्ये शतगुणा प्रोक्ता गङ्गायामपि तत्समा॥
आर्य्यावर्त्ते मध्यदेशे ब्रह्मावर्त्ते तथैव च।
विन्ध्यवत्फलदा पूजा प्रयागे पुष्करे तथा॥
ततश्चतुर्गुणं प्रोक्तं कुरुतोयानदीजले।
तस्माच्चतुर्गुणफला नन्दिकुण्डे च भैरव!॥
तस्माच्चतुर्गुणा प्रोक्ता जल्पेशेश्वरसन्निधौ।
तत्र सिद्धेश्वरीयोनौ ततोऽपि द्विगुणा स्मृता॥
ततश्चतुर्गुणा प्रोक्ता लौहित्यनदपार्श्वतः।
तत्समा कामरूपे तु सर्व्वत्रैव जले स्थले॥
सर्व्वश्रेष्ठो यथा विष्णुर्लक्ष्मीः सर्व्वोत्तमा यथा।
देवीपूजा तथा श्रेष्ठा कामरूपे सुरालये॥
देवीचैत्यं कामरूपं विद्यतेऽन्यत्र तत्समम्।
अन्यत्र विरला देवी कामरूपे गृहे गृहे॥
ततः शतगुणं प्रोक्तं नीलकूटस्य मस्तके।
ततोऽपि द्विगुणं प्रोक्तं हेरुके शिवलिङ्गके॥
ततोऽपि द्विगुणा प्रोक्ता शैलपुत्र्यादियोनिषु।
ततः शतगुणं प्रोक्तं कामाख्यायोनिमण्डले॥"

इति कालिकापुराणे ।५४।५७। अध्यायौ॥

पूजासनानि तत्फलानि च यथा,—

"उपविश्यासने रम्ये कृष्णाजिनकुशोत्तरे।
राङ्कवे कम्बले वापि काशादौ व्याघ्रचर्म्मणि॥
न कुर्य्यादर्च्चनं विष्णोः शिवे काष्ठासनादिषु।
काष्ठासने वृथा पूजा पाषाणे रोगसम्भवः॥
भूम्यासने भवेन्निर्ऋद्धिः वस्त्रासने दरिद्रता।
कुशासने ज्ञानवृद्धिः कम्बले सिद्धिरुत्तमा॥
कृष्णाजिने धनी पुत्री मोक्षः स्याद्व्याघ्रचर्म्मणि।
मन्त्रयोगं प्रकुर्व्वीत भोगार्थं सुखमासने॥"

इति पाद्मोत्तरखण्डे ७४ अध्यायः॥

पूजाधिकारिता प्रयोजकदेवषट्कपूजा यथा,—

"गणेशञ्च दिनेशञ्च वह्निं विष्णुं शिवं शिवाम्।
संपूज्य देवषट्कञ्च सोऽधिकारी च पूजने॥
गणेशं विघ्ननाशाय निष्पापाय दिवाकरम्।
वह्निं शुद्धाय विष्णुञ्च मुक्तये पूजयेन्नरः॥
शिवं ज्ञानाय ज्ञानेशां शिवाञ्च बुद्धिवृद्धये।
संपूज्य तान् लभेत् प्राज्ञो विपरीतमतोऽन्यथा॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ८ अध्यायः॥

द्वादशमासे विष्णुपूजाविधिर्यथा,—

"प्रत्यहं कार्त्तिके मासि जातीपुष्पैः समर्घयेत्।
दद्यादखण्डदीपञ्च नियतात्मा दृढ़व्रतः।
ब्राह्मणान् भोजयित्वाथ सहस्रायुष्यमाप्नुयात्॥
मार्गशीर्षे बकाग्रेण बकपुष्पैश्च केशवम्।
समर्च्च्य भोजयेद्विप्रान् वैकुण्ठपदमाप्नुयात्॥
धनुष्युषसि देवेशं मासमेकं निरन्तरम्।
अर्च्चयेदुपवासैश्च करवीरैः सिताम्बुजैः॥
धूपैर्दीपैश्च नैवेद्यैर्यथाशक्त्या निवेदयेत्।
समाप्तौ भोजयेद्विप्रान् महाभागवतोत्तमान्॥
अश्वमेधसहस्रस्य फलमाप्नोत्यसंशयः॥
तपोमासे तथा नित्यं स्नात्वा नद्यां विशेषतः।
अर्च्चयेन्माधवीपुष्पैरुत्पलैश्च शुभानने!॥
पायसं विविधं दिव्यं भक्त्या तत्र निवेदयेत्।
मासान्ते वैष्णवान् विप्रान् भोजयेत् भक्तितो द्विजः॥
तपस्ये च तथा देवि! माधवेः कुसुमैः शुभैः।
स्नात्वा संपूजयेद्विष्णुं मासमेकं निरन्तरम्॥
शर्करासु घृतं नित्यमूपांश्च निवेदयेत्।
वैष्णवान् भोजयेच्छ्रद्धया मासान्ते शुभदर्शने!॥
मधुमासि तथा नित्यं वकुलैश्चम्पकैरपि।
पूजयेच्च्युतामीशं गुड़ान्नञ्च! निवेदयेत्॥
मासान्ते वैष्णवान् विप्रान् भोजयेत् सुसमाहितः।
सहस्रवार्षिकं पूजाफलं नित्यमवाप्नुयात्॥
माधवे पूजयेद्विष्णुं घृतपद्मैर्मधूत्पलैः।
पूजयित्वा विधानेन दध्यन्नफलसंयुतम्॥
गुड़ोदकञ्च भक्त्या वै तस्मिन् देवि! निवेदयेत्।
लक्ष्म्या युक्तो जगन्नाथः प्रीतो भवति पार्व्वति!॥
ज्येष्ठे तु शुक्लकमलैः पाटलैः कुसुमोत्पलैः।
अर्च्चयित्वा हृषीकेशमन्नं चूतफलैर्युतम्॥
निवेदयित्वा भक्त्या वै गवां कोटिप्रदो भवेत्।
वैष्णवान् भोजयेन्नित्यं मासान्ते भक्तसत्तमः।
ब्राह्मणांश्च शिवे! सर्व्वं फलमानन्त्यमश्नुते॥

आषाढे देवतार्घार्थं लक्ष्मीभर्तारमद्भुतम् ।
औदुम्बरैर्घटैर्नित्यं पायसान्नं निवेदयेत् ॥
मासान्ते भोजयेद्विप्रान् महाभागवतोत्तमान् ।
यष्टिर्यज्ञस्य पूजां प्राप्नोत्यसंशयम् ॥
नभोमासार्घदेवेशं पुन्नागैः केतकीदलैः ।
अर्घयित्वाच्युतं भक्त्या न भूयो जन्मभाग्भवेत् ॥
दद्याद्वै पिष्टकान् भक्त्या शर्करासर्पिरन्वितान् ।
ब्राह्मणान् भोजयित्वा तु सर्वमानन्त्यमश्नुते ॥
नभस्यार्घार्चनेदीशं तुलसीदलैरपि ।
क्षीरान्नं गुडसंमिश्रन्तु भक्त्या तत्र निवेदयेत् ।
गवां कोटिप्रदानस्य प्रत्यहं समवाप्नुयात् ॥
इषे नीलोत्पलैर्मासि पूजयेन्मधुसूदनम् ।
भक्त्या निवेदयेत्तस्मिन् क्षीरमाज्यविमिश्रितम् ॥
कन्याकोटिसहस्राणि कन्याकोटिशतानि च ।
वैष्णवं लोकमाप्नोति मुदितः स्वजनैर्वृतः ॥
कार्त्तिके सर्वमासे तं देवि ! कोमलैस्तुलसीदलैः ।
पूजयित्वाच्युतं भक्त्या तत्सायुज्यमवाप्नुयात् ॥"

इति पाद्मोत्तरखण्डे ७५ अध्यायः ॥

द्वादशमासादौ दुर्गापूजादि देवीपुराणे द्रष्टव्यम् ॥

अथ देवपूजाविधिः ।

स्नातः स्नानासमर्थो वार्द्रवाससा क्षतगात्रमार्ष्णादिगृहसमीपं गत्वा प्राङ्मुख उदङ्मुखो वा प्रक्षालितपादः ऋषिर्दिवाचः कृशकरः साधान्तः सर्वत्र वीरासनोपविष्टः प्राङ्मुखः रात्रावुदङ्मुख एव मौनी ध्यानपरायणः कामरागभयक्रोधमात्सर्यत्वरारहितसज्जनः सुमना वा शुचौ चतुष्पथविशोधितभद्रगन्धरहिते देशे दक्षिणपार्श्वे नैवेद्यादुपकरणानि च वामपार्श्वे जलं पुरतो धूपदीपौ ताम्रादिपात्रेषु यथासन्निवेशं पाद्यार्घ्याचमनीयमात्रं षडङ्गादिपूर्णमभ्यतः स्थापयित्वा यथालाभं यज्ञोपवीतवस्त्रालङ्करणादि संस्थाप्य ।

ॐ अपसर्पन्तु ते भूता ये भूता भूमिपालकाः ।
भूतानामविरोधेन पूजाकर्म करोम्यहम् ॥

इत्युच्चार्य स्वस्त्राय फडिति तर्जन्यङ्गुष्ठयोगध्वनिश्लोटिकया दशदिग्बन्धनं कुर्यात् ॥ * ॥

नादेयो देवमर्घपेदित्यनुरोधात् सर्वदेवार्घपेषु भूतशुद्धिमाकुरागमिकाः । सा यथा,—

सोऽहमिति मन्त्रेण जीवात्मानं नाभितो हृदिस्थपरमात्मनि संयोज्य ततः पृथिवीं जले जलं तेजसि तेजो वायौ ततो वायुमाकाशे प्रवेश्य दक्षिणाङ्गुष्ठेन दक्षिणनासापुटं धृत्वा यमिति वायुबीजेन षोडशवारजपेन वायुकर्षणरूपपूरकसंज्ञया वायुचिन्तनरूपया वाय्वाधारतया देहं शोषयित्वा ततो नासापुटावङ्गुष्ठानामिकाभ्यां धृत्वा रमिति वह्निबीजेन चतुःषष्टिवारजपेन सम्भवरूपकुम्भकसंज्ञया वह्निचिन्तनरूपया साग्नेया धारणया देहं दाहयित्वा रमितीन्द्रबीजेन तर्जनिध्रुवाभ्यां नासापुटेन वायुनिःसारणरूपया रेचकसंज्ञया ऐन्द्र्यधारणरूपया ऐन्द्र्याधारतया स्थिरीकृत्य वमिति वरुणबीजेन चतुःषष्टिवारजपेन जलाधिपध्यानरूपया जलाधिपधारणया चन्द्रमण्डलादमृतं स्रावयित्वा तेनाप्लाव्य प्रयत्नेन सर्वाङ्गं संघटितं पुनर्नवीभूतं चिन्तयित्वा वायुादिभूतानि स्वोमादिभ्यो विपरीतक्रमेण यथिः कृत्वा हंस इति मन्त्रेण परमात्मतो जीवं नाभिपद्मे न्यसेत् ॥ * ॥

तत ऋष्यादिन्यासः ।

गोपालमन्त्रे तु नारदाय ऋषये नमः शिरसि । गायत्रीच्छन्दसे नमो मुखे । श्रीकृष्णाय देवाय नमो हृदि । एवमन्यत्रोह्यम् ॥ * ॥

ततः प्राणायामः ।

तत्रामूलमन्त्रेण षोडशवारजपेन अङ्गुष्ठेन दक्षिणनासापुटं धृत्वा वामनासया वायुं पूरयेत् । अङ्गुष्ठानामिकाभ्यां नासापुटौ धृत्वा चतुःषष्टिवारजपेन वायुं कुम्भयेत् । वामनासानामिकाभ्यां धृत्वा दक्षिणनासया द्वात्रिंशद्वारजपेन वायुं त्यजेत् । पुनर्दक्षिणनासया पूरयेत् । उभाभ्यां कुम्भयेत् । वामनासया रेचयेत् । पुनर्वामया पूरयेत् । उभाभ्यां कुम्भयेत् । दक्षिणया रेचयेदिति ॥ * ॥

ततो वाङ्मयाढकान्यासः । न्यासशब्दे द्रष्टव्यः ॥ अनेकदेवपूजने तु भूतशुद्धिमाढकान्यासयोरविशेषात् सकृदेवानुष्ठानम् ॥ * ॥

ततः करन्यासः ।

यथा गोपाले । ॐ क्रां अङ्गुष्ठाभ्यां नमः अङ्गुष्ठयोः । ॐ क्रीं तर्जनीभ्यां स्वाहा तर्जन्योः । ॐ क्रूं मध्यमाभ्यां वषट् मध्यमयोः । ॐ क्रैं अनामिकाभ्यां हूं अनामिकयोः । ॐ क्रौं कनिष्ठाभ्यां वौषट् कनिष्ठयोः । ॐ क्रः करतलपृष्ठाभ्यां फट् करतलपृष्ठयोः । एवमन्यत्रापूह्यम् ॥

ततोऽङ्गन्यासः ।

ॐ क्रां हृदयाय नमः हृदये दक्षतलेन । ॐ क्रीं शिरसे स्वाहा अङ्गुष्ठाङ्गुलिभिः शिरसि । ॐ क्रूं शिखायै वषट् अधोमुखाङ्गुलिमुद्रिता शिखायाम् । ॐ क्रैं कवचाय हूं वक्षःकरतलाभ्यां आशिरःपादपर्यन्तरूपसर्वाङ्गे । ॐ क्रौं नेत्राभ्यां वौषट् तर्जनीमध्यमाभ्यां नेत्रयोः । ॐ क्रः अस्त्राय फट् ऊर्ध्वधक्तालत्रयं क्षोटिकाभिर्दशदिग्बन्धनञ्च कुर्यात् । एवमन्यत्रापूह्यम् । आगमोक्तादिपूजने तु भूतशुद्ध्यादिनियमः अन्यत्र त्वनियमः ॥ * ॥

ततोऽर्घ्यस्थापनम् ।

वामतोऽर्घ्यपात्रादाचमनीयपात्राणि संस्थाप्य अर्घ्यपात्रं जलगन्धपुष्पैः संपूर्य तत्तद्देवतामूलमन्त्रं सर्वदेवतासाधारणे तु प्रत्यूहं वा अष्टधा जप्त्वा धेनुमुद्रया अमृतीकृत्य तदुदकं पात्रान्तरे किञ्चित् कृत्वा तेनोदकेनात्मानं पूजोपकरणञ्चाभ्युक्षयेत् । प्रत्यादित्यसर्वदेवतायै चतुर्थ्यन्तनाम्ना नमोऽन्तेन मूलमन्त्रेण वा आत्मानं गन्धादिभिरभ्यर्च्य तद्धृतं धात्वा तत्पात्रमग्रे चन्दनादिरचितवेदतदग्रे वर्गोधनान्तदेवतानाम्ना इहागच्छेत्यावाह्य स्थापयित्वा मूलेन चतुर्थ्यन्तनाम्ना आसनं दत्त्वा सम्बोधनान्तनाम्ना स्वागतं ते इति पृच्छेत् । दीक्षितस्तु मूलमन्त्रमाद्यं प्रणवादिचतुर्थ्यन्तनाम्ना नमोऽन्तेन दद्यादिति विशेषः । एवं पाद्यार्घ्याचमनीयादीनि दद्यात् । पाद्यार्घ्ययोः पौर्वापर्ये त्वनियमः । ततो घृतमधुदधिमेलकपलमितं कांस्यपात्रस्थं पिहितञ्च मधुपर्कं पुनराचमनीयञ्च दद्यात् । ततो लौकिकयष्ट्यधिकघृतत्रयतोलकान्यूनवैदिकाष्टोत्तरशतपलान्यूनजलेन तदभावे षष्टिरिक्तकमासद्वयाधिकत्रयोदशतोलकरूपवैदिकपलचतुष्टयान्यूनजलेन इदं स्वानीयं एवं दुग्धादिनापि । घृतादिस्नाने तु गन्धद्रव्यचूर्णकविरूक्षयसुशोदकेन स्नानं स्नाप्यं ततः पुनराचमनीयं वाससी पुनराचमनीयं दद्यात् । प्रत्येकमलङ्कारं यज्ञोपवीतं गन्धं पुष्पं धूपं दीपं नैवेद्यं पुनराचमनीयं ताम्बूलं दत्त्वा मूलमन्त्रं यथाशक्ति जप्त्वा समर्प्य च प्रदक्षिणीकृत्य अष्टाङ्गप्रणिपातेन पञ्चाङ्गप्रणिपातेन वा शिरसि करद्वयसंयोगेन च प्रणम्य स्तुत्वा प्रणवादिसम्बोधनान्तनाम्ना क्षमस्वेति विसर्जयेत् । यत्र षडुपचारद्रव्यासम्भवस्तत्रार्घे जलं देयम् । प्रतिष्ठितस्थिरतरप्रतिमायां तत्तदावाहनविसर्जने न स्तः । एवं शालग्रामे जले वा सर्वदेवपूजनेऽपि यथालाभं पाद्यादिदशोपचारैः । गन्धपुष्पधूपदीपनैवेद्यैः पञ्चोपचारैः गन्धपुष्पाभ्यां वा केवलेन पुष्पेण केवलेनाक्षतेन केवलेन जलेन मानसिकेन वा पूजयेत् । तत्र सामान्यदेवताधूपः शारदायाम् ।

सगुग्गुल्वगुरुक्षीरशर्करामधुचन्दनैः ।
धूपयेदाज्यसंमिश्रैर्नीलैर्देवाय दैशिकः ॥
एतैर्मिलितैर्यथालाभं वा । इति सर्वदेवतासाधारणो विधिः ॥ * ॥

ततः प्रथमं सूर्यपूजा ।

ॐ सूर्यायनमः इति पूजयेत् । तत्र मन्त्राः । चन्दनागुरुकर्पूरवीरचम्पकमल्लिकाकोरक्तचन्दनानि । पुष्पाणि । मल्लिकामालतीकरवीरचम्पकपाटलावकुलनगरपीतझिण्टीकुन्दनवमल्लिकाशोकपद्मागस्त्यजवापुष्पाणि विहितानि । तुलसीकृष्णतुलसीदूर्वाबिल्वपत्राणि राजिताकाशोकदलनगरसुन्दराणि निषिद्धानि । धूपाश्च । गुग्गुल्वगुरुदेवदारुबिल्वानि । दीपस्तु घृतेन तैलेन वा । नैवेद्यानि विविधभक्ष्याणि ॥ * ॥

अथ गणेशपूजा ।

तदावाहने । ॐ भूर्भुवःस्वर्गणेश इहागच्छ इति दूर्वापुष्पाक्षतैरावाह्य ॐ गणेशाय नमः इत्यनेन पूजयेत् । तत्र तुलसी निषिद्धा । रक्तचन्दनरक्तपुष्पादिकं विहितम् । देवतान्तरप्रसिद्धं अन्यत् शुक्लादिकं न देयम् ॥ * ॥

अथ दुर्गापूजा ।

ॐ भूर्भुवःस्वर्दुर्गे इहागच्छ इति पुष्पाक्षतैरावाह्य ॐ दुर्गायै नमः इत्यनेन पूजयेत् । तत्र

गन्धाः चन्दनागुरुकर्पूरकुङ्कुमानि। पुष्पाणि मल्लिकोत्पलपुन्नागशमीचम्पकाशोककर्णिकारकरवीरतुलसीविल्वपत्रादीनि विहितानि। सकुलार्कमन्दारपुष्पाणि निषिद्धानि। धूपाः कृष्णागुरुसहितघृतमधिष्ठाच्चगुग्गुलुविल्वान्यतमानि वीरमूलचन्दनेऽपि। दीपस्तु घृतेन तैलेन वा। नैवेद्यानि आम्रनारिकेलखर्ज्जूरकदलीबीजपूरादीनि। क्षयितं विद्धं फलं निषिद्धम्। यत्रपक्वकदलीफलमपि विहितम्॥ * ॥

अथ शिवपूजा।

उदङ्मुखः ॐ नमः शिवाय नमः इति मन्त्रेण पूजयेत्। तत्र गन्धः अगुरुचन्दने। पुष्पाणि च अर्कककरवीरजातीवकुलपाटलाश्वेतमन्दारनागकेशरचम्पक-धुस्तूरविल्वामलक-तुलसीपत्राणि विहितानि। केतकीमाधवीपुष्पकुन्दयूथीमदन्तिकाशिरीषसर्जवन्यूकसुकुलमात्राणि निषिद्धानि। धूपस्तु घृतगुग्गुलुविल्वफलानि उशीरागुरुचन्दनानि च। दीपस्तु घृतेन तैलेन सर्षपादिना वा। नैवेद्यानि गुड़खण्डघृतपक्वमातुलुङ्गफलादीनि॥ * ॥

अथ पार्थिवशिवलिङ्गपूजाविधिः।

ॐ हराय नम इति हृदाहरणम्। ॐ महेश्वराय नम इति वटनम्। ॐ शूलपाणे इह सुप्रतिष्ठितो भव इति प्रतिष्ठा। आचारात् ध्यायेन्नित्यमिलादिना शारदोक्तं ध्यायेत्। पिनाकधृक् इहागच्छ इत्यावाहनम्। ॐ पशुपतये नम इति स्नपनम्। एतत् पाद्यं ॐ नमः शिवाय नम इति पाद्यादिभिः संपूज्य वामावर्त्तेन वेद्यां प्राच्यादिषु ॐ सर्व्वाय क्षितिमूर्त्तये नमः ॐ भवाय जलमूर्त्तये नमः ॐ रुद्राय अग्निमूर्त्तये नमः ॐ उग्राय वायुमूर्त्तये नमः ॐ भीमाय आकाशमूर्त्तये नमः ॐ पशुपतये यजमानमूर्त्तये नमः ॐ महादेवाय सोममूर्त्तये नमः ॐ ईशानाय सूर्य्यमूर्त्तये नमः। इत्यष्टमूर्त्तीः पुष्पैः पूजयेत्। ततो सुखवादं कृत्वा महादेव क्षमस्वेति संहारमुद्रया विसर्ज्जयेत्। स्त्रीशूद्रस्तु नमः शिवायेति मन्त्रेण पूजयेत्॥ * ॥

अथ विष्णुपूजा।

शङ्खाद्यर्घ्यपात्रं पुरतो निधाय त्रिभागजलेनापूर्य्य वसेति धेनुमुद्रया अन्तरीकृत्य ॐ विष्णवे नम इत्यष्टधा जपित्वा तेनोदकेनात्मानं पूजोपकरणञ्चाभ्युक्षेत्। दीक्षितस्तु तन्मन्त्रसूचार्घ्यं तन्नाना पूजयेत् अङ्गाद्यावरणञ्च पूजयेत् शालग्रामे मणौ प्रतिमाष्टदलपद्मजलादिषु। तत्र शालग्रामे आवाहनविसर्ज्जने न स्तः। ध्येयः यदेत्यादिना ध्यात्वा ॐ भगवन् विष्णो इहागच्छेत्याद्यचतपुष्पैरावाह्य इदमासनं ॐ श्रीविष्णवे नमः ॐ विष्णो स्वागतमिति पृच्छेत् एतत् पाद्यं ॐ विष्णवे नमः सामगस्तु इदमर्घ्यं ॐ विष्णवे नमः इति वदेत्। तदितरस्तु एषोऽर्घ्य इति विशेषः। तत्र प्रथमं कुशपुष्पाक्षततिलदूर्व्वाचन्दनतोयानि यथालाभं वा सर्व्वपात्रयोस्तु पौर्व्वापर्य्येण नियमः। आचमनीये सुगन्धिद्रव्ययुक्तजलं केवलं वा प्रशस्तजलम्। घृतमधुदध्यात्मको मधुपर्कः तदभावे केवलं वा मधु। पूर्व्ववदिदमाचमनीयं इदं स्नानीयं तत्र लौकिकषडधिकशतत्रयतोलकान्यूनं जलम्। पुनराचमनीयं इदं वस्त्रं पुनराचमनीयं इदमाभरणं पुनराचमनीयं गन्धस्तु अङ्गुष्ठयुक्तकनिष्ठया गन्धमुद्रया तत्र चन्दनागुरुकर्पूरकुङ्कुमवीरमूलपद्मकाष्ठसिक्तरक्तचन्दनकस्तूरिकाजातीफलानि घृष्टानि एतच्चूर्णानि वा एतद्दाहाक्षष्टरसो वा पुष्पाणि च तर्ज्जन्यङ्गुष्ठयोगरूपपुष्पमुद्रया तत्र मल्लिका-मालतीजाती-केतक्यशोक-चम्पकनागकेशरबकुल-पद्मोत्पलतुलसी-विल्वकरवीरपारिभद्रपाटलार्श्वत्थापराजितावहुदलतगरश्वेतजवारक्ताशोकशुक्लपुष्पभूमिचम्पककरवीफालीनवमालिकायूथिकाकदम्बकुन्दलवङ्गमाधवीपुष्पबकवन्यूकङ्करबकबिल्वपुष्प-बहुवारक-कक्कारद्रोणपलाशपुष्पाणि विहितानि। नरसिंहैतरावतारे केतकी निषिद्धा। पर्य्युषितमच्छिद्राघ्रोक्षितस्वयंपतितोपहृतमध्याह्नस्नानोत्तरच्युटितपद्मचम्पकेतरकल्हिकातुलसीतरशुष्कपत्रपरिहित-पुष्पविहितेतररक्तपुष्पचैत्यवृक्षोद्भवप्रसूनजात-कुटज-शालूलीशिरीषपुष्पाणि निषिद्धानि। ब्राह्मणीतरस्त्र्यनोद्भवानि च। विहितपत्राणि तुलसीबिल्वशमीभृङ्गराजतमालामलककेतकीमत्राणि। पद्मकुन्दोत्पलानि पञ्चदिनात् परतः पर्य्युषितानि। तुलस्यगस्त्यबिल्वानि कदापि न पर्य्युषितानि। धूपस्थानञ्च देवस्य वामे पुरतो वा। तर्ज्जन्यङ्गुष्ठयोगरूपधूपमुद्रया वामहस्तेन घण्टां वादयन् देयः। स च भूमौ न देयः। धूपञ्च जटामांसीमधिष्ठाच्चगुग्गुलुकर्पूरागुरुसिक्तकदेवदारुजातीफलशारदोक्तमिश्रितगुग्गुल्वादयः। दीपस्थानं देवस्य दक्षिणतः पुरतो वा। मध्याङ्गुष्ठयोगरूपदीपमुद्रया एष दीपः घृतेन तैलेन वा भूमौ न देयः। नैवेद्यस्थानञ्च देवपृष्ठेतरदेशः। अनामिकाङ्गुष्ठयोगरूपनैवेद्यमुद्रया एतन्नैवेद्यं तत्र कदली-पनस-जम्बूलवनी-करमर्दक-हविःसंस्कृततिलमाषमुद्गयवगोधूमव्रीहिशाल्यन्नं विहितम्। निषिद्धन्तु अजामहिषीक्षीरदधिघृतं पलनखवराह-मत्स्य-खग-छागेतरमांस-हिरण्योदकस्पर्शेतरश्चाण्डालदृष्टविड़ालादुच्छिष्टस्पृष्टाक्तपर्य्युषितेतरभक्ष्यम्। खण्डादीनि यवगोधूमव्रीहिविकाराश्च न पर्य्युषिताः। ततः पुनराचमनीयं ताम्बूलञ्च दत्त्वा अष्टोत्तरसहस्रं शतं दश वा उत्तरीयवस्त्रेण छादितहृदयेन स्थिततिर्य्यग्भूतदक्षिणकरः यथाशक्ति मूलमन्त्रं जपित्वा ॐ गुह्यातिगुह्यगोप्ता त्वं गृहाणास्मत्कृतं जपम्। सिद्धिर्भवतु मे देव! त्वत्प्रसादात् त्वयि स्थिते॥ इत्यर्घोदकेन देवहस्ते जलं दद्यात्। ततोऽर्घ्यशङ्खं गृहीत्वा त्रिः प्रदक्षियीकृत्य,

ध्येयं सदा परिभवघ्नमभीष्टदोहं
तीर्थास्पदं शिवविरिञ्चिनुतं शरण्यम्।

भृत्यार्त्तिहं प्रणतपालभवाब्धिपोतं
वन्दे महापुरुष! ते चरणारविन्दम्॥
व्यक्ता सुरेन्द्रियसुरेङ्गितराध्यलक्ष्मीं
धर्म्मिष्ठ! आर्य्यवचसा यदगादरण्यम्।
मायामृगं दयितयेप्सितमन्वधाव-
द्वन्दे महापुरुष! ते चरणारविन्दम्॥

इति स्तुत्वा ॐ प्रसीद भगवन्निति दक्षपत्प्रथमेत्।

ॐ यत् किञ्चित् क्रियते देव मया सुकृतदुष्कृतम्।
तत् सर्व्वं त्वयि संन्यस्तं त्वत्प्रयुक्तः करोम्यहम्॥
इत्यनेन सर्व्वं समर्पयेत्॥

मन्त्रहीनं क्रियाहीनं भक्तिहीनं जनार्द्दन।
यत् पूजितं मया देव! परिपूर्णं तदस्तु मे॥
इति प्रार्थयेत्॥ ततः संहारमुद्रया निर्म्माल्यपुष्पमादाय भूमौ क्षिपेत् विसर्ज्जनमन्त्रे ॐ भगवन् विष्णो क्षमस्वेति विसर्ज्जयेत् तदमन्त्रे निर्म्माल्यपुष्पमादाय।

ॐ तिष्ठ देव परे स्थाने स्वस्थाने परमेश्वर।
यत्र ब्रह्माद्याः सर्व्वे सुरास्तिष्ठन्ति मे हृदि॥
इति मन्त्रेण देवं हृदि स्थापयेत्। तत ॐ विष्वक्सेनाय नम इति गन्धपुष्पनैवेद्यार्घं दद्यात्। ततो वैष्णवाय तन्निर्म्माल्यं 'अनुलेपनं नैवेद्यञ्च किञ्चिदृत्वा शिरसि निर्म्माल्यं धार्य्यं सर्व्वाङ्गेष्वनुलेपनं कृत्वा यथालाभं पादोदकं नैवेद्यञ्चोपभुञ्जीत। तत्र पादोदकमन्त्रो यथा:।

ॐ क्षमा क्षमा महाबाहो भक्तानामार्त्तिनाशन।
सर्व्वपापप्रशमनं पादोदकं प्रयच्छ मे॥
ततस्तत्पानादौ परोदितदेवतानाम स्मृत्वा स्वयं शिरश्चार्घ्यं पादोदकं पीत्वा तच्छेषम्।
अकालमृत्युशमनं सर्व्वव्याधिविनाशनम्।
विष्णोः पादोदकं पुण्यं शिरसा धारयाम्यहम्॥
इति शिरसि धारयेत्। नैवेद्यभक्षणे मन्त्रः।
ॐ उच्छिष्टभोजिनस्तस्य वयमुच्छिष्टकाङ्क्षिणः।
येन लीलावराहेण शिरस्याखो निपातितः॥
इत्युच्चार्य्य भक्षयेत्॥ * ॥ यथालाभं दशोपचारैर्वा पूजयेत्। तत्र दशोपचाराः। अर्घ्यपाद्याचमनीयमधुपर्काचमनगन्धपुष्पधूपदीपनैवेद्यानि। पञ्चोपचाराः। गन्धपुष्पधूपदीपनैवेद्यानि। गन्धपुष्पाभ्यां वा केवलपुष्पेण केवलजलेन वा पूजयेत् ततोऽग्निहोत्रसरस्वतीलक्ष्मीणां पूजनम्। इत्याह्निकप्रयोगतत्त्वम्॥ * ॥ तन्त्रोक्तसामान्यपूजा कलावतीशब्दे द्रष्टव्या॥

पूजार्हः, त्रि, (पूजामर्हतीति। पूजा+अर्ह+"अर्हः।" ३।२।१२। इत्यच्।) पूजायोग्यः। मान्यः। इति शब्दरत्नावली॥ (यथा, मनुः। ६।२६।

"प्रजनार्थं महाभागाः पूजार्हा गृहदीप्तयः।
स्त्रियः श्रियश्च गेहेषु न विशेषोऽस्ति कश्चन॥")

पूजितः, त्रि, (पूज+क्तः।) प्राप्तपूजः। अर्चितः। तत्पर्य्यायः। अर्चितः २। इत्यमरः। ३।१।८८॥ (यथा, भट्टिः। ४।१।

पूतिक

आजग्धोभाञ्जनजलैर्भावयेच्च पुनः पुनः ।
शिग्रुमूलेन कैतक्या: पुष्पपत्रपुटे च तम् ॥
पचेदेवं विशुद्धः सन् नष्टगनाभिसमो भवेत् ॥"
इति वैद्यकचक्रपाणिसंग्रहे वातव्याध्यधिकारे ॥

दुर्गन्धविशिष्टे, त्रि। यथा, भगवद्गीतायाम्।
१७। १०।
"यातयामं गतरसं पूति पर्य्युषितञ्च यत् ।
उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम् ॥")

पूतिकं, क्ली, (पूत्या दुर्गन्धेन कायतीति। कै+क:।) विष्ठा। इति राजनिर्घण्टः॥ (दुर्गन्धविशिष्टे, त्रि। यथा, महाभारते।१३।६।१२।
"किं त्वया पापकं पूर्व्वं कृतं कर्म्म सुदारुणम्।
यस्त्वं श्मशाने मृतकान् पूतिकानत्सि कुत्सितान् ॥")

पूतिकः, पुं, (पूत्या कायतीति। कै+कः।)
पूतिकरञ्जवृक्षः। इत्यमरः। २। ४। ४८॥
(अस्य पर्य्यायादिकं पूतिकरञ्जशब्दे द्रष्टव्यम्॥)

पूतिकरजः, पुं, (पूतियुक्तः करजः।) करञ्जभेदः।
इत्यमरः।२।४।४८॥ यथा, "अथ कटुकरञ्जघोराकरञ्जनामगुणाः।
करञ्जो नक्तमालश्च करञ्जश्चिरबिल्वकः।
घृतपूर्णकरञ्जोऽन्यः प्रकीर्य्यः पूतिकोऽपि च॥
स चोक्तः पूतिकरजः सोमवल्कश्च स स्मृतः।
करञ्जः कटुकस्तीक्ष्णो वीर्य्योष्णो योनिदोषहृत्॥
कुष्ठोदावर्त्तगुल्मार्शोव्रणकृमिकफापहः।
तत्पत्रं कफवातार्शःकृमिशोथहरं परम्॥
भेदनं कटुकं पाके वीर्य्योष्णं पित्तलं लघु।
तत्फलं कफवातघ्नं मेहार्शःकृमिकुष्ठजित्॥
घृतपूर्णकरञ्जोऽपि करञ्जसदृशो गुणैः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

पूतिकरञ्जः, पुं, (पूतियुक्तः करञ्जः।) करञ्जविशेषः। नाटाकरञ्ज इति भाषा। कठकरेज इति हिन्दी भाषा। तत्पर्य्यायः। प्रकीर्य्यः २ पूतिकरजः ३ पूतीकरजः ४ पूतिकः ५ पूतीकः ६ कलिकारकः ७ कलिमालकः ८ कफघ्नाग्नः ९। इत्यमरभरतौ॥ प्रकीर्य्यः १० रजनीपुष्पः ११ सुमनाः १२ पूतिकर्णिकः १३ कैडर्य्यः १४ कलिमाल्यः १५। अस्य गुणाः। कटुत्वम्। तिक्तत्वम्। उष्णत्वम्। विषवातार्शिःकफकृमिचर्च्चिकाकुष्ठसर्ग्वत्वगदोषनाशित्वञ्च।
इति राजनिर्घण्टः॥ (अस्य पर्य्यायान्तरं यथा,
"स चोक्तः पूतिकरजः सोमवल्कश्च स स्मृतः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

पूतिकर्णः, पुं, (पूतिर्दुर्गन्धः कर्णो यस्मात्।) कर्णरोगविशेषः। तल्लक्षणं यथा,—
पूतिकर्णमाह।
"कर्णविद्रधिपाकाद्वा स कर्णो वारिपूरणात्।
पूयं स्रवति यत् पूति स ज्ञेयः पूतिकर्णकः॥"
कर्णस्रावहेतुमाह।
पूतीति नियमेन पूति यथा स्यादेवं स्रवति॥
तच्चिकित्सा यथा,—
"कर्णस्रवे पूतिकर्णे तथैव कृमिकर्णके।

पूतिका

सामान्यं कर्म्म कुर्व्वीत योगान् वैशेषिकानपि॥
सर्ज्जिकाचूर्णसंयुक्तबीजपूररसं क्षिपेत्।
कर्णस्रावरुजा दाहास्तेन नश्यन्त्यसंशयम्॥१॥
आम्रजम्बुप्रवालानां मधुकस्य वटस्य च।
रसेषु साधितं तैलं पूतिकर्णगदं हरेत्॥२॥
जातीपत्ररसे तैलं विपक्वं पूतिकर्णजित्॥३॥
घृष्टं रसाञ्जनं नार्य्याः क्षौद्रेण क्षौद्रसंयुतम्।
प्रशस्यते चिरोत्थे तत् स्रावे पूतिकर्णके॥४॥
कुष्ठहिङ्गुवचादारुघृताक्षाविश्वसैन्धवैः।
पूतिकर्णापहं तैलं वस्त्रमूत्रेण साधितम्॥
कुष्ठादितैलम्॥५॥
"शम्बूकस्य तु मांसेन कटुतैलं विपाचयेत्।
तस्य पूरणमात्रेण कर्णनाड़ी प्रशाम्यति॥६॥
चूर्णेन गन्धकशिलारजनीभवेन
सृष्टं शृङ्गेण कटुतैलपलाष्टके तु।
धत्तूरपत्ररसतुल्यमिदं विपक्वं
नाड़ीं जघेचिरभवामपि कर्णजाताम्॥
सृष्टिः पलम्॥७॥
कृमिकर्णविनाशाय कृमिघ्नीं कारयेत् क्रियाम्।
वार्त्ताकुधूमश्च हितः सार्षपस्नेह एव च॥
पूरणं हरितालेन गवाश्मत्रयुतेन च।
धूपने कर्णदौर्गन्ध्ये गुग्गुलुः श्रेष्ठ उच्यते॥"
इति भावप्रकाशः॥
(चिकित्सास्य यथा,—
"निर्गुण्डी स्वरसे तैलं सिन्धुधूमरजो गुड़ः।
पूरणः पूतिकर्णस्य शमनो मधुसंयुतः॥"
इत्युत्तरतन्त्रे एकविंशेऽध्याये सुश्रुतेनोक्तम्॥)

पूतिकर्णकः, पुं, (पूतिः कर्णो यस्मात्। कप्।)
कर्णरोगभेदः। तस्य लक्षणम्। यथा,—
"कर्णविद्रधिपाकाद्वा जायते चाम्बुपूरणात्।
पूयं स्रवति वा पूति स ज्ञेयः पूतिकर्णकः॥"
इति माधवकरः॥
(लक्षणान्तरमस्य यथा,—
"स्थिते कफे स्रोतसि पित्ततेजसा
विलाप्यमाने शृङ्गसम्भृतापवान्।
अवेदनो वाप्यथवा सवेदनो
घनं स्रवेत् पूति स पूतिकर्णकः॥"
इत्युत्तरतन्त्रे विंशेऽध्याये सुश्रुतेनोक्तम्॥)
औषधं यथा,—
"निर्गुण्डी स्वरसे तैलं सिन्धुधूमरजोगुड़ः।
पूरणात् पूतिकर्णस्य शमनो मधुसंयुतः॥"
अथवा।
"वरुणार्द्रकपित्याम्रजम्बूपल्लवसाधितम्।
पूतिकर्णापहं तैलं जातीपत्ररसेन वा॥"
इति चक्रपाणिदत्तः॥
(चिकित्सास्य यथा,—
"घृष्टं रसाञ्जनं नार्य्याः क्षौद्रेण क्षौद्रसंयुतम्।
प्रशस्यते चिरोत्थेऽपि स्रावे पूतिकर्णके॥"
इति चोत्तरतन्त्रे एकविंशतितमेऽध्याये सुश्रुतेनोक्तम्॥)

पूतिका, स्त्री, (पूत्या कायतीति। कै+कः। टाप्।) मार्जारी। इति राजनिर्घण्टः॥

पूतितै

(कीटविशेषः। यथा, पञ्चतन्त्रे। ३। ६६।
"पुलका इव धान्येषु पूतिका इव पक्षिषु।
मशका इव मर्त्तेषु येषां धर्म्मो न कारणम्॥")
लताग्राकविशेषः। इत्यमरटीकायां भरतः॥
पुँइ इति भाषा। अस्याः पर्य्यायगुणौ उपोदकीशब्दे द्रष्टव्यौ॥ द्वादश्यां तद्भक्षणे दोषो यथा। पूतिका ब्रह्मघातिका। यदपि।
'कुसुम्भं नालिकाशाकं वृन्ताकं मौक्तिकीन्तथा।
भक्षयन् पतितस्तु स्यादपि वेदान्तगो द्विजः॥'
इत्युशनसा सामान्यतोऽभिहितम्। अत्र नालिका श्वेतकलम्बीति कल्पतरुः। पूतिका च द्वादश्यामधिकदोषाय शूद्रविषयिका वा।" इति तिथितत्त्वम्॥ (इयं हि सोमांशुतो जातेति सोमस्यालाभे प्रतिनिधित्वेन ग्राह्या। यथा, महाभारते। ३। ३५। ३२।
"अस्ति मासः प्रतिनिधिर्यथा प्राहुर्मनीषिणः।
पूतिकामिव सोमस्य तथेदं क्रियतामिति॥")

पूतिकासुखः, पुं, (पूतिकाया सुखमिव सुखं यस्य।)
शम्बूकः। इति शब्दमाला॥ (शम्बूकशब्देऽस्य विषयो ज्ञेयः॥)

पूतिकाष्ठं, क्ली, (पूति काष्ठमिति कर्म्मधारयः।)
देवदारु। सरलवृक्षः। इत्यमरः।२। ४। ५४, २। ४। ६०॥ पवित्रदारु च॥

पूतिकाष्ठकं, क्ली, (पूतिकाष्ठ+स्वार्थे कन्।)
सरलवृक्षः। इति शब्दचन्द्रिका॥

पूतिगन्धं, क्ली, (पूतिर्गन्धो यस्य।) रङ्गम्। इति राजनिर्घण्टः॥

पूतिगन्धः, पुं, (पूतिर्गन्धो यस्य।) गन्धकः। इक्षुदीवृक्षः। इति राजनिर्घण्टः॥ दुर्गन्धे, त्रि॥
(यथा, मनुः। ४। १०७।
"नित्यानध्याय एव स्यात् ग्रामेषु नगरेषु च।
धर्म्मज्ञे पुण्यकामानां पूतिगन्धे च सर्व्वदा॥")

पूतिगन्धिः, त्रि, (पूतिर्गन्धो यस्य। "गन्धस्येदुत्पूतिसुसुरभिभ्यः।" ५। ४। १३५। इति इः।) दुर्गन्धः। इत्यमरः। १। ५। १२॥
पूतिर्विट् पूतिरिव गन्धोऽस्य। इति रायमुकुटः॥
(यथा, महाभारते। २। ६०। २६।
"अथाधिनं कटुजं तीक्ष्णसुष्णं
यशोघ्नं परुषं पूतिगन्धि।
सतां पेयं यन्न पिबन्त्यसन्तो
मन्युं महाराज! पिब प्रशाम्य॥")

पूतिगन्धिकः, त्रि, (पूतिगन्धि+स्वार्थे कन्।)
दुर्गन्धः। इति हेमचन्द्रः। ६। २७॥

पूतिगन्धिका, स्त्री, (पूतिगन्धोऽस्यस्या इति। पूतिगन्ध+ठन्।) वाकुची। इति राजनिर्घण्टः॥

पूतितैला, स्त्री, (पूति दुर्गन्धं तैलं यस्याः।)
ज्योतिष्मती। इति रत्नमाला॥ नयाफट्की इति भाषा॥ (पर्य्यायोऽस्या यथा,—
"पारावतपदी पिण्या नगणास्फुटवल्गुनी।
ज्योतिष्मती पूतितैला केचित्तामिङ्गुदीं विदुः॥"
इति वैद्यकरत्नमालायाम्॥)

पूतिनस्यः, पुं, (पूतिर्दुर्गन्धो नस्यः नासिकाभवो रोगः ।) नासारोगभेदः । तस्य लक्षणम् । यथा,

"दोषैर्विदग्धैरंगलतामुन्नुदे
संमूर्च्छितो यस्य समीरणस्तु ।
निरेति पूतिर्मुखनासिकाभ्यां
तं पूतिनस्यं प्रवदन्ति रोगम् ॥"

इति माधवकरः ॥

औषधं यथा,—

"आर्द्रादन्तीविषाग्निगुम्बरसयोर्यसम्भवे: ।
साधितं सायं तैलं पूतिनासागदं जयेत् ॥"

अथवा ।

"त्रिकटुविड्डकसैन्धवदन्तीफलशिग्रुम्बरस-
दन्तीभिः ।
तैलं गोयलसिद्धं नस्यं स्यात् पूतिनस्यस्य ॥"

इति चक्रपाणिदत्तः ॥

(अस्य व्याख्याने श्रीकण्ठदत्तेन यद्विदेशवचनमाश्रितं तदृथा । "नासिका भवो नस्यः पूतिर्नस्यो वायुर्यत्र तं पूतिनस्यम् ।" इत्येव विदेयः ।

"कफपित्तमरुद्विघ्नं सञ्चितं मूर्द्धि देहिनाम् ।
विदग्धमुग्रगोदुग्धं रात्रौ कृत्वाधिशय्यताम् ॥
ततः प्रस्यन्दते प्राणात् सरक्तं पूति पीतकम् ।
पूतिनस्यन्तु तं विद्याद्व्याधिकर्षूस्वरग्रदम् ॥"

चिकित्सान्तरमस्य यथा,—

"पूर्व्वोद्दिष्टे पूतिनस्ये च जन्तोः
स्नेहस्वेदौ छर्दनं शंसनञ्च ।
युक्तं भक्तं तीक्ष्णमल्पं लघुत्वा-
दुष्णं तोयं धूमपानञ्च कार्य्ये ॥"

इत्युत्तरतन्त्रे चतुर्विंशेऽध्याये सुश्रुतेनोक्तम् ॥)

पूतिपर्णः, पुं, (पूति पर्णं यस्य ।) शोणाकप्रभेदः । इति राजनिर्घण्टः ॥

पूतिपुष्पिका, स्त्री, (पूति पुष्पमस्याः । कापि अत इत्वम् ।) मातुलुङ्गा । इति रत्नमाला ॥ मखुरलेबु इति मौटा वा इति च भाषा ॥ (गुणादयोऽस्या मातुलुङ्गशब्दे ज्ञातव्याः ॥)

पूतिफला, स्त्री, (पूति फलं यस्याः ।) शोमराजी । इति रत्नमाला ॥

पूतिफली, स्त्री, (पूति फलं यस्याः । ङीप् ।) शोमराजी । इत्यमरः । २ । ४ । ६६ ॥ (अस्याः पर्य्यायो यथा,—

"अवल्गुजी वाकुची स्यात् शोमराजी सुपर्णिका ।
अग्निशिखा कृष्णफला शोमा पूतिफलीति च ॥
शोमवल्ली कालमेषी कृष्णा च प्रकीर्त्तिता ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

पूतिमयूरिका, स्त्री, (पूतिर्मयूरीव । ततः सार्थे कन् इत्वञ्च ।) वचागन्धा । इति राजनिर्घण्टः ॥

पूतिमेदः, पुं, (पूतिर्मेदोऽस्य ।) अरिमेदः । इति राजनिर्घण्टः ॥ (विशेषोऽस्य अरिमेदशब्दे द्रष्टव्यः ॥)

पूतिवातः, पुं, (पूतये पावित्र्याय वातो यस्य ।) विष्णुः । इति रत्नमाला । (पर्य्यायोऽस्य यथा,

"विष्णो मधुकपित्त्वास्यः श्रीपतो गोपरीतकी ।
पूतिवातोऽथ माङ्गल्यो मालूरस्य मधुफलम् ॥"

इति वैद्यकरत्नमालायाम् ॥

(पूतिर्वातः ।) दुर्गन्धवायुश्च ॥

पूतिवृक्षः, पुं, (पूतिर्वृक्षः ।) श्योनाकः । इति रत्नमाला ॥ पवित्रदुर्गन्धौ तरुश्च ॥

पूतिशारिका, स्त्री, (पूतिः शारिरिव जायते इति । जन + डः । टाप् ।) खट्टाशी । इति त्रिकाण्डशेषः ॥

पूतीकः, पुं, (पुति + वा कीप् । तद्वत् कायतीति । कै + कः ।) पूतिकरञ्जः । इत्यमरटीकायां भरतः ॥ (यथास्य पर्य्यायः ।

"पूतीकरञ्जः पूतीकः प्रकीर्य्यश्च सकण्टकः ॥"

इति वैद्यकरत्नमालायाम् ॥

यथा च सुश्रुते । १ । ६६ ।

"पूतीकखिचकः पाठा विडङ्गैलाहरेणवः ॥")

गन्धमार्जारः । इति राजनिर्घण्टः ॥

पूतीकरञ्जः, पुं, (पूतीयुक्तः करञ्जः ।) पूतिकरञ्जः । इति रत्नमाला ॥ नाटा इति भाषा ॥ (पर्य्यायोऽस्य यथा,—

"पूतीकरञ्जः पूतीकः प्रकीर्य्यश्च सकण्टकः ॥"

इति वैद्यकरत्नमालायाम् ॥)

पूतीका, स्त्री, (पूत्या दुर्गन्धेन कायतीति । कै + कः ।) पूतिका । इत्यमरटीकायां भरतः ॥

पूत्यण्डः, पुं, (पूति दुर्गन्धमण्डमस्य ।) गन्धकीटः । गँदोमोका इति भाषा ॥ (यथा, महाभारते । १२ । ३२२ । ७ ।

"पुलाका इव धान्येषु पूत्यण्डा इव पक्षिषु ।
तद्विधास्ते मनुष्येषु येषां धर्म्मो न कारणम् ॥")

जन्तुभेदः । इति मेदिनी । डे, ३२ ॥ खटाशी इति भाषा ॥

पूनः, त्रि, (पू + क्तः । "पूनो विनाशे ।" ८ । २ । ४४ । इत्यस्य वार्त्तिकोक्त्या तस्य नः ।) नष्टः । इति सुग्धबोधव्याकरणम् ॥

पूपः, पुं, (पू + किप् । पुवं पवित्रं पाति रक्षतीति । पा + कः ।) पिष्टकः । इत्यमरः । २ । ९ । ४८ ॥ (यथा, मार्कण्डेये । १५ । २१ ।

"मधु कृत्वा नरो दंशः पूपं कृत्वा पिपीलिकाः ॥"

(पिष्टकशब्दस्य विवृतिर्द्रष्टव्या ॥)

पूपली, स्त्री, (पूपं तदाकारं लातीति । ला + कः ।) पोलिका । इति हेमचन्द्रः । ३ । ६३ ॥

पूपाली, स्त्री, (पूपाय चलतीति । चल + अच् । गौरादित्वात् ङीप् ।) पोली । इति त्रिकाण्डशेषः ॥

पूपाष्टका, स्त्री, (पूपप्रधानाष्टका अष्टमी ।) अग्रहायणीपूर्णिमायाः परतः कृष्णाष्टमी । तद्विवरणं अष्टकाशब्दे द्रष्टव्यम् । "तत्र नित्यं श्राद्धं पूपाद्यकं कर्त्तव्यम् । यथा गोभिलः । अष्टका योऽग्रहायण्यास्तमिस्राष्टमी । ब्रह्मपुराणे ।

पित्राद्दानाय कृष्णे स्युरष्टकास्तिस्र एव च ।
कृष्णपक्षे परिष्ठा हि पूर्व्वा चैन्द्री विभाव्यते ।
प्राजापत्या द्वितीया स्यात् तृतीया वैश्वदेवकी ।
श्राद्धा पूर्वैः सदा कार्य्या मांसैरन्वा भवेत्तथा ।
शाकैः कार्य्या तृतीया स्यादेष द्रव्यगतो विधिः ॥"

इति तिथितत्त्वम् ॥

पूपिका, स्त्री, (पूपः पूपाकारोऽस्त्यस्या इति ठन् । ततष्टाप् ।) पूलिका । इति हेमचन्द्रः । ३ । ६२ ॥

पूय, इं ऽ दुर्गन्धे । भ्वादिः । सेट् । इति कविकल्पद्रुमः ॥ (भा०-आत्म०-अक०-सक० च-सेट् । निष्ठायामनिट् ।) षष्ठस्वरी । इं, पूनः । ऽ, पूयते मत्यः दुर्गन्धः स्यादित्यर्थः । श्रीगन्धिभेदनम् । इति दुर्गादासः ॥

पूयं, क्ली, (पूयते दुर्गन्धो भवतीति । पूय + अच् ।) पक्वव्रणादिसम्भवघनीभूतशुक्लवर्णविकृतरक्तम् । पूँय इति भाषा । तत्पर्य्यायः । क्षतजम् २ असृजम् ३ पूयनम् ४ । अस्रितम् ५ । इति शब्दचन्द्रिका ॥ (यथा, महाभारते । ३ । १८८ । १४ ।

"ये च दुष्कृतकर्म्माणः पूयं तेषां विधीयते ॥")

पूयवर्द्धनद्रव्याणि यथा,—

नवधान्यमाषतिलकलायकुलत्थनिष्पावहरितक-
शाकाम्लवयकटुकगुडपिण्याविक्षतिवल्लूरशुष्क-
शाकाजाविकानूपौदकमांसवसाशीतोदकक्षीर-
रागपायसदधिदुग्धतक्रप्रभृतीन् परिहरेत् ।
"तक्रान्तैर्नवधान्यादिर्योयं वर्ग उदाहृतः ।
दोषसंजननो ज्ञेय विज्ञेयः पूयवर्द्धनः ॥"

इति सुश्रुतः ॥

(अस्य विषयो यथा,—

"वातार्त्ते नास्ति रुधा न पाकः
पित्तार्त्ते नास्ति कफश्च पूयः ॥"

इति सुश्रुते सूत्रस्थाने सप्तदशोऽध्याये ॥)

पूयनं, क्ली, (पूयतेऽनेनेति । पूय + ल्युट् ।) पूयम् । इति शब्दचन्द्रिका ॥

पूयरक्तः, पुं, (पूयविशिष्टं रक्तमस्मिन् ।) नासारोगभेदः । तस्य लक्षणम् । यथाह माधवकरः ।

"दोषैर्विदग्धैरथवापि घन्तो-
र्ललाटदेशेऽभिहतस्य नेत्रैः ।
नासा स्रवेत् पूयमसृग्विमिश्रं
तं पूयरक्तं प्रवदन्ति रोगम् ॥"

(क्लीवलिङ्गेऽपि दृश्यते । यथा,—

"निचयादभिघाताद्वा पूयासृङ्नासिका स्रवेत् ।
तत् पूयरक्तमाख्यातं शिरोदाहरुजाकरम् ॥"

इति वाभटे उत्तरस्थाने अनविंशेऽध्याये ॥

चिकित्सास्य यथा,—

"यस्यास्रृङ्मिश्रं रक्तपित्तोपद्रवाणां
नाड्यैवत्वात् पूयरक्ते चिकित्सा ।
वान्ते सम्यक् चार्यवीङ्गं वदन्ति
तीक्ष्णं धूमं शोधनञ्चात्र नस्यम् ॥"

इत्युत्तरतन्त्रे चतुर्विंशेऽध्याये सुश्रुतेनोक्तम् ॥)

पूयारिः, पुं. (पूयानामरिः शत्रिनाशकत्वात् ।) निम्बवृक्षः । इति शब्दचन्द्रिका ॥ (विवरणमस्य निम्बशब्दे ज्ञातव्यम् ॥)

पूयान्नः, पुं, (पूयः अन्नम् इव यत्र । सप्तम्येन पिशाचनिर्गमनादेव तथात्वम् ।) मन्त्रिजनरोगभेदः । तस्य लक्षणं यथा,—

पूक्काः

"पक्वः श्लोफः वन्निजः संसवेदयः
सान्नं पूयं पूतिपूयालसः सः ॥"
इति सुश्रुतः ॥
("पूयालसः सोपनाहः सावाच्चत्वार एव च।
पञ्चमीकालजौ जन्तुर्ग्रन्थिसन्धौ न वामयाः ॥"
"पूयालसन्तु तं विद्यात् यन्थौ कानौनके तृणामिति वचनात् ॥" इति भावप्रकाशस्य मध्यखण्डे चतुर्थे भागे ॥)

पूर, ईं य ऽ पूर्त्तौ। इति कविकल्पद्रुमः ॥ (दिवा०-आत्म०-सक०-सेट्। निष्ठायामनिट्।) दीर्घौ। ईं, पूर्णः। य ऽ, पूर्यन्ते पितरस्तर्प्यन्ति हलायुधः। पूर्णैरिड्याध्यायनम्। इति दुर्गादासः ॥

पूर, क पूर्त्तौ। इति कविकल्पद्रुमः ॥ (चुरा०-उभ०-सक०-सेट्।) दीर्घौ। क, पितॄन् पूरयति आद्धे हव्यैः कव्यैश्च यः सदा। इति हलायुधः ॥
इति दुर्गादासः ॥

पूरं, क्ली, (पूरयति सौगन्ध्येनेति। पूर+कः।) दाहागुरु। इति राजनिर्घण्टः ॥

पूरः, पुं, (पूरयतीति। पूर+कः।) जलसमूहः। (यथा, रघौ। ६। १७।
"मधोदधेः पूर इवेन्दुदर्शनात्
गुरुः प्रहर्षः प्रबभूव नात्मनि ॥")
ब्रणसंशुद्धिः। क्षारविशेषः। इति मेदिनी। रे, ६० ॥ (प्राणायामादिकर्त्तुर्नाभ्यादन्वेषं वहिः-पवनाकर्षणम्। यथा, भागवते। ३। २८। ६।
"प्राणस्य शोधयेन्मार्गं पूरकुम्भकरेचकैः।
प्रतिकूलेन वा चित्तं यथास्थिरमचञ्चलम् ॥"
बीजपूरः। तत्पर्य्यायो यथा,—
"बीजपूरो मातुलुङ्गः सुफलः फलपूरकः।
लुङ्गघः पूरकः पूरो बीजपूर्णोऽम्लकेशरः ॥"
इति वैद्यकरत्नमालायाम् ॥)

पूरकः, पुं, (पूरयतीति। पूरि+ण्वुल्।) बीजपूरः। इति राजनिर्घण्टः ॥ (अस्य पर्य्यायो यथा,—
"बीजपूरो मातुलुङ्गः सुफलः फलपूरकः।
लुङ्गघः पूरकः पूरो बीजपूर्णोऽम्लकेशरः ॥"
इति वैद्यकरत्नमालायाम् ॥)
गुणकाङ्क्षः। इति रत्नावली ॥ ध्यानादिकर्त्तृनासिकावायुनोच्छ्वासः। ब्रह्मध्यानपूर्व्वकप्राणायामाङ्गतत्तन्मन्त्रं जपन् वामनासिकया वायुना देहपूरणम्। (यथा, हठयोगप्रदीपिकायाम्। २। ७१।
"प्राणायामस्त्रिधा प्रोक्तो रेचपूरककुम्भकैः।
सहितः केवलश्चेति कुम्भको द्विविधो मतः ॥")
यथाच व्यासः।
"आदानं रोधसन्त्यागं वायोश्चिच्छिः समभ्यसेत्।
ब्रह्माणं कैशवं शम्भुं ध्यायेद्वेदानुक्रमात् ॥
पूर्व्ववचने त्रिर्जपमात्राभिधानादत्र त्रिश्चिरिति वीप्सा मन्त्रावृत्तापेक्षया।
ब्रह्माणं कैशवं शम्भुं ध्यायन् सुखेन यत्नतात् ॥
इति योगियाज्ञवल्क्यः।
'भूर्भुवःस्वर्महर्जनस्तपः सत्यं तथैव च।
प्रत्योङ्कारसमायुक्तं तथा तत् सवितुः पदम् ॥
ॐ आपो ज्योतिरित्येतच्छिरः पश्चात्तु योजयेत्।
त्रिरावर्त्तनयोगात्तु प्राणायामस्तु ग्रन्थितः ॥
पूरकः कुम्भको रेचः प्राणायामस्त्रिलक्षणः।
नासिकाक्रान्त उच्छ्वासो ध्यातुः पूरक उच्यते ॥
कुम्भको निश्चलः श्वासो सुच्यमानस्तु रेचकः ॥
मोचनं विश्लेषयति विष्णुपुराणम्।
नासंवृतसुखो जन्मोच्छ्वासकाशौ च वर्ज्जयेत्।
नोच्चैर्हसेत् सशब्दञ्च न सृजेत् पवनं बुधः ॥"
इत्याह्निकाचारतत्त्वम् ॥
षोड़शचतुरन्यतरसंख्यकप्रणववीजान्यतरजपेनैकनासापुटकरणकप्राणायामाङ्गवायुपूरणम्। यथा, मूलमन्त्रस्य बीजस्य प्रणवस्य वा षोड़शवारजपेन वामनासापुटे वायुपूरकं कुर्य्यादिति तन्त्रसारः ॥ ❁ ॥ क्ली, प्रेतदेहनिष्पादकाशौचकालदेयदशपिण्डम्। यथा,—
"पूरकैश्च तु पिण्डैस्तु देहो निष्पाद्यते यतः।
ज्ञातस्य करणायोगात् पुनर्गर्भत्वमेति क्रियाम् ॥"
इति वायुपुराणम् ॥

अन्यशब्दः।
"न स्वधाञ्च प्रयुञ्जीत प्रेतपिण्डे दशाहिके।
भावितैतच्च वै पिण्डं यन्मदत्तस्य पूरकम् ॥"
अत्र भावनाविधौ एतत्पिण्डं यन्मदत्तस्य पूरकमित्येतावन्मात्रश्रुतेः शिरःपूरकमित्यादिविशेषोल्लेखे प्रमाणं नास्ति। इति स्मार्त्तभट्टाचार्य्याः ॥ प्रेतपिण्डेस्तथा दत्तैर्देहमाप्नोति भार्गवेति विष्णुधर्म्मोत्तरे देहश्रुतेर्देहपूरकमिति प्रयोगाप्रसक्तेश्च। तस्मादनिरूढभट्टाद्युक्तः केवलपूरकप्रयोग एव युक्त इति। भ्रातातपः।
"भर्त्तुः पिण्डप्रदाने तु वाध्वी स्त्री चेन्नवस्वसा।
वस्त्रं त्यक्त्वा पुनः स्नात्वा सैव दद्याच्च पूरकम् ॥"
इति शुद्धितत्त्वम् ॥ ❁ ॥

पूरयकर्त्तरि, त्रि। इति शब्दरत्नावली ॥ (यथा, मनुः। ६। २८६।
"प्राकारस्य च नेतारं परिखायाश्च पूरकम्।
द्वाराणां चैव भङ्क्तारं क्षिप्रमेव प्रवासयेत् ॥")

पूरणं, क्ली, (पूर्य्यते अनेनेति। पूर+करणे ल्युट्।) पिण्डप्रभेदः। इति मेदिनी। णे, ६८ ॥ वृद्धिः। क्षेत्रफलम्। इति शब्दमाला ॥ अङ्कानां गुणनम्। इति शुभङ्करः ॥ वापतनुः। इति हेमचन्द्रः ॥

पूरणः, पुं, (पूर्य्यतेऽनेनेति। पूरि+करणे ल्युट्।) विष्णुतैलम्। इति धरणिः ॥ सेतुः। इति हारावली ॥ (पूरयतीति। पूरि+कर्त्तरि ल्युः।) समुद्रः। इति संक्षिप्तसारोणादिवृत्तिः ॥ पूरके, त्रि। इति मेदिनी। णे, ६३ ॥ (यथा, हरिवंशे। १२६। ५२।
"आसन्नः सन्नतरः साधनानां
श्रद्धावतां आहृतिप्रणेता।
पतिर्गणानां महतां सत्कृतीनां
मायाधीशः पूरणः षड्गुणानाम् ॥")

पूरुषः

पूरणी, स्त्री, (पूर्य्यते अनयेति। पूरि+ल्युट्+ङीप्।) शाल्मलिवृक्षः। इत्यमरः। २। ४। ४६॥ (अस्या पर्य्यायान्तरं यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।
"शाल्मलिस्तु भवेन्मोचा पिच्छिला पूरणीतिच।
रक्तपुष्पा स्थिरायुश्च कण्टकाढ्या च तूलिनी ॥")
पूर्य्यतेऽनया पूरणी। यथा पञ्चानां पूरणी पञ्चमी॥

पूरान्नं, क्ली, (पूरं पूरकमन्नमत्र।) दध्यान्नम्। इति राजनिर्घण्टः ॥

पूरिका, स्त्री, (पूर्य्यते इति। पूरि+कः। स्त्रियां ङीप्। पूरी। ततः स्वार्थे कन्। टाप् पूर्व्ववद्धस्वश्च।) पिष्टकभेदः। पूरी इति कचुरी इति च भाषा। यथा,—
"माषाणां पिष्टिकां युक्त्याक्षवर्णार्द्धकद्विजुभिः।
तया पिष्टिकया पूर्णा समिता घृतपोषिका।
ततस्तैले विपक्वा सा पूरिका कथिता बुधैः ॥"
अस्या गुणाः।
"रूक्षा स्वाद्वी गुरुः स्निग्धा वातपित्तास्रदूषिका।
चक्षुस्तेजोहरी चोष्णा पाके वातविनाशिनी ॥
तथैव घृतपक्वापि चक्षुष्या रक्तपित्तहृत् ॥"
इति भावप्रकाशः ॥
(अस्या गुणान्तरं यथा,—
"पूरिकाघृतपूरन्तु त्रिदोषघ्नमनं परम्।
दृष्यं संदृंहणं स्वाद्वग्निवातक्षयनिवारणम् ॥"
इति हारीते प्रथमे स्थाने द्वादशेऽध्याये ॥)

पूरितं, त्रि, (पूर्य्यते स्मेति। पृ पूरि वा+क्तः।
"वा दान्तशान्तपूर्णेति।" ७। २। २७। इति पक्षे इट्।) ज्ञातपूरणम्। तत्पर्य्यायः। पूर्णम् २। इत्यमरः। ३। १। ६८ ॥ गुणितञ्च ॥

पूरुषः, पुं, (पुरति अग्रे गच्छतीति। पुर+"पुरः कुषन्।" उणा० ४। ७४। इति कुषन्। "अन्येषामपि दृश्यते।" ६। ३। १३७। इति निपातनात् दीर्घः।) पुरुषः। पुमान्। इत्यमरः। २। ६। १॥
अथ पूरुषलक्षणम्।
"पञ्चदीर्घं चतुर्ह्रस्वं पञ्चसूक्ष्मं षडुन्नतम्।
सप्तरक्तं त्रिगम्भीरं त्रिविशालं प्रशस्यते ॥
बाहुनेत्रहनुद्वयं कुक्षिवृषौ तु नासा तथैव च।
जङ्घयोरन्तरञ्चैव पञ्चदीर्घं प्रशस्यते ॥
ग्रीवाच कर्णौ पृष्ठच हस्तौ जङ्घे सुपूजिते।
चत्वारि यस्य ह्रस्वानि पूजां प्राप्नोति नित्यशः।
लक्ष्माण्यङ्गुलिपर्व्वाणि दन्तकेशनखत्वचम्।
पञ्च सूक्ष्माणि येषां हि ते नरा दीर्घजीविनः ॥
नासा नेत्रच दन्ताच ललाटच शिरस्तथा।
हृदयञ्चैव विज्ञेयसप्तकं षट् प्रशस्यते ॥
पाणिपादतलौ रक्तौ नेत्रान्तरनखानि च।
तालुकोष्ठरसज्ञा च सप्तरक्तं प्रशस्यते ॥
स्वरो वृद्धिच नाभिच त्रिगम्भीरमुदाहृतम्।
उरः शिरो ललाटच त्रिविस्तीर्णं प्रशस्यते ॥
कटिर्विशाला बहुपुत्रभागी
विशालहस्तो नरपुङ्गवः स्यात्।
उरो विशालं धनधान्यभागी
शिरो विशालं नरपूजितः स्यात् ॥

न क्लीब्यति रक्ताक्षं नोर्ध्वं कनकपिङ्गलम् ।
दीर्घबाहुं न चैश्वर्ये न मांसोपचितांसकम् ॥
कदाचिद्दुःखुरो मर्त्यः कदाचित्सोमपः सुखी ।
कदाचित्तुन्दिलो दुःखी कदाचिच्चपला सती ॥
नेत्ररक्तेन सौभाग्यं दन्तरक्तेन भोजनम् ।
हस्तरक्तेन चैश्वर्यं पादरक्तेन वाहनम् ॥
अकर्मकठिनौ हस्तौ पादावध्वनि कोमलौ ।
यस्य पाण्डितलौ रक्तौ तस्य राज्यं विनिर्दिशेत् ॥
दीर्घस्निग्धेन दारिद्र्यं स्थूलस्निग्धेन निर्धनः ।
हस्वस्निग्धेन सौभाग्यं हस्वस्निग्धेन भूपतिः ॥
रेखाभिर्बहुभिर्दुःखं स्वल्पाभिर्धनहीनता ।
रक्ताभिः श्रियमाप्नोति शुक्लाभिर्लोकपूजितः ॥
बहुच्छिद्रमध्ये तु यवो यस्य विराजितः ।
उन्नतं भोजनं तस्य शतं जीवति मानवः ॥
बहुस्थं कुलिशं छत्रं यस्य पाणितले भवेत् ।
ऐश्वर्यञ्च विनिर्दिष्टमशीत्यायुर्भवेद्ध्रुवम् ॥
धनुर्यस्य भवेत् पाणौ पङ्कजं वाथ तोरणम् ।
तस्यैश्वर्यञ्च राज्यञ्च अशीत्यायुर्भवेद्ध्रुवम् ॥
कनिष्ठातर्जनीं यावत् रेखा भवति चाञ्चला ।
विंशत्यब्दाधिकशतं नरो जीवत्यनामया ॥
कनिष्ठामध्यमां यावत् रेखा भवति चाञ्चला ।
शतार्द्धं वाथ वाशीतिर्नरो जीवेन्न संशयः ॥
कनिष्ठानामिकायान्तु रेखा भवति चाञ्चला ।
षष्टिं पञ्चाशदब्दं वा नरो जीवत्यसंशयम् ॥
रेखया भिद्यते रेखा स्वल्पायुश्च भवेन्नरः ।
कनिष्ठायां स्थिता रेखा संख्या यावतिका स्मृता ।
तावती पुरुषायायान्तु नारी भवति निश्चितम् ॥
करमध्यगता रेखा ध्रुवा ऊर्द्धंभवेद्यदि ।
नृपो वा नृपतुल्यो वा चिरं ख्यातोऽर्थवान् भवेत् ॥
मत्स्यपुच्छप्रकीर्णेन विद्याविज्ञसमन्वितः ।
पितामहस्य वा किञ्चित् धनञ्च लभते ध्रुवम् ॥
मध्यमायां यदि यवा ह्यन्तेऽत्यन्तशोभनाः ।
तदान्यसञ्चितं वित्तं प्राप्नोत्यङ्कुशके यवे ॥
यस्याथ चक्रमङ्गुष्ठे यवाद्यैश्च दृश्यते ।
तदा वै पामरादीनामञ्चितं धनमाप्नुयात् ॥
तर्ज्जन्यामथ चक्रञ्च मित्रद्वारा धनं भवेत् ।
तेनैव विपरीतन्तु ययो भवति निश्चितम् ॥
मध्यमायां स्थिते चक्रे देवद्वारा धनं लभेत् ।
तेनैव विपरीतन्तु ययो भवति निश्चितम् ॥
अनामायां भवेत् चक्रं सर्व्वद्वारा भवेद्धनम् ।
तेनैव विपरीतन्तु ययो भवति निश्चितम् ॥
कनिष्ठायां भवेच्चक्रं वाणिज्येन धनं भवेत् ।
तेनैव विपरीतन्तु ययो भवति निश्चितम् ॥
ललाटे दृश्यते यस्य चक्ररेखाच्छत्रमेव वा ।
अशीत्यायुः समाप्नोति षष्टिरेखाः शतं समाः ॥
यस्योन्नतं ललाटञ्च ताम्रवर्णञ्च दृश्यते ।
रेखाहीनञ्च कचित्र च सोऽचलां मही भ्रमेत् ॥
यस्य शिखा भवेद्दीर्घा नाशायं वेदि सर्व्वदा ।
भोगी भवति निर्व्वाणः पृथ्वीं भ्रमति सर्व्वदा ॥
दन्ताश्च विरला यस्य नीचवक्रीचलन्मुखः ।
मलभृत् दशुरः सर्व्वं वेदान्तपारगो भवेत् ॥"

प्रकारान्तरम् ।
"दन्ताश्च विरला यस्य गण्डे कूपोऽपि जायते ।
परस्त्रीरमणे नित्यं परवित्तेन वित्तवान् ॥
दीर्घलिङ्गे च सौभाग्यं ह्रस्वलिङ्गे नृपो भवेत् ।
वक्त्रास्यकटिनेत्रेभ्यः प्रमाणान्निर्गतः सदा ॥
रमते च सदा दास्यां निर्धनो भवति ध्रुवम् ।
ह्रस्वलिङ्गेन सूक्ष्मेण रक्तवर्णेन भूपतिः ।
बहुस्त्रीरमणे नित्यं नारीणां वल्लभो भवेत् ॥
ह्रस्वलिङ्गेन रक्तेन लभते चोत्तमाङ्गनाम् ।
राज्यं सुखञ्च दिव्याङ्गाः कन्यकायाः पतिर्भवेत् ॥
यस्य पादतले पद्मं चक्रं वाप्यथ तोरणम् ।
बहुस्थं कुलिशं वापि स राजा भवति ध्रुवम् ॥
ह्रस्वनिर्लोमशा ये स्युः केकराक्षाः कृशेक्षकाः ।
कातरा बालचिष्टाश्च ते दरिद्रा न संशयः ।
कपिला मलिनाङ्गाश्च ह्रस्वाश्चैव दृढनखाः ॥
ह्रस्वातिदीर्घा मनुजास्ते दरिद्रा न संशयः ।
चिपिके ह्रस्वशून्या ये निर्लोमहृदयाश्च ये ।
ते धूर्त्ता नैव सन्देहः वसुव्रतवचनं यथा ॥
ह्रस्वोष्ठसुखा भग्नदृष्टाः ह्रस्वदन्ताः कृशेक्षकाः ।
वक्रनासा वचनासास्ते नरा दुष्टमानसाः ॥
दयालवश्च दातारो रूपवन्तो जितेन्द्रियाः ।
परोपकारिणश्चैव तेऽपूर्व्वा मानवाः स्मृताः ॥"
इति वास्तुशास्त्रे पुरुषलक्षणम् ॥ ६ ॥
दानवीरदयावीरयुद्धवीरसत्यवीरसंज्ञकपुरुषलक्षणन्तु पुरुषपरीक्षाग्रन्थे द्रष्टव्यम् ॥

पूर्णः, त्रि, (पूर्यते स्मेति । पॄ पूरि वा + क्तः ।) "वा दान्तशान्तपूर्णदस्तस्वच्छन्नच्छन्नाः ।" ७ । २ । २७ । इति इड्भावो निपात्यते च ।) पूरितः । सकलः । इत्यमरः । ३ । ३ । ८८ ॥ (यथा, पञ्चदश्याम् । ७ । ७७ ।
"तदर्थस्य च पारोक्ष्यं यद्येवं किं ततः शृणु ।
पूर्णानन्दैकरूपेण प्रत्यग्बोधोऽवतिष्ठते ॥")
शुक्लः । इति मेदिनी । णे, २२ ॥ स्त्रीयनुखेच्छावदन्यः । इति गदाधरभट्टाचार्य्यः ॥ (प्रभायाः पुत्रभेदः । यथा, महाभारते । १ । ६५ । ४७ ।
"विद्वः पूर्णश्च वर्हीं च पूर्णायुश्च महायशाः ॥" नागभेदः । यथा, महाभारते । १ । ५७ । ५ ।
"कोटिशो मानवः पूर्णः शतशः पालको हसी-मकः ॥")

पूर्णकः, पुं, (पूर्ण + "संज्ञायां कन् ।" ५ । ३ । ७५ । इति कन् ।) सर्षपचूर्णपर्पटी । इति मेदिनी । के, १२५ ॥ (देवयोनिविशेषः । यथा, महाभारते । ७ । ५५ । ४ ।
"नटनर्त्तकगन्धर्व्वैः पूर्णकैर्वर्द्धमानकैः ।
नित्योद्युक्तैश्च क्रीड़द्भिस्तत्र स्म परिवर्त्तितः ॥")

पूर्णकुम्भः, पुं, (सलिलादिभिः पूर्णः कुम्भः ।) जलपूरितघटः । तत्पर्य्यायः । भद्रकुम्भः २ । इत्यमरः । २ । ८ । ३२ ॥ (यथा, मनुः । ११ । १८७ ।
"प्रायश्चित्ते तु चरिते पूर्णकुम्भमथां नव ।
तेनैव सार्द्धं प्राश्नेयुः स्नाता पुण्ये जलाशये ॥")
पूर्णकलशादिश्च । इति भरतः ॥ (अधिताङ्गि-

लिभ्यां हस्ताभ्यां परशिरसः पीड़नं पूर्णकुम्भः । इति नीलकण्ठः ॥ यथा, महाभारते । २ । २३ । १४ ।
"बाहुपाशादिकं कृत्वा पादाहतशिरोरुहौ ।
उरोहस्तं ततश्चक्रे पूर्णकुम्भौ प्रयुज्य तौ ॥")

पूर्णकोष्ठा, स्त्री, (पूर्णः कोष्ठोऽस्याः ।) नागरमुस्ता । इति राजनिर्घण्टः ॥

पूर्णपात्रं, क्ली, (पूर्णञ्च तत् पात्रञ्चेति नित्यकर्म्मधारयः ।) वस्तुपूर्णपात्रम् । बर्द्धापकः । इति मेदिनी । रे, २८४ ॥ उत्सवकाले हर्षात् गृहीतवस्त्रालङ्कारादि । तत्पर्य्यायः । पूर्णालकम् २ । यथा,—
"हर्षादुत्सवकाले यत्नालङ्कारांशुकादिकम् ।
व्यवहृत्य गृह्यते पूर्णपात्रं पूर्णालकञ्च तत् ॥"
इति जटाधरः ॥
(यथा, अनर्घराघवे । ६ । ४५ ।
"ज्ञानभवं चापमारोप्य योऽस्मानानन्दयिष्यति ।
पूर्णपात्रमिवं तस्मै मैथिली कल्पयिष्यते ॥")
होमकर्म्मणि ब्रह्मदक्षिणा । यथा, गोभिलेनापि दर्शादियागमभिधाय पूर्णपात्रो दक्षिणा ब्रह्मणे दद्यादित्युक्तम् । आन्तत्वेऽपि पुंस्त्वं छान्दसम् । तस्य प्रमाणन्तु ग्रन्थसंग्रहे यज्ञपार्श्वपरिशिष्टयोः ।
अष्टसुष्टिर्भवेत् कुक्षिः कुक्षयोऽष्टौ च पुष्कलम् ।
पुष्कलानि च चत्वारि पूर्णपात्रं विधीयते ॥
अत्र षट्पञ्चाशदधिकशतद्वयमुष्टिमितं पूर्णपात्रम् । अत्रभवे तु छन्दोगपरिशिष्टम् ।
यावता वहुभोक्तुन्तु तृप्तिः पूर्णेन जायते ।
तादृशं गृहिणः कुर्य्यात् पूर्णपात्रमिति स्थितिः ॥"
इति संस्कारतत्त्वम् ॥

पूर्णबीजः, पुं, (पूर्णं बीजं यस्य ।) बीजपूरः । इति राजनिर्घण्टः ॥ (विवृतिरस्य बीजपूरशब्दे ज्ञातव्या ॥)

पूर्णमा, स्त्री, (पूर्णं कलापूर्णमिन्दुं पूरयं वा मातीति । मा + कः । टाप् । पूर्णिमा । इत्यमरटीकायां भरतः ।

पूर्णमासः, पुं, (पूर्णमासः पूर्णिमा साधनत्वेनास्त्यस्येति । अच् । यज्ञभेदः । इति जटाधरः ॥ (यथा, तैत्तिरीयसंहितायाम् । २ । २ । १० । २ ।
"वै तिथ्यः सोमः पूर्णमासः साक्षादेव ब्रह्मवर्चसमवरुन्धे ॥")
पूर्णो मासो यत्रेति । पूर्णिमा । यथा, महाभारते । १२ । २६ । ११८ ।
"दर्शे च पूर्णमासे च चातुर्मास्ये पुनः पुनः ।
अयजद्भयमेधेन सहस्रं परिवत्सरान् ॥")

पूर्णमासी, स्त्री, (पूर्णो मासश्चान्द्रमासो यत्र । गौरादित्वात् ङीष् ।) पूर्णिमा । इति शब्दमाला ॥

पूर्णा, स्त्री, (पूर्ण + टाप् ।) पञ्चमी । दशमी । पूर्णिमा । अमावस्या । यथा,—
"नन्दा भद्रा जया रिक्ता पूर्णा प्रतिपदः क्रमात् ॥"

तत्र स्त्रीसंसर्गनिषेधो यथा,—
"पूर्णासु योषितं परिवर्जनीया ॥"
इति तिथितत्त्वम् ।
"गुरौ पूर्णा च संयुक्ता विद्विद्योगाः प्रकीर्त्तिताः ॥"
इति ज्योतिःसारसंग्रहः ॥
पूर्णालकं, क्ली, वाह्वायनाम्नम् । तत्पर्य्यायः । पूर्णपात्रम् २ । इति त्रिकाण्डशेषः । पूर्णानकमपि पाठः ॥
पूर्णावतारः, पुं, (पूर्णः अवतारः ।) नृसिंहः । राम । यथा,—
"पूर्णो नृसिंहो रामश्च श्वेतद्वीपविराड्विभुः ।
परिपूर्णतमः कृष्णो वैकुण्ठे गोलके स्वयम् ॥
वैकुण्ठे कमलाकान्तो रूपभेदचतुर्भुजः ।
गोलोके गोकुले राधाकान्तोऽयं द्विभुजः स्वयम् ॥
तस्यैव तेजो नित्यञ्च चिन्तां कुर्वन्ति योगिनः ।
भक्ताः पादाम्बुजं तेजः स्तुतस्तेजस्विना विना ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ६ अध्यायः ॥
पूर्णिका, स्त्री, नासाच्छिन्नीनामकपक्षी । इति त्रिकाण्डशेषः ॥
पूर्णिमा, स्त्री, (पूर्णिः पूरणम् । पूर्णिं मिमीते इति । मा + कः । टाप् ।) पञ्चदशी तिथिः । तत्पर्य्यायः । पौर्णमासी २ । निशाकरे कलाहीने सा अनुमतिः ३ पूर्णे निशाकरे सा राका ४ । इत्यमरः ।१।४।७-८ ॥ पित्र्या ५ चान्द्री ६ पूर्णमासी ७ अनन्ता ८ चन्द्रमाता ९ निरञ्जना १० । इति वाचस्पतिः ॥ पूर्णिमा ११ । इति हलायुधः ॥ ज्योत्स्ना १२ इन्दुमती १३ सिता १४ । इति राजनिर्घण्टः ॥ सा द्विविधा । यथा,—
"राका चानुमती चैव द्विविधा पूर्णिमा मता ।
पूर्व्वोदितकलाहीने पौर्णमास्या निशाकरे ।
पूर्णिमानुमती ज्ञेया पञ्चाशत्प्रमितभास्करे ॥
यस्मात्तामनुमन्यन्ते देवताः पितृभिः सह ।
तस्मादनुमती नाम पूर्णिमा प्रथमा स्मृता ॥
यदा चाप्तप्रमिते सूर्य्ये पूर्णचन्द्रस्य चोद्गमः ।
युगपत् सोत्तरा रागात्तदानुमतिपूर्णिमा ॥
राकान्तामनुमन्यन्ते देवताः पितृभिः सह ।
रञ्जनाच्चैव चन्द्रस्य राकेति कवयोऽब्रुवन् ॥"
इति देवीपुराणम् ॥*॥
सा चन्द्रस्य तिथिः । यथा,—
"तस्य ब्रह्मा ददौ प्रीतः पौर्णमास्यां तिथिं प्रभुः ।
तस्मात्तस्यामुपवसेद्रात्रौ चन्द्रमसं यजेत् ॥
न चान्नाहारश्च भवेत्तस्य ज्ञानं प्रयच्छति ।
कान्तिं पुष्टिञ्च राजेन्द्र ! धनं धान्यञ्च केवलम् ॥"
इति वराहपुराणे सोमोत्पत्तिरहस्यम् ॥*॥
तस्यां जातफलम् ।
"कन्दर्पतुल्यो युवतीप्रियश्च
न्यायाप्तवित्तः सततं सहर्षः ।
शूरो बली शास्त्रविचारदक्ष-
श्चैत्र पूर्णिमा यस्मिन् यस्य जन्तोः ॥"
इति कोष्ठीप्रदीपः ॥ ८ ॥

सा चतुर्दशीयुक्ता ग्राह्या युग्मात् । यमः ।
"प्रदोषान्ते शीतांशुः क्षयात्तेन नाद्यति मत्पुरम् ॥"
विष्णुः ।
"दृश्यते सहितौ यस्यां दिवि चन्द्रबृहस्पती ।
पौर्णमासी तु महती ज्ञेया संवत्सरे तु सा ॥
तस्यां स्नानोपवासाभ्यामक्षयं परिकीर्त्तितम् ॥"
सहितौ माससंज्ञाविशेषनिमित्तनक्षत्रादिनक्षत्रगतौ । महाकार्त्तिक्यादिदर्शनात् । तथा च राजमार्त्तण्डे ।
"मासमध्ये यदा ऋक्षे चन्द्रः संपूर्णमण्डलः ।
गुरुणा याति संयोगं सा तिथिर्महती स्मृता ॥"
स्कान्दमात्स्ययोः ।
"पौर्णमासीषु चैतासु मासचैत्रसहितासु च ।
एतासां स्नानदानाभ्यां फलं दशगुणं स्मृतम् ॥"
वैशाखीमधिकृत्य यमः ।
"गौरान् वा यदि वा कृष्णांस्तिलान् चौद्रेण संयुतान् ।
प्रीयतां धर्म्मराजेति पितॄन्देवांश्च तर्पयेत् ॥
यावज्जीवकृतं पापं तत्क्षणादेव नश्यति ।
अब्दायुतञ्च तिष्ठेच्च स्वर्गलोके न संशयः ॥"*॥
ब्रह्मपुराणे ।
"महाज्येष्ठान्तु यः पश्येत् पुरुषः पुरुषोत्तमम् ।
विष्णुलोकमवाप्नोति मोक्षं गङ्गाम्बुमज्जनात् ॥*॥
ऐन्द्रे गुरुः शशी चैव प्राजापत्ये रविस्तथा ।
पूर्णिमा गुरुवारेण महाज्येष्ठी प्रकीर्त्तिता ॥"
अनुराधास्थगुरावपि ।
"ऐन्द्रे मैत्रे यदा जीवस्तत्पक्षदशके रविः ।
पूर्णिमा शक्रचन्द्रेण महाज्येष्ठी प्रकीर्त्तिता ॥"
अनुराधास्थचन्द्रेऽपि । याज्ञभूतिः ।
"ऐन्द्रर्क्षे लघवा मैत्रे गुरुचन्द्रौ यदा स्थितौ ।
पूर्णिमा ज्येष्ठमासस्य महाज्येष्ठी प्रकीर्त्तिता ॥"
राजमार्त्तण्डे ।
"ज्येष्ठे संवत्सरे चैव ज्येष्ठमासस्य पूर्णिमा ।
ज्येष्ठाभेन समायुक्ता महाज्येष्ठी प्रकीर्त्तिता ॥"
ज्येष्ठसंवत्सरश्च ।
"ज्येष्ठाक्षलोपगे जीवे वर्षे स्याच्छक्रदेवतम् ॥"
इति विष्णुधर्म्मोत्तरोक्तो ग्राह्यः । संवत्सरोऽत्र वत्सरो बोध्यः । न तु संवत्सरादिपञ्चकान्तर्गतवर्षविशेषः । ज्येष्ठ इति विशेषणस्य वैयर्थ्यापत्तेः । संवत्सरे यदि स्यात्तिथि पाठः काल्पनिकः । प्रपञ्चस्तु मलमासतत्त्वेऽनुसन्धेयः ॥*॥
विष्णुधर्म्मोत्तरब्रह्मपुराणयोः ।
"भाद्रे ज्येष्ठे तु संप्राप्ते नक्षत्रे शक्रदेवते ।
पौर्णमास्यां तदा स्नानं सर्व्वपापं हरेद्धि नाः ॥
तस्मिन् काले तु ये मर्त्याः पश्यन्ति पुरुषोत्तमम् ।
वसुभद्रं सुभद्राश्च ते यान्ति मदमक्षयम् ॥"
स्कन्दपुराणे ।
"ज्येष्ठामहर्द्वावतीर्णेत्तपुण्यं जप्यवासरम् ।
तस्यां मे स्नपनं कुर्य्याद्भक्तो ज्ञानविधानतः ॥
ज्येष्ठां प्रातःस्नानकाले ब्रह्मणा सहितश्च माम् ।
रामं सुभद्रां संस्नाप्य नरः शोकमवाप्नुयात् ॥

विष्णुधर्म्मोत्तरे ।
"पौर्णमासी तथा माघी श्रावणी च नरोत्तमः ।
प्रौष्ठपद्यामतीतायां तथा कृष्णा त्रयोदशी ॥
एतांस्तु श्राद्धकालान् वै नित्यानाह प्रजापतिः ॥"
तत्र पूर्व्वेद्युः सङ्गवलाभे रौहिणलाभे वा परदिने सङ्गवलाभे पूर्व्वदिने श्राद्धम् ।
"कृष्णपक्षस्य पूर्व्वाह्णे श्राद्धं कुर्य्यादिचक्षणः ।
कृष्णपक्षापराह्णे तु रौहिणन्तु न लङ्घयेत् ॥"
इति वायुपुराणवचनात् ॥
उभयदिने सङ्गवलाभे परदिने ।
"शुक्लपक्षे तिथिर्ग्राह्या यस्यामभ्युदितो रविः ।
कृष्णपक्षे तिथिर्ग्राह्या यस्यामस्तमितो रविः ॥"
इति विष्णुधर्म्मोत्तरात् ॥
एवमक्षयतृतीयादावपि ॥*॥ आषाढ़कार्त्तिकमाघपौर्णमासीषु दानमावश्यकम् । तथा चायोध्याकाण्डे भरतशपथे ।
"आषाढ़ी कार्त्तिकी माघी तिथयः पुण्यसम्भवाः ।
अप्रदानवतो यान्तु यस्यार्य्योऽनुमतो गतः ॥"
अप्रदानवतो दानरहितस्येत्यस्तिथयो यान्तु आर्य्यः श्रीरामचन्द्रो गतो यस्यानुमतः इत्यन्वयः । उत्तरवाक्ये यच्छब्दान्न तच्छब्दापेक्षा ॥
अथ कोजागरकृत्यम् । कल्पतरौ ब्रह्मपुराणम् ।
"आश्वयुज्यां पौर्णमास्यां निशुम्भो वालुकार्णवात् ।
आयाति सेनया सार्द्धं कृत्वा युद्धं सुदारुणम् ॥
तस्मात्तत्र नरैर्मार्गाः खगेन्द्रस्य समीपतः ।
शोधितव्याः प्रयत्नेन भूषितव्याश्च भूषणैः ॥
पुष्पार्घ्यफलमूलान्नसर्वपप्रकरैस्तथा ।
वेश्मानि भूषितव्यानि नानावर्णैर्विशेषतः ॥
सुस्नातैरनुलिप्तैश्च नरैर्भाव्यं सवान्धवैः ।
दिवा तत्र न भोक्तव्यं मनुष्यैश्च विवेकिभिः ॥
स्त्रीबालवृद्धसर्व्वैश्च भोक्तव्यं पूजितैः सुरैः ॥"
पूजितैः सुरैरिति विशेषणे तृतीया । तेन पूजितसुरैरित्यर्थः ।
"पुष्पाद्यैः सफलैः पत्रैस्तथा द्वारोर्द्वभित्तयः ।
द्वारोपान्ते सुदीप्तस्तु संपूज्यो हव्यवाहनः ॥
यथाशक्तिकृतोपेतैस्तण्डुलैश्च सुतर्पितैः ।
संपूजितव्यः पूर्णेन्दुः पयसा पायसेन च ॥
रुद्रः सभार्य्यः स्कन्दश्च तदा नन्दीश्वरो मुनिः ।
गोमद्भिः सुरभिः पूज्या छागवद्भिर्हुताशनः ॥
उरभ्रवद्भिर्वरुणो गजवद्भिर्विनायकः ।
पूज्यः साध्यैश्च रेवन्तो यथाविभवविस्तरैः ॥
ततः पूज्यो निशुम्भोऽपि समायैस्त्रिलतण्डुलैः ।
सुगन्धिभिर्धृतोपेतैः क्षुधराद्यैश्च भूरिभिः ॥
ब्राह्मणान् भोजयित्वा तु भोक्तव्यं मांसवर्जितम् ।
वह्निमार्च्चयतैर्नृत्यैर्दृष्ट्वा क्रीड़ाः पृथग्विधाः ॥"
ततश्च द्वारोर्द्वभित्तिहव्यवाहनपूर्णेन्दुसभार्य्यरुद्रस्कन्दनन्दीश्वरसुनयः सर्व्वैरेव पूज्याः । द्वारोर्द्वभित्तिशब्दोऽत्र बहुवचनान्तः । नन्दीश्वरसुनिरेकः । गोमता सुरभिः । छागवता हुताशनः । मेषवता वरुणः । इक्षिमता विनायकः । कस-

वता रेवत्यः । सर्व्वैरेव निकुम्भः पूज्यः । महार्णवे लिङ्गपुराणम् ।
"आश्विने पौर्णमास्यान्तु चरेज्जागरणं निशि ।
कौमुदी सा समाख्याता कार्य्या लोकविभूतये ॥
कौमुदीं पूजयेल्लक्ष्मीमिन्द्रैरावतसंस्थिताम् ।
सुगन्धिनिशि सद्वेषो अर्च्चेज्जागरणञ्चरेत् ॥"
तथा,—
"निशीथे वरदा लक्ष्मीः को जागर्त्तीतिभाषिणी ।
तस्मै वित्तं प्रयच्छामि अर्च्चेः क्रीड़ां करोति यः ।
नारिकेलैर्विघिपटकैः पितॄन् देवान् समर्च्चयेत् ।
यन्नूनं प्रीणयेत्तेन स्वयं तदश्नतो भवेत् ॥"
अत्र निशीति निशीथ इति चाभिधानाद्रात्रिकृत्यमिदम् ।
"ततः प्रदोषव्यापिनी ग्राह्या तिथिर्नक्तव्रते सदा ।
प्रदोषोऽस्तमयादूर्द्धं घटिकाद्वयमिष्यते ॥"
इति संवत्सरप्रदीपधृतवत्सवचनात् ॥
यदि प्रदोषनिशीथोभयव्यापिनी पौर्णमासी तदा कोजागरकृत्यम् । उभयव्याप्यनुरोधात् । यदा तु पूर्व्वदिने निशीथव्याप्तिः परदिने प्रदोषव्याप्तिस्तदा परेद्युस्तत्कृत्यम् । प्रधानपूजाकालव्याप्त्यनुरोधात् । यदा पूर्व्वेद्युर्निशीथव्याप्तिः परेद्युर्न प्रदोषव्याप्तिस्तदा सुतरां पूर्व्वेद्युस्तत्कृत्यम् ।
"अष्टःसु तिथयः पुण्याः कर्म्मानुष्ठानतो दिवा ।
नक्तादिव्रतयोगे तु रात्रियोगो विशिष्यते ॥"
इति वचनात् ॥
वर्षक्रियाकौमुद्यां मत्स्यसूक्ते ।
"महालक्ष्म्यास्तु तुलसीं भिक्षिकां काञ्चनन्तथा ॥"
लक्ष्मीध्यानमादित्यपुराणे ।
"पाद्माक्षमालिकाम्भोजहस्तिभिर्योन्यसौम्ययोः ।
पद्मासनस्थां ध्यायेच्च श्रियं त्रैलोक्यमातरम् ॥
गौरवर्णां सुरूपाञ्च सर्व्वालङ्कारभूषिताम् ।
रौक्मपद्मद्वयकरां वरदां दक्षिणेन तु ॥
पाद्मेति । दक्षिणे पाद्माक्षमालाभ्यां वामे पद्माङ्कुशाभ्यां भूषितां वामकरे हेमपद्मं दक्षिणकरे वरं दधतीत्यर्थः । ततः पाद्यादिभिः संपूज्य,—
"ॐ नमस्ते सर्व्वदेवानां वरदासि हरिप्रिये ।
या गतिस्त्वत्प्रपन्नानां सा मे भूयात् त्वदर्च्चनात् ॥"
इत्यनेन पुष्पाञ्जलित्रयं दत्त्वा प्रणमेत् ॥
स्कन्धध्यानमादित्यपुराणे ।
"षडूर्द्धगजारूढो वज्रपाणिः पुरन्दरः ।
शतधीपतिश्च ध्यातव्यो नानाभरणभूषितः ॥"
पाद्यादिभिः संपूज्य,—
"ॐ विचित्ररावणस्थाय शक्रवज्रहलिप्रपाणये ।
पौलोम्यालिङ्गिताङ्गाय महाज्ञाय ते नमः ॥"
इति पुष्पाञ्जलित्रयं दत्त्वा प्रणमेत् । ततः कुबेरः संपूज्यः । इति रुद्रधरः ॥ तं पाद्यादिभिः संपूज्य,—
"ॐ धनदाय नमस्तुभ्यं निधिपद्माधिपाय च ।
भवतु त्वत्प्रसादान्मे धनधान्यादिसम्पदः ॥"
इति प्रणमेत् ॥
यत्र प्रदोषे सर्व्वेषां पूर्णेति रुद्रधरप्रभृतयः ॥ न च निकुम्भपर्य्यन्तानां पूर्व्वाह्ण एव पूजनं निरूपणमिति वाच्यम् । दिवा तत्र न भोक्तव्यं इत्युपक्रम्य पूज्याश्च सफलैः पत्रैरित्यादिना विधिश्च पूजामभिधाय भोक्तव्यमित्यभिधानात् रात्रावेव पूजाभोजने अवगम्यते । अतएवाभुक्तानामेव भोक्तव्यं पूजितैः सुरैरित्यनेन विधिश्च दिवा पूजाभोजने विहिते ॥ * ॥
योगिनीतन्त्रे ।
"विरिञ्चेस्तु गृहे एकां घण्टां लक्ष्मीगृहे त्रयम् ।
सर्व्ववाद्यमयीं घण्टां वादयेत् वादयेत् ॥"* ॥
लक्ष्मीवाक्यम् ।
"प्रकीर्णभाण्डामनवेक्ष्य कारिणीं
सदा च भर्तुः प्रतिकूलवादिनीम् ।
परस्य वेश्माभिरतामलज्जा-
मेवंविधां स्त्रीं परिवर्जयामि ॥"
मार्कण्डेयः ।
"शिरः सपुष्पं चरणौ सपूजितौ
वराङ्गनासेवनमल्पभोजनम् ।
अनग्न्यगारित्वमपर्व्वमैथुनं
चिरप्रणष्टां श्रियमानयन्ति षट् ॥
मानुषास्थि गृहे यत्र अहोरात्रञ्च तिष्ठति ।
तत्रालक्ष्मि ! तवावासस्तथान्येषाञ्च रक्षसाम् ॥
सूर्पदात्रादिकं यत्र पदार्थैश्चोपघासनम् ॥"
हरिवंशे ।
"यत्र श्रीः श्रीः स्थिता तत्र यत्र श्रीश्चञ्चलस्थितिः ।
चञ्चलश्रीश्चलधा श्रीश्च नित्यं कृष्णे महात्मनि ॥"
मत्स्यपुराणे ।
"स्थिरो हि यो हि पुरुषः स्थिरश्रीरेव जायते ।
रक्षितुं नैव शक्नोति चपलश्चपलां श्रियम् ॥"
तथा,—
"अवश्यमुद्योगवतां श्रीरपारा भवेत् सदा ।
ब्रह्मप्रोक्ताहिता देवा मन्यवः पुनरम्बुधिम् ॥"
कृत्यकौमुद्याम् ।
"नारिकेलोदकं पीत्वा अर्च्चेज्जागरणं निशि ।
तस्मै वित्तं प्रयच्छामि को जागर्त्तीति भाषिणे ॥"
अत्र क्रीड़ायां वासवयुधिष्ठिरसंवादः प्रचरति । तत्क्रीड़ा चतुरङ्गशब्दे द्रष्टव्या ॥ * ॥ वैष्णवानान्तु स्कन्दपुराणम् ।
"पौर्णमास्यां समतीतायां यावद्भवति पूर्णिमा ।
माघमासस्य देवेन्द्र ! पूजा विष्णोर्विधीयते ॥"
इति । पौर्णमासीमासमुपक्रम्य ।
"पितरं देवतानाथ मूलकं नैव दापयेत् ।
ददन्नरकमाप्नोति सूकरीं ब्राह्मणो यदि ॥
ब्राह्मणो मूलकं भुक्त्वा चरेच्चान्द्रायणव्रतम् ।
अन्यथा नरकं याति चन्द्रो विट् शूद्र एव च ॥
वरं भक्ष्यमभक्ष्यञ्च पिबेद्वा गर्हितञ्च यत् ।
वर्ज्जनीयं प्रयत्नेन मूलकं मद्यसमम् ॥"* ॥
फाल्गुने दोलयात्रामाह वीर्यचिन्तामण्यौ मत्स्यपुराणम् ।
"नरो दोलागतं दृष्ट्वा गोविन्दं पुरुषोत्तमम् ।
फाल्गुन्यां संयतो भूत्वा गोविन्दस्य पुरं व्रजेत् ॥"
स्कन्दपुराणीयपुरुषोत्तममाहात्म्ये ऊनविंशाध्याये ।
"फाल्गुन्यां क्रीड़नं कुर्य्यात् दोलायां मम भूमिप ! ॥"
इति तिथितत्त्वम् ॥ * ॥
तस्याः पर्व्वत्वं पर्व्वशब्दे द्रष्टव्यम् ॥
पूर्त्त, क्ली, (पॄ पालने + भावे क्तः । "न ध्याख्यापॄमूर्च्छिमदाम् ।" ८ । २ । ५७ । इति निष्ठातस्य न नत्वम् ।) पालनम् । इति शब्दरत्नावली ॥ (पिपर्त्ति पालयत्यनेन जीवानिति । पॄ + करणे क्तः ।) खातादिकर्म्म । इत्यमरः । २ । ७ । २८ ॥ आदिना देवकुल्यादि । तदुक्तम् ।
"पुष्करिण्यः सभा वापी देवतायतनानि च ।
आरामश्च विशेषेण पूर्त्तं कर्म्म विनिर्द्दिशेत् ॥"
इति भरतः ॥
तत्करणफलम् ।
"इष्टापूर्त्तं द्विजातीनां प्रथमं धर्म्मसाधनम् ।
इष्टेन लभते स्वर्गं पूर्त्तेन मोक्षञ्च विन्दति ॥
वापीकूपतड़ागानि देवतायतनानि च ।
पतितान्युद्धरेद्यस्तु स पूर्त्तफलमश्नुते ॥"
इति वराहपुराणम् ॥ * ॥
वापीत्यादीनां पूर्त्तत्वाभिधानात् शूद्रस्याधिकारमाह जातूकर्णः ।
"वापीकूपतड़ागादि देवतायतनानि च ।
अन्नप्रदानमारामाः पूर्त्तमित्यभिधीयते ॥
ग्रहोपरागे यद्दानं पूर्त्तमित्यभिधीयते ।
इष्टापूर्त्तं द्विजातीनां धर्म्मः सामान्य उच्यते ।
अधिकारी भवेच्छूद्रः पूर्त्ते धर्म्मे न वैदिके ॥"
वैदिके वेदाध्ययनसाध्ये अग्निहोत्रादाविति रत्नाकरः ॥ एवं स्त्रीणामपि पूर्त्ताधिकारः । यथा नारीत्यनुवृत्तौ वृद्धशातातपः ।
"पितृश्वशुरदौहित्रान् भर्त्तुः स्वसीयमातुलान् ।
पूजयेत् कथयेत्पूर्त्ताभ्यां वृद्धानाघातिधीर्न्स्त्रियः ॥"
इति शब्दार्थतत्त्वम् ॥
(पूर्त्तं खातादिकर्म्म अङ्गत्वेनास्त्यस्येति । अर्श आद्यच् । धर्म्मविशेषे, पुं । यथा, मार्कण्डेये । १३ । १५ ।
"यत्तस्मै विमुखा यान्ति निश्चस्य गृहमेधिनः ।
तस्मादिष्टञ्च पूर्त्तञ्च धर्म्मो ह्यपि नश्यतः ॥")
पूर्त्तः, त्रि, (पॄ + कर्म्मणि क्तः ।) पूरितः । इत्रः । इति विश्वः ॥ (यथा, भागवते । ३ । २४ । ३१ ।
"ऐश्वर्य्यवैराग्ययशोऽवबोध-
वीर्य्यश्रिया पूर्त्तमहं प्रपद्ये ॥")
पूर्त्तिः, स्त्री, पूरणम् । पृधातोर्भावे क्तिः । इति व्याकरणम् । (यथा, ऋग्वेदे । ६ । १६ । ६ ।
"विश्वाभिर्गीर्भिरभि पूर्त्तिमश्वां
मदेम शतहिमाः सुवीराः ॥")
पूर्व्व, क निकेतने । इति कविकल्पद्रुमः । (पुरा० पर० निमन्त्रणे सक० नियासे अक० सेट् ।) षष्ठस्वरः । निकेतनमिह निमन्त्रणं निवासो वा । यः, पूर्व्वयति द्विजान् भोक्तुं यज्ञे । पूर्व्वयति तीर्थेषु साधुः । इति दुर्गादासः । पूर्व्वदानोद्यमः ॥

पू(र्व्व)र्व्वः, त्रि, (पूर्व्वे निमन्त्रणे निवासे वा+ अच्।) प्रथमः। (यथा, कुमारे। १। ५३।
"यदेव पूर्व्वे जनने प्रतीरं
सा दक्षरोधात् सुदती ससर्ज्ज।
तदा प्रभृत्येव विमुक्तसङ्गः
पतिः पशूनामपरियहोऽभूत्॥"
यथाच मनुः। २। १८४।
"गुरोः कुले न भिक्षेत न ज्ञातिकुलबन्धुषु।
अलाभे त्वन्यगेहानां पूर्व्वं पूर्व्वं विवर्ज्जयेत्॥")
आदिः। (यथा, मनुः। २। ७४।
"ब्राह्मणः प्रणवं कुर्य्यादादावन्ते च सर्व्वदा।
स्रवत्यनोङ्कृतं पूर्व्वं पुरस्ताच्च विशीर्य्यति॥")
प्राग्दिग्-देशकालाः। इत्यमरः॥ (यथा, मनुः। ५। ६२।
"दक्षिणेन स्पृतं शूद्रं पुरद्वारेण निर्हरेत्।
पश्चिमोत्तरपूर्व्वेषु यथायोगं द्विजन्मनः॥")
समग्रम्। इति तट्टीकायां स्वामी॥ अग्रः। इति हलायुधः॥ (यथा, मनुः। २। ५०।
"त्रिराचामेदपः पूर्व्वं द्विः प्रमृज्यात्ततो मुखम्।
खानि चैव स्पृशेदद्भिरात्मानं शिर एव च॥")

पूर्व्वगङ्गा, स्त्री, (पूर्व्वा चासौ गङ्गा चेति।) नर्म्मदानदी। इति हेमचन्द्रः। ४। १४६॥

पूर्व्वज, पुं, (पूर्व्वे जायते इति। पूर्व्व+जन+डः।) ज्येष्ठभ्राता। इत्यमरः। २।६।४३॥ (पूर्व्वकालोत्पन्ने, त्रि। यथा, महाभारते। १।१०५।२६।
"तामङ्गिः परिधिष्वाणां महर्षिरभिवाद्य च।
मातरं पूर्व्वजः पुत्रो यासो वचनमब्रवीत्॥")

पूर्व्वजाः, पुं, (पूर्व्वे पूर्व्वस्मिन् काले जायन्ते इति। जन+डः।) दिव्यपितृगणः। तत्पर्य्यायः। पितरः २ चन्द्रगोलस्थाः ३ व्यस्तघृष्वाः ४ स्वधाभुजः ५ कव्यवालादयः ६। बहुवचनान्तोऽयम्। इति त्रिकाण्डशेषः॥

पूर्व्वजा, स्त्री, (पूर्व्वं जायते इति। जन+डः। टाप्।) अग्रजा। ज्येष्ठा भगिनी। पूर्व्वज इत्यमरदर्शनात्॥

पूर्व्वजिनः, पुं, (पूर्व्वो जिनः।) अतीतजिनविशेषः। तत्पर्य्यायः। मञ्जुश्रीः २ ज्ञानदर्पणः ३ मञ्जुभद्रः ४ मञ्जुघोषः ५ कुमारः ६ अष्टारचक्रवान् ७ स्थिरचक्रः ८ वज्रधरः ९ प्रज्ञाकायः १० आदिराट् ११ नीलोत्पली १२ महाराजः १३ नीलः १४ घण्टीलवाहनः १५ धियाम्पतिः १६ खड्गी १७ दण्डी १८ विभूषणः १९ बालव्रतः २० पद्मचीरः २१ सिंहकेलिः २२ शिखाधरः २३ वागीश्वरः २४। इति त्रिकाण्डशेषः॥

पूर्व्वदिक्, स्त्री, (पूर्व्वा दिक्।) प्राची दिक्। यस्यां दिशि सूर्य्य उदेति। तदधिपतिरिन्द्रः। तस्याः पर्य्यायादिः पूर्व्वशब्दे द्रष्टव्यः॥

पूर्व्वदिक्पतिः, पुं, (पूर्व्वदिशः पतिरधिपतिः।) इन्द्रः। इति हेमचन्द्रः। २। ८७॥

पूर्व्वदेवः, पुं, (पूर्व्वश्चासौ देवश्चेति। यद्वा, पूर्व्वं देव इति सुप्सुपेति समासः।) असुरः। इत्यमरः। १।१।५२॥ (नरनारायणावृषी। तत्र द्वितीयगान्योऽयम्। यथा, महाभारते। ५। ४६। ५।
"तेषां मनश्च तेजश्चाप्यादधानाविवौजसा।
पूर्व्वदेवौ व्यतिक्रान्तौ नरनारायणावृषी॥")

पूर्व्वदेशः, पुं, (पूर्व्वो देशः।) प्राचीदिगवस्थितजनपदः। तत्पर्य्यायः। वर्द्धनिः २। इति त्रिकाण्डशेषः॥ यथा,—
"प्राच्यां मागधशौण्डौ च वारेन्द्रीगौड़राढ़काः।
वर्द्धमानतमोलिप्तप्राग्ज्योतिषोदयादयः॥"
इति ज्योतिस्तत्त्वम्॥

पूर्व्वपक्षः, पुं, (पूर्व्वः पक्षः।) शुक्लपक्षः। इत्यमरः॥ (यथा, मनुः। ३। २७८।
"यथा चैवापरः पक्षः पूर्व्वपक्षाद्विशिष्यते॥")
शास्त्रीयप्रश्नः। सिद्धान्तविरुद्धकोटिः। तत्पर्य्यायः। चोद्यम् २। इति त्रिकाण्डशेषः॥ देश्यम् ३ कक्किका ४। इति शब्दरत्नावली॥ (यथा, मार्कण्डेये। १। ३।
"पूर्व्वपक्षोक्तसिद्धान्तपरिनिष्ठासमन्वितम्॥"
अधिकरणावयवभेदो व्यवहारविशेषः। यथा, याज्ञवल्क्ये। २। १७।
"पूर्व्वपक्षेऽधरीभूते भवन्त्युत्तरवादिनः॥")

पूर्व्वपक्षपादः, पुं, (पूर्व्वपक्ष एव पादः।) चतुर्व्यादव्यवहारान्तर्गतः प्रथमः पादः। तस्य संज्ञान्तरम्। भाषा २ प्रतिज्ञा ३ पक्षः ४। इति मिताक्षरा॥ तत्र दृष्टस्मृतिः।
"पूर्व्वपक्षः स्मृतः पादो द्विपादश्चोत्तरः स्मृतः।
क्रियापादस्तथा चान्यश्चतुर्थो निर्णयः स्मृतः॥
मिथ्योक्तो च चतुर्व्यात् स्यात् प्रत्यवस्कन्दने तथा।
प्राड्न्याये च स विज्ञेयो द्विपात् संप्रतिपत्तिषु॥
यद्यपि संप्रतिपत्तावपि निर्णयोऽस्ति तथाप्युत्तरवादिनैव भाषार्थस्याङ्गीकृतत्वेन क्रियासाधो न भवतीति द्विपादतोक्ता॥ * ॥
अथ भाषापादः। तत्र भाषास्वरूपमाह बृहस्पतिः कात्यायनश्च दृष्टस्मृतौ।
"प्रतिज्ञादोषनिर्मुक्तं साध्यं सत्कारणान्वितम्।
निश्चितं लोकसिद्धञ्च पक्षं पक्षविदो विदुः॥
स्वल्पाक्षरः प्रभूतार्थो निःसन्दिग्धो निराकुलः।
विरोधिकारणैर्मुक्तो विरोधिप्रतिरोधकः॥
यदा त्वेवंविधः पक्षः कल्पितः पूर्व्ववादिना।
दद्यात्तत्पक्षसम्बद्धं प्रतिवादी तदोत्तरम्॥"
प्रतिज्ञा साध्याभिधायिका वाक्। तस्या दोषैः परस्परविरुद्धार्थपदादिभिरुक्तम्। साध्यं साधनार्हाभिमतार्थं पक्षं विदुः। अन्यथा प्रतिज्ञादोषेण साध्यदोषः स्यात्। अतएवोक्तम्।
"वचनस्य प्रतिज्ञात्वं तदर्थस्य च पक्षता।
व्यसङ्गरेण वक्तव्ये व्यवहारेषु वादिभिः॥"
वक्तव्ये पक्षप्रतिज्ञे पूर्व्वोक्ते। नारदेनापि।
"सारस्तु व्यवहाराणां प्रतिज्ञा समुदाहृता।
तद्धानौ हीयते वादी तरंस्तानुत्तरो भवेत्॥"
उत्तरो विजयी यद्यप्यत्र साध्यं साध्यं तद्विशिष्टधर्म्मो पक्ष इति भेदः। तथाप्यत्र वाक्यप्रत्याय्यार्थादिधर्म्मविशेषविशिष्टस्य पक्षतया धर्म्मिणोऽधमर्णादेरेव साध्यत्वात् साध्यपक्षयोरभेदाभिधानम्। अतएव उपसंहारे च एवंविधः पक्ष इति मिताक्षरायान्तु भाषा प्रतिज्ञापक्ष इति नार्थान्तरमित्युक्तम्। भाषार्थसूक्ता भाषास्वरूपप्रपञ्चमाह स्वल्पाक्षर इति। निराकुलः पौर्व्वापर्य्यविपर्य्यासादिशून्यः।
"अत्र द्यूते च व्यवहारे च प्रवृते यज्ञकर्म्मणि।
यानि पश्यन्त्युदासीनाः कर्त्ता तानि न पश्यति॥"
इति गृह्यसंग्रहवचनादुदासीनेभ्यो ज्ञात्वा शोधयेत्। तच्छोधनमाह बृहस्पतिः।
"न्यूनाधिकं पूर्व्वपक्षं तावद्वादी विशोधयेत्।
न दद्यादुत्तरं यावत् प्रत्यर्थी सभ्यसन्निधौ॥"
तल्लिखनप्रकारमाह व्यासः।
"पाण्डुलेखेन फलके भूमौ वा प्रथमं लिखेत्।
ऊनाधिकन्तु संशोध्य पश्चात् पत्रे निवेशयेत्॥"
फलकं काष्ठादिपट्टकम्। कात्यायनः।
"पूर्व्वपक्षं स्वभावोक्तं प्राड्विवाकोऽथ लेखयेत्।
पाण्डुलेखेन फलके ततः पत्रेऽभिलेखयेत्॥
शोधयेत् पूर्व्वपक्षन्तु यावन्नोत्तरदर्शनम्।
उत्तरेणावरुद्धस्य निवृत्तिः शोधनं भवेत्॥
अन्यदुक्तं लिखेदूर्ध्वोऽन्यदर्थिप्रत्यर्थिनोर्वचः।
चौरवच्छासयेत्तन्तु धार्म्मिकः पृथिवीपतिः॥"
स्वभावोक्तमकृत्रिमम्। एतच्च स्वरविशेषादिना सूचनीयम्। अतएव याज्ञवल्क्यः।
"छलं निरस्य भूतेन व्यवहारान्नयेन्नृपः।
भूतमप्यनुपन्यस्तं हीयते व्यवहारतः॥"
भूतं तत्त्वार्थसम्बद्धम्। यदाह नारदः।
"भूतं तत्त्वार्थसम्बद्धं प्रमादाभिहितं छलम्।
किन्तु राज्ञा विशेषेण स्वधर्म्ममभिरक्षता॥
मनुष्यचित्तवैचित्र्यात् परीक्षा साध्वसाधुता।
सर्व्वेष्वर्थविवादेषु वाक्छलेनावसीदति॥
पशुस्त्रीभूम्यादानेषु साक्षोऽप्यर्थान्न हीयते॥"
सर्व्वेषु अर्थविवादेषु प्रमादाभिधानेऽपि नावसीदति। अत्रोदाहरणं पशुस्त्रीत्यादि। अर्थविवादग्रहणान्यनुकृतविवादेषु प्रमादाभिधाने प्रकृतार्थाद्धीयत इति गम्यते। यथाहमनेन शिरसि पादेन ताड़ित इत्यभिधाय केवलं हस्तेन ताड़ित इति वदन् न केवलं दण्ड्यः पराजीयते च। तथा च त्वं मृतं मह्यं ऋणं धारयसि मम ऋणत्वेन गृहीतताबद्धनकत्वादित्यादि भाषाशरीरं एतच्च संस्कृतदेश्यभाषान्यतरेण यथावोधं वक्तव्यं लेख्यं वा सूत्रकाणामपि वादिप्रतिवादित्वदर्शनात्। अतएवाध्यापनेऽपि तथोक्तम्। विष्णुधर्म्मोत्तरे।
"संस्कृतैः प्राकृतैर्वाक्यैः शिष्यमनुरूपतः।
देशभाषादुपायाद्यैर्बोधयेत् च गुरुः स्मृतः॥"
इति व्यवहारतत्त्वम्॥

पूर्व्वपदं, क्ली, (पूर्व्वं पदम्।) परपदप्रागवर्त्ति-विभक्त्यन्तप्रकृतिः। यथा पूर्व्वपदात् संज्ञायामगः। इति व्याकरणम्॥

पूर्व्वपर्व्वतः, पुं, (पूर्व्वः पूर्व्वदिक्स्थः पर्व्वतः। इति नित्यकर्म्मधारयः।) उदयाचलः। इत्यमरः। २। ३। २॥

पू(र्व्व)र्व्वः, त्रि, (पूर्व्व निमन्त्रणे निवासे वा+ व्यच्।) प्रथमः। (यथा, कुमारे। १।५३।
"यदेव पूर्व्वे जनने शरीरं
सा दक्षरोषात् सुदती ससर्ज्ज।
तदा प्रभृत्येव विमुक्तसङ्गः
पतिः पशूनामपरियहोऽभूत्॥"
यथाच मनुः। २। १८४।
"गुरोः कुले न भिक्षेत न ज्ञातिकुलबन्धुषु।
अलाभे त्वन्यगेहानां पूर्व्वं पूर्व्वं विवर्ज्जयेत्॥")
आदिः। (यथा, मनुः। २। ७४।
"ब्राह्मणः प्रणवं कुर्य्यादादावन्ते च सर्व्वदा।
स्रवत्यनोङ्कृतं पूर्व्वं पुरस्ताच्च विशीर्य्यति॥")
प्राग्दिग्-देशकालाः। इत्यमरः॥ (यथा, मनुः। ५। ६२।
"दक्षिणेन मृतं शूद्रं पुरद्वारेण निर्हरेत्।
पश्चिमोत्तरपूर्व्वैस्तु यथायोगं द्विजन्मनः॥")
समग्रम्। इति तट्टीकायां स्वामी॥ अग्रः। इति हलायुधः॥ (यथा, मनुः। २। ५०।
"चिराचामेदपः पूर्व्वं द्विः प्रश्व्याक्तातो सुखम्।
खानि चैव स्पृशेदद्भिरात्मानं शिर एव च॥")
पूर्व्वगङ्गा, स्त्री, (पूर्व्वा चासौ गङ्गा चेति।) नर्म्मदानदी। इति हेमचन्द्रः। ४। १४६॥
पूर्व्वजः, पुं, (पूर्व्वं जायते इति। पूर्व्व+जन+डः।) ज्येष्ठभ्राता। इत्यमरः।२।६।४३॥ (पूर्व्वकालोत्पन्ने, त्रि। यथा, महाभारते।१।१०५।२६।
"तामग्निः परिधिचार्त्तां महर्षिरभिवाद्य च।
मातरं पूर्व्वजः पुत्रो वासो वचनमब्रवीत्॥")
पूर्व्वजाः, पुं, (पूर्व्वे पूर्व्वस्मिन् काले जायन्ते इति। जन+डः।) दिव्यपितृगणः। तत्पर्य्यायः। पितरः २ चन्द्रगोलस्थाः ३ न्यस्तग्रस्थाः ४ स्वधाभुजः ५ कव्यवालादयः ६। बहुवचनान्तोऽयम्। इति त्रिकाण्डशेषः॥
पूर्व्वजा, स्त्री, (पूर्व्वे जायते इति। जन+डः। टाप्।) अग्रजा। ज्येष्ठा भगिनी। पूर्व्वज इत्यमरदर्शनात्॥
पूर्व्वजिनः, पुं, (पूर्व्वो जिनः।) अतीतजिनविशेषः। तत्पर्य्यायः। मञ्जुश्रीः २ ज्ञानदर्पणः ३ मञ्जुभद्रः ४ मञ्जुघोषः ५ कुमारः ६ अष्टारचक्रवान् ७ स्थिरचक्रः ८ वज्रधरः ९ प्रज्ञाकायः १० आदिराट् ११ नीलोत्पली १२ महाराजः १३ नीलः १४ ग्राहूलवाहनः १५ धियाम्पतिः १६ खड्गी १७ दण्डी १८ विभूषणः १९ बालव्रतः २० पद्मचीरः २१ सिंहकेलिः २२ शिखाधरः २३ वागीश्वरः २४। इति त्रिकाण्डशेषः॥
पूर्व्वदिक्, स्त्री, (पूर्व्वा दिक्।) प्राची दिक्। यस्यान्दिशि सूर्य्य उदेति। तदधिपतिरिन्द्रः। तस्याः पर्य्यायादिः पूर्व्वाशब्दे द्रष्टव्यः॥
पूर्व्वदिक्पतिः, पुं, (पूर्व्वदिशः पतिरधिपतिः।) इन्द्रः। इति हेमचन्द्रः। २। ८७॥
पूर्व्वदेवः, पुं, (पूर्व्वश्चासौ देवश्चेति। यद्वा, पूर्व्वं देव इति सुप्सुपेति समासः।) असुरः। इत्यमरः। १।१।९२॥ (नरनारायणाद्यृषी। तत्र द्विवचनान्तोऽयम्। यथा, महाभारते। ५। ४६। ५।
"तेषां मनश्च तेजश्चाप्यादधानाविवौजसा।
पूर्व्वदेवौ व्यतिक्रान्तौ नरनारायणावृषी॥")
पूर्व्वदेशः, पुं, (पूर्व्वो देशः।) प्राचीदिगवस्थितजनपदः। तत्पर्य्यायः। वर्त्तनिः २। इति त्रिकाण्डशेषः॥ यथा,—
"प्राच्यां मागधशौण्डौ च वारेन्द्रीगौड़राढ़काः।
वर्द्धमानतमोलिप्तप्राग्ज्योतिषोदयाद्रयः॥"
इति ज्योतिस्तत्त्वम्॥
पूर्व्वपक्षः, पुं, (पूर्व्वः पक्षः।) शुक्लपक्षः। इत्यमरः॥ (यथा, मनुः। ३। २७८।
"यथा चैवापरः पक्षः पूर्व्वपक्षाद्विशिष्यते॥")
आक्षेपप्रश्नः। सिद्धान्तविरुद्धकोटिः। तत्पर्य्यायः। चोद्यम् २। इति त्रिकाण्डशेषः॥ देश्यम् ३ फक्किका ४। इति शब्दरत्नावली॥ (यथा, मार्कण्डेये। १। ३।
"पूर्व्वपक्षोक्तिसिद्धान्तपरिनिष्ठासमन्वितम्॥")
अधिकरणावयवभेदो व्यवहारविशेषः। यथा, याज्ञवल्क्ये। २। १७।
"पूर्व्वपक्षेऽधरीभूते भवन्त्युत्तरवादिनः॥")
पूर्व्वपक्षपादः, पुं, (पूर्व्वपक्ष एव पादः।) चतुर्व्यादव्यवहारान्तर्गतः प्रथमः पादः। तस्य संज्ञान्तरम्। भाषा २ प्रतिज्ञा ३ पक्षः ४। इति मिताक्षरा॥ तत्र दृष्टव्यतिः।
"पूर्व्वपक्षः स्मृतः पादो द्विपादश्चोत्तरः स्मृतः।
क्रियापादस्तथा चान्यश्चतुर्थो निर्णयः स्मृतः॥
मिथ्योक्तौ च चतुष्पात् स्यात् प्रत्यवस्कन्दने तथा।
प्राड्न्याये च स विज्ञेयो द्विपात् संप्रतिपत्तिषु॥
यद्यपि संप्रतिपत्तावपि निर्णयोऽस्ति तथाप्युत्तरवादिनैव भाषार्थस्याङ्गीकृतत्वेन क्रियासाध्यो न भवतीति द्विपादतोक्ता॥ * ॥
अथ भाषापादः। तत्र भाषास्वरूपमाहतुः कात्यायनदृष्टव्यतिः।
"प्रतिज्ञादोषनिर्मुक्तं साध्यं सत्कारणान्वितम्।
निश्चितं लोकसिद्धञ्च पक्षं पक्षविदो विदुः॥
स्वल्पाक्षरः प्रभूतार्थो निःसन्दिग्धो निराकुलः।
विरोधिकारणैर्मुक्तो विरोधिप्रतिरोधकः॥
यदा त्वेवंविधः पक्षः कल्पितः पूर्व्ववादिना।
दद्यात्तत्पक्षसम्बद्धं प्रतिवादी तदोत्तरम्॥"
प्रतिज्ञा साध्याभिधायिका वाक्। तस्या दोषैः परस्परविरुद्धार्थपदादिभिरुक्तम्। साध्यं साधनार्हाभिमतार्थं पक्षं विदुः। अन्यथा प्रतिज्ञादोषेण साध्यदोषः स्यात्। अतएवोक्तम्।
"वचनस्य प्रतिज्ञात्वं तदर्थस्य च पक्षता।
व्यसङ्गेन वक्तव्ये व्यवहारेषु वादिभिः॥"
वक्तव्ये पक्षप्रतिज्ञे पूर्व्वोक्ते। नारदेनापि।
"सारस्तु व्यवहाराणां प्रतिज्ञा समुदाहृता।
तद्धानौ क्षीयते वादी तस्मात्तामुत्तरो भवेत्॥"
उत्तरो विजयी यदप्यन्यच्च साध्यं ज्ञाप्यं तद्विशिष्टधर्म्मी पक्ष इति भेदः। तथाप्यत्र वाक्प्रत्यायनार्थाधिधर्म्मविशेषविशिष्टस्य पक्षतया धर्म्मिणोऽधमर्णादेरेव साध्यत्वात् साध्यपक्षयोरभेदाभिधानम्। अतएव उपसंहारे च एवंविधः पक्ष इति मिताक्षरायामु भाषा प्रतिज्ञायश्च इति नार्थान्तरमित्युक्तम्। भाषार्घसङ्गा भाषास्वरूपप्रपञ्चमाह स्वल्पाक्षर इति। निराकुलः पौर्ब्बापर्य्यविपर्य्यासादिशून्यः।
"अक्ष द्यूते च व्यवहारे च व्रतेऽक्ष कर्म्मणि।
यानि पश्यन्त्युदासीनाः कर्त्ता तानि न पश्यति॥"
इति गृह्यसंग्रहवचनादुदासीनेभ्यो ज्ञात्वा शोधयेत्। तच्छोधनमाह दृहस्पतिः।
"न्यूनाधिकं पूर्व्वपक्षं तावद्वादी विशोधयेत्।
न दद्यादुत्तरं यावत् प्रत्यर्थी सभ्यसन्निधौ॥"
तल्लिखनप्रकारमाह व्यासः।
"पाण्डुलेखेन फलके भूमौ वा प्रथमं लिखेत्।
ऊनाधिकन्तु संशोध्य पश्चात् पत्रे निवेशयेत्॥"
फलकं काष्ठादिपट्टकम्। कात्यायनः।
"पूर्व्वपक्षं स्वभावोक्तं प्राड्विवाकोऽथ लेखयेत्।
पाण्डुलेखेन फलके ततः पत्रेऽभिलेखयेत्॥
शोधयेत् पूर्व्वपक्षन्तु यावन्नोत्तरदर्शनम्।
उत्तरेणावरुद्धस्य निवृत्तिः शोधनं भवेत्॥
अन्यदुक्तं लिखेद्योऽन्यदर्थिप्रत्यर्थिनोर्वचः।
चौरवच्छासयेत्तन्तु धार्म्मिकः पृथिवीपतिः॥"
स्वभावोक्तमकृत्रिमम्। एतच्च स्वरविशेषादिना सूत्रेयम्। अतएव याज्ञवल्क्यः।
"कृलं निरस्य भूतेन व्यवहारान्नयेन्नृपः।
भूतमप्यनृपन्यस्तं क्षीयते व्यवहारतः॥"
भूतं तत्त्वार्थसम्बद्धम्। यदाह नारदः।
"भूतं तत्त्वार्थसम्बद्धं प्रमादाभिहितं कृलम्।
किन्तु राज्ञा विशेषेण स्वधर्म्ममभिरक्षता॥
मनुष्यचित्तवैचित्र्यात् परीक्ष्या साध्यसाधुता।
सर्व्वेष्वर्थविवादेषु वाक्कृलेनावसीदति॥
पशुस्त्रीभूम्यदानादाने ग्रास्तोऽप्यर्थान्न क्षीयते॥"
सर्व्वेषु अर्थविवादेषु प्रमादाभिधानेऽपि नावसीदति। अत्रोदाहरणं पशुस्त्रीत्यादि। अर्थविवादग्रहणाच्चान्युक्तविवादेषु प्रमादाभिधाने प्रकृतार्थाद्धीयत इति गम्यते। यथाहमनेन शिरसि पादेन ताडित इत्यभिधाय केवलं हस्तेन ताडित इति वदन् न केवलं दण्डाः पराजीयते च। तथा च त्वं भूतं मह्यं ऋणं धारयसि मत्त ऋणत्वेन गृहीतत्वादनकत्वादित्यादि भाषाशरीरं एतच्च संस्कृतदेशभाषान्यतरेण यथाबोधं वक्तव्यं लेखं वा मूर्खाणामपि वादिप्रतिवादित्वदर्शनात्। अतएवाध्यापनेऽपि तथोक्तम्। विष्णुधर्म्मोत्तरे।
"संस्कृतैः प्राकृतैर्वाक्यैः शिष्यमनुरूपतः।
देशभाषाद्युपायाद्वैर्बोधयेत् च गुरुः स्मृतः॥"
इति व्यवहारतत्त्वम्॥
पूर्व्वपदं, क्ली, (पूर्व्वं पदम्।) परपदप्रागवर्त्तिविभक्त्यन्तप्रकृतिः। यथा पूर्व्वपदात् संज्ञायामगः। इति पाकरणम्॥
पूर्व्वपर्व्वतः, पुं, (पूर्व्वः पूर्व्वदिकस्थः पर्व्वतः। इति नित्यकर्म्मधारयः।) उदयाचलः। इत्यमरः। २। ३। २।

पूर्व्वघ

पूर्व्वफल्गुनी, स्त्री, (पूर्व्वा फल्गुनीनि कर्म्मधारयः।) अश्विन्यादिसप्तविंशतिनक्षत्रान्तर्गतैकादशनक्षत्रम्। तत्तु खट्वाकृतितारकाद्वयात्मकम्। तस्याधिष्ठात्री देवता भगः। इति सुकूर्म्मचिन्तामणिः॥ अपि च।

"दक्षिणोत्तरगते द्वितारके
योनिमे मिलति मञ्चकोपरि।
कीर्त्तितः स्फुटतरोरुहानने!
निःसृता २६८ गजरत्नचिह्निका॥"

द० ४। २८। इति कालिदासछतरात्रिलक्षनिरूपणम्॥ ७॥ तत्र जातफलम्।

"नूरस्यागी वाहको भूमिभर्त्ता
कोपाक्रान्तः स्याच्छिरालोऽतिदक्षः।
धूर्त्तः क्रूरोऽत्यन्तवाताधिकः प्राक्-
फल्गुन्यर्क्षे जन्मकाले च यस्य॥"

इति कोष्ठीप्रदीपः॥

पूर्व्वफल्गुनीभवः, पुं, (पूर्व्वफल्गुन्यां भवतीति। भू+अच्।) दृढस्मृतिः। इति शब्दमाला॥

पूर्व्वभद्रपदः, पुं, पूर्व्वभद्रपदाः, स्त्री, पूर्व्वभाद्रपदाः, स्त्री, } अश्विन्यादिसप्तविंशतिनक्षत्रान्तर्गतपञ्चविंशनक्षत्रम्। तत्पर्य्यायः। प्रोष्ठपदाः २। इत्यमरः॥ "द्वे पूर्व्वभाद्रपदोत्तरभाद्रपदासु। प्रोष्ठौ गौः भद्रच गौः तस्यैव पाद आवां तास्यौ। यद्यपतिरिव भद्रपादानुगतो राजेत्याद्यर्थमञ्जरी यैवाङ्घ्रिभद्रादाद्यशब्दो ङ्यन्तादिः भाद्रपदाद्यशब्दो दीर्घान्तादिरपीति केचित्। दीर्घादिपाठः प्रामादिक इति सुकूटादयः॥ पूर्व्वे प्रोष्ठपदे द्वे उत्तरे तु भद्रपदे द्वे वसुदायद्यावां चतुःबंश इति बहुवचनम्। कदा पूर्व्वे प्रोष्ठपदे कदा उत्तरे प्रोष्ठपदे इति तारकयोर्द्वित्वात् द्विवचनम्। फल्गुनीप्रोष्ठपदाशब्दौ द्वित्वे बहुत्वे च भद्रपदा द्वेऽपीति केचित् भद्रपदेन युक्तः काल इति प्रयोगात् पुंलिङ्गोऽपि भद्रपद इति केचित्।" इति तट्टीकायां भरतः॥ ७॥

तां तु दक्षिणोत्तरवर्त्तिखट्वाकृतितारकाद्वयात्मिकाः। भारद्वाजविवाराङ्घ्रयरूपा वा। तदधिदेवता अजपादः आवां जघन्यगुणः। इति ज्योतिषम्॥ अपि च।

"भारद्वाजेष्टिकोपरिस्थिते
पूर्व्वभाद्रपदमे द्वितारके।
खट्विका करिकरास्थि २२८ संमिता
निःसरन्ति दृषभोदयात् प्रिये!॥"

द० ३। ४८। इति कालिदासछतरात्रिलक्षनिरूपणम्॥ ७॥

तत्र जातफलम्।

"जितेन्द्रियः सर्व्वकलासु दक्षो
जितारिपक्षः खलु तस्य जन्म।
भवेन्महीयान् सुतरामपूर्व्वा
पूर्व्वा यदा भाद्रपदा प्रसूतौ॥"

इति कोष्ठीप्रदीपः॥

पूर्व्वयच्, पुं, (पूर्व्वशब्दौ यच्चेति। पूर्व्वे पूर्व्वजिन् काले यचौ वा।) जिनविशेषः। तत्पर्य्यायः। मणिभद्रः २ जभलः ३ जवेन्द्रः ४। इति त्रिकाण्डशेषः॥

पूर्व्वरङ्गः, पुं, (पूर्व्वं रज्यतेऽस्मिन्निति। रञ्ज+अधिकरणे घञ्।) नान्दीपक्रमः। इति हेमचन्द्रः। २। १६६॥ तत्पर्य्यायः। प्राक्संगीतम् २ गुरुनिका ३। इति जटाधरः॥ (अस्य लक्षणं यथा, साहित्यदर्पणे। ६। १०।

"यन्नाट्यवस्तुनः पूर्व्वं रङ्गविघ्नोपशान्तये।
कृयीलवाः प्रकुर्व्वन्ति पूर्व्वरङ्गः स उच्यते॥")

पूर्व्वरागः, पुं, (पूर्व्वं पूर्व्वजातो रागोऽनुरागः।) नायकनायिकयोर्दर्शनाविघ्नेषः। यथा,—

"अवधार्य्यनादापि मिथः संरूढरागयोः।
दर्शनाविघ्नेषो योऽग्रानौ पूर्व्वरागः स उच्यते॥"

इति साहित्यदर्पणम्॥

पूर्व्वराद्धः, पुं, (रात्रेः पूर्व्वो भागः। अच् समासे।) रात्रेः पूर्व्वभागः। इति शब्दरत्नावलिः॥

पूर्व्वरूपं, क्ली, (पूर्व्वं रूपमिति कर्म्मधारयः।) पूर्व्वलक्षणम्। वैद्यके भाविव्याधिबोधकचिह्नम्। यथा,—

"————————प्राग्रूपं येन लक्ष्यते।
उत्पित्सुरामयो दोषविशेषेणानधिष्ठितः।
लिङ्गमव्यक्तमल्पत्वाद्व्याधीनां तदयोदयम्॥"

द्विविधं हि पूर्व्वरूपं भवति। सामान्यं विशिष्टच्च। सामान्यं येन दोषदूष्यसंमूर्च्छनावस्थाजनितेन भाविज्वरादिव्याधिमात्रं प्रतीयते न तु वातादिजनितत्वादिविशेषः। यथा। अमो रतिविपर्य्ययत्वमिति। तथा बालगुरुवाक्यप्रदेषादि। सामान्याभिप्रायेणैव तन्त्रान्तरं यथा। व्याधेर्जातिर्बन्धुभूषा च पूर्व्वरूपेण लक्ष्यते। भावः किमात्मकत्वच्च लक्ष्यते लक्षणेन तु इति॥ तथाह पराशरः। पूर्व्वरूपं नाम येन भाविव्याधिविशेषो लक्ष्यते न तु दोषविशेष इति। विशिष्टं यथा। उरःक्षतादौ लिङ्गान्येव वातादिजान्यवयक्तानि। वक्ष्यते तत्रैव। अवयक्तं लक्षणं तेषां पूर्व्वरूपमिति स्मृतमिति। तथाह सुश्रुतः।

सामान्यतो विशेषात्तु तृप्तभावर्थं समीरणात्।
पित्तान्नयनयोर्दाहः कफान्नाभिनन्दनमिति॥

हारीतेऽप्युक्तम्। इति पूर्व्वरूपमधानां ज्वराणां सामान्यतो विशेषात्तु तृप्ताङ्गमर्दभूयिष्ठं हृदयोद्वेगि वातजमिति। प्राग्रूपं येन लक्ष्यते इत्यस्यार्थमाह रक्षितः। येन श्रमादिना उत्पित्सुः सामग्रीपाकाद्युत्पादेच्छरामयो रोगः दोषविशेषेण वातादिजन्यावाधारणवेषव्यादिना व्यनधिष्ठितोऽवयक्तो लक्ष्यते ज्ञायते तत्प्राग्रूपमिति। लिङ्गमव्यक्तमल्पत्वादित्यस्यार्थमाह व एव। प्राग्रूपमित्यनेन पूर्व्वोक्तेन सम्बन्धः लिङ्गं लक्षणम् अवयक्तं नात्यभिव्यक्तं तत्र हेतुरल्पत्वात् न त्वावरणादियोगादव्यक्तत्वमित्यर्थः यथायथं यस्य व्याधेर्दूयं तदेवाव्यक्तं तस्य पूर्व्वमित्यर्थः।

पूर्व्वरूप

अन्ये तु पूर्व्वरूपलक्षणमाहुः।

स्थानसंश्रयिणः कृत्वा भाविव्याधिप्रबोधकम्।
दोषाः कुर्व्वन्ति यल्लिङ्गं पूर्व्वरूपं तदुच्यते॥ इति॥

संक्षेपतस्तु लक्षणं भाविव्याधिबोधकमेव लिङ्गं पूर्व्वरूपम्।" इति माधवकरविजयरक्षितौ॥

पूर्व्ववादः, पुं, (पूर्व्वो वादः।) व्यवहारे राजादिसभायां प्रागावेदनम्। यथा,—

"पूर्व्ववादमपरित्यज्य योऽन्यमालम्बते पुनः।
पदसंक्रामणाज्ज्ञेयो हीनवादी स वै नरः॥"

इति मिताक्षरा॥

पूर्व्ववादी, [न्] पुं, (पूर्व्ववादोऽस्यास्तीति। पूर्व्ववाद+इनिः।) प्रागभियोक्ता। प्रथमविवादी। यथा,—

"प्राङ्न्यायकारणोक्तौ तु प्रत्यर्थी निर्दिशेत् क्रियाम्।
मिथोक्तौ पूर्व्ववादी तु प्रतिपत्तौ न सा भवेत्॥"

इति मिताक्षरा॥

पूर्व्वशैलः, पुं, (पूर्व्वः पूर्व्वदेशस्थितो वा शैलः।) उदयपर्व्वतः। इति जटाधरः॥

पूर्व्वसरः, त्रि, (पूर्व्वः सन् सरतीति। पूर्व्व+सृ+"पूर्व्वे कर्त्तरि।" ३। २। १६। इति टः।) अग्रगामी। यथा, भट्टिः। ५। ६७।

"द्विषन् वनेचराणां त्वमादाय चरो धनं।
अग्रेसरो जघन्यानां माभूत् पूर्व्वसरो मम॥"

पूर्व्वसारः, त्रि, पूर्व्वं देशं सरतीति कर्त्तरि घञ्(अण्)प्रत्ययः। पूर्व्वसरः। इति व्याकरणम्॥

पूर्व्वा, स्त्री, (पूर्व्व+टाप्।) पूर्व्वदिक्। तत्पर्य्यायः। प्राची २ पुरा ३ माधवी ४ ऐन्द्री ५ माघवती ६। तद्गुणवत्त्वगुणाः।

"पूर्व्वस्तु मधुरो वातः स्निग्धः कटुरवान्वितः।
गुरुर्विदाहशमनो वातदः पित्तनाशनः॥"

इति राजनिर्घण्टः॥

अपि च। राजवल्लभः।

'प्राग्वातो मधुरः स्वादुर्बलिमान्यकरो गुरुः।
वैरस्यगौरवौष्ण्यानि करोत्यक्षौषधीषु च॥
भक्षोत्पिष्टच्छतादीषु रागश्चयमुदाहृतम्।
वह्निपातज्वरश्वासवलगदोषार्शोविघ्नक्रिमीन्॥
कोपयेदामवातञ्च वनसंघातकारणम्॥"॥ ७॥

तद्गुणाधिपतयः मेषविंहधनूराशयः। यथा,—

"प्रागादिदिक्कुभां नाथा यथासंख्यं प्रदक्षिणम्।
मेषाद्या राशयो ज्ञेयाश्चिराद्वृत्तिपरिभ्रमात्॥"

इति ज्योतिस्तत्त्वम्॥

पूर्व्वाः, पुं, पूर्व्वजाः। पूर्व्वपुरुषाः। बहुवचनान्तोऽयम्। इत्यमरः। ३। ३। १३३॥ (यथा, रघुः। १। ६७।

"मत्परं दुर्लभं मत्वा नूनमावर्ज्जितं मया।
पयः पूर्व्वैः स्तनिन्धाचेः कल्पोत्सृष्टमसृज्यते॥")

पूर्व्वाद्रिः, पुं, (पूर्व्वः पूर्व्वदिक्स्थितो वा अद्रिः पर्व्वतः।) उदयाचलः। तत्पर्य्यायः। दिनक्षर्त्ता २। इति त्रिकाण्डशेषः॥ (यथा, कथासरित्सागरे। १। १८।

"शिङ्गोत्तुङ्गजटाकूटगतो यस्यायुते नवः।
सन्ध्यापिशङ्गपूर्व्वाद्रिशृङ्गसङ्गसुखं शशी॥")

पूर्व्वय

पूर्व्वफल्गुनी, स्त्री, (पूर्व्वा फल्गुनीति कर्म्मधारयः।) अश्विन्यादिसप्तविंशतिनक्षत्रान्तर्गतैकादशनक्षत्रम्। तत्तु खट्वाकृतितारकाद्वयात्मकम्। तस्याधिष्ठात्री देवता भगः। इति सुकूर्म्मचिन्तामणिः॥ अपि च।

"इन्दियोत्तरगते दितारके
योनिमे मिलति मस्तकोपरि।
कीटतः स्फुटसरोरुहानने!
निःसृता २६८ गजरत्नचित्रिलिप्रिकाः॥"

इ० ४। २८। इति कालिदासस्तुतराचिलग्निरूपणम्॥ * ॥ तत्र जातफलम्।

"शूरस्त्यागी साहसी भूमिभर्त्ता
कोपाक्रान्तः स्याच्छिरालोऽतिदक्षः।
घूर्त्तः क्रूरोऽत्यन्तवाताधिकः प्राक्-
फल्गुन्यर्च्चन्मकाले च यस्य॥"

इति कोष्ठीप्रदीपः॥

पूर्व्वफल्गुनीभवः, पुं, (पूर्व्वफल्गुन्यां भवतीति। भू+अच्।) बुधग्रहः। इति शब्दमाला॥

पूर्व्वभद्रपदः, पुं, पूर्व्वभद्रपदाः, स्त्री, पूर्व्वभाद्रपदाः, स्त्री, } अश्विन्यादिसप्तविंशतिनक्षत्रान्तर्गतपञ्चविंशनक्षत्रम्। तत्पर्य्यायः। प्रोष्ठपदाः २। इत्यमरः॥ "द्वे पूर्व्वभाद्रपदोत्तरभाद्रपदासु। प्रोष्ठौ गौः भद्रञ्च गौः तस्यैव पाद आसां तासाम्। ग्रहपतिरिव भद्रपादानुगतो राजेत्याचार्य्यमञ्जरी। अजैकपादशब्दो ह्रस्वादिः भाद्रपदाशब्दो दीर्घादिरपीति केचित्। दीर्घादिपाठः प्रामादिक इति सुकूटादयः॥ पूर्व्वे प्रोष्ठपदे द्वे उत्तरे तु भद्रपदे द्वे समुदायश्चासां चतुःसंख्य इति बहुवचनम्। कदा पूर्व्वे प्रोष्ठपदे कदा उत्तरे प्रोष्ठपदे इति तारकयोर्द्वित्वात् द्विवचनम्। फल्गुनीप्रोष्ठपदाशब्दौ द्वित्वे बहुत्वे च भद्रपदा दैवतीति केचित् भद्रपदेन युक्तः काल इति प्रयोगात् पुंलिङ्गोऽपि भद्रपद इति केचित्।" इति तट्टीकायां भरतः॥ * ॥

तां तु दक्षिणोत्तरवर्त्तिखट्वाकृतितारकाद्वयात्मिकाः। भारालवितारात्रयरूपा वा। तदधिदेवता अजपादः आसां जघन्यगुयः। इति ज्योतिस्तत्त्वम्॥ अपि च।

"भारस्त्रीभृतिकोपरिस्थिते
पूर्व्वभाद्रपदभे दितारके।
लिम्पिकाः करिकराभि २२८ संमिता
निःसरन्ति दृषभोदयात् प्रिये!॥"

इ० ३। ४८। इति कालिदासस्तुतराचिलग्निरूपणम्॥ * ॥

तत्र जातफलम्।

"जितेन्द्रियः सर्व्वकलासु दक्षो
जितारिपक्षः खलु तस्य नित्यम्।
भवेन्नरीयान् स्तुतरामपूर्व्वा
पूर्व्वा यदा भाद्रपदा प्रसूतौ॥"

इति कोष्ठीप्रदीपः॥

पूर्व्वयज्वन्, पुं, (पूर्व्वञ्चासौ यज्वेति। पूर्व्वे पूर्व्वस्मिन् काले यज्वा वा।) जिनविशेषः। तत्पर्य्यायः। मणिभद्रः २ धनपालः ३ जयेन्द्रः ४। इति विकाण्डशेषः॥

पूर्व्वरङ्गः, पुं, (पूर्व्वं रङ्ग्यतेऽस्मिन्निति। रङ्ग+अधिकरणे घञ्।) नाट्योपक्रमः। इति हेमचन्द्रः। २। १६६॥ तत्पर्य्यायः। प्राक्संगीतम् २ गुणनिका ३। इति जटाधरः॥ (यस्य लक्षणं यथा, साहित्यदर्पणे। ६। १०।

"यन्नाट्यवस्तुनः पूर्व्वं रङ्गविघ्नोपशान्तये।
कुशीलवाः प्रकुर्व्वन्ति पूर्व्वरङ्गः स उच्यते॥")

पूर्व्वरागः, पुं, (पूर्व्वः पूर्व्वजातो रागोऽनुरागः।) नायकनायिकयोर्दशाविशेषः। यथा,—

"अवयोर्दर्शनादापि मिथः संरूढ़रागयोः।
दशाविशेषो योऽप्राप्तौ पूर्व्वरागः स उच्यते॥"

इति साहित्यदर्पणम्॥

पूर्व्वरात्रः, पुं, (रात्रेः पूर्व्वो भागः। अच् समासे।) "रात्राह्णाहाः पुंसि।" २। ४। २६। इति पुंस्त्वम्।) रात्रेः पूर्व्वभागः। इति मुग्धबोधव्याकरणम्॥

पूर्व्वरूपं, क्ली, (पूर्व्वं रूपमिति कर्म्मधारयः।) पूर्व्वलक्षणम्। वैद्यके भाविव्याधिबोधकचिह्नम्। यथा,—

"————————प्रागूपं येन लक्ष्यते।
उत्पित्सुरामयो दोषविशेषैर्विज्ञानधिष्ठितः।
लिङ्गमव्यक्तमल्पत्वाद्व्याधीनां तदयथायथम्॥"

द्विविधं हि पूर्व्वरूपं भवति। सामान्यं विशिष्टञ्च। सामान्यं येन दोषदूष्यसंमूर्च्छनावस्थाजनितेन भाविज्वरादिव्याधिमात्रं प्रतीयते न तु वातादिजनितत्वादिविशेषः। यथा। भ्रमो रतिर्विवर्त्तश्चमिति। तथा बालगुरुवाक्यप्रदेष्वादि। सामान्याभिप्रायेणैव तन्त्रान्तरं यथा। व्याधेर्जातिर्बुभूषा च पूर्व्वरूपेण लक्ष्यते। भावः किमात्मकत्वञ्च लक्ष्यते लक्षणेन तु इति॥ तथाह पराशरः। पूर्व्वरूपं नाम येन भाविव्याधिविशेषो लक्ष्यते न तु दोषविशेष इति। विशिष्टं यथा। उरःक्षतादौ लिङ्गान्येव वातादिजान्यव्यक्तानि। यदुक्तं तत्रैव। अव्यक्तं लक्षणं तेषां पूर्व्वरूपमिति स्मृतमिति। तथाह सुश्रुतः।

सामान्यतो विशेषात्तु वृद्ध्यर्थं समीरणात्।
पित्तान्नयनयोर्दाहः कफान्नाभिनन्दनमिति॥

हारीतेऽप्युक्तम्। इति पूर्व्वरूपमज्ञानां ज्वराणां सामान्यतो विशेषात्तु वृद्ध्यङ्गमर्दभूयिष्ठं ज्वरोद्वेगि वातजमिति। प्रागूपं येन लक्ष्यते इत्यस्यार्धमाह रचितः। येन भ्रमादिना उत्पित्सुः सामग्रीवैकल्यादुत्पादेच्छुरामयो रोगः दोषविशेषेण वातादिजन्यासाधारणवैषम्यादिना व्यवधिष्ठितोऽवस्थितो लक्ष्यते ज्ञायते ततप्राग्रूपमिति। लिङ्गमव्यक्तमल्पत्वादित्यस्यार्धमाह स एव। प्राग्रूपमित्यनेन पूर्व्वोक्तेन सम्बन्धः लिङ्गं लक्षणम् अव्यक्तं नात्यभिव्यक्तं तत्र हेतुरल्पत्वात् न त्वावरणादियोगादव्यक्तत्वमित्यर्थः यथायथं यस्य यावदर्थदूषं तदेवाव्यक्तं तस्य पूर्व्वमित्यर्थः। अन्ये तु पूर्व्वरूपलक्षणमाहुः।

स्थानसंश्रयिणः कृत्वा भाविव्याधिप्रबोधकम्।
दोषाः कुर्व्वन्ति यल्लिङ्गं पूर्व्वरूपं तदुच्यते॥ इति॥

संक्षेपतस्तु लक्षणं भाविव्याधिबोधकमेव लिङ्गं पूर्व्वरूपम्।" इति माधवकरविजयरक्षितौ॥

पूर्व्ववादः, पुं, (पूर्व्वो वादः।) व्यवहारे राजादिसभीपे प्रागावेदनम्। यथा,—

"पूर्व्ववादमपरित्यज्य योऽन्यमालम्बते पुनः।
पदसंक्रामणात्तज्ज्ञेयो हीनवादी स वै नरः॥"

इति मिताक्षरा॥

पूर्व्ववादी, [न्] पुं, (पूर्व्ववादोऽस्यास्तीति। पूर्व्ववाद+इनिः।) प्रागभियोक्ता। प्रथमविवादी। यथा,—

"प्राङ्न्यायकारणोक्तौ तु प्रत्यर्थी निर्दिशेत् क्रियाम्।
मिथ्योक्तौ पूर्व्ववादी तु प्रतिपत्तौ न सा भवेत्॥"

इति मिताक्षरा॥

पूर्व्वशैलः, पुं, (पूर्व्वः पूर्व्वदेशस्थितो वा शैलः।) उदयपर्व्वतः। इति जटाधरः॥

पूर्व्वसरः, त्रि, (पूर्व्वः सन् सरतीति। पूर्व्व+सृ+"पूर्व्वे कर्त्तरि।" ३। २। १६। इति टः।) अग्रगामी। यथा, भट्टिः। ५। ६७।

"द्विषन् वनेचराणाञ्च त्वमादाय चरो वने।
अग्रेसरो जघन्यानां माभूत् पूर्व्वसरो मम॥"

पूर्व्वसारः, त्रि, पूर्व्वं देशं सरतीति कर्त्तरि घञ् (अण्)प्रत्ययः। पूर्व्वसरः। इति व्याकरणम्॥

पूर्व्वा, स्त्री, (पूर्व्व+टाप्।) पूर्व्वदिक्। तत्पर्य्यायः। प्राची २ पुरा ३ माघोनी ४ ऐन्द्री ५ माघवती ६। तद्दिग्भववायुगुणाः।

"पूर्व्वस्तु मधुरो वातः स्निग्धः कटुरसान्वितः।
गुरुर्विदाहश्रमनो वातदः पित्तनाशनः॥"

इति राजनिर्घण्टः॥

अपि च। राजवल्लभः।

'प्राग्वातो मधुरः क्षारो वह्निमान्द्यकरो गुरुः।
वैरस्यनेत्रवैरूप्यानि करोत्यप्सौषधीषु च॥
भग्नोत्पिष्टक्षतादीषु रागश्वयथुदाहकृत्।
सन्निपातज्वरश्वासत्वग्दोषार्शोविषक्रिमीन्॥
कोपयेदामवातञ्च घनसंघातकारणम्॥"*॥

तद्दिग्धिपतयः मेषसिंहधनूराशयः। यथा,—

"प्रागादिदिक्प्रभा नाथा यथासंख्यं प्रदक्षिणम्।
मेषाद्या राशयो ज्ञेयास्तिराक्षत्तिपरिश्रमात्॥

इति ज्योतिस्तत्त्वम्॥

पूर्व्वाः, पुं, पूर्व्वजाः। पूर्व्वपुरुषाः। बहुवचनान्तोऽयम्। इत्यमरः। १। ३। १२३॥ (यथा, रघुः। १। ६०।

"सतपरं दुर्लभं मत्वा गुणमावर्ज्जितं मया।
पयः पूर्व्वैः स्तनिभासैः कवोष्णमुपसुष्यते॥")

पूर्व्वाद्रिः, पुं, (पूर्व्वः पूर्व्वदिक्स्थितो वा अद्रिः पर्व्वतः।) उदयाचलः। तत्पर्य्यायः। दिङ्नर्द्धा २। इति विकाण्डशेषः॥ (यथा, कथासरित्सागरे। १। १८।

"पिङ्गोत्तुङ्गजटाजूटगतो यस्याद्युते नवः।
सन्ध्यापिङ्गः पूर्व्वाद्रिश्रृङ्गसङ्गसुखं शशी॥")

पूर्व्वाषाढ़ा, स्त्री, (पूर्व्वा चासावाषाढ़ा चेति ।) अश्विन्यादिसप्तविंशतिनक्षत्रान्तर्गतविंशनक्षत्रम् । सा रूपालतिचतुस्तारात्मिका । गजदन्ताकृतिद्वितारात्मिका वा । अस्या अधिष्ठातृदेवता तोयम् । इति ज्योतिषम् ॥ अपि च ।

"सूर्पसूर्त्तिनि शिरोगते चतुस्तारके करिकरोरुवारिमे ।
अन्त्यभादहृतवारि ! निर्गताः
खेचराम्बरशशाङ्कलिप्तिकाः ॥"

द० १।४६ ॥ इति कालिदासकृतराशिलग्ननिरूपणम् ॥* ॥ तत्र जातफलम् ।

"भूयो भूयस्तूयमानानुरक्तो
भक्तो देवे बन्धुमान्योऽतिदक्षः ।
पूर्व्वाषाढ़ा जन्मकाले यदि स्या-
दाषाढ़ः स्याद्वैरिवर्गे नितान्तम् ॥"

इति कोष्ठीप्रदीपः ॥

पूर्व्वाह्णः, पुं, (अह्नः पूर्व्वम् । पूर्व्वापराधरेत्येकदेशिसमासः । "राजाहःसखिभ्यष्टच् ।" ५ । ४ । ९१ । इति टच् । "अह्नोऽह्न एतेभ्यः ।" ५ । ४ । ८८ । इति अह्नादेशः । "अह्नोऽदन्तात् ।" ८ । ४ । ७ । इति णत्वम् । "राजाहाहाः पुंसि ।" २ । ४ । २६ । इति पुंस्त्वम् ।) त्रिधाविभक्तदिनप्रथमभागः । स च त्रिंशद्दण्डदिनमाने सूर्य्योदयावधिदशदण्डकालः । यथा, पूर्व्वाह्णो वै देवानां मध्यन्दिनं मनुष्याणामपराह्णः पितॄणाम् । इति श्रुतिः ॥ अपि च । त्रिधाविभक्तदिनभागाभिप्रायेण तु लोकाक्षिः ।

"पूर्व्वाह्णे मध्यमे वापि यदि पर्व्व समाप्यते ।
तदोपवासः पूर्व्वेद्युरुक्तदक्षयोग इष्यते ॥
अपराह्णेऽथवा रात्रौ यदि पर्व्व समाप्यते ।
उपोष्य तस्मिन्नहनि श्वोभूते याग इष्यते ॥"

उपोष्येति नाहोरात्राभोजनपरं किन्तु क्षते व्यग्राधाने देवा यजमानस्य समीपमुपवसन्तीति उपवासशब्देनाग्न्याधानमुच्यते । सूर्य्योदयावधिप्रहरद्वयम् । द्विधाविभक्तदिनपूर्व्वभागः । यथा । पूर्व्वाह्णापराह्णरूपद्विधाविभक्तदिनस्यावधित्वेनावर्त्तनमाह स्कन्दपुराणम् ।

"आवर्त्तनात्तु पूर्व्वाह्णो ह्यपराह्णस्ततः परः ॥"

आवर्त्तनात् वासरस्य छायापरिवर्त्तनात् प्राप्तिनिमित्तः । अतएवोक्तम् ।

"अश्वत्थं वन्दयेन्नित्यं पूर्व्वाह्णे प्रहरद्वये ।
अत ऊर्द्धं न वन्देत अश्वत्थन्तु कदाचन ॥"

इति मलमासतत्त्वम् ॥

पूर्व्वाह्णिकः, त्रि, (पूर्व्वाह्णे भव इति । पूर्व्वाह्ण + "विभाषा पूर्व्वाह्णापराह्णाभ्याम् ।" ४ । ३ । २३ । इति ष्ठञ्ठकौ तुट् च । "षष्ठीकालतनेषु कालनाम्नः ।" ६ । ३ । २७ । इति षिभाषया सप्तम्या अलुक् ।) पूर्व्वाह्णे भवः । इति सिद्धान्तकौमुदी ॥

पूर्व्वेद्युः, [स्] अ, (पूर्व्वस्मिन्नहनीति । पूर्व्व + "सद्यःपरुत्परारेद्यवद्यपूर्व्वेद्युरन्येद्युरिति ।" ५ । ३ । २२ । इत्येद्युसूप्रत्ययो निपात्यते ।) पूर्व्वदिनम् । इत्यमरः । ३ । ४ । २१ ॥ प्रातःकालः । धर्म्मवासरः । इति मेदिनी । अह्नयसे, ८४ ॥ (यथा, मनौ । ३ । १८७ ।

"पूर्व्वेद्युरपरेद्युर्वा श्राद्धकर्म्मण्युपस्थिते ।
निमन्त्रयेत त्रयवरान् सम्यग्विप्रान् यथोदितान् ॥")

पूर्व्व, क निकेतने । इति कविकल्पद्रुमः ॥ (चुरा०-परं०-निमन्त्रणे सक०-निवासे अक०-सेट् ।) षष्ठस्वरी । निकेतनमिह निमन्त्रणं निवासो वा । क, पूर्व्वयति द्विजान् भोक्तुं गृही । पूर्व्वयति तीर्थेषु साधुः । इति दुर्गादासः ॥ अन्यवान्तोऽयम् ॥

पूल, कि संहतौ । इति कविकल्पद्रुमः ॥ (चुरा०-पक्षे भ्वा०-परं-सकं-सेट् ।) षष्ठस्वरी । कि, पूलयति पूलति । संहतौ राशीकरणम् । इति दुर्गादासः ॥

पूष, इद्धौ । इति कविकल्पद्रुमः ॥ (भ्वा०-परं०-अक०-सेट् ।) षष्ठस्वरी । पूषति । इति दुर्गादासः ॥

पूषः, पुं, (पूषति वर्द्धते इति । पूष + कः ।) ब्रह्मदारुवृक्षः । इत्यमरः । २ । ४ । ४१ ॥ तुत इति भाषा ॥ (ब्रह्मदारुशब्दोऽस्य विषयो ज्ञेयः ॥)

पूषकः, पुं, (पूष + स्वार्थे कन् ।) ब्रह्मदारुवृक्षः । इति राजनिर्घण्टः ॥ पलाशपिपल इति हिन्दीभाषा ॥ अस्य पर्य्यायगुणाः तूलशब्दे द्रष्टव्याः ॥

पूषभासा, स्त्री, (पूषेव सूर्य्य इव भासते इति । भास + अच् । टाप् ।) इन्द्रनगरी । तत्पर्य्यायः । सुरपुरी २ । इति शब्दरत्नावली ॥

पूषासुहृत्, [द्] पुं, (पूष्णोऽसुहृत् । शिवो हि खाञ्जनवैरभञ्जनाख्य इन्द्रसुत्राटयामास अतोऽस्य तथात्वम् ।) शिवः । इति हेमचन्द्रः । २ । ११४ ॥

पूषा, [न्] पुं, (पूयतीति । पूष वृद्धौ + "सृगृधिपूषन् क्षीहन्निति ।" उणा० १ । १५८ । इति कनिन्प्रत्ययान्तो निपात्यते ।) सूर्य्यः । इत्यमरः । १ । ३ । २६ ॥ (यथा, मार्कण्डेये । १०६ । ६४ ।

"आदित्यं भास्करं भानुं सवितारं दिवाकरम् ।
पूषाणमर्य्यमाणञ्च खर्भानुं दीप्तदीधितिम् ॥
स तु द्वादशादित्यानामन्यतमः । यथा, महाभारते । १ । ६५ । १५—१६ ।
"धाता मित्रोऽर्य्यमा शक्रो वरुणस्त्वंश एव च ।
भगो विवस्वान् पूषा च सविता दशमस्तथा ॥
एकादशस्तथा त्वष्टा द्वादशो विष्णुरुच्यते ।
जघन्यजस्तु सर्व्वेषामादित्यानां गुणाधिकः ॥")

पॄ, क पूर्त्तौ । इति कविकल्पद्रुमः ॥ (चुरा०-परं०-सक०-सेट् ।) पूर्त्तिः पूर्णीकरणम् । क, पारयति पयसा क्षुभं लोकः । इति दुर्गादासः ॥

पॄ, न प्रीतौ । इति कविकल्पद्रुमः ॥ (स्वा०-परं०-सक०-अनिट् ।) न, अतिर्यौति पृणोति । इति दुर्गादासः ॥

पॄ, लि पालने । इति कविकल्पद्रुमः ॥ (ह्वा०-परं०-सक०-अनिट् ।) लि, पिपर्त्ति । इति दुर्गादासः ॥

पॄ, ग्रॄ ङ व्यायामके । इति कविकल्पद्रुमः ॥ (तुदा०-आत्म०-अक०-अनिट् ।) व्यायामको व्यापारः ॥ ग्रॄ ङ, धर्म्मे व्याप्रियते सुधीः । इति दुर्गादासः ॥

पृक्का, स्त्री, (सृज्यते इति । सृज् + बाहुलकात् कक् । पृषोदरादित्वात् साधुः ।) शाकविशेषः । पिड़िं इति भाषा ॥ तत्पर्य्यायः । मरुज्भाला २ पिशुना ३ देवी ४ जता ५ लघुः ६ सप्तद्रान्ता ७ वधूः ८ कोटिवर्षा ९ लङ्कायिका १० । इत्यमरः ॥ मरुत् ११ माला १२ सृक्का १३ कोटी १४ वर्षा १५ लङ्कापिका १६ वर्षालङ्कायिका १७ । इति तट्टीकायां भरतः ॥ तस्करः १८ चोरकः १९ चण्डः २० । इति रत्नमाला ॥ अस्य गुणाः । पाके मधुरत्वम् । हृद्यत्वम् । पित्तकफनाशित्वञ्च । इति राजवल्लभः ॥

पृक्तं, क्ली, (पृच्यते स्म संबध्यते स्मेति । पृच् सम्पर्के + क्तः ।) धनम् । इति हेमचन्द्रः । २ । १०६ ॥ *सम्पर्कयुक्ते; त्रि ॥ (यथा, रघौ । २ । १३ ।

"पृक्तस्तुषारैर्गिरिनिर्झराणा-
मनोकहाकम्पितपुष्पगन्धी ॥")

पृक्तिः, स्त्री, (पृच् + भावे क्तिन् ।) सम्पर्कः । स्पर्शः । तत्पर्य्यायः । सृष्टिः २ । इत्यमरः । ३ । २ । ६ ॥

पृच्, ईं ल ङ सम्पर्के । इति कविकल्पद्रुमः ॥ (अदा०-आत्म०-अक०-सेट् । निष्ठायामनिट् ।) ईं, पृक्तः । ल ङ, पृक्ते । परीपृच्यते । स चेह सम्पृक्तीभावः । सम्पृक्ते नाभिशूक्तेर्य इति हलायुधः । सम्पृक्ते मधुना चूर्णे भिषगिति तु अन्तर्भूतण्यर्थत्वादिति चतुर्भुजः । इति दुर्गादासः ॥

पृच, कि संयमने । सम्पर्के । इति कविकल्पद्रुमः ॥ (चुरा० पक्षे भ्वा०-परं-सक० सेट् ।) संयमनं बन्धनम् । कि, पर्चयति पर्चति दुष्टं राजा । इति दुर्गादासः ॥

पृच, धं ईं सम्पर्के । इति कविकल्पद्रुमः ॥ (रुधा०-परं०-सक०-अक० च-सेट् । निष्ठायामनिट् ।) सम्पर्के इह संपृक्तीकरणं सम्पृक्तीभावश्च । ध, पृणक्ति घृतेन वाग्यम् । संपृणक्ति न मापिभिर्य इति हलायुधः । ईं, पृक्तः । मपर्च्च । इति दुर्गादासः ॥

पृच्छा, स्त्री, (प्रच्छ जिज्ञासायाम् + "गुरोश्च हलः ।" ३ । ३ । १०३ । इति अः ।) प्रश्नः । इत्यमरः । १ । ६ । १० ॥ (यथा, नैषधचरिते । १६ । ६० ।

"इह किंसुषमि पृच्छाप्रांसिकिंशब्दरूपप्रतिनियमितवाचा वाचसैवेष्टः ।
भव कथिभवप्राच्ये तातः स्यानिनौका
वितिविहिततुहीवागुत्तरः कोकिसोऽभूत् ॥"

"पृच्छा तन्त्रात् यथाम्नायं विधिना प्रश्न उच्यते ॥"
इति च वैद्यकचरके सूत्रस्थाने त्रिंशोऽध्याये ॥)

पृज, इ ल ङ सम्पर्के । इति कविकल्पद्रुमः ॥ (अदा०-आत्म०-अक०-सेट् ।) सप्तमस्वरी । इ, पृङ्क्ते । ल ङ, पृङ्क्त । अयं केचिन्न मन्यते । इति दुर्गादासः ॥

पृट, प्र सुदि। इति कविकल्पद्रुमः॥ (तुदा०-पर०-सक०-सेट्।) सुदि क्षुद्रीकरणे। प्र, पृड़ति क्षीणं दाता। पर्डिता। इति दुर्गादासः॥

पृण, प्र तृपि। इति कविकल्पद्रुमः। (तुदा०-पर०-सक०-सेट्।) तृपि तृप्तीकरणे। प्र, अग्निं पृणति यो द्विजः। पर्णिता। इति दुर्गादासः॥

पृतना, स्त्री, (प्रियते इति। पृङ् व्यायामे + वाहुलकात् तनन् गुणाभावश्च।) सेना। सेनाभेदः। इति मेदिनी। ने, ६४॥ वाहिनीत्रयम्। यत्र गजाश्चित्वारिंशदधिकशतत्रयम् २४३। रथाश्चित्वारिंशदधिकशतत्रयम् २४३। अश्वा जनचिंशदधिकसप्तशतम् ७२६। पदातिकाः पञ्चदशाधिकशतद्वयाधिकसहस्रम् १२१५। वसुदायेन त्रिंशदधिकचतुःशतद्वयाधिकसहस्रत्रयम् २४३०। इत्यमरभरतौ॥ (यथा, महाभारते। १। २। २१।

"त्रयो गुल्मा गणो नाम वाहिनी तु पृतनाऽत्रयः।
त्रितास्तिस्रस्तु वाहिन्यः पृतनेति विचक्षणैः॥"

"आप्रियन्तेऽत्र योद्धारः इति। पृङ् व्यायामे। 'पृसूसां कित्।' इति तननप्रत्ययः।" इति निघण्टौ देवराजयज्वा॥ संग्रामः। इति निघण्टुः॥ यथा, ऋग्वेदे। १। ८५। ८।

"शूरा इवेद्युयुधयो न जग्मयः
श्रवस्यवो न पृतनासु येतिरे॥"

"पृतनासु संग्रामेषु येतिरे।" इति तद्भाष्ये सायनः॥)

पृतनाषाट्, [षाह्] पुं, (पृतनां सहते इति। सह + "छन्दसि सहः।" ३। २। ६३। इति क्विप्। सहेरिति षः।) इन्द्रः। इति त्रिकाण्डशेषः॥

पृच, क प्रश्नेपे। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) क, पर्वतति गुल्मौषधे जनः। इति दुर्गादासः॥

पृथक्, व्य, (प्रथयतीति। प्रथ विस्तारे + "प्रथः कित् सम्प्रसारणञ्च।" उणा० १।१३६। इति अजिः कित् सम्प्रसारणञ्च धातोः।) भिन्नम्। तत्पर्य्यायः। विना २ अन्तरेण ३ ऋते ४ हिरक् ५ गाना ६ वर्ज्जनम् ७। इत्यमरः।३। ४। ३॥ (यथा, मार्कण्डेये। १४। ६६।

"तेषामेतैः चितैः शास्त्रैर्मुह्यद्विर्विलपतां तथः।
पृथक् कुर्वन्ति वै यात्राः शरीरादति-
दारुणाः॥")

पृथक्चेताः, पुं, (पृथक् भिन्नं चेतं उत्पत्तिस्थानं येषामिति।) एकस्मान्नानावर्णस्त्रीजातपुत्राः। इति मिताक्षरा॥

पृथक्त्वं, क्ली, (पृथगित्यस्य भावः। पृथक् + भावे त्व।) चतुर्विंशतिगुणान्तर्गतद्रव्यसमवायः। तस्य राजचिह्नम्। पृथक्प्रत्ययासाधारणकारणत्वम्। यथा, भाषापरिच्छेदे।

"संख्यायञ्च पृथक्त्वं स्यात् पृथक्प्रत्ययकारणम्।
अन्योन्याभावतो नास्य चरितार्थत्वतोऽन्यते॥
यस्मात् पृथगियं नेति प्रतीतिर्हि विलक्षणा॥"

"पृथक्त्वं निरूपयति संख्यावदिति पृथक्प्रत्ययाधाधारणकारणं पृथक्त्वम्। तन्नित्यतादिकं संख्यावत् यथा हि नित्येषु एकत्वं नित्यं अनित्ये अनित्यम् आश्रयद्वितीयत्वञ्चे चोत्पद्यते आश्रयनाशान्नश्यति तथा एकपृथक्त्वमपि द्वित्वादिवत् द्विपृथक्त्वादिकमपीत्यर्थः।" इति सिद्धान्तमुक्तावली॥

पृथक्पर्णी, स्त्री, (पृथक् पर्णानि यस्याः। "पाकर्णपर्णपुष्पफलेति।" ४। १। ६४। इति ङीप्।) क्षुद्रशुक्लविशेषः। चाकुल्या इति भाषा॥ तत्पर्य्यायः। पृश्निपर्णी २ चित्रपर्णी ३ अङ्गिवल्लिका ४। इत्यमरः। २। ४। ६२॥ (यथा, सुश्रुते। १। ३६।

"पृथक्पर्ण्यादिगुप्ता च हरिद्रे भासती सिता।
काकोल्यादिश्च योज्यः स्यात्प्रश्नो रोपणे
हृते॥"

पर्य्यायान्तरमस्या यथा, वैद्यकरत्नमालायाम्।

"पृश्निपर्णी पृथक्पर्णी लाङ्गली क्रोष्टुपुच्छिका।
धावनिः कलशी तन्वी गृहाक्रोष्टुकमेखला॥
दीर्घा शृगालविन्नासा शीपर्णी सिंहपुच्छिका।
दीर्घपत्रा क्षतिलुहा हृतिका चित्रपर्णिका॥")

पृथगात्मता, स्त्री, (पृथक् आत्मा स्वरूपं यस्य। तस्य भावः। तल्।) विवेकः। इत्यमरः। १। ७। ३८॥

पृथगात्मिका, स्त्री, (पृथक् आत्मा स्वरूपं यस्याः। कापि अत इत्वम्।) व्यक्तिः। यथा,—

"जातिर्जातिषु सामान्यं व्यक्तिषु पृथगात्मिका॥"

इति धनुर्जनगजन्मानीत्यादिश्लोकोत्तरं क्वचिदमरकोषे पाठः॥

पृथग्जनः, पुं, (पृथक् सज्जनेभ्यो विभिन्नो जनः।) मूर्खः। नीचः। इत्यमरः। २। १०। १६॥ (यथा, मनुः। ७। १३७।

"यत्किञ्चिदपि वर्षस्य दापयेत् करसंज्ञितम्।
व्यवहारेण जीवन्तं राजा राष्ट्रे पृथग्जनम्॥")

पापी। इति शब्दरत्नावली॥ भिन्नलोकश्च॥

पृथग्बीजः, पुं, (पृथक् विभिन्नानि बीजानि यस्य।) भल्लातकः। इति राजनिर्घण्टः॥

पृथग्विधः, त्रि, (पृथक् विभिन्नलक्षणा विधा प्रकारो यस्य।) नानारूपः। इत्यमरः। ३। १। ६३॥ (यथा, मनुः। १। ४०।

"सर्व्वेषन्तु सनामानि कर्म्माणि च पृथग्विधम्॥")

पृथवी, स्त्री, (प्रथते विस्तारमेतीति। प्रथ + "प्रथेः पिवन् सम्प्रसारणञ्च।" उणा० १। १५०। इत्यत्र 'अवन् इत्येके।' इत्युज्ज्वलदत्तोक्त्या अवन् सम्प्रसारणञ्च। पित्त्वात् ङीप्।) पृथिवी। यथा,

"पृथवी पृथिवी पृथ्वी धरा सर्व्वंसहा रसा॥"

इति भरतधृतवाचस्पतिः॥

पृथा, स्त्री, कुन्ती। इति जटाधरः॥ (इयं हि शूरस्य कन्या वसुदेवस्य भगिनी। अस्याः पिता शूरस्तु कुन्तिभोजाय निजबान्धवायापुत्रायैनां कृतकन्यकारूपेण दत्तवान्। तत्र कुन्तिराजवेश्मनि निवसन्ती दुर्व्वाससं सन्तोष्य तस्मात् मन्त्रवरं लब्ध्वा कन्यावस्थायामेव सूर्य्यात् कर्णं वीरवरं प्रसूतवती। ततो गच्छति काले कुरुवंशावतंसः पाण्डुनृपतिरेनां परिणीतवान्। भर्त्रादिष्टा धर्म्मात् युधिष्ठिरं वायोर्भीमं इन्द्रादर्জ্জুनं प्रसूतवती। अनन्तरं भर्त्रादेशेन सपत्नीमद्रसुतायै तन्मन्त्रं प्रदत्तवती तेन माद्री अश्विभ्यां नकुलसहदेवौ लेभे। इत्येषा कथा भागवते ६ स्कन्धे २४ अध्याये द्रष्टव्या॥)

पृथाजः, पुं, (पृथायाः जायते इति। जन + डः।) कुन्तीपुत्रः॥ अर्জ্জुनश्च। इति राजनिर्घण्टः॥

पृथापतिः, पुं, (पृथायाः पतिः।) पाण्डुराजः। इति त्रिकाण्डशेषः॥

पृथिका, स्त्री, शतपदी। इति शब्दमाला॥

पृथिविः, स्त्री, (पृथिवी। ङीषो वा ह्रस्वः।) पृथिवी। इति संक्षिप्तसारोणादिवृत्तिः॥

पृथिवी, स्त्री, (प्रथते विस्तारं यातीति। प्रथ + "प्रथेः पिवन् संप्रसारणञ्च।" उणा० १। १५०। इति पिवन् सम्प्रसारणञ्च। ङीप्।) सर्व्वाद्याधिष्ठानभूता। तत्पर्य्यायः। भूः २ भूमिः ३ अचला ४ अनन्ता ५ रसा ६ विश्वम्भरा ७ स्थिरा ८ धरा ९ धरित्री १० धरणी ११ क्ष्मा १२ क्ष्मा १३ काश्यपी १४ क्षितिः १५ सर्व्वंसहा १६ वसुमती १७ वसुधा १८ उर्व्वी १९ वसुन्धरा २० गोत्रा २१ कुः २२ पृथ्वी २३ क्ष्मा २४ अवनिः २५ मेदिनी २६ मही। इत्यमरः। २। १। १—३॥ भूर् २८ भूमौ २९ धरणिः ३० क्षोणिः ३१ क्षोणी ३२ क्षौणिः ३३ क्षमा ३४ अवनी ३५ महिः ३६ रत्नगर्भा ३७ सागराम्बरा ३८ अब्धिमेखला ३९ भूतधात्री ४० रत्नावती ४१ देहिनी ४२ धारा ४३ विपुला ४४ मध्यमलोकवर्त्मा ४५। इति भरतः॥ धरणीधरा ४६ धारणी ४७ महाकान्ता ४८ जगद्गृहा ४९ गन्धवती ५० खण्डनी ५१ गिरिकर्णिका ५२ धारयित्री ५३ धात्री ५४ सागरमेखला ५५ सहा ५६ अचलकीला ५७ गौः ५८ अब्धिद्वीपा ५९ स्थिरा ६० दृढ़ा ६१ दृढ़िका ६२ इला ६३ इलिका ६४। इति शब्दरत्नावली॥ उदधिवस्त्रा ६५ इरा ६६ आदिमा ६७ ईला ६८ वरा ६९ उर्व्वरा ७० आद्या ७१ जगती ७२ पृथुः ७३ भुवनमाता ७४ निश्चला ७५ वीरप्रसूः ७६ श्यामा ७७ क्रोड़कान्ता ७८। इति राजनिर्घण्टः॥ खगवती ७९ अदितिः ८०। इति जटाधरः॥ ८॥ (पृथवी ८१। इति शब्दार्णवः॥) न्यायमते अस्या धर्म्मः। रूपद्रवत्वप्रत्यक्षयोगित्वम्। इयं गुर्व्वी रसयुक्ता च। अस्या द्रवत्वं नैमित्तिकम्। अस्या गुणाः। संख्या १ संख्या २ परिमितिः ३ पृथक्त्वम् ४ संयोगः ५ विभागः ६ परत्वम् ७ अपरत्वम् ८ वेगः ९ द्रवत्वम् १० गुरुत्वम् ११ रूपम् १२

रसः १३ गन्धः १४। इयं गन्धकारणं नानारूपवती षड्रसयुक्ता। गन्धस्तु द्विविधः सौरभं असौरभम्। तस्याः सुरभिः अनुष्णाशीतपाकजः। सा द्विविधा नित्या अनित्या च। परमाणुस्वरूपा नित्या सावयवा अनित्या। सा त्रिविधा देहेन्द्रियविषयरूपा। देहरूपा योनिजादिः इन्द्रियात्मिका घ्राणरूपा विषयात्मिका द्व्यणुकादित्रह्माण्डपर्य्यन्ता। यथा,—

"रूपद्रव्यप्रत्यक्षयोगि स्यात् प्रथमत्रिकम्।
गुरुणी द्वे रसवती द्वयोर्नैमित्तिको द्रवः॥"
"स्पर्शादयोऽष्टौ वेगश्च द्रवत्वञ्च गुरुत्वकम्।
रूपं रसस्तथा स्नेहो वारिण्येते चतुर्दश॥
स्नेहहीना गन्धवती चितावेते चतुर्दश।
तत्र चितिर्गन्धहेतुर्नानारूपवती मता॥
षड्विधस्तु रसस्तत्र गन्धोऽपि द्विविधो मतः।
सुरभिस्तु तस्या विज्ञेयो ह्यनुष्णाशीतपाकजः॥
नित्यानित्या च सा द्वेधा नित्या स्यादणुलक्षणा।
अनित्या तु तदन्या स्यात् सैवावयवयोगिनी॥
सा च त्रिधा भवेद्देह इन्द्रियं विषयस्तथा।
योनिजादिर्भवेद्देहमिन्द्रियं घ्राणलक्षणम्॥
विषयो द्व्यणुकादिस्तु ब्रह्माण्डान्त उदाहृतः॥"

इति भाषापरिच्छेदे। २८—३८॥

तस्या अध्यात्मादि यथा,—

"पृथिवी पञ्चमं भूतं घ्राणञ्चाध्यात्मसुच्यते।
अधिभूतं तथा गन्धो वायुस्तत्राधिदैवतम्॥"

इति महाभारते आश्वमेधिकपर्व्व॥

(यथा, मार्कण्डेये। ५४। ४।

"शतार्द्धकोटिविस्तारो पृथिवी क्षतसत्तमौ
द्विज!।

तस्या हि स्थानमखिलं कथयामि शृणुष्व तत्॥")

तस्या उत्पत्तिकारणं यथा,—

"शृयतां वसुधाजन्म सर्व्वमङ्गलकारणम्।
विघ्ननिघ्नकरं पापनाशनं पुण्यवर्द्धनम्॥
अहो केचिदवन्तीति मधुकैटभमेदसा।
बभूव वसुधाजन्म तदविरुद्धमतं शृणु॥
ऊचतुस्तौ पुरा विष्णुं तुष्टौ युद्धेन तेजसा।
आवां वध न यत्रोर्व्वी प्लाधसा संवृतेति च॥
तयोर्नीवनकालेन प्रत्यक्षा साभवत् स्फुटम्।
ततो बभूव मेदश्च मरणस्यान्तरन्तयोः॥
मेदिनीति च विख्यातेत्युक्ता यैस्तन्मतं शृणु।
जलधौता क्षुण्णा पूर्व्वं वर्द्धिता मेदसा यतः॥
कथयामि च तच्चन्न सार्थकं सर्व्वसम्मतम्।
पुरा श्रुतं यत् श्रुयुक्तं धर्म्मवक्त्राच्च पुष्करे॥
महाविराट्शरीरस्य जलस्थस्य चिरं स्फुटम्।
मलो बभूव कालेन सर्व्वाङ्गव्यापको ध्रुवम्॥
स च प्रविष्टः सर्व्वेषां तल्लोमां विवरेषु च।
कालेन महता तस्माद्बभूव वसुधा सुने!॥
प्रत्येकं प्रतिलोम्नाञ्च कूपेषु सा स्थिरा स्थिता।
आविर्भूता तिरोभूता सा जले च पुनः पुनः॥
आविर्भूता सृष्टिकाले तल्लोमपर्य्यवस्थिता।
प्रलये च तिरोभूता जलाभ्यन्तरवस्थिता॥
प्रतिविश्वेषु पद्मधा शैलकाननसंयुता।
सप्तसागरसंयुक्ता सप्तद्वीपमिता सती॥
हिमाद्रिमेरुसंयुक्ता ग्रहचन्द्रार्कसंयुता।
ब्रह्मविष्णुशिवाद्यैश्च सुरैर्लोकैस्तदालये॥
पुण्यतीर्थसमायुक्ता पुण्यभारतसंयुता।
पातालसप्ततदधस्तदूर्द्धे ब्रह्मलोकका॥
ब्रह्मलोकश्च तत्रैव सर्व्वविश्वश्च तत्र वै।
एवं सर्व्वाणि विश्वानि पृथिव्यां निर्म्मितानि च।
ऊर्द्धो गोलोकवैकुण्ठौ नित्यौ विश्वपरौ च तौ॥
नश्वराणि च विश्वानि सर्व्वाणि क्षत्रिमाणि च।
प्रलये प्राकृते ब्रह्मन्! ब्रह्मणश्च निपातने।
महाविराड़ादिरुद्रौ द्वौ रुद्रः क्षणेन चात्मना॥
नित्यैः स्थिता च प्रलये कालाकाशेश्वरैः सह।
चित्यधिष्ठातृदेवी सा वाराहे पूजिता सुरैः॥
सुनिर्भिर्मनुभिर्विप्रैर्गन्धर्व्वादिभिरेव च।
विष्णोर्व्वराहरूपस्य पत्नी सा श्रुतिसम्मता।
ततः पुत्रो मङ्गलो ज्ञेयो धरण्यो मङ्गलात्मजः॥

नारद उवाच।

पूजिता केन रूपेण वाराहे च सुरैर्मही।
वराहेण च वाराही सर्व्वैः सर्व्वाश्रया सती॥
तस्याः पूजाविधानञ्चाप्यधोक्षजकृतम्।
मङ्गलं मङ्गलस्यापि जन्म यासं वद प्रभो!॥

श्रीनारायण उवाच।

वाराहे च वराहश्च ब्रह्मणा संस्तुतः पुरा।
उद्धार महीं कृत्वा हिरण्याक्षं रसातलात्॥
जले तां स्थापयामास पद्मपत्रं यथा हृदे।
तत्रैव निर्म्ममे ब्रह्मा सर्व्वं विश्वं मनोहरम्॥
दृष्ट्वा तदधिदेवीञ्च सकामां कामुको हरिः।
वराहरूपी भगवान् कोटिसूर्य्यसमप्रभः॥
कृत्वा रतिकरीं शय्यां मूर्त्तिञ्च सुमनोहराम्।
क्रीड़ाञ्चकार रहसि दिव्यं वर्षमहर्निशम्॥
सुखसम्भोगसंस्पर्शात् मूर्च्छां संप्राप सुन्दरी।
विदग्धायां विदग्धेन सङ्गमोऽतिसुखप्रदः॥
विष्णुस्तदङ्गसंस्पर्शात् बुबुधे न दिवानिशम्।
वर्षान्ते चेतनां प्राप्य कामी तत्याज कामुकीम्॥
पूर्व्वरूपञ्च वाराहं दधार चावलीलया।
पूजाञ्चकार भक्त्या च ध्यात्वा च धरणीं सतीम्॥
धूपैर्दीपैश्च नैवेद्यैः सिन्दूरैरनुलेपनैः।
वस्त्रैः पुष्पैश्च बलिभिः संपूज्योवाच तां हरिः॥

श्रीमहावराह उवाच।

सर्व्वाधारा भव शुभे! सर्व्वैः संपूजिता सुखम्।
मुनिभिर्मनुभिर्देवैः सिद्धैश्च मानवादिभिः॥
अम्बुवाचीत्यागदिने गृहारम्भप्रवेशने।
वापीतड़ागारम्भे च गृहे च कृषिकर्म्मणि॥
तव पूजां करिष्यन्ति मदरेण सुरादयः।
मूढ़ा ये न करिष्यन्ति यास्यन्ति नरकञ्च ते॥

वसुधोवाच।

वक्ष्यामि सर्व्वं वाराहरूपेणाहं तवाज्ञया।
लीलामात्रेण भगवन्! विश्वञ्च चराचरम्॥
शुक्तां मुक्तिं हरेर्दन्तं शिवलिङ्गं शिलां तथा।
शृङ्गं प्रदीपं मञ्चञ्च माणिक्यं हीरकं मणिम्॥
यज्ञसूत्रञ्च पुष्पञ्च पुस्तकं तुलसीदलम्।
जपमालां पुष्पमालां कर्पूरञ्च सुवर्णकम्॥
गोरोचनां चन्दनञ्च घृतगव्यमजलं विना।
एतान् वोढुमशक्ताहं क्षिप्ता च भगवन्!
शृणु॥

श्रीभगवानुवाच।

द्रव्याण्येतानि मूढ़ा ये अर्पयिष्यन्ति सुन्दरि!।
ते यास्यन्ति कालसूत्रं दिव्यं वर्षशतं त्वयि॥
इत्येवमुक्ता भगवान् विरराम च नारद!।
बभूव तेन गर्भेण तेजस्वी मङ्गलग्रहः॥
पूजां चक्रुः पृथिव्याश्च ते सर्व्वे चाज्ञया हरेः।
काण्वशाखोक्तध्यानेन तुष्टुवुः स्तवनेन च॥
दूर्व्वामूलेन मन्त्रेण नैवेद्यादिकमेव च।
संस्तुता विष्णुलोकेषु पूजिता सा बभूव ह॥

नारद उवाच।

किं ध्यानं स्तवनन्तस्या मूलमन्त्रञ्च किं वद।
गूढ़ं सर्व्वपुराणेषु श्रोतुं कौतूहलं मम॥

श्रीनारायण उवाच।

आदौ च पृथिवी देवी वराहेण च पूजिता।
ततः सर्व्वैर्मुनीन्द्रैश्च मनुभिर्मानवादिभिः।
ध्यानञ्च स्तवनं मन्त्रं शृणु वक्ष्यामि नारद!॥
ॐ श्रीं ह्रीं क्लीं वसुन्धरायै स्वाहा।
इत्यनेनैव मन्त्रेण पूजिता विष्णुना पुरा॥
श्वेतचम्पकवर्णाभां शरत्चन्द्रसमप्रभाम्।
चन्दनोक्षितसर्व्वाङ्गीं रत्नभूषणभूषिताम्॥
रत्नाधारां रत्नगर्भां रत्नाकरसमन्विताम्।
वह्निशुद्धांशुकाधानां सस्मितां वन्दितां भजे॥
ध्यानेनानेन सा देवी सर्व्वैश्च पूजिता भवेत्।
स्तवनं शृणु विप्रेन्द्र! काण्वशाखोक्तमेव च॥

श्रीविष्णुरुवाच।

जये जये जयाकारे जयशीले जयप्रदे!।
यज्ञशूकरजाये च जयं देहि जयावहे॥
मङ्गले मङ्गलाधारे मङ्गल्ये मङ्गलप्रिये।
मङ्गलार्हे मङ्गलेशे मङ्गलं देहि मे भवे॥
सर्व्वाधारे सर्व्वबीजे सर्व्वशक्तिसमन्विते।
सर्व्वकामप्रदे देवि सर्व्वं देहि मे भवे॥
पुण्यस्वरूपे पुण्यानां बीजरूपे सनातनि।
पुण्याश्रये पुण्यवतामालये पुण्यदे भवे॥
रत्नाधारे रत्नगर्भे रत्नाकरसमन्विते।
क्षीररत्नरूपे रत्नार्हे रत्नसारप्रदे भवे॥
सर्व्वशस्यालये सर्व्वशस्यार्हे सर्व्वशस्यदे।
सर्व्वशस्यहरे काले सर्व्वशस्याधिके भवे॥
भूमे भूमिपसर्व्वस्वे भूमिपानां परायणे।
भूपार्हङ्काररूपेण भूमिं देहि च भूमिपे॥
इदं पुण्यं महास्तोत्रं तां संपूज्य च यः पठेत्।
कोटि कोटि जन्म जन्म स भवेद्भूमिमेश्वरः॥
भूमिदानकृतं पुण्यं लभते पाठनाच्छ्रुतः।
भूमिदानहरात् पापान्मुच्यते नात्र संशयः॥
अम्बुवाचीभूखनने पापात् स मुच्यते ध्रुवम्।
अन्धकूपे कूपदानात् पापात् स मुच्यते ध्रुवम्।
परभूमिहरात् पापान्मुच्यते नात्र संशयः॥
भूमौ वीर्य्यपरित्यागात् भूमौ दीपादिस्थापनात्।
प्राणेन मुच्यते प्राज्ञः स्तोत्रस्य पठनाच्छ्रुते!।
अश्वमेधशतं पुण्यं लभते नात्र संशयः॥

नारद उवाच ।
भूमिदानकृतं पुण्यं पापं तद्धरणे च यत् ।
परभूमौ आहृतापं कूपे कूपदजं तथा ॥
अम्बुवाचीभूखननं वीर्य्यत्यागजमेव च ।
दीपादिस्थापनात् पापं श्रोतुमिच्छामि यत्नतः ॥
अन्यं वा पृथिवीजन्यं पापं मत्प्रश्नतः परम् ।
यदस्ति तत्प्रतीकारं वद वेदविदांवर ! ॥

श्रीनारायण उवाच ।
वितस्तिमानां भूमिञ्च यो ददाति च भारते ।
सन्ध्यापूताय विप्राय स याति विष्णुमन्दिरम् ॥
भूमिञ्च सर्व्वशस्याढ्यां ब्राह्मणाय ददाति यः ।
भूमिरेणुप्रमाणञ्च वर्षं विष्णुपदे स्थितिः ॥
ग्रामं भूमिञ्च धान्यञ्च यो ददात्याददाति च ।
सर्व्वपापविनिर्मुक्तौ चोभौ वैकुण्ठवासिनौ ॥
भूमिं दातुश्च यत्काले यः साधुश्चानुमोदते ।
स च याति च वैकुण्ठं मित्रगोत्रसमन्वितः ॥
स्वदत्तां परदत्तां वा ब्रह्मवृत्तिं हरेत्तु यः ।
स तिष्ठति कालसूत्रे यावच्चन्द्रदिवाकरौ ॥
तत्पुत्रपौत्रप्रभृतिर्भूमिहीनः श्रिया हतः ।
पुत्रहीनो दरिद्रश्चैवान्ते याति च रौरवम् ॥
गवां मार्गं विनिष्कृष्य यच्च शस्यं ददाति च ।
दिव्यं वर्षशतञ्चैव कुम्भीपाकेषु तिष्ठति ॥
गोष्ठं तद्वागं निष्कृष्य मार्गं शस्यं ददाति च ।
स च तिष्ठत्यसिपत्रे यावदिन्द्राश्चतुर्दश ॥
न पश्यपिण्डसुद्धृत्य परकूपे च स्नाति यः ।
प्राप्नोति नरकं नैव स्नानजं फलमेव च ॥
कामी भूमौ च रहसि वीर्य्यत्यागं करोति यः ।
स्निग्धरेणुप्रमाणञ्च वर्षं तिष्ठति रौरवे ॥
अम्बुवाचीं भूखननं यः करोति च मानवः ।
स याति कृमिदंशञ्च स्थितिस्तत्र चतुर्युगम् ॥
परकीयतडागस्थ कूपं मूढः प्रयच्छति ।
पुष्करिण्याञ्च लुप्तायां पुष्करिणीं यो ददाति च ॥
सर्व्वं फलं परस्यैव तत्तस्मिन् व्रजेत्तु सः ।
तत्र तिष्ठति सन्तप्तो यावदिन्द्राश्चतुर्दश ॥
परकीयतडागे च पङ्कसुत्कृष्य नोत्क्षिपेत् ।
रेणुप्रमाणवर्षञ्च ब्रह्मलोके वसेन्नरः ॥
पित्रे पित्रे भूमिभर्त्तुं प्रदाय च मानवः ।
आद्धं करोति यो मूढो नरकं याति निश्चितम् ॥
भूमौ दीपं यो ददाति स चान्धः सप्तजन्मनि ।
भूमौ शस्यञ्च संस्थाप्य मुष्टं जन्मान्तरे लभेत् ॥
मुक्तामाणिक्यहीरञ्च सुवर्णञ्च मणिन्तथा ।
यच्च संस्थापयेद्भूमौ स तिष्ठेन्नरके युगम् ॥
जपमालां पुष्पमालां कर्पूरं रोचनान्तथा ।
यो मूढस्तर्पयेद्भूमौ स याति नरकं ध्रुवम् ॥
मुने ! चन्दनकाष्ठञ्च रुद्राक्षं कुशमूलकम् ।
संस्थाप्य भूमौ नरके वसेन्मन्वन्तरावधि ॥
पुस्तकं यज्ञसूत्रञ्च भूमौ संस्थापयेत्तु यः ।
न भवेद्विप्रयोनौ च तस्य जन्मान्तरे क्वचित् ॥
ब्रह्महत्यासमं पापमश्नुते च लभेद्ध्रुवम् ।
अन्ययुक्तं यज्ञसूत्रं पूज्यस्य सर्व्ववर्णकैः ॥
यज्ञं कृत्वा च यो भूमिं क्षीरेण नहि सिञ्चति ।
स याति तप्तसूर्म्मिषु सप्तप्तः सप्तजन्मसु ॥
भूकम्पे ग्रहणे यो हि करोति खननं भुवः ।
जन्मान्तरे महापापी सोऽङ्गहीनो भवेद्ध्रुवम् ॥
भवनं यत्र सर्व्वेषां भूर्भूमिस्तेन कीर्त्तिता ।
वसुरत्नं या दधाति वसुधा सा वसुन्धरा ।
हरेरूरौ च या जाता सा चोर्व्वी परिकीर्त्तिता ॥
धरा धरित्री धरणी सर्व्वेषां धारणात्तु या ।
इज्या च यागाधाराच्च क्षौणी क्षोणालये च या ।
महालये क्षयं याति क्षितिस्तेन प्रकीर्त्तिता ॥
काश्यपी काश्यपस्येयमचला स्थिररूपतः ।
विश्वम्भरा तद्धरणाच्चानन्तानन्तरूपतः ॥
पृथिवी पृथुकन्यात्वाद्दित्तितत्वाच्चहासुने ! ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे पृथिव्युपाख्यानं ७ अध्यायः ॥ ८ ॥
तस्या भारा यथा,—
क्षितिरुवाच ।
"कृष्णभक्तिविहीना ये ये च तद्भक्तनिन्दकाः ।
तेषां महापातकिनामशक्ता भारवाहने ॥
स्वधर्म्माचारहीना ये नित्यकृत्यविवर्जिताः ।
ब्रह्महीनाश्च देवेषु तेषां भारेण पीड़िता ॥
पितृमातृगुरुस्त्रीणां पोषणं पुत्रपोष्ययोः ।
ये न कुर्व्वन्ति तेषाञ्च न शक्ता भारवाहने ॥
ये मिथ्यावादिनस्तात ! दयासत्यविहीनकाः ।
निन्दका गुरुदाराणां तेषां भारेण पीड़िता ॥
मित्रद्रोही कृतघ्नश्च मिथ्यासाक्षिप्रदायकः ।
विश्वासघ्नः स्याष्टहारी तेषां भारेण पीड़िता ॥
कल्याणयुक्तनामानि हरेर्नामैकमङ्गलम् ।
कुर्व्वन्ति विक्रयं ये वै तेषां भारेण पीड़िता ॥
जीवघाती गुरुद्रोही ग्रामयाजी च लुब्धकः ।
शवदाही शूद्रभोजी तेषां भारेण पीड़िता ॥
पूजायज्ञोपवासानि व्रतानि नियमानि च ।
ये ये मूढा विहन्तारस्तेषां भारेण पीड़िता ॥
सदा हिंसन्ति ये पापा गोविप्रसुरवेष्णवान् ।
हरिं हरिकथां भक्तिं तेषां भारेण पीड़िता ॥
शूद्रादीनाञ्च भारेण पीड़िताहं यथा विधे ! ।
ततोऽधिकेन दैत्यानां तेषां भारेण पीड़िता ॥
इत्येवमुक्ता वसुधा रुरोद च मुहुर्मुहुः ।
ब्रह्मा तद्रोदनं दृष्ट्वा तामुवाच कृपानिधिः ॥
भारं तवापनेष्यामि दस्यूनामप्युपायतः ।
उपायतोऽपि कार्य्याणि सिध्यन्त्येव वसुन्धरे ! ॥
मन्त्रं मङ्गलकुम्भञ्च शिवलिङ्गञ्च कुङ्कुमम् ।
मधुकाष्ठं चन्दनञ्च कस्तूरीं तीर्थमृत्तिकाम् ॥
खड्गं गण्डकखड्गञ्च स्फटिकं पद्मरागकम् ।
इन्द्रनीलं सूर्य्यमणिं रुद्राक्षं कुशमूलकम् ॥
शालग्रामशिलाशङ्खतुलसीप्रतिमाजलम् ।
शङ्खप्रदीपमालाञ्च शिलार्चातुलसीं तथा ॥
निर्म्माल्यञ्चैव नैवेद्यं हरिदर्शमणिन्तथा ।
यज्ञियुक्तं यज्ञसूत्रं दर्पणं श्वेतचामरम् ॥
गोरोचनाञ्च सुक्ताञ्च शुक्तिं माणिक्यमेव च ।
पुराणसंहितां वह्निं कर्पूरं परशुं तथा ॥
रजतं काञ्चनञ्चैव प्रवालं रत्नमेव च ।
कुशग्रन्थिं तीर्थतोयं गव्यं गोमूत्रगोमयम् ॥
लक्ष्मि ये स्थापयिष्यन्ति मूढाश्चैतानि सुन्दरि ! ।
पच्यन्ते कालसूत्रे च वर्षाणामयुतं ध्रुवम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ४ अध्यायः ॥
तस्य रूपान्तरं यथा,—
"...ति तस्य वचः श्रुत्वा जनकस्य तदा क्षितिः ।
मुनीनां सन्निधौ रूपं दर्शयामास भूमृते ॥
नीलोत्पलदलश्यामामत्तमालाजधारिणीम् ।
बाहुयुग्मेन सुश्लेष्म मृणालायतशोभिना ।
सुन्दरीं लोकधात्रीं तां दृष्ट्वा शृङ्खनृपोऽलयत् ॥"
इति कालिकापुराणे ३६ अध्यायः ॥
पृथिव्यां ग्रामशस्यादुत्पत्तिकारणं यथा,—
प्रजा ऊचुः ।
"अराजके नृपश्रेष्ठ ! धरित्र्या सकलौषधीः ।
गृहीत्वा तत्र यान्ति प्रजाः सर्व्वाः प्रजेश्वर ! ॥
त्वं नो वृत्तिप्रदो धात्रा प्रजापालो निरूपितः ।
देहि नः क्षुत्परीतानां प्रजानां जीवनौषधीः ॥
श्रीपराशर उवाच ।
ततोऽथ नृपतिर्दिव्यमादायाजगवं धनुः ।
शरांश्च दिव्यान् क्रुपितः सोऽभ्यधावद्वसुन्धराम् ॥
ततो धरापि त्वरिता गौर्भूत्वा तु वसुन्धरा ।
सा लोकान् ब्रह्मलोकादींस्तत्रासादगमन्मही ।
यत्र यत्र ययौ देवी सा तदा भूतधारिणी ।
तत्र तत्र तु सा वैण्यं ददर्शाभ्युद्यतायुधम् ॥
ततस्तं प्राह वसुधा पृथुं पृथुपराक्रमम् ।
प्रवेपमाना तद्वाणपरित्राणपरायणा ॥
पृथिव्युवाच ।
स्त्रीवधे त्वं महापापं किं नरेन्द्र ! न पश्यसि ।
येन मां हन्तुमत्यर्थं प्रकरोषि नृपोद्यमम् ॥
श्रीपृथुरुवाच ।
एकस्मिन् यत्र निधनं प्राप्ते दुष्टकारिणि ।
बहूनां भवति क्षेमस्तस्य पुण्यप्रदो वधः ॥
पृथिव्युवाच ।
प्रजानामुपकाराय यदि मां त्वं हनिष्यसि ।
आधारः कः प्रजानान्ते नृपश्रेष्ठ ! भविष्यति ॥
पृथुरुवाच ।
त्वां हत्वा वसुधे ! चाशैर्मच्छासनपराङ्मुखीम् ।
आत्मयोगबलेनेमा धारयिष्याम्यहं प्रजाः ॥
श्रीपराशर उवाच ।
ततः प्रणम्य वसुधा तं भूयः प्राह पार्थिवम् ।
प्रवेपिताङ्गी परमं साध्वसं समुपागता ॥
उपायतः समारब्धाः सर्व्वे सिध्यन्त्युपक्रमाः ।
तस्मादुपायं कुरुष्व यदीच्छसि ॥
समस्ताहं मया क्षीणा नरनाथ ! महौषधीः ।
यदीच्छसि प्रदास्यामि ताः क्षीरपरिणामिनीः ॥
तस्मात् प्रजाहितार्थाय मम धर्म्मभृतांवर ! ।
तन्तु वत्सं प्रयच्छस्व चरेयं येन वत्सला ॥
समाञ्च कुरु सर्व्वत्र येन क्षीरं समन्ततः ।
वरौषधीबीजभूतं वीर ! सर्व्वत्र भावये ॥
श्रीपराशर उवाच ।
तत उत्तारयामास शैलान् शतसहस्रशः ।
धनुष्कोट्या तदा वैण्यस्तेन शैला विवर्द्धिताः ॥
नहि पूर्व्वसर्गे वै विषमे पृथिवीतले ।

प्रतिभागः पुराणां वा ग्रामाणां वा पुराभवत् ॥
न शस्यानि न गोरक्ष्यं न कृषिर्न वणिक्पथः ।
वैण्यात् प्रभृति मैत्रेय ! सर्व्वस्येतस्य सम्भवः ॥
यत्र यत्र समं वस्या भूमेरासीद्द्विजोत्तम ! ।
तत्र तत्र प्रजानां हि निवासं समरोचयत् ॥
आहारः फलमूलानि प्रजानामभवत्तदा ।
कृच्छ्रेण महता सोऽपि प्रनष्टास्वोषधीषु वै ॥
स कल्पयित्वा वत्सन्तु मनुं स्वायम्भुवं प्रभुम् ।
स्वे पाणौ पृथिवीनाथो दुदोह पृथिवीं पृथुः ॥
शस्यजातानि सर्व्वाणि प्रजानां हितकाम्यया ।
तेनान्नेन प्रजास्तात ! वर्त्तन्तेऽद्यापि नित्यशः ॥
प्राणप्रदानात् स पृथुर्यस्मादभूमेरभूत् पिता ।
ततस्तु पृथिवीसंज्ञामवापाखिलधारिणी ॥
ततश्च देवैर्मुनिभिर्दैत्यै रक्षोभिरद्रिभिः ।
गन्धर्व्वैरुरगैर्यक्षैः पितृभिस्तरुभिस्तथा ॥
तत्तत्पात्रमुपादाय तत्र दुग्धा सुने ! पयः ।
वत्स ! दोग्धृविशेषाच्च तेषां तद्योनयोऽभवन् ॥
सैषा धात्री विधात्री च धारणी पोषणी तथा ।
सर्व्वस्य जगतः पृथ्वी विष्णुपादतलोद्भवा ॥
एवंप्रभावः स पृथुः पुत्रो वेणस्य वीर्य्यवान् ।
जज्ञे सहीपतिः पूर्व्वो राजाभूज्जनरञ्जनात् ॥"
इति श्रीविष्णुपुराणे १ अंशे पृथुचरितं १३ अध्यायः ॥ * ॥

तस्या नामगोरूपदोहनानां कारणानि यथा,—
ऋषय ऊचुः ।
"बहुभिर्धरणी भुक्ता भूपालैः श्रूयते पुरा ।
पार्थिवाः पृथिवीयोगात् पृथिवी कस्य योगतः ॥
किमर्थञ्च कृता संज्ञा भूमेः किं पारिभाषिकी ।
गौरितीयञ्च विख्याता सूत ! कस्माद्ब्रवीहि नः ॥
सूत उवाच ।
वंशे स्वायम्भुवे ह्यासीदङ्गो नाम प्रजापतिः ।
मृत्योस्तु दुहिता तेन परिणीतातिदुर्मुखी ॥
सुनीथा नाम तस्यास्तु वेणो नाम सुतः पुरा ।
अधर्म्मनिरतः कामी बलवान् वसुधाधिपः ॥
लोकेऽप्यधर्म्मकृच्छ्रातः परभार्य्यापहारकः ।
धर्म्माचारप्रसिद्ध्यर्थं जगतोऽस्य महर्षिभिः ॥
अनुनीतोऽपि न ददावनुज्ञां स यदा ततः ।
शापेन मारयित्वैनमराजकभयार्दिताः ।
ममन्थुर्ब्राह्मणास्तस्य बलाद्दक्षिणकाक्षया ॥
तत्कायानुमथ्यमानात्तु निर्य्येतुर्म्लेच्छजातयः ॥
शरीरे मातरंशेन कृष्णाञ्जनसमप्रभाः ।
पितुरङ्गस्य चांशेन धार्म्मिको धर्म्मचारिणः ॥
उत्पन्नो दक्षिणाहस्तात् सधनुः सशरो गदी ।
दिव्यतेजोमयवपुः सरत्नकवचाङ्गदः ॥
पृथुरेवाभवद्यस्मात्ततः पृथुरजायत ।
स विप्रैरभिषिक्तश्च तपः कृत्वा सुदुश्चरम् ॥
विष्णोश्चक्रेण भक्तस्य प्रभुत्वमगमत् प्रभुः ।
निःस्वाध्यायवषट्कारं निर्धनं वीक्ष्य भूतलम् ॥
दग्धुमेवोद्यतः कोपाच्छरेणामितविक्रमः ।
ततो गोरूपमास्थाय भूः पलायितुमुद्यता ॥
दृष्ट्वोर्व्वगतस्तस्याः पृथुर्दीप्तशरासनः ।
ततः स्थित्वैकदेशे तु किं करोमीति साब्रवीत् ॥
पृथुरप्यवदद्वाक्यमीप्सितं देहि सुव्रते ! ।
सर्व्वस्य जगतः शीघ्रं स्थावरस्य चरस्य च ॥
तथेत्युक्त्वाब्रवीद्भूमिर्दुदोह च नराधिपः ।
स्वे स्वे पात्रे पृथुर्वत्सं कृत्वा स्वायम्भुवं मनुम् ॥
तदन्नमभवत् शुद्धं प्रजा जीवन्ति तेन वै ।
ततस्तु ऋषिभिर्दुग्धा वत्सः सोमस्तदाभवत् ॥
दोग्धा बृहस्पतिरभूत् पात्रं वेदस्तपो रसः ।
वेदैश्च वसुधा दुग्धा दोग्धा मित्रस्तदाभवत् ॥
इन्द्रो वत्सः समभवत् क्षीरमूर्ज्जस्करं बलम् ।
देवानां काञ्चनं पात्रं पितॄणां राजतन्तदा ॥
अन्तकश्चाभवद्दोग्धा यमो वत्सः सुधारसः ।
अलाबुपात्रं नागानां तक्षको वत्सकोऽभवत् ॥
विषं क्षीरं ततो दोग्धा धृतराष्ट्रोऽभवत् पुनः ।
असुरैरपि दुग्धेयमायसे शुक्रपीड़नीम् ॥
पात्रे मायामभूद्वत्सः प्रह्लादश्च विरोचनः ।
दोग्धा द्विमूर्द्धा तत्रासीन्मायाः येन प्रवर्त्तिताः ॥
यत्रैश्च वसुधा दुग्धा पुरान्तर्द्धानमीप्सुभिः ।
कृत्वा वैश्रवणं वत्समामपात्रे महीपते ! ॥
प्रेतरक्षोगणैर्दुग्धा धरा रुधिरमुल्बणम् ।
रौप्यलाभोऽभवद्दोग्धा सुमाली वत्स एव तु ॥
गन्धर्व्वैश्च पुनर्दुग्धा वसुधा चाप्सरोगणैः ।
वत्सं चैत्ररथं कृत्वा गन्धान् पद्मदले तथा ॥
दोग्धा च सुरुचिर्नाम गान्धर्ववेदस्य पारगः ।
गिरिभिर्वसुधा दुग्धा रत्नानि विविधानि च ॥
औषधानि च दिव्यानि दोग्धा मेरुर्महाबलः ।
वत्सोऽभूद्धिमवांस्तत्र पात्रं शैलमयं पुनः ॥
वृक्षैश्च वसुधा दुग्धा क्षीरं छिन्नप्ररोहणम् ।
पालाशपात्रे दोग्धा तु सालः पुष्पदलाकुलः ॥
प्लक्षोऽभवत्ततो वत्सः सर्व्ववृक्षगणाधिपः ।
एवमन्यैश्च वसुधा तथा दुग्धा यथेप्सितम् ॥"
इति मत्स्यपुराणे १० अध्यायः ॥ * ॥

अन्यद्विवरणं भूगोलशब्दे द्रष्टव्यम् ॥ पृथ्वी । तद्दैदिकपर्य्यायः । गौः १ गमा २ जमा ३ क्ष्मा ४ चा ५ चामा ६ क्षोणी ७ क्षितिः ८ अवनिः ९ ऊर्व्वी १० पृथ्वी ११ मही १२ रिपः १३ अदितिः १४ इला १५ निर्ऋतिः १६ भूः १७ भूमिः १८ पूषा १९ गातुः २० गोत्रा २१ । इत्येकविंशतिपृथिवीनामधेयानि । इति वैद्यनिघण्टौ १ अध्यायः ॥ (अन्तरिक्षम् । इति निघण्टुः । १ । ३ ॥ यथा, ऋग्वेदे । १० । १२१ । १ ।
"स दाधार पृथिवीं द्यामुतेमां
कस्मै देवाय हविषा विधेम ॥"
"पृथिवीत्यन्तरिक्षनाम ।" इति तद्भाष्ये सायनः ॥)

पृथिवीगीता, स्त्री, (पृथिव्या गीता ।) पृथिवी-कथा । यथा,—
"मैत्रेय ! पृथिवीगीताः श्लोकाश्चात्र निबोध तान् ।
यानाह धर्म्मध्वनिने जनकायासितो मुनिः ॥
श्रीपृथिव्युवाच ।
कथमेष नरेन्द्राणां मोहो बुद्धिमतामपि ।
येन कृत्स्नं सधर्म्माणोऽप्यतिविश्वस्तचेतसः ॥
पूर्व्वमात्मजयं कृत्वा जेतुमिच्छन्ति मन्त्रिणः ।
ततो भृत्यांश्च पौरांश्च जिगीषन्ते तथा रिपून् ॥
क्रमेणानेन जेष्यामो वयं पृथ्वीं ससागराम् ।
इत्यासक्तधियो मृत्युं न पश्यन्त्यविदूरगम् ॥
ससुद्रावरणं याति मन्मण्डलमयो वशम् ।
कियदात्मजयादेतत्सुक्तिरात्मजये फलम् ॥
उत्सृज्य पूर्व्वे यां यांता यां नादाय गतः पिता ।
तां मामतिविसृज्यान्ये तुमिच्छन्ति पार्थिवाः ॥
मत्कृते पितृपुत्राणां भ्रातृणाञ्चापि विग्रहाः ।
जायन्तेऽत्यन्तमोहेन ममत्वाहतचेतसाम् ॥
पृथ्वी ममेयं सकला ममेयं
ममेति चैषा मम शाश्वतेयम् ।
यो यो मृतेऽन्यत्र बभूव राजा
कुवुद्धिरासीदिति तस्य तस्य ॥
दृष्ट्वा ममत्वाहतचित्तमेकं
विहाय मां मृत्युपथं व्रजन्तम् ।
तस्यान्वयस्यत्र कथं ममत्वं
हृद्यास्पदं मत्प्रभवं करोति ॥
पृथ्वी ममैषास्तु परित्यजैनां
वदन्ति ये दूततुखैः खशत्रून् ।
नराधिपास्तेषु समातिहासः
पुनश्च मूढ़ेषु दयाभ्युपैति ॥
श्रीपराशर उवाच ।
इत्येते धरणीगीताः श्लोका मैत्रेय यैः श्रुताः ।
ममत्वं विलयं याति तापन्यस्तं यथा हृदम् ॥"
इति विष्णुपुराणे ४ अंशे २४ अध्यायः ॥

पृथिवीपतिः, पुं, (पृथिव्याः पतिः ।) राजा । (यथा, मनुः । ७ । १७७ ।
"सर्व्वोपायैस्तथा कुर्य्यान् नीतिज्ञः पृथिवीपतिः ।
यथास्याभ्यधिका न स्युर्मित्रोदासीनशत्रवः ॥") ऋषभनामौषधिः । इति मेदिनी । ते, २३१ ॥ यमः । इति हेमचन्द्रः ॥

पृथिवीपालः, पुं, (पृथिवीं पालयतीति । पृथिवी + पालि + अण् ।) राजा । यथा,—
"बुभुजे पृथिवीपालः पृथिवीमेव केवलाम् ॥"
इति रघुः ॥

पृथिवीप्लक्षः, पुं. (पृथिव्यां प्लक्ष इव ।) राणा । इति हेमचन्द्रः । ३ । ३५३ ॥

पृथुः, पुं, (प्रथते विख्यातो भवतीति । प्रथ + "प्रथिम्रदिभ्रस्जां संप्रसारणं सलोपश्च ।" उणा० १ । २६ । इति कुः सम्प्रसारणञ्च ।) चेतायुगे सूर्य्यवंशीयपञ्चमनृपः । वेणनृपस्य दक्षिणकरमथनाज्जातः । प्रजारञ्जनात् आदौ राजोपाधिं प्राप्तः । यथा,—
"अथ ते ऋषयः सर्व्वे प्रसन्नमनसस्ततः ।
गतकल्मषमेवं तं जातं वेणं नृपोत्तमम् ॥
ममन्थुर्दक्षिणं पाणिं तस्यैव च महात्मनः ।
मथिते तस्य पाणौ च सञ्जातं स्वेदमेव हि ॥
पुनर्ममन्थुस्ते विप्रा दक्षिणं पाणिमेव च ।
स्वकरात् पुरुषो जज्ञे द्वादशादित्यसन्निभः ॥
तप्तकाञ्चनवर्णाङ्गो दिव्यमाल्याम्बरावृतः ।
दिव्याभरणशोभाङ्गो दिव्यगन्धानुलेपनः ॥

नृपतिर्न मुनिर्न कुलाभ्यां विराजते ॥
महाबाहो महावाहू रक्षेनाप्रतिमो भुवि ।
महत्सत्त्वगतश्चैव धर्मो ज्ञानं च महाप्रभः ॥
सर्वलक्षणसम्पन्नः सर्वाभरणभूषितः ।
तेजसा स्वभावेन साक्षादग्निरिव ज्वलन् ॥
साक्षान्मानवको नाम धनुर्गृह्य महावरम् ।
रथी हि दृश्यते भाति भुवि वैखानसस्तथा ॥
तस्मिन् याते महाभागे दैवात् मध्योऽभसः ।
उत्तस्थे ऋत्विजो सर्वे वेनस्य तनयं प्रति ॥
दीप्यमानः स्वपुषा वर्चसैव महामतिः ।
दृष्ट्वा च दिव्यान्याजौ वपुषश्च महाप्रभम् ॥
ऋत्विग्भिः सहसाऽऽऽ मानात्मानमृषिकाम् ।
याने तस्मिन्महाभागे पृथौ वीरे महात्मनि ॥
संप्रवृत्तानि भूतानि समस्तानि द्विजोत्तमाः ।
सर्वलोकानि लोकानि पुण्यानि विविधानि च ॥
स्थावराणि चराण्येव अभ्यषिञ्चन्नराधिपम् ।
महावीरं प्रजापालं पृथुमेवं द्विजोत्तमाः ॥
पृथुं वैन्यं वसुन्धाऽपि अभिषिक्तं चराचरैः ।
देवैर्विप्रैस्तथा सर्वैरभिषिक्तो महामनाः ॥
राज्ञाऽथैवाधिकारे वै पृथुर्वैन्यः प्रतापवान् ।
तदा विप्रा प्रजाः सर्वाः कदा नैवाऽसुरक्षिताः ॥
तेनाऽसुरक्षिताः सर्वाः सुखमेधुस्तदिरे तदा ।
अनुरागात्तु वीरस्य नाम राजेत्यभाषत ॥
प्रयातस्य सुधीरस्य मनुजस्य द्विजोत्तमाः ।
आपस्तस्तम्भिरे सर्वा भयात्तस्य महात्मनः ॥
प्रयातस्य रथस्यापि तस्यैव च महात्मनः ।
दुर्गमार्गं विलोक्यैव स्वमार्गं चक्रतां ददुः ॥
अभग्नं न पतुस्तस्मै गिरयः सर्व एव ते ।
ध्वजश्चास्य पृथिवी सर्वत्र कामगेयत्वः ॥
सर्वेषां कामवर्षी च पेदयात् महोत्सवान् ।
कुर्वन्ति ब्राह्मणाः सर्वे क्षत्रियाश्च तथाऽपरे ॥
सर्वेषामपि वृत्तानां स्थितिं प्राप्स्यति ऽऽऽनि ।
न दुर्भिक्षं न च व्याधिर्नाकालमरणं नृणाम् ॥
सर्वे शतेन जीवन्ति लोका धर्मपरायणाः ।
तस्मिन् प्रशासति दुर्धर्षे राजराजे महात्मनि ।"
इति वायवीयोत्तरखण्डे २६ अध्यायः ॥ ९ ॥

तस्य माहात्म्यं यथा,—
"पृथुना प्रविभक्ता च क्षोभिता च वसुन्धरा ।
अन्नरत्नवती स्फीता पुरग्रामाकुलाऽभवत् ॥
एवं प्रभावो वैखस्य राजासीद्राजसत्तमः ।
तमसस्तेन पुत्रस्य भक्तिकामेनरोत्तमैः ॥
ब्राह्मणैर्देवकल्पैश्च पृथुर्वैन्यः प्रतापवान् ।
आदिराजो रणादस्य योधानां प्रथमो नृपः ॥
यो हि योद्धा रणं याति कीर्तयित्वा पृथुं नृपम् ।
योत्स्यमानो न संग्रामात् क्षेमी तरति कौर्किमान् ॥
वैखेनापि हि पृथुना या या दुग्धा वसुन्धरा ।
पृथुरेव तमस्तासां सर्वासामभिरक्षणे ॥
स एव पृथुरूपेण पूर्वं प्रजापतिर्भवान् ।
सर्वलोकेशो महाविष्णुः पुरुषोत्तमः सुरासुरैः ।"
तस्य पत्नी स्त्री । यथा,—
"पृथोः स्त्री तु महाभागा नाम्नाऽर्चिरिति विश्रुता ।

अग्निस्त्री च पृथिव्यानमन्तर्धानाद्व्यजायत ।"
अरेणाभूराजः पुत्रः । यथा, अग्निपुराणे ।
"अयोधस्तस्य पुत्रोऽभूत् ककुत्स्थो नाम वीर्यवान् ।
ककुत्स्थस्य अरेणाभूत्तस्य पुत्रः पृथुः स्मृतः ॥"
अग्निः । इति मेदिनी । थे, १० ॥ (प्रियव्रतवंशोद्भवस्य विभोः पुत्रः । यथा, विष्णुपुराणे । २ । १ । ३८ ।
"सुवस्सम्मात् तथोद्गीथः प्रस्तारस्तत्सुतो विभुः ।
पृथुस्ततोऽभवद्भक्तो नक्तस्यापि नयः सुतः ॥"
तामसमन्वन्तरे ऋषिविशेषः । यथा, मार्कण्डेये ।
७४ । ५८ ।
"ज्योतिर्धामा पृथुः काव्यश्चैत्रोऽग्निर्वनकस्तथा ।
पीवरश्च तथा अनृ ! सप्त सप्तर्षयोऽभवन् ॥")
पृथुः, स्त्री, (प्रथते विस्तारमेतीति । प्रथ+कुः सम्प्रसारणञ्च ।) क्षणजीरकः । इत्यमरः । २ । ६ । ३७ ॥ (अतत्पर्य्यायो यथा,—
"क्षणजीरः सुगन्धश्च तथैवोद्गारशोधनः ।
कालाजाजी तु सुषवी कालिका चोपकालिका ॥
पृथ्वीका कारवी पृथ्वी पृथुः क्षुण्णोपकुञ्चिका ।
उपकुञ्ची च कुञ्ची च वृहज्जीरक इत्यपि ॥"
इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे ॥)
लकपर्णी । शिम्बपत्री । इति मेदिनी । थे, १० ॥ (पर्य्यायोऽस्या यथा,—
"शिम्बपत्री तु कवरी पृथ्विका पृथुका पृथुः ॥"
इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे ॥)
अहिफेनः । इति शब्दरत्नावली ॥
पृथुः, त्रि, (प्रथ+कुः सम्प्रसारणञ्च ।) महत् । इत्यमरः । ३ । १ । ६० ॥ (यथा, आर्य्यासप्तशत्याम् । ११७ ।
"उल्लसितभ्रूधनुषा तव पृथुना लोचनेन रुचिराङ्गि ! ।
अचला अपि न महान्तः के चञ्चलभावमानीताः ॥")
निपुणः । इति शब्दरत्नावली ॥
पृथुकः, पुं, (पृथुरेव । पृथु+संज्ञायां कन् । यद्वा, प्रथते इति । प्रथ+"अर्भकपृथुकेति ।" उणा० ५ । ५३ । इति कुकन् सम्प्रसारणञ्च ।) शिम्बिटकः । इत्यमरः । क्षीवलिङ्गोऽप्ययम् । यथा,—
"दिःसिद्धमन्नं पृथुकं गुडं देशविशेषजे ।
नात्यन्तशुष्कं विप्राणां भक्षणे च निवेदने ॥
अभक्ष्यञ्च यतीनाञ्च विधवाब्रह्मचारिणाम् ॥"
इति ब्रह्मवैवर्ते ब्रह्मखण्डे २७ अध्यायः ॥
(यथास्य गुणाः ।
"पृथुका गुरवो बल्या कफपित्तमरुत्करिः ॥"
इति वामटे सूत्रस्थाने षष्ठोऽध्याये ॥
"पृथुका गुरवो भक्षाः भक्षयेदल्पशस्तु तान् ।
यावा विरूक्ष शीतेषु सतुषा भिन्नवर्चसः ॥"
इति चरके सूत्रस्थाने सप्तविंशोऽध्याये ॥
"पृथुका गुरवः स्निग्धा दृढना बलवर्द्धनाः ।
रुक्षाः कफोरभावाय धानाया भिन्नवर्चसः ॥"
इति सुश्रुते सूत्रस्थाने ४६ अध्याये ॥

चाक्षुषमन्वन्तरे देवगणभेदः । यथा, हरिवंशे । ७ । ३२ ।
"आद्या प्रभूता अभवः पृथुकाश्च दिवौकसः ॥")
पृथुकः, त्रि, (प्रथते इति । प्रथ+"अर्भकपृथुकपाकवयसि ।" उणा० ५ । ५३ । इति कुकन् सम्प्रसारणञ्च । यद्वा, पृथु यथा स्यात् तथा कायति शब्दायते इति । के शब्दे+कः ।) बालकः । इति मेदिनी । के, १२६ ॥ (यथा, माघे । ३ । ३० ।
"प्रक्रीडितान् रेणुभिरेव तूर्णं
निर्गुर्जतश्च पृथुकान् पथिभ्यः ॥")
पृथुका, स्त्री, (पृथुः स्थूलेव । पृथु+कन्+टाप् ।) शिम्बपत्री । इति शब्दचन्द्रिका ॥ (अस्याः पर्य्यायो यथा,—
"शिम्बपत्री तु कवरी पृथ्विका पृथुका पृथुः ॥"
इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे ॥)
बालिका च ॥
पृथुकोलः, पुं, (पृथुः कोलः ।) राजबदरः । इति राजनिर्घण्टः ॥
पृथुच्छदः, पुं, (पृथवश्छदाः पत्राणि यस्य ।) हरिदर्भः । इति राजनिर्घण्टः ॥ वृक्षतुलसे, त्रि ॥
पृथुपत्रः, पुं, (पृथूनि पत्राणि यस्य ।) रक्तलसुनः । इति राजनिर्घण्टः ॥
पृथुपलाशिका, स्त्री, (पृथूनि पलाशानि यस्याः । कप् । टापि अत इत्वम् ।) शटी । इति राजनिर्घण्टः ॥ (पर्य्यायोऽस्या यथा,—
"शटी पलाशी षड्ग्रन्था सुव्रता गन्धमातृका ।
गन्धारिका गन्धबधूर्वेधूः पृथुपलाशिका ॥"
इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे ॥)
पृथुरोमा, [न्] पुं, (पृथूनि रोमाणि लोमस्थानीयानि शल्कान्यस्येति ।) मत्स्यः । इत्यमरः । १ । १० । १७ ॥ वृहल्लोमयुक्ते, त्रि ॥
पृथुलं, त्रि, (पृथुं पृथुत्वमस्यास्तीति । पृथु+सिध्मादित्वात् सच् । यद्वा, पृथुं लातीति । ला+कः ।) महत् । इत्यमरः । ३ । १ । ६० ॥ (यथा, माघे । १० । ६५ ।
"ओषधिप्रियकरः पृथुलासु
सर्वमाप सकलेन तलेन ॥")
पृथुला, स्त्री, (पृथुल+टाप् ।) शिम्बपत्री । इति धटाधरः ॥ (गुणादयोऽस्या शिम्बपत्रीशब्दे ज्ञातव्याः ॥)
पृथुशिम्बः, पुं, (पृथुः शिम्बा यस्याः ।) शिम्बाकप्रभेदः । इति राजनिर्घण्टः ॥ (पर्य्यायान्तरमस्य यथा,—
"शिम्बाकः शिम्बकस्य स्यात्पटवृक्षपटुशुकाः ।
मधुकमक्षपत्रौलेगुडकाम्बुकटम्बटाः ॥
दीर्घवृन्तोऽरुणश्चापि पृथुशिम्बः कटम्बरः ॥"
इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे ॥)
पृथुशरः, पुं, (पृथु महत् शैलरं शल्यं यस्य ।) शल्लकः । इति त्रिकाण्डशेषः ॥
पृथुस्कन्धः, पुं, (पृथुः स्कन्धो यस्य ।) शरभः । इति राजनिर्घण्टः ॥

पृथूदकं, क्ली, (पृथु पुण्यप्रदत्वात् महदुदकं यस्य।) तीर्थभेदः। यथा,—
"ते श्रुत्वा ऋषयः सर्व्वे तीर्थमाहात्म्यमुत्तमम्।
कपालमोचनमिति नाम चक्रुः समागताः॥
तत्रापि सुमहत्तीर्थं विश्वामित्रस्य विश्रुतम्।
ब्राह्मण्यं लब्धवान् यत्र विश्वामित्रो महामुनिः॥
तस्मिंस्तीर्थवरे स्नात्वा ब्राह्मण्यं लभते ध्रुवम्।
ब्राह्मणस्तु विशुद्धात्मा परं पदमवाप्नुयात्॥
ततः पृथूदकं गच्छेन्नियतो नियताशनः।
तत्र सिद्धस्तु ब्रह्मर्षी रुषदृग्नुर्नाम नामतः॥
जातिस्मरो रुषदृग्नुस्तु गङ्गाद्वारे तदा स्थितः।
अन्तकालं ततो दृष्ट्वा पुत्रान् वचनमब्रवीत्॥
इह श्रेयो न पश्यामि नयध्वं मां पृथूदकम्।
विज्ञाय तस्य तद्भावं रुषदृग्नोस्ते तपोधनाः॥
तं वै तीर्थमुपानिन्युः सरस्वत्यास्तपोधनम्।
स ते: पुत्रैः समानीतः सरस्वत्यां समाप्लुतः॥
स्नात्वा तीर्थगुणान् सर्व्वान् प्राहेदन्द्धर्षिसत्तमः।
सरस्वत्यास्तु तीरे यः संत्यजेदात्मनस्तनुम्॥
पृथूदके जप्यपरो नैनं श्वो मरणं लभेत्।
तत्रैव ब्रह्मयोन्यस्ति ब्रह्मणा यत्र निर्म्मिता॥
पृथूदकं समाश्रित्य सरस्वत्यास्तटे स्थितः।
चतुर्व्वर्गस्य दृष्ट्यर्थमात्मज्ञानपरोऽभवत्॥
तस्याभिध्यायतः सृष्टिं ब्रह्मणोऽव्यक्तजन्मनः।
मुखतो ब्राह्मणा जाता बाहुभ्यां क्षत्रियास्तथा॥
ऊरुभ्यां वैश्यजातीयाः पद्भ्यां शूद्रास्ततोऽभवन्।
चातुर्व्वर्ण्यं ततो दृष्ट्वा आत्मस्थान् सुतांस्ततः॥
एवं प्रतिष्ठितं तीर्थं ब्रह्मयोनीतिसंज्ञितम्।
तत्र स्नात्वा मुक्तिकामः पुनर्योनिं न पश्यति॥"
इति वामनपुराणे ३८ अध्यायः॥
(यथा च महाभारते। ३। ८३।१३२—१३६।
"ततो गच्छेत राजेन्द्र! तीर्थं चैलोक्यविश्रुतम्।
पृथूदकमिति ख्यातं कार्त्तिकेयस्य वै नृप!॥
तत्राभिषेकं कुर्व्वीत पितृदेवार्च्चने रतः।
अज्ञानाद् ज्ञानतो वापि स्त्रिया वा पुरुषेण वा॥
यत्किञ्चिदशुभं कर्म्म कृतं मानुषबुद्धिना।
तत् सर्व्वं नश्यते तत्र स्नानमात्रस्य भारत!॥
अश्वमेधफलञ्चापि लभते स्वर्गमेव च।
पुण्यमाहुः कुरुक्षेत्रं कुरुक्षेत्रात् सरस्वतीं॥
सरस्वत्याश्च तीर्थानि तीर्थेभ्यश्च पृथूदकम्।
उत्तमं सर्व्वतीर्थानां यस्त्यजेदात्मनस्तनुम्॥
पृथूदके जप्यपरो न तस्य मरणं भवेत्।
गौतमं सनत्कुमारेण व्यासेन च महात्मना॥
वेदे च नियतं राजन्नधिगच्छेत् पृथूदकम्।
पृथूदकात् तीर्थतमं नान्यत्तीर्थं कुरूद्वह!॥
तन्मेध्यं तत् पवित्रञ्च पावनञ्च न संशयः।
तत्र स्नात्वा दिवं यान्ति येऽपि पापकृता नराः।
पृथूदके नरश्रेष्ठ! एवमाहुर्मनीषिणः॥")

पृथूदरः, पुं, (पृथु महदुदरं यस्य।) मेघः। इति हारावली। ८॥ दृढकुक्षौ, त्रि॥

पृथ्वी, क्ली, (पृथुः स्थूलत्वगुणयुक्ता। "वोतो गुणवचनात्।" ४।१।४४। इति ङीष्।) पृथिवी। (यथा, देवीभागवते। ३। १३। ८।
"मधुकैटभयोर्मेदसंयोगोत् मेदिनी स्मृता।
धारणाच्च धरा प्रोक्ता पृथ्वी विस्तारयोगतः॥")
पृथोर्दुहितृत्वस्वीकारादेतन्नाम। यथा, अग्निपुराणे।
"दुहितृत्वमनुप्राप्ता देवी पृथ्वी तथोच्यते॥"
हिङ्गुपत्री। क्षणजीरकः। इत्यमरः। २। ६। ३७, २। ६। ४०॥ (एतस्याः पर्य्यायो यथा,—
"क्षणजीरः सुगन्धश्च तथैवोद्गारशोधनः।
कालाजाजी तु सुषवी कालिका चोपकालिका॥
पृथ्वीका कारवी पृथ्वी पृथुः क्षणोपकुञ्चिका।
उपकुञ्ची च कुञ्ची च दृढजीरक इत्यपि॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
दृक्तार्हन्माता। इति हैमचन्द्रः॥ पुनर्नवा। स्थूलैला। इति राजनिर्घण्टः॥ (सप्तदशाक्षरपादकश्छन्दोभेदः। इति छन्दोमञ्जरी॥ अस्य लक्षणादिकं छन्दःशब्दे द्रष्टव्यम्॥)

पृथ्वीका, स्त्री, (पृथ्वी + स्वार्थे कन्।) दृढदेला। इत्यमरः। २। ४। १२५॥ (अस्याः पर्य्यायो यथा,—
"एलासूला च वहुला पृथ्वीका त्रिपुटापि च।
भद्रैला दृढदेला च चन्द्रबाला च निष्कुटिः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
स्थूलैला। क्षणजीरकः। इति रत्नमाला॥ हिङ्गुपत्री। इति राजनिर्घण्टः॥

पृथ्वीकुरवकः, पुं, (पृथ्व्यां भूमौ कुरवक इव।) श्वेतमन्दारकः। इति राजनिर्घण्टः॥

पृथ्वीजं, क्ली, (पृथ्व्यां जायते इति। जन + डः।) गडूचीवृक्षः। इति राजनिर्घण्टः॥

पृदाकुः, पुं, (पर्दते इति। पर्द अपानशब्दे + "पर्देर्नित् सम्प्रसारणमलोपश्च।" उणा० ३। ८०। इति काकुः रेफस्य सम्प्रसारणं अलोपश्च।) सर्पः। इत्यमरः। १। ८। ६॥ (यथा, महाभारते। ६। १७८। २७।
"स भीमं सहसाभ्येत्य पृदाकुः कुपितो भृशम्।
जग्राहाजगरो ग्राहो भुजयोरुभयोर्बलात्॥")
वृश्चिकः। व्याघ्रः। चित्रकः। इति मेदिनी। के, १२५॥ कुञ्जरः। वृद्धः। इति संक्षिप्तसारोणादिवृत्तिः॥

पृश्निः, त्रि, (स्पृश्यते इति। स्पृश संस्पर्शे + "पृशिपृश्नीति।" उणा० ४।५२। इति नि निपातनात् साधुः।) अल्पतनुः। इत्यमरः। २। ६। ४८॥ (यथा, महाभारते। १३। २६। ८६।
"दत्त्वा पृश्निं दृढव्रतां विप्रमुख्यां
स्निग्धवत्सां भगिनीं सुप्रसन्नाम्।
विभावरीं सर्व्वभूतप्रतिष्ठां
गङ्गां गता ये त्रिदिवं गतास्ते॥")
खर्व्वदुर्ब्बलाल्पास्थिः। इति भरतः॥ (शुक्लवर्णः। यथा, ऋग्वेदे। १। १६०। ३।
"धेनुञ्च पृश्निं वृषभं सुरेतसम्॥"
"पृश्निं शुक्लवर्णां धेनुम्।" इति तद्भाष्ये सायणः॥ प्राप्ततेजाः। यथा, ऋग्वेदे। १०। १८८। १।
"आयं गौः पृश्निरक्रमीदसदन्मातरं पुरः॥")

पृश्निशृ, पुं, (पृश्निं स्वल्पं शृणाति हिनस्ति यः। शृ + "शॄस्वृस्निहीति।" उणा० ४।५२। इति नि निपातनात् साधुः।) रश्मिः। इति शब्दरत्नावली॥ (अन्नम्। वेदाः। जलम्। अमृतम्। इति महाभारतम्। १२। ३४१। ४४॥) सुतपोराजपत्नी। सैव जन्मान्तरे देवकी भूता। इति श्रीभागवते १० स्कन्धः॥

पृश्निका, स्त्री, (पृश्नौ जले कायति शोभते इति। के + कः। यद्वा, पृश्नि स्वल्पं कं जलं यत्र।) कुम्भिका। इति शब्दमाला॥

पृश्निगर्भः, पुं, (पृश्निर्वेदादयो गर्भे यस्य। यद्वा, पृश्निः जन्मान्तरजातदेवकी तस्याः गर्भे उत्पत्तिस्थानत्वेनास्त्यस्येति। अच्।) श्रीकृष्णः। इति हारावली। ६॥ (अस्य निरुक्तिर्यथा महाभारते। १२। ३४१। ४४।
"पृश्निरित्युच्यते चान्नं वेदा आपोऽमृतं तथा।
ममैतानि सदा गर्भे पृश्निगर्भस्ततोऽस्म्यहम्॥")

पृश्निपर्णी, स्त्री, (पृश्नि स्वल्पं पर्णमस्याः। ङीष्।) लताविशेषः। चाकुलिया इति भाषा। चकरौत इति हिन्दी भाषा। तत्पर्य्यायः। पृथक्पर्णी २ चित्रपर्णी ३ अङ्घ्रिवल्लिका ४ क्रोष्टुविन्ना ५ सिंहपुच्छी ६ कलश्रिः ७ धावनिः ८ गुहा ९। इत्यमरः। २। ४। ६२॥ केचित्तु पृश्निपर्ण्यादिचतुष्कं चाकुलिया इति ख्यातायाम्। क्रोष्टुविन्नादिपञ्चकं विरालकाँइ इति ख्यातायामित्याहुः। एतत्तु वैद्या न श्रद्दधते। ते हि कलश्र्यादिशब्देन पृश्निपर्णीमेव गृह्णन्ति। पृश्निपर्णी सिंहपुच्छी चित्रपर्णी कटुसिंहपुच्छी अनयोरल्पभेदान्नवैवैकार्था इति केचित्। इति भरतः॥ अपि च।
पिष्टपर्णी १० लाङ्गली ११ क्रोष्टुपुच्छिका १२ पूर्णपर्णी १३ कलश्री १४ क्रोष्टुकमेखला १५ दीर्घा १६ शृगालदन्ता १७ त्रिपर्णी १८ सिंहपुच्छिका १९ दीर्घपत्रा २० अतिगुहा २१ दृढिला २२ चित्रपर्णिका २३। इति साङ्गे रत्नमाला॥ महागुहा २४ शृगालविन्ना २५ धमनी २६ मेखला २७ लाङ्गूलिका २८ पृश्निपर्णी २९ दीर्घपर्णी ३०। इति राजनिर्घण्टः। अङ्घ्रिपर्णी ३१ धावनी ३२। इति भावप्रकाशः। अस्या गुणाः। कटुत्वम्। अतीसारकासवातरोगज्वरोन्मादव्रणदाहनाशित्वञ्च। इति राजनिर्घण्टः॥ त्रिदोषघ्नत्वम्। दृष्यत्वम्। मधुरत्वम्। सरत्वम्। श्वासरक्तार्शोसारकृद्वमिनाशित्वञ्च। इति भावप्रकाशः॥ ग्राहित्वम्। इति राजवल्लभः॥

पृश्निभद्रः, पुं, (पृश्नौ भद्रं यस्य।) श्रीकृष्णः। इति शब्दमाला॥

पृश्निशृङ्गः, पुं, (पृश्निर्वेदादयः शृङ्गमिवास्य।) विष्णुः। इति शब्दमाला॥ (पृश्नि स्वल्पं शृङ्गमिव मुख्याङ्गं यस्य।) गणेशः। इति त्रिकाण्डशेषः॥

पृषती, स्त्री, (सृजति गच्छतीति । सृज + क्तिः । सृजो वा दीर्घः ।) वारिबिन्दुः । इति शब्दरत्नावली ॥ (विस्तरोऽस्या वारिबिन्दुशब्दे ज्ञातव्यः ।) दृष्टिरुक् । इति भूरिप्रयोगः ॥

पृष, उ सेचने । इति कविकल्पद्रुमः ॥ (भ्वा०-परo-सक०-सेट् । लटपेट् ।) उ, पर्षिता पृष्टा । इति दुर्गादासः ॥

पृषत्, स्त्री, (पर्षति सिञ्चतीति । पृष सेचने + "पर्षतेर्नित् पृषद्भृषदिति ।" उणा० २ । ८२ । इति । नित्त्वात्प्रथमो गुणाभावश्च निपात्यते । ङीषन्तस्यास्य शब्दस्य विशेषणम् ।) जलबिन्दुः । इत्यमरः । १ । १० । ४ ॥ यथा, "पृषदपदयविषाणाग्रेण पृष्टति ।" इति श्रीभागवते ५ स्कन्धे ८ अध्यायः ॥ "पृषत् अल्पबिन्दुसदृशं व्यवरणेन रुदता विषादाश्रुणा पृष्टति सञ्चरति ।" इति तट्टीकायां श्रीधरस्वामी । इदं द्विवचनबहुवचनान्तमपि भवति ॥

पृषत्, पुं, (पर्षतीति । पृषि सेके + "पृषिरक्षिभ्यां कित् ।" उणा० ३ । १११ । इति अतच् । स च कित् ।) बिन्दुः । इत्यमरः । १ । १० । ६ ॥ (यथा, रघौ । ९ । ३ ।
"करीव सिक्तं पृषतैः पयोमुचां
सुविस्मयाये वनराजिपल्वलम् ॥")
श्वेतबिन्दुयुक्तमृगः । इति मेदिनी । ते, १३५ ॥ तत्पर्य्यायः । रक्तः २ अवसक्थकः ३ । इति राजनिर्घण्टः ॥ (यथा, सुश्रुते शरस्थाने ६ अध्याये । "हरितवर्णैकरङ्गकरालकृतमाल-प्रभृतयश्चेत्या पृषतधारस्वरश्यामाम्रकाम्रभृतयो वृक्षाः । कषाया मधुरा लघवो वातपित्तश्रमक्लीदहरा वस्तिशोधनाश्च ॥"०॥ द्रुपदराजस्य पिता । यथा, महाभारते । १ । १३१ । १० ।
"भरद्वाजसखा चासीत् पृषतो नाम पार्थिवः ।
तस्यापि द्रुपदो नाम तदा समभवत् सुतः ॥"
मृगलिप्तमर्म्मलक्षणमर्म्मविशेषः । यथा,—
"वादर्भसदृशैः श्वेतमण्डलो रक्तमण्डलश्चित्रमण्डलः पृषतो रोमपुष्प इत्यादिषु ।" इति सुश्रुते शरस्थाने चतुर्थेऽध्याये ॥)

पृषत्सखिः, पुं, (पृषतां बिन्दूनां पतिर्नेता इत्यलुक्समासः ।) वायुः । इति जटाधरः ॥ (यथा, माघे । ९ । ५५ ।
"गजमतिदयसीरपि हैमन-
सुषिरवपुः सरितः पृषत्सखिः ।
मलिनसलिलमर्म्मभग्नयोषित-
मनुकुलमनुलावकूजितं दधाम् ॥")

पृषत्सादः, पुं, (पृषतो मृगविशेषोऽत्र इव गतिमार्गे सादो यस्य ।) वायुः । इत्यमरटीकायां भरतः ॥

पृषती, स्त्री, (पृषत + स्त्रियां ङीप् ।) श्वेतबिन्दुयुक्तमृगी । इति मेदिनी । ते, १३५ ॥ (यथा, रघुः । ९ । ५८ ।
"पृषतीषु विलोभनीयतां
स्वयमूरुद्वयसाद्य निर्भयाः ।")

पृषदनुकः, पुं, (पृष्यते सिच्यते सिच्यते इति । पृष + अतिः । ततः संज्ञायां कन् ।) वागुः । इत्यमरः । २ । ८ । ५६ ॥ (यथा, रघौ । ७ । ४५ ।
"अध्यर्द्धभागे परवारणस्य
धनुर्भृतां दक्षतनोः पृषत्काः ॥")

पृषदश्वः, पुं, (पृषत् स्वगविशेषोऽत्र इव वाहनो यस्य ।) वायुः । इत्यमरः । १ । १ । ६५ ॥ (यथा, ऋग्वेदे । १ । ८० । ४ ।
"स हि सत्यः पृषदश्वो युवा गणो अया इवागन्
स्वधाभिरा हुतः ॥"
राजर्षिभेदः । यथा, महाभारते । २ । ८ । १२ ।
"अश्वः सदश्वो वश्याश्वः पृथुवेगः पृथुश्रवाः ।
पृषदश्वो वसुमनाः क्षुपश्च सुमहाबलः ॥"
विरूपस्य पुत्रः । यथा, भागवते । ९ । ६ । १ ।
"विरूपः केतुमान् प्रभुरमरीषसुतास्त्रयः ।
विरूपात् पृषदश्वोऽभूत् ततपुत्रस्तु रथीतरः ॥")

पृषदाज्यं, क्ली, (पृषद्भिः दधिबिन्दुभिः सहितमाज्यम् ।) सदध्याज्यम् । दधिमिश्रितघृतम् । इत्यमरः । २ । ७ । २४ ॥ (यथा, ऋग्वेदे । १० । ६० । ८ ।
"तस्माद्यज्ञात् सर्व्वहुतः सम्भृतं पृषदाज्यम् ।
पशूंस्ताँश्चक्रे वायव्यानारण्यान् ग्राम्याश्च ये ।"
"पृषदाज्यं दधिमिश्रमाज्यम् ।" इति तद्भाष्ये सायणः ॥)

पृषद्वसः, पुं, (पृषदेव बलमस्य ।) वायुः । यथा,—
"ध्रुवित्वमस्यादान्दोलः कृच्छ्रेष्वाश्वासनादिः ।
पृषद्बलस्तु वायुः स्यात् कृच्छ्रे तु प्रमोदितः ॥"
इति शब्दमाला ॥

पृषन्तिः, पुं, (पर्षतीति । पृष सेचने + अतिप्रत्ययः । निपातनात् साधुः ।) बिन्दुः । यथा,—
"पयःपृषन्तिभिः सृष्टा यान्ति वाताः शनैः शनैः ॥"
इति भरतधृतकामवतीविषयकाव्यम् ॥

पृषभाषा, स्त्री, (पर्षतीति । पृष सेके + कः । पृषान्ततर्षिणी भाषा यत्र ।) यमसावती । इति शब्दरत्नावली ॥

पृषाकरा, स्त्री, (पृष + भावे किप् । पृषे सेचनाय आकीर्य्यते इति । आ + कॄ + अप् + टाप् । प्रातः सन्ध्यायाश्चास्या उपरि जलसेचनादेव तथात्वम् ।) चुडशिखा । इति शब्दचन्द्रिका ॥ बाट्‌वारा इति भाषा ॥

पृषातकं, क्ली, (पृषन्तं पृषदाज्यमत्र कते दधतीति । तक + अच् । पृषोदरादित्वात् साधुः ।) दधिमुक्तघृतम् । इति हैमचन्द्रः ॥

पृषोदरः, त्रि, पृषदुदरं यस्य । ("पृषोदरादीनि यथोपदिष्टम् ।" ६ । ३ । १०९ । इति तत्त्वम् ।) मनीषादित्वात् तत्त्वम् । इति दुर्गादासः ॥
"भवेदर्शांसमाहीनः सिध्मी वर्णविपर्ययात् ।
पर्वादिभाव गूढाख्यो वर्णलोपात् पृषोदरः ॥"
इति गोपीचन्द्रकृतव्याख्या ॥

पृषोदात्तं, क्ली, चुद्रोपधत्वम् । मनीषादित्वात् पृषत्सकारस्य तः । इति सुग्धबोधटीकायां दुर्गादासः ॥

पृष्ठं, क्ली, (पृष्यते सिच्यते इति । पृष "तिथपृष्ठगूथयूथप्रोथाः ।" उणा० २ । १२ । इति थक्प्रत्ययेन निपातनात् निष्ठम् ।) शरीरपश्चाद्भागः । इत्यमरः । २ । ६ । ७८ ॥ पीठ इति भाषा ॥ (यथा, मनौ । ४ । ७२ ।
"न विगर्ह्य कथां कुर्य्यान्नैर्घृण्यं न परं वदेत् ।
न चाधर्म्यां गिरं सेवेत नानृतं न परोक्षतः ॥")
चरममात्रम् । इति मेदिनी । ठे, ७ ॥ (स्तोत्रविशेषः । यथा, शतपथब्राह्मणे । ८ । १ । १ । ५ ।
"त्रिवृतस्तोमाद्यन्तरं पृष्ठं निरमिमीत ॥")

पृष्ठग्रन्थिः, पुं, (पृष्ठस्य ग्रन्थिः ।) गडुः । इति हैमचन्द्रः । ३ । ४४६ ॥ कूँध इति भाषा ॥

पृष्ठतः, [स्] अ, (पृष्ठ + "प्रतियोगे पञ्चम्यास्तसिः ।" ५ । ३ । ३९ । इत्यस्य "आद्यादिभ्य उपसंख्यानम् ।" इति वार्त्तिकोक्त्या तसिः ।) पश्चात् । यथा, भट्टिः । २ । २४ ।
"तं पृष्ठतः प्रस्थमियाय नम्रो
हिंस्रेषु दीप्राक्षधरः कुमारः ॥"
पृष्ठदेशे । (यथा, मनौ । ८ । ३०० ।
"पृष्ठतस्तु शरीरस्य नोत्तमाङ्गे कथञ्चन ।
अतोऽन्यथा तु प्रहरन् प्राप्नः स्यात् चौरकिल्बिषम् ॥")

पृष्ठदृष्टिः, पुं, (पृष्ठे दृष्टिर्दर्शनं यस्य ।) भल्लूकः । इति राजनिर्घण्टः ॥

पृष्ठमांसादः, त्रि, (पृष्ठे परोक्षे मांसादः इव । व्यसकसमनिष्ठुरकठोरवाक्यकथनादस्य तथात्वम् ।) वाक्याभिधायी । इति त्रिकाण्डशेषः ॥ चोगोलखोर इति पारस्यभाषा । (पृष्ठमांसमत्तीति । अद् । पृष्ठमांसभक्षके, त्रि ॥)

पृष्ठमांसादनं, क्ली, (पृष्ठे परोक्षे मांसादनं मांसभक्षणमिव कीर्त्तनस्यास्यानिष्ठुरकत्वात् ।) परोक्षे दोषकीर्त्तनम् । इति हैमचन्द्रः । ३ । २६५ ॥ तद्वति, त्रि ॥ (पृष्ठमांस + अद् + कर्त्तरि ल्युः । पृष्ठमांसभक्षके, त्रि ।)

पृष्ठवंशः, पुं, (पृष्ठस्य वंशः वंश इव दण्ड इत्यर्थः ।) पृष्ठास्थि । पिठेर हाड़ा इति भाषा ॥ तत्पर्य्यायः । रीढ़कः २ । इति हैमचन्द्रः ॥ (यथा, सुश्रुते शारीरस्थाने ६ अध्याये ।
"तत्र पृष्ठवंशसुभगः प्रतिस्रोगी कालमस्तिनी कटीतरुणे नाम मर्म्मणी ।") स तु नाममात्रेण भवति । इति सुग्धबोधः ॥

पृष्ठवाट्, } [ट्] पुं, (पृष्ठं युगपार्श्वं वहतीति । वह + क्विप् ।) युगपार्श्वगतः । पाँटे पाँया गरु इति भाषा । इत्यमरः ॥ (पृष्ठं पृष्ठभागं वहतीति । वह + क्विप् । षत्वाभावश्छान्दसः । यथा, हरिवंशे भविष्यपर्व्वणि । ५५ । ३१ ।
"शरत्कं पृष्ठवाहन्तु कृत्वा देवप्रवेश्वरः ।

आग्नेयमस्त्रं संयोज्य शरे कस्मिंश्चिदीश्वरः ।
अनेन त्वां दहाम्यद्य यदि शक्तोऽसि वारय ॥")

पृष्ठवाह्यः, पुं, (पृष्ठे वाह्यं वहनीयद्रव्यमस्य ।) भारवाहकवृषः । तत्पर्य्यायः । स्थौरी २ पृष्ठ्यः ३ । इति हेमचन्द्रः । ४ । ३२६ ।

पृष्ठसङ्गः, पुं, (पृष्ठे सङ्गमस्य । सङ्गस्य वक्रभावेन पृष्ठगमनात् तथात्वम् ।) वनच्छागः । इति हेमचन्द्रः । ४ । ३४४ ॥

पृष्ठसङ्गी, न्] पुं, (पृष्ठे सङ्गमिव अस्यास्तीति । सङ्ग + इनिः ।) भीमसेनः । नपुंसकम् । महिषः । इति मेदिनीशब्दरत्नावल्यौ ॥

पृष्ठोदयः, पुं, (पृष्ठेनोदयोऽस्य ।) मेषवृषकर्कटधनुर्म्मकरमीनलग्नाः । यथा, ज्योतिस्तत्त्वे ।
"अजो गोपतियुग्मञ्च कर्किधन्विन्दुगास्तथा ।
निशासंज्ञाः स्मृताश्चैते शेषाश्चान्ये दिनात्मकाः ॥
निशासंज्ञा विमिथुना स्मृताः पृष्ठोदयास्तथा ।
शेषाः शीर्षोदया ह्येते मौनश्चोभयसंज्ञकः ॥"

पृष्ठ्य, क्ली, (पृष्ठानां स्तोत्रविशेषाणां समूह इति । पृष्ठ + "ब्राह्मणमाणववाडवाद् यत् ।" ४ । २ । ४२ । इत्यस्य "पृष्ठादुपसंख्यानम् ।" इति वार्त्तिकोक्त्या यत् ।) पृष्ठानां समूहः । इत्यमरः । ३ । २ । ४२ ॥

पृष्ठ्यः, पुं, (पृष्ठेन वहतीति । पृष्ठ + यत् ।) पृष्ठेन भारवाहकाश्वः । तत्पर्य्यायः । स्थौरी २ । इत्यमरः । २ । ८ । ४६ ॥ (यथा, महाभारते । १ । २२२ । ४६ ।
"पृष्ठ्यानामपि चाश्वानां वाल्किकानां जनार्द्दनः ।
ददौ शतसहस्राणि कन्याधनमनुत्तमम् ॥"
धारके, त्रि । यथा, ऋग्वेदे । ४ । ३ । १० ।
"ऋतेन हि ष्मा वृषभश्चिदक्तः
पुमाँ अग्निः पयसा पृष्ठ्येन ॥"
"पृष्ठ्येन धारकेण पयसाक्तः ।" इति तद्भाष्ये सायनः ॥)

पृष्ण्यः, त्रि, (पृश्निः । पृषोदरादित्वात् साधुः ।) प्रश्निः । इत्यमरटीकायां भरतः ॥ पार्ष्णिः । तत्र स्त्रीलिङ्गः । इत्युणादिकोषः ॥

पॄ, क पूर्त्तौ । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) क, पारयति । इति दुर्गादासः ॥

प, णि गि लि पालने । पूर्त्तौ । इति कविकल्पद्रुमः ॥ (क्रया०-क्रा०च-पर०-सक०-सेट् ।) णि, पूर्त्तोऽस्ति । रूक्ष्वाद्योदित्वात्र पूर्ववज्जनान्न निष्ठातस्य नः । गि, पृणाति । क्वौ तु पूर्त्तिरित्येव मनीषादित्वान्न निः । लि, पिपर्त्ति । इति दुर्गादासः ॥

पेचकः, पुं, (पचति पच्यते वा । पच + "पचिमथोरिच ।" उणा० ५ । ३७ । इति वुन् । उपधाया अत इच ।) पक्षिविशेषः । पेचा इति भाषा । तत्पर्य्यायः । उलूकः २ वायसारातिः ३ । इत्यमरः । २ । ५ । १५ ॥ शक्राख्यः ४ दिवान्धः ५ वक्रनासिकः ६ हरिनेत्रः ७ दिवाभीतः ८ नखाग्नी ९ पीलुः १० घर्घरः ११ काकभीरुः १२ नक्तचारी १३ । इति त्रिकाण्डशेषः ॥ निशाचरः १४ कौशिकः १५ रूपनाशनः १६ पेचः १७ रक्तनासिकः १८ भीरुकः १९ । इति शब्दरत्नावली ॥ करिपुच्छमूलोपान्तः । गुदाच्छादकमांसपिण्डविशेषः । इत्यमरः । ३ । ३ । ६ ॥ पर्य्यङ्कः । यूकः । इति विश्वः ॥ मेघः । इति शब्दरत्नावली ॥

पेचकी, [न्] पुं, (पेचकोऽस्यास्तीति । पेचक + इनिः ।) हस्ती । इति शब्दरत्नावली ॥

पेचिलः, पुं, (पच + बाहुलकात् इलच् अत इच ।) हस्ती । इति त्रिकाण्डशेषः ॥

पेचु, क्ली, (पच्यते इति । पच + उन् । अत इत्वञ्च ।) पेचुली । इति त्रिकाण्डशेषः ॥

पेचुली, स्त्री, (पच्यते इति । पच + उलच् । अत इत्वं गौरादित्वात् ङीष् ।) शाकभेदः । कचु इति ख्यातः । यथा,—
"कैचुकं पेचुली पेचु नाड़ीचौ विश्वरोचनः ॥"
इति त्रिकाण्डशेषः ॥

पेटः, पुं, (पेटतीति । पिट् + अच् ।) प्रहस्तः । इति राजनिर्घण्टः ॥ पेटके, क्ली । इत्यमरः । २ । १० । ३० ॥

पेटकः, पुं, (पेटतीति । पिट + ण्वुल् ।) वंशवेत्रादिमयसमुद्गकप्रायः । पेटारी इति पेटी इति पेड़ा इति च ख्यातः । तत्पर्य्यायः । पिटकः २ पेड़ा ३ मञ्जूषा ४ । इत्यमरः । २ । १० । ३० ॥ आद्यौ खल्पपेटिकायाम् । परौ महापेटिकायामिति स्वामी ॥ समूहः । इति मेदिनी । के, १२७ ॥

पेटाकः, पुं, (पेटक + पृषोदरादित्वात् साधुः ।) पेटकः । इति भरतद्विरूपकोषः ॥

पेटिका, स्त्री, (पिटतीति । पिट + ण्वुल् । कापि अत इत्वम् ।) वृक्षविशेषः । पेटारि इति भाषा । तत्पर्य्यायः । कुबेराक्षी २ कुलिङ्गाक्षी ३ क्षुद्रहन्तिका ४ । इति रत्नमाला ॥ (यथा,—
"पेटिकामूललेपाच्च योनिर्भिन्ना प्रशास्यति ॥"
इति वैद्यकचक्रपाणिसंग्रहे योनिव्यापदधिकारे ॥)

पेटी, त्रि, (पेट + गौरादित्वात् ङीष् ।) पेटकः । इत्यमरः । २ । १० । ३० ॥

पेड़ा, स्त्री, (पेटा । पृषोदरादित्वात् साधुः ।) मञ्जूषा । महापेटिका । इत्यमरभरतौ ॥

पेण, ऋ पेषे । गतौ । क्षेपे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-क्षेपे अक०-सेट् ।) ऋ, अपिपेणत् । पिपेणतुः । इति दुर्गादासः ॥

पेत्वं, क्ली, (पीयते इति । पा पाने + "अन्येभ्योऽपि दृश्यन्ते ।" उणा० ४ । १०५ । इति इत्वन् ।) अम्बुतम् । घृतम् । इत्युणादिकोषः ॥ (पुं, पतनशीलः पशुः । छागः । यथा, वाजसनेयसंहितायाम् । २६ । ५८ ।
"सावित्रो वारुणः कृष्ण एकशितिपात् पेत्वः ॥"
"पेत्वः पतनशीलो वेगवान् पशुः ॥" इति तद्भाष्ये महीधरः ॥ तथाच ऋग्वेदे । ७ । १८ । १७ ।
"सिंह्यं चित् पेत्वेना जघान ॥"
"पेत्वेन छागेन जघान घातयामास ।" इति तद्भाष्ये सायनः ॥)

पेयं, क्ली, (पीयते यदिति । पा पाने + कर्म्मणि यत् । "ईद्यति ।" ६ । ४ । ६५ । इति यात ईत् ततो गुणः ।) जलम् । इति मेदिनी । ये, ३६ ॥ दुग्धम् । इति शब्दचन्द्रिका ॥ अष्टविधान्नान्तर्गतान्नविशेषः । यथा,—
"भोज्यं पेयं तथा चूष्यं लेह्यं खाद्यञ्च चर्व्वणम् ।
निष्पेषञ्चैव भक्ष्यं स्यादन्नमष्टविधं स्मृतम् ॥"
इति राजनिर्घण्टः ॥
पातव्ये, त्रि । इति मेदिनी । ये, ३६ ॥ (यथा, महाभारते । १४ । ४४ । १० ।
"सर्व्वेषां भक्ष्यभोज्यानामन्नं परमसुच्यते ।
द्रवाणाञ्चैव सर्व्वेषां पेयानामाप उत्तमाः ॥")

पेया, स्त्री, (पीयते इति । पा + यत् । ततष्टाप् ।) सिक्थसमन्वितपेयद्रव्यम् । अस्या गुणाः ।
"पेया खेदाग्निजननी वातवर्च्चोऽनुलोमनी ।
क्षुत्तृष्णाग्लानिदौर्ब्बल्यक्षुच्चिरोगविनाशिनी ॥"
इति राजवल्लभः ॥
मिश्रेया । इति शब्दचन्द्रिका ॥ आशा । अच्छमद्यम् । इति मेदिनी । ये, ३६ ॥

पेयूषः, पुं, क्ली, (पीय पाने + "पीयेरूषन् ।" उणा० ४ । ७६ । इति ऊषन् बहुलवचनात् गुणः ।) अभिनवं पयः । इत्यमरः ॥ नवप्रसूतायां गोः सप्तदिनाभ्यन्तरीयदुग्धम् । यथा,
"आसप्तरात्रप्रभवं क्षीरं पेयूष उच्यते ॥"
इति हारावली ॥
"पीयते पेयूषः पीङ् पाने नान्तोऽयं यूषः ऋदुपधान्ताः क्लीबत्वञ्च । पीयूषञ्च अथ पीयूषपेयूषे नवं सप्तदीनावधीति शब्दार्णवः ॥" इति तट्टीकायां भरतः ॥ (यथा, मनुः । ५ । ६ ।
"शैलेयं गव्यञ्च पेयूषं प्रयत्नेन विवर्ज्जयेत् ॥")
अम्बुतम् । अभिनवसर्पिः । इत्युणादिकोषः ॥

पेरुः, पुं, (पीयते रसानिति । पीङ् पाने + "मिपीभ्यां रुः ।" उणा० ४ । १०१ । इति रुः ।) वह्निः । सूर्य्यः । इत्युणादिकोषः ॥ सप्तमः । इति त्रिकाण्डशेषः ॥ (त्रि, रक्षकः । यथा, ऋग्वेदे । ६ । ७४ । ४ ।
"नरो हितमवमेहन्ति पेरवः ॥"
"नरो नेतारः पेरवः । पा रक्षणे । सापोरित्वे रुन्निति रुनुप्रत्ययः । सर्व्वस्य रक्षकाः ।" इति तद्भाष्ये सायनः ॥ पूरकः । यथा, ऋग्वेदे । ५ । ८४ । २ ।
"प्र या वाजं न हेषन्तं पेरुमस्यस्यर्जुनि ॥")

पेरोजं, क्ली, उपरत्नविशेषः । पीरोजा इति यवनभाषा । तत्पर्य्यायः । हरिताश्मम् २ पेरुजम् ३ । तद्द्विविधम् । भस्माङ्गं हरितञ्च । तस्य गुणाः ।
"पेरुजं सुकषायं स्यान्मधुरं दीपनं परम् ।
स्थावरं जङ्गमञ्चैव संयोगाच्च यथा विषम् ॥
तत् सर्व्वं नाशयेत् शीघ्रं मूलभूतादिदोषजम् ॥"

पाठान्तरं यथा,—
"पित्तं सकषायं स्यान्मधुरं दीपनं दृयोः।
स्यावरादिविषघ्नं स्याद्धरितञ्चापरं गुरु॥
शीताङ्गं नाशयेच्छीघ्रं शूलं तिमिरभूतजम्॥"
इति राजनिर्घण्टः।

पेल, भ्वा॰ चालने। गतौ। इति कविकल्पद्रुमः॥ (भ्वा॰-पर॰-चालने अक॰-गतौ सक॰-सेट्।) ऋ, अपिपेलत् अपिपेलतुः। चालः कर्म्म। इति दुर्गादासः॥

पेलं, क्ली, (पेलति सदा चलतीति। पेल+अच्।) अण्डकोषः। इति हेमचन्द्रः। ३। २७५॥

पेलवं, त्रि, (पेलं कम्पनं वातीति। वा+कः।) विरलम्। अत्र सावकाशत्वं प्रकारः। इत्यमरभरतौ॥ ह्रस्वः। इति हेमचन्द्रः। ३। ११३॥ कोमलम्। इति त्रिकाण्डशेषः॥ (यथा, कुमारे। ५। ४।
"यदं सचेत भ्रमरस्य पेलवं
शिरीषपुष्पं न पुनः पतत्रिणः॥")

पेव, भ्वा॰ ङ सेवने। इति कविकल्पद्रुमः॥ (भ्वा॰-आत्म॰-सक॰-सेट्।) ऋ, अपिपेवत। ङ, पेवते। इति दुर्गादासः॥

पेशलः, त्रि, (पिश अवयवे+भावे घञ्। पेशं लातीति। ला+कः। यद्वा, पेशोऽस्यास्तीति। सिध्मादित्वात् लच्।) चारुः। (यथा, देवीभागवते। ५। ६। ५६।
"मन्त्रिणस्य वचः श्रुत्वा पेशलं मन्त्रिसत्तमः।
जगाम तरसा कामं गजाश्वरथसंयुतः॥")
सुन्दरः। (यथा, रघुः। ६। ४०।
"युवतयः कुसुमं दधुराहितं
तदलके दलकेसरपेशलम्॥")
दक्षः। चतुरः। कोमलः। इत्यमरभरतौ॥ (यथा, सुश्रुते उत्तरतन्त्रे। ४० अध्याये।
"मधुकं बिल्वपेश्यश्च शर्करामधुसंयुताः।
अतीसारं निहन्युश्च शालीषष्टिकयोः कणाः॥")

मांसी। खड्गपिधानकम्। मांसपिण्डी। इति मेदिनी। शे, १२॥ (यथा, महाभारते। १। ११५। १२।
"तां स मांसमयीं पेशीं ददर्श जपतां वरः॥"
(अस्याः संख्यावस्थानादयो यथा,—
"पञ्च पेशीशतानि भवन्ति। तासां चत्वारिंशतानि शाखासु। कोष्ठे षट्षष्टिः। ग्रीवां प्रत्यूर्द्ध्वं चतुश्चिंशत्। एकैकस्यान्तु पादाङ्गुल्यां तिस्रस्तिस्रस्ताः पञ्चदश। दश प्रपदे। पादोपरि कूर्चसन्निविष्टास्तावत्य एव। दश गुल्फतलयोः। गुल्फजानन्तरे विंशतिः। पञ्च जानुनि। विंशतिरूरौ। दश वङ्क्षणे। शतमेवमेकस्मिन् सक्थ्नि भवन्ति। एतेनेतरसक्थि बाहू च व्याख्यातौ। तिस्रः पायौ। एका मेढ्रे। सेवन्यामपरा। द्वे वृषणयोः। स्फिचोः पञ्च पञ्च। द्वे वस्तिशिरसि। पञ्चोदरे। नाभ्यामेका। पृष्ठोर्द्ध्वसंनिविष्टाः पञ्च पञ्च दीर्घाः। षट् पार्श्वयोः। दश वक्षसि। अक्षकांसौ प्रति समन्तात् सप्त। द्वे हृदयामाशययोः। षट् यकृत्प्लीहोण्डुकेषु॥ ग्रीवायामेकतः। अष्टौ हन्वोः। एकैका काकलकगलयोः। द्वे तालुनि। एका जिह्वायाम्। ओष्ठयोर्द्वे। घोणायां द्वे। द्वे नेत्रयोः। गण्डयोश्चतस्रः। कर्णयोर्द्वे। चतस्रो ललाटे। एका शिरसीत्येवमेतानि पञ्च पेशीशतानि। शिरास्नायुस्थिपर्व्वाणि सन्धयश्च शरीरिणाम्। पेशीभिः संवृतान्यत्र बलवन्ति भवन्त्यतः॥ स्त्रीणान्तु विंशतिरधिकाः। दश तासां स्तनयोरेकैकस्मिन् पञ्च पञ्च यौवने तासां परिवृद्धिः। अपत्यपथे चतस्रस्तासां प्रवृत्तेऽभ्यन्तरतो द्वे सुखाश्रिते बाह्ये च प्रवृत्ते द्वे। गर्भच्छिद्रसंश्रितास्तिस्रः। शुक्रार्त्तवप्रवेशिन्यस्तिस्र एव। पित्तपक्वाशयमध्ये गर्भाशयो यत्र गर्भस्तिष्ठति। तासां वहसपेलवस्थूलाणुपृथुवृत्तह्रस्वदीर्घस्थिरदृढश्लक्ष्णकर्कशभावाः सन्ध्यस्थिशिरास्नायुप्रच्छादका यथादेशं स्वभावत एव भवन्ति॥ भवति चात्र।
पुंसां पेश्यः पुरस्तादाः प्रोक्ता लक्षणसङ्ख्यकाः।
स्त्रीणामाहृत्य तिष्ठन्ति फलमन्तर्गतं हिताः॥"
इति सुश्रुते शारीरस्थाने पञ्चमेऽध्याये॥)
नदीभेदः। पिशाचीविशेषः। राक्षसीविशेषः। इति शब्दरत्नावली॥ (वाद्यविशेषः। यथा, महाभारते। ६। ४२। ३।
"तथा भेर्य्यश्च पेश्यश्च कृकचा गोविषाणिकाः।
सहसैवाभ्यहन्यन्त स शब्दस्तुमुलोऽभवत्॥")

पेषणं, क्ली, पिषधातोर्भावे ल्युट्प्रत्ययनिष्पन्नम्। चूर्णनम्। (यथा, मार्कण्डेये। १४। ८७।
"अयं कृतघ्नो मित्राणामपकारी दुरन्मतिः।
तप्तकुम्भे निपतति ततो वास्यति पेषणम्॥")
खलम्। शतघ्नी। इति शब्दचन्द्रिका॥ तेकाटासिन इति भाषा॥

पेषणिः, पेषणी } स्त्री, (पिष्यतेऽनयेति। पिष+करणे अनिः। वा ङीप्।) पेषणशिला। शिल इति भाषा। तत्पर्य्यायः। पेषणी २ पट्टः ३ गृहाश्मा ४ गृहकच्छपः ५। इति शब्दरत्नावली॥ (यथा, मनुः। ३। ६८।
"पञ्च सूना गृहस्थस्य चुल्ली पेषण्युपस्करः।
कण्डनी चोदकुम्भश्च वध्यते यास्तु वाहयन्॥")

पेषलः, त्रि, (पेषोऽस्यास्तीति। पेष+सिध्मादित्वात् लच्।) पेशलः। इत्यमरटीकायां भरतरमानाथौ॥

पेषाकः, पुं, (पिष+आकन्।) पेषणिः। इत्युणादिकोषः॥

पेस, ऋ गत्याम्। इति कविकल्पद्रुमः॥ (भ्वा॰-पर॰-सक॰-सेट्।) ऋ, अपिपेसत् अपिपेसतुः। इति दुर्गादासः॥

पेसलः, त्रि, (पेशलः। पृषोदरादित्वात् शस्य सत्वम्।) पेशलः। इत्यमरटीकायां भरतः॥

पे, प्रोवे। इति कविकल्पद्रुमः॥ (भ्वा॰-पर॰-सक॰-अनिट्।) पायति धान्यमातपेन। इति दुर्गादासः॥

पेक्षूषः, पुं, (पिक्षूषे साधुः। अण्।) कर्णः। इति हेमचन्द्रः। ३। २६७॥

पैठरं, त्रि, (पिठरे संस्कृतं पक्वम्। पिठर+अण्।) स्थालीपक्वमांसादि। इत्यमरः। २। ६। ४५॥ (यथा, रामा॰ रामायणे। २। १००। ६३।
"प्रतप्तैः पैठरैश्चैव मार्गमायूरतैत्तिरैः॥")

पैठीनसिः, पुं, मुनिविशेषः। स च स्मृतिगोत्रयोः कारकः। इति पुराणम्॥

पैण्डिन्यं, क्ली, (पिण्डं परपिण्डं भक्षयतीत्यस्येति। पिण्ड+इन्। ततः स्वार्थे ष्यञ्।) भैक्ष्यजीविका। इति त्रिकाण्डशेषः॥

पैतामहं, त्रि, (पितामहस्येदम्। पितामह+"तस्येदम्।" ४।३।१२०। इत्यण्।) पितामहसम्बन्धिधनादि। यथा, कात्यायनः।
"पैतामहञ्च पित्र्यञ्च यच्चान्यत् स्वयमर्ज्जितम्।
दायादानां विभागेषु सर्व्वमेतद्विभज्यते॥"
वृहस्पतिः।
"पैतामहं कृतं पित्रा स्वशक्त्या यदुपार्ज्जितम्।
विद्याशौर्य्यादिना प्राप्तं तत्र स्वाम्यं पितुः स्मृतम्॥"
इति दायभागः॥

पैटकं, त्रि, (पितुरागतं पितुरिदं वेति। पिट+ठञ्।) पितृसम्बन्धि। इति शब्दमाला॥ यथा, मनुः।
"ऊर्द्धं पितुश्च मातुश्च समेत्य भ्रातरः समम्।
भजेरन् पैटकं रिक्थमनीशास्ते हि जीवतोः॥"
मनुविष्णू।
"पैटकन्तु यदा द्रव्यमनवाप्तमवाप्नुयात्।
न तत् पुत्रैर्भजेत् सार्द्धमकामः स्वयमर्ज्जितम्॥"

पैटीनसिः। "पैत्रके विभज्यमाने दायाद्ये वसो विभागः॥" नारदः। "शौर्य्यभार्य्याधने हित्वा यच्च विद्याधनं भवेत्। त्रीण्येतान्यविभाज्यानि प्रसादो यच्च पैत्रकः॥" इति दायभागः॥

पैत्रकभूमिः, स्त्री, (पैत्रकी पितृसम्बन्धिनी भूमिः।) पितृसम्बन्धिस्थानम्। तस्या माहात्म्यं यथा,—

श्रीभगवानुवाच।

"भवांश्च यादवैः सार्द्धं प्रविश द्वारकापुरीम्। मत्पित्रा मातृभिः सार्द्धं माहेन्द्रे च क्षणे नृप!॥

उग्रसेन उवाच।

वासुदेव न यास्यामि भूमिं तां पैत्रकीं पुनः। सर्व्वतीर्थपरां पुण्यां दैवे कर्म्मणि पैत्रके॥ पारक्ये भूमिदेशे च पितॄणां निर्व्वपेत्तु यः। तद्भूमिस्वामिपितृभिः श्राद्धकर्म्म निहन्यते॥ पितॄणां निष्फलं श्राद्धं देवानामपि पूजनम्। किञ्चिन्नफलप्रदश्चैव सम्पूर्णं पैत्रके स्थले॥ पुत्रपौत्रफलेभ्यः प्राणेभ्यः प्रेयसी सदा। दुर्ल्लभा पैत्रकी भूमिः पितुर्मातुर्गरीयसी॥ तत् श्रुत्वा पवित्रञ्च दैवे कर्म्मणि पैत्रके। क्रीतञ्च तट्टते दानं परदत्तमनुद्धृतम्॥ म्रियते पैत्रकीभूम्यां तीर्थतुल्यफलं लभेत्। गङ्गाजलसमं पूतं पितृखातोदकं हरेः॥ तत्र स्नात्वा जले पूते गङ्गास्नानफलं लभेत्। पितॄणां तर्पणं तत्र पवित्रं देवपूजनम्॥ पैत्रकी जन्मभूमिश्चेत् फलं तद्द्विगुणं लभेत्। पैत्रकीभूमितुल्या च दानभूमिः सतामपि॥" इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १०३ अध्यायः॥

पैतृष्वसेयः, पुं, स्त्री, (पितृष्वसुरपत्यमिति। पितृष्वस्र+"ढक्यि लोपः।" ४।१।१३३। इति ज्ञापकत्वात् ढक् अन्तलोपश्च।) पितृभगिनीपुत्रः। इत्यमरः। २।६।२५॥ पिसतुतभाइ इति भाषा॥ (स्त्रियां ङीप्। पितृभगिनीपुत्री। यथा, मनुः। ११।१७२। "पैतृष्वसेयीं भगिनीं स्वस्रीयां मातुरेव च। मातुश्च भ्रातुस्तनयां गत्वा चान्द्रायणञ्चरेत्॥")

पैतृष्वसीयः, पुं, स्त्री, (पितृष्वसुरपत्यमिति। "पितृष्वसुश्छण्।" ४।१।१३२। इति छण्।) पितृभगिनीपुत्रः। इत्यमरः। २।६।२५॥ पिसतुतभाइ इति भाषा॥

पैत्तः, त्रि, (पित्तात् आगतं पित्तस्य शमनं कोपनं वेति। पित्त+अण्।) पित्तव्याधिः। इति राजनिर्घण्टः॥ (यथा, माधवनिदाने गुल्माधिकारे।

"कफ्वतीक्ष्णोष्णविदाहिरूक्ष-क्रोधानिमद्याकैतृनाग्नसेवा। व्यायामिघाती रुधिरञ्च दुष्टं पैत्तस्य गुल्मस्य निमित्तमुक्तम्॥")

पैत्तिकः, त्रि, (पित्तेन निर्वृत्त इति। पित्त+ठक्।) पित्तव्याधिः। इति राजनिर्घण्टः॥ (यथा, चरके चिकित्सास्थाने २२ अध्याये। "प्रततं कासमानञ्च द्योतीर्घैव च पश्यति। श्लेष्माणं पित्तसंसृष्टं निष्ठीवति च पैत्तिके॥")

पैत्तं, क्ली, (पितुरिदमिति। पित्त+अण्) पित्ततीर्थम्। अङ्गुष्ठतर्ज्जन्योर्मध्यम्। इत्यमरः। २।७।५१॥ पित्तसम्बन्धिनि, त्रि। (यथा, महाभारते। ७।१६६।७१।

"ऐन्द्रं याम्यं वारुणं वैत्तमाग्न्यं पैत्तं त्वाष्ट्रं कर्म्म सौम्यञ्च तुभ्यम्। रूपं ज्योतिः शब्दमाकाशवायुः स्पर्शः स्वादं सलिलं गन्ध उर्व्वी॥")

पैत्राहोरात्रः, पुं, (पैत्रः अहोरात्रः।) पितृलोकस्य दिवारात्रिः। स तु मनुष्यमाने मासैकेन भवति। यथा—

"मासेन स्यादहोरात्रः पैत्रो वर्षञ्च दैवतः॥" इत्यमरः। १।४।२१॥

पैलः, पुं, (पीलाया अपत्यमिति। पीला+"पीलाया वा।" ४।१।११८। इति अण्।) मुनिविशेषः। स च ऋग्वेदी यथा,—

"तत्रर्गवेदधरः पैलः सामगो जैमिनिः कविः। वैशम्पायन एवैको निष्णातो यजुषामुत॥ अथर्वाङ्गिरसामासीत् सुमन्तुर्दारुणो मुनिः। इतिहासपुराणानां पिता मे रोमहर्षणः॥"

इति श्रीभागवते १ स्कन्धे ४ अध्यायः॥

पैशाचः, पुं, (पिशाचस्यायमिति। पिशाच+अण्।) अष्टप्रकारविवाहान्तर्गताष्टमविवाहः। यथा याज्ञवल्क्यः। "पैशाचः कन्यका छलात्।" छलमाह मनुः। ३।३४।

"सुप्तां मत्तां प्रमत्तां वा रहो यत्रोपगच्छति। स पापिष्ठो विवाहानां पैशाचः कथितोऽष्टमः॥"

इत्युद्वाहतत्त्वम्॥

पिशाचसम्बन्धिनि, त्रि॥ (रागसकायान्तर्गतकायविशेषः। तल्लक्षणं यथा,—

"उच्छिष्टाहारता तैक्ष्ण्यं साहसप्रियता तथा। स्त्रीलोलुपत्वं नैर्लज्ज्यं पैशाचकायलक्षणम्॥"

इति सुश्रुते शारीरस्थाने चतुर्थेऽध्याये।)

पैशुन्यं, क्ली, (पिशुनस्य भावः। पिशुन+ब्राह्मणादित्वात् ष्यञ्।) पिशुनता। खलता। तच्च दशविधपापान्तर्गतवाङ्मयपापविशेषः। इति तिथितत्त्वम्। यथा,—

"पैशुन्यं साहसं द्रोह ईर्ष्यासूयार्थदूषणम्। वाग्दण्डजञ्च पारुष्यं क्रोधजोऽपि गणोऽष्टकः॥")

इति मनौ। ६।४८॥

अस्य विवरणं पातकशब्दे द्रष्टव्यम्॥

पैशः, त्रि, (पिशसेदमिति। पिश+अण्।) पिशसम्बन्धी। यथा,—

"यत्पदन्तकः पूषा पैशमत्ति सदा चरुम्। यमीन्द्रेश्वरसामान्यात्तदुलोऽत्र विधीयते॥"

इति तिथ्यादितत्त्वम्॥

पैष्टिकं, क्ली, (पिष्ट+ठक्।) पिष्टानां समूहः। इति आपूपिकशब्दटीकायां भरतः॥ मद्यविशेषः। यथा। इक्षुमाध्वीकादिजनिते मद्यत्वे स्निग्धपैष्टिकादि गुरु मद्यं हेतुविपरीतमेव॥ इति विनयरक्षितः॥ (यथा च सुश्रुते सूत्रस्थाने ४६ अध्याये।

"मालवाः श्लेष्मजनगाः शुष्कुल्यः कफपित्तलाः। वीर्य्योष्णाः पैष्टिका भक्ष्याः कफपित्तप्रकोपणाः॥")

पैष्टी, स्त्री, (पिष्टेन निर्वृत्तेति। पिष्ट+अण्+ङीप्।) विविधधान्यविकारजा सुरा। तस्या गुणाः।

"पैष्टी कफ्वतीक्ष्णा स्यादीषन्नौड्रीसमापरा। वातकृत् कफरक्तौषत्पित्तसन्मोहनी च सा॥"

इति राजनिर्घण्टः॥

(यथा च हारीते प्रथमे स्थाने एकादशेऽध्याये।

"गौड्री माध्वी तथा पैष्टी निर्य्यासा कथिता-परा। इति चतुर्व्विधा ज्ञेया सुरासाराः प्रभेदकाः॥"

"पैष्टी सन्दीपनी रुच्या कफरक्तवातनाशिनी। पित्तला पाण्डुरोगाणां कारिणी बहुधा मता॥")

पोगण्डः, पुं, (पुनातीति। पू+विच्। पौः शुद्धो गण्डो यस्य।) दशवर्षीयबालकः। यथा,—

"रोगी वृद्धस्तु पौगण्ड: कुर्व्वन्यन्यैर्व्रतं सदा।"

इति प्रायश्चित्ततत्त्वे ब्रह्मपुराणम्॥

पोगण्डः, त्रि, (पौः गण्ड एकदेशोऽस्य।) अपौगण्डः। स्वभावतो न्यूनाधिकाङ्गः। जनविंशत्यङ्गुलीकैकविंशत्यङ्गुलीकादिजनः। यथा। पोगण्डो विकलाङ्गे स्यादिति हलायुधः। पोगण्डो विकलाङ्गकः। इति रत्नकोषः। इत्यमरटीकायां भरतः॥

पोटः, पुं, (पुटत्यनेनेति। पुट संश्लेषे+आधारे घञ्।) वेश्मभूमिः। इति षटाधरः॥ (पुट-श्लेषे+भावे घञ्।) संश्लेषः। इति पोटगल-शब्दटीकायां भरतः॥

पोटगलः, पुं, (पोटेन संश्लेषेण गलतीति। गल+अच्।) गलः। काशः। इत्यमरः। २।४।१६२॥ (अस्य पर्य्यायो यथा,—

"पोटगलो दृढतकाशः काकेक्षुः स च खड्गकः॥"

इति वैद्यकरत्नमालायाम्॥) मत्स्यः। इति मेदिनी। ले, १५७॥ (सर्पजातन्तर्गतवैकरञ्जसर्पभेदः॥ "राजिलेन गोनस्यां वैपरीत्येन वा जातः पोटगलः।" इति सुश्रुते कल्पस्थाने चतुर्थेऽध्याये।)

पोटलिका, स्त्री, (पोटेन संश्लेषेण लीयते इति। ली+डः। ततः स्वार्थे कन् टाप् च इत्वञ्च।) वंशिपत्रखण्डादि। इति केचित्॥ पुंटुलि इति भाषा॥

पोटा, स्त्री, (पुटति स्त्रीपुरुषलक्षणं संश्लिष्यतीति। पुट+अच्। टाप् च।) स्त्रीपुंसलक्षणा। इत्यमरः। २।६।१५॥ स्त्रीपुंनपुंसकत्वं चिह्नं स्तनश्मश्वादिरूपं यस्यां सा। इति भरतः॥

पोटिकः, पुं. (पोटः संज्ञोषोऽस्यस्येति ठन् ।) विस्फोटकः । इति केचित् ॥ (विस्फोटकशब्दे-ऽस्य विवरिष्यमाणता ॥)

पोट्टली, स्त्री, (पोटेन संज्ञेषेण दीयते इति । ली+टः । पृषोदरादित्वात् साधुः । ङीप् ।) पोट्टलिका । वस्त्रवस्तुद्वयम् । पुंटुलि इति भाषा । यथा,—

"सुहृद्यै चिपलाक्षाये गुड़स्याः काथ एव वा ।
दोलायन्ते पुरः प्राप्य पोट्टल्या वस्त्रवस्तुया ॥"
इति वैद्यकम् ॥

पोडुः, पुं, (पुडतीति । पुड+उन् ।) कमालालिङ्गितकम् । इति राजनिर्घण्टः ॥

पोतः, पुं, स्त्री, (पुनातीति । पू+"हनिकुषिनी-रामिदमिलपूपूर्विभ्यस्तन् ।" उणा० ३ । ८६ । इति तन् ।) शिशुः । इत्यमरः । २ । ५ । ३८ ॥ (यथा, कथासरित्सागरे । १२ । १३३ ।

"तत्रस्थात् स्वर्णशृङ्गाख्यात् गिरेः संप्रेष्य राज-
सान् ।
आनाययत् पक्षिपोतं गरुडान्वयसम्भवम् ॥")

पोतः, पुं. (पुनाति इति । पू+"इवीति ।" उणा० ३ । ८६ । इति तन् ।) वह्निचम् । कृष्णलाङ्गम् । पोता इति भाषा । वस्त्रम् । इति मेदिनी । ते, ३० । दशवर्षीयहस्ती । इति हेमचन्द्रः ॥ यानपात्रम् । जाहाज इति भाषा ॥ (यथा, देवीभागवते । १ । ३ । ४२ ।

"सम्प्राप्य मानुषभवं सकलाङ्गयुक्तं
पोतं भवार्णवजलोत्तरणाय कामम् ।
सम्प्राप्य वाचकमयी न भजेति मूढः
सो वञ्चितोऽत्र विविधा सुहृदं पुराणम् ॥")

यथा,—

"चतुरश्राणि रत्नानि महामौल्यानि साधुभिः ।
रत्नपारीक्षकैः सार्द्धमानयिष्ये बहूनि च ॥
सुखेन सह संप्राप्तो महान्तं लवणार्णवम् ।
पोतारूढास्ततः सर्वे पोतवाहैरधिष्ठिताः ।
व्यापारे दुस्तरेऽगाधे यान्ति वेगेन नित्यशः ॥"
इति वाराहे गोकर्णमाहात्म्याध्यायः ॥

पोतकी, स्त्री, (पोत इवेति । पोत+इवार्थे कन् । स्त्रियां ङीप् ।) पूतिका । इति शब्दमाला ॥ (अस्याः पर्य्यायो गुणाश्च यथा,—

"पोतकी पूतिका सा तु मालवान्तत्वचारी ।
पोतकी शीतला स्निग्धा श्लेष्मला वातपित्तजित् ॥
अकस्मात् पिच्छिला स्निग्धा रक्तपित्तजित् ।
यदा कदाचित् पथ्या हृद्या दीपनी रुचिकारिणी ॥"
इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे ॥)

क्षामापत्री । इति राजनिर्घण्टः ॥

पोतजः, पुं, (पोतः वस्त्रं न तु डिम्बादिरूप इति भावः । जायते इति । जन+डः ।) कुक्कुरादिः । यथा, हेमचन्द्रः । ४ । ४२१ ।

"अस्पृश्याः पक्षिसर्पाद्याः पोतजाः कुक्कुरादयः ॥"

पोतवह्नि, पुं. (पोतेन वह्निः) वह्निचेय वाहिष्यकर्त्ता । नौवाहिष्यकरः । अस्यपर्य्यायः ।

सांयात्रिकः २ । इत्यमरः । १ । १० । १२ । सन्तरयानचारी ३ । इति जटाधरः ॥ नौवाहिष्यकरः ४ । इति शब्दरत्नावली ॥

पोतरज्जुः, पुं. (पोतं रज्जतीति । रज्ज+"कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् ।) केनिपातकः । इति शब्दमाला ॥ छाजि इति भाषा ॥

पोतवकप्रियः, पुं, (पोतवकः पर्व्वतविशेषः प्रियोऽस्य ।) वृहद्विशेषः । इति त्रिकाण्डशेषः ॥

पोतवाहः, पुं, (पोतं नावं वहतीति । वह+"कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् ।) वह्निचवाहकः । दाँड़ि इति भाषा । तत्पर्य्यायः । नियामकः २ । इत्यमरः । २ । १० । १२ ॥

पोता, [च्] पुं, (पुनातीति । पू+"नप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृभ्रातृजामातृमातृपितृदुहितृ ।" उणा० २ । ९६ । इति तृन्प्रत्ययेन निपात्यते ।) विष्णुः । इति संक्षिप्तसारोणादिवृत्तिः ॥ ऋत्विक् । इति भूरिप्रयोगः ॥ (यथा, ऋग्वेदे । ४ । ६ । ३

"स वह्निः परि णीयते होता मन्द्रो दिविष्टिषु ।
उत पोता नि षीदति ॥")

पोताच्छादनं, क्ली, (पोतमिवाच्छादयतीति । आ+छादि+ल्युः ।) वस्त्रकृत्रिमम् । इति हारावली ॥

पोताधानं, क्ली, (आधीयतेऽत्रेति । क्युट् । आधानम् । पोतानां अण्डजमत्स्यानामाधानम् ।) क्षुद्राण्डजमत्स्यसंघातः । इत्यमरः ।१।१०।१६॥ पोना इति भाषा । अस्य गुणाः । सुस्निग्धत्वम् । लघुत्वम् । रोचनत्वञ्च । इति राजवल्लभः ॥

पोतिका, स्त्री, (पोतोऽस्त्यस्या इति । पोत+ठन् । यद्वा, पूतिका पृषोदरादित्वात् साधुः ।) पूतिका । इत्यमरटीकायां भरतः ॥ घृतपुष्पा ॥ मूलपोती । इति राजनिर्घण्टः ॥

पोताशः, पुं, (पोतेभ्यः शिशुभ्यः अश्यते क्षिप्यते इति । अश+घञ् ।) कर्पूरविशेषः । इति राजनिर्घण्टः ॥

पोत्रं, क्ली, (पूयतेऽनेनेति । पू+"इलमूकरयोः पुवः ।" ३ । २ । १८३ । इति ष्ट्रन् ।) शूकरसुखास्यम् । शाङ्गलसुखास्यम् । वक्त्रम् । इति मेदिनी । रे, ६१ ॥ वह्निचम् । इति संक्षिप्तसारोणादिवृत्तिः ॥ (पोत्रनामर्षिकः पात्रभेदः । यथा, ऋग्वेदे । १ । १५ । २ ।

"मरुतः पिबत ऋतुना पोत्रादध्वं पुनीतन ।
यूयं हि ष्ठा सुदानवः ॥" "पोत्रात् पोत्रनामकस्य ऋत्विजः पात्रात् सोमं पिबत ।" इति तद्भाष्ये सायणः ॥)

पोत्रायुधः, पुं, (पोत्रं तत्सुखाग्रमेव आयुधं यस्य ।) शूकरः । इति राजनिर्घण्टः ॥

पोत्रिरथा, स्त्री. (पोत्री शूकरः रथ इव गतिसाधकोऽस्याः ।) जिनशक्तिविशेषः । इति त्रिकाण्डशेषः ॥

पोत्री, [न्] पुं, (पोत्रमस्यास्तीति । पोत्र+इनिः ।) शूकरः । इत्यमरः । २ । ५ । २ ॥ पोत्रविशिष्टे, त्रि ॥

पोलिन्दः, पुं. (पोतस्य व्यलिन्द इवेति । पृषोदरादित्वात् साधुः ।) नौकावयवभेदः । तत्पर्य्यायः । पादारकः २ । इति त्रिकाण्डशेषः ॥

पोलिका, स्त्री, (पोली+स्वार्थे कन् टाप् । पूर्व्वह्रस्वश्च ।) पिष्टकविशेषः । पातला रोटी इति हिन्दी भाषा । यथा,—

"कुर्य्यात् सम्मितयातीव तन्वी पर्पटिका ततः ।
खेदयेत्तप्तके तान्तु पोलिकां तां बुधो बुधः ॥
तां खादेल्लघिकायुक्तां तस्यां मण्डकवद्गुणाः ।
तप्तकं तावा इति लोके ।" इति भावप्रकाशः ॥ तत्पर्य्यायः । पूलिका २ पौलिः ३ पूपिका ४ पूपला ५ । इति हेमचन्द्रः ॥

पोली, स्त्री, (पोलति महत्त्वं गच्छतीति । पुल्+ व्यलादित्वात् यः । ङीप् ।) पिष्टकविशेषः । तत्पर्य्यायः । पूपाली २ चर्पटी ३ । इति त्रिकाण्डशेषः ॥

पोषः, पुं, पोषणम् । पुषधातोर्भावे घञ् प्रत्ययनिष्पन्नः । यथा, भट्टिः ।

"यः सर्व्वदास्मानपुषत् स्वपोषम् ॥"
(यथा, च भागवते । ३ । ३० । १० ।

"अथैरापादितैर्गुर्व्या हिंसयेतस्ततश्च तान् ।
पुष्णाति येषां पोषेण पोषभुग्यात्यधः स्वयम् ॥")

पोषणं, क्ली, (पुष्+ल्युट् ।) पुष्टिः । धृतिः । पुषधातोर्भावेऽनट् प्रत्ययनिष्पन्नः ॥ (यथा, मार्कण्डेये । २८ । ८ ।

"तद्वद्विजातिशुश्रूषा पोषणं क्रयविक्रयौ ।
वर्णधर्म्मास्त्विमे प्रोक्ताः शूद्रस्यामाश्रमाश्रयाः ॥")

पोषयित्नुः, पुं, (पोषयतीति । पुष+णिच् +"स्तनिन्धमिपुषिराजदिमदिभ्यो णेरिक्नुच् ।" उणा० २ । २६ । इति इक्नुच् ।) कोकिलः । भर्गा । इति संक्षिप्तसारोणादिवृत्तिः ॥ पोषयत्कर्त्तरि, त्रि ॥

पोष्टा, [ष्टृ] पुं, (पुष्णातीति । पुष+ष्टृच् ।) पूतीकः । इति शब्दचन्द्रिका ॥ काँटाकरञ्জ इति भाषा ॥ पोषयत्कर्त्तरि, त्रि ॥ (यथा, हरिवंशे । २५ । १७ ।

"ताभिर्धार्य्यास्त्रयो लोकाः प्रजाश्चैव चतुर्विधाः ।
पोष्टा हि भगवान् सोमो जगतो जगतीपते ! ॥")

पोष्टृवरः, त्रि, पोषकश्रेष्ठः । पोष्टृषु वर इति षष्ठ्यन्तो तत्पुरुषसमासः ॥

पोष्यः, त्रि, (पुष्यते इति । पुष+ण्यत् ।) पोषणीयः । पोषितव्यः । पुषधातोः कर्म्मणि यप्रत्ययनिष्पन्नः ॥ (यथा, राधातन्त्रे चतुर्दशपटले ।

"नन्दगोपस्य देवेशि ! कृष्णस्तु सर्व्वदा प्रियः ।
आत्मना जायते यस्तु आत्मजः स उदाहृतः ।
पोष्यः पुत्र इति ख्यातो नन्दस्य वरवर्णिनि ! ॥")

पोष्यपुत्रः, पुं, (पोष्यः पुत्रः । पोष्यत्वेनैव पुत्रत्वं प्राप्त इत्यर्थः ।) पालनादिना सुतत्वप्राप्तः यथा, ब्रह्मवैवर्त्ते गणपतिखण्डे १४ अध्याये ।

"अक्षता क्षत्रिकागाच्च यस्यां तत्पोष्यपुत्रकः ।
तस्थाम चक्रुषाः प्रेम्णा कार्त्तिकस्येति कौतुकात् ॥"

अथ तस्य अवस्था।
"तत्राह मनुः।
'अपुत्रेण सुतः कार्य्यो यादृक् तादृक् प्रयत्नतः।
पिण्डोदकक्रियाहेतोर्नामसंकीर्त्तनाय च ॥'
अत्रिश्च।
'अपुत्रेणैव कर्त्तव्यः पुत्रप्रतिनिधिः सदा।
पिण्डोदकक्रियाहेतोर्यस्मात्तस्मात् प्रयत्नतः ॥'
शौनकः।
'अपुत्रो मृतपुत्रो वा पुत्रार्थं समुपोष्य च ॥'
इति। तेन पुत्रोत्पत्त्या।
'ज्येष्ठेन जातमात्रेण पुत्री भवति मानवः।
पितॄणामनृणश्चैव स तस्मात्तत्समर्हति ॥'
इति मनुवचनावगत ऋणपरिहारेऽपि तनुपुत्रमरणे पिण्डोदकाद्यर्थं पुनः पुत्रकरणमावश्यकम्। अत्र पुत्रपदं पौत्रप्रपौत्रयोरप्युपलक्षणम्। तयोरपि पिण्डदातृत्ववंशकरत्वाविशेषात्। अन्यथा सत्यपि पौत्रे मृतपुत्रस्य निर्निमित्तपुत्रपरिग्रहापत्तिरतः पुत्रपौत्रप्रपौत्ररहितस्यैव पुत्रीकरणमवगम्यते ॥ * ॥ स्त्रिया भर्त्तुरनुज्ञया तदधिकारः। यथाह वशिष्ठः। 'न स्त्री पुत्रं दद्यात् प्रतिगृह्णीयाद्वा अन्यत्रानुज्ञानाद्भर्तुः।' इति ॥ * ॥ प्रतिनिधिरिति स च क्षेत्रजादिरेकादशविधः। यथाह मनुः।
'क्षेत्रजादीन् सुतानेतानेकादश यथोदितान्।
पुत्रप्रतिनिधीनाहुः क्रियालोपान्मनीषिणः ॥'
बृहस्पतिः।
'पुत्राख्ययोदश प्रोक्ता मनुना येऽनुपूर्व्वशः।
सन्तानकारणं तेषामौरसः पुत्रिका तथा ॥
आद्यं विना यथा तैलं सङ्गः प्रतिनिधीकृतम्।
तथैकादश पुत्रास्तु पुत्रिकौरसयोर्विना ॥'
तत्रापि कलौ न सर्व्वेषामभ्यनुज्ञानम्।
'अनेकधा कृताः पुत्रा ऋषिभिर्यैः पुरातनैः।
न शक्यास्तेऽधुना कर्त्तुं शक्तिहीनतया नरैः ॥'
इति वचनात् ॥
'दत्तौरसेतरेषान्तु पुत्रत्वेन परिग्रहः।'
इत्याद्यभिधाय।
'इमान् धर्म्मान् कलियुगे वर्ज्यानाहुर्म्मनीषिणः।'
इति दत्तकेतरप्रतिनिधिनिषेधात् ॥ * ॥ अतो दत्तकविधिर्विवित्यते। तत्र शौनकः।
'ब्राह्मणानां सपिण्डेषु कर्त्तव्यः पुत्रसंग्रहः।
तदभावेऽसपिण्डे वा अन्यत्र तु न कारयेत् ॥'
सपिण्डेष्विति सामान्यश्रवणात् समानासमानगोत्रेष्वित्यर्थः। तथा च सपिण्डाभावेऽसपिण्डः सगोत्रस्तदभावे भिन्नगोत्रोऽपि ग्राह्य इत्याह शाकलः।
'सपिण्डापत्यकश्चैव सगोत्रजमथापि वा।
अपुत्रको द्विजो यस्मात् पुत्रत्वे परिकल्पयेत् ॥
समानगोत्रजाभावे बालवेदन्यगोत्रजम्।
दौहित्रं भागिनेयञ्च मातृष्वस्रंसुतं विना ॥' इति अन्यत्र तु न कारयेदिति ब्राह्मणातिरिक्तक्षत्रियादिसमान्यजातीयो दत्तको व्यवस्थाप्यते। यदाह शङ्खः।
'माता पिता वा दद्यातां यमद्भिः पुत्रमापदि।
सदृशं प्रीतिसंयुक्तं स ज्ञेयो दत्तिमः सुतः ॥'।
आपदि पुत्रप्रतिग्रहीतुरपुत्रत्वे सदृशं सजातीयं। यत्तमाह बृहद्याज्ञवल्क्यः।
'सजातीयः सुतो ग्राह्यः पिण्डदाता स ऋक्थभाक्।
तदभावे विजातीयो वंशमात्रकरः स्मृतः ॥'
ग्रासाच्छादनमात्रन्तु स लभेत तदक्थिन इति।
दौहित्रं भागिनेयञ्चेति दौहित्रभागिनेयनिषेधः शूद्रातिरिक्तविषयः। तथा च शौनकः।
'क्षत्रियाणां स्वजातौ च गुरुगोत्रसमेऽपि वा।
वैश्यानां वैश्यजातेषु शूद्राणां शूद्रजातिषु ॥
सर्व्वेषामेव वर्णानां जातिष्वेव न चान्यतः।
दौहित्रो भागिनेयश्च शूद्रेष्वेव क्रियते सुतः ॥
ब्राह्मणादित्रये नास्ति भागिनेयः सुतः क्वचित्।'
जातिष्वेव न चान्यत इति नियमः सजातीयसम्भवे विजातीयनिषेधार्थः। अन्यथा प्रागुक्तकात्यायनविरोधः स्यात् ॥ * ॥ तत्रापि सन्निहितसपिण्डेषु सति भ्रातृपुत्रे स एव पुत्रीकार्य्य इत्याह मनुः।
'सर्व्वेषामेकजातानामेकश्चेत् पुत्रवान् भवेत्।
सर्व्वे ते तेन पुत्रेण पुत्रिणो मनुरब्रवीत् ॥'
बृहस्पतिः।
"यद्येकजाता बहवो भ्रातरश्च सहोदराः।
एकस्यापि सुते जाते सर्व्वे ते पुत्रिणः स्मृताः ॥'
इति। अत्र वचनद्वयेऽपि भ्रातृसुते च पुत्रप्रतिनिधितया कथञ्चित् सम्भवत्यन्यो न प्रतिनिधिः कार्य्य इत्यवगम्यते ॥ * ॥ भर्त्तृवंशमन्तरेण चास्या वंशान्तरासम्भवेन तस्यैव स्ववंशकरत्वञ्चेत् यतः समस्तस्यापि पुत्रप्रयोजनस्य सम्भवेन सति सपत्नीपुत्रे न दत्तकादुपादानम् ॥ * ॥ केन पुत्रो देय इत्याह शौनकः।
'नैकपुत्रेण कर्त्तव्यं पुत्रदानं कदाचन।
बहुपुत्रेण कर्त्तव्यं पुत्रदानं प्रयत्नतः ॥'
द्विपुत्रस्यापि पुत्रदाने अपरपुत्रनाशे वंशविच्छेदमाशङ्क्याह बहुपुत्रेणेति। स्त्रियास्तु जीवति भर्त्तरि तदनुमते प्रोषिते मृते वा तदनुज्ञां विनापि। यथा वशिष्ठः। 'न स्त्री पुत्रं दद्यात् प्रतिगृह्णीयाद्वा अन्यत्रानुज्ञानाद्भर्तुः।' इति। अनुमतिश्चाप्रतिषेधेऽपि भवति। अप्रतिषिद्धं परमनुमतं भवतीतिन्यायात् ॥ * ॥ निरपेक्षदानमाह याज्ञवल्क्यः।
'दद्यान्माता पिता वा यं स पुत्रो दत्तको भवेत् ॥'
तथा 'मातापित्रोभ्यामृतृष्टस्तयोरन्यतरेण वेति॥'
अथ पुत्रपरिग्रहविधिमाह शौनकः।
'शौनकोऽहं प्रवक्ष्यामि पुत्रसंग्रहसुत्तमम्।
अपुत्रो मृतपुत्रो वा पुत्रार्थं समुपोष्य च ॥'
उपोष्य ग्रहणात् पूर्व्वदिने कृतोपवासः। बृहद्गौतमः।
'वाससी कुण्डले दत्त्वा उष्णीषं चाङ्गुलीयकम्।
आचार्य्यं धर्म्मसंयुक्तं वेद्यां वेदपारगम्।
मधुपर्केण संपूज्य राजानञ्च द्विजान् शुचीन् ॥'
राज्ञो विप्रक्षत्रे ग्रामस्वामिनम्। 'बन्धूनाकृष्य सर्व्वांस्तु ग्रामस्वामिनमेव च। इतिस्मरणात्। द्विजानिति बहुत्वं त्रित्वपर्य्यवसितं कपिञ्जलन्यायात्।
'वह्निं कृष्णमयञ्चैव पालाशञ्चैधमेव च।
एतानाकृष्य बन्धूंश्च ज्ञातीनाकृष्य यत्नतः ॥
बन्धूनन्नेन सम्भोज्य ब्राह्मणांश्च विशेषतः।
अग्न्याधानादिकं तत्र कृत्वाज्योत्पवनान्तकम् ॥
दातुः समक्षं गत्वा च पुत्रं देहीति याचयेत्।
दाने समर्थो दातास्मै यो यज्ञेनेति षड्भिः ॥'
दद्यादिति शेषः। बन्धून् आत्ममातृपितृबन्धून्। ज्ञातीन् सपिण्डान्। तथा।
'देवस्यत्वेतिमन्त्रेण हस्ताभ्यां परिगृह्य च।
अङ्गादङ्गेत्यृचं जप्त्वा आघ्राय शिरसूर्द्धनि।
वस्त्रादिभिरलङ्कृत्य पुत्रच्छायावहं सुतम् ॥'
पुत्रच्छाया पुत्रसादृश्यं नियोगादिना स्वयमुत्पादनयोग्यत्वमिति यावत्। तथा।
'वृत्यगीतैश्च वाद्यैश्च स्वस्तिशब्दैश्च संयुतम्।
गृहमध्ये तमाधाय चरुं कृत्वा विधानतः ॥
यस्माच्छतेत्यृचा चैव तुभ्यमग्ने त्यृचैकया ॥
सोमो दददित्येताभिः प्रत्यृचं षड्भिस्तथेति।'
बृहद्गौतमः।
'पायसं तत्र साज्यञ्च घृतसंस्थञ्च होमयेत्।
प्रजापते न त्वदेतानित्युद्दिश्य प्रजापतिम् ॥'
इति ॥
वशिष्ठः। 'पुत्रं प्रतिग्रहीष्यन् बन्धूनाकृष्य राजनि निवेद्य निवेशनस्य मध्ये व्याहृतिभिर्हुत्वा अदूरबान्धवं बन्धुसन्निकृष्टमेव गृह्णीयात्। सन्देहे चोत्पन्ने दूरबान्धवं भूदमिव स्थापयेत्। विज्ञायते ह्येकेन बहूंस्त्रायत इति।' निवेशनं गृहम्। सन्देह इति दूरावस्थितबान्धवस्यात्यन्तदेशभाषाविप्रकर्षादिना कुलशीलादिसन्देहो भवत्येव तथात्वे निर्णयपर्य्यन्तं न व्यवहरेत् तत्र हेतुरेकेनेति। बन्धून् पित्रादीन्। एतदन्यतरविधिरावश्यकः ॥ * ॥ ततश्च शौनकः।
'दक्षिणां गुरवे दद्यादृत्विग्भ्यश्च द्विजोत्तमः।
नृपो राज्यार्द्धमेवाथ वैश्यो वित्तशतत्रयम्।
शूद्रः सर्व्वस्वमेवापि अशक्तस्त्वेदृशं यावलम् ॥'
राज्यार्द्धमर्द्धराज्योत्पन्नमेकवर्षीयद्रव्यम्। प्रदद्यादर्द्धराज्योत्थमेकवर्षाद्धनमिति बृहद्गौतमस्मरणात्। उत्तममध्यमाधमभेदेन वित्तानां सुवर्णरजततताम्राणामिति ज्ञेयम्।
'शतत्रयं नाणकानां सौवर्णमथ राजतम्।
प्रदद्यात्ताम्रमथवा उत्तमाद्यवस्थया ॥'
इति बृहद्गौतमस्मरणात् ॥
सर्व्वस्वमेकवर्षभृतिलभ्यमिति यावत् ॥ * ॥ तैत्तिरीयाणान्तु विधिविशेषमाह बौधायनः। अथ पुत्रपरिग्रहविधिं व्याख्यास्यामः। प्रतिग्रहीष्यन्नुपकल्पयते द्वे वाससी द्वे कुण्डले अङ्गुलीयकमाचार्य्यञ्च वेदपारगं कृष्णमयं वह्निपर्णमयमिध्ममित्यथ बन्धूनाकृष्य निवेशनस्य मध्ये राजनि निवेद्य परिवृते वागारमध्ये ब्राह्मणं

यागालम्भेन उपवेश्य पुण्याहस्वस्तिऋद्धिमिति वाचयित्वा यद्देवयजनोल्लेखप्रभृति आप्रणीताभ्यः श्रुत्वा दातुः समक्षं गत्वा मे पुत्रं देहीति भिक्षेत् ददानीतीतर आह तं परिगृह्णीत धर्म्माय त्वा परिगृह्णामि सन्तत्यै त्वा परिगृह्णामीत्यर्घेन वस्त्रकुण्डलादिभिरलङ्कृत्य परिधानप्रभृत्यग्निमुखं श्रुत्वा पक्वा जुहोति यस्या हृदा कीरिणा मन्यमान इति पुरोऽनुवाक्यमनूद्य यस्यैवं सुश्रुते जातवेद इति याज्यया जुहोति अथ व्याहृतिभिर्हुत्वा स्विष्टिकृत्प्रभृति सिद्धमाधेनुवरप्रदानात् दक्षिणां ददात्येते च वाससी एते कुण्डले एतच्चाङ्गुरीयकमेवं त्वौरस उत्पद्यते तुरीयभागे सम्भवतीति आहस्म बौधायन इति ॥ * ॥ एवमुक्तविधभावे परिगृहीतस्य तु विवाहोचितधनमात्रभागित्वं न त्वंशभागित्वमित्यग्रे वक्ष्यते । तथा च मनुः ,

'गोत्रऋक्थे जनयितुर्न हरेद्दत्रिमः सुतः ।
गोत्रऋक्थानुगः पिण्डो व्यपैति ददतः स्वधेति ॥'

एतेन दाढधने दानादेव पुत्रत्वनिवृत्तिद्वारा दत्रिमस्य स्वत्वनिवृत्तिर्दाढगोत्रनिवृत्तिश्च भवतीत्युच्यते । तथा च गोत्रादिनिवृत्तिरेव दर्शनात् संस्कुर्य्यात् स्वसुतान् पितेति स्मरणात् ग्रहणानन्तरसम्भाव्यमाना एव दत्तकस्य संस्काराः प्रतिगृहीत्रा कार्य्या न पुनर्जनकेन कृतपूर्व्वा अपि निवर्त्तनीयाः ॥ * ॥ यदि च तत्पूर्व्वभाविनोऽपि संस्कारा जनकेन न कृतास्तदा बीजगर्भदोषनाशावश्यकत्वेन क्रमानुरोधेन च प्रतिगृहीत्रैव ते समाधेयाः ॥ * ॥ एवमुपनयनमात्रकरणेऽपि प्रतिगृहीतुर्दत्तकपुत्रविधिः।

'अन्यशाखोद्भवो दत्तः पुत्रत्वेनोपनायितः ।
स्वगोत्रेण स्वशाखोक्तविधिना स स्वशाखभाक् ॥'

इति वशिष्ठस्मरणात् ॥

एतच्चाष्टमाब्दरूपतन्मुखकालाभ्यन्तरवर्त्तिपरिग्रहे बोध्यम् । अन्यथा मुख्यकाले अधिकारयोग्यत्वाभावे गौणकाले अनधिकारान्न तत्सिद्धिरिति ॥ * ॥ अत्र च जनकप्रतिगृहीत्रोरुभयोरपि पुत्राभिसन्धाने सति दत्तकस्य द्व्यामुष्यायणत्वेनोभयगोत्रभागित्वं विशेषतो वक्ष्यते ।

'चूडाद्या यदि संस्कारा निजगोत्रेण वै कृताः ।
दत्ताद्यास्तनयास्ते स्युरन्यथा दास उच्यते ॥'

एवञ्च चूडाद्या इत्यतदृगुणसंविज्ञानबहुव्रीहिणा द्विजातीनामुपनयनलाभः शूद्रस्य विवाहलाभः ॥ * ॥ तथा पैठीनसिः । अथ दत्तकक्रीतकृत्रिमपुत्रिकापुत्राः परपरिग्रहेणार्घेण ये च जातास्तेऽसङ्कृतकुलीना द्व्यामुष्यायणा भवन्तीति । आर्षेण ऋष्युक्तेन परिग्रहेण । जनकगृहीत्रोः स्वीकारेण द्व्यामुष्यायणा भवन्तीत्यर्थः ॥ * ॥ अथ तत्कर्त्तृकश्राद्धनिर्णयः । तत्र पितुः सपिण्डीकरणानूनोऽङ्गश्राद्धे दत्तकस्य पूर्व्वगृहीतत्वेऽपि सत्यौरसे नाधिकारः । औरसे पुनरुत्पन्ने तस्य ज्येष्ठं न विद्यते । इति देवलेन ज्येष्ठत्वप्रतिषेधात् ।

'पिण्डदोऽंशहरश्चैषां पूर्व्वाभावे परः परः ।'

इति याज्ञवल्क्यवचनाच्च । अन्यत्र सर्व्वत्रौरसवत् । क्वचिद्विशेषो यथा जातूकर्णः ।

'औरसश्चैत्रजौ पुत्रौ विधिना पार्व्वणेन तु ।
प्रत्यब्दमितरे कुर्य्युरेकोद्दिष्टं सुता दश ॥'

इतरे दत्तकादयः ॥ * ॥ अथ दत्तकाशौचादिनिर्णयः । तत्र शुद्धदत्तकस्य तु जनककुले परस्परमशौचं नास्त्येव गोत्रनिवृत्त्याशौचनिवृत्तेरर्थसिद्धत्वात् । द्व्यामुष्यायणस्य तु उभयत्रैवाशौचमिति । ब्रह्मपुराणे ।

'दत्तकश्च स्वयं दत्तः क्रत्रिमः क्रीत एव च ।
अपविद्धाश्च ये पुत्रा भरणीयाः सदैव ते ॥
भिन्नगोत्राः पृथक्पिण्डाः पृथग्वंशकराः स्मृताः ।
जनने मरणे चैव त्र्याहाशौचस्य भागिनः ॥'

पराशरः .

'भिन्नगोत्रः सगोत्रो वा नीतः संस्कृत्य चेच्छया ।
जनने मरणे तस्य त्र्याहाशौचं विधीयते ॥'

तथा ।

'औरसं वर्जयित्वा च सर्व्ववर्णेषु सर्व्वदा ।
क्षेत्रजादिषु पुत्रेषु जातेषु च मृतेषु च ।
अशौचन्तु त्रिरात्रं स्यात् समानमिति निश्चयः ॥'

अथ दत्तकविभागः । मनुः ।

'पुत्रान् द्वादश यानाह नृणां स्वायम्भुवो मनुः ।
तेषां षड्बन्धुदायादाः षड्दायादान्बवः ॥
औरसः क्षेत्रजश्चैव दत्तः क्रत्रिम एव च ।
गूढोत्पन्नोऽपविद्धश्च दायादा बान्धवाः षट् ॥
कानीनश्च सहोढश्च क्रीतः पौनर्भवस्तथा ।
स्वयं दत्तश्च शौद्रश्च षड्दायादान्बवः ॥'

बौधायनः ।

'औरसं पुत्रिकापुत्रं क्षेत्रजं दत्तक्रत्रिमौ ।
गूढश्चैवापविद्धश्च रिक्थभाजः प्रचक्षते ॥
कानीनश्च सहोढश्च क्रीतं पौनर्भवन्तथा ।
स्वयं दत्तं निषादश्च गोत्रभाजः प्रचक्षते ॥'

औरस पुत्रिकापुत्र-क्षेत्रज-कानीन-गूढोत्पन्नापविद्ध-सहोढ-पौनर्भव-दत्तक-स्वयमुपागत-कृतक-क्रीतानभिधाय देवलः ।

'एते द्वादश पुत्रास्तु सन्तत्यर्थमुदाहृताः ।
आत्मजाः परजाश्चैव लब्धा यादृच्छिकास्तथा ॥
तेषां षड्बन्धुदायादाः पूर्व्वोऽन्ये पितुरेव षट् ।
विशेषं वापि पुत्राणामानुपूर्व्व्यो विशिष्यते ॥
सर्व्वे ह्यौरसक्षेत्रे पुत्रा दायहराः स्मृताः ।
औरसे पुनरुत्पन्ने तेषु ज्येष्ठं न विद्यते ॥
तेषां सवर्णा ये पुत्रास्ते तृतीयांशभागिनः ।
हीनास्त्वनुपजीवेयुर्ग्रासाच्छादनसम्मताः ॥' * ॥

वशिष्ठः । तस्मिंश्चेत् प्रतिगृहीते औरस उत्पद्यते स चतुर्थभागभागी यदि नाभ्युदयिकेषु प्रयुक्तं स्यात् । च प्रतिगृहीतपुत्रः आभ्युदयिकेषु यज्ञादिषु यदि औरसेन प्रयुक्तं न स्यात् प्रभूतं धनमिति शेषः । अतश्च दत्तकग्रहणानन्तरमौरसोत्पत्तौ तदौरसचतुर्थांशविधिर्वंशिष्ठोक्तो दत्तकविषयो ज्ञेयः । तथा देवलकात्यायनवचने क्षेत्रजादीनांशग्रहणविधिरित्युक्तश्चतुर्थदत्तकविषयो वाच्यः ।

'उपपन्नो गुणैः सर्व्वैः पुत्रो यस्य हि दत्त्रिमः ।
स हरेतैव तद्वित्तं सम्प्राप्तोऽप्यन्यगोत्रतः ॥'

इति मनुवचनैकवाक्यत्वात् । गुणैर्जातिविद्याचारैः । तथा कैनापि मुनिना दत्तकस्य बन्धुदायादत्वमन्येन चादायादत्वमुक्तं तत् गुणवद्गुणवद्भेदेन समाधेयं एवं दत्तकस्य धनग्रहणादौ मुनिभेदेन पूर्व्वापरोक्तिवैषम्यं गुणागुणविवेकेनापास्तं एतेनौरसस्य भ्रात्रादिधने येनैव भ्रातृत्वादिना सम्बन्धेन अधिकारित्वं तादृग्भ्रात्रैव सम्बन्धेन तादृग्दत्तकस्यापि यथासम्भवमुचितांशभागित्वमवधेयम् । एवं धनिनः पुत्रान्तरसत्त्वे मृतपितृकदत्तकपौत्रस्यापि दत्तकोचितांशभागित्वम् । तदसत्त्वे सर्व्वहरत्वमपीति । न च पौत्रस्य स्वपितृयोग्यांशभागित्वं नियमात् दत्तकग्रहीतुः पितामहौरससत्त्वे तादृग्पितृव्यतुल्यस्यैवांशस्य तद्योग्यत्वात् दत्तकपौत्रः पितृव्यतुल्यमेवांशं लभतामिति वाच्यम् । पुत्रकस्य दत्तकत्वे चतुर्थांशः पौत्रस्य तु तथात्वे समानांश इति वैषम्यात् । ततश्च स्वसमानरूपस्य पितुर्व्याद्यंशः ग्राह्यसिद्धस्यैव स्वपितृयोग्यांशतेति यथोक्तमेव साधु । एवं रीतेः प्रपौत्रेऽप्यनुसर्त्तव्येति ॥ * ॥

'औरसः क्षेत्रजश्चैव दत्तः क्रत्रिम एव च ।
गूढोत्पन्नोऽपविद्धश्च भागार्हास्तनया इमे ॥
कानीनश्च सहोढश्च क्रीतः पौनर्भवस्तथा ।
स्वयंदत्तश्च दासश्च षडिमे पुत्रपांसनाः ॥
अभावे पूर्व्वपूर्व्वेषां परान् समभिषेचयेत् ।
पौनर्भवं स्वयंदत्तं दासं राज्ये न योजयेत् ॥'

तथा ।

'न क्षेत्रजादींस्तनयान् राजा राज्येऽभिषेचयेत् ।
पितॄणां श्रोधयेन्नित्यमौरसे तनये सति ॥' इति ।

एतावता प्रबन्धेनाभिहितो योऽयं क्षेत्रजदत्तकादीनामौरसेन सह विभागप्रकारः स तु शूद्रस्य न सम्भवति तस्य तु ।

'दास्यां वा दासदास्यां वा यः शूद्रस्य सुतो भवेत् ।
सोऽनुज्ञातो हरेदंशमिति धर्म्मो व्यवस्थितः ॥'

इति मनुवचनेन ज्ञातोऽपि दास्यां शूद्रेण कामतोऽंशहरो भवेत् ।

'मृते पितरि कुर्य्युस्तं भ्रातरस्तुर्यभागिनम् ।
अभ्रातृको हरेत् सर्व्वं दुहितृणां सुतास्तु ते ॥'

इति याज्ञवल्क्येन च दासीपुत्रस्याप्यौरसेन समांशाभिधानेन पितुरनन्तरं भ्रातृरहितस्य तस्यैव दौहित्रेण सह विभागदर्शनेन च दत्ताद्यपूपायितं सति पितरि क्षेत्रजदत्तकादीनामौरसेन समांशोऽस्तु तु तदर्द्धांशः अन्यथा यत्र च क्षेत्रजदत्तकादीनामौरसचतुर्थांशित्वं तत्र तदपेक्षया अत्यन्तविप्रकृष्टाधिकारस्य दासीपुत्रस्यौरससमांशित्वमिति महद्वैषम्यं स्यात् एवं सतश्च क्षेत्रजादिषु सत्योऽपि मन्त्रीकन्ययो-

पौंस्नं

दौहित्राधिकारे कुल्लूकाधिकारविधिवाधापत्तिस्तेन दौहित्रपर्य्यन्ताधिकारिश्रुतौ तदेकतमे सत्यपि न दासीपुत्रस्य सर्व्वहरत्वं किन्तु तत्समांशः। अतएव।

'दत्तपुत्रे यथा जाते कदाचित्त्वौरसो भवेत्।
पितुर्वित्तस्य सर्व्वस्य भवेतां समभागिनौ॥'

इत्यपि वचनं शूद्रविषय एव योजनीयम्॥ * ॥

अथान्धपङ्गुप्रभृतिपुत्राणां धनानधिकारितया तदौरसक्षेत्रजयोरेव पितामहधनभागित्वश्रुतेर्न तद्गृहीतदत्तकपुत्रादेः पितामहधनाधिकारः किं भरणमात्रं अन्धादिभार्य्याणां भरणविधानेन अङ्गरणस्य दण्डापूपायितत्वात्। तथा अन्धपङ्ग्वादीननधिकारिपुत्रानभिधायाह।

'औरसक्षेत्रजास्त्वेषां निर्दोषा भागहारिणः।
अपुत्रयोषितश्चैषां भर्त्तव्याः साधुवृत्तयः॥
सुताश्चैषां प्रभर्त्तव्या यावन्न भर्त्तृसात् कृताः॥'

एवं दत्तकग्रहणानन्तरोत्पन्नौरसेन सह दत्तकस्य विभागदर्शनात् सत्यौरसे गृहीतस्य तु नांशभागित्वमिति। तथा विधानं विना परिगृहीतस्यापि नांशभागित्वमित्याह।

'तस्मिन् जाते सुते दत्ते न कृते च विधानके।
तत्सुतस्तस्य वित्तस्य यः स्वामी पितुरज्ञया॥'

मनुः।

'अविधाय विधानं यः परिगृह्णाति पुत्रकम्।
विवाहविधिभाजं तं न कुर्य्याद्धनभाजनम्॥'

इति।

अन्यजातीयदत्तकस्यापि नांशभागित्वमित्याह 'यदि स्यादन्यजातीयो गृहीतोऽपि सुतः क्वचित्।
अंशभाजं न तं कुर्य्यात् शौनकस्य मतं हि तत्॥'

इत्युक्तप्रायमित्यास्तां विस्तारः॥" इति दत्तकचन्द्रिका॥

पौष्यवर्गः, पुं, (पोष्याणां प्रतिपालनीयानां वर्गः।) प्रतिपालनीयगणः। स तु मात्रादिः। यथा,—

"माता पिता गुरुः पत्नी स्वपत्यानि समाश्रिताः।
अभ्यागतोऽतिथिश्चाग्निः पोष्यवर्गो ह्यमी नव॥"

इति काशीखण्डम्॥

अपि च।

"माता पिता गुरुर्भ्राता प्रजा दीनः समाश्रिताः।
अभ्यागतोऽतिथिश्चाग्निः पोष्यवर्गः उदाहृतः॥
भरणं पोष्यवर्गस्य प्रशस्तं स्वर्गसाधनम्।
नरकं पीड़ने चास्य तस्मादयत्नेन तं भरेत्॥"

इति गारुड़े २१५ अध्यायः॥

पौंसवनं, क्ली, (पुंसवनमेव। स्वार्थे अण्।) पुंसवनसंस्कारः। इति भूरिप्रयोगः॥

पौंस्नं, क्ली, (पुंस इदम्। पुंस्+"स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात्।" ४।१।८७। इति स्नञ्।) पुंस्त्वम्। इति शब्दमाला॥ (धैर्य्यम्। यथा, भागवते। ४।२६।२६।

"का देवरं वज्रगतं कुसुमाक्षवेग-
विस्रस्तपौंस्नगृहती न भजेत क्षत्ये॥"

त्रि, पुंसि भवः। पुंस आगतः। यथा, भागवते। ३।१५।४७।

पौण्ड्रकः

"पौंस्नं वपुर्दैर्घ्यवानमन्यसिद्धे-
रौत्पत्तिकैः समगृणन् द्युतमष्टभोगैः॥"

स्त्रियां ङीप्। पुरुषयोग्या। पुरुषहिता। यथा, भट्टिः। ५।६१।

"सङ्गच्छ पौंस्नि! स्त्रैणं मां युवानं तरुणी शुभे॥")

पौंगण्डं, क्ली, (पौगण्डस्य भावः। पौगण्ड+ष्यञ्।) अवस्थाविशेषः। यथा,—

"कौमारं पञ्चमाब्दान्तं पौगण्डं दशमावधि।
कैशोरमापञ्चदशात् यौवनञ्च ततः परम्॥"

इतिदशमस्कन्धीयद्वादशाध्यायस्थसप्तत्रिंशश्लोकटीकायां श्रीधरस्वामिधृतवचनम्॥ (पौगण्डावस्थावति तदवस्थासम्बन्धिनि च त्रि। यथा, भागवते। ३।३१।२८।

"इत्येवं श्रेयसं शुक्ला दुःखं पौगण्डमेव च॥")

पौण्डरीकं, क्ली, (पुण्डरीकमिव। पुण्डरीक+"शर्करादिभ्योऽण्।" ५।३।१०७। इत्यण्।) प्रपौण्डरीकम्। इति राजनिर्घण्टः॥ (कुष्ठविशेषः। यथा, सुश्रुते निदानस्थाने ५ अध्याये।

"तत्र वातेनारुणं पित्तेनौदुम्बर्य्यलिङ्गकपालकाकणकानि। श्लेष्मणा पौण्डरीकं दद्रुकुष्ठे इति॥" पुं, यज्ञविशेषः। यथा, महाभारते। १३।१०७।३६-३७।

"यस्तु संवत्सरं चान्तो भुङ्क्ते ऽहन्यहमे नरः।
देवकार्य्यपरो नित्यं जुह्वानो जातवेदसम्॥
पौण्डरीकस्य यज्ञस्य फलं प्राप्नोत्यनुत्तमम्।
१ पद्मवर्णनिभश्चैव विमानमधिरोहति॥")

पौण्ड्र्यं, क्ली, (पुण्ड्र्यमेव। स्वार्थे अण्।) पुण्ड्र्यम्। इत्यमरटीकायां भरतः॥ (यथास्य पर्य्यायो गुणाश्च।

"प्रपौण्डरीकं पौण्ड्र्यं चक्षुष्यं पौण्डरीयकम्।
पौण्ड्र्यं मधुरं तिक्तं कषायं शुक्रलं हिमम्।
चक्षुष्यं मधुरं पाके वर्ण्यं पित्तकफप्रणुत्॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

पौण्ड्रः, पुं, देशभेदः। चन्देल इति ख्यातः। इति शब्दरत्नावली॥ (सोऽस्य अभिजनस्तस्य राजा वा। अण्। तद्देशनृपः। यथा, हरिवंशे।

"पाण्ड्यं पौण्ड्रं कलिङ्गञ्च मात्स्यञ्चैव जनार्द्दनः।
जघान सहितान् सर्व्वान्————॥"

पौण्ड्रदेशोद्भवे, पुंभूम्नि। यथा, हरिवंशे। ११६।५२।

"अङ्गवङ्गकलिङ्गैश्च सार्द्धं पौण्ड्रैश्च वीर्य्यवान्।
निर्य्ययौ चेदिराजस्तु भ्रातृभिः स महारथैः॥")

भीमसेनस्य शङ्खः। यथा,—

"पौण्ड्रं दध्मौ महाशङ्खं भीमकर्म्मा वृकोदरः॥"

इति श्रीभगवद्गीतायाम्। १।१५॥

(पुण्ड्र खण्डने+"स्फायितञ्चीति।" उणा० २।१३। इति रक्। ततः प्रज्ञाद्यण्।) इक्षुभेदः। इति रत्नमाला॥ पुँड्रि इति भाषा॥

पौण्ड्रकः, पुं, (पौण्ड्र एव। स्वार्थे कन्।) इक्षुभेदः। पुँड्रि चाक इति भाषा। (यथा,—

"पौण्ड्रको भीरुकश्चैव वंशकः शतपोरकः।
कान्तारस्तापसेक्षुश्च काष्ठेक्षुः सूचिपत्रकः॥

पौनःपुन

नेपालो दीर्घपत्रश्च नीलपोरोऽथ कोशकृत्।
इत्येता जातयः स्यौत्यादृगुणान् वक्ष्यन्यतः परम्॥"

इति सुश्रुते सूत्रस्थाने १५ अध्याये॥)

अस्य गुणाः। प्रीतलत्वम्। दृश्यत्वम्। स्निग्धत्वम्। मधुरत्वम्। दृंहणत्वञ्च। इति राजवल्लभः॥ (गुणान्तरमस्य यथा,—

"वातपित्तप्रशमनो मधुरो रसपाकयोः।
सुशीतो दृंहणो वल्यः पौण्ड्रको भीरुकस्तथा॥"

इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे॥

पौण्ड्रदेशीयनृपः। यथा, महाभारते।२।३४।१०।

"पौण्ड्रको वासुदेवश्च बङ्गः कालिङ्गकस्तथा॥")

जातिविशेषः। पुँड़ो इति भाषा। स च शौण्डिकायां वैश्यात्जातः। इति ब्रह्मवैवर्त्तपुराणम्॥ (पौण्ड्रदेशोद्भवक्षत्रियविशेषः। स तु क्रियालोपादिना शूद्रत्वमापन्नः। यथा, मनुः।१०।४४।

"पौण्ड्रकाश्चौड्रद्रविड़ाः काम्बोजा यवनाः शकाः॥")

पौण्ड्रवर्द्धनः, पुं, (पौण्ड्राणामिक्षुविशेषाणां वर्द्धनं यत्र।) देशभेदः। इति शब्दरत्नावली॥ बेहार इति ख्यातः॥ (यथा, कथासरित्सागरे। १६।१७।

"अभवत्तस्य भार्य्या च नगरात् पौण्ड्रवर्द्धनात्॥")

पौण्ड्रकः, पुं, (पुण्ड्र+स्वार्थे ठण्।) इक्षुभेदः। पुँड़ि इति भाषा। तत्पर्य्यायः। पुण्ड्रेक्षुः २ पुण्ड्रः ३ सेव्यः ४ अतिरसः ५ मधुः ६। इति शब्दमाला॥

पौतवं, क्ली, परिमाणम्। इति यौतवशब्दटीकायां भरतः॥

पौत्तिकं, क्ली, (पुत्तिकाभिर्मधुमक्षिकाविशेषैः कृतम्। पुत्तिका+"संज्ञायाम्।" ४।३।११७। इति ठन्।) पिङ्गलवर्णपुत्तिकाख्यक्षुद्रमक्षिकाकृतक्षुद्रतवर्णमधु। इति घटाधररत्नमाले॥ (यथा, सुश्रुते।१।४५।

"पौत्तिकं भ्रामरं क्षौद्रं माक्षिकं छात्रमेव च।
आर्घ्यमौद्दालिकं दालमित्यष्टौ मधुजातयः॥")

पौ(त्र)त्रः, पुं, (पुत्रस्यापत्यम्। पुत्र+"अपत्यादिनन्तर्ये विदादिभ्योऽञ्।" ४।१।१०४। इति अञ्।) पुत्रस्य पुत्रः। नाति इति भाषा॥ तत्पर्य्यायः। नप्ता २। इति हेमचन्द्रः॥ यथा,—

"पुत्रेण लोकाञ्जयति पौत्रेणानन्त्यमश्नुते।
अथ पुत्रस्य पौत्रेण ब्रध्नस्याप्नोति विष्टपम्॥"

इति दायभागधृतमनुशङ्खलिखितवशिष्ठहारीतवचनम्॥

पौत्री, स्त्री, (पुत्रस्यापत्यं स्त्री। पुत्र+अण्। ङीप्।) पुत्रात्मजा। तत्पर्य्यायः। नप्त्री २। इत्यमरः।२।६।२६॥

पौनःपुनिकः, त्रि, (पुनः पुनर्भवः। पुनःपुनः+ठण्। टिलोपः।) पुनःपुनर्भवः। इति सुग्धबोधव्याकरणम्।

पौनःपुन्यं, क्ली, (पुनः पुनरेव। स्वार्थे ष्यञ्। टिलोपः।) पुनर्व्वारम्। तत्पर्य्यायः। वारंवारम् २ सकृदः

प्रथमत् ६ यमक्रतु ५ पुनःपुनः ६ वारंवारेण ७ अभीक्ष्णम् ८ प्रतिवचनम् ९। इति शब्दरत्नावली ॥

पौनर्भवः, पुं, (पुनर्भूयोरपत्यमिति। पुनर्भू+"अपत्यादिभ्यो विदादिभ्योऽण्।" ४।१।१०६। इति अण्।) द्वादशविधपुत्रान्तर्गतपुत्रविशेषः। इति शब्दाचरः॥ पुनर्भूपुत्रः। न तु भर्तृपरित्यक्तविधवयोरन्येनोत्पादितः। तस्य लक्षणं यथा,—

"या पत्या वा परित्यक्ता विधवा वा स्वेच्छया। उत्पादयेत् पुनर्भूत्वा स पौनर्भव उच्यते॥"

इति मानवे। ९। १७५॥

"पतिः। या भर्त्रा परित्यक्ता मृतभर्तृका वा स्वेच्छया अन्यस्य पुनर्भार्या भूत्वा यमुत्पादयेत् स उत्पादकस्य पौनर्भवः पुत्र उच्यते।" इति तट्टीकायां कुल्लूकभट्टः॥ ९॥ भर्तृविशेषः। अक्षतयोनेर्भर्तृपरित्यक्तविधवयोः पौनर्भवेन भर्त्रा सह विवाहविधिः एवं कौमारं पतिमृतस्त्र्यन्यमाश्रित्यपुनरागतायास्तेन कौमारेण भर्त्रा सह विवाहविधिर्यथा,—

"सा चेदक्षतयोनिः स्याद्गतप्रत्यागतापि वा। पौनर्भवेन भर्त्रा सा पुनः संस्कारमर्हति॥"

इति मानवे। ९। १७६॥

"सा चेदिति। सा स्त्री यद्यक्षतयोनिः सती अन्यमाश्रयेत्तदा तेन पौनर्भवेन भर्त्रा पुनर्विवाहाख्यं संस्कारमर्हति। यद्वा कौमारं पतिमृतस्त्र्यन्यमाश्रित्य पुनस्तमेव प्रत्यागता भवति तदा तेन कौमारेण भर्त्रा पुनर्विवाहाख्यं संस्कारमर्हति।" इति तट्टीकायां कुल्लूकभट्टः॥९॥

कन्याविशेषे, स्त्री। सप्तविधपौनर्भवाः कन्या वर्ज्यनीयाः। यथा,—

"सप्त पौनर्भवाः कन्या वर्ज्यनीयाः कुलाधमाः। वाचा दत्ता मनोदत्ता कृतकौतुकमङ्गला॥ उदकस्पर्शिता या च या च पाणिगृहीतिका। भ्रष्टं परिगता या च पुनर्भूप्रभवा च या॥ इत्येताः काश्यपेनोक्ता दहन्ति कुलमग्निवत्। कृतकौतुकमङ्गला यद्यकन्या। उदकस्पर्शिता उदकपूर्वं दत्तेति रत्नाकरः।" इत्युद्वाहतत्त्वम्॥

पौरं, स्त्री, (पुरे भवम्। पुर+"तत्र भवः।" ४। ३। ५३। इत्यण्।) रोहिषतृणम्। इत्यमरः। २। ४। १४६। रामकर्पूर इति ख्यातम्॥ (अस्य पर्य्यायो यथा,—

"कक्षजं रौहिषं देवजग्धं सौगन्धिकन्तथा। भूतीकं वालपौरुष ग्रामकं घूसगन्धिकम्॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

पुरोदृशे, त्रि। इति मेदिनी॥ (यथा, रघुः। १।८५।

"इति समुद्योगमुदीतयज्ञस्य पौराः
अवन्धकृत्यं नृपमेकवाक्यं विभुः॥"

पुं, पुरुषसमूहः। यथा, ऋग्वेदे। ८। ६।१२।

"शतं नो यस्य वह्नयः पौरमाविष्य शिक्षति इन्द्र
विश्वायतः॥"

पूरः पूरक एव। स्वार्थे अण्। उदरपूरके, त्रि। यथा, तत्रैव। २। ११। ११।

"एवन्तसे कुक्षी वर्द्धयन्त्विला इतः पौर इन्द्रभाव॥")

पौरकः, पुं, (पौर एव कायतीति। के+कः।) गृहवाटीपवनम्। यथा,—

"निष्कुटस्तु गृहारामो वाटारामस्तु पौरकः॥"

इति हेमचन्द्रः। ४।१७८॥

पौरवः, पुं, (पुरोरपत्यमिति। पुरु+अण्।) पुरुवंशः। यथा,—

"दुष्मोस्तु तनया भोजा अनोस्तु म्लेच्छजातयः। पुरोस्तु पौरवो वंशो यत्र जातोऽसि पार्थिव!॥"

इति मात्स्ये ३४ अध्यायः॥

(देशविशेषः। यथा, मार्कण्डेये। ५८। ५२।

"त्रिनेत्राः पौरवाश्चैव गन्धर्व्वाश्च द्विजोत्तम!। पूर्व्वोत्तरन्तु कूर्मस्य पादमेते समाश्रिताः॥"

पुरुवंशीये, त्रि॥ (यथा, अभिज्ञानशाकुन्तलायां प्रथमेऽङ्के।

"कः पौरवे वसुमतीं शासति शासितरि दुर्विनीतानाम्।
अयमाचरत्यविनयं सुखासु तपस्विकन्यकासु॥")

पौरस्त्यः, त्रि, (पुरो भवः। पुरस्+"दक्षिणापश्चात्पुरसस्त्यक्।" ४। २। ८८। इति त्यक्।) प्रथमः। इत्यमरः। ३। १। ८०॥ (पूर्व्वदिग्भवः। यथा, रघुः। ४। ३४।

"पौरस्त्यानेवमाक्रामन् तान् तान् जनपदान् जयी॥")

पौराणिकः, त्रि, (पुराणमधीते वेद वा। पुराण+"आख्यानाख्यायिकेतिहासपुराणेभ्यश्च।" ४। २। ६०। इत्यस्य वार्त्तिकोक्त्या ठक्।) पुराणवेत्ता। इति सिद्धान्तकौमुदी॥ (यथा, महाभारते। १। ४। १।

"लोमहर्षणपुत्र उग्रश्रवाः सौतिः पौराणिको नैमिषारण्ये शौनकस्य कुलपतेर्द्वादशवार्षिके सत्रे ऋषीनभ्यागतानुपतस्थे॥"

यथा च भागवते। १२। ७। ५।

"वेदाचार्य्यः कश्यपश्च सावर्णिरकृतव्रणः। वैशम्पायनहारीतौ षड्वै पौराणिका इमे॥")

पौरुषं, क्ली, (पुरुष+अण्।) पुंसस्य भावः। पुरुषस्य कर्म्म। पुरुषस्य तेजः। इति मेदिनी॥

"क्लीवा हि दैवमेवैकं प्रशंसन्ति न पौरुषम्। दैवं पुरुषकारेण घ्नन्ति शूराः सदोद्यमाः॥"

इत्यग्निपुराणम्॥

"उद्योगिनं पुरुषसिंहमुपैति लक्ष्मी-
र्दैवेन देयमिति कापुरुषा वदन्ति।
दैवं निहत्य कुरु पौरुषमात्मशक्त्या
यत्ने कृते यदि न सिध्यति कोऽत्र दोषः॥"

इति हितोपदेशः॥

पौरुषं, त्रि, (पुरुष+अण्।) जङ्गविकृतदोषः-माप्तिमाषम्। पुरुषपरिमाणम्। इत्यमरः। ३। ३। २२२॥ (पुरुषवाहः। यथा, मनुः। ८। ४०१।

"मद्यं यानं स्त्रियो दायं पौरुषोऽर्थमं नरेः॥")

पौरुषेयः, पुं, (पुरुष+"सर्व्वपुरुषाभ्यां णढञौ।" ५। १। १०। इत्यत्र "पुरुषाद्यधिकारसमूहेन कृतेषु" एवार्थेषु ढञ्।) समूहः। (यथा, माघः। २। ४।

"एकाकिनोऽपि परितः पौरुषेयवृता इव॥")

वधः। पुरुषस्य पदान्तरम्। इति मेदिनी॥

पौरुषेयः, त्रि, (पुरुष+ढञ्।) पुरुषकृतः। पुरुषविकारः। इति मेदिनी॥ (पुरुषसम्बन्धिनि। यथा, ऋग्वेदे। १०। ८७। १६।

"यः पौरुषेयेण क्रविषा समङ्क्ते॥")

पौरोगवः, पुं, स्त्री, (पुरोऽग्रे गौर्नेतं यस्येति। पुरोगुः। ततः प्रज्ञाद्यण्।) पाकशालाध्यक्षः। इत्यमरः। २।९।२७॥ (यथा, हरिवंशे। १२६।५८।

"दृक्षान्नसौवर्चलचुक्रपूर्णान्
पौरोगवोक्तानुपसद्य चैषाम्॥")

पौरोडाश्नः, पुं, (पुरोडाश एव। प्रज्ञाद्यण्।) पुरोडाशः। पुरोडाशसहचरितो मन्त्रः। इति सिद्धान्तकौमुदी॥

पौरोडाशिकः, पुं, (पुरोडाशसहचरितो मन्त्रः पुरोडाशः स एव पौरोडाशः। तस्य व्याख्यानमत्र भवो वा। "पौरोडाश-पुरोडाशात् ठन्।" ४। ३। ७०। इति ठन्।) पुरोडाशिकः। इति सिद्धान्तकौमुदी॥

पौर्णमासः, पुं, (पौर्णमास्यां भवः। पौर्णमासी+"सन्धिवेलाद्यृतुनक्षत्रेभ्योऽण्।" ४। ३। १६। इत्यण्।) यागविशेषः। इत्यमरः। २। ७। ६८॥ (यथा, मनुः। ४। २५।

"दर्शेन चार्द्धमासान्ते पौर्णमासेन चैव हि॥")

तथा हि। अमावस्यायां अमावस्यया यजेत पौर्णमास्यां पौर्णमास्या यजेत इति श्रुतिविहितदर्शपौर्णमासयागयोः कर्म्मस्वरूपप्रापकयोरुत्पत्तिश्रुतीः समामनन्ति। यथा। आग्नेयाष्टाकपालोऽमावास्यायां पौर्णमास्यामाधीयते। उपांशुयाजमन्तरा यजति ताभ्यामेवाग्नीषोमीयमेकादशकपालं पौर्णमास्यामेव प्रायच्छत् ऐन्द्रं दधि भवत्यमावास्यायामैन्द्रं पयो भवत्यमावास्यायामिति। ताभ्यामाग्नेयाष्टाकपालोपांशुयाजाभ्याम्। तेन आग्नेयाष्टाकपालोपांशुयाजाभ्यामग्नीषोमीयैकादशकपालाभ्यां पौर्णमास्याम्। आग्नेयाष्टाकपालैन्द्रदधियागैन्द्रपयोयागाभ्यामित्यर्थः। आप्तु श्रुतिषु अमावास्यापौर्णमासीपदानि प्रतिपत्सहितानि दृश्यन्ते। तत्र पूर्व्वयोर्यागारम्भः प्रतिपदोर्यागः। तथा च ऐष्टे वै पौर्णमासी वै अमावास्ये तस्मात् प्रतिपदुपवसन् यजेतापरेद्युरिति श्रुतिः। अस्यार्थः। यावज्जीविकयोर्दर्शपौर्णमासयोः प्रकृतिभूतयोः त्रिंशतिभूतौ दर्शपौर्णमासौ कौण्डपायिनामयनीयौ पशादौ कर्त्तव्यौ।" इति मलमासतत्त्वम्॥

पौर्णमासी, स्त्री, (पूर्णो मासोऽस्यां वर्त्तते इति। पूर्णमासादण् वक्तव्य इत्यण्। ततो ङीप्।) पूर्णिमा। इत्यमरः। १। ४। ७॥

पौर्व्वाह्णिकः, त्रि, (पूर्व्वाह्ण + "विभाषा पूर्व्वाह्णापराह्णाभ्याम्।" ४।३।२४। इति ठञ्।) पूर्व्वाह्णे भवः। पूर्व्वाह्णसम्बन्धी। इति सिद्धान्तकौमुदी॥

पौलस्ती, स्त्री, (पुलस्तेः स्त्र्यपत्यम्। पुलस्त + यञ्। ङीप्। यलोपः।) शूर्पणखा। इति व्याकरणम्॥

पौलस्त्यः, पुं, (पुलस्तेरपत्यमिति। पुलस्ति + गर्गादित्वात् यञ्।) कुबेरः। इत्यमरः। १।१।७२॥ रावणः। इति मेदिनी॥ (यथा, हरिवंशे। ३३।३५।

"तमोघ रक्षः पौलस्त्यं पुलस्त्येनानुयाचितः॥")

विभीषणः। इति शब्दरत्नावली॥

पौलिः, पुं, (पोलतीति। पुल महत्त्वे + ज्वलादित्वात् णः। पौलेन निर्व्वृत्तः। सुतङ्गमादित्वात् इञ्।) पाकावस्थागतकलायादिः। आरब्धपाकयवसर्षपादिः। वह्निना ईषद्दग्धचुट्चुट्शब्दवान्। इति केचित्। दरदग्धः। इति श्रीधरः। इति भरतः॥ तत्पर्य्यायः॥ आपक्वम् २ अभ्युषः ३। इत्यमरः॥ अभ्युषः ४ अभ्योषः ५। इति भरतः॥

पौलोमी, स्त्री, (पुलोम्नोऽपत्यमिति। पुलोमन् + अण्। अनो लोपः।) शची। इति हेमचन्द्रः॥ (यथा, भागवते। ५।७।६।

"विराजमानः पौलोम्या सहार्द्धासनयाभ्रगम्॥")

पौषः, पुं, (पौषी पौर्णमास्यस्मिन्निति। सास्मिन् पौर्णमासीत्यण्।) वैशाखादिद्वादशमासान्तर्गतनवममासः। पुष्यनक्षत्रयुक्ता पौर्णमासी यत्र मासे सः। तत्पर्य्यायः। तैषः २ सहस्यः३। इत्यमरः॥ पौषिकः ४ हैमनः ५। इति राजनिर्घण्टः॥ नित्यः ६ तिष्यकः ७। इति शब्दरत्नावली॥ अयं धनुःस्थरविप्रारब्धशुक्लप्रतिपदादिदर्शान्तरूपो सुखचान्द्रः। कृष्णप्रतिपदादिपौर्णमास्यन्तरूपो गौणचान्द्रः। धनूराशिस्थरविकः सौरः। इति स्मृतिः॥ * ॥ तत्र जातफलम्। यथा, कोष्ठीप्रदीपे।

"निगूढमन्त्रः सुकृशाङ्गयष्टिः
परोपकारी पिठरोदरश्च।
कष्टान्वितार्थव्ययकृद्विधिज्ञः
पौषप्रसूतः पुरुषः सुधीरः॥"

पौषी, स्त्री, (पुष्य + "नक्षत्रेण युक्तः।" इत्यण्। नित्यपुष्येति यलोपः।) पुष्ययुक्ता पौर्णमासी। इत्यमरः॥ पुष्येण युक्ता रात्रिः। इति मुग्धबोधव्याकरणम्॥

पौष्करं, क्ली, (पुष्करस्येदमिति। पुष्कर + अण्।) पुष्करमूलम्। इति राजनिर्घण्टः॥ (अस्य पर्य्यायो गुणाश्च यथा.—

'उक्तं पुष्करमूलन्तु पौष्करं पुष्करञ्च तत्।
पद्मपत्रञ्च काश्मीरं कण्ठभेदमिमं जगुः॥
पौष्करं कटुकन्तिक्तमुष्णं वातकफच्चरान्।
हन्ति शोथारुचिश्वासान् विशेषात् पार्श्वशूलजित्॥"

अस्य प्रतिनिधिर्यथा,—

"पौष्कराभावतः कुष्ठम्॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

पौष्करमूलं, क्ली, (पौष्करं मूलम्।) पुष्करमूलम्। यथा,—

"मूले पुष्करकाश्मीरपद्मपत्राणि पौष्करे।"

इत्यमरः॥

"त्रीणि पुष्करमूले। पुष्करं सुगन्धिद्रव्यं वणिक्ख्यातं तस्य इदं पौष्करं स्यात्। पौष्करे मूले पुष्करादीत्यन्वयः।" इति भरतः॥

पौष्करिणी, स्त्री, (पौष्करं पुष्कराणां समूहोऽस्या अस्तीति। पौष्कर + इनि। स्त्रियां ङीप्।) पुष्करिणी। इति शब्दरत्नावली॥

पौष्टिकं, क्ली, (पुष्टेर्व्वृद्धेर्व्वितमिति। पुष्टि + ठञ्।) चौरसमये गात्राच्छादनवस्त्रविशेषः। कावाइ इति भाषा॥ अस्य गुणाः। धनचिक्कणत्वम्। आयुष्यत्वम्। शुचित्वम्। रूपविराजनत्वञ्च। इति राजवल्लभः॥ धन्यं धनचिक्कणम्। बल्यमिति वा पाठः। पुष्टिर्धननन्दनादीनां वृद्धिरित्यभिधीयते। तद्धेतुभूतं कर्म्म। इति दुर्गभङ्गः॥ (पुष्टिहिते, त्रि। यथा, महाभारते। १२।२६६।२६।

"सतां वृत्तमधिष्ठाय निहीनानुज्झितौर्ध्ववः।
मन्त्रवर्च्चं न दुष्यन्ति कुर्व्वाणाः पौष्टिकीः क्रियाः॥")

पौष्यं, त्रि (पुष्येण निर्व्वृत्तम्। पुष्यस्येदं वेति। पुष्य + अण्।) पुष्यनिर्म्मितम्। पुष्यसम्बन्धि। यथा, कालिकापुराणे ६७ अध्याये।

"आसनं प्रथमं दद्यात् पौष्यं दारुजमेव वा।
वास्त्रं वा चार्म्मजं कौशं मण्डलस्योत्तरे क्षुचेत्॥"

पौष्पकं, क्ली, (पुष्पेण कायतीति। कै + कः। पुष्पक + स्वार्थे अण्।) कुसुमाञ्जनम्। इत्यमरः॥

पौष्पी, स्त्री, (पुष्यस्य इयं इति। पुष्य + अण्। गौरादित्वात् ङीष्। पुष्याख्यया प्रसिद्धत्वात् तथात्वम्।) देशविशेषः। यथा,—

"अथ पुष्यपुरं पौष्पी तथा पाटलिपुत्रकम्॥"

इति शब्दरत्नावली॥

पौष्यः, पुं, (पूष्णोऽपत्यमिति। पूषन् + यञ्।) पूषपुत्रः। स च करवीरपुरस्य राजा। तस्य पुत्रः शिवांशजचन्द्रशेखरः। यथा,—

"पूष्णः पुत्रोऽभवत् पौष्यः सर्व्वशास्त्रार्थपारगः।
स पुत्रहीनो राजाभूत् पौष्यो नृपतिसत्तमः॥
ततः पुत्रार्थिनं भूपं प्रसन्नो वृषभध्वजः।
ब्रह्मदत्तफलं हस्ते क्षत्वेदं तमुवाच ह॥
इदं फलं ब्रह्मदत्तं विभज्य नृपते! त्रिधा।
भोजयेस्ताः स्वजायास्तं प्रहृष्टः शुद्धमानसः॥
ततः फले स्वयं देवः प्रविवेश वृषध्वजः।
ततश्चखात्तत् फलं भूतं त्रिभागं स्वयमेव हि॥
ततः समुचिते काले प्राप्ते ताभिस्तु भक्षितम्।
तत् फलं नृपशार्दूल! गर्भाच्चाप्याहिताः सुताः॥
सम्पूर्णे गर्भकाले तु गर्भेभ्यः समजायत।
खड्गत्रयं पृथक् राजा यथा भर्गेण भाषितम्॥
तच्च खड्गत्रयं पौष्यो यथास्थानं नियोज्य च।
एकं पितुः चकारासु तत्र पुत्रो व्यजायत॥
तस्य नामाकरोद्राजा ब्राह्मणैः स्वैः पुरोहितैः।
चन्द्रशेखर इत्येवं कान्त्या चन्द्रमसः समः॥
ब्रह्मावर्त्ताख्ये रम्ये करवीराख्ये पुरे।
दृषद्वतीनदीतीरे राजा भूत्वा ससोद ह॥"

इति कालिकापुराणे ४६ अध्यायात् सङ्कलितः। (नृपभेदः। स तु गुरुदक्षिणार्थमागताय उतङ्काय कुण्डले दत्तवान्। यथा, महाभारते। १।३।११२।

"ततस्तङ्कं पौष्यः प्रत्युवाच भगवंस्त्वरेण पात्रमासाद्यते भवांश्च गुरुवानतिधिस्त्वदिच्छे मातुं कर्त्तुं क्रियतां त्वरा इति॥" इतश्चिन्तेषविवरणञ्च तत्रैव द्रष्टव्यम्॥)

प्याट्, य, द्वे। भीः। इत्यमरः। ३।४।७॥

प्याय, ओ ईं ङ वृद्धौ। इति कविकल्पद्रुमः। (भ्वा०-आत्म०-अक०-सेट्।) ओ ईं, पीनं सुखम्। उपसर्गात्तु प्रध्यानम्। अस्त्राङ्गे तु प्यानः पीनः स्वेदः। ङ, प्यायते। इति दुर्गादासः।

प्युष, क उत्सर्गे। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) अन्तःस्थाद्ययुक्तः। उत्सर्गे उत्सर्गः। क, प्योषयति धनं दाता। इति दुर्गादासः॥

प्युष, य इर् भागे। दहि। इति कविकल्पद्रुमः॥ (दिवा०-पर०-सक०-सेट्।) अन्तःस्थाद्ययुक्तः। य, प्युष्यति धनं दायादः। इर्, अप्युषत् अप्योषीत्। अस्मात् पुषादित्वान्नित्यं ङ इत्यन्ये। इति दुर्गादासः॥

प्युष, य इर् विभागे। इति कविकल्पद्रुमः॥ (दिवा०-पर०-सक०-सेट्।) अन्तःस्थाद्ययुक्तः। य, प्युष्यति धनं दायादः। इर्, अप्युषत् अप्योषीत्। अस्मात् पुषादित्वात् नित्यं ङ इत्यन्ये। इति दुर्गादासः॥

प्ये, ङ वृद्धौ। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-अक०-अनिट्।) अन्तःस्थाद्ययुक्तः। ङ, प्यायते। इति दुर्गादासः॥

प्र, य, (प्रथयतीति। प्रथ + डः।) विंशत्युपसर्गान्तर्गतप्रथमोपसर्गः। अस्यार्थाः। गतिः। आरम्भः। उत्कर्षः। सर्व्वतोभावः। प्राचुर्य्यम्। ख्यातिः। उत्पत्तिः। व्यवहारः। इति दुर्गादासधृतपुरुषोत्तमः॥

प्रकटं, त्रि, (प्रकटतीति। प्र + कट + अच्।) स्पष्टम्। अस्य पर्य्यायः प्रकाशशब्दे द्रष्टव्यः।

"प्रकटाप्रकटा चेति लीला सैवं द्विधोच्यते।"

इति भागवतान्तम्।

(यथा च, देवीभागवते। १।७।३८।

"जानन्ति ये न तव देवि! परं प्रभावं
ध्यायन्ति ते हरिहरावपि मन्दचित्ताः।
ज्ञातं मयाद्य जननि! प्रकटं प्रभावं
यद्विष्णुरप्यतितरां विवशोऽभवत् ते॥")

प्रकटितं, त्रि, (प्र + कट + क्त।) प्रकाशितम्। इति हेमचन्द्रः॥ (यथा, देवीभागवते। १।७।४४।

"प्रभूतमल्पं कार्य्यं वा यो नरः कर्त्तुमिच्छति ।
सर्व्वारम्भेण तत् कुर्य्यात् सिंहादेकं प्रकीर्त्तितम्॥"
इति चाणक्यसंग्रहः ॥

प्रकीर्य्यः, पुं, (प्रकीर्य्यते इति । प्र + कॄ + आधारादित्वात् यक् ।) करञ्जभेदः । इत्यमरः ॥ गाटाकरञ्ज इति भाषा ॥ घृतकरञ्जः । रीठाकरञ्जः । इति राजनिर्घण्टः ॥ (अस्य पर्य्यायो यथा,—
"घृतपूर्णकरञ्जोऽन्यः प्रकीर्य्यः पूतिकोऽपि च ।
स चोक्तः पूतिकरञ्जः सोमवल्कश्च स स्मृतः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

प्रकुलं, क्ली, (प्रकर्षेण कौलति राशीकरोति मैत्रीकरोति वेति । प्र + कुल + कः ।) प्रशस्तवपुः । इति त्रिकाण्डशेषः ॥

प्रकृतः, त्रि, (प्रक्रियते स्मेति । प्र + कृ + क्तः ।) प्रकरणप्राप्तः । यथा । प्रकृतमनुसराम्यः । प्रकर्षेण कृतः । अविकृतः । प्रपूर्ब्बकृञ्धातोः कर्म्मणि क्तप्रत्ययः ॥ (प्रक्रान्तः । यथा, साहे ।११ ।४२ ।
"प्रकृतजपविधीनामारुरुक्षन्निशन्त-
मुहुरपि हितमौष्ठैरक्षरैर्लक्ष्यसन्धेः ॥")

प्रकृतिः, स्त्री, (प्रक्रियते कार्य्यादिकमनयेति । प्र + कृ + क्तिन् ।) स्वभावः । (यथा चरके विमानस्थाने प्रथमेऽध्याये ।
"तत्र प्रकृतिरुच्यते स्वभावो यः स पुनराहारौषधद्रव्याणां स्वभाविको गुर्व्वादिगुणयोगः । तद्यथा माषमुद्गयोः सूकरैणयोश्च ।") योनिः । लिङ्गम् ॥ स्वामी । अमात्यः । सुहृत् । कोषः । राष्ट्रम् । दुर्गम् । बलम् । (यथा, मनौ ।६।२९४।
"स्वाम्यमात्यौ पुरं राष्ट्रं कोषदण्डौ सुहृत्तथा ।
सप्त प्रकृतयो ह्येता सप्ताङ्गं राज्यमुच्यते ॥"
धर्म्माध्यक्षादिसप्तप्रकृतयो यथा,—
"धर्म्माध्यक्षो धनाध्यक्षः कोषाध्यक्षश्च भूपतेः ।
दूतः पुरोधा दैवज्ञः सप्त प्रकृतयोऽभवन् ॥")
पौराणां श्रेण्यः । इत्यमरः । २ । ८ । १८ ॥
(यथा, मार्कण्डेये । १६ । २० ।
प्रणिपत्य ततस्तस्मै दत्तात्रेयाय सोऽर्ज्जुनः ।
ज्ञानाय प्रकृतीः सम्यगभिषेकमगृह्णत ॥"
स्वरूपावस्था । यथा, हितोपदेशे । २ । १६६ ।
"स्नेहिनो मर्द्दितस्यैव रज्जुभिः परिवेष्टितः ।
सुखी दादशभिर्वर्षैः स्वपुच्छः प्रकृतिं गतः ॥")
श्लेष्मा । इति हेमचन्द्रः ॥ प्रकृतिः । (यथा,—
"प्रधानं प्रकृतिः प्रकृतिर्नित्याचाविकृतिस्तथा ।
एतानि तस्या नामानि शिवमाश्रित्य याः स्थिताः ॥"
इति पूर्व्वखण्डे पञ्चमेऽध्याये भार्ङ्गधरेणोक्तम् ॥) योषित् । इति शब्दरत्नावली ॥ परमात्मा । इति धरणिः । पञ्चभूतानि । करणम् । गुह्यम् । जन्तुः । एकविंशत्यक्षरपादच्छन्दोविशेषः । माता । इति नानार्थरत्नमाला ॥ प्रत्ययात् प्रथमः । स च द्विधा धातुनाम च । इत्यजयपालः ॥ (प्रकर्षेण स्वयादिकं करोतीति । प्र + कृ + कर्त्तरि क्तिच् ।) भगवतो मायाख्या शक्तिः । सा च परापरभेदेन द्विधा । यथा,—

"भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च ।
अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा ॥ ६ ॥
अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम् ।
जीवभूतां महाबाहो ययेदं धार्य्यते जगत्॥"५॥
इति श्रीभगवद्गीतायां ७ अध्यायः ॥
"एवं स्तोत्रमभिसुखीकृत्य इदानीं प्रकृतिद्वारा सृष्ट्यादिकर्तृत्वेन ईश्वरतत्त्वं प्रतिज्ञातं निरूपयिष्यन् परापरभेदेन प्रकृतिद्वयमाह भूमिरिति द्वाभ्याम् । भूम्यादीनि पञ्चभूतेऽहङ्कारे मनः-शब्देन तत्कारणभूतोऽहङ्कारः बुद्धिशब्देन तत्कारणं महत्तत्त्वं अहङ्कारशब्देन तत्कारणमविद्या इत्येवमष्टधा भिन्ना । यदा भूम्यादिशब्दैः पञ्च महाभूतानि लक्ष्यैः सह एकीकृत्य गृह्यन्ते । अहङ्कारशब्देनैवाहङ्कारं शैवैव तत्कार्य्याणि इन्द्रियाण्यपि गृह्यन्ते बुद्धिरिति महत्तत्त्वम् । मनःशब्देन तु मनस्येवोन्नेयं अव्यक्तस्वरूपं प्रधानमित्यनेन प्रकारेण मे प्रकृतिर्म्मायाख्या शक्तिरष्टधा भिन्ना विभागं प्राप्ता । चतुर्विंशतिभेदभिन्नाप्यष्टस्वेवान्तर्भावविवक्षयाऽष्टधा भिन्नेत्युक्तम् । तथा च क्षेत्राध्याये इमामेव प्रकृतिं चतुर्विंशतितत्त्वात्मना प्रपञ्चयिष्यति ।
'महाभूतान्यहङ्कारो बुद्धिरव्यक्तमेव च ।
इन्द्रियाणि दशैकञ्च पञ्च चेन्द्रियगोचराः ॥'
इति ॥ ४ ॥
अपरास्मिं प्रकृतिमुपसंहरन् परां प्रकृतिमाह अपरेयमिति । अष्टधा प्रकृतिरुक्ता इयमपरा निकृष्टा जड़त्वात् परार्थत्वाच्च । इतः सकाशात् परां प्रकृष्टामन्यां जीवभूतां जीवस्वरूपां मे प्रकृतिं जानीहि । परत्वे हेतुः यया चेतनया क्षेत्रज्ञस्वरूपया स्वकर्म्मद्वारेणेदं जगद्धार्य्यते ॥" ५ ॥ इति तट्टीकायां श्रीधरस्वामी ॥
सत्त्वरजस्तमसां साम्यावस्था । यथा,—
"सत्त्वं रजस्तमश्चैव गुणत्रयमुदाहृतम् ।
साम्यावस्थितिरेतेषां प्रकृतिः परिकीर्त्तिता ॥
केचित् प्रधानमित्याहुरव्यक्तमपरे जगुः ।
एतदेव प्रजासृष्टिं करोति विकरोति च ॥"
इति मात्स्ये ३ अध्यायः ॥
तत्पर्य्यायः । प्रधानम् २ । इत्यमरः ॥ माया ३ शक्तिः ४ चैतन्यम् ५ । इति राजनिर्घण्टः ॥
तस्या नामान्तराणि यथा,—
"तमोऽव्यक्तं शिवो धाम रजो योनिः सनातनः ।
प्रकृतिर्विकारः प्रलयः प्रधानं प्रभवाप्ययौ ॥
अनुद्दिक्तमनूनं वाप्यकम्पमचलं ध्रुवम् ।
सदसच्चैव तत्सर्व्वमव्यक्तं त्रिगुणं स्मृतम् ।
ज्ञेयानि नामधेयानि नरैरध्यात्मचिन्तकैः ॥
अव्यक्तनामानि गुणांश्च तत्त्वतो
यो वेद सर्व्वाणि गतीश्च केवलाः ।
विसृष्टदेहः प्रविभागतत्त्ववित्
स सत्यते सर्व्वगुणैर्निरामयः ॥"
इति महाभारते आश्वमेधिकपर्व्व ॥ ७ ॥
सा पञ्चविधा ।

"गणेशजननी दुर्गा राधा लक्ष्मीः सरस्वती ।
सावित्री च सृष्टिविधौ प्रकृतिः पञ्चमी स्मृता ॥" ७ ॥
तस्या व्युत्पत्तिर्यथा —
"प्रकृष्टवाचकः प्रश्च कृतिश्च सृष्टिवाचकः ।
सृष्टौ प्रकृष्टा या देवी प्रकृतिः सा प्रकीर्त्तिता ॥
गुणे प्रकृष्टे सत्त्वे च प्रशब्दो वर्त्तते श्रुतौ ।
मध्यमे रजसि ह्यश्च तिशब्दस्तामसः स्मृतः ॥
त्रिगुणात्मस्वरूपा या सर्व्वशक्तिसमन्विता ।
प्रधाना सृष्टिकरणे प्रकृतिस्तेन कथ्यते ॥
प्रथमे वर्त्तते प्रश्च कृतिश्च सृष्टिवाचकः ।
सृष्टेरादौ च या देवी प्रकृतिः सा प्रकीर्त्तिता ॥" ८ ॥
तासां उत्पत्तिः स्वरूपञ्च यथा,—
"योगेनात्मा सृष्टिविधौ द्विधारूपो बभूव सः ।
पुमांश्च दक्षिणार्द्धाङ्गात् वामार्द्धात् प्रकृतिः स्मृता ॥
सा च ब्रह्मस्वरूपा च या या गित्वा सनातनम् ।
आत्मा च यथाशक्तिर्यथाग्नौ दाहिका स्मृता ॥
अतएव हि योगीन्द्रः स्त्रीपुंभेदं न मन्यते ।
सर्व्वं ब्रह्ममयं ब्रह्मन् ! पश्यत् पश्यति नारद ! ॥
स्वेच्छामयं स्वेच्छया च श्रीकृष्णस्य विरुचया ।
साविर्बभूव सहसा मूलप्रकृतिरीश्वरी ।
तदाज्ञया पञ्चविधा सृष्टिकर्म्मणि वेदतः ॥"
दुर्गाप्रकृतिर्यथा,—
"अथ भक्तानुरोधाद्वा भक्तानुग्रहविग्रहा ।
गणेशमाता दुर्गा या शिवरूपा शिवप्रिया ॥
नारायणी विष्णुमाया पूर्णब्रह्मस्वरूपिणी ।
ब्रह्मादिदेवैर्मुनिभिर्मनुभिः पूजिता स्तुता ॥
सर्व्वाधिष्ठातृदेवी सा सर्व्वरूपा सनातनी ।
धर्म्मसत्यपुण्यकीर्त्तियशोमङ्गलदायिनी ॥
सुखमोक्षहर्षदात्री शोकार्त्तिदुर्गनाशिनी ।
शरणागतदीनार्त्तपरित्राणपरायणा ॥
तेजःस्वरूपा परमा तदधिष्ठातृदेवता ।
सर्व्वशक्तिस्वरूपा च शक्तिरीशस्य सन्ततम् ॥
सिद्धेश्वरी सिद्धरूपा सिद्धिदा सिद्धिदेश्वरी ।
बुद्धिर्निद्रा क्षुत्पिपासा छाया तन्द्रा दया स्मृतिः ॥
जातिः प्रान्तिश्च शान्तिश्च कान्तिर्भ्रान्तिश्च चेतना ।
तुष्टिः पुष्टिस्तथा लक्ष्मीर्वृत्तिर्मातेव च ॥
सर्व्वशक्तिस्वरूपा सा कृष्णस्य परमात्मनः ।
उक्ता श्रुतौ स्मृतिगणैश्चातिस्तुत्यं यथागमम् ॥
गुणोऽस्यनन्तोऽनन्ताया अस्याश्च निगमागमैः ॥"
लक्ष्मीप्रकृतिर्यथा,—
"शुद्धसत्त्वस्वरूपा या पद्मा च परमात्मनः ।
सर्व्वसम्पत्स्वरूपा सा तदधिष्ठातृदेवता ॥
क्षान्ता दान्ता च ज्ञाना च नम्रशीला सुमङ्गला ।
लोभमोहकामरोषाहङ्कारपरिवर्জ্জিতা ॥
भक्तानुरक्ता पत्युश्च पत्न्याश्च सततम् हिता ।
प्राणतुल्या भगवतः प्रेमपात्री प्रियंवदा ॥

सर्वशस्यात्मिका सर्वजीवनोपायरूपिणी ।
मर्त्यलक्ष्मीश्च वैकुण्ठे पाताले वरदा सती ॥
स्वर्गे च स्वर्गलक्ष्मीश्च मर्त्यानां यष्टिदान्यधा ।
सर्वप्राणिषु हर्म्येषु शोभारूपा मनोहरा ॥
प्रीतिरूपा पुण्यवतां प्रभारूपा नृपेषु च ।
वाणिज्यरूपा वणिजां पापिनां कलहाङ्कुरा ॥
दयामयी भक्तिमतो भक्तानुग्रहकातरा ।
चपले चपला भक्ता सम्पदे च धनाय च ॥
जगत्त्रीवं नृतं सर्वं यया देया विना सुने ! ।
प्रकृतिर्द्वितीया कथिता वेदोक्ता सर्वसम्मता ॥
सर्वपूज्या सर्ववन्द्या चाद्यां मत्तो निशा-
मय ॥" २ ॥ ८ ॥

सरस्वतीप्रकृतिर्यथा,—

"वागधिष्ठातृदेवी च परमात्मनः ।
सर्वविद्या सर्वरूपा सा च देवी सरस्वती ॥
सद्बुद्धिकविता मेधा प्रतिभा स्मृतिदा सताम् ।
नानाप्रकारसिद्धान्तभेदार्थकल्पनाप्रदा ॥
व्याख्या बोधस्वरूपा च सर्वसन्देहभञ्जिनी ।
विचारकारिणी ग्रन्थकारिणी शक्तिरूपिणी ॥
स्वरसङ्गीतसन्तानतालकारणरूपिणी ।
विषयज्ञानवाग्रूपा प्रतिविम्बेषु जीविनाम् ॥
व्याख्या सुधाकरा शान्ता वीणापुस्तकधारिणी ।
शुद्धसत्त्वस्वरूपा च सुशीला श्रीहरिप्रिया ॥
हिमचन्दनकुन्देन्दुकुसुदाम्भोजसन्निभा ।
जपन्ती परमात्मानं श्रीकृष्णं रत्नमालया ॥
तपःस्वरूपा तपसां फलदात्री तपस्विनी ।
बुद्धिविद्यास्वरूपा च सर्वसिद्धिप्रदा सदा ॥
यया विना च विश्वेषु मूको मृतसमः सदा ।
देवी तृतीया गदिता श्रुतुक्ता शतरूपिका ॥
यथागमं यथाकिञ्चिदपरां संनिबोध मे ॥"३॥*॥

सावित्री प्रकृतिर्यथा,—

"माता चतुर्णां वेदानां वेदाङ्गानां च छन्दसाम् ।
सन्ध्यावन्दनमन्त्राणां तन्त्राणाञ्च विचक्षणा ॥
द्विजातिजातिरूपा च जपरूपा तपस्विनी ।
ब्रह्मक्षत्रतेजोरूपा च सर्वसंस्कारकारिणी ॥
पवित्ररूपा सावित्री गायत्री ब्रह्मणः प्रिया ।
तीर्थानि यस्याः संस्पर्शं दर्शं वाञ्छन्ति शुद्धये ॥
शुद्धस्फटिकसङ्काशा शुद्धसत्त्वस्वरूपिणी ।
परमानन्दरूपा च परमा च सनातनी ॥
परब्रह्मस्वरूपा च निर्वाणपददायिनी ।
ब्रह्मतेजोमयी शक्तिस्तदधिष्ठातृदेवता ॥
यत्पादरजसा पूतं जगत् सर्वत्र गारद ! ।
देवी चतुर्थी कथिता पञ्चमीं वर्णयामि ते ॥"४॥

राधाप्रकृतिर्यथा,—

"प्रेमप्राणाधिका देवी या पद्मप्राणरूपिणी ।
प्राणाधिकप्रियतमा सर्वाभ्यः सुन्दरी वरा ॥
सर्वसौभाग्ययुक्ता च मानिनी गौरवान्विता ।
वामार्द्धाङ्गस्वरूपा च गुणेन तेजसा समा ॥
परा वरा सारभूता परमाद्या सनातनी ।
परमानन्दरूपा च धन्या मान्या च पूजिता ॥
रासक्रीड़ाधिदेवी च कृष्णस्य परमात्मनः ।
रासमण्डलसंभूता रासमण्डलमण्डिता ॥
राजेश्वरी सुरसिका रासवासनिवासिनी ।
गोलोकवासिनी देवी गोपीवेशविधायिका ॥
परमानन्दरूपा च सन्तोषहर्षरूपिणी ।
निर्गुणा च गुणाकारा निर्लिप्तात्मस्वरूपिणी ॥
निरीहा निरहङ्कारा भक्तानुग्रहविग्रहा ।
वेदानुसारध्यानेन विज्ञाता या विचक्षणैः ॥
दृष्टिदृष्टा सर्वदृष्टा सुरेन्द्रैर्मुनिपुङ्गवैः ।
वह्निशुद्धांशुकाधाना रत्नालङ्कारभूषिता ॥
कोटिचन्द्रप्रभाजुष्टपुण्यश्रीयुक्तविग्रहा ।
श्रीकृष्णभक्तिदा सेव दात्री च सर्वसम्पदाम् ॥
अवतारे च वाराहे वृषभानुसुता च या ।
यत्पादपद्मसंस्पर्शपवित्रा च वसुन्धरा ॥
ब्रह्मादिभिरदृष्टा या सर्वदृष्टा च भारते ।
क्षीरजसारसंभूता कृष्णवक्षःस्थलोज्ज्वला ॥
यथा घने नवघने लोला सौदामिनी सुने ! ।
षष्टिवर्षसहस्राणि प्रतप्तं ब्रह्मणा पुरा ॥
यत्पादपद्मनखरदृष्टये चात्मशुद्धये ।
न च दृष्टापि स्वप्नेऽपि प्रत्यक्षस्यापि का कथा ॥
तेनैव तपसा दृष्टा भुवि वृन्दावने वने ।
कथिता पञ्चमी देवी सा राधा परिकीर्त्तिता ॥
चांशरूपा कलारूपा कलांशांशसमुद्भवा ।
प्रकृतिः प्रतिविम्बेषु दैवश्च सर्वयोषितः ॥
परिपूर्णतमा षड्विधा देवी प्रकीर्त्तिता ।
यायाः प्रधानांशरूपा वर्णयामि निशामय ॥"५॥

गङ्गा यथा,—

"प्रधानांशस्वरूपा या गङ्गा भुवनपावनी ।
विष्णुविग्रहसंभूता द्रवरूपा सनातनी ॥
पापिपापेन्धदाहाय ज्वलदग्निस्वरूपिणी ।
सुखस्वर्गस्थानपाने निर्वाणपददायिनी ॥
गोलोके स्थानप्रस्थानसुखसोपानरूपिणी ।
पवित्ररूपा तीर्थानां सरिताञ्च परा वरा ॥
शम्भुमौलिजटामेरुसुक्तापंक्तिस्वरूपिणी ।
तपःसन्तापिनी सद्यो भारते च तपस्विनाम् ॥
पद्मपद्मचीरनिभा शुद्ध सत्त्वस्वरूपिणी ।
निर्ममा निरहङ्कारा साध्वी नारायण-
प्रिया ॥"६॥

तुलसी यथा,—

"प्रधानांशस्वरूपा च तुलसी विष्णुकामिनी ।
विष्णुभूषणरूपा च विष्णुपादस्थिता सती ॥
तपःसङ्कल्पपूजादिसद्यःसम्पादिनी सुने ! ।
सारभूता च पुष्पाणां पवित्रा पुण्यदा सदा ॥
दर्शनस्पर्शनाभ्यां च सद्योनिर्वाणदायिनी ।
कलौ कलुषपुञ्जेध्मदाहायाग्निस्वरूपिणी ॥
यत्पादपद्मसंस्पर्शसद्यःपूता वसुन्धरा ।
यत्स्पर्शदर्शं वाञ्छन्ति तीर्थानि चात्मशुद्धये ॥
यया विना च विश्वेषु सर्वकर्मातिनिष्फलम् ।
मोक्षदा या मुमुक्षूणां कामिनां सर्वकामदा ॥
कल्पवृक्षस्वरूपा च भारते ब्रह्मरूपिणी ।
ध्यानाय भारतानाञ्च प्राणानां परदेवता ॥" २॥

मनसा यथा,—

"प्रधानांशस्वरूपा या मनसा कश्यपात्मजा ।
शङ्करप्रियशिष्या च महाज्ञानविशारदा ॥
नागेश्वरस्यानन्तस्य भगिनी नागपूजिता ।
नागेश्वरी नागमाता सुन्दरी नागवाहिनी ॥
नागेन्द्रगणयुक्ता चा नागभूषणभूषिता ।
नागेन्द्रैर्वन्दिता सिद्धयोगिनी नागशायिनी ॥
विष्णुरूपा विष्णुभक्ता विष्णुपूजापरायणा ।
तपःस्वरूपा तपसां फलदात्री तपस्विनी ॥
दिव्यं चिलक्षवर्षञ्च तपस्तप्तं यया हरेः ।
तपस्विनीषु पूज्या च तपस्विना च भारते ॥
सर्पमन्त्राधिदेवी च ज्वलन्ती ब्रह्मतेजसा ।
ब्रह्मस्वरूपा परमा ब्रह्मभावेन तत्परा ॥
जरत्कारुमुनेः पत्नी क्षणांशस्य पतिव्रता ।
आस्तीकस्य मुनेर्माता प्रवरस्य तपस्वि-
नाम् ॥" ३॥

षष्ठी यथा,—

"प्रधानांशस्वरूपा या देवसेना च नारद ! ।
मातृकासु पूज्यतमा सा च षष्ठी प्रकीर्त्तिता ॥
शिशूनां प्रतिविम्बेषु प्रतिपालनकारिणी ।
तपस्विनी विष्णुभक्ता कार्त्तिकेयस्य कामिनी ॥
षष्ठांशरूपा प्रकृतेस्तेन षष्ठी प्रकीर्त्तिता ॥
पुत्रपौत्रप्रदात्री च धात्रीति जगतां सती ।
सुन्दरी युवती रम्या सन्ततं भर्तुरन्तिके ॥
स्थाने शिशूनां परमा वृद्धरूपा च योगिनी ।
पूजा द्वादशमासेषु यस्या विश्वेषु सन्ततम् ॥
पूजा च सूतिकागारे परा षष्ठदिने शिशोः ।
एकविंशतिमे चैव पूजा कल्याणहेतुकी ॥
शश्वन्नियमिता चैषा नित्या कान्या हुतिः परा ।
मातृरूपा दयारूपा शश्वद्रक्षणरूपिणी ॥
जले स्थले चान्तरीक्षे शिशूनां खप्नगोचरे ॥" ४॥

मङ्गलचण्डी यथा,—

"प्रधानांशस्वरूपा च देवी मङ्गलचण्डिका ।
प्रकृतेर्मुखसंभूता सर्वमङ्गलदा सदा ॥
रुष्टौ मङ्गलरूपा च संहारे कोपरूपिणी ।
तेन मङ्गलचण्डी सा पण्डितैः परिकीर्त्तिता ॥
प्रतिमङ्गलवारेषु प्रतिविम्बेषु वन्दिता ।
षष्ठ्युपचारैर्योषिद्भिर्भक्त्या च परिपूजिता ॥
पुत्रपौत्रधनैश्वर्ययशोमङ्गलदायिनी ।
लोकसन्तापपापार्त्तिदुःखदारिद्र्यनाशिनी ॥
परितुष्टा सर्ववाञ्छाप्रदात्री सर्वयोषिताम् ।
रुष्टा क्षणेन संहर्त्तुं शक्ता विश्वं महेश्वरी ॥"५॥

काली यथा,—

"प्रधानांशस्वरूपा च काली कमललोचना ।
दुर्गाललाटसम्भूता रणे शुम्भनिशुम्भयोः ॥
दुर्गार्द्धांशस्वरूपा सा गुणेन तेजसा समा ।
कोटिसूर्यप्रभाजुष्टपुण्यलावण्यविग्रहा ॥
प्रधाना सर्वशक्तीनां वरा बलवती परा ।
सर्वसिद्धिप्रदा देवी परमा सिद्धयोगिनी ॥
क्षणभक्ता क्षणतुल्या तेजसा विष्णुमेगुणैः ।
क्षणभावनया शश्वत् क्षणवर्गा सनातनी ॥
संहर्त्तुं सर्वब्रह्माण्डं शक्ता निश्वासमात्रतः ।
रणं दैत्यैः समं तस्याः क्रीड़या लोकरक्षया ॥
धर्मार्थकाममोक्षांश्च दातुं शक्ता च पूजिता ।
ब्रह्मादिभिः स्तूयमाना मुनिभिर्मनुभिर्नरैः ॥"६॥

वसुन्धराप्रकृतिर्यथा,—
"प्रधानांशस्वरूपा च प्रकृतेश्च वसुन्धरा।
आधाररूपा सर्व्वेषां सर्व्वशस्यप्रसूतिका॥
रत्नाकरा रत्नगर्भा सर्व्वरत्नाकरालया।
प्रजाभिश्च प्रजेशैश्च पूजिता वन्दिता सदा॥
सर्व्वोपजीव्यरूपा च सर्व्वसम्पद्विधायिनी।
यया विना जगत् सर्व्वं निराधारं चराचरम्॥७॥
प्रकृतेश्च कला या या सा निबोध मुनीश्वर!।
यस्य यस्य च याः पत्न्यस्ताः सर्व्वा वर्णयामि ते॥
स्वाहा देवी वह्निपत्नी त्रिषु लोकेषु पूजिता।
यया विना हविर्दानं न ग्रहीतुं सुराः क्षमाः॥१
दक्षिणा यज्ञपत्नी च दीक्षा सर्व्वत्र पूजिता।
यया विना च विश्वेषु सर्व्वं कर्म्म च निष्फलम्॥२॥
स्वधा पितॄणां पत्नी च मुनिभिर्मनुभिर्नरैः।
पूजिता पिण्डदानञ्च निष्फलञ्च यया विना॥३॥
स्वस्तिदेवी वायुपत्नी प्रतिविश्वेषु पूजिता।
आदानञ्च प्रदानञ्च निष्फलञ्च यया विना॥४॥
पुष्टिर्गणपतेः पत्नी प्रतिविश्वेषु पूजिता।
यया विना परिक्षीणाः पुमांसो योषितो भवेत्॥५॥
अनन्तपत्नी तुष्टिश्च पूजिता वन्दिता भवे।
यया विना न सन्तुष्टाः सर्व्वे लोकाश्च सन्ततम्॥६
ईशानपत्नी सम्पत्तिः पूजिता च सुरैर्नरैः।
सर्व्वलोका दरिद्राश्च विश्वेषु च यया विना॥७॥
धृतिः कपिलपत्नी च सर्व्वैः सर्व्वत्र पूजिता।
सर्व्वलोका अधैर्य्याः स्युर्दुर्भगत्वं च यया विना॥८
यमपत्नी क्षमा साध्वी सुशीला सर्व्वपूजिता।
समुन्मत्ताश्च रुष्टाश्च सर्व्वलोका यया विना॥९॥
क्रीड़ाधिष्ठातृदेवी च कामपत्नी रतिः सती।
केलिकौतुकहीनाश्च सर्व्वलोका यया विना॥१०
सत्यपत्नी सती मुक्तिः पूजिता जगतां प्रिया।
यया विना भवे लोका बन्धुतारहिताः सदा॥११
मोहपत्नी दया साध्वी पूजिता च जगत्प्रिया।
सर्व्वे लोकाश्च सर्व्वत्र निष्ठुराश्च यया विना॥१२
पुण्यपत्नी प्रतिष्ठा सा पुण्यरूपातिपूजिता।
यया विना जगत् सर्व्वं जीवन्मृतपरं मुने!॥१३
सुकर्म्मपत्नी कीर्त्तिश्च धन्या मान्या च पूजिता।
यया विना जगत् सर्व्वं यशोहीनं हतं यथा॥१४
क्रिया उद्योगपत्नी च पूजिता सर्व्वसम्मता।
यया विना जगत् सर्व्वमुच्छ्रमिव नारद!॥१५॥
अधर्म्मपत्नी मिथ्या सा सर्व्वधूर्त्तैश्च पूजिता।
यया विना जगन्मुक्तमुच्छ्रं विधिनिर्म्मितम्॥
सत्ये चादर्शना या च त्रेतायां सूक्ष्मरूपिणी।
अर्द्धावयवरूपा च द्वापरे संहृता भिया॥
कलौ महाप्रमत्ता च सर्व्वत्र व्यापिका बलात्।
कपटेन समं भ्रात्रा धर्मस्यैव गृहे गृहे॥१६॥
शान्तिः-१७ लज्जा १८ च भार्य्ये द्वे सुशीलस्य च पूजिता।
याभ्यां विना जगत् सर्व्वमुच्छ्रमिव नारद!॥
धृतेश्च भार्य्यास्तिस्रश्च बुद्धि-१९ मेधा २० स्मृति-२१ क्षमा।
याभिर्विना जगत् सर्व्वं मृढं मृतसमं तदा॥

मूर्त्तिश्च धर्म्मपत्नी सा कान्तिरूपा मनोहरा।
परमा सा च विश्वौघा निराधारा यया विना॥
सर्व्वत्र शोभारूपा सा लक्ष्मीर्मूर्त्तिमती सती।
श्रीरूपा मूर्त्तिरूपा च मान्या धन्या च पूजिता॥२२॥
कालाग्निरुद्रपत्नी च निद्रा सा सिद्धयोगिनी।
सर्व्वलोकाः समाच्छन्ना मायायोगेन राचिषु॥२३॥
कालस्य तिस्रो भार्य्याश्च सन्ध्या-२४ रात्रि-२५ दिनानि च २६।
याभिर्व्विना विधात्रा च संख्यां कर्त्तुं न शक्यते॥
क्षुत्-२७ पिपासे २८ मनोभार्य्ये धन्ये मान्ये सुपूजिते।
याभ्यां व्याप्तं जगत् सर्व्वं युक्तचिन्तितमेव च॥
प्रभा च २९ दाहिका ३० चैव द्वे भार्य्ये तेजसस्तथा।
याभ्यां विना जगत् स्रष्टुं विधातापि नहीश्वरः॥
कालकन्ये मृत्यु-३१जरे ३२ प्रज्वरस्य प्रिये प्रिये।
याभ्यां जगत् समुच्छ्रन्नं विधात्रा निर्म्मितं विधौ॥
निद्राकन्या च तन्द्रा ३३ सा प्रीति-३४ रन्या सुखप्रिये।
याभ्यां व्याप्तं जगत् सर्व्वं विधिपुत्रविधेर्विधौ॥
वैराग्यस्य हि जाये च श्रद्धा-३५भक्ती ३६ च पूजिते।
याभ्यां शून्यञ्जगत् सर्व्वं जीवन्मुक्तमिदं मुने!॥
अदिति-३७र्हैवमाता च सुरभी २८ च गवां प्रसूः।
दितिश्च ३९ दैत्यजननी कद्रुश्च ४० विनता ४१ दनुः ४२॥
उपयुक्ताः सृष्टिविधौ स्मृताश्च प्रकृतेः कलाः॥*
कलाख्यान्याः सन्ति वक्ष्यास्तासु काश्चिन्निबोध मे॥
रोहिणी ४३ चन्द्रपत्नी च संज्ञा ४४ सूर्य्यस्य कामिनी।
शतरूपा४५ मनोर्भार्य्या शचीन्द्रस्य च गेहिनी ४६॥
तारा४७ बृहस्पतेर्भार्य्या वशिष्ठस्य त्वरुन्धती ४८।
अहल्या ४९ गौतमस्त्री तु सानसूया ५० चिरकामिनी॥
पितॄणां मानसी कन्या मेनका ५१ साम्बिकाप्रसूः।
लोपामुद्रा ५२ तथा भूती ५३ कुबेरकामिनी तथा॥
वरुणानी ५४ यमस्त्री च बलेर्विन्ध्यावली ५५ तथा।
कुन्ती च ५६ दयमन्ती च ५७ यशोदा ५८ देवकी ५९ सती॥
गान्धारी ६० द्रौपदी ६१ सत्या ६२ सावित्री६३ सत्यवतप्रिया।
वृषभानुप्रिया साध्वी राधामाता कलावती६४॥
मन्दोदरी ६५ च कौशल्या ६६ सुभद्रा ६७ कैटभी ६८ तथा।

रेवती ६९ सत्यभामा ७० च कालिन्दी ७१ लक्ष्मणा ७२ तथा॥
जाम्बवती ७३ नाग्नजिती ७४ मित्रविन्दा ७५ तथापरा।
लक्ष्मणा ७६ रुक्मिणी ७७ सीता ७८ स्वयं-लक्ष्मीः प्रकीर्त्तिता॥
कला योजनगन्धा च७९ व्यासमाता महासती।
वाग्दुष्टा तपोधा ८० च चित्रलेखा च ८१ तत्सखी॥
प्रभावती८२ भानुमती८३तथा मायावती८४सती।
रेणुका ८५ च भृगोर्माता हलिमाता च रोहिणी ८६॥
एकानंशा ८७ च दुर्गांशा श्रीकृष्णभगिनी सती।
वक्ष्यन्ति कलाश्चैव प्रकृतेरेव भारते॥
या याश्च ग्रामदेयस्ताः सर्व्वाश्च प्रकृतेः कलाः।
कलांशांशसमुद्भूताः प्रतिविश्वेषु योषितः॥७॥
योषितामपमानेन प्रकृतेश्च पराभवः।
ब्राह्मणी पूजिता येन पतिपुत्रवती सती॥
प्रकृतिः पूजिता तेन वस्त्रालङ्कारचन्दनैः।
कुमारी चाष्टवर्षीया वस्त्रालङ्कारचन्दनैः।
पूजिता येन विप्रस्य प्रकृतिस्तेन पूजिता॥८॥
सर्व्वाः प्रकृतिसम्भूता उत्तमाधममध्यमाः।
सत्त्वांशाश्चोत्तमा ज्ञेयाः सुशीलाश्च पतिव्रताः॥
मध्यमा राजसाश्चांशास्ताश्च भोग्याः प्रकीर्त्तिताः।
सुखसम्भोगवश्याश्च स्वकार्य्ये तत्पराः सदा।
अधमास्तामसाश्चांशा अजातकुलसम्भवाः॥
दुर्मुखाः कुलटा धूर्त्ताः स्वतन्त्राः कलहप्रियाः।
पृथिव्यां कुलटा याश्च स्वर्गे चाप्सरसां गणाः॥
प्रकृतेस्तामसांशांशाः पुंश्चल्यः परिकीर्त्तिताः।
एवं निगदितं सर्व्वं प्रकृतेः परिकीर्त्तनम्॥८॥
ताश्च सर्व्वाः पूजिताश्च पुण्यक्षेत्रे च भारते।
पूजिता सुरथेनादौ दुर्गा दुर्गतिनाशिनी॥
द्वितीये रामचन्द्रेण रावणस्य वधार्थिना॥
ततश्चाब्जगतां माता त्रिषु लोकेषु पूजिता।
जातादौ दक्षयज्ञाच्च निहत्य देवदानवान्॥
ततो देहं परित्यज्य यज्ञे भर्त्तुश्च निन्दया।
जज्ञे हिमवतः पत्न्यां लेभे पशुपतिं पतिम्॥
गणेशश्च स्वयं कृष्णः स्कन्दो विष्णुकलोद्भवः।
बभूवतुस्तौ तनयौ पश्चात्तस्याश्च भौनक!॥
लक्ष्मीर्म्मैलयभूपेन प्रथमे परिपूजिता।
त्रिषु लोकेषु ततश्चादेवतामुनिमानवैः॥
सावित्री चाश्वपतिना प्रथमे परिपूजिता।
ततश्चात्रिषु लोकेषु देवतामुनिमानवैः॥
आदौ सरस्वती देवी ब्रह्मणा परिपूजिता।
ततश्चात्रिषु लोकेषु देवतामुनिमानवैः॥
प्रथमे पूजिता राधा गोलोके रासमण्डले।
पौर्णमास्यां कार्त्तिकस्य कृष्णेन परमात्मना॥
गोपिकाभिश्च गोपैश्च बालिकाभिश्च बालकैः।
गवां गणैः सुरभ्या च ततश्चाज्ञायया हरेः॥
तदा ब्रह्मादिभिर्देवैर्मुनिभिर्मनुभिस्तथा।
पुष्पधूपादिभिर्भक्त्या पूजिता वन्दिता सदा॥

पृथिव्यां प्रथमे देवी सुयज्ञेनैव पूजिता।
शङ्करेणोपदिष्टेन पुण्यक्षेत्रे च भारते॥
त्रिषु लोकेषु तत्पश्चादाज्ञया परमात्मनः।
पुष्यधूपादिभिर्भक्त्या पूजिता मुनिभिः सुरैः॥
कलया वा: सशुद्धभूताः पूजितास्ताश्च भारते।
पूजिता ग्रामदेवाश्च ग्रामे च नगरे मुने!॥
एवं ते कथितं सर्वं प्रकृतेश्चरितं शुभम्।
यथागमं लक्षणञ्च किं भूयः श्रोतुमिच्छसि॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे प्रकृतिचरितं नामानुक्रमः प्रथमोऽध्यायः॥ * ॥ पुरुषनाम्नोऽग्रे प्रकृतेर्नाम्न उच्चार्य्यता यथा,—

नारद उवाच।

"आदौ राधां समुच्चार्य्य पश्चात् कृष्णं विदुर्बुधाः।
निमित्तमस्य मां भक्तं वद भक्तजनप्रिय!॥

श्रीनारायण उवाच।

निमित्तमस्य त्रिविधं कथयामि निशामय।
जगन्माता च प्रकृतिः पुरुषश्च जगत्पिता।
गरीयसीति जगतां माता प्रणतगुरोः पितुः॥
राधाक्लेशेति गौरीशैत्येवं शब्दः श्रुतौ श्रुतः।
कृष्णारा शिवगौरीति लोके न च कदा श्रुतः॥
प्रसीद रोहिणीचन्द्र महाार्घमिदं मम।
गृहाणार्घं मया दत्तं संज्ञया सह भास्कर॥
प्रसीद कमलाकान्त गृहाण मम पूजनम्।
इति दृष्टं सामवेदे कौथुमे मुनिसत्तम!॥
राधाशब्दोच्चारणादेव स्त्रीतो भवति माधवः।
धाशब्दोच्चरितः पश्चाद्धावत्येव ससम्भ्रमः॥
आदौ पुरुषमुच्चार्य्य पश्चात् प्रकृतिमुच्चरेत्।
स भवेन्नाट्य नामी च वेदातिक्रमणे मुने!॥"
इति ब्रह्मवैवर्त्ते तृतीये श्रीकृष्णजन्मखण्डे ५० अध्यायः॥

प्रकृष्टं, त्रि, (कृष्यते इति। प्र+कृष+क्त।) प्रकर्षयुक्तम्। तत्पर्य्यायः। सुखम् २ प्रसुखम्३ प्रवर्हम् ४ वर्य्यम् ५ वरेण्यम्६ प्रवरम् ७ पुरोगम् ८ अनुत्तरम् ९ प्राग्रहरम् १० प्रवेकम् ११ प्रधानम् १२ अग्रेसरम् १३ उत्तमम् १४ अग्र्यम् १५ ग्रामण्यीः १६ अग्रणीः १७ अग्रिमम् १८ जात्यम् १९ अग्र्याम् २० अनुत्तमम्२१ अनवरार्द्ध्यम् २२ श्रेष्ठम् २३ परार्द्ध्यम् २४ परम् २५। इति हेमचन्द्रः। ६। ७४॥ (यथा, मनुः। ७। १७०।

"यदा प्रकृष्टा मन्येत सर्व्वास्तु प्रकृतीर्भृशम्।
अत्युच्छ्रितं तथात्मानं तदा कुर्व्वीत विग्रहम्॥"

आकृष्टम्। यथा, देवीभागवते। १। ६। ८२।

"रथाङ्गेन तदा च्छिन्ने विष्णुना प्रभविष्णुना।
जघनोपरि वेगेन प्रकृष्टे शिरसी तयोः॥")

प्रकोष्ठः, पुं, (प्रकुष्यतेऽनेनेति। प्र+कुष निष्कर्षे+"उषिकुषीति।" उणा० २। ४। इति स्थन्।) कफोणेरधोमणिबन्धपर्य्यन्तहस्तभागः। इत्यमरः। २। ६। ८०॥ (यथा, रघुः। ३। ५६।

"ततः प्रकोष्ठे हरिचन्दनाङ्किते
प्रमथ्यमानार्ण्यवधीरनादिनीम्।
रघुः प्रशाङ्कार्द्धसुखेन पत्रिणा
प्रारासनज्यामनुनाद्विडौजसः॥")

गृहद्वारपिण्डकम्। वीथी इति विहोन्द इति च ख्यातम्। इति प्रयागशब्दटीकायां भरतसुकुटमथुरेशाः॥ (यथा, मानवे। ७। २२३। श्लोकटीकायां कुल्लूकभट्टः।

"ततः सन्ध्योपासनं कृत्वा तस्मात् प्रदेशात् कक्षान्तरं विविक्तप्रकोष्ठावकाशमन्यदृगत्वा गृहाभ्यन्तरे घृतशस्त्रो रहस्याभिधायिनां चराणां स्वयापारं शृणुयात्॥")

प्रक्खरः, पुं, (प्रचर+पृषोदरादित्वात् साधुः।) अश्वकवचः। इति शब्दमाला॥ प्रखर इति च पाठः॥

प्रक्रन्ता, [न्तृ] त्रि (प्र+क्रम+लृच्।) उपक्रमकर्त्ता। आरम्भकर्त्ता। इति व्याकरणम्॥

प्रक्रमः, पुं, (प्र+क्रम+भावे घञ्।) क्रमः। अवसरः। इति मेदिनी। मे, ४६॥ प्रथमारम्भः। तत्पर्य्यायः। उपक्रमः २। इत्यमरः। ३। २। २६॥ (यथा, कथासरित्सागरे। १८। ६३।

"पूर्व्वजैरपि हि प्राची प्रक्रमेण जिता दिशः।
गङ्गोपकण्ठे वासश्च विहितो हस्तिनापुरे॥")

प्रक्रान्तः, त्रि, (प्र+क्रम+क्तः।) प्रकरणस्थः। आरब्धः। यथा, भट्टिः। ४। ११।

"अतिष्ठदुग्रं जपन् सन्ध्यां प्रक्रान्तामायतीगवम्।
प्रातस्तरां पतत्रिभ्यः प्रबुद्धः प्रणमन्विभुम्॥"

प्रक्रिया, स्त्री, (प्र+कृ+भावे अः।) नृपदीनां चामरधूननच्छत्रधारणादिव्यापारः। तत्पर्य्यायः। अधिकारः २। इत्यमरः। २। ८। ३१॥ अधीकारः ३ नियतविधिः ४। इति शब्दरत्नावली॥ प्रकृष्टकार्य्यम्॥ (यथा, महाभारते। १२। १११। ५८।

"नोच्छ्रितं सहते कश्चित् प्रक्रियां वैरकारिकाम्।
सुचेरपि हि युक्तस्य दोष एव निपात्यते॥")

प्रक्लिन्नः, त्रि, (प्र+क्लिद्+क्तः।) क्लिन्नः। इति जटाधरः॥ प्रकर्षेण क्लेदयुक्तश्च॥

प्रक्वणः, पुं, (प्र+क्वण शब्दे+"क्वणो वीणायाञ्च।" ३। ३। ६५। इति अप्।) वीणायाः क्वणितः। वीणाशब्दः। तत्पर्य्यायः। प्रक्वाणः २। इत्यमरः। १। ६। २४॥ सुक्वाणः ३ सुक्वणः ४ उपक्वाणः ५ उपक्वणः ६। इति भरतः॥

प्रक्वाणः, पुं, (प्र+क्वण+घञ्।) प्रक्वणः। इत्यमरः। १। ६। २४॥

प्रचरः, पुं, (प्रकर्षेण चरति सञ्चलतीति। प्र+चर+अच्।) अश्वसन्नाहः। इति हेमचन्द्रः। ४। ३१७॥

प्रचालनं, क्ली, (प्र+चालि+ल्युट्।) धावनम्। मार्জ্জনम्। यथा,—

"घर्म्मार्थं यस्य वित्तेहा वरं तस्य निरीहता।
प्रचालनाहि पङ्कस्य दूरादस्पर्शनं वरम्॥"

इति हितोपदेशे १ परिच्छेदः॥

प्रचालितः, त्रि, (प्र+चालि+क्तः।) धौतः। मार्জ্জितः। इति हलायुधः॥

प्रक्षेपः, पुं, (प्र+क्षिप+घञ्।) औषधादिषु क्षेपणीयद्रव्यम्। यथा,—

"प्रक्षेपः पादिकः काथात् स्नेहे कल्कसमो मतः।
षोड़शांशश्चतुर्भागं वातपित्तकफार्त्तिषु॥
क्षौद्रं कषाये दातव्यं विपरीता तु शर्करा।
मात्रा क्षौद्रघृतादीनां स्नेहे क्वाथे च चूर्णवत्॥
साधिकं द्विषु विन्यूत्यं जरणायास्तु
प्राग्भिकाः॥"

इति वैद्यकपरिभाषा॥

विक्षेपः। यथा, "समित्यक्षेपान्तं कर्म्म कृत्वा।" इति भवदेवभट्टः॥ (प्रहरणम्। यथा, भागवते। ४। २६। १६।

"मनोरभिसृतो दृप्तो दृप्तश्रीड़ो दृप्तकूवरः।
पञ्चेन्द्रियार्थप्रक्षेपः सप्तधातुवरूथकः॥")

प्रक्षेपणं, क्ली, (प्र+क्षिप्+ल्युट्।) प्रकर्षेण क्षेपः। निक्षेपणम्। (यथा, याज्ञवल्क्ये। २। २६४।

"अर्द्धप्रक्षेपणात् विंशं भागं शुल्कं नृपो हरेत्॥")

प्रक्ष्वेड़नः, पुं, (प्रक्ष्वेड़तीति। प्र+क्ष्विड़ अव्यक्तशब्दे+ल्युः।) नाराचः। इत्यमरः। २। ८। ८७॥

प्रक्ष्वेड़ना, स्त्री, (प्रक्ष्वेड़न+टाप्। यद्वा, प्रक्ष्वेड़नं अव्यक्तशब्दोऽस्यस्या इति। अच्। टाप्।) नाराचः। इत्यमरटीकायां भगीरथः॥

प्रक्ष्वेदनः, पुं, (प्रक्ष्वेदनीति। प्र+क्ष्विड अव्यक्तशब्दे+ल्युः।) नाराचः। इत्यमरटीकायां भगीरथः॥

प्रक्ष्वेदना, स्त्री, (प्रक्ष्वेदन+टाप्।) नाराचः। इत्यमरटीकायां भगीरथः॥

प्रखरः, पुं (प्रकृष्टः खरः।) हयसन्नाहः। कुक्कुरः। अश्वतरः। अत्यन्तखरे, त्रि। इति मेदिनी॥

प्रख्यः, त्रि, (प्रख्यातीति। प्र+ख्या ख्याताै+कः।) उत्तरपदे तुल्यार्थवाचकः यथा,—

"सुरुत्तरपदे प्रख्यः प्रकारः प्रतिमो निभः॥"

इति हेमचन्द्रः॥

(यथा, महाभारते। १। २०८। ३१।

"द्विपच्चगरुड़प्रख्यैर्द्वारैः सौधैश्च शोभितम्।
गुप्तमभ्रचयप्रख्यैर्गोपुरैर्मन्दरोपमैः॥"

श्रेष्ठः। यथा, तत्रैव। १२। २०४। ८।

"क्षात्रसूत्रपदे पुंसां च्यवात् पापस्य कर्म्मणः।
यथादर्शतले प्रख्ये पश्यत्यात्मानमात्मनि॥")

प्रख्यातः, त्रि, (प्र+ख्या+क्तः।) प्रकृष्टख्यातियुक्तः। विख्यातः। यथा,—

"यस्य व्याकरणे वरेण्यघटनास्फीताः प्रबन्धा दश
ख्याता नव वैद्यकेऽपि तिथिनिर्द्धारार्थ-
मेकोऽद्भुतः॥"

इति मुग्धबोधव्याकरणे तद्धिताध्यायः॥

प्रख्यातवंशकः, पुं, (प्रख्यातो वंशो जनयिता यस्य। कप्।) विख्यातपिप्पलकः। यथा,—

"स्यादासुर्य्यायणोऽस्य पुत्रः प्रख्यातवंशकः॥"

इति हेमचन्द्रः। ३। १६६॥

प्रख्यातिः, स्त्री, प्रकृष्टकीर्त्तिः। विख्यातिः। प्रपूर्ब्बख्याधातोः क्तिन्प्रत्ययनिष्पन्ना॥

प्रगण्डः, पुं, (प्रत्यासन्नौ गण्डौ यस्मिन्।) कर्णरोपरिकेशपर्य्यन्तभागः। इत्यमरः। २। ६। ८०॥ कनुइ अवधि बगल पर्य्यन्त इति भाषा॥

प्रगण्डी, स्त्री, (प्रगण्ड+गौरादित्वात् ङीष्) बहिःप्राकारः। दुर्गप्राकारभित्तौ शूराणां उपवेशनस्थानानि। (यथा, महाभारते। १२। ६६। ४३।
"प्रगण्डीः कारयेत् सम्यगाकाशजननीस्तदा॥")

प्रगतजानुः, त्रि, (प्रगते संश्लिष्टे जानुनी यस्य।) प्रगतजानुकः। इत्यमरटीकायां रमानाथः॥

प्रगतजानुकः, त्रि, (प्रगते जानुनी यस्य। कप्।) यस्य जानुनोर्मध्ये नित्यं कादाचित्कं वा महदन्तरालं सः। प्राफाराक् व्यक्ति इति भाषा॥ तत्पर्य्यायः। प्रङ्गुः २। इत्यमरः। २। ६। ४७॥ प्रङ्गः ३ प्रगतजानुः ४। इति भरतः॥

प्रगन्धः, पुं, (प्रकृष्टो गन्धो यस्य।) पर्पटः। इति राजनिर्घण्टः॥

प्रगल्भः, त्रि, (प्रगल्भते इति। प्र+गल्भ धार्ष्ट्ये+पचाद्यच्।) प्रत्युत्पन्नमतिः। तत्पर्य्यायः। प्रतिभान्वितः २। इत्यमरः। ३। १। २५॥ (यथा, महाभारते। १२। ६८। ५८।
"प्रज्ञा प्रगल्भं कुरुते मनुष्यं
राजा कृशान् वै कुरुते मनुष्यान्॥")

प्रगल्भता, स्त्री, प्रगल्भस्य भावः। (प्रगल्भ+तल्।) प्रागल्भ्यम्। तत्पर्य्यायः। उत्साहः २ अभियोगः ३ उद्यमः ४ प्रौढिः ५ उद्योगः ६ क्रियादैर्घ्यं ७ अध्यवसायः ८ ऊर्ज्जः ९। इति हैमचन्द्रः। २। २१३॥ तस्य लक्षणम्। यथा,
"निःशङ्कत्वं प्रयोगेषु बुधैरुक्ता प्रगल्भता॥"
इत्युज्ज्वलनीलमणिः॥
(यथा, कुमारे। ६। ३२।
"आर्य्याप्यरुन्धती तत्र व्यापारं कर्त्तुमर्हति।
प्रायेणैवंविधे कार्य्ये पुरन्ध्रीणां प्रगल्भता॥")

प्रगल्भा, स्त्री, (प्रगल्भते धृष्टा भवतीति। प्र+गल्भ धार्ष्ट्ये+पचाद्यच्+टाप्।) नायिकाभेदः। अस्या लक्षणम्। पतिमात्रविषयकेलिकलाप्रकोविदा। अस्याश्चेष्टा रतिप्रीतिः। आनन्दादात्मसंमोहः। रतिप्रीतिर्यथा,—
"संस्पृश्य स्तनमाकलय्य वदनं संक्षिप्य कण्ठस्थलं
निर्य्यौयाधरबिम्बमम्बरमपाकृष्य युदस्यालकम्।
देवस्यानुजिनीपतेः समुदयं निश्वासमाने प्रिये
वामाक्षी वसनाञ्चलेन श्रवणयोर्नीलोत्पलं निह्नुते॥"
आनन्दादात्मसंमोहो यथा,—
"नखाङ्कितसुरःस्थलेऽधरतले रदस्य क्षतं
श्रुता वकुलमालिका विगलिता च सुक्तावली।
रतान्तसमये मया सकलमेतदाचोचितं
स्मृतिः क्व च पतिः क्व च क्व च तवालिभिश्चाविधिः॥"
सा मानावस्थायां त्रिविधा। धीरा अधीरा धीराधीरा च। यत्र कोपप्रकाशो धीरा। यत्र न कोपप्रकाशो अधीरा। यत्राल्पकोपप्रकाशो धीराधीरा। प्रौढ़ाधीरायान्तु रतावौदास्यम्। अधीरायान्तर्ज्जनताड़नादि। धीराधीरायां रतावौदास्यं तर्ज्जनादि च कोपस्य प्रकाशकम्। प्रौढ़ाधीरा यथा,—
"नो तल्पं भजसे न जल्पसि सुधाधारानुकारा गिरो
दृक्पातं कुरुषे न वा परिजने कोपप्रकाशच्छलात्।
इत्थं केतकगर्भगौरि दयिते कोपस्य संगोपनं
किं स्यादेव नचेत् पुनः सहचरी कुर्व्वीत साचि स्मितम्॥"
प्रगल्भा अधीरा यथा,—
"प्रतिफलमवलोक्य स्वीयमिन्दोः कलायां
हरशिरसि परस्त्रा वासमाशङ्कमाना।
गिरिशमचलकन्या तर्ज्जयामास कम्प
प्रचलवलयवेल्लत्कान्तिभाजा करेण॥"
प्रगल्भा धीराधीरा यथा,—
"तल्पोपान्तमुपेयुषि प्रियतमे साचीकृतग्रीवया
काङ्क्षव्याकुलवाचि साचिहसितस्फूर्जत्कपोलश्रिया।
हस्तन्यस्तकरे पुनर्मृगदृशा साचारसच्चालितप्रोष्ठीपृष्ठमयूखमांसलरुचो विस्कारिता दृष्टयः॥"
इति रसमञ्जरी॥
(तल्लक्षणञ्च यथा साहित्यदर्पणे। ३। १०१।
"स्मरान्धा गाढ़तारुण्या समस्तरतकोविदा।
भावोन्नता दरव्रीड़ा प्रगल्भाक्रान्तनायका॥"
तस्या उदाहरणभेदादिकं तत्रैव विशेषतो द्रष्टव्यम्॥)

प्रगाढ़, त्रि, (प्रकर्षेण गाह्यते सेति। प्र+गाह+क्तः। "यस्य विभाषा।" ७। २। १५। इति न इट्।) भृशम्। क्षिप्रम्। इत्यमरः। ३। ३। ४४॥ (यथा, महाभारते। ४। ५६। २६।
"अहमिन्द्राद्दृढ़ां सृष्टिं ब्रह्मणः क्षतहस्तताम्।
प्रगाढे तुमुलं चित्रमभ्यश्चिच्चं प्रजापतेः॥")
दृढ़म्। इति भरतः॥ (यथा, महाभारते। ७। ६७। ४८।
"तत्रान्तरीक्षे वाणानां प्रगाढ़ानां विशाम्पते।
संघर्षेण महार्चिष्मान् पावकः समजायत॥")
घनम्। यथा, सुश्रुते चिकित्सितस्थाने ५ अ०।
"तूष्णीप्रतूर्य्योः स्विन्नसवणमुदकेन पाययेत् पिप्पल्यादिचूर्णं वा क्षिप्रमुपचारप्रगाढ़ं सर्पिर्वर्त्तिभिश्चैनमुपक्रमेत्॥")

प्रगाता, [तृ] त्रि, (प्र+गै+तृच्।) उत्तमगायकः। इति शब्दरत्नावली॥ (यथा, महाभारते। ३। २३६। ८।
"ततो गोपाः प्रगातारः शुश्रुवुः तूर्य्यवादितं।
घार्त्तराष्ट्रमुपातिष्ठन् कन्याश्चैव सलङ्कृताः॥")

प्रगुणः, त्रि, (प्रकर्षेण गुणो यत्र।) ऋजुः। इत्यमरः। ३। १। ७२॥ (प्रकृष्टगुणवति, त्रि। यथा, रघौ। ६। ४६।
"परिचयं चलल्लनिपातने
भयरुषोश्च तदिङ्गितबोधनम्।
श्रमनयात् प्रगुणाश्च करद्वयौ
तनुमतोऽनुमतः सचिवैर्यथौ॥")

प्रगृह्यं, त्रि, (प्रगृह्यते इति। प्र+ग्रह+"पदास्वैरिवाह्यापस्त्येषु च।" ३। १। ११६। इति क्यप्। "ग्रहिज्येति।" ६। १। १६। इति सम्प्रसारणम्।) सन्धिरहितं पदम्। इति मुग्धबोधव्याकरणम्॥ पदपक्षपरतन्त्रयद्भिर्भूतेषु गृह्यपदं निपात्यते। यथा, प्रगृह्यं पदं यत् स्वरेण न समुन्नीयते। इति दुर्गादासः॥ "आप्रगृह्यः स्तुतौ वाक्ये।" इत्यमरः॥ प्रगृह्यः पाणिन्यादिकृतप्रगृह्यसंज्ञो डाद्युवन्त्वरहितः आमन्त्र्यः योऽचा न सन्धीयते स इत्यर्थः। स्तुतौ सरसे यथा। आ ज्ञातं स जटायुरेषः। वाक्ये यथा। आ एवं मन्यसे। इति भरतः॥

प्रगे, व्य, (प्रकर्षेण गीयतेऽत्रेति। प्र+गै+के।) प्रातः। इत्यमरः। ३। ४। १६॥ (यथा, माघे। १२। १।
"इत्थं रथाङ्गेभनिषादिनाय्युगे
गणो नृपाणामथ तोरणाङ्गणे।
प्रस्थानकालक्षमवेषकल्पना
कृतक्षणश्चेपसुदेक्षताच्युतम्॥")

प्रगेतस्, त्रि, (प्रगे प्रातर्भव इति। प्रगे+"सायचिरमिति।" ४। ३। २३। इति ष्यु तुट् च।) प्रगे भवः। प्रातर्भवः। तत्पर्य्यायः। चक्षनः २। इति राजनिर्घण्टः॥

प्रग्रहः, पुं, (प्रगृह्यते इति प्रगृह्णात्यनेनेति वा। प्र+ग्रह+"प्रे दणिनाम्।" ३। ३। ५२। "रश्मौ च।" ३। ३। ५३। इति घञभावपक्षे "अवृदृदृनिश्विगमश्च।" ३। ३। ५८। इति अप्।) तुलारज्जुः। अश्वादिरश्मिः। वल्गी। इत्यमरः। ३। ३। २३६॥ नियमनम्॥ (यथा, महाभारते। ३। १७६। १६।
"नहि मे सृज्यते कश्चित् कथञ्चित् प्रग्रहं गतः।
गवो वा महिषो वापि यदि वाश्वे नरोत्तम!॥")
सूचः। रश्मिः। (यथा, गोसाधाध्याये। ८।
"इन्दोः प्राच्यां भवति तरणेः प्रग्रहः किं प्रतीच्याम्॥")
सुवर्णासुमहीग्रहः। इति मेदिनी॥ कर्णिकारवृक्षः। इति राजनिर्घण्टः॥ (तत्पर्य्यायो यथा,
"आरेवतो राजवृक्षः प्रग्रहश्चतुरङ्गुलः
आरग्वधोऽथ सम्याकः शुकमालः सुवर्णकः॥"
इति वैद्यकरत्नमालायाम्॥
प्र+ग्रह+भावे अप्। इन्द्रियादीनां निग्रहः। यथा, हरिवंशे भविष्यपर्व्वणि। ८। ७८।
"व्यर्थो हि केवलं तस्य प्रग्रहो वाङ्मनोधरः।
तस्मात् सर्व्वप्रयत्नेन चित्तं रक्ष जनार्द्दन!॥"
धारणम्। यथा, हरिवंशे भविष्यपर्व्वणि २२। ४।
"उद्धवोऽथ महाबुद्धिरक्रूरो महाबलः।
अन्ये च यादवाः सर्व्वे कवचप्रग्रहे रताः॥"
अवलम्बनम्। यथा, हरिवंशे। ४१। १६६।
"नृपेष्वथ प्रनष्टेषु जगत्प्रग्रहाः प्रजाः।
क्षयेण निर्वृते चैवं हत्वा चान्योन्यमाहवे॥
परस्परहृतस्वाश्च निराक्रन्दाः सुदुःखिताः।

एवं कश्मलमुप्राप्ताः कलिसन्ध्यांशके तदा ॥" विष्णुः । यथा, महाभारते । १३ । १४६ । ६४ । "प्रग्रहो नियहो यमोऽनेकश्रृङ्गो गदाग्रजः ॥" प्रकृष्टाधिष्ठानादौ, त्रि । यथा, रामायणे । २ । ८२ । १ । "तामार्यगणसम्पूर्णां भरतः प्रग्रहां सभाम् । ददर्श बुद्धिसम्पन्नः पूर्णचन्द्रां निशामिव ॥" "प्रग्रहा प्रकृष्टैरभिज्ञादिभिर्ग्रहोऽधिष्ठानं यस्यां सा ।" इति तट्टीका ॥ उद्यतबाहुः । यथा, रामायणे । ७ । ६५ । १४ । "एवमुक्तस्तु सुमित्रा प्राञ्जलिः प्रग्रहो नृपः । अभ्यवादयत प्राप्तस्तद्धर्मं सत्यशालिनम् ॥")

प्रग्राहः, पुं, (प्रगृह्यते इति । प्र + ग्रह + "ग्रहे वणिजाम् ।" ३ । ३ । ५२ । "रज्जौ च ।" ३ । ३ । ५३ । इति च घञ् ।) प्रग्रहः । इत्यमरः । ३ । ३ । २३६ ॥ ("ग्रहे लिप्सायाम् ।" ३ । ३ । ४६ । इति घञ् । प्रग्रहणम् । "पात्रप्रग्राहेण चरति भिक्षुः ।" इति सिद्धान्तकौमुदी ॥)

प्रग्रीवः, पुं क्ली, (प्रकृष्टा ग्रीवा ग्रीवाऽतिरस्य ।) गृहादौ प्रान्ते धारणं दारुपङ्क्तिः । वाताय़नम् । इति भूमिः । सुखशाला । इत्येके । अश्वशाला । इति केचित् । इत्यमरटीकायां भरतः ॥

प्रघटावित्, [ट्] त्रि, (प्रघटां आडम्बरं वेत्तीति । प्रघटा + विद् + क्विप् ।) आखगडः । इति त्रिकाण्डशेषः ॥

प्रघणः, पुं, (प्रविशद्भिर्जनैः पादैः प्रकर्षेण हन्यते इति । प्र + हन + "अगारैकदेशे प्रघणः प्रघाणश्च ।" ३ । ३ । ७६ । इति कर्मणि अप् । नत्वम् ।) बहिर्द्वारप्रकोष्ठकम् । तत्पर्य्यायः । प्रघाणः२ अलिन्दः ३ । इत्यमरः । २ । २ । १२ ॥ आलिन्दः ४ । इति भरतः ॥ तान्त्रकुम्भः । लौहमुद्गरः । इति मेदिनी । णे, ६० ॥ (गृहाभ्यन्तरगृह्यार्थपिण्डिका । यथा,—

"प्रघणप्रघणालिन्दा द्वारदालप्रकोष्ठके । गृहाभ्यन्तरगृह्यार्थपिण्डिकायामपि त्रयम् ॥"

इति शब्दरत्नावली ॥)

घणः, पुं, (प्रविशद्भिर्जनैः पादैः प्रकर्षेण हन्यते इति । प्र + हन + अप् । न नत्वम् ।) प्रघणः । इति हेमचन्द्रः ॥

प्रघसः, पुं, (प्रकर्षेण अत्तीति । प्र + अद + अप् । "प्रघसोऽपि ।" २ । ४ । ३८ । इति घसलादेशः ।) व्यञ्जनः । दैत्यः । इति त्रिकाण्डशेषः ॥ (राक्षसभेदः । यथा, महाभारते । ३ । २८४ । २ । "प्रघसः पृतनो भीमः खरः क्रोधवशो हरिः । प्रघसश्चारुचक्षुश्च प्रघसश्चेत्यमादयः ॥")

प्रघाणः, पुं. (प्रहन्यते इति । प्र + हन् + "अगारैकदेशे प्रघणः प्रघाणश्च ।" ३ । ३ । ७६ । इति घञ् । पक्षे ह्रस्वश्च ।) प्रघणः । इत्यमरः । २ । २ । १२ ॥ (यथा, नैषधे । १६ । ११ । "नयति भगवान्मोक्षस्यापि त्वदन्यवान्धवः किमपि मघवन्नास्मादस्य प्रघाणमुपप्लवान् । अपसरदरिध्वान्तप्रत्यग्रियत्पथमण्डली लगनफलदभ्रान्तस्वर्गाचलभ्रमविभ्रमः ॥")

प्रघातः, पुं. (प्रकर्षेण हन्यते यत्रेति । प्र + हन् + घञ् ।) युद्धम् । इति हेमचन्द्रटीका ॥

प्रघाणः, पुं, (प्रविशद्भिर्जनैः पादैः प्रकर्षेण हन्यते इति । प्र + हन + अप् । हृद्भावः । न नत्वम् ।) प्रघणः । इति सङ्क्षिप्तः ॥

प्रघूर्णः, पुं, (प्रघूर्णति भ्रमतीति । प्र + घूर्ण + अच् ।) अतिथिः । इति हेमचन्द्रः ॥ प्रकृष्टघूर्णयुक्ते, त्रि ॥

प्रघोषकः, पुं, (प्र + घुष् + भावे घञ् । ततः कन् ।) ध्वनिः । इति जटाधरः ॥

प्रचक्रं, क्ली, (पगतश्चक्रमिति प्रादिसमासः ।) चलितसैन्यम् । प्रस्थितसेना । इत्यमरः । २ । ८ । ६६ ॥

प्रचक्षाः, [स्] पुं, (प्रकर्षेण चक्षते वक्तीति । प्र + चक्ष + अचिः । न खादेशः ।) दक्षस्रतिः । इत्युणादिकोषः ॥

प्रचण्डः, पुं, (प्रकर्षेण चण्डः उग्रगुणत्वात् ।) श्वेतकरवीरः । इति मेदिनी ॥ (वसुप्रीनामनृपतेः सुनन्दागर्भजातः पुत्रभेदः । यथा, मार्कण्डेये । ११८ । २ । "बलीबलाकचण्डश्च प्रचण्डश्च सुविक्रमः ॥")

प्रचण्डः, त्रि, (प्रकर्षेण चण्डः ।) दुर्ग्रहः । दुर्धर्षः । प्रगल्भः । (यथा, व्याख्यासप्तशत्याम् । ३३० । "नाहं वदामि सुतनु त्वमशीला वा प्रचण्डचरिता वा । प्रेमस्वभावसुलभं भयमुदयति मम तु हृदयस्य ॥") प्रतापी । इति मेदिनी गानार्थरत्नमाला च ॥ (यथा. भागवते । १ । ७ । २१ । "ततः प्रादुष्कृतं तेजः प्रचण्डं सर्व्वतोदिग्रम् । प्राणापदमभिप्रेक्ष्य विष्णुं जिष्णुरुवाच ह ॥")

प्रचण्डमूर्त्तिः, स्त्री, (प्रचण्डा मूर्त्तिर्यस्य ।) वरुणवृक्षः । इति शब्दचन्द्रिका ॥ प्रतापयुक्तशरीरे च ॥

प्रचण्डा, स्त्री, (प्रकर्षेण चण्डा ।) दुर्गायाः अष्टनायिकान्तर्गतनायिकाभेदः । इति कालीपुराणम् ॥ (सा तु क्रुगलण्डे पीठस्थाने विराजते । यथा, देवीभागवते । ७ । ३० । ७३ । "क्रुगलण्डे प्रचण्डा तु चण्डिकामरकण्टके ॥") श्वेतदूर्व्वा । इति राजनिर्घण्टः ॥

प्रचयः, पुं, (प्रचीयते इति । प्र + चिञ् चयने + "एरच् ।" ३ । ३ । ५६ । इत्यच् ।) समूहः । इति शब्दचन्द्रिका ॥ शिथिलावयवसंयोगः । स च परिमाणजन्यः । यथा,—

"संख्यातः परिमाणाच्च प्रचयादपि जायते । प्रचयः शिथिलावयवः संयोगस्तेन जन्यते । परिमाणन्तूलकादौ नाम्रस्त्राद्यवयवागतः ॥"

इति भाषापरिच्छेदः ॥ (यज्ञादिकरणकपुण्यफलादीनां चयने । यथा, "वृक्षाग्र्यानां फलानां यज्ञा प्रचयं करोति।" इति सिद्धान्तकौमुदी । ३ । ३ । ४० ।)

प्रचरः पुं, (प्रचरत्यस्मिन्निति । प्र + चर + आधारे अप् ।) पन्थाः । इति धरणिः ॥ प्रकर्षेण गमनञ्च ॥

प्रचरद्रूपः, त्रि, प्रकाशरूपः । प्रचारविशिष्टः । प्रचरत् प्रकाशमानं रूपं स्वरूपं यस्य सः ॥

प्रचलाकः, पुं, (प्रकर्षेण चलतीति । प्र + चल + आकन् ।) शराघातः । शिखण्डः । सुजङ्घमः । इति मेदिनी । के, १६६ ॥

प्रचलाकी, [न्] पुं, (प्रचलाकः शिखण्डोऽस्यास्तीति । प्रचलाक + इनिः ।) मयूरः । इति मेदिनी ॥ (यथा, उत्तररामचरिते । २ अङ्के । "कूजत्कुञ्जकुटीरकौशिकघटाबुत्कारवत्-कीचक-स्तम्बाडम्बरमेकमौकुलिकुलक्रौञ्चावतीर्य्यं गिरिः। एतस्मिन् प्रचलाकिनां प्रचलतामुद्वेजिताः कूजिते-रुद्वेल्लन्ति पुराणचन्दनतरुस्कन्धेषु कुम्भीनसाः॥")

प्रचलायितं, त्रि, (प्रचल इवाचरतीति । "कर्तुः क्यङ् सलोपश्च ।" ३ । १ । ११ । इति क्यङ् । प्रचलाय-नामधातोः कर्त्तरि क्तः ।) निद्रादिना घूर्णितम् । इत्यमरः । ३ । १ । ३२ ॥

प्रचारः, पुं, (प्रचरणमिति । प्र + चर + भावे घञ् ।) प्रचरणम् । व्यक्तः । प्रकाशः । यथा,

"दमनकतरुशाखालम्बिछोलङ्घयुग्मं तुहिनकिरणबिम्बे खञ्जरीटप्रचारः ॥"

इति शङ्कराचार्य्यः ॥ (प्रचरत्यस्मिन्निति । प्र + चर + आधारे घञ् । गवादेश्चरणस्थानम् । यथा, महाभारते । १ । ४० । १८ । "परिश्रान्तः पिपासार्त्तः आससाद मुनिं वने । गवां प्रचारेष्वासीनं फेनमापिबतां पयः ॥" अश्वानां नेत्ररोगविशेषः । तच्चिकित्सादिकं यथा, अश्ववैद्यके । ३० । ३१—३६ । "प्रच्छादयति यद्दृष्टिं मांसं पर्य्यन्तवर्त्तिनम् । प्रचारकाख्यं तं विन्द्यात् नेत्ररोगं कफात्मकम् ॥ क्षितौ निपात्य तुरगं ततो नेत्रं प्रसारयेत् । शस्तकर्म्मा भिषग् विद्वान् वड़िशेनाधिवर्त्मनि ॥ ततस्तीक्ष्णेन शस्त्रेण छिन्द्यात् प्रावरकं बुधः । तारकस्य यथा पीड़ा जायेत न मनागपि ॥ शुद्धं तत् पूरयेन्नेत्रं मधुना सैन्धवेन वा । प्रक्षाल्य चोत्थाय ततः शस्त्रजां वेधयेत् शिराम् । कुष्ठेन वचया चव्या तथा विकटुकेन च । प्रतिप्राणं प्रदातव्यं सुरया लवणैः सह ॥ निर्व्वातं विहितं स्थानं ग्रासे दूर्व्वा च पूजिता । गुरुभक्ष्यं न दातव्यं मधुरञ्च विशेषतः ॥")

प्रचुरं, त्रि, (प्रचीरतीति । प्र + चुर + "इगुपधज्ञेति ।" ३ । १ । १३५ । इति कः । यद्वा, प्रगतचुराया इति प्रादिसमासः ।) अनेकम् । तत्पर्य्यायः । प्रभूतम् २ प्राप्यम् ३ अदभ्रम् ४ बहुलम् ५ बहु ६ पुरुषम् ७ पुरु ८ भूयिष्ठम् ९ स्फिरम् १० भूयः ११ भूरि १२ । इत्यमरः । ३ । १ । ६३ । (यथा, भागवते । ५ । १३ । २१ ।

"अहो नृजन्माखिलजन्मशोभनं
किं जन्मभिस्वपरेरप्यसुम्बिन् ।
न यत् हृषीकेशयशः कृतात्मनां
महात्मनां वः प्रचुरः समागमः ॥")

प्रचुरपुरुषः, पुं, (प्रचोरतीति । प्र + चुर कि स्तेये + कः । प्रचुरश्चासौ पुरुषश्चेति ।) चौरः । इति त्रिकाण्डशेषः ॥ (प्रचुरो बहुलः पुरुषश्चेति कर्म्मधारये ।) बहुनरश्च ॥

प्रचेतसी, स्त्री, (प्रचेतयति मूर्च्छितमिति । प्र + चित् + णिच् + असच् । गौरादित्वात् ङीष् ।) कटफलः । इति राजनिर्घण्टः ॥ प्रचेतसः कन्या च ॥

प्रचेता, [तृ] पुं, (प्रचेतति युद्धादिस्थाने वीरान् सञ्चिनोतीति । प्र + चित् + तृच् ।) सारथिः । इति हेमचन्द्रः ॥

प्रचेताः, [स्] पुं, (प्रचेततीति । प्र + चित + असुन् ।) वरुणः । इत्यमरः । १ । १ । ६४ ॥ (यथा, रघौ । १ । ८० ।
"हविषे दीर्घसत्रस्य सा चेदानीं प्रचेतसः ।
भुजङ्गपिहितद्वारं पातालमधितिष्ठति ॥"
मुनिविशेषः । (यथा, मनौ । १ । ३५ ।
"मरीचिमत्र्यङ्गिरसौ पुलस्त्यं पुलहं क्रतुम् ।
प्रचेतसं वशिष्ठञ्च भृगुं नारदमेव च ॥"
प्रकृष्टं चेतोऽस्य ।) प्रकृष्टहृदि, त्रि । इति मेदिनी ॥ प्राचीनबर्हिराजपुत्रः । यथा,—
"प्राचीनबर्हिर्भगवान् सर्व्वयज्ञेश्वरो मखैः ।
समुद्रतनयायां वै दश पुत्रानजीजनत् ॥
प्रचेतसस्ते विख्याता राजानः प्रथितौजसः ॥"
इति कौर्म्मे १२ अध्यायः ॥

अपि च ।
"प्राचीनबर्हिःसुतपुत्रः पृथिव्यामेकराड्बभौ ।
उपयेमे समुद्रस्य लवणस्य स वै सुताम् ॥
तस्मात् सुधाव सासूयी दश प्राचीनबर्हिषः ।
सर्व्वे प्रचेतसो नाम धनुर्व्वेदस्य पारगाः ॥
अपृथग्धर्म्मचरणास्तेऽतप्यन्त महत्तपः ।
दश वर्षसहस्राणि समुद्रसलिले शुचयः ॥
प्रजापतित्वं संप्राप्य भार्य्या तेषाञ्च मारिषा ।
अभवद्वृक्षराजेन तस्यां दक्षोऽभवत् ततः ॥"
इति गारुडे ६ अध्यायः ॥
(प्रकृष्टज्ञानयुक्ते, त्रि । यथा, ऋग्वेदे । २।२३।२।
"देवा अदुः ते असुर्य्यप्रचेतसो बृहस्पते यज्ञियं
भागमानशुः ॥"
'हे बृहस्पते ! प्रचेतसः प्रकृष्टज्ञानास्ते त्वदीया देवाश्चिद् देवा अपि।" इति तद्भाष्ये सायनः ॥)

प्रचैलं, क्ली, (प्रचैलतीति । प्र + चैल् + अच् ।) पीतकाष्ठम् । इति शब्दचन्द्रिका ॥

प्रचैलकः, पुं, (प्रकर्षेण चैलति गच्छतीति । प्र + चैल् + ण्वुल् ।) घोटकः । इति शब्दमाला ॥

प्रचोदनी, स्त्री, (प्रचोद्यते रोगो ययेति । प्र + चुद् + णिच् + ल्युट् । ङीप् ।) कण्टकारी । इत्यमरः । २ । ४ । ६४ ॥

प्रचोदितः, त्रि, (प्र + चुद् + क्तः ।) प्रेरितः । यथा,—
"प्रचोदिता येन पुरा सरस्वती ।"
इति श्रीभागवते २ स्कन्धे ४ अध्यायः ॥

प्रच्छ, औ प्र ज्ञीप्से । इति कविकल्पद्रुमः ॥ (तुदा०-परः-सेट्क०-अनिट् ।) ज्ञीप्सा ज्ञातुमिच्छा । ऋप क इत्यस्यैव ज्ञानपक्षे निष्पादनात् । औ, अप्राक्षीत् । प्र, पृच्छति वार्त्तां गुरुं शिष्यः । इति दुर्गादासः ॥

प्रच्छदः, पुं, (प्रच्छाद्यतेऽनेनेति । प्र + छद + णिच् + करणे घः । "छादेर्घेऽद्व्युपसर्गस्य ।" ६ । ४ । ६६ । इति उपधाया ह्रस्वः ।) आच्छादनम् । इति शब्दरत्नावली ॥ (यथा, रघुः । १६ । २२ ।
"प्रच्छदान्तगलिताश्रुबिन्दुभिः
क्रोधभिन्नवलयैर्विवर्त्तने: ॥")

प्रच्छदपटः, पुं, प्रकर्षेण छाद्यतेऽनेन स चासौ पटश्चेति । आच्छादनपटः । पाछुड़ इति ख्यातः । तत्पर्य्यायः । निचोलः २ । इत्यमरः । २।६।११६॥ निचुलः ३ । इति भाड़ि: ॥ निचोलम् ४ । इति रभसः ॥ निचोली ५ । इति राजदेवः ॥ इत्यमरटीकायां भरतः ॥ (यथा, साहित्यदर्पणे ३ परिच्छेदे ।
"वलीभङ्गाभोगैरलकपतितैः श्लीर्णकुसुमः
स्त्रियाः सर्व्वावस्थं कथयति रतं प्रच्छदपटः ॥")

प्रच्छना, स्त्री, (प्रच्छ + बाहुलकात् युच् । टाप् ।) आमन्त्रणा । इति जटाधरः ॥

प्रच्छन्नं, क्ली, (प्र + छद् + क्तः ।) अन्तर्द्धानम् । इत्यमरः । २ । २ । १४ ॥ आच्छन्ने, त्रि ॥ (यथा, महाभारते । ३ । ७१ । ३१ ।
"प्रच्छन्ना हि महात्मानश्चरन्ति पृथिवीमिमाम् ॥")

प्रच्छर्द्दिका, स्त्री, (प्र + छर्द् वमने + "रोगाख्यायां ण्वुल् बहुलम् ।" ३ । ३ । १०८ । इति ण्वुल् । स्त्रियां टापि अत इत्वम् ।) वमिः । इत्यमरः । २ । ६ । ५५ ॥ (वमनकारके, त्रि ॥)

प्रच्छादनं, क्ली, (प्रच्छाद्यतेऽनेनेति । प्र + छद् + णिच् + ल्युट् ।) उत्तरीयवस्त्रम् । तत्पर्य्यायः । प्रावरणम् २ संव्यानम् ३ उत्तरीयकम् ४ । इति हेमचन्द्रः । ३ । ३३५ ॥ (नेच्छादम् । यथा, ऋग्वेदीये । २ । १० ।
"प्रच्छादनं भवेद्वर्म्म चाप्यिकूटमतः परम् ॥"
"वर्म्म नेच्छदं प्रच्छादनं प्रच्छादनापरनामकं भवेत् । वर्म्म नेच्छदेऽमरः ॥" इति तट्टीका ॥ भावे ल्युट् । गोपनम् । यथा, महाभारते । १ । १६१ । १७ ।
"आत्मप्रच्छादनार्थं वै वाहुवीर्य्यमुपाश्रितः ।
विप्ररूपं विधायेदं मन्ये मां प्रति युध्यसे ॥")

प्रच्छादितं, त्रि, (प्र + छद + णिच् + क्तः ।) आच्छादितम् । इति हलायुधः ॥

प्रजः, पुं, (प्रजायते जायागर्भे इति । प्र + जन् + डः ।) पतिः । "जायायां प्रविश्य पुनर्जायते इति डे प्रजः पतिः ।" इति प्रजावतीशब्दटीकायां भरतः ॥

प्रजनः, पुं, (प्रजायतेऽनेनेति । प्र + जन् + करणे घञ् । "जनिवध्योश्च ।" ७ । ३ । ३५ । इति न वृद्धिः ।) उपस्थः । इत्यमरः । ३ । २ । २५ ॥ हे स्त्रीगवादिषु पुङ्गवादीनां प्रथमगर्भाधानाय मैथुनाभियोगः । प्रजनं क्लीवमिति केचित् ॥ पशूनां गर्भग्रहणकालः । इति स्वामी ॥ गवां प्रथमगर्भग्रहणाभियोगः । इति सुभूतिः ॥ स्त्रीगवीषु पुङ्गवानां प्रथमगमनमिति सर्व्वस्वम् ॥ किन्तु वीनामुपसरं दृष्ट्वेति भट्टिः । इत्यमरटीकायां भरतः ॥ (मैथुनसाधनोपस्थेन्द्रियम् । यथा, मनुः । १२ । १२१ ।
"वाच्यर्थं मित्रसुत्सर्गे प्रजने च प्रजापतिम् ॥"
प्र + जन् + भावे घञ् । पुत्रोत्पादनम् । यथा, मनुः । ६ । १२१ ।
"उपसर्ज्जनं प्रधानस्य धर्म्मतो नोपपद्यते ।
पिता प्रधानं प्रजने तस्माद्धर्म्मेण तं भजेत् ॥"
जनयितरि, त्रि । यथा, भागवते । ८ । ५ । ३४ ।
"ईशो नगानां प्रजनः प्रजानां
प्रसीदतां नः स महाविभूतिः ॥"
तथा, भगवद्गीतायाम् । १० । २८ ।
"प्रजनश्चास्मि कन्दर्पः सर्पाणामस्मि वासुकिः ॥")

प्रजननं, क्ली, (प्रजायतेऽनेनेति । प्र + जन् + ल्युट् ।) योनिः । (यथा, सुश्रुते । १ । २३ ।
"स्त्रिक्पायुप्रजननललाटगण्डौष्ठपृष्ठकर्णफलकोषोदरजानुसुखाभ्यन्तरसंस्थाः सुखरोपणीयव्रणाः ॥" प्र + जन् + भावे ल्युट् ।) जन्म । इति मेदिनी । ने, १६१ ॥ (यथा, राजतरङ्गिण्याम् । २ । ६१ ।
"वेधाः परां धुरमुपेति परीक्षकाणामिक्षोः फलप्रजननेन कृतश्रमो यः ॥"
धात्रीकर्म्म । यथा, सुश्रुते शारीरस्थाने । १० अध्याये । "ततः कृतोपधाने मृदुविस्तीर्णे शयने स्थितामाशुगसक्थीसुत्तानामग्रङ्गनीयाश्चतस्रः स्त्रियः परिगतवयसः प्रजननकुशलाः कर्त्तितनखाः परिचरेयुरिति ॥") प्रगमः । इति विश्वः ॥ (यथा, महाभारते । १ । १२० । ३७ ।
"तस्मात् प्रहेष्याम्यद्य त्वां हीनः प्रजननात् स्वयम् ।
सदृशात् श्रेयसो वापि त्वं विद्ध्यपत्यं यशस्विनि ! ॥"
प्रजनयतीति । प्र + जन + ल्युः । प्रजोत्पादके, त्रि । यथा, वाजसनेयसंहितायाम् । १६ । ४८ ।
"इदं हविः प्रजननं मेऽस्तु ॥")

प्रजनिका, स्त्री, (प्रजनयतीति । प्र + जन + णिच् + ण्वुल् । टापि अत इत्वम् ।) माता । इति जटाधरः ॥

प्रजल्पः, पुं, (प्र + जल्प + भावे घञ् ।) वाक्यविशेषः । यथा,—
"अस्त्रवेर्य्यामदयुजा योऽवधीरणसूचया ।
प्रियस्य कौशलोद्गारः प्रजल्पः स तु कथ्यते ॥"
इत्युज्ज्वलनीलमणिः ॥

(बहुभाष्यम्। यथा, हठयोगप्रदीपिकायाम्। १।१५।
"अत्याहारः प्रयासश्च प्रजल्पो नियमग्रहः।
जनसङ्गश्च लौल्यञ्च षड्भिर्योगो विनश्यति॥")

प्रजवः, पुं, (प्रजवनमिति। प्र+जु वेगगतौ+"ऋदोरप्।" ३।३।५७। इति भावे अप्।) प्रकृष्टवेगः। प्रपूर्ब्बजुधातोर्भावेऽल्प्रत्ययनिष्पन्नः॥ (यथा, ऋग्वेदे। ७। ३३। ८।
"वातस्येव प्रजवो नान्येन स्तोमो वसिष्ठा अन्वेतवे कः॥")

प्रजवी, त्रि, (प्रजवतीति। प्र+जु वेगगतौ+"प्रजोरिनिः।" ३।२।१५६। इति इनिः।) प्रकृष्टवेगयुक्तः। इत्यमरः। २।८।७३॥

प्रजा, स्त्री. (प्रजायते इति। प्र+जन्+"उपसर्गे च संज्ञायाम्।" ३।२।९९। इति डः।) सन्ततिः। पितृमातृगुणदोषैर्या प्रजा विभिन्ना भवति। यथा, अग्निपुराणे।
"मातृजां शीलदोषैर्या पितृशीलगुणेन च।
विभिन्नास्तु प्रजाः सर्व्वा भवन्ति भवशीलिनाम्॥"
जनः। इत्यमरः। ३।३।३२॥ (यथा, रघुः। १।२४।
"प्रजानां विनयाधानात् रक्षणात् भरणादपि।
स पिता पितरस्तासां केवलं जन्महेतवः॥"
उत्पत्तिः। यथा, ऋग्वेदे। १०।७२।६।
"प्रजाये म्रियवे त्वत्पुनर्मार्ताण्डमाभरत्॥")

प्रजागरः, पुं. (प्र+जागृ+"ऋदोरप्।"३।३।५७। इति भावे अप्।) प्रकर्षेण जागरणम्। इति हलायुधः॥ यथा, अग्निपुराणे।
"देवतानां पितॄणाञ्च घोरं ज्ञात्वा प्रजागरम्।
जेतायुगे चतुर्थेऽपि रावणस्तपसः क्षयात्।
रामं दाशरथिं प्राप्य समरे क्षयमेष्यिति॥"
(विष्णुः। यथा, महाभारते।१३। १६६।११५।
"आधारनिलयो धाता पुष्पहासः प्रजागरः॥"
"नित्यबुद्धस्वरूपत्वात् प्रजागरः।" इति तद्भाष्यम्॥ प्रायः। यथा, भागवते। ४। २७। १५।
"ते षष्ठवेगानुचराः पुरञ्जनपुरं यदा।
हर्त्तुमारेभिरे तत्र प्रत्यषेधत् प्रजागरः॥"
"प्रजागरः प्रायः।" इति तट्टीकायां स्वामी॥)

प्रजाता, स्त्री. (प्रजातं प्रजननं सुतादीनामुत्पत्तिरित्यर्थः। तदस्या अस्तीति। अच्। ततष्टाप्।) जातापत्या। प्रसूता। इत्यमरः। २।६।१६॥ (यथा, सुश्रुते निदानस्थाने ६ अध्याये।
"स्त्रीणामप्रजातानां प्रजातानां तथार्त्तिनाम्।
दारुणः करुणो घोरो जायते रक्तविद्रधिः॥"
"ततोऽनन्तरं बलवत्तरमिति तस्याञ्च प्रवाहमाणायां स्त्रियः शब्दं कुर्य्युः प्रजाता प्रजाता धन्यं धन्यं पुत्रमिति तथास्या हर्षमाणायन्ति प्राप्ताः। यदा च प्रजाता स्यात् तदैनामवेक्ष्य काचिदस्या जननी प्रजाता वाप्रजाता वेति॥"
इति चरके शारीरस्थाने २८मेऽध्याये॥

अन्यविशेषे, पुं। यथा, कात्यायनश्रौतसूत्रे। २०।३।२०।
"प्रजाते वाययम्।" "बडवायां क्षतरतःस्कन्दनः प्रजात इत्युच्यते॥" इति तद्भाष्यम्॥)

प्रजादा, स्त्री, (प्रजां गर्भदोषनिवारणेन सन्ततिं ददातीति। दा+कः। टाप्।) गर्भदात्रीक्षुपः। इति राजनिर्घण्टः॥ प्रजादातरि, त्रि॥

प्रजादानं, क्ली, (प्रजातो जन्मतो दानं शुद्धिरस्य।) रजतम्। इति शब्दचन्द्रिका॥ (प्रजाया दाने आदाने अदाने च॥)

प्रजानन्ती, स्त्री, (प्रजानातीति। प्र+ज्ञा+शतृ+ङीप्।) पण्डिता। प्राज्ञी। इति हेमचन्द्रः। ३।१८६॥ (विशेषवेत्तरि, त्रि। यथा, रामायणे। २।७२।१४।
"तं प्रत्युवाच कैकेयी प्रियवद्घोरमप्रियम्।
अजानन्तं प्रजानन्ती राज्यलोभेन मोहिता॥")

प्रजापः, पुं, (प्रजाः पातीति। पा रक्षणे+कः।) राजा। इति हेमचन्द्रः। ३।३५४॥

प्रजापतिः, पुं, (प्रजानां पतिः।) ब्रह्मा। इत्यमरः। १।१।१७॥ (यथा, महाभारते। १।१।३२।
"यस्मात् पितामहो जज्ञे प्रसूरेकः प्रजापतिः।
ब्रह्मा सुरगुरुः स्थाणुर्मनुः कः परमेष्ठ्यथ॥")
दक्षादिः। (यथा,—
"द्वितीये हि युगे सर्व्वमक्रोधव्रतमास्थितम्।
दिव्यं सहस्रवर्षाणामसुरा अभिदुद्रुवुः॥
तपोविघ्नं शुभीकर्त्तुन्नपोविघ्नं महात्मनाम्।
पश्यन् समर्थस्तोषेचाश्चक्रे दक्षः प्रजापतिः॥
पुनर्मांहेश्वरं भागं ध्रुवं दत्त्वप्रजापतिः।
प्रायो न कल्पयामास प्रोच्यमानः सुरैरपि॥"
इति चरके चिकित्सास्थाने द्वतीयेऽध्याये॥)
मही। मालः। इति मेदिनी। ते, २०८॥ (इन्द्रः। यथा, महाभारते। ३।१९५।१६।
"अयमेव विधाता हि तथैवेन्द्रः प्रजापतिः॥")
जामाता। दिवाकरः। वह्निः। त्वष्टा। इति हेमचन्द्रः॥ (यथा. वाजसनेयसंहितायाम्।१२।६१।
"तां विश्वेदेवैर्ऋतुभिः संविदानः
प्रजापतिर्विश्वकर्म्मा विमुञ्चतु॥"
मनुः। यथा, मनौ। १०।७८।
"न तौ प्रति हि तान् धर्म्मान् मनुराह प्रजापतिः॥")
दश प्रजापतयो यथा, आह्निकतत्त्वे।
"मरीचिमत्र्यङ्गिरसौ पुलस्त्यं पुलहं क्रतुम्।
प्रचेतसं वशिष्ठञ्च भृगुं नारदमेव च।
देवान् सर्व्वानृषीन् सर्व्वांस्तर्पयेदक्षतोदकैः॥"
एकविंशतिप्रजापतयो यथा,—
"ब्रह्मा स्थाणुर्मनुर्दक्षो भृगुर्धर्म्मस्तथा यमः।
मरीचिरङ्गिराश्चैव पुलस्त्यः पुलहः क्रतुः॥
वशिष्ठः परमेष्ठी च विवस्वान् सोम एव च।
कर्दमश्चापि यः प्रोक्तः क्रोधोऽर्व्वाक् क्रीत एव च॥
एकविंशतिरित्येते प्रजापतय स्मृताः॥"
इति महाभारते मोक्षधर्म्मः॥ *॥

पिता। यथा,—
"जनको जन्मदानाच्च रक्षणाच्च पिता नृणाम्।
ततो विस्तीर्णकरणात् कलया स प्रजापतिः॥"
इति ब्रह्मवैवर्त्ते गणपतिखण्डे ४४ अध्यायः॥*॥
स्वनामख्यातकीटविशेषश्च॥

प्रजावती, स्त्री, (प्रजास्त्यस्या इति। प्रजा+मतुप्। मस्य वः। स्त्रियां ङीप्।) भाल्लातायाः। इत्यमरः। २।६।३०॥ व्यक्तभाल्लपत्नी। इति केचित्। इति भरतः॥ (यथा, रघुः। १४।४५।
"प्रजावती दोहदशंसिनी ते
तपोवनेषु स्पृहयालुरेव।
स त्वं रघौ तद्व्यपदेशभूनेयां
प्रापय्य वाल्मीकिपदं त्वजेनाम्॥"
प्रियव्रतपत्नी। यथा, मार्कण्डेये। ५३।१३।
"प्रियव्रतात् प्रजावत्यां वीरात् कन्या व्यजायत॥")
सन्तानविशिष्टा॥ (यथा, मार्कण्डेये।६७।१८।
"साम्प्रतं सर्गकर्त्तृत्वमादिष्टं ब्रह्मणा मम।
सोऽहं पत्नीमभिष्यामि धन्यां दिव्यां प्रजावतीम्॥")

प्रजाहितं, क्ली, (प्रजायै हितम्।) जलम्। इति शब्दमाला॥ प्रजोपकारे, त्रि॥

प्रजिनः, पुं. (प्रकर्षेण जयतीति। प्र+जि+बाहुलकात् नक्।) वायुः। इति शब्दमाला॥

प्रजेश्वरः, पुं, (प्रजानामीश्वरः।) राजा। इति त्रिकाण्डशेषः॥ (यथा, रघुः। ३।६८।
"तमभ्यनन्दत् प्रथमं प्रबोधितः
प्रजेश्वरः शासनहारिणा हरेः॥")

प्रज्ञः, त्रि, (प्रकर्षेण जानातीति। प्र+ज्ञा+"व्यातश्चोपसर्गे।" ३।१।१३६। इति कः।) पण्डितः। इति प्राज्ञशब्दटीकायां भरतः॥ (यथा, माण्डूक्योपनिषदि। ७।
"नान्तःप्रज्ञं न बहिःप्रज्ञं नोभयतःप्रज्ञं न प्रज्ञानघनं न प्रज्ञं नाप्रज्ञम्॥") प्रगतजानुकः। इति प्रज्ञशब्दटीकायां भरतः धरणिश्च॥

प्रज्ञप्तिः, स्त्री, (प्र+ज्ञा+णिच्+क्तिन्।) सङ्केतम्। इति त्रिकाण्डशेषः॥ (यथा, सर्व्वदर्शनसंग्रहे पूर्णप्रज्ञदर्शनम्।
"विष्णोः प्रज्ञप्तिरेवैका शब्दैरेतैरुदीर्य्यते।
प्रज्ञप्तिरूपो हि हरिः सा च स्वानन्दलक्षणा॥")
ज्ञानम्। ज्ञापनम्। यथा, भागवते।३।२५।१।
"कपिलस्तत्त्वसंख्याता भगवानात्ममायया।
जातः स्वयमजः साक्षादात्मप्रज्ञप्तये नृणाम्॥"
जिनविद्यादेवीविशेषः। इति हेमचन्द्रः। २।१५३॥)

प्रज्ञप्ती, स्त्री, (प्रज्ञप्ति+वा ङीप्।) जिनविद्यादेवीविशेषः। इति हेमचन्द्रः। २।१५३॥

प्रज्ञा, स्त्री. (प्र+ज्ञा+कः। टाप्।) बुद्धिः। (यथा, रघुः। १।१५।
"आकारसदृशप्रज्ञः प्रज्ञया सदृशागमः॥")
एकाग्रता। यथा, पञ्चदश्याम्। ७।१०६।
"तमेव धीरो विज्ञाय प्रज्ञां कुर्व्वीत ब्राह्मणः॥")
प्राज्ञी। प्रकर्षेण जानाति या। इत्यमरः॥

सरस्वती। इति शब्दरत्नावली॥ बुद्धिवैदिक-पर्य्यायः। केतुः १ केतः २ चेतः ३ चित्तम् ४ क्रतुः ५ असुः ६ धीः ७ प्रचीः ८ माया ९ वयुनम् १० अभिख्या ११। इत्येकादशप्रज्ञा-नामानि। इति वेदनिघण्टौ ३ अध्यायः॥

प्रज्ञाकायः, पुं, (प्रज्ञा काय इवास्य।) मञ्जुघोषः। इति त्रिकाण्डशेषः॥

प्रज्ञाचक्षुः, पुं, (प्रज्ञा एव चक्षुर्यस्य।) धृत-राष्ट्रः। इति शब्दरत्नावली॥ (यथा, महा-भारते। १।१।१४७।

"श्रुत्वा तु मम वाक्यानि बुद्धियुक्तानि तत्त्वतः। ततो ज्ञास्यसि मां सौते प्रज्ञाचक्षुषमित्युत॥")

प्रज्ञानं, क्ली, (प्रज्ञायतेऽनेनेति। प्र+ज्ञा+ल्युट्।) बुद्धिः। (यथा, महाभारते। ३।१८५।१६।

"त्वमेवं मुह्यसे मोहात् न प्रज्ञानं तवास्ति ह॥")

चिह्नम्। इत्यमरः। ३।३।१५२॥ (यथा, महा-भारते। ५।३३।२६।

"नासं पृष्टो ह्युपयुक्ते परार्थे तत् प्रज्ञानं प्रथमं पण्डितस्य॥"

चैतन्यम्। तल्लक्षणं यथा, पञ्चतन्त्रे। ५।१।

"येनेक्षते शृणोतीदं जिघ्रति व्याकरोति च। स्वादस्वादू विजानाति तत् प्रज्ञानमुदीरितम्॥")

पण्डिते, त्रि। इति भरतद्विरूपकोषः॥

प्रज्ञी, [न्] त्रि, (प्रज्ञास्यस्येति। प्रज्ञा+इनिः।) पण्डितः। इति भरतद्विरूपकोषः॥

प्रज्ञुः, पुं, (प्रगते जानुनी यस्य। "प्रसम्भ्यां जानु-नोर्ज्ञुः।" ५।४।१२६। इति ज्ञुः।) प्रगत-जानुकः। इत्यमरः। २।६।४७॥ यस्य जानुनोर्मध्ये नित्यं कादाचित्कं वा महदन्त-रालं तस्मिन् द्वयम्। इति भरतः॥

प्रज्वलितः, त्रि, (प्र+ज्वल+क्तः।) प्रकृष्टज्वलन-विशिष्टः। यथा,—

"अग्निं प्रज्वलितं वन्दे जातवेदं हुताशनम्। सुवर्णवर्णममलं समिद्धं सर्व्वतोमुखम्॥"

इति भक्तदेवभट्टः॥

प्रडीनं, क्ली, (प्र+डी नभोगतौ+क्तः।) पक्षिणां गतिविशेषः। इत्यमरः। २।५।३७॥ प्रथम-डीनं प्रडीनं उड्डयनाय क्रमबन्धः। तिर्य्यग्-गमनम्। इत्यन्ये। इति भरतः॥

प्रणः, पुं, (प्र+"नञ्च पुराणे प्रात्।" ५।४।५ इत्यस्य वार्त्तिक० इति नः।) पुराणः। "पुरा-णार्थे वर्त्तमानात् प्रशब्दात् नो वक्तव्यः।" इति सिद्धान्तकौमुदी॥

प्रणतः, त्रि, (प्र+णम+क्तः।) प्रकर्षेण नतः। प्रणतिविशिष्टः। यथा,—

"ध्येयं सदा परिभवघ्नमभीष्टदोहं तीर्थास्पदं शिवविरिञ्चिनुतं शरण्यम्। भृत्यार्त्तिहं प्रणतपालभवाब्धिपोतं वन्दे महापुरुष! ते चरणारविन्दम्॥"

इति श्रीभागवतम्।

प्रणतिः, स्त्री, (प्रकृष्टं नमनमिति। प्र+णम+ भावे क्तिन्।) प्रणामः। तत्पर्य्यायः। प्रणि-

पातः २ अनुनयः ३। इति हेमचन्द्रः॥ (यथा, रघौ। ११।८६।

"राघवोऽपि चरणौ तपोनिधेः चक्रतामिति वदन् समस्पृशत्। निर्ज्जितेषु तरसा तरस्विनां प्रश्रुषु प्रणतिरेव कीर्त्तये॥")

प्रणयः, पुं, (प्रणयनम्। प्र+णी+"ऋदृ।" ३।३।५६। इति अच्।) प्रीत्या प्रार्थनम्। तत्पर्य्यायः। प्रश्रयः २। इत्यमरः। ३।२।२५॥ प्रसरः ३। इति भरतः॥ (यथा, रघौ।२।५८।

"सम्बन्धमाभाषणपूर्व्वमाहु- र्वृत्तः स नौ सङ्गतयोर्व्वनान्ते। तद्भूतनाथानुग! नार्हसि त्वं सम्बन्धिनो मे प्रणयं विहन्तुम्॥")

प्रेम। (यथा, भगवद्गीतायाम्। ११।४।

"सखेति मत्वा प्रसभं यदुक्तं हे कृष्ण हे यादव हे सखेति। अजानता महिमानं तवेदं मया प्रमादात् प्रणयेन वापि॥")

याच्ञा। विश्रम्भः। निर्व्वाणः। इति मेदिनी। ये, ८६॥

प्रणयी, पुं, (प्रणयोऽस्यास्तीति। प्रणय+इनिः।) स्वामी। इति हेमचन्द्रः॥ प्रणययुक्ते, त्रि। (यथा,—

"प्रणयिनि निजनाथे लज्जया मौनभावं प्रति किमिह नवोढ़ां रौषि विर्वीक्षयाक्ष॥"

इत्युद्भटः॥)

प्रणयिनी, स्त्री, (प्रणयिन्+ङीप्।) भार्य्या। इति हेमचन्द्रः॥

प्रणवः, पुं, (प्रकर्षेण नूयते स्तूयते आत्मा स्वेष्ट-देवता वानेनेति। प्र+णु स्तुतौ+"ऋदो-रप्।" ३।३।५७। इति अप्। "उपसर्गा-दसमासेऽपि णोपदेशस्य।" ८।४।१४। इति णत्वम्। यद्वा, ब्रह्मविष्णुमहेशरूपत्वात् प्रण-म्यते इति। प्र+णम+कर्म्मणि घञ्। संज्ञा-पूर्व्वकत्वात् वृद्ध्यभावः। पृषोदरादित्वात् मस्य वः।) ॐकारः। इत्यमरः। १।६।४॥ तस्य पर्य्यायो यथा,—

"ॐकारः प्रणवस्तारो वेदादिर्ब्रह्मुलो ध्रुवः। त्रैगुण्यं त्रिगुणो ब्रह्म सत्त्वो मन्त्रादिरव्ययः॥ ब्रह्मबीजं त्रितत्त्वश्च पञ्चरश्मिस्त्रिदेवतः॥"

इति बीजवर्णाभिधानम्॥

अपि च।

"ॐकारो वर्त्तुलस्तारो वामश्च हंसकारणम्। मन्त्राद्यः प्रणवः सत्यं त्रिदृग्ज्ञानस्त्रिदेवतम्॥ सर्व्वजीवोत्पादकश्च पञ्चदेवो ध्रुवस्त्रिकः। सावित्री त्रिशिखो ब्रह्म त्रिगुणो गुणजीवकः॥ आदिबीजं वेदसारो वेदबीजमतः परम्। पञ्चरश्मिस्त्रिकूटश्च त्रिभवे भवनाशनः॥ गायत्री बीजपञ्चार्णो मन्त्रविद्याप्रदः प्रभुः। अक्षरं मातृकाक्षश्चानादिदेवतमोचदौ॥"

इति तन्त्रम्॥ *॥

(यथा, महानिर्व्वाणतन्त्रे। ३।३२।

"अकारेण जगत्पाता संहर्त्ता स्याद्उकारतः। मकारेण जगत्स्रष्टा प्रणवार्थः उदाहृतः॥"

यथा च।

"अकारो विष्णुरुद्दिष्ट उकारस्तु महेश्वरः। मकारेणोच्यते ब्रह्मा प्रणवेन त्रयो मताः॥"

वेदस्याध्ययनारम्भे अध्ययनसमाप्तौ च ब्राह्म-णस्य ॐकारोच्चारकर्त्तव्यत्वमुक्तं यथा मनौ। २।७४।

"ब्राह्मणः प्रणवं कुर्य्यादादावन्ते च सर्व्वदा। स्रवत्यनोङ्कृतं पूर्व्वं परस्ताच्च विशीर्य्यते॥")

अस्योद्धारक्रमो यथा,—

"एकमेवाक्षरं ब्रह्म मायया तु चतुष्टयम्। रौहिणीतनयो रामः अकाराक्षरसम्भवः॥ तैजसात्मकप्रद्युम्न उकाराक्षरसम्भवः। प्रज्ञात्मको निरुद्धो वै मकाराक्षरसम्भवः। अर्द्धमात्रात्मकः कृष्णो यस्मिन् विश्वं प्रतिष्ठि-तम्॥"

इति गोपालतापनीयोपनिषत्॥ *॥

स च माङ्गलिकः। यथा,—

"ॐकारश्चाथ शब्दश्च द्वावेतौ ब्राह्मणः पुरा। कण्ठं भित्त्वा विनिर्य्यातौ तेन माङ्गलिकावुभौ॥

इति मुग्धबोधटीकायां दुर्गादासः॥ *॥

अस्य माहात्म्यं यथा,—

"विश्वपादशिरोग्रीवं विश्वेशं विश्वभावनम्। यत्प्राप्तये महापुण्यमोमित्येकाक्षरं जपेत्॥ तदेवाध्ययनं तस्य स्वरूपं ब्रह्मणः परम्। अकारश्च तथोकारो मकारश्चाक्षरत्रयम्॥ ऋतास्त्रिसः स्मृता मात्राः सात्त्वराजसतामसाः। निर्गुणा योगिगम्याश्च अर्द्धमात्रा तु सा स्मृता॥ गान्धारीति च विज्ञेया गान्धारस्वरसंश्रया। पिपीलिकागतिस्पर्शा प्रयुक्ता मूर्द्धनि लक्ष्यते॥ यदा प्रयुक्त ॐकारः प्रतिनिर्य्याति मूर्द्धनि। तदोङ्कारमयो योगी अक्षरे क्षरतां भवेत्॥ प्राणो धनुः शरश्चात्मा ब्रह्म वेध्यमुदाहृतम्। अप्रमत्तेन वेद्धव्यं शरवत्तन्मयो भवेत्॥ ओमित्येते त्रयो देवास्त्रयो लोकास्त्रयोऽग्नयः। विष्णुक्रमास्त्रयश्चैव ऋक्सामानि यजूंषि च॥ मात्राश्चार्द्धान्वितास्तु विज्ञेयाः परमार्थतः। तत्र युक्तश्च यो योगी स तल्लयमवाप्नुयात्॥ अकारस्तत्र भूर्लोक उकारश्चोच्यते भवः। सत्यज्ञानो मकारश्च स्वर्लोकः परिकल्पितः॥ अर्द्धा तु प्रथमा मात्रा द्वितीयार्द्धसंज्ञिका। मात्रा तृतीया चिच्छक्तिरर्द्धमात्रा परं पदम्॥ अनेनैव क्रमेणैता विज्ञेया योगभूमयः। ओमित्युच्चारणात् सर्व्वं गृहीतं सदसद्भवेत्॥ ह्रस्वा तु प्रथमा मात्रा द्वितीया दीर्घसंयुता। प्लुतीया तु मृताङ्गाख्या वचनः सात्त्वगोचरे॥ इत्येतदक्षरं ब्रह्म परमोङ्कारसंज्ञितम्। यस्तं वेद नरः सम्यक् तथा ध्यायति वा पुनः॥ संसारचक्रमुत्सृज्य त्यक्त्वा त्रिविधबन्धनः। प्राप्नोति ब्रह्मनिलयं परमं परमात्मनि॥

एकीयकर्म्मजन्यन्तु ज्ञात्वा ग्रन्थमुपस्थितम्।
उत्पत्तिक्रमे संस्तुत्य पुनर्योगित्वमिच्छति॥
तन्मादक्षिद्रयोगेन सिद्धयोगेन वा पुनः।
क्षेयान्परिणामे वदा येनोत्क्रान्तो न
यीदति॥"

इति श्रीमार्कण्डेयपुराणे ॐकारमाहात्म्यम्॥॥

"यज्ञूनमतिरिक्तञ्च यच्छिद्रं यदयज्ञियम्।
यन्मेध्यमनुद्दिष्टं यातयामञ्च यद्भवेत्।
तदोङ्कारप्रयुक्तेन सर्व्वमेवाविकलं भवेत्॥"

इति तिथ्यादितत्त्वम्॥८॥

"ओमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन्।
यः प्रयाति त्यजन् देहं स याति परमां गतिम्॥"

इति श्रीभगवद्गीतायाम्। ८। १३॥

प्रणादः, पुं, (प्रणदनमिति। प्र+नद+घञ्।) अनुरागजशब्दः। इत्यमरः। १। ६। ११॥ "प्रीतिजनितो सुखकण्ठादिशब्दः। प्रीतिजं प्रीतिकृतम्। 'अनुरागकृते शब्दे प्रणादः प्रीतिकृतं पृथाम्।' इति शब्दार्णवः॥ अनुरागजलोकप्रभवः शब्दः। इति मधुमाधवः। अनुरागजन्मा जनशब्दः। इति कलिङ्गः।" इत्यमरटीकायां भरतः॥ तारशब्दः। (यथा, रामायणे। २। ३८। २।

"तेन तत्र प्रणादेन दुःखितः स महीपतिः।
चिच्छेद जीविते श्रद्धां धर्म्मे यशसि चात्मनः॥")

अवगमः। इति मेदिनी। दे, ३६॥ ग्रीवस्य नामान्तरं कर्व्वनादः। यथा,—

"कर्व्वसोत्सिते वाति ध्वनति विविधान्
स्वरान्।
भेरीमृदङ्गझल्लानां कर्व्वनादः स उच्यते॥"

इति माधवकरः॥

प्रणामः, पुं, (प्र+नम+भावे घञ्।) प्रणतिः। प्रणिपातः। भक्तिश्रद्धानिश्चययुक्तनमस्कारः। स तु स्वापकर्षबोधकव्यापारविशेषः। इति दुर्गादासः॥ स चतुर्विधः। अभिवादनम् १ अष्टाङ्गः २ पञ्चाङ्गः ३ करशिरःसंयोगश्च ४। प्रथमस्य लक्षणं तच्छब्दे द्रष्टव्यम्॥ द्वितीयो यथा,—

"पद्भ्यां कराभ्यां जानुभ्यामुरसा शिरसा दृशा।
वचसा मनसा चैव प्रणामोऽष्टाङ्ग ईरितः॥"

तस्य फलम्।

"भूमौ निपत्य यः कुर्य्यात् क्षणेऽष्टाङ्गमतिं बुधः।
सप्तजन्मकृतं पापं त्यक्त्वा वैकुण्ठमाप्नुयात्॥"

तृतीयो यथा,—

"बाहुभ्यामेव जानुभ्यां शिरसा वचसा दृशा।
पञ्चाङ्गोऽयं प्रणामः स्यात् पूजासु प्रवरार्विभौ॥" ७॥

प्रकर्षेण नमनम्। तद्विधिर्यथा, कालिकापुराणे।

"शिरोमस्तादयोः कृत्वा बाहुभ्याञ्च परस्परम्।
प्रणमं पाहि मामीश भीतं मृत्युमहार्णवात्॥"

किरातार्जुनीये।

"दोर्भ्यां पद्भ्यां च जानुभ्यामुरसा शिरसा दृशा।
मनसा वचसा चेति प्रणामोऽष्टाङ्ग ईरितः॥८॥

जानुभ्यामेव बाहुभ्यां शिरसा वचसा धिया।
पञ्चाङ्गकः प्रणामः स्यात् पूजासु प्रवरार्विभौ॥"

इति॥ ९॥

"गरुडं दक्षिणे कृत्वा कुर्य्यात्तत्पृष्ठतो बुधः।
अवश्यञ्च प्रणामांस्त्रीन् मुक्तश्चेदधिकाधिकान्॥" १०॥

तथा च नारदपञ्चरात्रे।

"वन्दिं वीक्ष्य हरिं चाद्यं गुरून् स्वगुरुमेव च।
द्विचतुर्व्विंशदथवा चतुर्व्विंशतदर्हकम्॥
नमेत्तदर्हमथवा तदर्हं सर्व्वदा नमेत्॥" ११॥

विष्णुधर्म्मोत्तरे।

"देवार्चादर्शनादेव प्रणमेन्मधुसूदनम्।
स्नानार्पेक्षा न कर्त्तव्या दृष्ट्वार्चां द्विजसत्तमाः॥
देवार्चादृष्टिपूतं हि शुचि सर्व्वं प्रकीर्त्तितम्॥" १२॥

अथ नमस्कारमाहात्म्यम्। नारसिंहे।

"नमस्कारः स्तुतो यज्ञः सर्व्वयज्ञेषु चोत्तमः।
नमस्कारेण चैकेन नरः पूतो हरिं व्रजेत्॥"

स्कान्दे।

"दण्डप्रणामं कुरुते विष्णवे भक्तिभावतः।
रेणुसङ्ख्यां वसेत् स्वर्गे मन्वन्तरशतं नरः॥"

तत्रैव ब्रह्मनारदसंवादे।

"प्रणम्य दण्डवद्भूमौ नमस्कारेण योऽर्चयेत्।
स यां गतिमवाप्नोति न तां क्रतुशतैरपि।
नमस्कारेण चैकेन नरः पूतो हरिं व्रजेत्॥"

तत्रैव श्रीशिवोमासंवादे।

"भूमिमाप्रीड्य जानुभ्यां शिर आरोप्य वै
भुवि।
प्रणमेद्यो हि देवेशं सोऽश्वमेधफलं लभेत्॥"

तत्रैवान्यत्र।

"तीर्थकोटिसहस्राणि तीर्थकोटिशतानि च।
नारायणप्रणामस्य कलां नार्हन्ति षोडशीम्॥
श्राद्धेनापि नमस्कारं कुर्व्वतः श्राद्धदानवत्।
शतजन्मार्ज्जितं पापं तत्क्षणादेव नश्यति॥
रेणुसङ्ख्यितगात्रस्य कथा देहे भवन्ति ये।
तावद्वर्षसहस्राणि विष्णुलोके महीयते॥"

विष्णुधर्म्मोत्तरे।

"अभियाद्य जगन्नाथं कृतार्थश्च तथा भवेत्।
नमस्कारक्रिया तस्य सर्व्वपापप्रणाशिनी॥
पाणिभ्यामेव पाणिभ्यां शिरसा च द्विषट्टयः।
दत्त्वा प्रणामं देवस्य सर्व्वान् कामानवाप्नुयात्॥"

विष्णुपुराणे।

"अनादिनिधनं देवं देवदानवपूजितम्।
ये नमन्ति नरा नित्यं न हि पश्यन्ति ते यमम्॥
ये जगत्प्रणतां पापं नित्यं नारायणं द्विजाः।
नमन्ति न हि ते विष्णोः स्यानादण्डस्य भागिनः॥"

नारदीये।

"एकोऽपि कृष्णस्य कृतः प्रणामो
दशाश्वमेधावभृथेन तुल्यः।
दशाश्वमेधी पुनरेति जन्म
कृष्णप्रणामी न पुनर्भवाय॥"

हरिभक्तिसुधोदये।

"विष्णोर्देहप्रणामार्थं भक्त्या यतता भुवि।
पातितं पातकं तत्तु नोत्तिष्ठति पुनः क्वचित्॥"

स्कान्दे देवकृतविष्णुस्तवसंवादे।

"तपस्तप्त्वा नरो घोरमरण्ये निर्व्वृतेन्द्रियः।
यत् फलं समवाप्नोति तन्नत्वा गरुडध्वजम्॥
कृत्वापि बहुशः पापं नरो मोहसमन्वितः।
न याति नरकं नत्वा सर्व्वपापहरं हरिम्॥"

तत्रैव वेदनिधिस्तुतौ।

"अपि पापं दुराचारं नरं त्वत्प्रणतं हरे।
नेक्षन्ते किङ्करा यान्या उलूकास्तमसं यथा॥"

विष्णुपुराणे श्रीयमस्य निजभटानुशासने।

"हरिमभरणार्चिताङ्घ्रिपद्मं
प्रणमति यः परमार्थतो हि मर्त्यः।
तमपगतसमस्तपापपङ्कं
व्रज परिवर्ज्य यथाग्निमाज्यसिक्तम्॥"

ब्रह्मवैवर्त्ते।

"शरणागतरक्षणोद्यतं
हरिमीशं प्रणमन्ति ये नराः।
न पतन्ति भवाम्बुधौ स्फुटं
पतितानुद्धरति स्म तानसौ॥"

अष्टमस्कन्धे च बलिवाक्ये।

"अहो प्रणामाय कृतः सतल्पमः
प्रपन्नभक्तार्थविधौ समाहितः।
यल्लोकपालैस्तदनुग्रहोऽमरै-
रलब्धपूर्व्वोऽपदि सुरैरपार्थितः॥"

अतएव नारायणबृहत्स्तवे।

"अहो भाग्यमहो भाग्यमहो भाग्यं वृणामिदम्।
येषां हरिपदाम्भोजे शिरो न्यस्तं यथा तथा॥"

किञ्च। नारसिंहे श्रीयमोक्तौ।

"तस्य वै नारसिंहस्य विष्णोरमिततेजसः।
प्रणामं ये प्रकुर्व्वन्ति तेषामपि नमो नमः॥"

भविष्योत्तरे च जलधेनुप्रसङ्गे।

"विष्णोर्देवजगद्धातुर्जनार्द्दनजगत्पतेः।
प्रणामं ये प्रकुर्व्वन्ति तेषामपि नमो नमः॥"

इत्यादि॥ १०॥

अथ प्रणामनित्यता। दक्षस्मारदीये सुव्रकोपाख्यानारम्भे।

"सकृद्वा न नमेद्यस्तु विष्णवे धर्म्मकारिणे।
शूकरोपमं विजानीयात् कदाचिदपि नास्पृशेत्॥"

किञ्च। पाद्मे वैशाखमाहात्म्ये यमब्राह्मणसंवादे।

"पश्यन्तो भगवद्वारं नाम शुक्लपरिच्छदम्।
चक्रुत्वा तत्प्रणामादि यान्ति ते नरकौकसः॥" ११॥

अथ नमस्कारे निषिद्धानि। विष्णुस्तुतौ।

"जन्मप्रभृति यत्किञ्चित् पुमान् वै धर्म्ममाचरेत्।
सर्व्वं तन्निष्फलं याति एकपृच्छाभिवादनात्॥"

वाराहे

"वक्त्रप्राङ्मुखदेहस्तु यो नरः प्रत्यगं नमेत्।
श्रियं च जायते नूनं सप्तजन्मनि भामिनि!॥"

किरातार्जुनीये च।

"चक्रे पृष्ठे वामभागे समीपे शम्भुमन्दिरे।
नमस्कोमननस्कारान्न कुर्य्यात् केशवार्चने॥"

अपि च ।
"सकृद्भूमौ निपतितो न मुक्तः प्रणमेन्मुहुः ।
उत्थायोत्थाय कर्त्तव्यं दण्डवत् प्रणिपातनम् ॥"
इति श्रीहरिभक्तिविलासे ८ विलासः ॥
ननिविशेषस्तु यामले ।
"त्रिकोणाकारा सर्व्वत्र नतिः मुक्तैः समीरिता ।
दक्षिणादावर्त्तीं गत्वा दिशं तस्याश्च शाम्भवीम् ॥
ततश्च दक्षिणां गत्वा नमस्कारस्त्रिकोणवत्॥"*॥
एकहस्तप्रणामनिषेधो यथा,—
"एकहस्तप्रणामश्च एकं वापि प्रदक्षिणम् ।
अकाले दर्शनं विष्णोर्हन्ति पुण्यं पुराकृतम् ॥"
इति तन्त्रसारः ॥ * ॥
कायिकवाचिकमानसभेदेन प्रत्येकं त्रिविधः ।
यथा, कालिकापुराणे ७० अध्याये ।
"कायिको वाग्भवश्चैव मानसस्त्रिविधः स्मृतः ।
नमस्कारस्तु तत्त्वज्ञैरुत्तमाधममध्यमः ॥
प्रसार्य्य पादौ हस्तौ च पतित्वा दण्डवत् क्षितौ ।
जानुभ्यामवनीं गत्वा शिरसा स्पृश्य मेदिनीम् ॥
क्रियते यो नमस्कार उत्तमः कायिकस्तु सः ।
जानुभ्यां क्षितिं संस्पृश्य शिरसा स्पृश्य मेदिनीम् ॥
क्रियते यो नमस्कारो मध्यमः कायिकस्तु सः ।
पुटीकृत्य करौ शीर्षे दीयते यद्यथा तथा ॥
अस्पृश्य जानुशीर्षाभ्यां क्षितिं सोऽधम उच्यते॥
यः स्वयं गत्यपद्याभ्यां घटिताभ्यां नमस्कृतिः ।
क्रियते भक्तियुक्तैर्वा वाचिकस्तूत्तमः स्मृतः ॥
पौराणिकैर्वैदिकैर्वा मन्त्रैर्यो क्रियते नतिः ।
मध्यमोऽसौ नमस्कारो भवेद्वाचनिकः सदा ।
स वाचिकोऽधमो ज्ञेयो नमस्कारेषु पुत्रकौ ॥*
इष्टमध्यानिष्टगतैर्मनोभिस्त्रिविधं पुनः ।
मननं मानसं प्रोक्तमुत्तमाधममध्यमम् ॥
त्रिविधे च नमस्कारे कायिकश्चोत्तमः स्मृतः ।
कायिकैस्तु नमस्कारैर्देवास्तुष्यन्ति नित्यशः ॥
अयमेव नमस्कारो दण्डादिप्रतिपत्तिभिः ।
प्रणाम इति विज्ञेयः स पूर्व्वं प्रतिपादितः ॥"*॥
शूद्रपूजितदेवताप्रणामनिषेधो यथा,—
"यः शूद्रेणार्च्चितं लिङ्गं विष्णुं वा प्रणमेद्यदि ।
निष्कृतिस्तस्य नास्त्येव प्रायश्चित्तायुतैरपि ॥"
इति कर्म्मलोचनम् ॥

प्रणाय्यः, त्रि, (प्रणीयते इति । प्र+नी+ण्यत् । "प्रणाय्योऽसम्मतौ ।" ३ । १ । १२८ । इति साधुः ।) असम्मतः । (यथा, भट्टिः । ६।६६ । "न प्रणाय्यो जनः कश्चित् निकार्य्यं तेऽधितिष्ठति ॥") अभिलाषविवर्ज्जितः । इति मेदिनी । ये, ६३ ॥ साधुः । इति त्रिकाण्डशेषः । प्रियः । इति शब्दबोधव्याकरणम् ॥

प्रणालः, पुं, (प्रणाल्यते जलादिर्निःसार्य्यतेऽनेनेति । प्र+णल+घञ् ।) जलनिःसरणमार्गः । इत्यमरः । १ । १० । ३५ ॥ पयनाला इति भाषा ॥

प्रणाली, स्त्री, (प्रणाल+गौरादित्वात् ङीष् ।) जलनिःसरणमार्गः । इत्यमरः । १ । १० । ३५ ॥ पयनाला इति भाषा ॥ (यथा, रामायणे । २ । ६२ । १० ।
"तदाक्यं करुणं राज्ञः श्रुत्वा दीनस्य भाषितम् ।
कौशल्या वर्द्धनीयं प्रणालीव नवोदकम् ॥")

प्रणिधानं, क्ली, (प्रणिधीयतेऽनेनेति । प्र+नि+धा+ल्युट् ।) प्रयत्नः । (यथा, महाभारते । ५ । १०३ । २१ ।
"प्रणिधानेन धैर्य्येण रूपेण वयसा च मे ।
मनःप्रविष्टो देवर्षे ! गुणकेश्याः पतिर्व्वरः ॥")
समाधिः । (यथा, रघुः । १ । ७४ ।
"सोऽपश्यत् प्रणिधानेन सन्ततेः स्तम्भकारणम् ॥")
प्रवेशनम् । इति मेदिनी । ने, १६३ ॥ (यथा, सुश्रुते शारीरस्थाने ८ अध्याये ।
"बहुशः चिता हीनग्रस्तप्रणिधानेनापविद्धा ॥")

प्रणिधिः पुं, (प्रणिधीयते इति । प्र+नि+धा+किः ।) चरः । (यथा, देवीभागवते । ५।३।६ ।
"प्रणिधिं प्रेषयामास द्वयारिस्तु गृचीपतिम् ॥")
प्रार्थनम् । इत्यमरः । ३ ।३ । ६६ ॥ अवधानम् । इति भरतः ॥ (बृहद्रथपुत्रः । यथा, महाभारते । ३ । २१६ । ६ ।
"बृहद्रथस्य प्रणिधिः कश्यपस्य बृहत्तरः ।
भानुरङ्गिरसो धीर ! पुत्रो वर्चस्य सौरभः ॥")

प्रणिपातः, पुं, (प्र+नि+पत+घञ् ।) प्रणतिः । इति हेमचन्द्रः ॥ (यथा, कुमारे । ३ । ६१ ।
"तस्याः सखीभ्यां प्रणिपातपूर्व्वं
स्वहस्तलूनः शिशिरात्ययस्य ।
अकीर्य्यत चाम्बकपादमूले
पुष्पोच्चयः पल्लवभङ्गभिन्नः ॥")

प्रणिहितं, त्रि, (प्र+नि+धा+क्तः ।) स्थापितम् । प्राप्तम् । समाहितम् । इति मेदिनी । ते, २०३ ॥ (मिलितम् । यथा, रामायणे । ४ । २५ । ३४ ।
"ततः प्रणिहिताः सर्व्वा वानर्य्योऽस्य वशानुगाः ।
चुक्रुशुर्व्वीरवीरेति भूयः क्रोशन्ति ताः प्रियम् ॥")

प्रणीतं, त्रि, (प्र+नी+क्त ।) उपसम्पन्नम् । पाकेन रूपरसादिसम्पन्नशञ्जनादि । इत्यमरभरतौ । क्षिप्तम् । विहितम् । प्रवेशितम् । इति मेदिनी । ते, १२४ ॥ कृतम् । इति हेमचन्द्रः ॥

प्रणीतः, पुं, (प्रणीयते इति । प्र+नी+क्त ।) संस्कृतानलः । यज्ञे मन्त्रादिना संस्कृताग्निः । इत्यमरः । २ । ७ । २० ॥

प्रणीता, स्त्री, (प्रणीत+टाप् ।) यज्ञपात्रविशेषः । इति मेदिनी । ते, १२४ ॥

प्रणुतं, त्रि, (प्र+णु+क्त ।) स्तुतम् । इत्यमरः । ३ । १ । १०६ ॥

प्रणेयः, त्रि, (प्रकर्षेण नेतुं शक्यः । प्र+नी+"अचो यत् ।" ३ । १ । ६७ । इति यत् ।) वश्यः । इत्यमरः । ३ । ३ । २५ ॥ (यथा, महाभारते । १२ । ५६ । ६० ।
"असत्प्रणेयो राजेति लोकांश्चैव वदन्त्युत ॥")

प्रतितिः, स्त्री, (प्रतनोतीति । प्र+तन+क्तिच् ।) विस्तृतिः । वल्ली । इति मेदिनी । ते, १२६ ॥
प्रतती, स्त्री, (प्रतति+ङीष् ।) व्रततौ । इत्यमरटीकायां भरतः ॥

प्रतनः, त्रि, (प्र+"नञ्च पुराणे प्रात् ।" ५ । ४ । २५ । इत्यस्य वार्त्तिके इति चकारात् ट्यु तुट् च ।) पुरातनः । इत्यमरः । ३ । १ । ७७ ॥

प्रतर्कणं, क्ली, (प्र+तर्क+भावे ल्युट् ।) वितर्कः । तत्पर्य्यायः । तर्कः २ वितर्कः ३ ऊहः ४ वहः ५ जहः ६ वितर्कणम् ७ अध्याहारः ८ अध्याहरणम् ९ ऊहनम् १० । इति शब्दरत्नावली ॥

प्रतलं, क्ली, (प्रकृष्टं तलम् ।) पातालभेदः । इति मेदिनी । ले, १०६ ॥

प्रतलः, पुं, (प्रकृष्टं तलमस्य ।) विस्तृताञ्जलिपाणिः । चपेटः । इत्यमरः । २ । ६ । ८४ ॥

प्रतानः, पुं, विस्तृतः । प्रपूर्ब्बतनधातोर्घञ्प्रत्ययनिष्पन्नः ॥ (तन्तुः । यथा, रघुः । २ । ८ ।
"लताप्रतानोद्ग्रथितैः स केशै-
रधिज्यधन्वा विचचार दावम् ॥")
वायुरोगविशेषः । तस्य संज्ञान्तरं अपतानकम् । यथा,—
"दृष्टिं संस्तभ्य संज्ञाञ्च हत्वा कण्ठेन कूजति ।
हृदि सुप्ते नरः खास्थ्यं याति मोहं पुनः पुनः ।
वायुना दारुणं प्राहुरेके तदपतानकम् ॥"
इति माधवकरः ॥

प्रतानिनी, स्त्री, (प्रतानो विस्तारोऽस्यस्या इति । प्रतान+इनिः ।) प्रतानवती । विस्तृतलतादिः । इत्यमरभरतौ ॥

प्रतापः, पुं, (प्र+तप्+घञ् ।) कोषदण्डजतेजः । कोषो धनं दण्डो दमः तद्धेतुत्वात् सैन्यमपि दण्डः ताभ्यां यत्तेजो जायते सः । इति भरतः ॥ तत्पर्य्यायः । प्रभावः २ । इत्यमरः । २ । ८ । २० ॥ (यथा, मनुः । ६ । ३१० ।
"प्रतापयुक्तस्तेजस्वी नित्यं स्यात् पापकर्म्मसु ॥"
पौरुषम् । यथा, रामायणे । १ । १ । ११ ।
"समः समविभक्ताङ्गः स्निग्धवर्णः प्रतापवान् ॥"
"प्रतापः स्तुतिमात्रेण रिपुहृदयविदारणक्षमं पौरुषं तद्वान् । 'प्रतापौ पौरुषातपौ ।' इति कोषः ।" इति तट्टीकायां रामानुजः ॥) तापः । (यथा, रघुः । ४ । १२ ।
"यथा प्रह्लादनाच्चन्द्रः प्रतापात् तपनो यथा ।
तथैव सोऽभूदन्वर्थो राजा प्रकृतिरञ्जनात् ॥")
तेजः । इति मेदिनी । पे, २० ॥ अर्कवृक्षः । इति राजनिर्घण्टः ॥ (युवराजस्य छत्रे, क्ली । यथा, भोजराजकृतयुक्तिकल्पतरौ ।
"नीलो दण्डश्च वस्त्रञ्च शिरःक्षौमस्तु कानकः ।
सौवर्णं युवराजस्य प्रतापं नाम विश्रुतम् ॥")

प्रतापनं, क्ली, (प्र+तप+णिच्+भावे ल्युट् ।) पीडनम् । इति शब्दरत्नावली ॥ (यथा, सुश्रुते । १ । २६ ।
"कानकं राजतं ताम्रं रैतिकं त्रपु सीसकम् ।
शिरस्यानाह्यशीर्य्यन्ते पित्ततेजःप्रतापनात् ॥")

प्रतापन:, पुं, (प्रतापयतीति। प्र+तप्+णिच्+ल्युः।) नरकविशेषः। इति शब्दरत्नावली॥ स च क्रमीपाकः। इति श्रीभागवतम्॥ (लैंग्रदायक,त्र। यथा, सुश्रुते उत्तरतन्त्रे ३६अध्याये। "रुद्रकोपाग्निसम्भूतः सर्व्वभूतप्रतापनः॥")

प्रतापवः, पुं, (प्रतापं चक्षुस्तेजः स्यति नाशयतीति। सो+कः।) सुक्ताकवृक्षः। इत्यमरः। २। ४। ८१॥ (यथा, भावप्रकाशे। "श्वेतार्कौ गणरूपः स्यान्मन्दारो वसुकोऽपि च। श्वेतपुष्पो महापुष्पः सबालार्कः प्रतापसः॥" प्रज्ञस्तापसश्च॥)

प्रतारकः, त्रि, (प्रतारयतीति। प्र+तॄ+णिच्+ण्वुल्।) वञ्चकः। धूर्त्तः। यथा। यो यस्य प्रतारकः स तस्याध्यापकः॥ (यथा च ब्रह्मवैवर्त्ते प्रकृतिखण्डे २७ अध्याये। "शून्यन्नास्तीति वादी यो मिथ्यावादी प्रतारकः। देवद्वेषी गुरुद्वेषी स गोहत्यां लभेद्ध्रुवम्॥")

प्रतारणं, क्ली, (प्र+तॄ+णिच्+भावे ल्युट्।) प्रतारणा। तत्पर्य्यायः। वञ्चनम् २ वलीकम्३ अभिसन्धानम् ४। इति हेमचन्द्रः। ३। ४३॥ (यथा, राजतरङ्गिण्याम्। १। १५७। "क्षुद्रे दामोदरीये वत्तस्यासीत् खलतं पुरम्। सेतुना तेन तच्चैक्षत् कर्त्तुं सोऽम्भःप्रतारणम्॥")

प्रतारणा, स्त्री, (प्र+तॄ+णिच्+युच्। टाप्।) वञ्चना। यथा,— "यदीच्छसि वशीकर्त्तुं जगदेकेन कर्म्मणा। उपास्यतां कलौ कल्पलता देवी प्रतारणा॥" इत्युड्डटः॥

प्रतारितः, त्रि, (प्र+तॄ+णिच्+क्तः।) क्षतप्रतारणः। तत्पर्य्यायः। वंचितः २। इति त्रिकाण्डशेषः॥

प्रति, अ, (प्रथते इति। प्रथ विख्यातौ+बाहुलकात् डति।) विंशत्युपसर्गान्तर्गतपञ्चदशोपसर्गः। वीप्सादेर्वेनास्य गिसंज्ञा क्षता। अस्यार्थाः। प्रतिनिधिः। सुखबद्धः। यथा प्रद्युम्नः केशवात् प्रति॥ वीप्सा। व्याप्तुमिच्छा। यथा वृक्षं वृक्षं प्रति सिञ्चति॥ लक्षणम्। चिह्नम्। यथा वृक्षं प्रति विद्योतते विद्युत्॥ इत्यम्भूताख्यानम्। कथञ्चित् प्रकारमापन्नं इत्यम्भूतं तस्याख्यानम्। यथा साधुर्विप्रो मातरं प्रति॥ भागः। स्वीक्रियमाणोंऽशः। यथा हरं प्रति हलाहलम्॥ प्रतिदानम्। गृहीतस्य प्रतिदानम्। यथा भक्तेः प्रत्यष्टतं शुभ्रोः। तिलेभ्यः प्रति माषान् यच्छति। तिलान् गृहीत्वा माषान् ददातीत्यर्थः॥ स्तोकम्। अल्पम्। यथा। शाकप्रति रूपप्रति। क्षेपः। निश्चयः। इत्यमरभरतमेदिनीकाराः॥ व्याहृत्तिः। प्रश्नोक्तिः। विरोधः। समाधिः। इति मुग्धबोधटीकायां दुर्गादासः॥ अभिमुखम्। स्वभावः। इति शब्दरत्नावली॥

प्रतिकः, त्रि, कार्षापणेन क्रीतः। "कार्षापणाट्ठिठन् वक्तव्यः प्रतिरादेशश्च वा।" ५। १। २५। इत्यस्य वार्त्तिकोक्त्या टिठन्। कार्षापणिकः। इति सिद्धान्तकौमुदी॥

प्रतिकर्म्म, [न्] क्ली, (प्रत्यङ्गं प्रतिख्यातं वा कर्म्म। शाकपार्थिवादिवत् समासः।) प्रसाधनम्। वेषः। इत्यमरः। २। ६। ६६॥ (यथा, माघे। ५। २७। "आस्तीर्णतल्परचितावसथः क्षणेन वेषाञ्जनः क्षतनवप्रतिकर्म्मकान्तः॥")

प्रतीकारः। यथा, महाभारते। ४। ५६। १८। "उषिताः स्मो वने वासं प्रतिकर्म्मचिकीर्षवः। कोपं नार्हसि नः कर्त्तुं सदा समरदुर्ज्जय!॥" अङ्गसंस्कारः। इति क्वचिदमरे। २। ६। १२१॥)

प्रतिकायः, पुं, (प्रतिगतः कायो यत्र।) शरव्यम्। प्रतिरूपकम्। इति जटाधरः॥

प्रतिकारः, पुं, (प्रति+कृ+घञ्।) प्रतीकारः। इति शब्दरत्नावली॥ (यथा, रघुः। ८। ४०। "प्रतिकारविधानमायुषः सति शेषे हि फलाय कल्पते॥")

प्रतिकाशः, त्रि, (प्रति+काश+घञ्।) प्रतीकाशः। इत्यमरटीकायां भानुदीक्षितः॥

प्रतिकासः, त्रि, (प्रति+कास+घञ्।) प्रतीकाशः। इत्यमरटीकायां रमानाथः॥

प्रतिकूपः, पुं, (प्रतिरूपः कूपः।) परिखा। इति हारावली। १७४॥

प्रतिकूलं, त्रि, (प्रतीपं कूलादिति।) अननुकूलम्। विपक्षः। तत्पर्य्यायः। प्रसह्यम् २ अपसव्यम्३ अपहनु ४। प्रतीपम्। इत्यमरः। ३। १। ८४॥ (यथा, मनुः। ६। २७५। "राज्ञः कोषापहर्त्तुं च प्रतिकूलेषु च स्थितान्। घातयेद्विविधैर्दण्डैररीणाञ्चोपजापकान्॥")

प्रतिकृतिः, स्त्री, (प्रकृष्टा कृतिः।) प्रतिमा। इत्यमरः। २। १०। ३६॥ प्रतिनिधिः। (यथा, रघुः। ८। ६२। "तेनाष्टौ परिगमिताः समाः कथञ्चित् बालत्वादवितथसूनृतेन सूनोः। साद्दश्यप्रतिकृतिदर्शनैः प्रियायाः स्वप्नेषु क्षणिकसमागमोत्सवेच्छ॥")

प्रति+कृ+भावे क्तिन्।) प्रतिकारः। इति मेदिनी। ते, २१०॥ (यथा, हरिवंशे। २५७। २३। "शृणुध्वं देवताः सर्व्वाः शत्रुप्रतिकृतिं पराम्। अवध्या दानवाः सर्व्वे ऋते शस्त्रमयत्नम्॥")

प्रतिकृत्तं, त्रि, (प्रति कृत्यते स्मेति। प्रति+कृत्+क्तः।) गर्ह्यम्। द्विराहृत्याकर्षितम्। इति मेदिनी। टे, ६४॥

प्रतिक्षणं, अ, (क्षणं क्षणं प्रति।) पौनःपुन्यम्। इति शब्दरत्नावली॥ (यथा, कुमारे। ५। १०। "प्रतिक्षणं सा कृतरोमविक्रियां व्रताय मौञ्जीं त्रिगुणां बभार याम्। अकारि तत्पूर्व्वनिबद्धया तया सरागमस्या रशनागुणाद्यदम्॥")

प्रतिक्षयः, पुं, (प्रतिक्षिणोति हिनस्ति विपक्षादीनिति। प्रति+क्षि+अच्।) रक्षकः। इति शब्दरत्नावली॥

प्रतिक्षिप्तः, त्रि, (प्रतिक्षिप्यते स्मेति। प्रति+क्षिप+क्तः।) वारितः। प्रेषितः। इति मेदिनी। ते, २०५॥ अधिक्षिप्तः। इत्यमरः। ३। १। ४२॥ "हे कृताधिक्षेपे। स्पर्द्धया परगुणं प्रति दुर्व्वचनमधिक्षेपः अधिक्षिप्यते स्म अधिक्षिप्तः क्तः एवं प्रतिक्षिप्तः। कस्यचित् शौर्य्यादिकं प्रति स्पर्द्धमानेन दुर्व्वचनमधिक्षेपः स यस्य कृतः सोऽधिक्षिप्तः। इति मुकुटोऽपि। केचित्तु। हे प्रेषिते। आहूय प्रेषितो यस्तु प्रतिक्षिप्तः स उच्यते। इति कृष्णदासः। इत्याहुः।" इति भरतः॥

प्रतिगतं, क्ली, (प्रतिमुखं गतं गमनम्।) पक्षिगतिविशेषः। यथा,— "गतागतप्रतिगतसम्पताद्याश्च पक्षिणाम्। गतिभेदाः पक्षियहं कृत्वायो नीड़मक्षियाम्॥" इति जटाधरः॥ (प्रति+गम+कर्त्तरि क्तः। प्रतियाते, त्रि॥)

प्रतिग्रहः, पुं, (प्रतिगृह्यमिति। प्रति+ग्रह--"ग्रहवृदृनिश्चिगमश्च।" ३। ३। ५८। इति भावे अप्।) स्वीकरणम्। सैन्यपृष्ठम्। (प्रतिगृह्णाति निष्ठीवनादिकमिति। प्रति+ग्रह+"विभाषा ग्रहः।" ३। १। १४३। इति पचे अच्।) पतद्ग्रहः। (प्रतिगृह्यते इति। प्रति+ग्रह+अप्।) द्विजेभ्यो विधिवद्देयम्। तद्ग्रहः। ग्रहभेदः। इति मेदिनी। हे, ३१॥ * ॥ ब्राह्मणस्यार्घः प्रतिग्रहार्च्चितः। यथा,— "प्रतिग्रहार्जिता विप्रे क्षत्रिये शस्त्रनिर्जिताः। वैश्ये न्यायार्जिताश्चार्घाः शूद्रे शुश्रूषयार्जिताः॥" अयाचितप्रतिग्रहे दोषाभावो यथा,— "अयाचितोपपन्ने तु नास्ति दोषः प्रतिग्रहे। अन्दतं तं विदुर्देवास्तस्मात्तत्रैव निर्गुदेत्॥ * ॥ गुरुभृत्यांश्चोज्झितीर्षुरर्च्चियन् देवतातिथीन्। सर्व्वतः प्रतिगृह्णीयात् न तु क्षयेत् स्वयं ततः॥ साधुतः प्रतिगृह्णीयादथवासाधुतो द्विजः। गुणवानल्पदोषश्च निर्गुणो हि निमज्जति॥ एवं तस्करवृत्त्या वा कृत्वा भरणमात्मनः। कृच्छ्राद्विमुच्यते परतः प्रायश्चित्तं द्विजोत्तमः॥" इति गारुड़े २१५ अध्यायः॥ * ॥ तीर्थे प्रतिग्रहनिषेधो यथा,— "सुवर्णमध युक्तात्मा तत्रैवान्यप्रतिग्रहम्। स्वकार्य्ये पितृकार्य्ये वा देवताभ्यर्च्चनेऽपि वा॥ निष्फलं तस्य तत्तीर्थे यावत्तद्धनमश्नुते। अतस्तीर्थे न गृह्णीयात् पुण्येष्वायतनेषु च॥" इति कौर्म्मे ३३ अध्यायः॥ * ॥ राजादितः प्रतिग्रहनिषेधो यथा,— "न राज्ञः प्रतिगृह्णीयान्न शूद्रपतितादपि। न चान्यस्मादशक्तश्च निन्दितान् वर्जयेद्बुधः॥" इति कौर्म्मे उपविभागे १५ अध्यायः॥ * ॥ विद्यारहितस्य प्रतिग्रहनिषेधो यथा,— "हेम भूमिं तिलान् गाञ्च अविद्वानाददाति यः। भस्मीभवति सोऽग्नाय दातुः स्वाग्निष्कलञ्च तत्॥

तस्मादविद्वान्नादद्यादल्पस्योऽपि प्रतिग्रहम् ।
विषमन्नापरिज्ञानी विषेणाल्पेन नश्यति ॥" *॥
गर्हितप्रतिग्रहादिर्यथा,—
"हस्तिहयाजिनाद्यास्तु गर्हिता ये प्रतिग्रहाः।
सद्विप्रास्तान्न गृह्णीयुर्गृह्णन्तस्तु पतन्ति ते ॥
कृष्णाजिनप्रतिग्राही हयानां शुक्लविक्रयी ।
नवश्राद्धस्य भोक्ता च न भूयः पुरुषो भवेत् ॥"*॥
आपदि गर्हितप्रतिग्रहकर्त्तव्यता यथा,—
"प्रोक्तप्रतिग्रहाभावे प्रोक्तायां दृढदापदि ।
विप्रोऽश्नन् प्रतिगृह्णन् वा यतस्ततोऽपि नाघभाक्॥
गुर्वादिपोष्यवर्गार्थं देवाद्यर्थञ्च सर्व्वशः ।
प्रत्यादद्याद्द्विजो यस्तु भृत्यर्थमात्मनोऽपि च ॥
दधिक्षीराद्यमांसानि गन्धपुष्पाम्बुमत्स्यकान् ।
प्रत्याग्रहासनं शाकं प्रत्याख्येयं न कर्हिचित् ॥
अपि दुष्कृतकर्म्मभ्यः समादद्यादयाचितम् ।
पतितेभ्यस्तथान्येभ्यः प्रतिग्राह्यमसंशयम् ॥"*॥
प्रतिग्रहीतुं शक्तस्य लभ्यमानपरित्यागेन स्वर्गो भवति । यथा,—
"शक्तः प्रतिग्रहीतुं यो वेदवृत्तः सुसंयतः ।
लभ्यमानं न गृह्णाति स्वर्गस्तस्य सुनिश्चितम्॥*॥
प्रतिग्रहन्तु वापि याचितं यो न यच्छति ।
तत्कोटिगुणितग्रस्तो मृतो दासत्वमृच्छति ॥*॥
दाता च न स्मरेद्दानं प्रतिग्राही न याचते ।
तावुभौ नरकं यातौ दाता चैव प्रतिग्रही ॥*॥
वदन्ति कवयः केचिद्दानप्रतिग्रहौ प्रति ।
प्रत्यक्षं लिङ्गमेवेह दात्रयाचक्रयोर्बलम् ॥
दातृहस्तो भवेदूर्द्ध्वमधस्तिष्ठेत् प्रतिग्रही ।
यद्दानं प्रतिगृह्णीयात् प्रतिग्राही ब्रजत्यधः॥"*॥
प्रतिग्रहप्रकारो यथा,—
"भूमेः प्रतिग्रहं कुर्य्याद्भूमिं कृत्वा प्रदक्षिणम् ।
करे गृह्य तथा कन्यां दासदास्यौ तथा द्विजाः ॥
करं हि हृदि विन्यस्य धर्म्मार्थी ज्ञेयः प्रतिग्रहः ।
आरुह्य च गजस्योक्तः कर्णे चाम्बस्य कीर्त्तितः॥
तथा चैकशफानाञ्च सर्व्वेषामविशेषतः ।
प्रतिगृह्णीत गां श्रृङ्गे पुच्छे कृष्णाजिनं तथा ॥
आरण्याः पशवः सर्व्वे ग्राम्याः पुच्छे विचक्षणे ।
प्रतिग्रहमधोऽस्य आरुह्यैव तु पादुके ॥
इध्मायानु रथो ग्राह्यश्चक्रे दण्डन्तु धारयेत् ।
द्रुमाणामथ सर्व्वेषां मूले न्यस्तकरो भवेत् ॥
आयुधानि समादाय तथा भूय विभूषणम् ।
धर्म्मध्वजी तथा सृष्ट्वा प्रविश्य च तथा गृहम्॥
अवतीर्य्य तु सर्व्वाणि जलस्थानानि चैव हि ।
उपविश्य च मृग्यायां सम्पूजयित्वा करेण वा ॥
द्रव्याण्यन्यान्यथादाय सृष्ट्वा वा ब्राह्मणं पठेत् ।
कन्यादाने न तु पठेद्व्याधि च पृथक् पृथक् ॥
प्रतिग्रहा द्विजश्रेष्ठ तत्रैवान्तर्भवन्ति ते ।
द्रव्यागमश्च सर्व्वेषां द्रव्यसंव्ययगाश्चरः ॥
वाचयेच्चलमादाय करेण च प्रतिग्रहम् ।
प्रतिग्रहस्य यो धर्म्मं न जानाति द्विजो विधिम ॥
स द्रव्यस्नेयसंयुक्तो नरकं प्रतिपद्यते ।
अथापि हि प्रवक्ष्यामि विधिं सर्व्वं विशेषतः ॥ ॥

वाग्निप्रदानेन प्रतिगृह्णे वा
दात्रग्रहीत्रोरपि येन पुण्यम् ।
स्वर्गं प्रजायेत शृणुध्वमेतत्
गृहीतयोर्वै विधिवद्द्विजेन्द्र ॥
कुर्य्यादसौ पञ्चदिनानि पूर्व्वं
पक्षोपचारैर्धृतविष्णुपूजाम् ।
कृष्णाग्नमन्त्रैर्घृतदुग्धहोमं
यद्ग्राम इत्यादि मरुत्वतीयम् ॥
सोङ्कारपूर्व्वादिभिरन्वितं तं
प्रत्येकमष्टौ जुहुयाद्द्विजेन्द्रः ।
सूर्य्येण मन्त्रेण च तद्दशौ
षष्ठ्या प्रयुक्तं त्रिशतं जुहोति ॥
कुर्य्याच्च गायत्रिजपं सहस्रं
पश्चात् प्रगृह्यं तुरगं द्विजाग्र्यः ।
तद्दत्तयात्मानमयं नयेद्वि
दातापि चैतद्व्रतमाविदध्यात् ॥
द्विजाग्र्यवत् प्राक्तनपापमुद्रौ
द्वावप्यमू सूर्य्यजनं लभेताम् ॥"

इति हेमाद्रौ दानखण्डे । ४ । ८ । अध्यायः ॥*॥
अपि च । विष्णुधर्म्मोत्तरे ।
"बीजानां सुस्थिमादाय रत्नान्यादाय सर्व्वतः ।
वस्त्रं दशान्तमादाय परिधाय तथा पुनः ॥
आरुह्योपानहौ चैव यानमारुह्य पादुके ।
प्रतिगृहीता सावित्रीं सर्व्वत्रैव प्रकीर्त्तयेत् ॥
ततस्तु सार्द्धं द्रव्येण तस्य द्रव्यस्य देवताम् ।
समाप्येत्ततः पश्चात् कामस्तुत्या प्रतिग्रहम् ॥
विधिं धर्म्मागमयो ज्ञात्वा यस्तु कुर्य्यात् प्रतिग्रहम्।
दात्रा सह तरत्येव नानादुर्गाण्यसौ द्विजः ॥"
ब्रह्मपुराणे ।
"ब्राह्मणः प्रतिगृह्णीयात् दृष्ट्वार्थं साधुसम्मतः ।
अयज्ञमपि मातङ्गतिललौहांश्च वर्ज्जयेत् ॥
कृष्णाजिनतिलग्राही न भूयः पुरुषो भवेत् ॥
भृग्यालङ्कारवस्त्रादि प्रतिगृह्य मृतस्य च ।
नरकान्न निवर्त्तन्ते धेनुं तिलमयीं तथा ॥"
तथा ।
"ब्रह्महत्या सुरापानमपि स्वैरं तरिष्यति ।
आतुरादृग्गृहीतन्तु तत् कथं वै तरिष्यति ॥"
एतदादिश्रयदानं प्रतिगृहीतुर्दोषजनकम् ॥*॥
एतदनिच्छवे विद्यादिरहितत्वेनासमर्थाय च
दातुरपि दोषजनकमाह दक्षः ।
"न केवलं हि तद्याति श्रेयसस्य च नश्यति।"
तद्दत्तद्रव्यम् । अतएव याज्ञवल्क्यः ।
"विद्यातपोभ्यां हीनेन न तु ग्राह्यः प्रतिग्रहः ।
ग्रहन् प्रदातारमधो नयत्यात्मानमेव च ॥"
अधो नरकम् ॥*॥ एतद्दानप्रतिग्रहीत्रादिरक्षा-
तपोजपादिभिरात्मतरणचमाय स्वेच्छया प्रति-
गृह्यते दानं न दोषाय इत्याह विष्णुः ।
"एतानि प्रतिगृह्णाति स्वेच्छयाभ्यर्थितो न तु ।
तस्के दाने न दोषोऽस्ति यस्तात्मानन्तु तारयेत् ॥"
तारणप्रकारमाह हारीतः ।
"गवि वाऽश्वोगवादीनां प्रतिग्रहे साविच्यष्टसहस्रं
जपेत् ॥" *। देवलः ।

"प्रतिगृह्य समर्थो हि कृत्वा विप्रो यथाविधि ।
निस्तारयति दातारमात्मानञ्च स्वतेजसा ॥"
स्कान्दे ।
"वेदाङ्गपारगो विप्रो यदि कुर्य्यात् प्रतिग्रहम्।
न स पापेन लिप्येत पद्मपत्रमिवाम्भसा ॥"
महाभारते ।
"तीर्थे न प्रतिगृह्णीयात् पुण्येष्वायतनेषु च ।
निमित्तेषु च सर्व्वेषु न प्रमत्तो भवेन्नरः ॥"
प्रतिग्रहसमर्थस्य तदकरणे फलाधिक्यं यथा ।
याज्ञवल्क्यः ।
"प्रतिग्रहसमर्थो हि नादत्ते यः प्रतिग्रहम् ।
ये लोका दानशीलानां स तानाप्नोति पुष्क-
लान् ॥"
अपवादमाह स एव ।
"कृष्णाः शाकं मयो मत्स्या गन्धाः पुष्पं दधि
क्षितिः ।
मांसं मृग्यासनं धानाः प्रत्याख्येयं न वारि च ॥"
अन्यच्च ।
"मृग्यां गृहान् कृष्णान् गन्धानपः पुष्पं मणीन्
दधि ।
मत्स्यान् धानाः पयो मांसं शाकश्चैव न निर्णुदेत्॥"
मणीन् विषादिनिवारकान् ।
"एधोदकं फलं मूलमन्नमभ्युद्धृतञ्च यत् ॥"
अभ्युद्धृतमभ्यर्थं दत्तम् ।
"सर्व्वतः प्रतिगृह्णीयात् मध्वद्योभयदक्षिणाम् ॥"
किमिति न प्रत्याख्येयमित्याह मनुः ।
"अयाचिताहृतं ग्राह्यमपि दुष्कृतकर्म्मणः ।
अन्यत्र क्षुलटाषण्डपतितेभ्यस्तथा स्त्रियः ॥"
प्रतिग्रहमात्रे प्रयोगसारे ।
"प्रतिग्रहं न गृह्णीयादात्मभोगविधित्सया ।
देवतातिथिपूजार्थं यतस्तद्धनमर्च्चयेत् ॥"
अङ्गिराः ।
"कुटुम्बार्थं द्विजः शूद्रात् प्रतिगृह्णीत याचितम् ।
कृत्वर्थमात्मने चैव न हि याचेत कर्हिचित् ॥"
यज्ञार्थं याचने निन्दामाह याज्ञवल्क्यः ।
"याज्ञाजो जायते यज्ञकरणाच्छूद्रभिक्षितात्॥"

इति शुद्धितत्त्वम् ॥

प्रतिग्राहः, पुं, (प्रतिगृह्णाति निष्ठीवनादिकमिति प्रति + ग्रह् + "विभाषा ग्रहः ।" ३ । १ । १४३ । इति घञ् ।) पतद्ग्रहः । इत्यमरः । २ । ६ । १६ ॥ (प्रति + ग्रह् + भावे घञ् ।) प्रतिग्रहणञ्च ॥

प्रतिघः, पुं, (प्रतिहन्त्यनेनेति । प्रति + हन् + डः । चर्त्वादित्वात् झत्वम् ।) क्रोधः । इत्यमरः । १ । ७ । २६ ॥ (यथा, मनौ । १५ । ५३ ।
"प्रतिघ्नतोऽपि सक्रुद्धे
नरप्रतिगणं समाश्रयत् ॥"
प्रतिघ्ननमिति ।) प्रतिघातः । इति मेदिनी । घे, १० ॥ मूर्च्छा । इति शब्दरत्नावली ॥

प्रतिघातनं, क्लो, (प्रति + हन् + णिच् + भावे ल्युट् ।) मारणम् । इत्यमरः । २ । ८ । ११७ ॥

प्रतिघं, क्लो. (प्रतिहन्यतेऽस्मिन्निति । प्रति + हन् + घञर्थे कः ।) अङ्गम् । इति शब्दचन्द्रिका ॥

प्रतिच्छन्दः, [स्] क्ली, (छन्दोऽभिप्रायः । प्रतिगतं छन्दः इति प्रादिसमासः ।) प्रतिरूपम् । इति त्रिकाण्डशेषः ॥ (अकारान्तोऽपि दृश्यते । यथा, रामायणे अयोध्याकाण्डे । ३ । ७७ ।
"रथः शिरःप्रतिच्छन्दैः शिरस्त्राणैश्च कल्पितः ।
रुक्मकक्ष्यधिरत्नान् प्रादात् तस्मै रथःप्रतिच्छन्दान् ॥")

प्रतिच्छाया, स्त्री, (प्रतिगता छायामिति।) प्रतिकृतिः। सूर्त्तिमद्द्रव्यच्छिलादिनिर्म्मितप्रतिरूपम्। इत्यमरभरतौ ॥ (यथा, हरिवंशे । १५९ । ३० ।
"मायया तस्य प्रतिच्छाया दृश्यते हि गटालये ।
देहार्द्धेन तु कौरव्य ! सिषेवे च प्रभावतीम् ॥")

प्रतिजङ्घा, स्त्री, (प्रतिगता जङ्घाम् ।) अग्रजङ्घा । इति हेमचन्द्रः । ३ । ४१५ ॥

प्रतिजल्पः, पुं, (प्रतिगतो जल्पम् ।) वाक्यविशेषः। यथा,—
"दृश्यश्रव्यप्रबन्धेऽस्मिन् प्राप्तिर्नार्थस्य युक्ततम् ।
दूतसम्भाषणेनोक्तं यत्र स प्रतिजल्पकः ॥"
इत्युज्ज्वलनीलमणिः ॥

प्रतिजागरः, पुं, (प्रतिजागरणमिति । प्रति + जागृ + घञ् । "जाग्रोऽविचीति ।" ७ । ३ । ८५ । इति गुणः ।) प्रत्यवेक्षणम् । तत्पर्य्यायः । अपेक्षा २ । इत्यमरः । ३ । २ । २८ ॥ जागरप्रतिनिधिः प्रतिजागरः । दे गृहमवेक्षस्व इत्यादिनियोगस्य इति रायमुकुटः ॥

प्रतिजिह्वा, स्त्री, (प्रतिरूपा जिह्वा ।) तालुस्थलम्बचुद्रजिह्वा । आलजिभ इति भाषा । तत्पर्य्यायः । प्रतिजिह्विका २ माध्वी ३ रसनाकूः ४ प्रतिजिह्विकाः ५ । इति शब्दरत्नावली ॥

प्रतिजिह्विका, स्त्री, (प्रतिजिह्वा + स्वार्थे कन् । टापि अत इत्वम् ।) प्रतिजिह्वा । इति त्रिकाण्डशेषः ॥

प्रतिज्ञा, स्त्री, (प्रतिज्ञायते इति । प्रति + ज्ञा + "आतश्चोपसर्गे ।" ३ । ३ । १०६ । इति अङ् । टाप् ।) कर्त्तव्यत्वप्रकारकज्ञानानुकूलव्यापारः । इत्यनुमितिनिरूपणाधिकारे ॥ साध्यनिर्देशः । इति गौतमसूत्रम् ॥ साध्याभिधायिका वाक् । इति न्यायसूत्रम् ॥ तत्पर्य्यायः । आम् २ प्रतिज्ञानम् ३ अङ्गीकारः ४ पतिव्रत्यः ५ ॐ ६ नमाधिः ७ संविद् ८ आगूः ९ आश्रवः १० संश्रवः ११ नियमः १२ अभ्युपगमः १३ वाङ्मम १४ आज्ञा १५ । इति शब्दरत्नावली ॥ सन्धा १६ सङ्गरः १७ संश्रवः १८ उररीकारः १९ अवः २० । इति जटाधरः ॥ ❀ ॥ (यथा, गोः रामायणे । २ । ११० । ६ ।
"पूर्व्वन्तु रामसन्निधावुपन्यस्य
तुल्या च दास्यं भरतस्य तस्य ।
विसर्ज्जयामास रघुनन्दनजां
विदुः प्रतिज्ञां स वभूव तूष्णीम् ॥")
प्रतिज्ञारोधो न कर्त्तव्यः । यथा,—
"यथाश्वं देवयजिते दानं नाम यतो वरम् ।
प्रतिज्ञा नावरोद्धव्या सत्यकेऽपि च वस्तुनि ॥"
इत्यग्निपुराणम् ॥

प्रतिज्ञातं, त्रि, (प्रतिज्ञायते स्मेति । प्रति + ज्ञा + क्तः ।) अङ्गीकृतम् । इत्यमरः । ३ । २ । १०८ ॥ (यथा, मनुः । ८ । १३६ ।
"अर्थे देये प्रतिज्ञाते पश्चात् भवति यो दृढः ।
अपह्नवे तद्द्विगुणं तन्मनोरनुशासनम् ॥")

प्रतिज्ञानं, क्ली, (प्रति + ज्ञा + ल्युट् ।) प्रतिज्ञा । इत्यमरः । १ । ५ । ५ ॥

प्रतिज्ञेयः, पुं, (प्रतिजानात्यनेनेति । प्रति + ज्ञा + यत् ।) स्तुतिपाठकः । इति भूरिप्रयोगः ॥ (प्रतिज्ञातुं शक्यः ।) प्रतिज्ञानार्हे, त्रि ॥

प्रतितालः, पुं, (प्रतिगतस्तालम् ।) तालविशेषः । यथा, सङ्गीतदामोदरे ।
"कान्तारः समराख्यश्च वैकुण्ठो वाञ्छितस्तथा ।
कथिताः शङ्करेणैव चत्वारः प्रतितालकाः ॥
कान्तारो यथा,—
कान्तारः प्रतितालस्तु चन्द्रक्रीड़े द्रुतद्वयम् ।
दशाक्षरपदैर्नायं शङ्कारे वर्त्तते रसे ॥ १ ॥
समराख्यो यथा,—
लघुद्रुतौ लघुश्चान्ते नृपताल उदाहृतः ।
रुद्रसंख्याक्षरपदः समरे वीररे रसे ॥ २ ॥
वैकुण्ठो यथा,—
रुद्रत्रयस्तु वैकुण्ठे प्रतितालेऽयमीरितः ।
अर्कसंख्याक्षरैः पादो हास्ये त्रिपुटतालके ॥ ३ ॥
वाञ्छितो यथा,—
वाञ्छितस्तृतीये ताले लघुरेको द्रुतस्तथा ।
चतोदशाक्षरैर्युक्तो रसेऽद्भुते प्रकीर्त्तितः ॥" ४ ॥

प्रतितालो, स्त्री, (प्रतिगता तालमिति । गौरादित्वात् ङीष् ।) तालकोद्घाटनयन्त्रम् । इति हेमचन्द्रः ॥ चाबि इति भाषा ॥

प्रतिदानं, क्ली, (प्रतिकृत्य दानं प्रतिरूपं दानं वा ।) विनिमयः । व्यक्तार्थकम् । इत्यमरः । २ । ९ । ८१ ॥

प्रतिदारणं, क्ली, (प्रतिदार्य्यतेऽस्मिन्निति । प्रति + दृ + णिच् + आधारे ल्युट् ।) युद्धम् । इति शब्दमाला ॥

प्रतिदिनं, क्ली, दिनं दिनं प्रति । अव्ययम् । यथा,
"ततः प्रतिदिनं वेला वर्द्धते त्रिपलात्मिका ॥"
इति सङ्क्षिप्तसारावली ॥

प्रतिदिवा, [न्] पुं, (प्रतिदीव्यतीति । प्रति + दिव + "कनिन् युवृषितक्षिराजिधन्विद्युप्रतिदिवः ।" उणा० १ । १५६ । इति कनिन् ।) सूर्य्यः । इति त्रिकाण्डशेषः ॥ प्रतिदिनेऽपि ॥

प्रतिदीवा, [न्] पुं, (प्रतिदिवन् । ओदरादित्वात् साधुः ।) सूर्य्यः । इति शब्दरत्नावली ॥

प्रतिदेयं, त्रि, (प्रति + दा + यत् ।) क्रीतस्यस्य दुष्क्रीतत्वज्ञा परावृत्य दानम् । यथा,—
"क्रीत्वा सत्येन यः पण्यं दुष्क्रीतं मन्यते क्रयी ।
विक्रेतुः प्रतिदेयन्तत्क्षिप्रमेवाहृतविक्षतम् ॥"
इति मिताक्षरा ॥

प्रतिध्वनिः, पुं, (प्रतिरूपो ध्वनिरिति ।) प्रतिनादः । गुमरुन इति भाषा । तत्पर्य्यायः । प्रतिशब्दः २ प्रतिश्रुत् ३ प्रतिध्वानम् ४ । इति शब्दरत्नावली ॥ (यथा, नैषधे । १६ । १० ।
"वदनकुहरेष्वधीरुद्गमयं तदुदस्यति
श्रुतिपदमयस्तेषामेव प्रतिध्वनिरध्वनि ॥")

प्रतिध्वानं, क्ली, (प्रतिध्वननमिति । प्रति + ध्वन + घञ् ।) प्रतिध्वनिः । इत्यमरः । १ । ६ । २५ ॥

प्रतिनप्ता, [तृ] पुं, (प्रतिरूपो नप्ता नप्तुः सदृश इत्यर्थः ।) प्रपौत्रः । इति हेमचन्द्रः ॥

प्रतिनवं, त्रि, (प्रतिगतं नवं नवतामिति ।) नूतनम्। इति जटाधरः ॥ (यथा, मेघदूते । ३८ ।
"पश्चादुच्चैर्भुजतरुवनं मण्डलेनाभिलीनः
सान्ध्यं तेजः प्रतिनवजवापुष्परक्तं दधानः ॥")

प्रतिनिधिः, पुं, (प्रतिनिधीयते सदृशीक्रियते इति । प्रति + नि + धा + "उपसर्गे धोः किः ।" ३ । ३ । ९२ । इति किः ।) प्रतिमा । इत्यमरः । २ । १० । ३६ ॥ सदृशः । (यथा, रघौ । १ । ८१ ।
"हुतां तदीयां सुरभेः क्रतौ त्वां प्रतिनिधिं शुचिः ।
आराधयसवलोकः प्रीता कामदुघा हि सा ॥")
तस्य विवेचनं यथा । "अत्यन्तासामर्थ्ये स्कन्दपुराणम् ।
'पुत्रं वा विनयोपेतं भगिनीं भ्रातरं तथा ।
श्यामभाव एवान्यं ब्राह्मणं विनियोजयेत् ॥'
गरुडपुराणे ।
'भार्य्यां भर्त्तृव्रतं कुर्य्यात् भार्य्यायाश्च पतिस्तथा ।
असामर्थ्ये तयोक्ताभ्यां व्रतभङ्गो न जायते ॥'
वराहपुराणे ।
'पितृमातृपतिभ्रातृश्वशुरर्त्विग्गुरुस्त्रियाम् ।
अदृष्टार्थेषु पोषित्वा स्वयञ्च फलभाग्भवेत् ॥'
अत्रैव विषये काव्यायनः ।
'दक्षिणा नाच कर्त्तव्या शुश्रूषा विहिता च या ।
नतु प्रतिनिधौ समेऽपि धर्म्मोयज्ञमन्त्रस्यफलं कुत्रान्येति चेत् प्रधान एव । तथा च शारीरिकभाष्ये श्रुतिः । 'यां वै काञ्चनयज्ञश्रुत्विज आशिषमाशासते यजमानायैव तामाशासते इति होवाच इति ।' ब्राह्मणसर्व्वस्वे तु यजमानायेत्यादौ यजमानस्यैव नेति पाठे विशेषः। तथा च सरलायां स्कन्दम् । 'यां वै काञ्चनयाज्ञ ऋत्विगाशिषमाशास्ते सा यजमानस्यैवेति।' ऋत्विग्यजमानयोर्द्वे प्रतिनिधिप्रधानपरे व्याकोपितत्वादिति । अतएव प्रतिनिधिपुत्रादिनाप्यानृ नः पितर इत्यादिवदनूद्य एव पद्यते वाक्यस्य कारणिकत्वाच्च न तथेति ॥ ❀ ॥ अत्र प्रतिनिधिप्रसङ्गेन स्मृत्यनुसारात् किञ्चिल्लिख्यते । कालमाधवीये ।
'काम्ये प्रतिनिधिर्नास्ति नित्यनैमित्तिके हि सः ।
काम्येऽपक्रमाद्दुर्निमित्ते प्रतिनिधिं विदुः ॥'
अस्यार्थस्तु माधवाचार्य्येणाभिहितः । यथा नित्यनैमित्तिकं प्रतिनिधिनाप्युपक्रम्य कारयेत् । काम्यन्तु स्वसामर्थ्ये परोक्षं स्वयमेव उपक्रम्य कुर्य्यात् । असामर्थ्ये तु उपक्रमाद्ध्वं प्रतिनिधिनापि तत्कारयेत् । अतश्च काम्यं त्रैतयरम् । काम्यमार्त्तेन अन्यद्वारापुपक्रम्य कुर्य्यात् । तथा च पराशरभाष्ये आतातपः ।

'औतं कर्म्म स्वयं कुर्य्यादन्योऽपि स्नातमाचरेत्।
अशक्तौ औतमप्यन्यः कुर्य्यादाचारमन्ततः॥'
अन्ततः उपक्रमात् परतः। अन्यथा नित्यनैमित्तिकमात्रपरत्वे औतस्नार्त्तभेदेनोपादानं व्यर्थं स्यात्तयोरविशेषादेव प्रतिनिधिलाभात्। अतएव भारतपाठादौ तथा समाचारः॥ * ॥
स्मृत्यर्थसारे।
'नाभावस्य प्रतिनिधिरभावान्तरमिष्यते।' सज्ञातीयमप्यभावान्तरमभावस्य प्रतिनिधिर्नेष्यते। भावस्तु कदाचित्। यथोपवासादौ ब्राह्मणभोजनादि।
'नापि प्रतिनिधातव्यं निषिद्धं वस्तु कुत्रचित्।
श्रोत्रियाणामभोज्यञ्च यद्दृश्यं तद्विशेषतः।
ग्राह्यं प्रतिनिधिस्तेन होमकार्य्ये न कुत्रचित्॥
द्रव्यं वैकल्पिकं किञ्चिद्दृश्यञ्च सङ्कल्पितं भवेत्।
तदलाभे सदृग्ग्राह्यं न तु वैकल्पिकान्तरम्॥
उपात्ते तु प्रतिनिधौ मुख्यार्थो लभ्यते यदि।
तत्र मुख्यमनादृत्य गौणेनैव समापयेत्॥
संस्काराणामयोग्योऽपि मुख्य एव हि गृह्यते।
न तु संस्कारयोग्योऽन्यो गृह्यते प्रतिरूपकः॥
मुख्ये कार्य्यासमर्थे तु लब्धेऽप्येतस्य नादरः।
प्रतिरूपमुपादाय प्रकृतमेवोपयुज्यते॥
काष्ठे रूपेऽक्षयो पर्णैः क्षीरैः पुष्पैः फलैस्तथा।
गन्धे रसे सदृग्ग्राह्यं सर्व्वालाभे परं परम्॥
ग्राम्याणान्तु भवेदृग्ग्राम्यमारण्यानामरण्यजम्।
यवाभावे तु गोधूमास्तथा वेणुयवादयः॥
हविष्ये गोधृतं ग्राह्यं तदलाभे तु माहिषम्।
आज वा तदलाभे तु साक्षात्तैलं प्रयुज्यते॥
तैलाभावे यहीतव्यं तैलजं तिलसम्भवम्॥'
तैलजं तिलसम्भवं तैलभृष्टतिलपिष्टम्।
'तदभावे तु सर्ज्जेहं कौसुम्भं सर्षपोद्भवम्॥
वृक्षस्नेहोऽथ वा ग्राह्यः पूर्व्वाभावे परः परः।
तदभावे गवादीनां क्रमात् क्षीरं विधीयते॥
तदलाभे दधि ग्राह्यमलाभे तिल इष्यते।
यत्र मुख्यं दधि क्षीरं तत्रापि तदलाभतः॥
अजादेः क्षीरदध्यादि तदलाभे तु गोघृतम्।
मुख्यासन्नोऽथवा ग्राह्यः कार्य्यकारणसन्ततौ॥
अतएव घृताभावे पूर्व्वं दधि ततः पयः॥'
तथा।
'नैमित्तिकञ्च गौणकालेषु कर्म्मचोदितमाचरेत्।
प्रायश्चित्तं वाहृतिभिर्हुत्वा कर्म्म समाचरेत्॥'
मात्स्ये।
'घृतं न लभ्यते यत्र शुष्कक्षीरेण होमयेत्।
क्षीरस्य च दधि ज्ञेयं मधुनश्च गुडो भवेत्॥'
आयुर्व्वेदेऽपि।
'मधु यत्र न विद्येत तत्र जीर्णगुडो भवेत्॥'
पैठीनसिः। 'काण्डमूलपर्णपुष्पफलप्ररोहरसगन्धादीनां सादृश्येन प्रतिनिधिं कुर्य्यात्। सर्व्वालाभे यवः प्रतिनिधिर्भवति।' काण्डं नालं प्ररोहोऽङ्कुरः। 'सर्व्वालाभे यव' इति कल्पतरुः। अत्रैव इति नारायणोपाध्यायाः॥ भ्रान्तिदीपिकायां नारदीयपक्षरात्रम्।
'अभावे चैव धातूनां हरितालं प्रशस्यते।
बीजानामप्यलाभे तु यव एको विधीयते।
ओषधीनामलाभे तु सहदेवा प्रशस्यते।
रत्नानामप्यलाभे तु मुक्ताफलमनुत्तमम्॥
लोहानामप्यलाभे तु हेमपात्रं प्रकल्पयेत्।'
लोहानां तैजसमात्राणाम्। न्यायप्राप्तप्रतिनिधिमधिकृत्य जैमिनिः।
'न देवतामिशब्दक्रियाणामिति।' अस्यार्थः। देवतायाः अग्नेश्च आहवनीयादेः शब्दस्य मन्त्रस्य क्रियायाः प्रधानदृष्टार्थकर्म्मणश्चादृष्टमात्रार्थकत्वेन आरादुपकारकत्वान्न प्रतिनिधिः। व्रीह्यादीनान्तु सन्निपत्योपकारकाणां पुरोडाशसाधनं दृष्टमेव प्रयोजनमिति तत्र प्रतिनिधिरुचित इत्युक्तम्।" इत्येकादशीतत्त्वम्॥ * ॥ "आरब्धकार्त्तिकादिस्नाने तु व्याधादिनाशामर्थ्ये पुत्रादिभिः प्रतिनिधिना कारयितव्यं नानुकल्पविधिना नित्यस्नान एव तद्विधानादिति।" इति मलमासतत्त्वम्॥ * ॥
स्वयंकरणासामर्थ्ये अन्यद्वारा। यथा,—"दत्तः।
'स्वयं होमे फलं यच्च तदन्येन न जायते।
ऋत्विक् पुत्रो गुरुर्भ्राता भागिनेयोऽथ विट्पतिः।
एभिरेव हुतं यत्तु तद्धुतं स्वयमेव हि॥'
विट्पतिर्ज्जामाता। एवञ्च ऋत्विगादीतरत्र फलन्यूनता॥ * ॥ अत्राशौचाशङ्कया बोधनदिनात् पूर्व्वं सुचितत्कालजीवित्वरूपाधिकारिताभावेऽपि यद्वरणादिकं क्रियते तत् कर्म्मकाले तस्य नारदोक्तस्वयं प्रवर्त्तनवत् प्रवर्त्तनाय न तु तदानीं प्रतिनिधीयते। अथवा।
'निःक्षिप्याग्निं स्वदारेषु परिकल्प्यार्त्विजन्यया।
प्रवसेत् कार्य्यवान् विप्रो वृत्त्यैव न चिरं वसेत्॥'
इति छन्दोगपरिशिष्टवदत्रापि प्रतिनिधीयते। एवं वरणं विनापि क्वचिद्यदि ऋत्विक् प्रवर्त्तते तथापि तत्कर्म्मसिद्धिः। दक्षिणा च तस्मै शुचिकाले दातव्येति। तथा च नारदः।
'ऋत्विक् च त्रिविधो दृष्टः पूर्व्वैर्मुनिभिः स्वयंकृतः।
यदृच्छया वा यः कुर्य्यादार्त्विज्यं प्रीतिपूर्व्वकम्॥'
यदृच्छया स्वेच्छया।" इति तिथ्यादितत्त्वम्॥
प्रतिपः, पुं, (प्रतिपाति पालयतीति। प्रति+पा+कः।) शास्त्रनृराजपिता। इति शब्दरत्नावली॥
प्रतिपक्षः, पुं, (प्रतिकूलः पक्ष इति प्रादिसमासः।) शत्रुः। इति हेमचन्द्रः। ३।३६२।
(यथा, रुक्मिणीहरणे १० अङ्के।
"अन्योन्यं प्रतिपक्षसंहतिमिमां लोकस्थितिं बोधयन्नेष क्रीडति कूपयन्त्रघटिकान्यायप्रसक्तो विधिः॥")
सादृश्यम्। यथा,—
"प्रतिवन्दिप्रतिनिधिप्रतिपक्षविडम्बकाः।"
इति कायचन्द्रिका॥
प्रतिवादी च।

प्रतिपत्, [द्] स्त्री, (प्रतिपद्यते उपक्रम्यतेऽनयेति। प्रति+पद्+करणे क्विप्।) प्रगड्वाद्यम्। इति त्रिकाण्डशेषः॥ वृद्धिः। तिथिविशेषः। तत्पर्य्यायः। पक्षतिः २। इत्यमरः। १।४।१॥ सा च चन्द्रस्य प्रथमकलाक्रियारूपा। वृद्धिरूपा चेत् शुक्ला१ एकाङ्कबोधिता। ह्रासरूपा चेत् कृष्णा १७ समुद्राङ्कबोधिता॥ * ॥ तस्या व्यवस्था यथा। "सा च कृष्णा द्वितीयायुक्ता ग्राह्या प्रतिपत् सद्वितीया स्यादित्यापस्तम्बीयात्। शुक्ला अमावास्यायुता ग्राह्या। प्रतिपदाप्यमावास्येति वचनात्। त्रिसन्ध्यव्यापिनीत्वे तु सर्व्वत्र न युग्मादरः। तथा च पराशरः।
'त्रिसन्ध्यव्यापिनी या तु सैव पूज्या सदा तिथिः।
न तत्र युग्मादरणमन्यत्र हरिवासरात्॥'*॥
कृष्णापि उपवासे द्वितीयायुता न ग्राह्या। तथा च वृद्धवशिष्ठः।
'द्वितीया पञ्चमी वेधाद्दशमी च त्रयोदशी।
चतुर्दशी चोपवासे हन्युः पूर्व्वोत्तरे तिथी॥'
द्वितीया वेधात् योगात् प्रतिपत्तृतीये हन्तीत्यर्थः। एवमन्यत्र। अत्रोपवासपरेण विशेषविधानात् व्यापस्तम्बीयसामान्यवचनस्य सङ्कोचः॥ * ॥
कार्त्तिकशुक्लप्रतिपदमधिकृत्य बलिं प्रति भगवद्वाक्यम्।
'वीर! प्रतिपदा नाम तव भावी महोत्सवः।
अत्र त्वां नरशार्दूल! हृष्टाः पुष्टाः स्वलङ्कृताः।
पुण्यदीपप्रदानेन पूजयिष्यन्ति मानवाः॥'
तत्र मन्त्रः।
'बलिराज! नमस्तुभ्यं विरोचनसुत प्रभो।
भविष्येन्द्र सुराराते पूजेयं प्रतिगृह्यताम्॥'
प्रतिपदा प्रतिपत्तिथ्या। अत्र प्रतिपदि। ब्रह्मपुराणे तु बलिराजेतिमन्त्रस्य पूर्व्वम्।
'मन्त्रेणानेन राजेन्द्र! समन्त्री सपुरोहितः।'
इत्यर्द्धम्॥
पद्मादपि।
'एवं पूजां नृपः कृत्वा रात्रौ जागरणं ततः।'
इत्युक्तमिति॥
पुनर्ब्रह्मपुराणे।
'शङ्करश्च पुरा द्यूतं ससर्ज्ज सुमनोहरम्।
कार्त्तिके शुक्लपक्षे च प्रथमेऽहनि भूपते!॥
जितञ्च शङ्करस्तत्र जयं लेभे च पार्व्वती।
अतोऽद्यारभ्य शङ्करो दुःखी नित्यं गौरी सुखोषिता॥
तस्मात् द्यूतं प्रकर्त्तव्यं प्रभाते तत्र मानवैः।
तस्मिन् द्यूते जयो यस्य तस्य संवत्सरः शुभः॥
पराजयो विपरीतश्च लक्ष्मनाशकरो भवेत्॥'
द्यूतस्याप्राप्तिभिः क्रीड़नम्। यथा मनुः।
'अप्राप्तिभिश्चतं क्रियते तल्लोके द्यूतमुच्यते॥'*॥
तत्तिथिमधिकृत्य भविष्योत्तरे।
'यो यो यादृशभावेन तिष्ठत्यस्यां युधिष्ठिर!।
हर्षदैन्यादिना तेन तस्य वर्षं प्रयाति हि॥'
तथा।
'महापुण्या तिथिरियं नक्षिराज्यप्रवर्द्धिनी।

स्नानं दानं श्रुतगुणं कार्त्तिक्यां तिथौ भवेत्॥'
प्रतिपदोद्दिर्गयोगो यथा। भविष्ये।
'रोहिण्या प्रतिपद्युक्ता मार्गे मासि सितेतरा।
गङ्गायां यदि लभ्येत सूर्य्यग्रहणे समा॥' *॥
तस्याः संज्ञा नन्दा। तत्राभ्यङ्गनिषेधो यथा,—
'नन्दासु नाभ्यङ्गमुपाचरेच्च
चौरञ्च रिक्तासु जयासु मांसम्।
पूर्णासु योषित् परिवर्ज्जनीया
भद्रासु सर्व्वाणि समाचरेच्च॥' *॥
नन्दादिक्रममाह ज्योतिषे।
'नन्दा भद्रा जया रिक्ता पूर्णा प्रतिपदः क्रमात्।'
प्रतिपदादिपञ्चदशतिथिषु पञ्चदशद्रव्यभक्षण-
निषेधमाह स्मृतिः।
'कुष्माण्डे चार्थहानिः स्यात् दृष्ट्वा न स्मरेद्धरिम्।
बृहच्छ्रुतः पटोले स्याद्धनहानिश्च मूलके॥
कलङ्की चायते विल्वे तिर्य्यग्योनिश्च नक्तके।
नाले शरीरनाशः स्यान्नारिकेले च मूर्खता॥
तुम्बी गोमांसतुल्या स्यात् कलम्बी गोवधात्मिका।
ग्रिम्बी पापकरी प्रोक्ता पूतिका ब्रह्मघातिका॥
वार्त्ताकी सुतहानिः स्याच्चिररोगी च मायके।
महापापकरं मांसं प्रतिपदादिषु वर्ज्जयेत्॥' *॥
तत्र चौरनिषेधो यथा। चौरं विशाखाप्रति-
पत्सु वर्ज्यम्।" इति तिथ्यादितत्त्वम्॥ *॥
तत्र जातफलम्।
"मल्लिकनकविभूषासंयुतश्चारुकान्ति-
र्निजकुलकमलोद्घाटमार्त्तण्डबिम्बः।
प्रतिपदि यदि पूर्णो लब्धजन्मा प्रतापी
भवति विमलवेषश्चारुकेशः प्रजेशः॥"
इति कोष्ठीप्रदीपः॥ *॥
सा अग्नेर्ब्रह्मतिथिः। यथा,—
महातपा उवाच।
"विष्णोर्विभूतिमाहात्म्यं कथितं ते प्रसङ्गतः।
तिथीनां शृणु माहात्म्यं कथ्यमानं मया नृप!॥
इत्यभूतो महानग्निर्ब्रह्मक्रोधोद्भवो महान्।
उवाच देवं ब्रह्माणं तिथिर्मे दीयतां प्रभो!॥
यस्यामहं समस्तस्य जगतः ख्यातिमाप्नुयाम्॥
ब्रह्मोवाच।
देवानामथ यज्ञानां गन्धर्व्वाणाञ्च सत्तम!॥
यस्यां प्रतिपदा येन त्वमुत्पन्नोऽसि पावक!॥
तत्प्रदात् प्रातिपदिकं संभविष्यन्ति देवताः।
अतस्ते प्रतिपन्नाम तिथिरेषा भविष्यति॥
तस्यां तिथौ हविष्येण प्राज्ञापत्येन सूर्य्यिणा।
होष्यन्ति तेषां प्रीताः स्युः पितरः सर्व्वदेवताः॥
चतुर्विधानि भूतानि मनुष्याः पशवोऽसुराः।
देवाः सर्व्वे समन्त्रज्ञाः प्रीताः स्युस्तर्पिते त्वयि॥
दधोपवासं कुर्व्वीत तद्व्रतः प्रतिपद्दिने।
शारदाग्नौ वा वर्त्तेत शृणु तस्य फलं महत्॥
चतुर्युगानि षट्त्रिंशत्तल्लोकेशो महीयते।
तेजस्वी रूपसम्पन्नो द्रव्यवान् जायते नरः॥
एष धन्यस्तथा राजा स्वर्गलोके महीयते।
तूष्णीम्भूय सोऽग्निर्ब्रह्मदत्तामयं ययौ॥

यं इदं शृणुयान्नित्यं प्रातरुत्थाय मानवः।
अग्नेर्जन्म न पापेभ्यो भयं तस्य न संशयः॥"
इति वराहपुराणे महातपोपाख्याने अग्नुत्-
पत्तिनामाध्यायः॥ *॥ प्रतिपदि चन्द्रदर्शन-
कारणम्। यथा, ज्योतिषे।
"अमावस्याघटीशोध्या यस्याहर्मानसंयुता।
सूर्य्यराहुघटीभ्यश्चेदधिका दृश्यते शशी॥"
प्रतिपत्तिः, स्त्री, (प्रतिपदनमिति। प्रति+पद्+
क्तिन्।) प्रवृत्तिः। (यथा, कुमारे। ५। ४२।
"मनस्विनीनां प्रतिपत्तिरीदृशी॥")
प्रागल्भ्यम्। गौरवम्। (यथा, युक्तिकल्पतरौ
चारलक्षणे।
"सुभक्तो राजसु तथा कार्य्यागां प्रतिपत्तिमान्॥")
संप्राप्तिः। (यथा, रघुः। १। १।
"वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये।
जगतः पितरौ वन्दे पार्व्वतीपरमेश्वरौ॥")
प्रबोधः। (यथा, भागवते। ३। ६। १४।
"चक्षुषांशेन रूपाणां प्रतिपत्तिर्यतो भवेत्॥")
पदप्राप्तिः। इति मेदिनी। ते, २०६॥ मीमां-
सकमते फलशून्यकर्म्माङ्गम्। यथा। देव-
तोद्देशेन यागादौ त्यक्तहविरादेरग्नौ निःक्षेपः।
पूजितप्रतिमादेर्जले विसर्জनमित्यादि। श्राद्धादौ
सर्व्वशेषाङ्गकर्म्म यथा। प्रतिपत्तिरूपकर्म्माङ्ग
एव प्रतिपाद्याभावे तन्निवृत्तिः। इति तिथ्यादि-
तत्त्वम्॥ *॥ निर्व्वाहिताङ्गकद्रव्यकरणकाङ्गत्वं
प्रतिपत्तिरूपकर्म्माङ्गत्वम्। प्रतिपत्तिकर्म्म
उत्तरा क्रिया। यत्र एकेन द्रव्येण कर्म्म-
द्वयं निर्व्वाह्यते तत्र उत्तरं कर्म्म प्रतिपत्तिकर्म्म।
तन्निर्व्वाहकत्वं प्रतिपाद्यम्। इति तट्टीकायां
काशीरामवाचस्पतिः॥ *॥ अथ प्रतिपत्त्यधि-
करणम्। शृङ्गिनिरस्यति लोहितं निर-
स्यति गुदेनोपजघ्रति सर्व्वं जुहोति। इत्य-
ग्नीषोमीयपशौ श्रूयते। शृङ्गिनिरस्यतीति दृष्टा-
न्तार्थम्। यथा पशोरुदरवर्त्तिशृङ्गात् त्यजति
तथा लोहितमपि त्यजति। अन्यत्र पशोः
शौर्य्यमांसोपक्रमेण होमः। अत्र तु गुदमांसोप-
क्रमेणेति। तत्र च यज्ञियवृक्षेभ्यो ददातीति
परिभाषया मांसस्योत्तरा प्रतिपत्तिः प्राप्ता।
अत्र सर्व्वशब्देन प्रतिपत्त्यभावात् कर्म्मवैगुण्यं
स्यादिति। अत्र सिद्धान्तः। यदिकारादुपपत्ति
रिति। यदि प्रतिपाद्यं स्यात् तदा प्रतिपत्ति-
रङ्गमित्यर्थः। इति रामशब्दीयाधिकरण-
कौस्तुभे॥ *॥ अपि च।
"उपांशुयाजद्रव्येण शेषकार्य्यं भवेन्न वा।
भवेद्धविर्भ्यः सर्व्वेभ्य इत्युक्त्या प्राप्तितस्ततः॥
उक्तान्यद्रव्यशेषेषु भाषुपस्तरणादिवत्।
अतो न प्रतिपत्त्यर्थः शेषकार्य्ये ततः क्वयम्॥"
इति माधवीयाधिकरणमालायाम् ५ पादे प्रथ-
माधिकरणम्॥
प्रतिपत्तिपटहः, पुं, (प्रतिपत्तये पटहः।) वाद्य-
विशेषः। नागरा इति भाषा। तत्पर्य्यायः।
तम्यापटहः २। इति शब्दरत्नावली॥

प्रतिपत्तूर्य्यं, क्ली, (प्रतिपदे संविदे तूर्य्यम्।)
दगड़वाद्यम्। इति त्रिकाण्डशेषः॥
प्रतिपत्फला, स्त्री, (प्रतिपत्फलमस्याः।) चुद्र-
कारवेल्ली। इति राजनिर्घण्टः॥
प्रतिपन्न, त्रि, (प्रतिपद्यते स्मेति। प्रति+पद्+
क्तः।) अवगतम्। इत्यमरः। ३। २। १०८॥
(यथा, कुमारे। ४। ३३।
"प्रमदाः पतिवर्त्मगा इति
प्रतिपन्नं हि विचेतनैरपि॥")
अङ्गीकृतम्। इति मेदिनी। ने, १६४॥
विक्रान्तः। इति हेमचन्द्रः॥
प्रतिपर्णशिफा, स्त्री, (प्रतिपर्णे शिफा जटा
अस्याः।) द्रवन्ती। इति राजनिर्घण्टः॥
प्रतिपादकः, त्रि, (प्रतिपादयतीति। प्रति+पद्+
णिच्+ण्वुल्।) प्रतिपत्तिजनकः। बोधकः।
(यथा, सर्व्वदर्शनसंग्रहे पूर्णप्रज्ञदर्शने। "ननु
सजातीयविजातीयस्वगतनानात्वशून्यं ब्रह्मतत्त्व-
मिति प्रतिपादकेषु वेदान्तेषु जागरूकेषु कथ-
मशेषगुणत्वमिति॥") यथा च। प्रतिपाद्यप्रति-
पादकभावश्च सम्बन्धः। इति दिनकरी॥
प्रतिपादनं, क्ली, (प्रति+पद्+णिच्+भावे
ल्युट्।) दानम्। प्रतिपत्तिः। बोधनम्। इति
मेदिनी। ने, २३६॥ (नियादनम्। यथा,
महाभारते। १२। १४१। १४।
"चेता विमोचसमये द्वापरप्रतिपादने॥")
प्रतिपालकः, त्रि, (प्रति+पा+णिच्+ण्वुल्।)
पालनकर्त्ता। प्रतिपालयतीति प्रतिपूर्ब्व-
आन्तपाधातोर्ण्वुलप्रत्ययनिष्पन्नः॥
प्रतिपालनं, क्ली, (प्रति+पा+णिच्+भावे ल्युट्।)
रक्षणम्। पोषणम्। यथा। "कुन्या प्रकृतस्य
कर्णस्य राधाप्रतिपालनात् राधेयत्वं सङ्गच्छते।"
इति दुर्गादासः॥
प्रतिपाल्य, त्रि, (प्रति+पा+णिच्+कर्म्मणि
यत्।) प्रतिपालनीयम्। प्रतिपालितव्यम्।
प्रतिपूर्ब्वआन्तपालधातोः कर्म्मणि
यप्रत्ययेन निष्पन्नम्॥ (यथा, महाभारते।
१३। ४५। २।
"या पुत्रकस्य ऋक्षस्य प्रतिपाल्या तदा भवेत्,
अथैनामाहरेत् शुल्कं क्रीता शुल्कप्रदस्य सा॥")
प्रतिप्रसवः, पुं, (प्रति प्रतियिद्धं प्रसूते इति,
प्रति+प्र+सू+अप्।) निषिद्धस्य पुनर्विधा-
नम्। यथा, प्रायश्चित्ततत्त्वे।
"रविशुक्रदिने चैव द्वादश्यां आद्धवासरे।
इत्यादिना निषिद्धस्य तिलतर्पणस्य तीर्थेतरत्र
प्रतिप्रसवमाह स्मृतिः।
अयने विषुवे चैव संक्रान्त्यां ग्रहणेषु च॥"
प्रतिप्रसूतः, त्रि, (प्रतिप्रसूते स्मेति। प्रति+प्र+
सू+क्तः।) प्रतिप्रसवविशिष्टः। इति मल-
मासतत्त्वम्॥ पुनःसम्भावितः। यथा,—
"उक्तानि प्रतिसिद्धानि पुनःसम्भावितानि च।
सापेक्षनिरपेक्षाणि मीमांस्यानीह कोविदैः॥"
इति चतुरर्थचिन्तामणौ॥

प्रतिफलं, क्ली, (प्रतिफलतीति। प्रति+फल्+अच्।) प्रतिविम्बम्। यथा,—
"प्रतिफलमवलोक्य स्वीयमिन्दोः कलायां
हरशिरसि परस्त्रा वासमाशङ्कमाना॥"
इति रसमञ्जरी॥
तुल्यफलम्। फलं फलच्च॥

प्रतिफलनं, क्ली, (प्रति+फल्+ल्युट्।) प्रतिविम्बम्। यथा,—
"न विम्बं त्वद्विम्बप्रतिफलनलाभादरुचितं
ललामध्यारोढुं कथमपि न लज्जेत कलया॥"
इत्यानन्दलहरी। ६२॥

प्रतिफलितं, त्रि, (प्रति+फल्+क्त।) प्रतिविम्बितम्। यथा,—
"मोहातीतो विबुद्धो मुनिभिरभिहितो मोह-
संक्रान्तमूर्त्तिः
साक्षी स्वान्ते तदुत्थे प्रतिफलितवपुः——॥"
इत्यादि मुक्तिवादगादाधरी॥

प्रतिफुल्लकः, त्रि, (प्रतिफुल्लति विकसतीति। प्रति+फुल्ल+ण्वुल्।) प्रफुल्लः। इति शब्दचन्द्रिका॥

प्रतिबद्धः, त्रि, प्रतिबन्धविशिष्टः। प्रतिपूर्ब्बबन्धधातोः कर्म्मणि क्तप्रत्ययेन निष्पन्नः॥

प्रतिबध्यः, त्रि, (प्रति+बन्ध+यत्।) प्रतिबन्धनीयः। प्रतिबन्धार्हः। यथा। वस्तुतो हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकत्वप्रकारिता-शून्यज्ञानवृत्तिप्रकारितावच्छेदत्वेनैव प्रतिबध्यत्वं निवेश्यमिति व्याप्त्यनुगमजागदीशी॥

प्रतिबन्धः, पुं, (प्रति+बन्ध+घञ्।) कार्य्यप्रतिघातः। तत्पर्य्यायः। प्रतिरूपः २। इत्यमरः। ३। २। २७॥ (यथा, रघौ। ८। ८०।
"स तपःप्रतिबन्धमन्युना
प्रसभाविष्कृतचारुविभ्रमाम्।
अभवत्पदभव मानुषीति तां
भ्रमवेलाप्रलयोर्म्मिणा भुवि॥")

प्रतिबन्धकः, पुं, (प्रतिबध्नातीति। प्रति+बन्ध+ण्वुल्।) विटपः। इति शब्दचन्द्रिका॥ प्रतिरोधके, त्रि॥ (यथा, राजतरङ्गिण्याम्। ३।१६६।
'त्यागिनी निष्कलङ्कस्य को दोषोऽस्य महीपतेः।
ममापुण्यन्तु तन्निन्द्यं यच्छ्रेयःप्रतिबन्धकम्॥")

प्रतिबन्धिः, पुं, (प्रतिबध्नात्यनेनेति। प्रति+बन्ध+इन्।) व्यभिचारान्तरप्रसञ्जकं वाक्यम्। प्रतिबन्धः। यथा। प्रतिबन्धिरनुत्तरत्वादाहेति विशेषव्याप्तिजागदीशी॥

प्रतिबलः, त्रि, (प्रतिगतं बलमस्य।) समर्थः। शक्तः। इति त्रिकाण्डशेषः॥ (प्रतिरूपं बलमस्य।) तुल्यबलः॥ (यथा, महाभारते। १। १५४। ८।
"नायं प्रतिबलो भीरु। राक्षसापसदो मम।
नीतो बुधि परिस्पन्दमधवा सर्व्वराक्षसाः॥")

प्रतिभयं, त्रि, (प्रतिगतं भयं यत्र।) भयङ्करम्। इत्यमरः। १। ७। २०॥ (यथा, रामायणे। ६। ८०। ६५।
"दिशश्च प्रदिशश्चैव बभूवुः भृशदारुणाः।
तमसा पिहितं सर्व्वमासीत् प्रतिभयं महत्॥")

भये, क्ली। इति मेदिनी। ये, १२२॥

प्रतिभा, स्त्री, (प्रतिभाति शोभते इति। प्रति+भा+कः। टाप्।) द्विः। इति हेमचन्द्रः॥ प्रत्युत्पन्नमतित्वम्। इति प्रतिभान्वितशब्दटीकायां भरतः॥ नवनवोन्मेषशालिनी प्रज्ञा। यथाह, रुद्रः।
"प्रज्ञा नवनवोन्मेषशालिनी प्रतिभा मता॥"
(यथा च, महाभारते। १२। २५६। १।
"श्रुत्वं साधु समुद्दिष्टं नियतं ब्रह्मलक्षणम्।
प्रतिभा त्वस्ति मे काचित् तां ब्रूयामनुमानतः॥"
प्रतिभायते इति। प्रति+भा+"आतश्चोपसर्गे।" ३। ३। १०६। इति अङ्।) दीप्तिश्च॥

प्रतिभान्वितः, त्रि, (प्रतिभया अन्वितः।) प्रगल्भः। प्रत्युत्पन्नमतियुक्तः। इत्यमरः। ३। १। २५॥

प्रतिभासुखः, त्रि, (प्रतिभान्वितं सुखमस्य।) प्रगल्भः। इति हेमचन्द्रः। ३। ७॥

प्रतिभावान्, [त्] त्रि, (प्रतिभा विद्यतेऽस्य। प्रतिभा+मतुप्। मस्य वः।) प्रतिभान्वितः। प्रागल्भ्ययुक्तः। प्रतिभाशब्दादस्यर्थे वतुप्रत्ययेन निष्पन्नः॥ (यथा, कथासरित्सागरे। ४। ३२।
"आगच्छन्तीञ्च सायन्तां कुमारसचिवो हठात्।
अग्रहीदथ साप्येनमवोचत् प्रतिभावती॥")

प्रतिभाहानिः, स्त्री, (प्रतिभाया हानिः।) बुद्धिमान्द्यम्। इति शब्दमाला॥

प्रतिभूः, पुं, (प्रतिरूपः प्रतिनिधिर्वा भवतीति। प्रति+भू+"भुवः संज्ञान्तरयोः।" ३। २। १७६। इति क्विप्। "धनिकाधमर्णयोरन्तरे यस्तिष्ठति विश्वासार्थं स प्रतिभूः।" इति सिद्धान्तकौमुदी॥) लग्नकः। इत्यमरः। २। १०। ४४॥ आमिन् इति पारस्यभाषा॥ (यथा, प्रद्युम्नविजये। १ अङ्के।
"यश्चैकः प्रतिभूः फलेषु ज्ञातिनां यज्ञेषु यज्ञेश्वरो
विघ्नस्तोमतमःसमूहहतपनः सोऽयं स्वयं
श्रीहरिः॥")

तस्य कर्त्तव्यत्वं यथा,—
"सभापतेः कर्त्तव्यमाह कात्यायनः।
'अथ चेत् प्रतिभूर्नास्ति वादयोग्यस्तु वादिनोः।
स रक्षितो दिनस्यान्ते दद्याद्दण्डाय वेतनम्॥'
प्रतिभवति तत्कार्य्ये तद्वत्त्वतीति प्रतिभूर्लग्नकः।
वाद्ययोग्यः विवादफलस्य साधितधनादिदानस्य दण्डदानस्य च क्षमः। वादिनोः भाषावादिनः उत्तरवादिनश्च। तथा च याज्ञवल्क्यः।
'उभयोः प्रतिभूर्ग्राह्यः समर्थः कार्य्यनिर्णये।
प्रतिभुवस्त्वभावे च राज्ञा संग्रहणं तयोः॥'
राज्ञा संग्रहणं दण्डतुल्याधिकरणम्। निर्वयस्य कार्य्ये धनादिदाने राजदन्तादित्वात् कार्य्यशब्दस्य पूर्व्वनिपातः। भृत्यस्तद्रक्षको राजनियुक्तः।" इति व्यवहारतत्त्वम्॥

प्रतिमः, त्रि, (प्रतिमातीति। प्रति+मा+"आतश्चोपसर्गे।" ३। १। १३६। इति कः।) उत्तरपदस्थे सदृशवाचकः। यथा,—
"स्युरुत्तरपदे प्रख्यः प्रकारः प्रतिमो निभः॥"
इति हेमचन्द्रः॥
(यथा, रामायणे। २। ४०। १३।
"आर्यस्य हृदयं नूनं राममातुरसंशयम्।
यद्देवगर्भप्रतिमे वनं याति न भिद्यते॥")

प्रतिमा, स्त्री, (प्रतिमीयते इति। प्रति+मा+अङ्। टाप्।) अनुकृतिः। गजदन्तस्य वन्द्यः। इति मेदिनी। मे, ४८॥ (प्रतिबिम्बम्। यथा, रघुः। ७। ६४।
"निमीलितानामिव पङ्कजानां
मध्ये स्फुरन्तं प्रतिमाशशाङ्कम्॥"
तथा च कुमारे। ७। ३६।
"आत्मानमासक्तगणोपनीते
खड्गे निषक्तप्रतिमं ददर्श॥"
प्रतिमीयते अनयेति करणे अङ्।) मूर्त्तिसदृशग्रन्थच्छिलादिनिर्म्मितप्रतिरूपकम्। तत्पर्य्यायः। प्रतिमानम् २ प्रतिबिम्बम् ३ प्रतियातना ४ प्रतिच्छाया ५ प्रतिकृतिः ६ अर्च्चा ७ प्रतिनिधिः ८। इत्यमरः। २। १०। ३६॥ प्रतिच्छन्दः ९ प्रतिकायः १० प्रतिरूपम् ११। इति हेमचन्द्रः॥* (यथा, महाभारते। १। १७२। २७।
"गिरिपृष्ठे तु सा तस्मिन् स्थिता खचितलोचना।
विभ्राजमाना शुशुभे प्रतिमेव हिरण्मयी॥")

देवप्रतिमाघटनप्रमाणादि यथा,—
"विष्णोस्तावत् प्रवक्ष्यामि यादृगूरूपं प्रशस्यते।
शङ्खचक्रधरं शान्तं पद्महस्तं गदाधरम्॥
ह्रस्वाकारं शिरस्तस्य कम्बुग्रीवं सुभेक्षणम्।
तुङ्गनासं सुस्निकर्णं प्रशान्तोरुभुजक्रमम्॥
क्वचिदष्टभुजं विद्याच्चतुर्भुजमथापि वा।
द्विभुजं वापि कर्त्तव्यं भवनेषु पुरोधसा॥"*॥
दैवमष्टभुजस्यास्य यथास्थानं निबोध मे।
खड्गो गदा शरः पद्मं देयं दक्षियतो हरेः।
धनुश्च खेटकश्चैव शङ्खचक्रे च वामतः॥*॥
चतुर्भुजस्य वक्ष्यामि यथैवायुधसंस्थितिः।
दक्षिणेन गदां पद्मं वासुदेवस्य कारयेत्॥
वामतः शङ्खचक्रे च कर्त्तव्ये भूतिमिच्छता।
क्षणावतारे तु गदा वामहस्ते प्रशस्यते॥
यथेच्छया शङ्खचक्रमुपरिष्टात् प्रकल्पयेत्।
अधस्तात् पृथिवी तस्य कर्त्तव्या पादमध्यतः।
दक्षिणे प्रणतं तद्वत् गरुत्मन्तं निवेशयेत्।
वामतस्तु भवेल्लक्ष्मीः पद्महस्ता सुशोभना।
गरुत्मानग्रतो वापि संस्थाप्यो भूतिमिच्छता॥
श्रीश्च पुष्टिश्च कर्त्तव्ये पार्श्वयोः पद्मसंयुते।
तोरणोपरिष्टाच्च विद्याधरसमन्वितम्॥
देवदुन्दुभिसंयुक्तं गन्धर्व्वमिथुनान्वितम्।
पत्रवल्लीसमोपेतं सिंहव्यालसमन्वितम्।
तथा कल्पलतोपेतं भ्रुवद्विरमरेश्वरैः।
एवंविधो भवेद्विष्णुस्त्रिभागेनास्य पीठिका॥
नवतालप्रमाणास्तु देवदानवकिन्नराः।
अतःपरं प्रवक्ष्यामि मानोन्मानं विशेषतः॥*॥
मानान्तरप्रविष्टानां भानूनां यद्वनः स्फुटम्।

पाणिपादविहीनायां जायते मरको महान् ।
जङ्घाजानुविहीना च प्रजुकल्याणकारिणी ॥
पुत्रमित्रविनाशायं हीना वक्षःस्थलेस्तु या ।
सम्पूर्णावयवा या तु आयुर्लक्ष्मीप्रदा सदा ।
एवं लक्षणमासाद्य कर्त्तव्यः परमेश्वरः ॥ * ॥
स्तूयमानः सुरैः सर्वैः समन्ताद्दर्शयेद्भवम् ।
प्रक्रमेण नन्दिना चैव महाकालेन शङ्करम् ॥
प्रणता लोकपालाश्च पार्श्वे तु गणनायकाः ।
तृत्यद्भृङ्गिरिटिश्चैव भूतवेतालसंवृतः ।
सर्वे हृष्टाश्च कर्त्तव्याः स्तुवन्तः परमेश्वरम् ॥

गन्धर्वविद्याधरकिन्नराणा-
मधाश्वरोगुह्यकनायकानाम् ।
गणैरनेकैः शतशो महेन्द्र-
मुनिप्रवीरैरभिनन्द्यमानम् ॥
घृताच्यलम्बैः शतशः प्रवाल-
पुष्पोपहारप्रचयं ददद्भिः ।
संस्तूयमानं भगवन्तमीड्यं
नेत्रत्रयेणामरमर्त्यपूज्यम् ॥ * ॥

सूत उवाच ।

अधुना संप्रवक्ष्यामि अर्द्धनारीश्वरं परम् ।
अर्द्धेन देवदेवस्य नारीरूपं सुशोभनम् ॥
ईशार्द्धे तु जटाभारो बालेन्दुकलया युतः ।
उमार्द्धे तु प्रदातव्यौ सीमन्ततिलकावुभौ ॥
वामकर्णं दक्षिणे कर्णे वामे कुण्डलमादिशेत् ।
वालिका चोपरिष्टात्तु कपालं दक्षिणे करे ॥
त्रिशूलं वापि कर्त्तव्यं देवदेवस्य शूलिनः ।
वामतो दर्पणं दद्यादुत्पलं वा विशेषतः ॥
वामबाहुश्च कर्त्तव्यः केयूरवलयान्वितः ।
उपवीतश्च कर्त्तव्यं मणिमुक्तामयन्तथा ॥
स्तनभारमधार्द्धे तु वामे पीनं प्रकल्पयेत् ।
हारार्द्धमुज्ज्वलं कुर्यात् श्रोणयर्द्धन्तु तथैव च ॥
लिङ्गार्द्धमूर्द्धं कर्त्तव्यं व्याघ्राजिनकृताम्बरम् ।
वामे लम्बपरीधानं कटिसूत्रत्रयान्वितम् ॥
नानारत्नसमोपेतं दक्षिणं भुजगान्वितम् ।
देवस्य दक्षिणं पादं पद्मोपरिसमास्थितम् ॥
किञ्चिदूर्द्धन्तथा वामं भूषितं नूपुरेण च ।
रत्नैर्विभूषितान् कुर्यादङ्गुलीश्चङ्गुलीयकान् ॥
सालक्तकं तथा पादं पार्वत्या दर्शयेत् सदा ।
अर्द्धनारीश्वरस्येदं रूपमस्मिन्नुदाहृतम् ॥ * ॥
उमामहेश्वरस्यापि लक्षणं शृणुत द्विजाः ।
संस्थानन्तु तयोर्वक्ष्ये लीलाललितविभ्रमम् ॥
चतुर्भुजं द्विबाहुं वा जटाभारेन्दुभूषितम् ।
लोचनत्रयसंयुक्तमेकस्कन्धोपवीतिनम् ॥
दक्षिणोत्थितं शूलं वामं कुचभरं करम् ।
दक्षिणेनोत्थितं शूलं वामं कुचभरं करम् ।
व्याघ्रचर्मपरीधानं नागरत्नोपशोभितम् ॥
सुप्रतिष्ठं सुवेशश्च तथार्द्धेन्दुहुताशनम् ।
वामे तु संस्थिता देवी तस्योरौ बाहुगूहिता ॥
शिरोभूषणसंयुक्तैरसकेलितानना ।
चन्द्रालिका कर्णवती ललाटतिलकोज्ज्वला ॥
मणिकुण्डलसंयुक्ता कर्णिकाभरणा क्वचित् ।
हारकेयूरवलया दरवक्त्रावलोकिनी ॥
वामार्धं देवदेवस्य शृङ्गारी लीलया क्वचित् ।

दक्षिणन्तु वहिः कृत्वा बाहुं दक्षिणतोऽथवा ॥
स्कन्धे वा दक्षिणे कुक्षौ सृणत्यङ्गुलिजैः क्वचित् ।
वामे च दर्पणं दद्यादुत्पलं वा सुशोभनम् ॥
कटिसूत्रत्रयश्चैव नितम्बे स्यात् प्रलम्बकम् ।
जया च विजया चैव कार्त्तिकेयविनायकौ ॥
पार्श्वयोर्दर्शयेत्तत्र सतोरणमगुह्यकम् ।
मालाविद्याधरांस्तत्र वीणावानश्वरोगणः ।
एतद्रूपसमेशस्य कर्त्तव्यं भूतिमिच्छता ॥ * ॥
शिवनारायणं वक्ष्ये सर्वपापप्रणाशनम् ।
वामार्द्धे माधवं कुर्यादक्षिणे शूलपाणिनम् ॥
बाहुद्वयञ्च कृष्णस्य मणिकेयूरभूषितम् ।
प्रक्रमेण तथा शान्तमारक्ताङ्गुलिविभ्रमम् ॥
चक्रस्थाने गदाचापि पाणौ दद्यादधस्तवे ।
प्रक्रमेणैवेतरे दद्याङ्गुल्यर्थं भूषणोज्ज्वलम् ॥
पीतवस्त्रपरीधानं चरणं मणिभूषितम् ।
दक्षिणार्द्धे जटाभारमर्द्धेन्दुकृतलक्षणम् ॥
भुजङ्गहारवलयं वरदं दक्षिणं करम् ।
द्वितीयचापि कुर्वीत त्रिशूलवरधारिणम् ॥
बालोपवीतसंयुक्तं कथार्द्धं कृत्तिवाससम् ।
मणिरत्नैश्च संयुक्तपादं नागविभूषितम् ।
शिवनारायणैवं कल्पयेद्रूपमुत्तमम् ॥ * ॥
महावराहं वक्ष्यामि पद्मचक्रं गदाधरम् ।
तीक्ष्णदंष्ट्राग्रघोराक्षं मेदिनीवामकुक्षिरम् ॥
दंष्ट्राग्रेणोद्धृतां दान्तां धरणीसुत्पलान्विताम् ।
विस्मयोत्फुल्लनयनासुपरिष्टात् प्रकल्पयेत् ॥
दक्षिणं कटिसंस्थन्तु करन्तस्य प्रकल्पयेत् ।
कूर्मोपरि तथा पादमेकं नागेन्द्रमूर्द्धनि ।
संस्तूयमानं लोकैश्चैः समन्तात् परिकल्पयेत् ॥*॥
नारसिंहश्च कर्त्तव्यं भुजाष्टकसमन्वितम् ।
रौद्रसिंहासनं तद्वद्दृविदारितसुखेक्षणम् ॥
लम्बपीनशटाकीर्णं दारयन्तं दितेः सुतम् ।
विनिर्गतान्त्रजालञ्च दानवं परिकल्पयेत् ॥
वमन्तं रुधिरोद्गारं भ्रुकुटीकुटिलेक्षणम् ।
युध्यमानञ्च कर्त्तव्यं क्वचित् करणवन्नरैः ॥
परिश्रान्तेन दैत्येन तर्ज्यमानं सुदुर्मुखैः ।
दैत्यं प्रदर्शयेत्तत्र खड्गखेटकधारिणम् ।
स्तूयमानं तथा विष्णुं दर्शयेदमराधिपैः ॥ * ॥
तथा त्रिविक्रमं वक्ष्ये ब्रह्माण्डाक्रमणोत्थितम् ।
वामपार्श्वे तथा राहुमुपरिष्टात् प्रकल्पयेत् ॥
अधस्ताद्वामनं तावत् कल्पयेत् सकमण्डलुम् ।
दक्षिणे क्षत्रिकां विद्यान्मुखं दीनं प्रदर्शयेत् ।
भृङ्गारधारिणं तद्वद्वलिन्यस्यैव पार्श्वतः ॥
वन्दनञ्चापि कुर्वन्तं गरुडन्तस्य दर्शयेत् ॥ * ॥
मत्स्यरूपं तथा मात्स्यं कौर्म्मं कूर्मान्नतिं न्यसेत् ।
एवं रूपस्तु भगवान् कार्य्यो नारायणो हरिः ॥*॥
ब्रह्मा कमण्डलुधरः कर्त्तव्यः स चतुर्मुखः ॥
हंसारूढः क्वचित् कार्य्यः क्वचिच्च कमलासनः ।
वर्णेन पद्मगर्भाभश्चतुर्बाहुः सुनेक्षणः ॥
कमण्डलुं वामकरे सुचं हस्ते च दक्षिणे ।
वामे दण्डधरं तद्वत् सुचमपि प्रदर्शयेत् ॥
मुनिभिर्देवगन्धर्वैः स्तूयमानं समन्ततः ।
ऊर्ध्वास्यमिव लोकानां स्तम्भान्तरगतं विभुम् ॥

नग्नचर्म्मधरश्चापि दिव्ययज्ञोपवीतिनम् ।
वाम्यस्थालीं न्यसेत् पार्श्वे वेदांश्च चतुरः पुनः ॥
वामपार्श्वे तु सावित्री दक्षिणे च सरस्वती ।
अग्रे च ऋषयस्तद्वत् कार्याः पैतामहे पदे ॥*॥
कार्त्तिकेयं प्रवक्ष्यामि तरुणादित्यसन्निभम् ।
कमलोदरवर्णाभं सुकुमारं कुमारकम् ॥
गेण्डुकैश्चीरकैर्युक्तं मयूरवरवाहनम् ।
स्थानीयखेटनगरे भुजान् द्वादश कल्पयेत् ॥
चतुर्भुजः कर्व्वटे स्याद्दने ग्रामे द्विबाहुकः ॥
शक्तिः पाशस्तथा खड्गः शरः शूलन्तथैव च ।
वरदश्चैव हस्तः स्यादथवाभयदो भवेत् ॥
एते दक्षिणतो ज्ञेयाः केयूरकटकोज्ज्वलाः ।
धनुः पताकासृष्टिश्च तर्ज्जनी च प्रसारिता ॥
खेटकं ताम्रचूडञ्च वामहस्ते प्रशस्यते ।
द्विभुजस्य करे शक्तिर्वामे स्यात् कुक्कुटोऽपरे ॥
चतुर्भुजे शक्तिपाशौ वामतो दक्षिणे त्वसिः ।
वरदोऽभयदो वापि दक्षिणः स्यात् तुरीयकः ॥*॥
विनायकं प्रवक्ष्यामि गजवक्त्रं त्रिलोचनम् ।
लम्बोदरं चतुर्बाहुं बालयज्ञोपवीतिनम् ॥
स्वस्तिकर्णं दृढस्थूलमेकदन्तं पृथूदरम् ।
खं दन्तं दक्षिणकरे उत्पलञ्च तथापरे ॥
लड्डुकं परशुश्चैव वामतः परिकल्पयेत् ।
दृढसंक्षिप्तगमनं पीनस्कन्धाङ्घ्रिपाणिनम् ।
युक्तं बृहिकृबृहिभ्यामधस्ताभ्मूषिकान्वितम् ॥*॥
कात्यायन्याः प्रवक्ष्यामि रूपं दशभुजन्तथा ।
त्रयाणामपि देवानामनुकारानुकारिणीम् ॥
जटाजूटसमायुक्तामर्द्धेन्दुकृतशेखराम् ।
लोचनत्रयसंयुक्तां पूर्णेन्दुसदृशाननाम् ॥
अतसीपुष्पवर्णाभां सुप्रतिष्ठां सुलोचनाम् ।
नवयौवनसम्पन्नां सर्व्वाभरणभूषिताम् ॥
सुचारुदशनां तद्वत् पीनोन्नतपयोधराम् ।
त्रिभङ्गस्थानसंस्थानां महिषासुरमर्द्दिनीम् ॥
त्रिशूलं दक्षिणे दद्यात् खड्गषक्रन्तथैव च ।
तीक्ष्णबाणं तथा शक्तिं दक्षिणे सन्निवेशयेत् ॥
खेटकं पूर्णचापञ्च पाशमङ्कुशमेव च ।
घण्टां वा परशुं वापि वामतः सन्निवेशयेत् ॥
अधस्ताम्महिषं तद्वद्विशिरस्कं प्रदर्शयेत् ।
शिरश्छेदोद्भवं तद्वद्दानवं खड्गपाणिनम् ॥
हृदि शूलेन निर्भिन्नं निर्यदन्त्रविभूषितम् ।
रक्तरक्तीकृताङ्गञ्च रक्तविप्रुषितेक्षणम् ॥
वेष्टितं नागपाशेन भ्रुकुटीभीषणाननम् ।
सपाशवामहस्तेन धृतकेशञ्च दुर्गया ॥
वमद्रुधिरवक्त्रञ्च देव्याः सिंहं प्रदर्शयेत् ।
देव्यास्तु दक्षिणं पादं समं सिंहोपरिस्थितम् ॥
किञ्चिदूर्द्धं तथा वाममसुरं महिषोपरि ।
स्तूयमानञ्च तत्रूपममरैः सन्निवेशयेत् ॥ * ॥
इदानीं सुरराजस्य रूपं वक्ष्ये विशेषतः ।
सहस्रनयनं देवं मत्तवारणसंस्थितम् ॥
पृथूरुवक्षोवदनं सिंहस्कन्धं महाभुजम् ।
किरीटकुण्डलधरं श्रीवरोरुसुवेक्षणम् ॥
वज्रोपलधरं तद्वन्नानाभरणभूषितम् ।
मूर्द्धानं देवगन्धर्वैरसरोगणसंस्तुतम् ॥

छत्रचामरधारिण्यौ स्त्रियौ पार्श्वे तु कारयेत् ।
सिंहासनगतं वापि गन्धर्वगणसंयुतम् ॥
इन्द्राणीं वामतस्तस्य कुर्य्यादुत्पलधारिणीम् ॥

सूत उवाच ।

प्रभाकरस्य प्रतिमामिदानीं शृणुत द्विजाः ।
रथस्थं कारयेद्देवं पद्महस्तं सुलोचनम् ॥
सप्ताश्वचैकचक्रञ्च रथन्तस्य प्रकल्पयेत् ।
सुकुटेन विचित्रेण पद्मगर्भसमप्रभम् ॥
नानाभरणभूषाढ्यं भुजाभ्यां धृतपुष्करम् ।
स्कन्धस्थे पुष्करे ते तु लीलयैव धृते सदा ॥
चोलकेनोत्तरीयेण क्वचिच्चिह्नेषु दर्शयेत् ।
वस्त्रयुग्मसमोपेतं चरणौ तेजसावृतौ ॥
प्रतीहारौ च कर्त्तव्यौ पार्श्वयोर्दण्डधिङ्गलौ ।
कर्त्तव्यौ खड्गहस्तौ च पार्श्वयोः पुरुषावुभौ ॥
लेखनीकृतहस्तञ्च पार्श्वे धातारमन्वयम् ।
नानादेवगणैर्युक्तमेवं कुर्य्याद्दिवाकरम् ॥
अरुणः सारथिस्तस्य पद्मिनीपत्रसन्निभः ।
अश्वौ च वलिसुग्रीवावन्तस्थौ तस्य पार्श्वयोः ॥
भुजङ्गरश्मिभिर्बद्धाः सप्ताश्वा रश्मिसंयुताः ।
पद्मस्थं वा हयस्थं वा पद्महस्तं प्रकल्पयेत् ॥*॥
अग्निस्तु लक्षणं वक्ष्ये सर्व्वकामफलप्रदम् ।
दीप्तं सुवर्णवपुषमर्द्धचन्द्रासनस्थितम् ॥
बालार्कसदृशोन्तस्थ वसनञ्चापि दर्शयेत् ।
यज्ञोपवीतिनं देवं लम्बश्मश्रुधरन्तथा ॥
कमण्डलुं वामकरे दक्षिणे त्वक्षसूत्रकम् ।
ज्वालावितानसंयुक्तमजवाहनमुज्ज्वलम् ।
कुण्डस्थञ्चापि कुर्व्वीत मूर्द्धिं सप्तशिखान्वितम्॥*
तथा यमं प्रवक्ष्यामि दण्डपाशधरं विभुम् ।
महामहिषमारूढं कृष्णाञ्जनचयोपमम् ॥
सिंहासनगतञ्चापि दीप्ताग्निसमलोचनम् ।
महिषं चित्रगुप्तञ्च करालान् किङ्करांस्तथा ॥
समन्ताद्दर्शयेत्तस्य सौम्यासौम्यांस्तथा सुरान् ॥
राक्षसेन्द्रं तथा वक्ष्ये लोकपालञ्च नैर्ऋतम् ।
नरारूढं महाकायं रक्षोभिर्ब्बहुभिर्वृतम् ॥
खड्गहस्तं महानीलं कज्जलाचलसन्निभम् ।
नरयुक्तविमानस्थं पीताम्बरविभूषितम् ॥ * ॥
वरुणञ्च प्रवक्ष्यामि पाशहस्तं महाबलम् ।
शङ्खस्फटिकवर्णाभं हारकेयूरभूषितम् ॥
मृगाधिरूढं वरदं पताकाध्वजसंयुतम् ।
भूषणावगतं शान्तं किरीटवरधारिणम् ॥ * ॥
वायुरूपं प्रवक्ष्यामि धूम्रञ्च मृगवाहनम् ।
चित्राम्बरधरं शान्तं युवानं कुञ्चितभ्रुवम् ।
मृगाधिरूढं वरदं पताकाध्वजसंयुतम् ॥ * ॥
कुबेरञ्च प्रवक्ष्यामि कुण्डलाभ्यामलङ्कृतम् ।
हारकेयूररचितं सिताम्बरधरं सदा ॥
गदाधरञ्च कर्त्तव्यं वरदं मुकुटान्वितम् ।
नरयुक्तविमानस्थं मेषस्थं वापि कारयेत् ॥
वर्णेन पीतवर्णेन गुह्यकैः परिवारितम् ।
महोदरं महाकायं ऋद्ध्याष्टकसमन्वितम् ॥
गुह्यकैर्बहुभिर्युक्तं धनरत्नकरेस्तथा ॥ * ॥
सर्व्वैर्मुकुटकेयूरैः [illegible]
[illegible] विभुम् ॥ * ॥

मातृणां लक्षणं वक्ष्ये यथावदनुपूर्व्वशः ।
ब्रह्माणी ब्रह्मसदृशी चतुर्व्वक्त्रा चतुर्भुजा ।
हंसाधिरूढा कर्त्तव्या साक्षसूत्रकमण्डलुः ॥*॥
महेश्वरस्य रूपेण तथा माहेश्वरी मता ।
जटासुकुटसंयुक्ता वृषस्था चन्द्रशेखरा ।
कपालशूलखट्वाङ्गवरदाश्च चतुर्भुजा ॥ * ॥
कुमाररूपा कौमारी मयूरवरवाहना ।
रक्तवस्त्रधरा तद्वच्छूलशक्तिधरा तथा ॥
हारकेयूरसम्पन्ना कुक्कुटाकुधरा तथा ॥ * ॥
वैष्णवी विष्णुसदृशी गरुत्मति समास्थिता ।
चतुर्बाहुश्च वरदा शङ्खचक्रगदाधरा ।
सिंहासनगता वापि बालकेन समन्विता ॥ * ॥
वाराहीञ्च प्रवक्ष्यामि महिषोपरिसंस्थिताम् ।
वराहसदृशीं देवीं वस्त्राक्षामरधारिणीम् ।
गदाचक्रधरान्तद्वद्दानवेन्द्रविनाशिनीम् ॥ * ॥
इन्द्राणीमिन्द्रसदृशीं वज्रशूलगदाधराम् ।
गजासनगतान्देवीं लोचनैर्बहुभिर्वृताम् ।
तप्तकाञ्चनवर्णाभां सर्व्वाभरणभूषिताम् ॥ * ॥
तीक्ष्णखड्गधरान्तद्वद्धत्ते योगीश्वरीमिमाम् ।
दीर्घजिह्वामूर्द्धकेशीमस्थिखण्डैश्च मण्डिताम् ।
दंष्ट्राकरालवदनां कुर्य्याच्चैव क्षणोदरीम् ॥ * ॥
कपालमालिनीं देवीं सुरुण्डमालाविभूषिताम् ।
कपालं वामहस्ते तु मांसशोणितपूरितम् ॥
सकेशशिरो न्यस्य शिखिका दक्षिणे तथा ।
वृषस्था वायसस्था वा निर्म्मांसा विगतोदरी ।
करालवदना तद्वत् कर्त्तव्या सा त्रिलोचना ॥*॥
चामुण्डा वह्निघण्टा च द्वीपिचर्म्मधरा शिवा ।
दिग्वासा कालिका तद्वद्वासभस्था कपालिनी ॥
सुरक्तपुष्पाभरणा वह्निनी ध्वजसंयुता ।
विनायकञ्च कुर्व्वीत मातृणामन्तिके सदा ॥
वीरेश्वरञ्च भगवान् वृषारूढो जटाधरः ।
वीणाहस्तश्शिखिशूली च मातृणामग्रतो भवेत् ॥*॥
श्रियन्देवीं प्रवक्ष्यामि नवे वयसि संस्थिताम् ।
सुयौवनां पीनगण्डां रक्तोष्ठीं कुञ्चितभ्रुवम् ॥
पीनोन्नतस्तनतटां मणिकुण्डलधारिणीम् ।
सुमण्डलं मुखं तस्याः शिरः सीमन्तभूषितम् ॥
पद्मस्रस्तिकपाणिर्वा भूषितां कुन्तलालकैः ।
कम्बुकावद्गलाञ्चौ च हारभूषौ पयोधरौ ॥
नागहस्तोपमौ बाहू केयूरकटकोज्ज्वलौ ।
पद्मं हस्ते च दातव्यं श्रीफलं दक्षिणे करे ॥
मेखलाभरणान्तद्वत्तप्तकाञ्चनसुप्रभाम् ।
नानाभरणसम्पन्नां शोभनाम्बरधारिणीम् ।
पार्श्वे तस्याः स्त्रियः कार्य्याश्चामरव्यग्रपाणयः ।
पद्मासनोपविष्टान्तु पद्मसिंहासनस्थिताम् ॥
करिभ्यां स्नाप्यमाना सा शृङ्गाराभ्यामनेकशः ।
प्रतिपालयन्ती करिणौ शृङ्गाराभ्यां तथापरौ ॥
स्तूयमाना च लोकेशैस्तथा गन्धर्व्वगुह्यकैः ॥ * ॥
तथैव यक्षिणी कार्य्या सिद्धासुरनिषेविता ।
पार्श्वयोः कलशौ तस्याश्चोरयोर्देवदानवाः ॥
नागास्त्वेव तु कर्त्तव्याः खड्गखेटकधारिणः ।
व्यक्तात्प्रकृतिरूपेयं नाभेरूर्द्ध्वं च पौरुषी ॥
फणाश्च मूर्द्धि कर्त्तव्या द्विजिह्वा बहवः समाः ।

पिशाचा राक्षसाश्चैव भूतवेतालजातयः ॥
निर्म्मांसाश्चैव ते सर्व्वे रौद्रा विकृतरूपिणः ।
क्षेत्रपालश्च कर्त्तव्यो जटिलो विकृताननः ॥
दिग्वासा जटिलस्तद्वत् श्वगोमायुनिषेवितः ।
कपालं वामहस्ते तु शिरः केशसमावृतम् ।
दक्षिणे शस्त्रिकां दद्यादसृक्चषकधारिणीम् ॥*॥
अथातः संप्रवक्ष्यामि द्विभुजं कुसुमायुधम् ।
पार्श्वे चाश्वसुखं तस्य मकरध्वजसंयुतम् ॥
दक्षिणे पुष्पबाणञ्च वामे पुष्पमयं धनुः ।
प्रीतिः स्याद्दक्षिणे तस्य भोजनोपस्करान्विता ॥
रतिस्तु वामपार्श्वे च शयनोपस्करान्विता ।
षट्च षट्हस्तश्चैव खरः कामातुरस्तथा ॥
पार्श्वतो जलवापी च वनं नन्दनमेव च ।
सुशोभनञ्च कर्त्तव्यो भगवान् कुसुमायुधः ॥
संस्थानमीदृक्षं स्यादिस्त्रयं विश्वनेत्रकम् ।
एतदुद्देशतः प्रोक्तं प्रतिमालक्षणं मया ॥
विस्तरेण न शक्नोति वक्तुमप्यतिरपि द्विजाः ॥"
इति मत्स्यपुराणे देवाद्यानुकीर्त्तने प्रतिमालक्षणं नाम २३२ । २३३ । २३४ । २३५ अध्यायाः ॥ * ॥ सा द्विविधा । स्थापनरूपा स्वयं व्यक्तरूपा च । यथा,—

श्रीसदाशिव उवाच ।

"शृणु देवि ! प्रवक्ष्यामि तदप्यावश्यं हरेः ।
स्थापनञ्च स्वयं व्यक्तं द्विविधं तत् प्रकीर्त्तितम् ॥
शिलादारुलौहाद्यैः कृत्वा प्रतिकृतिं हरेः ।
श्रौतस्मार्त्तागमैः प्रोक्ता क्रियासंस्थापना हि
तत् ॥
तत्स्थापनमिति प्रोक्तं स्वयं व्यक्तं हि मे शृणु ।
यस्मिंस्तु निहितो विष्णुः स्वयमेव नृणां भुवि ॥
पाषाणदार्व्वीरात्मेशः स्वयं व्यक्तं हि तत् स्मृतम् ।
स्वयं व्यक्ते स्थापने वा पूजयेन्मधुसूदनम् ॥
देवतानां महर्षीणामर्च्चनार्थं सनातनः ।
स्वयमेव जगन्नाथः सान्निध्यं याति केशवः ॥
यस्य यद्विग्रहे भाग्यं तदेवाविरभूद्भुवि ।
तदेव पूजयेन्नित्यन्तस्मिन्नेव रमेत् सदा ॥
श्रियोऽङ्कशायी देवेशो विधेरर्च्चा शुभानने ! ।
स एवेक्ष्वाकुनाथानां तपसाविरभूद्भुवि ॥
मयापि काश्यां संपूज्यो माधवः कलुषापहः ।
दक्षिणोदधितीरे तु नीलाद्रौ पुरुषोत्तमे ॥
दारुरूपी जगन्नाथो ब्रह्मणा स्थापितः स्वयम् ।
स एव पूज्यः सर्व्वेषां लोकानां खलु पार्व्वति ! ॥
नरनारायणः साक्षात् पूज्यो बदरिकाश्रमे ।
गदाधरो गयायान्तु प्रयागे माधवस्तथा ॥
माधवो विधिवत् पूज्यो गङ्गासागरसङ्गमे ।
कपालमोचने तीर्थे कलिङ्गेश्चर्ग्गे हरिस्तथा ॥
विष्णुश्च वहिरङ्गे तु भीमस्थः शिवे यतः ।
द्वारकायां वासुदेवः कुरुक्षेत्रे रणेश्वरः ॥
नारायणो वदरिकाश्रमे पूज्यो नित्यं सनातनः ।
स्वयं श्रीभगवान् कृष्णो धात्रि वृन्दावने शुभे ॥
गोविन्दः केशवो नन्दयशोदानन्दनो विभुः ।
पूज्यो मदनगोपालगोवर्द्धनधरादिकः ॥
चतुरशीतिके क्रोशे ब्रह्माण्डातीतके शिवे ! ।

कलिन्दनन्दिनीतीरे महाप्रलयवर्जिते ॥
सदैव कार्ष्णिरभ्यर्च्यः श्रीगोपीजनवल्लभः ।
यत्र यत्र हरेरर्चा स्वयं व्यक्ता शुभानने ! ॥
स्थानं तीर्थं तथा क्षेत्रं यज्ञदानमहोत्सवम् ।
संकीर्त्तनं सर्व्वभक्तिस्तथा कार्ष्णादिकं जनम् ॥
कायेन मनसा वाचा भक्त्या देवि ! पुनः पुनः ।
तत्र तत्र समागम्य रमेऽहं संयतस्थितः ॥
नाष्टाङ्गयोगजं ज्ञानमर्च्चायां विन्दते नृणाम् ।
चक्षुषोर्विषयं प्राप्य ददाति फलमीप्सितम् ॥
सर्व्वावस्थासु सौरभ्यमर्च्चायां लभते नरः ।
व्यङ्गानामपि सान्निध्यं सर्व्वदा पृथिवीतले ॥
जम्बुद्वीपे महापुण्ये वर्षे वै भारते शुभे ।
अर्च्चायां सन्निधिर्विष्णोर्नेतरेषु कदाचन ॥
तस्माद्वै भारतं वर्षं मुनिभिस्त्विदृशैरपि ।
सेवितं सततं सुभ्रु ! तपोयज्ञक्रियादिभिः ॥
भारतेऽस्मिन् महावर्षे नित्यं सन्निहितो हरिः ।
इन्द्रद्युम्ने तथा कौर्म्मे सिंहाद्रौ बदरीवने ॥
काश्यां प्रयागे सोमे च शालग्रामाश्रमे तथा ।
नारायणाचले सोमे वराहे वामनाश्रमे ।
एवमाद्याः स्वयं व्यक्ताः सर्व्वकामफलप्रदाः ॥
स्वयमेव हि सान्निध्यं यस्मिन् याति जनार्द्दनः ।
तस्मिन्नेव स्वयं व्यक्तं वसन्ति मुनयः शुभाः ॥
महाभागवतश्रेष्ठो विधिना स्थाप्य केशवम् ।
मन्त्रेण कुर्य्यात् सान्निध्यं स्थापनं तद्विधीयते ॥
न तु शास्त्रादिभिः कार्य्यं सुकुन्दस्थापनादिकम् ।
श्रीहरेरर्चनं कर्म्म यात्रोत्सवमधाध्वरम् ॥
यत्किञ्चिद्देवयोः कार्य्यमपरं मन्दिरादिकम् ।
ध्रुवं विष्णुर्न गृह्णाति कृतमेतद्विदुर्मुखैः ॥"

इति पाद्मोत्तरखण्डे ७३ अध्यायः ॥ * ॥

भगवत्याः प्रतिमाराधनविधिर्यथा,—

ब्रह्मोवाच ।

"शृणु तस्याः सुराध्यक्ष ! आराधनविधिं परम् ।
यथा सा तोषिता पूर्व्वं शङ्करार्द्धैः फलैषुभिः ॥
कर्म्मयज्ञेन देवेश ! तथा त्वमपि पूजय ॥
शम्भुः पूजयते देवीं मन्त्रशक्तिमयीं शुभाम् ।
चक्रमालाकरो नित्यं तेनासौ विश्वरीश्वरः ॥
अहं शैलमयीं देवीं यजामि हरसत्तम ! ।
तेन ब्रह्मत्वमेवेदं मया प्राप्तं सुदुर्लभम् ॥
इन्द्रनीलमयीं देवीं विष्णुरर्च्चयते सदा ।
विष्णुत्वं प्राप्तवांस्तेन अद्युतैकं सनातनम् ॥
देवीं हेममयीं कान्तां धनदोऽर्च्चयते सदा ।
तेनासौ धनदो देवो धनेशत्वमवाप्तवान् ॥
विश्वेदेवा महात्मानो रौप्यां देवीं मनोहराम् ।
यजन्ति विधिवद्भक्त्या तेन विश्वत्वमाप्नुयुः ॥
वायुः पूजयते भक्त्या देवीं पित्तलसम्भवाम् ।
वायुत्वं तेन तत् प्राप्तमनौपम्यं गुणावहम् ॥
यमः कांसिकां देवीं पूजयन्ते विधानतः ।
प्राप्तवन्तो महात्मानो यमत्वं सुमहोदयम् ॥
अश्विनौ पार्थिवीं देवीं पूजयन्तौ विधानतः ।
तेन तावश्विनौ देवौ दिव्यदेहं गतावुभौ ॥
स्फाटिकां शोभनां देवीं वरुणोऽर्च्चयते सदा ।
वरुणत्वं हि संप्राप्तं तेन भक्त्या समन्वितम् ॥
देवीमन्त्रमयीं पुण्यामग्निर्यजति भावितः ।
अग्नित्वं प्राप्तवांस्तेन तेजोरूपसमन्वितम् ।
तान्त्रां देवीं सदाकालं भक्त्या देवो दिवाकरः ।
अर्च्चते तत्र सम्प्राप्तं तेन सूर्य्यत्वमुत्तमम् ॥
मुक्ताशैलमयीं देवीं सोमः पूजयते सदा ।
तेन सोमोऽपि संप्राप्तः सोमत्वं सततोज्ज्वलम् ॥
प्रवालकमयीं देवीं यजन्ते पन्नगोत्तमाः ।
तेन नागास्तु भोगाढ्याः प्रयान्त्येते परं पदम् ।
क्षयायसमयीं देवीं पूजयन्त्यसुरोत्तमाः ।
राजसाश्च महात्मानस्तेन तेऽमितविक्रमाः ॥
त्रपुसीसमयीं देवीं पिशाचाः पूजयन्ति ताम् ।
तेन ऋद्धिबलोपेताः प्रयान्ति परमं पदम् ॥
त्रैलोहिकां सदा देवीं यजन्ते गुह्यकादयः ।
तेन भोगबलोपेताः प्रयान्तीश्वरमन्दिरम् ॥
वज्रलौहमयीं देवीं यजन्ते मातरः सदा ।
मातृत्वं प्राप्य ताः सर्व्वाः प्रयान्ति परमं पदम् ॥
एवं देवाः सगन्धर्व्वाः पिशाचोरगराक्षसाः ।
पूजयन्ते सदाकालं चर्च्चिकां सुरनायिकाम् ॥
तथा त्वमपि देवेन्द्र ! यदीच्छसि परां गतिम् ।
शिवां मणिमयीं पूज्य लभसे मनसेप्सितान् ॥
कामान् सुरवराध्यक्ष ! कामिकैः पूजिता सदा ।
ददाति सर्व्वलोकानां चिन्तामणिर्यथा शिवा ॥"

अपि च ।

"हेमताम्रा च रूप्यार्च्चा शैलाचित्रायसापि वा ।
शुक्तिमूले स्थिता देवी सर्व्वकामफलप्रदा ॥
यो यस्य आयुधः प्रोक्तस्तच्छक्तिं प्रतिपूजयेत् ।
देवी शक्तिश्चिता पुंसां कामायुःसुतसौख्यदा ॥
मूले संपूजिता वत्स ! सर्व्वं भवति पूजितम् ।
चार्च्चां वा शैलजां वापि रत्नधातुमयीमपि ॥
विधिना शास्त्रदृष्टेन दृष्ट्वाहुश्चिलोचनाम् ।
कारयेद्भक्तिमान् यस्तु देवीं शास्त्रविशारदः ॥"

स्थापनविधिर्यथा,—

"सर्व्वशैलेष्टकाद्योत्थं गृहं वास्तुविभाजितम् ।
बलभीमण्डपं वत्स ! तासान्तु स्थापने शुभम् ॥
गन्धनैवेद्यधूपेन बलिमाल्यविभूषणैः ।
अधिवासनपूर्व्वास्तु स्थापनीयास्तु तद्विदैः ॥
वेदध्वनिमहाघोषैः स्त्रीसङ्गीतोपशोभितम् ।
कर्त्तव्यं स्थापनं तासां बहुवादित्रनादितम् ॥
रात्रौ जागरणं तत्र देव्याः पूजार्द्धदर्शने ।
सर्व्वलक्षणसम्पूर्णं सर्व्वोपकरणान्वितम् ॥
वापीकूपतडागादिवाटिकावनशोभितम् ।
वेश्यातूर्य्योपसम्पन्नं ध्वजच्छत्रविभूषितम् ॥
घण्टादर्पणदीपादि देयं द्रव्यं निरूपितम् ।
यष्टिका तत्र यष्ट्यादि दिनसंख्यार्थनिश्चये ॥
कर्त्तव्या एकमेकं वा यथाकालपरिच्छिदे ।
अनेन विधिना यस्तु मातरः स्थापयेन्नरः ।
इहात्र पूजनीयस्तु स्तुतो याति परां गतिम् ॥"

इति देवीपुराणे मातृप्रतिष्ठामहाभाग्यम् ॥ * ॥

अल्पबुद्धीनां प्रतिमासु देवत्वं यथा,—

"यस्मौ क्रियावतां देवो हृदि देवो मनीषिणाम् ।
प्रतिमा स्वल्पबुद्धीनां सर्व्वतो हरिः ॥"

अपि च ।

"यस्मौ क्रियावतामस्मि हृदि चाहं मनीषिणाम् ।
प्रतिमा स्वल्पबुद्धीनां ज्ञानिनामस्मि सर्व्वतः ॥ * ॥
प्रतिमां लक्षणवतीं यः कुर्य्याच्चैव मानवः ।
केशवस्य परं लोकमक्षयं प्रतिपद्यते ॥
षष्टिवर्षसहस्राणां सहस्राणि महामुने ! ॥
क्रीडते देववत्तत्र अप्सरोभिः सकिन्नरैः ॥
यः स्थापयेद्धरेरर्चां सुप्रशस्ते निवेशने ।
पुरुषः कृतकृत्यत्वान्नेच्छेत् मरणं नयेत् ॥ * ॥
संस्थाप्य प्रतिमां विष्णोर्हैमरूप्यसुशैलजाम् ।
रत्नजां रैतिकीं वापि बहिर्स्तीर्थे गृहेऽपि वा ॥
महास्नानेन गोविन्दं सम्यक् संस्नाप्य मानवः ।
यं यं कामयते कामं तं तं प्राप्नोत्यसंशयम् ॥"

इत्यग्निपुराणम् ॥

प्रतिमानं, क्लीं, (प्रतिमीयतेऽनेनेति । प्रति + मि भावा + ल्युट् ।) प्रतिबिम्बम् । वाहित्थस्याधोभागः । इत्यमरः । २ । १० । ३६, २ । ८ । ३६ । "अस्य वाहित्थस्याधोभागो दन्तयोर्मध्यं प्रतिमानमुच्यते प्रतिमीयते अनेन प्रतिमानं क्लीं मिव न क्षेपे ल्युट् मिश्योरिति ठा । प्रतिमानं प्रतिच्छाया गण्डदन्तान्तरालयोरिति रुद्रः ।" इति भरतः ॥ (यथा, महाभारते । ८ । २८ । २६ ।

"प्रतिमानेषु कुम्भेषु दन्तवेष्टेषु चापरे ।
निगृहीता भृशं नागाः प्रासतोमर-
शक्तिभिः ॥"

हस्तिललाटदेशः । इति महाभारतटीकायां नीलकण्ठः । ६ । ४५ । २७ । * ॥ मानदण्डम् । यथा, ऋग्वेदे । १ । ३२ । ७ ।

"वृष्णो वधिः प्रतिमानं बुभूषन् ।
पुरुत्रा वृत्रो अशयद्व्यस्तः ॥"

"प्रतिमानं मानदण्डम् ।" इति तद्भाष्ये सायणः ॥ प्रतिनिधिः । यथा, ऋग्वेदे । ६ । १८ । १० ।

"नास्य शत्रुर्न प्रतिमानमस्ति ।"

"प्रतिमानं प्रतिनिधिर्नास्ति ।" इति तद्भाष्ये सायणः ॥ * ॥ दृष्टान्तम् । यथा, भागवते । ७ । ८ । ३५ ।

"यं साधुगाथासदसि रिपवोऽपि सुरा नृप ! ।
प्रतिमानं प्रकुर्व्वन्ति किमुतान्ये भवादृशाः ॥"

तथा च महाभारते । ६ । २ । ६६ ।

"उग्रायुधश्च विक्रान्तः प्रतिमानं धनुष्मताम् ॥"

धान्यादिपरिमाणगिर्हारार्घप्रस्थद्रोणादिकम् । यथा, याज्ञवल्क्ये । २ । १०० ।

"तुलाधारणविद्दक्षैरभियुक्तस्तुलाश्रितः ।
प्रतिमानसमीभूतो रेखां कृत्वावतारितः ॥"

मनुसंहितायान्तु । ८ । ४०३ । क्रीते प्रतीमानं इत्येव दृश्यते ॥)

प्रतिमार्गकः, पुं, (प्रतिदिशं मार्गो गमनपन्था यस्य । कप् ।) पुरविशेषः । यथा,—

"योमचारिपुरं शोभनद्रुः प्रतिमार्गकः ॥"

इति भटाक्षरः ॥

"हरिश्चन्द्रपुरं शोभनद्रुः प्रतिमार्गकः ॥"

इति त्रिकाण्डशेषः ॥

प्रतियो

प्रतिमुक्तः, त्रि, (प्रतिमुच्यते स्मेति। प्रति+मुच्+क्तः।) परित्यक्तवस्त्रादिः। इत्यमरः। २।८।६५॥ (परित्यक्तः। यथा, रघुः। ४। ४३।
"गृहीतप्रतिमुक्तस्य स धर्म्मविनयी नृपः।
श्रियं महेन्द्रनाथस्य जहार न तु मेदिनीम्॥"
वटुः। यथा, भागवते। ३। १८। १०।
"न रथ्युपात्तैः प्रतिमुक्तवस्त्र
विकत्थनं तव गृहान्धभद्र॥"
प्रतिनिर्मुक्तः। विच्युतः। यथा, मार्कण्डेये।१५।१।
"नरकात् प्रतिमुक्तस्तु कृमिः पतितयाजकः॥"
प्रत्यर्पितः। यथा, रघुः। १६। ५६।
"सद्यःपरीभिर्मदरागशोभां
विलोचनेषु प्रतिमुक्तमासाम्॥")

प्रतियत्नः, पुं, (प्रतियत्यते इति। प्रति+यत् प्रयत्ने+"यजयाचयतविच्छप्रच्छरक्षो नङ्।"३। ३। ९०। इति नङ्।) लिप्सा। वाञ्छा। उपग्रहः। वन्दी। इत्यमरः। ३। ३। १०६॥ निग्रहादिः। सतो गुणान्तराधानम्। इति भरतः॥ संस्कारः। इति स्वामी॥ (यथा, माघे।३।५४।
"सुगन्धिनामप्रतियत्नपूर्व्वां
विभ्रन्ति यत्र प्रमदाय पुंसाम्॥"
"यत्र पुरि न प्रतियत्नः संस्कारः पूर्व्वो यस्याम्।" इति तट्टीकायां मल्लिनाथः॥) ग्रहणादिः। इति रामाश्रमः॥ प्रतिग्रहः। इति मुकुटः॥
"प्रतियत्नस्तु संस्कारलिप्सोपग्रहणेषु च॥"
इति मेदिनी। ने, १६६॥
रचना। इति जटाधरः॥ प्रयत्नवति, त्रि। इति विश्वप्रकाशशेषः॥

प्रतियातना, स्त्री, (प्रतियात्यते अनया इति। प्रति+यत्+णिच्+"ण्यासश्रन्थो युच्।" ३। ३। १०७। इति युच्।) प्रतिमा। इत्यमरः। २। १०। ३६॥ (यथा, माघे।३।३४।
"व्यनिन्दिदा या विदधे विधात्रा
पृथ्वी पृथिव्या प्रतियातनेव॥")
तुल्ययातना च॥

प्रतियोगः, पुं, प्रतियुज्यत इति। प्रति+युज्+भावे घञ्।) विरोधः। (पुनरुद्योगः। यथा, भागवते। ४। १०। २२।
"इति प्रवेपितरथः स्वसारथिं
यतः परेषां प्रतियोगशङ्कितः।
शुश्राव शब्दं जलधेरिवेरितं
नभस्वतो दिक्षु रजोऽन्वदृश्यत॥"
"प्रतियोगः पुनरुद्योगः।" इति तट्टीकायां श्रीधरस्वामी॥)

प्रतियोगी, [न्] त्रि, (प्रतिरूपं युज्यते इति। प्रति+युज्+घिनुण्।) विरोधी। यथा,—
"माधवप्रतियोगिकान्योन्याभावासामानाधिकरण्यम्। इति चिन्तामणिः॥ सत्प्रतिपक्षः। यथा,—
"प्रतियोगिनं दृष्ट्वा प्रतियोगी निवर्त्तते।" इति प्राचीनकारिका॥

प्रतिलो

प्रतिरम्भः, पुं, (प्रति+लम्भ+भावे घञ्। लस्य रः।) प्रतिलम्भः। इति द्विरूपकोषः॥

प्रतिरूपं, क्ली, (प्रतिगतं प्रतिकृतं वा रूपमिति प्रादिसमासः।) प्रतिमा। इति विश्वप्रकाशशेषः॥ (यथा, भागवते। ७। १०। २१।
"भवान् मे खलु भक्तानां सर्व्वेषां प्रतिरूपधृक्॥"
त्रि, प्रतिगतं रूपमस्य। अनुरूपः। यथा, महाभारते। १। १०२। ६१।
"आत्मनः प्रतिरूपोऽसौ लब्धः पतिरिति स्थिते।
विचित्रवीर्य्यं कल्याणौ पूजयामासतुः शुभे॥"
दानवविशेषे, पुं। यथा, महाभारते। १८। २०७। ५१। [मधुः॥")
"विश्वजिन् प्रतिरूपश्च वृषाकपिर्विकर्परो

प्रतिरूपकं, क्ली, (प्रतिरूप+स्वार्थे कन्।) प्रतिबिम्बम्। इति जटाधरः॥ (यथा, महाभारते। १२। ५६। ४६।
"अग्निदेवरदेवैव प्रतिरूपककारकैः।
श्रेणीसुखोपजापेन वीरुधश्छेदनेन च॥")

प्रतिरोधः, पुं, (प्रतिरुध्यते अनेनेति। प्रति+रुध्+करणे घञ्।) तिरस्कारः। इति युद्धानशब्दटीकायां भरतः॥ (प्रति+रुध्+कर्त्तरि अच्।) सत्प्रतिपक्षः। यथा। पक्षसाधसाधनाप्रसिद्धिस्वरूपा सिद्धिबाधप्रतिरोधानां निरासः। इति सत्यभिचारशिरोमणिः॥

प्रतिरोधकः, पुं, (प्रतिरुणद्धि प्रतिरुध्य चौर्य्यं करोतीति। प्रति+रुध्+ण्वुल्।) चौरः। इति हेमचन्द्रः। ३। ४५॥

प्रतिरोधी, [न्] पुं, (प्रतिरुणद्धीति। प्रति+रुध्+णिनिः। प्रतिरोधस्तिरस्कारोऽस्यास्तीति वा। प्रतिरोध+इनिः।) चौरः। इत्यमरः। २। १०। २५॥

प्रतिलम्भः, पुं, (प्रति+लम्भ+भावे घञ्।) लाभः। तत्पर्य्यायः। लम्भनम् २। इति हेमचन्द्रः॥ यथा, श्रीहर्षः।
"नैव नः प्रियतमोभयथासौ
यद्यमुं न वृणुते वृणुते वा।
एकतो हि विगमस्मगुणज्ञा-
मन्यतः कथमदःप्रतिलम्भः॥"

प्रतिलोमः, त्रि, (प्रतिगतं लोम आनुकूल्यं यस्मादिति। "अच् प्रत्यन्ववपूर्व्वात्सामलोम्नः।" ५। ४। ७५। इति समासान्तोऽच्प्रत्ययः।) वामः। इति हेमचन्द्रः॥ (यथा, हरिवंशे। १२७।२४।
"बहूनि प्रतिलोमानि पुरा त्वं कृतवान् मयि।
क्षमो नारद! सोढानि भ्रातेतिस्म मयानघ!॥")
विलोमः। यथा,—
"तावुभावप्यसंस्कार्य्याविति धर्म्मो व्यवस्थितः।
वैगुण्याज्जन्मनः पूर्व्व उत्तरः प्रतिलोमतः॥"
इति मानवे। ६। ६८॥

प्रतिलोमजः, त्रि, (प्रतिलोमात् जायते इति। प्रतिलोम+जन्+डः।) प्रतिलोमजातः। उत्तमवर्णायां अधमवर्णात्जातः। यथा,—

प्रतिवि

"संकीर्णयोनयो ये तु प्रतिलोमानुलोमजाः।
अन्योन्यव्यतियक्ताश्च तान् प्रवक्ष्याम्यशेषतः॥"
इति मानवे १० अध्याये॥

प्रतिवचः, [स्] क्ली, (प्रतिरूपं वचः।) प्रत्युत्तरम्। इति हेमचन्द्रः॥ (यथा, देवीभागवते। १। ११। ५४।
"सोमः श्रुत्ववचः श्रुत्वा किञ्चित् क्रोधसमाकुलः।
भङ्क्त्वा प्रतिवचः प्राह शुम्भदूतं तदा शृणु॥")

प्रतिवचनं, क्ली, (प्रतिरूपं वचनम्।) प्रतिवाक्यम्। उत्तरम्। इति विश्वप्रकाशशेषः॥ (यथा, कलाविलासे। २। ६।
"न ददाति प्रतिवचनं विक्रयकाले भ्रष्टो वणिग् मौनी।
निक्षेपपाणिपुरुषं दृष्ट्वा सम्भाषणं कुरुते॥"
प्रतिनिर्देशः। इति निरुक्तम्। ६। ३। ६॥)

प्रतिवसथः, पुं. (प्रतिवसत्यस्मिन्निति। प्रति+वस्+बाहुलकात् अथ।) ग्रामः। इति हेमचन्द्रः। ४। २७॥

प्रतिवाक्, [च्] स्त्री, (प्रतिरूपा वाक्।) उत्तरम्। इति शब्दरत्नावली॥ (यथा, महाभारते। ५। ७२। ७१।
"लाङ्गूलचालनं चेष्टा प्रतिवाचो विवर्त्तनम्।
दन्तदर्शनमारावस्ततो युद्धं प्रवर्त्तते॥")

प्रतिवाक्यं, क्ली, (प्रतिरूपं वाक्यम्।) उत्तरम्। इत्यमरः। २। ६। १०॥

प्रतिवाणिः, स्त्री, (प्रतिरूपा वाणिः।) प्रत्युक्तिः। प्रत्युत्तरम्। इति भूरिप्रयोगः॥

प्रतिवादी, [न्] त्रि, (प्रतिवादोऽस्यास्तीति इनिः। यद्वा, प्रतिकूलं वदतीति। प्रति+वद्+णिनिः।) प्रतिपक्षः। यथा,—
"यदा त्वेवंविधः पक्षः कथितः पूर्व्ववादिना।
एवात्तत्पक्षसम्बन्धं प्रतिवादी तदोत्तरम्॥"
इति अवहारतत्त्वे रघुनन्दनवचनम्॥

प्रतिवासरः, पुं, (प्रतिगतो वासरम्।) प्रतिदिनम्। तद्दिनम्। इति शब्दरत्नावली। १६८। (क्ली, वासरं वासरं प्रतीति समासे। प्रतिदिनम्। यथा, राजतरङ्गिण्याम्। २। १७७।
"भूतेश्वरर्द्धमानेशविजयेशानपञ्चतः।
नियमो राजकार्य्येषु तस्याभूत् प्रतिवासरम्॥")

प्रतिवासी, [न्] त्रि, (प्रत्यासन्नं वसतीति। प्रति+वस्+णिनिः।) आसन्नग्रही। निकटस्थायी। पड़सि इति भाषा। प्रतिवसतीति ग्रहादित्वाणिनिप्रत्ययनिष्पन्नः॥

प्रतिविम्बं, क्ली, (प्रतिरूपं विम्बमिति। "कुगतिप्रादयः।" २। २। १८। इति समासः।) प्रतिमा। प्रतिच्छाया। इत्यमरः। २।१०।३६॥ (यथा, पञ्चदश्याम्। १। १५।
"चिदानन्दमयब्रह्मप्रतिबिम्बसमन्विता।
तमोरजःसत्त्वगुणा प्रकृतिर्द्विविधा च सा॥")

प्रतिविषा, स्त्री, (प्रतीपं विषं यस्याः।) अतिविषा। इत्यमरः। २।४।६६॥ चाताइस इति भाषा॥ (यथा, सुश्रुते उत्तरतन्त्रे। ४० अः।

"महौषधं प्रतिविषा मुस्तं चेत्यामपाचनाः ॥"
अस्याः पर्य्यायो यथा,—
"विषा त्वतिविषा विश्वा घृङ्गी प्रतिविषारुणा।
शुक्लकन्दा चोपविषा भङ्गरा घुणवल्लभा ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

प्रतिविष्णु, क्ली, विष्णुं विष्णुं प्रति। इति सुग्धबोधव्याकरणम् ॥

प्रतिविष्णुकः, पुं, (प्रतिगतो विष्णुर्यस्मिन्निति। प्रतिविष्णुमुंचुकुन्दो नृपतिः। तन्नाम्ना कायति प्रकाशते इति। कै+कः।) सुचुकुन्दवृक्षः। इति राजनिर्घण्टः ॥ (पर्य्यायोऽस्य यथा,—
"सुचुकुन्दः चक्रवृक्षचिक्कः प्रतिविष्णुकः ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

प्रतिवेशः, पुं, (प्रत्यासन्नो वेशो निवेशः। प्रतिविशत्यत्रेति आधारे घञ् वा।) प्रतिवासिगृहम्। आसन्नगृहिणां गृहम्। इति शब्दरत्नावली ॥ (त्रि, आसन्नवर्त्ती। यथा, ऋग्वेदे।१०।६६।१३।
"चैत्यस्य पतिं प्रतिवेशमीमहे।"
"प्रतिवेशं समीपे वर्त्तमानम्।" इति तद्भाष्ये सायनः ॥)

प्रतिवेशवासी, [न्] त्रि, (प्रतिवेशे वसतीति। वस्+णिनिः।) प्रतिवासी। यथा,—
"नो जाने प्रतिवेशवासिनि गुरोः किं भावि सम्भावितम्।"
इत्यलङ्कारकौस्तुभम् ॥

प्रतिवेशी, [न्] त्रि, (प्रतिवेश आसन्नवर्त्तिगृहमस्यास्तीति। इनिः।) प्रतिवासी। इति शब्दरत्नावली ॥ (यथा, मृच्छकटिके ३ अङ्के।
"दृष्ट्वा प्रभातसमये प्रतिवेशिवर्गो
दोषांश्च मे वदति कर्म्मणि कौशलञ्च ॥")

प्रतिश्यामनं, क्ली, (प्रति+श्यास्+भावे ल्युट्।) आकृष्य भक्षादीनां कार्य्ये प्रेरणम्। इत्यमरः ॥

प्रतिश्रिष्टं, त्रि, (प्रतिगतं श्रिष्टमवश्रिष्टम्।) प्रत्याख्यातम्। (प्रति+श्रास्+क्तः।) प्रेषितम्। इति त्रिकाण्डशेषः ॥

प्रतिश्या, स्त्री, (प्रतिश्यायते इति। प्रति+श्यैङ् गतौ+"आतश्चोपसर्गे।" ३।१।१३६। इति कः। टाप्।) प्रतिश्यायः। इति शब्दरत्नावली ॥

प्रतिश्यायः, पुं, (प्रतिश्यायं श्यायते इति। प्रति+श्यै+"श्यादृवधासुसंभ्रमतीयेति।"३।२।१४९। इति घञ्।) पीनसरोगः। इत्यमरः।२।६।५२॥ (यथा, सुश्रुते सूत्रस्थाने ४५ अध्याये।
"पार्श्वशूले प्रतिश्याये वातरोगे गलग्रहे ॥"
अस्य सकारस्यलत्वं सम्प्राप्तिश्च यथा,—
"सन्धारणाजीर्णगुरूतिभाष्य-
क्रोधर्तुवैषम्यशिरोऽभितापैः।
प्रजागरातिस्वपनासृशीते-
रपथ्यया मेघुनवाष्यधूमैः ॥
संस्थानदोषे शिरसि प्रदुष्टो
वायुः प्रतिश्यायसुदीरयेत्तु।
वाताभितप्तैः श्लथधुर्जलाभः
सार्द्धोऽनिलात् सस्रवमक्षिरोगः।
नासाग्रपाकज्वरवक्त्रशोष-
लक्षोणपीतस्रवणानि पित्तात्।
कासारुचिस्रावनयनप्रसेकाः
कफाद्गुरुः स्रोतसि चापि कण्डूः ॥
सर्व्वाणि रूपाणि तु सन्निपातात्
स्युः पीनसे तीव्ररुजेऽतिदुःखे।
सर्व्वोऽतिवृद्धोऽहितभोजनात्तु
दुष्टप्रतिश्याय उपेक्षितः स्यात् ॥"
इति चरके चिकित्सास्थाने षड्विंशेऽध्याये ॥)

प्रतिश्रयः, पुं, (प्रतिश्रीयते अस्मिन्निति। प्रति+श्रि+आधारे अच्।) यज्ञशाला। इति जटाधरः ॥ सभा। आश्रयः। इति मेदिनी। ये, १२२ ॥ ओकः। इति हेमचन्द्रः ॥ (यथा, महाभारते। १। १६६। ४।
"स सम्यक् पूजयित्वा तं विप्रं विप्रथभस्सदा।
ददौ प्रतिश्रयन्तस्मै सदा सर्व्वातिथिव्रतः ॥"
निवासः। यथा, मनौ। १०। ५१।
"चण्डालश्वपचानान्तु बहिर्ग्रामात् प्रतिश्रयः ॥"
"प्रतिश्रयो निवासः।" इति मेधातिथिः ॥)

प्रतिश्रवः, पुं, (प्रति+श्रु+"ऋदोरप्।" ३। ३। ५७। इति अप्।) अङ्गीकारः। इत्यमरः ॥ (यथा, राजतरङ्गिण्याम्। ३। ४२४।
"इति सोऽभीष्टसंप्राप्तौ कारयित्वा प्रतिश्रवम्।
दूरमुत्क्रान्तमर्य्यादः सङ्गमं तमयाचत ॥")

प्रतिश्रुत्, स्त्री, (प्रतिरूपं श्रूयते इति। प्रति+श्रु+सम्पदादित्वात् क्विप्।) प्रतिध्वनिः। इत्यमरः। १। ६। २५॥ (यथा, रघौ। १३। ४०।
"यस्यायमन्तर्हितसौधभाजः
प्रसक्तसङ्गीतमृदङ्गघोषः।
वियन्नतः पुण्यकचन्द्रशालाः
चणं प्रतिश्रुन्मुखराः करोति ॥")

प्रतिश्रुतः, त्रि, (प्रतिश्रूयते स्मेति। प्रति+श्रु+क्तः।) अङ्गीकृतः। इत्यमरः। ३। २। १०६॥

प्रतिषिद्धः, त्रि, (प्रति+सिध्+क्तः।) प्रतिषेधविषयः। निषिद्धः। यथा। अप्रतिषिद्धमनुमतं भवतीति दत्तकचन्द्रिका ॥ (यथा च,—
"सर्व्वेषु दिवास्वापः प्रतिषिद्धोऽन्यत्र ग्रीष्मात् ॥"
इति सुश्रुते शारीरस्थाने चतुर्थेऽध्याये ॥)

प्रतिषेद्धा, [ष्टृ] त्रि, (प्रति+सिध्+तृच्।) प्रतिषेधकर्त्ता। तत्पर्य्यायः। माशब्दिकः २। इति त्रिकाण्डशेषः ॥ (यथा, महाभारते। १। १८१। १०।
"यदा तु प्रतिषेद्धारं पापो न लभते क्वचित्।
तिष्ठन्ति बहवो लोकास्तदा पापेषु कर्म्मसु ॥")

प्रतिषेधः, पुं, (प्रति+सिध्+भावे+घञ्।) निषेधः। यथा, मलमासतत्त्वे।
"प्राधान्यन्तु विधेर्यत्र प्रतिषेधेऽप्रधानता।
पर्य्युदासः स विज्ञेयो यत्रोत्तरपदेन नञ्॥"

प्रतिषेधकः, त्रि, (प्रतिषेधतीति प्रति+सिध्+ण्वुल्।) प्रतिषेधकर्त्ता। यथा तत्रैव।
"षष्टिवर्षसहस्राणां सहस्राणि वसेद्दिवि।
योऽनुमन्तापि भवति निरये प्रतिषेधकः॥"

प्रतिष्कन्दः, पुं, (प्रतिष्कन्दतीति प्रतिगच्छतीति। प्रति+स्कन्द्+बाहुलकात् घञ्।) दूतः। इति शब्दरत्नावली ॥

प्रतिष्कशः, पुं, (प्रतिकशतीति। प्रति+कश्+अच्। बाहुलकात् सुट्।) सहायः। वार्त्ताहरः। पुरोगः। इति मेदिनी। शे, ३६ ॥

प्रतिष्कसः, पुं, (प्रतिकष्यतेऽनेनेति। प्रति+कष् हिंसायाम्+अच्। बाहुलकात् सुट्।) चर्म्मरज्जुः। इति जटाधरः॥

प्रतिष्कसः, पुं, (प्रतिकसति प्रतिगच्छतीति। प्रति+कस्+अच्। सुट्।) चरः। इति शब्दरत्नावली॥

प्रतिष्टम्भः, पुं, (प्रतिष्टम्भनमिति। प्रति+स्तम्भ+भावे घञ्। षत्वम्।) प्रतिबन्धः। इत्यमरः। ३। २। २७ ॥ (यथा, रघौ। २। ३२।
"बाहुप्रतिष्टम्भविघट्टनानु-
रभ्यर्थनाभागरूतमसृग्भिः ॥")

प्रतिष्ठः, पुं, (प्रतिष्ठा अस्यास्तीति। अच्।) सुपार्श्वनामकहत्तार्हत्पिता। इति हेमचन्द्रः। १। ३६ ॥ प्रतिष्ठायुक्ते, त्रि ॥ (यथा, महाभारते। ५। ४६। ३०।
"आत्मैव स्थानं मम चण्म चात्मा
ओतप्रोतोऽहमजरः प्रतिष्ठः ॥)

प्रतिष्ठा, स्त्री, (प्रतितिष्ठतीति। प्रति+स्था+"आतश्चोपसर्गे।" ३।३।१०६। इति भावादौ अङ्। टाप्।) गौरवः। (यथा, कथासरित्सागरे। २। ६६।
"किञ्च आकरणं लोके प्रतिष्ठां प्रापयिष्यति ॥")
स्थितिः। स्थानम्। (यथा, रघुः। १६। ३५।
"वेदिप्रतिष्ठान् वितताध्वराणां
यूपानपश्यच्छतशो रघूणाम् ॥"
आश्रयः। यथा, मार्कण्डेये। ८४। १०।
"गौरी त्वमेव अग्निर्मौलिगतप्रतिष्ठा ॥")
यागनिष्पत्तिः। चतुरक्षरपद्यम्। इति मेदिनी। ते, १३ ॥ ८ ॥ (स्थितिः। यथा, हरिवंशे। २८। ३७।
"य इदं भावनं स्थानात्प्रतिष्ठाप्य प्रयत्नतः।
श्रपयेद्वाऽरचेद्वापि न स दौरात्म्यमाप्नुयात्॥"
शरीरम्। यथा, ऋग्वेदे। १०। ७३। ६।
"साकं प्रतिष्ठा हृदया मनश्च॥")
संस्कारविशेषः।(यथा, आर्य्यासप्तशत्याम्।३८६।
"पूजा विना प्रतिष्ठां नास्ति न मन्त्रं विना प्रविष्टा च।
तदुभयविप्रनिषन्नः पश्यतु गीर्व्वाणपाषाणम्॥")
तद्विधादि यथा,—
मत्स्यपुराणे।
"चैत्रे वा फाल्गुने वापि ज्येष्ठे वा माधवे तथा।
समयः सर्व्वदेवानां प्रतिष्ठा शुभदा भवेत्॥
प्राप्य पर्व्व शुभं शुक्लमतीते चोत्तरायणे।
पञ्चमी च द्वितीया च तृतीया सप्तमी तथा॥
दशमी पौर्णमासी च तथा त्रेया त्रयोदशी।
आसु प्रतिष्ठा विधिवत् कृता बहुफला भवेत्॥

प्रतिष्ठा सर्व्वदेवानां क्षेत्रवस्य विशेषतः ।
उत्तरायणमापन्ने शुक्लपक्षे शुभे दिने ॥
कृष्णपक्षे च पञ्चम्यामष्टम्यामेव शस्यते ॥' *॥
भुजबलभीमे ।
'युगादावयने पुण्ये कर्त्तव्यं विषुवद्वये ।
चन्द्रसूर्य्यग्रहे वापि दिने पुण्येऽथ पर्व्वसु ॥
या तिथिर्यस्य देवस्य तस्यां वा तस्य कीर्त्तिता ।
सर्व्वागमविशेषेण प्रतिष्ठा मुक्तिदायिनी ॥' *॥
पद्मपुराणे ।
'प्रतिपद्वनदस्योक्ता पविचारोपणे तिथिः ।
श्रिया देया द्वितीया तु तिथीनामुत्तमा स्मृता॥
तृतीया तु भवान्याश्च चतुर्थी तत्सुतस्य च ।
पञ्चमी सोमराजस्य षष्ठी प्रोक्ता गुहस्य च ॥
सप्तमी भास्करस्योक्ता दुर्गायाश्चाष्टमी तथा ।
मातॄणां नवमी प्रोक्ता दशमी वासुकेस्तथा ॥
एकादशी ऋषीणाञ्च द्वादशी चक्रपाणिनः ।
त्रयोदशी त्वनङ्गस्य शिवस्योक्ता चतुर्दशी ।
मम चैव मुनिश्रेष्ठ! पौर्णमासी तिथिः स्मृता ॥'
कल्पतरौ देवीपुराणम् ।
'महिषासुरहन्त्राश्च प्रतिष्ठा दक्षिणायने ।
यस्य देवस्य यः कालः प्रतिष्ठाध्वनरोपणे ॥
गर्भापूरग्रिलान्यासे शुभदस्तस्य पूजितः ॥'
यस्य देवस्य प्रतिष्ठाध्वनरोपणे यः कालः शुभदस्तस्य गर्भापूरग्रिलान्यासे गृहारम्भे स कालः पूजित इत्यर्थः ॥ * ॥ प्रतिष्ठासमुच्चये ।
'माघे वा फाल्गुने वापि चैत्रवैशाखयोरपि ।
ज्येष्ठाषाढ़कयोर्वापि प्रतिष्ठा शुभदा भवेत् ॥' *॥
भविष्ये ।
'सोमो बृहस्पतिश्चैव शुक्रश्चैव बुधस्तथा ।
एते सौम्यग्रहाः प्रोक्ताः प्रतिष्ठा यज्ञकर्म्मणि ॥
मत्स्यपुराणम् ।
'आषाढ़े दे तथा मूलसुत्तराचयमेव च ।
ज्येष्ठाश्रवणरोहिण्यः पूर्व्वभाद्रपदस्तथा ॥
हस्ताश्विनी रेवती च पुष्या मृगशिरस्तथा ।
अनुराधा तथा स्वाती प्रतिष्ठादौ प्रशस्यते ॥'
दीपिकायाम् ।
'प्राजेशवासवकरादितिभाश्विनीषु
पौष्णामरेज्यशशिभेषु तथोत्तरेषु ।
कर्त्तुः शुभे शशिनि केन्द्रगते च जीवे
कार्य्या हरेः शुभतिथौ विधिवत् प्रतिष्ठा ॥
प्राजेशादयः । रोहिणीज्येष्ठाहस्तापुनर्व्वसुश्विनीरेवतीपुष्याग्नेमृगशिरउत्तरफल्गुन्युत्तराषाढ़ोत्तरभाद्रपदश्चाश्वि ॥ * ॥ सर्व्वमङ्गलाङ्कान्ते देवीपुराणम् ।
'यथा द्वादशमे जीवे व्यष्टमे वाथ भास्करे ।
प्रतिष्ठा कारिता विष्णोर्महाभयकरी मता ॥'
कल्पतरौ देवीपुराणम् ।
'चतुर्व्वर्णैस्तथा विष्णुः प्रतिष्ठाप्यः सुखार्थिभिः ।
प्रतिष्ठा ब्राह्मणद्वारैव कर्त्तव्या ।
'कर्त्तुमिच्छति यः पुण्यं मम मूर्त्तिप्रतिष्ठया ॥
अन्येषर्णीयस्तत्राचार्य्यत्वेन लक्षणसंयुतः ॥
ब्राह्मणः सर्व्ववर्णानां पञ्चरात्रविशारदः ।
ब्राह्मणानामलाभे तु क्षत्रियो वैश्यशूद्रयोः ॥
क्षत्रियाणामलाभे तु वैश्यः शूद्रस्य कथितः ।
कदाचिदपि शूद्रस्तु न च कार्य्यार्घमर्हति ।'* ॥
बृहन्नारदीये ।
'प्रणमेच्छूद्रसंस्पृष्टं लिङ्गं वा हरिमेव वा ।
स सर्व्वयातनाभोगी यावदाहूतसंप्लवम् ॥'
यावदाहूतसंप्लवं प्रलयपर्य्यन्तम् ॥ तथा ।
'स्त्रीणामनुपनीतानां शूद्राणाञ्च जनेश्वर ! ।
स्पर्शने नाधिकारोऽस्ति विष्णौ वा शङ्करेऽपि वा ॥' * ॥
प्रतिष्ठाप्रकारस्तु मत्स्यपुराणादावुक्तः । तदसम्भवे विद्याकरवाजपेयिप्रभृतिसम्मतो भविष्यादुक्तः । यथा भविष्यपुराणम् ।
'स्नपनादि यथाशक्ति कृत्वा तन्मूलमन्त्रकम् ।
विन्यसेद्धृदयाम्भोजे प्रतिमासु कृता भवेत् ॥'
आदिपदात् पूजोतृसवहोमादि महाकपिलपञ्चरात्रोक्तकर्म्म च कर्त्तव्यम् । तद्यथा,—
'सपुष्पं सक्षुरं पाणिं न्यसेद्देवस्य मस्तके ।
पञ्चवारं जपेन्मूलमथोत्तरगतोत्तरम् ॥
ततो मूलेन मूर्द्धादिपीठान्तं संस्पृशेदिति ।
तत्त्वन्यासं लिपिन्यासं मन्त्रन्यासञ्च विन्यसेत् ॥
पूजाञ्च महतीं कुर्य्यात् स्वमन्त्रोक्तां यथाविधि ।
प्राणप्रतिष्ठामन्त्रेण प्राणस्थापनमाचरेत् ॥'
लिपिन्यासस्तु मातृकान्यासः । उक्तञ्च ।
'जपादौ सर्व्वमन्त्राणां विन्यसेन्न लिपिं विना ।
कृतं तन्निष्फलं विद्यात्तस्मात् पूर्व्वं लिपिं न्यसेत्॥'
कादिमतेऽपि ।
'मातृकायाः षड़ङ्गञ्च मातृकान्यासमेव च ।
सर्व्वासां प्रथमं कृत्वा पश्चात्तन्त्रोदितं न्यसेत् ॥
एतद्वचनाच्च मातृकान्यासः पूर्व्वं पश्चात्तत्त्वन्यासः ॥'
क्रमदीपिकायामप्येवं क्रमः । मन्त्रन्यासश्च तत्तन्मन्त्रविशेषोक्तपदवर्णन्यासः । तदभावे मूलमन्त्रेण शिरसि हृत्तन्यासः । तत्त्वन्यासस्तु विष्णुविषयक एव । न्यासप्रमाणानि सारदाक्रमदीपिकोक्तान्यनुसन्धेयानि ॥ * ॥ प्राणप्रतिष्ठामन्त्रस्तु सारदात्रयोविंशतिपटलोक्तः । यथा,—
'पाशाङ्कुशपुटाशक्तिर्वाग्बीविन्दुविभूषितः ।
याद्याः सप्त सकारान्ता बीजसप्तेन्दुसंयुतम् ॥
समन्ते हंसमन्तः स्यात्ततोऽमुष्यपदं भवेत् ।
प्राणा इति वदेत् पश्चात् इह प्राणास्ततः परम् ॥
अमुष्य जीव च इह स्थितोऽमुष्यपदं भवेत् ।
सर्व्वेन्द्रियाणमुष्यान्ते वाङ्मनश्चक्षुरन्ततः ॥
श्रोत्रघ्राणपदे प्राणा इहागत्य सुखं चिरम् ।
तिष्ठन्त्वमिवधूरन्ते प्राणमन्त्रोऽयमीरितः ॥
प्रत्यमुष्यपदात् पूर्व्वं पाशाद्यानि प्रयोजयेत् ।
प्रयोगेषु समाख्यातः प्राणमन्त्रो मनीषिभिः ॥'
पाशाङ्कुशपुटाशक्तिरित्यनेन प्रथमं पाशबीजं आं ततः शक्तिबीजं ह्रीं ततोऽङ्कुशबीजं क्रों वाग्बी यकारः बिन्दुविभूषितो यं । याद्याः सप्त सकारान्ताः उद्धृतयकारानुवादेन सप्त तद्भिन्नं बीजं पूर्व्वं पृथगुद्धारस्तु सप्तानामपि सविन्दूनामाद्यायगाय । अङ्कुशवायुनलावनिवरुणबीजानीत्युक्तम् । अत्र वायुबीजस्यैकत्वं बीजत्वेन सर्व्वेषां सविन्दुत्वं वक्तुम् । राघवभट्टोऽप्येवम् । अन्यस्तु वाग्बीविन्दुविभूषिता इति पठित्वा नादविन्दुविभूषिता इति व्याख्यातं याद्या इत्यस्य विशेषणं वदति । ओम इकारः सत्य ओकारः इन्दुर्विन्दुः तेन हौं । अतएव पाशाङ्कुशान्तरितशक्तिमनोः परस्तादुचार्य्य यादिसप्तवर्णगुणं सहंसमिति प्रपञ्चसारप्रतिपाद्यगुणमित्यनेन होमिति पद्मपादाचार्य्यैर्व्याख्यातम् । अमिवषुः स्वाहा । तेनायं मन्त्रः । आं ह्रीं क्रों यं रं लं वं षं षं सं हौं हं सः असुष्य प्राणा इह प्राणाः आमित्यादि असुष्य जीव इह स्थितः आमित्यादि असुष्य सर्व्वेन्द्रियाणि आमित्यादि असुष्य वाङ्मनश्चक्षुश्रोत्रघ्राणप्राणा इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा । असुष्य इति षष्ठ्यन्तदेवतानामोपलक्षणम् ।
'अदःपदं हि यद्रूपं यत्र मन्त्रे हि दृश्यते ।
असुष्याभिधानं तद्रूपं तत्र स्थाने नियोजयेत् ॥'
इति नारदीयात् ॥
वशिष्ठसंहितायाम् ।
'हृदि हस्तं सन्निधाय प्राणस्थापनमाचरेत्॥' *॥
प्रागुक्तभविष्यपुराणवचनेन तन्मूलमन्त्रकं तत्तद्देवतामन्त्रकं स च वैदिकस्तान्त्रिकश्च ।
'ओङ्कारादिसमायुक्तं नमस्कारान्तकीर्त्तितम् ।
स्वनाम सर्व्वसत्त्वानां मन्त्र इत्यभिधीयते ॥'
ब्रह्मपुराणे ।
'ओङ्कारादिनमोऽन्तेन चतुर्थ्यन्ततत्तद्देवताग्रामरूपो वा ।"
कालिकापुराणे ।
'प्रतिमायाः कपोलौ द्वौ स्पृष्ट्वा दक्षिणपाणिना ।
तथैव हृदये हस्तं दत्त्वा मन्त्रञ्च मन्त्रवित् ॥
एभिर्मन्त्रैः प्रतिष्ठान्तु हृदयेऽपि समाचरेत् ।
अस्यै प्राणाः प्रतिष्ठन्तु अस्यै प्राणाः चरन्तु च ।
अस्यै देवत्वसंख्यायै स्वाहेति यजुरीरयन् ॥
अङ्गमन्त्रैरङ्गमन्त्रैर्वैदिकैरित्यनेन च ।
प्राणप्रतिष्ठां सर्व्वत्र प्रतिमासु समाचरेत् ॥'
अङ्गमन्त्रैः अङ्गन्यासमन्त्रैः । अङ्गिमन्त्रैः मूलमन्त्रैः वैदिकैर्मन्त्रैर्व्याहृतिभिरित्यादिभिः ॥ * ॥
स्नपनात् पूर्व्वं वल्मीकमृत्तिकादिभिक्षिप्तभिश्चालनमाह हयशीर्षपञ्चरात्रम् ।
'वल्मीकमृत्तिकाभिस्तु गोमयेन स्वभक्तिना ।
चालयेच्छिप्तिसंस्पर्शदोषाणामुपशान्तये ॥
स्नापयेन्नवतोयेन शुद्धवस्त्रा तु देशिकः ॥
नमस्तेऽस्तु सुरेशानि प्रणीते विश्वकर्म्मणा ।
प्रभावितापैर्यजगद्धात्रि ! तुभ्यं नमो नमः ॥
त्वयि संपूजयामीशे नारायणमनामयम् ।
रहिता शिल्पिदोषैस्त्वन्द्वियुक्ता सदा भव ॥'*॥
तेन यथाशक्ति स्नपनादिपूर्व्वकप्रतिमाहृदये तन्मूलमन्त्रविन्यासेन देवताया विशेषसन्निधिः प्रतिष्ठेति । राघवभट्टधृतमहाकपिलपञ्चरात्रेऽपि ।

'प्रतिष्ठाशब्दसंसिद्धिः प्रतिपूर्व्वाच्च तिष्ठतेः।
वह्न्यर्थत्वान्निपातानां संस्कारादौ प्रतेः स्थितिः॥
अर्थस्तदयमेतस्य गीयते ग्राव्भिर्जनैः।
विशेषसन्निधिर्यो तु क्रियते व्यापकस्य तु॥
तन्मूर्त्तौ भावनामन्त्रैः प्रतिष्ठा साभिधीयते॥'*॥
स्वभस्मना गोमयभस्मना।
'अष्टोत्तरं पलशतं स्नाने देयञ्च सर्व्वदा॥'
पलमाह मनुः।
'पञ्चकृष्णलको माषस्ते सुवर्णस्तु षोड्श।'
पलं सुवर्णाश्चत्वारः। तेनाष्टरक्तिकाधिकलौकिकमाषद्वयाधिकतोलकचयेण पलं भवति एवंविधाष्टोत्तरपलशतेन लौकिकषष्ट्याधिकशतत्रयतोलका इति। एवं वल्मीकमृदादिचालने गायत्र्या वल्मीकमृदा स्नापयेत्। तत्रापि अष्टोत्तरशतपलं मूलपाणिलिखितन्यायात्। गायत्र्या मूलमन्त्रेण वा गन्धोदकस्नाने शुद्धवत्या एतोन्विन्द्रमित्यादि ऋक्त्रयात्मिकया देशिको गुरुर्यजमानो वा विप्रः नमोऽस्तु इत्यादिमन्त्रौ देवतान्तरे च तत्तद्देवतानामोहः। शिवलिङ्गस्याप्यर्चात्वात् स्त्रीलिङ्गमविरुद्धम्॥*॥ यमः।
'कृत्वा देवकुलं सर्व्वं प्रतिष्ठाप्य च देवताम्।
विधाय विविधं चित्रं तल्लोकं विन्दते ध्रुवम्॥'
नारसिंहे।
'प्रतिमां लक्षणोपेतां नरसिंहस्य कारयेत्।
सर्व्वपापानि सन्त्यज्य स तु विष्णुपुरं व्रजेत्॥
प्रतिष्ठां नरसिंहस्य यः करोति यथाविधि।
निष्कामो नरशार्दूल! देहबन्धात् प्रमुच्यते।
सकामो नरसिंहस्य पुरं प्राप्य प्रमोदते॥
विधिवत् स्थापयेद्यस्तु कारयित्वा जनार्दनम्।
न जातु निर्गमस्तस्य विष्णुलोकात् कथञ्चन॥'
माधवमानसोल्लासे।
'देवस्य प्रमितायान्तु यावन्तः परमाणवः।
तावद्वर्षसहस्राणि स्वर्गलोके महीयते॥'
राजमार्त्तण्डे।
'पुत्रोत्पत्तौ सदा ग्राह्यमन्नप्राशनिके तथा।
चूड़ाकार्य्ये व्रते चैव नाग्नि पुंसवनेऽपि च॥
पाणिग्रहे प्रतिष्ठायां प्रवेशे नववेश्मनः।
एतद्वृद्धिकरं नाम गृहस्थस्य विधीयते॥'
सूत उवाच।
'कलौ चैकाहसाध्येन प्रतिष्ठां मन्त्रवित्तवान्।
मध्यमेनाधमेनापि प्रकुर्य्यात्तान्त्रिकैर्मतैः॥'
तथा।
'नित्यं नित्यत्वे मतिमान् कुर्य्यादभ्युदयं ततः।
विप्रान् संपूजयित्वाथ ततो यागपुरं व्रजेत्॥
गणेशग्रहदिक्पालान् प्रतिकुम्भेषु पूजयेत्।
स्थण्डिले विधिवद्विष्णुं परिवारगणं यजेत्॥
स्नापयेत् प्रथमं देवं तोयैः पञ्चविधैरपि।
पञ्चाग्नेयैः पञ्चगव्यैः पञ्चरत्निकरैरपि॥
निम्बैर्लेप्यैश्च सर्व्वैश्च कषायैरपि शक्तिमान्।
पञ्चपुष्पोदकैर्वापि चित्रकैरपि शक्तिमान्॥
तुलसीकुन्दमान्दारपद्मगन्धाहृतिप्रकम्।
पञ्चकाम्रवटोदुम्बराश्वत्थैरपि पञ्चमम्॥
मृत्तिका करिदन्तस्य पर्व्वताश्वखुरस्य च।
कुशवल्मीकसम्भूतं मृदां पञ्चकमीरितम्॥*॥
गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम्।
कुर्य्यात् प्राणप्रतिष्ठाञ्च होमं कुर्य्यादथाविधि।
दक्षिणां विधिवद्दद्यात् पूर्णार्घं तदनन्तरम्॥'
इति भविष्यपुराणे चतुर्थभागे ६ अध्यायः॥*॥
'चतुरङ्गुलविस्तारा दीर्घा हस्तद्वयावधि।
पताका लोकपालानां दशानां परिकीर्त्तिताः।
पञ्चहस्ताश्च वै दण्डाः पताकानां प्रकीर्त्तिताः॥'
ज्योतिषे।
'दुग्धं सशर्करञ्चैव घृतं दधि तथा मधु।
पञ्चामृतमिदं प्रोक्तं विधेयं सर्व्वकर्म्मसु॥'*॥
प्रतिष्ठानन्तरं मात्स्ये।
'ततः सहस्रं विप्राणामष्टोत्तरशतन्तथा।
भोजयेच्च यथाशक्त्या पञ्चाशद्वाथ विंशतिम्॥'
षोड्शोपचाराः आसनमित्यादि। दशोपचाराः पाद्यादि। पञ्चोपचारा गन्धादि।
'सर्व्वोपचारवस्तूनामलाभे भावनैव हि।
निर्म्मलेनोदकेनापि पूर्णतेत्याह नारदः॥'*॥
नारसिंहे।
'स्नाने वस्त्रे च नैवेद्ये दद्यादाचमनीयकम्॥'
कालिकापुराणम्।
'यद्दीयते च देवेभ्यो गन्धपुष्पादिकं तथा।
अर्घ्यपात्रस्थितैस्तोयैरभिषिच्य तमुत्क्षिपेत्॥'
देवीपुराणम्।
'होमो ग्रहादिपूजायां शतमष्टोत्तरं भवेत्।
अष्टाविंशतिरष्टौ वा यथाशक्ति विधीयते॥'
कात्यायनः।
'आज्यं द्रव्यमनादेशे जुहोतिषु विधीयते॥'
अत्र नीराजनमाह पूजारत्नाकरे देवीपुराणम्।
'शङ्खभेर्य्यादिनिनदैर्जयशब्दैश्च पुष्कलैः।
यावतो दिवसान् वीर! देवा नीराजनं कृतम्।
तावत्कल्पसहस्राणि स्वर्गलोके महीयते॥
भक्ष्यैः पिष्टप्रदीपाद्यैश्चूताश्वत्थादिपल्लवैः।
ओषधीभिश्च मेध्याभिः सर्व्वबीजैर्यवादिभिः॥
नवम्यां पर्व्वकालेषु यात्राकाले विशेषतः।
यः कुर्य्याच्छ्रद्धया वीर! देवा नीराजनं नरः।
यस्तु कुर्य्यात् प्रदीपेन सूर्य्यलोकं स गच्छति॥'
पर्व्वकाल उत्सवकालः। देवा इति स्त्रीत्वमविवक्षितं बहुषु निबन्धकारैर्व्याख्यातत्वात् व्याचाराच्च॥*॥ अथ प्रतिष्ठितमूर्त्तौ कदाचित् पूजाभावेन महाकपिलपञ्चरात्रम्।
'एकाहपूजाविधितो कुर्य्याद्विगुणमर्च्चनम्।
त्रिरात्रे च महापूजा संप्रोक्षणमतः परम्॥
मासाद्वर्षमनेकाहपूजा यदि विहन्यते।
प्रतिष्ठैवेष्यते केचित् केचित् संप्रोक्षणक्रमः॥'
संप्रोक्षणं ॐ देवस्य त्वेत्यादिना।
'गवां रक्षेच्च संस्थाप्य दर्भतोयैर्विशोध्य च।
प्रोक्षयेत् प्रोक्षणीतोयैर्मूलेनाष्टोत्तरं शतम्॥
सपुष्पं सकुशं पात्रं न्यसेद्देवस्य मस्तके।
पञ्चवारं पवेन्मूलमष्टोत्तरशतोत्तरम्॥
ततो रूपेण सर्व्वांदिपीठान्तं संस्पृशेदिति।
तत्तन्न्यासं लिपिन्यासं मन्त्रन्यासञ्च विन्यसेत्॥
प्राणप्रतिष्ठामन्त्रेण प्राणस्थापनमाचरेत्।
पूजाञ्च महतीं कुर्य्यात् स्वतन्त्रोक्तां यथाविधि।
यागहोमादिषु प्रायः संक्षेपोऽयं विधिः स्मृतः॥'
असृक्स्रक्सर्पणे तु बौधायनः। तासां द्रव्यवत् क्षतशौचानां देवार्चानां भूयः प्रतिष्ठापयेत्। तासामसृक्स्रक्सर्पणम्। प्रकृतिद्रव्यस्य तान्त्रादेर्यथेष्टशौचं श्रुत्वा पुनः प्रतिष्ठां कारयेदिति रत्नाकरः। तदा पूर्व्वत्वमित्याह रत्नाकरादयः॥*॥ आदित्यपुराणे।
'खण्डिते स्फुटिते दग्धे भ्राजमानविवर्जिते।
योगहीने पशुस्पृष्टे पतिते दुष्टभूमिषु॥
अन्यमन्त्रार्चिते चैव पतितस्पर्शदूषिते।
एतेषु देवेषु नो कुर्य्युः सन्निधानं दिवौकसः॥
इति सर्व्वगतो विष्णुः परिभाषामकारयत्॥'
उपचारद्रव्याणि शारदातिलके।
'पाद्यं श्यामाकदूर्व्वाजविष्णुक्रान्ताभिरिष्यते।'
तदुक्तफलमित्याह गौतमः।
'गन्धपुष्पाक्षतयवकुशाग्रतिलसर्षपैः।
सदूर्व्वैः सर्व्वदेवानामर्घ्यमेतदुदीरितम्॥
जातीलवङ्गकक्कोलैर्जलमाचमनीयकम्।
आज्यं दधिमधून्मिश्रं मधुपर्के निवेदयेत्॥'
कात्यायनः।
'मधुपर्के दधिमधुघृतसर्षपसहितं क्षौमे कार्पासे।'
गन्धश्चन्दनकर्पूरकालागुरुभिरीरितः। पुष्पाणि देवदेयानि।
'गुग्गुल्वगुरुधूपैरुत्कराम्बुवन्हिभिः।
धूपयेदाज्यसंमिश्रैर्गोचर्मेवस्य देशिकः।
तत्र तत्र जलं दद्यादुपचारान्तरान्तरे॥'
अत्र दक्षिणहोमौ स्वनावश्यकौ यथाशक्ति इत्यभिधानात्॥*॥ तथा षोडशघटानां एकमप्येन विनापि पूजामाह विष्णुधर्म्मोत्तरप्रथमकाण्डम्।
'पूजा कार्य्या वरिष्ठैषा श्रद्धया भृगुनन्दन!।
न त्वल्पदक्षिणैर्यज्ञैर्यजेद्विष्णुं कदाचन॥
विष्णुं देवनिकायस्थं यथाश्रद्धमरिन्दम!।
तर्पयेत् पूजयेन्नित्यं तस्मादल्पधनो नरः॥"*॥
यद्येकाहे देवप्रतिष्ठावास्तुयागग्रहोत्सर्गास्तदा तत्रैव दक्षिणार्द्धं कुर्य्यात्। गयशः क्रियमाणे तिथिवचनात्॥*॥ तथा एकस्मिन्नपि अग्नौ होमत्रयं विधेयम्। एकाग्नावनेकहोमकरणपक्षे तत्रैव परिसमूहनादिकमाह गोभिलः।
गणेशैकं परिसमूहनमग्नौ वर्षिःपर्युक्षणमाज्यभागाविति॥*॥ पूजादिकन्तु प्रत्येकमेव।
ब्रह्मपुराणे।
'देवानां प्रतिमा यत्र क्षताभ्यङ्गक्षमा भवेत्।
पलानि तस्मै देयानि शतानि पञ्चविंशतिः॥
अष्टोत्तरशतपलं स्नाने देयञ्च सर्व्वदा॥'
नारसिंहे।
यवगोधूमचूर्णैरङ्गलोष्टेन वारिणा।
प्रक्षाल्य देवदेवेशं वाससा लोकमाप्नुयात्।

पादयोर्हरन् यो वेद्यान् विस्तरेणनिवर्षयम् ।
उच्चारयन् च प्रयान्न सर्वपापैः प्रमुच्यते ॥"
इति प्रतिष्ठानस्थम् ॥ ७ ॥
प्रकारान्तरं मात्स्ये १८ अध्याये मत्स्यपुराणे च द्रष्टव्यम् ।

प्रतिष्ठानं, क्ली, (प्रतिनिष्ठत्यत्रेति । प्रति+स्था+अधिकरणे ल्युट् ।) नगरविशेषः । विठोर इति ख्यातः । तत्र पुरूरवा राजचक्रवर्त्ती आसीत् । इति महाभारतम् । (यथा, देवीभागवते । १ । १३ । १-२ ।
"सुद्युम्ने तु दिवं याते राज्यं चक्रे पुरूरवाः ।
सगुणश्च सुरूपश्च प्रजारञ्जननत्परः ॥
प्रतिष्ठाने पुरे रम्ये राज्यं सर्वनमस्कृतम् ।
चकार सर्वधर्मज्ञः प्रजारक्षणतत्परः ॥"
इदं हि गङ्गातीरस्थम् । यथा, हरिवंशे । २६ । ४०—४८ ।
"एवं प्रभावो राजर्षिरेलस्तु पुरुषोत्तमः ।
ऐले पुरूरवस्येव महर्षिभिरभिष्टुते ।
राज्यं स कारयामास प्रयागे पृथिवीपतिः ।
उत्तरे जाह्नवीतीरे प्रतिष्ठाने महायशाः ॥")

प्रतिष्ठितः, त्रि, (प्रतिष्ठा जातास्येति । तारकादित्वात् इतच् ।) प्रतिष्ठायुक्तः । (यथा, देवीभागवते । ३ । ६ । ७३ ।
"सदङ्गुलस्वयम्भूलिङ्गनाथं कारणं शिवा ।
यत्कारस्य मे कार्य्यं त्रिगुणोऽयं प्रतिष्ठितः ॥")
नीरवान्वितः । यथा,—
"प्रतिष्ठितानाद्यकीर्त्तिर्मरुद्गणादतिरिच्यते ॥"
इति ब्रह्मवैवर्त्ते गणेशखण्डे ३४ अध्यायः ॥
निष्पन्नयागः । संस्कृतः । इति प्रतिष्ठाशब्दार्थदर्शनात् ॥

प्रतिसरः, पुं, (प्रतिसरतीति । प्रति+सृ+अच् ।) मन्त्रभेदः । माङ्गल्यम् । कङ्कणम् । ग्रन्थिः । यज्ञसूत्रम् । इति मेदिनी । रे, २०६ ॥ प्रातःकालः । इति शब्दमाला ॥

प्रतिसरः, पुं क्ली, (प्रतिसरतीति । प्रति+सृ+अच् ।) मङ्गलम् । आरक्षम् । करक्षकम् । निर्लोमेऽपि, त्रि । इति मेदिनी । रे, २०६ ॥

प्रतिसर्गः, पुं, (प्रतिरुद्धः सर्गः ।) ब्रह्मणः सृष्ट्यारम्भं प्रलयादीनां लक्षणं च पुराणपञ्चलक्षणान्तर्गतलक्षणविशेषः । यथा,—
ऋषय ऊचुः ।
"त्वादिसर्गमस्माकं श्रुतं ते विस्तरेण च ।
प्रतिसर्गञ्च ये येषामधिपास्तान् वदस्व नः ॥
सूत उवाच ।
यदाभिषिक्तः सकलाधिराज्ये
पृथुर्धरित्र्यामधिपो बभूव ।
तदौषधीनामधिपश्चकार
यज्ञप्रतानां तपसाञ्च सोमम् ॥
नक्षत्रतारादिग्रहाश्वगुल्म-
स्तस्यावितानस्य च रुक्मगर्भः ।
अपामधीशं वरुणं प्रतानां
राज्ये प्रभुं वैश्रवणञ्च वह्निम् ॥

विष्णुं रवीणामधिपं वसूना-
मग्निञ्च लोकाधिपतिश्चकार ।
प्रजापतीनामधिपञ्च दक्षं
चक्रे प्रभुं मरुतामधीशम् ॥
दैत्याधिपानामथ दानवानां
प्रह्लादमीशञ्च यमं पितॄणाम् ।
पिशाचरक्षःपशुभूतवच्च-
वेतालराजन्तथ भूतपाणिम् ॥
प्राचेयशैलञ्च पतिं गिरीणा-
मीशं सहस्रं सरितान्नदीनाम् ।
गन्धर्वविद्याधरकिन्नराणा-
मीशं पुनश्चित्ररथञ्चकार ॥
नागाधिपं वासुकिमुग्रवीर्य्यं
सर्पाधिपं तक्षकमादिदेश ।
दिग्वारणानामधिपञ्चकार
गजेन्द्रमैरावतनामधेयम् ॥
सुपर्णमीशं पततामथाश्व-
राजानमुच्चैःश्रवसञ्चकार ।
सिंहं मृगाणां वृषभं गवाञ्च
शाकं पुनः सर्ववनस्पतीनाम् ॥
पितामहः पूर्व्वमथाभ्यषिञ्च-
देतान् पुनः पूर्व्वदिगधिनाथान् ।
पूर्व्वेण दिक्पालमथाभ्यषिञ्च-
न्नाम्ना सुधर्म्माणमरातिकेतुम् ॥
ततोऽधिपन्दक्षिणतश्चकार
सर्व्वेश्वरं यमरूपदाभिधानम् ।
वरुणमन्तं दिगधीशमीश-
श्चकार पश्चाद्भुवनाङ्गभूः ॥
हिरण्यरोमाणमथोदगदिगीशं
प्रजापतिं मेरुसुतञ्चकार ।
अद्यापि कुर्व्वन्ति दिशामधीशाः
शब्दं यदन्तस्तु सुरोऽभिधानम् ॥
चतुर्भिरेभिः पृथुनामधेयो
नृपोऽभिषिक्तः प्रथमं पृथिव्याम् ।
मन्वन्तरे चापि गते त एव
वैवस्वतस्यान्तरिमं पृथिव्याम् ॥
गतेऽन्तरे चाक्षुषनामधेये
वैवस्वताख्ये च पुनः प्रवृत्ते ।
प्रजापतेः सोमस्य चराचरस्य
बभूव सूर्य्यान्वयवंशचिह्नः ॥"
इति मात्स्ये आधिपत्यसेचनं मन्वन्तराधिपत्यं नाम ८ अध्यायः ॥ ७ ॥ अपि च ।
मार्कण्डेय उवाच ।
"वाराहोऽयं श्रुतः सर्गो वराहाधिष्ठितो यतः ।
प्रतिसर्गः स्मृतः सो वै दक्षाद्यैः कृतः पृथक् ॥
ब्रह्मो विराड् मनुर्दक्षो मरीच्याद्यास्तु मानसाः ।
यं यं सर्गं पृथक् चक्रुः प्रतिसर्गः स स स्मृतः ॥
विराट्सुतोऽथ दक्षांस्तान् मनून् वैवस्वतं जगत् ।
मनुः सप्त मनून् सृष्ट्वा चकार बहुधाः प्रजाः ॥
प्रजाः सिसृक्षुः स मनुर्योऽसौ स्वायम्भुवाग्रजः ।
यदवत् प्रथमं सर्गं वै मनून् बहुपरान् सुतान् ।
सारोचिषश्चोत्तमिश्च तामसो रैवतस्तथा ।

चाक्षुषश्च महातेजा विद्वान् परतस्तथा ।
यक्षरक्षःपिशाचांश्च नागगन्धर्वकिन्नरान् ।
विद्याधरानप्सरसः सिद्धान् भूतगणान् बहून् ॥
मेघान् सविद्युतो वृक्षान् लतागुल्मवीरुधादिकान् ।
मत्स्यान् पशूंश्च कीटांश्च चलजान् स्थलजां-
स्तथा ॥
एतादृशानि सर्व्वाणि मनुः स्वायम्भुवः सृष्टेः ।
सर्गः सप्तसे सोऽस्य प्रतिसर्गः प्रकीर्त्तितः ॥
अन्ये यन्मनवो ये वै तेऽपि स्वे स्वेऽन्तरेऽन्तरे ।
प्रतिसर्गं स्वयं कृत्वा प्राप्नुवन्ति चराचरम् ॥
यज्ञस्य संभृतं यज्ञात् यूपं प्राग्वंशमेव च ।
धर्म्माधर्म्मौ गुणान् सर्व्वान् वराहः सृष्टवान्
पुरा ॥
सुतन्तु बहून् सप्तपाद्य दक्षो देवर्षिसत्तमान् ।
महर्षीन् सोमपादींश्च बहून् पितृगणांस्तथा ॥
सृष्टिं प्रवर्त्तयामास प्रतिसर्गोऽस्य स स्मृतः ।
अजायन्त मुखाद्विप्राः क्षत्रिया बाहुयुग्मतः ॥
ऊर्व्वोर्विशः पदः शूद्राश्चतुर्वेदाश्चतुर्मुखात् ।
ब्रह्मणः प्रतिसर्गोऽयं ब्राह्मः सर्गस्तः स्मृतः ॥
मरीचेः कश्यपो जातः कश्यपात् सकलं जगत् ।
देवा दैत्या दानवाश्च तस्मे सर्गः प्रकीर्त्तितः ॥
अत्रेर्नेत्रादभूच्चन्द्रश्चन्द्रवंशस्ततोऽभवत् ।
तेन सर्गे जगद्यात्रा सोमसर्गः प्रकीर्त्तितः ॥
अथर्वाङ्गिरसो कृत्वा पुत्राश्च बहवोऽपरे ।
मन्त्रयज्ञादयो ये वै ते सर्व्वेऽङ्गिरसः स्मृताः ॥
आद्यपाख्याः पुलस्त्यस्य पुत्राश्चान्ये च
राक्षसाः ।
प्रतिसर्गाः पुलस्त्यस्य बलवीर्यसमन्विताः ॥
कादवेया गणा ह्यन्ये प्रह्लादा बहुनराक्षसाः ।
सर्गे पुलस्त्येनैष सर्गोऽस्य प्रकीर्त्तितः ॥
क्रतोः पुत्रा बालखिल्या सर्व्वज्ञा भृतितेजसः ।
षष्टिसप्तशतसंख्याश्च ज्वलदङ्गुष्ठसन्निभाः ॥
प्रचेतसः सुताः सर्व्वे ये वै प्राचेतसाः स्मृताः ।
षड्शीतिसहस्राणि पावकोपमतेजसः ॥
सुकालिनी वशिष्ठस्य पुत्राश्चान्येऽथ योगिनः ।
आरुन्धत्यां पराशृद्वाशिष्ठः सर्ग उच्यते ॥
भृगोश्च भार्गवा ज्ञाता ये वै दैत्यपुरोधसः ।
कवयस्ते महाप्राज्ञास्त्रैयाम्नसहितं जगत् ॥
नारदात्तारका ज्ञाता विमानानि तथैव च ।
प्रश्नोत्तराख्यवेदाख्यं गृह्यं गीतञ्च कौतुकम् ॥
एते दक्षमरीच्याद्याः कृतदारान् बहून् सुतान्
उत्पाद्योत्पाद्य पृथिवीं दिवञ्च समपूरयन् ॥
तेषां सुतेभ्यश्च सुतास्तत्सुतेभ्यः परे सुताः ।
सप्तसप्तका प्रवर्त्तन्ते येऽद्यापि भुवनेषु वै ॥
विष्णोस्तु चक्षुषः सूर्य्यो मनसश्चन्द्रमाः स्मृतः ।
श्रोत्राद्वायुः सप्तदृतो मुखादग्निरजायत ॥
प्रतिसर्गोऽयं विष्णोस्तथा चापि दिशो दश ।
स्वर्भानुश्चन्द्रमाः पश्चादविनेत्रादवातरत् ॥
भास्करः कश्यपाज्ज्ञातो भार्य्यायास्य समर्चितः ।
रुद्राश्च बहवो ज्ञाता भूतग्रामाश्चतुर्विधाः ॥
श्वेतरोहितरूपाश्च त्रयस्त्रिंशाद्गणोत्तराः ।
अष्टमार्जारवदनाः सिंहव्याघ्रमुखाः परे ॥

प्रतिह

नागाश्चस्वधराः सर्व्वे नानारूपा महाबलाः ।
एष वः प्रतिसर्गोऽपि कथितो द्विजसत्तमाः ॥"
इति कालिकापुराणे २६ अध्यायः ॥

प्रतिसर्य्य, त्रि, (गतिगतं सर्य्यं वाममिति ।) प्रतिकूलम् । इति जटाधरः ॥

प्रतिसान्त्वानिकः, पुं, (प्रतिसन्त्वानं प्रयोजनमस्येति । प्रतिसन्त्वान + ठक् ।) मागधः । स्तुतिपाठकः । इति शब्दरत्नावली ॥

प्रतिसीरा, स्त्री, (प्रतिसिनोति प्रतिबध्नातीति । प्रति + सि + "सृसिचिमिलां दीर्घश्च ।" उणा० २ । २५ । इति क्रन् दीर्घश्च । ततष्टाप् ।) यवनिका । अवधायकपटः । इत्यमरः ।२।६।१२०॥

प्रतिसूर्य्यः, पुं, (प्रतिरूपः सूर्य्य इति प्रादिसमासः ।) सकलासः । इति त्रिकाण्डशेषः ॥ (यथा, सुश्रुते । कल्पस्थानेऽष्टमाध्याये ।
"प्रतिसूर्य्यः पिङ्गभासो बहुवर्णो महाशिराः ॥"
उपसूर्य्यकमण्डलम् । यथा, बृहत्संहितायाम् । ३७ । २ ।
"प्रतिसूर्य्यानां माला
दस्युभयातङ्कनृपहन्त्री ॥")

प्रतिसूर्य्यकः, पुं, (प्रतिसूर्य्य + स्वार्थे कन् ।) सकलासः । (यथा, उत्तररामचरिते द्वितीयेऽङ्के ।
"सीमान्तप्रदरोदरेषु विलसत्सख्याभसो या स्वयं
दृश्यन्ते प्रतिसूर्य्यकैरनगरस्खेदघ्नवः पीयते ॥"
तद्दृष्टस्य चिकित्सा सुश्रुते कल्पस्थाने ८ अध्याये उक्ता । यथा,—
"प्रतिसूर्य्यकदष्टानां सर्पदष्टवदाचरेत् ॥")
उपसूर्य्यकमण्डलम् । इति विश्वः॥ (अस्य शुभाशुभलक्षणम् । यथा, बृहत्संहितायाम् ।३७।२-३।
"प्रतिसूर्य्यकः प्रशस्तो
दिवसकृतुवर्णसप्रभः स्निग्धः ।
वैदूर्य्यनिभः स्वच्छः
शुक्लश्च क्षेमसौभिक्षः ॥
पीतो व्याधिं जनय-
त्यग्नीकरूपश्च शस्त्रकोपाय ।
प्रतिसूर्य्यानां माला
दस्युभयातङ्कनृपहन्त्री ॥
दिवसकृतः प्रतिसूर्य्यो
जलदोदग्दक्षिणे स्थितोऽनिलकृत् ।
उभयतः सलिलभयं
नृपमुपरि निहन्त्यधो जनघ्नः ॥")

प्रतिसृष्टः, त्रि, (प्रति + सृज् + कर्म्मणि क्तः ।) प्रेषितः । प्रत्याख्यातः । इति मेदिनी । टे, ६५ ॥ दत्तः । इति धरणिः ॥

प्रतिसोमा, स्त्री, (प्रतिरूपः सोमः सोमवल्ली यस्याः ।) मधियवल्ली । इति राजनिर्घण्टः ॥

प्रतिसर्हा, स्त्री, (प्रति + सर्ह + भावे अङ् ।) प्रतिकक्षा । सर्हा । इति शब्दरत्नावली ॥

प्रतिहतः, त्रि, (प्रतिहन्यते स्मेति । प्रति + हन् + क्तः ।) हिंसः । प्रतिरुद्धितः । रुद्धः । इति मेदिनी । ते, २०५ । निराकृतः । यथा,—

प्रतीका

"मनोहतः प्रतिहतः प्रतिबद्धो हतश्च सः ॥"
इति सुद्राङ्कितामरकोषे पाठः । ३ । १ । ४१ ॥

प्रतिहस्तकः, पुं, (प्रतिरूपः हस्तोऽवलम्बनरूपो यस्य । कप् ।) प्रतिनिधिः । यथा,—
"आश्रितानां भृतौ स्वामिसेवायां धर्म्मसेवने ।
पुत्रस्योत्पादने चैव न सन्ति प्रतिहस्तकाः ॥"
इति हितोपदेशे नीतिशास्त्रे सुहृद्भेदो नाम द्वितीयकथासंग्रहः परिच्छेदः ॥

प्रतिहारः, पुं, (प्रतिविषयं प्रतेरकं वा हरति स्वामिसमीपमानयतीति । प्रति + हृ + घञ् ।) द्वारपालः (यथा, देवीभागवते । १ । १७ । ३० ।
"ज्ञातो हि प्रतिहारेण ज्ञानी कश्चिद् द्विजोत्तमः ॥"
प्रति + हृ + आधारे घञ् ।) द्वारः । इति शब्दरत्नावली ॥ (यथा, रघौ । ६ । २० ।
"ततो नृपाणां श्रुतवृत्तवंश्या
पुंवत्प्रगल्भा प्रतिहाररक्षी ।
प्राक्सन्निकर्षं मगधेश्वरस्य
नीत्वा कुमारीमवदत् सुनन्दा ॥"
प्रतिरूपं हरतीति । हृ + अण् ।) मायाकारः । इत्यमरटीकायां भरतः । २ । १० । ११ ॥ (परमेष्ठिनः पुत्रः । यथा, विष्णुपुराणे ।२।१।३७।
"परमेष्ठी ततस्तस्मात् प्रतिहारस्तदन्वयः ॥")

प्रतिहारकः, पुं, (प्रतिरूपं हरतीति । हृ + ण्वुल् ।) मायाकारः । इत्यमरटीकायां भरतः । २ । १० । ११ ॥

प्रतिहासः, पुं, (प्रतिरूपो हासो यस्य ।) करवीरः । इत्यमरः । २ । ४ । ७६ ॥ हासकम्पृति हास्यञ्च ॥

प्रतीकः, पुं, (प्रतीयते प्राप्नोति वा इति । प्रति + इ + अलीकादयश्चेति ईकनूप्रत्ययेन साधुः ।) एकदेशः । अङ्गम् । (यथा, ऋग्वेदे । ७ । ३६ । १ ।
"वि सानुना पृथिवी सस उर्वीं पृथु प्रतीक मध्येधे अग्निः ॥"
"तथाग्निः पृथु विस्तीर्णं प्रतीकं पृथिव्या अवयवम् ॥" इति तद्भाष्ये सायनः ॥) खाङ्गवाद्यनिषेधो यथा, कौर्म्मे १५ अध्याये ।
"न खाङ्गनखवाद्यं वै कुर्य्यान्नाञ्जलिना पिबेत् ॥"
अपि च, लक्ष्मीचरित्रे ।
"खाङ्गे पीठे च वाद्यं हरति धनपतेः केशवस्यापि लक्ष्मीम् ॥"

प्रतिकूले, त्रि । इत्यमरः ।१।६।७० ॥ विलोमः । इति मेदिनी । के, ११२ ॥

प्रतीकारः, पुं, (प्रतिकरणमिति । प्रति + कृ + घञ् । उपसर्गस्येति पक्षे दीर्घः ।) कृतापकारस्य प्रत्यपकारः । तत्पर्य्यायः । वैरशुद्धिः २ वैरनिर्यातनम् ३ । इत्यमरः । २ । ८ । ११० ॥ (यथा, देवीभागवते । ३ । २५ । ३ ।
"हर्षया तौ हतौ संख्ये नापराधो ममात्र वै ।
अवश्यम्भाविभावेषु प्रतीकारो न विद्यते ॥")
चिकित्सा । इति शब्दमाला ॥

प्रतीची

प्रतीकाश्यः, पुं, (प्रतिकाश्यते इति । प्रति + काश् + घञ् । उपसर्गस्य दीर्घः ।) उपमा । इत्यमरः ।२ । १० । ३८ ॥ (यथा, महाभारते । १ । १५४ । ३२ ।
"अद्य त्वां भगिनी रुक्षः कृष्णमार्ग मयासकृत् ।
द्रक्ष्यत्यद्रिप्रतीकाशं सिंहेनेव महाद्विपम् ॥")

प्रतीक्षा, स्त्री, (प्रति + ईक्ष + अङ् ।) प्रतीक्षणम् । अपेक्षा । प्रतिपूर्ब्बेक्षधातोर्भावे अप्प्रत्ययेन निष्पन्नः ॥ (यथा महाभारते ।८।४०।५२।
"मित्रप्रतीक्षया शल्य धार्त्तराष्ट्रस्य चोभयोः ।
अपवादतितिक्षाभिक्षिभिरेतैर्हि जीवसि ॥")

प्रतीक्ष्यः, त्रि, (प्रतीक्ष्यते इति । प्रति + ईक्ष + यत् ।) पूज्यः । इत्यमरः । ३ । १ । ५ ॥ (यथा. रघौ । ५ । १४ ।
"भक्तिः प्रतीक्ष्येषु कुलोचिता ते
पूर्व्वान् महाभाग ! तयातिशेषे ।
अतीतकालस्त्वहमभ्युपेतः
त्वामर्थिभावादिति मे विषादः ॥")
प्रतीक्षणीयः ॥ (यथा, माघे । २ । १०८ ।
"प्रतीक्ष्यं तत्प्रतीक्षाये प्रतिष्वसे प्रतिश्रुतम् ॥")

प्रतीची, स्त्री, (प्रतिदिनान्तं प्रतिदिनान्ते इत्यर्थः अञ्चति क्रम्यमिति । अञ्चु गतिपूजनयोः + "ऋत्विग्दधृक्सग्दिगुष्णिगञ्चुयुजिक्रुञ्चाम् ।" ३ । २ । ५९ । इति क्विन् अनुलोपो दीर्घश्च । "उगितश्च ।" ४ । १ । ६ । इति ङीप् ।) पश्चिमदिक् । इत्यमरः । १ । ३ । १ ॥ (यथा, महाभारते । ४ । ४१ । १८ ।
"येनासौ यजयत् क्रतुस्तां प्रतीचीं दिशमाश्रये ।
कलापो ह्येष तस्यासीन्मान्धातुर्युक्तस्य धीमतः ॥"
त्रि, पश्चिमाभिमुखी । यथा, ऋग्वेदे ।१।८२।८।
"विश्वानि देवी भुवनाभिचक्ष्या
प्रतीची चक्षुरुर्विया वि भाति ।
विश्वं जीवं चरसे बोधयन्ती
विश्वस्य वाचमविदन् मनायोः ॥"
"भुवना भुवनानि भूतजातान्यभिचक्ष्याभिप्रकाश्य प्रकाशवन्ति कृत्वागन्तरं प्रतीची प्रत्यङ्मुखी सती ।" इति तद्भाष्ये सायनः ॥ प्रतिनिवृत्तमुखी । यथा, ऋग्वेदे । १ । १२१ । ७ ।
"अश्वातेव पुंस इति प्रतीची गर्त्तारुगिव सनये धनानाम् ॥"
"अश्वातेव भ्राष्टरहितेव पुंसः पित्रादीनू प्रतीची स्वकीयस्थानात् प्रतिनिवृत्तमुखी ।" इति तद्भाष्ये सायनः ॥)

प्रतीचीन, त्रि, (प्रतीचि भवम् । प्रत्यच् + "विभाषाञ्चेरदिक् स्त्रियाम् ।" ५ । ४ । ८ । इति खः । अञ्चोपो दीर्घश्च ।) प्रत्यक् । प्रतीच्यां भवः । इति हेमचन्द्रः । २ । ८२ ॥ (पराङ्मुखम् । यथा, ऋग्वेदे । ३ । ५५ । ८ ।
"सूरस्येव युध्यतो अन्तमस्य प्रतीचीनं ददृशे विश्वमायत् ॥"
"विश्वं भूतजातं प्रतीचीनं पराङ्मुखं ददृशे ।"
इति तद्भाष्ये सायनः ॥)

प्रतीप, त्रि, प्रतीपं भवः। प्रतीपमभिमुखादुपायैः आगच्छतीति वा। (यथा, महाभारते। २। ३२। १२।
"रामतात् द्वारकुर्यांच प्रतीपाद्येव ये दृमाः।
सान् सर्वान् सपर्णे यदि रामनादेव गच्छतः।")
प्रतीत, त्रि, (प्रतीयते स्म प्रतीत्यमात्रादेवेति। प्रति + इण् + क्तेनेति कर्त्तरि वा क्तः।) ज्ञातः। इत्यमरः। ३। १। ६। (यथा, रामायणे। २। ८। १०।
"प्राप्तां यशस्विनीं प्रीतिं प्रतीतां धनविद्विषम्'
उपलभ्यासि कौशल्ये दीर्घकालं तपोधने।")
आदरः। ज्ञानः। हृष्टः। इति मेदिनी। ते, १०५। (पुं. विश्वेदेवानामन्यतमः। यथा, महाभारते। १३। ८१। ३२।
"अनुकर्मा प्रतीतश्च प्रदाताधोक्षजोऽग्रजः।")
प्रतीति, स्त्री, (प्रति + इण् + भावे क्तिन्।) ज्ञानम्। इति अटाधरः। (यथा, भाषापरिच्छेदे। ११४।
"अनधीतभावनो नास्य परिनार्थत्वमुच्यते।
अनात् दृष्टमिदं नेति प्रतीतिर्हि विलक्षणा।")
ज्ञानं। आदरः। हर्षः। इति प्रतीतशब्दार्थदर्शनात्।
प्रतीप, त्रि, (प्रतिकूलः आपो यस्मिन्। "अक्षुण्णः प्रयासानर्थे।" ५। ४। ७४। इति अप्रत्ययः। "इन्नन्नपमर्मभ्योऽप इन्।" ६। ३। ८१। इति इन्।) प्रतिकूलम्। इति हेमचन्द्रः। ६। १०१। (यथा, भागवते। ३। १। १४।
"क्व रूपमस्योपरुधे त्रिणं
दास्याः सुतं यद्वहितेव पुष्टः।
तस्मिन् प्रतीपः परकृत्य आस्ते
स्त्रीणां स्वयामाय पुरात्मनानः।"
स्त्री, अर्थालङ्कारभेदः। तस्य लक्षणादिकं साहित्यदर्पणे १० परिच्छेदे उक्तम्। यथा,—
"प्रसिद्धस्योपमानस्योपमेयत्वप्रकल्पनम्।
निष्फलत्वाभिधानं वा प्रतीपमिति कथ्यते।
क्रमेण उदाहरणं यथा,—
यत्प्रेक्षणमनालक्ष्यलक्ष्मि तत्सदृशं तदिन्दीवरं
नेत्रैस्त्वरितं प्रिये! तव मुखमाशयानुकारी
कथं।
यत्रि सदृशमनादृत्य तत्सदृशे राजहंसा गता-
स्तत्कादम्बविरोदमाश्रयमपि मे दैवेन न क्लप्यते।
सरलं यदि सुहृदा अभिलषा वा देव वा
पेटुटुलि-
तमन्यत्र वा धातिं तुल्यमेवेषु मित्रं वा
तथा।
विपक्षत्वेऽनुभूतौ यदि च ते विद्वा यद्यु मुखं
यत्तं पुनः स्तुधिरः सर्वमेतौ वेषः।
अथा चन्द्रादित्यैरेव चन्द्रादीनां श्रीभाग्यिरुद्-
भाव्यं विलक्षणम्।
उक्ता यत्नमनुकरणेनानुकरणस्य वस्तुनः।
कल्पितोपमानानां प्रतीपं केचिदूचिरे।

यथा,—
अहमेव गुरुः सुहृत्तमाना-
मिति धात्तसे! तात! मान्य दृष्यः।
यदु सन्ति भवादृशानि भूयो
भुवनेऽस्मिन् वचनानि दुर्जनानाम्।
अत्र प्रथमपादे उत्कर्षोक्तिरूप उक्तः। तदनुक्तौ तु नायमलङ्कारः।")
प्रतीप, पुं, चन्द्रवंशीय अक्षराजपुत्रः। शान्तनु-राजपिता च। इति पुराणं शब्दरत्नावली च। (यथा, महाभारते। १। ९०। २०।
"प्रतीपः शान्तनुं पुत्रं यौवनस्थं तपोधनम्।"
एतस्य विवरणं तत्रैवाध्याये विस्तरशो द्रष्टव्यम्।)
प्रतीपदर्शिनी, स्त्री, (प्रतीपं प्रतिकूलं वामं वा पश्यतीति। दृश् + णिनिः। ङीप्।) खोमाचम्। इत्यमरः। २। ६। २।
प्रतीर, क्ली, (प्रतीरयति जलगतिकर्म्मसमाप्तिं नयतीति। प्र + तीर कर्म्मसमाप्तौ + कः।) तटम्। इत्यमरः। १। १०। ७।
प्रतीवाप, पुं, (प्रक्षिप्यते प्रक्षिप्यते अथवा निक्षिप्यतेऽस्मिन्निति। प्रति + वप निक्षेपादौ + घञ्।) मलितस्य सर्व्वाङ्गेषु तैलादेरभ्यङ्गः। इति भरतः। स्नपनम्। निःक्षेपणमिति यावत्। इति सुश्रुतः। उपनयः। इति सुश्रुतः।
"आवापस्तु प्रतीवापो मारोरीतिरुपनयः।"
इति राजनिर्घण्टः।
इत्यातपेनशब्दटीकायां भरतः। पानीयौषधविशेषः। यथा,—
"उपजोदि प्रतीवापं पिबेत् संग्रहणाय वै।"
इति विद्यविनिर्णयायां चक्रपाणिदत्तः।
(यथा च सुश्रुते सूत्रस्थाने। ४३ अध्याये।
"मदनफलमञ्जकाभ्यां वा पिप्पल्यादि प्रतीवापं तत्पूर्वं वा निरूहयित्वा कषाययोरन्यतरेण सन्तर्पणं कफजव्याधिषु।")
प्रतीवेश, पुं. (प्रतिविश्यते इति। प्रति + विश् + घञ्। उपसर्गस्य दीर्घः।) प्रतिवेशः। इति शब्दरत्नावली।
प्रतीवेशी, [न्] स्त्री, (प्रतीवेशोऽस्यास्तीति। प्रतिवेश + "व्रत इनिठनौ।" ५। २। ११५। इति इनिः।) प्रतिवेशी। इति शब्दरत्नावली।
प्रतीहार, पुं, (प्रतिहियते अत्रेति। प्रति + हृ + घञ्। उपसर्गस्य दीर्घः।) द्वारः। (प्रतिहरत्यनेनेति। करणे घञ्।) द्वारपालः। इत्यमरः। २। ८। ९। तस्य लक्षणम्। यथा,—
"प्रविशागारतत्त्वज्ञो बलवान् प्रियदर्शनः।
अप्रमादी सदा दक्षः प्रतीहारः स उच्यते।"
इति वास्तुशास्त्रम्।
अपि च। मात्स्ये १९८ अध्यायः।
"प्रांशुः सुदर्शो दक्षश्च प्रियवादी न चौद्धतः।
विनयाधश्च सर्व्वेषां प्रतीहारो विधीयते।"
इत्यग्निपुराणम्। यथा, हरिवंशे।
"मयासौम्यत्वं पुत्रस्यन्योऽकरिष्यति।
इति यः स्थिते मनिः प्रतीहारः स उच्यते।"

प्रतीहारी, [न्] त्रि, (प्रतिहरति स्वामिनमीप्सितं सर्व्वविषयमिति। प्रति + हृ + णिनिः। उपसर्गस्य दीर्घः। यद्वा, प्रतीहारी रक्षणीयतेनास्यास्तीति। इनिः।) द्वा॰। इत्यमरः। ३। ३। ३। कार्य्यकरणीहारशब्दादस्यर्थे इनप्रत्ययेन निष्पन्नः।
प्रतीहारी, स्त्री, (प्रतीहारीरूपस्या अस्तीति। अण्। गौरादित्वात् ङीष्।) द्वारस्थिता। इति मेदिनी। रे, २८०।
प्रतीहार, पुं, (प्रतिरूपो हारोऽस्य। उपसर्गस्य दीर्घः।) करवीरः। इत्यमरः। २। ४। ७६।
प्रतुद, पुं, (प्रतुदतीति। प्र + तुद् + कः।) खगादिः। आदिना श्येनः। कङ्कः। काकः। दीर्घकाकः। उलूकः। मयूरः। इति राजनिर्घण्टः। अस्यमांसगुणाः।
"लावादा विष्किरो वर्गः प्रतुदा शास्त्रिणो खगाः।
लघवः स्निग्धमधुराः कषायाश्च हिता दृशाम्।"
इति राजवल्लभः।
(यथा च चरके सूत्रस्थाने सप्तविंशाध्याये।
"शतपत्रो भृङ्गराजः कोयष्टी जीवजीवकः।
कैरातः कोकिलोलूकी गोपाश्चः प्रियात्मजः।
सङ्घा लङ्घाकपी वभ्रुर्वटहा डिण्डिमानकः।
घण्टी दुण्डिभिराजाश्च वलीमुखकुलिङ्गकाः।
कपोतशुकसारङ्गखिरिटीकक्रुञ्चटिकाः।
शारिकाकलविङ्कश्च चटकोष्ट्रारचूडकः।
पारावतः पाण्डुविक इत्युक्ताः प्रतुदा द्विजाः।"
यथा च सुश्रुते सूत्रस्थाने ४६ अध्याये।
"कपोतपारावतभृङ्गराजशरभशतकोयष्टिकुलिङ्ग-शुकुलिङ्गगोधोलूककिष्किमानकप्रतपचक्रवाकलिन्दकभेदाग्निमुखकारिकावल्गुलीगिरिग्राम-शालदूषकतमचीसप्तशरीटकशारीनदात्यूहप्रभृतयः प्रतुदाः।")
प्रतोद, पुं. (प्रतुद्यतेऽनेनेति। प्र + तुद् + करणे घञ्।) अश्वादितादनदण्डः। चाबुक् इति भाषा। तत्पर्य्यायः। यामनम्२ प्रयत्नम्३ तोत्रम्४ नोदनम्५। इति अटाधरः। (यथा, महाभारते। २। ५४। ८।
"प्रवातरंहिभिः सर्व्वैः प्रतोदैरेव सारथिः।
प्रत्यमित्रचिकीर्षुं दीप्तां विष्णुर्भैरवनर्दिनम्।")
प्रतोली, स्त्री, (प्रतुन्नते परिमीयते इति। प्र + तुद् परिमाणे + घञ्। गौरादित्वात् ङीष्।) रथ्या। इत्यमरः। २। २। ३। (यथा, रामायणे। २। ८०। १८।
"बहुपांसुचयाकीर्णा परिखाभिरिवायताः।
तत्रैवन्नीलप्रतिमाः प्रतोलीरवगाहिताः।")
सम्भ्रमरमार्गः। साहु इति ख्याते। पुरी इति च ख्याते। एकादिसप्तसंख्यासंख्ये पदीति भाषा। दुर्गसमरद्वारे इति केचित्। इति तट्टीकायां भरतः।
प्रत्त, त्रि, (प्रदीयते स्मेति। प्र + दा + क्तः। "आदेच उपदेशेऽशिति।" ६। १। ४५। इति आदेशः।) दत्तम्। इति शब्दरत्नावली।

प्रत्नः, त्रि, (प्र+"गत्व प्रराये प्रात्।" इति त्नकारात् त्नप्।) पुरातनः। इत्यमरः। ३। १। ७७॥ (यथा, भागवते। ५। २०। ५।
"प्रत्नस्य विष्णो रूपं यत् सत्यस्यर्तस्य ब्रह्मणः।
ममृतस्य च मृत्योश्च सूर्य्यमात्मानमीमहि॥")

प्रत्यक्, [च्] त्रि, (प्रत्यञ्चतीति। प्रति+अनच्+क्विन्।) पश्चिमदिक्। पश्चिमदेशः। (यथा, मनुः। २। २१।
"हिमवद्विन्ध्ययोर्मध्यं यत् प्राग्विनशनादपि।
प्रत्यगेव प्रयागाच्च मध्यदेशः प्रकीर्त्तितः॥")
पश्चिमकालः। इति मेदिनी। चे, १६॥ (य, प्रतीच्यां दिशि प्रतीच्या दिशः प्रतीची दिग्वा एवं देशे काले च। "दिक्शब्देभ्यः सप्तमीपञ्चमीप्रथमाभ्यो दिक्देशकालेष्वस्तातिः।" ५। ३। २७। इति अस्तातिः। "अञ्चेर्लुक्।" ५। ३। ३०। इति अस्तातेर्लुक्। "लुक् तद्धितलुकि।" १। २। ४६। इति लुक्। दिक्देशकाले। इति मेदिनी। चे, १६॥ प्रतिलोमम्। यथा, भागवते। ४। २२। ३७।
"यः क्षेत्रचित्तपतया हृदि विश्वगावि-
प्रत्यक् प्रपन्नमि भगवांस्तमवेहि सोऽस्मि॥"
प्रतिकूलम्। यथा, महाभारते। ५। ८४। ६।
"प्रत्यगूर्ध्वमधश्चाद्याः प्राङ्मुखाः विन्दुसत्तमाः।
विपरीता दिशः सर्व्वा न प्राज्ञायत किञ्चन॥")

प्रत्यक्पर्णी, स्त्री, (प्रत्यञ्चि पर्णानि अस्याः। पाकलक्षेति ङीष्।) अपामार्गः। इत्यमरः। २। ४। ८६॥ (अस्याः पर्य्यायो यथा, भावप्रकाशस्य पूर्व्वखण्डे १ भागे।
"रक्तोऽन्यो बहिरो दृक्फलो धामार्गवोऽपि च।
प्रत्यक्पर्णी केशपर्णी कथिता कपिपिप्पली॥")
ह्रस्वपत्री। इति राजनिर्घण्टः॥ (अस्याः पर्य्यायो यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।
"ह्रस्वपत्री शाबरी चित्रा प्रत्यक्पर्ण्यर्कपर्ण्यपि।
चित्रोपधिचान्यगोधी प्रत्यक्श्रेण्यांखुकर्ण्यपि॥"

प्रत्यक्पुष्पी, स्त्री, (प्रत्यञ्चि पुष्पाण्यस्याः। पाकलक्षेति ङीष्।) अपामार्गः। इत्यमरः। २। ८४। ८॥ (यथा, सुश्रुते। १। ४३।
"प्रत्यक्पुष्पीसहापुष्पीनिम्बकषायाद्यामगन्धमेनालोच्य मधुसैन्धवयुक्तां मात्रां मायोजयेत्॥" पर्य्यायान्तरमस्याः। यथा,—
"स्वल्पमञ्जर्य्यपामार्गः प्रत्यक्पुष्पी मयूरकः।
क्षारमधस्त्रधोगण्टा शिखरी खरमञ्जरी॥"
इति वैद्यकरत्नमालायाम्॥)

प्रत्यक्श्रेणी, स्त्री, (प्रतीची श्रेणी यस्याः। समासान्तविधेरनित्यत्वात् न कप्।) दन्तीवृक्षः। क्षुद्रिकापर्णी। इत्यमरः। २। ४। ८८॥ (अस्याः पर्य्यायो यथा
"प्रत्यक्श्रेणी ह्रवन्ती च पुनर्नवेक्षारपर्णिका।
दन्तपर्ण्यंशुपर्णी च क्षुद्रिका काम्बिपत्रिका॥"
इति वैद्यकरत्नमालायाम्॥)

प्रत्यक्ष, त्रि, (प्रतिगतमक्षि इन्द्रियं यत्र। समासान्तः अच्। यद्वा, प्रत्यक्षमस्यस्येति। अर्श आदित्वात् अच्।) इन्द्रियग्राह्यम्। तत्पर्य्यायः। ऐन्द्रियकम् २। इत्यमरः। ३। १। ७६॥ (यथा, ज्ञानसङ्कर्षे। २। १। ५२।
"यत्पादपङ्कजनखरदृष्टये चात्मबुद्धये।
न च दृष्टश्च स्वप्नेऽपि प्रत्यक्षस्यापि का कथा॥")
अनुभवविशेषः। तत् षड्विधम्। घ्राणजम् १ रासनम् २ श्रावणम् ३ चाक्षुषम् ४ स्पार्शनम् ५ मानसम् ६। निर्व्विकल्पकसविकल्पकभेदेन प्रत्येकं द्विविधम्। निर्व्विकल्पकन्तु अतीन्द्रियम्। सविकल्पकं मनोग्राह्यम्। षड्विधप्रत्यक्षे आश्रयस्य महत्त्वं कारणम्। इन्द्रियं करणम्। विषयेण सह इन्द्रियसन्निकर्षः। अस्य व्यापारः। यथा, भाषापरिच्छेदे।
"घ्राणजादिप्रभेदेन प्रत्यक्षं षड्विधं मतम्।
घ्राणस्य गोचरो गन्धो गन्धत्वादिरपि स्फुटः।
तथा रसो रसज्ञायास्तथा शब्दोऽपि च श्रुतेः॥
उद्भूतरूपं नयनस्य गोचरो
ह्यथापि तद्वन्ति पृथक्त्वसंख्ये।
विभागसंयोगपरापरत्व-
स्नेहद्रवत्वं परिमाणयुक्तम्॥
क्रिया जातिं योग्यवृत्तिं समवायञ्च तादृशम्।
गृह्णाति चक्षुःसम्बन्धादालोकोद्भूतरूपयोः॥
उद्भूतस्पर्शवद्द्रव्यं गोचरः सोऽपि च त्वचः।
रूपाद्यचक्षुषो योग्यं रूपमत्रापि कारणम्॥
द्रव्याध्यक्षे त्वचो योगो मनसा ज्ञानकारणम्।
मनोग्राह्यं सुखं दुःखमिच्छा द्वेषो मतिः कृतिः॥
घ्राणं यन्निर्व्विकल्पाख्यं तदतीन्द्रियमिष्यते।
महत्त्वं षड्विधे हेतुरिन्द्रियं करणं मतम्॥
विषयेन्द्रियसम्बन्धो व्यापारः सोऽपि षड्विधः॥")
(यथा, विद्वन्मोदतरङ्गिण्याम्।
"देवानर्च्चय सततं प्रतिदिनं पुण्यानि धत्स्वान्तरे
भोगाय प्रयतो महाक्रतुविधौ स्वर्गाय हिंसां कुरु।
इत्थं वञ्चकवञ्चगोत्पथगता युष्मिन्दुरन्ते चिरा-
दप्रत्यक्षपदार्थसार्थरहितं पश्चागमारोहतु॥")
अक्ष, अक्षि अक्षि प्रतीति वीप्सायां यथार्थत्वेन समावः। अक्ष्णोराभिमुख्यमित्यर्थे। "अक्षण्यक्षिण्यभिमुखे।" २। १। १४। इत्यव्ययीभावः। "अव्ययीभावे शरत्प्रभृतिभ्यः।" ५। ४। १०७। इत्यत्र "प्रतिपरसमनुभ्योऽक्ष्णः।" इति टच्। इन्द्रियलक्षणम्। अपरोक्षम्। यथा, मनुः। ६। ५२।
"फलन्त्यनभिसन्धाय चेष्टिरां वीक्षिनान्तधा।
प्रत्यक्षं चेष्टियाणां वीक्षादृष्टोनिर्गरीयसी॥")

प्रत्यक्षदर्शनं, त्रि, (प्रत्यक्षं पश्यतीति। प्रत्यक्ष+दृश्+ल्युः। प्रत्यक्षं दर्शनं यस्येति वा।) साक्षी। इति शब्दमाला॥ (क्ली, प्रत्यक्षं दर्शनम्। यथा, महाभारते। ६। ५०। ३६।
"प्रत्यक्षदर्शनं यज्ञे गतिरद्यानुत्तमां शुभाम्।
नेष्यध्वं दक्षो ब्रह्मः प्रीयमाणः प्रजापतिः॥")

प्रत्यक्षवादी, [न्] पुं, (प्रत्यक्षमेव प्रमाणत्वेन वदतीति। वद्+णिनिः।) चार्व्वाकः। नास्ति प्रत्यक्षं प्रमाणमिति तन्मतम्॥ (प्रत्यक्षं वदति यस्तच्च त्रि॥)

प्रत्यक्षी, [न्] त्रि, (प्रत्यक्षमस्यस्येति। प्रत्यक्ष+इनिः।) यक्तदृष्टार्थः। इति त्रिकाण्डशेषः॥

प्रत्यगाशापतिः, पुं, (प्रत्यगाशायाः पश्चिमस्या दिशः अधिपतिः।) वरुणः। इति हलायुधः॥

प्रत्यग्रः, त्रि, (प्रतिगतमग्रं अग्रे प्रथमदर्शनं वास्येति।) नूतनः। इत्यमरः। ३। १। ७०॥ (यथा, महाभारते। ८। ६८। १८।
"दासीनां निष्ककण्ठीनां मागधीनां शतं शुभा।
प्रत्यग्रवयसां दद्यां वो मे भूयाद्वनञ्जयम्॥")
शोधितः। इति घटाधरः॥ (पुं, उपरिचरस्य वसोः पुत्रात्मामन्यतमः। यथा, भागवते। ६। २२। ६।
"वसुस्त्वशेषितरिरा हृद्ग्रहणसञ्जातः।
कुशाम्बमत्स्यप्रत्याद्यांश्चेदिपादाप्य चेदिषाः॥")

प्रत्यग्रथः, पुं, (प्रतीचां रथ इव।) अहिच्छत्रदेशः। इति हेमचन्द्रः। ४। २६॥

प्रत्यञ्च्, [च्] त्रि, (प्रत्यञ्चतीति। प्रति+अनच्+क्विन्।) पश्चिमदिक्। पश्चिमदेशः। पश्चिमकालः। प्रतिपूर्ब्बाञ्चधातोः कर्त्तरि विच्प्रत्ययेन निष्पन्नः। इति व्याकरणम्॥ (यथा, शतपथब्राह्मणे। १२। ८। २। ३५।
"ऋतवः सर्व्वे परोक्षाः सर्व्वे प्रत्यञ्चः॥"
प्रतिगतः। अभिमुखः। यथा, ऋग्वेदे। १। ५०। १५।
"प्रत्यङ्देवानां विशः प्रत्यङ्डुदेषि मानुषान्।
प्रत्यङ् विश्वं स्वर्दृशे॥"
"हे सूर्य्य त्वं देवानां विशो मनुष्यमरणान् देवान्। मनुतो वै देवानां विश इति श्रुत्यन्तरात्। तान् मनुष्यसंम्बन्धान् देवान् प्रत्यङ्डुदेषि। तान् प्रतिगच्छन्नुदयं प्राप्नोषि। तेषामभिमुखं यथा भवति तथेत्यर्थः। तथा मानुषान् मनुष्यान् प्रत्यङ्डुदेषि। तेऽपि यथास्वमभिमुखमेव सूर्य्यं उदेतीति मन्यन्ते। तथा विश्वं चाक्षं स्वः स्वर्लोकं दृशे द्रष्टुं प्रत्यङ्डुदेषि। यथा स्वर्लोकवासिनो जनाः सर्व्वेऽपि स्वस्वाभिमुखेन सूर्य्यं पश्यन्तीति।" इति तद्भाष्ये सायणः॥ अन्तर्यामी। इति श्रीधरस्वामी॥ यथा, भागवते। ६। ६। २०।
"प्रत्यक्षमादिपुरुषमुपतस्थुः समाहिताः॥")

प्रत्यङ्ग, क्ली, (प्रतिगतमङ्गमिति।) अवयवविशेषः। यथा, शब्दचन्द्रिकायाम्।
"प्रत्यङ्गं कर्णनासाक्षिललाटानि करादिकम्॥"
(यथा, रामायणे। २। ७४। १६।
"अङ्गप्रत्यङ्गजः पुत्रो हृदयादपि जायते।
तस्मात् प्रियतरो मातुः प्रिया एव तु बान्धवाः॥"
"अतः परं प्रत्यङ्गानि वक्ष्यन्ते। मस्तकोदरहृदनाभिललाटनासाचिबुकवस्तिग्रीवा इत्येता एकैकाः। कर्णनेत्रनासाभ्रूओष्ठांसभुजकक्षसनथमाम्बैस्त्रिगुणानुत्तरोत्तरतयो द्वे द्वे विद्यति-

अपि च ।
"अर्थेनाभिहितो योऽर्थः प्रत्यर्थी यदि तन्तथा।
प्रपद्य कारणं ब्रूयात् प्रत्यवस्कन्दनं हि तत् ॥"
इति व्यवहारतत्त्वे बृहस्पतिवचनम् ॥
प्रत्यवस्थाता, [तृ] त्रि, (प्रतिपक्षतया अवतिष्ठते इति । प्रति + अव + स्था + तृच् ।) शत्रुः । इति हेमचन्द्रः । ३ । ३६२ ॥
प्रत्यवायः, पुं, (प्रत्यवाय्यते इति । प्रति + अव + अय गतौ + घञ् ।) पापम् । दुरदृष्टम् । यथा.
"त्वयं केचिदुपात्तस्य दुरितस्य प्रचक्षते ।
अनुत्पत्तिं तथा चान्ये प्रत्यवायस्य मन्वते ॥"
इत्येकादशीतत्त्वे जाबालवचनम् ॥
प्रत्यक्षा, [तृ] पुं, (प्रतिरूपः अक्षा ।) गोरिकम् । इति त्रिकाण्डशेषः ॥
प्रत्यहं अ, (अहः अहः प्रति । "नपुंसकादन्यतरस्याम् ।" ५ । ४ । १०६ । इति टच् ।) प्रतिदिनम् । यथा. कुमारसम्भवे ।
"गिरिशमुपचचार प्रत्यहं सा सुकेशी ॥"
प्रत्याकारः, पुं, (प्रतिरूपः खड्गेन सदृशः आकारो यस्य ।) खड्गकोषः । इति हेमचन्द्रः । ३ । ४४७ ॥ खाप् इति भाषा ॥
प्रत्याख्यातः, त्रि, (प्रति + आ + ख्या + क्तः ।) दूरीकृतः । तत्पर्य्यायः । प्रत्यादिष्टः २ निरस्तः३ निराकृतः ४ निक्षतः ५ विप्रकृतः ६ । इत्यमरः ।३।१।४०॥ क्वचित् पुस्तके प्रत्यादिष्टेत्यादिश्लोकमेकमधिकं दृश्यते तच्चात्रचतुष्कं प्रत्यादिष्टे । परचतुष्कं तिरस्कृते । इति तट्टीकासारसुन्दरी ॥ (यथा, महाभारते । १ । २५६ ।८।
"वीरेणाहं तथानेन त्वया वापि यशस्विनि ! ।
प्रत्याख्याता न जीवामि सत्यमेतद्ब्रवीमि ते ॥")
प्रत्याख्यानं, क्ली, (प्रति + आ + ख्या + भावे ल्युट् ।) निराकरणम् । तत्पर्य्यायः । निरसनम् २ प्रत्यादेशः ३ निराकृतिः ४ । इत्यमरः ।३।१।३९ ॥ (यथा, मार्कण्डेये । ६१। ७२ ।
"प्रत्याख्यानादहं रटतुं त्वञ्च पापमवाप्स्यसि॥")
प्रत्यागमः, पुं, (प्रत्यागमनमिति । प्रति + आ + गम् + अप् ।) प्रत्यागमनम् । फिरे आसा इति भाषा ॥ यथा,—
"तीर्थयात्रासमारम्भे तीर्थप्रत्यागमेषु च ॥"
इति प्रायश्चित्ततत्त्वम् ॥
(यथा, हरिवंशे भविष्यपर्व्वणि । ३६ । २४ ।
"किमर्थं ब्रूहि विप्रेन्द्र ! अस्मिन् प्रत्यागमो हि वः ॥")
प्रत्यादिष्टः, त्रि, (प्रत्यादिश्यते स्मेति । प्रति + आ + दिश् + क्तः ।) प्रत्याख्यातः । तत्पर्य्यायः । निरस्तः २ प्रत्याख्यातः ३ निराकृतः ४ निक्षतः ५ विप्रकृतः ६ । इत्यमरः । ३। १।४० ॥
प्रत्यादेशः, पुं, (प्रत्यादिश्यनमिति । प्रति + आ + दिश् + घञ् ।) निराकरणम् । प्रत्याख्यानम् । इत्यमरः । ३ । २ । ९१ ॥ (यथा, मेघदूते । ६६ ।
"प्रत्यादेशादपि च मधुनो विस्मृतभ्रूविलासम् ॥"
प्रसङ्गनिवारणम् । इति कुल्लूकभट्टः ॥ यथा, मनुः । ८ । ३३४ ।
"येन येन यथाङ्गेन स्तेनो नृषु विचेष्टते ।
तत्तदेव हरेत्तस्य प्रत्यादेशाय पार्थिवः ॥")
भक्तं प्रति देवानामादेशश्च ॥
प्रत्याध्मानः, पुं, (प्रतिगतमाध्मानमीषत्-शब्दो यत्र ।) वातव्याधिविशेषः । तस्य लक्षणमाह ।
"विमुक्तपार्श्वहृदयं तदेवाध्मायतीत्यितम् ।
प्रत्याध्मानं विजानीयात् कफव्याकुलितानिलम्॥"
विमुक्तपार्श्वहृदयं पार्श्वे हृदये विहाय स्थितं तदेवाध्मानम् । कफव्याकुलितानिलं कफेनावरुद्धवातम् ॥ * ॥ अथ तस्य चिकित्सा ।
"प्रत्याध्माने समुत्पन्ने कुर्य्यात् वमनलङ्घने ।
दीपनादि नियुञ्जीत पूर्ब्ववद्वस्तिकर्म्म च ॥"
इति भावप्रकाशः ॥
प्रत्यालीढं, क्ली, (प्रति + आ + लिह + क्तः ।) धन्विनां पादसंस्थानविशेषः । तत्रोर्द्धस्य वामपादप्रसारे दक्षिणपादसङ्कोचः । इत्यमरटीकायां भरतः ॥ धन्विनामवस्थानविशेषः । यथा,—
"स्यात् प्रत्यालीढमालीढं समं पादं तथापरम् ।
वैशाखं मण्डलस्थेति धन्विनां स्थानपञ्चकम् ॥
स्याद्दक्षपादसङ्कोचात् वामपादप्रसारणात् ।
प्रत्यालीढमिति प्रोक्तमालीढं तद्विपर्य्ययात् ॥
तुल्यं पादयुगं यत्र समपादसदाहृतम् ।
वितस्त्यन्तरितं पादयुगं वैशाखमुच्यते ।
मण्डलाकारपादाभ्यां मण्डलं स्थानमीरितम् ॥"
इति शब्दरत्नावली ॥
(यथा च यादवः ।
"स्थानानि धन्विनां पञ्च तत्र वैशाखमस्त्रियाम् ।
वितस्त्यन्तरगौ पादौ मण्डलं तोरणाकृती ॥
समानौ स्यात् समपदमालीढं पदमग्रतः ।
दक्षिणं वाममाकृष्य प्रत्यालीढं विपर्य्ययः ॥")
आलीढे, त्रि । इति मेदिनी । ढे, १२ ॥
प्रत्याशा, स्त्री, (प्रति किञ्चित् वस्तु सञ्चीकृत्य आ समन्तात् अश्नुते व्याप्नोतीति । प्रति + आ + अश् + अच् । ततष्टाप् ।) आकाङ्क्षा । यथा, भ्रान्तिप्रकरे ।
"मरुप्रोन्नत्य मरीचिकासु पशुवत् प्रत्याशया धावति ॥"
प्रत्यासन्नः, त्रि, (प्रति + आ + सद् + क्तः ।) निकटवर्त्ती । इति जटाधरः ॥ (यथा, प्रबोधचन्द्रोदये २ अङ्के ।
"आर्य्ये ! प्रत्यासन्नो महाराजः । तत्प्रत्युद्गमनेन संभावयतामार्य्यम् ॥")
प्रत्यासरः, पुं, (प्रत्यासियते इति । प्रति + आ + सृ + "अदोरप् ।" ३ । ३ । ५७ । इत्यप् ।) सैन्यसृष्टः । इति शब्दरत्नावली ॥
प्रत्यासारः, पुं, (प्रत्यासियते इति । प्रति + आ + सृ + घञ् ।) यूषस्य पश्चाद्भागः । यूषस्य पश्चाद्भागान्तरम् । तत्पर्य्यायः । यूषपार्श्विः २ । इत्यमरभरतौ ॥
प्रत्याहरणं, क्ली, (प्रति + आ + हृ + भावे ल्युट् ।) प्रत्याहारः । इति शब्दरत्नावली ॥
प्रत्याहारः, पुं, (प्रति + आ + हृ + भावे घञ् ।) स्वस्वविषयेभ्य इन्द्रियाकर्षणम् । तत्पर्य्यायः । उपादानम् २ । इत्यमरः ॥ प्रत्याहरणम् ३ । इति शब्दरत्नावली ॥ स च योगाङ्गविशेषः । यथा,
"प्रत्याहारश्च तर्कश्च प्राणायामस्तृतीयकः ।
समाधिर्धारणं ध्यानं षड़ङ्गो योग उच्यते ॥"
इति तट्टीकायां भरतः ॥
प्रत्याहारमाह ।
"शब्दादिष्वनुरक्तानि निग्रह्याक्षाणि योगवित् ।
कुर्य्याच्चित्तानुकारीणि प्रत्याहारपरायणः ॥"
इति विष्णुपुराणे ६ अंशे ७ अध्यायः ॥
अपि च ।
"इन्द्रियाणीन्द्रियार्थेभ्यः समाकृष्य स्थितो हि सः ।
मनसा सह बुद्ध्या च प्रत्याहारेण संस्थितः ॥"
इति गारुड़े २४० अध्यायः ॥
(यथा च पातञ्जले साधनपादे ।
"यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टावङ्गानि ॥" २९ ॥
"स्वस्वविषयसंप्रयोगाभावे चित्तस्वरूपानुकार इन्द्रियाणां प्रत्याहारः ॥" ५४ ॥)
अत्रेन बहूनां ग्रहणम् । यथा, अप् इति द्व्यक्षरेण सर्व्वेषां ग्रहणम् । इति भरतः ॥
प्रतुक्तिः, स्त्री, (प्रतिवचनमिति । प्रति + वच् + भावे क्तिन् । प्रतिरूपा उक्तिरिति वा ।) प्रत्युत्तरम् । इति शब्दरत्नावली ॥
प्रतुत, य, (प्रति च उत च इति द्वन्द्वः ।) वैपरीत्यम् । यथा । बुधादिवाक्यं तु न नियामकं प्रमाणाभावात् प्रतुत फलश्रुतेर्गुणफलबोधकमिति । इति तिथ्यादितत्त्वे जाम्भोपक्रियणम् ॥
(यथा, मार्कण्डेये । ६५ । २० ।
"विहिताकरणात् पुंभिरसद्भिः क्रियते तु यः ।
संयमो मुक्तये सोऽन्ते प्रतुतायोगतिप्रदः ॥")
प्रतुत्क्रमः, पुं, (प्रतुत्क्रमणमिति । प्रति + उत् + क्रम् + घञ् ।) प्रधानप्रयोजनानुकूलप्रयोजनानुष्ठानम् । तत्पर्य्यायः । प्रयोगार्थः २ । इत्यमरः ॥ प्रकृष्टयोगः । इति केचित् । प्रकृष्टयुद्धार्थमुपक्रमः प्रयोगः तद्वाच्यः । इति केचित् । प्रयोगो युद्धं तदभिधेय इति केचित् । प्रतुत्क्रमो युद्धार्थ इति भागुरिः । युद्धार्थे प्रथमाक्रान्तिः । इत्यपरे । कर्म्मारम्भे प्रथमयुक्तिः प्रयोगः । इत्यपरे ॥ इति भरतः ॥
प्रतुत्क्रान्तिः, स्त्री, (प्रति + उत् + क्रम् + क्तिन् ।) प्रतुत्क्रमः । इत्यमरटीकायां क्षीरस्वामी ॥
प्रतुत्तरं, क्ली, (प्रतिरूपमुत्तरम् ।) उत्तरं प्रति उत्तरम् । यथा । ममेयं भूमिः क्रमागतत्वात् इति वादयुक्ते ममेयं भूमिर्द्वयवर्षोपभुज्यमानत्वात् इति प्रतुत्तरम् । इति व्यवहारतत्त्वम् ॥
प्रत्युत्थानं, क्ली, (प्रतुत्थीयते इति । प्रति + उत् + स्था + ल्युट् ।) अभ्युत्थानम् । गात्रोत्थानम् । यथा,—

"दीक्षान्तमक्षैस्त्वापि प्रियया चोद्धवेन च।
पूजितः परया भक्त्या प्रत्युत्थानासनादिभिः॥"
इति श्रीभागवते। १०। ६८। २०॥

प्रत्युत्पन्नः, त्रि, (प्रति+उत्+पद्+क्तः।) उत्पत्तिविशिष्टः। प्रत्युत्पूर्ब्बपद्धातोः कर्त्तरि क्तप्रत्ययेन निष्पन्नः॥

प्रत्युत्पन्नमतिः, त्रि, (प्रत्युत्पन्ना मतिर्यस्य।) सूक्ष्मबुद्धियुक्तः। तत्पर्य्यायः। कृच्छ्रश्रीयमतिः २ सत्त्वदर्शी ३ तत्कालधीः ४। इति हेमचन्द्रः॥ प्रतिभान्वितः। इति जटाधरः॥ (यथा,—
"प्रत्युत्पन्नमतिर्धीमान् ववसायी विशारदः।
सत्यधर्म्मपरो यश्च स भिषक्पाद उच्यते॥"
इति सुश्रुते सूत्रस्थाने ३४ अध्यायः॥)

प्रत्युद्गमनीयं, क्ली, (प्रति+उत्+गम्+अनीयर्।) धौतांशुकद्वयम्। इति मेदिनी। ये, १३४॥ (यथा, कुमारे। ७। ११।
"सा मङ्गलस्नानविशुद्धगात्री
गृहीतप्रत्युद्गमनीयवस्त्रा॥"
क्वचित् प्रत्युद्गमनीयवस्त्रा इत्यपि पाठः॥)

सप्तम्यानयोर्म्ये पूजनीये च, त्रि। इति शब्दरत्नावली॥

प्रत्युद्गमः, पुं, (प्रति+उत्+गम्+अप्।) प्रत्युत्थानम्। यथा, साहित्यदर्पणे दृतीयपरिच्छेदे। ७३।
"एकत्रासनसंस्थितिः परिचिता प्रत्युद्गमाद्दूरतः॥"

प्रत्युद्गमनं, क्ली, (प्रति+उत्+गम्+ल्युट्।) प्रत्युत्थानम्। (यथा, प्रबोधचन्द्रोदये २ अङ्के।
"आर्य्य! प्रत्यासन्नो महाराजः। तत्प्रत्युद्गमनेन संभावयतामार्य्येण॥")

प्रत्यूषः, पुं, (प्रतीषति विनाशयति अन्धकारमिति। प्रति+उष् दाहे+"इगुपधज्ञेति।" ३। १। १३६। इति कः।) प्रत्यूषः। प्रातः। इत्यमरटीकायां मधुरेशः॥ (यथा, पद्मतन्त्रे। १। २१२।
"प्रत्यूषे च स्वयमभ्युपेत्य द्वारदेशस्थितोऽपि विविधपौरुषत्योत्सुकतया तामाहेति॥")

प्रत्युषः, [स्] क्ली, (प्रत्योषति नाशयत्यन्धकारमिति। प्रति+उष्+"उषः किच्च।" उणा० ४। २३३। इति असिः। स च किच्च।) प्रत्यूषः। इत्यमरः। १। ४। २॥ यथा, भरतधृतस्यर्य्यशतके।
"याति यत्किं पुरस्तादरुणकिसलये प्रत्युषः-पारिजातः॥"

प्रत्यूषः, पुं, (प्रत्यूषति रुजति कासकानिति। प्रति+उष् रोगे+कः।) प्रभातम्। इत्यमरः। १। ४। २॥ (यथा, मेघदूते। ३३।
"दीर्घीकुर्व्वन् पटुमदकलं कूजितं सारसानां
प्रत्यूषेषु स्फुटितकमलामोदमैत्रीकषायः॥")
सर्य्यः। इति शब्दरत्नावली॥ वसुभेदः। इति जटाधरः॥ (यथा, विष्णुपुराणे। २। १५। १११।
"वसवोऽष्टौ समाख्याताञ्छृणु वक्ष्यामि विस्तरम्।
आपो ध्रुवश्च सोमश्च धरश्चैवानिलोऽनलः।
प्रत्यूषश्च प्रभावश्च वसवो नामभिः स्मृताः॥")

प्रत्यूषः, [स्] क्ली, (प्रति+ऊष्+असिः।) प्रभातम्। इत्यमरटीकायां भरतः॥ (यथा, सुश्रुते। १। २१।
"प्रत्यूषस्यपराह्णे तु चीर्णेऽन्ने च प्रकुप्यति॥")

प्रत्यूहः, पुं, (प्रत्यूहनमिति। प्रति+ऊह+घञ्।) विघ्नः। इत्यमरः। ३। २। ४८॥ (यथा, मार्कण्डेये। १६। ५५।
"भक्तैश्च श्रूयणादेव मया प्राप्तं महत् फलम्।
सर्व्वकामफलावाप्या प्रत्यूहाः परिवर्जिताः॥")

प्रत्येकं, क्ली, एकं एकं प्रति। यथा, कर्पूरखण्डे।
"प्रत्येकं वा द्वयं वा त्रयमपि च परं बीजमत्यन्तगुह्यम्॥"
(यथा च कुमारे। २। ३१।
"एवं यदात्थ भगवन्नाज्ञप्तं नः परैः पदम्।
प्रत्येकं विनियुक्तात्मा कथं न ज्ञास्यसि प्रभो!॥")

प्रथ, क प्रख्याने। ख्यातौ। इति कविकल्पद्रुमः॥ (चुरा०-परः-सकः-अकः-चः सेट्।) रेफयुक्तः। क, प्राथयति। इति दुर्गादासः॥

प्रथ, म थ ड ख्यातौ। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-अकः-सेट्।) रेफयुक्तः। म, प्रथयते। थ, प्रथा। ड, प्रथते गुणैः प्रसिद्धः स्यादित्यर्थः। इति दुर्गादासः॥

प्रथमः, त्रि, (प्रथते प्रसिद्धो भवतीति। प्रथ्+"प्रथेरमच्।" उणा० ५। ६८। इति अमच्।) प्रधानम्। (यथा, रघुः। १०। ६७।
"राम इत्यभिरामेण वपुषा तस्य चोदितः।
नामधेयं गुरुश्चक्रे जगत्प्रथममङ्गलम्॥")
आदिमः। तत्पर्य्यायः। आदिः २ पूर्व्वः ३ पौरस्त्यः ४ आद्यः ५। इत्यमरः॥ अग्रिमः ६ इति जटाधरः॥ प्राक्७। इत्यव्ययवर्गे अमरः॥ (यथा, विष्णुपुराणे। १। ११। ५२।
"वाञ्छार्थानखिलांश्चित्तं त्याजयेत्प्रथमं नरः॥")

प्रथा, स्त्री, (प्रथ्+"भिदिरादिभ्योऽङ्।" ३। ३। १०४। इत्यङ्। ततष्टाप्।) ख्यातिः। इत्यमरः। ३। २। ६॥ (यथा, राजतरङ्गिण्याम्। १। १२।
"या प्रथामगमन्नेति सापि वाथप्रकाशने॥")

प्रथितः, त्रि, (प्रथ्+क्तः।) ख्यातः। इत्यमरः। ३। १। ६॥ (यथा, रघुः। ६। ७६।
"तेनावतीर्य्य तुरगात् प्रथितान्वयेन
पृष्टान्वयः स जलकुम्भनिषण्णदेहः॥"
खारोचिषमनोः पुत्रे, पुं। यथा, हरिवंशे। ७। १४।
"हविष्मः सुकृतिर्ज्योतिरापो मूर्त्तिरयः स्मृतः।
प्रथितश्च नभस्यश्च नभ ऊर्ज्जस्वदेव च।
खारोचिषस्य पुत्रास्ते मनोर्जातस्य मन्वतः॥")

प्रथितिः, स्त्री, (प्रथ्+"प्रदिप्रथिभ्यां नित्।" उणां ४। १८२। इतिः तित्। स च नित्।) ख्यातिः। प्रथधातोर्भावे क्तिप्रत्ययेन निष्पन्नः। इति व्याकरणम्॥

प्रथिमा, [न्] पुं, (पृथोर्भावः। "पृथ्वादिभ्य इमनिज्वा।" ५। १। १२२। इति इमनिच्। "ऋतोऽलादेर्लघोः।" ६। ४। १६१। इति रः। "टेः।" ६। ४। १५५। इति टेर्लोपः।) पृथोर्भावः। पृथुत्वम्। इति सिद्धान्तकौमुदी॥ यथा,—
"प्रथिमानन्दधानेन घनेन जघनेन सा॥"
इति भट्टिः। ४। १७॥
त्रि, अतिशयेन पृथुः। पृथुशब्दादतिशयार्थे इमनिप्रत्ययेन निष्पन्नः। इति व्याकरणम्॥

प्रथिमिनी, स्त्री, (प्रथिमास्त्यस्या इति। प्रथिमन्+"संज्ञायां मन्माभ्याम्।" ५। २। १३७। इति इनिः।) प्रथिमयुक्तस्त्री। इति सिद्धान्तकौमुदी॥

प्रथिष्ठः, त्रि, अतिशयेन पृथुः। (पृथु+इष्ठन्।) अतिपृथुः। इति मुग्धबोधव्याकरणम्॥

प्रथुकः, पुं, पृथुकः। इत्यमरटीकायां रायमुकुटः॥

प्रदः, त्रि, प्रकर्षेण ददाति यः। (प्र+दा+कः।) प्रदाता। इति सिद्धान्तकौमुदी॥ (कर्म्मण्युपपदे तु "प्रे दाज्ञः।" ३। २। ६। इति कः। यथा, मनुः। ४। २३२।
"यानप्रदाप्रदो भार्य्यामैश्वर्य्यमभयप्रदः॥")

प्रदक्षिणं, क्ली, पुं, (प्रगतं दक्षिणमिति। "तिङतिङः प्रभृतीनि च।" २। १। १७। इति समासः।) दक्षिणावर्त्तेन देवादिकसृष्टिस्य भ्रमणम्। यथा,
"एकं देवांस्त्रयो सप्त त्रीणि कुर्य्यात्पितामहे।
चत्वारि केशवे कुर्य्यात् शिवे चार्द्धप्रदक्षिणम्॥"
इति कर्म्मलोचनम्॥
सर्व्वदेवतातुष्टिप्रदक्षिणं यथा,—
"प्रसार्य्य दक्षिणं हस्तं स्वयं नम्रशिराः पुनः।
दक्षिणं दर्शयन् पार्श्वं मनसापि च दक्षिणः॥
सकृत्त्रिर्वा वेष्टयेत्ता देवाः प्रीतिः प्रजायते।
स च प्रदक्षिणो ज्ञेयः सर्व्वदेवौघतुष्टिदः॥
सर्व्वान् कामान् समाप्नोति पश्चान्मोक्षमवाप्नुयात्॥
मनसापि च यो दद्याद्दैवे भक्त्या प्रदक्षिणम्।
प्रदक्षिणाद्दृयमघं हरेत्कायिं न पश्यति॥"
इति कालिकापुराणे ७० अध्यायः॥ * ॥
अपि च। तन्त्रसारे।
"दक्षिणाद्दायवीं गत्वा दिशं तस्याश्च प्राग्भवीम्।
ततश्च दक्षिणां गत्वा नमस्कारक्षिकोणवत्॥
अर्द्धचन्द्रं महेशस्य पृष्ठतश्च समीरितम्।
शिवप्रदक्षिणो मन्त्री अर्द्धचन्द्रक्रमेण तु॥
सव्यासव्यक्रमेणैव सोमसूत्रं न लङ्घयेत्॥"
सोमसूत्रं जलनिःसरणस्थानम्।
"प्रसार्य्य दक्षिणं हस्तं स्वयं नम्रशिराः पुनः।
दर्शयेद्दक्षिणं पार्श्वं मनसापि च दक्षिणः॥
त्रिधा च वेष्टयेत् सम्यक् देवताया प्रदक्षिणम्॥
एकहस्तप्रयासस्य एकं वापि प्रदक्षिणम्।
यत्काले दर्शनं विष्णोर्हरन्ति पुण्यं पुराकृतम्॥"
(समर्थे, त्रि। यथा, रामायणे। ३। ४३। ५१।
"प्रदक्षिणेनातिबलेन पक्षिणा
जटायुषा गृध्रिमता च सख्यम्॥"

"प्रदक्षिणेन समर्थेन।" इति तट्टीकायां रामानुजः॥)

प्रदक्षिणा, स्त्री, (प्रगता दक्षिणमिति। "तिष्ठद्गु प्रभृतीनि च। २।१।१७।" इति समासः।) प्रदक्षिणम्। यथा,—

अथ प्रदक्षिणा।

"ततः प्रदक्षिणां कुर्य्यादृक्वया भगवतो हरेः। नामानि कीर्त्तयन् मुक्तौ ताच साष्टाङ्गवन्दनान्॥"

प्रदक्षिणासङ्ख्या चोक्ता नारसिंहे।

"एकां चण्डां रवेः सप्त तिस्रो दद्याद्विनायके। चतस्रः केशवे दद्यात् शिवे त्वर्द्धप्रदक्षिणाम्॥"

प्रदक्षिणामाहात्म्यं वाराहे।

"प्रदक्षिणां ये कुर्व्वन्ति भक्तियुक्तेन चेतसा। न ते यमपुरं यान्ति यान्ति पुण्यकृतां गतिम्॥ यस्मिन् प्रदक्षिणं कुर्य्यात् साष्टाङ्गकप्रणामकम्। दशाश्वमेधस्य फलं प्राप्नुयान्नात्र संशयः॥"

स्कान्दे ब्रह्मनारदसंवादे॥

"विष्णोर्विमानं यः कुर्य्यात् सकृच्छ्रद्धया प्रदक्षिणम्। अश्वमेधसहस्रस्य फलमाप्नोति मानवः॥"

तत्रैव चातुर्मास्यमाहात्म्ये।

"चतुर्व्वारं भ्रमीभिस्तु जगत् सर्व्वं चराचरम्। क्रान्तं भवति विप्राग्र्य! तत्तीर्थगमनाधिकम्॥"

तत्रैवान्यत्र।

"प्रदक्षिणं तु यः कुर्य्याद्धरिं भक्त्या समन्वितः। हंसयुक्तविमानेन विष्णुलोकं स गच्छति॥"

नारसिंहे।

"प्रदक्षिणेन चैकेन देवदेवस्य मन्दिरे। कृतेन यत् फलं नृणां तच्छृणुष्व नृपात्मज!। पृथ्वीप्रदक्षिणफलं यत्तत् प्राप्य हरिं व्रजेत्॥"

अन्यत्र च।

"एवं कृत्वा तु कृष्णस्य यः कुर्य्याद्विप्रदक्षिणम्। सप्तद्वीपवतीपुण्यं लभते तु पदे पदे॥ षट्त्रिंशत्सहस्राणि नामान्येवाथ केवलम्॥"

भक्तिसुधोदये।

"विष्णुं प्रदक्षिणीकुर्व्वन् यत्रयत्रावर्त्तते पुनः। तत्रैवावर्त्तनं तस्य पुनर्नावर्त्तते भवे॥"

दक्षनारदीये यमभगीरथसंवादे।

"प्रदक्षिणत्रयं कुर्य्यात् यो विष्णोर्मनुजेश्वर!। सर्व्वपापविनिर्मुक्तो देवेन्द्रत्वं समश्नुते॥"

तत्रैव प्रदक्षिणमाहात्म्ये सुधर्म्मोपाख्यानारम्भे।

"भक्त्या कुर्व्वन्ति ये विष्णोः प्रदक्षिणचतुष्टयम्। तेऽपि यान्ति परं स्थानं सर्व्वलोकोत्तमोत्तमम्॥ तत् श्रुतं यत् सुधर्म्मस्य पूर्व्वस्मिन् राजजन्मनि। कृष्णप्रदक्षिणाभावान्नष्टाखिलभूदिति॥"

अथ प्रदक्षिणायां निषिद्धं विष्णुस्मृतौ।

"एकहस्तप्रणामश्च एका चैव प्रदक्षिणा। अकाले दर्शनं विष्णोर्हन्ति पुण्यं पुराकृतम्॥"

अकाले भोजनादिसमये। किञ्च।

"कृष्णस्य पुरतो नैव सूर्य्यस्यैव प्रदक्षिणाम्। कुर्य्यादूर्ध्वमरिकारूढं वेणुकाष्ठादनौ प्रभौ॥"

तथा चोक्तम्।

"प्रदक्षिणं न कर्त्तव्यं विमुखत्वाच्च कारणम्॥"

इति श्रीहरिभक्तिविलासे ८ विलासः॥

प्रदत्त, त्रि, (प्र+दा+क्तः।) प्रकर्षेण दत्तम्। इति मुग्धबोधव्याकरणम्॥

प्रदरः, पुं, (प्र+दॄ विदारणे+"ऋदोरप्।" ३।३।५७। इति भावादौ यथायथं अप्।) भङ्गः। वाय्वः। इत्यमरः॥ विदारः। नारीरुग्भेदः। इति मेदिनी॥ * ॥ अस्य नामान्तरं अङ्गदरम्। तत्तु फलितयोन्या रक्तादिधातुचरणम्। अस्य निदानम्। यथा,—

"विरुद्धमद्याध्यशनादजीर्णाद् गर्भप्रपातादतिमैथुनाच। यानाश्वगोकादतिकर्षणाच्च भाराभिघाताच्चयनाद्दिवा च॥ अङ्गदरं भवेत् सर्व्वं साङ्गमर्दं सवेदनम्॥ तस्यातिदृष्टौ दौर्ब्बल्यं भ्रमो मूर्च्छा मदस्तृषा। दाहः प्रलापः पाण्डुत्वं तन्त्रा रोगाश्च वातजाः॥"

स च चतुर्विधो यथा,—

"तं श्लेष्मपित्तानिलसन्निपाते-चतुःप्रकारं प्रदरं वदन्ति॥"

श्लैष्मिकस्य तस्य लक्षणम्।

"आमं सपिच्छाप्रतिमं सपाण्डुपुलाकतोयप्रतिमं कफात्तु॥"

पैत्तिकस्य तस्य लक्षणम्।

"सधीतनीलासितरक्तसुर्य्यं पित्तान्वितं भक्षवेगि पित्तात्॥"

वातिकस्य तस्य लक्षणम्।

"रूक्षारुणं फेनिलमल्पमल्पं वातान्वितं वातात् पिच्छितोदकाभम्॥"

तस्य त्रैदोषिकस्य लक्षणम्।

"सर्व्वैरसैर्पैर्हरितालवर्णं मज्जप्रकाशं कृमिपं त्रिदोषात्। तत्राप्यसाध्यं प्रवदन्ति तज्ज्ञा न तत्र कुर्व्वीत भिषक् चिकित्साम्॥"

इति माधवकरः॥ * ॥

अस्यौषधं यथा,—

"घृततुल्या यदलाजा पीता क्षीरेण वे सहा। प्रदरं हरते रोगं नात्र कार्य्या विचारणा॥"

इति गारुडे १६६ अध्यायः॥ ६ ॥

अपि च।

"दृषा सौवर्चलाजाजीमधूकं नीलसुत्पलम्। पिबेत् क्षौद्रयुतं नारी वातासृग्दरशान्तये॥ एषां प्रत्येकं मात्रयम्। सर्व्वमेकीकृत्य दृषा कर्षचतुष्टयेन पिष्ट्वा तत्र मात्राष्टकं मधु निःक्षिप्य पेयम्॥ ६ ॥

"मधूकं कर्षमेकन्तु चतुष्कर्षां सितान्वया। तण्डुलोदकसंपिष्टां लोहिते प्रदरे पिबेत्॥ वल्का कट्फलिजाख्या या तस्या मूलन्तु चूर्णितम्। लोहिते प्रदरे खादेच्छर्करामधुसंयुतम्॥ ६ ॥ मुचिस्यामे वाधनस्या मूलमुत्तरदिग्भवम्। गोतण्डुलोदकपलगुणां कटिबद्धं धरेदसृक्॥ ६ ॥ रसाञ्जनं तण्डुलकस्य मूलं क्षौद्रान्वितं तण्डुलतोयपीतम्। अङ्गदरं सर्व्वभवं निहन्ति यासच्च भागौ सह नागरेण॥ * ॥

अशोकवल्कलक्काथप्लुतं दुग्धं सुशीतलम्। यथाबलं पिबेत् प्रातस्तीव्राङ्गदरनाशनम्॥"

अशोकवल्कलपलं द्वाविंशत्पलसंमितेन जलेन निष्क्वाथ्य शेषेण पलाष्टकक्काथेन सह क्षीरं पलाष्टकमितं विपचेत् तत्तु दुग्धावशेषं कर्त्तव्यं तस्मध्ये पलचतुष्टयमितं दुग्धं पेयं वह्निबलापेक्षया वा॥ * ॥

"कृष्णमूलं समुद्धृत्य पेषयेत्तण्डुलाम्बुना। एतत् पीत्वा त्र्यहं नारी प्रदरात् परिमुच्यते॥"

इति भावप्रकाशः॥

(तथास्य चिकित्सान्तरं यथा,—

"काकजानुकमूलं वा मूलं कार्पासमेव वा। पाण्डुप्रदरशान्त्यर्थं पिबेत्तण्डुलवारिणा॥"

"कृष्णमूलं समुद्धृत्य पेषयेत्तण्डुलाम्बुना। एतत् पीत्वात्र्यहान्नारी प्रदरात् परिमुच्यते॥"

"प्रदरं हन्ति बलामूलं दुग्धेन मधुयुतं पीतम्॥"

"गुडेन बदरीचूर्णं मोचमामं तथा पयः। पीता लाजा च सक्तवः पृथक्प्रदरनाशनाः॥"

इति चक्रपाणिसंग्रहेऽङ्गदराधिकारे॥)

प्रदर्शितः, त्रि, (प्र+दृश्+णिच्+क्तः।) आलोकितः। यथा,—

"क्रियावाचित्वमाख्यातुं प्रसिद्धोऽर्थः प्रदर्शितः। प्रयोगतोऽन्ये मन्तव्या अनेकार्था हि धातवः॥"

इति मुग्धबोधटीकायां दुर्गादासः॥

प्रदलः, पुं, (प्रकर्षेण दलति दारयतीत्यर्थः। प्र+दल्+अच्।) वायुः। इति जटाधरः॥

प्रदानं, क्ली, (प्र+दा+भावे ल्युट्।) दानम्। इति शब्दरत्नावली॥ प्रकृष्टदानञ्च। (यथा, मनौ। ३। २४०।

"होमे प्रदाने भोज्ये च यदेभिरभिधीयते॥")

प्रदिक्, [ग्] स्त्री, (प्रगता दिग्भ्यः।) विदिक्। इति जटाधरः॥ (यथा, महाभारते। १।१७०।१६।

"ततो विश्रान्तमनसो जनाःक्षुद्भयपीडिताः। गृहाणि संपरित्यज्य ययुः प्रदिशो दिशः॥"

प्रकृष्टा दिक्। (यथा, हरिवंशे। १६५। ८।

"प्रदिशो विदिशश्चैव शरधाराभिमोहिताः। अन्धकारीकृतं व्योम दिनेशो नैव दृश्यते॥")

प्रदिग्धं, क्ली, (प्र+दिह्+कर्म्मणि क्तः।) मांसयञ्जनभेदः। यथा, शब्दचन्द्रिकायाम्।

"मांसं बहुघृतेभृष्टं क्षिप्त्वा चोष्णाम्बुना सह। क्षीरकाद्यैः समायुक्तं परिशुष्कं तदुच्यते॥ तदेव घृततक्राढ्यं प्रदिग्धं सन्निगद्यते॥"

त्रि, प्रलिप्तः॥ (दूषितः। यथा, रामायणे। ५।५।२८।

"अवक्षरेखामिव चन्द्रलेखां पांशुप्रदिग्धामिव हेमरेखाम्॥")

प्रदीपः, पुं, (प्रकर्षेण दीपयति प्रकाशयति प्रदीप्यते इति वा। प्र+दीप्+णिच् वा+कः।)

प्रदीपः

दीपः। इत्यमरः। २। ७। १६८॥ तत्पर्य्यायः। शैवदार्दीपकः २ कज्जलध्वजः ३ शिखातरः ४ अग्निमणिः ५ ज्योतुरादृतः ६ दशैन्यनः ७ दीपातिलकः ८ दीपास्यः ९ नयनोत्सवः १०। इति शब्दरत्नावली॥ (यथा, रघौ। ५।३०।

"स्वर्गं तदीपमपि तद्दैव वीर्य्यं
तद्दैव नैसर्गिकमुन्नतत्वम्।
न कारणात् स्वाद्विभिदे कुमारः
प्रवर्त्तितो दीप इव प्रदीपात्॥")

दीपमाहात्म्यम्। यथा,—

"दीपेन लोकान् जयति दीपस्तेजोमयः स्मृतः।
चतुर्वर्गप्रदो दीपस्तस्माद्दीपं प्रदापयेत् प्रिये!॥"

सप्तप्रकारा दीपा यथा,—

"घृतप्रदीपः प्रथमस्तिलतैलोद्भवस्ततः।
माधवः प्रसनियांसजातो वा राजिकोद्भवः॥
दधिघ्नाम्रप्रसूतश्च प्रदीपाः सप्त कीर्त्तिताः॥"

तस्य षष्प्रकारा वर्त्तिका यथा,—

"पद्मस्तम्भवा दर्भगर्भसम्भवाथवा।
सालजा वाऽरुजा वापि कृष्णकोद्भवाथवा॥
वर्त्तिका दीपलक्ष्येषु सदा षष्ठविधाः स्मृताः॥"

दीपपात्राणि यथा,—

"तैजसं दारवं लौहं मार्त्तिकं नारिकेलजम्।
दृषध्नशोद्भवं वापि दीपपात्रं प्रशस्यते॥"*॥

दीपवृक्षे दीपस्थापनं भूमौ तन्निषेधश्च यथा,—

"दीपवृक्षाश्च कर्त्तव्यास्तेषु सायञ्च भैरव!।
वृक्षे च दीपो दातव्यो न तु भूमौ कदाचन॥
कर्त्तव्यसदा वसुमती सहते न त्विदं द्वयम्।
अकार्य्यभारादाघातश्च दीपतापस्तथैव च॥
तस्माद्यथा तु पृथिवी तापं नाप्नोति वै तथा।
दीपं दद्यान्महादेवे अन्येभ्योऽपि च भैरव!॥
कुर्व्वन्तं पृथिवीतापं यो दीपस्तुरुवेश्वरः।
स तामतापं नरकमाप्नोत्येव शतं समाः॥"*॥

सुवर्णवर्त्तिः सर्पिषः पात्रैरभ्रे सुदर्शने।
सम्पूर्णे पृथकोटौ तु दीपं दद्यात् प्रयत्नतः॥
लभते यस्य तामस्तु दीपस्य चतुरङ्गुलात्।
न स दीप इति ख्यातो लोपवह्निस्तु स स्मृतः॥
नेत्राभादकरः सर्व्वभूमितापविवर्जितः।
सुस्निग्धः प्रखरश्चिस्तो निर्धूमो गतिहृस्वकः॥
दक्षिणापर्व्ववर्त्तिस्तु प्रदीपः श्रीविवृद्धये।
दीपवृक्षस्थिते तुल्यैरेतैव प्रपूरिते॥
दक्षिणापर्व्ववर्त्ती तु चारुदीपः प्रदीपकः।
उत्तमः प्रोच्यते पुत्र! सर्व्वतृप्तिप्रदायकः॥
तुल्येन वर्त्तितो दीपो मध्यमः परिकीर्त्तितः।
विहीनः साधनैर्य्याम्यमधमः परिकीर्त्तितः॥"

इति कालिकापुराणे ६८ अध्यायः॥ ७॥

कार्त्तिके तद्दानफलं यथा,—

"कार्त्तिके मासि यो दद्यात् प्रदीपं सर्पिरादिना।
आकल्पं भास्करे यापि स चाक्षयफलं लभेत्॥"

इति कर्म्मलोचनम्॥ ९॥

अपि च।

"समग्रमासं हरिं भक्त्या दीपं दत्त्वा दिवानिशम्।
तत्र मासविभुङ्क्ते नरो याति दिवं ध्रुवम्!॥

प्रदेश

लक्ष्मपक्षे विशेषेण तत्र पक्ष दिनानि तु।
पुण्यानि तेषु यद्दत्तमक्षयं सर्व्वकामिकम्॥
एकादश्यां हरिमुद्दिश्य दीपं प्रज्वाल्य सूचिका।
मानुष्यं दुर्लभं प्राप्य परां गतिमवाप सा॥
द्वादश्यां तस्करो रात्रिदीपमुद्दीप्य चौर्य्यतः।
कारणात् परमं प्राप्तो लोकं विष्णोः सनातनम्॥
स्वपचोऽपि त्रयोदश्यां दीपान् दत्त्वापरैः कृतान्।
वैश्या लीलावती भूत्वा जगाम स्वर्गमक्षयम्॥
सुभद्रोऽपि चतुर्दश्यां पूजयित्वा जनार्द्दनम्।
निर्भीतिः परसंगत्या विष्णुलोकं जगाम सः॥
गोपः कश्चिदमावास्यां पूजां दृष्ट्वा शार्ङ्गिणः।
सद्यश्चक्रवर्त्तिजातो राजराजेश्वरोऽभवत्॥
तस्मादीपाः प्रदातव्या रात्रावक्षयमिच्छता।
गृहेषु सर्व्वगोष्ठेषु चैत्येष्वायतनेषु च॥
देवानामेव रथ्यासु श्मशानेषु सरःसु च॥"

इत्यग्निपुराणम्॥

प्रदीपनः, पुं, (प्रदीपयतीति। प्र+दीप्+णिच्+ल्युः।) स्थावरविषभेदः। इत्यमरः। १।८।१०॥ (अस्य पर्य्यायो यथा, वैद्यकरत्नमालायाम्।

"काकोली गरलः चुक्रो वत्सनाभः प्रदीपनः।
शौक्लिकेयो ब्रह्मपुत्रो विषं स्थाद्गरलो विषः॥")

तस्य लक्षणम् यथा,—

"वर्त्ततो लोहितो यः स्यात् दीप्तिमान् दहनप्रभः।
मक्षादाहकरः पूर्व्वैः कथितः स प्रदीपनः॥"

इति राजनिर्घण्टः॥

प्रकाशके, त्रि॥

प्रदेशः, पुं, (प्रदिश्यते इति। प्र+दिश्+"इगुपधलक्षणश्च।" ३। ३। १२३। इति घञ्। "उपसर्गस्य घञ्यमनुष्ये बहुलम्।" ६। ३। १२२। इति माचिको दीर्घाभावः।) देशमात्रम्। (यथा, हरिवंशे भविष्यपर्व्वणि। ५। ३६।

"गरुडादवरुह्याथ दीपिकादीपिते तदा।
प्रदेशे पुष्करीकाक्षो स्थितस्तावत्सहामरैः॥")

तत्पर्य्यायः। आस्थानम् २ आस्था ३ भूः ४ अवकाशः ५ स्थितिः ६ पदम् ७। इति राजनिर्घण्टः॥ तर्जन्यङ्गुष्ठसन्मितः। भित्तिः। इति मेदिनी। शे, २५॥ संज्ञा। इति निरुक्तम्। १। ३। २॥ तन्नयुक्तिप्रकारविशेषः। यथा,—

"प्रकृतस्यातिक्रान्तेन साधनं प्रदेशः। यथा देवदत्तस्थानेन शल्यसुधृतं तस्याग्रदत्तस्याग्रयमेवोद्धरिष्यतीति।" इत्युत्तरतन्त्रे पञ्चषष्टितमेऽध्याये सुश्रुतेनोक्तम्॥)

प्रदेशनं, क्ली, (प्रदिश्यते अनेनेति। प्र+दिश्+करणे ल्युट्।) कृपादेरमङ्गलम्। भेंटी इति ख्यातम्। तत्पर्य्यायः। प्राभृतम् २ उपायनम् ३ उपायाग्रम् ४ उपहारः ५ उपदा ६। इत्यमरः। २। ८। २७॥ केचित्तु देवताभ्यो भक्ष्या मित्रादिभ्यश्च प्रीत्या यत् प्रसृष्टं सदुकादि दीयते तत् इत्याहुः। वैद्यके प्राभृतादि द्रव्यं ग्रहणा देवतामाक्षत्रराजादिभ्यो यदीयते तत्र। उपायनादि चतुष्कं तुष्यमिदं दीयते सर्व्वेषु मम

प्रद्युम्नः

कार्य्यं साधनीयमिति यदीयते धुनी इति ख्याते इत्याहुः। किन्तु षट्कर्म्मकार्य्यमेवति यदुः। उपायनसपर्य्यास्तं प्राभृतयोपदा क्रियाभित्यमरमाला। इति भरतः॥

प्रदेशिनी, स्त्री, (प्रदिश्यते अनयेति। प्र+दिश्+करणे ल्युट्।) तर्ज्जनी। इत्यमरटीकायां भरतः॥

प्रदेशिनी, स्त्री, (प्रदिशतीति। प्र+दिश्+णिनिः ङीप्।) तर्ज्जनी। इत्यमरः। २।६।८१॥ (यथा, महाभारते। १। ८३। १६।

"तेऽपश्यन् प्रदेशिन्या तमेव नृपसत्तमम्।
अस्मिंस्तं मातरश्चैव तथाचक्षुश्च दारकाः॥"

"खेरङ्गुलेः पादाङ्गुष्ठप्रदेशिन्यौ हाङ्गुलायते। प्रदेशिन्यास्तु मध्यमागामिका कनिष्ठिका यथोत्तरं पञ्चमभागहीना।" इति सुश्रुते सूत्रस्थाने ३५ अध्याये॥)

प्रदेहः, पुं, (प्रदिह्यते इति। प्र+दिह् लेपने+घञ्।) प्रलेपः। इति वैद्यकम्॥ (यथा, सुश्रुते सूत्रस्थाने। १३ अध्याये।

"इन्द्रवज्राभिहतोऽपि जीवति प्रतिकारवेत्।
स्नेहाभ्यङ्गपरीषेकैः प्रदेहैश्च तथा भिषक्॥"

यथा च "प्रदेहो वातश्लेष्मप्रशमनः सन्धानः शोधनो रोपणः शोफवेदनापहश्च तस्योपयोगः क्षताक्षतेषु।" इति सुश्रुते सूत्रस्थानेऽष्टादशेऽध्याये॥ अस्यानधिकारः। तद्यथा—

"स्नेहः स्नेहोदनं दध्यात् प्रदेहांश्च सुसंस्कृतान्॥"

इति च तत्र सूत्रस्थाने ४६ अध्याये॥)

प्रदोषः, पुं, (दोषा रात्रिः। प्रारम्भो दोषाया इति प्रादिसमासः। प्रक्रान्ता दोषा रात्रिरत्रेति वा।) रजनीमुखम्। इत्यमरः। १।४।९॥ तच्च रात्रेः प्रथमदण्डचतुष्टयम्। यथा,—

"प्रदोषोऽस्तमयादूर्द्धं घटिकाद्वयमिष्यते॥"

इति तिथ्यादितत्त्वम्॥

(यथा, कुमारे। ५। ४४।

"वद प्रदोषे स्फुटचन्द्रतारका
विभावरी यद्यरुणाय कल्पते॥")

दोषः। इति हेमचन्द्रः॥ (प्रकृष्टो दोषो यस्येति। द्वेष्टि, त्रि। यथा, माघे। २। ६८।

"ये चान्ये कालयवनशाल्वरुक्मिदुमादयः।
तमःस्वभावास्तेष्वेनं प्रदोषमनुयायिनः॥"

"ये चान्ये कालयवनशाल्वरुक्मिदुमादयो राजानस्तमःस्वभावाः तमोगुणात्मकाः अतएव तेऽपि प्रदोषं प्रकृष्टदोषम्। प्रदोषो द्वेष्टराजांशाविति वैद्यवन्तौ। तामसमेवैनं चैद्यमनुयायिनः अनुयास्यन्ति सारथ्यादिति भावः॥" इति तट्टीकायां मल्लिनाथः॥)

प्रद्यु, क्ली, प्रकृष्टा द्यौः स्वर्गो यस्मात् ततः। पुण्यम्। इति शब्दबोधटीकायां दुर्गादासः॥

प्रद्युम्नः, पुं, (प्रकृष्टं द्युम्नं यशो यस्य।) कन्दर्पः। इत्यमरः। १। १। २६॥ स वासुदेवस्य चतुर्व्यूहः। यथा,—

"एकदैव चतुर्व्यूहं चतुर्धा पुनरच्युतः।
विभेद वासुदेवोऽसौ प्रद्युम्नो हरिरव्ययः॥

कृष्णद्वैपायनो व्यासो विष्णुर्नारायणः स्वयम् ।
अपां तरतमाः पूर्वं स्वेच्छया शुभवद्धरिः ॥"
इति कौर्मे ४८ अध्यायः ॥
अपि च ।
"अनिरुद्धः स्वयं ब्रह्मा प्रद्युम्नः काम एव च ।
बलदेवः स्वयं शेषः कृष्णश्च प्रकृतेः परः ॥"
इति ब्रह्मवैवर्ते श्रीकृष्णजन्मखण्डे ११६ अध्यायः ॥
(नड्वलागर्भजातो मनोरपत्यभेदः । यथा, भागवते । ४ । १३ । १५–१६ ।
"मनोरकृत महिषी विरजान् नड्वला सुतान् ।
पुरुं कुत्सं ऋतं दुम्नं सत्यवन्तं ऋतं व्रतम् ॥
अग्निष्टोममतीरात्रं प्रद्युम्नं शिवसुल्मुकम् ॥")
प्रद्योतः, पुं, (प्रकृष्टो द्योतः ।) रश्मिः । इति हलायुधः ॥ (यज्ञभेदः । यथा, महाभारते । २ । १० । १५ ।
"कण्वोरको गण्डकण्डुः प्रद्योतश्च महाबलः ॥")
प्रद्योतनः, पुं, (प्रद्योतते इति । प्र + द्युत् + "अनुदात्तेतश्च हलादेः ।" ३ । २ । १४६ । इति युच् ।) सूर्यः । इति हलायुधः ॥ (भावे ल्युट् ।) द्युतौ, स्त्री ॥
प्रद्रावः, पुं, (प्र + द्रु + "प्रे द्रुस्रुसुवः ।" ३ । ३ । २७ । इति घञ् ।) पलायनम । इत्यमरः । २ । ८ । १११ ॥
प्रधनं, क्ली, (प्रदधातीति । प्र + धा + "कृपृवृजि मन्दिनिधाञ्यः क्युः ।" उणा० २ । ८१ । इति बाहुलकात् क्युः आतो लोपश्च ।) युद्धम । इत्यमरः । २ । ८ । १०३ ॥ (यथा, देवीभागवते । ४ । ७ । ५३ ।
"वैरं भवति वित्तार्थे दारार्थे वा परस्परम् ।
राज्यारहितौ कस्मात् चक्रतुः प्रधनं महत् ॥")
दारणम् । इति मेदिनी । ने, ८३ ॥ (प्रकृष्टं धनमस्येति विग्रहे प्रभूतधनविशिष्टे, त्रि ॥)
प्रधानं, क्ली, (प्रधत्ते सर्वमात्मनीति । प्र + धा + युच् ।) प्रकृतिः । (यथा, विष्णुपुराणे । १ । १ । २ ।
"सदचरं ब्रह्म य ईश्वरः पुमान्
गुणोर्म्मिसृष्टिस्थितिकालसंलयः ।
प्रधानबुद्ध्यादिजगत् प्रपञ्चकः
स नोऽस्तु विष्णुर्गतिभूतिमुक्तिदः ॥"
महामात्रः । (यथा, मनुः । ७ । २०२ ।
"प्रमाणानि च कुर्व्वीत तेषां धर्म्म्यान् यथोदितान् ।
रत्नैश्च पूजयेदेनं प्रधानपुरुषैः सह ॥"
प्रधत्तेऽनेनास्मिन् वा । प्र + धा + ल्युट् ।) परमात्मा । बुद्धिः । त्रि, प्रकृष्टम् । तत्पर्य्यायः । प्रसृतम् २ प्रवेकम् ३ अनुत्तमम् ४ उत्तमम् ५ सत्यम् ६ वर्य्यम् ७ वरेण्यम् ८ प्रवर्हम् ९ अग्रवरार्घ्यम्१० परार्घ्यम् ११ अग्र्यम् १२ प्राग्रहरम् १३ प्रथ्यम् १४ अग्र्यम् १५ अग्रीयम् १६ अग्रिमम् १७ । इत्यमरः ।३ । १ । ५७ ॥ (यथा, मनुः । ८ । १२१ ।
"उपस्कुर्व्वनं प्रधानस्य धर्म्मतो नोपपद्यते ।
पिता प्रधानं प्रकृते तस्माद्धर्म्मेण तं भजेत् ॥"
प्रधानः, पुं. (प्रधत्ते इति । प्र + धा + ल्युः ।) महामात्रः । सेनापत्यादिः । महामात्रः प्रधानः स्यादिति पुंस्काण्डे वोपालितः । इत्यमरटीकायां भरतः ॥ (राजर्षिभेदः । यथा, महाभारते । १२ । २३० । १८१ ।
"प्रधानो नाम राजा च यक्तं ते श्रोत्रमागतः ।
कुले तस्य समुत्पन्नां सुलभां नाम विद्धि माम् ॥")
प्रधिः, पुं, (प्रधीयते अनेनेति । प्र + धा + "उपसर्गे धोः किः ।" ३ । ३ । ९२ । इति किः ।) नेमिः । इत्यमरः । २ । ८ । ५६ ॥ (यथा, महाभारते । ५ । ५१ । ५८ ।
"मन्ये पर्य्यायधर्म्मोऽयं कालस्यात्यन्तगामिनः ।
चक्रे प्रधिरिवासक्तो नास्य ग्रक्षं पलायितुम् ॥")
प्रधीः, त्रि, (प्रकृष्टा धीर्बुद्धिर्यस्य ।) प्रकृष्टबुद्धियुक्तः । (प्रकृष्टा धीः ।) प्रकृष्टबुद्धौ, स्त्री । इति सुग्धबोधव्याकरणम् ॥
प्रधूपिता, स्त्री, (प्रकर्षेण धूपिता ।) क्षेपिता । सूर्य्यगन्तव्यदिक् । इति मेदिनी । ते, २०७ ॥ प्रकर्षेण तप्ते दीप्ते च त्रि ॥
प्रनष्टः, त्रि, (प्र + नश् + क्तः ।) प्रकर्षेण नाशयुक्तः ।
"कच्चिदज्ञानसम्मूढः प्रनष्टस्ते धनञ्जय ! ॥"
इति श्रीभगवद्गीतायाम् १८ अध्यायः ॥
प्रनिघातनं, क्ली, (प्र + नि + हन् + णिच् + भावे ल्युट् ।) प्रणिघातनम् । वधः । इति हेमचन्द्रः ॥
प्रपञ्चः, पुं, (प्रपञ्चते इति । प्र + पचि व्यक्तीकरणे + घञ् ।) विपर्य्यासः । विस्तरः । इत्यमरः ॥
"विपर्य्यासो वैपरीत्यं भ्रमो वा मायेति स्वामी ॥"
इति भरतः ॥ सञ्चयः । प्रतारणम् । इति मेदिनी । चे, १५ ॥ संसारः । यथा,—
"षाड्गुण्यषड्वक्त्रोत्थं पञ्चवक्त्रादिनिर्गतम् ।
षड़ाम्नायफलोपेतं प्रपञ्चे चातिदुर्लभम् ॥"
इति गुरुपादुकास्तोत्रम् ॥
प्रपञ्चितं, त्रि, (प्रपञ्चते स्मेति । प्र + पचि + क्तः ।) विस्तृतम् । भ्रमयुक्तम् । यथा,—
"आत्मानमेवात्मतया विजानतां
तेनैव जातं निखिलं प्रपञ्चितम् ।
ज्ञानेन भूयोऽपि च तत् प्रलीयते
रज्वामहेर्भोगभवाभवौ यथा ॥"
इति श्रीभागवते । १० । १४ । २५ ॥
प्रपथः, त्रि, (प्रकृष्टः पन्था यत्र ।) शिथिलः । इति भूरिप्रयोगः ॥ (प्रकृष्टः पन्था इति प्रादिसमासः । प्रकृष्टमार्गः । यथा ऋग्वेदे । १० । १७ । ४ ।
"आयुर्विश्वायुः परिपासति त्वा
पूषा त्वा पातु प्रपथे पुरस्तात् ॥")
प्रपथ्या, स्त्री, (प्रकृष्टा पथ्येति प्रादिसमासः ।) हरीतकी । इति राजनिर्घण्टः ॥ (हरीतकीशब्देऽस्या विवरणं ज्ञातव्यम् ॥)
प्रपदं, क्ली, (प्रारब्धं प्रगतं वा पदमिति प्रादिसमासः ।) पादाग्रम् । इत्यमरः । २ । ६ । ७१ ॥ (यथा, मनौ । ६ । २२ ।
"भूमौ विपरिवर्त्तेत तिष्ठेद्वा प्रपदैर्दिनम् ।
स्थानासनाभ्यां विहरेत् सवनेषूपयन्नपः ॥")
प्रपन्नः, त्रि, (प्रपद्यते स्मेति । प्र + पद् + क्तः ।) शरणागतः । यथा,—
"गोविन्दं पुण्डरीकाक्षमनन्तमनघमव्ययम् ।
कैटभघ्न प्रपन्नोऽस्मि किन्नो मृत्युः करिष्यति ॥"
इति मार्कण्डेयपुराणे मृत्युञ्जयो नामैकोनत्रिंशोऽध्यायः ॥
प्रपन्नाड़ः, पुं (प्रपन्नं अलति भूषयतीति । प्रपन्न + अल् + "कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् । ड़लयोरैक्यम् ।) प्रपुन्नाड़ः । चक्रमर्द्दकः । इति रत्नमाला ॥ (विट्तिरस्य चक्रमर्द्दकशब्दे ज्ञेया ॥)
प्रपा, स्त्री, (प्रकर्षेण पिबन्त्यस्यामिति । प्र + पा + "आतश्चोपसर्गे ।" ३ । ३ । १०६ । इत्यङ् । षष्ठ्यर्थे को वा ।) पानीयशालिका । इत्यमरः । २ । २ । ७ ॥ (यथा, मनुः । ८ । ३१६ ।
"यस्तु रज्जुं घटं कूपात्तरेच्छिन्द्याच्च यः प्रपाम् ।
स दण्डं प्राप्नुयान्माषं तच्च तस्मिन् समाहरेत् ॥")
यज्ञशाला । यथा, रामायणे । १ । ७३ । २० ।
"विश्वामित्रं पुरस्कृत्य शुतानन्दश्च धार्म्मिकम् ।
प्रपामध्ये तु विधिवद्वेदिं कृत्वा महातपाः ॥"
"प्रपामध्ये यज्ञशालामध्ये इति कतकः ॥" इति तट्टीकायां रामानुजः ॥)
प्रपाणिः, पुं, (प्रकृष्टः पाणिः । प्रादिसमासः ।) करस्याधोदेशः । पाणितलम् । इति राजनिर्घण्टः ॥ (विषयोऽस्य यथा, "पक्षदशाङ्गुलौ प्रपाणी ।" इति चरके विमानेऽष्टमेऽध्याये ॥)
प्रपातः, पुं, (प्रपतत्यस्मादिति । प्र + पत् + "अकर्त्तरि च कारके संज्ञायाम् ।" ३ । ३ । १९ । इति घञ् ।) निरवलम्बनपर्व्वतादिपार्श्वम् । आरुढ़ इति ख्यातम् । यस्मात् पतने अवस्थानक्रियाविशेषो नास्ति । तत्पर्य्यायः । अवटः २ भृगुः ३ । इत्यमरः । २ । ३ । ४ ॥ (यथा, देवीभागवते । ४ । ७ । ४८ ।
"मधु पश्यति मूढ़ात्मा प्रपातं नैव पश्यति ।
करोति निन्दितं कर्म्म नरकात् न बिभेति च ॥")
निर्झरः । इति मेदिनी । ते, १२७ ॥ (भावे घञ् ।) अभ्यवस्कन्दः । कूर्दनम् । इति हेमचन्द्रः ॥ (उड्डीनगतिविशेषः । यथा, पञ्चतन्त्रे । २ । ५७ । "अथ सम्पातादिकानष्टावुड्डीनगतिविशेषान् वेद्मि । उक्तञ्च ।
सम्पातश्च प्रपातश्च महापातं निपातनम् ।
चक्रं तिर्य्यक् तथा चोर्द्धमष्टमं लवुसञ्चकम् ॥
प्रपातनम् । यथा, सुश्रुते चिकित्सितस्थाने । ४० अध्याये ।
"तत्र नस्यं देयं वाताभिभूते शिरसि इन्द्रलुप्तप्रपातदारुणकर्णशूलकर्णक्ष्वेडशिरोरोगपीनसार्द्धावभेदकालसकपालीपलितप्रादुर्भावदारुणप्रबाधेषु इति ॥")
प्रपायी, [न्] त्रि, (प्रपिबतीति । प्र + पा + णिनिः ।) पानकर्त्ता । रक्षणकर्त्ता । इति सुग्धबोधव्याकरणम् ॥

पलाशकुसुमाभासं तथा पाटलसन्निभम् ।
वैश्यजातिर्भवेत् स्निग्धं वर्णाढ्यं मन्दकान्तिभम् ॥
रक्तोत्पलदलाकारं कठिनं न चिरद्युति ।
विद्रुमं शूद्रजातिः स्याद्दायुवेध्यं तथैव च ॥*॥
रक्तता स्निग्धता दार्ढ्यं चिरद्युतिः सुवर्णता ।
प्रवालानां गुणाः प्रोक्ता धनधान्यकराः पराः ॥
हिमाद्रौ यत्तु संजातं तद्रक्तमतिनिष्ठुरम् ।
तत्र लिप्तो भवेन्निम्बकल्कोऽतिमधुरः स्थितः ।
तस्य धारणमात्रेण विषवेगः प्रशाम्यति ॥*॥
विवर्णता तु खरता प्रवाले दूषणद्वयम् ।
रेखाकाकपदौ बिन्दुर्यथा वज्रेषु दोषकृत् ।
तथा प्रवाले सर्व्वत्र वर्जनीयं विचक्षणैः ॥
रेखा हन्याद्यशो लक्ष्मीमावर्त्तः कुलनाशनः ।
पट्टलो रोगकृत् ख्यातो बिन्दुर्धनविनाशकृत् ॥
त्रासः संजनयेत्त्रासं नौलिका मृत्युकारिणी ।
मूल्यं वृद्धप्रवालस्य रूप्यद्विगुणमुच्यते ॥
धारणेऽप्यत्रापि नियमो जातिभेदेन पूर्ब्ववत् ॥*॥
तथाहि ।
"विरूपजातिं विषमं विवर्णं
खरप्रवालं प्रवहन्ति ये ये ।
ते मृत्युमेवात्मनि वै वहन्ति
सत्यं वदत्येष कृती मुनीन्द्रः ॥"
इति युक्तिकल्पतरौ प्रवालपरीक्षा ॥*॥
(अस्य संशोधनादिकं यथा,—
"कुमार्या तण्डुलीयेन तुल्येन च निषेचयेत् ।
प्रत्येकं सप्तवारांश्च तप्ततप्तानि कृत्स्नशः ॥
मौक्तिकानि प्रवालानि तथा रत्नान्यशेषतः ।
जायादिविधवर्णानि स्त्रियन्ते नात्र संशयः ॥
श्रीदुग्धेन प्रवालञ्च भावयित्वा तु खण्डिकं ।
मधोरपि तक्रसहितं स्यापयेत्तन्निरोधयेत् ।
वृक्षाग्निसन्निपातेन म्रियते प्रहरद्वये ॥
इति प्रवालमारणम् ।"
इति वैद्यकरत्नेन्द्रसंग्रहे मारणमारणाधिकारे॥)
किंशुलयः । (यथा, कुमारे । १ । ४४ ।
"पुष्पं प्रवालोपहितं यदि स्यात्
मुक्ताफलं वा स्फुटविद्रुमस्थम् ।
ततोऽनुकुर्य्याद्विशदस्य तस्या-
स्ताम्रौष्ठपर्य्यस्तरुचः स्मितस्य ॥")
वीणादण्डः । इति मेदिनी । ले, १०७ ॥
प्रवालफलं, क्ली, (प्रवालवद्रक्तं फलं यस्य ।) रक्तचन्दनम् । इति भावप्रकाशः ॥
प्रवालिकः, पुं, (प्रवालोऽस्यास्त्य स्यामिति । प्रवाल + "अत इनिठनौ ।" ५ । २ । ११५ । इति ठन् ।) वीरणाकः । इति राजनिर्घण्टः ॥
प्रबाहुः, पुं, (प्रगतो बाहुमिति ।) कूर्म्मस्याधोभागः । यथा, विष्णुपुराणे ५ । ५ । १६ ।
"सुखं बाहुप्रबाहू च मनः सर्व्वेन्द्रियाणि च ।
रक्षत्यवाङ्गतिश्चास्य तस्य नारायणोऽव्ययः ।"
प्रबाहुकम्, अ, समानकाले । अनूर्द्धे । प्रबाहिकेति पाठान्तरम् । इति कौमुदीटीकातत्त्वबोधिनी ॥
प्रबुद्धः, त्रि, (प्र + बुध + क्तः ।) पण्डितः । प्रफुल्लः । इति हेमचन्द्रः ॥ (यथा, रघुः । १० । ८ ।
"प्रबुद्धपुण्डरीकाक्षं बालातपनिभांशुकम् ।
दिवसं शारदमिव प्रारम्भसुखदर्शनम् ॥")
जागरितः । यथा, भट्टिः । ४ । १४ ।
"प्रातस्तरां पतत्रिभ्यः प्रबुद्धः प्रथमन्दिवम् ।"
प्रबोधः, पुं, (प्र + बुधौ + घञ् अपगमे + भावे घञ् ।) विनिद्रत्वम् । इति हेमचन्द्रः ॥ (यथा, मार्कण्डेये । ८१ । ६७ ।
"प्रबोधश्च जगत्स्वामी नीयतामच्युतो लघु ।
बोधश्च क्रियतामस्य हन्तुमेतौ महासुरौ ॥")
प्रकृष्टज्ञानञ्च । यथा,—
"तावत् सत्यं जगद्भाति प्रबोधे सत्यसङ्गवेत् ॥"
इत्यात्मबोधग्रन्थः ॥
(यथा च रघुः । ५ । ६५ ।
"सुतात्मजाः सवयसः प्रथितप्रबोधं
प्राबोधयन्नुषसि वाग्भिरुदारवाचः ॥")
प्रबोधनं, क्ली, (प्र + बुध + ल्युट् ।) न्यूनपूर्ब्वगन्धस्य चन्दनादेः प्रयत्नविशेषेण पुनः पूर्ब्वसौगन्ध्योत्पादनम् । तत्पर्य्यायः । अनुबोधः २ । इत्यमरभरतौ । बोधजननञ्च ॥ (जागरणम् । यथा, हरिवंशे । १७७ । ७१ ।
"ततस्तूर्य्यनिनादैश्च शृङ्खानाञ्च महास्वनैः ।
प्रबोधनं महाबाहोः क्षणस्याक्रियतालये ॥"
विकाशः । यथा, पञ्चतन्त्रे कथासुखे ।
"तदेतेषां बुद्धिप्रबोधनं यथा भवति तथा केनाप्युपायेनानुष्ठीयतामिति ॥" तथा च ऋतुसंहारे । ५ । १० ।
"सुगन्धिनिःश्वासविकम्पितोत्पलं
मनोहरं कामरतिप्रबोधनम् ॥")
प्रबोधनी, स्त्री, (प्रबोध्यतेऽनयेति । प्र + बुध् + णिच् + ल्युट् + ङीप् ।) दुरालभा । इति राजनिर्घण्टः ॥ (प्रबुध्यते हरिरत्रेति ।) श्रीहरेरुत्थानैकादश्यादिः ।
अथ प्रबोधनीकृत्यम् ।
"शयन्यामिव कान्तायां क्षीराम्भोधिमहोत्सवम् ।
प्रबोध्य कृष्णं संपूज्य विधिनारोहयेद्रथम् ॥"
अथ प्रबोधनीकृत्यनित्यता ।
स्कान्दे तत्रैव ।
"जन्मप्रभृति यत् पुण्यं नरेणोपार्जितं भुवि ।
वृथा भवति तत्सर्व्वं न कृत्वा बोधवासरम् ॥"
अथ प्रबोधनीमाहात्म्यम् । तत्रैव ।
"प्रबोधन्याश्च माहात्म्यं पापघ्नं पुण्यवर्द्धनम् ।
शृणुष्वेदं कृतवतीनां श्रेष्ठं त्वं मुनिसत्तम ! ॥
तावद्गर्জति विप्रेन्द्र ! गङ्गा भागीरथी क्षितौ ।
यावन्नायाति पापघ्नी कार्त्तिके हरिबोधनी ॥
तावद्गर्জन्ति तीर्थानि व्रतसुव्रतराणि च ।
यावत् प्रबोधनीं विष्णोर्न्निधनायाति कार्त्तिके ॥
वाजपेयसहस्राणि अश्वमेधशतानि च ।
एकेनैवोपवासेन प्रबोधन्यां लभेन्नरः ॥
दुर्लभश्चैव दुष्प्रापं त्रैलोक्ये सचराचरे ।
तदपि प्रार्थितं विप्र ! ददाति हरिबोधनी ॥
ऐश्वर्य्यं सन्ततिं प्रज्ञां राज्यञ्च सुखसम्पदः ।
ददात्युपोषिता विप्र ! श्रेयसा हरिबोधनी ।
मेरुमन्दरतुल्यानि पापान्यत्यर्জितान्यपि ।
एकेनैवोपवासेन दहते हरिबोधनी ॥
पृथिव्यां यानि दानानि दत्त्वा यत् फलमाप्नुते ।
एकेनैवोपवासेन ददाति हरिबोधनी ।"
किञ्च ।
"यातः स एव सुकृती कुलं तेनैव पावितम् ।
कार्त्तिके मुनिशार्দ্দूल ! जागर्त्ति येन बोधनी ॥
यानि कानि च तीर्थानि त्रैलोक्ये सम्भवन्ति च ।
तानि तस्य गृहे सम्यक् यः करोति प्रबोधनीम् ॥
सर्व्वं कृत्यं परित्यज्य तुष्यार्थं चक्रपाणिनः ।
उपोष्यैकादशीं सम्यक् कार्त्तिके हरिबोधनीं ॥
किं तस्य बहुभिः क्रतुभिः परलोकप्रदैर्मुने ! ।
सकृच्चोपोषिता येन कार्त्तिके हरिबोधनी ॥
स ज्ञानी स हि योगी च स तपस्वी जितेन्द्रियः ।
स्वर्गमोक्षौ च तस्यास्तामुपास्ते हरिबोधनीम् ॥
विष्णोः प्रियतमा ह्येषा धर्म्मसारस्य दायिनी ।
इमां सकृदुपोष्यैव मुक्तिभागी भवेन्नरः ॥
प्रबोधनीमुपोष्यैव न गर्भे विशते नरः ।
सर्व्वधर्म्मान् परित्यज्य तस्मात् कुर्व्वीत नारद ! ॥
स्नानं दानं तपो होमः सर्व्वदृश्यं जनार्দ্দनम् ।
नरैर्यत् क्रियते विप्र ! प्रबोधन्यां तदक्षयम् ।
महाव्रतमिदं पुत्र ! महापापौघनाशनम् ।
प्रबोधवासरं विष्णोर्विधिवत् सुसमाचरेत् ॥
व्रतेनानेन देवेशं परितोष्य जनार्দ्दनम् ।
विराजयन् दिशो दीप्त्या प्रयाति सुवनं हरेः ॥"
पाद्मे च तत्रैव ।
"दुग्धाब्धिभोगिशयने भगवानन्तो
यस्मिन्दिने स्वपिति चाथ विबुध्यते च ।
तस्मिन्ननन्यमनसामुपवासभाजां
पुंसां ददात्यभिमतं गरुड़ाङ्कधार्य्यः ॥"
वाराहे च ।
"उपवासासमर्थानां सदैव पृथुलोचने ! ।
एका सा द्वादशी पुण्या सर्व्वपापा प्रबोधनी ॥
तस्यामाराध्य विश्वेशं जगतामीश्वरेश्वरम् ।
प्राप्नोति सकलं तद्धि द्वादशद्वादशीव्रतम् ॥
उत्तराङ्गारकयुता यदि सा भवति प्रिये ! ।
तदा सा महती पुण्या कोटिकोटिगुणोत्तरा ॥
श्रवणे बोधने चैव कोटिदाने च सुन्दरि ! ।
उपोष्यैव विधानेन यान्ति मद्भवनं नराः ॥
एकादशी सोमयुता कार्त्तिके मासि भामिनि !
उत्तराभाद्रसंयोगे श्रवणन्तु सा प्रकीर्त्तिता ॥
तस्यां यत् क्रियते भद्रे ! सर्व्वमानन्त्यमश्नुते ।
अनन्तपुण्यफलदा तेनानन्ता स्मृता बुधैः ।"
तत्रैव श्रीनारदसंवादे ।
"अन्यच्च ते प्रवक्ष्यामि गुह्यादगुह्यतरं मुने ! ।
कार्त्तिकेऽमलपक्षे तु साचाद्देकादशी स्मृता ॥
भक्तिप्रदा हरेः सा तु गङ्गा स्यात्सा प्रबोधनी ।
या सा विष्णोः परा शक्तिरव्यक्तानेकरूपिणी ॥
सा चिन्ता मानुषे लोके द्वादशी मुनिपुङ्गव ! ।"
श्रीमधुराचार्य्यश्च विष्णुव्रतः पाद्मे तत्रैव ।
"तावद्गर्জन्ति तीर्थानि वाजिमेधादयो मखाः ।

सप्तद्वीपसमुद्रान्ता रत्नधान्यसमन्विता ।
सशैलवनपुण्याढ्या तेन दत्ता मही भवेत् ॥"
अन्यच्च ।
"बोधनी जगदाधारा कार्त्तिके शुक्लपक्षतः ।
रथस्थो यत्र भगवांस्तुष्टो यच्छति वाञ्छितम् ॥
भजन्ते ये रथारूढं देवं सर्व्वेश्वरेश्वरम् ।
तेषां याचा कृता नृणां कामानिष्टान् प्रयच्छति ॥
श्रीकृष्णरथशोभां ये प्रकुर्व्वन्ति प्रहर्षिताः ।
तेषां मनोरथावाप्तिं यच्छते पुरुषोत्तमः ॥
कृष्णस्य रथशोभां ये प्रकुर्व्वन्ति स्वशक्तितः ।
वाञ्छितं तेभ्यो यच्छन्ति नित्यं सूर्य्यादयो ग्रहाः ॥
कृष्णस्य रथशोभां ये प्रकुर्व्वन्ति सुहर्षिताः ।
पदे पदे तथा पुत्र ! पुण्यं तेषां प्रयागजम् ॥
रथयात्रास्थिते कृष्णे जयेति प्रवदन्ति ये ।
जयेति च पुनर्यै वै शृणु पुण्यं वदाम्यहम् ॥
गङ्गाद्वारे प्रयागे च गङ्गासागरसङ्गमे ॥
वाराणस्यादितीर्थेषु देवानाञ्चैव दर्शने ।
यत् पुण्यं कविभिः प्रोक्तं कार्त्तिकेन च नरेश्वर ! ॥
जयशब्दे कृते विष्णौ रथस्थे तत् फलं लभेत् ।
रथस्थितो नरैर्यस्तु पूजितो धरणीधरः ।
यथालाभोपपन्नैश्च पुष्पैर्भक्त्या समर्चितः ॥
ददाति वाञ्छितान् कामानन्ते च परमं पदम् ।
मङ्गलं ये प्रकुर्व्वन्ति धूपदीपांस्तथा स्तवम् ॥
नैवेद्यं वस्त्रपूजाञ्च भक्त्या नीराजनं हरेः ।
रथारूढस्य कृष्णस्य संग्रामे हरिवासरे ॥
फलं न तस्या ज्ञातं जानाति यदि केशवः ।
ब्रह्मस्वहारी गोघ्नश्च भ्रूणहा ब्रह्मनिन्दकः ॥
महापातकयुक्तोऽपि ब्रह्महा गुरुतल्पगः ।
मद्यपः सर्व्वपापोऽपि कलिकालेन मोहितः ॥
रथाग्रतः पदैकेन सुध्यते सर्व्वपातकैः ॥"
क्रियान्यच्च ।
"रथारूढे महाविष्णौ ये कुर्व्वन्ति जयस्वनम् ।
पूजांचाखिलपापेभ्यो मुक्ता यान्ति हरेः पदम् ॥"
क्रियच ।
"रथस्याकर्षणं पूर्व्वं कुरुते देवनायकः ।
ततः सुराः सिद्धसङ्घा यक्षा गन्धर्व्वमानवाः ॥
इत्यञ्च रथयात्राया विधिर्यत्नः स्वतोऽभवत् ।
तथापि कथितत्वान्नो विस्तरोऽपि वितन्यते ॥"

अथ रथयात्राविधिः ।

"श्रीकृष्णे तु रथारूढे कृत्वा जयजयध्वनिम् ।
निष्क्राम्य च महापूजामाप्नोतीप्सितानि कीर्त्तयेन ॥"

तथा च विष्णुधर्म्मे ।

"वक्त्रं नीलोत्पलरुचिरमनुकुरुलाभ्यां सुरुग्रं
चन्द्राकारं रचिततिलकं चन्दनेनाचतैश्च ।
गत्वा लोलां जननसुखकरीं प्रेक्षणेनान्दोलं
पश्यावासो मनसनुरसा धारयन् पातु विष्णुः ॥
शुक्लः शैलादिवाहैर्मधुरतररवत्किङ्किणीजालमालै-
रत्नैर्नीलोत्पलाभैरविरतमधिभिः संभृतैश्चैव हारैः ।
हेमैः कुम्भैः पताकाश्चितवरवचिभिर्भूषितः केतुसङ्घै-
श्चत्रैर्लक्ष्मीप्रबन्धो दुरितहरहरेः पातु नेत्रो रथो वः ॥
मोदन्तां सुजना ह्यनिन्दितधियः सत्साखिलो-
पद्रवाः
स्वस्थाः सन्तु सुखिरवह्नयः प्रतिहतामित्रा रमन्तां सुखम् ।
रे दैत्या गिरिगह्वराणि गहनान्यासु व्रजध्वं भया-
द्दैत्यारिर्भगवानयं यदुपतिर्यानं समारोहति ॥
पलायध्वं पलायध्वं रे रे दितिजदानवाः ।
संरक्षणाय लोकानां रथारूढो हृषीकेशरी ॥
ततो विचित्रगद्यानि पठित्वाथ महाप्रभोः ।
महाप्रसादमालाश्च स्वीकुर्य्यात् परया मुदा ॥"
तत्माहात्म्यमुक्तम् ।
"भक्त्या गृह्णाति यो मालां वैष्णवीं मङ्गलाश्रयाम् ।
न तेषां दुर्लभं किञ्चिदिह लोके परत्र च ॥
तस्मात् सर्व्वप्रयत्नेन सर्व्वकामसमृद्धये ।
मालामेतां प्रगृह्णीयात् सौख्यमोक्षप्रदायिनीम् ॥"

इति ।

"संचिन्त्याराध्यमाणश्च श्रीप्रह्लादादिभी रथम् ।
आरुह्य प्रेरयन् पूर्य्यां श्रामयेद्वैष्णवैः सह ॥"
तथा च भविष्योत्तरे तत्रैव ।
"गृह्यमानैर्भागवतैर्गीतवादित्रनिस्वनैः ।
भ्रामयेत् स्यन्दनं विष्णोः पुरमध्ये समन्ततः ॥"
किञ्च ।
"प्रबोधवासरे प्राप्ते कार्त्तिके पाण्डुनन्दन ! ।
देवालयेषु सर्व्वेषु पुरमध्ये समन्ततः ॥
भ्रामयेत्सूर्य्यनिर्घोषे रथस्थं धरणीधरम् ॥"
किञ्च ।
"रथागमे शुकुन्दस्य पुरशोभान्तु कारयेत् ।
सर्व्वतो रमणीयन्तु पताकैरुपशोभितम् ॥
तोरणैर्वहुभिर्युक्तै रम्यास्तम्भैश्च शोभितम् ।
स्थाने स्थाने महीपाल ! कर्त्तव्यं पुण्यसंयुतम् ॥
विचित्ररथशोभा च कर्त्तव्या भावितैर्नरैरिति ॥
रथेन गच्छन् भगवानुभयोरखिलेक्षणैः ।
स्वस्मगेहागतस्यापि नास्य दोषो महान् भवेत् ॥" ७ ॥

अथ रथानुगमनविधिः । तत्रैव ।

"रथेन सह गच्छन्ति पार्श्वतः पृष्ठतोऽग्रतः ।
विष्णुनैव समाः सर्व्वे भवन्ति यमचाक्षयाः ॥
रथस्थं ये न गच्छन्ति यममार्गं जनार्द्दनम् ।
विप्राध्ययनसम्पन्ना भवन्ति यमपाशधमाः ॥"
किञ्च ।
"येषां गृहागतो याति रथस्थो मधुसूदनः ।
पूजा तैस्तैः प्रकर्त्तव्या वित्तशाठ्यविवर्ज्जितैः ॥
अनर्चितो यदा याति गृहाद्यस्य महीधरः ।
पितरस्तस्य विमुखा वर्षाणां दश पञ्च च ॥
यः पुनः कुरुते पूजां गृह्यमाणे तु माधवे ।
वसते श्वेतद्वीपे तु यावदिन्द्राश्चतुर्दश ॥"

अन्यच्च ।
"नानुव्रजति यो मोहाद्व्रजन्तं जगदीश्वरम् ।
ज्ञानाग्निदग्धकर्म्मापि स भवेद्व्रजराजवत् ॥"

इति ॥

"अथ स्वमन्दिरं नीत्वा पूर्व्ववत् पूजयेत् प्रभुम् ।
रात्रौ जागरणं कुर्य्याद्विधिवद्वैष्णवैः समम् ॥"
अथ प्रबोधनीजागरणमाहात्म्यम् ।
स्कान्दे तत्रैव ।
"पूर्व्वजन्मसहस्रेषु पापं यत् समुपार्ज्जितम् ।
जागरेण प्रबोधन्यां दह्यते तूलराशिवत् ॥
कृत्वापि पातकं घोरं ब्रह्महत्यादिकं नरः ।
कृत्वा जागरणं विष्णोर्धूतपापो भवेन्नुने ! ॥
कर्म्मणा मनसा वाचा पापं यत् समुपार्ज्जितम् ।
क्षालयेत्तच्च गोविन्दः प्रबोधन्यान्तु जागरे ॥
दुष्प्राप्यं यत् फलं विप्रैरश्वमेधादिभिर्मखैः ।
प्राप्यते तत् सुखेनैव प्रबोधन्यान्तु जागरे ॥
आजन्म सर्व्वतीर्थानि दत्त्वा गां काञ्चनीं महीम् ।
न तत् फलमवाप्नोति यत् कृत्वा जागरं हरेः ॥
चन्द्रसूर्य्योपरागे तु यत् फलं परिकीर्त्तितम् ।
तत्सहस्रगुणं पुण्यं प्रबोधन्यान्तु जागरे ॥
स्नानं दानं तपो होमः स्वाध्यायस्तार्च्चनं हरेः ।
तत् सर्व्वं कोटिगुणितं प्रबोधन्यान्तु जागरे ॥
समतीतं भविष्यञ्च वर्त्तमानं कुलायुतम् ।
विष्णुलोकं नयत्याशु जागरेण प्रबोधनी ॥
पतन्ति पितरो हृष्टा विष्णुलोकमसंशयम् ।
विमुक्ता नारकैर्दुःखैः कर्त्तुः कृष्णप्रजागरम् ॥
भार्य्यापत्ये तु ये जाता मातृत पितृतस्तथा ।
तारयेन्नात्र सन्देहः प्रबोधन्यां तु जागरे ॥"
किञ्च ।
"फलैर्नानाविधैर्देयैः प्रबोधन्यान्तु जागरे ।
घृते तोयं समादाय अर्घं दद्यात्जनार्द्दने ॥
यत् फलं सर्व्वदानेषु सर्व्वतीर्थेषु यत् फलम् ।
तत् सर्व्वं कोटिगुणितं दत्तार्घे बोधवासरे ॥"
पाद्मे च तत्रैव ।
"अन्यत्रापि प्रिया विष्णोर्जागरे स्यात् प्रबोधनी ।
किं पुनर्मथुरायां सा ततो वै जन्मसञ्ज्ञिनि ॥
एकैवैकादशी कृष्णजन्मगेहे कृता नरैः ।
ततोऽधिकं न कर्त्तव्यं लोके किञ्चन विद्यते ॥
रात्रौ जागरणं तत्र प्रीत्या कुर्व्वन्ति ये नराः ।
संसारे मोहसम्प्राप्ते सदा जाग्रति जाग्रति ॥"
किञ्च तत्रैव श्रीराधिकोपाख्यानान्ते ।

"सुबोधनीजागरपुण्यवैभवात्
प्रसन्न दृष्टो विधिवत्कृतस्तुतः ।
चकार रासोत्सवनर्त्तनं सह
वृन्दावनेश्वर्याभिरीश राधया ॥
सा गृह्यमाणाङ्गनगोपरूपिणा
कृष्णेन जन्मान्तरवाञ्छितेन ।
राधा महाप्रेमभवाकुलेन्द्रिया
निर्योऽन्यलोकं कथया कृतार्थताम् ॥

तस्मात् सुबोधनीं कृत्वा रात्रौ कृत्वा च जागरम् ।
सुप्रीतियुतं हरिं दृष्ट्वा का भीः संसारणा हिता ॥

प्रभा, स्त्री, (प्रकर्षेण भातीति। प्र+भा+"आतश्चोपसर्गे।" ३। ३। १०६। इति अङ्।) कुबेरपुरी। इति हेमचन्द्र:। २। २०४॥ (प्र+भा+भावे अङ्।) दीप्ति:। तत्पर्य्याय:। रोचि: २ द्युति: ३ श्रीचि: ४ विभा ५ ओज:६ भा: ७ रुचि: ८ विभा ९ आलोक: १० प्रकाश: ११ तेज: १२ रुक् १३। इति राजनिर्घण्ट:॥ * ॥ (यथा, रामायणे। २।३६।१८। "यराजयत वैदेही वेश्म तत् सुविभूषिता। उद्यतोऽंशुमत: काले खं प्रभेव विवस्वत:॥" तथा च महाभारते। ४। १३। १७। "रतीव रूपिणी किन्त्वमनङ्गाङ्गविहारिणी। अतीव भ्राजसे सुभ्रु! प्रभेवेन्दोरनुत्तमा॥") गोपीविशेष:। यथा,— "दृष्टस्त्वं प्रभया गोप्या युक्तो वृन्दावने वने। सद्योमनुग्रह्मचेण तिरोधानं कृतं त्वया॥ प्रभा देहं परित्यज्य जगाम सूर्य्यमण्डलम्। ततस्तस्या: शरीरच्च तीव्रं तेजो बभूव ह॥ संविभज्य त्वया दत्तं प्रेमगान्धु रुदता पुरा। विस्मृत्य चक्षुषोर्लोहं लज्जया मद्भयेन च॥ हुताशनाय किञ्चिच्च नृपेभ्यश्चापि किञ्चन। किञ्चित् पुण्यसिंहेभ्यो देवेभ्यश्चापि किञ्चन॥ किञ्चिद्दस्युजनेभ्यश्च नागेभ्यश्चापि किञ्चन। ब्राह्मणेभ्यो मुनिभ्यश्च तपस्विभ्यश्च किञ्चन॥ स्त्रीभ्य: सौभाग्ययुक्ताभ्यो यशस्विभ्यश्च किञ्चन। तच्च दत्त्वा तु सर्व्वेभ्य: पूर्व्वं रोदितुमुद्यत:॥" इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे। ११। ५७—६२॥ दुर्गा। यथा,— "यमस्य भगिनी जाता यमुना तेन सा मता। प्रभा प्रसादशीलत्वात् द्योतत्ता चन्द्रार्क- मालिनी॥" इति देवीपुराणे ४५ अध्याय:॥ * ॥ (इयं हि सूर्य्यबिम्बे रतनाम्ना कीर्त्यते। यथा, देवीभागवते। ७। ३०। ८२। "देवलोके तथेन्द्राणी ब्रह्मास्येषु सरस्वती। सूर्य्यबिम्बे प्रभा नाम मातृणां वैष्णवी मता॥") सूर्य्यपत्नी। यथा,— सूत उवाच। "विवस्वान् कश्यपात् पूर्व्वमदित्यामभवत् पुरा। तस्य पत्नीत्रयञ्चासन् संज्ञा राज्ञी प्रभा तथा॥ रेवतस्य सुता राज्ञी रेवन्तं सुषुवे सुतम्। प्रभा प्रभावं सुषुवे त्वाष्ट्री संज्ञा तथा मनुम्॥" इति मात्स्ये। १२। २—३॥ (द्वादशाक्षरवृत्तिविशेष:। तल्लक्षणं यथा, वृत्तरत्नाकरटीकायाम्। "वसुयुगविरतिर्नगौ रौ प्रभा॥") प्रभाकर:, पुं, (प्रभां करोतीति। कृ+"दिवाविभानिशाप्रभेति।" ३। २। २१। इति ट:।) सूर्य्य:। (यथा, रघौ। १०। ७१। "शशाङ्करश्मधूमत्वात् प्रभुत्वात् प्रभाकर:। रघोरप्रलयावासामपविघ्नमुपाविश॥") अग्नि:। चन्द्र:। (यथा, महाभारते। ७।६६।५। "तावतीत्य रथानीकं विमुक्तौ पुरुषर्षभौ। ददृशाते यथा राहोरास्यान्मुक्तौ प्रभाकरौ॥" "प्रभाकरौ चन्द्रसूर्य्यौ॥") वसुद्र:। इति शब्दरत्नावली॥ अर्कवृक्ष:। इत्यमर:। १।३।७८॥ (अष्टममन्वन्तरे देवगणभेद:। यथा, मार्कण्डेयपुराणे। ८०। ६। "तपस्तप्यञ्च शुक्रञ्च द्युतिर्ज्योति: प्रभाकर:॥" ऋचिवंशीयमुनिविशेष:। यथा, हरिवंशे। ३१। १०। "ऋचिर्जानोऽचिवंशे तु नासां भर्त्ता प्रभाकर:। भद्रायां जनयामास सुतसोमं यशस्विनम्॥" नाभभेद:। यथा, महाभारते। १। ३५। १५। "कुठर: कुञ्जरश्चैव तथा नाग: प्रभाकर:॥" मीमांसकप्रभेद:। स च गुरुत्वेन प्रसिद्ध:। तस्य मतं दर्शनशास्त्रादौ प्राभाकरमतमिति प्रसिद्धम्। यदुक्तं वेदान्तसारे।५३। "प्राभाकरतार्किकौ तु 'अन्योऽन्तरात्मा आनन्दमय' इत्यादिश्रुते: सुषुप्तौ बुद्ध्यादीनामज्ञाने लयदर्शनात् अहमज्ञोऽहं ज्ञानीत्यायनुभवाच्च अज्ञानमात्मेति वदत:॥" क्ली, कुशद्वीपस्थवर्षभेद:। यथा, मात्स्ये। १२१। ६८। "महिषं महिषस्यापि पुनश्चापि प्रभाकरम्॥") प्रभाकीट:, पुं. (प्रभान्वित: कीट इति मध्यलोपी समास:।) खद्योत:। इति राजनिर्घण्ट:॥ प्रभाञ्जन:, पुं, (शोभाञ्जन:। इति हेमचन्द्र:॥ प्रभातं, क्ली, (प्रकर्षेण भातुं प्रवृत्तमिति। प्र+भा+आदिकर्म्मणि क्त:। यद्वा, प्रकृष्टं भातं दीप्तिरत्रेति।) प्रात:काल:। तत्पर्य्याय:। प्रत्यूष: २ अहर्मुखम् ३ कल्यम् ४ उष: ५ प्रत्युष: ६। इत्यमर:। १। ४। ३॥ दिनादि: ७ निशान्तम् ८ युग्मम् ९ प्रगे १० प्राह्णम् ११। इति राजनिर्घण्ट:॥ गोस: १२ गोसङ्ग: १३ ऊष: १४ ऊषकम् १५ उषा १६ ऊषा १७ विभातम् १८। इति शब्दरत्नावली॥ * ॥ (यथा,— "प्रभाते य: स्मरेन्नित्यं दुर्गा दुर्गाक्षरद्वयम्। आपदस्तस्य नश्यन्ति तम: सूर्य्योदये यथा॥" इति धर्म्मशास्त्रम्॥) तत्र दर्शनीया यथा,— "वैद्य: पुरोहितो मन्त्री देवज्ञोऽथ चतुर्थक:। प्रभातकाले द्रष्टव्यो नित्यं स्वश्रियमिच्छता॥" इति राजवल्लभ:॥ प्रभाव:, पुं, (प्र+भू+घञ्।) कोषदण्डजनेज:। तत्पर्य्याय:। प्रताप: २। इत्यमर:। २।८।२०॥ "कोषो धनं दण्डो दम: तद्धेतुत्वात् सैन्यमपि दण्ड: ताभ्यां यत्तेजो जायते स प्रताप: प्रभावश्च कथ्यते।" इति भरत:॥ शक्ति:। (यथा,— "प्रभावती यथा धात्री लक्ष्मणस्य रसादिभि:। समापि कुरुते दोषचित्तयस्य विनाशनम॥ क्वचित्तु केवलं द्रव्यं कर्म्म कुर्य्यात् प्रभावत:। स्वरं हन्ति शिरोबुद्ध्या गण्डदेवी घटा यथा॥" इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥) तेज:। इति हेमचन्द्र:। ३। ४०४॥ (यथा, रामायणे। २। २३। ३८। "अद्य मेरुस्वप्रभावस्य प्रभाव: प्रभविष्यति। राज्यस्याप्रसृतां कर्त्तुं प्रभुत्वञ्च तव प्रभो!॥") भ्रान्ति:। इति मेदिनी। वे, ४०॥ (प्रभागर्भजात: सूर्य्यपुत्र:। इति मात्स्ये। ११। ३॥ कलावत्यां जात: स्वरोचिषो मनो: पुत्रविशेष:। यथा, मार्कण्डेये। ६६। ५। "ततश्च जज्ञिरे तस्य त्रय: पुत्रा: स्वरोचिष:। विजयो मेरुगर्भश्च प्रभावश्च महाबल:॥") प्रभावज:, पुं, (प्रभावात् जायते इति। जन्+ड:।) शुक्तिविशेष:। प्रभावो वीर्य्याधिक्यं तज्जात:। इत्यमरटीकासारसुन्दरी॥ प्रभुत्वसाधकत्वात् दण्डकोषौ प्रभुशक्ति:। इति भरत:॥ (प्रभावज्ञाते, त्रि। यथा,— "रसादिसाम्ये यत् कर्म्म विशिष्टं तत् प्रभावजम्।" इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥) प्रभावान्, [त्] त्रि, (प्रभा अस्त्यस्येति। प्रभा+मतुप् मस्य व:।) प्रभायुक्त:। प्रभाशब्दादस्त्यर्थे वतुप्रत्ययेन निष्पन्नम्॥ प्रभावती, स्त्री, (प्रभावत्+ङीप्।) मालिनामकोनविंशवृत्तार्हमाता। गणानां बीजा। इति हेमचन्द्र:। २। २०३॥ त्रयोदशाक्षरच्छन्द:। यथा, श्रुतबोधे। ३। २। "यस्यां प्रिये! प्रथमकमत्रयं तुर्य्यन्तथा गुरु नवमं दशान्तिमम्। सान्त्यं भवेदयतिरपि चेद्वृगग्रहै: सालक्ष्यतामगतरते! प्रभावती॥" (सूर्य्यपत्नी। यथा, महाभारते। ५। ११७।८। "रेमे स तस्यां राजर्षि: प्रभावत्यां यथा रवि:॥" कुमारानुचरमातृगणविशेष:। यथा, तत्रैव। ९। ४६। ३। "प्रभावती विशालाक्षी पलिता गोनसी तथा॥" वज्रनाभासुरस्य कन्या। सा तु प्रद्युम्नेन विवाहिता। यथा, हरिवंशे। १४८। ४१। "तस्यास्ति कन्यारत्नं हि त्रैलोक्यातिशयं शुभम्। नाम्ना प्रभावती नाम चन्द्राभेव प्रभावती॥" अङ्गेश्वरचित्ररथस्य स्वनामख्याता भार्य्या। यथा, महाभारते। १३। ४२। ८। "तस्या हि भगिनी तात! श्रेष्ठा गान्धा प्रभावती। भार्य्या चित्ररथस्यास्य बभूवाङ्गेश्वरस्य च॥") प्रभाष:, पुं, (प्रभाषते य: स:। प्र+भाष्+अच्।) वसुभेद:। इति जटाधर:। (यथा, महाभारते। १। ६६। १८। "प्रत्यूषश्च प्रभासश्च वसवोऽष्टाविति स्मृता:॥" प्र+भाष्+भावे घञ्।) प्रकृष्टकथनञ्च॥ प्रभास:, पुं, (प्रभासते शोभते इति। प्र+भास्+अच्।) सोमतीर्थम्। इति त्रिकाण्डशेष:॥ (यथा, महाभारते। ३। ८२। ५९—५७। "ततो गच्छेत राजेन्द्र! प्रभासं तीर्थमुत्तमम्। तत्र सन्निहितो नित्यं स्वयमेव हुताशन:। देवतानां मुखं यौनि: पवित्राणां पवित्रकृत्॥

तस्मिंस्तीर्थे नरः स्नात्वा शुचिः प्रयतमानसः ।
अग्निष्टोमातिरात्राभ्यां फलं प्राप्नोति मानवः ॥")
नैनमाराधिपविशेयः । इति हेमचन्द्रः । १।३२ ॥
(वनभेदः । यथा, मात्स्ये । ५ । २१ ।
"प्रत्यूषश्च प्रभासश्च वसवोऽष्टौ प्रकीर्त्तिताः ॥")
प्रभिन्नः, पुं. (प्र + भिद् + क्त ।) उत्तमद्विपः ।
तत्पर्य्यायः । गर्ज्जितः २ मत्तः ३ । इत्यमरः ।
२ । ८ । ३६ ॥ म्लानः ४ मदकलः ५ । इति
राजनिर्घण्टः ॥ (यथा, रामायणे । २।१५।१६ ।
"ततो महामेघमहीधराभं
प्रभिन्नमत्यङ्कुशमत्यशक्तम् ।
रामोपयाणं रुचिरं ददर्श
भ्रातुर्जयं नागमुदग्रकायम् ॥"
तथा च महाभारते । ७ । २७ । २० ।
"यथा नलवनं कृत्स्नं प्रभिन्नः षष्टिहायनः ।
मृद्नीयात्तद्वदायत्तः पार्थोऽन्यद्दानवं बलम् ॥")
प्रकृष्टभेदविशिष्टे, त्रि॥ (यथा, ऋतुसंहारे । २।५।
"प्रभिन्नवैदूर्य्यनिभैस्तृणाङ्कुरैः
समाचिता प्रोत्थितकन्दलीदलैः ॥")
प्रभुः, पुं, (प्रभवतीति । प्र + भू + डुः ।) विष्णुः ।
इति शब्दरत्नावली ॥ (शिवः । यथा, महाभारते । १३ । १७ । ३१ ।
"हरश्च हरिकाक्षश्च सर्व्वभूतहरः प्रभुः ॥")
पारदः । इति राजनिर्घण्टः ॥ शब्दः । इति
धरणिः ॥
प्रभुः, त्रि, (प्रभवतीति । प्र + भू + "विप्रसंभ्यो
डुमंज्ञायाम् ।" ३ । २ । १८० । इति डुः ।)
अधिपतिः । तत्पर्य्यायः । स्वामी २ ईश्वरः ३
पतिः ४ इंशिता ५ अधिभूः ६ नायकः ७
नेता ८ परिवृढः ९ अधिपः १० । इत्यमरः ।
३ । १ । ११ ॥ पालकः १२ । इति शब्दरत्नावली ॥ (यथा, भगवद्गीतायाम् । ५ । १४ ।
"न कर्त्तृत्वं न कर्म्माणि लोकस्य सृजति प्रभुः ।
न कर्म्मफलसंयोगं स्वभावस्तु प्रवर्त्तते ॥")
नित्यः । इति धरणिः ॥ शक्तः । इति नानार्थरत्नमाला ॥ (यथा, कुमारे । ३ । ४० ।
"आत्मेश्वराणां न हि जातु विघ्नाः
समाधिभेदप्रभवो भवन्ति ॥"
श्रेष्ठः । यथा, मनौ । १० । ३ ।
"वैश्येष्वात् प्रकृतिश्रेष्ठात् नियमस्य च धारणात् ।
संस्कारस्य विशेषाच्च वर्णानां ब्राह्मणः प्रभुः ॥")
प्रभुता, स्त्री, (प्रभोर्भावः । प्रभु + तल् ।) प्रभुत्वम् । ऐश्वर्य्यम् । इति हेमचन्द्रः ॥ ४ । २०० ॥
प्रभुभक्तः, पुं, (प्रभौ भक्तः ।) उत्तमघोटकः । यथा,
"प्रभुभक्ता भक्तिमाश्च कुलीनेषु कुलोत्कटाः ॥"
इति शब्दचन्द्रिका ॥
भास्वद्वरे, त्रि । यथा, भागवते ।
"यद्यप्यसौ स्वभवनेषु निरीह आत्मा
प्रत्यग्धिताखिलसुखो भगवान् स्वयंदृक् ।
प्रेम्णा भक्तिषु हरेः प्रतनोति नित्यं
ह्यानन्दबाष्पकलिलाकुलनेत्रनलिनः ॥"
प्रभूतं, त्रि, (प्र + भू + क्तः ।) प्रचुरम् । इत्यमरः । ३ । १ । ९३ ॥ (यथा, कुमारविनाशे । १।८।
"तत्राभूदभिभूतप्रभूतमायानिकायप्रभवैः ।
मरुत्कलानिलयानां युवभिः श्रीमूलदेवाख्यः ॥")
उन्नतम् । इति मेदिनी । ते, १२१ ॥ भूतम् ।
उन्नतम् । इति शब्दरत्नावली ॥
प्रभूष्णुः, त्रि, (प्रभवतीति । प्र + भू + "ग्लाजिस्थश्च गुस्नुः ।" ३ । २ । १३८ । इति गस्नुः ।)
क्षमः । शक्तः । इति हेमचन्द्रः । ३ । २५५ ॥
प्रभृति, व्य (प्र + भृ + क्तिच् ।) तदादिः । यथा,
"ततःप्रभृति पितरः पिण्डनैर्व्राह्मणैर्लेभिरे ॥"
इति निष्पादितत्वम् ॥
प्रभेदः, पुं, (प्र + भिद् + घञ् ।) भेदः । तत्पर्य्यायः । प्रकारः २ विशेषः ३ भिदा ४ अन्तरम् ५ । इति जटाधरः ॥ (यथा, सुश्रुते निदानस्थाने १० अध्याये ।
"पित्तात्मको द्रुतगतिर्व्वरदाहपाक-
स्फोटप्रभेदबहुलः क्षतजप्रकाशः ॥"
स्फोटनम् । यथा, रघुः । ३ । ३० ।
"बभूव तेनातितरां सुदुःसहः
क्षतप्रभेदेन करीव पार्थिवः ॥")
प्रभ्रष्टकं, क्ली, (प्र + भ्रंश् + क्तः । ततः स्वार्थे कन् ।) शिखालम्बिमालम् । चूड़ानो लम्बमानमाल्यम् । इत्यमरभरतौ । २ । ६ । १२५ ॥
प्रमत्तः, त्रि, (प्रमाद्यति स्मेति । प्र + मद् + गत्यर्थेभ्यः क्तः । नञ्यास्येति नञ्याभावः ।) प्रमादी । अनवधानतायुक्तः । यथा,—
"मत्तं प्रमत्तसुप्तं सुप्तं बालं स्त्रियं जडम् ।
प्रपन्नं विरथं भीतं न रिपुं घ्नन्ति धर्म्मवित् ॥"
इति श्रीभागवते १ स्कन्धे ७ अध्यायः ॥
"मत्तं मद्यादिना । प्रमत्तमनवहितम् । उन्मत्तं ग्रहवातादिना । जडं अनुद्यमम् । प्रपन्नं शरणागतम् । विरथं भग्नरथम् ।" इति श्रीधरस्वामी ॥
अपरप्रमत्तो यथा,—
"सन्ध्यापूजाविहीनश्च प्रमत्तः पतितः स्मृतः ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २७ अध्यायः ॥
स च राज्ञा नाशनीयस्तिथ्यः । यथा —
"मत्तोन्मत्तप्रमत्तार्त्तभृत्याद्राज्ञानवेक्षितः ॥"
इति मिताक्षरा ॥
प्रमथः, पुं, (प्रमथतीति । प्र + मथ् + अच् ।)
घोटकः । शिवपारिषदः । इति शब्दरत्नावली ॥ न च षट्त्रिंशत्कोटिसंख्यकः । यथा,
"षट्त्रिंशत्तु सहस्राणि प्रमथा द्विजसत्तमाः ।
तत्रैकत्र सहस्राणि भागे षोडश संस्थिताः ॥
नानारूपधरा ये वै जटाचन्द्रार्द्धमण्डिताः ।
ते सर्व्वे सकलैश्वर्य्ययुक्ता ध्यानपरायणाः ॥
योगिनो मदमात्सर्य्यदम्भाहङ्कारवर्ज्जिताः ।
शीलदया महाभागाः शम्भोः प्रीतिकराः परा ॥
न ते परिग्रहं रागं काङ्क्षन्ति स्म कदाचन ।
संसारविमुखाः सर्व्वे यतयो योगतत्परा ॥
ध्यानाख्यं महादेवं परित्यज्य व्रतव्रताः ।
हत्वा परिषदं गत्वा तिष्ठन्ति विगतस्पृहाः ॥
यदेव परमं ज्योतिश्चिन्मात्रमविकारतः ।

तदेव ते पारिषदाः सर्व्वे संवेष्टयन्ति तम् ॥
ते षोडश समाख्याताः कोटयो वै व्रतव्रताः ।
निष्टप्तपादसारूप्या अग्निमाद्यिसमायुताः ॥
अपरे कामिनः शम्भोः सुगर्व्वसचिवाः स्मृताः ।
विचित्ररूपाभरणा जटाचन्द्रार्द्धमण्डिताः ॥
हरस्य तुल्या रूपेण विशदा वृषभध्वजाः ।
उमामङ्गलरूपाभिः रमाभिः समागताः ॥
विचित्रमाल्याभरणा दिव्यवस्त्रगन्धभूषणाः ।
उमासहायं क्रीड़न्तमनुगच्छन्ति भूषिताः ।
भङ्गाक्षवेशाभरणा अष्टौ ते कोटयो गणाः ॥
अर्द्धनारीश्वराख्ये तु अर्द्धनारीश्वरं हरम् ।
अनुयान्ति महाभागास्तुल्यरूपा हरस्य ये ॥
उमासहायं हि यदा स्मरते स सुखं हरः ।
अर्द्धनारीश्वरीभागस्तु द्वारपाला भवन्ति ते ॥
व्याघ्रचर्म्मावृतं शक्तमनुगच्छन्ति नित्यशः ।
ध्यानस्थं परिवर्त्तन्ति नलिलादिभिरीश्वरम् ॥
नागाश्चस्रग्धराः शम्भोर्गलात्तु प्रमथाः स्मृताः ।
प्रमथन्ति च वृद्धेषु युद्धमार्गान्महाबलान् ।
ते वै महाबलाः शूराः संख्यया नवकोटयः ॥
अपरे गायनास्तालनृत्तवाद्यप्रगायकाः ।
नृत्यन्ति वाद्यं कुर्व्वन्तो गायन्ति मधुरस्वरम् ॥
नानारूपधरास्ते वै संख्यया कोटयास्त्रयः ।
सततं चानुगच्छन्ति विचरन्तं महेश्वरम् ॥
सर्व्वे मायाविनः शूराः सर्व्वे शास्त्रार्थपारगाः ।
सर्व्वे सर्व्वत्र दक्षाश्च सर्व्वे सर्व्वत्रगाः सदा ॥
सृष्टीनां सञ्चयं गत्वा क्रान्ति पुनः पुनः ।
अणिमाद्यष्टैश्वर्य्ययुक्तास्ते वै महाबलाः ॥
अपरे नटनामानो जटाचन्द्रार्द्धमण्डिताः ।
देवेन्द्रस्य नियोगेन वर्त्तन्ते त्रिदिवे सदा ॥
तेषां संख्या चैककोटिस्ते सर्व्वे बलवत्तराः ।
कुर्व्वन्ति हि सदा सेवां हरस्य सततं गणाः ॥
विनयन्ति च पापिष्ठान् धर्म्मिष्ठान् पालयन्ति च ।
अनुगृह्णन्ति सततं हृतपापानुपव्रतान् ॥
विघ्नांश्च सततं घ्नन्ति योगिनां प्रयतात्मनाम् ।
षट्त्रिंशत् कोटयश्चैते हरस्य सकला गणाः ॥
वराहगणनाथार्थे हिताय जगतां तथा ।
शङ्करस्य च सेवार्थे समुत्पन्ना इमे गणाः ॥
वराहस्य गणान् दृष्ट्वा नरसिंहं तथा हरिम् ।
स्वयं सरभरूपः सन् ध्यायन् नादं यतोऽकरोत् ॥
तच्छीकरानुगा जातास्तेषां बहुरूपता ।
क्रूरदृष्ट्या क्रूरमुष्टेः क्रूरकर्त्तेरिमान् गणान् ॥
वराहस्य हृतेर्व्वेद यतः प्रोक्तं कपर्द्दिना ।
ततस्ते क्रूरकर्म्माणः प्रजाबाधभयङ्कराः ॥
न सदा क्रूरकर्म्माणि ते कुर्व्वन्ति महीतले ।
दृष्टिमात्रेण ते क्रूराः क्रूरकृत्याश्च कार्य्यतः ॥
फलं जलं तथा पुष्पं पत्रं मूलं तथैव च ।
निवेदितानि भुञ्जन्ति यदभक्तैर्नरादिभिः ॥
व्याकृत्यापि च भुञ्जन्ति पत्रं पुष्पादिकञ्च यत् ।
भवेद्भक्तस्य यद्भोज्यं तद्भोक्ष्यन्ति महीतले ॥
यामिषं नापि चाश्नन्ति हित्वा चैवचतुर्द्दशीम् ।
तत्रामिषं हरो भुङ्क्ते चतुर्द्दश्यां मघोः सदा ॥

ततः सर्व्वे गणास्तत्र मुह्यन्ते प्रलयान्यपि ।
हृते वराहरूपेण गणे भर्गमाराध्य ते गणाः ।
चतुर्भागाः स्वयं भूत्वा भूतं कर्म्मेति वै जगुः ॥
भूतत्वमभवत्तेषां चतुर्भागवतां तदा ।
वचनात् पद्मजातस्य भूतग्रामास्ततो मताः ॥
यो लोकविदितः पूर्व्वं भूतग्रामश्चतुर्विधः ।
यतस्तेभ्योऽधिका यत्नैस्तद्दृष्टग्राम उच्यते ॥
इति वः सर्व्वमाख्यातं भूताः शृण्वन्तु गणा यथा ।
यदाहारा यदाकारा यत्प्रलयास्ते महौजसः ॥
य इदं शृणुयान्नित्यमाख्यानं योगमुत्तमम् ।
स दीर्घायुः सदोत्साही योगयुक्तश्च जायते ॥"
इति कालिकापुराणे पारिषदोत्पत्तिर्नाम २६ अध्यायः ॥ (धृतराष्ट्रपुत्राणामन्यतमः । यथा, महाभारते । १ । ११७ । १२ ।
"प्रमथश्च प्रमाथी च दीर्घरोमश्च वीर्य्यवान् ॥")

प्रमथनं, क्ली, (प्र + मथ + भावे ल्युट् ।) वधः । इत्यमरः । २ । ८ । ११५ ॥ (यथा, रामायणे । १ । ३ । २४ ।
"बालिप्रमथनश्चैव सुग्रीवप्रतिपादनम् ॥"
क्लेशनम् । विलोड़नम् । इति मथधात्वर्थदर्शनात् ॥ (प्रकर्षेण मथतीति । प्र + मथ् + ल्युः । प्रमाथके, त्रि । यथा, महाभारते । १।१०२।६२।
"स चाग्निरूपसदृशो देवतुल्यपराक्रमः ।
सर्व्वासामेव नारीणां चित्तप्रमथनो रहः ॥")

प्रमथा, स्त्री, (प्रमथति चित्तदोषानिति । प्र + मथ् + अच् ।) हरीतकी । इति मेदिनी । थे, २१ ॥ (गुणादिकमस्य हरीतकीशब्दे ज्ञातव्यम् ।)

प्रमथाधिपः, पुं, (प्रमथानां अधिपः ।) शिवः । इत्यमरः । १ । १ । ३३ ॥

प्रमथितं, क्ली, (प्रकर्षेण मथितम् ।) निर्जलनक्रम् । इति राजनिर्घण्टः ॥

प्रमदः, पुं, (प्र + मद् + "प्रमदसंमदौ हर्षे ।" ३ । ३ । ६८ । इति अप् ।) हर्षः । इत्यमरः । १।८।२४ ॥ (यथा, कथासरित्सागरे । ६।१६२ ।
"तच्छ्रुत्वा मम राज्ञश्च विषादप्रमदौ द्वयोः ।
अभूतां मेघमालोक्य हंसचातकयोरिव ॥"
प्रमादजननेनेति । प्र + मद् + करणे अप् ।) धुस्तूरफलम् । इति शब्दचन्द्रिका ॥ (दानवविशेषः । यथा, हरिवंशे । ३ । ८७ ।
"प्रमदो मयः कृपयो हयग्रीवश्च वीर्य्यवान् ॥"
वसिष्ठतनयानामन्यतमः । स तु उत्तममन्वन्तरे सप्तर्षिभेदः । यथा, भागवते । ८ । १ । २४ ।
"वसिष्ठतनयाः सप्त ऋषयः प्रमदादयः ।
सत्या वेदश्रुता भद्रा देवा इन्द्रस्तु सत्यजित् ॥")

प्रमादयतीति । प्र + मद् + कर्त्तरि अच् । यद्वा प्रकर्षेण मदोऽस्य ।) मत्तः, त्रि । इति मेदिनी । दे, ७५ ॥ (यथा, स्त्री । १६ । ३७ ।
"प्राविशि प्रमदवद्विशेषभृत्
इत्तिमास्थि विहारविभ्रमः ॥")

प्रमदाकाननं क्ली, (प्रमदानां काननम् । "ङ्याप्रातिपदिकात्" ६ । ३ । ६३ । इति हस्वः । यद्वा, प्रमदाय हर्षाय यत् काननम् ।) प्रमदावनम् । इत्यमरटीकायां भरतः । २ । ४ । ३ ॥

प्रमदवनं, क्ली, (प्रमदानां वनमिति । "ङ्याप्रातिपदिकात्" ६ । ३ । ६३ । इति ह्रस्वः ।) राज्ञोऽन्तःपुरोचितवनम् । इत्यमरः । २ । ४ । ७ ॥

प्रमदा, स्त्री, (प्रमदयति पुरुषमिति । प्र + मद हर्षे + णिच् + अच् । यद्वा, प्रमदो हर्षोऽस्यास्या इति अच् । टाप् ।) उक्तमयोषित् । इति मेदिनी । दे, ५ ॥ (यथा, कुमारे । ४ । १२ ।
"नयनान्यरुणानि घूर्णयन्
वचनानि स्खलयन् पदे पदे ।
असति त्वयि वारुणीमदः
प्रमदानामधुना विडम्बना ॥")
चतुर्दशाक्षरवृत्तिविशेषः । तल्लक्षणं यथा, वृत्तरत्नाकरटीकायाम् ।
"नजभजला गुरुश्च भवति प्रमदा ॥")

प्रमदाकाननं क्ली, (प्रमदानां काननम् ।) प्रमदवनम् । इत्यमरटीकायां भरतः । २ । ४ । ३ ॥

प्रमदावनं, क्ली, (प्रमदानां वनम् ।) प्रमदवनम् । इति शब्दरत्नावली ॥

प्रमनाः, [स्] त्रि, (प्रहृष्टं मनोऽस्य ।) हर्षयुक्तः । इत्यमरः । ३ । १ । ७ ॥ (यथा, महाभारते । ८ । ३७ । ४१ ।
"इति बहुपरुषं प्रभाषति
प्रमनसि भद्रपतौ रिपुस्तवम् ।")

प्रमयः, पुं, (प्र + मी वधे + भावे अच् ।) वधः । इति हेमचन्द्रः । ३ । ३४ ॥ (यथा, राजतरङ्गिण्याम् । १ । ६ ।
"दृष्टं दृष्टं तृणोदन्तं वद्धा प्रमयमीयुषाम् ।
अर्व्वाक्कालभवैर्वार्त्ता यत्प्रबन्धेषु पूर्य्यते ॥")

प्रमा, स्त्री, (प्रमीयते इति । प्र + मा मानं + "आतश्चोपसर्गे ।" ३ । ३ । १०६ । इति अङ् । टाप् ।) यथार्थज्ञानम् । तत्पर्य्यायः । प्रमितिः २ । इत्यमरः । ३ । २ । १० ॥ प्रमाणम् ३ । इति शब्दरत्नावली ॥ (यथा, प्रबोधचन्द्रोदये । २य अङ्के ।
"प्रत्यक्षादिप्रमासिद्धविरुद्धार्थाभिधायिनः ।
वेदान्ता यदि शास्त्राणि बौद्धैः किमपराध्यते ॥"
यथा च ऋग्वेदे । १० । ९३० । ३ ।
"कासीत्प्रमा प्रतिमा किम् ॥"
"यज्ञस्य प्रमा प्रमाणमियत्ता का कथमूतासीत् ।"
इति तद्भाष्ये सायणः ॥) न्यायमते तद्वति तत्प्रकारकज्ञानम् । भ्रमभिन्नज्ञानम् । अस्याः कारणं गुणः । स च प्रत्यक्षे विशेष्ये विशेषणस्य सम्बन्धः । अनुमितौ साध्यविशिष्टपक्षे परामर्शः । शाब्दबोधे योग्यतायाः तात्पर्य्यस्य वा यथार्थज्ञानम् । उपमितौ शब्दे सादृश्यबुद्धिः । यथा,—
"दोषोऽप्रमाया जनकः प्रमायास्तु गुणो भवेत् ।
पित्तदूरत्वादिरूपो दोषो नानाविधः स्मृतः ॥
प्रत्यक्षे तु विशेष्यस्य विशेषणवता समम् ।
सन्निकर्षो गुणस्तु स्यादथ लिङ्गामृतौ पुनः ।
पक्षे साध्यविशिष्टे च परामर्शो गुणो भवेत् ।
शब्दे सादृश्यबुद्धिस्तु भवेदुपमितौ गुणः ।
शाब्दबोधे योग्यतायास्तात्पर्य्यस्याथ वा प्रमा ॥
गुणः स्याद्भ्रमभिन्नस्तु ज्ञानमत्रोच्यते प्रमा ।
अथवा तत्प्रकारं यत् ज्ञानं तद्वद्विशेष्यकम् ॥"
इति भाषापरिच्छेदे । १३१-१३५ ॥
("दोषः इति । अप्रमां प्रति दोषः कारणं प्रमां प्रति गुणः कारणं तत्रापि पित्तादिरूपा दोषा अननुगताः तेषां कारणत्वम् अन्वयव्यतिरेकाभ्यामेव सिद्धम् । गुणस्य प्रमाजनकत्वन्तु अनुमानात् सिद्धम् । यथा प्रमाज्ञानसाधारणकारणभिन्नकारणजन्याजन्यज्ञानत्वात् अप्रमावत् । न च दोषाभाव एव कारणमस्तिति वाच्यम् । पीतः शङ्ख इति ज्ञानस्थले पित्तदोषसत्त्वात् शङ्खप्रमानुत्पत्तिप्रसङ्गात् विनिगमनाविरहात् अनन्तदोषाभावस्य कारणत्वमपेक्ष्य गुणकारणतायाः न्याय्यत्वात् । न च गुणसत्त्वेऽपि पित्तप्रतिबन्धात् शङ्खे न श्वेतज्ञानमतः पित्तादिदोषाभावानां कारणत्वमवश्यं वाच्यं तथा च किं गुणस्य हेतुत्वकल्पनयेति वाच्यं तथाप्यन्वयव्यतिरेकाभ्यां गुणस्यापि हेतुत्वसिद्धेः । एवं भ्रमं प्रति गुणाभावः कारणमित्यस्यापि सुवचत्वाच्च । तत्र दोषाः के इत्याकाङ्क्षायामाह पित्तेति । क्वचित् पीतादिभ्रमे पित्तं दोषः क्वचित् चन्द्रादेः स्वल्पपरिमाणभ्रमे दूरत्वं दोषः । क्वचिच्च वंशीरङ्गभ्रमे मङ्क्षूकषसाञ्जनमित्येवं दोषा भ्रान्तिजनका इत्यर्थः । अथ के गुणा इत्याकाङ्क्षायां प्रत्यक्षादौ क्रमशो गुणान् दर्शयति प्रत्यक्षे इति । प्रत्यक्षे विशेषणयत् विशेष्यसन्निकर्षो गुणः अनुमितौ साध्यवति साध्यत्वेनविशिष्टज्ञानं गुण इति एवमग्रेऽप्यूह्यः । प्रमां निरूपयति भ्रमभिन्नमिति । ननु यत्र शुक्तिरजतयोरिमे रजते इति ज्ञानं जातं तत्र रजतांशेऽपि प्रमा न स्यात् तज्ज्ञानस्य भ्रमभिन्नत्वाभावात् अत आह यथार्थेति । तद्वद्विशेष्यकं तत्प्रकारकं ज्ञानं प्रमा इत्यर्थः । इदन्तु बोध्यम् । येन सम्बन्धेन सद्वत्ता तेन सम्बन्धेन तद्वद्विशेष्यकं तेन सम्बन्धेन प्रकारकत्वं वाच्यम् । तेन कपालादौ संयोगादिना घटादिज्ञाने नातिव्याप्तिः ।" * ।)

प्रमाणं, क्ली, (प्रमीयते विश्वमनेनेति । प्र + मा + ल्युट् ।) विष्णुः । यथा,—
"प्रमाणं प्राणनिलयः प्राणभृत् प्राणजीवनः ॥"
इति महाभारते शान्तिपर्व्वणि दानधर्म्मः ॥
नित्यम् । मर्य्यादा । शास्त्रम् । (यथा,—
"आप्ता ह्यवितथेकन्तुतिविभागविदो निपुणोपलभ्यदर्शिनश्च । तेषामेवह्युपयोगात् यद्वचनं तत् प्रमाणम् । अप्रमाणं पुनर्मलोच्छ्वासनिश्वरक्तदुष्टादुष्टवचनमिति ।" इति चरके विमानस्थाने चतुर्थेऽध्याये ॥) सत्यवादी । (प्र + मा + भावे ल्युट् ।) प्रयत्नः । हेतुः । (प्रमिणोतीति । प्र + मा + कर्त्तरि ल्युः ।) प्रमाता । इति मेदिनी । दे, ६१ ॥ प्रमा ।

इति शब्दरत्नावली ॥ नित्यस्त्रीवैकल्यवानयं शब्दः। यथा वेदाः प्रमाणं स्मृतयः प्रमाणमित्यादि ॥ प्रमायाः करणम्। न्याये तु प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि। इत्यत्र बहुवचनान्तोऽपि ॥ (यथा, मनौ। २। १३।
"अर्थकामेष्वसक्तानां धर्ममज्ञानं विधीयते।
धर्मं जिज्ञासमानानां प्रमाणं परमं श्रुतिः ॥"
वेदान्तसारे च। "वेदान्तो नाम उपनिषत् प्रमाणं तदुपकारीणि शारीरिकसूत्रादीनि च॥"
"उपनिषच्छब्दो ब्रह्मात्मैक्यसाक्षात्कारविषयः। सैव उपनिषत् प्रमाणं तस्याः प्रमारूपायाः करणभूता।" इति विद्वन्मनोरञ्जनीटीका ॥)

प्रमाणबाधितार्थकः, पुं, (प्रमाणेन बाधितः अर्थो यस्य। ततः कप्।) तर्कविशेषः। तस्य लक्षणम्। आत्माश्रयादिचतुष्कान्यप्रसङ्गत्वम्। स द्विविधः। आत्मग्राहकः विषयपरिशोधकश्च। तत्राद्यो यथा। धूमो यदि वह्निव्यभिचारी स्यात्तदा वह्निजन्यो न स्यात्। द्वितीयस्तु पर्वतो यदि निर्वह्निः स्यात्तदा निर्धूमः स्यात्। इति तर्कभाषादीपौ ॥

प्रमातामहः, पुं, (प्रकृष्टो मातामहस्तत्स्थापि जनकत्वादिति। प्रादिसमासः।) मातामहपिता। यथा, अमरे।
"पितामहः पितृपिता तत्पिता प्रपितामहः।
मातुर्मातामहाद्येवं सपिण्डास्तु सनाभयः ॥"

प्रमातामही, स्त्री, (प्रकृष्टा मातामही।) प्रमातामहपत्नी। इति स्मृतिः ॥

प्रमाथः, पुं, (प्र+मथ्+भावे घञ्।) प्रमथनम्। बलात् हरणम्। इति भरतः। (निपात्य भूमौ पेषणम्। यथा, महाभारते। ४। १२। २७।
"क्षतप्रतिक्षतैश्चैव बाहुभिश्च सुसङ्कटैः।
सन्निपातावधूतैश्च प्रमाथोन्माथनैस्तथा ॥"
अस्य टीकायां नीलकण्ठेन मल्लशास्त्रात् एतल्लक्षणमुद्धृतम्। यथा,—
"निपात्य पेषणं भूमौ प्रमाथ इति कथ्यते ॥"
कुमारस्यानुचरभेदः। यथा, महाभारते। ९। ४५। २६।
"ततः प्रादादनुचरौ यमः कालोपमावुभौ।
उन्माथश्च प्रमाथश्च महावीर्यौ महाद्युती ॥"
शिवपारिषदप्रमथगणः। यथा, हरिवंशे। १७८। ५३।
"ते प्रदीप्तप्रहरणा दैत्यदानवराक्षसाः।
प्रमाथगणमुख्याश्च प्रायुध्यन् क्षणमन्ययम् ॥")

प्रमाथी, [न्] त्रि, प्रपूर्व्वमथधातोः कर्त्तरि णिन्। पीड़नकर्त्ता। मारणकर्त्ता। प्रमथनशीलः। देहेन्द्रियक्षोभक इत्यर्थः। इति श्रीधरस्वामी ॥ यथा,—
"चञ्चलं हि मनः कृष्ण! प्रमाथि बलवद्दृढम्॥"
अपि च।
"इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभं मनः ॥"
इति श्रीभगवद्गीता ॥

प्रमादः, पुं, (प्र+मद्+भावे+घञ्।) अनवधानता। इत्यमरः। १। ७। ३० ॥ यथा,—
"लोभप्रमादविभ्रान्तैः पुरुषो नश्यते त्रिभिः।
तस्माल्लोभो न कर्त्तव्यः प्रमादो न न विश्वसेत्॥"
इति गारुड़े नीतिसारे ११५ अध्यायः ॥

प्रमादवान्, [त्] त्रि, (प्रमादोऽस्यास्मिन् वा। प्रमाद+मतुप्। मस्य वः।) प्रमादयुक्तः। तत्पर्य्यायः। जाल्मः २ असमीक्ष्यकारी ३ खड्गारूढः ४। इति जटाधरः ॥ (यथा, याज्ञवल्क्ये। ३। १३६।
"निद्रालुः क्रूरकृत्युश्च नास्तिको याचकस्तथा।
प्रमादवान् भिन्नवृत्तो भवेत्तैर्य्यक्तु तामसः ॥")

प्रमादिका, स्त्री, (प्रमादोऽनवधानतास्यस्या इति। प्रमाद+ठन्। टाप्।) दूषिता कन्या। तत्पर्य्यायः। संवेदा २ दूषिता ३ धर्षकारिणी ४। इति शब्दरत्नावली ॥

प्रमादी, [न्] त्रि, (प्रमादोऽस्यस्येति। प्रमाद+इनिः।) प्रमादविशिष्टः। अनवधानतायुक्तः। यदुक्तम्।
"कुरङ्गमातङ्गपतङ्गभृङ्ग-
मीना हताः पञ्चभिरेव पञ्च।
एकः प्रमादी स कथं न हन्यते
यः सेवते पञ्चभिरेव पञ्च ॥"

प्रमापणं, क्ली, (प्र+मी च हिंसायाम्+स्वार्थे णिच्+भावे ल्युट्।) मारणम्। इत्यमरः। ३। ८। ११२ ॥ (यथा, मनुः। ११। १४१।
"अस्थिमतान्तु सत्त्वानां सहस्रस्य प्रमापणे।
पूर्णे चानस्थानस्यान्तु शूद्रहत्याव्रतञ्चरेत् ॥")

प्रमितः, त्रि, (प्र+मि+क्तः। यद्वा, प्र+मा+क्तः। "द्यतिस्यतिमास्थेति।" ७। ४। ४०। इतीत्वम्।) ज्ञातः। इति जटाधरः ॥ (अस्यतमम्। इति विजयरक्षितः ॥ यथा, निदाने अर्शोरोगाधिकारे।
"प्रमिताल्पाशनं तीक्ष्णं मद्यं मैथुनसेवनम् ॥"
परिमितम्। यथा, सुश्रुतसंहितायाम्। १०४। ३७।
"प्रमिताच्चराणि वदन् ॥")

प्रमितिः, स्त्री, (प्र+मा वा मि+क्तिन्।) प्रमा। इत्यमरः। ३। २। १० ॥

प्रमीढः, त्रि, (प्र+मिह सेचने+क्तः।) घनः। सञ्चितः। इति मेदिनी। ढे, ८ ॥ (यथा,—
"त्वग्दोषिणां प्रमीढानां स्निग्धाभिष्यन्दिदृढ्यिणाम्।
शिशिरे लङ्घनं शस्तमपि वातविकारिणाम् ॥"
इति चरके सूत्रस्थाने द्राविंशेऽध्याये ॥)

प्रमीतः, त्रि, (प्र+मी च हिंसायाम्+क्तः।) मृतः। यज्ञार्थहतपशुः। इत्यमरः। २। ८। ११७ ॥

प्रमीला, स्त्री, (प्रमीलनमिति। प्र+मील संमीलने+"गुरोश्च हलः।" ३। ३। १०३। इत्यः। ततष्टाप्।) तन्द्री। इत्यमरः। ३। ३। १७५ ॥

प्रमुखं, क्ली, (प्रकृष्टं मुखमारम्भः।) तदादित्वम्। तत्कालः। इति त्रिकाण्डशेषः ॥ (सम्मुखम्। यथा, भगवद्गीतायाम्। २। ६।
"यानेव हत्वा न जिजीविषाम-
स्तेऽवस्थिताः प्रमुखे धार्त्तराष्ट्राः ॥").

प्रमुखः, पुं, (प्रकृष्टं मुखं अग्रभागो यस्य।) पुन्नागवृक्षः। इति शब्दचन्द्रिका ॥ सप्तपर्णः। इति शब्दरत्नावली ॥

प्रमुखः, त्रि, (प्रकृष्टं मुखमाद्यं यस्य।) प्रधानम्। (यथा, कुमारसम्भवे। २। ३८।
"ज्वलन्मणिशिखाक्षेपैर्नागकिंप्रमुखा निशि।
स्थिरप्रदीपतामेत्य भुजङ्गाः पर्य्युपासते ॥")
श्रेष्ठः। इत्यमरः। ३। १। ५७ ॥ (यथा, हितोपदेशे। ३। १२४।
"बलेषु प्रमुखो हस्ती न तथान्यो महीपतेः ॥")
प्रथमः। इति मेदिनी। खे, १० ॥ (यथा, महाभारते। २। ६। २।
"नारदप्रमुखास्तस्यामन्वर्च्छन् महर्षिणः।
समासीनाः सुसुभिरे सह राजर्षिभिस्तथा ॥")
मान्यः। इति शब्दरत्नावली ॥

प्रमृत्, [द्] त्रि, (प्रकृष्टासृत् प्रीतिर्यस्य।) हृष्टः। इत्यमरः। ३। १। १०३ ॥ (प्रकृष्टा सृदिति विग्रहे प्रकृष्टानन्दे, स्त्री। यथा, महाभारते। १४। ७। ६।
"श्रुत्वा तु पार्थिवस्तेतु सम्वर्त्तः प्रमृदं गतः ॥")

प्रमृदितः, त्रि, (प्र+मृद्+क्तः। "उदुपधादिति।" १। २। २१। इति पक्षे कित्।) हृष्टः। इत्यमरः। ३। १। १०३ ॥ (यथा, देवीभागवते। १। १२। ४७।
"वाञ्छत्यहो हरिरशोक इवातिकामं
पादाहतिं प्रमृदितः पुरुषः पुराणः ॥")

प्रमेहः, पुं, (प्रकर्षेण मेहति क्षरति वीर्य्यादिरनेनेति। प्र+मिह क्षरणे+करणे घञ्।) रोगविशेषः। तत्पर्य्यायः। मेहः २ मूत्रदोषः ३। इति राजनिर्घण्टः ॥ बहुमूत्रता ४। इति हैमचन्द्रः। ३। १३४ ॥ अस्य निदानम्।
"आस्यासुखं स्वप्नसुखं दधीनि
ग्राम्यौदकानूपरसाः पयांसि।
नवान्नपानं गुड़वैकृतञ्च
प्रमेहहेतुः कफकृच्च सर्व्वम् ॥" ❁ ॥
अस्य सम्प्राप्तिर्यथा,—
"मेदश्च मांसञ्च शरीरजञ्च
क्लेदं कफो वस्तिगतः प्रदूष्य।
करोति मेहान् सदृशैर्गुणैः स्वै-
स्तानेव पित्तं परिदूष्य चापि ॥" ❁ ॥
वातिकस्य तस्य लक्षणम्।
"क्षीणेषु दोषेष्ववलम्ब्य धातून्
सन्दूष्य मेहान् कुरुतेऽनिलश्च ॥" ❁ ॥
तस्य कफजादिभेदेन साध्यादिलक्षणम्। यथा,
"साध्याः कफोत्था दश पित्तजाः षट्
याप्या न साध्याः पवनाच्चतुष्काः।
समक्रियत्वाद्विषमक्रियत्वा-
न्महात्ययत्वाच्च यथाक्रमन्तु ॥
कफः सपित्तः पवनश्च दोषा
मेदोऽसृगम्बूवसालसीकाः।

मज्जा रसौजः पिप्पितच्च दूष्याः
प्रमेहिणां विंशतिरेव मेहाः ॥" * ॥

तस्य पूर्व्वरूपम् ।

"दन्तादीनां मलाढ्यत्वं प्राग्रूपं पाणिपादयोः ।
दाहश्चिक्कणता देहे हृट् स्वाद्वास्यच्च जायते ॥
सामान्यं लक्षणं तेषां प्रभूताविलमूत्रता ।
दोषदूष्या विशेषेऽपि तत्संयोगविशेषतः ।
मूत्रवर्णादिभेदेन भेदो मेहेषु कल्प्यते ॥"* ॥

क्रमेण कफजानां दशानां लक्षणानि ।

"अच्छं बहुसितं शीतं निर्गन्धसुदकोपमम् ।
मेहत्युदकमेहेन किञ्चिदाविलपिच्छिलम् ॥
इक्षो रसमिवात्यर्थं मधुरं चेक्षुमेहतः ।
सान्द्रो भवेत् पर्य्युषितं सान्द्रमेहेन मेहति ॥
सुरामेही सुरातुल्यमुपर्य्यच्छमधोघनम् ।
संहृष्टलोमा पिष्टेन पिष्टवद्बहुलं सितम् ॥
शुक्राभं शुक्रमिश्रं वा शुक्रमेही प्रमेहति ।
सूक्ष्माणून् सिकतामेही सिकतारूपिणो मलान् ॥
शीतमेही सुबहुशो मधुरं भृशशीतलम् ।
शनैः शनैः शनैर्मेही मन्दं मन्दं प्रमेहति ॥
लालातन्तुयुतं सूक्ष्मं लालामेहेन पिच्छिलम् ॥"

क्रमेण पित्तजानां षण्णां लक्षणानि ।

"गन्धवर्णरसस्पर्शैः क्षारेण क्षारतोयवत् ॥
नीलमेहेन नीलाभं कालमेही मसीनिभम् ।
हारिद्रमेही कटुकं हरिद्रासन्निभं दहत् ॥
विस्रं माञ्जिष्ठमेहेन माञ्जिष्ठसलिलोपमम् ।
विस्रमुष्णं सलवणं रक्ताभं रक्तमेहतः ॥" * ॥

क्रमेण वातजानां चतुर्णां लक्षणानि ।

"वसामेही वसाभिश्रं वसाभं मूत्रयेन्मुहुः ।
मज्जाभं मज्जमिश्रं वा मज्जमेही मुहुर्मुहुः ॥
कषायं मधुरं रूक्षं क्षौद्रमेहं वदेद्बुधः ।
रूक्षो मत्त इवाजस्रं मूत्रं वेगविवर्ज्जितम् ।
सलसीकं विबद्धञ्च हस्तिमेही प्रमेहति ॥"* ॥

कफजादिभेदेन तेषामुपद्रवाः ।

"व्यधिषाकोरुचिच्छर्द्दिनिद्रानाशः सपीनसः ।
उपद्रवाः प्रजायन्ते मेहानां कफजन्मनाम् ॥
वस्तिमेहनयोस्तोदो मुष्कावदरगं ज्वरः ।
दाहस्तृष्णाग्निका मूर्च्छा विड्भेदः पित्तजन्मनाम् ॥
वातजानामुदावर्त्तः कम्पश्चदृग्रहलोलताः ।
शूलसुन्निद्रता शोषः कासः श्वासश्च जायते ॥"

अरिष्टलक्षणम् ।

"यथोक्तोपद्रवारिष्टमतिप्रमृतमेव च ।
पिडकापीडितं गाढं प्रमेही हन्ति मानवम् ॥
ज्ञातः प्रमेही मधुमेहिनी वा
न साध्यरोगः स हि बीजदोषात् ।
ये चापि केचित् कुलजा विकारा
भवन्ति तांश्च प्रवदन्त्यसाध्यान् ॥ * ॥

मद्यं रक्तं प्रमेहास्तु कालेनाप्रतिकारिणः ।
मधुमेहत्वमायान्ति तदासाध्या भवन्ति हि ॥
मधुमेहः मधुसमं जायते स किल द्विधा ।
कृशैः धातुक्षयाद्यौ शोणितक्षयहेतुवा ॥
व्याख्यातो दोषनिर्द्धारनिमित्तं प्रदर्शयन् ।

क्षीणः क्षणात् क्षणात् पूर्णो भवते क्षुद्रसाध्यताम् ॥
मधुरं यच्च मेहेषु प्रायो मध्विव मेहति ।
सर्व्वेऽपि मधुमेहाख्या माधुर्य्याच्च तनोरतः ॥*॥
प्रमेहिणो यदा मूत्रमनाविलमपिच्छिलम् ।
विषदं तिक्तकटुकं तदारोग्यं प्रचक्षते ॥"

इति माधवकरः ॥

अस्य दशविधपिडकाः पिडकाशब्दे द्रष्टव्याः ॥

अथ प्रमेहस्य चिकित्सा ।

"श्यामाकको द्रवोद्दालो गोधूमश्चणकावटी ।
कुलत्थाः कथिता भोज्ये पुराणा मेहिनां हिताः ॥
यवान्नविकृतिर्मुद्गाः शालयः षष्टिकास्तथा ।
तथा तिक्तानि शाकानि जाङ्गलाः पक्षिणो मृगाः ॥
उद्दालो वनकोद्रवः ॥ * ॥
प्रमेही गुडदुग्धाद्यैतैलतक्रसुरा सदा ।
अश्नेच्छुरसपिष्टान्नानूपमांसानि वर्ज्जयेत् ॥ * ॥
सुस्ताहरीतकीलोध्रैः कट्फलेन कृतं हृतम् ।
पीतं मधुयुतं हन्ति प्रमेहं कफहेतुकम् ॥ * ॥
पटोलनिम्बामलकान्हतानां
पिबेत् कषायं मधुना समेतम् ।
उशीरलोध्रार्জ্জুनचन्दनानां
तथा पिबेत् पित्तनिमित्तमेही ॥ * ॥
पाठाशिरीषदुःस्पर्शाजातित्रिन्दुककिंशुकैः ।
कपित्थस्य भिषक् क्वाथं हस्तिमेहे प्रयोजयेत् ॥
पाठादिभिः सहितस्य कपित्थस्य क्वाथम् ।
गुडूच्याः स्वरसः पेयो मधुना सर्व्वमेहजित् ।
हरिद्राचूर्णयुक्तो वा रसो धात्र्याः समाक्षिकः ॥
मधुना त्रैफलं चूर्णमथवाश्नञ्जतूद्भवम् ।
लोहजं वाभयोत्थं वा लिह्यान्मेहनिवृत्तये ॥*॥
चन्द्रप्रभावचासुस्ताभूनिम्बसुरदारवः ।
हरिद्रातिविषा दार्व्वी पिप्पलीमूलचित्रकम् ॥
त्रिवृद्दन्ती पत्रकञ्च त्वगेला वंशलोचना ।
प्रत्येकं कर्षमात्राणि कुर्य्यादेतानि बुद्धिमान् ॥
धान्यकं त्रिफला चव्यं विड्ङ्गं गजपिप्पली ।
सुवर्णमाक्षिकं शोषं द्वौ द्वौ चारौ लवणत्रयम् ॥
एतानि टङ्कमात्राणि संगृह्णीयात् पृथक् पृथक् ।
द्विकर्षहतलोहं स्याच्चतुष्कर्षा सिता भवेत् ॥
शिलाजत्वष्टकर्षं स्यादष्टौ कर्षाश्च गुग्गुलोः ।
विधिना योजितैरेतैः कर्त्तव्या गुटिका शुभा ॥
चन्द्रप्रभातिविख्याता सर्व्वरोगप्रणाशिनी ।
निहन्ति विंशतिं मेहान् कृच्छ्रमष्टविधं तथा ॥
वातरक्ताश्मरीसृक्दन्मूत्राघातांस्तथोदरम् ।
अष्ठग्रन्थिं पाण्डुरोगं कामलाञ्च हलीमकम् ॥
कासं श्वासं तथा कुष्ठमग्निमान्द्यमरोचकम् ।
वातपित्तकफव्याधीन् बल्या दृष्या रसायनी ॥
समाराध्य शिवं तस्मात् प्रयत्नाद्गुटिकामिमाम् ।
प्राप्नवांश्चन्द्रमा यस्मात् तस्माच्चन्द्रप्रभा स्मृता ॥
चन्द्रप्रभाकर्पूर इति लोके । शोषं त्रिकटु । द्वौ द्वौ चारौ सर्জिकायवक्षारौ । लवणत्रयम् । नैत्यं रूक्षकफापि विड्ङ्ग लवणत्रयमिति चन्द्रप्रभादिवटिका ॥ * ॥ —

प्रमेहपिडकानां प्राक् कार्य्यं रक्तविमोक्षणम् ।
पाटनञ्च विपक्वानां ततो व्रणविधिः स्मृतः ॥"

इति भावप्रकाशः ॥

(अस्य सकारणपूर्व्वरूपसम्प्राप्तयसङ्ख्योपद्रवच्च । यथा,—

"त्रिदोषकोपननिमित्ता विंशतिप्रमेहविकारास्तापरेऽपरिसङ्ख्येयाः । तत्र यथा त्रिदोषप्रकोपप्रमेहानभिनिर्वर्त्तयति तथानुव्याख्यास्यामः ।

इह खलु निदानदोषदूष्यविशेषेभ्यो विकाराणां विघातभावाभावप्रतिविशेषा भवन्ति । यदा ह्येते त्रयो निदानादिविशेषाः परस्परं नानुवध्नन्त्यथवाप्रकर्षादबलीयांसो वानुबध्नन्ति न तदा विकाराभिनिर्वृत्तिः । चिराद्वाप्यभिनिर्वर्त्तन्ते तनवो भवन्त्यथवाप्यथोक्तसङ्क्लिष्टा विपर्य्ययेण विपरीता इति सर्व्वविकारविघातभावाभावप्रतिविशेषाभिनिर्वृत्तिहेतुरुक्तः ।

तत्र इमे निदानादि विशेषाः श्लेष्मनिमित्तानां प्रमेहाणामाश्वभिनिर्वृत्तिकरास्तद्यथा शयनकयवचीनकोद्दालकनैषधोत्कटसुकुन्दकमधाव्रीहिप्रमोदकसुगन्धकानां नवानामतिवेलमतिप्रमाणेनोपयोगः । तथा सर्पिर्गुतां नवहरेणुमाषरूपानां ग्राम्यानूपौदकानां मांसानां प्रायस्तिलपललपिष्टान्नपायसशूकशरविलेपीक्षुविकाराणां क्षीरमन्दकदधिदधवमधुरतरुणप्रायाणामुपयोगो मृजायायामवर्জ्जनस्वप्नप्रसङ्गो यच्च कञ्चिदधिरन्योऽपि श्लेष्ममेदो मूत्रसङ्गनन: सर्व्वः सनिदानविशेषः ।

बहुद्रवश्लेष्मा दोषविशेषः बहुवर्च्चं मेदः मांसञ्च शरीरक्लेदः शुक्रं शोणितञ्च वसामज्जानसीकारसचौजः सङ्घाता इति दूष्यविशेषाः ।

त्रयाणामेषां निदानादिविशेषाणां सन्निपाते क्षिप्रं श्लेष्मप्रकोपमापद्यते प्रागतिभूयस्त्वात् । स प्रकुपितः क्षिप्रमेव शरीरे विसर्पं लभते । शरीरश्लेष्मिल्यात् स विसर्पं शरीरे मेदसेवादितो मिश्रीभावं गच्छति । मेदसश्चैव बहुवर्च्चस्त्वान्मेदसश्च गुणानां गुणैः समानगुणभूयिष्ठत्वात् स मेदसा मिश्रीभावं गच्छन् दूषयत्येतद्विकृतत्वात् स विकृतो दुष्टेन मेदसोपचितः शरीरक्लेदमांसाभ्यां संसर्गं गच्छति । क्लेदमांसयोरतिप्रमाणाभिवृद्धित्वात् स मांसे मांसप्रदोषात् पूतिमांसपिडकाः शरीरविकाः कच्छपिकाद्याः सञ्जनयत्यप्रकृतिभूतत्वात् शरीरक्लेदं पुनर्दूषयन् मूत्रत्वेन परिणमयति । मूत्रवहानां स्रोतसां बहुत्ववस्तिप्रभवानां मेदःक्लेदोपचितानि गुरूणि सुखान्यासाद्य प्रतिषध्नाति । ततः स्थैर्य्यं साध्यतां वा जनयति प्रकृतिविकृतिभूतत्वात् ।

शरीरक्लेदस्तु श्लेष्ममेदोमिश्रः प्रविशन् मूत्राशयं मूत्रत्वमापद्यमानः श्लैष्मिकैरभिदंशैरभिसंश्लेषमुपयाति येनास्य वहानिवृद्धियुक्तोक्तद्रव्यया क्षतक्षीणमूत्रपिच्छिलाक्षस्निग्धगुरुमधुरमान्दप्रसादमदैन्यञ्च येन गुणेनैकेनानेकेन वा भूयस्तरमुप-

रुच्यते। तत्समाख्यं गौणं नामविशेषं प्राप्नोति।

ते तु खल्विमे दशप्रमेहा नाम विशेषेण भवन्ति। तथा उदकमेहश्चेक्षुरालिकारसमेहश्च सान्द्रमेहश्च सान्द्रप्रसादमेहश्च शुक्रमेहश्च शीतमेहश्च सिकतामेहश्च शनैर्मेहश्च लालामेहश्चेति।

ते दशप्रमेहाः साध्याः समानगुणमेदःस्थानत्वात् कफस्य प्रधान्यात् समानक्रियत्वाच्च।"

"उष्णाम्ललवणक्षारकटुकाजीर्णभोजनोपसेविनस्तथातितीक्ष्णातपाग्निसन्तापश्रमक्रोधविषमाहारोपसेविनश्च तथात्मकशरीरस्येव क्षिप्रं पित्तं प्रकोपमापद्यते।

तत् प्रकुपितं तत्रैवानुपूर्व्या प्रमेहानिमान् षट् क्षिप्रमभिनिर्वर्त्तयति। तेषामपि च पित्तगुणविशेषेण नामविशेषाः। तद्यथा,—क्षारप्रमेहश्च कालमेहश्च नीलमेहश्च लोहितमेहश्च मञ्जिष्ठामेहश्च हारिद्रमेहश्चेति ते षड्भिरेव क्षारलवणकटुकविस्रोष्णैः पित्तगुणैः पूर्ववत् समन्विताः। सर्व एव ते याप्याः संसृष्टदोषमेदःस्थानत्वात् विरुद्धोपक्रमत्वाच्चेति।"

"कटुकक्षायतिक्तरूक्षलघुशीतव्यवायव्यायामवमन-विरेचनास्थापन-शिरोविरेचनातियोगसन्धारणानशनाभिघातानपोदेगशोकशोणितातिसेकजागरणविषमशरीरन्यासाशुपसेवमानस्य तथात्मकशरीरस्येव क्षिप्रं वायुः प्रकोपमापद्यते। स प्रकुपितस्तथात्मके शरीरे विसर्पन् यदा वसामादाय मूत्रवहानि स्रोतांसि प्रतिपद्यते तदा वसामेहमभिनिर्वर्त्तयति॥ * ॥ यदा पुनर्मज्जानं मूत्रवस्त्रावाकर्षति तदा मज्जमेहमभिनिर्वर्त्तयति॥ * ॥ यदा लसीकां मूत्राग्नेयेऽभिवहन् मूत्रमनुवर्त्मन्येवातयति। लसीकातिबहुत्वाद्विच्छेदाच्च वायोः स्वस्थातिमूत्रप्रवृत्तिसङ्गं करोति। तदा स मत्त इव गजः स्रवत्यजस्रं मूत्रमवेगं तं हस्तिमेहिनमाचक्षते॥ * ॥ ओजः पुनर्मधुरस्वभावं तद्भक्षादायुः कषायत्वेनाभिसंरुध्य मूत्राग्नेयेऽभिवहति तदा मधुमेहं करोति॥ * ॥

तानिमांश्चतुरः प्रमेहान् वातजानसाध्यानाचक्षते। महाव्याधित्वाद्विप्रतिषिद्धोपक्रमत्वात् तेषामपि च पूर्ववत् गुणविशेषेण नामविशेषाः। तद्यथा,—वसामेहश्च मज्जमेहश्च हस्तिमेहश्च मधुमेहश्चेति।"

"त्रयस्तु दोषाः प्रकुपिताः प्रमेहानभिनिर्वर्त्तयिष्यन्त इमानि पूर्वरूपाणि दर्शयन्ति। तद्यथा,—जटिलीभावं केशेषु माधुर्य्यमास्ये करपादयोः सुप्तता दाहः सुखतालुकण्ठशोषः पिपासामालस्यं मलश्च काये कायच्छिद्रेषूपदेहं परिदाहं सुप्तता चाङ्गेषु षट्पदेपिपीलिकाभिः शरीरस्यावाभिसरणं मूत्रे च मूत्रदोषान्वितं शरीरगन्धं निद्रां तन्द्राञ्च सर्वकालमिति।

उपद्रवास्तु खलु प्रमेहिणां तृष्णातीसारज्वरदाहदौर्बल्यान्यस्फोटपिडकाविषाकाः पूतिमांसपिडका व्रणजीविद्रध्यादयश्च तत् प्रसङ्गाद्भवन्ति।

तत्र साध्यान् प्रमेहान् संशोधनोपशमनैर्यथार्हं सुपपादयेच्चिकित्सेदिति।" इति चरके निदानस्थाने चतुर्थेऽध्याये॥)

प्रमोचनी, स्त्री, (प्रकर्षेण मुच्यतेऽनयेति। प्र+मुच्+ल्युट्+ङीप्।) गवाक्षी। गोडुम्बा। इति जटाधरः॥ प्रकृष्टमोचनकर्त्तरि, त्रि॥ (यथा, महाभारते। ३। ८४। ५०।

"महाश्रमे वसेद्राजन् सर्वपापप्रमोचने॥")

प्रमोदः, पुं, (प्र+मुद् हर्षे+भावे घञ्।) हर्षः। इत्यमरः। १। ४। २४॥ (यथा, देवीभागवते। ४। २४। ५५।

"उत्पाद्य पुत्रजननप्रभवं प्रमोदं
दत्त्वा पुनर्विरहजं किल दुःखभारम्।
त्वं क्रीड़से सुललितैः खलु तैर्विहारैर्-
नोचेत् कथं मम सुताग्निरतिर्वृथा स्यात्॥"

आमोदः। स तु गन्धविशेषः। यथा, भागवते। २। ६। २।

"अग्निनोरोषधीनाञ्च घ्राणो मोदप्रमोदयोः॥"

"मोदप्रमोदयोः सामान्यविशेषगन्धयोः घ्राणेन्द्रियं परमायनम्।" इति तट्टीकायां श्रीधरस्वामी॥ नागविशेषः। यथा, महाभारते। १। ५७। ११।

"विहङ्गः शरभो मेदः प्रमोदः संहतापनः॥"

स्कन्दानुचरविशेषः। यथा, तत्रैव। ९।४५।६३।

आनन्दश्च प्रमोदश्च स्वस्तिको ध्रुवक्षत्रधा॥")

प्रमोदितः, पुं, (प्र+मुद् हर्षे+क्तः। "उदुपधादिति।" १। २। २१। इति किदभावः। प्रमोदोऽस्य जातः इति तारकादित्वात् इतच् वा।) कुबेरः। इति शब्दमाला॥ प्रमोदयुक्ते, त्रि॥

प्रमोदिनी, स्त्री, (प्रमोदयतीति। प्र+मुद्+णिच्+णिनिः। ङीप्।) जिह्वनीवृक्षः। इति भावप्रकाशः॥ प्रकृष्टहर्षयुक्ता च॥

प्रम्लोचा, स्त्री, (प्रम्लोचति तापसादीन् प्रति गच्छतीति। प्र+म्लुच् गतौ+अच्। टाप्।) अप्सरोविशेषः। यथा, गारुड़े ६० अध्याये।

"तत्र तस्मान्नदीमध्यात् समुत्तस्थौ मनोरमा।
प्रम्लोचा नाम तन्वङ्गी तत्समीपे वराप्सराः॥"

प्रयतः, त्रि, (प्र+यम्+क्तः। यद्वा, प्रयतते धर्म्मान्यर्थमिति। प्र+यत्+अच्।) पवित्रः। इत्यमरः। २। ७। ४५॥ (यथा, मनुः। २। १८३।

"ब्रह्मचार्य्याहरेद्भैक्षं गृहेभ्यः प्रयतोऽन्वहम्॥"

। इति रामायणटीकायां रामानुजः॥ ।, रामायणे। १। २। २४।

वाल्मीकिरथ तं दृष्ट्वा सहसोत्थाय वाग्यतः।
प्राञ्जलिः प्रयतो भूत्वा तस्थौ परमविस्मितः॥"

प्रयत्नविशिष्टे च॥)

प्रयत्नः, पुं, (प्र+यत यत्ने+"यजयाचयतविच्छप्रच्छरक्षो नङ्।" ३। ३। ९०। इति नङ्।) प्रकृष्टयत्नः। (यथा, मनुः। ७। ६८।

"बुद्ध्या च सर्वं तत्त्वेन परराजचिकीर्षितम्।
तथा प्रयत्नमातिष्ठेदयथात्मानं न पीड़येत्॥")

न्यायमते स च त्रिविधः। यथा,—

"प्रवृत्तिश्च निवृत्तिश्च तथा जीवनकारणम्।
एवं प्रयत्नवैविध्यं तान्त्रिकैः परिदर्शितम्॥
चिकीर्षा कृतिसाध्येऽर्थसाधनत्वमतिस्तथा।
उपादानस्य चाधत्तं प्रवृत्तौ जनकं भवेत्॥
निवृत्तिस्तु भवेद्द्वेधा द्विष्टसाधनताधियः।
यत्नो जीवनयोनिस्तु सर्वदातीन्द्रियो भवेत्॥
शरीरे प्राणसञ्चारे कारणं तत् प्रकीर्त्तितम्॥"

इति भाषापरिच्छेदः॥

(तल्लक्षणं यथा, साहित्यदर्पणे।

"प्रयत्नस्तु फलावाप्तेर्व्यापारोऽतित्वरान्वितः॥")

प्रयत्नवान्, [न्] त्रि, (प्रयत्नोऽस्यास्तीति। प्रयत्न+मतुप्। मस्य वः।) प्रकृष्टयत्नविशिष्टः। तत्पर्य्यायः। प्रतियत्नः२। इति त्रिकाण्डशेषः॥

प्रयस्त, त्रि, (प्र+यस् प्रयत्ने+क्तः।) यत्नवत्तुल्यादिना द्रव्येण प्रयत्नसुसंस्कृतव्यञ्जनादिः। इत्यमरः। २। ९। ४५॥

प्रयागः, पुं, (प्रकृष्टो यागो यत्र। यत्र यज्ञः प्रकर्षेण भवतीत्यर्थः।) तीर्थभेदः। (प्रकृष्टो यागः।) यज्ञः। (प्रकृष्टा यागाः यज्ञा यस्य यस्माद्वा।) इन्द्रः। अश्वः। इति मेदिनी। गे, ४१॥ * ॥

अथ प्रयागमाहात्म्यम्।

"ततो गच्छेत धर्म्मज्ञ! प्रयागमृषिसम्मतम्।
यत्र ब्रह्मादयो देवा दिशश्च सदिगीश्वराः॥
लोकपालाश्च सिद्धाश्च निरताः पितरस्तथा।
सनत्कुमारप्रमुखास्तथैव च महर्षयः॥
तथा नागाः सुपर्णाश्च सिद्धाश्च क्रतवस्तथा।
गन्धर्व्वाप्सरसश्चैव सरितः सागरास्तथा॥
हरिश्च भगवानास्ते प्रजापतिभिरावृतः।
तत्र वीरध्वजिकुण्डानि तयोर्मध्ये तु जाह्नवी॥
प्रयागात् समतिक्रान्ता सर्वतीर्थपुरस्कृता।
तपनस्य सुता तत्र त्रिषु लोकेषु विश्रुता॥
यमुना गङ्गया सार्द्धं सङ्गता लोकभाविनी।
गङ्गायमुनयोर्म्मध्ये पृथिव्या जघनं स्मृतम्॥
प्रयागं जघनस्यान्तमुपस्थमृषयो विदुः।
प्रयागं सप्रतिष्ठानं कम्बलाश्वतरावुभौ॥
तीर्थं भोगवती चैव वेदी प्रोक्ता प्रजापतेः।
तत्र वेदाश्च यज्ञाश्च मूर्त्तिमन्तो महामते!॥
प्रजापतिमुपासन्त ऋषयश्च महाव्रताः।
यजन्ते क्रतुभिर्देवास्तथा चक्रधराः सदा॥
ततः पुण्यतमं नास्ति त्रिषु लोकेषु सत्तम!।
प्रयागं सर्वतीर्थेभ्यः प्रवदन्त्यधिकं द्विजाः॥
श्रवणात् तस्य तीर्थस्य नामसङ्कीर्त्तनादपि।
मृत्तिकालभनादापि सर्वपापैः प्रमुच्यते॥
तत्राभिषेकं यः कुर्य्यात् सङ्गमे संशितव्रतः।
पुण्यं स महदाप्नोति राजसूयाश्वमेधयोः॥
एषा यजनभूमिर्हि देवानामपि सत्तमा।
दत्तं तत्र स्वल्पमपि महाफलवति स्मृतम्॥
न वेदवचनात्तात! न लोकवचनादपि।
मतिरुत्क्रमणं याति प्रयागमरणं प्रति॥

दशतीर्थसहस्राणि षष्टिकोट्यस्तथापराः ।
तेषां सान्निध्यमत्रैव कीर्त्तितं सूतनन्दन ! ॥
यत् पुण्यं त्रिषु लोकेषु वेदविद्यासु यत् फलम् ।
स्नातमात्रस्य तत् पुण्यं गङ्गायमुनसङ्गमे ॥"
इति पाद्मे भूमिखण्डे १२७ अध्यायः ॥ ❀ ॥

अपि च ।

"पुत्रकामः प्रयागे हि स्नायात् पुण्ये सिताऽसिते ॥
धनकामः पुराश्चक्रः स्नातो यत्र द्विजोत्तम ! ॥
धनदस्य निधीन् सर्व्वान् तस्माल्लेभे मायया ।
नारायणो नरेणैव वर्षाणामयुतं पुरा ॥
अनाहारः प्रयागेऽस्मिन् कृतवान् पुण्यमुत्तमम् ।
सिद्धिञ्च साधका यान्ति प्रयागेऽस्मिन् द्विजोत्तम ! ॥"
इति पाद्मोत्तरखण्डे २३ अध्यायः ॥ ❀ ॥

अपि च ।

युधिष्ठिर उवाच ।

"भगवन् ! श्रोतुमिच्छामि प्रयागगमनं फलम् ।
मृतानां का गतिस्तत्र स्नातानामपि किं फलम् ॥
ये वसन्ति प्रयागे तु ब्रूहि तेषान्तु किं फलम् ।
भवता विदितं ह्येतत् तन्मे ब्रूहि नमोऽस्तु ते ॥

मार्कण्डेय उवाच ।

कथयिष्यामि ते वत्स ! या चेष्टा यत्र तत् फलम् ।
दृष्टा महर्षिभिः सम्यक् कथ्यमानं मया श्रुतम् ॥
यत्र स्नात्वा दिवं यान्ति ये मृतास्तेऽपुनर्भवाः ।
यत्र ब्रह्मादयो देवा रक्षां कुर्व्वन्ति सङ्गताः ॥
बहून्यन्यानि तीर्थानि सर्व्वपापहराणि च ।
कथितुं नेह शक्नोमि बहुवर्षशतैरपि ॥
संक्षेपेण प्रवक्ष्यामि प्रयागस्येह कीर्त्तनम् ।
षष्टिर्वर्त्तिसहस्राणि यत्रा रक्षन्ति जाह्नवीम् ॥
यमुनां रक्षति सदा सविता सप्तिवाहनः ।
प्रयागन्तु विशेषेण स्वयं रक्षति वासवः ॥
मण्डलं रक्षति हरिः सर्व्वतैवेह सस्मितम् ।
न्यग्रोधं रक्षते नित्यं मूलपार्श्वमहेश्वरः ॥
स्नानं रक्षन्ति वै देवाः सर्व्वे पापहरं शुभम् ।
स्वकर्म्मणाहता लोका नैव गच्छन्ति तत्पदम् ॥
स्वल्पमल्पतरं पापं यदा तस्य नराधिप ! ।
प्रयागं स्मरमाणस्य सर्व्वमायाति संक्षयम् ॥
दर्शनात्तस्य तीर्थस्य नामसंकीर्त्तनादपि ।
मृत्तिकालम्भनाद्वापि नरः पापात् प्रमुच्यते ॥
पञ्चक्रोशानि राजेन्द्र ! येषां मध्ये तु जाह्नवी ।
प्रयागं विशतः पुंसः पापं नश्यति तत्क्षणात् ॥
योजनानां सहस्रेषु गङ्गां यः स्मरते नरः ।
अपि दुष्कृतकर्म्मासौ लभते परमां गतिम् ॥
कीर्त्तनान्मुच्यते पापात् दृष्ट्वा भद्राणि पश्यति ॥
व्याधितो यदि वा क्षीणः कुष्ठी वापि भवेन्नरः ।
गङ्गायमुनमासाद्य त्यजेत् प्राणान् प्रयत्नतः ॥
दीप्तकाञ्चनवर्णाभैर्विमानैर्भास्वरैर्भिः ।
ईप्सितान् लभते कामान् वदन्ति मुनिपुङ्गवाः ॥
सर्व्वरत्नमयैर्हर्म्यैर्नानाध्वजसमाकुलैः ।
वराप्सरोसमाकीर्णैर्भोगिभिः सुमनस्तमैः ।
गीतवादित्रनिर्घोषैः प्रथमः प्रतन्यते ।
यावन्न स्मरते चक्रं तावत् स्वर्गे महीयते ॥
तस्मात् स्वर्गात् परिभ्रष्टः क्षीणकर्म्मा नरोत्तमः ।
हिरण्यरत्नसंपूर्णे चन्द्रे जायते कुले ॥
तदेव स्मरते तीर्थं स्मरणात्तत्र गच्छति ।
देशस्थो यदि वारण्ये विदेशे यदि वा गृहे ॥
प्रयागं स्मरमाणस्तु यस्तु प्राणान् परित्यजेत् ।
ब्रह्मलोकमवाप्नोति वदन्ति मुनिपुङ्गवाः ॥
सर्व्वकामफला दृष्टा मही यत्र हिरण्मयी ।
ऋषयो मुनयः सिद्धास्तत्र लोके स गच्छति ॥
स्त्रीसहस्राकुले रम्ये मन्दाकिन्यास्तटे शुभे ।
मोदते मुनिभिः सार्द्धं स्वर्गतेनेह कर्म्मणा ॥
सिद्धचारणगन्धर्व्वैः पूज्यते दिवि देवतैः ।
अथ स्वर्गात् परिभ्रष्टो जम्बुद्वीपपतिर्भवेत् ॥
अतः शुभानि कर्म्माणि चिन्त्यमानः पुनः पुनः ।
गुणवान् वित्तसम्पन्नो भवतीह न संशयः ॥
कर्म्मणा मनसा वाचा सत्यधर्म्मप्रतिष्ठितः ।
गङ्गायमुनयोर्मध्ये यस्तु ग्रामं प्रयच्छति ।
सुवर्णमणिसुक्तां वा तथैवान्यत् प्रतिग्रहम् ॥
स्वकार्य्ये पितृकार्य्ये वा देवताभ्यर्चनेऽपि वा ।
निष्फलं तस्य तत्तीर्थं यावत् तद्वनमभुते ॥
अतस्तीर्थे न गृह्णीयात् पुण्येष्वायतनेषु च ॥
कपिलां पाटलाभान्तु यस्तु धेनुं प्रयच्छति ।
यावद्रोमाणि तस्या वै सन्ति गात्रेषु सत्तम ! ।
तावद्वर्षसहस्राणि रुद्रलोके महीयते ॥"
इति कौर्म्मे प्रयागमाहात्म्ये ३३ अध्यायः ॥ ❀ ॥

तत्र मुण्डनविधिर्यथा,—

"गङ्गायां भास्करक्षेत्रे मातापित्रोर्गुरौ मृते ।
व्याधाने सोमग्रहणे च वपनं सप्तसु स्मृतम् ॥"
इति स्मृतिसमुच्चयलिखितवचनं प्रयागावच्छिन्नगङ्गायां विधायकम् । भास्करक्षेत्रं प्रयागः ।

अपि च । प्रयागमधिकृत्य ।

"केशानां वापती संख्या छिन्नानां जाह्नवीजले ।
तावद्वर्षसहस्राणि स्वर्गलोके महीयते ॥"

प्रयागे स्त्रीणामपि मुण्डनं न तु केशानां वपनमुक्तच्छेदनमात्रम् । यथा,—

"केशग्रहमुपाश्रित्य सर्व्वपापानि देहिनाम् ।
तिष्ठन्ति तीर्थस्नानेन तस्मात्तान्यत्र वापयेत् ॥"

प्रयागे मुण्डनाकरणे दोषोऽपि ।

"गङ्गायां भास्करक्षेत्रे मुण्डनं यो न कारयेत् ।
स कोटिकुलसंयुक्त आकल्पं रौरवे वसेत् ॥"
इति प्रायश्चित्ततत्त्वम् ॥

प्रयागभयः, पु, (प्रयागात् प्रकृष्टयागकारिजनात् बिभेति स्वप्रदमरिष्यदृष्ट्येति । भी + अच् ।) इन्द्रः । इति शब्दरत्नमाला ॥

प्रयाणं, क्ली, (प्र + या + ल्युट् । णत्वम् ।) गमनम् । इति हलायुधः । २ । २८७ ॥ यथा,—

"उड्डामितनवद्वारे पञ्जरे विहगोत्तमः ।
यस्तिष्ठति तदाश्चर्य्यं प्रयाणे विस्मयः कुतः ॥"
इत्युद्भटः ॥

तत्पर्य्यायः । प्रस्थानम् २ गमनम् ३ प्रस्था ४ अभिनिर्यानम् ५ प्रयाणकम् ६ । इति हेमचन्द्रः । ३ । ४५३ ॥ अत्र राज्ञां युद्धादिप्रयाणे वर्ज्जनीयानि यथा । भेरीरोगिखनः १ भूकम्पः २ यज्ञभूमिः ३ करभः ४ दग्धः ५ भग्नः ६ छत्रम् ७ वल्मिक् ८ प्रकटम् ९ रथः १० । इति कविकल्पलता ॥

प्रयातः, पुं, (प्रकर्षेण यातः । प्र + या + कर्त्तरि क्तः ।) सौम्मिकः । भटुः । इति हेमचन्द्रः ॥ गते, त्रि ॥ (स्त्री, भावे क्तः । गमनम् । प्रस्थानम् । यथा, छन्दोमञ्जर्य्याम्

"मया क्षोभितः कालियेत्थं द्रुतं त्वं
सचक्र ! प्रयातं द्रुतं सागराय ॥")

प्रयामः, पुं, (प्र + यम् + घञ् ।) नीवाकः । इत्यमरः । २ । २ । २३ ॥ महार्घ्यहेतोर्धान्यादिषु धनानामादरातिशये तुलाधरण्याधिक्यम् । इति केचित् । क्रयादरः । इति केचित् । मूल्याधिक्यहेतोर्निश्चयेन परिच्छेदनम् । इति केचित् । इति भरतः ॥

प्रयासः, पुं, (प्र + यस प्रयत्ने + भावे घञ् ।) प्रयत्नः । तत्पर्य्यायः । श्रमः २ क्लमः ३ क्लेशः ४ परिश्रमः ५ आयासः ६ आयामः ७ । इति हेमचन्द्रः । २ । २३४ ॥ (यथा, षष्ठयोगप्रदीपिकायाम् । १ । १५ ।

"अत्याहारः प्रयासश्च प्रजल्पो नियमग्रहः ।
जनसङ्गश्च लौल्यञ्च षड्भिर्योगो विनश्यति ॥").

प्रयुक्तं, त्रि, (प्र + युज् + क्तः ।) प्रकर्षेण युक्तम् । यथा,—

"गुणप्रयुक्ताः परमर्म्ममेदिनः
शरा इवावंशभवा भवन्ति हि ।
तथाविधा ये तु विशुद्धवंशजा
भवन्ति छाया इव तेऽतिसम्मताः ॥"
इत्युद्भटः ॥

प्रकृष्टसमाधियुक्तम् । प्रकृष्टसंयोगविशिष्टम् । प्रकृष्टनिन्दायुक्तम् । प्रकृष्टसंयमविशिष्टम् । प्रपूर्ब्बयुजधात्वर्थदर्शनात् । हेतौ क्तौ । यथा । न च समवायिनिमित्ताभावप्रयुक्तो नियमेन कार्य्याभावः किन्त्वसमवायिकारणाभावप्रयुक्तोऽपि । इति रघुनाथः ॥

प्रयुक्तिः, स्त्री, प्रयोजनम् । प्रपूर्ब्बयुजधातोर्भावे क्तिः (क्तिन्) । यथा,—

"तरण्यो दमती भार्य्या प्रवीरं पुत्रकाम्यति ।
अग्रहस्य राजसावज्ञा इति न स्मुः प्रयुक्तयः ॥"
इति प्राशः ॥

(प्रयोगः । यथा, ऋग्वेदे । १ । १५१ । ८ ।

"युवां यज्ञैः प्रथमा गोभिरञ्जत ऋतावाना
मनसो न प्रयुक्तिषु ॥"

"प्रयुक्तिषु प्रयोगेषु ।" इति तद्भाष्ये सायणः ॥)

प्रयुतं, क्ली, (प्रकर्षेण युतम् । यद्वा, प्रयुतकोटयः क्रमशः ।" इति लीलावती ॥ यथा च महाभारते । १ । ३५ । १६ ।

"बहूनीह सहस्राणि प्रयुतान्यर्ब्बुदानि च ।
शतशश्चैव संख्यातुं पन्नगानां तपोधन ! ॥")

प्रयुक्तार्थः, पुं, (प्रयुक्तः अर्थो यस्य सः ।) प्रयुक्तक्रमः । इति प्रयोगार्थशब्दटीकायां रमागाथः । ३ । २ । २६ ॥

प्रयोक्ता, [क्तृ] पुं, (प्रयुनक्तीति । प्र+युज्+तृच् ।) उत्तमर्णः । यथा,—

"उत्तमर्णाधमर्णौ तौ प्रयोक्तृग्राहकौ क्रमात् ॥"

इत्यमरः । २ । ९ । ५ ॥

चि, प्रयोगकर्त्ता । (यथा, रघुः । ५ । ५७ ।

"संमोहनं नाम सखे ! ममाध्वं
प्रयोगसंहारविभक्तमन्त्रम् ।
गान्धर्व्वमादत्त्व यतः प्रयोक्तु-
र्नैचारिहिंसा विषयश्च हस्ते ॥"

अनुष्ठाता । यथा, रघुः । ६ । ७६ ।

"पुत्तो रघुस्तस्य पदं प्रपद्यति
महाक्रतोर्विश्वजितः प्रयोक्ता ॥"

नियोगकर्त्ता । यथा, महाभारते । १३ । २३ । ६२ ।

"परदाराभिहर्त्तारः परदाराभिमर्शिनः ।
परदारप्रयोक्तारस्ते वै निरयगामिनः ॥"

नाट्याचार्य्यः । यथा, रघुः । १६ । ३६ ।

"स प्रयोगनिपुणः प्रयोक्तृभिः
सङ्गमर्य्य सह मित्रसन्निधौ ॥")

प्रयोगः, पुं, (प्र+युज्+भावकर्म्मादौ यथायथं घञ् ।) कार्म्मणम् । वशीकरणम् । प्रयुक्तिः । (यथा, रघुः । २ । ४२ ।

"प्रत्यग्रहीत्पेनमिषुप्रयोगे
तत्पूर्व्वभङ्गे वितथप्रयत्नः ॥")

निदर्शनम् । इति मेदिनी । गे, ४४ ॥ (यथा, पञ्चदश्याम् । ६ । ४३ ।

"स्वयमात्मेति पर्य्यायैस्तेन लोके तयोः सह ।
प्रयोगो गम्यतः स्वत्वमात्मत्वाग्र्यवारकम् ॥")

घोटकः । इति शब्दमाला ॥ (सामान्योपायानुष्ठानम् । यथा, माघे । ११ । ६ ।

"क्षणप्रथितविबुधाः कल्पयन्तः प्रयोगा-
नुदधिमथति राज्ये कायवद्दुर्विगाहे ॥"

अभिनयः । यथा, रघुः । १६ । ३६ ।

"स प्रयोगनिपुणः प्रयोक्तृभिः
सङ्गमर्य्य सह मित्रसन्निधौ ॥"

दृष्टेर्द्रव्यदानम् । स तु धनप्राप्त्युपायेषु अन्यतमः । यथा, मनुः । १० । ११५ ।

"सप्त वित्तागमा धर्म्म्या दायो लाभः क्रयो जयः ।
प्रयोगः कर्म्मयोगश्च सत्प्रतिग्रह एव च ॥")

प्रयोगार्थः, पुं, (प्रयोगः अर्थः प्रयोजनं यस्य ।) प्रधानप्रयोगानुकूलं प्रयोजनानुष्ठानम् । तत्पर्य्यायः । प्रयुक्तक्रमः २ । इत्यमरः । ३ । २ । २६ ॥

प्रयोगी, [न्] चि, (प्रयोगोऽस्यस्येति । प्रयोग+"अत इनिठनौ ।" ५ । २ । ११५ । इति इनिः ।) प्रयोगयुक्तः । (यथा, अमरे । २ । ७ । २० ।

"सङ्घः परिचार्य्योपचार्य्यावपौ प्रयोगिणः ॥")

प्रयोजकः, चि, (प्रयुनक्ति प्रेरयति कार्य्यादौ अन्यानीति । प्र+युज्+ण्वुल् ।) प्रयोगकर्त्ता । नियोगकर्त्ता । स्वतन्त्रतत्प्रयोजकौ कर्त्ता । इति सुपद्मव्याकरणम् ॥ (यथा, राघवपाण्डवीये । ६ । ११६ ।

"यान् क्रोधभीरून् समवाय संविभेजे यमस्वरः ।
तस्य तत्तनयोच्छेदे त एवासन् प्रयोजकाः ॥"

नियन्ता । यथा, याज्ञवल्क्ये । १ । ५ ।

"ज्ञातातपो वह्निरथ धर्म्मशास्त्रप्रयोजकाः ॥")

प्रयोजनं, क्ली, (प्रयुज्यते इति । प्र+युज्+ल्युट् ।) कार्य्यम् । (प्रयुज्यतेऽनेनेति । प्र+युज्+करणे ल्युट् ।) हेतुः । इति मेदिनी । ने, १६२ ॥ यथा,

"सर्व्वस्यैव हि शास्त्रस्य कर्म्मणो वापि कस्यचित् ।
यावत् प्रयोजनं नोक्तं तावत् तत्केन प्रयुज्यते ॥
सिद्धार्थं सिद्धसम्बन्धं श्रोतुं श्रोता प्रवर्त्तते ।
शास्त्रादौ तेन वक्तव्यः सम्बन्धः सप्रयोजनः ॥"

इति भाषा ॥

("प्रयोजनञ्च द्विविधं सुखं गौणञ्च । तत्र अन्येच्छानधीनेच्छाविषयत्वं सुखप्रयोजनत्वम् । अन्येच्छाधीनेच्छाविषयत्वं गौणप्रयोजनत्वम् । तत्राद्यं सुखं तद्भोगो दुःखाभावश्च द्वितीयं तदुपकारि भोजनादि । तस्य सुखप्रयोजनेच्छयैव तत्तदिच्छाया विषयत्वात्तथात्वम् ।" इति मुक्तिवादे गदाधरः ॥ उद्देश्यः । यथा,

"अथ प्रयोजनम् । प्रयोजनं नाम यदर्थमारभ्यन्त आरम्भाः । यथा यदकामस्तदुरक्षि ततोऽहमात्मानमायुष्येरूपचरिष्यामि नायुष्यैः परिहरिष्यामि कथं न मामकामस्तदुः प्रद्वेष्टेति ।"

इति चरके विमानस्थानेऽष्टमेऽध्याये ॥)

प्रयोज्यः, चि, (प्र+युज्+ण्यत् । "प्रयोज्यनियोज्यौ शक्यार्थे ।" ७ । ३ । ६८ । इति निपातनात् साधुः ।) प्रयोक्तुं शक्यः । इति मुग्धबोधव्याकरणम् ॥ (यथा, मनुः । २ । १५६ ।

"वाक् चैव मधुरा श्लक्ष्णा प्रयोज्या धर्म्ममिच्छता ॥")

मूलधने, क्ली ॥

प्ररूढः, पुं, (प्ररोहत्यत्रेति । प्र+रुह्+क्तः ।) जठरम् । इति मेदिनी । ढे, ८ ॥ (क्वचित् जरठोऽपि पाठः ॥)

प्ररूढः, चि, (प्र+रुह्+क्तः ।) वद्धमूलः । इति मेदिनी । ढे, ८ ॥ (यथा, भागवते । ४ । १३ । १ ।

"प्ररूढभावो भगवत्यधोक्षजे
प्रभुं पुनस्तं विदुरः प्रचक्रमे ॥")

जातः । (यथा, रघुः । १३ । ६ ।

"नाभिप्ररूढ़ामुरुहासनेन
संभूयमानः प्रथमेन धात्रा ॥")

प्रवृद्धः । इति शब्दरत्नावली ॥

प्ररोहः, पुं, (प्ररोहतीति । प्र+रुह्+घञ् ।) अङ्कुरः । इति हेमचन्द्रः । ३ । १८५ ॥ (यथा, कुमारे । ५ । ६० ।

"हुमेषु सद्यः कृतपल्लवासु स्वयं
पतं तपःसाक्षिषु दृष्टमेभ्यपि ।
न च प्ररोहाभिमुखोऽपि दह्यते
ममोरधोऽस्याः शुचिमौक्तिसंश्रयः ॥"

गन्धीवृक्षः । तत्पर्य्यायो यथा,—

"गन्धीवृक्षोऽन्त्यभेदः प्ररोहो गणपादपः ।
स्यात्गोवृक्षः चयतरुः चीरी च स्यात्नखातिः ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

प्रलपितः, त्रि, प्रपूर्व्वलपधातोः कर्म्मणि क्तः । कथितः । यथा, काव्यप्रकाशे ।

"जनस्थाने क्वान्तं कनकरुचिलक्ष्मान्वितधिया
वयो वैदेहीति प्रतिपदमुदस्रं प्रलपितम् ॥"

प्रलम्बः, पुं, (प्रलम्बते इति । प्र+लम्ब+अच् । अतिदीर्घत्वादेव तथात्वम् ।) दैत्यभेदः । स च दनुपुत्रः मनुष्यवधः । यथा,—

"एकाक्ष ऋषभोरिष्टः प्रलम्बनरकौ तथा ।
इन्द्रबाधनकेशी च पुरः शङ्खोऽथ धेनुकः ॥
गवेधिको गवाक्षश्च तालकेतुश्च वीर्य्यवान् ।
एते मनुष्यवध्यास्तु दनोः पुत्रान्वयाः स्मृताः ॥"

इत्यग्निपुराणम् ॥

(अयं हि बलदेवेन निहतः । यथा, भागवते । १० स्कन्धे १८ । अध्याये ।

"तत्रोपाकृष्य गोपालान् कृष्णः प्राह विहारवित् ।
हे गोपा विहरिष्यामो द्वन्द्वीभूय यथायथम् ॥
तत्र चक्रुः परिवृढौ गोपा रामजनार्द्दनौ ।
कृष्णसङ्घट्टिनः केचिदासन् रामस्य चापरे ॥
आचेरुर्विविधाः क्रीड़ा वाह्यवाहकलक्षणाः ।
यत्रारोहन्ति जेतारो वहन्ति च पराजिताः ॥"
"उवाह कृष्णो भगवान् श्रीदामानं पराजितः ।
वृषभं भद्रसेनस्तु प्रलम्बो रोहिणीसुतम् ॥
अविषह्यं मन्यमानः कृष्णं दानवपुङ्गवः ।
वहन् द्रुततरं प्रागादवरोहणतः परम् ॥"
"अथागतस्मृतिरभयो रिपुं बलो
विहायसार्थमिव हरन्तमात्मनः ।
रुषाहनच्छिरसि दृढेन सुष्टिना
सुराधिपो गिरिमिव वज्रमूर्জসा ॥
स आहतः सपदि विशीर्ण्यमस्तको
मुखादसृग् रुधिरमपस्रुतोऽसुरः ।
महारवं व्यसुरपतत् समीरयन्
गिरिर्यथा मघवत आयुधाहतः ॥")

प्रपुषः । पयोधरः । लताङ्कुरः । शाखा । प्रकारभेदः । (भावे घञ् ।) प्रलम्बनम् । इति मेदिनी । बे, १३ ॥ (देशविशेषः । यथा, रामायणे । २ । ६८ । १२ ।

"म्लेच्छानापरतालस्य प्रलम्बस्योत्तरं प्रति ।
निषेवमाणास्ते यमुनां मधुनं मालिनीम् ॥")

लम्बमाने, त्रि । यथा, महाभारते । ५ । १६५ । १० ।

"गूढोत्तरांसान् सुजगेन्द्रभोग-
प्रलम्बबाहून् पुरुषप्रवीरान् ॥")

प्रलम्बघ्नः, पुं, (प्रलम्बं हन्तीति । हन्+कः ।) बलरामः । इत्यमरः । १ । १ । २४ ॥

प्रलम्बभित्, पुं, (प्रलम्बं भिनत्तीति । भिद्+क्विप् ।) बलरामः । इति हेमचन्द्रः । २ । १३८ ॥

प्रलम्बाक्षः, पुं, (प्रलम्बो लम्बमानः अक्षो यस्य ।) दीर्घाष्टकोषविशिष्टः । तत्पर्य्यायः । पुष्करः २ । इति हेमचन्द्रः । ३ । १२१ ॥

प्रलम्बितः, त्रि, प्रपूर्ब्बलम्बधातोः कर्त्तरि क्तः ॥ प्रकर्षेण लम्बितमाद्यादिः ॥

प्रलयः, पुं, (प्रलीयते लीयते जगदस्मिन्निति । प्र+ली+"हरच् ।" ३ । ३ । ५६ । इत्यच् ।) प्रक्षयः । तत्पर्य्यायः । संवर्त्तः २ कल्पः ३ क्षयः ४ कल्पान्तः ५ । इत्यमरः ।१ । ४ । २२ ॥ लयः ६ संक्षयः ७ विलयः ८ । इति शब्दरत्नावली ॥ प्रतिसर्गः ९ प्रतिसञ्चरः १० । स च नित्यनैमित्तिकप्राकृतात्यन्तिकभेदेन चतुर्धा । यथा,—

कूर्म्म उवाच ।

"नित्यं नैमित्तिकञ्चैव प्राकृतात्यन्तिकौ तथा ।
चतुर्धाऽयं पुराणेऽस्मिन् प्रोच्यते प्रतिसञ्चरः ॥"*

नित्यो यथा,—

"योऽयं संदृश्यते नूनं नित्यं लोके क्षयन्निह ।
नित्यं संकीर्त्यते नाम्ना मुनिभिः प्रतिसञ्चरः ॥"

नैमित्तिको यथा,—

"ब्राह्मो नैमित्तिको नाम कल्पान्ते यो भविष्यति ।
त्रैलोक्यस्यास्य कथितः प्रतिसर्गो मनीषिभिः ॥"

प्राकृतो यथा,—

"महदादेर्विशेषान्तं यदा संयाति संक्षयम् ।
प्राकृतः प्रतिसर्गोऽयं प्रोच्यते कालचिन्तकैः ॥"

आत्यन्तिको यथा,—

"ज्ञानादात्यन्तिकः प्रोक्तो योगिनः परमात्मनि ।
प्रलयः प्रतिसर्गोऽयं कालचिन्तापरैर्द्विजैः ॥
आत्यन्तिकश्च कथितः प्रलयो लयसाधनः ॥"*॥

नैमित्तिकप्रलयविस्तारो यथा,—

"नैमित्तिकमिदानीं वः कीर्त्तयिष्ये समासतः ॥
चतुर्युगसहस्रान्ते संप्राप्ते प्रतिसञ्चरे ।
आत्मसंस्थाः प्रजाः कर्त्तुं प्रतिपेदे प्रजापतिः ॥
ततो भवत्यनावृष्टिर्घोरा सा शतवार्षिकी ।
भूतक्षयकरी घोरा सर्व्वभूतभयङ्करी ॥
ततो यान्यल्पसाराणि भूस्थानि पृथिवीतले ।
तानि चाग्नेः प्रलीयन्ते भूमित्वमुपयान्ति च ॥
सप्तरश्मिरधो भूत्वा वर्त्तिष्यन् दिवाकरः ।
अवस्करश्चिभवति पिबन्नम्भो गभस्तिभिः ॥
ततस्ते रश्मयः सप्त पिबन्त्यम्बु महार्णवे ।
तेनाहारेण ते सूर्य्या दीप्ताः सप्त भवन्ति हि ॥
तस्य ते रश्मयः सप्त सूर्य्या भूत्वा चतुर्दिशम् ।
चतुर्लोकमिदं कृत्स्नं दहन्ति शिखिनो यथा ॥
व्याप्नुवन्तश्च ते विप्रास्तूर्द्ध्वाधश्च रश्मिभिः ।
दीप्यन्ते भास्कराः सप्त दहन्तोऽग्नितापिनः ॥
ते सूर्य्या वारिणा दीप्ता बहुयोजनसञ्चयः ।
सर्वं समादाय तिष्ठन्ति निर्दहन्तो वसुन्धराम् ॥
ततस्तेषां प्रतापेन दह्यमाना वसुन्धरा ।
सार्द्रनष्टर्क्षवृक्षौघा निःस्नेहा समपद्यत ॥
दीप्ताभिः रक्ततामाभिश्च ज्वालाभिश्च समाहतः ।
अधश्चोर्द्ध्वं तिर्य्यक् च समादत्ते महत्तपः ॥
सूर्य्याग्निना प्रदग्धानां संचूर्णानां परस्परम् ।
एकत्वमुपयातानामेकत्वान्नो भवेत् प्रभुः ॥
सर्व्वलोकप्रयात्यन्तं योऽग्निभूत्वात्मकुण्डली ।
चतुर्लोकमिदं कृत्स्नं निर्दहत्यात्मतेजसा ॥
ततः प्रलीने सर्व्वस्मिन् जङ्गमे स्थावरे तथा ।
निर्वृक्षा निस्तृणा भूमिः कूर्म्मपृष्ठे प्रकाशते ॥
अम्बरीषमिवाभाति सर्व्वमापूरितं जगत् ।
सर्व्वमेव तदार्च्चिर्भिः पूर्णं व्याप्यवते नभः ॥
पाताले यानि तीर्थानि महोदधिगतानि तु ।
तत्र तानि प्रलीयन्ते भूमित्वमुपयान्ति वै ॥
द्वीपांश्च पर्व्वतांश्चैव वर्षाण्यथ महोदधीन् ।
तान् सर्व्वान् भस्मसात् कृत्वा समात्मा पावकः प्रभुः ॥
सप्तभ्यो नदीभ्यश्च पातालेभ्यश्च सर्व्वशः ।
पिबन्नपः समिद्धोऽग्निः पृथिवीमाश्रितोऽज्वलत् ॥
ततः सवर्त्तकः श्रीमानतिक्रम्य महांस्तथा ।
लोकान् दहति दीप्तात्मा रक्ततोयविजृम्भितः ॥
स दग्ध्वा पृथिवीन्देवो रसातलमशोषयत् ।
अधस्तात् पृथिवीं दग्ध्वा दिवमूर्द्धं दहिष्यति ॥
योजनानां शतानीह सप्तसाप्तयुतानि च ।
उत्तिष्ठन्ति शिखास्तस्य वायुः सम्वर्त्तकस्य च ॥
गन्धर्व्वांश्च पिशाचांश्च सयक्षोरगराक्षसान् ।
तदा दहत्यसौ दीप्तः कालरुद्रप्रचोदितः ॥
भूर्लोकश्च सुवर्लोकं खर्लोकश्च तथा महः ।
दहेदशेषं कालाग्निः कालो विश्वतनुः स्वयम् ॥
तुष्टेषु तेषु लोकेषु तिर्य्यगूर्द्धमधोऽग्निना ।
तत्तेजः समनुप्राप्य कृत्स्नं जगदिदं पुनः ॥
आयोगहनिभं सर्व्वं तदेवैकं प्रकाशते ।
ततो गजकुलोत्पादाः स्तनितैः समसङ्कुलाः ॥
उत्तिष्ठन्ति तदा घोरा घोरा वर्षन्ति घनाः ।
कैचिन्नीलोत्पलश्यामाः केचित् कुमुदसन्निभाः ॥
धूम्रवर्णास्तथा केचित् तथा पीताः पयोधराः ।
केचिद्रक्ताभवर्णाश्च स्थूलाः शारनिभास्तथा ॥
अञ्जनेन्द्रनिभाश्चान्ये जात्यञ्जननिभाः परे ।
मनःशिलानिभास्त्वन्ये कपोतसदृशाः परे ॥
केचिद्वैडूर्य्यवर्णाभास्तथान्ये चीरसन्निभाः ।
तथा कर्व्वूरवर्णाभा भिन्नाञ्जननिभास्तथा ॥
इन्द्रगोपनिभाः केचिद्धरितालनिभास्तथा ।
काकाण्डनिभाः केचिदुत्तिष्ठन्ति घना दिवि ॥
केचित् पर्व्वतसङ्काशाः केचिन्नलकुलोपमाः ।
कूटागारनिभाश्चान्ये केचिन्नीलकुलोद्वहाः ॥
बहुरूपा घोररूपा घोरस्वरनिनादिनः ।
तदा जलधराः सर्व्वे पूरयन्ति नभस्तलम् ॥
ततस्ते जलदा घोरा वारिणा भास्करात्मजाः ।
सप्तधा संवृतात्मानस्तमग्निं शमयन्त्युत ॥
ततस्ते जलदा वर्षं वर्षन्तीह दिनौघवत् ।
सुघोरमग्निं सर्व्वं नाशयन्ति च पावकम् ॥
प्रवृत्तेन तदात्यर्थमम्भसा पूर्य्यते किल ।
अग्निस्तेजोऽभिभूतत्वात्तदाम्भः प्रविशत्यपः ॥
नष्टे चाग्नौ वर्षशते पयोदा जलसम्भवाः ।
प्लावयन्तोऽथ सुवनं महाजलपरिप्लवैः ॥
धाराभिः पूरयन्तीदं चोद्यमाना स्वयम्भुवा ।
उद्यन्तः सलिलौघैश्च वेला इव महोदधेः ॥
सार्द्रद्वीपा तदा पृथ्वी तले संक्षयते भुवः ।
आदित्यरश्मिभिः पीतं जलमम्बरे तिष्ठति ।
पुनः पतति तद्भूमौ पूर्य्यन्ते तेन चार्णवाः ॥
ततः सप्तद्रयः स्थाः वेलामतिक्रान्तास्तु कृत्स्नशः ।
पर्व्वताश्च विलीयन्ते मही चाप्सु निमज्जति ॥
तस्मिन्नेकार्णवे घोरे नष्टे स्थावरजङ्गमे ।
योगनिद्रां समास्थाय शेते देवः प्रजापतिः ॥
चतुर्युगसहस्रान्तं कल्पमाहुर्मनीषिणः ।
वराहो वर्णते कल्पो यस्य विस्तार ईरितः ॥
असंख्यातास्तथा कल्पा ब्रह्मविष्णुशिवात्मकाः ।
कथिता हि पुराणेषु मुनिभिः कालचिन्तकैः ॥
सात्विकेष्वेव कल्पेषु माहात्म्यमखिलं हरेः ।
तामसेषु शिवस्योक्तं राजसेषु प्रजापतेः ॥
सोऽयं प्रवर्णते कल्पो वाराहः सात्विको मतः ।
अन्ये च सात्विकाः कल्पा मम तेषु परिग्रहः ॥
ध्यानस्तुत्यर्च्चया ज्ञानं लब्ध्वा तेष्वेव योगिनः ।
आराध्य गिरिशं यान्ति तत्परमं पदम् ॥
सोऽहं च त्वं समाधाय मायी मायामयं स्वयम् ॥
एकार्णवे जगत्यस्मिन् योगनिद्रां व्रजामि तु ।
मां पश्यन्ति महात्मानः सुप्तं काले महर्षयः ॥
जनलोके वर्त्तमानास्तपसा योगचक्षुषा ।
अहं पुराणपुरुषो भूर्भुवःप्रभवो विदुः ॥
सहस्रचरणः श्रीमान् सहस्राक्षः सहस्रपात् ।
मन्वोऽग्निर्ज्ञानजा गावः कुशाश्चाग्निमुखोऽक्षयम् ॥
प्रोच्यते च सुवश्चैव सोमो हृतमयोऽक्षयम् ।
संवर्त्तको महागात्रा पवित्रं परमं यशः ॥
वेदवेद्यः प्रसूर्गोप्ता गोपतिर्गहनो गुहम् ।
अनन्तस्त्वारको योगी गतिर्मतिमतां वरः ॥
हंसः प्राणोऽथ कपिलो विश्वमूर्त्तिः सनातनः ।
क्षेत्रज्ञः प्रकृतिः कालो जगद्बीजमधोक्षजम् ॥
माता पिता महादेवो मत्तो नान्यन्न विद्यते ॥
आदित्यवर्णो भुवनस्य गोप्ता
नारायणः पूरुषो योगमूर्त्तिः ।
मां पश्यन्ति यतयो योगनिष्ठा
ज्ञात्वात्मानमव्ययं व्रजन्ति ॥" ८ ॥

प्राकृतप्रलयविस्तारो यथा,—

कूर्म्म उवाच ।

"अतःपरं प्रवक्ष्यामि प्रतिसर्गमनुत्तमम् ।
प्राकृतं प्रसमासेन शृणुध्वं गदतो मम ॥
गते परार्द्धद्वितये काले लोकप्रकालकः ।
कालाग्निर्भस्मसात् कर्त्तुं करोति निखिलं मनिम् ॥
आत्मन्यात्मानमावेश्य भूतो देवो महेश्वरः ।
दहेदशेषं ब्रह्माण्डं सदेवासुरमानुषम् ॥
तमाविश्य महादेवो भगवान्नीललोहितः ।
करोति लोकसंहारं भीषणं लोकमात्रिणः ॥
प्रविश्य मण्डलं सौरं हृत्वासौ बहुधा पुनः ।
निर्दहत्यखिलं लोकं सप्तसप्तिस्वरूपधृक् ॥
स दग्ध्वा सकलं सत्त्वं मत्तं ब्रह्मशिरो महत् ।
देवतानां शरीरेषु क्षिपत्यखिलदाहकः ॥
दग्धेष्वशेषदेहेषु देवो गिरिवरात्मजा ।
एका सा साक्षिणः शम्भोस्तिष्ठते वैदिकी श्रुतिः ॥
शिरःकपालैर्देवानां कृतसंस्तरभूषणः ।
आदित्यचन्द्रादिगणैः पूरयन् योगमण्डलम् ॥

महसनयनो देवः सहस्राक्षतिरीश्वरः ।
सहस्रसहस्रचरणः सहस्रार्चिर्महाभुजः ॥
दंष्ट्राकरालवदनः प्रदीप्तानललोचनः ।
त्रिशूली शक्तिवसनो योगमैश्वरमास्थितः ॥
पीत्वा तत् परमानन्दं प्रभूतसन्ततं स्वकम् ।
करोति ताण्डवं देवीमालोक्य परमेश्वरः ॥
पीत्वा मृत्यान्तकं देवी भक्तुं: परममङ्गला ।
योगमास्थाय देवस्य देहमायाति भूतिनः ॥
स त्यक्त्वा ताण्डवरसं स्वेच्छयैव पिनाकधृक् ।
याति स्वभावं भगवान् दग्ध्वा ब्रह्माण्डमण्डलम् ॥
संस्थितेष्वथ देवेषु ब्रह्मविष्णुपिनाकिषु ।
गुणैरनेकैः पृथिवी विलयं याति वारिषु ।
स वारितत्त्वं सगुणं ग्रसते हव्यवाहनः ॥
तैजसं गुणसंयुक्तं वायौ संयाति संक्षयम् ।
आकाशे सगुणो वायुः प्रलयं याति सत्तमाः ॥
भूतादौ च तथाकाशं लीयते गुणसंयुतम् ।
इन्द्रियाणि च सर्वाणि तैजसे यान्ति संक्षयम् ॥
वैकारिके देवगणाः प्रलयं यान्ति सत्तमाः ।
वैकारिकस्तैजसश्च भूतादिर्याति सत्तमाः ॥
त्रिविधोऽयमहङ्कारो महति प्रलयं व्रजेत् ।
महान्तमेभिः सहितं ब्रह्माण्डमन्ततौजसम् ॥
अव्यक्तं जगतो योनिः संहरेदेकमव्ययम् ।
एवं संहृत्य भूतानि तत्त्वानि च महेश्वरः ॥
नियोजयत्यथान्योन्यं प्रधानं पुरुषं परम् ।
प्रधानपुंसोरुभयोरेष संहार ईरितः ॥
महेश्वरेच्छाजनितो न स्वयं विद्यते लयः ।
गुणसाम्यं तदव्यक्तं प्रकृतिः परिगीयते ।
प्रधानं जगतो योनिर्मायातत्त्वमचेतनम् ।
कूटस्थश्चिन्मयो ह्यात्मा केवलः पञ्चविंशकः ॥
गीयते मुनिभिः साद्यो महानेकः पितामहः ।
एवं संहारकरणी शक्तिर्माहेश्वरी ध्रुवा ॥
प्रधानाद्यं विशेषान्तं देहेद्रव इति श्रुतिः ।
योगिनामथ सर्वेषां ज्ञानविध्वस्तचेतसाम् ।
आत्यन्तिकश्चैव लयं विदधातीह शङ्करः ॥"

इति कौर्मे ।४२।४३। अध्यायौ ॥ * ॥

आत्यन्तिकप्रलयविस्तारो यथा,—

श्रीपराशर उवाच ।

"आध्यात्मिकादि मैत्रेय! ज्ञात्वा तापत्रयं बुधः ।
उत्पन्नज्ञानवैराग्यः प्राप्नोत्यात्यन्तिकं लयम् ॥
आध्यात्मिको द्वे द्विविधः शारीरो मानसस्तथा ।
शारीरैः बहुभिर्भेदैर्भिद्यते श्रूयतां च सः ॥
शिरोरोगप्रतिश्यायज्वरशूलभगन्दरैः ।
गुल्मार्शःक्षयदुःश्वासच्छर्द्यादिभिरनेकधा ॥
तथातिरोगातीसारकुष्ठाङ्गामयसंज्ञकैः ।
भिद्यते देहजस्तापो मानसं श्रोतुमर्हसि ॥
कामक्रोधभयद्वेषलोभमोहविषादजः ।
प्रोक्तोऽयावमानेर्ष्यामात्सर्यादिभवस्तथा ॥
मानसोऽपि द्विजश्रेष्ठ! तापो भवति नैकधा ।
इत्येवमादिभिर्भेदैस्तापो ह्याध्यात्मिकः स्मृतः ॥
खगपश्चिमनुष्याद्यैः पिशाचोरगराक्षसैः ।
सरीसृपादेश्च मृगा जन्यते चाधिभौतिकः ॥
शीतोष्णवातवर्षाम्बुवैद्युतादिसमुद्भवः ।
तापो द्विजवरश्रेष्ठ! कथ्यते चाधिदैविकः ॥
तदस्य त्रिविधस्यापि दुःखजातस्य पण्डितैः ।
गर्भजन्मजरादेषु स्थानेषु प्रभविष्यतः ॥
निरतिशयाह्लादसुखभावैकलक्षणा ।
भेषजं भगवत्प्राप्तिरेकान्तात्यन्तिकी मता ॥
तस्मात्तत्प्राप्तये यत्नः कर्तव्यः पण्डितैर्नरैः ।
तत्प्राप्तिहेतुर्ज्ञानं च कर्म चोक्तं महामुने! ॥
आगमोत्थं विवेकाच्च द्विधा ज्ञानं तथोच्यते ।
शब्दब्रह्मागममयं परं ब्रह्म विवेकजम् ॥
अन्धस्य इवाज्ञानं दीपवच्चेन्द्रियोद्भवम् ।
यथा सूर्यस्तथा ज्ञानं यद्विप्रर्षे विवेकजम् ॥
मनुरप्याह वेदार्थं स्मृत्वा यन्मुनिसत्तम! ।
तदेतत्कूर्यतामत्र सम्बन्धे गदतो मम ॥
द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परञ्च यत् ।
शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति ॥
द्वे विद्ये वेदितव्ये वै इति याज्ञवल्क्यिनी श्रुतिः ।
परया त्वक्षरप्राप्तिर्ऋग्वेदादिमया परा ॥
यत्तदव्यक्तमजरमचिन्त्यमजमव्ययम् ।
अनिर्देश्यमरूपञ्च पाणिपादाद्यसंयुतम् ॥
विभुं सर्वगतं नित्यं भूतयोनिमकारणम् ।
व्याप्याव्याप्यं यतः सर्वं तं वै पश्यन्ति सूरयः ॥
तद्ब्रह्म तत् परं धाम तद्ध्येयं मोक्षकाङ्क्षिणाम् ।
श्रुतिवाक्योदितं सूक्ष्मं तद्विष्णोः परमं पदम् ॥
तदेव भगवद्वाच्यं स्वरूपं परमात्मनः ।
वाचको भगवच्छब्दस्तस्याद्यस्याक्षरात्मनः ॥
एवं निगदितार्थस्य सतत्त्वं तस्य तत्त्वतः ।
ज्ञायते येन तज्ज्ञानं परमन्यत्त्वयीमयम् ॥
अशब्दगोचरस्यापि तस्यैव ब्रह्मणो द्विज! ।
पूजायां भगवच्छब्दः क्रियते ह्यौपचारिकः ॥
शुद्धे महाविभूत्याख्ये परे ब्रह्मणि वर्तते ।
मैत्रेय! भगवच्छब्दः सर्वकारणकारणे ॥
सर्वाणि तत्र भूतानि वसन्ति परमात्मनि ।
भूतेषु च स सर्वात्मा वासुदेवस्ततः स्मृतः ॥
खादिक्ष्यवनकायाह पृष्टः केशिध्वजः पुरा ।
नामव्याख्यायनन्तस्य वासुदेवस्य तत्त्वतः ॥
भूतेषु वसते सोऽन्तर्वसन्त्यत्र च तानि यत् ।
धाता विधाता जगतां वासुदेवस्ततः प्रभुः ॥
स सर्वभूतप्रकृतिर्विकार-
गुणांश्च दोषांश्च मुने! व्यतीतः ।
व्यतीतसर्वावरणाखिलात्मा
तेनास्तृतं यद्भुवनान्तराणि ॥
समस्तकल्याणगुणात्मको हि
स्वशक्तिलेशावृतभूतसर्गः ।
इच्छागृहीताभिमतोरुदेहः
संसाधिताशेषजगद्धितोऽसौ ॥
तेजोवलैश्वर्यमहान्वितश्च
सदीर्घशुक्लादिगुणैकराशिः ।
परः पराणां सकलो न यत्र
क्लेशादयः सन्ति परावरेशे ॥
स ईश्वरो व्यष्टिसमष्टिरूपो-
व्यक्तस्वरूपः प्रकटस्वरूपः ।
सर्वेश्वरः सर्वदृक् सर्ववेत्ता
समस्तशक्तिः परमेश्वराख्यः ॥
स ज्ञायते येन तदस्तदोषं
शुद्धं परं निर्मलमेकरूपम् ।
संदृश्यते वाप्यवगम्यते वा
तज्ज्ञानमज्ञानमतोऽन्यदुक्तम् ॥"

इति विष्णुपुराणे ६ अंशे आत्यन्तिकप्रलयसञ्चारो नाम ५ अध्यायः ॥ ॥ अपि च ।

नारद उवाच ।

"श्रुतं चैता हापरञ्च कलिश्चेति चतुर्युगम् ।
दिव्यैरेकयुगं ज्ञेयं तस्य या वैकसप्ततिः ॥
मन्वन्तरन्तु तत्प्रोक्तं तैस्तु यत्र चतुर्दश ।
स कल्पो नाम वै कालस्तत्रैव प्रलयास्तु यः ॥
सा ब्रह्मरात्री राजेन्द्र! यत्र शेतेऽच्युताजगः ।
त्रयो लोकास्तदा राजन्! लीयन्ते तन्निमित्ततः ॥
नैमित्तिको लयो नाम दैनन्दिन इतीर्यते ॥
एवं दिनप्रमाणेन ब्रह्मणः शृतवार्षिकम् ।
आयुः पूर्वपरार्द्धं तु परार्द्धं द्वे प्रकीर्तिते ॥
द्विपरार्द्धं व्यतीते तु ब्रह्मणो जगदात्मनः ।
तदा प्रकृतयः सप्त प्रलयं यान्ति भूमिप! ॥
लयः प्राकृतिको ह्येष लीने ब्रह्मणि भूपते! ।
अण्डकोशेऽपि सकलः प्रलयं याति सर्वशः ॥
पूर्वरूपन्तु वक्ष्यामि प्रलयस्यास्य भूपते! ।
शृतवर्षाणि भूमौ हि पर्जन्यो नैव वर्षति ॥
दुर्भिक्षे निर्जने लोके प्रजाः सर्वाः क्षुधार्दिताः ।
परस्परं भक्ष्यमाणाः क्षयं यास्यन्ति भूमिप! ॥
सङ्क्षये च धरण्याप्च क्षीणेषु च लतासु च ।
देहे च यो रसस्तं हि रविर्हरति रश्मिभिः ॥
ततः संवर्तको नाम ज्वालामाली हुताशनः ।
सङ्कर्षणमुखोत्पन्नो दहत्यनिलसारथिः ॥
सर्वं ब्रह्माण्डभाण्डं वै तत्कालचोदगर्जितः ।
एवं दग्धं महाराज! वह्नर्क्काभ्यां समन्ततः ॥
दग्ध्वा गोमयपिण्डाभं ब्रह्माण्डं सारवर्जितम् ।
प्रचण्डपवनो राजंस्ततो वर्षशतं पुनः ॥
संवर्तको नाम महान् ब्रह्माण्डं चालयिष्यति ।
ततो मेघा महाघोरा नानावर्णा अनेकशः ॥
शृतं वर्षाणि वर्षन्ति गर्जन्ति च महास्वनाः ।
एकोदकं ततो विश्वं निर्गुणं निर्विकारकम् ॥
भूमेर्गन्धगुणं राजन्! ग्रसन्त्याप्यः समन्ततः ।
गुणनाशात् स्वयं पृथ्वी प्रलयं याप्यते तदा ॥
तेजस्त्वपां रसगुणं सगन्धं पिबते बलात् ।
ततः प्रलयमायान्ति राजन्नापोऽपि तत्क्षणात् ॥
तेजसस्तु ततो रूपं रसगन्धसमन्वितम् ।
वायुर्हरति चण्डात्मा तेजःप्रलयमृच्छति ॥
आकाशस्तु ततो वायोः सार्द्धं परगुणैः सह ।
समादत्ते महाराज! अम्बरेऽथ प्रलीयते ॥
आकाशस्य गुणं शब्दं गुणैरन्यैः समन्वितम् ।
अहङ्कारः समादत्ते तमस्त्वस्मिन् प्रलीयते ॥
तैजसैश्चेन्द्रियाण्यङ्ग देवा वैकारिके तथा ।
अहङ्कारे प्रलीयन्ते जगदेतच्चराचरम् ॥
अहङ्कारं भक्षयन्ति ततः सत्त्वादयो गुणाः ।
ग्रसते तान् महाराज! आद्या प्रकृतिरुच्यते ।

न तस्याः कालदोषेण परिणामो नरर्षभ ! ।
आद्यन्तरहिता सा हि नित्यं कारणमव्ययम् ॥
भक्तिर्भगवतः सा हि तदेकपरमा च सा ।
इत्युक्तः प्रलयो राजन् ! विश्वस्यास्य महामते ! ॥
यथोत्पत्तिक्रमेणास्य श्रुतक्रमेण तथैव ॥"
इति माग्ने स्वर्गखण्डे ३६ अध्यायः ॥
(सात्त्विकविकारान्तर्गतविकारविशेषः । तल्लक्षणं यथा, साहित्यदर्पणे । ३ । १६७ ।
"प्रलयः सुखदुःखाभ्यां चेष्टाज्ञानविराकृतिः॥")

प्रलापः, पुं, (प्रलपनमिति । प्र + लप् + भावे घञ् ।) प्रलपनम् । अनर्थकवाक्यम् । निष्प्रयोजनमुन्मत्तादिवचनम् । इत्यमरभरतौ । १ । ६ १५ ॥ रोगाणामुपसर्गोऽयम् ॥ (यथा, भावप्रकाशे ।
"मूर्च्छा प्रलापो वमथुः प्रसेकः सादनं भ्रमः ।
उपद्रवा भवन्त्येते मृतिश्च रसशेषतः ॥"
अस्य लक्षणं चिकित्सा च यथा,—
"स्वदोषकुपिताद्वाताद्यस्यस्यन्निरर्थकम् ।
वचनं यन्नरो ब्रूते स प्रलापः प्रकीर्त्तितः ॥
सतगरवरतिक्ता रेवताम्भोदतिक्ता
नलदतुरगगन्धा भारती हारहूरा ।
मलयजदृषमूलीशुक्लपुष्पी सुपक्का
प्रलपनमयहन्युः पानतो नातिदूरात् ॥
वरतिक्तोऽथ पर्पटः नलदसृणीरं भारती ब्राह्मी हारहूरा द्राक्षा ।" इति भावप्रकाशस्य मध्यखण्डे प्रथमे भागे ॥)

प्रलापहा, [न्] पुं, (प्रलापं हन्तीति । हन् + क्विप् ।) क्षुलत्याञ्जनम् । इति राजनिघण्टः ॥

प्रलीनता, स्त्री, (प्रलीनस्य निश्चेष्टस्य भावः । प्रलीन + तल् ।) प्रलयः । तत्पर्य्यायः । इन्द्रियस्वापः २ चेष्टानाशः ३ । इति राजनिघण्टः ॥

प्रलेहः, पुं, (प्रलिह्यते इति । प्र + लिह् + घञ् ।) व्यञ्जनविशेषः । इति प्राकाशेश्वरः । इम्योखत कोरमा इत्यादि पारस्यभाषा ॥ (चिन्तामणौ धृतः प्रलेहप्रकारो यथा,—
"स्थूलानि मांसखण्डानि क्षालितानि च वारिणा ।
तप्तस्नेहे विनिःक्षिप्य दर्व्या सन्धालयन् पचेत् ॥
तप्तं तप्तं विनिःक्षिप्य लावणं जलमत्यकम् ।
पचेत् पटपटाशब्दं तस्मिन् मांसे प्रकुर्वति ॥
प्रक्षिपेद्राढिमीनीरं बहुवेन पचेत् पुनः ।
मांसपिण्डेषु सिद्धेषु देया मुद्गी सघीरका ॥
ततश्चोत्तार्य तस्मांसं पृथक् कुर्य्यात् प्रलेहतः ।
प्रलेहं वाससा पूतं स्थापयेदन्यभाजने ॥
हिङ्गुना हतयुक्तेन धूपेन तच्च धूपयेत् ॥"
गौड़देशीयप्रलेहस्तु ।
"द्विप्रार्द्धसीरपूरेसालवणैः सम्भृतेन तु ।
कृत्तिताभिषपिण्डेन तत्र दाड़िमबीजतः ॥
गोघृतार्द्धसवारस्य प्रलेहो गौड़देशजः ॥
प्रलेहो बहिदो बल्यः कफानिलरुजापहः ।
संग्राही पित्तकृत् किञ्चिच्छ्लाघ्यानगदान् जयेत् ॥"

पूर्व्वप्रलेहस्तु ।
"मांसपूरणयोगेन कोष्ठाकारं विधाय च ।
स्निग्धं क्षुण्णं घृते भृष्टं प्रलेहविधिना पचेत् ॥
पूरणस्य प्रलेहोऽयं विज्ञेयो वातनाशनः ।
शेषान्नाकारकश्चैव सुखवेरस्यहृद्गुरुः ॥"
शुक्लवर्णः प्रलेहः ।
"घृते वेसरधान्याकाद्विक्षुभृद्धिसंयुते ।
वस्त्रपूतेऽर्द्धसम्पक्वे स्निग्धं मांसं विनिःक्षिपेत् ॥"
पीतवर्णस्तु ।
"प्रलेहः पीतवर्णोऽपि कार्य्यः शुक्लप्रलेहवत् ।
विशेषोऽत्र हरिद्रायाः संसर्गः कुङ्कुमस्य वा ॥"
रक्तवर्णोऽपि ।
"तप्तस्नेहे क्षिपेद्विक्षुसंयुतं कासमर्द्दकम् ।
धान्यकं सवणाजाजीधौतं मांसञ्च तत् क्षिपेत् ॥
ततोऽर्द्धस्फुटिते मांसे दाड़िमीबीजसंयुते ।
सम्पक्वे चातिमृदुले तक्रं मुद्गीञ्च निःक्षिपेत् ॥
तत उत्तार्य्य वस्त्रेण गालयेद्धूपयेदपि ।
रक्तवर्णप्रलेहस्य संक्षिप्तार्थं विनिःक्षिपेत् ॥
करमर्द्दं दाड़िमस्य स्थाने शेषन्तु पूर्व्ववत् ॥"
हरितवर्णस्तु ।
"मेथिकाकासमर्द्दाम्लकल्केन चलकारिते ।
घृते मांसं विनिःक्षिप्य पचेच्छुष्कप्रलेहवत् ॥
सिद्धे च गालयेद्वस्त्रे क्षत्वा वर्णप्रयोजनम् ।
ताम्बूलं कटुकाङ्गारं देयं हरितहेतुना ॥
अत्रापि रुचिदः सद्यो नानावर्णप्रसाधितः ।
प्रलेहः कफवातघ्नः किञ्चित् पित्तकरो लघुः ॥"
वटकप्रलेहोऽपि ।
"माषस्य पिष्टिका क्षुण्णा वेसवारेण संयुता ।
बहुधा क्रियते तस्या वटिकावटकादिकम् ॥
आम्रविम्बीफलाकारं लड्डुकावटकादिकम् ।
मृद्भाटकफलाकारं यथायुद्धिप्रकारजम् ॥
क्षत्वा हि बहुधाधारे खेदितं घृतभार्ज्जितम् ।
सवेसवारके तक्रे कथिते च मनोरमे ॥
निःक्षिप्य चाम्लवेदोद्भवैर्यवैलादिवासिते ।
एवन्तु बहुधा कार्य्यो माषसूपप्रलेहकः ॥
प्रलेहो वातजिद्बल्यः शुक्रमांसप्रदो रसः ।
प्रीणनः प्रायशुक्तानां शुक्रदः क्षीणरेतसाम् ॥"
मत्स्यप्रलेहस्तु ।
"मांसप्रलेहवत्कार्य्यः प्रलेहो मत्स्यसम्भवः ।
व्यादौ तैले घृतं पक्वं सर्व्वमत्स्येषु पूर्व्ववत् ॥
वर्णस्य करणे देयं पूर्व्वोक्तं द्रव्यकं हि यत् ।
उद्धूलनं सुगन्धाय दातव्यं पूर्व्वसम्भवम् ॥"
मत्स्यखण्डप्रलेहस्तु ।
"सम्यक् प्रक्षालितं मत्स्यं वेसवारेण वेष्टितम् ।
तप्तनेत्रे क्षिपेत् खण्डं दिङ्मुखेन्यवमिश्रितम् ॥
प्रलेहविधिवत् साध्यो मत्स्यखण्डप्रलेहकः ॥")

प्रवक्ता, [क्तृ] त्रि, प्रकर्षेण वक्ति यः । (प्र + वच् + तृच् ।) वेदादिवाचकः । यथा,—
"शास्त्रिमात्रोपजीवी वा कामं स्याद्ब्राह्मणध्रुवः ।
धर्म्मप्रवक्ता नृपतेर्न तु शूद्रः कदाचन ॥"
इति मानवे ७ अध्यायः ॥

प्रवचनं, क्ली, (प्रकर्षेण उच्यते इति । प्र + वच् + ल्युट् । वेदः । (यथा, अमरकोषे । २ । ७ । १० ।
"अनूचानः प्रवचने साङ्गेऽधीती गुरोस्तु यः ।
लब्धानुज्ञः समाप्तः सन् स्नात्वा त्वभिषवे कृते ॥"
वेदाङ्गम् । यथा, मनुः । ३ । १८४ ।
"अग्र्याः सर्व्वेषु वेदेषु सर्व्वप्रवचनेषु च ॥"
"प्रकर्षेणैव उच्यते वेदार्थ एभिरिति प्रवचनान्यङ्गानि तेषु अग्र्याः षड़ङ्गविदः ।" इति तच्च कुल्लूकभट्टः ॥ तथा च हरिवंशे । १६७ । ६६ ।
"उवाच वेदांश्चतुरो मन्त्रब्राह्मणगोचितान् ॥"* ॥
प्रशस्तं वचनमिति कर्म्मधारयः ।) प्रशस्तवाक्यम् । इति मेदिनी । ने, १६१ ॥ (यथा, शुक्लोपनिषदि । ३ । २ । ३ ।
"नायमात्मा प्रवचनेन लभ्यो
न मेधया न बहुधा श्रुतेन ।
येनैवैष वृणुते तेन लभ्य-
स्तस्यैष आत्मा विवृणुते तनूं स्वाम् ॥")

प्रवचनीयः, त्रि, (प्रवक्तीति । प्र + वच् + "भव्यगेयप्रवचनीयेति ।" ३ । ४ । ६८ । इति कर्त्तरि अनीयर् ।) प्रवक्ता । (प्रोच्यते इति । प्र + वच् + कर्म्मणि अनीयर् ।) प्रवाच्यः । इति मेदिनी । ये, १३२ ॥

प्रवणः, पुं, (प्रवन्ते गच्छन्ति जना अनेनेति । प्रु गतौ + करणे ल्युट् ।) चतुष्पथः । इत्यमरः । ३ । ३ । ५६ ॥

प्रवणः, त्रि, (प्रवतेऽत्रेति । प्रु + अधिकरणे ल्युट् ।) क्रमनिम्नभूमिः । (यथा, मनुः । ६ । २०६ ।
"इन्द्रियाणां प्रसङ्गेन दोषमृच्छत्यसंशयम् ।
सन्नियम्य तु तान्येव ततः सिद्धिं नियच्छति ॥")
उदरम् । प्रश्नः । इति मेदिनी । ने, ५६॥ (यथा, मार्कण्डेये । २३ । ८६ ।
"धन्योऽहमतिपुण्योऽहं कोऽन्योऽस्ति सदृशो मया ।
यत्तातो मामभिद्रष्टुं करोति प्रवणं मनः ॥")
व्यायतः । प्रगुणः । शुभः । इति त्रिकाण्डशेषः ॥ स्निग्धः । इति शब्दरत्नावली ॥ आसक्तः । इति हेमचन्द्रः । ३ । ४८ ॥ (यथा, विष्णुपुराणे । ६ । २ । ११ ।
"प्रह्लादो ब्रह्मणा दृष्ट्वा सुतं विष्णुव्यवस्थितौ ।
सम्यक्त्वप्रवणाधारप्रवणा तुनिसत्तम ! ॥")
नीचः । इति धरणिः ॥

प्रवत्स्यत्पतिका, स्त्री, (प्रवत्स्यन् प्रवासं गमिष्यन् पतिर्यस्याः । कप् ।) नायिकाभेदः । अस्या लक्षणम् । यस्याः पतिरग्रिमदिने देशान्तरं यास्यतीव सा । अस्यास्चेष्टा कातुवचनकातरप्रेक्षणगमनविलोपदर्शननिर्वेदसन्तापसम्मोहनिश्वासवाष्पादयः ॥ सुधा प्रवत्स्यत्पतिका यथा,—
"प्राचीश्वरे किमपि शस्यति निर्गमाय
यामीदरी वदनमानमयाधकार ।
व्याप्ती पुनर्निभृतमेव समानिशुभ्र-
सुप्तातकोकिलकराध्वनिमानतान ॥" १ ॥

सधा प्रवत्स्यत्पतिका यथा,—
"गन्तुं प्रिये ! वदति निःश्वसितं न दीर्घ-
मासीन्न वा नयनयोर्ज्वलमाविरासीत् ।
आयुर्लिपिं पठितुमेणदृशः परन्तु
भालस्थलीं किमु करः समुपाजगाम ॥"२॥
प्रौढ़ा प्रवत्स्यत्पतिका यथा,—
"नायं सुश्वति सुभ्रुवामपि तनुत्यागे वियोगज्वर-
स्तेनाहं विहिताङ्गलिर्यदुपते ! पृच्छामि सत्यं वदः ।
ताम्बूलं कुसुमं पटीरसुरकं वह्नुभिर्दीयते
तन् स्यादत्र परत्र वा किमु वियच्चालावलीदुःसहम् ॥" ३ ॥
परकीया प्रवत्स्यत्पतिका यथा,—
"न्यस्तं पन्नगमूर्द्धि पादयुगलं भक्तिर्विसृष्टा गुरौ
व्यक्ता नीतिरकारि किं न भवतो हेतोर्मया दुष्कृतम् ।
अङ्गानां गृहयातना नयनयोः कोपक्रमो रौरवः
क्रूम्भीपाकपराभवश्च मनसो युक्तं त्वयि प्रस्थिते ॥" ४ ॥
सामान्यप्रवत्स्यत्पतिका यथा,—
"मुद्रां प्रदेहि वलयाय भवद्वियोग-
मासाद्य यास्यति वहिः सहसा वदेतत् ।
इत्थं निगद्य विगलन्नयनाम्बुधारा
वाराङ्गना प्रियतमं करयोर्बभार ॥" ५ ॥
इति रसमञ्जरी ॥

प्रवयणं, क्ली, (प्रवीयतेऽनेनेति । प्र + अज गतौ क्षेपणे च + ल्युट् । "वा यौ ।" २ । ४ । ५७ । इति वी । "ह्रस्वः ।" ८ । ४ । २६ । इति णत्वम् ।) प्रतोदः । इति हेमचन्द्रः । ३।५५७ ॥ (प्र + वय गतौ + भावे ल्युट् । प्रकर्षेण गमनम् । इति केचित् ॥)

प्रवयाः, [स्] त्रि, (प्रगतं वयो यस्य ।) वृद्धः । इत्यमरः । २ । ६ । ४२ ॥ (यथा, रघुः ।८।९८।
"नृपतिः प्रकृतीरवेक्षितुं
व्यवहारासनमाददे युवा ।
परिचेतुमुपांशुधारणां
क्रमप्राप्तं प्रवयास्तु विष्टरम् ॥"
पुराणः ।" इति निघण्टुः । ३ । २७ ॥ यथा, ऋग्वेदे । २ । १७ । ४ ।
"अधा यो विश्वा भुवनानि मज्मनेशानकृत्-
प्रवया अभ्यवर्धत ॥")

प्रवरं, क्ली, (प्रियते इति । प्र + वृ + अप् ।) अगुरु । इति भावप्रकाशः ॥ गोत्रम् । श्रेष्ठे, त्रि । इति मेदिनी । रे, १७६ ॥ (यथा, मनुः । १० । २७ ।
"एते षट् सदृशान् वर्णान् जनयन्ति स्वयोनिषु ।
मातृजात्यां प्रसूयन्ते प्रवरासु च योनिषु ॥")

प्रवरः, पुं, (प्र + वृ + अप् ।) सन्ततिः । इति मेदिनी । रे, १७६ ॥ गोत्रप्रवर्त्तकमुनियावत्कोऽपि मुनिगणः । तथा च यमदग्निगोत्रस्य प्रवराः यमदग्न्यौर्ववभृष्ठाः । भरद्वाजगोत्रस्य भरद्वाजाङ्गिरसबार्हस्पत्याः । विश्वामित्रगोत्रस्य विश्वामित्रमरीचिकौशिकाः । अत्रिगोत्रस्य अत्रयार्चनानातपाः । गौतमगोत्रस्य गौतमवशिष्ठवार्हस्पत्याः । वशिष्ठगोत्रस्य वशिष्ठः । कैश्चित् वशिष्ठात्रिसाङ्कृतयः । काश्यपगोत्रस्य काश्यपावत्सारनैध्रुवाः । अगस्त्यगोत्रस्य अगस्त्यदार्ढीच्युतैमिनयः । सौकालिनगोत्रस्य सौकालिनाङ्गिरसबार्हस्पत्यावत्सारनैध्रुवाः । मौद्गल्यगोत्रस्य और्व्यच्यवनभार्गवजामदग्न्याप्नुवतः । पराशरगोत्रस्य पराशरगृक्षिवशिष्ठाः । वृहस्पतिगोत्रस्य वृहस्पतिकपिलपार्व्वणाः । काश्यपगोत्रस्य अश्वत्थदेवलदेवराजाः । विष्णुगोत्रस्य विष्णुवृद्धिकौरवाः । कौशिकगोत्रस्य कौशिकाचिजमदग्नयः । कात्यायनगोत्रस्य अत्रिभृगुवशिष्ठाः । आत्रेयगोत्रस्य आत्रेयगातातपसांख्याः । काश्यगोत्रस्य काश्यावत्सदेवलाः । कृष्णात्रेयगोत्रस्य कृष्णात्रेयात्रेयावासाः । साङ्कृतिगोत्रस्य अत्याहारात्रिसाङ्कृतयः । कौण्डिल्यगोत्रस्य कौण्डिल्यस्तिमिककौतृषः । गार्गगोत्रस्य गार्ग्यकौक्षुभमाण्डव्याः । आङ्गिरसगोत्रस्य आङ्गिरसवशिष्ठवार्हस्पत्याः । अनाहृताग्नेयगोत्रस्य गार्ग्यगौतमवशिष्ठाः । अत्रयगोत्रस्य अत्रयबलिसारस्वताः । जैमिनिगोत्रस्य जैमिन्युतथ्यसाङ्कृतयः । वृद्धिगोत्रस्य क्रुरुवृद्धाङ्गिरोवार्हस्पत्याः । माण्डिव्यगोत्रस्य माण्डिव्यासितदेवलाः । वात्स्यगोत्रसावर्णगोत्रयोः और्व्यच्यवनभार्गवजामदग्न्याप्नुवतः । आलम्बायनगोत्रस्य आलम्बायनशालङ्कायनशाकटायनाः । वैयाघ्रपद्यगोत्रस्य साङ्कृतिः । घृतकौशिकगोत्रस्य कुशिककौशिकघृतकौशिकाः । कैश्चित् कुशिककौशिकवसुलाः । गृक्षिगोत्रस्य गृक्षिपराशरवशिष्ठाः । काश्यायनगोत्रस्य काश्यायनाङ्गिरसबार्हस्पत्यभरद्वाजाजमीढ़ाः । वासुकिगोत्रस्य अत्रौभ्यानन्तवासुकयः । गौतमगोत्रस्य गौतमाङ्गिरसबार्हस्पत्यनैध्रुवाः । कैश्चित् गौतमाङ्गिरसावासाः । शुनकगोत्रस्य शुनकशौनकघृत्समदाः । सौपायनगोत्रस्य प्रवराः और्व्यच्यवनभार्गवजामदग्न्याप्नुवतः । इति धनञ्जयकृतधर्म्मप्रदीपे गोत्रप्रवरविवेकः ॥

प्रवर्गः, पुं (प्रवृज्यते निःक्षिप्यते हविरादिकमस्मिन्निति । प्र + वृज् + अधिकरणे घञ् ।) होमाग्निः । इति हेमचन्द्रः ।३।५०० ॥ (यथा, हरिवंशे । ४१ । ३४ ।
"दक्षिणाहृदयो योगी महायज्ञमयो महान् ।
उपाकर्म्मोष्ठरुपकः प्रवर्गावर्त्तभूषणः ॥"
प्रवर्ग्य इति पाठोऽपि दृश्यते ॥)

प्रवर्त्तकः, त्रि, (प्रवर्त्तयतीति । प्र + वृत् + णिच् + ण्वुल् ।) प्रवर्त्तनकारी । प्रवृत्तिजनकः । यथा,
"प्रवर्त्तकं चावयत्यवाच्च चोदनां
निवर्त्तकं नैवसवाच्च भाष्यकृत् ।
ततश्च विद्यो नहि चोदनास्ति सा
प्रवर्त्तिका या न भवेदिति स्थितिः ॥"
इति संक्षेपशारीरकम् ॥

(यथा च देवीभागवते । १ । १४ । ४२ ।
"प्रथमं पठिता वेदा मया विस्तारिताश्च ते ।
हिंसामयास्ते पठिताः कर्म्ममार्गप्रवर्त्तकाः ॥"
प्रयोजकः । यथा, भागवते । ६ । १७ । ४ ।
"धन्वन्तरिर्दीर्घतमस आयुर्वेदप्रवर्त्तकः ।
यज्ञपुग् वासुदेवांशः स्तुतिमाचार्त्तिनाशनः ॥")

प्रवर्त्तनं, क्ली, (प्र + वृत् + णिच् + ल्युट् ।) प्रवृत्तिः । यथा,—
"तेऽन्येर्वान्तं समश्नन्ति परोत्सर्गेषु सुज्यते ।
इतरार्थग्रहे येषां कवीनां स्यात् प्रवर्त्तनम् ॥"
इति काव्यप्रकाशः ॥
आरम्भः । यथा,—
"हृते तु स्वामिनि पुनस्तद्वंश्ये वापि मानवे ।
राजानमामन्त्र्य ततः कुर्य्यात् सेतुप्रवर्त्तनम् ॥"
इति मिताक्षरा ॥

प्रवर्त्तना, स्त्री, (प्र + वृत् + णिच् + युच् ।) प्रवृत्तिप्रेरणम् । यथा, नैषधे । २ । ६१ ।
"अथवा भवतः प्रवर्त्तना
न कथं पिष्टमियं पिनष्टि न ।
स्वत एव सतां परार्थता
ग्रहणानां हि यथा यथार्थता ॥"

प्रवर्त्तितः, त्रि, (प्र + वृत् + णिच् + क्तः ।) जातः । यथा, रघुवंशे । ५ । ३७ ।
"रूपं तदोजस्वि तदेव वीर्य्यं
तथैव नैसर्गिकमुन्नतत्वम् ।
न कारणात् स्खात् विभिदे कुमारः
प्रवर्त्तितो दीप इव प्रदीपात् ॥"

प्रवर्हणं, क्ली, प्रपूर्ब्बवृहधातोर्भावे अनट् (ल्युट् ।) विवर्हणम् । कर्त्तरि (ल्यु) अनप्रत्यये, वृद्धिकारके, त्रि ॥ (यथा, सुश्रुते सूत्रस्थाने ४६ अध्याये ।
"रुरुमांसं समधुरं कषायानुरसं स्मृतम् ।
वातपित्तोपशमनं गुरु शुक्रप्रवर्हणम् ॥")

प्रवर्हः, त्रि, (प्रवर्हति प्रवर्हते इति । प्र + वृह् + अच् ।) प्रधानम् । श्रेष्ठः । इत्यमरः ।३।१।५७॥

प्रवलाकी, पुं, शुचङ्गः । चित्रमेखलकः । इति विश्वः ॥

प्रवहः, पुं, (प्र + वह् + भावे + अच् ।) ग्रहनगरादेर्बहिर्गमनम् । इत्यमरः । ३ । १ । १८॥ (प्रवहतीति । प्र + वह् + अच् ।) वायुः । इति हेमचन्द्रः ॥ सप्तवायुस्कन्धगतद्वितीयवायुः । स तु आवहवायोरूर्द्धस्थितः । इति सिद्धान्तशिरोमणिः ॥
"यस्माज्ज्योतींषि वहति प्रवहस्तेन स स्मृतः ॥"
इति विष्णुपुराणे २ अंशे १२ अध्यायः ॥
अस्य टीका । "यस्माज्ज्योतींषि ग्रहर्क्षेण वहति तेन स वायुः प्रवहः स्मृतः प्रवहस्यैव भेदाः सर्व्वे वायुस्कन्धाः ॥" (मेघविशेषः । यथा, स्कान्दे सह्याद्रिखण्डे । ५ । ६ ।
"आवहः प्रवहश्चैव उद्वहासौ महाबलः ।
परीवहः पञ्चमश्च विनद्यश्च परावहः ॥")

प्रवहणं, क्ली, (प्रोह्यते अनेनेति । प्र + वह् + करणे ल्युट् ।) कर्णौरधः । स्त्रीरजवहनार्थ-

मुपरि वस्त्राच्छादितमनुष्यवाह्ययानविशेषः। इत्यमरभरतौ। २। ८। ५२॥ (यथा, मृच्छकटिकनाटके चतुर्थेऽङ्के। "प्रविश्य सप्रवहण-चेटः इति॥")

प्रवह्निः, स्त्री, (प्रवह्नते आच्छादयतीति। प्र+वह्न+इन्।) प्रवह्निका। इत्यमरटीकायां भरतः॥

प्रवह्निका, स्त्री, (प्र+वह्न+ण्वुल्। टाप् अत इत्वम्।) प्रहेलिका। इत्यमरः। १। ६। ६॥

प्रवह्नी, स्त्री, (प्रवह्नि+पक्षे ङीष्।) प्रवह्निका। इति भरतः॥

प्रवाक्, [च्] त्रि, (प्रकृष्टा वाग् यस्य।) वाग्मी युक्तिपटुः। यथा,—

"वाग्मी युक्तिपटुर्वाग्मी वचोज्ञः प्रवचाः प्रवाक्॥"

इति जटाधरः॥

(स्त्री, प्रकृष्टा वागिति प्रादिसमासः।) प्रकृष्टवाक्यञ्च॥

प्रवाचकः, त्रि, (प्रकृष्टं वक्तीति। प्र+वच्+ण्वुल्।) प्रकृष्टवक्ता। प्रपूर्ब्बवचधातोः कर्त्तरि ण्वुलप्रत्ययः॥

प्रवाणिः, स्त्री, (प्रकर्षेण ऊयतेऽनयेति। प्र+वे+करणे क्विप्। ङीप्। निपातनात् ङीपो ह्रस्वः।) तन्त्रशलाका। इति निघण्टवाणिशब्दटीकायां भरतः॥ माकु इति भाषा॥

प्रवाणी, स्त्री, (प्र+वे+क्विप्+ङीप्।) तन्त्रशलाका। इति निघण्टवाणिशब्दटीकायां भरतः॥ माकु इति भाषा॥

प्रवादः, पुं, (प्रकृष्टो वादः। प्र+वद्+घञ् वा।) परस्परवाक्यम्। यथा, भट्टिः। २। ३६।

"इत्थं प्रवादं युधि संप्रहारं
प्रचक्रतू रामनिशाविहारौ।
क्षयाय मत्वा रघुनन्दनोऽथ
बाणेन रक्षः प्रधनान्निरास्यत्॥"

जनरवः। यथा,—

"प्रेयांस्तेऽहं त्वमपि च मम प्रेयसीति प्रवाद-स्तं मे प्राणा अहमपि तवास्मीति हन्त प्रलापः।
त्वं मे तेऽस्यामहमपि च यत्तच्च नो साधु राधे! आधारे नौ नहि समुचितो युष्मदस्मत्प्रयोगः॥"

इत्यलङ्कारकौस्तुभः॥

प्रवारः, पुं, (प्रवृणोत्यनेनेति। प्र+वृ+करणे घञ्।) प्रवरः। वस्त्रम्। प्रपूर्ब्बवृधातोर्घञ्। इति संक्षिप्तसारव्याकरणम्॥

प्रवार्य्यं, क्ली, (प्र+वृ+णिच्+ण्यत्।) काम्यदानम्। इत्यमरः। ३। २। ३॥ काम्यस्य कमनीयस्य वस्तुनो वरस्त्रीरत्नादिनो दानम्। काम्येन कामनया वा दानं प्रवार्य्यमुच्यते। काम्यशब्दोऽत्र तन्त्रिगोभयार्थः। प्रकर्षेण वार्य्यते संगृह्यते प्रवार्य्यं तत् महादानम्। प्रवार्य्यं महादानमिति त्रिकाण्डशेषः। इति भरतीकायां भरतः। (प्रकर्षेण वार्य्यमिति।) निषेधः। इति मेदिनी। ने, १०१॥

प्रवासः, पुं, (प्रवसन्त्यस्मिन्निति। प्र+वस्+"हलश्च।" ३। ३। १२१। इति घञ्।) विदेशः। विदेशस्थितिः। यथा,—

"कर्णेजपैराहितराज्यलोभा
स्त्रैणेन नीता विकृतिं लघिम्ना।
रामप्रवासे यदयन्नदोषं
जनापवादं खनरेन्द्रजत्युम्॥"

इति भट्टिः। ३। ७॥ *॥

द्वादशवर्षाश्रुतवार्त्ताकप्रोषितस्य तत्प्रवासाद्यदिने श्राद्धं कर्त्तव्यम्। यथा,—

"प्रवासवार्त्तरे श्रेयं तन्मासेन्दूदयेऽथवा॥"

इति मिताक्षरा। ३। ७॥ *॥

प्रवासागतेन गुर्व्वाद्यभिवादनं कर्त्तव्यम्। यथा,

"विप्रोऽथ पादग्रहणमन्यस्त्वाभिवादनम्।
गुरुदारेषु कुर्व्वीत सतां धर्म्ममनुस्मरन्॥
मातृष्वसा मातुलानी श्वश्रूश्चाथ पितुः स्वसा।
प्रपूज्या गुरुपत्नीव समास्ता गुरुभार्य्यया॥
श्यालभार्य्योपसंग्राह्या सवर्णाहन्यहन्यपि।
विप्रोष्य भूप! संग्राह्या ज्ञातिसम्बन्धियोषितः॥
पितुर्भगिन्यां मातुश्च ज्यायस्याश्च स्वसर्य्यपि।
मातृवद्वृत्तिमातिष्ठेन्माता ताभ्यो गरीयसी॥"

इति कौर्म्मे उपविभागे १३ अध्यायः॥

प्रवासनं, क्ली, (प्र+वास क्षेपे+ल्युट्।) वधः। इत्यमरः॥ (प्र+वस्+णिच्+ल्युट्।) प्रवासना। यथा, उत्तररामचरिते।

"सीताप्रवासनपटोः करुणा कुतस्ते॥"

प्रवासी, त्रि, (प्रवसितुं शीलमस्येति। प्र+वस्+"प्रे लप्रसुदमथवदवसः।" ३। २। १४५। इति घिनुण्।) प्रवासविशिष्टः। प्रोषितः। विदेशस्थः। यथा,—

"अध्वनीनोऽध्वगोऽध्वन्यः पान्थः पथिकदेशिकौ।
प्रवासी तद्गणो हारिः पाथेयं सम्बलं समे॥"

इति हेमचन्द्रः। ३। १५७॥

(यथा, मार्कण्डेये। १८। ५१।

"लक्ष्मीर्लक्ष्मीवतां श्रेष्ठा कण्ठस्था कण्ठभूषणम्।
अभीष्टवन्दुदारेच्च तथाश्लेषं प्रवासिभिः॥")

प्रवाहः, पुं, (प्र+वह्+भावे घञ्।) प्रवृत्तिः। (यथा, भागवते। ७। ८। ८।

"सत्त्वैकतानमतयो वचसां प्रवाहैः॥")

जलस्रोतः। इति मेदिनी। हे, २१॥ (यथा, रघौ। ५। ४६।

"पूर्व्वं तदुत्पीडितवारिराशिः
सरित्प्रवाहस्तटमुत्ससर्प॥")

अवघातः। इति विश्वः॥ प्रकृष्टाश्वः। इति नानार्थरत्नमाला॥ (पुरीषादेर्निर्गमः। यथा, सुश्रुते उत्तरतन्त्रे। ४० अध्याये।

"प्रवाहेण गुदभ्रंशे मञ्जधाते कटिग्रहे।
मधुराम्लगुरुस्निग्धं सर्पिर्बस्तिनुवासनम्॥")

प्रवाहकः, पुं, (प्रवहतीति। प्र+वह्+ण्वुल्।) राजभृत्यः। इति शब्दमाला॥ प्रकृष्टवहनकर्त्तरि, त्रि॥

प्रवाहिका, स्त्री, (प्रवहति सुखमुच्चैः प्रवर्त्तते इति। प्र+वह्+ण्वुल्। टाप् अत इत्वम्।) ग्रहणीरुक्। इत्यमरः। २। ६। ५५॥ (यथा, सुश्रुते सूत्रस्थाने। ३१ अध्याये।

"प्रवाहिका शिरःशूलं कोष्ठशूलञ्च दारुणम्।
पिपासावलहानिश्च तस्य स्युरुपस्थिताः॥"

अस्या निदानं ग्रहणीशब्दे द्रष्टव्यम्। अस्याः स्वरूपमाह चरकः।

"अग्न्याधिष्ठानमन्नस्य ग्रहणाद्ग्रहणी मता।
अपक्वं धारयेत् तच्च पक्वं याति बलाधः॥"

सुश्रुतोऽपि।

"षष्ठी पित्तधरा नाम या कला परिकीर्त्तिता।
आमपक्वाशयान्तःस्था ग्रहणी साभिधीयते॥
ग्रहण्या बलमग्निश्च यापि ग्रहणीश्रितः।
तस्मादग्नौ प्रदुष्टे तु ग्रहण्यपि विदुष्यति॥
तस्मात् कार्य्यः परीहारो ह्यतीसारे विरिक्त-वत्॥" *॥

अतीसारे द्रवधातुप्रवृत्तिः ग्रहण्यान्तु बहुस्थापि मलस्य प्रवृत्तिरिति तयोर्भेदः॥ *॥ ग्रहणी-रोगस्य भेदं संग्रहग्रहणीरोगमाह।

"द्रवं घनं सितं स्निग्धं सकटीवेदनं शकृत्।
आमं बहुसपेक्ष्यं सशब्दं मन्दवेदनम्॥
पक्वान्नासाद्यशाद्वाह्वा नित्यशापि विसुच्यति।
अन्नकूजनमालस्यं दौर्ब्बल्यं सदनं भवेत्॥
दिवा प्रकोपो भवति रात्रौ शान्तिश्च गच्छति।
दुर्ब्बिज्ञेया दुर्निवारा चिरकालानुबन्धिनी॥
सा भवेदामवातेन संग्रहग्रहणी मता॥"

अथ घटीयन्त्राख्यं ग्रहणीरोगमाह।

"प्रसृतिः पार्श्वयोः शूलं तथा जलघटीध्वनिः।
तं वदन्ति घटीयन्त्रमसाध्यं ग्रहणीगदम्॥"

अथ ग्रहणीरोगस्यारिष्टमाह।

"यैर्लक्षणैः सिध्यति नातिसार-स्तैः स्यान्न साध्यो ग्रहणीगदोऽपि।
वृद्धस्य जायेत यदा गदोऽयं
देहं तदा तस्य विनाशयेच्छीघ्रम्॥" *॥

अथ सामान्यग्रहणीरोगस्य चिकित्सामाह।

"ग्रहणीमाश्रितं रोगमग्नौ तस्मिंश्च दुर्बले।
लङ्घनैर्दीपनीयैश्च मन्दातीसारभेषजैः॥
दोषं सामं निरामञ्च विद्यादतिसारवत्।
अतीसारोक्तविधिना तस्यामञ्च विपाचयेत्॥
पेयादि पटु लघ्वन्नं पञ्चकोलादिभिर्युतम्।
दीपनानि च तक्रञ्च ग्रहण्यां योजयेद्भिषक्॥
कपित्थबिल्वचाङ्गेरीतक्रदाडिमसाधिता।
यवागूः पाचयत्यामं शकृत् संवर्त्तयत्यपि॥"

संवर्त्तयति घनीकरोति॥

अथ खड्गवृषः।

"सुद्रवृषं रसं तक्रे धान्याजीरकसंयुतम्।
सैन्धवेनान्वितं दद्यात् खड्गवृषमिति कीर्त्तितम्॥"

रसं लक्षगुणाधिकमांसभवम्॥ *॥

"कर्षं गन्धकमर्द्धभारदमृते कुर्य्याच्छुभां कज्जलीं त्र्यूषत्रायमतस्त्र्यमलवणं सार्द्धञ्च कर्षं पृथक्।

शुण्ठीं पिप्पलीं च क्षीरकदयुतं सर्जार्द्धभागान्वितं
खादेदुन्मिषितं प्रवृत्तिगदार्त्तोऽक्षस्य विल्वेन च ।
लवणाधिकाचूर्णमित्यर्थः । इति लघुपाठेचूर्णम् ॥
"त्रिकटु त्रिफला चैव विडङ्गं क्षीरकद्वयम् ।
भल्लातकं यवानी च पिप्पलीवलपञ्चकम् ॥
गन्धधूमो वचा कुष्ठं रसो गन्धकमभ्रकम् ।
चारद्वयाम्लमोदौ च चित्रकं गजपिप्पली ॥
तुल्या सोपरसं पाठा लवङ्गं जातिपत्रकम् ।
समभागक्षतक्षेषां चूर्णं श्लक्ष्णं विनिर्मितम् ॥
प्रक्षाल्यास्य चूर्णन्तु चूर्णतुल्यं प्रदापयेत् ।
मन्दाग्निकासदुर्नामप्लीहपाण्डुरुचिज्वरान् ॥
विषमं संग्रहं शूलं कफवातातिसारजित् ।
आमवातापहं श्रेष्ठं सूतिकादोषनाशनम् ॥
वर्ण्यमेतन्नाममन्त्रं स्वादं पित्तिप्रभोजनम् ।
मद्यं काञ्जिकमक्षापि दधितक्रमथापि वा ॥
दशाहाद्चूर्णमिदं खादेन्मासितसुखम् ॥"
इति दशाहाद्चूर्णम् । दशाहाद्चूर्णमिति प्रसिद्धम् ॥ ७ ॥
"जातीफलत्वक्पत्रैलामरिचत्रिजागकेशरैः ।
कर्पूरचन्दनतिलत्वक्क्षीरीतगरामलैः ॥
लाक्षीशुण्ठीपिप्पलीपथ्याभूनागरकचित्रकैः ।
मुस्तोविड्डमरिचैः समभागविचूर्णितैः ॥
यावन्त्येतानि सर्वाणि दद्याद्गुडस्य तावतीम् ।
सर्वचूर्णसमानांशा प्रदेया शुभशर्करा ॥
कर्षमात्रमिदं खादेन्मधुना प्रावितं जनः ।
नाशयेद्दशदोषौ कासं श्वासमरोचकम् ॥"
इति जातीफलादिचूर्णम् ॥ ८ ॥
"चित्रकं पिप्पलीमूलं शारौ लवणपञ्चकम् ।
शोषं विड्डमोदाख्यं यवक्षैकत्र चूर्णयेत् ॥
यटिका मातुलुङ्गस्य रसैर्वा दाडिमस्य वा ।
सप्ता विषमज्वरान् प्रदीपयति पावनम् ॥"
शारौ सर्जिका यवक्षारश्च । लवणपञ्चकमिति ।
"सैन्धवं चक्रकक्षैव विडं साम्लवेतसम् ।"इति ।
शोषं शुण्ठीपिप्पलीमरिचानि । अजमोदाच्च यवानिका । मातुलुङ्गं बीजपूरकम् । इति चित्रकादिवटिका ॥ ९ ॥
"श्रीफलाग्निकाटुत्रिफलानागरचूर्णेन मिश्रितः
गुडः ।
गदमेहकुष्ठं तत्क्षणाच्छोलितो जयति ॥"
श्रीफलाग्निकाटुः विल्वस्यामं फलम् । गुडस्यात्र भागत्रयम् । इति विल्वकल्कः ॥ १० ॥
"पक्वस्य सुपाकाक्षं त्रिफलं लवणत्रयम् ।
यावशूकोः गुडस्यार्द्धकर्षमात्रं तथानलात् ॥
दग्ध्वा क्षपेण यावशूकोर्गुटिका भोजनोत्तरम् ।
भुक्त्वा भुक्तं पचत्याशु नाशयेद्दशदोषजान् ॥
कासं श्वासं तथार्शांसि विशूचीश्च हृदामयम् ॥"
इति यावशूकगुटिका ॥ ११ ॥
"मुस्तकानिविषाविल्वकौटजं सप्तचूर्णितम् ।
मधुना च समायोढं सद्यो सर्वसा जयेत् ॥"
कौटजं इन्द्रयवः । मुस्तकादिचूर्णम् ॥ १२ ॥
"श्वेतो वा यदि वा रक्तः सुपक्वो बदरीफलः ।
गुडेनाधिकवर्षेण भक्षितेनाशु नश्यति ॥"

सर्जः क्षारः । सर्जक्षारचूर्णम् ॥ १३ ॥
"बिल्वाब्दशक्रयवबालकमोचमिङ्-
माजं पयः पिबति यो दिवसत्रयेण ।
सोऽतिप्रवृद्धचिरजन्यसृजोविकारं
सामं नखोत्थितमसाध्यमपि क्षिणोति ।"
मोचो मोचरसः । क्षिणोति हन्ति ॥ १४ ॥
"प्रस्थत्रये त्वामलकीरसस्य
गुडस्य दत्त्वार्द्धतुलां गुडस्य ।
चूर्णीकृतैर्नस्थिकजीरकाद्यै-
र्योषेभक्षणाद्यवागूमोदैः ॥
विड्डङ्गसिन्धुचिफलायवानी-
पाठाभिधानैश्च पलप्रमाणैः ।
दत्त्वा त्रिवृच्चूर्णपलानि चाष्टा-
वष्टौ च तैलस्य पचेद्यथावत् ॥
तं भक्षयेदक्षफलप्रमाणं
यथेष्टचेष्टस्त्रिसुगन्वियुक्तम् ।
अनेन सर्वे ग्रहणीविकाराः
सश्वासकासक्षयमेदसोत्थाः ॥
शाम्यन्ति चायं चिरमग्नरग्नेः
पुंस्त्वस्य च वृद्धिहेतुः ।
स्त्रीणान्तु वन्ध्यामयनाशनः स्यात्
कल्याणको नाम गुडः प्रसिद्धः ॥
तैले मनाक् त्रिवृद्भृष्ट्वा त्रिसुगन्धि पलं पलम् ।
सिद्धे निधेयमत्रैव गुडे कल्याणपूर्व्वके ॥"
इति कल्याणकगुडः ॥ १५ ॥
"पिप्पली पिप्पलीमूलं चित्रकं गजपिप्पली ।
शाल्मकञ्च विडङ्गानि यवानी मरिचानि च ॥
त्रिफला चाजमोदा च नलिनी क्षीरकस्तथा ।
सैन्धवं रौमकक्षापि साम्लवेतसचक्रकं विडम् ॥
चारद्वयञ्च लवणत्रयं कृष्णेला शोषदुग्धिका ।
शुण्ठीशक्रयवाक्षैव प्रत्येकं कर्षसम्मिताः ॥
यष्ट्याह्वकाया: पलान्यत्र चत्वारि कथितानि हि ।
चित्रतायाः पलान्यष्टौ गुडस्यार्द्धतुला तथा ॥
तिलतैलपलान्यष्टावामलक्या रसस्य तु ।
प्रस्थत्रयमिदं सर्वं प्रनेर्दहनेन पचेत् ॥
यौवनस्थं घामलकं बादरं वा यथा फलम् ।
तावन्मात्रमिदं खादेद्भक्षयेद्वा यथानलम् ॥
निखिलान् ग्रहणीरोगान् प्रमेहांश्चैव विंशतिम् ।
उरोघातं प्रतिश्यायं दौर्ब्बल्यं वह्निसंक्षयम् ॥
ज्वरानपि हरेत् सर्व्वान् कुर्य्यात् कान्तिं मतिं स्मरम् ।
पित्तपाण्डुत्वयाङ्गक्ति रक्तपित्तञ्च विंशतिम् ॥
धातुक्षीणो वयःस्त्रीणः स्त्रीषु क्षीणः क्षयी च यः ।
तेभ्यो हितश्च नन्याये महाकल्याणको गुडः ॥"
इति महाकल्याणकगुडः ॥ १६ ॥
"कृष्णानां तुषकानां स्निग्धानां निष्कुलत्वचाम् ।
सर्पिःप्रस्थे पलशतं तान्मात्रे घृते: पचेत् ॥
पिप्पली पिप्पलीमूलं चित्रकं गजपिप्पली ।
शाल्मकानि विडङ्गानि नागरं मरिचानि च ॥
त्रिफला चाजमोदा च कलिङ्गाकालिकेत्वचम् ।
एकैकस्य पलञ्चैकं त्रिवृतोऽष्टौ पलानि च ।
तैलस्य च पलान्यष्टौ गुडात् पथ्यासमं तु तु ॥

श्यामलक्या रसस्यात्र प्रस्थत्रयमुदीरितम् ।
तावत् पाकं प्रकुर्व्वीत मृदुना वह्निना भिषक् ॥
यावद्घ्रीप्रवेषः स्यात्तदेनमवतारयेत् ।
यौडुम्बरश्यामलकं बादरं वा यथा फलम् ॥
तावन्मात्रमिदं खादेद्भक्षयेद्वा यथानलम् ।
अनेनैव विधानेन प्रयुक्तश्च दिने दिने ॥
निहन्ति ग्रहणीरोगान् कुष्ठान्यर्शांसि गन्दरान् ।
ज्वरमानाहगुल्मोदरविसूचिकाः ॥
कामलां पाण्डुरोगञ्च प्रमेहांश्चैव विंशतिम् ।
वातश्लेष्मितवीसर्पदद्रुयक्ष्मश्लीपकान् ॥
वातपित्तकफान् सर्व्वान् दुष्टान् दुष्टान् समाचरेत् ।
याधिक्षीणा वयःक्षीणाः स्त्रीषु क्षीणाश्च ये नराः ॥
तेभ्यो हितो गुणैर्युक्तः स्याद्दहन्यानामपि पुष्टदः ।
वृष्यो बल्यो वृंहणश्च वयसः स्थापनः परः ॥"
इति कृष्णाक्षकल्याणकगुडः ॥ १७ ॥
अतीसाराधिकारलिखितं त्रिवृत्तैलञ्चात्र हितम् । इति भावप्रकाशे ग्रहणीरोगाधिकारः ॥
(चिकित्सान्तरमस्या यथा,—
"बाकं बिल्वं गुडं तैलं पिप्पली बिल्वभेषजम् ।
लिह्यादाते प्रतिघते सद्यूते सप्रवाहिके ॥
पयसा पिप्पलीकल्कः पीतो वा मरिचोद्भवः ।
चाशात् प्रवाहिकां हन्ति चिरकालानुबन्धिनीम् ॥
कल्कः स्याद्बालबिल्वानां तिलकल्कस्य तत्समः ।
दधः सराम्लः सेहाढ्यः खड्गो हन्यात् प्रवाहिकाम् ॥"
इति वैद्यकचक्रपाणिसंग्रहेऽतीसाराधिकारे ॥)
प्रवाही, स्त्री, (प्रोह्यते इति । प्र + वह् + घञ् । गौरादित्वात् ङीष् ।) वालुका । इति राजनिर्घण्टः ॥
प्रविख्याति:, स्त्री, (प्र + वि + ख्या + क्तिन् ।) ख्यातिप्रसिद्धिः । तत्पर्य्यायः । विश्रावः २ । इत्यमरः । ३ । २ । २८ ॥
प्रविदारणं, क्ली, (प्रविदारयत्यनेनेति । प्र + वि + दृ + णिच् + आधारे ल्युट् ।) वृक्षम् । इत्यमरः । २ । ८ । १०३ ॥ (प्र + वि + दृ + णिच् + भावे ल्युट् ।) व्यवदारणम् । इति मेदिनी । णे, ११३ । आकीर्णम् । इति शब्दरत्नावली ॥ (प्र + वि + दृ + णिच् + कर्त्तरि ल्युः । प्रविदारके, त्रि ।)
प्रविर:, पुं, पीतकाष्ठम् । इति शब्दचन्द्रिका ॥
प्रविश्रेय:, पुं, (प्रकृष्टो विश्रेयो यस्य ।) प्रकृष्टविश्रेयः । तत्पर्य्यायः । विश्रुरम् २ । इत्यमरः । ३ । २ । १० ॥ यथा,—
"वैकङ्कतेऽपि प्रविश्रेये विश्रुरं विकटे त्रिषु ॥"
इति भरतधृतत्रिकाण्डशेषः ॥
प्रविषा, स्त्री, (प्रकृतं विषमनया ।) अतिविषा । इति कविदर्पणे । २ । ४ । ६६ ॥ (अतिविषाशब्दस्य विवरणं ज्ञातव्यम् ॥)
प्रविष्ट:, त्रि, (प्र + विश् + कर्त्तरि क्तः ।) प्रवेशविशिष्टः । यथा,—

प्रवृत्तः

"स तं प्रविष्टं वृतमातताविभि-
र्भटैरनेकैरवलोक्य माधवः ॥"
इति श्रीभागवते वाणयुद्धे ६२ अध्यायः ॥

प्रवीणः, त्रि, (प्रकृष्टा संवाधिता वीणास्य । यद्वा, प्रवीणयति वीणया प्रगायतीति । प्र + वीण + णिच् + अच् । वीणया गायकस्य नैपुण्यप्रसिद्धे-स्तत्तुल्यनैपुण्यात् तथात्वम् ।) प्रकृष्टं वेत्ति यः । तत्पर्य्यायः । निपुणः २ अभिज्ञः ३ विज्ञः ४ निष्णातः ५ शिक्षितः ६ वैज्ञानिकः ७ कृत-मुखः ८ कृती ९ कुशलः १० । इत्यमरः । ३ । १ । ४ ॥ (यथा, कुमारे । १ । ४८ ।
"विश्वावसुप्राग्गहरे: प्रवीणै:
सङ्गीयमानत्रिपुरावदानः ।
अध्यागमध्वान्तविकारलक्ष्म-
स्तारं तारार्धिपखण्डधारी ॥")

प्रवीरः, पुं, (प्रकृष्टो वीरः ।) सुभटः । (यथा, कथासरित्सागरे । २५ । १४५ ।
"इति तस्या वचः श्रुत्वा च प्रवीरोऽप्युवाच ताम् ॥"
औत्तम्यस्य मनोः पुत्रभेदः । यथा, हरिवंशे । ७ । ८८ ।
"अभिमानी प्रवीरश्च जिष्णुः संक्रन्दनस्तथा ॥"
अत्र क्वचित् प्रवीणोऽपि पाठः ॥ पुरुवंशीयस्य प्रचिन्वतः पुत्रः । यथा, तत्रैव । ३१ । ५ ।
"प्रचिन्वतः प्रवीरोऽभून्मनस्युक्तस्य चात्मजः ॥"
धर्म्मनेत्रस्य उपदानवीगर्भजातः पुत्रभेदः । यथा, तत्रैव । ३२ । ७—८ ।
"वंशोः सुरोधो राजर्षिर्धर्म्मनेत्रः प्रतापवान् ।
ब्रह्मवादी पराक्रान्तस्तस्य भार्य्योपदानवी ॥
उपदानवी सुतान् लेभे चतुरस्रान् सुयोधतः ।
दृप्तस्तथा सुदृप्तश्च प्रवीरमनघं तथा ॥"
चण्डालपुरुषविशेषः । यथा, मार्कण्डेये । ८८ । ६ ।
"चण्डालोऽहमिहाख्यातः प्रवीरेति पुरोत्तमे ।
विख्यातो वधबन्धको मृतकम्बलधारकः ॥")
उत्तमे, त्रि । इति धरणिः ॥ (यथा, देवी-भागवते । २ । ५ । २० ।
"क्षत्रप्रवीरं कुरु मां पतिं त्वं
वृथा न गच्छेन्मम यौवनं ते ॥")

प्रवृत्तः, त्रि, (प्रवर्त्तते स्मेति । प्र + वृत् + क्तः ।)
प्रवृत्तिविशिष्टः । यथा,—
"प्रवृत्त एव स्वयमुज्झितश्रमः
श्रमेण पेष्टुं भुवनद्वयामसि ।
तथापि बाधावलतया युनक्ति मां
मिथस्त्वदाभाषणलोलुपं मनः ॥"
इति शिशुपालवधे । २ । ४० ॥
आरब्धः । यथा,—
"प्रवृत्तमन्यथा कुर्य्यात् यदि मोहात् कथञ्चन ।
यतस्तदन्यथा भूतं तत एव समाचरेत् ॥"
इति छन्दोगपरिशिष्टम् ॥
प्रकृष्टवर्त्तनविशिष्टश्च ॥ (यथा, रामायणे । ७ । ८० । १ ।
"अथ राज्ञां गतायां प्रत्युद्गतो भरतस्तदानम् ।
मन्त्रिणः शत्रुघ्नं त्वरितं समादिशद्यथा क्रमम् ॥")

प्रवृत्तिः

प्रवृत्तिः, स्त्री, (प्रवर्त्तते इति । प्र + वृत् + क्तिन् ।)
प्रवाहः । उदन्तः । (यथा, मेघदूते । ४ ।
"प्रत्यासन्ने नभसि दयिताजीवितालम्बनार्थी
जीमूतेन स्वकुशलमयीं हारयिष्यन् प्रवृत्तिम् ॥"
प्रवर्त्तनमिति । प्र + वृत् + क्तिन् ।) प्रवर्त्तनम् । (यथा, महाभारते । १२ । ३० । १६ ।
"वृद्धे हि ततस्तस्य हृदि कामो महात्मनः ।
यथा शुक्लस्य पक्षस्य प्रवृत्तौ चन्द्रमाः शनैः ॥"
प्रवर्त्तते आप्नोति प्रक्रियत्वेनेति । प्र + वृत् + क्तिच् । यत्नादिव्यापारः । यथा, महाभारते । १ । २ । २५५ ।
"असच्च सदसच्चैव यस्माद्विश्वं प्रवर्त्तते ।
सन्ततिश्च प्रवृत्तिश्च तस्मान्नत्वपुनर्भवाः ॥"
"सन्ततिर्ब्रह्मादिः । प्रवृत्तिर्यत्नादिः ॥" इति तट्टीकायां नीलकण्ठः ॥") अवन्त्यादिदेशः । इति मेदिनी । ते, १३० ॥ हस्तिमदः । इति हेमचन्द्रः । ४ । २६० ॥ न्यायसते यत्नविशेषः । अस्याः कारणम् । चिकीर्षा । इतिसाधनता-ज्ञानम् । इष्टसाधनताज्ञानम् । उपादानप्रत्य-क्षम् । यथा,—
"प्रवृत्तिश्च निवृत्तिश्च तथा जीवनकारणम् ।
एवं प्रयत्नश्चैविध्यं तान्त्रिकैः परिदर्शितम् ॥
चिकीर्षा कृतिसाध्येऽसाधनत्वमतिस्तथा ।
उपादानस्य चाधिक्यं प्रवृत्तौ जनकं भवेत् ॥"
इति भाषापरिच्छेदः ॥
(यथा, पद्मदूतम् । ६ । १०३ ।
"देहादिपङ्क्तेः यत्नं तदारोहोऽभिमानिता ।
विहितप्रतिषिद्धेषु प्रवृत्तिर्भ्रमणं भवेत् ॥"
प्रयत्नसहितादन्तःकरणात् प्रवृत्तिर्जायते । यदुक्तं कामन्दकीये नीतिसारे । १ । ३३—३५ ।
"आत्मा मनश्च तच्चिष्टेरन्तःकरणमुच्यते ।
आभ्यान्तु सप्रयत्नाभ्यां सङ्कल्प उपजायते ॥
आत्मबुद्धीन्द्रियार्थानां वहिष्करणमुच्यते ।
सङ्कल्पाध्यवसायाभ्यां तद्विरस्य प्रवीर्त्तिता ॥
उभे एते हि करणे यत्नानन्तर्य्यके स्मृते ।
तस्मात् प्रवृत्तिसंरोधाद्भावयेन्निर्मनस्कताम् ॥"
"आत्ममनोबुद्धिकर्म्मेन्द्रियार्थां सङ्घातमभिधाय बुद्धेरन्तःपरिकल्पनया कारणविभागमभिधातु-माह । आत्मा मनश्चेति । अभिहितेन लक्ष-णेनेति प्रतिपाद्यते यया विद्यया सान्वयविद्या सा विद्यते येषां ते तद्विदाः कणादाक्षपादा-दयः तैः तद्विदैः आत्मा मनश्च अन्तःकरण-मुच्यते । आभ्यां आत्ममनोभ्यां प्रयत्नसहिताभ्यां सङ्कल्पः प्रवृत्तिः इन्द्रियप्रवर्त्तनं उपजायते । बहिःकरणमभिधातुमाह । आत्मा बुद्धीति । आत्मा उक्तलक्षणः । बुद्धिः मनः । इन्द्रियाणि बाह्यरूपाणि । तथाः शब्दादयः । कर्म्मे-न्द्रियाणां हि उत्सर्गादिका अर्थाः प्रयोजनानि । एतत् सर्वं बहिःकरणम् । सङ्कल्पः सम्यग्-भूतार्थकल्पनं अध्यवसायः प्रयत्नविशेषः ताभ्यां यस्य आत्मनः सुखासुखसञ्ज्ञया क्रियाः प्रवर्त्तन्ते । तदेवं अन्तःकरणप्रवृत्तिः प्रयत्नादेव बहिःकरणप्रवृत्तिरपि अध्यवसायतश्चात् प्रयत्नादेवेति दर्शितं भवति एतदेव समर्थ-यन्नाह । उभे एते इति । उभे एते अनन्त-रोक्ते हि स्फुटं करणे अनन्तर्यबहिःकरणसंज्ञके यत्नानन्तर्यके प्रयत्नानन्तरं वर्त्तेते प्रयत्नप्रेर-णादित्यर्थः । तस्मादिति । यस्मादेवं तस्मात् प्रवृत्तिसंरोधात् उभयात्मकस्य प्रयत्नस्यैव संरोधं कृत्वा निर्म्मनस्कतां भावयेत् निर्म्मनस्कभावं अभ्य-स्येत् यावत् प्रयत्न एव निरुद्धो भवति तावदात्मा मनसा न युज्यते ततश्च विद्यमानमपि मनो नास्त्येव मनःकार्य्याकरणात् । अन्तः-करणविशेषात् प्रवृत्तिर्नोपपद्यते । एवमन्तः-करणप्रवृत्त्यभावात् बहिःकरणप्रवृत्तेरप्यभावः । तदभावात् इन्द्रियाणां विषयैः सम्बन्ध एव न स्यात् इति भावः ।" इति तट्टीका ॥)

प्रवृत्तिज्ञः, पुं, (प्रवृत्तिं वृत्तान्तं जानातीति । ज्ञा + कः ।) चारभेदः । तत्पर्य्यायः । वार्त्तिकः २ वार्त्तायनः ३ । इति त्रिकाण्डशेषः ॥

प्रवृद्धः, त्रि, (प्रवर्द्धते स्मेति । प्र + वृध् + क्तः ।) वृद्धियुक्तः । तत्पर्य्यायः । प्रौढः २ स्फीतः ३ । प्रसारितः । तत्पर्य्यायः । प्रथितः २ । इत्यमरः । ३ । १ । ७६ ॥ (यथा, देवीभागवते । ३ । ८ । २६ ।
"सत्यं सस्तुतकटं ज्ञातं प्रवृद्धं श्राद्धदर्शनात् ।
वैराग्यं तत्फलं ज्ञातं तामसार्थेषु गारुड ! ॥")

प्रवेकः, त्रि, (प्रविष्यते पृथक् क्रियते इति । प्र + विच् + कर्म्मणि घञ् ।) उत्तमः । प्रधा-नम् । इत्यमरः । ३ । १ । ५७ ॥ (यथा, भाग-वते । २ । ६ । ११ ।
"श्यामावदाताः शतपत्रलोचनाः
पिशङ्गवस्त्राः सुरुचः सुपेशसः ।
सर्व्वे चतुर्व्वाहव उन्निषन्नधि-
प्रवेकनिष्काभरणा सुवर्च्चसः ॥")

प्रवेटः, पुं, (प्रवीयते स्वाद्यते इति । प्र + वी + बाहुलकात् टः ।) यवः । इति त्रिकाण्डशेषः ॥

प्रवेणिः, स्त्री, (प्रकर्षेण वीयते इति । प्र + वी गतौ + "वीप्याज्वरिभ्यो निः ।" उणा० ४ । ४८ । इति निः । णत्वम् । यद्वा, प्रवेणयति सौन्दर्य्यं प्राप्नो-तीति । प्र + वेण गतौ + इन् ।) कुशः । वेणी । इति मेदिनी । णे, ६३ ॥

प्रवेणी, स्त्री, (प्रकर्षेण वीयते इति । प्र + वी गतौ + "वीप्याज्वरिभ्यो निः ।" उणा० ४ । ४८ । इति निः । णत्वम् । ऋदिकारादिति ग्राधिको ङीप् ।) वेणी । (यथा, रघौ । १५ । ६० ।
"तत्र सौधगतः पश्यन् यमुना चक्रवाकिनीम् ।
हेमभक्तिमतीं भूमेः प्रवेणीमिव विभ्रतीम् ॥")
गवादृष्टस्यचिक्कम्बलम् । इत्यमरः । २ । ९ । ८१ (यथा, महाभारते । १५ । २० । १३ ।
"अजिनानि प्रवेणीश्च कुथाः सुरुचः मही पतिः ।
कम्बलांश्च खलीनांश्च पिठराणि च भारत ! ॥
नदीविशेषः । यथा, महाभारते । ६ । ८८ । ११ ।
"प्रवेण्युत्तारमार्गे तु पुण्ये कण्वाश्रमे तथा ।
तापसानामरण्यानि कीर्त्तितानि यथाश्रुति ॥")

प्रवेलः, पुं, (प्र+वेल्+अच् ।) प्रीतसुद्गः । इति हेमचन्द्रः । ४ ।२३८॥

प्रवेशः, पुं, (प्र+विश्+"हलश्च ।" ३ । ३ । १२१ । इति भावे घञ् ।) अन्तर्विगाहनम् । इति हेमचन्द्रः । ६ । १०६ ॥ (यथा, कामन्दकीये नीतिसारे । ७ । ३६ ।

"निर्गमे च प्रवेशे च राजमार्गं समन्ततः ।
प्रोत्थाहितजनं गच्छेत् सम्यगाविष्कृतोन्नतिः ॥")

प्रवेशनं, क्ली, (प्रविश्यतेऽनेनेति । प्र+विश्+करणे ल्युट् ।) सिंहद्वारम् । इति हेमचन्द्रः । ४ । ५६॥ (प्र+विश्+भावे ल्युट् ।) प्रवेशः । (यथा, हरिवंशे । १७४ । ११२ ।

"तव योगप्रभावेन शुक्रस्य तत्र प्रवेशनम् ।
किं मे वहुविलापेन मृयतां सखि ! कारणम्॥")

प्रवेष्टः, पुं, (प्रवेष्टते इति । वेष्ट् वेष्टने+अच् ।) बाहुः । इत्यमरः । २ । ६ । ८० ॥ बाहुनीचभागः । इति शब्दचन्द्रिका ॥ पक्षिदन्तमांसम् । इति हारावली । ३० ॥ गजपृष्ठतल्पनम् । इति त्रिकाण्डशेषः ॥

प्रवर्त्तं, त्रि, (प्रवर्त्यते स्मेति । प्र+वि+वृत्+क्तः ।) स्फुटम् । इत्यमरः । ३ । १ । ८२ ॥ (यथा, सुश्रुते निदानस्थाने द्वितीयाध्याये ।

"जातिष्वेतानि रूपाणि प्रवक्तव्यानि भवन्ति॥")

प्रव्रजितः, पुं, (प्र+व्रज्+क्तः ।) वुद्धभिक्षुशिष्यः । तत्पर्य्यायः । चैलुकः २ श्रामणेरः ३ सङ्घापाश्रकः ४ गोसो ५ । इति त्रिकाण्डशेषः ॥ त्रि, प्रव्रज्याश्रमविशिष्टः ॥ (यथा, पराशरसंहितायाम् । ४ । २६ ।

"नष्टे मृते प्रव्रजिते क्लीवे च पतिते पतौ ।
पञ्चस्वापत्सु नारीणां पतिरन्यो विधीयते ॥"

प्र+व्रज्+भावे क्तः । क्ली, सन्न्यासः । यथा, महाभारते । ५ । १७६ । ५ ।

"अलं प्रव्रजितेनेह भद्रे ! शृणु हितं वचः ।
इतो गच्छस्व भद्रन्ते पितुरेव निवेशनम् ॥")

प्रव्रजिता, स्त्री, (प्रव्रजितस्य लिङ्गमिव जटादिकमस्त्यस्या इति । अच् । टाप् ।) सांखी । सन्न्यासिनी । (प्रव्रजित+टाप् ।) तापसी । इति मेदिनी । ते, २९० ॥

प्रव्रज्या, स्त्री, (प्र+व्रज+"व्रजयजोर्भावे क्यप् ।" ५ ।३ ।९८ । इति भावे क्यप्प्रत्ययः ।) सन्न्यासः ॥ (यथा, महाभारते । ३ । १७७ । ७ ।

"वाग्वेगं हि कस्यस्य शक्तः सोढुं महात्मनः ।
प्रव्रज्यायां हि मे हेतुः स एव पुरुषर्षभः ॥"

यथा च कुमारे । ६ । ६ ।

"सुक्षायशोपवीतानि विभ्रतो हैमवल्कलाः ।
रक्ताधरत्वाः प्रव्रज्यां कथयद्भिरिवाङ्गिभिः ॥"

"अत्र चतुर्थाश्रमवाचिना प्रव्रज्याशब्देन वानप्रस्थाश्रमो लक्ष्यते 'जहुः परिग्रहव्रीड़ां प्राजापत्यास्पदस्थिनः' इति सपत्नीकत्वाभिधानात् 'सुतविन्यस्तपत्नीकः तया वानुगतोऽपि सन्' इति वानप्रस्थस्योभयथा स्मरणात् ॥" इति तट्टीकायां मल्लिनाथः ॥ वृथाप्रव्रज्याश्रितानां निन्दनीयत्वमुक्तम् । यथा, मनौ । ५ । ८६ ।

"वृथासङ्करजातानां प्रव्रज्यासु च तिष्ठताम् ।
आत्मनस्त्यागिनाञ्चैव निवर्त्तेतोदकक्रिया ॥"

क्ली, प्रव्रजनम् । यथा, महाभारते । ४ । १७ । ११ ।

"कोऽहि राज्यं परित्यज्य सर्व्वस्वं चात्मना सह ।
प्रव्रज्यार्थेव दीयेत विना दुर्द्यूतदेविनम् ॥")

प्रव्रज्यावसितः, पुं, (प्रव्रज्याया अवसितो विच्युतः ।) सन्न्यासभ्रष्टः । यथा,—

"तवाहमित्युपगतः प्रव्रज्यावसितः स्मृतः ॥"

इति दायभागवचनव्याख्यायां क्रमसंग्रहः ॥ (यथा, कात्यायनवचनम् ।

"प्रव्रज्यावसिता यत्र त्रयो वर्णा द्विजोत्तमाः ।
निर्वासं कारयेद्विप्रं दासत्वं चक्रवेश्ययोः ॥")

प्रशंसा, स्त्री, (प्र+शंस+भावे अ: । स्त्रियां टाप् ।) प्रशंसनम् । तत्पर्य्यायः । वर्णना २ ईड़ा ३ स्तवः ४ स्तोत्रम् ५ स्तुतिः ६ नुतिः ७ शाघा ८ अर्थवादः ९ । इति हेमचन्द्रः । २ । १८४ ॥ (यथा, मनुः । १० । १२७ ।

"धर्म्मैकसेवस्तु धर्म्मज्ञाः सतां वृत्तिमनुष्ठिताः ।
अलब्धव्यं न दुष्यन्ति प्रशंसां प्राप्नुवन्ति च ॥")

आत्मप्रशंसानिषेधो यथा,—

"न चात्मानं प्रशंसेद्वा परनिन्दाञ्च वर्जयेत् ।
वेदनिन्दां देवनिन्दां प्रयत्नेन विवर्जयेत् ॥"

इति कौर्म्मे उपविभागे १५ अध्यायः ॥

प्रशमः, पुं, (प्रशमनमिति । प्र+शम्+भावे घञ् ।) शमता । उपशमः । यथा,—

"शतानि दशपापानि प्रशमं यान्तु पाण्डवि ! ॥"

इति तिथ्यादितत्त्वम् ॥ (यथा च हरिवंशे । ६८ । ८१ ।

"स तेन वारिणा वह्निस्तत्क्षणात्प्रशमं ययौ ॥")

प्रशमनं, क्ली, (प्र । शम्+णिच्+ल्युट् ।) मारणम् । वधः । इति हेमचन्द्रः ॥ (प्र+शम्+ल्युट् ।) शमता । प्रशान्तिः । यथा,—

"सर्व्वावाधाप्रशमनं त्रैलोक्यस्याखिलेश्वरि ! ।
एवमेव त्वया कार्य्यमस्मद्वैरिविनाशनम् ॥"

इति मार्कण्डेयपुराणम् । ९१ । ३५ ॥ (प्रतिपादनम् । दानम् । इति भरतमल्लिकभट्टः ॥ यथा, मनुः । ७ । ५६ ।

"तैः सार्द्धं चिन्तयेन्नित्यं सामान्यं सन्धिविग्रहम् ।
स्थानं समुदयं गुप्तिं लब्धप्रशमनानि च ॥"

स्थिरीकरणम् । प्रशमनेन स्थिरीकरणेन । यथा, रघुः । ४ । १४ ।

"लब्धप्रशमनस्यस्मद्वैरं सम्पत्स्यितात् ।
पार्थिवश्रीर्द्वितीयेव भरतस्पर्शलक्षणा ॥")

इति मल्लिनाथः ॥

प्रशस्तं, त्रि, (प्रशस्यते स्मेति । प्र+शंस्+क्तः ।) श्रेष्ठम् । इति शब्दरत्नावली ॥ प्रशंसनीयम् । अतिश्रेष्ठम् । इति भरतमल्लिकादिशब्दटीकायां भरतः ॥ (यथा, रघुः । ५ ।२५ ।

"स त्वं प्रशस्ते महिते मदीये
वंशे चतुर्थोऽग्निरिवाग्रगारे ॥")

प्रशस्यः, त्रि, प्रशंसनीयः । प्रपूर्व्वशंसधातोः कर्म्मणि क्यप्प्रत्ययेन निष्पन्नः ॥ (यथा, कामन्दकीयनीतिसारे । १९ । ५५ ।

"अपश्चात् तापदात्सभ्यगुरक्तिफलप्रदः ।
अदीर्घकालोऽभीष्टश्च प्रशस्यो मन्त्र इष्यते ॥")

प्रशान्त, [मृ] त्रि, प्रकर्षेण शान्यति यः । (प्र+शम्+क्विप् । "अनुनासिकस्य क्विझलोः क्ङिति ।" ६ । ४ । १५ । इति दीर्घः ।) शान्तः । इति सुग्धबोधव्याकरणम् ॥ (सामर्थ्ये नान्तोऽयमयम् ॥)

प्रशान्तः, त्रि, (प्रकर्षेण शान्तः ।) प्रकृष्टशमताविशिष्टः । यथा,—

"प्रशान्तश्चापदाकीर्णं मुनिशिष्योपशोभितम् ॥"

इति मार्कण्डेयपुराणे । ८१ । ६ ।

प्रशास्ता, [ऋ] त्रि, (प्रशास्तीति । प्र+शास्+तृच् । "अस्तिसक्तिमितीति ।" ७ । २ । ३४ । इति निपातनादिड्भावः । यद्वा, "तृन्तृचौ शंसिच्छदादिभ्यः संज्ञायाञ्चानिटौ ।" उणा० २ । ६७ । इति तृच् इट् च न ।) ऋत्विक् । मित्रम् । इति संक्षिप्तसारोणादिवृत्तिः ॥ शासनकर्त्ता ॥ (यथा, कामन्दकीयनीतिसारे । १३ । ४५ ।

"प्रशास्त्रध्यक्षसेनानां मन्त्रमात्यपुरोधसाम् ।
सम्यक्प्रचारविज्ञानं दूतानाञ्चावबोधनम् ॥")

प्रश्नः, पुं, (प्रच्छनमिति । प्रच्छ+"यजयाचयतेति ।" ३ । ३ । ९० । इति नङ् । "च्छ्वोः शूड़िति ।" ६ । ४ । १९ । इति शूः । "प्रश्नि चेति ।" ३ । २ । ११७ । इति ज्ञापकात् न सम्प्रसारणम् ।) जिज्ञासा । तत्पर्य्यायः । अनुयोगः २ पृच्छा ३ । इत्यमरः । १ । ६ । १० ॥ (यथा, मनुः । १ । ११५ ।

"साक्षिप्रश्नविधानञ्च धर्म्मं स्त्रीपुंसयोरपि ॥"

"पृच्छा तत्त्वात् यथातथ्यं विधिना प्रश्न उच्यते॥"

इति चरके सूत्रस्थाने त्रिंशेऽध्याये ॥)

प्रश्नदूती, स्त्री, (प्रश्नस्य दूतीव ।) प्रहेलिका । इति त्रिकाण्डशेषः ॥

प्रश्नी, स्त्री, (पृश्निः पृषोदरादित्वात् रः । वा ङीष् ।) कुम्भिका । इति त्रिकाण्डशेषः ॥

प्रश्रयः, पुं, (प्रश्रयणमिति । प्र+श्रि+भावे अच् ।) प्रणयः । इत्यमरः । ३ । २ । २५ ॥ (यथा, कामन्दकीयनीतिसारे । ८ । ८ ।

"अदीर्घसूत्रताचौद्रं प्रश्रयः स्वप्रधानता ।
प्रकृतिस्फीतता चेति विजिगीषुगुणाः स्मृताः॥")

प्रश्रितः, त्रि, (प्र+श्रि+क्तः ।) विनीतः । इत्यमरः । ३ । १ । २५ ॥ (यथा, रामायणे । १ । १३ । २ ।

"अब्रवीत् प्रश्रितं वाक्यं प्रसवार्थे द्विजोत्तमम् ॥")

प्रश्लथः, त्रि, (प्रकृष्टः श्लथः ।) शिथिलः । इति त्रिकाण्डशेषः ॥

प्रष्टा, [ष्टृ] त्रि, (पृच्छतीति । प्रच्छ+तृच् । "प्रश्नेति ।" ८ । २ । ३६ । इति षः ।) प्रश्नकर्त्ता । तत्पर्य्यायः । कथंकथिकः २ । इति

विक्षाऽऽक्षेपः । (यथा, मार्कण्डेये । ७५ । २६ ।
"विवेश वह्निप्राणां वै प्रधारं प्राह्य हव्यभुक्")
प्रसः, त्रि, (प्रतिष्ठते अग्रतो गच्छतीति । प्र + स्था + "सुपि स्थः ।" ३ । २ । ४ । इति कः । "प्रष्ठोऽग्रगामिनि ।" ८ । ३ । ६२ । इति षत्वम् ।) अग्रगामी । इत्यमरः । २ । ८ । ७२ ॥ (यथा, रघुः । १५ । १० ।
"आदिष्टवर्त्मा सुनिभिः स गच्छंस्तापसं वरः ।
विरराज रथप्रष्ठैर्वालखिल्यैरिवांशुमान् ॥")
प्रष्ठवाट्, [ह्] पुं, (प्रष्ठः अग्रगामी सन् वहतीति । प्रष्ठ + वह् + "वहश्च ।" ३ । २ । ६४ । इति क्विप् ।) युगपार्श्ववः । इत्यमरः । २ । ६ । ६५ ॥ शिष्टार्थं युगवाहिपार्श्वयोजितः । इति भरतः ॥ योजितं युगपार्श्वे दमनार्थं वंशालिका आमवन्ति वः । इति लघुः ॥ युवा गौर्दमनाय योजितः । इत्यत्रे ॥
प्रष्ठी, स्त्री, (प्रष्ठ + ङीष् ।) प्रष्ठभार्य्या । अग्रगामिपत्नी । इति शब्दरत्नावली ॥
प्रष्ठौही, स्त्री, (प्रष्ठवाह् + "वाहः ।" ४ । १ । ६१ । इति ङीष ।) वालगर्भिणी । प्रथमगर्भवती गौः । प्रष्ठं प्रथमगर्भं वहति या सा । वाला सती गर्भिणी प्रथमगर्भेत्यर्थः । इति भरतः ॥ (यथा, महाभारते । १३ । ६३ । ३३ ।
"प्रष्ठौहीनां पीवरीणाञ्च तावद्
अग्र्या गुरुर्धेनव: सुव्रताच्च ॥")
प्रस, म ष ऊ प्रसदे । तनौ । इति कविकल्पद्रुमः ॥ (भ्वा०-चुरा०-सक०-सेट् ।) रेफयुक्ताद्यः । म, प्रसयति । ष, प्रसा । ऊ, प्रसते कीर्त्तिं विद्या । प्रसते विस्तारयति येत्यर्थः । इति दुर्गादासः ॥
प्रसक्तं, क्ली, (प्र + सञ्ज् + क्त ।) नित्यम् । इति शब्दरत्नावली ॥ (यथा, माधवहतस्त्रिनिषण्णस्य कावाधिकारे ।
"प्रसक्तवेगस्तु समीरणेन
भिन्नस्वरः काहति मुष्कमेव ॥"
"प्रसक्तवेगः सततकावेगः ।" इति तट्टीकायां विजयरक्षितः ।) तत्परे, त्रि ॥ (व्याक्तः । यथा, गीतायाम् । १६ । १६ ।
"अनेकचित्तविभ्रान्ता मोहजालसमावृताः ।
प्रसक्ताः कामभोगेषु पतन्ति नरकेऽशुचौ ॥")
प्रसक्तिः, स्त्री, (प्र + सञ्ज् + भावे क्तिन् ।) प्रसङ्गः । (यथा, किरातें । ५ । ५० ।
"मा भूत्तमोमयपरासवेन्द्रियाणां
सन्ताप दिश्तु शिवः शिवां प्रसक्तिम् ॥")
व्यभिचारिता । व्यापत्तिः । इति सर्वाभिचारिशिरोमणिः ॥
प्रसङ्गः, पुं, (प्र + सञ्ज् + घञ् ।) सङ्गतिविशेषः । यथा,—
"स प्रसङ्गः उपोद्घातो हेतुतावच्छरत्तया ।
निर्बन्धैकैकतात्पर्य्ये शोढायाः प्रतिरिष्यते ।"
तस्य उपयमः । अन्योपोद्घातनं तत् । तत्पर्य्यन्तु स्वतिरिक्तविषयतावच्छेदे सति स्वविषयतावच्छेदकत्वम् । इत्यनुमितिमत्त्वे गदाधरभट्टाचार्य्यः ॥ ("प्रकरणान्तरेण समापनं प्रसङ्गः । यथा प्रकारान्तरितो योऽर्थोऽङ्गदुक्तः समाप्यते स प्रसङ्गः । यथा । महाभूतशरीरिसमवायः पुरुषस्तस्मिन् सोऽधिष्ठानमिति वेदोत्पत्त्यभिधाय भूतविद्यायां पुनरुक्तं वर्त्तोऽभिहितं पञ्च महाभूतशरीरिसमवायः पुरुष इति स खल्वेवं कर्म्म पुरुषाधिकितृसायामधिक्षतः ।" इत्युत्तरतन्त्रे पञ्चवष्टितन्त्राध्याये सुश्रुतेनोक्तम् ॥) अन्योद्देशेन प्रस्तावन्यस्यापि सिद्धिः । यथा,—
"इष्टा तु हरते पापं दृष्टा तु त्रिदिवं नयेत् ।
प्रसङ्गेनापि या गङ्गा मोक्षदा स्त्रवगाहिता ॥"
इति प्रायश्चित्ततत्त्वम् ॥ ॐ ॥
(यथा च देवीभागवते । ३ । ६ । ४२ ।
"अस्माभिरपि तन्नाम प्रसङ्गेनापि भाषितम् ।
ददाति वाञ्छितानर्थान् दुर्लभानपि सर्व्वथा ॥")
प्रसक्तिः । यथा,—
"आनीता भवता यदा पतिव्रता साध्वी धरत्रीसुता
स्फुर्ज्जद्राक्षसमायया न च कथं रामाङ्गमङ्गीकृतम् ।
कर्त्तुं चेतसि पुण्डरीकनयनं दूर्व्वादलश्यामलं
तुच्छं ब्रह्मपदं भवेत् परवधूसङ्गप्रसङ्गः कुतः ॥"
इति नाटकम् ॥ ॐ ॥
प्रसादः । यथा,—
"तत्रैव गङ्गा यमुना च तत्र
गोदावरी तत्र सरस्वती च ।
सर्व्वाणि तीर्थानि वसन्ति तत्र
यत्राच्युतोदारकथाप्रसङ्गः ॥"
इति पौराणिकाः ॥ ॐ ॥
मैथुनम् । यथा । प्रसङ्गनित्यद्रुतदृष्टयानादिति रुग्विनिश्चयवचनटीकायां विजयरक्षितः ॥ (यथा च देवीभागवते । १ । १२ । २० ।
"अयोरपि तयोर्वीक्ष्य प्रसङ्गं रममाणयोः ।
परिहृत्य ययुस्तूर्णं नरनारायणाश्रमम् ॥")
प्रसज्यप्रतिषेधः, पुं, (प्रसज्य प्रवृत्तिं सम्यक् प्रतिषेधो निषेधः ।) निषेधविशेषः । तल्लक्षणं यथा,
"अप्राधान्यं विधेर्यत्र प्रतिषेधे प्रधानता ।
प्रसज्यप्रतिषेधोऽसौ क्रियया सह यत्र नञ् ॥"
अस्योदाहरणम् । भोजराजः ।
"पौषे पौत्रे क्षणदचरे नवाङ्गं गायरेदुधः ।
भवेच्छ्मशानरे रोगी पितृव्यां नोपतिष्ठते ॥"
अत्र रोगीतिनिन्दाश्रवणात् प्रसज्यता । नोपतिष्ठते इति श्रवणात् पर्य्युदासता । इति मलमासतत्त्वम् ॥
प्रसत्तिः, स्त्री, (प्र + सद् + क्तिन् ।) प्रसन्नता । नैर्म्मल्यम् । इति शब्दरत्नावली ॥
प्रसत्तरी, स्त्री, (प्रसत्तृ + "वर्णो वर्च ।" ४ । १ । ७ । इति ङीर्त्रौ ।) प्रतिपत्तिः । इति संक्षिप्तसारोणादिवृत्तिः ।
प्रसत्वा [तृ] पुं, (प्रसीदतीति । प्र + सद् + क्वनिप् ।) धर्म्मः । प्रजापतिः । इति संक्षिप्तसारोणादिवृत्तिः ।
प्रसन्नः, त्रि, (प्रसीदतीति । प्र + सद् + क्त ।) निर्म्मलः । तत्पर्य्यायः । स्वच्छः २ । इत्यमरः । १ । १० । १४ ॥ (यथा, महाभारते । ७ । २७ । २४ ।
"रसाः स्पर्शाश्च गन्धाश्च शब्दाश्चापि गुणान्विताः ।
इत्यानि च प्रसन्नानि यस्य राज्ञा युधिष्ठिरः ॥")
सन्तुष्टः । इति मेदिनी । ने, ९८ ॥ (यथा, रघुः । ५ । १० ।
"अपि प्रसन्नेन मघोनिया त्वं
सम्यग्विनीयानुमतो गृहाय ॥")
प्रसन्नता, स्त्री, (प्रसन्न + तल् ।) प्रसन्नस्य भावः । तत्पर्य्यायः । प्रसादः २ । इत्यमरः । १ । ३ । १९ ॥ (यथा, षष्ठयोगप्रदीपिकायाम् । २ । ७८ ।
"वपुः स्वास्थ्यं वदने प्रसन्नता
नादस्फुटत्वं नयने सुनिर्म्मले ॥")
प्रसन्ना, स्त्री, (प्रसन्न + टाप् ।) सुरा । इत्यमरः । २ । ९० । ४० ॥ मद्यविशेषः । तस्य गुणाः ।
"प्रसन्ना गुल्मवातार्शोविबन्धानाहनाशिनी ।
मूलप्रवाहिकाटोपकफवातार्शसां हिता ॥"
इति राजवल्लभः ॥
प्रसादविशिष्टा । यथा, मार्कण्डेये । ८१ । ७३ ।
"सैषा प्रसन्ना वरदा नृणां भवति सुक्षये ॥"
प्रसन्नेरा, स्त्री, (प्रसन्ना निर्म्मला इरा जलमिव । मदिरा । इत्यमरटीकायां भरतः । २ । १० । ४० ॥)
प्रसभः, पुं (प्रगता सभा सभाधिकारो यस्मात् ।) बलात्कारः । इत्यमरः । २ । ८ । १०८ ॥ (यथा, श्रीकृष्णचरिते । ५ । ४२ ।
"यस्मिन् विनिर्म्मितवति प्रसभं प्रकोपा-
दत्युग्रनिग्रहनवानुभवोपदेशम् ॥")
प्रसरः, पुं, (प्र + सृ + भावादौ यथायथं घञ् ।) तन्तुव्रणविटपादेर्विसर्पणम् । प्रकर्षेण निकटे सरणं सर्पणम् । तत्पर्य्यायः । विसर्पः २ । इत्यमरभरतौ । ३ । २ । २३ ॥ (यथा, रघुः । १९ । २० ।
"तिरस्क्रियन्ते क्षमितन्तुपाले-
र्विच्छिन्नधूमप्रसरा गवाक्षाः ॥")
प्रणयः । वेगः । इति मेदिनी । रे, १८२ ॥ (यथा, कथासरित्सागरे । १ । २९ ।
"इति विनयनम्रशिरसा तेन वचो युक्तमुक्त-
मवधार्य ।
तनयाय मूलदेवः प्रीतिप्रसरैः प्रसादितो-
ऽवोचत् ॥")
समूहः । इति शब्दरत्नावली ॥ (यथा, आर्य्यासप्तशत्याम् । ५८ ।
"अननूतननखलेखासखी तव वर्म्मविन्द-
सन्दोहः ।
आभाति पट्टसूत्रे प्रविरलमिव मौक्तिकप्रसरः ॥"
प्रसरस्वरूपम् । यथा,—
"अत ऊर्द्धं प्रसरं वक्ष्यामः । तेषामेभिरातन्त्रविशेषैः प्रकुपितानां पर्य्युषितकिण्वोदकपिष्टसमवाय इवोत्क्लिष्टानां प्रसरो भवति तेषां वायुर्गतिमत्त्वात् प्रसरहेतुः सञ्चयहेतुत्वे च दि

रसोभूविष्ठो रसस्य प्रवर्त्तकं सर्व्वभावानाम्। यथा मद्यानुद्रवसघयोरतिद्रवः सेतुमवद्दार्य्या-परेणोद्रवेण यामिश्रः सर्व्वतः प्रधावत्येवं दोषाः कदाचिदेकाग्रो दिग्रः समस्ताः शोणितसहिता वानेकधा प्रसरन्ति।" इति सुश्रुते सूत्रस्थाने २१अध्यायः॥) युतम्। इति विश्वः। नाराचः। इति भूरिप्रयोगः॥

प्रसरणं, क्ली, (प्र+सृ+भावे ल्युट्।) सैन्यानां सर्व्वतो व्याप्तिः। तत्पर्य्यायः। चारः २। इत्यमरः। २। ८। ६६॥ प्रसरणी ३ प्रसरिः ४ प्रसारणी ५। इति रायमुकुटः॥ सैन्यानां दूरकालादिहेतवे इतस्ततो गमनम्। इति हेमचन्द्रः। ३। ४५५॥ (गमनमात्रम्। यथा, रघुः। ९। ४३। "मार्ग्गाः क्रमेण रुतः प्रसरणे श्रमेनो गण्डा-लुलने सुप्तासुप्तमृगाधिपोत्तुलदं वा सर्पणे पन्नगः॥" प्रभुत्वमानादिकम्। यथा, भागवते। ५। १। २६। "वर्द्धिष्यत्याषानुदिनमेधमानप्रमोदप्रसरण-यौवित्रयप्रीढ़ाप्रसुषिरशासावलोकरुचिरचर्व्वु-ल्यादिभिरिति॥") प्रसरणी, स्त्री, (प्र+सृ+"अर्त्तिसृधृनि॥" इति अनिः। ङादिकादिति वा ङीप्।) प्रसरणम्। इत्यमरटीकायां भरतः। २। ८। ६६॥

प्रसर्पणं, क्ली, (प्र+सृप्+ल्युट्।) गमनम्। प्रसरणम्। प्रपूर्व्वस्यधातोर्भावेऽनट्प्रत्ययः॥ (यथा, महाभारते। ३। १२६। ६। "प्रसर्पणं मदीपाल! रौप्यायाममितौजसः॥" गतिसाधने, त्रि। यथा, ऋग्वेदे। १०। ६०। ७। "इदं तव प्रसर्पणं सुवन्धवेहि निरिहि॥" "वर्त्तमानेदं तव शरीरं तव प्रसर्पणं प्रकर्षेण सर्पणसाधनम्॥" इति तद्भाष्ये सायनः॥)

प्रसवः, पुं, (प्र+सू+"ऋदोरप्।" ३। ३। ५७। इत्यप्।) गर्भमोचनम्। तत्पर्य्यायः। प्रसूतिः २। इत्यमरः। ३। २। १०॥ (यथा, रघुः। ३। १२। "मतिः प्रतीतः प्रसवोत्सुकां प्रियां दृष्ट्वा काले दिवसस्थितामिव॥" गर्भमोचनम्। यथा, मनुः। ६। ७०। "यथाविधिभिगच्छेनां शुक्लवस्त्रां शुचिव्रताम्। मिथो भजेतामप्रसवात् सकृत्सकृतावृतौ॥") उत्पादः। (जन्म। यथा, रघुः। १। २२। "ज्ञाने मौनं क्षमा शक्तौ त्यागे श्लाघाविपर्य्ययः। गुणागुणानुबन्धित्वात्तस्य सप्रसवा इव॥" "सह प्रसवो यस्य वेषां ते सप्रसवाः सोदरा इव।" इति तट्टीकायां मल्लिनाथः॥) पशुः। (यथा, रघुः। ८। ३०। "अधिदेवनयज्ञसूत्रणां सुखसाधप्रसवैः स साधिवः। अकृशत्वमुपेयिवान् गवां परिधेर्मुख इवोष्णदीधितिः॥") दशम्। इक्षुमम्। इति मेदिनी। गे, ७२॥ (यथा, रघुः। ७। २३। "प्रसवैः सप्तपर्णानां मदगन्धिभिराहताः। व्यलयन्येव तन्द्रागाः सप्तधैव प्रसुस्रुवुः॥" आज्ञा। यथा, वाजसनेयसंहितायाम्। १०। २२। "मरुतां प्रसवेन जय।" "हे युर्य्य मरुतां देवानां प्रसवेनाज्ञया त्वं जय भवतीति शेषः॥" इति तद्भाष्ये महीधरः॥) प्रसवस्य मासनियमो यथा,—

"नवमे दशमे मासि नारी गर्भं प्रसूयते। एकादशे द्वादशे वा ततोऽन्यत्र विकारतः॥"

इति भावप्रकाशः॥ * ॥

प्रसूतिकारकौषधादि यथा,—

"पीतस्तु काञ्चिकं रुद्र! क्षपितं शरपुङ्खया। छिन्नुसैन्धवसंयुक्तं शीघ्रं स्त्रीणां प्रसूतिकृत्॥ मातुलुङ्गस्य वै मूलं कटिबद्धं प्रसूतिकृत्। अपामार्गस्य वै मूले योनिस्थश्च प्रसूतिकृत्॥ अपामार्गस्य वै मूले गर्भवत्यास्तु नामतः। उत्पाट्यमाने सकले पुत्रः स्यादन्यथा सुता॥ अपामार्गस्य वै मूले नारीणां शिरसि स्थिते। गर्भशूलं विनश्येत नात्र कार्य्या विचारणा॥"

इति गारुड़े १६६ अध्यायः॥ * ॥

अपि च।

"पाटालाङ्गलिचिंह्नास्थमयूरकजटेः पृथक्। गोभिक्षभिगालेयात् सुखं नारी प्रसूयते॥ पाटायास्तु शिफायोनौ वा नारी संप्रधारयेत्। उषः प्रसवकाले तु सा सुखेन प्रसूयते॥ तुषाम्बुपरिपिष्टेन मूलेन परिलेपयेत्। साङ्गुल्याश्चरणौ मूले चिप्रमेतेन गर्भिणी॥ मातुलुङ्गस्य मूलानि मधुकं मधुसंयुतम्। घृतेन सह पातव्यं सुखं नारी प्रसूयते॥"

इति चक्रपाणिदत्तः॥ * ॥

सुखप्रसवमन्त्रो यथा,—

"अस्ति गोदावरीतीरे जम्भला नाम राक्षसी। तस्याः स्मरणमात्रेण विप्रुच्या गर्भिणी भवेत्॥"

सुखप्रसवचक्रं यथा,—

"पञ्चरेखाः समुल्लिख्य तिर्य्यगूर्द्धक्रमेण हि। पदानि षड्दशाग्राद्य लेकमाद्ये सुनौ त्रयम्॥ नवमे वह्न दद्यात्तु वायुं पञ्चदशे तृया। द्वितीयेऽष्टादशे षट्दिग्नि द्वौ षोड़शे श्रुतिः॥ एकादिना समं त्रैयमिच्छाङ्कार्द्धं त्रिकोणके। तदा द्वाविंशदादिः स्याच्चतुष्कोष्ठेषु सर्व्वतः॥ दर्शनाहारयात्रासु सुखं स्यादेषु कर्म्मसु। द्वाविंशत् प्रथवे गार्य्यास्त्रयस्त्रिंशत्तमे वृधाम्॥ भूताविंशेषु पञ्चाशन्मृतापत्यात् वै शतम्। द्वावप्रतिस्तु वन्ध्यायां चतुःषष्टी रजाधनि॥ विषे विंशो धान्यकीटेष्वधाविंशतिरेव च। चतुरश्रौ च बालानां रोदने परिकीर्त्तिता॥"

इति ज्योतिस्तत्त्वम्॥ * ॥

तस्य वैद्यकं यथा,—

नर्त्त उवाच।

"चकासप्रवदा गार्य्यः कालातीतप्रजास्तया। विद्धतप्रसवाश्चैव मृतप्रसवकास्तथा॥ जगाद्या अवरास्तत्र न जातप्रजगास्तथा। क्षीणाङ्गा अधिकाङ्गाश्च जायन्ते यदि वा स्त्रियः॥ प्रसूतः प्रक्रियत्येव तस्मिन्नेव च वत्सरेऽथवा। विनाशं तस्य देहस्य कुरुते च विनिर्द्दिशेत्॥ निर्व्वासयेत्तां भूपतिः खराद्यात् स्त्रियश्च पूज्याश्च ततो द्विजेन्द्राः। किमिच्छकैर्व्राह्मणतर्पणैश्च लोके ततः शान्तिमुपैति पापम्॥"

इति मात्स्ये अद्भुतशान्तिकीप्रसवविधितो नाम २०६ अध्यायः॥ * ॥

प्रसवाद्भुतत्वं यथा,—

"एको द्वयोस्त्री गावः सप्ताश्वा नवदन्तिनः। सिंहप्रसूतिकाश्चैव कथिताः शालिघातकाः॥" तिल इति वक्तव्ये छान्दसत्वात् चय इत्युक्तम्। सिंहप्रसूतास्त्रियो दोग्ध्याः। "भागौ सिंहसते चैव यस्य गौः संप्रसूयते। मरणं तस्य निर्द्दिष्टं ऋत्विग्भिर्व्वेदपारगैः॥ अत्र शान्तिं प्रवक्ष्यामि येन सम्प्रयते शुभम्। प्रसूतां तत्क्षणादेव तां गां विप्राय दापयेत्॥ ततो होमं प्रकुर्व्वीत घृताक्तैः राजसर्षपैः। आहुतीनां घृताक्तानामयुतं जुहुयात्ततः॥" आहुतिभिश्चायं होमः। "सोपवासः प्रयत्नेन ब्रह्मादिभ्यो द्विजेभ्यः॥" अपि च। "सिंहराशौ गते सूर्य्ये गोप्रसूतिर्यदा भवेत्। पौषे च महिषी सूते दिवा चेत्तरी तथा॥ तदानिष्टमवेत् किञ्चित् तच्छान्त्यै शान्तिकाचरेत्। अस्य वामेतिसूक्तेन तरिष्यतीतिमन्त्रतः॥ जुहुयाच्च तिलाज्येन शतमष्टोत्तराधिकम्। नक्षत्रयविधानेन जुहुयाच्च तथायुतम्। श्रीसूक्तेन ततः स्नायात् शान्तिसूक्तेन वा पुनः॥"

इत्यद्भुतसागरे नारदः॥

प्रसवकः, पुं. (प्रसवेन पुष्पादिना कायति शोभते इति। कै+कः।) पियालवृक्षः। इति शब्दमाला॥ (विवृतिविशेषोऽस्य पियालशब्दे ज्ञातव्यः॥)

प्रसवबन्धनं, क्ली, (प्रसवानां पुष्पफलानां बन्धनं यत्र।) वृन्तम्। इत्यमरः। २। ४। १५॥

प्रसवस्त्रजी, स्त्री, (प्रसवस्य स्त्रजीव।) माला। यथा, महानाटके।

"इयमियं मदवारणगन्दिनी चिदवृणगाधणितः प्रसवस्त्रजी॥"

प्रसविता, [तृ] पुं, (प्रसूते जनयतीति। प्र+सू+तृच्।) पिता। इति शब्दरत्नावली॥ (अनुशासनेऽपि, त्रि। यथा, ऋग्वेदे। ७। ६३। २। "उक्षेति प्रसविता जगतां महान् केतुरर्णव: सूर्य्यस्य।" "जगतां सर्व्वेषां प्रसविता सर्व्वेषु कर्म्मसु प्रवर्त्तयिता॥" इति तद्भाष्ये सायनः॥)

प्रसवित्री, स्त्री, (प्रसूते इति। प्र+सू+तृच्+ङीप्।) जनयित्री। (यथा, महाभारते। १२। २६३। ८।

"नाविन्नो प्रसविन्नी च बहिर्गच्छ मनसी ततः॥")
माता। प्रपूर्वकस्यधातोः कर्त्तरि क्त्यु ईम् च॥
प्रसवं, त्रि, (प्रगतं सत्यादिति।) प्रतिज्ञानम्। इत्यमरः। ३। १। ८४॥ (प्रकृष्टियम्। यथा, रामायणे। २। ७३। २०।
"प्रसवश्चापि तस्यैतत् त्रिलोकविदितं वृषम्॥"
प्र+सू+कर्म्मणि यत्। प्रसवनीये च॥)
प्रसहः, पुं, (प्रसहतीति। प्र+सह्+अच्।) व्याघ्रकारेय भक्षकपक्षी। स च क्रूर-स्वभावादिः। यथा,—
"प्रसह्य भक्षयन्त्येते प्रसहास्तेन कीर्त्तिताः॥"
अस्य मांसगुणाः।
"गुरुष्णमधुराः स्निग्धा वातघ्नाः शुक्रवर्द्धनाः।"
इति राजवल्लभः।
अपि च भावप्रकाशे।
"काको गृध्र उलूकश्च शिक्षश्च श्येनवातकः।
चाषो भासश्च क्रूर इत्याद्याः प्रसहाः स्मृताः॥
श्येनवातकः बाज इति लोके।
प्रसहाः कीर्त्तिता एते प्रसह्य हिंस्य भक्षणात्।
प्रसहाः खलु वीर्य्योष्णास्तान्मांसं भक्षयन्ति ये॥
ते घोरभस्मकोन्माद्दैः शुक्रधीया भवन्ति हि॥"
प्रसहनः, पुं, (प्रगतं सहनं बलगुणो यस्मात्।) हिंस्रजन्तुः। यथा,—
"शार्दूलसिंहशरभर्क्षतरक्षुमुख्यो
येऽन्यान् प्रसह्य विनिहत्य निवर्त्तयन्ते।
ते कीर्त्तिताः प्रसहनाः प्रबलं तदीय-
मर्म्मप्रभेदनटरामयनाशहारि॥"
इति राजनिर्घण्टः॥
चालिङ्गने, क्ली। यथा,—
"परस्परप्रसहनचुम्बनादिका-
स्तथा सखे बहुलविधा भिदा मताः॥"
इति काव्यप्रकाशटीकायां तत्काव्यकौमुद्यां॥
(प्र+सह+भावे ल्युट्।) सहने, क्ली। सहति, त्रि॥
प्रसहा, स्त्री, (प्र+सह्+अच्। टाप्।) दृष्टतिका। इति रत्नमाला॥ (गुणादयोऽस्या दृष्टतीशब्दे ज्ञातव्याः॥)
प्रसह्य, अ, (प्रकर्षेण सोढ़ा इति। प्र+सह्+क्त्वा। ल्यप्।) हठार्थकम्। बलात्कारार्थम्। इत्यमरः। ३। ४। १०॥ (यथा, माघे। १।२७।
"प्रसह्य वेगोभिरुदूहतान्नतै-
रदस्यया शुभ्रमुचं तनः॥"
प्रसोढुं शक्य इति। प्र+सह्+यत्। प्रकर्षेण सोढुं शक्यो, त्रि। यथा, रघुः। १८। ६२।
"मन्त्रैर्न शस्त्रान्तरघातकानां
विषाग्निविस्फूर्जथुरप्रसह्याः॥")
प्रसह्यचौरः, पुं, (प्रसह्य बलात्कारेण चौरः।) हठात् चौर्य्यकारी। डाकात इति टुटेरा इति च भाषा। तत्पर्य्यायः। बन्दीग्राहः २ माथवः ३ विलोपः ४। इति त्रिकाण्डशेषः॥
प्रसाति, स्त्री, (सो गतौ—भावे क्तिन्। प्रगता सातिर्गतिर्यस्याः। बहु।) बहुगतिः।

सूत्रमाल्यम्। इति रत्नमाला॥ (यथा, मार्कण्डेये। ३२। ६।
"श्यामाकराजश्यामाकौ तथैव प्रसातिनाः।
नीवाराः पौष्कलाश्चैव धान्यानां पिञ्जलप्रदे॥")
प्रसादः, पुं, (प्र+सद्+घञ्।) प्रसन्नता। नैर्म्मल्यम्। इत्यमरः। १। ३। १९॥ (यथा, प्रबोधचन्द्रोदये प्रस्तावनायाम्।
"कल्याणवातसंचीभवल्लिताशेषभूभृतः।
स्थैर्य्यप्रसादमर्य्यादास्था एव हि महोदधेः॥")
अनुग्रहः। (यथा, रघुः। २। ६८।
"तस्याः प्रसन्नेन्द्रमुखः प्रसादं
गुरुर्नृपायां गुरवे निवेद्य।
प्रहर्षचिह्नानुमितं प्रियायै
प्रश्रंच वाचा पुनरुक्तयेव॥")
काव्यगुणः। खास्थ्यम्। प्रसक्तिः। इति मेदिनी। दे, ३५॥ वैदर्भीरीतियुक्तकाव्यगुणः। तस्य लक्षणम्। यान्यशब्दभिन्नयत्काव्यपदवत्त्वम्। यथा,—
"ओजःप्रसादमाधुर्य्यगुणचित्तयमेदतः।
गौड़वैदर्भपाञ्चाला रीतयः परिकीर्त्तिताः।
यत्तार्थपदमग्राम्यं प्रसादः परिकीर्त्तितः॥"
इति काव्यचन्द्रिका॥ ९॥
(तथा च साहित्यदर्पणे ८ परिच्छेदे।
"चित्तं व्याप्नोति यः क्षिप्रं शुष्केन्धनमिवानलः।
स प्रसादः समस्तेषु रसेषु रचनासु च॥")
दैवनिवेदितद्रव्यं गुरुभ्यो दत्तावशेषञ्च। यथा,
"यावीदंग्रथनो राजा प्रजापालनतत्परः।
प्रसादं सत्यदेवस्य तदा दुःखमवाप सः॥"
इति स्कान्दे रेवाखण्डे सत्यनारायणव्रतकथा॥
प्रसादनं, क्ली, (प्रसादयतीति। प्र+सद्+णिच्+ल्युट्।) अभ्रम्। इति त्रिकाण्डशेषः॥ (प्र+सद्+णिच्+ल्युट्।) प्रसन्नताकारकम्। यथा, बलवर्यप्रसादनमिति राघवभरतः॥ (यथा च महाभारते। ४। ६६। २२।
"प्रसादनं पाण्डवस्य प्राप्तकालं हि रोचये॥")
प्रसादना, स्त्री, (प्र+सद्+णिच्+युच्+टाप्।) सेवा। परिचर्य्या। इति हेमचन्द्रः। ३। १६०॥
प्रसाधनं, क्ली, (प्रसाधयतेऽनेनेति। प्र+साध्+ल्युट्।) वेषः। इत्यमरः। २। ६। ९९॥ (यथा, मनुः। २। २११।
"गात्राभ्यङ्गं स्नापनञ्च गात्रोत्सादनमेव च।
शुभयात्रा न कार्य्याणि केशानाञ्च प्रसाधनम्॥")
प्रसाधनिका। इति भरतधृतामरमाला॥ प्रसाधयित्रि, त्रि। (प्र+साध्+णिच्+ल्युः। प्रसाधयितरि, त्रि। यथा, ऋग्वेदे। १०।५७।२।
"यो यज्ञस्य प्रसाधनस्तन्तुर्देवेष्वाततः॥")
प्रसाधनी, स्त्री, (प्रसाध्यतेऽनयेति। प्र+साध्+ल्युट्। ङीप्।) विधिः। इति मेदिनी। ने, २५१॥ प्रसाधिका। इत्यमरः। २। ६। १३९॥ (यथा, रघुवंशे त्रिविक्रमविजये। २१।
"दिग्प्रसाधनधौरेया रथौघानुगमादृता॥")
तद्व्युत्पत्तिर्यथा,—

"प्रसाधनी दिङ्गजगामग्न-
सङ्ग्रामिरक्ताङ्गुलिभिः क्रमेण।
चतुर्विधानां पृथिवीपतीनां
सम्पत्तिसौभाग्यमयश्चकर्ष॥
काष्ठया धातुया चैव मृत्तया च यथाक्रमम्।
पाञ्चालानूपवासान्यदेशजानां महीभुजाम्॥
एतद्दृष्टवदुन्नेयः काष्ठजाया विनिश्चयः।
कनकं रजतं ताम्रं पित्तलं सीसकं तथा॥
लौहं सर्व्वञ्च सर्व्वार्हमादित्यादिदशासुधाम्।
राज्ञामेवोपयुज्येत कालकीर्त्तिप्रसाधनी॥
नगानां महियायाञ्च सिंहजाता प्रसाधनी।
गजदन्तसमुद्भूता राज्ञामेवोपयुज्यते॥
यत्रापि रत्नविन्यासो ज्ञेयश्चामरदण्डवत्॥"
इति युक्तिकल्पतरुः॥
प्रसाधिका, स्त्री, (प्रसाधयति निष्पादयतीति। प्र+साध्+ण्वुल्। टापि अत इत्वम्।) नीवारः। यथा,—
"प्रसाधिका तु नीवारस्तृणान्नमिति च स्मृतम्॥"
अस्या गुणाः।
"नीवारः शीतलो वाते पित्तघ्नः कफघातकृत्॥"
इति भावप्रकाशः॥
(प्रसाधयति अलङ्करोतीति। प्र+साध्+णिच्+ण्वुल्।) वेषकारिणी। यथा,—
"प्रसाधिकालम्बितमग्रपाद-
माधिप्य काचित् द्रुतरागमेव॥"
इति कुमारसम्भवे सप्तमः सर्गः॥
(धान्यविशेषः यथा। "अग्रकीर्त्तिः प्रसाधिका।" इति वैद्यकरत्नमालायाम्॥)
प्रसाधित, त्रि, (प्र+साधि+क्तः। अलङ्कृतः। इत्यमरः। २। ६। १००॥ प्रकृष्टनिष्पन्नः। निष्पादितः। यथा, भारवंशे।
"ततः प्रस्थमितं कर्त्तुं दारा नीयतुर्गुरुं।
क्षीरे प्रसाधितं तैलं यद्गौ दत्तवर्त्तात्॥"
प्रसारः, पुं, (प्र+सृ+घञ्।) प्रसरणम्। इति हेमचन्द्रः। ३। ४६६॥ (यथा, सुश्रुते। १।२५।
प्रसाराकुञ्चनाभ्यां निःशल्यमिति निर्दिशेत्॥")
प्रसारणं, क्ली, (प्र+सृ+णिच्+ल्युट्।) पश्चिमदेशीयतर्कवैशेषिकभेदः। स तु विशदरूपः। यथा, भाषापरिच्छेदे।
"उत्क्षेपणं ततोऽवक्षेपणमाकुञ्चनं तथा।
प्रसारणञ्च गमनं पञ्चान्येतानि कर्म्म च॥"
(परिवर्त्तनम्। यथा, कामन्दकीयनीतिसारे। १६। ३५।
"तिमिञ्जिलिकिन्यानां भूमीनाञ्च प्रसारणम्॥")
प्रसारणी, स्त्री, (प्रसार्य्यते इति। प्र+सृ+णिच्+ल्युट्। ङीप्।) वनजातिभेदः। गन्धभादालिया इति भाषा। अस्य गुणाः। वातपित्तनाशित्वम्। उष्णत्वम्। बलकारित्वम्। इति राजवल्लभः॥ वैद्यानां मतेऽपि वातघ्नी। इति प्रसारणशब्दटीकायां भरतः॥
प्रसारिणी, स्त्री, (प्रसरतीति। प्र+सृ+णिच्+णिनिः। ङीप्।) दन्तावलम्बा। प्रसारणी। गन्धभादा-

लिया इति भाषा ॥ तत्पर्य्यायः । सुप्रजस २ सारिणी ३ प्रजस ४ सूता ५ जातपत्नी ६ जातपुत्रा ७ भद्रपत्नी ८ प्रजानिका ९ प्रसवा १० जातपत्नी ११ जातपत्नी १२ भद्रसवा १३ चक्रपत्नी १४ प्रभवा १५ । अस्या गुणाः । गुरुत्वम् । उष्णत्वम् । स्निग्धत्वम् । वातार्शःक्षयपुंसवित्वसन्तानजित्त्वम् । इति राजनिर्घण्टः ॥

प्रसारी, [न्] त्रि, (प्रसरतीति । प्र+सृ+णिनिः ।) प्रसरणशीलः । तत्पर्य्यायः । विस्तरः २ विस्तरः ३ विसारी ४ । इत्यमरः । ३ । १ । ३१ ॥ (यथा, शिशुपालवधे । १० । ४४ ।

"प्रसारिणी सपदि नभस्यते सतः
समीरणभ्रमितपरागरञ्जिता ॥")

प्रसितं, क्ली, (प्र+सो+क्तः ।) पूयम् । इति शब्दचन्द्रिका ॥ आसक्ते, त्रि । इत्यमरः । ३ । १ । १६ ॥ (यथा, रघौ । ८ । २३ ।

"इति प्रसुप्तेन्द्रियेषु च
प्रतिविधिप्रसरेषु जाग्रती ।
प्रमितायुदयापरवर्गयो-
रुभयीं सिद्धिसुभावबाधतुः ॥")

प्रसितिः, स्त्री, (प्रसिनोति बध्नात्यनयेति । प्र+सि+करणे क्तिन् ।) बन्धनसाधनरज्ज्वादिनिगडादिः । इत्यमरः । ३ । २ । १४ ॥ (व्याप्तौ । यथा, ऋग्वेदे । २ । २५ । ३ ।

"अर्वेरिव प्रसितिर्नाहं वर्णवे ।"

"प्रसीयते बध्यतेऽनयेति । प्रसितिर्व्याप्तौ ।" इति तट्टीकायां भरतः ॥ * ॥ भावे क्तिन् । प्रबन्धनम् । यथा, ऋग्वेदे । ६ । ६ । ५ ।

"सूरस्येव प्रसितिः पातिरस्मैः ॥")

प्रसिद्धः, त्रि, (प्रसिध्यतीति । प्र+सिध्+गत्यर्थेति क्तः ।) भूषितः । ख्यातः । इति मेदिनी । धे, ३८ ॥ (यथा, पद्मपुराणम् । ४ । ५७ ।

"कामादिदोषरहिताः कामादित्यागहेतवः ।
प्रसिद्धा मोक्षशास्त्रेषु तानन्विष्य सुखी भव ॥")

प्रसिद्धिः, स्त्री, (प्र+सिध्+क्तिन् ।) टङ्कारः । ख्यातिः । इति विकाण्डशेषः ॥ (यथा, कामन्दकीयनीतिसारे । २ । ६ ।

"विद्याधनन्तु सर्वेषा इति नौ गुरुदर्शनम् ।
यथन् एथन् प्रसिद्ध्यर्थं यातु लोको यथास्थितः ॥")

भूषणे । इति प्रसिद्धशब्दार्थदर्शनात् ॥

प्रसूः, स्त्री, (प्रसवते इति । प्र+सू+"सूसूधाञ्गृधिभ्य क्यप् ।" उ । २ । ९१ । इति क्विप् ।) माता । इत्यमरः । २ । ६ । २८ ॥ (यथा, ब्रह्मवैवर्ते । २ । १ । १२८ ।

"शिशूनां मातरो नत्वा मेनका सात्मिकाप्रसूः ॥")

योनिः । इत्यमरः । ३ । ३ । २२८ ॥ कन्यायाम् । गौरवम् । इति मेदिनी । से, ९ ॥ (प्रजनकर्त्री । यथा, सुश्रुते उत्तरतन्त्रे ६८ अध्याये ।

"प्रसूतिनी सन्धुक्षे तु क्षीणिता दुःप्रसूर्यतः ॥")

प्रसूता, स्त्री, (प्रसूतेऽर्थे प्रसू+स्वार्थे कन् ।) माता । इति त्रिकाण्डशेषः ॥

प्रसूनं, क्ली, (प्रसूयते इति । प्र+सू+क्तः ।) कुसुमम् । इति मेदिनी । ने, १२४ ॥

प्रसूतः, त्रि, (प्र+सू+क्तः ।) सञ्जातः । (यथा, रघुः । १ । १२ ।

"तदन्वये शुद्धिमति प्रसूतः शुद्धिमत्तरः ।
दिलीप इति राजेन्दुरिन्दुः क्षीरनिधाविव ॥")

स्तुतः । इति मेदिनी । ते, १२४ ॥

प्रसूता, स्त्री, (प्रसूते स्म इति । प्र+सू+कर्त्तरि क्तः ।) जातसन्ताना । तत्पर्य्यायः । जातापत्या २ प्रजाता ३ प्रसूतिका ४ । इत्यमरः । २ । ६ । १६ ॥ (यथा, सुश्रुते चिकित्सितस्थाने । ३१ ।

"अकाले च प्रसूता स्त्री सेवेतापानं विवर्जयेत् ॥"

यथा च हरिवंशे । ८४ । १०१ ।

"श्रूयन्ते हि स्त्रियो वध्रो यभिचारनिमित्तजैः ।
प्रसूता देवसङ्काशान् पुत्रानमितविक्रमान् ॥")

प्रसूतिः, स्त्री, (प्रसूयते इति । प्र+सू+क्तिन् ।) प्रसवः । इत्यमरः । ३ । २ । १० ॥ (यथा,—

"क्षौमा वधा चापि जलेन पिष्टा
सैरण्डतैला खलु नाभिलेपात् ।
सुखं प्रसूतिं कुरुतेऽङ्गनानां
निषेवितानां बहुभिः प्रमादैः ॥"

इति भावप्रकाशस्य मध्यखण्डे चतुर्थे भागे ॥ प्र+सू+भावे क्तिन् ।) उद्भवः । (यथा, अभिज्ञानशाकुन्तलायाम् ४ अङ्के ।

"आद्ये वः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः
सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम् ॥")

तनयः । दुहिता । इति मेदिनी । ते, १२६ ॥ (सन्ततिः । यथा, रघुः । ५ । ७ ।

"कक्षिण्वतीमाममघा प्रसूतिः ॥"

कारणम् । यथा, रघुः । २ । ६३ ।

"न केवलानां पयसां प्रसूतिं-
मवेहि मां कामदुघां प्रसन्नाम् ॥"

उत्पत्तिस्थानम् । यथा, महाभारते । १ । २३३ । १४ ।

"त्वं सर्वस्य भुवनस्य प्रसूतिः
सनेवार्थे ! भवसि प्रतिष्ठा ॥"

एतत्पत्नी । सा तु सत्यवतीजननी । यथा, ब्रह्मवैवर्ते । २ । १ । १२८ ।

"देवकृतिः कर्दमस्य प्रसूतिर्दक्षकामिनी ॥")

प्रसूतिका, स्त्री, (प्रसूताः स्तोऽस्या अस्तीति । ठन् ।) प्रसूता । इत्यमरः । २ । ६ । १६ ॥

प्रसूतिगृहं, क्ली, (प्रसूतेरुद्भवमारभ्येत्यर्थः आयते इति । आ+यै+डः ।) सूतिकागृहम् । इत्यमरः । २ । ८ । ३१ ॥

प्रसृगं, क्ली, (प्रसृज्यते क्षीयते । प्र+सृ+क्तः । ओदितश्चेति निष्ठानत्वं नः ।) पुष्पम् । (यथा, रघुः । २ । १० ।

"अपाकिरन् दारलताः प्रसूने-
राचारलाजैरिव पौरकन्याः ॥")

पक्षम् । इत्यमरः । ३ । ४ । १७ ॥ आते, त्रि । इति मेदिनी । ने, ८० ॥

प्रसूनेषुः, पुं, (प्रसूनं पुष्पं इषुर्बाणो यस्य ।) कामदेवः । इति त्रिकाण्डशेषः ॥

प्रसृतं, क्ली, (प्र+सृ+क्तः ।) पलद्वयम् । इति शब्दमाला ॥ (यथा, सुश्रुते चिकित्सितस्थाने ३ ।

"क्षणत्रिलप्रसृतं मधुकं वा पालः पालरनुवेलं पीतोदकानुपानम् ॥"

"पलाभ्यां प्रसृतिर्ज्ञेया प्रसृतस्य निगद्यते ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥)

प्रसृतः, पुं, (प्र+सृ+क्तः ।) नियुक्तमात्रिः । अञ्जलिः । इत्यमरः । २ । ६ । ८५ ॥ (यथा, भावप्रकाशे । ४ । ५ । १० । ७ ।

"यद्यनुलोमेरन् प्रसृतमात्रं वाञ्जलिमात्रं वा ॥")

प्रसृतः, त्रि, (प्र+सृ+क्तः ।) प्रहृतः । प्रसारितः । इत्यमरः । ३ । १ । ८८ ॥ (यथा, देवीभागवते । २ । १४ । ५ ।

"न शशाक नियन्तुञ्च स यानः प्रसृतं मनः ॥")

विनीतः । वेगितः । इति मेदिनी । ते, १२३ ॥ गतः । इति त्रिकाण्डशेषः ॥ नियुक्तः । इति हलायुधः । २ । ३६० ॥

प्रसृता, स्त्री, (प्र+सृ+क्तः । टाप् ।) जङ्घा । इति मेदिनी । ते, १२३ ॥ (विवरणमस्या जङ्घाशब्दे ज्ञातव्यम् ॥)

प्रसृतिः, स्त्री, (प्र+सृ+क्तिन् ।) प्रसृतः । व्याकुञ्चितपाणिः । इति रायमुकुटः राजनिर्घण्टश्च ॥ (यथा, याज्ञवल्क्ये । २ । ११२ ।

"देवानुद्यान् समभ्यर्च्य ततस्तानोदकमाहरेत् ।
संन्याय पाययेत्तस्माच्चलात् प्रसृतित्रयम् ॥")

सन्ततिः । यथा, महाभारते । ५ । १०१ । ३ ।

"वर्द्धितानि प्रसृत्या वै विनताकुलकर्तृभिः ॥"

प्रसृत्या इति वा पाठः ॥ पलद्वयम् । तद्यथा,

"पलाभ्यां प्रसृतिर्ज्ञेया ——— ॥"

इति पूर्व्वखण्डे प्रथमेऽध्याये धन्वन्तरेरुक्तम् ॥)

प्रसेकः, पुं, (प्रसेचनमिति । प्र+सिच्+घञ् ।) सेचनम् । क्षुतिः । इति मेदिनी । के, १११ ॥ (यथा, ऋतुसंहारे । ३ । ६ ।

"मत्तद्विरेफपरिपीतमधुप्रसेक-
स्निग्धं विदारयति कस्य न कोविदारः ॥"

रोगविशेषः । यथा, सुश्रुते । १ । ४६ ।

"श्वासकासप्रतिश्यायप्रसेकारोचकज्वरान् ।
हन्ति मूलकयूषस्तु कफमेदोगलामयान् ॥")

प्रसेदिका, स्त्री, क्षुद्रारामः । इति हेमचन्द्रः । ४ । १०८ ॥ (प्रसीदिका इति क्वचित्पाठः ॥)

प्रसेदिवान्, [स्] त्रि, प्रसन्नः । प्रपूर्ब्बसद्धातोः कर्त्तरि जसुप्रत्ययनिष्पन्नः ॥

प्रसेवः, पुं, (प्रसीव्यते क्षरति । प्र+षिव+"अकर्त्तरि चेति ।" ३ । ३ । १९ । इति घञ् ।) योगाङ्गम् । सूतः । इति मेदिनी । वे, ४९ ॥

प्रसेवकः, पुं, (प्र+सिव+ण्वुल् । यद्वा, प्रसेव एव । स्वार्थे कन् ।) योगाङ्गप्रस्वेदकम् । एतत्पर्य्यायः । शब्दशास्त्रीयधार्थे दारुमयं भाण्डं यत्संस्कृत्य व्याप्तान् दीयते सः । इत्यत्रे । योगाङ्गितालाबूफलम् । इत्यमरः । इति भरतः ॥

तत्पर्य्यायः। कङ्कभः २। इत्यमरः। १। ७। ७॥ सुचरचितभाण्डम्। धोकड़ा इति ख्यातः। तत्पर्य्यायः। स्यूनः २ स्योनः ३ धौतकटः ४ स्योतः ५ स्यूतः ६। इति भरतः॥ (यथा, सुश्रुते। १। ६।
"इतिवक्तिप्रसेवकप्रभृतिषूदकपङ्कपूर्णेषु भेद्ययोग्यासु॥") प्रक्षप्ततन्तुसन्तानकर्त्ता च॥

प्रस्कण्वः, पुं, (प्रगतं कण्वं पापं यस्मादिति। "प्रस्कण्वहरिश्चन्द्रावृषी।" ६। १। १५३। इति सुट्।) ऋषिविशेषः। स च वैदिकसन्ध्यान्तर्गतसूर्य्योपस्थानमन्त्रस्य ऋषिः। (यथा, ऋग्वेदे। १। ४४। ६।
"प्रस्कण्वस्य प्रतिरन्नायुर्जीवसे नमस्या दैव्यं जनम्॥")

प्रस्कन्दनं, क्ली, (प्र+स्कन्द+ल्युट्।) विरेकः। इति रत्नमाला॥ (यथा, महाभारते। १। ८४। २६।
"अग्निप्रस्कन्दनपरस्त्वाप्येवं भविष्यसि॥")

प्रस्कन्नः, त्रि, (प्रकर्षेण स्कन्नः।) पतिते, त्रि। इति हेमचन्द्रः॥

प्रस्तरः, पुं, प्रस्तृणाति आच्छादयति यः। (प्र+स्तृ+घञ्वच्।) शिला। मातर इति भाषा। तत्पर्य्यायः। अश्मा २ पाषाणः ३ उपलः ४ अश्मा ५ दृषत् ६ दृषत् ७ पाषाणकः ८ पारटोटः ९ शम्बरः १० काचकः ११ शिला १२॥ पल्लवादिरचितशय्या। यथा,—
"पल्लवाद्यैर्विरचिते शयनीये तु संस्तरः।
प्रस्तरः प्रस्तिरश्चेति प्रस्तारोऽपि च क्वचित्॥"
इति शब्दरत्नावली॥
(यथा, मनुः। २। २०४।
"गोभ्योऽयानप्रासादप्रस्तरेषु कटेषु च।
आसीत गुरुणा सार्द्धं शिलाफलकनौषु च॥")
मणिः। इति मेदिनी। रे, १८१॥

प्रस्तरिणी, स्त्री, (प्रस्तरस्तदाकारोऽस्यस्या इति। प्रस्तर+इनिः। ङीप्।) गोलोमिका। इति राजनिर्घण्टः॥ (विषयोऽस्या गोलोमिकाशब्दे ज्ञेयः॥)

प्रस्तारः, पुं, (प्र+स्तृ+घञ्।) लवणम्। तत्पर्य्यायः। लवणाटवी २ क्षयः ३। इति हेमचन्द्रः। ४। १७७॥ पल्लवादिविरचितशय्यनीयम्। इति शब्दरत्नावली॥ शय्या। इति हारावली॥ छन्दःप्रभृतीनां प्रभेदज्ञापकक्रमेतविशेषः। यथा,—
"आदौ सर्व्वगुरावाद्यात् लघु न्यस्य गुरोरधः।
यथोपरि तथा शेषं भूयः कुर्य्यादसुं विधिम्॥
लघ्वं एवादृगुरुनैव यावत् सर्व्वलघुर्भवेत्।
प्रस्तारोऽयं समाख्यातश्छन्दोविचितिवेदिभिः॥"
इति वृत्तरत्नावली॥ ७॥
अपि च। आदिमत्यागे। पढम गुरु देइ टालै तइया पढिवउ सव्वलहुओ ए। बीआ आदिम पत्तो उत्तरिआ गुरुसहु देहु। अस्य टीका। एतद्वैरूप्यानं प्रस्तारज्ञानाधीनमिति प्रस्तार दर्शयति। प्रथमं गुरोरधःस्थाने लघुकं स्थापय आत्मबुद्ध्या बहुधी बहुधी पंक्तिरुद्दृत्तौ गुरुलघू देहि बहुधी पंक्तिर्दक्षिणे कार्य्या वामे गुरुलघुभिः पूरणं कार्य्यं इदमु मात्राप्रस्तारविषयं तत्रापि गुरोर्लिखनयोग्यत्वे गुरुर्लेख्यः अपरच लघुर्देय्यः। वर्णप्रस्तारे तु गुरुरेव पूरणं कार्य्यं तत्रायं प्रकारः आदौ गुरुर्लेख्यः तत्र प्रथमं गुरोरधःस्थाने लघुर्लेख्यः तदक्षिणे चोपरिस्थितपंक्तेः बहुधी कार्य्या वामे च गुरुलघुभिः पूरणं कार्य्यं वामे चैक एकलघुः यतति वर्णप्रस्तारे तु वामे लघुसर्गो नास्ति यथा चिकलप्रस्तारे। ६६। प्रथमगुरोरधो लघुर्वामतश्च कलार्द्धपूरणं गुरुरेव कार्य्यं दक्षिणे च पंक्त्यभावः ततो गुरोरधो लघुर्लेख्यः दक्षिणे च लघोरधो लघुर्लेख्यः वामे च कलापूरणं एकेन लघुना कार्य्यं एवं चतुष्कला-६६दावपि बोध्यं यथा अचरच्छन्दसि ६६एवमन्यत्रापि बोध्यम्॥ अथ सकलप्रस्तारसंख्या। दव्वीसा सत्तसयातइं सत्तावन्न सहस्साइं वाग्यालिसइ लक्खं तेरहकोड़ी समग्गाइं। अस्य टीका। अत्र चैकाक्षरमारभ्य षड्विंशत्यवधिवर्णवृत्तानां प्रस्तारे कियती संख्येत्यत आह। १३४,२१७,७२६ षड्विंशतिः सप्त. तानि तथा सप्तदशसहस्राणि द्विचत्वारिंशल्लक्षाण्येकोनत्रिंशत्कोट्यः समग्राणि अक्षस्य वामा गतिरित्यङ्काः स्याप्याः। इति पिङ्गलः शीघ्रबोधभूषणञ्च॥

प्रस्तार्य्यर्म्म, [न्] क्ली, नेत्ररोगभेदः। तस्य लक्षणम्।
"प्रस्तार्य्यर्म्म तनुस्फोटं श्यावं रक्तनिभं सिते॥"
इति माधवकरः॥
अपि च।
"समन्ताद्विसृतः श्यावो रक्तो वा मांससंचयः।
सन्निपातेन दोषाणां प्रस्तार्य्यर्म्म तदुच्यते॥"
इति रचितभूतनिमिः॥
तस्यौषधम्।
"कनकस्य फलं शुष्कं चूर्णयं सैन्धवान्वितम्।
फेनो रसाञ्जनं चौद्रं विड्ङ्गानि मनःशिला॥
कुक्कटाण्डकपालानि वर्त्तिरेषा यथोदिता।
तिमिरं पटलं काचमर्म्मस्थं तत्क्षणेव च॥
कण्डूक्लेदावुदं हन्ति मलमांसं सुरावती॥"
इति चक्रपाणिदत्तः॥

प्रस्तावः, पुं, (प्र+स्तु+"ग्रे इस्तुस्वः।" ३। ३। २७। इति घञ्।) अवसरः। इत्यमरः। ३। २। २६॥ प्रस्तुतिः। इति भरतः॥ प्रसङ्गः। इति भानुदीक्षितः॥ (यथा, रत्नकर्त्तिके। ६ अङ्के। "प्रस्तावेनाधिकरणिकत्वां ब्रह्मभिक्षतीति॥") प्रकरणम्। यथा,—
"प्रस्तावेऽस्मात्कालादेवंविधान् प्रतिभानुबांश्च।"
इत्यन्वर्थे काव्यप्रकाशः॥

प्रस्तावना, स्त्री, (प्रस्तावयति विज्ञापयति कार्य्यादिकमिति। प्र+स्तु+णिच्+युच्। टाप्।) आरम्भः। इति हेमचन्द्रः॥ रत्नधारेण सह नटीविदूषकादीनां परस्परविचित्रभाषणम् तस्या लक्षणम्। यथा,—
"नटी विदूषको वापि पारिपार्श्विक एव वा।
रत्नधारेण सहिताः संलापं यत्र कुर्व्वते॥
चित्रैर्वाक्यैः स्वकार्य्योत्थैः प्रस्तुताक्षेपिभिर्मिथः।
आमुखं तत्तु विज्ञेयं नाम्ना प्रस्तावनापि सा॥"
इति साहित्यदर्पणम्॥

प्रस्तिरः पुं, (प्रस्तरः। निपातनात् इत्वम्।) पल्लवादिरचितशय्या। इति शब्दरत्नावली॥

प्रस्तीतः, त्रि, (प्र+स्त्यै+क्तः। "श्रस्त्योश्च-
प्रस्तीमः, तस्याम्।" ८। २। ५४। इति निष्ठातस्य मो वा।) संहतः। घनितः। प्रपूर्ब्बस्त्यैधातोः कर्म्मणि क्तप्रत्ययः। इति सुग्धबोधव्याकरणम्॥

प्रसृतः, त्रि. (प्रसूयते स्मेति। प्र+सु+क्तः।) प्रकरणप्राप्तः। यथा,—
"अप्रस्तुतप्रशंसा सा या सैव प्रस्तुताश्रया॥"
इति काव्यप्रकाशः॥
प्राकरणिकः। प्रासङ्गिकः। इत्यलङ्कारकौस्तुभः॥ निष्पन्नः। यथा। प्रस्तुतस्तेमयट्। अन्नं प्रस्तुतं चन्नमयम्। यवागूः प्रस्तुता यवागूमयी। इति कलापतद्धितः॥ प्रकर्षेणस्तुतियुक्तः। प्रपूर्ब्बस्तुधातोः कर्म्मणि क्तः। उपस्थितः। प्रतिपन्नः। उदीरितः। इति लोकव्यवहारदर्शनात्॥

प्रस्तृतः, त्रि, (प्र+स्तृ+क्तः।) व्याकरितः। इति त्रिकाण्डशेषः॥

प्रस्थः, पुं, (प्रकर्षेण तिष्ठतीति। प्र+स्था+"आतश्चोपसर्गे।" ३। १। १३६। इति कः। यद्वा, प्रतिष्ठतेऽस्मिन्नेनेति घञर्थे कः।) परिमाणविशेषः। स तु चतुःकुडवरूपः। इत्यमरभरतौ॥ आढकचतुर्थांशः। इति शब्दमालावली॥ द्विशरावपरिमाणम्। इति वैद्यकपरिभाषा॥ (यथा, सुश्रुते शारीरस्थाने। ८। अध्याये।
"बलिनो बहुदोषस्य वयःस्थस्य शरीरिणः।
परं प्रमाणमिच्छन्ति प्रस्थं शोणितमोक्षणे॥")

प्रस्थः, पुं. क्ली, (प्र+स्था+कः।) अद्रेः समभूभागः। अद्रेरेकदेशः। इति भरतः॥ तत्पर्य्यायः। क्षुः २ क्षाणुः ३। इत्यमरः। २। ३। ५॥ (यथा, कुमारे। १। ५४।
"प्रस्थं हिमाद्रेर्मृगराजभिन्नं
किञ्चिन् नगानुत्किरमण्डुलोमम्॥")
उन्नतवस्तु। इति मेदिनी॥ विस्तारः। यथा,
"दीर्घे प्रस्थे समानद्ये न कुर्य्यान्मन्दिरं बुधः।"
इति ब्रह्मवैवर्त्ते जन्मखण्डे १०२ अध्यायः॥ प्रशस्थस्थितिविशिष्टे, त्रि॥

प्रस्थपुष्पः, पुं, (प्रस्थमिते पुष्पमस्य।) मरुवकः इत्यमरः। २। ४। ७८॥ (तत्पर्य्यायो यथा,—
भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे।
"मारुतोऽसौ मरुवको मरुमारुररिष्ट सुतः।
कृष्णो दलिष्ठभक्तश्चापि प्रस्थपुष्पः समीरणः॥")

सम्बन्धवस्तुनोर्यो । अर्थोभेदः । इति मेदिनि । ३ अवसरमात्रम् । इति मेदिनि । इति तट्टीकायां भरतः ।

प्रस्थानं, क्ली, (प्र + स्था + ल्युट् ।) विधिनोर्ध्वः प्रयाणम् । इत्यमरः । २ । ८ । ८५ । (यथा, रघौ भारवेः । ५ । ६ । १९ ।

"अनतिक्रियां यमानां अनर्थक्या यथार्थतः ।
योगात् २ अधिष्ठानं कृत्वा यान् सदानित्तः ।")

प्रस्थानकम् । यथा, महाभारते ।

"प्रस्थानकी तु विधिवत्कालसिद्धिर्तं प्रतिक्रियाम् ।"

प्रस्थानविधः, पुं, (प्रस्थानस्य विधिः ।) प्रयाणप्रकारः । यथा । यः पुनर्विवाहावसरे मङ्गलार्थं यात्रे प्रतिक्षमाणस्य तत्प्रस्थानोपकरणं कर्मे प्रारब्धोत्सव सदानीं न करिष्यामीति प्रस्थानविघ्नमाचरति सदानीं दिनुषां दर्शं दाद्यः । इति विवाहवरः ।

प्रस्थायिन्, त्रि, (प्र + स्था + णिच् + णिनिः ।) प्रेषिणः । इति हेमचन्द्रः । प्रस्थेयच्च व्याप्तिश्च ।

प्रस्थिति, स्त्री, (प्रस्थस्यारोहारोहस्थेत्यर्थः इति । प्रस्थ + इन् ।) अवस्था । इति भावप्रकाशः ।

प्रस्फुटः, त्रि, (प्रस्फुटति विकसतीति । प्र + स्फुट् + कः ।) प्रफुल्लः । इति शब्दरत्नावली । (सुगन्धः । यथा, मार्कण्डेये । २० । २१ ।

"निष्कम्प आसनं तस्माद्दधौ प्रस्फुटाधरम् ।")

प्रस्फोटनं, क्ली, (प्रस्फोटयतेऽनेनेति । प्र + स्फुट् + णिच् + करणे ल्युट् ।) हर्षम् । इत्यमरः । २ । ८ । २१ । (प्र + स्फुट् + भावे ल्युट् ।) आस्फालनम् । विजृम्भणम् । इति मेदिनी । ने, १८० । प्रसवनम् । सुखादिद्योतनम् । इति हेमचन्द्रः । ३ । ८३ ।

प्रसक्तं, क्ली, (प्रसक्तति आसक्तमात्मानमिच्छतीति वा । प्र + सञ्ज + क्यादाने व्यधिकरणे वा क्तः ।) यत्र स्थाने सुखा सक्तं गच्छति तत् । इति भरतः । अविच्छेदेन सक्तार्थं यत्र स्थाने प्रसक्तति यत्र निपत्य च गच्छतीभाति तत् । इति स्वाम्यादयः । निरन्तरं निर्झरादिप्रभवजलसंघातः । इति भरतः । (यथा, हरिवंशे । ८ । ५३ । ११ ।

"दूरं गीत्वेवरं दृष्ट्वा विस्मयं परमं गतः ।
प्रसक्तं तत्रैवेन्द्रः क्षणमात्रं स्थितः ।")

आसक्तं तत्रैवेन्द्रेण तत्रस्थत्वम् । इति कीरतः । गुणवत्त्वम् । उक्तः २ । इत्यमरः । २ । ३ । ५ । अनवरतम् । (यथा, मनुः । ३ । २०३ ।

"दानं दमोऽहिंसा च सर्वेषामेव धर्मिणाम् ।")

प्रसक्ता गुणाः । प्रसक्तजलं स्वच्छं लघु मधुरं शीतलञ्च शीतलम् । इति राजनिर्घण्टः । (प्र + सञ्ज + भावे क्तः ।) प्रकर्षेण सङ्गमः ।

प्रसक्तः, पुं, (प्रसक्तति आसक्तमात्मानमिति । प्र + सञ्ज + क्यादाने क्तः ।) मालतीवृक्षभेदः । इति हेमचन्द्रः । ३ । ८८ । भेदः । इति त्रिकाण्डशेषः ।

प्रसादः, पुं, (प्रसीदति इति । प्र + सद् + "सितिसृतिस्तुदिसदिमदिस्वपियजिराजिभ्यः ।" ३ । ३ । ९७ । इति घञ् ।) सख्यम् । इत्यमरः । ९ । ६ । ६० । सौम्यगुणसमाहारो

यथा, रघौ ।

"प्रसादेन तु यः आयात् रोहिण्यां मानसो दिव ! ।
सर्वभावज्ञतादीप्तान् दृष्ट्वास्य न संशयः ।"
(गुणादयोऽस्य सत्त्वस्थे ज्ञातव्याः ।)

प्रसादः, पुं, उत्तेजशब्दः । प्रसूर्मरणप्रायोपवेशनप्रयत्नेन निष्पन्नः ।

प्रसेदिः, पुं, (प्र + स्विद् धर्मक्षुतौ + घञ् ।) अतिप्रयत्नधर्मः । (यथा, मार्कण्डेये । १२ । १५ ।

"नरव्याघ्रा प्रसेदिजलसिक्तानना यमम् ।")

तस्यौषधं यथा,—

"चन्दनं कुङ्कुमं मांसी कर्पूरो जातिपत्रिका ।
जातीफलीफलयुगानां सत्वस्य पलानि च ।
अगुरुश्चीरकाश्मर्यः कुष्ठं तगरनालिका ।
गोरोचना प्रियङ्गुश्च धौतं मदनकं नखम् ।
नखः नखपर्णश्च लाक्षा चामलकी तथा ।
कर्पूरकः पङ्ककरः एतैस्तैलं प्रसाधितम् ।
प्रसेदमगदौ गन्धकरकुङ्कुमरं परम् ।
पुमान् युवा स्नातः शुक्लाद्यः स्त्रीभाषालक्तवक्षभः ।
स्त्रीप्रियं भक्षते यत्र ! यत्यापि रमते सुतम् ।"
इति गारुडे १८९ अध्यायः ।
(विषयोऽस्य यथा,—

"क्षेमित्यं मधुराक्षता च जड़ता निद्रा च तन्द्रा शर्म
गात्राणां गुरुतारुचिर्विरमता रोमोद्गमः शीतता ।
प्रस्वेदः क्षुतिबाधनञ्च कुरुते नेत्रे च पाण्डुच्छविर्विश्वासस्तरुणीषु च यमनं श्रेष्ठज्वरे वै विदुः ।"
इति हारीते चिकित्सितस्थाने द्वितीयेऽध्याये)

प्रसन्नं, त्रि, (प्रसन्नति स्मेति । प्र + सद् + क्तः ।) विततम् । चुम्बम् । इति शब्दरत्नावली । प्रकर्षेण खिन्नम् । (यथा, महाभारते । ७ । १०१ ।

"प्रहसन्निव मन्दाक्षरं
प्रतिभयदर्शनमुत्तरासनम् ।
तदधिगतमतापनौ बलं
विदधतिराजसु प्रशाधि ।")

प्रकर्षेण गतम् । (विस्तारितम् । यथा, भागवते । १० । ७२ । ३८ ।

"इत्थं सतां ब्रह्मसुखानुभूत्या
दास्यं गतानां परदैवतेन ।
मायाश्रितानां नरदारकेण
साकं विचेष्टे कृतपुण्यपुञ्जैः ।"

वादितम् । यथा, रघुः । १८ । १४ ।

"स सूर्य प्रहसद्भास्करः शशी
शीतमालाबलयो दरन् मनः ।
नर्मशैरभिनयानिलङ्घिनीः
पार्श्वचर्षिषु मुखस्यवर्तयत् ।")

प्रसन्नेमिः, पुं, (प्रसन्नां नेमिरिव । निमाननात् यस्य सः ।) चक्रः । इति त्रिकाण्डशेषः । (प्रसन्नेमिरिति वा पाठः ।)

प्रसरः, पुं, (प्रसरति प्रसार्यतेऽनेनेति । प्र + सृ + घञ् । अप् वा ।) वाक्यस्यारम्भांशे भागः । प्रसर इति हिन्दीभाषा । तत्पर्यायः ।

याम: २ । इत्यमरः । १ । ४ । ४ । (यथा, कथासरित्सागरे । ४ । ३० ।

"सप्तमेऽहनि द्वितीयेऽस्मिन् प्रसरे पर्यवस्थति ।")

प्रसरद्गुडी, स्त्री, (प्रसरस्य कुटुम्बी कुटुम्बिनीवत् ।) कुटुम्बिनीभेदः । इति राजनिर्घण्टः ।

प्रसरणं, क्ली, (प्रसियतेऽनेनेति । प्र + सृ + करणे ल्युट् ।) अस्त्रम् । इत्यमरः । २ । ८ । ९९ । (यथा, महाभारते । १२ । १४१ । २ ।

"धनुः प्रसरणं श्रेष्ठमस्त्रेषात्र विद्धामह ! ।")

कर्मणि घञ् । इति तट्टीकाभारतसुन्दरी । (यथा, भागवते । ४ । २६ । २ ।

"पश्यप्रसरणं सम्यक्स्वं प्रयविक्रमम् ।"

प्रसियतेऽस्मिन्निति ।) युद्धम् । इति हलायुधः । २ । २८९ । (प्र + सृ + भावे घञ् ।) प्रसारः । (यथा, महाभारते । ४ । ४ । ७ ।

"यानं प्रसरणं चैव तथैवास्मिन् भारत ।")

प्रसरी, [न्] त्रि, यामिकः । प्रसरो विद्यते अस्येति प्रसरशब्दादस्यर्थे इनिप्रत्ययेन निष्पन्नः ।

प्रसर्पकः, पुं, (प्रसर्पयतीति । प्र + सृप् + णिच् + ण्वुल् ।) वृश्चिकः । इति त्रिकाण्डशेषः । सर्पविशिष्टे, सर्पकारके च, त्रि । (यथा, महाभारते । १ । २० । ६ ।

"नानाविधिकृतं रम्यं कदनप्रसर्पणम् ।"

प्र + सृप + भावे ल्युट् । आनन्दे, क्ली । यथा, महाभारते । १२ । ३३६ । २५ ।

"अथ व्रतस्थावस्थते वायुवाचाशरीरिणी ।
स्निग्धगम्भीरया वाचा प्रहर्षणकरी विभो ! ।")

प्रहर्षणी, स्त्री, (प्रहर्षयतीति । प्र + हृष् + णिच् + ल्युः । ङीप् ।) हरिद्रा । इति शब्दावली । चयोदशाक्षरपादच्छन्दोभेदः । तस्या लक्षणं यथा । छन्दोमञ्जर्याम् । "त्रयोदशाभिर्मनरगाः प्रहर्षणीयम् ।" तस्या उदाहरणं यथा,—

"गोपीगानधरतुधारनस्य पाने-
रघुल्लसनकलसीपयःप्रदेशे च ।
व्याकर्षैरपि रतिविभ्रमैर्मुरारेः
संसारे मतिरभवत् प्रहर्षणीह ।"

प्रहसनं, क्ली, (प्र + हस् + भावे ल्युट् ।) प्रहासः । (प्रहसत्यनेन वा । प्र + हस् + आधारे करणे वा ल्युट् ।) रूपकभेदः । परिहासः । इति मेदिनी । ने, १८० । आदेयः । इति हेमचन्द्रः । रूपकभेदस्य लक्षणं यथा,—

"भाणवत्सन्धिसन्ध्यङ्गलास्याङ्गैर्विनिर्मितेः ।
भवेत् प्रहसनं हास्यं निन्द्यानां कविकल्पितम् ।
तत्र नारभटीमपि विन्यसेत्प्रवेशकौ ।
अङ्कौ वाप्यरसस्यैव नीचपात्राणां स्थितिं वा ।
तत्रस्थितमहिप्रभृतिभिश्च नायकः ।
हसेत् यत्र भवेद्धास्यं तत्प्रहसनमुत्तमम् ।"
इति साहित्यदर्पणम् ।

प्रहसनी, स्त्री, (प्रहसति प्रकर्षेण चित्तमाकर्षति । प्र + हस् + ल्युट् + ङीप् ।) वधूः । इति त्रिकाण्डशेषः । वाग्मी । इति राजनिर्घण्टः । प्रहसनाकारयानी च ।

प्रहीणः

प्रहस्तः, पुं, (प्रतत: प्रस्तो वा हस्तो यत्र ।) विस्तृताङ्गुलिपाणिः । चपेटः । इत्यमरः । २ । ६ । ८४ ॥ रावणसेनापतिविशेषः । यथा,—

"ततो नीलाम्बुदप्रख्यं प्रहस्तो नाम राक्षसः ।
अब्रवीत् प्राञ्जलिर्वाक्यं शूरः सेनापतिस्तदा ॥"

इति रामायणे लङ्काकाण्डे ८ सर्गः ॥

प्रहारः, पुं, (प्रहरणमिति । प्र + हृ + घञ् ।) आघातः । यथा, मार्कण्डेये ।

"करप्रहारेण शिरस्तामरस्य पृथक् कृतम् ॥"

प्रहारणं, क्ली, (प्र + हृ + णिच् + ल्युट् ।) काष्यदानम् । इति प्रवारणशब्दटीकायां भारतसुन्दरी ॥

प्रहारवल्ली, स्त्री, (प्रहारोपशमा आघातजन्यवेदनादिनाशिका वल्ली लता । शाकपार्थिवादित्वात् मध्यपदलोपः ।) मांसरोहिणी । इति भावप्रकाशः ॥ (पर्य्यायोऽस्या यथा,—

"मांसरोहिण्यतिरुहा वृक्षा चर्म्मकरी शुभा ।
प्रहारवल्ली विकशा वीरवल्ल्यपि कथ्यते ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

प्रहासः, पुं, (प्रकृष्टो हासो यस्य ।) शिवः । इति त्रिकाण्डशेषः ॥ (कार्त्तिकेयस्य चतुचरविशेषः । यथा, महाभारते । ६ । ४५ । ६६ ।

"रणोत्कटः प्रहासश्च श्वेतसिंहश्च नन्दकः ॥"

नागविशेषः । यथा, तत्रैव । १ । ५७ । १५ ।

"पूर्णाङ्गदः पूर्णमुखः प्रहासः शङ्खनिर्दरिः ॥"

प्रकृष्टो हासो यस्मात् ।) नटः । इति धरणिः ॥ (प्रकृष्टो हासः प्रकाशो यस्य ।) सोमतीर्थम् । इति जटाधरः ॥ (प्रकृष्टो हास इति ।) अट्टहासः । इति शब्दरत्नावली ॥ (यथा, कामन्दकीये । ५ । २० ।

"न नर्म्मसचिवैः सार्द्धं किञ्चिदप्यप्रियं वदेत् ।
ते हि मर्म्माण्यभिघ्नन्ति प्रहासेनापि संसदि ॥")

प्रहासी, [न्] पुं, प्रकृष्टं हासयति हसति च यः । (प्र + हस् + णिच् वा + णिनिः ।) हासकारकः । भाँड़ इति भाषा । तत्पर्य्यायः । वासन्तिकः २ केलिकिलः ३ वैहासिकः ४ विदूषकः ५ प्रीतिदः ६ । इति हेमचन्द्रः । २ । २४५ ॥ (हासकारिणि, त्रि । यथा, अथर्ब्ववेदे । ८ । ६ । १४ ।

"आपाकेस्याः प्रहासिनस्तम्बे ये शुल्बते ॥")

प्रहिः, पुं, (प्रकर्षेण ह्रियतेऽनेनेति । प्र + हृ + "प्रहरतेः कूपे ।" उणा० ४ । १३४ । इति इन् । स च डित् ।) कूपः । इत्यमरः । १ । १० । २६ ॥

प्रहितं, क्ली, (प्रधीयते स्मेति । प्र + धा + क्तः ।) कूपः । इति हेमचन्द्रः । ३ । ६१ ॥ (प्र + हि प्रेरणे + क्त ।) क्षिप्ते, त्रि । इति निरुक्तशब्दटीकायां भरतः ॥

प्रहीणः, त्रि, (प्र + ओ हा त्यागे + क्त । "ज्ञाश्रुस्मृदृजनवसजीर्यतिभ्यश्छः ।" ६ । ४ । ६६ । इति यात ईत् । "ओदितश्च ।" ८ । २ । ४५ । इति निष्ठातस्य नः ततो णत्वम् ।) परित्यक्तः । प्रपूर्ब्बहाधातोः कर्म्मणि क्तः । इति तुग्धबोधव्याकरणम् ॥ यथा,—

प्रह्लादः

"प्रहीणपूर्ब्बध्वनिनाधिरूढ-
स्तुलामधारेण शरद्घनेन ॥"

इति रघुकाव्यम् ॥

प्रहुतं, क्ली, (प्रहूयते स्मेति । प्र + हु + क्तः ।) भूतयज्ञः । इति जटाधरः ॥ (यथा, मनुः । ३ । ७३—७४ ।

"अहुतञ्च हुतञ्चैव तथा प्रहुतमेव च ।
ब्राह्म्यं हुतं प्राशितञ्च पञ्च यज्ञान् प्रचक्षते ॥
अपोऽहुतो हुतो होमः प्रहुतो भौतिको बलिः ।
ब्राह्म्यं हुतं द्विजाग्र्यार्च्चा प्राशितं पित्र्यतर्पणम् ॥")

प्रहेलकं, क्ली, (प्रहेलकम् । पृषोदरादित्वात् लस्य णः ।) पिष्टकविशेषः । तत्पर्य्यायः । वाचनम् २ प्रतोषायनम् ३ । इति त्रिकाण्डशेषः ॥ प्रहेलकम् ४ वाचनकम् ५ । इति हारावली । १५२ ॥

प्रहेलकं, क्ली, (प्रहिलति स्वादादिना अभिप्रायं सूचयतीव । प्र + हिल भावसूचने + ण्वुल् । प्रहेलति वेष्टयतीति । प्र + हेल + ण्वुल् वा ।) प्रहेलकम् । इति हारावली । १५२ ॥

प्रहेलिका, स्त्री, (प्रहिलति अभिप्रायं सूचयतीति । प्र + हिल अभिप्रायसूचने + ण्वुल् । टाप् अत इत्वम् ।) दुर्विज्ञानार्थप्रश्नः । कूटार्थभाषिता कथा । हेयालि इति भाषा । तत्पर्य्यायः । प्रवल्हिका २ । इत्यमरः । १ । ६ । ६ ॥ प्रवल्लिका ३ प्रवल्गिः ४ प्रवल्ली ५ प्रहेलिः ६ । इति भरतः ॥ प्रभूतौ ७ प्रवल्लीका ८ । इति शब्दरत्नावली ॥ तस्य लक्षणम् ।

"यत्कीर्त्तनाय कमप्यर्थं स्वरूपार्थस्य गोपनात् ।
यत्र वाक्यान्तरार्थो वा कथ्यते सा प्रहेलिका ॥
सा द्विधार्थी च शाब्दी च विख्याता प्रश्नशासने ।
आर्थी स्यादर्थविज्ञानात् शाब्दी शब्दस्य भङ्गतः ॥"

आर्थी । यथा,—

"तरुण्यालिङ्गितः कण्ठे नितम्बस्थलमाश्रितः ।
शुक्लां वह्निभानेऽपि कः कूजति सुदुर्मुखः ॥"

पानीयकुम्भ इति ॥ शाब्दी यथा,—

"सदारिमध्यापि न वैरियुक्ता
नितान्तरक्ताप्यसितैव नित्यम् ।
यथोक्तवादिन्यपि नैव दूती
का नाम कान्तेति निवेदयन्ति ॥"

सारिका । इति विदग्धमुखमण्डनम् ॥

प्रह्लादः, पुं, (प्रह्लादते इति । प्र + ह्लाद शब्दे + घञ् । यद्वा, प्रह्लादयतीति । प्र + ह्लाद + णिच् + अच् । रलयोरैक्यम् ।) प्रमादः । स च हिरण्यकशिपोः पुत्रः परमवैष्णवः । (यथा, हरिवंशे । ३ । ७१ ।

"हिरण्यकशिपोः पुत्राश्चत्वारः प्रथितौजसः ।
अनुह्लादश्च ह्लादश्च प्रह्लादश्चैव वीर्य्यवान् ॥")

तस्य चरित्रादिकं प्रह्लादशब्दे द्रष्टव्यम् । (जनपदविशेषः । यथा, महाभारते । ६ । ८ । ४६ ।

"मद्राः सुदेष्णाः प्रह्लादा माहिषाः शुष्किकास्तथा ॥")

प्रह्लादः

प्रह्लादः, पुं, (प्र + ह्लाद् + क्तिन् । ह्रस्वः ।) प्रीतिः । ("ह्लादेः स्वः क्तौ च ।") इति मुग्धबोधव्याकरणम् ॥

प्रह्लादः, त्रि, (प्र + ह्लाद् + क्त । "ह्लादो निष्ठायाम् ।" ६ । ४ । ६५ । इति ह्रस्वः ।) प्रीतः । इत्यमरः । ३ । २ । १०३ ॥

प्रह्लादः, पुं, (प्रह्लादयतीति । प्र + ह्लाद् + णिच् + अच् ।) प्रह्लादः । स च पूर्व्वजन्मनि शिवशर्म्मणः पुत्रः सोमशर्म्मनामाभूत् ततो दैत्यभावनया च्युतः अनन्तरं कमलायां हिरण्यकशिपोः सकाशाद्दैत्यभावेन जातः । यथा, सूत उवाच ।

"स लोष्टेन समं मेने काञ्चनं भूषणं पुनः ।
जिताक्षः स धर्म्मात्मा निद्रया परिवर्जितः ॥
विषयान् स परित्यज्य एकान्तमपि सेवते ।
योगासनसमारूढो निराशो निष्परिग्रहः ॥
तस्य वेलां सुसंप्राप्य च्युतकालः समागतः ।
आगतान् दानवान् विप्रः सोमशर्म्मा बलीयसः ॥

च्युतकाले तु संप्राप्ते प्राणयात्राप्रवर्त्तके ।
शालग्रामे महाक्षेत्रे ऋषीणामेव सन्निधौ ॥
केचिद्वदन्ति वै दैत्याः केचिद्वदन्ति दानवाः ।
एवंविधो महाशब्दः कर्णरन्ध्रगतस्तदा ॥
तस्यैव विप्रवर्य्यस्य सुविप्राः सोमशर्म्मणः ।
ध्यानध्यानात् प्रचलतः प्रविष्टं दैत्यजं भयम् ॥
तेन ध्यानेन तस्यापि दैत्यभूतेन वै सदा ।
सत्वरं तस्य वै प्राणा गतास्तस्य महात्मनः ॥
दैत्यभावेन संयुक्तः स हि च्युतवशं गतः ।
तस्माद्दैत्यगृहे जातो हिरण्यकशिपोस्तदा ॥
देवासुरे महायुद्धे निहतचक्रपाणिना ।
युध्यमानेन तेनापि प्रह्लादेन महात्मना ॥
शुश्रूषं वासुदेवं तद्विश्वरूपं विचिन्तितम् ।
योगाभ्यासेन पूर्व्वेण ज्ञानमासीन्महात्मनः ॥
सस्मार पौर्व्विकं सर्व्वं चरितं शिवशर्म्मणः ।
सोऽयं सोमशर्म्मा वै प्रविष्टो दानवीं तनुम् ॥
कस्य कार्यं कदा पुण्यं केवलं ध्यानसंभवम् ।
प्रणामि च महापुण्येनानाख्येमोक्षदायिनि ॥
स्मरे प्रीयमाणेन प्रह्लादेन महात्मना ।
एवं चिन्ता कृता पूर्व्वं श्रूयतां द्विजसत्तम ! ॥
एतत्ते सर्व्वमाख्यातं सर्व्वसंदेहनाशनम् ॥"

सूत उवाच ।

"प्रह्लादे तु हते संख्ये देवदेवेन चक्रिणा ।
संह्लादे च महावीर्य्ये तस्मिंश्च कालनेमिनि ॥
प्रह्लादस्य तु या माता हिरण्यकशिपोः प्रिया ।
प्रह्लादस्यं महाशोकैर्दिवा रात्रौ प्रशोचति ॥
पतिव्रता महाभागा कमला नाम दुःखिता ।
सिद्धमार्गा दिवा रात्रौ नारदस्यानुवाच ह ॥
मा शुचस्त्वं महाभागे प्रचार्यं पुण्यभागिनि ! ।
निहतो वासुदेवेन तव पुत्रः समेष्यति ॥
तद्भूपलक्षणोपेतस्तवोदरे महामतिः ।
प्रह्लादेति च वै नाम पुनरस्य भविष्यति ॥
विधीन् चासुरभावैर्वैष्णवेन समन्वितः

इन्द्रत्वं भोक्ष्यते भद्रे ! सर्व्वदेवैर्नमस्कृतः ॥
सुखीभव महाभागे ! पुत्रेण तेन वै सदा ।
न प्रकाश्या त्वया देवि ! स्ववार्त्तेयञ्च कस्यचित् ॥
कर्त्तव्यमज्ञानभावैः सुगोप्यं त्वं सदा कुरु ।
एवमुक्त्वा गतो विप्र नारदो मुनिसत्तमः ॥
कमलायाश्चोदरे वै आसीत् तच्चन्म चोत्तमम् ।
पुनः प्रजादो वै नाम तस्यां जातो महात्मनः ॥
बाल्यभावं गतो विप्र कृष्ण एवं विचिन्त्य च ।
नरसिंहप्रसादेन देवराजोऽप्यभूत् स हि ॥"

इति पाद्मे भूमिखण्डे ५ अध्यायः ॥ * ॥
(अनेन सह नरनारायणयोर्युद्धमासीत् । एतद्-विवरणन्तु देवीभागवते चतुर्थस्कन्धे नवमाध्याये द्रष्टव्यम् ॥) प्रमोदः । इति विश्वः ॥ (यथा, महाभारते । १ । ७० । ३ ।
"मनःप्रह्लादजननं दृष्टिकान्तमतीव च ॥")
मुख्यः । इति धरणिः ॥ (नागविशेषः । यथा, महाभारते । २ । ६ । १० ।
"प्रह्लादो ऋषिकादश्च तथैव जनमेजयः ॥")

प्रह्वः, त्रि, (प्रह्वयते इति । प्र + ह्वे + "सर्व्वधातुभ्यश्विन्नि ।" उणा० १ । १५३ । इति वन् । आलोपश्च ।) नम्रः । इत्युणादिकोषः ॥ (यथा, रघुः । १६ । ८० ।
"विभूषणप्रत्युपहारहस्त-
मुपस्थितं वीक्ष्य विधान्यतिस्तम् ।
सौपर्णमस्त्रं प्रतिसञ्जहार
प्रह्वैर्न्निवर्न्तन्त्यरयो हि सन्तः ॥")
आसक्तः । इति हेमचन्द्रः । ३ । ४६ ॥

प्रा, ल पूर्त्तौ । (अदा०-परः-सकः-अनिट् ।) ल, प्राति घटं जलेन लोकः । इति दुर्गादासः ॥

प्राक्, व्य, पूर्व्वदिग्देशकालाः । इत्यमरः । ३ । ४ । २३ ॥ प्राची दिक् प्राड् देशः कालो वा प्राक् । एवं प्राच्या दिशः प्राचो देशात् कालाद्वा आगतः प्रागागतः । एवं प्राच्यां दिशि प्राचि देशे वा वसति प्राग्वसति । दिक्-शब्दाद्दिग्देशकाले इति प्रथमापञ्चमीसप्तमीनां स्तात् अचो लुगिति स्तातो लुक् । इति तट्टीकायां भरतः ॥ ("दिक्शब्देभ्यः सप्तमीपञ्चमी-प्रथमाभ्यो दिक्देशकालेष्वस्तातिः ।" ५ । ३ । २७ । इति अस्तातिः । "अस्तेर्लुक् ।" ५ । ३ । ३० । अस्तातेर्लुक् । "लुक् तद्धितलुकि ।" १ । २ । ४६ । इति स्त्रीप्रत्ययस्य लुक् ।) पूर्व्वम् । (यथा, मनुः । २ । २६ ।
"प्राक् नाभिवर्द्धनात् पुंसो जातकर्म्म विधीयते ॥")
प्रभातम् । अवान्तरम् । अतीतम् । अग्रम् । इति हेमचन्द्रः मेदिनी च । चे, ७ ॥ क्रमप्राप्तिः । इति शब्दरत्नावली ॥

प्राक्षिकः, पुं, (प्राक्षयति हिनस्ति । प्र + क्षि + कष हिंसायाम् + "प्राडि पनिकषः ।" उणा० २ । १४ । इति किकन् ।) पिङ्गः । मायानर्त्तकः । इत्युणादिकोषः ॥ (परदारोपजीवी । इत्युज्ज्वलदत्तः ॥)

प्राकाम्यं, क्ली, (प्रकामस्य भावः । प्रकाम + ष्यञ् ।) शिवस्याष्टविधैश्वर्य्यान्तर्गतैश्वर्य्यविशेषः । तच्च इच्छानभिघातः । इत्यमरटीकायां भरतो हेमचन्द्रश्च । २ । ११६ ॥ (यथा, तत्त्वकौमुद्याम् ।
"अणिमा लघिमा प्राप्तिः प्राकाम्यं महिमा तथा ।
ईशित्वञ्च वशित्वञ्च तथा कामावसायिता ॥")
स्वाच्छन्द्यानुमतिः । तत्पर्य्यायः । अवसर्गः २ स्वाच्छन्द्यानुमननम् ३ । इति त्रिकाण्डशेषः ॥ (यथा, कुमारे । २ । ११ ।
"यक्षो यक्षेतरञ्चासि प्राकाम्यं ते विभूतिषु ॥")

प्राकारः, पुं, (प्रक्रियते इति । प्र + कृ + घञ् । उपसर्गस्य घञीति दीर्घः ।) वप्रोपरि अन्यत्र वा इष्टकादिरचितवेष्टनम् । (यथा, महाभारते । १ । २०८ । २६ ।
"प्राकारेण च सम्पन्नं दिवमावृत्य तिष्ठता ॥")
तत्पर्य्यायः । वरणः २ साल: ३ । इत्यमरः । २ । २ । ३ ॥ प्रालः ४ । इति भरतः ॥ वप्रः ५ । यथा,—
"प्राकाररोधसीर्व्वप्रः पिलकेदारयोरपि ॥"
इति रत्नकोषः ॥
तस्य परिमाणं यथा,—
"ऊर्द्धं षोड़शहस्तेभ्यो नैव कुर्य्यादृगृहं गृही ।
ऊर्द्धं विंशतिहस्तेभ्यः प्राकारं न शुभप्रदम् ॥"
तस्य द्वारमानम् ।
"प्रस्थे हस्तद्वयात् पूर्व्वं दीर्घे हस्तत्रयन्तथा ।
गृहिणां शुभदं द्वारं प्राकारस्य गृहस्य च ॥
न मध्यदेशे कर्त्तव्यं किञ्चिन्न्यूनाधिके शुभम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १०३ अध्यायः ॥

प्राकृतः, त्रि, (प्रकृष्टमकृतमकार्य्यं यस्य ।) नीचः । इत्यमरः ॥ (यथा, देवीभागवते । १ । १५ । ३१ ।
"अश्रुपातं करोत्यद्य विवशः प्राकृतो यथा ॥")
अविकारकः । यथा, भावप्रकाशे अजीर्ण-रोगाधिकारे ।
"वदन्ति षड्डं चाजीर्णं प्राकृतं प्रतिवासरम् ॥
प्राकृतं अविकारकम् ॥" * ॥) प्रकृतिसम्बन्धी । यथा,—
"इत्युक्त्वासीद्धरिस्तूष्णीं भगवानात्ममायया ।
पित्रोः संपश्यतोः सद्यो बभूव प्राकृतः शिशुः ॥"
इति श्रीभागवते दशमस्कन्धे ३ अध्यायः ॥
(यथाच मार्कण्डेये । ४५ । ७३ ।
"इत्येष प्राकृतः सर्गः चैत्रश्चाधिष्ठितस्तु सः ॥"
यथा च मनौ । ११ । १५६ ।
"स कृत्वा प्राकृतं कृच्छ्रं व्रतैरेवं समापयेत् ॥"
"प्राकृतं प्राक्तनत्वं प्रकृतौ भवं प्राकृतं सर्व्व-कृच्छ्राणां प्रकृतित्वादेवमुच्यते ।" इति तद्भाष्ये मेधातिथिः ॥ * ॥ प्रकृतौ भवस्तत आगतो वा । प्रकृति + "तत्र भवः ।" ४ । ३ । ५३ । "तत आगतः ।" ४ । ३ । ७४ । इति वा अण् ।) भाषाभेदे, क्ली । स च संस्कृतप्रकृतिकः । यथा । अथ प्राकृतम् । अथशब्द आनन्तर्य्यार्थोऽधिकारार्थश्च । प्रकृतिः संस्कृतं तत्र भवं तत आगतं वा प्राकृतम् । संस्कृतानन्तरं प्राकृत-मधिक्रियते । संस्कृतानन्तरं प्राकृतस्यानुशासनम् । सिद्धसाध्यमानभेदसंस्कृतयोनेरेव तस्य लक्षणं न देश्यस्य इति ज्ञापनार्थम् । संस्कृत-समन्तु संस्कृतलक्षणेनैव गतार्थम् । प्राकृते प्रकृतिप्रत्ययलिङ्गकारकसमाससंज्ञादयः संस्कृत-वदेवेदितव्याः । लोकादिति च वर्त्तते । तेन ऋ ॠ ऌ ॡ ऐ औ ङ ञ ण्य ष विसर्ज्जनीयप्लुतवर्णौ वर्णसमाम्नायो लोकादवगन्तव्यः । ह्रस्वौ स्ववर्ग्य-संयुक्तौ भवत एव । ऐदौतौ च केषाञ्चित् । कैतवं कैअवम् । सौदर्य्यं सौअरिअम् । कौरवाः कौअवा । तथा स्वरव्यञ्जनं द्विवचनं चतुर्थी-बहुवचनञ्च न तु भवति । अबहुलं बहुल-मित्यधिकृतं वेदितव्यमाशास्त्रपरिसमाप्तेः । ततश्च क्वचित् प्रवृत्तिः क्वचिदप्रवृत्तिः क्वचिद्-विभाषा क्वचिदन्यदेव भवति । इति हेमचन्द्र-कृतशब्दानुशासनवृत्तौ अष्टमाध्यायस्य चतुर्थः पादः ॥ * ॥ (यथा च प्राकृतचन्द्रिकायाम् ।
"प्रकृतिः संस्कृतं तत्र भवत्वात् प्राकृतं स्मृतम् ।
तद्भवं तत्समं देशीत्यैवमेतत् त्रिधा मतम् ॥"
चण्डाचार्य्यादयस्तु आर्षप्राकृतभेदेन प्राकृतं द्विविधं कल्पयन्ति । जैनबौद्धानां ग्रन्थेषु प्राचीनतमनाटकादिषु च आर्षप्राकृतप्रयोगः प्रायशो दृश्यते ॥ कानिचित् विशेषलक्षणानि प्राकृतचन्द्रिकायामुक्तानि । यथा,—
"तच्चार्षं मागधी शौरसेनी पैशाचिकी तथा ।
चूलिका पैशाचिकत्वापभ्रंशश्चेति षड्विधम् ॥
महाराष्ट्रोद्भवां भाषां प्रकृष्टं प्राकृतं विदुः ।
आकरः सूक्तिरत्नानां सेतुबन्धादि यन्मयम् ॥"
नाटकादौ उत्तमस्यापि नायकादेः कदाचित् मत्तादिदोषोपहृतस्य प्राकृतकथनं नैव दोषाय । युक्तं तत्रैव ।
"ऐश्वर्य्यादिप्रमत्तस्य दारिद्र्योपप्लुतस्य च ।
उत्तमस्यापि पठतः प्राकृतं नैव दूष्यति ॥
क्रीड़ार्थं नृपतेरिष्टं प्राकृतञ्च द्विजन्मनाम् ।
भरतेनोदितं प्राच्यमबाधितमिदं वचः ॥"
नाटकादौ बालस्त्रीवृद्धादीनामशुद्धान्वितानां प्राकृतकथनमेव युक्ततरम् । यथाह भरद्वाजः ।
"गाथासु तु महाराष्ट्रा अन्या नाट्याश्रया मताः ।
बालस्त्रीवृद्धभिक्षूणां श्रावकाजलिङ्गिनाम् ।
अशेषपठतामत्तानां प्राकृतं षष्ठरूपिणाम् ॥" * ॥
प्रलयविशेषे, पुं । यथा, विष्णुपुराणे । १ । ७ । ३८—३६ ।
"नैमित्तिकः प्राकृतिकस्तथैवात्यन्तिको द्विज ! ।
नित्यश्च सर्व्वभूतानां प्रलयोऽयं चतुर्व्विधः ॥
ब्राह्मो नैमित्तिकस्तत्र यच्छेते जगतः पतिः ।
प्रयाति प्राकृते चैव ब्रह्माण्डं प्रकृतौ लयम् ॥")

प्राकृतज्वरः, पुं, (प्राकृतः प्रकृतिसम्बन्धी ज्वरः ।) वर्षाशरद्वसन्तेषु त्रिषु ऋतुषु क्रमेण वातपित्त-कफज्वरः । यथा, माधवकरः ।
"वर्षाशरद्वसन्तेषु वाताद्याः प्राकृतः क्रमात् ॥"

प्राकृत

प्राकृतदोषः, पुं, (प्राकृतो दोषः।) वर्षाशरद्वसन्तेषु क्रमेण कुपितो वातः पित्तं कफश्च। यथा, रत्नितः।

"चयप्रकोपप्रशमाः पित्तस्य प्रावृडादिषु।
श्लेष्मणः शिशिराद्येषु वार्योर्घर्मादिषु त्रिषु॥"

प्राकृतप्रलयः, पुं, (प्राकृतः प्रकृतिसम्बन्धी प्रलयः।) प्रकृतेर्लयः। तस्य विवरणम्। यथा,—

"निर्गुणस्य च नित्यस्य चाद्यन्तरहितस्य च।
निमेषाणां सहस्रेण प्रकृतेर्दण्ड उच्यते॥
षष्टिदण्डात्मकस्तस्य वासरश्च प्रकीर्त्तितः।
मासस्त्रिंशद्दिवारात्रैर्वर्षं द्वादशमासकैः॥
शत गते शताब्दे च श्रीकृष्णे प्रकृतेर्लयः।
प्रकृत्याश्च प्रलीनायां तदैवं प्राकृतो लयः॥
सर्व्वाः संहृत्य सा चेका महाविष्णोः प्रसुप्तयः।
कृष्णवक्षसि लीना च मूलप्रकृतिरीश्वरी॥
प्राहुस्तां वेदवित्तां दुर्गां विष्णुमायां सनातनीम्।
सर्व्वशक्तिस्वरूपाञ्च परां नारायणीं सतीम्॥
वृद्धाधिष्ठातृदेवीञ्च कृष्णस्य त्रिगुणात्मिकाम्।
यन्मायया मोहिताश्च ब्रह्मविष्णुशिवादयः॥
वैष्णवास्तां महालक्ष्मीं परां राधां वदन्ति ते।
यद्दक्षांशा महालक्ष्मीः प्रिया नारायणस्य च॥
प्राणाधिष्ठातृदेवीञ्च प्रेम्णा प्राणाधिकां वराम्।
शश्वत् प्रेममयीं भक्तिं निर्गुणां निर्गुणस्य च॥
नारायणश्च शम्भुश्च संहृत्य स्वगणान् बहून्।
सुप्तस्तत्त्वस्वरूपी च कृष्णे लीनश्च निर्गुणे॥
गोपा गोप्यश्च गावश्च सुरभ्यश्च नराधिप!।
सर्व्वे लीनाः प्रकृत्याञ्च प्रकृतिः प्रकृतौश्वरे!॥
महाविष्णौ विलीनाश्च सर्व्वे ते क्षुद्रविष्णवः।
महाविष्णुः प्रकृत्याञ्च सा चैवं परमात्मनि॥
प्रकृतिर्योगनिद्रा च श्रीकृष्णनेत्रपद्मयोः।
अधिष्ठानं चकारैवं मायया चेश्वरेच्छया॥
प्रकृतेर्व्वासरं यावन्मितं कालं प्रकीर्त्तितम्।
तावद्वृन्दावने निद्रा कृष्णस्य परमात्मनः॥
अस्त्यारक्तनखे च वह्निशुद्धांशुकार्व्विते।
गन्धचन्दनमाल्याढ्ये वायुना सुरभीकृते॥
पुनः प्रजागरे तस्य सर्व्वसृष्टिर्भवेत् पुनः।
एवं सर्व्वे प्राकृतिकाः श्रीकृष्णं निर्गुणं विना॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५१ अध्यायः॥*॥

अपि च।

"प्रकृतौ संस्थितो यस्मात् सर्व्वस्तन्मात्रसंज्ञयः।
अहङ्कारमहत्तत्त्वगतो यत् प्राकृतो लयः॥
प्रकृतौ संस्थितो यत्तु मतीतप्रलयस्तु यत्।
तस्मात् प्राकृतसंज्ञोऽयमुच्यते प्रतिसञ्चरः॥
अयं यः कथितो विप्राः प्राकृतास्यो महालयः॥"

इति कालिकापुराणे २४ अध्यायः॥

प्राकृतमानुषः, पुं, (प्राकृतः सामान्यो मानुषः।) सामान्यमनुष्यः। यथा, महाभारते गदापर्व्वणि।

"एकादशचमूनाथं भीम! पादेन मा स्पृश।
पश्यानामपि यो भर्त्ता नामतो प्राकृतमानुषः॥"

प्राकृतमित्रं, क्ली, (प्राकृतं स्वाभाविकं मित्रं यत्।) स्वदेशाश्रयवस्थितदेशाधिपस्थितराजादिः। यथा, माघे। २। ६६।

"सखा गरीयान् शत्रुश्च कृत्रिमस्तौ हि कार्य्यतः।
स्यातामभित्रौ मित्रे च सहजप्राकृतावपि॥"

अस्य टीका। "ननु चुद्रोऽयं चेद्यः किं नः करिष्यतीत्याशङ्क्य तस्य बलवत्तां वक्तुं मित्राभित्रबलाबलविवेकं तावत् करोति। सखेति। क्रियया उपकारापकारान्यतररूपया निर्वृत्तः कृत्रिमः सखा सुहृत् गरीयान् बलवान् एवं शत्रुश्च कृत्रिमो गरीयान् कुतः हि यस्मात्तौ कृत्रिममित्रशत्रू च कार्य्यतः उपकारापकाररूपकार्य्यवशात् निर्वृत्ताविति शेषः। उक्तकार्य्योपाधेर्यावच्जीवमनपायादनयोर्मित्राभित्रभावोऽपि अनपायीति गरीयस्त्वमिति भावः। सहजप्राकृतौ तु नैवमित्याह। स्यातामिति। सहजात् सहजः एकशरीरावयवत्वात् तत्र सहजं मित्रं मातृष्वसेयपितृष्वसेयादि सहजशत्रुस्तु पितृव्यतनूजादिः प्रकृत्या सिद्धः प्राकृतः पूर्व्वोक्तसहजकृत्रिमलक्षणरहित इत्यर्थः। तत्र विषयान्तरः प्राकृतः शत्रुः तदनन्तरः प्राकृतं मित्रं अपि तथैव तौ सहजप्राकृतौ शत्रुमित्रे च स्यातां न ह्यात्मकार्य्यवशादनियमेनोभयरूपतामापद्येते न कृत्रिमशत्रुमित्रे कृत्रिमशत्रुः शत्रुरेव मित्रञ्च मित्रमेवेति कृत्रिमावेव मित्रामित्रौ गरीयांसौ न तु सहजौ नापि प्राकृतावित्यर्थः। अनेन कृत्रिमत्वं सर्व्वापवादीति सिद्धम्।" इति मल्लिनाथः॥

प्राकृतशत्रुः, पुं, (प्राकृतः स्वाभाविकः शत्रुः।) स्वदेशाश्रयवस्थितदेशाधिपस्थितराजादिः। यथा। "विषयान्तरः प्राकृतः शत्रुः।" इति माघटीकायां मल्लिनाथः॥

प्राकृतिक, त्रि, (प्रकृति+ठञ्।) प्रकृतिविकारः। प्रकृतिसम्बन्धी। यथा,—

"एवं सर्व्वे प्राकृतिकाः श्रीकृष्णं निर्गुणं विना॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५१ अध्यायः॥

(प्रलयविशेषे, पुं। यथा, विष्णुपुराणे।२।७।३८।

"नैमित्तिकः प्राकृतिकस्तथैवात्यन्तिको द्विज!।
नित्यश्च सर्व्वभूतानां प्रलयोऽयं चतुर्व्विधः॥")

प्राक्तन, त्रि, (प्राक् प्राचि काले देशे प्राच्यां दिशि वा भवः। प्राक्+कालवाचिनोऽव्ययात् ट्युट्युलौ।) प्राग्भवः। यथा। "प्रपेदिरे प्राक्तनजन्मविद्याः॥" इति कुमारसम्भवम्॥

अन्यच्च।

"प्राक्तनेन शुभं सर्व्वं सुखञ्च विभवश्चिरम्।
दुःखं शोकः प्राक्तनेन विपत् सम्पच्च सम्भवम्॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १४ अध्यायः॥

अपि च। तत्रैव १२६ अध्याये।

"विधाता लिखितं कर्म्म प्राक्तनं केन वार्य्यते।
मा भुक्तं क्षीयते कर्म्म कल्पकोटिशतैरपि॥"

प्राक्तनकर्म्म, क्ली, (प्राक्तनं पुराभवं कर्म्म अत्रास्य तच्छब्दकत्वादपि तच्छब्दत्वारोपः।) भाग्यम्। अदृष्टम्। इति घटाधरः॥ पुराकृतकार्य्यञ्च॥

प्राक्फल्गुनी, स्त्री, (प्राची फल्गुनी।) पूर्व्वफल्गुनी। यथा। प्राक्फल्गुन्यश्चैज्जन्मकाले च यस्य। इति कोष्ठीप्रदीपः॥

प्राक्फल्गुनीभवः, पुं, (प्राक्फल्गुन्यां भव उत्पत्तिर्यस्य।) दृहस्पतिः। इति हारावली।३६॥ पूर्व्वफल्गुन्यां जाते, त्रि॥

प्राक्फाल्गुनः, पुं, (प्राक्फल्गुन्यां भव इति। प्राक्फल्गुन+अण्।) दृहस्पतिः। इति शब्दरत्नावली॥

प्राक्फाल्गुनेयः, पुं, (प्राक्फल्गुन्यां भव इति। प्राक्फल्गुन+ढक्।) दृहस्पतिः। इति त्रिकाण्डशेषः॥

प्राखर्य्यं, (प्रखरस्य भावः। प्रखर+ष्यञ्।) प्रखरत्वम्। तीक्ष्णता। प्रखरशब्दात् भावार्थे ष्यञ्प्रत्ययः॥

प्रागभावः, पुं, (प्राग्वर्त्ती अभावः।) संसर्गाभावविशेषः॥ (यथा, भाषापरिच्छेदे।१२—१३।

"अभावस्तु द्विधा संसर्गान्योन्याभावभेदतः।
प्रागभावस्तथाध्वंसोऽप्यत्यन्ताभाव एव च॥
एवं त्रैविध्यमापन्नः संसर्गाभाव इष्यते॥")

तस्य लक्षणम्। विनाश्यभावत्वम्। इति सिद्धान्तमुक्तावली॥

प्रागल्भ्यं, क्ली, (प्रगल्भस्य भावः। प्रगल्भ+ष्यञ्।) प्रगल्भता। यथा,—

"प्रागल्भ्यहीनस्य नरस्य विद्या
शस्त्रं यथा कापुरुषस्य हस्ते।
न ह्यस्मिसुतृपादयते शरीरे
वृद्धस्य दारा इव दर्शनीयाः॥"

इति ज्योतिस्तत्त्वम्॥

स्त्रीणामयत्नजभावविशेषः। यथा,—

"प्रागल्भ्यौदार्य्यमाधुर्य्यधीराधीरत्वकान्तयः।
दीप्तिश्चायत्नजा भावहावहेलास्त्रियोऽङ्गजाः॥"

इति हेमचन्द्रः।३।१०३॥

(यथा च साहित्यदर्पणे। ३। १०२।

"निःसाध्वसत्वं प्रागल्भ्यम्॥" यथा,—

"समाश्लिष्टाः समाश्लेषैश्चुम्बिताश्चुम्बनैरपि।
दष्टाश्च दंशनैः कान्तं दारुणैरुन्मदा योषितः॥")

प्रागुदीची, स्त्री, (प्राची उदीची च दिगिति कर्म्मधारयः।) पूर्व्वोत्तरदिक्। ईशानकोणः। यथा,

"तत्रोत्कीर्णदृत्तिकाः प्रागुदीच्यां दिशि क्षिपेत्॥"

इति भवदेवभट्टः॥

प्राग्ज्योतिषः, पुं, (प्राक् ज्योतिषं नक्षत्रं यत्र। तदुक्तं कालिकापुराणे।

"अत्रैव हि स्थितो ब्रह्मा प्राङ् नक्षत्रं ससर्ज्ज ह।
ततः प्राग्ज्योतिषाख्येयं पुरी शक्रपुरीसमा॥")

कामरूपदेशः। इति हेमचन्द्रः। ४। २३।

स तु नरकराजपुरम्। यथा,—

श्रीभगवानुवाच।

"करतोया सदागङ्गा पूर्व्वभागादधिष्ठिता।
यावल्लोहितकान्तास्ति तावद्देशं पुरं तदा॥
तत्र देवी महामाया योगनिद्रा जगत्प्रसूः।
कामाख्यारूपमादाय सदा तिष्ठति शोभना॥

प्राकृत

"सखा गरीयान् शत्रुश्च कृत्रिमस्तौ हि कार्य्यतः।
स्यातामभित्रौ मित्रे च सहजप्राकृतावपि॥"

अस्य टीका। "ननु चुद्रोऽयं चेद्यः किं नः करिष्यतीत्याशङ्क्य तस्य बलवत्तां वक्तुं मित्राभित्रबलाबलविवेकं तावत् करोति। सखेति। क्रियया उपकारापकारान्यतररूपया निर्वृत्तः कृत्रिमः सखा सुहृत् गरीयान् बलवान् एवं शत्रुश्च कृत्रिमो गरीयान् कुतः हि यस्मात्तौ कृत्रिममित्रशत्रू च कार्य्यतः उपकारापकाररूपकार्य्यवशात् निर्वृत्ताविति शेषः। उक्तकार्य्योपाधेर्यावज्जीवमनपायादनयोर्मित्राभित्रभावोऽपि अनपायीति गरीयस्त्वमिति भावः। सहजप्राकृतौ तु नैवमित्याह। स्यातामिति। सहजात् सहजः एकशरीरावयवत्वात् तत्र सहजं मित्रं मातृष्वसेयपितृष्वसेयादि सहजशत्रुस्तु पितृव्यतनूजादिः प्रकृत्या सिद्धः प्राकृतः पूर्व्वोक्तसहजकृत्रिमलक्षणरहित इत्यर्थः। तत्र विषयान्तरः प्राकृतः शत्रुः तदनन्तरः प्राकृतं मित्रं अपि तथैव तौ सहजप्राकृतौ शत्रुमित्रे च स्यातां न ह्यात्मकार्य्यवशादनियमेनोभयरूपतामापद्येते न कृत्रिमशत्रुमित्रे कृत्रिमशत्रुः शत्रुरेव मित्रञ्च मित्रमेवेति कृत्रिमावेव मित्रामित्रौ गरीयांसौ न तु सहजौ नापि प्राकृतावित्यर्थः। अनेन कृत्रिमत्वं सर्व्वापवादीति सिद्धम्।" इति मल्लिनाथः॥

प्राकृतशत्रुः, पुं, (प्राकृतः स्वाभाविकः शत्रुः।) स्वदेशाश्रयवस्थितदेशाधिपस्थितराजादिः। यथा। "विषयान्तरः प्राकृतः शत्रुः।" इति माघटीकायां मल्लिनाथः॥

प्राकृतिक, त्रि, (प्रकृति+ठञ्।) प्रकृतिविकारः। प्रकृतिसम्बन्धी। यथा,—

"एवं सर्व्वे प्राकृतिकाः श्रीकृष्णं निर्गुणं विना॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५१ अध्यायः॥

(प्रलयविशेषे, पुं। यथा, विष्णुपुराणे।२।७।३८।

"नैमित्तिकः प्राकृतिकस्तथैवात्यन्तिको द्विज!।
नित्यश्च सर्व्वभूतानां प्रलयोऽयं चतुर्व्विधः॥")

प्राक्तन, त्रि, (प्राक् प्राचि काले देशे प्राच्यां दिशि वा भवः। प्राक्+कालवाचिनोऽव्ययात् ट्युट्युलौ।) प्राग्भवः। यथा। "प्रपेदिरे प्राक्तनजन्मविद्याः॥" इति कुमारसम्भवम्॥

अन्यच्च।

"प्राक्तनेन शुभं सर्व्वं सुखञ्च विभवश्चिरम्।
दुःखं शोकः प्राक्तनेन विपत् सम्पच्च सम्भवम्॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १४ अध्यायः॥

अपि च। तत्रैव १२६ अध्याये।

"विधाता लिखितं कर्म्म प्राक्तनं केन वार्य्यते।
मा भुक्तं क्षीयते कर्म्म कल्पकोटिशतैरपि॥"

प्राक्तनकर्म्म, क्ली, (प्राक्तनं पुराभवं कर्म्म अत्रास्य तच्छब्दकत्वादपि तच्छब्दत्वारोपः।) भाग्यम्। अदृष्टम्। इति घटाधरः॥ पुराकृतकार्य्यञ्च॥

प्राक्फल्गुनी, स्त्री, (प्राची फल्गुनी।) पूर्व्वफल्गुनी। यथा। प्राक्फल्गुन्यश्चैज्जन्मकाले च यस्य। इति कोष्ठीप्रदीपः॥

प्राक्फल्गुनीभवः, पुं, (प्राक्फल्गुन्यां भव उत्पत्तिर्यस्य।) दृहस्पतिः। इति हारावली।३६॥ पूर्व्वफल्गुन्यां जाते, त्रि॥

प्राक्फाल्गुनः, पुं, (प्राक्फल्गुन्यां भव इति। प्राक्फल्गुन+अण्।) दृहस्पतिः। इति शब्दरत्नावली॥

प्राक्फाल्गुनेयः, पुं, (प्राक्फल्गुन्यां भव इति। प्राक्फल्गुन+ढक्।) दृहस्पतिः। इति त्रिकाण्डशेषः॥

प्राखर्य्यं, (प्रखरस्य भावः। प्रखर+ष्यञ्।) प्रखरत्वम्। तीक्ष्णता। प्रखरशब्दात् भावार्थे ष्यञ्प्रत्ययः॥

प्रागभावः, पुं, (प्राग्वर्त्ती अभावः।) संसर्गाभावविशेषः॥ (यथा, भाषापरिच्छेदे।१२—१३।

"अभावस्तु द्विधा संसर्गान्योन्याभावभेदतः।
प्रागभावस्तथाध्वंसोऽप्यत्यन्ताभाव एव च॥
एवं त्रैविध्यमापन्नः संसर्गाभाव इष्यते॥")

तस्य लक्षणम्। विनाश्यभावत्वम्। इति सिद्धान्तमुक्तावली॥

प्रागल्भ्यं, क्ली, (प्रगल्भस्य भावः। प्रगल्भ+ष्यञ्।) प्रगल्भता। यथा,—

"प्रागल्भ्यहीनस्य नरस्य विद्या
शस्त्रं यथा कापुरुषस्य हस्ते।
न ह्यस्मिसुतृपादयते शरीरे
वृद्धस्य दारा इव दर्शनीयाः॥"

इति ज्योतिस्तत्त्वम्॥

स्त्रीणामयत्नजभावविशेषः। यथा,—

"प्रागल्भ्यौदार्य्यमाधुर्य्यधीराधीरत्वकान्तयः।
दीप्तिश्चायत्नजा भावहावहेलास्त्रियोऽङ्गजाः॥"

इति हेमचन्द्रः।३।१०३॥

(यथा च साहित्यदर्पणे। ३। १०२।

"निःसाध्वसत्वं प्रागल्भ्यम्॥" यथा,—

"समाश्लिष्टाः समाश्लेषैश्चुम्बिताश्चुम्बनैरपि।
दष्टाश्च दंशनैः कान्तं दारुणैरुन्मदा योषितः॥")

प्रागुदीची, स्त्री, (प्राची उदीची च दिगिति कर्म्मधारयः।) पूर्व्वोत्तरदिक्। ईशानकोणः। यथा,

"तत्रोत्कीर्णदृत्तिकाः प्रागुदीच्यां दिशि क्षिपेत्॥"

इति भवदेवभट्टः॥

प्राग्ज्योतिषः, पुं, (प्राक् ज्योतिषं नक्षत्रं यत्र। तदुक्तं कालिकापुराणे।

"अत्रैव हि स्थितो ब्रह्मा प्राङ् नक्षत्रं ससर्ज्ज ह।
ततः प्राग्ज्योतिषाख्येयं पुरी शक्रपुरीसमा॥")

कामरूपदेशः। इति हेमचन्द्रः। ४। २३।

स तु नरकराजपुरम्। यथा,—

श्रीभगवानुवाच।

"करतोया सदागङ्गा पूर्व्वभागादधिष्ठिता।
यावल्लोहितकान्तास्ति तावद्देशं पुरं तदा॥
तत्र देवी महामाया योगनिद्रा जगत्प्रसूः।
कामाख्यारूपमादाय सदा तिष्ठति शोभना॥

अत्रास्ति नदराजोऽयं लौहित्यो ब्रह्मणः सुतः।
अत्रैव दशदिक्पालाः स्वे स्वे पीठे व्यवस्थिताः॥
अत्र स्वयं महादेवो ब्रह्मा चाहञ्च सर्व्वदा।
चन्द्रः सूर्य्यश्च सततं वसतेऽत्रैव पुत्रक!॥
सर्व्वे क्रीड़ार्थमायाता रहस्यदेशमुत्तमम्।
अत्र श्रीः सर्व्वतो भद्रा भोग्यमत्र सदा बहु॥
अत्रैव हि स्थितो ब्रह्मा प्राङ्मुखं सतर्च्छ ह।
ततः प्राग्ज्योतिषाख्येयं पुरी शक्रपुरीसमा॥
अत्र त्वं वस भद्रन्ते ह्यभिषिक्तो मया स्वयम्।
ततो विदर्भराजस्य पुत्रीं मायाङ्कयां हरिः।
पुत्रार्थे वरयामास नरकस्य समां गुणैः॥"

इति कालिकापुराणे ३७ अध्यायः॥

(इदानीं प्रसिद्धमासामप्रदेशमस्यिदंशमुक्तविहारकामरूपं पुरा प्राग्ज्योतिषाख्ययाभिहितम्॥")

प्राग्भारः, पुं, (प्रकृष्टो भारो यत्र।) पर्व्वताग्रभागः। इति त्रिकाण्डशेषः॥ कुत्रचित् प्राग्भाव इति च पाठः॥

प्राग्रहरः, त्रि, (प्राग्रं प्रकृष्टमग्रं ह्रियतेऽनेनेति। हृ+अप्।) श्रेष्ठः। इत्यमरः। ३।१।५८॥ (यथा, रघौ। १६। २३।

"तर्घेति तस्याः प्रणयं प्रतीतः
प्रत्यग्रहीत्प्राग्रहरो रघूणाम्।
पूरयभिव्यक्तसुखप्रसादा
शरीरबन्धेन तिरोबभूव॥")

प्राग्घाटं, क्ली, (प्राग्रे अटतीति। अट्+अच्।) अघनदधि। इति त्रिकाण्डशेषः॥

प्राग्र्य, त्रि, (प्रकर्षेणाग्रे भव इति। प्राग्र+यत्।) श्रेष्ठः। इत्यमरः। ३।१।५८॥ (यथा, महाभारते। ६। ५८। ११।

"कृत्वा हि सुमहत् कर्म्म हत्वा भीष्मसुखान् कुरून्।
जयः प्राप्तो यशःप्राग्र्यं वैरञ्च प्रतियाचितम्॥")

प्राग्वंशः, पुं, (प्राञ्चतीति। प्र+अञ्च+क्विन्। प्राक्। प्राक् वंशः सपत्नीकयजमानादिसन्मुहीऽच।) हविर्धां होतव्यानां आधारो यद्गृहं ततः प्राक् पूर्व्वदेशे यजमानसदस्यादिस्थित्यर्थं गृहम्। इत्यमरभरतौ॥ (यथा, हरिवंशे। ४१। ७।

"यूपं समित्कुशं दर्व्वीं चमसोलूखलानि च।
प्राग्वंशं यज्ञभूमिञ्च होतारं चयनञ्च यत्॥"

प्राक्चासौ वंशश्चेति कर्म्मधारयः॥) पूर्व्वकुलञ्च॥

प्राघातः, पुं, (प्रकृष्टं घ्नन्त्यस्मिन्। यद्वा, प्राहन्यतेऽस्मिन्निति। प्र+घ्ना+हन्+आधारे घञ्।) युद्धम्। इति हेमचन्द्रः। ३। ४६१॥

प्राघारः, पुं, (प्राघरणमिति। प्र+घृ प्रस्रवणे+घञ्। "उपसर्गस्य घञ्यमनुष्ये बहुलम्।" ६। ३। १२२। इत्युपसर्गस्य दीर्घः।) घृतादिक्षरणम्। तत्पर्य्यायः। द्योतः २। इत्यमरः। ३। २। १०॥

प्राघुणः, पुं, (प्राघोणते भाष्यतीति। प्र+घ्ना+घुण+कः।) अतिथिः। इति त्रिकाण्डशेषः॥ (प्राघुण+स्वार्थे कन्। प्राघुणकस्तत्रार्थे। यथा, पञ्चतन्त्रे चतुर्थतन्त्रे।

"तदागच्छ प्राघुणकन्यायेनास्मदावासम्॥")

प्राघुणिकः, पुं, (प्राघुण+स्वार्थे ठक्।) अतिथिः। यथा, नैषधे। २। ५६।

"अमितं मधु तत्कथा मम
श्रवणप्राघुणिकीकृता जनैः।
मदनानलबोधनेऽभवत्
खग धाय्या धिगधैर्य्यधारिणः॥"

प्राघूर्णिकः, पुं, (प्र+घ्ना+घूर्ण+भावे घञ्। प्राघूर्णो भ्रमणम्। तत्र साधु इति ठक्।) अतिथिः। इति हेमचन्द्रः। २। ३३४॥

प्राङ्, त्रि, (प्रकर्षेण अञ्चतीति। प्र+अञ्च्+"ऋत्विग्दधृक्स्रगिति।" ३। २। ५९। इति क्विन्। "अनिदितां हल उपधायाः क्ङिति।" ६। ४। २४। इति नलोपः। "उगिदचाम्।" इति नुम्। संयोगान्तस्य लोपः। नुमो नकारस्य। "क्विन् प्रत्ययस्य कुः।" ८। २। ६२। इति कुत्वेन ङकारः।) पूर्व्वदिक्। पूर्व्वदेशः। पूर्व्वकालः। इति मेदिनी। चे, ७॥

प्राङ्गः, पुं, (प्रकृष्टमङ्गं यस्य।) पणववाद्यम्। इति शब्दरत्नावली॥

प्राङ्गणं, क्ली, (प्रकृष्टमङ्गनमङ्गं यस्य।) पणववाद्यम्। इति शब्दरत्नावली॥ (प्रकर्षेण अङ्गनं गमनं यत्र। ल्युट्।) गृहभूमिः। आङ्गिना इति उठान इति च भाषा। तत्पर्य्यायः। अजिरम् २ चत्वरम् ३ अङ्गनम् ४। इति हेमचन्द्रः। ४। ७०॥ (यथा, भविष्योत्तरे।

"गदोपसमये स्त्रीभिः पूज्यो जीमूतवाहनः।
पुष्करिणीं विधायाथ प्राङ्गणे चतुरस्रिकाम्॥")

सूर्य्यविद्वस्य तस्य दोषो यथा,—

"अभद्रदं सूर्य्यवेधं प्राङ्गणञ्च तथैव च॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १०३ अः॥

प्राङ्न्यायः, पुं, (प्राक् न्यायः।) चतुर्थोत्तरान्तर्गतोत्तरविशेषः। यत्राभियुक्त एवं ब्रूयादस्मिन्नर्थे अनेनाहमभियुक्तस्तु तत्र चायं व्यवहारमार्गेण पराजित इति। उक्तञ्च कात्यायनेन।

"आचारेणावसन्नोऽपि पुनर्लेखयते यदि।
सोऽभियोगो जितः पूर्व्वं प्राङ्न्यायश्च स उच्यते॥"

इति मिताक्षरा॥

प्राचिका, स्त्री, (प्राञ्चतीति। प्र+अञ्च+क्विन्। टापि अत इत्वञ्च।) वनमल्लिका। इत्यमरभरतौ। ३। ५। ८॥ डाँग्र इति भाषा॥

प्राची, स्त्री, (प्रथमं अञ्चति सूर्य्ये प्राप्नोतीति। प्र+अञ्च+"ऋत्विग्दधृक् स्रगिति।" ३।२।५९। इत्यादिना क्विन्। "उगितश्च।" ४। १। ६। इति ङीप्।) पूर्व्वा दिक्। इत्यमरः। १।३।१॥ (यथा, महाभारते। १। ६५। १२।

"जनमेजयः खाण्डवन्तां नामोपयेमे माधवीं
तस्यामस्य जज्ञे प्राचिन्वान्। यः प्राचीं दिशं निगाय यावत् सूर्य्योदयात् ततस्तस्य प्राचिन्वत्तम्॥") पूजकपूज्ययोरयम्। यथा,—

"देवाग्रे भस्य चाप्यग्रे प्राची प्रोक्ता गुरुक्रमैः॥"

इति।

"यत्रैव भानुस्तु वियत्युदेति
प्राचीति तां वेदविदो वदन्ति।
तथा परः पूजकपूज्ययोश्च
सदागमज्ञाः प्रवदन्ति तज्ज्ञे॥"

इति तिथ्यादितत्त्वम्॥

प्राचीनः, त्रि, (प्रागेवेति। प्राक्+"विभाषाञ्चेरदिक् स्त्रियाम्।" ५। ४। ८। इति खः खस्येनादेशः।) पूर्व्वदिग्देशकालभवः। तत्पर्य्यायः। प्राक् २। (यथा, आर्य्यासप्तशत्याम्। ३५१।

"प्राचीनाचलमौलेर्य्य शशी गगनमध्यमधिवसति।
त्वां सखि। पश्यामि तथा छायामिव संकुचन्नाम॥"

यथा च भागवते। ४। २४। १०।

"प्राचीनाग्रैः कुशैरासीदास्तृतं वसुधातलम्॥"

प्रागग्रम्। यथा, ऋग्वेदे। १। १८८। ४।

"प्राचीनं बर्हिरोजसा सहस्वीरमस्तृणन्॥"

"प्राचीनं प्रागग्रम्।" इति तद्भाष्ये सायनः॥ प्रकृष्टगन्ता। अपराङ्मुखः। यथा, ऋग्वेदे। १। ५४। ५।

"प्राचीनेन मनसा बर्हिषावता।"

"प्राचीनेन प्रकर्षेण गन्त्रा अपराङ्मुखेनेत्यर्थः॥" इति तद्भाष्ये सायनः॥)

पुं, प्राचीरम्। तत्पर्य्यायः। आवेष्टकः २ वृतिः ३। इति हेमचन्द्रः। ४। ४८॥

प्राचीनानसः, पुं, (प्राचीनः अनस इति नित्यकर्म्मधारयः।) विल्वम्। इति त्रिकाण्डशेषः॥

प्राचीनबर्हिः, [स्] पुं, इन्द्रः। इति हेमचन्द्रः। २। ८५॥ (यथा, रघौ। ४। २८।

"स यदौ प्रथमं प्राचीं तुल्यः प्राचीनबर्हिषा।
अहितानिलोद्धूतैस्तर्ज्जयन्निव केतुभिः॥")

राजविशेषः। (यथा, महाभारते। १२।२०८।६।

"अत्रिवंशे समुत्पन्नो ब्रह्मयोनिः सनातनः।
प्राचीनबर्हिर्भगवांस्तस्मात् प्रचेतसो दश॥")

यथा च।

"हविर्द्धानात् षड़ाग्नेयी सुतानञ्जनयद्व्रतम्।
प्राचीनबर्हिषं शुक्रं गयं कृष्णं व्रजाजिनौ॥
प्राचीनबर्हिर्भगवान् महानासीत् प्रजापतिः।
हविर्द्धानात् द्विजश्रेष्ठ! येन संवर्द्धिता प्रजाः॥
प्राचीनाग्राः कुशास्तस्य पृथिव्यां विश्रुता मुने!।
प्राचीनबर्हिर्भगवान् ख्यातो भुवि महाबलः॥
समुद्रतनयायान्तु कृतदारो महीपतिः।
महतस्तपसः पारे सुवर्णायां सतीपतिः॥
सुषुवे दश पुत्रांश्च सुस्निग्धां वै प्रचेतसः।
दशवर्षसहस्राणि समुद्रसलिलेशयाः॥"

इति वह्निपुराणे वरसर्गो नामाध्यायः॥

प्राचीना, स्त्री, (प्राचीन+टाप्।) वनतिक्तिका। इत्यमरः। २।४। ८५॥ आकनादि इति भाषा॥ रास्ना। इति शब्दचन्द्रिका॥ (प्राचि भवेति। प्राच्+खः। टाप्।) प्राग्भवा च॥ (पाठा।

तत्पर्य्यायो यथा,—
"पाटास्वष्टावष्टकी च प्राचीना प्राचचेलिका।
एकस्त्रीला रसा प्रोक्ता पाठिका वरतिक्तिका॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

प्राचीनामलकं, क्ली, (प्राचीनमामलकमिति नित्यकर्म्मधारयः।) पानीयामलकम्। पानी आमला इति भाषा। तत्पर्य्यायः। वारिवदरम् २। इति त्रिकाण्डशेषः॥ (यथा, महाभारते। १। २०८। ४१।
"प्राचीनामलकैर्लोध्रैरङ्कोलैश्च सुपुष्पितैः॥")
अस्य गुणः। दोषत्रयगरनाशित्वम्। इति भावप्रकाशः॥ (यथा च।
"गरदोषहरं नीपं प्राचीनामलकन्तथा॥"
इति सुश्रुते सूत्रस्थाने ४६ अध्यायः॥)

प्राचीनावीतं, क्ली, (प्राचीनं प्रदक्षिणं आवीयते स्मेति। आ+वी गत्यादौ+क्तः। यद्वा, प्राचीनं आवेतीति। "गत्यर्थेति।" क्तः।) आद्धादौ वामकरे बहिष्कृते सति दक्षिणस्कन्धार्पितयज्ञसूत्रम्। इत्यमरभरतौ। २। ७। ५०॥ तथाहि कौर्म्मे उपविभागे १० अध्याये।
"सव्यं बाहुं समुद्धृत्य दक्षिणे तु धृतं द्विजाः।
प्राचीनावीतमित्युक्तं पित्र्ये कर्म्मणि योजयेत्॥"

प्राचीनावीती, [न्] पुं, (प्राचीनावीतमस्यास्तीति। प्राचीनावीत+इनिः।) प्राचीनावीतविशिष्टः। यथा। सव्यं बाहुमुद्धृत्य शिरोऽवधाय दक्षिणोर्द्ध्वं प्रतिष्ठापयति सव्यं कक्षमवलम्बं भवति एवं प्राचीनावीती भवतीति। इति गोभिलः॥ प्रतिष्ठापयति यज्ञोपवीतमिति शेषः। इत्याह्निकतत्त्वम्॥

प्राचीपतिः, पुं, (प्राच्याः पूर्ब्बस्या दिशः पतिः।) इन्द्रः। इति त्रिकाण्डशेषः॥

प्राचीरं, क्ली, (प्राचीयते इति। प्र+आ+चि चु चयने+"सुषिचिमिभ्यां दीर्घश्च।" उणा० २। २५। इति क्रन् दीर्घश्च।) प्रान्ततोहतिः। इत्यमरः। २। २। ३॥ पाँचील इति भाषा॥ दुर्गार्थं नगरादेः प्रान्तभागे वेणुकण्टकवेत्रादिमयी वृतिर्वेष्टनिका। इति भरतः॥ सूत्रस्थानेऽपि वृतौ प्राचीरमुपचारादिति स्वाम्यादयः॥ तत्पर्य्यायः। वृतिः २। इति भट्टः॥ प्राचीनम् ३। इति मुकुटः॥
"प्राचीर प्रावरोऽपिः स्यात् प्रावृतिः५ प्रान्ततो वृतिः ६।
इष्टकास्थिकाद्वेश्म वृणवाद्यादिवेष्टने।"
इति शब्दरत्नावली॥ *॥

अथ प्राचीरनिर्णयः।
"गजैरभेद्या मनुजैरलङ्घ्याः
प्राचीरवक्षा नृपतेर्भवन्ति॥
राजदण्डोन्नताः सर्व्वे प्राचीराः पृथिवीभुजः।
विष्कम्भस्तु पदाग्रे पार्श्वयोः पञ्च पञ्च च॥
पश्चात् पञ्च च विज्ञेयाः प्राचीराः पृथिवीभुजः।
सर्व्वप्रान्ते त्वायसो नाम प्राचीर उच्यते॥
प्रतिप्राकारसंस्थानं द्वारं नाभिसुखस्थितम्॥"

तत्र जयाख्यस्य दीर्घस्य वास्तुखण्डस्य निर्णयः। तद्यथा,—
"राजच्छन्दान्तरे पञ्च राजद्वारे महीपतेः।
राजदण्डत्रये सार्द्धे जयद्वारे प्रतिष्ठिताः॥
अद्वारे राजदण्डार्द्धे प्राचीराः पृथिवीपतेः।
एवं व्यवस्थिते स्थाने मध्यमे तद्धि तिष्ठति॥
राजच्छन्दत्रयं सार्द्धमायामे जयवास्तुनि।
परिणाहे पञ्च राजदण्डास्तिष्ठन्ति मध्यतः॥
राजपट्टाभिधानेन स्थानमेतन्निगद्यते।
अस्मिन् गृहं नृपः कृत्वा सुचिरं सुखमश्नुते॥
अज्ञानाद्भ्रमतो राज्ञो योऽन्यत्र गृहमारभेत्।
सोऽचिरान्मृत्युमाप्नोति रोगं शोकं भयन्तथा॥
यमदण्डोदयदण्डौ कोणाहतिरुपप्लवः॥
ये चान्ये वास्तुदोषाः स्युः स्थाने दोषाश्च ये पुनः॥
न स्पृश्यते राजपट्टैः सर्व्वैरेतैर्वरो यथा।
द्विगुणादिरतोऽपि स्यात् क्रमाद्भङ्गादिवासुषु॥
राजच्छन्दमितेऽर्द्धं प्राचीरे गुणदोषकौ॥"
इति युक्तिकल्पतरुः॥

प्राचेतसः, पुं, (प्रचेतसोऽपत्यमिति। प्रचेतस्+अण्।) वाल्मीकिमुनिः। इति हेमचन्द्रः। ३। ५१०॥ (यथा, रघुः। १५। ६३।
"अथ प्राचेतसोपज्ञं रामायणमितस्ततः।
मैथिलेयौ कुशलवौ जगतुर्गुरुचोदितौ॥"
प्रचेतसोऽपत्यमात्रम्। विष्णुः। यथा, हरिवंशे। २०३। १४।
"प्रज्ञया तेजसा योगात्तस्मात् प्राचेतसः प्रभुः।
विष्णुरेव महायोगी कर्म्मणामन्तरङ्गतः॥"
दक्षः। यथा, महाभारते। १। ७५। ५।
"वीरिण्या सह सङ्गम्य दक्षः प्राचेतसो मुनिः।
आत्मतुल्यानजनयत् सहस्रं संशितव्रतान्॥")

प्राचेतसः, [स्] पुं, प्राचीनबर्हीराजपुत्राः। सान्तनित्यबहुवचनान्तोऽयम्। यथा,—
"एवमुक्तास्तु ते पुत्रास्तपः प्राचेतसो दश।
पयोधिसलिले मग्नास्तपस्तेपे सुदारुणम्॥
एतच्चिराजमारूढं नीलोत्पलदलच्छविम्।
दृष्ट्वा प्राचेतसः सर्व्वे शिरोभिरवनीं गताः॥"
इति वह्निपुराणम्॥

प्राच्यः, पुं, (प्राचि भवः। प्राच्+"द्युप्रागपागुदक्प्रतीचो यत्।" ४। २। १०१। इति यत्।) शरावत्याः प्राग्दक्षिणदेशः। इत्यमरः। २। १। ७॥ (पूर्ब्बदिग्भवे, त्रि। यथा मार्कण्डेये। ५७। ४२—४४।
"————प्राच्यान् देशान् निबोध मे।
अङ्गारका मुद्गरा अन्तर्गिर्या बहिर्गिराः॥
वङ्गा प्रवङ्गा वङ्गेया मालदा मालवल्लिकाः।
प्राग्ज्योतिषाश्च मद्राश्च विदेहास्तामलिप्तकाः॥
मल्ला मगधगोमन्ताः प्राच्या जनपदाः स्मृताः॥")
पूर्ब्बदेशीये च, त्रि॥ (यथा, महाभारते। ८। ४५। २८।
"प्राच्या दासा वृषला दाक्षिणात्याः
सेना गोपाः कङ्कुरा वै सुराष्ट्राः॥")

प्राजकः, पुं, (प्राजयति प्रकर्षेण नमयति घोटकादीनिति। प्र+अज्+णिच्+ण्वुल्।) सारथिः। यथा, मनुवचने। ८। २६३।
"यत्रापवर्त्तते युग्यं वैगुण्यान् प्राजकस्य च।
तत्र स्वामी भवेद्दण्ड्यो हिंसायां द्विशतं दमम्॥"
"यत्र सारथेरकौशल्यादुपानमन्यथा गच्छति तत्र हिंसायां अग्निचितसारथिनियोगात् स्वामी द्विशतं दण्डं दण्ड्यः स्यादिति कुल्लूकभट्टः।" इति प्रायश्चित्ततत्त्वम्॥

प्राजनं, क्ली, (प्रवीयतेऽनेनेति। प्र+अज्+ल्युट्। "व्रा यौ।" २। ४। ५७। इति पक्षे यभावः।) तोदनम्। इत्यमरः। २। ६। १२॥ पाचनीवाड़ी इति भाषा॥

प्राजापत्यं, क्ली, (प्रजापतिर्देवतास्येति। प्रजापति+"दित्यदित्यादित्यपत्युत्तरपदात् ण्यः।" ४। १। ८५। इति ण्यः।) द्वादशाहसाध्यव्रतविशेषः। तत्र दिवसत्रयं रात्रिमात्रभोजनम् २२ यासाः। दिवसत्रयं दिवामात्रभोजनम् २६ यासाः। दिवसत्रयं अयाचितभोजनम् २४ यासाः। दिवसत्रयं उपवासः। यथा,—
"त्र्यहं सायं त्र्यहं प्रातस्त्र्यहमद्यादयाचितम्।
त्र्यहं परन्तु नाश्नीयात् प्राजापत्यं चरन् द्विजः॥"
याससंख्या पराशरेणोक्ता।
"सायं द्वाविंशतिर्यासाः प्रातः षड्विंशतिस्तथा।
अयाचिते चतुर्व्विंशः परेह्यशनं स्मृतम्॥"
इति प्रायश्चित्ततत्त्वम्॥ *॥

तत्तु अगम्यागमनादिप्रायश्चित्तम्। यथा,—
"अगम्यागमनं कृत्वा मद्यगोमांसभक्षणम्।
शुध्येच्चान्द्रायणाद्विप्रः प्राजापत्येन भूमिपः।
वैश्यः प्राजापनाच्छूद्रः षण्मासैर्मिक्षुशुध्यति॥
प्रायश्चित्ते कृते दद्याद्गवां ब्राह्मणभोजनम्॥"
इति गारुड़े २२६ अध्यायः॥ *॥

रोहिणीनक्षत्रम्। यथा,—
"ऐन्द्रे गुरुः शुक्रो चैव प्राजापत्ये रविस्तथा।
पूर्णिमा गुरुवारेण महाज्येष्ठी प्रकीर्त्तिता॥"
इति प्रायश्चित्ततत्त्वम्॥
(प्रजापतेरपत्यमिति। ण्यः। प्रजापतिपुत्रः। यथा, कुमारे। ६। ३४।
"तस्मिन् संयमिनामाद्ये याते परिणयोन्मुखे।
जहुः परिग्रहव्रीड़ां प्राजापत्यास्तपस्विनः॥"
प्रजापतेरिदमिति। प्रजापतिसम्बन्धिनि, त्रि। यथा, मार्कण्डेये। ४६। ७७।
"प्राजापत्यं ब्राह्मणानां क्षत्रं स्यात् क्रियावताम्।
स्थानमैन्द्रं क्षत्रियाणां संग्रामेष्वपलायिनाम्॥")

प्राजापत्यः, पुं, (प्रजापतेरयमिति। प्रजापति+ण्यः।) "प्रजापतेर्यज्ञ आसीत् प्रयागे।" इति महाभारतीय-। १। ५५। १। वचनात् तथात्वम्।) प्रयागः। इति त्रिकाण्डशेषः॥ वैनराजभेदः। तत्पर्य्यायः। विष्टरः २। इति हेमचन्द्रः। ३। ५८॥ कायनामकविवाहः।

सह धर्म्मं चरतां इति नियमं कृत्वा कन्यादानम्। यथा,—
"इत्युक्ता चरतां धर्म्मं सहजा दीयतेऽर्थिने।
स कायः प्राजापत्यः स्यात् षट् षड्वंश्यान् सहात्मना॥"
इति मिताक्षरा॥
कायः कः प्रजापतिर्देवता अस्येति प्राजापत्य इत्यर्थः। इत्युद्वाहतत्त्वम्॥ (तथा च मनुः। ३। ३०।
"सहोभौ चरतां धर्म्ममिति वाचानुभाष्य च।
कन्याप्रदानमभ्यर्च्य प्राजापत्यो विधिः स्मृतः॥")
प्राजापत्या, स्त्री, (प्रजापतिर्देवतास्या इति। प्राजापति+यः। स्त्रियां टाप्।) प्रव्रज्याश्रमपूर्ब्बकर्त्तव्यप्रजापतिदेवताकसर्ब्बस्वदक्षिणा इष्टिः। यथा, मानवे ६ अध्याये।
"प्राजापत्यां निरूप्येष्टिं सर्ब्ववेदसदक्षिणाम्।
आत्मन्यग्नीन् समारोप्य ब्राह्मणः प्रव्रजेद्गृहात्॥"
प्राज्ञिता, [ऋ] पुं, (प्राजनीति। प्र+अज्+तृच्। वीभावाभावः।) सारथिः। इत्यमरः। २। ८। ५६॥ प्रकृष्टमन्तरि, त्रि॥
प्राज्ञः, पुं, (प्रकर्षेण जानातीति। प्र+ज्ञा+कः। ततः प्रज्ञ एव स्वार्थे अण्।) कल्किदेवस्य ज्येष्ठभ्राता। यथा,—
"कल्किं द्रष्टुं हरेरंशमाविर्भूतञ्च शम्भले।
कविं प्राज्ञं सुमन्तञ्च पुरस्कृत्य महाप्रभम्॥"
इति कल्किपुराणे २ अध्यायः॥
पण्डितः। इत्यमरः। २। ७। ५॥ (यथा,—
"पण्डिते च गुणाः सर्ब्वे मूर्खे दोषाहि केवलम्।
तस्मान्मूर्खसहस्रेषु प्राज्ञ एको विशिष्यते॥"
इत्युद्भटः॥)
राजयुक्तः। इति राजनिर्घण्टः॥ (प्रकर्षेण अज्ञः इति विग्रहे मूर्खोऽपि॥)
प्राज्ञः, त्रि, (प्रज्ञ+स्वार्थे अण्। यद्वा, प्रज्ञास्त्यस्येति। अच्।) पण्डितः। (यथा, महाभारते। १। १४६। १६।
"पौरेषु विनिवृत्तेषु विदुरः सर्ब्वधर्म्मवित्।
बोधयन् पाण्डवश्रेष्ठमिदं वचनमब्रवीत्॥
प्राज्ञः प्राज्ञं प्रलापज्ञः प्रलापज्ञमिदं वचः॥")
दक्षः। इति शब्दरत्नावली॥ (विज्ञः। यथा, मनुः। २। १२३।
"नामधेयस्य ये केचिदभिवादं न जानते।
तान् प्राज्ञोऽहमिति ब्रूयात् स्त्रियः सर्ब्वास्तथैव च॥")
प्राज्ञमानी, [न्] त्रि, (आत्मानं प्राज्ञं मन्यते इति। प्राज्ञ+मन्+णिनिः।) पण्डिताभिमानी। यथा, चरके।
"दुःखिताय मुमूर्षवे अश्रद्धानाय रोगिणे।
यो भेषजमविज्ञाय प्राज्ञमानी प्रयच्छति॥"
प्राज्ञा, स्त्री, (प्रज्ञास्त्यस्या इति। अच्। टाप्।) बुद्धिमती। तत्पर्य्यायः। धीमती २। इत्यमरः। २। ६। १२॥ बुद्धिः। यथा,—
"प्रज्ञा प्राज्ञा धरा भूमिः पण्डा संवेदनं विदा॥"
इति रायमुकुटधृतशब्दार्णवः॥
प्राज्ञी, स्त्री, (प्रज्ञ+स्वार्थे अण्। ङीप्।) स्वयं ज्ञाती। तत्पर्य्यायः। पण्डा २। इत्यमरः। २। ६। १२॥ पण्डितपत्नी। इति प्राज्ञशब्दटीकायां भानुदीक्षितः॥
प्राच्यं, त्रि, (प्रवीयते इति। प्र+अज्+ण्यत्। वीभावाभावः।) प्रचुरम्। इत्यमरः। ३। १। ६३॥ (यथा, कुमारे। २। १८।
"स्वागतं स्वानधीकारान् प्रभावैरवलम्ब्य वः।
युगपद्युगबाहुभ्यः प्राग्भ्यः प्राच्यविक्रमाः॥"
प्रभूतं आच्यं घृतं यस्येति विग्रहे प्रचुरघृतसम्पन्नः। प्रकृष्टमाज्यमिति विग्रहे प्रकृष्टघृते, क्ली॥)
प्राञ्जलः, त्रि, (प्र+अञ्ज+बाहुलकात् अलच्।) सरलः। यथा,—
"ऋजावविच्छिन्नप्रगुणौ प्राञ्जलः सरलोऽपि च।
इति जटाधरः॥
प्राट्, [ड्] पुं, पृच्छति यः। (प्रच्छ+"क्विप् वचिप्रच्छीति।" उणा० २। ५७। इति क्विप् दीर्घः सम्प्रसारणाभावश्च।) प्रश्नकर्त्ता। इति सुग्धबोधव्याकरणम्॥
प्राड्विवाकः, पुं, (पृच्छतीति प्राट् विविच्य वक्तीति विवाकः। ततः कर्म्मधारयः।) व्यवहारद्रष्टा। जज् इति इङ्गरेजी भाषा। तत्पर्य्यायः। अक्षदर्शकः २। इत्यमरः। २। ८। ५॥ व्यवहारदर्शी ३। इति शब्दरत्नावली॥ ते व्यवहाराणां ऋणादानादिविवादानां द्रष्टरि निर्णेतरि धर्म्माध्यक्षे इत्यर्थः। पृच्छति वादिप्रतिवादिवाक्यं प्राट् दृक्क्विन्कूवाक् प्राड्डिति निपातः। विविच्य वक्ति विवाकः कर्म्मण्यमी इति षष्प्राट् चासौ विवाकश्चेति प्राड्विवाकः।
"विवादानुगतं पृष्ट्वा पूर्ब्ववाक्यं प्रयत्नतः।
विचारयति येनासौ प्राड्विवाकस्ततः स्मृतः॥"
इति स्मृतिः। इति भरतः॥
अपि च। अर्थिप्रत्यर्थिनौ पृच्छतीति प्राट् तयोर्व्वचनं विरुद्धाविरुद्धञ्च सभ्यैः सह विविनक्ति विवेचयति वेति विवाकः प्राट् चासौ विवाकश्चेति प्राड्विवाकः। उक्तञ्च।
"विवादानुगतं पृष्ट्वा सभ्यैस्तत् प्रयतः।
विचारयति येनासौ प्राड्विवाकस्ततः स्मृतः॥"
इति मिताक्षरा॥
प्राण, पुं, (प्राणिति जीवति बहुकालमिति। प्र+अन+अच्। प्राणित्यनेनेति करणे घञ् वा।) ब्रह्मा। इति त्रिकाण्डशेषः॥ हृन्नाभ्यन्तरः। (यद्वक्तम्।
"हृदि प्राणो गुदेऽपानः समानो नाभिसंस्थितः॥")
वोलः। काष्ठजीवः। अनिलः। बलम्। (यथा, हरिवंशे। ८६। ३६।
"बाहुप्राणेन शूराणां समाजोत्सवसन्निधौ॥")
पूरिते, त्रि। इति मेदिनी॥ सूक्ष्मशरीरसमुत्पहितचैतन्यम्॥ प्राग्गमनवान् नाडीप्रस्थान वर्त्ती वायुः। इति वेदान्तसारः॥ तस्य कर्म्मबहिर्गमनम्। इति श्रीधरस्वामी॥ तस्य रूपं स्थानानि च यथा,—
"इन्द्रनीलप्रतीकाशं प्राणरूपं प्रकीर्त्तितम्।
आस्यनासिकयोर्म्मध्ये हृत्मध्ये नाभिमध्यगे॥
प्राणालय इति प्राहुः पादाङ्गुष्ठेऽपि केचन॥"
इति योगार्णवः॥
(यथा, महाभारते। १३। ३२८। ३५।
"प्राणिनां सर्ब्वतो वायुश्चेष्टां वर्त्तयते पृथक्।
प्राणनाच्चैव भूतानां प्राण इत्यभिधीयते॥")
षष्ठप्राणविवरणं बहुवचनान्तप्राणशब्दे द्रष्टव्यम्॥ धातुः पुत्रः। यथा,—
"आयतिर्नियतिश्चैव मेरोः कन्ये महात्मनः।
भार्ये धातृविधातृभ्यां तयोर्जातौ सुतावुभौ॥
प्राणश्चैव मृकण्डुश्च पिता मम महायशाः॥"
इति मार्कण्डेये रुद्रसर्गाध्यायः॥
(धरपुत्रविशेषः। यथा, मत्स्यपुराणे। ५। २३-२४।
"द्रविणो हव्यवाहश्च धरपुत्रावुभौ स्मृतौ।
कल्यानिन्यां ततः प्राणो रमणः शिशिरोऽपि च॥
मनोहरा धरात् पुत्रानवापाथ हरेः सुता॥")
प्राणकः, पुं, (प्राणैः प्राणेन वा कायतीति। के+कः।) सत्त्वजातीयः। प्राणिमात्रम्। जीवकद्रुमः। चोलः। इति मेदिनी। के, ११५॥
प्राणदः, पुं, (प्राणित्यनेनेति। प्र+अन प्राणने+"ग्रीड्शूपिरुहमीति।" उणा० ३। ११३। इति अथः।) वायुः। (प्राणितीति। कर्त्तरि अथः।) बलवान्। इत्युणादिकोषः॥ प्रजापतिः। तीर्थम्। इति संक्षिप्तसारोणादिवृत्तिः॥
प्राणदं, क्ली, (प्राणं प्राणनं बलं वा ददातीति। प्राण+दा+"आतोऽनुपसर्गेति।" ३। २। ३। इति कः।) जलम्। रक्तम्। इति हेमचन्द्रः। ४। १३६॥ (प्राणदातरि, त्रि। यथा, कथासरित्सागरे। २८। ६।
"अर्थप्रदानमेवाहुः संसारे सुमहत् तपः।
अर्थदः प्राणदः प्रोक्तः प्राणा ह्यर्थेषु कीलिताः॥")
प्राणदः, पुं, (प्राणं ददातीति। दा+कः।) जीवकवृक्षः। इति राजनिर्घण्टः॥
प्राणदा, स्त्री, (प्राणं जीवनं बलं वा ददातीति। दा+कः। टाप्।) ऋद्धिवृक्षः। हरीतकी। इति राजनिर्घण्टः॥ (प्राणदात्री। यद्वक्तम्।
"यशोहरे किमाश्चर्य्यं प्राणदा यमभूतिका॥")
प्राणनं, क्ली, (प्र+अन प्राणने+ल्युट्।) जीवनम्। इति जटाधरः॥ (यथा, भागवते। ३। २६। ४१।
"क्लेदनं पिण्डनं तृप्तिः प्राणनाप्यायनोन्दनम्।
तापापनोदो भूयस्त्वमम्भसो वृत्तयस्त्विमाः॥"
चेष्टनम्। यथा, ऋग्वेदे। १। ६८। १०।
"विश्वस्य हि प्राणनं जीवनं त्वे वियद्यक्षसि सूनरि॥"
"हे सूनरि उषोदेवि विश्वस्य सर्ब्वस्य प्राणिजातस्य प्राणनं चेष्टनं जीवनं प्राणधारणञ्च।"

इति तद्भाष्ये सायणः ॥ प्राणित्यनेनेति । करणे ल्युट् ।) गले, पुं । इति शब्दचन्द्रिका ॥

प्राणनाथः, पुं, (प्राणानां नाथः ।) पतिः । इति शब्दरत्नावली ॥ (यथा, साहित्यदर्पणे ३ परिच्छेदे ।

"चाटुकारमपि प्राणनाथं रोषादपास्य या ।
पश्चात्तापमवाप्नोति कलहान्तरिता तु सा ॥"

स्त्रियां टाप् । पत्नी । यथा. विष्णुस्तोत्रे । ६ ।

"धात्रीं स्वाहां वनितां प्रकृतिमविकृतिं विश्व-
शक्तिं विधात्रीं
विष्णोर्विश्वात्मनस्तां विपुलगुणमयीं प्राणनाथां
प्रणौमि ॥")

प्राणन्तः, पुं, (प्राणित्यनेनेति । प्र + अन + "रुहि-नन्दिनीविप्राग्निभ्यः षिदाग्निषि ।" उणा० ३ । १२७ । इति झच् ।) वायुः । इति सिद्धान्त कौमुद्यामुणादिवृत्तिः ॥ रसाञ्जनम् । इत्युणादि-कोषः ॥

प्राणन्ती, स्त्री, (प्र + अन् झच् । स च षित् । षित्त्वात् ङीष् ।) क्षुत् । हिक्का । इत्युणादि-कोषः ॥

प्राणप्रदा, स्त्री.(प्राणं प्रददातीति । प्र + दा + कः ।) अहिनामकौषधम् । इति रत्नमाला ॥ (प्राण-दातरि, त्रि । यथा, कथासरित्सागरे ।२२।८६। "त्वाच्च दृष्ट्वाधुनाल्पोऽयं देवि! प्राणप्रदः सुहृत् । सार्थवाहसुतः श्रीमान् वसुदत्तो मया स्तुतः ॥")

प्राणभास्वान्, [त्] पुं, (प्राणेन वायुना चलेन वा भास्वान् उद्दीप्तः ।) वसुदः । इति शब्द-रत्नावली ॥

प्राणमयकोषः, पुं, (प्राणमयः कोषः आच्छादकः ।) कर्म्मेन्द्रियसहितप्राणादिपञ्चकम् । इति वेदान्त-सारः ॥

प्राणसंयमः, पुं, (प्राणानां संयमः ।) प्राणा-यामः । यथा, "तद्भक्तौ तत्तदुर्यमेवं प्राणस्य संयमः ॥" इति तन्त्रसारः ।

प्राणसद्म, [न्] क्ली,) प्राणानां सद्म गृहम् ।) शरीरम् । इति केचित् ॥

प्राणसमा, स्त्री, (प्राणानां समा ।) पत्नी । इति हेमचन्द्रः । ३ । १८० ॥ (यथा, गीतगोविन्दे । १ । ३८ ।

"नीवन्ते पथिकैः कथं कथमपि ध्यानावधानक्षण-
प्राप्तप्राणसमासमागमरसोल्लासैरमी वासराः ॥"

प्राणतुल्ये, त्रि । यथा, रामायणे ।१।१।८६।

"रामस्य दयिता भार्य्या नित्यं प्राणसमा हिता ।"

तथा च तत्रैव । २ । ३१ । १० ।

"प्रियः प्राणसमो वश्यो विधेयश्च सखा च मे ॥"

पत्नी, पुं । इति हेमचन्द्रः । ३ । १८० ॥)

प्राणहारकं, क्ली, (प्राणान् हरतीति । हृ + ण्वुल् ।) वत्सनाभः । इति राजनिर्घण्टः ।

प्राणाः, पुं, (प्राणन्तिभिरिति । प्र + अन + करणे (मन् ।) असवः । इत्यमरः । २ । ८ । ११८ ।

"हे अङ्गसन्निहितेषु पञ्चवायुषु । अस्यन्ते असवः नास्मीति उः । प्राणिति एभिः प्राणाः षच् । एवमिति असुवत् प्राणा अपि पुं बहुत्वे इत्यर्थः । असुप्राणशब्दाभ्यां बहुवचनान्ताभ्यां पञ्चप्राणा-दय उच्यन्ते न पुनरेकैकाभिधाने बहुवचनम् अतएव प्राणोऽपान इत्युक्तं हृदि प्राणो गुदे-ऽपान इत्यादि च दृश्यते ।" इति तट्टीकायां भरतः ॥ (यथा हितोपदेशे । १ । ७३ ।

"प्राणा यथात्मनोऽभीष्टा भूतानामपि ते तथा ।
आत्मौपम्येन भूतानां दयां कुर्व्वन्ति साधवः ॥"

शरीरस्थपञ्चप्राणा यथा,—

"प्राणोऽपानः समानश्चोदानव्यानौ च वायवः ॥"
शरीरस्था इमे————————॥"

इत्यमरः । १ । १ । ६७ ॥

"इमे प्राणादयः पञ्च वायवः शरीरे तिष्ठन्ति ते च नियतस्थानस्थाः ॥ यदाहुः ।

'हृदि प्राणो गुदेऽपानः समानो नाभि-
संस्थितः ।
उदानः कण्ठदेशे च व्यानः सर्व्वशरीरगः ॥'

एवं तद्व्यापाराश्च यथा,—

"व्यानप्रवेशनं सत्त्वादुत्सर्गोऽन्नविपाचनम् ।
भाषणादिनिमेषादितद्व्यापाराः क्रमादमी ॥"

इति च भरतः ॥

प्राणकराणि यथा,—

"सद्योमांसं नवान्नञ्च बालास्त्री क्षीरभोजनम् ।
घृतसद्योदकञ्चैव सद्यः प्राणकराणि षट् ॥"

प्राणहराणि यथा,—

"शुष्कं मांसं स्त्रियो वृद्धा बालार्कस्तरुणं दधि ।
प्रभाते मैथुनं निद्रा सद्यःप्राणहराणि षट् ॥"

इति चाणक्यकर्म्मलोचने ॥

प्राणवियोगकालकर्त्तव्यं यथा,—

"कण्ठस्थानं गते जीवे भीतिविभ्रान्तमानसः ।
ज्ञात्वा च विह्वलं तत्र क्षिप्रं निःसारयेद्गृहात् ।
क्षुत्तृष्णात्तरुणश्चैव दिग्रः सर्व्वा न पश्यति ।
लब्धलुप्तिमुपैत्यन्तु यावज्जीवो न नश्यति ॥
वाचयेत् स्वेहभावेन भूमौ दर्भा द्विजातयः ।
सुवर्णञ्च हिरण्यञ्च यथोत्पन्नेन माधवि ॥
परलोकहिताधाय गोप्रदानं विशिष्यते ।
सर्व्वदेवमया गावः ईश्वरैरुपवर्णिताः ॥
चरन्तं चरयन्तञ्च प्रचरन्ति महीतले ।
एतासाञ्चैव दानेन क्षिप्रं मुच्येत किल्बिषात् ॥
यस्मात् स्तनपयं दिव्यमृतकर्म्मेण च श्रावयेत् ॥
यावत्प्राणान् प्रमुञ्चेत कृत्वा कर्म्म सुदुष्करम् ।
दृष्ट्वा सुविह्वलं स्नेहं मम मार्गानुसारिणम् ।
प्रयाणकाले तु नरो मन्त्रेण विधिपूर्व्वकम् ॥
मन्त्रेणानेन कर्त्तव्यं सर्व्वसंसारमोचनम् ।
मधुपर्के चरन् गच्छ इदं मन्त्रमुदाहरेत् ।"

मन्त्रः ।

"गृहाण चेमं मधुपर्कमाद्यं
संसारनाशनकरं चरणेन तुल्यम् ।
नारायणेन रचितं भगवत्-प्रियाणां
हार्दं च शान्तिकरणं सुरलोकपूज्यम् ॥

तत एतेन मन्त्रेण दद्याद्दे मधुपर्ककम् ।
पुरुषो ऋतुकाले तु परलोकसुखावहम् ॥
एवं विनिःसृतान् प्राणात् संसारञ्च न गच्छति ।
नरसंज्ञं सहस्रिञ्च ज्ञात्वा ऋतुवधं मनम् ।
महावनस्थितं गत्वा गत्वाञ्च विविधानपि ॥
घृततैलसमायुक्तं कृत्वा वै देहशोधनम् ॥
तेजोमयकरं वास्य तत्कर्म्म परिकल्प्य च ।
दक्षिणायां शिरः कृत्वा सलिले तं निधाय च ॥
तीर्थावाहनं कृत्वा स्नापनं तस्य कारयेत् ॥
गयादीनि च तीर्थानि ये च पुण्याः शिलोच्चयाः ।
कुरुक्षेत्रञ्च गङ्गा च यमुना च सरिद्वरा ।
कौशिकी च पयोष्णी च सर्व्वपापप्रणाशिनी ।
गण्डकी भद्रनामा च सरयूर्बलदा तथा ॥
वनानि नववाराहं तीर्थं पिण्डारकं तथा ।
पृथिव्यां यानि तीर्थानि चत्वारः सागरास्तथा ।
सर्व्वाणि मनसा ध्यात्वा स्नानमेवन्तु कारयेत् ॥
प्राणाङ्गतन्तु तं ज्ञात्वा चितां कृत्वा विधानतः ।
तस्या उपरि तं स्थाप्य दक्षिणाग्रं शिरस्तथा ॥
देवानभिमुखान् ध्यात्वा गृह्य हस्ते हुताशनम् ।
प्रज्वाल्य विधिवत्तत्र मन्त्रमेतदुदाहरेत् ॥"

मन्त्रः ।

"कृत्वा तु दुष्करं कर्म्म जानता वाप्यजानता ।
ऋतुकालवधं प्राप्य नरः पञ्चत्वमागतः ॥
धर्म्माधर्म्मसमायुक्तो लोभमोहसमावृतः ।
देहेयं तस्य गात्राणि दैवलोकाय गच्छतु ।
एवमुक्त्वा ततः शीघ्रं ज्ञात्वा चैव प्रदक्षिणम् ।
ज्वलमानं तदा वह्निं शिरःस्थाने प्रदापयेत् ॥
चातुर्व्वर्ण्येषु संस्कारमेवमाहुर्मनीषिणः ।
गात्राणि वाससी चैव प्रक्षाल्य विनिवर्त्तयेत् ॥
मृतनाम तथोद्दिश्य दद्यात् पिण्डं मनीषिणः ।
तदाप्रभृति चाशौचं देवकर्म्म न कारयेत् ॥"

इति वराहपुराणे आद्योत्पत्तिनामाध्यायः ।

प्राणा, स्त्री, (प्राणिति बहुकालमिति । प्र + अन + अच् । टाप् ।) पक्षिणीविशेषः । सा चारुगात्रयष्ट्योः भवति । यथा,—

"पुलहस्यात्मजः सर्गः प्राणायास्तु निबोधत ।
कन्याः षष्टिरिति ख्याताः प्राणायाश्च विजज्ञिरे ।
श्येनी भासी तथा क्रौञ्ची धृतराष्ट्री शुनी शुकी ।
शुकस्य भार्य्या श्येनी वै तस्यां श्येनाश्च सप्तवै ॥
सम्पातिश्च जटायुश्च प्रहस्तो पक्षिणस्त्रयः ।
सम्पातिर्जनयत् पुत्रान् काकः पुत्रा जटायुषः ।
भार्य्या गरुत्मतश्चापि भासी क्रौञ्ची शुनी शुकी ।"

इत्यग्निपुराणम् ॥

प्राणाधिनाथः, पुं, (प्राणानामधिनाथः ।) पतिः । इति हलायुधः । २ । ३४२ ।

प्राणापानौ, पुं, (प्राणश्च अपानश्च तौ । तदा-त्मकौ वायू । यथा, विष्णुपुराणे ।६।७।८१।

"परस्परेणाभिभवं प्राणापानौ यदाश्रितौ ॥")

अश्विनीकुमारौ । यथा,—

"प्राणापानौ कथं देवावश्विनौ संबभूवतुः ॥"

इति प्रजामालाग्रन्थे ।

महातपा उवाच ।
"तस्यां त्वाष्ट्र्यामभरद्यां मार्कण्डस्तीव्रतेजसा ।
बीजं निर्व्यापयामास तच्चलं तद्विधापतत् ॥
तच्च प्राणत्वमापन्न योनौ चात्मजिनौ पुरा ।
वरदानेन च पुनर्जिमन्तौ प्रभूवतुः ॥
तौ त्वाष्ट्र्यामभरद्विप्रयां जातौ येन नरोत्तमौ ।
ततस्तावश्विनौ देवौ कीर्त्येते रविनन्दनौ ॥"
इति वाराहे अश्विनोत्पत्तिनामाध्यायः ॥

प्राणायामः, पुं, (प्राणस्य वायुविशेषस्य आयामो रोधः । यद्वा, प्राण आयम्यतेऽनेनेति । आ + यम् + करणे घञ् ।) योगाङ्गविशेषः । (यथा. भागवते । ३ । २८ । ११ ।
"प्राणायामैर्दहेद्दोषान् धारणाभिश्च किल्बिषान् ।
प्रत्याहारेण संसर्गान् ध्यानेनानीश्वरान् गुणान् ॥")

तत्राङ्गुलिनियमो ज्ञानार्णवे ।
"कनिष्ठानामिकाङ्गुष्ठैर्नासापुटधारणम् ।
प्राणायामः स विज्ञेयस्तर्जनीमध्यमे विना ॥"
स द्विविधः । सगर्भो निर्गर्भश्च । तथा च ।
सगर्भो मन्त्रजापेन निर्गर्भो मात्रया भवेदिति ।
मात्रा च ।
"वामजानुनि तद्धस्तभ्रामणं यावता भवेत् ।
कालेन मात्रा सा ज्ञेया मुनिभिर्वेदपारगैः ॥"
अथ प्राणायामः । मूलमन्त्रस्य बीजस्य प्रणवस्य वा षोडशवारजपेन वामनासापुटे वायुं पूरयेत् । तस्य चतुःषष्टिवारजपेन वायुं कुम्भयेत् । तस्य द्वात्रिंशद्वारजपेन वायुं रेचयेत् । पुनर्दक्षिणेनापूर्य उभाभ्यां कुम्भयित्वा वामेन रेचयेत् । पुनर्वामेनापूर्य उभाभ्यां कुम्भयित्वा दक्षिणेन रेचयेत् । तथा च कालीहृदये ।
"प्राणायामत्रयं कुर्यान्मूलेन प्रणवेन वा ।
अथवा मन्त्रबीजेन यथोक्तविधिना सुधीरिति ॥"
सारसमुच्चयेऽपि ।
"विपरीतमतो विदधीत बुधः
पुनरेव तु तद्विपरीतक्रमिति ॥"
यौगिके पुनर्मात्रानियमः । तथा च गौतमीये ।
"मन्त्रः प्राणायामः प्रोक्तो यौगिकं कथयामि ते ।
पूरयेद्वामया विद्वान् मात्रायोडशसंख्यया ॥"
यद्वा, चतुःषोडशवारजपेन पूरकादिकं कुर्यात् । अथवा एकचतुर्द्विवारेण । तथा च तन्त्रान्तरे ।
"पूरयेत् षोडशभिर्वायुं धारयेत्तच्चतुर्गुणैः ।
रेचयेत् कुम्भकार्द्धेन त्र्यङ्गुला तत्तुरीयकैः ॥"
तदशक्तौ तत्तुर्यमेव प्राणस्य संयमः । अस्य नित्यत्वमाह तत्रैव ।
"प्राणायामं विना मन्त्रपूजने नहि योग्यता ॥"
गोपाले तु विशेषो यथा,—
कामबीजस्वैकवारजपेन दक्षिणनासया वायुं रेचयेत् । पुनः सप्तवारजपेन वामनासया वायुं पूरयेत् । नासापुटौ धृत्वा विंशतिवारजपेन वायुं कुम्भयेत् । पुनर्वामेन रेचयेत् । दक्षिणेन पूरयेत् । उभाभ्यां कुम्भयेत् । पुनर्दक्षिणेन रेचयेत् । वामेनापूर्य उभाभ्यां कुम्भयेत् । तथा च ।
"एकेन रेचयेत् कामबीजेनैव पृथक् पृथक् ।
पूरयेत् सप्तजप्तेन विंशत्या तेन धारयेत् ॥
सर्व्वेषु कुम्भमन्त्रेषु बीजेनानेन रेचयेत् ॥"
यदा मूलमन्त्रेणैव प्राणायामः । तथा च ।
"पवनसंयमनस्त्वनुचारयन्
यमिह जप्तमसौ मनुमिच्छति ।"
यदि दशाक्षरं जपति तदा दशाक्षरेण चैतच्च चाष्टाविंशतिवारं रेचयेत् ।
"पूरयेद्वामया तद्वद्धारयेत्तत्प्रमाणतः ।
प्राणायामो भवेदेको रेचपूरककुम्भकैः ॥
अष्टादशाक्षरेण चेत् द्वादशैवं समाचरेत् ॥"
अत्रमनुभिर्वर्णानुरूपमित्युक्तत्वात् ।
तत्तन्मन्त्रवर्णसंख्याके रेचकादित्रयं कुर्य्यात् ।
क्रमदीपिकायाम् । रेचयेन्मारुतं दक्षया दक्षिणः । पूरयेद्वामया मध्यनाड्या पुनर्धारयेदित्यादि । एतत्तु श्रीकृष्णमन्त्रविषयं नान्यत्र ।
इति तन्त्रसारः ॥ * ॥ अपि च ।
"आसनं पद्मकाद्युक्तं प्राणायामो मरुज्जयः ।
मन्त्रध्यानयुतो गर्भो विपरीतो ह्यगर्भकः ॥
अगर्भात्तु सगर्भस्यः प्राणायामस्ततोऽधिकः ।
एवं द्विधा त्रिधापुक्तः पूरणात् पूरकः स च ॥
कुम्भको निश्चलत्वात् स रेचनाद्रेचकस्त्रिधा ।
लघुर्द्वादशमात्रः स्याच्चतुर्विंशतिकः परः ॥
षट्त्रिंशन्मात्रिकः श्रेष्ठः प्रत्याहारस्य रोधनम् ॥"
इति गारुडे ४६ अध्यायः ॥ * ॥
तस्य फलं यथा,—
"प्रथमे जनयेत् स्वेदं मध्यमेन च वेपथुम् ।
विघातं हि तृतीयेन जयेद्दोषाननुक्रमात् ॥"
इति तत्रैव २३० अध्यायः ॥ * ॥
अन्यच्च ।
"यथा पर्व्वतधातूनां ध्मातानां दह्यते मलम् ।
तथेन्द्रियकृता दोषा दह्यन्ते प्राणनिग्रहात् ॥
प्रथमं साधनं कुर्य्यात् प्राणायामस्य योगवित् ।
प्राणापाननिरोधस्तु प्राणायाम उदाहृतः ॥
लघुमध्योत्तरीयास्त्रः प्राणायामस्त्रिधोदितः ।
तस्य प्रमाणं वक्ष्यामि तदत्रैकं शृणुष्व मे ॥
लघुर्द्वादशमात्रस्तु द्विगुणः स तु मध्यमः ।
त्रिगुणाभिश्च मात्राभिरुत्तरीय उदाहृतः ॥
निमेषोन्मेषणे मात्रा तालो लघ्वक्षरो मतः ।
प्राणायामस्य संख्यार्थं स्मृतो द्वादशमात्रकः ॥
प्रथमे जनयेत् स्वेदं मध्यमेन तु वेपथुम् ।
विघातं हि तृतीयेन जयेद्दोषाननुक्रमात् ॥
स्फुटत्वं सेध्यमानासु सिध्यन्मात्रासु जन्तुजाः ।
यथा यान्ति तथा प्राणो वश्यो भवति योगिनः ॥
वश्यं वन्यं यथेच्छातो नागं नयति हस्तिपः ।
तथैव योगी छन्देन प्राणं नयति साधितम् ॥
यथा हि साधितः सिंहो नृगान् हन्ति न मानुषान् ।
तद्वन्निषिद्धः पवनः किल्बिषं न वृथा तनुम् ॥

तस्माद्युक्तः सदा योगी प्राणायामपरो भवेत् ।
शृणुतां मुक्तिफलदं तस्यावस्थाचतुष्टयम् ॥
ध्वस्तिः प्राग्लघुना सम्वित्प्रसादश्च मध्यमे ।
स्वरूपं शृणु चैतेषां कथ्यमानमनुक्रमात् ॥
कर्म्मणामिष्टदुष्टानां जायते फलसंचयः ।
चेतसो विकथायत्नं यत्र सा ध्वस्तिरुच्यते ॥"
इष्टदुष्टानां पुण्यपापानाम् ।
"ऐहिकामुष्मिकान् कामान् लोभमोहात्मकांश्च यान् ।
निरुध्यास्ते सदा योगी प्राप्तिः सा सार्व्वकामिकी ॥
अतीतानागतानर्थान् विप्रकृष्टतिरोहितान् ।
विजानन्तीन्द्रियार्थेभ्यो ज्ञानसम्पदा ॥
तुल्यप्रभावस्तु यदा योगी प्राप्नोति सम्विदम् ।
तदा सम्विदिति ख्याता प्राणायामस्य सा स्थितिः ॥
यान्ति प्रसादं येनास्य मनः पञ्च च वायवः ।
इन्द्रियार्थेन्द्रियार्थाश्च स प्रसाद इति स्मृतः ॥
शृणुष्व च महीपाल ! प्राणायामस्य लक्षणम् ।
युञ्जतश्च यथायोगं यादृग्विच्छितमानसम् ॥"
इति मार्कण्डेयपुराणे योगिचिकित्सानामाध्यायः ॥ * ॥ अन्यच्च ।
"प्राणाख्यमनिलं वश्यमभ्यासात् कुरुते तु यत् ।
प्राणायामः स विज्ञेयः सबीजोऽबीज एव च ॥
परस्परेणाभिभवं प्राणापानौ यदानिलौ ।
कुरुतः सद्विधानेन तृतीयः संयमात् तयोः ॥
तस्य चालम्बनवतः स्थूलरूपं द्विजोत्तम ! ।
आलम्बनमनन्तस्य योगिनोऽभ्यसतः स्मृतम् ॥"
एतेषां टीका। प्राणायाममाह प्राणाख्यमिति । सबीजः सालम्बनो भगवन्मूर्त्तिध्यानमन्त्रजपसहितः । द्विविधस्यापि तस्य पुनर्विधिमाह परस्परेणेति । उच्छ्वासेन सुखनासिकाभ्यां बहिर्निर्गच्छति वायुः स प्राणः । निश्वासेनान्तः प्रविशति यः सोऽपानः । तत्र प्राणवृत्त्यापानवृत्तेरभिभवो निरोधो रेचकाख्यः प्राणायामः । एवमपानवृत्त्या प्राणवृत्तेरभिभवः पूरकाख्यः । एवमनेन परस्पराभिभवप्रकारद्वयेन स प्राणायामो द्विधा । तयोर्युगपत्संयमात् कुम्भकाख्यस्तृतीयः प्राणायामः । यद्वा । सद्विधानेनैकमेव पदम् । तत्र चायमर्थः । सद्विधानेन सद्गुरूपदिष्टमार्गेण रेचकपूरकाभ्यां यत् परस्पराभिभूतं हृयं यच्च कुम्भकेनोभयोः समाभिभवः । एवमभिभवत्रयेणैव प्राणायाम इति । सबीजस्यालम्बनमाह । तस्य चेति । मूलं वक्ष्यमाणं हिरण्यगर्भादिरूपम् ।" इति विष्णुपुराणे ६ अंशे ७ अध्यायः ॥ * ॥ गायत्री प्राणायामो यथा,—
"सप्तव्याहृतिं सप्रणवां गायत्रीं शिरसा सह ।
त्रिः पठेदायतप्राणः प्राणायामः स उच्यते ॥
प्राणायामत्रयं कृत्वा प्राणायामैस्त्रिभिस्त्रिभिः ।
अहोरात्रकृतात् पापान्मुच्यते नात्र संशयः ॥
सर्व्वपापहरं प्रोक्तं प्राणायामं द्विजन्मनाम् ।

तत्स्नध्यधिकं शक्ति तपः परमपावनम् ॥
प्राणसंधारणं मासं कृशाग्रयुतबिन्दुना ।
यः कुर्यात् प्रयतो नित्यं प्राणायामस्तु तत्समः ॥
निरोधाच्छ्वायते वायुस्तस्मादग्निस्ततो जलम् ।
त्रिभिः शरीरं सकलं प्राणायामेन शुद्ध्यति ॥
आत्रेयादानखाग्राच्च तप्तस्तप्तेन सुदारुणम् ।
आत्मानं शोधयेद्यस्तु प्राणायामैः पुनः पुनः ॥
श्रावण्यां पौर्णमास्यां च सोपवासो जितेन्द्रियः ।
प्राणायामशतं कृत्वा शुचते सर्व्वकिल्बिषैः ॥"
इत्यग्निपुराणम् ॥

प्राणिद्यूतं, क्ली, (प्राणिभिर्मेषादिभिः कृतं द्यूतमिति मध्यपदलोपी समासः ।) पशुपूर्व्वकमेषकुक्कुटादिद्युद्धम् । तत्पर्य्यायः । समाह्वयः २ । इत्यमरः । २ । १० । ४६ ॥ वाह्वयः ३ । इति शब्दरत्नावली ॥

प्राणिमाता, स्त्री, (प्राणिनां मातेव गर्भदात्रत्वात् ।) गर्भदात्रीत्युपः । इति राजनिर्घण्टः ॥

प्राणिहिता, स्त्री, (प्राणिनां हिता ।) पादुका । इति चिकाण्डशेषः ॥ लोकहितकारिणी च ॥

प्राणी, [न्] त्रि, (प्राणाः सन्त्यस्येति । प्राण + "अत इनिठनौ ।"५ । २ । ११५ । इति इनिः ।) प्राणविशिष्टः । मनुष्यादिः । तत्पर्य्यायः । चेतनः २ जन्तुः ३ जन्तुः ४ शरीरी ५ । इत्यमरः । १ । ४ । ३० ॥ (यथा, मनौ । १ । २२ ।
"कर्म्मात्मनाञ्च देवानां सोऽसृजत् प्राणिनां प्रभुः ।
साध्यानाञ्च गणं सूक्ष्मं यज्ञञ्चैव सनातनम् ॥")

प्राणील, क्ली, (प्रणीतस्य प्रयोजितस्य भावः । प्रणीत + ष्यञ् ।) क्रमम् । यथा, चिकाण्डशेषः ।
"प्राणीलन्दमघानां प्रयोगः स्यात् क्रमात्मिका ॥"

प्राणेशः, पुं, (प्राणानामीशः ।) पतिः । इति जटाधरः ॥ (यथा, साहित्यदर्पणे ३ परिच्छेदे ।
"स्वामिन् ! भङ्गुरयालकं सतिलकं भालं विलासिन् ! कुरु
प्राणेश ! च्युतितं पयोधरतटे हारं पुनर्योजय ॥")

प्राणेशा, स्त्री, (प्राणानामीशा ।) भार्य्या । इति हेमचन्द्रः ॥

प्रातः, [र्] अ, (प्रातर्तीति । प्र + अत् + "प्रातते रन् ।" उणा० ५ । ५६ । इति अरन् ।) प्रभातम् । तत्पर्य्यायः । प्रगे २ । इत्यमरः । ३ । ४ । १६ ॥ सूर्य्योदयावधिविसुहूर्त्तकालः । यथा,—
"प्रातःकालो मुहूर्त्तौस्तौ सङ्गवस्तावदेव तु ॥"
इति तिथ्यादितत्त्वम् ॥
(यथा, ऋचौ । १ । ६० । —
"प्रथमा प्रातरन्ने तु नाम प्रत्यहृत्रवेदयि ॥")

प्रातःस्नानं, क्ली, (प्रातः प्रभातकालस्य कृत्य कर्त्तव्या क्रिया ।) प्रभातकर्त्तव्यकर्म्म । तदनुष्ठानं यथा,
"ब्राह्मे मुहूर्त्ते उत्थाय धर्म्ममर्थञ्च चिन्तयेत् ।
कायक्लेशञ्चतद्मूलं ध्यायेच्च मनसेश्वरम् ॥
उषःकालेऽथ संप्राप्ते कृत्वा चावश्यकं बुधः ।
स्नायान्नदीषु सुप्तासु शौचं कृत्वा यथाविधि ॥
प्रातःस्नानेन शुध्यन्ति वेऽपि पापकृतो जनाः ।
तस्मात् सर्व्वप्रयत्नेन प्रातःस्नानं समाचरेत् ॥
प्रातःस्नानं प्रशंसन्ति दृष्टादृष्टफलं शुभम् ।
ऋषीणां शुचिता नित्यं प्रातःस्नानान्न संशयः ॥
सुप्ते सुप्तस्य सततं लालाद्याः प्रस्रवन्ति हि ।
ततो नैवाचरेत् कर्म्माण्यकृत्वा स्नानमादितः ॥
अलक्ष्मीः कालकर्णी च दुःस्वप्नं दुर्विचिन्तितम् ।
प्रातःस्नानेन पापानि प्रयान्ते नात्र संशयः ॥
न च स्नानं विना पुंसां पावनं प्रत्यहं स्मृतम् ।
होमे जप्ये विशेषेण तस्मात् स्नानं समाचरेत् ॥
अशक्तावशिरस्कं वा स्नानमस्य विधीयते ।
आर्द्रेण वाससा चाथ मार्জनं कायिकं स्मृतम् ॥
अप्रायश्चे समुत्पन्ने स्नानमेव समाचरेत् ।
ब्राह्मादीनि यथाशक्तौ स्नानान्याहुर्म्मनीषिणः ॥
ब्राह्ममाग्नेयमुद्दिष्टं वायव्यं दिव्यमेव च ।
वारुणं यौगिकं नवमं योगाख्यानं प्रकीर्त्तितम् ॥
ब्राह्मन्तु मार्জनं मन्त्रैः कुशैः सोदकबिन्दुभिः ।
आग्नेयं भस्मना गात्रमस्त्रकादिविधूननम् ॥
गवां हि रजसा प्रोक्तं वायव्यं स्नानमुत्तमम् ।
यत्तु स्नानपदार्थेन स्नानमद्भिरनुच्यते ॥
वारुणस्नानमाख्यातं योगो विष्णुविचिन्तनम् ॥
आत्मतीर्थमिति ख्यातं सेवितं ब्रह्मवादिभिः ॥
मनःशुचिकरं पुंसां नित्यमेतत्स्नानमाचरेत् ।
भक्तश्चेद्दारुणं विद्वान् प्रायश्चित्तञ्चरेच्च ॥
प्रक्षाल्य दन्तकाष्ठं वै भक्षयित्वा विधानतः ।
आचम्य प्रयतो नित्यं स्नानं प्रातः समाचरेत् ॥
मध्याङ्गुलसमस्थौल्यं द्वादशाङ्गुलसम्मितम् ।
सत्वक्त्वं दन्तकाष्ठं स्यात्तस्याग्रेण च धावयेत् ॥
क्षीरिवृक्षसमुद्भूतं मालतीसम्भवं शुभम् ।
अपामार्गञ्च बिल्वञ्च करवीरं विशेषतः ॥
वर्জयित्वा निन्दितानि गृहीत्वैतेन यथोदितम् ।
परिक्षाल्य दिनं पापं भक्षयित्वा विधानतः ॥
नीत्वापाटवेद्दन्तकाष्ठं नाङ्गुल्या धावयेत् क्वचित् ।
प्रक्षाल्य मुक्त्वा तच्चाक्ष्णोर्द्वे हस्ते समाहितः ॥
स्नात्वा सन्तर्पयेद्देवानृषीन् पितृगणांस्तथा ।
सम्मार्ज्यमन्त्रैरात्मानं कुशैः सोदकबिन्दुभिः ॥
आपोहिष्ठादितिभिः सावित्र्या वारुणैः शुभैः ।
ॐकारव्याहृतियुता गायत्री देवमातरम् ।
जप्त्वा जलाञ्जलिं दद्याद्भास्करं प्रति तन्मनाः ॥
प्राक्कूलेषु समासीनो दर्भेषु सुसमाहितः ।
प्राणायामत्रयं कृत्वा ध्यायेत् सन्ध्यामिति स्मृतिः ॥
या सन्ध्या सा जगत्सृतिर्मायातीता च निष्कला ।
ऐश्वरी तु परा शक्तिस्तत्सन्नस्तसमुद्भवा ॥
ध्यात्वार्कमण्डलगतां सावित्रीं वै जपन् बुधः ।
प्राक्शुचिः सततं विप्रः सन्ध्योपासनमाचरेत् ॥
सन्ध्याहीनोऽशुचिर्नित्यमनर्हः सर्व्वकर्म्मसु ।
यदन्यत् कुरुते किञ्चित् न तस्य फलमाप्नुयात् ॥
अनन्यचेतसः शान्ता ब्राह्मणा वेदपारगाः ।
उपास्य विधिवत् सन्ध्यां प्राप्नुवन्ति परमां गतिम् ॥
योऽन्यत्र कुरुते यत्नाद्दर्म्मकार्य्यं द्विजोत्तमः ।
विहाय सन्ध्याप्रणतिं स याति नरकायुतम् ॥
तस्मात् सर्व्वप्रयत्नेन सन्ध्योपासनमाचरेत् ।
उपासितो भवेत्तेन देवो योगतनुः परः ॥
सहस्रपरमां नित्यं शतमध्यां दशावराम् ।
सावित्रीं वै जपेद्विद्वान् प्राङ्मुखः प्रयतः स्थितः ॥
अधोपतिष्ठेदादित्यमुदयन्तं समाहितः ।
मन्त्रैस्तु विविधैः सौरैर्ऋग्यजुःसामसम्भवैः ॥
उपस्थाय महायोगं देवदेवं दिवाकरम् ।
कुर्व्वीत प्रणतिं भूमौ स्पृष्ट्वा नित्यञ्च मस्तकम् ॥
ॐ खं खखोल्काय शान्ताय कारणत्रयहेतवे ।
निवेदयामि चात्मानं नमस्ते ज्ञानरूपिणे ॥
नमस्ते रुद्रये तुभ्यं सूर्य्याय ब्रह्मरूपिणे ।
त्वमेव ब्रह्म परममायो ज्योती रसोऽमृतम् ॥
भूर्भुवः स्वस्त्रयोङ्कारः सर्व्वं रुद्रः सनातनः ।
पुरुषः सन्महोऽन्तस्थां प्रणमामि कपर्द्दिनम् ॥
त्वमेव विश्वं बहुधा सदसत् स्वयसे च यत् ।
नमो रुद्राय सूर्य्याय त्वामहं शरणं गतः ॥
प्राचेतसे नमस्तुभ्यमुमायाः पतये नमः ।
नमोऽस्तु नीलग्रीवाय नमस्तुभ्यं पिनाकिने ॥
विलोहिताय भर्गाय सहस्राक्षाय ते नमः ।
नम उमापतये तुभ्यमादित्याय नमोऽस्तु ते ॥
नमस्ते बहुरूपाय त्र्यम्बकाय नमोऽस्तु ते ।
प्रपद्ये त्वां विरूपाक्ष ! महान्तं परमेश्वरम् ॥
हिरण्मये गृहे गुप्तमात्मानं सर्व्वदेहिनाम् ।
नमस्यामि परं ज्योतिर्न्नाथं त्वां पराङ्गतम् ॥
विश्वं पशुपतिं भीमं नरनारीशरीरिणम् ।
नमः सूर्य्याय रुद्राय भास्वते परमेष्ठिने ॥
उग्राय सर्व्वभक्षाय त्वां प्रपद्ये सदैव हि ॥
एतद्वै सूर्य्यहृदयं जप्त्वा स्नात्वमनुत्तमम् ।
प्रातःकालेऽथ मध्याह्ने नमस्कुर्य्यादिवाकरम् ॥
इदं पुत्राय शिष्याय धार्म्मिकाय द्विजातये ।
प्रदेयं सूर्य्यहृदयं ब्रह्मणा तु प्रदर्शितम् ॥
सर्व्वपापप्रशमनं वेदसारं समुद्धृतम् ।
ब्राह्मणानां हितं पुण्यं ऋषिसंवेदनैर्विनम् ॥
यस्तु नित्यं पठेद्भक्त्या प्रेक्षन्नादित्यमण्डलम् ।
महापातकयुक्तोऽपि मुच्यते नात्र संशयः ॥
चयमस्मारकृष्णाद्यैर्व्याधिभिः पीड़ितोऽपि सन् ।
जप्त्वा मृत्युञ्जयं स्तोत्रं च ह्याद्यो भवति द्रुतम् ॥
भूतग्रहपिशाचादिनिर्जयजनकर्षिभिः ।
स्तुवन् ध्यात्वा हरिं विप्रो मुच्यते महतो भयात् ॥
अथागत्य गृहं विप्रः समाचम्य यथाविधि ।
प्रज्वाल्य वह्निं विधिवज्जुहुयाज्जातवेदसम् ॥
ऋत्विक्पुत्रोऽथ पत्नी वा शिष्यो वापि सहोदरः ।
प्राप्यानुज्ञां विशेषेण जुहुयुर्व्वा यथाविधि ॥
पवित्रपाणिः पूतात्मा शुक्लाम्बरधरोऽधरः ।
अनन्यमानसो भूत्वा जुहुयात् संयतेन्द्रियः ॥
विना दर्भेण यत् कर्म्म विना मन्त्रेण वा पुनः ।
राक्षसं तद्भवेत् सर्व्वं नासुरेषु फलप्रदम् ॥१॥

दैवतानि नमस्कुर्य्यादेवमारान्निवेदयेत् ।
दद्यात् पुष्पादिकं तेषां वृद्धांश्चैवाभिवादयेत् ।
गुरुञ्चैवाभ्युपासीत हितञ्चास्य समाचरेत् ।
वेदाभ्यासं ततः कुर्य्यात् प्रयत्नाच्छक्तितो द्विजः ॥
जपेदुधापयेच्छिष्यान् श्रावयेच्च विधारयेत् ।
अवेक्षेत च शास्त्राणि धर्म्मादीनि द्विजोत्तमः ॥
वेदिकांश्चैव नियमान् वेदाङ्गानि विशेषतः ।
उपेयादीश्वरञ्चाथ योगक्षेमप्रसिद्धये ॥
साधयेद्विविधानर्थान् कृटस्थार्थे ततो द्विजः ॥"
इति कौर्म्मे उपविभागे १७ अध्यायः ॥ * ॥

अपि च ।

"प्रातः शिरसि शुक्लाब्जे द्विनेत्रं द्विभुजं गुरुम् ।
प्रसन्नवदनं शान्तं स्मरेत्तत्रामपूर्व्वकम् ॥
ॐ नमो गुरवे तस्मा इष्टदेवस्वरूपिणे ।
यस्य वाक्यामृतं हन्ति विषं संसारसंज्ञकम् ॥"
इति पठेत् ॥

"अहं देवो न चान्योऽस्मि ब्रह्मैवास्मि न शोकभाक् ।
सच्चिदानन्दरूपोऽहं नित्यमुक्तस्वभाववान् ॥"
इति भावयेत् ।

"लोकेश ! चैतन्यमयादिदेव
श्रीकान्त विष्णो भवदाज्ञयैव ।
प्रातः समुत्थाय तव प्रियार्थं
संसारयात्रामनुवर्त्तयिष्ये ॥
जानामि धर्म्मं न च मे प्रवृत्ति-
र्जानाम्यधर्म्मं न च मे निवृत्तिः ।
त्वया हृषीकेश ! हृदि स्थितेन
यथा नियुक्तोऽस्मि तथा करोमि ॥"

विष्णुपुराणे ।

"प्रबुद्धश्चिन्तयेद्धर्म्ममर्थञ्चास्याविरोधिनम् ।
अपीड़या तयोः कामसुभयोरपि चिन्तयेत् ॥"

धर्म्मलक्षणन्तु भविष्ये ।

"धर्म्मः श्रेयः समुद्दिष्टं श्रेयोऽभ्युदयसाधनम् ॥"

अतएव जैमिनिः । चोदनालक्षणोऽर्थो धर्म्म इति । तेन वेदैकलिङ्गप्रतिपाद्योऽर्थो धर्म्मः । कोऽर्थो योऽभ्युदयाय इति तु भविष्ये ॥ * ॥

ततः ॐ प्रियदत्तायै भुवे नमः । इति नमस्कृत्य दक्षिणं चरणं न्यसेत् । छन्दोगपरिशिष्टम् ।

"श्रोत्रियं सुभगामग्निं गाञ्चैवाभिचितं तथा ।
प्रातरुत्थाय यः पश्येदापद्भ्यः स विमुच्यते ॥
पापिष्ठं दुर्भगां मद्यं नग्नमुत्कृत्तनासिकम् ।
प्रातरुत्थाय यः पश्येत्तत् कलेरुपलक्षणम् ॥"

अतएव व्यासः ।

"धनिनः श्रोत्रियो राजा नदी वैद्यस्तु पञ्चमः ।
पञ्च यत्र न विद्यन्ते तत्र वासं न कारयेत् ॥"

महाभारते ।

"कर्कोटकस्य नागस्य दमयन्त्या नलस्य च ।
ऋतुपर्णस्य राजर्षेः कीर्त्तनं कलिनाशनम् ॥"

मात्स्ये ।

"कार्त्तवीर्य्यार्জ্জুनो नाम राजा बाहुसहस्रवान् ।
योऽस्य संकीर्त्तयेन्नाम कल्यउत्थाय मानवः ॥
न तस्य वित्तनाशः स्यान्नष्टञ्च लभते पुनः ॥"

कल्यं प्रातः ॥ * ॥

अथ विष्णूच्चोत्सर्गः । विष्णुधर्म्मोत्तरे ।

"निद्रां जह्यादृषी राम ! नित्यमेवारुणोदये ।
वेगोत्सर्गं ततः कृत्वा दन्तधावनपूर्व्वकम् ॥
स्नानं समाचरेत् प्रातः सर्व्वकल्मषनाशनम् ॥"

अरुणोदयकालमाह स्कन्दपुराणम् ।

"उदयात् प्राक् चतस्रस्तु नाड़िका अरुणोदयः ।
तत्र स्नानं प्रशस्तं स्यात्तहि पुण्यतमं स्मृतम् ॥"

नाड़िका दण्डः । विष्णुधर्म्मोत्तरे ।

"वेगरोधं न कर्त्तव्यमन्यत्र क्रोधवेगतः ।"

आयुर्व्वेदीयेऽपि । न वेगितोऽन्यकार्य्यसिद्धिः स्यान्नाशित्वा साधयमायम् । अङ्गिराः ।

"उत्थाय पश्चिमे रात्रेस्तत आचम्य चोदकम् ।
अन्तर्द्धाय क्षणेभूमिं शिरः प्रावृत्य वाससा ॥
वाचं नियम्य यत्नेन क्षीवनोच्छ्वासवर्জ্জितः ॥
कुर्य्यान्मूत्रपुरीषे तु शुचौ देशे समाहितः ॥"

विष्णुपुराणम् ।

"ततः कल्यं समुत्थाय कुर्य्यान्मैत्रं नरेश्वर ! ।
नैर्ऋत्यामिषुविक्षेपमतीत्याभ्यधिकं भुवः ॥
तिष्ठेन्नातिचिरं तत्र नैव किञ्चिदुदीरयेत् ॥"

कल्यसुषःकालम् । मैत्रं मित्रदेवताकापायुसम्बन्धात् पुरीषोत्सर्गः । नैर्ऋत्यामित्यानदेशमारभ्य उत्थायेत्यनेन उपस्थितेः इषुप्रक्षेपयोग्यदेशाद्वहिः । तद्देशपरिमाणमाह पितामहः ।

"मध्यमेन तु चापेन प्रक्षिपेत्तु शरत्रयम् ।
हस्तानाञ्च शते सार्द्धे लक्ष्यं कृत्वा विचक्षणः ॥"

आपस्तम्बः ।

"मूत्रपुरीषोत्सर्गे कुर्य्याद्दक्षिणां दिशं दक्षिणापरां वेति ।" दक्षिणापरां नैर्ऋतीम् । मनुः ।

"मूत्रोच्चारसमुत्सर्गे दिवा कुर्य्यादुदङ्मुखः ।
दक्षिणाभिमुखो रात्रौ सन्ध्ययोश्च यथा दिवा ॥"

यत्तु यमवचनम् ।

"प्रत्यङ्मुखश्च मूत्रादौ त्वपराह्णे च प्राङ्मुखः ।
उदङ्मुखस्तु मध्याह्ने निशायां दक्षिणामुखः ॥"

इति तदिच्छाविकल्पार्थं सूर्य्याभिमुखनिरासार्थञ्च न तु नियमार्थं देवलवचनविरोधात् । तथा च देवलः ।

"सदैवोदङ्मुखः प्रातः सायाह्णे दक्षिणामुखः ।
विण्मूत्रमाचरेन्नित्यं सन्ध्यायां परिवर्জ্জयेदिति ॥"

अत्र प्रातःसायाह्णशब्दौ दिवारात्रिपरौ पूर्व्वोक्तमनुवचनैकवाक्यत्वात् । सन्ध्यायां परिवर्জ্জयेदिति तु पीड़ितेतरपरम् ॥ * ॥ यमः ।

"कृत्वा यज्ञोपवीतन्तु दृष्टतः कण्ठलम्बितम् ।
विण्मूत्रे च गृही कुर्य्यादृद्धा कर्णे समाहितः ॥"

दृष्टतः दृष्टे कण्ठलम्बितं निवीतं तत् दृष्टलम्बितं निवीतमाहृदेशावलम्बं ग्राम्यधर्म्मेष्विति निगमपरिशिष्टवचनात् ।

"नियम्य प्रयतो वाचं संवीताङ्गोऽवगुण्ठितः ।"
इति मनुवचनाच्च ॥

अत्र संवीतं निवीतं संवीतं मानुष इति तैत्तिरीयश्रुतेः । मानुषे सनकादिकल्पे । दृष्टलम्बितं निवीती नेति बौधायनीयाच्च । ततश्च हारवत्

कृत्वा दृष्टलम्बितं स्कन्धे इत्यर्थः । एकवस्त्रतापक्षे व्यवस्थामाह सांख्यायनः । यद्येकवस्त्रो यज्ञोपवीतं कर्णे कृत्वा अवगुण्ठित इति । कर्णे दक्षिणे । पवित्रं दक्षिणे कर्णे विण्मूत्रमाचरेदिति स्मृतौ तथा दर्शनात् । अवगुण्ठितः कृतशिरोऽवगुण्ठनः । मनुः ।

"छायायामन्धकारे वा रात्रावहनि वा द्विजः ।
यथासुखमुखः कुर्य्यात् प्राग्व्याधभयेषु च ॥"

महाभारते ।

"प्रत्यादित्यं प्रतिजलं प्रति गाञ्च प्रति द्विजम् ।
मेहन्ति ये च पथिषु ते भवन्ति गतायुषः ॥"

प्रतिः सांमुख्ये ॥ * ॥ मनुः ।

"न मूत्रं पथि कुर्व्वीत न भस्मनि न गोव्रजे ।
न फालकृष्टे न जले न चित्यां न च पर्व्वते ॥
न जीर्णदेवायतने न वल्मीके कदाचन ।
न ससत्त्वेषु गर्त्तेषु न गच्छन्नापि संस्थितः ॥
न नदीतीरमासाद्य न च पर्व्वतमस्तके ।
गवाग्निविप्रादित्यमपः पश्यंस्तथैव च ॥
न कदाचन कुर्व्वीत विण्मूत्रस्य विसर्জ্জनम् ॥"

ससत्त्वेषु प्राणिमत्सु । संस्थित उत्थितः । पर्व्वतनिषेधादेव मस्तकनिषेधे सिद्धे पुनर्निषेधो यत्र पर्व्वतोऽशक्यपरीहारस्तत्रापि मस्तकवर्জ্जनार्थः । अथवा । पर्व्वतमस्तकनिषेधोऽधिकदोषाय ॥ * ॥ वशिष्ठः ।

"आहारनिर्हारविहारयोगाः
सुसंवृता धर्म्मविदा तु कार्य्याः ।
वाग्बुद्धिगुप्तौ च नमस्तथैव
धनायुषी गुप्ततमे तु कार्य्ये ॥"

निर्हारो मूत्रपुरीषोत्सर्गः । विहारः स्त्रीसंभोगः । योगः समाधिः । वाग्गुप्तिरशुभालापत्यागः । बुद्धिगुप्तिरनिष्टचिन्तात्यागः । हारीतः ।

"आहारन्तु रहः कुर्य्यान्निर्हारञ्चैव सर्व्वदा ।
गुप्ताभ्यां लक्ष्यते ह्यात्मा प्रकाशे क्षीयते तथा ॥"

विष्णुपुराणम्

"सोमाग्न्यर्काम्बुवायूनां पूज्यानाञ्च न संमुखम् ।
कुर्य्यात् क्षीवनविण्मूत्रससुत्सर्गञ्च पण्डितः ॥"

आपस्तम्बः । "न च सोपानत्को मूत्रपुरीषे कुर्य्यादिति ।" हरिहन्मनुः ।

"करगृहीतपात्रेण कृत्वा मूत्रपुरीषके ।
मृत्तदुल्लन्तु पानीयं शौचे चान्नायवच्चरेत् ॥"

भरद्वाजः ।

"अधावल्लघ्यविण्मूत्रं लोष्टकाष्ठतृणादिना ।
उदक्प्लवासा उत्तिष्ठेदृष्टं विधृतमेहनः ॥" * ॥

उदक्प्लवासाः कटिदेशादूर्द्ध्वं छिन्नवस्त्रः ।

अथ शौचम् । देवलः ।

"धर्म्मविद्दक्षिणं हस्तमधःशौचे न योजयेत् ।
तथैव वामहस्तेन नाभेरूर्द्धं न शोधयेत् ।
प्रकृतिस्थितिरेषा स्यात् कारणादुभयक्रिया ॥"

कारणाद्रोगादेः । ब्रह्माण्डपुराणम् ।

"उद्धृतोदकमादाय मृत्तिकाञ्चैव वाग्यतः ।
उदङ्मुखो दिवा कुर्य्याद्रात्रौ चैवं दक्षिणामुखः ॥
मुनिर्निर्क्ते मृदं दद्यान्मृद्दन्ते त्वप एव च ।"

कुर्याच्छौचमिति शेषः। सुनिर्णिक्ते भरद्वाजोक्त-लोष्टादिप्रहरे गुदे। उदकपात्राभावे करेण जलाशयात् उदकग्रहणमाह आदित्यपुराणम्। "रात्रिमात्रं जलं यद्वा कुर्याच्छौचमशुद्धये। यच्चाप्यशौचवेलौर्ध्वसन्ध्या न शुचिर्भवेत्॥" तस्मिन् देशे शौचं कर्तव्यं यस्मादनिमाचमयव-हितं जलं तत्स्थलमेव तीर्थं जलसमीपत्वात्॥ ॥ विष्णुपुराणम्। "वल्मीकमूषिकोत्खातां मृदमन्तर्जलाप्लुताम्। शौचावशिष्टां गेहाच्च गादद्यालेपसम्भवाम्॥ अन्तःप्राण्यवपन्नाच्च हलोत्खातां सकर्दमाम्॥" मनुदर्शौ। "एका लिङ्गे गुदे तिस्रस्तथा वामकरे दश। उभयोः सप्त दातव्या मृदः शुद्धिमभीप्सता॥" उभयोः करयोः। वामहस्ते दशदानानन्तरं ततृष्टे षड्दानमाह हारीतः। दशमध्ये च षट् पृष्ठे इति। मृदादर्शौ। "तिस्रस्तु मृत्तिका देयाः शुद्ध्या तु नखशोधनम्। तिस्रस्तु पादयोर्देयाः शुद्धिकामेन नित्यशः॥" नखशोधनं मृदादिना नखान्तर्मलशोधनम्। तिस्र इति पूर्वयोरिति शेषः॥ ॥ पादप्रक्षालनं न कांस्ये कर्तव्यमित्याह विष्णु-धर्मोत्तरम्। "दर्भैर्न मार्ज्जयेत् पादौ न च कांस्ये प्रधावयेत्॥" दक्षः। "लिङ्गे तत्र समाख्याता त्रिपञ्चाशत् पूर्यते यया। अर्द्धप्रकृतिमात्रा तु प्रथमा मृत्तिका स्मृता॥ द्वितीया च तृतीया च तदर्द्धं परिकीर्त्तितम्॥" यदा तु उक्तप्रमाणया मृदा गन्धलेपक्षयो न भवति तदा अधिकयापि कर्त्तव्यम्। "गन्धलेपक्षयकरं शौचं कुर्यादतन्द्रितः॥" इति याज्ञवल्क्यवचनात्॥ मृदादन्यत्र परिमाणमाह यमः। "मृत्तिका तु समुद्दिष्टा त्रिपञ्चाशत् पूर्यते यया।" त्रिपञ्चाशत् तर्जनीमध्यमानामिकानामग्रपर्व-क्षयम्॥ ॥ सूत्रमात्रे तु स्मृतिः। 'एकां लिङ्गे मृदं दद्यात् वामहस्ते तु सप्तकम्। उभयोर्हस्तयोर्दद्यात् तु सप्तशौचं प्रकीर्त्तितम्॥" ब्रह्मपुराणे। "पादयोर्दत्तं गृहीत्वा च सुप्रक्षालितपाणिमान्। द्विराचम्य ततः शुद्धः स्मृत्वा विष्णुं सनातनम्॥" पादयोर्दत्तं एकैका। इदं सूत्रे पुरीषोत्सर्गे तिस्रां विधानात्॥ ॥ दक्षः। "यद्येतदिच्छेत् शौचमहः रात्रौ विधीयते। आतुरे च तदर्द्धं स्यात् तदर्द्धन्तु पथि स्मृतम्॥" यद्येतत्करणोक्तावेदं न तु निशादिपुरस्कारे-णैव वाक्यात्। अहरादर्थतायाम्॥ ॥ आपस्तम्बः। "पथि पादस्तु विप्रेण चार्द्रः कुर्यादृषावरुमा" मृतयोर्विरोधस्तु आर्द्रानार्द्राभ्यां परिहर-णीयः। दक्षः। "देहं कांस्यं तथाक्षांश्च दन्तं क्षयव्ययौ नवम्। उच्छिष्टमत्वाच्च ज्ञात्वा शौचं प्रकल्पयेत्॥" ब्रह्मपुराणे। "न यावद्दुपनीयेत द्विजः मूद्धरुचाङ्गना। गन्धलेपक्षयकरं शौचं तेषां विधीयते॥ प्रमाणं शौचसंख्या वा न शिष्टैरुपदिश्यते। यावच्च शुद्धिं मन्येत तावत् शौचं समाचरेत्॥" दक्षः। "न्यूनाधिकं न कर्त्तव्यं शौचं शुद्धिमभीप्सता। प्रायश्चित्तं प्रसज्येत विहितातिक्रमे कृते॥ शौचाचारविहीनस्य समस्ता निष्फलाः क्रियाः॥" गन्धलेपक्षये सत्यधिकं न कर्त्तव्यं पूर्व्वोक्तयाज्ञ-वल्क्यविरोधात्। गन्धलेपाक्षये त्वधिकसंख्या-यामपि। याज्ञवल्क्यवचनमनुपनीतादिपरं वा पूर्व्वोक्तब्रह्मपुराणैकवाक्यत्वात्॥ ॥ "एतच्छौचं गृहस्थानां द्विगुणं ब्रह्मचारिणाम्। त्रिगुणन्तु वनस्थानां यतीनाञ्च चतुर्गुणम्॥" इदन्तु द्वैगुण्यादिकं संख्यामात्रे तदनन्तराभि-धानात्। याज्ञपादः। "शौचन्तु द्विविधं प्रोक्तं बाह्यमाभ्यन्तरं तथा। मृज्जलाभ्यां स्मृतं बाह्यं भावशुद्धिस्तथापरम्॥ गङ्गातोयेन कृत्स्नेन मृद्भारैश्च नगोपमैः। आप्लुतो यः सातकृत्वैव भावदुष्टो न शुध्यति॥" स्मृतिः। "धावन्तश्च प्रमत्तश्च मूत्रोच्चारकृतन्तथा। भुञ्जानमाचमानश्च नास्तिकं नाभिवादयेत्॥ जन्मप्रभृति यत्किञ्चित् चेतसा धर्ममाचरेत्। सर्वं तन्निष्फलं याति एकहस्ताभिवादनात्॥" ऋष्यशृङ्गः। "यस्मिन् स्थाने कृतं शौचं वारिणा तद्विशोधयेत्। न शुद्धिस्तु भवेत्तस्य मृत्तिकां यो न शोधयेत्॥" शौचानन्तरं हारीतः। गोमयेन मृदा वा कामपूर्वं प्रदृष्टं पूर्ववदुपसृज्य आदित्यं सोम-मग्निं वा वीक्षेतेति। अत्र मार्जनानन्तरं क्षालनं अन्यत्र तथादर्शनात्। आचमनान-न्तरं आदित्यादिदर्शनं यथासम्भवम्। शौचं कृत्वा मूत्रोच्चारं न पश्येत् दृष्ट्वादित्यमग्निं सोमं वा पश्येदिति॥ ॥ अथाचमनविधिः। दक्षः। "प्रक्षाल्य पाणी पादौ च त्रिः पिबेदनु वीक्षि-तम्। संवृत्याङ्गुष्ठमूलेन द्विः प्रमृज्यात्ततो मुखम्॥ संस्पृश्य तिसृभिः पूर्वमास्यमेवमुपस्पृशेत्। अङ्गुष्ठेन प्रदेशिन्या प्राणं पश्चादनन्तरम्॥ अङ्गुष्ठानामिकाभ्याञ्च चक्षुःश्रोत्रे पुनः पुनः। नाभिं कनिष्ठाङ्गुष्ठेन हृदयन्तु तलेन वै॥ सर्वाभिस्तु शिरः पश्चाद्बाहू चाथेव संस्पृशेत्॥" पादप्रक्षालनं विशेषयति देवलः। "प्रथमं प्राङ्मुखः स्थित्वा पादौ प्रक्षालयेत् सुधीः। उदङ्मुखो वा दैवे पैत्र्ये दक्षिणाननः॥" सुधीरित्यरः। दैवपैत्र्येतरत्रामुखः। प्रत्यक्-पादावसेचनमिति। प्रत्यक् पश्चिमाभिमुखः। क्रममाह गौभिलः। "स्वयं पादमवनेनिज्य इति दक्षिणं पादं प्रक्षालयेदिति अर्थात्तथादर्शनात् सर्वत्र तथा कल्प्यते। पारस्करः। स्वयं पादं प्रक्षाल्य दक्षिणं प्रक्षालयतीति सूत्रेण प्राक् स्वयंपादप्रक्षालने सिद्धे स्वयं प्रक्षाल्य दक्षिणं प्रक्षालयतीत्यत्र स्वयंग्रहणं सामान्यार्थं तेनान्यस्यापि पादप्रक्षालने स्वयमेव प्राधान्यम् अन्यार्थं पुनर्ग्रहणमिति न्यायात्। अन्यार्थमधि-कारार्थम्। ब्राह्मणश्चेद्दक्षिणं प्रथममिति सूत्रं तस्य पादौ यदि ब्राह्मणः प्रक्षालयति तदा दक्षिणं प्रथममिति न स्वयम्। यथा प्रक्षाल-यतीत्यनुवृत्तौ आश्वलायनः। दक्षिणमग्रे ब्राह्म-णाय प्रयच्छेत् स्वयं मूद्धायेति। स्वयं प्रक्षालने स्वयमेव प्राधान्यमिति स्वयं ग्रहणमपि। आचमने पाणिपादप्रक्षालनं मूद्धाङ्गुल्यर्थं। यथा वृद्धपराशरः। "कृत्वाथ शौचं प्रक्षाल्य हस्तौ पादौ च यत्नतः। निवृद्धशिख आसीनो द्विज आचमनन्चरेत्। कृतोपवीतं सर्वांगे वाङ्मनःकायसंयतः॥" आपस्तम्बः। "इत्येवमङ्गिराचापि प्रक्षाल्य चरणौ पृथक्। हस्तौ चामणिबन्धाभ्यां पश्चादाचेत संयतः॥" आगापि आमणिबन्धाभ्यामित्यवधृपादानं तत्-पर्य्यन्तानुचित्तशुद्ध्यर्थं अध्वश्रमापनोदनाय अतिशयशौचाय वा। अतएवोक्तं अङ्गप्रकर्षात् फलप्रकर्ष इति॥ ॥ शिखाबन्धने विशेषमाह ब्रह्मपुराणम्। "गायत्र्या तु शिखां बद्ध्वा नैर्ऋत्यां ब्रह्मरन्ध्रतः। त्रुटिकाश्च ततो बद्ध्वा ततः कर्म समाचरेत्॥" ॥ पिबेदित्यत्रान्तर्वाचाह याज्ञवल्क्यः। "अन्तर्जानु शुचौ देशे उपविश्य उदङ्मुखः। प्राग्वा ब्राह्मेण तीर्थेन द्विजो नित्यमुपस्पृशेत्॥" अन्तर्जानु जानुनोर्मध्ये हस्तौ कृत्वेति शेषः। वाग्यच्छब्दादीशानाभिमुखः। "ईशानाभिमुखो भूत्वोपस्पृशेत्तु यथाविधि॥" इति मरीच्युक्तेः॥ ब्राह्मेण तीर्थेन अङ्गुष्ठमूलेन। "कनिष्ठादेशिन्यङ्गुष्ठमूलान्यग्रं करस्य च। प्रजापतिपितृब्रह्मदेवतीर्थान्यनुक्रमात्॥" इति याज्ञवल्क्यात्॥ देशिनी तर्जनी। करस्य दक्षिणस्य। यथा मार्कण्डेयपुराणम्। "अङ्गुष्ठोत्तरतो रेखा या पाणेर्देशिनस्य च। एतद्ब्राह्ममिति ख्यातं तीर्थमाचमनाय वै॥" अत्र द्विजो न स्त्रीशूद्राविति मिताक्षरा। अत-एव। "स्त्रियाश्चैतद्भिजं तीर्थं मूद्धजातिस्तथैव च। सकृदाचमनाच्छुद्धिरेतयोरेव नोभयोः॥" ब्राह्मतीर्थावरोधे तु मनुः। "कायत्रैदशिकाभ्यां वा न पैत्र्येण कदाचन।" उक्ततीर्थत्रयस्य ब्राह्मादिनावरोधे क्रममाह-

कामधेनापि। एवञ्च सर्व्वाविरोधे सुवर्णादिपात्रेणाप्याचमनं कार्य्यं स्वयमसामर्थ्येऽन्येनाचमनं कारयितव्यम्। याज्ञवल्क्यः।

"अद्भिस्तु प्रकृतिस्थाभिर्हृदयंगमाभिः फेनबुद्बुदः। हृत्कण्ठतालुगाभिस्तु यथासंख्यं द्विजातयः॥ शुध्येरन् स्त्री च शूद्रश्च सकृत् सृष्टाभिरन्ततः॥"

अन्ततः ओष्ठोपान्ते। उत्तरोत्तरमुपकर्षात्। अतएव सृष्टाभिरित्युक्तं न तु भक्षिताभिरिति। स्त्री शूद्रो वाथ नित्यास्तःस्नानाय करोऽथवेति ब्रह्मपुराणाच्च। आचमनार्थे पाणिपादप्रक्षालनमेवैत्येके। इति शूद्राधिकारे गोतमोक्तेश्च। आचमनार्थेऽजलाभावे इदमित्याचाराध्यायः। मनुः।

"हृद्गाभिः पूयते विप्रः कण्ठगाभिस्तु भूमिपः। वैश्योऽद्भिः प्राशिताभिस्तु शूद्रः सृष्टाभिरन्ततः॥"

अत्र यज्ञावधिप्राशनमुक्तम्। अमुपनीतानान्तु स्त्रीशूद्रवदाचमनं न यावदुपनीयेत। इति प्रागुक्तगौतमाच्च तथात्वात्। मिताक्षरादयोऽप्येवम्। अत्रु विशेषयति बौधायनः। पादप्रक्षालनाच्छेषेण नाचामेत् यदाचामेत् भूमौ सावधित्वाचामेदिति। उशनाः।

"कांस्यायसेन पात्रेण चमूयीयकपित्तलैः।
आचान्तः शूतहस्तोऽपि न कदाचिच्छुचिर्भवेत्॥"

कांस्यादिपात्रकरणकाचमनं कांस्यायसेनेत्यादिना निषिद्धमिति केचित्। हस्तेनाचमनेऽपि कांस्यादिपात्रावर्च्छितं तन्निषिद्धमित्यपरे। आचमनजलनिषेधे गृहलिखितौ। न शूद्रा मुखेकपाण्या वर्च्छितेनेति अत्राशुचिपदम् आचमनकर्त्तृभिन्नपरम्। शूद्रसाहचर्य्यात् एक पाणिपदमपि आचमनकर्त्तृभिन्नपाणिपरम्। तेन स्वीयवामपाण्यावर्च्छितमनिषिद्धम्। तथा च कर्मलघ्वधिकारे बौधायनः। शूद्रपुरीषे कुर्व्वन् दक्षिणहस्तेन गृह्णाति सव्येनाचमनीयमिति। गृह्णाति जलपात्रमिति शेषः। आचामेदित्यनुवृत्तौ देवलः।

"शिखां बद्ध्वा वसित्वा वै निर्निक्ते वाससी शुभे।
तूष्णीं भूत्वा समादाय गोदृच्छन्नविलोकयन्॥"

एकवस्त्रः प्राचीनावीतिन इत्यादिपारस्करदर्शनात् यत्र प्रेतस्नानतर्पणादौ एकवस्त्रत्वं विहितं तत्र तदङ्गत्वादेकवस्त्रा एवाचमनं कुर्य्युः। प्रचेताः।

"अनुष्णाभिरफेनाभिः पूताभिर्वोक्ष्य चक्षुषा।
हृन्नताभिरथब्दाभिश्चिबुकाद्भिराचमेत्॥"

चतुर्व्वेति भावशुद्ध्यपेक्षया विकल्पः। न तु फलभूयस्त्वार्थं कल्पनागौरवापत्तेः। वीक्षणानुमन्त्रणयोर्भट्टभाष्यमाधवाचार्य्यकृतपराशरभाष्ययोरपवादमाह यमः।

"रात्रावह्नीक्षितेनापि शुद्धिरुक्ता मनीषिभिः।
उदके मातुराद्याश्च तथोच्छिष्टोच्छपायिनाम्॥"

आचामेदित्यनुवृत्तौ वशिष्ठः। प्रदरादपि या गोस्पर्शाय स्रुवं वर्णरक्तदृष्टाभिर्वाच्च स्रुरशुभागमा इति। प्रदरो विदीर्णभूभागः। अशुभागमाः अशुचिदेशादागताः। यस्मिन् देशे वर्णादिदुष्टमेव तोयं तत्र तदपि ग्राह्यम्। तथा च मरीचिः।

"येषु स्थानेषु यच्छौचं धर्म्माचारश्च यादृशः।
तत्र तत्रावमन्येत धर्म्मज्ञत्वेन तादृशः॥
येषु स्थानेषु ये देवा येषु देशेषु ये द्विजाः।
येषु स्थानेषु यत्तोयं या च यत्रैव मृत्तिका॥"

आचमने उदकग्रहणप्रकारं परिमाणञ्चाह भरद्वाजः।

"आयतं पर्व्वणां कृत्वा गोकर्णाकृतिवत् करम्।
संहताङ्गुलिना तोयं गृहीत्वा पाणिना द्विजः॥
सुप्ताङ्गुष्ठकनिष्ठाभ्यां शेषेणाचमनक्षरेत्।
मात्रमञ्जनमात्रास्तु संगृह्य त्रिः पिबेदपः॥"

पाणिना दक्षिणेन। त्रिः पिबेदित्यत्रेणापि इत्यादिपुराणोक्तेः। मार्कण्डेयः।

"सपवित्रेण हस्तेन कुर्य्यादाचमनक्रियाम्।
नोच्छिष्टं तत्पवित्रन्तु मुक्तोच्छिष्टन्तु वर्ज्यते॥"

मदनपारिजाते हारीतः।

"अग्निर्यस्य पवित्रस्य न तेनाचमनक्षरेत्॥"

अन्यनादृत्यग्निरिति समुद्रकरेऽपि। आचमनानुवृत्तौ देवलः।

"न गच्छन्न प्रधावन्च न चलन्न परान् स्पृशन्।
न हसन्नेव संजल्पन्नात्मानञ्चैव वीक्षयन्॥"

चलन् कम्पमान इति रत्नाकरः॥ आत्मानं आत्मस्थानं हृदयम्। वीक्षयन्निति स्वार्थे णिच्।

"केशग्राहीवीमधःकायं न स्पृशन् धरणीमपि।
यदि स्पृशति चैतानि भूयः प्रक्षालयेत् करम्॥"

अधःकायं नाभेरधःप्रदेशम्। करं दक्षिणम्। आचमनानुवृत्तौ गोभिलः।

"नान्तरीयेकदेशेन कण्ठयित्वोत्तरीयकम्॥"

अन्तरीयमधःपरीधानं तदेकदेशमुत्तरीयं कृत्वा मरीचिः।

"न वहिर्जानुखरया नासनस्थो न चोत्थितः।
न पादुकास्थोऽन्यचित्तः शुचिः प्रयतमानसः॥
उपस्पृश्य द्विजो नित्यं शुद्धः पूतो भवेन्नरः।
शुक्लासनस्थो नाचामेन्नान्यकाले कदाचन॥"

जलस्थलोभयकर्म्मानुष्ठानार्थन्तु जलस्थलैकचरणेनाचमनं कर्त्तव्यमित्याह पैठीनसिः। अन्तरुदके आचान्तोऽन्तरेव शुद्धः स्यात् तस्मादन्तरेकं बहिरेकञ्च कृत्वा पादमाचामेत् सर्व्वत्र शुद्धो भवतीति। जले तूत्तिष्ठन्नाचामेत्। जानोर्ध्वं जले तिष्ठन्नाचान्तः शुचितामियात्। अधस्तात् शूतहस्तोऽपि समाचान्तो न शुध्यतीति विष्णुः। हारीतः।

"आर्द्रवासा जले कुर्य्यात्तर्पणाचमनं जपम्।
शुष्कवासाः स्थले कुर्य्यात्तर्पणाचमनं जपम्॥"

कात्यायनः।

"स्नानाचमनं होमं भोजनं देवतार्चनम्।
प्रौढ़पादो न कुर्व्वीत स्नात्वायं पिलतर्पणम्॥
आसनारूढ़पादस्तु जानुनोर्बद्धयोस्तथा।
हृतावसक्थिको यस्तु प्रौढ़पादः स उच्यते॥"

आसनारूढ़पादः आसनारोपितपादतलः। जानुनोर्बद्धयोः हृतावसक्थिको वस्त्रादिना हृतदृढ़जानुबन्धः। तृतीयेन भेदप्रतीतेः प्रौढ़पादस्य द्विविधत्वं प्रतीयते॥ * ॥ अत्र च अनेकोद्दाहृते दारुशिले भूमिसमे दृढ़काष्ठे सङ्कीर्णीभूता इति बौधायनवचनात्तथाविधे आरूढ़पादोऽपि कुर्य्यात्। व्यासः।

"शिरः प्रावृत्य कण्ठं वा मुक्तकच्छशिखोऽपि वा।
अकृत्वा पादयोः शौचमाचान्तोऽप्यशुचिर्भवेत्॥"

तथा।

"अपः पाणिनखाग्रेण नाचामेद्यस्तु ब्राह्मणः।
सुरापानेन तत्तुल्यमित्यब्रवीद्विरञ्चनः॥"

संहृतेति सुखं संहृत्य अलोमकोच्छ्वासौ यथा न भवतीति तात्पर्य्यम्। तथा च वसिष्ठः।

"आचान्तः पुनराचामेद्वासो विपरिधाय च।
ओष्ठौ च संमृज्य तथा यत्र स्नातमलोमकौ॥"

एवञ्च प्रागुक्तहारीतवचने ओष्ठयोर्मार्जनमुक्तं तत् सलोमकयोरेवेति। एतदनन्तरं वामहस्तं पादौ शिरश्च दक्षिणेन पाणिनाभ्युक्षेत्। तथा च कामधेनावापस्तम्बः। चिराचामेत् हृद्गाभिस्त्रिरोष्ठौ परिमृज्येत् द्विरित्येके दक्षिणेन पाणिना सर्व्वं प्रोक्ष्य पादौ शिरश्चेति। गोभिलः। चिराचामेत् द्विः परिमृज्यात् पादावभ्युक्ष्य शिरोऽभ्युक्षेदिति इन्द्रियाण्यक्षिः स्पृशेत् अक्षिणी नासिके कर्णाविति। इन्द्रियाणि इन्द्रियायतनानि इन्द्रियाणामलूनत्वात्। तिसृभिरिति तर्ज्जनीमध्यमानामिकाभिः॥ * ॥ सर्व्वत्राङ्गुष्ठयोगेन आचमनकारणमाह पैठीनसिः। अग्निरङ्गुष्ठसहितेनापि सर्व्वाणि स्थानानि स्पृशेत्। निष्ठीवनादावाचमनं यथा। वायुपुराणे।

"निष्ठीवने तथाभ्यङ्गे तथा पादावसेचने।
उच्छिष्टस्य च सम्भाषादशुचुपहतस्य च॥
सन्देहेषु च सर्व्वेषु शिखां मुक्त्वा तथैव च।
विना यज्ञोपवीतेन नित्यमेव उपस्पृशेत्॥
उदृवायससंस्पर्शे दर्शने चान्त्यवासिनाम्॥"

हारीतः।

"स्त्रीशूद्रोच्छिष्टसंभाषणे मूत्रपुरीषोत्सर्गदर्शने देवमभिगन्तुकाम आचामेदिति।" याज्ञवल्क्यः।

"स्नात्वा पीत्वा क्षुते सृष्टे भुक्त्वा रथ्योपसर्पणे।
आचान्तः पुनराचामेद्वासो विपरिधाय च॥"

ब्रह्मपुराणे।

"क्षौमे भोजनकाले च सन्ध्ययोरुभयोरपि
आचान्तः पुनराचामेदन्यत्रापि सकृत् सकृत्॥
विरात्रस्य ततः शुद्धः स्नात्वा विष्णुं सनातनम्॥"

स्मृतिः।

"क्षुते निष्ठीविते स्वप्ने परिधानेऽशुपातने।
कर्म्मस्थ एषु नाचामेत् दक्षिणं श्रवणं स्पृशेत्॥"

अत्र हेतुमाह पराशरः ।
"प्रभासादीनि तीर्थानि गङ्गाद्याः सरितस्तथा ।
विप्रस्य दक्षिणे कर्णे वसन्ति मनुरब्रवीत् ॥"
सांख्यायनः ।
"आदित्या वसवो रुद्रा वायुरग्निश्च धर्म्मराट् ।
विप्रस्य दक्षिणे कर्णे नित्यं तिष्ठन्ति देवताः ॥"
पुराणसारवायुपुराणयोः ।
"यः कर्म्म कुरुते मोहादनाचम्यैव नास्तिकः ।
भवन्ति हि वृथा तस्य क्रियाः सर्व्वा न संशयः ॥" * ॥
अथ दन्तधावनम् । ब्रह्मशातातपः ।
"मुखे पर्य्युषिते नित्यं भवत्यप्रयतो नरः ।
तस्मात् सर्व्वप्रयत्नेन भक्षयेद्दन्तधावनम् ॥"
आद्धदिनादौ तस्य वर्ज्यत्वं यथा । विष्णुः ।
"आद्धे चैवादिने चैव विवाहेऽजीर्णसम्भवे ।
व्रते चैवोपवासे च वर्ज्ययेद्दन्तधावनम् ॥"
दन्तधावनमदाद्दद्दुखः प्राद्सुखो वेति ॥ * ॥
दन्तलग्नस्य दन्ततुल्यत्वं यथा । गौतमः ।
दन्तशिष्टे दन्तवदन्यत्र जिह्वाभिघर्षणात् प्राक् च्युतेरित्येके । च्युतेरासाववद्विद्याग्निगरश्चैव तच्छुचिरिति । जिह्वाभिघर्षणायोग्यं दन्तलग्नं यद्यौचजनकं न भवतीत्यर्थः । दृष्टानुपलभ्यमानरसविषयम् । दन्तवद्दन्तलग्नेषु रसवर्ज्जमिति शङ्खवचनात् । जिह्वाभिघर्षणेऽपि अशक्योद्धरणे न दोषः ।
"भोजने दन्तलग्नानि निर्हृत्याचमनक्षरेत् ।
दन्तलग्नमसंशार्य्यं शेषं मन्येन दन्तवत् ॥
न तत्र कुर्य्याद्बहुशो यत्नमुद्धरणे पुनः ।
भवेदशौचमत्यर्थं छद्मवेधाद्व्रणे क्षते ॥"
इति देवलवचनात् ॥
च्युतेरित्युपलभ्यमानरसविषयम् । व्यासावो मांसा तद्वन्निगरश्चित्यर्थः । अतएव शौचितं यथा न भवति तथा तृणादिना दन्तलग्नं निःसारणमाचरणम् ॥ * ॥ छन्दोगपरिशिष्टम् ।
"नारदादुक्तवार्क्षेयमष्टाङ्गुलमपाटितम् ।
सत्वचं दन्तकाष्ठं स्यात्तदर्द्धेन प्रधावयेत् ॥
उत्थाय नैर्ऋते प्रक्षाल्य शुचिर्भूत्वा समाहितः ॥
परिणाय्य तु मन्त्रेण भक्षयेद्दन्तधावनम् ॥
आयुर्वर्चः यशो वर्चः प्रजा पशुवसूनि च ।
ब्रह्मप्रज्ञां मेधां त्वञ्जो धेहि वनस्पते ॥"
शुचिर्भूत्वा दिराचमनेनेति शेषः ॥ * ॥ नरसिंहपुराणम् ॥
"दन्तकाष्ठस्य यक्ष्यामि समासेन प्रशस्तताम् ।
सर्व्वे शास्त्रविदः पुण्याः शौरेश्च यशस्विनः ॥"
प्रमाणं शौक्लपक्षे विष्णुः ।
"कनीन्यग्निभस्मौत्सं सङ्कर्षं द्वादशाङ्गुलम् ।
प्राक्शीर्षं त्वा च यतवाङ् भक्षयेद्दन्तधावनम् ॥
प्रक्षाल्य मुखं तत्क्षालयुर्वा देशे समाहितः ॥"
सङ्कर्षं इतिनायम् । द्वादशाङ्गुलन्तु छन्दोगपरिशेषम् ।
"द्वादशाङ्गुलन्तु विप्राणां क्षत्रियाणां नवाङ्गुलम् ।
वैश्यानां सप्ताङ्गुलं षडङ्गुलम् ।
भक्षयेत् प्राक्षतदलानि पर्व्वस्वपि च वर्जयेत् ॥"
तिथिविशेषे तस्य वर्ज्जनं यथा । वृसिंहपुराणम् ।
"प्रतिपद्दर्शषष्ठीषु नवम्यामेव सप्तमाः ।
दन्तानां काष्ठसंयोगो दहत्याचप्तमं कुलम् ॥
अलाभे दन्तकाष्ठानां प्रतिषिद्धदिने तथा ।
अपां द्वादशगण्डूषैर्मुखशुद्धिर्विधीयते ॥"
गण्डूषस्य दन्तकाष्ठकार्य्यकारित्वेऽपि न तत्र मन्त्रान्वयः । शातातपः ।
"प्रतिपद्दर्शषष्ठीषु नवम्यां दन्तधावनम् ।
पत्रैरन्यत्र काष्ठैश्च जिह्वोल्लेखः सदैव हि ॥"
गुवाकादिपत्रैर्दन्तधावनं निषिद्धं यथा । क्रियाकौमुद्यां वशिष्ठः ।
"गुवाकतालहिन्तालास्तथा ताड़ी च केतकी ।
खर्ज्जूरनारिकेलौ च सप्तैते व्रणराजकाः ॥
व्रणराजशिरापत्रैर्यः कुर्य्याद्दन्तधावनम् ।
तावद्भवति चाण्डालो यावद्गां नैव पश्यति ॥"
पराशरभाष्ये याज्ञवल्क्यः ।
"नेष्टकालोष्टपाषाणैरितराङ्गुलिभिस्तथा ।
त्यक्त्वा अनामिकाङ्गुष्ठौ वर्ज्जयेद्दन्तधावनम् ॥"
प्रचेताः ।
"मध्याह्नस्नानकाले तु यः कुर्य्याद्दन्तधावनम् ।
निराशास्तस्य गच्छन्ति देवाः पितृगणैः सह ॥"
स्मृतिः ।
"वमन्तं भ्रमाणञ्च कुर्वन्तं दन्तधावनम् ।
अभ्यक्ताङ्गिरस्त्वेव स्नातं नैवाभिवादयेत् ॥"
हारीतः ।
"शुचिं देवाभिरक्षन्ति पितरः शुचिमन्विषुः ।
शुचेर्विभर्त्ति रक्षांसि ये चान्ये दुश्चारिणः ॥"
तथा ।
"स्नानं दानं तपस्त्यागो मन्त्रकर्म्मविधिक्रियाः ।
सङ्गत्याचारनियमाः शौचभक्षस्य निष्फलाः ॥
शौचन्तु द्विविधं प्रोक्तं बाह्यमाभ्यन्तरन्तथा ।
मृज्जलाभ्यां भवेद् बाह्यं भावशुद्धिस्तथाऽऽन्तरम् ॥"
अथ प्रातःस्नानसन्ध्ये । ब्रह्मपुराणम् ।
"प्रातःस्नानं ततः कृत्वा संक्षेपेण यथोदितम् ।
सन्ध्यामपि तथा कुर्य्यात् नित्यनैमित्तिकं तथा ॥"
कात्यायनः ।
"यथाहनि तथा प्रातर्नित्यं स्नायादनातुरः ।
दन्तान् प्रक्षाल्य नद्यादौ गेहे चेत्तदमन्त्रवत् ॥
दन्तान् प्रक्षाल्य प्रातरनातुरः स्नायात् ॥ * ॥
आतुरं विशेषयति आयुर्व्वेदीये ।
"स्नानमर्दितनेत्रास्यकर्णरोगातिसारिषु ।
प्राधानपीनसाजीर्णसुप्तवमनु च गर्हितम् ॥"
तत्कालमाह विष्णुः । प्रातःस्नायस्तत्किरनक्षत्रां प्राचीमयलोक्य स्नायात् । इति मनुरकरणम् ॥ * ॥
"मृत्तिकानिमलं कुर्य्यात् स्नात्वा तु वा भस्मना ।
दन्तौषविघातार्थं वाससाद्यादिदर्शने ॥"
उशनाः ।
"अभावे मृत्तिकायापि पितृदैवतमर्थयेत् ॥"
ब्रह्माण्डपुराणे ।
"कर्म्मादौ तिलकं कुर्य्यादूर्द्धं तदैणवं परम् ।
गोप्रदानं जपो होमः स्वाध्यायः पितृतर्पणम् ।
भस्मीभवति तत्सर्व्वमूर्द्धपुण्ड्रं विना कृतम् ॥"
व्यासे ।
"अङ्गुष्ठः पुष्टिदः प्रोक्तो मध्यमायुष्करी भवेत् ।
अनामिकार्थदा नित्यं मुक्तिदा च प्रदेशिनी ॥"
व्यासः ।
"जाह्नवीतीरसम्भूतां मृदं मूर्द्ध्ना बिभर्त्ति यः ।
बिभर्त्ति रूपं सोऽर्कस्य तमोनाशाय केवलम् ॥"
गोपीचन्दनमाह शातातपः ।
"गोमतीतीरसम्भूतां गोपीदेहसमुद्भवाम् ।
मृदं मूर्द्ध्ना यदेद्यस्तु सर्व्वपापैः प्रमुच्यते ॥"
ब्रह्माण्डपुराणे ।
"ऊर्द्धपुण्ड्रं मृदा कुर्य्यात् त्रिपुण्ड्रं भस्मना सदा ।
तिलकं वै द्विजः कुर्य्यात् चन्दनेन यदृच्छया ॥
ऊर्द्धपुण्ड्रं द्विजः कुर्य्यात् क्षत्रियश्च त्रिपुण्ड्रकम् ।
अर्द्धचन्द्रञ्च वैश्यश्च वर्त्तुलं शूद्रयोगिजः ॥" * ॥
व्यातुराणान्तु ।
"अग्निरक्षं भवेत् स्नानं स्नानाशक्तौ च कर्म्मिणाम् ।
आर्द्रेण वाससा वापि मार्ज्जनं दैहिकं विदुः ॥"
इति जाबालवचनात् शिरो विहाय गात्रप्रक्षालनम् । तदशक्तावार्द्रवाससा गात्रमार्जनं कुर्य्यात् तदनन्तरं सन्ध्यां कुर्य्यात् । एतत्परमेव प्रातःसन्ध्यां ततः कुर्य्यात् दन्तधावनपूर्व्वकमिति याज्ञवल्क्यवचनम् । इत्याह्निकाचारतत्त्वम् ॥

प्रातःसन्ध्या, स्त्री, (सन्धौ भवा । यत् प्रत्ययः । टाप् । प्रातः प्रथमार्द्धेवा सन्ध्या ।) सन्ध्यादेरुपूर्व्वार्द्धम् । तदुत्पत्तिर्यथा ।
"तस्मिन् गिरौ चन्द्रभागे दृष्ट्वा लोकहितैषिणम् ।
सन्ध्यां दृष्ट्वाथ पप्रच्छ वशिष्ठः सादरन्तदा ॥
वशिष्ठ उवाच ।
किमर्थमागता भद्रे ! निर्जनं त्वं मधीधरम् ।
कस्य वा तनया गौरि ! किं वा तव चिकीर्षितम् ॥
एतदिच्छाम्यहं श्रोतुं यदि गुह्यं न ते भवेत् ।
वदनं पूर्णचन्द्राभं निश्रीकं वा कथं तव ॥
श्रीमार्कण्डेय उवाच ।
तत् श्रुत्वा वचनं तस्य वशिष्ठस्य महात्मनः ।
दृष्ट्वा च तत्प्रभावात्मानं ज्वलन्तमिव पावकम् ॥
शरीरदृग्ब्रह्मचर्य्यसप्तमं तं जटाधरम् ।
सादरं प्रणिपत्याथ सन्ध्योवाच तपोधनम् ॥
सन्ध्योवाच ।
यदर्थमागता शैलं सिद्धं तस्मिं तपोधन ! ।
तव दर्शनमात्रेण तस्मिं सेत्स्यति वा विभो ! ॥
तपः कर्त्तुमहं ब्रह्मन् ! निर्जनं शैलमागता ।
ब्रह्मणोऽहं मनोजाता सन्ध्या नाम्ना च विश्रुता ।
नोपदेशमहं जाने तपसो मुनिसत्तम ! ।
यदि ते रुच्यते गुह्यं मां त्वं समुपदेशय ॥
एतच्चिकीर्षितं गुह्यं नान्यत् किञ्च न विद्यते ।
अज्ञात्वा तपसो भावं तपोवनमुपस्थिता ॥
चिन्तया परिशुष्येयं वेपते च मनः सदा ॥

श्रीमार्कण्डेय उवाच ।
याज्ञवल्क्यं तस्या वचनं वशिष्ठो ब्रह्मणः सुतः ।
स्वयं स सर्व्वज्ञत्वञ्च नान्यत् किञ्चन दृष्टवान् ॥
अथ तां नियतात्मानं तपसेऽतिधृतोद्यमाम् ।
वशिष्ठो मन्त्रयामास गुरुवत् शिष्यवत्सदा ॥
वशिष्ठ उवाच ।
परमं यो महत्तेजः परमं यो महत्तपः ।
परमः परमाराध्यो विष्णुर्मनसि धीयताम् ॥
मन्त्रेणानेन देवेशं विष्णुं भज शुभानने ! ।
ॐ नमो वासुदेवाय इत्यनेन च सन्ततम् ॥
मार्कण्डेय उवाच ।
उपदिश्य वशिष्ठोऽथ सन्ध्यायै तपसः क्रियाम् ।
तामाभाष्य यथान्यायं तत्रैवान्तर्दधे मुनिः ॥
यथोक्तन्तु वशिष्ठेन मन्त्रं तपसि साधनम् ।
व्रतेन तेन गोविन्दं पूजयामास भक्तितः ॥
प्रसन्नस्तेन रूपेण यद्रूपं चिन्तितं तया ।
पुरः प्रत्यक्षतां यातस्तस्यां विष्णुर्जगत्पतिः ॥
निमीलिताक्ष्यास्तस्यास्तु प्रविश्य हृदयं हरिः ।
दिव्येङ्गितं ददौ तस्यै वाचं दिव्यै च चक्षुषी ॥
दिव्यं ज्ञानं दिव्यचक्षुर्दिव्यां वाचमवाप्य सा ।
प्रत्यक्षं वीक्ष्य गोविन्दं तुष्टाव जगतां पतिम् ॥
अथ तस्याः शरीरन्तु वल्कलाजिनसंवृतम् ।
परिचीर्णं जटाव्रातैः पवित्रं मूर्द्ध्नि राजितम् ॥
निरीक्ष्य कृपयाविष्टो हरिः प्रोवाच तामिदम् ॥
श्रीभगवानुवाच ।
यः पश्यति सकामस्त्वां पाणिग्राहमृते तव ।
स सद्यः क्लीवतां प्राप्य दुर्ब्बलत्वं गमिष्यति ॥
पतिस्तव महाभागस्तपोरूपसमन्वितः ।
सप्तकल्पान्तजीवी च भविष्यति सह त्वया ॥
अन्यच्च ते वदिष्यामि पूर्ब्बं यन्मनसि स्थितम् ।
अग्नौ शरीरत्यागस्ते पूर्ब्बमेव प्रतिश्रुतः ॥
स च मेधातिथेर्यज्ञे सुनेर्दाक्षायणीसुते ।
घृतप्रज्वलिते वह्नौ न चिरात् क्रियतां त्वया ॥
तत्र गत्वा स्वयं छन्नं मुनिभिर्नोपलक्षिता ।
मन्त्रसादाद्द्विजाता तस्य पुत्री भविष्यसि ॥
यस्ते वा वाञ्छनीयोऽस्ति स्वामी मनसि कश्चन ।
तन्निधाय निजस्वान्ते त्यज वह्नौ वपुः स्वकम् ॥
नारायणः स्वयं सन्ध्यां प्रसूर्गर्भाग्रपायिनः ।
ततः पुरोडाशमयं तत् शरीरमभूत् क्षणात् ॥
समिद्धेऽग्नौ महायज्ञे मुनिभिर्नोपलक्षिता ।
तदा विष्णोः प्रसादेन सा विवेश विधेः सुता ॥
वह्निस्तस्याः शरीरं तद्दग्ध्वा सूर्य्यस्य मण्डले ।
मुहुं प्रवेशयामास विष्णोरेवाज्ञया पुनः ॥
सूर्य्यो द्विधा विभज्याथ तत् शरीरं तदा रथे ।
स्वके संस्थापयामास प्रीतये पितृदेवयोः ॥
यद्दुर्भागस्तस्यास्तु शरीरस्य द्विजोत्तमाः ।
प्रातःसन्ध्याभवत् सा तु अहोरात्रादिमध्यगा ॥
यच्छेषभागस्तस्यास्तु अहोरात्रान्तमध्यगः ।
सा सायमभवत् सन्ध्या पितृप्रीतिप्रिया सदा ॥
सूर्य्योदयाच्च प्रथमं यदा स्यादरुणोदयः ।
प्रातःसन्ध्या तदोदेति देवानां प्रीतिकारिणी ॥
अस्तं गते ततः सूर्य्ये शोणपद्मनिभा सदा ।

उदेति सायंसन्ध्यापि पितॄणां मोदकारिणी ॥"
इति कालिकापुराणे २२ अध्यायः ॥
प्रातःकालकर्त्तव्यवैदिकतान्त्रिकोपासनाविशेषः । वैदिके तदनुष्ठानानि यथा । मार्জ্জনम् १ प्रार्थनम् २ प्राणायामः ३ आचमनम् ४ आपोमार्জ্জनम् ५ अघमर्षणम् ६ सूर्य्योपस्थानम् ७ देवतर्पणम् ८ सावित्र्यावाहनम् ९ सावित्रीध्यानम् १० सावित्रीजपः ११ सावित्रीविसर्জ্জनम् १२ आदित्यशुक्लप्रीणनम् १३ आत्मरक्षणम् १४ रुद्रोपस्थानम् १५ ब्रह्मादिभ्यो जलदानम् १६ सूर्य्यार्घदानम् १७ सूर्य्यनतिः १८ ॥ तान्त्रिके तदनुष्ठानानि यथा । मन्त्राचमनम् १ जलशुद्धिः २ करन्यासः ३ अङ्गन्यासः ४ अघमर्षणम् ५ हस्तप्रक्षालनम् ६ आचमनम् ७ सूर्य्यार्घदानम् ८ गायत्र्या जलदानम् ९ तर्पणम् १० गायत्रीध्यानम् ११ गायत्रीजपः १२ जलसमर्पणम् १३ इष्टदेवध्यानम् १४ प्राणायामः १५ मूलमन्त्रजपः १६ जलसमर्पणम् १७ प्राणायामः १८ नमस्कारः १९ । इति सुतिरत्ने ॥
प्रातःस्नानं, क्ली, (प्रातः प्रभातकाले यत् स्नानम् ।) प्रभातकर्त्तव्यावगाहनादि । यथा, गारुडे ५० अः ।
"उषःकाले तु संप्राप्ते त्यक्त्वा चावश्यकं बुधः ।
स्नायान्नदीषु शुद्धासु शौचं कृत्वा यथाविधि ॥
प्रातःस्नानेन पूयन्ते येऽपि पापकृतो जनाः ।
तस्मात् सर्व्वप्रयत्नेन प्रातःस्नानं समाचरेत् ॥
प्रातःस्नानं प्रशंसन्ति दृष्टादृष्टकरं हि तत् ।
सुखे सुप्तस्य सततं लालाद्याः संस्रवन्ति हि ॥
अतो नैवाचरेत् कर्म्माण्यकृत्वा,स्नानमादितः ।
अलक्ष्मीः कालकर्णी च दुःस्वप्नं दुर्विचिन्तितम्॥
प्रातःस्नानेन पापानि पूयन्ते नात्र संशयः ।
न च स्नानं विना पुंसां प्राशस्त्यं कर्म्म संस्रुतम् ।
होमे जप्ये विशेषेण तस्मात् स्नानं समाचरेत् ॥
अशुक्लावग्निरस्कन्तु स्नानमस्य विधीयते ॥"
अपि च गारुडे २१५ अध्याये ।
"प्रातःसंक्षेपतः स्नानं मध्याह्ने विधिविस्तरम् ।
प्रातर्मध्याह्नयोः स्नानं वानप्रस्थगृहस्थयोः ॥
यतेस्त्रिसवनं प्रोक्तं सकृत्तु ब्रह्मचारिणः ॥"
अपि च ।
"उषस्युषसि यत् स्नानं सन्ध्यायामुदिते रवौ ।
प्राजापत्येन तत्तुल्यं महापातकनाशनम् ॥
यत् फलं द्वादशाब्दानि प्राजापत्यैः कृतैर्भवेत् ।
प्रातःस्नायी तदाप्नोति वर्षेण अत्रयान्वितः ॥
य इच्छेद्विपुलान् भोगान् चन्द्रसूर्य्यग्रहोपमान् ।
प्रातःस्नायी भवेन्नित्यं द्वौ मासौ माघफाल्गुनौ॥
षट्तिलौ माघमासन्तु प्रातःस्नायी हविष्यभुक् ।
अतिपापं महाघोरं मासादेव व्यपोहति ॥
मातरं पितरञ्चापि भ्रातरं सुहृदं गुरुम् ।
समुद्दिश्य गिमज्जेत द्वादशांशं लभेत्तु सः ॥"
प्रातराशः, पुं, (अश्नमिति । अश् + भावे घञ् । आशः । प्रातः प्रातःकाले आशो भोजनम् ।) प्रातःकालीनभोजनम् । तत्पर्य्यायः । कल्यवर्त्तः

२ । इति हेमचन्द्रः ॥ प्रातर्भोजनम् ३ । इति त्रिकाण्डशेषः ॥ कल्यचर्च्चिः ४ । इति जटाधरः ॥ (यथा, भागवते । ३ । २ । २ ।
"यः मद्यहायनो माचा प्रातराशाय याचितः ।
तन्नैच्छद्वयन् यस्य सपर्य्यां बाललीलया ॥")
प्रातर्गेयः, पुं, प्रातःकाले गेय ईश्वरादिर्यैः । स्तुतिपाठकः । तत्पर्य्यायः । स्तुतिव्रतः २ । इति त्रिकाण्डशेषः ॥ प्रभातगातरि, त्रि ॥
प्रातर्भोक्ता, [क्तृ] पुं, (प्रातर्भुङ्क्ते इति । भुज् + ण्वुच् ।) काकः । इति शब्दचन्द्रिका ॥ प्रभाते भोजनकर्त्तरि, त्रि ॥
प्रातर्भोजनं, क्ली, (प्रातः प्रभातकाले भोजनम् ।) प्रातराशः । इति जटाधरः ॥
प्रातिका, स्त्री. (प्रातनोति । प्र + यत् + खुल् + टाप् । अत इत्वम् ।) जवा । इति राजनिर्घण्टः ॥
प्रातिपदिकः, पुं, (प्रतिपदि तिथौ भव इति । प्रतिपद् + "कालात् ठञ् ।"४ । ३ । ११ । इति ठञ् ।) अग्निः । यथा,—
"इत्यभूतो महानग्निर्ब्रह्मक्रोधोद्भवो महान् ।
उवाच देवं ब्रह्माणं तिथिर्मे दीयतां प्रभो ! ॥
यस्यामहं समस्तस्य जगतः ख्यातिमाप्नुयाम् ॥
ब्रह्मोवाच ।
देवानामथ यज्ञानां गन्धर्व्वाणाञ्च सत्तम ! ।
आदौ प्रतिपदा येन त्वमुत्पन्नोऽसि पावक ! ॥
त्वत्प्रदात् प्रातिपदिकं सम्भविष्यन्ति देवताः ।
अतस्ते प्रतिपन्नाम्न तिथिरेषा भविष्यति ॥"
इति वराहपुराणम् ॥
(प्रतिपदे धातुभिन्नपदे भव इति । प्रतिपद + ठक् ।) नाग्नि, क्ली । यथा । अधातुविभक्त्यर्थवत् प्रातिपदिकम् । इति सुपद्मव्याकरणम् ॥
प्रातिभाव्यं, क्ली, (प्रतिभू + ष्यञ् । द्विपदवृद्धिः ।) प्रतिभुवो भावः । जामिनी इति भाषा । यथा,
"साक्षित्वं प्रातिभाव्यञ्च दानं ग्रहणमेव च ।
विभक्ता भ्रातरः कुर्य्युर्नाविभक्ता परस्परम् ॥"
इति दायभागः ॥
प्रातिस्विकं, त्रि, (प्रतिस्वं भवः । प्रतिस्व + ठक् ।) व्यसाधारणम् । तत्पर्य्यायः । अन्यासाधारणम् २ आवेणिकम् ३ । इति त्रिकाण्डशेषः ॥
प्रातिहारः, पुं, (प्रतिहार एव । स्वार्थे अण् ।) प्रातिहारिकः । इत्यमरटीकायां भरतः ॥
प्रातिहारकः, पुं, (प्रतिहारक एव । स्वार्थे अण् ।) प्रातिहारिकः । इत्यमरटीकायां भरतः ॥
प्रातिहारिकः, पुं, (प्रतिहारः प्रतिहरणं याच इत्यर्थः । स प्रयोजनमस्येति । प्रतिहार + "प्रयोजनम् ।" ५ । १ । १०९ । इति ठक् ।) मायाकारः । इत्यमरः । २ । १० । ११ ॥
प्रातीपः, पुं, (प्रतीपस्यापत्यं प्रतीपस्यायमिति वा । प्रतीप + अण् ।) प्रतीपपुत्रः । शान्तनुराजः । इति त्रिकाण्डशेषः ॥ (यथा, महाभारते । ५ । १४८ । २ ।
"प्रातीपः शान्तनुस्तात ! कुलस्यार्थे यथोत्थितः ॥")

प्राथमकल्पिकः, पुं, (प्रथमकल्प आद्यारम्भः प्रयोजनं यस्य। "प्रयोजनम्।" ५।१।१०६। इति ठञ्। यद्वा, प्रथमकल्पमधीते इति। विद्यालक्षणकल्पान्ताच्चेति वक्तव्यमिति ठक्।) प्रथमारब्धवेदाध्ययनः। प्रथमं शिक्षणीयं कल्पं शास्त्रमधीते यः इत्यर्थे णिकः। तत्पर्य्यायः। शैक्षः २। इत्यमरभरतौ॥

प्राथमिकः, त्रि, (प्रथमे भवः। प्रथम+ठञ्।) प्रथमभवः। यथा। यत्राविरलक्रमेण सिद्धिसिषाधयिषानुमितयस्तत्र द्वितीयत्वगे पक्षतासन्यत्तार्थे द्वितीयः सिषाधयिषाविरहो विशेषयमस्तु सिद्धेः प्राथमिकत्वं किमर्थम्। इति पक्षतागिरीशमणिः॥

प्राथर्य्यं, त्रि, (प्रथम+ष्यञ्।) प्रथमस्य भावः। यथा, "अस्माभिरेव प्राथर्य्येन नानामुनीनां वचनैरेवंविधो निबन्धः क्रियते।" इति विषयरक्षितः॥

प्राडुः, [स्] ष, (प्राक्षीति। प्र+अद्+"वाहुलकादर्देरुप्रसिप्रत्ययः।" उणा० २।११८। इत्यत्र उज्ज्वलदत्तोक्त्या ऊषिः।) नाम। प्राकाश्यम्। स्फुटत्वम्। तत्पर्य्यायः। आविः २। यथा। प्राडुरासीत्। आविर्भूतः। इत्यमरभरतौ॥ (यथा, रघुः। ११।१५।
"व्यानिनादमथ गृह्णती तयोः
प्राडुराथ बहुलत्वपाण्डविः।
ताडका चलकपालकुण्डला
कालिकेव निविडा बलाकिनी॥")
प्रकाशः। उभावयम्। वृत्तिः। इति शब्दरत्नावली॥

प्राडुर्भावः, पुं, (प्राडुस्+भू+भावे घञ्।) आविर्भावः। यथा,—
"वपुः प्राडुर्भावादनुमितमिदं जन्मनि परा॥"
इति क्षुवलयानन्दः॥

प्रादेशः, पुं, (प्रदिश्यते इति। प्र+दिश्+हलश्चेति घञ्। "उपसर्गस्य घञि" इति दीर्घः।) तर्ज्जनीवेष्टितविस्तृताङ्गुष्ठः। इत्यमरः। २।६।८३॥ (यथा, महाभारते। ५।५१।१६।
"रमायतो भीमसेनः प्रादेशेनाधिकोऽर्जुनात्॥"
देश एव। स्वार्थे अण्।) देशमात्रम्। यथा,
"प्रादेशो देशमात्रे च तर्ज्जन्यङ्गुष्ठसम्मिते॥"
इति मेदिनी॥
"अङ्गुष्ठस्य प्रदेशिन्या यावः प्रादेश उच्यते॥"
इति देवीपुराणञ्च॥

प्रादेशनं, क्ली, (प्र+आ+दिश्+ल्युट्।) दानम्। इत्यमरः। २।७।३०॥

प्रादोषः, त्रि, (प्रदोषस्यायमिति। प्रदोष+अण्।) प्रदोषसम्बन्धी। इति सिद्धान्तकौमुदी॥ (प्रदोषे आहरतीति। "आहरति।" ४।३।५१। इति अण्। प्रादोषो नगः। प्रदोषकृत्यचरितं अध्ययनं सोढ़मस्य। "तदस्य सोढ़म्।" ४।३।५२। इति अण्। प्रादोषः शिष्यः। इति भारतम्॥)

प्रादोषिकः, त्रि, (प्रदोषस्यायमिति। प्रदोष+"निशाप्रदोषाभ्याष्ठञ्।" ४।३।१४। इति ठञ्।) प्रदोषसम्बन्धी। इति सिद्धान्तकौमुदी॥

प्राधान्यं, क्ली, प्रधानस्य भावः। (प्रधान+भावे ष्यञ्।) प्रधानत्वम्। यथा, धर्म्मदीपिकायाम्।
"वेदार्थोपनिबन्धृत्वात् प्राधान्यं हि मनोः स्मृतम्॥"

प्राध्वं, ष, (प्राध्वगतीति। प्र+आ+ध्वन+ष्यञ्।) अनुकूलम्। इत्यमरः। ३।४।४॥ (यथा, रघुः। १३।४३।
"अभाजने मे सुखमूर्द्धबाहुः
सर्व्वेतरं प्राध्वमितः प्रयुङ्क्ते॥")

प्राध्वः, त्रि, (प्रगतोऽध्वानमिति। "उपसर्गादध्वनः।" ५।४।८५। इति ष्यञ्।) बहुदूरगामि-रथादिः। इति वोपदेवः॥ दूरमधः। प्रध्वः। दध्वः। इति हेमचन्द्रः॥ (यथा, महाभारते। ३।१६२।२७।
"ततः शक्तिं गदां खड्गं धनुश्च भरतर्षभः।
प्राध्वं कृत्वा नमस्कृत्य कुबेराय ददौ वरः॥")

प्रान्तः, पुं, (प्रकृष्टोऽन्तः।) अन्तभागः। शेषसीमा। यथा, कुमारे। ३।४३।
"प्रान्तेषु संसक्तनमेरुशाखं
ध्यानासनं भूतपतेर्विवेश॥"

प्रान्ततः, [स्] ष, (प्रान्त+तसिल्।) प्रान्तभागे। यथा, प्राचौरं प्रान्ततो इतिः। इत्यमरः। २।२।३॥

प्रान्तरं, क्ली, (प्रकृष्टमन्तरमवकाशो व्यवधानं वा यत्र।) दूरशून्योऽध्वा। इत्यमरः। २।१।१०॥ छायातरुजलादिरहिते पथि प्रान्तरं दूरं शून्यो दूरशून्यः दूरञ्चासौ शून्यश्चेति वा दूरशून्यो जलादिवर्जितत्वात् ईदृक् योऽध्वा स प्रान्तरमित्यन्वयः। प्रकृष्टमन्तरं व्यवधानमवकाशो वा यत्रेति प्रान्तरम्। इति भरतः॥ (यथा, महानिर्व्वाणतन्त्रे। १।६४।
"कूपे गर्त्ते प्रान्तरे च प्रासादात् पर्व्वतादपि।
पतिष्यन्ति मरिष्यन्ति मनुजा मदविह्वलाः॥")
विपिनम्। कोटरम्। इति मेदिनी॥

प्रान्तशून्यं, क्ली, (प्रान्ते शून्यमस्य।) दूरशून्यपथः। छायादिरहितपथः। इति शब्दरत्नावली॥

प्रापणं, क्ली, (प्र+आप्+ल्युट्।) अर्जनम्। प्राप्तिः। (यथा, मनुः। २।६५।
"प्रापणात् सर्व्वकामानां परित्यागो विशिष्यते॥"
प्राप्तिप्रेरणा। प्रकर्षेण आपनम्। व्याप्तादण्यन्ताद्धा प्रपूर्ब्बापधातोर्भावे ल्युट् प्रत्ययः॥

प्रापणिकः, पुं, (प्रापणाय्यते इति। प्र+आ+पण व्यवहारे+"प्राहि पणिकश्च।" उणा०२।८१। इति किकन्।) पण्यविक्रयी। इति सिद्धान्तकौमुदादिवृत्तिः॥ (यथा, माघे। ४।५९।
"आढ्यादिव प्रापणिकादलब्धं
लक्ष्मीं रत्नान्यमितानि लोकः॥")

प्रापणीयं, त्रि, प्राप्यते यत्। (प्र+आप्+अनीयर्।) प्राप्यम्। (यथा, मेघदूते। ५।
"धूमज्योतिःसलिलमरुतां सन्निपातः क्व मेघः
सन्देशार्थाः क्व पटुकरणैः प्राणिभिः प्रापणीयाः॥")

प्रापेयः, पुं, गन्धर्व्वगणविशेषः। यथा, अग्निपुराणे।
"प्रावाप्य धनयत् पुत्रान् दिवान् वै गायनोत्तमान्।
चतुर्देश देवगन्धर्व्वाः प्रापेयाः परिकीर्त्तिताः॥"

प्राप्तः, त्रि, (प्र+आप्+क्त।) प्रस्थापितः। तत्पर्य्यायः। प्रतिष्ठितः २। लब्धः। तत्पर्य्यायः। विन्नः २ भावितः ३ आसादितः ४ भूतः ५। इत्यमरः। ३।१।८६, ३।१।१०४॥ (उत्पन्नः। समुपस्थितः। यथा, मनुः।१२।१२२।
"इतश्चिन्वंश्चरिष्यंश्च बलिं भक्षांश्च भक्षयन्।
सभागारांश्चरेद्धैर्य्यं स्वकर्म्म परिकीर्त्तयन्॥")

प्राप्तपत्त्वं, त्रि, (प्राप्तं पत्त्वं मरुत् येन।) हतम्। इत्यमरः। २।८।११७॥

प्राप्तभावः, पुं, (प्राप्तो भावो येन।) जातोद्यः। इति शब्दचन्द्रिका॥ (प्राप्तभार इत्यपि क्वचित् पाठः॥) लब्धसत्ताकौ, त्रि॥

प्राप्तरूपः, त्रि, (प्राप्तं रूपं येन।) पण्डितः। मनोज्ञः। इत्यमरः।३।३।१३१॥ रूपवांश्च॥

प्राप्तव्यं, त्रि, प्राप्यते यत्। प्रपूर्ब्बापधातोः कर्म्मणि तव्यप्रत्ययः। प्राप्यम्। (यथा, रामायणे। २।२६।१०।
"आदेशो वनवासस्य प्राप्तव्यः स मया किल॥")

प्राप्तिः, स्त्री, (प्र+आप्+क्तिन्।) उदयः। (यथा, महाभारते। १४।४८।३।
"गच्छत्यात्मप्रसादेन विदुषां प्राप्तिमव्ययाम्॥")
धनादिवृद्धिः। अधिगमः। लाभः। इत्यमरभरतौ॥ प्राप्यम्। (यथा, मनुः। ६।१०३।
"एष स्त्रीपुंसयोरुक्तो धर्म्मो वो रतिसंहितः।
व्यापत्यफलप्राप्तिश्च दायभागं निबोधत॥")
संहतिः। इति शब्दरत्नावली॥ अणिमाद्यैश्वर्य्यान्तर्गतैश्वर्य्यविशेषः। स च सभीप्सितप्राप्यम्। इति हेमचन्द्रो भरतश्च॥

प्राप्यं, त्रि, (प्र+आप्+ण्यत्।) प्राप्तव्यम्। तत्पर्य्यायः। गम्यम् २ समासाद्यम् ३। इत्यमरः।३।१।६२॥ (यथा, मार्कण्डेये। ६२।२०।
"मयेयं सानुरागेण बहुशः प्रार्थिता सती।
विरक्तवती सेयमद्य पापा भविष्यति॥"
यत्, प्र+आप्+क्यप्। यथा, मेघदूते।
"प्राप्यावन्तीनुदयनकथाकोविदग्रामवृद्धान्॥")

प्रावोधिकः, पुं, (प्रबोधाय स्थितः। प्रबोध+ठञ्।) उषःकालः। इति शब्दमाला॥ प्रावोधकोऽपि पाठः॥

प्राभवं, क्ली, (प्रभोर्भावः। प्रभु+अण्।) श्रेष्ठत्वम्। इति शब्दचन्द्रिका॥

प्राभाकरः, पुं, (प्रभाकरस्यायं तन्त्रं वेत्तीति। प्रभाकर+अण्।) मीमांसकविशेषः। यथा, "यागिस्वरूपं निरूप्य परमतनिराकरणपूर्ब्बकं

स्वमतेन तदृग्रहोपायमभिधातुं प्रथमं प्राभाकरमतमुपदर्शयति सेयमित्यादिना।" इति याज्ञिकग्रहोपाध्यायशिरोमणिः॥ प्राभाकरमते याज्ञेः सकृद्दर्शनगन्यत्वं यथा तस्मात् परिशेषेण सकृद्दर्शनगम्या वा। इति याज्ञिकग्रहोपाध्यायचिन्तामणिः॥

प्राभृतं, क्ली, (प्राभियते क्षेपते। प्र+भृ+क्त।) उपढौकनम्। इत्यमरः॥ (यथा, कथासरित्सागरे। १७। १६४।
"तं दत्तप्राभृतं दूतं स संमान्य व्यसर्जयत्॥")

प्राभृतकं, क्ली, (प्राभृत+स्वार्थे कन्।) प्राभृतम्। तत्पर्य्यायः। कौशूलिका २। इति हारावली। १५६॥

प्रामाण्यः, पुं, (प्रमाद्यत्यनेनेति। प्र+मद्+ण्यत्।) वाचकः। इति शब्दचन्द्रिका॥ स्वार्थे ष्ण्यो प्रमादः। तस्य भावे, क्ली॥

प्रामाणिकः, त्रि, (प्रमाणादागतः। प्रमाण+ठक्।) हैतुकः। मर्य्यादार्हः। श्राद्धज्ञः। परिच्छेदकः। प्रमाणकर्त्ता। इति प्रमाणशब्दात् कर्त्तरि ठिकप्रत्ययः॥

प्रामाण्यं, क्ली, (प्रमाणस्य भावः। प्रमाण+ष्यञ्।) प्रमाणत्वम्। प्रमाणशब्दाद्भावार्थे ष्यञ्प्रत्ययः॥ (यथा, मार्कण्डेये। १५। ४३।
"सत्यं भूतहितार्थोक्तिर्वेदप्रामाण्यदर्शनम्।
गुरुदेवर्षिविद्वर्षिपूजनं साधुसङ्गमः॥")

प्रामाण्यवादः, पुं, (प्रामाण्यस्य वादः कथनम्।) प्रमाकरणताकथनम्। तद्वति तत्प्रकारकत्वप्रमात्वकथनम्। चिन्तामणिव्याख्यान्थविशेषः। इति पूर्व्वाचार्य्याः॥ स यथा। अथ जगदेव मङ्गलमयमुद्दीर्षुरुदादशसु विद्यास्थानेष्वभ्यर्हिततमामान्वीक्षिकीं परमकारुणिको मुनिः प्रणिनाय। तच्च प्रेक्षावत् प्रवृत्त्यर्थं प्रमाणादिपदार्थतत्त्वज्ञानान्निःश्रेयसाधिगम इत्यादावुक्तत्वात्। तेषु प्रमाणाधीना सर्व्वेषां व्यवस्थितिरिति प्रमाणतत्त्वमत्र विविच्यते। इत्यादि गङ्गेशोपाध्यायः॥

प्रायोक्यं, क्ली, (प्रमीयतेऽनेति। प्र+मी वधे+भावे क्त। तत्र प्रमीते मरणे साधु इति यत्। अस्य वधतुल्यत्वात्तथात्वम्।) क्षयम्। इति त्रिकाण्डशेषः। (प्रमीतस्य भाव इति। प्रमीत+ष्यञ्।) कृतत्वञ्च॥

प्रायः, पुं, (प्रकृष्टमयनमिति। प्र+अय+घञ्। यद्वा, प्र+इ+"अरुर्द्विषदजन्तस्य मुम्।" ३। ३। ५६। इत्यच्।) मरणम्। मरणार्थमनशनम्। (यथा, रामायणे। ४। ५३। १२।
"अहं वः प्रतिजानामि न गमिष्यामि वै पुरीम्।
इहैव प्रायमासिष्ये श्रेयो मरणमेव च॥")
तुल्यम्। बाहुल्यम्। इति मेदिनी। ये, ३६॥ (यथा, साहित्यदर्पणे। ३। १११।
"तस्कराः षट्पदा ज्ञेयाः सुखप्राप्तधनास्त्यजाः।
लिङ्गिनश्चक्रकामाद्या यासां (वेश्यानाम्) प्रायेण वल्लभाः॥")

वयः। इति हेमचन्द्रः॥ (पापम्। तपः। इति स्मृतिः॥ क्ली, प्रवेशः। युद्धम्। यथा, ऋग्वेदे। २। १८। ८।
"उप ध्येष्ठे वरूथे गभस्तौ
प्राये प्राये जिगीवांसः स्याम॥"
"किञ्च प्राये प्राये सोमपानार्थमिन्द्रस्य यज्ञशालायां प्रवेशे प्रवेशे जिगीवांसः शत्रूणां जेतारो भवेम। यद्वा, प्राये प्राये प्रकर्षेण इयते गम्यते योद्धृभिरिति प्रायं युद्धम्। तस्मिन् युद्धे जिगीवांसः शत्रून् जितवन्तो भवेम॥" इति तद्भाष्ये सायणः॥ त्रि, गमकः। यथा, मनौ। ३। २६४।
"प्रचाल्यहस्तावाचम्य ज्ञातिप्रायं प्रकल्पयेत्।
ज्ञातिभ्यः सत्कृतं दत्त्वा बान्धवानपि भोजयेत्॥"
"प्रचाल्येति। तदनुहस्तौ प्रचाल्याचम्य ज्ञातिप्रायमन्नं कुर्य्यात्। ज्ञातीन् प्रेति गच्छतीति ज्ञातिप्रायं कर्म्मण्यण्। ज्ञातीन् भोजयेदित्यर्थः॥" इति कुल्लूकभट्टः॥)

प्रायः, [स्] अ, (प्र+अय गतौ+असुन्।) बाहुल्यम्। इत्यमरः। ३। ४। १७॥ (यथा, कथासरित्सागरे। ६। १२३।
"ततोऽहं धर्म्मवर्म्मा च ज्ञातवन्तौ क्रमेण ताम्।
अत्रान्तरे स च प्रायः पर्य्यहीयत वासरः॥")

प्रायश्चित्तं, क्ली, (प्रायस्य पापस्य चित्तं विशोधनं यस्मात्। यदुक्तं स्मृतौ।
"प्रायः पापं समुद्दिष्टं चित्तं तस्य विशोधनम्॥"
यद्वा, प्रायस्य तपसः चित्तम् निश्चय इति।
"पारस्करप्रभृतीनि च संज्ञायाम्।" ६। १। १५७। इत्यत्र। "प्रायस्य चित्तिश्चित्तयोः।" इति वार्त्तिकोक्त्या सुट् निपात्यते च। निरुक्तिस्तु निष्ण्णे द्रष्टव्या।) पापक्षयमात्रसाधनं कर्म्म। यथा, हारीतः। प्रयतत्वाद्दोषचितमशुभं नाशयतीति प्रायश्चित्तम्॥ * ॥ ("प्रायश्चित्तमिति। यत्तपःप्रभृतिकं कर्म्म उपचितं सञ्चितमशुभं पापं नाशयतीति कृततत्तत्कर्म्मभिः कर्त्तुः प्रयतत्वाद्वा शुद्धत्वादेव तत्प्रायश्चित्तम्। तथाच पुनर्हारीतः। यथा, चारोपस्वेदचक्रनिर्णोदनप्रक्षालनादिभिर्वासांसि शुध्यन्ति एवं तपोदानयज्ञैः पापकृतः शुद्धिमुपयान्ति। शुद्धिं पापक्षयम्। यथा, महाभारते।
'अङ्गिरांचान् मलमिव तमो ह्यभिभवाद्यथा।
दानेन तपसा चैव सर्व्वपापमपोहति॥'
तेन पापक्षयमात्रसाधनत्वेन विधिबोधितं कर्म्म प्रायश्चित्तम्। मात्रार्थलाभस्तु प्रयतत्वाद्वेत्येवकारार्थकवाग्भट्टात्। तथाच विश्वः।
'वा स्याद्विकल्पोपमयोरेवार्थे च समुच्चये।'
एवञ्च।
'अश्वमेधेन शुध्यन्ति महापातकिनस्त्विमे।'
इति विष्णूक्तस्याश्वमेधस्यापि प्रायश्चित्तत्वम्। पापक्षयस्वर्गोभयसाधकस्य तु तस्यापि न प्रायश्चित्तत्वम्। प्रायश्चित्तस्य स्वर्गादिजनकत्वेऽपि तदंशे विधिबोधितत्वाभावान्नाशमभवः॥ इति प्रायश्चित्ततत्त्वम्॥) तस्य युत्पत्तिर्यथा। अङ्गिराः।
"प्रायो नाम तपः प्रोक्तं चित्तं निश्चय उच्यते।
तपोनिश्चयसंयुक्तं प्रायश्चित्तमिति स्मृतम्॥"
निश्चयसंयुक्तस्यापक्षयसाधनत्वेन निश्चितमित्यर्थः॥ * ॥ पापन्तु वैदिकप्रतिपाद्योऽनर्थः। अनर्थस्यानिष्टसाधनम्। पापकारणमुक्तं याज्ञवल्क्येन। यथा,—
"विहितस्याननुष्ठानान्निन्दितस्य च सेवनात्।
अनिग्रहाच्चेन्द्रियाणां नरः पतनमृच्छति॥"*॥
पापविशेषेणावस्थाविशेषमाह मनुः।
"शरीरजैः कर्म्मदोषैर्याति स्थावरतां नरः।
वाचिकैः पक्षिमृगतां मानसैरन्यजातिताम्॥
इह दुश्चरितैः केचित् केचित् पूर्व्वकृतैस्तथा।
प्राप्नुवन्ति दुरात्मानो नरा रूपविपर्य्ययम्॥"
यमः।
"सुरापो ब्रह्महा गोघ्नः सुवर्णस्तेयकृन्नरः।
पतितैः संप्रयुक्तश्च कृतघ्नो गुरुतल्पगः।
एते पतन्ति सर्व्वेषु नरकेष्वनुपूर्व्वशः॥"*॥
प्रायश्चित्तमाहात्म्यं यथा। अङ्गिराः।
"उद्यन्नद्य यदादित्यस्तमः सर्व्वं व्यपोहति।
तद्वत् कल्याणमातिष्ठन् सर्व्वं पापं व्यपोहति॥
पापश्चेत् पुरुषः कृत्वा कल्याणमभिपद्यते।
मुच्यते पातकैः सर्व्वैर्महाभ्रैरिव चन्द्रमाः॥"
कल्याणं प्रायश्चित्तम्॥ * ॥ तस्यावश्यकर्त्तव्यत्वमाह यमः।
"तपसोऽन्ते विशुध्यन्ति कर्म्मण्या वा परिक्षयात्।
तस्मात् कर्त्तव्यमेतेषु प्रायश्चित्तं विशुद्धये॥"
कर्म्मण्या भोगेन परिक्षयादित्यर्थः॥ * ॥ प्रायश्चित्तार्हत्वमाह मनुः।
"अकुर्व्वन् विहितं कर्म्म निन्दितञ्च समाचरन्।
प्रसक्तश्चेन्द्रियार्थेषु प्रायश्चित्तीयते नरः॥"*॥
अज्ञानाद्यदि वा ज्ञानात् कृत्वा कर्म्म विगर्हितम्।
तस्मादिमुक्तिमन्विच्छन् द्वितीयं न समाचरेत्॥"
प्रायश्चित्तस्य काम्यत्वं नैमित्तिकत्वं नित्यत्वञ्च यथा। जाबालः।
"काम्यानां सफलार्थञ्च दीक्षातार्थमेव च।
अतः काम्यं नैमित्तिकञ्च प्रायश्चित्तमिति स्थितिः॥
चरितव्यमतो नित्यं प्रायश्चित्तं विशुद्धये।
निन्द्यैश्च लक्षणैर्युक्ता जायन्ते निष्कृतेनसः॥"*॥
ज्ञानाज्ञानकृतपापयोः प्रायश्चित्तभेदो यथा। अङ्गिराः।
"अकामतः कृते पापे प्रायश्चित्तं न कामतः।
स्यात्कामकृते यत्तु द्विदृग्यं बुद्धिपूर्व्वके॥"*॥
अथ प्रायश्चित्तानुष्ठानस्य कर्त्तुरुपस्थानम्। तत्राङ्गिराः।
"कृते निःसंशये पापे न भुञ्जीतानुपस्थितः।
भुञ्जानो वर्द्धयेत् पापमतः पर्य्यवदि ब्रुवन्॥
वचसं वाग्यतः स्नात्वा क्लिन्नवासाः समाहितः।

उपस्थाय ततः शीघ्रमार्त्तिमान् धरणीं गतः ।
गात्रैश्च शिरसा चैव न च किञ्चिदुदाहरेत् ॥"
उपस्थानञ्च ब्राह्मणान् वस्त्रादिना तोषयित्वा कार्य्यम् । महत्तु पापेषु राज्ञोऽप्युपस्थितिः कार्य्यत्वाह देवलः ।
"स्वयं वा ब्राह्मणैः क्षुद्रमल्पदोषे विधीयते ।
राज्ञा च ब्राह्मणैश्चैव महत्तु परिचक्षते ॥"*॥
परिषदमाहाङ्गिराः ।
"एकविंशतिसंख्याकैर्मीमांसावेदपारगैः ।
वेदाङ्गकुशलैश्चैव परिषत् संप्रकल्पयेत् ॥
चातुर्विद्यो विकल्पी च त्र्यङ्गविद्धर्म्मपाठकः ।
त्रयश्चाश्रमिणो दृष्टाः पर्षत् स्यात्तु दशावरा ॥"
मनुः ।
"त्रैविद्यो हैतुकस्तर्की नैरुक्तो धर्म्मपाठकः ।
त्रयश्चाश्रमिणः पूर्व्वे पर्षत् स्यात्तु दशावरा ॥"
अङ्गिराः ।
"एषा तु लघुकार्य्येषु मध्यमेषु तु मध्यमा ।
महापातकिशोधेषु शतशो भूय एव वा ॥"
प्रदर्शनार्थमिदम् । यावद्भिरेव निरूपणं तावद्भिरेव परिषत् । दृष्टार्थत्वादेव तस्याः । तथा च यमः ।
"एको द्वौ वा त्रयो वापि यदृग्यजुर्धर्म्मपाठकाः ।
स धर्म्म इति विज्ञेयो नेतरेषां सहस्रशः ॥*"॥
प्रायश्चित्ताकथने दोषो यथा,—
"आर्त्तानां मार्गमाणानां प्रायश्चित्तानि ये द्विजाः ।
जानन्तो न प्रयच्छन्ति तेऽपि तद्दोषभागिनः ॥
अनर्चितैरनाकृतैरदृष्टैश्चैव संसदि ।
प्रायश्चित्तं न वक्तव्यं जानद्भिरपि जल्पतः ॥
न्यायतो मार्गमाणस्य क्षत्रियादेः प्रणामिनः ।
अन्तरा ब्राह्मणं कृत्वा व्रतमेतत् समादिशेत् ॥"
हारीतः ।
"यथावयो यथाकालं यथाप्राणञ्च ब्राह्मणे ।
प्रायश्चित्तं प्रदातव्यं ब्राह्मणैर्धर्म्मपाठकैः ॥
तस्मात् क्षुद्रमयार्द्धं पादं वापि विधानतः ।
ज्ञात्वा बलाबलं कालं प्रायश्चित्तं प्रकल्पयेत् ॥"
अनुग्रहमाह पराशरः ।
"दुर्ब्बलेऽनुग्रहः कार्य्यस्तथा वै शिशुवृद्धयोः ।
अतोऽन्यथा भवेद्दोषस्तस्मान्नानुग्रही भवेत् ॥"
स्त्रीदिनानुग्रहे दोषो यथा,—
"स्त्रीत्वादा यदि वा लोभात् मोहादज्ञानतोऽपि वा ।
कुर्व्वन्त्यनुग्रहं ये तु तत् पापं तेषु गच्छति ॥"
शास्त्रीयप्रायश्चित्तमुदाहृत्य पश्चादनुग्रहः कार्य्य इत्याहाङ्गिराः ।
"कृत्वा पूर्व्वमुदाहारं यथोक्तं धर्म्मवक्तृभिः ।
पश्चात् कार्य्यानुसारेण शक्त्या कुर्व्वन्त्यनुग्रहम् ॥"
वृद्धत्वादिभेदात् प्रायश्चित्तं यथा,—
"अशीतिर्यस्य वर्षाणि बालो वापूरणोऽक्षमः ।
प्रायश्चित्तार्हमर्हन्ति स्त्रियो रोगिण एव च ॥"

अथ पापनिष्क्रमणादिः ।

तत्र मनुः ।

"स्थानेनानुतापेन तपसाध्ययनेन च ।
पापकृन्मुच्यते पापात्तथा दानेन चापदि ॥"
आपदीत्यनेन अध्ययनतपोदानमनुकल्प इत्युक्तम् । एतद्धिंसाद्यतिरिक्तविषयम् । हिंसायान्तु दानं सुखम् । यथा, भविष्ये ।
"हिंसात्मकानां सर्व्वेषां कीर्त्तितानां मनीषिभिः ।
प्रायश्चित्तकदम्बानां दानं प्रथम उच्यते ॥"
तथा मनुः ।
"दानेन वधनिर्णेकं सर्पादीनामशक्नुवन् ।
एकैकमृक्षरेत् कृच्छ्रं द्विजः पापापशुत्तये ॥"*॥
सामान्यप्रायश्चित्तानि यथा, संवर्त्तः ।
"हिरण्यदानं गोदानं भूमिदानं तथैव च ।
नाशयन्त्याशु पापानि महापातकजान्यपि ॥"
यमः ।
"शोधयेन शरीरस्य तपसाध्ययनेन च ।
पापकृन्मुच्यते पापात् दानेन च दमेन च ॥"
मनुः ।
"कृत्वा पापं हि सन्तप्य तस्मात् पापात्प्रमुच्यते ।
नैवं कुर्य्यात् पुनरिति निवृत्त्या पूयते नरः ॥"
विष्णुपुराणम् ।
"प्रायश्चित्तान्यशेषाणि तपःकर्म्मात्मकानि वै ।
यानि तेषामशेषाणां कृष्णानुस्मरणं परम् ॥"
यमः ।
"गवाह्निका देवपूजा वेदाभ्यासः सरित्प्लवः ।
नाशयन्त्याशु पापानि महापातकजान्यपि ॥"
गौतमः । "हिरण्यं गौर्वासोऽश्वो भूमिस्तिला घृतमन्नमिति देयानि । एतान्येवानादेशे विकल्पेन क्रियेरन् एनसि लघुनि लघूनि गुरुणि गुरूणि ।" विष्णुपुराणम् ।
"एवं विषयभेदादे व्यवस्थाप्यानि पुत्रक ! ।
प्रायश्चित्तानि सर्व्वाणि गुरूणि च लघूनि च ॥
अन्यथा हि महाबाहो ! लघूनामपदेशतः ।
गुरूणामपदेशो हि निश्चयोजनतां व्रजेत् ॥"
महाभारते ।
"यत्किञ्चिन्मनसा कृत्वा कृतं गङ्गाभिषेचनम् ।
सर्व्वं दहति गङ्गाम्भःकृतराशिमिवानलः ॥"
व्रतानि शुद्धिकारणान्याह विश्वामित्रः ।
"कृच्छ्रं चान्द्रायणादीनि शुद्धाभ्युदयकारणम् ।
प्रकाशे वा रहस्ये वा संशयेऽनुक्तके स्फुटे ॥
प्राजापत्यः शान्तपनः शिशुकृच्छ्रः पराकः ।
अतिकृच्छ्रः पर्णकृच्छ्रः सौम्यः कृच्छ्रातिकृच्छ्रकः ॥
महाशान्तपनः शुद्ध्यै तप्तकृच्छ्रस्तु पावनः ।
अलोपवासकृच्छ्रश्च नक्तकृच्छ्रस्तु शोधकः ॥
एते समस्ता यस्ता वा प्रत्येकमेकशोऽपि वा ।
पातकादिषु सर्व्वेषु पापेषु प्रयतव्रतः ॥
कार्य्याश्चान्द्रायणैर्युक्ताः केवला वा विशुद्धये ।
शिशुचान्द्रायणं प्रोक्तं यतिचान्द्रायणं तथा ॥
यवमध्यं तथा प्रोक्तं तथा मियोशिकाकृतिः ।
उपवासत्रिरात्रं वा मासः पक्षस्तदर्द्धकम् ॥
षट्पञ्चाशदहोरात्रं कार्य्यं शुद्धिफलार्थिना ।
उपपातकयुक्तानामनादिष्टेषु चैव हि ॥
प्रकाशे च रहस्ये च अभिसन्धायपेक्षया ।
जातिशक्तिगुणान् दृष्ट्वा सकृद्दुष्टिकृतं तथा ॥
अनुबन्धादिकं दृष्ट्वा सर्व्वं कार्य्यं यथाक्रमम् ॥"
प्रकाशकृते पापे व्रतानि सुखानि । रहस्यकृते जपादीनि । यथा याज्ञवल्क्यादीन्यभिधाय मनुः ।
"एतैर्द्विजातयः शोध्या व्रतैरविष्कृतैनसः ।
अनाविष्कृतपापांस्तु मन्त्रैर्होमैस्तु शोधयेत् ॥"
देवलः ।
"प्रकाशं उक्तं यत्किञ्चित् विंशभागो रहस्यके ।
विंशभागः षष्टिभागः कल्पो ज्ञात्वापेक्षया ॥"
इति प्रायश्चित्तविवेकः ॥

अथ प्रायश्चित्तपूर्व्वाङ्गत्वम् । शङ्खलिखितौ ।
"वाप्य केशनखान् पूर्व्वं कृतं प्राश्य बहिर्निशि ।
प्रत्येकं नियतं कालमात्मनो व्रतमादिशेत् ।
प्रायश्चित्तसुपाक्षीनो वाग्यतश्चिरवर्णं स्मृशेत् ॥"
केशधारणेच्छायां द्विगुणव्रतादिकमाह हारीतः ।
"राजा वा राजपुत्रो वा ब्राह्मणो वा बहुश्रुतः ।
केशानां वपनं कृत्वा प्रायश्चित्तं समाचरेत् ॥
केशानां धारणार्थन्तु द्विगुणं व्रतमाचरेत् ।
द्विगुणे तु व्रते चीर्णे द्विगुणा दक्षिणा भवेत् ॥"
विदुषिप्रभृतीनां नेष्यते केशवापनम् ।
ऋते महापातकिनो गोरनुच्चावकीर्णिनः ॥"
सधवास्त्रीणां विशेषमाह भवदेवभट्टधृतं वचनम् ।
"वपनं नैव नारीणां नानुव्रज्या जपादिकम् ।
न गोष्ठे शयनं तासां न च दद्यादृगवाजिनम् ॥
सर्व्वान् केशान् समुद्धृत्य छेदयेदङ्गुलिद्वयम् ।
सर्व्वमेवं हि नारीणां शिरसो मुण्डनं स्मृतम् ॥"
अथ धेनुमूल्यव्यवस्था । तत्र संवर्त्तः ।
"प्राजापत्यव्रताशक्तो धेनुं दद्यात् पयस्विनीम् ।
धेनोरभावे दातव्यं तुल्यं मूल्यं न संशयः ॥"
पयस्विनीमिति विशेषणं दुग्धोपयोगाय । स च वत्सं विना न सम्भवति । अतः सवत्साया एव दानं सुखम् । तदभावे यथोचितं मूल्यम् । तदसम्भवे पुराणत्रयम् । द्वात्रिंशत्पणिका गावो वत्सः पौराणिको भवेदिति कात्यायनवचनात् । षट्त्रिंशन्मतमिति कृत्वा पठन्ति ।
"धेनुः पञ्चभिराढ्यानां मध्यानां त्रिपुराणिकी ।
कार्षापणैकमूल्या हि दरिद्राणां प्रकीर्त्तिता ॥"
प्रायश्चित्तोत्तरकर्त्तव्यानि । यथा । भविष्ये ।
"क्रियते शुद्धये यस्तु ब्राह्मणानान्तु भोजनम् ।
शुद्ध्यर्थमिति तत् प्रोक्तं वैनतेय ! मनीषिभिः ॥"
जाबालः ।
"आरम्भे सर्व्वकृच्छ्राणां समाप्तौ च विशेषतः ।
आज्येनैव हि शालायां जुहुयादाहुतीः पृथक् ।
आद्यं कुर्य्यादव्रतस्यान्ते गोश्चिरस्थायिनं दक्षिणम् ॥"
प्रायश्चित्तानन्तरं गोभ्यो यवसं दद्यात् । यदि तु गवस्तदहरं न गृह्णीयुस्तदा पुनस्तत्प्रायश्चित्तमनुतिष्ठेत् । यथा हारीतः । स्वगिरसा यवसमादाय गोभ्यो दद्यात् यदि ताः प्रमुदिता गृह्णीयुरेवं प्रवर्त्तयेयुः । एवं कृतप्रायश्चित्तम् । इतरथा न । इति प्रायश्चित्ततत्त्वम् ॥ ७ ॥

अथ प्रायश्चित्तविवेकोक्तनवविधपापानां प्रायश्चित्तानि लिख्यन्ते।

अपातिपातकानि।	प्रायश्चित्तानि।	तदप्रकृतौ धेनुदानम्।	तदप्रकृतौ पूर्णोदानम्।	दक्षिणा।
ब्राह्मणस्य माहणमसम्यं दुष्टिमसम्यं सुषामसम्यच।	अज्ञानतो द्विगुणद्वादशवार्षिकव्रतम्। तच्च मद्यपानके द्रष्टव्यम्। ज्ञानत एतद्द्विगुणम्।	३६० धेनवः।	१०८० कार्षापणाः। तल्लभ्यस्वर्णादि वा।	२०० गावः। अप्रकृतौ २०० कार्षापणाः।
क्षत्रियवैश्यस्त्रीणां माहदुष्टिसमुषामसम्।	चूताज्ञानपर्यन्तेन मरणम्। चतुर्विंशतिवार्षिकव्रतं वा। एतच्च अकामतः कामतस्तद्द्विगुण्यम्। माहदुष्टिसमुषासामपि एतद्व्रतादिकं करणीयम्।	३६० धेनवः।	१०८० कार्षापणाः। तल्लभ्यस्वर्णादि वा।	२०० गावः। अप्रकृतौ २०० कार्षापणाः।

अथ महापातकानि।	प्रायश्चित्तानि।	तदप्रकृतौ धेनुदानम्।	तदप्रकृतौ पूर्णोदानम्।	दक्षिणा।
अज्ञानतो ब्राह्मणवधकृच्छ्रवधः।	द्वादशवार्षिकव्रतम्। यथा मनुः। "ब्रह्महा द्वादशश्यानं कुटीं कृत्वा वने वसेत्। भैक्षाण्यात्मविशुद्ध्यर्थं कृत्वा शवशिरोध्वजम्। भिक्षार्थी विचरेद्ग्रामं वन्येर्यदि न जीयति।"	१८० धेनवः।	५४० कार्षापणाः। तल्लभ्यहिरण्यादिकं वा।	१०० गावः। तदप्रकृतौ १०० कार्षापणाः।
ज्ञानतो ब्राह्मणवधकृच्छ्रवधः।	याज्ञवल्क्योक्तप्रकारेण मरणम्। तथा। सोमश्यः शाधीति ऋचा लोमशश्मश्रुणी वै तनुम्। मन्त्रान्तां जुहुयाद्वापि मन्त्रैरेभिर्यथाक्रमम्। एतच्च कर्मणो ब्राह्मणेतरपरम्। तदप्रकृतौ द्विगुणद्वादशवार्षिकव्रतम्।	३६० धेनवः।	१०८० कार्षापणाः। तल्लभ्यस्वर्णादि वा।	२०० गावः। अप्रकृतौ २०० कार्षापणाः।
ज्ञानतो ब्राह्मणवधकृच्छ्रब्राह्मणीगर्भवधः।	ब्रह्मवधप्रायश्चित्तम्। अज्ञानत एतदर्धम्। अनुपनीतबालकवधेऽप्येवम्।	३६० धेनवः।	१०८० कार्षापणाः। तल्लभ्यस्वर्णादि वा।	२०० गावः। अप्रकृतौ २०० कार्षापणाः।
अज्ञानतः सवत्सगोब्राह्मणवधः।	द्विगुणद्वादशवार्षिकव्रतम्।	३६० धेनवः।	१०८० कार्षापणाः। तल्लभ्यस्वर्णादि वा।	२०० गावः। अप्रकृतौ ४०० कार्षापणाः।
कामतः सवत्सगोब्राह्मणवधः।	तद्द्विगुण्यम्। ४८ अष्टचत्वारिंशद्वार्षिकव्रतम्।	७२० धेनवः।	२१६० कार्षापणाः। तल्लभ्यस्वर्णादि वा।	४०० गावः। अप्रकृतौ ४०० कार्षापणाः।
ब्राह्मणकृच्छ्रमातृसोदरभ्रातृगुरुस्त्रीधिषाधिताधीनां वधः।	४८ अष्टचत्वारिंशद्वार्षिकव्रतम्। एतच्च कामतः। अकामत एतदर्धम्।	७२० धेनवः।	२१६० कार्षापणाः। तल्लभ्यस्वर्णादि वा।	४०० गावः। अप्रकृतौ ४०० कार्षापणाः।
ज्ञानतो ब्राह्मणकृच्छ्रवेदपारगस्यापिब्राह्मणवधः।	१२ द्वादशवार्षिकव्रतम्।	१८० धेनवः।	५४० कार्षापणाः। तल्लभ्यस्वर्णादि वा।	१०० गावः। अप्रकृतौ १०० कार्षापणाः।
अज्ञानतक्षत्रवधः।	तदर्धम्। ६ षड्वार्षिकव्रतम्।	९० धेनवः।	२७० कार्षापणाः।	५० गावः। तदप्रकृतौ ५० कार्षापणाः।
ज्ञानतो ज्ञानतो वा ब्राह्मणकृच्छ्रक्षत्रियब्राह्मणवधः।	तथा।	तथा।	तथा।	तथा।
अज्ञानत आचार्यादिब्राह्मणवधः।	एकवार्षिकव्रतम्।	१५ धेनवः।	४५ कार्षापणाः।	८ गावः। तदप्रकृतौ ८/४८ कार्षापणाः।
ब्राह्मणवधवत्।	तद्द्विगुणम्।	तद्द्विगुणम्।	तद्द्विगुणम्।	तद्द्विगुणम्।
अज्ञानतः क्षत्रियब्राह्मणवधः।	ब्राह्मणकृच्छ्रवधप्रायश्चित्तद्द्विगुणम्। तच्च ९६ षण्णवतिवार्षिकव्रतम्।	३६० धेनवः।	१०८० कार्षापणाः। तल्लभ्यस्वर्णादि वा।	२०० गावः। अप्रकृतौ २०० कार्षापणाः।

अथ महापातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा।
कामतस्तद्वधः।	तद्द्विगुणम्।	तद्द्विगुणम्।	तद्द्विगुणम्।	तद्द्विगुणम्।
अकामतो वैश्यकर्तृकब्रह्मवधः।	ब्राह्मणकर्तृकवधप्रायश्चित्तत्रिगुणम्। तच्च ३६ वार्षिकव्रतम्।	५४० धेनवः।	१६२० कार्षापणाः।	३०० गावः। अशक्तौ ३०० कार्षापणाः।
कामतो वैश्यकर्तृकब्रह्मवधः।	७२ वार्षिकव्रतम्।	१०८० धेनवः।	३२४० कार्षापणाः।	६०० गावः। अशक्तौ ६०० कार्षापणाः।
अकामतः शूद्रकर्तृकब्रह्मवधः।	ब्राह्मणकर्तृकवधप्रायश्चित्तचतुर्गुणम्। तच्च ४८ वार्षिकव्रतम्।	७२० धेनवः।	२१६० कार्षापणाः।	४०० गावः। अशक्तौ ४०० कार्षापणाः।
कामतस्तद्वधः।	तद्द्विगुणम्।	तद्द्विगुणम्।	तद्द्विगुणम्।	तद्द्विगुणम्।
अकामतो ब्राह्मणकर्तृकब्राह्मणीवधः।	ब्रह्मवधप्रायश्चित्तार्द्धम्। तच्च ६ वार्षिकव्रतम्।	६० धेनवः।	२७० कार्षापणाः।	५० गावः। अशक्तौ ५० कार्षापणाः।
कामतस्तद्वधः।	तद्द्विगुणम्। क्षत्रियस्य ब्राह्मणीवधे ब्राह्मणकर्तृकवधप्रायश्चित्तद्विगुणम्। वैश्यस्य त्रिगुणम्। शूद्रस्य चतुर्गुणम्। अनेकब्राह्मणवधे प्रायश्चित्तस्यैकत्वम्। यदेव साक्षाद्वधकर्त्तुः प्रायश्चित्तं तदेव स्वल्पप्रवर्त्तुरनुग्राहकस्य अप्रवृत्तप्रवर्त्तकरूपप्रयोजकस्य च पादहीनम्। तथ्यप्रतिरोधकस्य अनुग्राहकस्य प्रवृत्तप्रवर्त्तकरूपप्रयोजकस्य च अर्द्धम्। अनुमन्तुर्निमित्तिनश्च पादः। अशक्तौ स्त्रीबालवृद्धानां सर्वत्रार्द्धम्।	तद्द्विगुणम्।	तद्द्विगुणम्।	तद्द्विगुणम्।
ज्ञानतो ब्राह्मणस्य पैष्टीसुरापानम्। दिरभ्यक्तगौडीमाध्वीपानञ्च।	अग्नितप्तसमर्पणानां सुरागोमूत्रजलदुग्धघृतगोमयरसानामन्यतमस्यामरणात् पानम्। चतुर्विंशतिवार्षिकव्रतं वा।	३६० धेनवः।	१०८० कार्षापणाः। तल्लभ्यस्वर्णादि वा।	२०० गावः। अशक्तौ २०० कार्षापणाः।
अज्ञानतो ब्राह्मणस्य तासां पानम्।	एतदर्द्धम्। तत्तु द्वादशवार्षिकव्रतम्।	१८० धेनवः।	५४० कार्षापणाः। तल्लभ्यस्वर्णादि वा।	१०० गावः। अशक्तौ १०० कार्षापणाः।
अज्ञानतः क्षत्रियस्य पैष्टीसुरापानम्।	नववार्षिकव्रतम्। ज्ञानत एतद्द्विगुणम्।	१३५ धेनवः।	४०५ कार्षापणाः। तल्लभ्यस्वर्णादि वा।	७५ गावः। अशक्तौ ७५ कार्षापणाः।
अज्ञानतो वैश्यस्य पैष्टीसुरापानम्।	षड्वार्षिकव्रतम्। ज्ञानत एतद्द्विगुणम्। स्त्रीबालवृद्धानामर्द्धादिकम्।	६० धेनवः।	२७० कार्षापणाः। तल्लभ्यस्वर्णादि वा।	५० गावः। अशक्तौ ५० कार्षापणाः।
अज्ञानतो ब्राह्मणकर्तृकब्राह्मणस्वामिकाशीतिरत्तिकापरिमितसुवर्णस्तेयम्।	अपहृतद्रव्यं तस्यानुरूपं मूल्यं वा स्वामिने दत्त्वा द्वादशवार्षिकव्रतं करणीयम्।	१८० धेनवः।	५४० कार्षापणाः। तल्लभ्यस्वर्णादि वा।	१०० गावः। अशक्तौ १०० कार्षापणाः।
ज्ञानतस्तत्कर्तृकतत्स्तेयम्।	एतद्द्विगुणं २४ वार्षिकव्रतम्। गुरुवद्ब्राह्मणकर्तृके तु सर्वत्रार्द्धम्।	३६० धेनवः।	१०८० कार्षापणाः।	२०० गावः। अशक्तौ २०० कार्षापणाः।
ज्ञानतः क्षत्रियवैश्यशूद्रकर्तृकब्राह्मणस्वामिकाशीतिरत्तिकापरिमितसुवर्णस्तेयम्।	राजकर्तृकानुपलाभावेन सरत्नम्। चतुर्विंशतिवार्षिकव्रतं वा।	३६० धेनवः।	१०८० कार्षापणाः। तल्लभ्यस्वर्णादि वा।	२०० गावः। अशक्तौ २०० कार्षापणाः।

अथ महापातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चर्मदानम्।	दक्षिणा।
अज्ञानतस्तत्कृतनष्टस्वामिकतत्तुल्यसंख्येयम्।	द्वादशवार्षिकव्रतं स्त्रीबालवृद्धानामर्धम्। एकस्योभयधर्मत्वात्।	१८० धेनवः।	५४० कार्षापणाः। तत्तुल्यस्वर्णादि वा।	१०० गावः। अशक्तौ १०० कार्षापणाः।
ज्ञानतो गुर्वङ्गनागमनम्। अथवा ब्रह्महत्यागमनम्। सुरायास्त्रासर्यागमनञ्च।	गुरुतल्पगः प्रथममभिशस्य तप्ते लौहमये सुप्यात्। ज्वलन्तीं लौहप्रतिमां स्वस्त्रियं प्रतिमां वा आलिङ्ग्य म्रियेत। स्वयं वा शिश्नवृषणावुत्कृत्य अञ्जलौ निधाय आमरणात् नैर्ऋतीन्दिशमातिष्ठेत्।			
	चतुर्विंशतिवार्षिकव्रतं वा चरेत्। गुर्वङ्गनयापि एतत् कर्तव्यम्।	३६० धेनवः।	१०८० कार्षापणाः। तत्तुल्यस्वर्णादि वा।	२०० गावः। अशक्तौ २०० कार्षापणाः।
अज्ञानतो गुर्वङ्गनागमः।	द्वादशवार्षिकव्रतम्। बालवृद्धयोरर्धम्। एतच्चातुर्वर्ण्यविषयम्।	१८० धेनवः।	५४० कार्षापणाः। तत्तुल्यस्वर्णादि वा।	१०० गावः। अशक्तौ १०० कार्षापणाः।
चतुर्णां महापातकिनां संसर्गः।	ज्ञानतः सकृत् प्रथमसंसर्गिणोऽष्टादशवार्षिकव्रतम्।	२७० धेनवः।	८१० कार्षापणाः। तत्तुल्यस्वर्णादि वा।	१५० गावः। अशक्तौ १५० कार्षापणाः।
तत्र गुरुसंसर्गो यथा। पतितात्सावित्र्यात् वेदाध्ययनम्। १। पतितशिष्याय वेदाध्यापनम्। २। पतितेन सहैकासनादि ज्योतिष्टोमादियजनम्। ३। पतितस्य ज्योतिष्टोमादिनिष्पादनरूपयाजनम्। ४। पतितेन पतितया वा परिणयनम्। ५। स्त्रीवादिपतितान्यजातिसंसर्गगमनम्। ६। पतितान्नस्य पतितेन सहैकपात्रे भोजनम्। ७।	अज्ञानतः सहस्रत्रयसंसर्गिणो नववार्षिकव्रतम्।	१३५ धेनवः।	४०५ कार्षापणाः।	७५ गावः। अशक्तौ ७५ कार्षापणाः।
	ज्ञानतो द्वितीयसंसर्गिणः नववार्षिकव्रतम्।	१३५ धेनवः।	४०५ कार्षापणाः।	७५ गावः। अशक्तौ ७५ कार्षापणाः।
	अज्ञानतो द्वितीयसंसर्गिणः सार्धचतुर्वार्षिकव्रतम्।	६८ धेनवः।	२०२१० कार्षापणाः।	३८ गावः। अशक्तौ ३८१० कार्षापणाः।
	ज्ञानतस्तृतीयसंसर्गिणः षड्वार्षिकव्रतम्।	९० धेनवः।	२७० कार्षापणाः।	५० गावः। अशक्तौ ५० कार्षापणाः।
	अज्ञानतस्तृतीयसंसर्गिणस्त्रैवार्षिकव्रतम्।	४५ धेनवः।	१३५ कार्षापणाः।	२५ गावः। अशक्तौ २५ कार्षापणाः।
	ज्ञानाज्ञानतश्चतुर्थसंसर्गिणः प्रायश्चित्ताभावः। ब्रह्मघातिनां क्षत्रियवैश्यशूद्राणां ज्ञानाज्ञानतः संसर्गे तु क्रमेण एतस्य द्विगुणं त्रिगुणं चतुर्गुणं क्षेयम्।			
तत्र लघुसंसर्गो यथा। उपनयनं दत्त्वा पतितायाध्यापनम्। १। पतितायाध्यापनम्। २। पतितयाजमानस्य अध्वर्यादियज्ञयाजनम्। ३। पतितेन सहासनादियज्ञयजनम्। ४। पतितस्यान्तर्गमनम्। ५। पतितगृहगमनम्। ६। पतितान्नस्य पतितेन सहैकपात्रे भोजनम्। ७। पतितौष्ट्रदोहनम्। ८।	ज्ञानतः ब्रह्मासंसर्गे प्रथमसंसर्गिणोऽष्टादशवार्षिकव्रतम्।	२७० धेनवः।	८१० कार्षापणाः।	१५० गावः। अशक्तौ १५० कार्षापणाः।
	अज्ञानतः ब्रह्मासंसर्गे प्रथमसंसर्गिणो नववार्षिकव्रतम्।	१३५ धेनवः।	४०५ कार्षापणाः।	७५ गावः। अशक्तौ ७५ कार्षापणाः।
	ज्ञानतः ब्रह्मासंसर्गे द्वितीयसंसर्गिणो नववार्षिकव्रतम्।	१३५ धेनवः।	४०५ कार्षापणाः।	७५ गावः। अशक्तौ ७५ कार्षापणाः।
	अज्ञानतः ब्रह्मासंसर्गे द्वितीयसंसर्गिणः सार्धचतुर्वार्षिकव्रतम्।	६८ धेनवः।	२०२१० कार्षापणाः।	३८ गावः। अशक्तौ ३८१० कार्षापणाः।
	ज्ञानतः ब्रह्मासंसर्गे तृतीयसंसर्गिणः षड्वार्षिकव्रतम्।	९० धेनवः।	२७० कार्षापणाः।	५० गावः। अशक्तौ ५० कार्षापणाः।
	अज्ञानतः ब्रह्मासंसर्गे तृतीयसंसर्गिणस्त्रैवार्षिकव्रतम्।	४५ धेनवः।	१३५ कार्षापणाः।	२५ गावः। अशक्तौ २५ कार्षापणाः।
	चतुर्थसंसर्गिणो ज्ञानाज्ञानतः प्रायश्चित्ताभावः।			

अथ महापातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णोदानम्।	दक्षिणा।
महापातकिनां लघुतरसंसर्गो यथा। एकशय्याशनयानादिः। ततो लघुतर आलापस्पर्शनिःश्वासादिः।	एभिश्च त्रिभिर्लघुतरसंसर्गैरेको लघुसंसर्गः।			
	ज्ञानतस्त्रिभिर्लघुसंसर्गैर्वत्सरेण साम्यम्। तेनाष्टादशवार्षिकव्रतम्।	२७० धेनवः।	८१० कार्षापणाः। तल्लभ्यस्वर्णादि वा।	१५० गावः। अशक्तौ १५० कार्षापणाः।
	अज्ञानतो वत्सरद्वयेन।	तथा।	तथा।	तथा।
	ज्ञानत एकैकशो वत्सरत्रयेण।	तथा।	तथा।	तथा।
	अज्ञानाद्वत्सरषट्केन।	तथा।	तथा।	तथा।
	संलापादीनां त्रयाणां एकैकयानादिसमानत्वात् ज्ञानतो वत्सरत्रयेण पातः।	तथा।	तथा।	तथा।
	संलापादीनां त्रयाणां एकैकयानादिसमानत्वादज्ञानाद्वर्षषट्केन पातः। तेनाष्टादशवार्षिकव्रतम्।	२७० धेनवः।	८१० कार्षापणाः। तल्लभ्यस्वर्णादि वा।	१५० गावः। अशक्तौ १५० कार्षापणाः।
	ज्ञानादेकैकशो वत्सरनवकेन।	तथा।	तथा।	तथा।
	अज्ञानादेकैकशोऽष्टादशवत्सरैः पातः॥*॥ नवविधपापान्वितानां मध्यात् येन पापीयसा यः संसृष्टः स तस्य व्रतं पादहीनं कुर्यात्॥ एतच्च प्रथमसंसर्गिणाम्। द्वितीयसंसर्गिणां द्विपादहीनम्। तृतीयसंसर्गिणां त्रिपादहीनं सर्वत्र ज्ञेयम्॥*॥ संसर्गाणासुक्तकालन्यूनाधिक्ये भागहारेण प्रायश्चित्तन्यूनाधिक्यं ज्ञेयम्॥*॥ रघुनन्दनभट्टाचार्यमते कलौ लघुसंसर्गेषु प्रतिग्रहादिषु पातित्याभावात् तत्प्रायश्चित्ताभावः॥	तथा।	तथा।	तथा।
पतितोत्पन्नत्वमपि महापातकिसंसर्गविशेषः।	यस्य पतितस्य यत् प्रायश्चित्तं तस्य पातित्यदशायां जातस्य पुत्रस्य तत् तृतीयभागप्रायश्चित्तम्। तदानीं तज्जातायाः कन्यायाः पतितोत्पन्नपुत्रप्रायश्चित्ततृतीयभागप्रायश्चित्तम्।			

अथानुपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ। चूर्णोदानम्।	दक्षिणा।
समुत्कर्षे अनृतम्। तत्तु सतुत्कर्षनिमित्तं वाचा क्रियया वा अन्यथा प्रतिपादनं यथा शूद्रस्य ब्राह्मणोऽहमिति वचनं यज्ञोपवीतधारणञ्च। अथवा परस्य सम्यग्जातिविद्योत्कर्षे सति नायं ब्राह्मणो न च किञ्चिदपि जानाति इत्यनृतवचनम्। १। राजगामिपैशुनम्। तत्तु राज्ञि निर्दोषस्य दोषख्यापनम्। २। गुरोरलीकनिर्बन्धः। स तु गुरोर्जन्मदातुरुपाध्यायोपाभियोगः। ३।	द्वादशवार्षिकव्रतम्। एतच्च ज्ञानात्यन्ताभ्यासतः॥*॥ एतन्मध्यादृयदुपपातके दृश्यते तदज्ञानादिना लघुविषयत्वेत्यादिवक्ष्येयम्॥*॥ यच्च वशिष्ठवचनं ब्रह्मोज्झः कृच्छ्रं द्वादशरात्रं चरित्वा पुनरुपयुञ्जीत वेदमाचार्यान्। विष्णुः। सतुत्कर्षानृते गुरोश्चालीकनिर्बन्धे तदाचार्ये च मासं पयसा वर्तेत। आचार्यं परदारगमनाभिप्रायः। वशिष्ठः। गुरोश्चालीकनिर्बन्धे सचेलस्नातो गुरुं प्रसादयेत् प्रसादात् पूतो भवति। एतानि प्रमादादिकृते बोध्यानि।	१८० धेनवः।	५४० कार्षापणाः।	१०० गावः। अशक्तौ १०० कार्षापणाः।

अथानुपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा।
एतानि त्रीणि ज्ञानतः अत्यन्ताभ्यासे अज्ञानकृतब्रह्महत्यासमानि। यागस्थयोः क्षत्रियवैश्ययोर्वधः। ४। गर्भिणीवधः। ५। रजस्वलावधः। ६। अग्निगोत्रावधः। ७। ब्राह्मणव्यतिरिक्ताविज्ञातगर्भवधः। ८। शरणागतवधः। ९। एतानि च अज्ञानकृतब्रह्महत्यासमानानि।				
ब्रह्मोज्झता। सा च अस्त्रशस्त्राभियोगेन अधीतवेदविस्मरणम्। १। वेदनिन्दा। अर्थतो ग्रन्थतश्च।२। कौटसाक्ष्यम्। ३। सुहृद्वधः। स च ब्राह्मणव्यतिरिक्तमित्रवधः। ४। गर्हितान्नजग्धिः। सा च ज्ञानतोऽत्यन्ताभ्यासेन अन्त्यजान्नभोजनम्। ५। गर्हितान्नजग्धिः। ज्ञानतोऽत्यन्ताभ्यासेन कृत्राकलशुनादिभोजनम्। ६। एतानि षट् अज्ञानकृतसुरापानसमानि।	द्वादशवार्षिकव्रतम्।	१८० धेनवः।	५४० कार्षापणाः। तल्लभ्यस्वर्णादि वा।	१०० गावः। अशक्तौ १०० कार्षापणाः।
ब्राह्मणसम्बन्धिनिःक्षेपहरणम्। १। नरा२श्व३रजत४भूमि५वज्र६मणीना७श्चाभ्यासेन हरणम्। एतानि सप्त ब्राह्मणस्वामिकाशीतिरत्तिकापरिमितसुवर्णस्तेयसमानि।	ज्ञानतो द्वादशवार्षिकव्रतम्। अज्ञानतस्तदर्द्धम्।	१८० धेनवः।	५४० कार्षापणाः। तल्लभ्यस्वर्णादि वा।	१०० गावः। अशक्तौ १०० कार्षापणाः।
सपिण्डस्त्रीगमनम्। १। ब्राह्मणकुमारीगमनम्। २। चाण्डालादिस्त्रीगमनम्। ३। सवर्णमित्रस्त्रीगमनम्। ४। पुत्रस्यासवर्णस्त्रीगमनम्। ५। औरसेतरपुत्रभार्यागमनम्। ६। पितृष्वस्रगमनम्। ७। मातृष्वस्रगमनम्। ८। गन्तारमपेक्ष्य हीनवर्णपितृपत्नीगमनम्। ९। पितृव्यपत्नीगमनम्। १०। मातामहपत्नीगमनम्। ११। मातुलपत्नीगमनम्। १२। श्वश्रूगमनम्। १३। स्वसृगमनम्। १४। ज्येष्ठभ्रातृपत्नीगमनम्। १५। राजपत्नीगमनम्। १६। श्रोत्रिय-	ज्ञाननो महापातकोक्तप्रकारेण मरणं तदैकल्पिकं चतुर्विंशतिवार्षिकव्रतम्।	३६० धेनवः।	१०८० कार्षापणाः। तल्लभ्यस्वर्णादि वा।	२०० गावः। अशक्तौ २०० कार्षापणाः।
	अज्ञानतो द्वादशवार्षिकव्रतम्।	१८० धेनवः।	५४० कार्षापणाः। तल्लभ्यस्वर्णादि वा।	१०० गावः। अशक्तौ १०० कार्षापणाः।
	पञ्चपुरुषाधिकगामिनीनामासां गमने चान्द्रायणम्।	८ धेनवः।	२२॥० कार्षापणाः। साङ्गसप्तधेनुसंकलनात्।	यथाशक्ति।
	अभ्यासव्यभिचारिण्याः सकृद्गमने अर्थात् सप्तमपुरुषगामिन्या गमने पराकः।	५ धेनवः।	१५ कार्षापणाः।	यथाशक्ति।
	अष्टमादिपुरुषगामिन्या गमने तप्तकृच्छ्रम्।	४ धेनवः।	११।० कार्षापणाः। पादोनधेनुचतुष्टयस्य ग्राह्यत्वात्।	यथाशक्ति।

अथानुपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा।
पत्नीगमनम्।१७। ऋत्विक्-पत्नीगमनम्। १८। उपाध्यायपत्नीगमनम्। १९। शिष्यपत्नीगमनम्। २०। स्वसृसखीगमनम्।२१। असवर्णाजातदुहितृगमनम्। २२। आचार्यपत्नीगमनम्। २३। गुरुणागनागमनम्। २४। प्रव्रजितागमनम्।२५। धात्रीगमनम्। २६। साध्वीगमनम्। २७। निःक्षत्रस्त्रीगमनम्। २८। वर्णोत्तमागमनम्।२९। एतानि गुरुतल्पगमनसमानि।*। इति चतुःप्रकाराण्यनुपातकानि मिलित्वा एकपञ्चाशत्संख्येयानि॥	अज्ञानादारोहणमात्रे सम्बन्धविप्रकर्षे वा परावस्त्रमन्त्रकृच्छ्रो वा।			
	ज्ञानतो महापातकोक्तप्रकारेण मरणम्। तद्वैकल्पिकं चतुर्विंशतिवार्षिकव्रतम्।	३६० धेनवः।	१०८० कार्षापणाः। तत्तुल्यस्वर्णादि वा।	२०० गावः। अशक्तौ २०० कार्षापणाः।
	अज्ञानतो द्वादशवार्षिकव्रतम्।	१८० धेनवः।	५४० कार्षापणाः। तत्तुल्यस्वर्णादि वा।	१०० गावः। अशक्तौ १०० कार्षापणाः।
	षण्ढपुरुषाधिकगामिनीनामासां गमने चान्द्रायणम्।	८ धेनवः।	२२॥० कार्षापणाः। सार्द्धसप्तधेनुसंकलनात्।	यथाशक्ति।
	अभ्यासस्थभिचारिण्याः सकृद्गमने अथवा सप्तमपुरुषगामिन्या गमने पराकः।	५ धेनवः।	१५ कार्षापणाः।	यथाशक्ति।
	अष्टमादिपुरुषगामिन्या गमने तप्तकृच्छ्रम्।	४ धेनवः।	११।० कार्षापणाः। पादोनधेनु-चतुष्टयस्य ग्राह्यत्वात्।	यथाशक्ति।

अथोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा।
ब्राह्मणक्षत्रियवैश्यकर्तृकज्ञानकृतब्राह्मणस्वामिकगवीवधः।	त्रैमासिकव्रतम्। तद्यथा। क्षतसक्षिखवनो व्यापादितायाः गोश्चर्म्मणा क्षतपरिधानोत्तरावगुण्ठनो मासमेकं गोमूत्रेण यवागूकृतान् यवान् पिबन् गोष्ठे वसेत्। अपरमासद्वये उपोष्यापरदिने सायं स्वयं भुञ्जीत। जितेन्द्रियो गोमूत्रेण स्नानं चरेत्। दिवा गवानुगमनं ऊर्द्धं तिष्ठन् गोरजःपानञ्च चरेत्। गोः शुश्रूषां नमस्कारञ्च कुर्य्यात्। रात्रौ वीरासनं वसेत्। तिष्ठन्तीषु गोष्वनुतिष्ठेत्। व्रजन्तीषु तास्वनुव्रजेत्। आसीनासु तास्वासीनः। पीतमत्सरः। आतुरामभिशस्तां पतितां पङ्कलग्नां भयनिमित्तैश्चौरव्याघ्रादिभिराक्रान्तां च गां सर्वशक्तिभिर्विमोचयेत्। ग्रीष्मवर्षाशीतेषु मारुते भृशं वाति वा गोस्त्राणमकृत्वा आत्मत्राणं न कुर्य्यात्। आत्मनः अन्येषां वा गृहक्षेत्रखलेषु भक्षयन्तीं पिबन्तं वत्सञ्च निवारणाभिप्रायेण न कथयेत्। एतद्विधानेन यो गामनुगच्छति स गोहत्याकृतपापात् प्रमुच्यते। एकं वृषं दश गाश्च दक्षिणां दद्यात्। एतदशक्तौ वेदविद्वान् सर्वस्वं दद्यात्। एतच्चतुर्थांशस्यादिविषयम्। स्त्रीशूद्रबालवृद्धानामर्द्धम्।	१२ धेनवो भवदेवभट्टसम्मताः। १७ धेनवो बहुसम्मताः।	३६ कार्षापणाः। तत्तुल्यस्वर्णादि वा। ५१ कार्षापणाः।	१ वृषः १० गावः। अशक्तौ १५ कार्षापणाः। तथा।

यथोपपातकानि ।	प्रायश्चित्तानि ।	तदशक्तौ धेनुदानम् ।	तदशक्तौ चूर्णोदानम् ।	दक्षिणा ।
ब्राह्मणक्षत्रियवैश्यकर्तृकब्राह्मणस्वामिकाज्ञानहृतगवीवधः ।	सार्द्धमासिकव्रतम् । तद्यथा । गोष्ठे गोसमीपे गोघ्नः स्थितिं कुर्य्यात् । तत्रैव स्थितौ भुयनञ्च । भक्तुयावकपयोदधिसद्यगोमयानां भक्षणं क्रमशः कुर्य्यात् । नखरोमविवर्जितस्रिसवनस्नानचरेत । जितेन्द्रियो वीतमत्सरश्च भवेत् । यथाशक्ति गायत्रीञ्च जपेत् । सार्द्धमासे पूर्णे सति विप्रान् भोजयेत् । गां तन्मूल्यं वा दक्षिणां दद्यात् । अनेन विधानेन गोघ्नः प्रायानुशुध्येत । एतद्व्रतं गोस्वामिने तत्प्रतिरूपं गवान्तरं यथोक्तमूल्यं वा दत्त्वा कर्त्तव्यम् । स्त्रीशूद्रबालवृद्धागामर्द्धं प्रायश्चित्तम् ।	६ धेनवो भवदेवभट्टसम्मताः । ६ धेनवो बहुसम्मताः ।	१८ कार्षापणाः । तन्मूल्यस्वर्णादि वा । २५॥० कार्षापणाः । बहुसम्मताः । सार्द्धाष्ट धेनुसंकलनात् ।	१ गौः । अशक्तौ १ कार्षापणः । स्वार्त्तमते ७॥० कार्षापणाः ।
अज्ञानकृतशूद्रकर्तृक-ब्राह्मणस्वामिकगवीवधः ।	त्रैमासिकव्रतार्द्धम् । अज्ञानतस्तदर्द्धम् ।	६ धेनवो भवदेवभट्टसम्मताः । ६ धेनवो बहुसम्मताः ।	१८ कार्षापणाः । २५॥० कार्षापणाः । बहुसम्मताः । तन्मूल्यस्वर्णादि वा ।	१ गौः । अशक्तौ १ कार्षापणः ।
अज्ञानकृतब्राह्मणक्षत्रियवैश्यकर्तृकक्षत्रियस्वामिकगवीवधः ।	षाण्मासिकव्रतम् । तद्यथा । वणमासान् तत्तन्मेणा परिवृतो गोग्रासाहर्त्ता गोव्रतो यवाग्वी गोभिरेव सञ्चरन् तत्पापात् विमुच्येत ।	१२ धेनवः ।	३६ कार्षापणाः । तन्मूल्यस्वर्णादि वा ।	यथाशक्ति ।
ब्राह्मणक्षत्रियवैश्यकर्तृकाज्ञानकृतक्षत्रियस्वामिकगवीवधः ।	षाण्मासिकव्रतार्द्धम् ।	६ धेनवः ।	१८ कार्षापणाः । तन्मूल्यस्वर्णादि वा ।	यथाशक्ति ।
शूद्रकर्तृकाज्ञानकृतक्षत्रियस्वामिकगवीवधः ।	षाण्मासिकव्रतार्द्धम् ।	६ धेनवः ।	१८ कार्षापणाः । तन्मूल्यस्वर्णादि वा ।	यथाशक्ति ।
तत्कर्तृकाज्ञानकृततत्स्वामिकगवीवधः ।	एतद्व्रतार्द्धम् । स्त्रीशूद्रबालवृद्धानां सर्व्वार्द्धम् ।	३ धेनवः ।	६ कार्षापणाः । तन्मूल्यस्वर्णादि वा ।	यथाशक्ति ।
ब्राह्मणक्षत्रियवैश्यकर्तृकाज्ञानकृतवैश्यस्वामिकगवीवधः ।	द्विगुणं मासव्रतम् । मासव्रतं यथा । मासैकं पञ्चगव्यपानं गोष्ठे वासः गवानुगमनं गोमतीजपः ।	१० धेनवः ।	३० कार्षापणाः । तन्मूल्यस्वर्णादि वा ।	यथाशक्ति ।
तत्कर्तृकाज्ञानकृततत्स्वामिकगवीवधः ।	एतदर्द्धम् ।	५ धेनवः ।	१५ कार्षापणाः । तन्मूल्यस्वर्णादि वा ।	यथाशक्ति ।
ब्राह्मणक्षत्रियवैश्यकर्तृकाज्ञानकृतशूद्रस्वामिकगवीवधः ।	४ प्राजापत्यानि ।	४ धेनवः ।	१२ कार्षापणाः । तन्मूल्यस्वर्णादि वा ।	यथाशक्ति ।
ब्राह्मणक्षत्रियवैश्यकर्तृकाज्ञानकृतशूद्रस्वामिकगवीवधः ।	२ प्राजापत्ये । स्त्रीशूद्रबालवृद्धानां सर्व्वार्द्धम् । एकस्य स्त्रीत्वशूद्रत्वादुभयधर्म्मवत्त्वे प्रायश्चित्तपादः ।	२ धेनू ।	६ कार्षापणाः । तन्मूल्यस्वर्णादि वा ।	यथाशक्ति ।
ब्राह्मणस्वामिकगर्भिणीकपिलादोग्ध्रीहोमधेनुसुव्रतानां गवां ब्राह्मणक्षत्रियवैश्यकर्तृकाज्ञानकृतवधः ।	द्विगुणं त्रैमासिकव्रतम् । अज्ञानतस्तदर्द्धम् ।	२४ धेनवो भवदेवभट्टसम्मताः । ३४ धेनवो बहुसम्मताः ।	७२ कार्षापणाः । १०२ कार्षापणा बहुसम्मताः ।	२ वृषौ २० गावः । अशक्तौ ३० कार्षापणाः ।
ब्राह्मणस्वामिकगर्भिणीकपिलादोग्ध्रीहोमधेनुसुव्रतानां गवां शूद्रकर्तृकाज्ञानकृतवधः ।	त्रैमासिकव्रतम् । अज्ञानतस्तदर्द्धम् ।	१२ धेनवः । १७ धेनवो बहुसम्मताः ।	३६ कार्षापणाः । ५१ कार्षापणा बहुसम्मताः ।	१० वृषः १० गावः । अशक्तौ १५ कार्षापणाः ।

अघोपपातकानि ।	प्रायश्चित्तानि ।	तदशक्तौ धेनुदानम् ।	तदशक्तौ चूर्णीदानम् ।	दक्षिणा ।
क्षत्रियस्वामिकगर्भिणीकपिलादोग्ध्रीहोमधेनुसुव्रतानां गवां ब्राह्मणक्षत्रियवैश्यकर्तृकज्ञानकृतवधः ।	द्विगुणं षाण्मासिकव्रतम् । अज्ञानतस्तदर्द्धम् ।	२४ धेनवः ।	७२ कार्षापणाः ।	यथाशक्ति ।
क्षत्रियस्वामिकगर्भिणीकपिलादोग्ध्रीहोमधेनुसुव्रतानां गवां शूद्रकर्तृकज्ञानकृतवधः ।	षाण्मासिकव्रतम् । अज्ञानतस्तदर्द्धम् ।	१२ धेनवः ।	३६ कार्षापणाः ।	यथाशक्ति ।
वैश्यस्वामिकगर्भिणीकपिलादोग्ध्रीहोमधेनुसुव्रतानां गवां ब्राह्मणक्षत्रियवैश्यकर्तृकज्ञानकृतवधः ।	चतुर्गुणं मासिकव्रतम् । अज्ञानतस्तदर्द्धम् ।	२० धेनवः ।	६० कार्षापणाः ।	यथाशक्ति ।
वैश्यस्वामिकगर्भिणीकपिलादोग्ध्रीहोमधेनुसुव्रतानां गवां शूद्रकर्तृकज्ञानकृतवधः ।	द्विगुणं मासिकव्रतम् । अज्ञानतस्तदर्द्धम् ।	१० धेनवः ।	३० कार्षापणाः ।	यथाशक्ति ।
शूद्रस्वामिकगर्भिणीकपिलादोग्ध्रीहोमधेनुसुव्रतानां गवां ब्राह्मणक्षत्रियवैश्यकर्तृकज्ञानकृतवधः ।	८ प्राजापत्यानि । अज्ञानतस्तदर्द्धम् ।	८ धेनवः ।	२४ कार्षापणाः ।	यथाशक्ति ।
शूद्रस्वामिकगर्भिणीकपिलादोग्ध्रीहोमधेनुसुव्रतानां गवां शूद्रकर्तृकज्ञानकृतवधः ।	४ प्राजापत्यानि । अज्ञानतस्तदर्द्धम् ।	४ धेनवः ।	१२ कार्षापणाः ।	यथाशक्ति ।
ज्ञानकृतब्राह्मणक्षत्रियवैश्यकर्तृकार्धमशूद्रस्वामिकगवीवधः ।	२ प्राजापत्ये । अज्ञानतस्तदर्द्धम् ।	२ धेनू ।	६ कार्षापणाः ।	यथाशक्ति ।
ज्ञानकृतशूद्रकर्तृकार्धमशूद्रस्वामिकगवीवधः ।	१ प्राजापत्यम् । अज्ञानतस्तदर्द्धम् ।	१ धेनुः ।	३ कार्षापणाः ।	यथाशक्ति ।
अधमशूद्रस्वामिकगर्भिणीकपिलादोग्ध्रीहोमधेनुसुव्रतानां गवां ब्राह्मणक्षत्रियवैश्यकर्तृकज्ञानकृतवधः ।	४ प्राजापत्यानि । अज्ञानतस्तदर्द्धम् ।	४ धेनवः ।	१२ कार्षापणाः ।	यथाशक्ति ।
अधमशूद्रस्वामिकगर्भिणीकपिलादोग्ध्रीहोमधेनुसुव्रतानां गवां शूद्रकर्तृकज्ञानकृतवधः ।	२ प्राजापत्ये । अज्ञानतस्तदर्द्धम् ।	२ धेनू ।	६ कार्षापणाः ।	यथाशक्ति ।
ब्राह्मणस्वामिकाया गोरुत्पन्नमात्रगर्भस्य ब्राह्मणक्षत्रियवैश्यकर्तृकज्ञानकृतवधः ।	त्रैमासिकव्रतपादः । अज्ञानतस्तदर्द्धम् ।	५ धेनवः ।	१२॥० कार्षापणाः । सपादधेनुचतुष्टयसङ्कलनात् ।	३॥० कार्षापणाः ।
ब्राह्मणस्वामिकाया गोर्गर्भाच्चर्मास्थिगर्भस्य ब्राह्मणक्षत्रियवैश्यकर्तृकज्ञानकृतवधः ।	त्रैमासिकव्रतपादद्वयम् । अज्ञानतस्तदर्द्धम् । स्त्रीशूद्रबालवृद्धानामर्द्धम् ।	६ धेनवः ।	२५॥० कार्षापणाः । सार्द्धाष्टधेनुसङ्कलनात् ।	७॥० कार्षापणाः ।
ब्राह्मणस्वामिकाया गोर्निष्पन्नसकलगात्रचैतन्यरहितगर्भस्य ब्राह्मणक्षत्रियवैश्यकर्तृकज्ञानकृतवधः ।	त्रैमासिकव्रतपादत्रयम् । अज्ञानतस्तदर्द्धम् । स्त्रीशूद्रबालवृद्धानामर्द्धम् । चैतन्ययुक्तगर्भवधे क्षत्रियमेव प्रायश्चित्तम् ।	१३ धेनवः ।	३८॥० कार्षापणाः । पादोनत्रयोदशधेनुसङ्कलनात् ।	११॥० कार्षापणाः ।
क्षत्रियस्वामिकाया गोरुत्पन्नमात्रगर्भस्य ब्राह्मणक्षत्रियवैश्यकर्तृकज्ञानकृतवधः ।	षाण्मासिकव्रतपादः । अज्ञानतस्तदर्द्धम् ।	३ धेनवः ।	९ कार्षापणाः ।	यथाशक्ति ।

अथोपपातकानि ।	प्रायश्चित्तानि ।	तदशक्तौ धेनुदानम् ।	तदशक्तौ चूर्णोदानम् ।	दक्षिणा ।
गवां ब्राह्मणक्षत्रियवैश्यकर्तृकज्ञानकृतवधः ।	स्त्रीशूद्रबालवृद्धानामर्द्धम् ।			
ब्राह्मणस्वामिकानां बहूनां गवां ब्राह्मणक्षत्रियवैश्यकर्तृकैकप्रयत्ननिष्पन्नज्ञानकृतवधः ।	द्विगुणश्चैमासिकव्रतम् । अज्ञानतस्तदर्द्धम् । स्त्रीशूद्रबालवृद्धानामर्द्धम् ।	३४ धेनवः ।	१०२ कार्षापणाः ।	२ वृषौ २० गावः । अशक्तौ ३० कार्षापणाः ।
क्षत्रियस्वामिकानां बहूनां गवां ब्राह्मणक्षत्रियवैश्यकर्तृकैकप्रयत्ननिष्पन्नज्ञानकृतवधः ।	द्विगुणषाण्मासिकव्रतम् । अज्ञानतस्तदर्द्धम् । स्त्रीशूद्रबालवृद्धानामर्द्धम् ।	२४ धेनवः ।	७२ कार्षापणाः ।	यथाशक्ति ।
वैश्यस्वामिकानां बहूनां गवां ब्राह्मणक्षत्रियवैश्यकर्तृकैकप्रयत्ननिष्पन्नज्ञानकृतवधः ।	चतुर्गुणमासव्रतम् । अज्ञानतस्तदर्द्धम् । स्त्रीशूद्रबालवृद्धानामर्द्धम् ।	२० धेनवः ।	६० कार्षापणाः ।	यथाशक्ति ।
शूद्रस्वामिकानां बहूनां गवां ब्राह्मणक्षत्रियवैश्यकर्तृकैकप्रयत्ननिष्पन्नज्ञानकृतवधः ।	८ प्राजापत्यानि । अज्ञानतस्तदर्द्धम् । स्त्रीशूद्रबालवृद्धानामर्द्धम् । स्त्रीत्वाद्युभयधर्म्मसत्त्वे पादः । प्रयत्नभेदे प्रायश्चित्तावृत्तिः ।	८ धेनवः ।	२४ कार्षापणाः ।	यथाशक्ति ।
ज्ञानकृतबहुकर्तृकब्राह्मणस्वामिकैकगवीवधः ।	प्रत्येकं त्रैमासिकव्रतपादः । अज्ञानतस्तदर्द्धम् ।	५ धेनवः ।	१२॥० कार्षापणाः । सपादधेनुचतुष्टयसङ्कलनात् ।	३॥० कार्षापणाः ।
ज्ञानकृतबहुकर्तृकक्षत्रियस्वामिकैकगवीवधः ।	प्रत्येकं षाण्मासिकव्रतपादः । अज्ञानतस्तदर्द्धम् ।	३ धेनवः ।	९ कार्षापणाः ।	यथाशक्ति ।
ज्ञानकृतबहुकर्तृकवैश्यस्वामिकैकगवीवधः ।	प्रत्येकं द्विगुणमासव्रतपादः । अज्ञानतस्तदर्द्धम् ।	३ धेनवः ।	७॥० कार्षापणाः । सार्द्धत्रयधेनुसङ्कलनात् ।	यथाशक्ति ।
ज्ञानकृतबहुकर्तृकशूद्रस्वामिकैकगवीवधः ।	प्रत्येकं प्राजापत्यम् । अज्ञानतस्तदर्द्धम् ।	१ धेनुः ।	३ कार्षापणाः ।	यथाशक्ति ।
द्वाभ्यामेकगवीवधः ।	यद्यत्स्वामिकाया गोर्वधे यद्यत्प्रायश्चित्तमुक्तं प्रत्येकं संपूर्णं तत्तत् प्रायश्चित्तम् ।			
द्वाभ्यामेकप्रयत्ननिष्पन्नबहुगवीवधः ।	यद्यत्स्वामिकाया गोर्वधे यद्यत्प्रायश्चित्तं प्रत्येकं तद्द्वैगुण्यम् ।			
एकप्रयत्ननिष्पन्नबहुकर्तृकबहुगवीवधः ।	प्रत्येकं तत्तद्बोधोक्तव्रतपादद्वयम् ।			
एकप्रयत्ननिष्पन्नाभ्यामज्ञानबहुकर्तृकबहुगवीवधः ।	प्रत्येकं तत्तद्बोधोक्तव्रतद्विपादप्रायश्चित्तावृत्तिः ।			
ज्ञानकृतब्राह्मणक्षत्रियवैश्यकर्तृकब्राह्मणस्वामिकैकहायनगवीवधः ।	त्रैमासिकव्रतपादः । अज्ञानतस्तदर्द्धम् । स्त्रीशूद्रबालवृद्धानामर्द्धम् ।	५ धेनवः ।	१२॥० कार्षापणाः । सपादधेनुचतुष्टयसङ्कलनात् ।	३॥० कार्षापणाः ।
ज्ञानकृतब्राह्मणक्षत्रियवैश्यकर्तृकब्राह्मणस्वामिकद्विहायनगवीवधः ।	त्रैमासिकव्रतार्द्धम् । अज्ञानतस्तदर्द्धम् । स्त्रीशूद्रबालवृद्धानामर्द्धम् ।	६ धेनवः ।	२५॥० कार्षापणाः । सार्द्धाष्टधेनुसङ्कलनात् ।	७॥० कार्षापणाः ।
ज्ञानकृतब्राह्मणक्षत्रियवैश्यकर्तृकब्राह्मणस्वामिकत्रिहायनगवीवधः ।	पादन्यूनत्रैमासिकव्रतम् । अज्ञानतस्तदर्द्धम् । स्त्रीशूद्रबालवृद्धानामर्द्धम् ।	१३ धेनवः ।	३९॥० कार्षापणाः । पादोनत्रयोदशधेनुसङ्कलनात् ।	११॥० कार्षापणाः ।
ज्ञानकृतब्राह्मणक्षत्रियवैश्यकर्तृकक्षत्रियस्वामिकैकहायनगवीवधः ।	षाण्मासिकव्रतपादः । अज्ञानतस्तदर्द्धम् । स्त्रीशूद्रबालवृद्धानामर्द्धम् ।	२ धेनवः ।	६ कार्षापणाः ।	यथाशक्ति ।

.यथोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णोदानम्।	दक्षिणा।
ज्ञानकृतब्राह्मणक्षत्रियवैश्यक-तूंकक्षत्रियस्वामिकद्विहायनगवीवधः।	षाण्मासिकव्रतपादद्वयम्। अज्ञानतस्तदर्द्धम्। स्त्रीशूद्रबालवृद्धानामर्द्धम्।	६ धेनवः।	१८ कार्षापणाः।	यथाशक्ति।
ज्ञानकृतब्राह्मणक्षत्रियवैश्यक-तूंकक्षत्रियस्वामिकत्रिहायणगवीवधः।	पादन्यूनषाण्मासिकव्रतम्। अज्ञानतस्तदर्द्धम्। स्त्रीशूद्रबालवृद्धानामर्द्धम्।	६ धेनवः।	२७ कार्षापणाः।	यथाशक्ति।
ज्ञानकृतब्राह्मणक्षत्रियवैश्यक-तूंकवैश्यस्वामिकैकहायनगवीवधः।	मासैकव्रतार्द्धम्। अज्ञानतस्तदर्द्धम्।	३ धेनवः।	७॥० कार्षापणाः। सार्द्धद्वयधेनुसङ्कलनात्।	यथाशक्ति।
ज्ञानकृतब्राह्मणक्षत्रियवैश्यक-तूंकवैश्यस्वामिकद्विहायनगवीवधः।	मासव्रतम्। अज्ञानतस्तदर्द्धम्। स्त्रीशूद्रबालवृद्धानामर्द्धम्।	५ धेनवः।	१५ कार्षापणाः।	यथाशक्ति।
ज्ञानकृतब्राह्मणक्षत्रियवैश्यक-तूंकवैश्यस्वामिकत्रिहायणगवीवधः।	पादोनं द्विगुणमासव्रतम्। अज्ञानतस्तदर्द्धम्। स्त्रीशूद्रबालवृद्धानामर्द्धम्।	८ धेनवः।	२२॥० कार्षापणाः। सार्द्धसप्तधेनुसङ्कलनात्।	यथाशक्ति।
ज्ञानकृतब्राह्मणक्षत्रियवैश्यक-तूंकशूद्रस्वामिकैकहायनगवीवधः।	१ प्राजापत्यम्। अज्ञानतस्तदर्द्धम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
ज्ञानकृतब्राह्मणक्षत्रियवैश्यक-तूंकशूद्रस्वामिकद्विहायनगवीवधः।	२ प्राजापत्ये। अज्ञानतस्तदर्द्धम्। स्त्रीशूद्रबालवृद्धानामर्द्धम्।	२ धेनू।	६ कार्षापणाः।	यथाशक्ति।
ज्ञानकृतब्राह्मणक्षत्रियवैश्यक-तूंकशूद्रस्वामिकत्रिहायणगवीवधः।	३ प्राजापत्यानि। अज्ञानतस्तदर्द्धम्। स्त्रीशूद्रबालवृद्धानामर्द्धम्।	३ धेनवः।	६ कार्षापणाः।	यथाशक्ति।
क्षीणाया गोरक्षीणत्वभ्रमेणाहारप्रचारनिर्गमरोधनिमित्तवधः।	प्राजापत्यपादः।	१ धेनुः।	॥० पणाः। धेनुपादसङ्कलनात्।	यथाशक्ति।
	चैत्यज्ञाने प्रायिकमरणं ज्ञात्वा प्रवृत्तस्य चान्द्रायणपादः। इदन्तु सर्व्वस्वामिकायाः सर्व्ववयस्कायाः गोः सर्व्वकर्तृकवधे वोद्वयम्।	२ धेनू।	५॥८० कार्षापणाः। पादार्द्धोनधेनुद्वयसङ्कलनात्।	यथाशक्ति।
क्षीणाया गोरक्षीणत्वभ्रमेणाकालबन्धनायथाबन्धननिमित्तवधः।	प्राजापत्यपादद्वयम्।	१ धेनुः।	१॥० कार्षापणाः। धेन्वर्द्धसङ्कलनात्।	यथाशक्ति।
	चैत्यज्ञाने तु प्रायिकमरणं ज्ञात्वा प्रवृत्तस्य चान्द्रायणपादद्वयम्। एतदपि सर्व्वस्वामिकायाः सर्व्ववयस्कायाः गोः सर्व्वकर्तृकवधे वोद्वयम्।	४ धेनवः।	११।० कार्षापणाः। पादोनधेनुचतुष्टयसङ्कलनात्।	यथाशक्ति।
क्षीणाया गोरक्षीणत्वभ्रमेणशूलशकटादियोजननिमित्तवधः।	प्राजापत्यपादत्रयम्।	१ धेनुः।	२।० कार्षापणाः। पादोनधेनुसङ्कलनात्।	यथाशक्ति।
	चैत्यज्ञाने तु चान्द्रायणपादत्रयम्।	६ धेनवः।	१६॥८० कार्षापणाः। पादोनसार्द्धसप्तधेनुसङ्कलनात्।	यथाशक्ति।
क्षीणाया गोरक्षीयत्वभ्रमेणकूपावटादिषु भयादिनापातनेन प्राक्षीयदक्षिनिपातनेन वधः।	प्राजापत्यम्। चैत्यज्ञाने प्रायिकमरणं ज्ञात्वा प्रवृत्तस्य चान्द्रायणम्। एतदपि सर्व्वस्वामिकादिविषयम्। यदृयन्तस्वामिकयदृयन्त-	१ धेनुः। ८ धेनवः।	३ कार्षापणाः। २२८० कार्षापणाः। सार्द्धसप्तधेनुसङ्कलनात्।	यथाशक्ति। यथाशक्ति।

अघोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णोदानम्।	दक्षिणा।
	कर्तृकवटुयज्ञववधे यद्यत्प्रायश्चित्तमुक्तं अप्रवृत्तप्रवर्तकरूपप्रयोजकस्य तत्तत् प्रायश्चित्तस्य पादत्रयम्। प्रवृत्तप्रवर्तकरूपप्रयोजकस्य पादद्वयम्। स्वल्पप्रवर्तरूपानुग्राहकस्य पादत्रयम्। वधप्रतिरोधकरूपानुग्राहकस्य पादद्वयम्।			
ब्राह्मणक्षत्रियवैश्यकर्तृकशूद्रेतरस्वामिकगवापालननिमित्तवधः।	सेतिकर्तव्यताकप्राजापत्यम्। स्त्रीशूद्रबालवृद्धानामर्द्धम्। इति कर्तव्यता यथा। सन्निधेयं वपनं कार्य्यं त्रिसन्ध्यमवगाहनम्। शृङ्गैर्वापि खुरैर्युक्तं लाङ्गूलश्रवणादिभिः॥ आर्द्रमेव हि तच्चर्म्म परिधाय स गां व्रजेत्। तासां मध्ये वसेद्रात्रौ दिवा ताभिः समं व्रजेत्॥ ब्राह्मणस्य विशेषेण तथा राजन्यवैश्ययोः। प्रायश्चित्ते ततश्चीर्णे कर्य्यादब्राह्मणभोजनम्॥ अनड्वत्सहितां गाञ्च दद्याद्विप्राय दक्षिणाम्॥ इति पराशरोक्ता।	२ धेनू।	६ कार्षापणाः।	१ वृषः १ गौः। अप्रक्तौ ६ कार्षापणाः।
ब्राह्मणक्षत्रियवैश्यकर्तृकशूद्रस्वामिकगवापालननिमित्तवधः।	प्राजापत्यद्वयम्। स्त्रीशूद्रबालवृद्धानामर्द्धम्।	२ धेनू।	६ कार्षापणाः।	यथाशक्ति।
ब्राह्मणक्षत्रियवैश्यशूद्रकर्तृकशूद्रेतरस्वामिकाप्राप्तदम्यावस्थगोवत्सापालननिमित्तवधः। अप्राप्तदम्यावस्था तु त्रिहायणपर्य्यन्तम्।	सेतिकर्तव्यताकप्राजापत्यपादः।	धेनोरर्द्धस्यासम्भवात् १ एका धेनुः।	१॥० कार्षापणाः।	१॥० कार्षापणाः।
ब्राह्मणक्षत्रियवैश्यशूद्रकर्तृकशूद्रस्वामिकाप्राप्तदम्यावस्थगोवत्सापालननिमित्तवधः।	प्राजापत्यव्रतत्रयपादः।	धेनोरर्द्धस्यासम्भवात् १ एका धेनुः।	१॥० कार्षापणाः।	यथाशक्ति।
उत्तरोत्तरवत्सतर्य्योर्वधः।	भूतपूर्वस्वामिकगववधप्रायश्चित्तद्विगुणम्। पूर्वस्वान्यज्ञाने ब्राह्मणस्वामिकगववधद्विगुणप्रायश्चित्तम्।			
गवां शृङ्गभङ्गास्थिभङ्गचर्म्मनिर्लोचनलाङ्गूलच्छेदनम्।	दशरात्रं वज्रव्रतम्। मासार्द्धयवपानम्। प्राजापत्यं वा। वज्रव्रतं यथा। गोमन्त्रेण समायुक्तं यावकक्षीरयोजयेत्। एकाहेनैव कृच्छ्रोऽयमुक्तश्चाङ्गिरसा स्वयम्। सर्व्वपापहरो दिव्यो नाम्ना वज्र इति स्मृतः॥ * ॥ शृङ्गभङ्गादिना षण्मासाभ्यन्तरे गोर्मरणे अन्यूनं वधप्रायश्चित्तं करणीयम्। गुरुणा समेन वा तेन प्रायश्चित्तेन शृङ्गभङ्गादिप्रायश्चित्तसिद्धिः। षण्मासोत्तरमरणे शृङ्गभङ्गादिप्रायश्चित्तमात्रं कर्त्तव्यम्॥	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
गवां सुष्कमोषः।	यत्कर्तृकयत्स्वामिकगववधे यत्प्रायश्चित्तमुक्तं तत्कर्तृकतत्स्वामिकगवसुष्कमोषे तत्प्रायश्चित्तम्। शृङ्गशिरश्छेदयोस्तुल्यत्वाभिधानात्। अत्र प्रयोजकभेदस्यार्द्धपादोनत्व।			

अथोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णोदानम्।	दक्षिणा।
वृषस्य स्वयं ब्राह्मणकर्तृकचटक-शुकटादियोजनम्।	प्राजापत्यद्वयम्।	२ धेनू।	६ कार्षापणाः।	यथाशक्ति।
योषिद्वां ब्राह्मणकर्तृकचटक-शुकटादियोजनम्।	४ प्राजापत्यानि। ब्राह्मणेतरेषां प्राजापत्यद्वयम्।	४ धेनवः।	१२ कार्षापणाः।	यथाशक्ति।
उत्सृष्टवृषस्य कपिलायाश्च ब्राह्मणकर्तृकचटकशुकटादि-योजनम्।	यतिचान्द्रायणद्वयम्। ब्राह्मणेतरेषां यतिचान्द्रायणैकम्।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।
गोमांसखादके गोविक्रयविनिमयादिः।	विक्रयादिमात्रे अज्ञानकृततत्तत्कर्तृकतत्तत्स्वामिकगववधप्रायश्चित्तार्द्धम्। गोमांसखादककर्तृकतद्गववधे तु अज्ञानकृततत्तत्कर्तृकतत्तत्स्वामिकगववधोक्तसंपूर्णप्रायश्चित्तम्।			

अथ गोवधापवादः।

तत्र पराशरः।

"धूर्ष्वेषु वहमानेषु दष्टेनाभिहतेषु च। काष्ठेन वेणुना वापि पाषाणेन तु ताडितः॥ मूर्च्छितः पतितश्चैव स्तो वा सद्य एव च। एवंगतानां धूर्ष्याणां प्रवक्ष्यामि यथाविधि॥ उत्थितस्तु पदं गच्छेत् पञ्च सप्त दशापि वा। ग्रासं वा यदि गृह्णाति तोयं वा पिबति स्वयम्। पूर्व्वव्याधिविनष्टानां प्रायश्चित्तं न विद्यते॥" सम्वर्तः। "यन्त्रणे गोचिकित्सायां मूढगर्भविमोचने। यत्ने कृते विपत्तिः स्यात् प्रायश्चित्तं न विद्यते॥ औषधं स्नेहमाहारं ददतोव्राह्मणेषु च। प्राणिनां प्राणवृत्त्यर्थं प्रायश्चित्तं न विद्यते॥ दाहच्छेदसिराभेदप्रयत्नैरुपकुर्वताम्। द्विजानां गोहितार्थं वा प्रायश्चित्तं न विद्यते॥" याज्ञवल्क्यः। "क्रियमाणोपकारे तु मृते विप्रे न पातकम्। विपाके गोवृषाणाञ्च मेषजाग्निक्रियासु च॥" मिताक्षराधृतपराशरवचनम्। "कूपे खाते च धर्म्मार्थं गृहदाहे च ये मृताः। ग्रामदाहे तथा घोरे प्रायश्चित्तं न विद्यते॥" भवदेवभट्टधृतवचनम्। "छल्लभङ्गेऽस्थिभङ्गे च कटिभङ्गे तथैव। यदि जीवति षण्मासात् प्रायश्चित्तं न विद्यते॥" सम्वर्तः। "देवद्रोण्यां विहारे च कूपेष्वायतनेषु च। एषु गोषु प्रपन्नासु प्रायश्चित्तं न विद्यते॥" देवद्रोणी स्वयम्भूलिङ्गाद्यवस्थानगृहम्। विहारो गवां मेथुनम्। आयतनं सीमानिबन्धनस्थानम्। अत्र कूपायतनकर्त्तुर्दोषाभावो न तु गोस्वामिनः। इति प्रायश्चित्तविवेकप्रायश्चित्ततत्त्वस्मृतिसारमौर्खेहसम्मतं गोवधप्रायश्चित्तं समाप्तम्॥ * ॥

अथोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णोदानम्।	दक्षिणा।
ब्राह्मणक्षत्रियकर्तृकाज्ञानकृत-क्षत्रियवधः।	अज्ञानकृतब्रह्महत्याप्रायश्चित्तपादः। स तु त्रैवार्षिकव्रतरूपः।	४५ धेनवः।	१३५ कार्षापणाः।	२५ गावः। अशक्तौ २५ कार्षापणाः।
ब्राह्मणक्षत्रियकर्तृकाज्ञानकृत-क्षत्रियवधः।	सार्द्धद्वार्विंशतिकव्रतम्।	सार्द्धद्वार्विंशतिधेन्वसम्भवात् २३ धेनवः।	६७॥० कार्षापणाः।	१३ गावः। अशक्तौ १२॥० कार्षापणाः।
वैश्यकर्तृकाज्ञानकृतक्षत्रियवधः।	षाड्वार्षिकव्रतम्।	९० धेनवः।	२७० कार्षापणाः।	५० गावः। अशक्तौ ५० कार्षापणाः।
वैश्यकर्तृकाज्ञानकृतक्षत्रियवधः।	त्रैवार्षिकव्रतम्।	४५ धेनवः।	१३५ कार्षापणाः।	२५ गावः। अशक्तौ २५ कार्षापणाः।
शूद्रकर्तृकज्ञानकृतक्षत्रियवधः।	नववार्षिकव्रतम्।	१३५ धेनवः।	४०५ कार्षापणाः।	७५ गावः। अशक्तौ ७५ कार्षापणाः।
शूद्रकर्तृकाज्ञानकृतक्षत्रियवधः।	सार्द्धसप्तदशवार्षिकव्रतम्।	सार्द्धसप्तषष्टिधेन्वसम्भवात् ६८ धेनवः।	२०२॥० कार्षापणाः।	३८ गावः। अशक्तौ ३७॥० कार्षापणाः।
ब्राह्मणक्षत्रियवैश्यकर्तृकज्ञान-कृतवैश्यवधः।	ब्रह्महत्याव्रताष्टमभागः। स च सार्द्धद्वार्विंशतिकव्रतरूपः।	सार्द्धद्वार्विंशतिधेन्वसम्भवात् २३ धेनवः।	६७॥० कार्षापणाः।	१३ गावः। अशक्तौ १२॥० कार्षापणाः।
ब्राह्मणक्षत्रियवैश्यकर्तृकाज्ञान-कृतवैश्यवधः।	ब्रह्महत्याव्रतषोडशभागः। स च नवमासिकव्रतरूपः।	सपादैकादशधेन्वसम्भवात् १२ धेनवः।	३३॥० कार्षापणाः।	७ गावः। अशक्तौ ६॥० कार्षापणाः।

अघानुपातकानि ।	प्रायश्चित्तानि ।	तदशक्तौ धेनुदानम् ।	तदशक्तौ चूर्णीदानम् ।	दक्षिणा ।
शूद्रकर्तृकज्ञानकृतवैश्यवधः ।	ब्रह्महत्याव्रतचतुर्थभागः । स च चैवार्षिकव्रतरूपः ।	४५ धेनवः ।	१३५ कार्षापणाः ।	२५ गावः । अशक्तौ २५ कार्षापणाः ।
शूद्रकर्तृकाज्ञानकृतवैश्यवधः ।	ब्रह्महत्याव्रताष्टमभागः । स च सार्द्धवार्षिकव्रतरूपः ।	सार्द्धद्वाविंशतिधेन्वसम्भवात् २३ धेनवः ।	६७॥० कार्षापणाः ।	१३ गावः । अशक्तौ १२॥० कार्षापणाः ।
ब्राह्मणक्षत्रियवैश्यशूद्रकर्तृकज्ञानकृतशूद्रवधः ।	ब्रह्महत्याव्रतषोडशभागः । स च नवमासिकव्रतरूपः ।	सपादैकादशधेन्वसम्भवात् १२ धेनवः ।	३३॥० कार्षापणाः ।	७ गावः । अशक्तौ ६॥० कार्षापणाः ।
ब्राह्मणक्षत्रियवैश्यशूद्रकर्तृकाज्ञानकृतशूद्रवधः ।	ब्रह्महत्याव्रतद्वात्रिंशत्तमभागः । स च सार्द्धचतुर्म्मासिकव्रतरूपः । सर्व्वत्र बालवृद्धस्त्रीणामर्द्धम् । एकस्य बालत्वादिधर्म्मद्वयवत्ते पादः ।	पादाढ्याधिकसार्द्धपञ्चधेन्वसम्भवात् ६ धेनवः ।	१६॥८० कार्षापणाः ।	४ गावः । अशक्तौ ३८० कार्षापणाः ।
ब्राह्मणक्षत्रियवैश्यशूद्रकर्तृकज्ञानकृतवृत्तिस्थशूद्रवधः ।	ब्रह्महत्याव्रतद्वादशभागः । स च वार्षिकव्रतरूपः । अज्ञानतस्त्वेतदर्द्धम् ।	१५ धेनवः ।	१५ कार्षापणाः ।	६ गावः । अशक्तौ ८।६॥ = कार्षापणाः ।
सर्व्ववर्णकर्तृकज्ञानकृतप्रतिलोमजातवधः अर्थात् अपकृष्टशूद्रवधः ।	चान्द्रायणव्रतम् ।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः ।	२२॥० कार्षापणाः ।	यथाशक्ति ।
सर्व्ववर्णकर्तृकाज्ञानकृतापकृष्टशूद्रवधः ।	पराकव्रतम् । सर्व्वत्र बालवृद्धस्त्रीणामर्द्धम् । एकस्य बालत्वादिधर्म्मद्वयवत्ते पादः ।	५ धेनवः ।	१५ कार्षापणाः ।	यथाशक्ति ।
ब्राह्मणकर्तृकज्ञानकृतब्राह्मणीवधः ।	षाड्वार्षिकं महाव्रतम् । अज्ञानतस्त्वेतदर्द्धम् ।	६० धेनवः ।	२७० कार्षापणाः ।	५० गावः । ५० कार्षापणा वा ।
क्षत्रियकर्तृकज्ञानकृतब्राह्मणीवधः ।	द्वात्रिंशद्वार्षिकव्रतम् । अज्ञानतस्त्वेतदर्द्धम् ।	१८० धेनवः ।	५४० कार्षापणाः ।	१०० गावः । १०० कार्षापणा वा ।
वैश्यकर्तृकज्ञानकृतब्राह्मणीवधः ।	अष्टादशवार्षिकव्रतम् । अज्ञानतस्त्वेतदर्द्धम् ।	२७० धेनवः ।	८१० कार्षापणाः ।	१५० गावः । १५० कार्षापणा वा ।
शूद्रकर्तृकज्ञानकृतब्राह्मणीवधः ।	चतुर्व्विंशतिवार्षिकव्रतम् । अज्ञानतस्त्वेतदर्द्धम् । सर्व्वत्र बालवृद्धस्त्रीणामर्द्धम् । एकस्य बालत्वाद्युभयधर्म्मवत्ते पादः ।	३६० धेनवः ।	१०८० कार्षापणाः ।	२०० गावः । अशक्तौ २०० कार्षापणाः ।
ब्राह्मणक्षत्रियकर्तृकज्ञानकृतक्षत्रियावधः ।	चैवार्षिकव्रतम् । अज्ञानतस्त्वेतदर्द्धम् ।	४५ धेनवः ।	१३५ कार्षापणाः ।	२५ गावः । २५ कार्षापणा वा ।
वैश्यकर्तृकज्ञानकृतक्षत्रियावधः ।	षाड्वार्षिकव्रतम् । अज्ञानतस्त्वेतदर्द्धम् ।	६० धेनवः ।	२७० कार्षापणाः ।	५० गावः । ५० कार्षापणा वा ।
शूद्रकर्तृकज्ञानकृतक्षत्रियावधः ।	नववार्षिकव्रतम् । अज्ञानतस्त्वेतदर्द्धम् । सर्व्वत्र बालवृद्धस्त्रीणामर्द्धम् । एकस्य बालत्वाद्युभयधर्म्मवत्ते पादः ।	१३५ धेनवः ।	४०५ कार्षापणाः ।	७५ गावः । अशक्तौ ७५ कार्षापणाः ।
ब्राह्मणक्षत्रियवैश्यकर्तृकज्ञानकृतवैश्यावधः ।	वार्षिकव्रतम् । अज्ञानतस्त्वेतदर्द्धम् ।	१५ धेनवः ।	४५ कार्षापणाः ।	६ गावः । ८।६॥ कार्षापणा वा ।
शूद्रकर्तृकज्ञानकृतवैश्यावधः ।	द्विवार्षिकव्रतम् । अज्ञानतस्त्वेतदर्द्धम् । स्त्रीबालवृद्धानामर्द्धम् । एकस्य स्त्रीत्वाद्युभयधर्म्मवत्ते पादः ।	३० धेनवः ।	६० कार्षापणाः ।	१७ गावः । अशक्तौ १६॥=१३। कार्षापणाः ।
ब्राह्मणक्षत्रियवैश्यशूद्रकर्तृकशूद्रावधः ।	वार्षिकव्रतम् । अज्ञानतस्तु एतदर्द्धम् । स्त्रीबालवृद्धानामर्द्धम् । एकस्य स्त्रीत्वाद्युभयधर्म्मवत्ते पादः ।	१५ धेनवः ।	४५ कार्षापणाः ।	६ गावः । अशक्तौ ८।६॥ कार्षापणाः ।
आत्रेयीवधः । आत्रेयी त्रिविधा । अत्रिगोत्रा ऋतुस्नाता गर्भिणी च ।	यत्कर्तृकयद्योनीवधे यत्प्रायश्चित्तं उद्दे-गुरुक्तम् ।			

अधोपपातकानि ।	प्रायश्चित्तानि ।	तदशुद्धौ धेनुदानम् ।	तदशुद्धौ चूर्णीदानम् ।	दक्षिणा ।
ब्राह्मणकर्तृकज्ञानकृतसकृत्सवर्णाभिचरितब्राह्मणीवधः ।	वार्षिकव्रतम् । अज्ञानतस्त्वेतदर्द्धम् ।	१५ धेनवः ।	४५ कार्षापणाः ।	६ गावः । अशुद्धौ ७।६॥ कार्षापणाः ।
क्षत्रियकर्तृकज्ञानकृतसकृत्सवर्णाभिचरितब्राह्मणीवधः ।	द्विवार्षिकव्रतम् । अज्ञानतस्त्वेतदर्द्धम् ।	३० धेनवः ।	९० कार्षापणाः ।	१७ गावः । अशुद्धौ १६॥८।१३॥ कार्षापणाः ।
वैश्यकर्तृकज्ञानकृतसकृत्सवर्णाभिचरितब्राह्मणीवधः ।	त्रैवार्षिकव्रतम् । अज्ञानतस्त्वेतदर्द्धम् ।	४५ धेनवः ।	१३५ कार्षापणाः ।	२५ गावः । अशुद्धौ २५ कार्षापणाः ।
शूद्रकर्तृकज्ञानकृतसकृत्सवर्णाभिचरितब्राह्मणीवधः ।	चतुर्वार्षिकव्रतम् । अज्ञानतस्त्वेतदर्द्धम् । बालवृद्धस्त्रीणामर्द्धम् । एकस्य उभयधर्म्मवत्त्वे पादः ।	६० धेनवः ।	१८० कार्षापणाः ।	३४ गावः । अशुद्धौ ३३।८।६॥ कार्षापणाः ।
ब्राह्मणकर्तृकाज्ञानकृतो भूयो अभिचरिताया अधमवर्णाभिचरिताया च ब्राह्मण्या वधः ।	द्वितदानम् । ज्ञानकृते तु द्वैगुण्यम् । क्षत्रियस्य एतद्द्विगुणम् । वैश्यस्य त्रिगुणम् । शूद्रस्य चतुर्गुणम् ।	०	०	यथाशक्ति ।
ब्राह्मणक्षत्रियकर्तृकाज्ञानकृतो भूयो अभिचरिताया अधमवर्णाभिचरिताया च क्षत्रियाया वधः ।	द्वयुर्दानम् । कामतो द्वैगुण्यम् । वैश्यस्य एतद्द्विगुणम् । शूद्रस्य त्रिगुणम् ।	०	०	यथाशक्ति ।
ब्राह्मणक्षत्रियवैश्यकर्तृकाज्ञानकृतो भूयो अभिचरिताया अधमवर्णाभिचरिताया च वैश्याया वधः ।	त्रयुदानम् । कामतस्त्वेतद्द्विगुणम् । शूद्रस्य एतद्द्विगुणम् ।	०	०	यथाशक्ति ।
ब्राह्मणक्षत्रियवैश्यशूद्रकर्तृकाज्ञानकृतो भूयो अभिचरिताया अधमवर्णाभिचरिताया च शूद्राया वधः ।	मेषदानम् । ज्ञानतो द्वैगुण्यम् । सर्व्वत्र स्त्रीबालवृद्धानामर्द्धम् । एकस्य उभयधर्म्मवत्त्वे पादः । प्रयोजकादीनां पादपादहानिः ।	०	०	यथाशक्ति ।
ब्राह्मणकर्तृकज्ञानकृतब्राह्मणीगर्भवधः ।	द्वादशवार्षिकव्रतम् । अज्ञानतोऽर्द्धम् ।	१८० धेनवः ।	५४० कार्षापणाः ।	१०० गावः । अशुद्धौ १०० कार्षापणाः ।
ब्राह्मणकर्तृकज्ञानकृतक्षत्रियागर्भवधः ।	त्रैवार्षिकव्रतम् । अज्ञानतोऽर्द्धम् ।	४५ धेनवः ।	१३५ कार्षापणाः ।	२५ गावः । अशुद्धौ २५ कार्षापणाः ।
ब्राह्मणकर्तृकज्ञानकृतवैश्यागर्भवधः ।	सार्द्धद्वार्षिकव्रतम् । अज्ञानतोऽर्द्धम् ।	सार्द्धद्वाविंशतिधेन्वसम्भवात् २३ धेनवः ।	६७॥० कार्षापणाः ।	१३ गावः । अशुद्धौ १२॥० कार्षापणाः ।
ब्राह्मणकर्तृकज्ञानकृतशूद्रागर्भवधः ।	नवमासिकव्रतम् । अज्ञानतोऽर्द्धम् ।	सपादैकादशधेन्वसम्भवात् १२ धेनवः ।	३३॥० कार्षापणाः ।	७ गावः । अशुद्धौ ६।० कार्षापणाः ।
क्षत्रियकर्तृकज्ञानकृतब्राह्मणीगर्भवधः ।	चतुर्विंशतिवार्षिकव्रतम् । अज्ञानतोऽर्द्धम् ।	३६० धेनवः ।	१०८० कार्षापणाः ।	२०० गावः । अशुद्धौ २०० कार्षापणाः ।
क्षत्रियकर्तृकज्ञानकृतक्षत्रियागर्भवधः ।	त्रैवार्षिकव्रतम् । अज्ञानतोऽर्द्धम् ।	४५ धेनवः ।	१३५ कार्षापणाः ।	२५ गावः । अशुद्धौ २५ कार्षापणाः ।
क्षत्रियकर्तृकज्ञानकृतवैश्यागर्भवधः ।	सार्द्धद्वार्षिकव्रतम् । अज्ञानतोऽर्द्धम् ।	सार्द्धद्वाविंशतिधेन्वसम्भवात् २३ धेनवः ।	६७॥० कार्षापणाः ।	१३ गावः । अशुद्धौ १२॥० कार्षापणाः ।
क्षत्रियकर्तृकज्ञानकृतशूद्रागर्भवधः ।	नवमासिकव्रतम् । अज्ञानतोऽर्द्धम् ।	सपादैकादशधेन्वसम्भवात् १२ धेनवः ।	३३॥० कार्षापणाः ।	७ गावः । अशुद्धौ ६।० कार्षापणाः ।
वैश्यकर्तृकज्ञानकृतब्राह्मणीगर्भवधः ।	षट्त्रिंशद्वार्षिकव्रतम् । अज्ञानतोऽर्द्धम् ।	५४० धेनवः ।	१६२० कार्षापणाः ।	३०० गावः । अशुद्धौ ३०० कार्षापणाः ।

अघोपपातकानि ।	प्रायश्चित्तानि ।	तदशक्तौ धेनुदानम् ।	तदशक्तौ चूर्णोदानम् ।	दक्षिणा ।
वैश्यकर्तृकज्ञानकृतक्षत्रियागर्भवधः ।	षाड्वार्षिकव्रतम् । अज्ञानतोऽर्द्धम् ।	६० धेनवः ।	२७० कार्षापणाः ।	५० गावः । अशक्तौ ५० कार्षापणाः ।
वैश्यकर्तृकज्ञानकृतवैश्यागर्भवधः ।	सार्द्धद्वादशवार्षिकव्रतम् । अज्ञानतोऽर्द्धम् ।	सार्द्धद्वाविंशतिधेन्वसम्भवात् २३ धेनवः ।	६७॥० कार्षापणाः ।	१३ गावः । अशक्तौ १२॥० कार्षापणाः ।
वैश्यकर्तृकज्ञानकृतशूद्रागर्भवधः ।	नवमासिकव्रतम् । अज्ञानतोऽर्द्धम् ।	सपादैकादशधेन्वसम्भवात् १२ धेनवः ।	३३॥० कार्षापणाः ।	७ गावः । अशक्तौ ६॥० कार्षापणाः ।
शूद्रकर्तृकज्ञानकृतब्राह्मणीगर्भवधः ।	अष्टचत्वारिंशद्वार्षिकव्रतम् । अज्ञानतोऽर्द्धम् ।	७२० धेनवः ।	२१६० कार्षापणाः ।	४०० गावः । अशक्तौ ४०० कार्षापणाः ।
शूद्रकर्तृकज्ञानकृतक्षत्रियागर्भवधः ।	नववार्षिकव्रतम् । अज्ञानतोऽर्द्धम् ।	१३५ धेनवः ।	४०५ कार्षापणाः ।	७५ गावः । अशक्तौ ७५ कार्षापणाः ।
शूद्रकर्तृकज्ञानकृतवैश्यागर्भवधः ।	त्रैवार्षिकव्रतम् । अज्ञानतोऽर्द्धम् ।	४५ धेनवः ।	१३५ कार्षापणाः ।	२५ गावः । अशक्तौ २५ कार्षापणाः ।
शूद्रकर्तृकज्ञानकृतशूद्रागर्भवधः ।	नवमासिकव्रतम् । अज्ञानतोऽर्द्धम् । ब्राह्मण्यादिगर्भे पुंस्त्वेन ज्ञाते विप्रेणेत्यादि ज्ञाते चोक्तं प्रायश्चित्तम् । स्त्रीत्वेन ज्ञाते सर्वत्रार्द्धं प्रायश्चित्तं ज्ञेयम् । सर्वत्र स्त्रीबालवृद्धानामर्द्धम् । प्रयोजकादीनां पादपादहानिः ।	सपादैकादशधेन्वसम्भवात् १२ धेनवः ।	३३॥० कार्षापणाः ।	७ गावः । अशक्तौ ६॥० कार्षापणाः ।
यद्यपि गवाश्वादिवधः सङ्करीकरणपापमिदं तथापि हिंसासाजात्यादुपपातकप्रकरणे तत्प्रायश्चित्तं निरूप्यते ।				
हयासम्मान्यपशुघातः । हयेतियङ्गणात् यागान्यर्थे प्रायश्चित्ताभावः ।	प्राजापत्यम् ।	१ धेनुः ।	३ कार्षापणाः ।	यथाशक्ति ।
राजसम्मतभगवधः ।	पद्मनीलवृषदानम् ।	०	२५ कार्षापणाः ।	यथाशक्ति ।
अत्यन्तोत्तमवाजिराजवधः ।	चान्द्रायणम् ।	८ धेनवः । सार्द्धसप्तधेन्वसम्भवात् ।	२२॥० कार्षापणाः ।	यथाशक्ति ।
अश्ववधः ।	वासोयुगदानम् । एतच्च ज्ञानतः । अज्ञानतस्तदर्द्धम् ।	०	०	यथाशक्ति ।
रुरुगमहिषवराहकृष्णरुरुगवयचमरशरभवानरसिंहव्याघ्रभल्लर्क्षचमररुरुकादीनां वधः । अजाद्यादिवधः ।	अहोरात्रोपवासान्ते घृतघटदानम् । एतच्चाज्ञानतः सकृदधविषयम् । ज्ञानतो द्वैगुण्यम् ।	०	उपवासासामर्थ्ये । अष्ट पणाः ।	यथाशक्ति ।
	त्रिरात्रोपवासः । एतदज्ञानतोऽत्यन्तधार्मिकब्राह्मणैकसकृदधे वेदितव्यम् ।	०	११० कार्षापणाः ।	स्थिरण्यं वस्त्रं वा ।
	प्रकृतस्य एकहायनवृषदानम् ।	०	वृषमूल्यम् ५ कार्षापणाः ।	यथाशक्ति ।
	अशक्तस्य धेनुदानम् । तदशक्तौ प्राजापत्यव्रतम् ।	१ धेनुः ।	३ कार्षापणाः ।	यथाशक्ति ।
	अभ्यासे मासं यावकपानम् ।	२ धेनू ।	६ कार्षापणाः ।	यथाशक्ति ।
	अत्यन्ताभ्यासे कृच्छ्रातिकृच्छ्रम् ।	४ धेनवः ।	१२ कार्षापणाः ।	यथाशक्ति ।
मात्रारिगोधानकुलमण्डूकश्वपत्तिभिन्नधिकसर्पवधः । प्रतत्रो यद्यपत्नी ।	चान्द्रं क्षीरपानम् । पादिककृच्छ्रं वा । एतत्सकृदज्ञानविषयम् । ज्ञानतोऽभ्यासे द्वादशरात्रं कृच्छ्रम् । स्त्रीबालवृद्धानामर्द्धम् ।	० यत्किञ्चिदधिकसपादधेन्वसम्भवात् २ धेनू ।	१ कार्षापणाः । ४ कार्षापणाः ।	यथाशक्ति । यथाशक्ति ।

यथोपपातकानि ।	प्रायश्चित्तानि ।	तदशक्तौ धेनुदानम्	तदशक्तौ चूर्णीदानम् ।	दक्षिणा ।
	कृष्णसर्पवधे तीक्ष्णाग्रलौहकीलिकादानमादौ कर्त्तव्यम्। सर्पजातीयषण्डवधे पलालभारः सीसकमाषश्च दातव्यः। एतज्ज्ञानतः। एतदशक्तौ व्रतादिकं कर्त्तव्यम्।			
अथ सामान्यपक्षिवधः।	नक्तव्रतम्। द्विरक्तिपरिमितरौप्यदानं वा।	०	८१३। — पणौ। नक्तव्रतस्योपवासतृतीयभागत्वात्।	यथाशक्ति।
	कामतोऽत्यन्ताभ्यासे शूद्रहत्याव्रतम्। गुरुगोवधव्रतं वा। स्त्रीशूद्रबालवृद्धानामर्द्धम्। एकस्य स्त्रीत्वादुभयधर्म्मवत्त्वे पादः।	१२ धेनवः।	३६ कार्षापणाः।	७ गावः। अशक्तौ ६।० कार्षापणाः।
अथ विशेषपक्षिवधः। वकबलाका-हंससारसकारण्डवचक्रवाककुररगृध्रश्येनस्वञ्जरीटट्टिट्टिभोलूक-शुकशारिकातित्तिरिमयूरकाककलविङ्ककालञ्जकमद्गुकपोतपारावतादीनां वधः।	अहोरात्रोपवासः सर्व्वबीजदानञ्च। एतदज्ञानविषयम्।	०	उपवासानुकल्पः ॥० पणाः। सर्व्वबीजमूल्यम् ।० पणाः।	यथाशक्ति।
	ज्ञानकृते त्वहोपवासः। शुक्लस्य गोदानम्। तत्रायं विशेषः। शुकवधे द्विहायनगवदानम्। क्रौञ्चवधे त्रिहायणगवदानम्। क्रौञ्चशुकभासमयूरश्येनगृध्रवधे वत्सतरीदानम्। अत्र वृषदानवत्सतरीदानयोर्व्यवस्था शक्ताशक्तविषयिका। एतद्दानाशक्तानां व्रतादिकम्।	०	१५० कार्षापणः।	यथाशक्ति।
कोकिलशुककपोतकपिञ्जलकुक्कुटट्टिट्टिभखर्ज्जूरखञ्जरीटानां पुरुषभारपरिमितानां वधः।	उत्कृष्टशूद्रहत्याव्रतम्।	१५ धेनवः।	४५ कार्षापणाः।	६ गावः। अशक्तौ ८।८ ।। कार्षापणाः।
मत्स्यमण्डूकमकरशिशुमारादिजलचरवधः।	सप्तरात्रब्रह्महत्याव्रतम्। एतदज्ञानतः सकृद्वधे।	०	१ कार्षापणः।	८११॥ — पणौ।
	अहोरात्रोपवासः यथाशक्तिलवणदानञ्च। एतत् कामतः सकृत्। अभ्यासात्यन्ताभ्यासयोस्तु मलावहप्रायश्चित्ते दर्शयिष्यते।	०	॥० पणाः उपवासानुकल्पः। १॥० कार्षापणः लवणमूल्यम् ।२।	।८३॥ = पणाः।
अथ सान्ध्यनस्थिप्राणिवधः।				
सहस्रसंख्यकानां अस्थिमतां कृकलासादीनां ज्ञानकृतवधः।	आब्दिकं शूद्रहत्याव्रतम्। अज्ञाने षाण्मासिकम्।	१५ धेनवः।	४५ कार्षापणाः।	६ गावः। अशक्तौ ८।८॥ कार्षापणाः।
अनस्थां क्रमिकीटपतङ्गभ्रमरदंशमशकमक्षिकादीनां शकटपूरितमितानां ज्ञानकृतवधः।	आब्दिकं शूद्रहत्याव्रतम्। अज्ञाने षाण्मासिकम्।	१५ धेनवः।	४५ कार्षापणाः।	६ गावः। अशक्तौ ८।८॥ कार्षापणाः।
अस्थिमतां प्रत्येकं वधः।	पणदानम्।	०	०	यत्किञ्चित्।
अनस्थां प्रत्येकं वधः।	प्राणायामः। पणदानं वा।	०	०	तथा।
अन्नशाकादिगुडादिसर्व्वरसफलपुष्पजातप्राणिवधः।	दिनमेकं घृतमात्रभोजनम्। एतदज्ञाने। ज्ञाने तद्द्वैगुण्यम्।	०	॥० पणाः।	यथाशक्ति।
	अभ्यासे तप्तकृच्छ्रम्।	४ धेनवः।	११० कार्षापणाः।	यथाशक्ति
	अत्यन्ताभ्यासे कृच्छ्रातिकृच्छ्रम्।	६ धेनवः।	१८ कार्षापणाः।	यथाशक्ति।
फलवद्वृक्षलतागुल्मोच्छेदनम्।	प्राजापत्यम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।

अघोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णोदानम्।	दक्षिणा।
अफलवतामेतेषां छेदनम्।	अर्धाहसाध्यवृद्धक्षुद्रम्।	०	२ कार्षापणौ।	यथाशक्ति।
अत्यन्तोत्कृष्टफलवद्वृक्षच्छेदनम्।	चान्द्रायणम्।	८ धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।
अभ्यासादत्यन्तोत्कृष्टफलवद्वृक्षच्छेदनम्।	आब्दिकव्रतम्।	१५ धेनवः।	४५ कार्षापणाः।	६ गावः। अशक्तौ ८।६० कार्षापणाः।
चैत्यवृक्षश्मशानसीमपुण्यस्थानदेवालयजातवृक्षच्छेदनम्। विंशतिसंख्यकोपजीव्यवृक्षच्छेदनम्। ख्यातवृक्षच्छेदनञ्च।	पूर्वोक्तवृक्षच्छेदनप्रायश्चित्तद्वैगुण्यादि। सर्वत्र स्त्रीशूद्रबालवृद्धानामर्द्धम्।			
वापीकूपारामसेतुसभातडागवह्निदेवतायतनभेदनम्।	ब्राह्मणेभ्यो निवेद्य घृतस्य आहुतीर्जुहुयात्। इदं विष्णुरिति प्रथमां मानस्तोके इति द्वितीयां विष्णोः कर्म्माणीति तृतीयां पादोऽस्यान्त्यामिति चतुर्थीं यां देवतामुत्सादयति तस्यै देवतायै। ब्राह्मणान् भोजयेत्। एतत् सकृदल्पोपघातविषयम्। अभ्यासे महोपघाते च प्राजापत्यम्। दण्डश्च। यथा। सकृदल्पोपघाते प्रथमसाहसः २५० पणाः। अभ्यासे महोपघाते उत्तमसाहसः। १००० पणाः।			
देवतायाः उत्कृष्टप्रतिमाभेदनच्छेदनदहनहरणानि।	चान्द्रायणम्। वाप्यादिभेदनोक्तान्यघृतस्य आहुतयः। उत्तमसाहसो दण्डश्च। १००० पणाः।	सार्द्धसप्तधेन्वसमः-वात् ८ धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।
देवतायाः अपकृष्टप्रतिमाभेदनच्छेदनदहनहरणानि।	प्राजापत्यम्। पूर्वोक्तघृताहुत्यादिदानम्। प्रथमसाहसो दण्डश्च। २५० पणाः।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
अघाभिचारः। स तु परहिंसार्थं जपहोमादिकर्म्म।	अतिकृच्छ्रम्। एतत् सकृदाचरणे। अभ्यासे प्रायश्चित्तावृत्तिः। इति हिंसाप्रायश्चित्तम्॥ ६॥	३ धेनवः।	६ कार्षापणाः।	यथाशक्ति।
व्रात्ययाजनम्।	प्राजापत्यम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
मूत्रेण घृतस्य दहनवहनादिकम्।	सान्तपनम्।	२ धेनू।	६ कार्षापणाः।	यथाशक्ति।
अघाभक्ष्यभक्षणम्। अभक्ष्यं षड्विधम्। जातिदुष्टम् १ क्रियादुष्टम् २ कालात्ययविदूषितम् ३ संसर्गात्ययदुष्टम् ४ सकृल्लेखन् ५ स्वभावतो दुष्टम् ६। जातिदुष्टं लशुनगृञ्जनपलाण्डुचाकवेनवार्त्ताकोलालिकावर्षुलाकारालाबूरूपम् १ क्रियादुष्टं पतितसंस्पृष्टम् २ कालदुष्टं दुरूढं चिरसंस्थितञ्च ३ संसर्गदुष्टं सुरानलुनपर्युषितादियुक्तम् ४ सकृल्लेखनं यत्किञ्चित्तालम् ५ स्वभावदुष्टं सुरादि ६।	चान्द्रायणम्। एतद्गुरुतरविषयम्। विशेषानिर्देशे त्रैवम्।	सार्द्धसप्तधेन्वसमवात् ८ धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।

अथोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णोदानम्।	दक्षिणा।
अपरञ्च। संघातान्नम्। शूद्रोपनीतान्नम्। पतितोपनीतान्नम्। शूद्रवेश्मस्थान्नञ्च।				
शूद्रस्य पक्वान्नभक्षणम्।	ब्राह्मणस्य चाष्टोपवासः। एतदज्ञानतः।	१ धेनुः। अर्द्धधेन्वसम्भवात्।	१॥० कार्षापणः।	यथाशक्ति।
	ज्ञानतः प्रायश्चित्तम्। आपदि भक्षणे मनस्तापः दुष्टां श्रुतजपो वा। क्षत्रियादीनां पादपादहानिः।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
अभ्यासात् शूद्रस्य पक्वान्नभक्षणम्।	ब्राह्मणस्य मासयावकपानम्। क्षत्रियादीनां पादपादहानिः।	२ धेनू।	६ कार्षापणाः।	यथाशक्ति।
शूद्रस्यामान्नभक्षणम्।	उक्तप्रायश्चित्ततुरीयभागः। आपदि भक्षणे प्रायश्चित्ताभावः।			
अथ रजकश्लैलूषवेणुचर्म्मोपजीविकैवर्त्तादन्त्यजान्नभक्षणम्।	चान्द्रायणम्। एतत् ज्ञानाभ्यासविषयम्। अज्ञाने अर्द्धम्।	८ धेनवः। सार्द्धसप्तधेन्वसम्भवात्।	२२॥० कार्षापणाः।	यथाशक्ति।
	ज्ञानतोऽभ्यासे कृच्छ्राब्दव्रतम्।	३० धेनवः।	९० कार्षापणाः।	१७ गावः। अशक्तौ १६॥-१६॥ कार्षापणाः।
	अज्ञानतोऽभ्यासे एतदर्द्धम्। एतत्तु ब्राह्मणविषयम्। क्षत्रियादीनां पादपादहानिः।	१५ धेनवः।	४५ कार्षापणाः।	९ गावः। अशक्तौ ८।८॥ कार्षापणाः।
सकृदज्ञानकृतान्त्यजोच्छिष्टाशनम्।	ब्राह्मणस्य चान्द्रायणम्।	८ धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।
	क्षत्रियस्य तप्तकृच्छ्रम्।	४ धेनवः।	१२ कार्षापणाः।	यथाशक्ति।
	वैश्यस्य तप्तकृच्छ्रार्द्धम्।	२ धेनू।	६ कार्षापणाः।	यथाशक्ति।
	शूद्रस्य तप्तकृच्छ्रपादः।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
	ज्ञानत एतद्द्वैगुण्यम्।			
कापालिकान्नभक्षणम्।	ज्ञानात् कृच्छ्राब्दम्।	३० धेनवः।	९० कार्षापणाः।	१७ गावः। अशक्तौ १६॥-१६॥ कार्षापणाः।
	अज्ञानात् चान्द्रायणद्वयम्। एतदर्द्धाभ्यस्तविषयम्। एतत् सर्व्वं ब्राह्मणे। क्षत्रियादौ पादपादहानिः।	१५ धेनवः।	४५ कार्षापणाः।	यथाशक्ति।
चाण्डालश्वपचक्षत्तृसूतवैदेहकमागधायोगवानामन्यावसायिनामन्नभक्षणम्।	ब्राह्मणस्य कामतः सकृद्भोजने चान्द्रायणम्।	८ धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।
	अज्ञानतस्तप्तकृच्छ्रम्।	४ धेनवः।	१२ कार्षापणाः।	यथाशक्ति।
	बलाद्भोजने पराकः।	५ धेनवः।	१५ कार्षापणाः।	यथाशक्ति।
	अज्ञानतोऽष्टचत्वारिंशद्वारभोजने द्वादशवार्षिकव्रतम्। ज्ञानतश्चतुर्विंशतिवारभोजने एतदेव।	१८० धेनवः।	५४० कार्षापणाः।	१०० गावः। अशक्तौ १०० कार्षापणाः।
	ज्ञानतोऽष्टचत्वारिंशद्वारभोजने चतुर्विंशतिवार्षिकव्रतं व्यवहार्य्यता च।	२६० धेनवः।	१०८० कार्षापणाः।	२०० गावः। अशक्तौ २०० कार्षापणाः।
	सकृज्ज्ञानत आमान्नभोजने त्रिरात्रोपवासः। सर्व्वत्र क्षत्रियादीनां पादपादहानिः।	०	१॥० कार्षापणः।	यथाशक्ति।
	आपदि पक्वान्नभोजने क्षत्रियस्य सान्तपनम्।	२ धेनू।	६ कार्षापणाः।	यथाशक्ति।
	वैश्यस्य षडहम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
	शूद्रस्य त्रिरात्रम्।	०	१॥० कार्षापणः।	यथाशक्ति।
चाण्डालपतितादीनामुच्छिष्टान्नभक्षणम्।	द्विजस्य पराकः।	५ धेनवः।	१५ कार्षापणाः।	यथाशक्ति।
	शूद्रस्य कृच्छ्रम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
	एतत् सकृज्ज्ञानविषयं ज्ञानतो द्वैगुण्यादिकम्।			

अथोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णोदानम्।	दक्षिणा।
अथ सामान्याभोज्यान्नभोजनम्।	त्र्यहोपवासः।	०	१।० कार्षापणः।	यथाशक्ति।
	एतत् सकृदज्ञानविषयम्।			
	ज्ञाने प्राजापत्यम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
	क्षत्रियादीनां पादपादहानिः।			
अभोज्यान्नानि यथा। अनधीतवेदारण्यकान्नम्। ग्रामयाजिहोलकयज्ञान्नम्। स्त्रीक्लीबहुतयज्ञान्नम्। मत्तक्षुद्रातुरान्नम्। केशेन कीटेन वा सह पक्वमन्नम्। कामतः पादस्पृष्टमन्नम्। भ्रूणघ्नादिपतितावेक्षितान्नम्। रजस्वलास्पृष्टान्नम्। पतत्रिणावलीढमन्नम्। शुनास्पृष्टमन्नम्। गवाघ्रातमन्नम्। घुष्टान्नम्। घोषणया दत्तमन्नमित्यर्थः। गणान्नम्। मठब्राह्मणसंघान्नमित्यर्थः। गणिकान्नम्। विद्वज्जुगुप्सितान्नम्। स्तेनान्नम्। गायनान्नम्। तक्षान्नम्। वार्धुषिकान्नम्। दीक्षितान्नम्। दीक्षणीययागानन्तरं यज्ञसमाप्तिपर्यन्तं तद्यागकर्तुरन्नमित्यर्थः। कदर्यस्यान्नम्। रज्जादिनाबद्धस्यान्नम्। अयोनिगर्हितस्यान्नम्। अभिशस्तस्यान्नम्। क्लीबान्नम्। पुंश्चल्यन्नम्। दाम्भिकान्नम्। कृपणा धर्मचारिण्योऽन्नमित्यर्थः। शुक्तान्नम्। पर्युषितान्नम्। सूतोच्छिष्टान्नम्। चिकित्सकान्नम्। गाधान्नम्। क्रूरान्नम्। उच्छिष्टभोजिनामन्नम्। उग्रस्यान्नम्। दारुणकर्मणो जातिविशेषस्य वा अन्नमित्यर्थः। सूतिकोदेशेन पक्वमन्नम्। पर्याचान्तम्। आचमनत्रयरहितान्नमित्यर्थः। एकपंक्तिस्थानन्यानवमन्य यत्रान्ने भुज्यमाने केनचिदाचमनं क्रियते तत् पर्याचान्तमिति कुल्लूकभट्टः। अनर्चितान्नम्। अर्थादेस्यात्तया दत्तमन्नमित्यर्थः। ग्रामयाजम्। अगारान्नम्। दिवदम्। नगराधिपान्नम्।				

अभोज्यान्नानि ।	प्रायश्चित्तानि ।	तदशक्तौ धेनुदानम् ।	तदशक्तौ पणदानम् ।	दक्षिणा ।
पलितान्नम् । यवचुना-न्नम् । यवपुलाकान्न-मित्यर्थः । पियुकान्नम् । अहविनामान्नम् । कूटमा-षान्नमित्यर्थः । यज्ञकर्म विघातकान्नम् । शैलूषा-न्नम् । तुन्नवायान्नम् । क्षत-घ्नान्नम् । चर्मारान्नम् । नि-षादान्नम । रङ्गावतारका-न्नम् । सूचीकारान्नम् । वेणु-वीणिनामन्नम् । सौप्तिकाय-कान्नम् । यवनान्नम् । आगेष्टकाद्यर्थं पुनः पोष-कागामन्नमित्यर्थः । शौ-ण्डिकवृत्तिग्रहिणान्नम् । चैल-निर्णेजकस्यान्नम् । बन्ध-नागारकस्यान्नमित्यर्थः । रञ्ज-कान्नम् । कुसुम्भादिना वस्त्र-रागकारकस्यान्नमित्यर्थः । तृ-णंहान्नम् । गृहसितोप-नतिकान्नम् । उपपतिमर्थ-कान्नम् । गेहे ज्ञातं भार्या-यारं ये सहन्ते तेषामन्न-मित्यर्थः । स्त्रीजितान्नम् । अनिर्दशं प्रेतान्नम् । अनिर्गताशौचस्य सूतिका-न्नमित्यर्थः । अनुष्टिकरा-न्नम् ॥२०॥	एतेषामभोज्यानामन्यतमानां भक्षणे पूर्वो-क्तस्याशौचवासः । एष सकृदज्ञान-विषयः ।	०	१८० कार्षापणाः ।	यथाशक्ति ।
	ज्ञाने प्राजापत्यम् । अक्षिप्यादीनां पादपादहानिः ।	१ धेनुः ।	३ कार्षापणाः ।	यथाशक्ति ।
चाण्डालादिपतितसूतिकान्नभक्ष-णम् । यत्तु पतितपदं सर्वधर्म-भ्रष्टिकृतवाचि यवनादि-स्पष्टपदं उच्छिष्टान्नभोज-नप्रकरणे तथा लिखनात् यतश्च चाण्डालसूतिका-न्नभक्षणप्रतिज्ञायां पतितपदं दृष्ट्वा न लिखितम् ।	प्राजापत्यम् । एतत्सकृदज्ञाने ज्ञातविषय-यम् । ज्ञाने द्वैगुण्यम् । अभ्यासे तु प्रायश्चित्तावृत्तिः । अक्षिप्यादीनां पाद-पादहानिः । एतत्कुरण्यादिष्वभ्यासे द्वैगुण्यम् । रजकादिसूतिकान्नभक्षणे तु एतदर्धम् ।	१ धेनुः ।	३ कार्षापणाः ।	यथाशक्ति ।
पतितस्पर्शे सकृत्तदन्नस्य भोजनम् ।	यावन्तश्चोक्तचतुरहःसाध्यं तावत्कृच्छ्रम् ।	सपादधेनुसम्मि-तान् ३ धेनून् ।	६८० कार्षा-पणाः ।	यथाशक्ति ।
	सकृज्ज्ञाने एतदर्धम् । अभ्यासे प्रायश्चित्ता-वृत्तिः ।			
	तत्तदभ्यासे चान्द्रायणम् । अक्षिप्यादीनां पादपादहानिः । चाण्डा-लादिस्पर्शे एतदर्धोचितत्वम् ।	सार्धसप्तधेनुसम्मि-तान् ८ धेनवः ।	२२१० कार्षा-पणाः ।	यथाशक्ति ।
सूतकादिसूतिकान्नं पूर्वोक्तदोष-दुष्टान्नं च भक्षणम् ।	एकरात्रम् ।	०	१० पणाः ।	यथाशक्ति ।
प्रथमगर्भान्नभक्षणम् । यत्तु वै-वाहिकपतितभक्षणप्रतिषे-धम् ।	चान्द्रायणमेतत्सकृज्ज्ञानेऽभ्यासे । एतद-र्धम् । ज्ञाने द्वैगुण्यम् ।	०	१० पणाः ।	यथाशक्ति ।

अघोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णोदानम्।	दक्षिणा।
वृथामांसभक्षणम्। तत्तु पितृदेवार्चनरहितं मांसम्।	प्राजापत्यव्रतम्। एतद्ब्राह्मणस्य। क्षत्रियादीनां पादपादहानिः। अभ्यासे प्राजापत्यावृत्तिः। एतत् रोगिदेवपितृकर्म्मनिमन्त्रितेतरविषयम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
सामान्याभक्ष्यमांसभक्षणम्।	सप्तरात्रयवागूपानम्। एतत् सकृदज्ञाने। ज्ञानतो द्वैगुण्यम्। क्षत्रियादीनां पादपादहानिः। एतदभ्यासे प्रायश्चित्तावृत्तिः।	०	१॥० कार्षापणः।	यथाशक्ति।
अश्वगोकुञ्जरोष्ट्रशुनकादिपञ्चनखानिरिक्तपञ्चनखक्रव्याद्ग्राम्यकुक्कुटानां मांसभक्षणम्। विड्वराहनरमांसभक्षणञ्च।	ब्राह्मणानां सकृदज्ञानतः प्राजापत्यम्। पुनरुपनयनञ्च। ज्ञाने तु द्वैगुण्यम्। अभ्यासे उपनयनसहितप्रायश्चित्तावृत्तिः। उपनयनाशक्तौ चान्द्रायणं तदशक्तौ धेन्वष्टकम्। क्षत्रियादीनां पादपादहानिः।	१ धेनुः।	३ कार्षापणाः।	अनड्वत्सहितगौः। अशक्तौ ६ कार्षापणाः।
हंसमद्गुकाकोलकाकखञ्जरीटमत्स्यादबलाकाशुकसारिकाचक्रवाकप्लवकोककलविङ्कुरव्वुवालसारसदात्यूहभासकोकिलमद्गूकशुनगानामन्यतमस्य मांसभक्षणम्।	विप्रस्याज्ञानतः सकृद्भोजने त्रिरात्रोपवासः। ज्ञानतो द्वैगुण्यम्। ज्ञानाभ्यासे प्रायश्चित्तावृत्तिः। क्षत्रियादीनां पादपादहानिः।	०	१॥० कार्षापणः।	यथाशक्ति।
मत्स्यभक्षणम्।	विप्रस्य कामतस्त्र्यहोपवासः। अकामत एतदर्द्धम्। क्षत्रियादीनां पादपादहानिः।	०	१॥० कार्षापणः।	यथाशक्ति।
एकशफमांस-गर्भशुक्राभ्यवहरणान्तर्गतपक्षमांसजीवपक्षमांसकृकलासमांसशुष्कमांसानामन्यतमस्य भक्षणम्। कृता घातनस्थली तद्भवं मांसम्।	कामतः सकृद्भक्षणे त्र्यहोपवासः। अकामत एतदर्द्धम्। अभ्यासे प्रायश्चित्तावृत्तिः। एतत् ब्राह्मणस्य। क्षत्रियादीनां पादपादहानिः।	० ०	१॥० कार्षापणः। ॥० पणाः।	यथाशक्ति। यथाशक्ति।
षष्ठ्यां पक्षपर्व्वसु च स्त्रीतैलमांससम्भोगः क्षुरकर्म्म च।	एकाहोपवासः। अभ्यासे प्रायश्चित्तावृत्तिः। एतद्ब्राह्मणस्य। क्षत्रियादीनां पादपादहानिः।	०	॥० पणाः।	यथाशक्ति।
वृथायासपूयपुरीषकुलीकक्षरसंयावपिण्याकलोहितदूषिनिर्य्यासमेध्यप्रभवानां भक्षणम्।	कामतस्त्र्यहोपवासः। अज्ञानतस्तदर्द्धम्। एतद्ब्राह्मणस्य। क्षत्रियादीनां पादपादहानिः।	०	१॥० कार्षापणः।	यथाशक्ति।
एकाकिमिश्रान्नभक्षणम्।	एकाहोपवासः। अभ्यासे द्वैगुण्यम्।	०	॥० पणाः।	यथाशक्ति।
अखेटोक्तपर्य्युषितान्नदधिवर्जं-मुक्तचारलवणभक्षणम्।	अज्ञानत एकाहोपवासः। ज्ञानतस्त्र्यहोपवासः। अभ्यासे द्वैगुण्यम्।	० ०	॥० पणाः। १॥० कार्षापणः।	यथाशक्ति। यथाशक्ति।
यामदुष्टभावदुष्टभाजनपक्वान्नभक्षणम्।	अभ्यासे त्रिरात्रयावकपानम्।	०	॥० पणाः।	यथाशक्ति।
मृद्भाजने भिन्नकांस्ये च भोजनम्।	अहोरात्रोपवासः पञ्चगव्यपानञ्च।	०	॥० पणाः।	यथाशक्ति।
कुम्भीभक्षणम्।	द्वादशरात्रं पयःपानम्।	सपादधेन्वङ्गमात् २ धनूः।	६॥० कार्षापणाः।	यथाशक्ति।

अयोपपातकानि।	प्रायश्चित्तानि।	तद्प्रवृत्तौ धेनुदानम्।	तद्प्रवृत्तौ चूर्णादानम्।	दक्षिणा।
लशुनपलाण्डुगृञ्जनभक्षणम्। रुपरसादिभिर्लसुनादितुल्यद्रव्यभक्षणञ्च।	ज्ञानतश्चान्द्रायणम्।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।
	अज्ञानात्तप्तकृच्छ्रम्।	पादोनधेनुचतुष्टयासम्भवात् ४ धेनवः।	११।० कार्षापणाः।	यथाशक्ति।
	चिरतराभ्यासे संवत्सरयावकपानम्। एतदुभयत्र पुनरुपनयनमपि शूद्राणामुपनयनतुल्यचान्द्रायणेन सह प्रकृतव्रतस्य पादः।	१५ धेनवः।	४५ कार्षापणाः।	यथाशक्ति।
सजातीयगृहस्थकिनां पक्वान्नभक्षणम्।	ज्ञानतः प्राजापत्यम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
	अज्ञानात् त्र्यहोपवासः।	०	१॥० कार्षापणः।	यथाशक्ति।
	अभ्यासे द्वैगुण्यादिकम्।			
गृहस्थकिनां ब्राह्मणक्षत्रियवैश्यशूद्राणामामान्नस्य ब्राह्मणकर्तृकभक्षणम्।	विप्रस्यामान्ने प्राणायामः। क्षत्रियस्यामान्ने घृतगायत्रीजपः। वैश्यस्यामान्ने पञ्चघृतगायत्रीजपः। शूद्रस्यामान्ने अष्टसहस्रगायत्रीजपः। अभ्यासे द्वैगुण्यम्।			
गृहस्थकिनां किञ्चलपानम्।	ब्राह्मणस्य पञ्चगव्यं पीत्वा उपवासः। एतत् सकृदज्ञाने ज्ञाने तु द्वैगुण्यम्। अभ्यासे त्वावृत्तिः। तच्चलस्पर्शे स्नानमात्रम्। क्षत्रियादीनां पादपादहानिः।	०	॥० पणाः।	यथाशक्ति।
नवश्राद्धान्नभोजनम्। नवश्राद्धन्तु साग्नीनां चतुर्थपञ्चमनवमैकादशाहक्रियमाणं निरग्नीनान्तु आद्यश्राद्धमात्रम्।	चान्द्रायणम्।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।
प्रथममासिकश्राद्धान्नभोजनम्।	पराकः।	५ धेनवः।	१५ कार्षापणाः।	यथाशक्ति।
त्रिपक्षे प्रेतश्राद्धान्नभोजनम्।	अतिकृच्छ्रम्।	३ धेनवः।	९ कार्षापणाः।	यथाशक्ति
द्विमासादिषण्मासपर्य्यन्तं प्रेतश्राद्धान्नभोजनम्।	प्राजापत्यम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
षण्मासादूर्द्धमब्दपर्य्यन्तं प्रेतश्राद्धान्नभोजनम्।	पादकृच्छ्रम्।	०	१ कार्षापणः।	यथाशक्ति।
पुनरान्दिकश्राद्धान्नभोजनं अर्थात् सपिण्डीकरणान्नभोजनम्। एतत् स्मार्त्तमतं मूलपार्त्तमते तु द्वितीयसांवत्सरिकान्नभोजनम्।	एकाहोपवासः।	०	॥० पणाः।	यथाशक्ति।
पञ्चानन्तरितसप्तानां एकसप्तदशानां शूद्रादत्तानाञ्चघृततैललवणशङ्खनपानीयपायसमाक्षिकफाणितगोरसशाकानां भक्षणम्।	द्वादशाध्यसान्तपनम्। एतत् ज्ञानतः। अज्ञानादर्द्धम्। लौहपात्रेण परिवेषणेऽप्येतदेव प्रायश्चित्तं ज्ञेयम्। एतद् ब्राह्मणस्य। क्षत्रियादीनां पादपादहानिः।	०	१ कार्षापणः।	यथाशक्ति।
अकृतापौरुषान्नस्य अकृतमौनस्य च भोजनम्।	अष्टोत्तरशतगायत्रीजपः एतद्विज्ञानामनाम्नविषयम्।	०	०	०
अकृताचमनस्य अन्नभोजनम्।	अष्टोत्तरसहस्रगायत्रीजपः उपवासो वा। अभ्यासे द्विगुणादि। एतत् कटुकषायताम्बूलेक्षुव्यतिरिक्तभोजनविषयम्।	०	॥० पणाः।	यथाशक्ति।

अघोपपातकानि।	प्रायश्चित्तानि।	तदुक्तौ धेनुदानम्।	तदुक्तौ चूर्णोदानम्।	दक्षिणा।
यज्ञोपवीतरहितकर्तृकान्नभोजनम्।	स्नानं घृतगायत्रीजपः उपवासश्च।	०	॥० पणाः।	यथाशक्ति।
रेतोमूत्रपुरीषागमन्यतमस्य भक्षणम्।	ज्ञानतश्चान्द्रायणम्।	८ धेनवः। सार्द्धसप्तधेन्वसम्भवात्।	२२॥० कार्षापणाः।	यथाशक्ति।
	अज्ञानतस्तप्तकृच्छ्रम्।	पादोनधेनुचतुष्टयासम्भवात् ४ धेनवः।	११।० कार्षापणाः।	यथाशक्ति।
	बलात्कारे प्राजापत्यम्। सर्वत्र द्विजातीनां पुनः संस्कारश्च।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
विण्मूत्रादिदूषितफलादिभक्षणम्।	संसर्गमात्रे कृच्छ्रपादः।	०	॥० पणाः।	यथाशक्ति।
	सन्निकृष्टे अर्धात् मद्यसंसर्गे कृच्छ्रार्द्धम्। एतत् रसास्वादनानुपलम्भनपक्षे अज्ञानतः सकृद्विषयम्। ज्ञानतो द्वैगुण्यम्।	०	१॥० कार्षापणः।	यथाशक्ति।
	रसानुपलम्भे तु गौतमोक्ततप्तकृच्छ्रं द्वादशग्राह्यसाध्यम्। अज्ञानत उपलम्भे अर्द्धम्। क्षत्रियादीनां पादपादहानिः।	पादोनधेनुचतुष्टयासम्भवात् ४ धेनवः।	११।० कार्षापणाः।	यथाशक्ति।
म्लेच्छभोजनम्।	अहोरात्रोपवासः।	०	॥० पणाः।	यथाशक्ति।
	अभ्यासे याज्ञवल्क्योक्तचतुरहसाध्यतप्तकृच्छ्रम्।	सपादधेन्वसम्भवात् २ धेनू।	३॥०कार्षापणाः।	यथाशक्ति।
ब्रह्मचारिणां मधुमांसभोजनम्।	ज्ञानतः प्राजापत्यम्। अज्ञानात् अर्द्धम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
ब्रह्मचारिणामामिषभाक्पक्वान्नभोजनम्।	त्र्यहं कृच्छ्रमूलविपक्वक्षीरपानमात्रम्। एतदज्ञानतः।	०	१ कार्षापणः।	यथाशक्ति।
	ज्ञानतो द्वैगुण्यम्।	०	२ कार्षापणौ।	यथाशक्ति।
देवतातिथिभृत्यादिवर्जनभोजनम्।	अभ्यासे प्राजापत्यम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
अस्त्यादिदूषितान्नभोजनम्। अस्थिशब्दोऽत्राभक्ष्यास्थिमात्रवचनम्।	स्नात्वार्कमर्चयित्वा घृतमात्राशनम्।	०	॥० पणाः।	यथाशक्ति।
मत्स्यकण्टकशम्बूककृमिसुक्तिकपर्दकभक्षणम्।	पञ्चगव्यमात्रभक्षणम्।	०	॥० पणाः।	यथाशक्ति।
पुंसवनसीमन्तोन्नयनकर्मणि भोजनम्।	ज्ञानाभ्यासे चान्द्रायणम्।	८ धेनवः।	२२॥०कार्षापणाः।	यथाशक्ति।
	अज्ञानाभ्यासे तदर्द्धम्।	४ धेनवः।	११।०कार्षापणाः।	यथाशक्ति।
	सकृदज्ञाने विण्मूक्तकृच्छ्रपादः।	०	॥० पणाः।	यथाशक्ति।
	सकृज्ज्ञाने द्वैगुण्यं कृच्छ्रार्द्धम्।	०	१॥०कार्षापणः।	यथाशक्ति।
जातकर्मादिसंस्कारान्नभोजनम्।	अज्ञानतोऽस्पृष्टानां द्वाद्दसाध्यं सान्तपनम्।	०	९ कार्षापणः।	यथाशक्ति।
	ज्ञानतो द्वैगुण्यम्।	०	२ कार्षापणौ।	यथाशक्ति।
भोजनकाले गुदस्रावः।	अहोरात्रमुपित्वा पञ्चगव्यपानम्। एतत् सकृन्निगीर्यग्रासे।	०	॥० पणाः।	यथाशक्ति।
	अत्यन्तग्रासाशने त्रिरात्रोपवासः।	०	१॥० कार्षापणः।	यथाशक्ति।
भोजनकाले श्वसृगकाद्यशुचि तद्भक्षणम्।	ग्रासभोजने एकोपवासः।	०	॥० पणाः।	यथाशक्ति।
	सकलान्नभोजने त्रिरात्रोपवासः। अभोजने खगमात्रम्।	०	१॥० कार्षापणः।	यथाशक्ति।
नेक्षाध्वगादिस्थानार्द्रस्थाक्षतस्य भोजनम्।	स्नात्वा अहोरात्रसप्तगायत्रीजपः। अभ्यासे प्रायश्चित्तावृत्तिः।	०	०	०

अशौचयानकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ पूर्तिदानम्।	दक्षिणा।
परिक्षितनीवीवस्त्रस्य भोजनम्।	अज्ञानतश्चिरात्रोपवासः।	०	१५० कार्षापणाः।	यथाशक्ति।
	ज्ञानात् द्वैगुण्यम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
सकृत्पीतोच्छिष्टभोजनम्।	क्षत्रियादेः। एतत् सकृदज्ञानतः।	०	५० पणाः।	यथाशक्ति।
	अभ्यासे द्वैगुण्यादिकम्। तक्रभोजने भोजनेऽप्येवम्।			
ब्राह्मणकर्तृकब्राह्मणोच्छिष्टभोजनम्।	मधुव्याहृतिभिरामन्त्र्य जलं पीत्वा उपवसेत्।	०	५० पणाः।	यथाशक्ति।
	एतत् सकृदज्ञानतः।			
	ज्ञानात् द्वैगुण्यम्।	०	१ कार्षापणः।	यथाशक्ति।
ब्राह्मणकर्तृकक्षत्रियोच्छिष्टभोजनम्।	सकृदज्ञाने त्र्यहं ब्राह्मीरसविपक्वक्षीरपानमात्रम्।	०	१५० कार्षापणाः।	यथाशक्ति।
	ज्ञाने द्वैगुण्यम्।	२ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
ब्राह्मणकर्तृकवैश्योच्छिष्टभोजनम्।	सकृदज्ञाने त्र्यहोपवासः ब्रह्मसुवर्चलापानञ्च।	०	१५० कार्षापणाः।	यथाशक्ति।
	ज्ञानात् द्वैगुण्यम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
ब्राह्मणकर्तृकशूद्रोच्छिष्टभक्षणम्।	सकृदज्ञाने षड्रात्रोपवासः।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
	ज्ञानात् द्वैगुण्यम्।			
	ज्ञानाभ्यासे चान्द्रायणम्।	८ धेनवः।	२२५० कार्षापणाः।	यथाशक्ति।
	क्षत्रियादीनां पादपादक्षतिः।			
	एतन्नाढपिठ्यैरेभातृणासुच्छिष्टयतिरिक्तविषयं तेषामुच्छिष्टस्य भोज्यत्वात्।			
बिडालकाकमूषिकनकुलश्वभिरुच्छिष्टभोजनम्।	त्र्यहोपवासः।	०	१५० कार्षापणः।	यथाशक्ति।
	एतत् सकृज्ज्ञानतः।			
	अज्ञाने ब्रह्मसुवर्चलां पीत्वोपवासः।	०	५० पणाः।	यथाशक्ति।
	ब्रह्मसुवर्चला तु पीतकुसुमस्तम्बाख्यः।			
	अत्यन्ताभ्यासे यतिकृच्छ्रम्।	३ धेनवः।	६ कार्षापणाः।	यथाशक्ति।
ब्राह्मणस्य कुत्सितषड्क्षौ भोजनम्। षड्क्षैः कुत्सितत्वम् निन्दितब्राह्मणाद्युपवेशनेन मलादिना षड्क्षिभेदसम्भवेन च भवति।	त्र्यहोरात्रोपवासः स्नानं पञ्चगव्यपानञ्च।	०	५० पणाः।	यथाशक्ति।
	एतत् ज्ञानतः।			
	क्षत्रियषड्क्षौ भोजने नक्तव्रतम्।	०	१० पणाः।	यथाशक्ति।
	वैश्यषड्क्षौ एकरात्रोपवासः।	०	५० पणाः।	यथाशक्ति।
	शूद्रषड्क्षौ त्रिरात्रोपवासः।	०	१५० कार्षापणाः।	यथाशक्ति।
षड्क्षिषु एकस्योत्थाने भोजनम्।	दाढ्यमाधमान्तपनम्।	०	१ कार्षापणः।	यथाशक्ति।
	एतद्ब्राह्मणस्य।			
	क्षत्रियादीनां पादपादक्षतिः।			
	एतज्ज्ञानतः सकृत्। अज्ञानतोऽर्धम्।			
सुराभाजनस्थजलपानम्।	सप्तं यावकपानम्। एतज्ज्ञानतः। अज्ञानतोऽर्धम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
मद्यभाण्डस्थजलपानम्।	नक्तार्धं यावकपानम्। एतज्ज्ञानतः। अज्ञानतोऽर्धम्।	०	१५० कार्षापणाः।	यथाशक्ति।
	सुरासंसृष्टरेणोस्त्वादिदूषितजलादिपाने तु चतुरहमार्द्रं नक्तव्रतम्। एतदपि स्वाद्वनुपलब्धावेवास्ते।	समादधेन्वसम्भवात् २ धेनू।	३५० कार्षापणाः।	यथाशक्ति।
श्वशृगालकूपभाण्डोदकपानम्।	ब्राह्मणस्य सान्तपनम्।	२ धेनू।	६ कार्षापणाः।	यथाशक्ति।
	क्षत्रियस्य प्राजापत्यम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
	वैश्यस्य प्राजापत्यार्धम्।	•	१५० कार्षापणः।	यथाशक्ति।
	शूद्रस्य प्राजापत्यपादः।	•	५० पणाः।	यथाशक्ति।
	एतत् सर्वं ज्ञानतः।			
	अज्ञानादेतन्यूनम्।			
	स्नानलाटे तु पूर्वेदुरमोघ्य पञ्चगव्यपानम्।	•	५० पणाः।	यथाशक्ति।

अपेयपानकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णोदानम्।	दक्षिणा।
चण्डालस्पृष्टक्षीरजलादिपानम्।	चिरान्नुपोष्य पञ्चगव्यपानम्। एतत् ज्ञानतः।	०	१॥० कार्षापणः।	यथाशक्ति।
	अज्ञानात् द्वाहसाध्यसान्तपनम्।	०	१ कार्षापणः।	यथाशक्ति।
अन्त्यजखानिनकूपादिजलपानम्।	उपवासपूर्वकपञ्चगव्यपानम्। एतदज्ञानतः।	०	॥० पणाः।	यथाशक्ति।
	ज्ञानात् द्वैगुण्यम्।	०	१ कार्षापणः।	यथाशक्ति।
अन्त्यजभाण्डस्थजलादिपानम्।	ब्राह्मणस्य द्वाहसाध्यं ब्रह्मकूर्चव्रतम्। एतत् अज्ञानतः। ज्ञानतो द्वैगुण्यम्।	०	१ कार्षापणः।	यथाशक्ति।
	शूद्रस्य नोपवासः पञ्चगव्यपानमात्रम्। ब्रह्मकूर्चं यथा। "अहोरात्रोषितो भूत्वा पौर्णमास्यां विशेषतः। पञ्चगव्यं पिबेत् प्रातर्ब्रह्मकूर्चविधिः स्मृतः॥" पञ्चगव्यं यथा। "गोघृतात् द्विगुणं सूत्रं सर्पिर्विद्याच्चतुर्गुणम्। क्षीरमष्टगुणञ्चैव पञ्चगव्ये तथा दधि॥" अथवा। "गोमूत्रमाषकास्त्रयो गोमयस्य तु षोडश। क्षीरस्य द्वादश प्रोक्ता दध्नस्तु दश कीर्तिताः॥ गोमूत्रवदृतस्योक्तास्तद्वर्द्धेन कुशोदकम्॥"	०	॥० पणाः।	यथाशक्ति।
शूद्रोदकपानम्।	उपोष्य बिल्वपद्मपलाशकुशानासुदकमात्रपानम्। एतद्द्वाहसाध्यं ज्ञानतः सकृत्पाने। अज्ञानादर्द्धम्। नवभाण्डोदकपाने प्रायश्चित्ताभावः।	०	१ कार्षापणः।	यथाशक्ति।
पीतशेषपानीयपानम्। केवलवामहस्तेन जलपानञ्च।	चिराच्चोपवासः। एतच्च ज्ञानतः।	०	१॥० कार्षापणः।	यथाशक्ति।
	अज्ञानतोऽर्द्धम्। एतत् प्रायश्चित्तं ग्रासशेषाशनादिष्वपि ज्ञेयम्।	०	॥॰ पणाः।	यथाशक्ति।
	शूद्रपीतशेषजलपाने तु ब्राह्मणस्य चान्द्रायणम्।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।
प्रपादिजलपानम्।	सचैलस्नानम्। उपवासश्च।	०	॥० पणाः।	यथाशक्ति।
प्रपादिना कूपजलाहरणार्थं घटस्थजलं द्रोणीजलं खड्गादिकोषस्थजलञ्च।	एतत् सकृज्ज्ञानतः। आपदि दोषाभावः।			
विण्मूत्रसंस्पृष्टकूपजलपानम्।	चिराच्चोपवासः। एतदज्ञानतः।	०	१॥० कार्षापणः।	यथाशक्ति।
	ज्ञानतः सान्तपनम्।	२ धेनू।	६ कार्षापणाः।	तथा।
विण्मूत्रसंस्पृष्टकुल्यस्थजलपानम्।	अज्ञानतः सान्तपनम्। ज्ञानतो द्वैगुण्यम्।	२ धेनू।	६ कार्षापणाः।	यथाशक्ति।
शवदूषितजलपानम्। एतत्मानुषेतरास्थिपक्षनखशवदूषितकूपजलपानपरम्।	ब्राह्मणस्य चिराच्चोपवासः।	०	१॥० कार्षापणः।	यथाशक्ति।
	क्षत्रियस्य द्व्यहोपवासः।	०	१ कार्षापणः।	यथाशक्ति।
	वैश्यस्यैकाहोपवासः।	०	॥० पणाः।	यथाशक्ति।
	शूद्रस्य नक्तम्।	०	।० पणाः।	यथाशक्ति।
	सर्वेषां व्रतान्ते पञ्चगव्यपानम्। एतत् ज्ञानतः। अज्ञानतोऽर्द्धम्। एतदक्षिप्तशवे।			
	ज्ञानतः क्षिप्ते षड्रात्रोपवासः। एतत् सर्वं मानुषशवेतरपरम्। मानुषशवे द्विगुणम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
	कामाभ्यासे प्रसक्तः।	५ धेनवः।	१५ कार्षापणाः।	यथाशक्ति।
	अत्यन्ताभ्यासे चान्द्रायणम्।	८ धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।

अपेयपानादीनि ।	प्रायश्चित्तानि ।	तदशक्तौ धेनुदानम्	तदशक्तौ वृषोदानम् ।	दक्षिणा ।
अपेयक्षीरपानम् । मनुष्यक्षीरपानञ्च । अपेयक्षीरं यथा । अनिर्दशाना गोमहिषीउष्ट्राणां क्षीरम् । क्षीरं ऐकशफं आविकञ्च । सन्धिनीक्षीरम् । सन्धिनी इयाल्लक्षणा । विवत्साक्षीरम् । अरण्यगवीक्षीरम् । क्षीरक्षीरम् । सद्यदुग्धाक्षीरम् । यमलक्षीरम् । विवत्साया अन्यवत्सायाश्च क्षीरम् । सद्यिवक्षीरम् । द्वादशवर्षं द्विसन्धीक्षीरम् । अभेध्यभुजः क्षीरम् । ग्रामादिदूषितसन्धीक्षीरञ्च ।	ज्ञानतोऽभ्यासे पञ्चं यावकव्रतम् । अज्ञानतोऽर्धम् । अस्थियादौ पादपादहानिः । अत्र उष्ट्रीक्षीरमानुषीक्षीरयोर्न पुनरुपनयनञ्च । इति अभक्ष्यभक्षणप्रायश्चित्तम् ॥ ॥	१ धेनुः ।	३ कार्षापणाः ।	यथाशक्ति ।
अथ क्षेयम् । मक्षिकोच्छ्राप्रवाणाग्रसमयलौकिकोपलानां हरणम् ।	द्वादशाहं कृच्छ्रभक्षणम् । तत् षड्डुपवासात्मकम् । अपहृतद्रव्यं स्वामिने दत्त्वैतत् करणीयम् । अत्र च सकृदभ्यासकालदेशद्रव्यस्वाम्यपहर्तृगुणदोषापेक्षया उत्कृष्टापकृष्टद्रव्ययोर्विषमदोषः समर्थनीयः ।	१ धेनुः ।	३ कार्षापणाः ।	यथाशक्ति ।
रत्नताम्रगोभूमिकन्यानां वस्त्रहरणम् । एतत् ब्राह्मणासम्बन्धिविषयम् । अत्र कन्यापदं अधमकन्यापरम् ।	चान्द्रायणम् ।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः ।	२२१० कार्षापणाः ।	यथाशक्ति ।
उक्तेतरद्रुहपशुहरणम् ।	प्राणायामत्रयम् । अभ्यासे चान्द्रायणम् ।	१ धेनुः । ८ धेनवः ।	३ कार्षापणाः । २२१०कार्षापणाः ।	यथाशक्ति । यथाशक्ति ।
धान्याम्बरधनानां हरणम् । अन्नं क्षुताम्नम् । धनं गवादि ।	चन्द्रकृच्छ्रम् । एतत् ब्राह्मणकर्तृकब्राह्मणस्वामिकद्रव्यक्षुम्भाधिकधान्यस्तेये ज्ञेयम् । क्षुम्भपरिमाणं यथा । द्रव्यद्रोणं भवेत् खारी क्षुम्भोऽपि द्रोणविंशतिः ।	१५ धेनवः ।	४५ कार्षापणाः ।	यथाशक्ति ।
	दिवाभोजनोचितभक्ष्यभोज्यान्नहरणे त्रिरात्रं पञ्चगव्यपानमात्रम् । भक्ष्यं मोदकादि । भोज्यं ओदनादि ।	०	१।० कार्षापणः ।	यथाशक्ति ।
	एककालभोजनोचितान्नहरणे एकरात्रं पञ्चगव्यमात्रपानम् । धनमपि एतत्परिमाणद्रव्यमूल्यसमं ज्ञेयम् ।	०	१० पणाः ।	यथाशक्ति ।
मनुष्यादिस्तेयम् । तनुष्पदद्विपदचतुष्पदक्षुद्रपशूनां हरणम् ।	चान्द्रायणम् । चेटादीनान्तु उपयोगानिष्पत्त्याद्यभावापेक्षयास्तेय प्रायश्चित्तं गुरुतावत्तमिति ।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः ।	२२१० कार्षापणाः ।	यथाशक्ति ।
गुरुादिस्तेयम् । आदिना काञ्चनगवित्तेयप्रायश्चित्तार्थं पतितेभ्यश्चोरयतां स्वर्णरूप्यमणीनां हरणम् ।	कृच्छ्रम् । एतत् सकृद्धरणविषयम् । अभ्यासे द्वैगुण्यम् । अत्र किञ्चिदधिकोच्चयस्य प्रायश्चित्तावहत्वसम्भावनायाञ्चैषां हरणे एतदेतिकम् ।	०	८० पणाः ।	यथाशक्ति ।

अघोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा।
लशादिस्तेयम्। आदिना कालदृमचैलचर्म्मामिषेक्षुतक्रमूलगुल्मवैदलब्रह्मगन्धानां ग्रहणम्। वैदलं वेणुघटितभाण्डम्। गन्धः कस्तूर्य्यादिः। अत्रापवादः। अस्तेयमन्यत्र काष्ठमस्तेयञ्च लशं गवे।	चिरात्रोपवासः। लशादीनां हरणे मासैकव्रतम्। मासार्द्धव्रतञ्च। शङ्खमुनिना यदुक्तं तत् कालदेशापहर्तृस्वामिगुणदोषौचित्याभ्यासानभ्यासकामाकामापेक्षया उत्कृष्टापकृष्टद्रव्यापहारे च वेदितव्यम्।	०	१॥० कार्षापणः।	यथाशक्ति।
जीविकाहरणम्।	यस्य यस्य वर्णस्य वृत्तिच्छेदः तत्तद्वर्णवधोक्तं प्रायश्चित्तं कर्त्तव्यम्।			
	अल्पवृत्त्यपहारे चान्द्रायणम्। अत्र चोत्तमाधमत्वे प्रयोजकादिकं सकृदभ्यासौ ज्ञानाज्ञाने च संवीक्ष्य वधोक्तपादार्द्धादिव्यवस्थोहनीया।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।
दैवहिंसद्रव्यापहरणम्।	संवत्सरमप्सु मज्जनं अघमर्षणावर्त्तनञ्च। यच्चात्र गुरुप्रायश्चित्तं सुन्यन्तरोक्तं तदत्यन्ताभ्यास उत्तमसम्बन्धादपेक्षया सन्त्यज्य। इति स्तेयप्रायश्चित्तम्॥*॥			
अथ अगम्यागमनम्। तत्र मवर्णासु अस्खलनस्त्रीगमनम्। तत्र ब्राह्मणस्य श्रोत्रियभार्य्यागमनम्।	सकृद्गमने त्रैवार्षिकव्रतम्। द्वितीये षाड्वार्षिकं तृतीये नववार्षिकं चतुर्थे संपूर्णं द्वादशवार्षिकम्।	४५ धेनवः।	१३५ कार्षापणाः।	२५ गावः। अशक्तौ २५ कार्षापणाः।
	अश्रोत्रियनिर्गुणभार्य्यागमने त्रैवार्षिकव्रतम्। एतच्च ज्ञानतः। अज्ञानादर्द्धम्।	३० धेनवः।	९० कार्षापणाः।	१७ गावः। अशक्तौ १६।८।१३ कार्षापणाः।
क्षत्रियस्य क्षत्रियभार्य्यागमनम्।	त्रैवार्षिकव्रतम्। एतच्च ज्ञानतः। अज्ञानादर्द्धम्। अभ्यासे द्वैगुण्यादिकम्।	३० धेनवः।	९० कार्षापणाः।	१७ गावः। अशक्तौ १६॥८।१३ कार्षापणाः।
वैश्यस्य वैश्यभार्य्यागमनम्।	वार्षिकव्रतम्। एतच्च ज्ञानतः। अज्ञानादर्द्धम्।	१५ धेनवः।	४५ कार्षापणाः।	९ गावः। अशक्तौ ८।७ कार्षापणाः।
शूद्रस्य सपत्नयज्ञानुष्ठात्रन्यायवृत्तशूद्रभार्य्यागमनम्।	वार्षिकव्रतम्। एतच्च ज्ञानतः। अज्ञानादर्द्धम्।	१५ धेनवः।	४५ कार्षापणाः।	९ गावः। अशक्तौ ८।७ कार्षापणाः।
शूद्रस्यान्यशूद्रागमनम्।	षाण्मासिकव्रतम्। एतच्च ज्ञानतः। अज्ञानादर्द्धम्।	८ धेनवः।	२२॥० कार्षापणाः।	५ गावः। अशक्तौ ४।२॥ कार्षापणाः।
ब्राह्मणस्य क्षत्रियागमनम्।	सार्द्धवार्षिकव्रतम्। एतत् सकृज्ज्ञानतः। अज्ञानादर्द्धम्।	२३ धेनवः।	६७॥० कार्षापणाः।	१३ गावः। अशक्तौ १२॥० कार्षापणाः।
ब्राह्मणस्य वैश्यागमनं विशिष्टशूद्रागमनञ्च।	षाण्मासिकव्रतम्। एतत् सकृज्ज्ञानतः। अज्ञानादर्द्धम्।	८ धेनवः।	२२॥० कार्षापणाः।	५ गावः। अशक्तौ ४।२॥ कार्षापणाः।
ब्राह्मणस्याधमशूद्रागमनम्।	सार्द्धमासिकव्रतम्। एतत् सकृज्ज्ञानतः। अज्ञानादर्द्धम्।	२ धेनू।	५॥८० कार्षापणाः।	१ गौः। अशक्तौ १ कार्षापणः।
क्षत्रियस्य वैश्यभार्य्यागमनं सकृद्गमनञ्च।	नवमासिकव्रतम्। एतत् सकृज्ज्ञानतः। अज्ञानादर्द्धम्।	१२ धेनवः।	३३॥० कार्षापणाः।	७ गावः। अशक्तौ ६।० कार्षापणाः।
क्षत्रियस्याधमशूद्रागमनम्।	त्रैमासिकव्रतम्। एतत् सकृज्ज्ञानतः। अज्ञानादर्द्धम्।	४ धेनवः।	११।० कार्षापणाः।	२ गावौ। अशक्तौ २ कार्षापणौ।
वैश्यस्य सकृद्गमनम्।	वार्षिकव्रतम्। एतच्च ज्ञानतः। अज्ञानादर्द्धम्।	१५ धेनवः।	४५ कार्षापणाः।	९ गावः। अशक्तौ ८।७ कार्षापणाः।
वैश्यस्याधमशूद्रागमनम्।	सार्द्धचातुर्मासिकव्रतम्। एतच्च ज्ञानतः। अज्ञानादर्द्धम्।	६ धेनवः।	१६॥८० कार्षापणाः।	३ गावः। अशक्तौ ३।१ कार्षापणाः।
अथ प्रतिलोमस्त्रीगमनम्। तत्र शूद्रस्याज्ञानतो ब्राह्मणीगमनम्।	द्वादशवार्षिकव्रतम्। ज्ञानात् गुर्वङ्गनागमनोक्तप्रकारेण मरणम्।	१८० धेनवः।	५४० कार्षापणाः।	१०० गावः। अशक्तौ १०० कार्षापणाः।

अधोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ। पूर्णोदानम्।	दक्षिणा।
	वैकल्पिकं चतुर्विंशतिवार्षिकव्रतम्। एतद्ब्राह्मण्यापि कर्त्तव्यम्।	३६० धेनवः।	१०८० कार्षापणाः।	२०० गावः। अशक्तौ २०० कार्षापणाः।
वैश्यस्याज्ञानतो ब्राह्मणीगमनम्।	नववार्षिकव्रतम्। ज्ञानाद्वैगुण्यम्। ब्राह्मण्यापि एतत् कार्य्यम्।	१३५ धेनवः।	४०५ कार्षापणाः।	७५ गावः। अशक्तौ ७५ कार्षापणाः।
क्षत्रियस्याज्ञानतो ब्राह्मणीगमनम्।	षाड्वार्षिकव्रतम्। ज्ञानाद्वैगुण्यम्। ब्राह्मण्यापि एतत् कार्य्यम्।	९० धेनवः।	२७० कार्षापणाः।	५० गावः। अशक्तौ ५० कार्षापणाः।
यद्यपि शूद्रस्य ब्राह्मणीगमनं महापातकत्वेन तथा क्षत्रियवैश्ययोर्ब्राह्मणीगमनमनुपातकत्वेन प्रोक्तं तथाप्यनुलोमगमनं तावदुपपातकमेव तत्प्रसङ्गादसवर्णत्वेन प्रतिलोमस्त्रीगमनप्रायश्चित्तमप्युक्तमतो न वैयर्थ्यमिति।				
शूद्रस्याज्ञानतः क्षत्रियागमनम्।	नववार्षिकव्रतम्। ज्ञानाद्वैगुण्यम्। क्षत्रियाया अप्येतत्।	१३५ धेनवः।	४०५ कार्षापणाः।	७५ गावः। अशक्तौ ७५ कार्षापणाः।
वैश्यस्याज्ञानतः क्षत्रियागमनं शूद्रस्याज्ञानतो वैश्यागमनञ्च।	नवमासाधिकषाड्वार्षिकव्रतम्। ज्ञानाद्वैगुण्यम्। क्षत्रियाया वैश्यायाश्चाप्येतत्।	१०२ धेनवः।	३०६० कार्षापणाः।	५७ गावः। अशक्तौ ५६। कार्षापणाः।
अथ समोत्तमवर्णद्विजिपुरुषयभिचरितसवर्णासवर्णस्त्रीगमनम्।				
तत्र ब्राह्मणस्य समोत्तमवर्णद्विजिपुरुषयभिचरितशूद्रागमनम्।	सकृद्गमने मासार्द्धं गोमूत्रसिद्धयावकपानम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
	अभ्यासे मासं गोमूत्रसिद्धयावकपानम्।	२ धेनू।	६ कार्षापणाः।	यथाशक्ति।
ब्राह्मणस्य समोत्तमवर्णद्विजिपुरुषयभिचरितक्षत्रियागमनम्। तथाविधवैश्यागमनञ्च।	सकृद्गमने सान्तपनम्। अभ्यासे प्रायश्चित्तवृद्धिः।	२ धेनू।	६ कार्षापणाः।	यथाशक्ति।
अथ चातुवर्ण्यस्त्रैरिणीगमनम्। स्त्रैरिणी चतुःपुरुषगामिनी। सा द्विविधा। केनचिदनवरुद्धा अवरुद्धा च।	ब्राह्मणस्य स्त्रैरिण्या ब्राह्मण्या गमने चिरात्रोपवासः ब्राह्मणाय गवाजिनदानञ्च।	०	१।० कार्षापणः।	यथाशक्ति।
	तथाविधक्षत्रियाया गमने चिरात्रोपवासः धनुर्दानञ्च।	०	१।० कार्षापणः।	यथाशक्ति।
	तथाविधवैश्याया गमने चिरात्रोपवासः अयःशिक्षादानञ्च।	०	१।० कार्षापणः।	यथाशक्ति।
	तथाविधशूद्राया गमने चिरात्रोपवासः उदकुम्भदानन्तया संभाजनीदानञ्च।	०	१।० कार्षापणः।	यथाशक्ति।
ब्राह्मणस्य शूद्रान्त्यवादिगामिस्त्रैरिणीगमनम्।	द्वादशवार्षिकव्रतम्। क्षत्रियादौ पादपादहानिः। विप्रास्त्रैरिणीषाण्डालस्त्रैरिणीगमनेऽप्येवम्। सर्वत्राभ्यासे द्वैगुण्यम्।	१८० धेनवः।	५४० कार्षापणाः।	१०० गावः। अशक्तौ १०० कार्षापणाः।
ब्राह्मणस्य वेश्यस्त्रीगमनम्। वेश्यास्त्री नाम या भर्तुरतिरिक्तपुरुषगामिनी।	रमयित्वादानम्।	०	०	यथाशक्ति।
क्षत्रियस्य वेश्यस्त्रीगमनम्।	वस्त्रादानम्।	०	०	यथाशक्ति।

अधोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णोदानम्।	दक्षिणा।
वैश्यवन्ध्यकीगमनम्।	प्रतोददानम्।	०	०	यथाशक्ति।
शूद्रवन्ध्यकीगमनम्।	स्नानपुरःसरप्राणायामः। एतानि वन्ध्यकीगमनप्रायश्चित्तानि सवर्णानुलोमप्रतिलोमविषयाणि॥ * ॥	०	०	०
अथ क्रमविवाहः। तत्र ब्राह्मणस्य प्रथमतः क्षत्रियादिविवाहः।	दारव्यतिक्रमी खराजिनं वह्निलोम परिधाय दारव्यतिक्रमिणे भिक्षां देहीति सप्तागारणि चरेत्। सा वृत्तिः षण्मासान्। दारव्यतिक्रमी ब्राह्मणक्षत्रियवैश्यकन्याविवाहमकृत्वा यो ब्राह्मणः शूद्राविवाहं करोति स उच्यते। एतदनापदि सकृदज्ञानविषयम्।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।
	आपदि त्वाह भ्रातातपः। ब्राह्मणो राजन्यापूर्वां द्वादशरात्रं चरित्वा निर्विशेत् तामेवोपगच्छेत्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
	वैश्यापूर्वां तप्तकृच्छ्रम्।	सपादधेन्वसम्भवात् २ धेनू।	३॥० कार्षापणाः।	यथाशक्ति।
	शूद्रापूर्वां कृच्छ्रातिकृच्छ्रम्।	५ धेनवः।	१५ कार्षापणाः।	यथाशक्ति।
	अनापदि ज्ञानाभ्यासे मनूक्तमेवार्धिकव्रतम्।	४५ धेनवः।	१३५ कार्षापणाः।	२५ गावः। अशक्तौ २५ कार्षापणाः।
वैश्यागमनम्।	प्राजापत्यम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
पश्चाधिकपुरुषगामिनी वैश्या।	अभ्यासे चान्द्रायणम्।	८ धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।
रजस्वलागमनम्।	चिराच्चोपवासः। घृतप्राशनम्। एतत् कामतः सकृद्गमने। अभ्यासे तु द्वैगुण्यादिकम्।	०	१॥० कार्षापणः।	यथाशक्ति।
ऋतौ भार्यानभिगमनम्।	चिराच्चोपवासः।	०	१॥० कार्षापणः।	यथाशक्ति।
	ज्ञानाभ्यासे प्राजापत्यम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
पर्वसु स्त्रीगमनम्।	एकोपवासः।	०	॥० पणाः।	यथाशक्ति।
आर्द्रदिने मैथुनम्।	एकोपवासः।	०	॥० पणाः।	यथाशक्ति।
दिवामैथुनम्।	एकाहं यावकपानम्। नग्नस्त्री स्नाने नग्नपरस्त्रीदर्शनेऽप्येवं प्रायश्चित्तम्। अभ्यासे प्रायश्चित्तावृत्तिः॥ * ॥	०	०	०
अथ स्त्रीव्यभिचारः।	समोत्तमवर्णेषु सकृदुपगमे प्राजापत्यम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
	हिरभ्यासे पराकः।	५ धेनवः।	१५ कार्षापणाः।	यथाशक्ति।
	त्रिरभ्यासे चान्द्रायणम्।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।
अन्यजागमनम्। अथान्त्यसकृत्कर्मकारनटवरुडकैवर्तभेदभिल्लपुल्कसीविश्लेलूपाख्यासु स्त्रीषु गमनम्।	अज्ञानतश्चान्द्रायणम्। ज्ञानाद्द्वैगुण्यम्।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।
	चतुर्विंशतिवारागमने द्वादशवार्षिकव्रतम्। एतदज्ञानतः। ज्ञानतो द्वैगुण्यम्। अत्यवरार्थेना च।	१८० धेनवः।	५४० कार्षापणाः।	१०० गावः। अशक्तौ १०० कार्षापणाः।
कापालिकस्त्रीगमनम्।	ज्ञानाद्ब्रह्मकृच्छ्रम्। अज्ञानाच्चान्द्रायणद्वयम्।	३० धेनवः। १५ धेनवः।	९० कार्षापणाः। ४५ कार्षापणाः।	यथाशक्ति। यथाशक्ति।
अथ तिर्यग्योनिगमनम्। तत्र गोवर्ज्यपशुगमनम्।	सचेलस्नानपूर्वकं गोभ्यो यवसभारदानम्। इदं सकृद्गमने।			
गोगमनम्।	गोवधोक्तमासिकव्रतम्। एतत् सकृद्गमने।	४ धेनवः।	१२ कार्षापणाः।	यथाशक्ति।
	अभ्यासे संवत्सरं प्राजापत्यम्।	९० धेनवः।	६० कार्षापणाः।	१७ गावः। अशक्तौ १६।८।६। कार्षापणाः।

अधोपपातकानि ।	प्रायश्चित्तानि ।	तदशक्तौ धेनुदानम् ।	तदशक्तौ पणदानम् ।	दक्षिणा ।
	अब्दमात्रभाषी द्वादशवार्षिकव्रतम् । इत्युपपातके अनन्वानमनप्रायश्चित्तं समाप्तम् । ७ ।	१८० धेनवः ।	५४० कार्षापणाः ।	१०० गावः । अशक्तौ १०० कार्षापणाः ।
अथ परिवेदनादि ।	परिवित्तिनिर्विष्टे कनीयानिर्विन्नन् परिवेत्ता । परिवित्तो ज्येष्ठः । परिवेदनीया कन्या । परिदाता । परिकर्ता याजकः । ते सर्वे पतिताः । इतीयं प्रायश्चित्तम् ।			
	संवत्सरं प्राणायामम् । कृतं कामतः । अकामतोऽहम् । अनाम्नयात् । "दैशान्तरस्यन्दीवैकशफगानसहोदरान् । वैडालाभिसक्तपतितशूद्रतुल्यातिरोगिणः । कङ्कशकाव्यधिरकुब्जवामनकुण्डकान् । अनिर्दशाग्न्याधेयांश्च ऋषिसत्रानृषस्य च । धनदृष्टिप्रयक्तांश्च कामतः कारयेत्तथा । कुण्डोन्मत्तचौरांश्च परिविन्दन्न दुष्यति ।"	३० धेनवः ।	९० कार्षापणाः ।	१० गावः । अशक्तौ १९०-१२० कार्षापणाः ।
प्राजापत्यम् । यथोक्तं सावित्रीपतितस्य । यदुदशान्दपर्यन्तमुपनयनाभावे प्राजापत्यस्य प्रायश्चित्तम् ।	पिप्पलादरहितनिःसपत्नस्य सावित्रीपातिते प्राजापत्यद्वयम् । यथाविधूपनयनस्य । आत्मस्थानवधादिना सावित्रीपातिते तु प्राजापत्यत्रयम् ।	३ धेनवः ।	९ कार्षापणाः ।	यथाशक्ति ।
एकविंशतिवर्षपर्यन्तमुपनयनाभावे क्षत्रियस्य प्रायश्चित्तम् । षष्टिवर्षपर्यन्तमुपनयनाभावे वैश्यस्य प्रायश्चित्तम् ।	सहैकत्रिंशं दिनत्रयाधिकमासचतुष्टयसमाप्यमुदावसकृच्छ्रम् । तद्यथा द्वौ मासौ यावदेन पर्येत् मासं पयसा अर्धं मासमामिक्षया अर्धरात्रं एतेन षड्रात्रमयाचितं त्रिरात्रमक्तभक्तः अष्टौरात्रमुपवसेत् ।	सपादनवधेन्वन्तम् १० धेनवः ।	२७० कार्षापणाः ।	यथाशक्ति ।
	दैशोपद्रवादिनासावित्रीपतने एकविंशतिरात्रं प्रकृतिमितयावकव्रतम् । तत उपनयनम् ।	९ धेनवः ।	८८० कार्षापणाः ।	यथाशक्ति ।
अथाधोरेतम् । अथोर्ध्वरेतसो यौधिष्ठिरम् ।	अकामं प्रकृष्टव्रतम् । सरघर्मसरिधानम् । अब्दान्ते संवत्सरं प्रकृष्टव्रतम् ।	सार्धसप्तधेन्वन्तम् ७ धेनवः । १५ धेनवः ।	२२१० कार्षापणाः । ४५ कार्षापणाः ।	५ गावः । अशक्तौ ६०।१ कार्षापणाः । ६ गावः । अशक्तौ ७०।२ कार्षापणाः ।
पितृव्यसुतादिविरिक्थम् । आदिना मातृष्वसृसुतामातृलसुतासगोत्रसगोत्रमातृकविद्याशौर्यसम्बन्धिनां ग्रहणम् ।	प्राजापत्यम् । कामतस्तत्र मातृष्वसृव्रतम् । एतदुभयतः । अब्दान्ते कृच्छ्राब्दम् ।	सार्धसप्तधेन्वन्तम् ७ धेनवः । ९ धेनवः ।	२२१० कार्षापणाः । ३३।० कार्षापणाः ।	यथाशक्ति । यथाशक्ति ।
अथ्यनुजातम् । अथोर्ध्वरेतसो विद्याशौर्यसम्बन्धिनः ।	कामतः संवत्सरोनाब्दे प्राजापत्यम् । दक्षोत्तरान्ते सोमायनान्तायनं । एतदुभयतोऽधिकाब्दौकिकम् ।	सार्धसप्तधेन्वन्तम् ७ धेनवः । साष्टधेन्वन्तम् ८ धेनवः ।	२२१० कार्षापणाः । २४।० कार्षापणाः ।	यथाशक्ति । यथाशक्ति ।
एकतस्तः पितृव्यसुतादिविरिक्थम् ।	सोमायनं वैशाखिव्रतम् । अब्दान्ते अब्दान्ते च प्राजापत्यम् ।	१० धेनवः ।	३० कार्षापणाः ।	१० गावः । १ वृषः । अशक्तौ १५ कार्षापणाः ।

अघोपपातकानि ।	प्रायश्चित्तानि ।	तदशक्तौ धेनुदानम् ।	तदशक्तौ चूर्णोदानम् ।	दक्षिणा ।
ब्राह्मणस्य वेदानध्ययनं यज्ञाकरणं पुत्रानुत्पादनञ्च ।	त्रैमासिकं गोव्रतम् ।	१२ धेनवः ।	३६ कार्षापणाः ।	१ वृषः । १० गावः । अशक्तौ १५ कार्षापणाः ।
अनाश्रमित्वम् ।	संवत्सरे प्राजापत्यम् ।	१ धेनुः ।	३ कार्षापणाः ।	यथाशक्ति ।
	वर्षद्वये अतिकृच्छ्रम् ।	३ धेनवः ।	९ कार्षापणाः ।	यथाशक्ति ।
	वर्षत्रये कृच्छ्रातिकृच्छ्रम् ।	६ धेनवः ।	१८ कार्षापणाः ।	यथाशक्ति ।
	अत ऊर्द्धं चान्द्रायणम् ।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः ।	२२॥० कार्षापणाः ।	यथाशक्ति ।
सूर्योदयास्तकालयोः शयनम् ।	सकृदाचरणे स्नानम् । अभ्यासे प्राजापत्यम् ।	१ धेनुः ।	३ कार्षापणाः ।	यथाशक्ति ।
ब्रह्मचारिणः सन्ध्यादीनामतिक्रमः । आदिना अग्नीन्धनाकरणं भैक्ष्यचर्याकरणञ्च ।	अरोगिणो निरन्तरं सप्तरात्रमकरणे अवकीर्णिव्रतम् । तत्तु खरचर्म्मपरिधानपूर्व्वकषण्मासिकं ब्रह्महत्याव्रतम् । एतदूने ऊनं अधिके अधिकम् ।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः ।	२२॥० कार्षापणाः ।	५ गावः । अशक्तौ ४।१४ कार्षापणाः ।
अनातुरगृहस्थस्य सन्ध्याखागाग्निकनित्यक्रियापातः ।	दिनैकनित्यक्रियातिपाते एकाहोपवासः ।	०	६ रक्तिकरजतम् ।	यथाशक्ति ।
	दिनत्रयक्रियातिपाते कृच्छ्रार्द्धम् ।	०	१॥० कार्षापणः ।	यथाशक्ति ।
	वर्षैकनित्यक्रियातिपाते एकदिनक्रियातिपातप्रायश्चित्तानुसरणेन प्रायश्चित्तम् ।	०	२ पल ६तोलक-४ माषकमितरजतम् ।	यथाशक्ति ।
शूद्रयतिरिक्तायाज्ययाजनम् । अयाज्याच्च निन्दितप्रतिग्रहादिना निन्दितब्राह्मणादयः ।	घृतगायत्रीजपः ।	०	०	०
	अभ्यासे सहस्राधिकं चान्द्रायणं वा । दक्षिणात्यागाच्च पूतो भवति ।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः ।	२२॥० कार्षापणाः ।	यथाशक्ति ।
शूद्रयाजनम् ।	लोभादिना याजने अर्जितभुक्तावशिष्टधनस्यागाधजले प्रक्षेपपूर्व्वकं ब्रह्मचारिणे दानपूर्व्वकं वा चान्द्रायणं पुनरुपनयनञ्च । अचारलवणब्रह्मसुवर्चलापानञ्च । एतदशक्तौ तद्धनं परित्यज्य त्रिंशत्पुराणाः प्रदातव्याः ।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः ।	२२॥० कार्षापणाः ।	यथाशक्ति ।
	स्नेहादनुप्रसङ्गादिना याजने द्रव्यत्यागपूर्व्वकं प्राजापत्यम् । अज्ञानतः प्राणायामसहस्रम् ।	१ धेनुः ।	३ कार्षापणाः ।	यथाशक्ति ।
शूद्रप्रतिग्रहः ।	सकृत्प्रतिग्रहे त्रिसहस्रगायत्रीजपः । अभ्यासे चान्द्रायणम् । एतच्च द्रव्यत्यागपूर्व्वकं कार्य्यम् ।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः ।	२२॥० कार्षापणाः ।	यथाशक्ति ।
उच्छास्त्रवर्त्तिक्षत्रियनृपप्रतिग्रहः ।	षष्ठे काले चौराशनं मासैकं जलवासः प्रभूतरत्नहिरण्यदानञ्च । मासोपवासेनैवास्य सङ्कलनम् ।	१५ धेनवः ।	४५ कार्षापणाः ।	यथाशक्ति ।
अधान्यधनप्रतिग्रहः । स च अयाचितपुष्पफलशाकलवणकाष्ठधान्यपयोमांसदधिघृतगोकृष्णगन्धमणिमत्स्यादीतरविषयः ।	ज्ञानादेकचत्वारिंशद्वाराभ्यासात् द्वादशवार्षिकव्रतम् ।	१८० धेनवः ।	५४०कार्षापणाः ।	१०० गावः । अशक्तौ १०० कार्षापणाः ।
	अज्ञानात् द्विरभ्यासे तप्तकृच्छ्रम् ।	४ धेनवः ।	१२ कार्षापणाः ।	यथाशक्ति ।
	ज्ञानात् द्विरभ्यासे चान्द्रायणम् ।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः ।	२२॥० कार्षापणाः ।	यथाशक्ति ।
धान्यप्रतिग्रहः ।	अज्ञानात् एकचत्वारिंशद्वाराभ्यासात् द्वादशवार्षिकव्रतम् ।	१८० धेनवः ।	५४० कार्षापणाः ।	१०० गावः । अशक्तौ १०० कार्षापणाः ।
	अज्ञानात् सकृत्कृते तप्तकृच्छ्रम् ।	४ धेनवः ।	१२ कार्षापणाः ।	यथाशक्ति ।
	ज्ञानात् सकृत्कृते चान्द्रायणम् ।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः ।	२२॥० कार्षापणाः ।	यथाशक्ति ।
पतितप्रतिग्रहः ।	ज्ञानात् सकृत्कृते चान्द्रायणम् । अज्ञानात्तदर्द्धम् ।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः ।	२२॥० कार्षापणाः ।	यथाशक्ति ।

अपोषणादिदोषे।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ कृच्छ्रदानम्।	दक्षिणा।
प्रायश्चित्तप्रकरणम्।	त्रिषट्समायत्तोऽन्नः मासेकं गोष्ठे पयःपानं वा। एतत् सकृत्करणे प्रायश्चित्तप्रकरणम्।	०	०	०
समानाधिकरणादिनीभयतोदती-नीमन्नादिप्रतिषिद्धे।	उत्तमसमणादिप्रतिषिद्धे दशमषट्समायत्तोऽन्नः। मध्यमे षष्ठसप्तसमायत्तोऽन्नः। अधमे सप्तोत्तरसप्तसमायत्तोऽन्नः। द्वादशरात्रं पयोव्रतम्। अत्यन्तनिषिद्धक्रयादिनीभयतोदतीप्रतिषिद्धे नवसमायत्तोऽन्नः।			
अन्न ब्राह्मणस्य क्षत्रियवैश्यकन्या धनार्जनम्।	संवत्सरे चान्द्रायणम्। संवत्सराभ्यन्तरे मासैकद्विकादौ चान्द्रायणभागहारः कार्यः। संवत्सरादूर्ध्वं द्वैगुण्यत्रैगुण्यादिकं कार्यम्। व्यापत्काले दोषाभावः।	सार्धसप्तधेनुसमावात् ८ धेनवः।	२२१० कार्षापणाः।	यथाशक्ति।
ब्राह्मणस्य सेवादृत्तिधनार्जनम्।	प्राणात्ययेऽयं पुनरन्नमनम्। क्रयत्यागपूर्वकं करणीयम्	६ धेनवः।	६ कार्षापणाः।	यथाशक्ति।
ब्राह्मणस्य गीतादिना धनार्जनम्।	चान्द्रायणम्। एतत्प्रायश्चित्तस्याप्ययमर्थः।	सार्धसप्तधेनुसमावात् ८ धेनवः।	२२१० कार्षापणाः।	यथाशक्ति।
ब्राह्मणस्य कृषिसेवनम्।	चान्द्रायणम्।	सार्धसप्तधेनुसमावात् ८ धेनवः।	२२१० कार्षापणाः।	यथाशक्ति।
	चिरतरकालाभ्यासे चैवार्धिकव्रतम्।	४५ धेनवः।	१६५ कार्षापणाः।	२५ गावः। अशक्तौ २५ कार्षापणाः।
अविक्रेयविक्रयः। ब्राह्मणक्षत्रियविशां यथा। लवणं पयसा सप्त क्षीरं दधि दृतोदक मर्जनरोचन मांसा रसवाः गुडतैल मांसपयस्तक्रक्षौद्र सर्वगन्धौषध मांसा रसवाः गुडतैल मांसपयस्तक्रक्षौद्र सर्वगन्धौषधयः अर्क मद्यमांसमांस सुरा सोम लिंग मौषधं कन्या दिकं गुरुगुरु चर्मरस दरितान्न मद्यभिन्नाद्यान मेदिक चार मदि मौक्तिक प्रवाल एक मद्य चार्मौषधि मणि वेद वेदक मद्यमद्यान दुग्ध गुड तुष कार्पास मक्षार्थि द्विजाद्य प्रभु सोमक मद्यौषधस्य मद्यमांसादि दत्तविक्रयादि।	सकृत्करणे चिरात्रोपवासः चिरत्वासे प्राणात्ययम्। अयनाभ्यासे चान्द्रायणम्।	० १ धेनुः। सार्धसप्तधेनुसमावात् ८ धेनवः।	११० कार्षापणाः। ३ कार्षापणाः। २२१० कार्षापणाः।	यथाशक्ति। यथाशक्ति। यथाशक्ति।
	नित्यविक्रये बहुतरकालाभ्यासे वा। त्रिसवनस्नानाधःशयनचतुर्थकालभोजनरूपसंवत्सरव्रतम्। गुरुत्वालाभादि दोषाभावः।	१५ धेनवः।	४५ कार्षापणाः।	६ गावः। अशक्तौ ८।० कार्षापणाः।

अघोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णोदानम्।	दक्षिणा।
निन्दितदेशगमनम्। तत्तु तीर्थयात्राव्यतिरेकेण। निन्दितदेशा यथा। कारस्करकलिङ्गोड्रान्ध्रपुण्ड्रसुह्मवङ्गभूमिलवसिन्धुसौराष्ट्रसौवीरप्रत्यन्तदेशाङ्गवङ्गकलिङ्गाटव्यः।	एतान् गत्वा तत्रैव चिरमुषित्वा गङ्गादिगमनम्। तदशक्तौ पुनरुपनयनम्।			
	अतिचिरवासे पुनरुपनयनं चान्द्रायणञ्च।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।
असत्याभिधानम्।	सकृदसत्यभाषणे क्षणानुस्मरणम्।			
	अत्यन्ताभ्यासे तप्तकृच्छ्रम्।	४ धेनवः।	१२ कार्षापणाः।	यथाशक्ति।
	अतिबहुतरकालाभ्यासे माससाध्यचान्द्रायणम्।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।
	साक्षिणोऽसत्यभाषणे ज्ञानाज्ञानतो द्वादशवार्षिकव्रतमित्युक्तमनुपातके। विवाहभयमैथुनबालप्रतारणपरीहासगोब्राह्मणहितस्त्रीराजस्वप्राणात्ययसर्वधनापहारविषयेषु मिथ्याकथने दोषाभावः।			
उच्छिष्टस्य चाण्डालादिदर्शनम्।	दर्शने एकरात्रोपवासः।	०	॥० पणाः।	यथाशक्ति।
	सम्भाषणे द्विरात्रोपवासः।	०	१ कार्षापणः।	यथाशक्ति।
	संस्पर्शे त्रिरात्रोपवासः।	०	१॥० कार्षापणाः।	यथाशक्ति।
	पङ्क्तिगमने सचेलस्नानम्। अनुच्छिष्टस्य दर्शने सूर्यादिदर्शनम्। सम्भाषणे ब्राह्मणसम्भाषणम्। इदं ज्ञाने।			
उच्छिष्टस्य सूर्यादिदर्शनम्। आदिना नक्षत्रचन्द्रौ। कामत इदम्।	एकोपवासः।	०	६ रक्तिकरजतम्।	यथाशक्ति।
तैलाभ्यक्तादिमूत्रोच्चारसमुत्सर्गः। आदिना अनाचान्तस्मृत्वाऽस्मिन्मैथुनिनः।	एकोपवासः।	०	॥० पणाः।	यथाशक्ति।
विप्रस्यादिमध्यगमनम्। आदिना दन्तधावनोर्ग्रहणम्।	कामतोऽत्यन्ताभ्यासे चान्द्रायणम्।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।
	सकृदभ्यासादिषु तु स्नातकव्रतलोपप्रायश्चित्तम्। एकदिनाभोजनम्। तदाकृतिरूहनीया।	०	॥० पणाः।	यथाशक्ति।
अग्नौ पादप्रतापनम्। क्षुद्रेण पादसम्मार्जनञ्च।	एकोपवासः। इदं सकृत्करणे। अभ्यासे द्वैगुण्यादिकम्।	०	॥० पणाः।	यथाशक्ति।
गुरोर्ब्राह्मणस्य च तिरस्कारः।	दर्पेण हुङ्कारे त्वङ्कारे वादेन जये वाससा बन्धने क्षयेण ताडने च त्रिरहं प्रसाद्य दिनमेकमुपवासः। एतदीषत्संरम्भतः सकृत्करणीयम्।	०	॥० पणाः।	यथाशक्ति।
	आस्त्रीयविवादे दर्पात् पुनः पुनर्जये स्खलित्वा प्रणिपत्य त्रिरात्रोपवासः।	०	१॥० कार्षापणः।	यथाशक्ति।
	प्रमादतः पादेन स्पर्शे एकरात्रोपवासः अभिवादनं प्रसादनञ्च। क्रोधादिना अनुबन्धापेक्षया चाण्डालादिकं कल्पम्।	०	॥० पणाः।	यथाशक्ति।
	महापातकेन ब्राह्मणस्य विरूपाभिधाने कृच्छ्रातिकृच्छ्रम्।	५ धेनवः।	१५ कार्षापणाः।	यथाशक्ति।

अधोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा।
	शिरसि क्रिमिदंशने हृषदक्षिणायुक्तसान्तपनं तप्तकृच्छ्रं वा।	पादोनधेनुचतुष्टयासम्भवात् ४ धेनवः।	११।० कार्षापणाः।	यथाशक्ति।
श्वादिदंशः। श्वादिना शृगालखरग्राम्यकव्याघ्रराक्षोष्ट्रवराहपुंश्चलीवानरवायसानां दंशनम्।	पादयोरुधिरदर्शने जले प्राणायामः घृतप्राशनञ्च। पादयोरतिगाढ़दंशने नद्यां १६ प्राणायामाः। नाभेरधोगाढ़दंशने ब्रह्मचारिणस्त्वहं सायं पयःपानम्।			
	गृहस्थस्य चिरात्रमुपवासः।	०	१॥० कार्षापणः।	यथाशक्ति।
	एकाहमग्निहोत्रिणः।	०	॥० पणाः।	यथाशक्ति।
	नाभ्यूर्द्धं दंशने एतद्द्वैगुण्यम्। वाक्षोच्चतुर्गुणम्। मूर्ध्नि षोड़शगुणम्। इदं सरुधिरदंशने। नाभेरूर्द्धं मतिगाढ़दंशने सागरगनदीस्नानपूर्व्वकोपवासः घृतं प्राणायामावर्त्तनञ्च।			
	व्रतस्थस्य श्वादिदंशने चिरात्रोपवासः सघृतयावकपानञ्च। बालस्यात्रत्वे अशक्तत्वे वा तदीयपापत्वयं संकल्प्य पित्रादिः प्रायश्चित्तं कुर्य्यात्। दष्टस्थानस्य गायत्र्यष्टसहस्राभिमन्त्रणपूर्व्वकमुल्मुकेन दहनम्। चतुर्भिः कलसैर्नदीसङ्गमे वा स्नानम्। स्त्रियास्तु विशेषः। उदितसोमनक्षत्रदर्शनं समुद्रदर्शनं वा। कृष्णपक्षे चन्द्रगमनदिग्दर्शनम्।	०	१॥० कार्षापणः।	यथाशक्ति।
विप्रादिहते चात्मघातदृते वा अश्रुपातजलादिदानम्।	दहनवहनकटक्रियातर्पणश्राद्धादौ तप्तकृच्छ्रम्।	४ धेनवः।	१२ कार्षापणाः।	यथाशक्ति।
	तच्छवस्य केवलस्यार्द्धे अश्रुपाते वा एकाहोपवासः।	०	६ रक्तिकरजतम्।	यथाशक्ति।
	अभ्यासे अनड्वत्सहितगोदक्षिणायुक्ततप्तकृच्छ्रम्।	४ धेनवः।	१२ कार्षापणाः।	१ वृषः। १ गौः। अश्व ६ कार्षापणाः।
	आत्मघातिनः स्नेहात् दाहादिकरणे तप्तकृच्छ्रसहितचान्द्रायणम्। बलात्कारेण उद्बन्धनस्तस्य पाशच्छेदनदहनवहनेषु मासं भैक्ष्यभक्षणं त्रिसवनस्नानञ्च। वेतनेन दहनवहनादिकरणे असम्बन्धिनां कृच्छ्रपादः।	१२ धेनवः।	३४॥० कार्षापणाः।	यथाशक्ति।
	दहनवहनव्यतिरेकेण कामतः सर्व्वाङ्गीनाभ्यासस्पर्शे प्राजापत्यम्।	१ धेनुः।	६ कार्षापणाः।	यथाशक्ति।
	तथैवाभ्यासे तप्तकृच्छ्रम्।	४ धेनवः।	१२ कार्षापणाः।	यथाशक्ति।
	द्विजस्य शूद्रशवानुगमने चिरात्रौर्द्धं तदन्ते समुद्रगां नदीं गत्वा प्राणायामशतं कृत्वा घृतप्राशनम्। अवन्तीमाप्य १००८ गायत्रीजपो वा। द्विजस्य द्विजशवानुगमने १०८ गायत्रीजपः। शूद्रस्य सर्व्वशवानुगमने स्नानम।			
बलात्कारितश्वेच्छदास्थ्यभक्षणे।	श्वेक्षेक्षाप्लावादैर्दंशभिः उच्छिष्टमार्ज्जनोच्छिष्टभक्षणशरीरोपविष्टवराहमांसभक्षणेच्छस्त्रीसङ्गतदीयस्त्रीसहभोजनाऽ-			

अपोपयानादि।	प्रायश्चित्तानि।	तदग्रतो धेनुदानम्।	तदग्रतो। पूर्णोदानम्।	दक्षिणा।
	दिनत्रयनिवर्त्ये बलात्संसेवं कारित्वा निरविहिंसायां प्रायश्चित्तम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
	मासेषान्द्रायणम्।	सार्द्धसप्तधेन्वसमायात् ८ धेनवः।	२१० कार्षापणाः।	यथाशक्ति।
	अस्थिभेदेष्वयोः परार्कः।	५ धेनवः।	१५ कार्षापणाः।	यथाशक्ति।
	अस्रक्स्रावे मासार्धं यावकपानम्। यत्प्रमाणादूर्ध्वं वर्षचतुष्टयं यावत् भागद्वारेण प्रायश्चित्तमधिकमधिकं कार्यम्। तदूर्ध्वं तत्प्रमाणात् पतितत्वेन प्रायश्चित्तान्तराभावात्सत्रम्।	२ धेनुः।	६ कार्षापणाः।	यथाशक्ति।
अतुदकमनपूरीषकरणम्।	मधिमस्थानं गोमयेन। अभ्यासे एकोपवासः मधिमस्थानेषु।	०	१० पणाः।	यथाशक्ति।
अनाधोरनुचिप्रयत्नभेदः।	मासं यावकपानम्। एतदभ्यासे।	२ धेनू।	६ कार्षापणाः।	यथाशक्ति।
	ज्ञानतः दुःखदार्तस्य त्रिरात्रोपवासः। एतदभ्यासः प्रथमस्य दनि पञ्चमे।	०	१६० कार्षापणाः।	यथाशक्ति।
	अनार्तस्य कौतूहलादिना तमश्नतः।	४ धेनवः।	१२ कार्षापणाः।	यथाशक्ति।
अनोत्पादनम्। अधोमेध्यावहेदकरणम्।	अधोरात्रमनश्नन् भूत्वा पयःपानम्।	०	५ रजतमाषकाः।	धनुर्दर्शने।
अन्नधनःपरान्नादिदर्शनकरणम्।	इदं भक्षयेति अपदिश्य कामतो दर्शयित्वाधोरात्रोपवासः।	०	३ रजतमाषकाः।	यथाशक्ति।
आहुतिमन्त्रितप्राक्षणाभाक्षणम्।	यतिचान्द्रायणम्।	। ९ धेनवः।	११० कार्षापणाः।	यथाशक्ति।
देवागारस्तेयकालाहुतिलादि वा प्रायश्चित्तम्।	प्राजापत्यम्।	१ धेनुः।	६ कार्षापणाः।	यथाशक्ति।
निशोषणादि। आदिना पातकर्मोदक्याहुतिभक्षणपतितसंसर्गाशुचिवासःपरिधानानि।	आचमनम्। गोस्पर्शः। अर्कदर्शनम्। दक्षिणाग्रयवस्पर्शो वा। अन्य पूर्वाभावे तत्परम्। दक्षिणप्रदक्षमेथुनस्य सुरास्पर्शे स्नानम्।			
अनोनां अनोपशमभङ्गः। एतानि यथा। अस्थिसंसर्गलाक्षेयमैथुनस्पर्शनानि। उपपातानि यथा। अक्षोधमुरुमुत्रमाप्रमादशौचाचारत्वमिति।	अधोरात्रोपवासपूर्वकचान्द्रायणम्।	सार्द्धसप्तधेन्वसमायात् ८ धेनवः।	२१० कार्षापणाः।	यथाशक्ति।
	रसलेप्यया क्षीरमोषमन्ने प्राजापत्यमेतपूर्वकमात्मपतनम्।	२ धेनू।	६ कार्षापणाः।	यथाशक्ति।
	अनुद्धादे उपवासः प्राजापत्यमेतत्।	०	॥० पणाः।	यथाशक्ति।
	अथातः पशुक्रिमिसिंहसायां दष्ट्यादिलक्षणम्।	६ धेनवः।	१८ कार्षापणाः।	यथाशक्ति।
	चान्द्रायणं वा। दक्षिणदर्शनात् क्षीरदर्शनात् स्कन्दने षोडशप्राजापत्यानि। स्त्रियं पिता वामतो दिवास्कन्दे त्रिरात्रोपवासः प्राजापत्यमेतत्तस्य। रात्रौ स्कन्दे मानपूर्वकद्वादशप्राजापत्यानि।	सार्द्धसप्तधेन्वसमायात् ८ धेनवः।	२१० कार्षापणाः।	यथाशक्ति।
	एतावन्मधुमांसमद्यलशुनसंसर्गाणामोष्यानामेकैकस्य भोजने प्राजापत्यम्। योनिरां प्रमादे योनिः शुद्धिः। आदिरां ज्ञानेन शुद्धिकारकम्। अकृत्यारिष्टोऽकामतः सर्वे केशवपनं स्नानम्। अवांधेनम्। अपि दुष्कर्मनिष्कृतौ सत्यम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।

अथोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा।
व्रतभङ्गः।	लोभान्मोहात् प्रमादाद्वा व्रतभङ्गे उपवासत्रयं क्षीरसुण्डनञ्च।	०	१॥० कार्षापणः।	यथाशक्ति।
उष्ट्रारोहणम्।	कामतः सकृदारोहणे नग्नस्नाने च प्राणायामः।			
	अभ्यासे चिरात्रोपवासः। अथवधानेनारोहणे नग्नस्य ईषदभ्यक्तस्नानभोजने च प्राणायामशतम्। अत्र उपपातकगणपठितेषु यत्र प्रायश्चित्तं नोक्तं तत्रोपपातकसामान्यप्रायश्चित्तमेव ग्राह्यम्। तत्तु मनूक्तं त्रैमासिकं गोव्रतं चान्द्रायणं वा। याज्ञवल्क्योक्तं मासं पयःपानं पराको वा। एतान्येव प्रायश्चित्तानि पापस्य गुरुलाघवमवगम्य व्यवस्थेयानि॥ ४॥	•	१॥० कार्षापणः।	यथाशक्ति।

अथ जातिभ्रंशकरपापानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा।
ब्राह्मणपीड़ाकरणम्। लशुनादिभक्षयोर्व्रात्यम्। मिथ्ये कौटिल्यम्। पुंसि मैथुनञ्च।	कामतः सान्तपनम्।	२ धेनू।	६ कार्षापणाः।	यथाशक्ति।
	अकामतः प्राजापत्यम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
	एतच्चाभ्यासे।			
	अत्रायं विशेषः।			
	ब्राह्मणावगोरणे प्राजापत्यम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
	ब्राह्मणे दण्डादिनिपातने अतिकृच्छ्रम्।	३ धेनवः।	६ कार्षापणाः।	यथाशक्ति।
	ब्राह्मणस्य श्रोत्रितोत्पादने कृच्छ्रातिकृच्छ्रम्।	५ धेनवः।	१५ कार्षापणाः।	यथाशक्ति।
	ब्राह्मणाङ्गच्छेदने कृच्छ्रातिकृच्छ्रम्।	५ धेनवः।	१५ कार्षापणाः।	यथाशक्ति।
	चान्द्रायणम्।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः।	२२।० कार्षापणाः।	यथाशक्ति।
	दृषभोदानञ्च।			

अथ सङ्करीकरणपापानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा।
खराश्वोष्ट्रगवयैणशृगालमेषमीनाहिमहिषार्क्षवधस्वपाके।	सकृत्करणे मासं यावकपानम्।	२ धेनू।	६ कार्षापणाः।	यथाशक्ति।
	अभ्यासे कृच्छ्रातिकृच्छ्रम्।	५ धेनवः।	१५ कार्षापणाः।	यथाशक्ति।
	अत्यन्ताभ्यासे चान्द्रायणम्।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः।	२२।० कार्षापणाः।	यथाशक्ति।

अथापात्रीकरणपापानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा।
निन्दितेभ्यो धनादानम्। वाणिज्यम्। शूद्रसेवनम्। अकृत्यभक्षणञ्च।	सकृत्करणे चतुरहमार्द्रं तप्तकृच्छ्रं शीतकृच्छ्रं वा।	नवादधेन्वसम्भवात् ७ धेनू।	३।।० कार्षापणाः।	यथाशक्ति।
	अभ्यासे महासान्तपनम्।	६ धेनवः।	१८ कार्षापणाः।	यथाशक्ति।
	अत्यन्ताभ्यासे चान्द्रायणम्।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः।	२२।० कार्षापणाः।	यथाशक्ति।

अथ मलावदूषणानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णोदानम्।	दक्षिणा।
कृमिकीटपक्षिणां हननम्। मद्यानुगतदधिभोजनम्। कलकापुष्पाणां स्त्रेयम्। अधैर्यम्। तच्च गीतश्रवणादि। अल्पेऽल्पचये अत्यन्तवेदनत्वच।	सहस्रादारभ्य लक्षपर्यवसानम्।	०	॥८१२	यथाशक्ति।
	अभ्यासे तन्नक्तम्।	४ धेनवः।	१२ कार्षापणाः।	यथाशक्ति।
	अत्यन्ताभ्यासे नक्तातिनक्तम्।	५ धेनवः।	१५ कार्षापणाः।	यथाशक्ति।
	एषु चतुर्षु यत्र यत्र प्रायश्चित्तविशेषो नोक्तस्तत्रैव बोध्यम्।			

अथ प्रकीर्णकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णोदानम्।	दक्षिणा।
यदुक्तं तत्प्रकीर्णकम्। इतिवचनात् अतिपातकान्यघान्यतमत्वेन विशेषतोऽनुक्तानि पापानि।	चान्द्रायणम्। पराकः। तुलापुरुषः। गवानुगमनम्। प्राजापत्यम्। एतानि सर्वपापप्रणाशकानि। पापस्य गुरुलाघवं वीक्ष्य प्रायश्चित्तान्येतानि शिष्टैर्व्यवस्थेयानि।			
अथास्पृश्यसंसर्गनम्। तत्र चाण्डालरजस्वलापतितसूतिकाशवस्पृष्टिवयङ्गोन्मत्तास्थिकम्याभ्याभक्कुटवराहादीनां संसर्गनम्।	अशुद्धिरुक्तस्य चाण्डालादिसंसर्गे अकामतः सचेलं सशिरस्कं स्नानम्। कामतः सचेलस्नानम्। महाव्याहृतिभिर्होमः। घृतप्राशनच्च। चिताधूमसंसर्गे ऋतुकालीनमैथुने दुःस्वप्ने वमने विरेके श्मशुकर्मणि यूपभस्मपक्षनखशवसस्पृष्टतदस्थ्नां संसर्गे स्नानपूर्वकं प्रक्षालितवस्त्रपरिधानम्। अनृतौ मैथुने मूत्रपुरीषत्यागवच्छुद्धिः।			
	सर्वाङ्गसंसर्गे त्रिरात्रोपवासः। रात्रौ शवव्रजंस्पृश्यसंसर्गने सुवर्णं प्रक्षिप्य वह्निं सन्निधाप्य दिवाकृतनक्तैः स्नानम्। सर्वत्र प्रागन्नप्राशनात् शिशोरभ्युक्षणम्। प्राक् चूडाकरणात् बालस्याचमनम्। प्रागुपनयनात् कुमारस्य स्नानम्।	०	१॥० कार्षापणः।	यथाशक्ति।
अघोक्षिप्तस्य चाण्डालादिसंसर्गः। आदिना पतितरजस्वलान्त्यजचण्डालमद्यभाण्डानां ग्रहणम्।	सद्यः स्नात्वा परदिने प्रायश्चित्तं करणीयम्।			
	ऊर्ध्वोक्षिप्तस्य प्राजापत्यम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
	कामाभ्यासे सान्तपनम्।	४ धेनवः।	१२ कार्षापणाः।	यथाशक्ति।
	अज्ञाने त्रिरात्रोपवासः। पञ्चगव्यपानच्च।	०	१॥० कार्षापणः।	यथाशक्ति।
	अधोक्षिप्तस्य अर्धादनिगीर्णग्रासस्य आमाशयोक्षिप्तस्य च प्राजापत्यपादः। आपदि स्नानात् विशेषो यथा।	०	॥० पणाः।	यथाशक्ति।
	मूत्रत्यागाशौचिनः शवादिसंसर्गे एकोपवासः।	०	॥० पणाः।	यथाशक्ति।
	पुरीषत्यागाशौचिनः शवादिसंसर्गे दिनद्वयमुपवासः।	०	१ कार्षापणः।	यथाशक्ति।
	मैथुनाशौचिनः शवादिसंसर्गे दिनत्रयमुपवासः।	०	१॥० कार्षापणः।	यथाशक्ति।
	पानाशुचीनां शवादिसंसर्गे दिनचतुष्टयमुपवासः।	०	२ कार्षापणौ।	यथाशक्ति।
अथ तलाभ्यक्तस्य चाण्डालादिसंसर्गः।	उपवासः। पञ्चगव्यपानच्च। चाण्डालोदकसंस्पृष्टस्य स्नानम्।	०	॥० पणाः।	यथाशक्ति।
	उच्छिष्टस्य चाण्डालोदकसंसर्गे त्रिरात्रोपवासः।	०	१॥० कार्षापणः।	यथाशक्ति।

अथ प्रकीर्णकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा।
अथ रजकादिस्पर्शः। आदिना चर्मकारवेणधीवरनटानां ग्रहणम्।	अनुच्छिष्टस्य द्विजस्य रजकादिभिरकामतः स्पर्शे आचमनम्। कामतः शिरोयतिरिक्ताङ्गस्पर्शे तदङ्गप्रक्षालनपूर्वकमाचमनम्। शिरःस्पर्शे स्नानम्। उच्छिष्टस्य तु ब्राह्मणस्यानुच्छिष्टचर्मकारादिस्पर्शे एकरात्रं पयःपानम्।			
	उच्छिष्टचर्मकारादिकर्तृकस्पर्शे त्रिरात्रोपवासान्ते घृतप्राशनम्। ज्ञानत ऊर्ध्वोच्छिष्टविषयश्चेदम्।	०	१॥० कार्षापणः।	यथाशक्ति।
	अज्ञानतस्तदर्धम्।	०	॥० पणाः।	यथाशक्ति।
अथोच्छिष्टस्य ब्राह्मणस्योच्छिष्टसच्छूद्रस्पर्शः।	एकोपवासानन्तरं पञ्चगव्यपानम्। कामत इदम्।	०	॥० पणाः।	यथाशक्ति।
	अकामेऽधोच्छिष्टे च नक्तम्। पुनः स्पर्शेऽप्येवम्।	०	२ रजतरक्तिके।	यथाशक्ति।
अथोच्छिष्टोच्छिष्टसवर्णस्पर्शः।	द्वयोरेवोच्छिष्टयोर्ब्राह्मणयोरन्योन्यस्पर्शे तदन्नत्यागपूर्वकं स्नानम्। अत उच्छिष्टस्य विप्रस्यानुच्छिष्टविप्रस्पर्शे दोषाभाव एव। एतदकामतः।			
	कामतो नक्तपूर्वं घृताशनम्।	०	२ रजतरक्तिके।	यथाशक्ति।
	उच्छिष्टब्राह्मणस्योच्छिष्टचत्रस्पर्शे नक्तम्।	०	२ रजतरक्तिके।	यथाशक्ति।
	ताडशवैश्यस्पर्शे उपवासः।	०	॥० पणाः।	यथाशक्ति।
	भुञ्जानयोः सवर्णयोः परस्परस्पर्शे तदन्नत्यागपूर्वकं स्नानं प्राणायामश्च। अज्ञानात्तदन्नभोजने परदिने नक्तं पञ्चगव्यपानम्। तदन्ते भोजने न दोषः।			
	ज्ञानात् उपवासानन्तरं ब्रह्मकूर्चपानं हविष्यभोजनञ्च।	०	॥० पणाः।	यथाशक्ति।
	शूद्रस्यापि विशेषाश्रवणादुच्छिष्टोच्छिष्टसंस्पर्शे एतदेव। नक्ताशक्तौ रजतरक्तिकादयं देयम्।			
अथ नीलीवस्त्रपरिधानम्।	अहोरात्रोपवासानन्तरं पञ्चगव्यपानम्। इदमज्ञाने। ज्ञाने द्वैगुण्यम्।	०	॥० पणाः।	यथाशक्ति।
	पालनाद्विक्रयात्तद्वृत्तेश्चोपजीवनात् त्रीणि कृच्छ्राणि। नीलीवस्त्रधारिणां स्नानदानतपोहोमस्वाध्यायपितृतर्पणमहायज्ञानां वृथात्वम्। स्त्रीणां क्रीड़ार्थसंयोगे प्रयतीवे न दोषः।	३ धेनवः।	६ कार्षापणाः।	यथाशक्ति।
अथ पलाण्डुलशुनादिस्पर्शः। आदिना सुरामद्यमूद्योच्छिष्टानां ग्रहणम्	ऊर्ध्वोच्छिष्टस्य द्विजस्य कामतः स्पर्शे चाहं कृच्छ्रचतुष्टयं सावित्रीशतजपश्च।	०	१॥० कार्षापणलभ्यकाञ्चनम्।	यथाशक्ति।
	नूतोच्छिष्टस्य स्पर्शे नक्तम्।	०	२ रजतरक्तिके।	यथाशक्ति।
	ऋतुपरीयोत्सर्गस्य पलाण्डुलशुनादिस्पर्शे एकोपवासः।	०	॥० पणाः।	यथाशक्ति।
	ऊर्ध्वोच्छिष्टस्य त्रयोपवासः। एतत्त्रयमकामतः।	०	१ कार्षापणः।	यथाशक्ति
	अनुच्छिष्टस्य स्पर्शे केवलं स्नानम्			

अथ प्रतीर्यकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णादानम्।	दक्षिणा।
	अधोच्छिष्टस्य कामतः सुरेतरमद्यस्पर्शे चकामतः शूद्रोच्छिष्टस्य लशुनादीनाञ्च स्पर्शे अहोरात्रोपवासः। पञ्चगव्यपानञ्च।	०	॥० पणाः।	यथाशक्ति।
	कामतः सुरायाः स्पर्शने स्नानं प्राणायामत्रयं घृतप्राशनञ्च।			
	चकामतः सुरायाः स्पर्शने प्राशे चाप्येवम्।			
	कामतस्तस्याः स्पर्शे प्राशे च जातिभंशकरपापस्य प्रायश्चित्तं ज्ञेयम्। अमेध्यपायिनां सुरापस्यन्यिसुराप्राशे उदकमग्नं चिरचमर्षणं घृतप्राशनञ्च।			
अधोच्छिष्टस्य नरादिपुरीषस्पर्शः। नरादिना चकाकजलूकप्रादियरणम्।	अधोच्छिष्टस्य सचैलस्नानम्।			
	ऊर्ध्वोच्छिष्टस्योपवासः। पञ्चगव्यपानञ्च।	०	॥० पणाः।	यथाशक्ति।
अधानुच्छिष्टस्य मलस्पर्शः। मलाः यथा। "वसाशुक्रमसृङ्मज्जामूत्रविट्कर्णविण्मलाः। श्लेष्माश्रुदूषिका स्वेदो दादशैते नृणां मलाः॥"	पूर्वेषां षण्णां नाभेरधः करद्वये च स्पर्शे मृज्जलाभ्यां क्षालनम्। उत्तरेषां षण्णां नाभेरधः करद्वये च स्पर्शे केवलजलेन क्षालनम्। नाभेरूर्ध्वं विण्मूत्रप्रस्तिस्पर्शे स्नानम्। चक्षुषि ओष्ठे बाहुकरयोश्च स्पर्शे गवोयगोमयैस्तद्वक्षालनं स्नानं उपवासः पञ्चगव्यपानञ्च।	०	॥० पणाः।	यथाशक्ति।
	मानवानरमार्जारखरोष्ट्रशूकरणामन्यमेध्यस्पर्शे सचेलं स्नानम्।			
	एतदपि अनुच्छिष्टस्य नाभ्यूर्ध्वमेवोपहतविषयम्। अध उच्छिष्टविषयञ्च।			
	काकबलाढकाभ्यां विष्ठितस्य श्रोत्रमुखाप्रविष्टामेध्यलिप्तशरीरस्य च तदङ्गक्षालनं स्नानञ्च। अमेध्यानि यथा। "मानुषास्थि शवं विष्ठा रेतो मज्जार्णवं वसा। स्वेदाश्रुदूषिका श्लेष्मा सद्यश्चामेध्यमुच्यते॥" एषां दैवात् प्रच्युतानामेवामेध्यत्वम्। मद्यविण्मूत्रविपुषां सुखमरुत्स्पर्शे गवयिकागोमयैर्लेपनं स्नानं उपवासः। तदन्ते पञ्चगव्यपानञ्च। अत्र विशेषो यथा। परस्य मानुषस्यास्थिवसाविष्ठार्णवमज्जरेतोमज्जश्लेष्मितानां स्पर्शे लेपमार्जनं स्नानं आचमनञ्च। आत्मसम्बन्धिनामेतेषां स्पर्शे परिमार्जनमाचमनञ्च।	०	॥० पणाः।	यथाशक्ति।
अथ मानुषास्थिस्पर्शः।	तत्स्पर्शे मानुषास्थिस्पर्शे स्नानम्।			
	कामतः स्पर्शे स्नानं गायत्र्यष्टशतजपः। घृतप्राशनं चिराचमनञ्च।			
	कामतोरक्तास्थ्यादौ चिराचमनौचान्ते कृच्छ्रमादः।	०	॥० पणाः।	यथाशक्ति।
	निःसारस्य स्पर्शे स्नानमात्रं गोस्पर्शः अर्कदर्शनं वा। कामतोरक्तास्थ्यादौ अहोरात्रोपवासौचान्ते कृतानि कार्याणि।			
अथ रक्तस्पर्शः।	रक्तस्पर्शे स्नानम्।	०		
अथ रक्तमांसयोः मज्जशुक्रयोः मलमूत्रयोः मलस्पर्शः।	रक्तमांसयोः ब्राह्मणस्य सर्वशरीरजस्पर्शे स्नानगोमयम्। पञ्चगव्यपानञ्च। स्नातु कामतः।	०	६० पणाः।	यथाशक्ति।

अथ प्रकीर्णकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा।
	अकामतस्तदर्द्धं अर्धान्नक्तव्रतम्।	०	१० पणाः।	यथाशक्ति।
	रजस्वलाया ब्राह्मण्याः श्वेतवर्णरजस्वलायाः अर्थात् क्षत्रियादिरजस्वलायाः स्पर्शे षड्रात्रोपवासः। एतच्च कामतः। अकामतस्तदर्द्धम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
	रजस्वलायाः शूद्रायाः सवर्णरजस्वलास्पर्शे एकरात्रोपवासः पञ्चगव्यपानञ्च।	०	॥० पणाः।	यथाशक्ति।
	सवर्णयो रजस्वलयोरन्योन्यस्पर्शे एकोपवासः पञ्चगव्यपानञ्च।	०	॥० पणाः।	यथाशक्ति।
	अत्यन्ताधमरजक्यादिरजस्वलास्पर्शे द्वाहताध्यं नक्तकूर्चव्रतम्। एतच्च कामतः। अकामतस्तदर्द्धम्। एतत् सर्वं शुद्धिकालानन्तरं अर्थात् पञ्चमेऽहनि कार्यम्।	०	१ कार्षापणलभ्यकाञ्चनम्।	यथाशक्ति।
अथ रजस्वलायाः पतितचाण्डालादिस्पर्शः। आदिना अन्त्यजवायसयोर्ग्रहणम्।	प्रथमेऽह्नि स्पर्शे त्रिरात्रोपवासः।	०	१॥० कार्षापणः।	यथाशक्ति।
	द्वितीयेऽह्नि द्व्यहोपवासः।	०	१ कार्षापणः।	यथाशक्ति।
	तृतीयेऽह्नि अहोरात्रोपवासः।	०	॥० पणाः।	यथाशक्ति।
	चतुर्थेऽह्नि विशुद्धिस्नानात् पूर्वं स्पर्शे नक्तम्। एतच्चाकामतः।	०	१ रौप्यमाषकम्।	यथाशक्ति।
	कामतः स्पर्शे सर्वत्र त्रिरात्रोपवासः। तदन्ते अजाप्राता कारयितव्या च।	०	१॥० कार्षापणः।	यथाशक्ति।
अथ रजस्वलाया उच्छिष्टशूद्राश्वशूकरादिस्पर्शः। आदिना वस्त्रकखरग्राम्यकुक्कुटानां ग्रहणम्।	प्रथमद्वितीयदिनयोरुच्छिष्टशूद्रास्पर्शे द्व्यहोपवासः।	०	१ कार्षापणः।	यथाशक्ति।
	तृतीयदिने स्पर्शे एकोपवासः।	०	॥० पणाः।	यथाशक्ति।
	चतुर्थदिने स्पर्शे नक्तम्।	०	२ रजतमाषकौ।	यथाशक्ति।
	कुक्कुटादिस्पर्शे सर्वत्र नक्तमेव।	०	२ रजतमाषकौ।	यथाशक्ति।
	एतच्च प्रायश्चित्तं विशुद्धिस्नानानन्तरं कर्त्तव्यम्।			
	एकदृष्टौ रजस्वलायाश्चाण्डालस्पर्शे अहोरात्रोपवासः। पञ्चगव्यपानञ्च।	०	॥० पणाः।	यथाशक्ति।
	रजस्वलाया उच्छिष्टचाण्डालादिस्पर्शे द्विजस्त्रीणां प्राजापत्यम्। शूद्राया धेनुदानम्। एषु प्रायश्चित्तेषु रजस्वलात्वमेव निमित्ततो न ब्राह्मण्यादिभ्यो विशेषः। अत्रापवादः। "तीर्थे विवाहे यात्रायां संग्रामे देशविप्लवे। नगरग्रामदाहे च स्पृश्यास्पृष्टिं न दूष्यति॥"	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
अथ चाण्डालादिसङ्करः। आदिना श्वपाकपुक्कसयोर्ग्रहणम्।	संवत्सरैकचाण्डालसङ्करे मासैकं गोमूत्रयावकाहारः। एतत् प्रायश्चित्तं यौनादिवर्जितसंसर्गविषयम्।	१२ धेनवः।	३६ कार्षापणाः।	१०० गावः। अशक्तौ १०० कार्षापणाः। अभावे सर्वस्वम्।
	बालवृद्धस्त्रीशूद्राणामर्द्धम्। आर्योऽग्र्यादालः। सम्पूर्णः स्थविरः। चौर्ये प्रायश्चित्ते ब्राह्मणभोजनम्। एतत् प्रायश्चित्तं ब्राह्मणक्षत्रियविशां तुल्यमेव।	६ धेनवः।	१८ कार्षापणाः।	५० गावः। अशक्तौ ५० कार्षापणाः। अभावे सर्वस्वार्द्धम्।

अथ प्रकीर्णकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा।
	पूर्वोक्तकालादल्पकालसङ्करे चान्द्रायणम्।	सार्द्धसप्तधेन्वर्द्धम्- वात् ८ धेनवः।	२२॥० कार्षा- पणाः।	यथाशक्ति।
	स्वल्पतरे पराकः।	५ धेनवः।	१५ कार्षापणाः।	यथाशक्ति।
	अत्यन्तस्वल्पकाले कृच्छ्रद्वयम्।	२ धेनू।	६ कार्षापणाः।	यथाशक्ति।
	शूद्रस्याऽऽ प्राजापत्यम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
	चाण्डालादिसङ्करे गृहादिमृद्विर्यथा। भवन- दहनं अर्थात् हुताशनज्वालासंस्पृष्टम्। पवनं अर्थात् पूर्वभित्तिकाकर्षणेन भि- त्तिकान्तरदानम्। सर्व्वभाण्डभाजनभेद- नम्। दारवाणां तक्षणम्। शुक्लशुक्ति- रजतसुवर्णचेलानामद्भिः प्रक्षालनम्। कांस्यताम्राणामाकरे अर्थाद्गौ शुद्धिः। सौवीरपयोदधितक्राणां परित्यागः। लाक्षादिरसधान्यादिद्रव्याणां रक्षणम्। घृतादीनां तापनञ्च।			
	एकस्मिन्नेव कूपे द्विजानां चाण्डालानाञ्च सह जलपानं कुर्व्वतां संसर्गदुष्टानां उपवासः। पञ्चगव्यपानञ्च।	०	॥० पणाः।	यथाशक्ति।
	बालापत्यातुरोगिगर्भिणीवृद्धानां नक्तम्।	०	२ रजतरक्तिके।	यथाशक्ति।
	बालानां प्रहरद्वयमभोजनम्।	०	१ रजतरक्तिका।	यथाशक्ति।
	चर्म्मकारादीनामविज्ञातसङ्करे तु चाण्डाल- सङ्करप्रायश्चित्तस्य षष्ठो भागः कर्त्तव्यः। संहतानां एकस्मिन्नुपहते तस्यैव शोध- नम्। न तु तत्सृष्टिनां सर्व्वेषां शोध- नम्। एकशाखापाषाणादौ चाण्डाला- दिभिः सहारोहणे ब्राह्मणस्य स्नान- मात्रम्।			
	तत्र फलभोजने ब्राह्मणानुज्ञापनं सचेल- स्नानं अहोरात्रोपवासः पञ्चगव्यपानञ्च। एतद्व्यवधाने।	०	॥० पणाः।	यथाशक्ति।
	सन्निधाने त्रिरात्रोपवासः। पञ्चगव्यपानञ्च।	०	१॥० कार्षापणाः।	यथाशक्ति।
	एतदुभयं ज्ञानविषयम्। अज्ञाने एक- वृक्षादौ चाण्डालादिभिः सह फल- भोजने अघमर्षणम्। एकावयवविदारा परम्परासर्गेऽपि स्नानादिकम्। अत्रापि- वादः। "रथाकर्द्दमतोयानि नावः पन्था- सृणानि च। सर्गेनान्न प्रदूषन्ति पक्वेष्ट- रचितानि च॥" तृणानि तृणसन्दोहः। पक्वेष्टरचितानि मठादीनि। द्वितीय- संसर्गितृतीयसंसर्गिणोर्हस्तपादप्रक्षाल- नपूर्व्वकमाचमनम्। चतुर्थसंसर्गे दोषा- भावः।			
	इत्यसृग्दृक्सर्गप्रायश्चित्तम्॥ ❀॥			
अथ रहस्यपापानि।	रहस्यकृते पापे रहस्यप्रायश्चित्तं करणी- यम्। अन्येनावेदितमित्यर्थः। तत्र यदि कर्त्ता स्वयं प्रायश्चित्तानभिज्ञस्तदा कस्य- चिद्रहस्यपापस्य किं रहस्यप्रायश्चित्त- मिति सामान्येन प्रायश्चित्ताभिज्ञं पृष्ट्वा रहस्यं प्रायश्चित्तं कुर्य्यात्। तत्र यदि			

अघ प्रकीर्णकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा।
	मरणान्तिकं प्रायश्चित्तं तत्र रहस्यव्रतेऽपि मरणमेव कर्त्तव्यम्। यत्र तु व्रतादिकं तत्र जातिशक्तियुगबलवृद्ध्याद्यपेक्षया प्रकाशव्रतपापोक्तप्रायश्चित्तस्य विंशतिभागत्रिंशद्भागषष्टिभागाः कल्प्याः।			
	अथवा महापातकेष्वकामतो मनूक्तमाब्दिकं व्रतं करणीयम्।	१५ धेनवः।	४५ कार्षापणाः।	६ गावः। अशक्तौ ८।६१ कार्षापणाः।
	कामतो द्वैगुण्यम्।	३० धेनवः।	९० कार्षापणाः।	१७ गावः। अशक्तौ १६।१३। कार्षापणाः।
	अन्येषु पापेषु गुरुलाघवापेक्षया प्राणायामशतमेव एकाहद्व्यहत्र्यहक्रमेण मासं षण्मासं संवत्सरं वाभ्यसनीयम्। व्रतकरणाशक्तेनापि जपहोमध्यानतीर्थसेवादानवेदाभ्यासादयः कार्य्याः। इति रहस्यप्रायश्चित्तम्॥			

इति मूलप्राणिकृतप्रायश्चित्तविवेकोक्तनवविधपापानां प्रायश्चित्तानि समाप्तानि॥ * ॥

प्रायिकं, त्रि, (प्रायेण प्राये वा भवमिति। प्राय+ठक्।) बाहुल्ये भवम्। यथा। "हैयङ्गवीने तु प्रायिकमरणं ज्ञात्वा प्रवृत्तस्य चान्द्रायणादिकम्।" इति प्रायश्चित्ततत्त्वम्॥

प्रायुधेयी, [न्] पुं, (प्रायुधि प्रकृष्टयुद्धादिस्थाने हैयते शब्दायते इति। हैय्+णिनिः।) घोटकः। इति शब्दचन्द्रिका॥

प्रायोज्यं, त्रि, (प्र+आ+युज्+णिच्+यत्।) प्रयोजनार्हम्। यथा। प्रायोज्यं न विभज्येत। यद्यस्य प्रयोजनार्हं पुस्तकादि तत्सूर्ख्यैः सह न विभजनीयमिति दायभागः॥

प्रायोपविष्टः, त्रि, (प्रायेण मरणार्थमनशनेन उपविष्टः।) प्रायोपवेशविशिष्टः। यथा,—

"प्रायोपविष्टं गङ्गायां परीतं परमर्षिभिः॥"

इति श्रीभागवतम्।

"प्रायेण स्वल्पपर्य्यन्तानशनेनोपविष्टम्।" इति तट्टीकायां श्रीधरस्वामी॥

प्रायोपवेशः, पुं, (प्रायेण स्वल्पनिमित्तकानशनेन उपवेशः स्थितिः।) सन्न्यासपूर्व्वकानशनस्थितिः। यथा,—

"प्रायोपवेशो राजर्षेर्विप्रशापात् परीक्षितः॥"

इति श्रीभागवते १२ स्कन्धः॥

प्रारब्धं, क्ली, (प्रकृष्टमारब्धं स्वकार्य्यजननायेति।) प्रालब्धम्। शरीरारम्भकाटष्टविशेषः। यथा,—

"प्रारब्धकर्म्मणां भोगादेव क्षयः।" इति स्मृतिः।

"प्रारब्धमश्नताभिमानशून्यः।"

इति श्रीभागवतम्।

"प्रारब्धकर्म्मविच्छेदाद्ज्ञानं तु न नश्यति।"

इति भगवद्गीतायां मधुसूदनसरस्वती च।

(प्र+आ+रभ+कर्म्मणि क्तः। द्वितारम्भि, त्रि। यथा, रघौ। १४। ७।

"अथाभिषेकं रघुवंशकेतोः
प्रारब्धमानन्दजलैर्जनन्योः।
निर्व्वर्त्तयामासुरमात्यवृद्धा-
स्तीर्थाहृतैः काञ्चनकुम्भतोयैः॥")

प्रारब्धिः, स्त्री, (प्र+आ+रभ्+क्तिन्।) गजबन्धनरज्जुः। इति हारावली॥

प्रारम्भः, पुं, (प्र+आ+रभ्+भावे घञ्। सुम् च।) प्रकर्षेण आरम्भः। यथा, स्मृतिः।

"प्रारम्भे कर्म्मणां विप्रः पुण्डरीकं स्मरेद्धरिम्॥"

(प्रारभ्यते इति। प्र+आ+रभ्+कर्म्मणि घञ्। सुमुच। कर्म्म। यथा, मार्कण्डेयपुराणे। ५१। १७।

"शुभाशुभञ्च कुशलैः कुमारोऽन्यो ब्रवीति वै।
तत्रापि दुष्टे याचेतः प्रारम्भत्याग एव च॥"

प्रकृष्ट आरम्भो योगो यस्येति विग्रहे। योगी। यथा, रघुः। १०। ६।

"प्रबुद्धपुण्डरीकाक्षं बालातपनिभांशुकम्।
दिवसं शारदमिव प्रारम्भसुखदर्शनम्॥")

प्रार्घनं, क्ली, (प्र+अर्घ+ल्युट्।) प्रकर्षेण याचनम्। तत्पर्य्यायः। याच्ञा २ अभिशस्तिः ३ याचना ४ अर्थना ५ प्रार्घना ६। इति शब्दरत्नावली॥ (यथा, महाभारते। ३। १४६। ३७।

"युगक्षयकृता धर्म्माः प्रार्घनानि विकुर्व्वते।
एतत् कलियुगं नाम यदिदानीं प्रवर्त्तते॥")

प्रार्घना, स्त्री, (प्र+अर्घ+णिच्+युच्।) प्रकर्षेण याचनम्। (यथा, महाभारते। ३। ३१०। ८१।

"सन्तो दिशन्ति चक्षूंषि सौरञ्च प्रार्घना विषम्।
आदत्ते प्रार्थना कान्तं कर्त्तुं वा यच्छ मन्यसे॥")

प्रार्घनीयं, क्ली, (प्रार्घ्यते इति। प्र+अर्घ+णिच्+अनीयर्।) द्वापरयुगम्। इति प्रत्नरत्नावली॥ प्रार्घनाविषये, त्रि॥ (यथा, पद्मतन्त्रे। २। ११६।

"ततस्तयोः स्वभूपं वृत्ता एकस्य वरः प्रार्घनीयः॥")

प्रार्थितः, त्रि, (प्रार्थ्यते स्मेति। प्र+अर्थ+क्तः।) याचितः। (यथा, देवीभागवते। २। ६। ५६।

"प्रार्थिता पतिना क्षुत्ती ददौ मन्त्रं दयान्विता।
एकपुत्रप्रबन्धेन मान्द्री पतिमते स्थिता॥")

प्रसूनसंरुद्धः। अभिहितः। इति मेदिनी॥ एतत् इति त्रिकाण्डशेषः॥

प्रालम्बं, क्ली, (प्रालम्बते इति। लबि अवस्रंसने घञ्।) कण्ठात् अधोलम्बमानमाल्यम्। इति अमरः। २। ६। १३६॥ (यथा, रघौ। ६। १४।

"विलम्बमंसादपरो विलासी
रत्नानुविद्धाङ्गदकोटिलग्नम्।
प्रालम्बमुत्कृष्य यथावकाशं
निनाय चाचीक्षतचारुवक्त्रः॥"

प्रकर्षेण लम्बमाने, त्रि॥)

प्रालम्बिका, स्त्री, (प्रालम्बते इति। लबि+ण्वुल्। टाप् च अत इत्वम्।) सुवर्णहारः। इत्यमरः। २। ६। १०१॥

प्रालेयं, क्ली, (प्रकर्षेण लीयन्ते लीना भवन्त्यदार्था अत्रेति प्रलयो हिमालयस्तत्र जातम्। प्रलय+अण्।) "केकयमित्रयुप्रलयान्दायादेष्यः।" ७। ३। २। इति यस्येयाटेशः। हिमम्। इत्यमरः। १। ३। १८१। (यथा, देवीभागवते। ६। ५। १३।

"नरनारायणौ चैव पितरौ तप उत्तमम्।
प्रालेयाद्रिं समागत्य तीर्थे बदरिकाश्रमे।

प्रालेयांशुः, पुं, (प्रालेयानि हिमानि तद्वत् शीता वा अंशवो यस्य ।) चन्द्रः । इति हलायुधः ॥ (यथा, माघे । ८ । ८७ ।
"इत्थं नारीर्घटयितुमलङ्कामिभिः काममासन् प्रालेयांशोः सपदि रुचयः शान्तमानान्तरायाः ॥")

प्रावटः, पुं, (प्र + अव + अट् + अच् । प्रकन्धादित्वात् साधुः ।) वर्षः । इति जटाधरः ॥

प्रावरः, पुं, (प्राव्रणोत्यनेनेति । प्र + आ + वृ + करणे अप् ।) प्राचीरम् । इति शब्दरत्नावली ॥

प्रावरणं, क्ली, (प्रावृणोत्यनेन गात्रमिति । प्र + आ + वृ + करणे ल्युट् ।) उत्तरीयवस्त्रम् । तत्पर्य्यायः । प्रच्छादनम् २ संव्यानम् ३ उत्तरीयकम् ४ । इति हेमचन्द्रः ॥ (यथा, राजतरङ्गिण्याम् । ४ । ६७४ ।
"वन्यकीपादसन्नद्धचारुप्रावरणादिभिः । गौरवार्हान् इरावारेः सचिवान् पर्य्यधापयत् ॥")
प्रच्छदावरणञ्च ॥

प्रावारः, पुं, (प्राव्रियते गात्रमनेनेति । प्र + आ + वृ + करणे घञ् ।) उत्तरासङ्गः । उत्तरीयवस्त्रम् । इत्यमरः ॥ (यथा, महाभारते । २ । ४८ । ६ ।
"आच्छादयसि प्रावारानन्नानि पिशितौदनम् । आजानेया वहन्त्यश्वाः कैनासि हरिणः कृशः ॥")

प्रावारकीटः, पुं, (प्रावारस्य कीटः ।) कीटविशेषः । तत्पर्य्यायः । कृमिः २ । इति जटाधरः ॥

प्रावृट्, [ष्] स्त्री, (प्रकर्षेण या सम्यक्प्रकारेण च वर्षतीति । प्र + आ + वृष् + क्विप् । प्रावर्षत्यत्रेति आधारे क्विप् वा । यद्वा, वर्षणमिति वृट् प्रकृष्टा वृड्च । "नहिवृतिवृषीति ।" ६ । ३ । ११६ । इति पूर्व्वपदस्य दीर्घः ।) वर्षाकालः । श्रावणभाद्रमासौ । इत्यमरः । १ । ४ । १६ ॥ (यथा, रघौ । ६ । ५१ ।
"अथास्य चाम्भः पृषतोचितानि शैलेयगन्धीनि शिलातलानि । कलापिनां प्रावृषि पश्य नृत्यं कान्तासु गोवर्द्धनकन्दरासु ॥")

प्रावृड्व्ययः, पुं, (प्रावृषः अव्ययो नाशो यत्र ।) शरत्कालः । इति राजनिर्घण्टः ॥

प्रावृतं, त्रि, (प्राव्रियते स्मेति । प्र + आ + वृ + क्तः ।) प्रच्छदावरणम् । ओढ़ितवस्त्रम् । इति भरतः ॥ तत्पर्य्यायः । निवीतम् २ । इत्यमरः ॥ निवृतम् ३ । इति तट्टीकायां स्वामी ॥

प्रावृतिः, स्त्री, (प्रावृणोति प्रकर्षेण आच्छादयति दृष्टिपथमनयेति । प्र + आ + वृ + करणे क्तिन् ।) प्राचीरम् । इति शब्दरत्नावली ॥ (मलः । यथा, सर्व्वदर्शनसंग्रहे शैवदर्शने ।
"प्रावृतीशौ बलं कर्म मायाकार्य्यचतुर्विधम् । पाशजालं समासेन धर्म्मनाम्नैव कीर्त्तितम् ॥"
"अस्यार्थः । प्रावृणोति प्रकर्षेणाच्छादयत्यात्मनो दृक्क्रिये इति प्रावृतिः स्वाभाविकमनुचिमलं इति ॥")

प्रावृषा, स्त्री, (प्रावृष् + इलन्तात् टाप् वा ।) वनागमः । वर्षाकालः । इति त्रिकाण्डशेषः ॥

प्रावृषायणी, स्त्री, (प्रावृषायां अयनमुद्भवो यस्याः । गौरादित्वात् ङीष् ।) कपिकच्छुः । इत्यमरः । २ । ४ । ६ ॥ आलकुशी इति भाषा ॥

प्रावृषिकः, पुं, (प्रावृषि वर्षाकाले कायति शब्दायते इति । कै + कः । अलुक्समासः ।) मयूरः । इति धरणिः ॥ (प्रावृषि भवः । प्रावृष् + ठक् ।) प्रावृट्कालभवे, त्रि ॥

प्रावृषेण्यः, पुं, (प्रावृषि भवः प्रावृट् देवतास्य वेति । प्रावृष् + "कालेभ्यो भववत् ।" ४ । २ । ३ । इति "प्रावृष एण्यः ।" ४ । ३ । १७ । इति एण्यः ।) कदम्बवृक्षः । इति मेदिनी ॥ कुटजवृक्षः । धारकदम्बः । इति राजनिर्घण्टः ॥

प्रावृषेण्यः, त्रि, (प्रावृषि भव इति । प्रावृष् + एण्यः ।) प्रावृट्कालभवः । इति मेदिनी ॥ (यथा, रघौ । १ । ३६ ।
"स्निग्धगम्भीरनिर्घोषमेकं स्यन्दनमास्थितौ । प्रावृषेण्यं पयोवाहं विद्युदैरावताविव ॥")
प्रावृष्यम् । इति शब्दरत्नावली ॥

प्रावृषेण्या, स्त्री, (प्रावृषेण्य + टाप् ।) कपिकच्छुः । रक्तपुनर्नवा । इति राजनिर्घण्टः ॥

प्रावृष्यं, क्ली, (प्रावृषि भवमिति । यत् ।) वैदूर्य्यम् । इति राजनिर्घण्टः ॥ प्रावृषि भवे, त्रि ॥

प्रावृष्यः, पुं, (प्रावृषि भव इति । प्रावृष् + यत् ।) कुटजः । धारकदम्बः । विकङ्कतः । इति राजनिर्घण्टः ॥

प्राशितं, क्ली, (प्रकर्षेण अशितं यत्र ।) पिष्टयज्ञः । इति जटाधरः ॥ (प्र + अश् + कर्म्मणि क्तः ।) भक्षिते, त्रि ॥

प्राश्निकः, पुं, (प्रश्नाय तदुत्तरप्रदानाय साधुरिति । प्रश्न + ठक् ।) सभ्यः । इति त्रिकाण्डशेषः ॥ प्रश्नकर्त्तरि, त्रि ॥

प्राशः, पुं, (प्राश्यते क्षिप्यते इति । प्र + अश् + "हलच ।" ३ । ३ । १२१ । इति घञ् ।) कुन्ताक्षम् । इत्यमरः । २ । ८ । ६३ ॥ कौंच इति भाषा ॥ (यथा, महाभारते । ६ । ६७ । २३ ।
"गदाभिरसिभिः प्रासैर्वाणैश्चानतपर्व्वभिः ॥"
अस्य आकृतिलक्षणादिकं यदुक्तं शुक्रनीतौ तद्यथा,—
"प्रासाख्यन्तु चतुर्हस्तं दण्डवृन्तं क्षुराननम् ॥"
यथाच ।
"प्रासस्तु सप्तहस्तः स्यादौन्नत्येन तु वैश्यवः । लौहग्रीवस्त्रिलौक्ष्ण्यपादः कौशेयसूत्रकाञ्चितः ॥ आकर्षश्च विकर्षश्च धूननं वेधनं तथा । चतस्र इता गतय उक्ताः प्रासं समाश्रिताः ॥")

प्रासकः, पुं, (प्रास + संज्ञायां स्वार्थे वा कन् ।) प्रासास्त्रम् । पाशकः । इति हेमचन्द्रः ॥

प्रासङ्गः, पुं, (प्रसज्यते इति । प्र + सृज + घञ् । उपसर्गस्येति दीर्घः) युगम् । इत्यमरः । २ । ८ । ५७ ॥ योयाडि इति भाषा । "अनसः प्रकटस्य सम्बन्धि अनसि सम्बद्धं वा यत् युगं ततोऽन्यत् यत् वत्सानां दमनकाले स्कन्धे आसज्यते तत युगं प्रासङ्गः ।" इति भरतः ॥ (यथा, महाभारते । १३ । ६४ । १६ ।
"विप्राणायामनड्वाहं धेनुं दत्त्वा च दुग्धदाम् । सप्रासङ्गञ्च शकटं सधान्यं वस्त्रसंयुतम् ॥")

प्रासङ्गः, पुं, (प्रासङ्गं वहतीति । प्रासङ्ग + "तद्वहति रथयुगप्रासङ्गम् ।" ४ । ४ । ७६ । इति यत् ।) युगवोढृवृषः । इत्यमरः । २ । १ । ६४ ॥

प्रासादः, पुं, (प्रसीदन्त्यस्मिन्निति । प्र + सद् + "हलच ।" ३ । ३ । १२१ । इत्याधारे घञ् । "उपसर्गस्य घञ्यमनुष्ये बहुलम् ।" ६ । ३ । १२२ । इति उपसर्गस्य दीर्घः ।) देवभूसुरां गृहम् । इत्यमरः । २ । २ । ६ ॥ (यथा, देवीभागवते । २ । ६ । ४२ ।
"इत्युक्त्वा सचिवान् राजा कल्पयित्वा सुरक्षकान् । कारयित्वाथ प्रासादं सप्तभूमिकसुत्तमम् ॥")
तल्लक्षणादि यथा,—
सूत उवाच ।
"प्रासादानां लक्षणन्तु वक्ष्ये शौनक ! तच्छृणु । चतुःषष्टिपदं कृत्वा दिग्विदिक्षूपलक्षितम् ॥ चतुष्कोणं चतुर्भिश्च द्वाराणि सूर्य्यसंख्यया । चत्वारिंशाष्टभिश्चैव भित्तीनां कल्पना भवेत् ॥ ऊर्द्धचैत्रसमा चङ्घा जङ्घार्द्धद्विगुणं भवेत् । गर्भविस्तारविस्तीर्णा शुकाग्रा च विधीयते ॥ तत्त्रिभागेण कर्त्तव्या पञ्चभागेन वा पुनः । निर्गमस्तु शुकाग्राया उच्छ्रयः शिखरार्द्धगः ॥ चतुर्धा शिखरं कृत्वा त्रिभागे वेदिवन्यसेत् । चतुर्थे पुनरप्येव कण्ठमामलसारकम् ॥ ४ ॥ अथवापि समं वास्तु कृत्वा षोड़शभागिकम् । तस्य मध्ये चतुर्भागमादौ गर्भन्तु कारयेत् ॥ भागद्वादशकां भित्तिं ततस्तु परिकल्पयेत् । चतुर्भागेण भित्तीनामुच्छ्रयः स्यात् प्रमाणतः ॥ द्विगुणः शिखरोच्छ्रायो भित्तुच्छ्रायाच्च मानतः । शिखरार्द्धस्य चार्द्धेन विधेयास्तु प्रदक्षिणाः ॥ चतुर्हीनन्तु तथा ज्ञेयो निर्गमस्तु तथा बुधैः । पञ्चभागेन संभज्य गर्भमानं विचक्षणः ॥ भागमेकं गृहीत्वा तु निर्गमं कल्पयेत् पुनः । गर्भसूत्रसमो भागादग्रतो सुखमण्डपः ॥ एतत् सामान्यसंदिष्टं प्रासादस्य हि लक्षणम् । लिङ्गमानमधो वक्ष्ये पीठो लिङ्गसमो भवेत् ॥ द्विगुणेन भवेद्गर्भः समन्ताच्छौनक ! ध्रुवम् । तद्विधा च भवेद्भित्तिर्जङ्घा तद्विस्तरार्द्धगा ॥ द्विगुणं शिखरं प्रोक्तं जङ्घायाश्चैव शौनक ! । पीठं गर्भावरं कर्म्म तन्मानेन शुकाग्रकाम् । निर्गमस्तु समाख्यातः शैवं सुखवदेव तु । लिङ्गमानः स्मृतो लिङ्ग द्वारमानमथोच्यते ॥ ४ ॥ करार्द्धं वेदतः कृत्वा द्वारं भागाष्टकं भवेत् । विस्तरेण समाख्यातं द्विगुणं वेदभक्त्या भवेत् ॥ द्वारवत् पीठमध्ये तु शैवं सुषिरकं भवेत् । पादिकं शैविकं भित्तिर्द्वारार्द्धेन परिग्रहात् । तद्विस्तारसमा जङ्घा शिखरं द्विगुणं भवेत् ।

शुकनासा पूर्ववज्ज्ञेया निर्गमोच्छ्रायकं भवेत् ॥
मण्डपे मानमेतत्तु स्वरूपच्छायरं वदे । * ।
चैत्यं कारयेत् चैत्यं यत्र तिष्ठन्ति देवताः ॥
इत्थं कृतेन मानेन बाह्यभागविनिर्गतम् ।
नेमिः पादेन विस्तीर्णा प्रासादस्य समन्ततः ॥
गर्भान्तु द्विगुणं कुर्यात् नेम्या मानं भवेदिह ।
स एव भित्तिरुत्सेधो द्विगुणः शिखरो मतः ॥*॥
प्रासादानाञ्च नक्षत्रमानं योनिश्च नामतः ।
वैराजः पुष्पकाख्यश्च कैलासो मालकाह्वयः ॥
त्रिषिष्टश्च पञ्चैते प्रासादाः सर्व्वयोनयः ।
प्रथमश्चतुरस्रो हि द्वितीयस्तु तदायतः ॥
वृत्तो वृत्तायतश्चान्योष्टास्रश्चेह च पञ्चमः ।
एतेभ्य एव सम्भूताः प्रासादाः सप्तनोदराः ॥
सर्व्वप्रकृतिभूतेभ्यस्त्वारिंशच्च एव च ।
मेरुश्च मन्दरश्चैव विमानश्च तथापरः ॥
भद्रकः सर्व्वतोभद्रो रुचको नन्दनस्तथा ।
नन्दिवर्द्धनसंज्ञश्च श्रीवत्सश्च नवेत्यमी ॥
चतुरस्रात् समुद्भूता वैराजादिति गम्यताम् ।*।
वडभी गृहराजश्च शालागृहश्च मन्दिरम् ॥
विमानश्च तथा ब्रह्ममन्दिरं भवनं तथा ।
उक्तस्तं शिविका वेश्म नवैते पुष्पकोद्भवाः ॥*॥
वलयो दुन्दुभिः पद्मो महापद्मस्तथापरः ।
भद्रकः सर्व्वतोभद्रो रुचको नन्दनस्तथा ॥
गुवाटश्चस्तथान्यश्च वृत्ताः कैलाससम्भवाः ।*।
गजोऽथ वृषभो हंसो गरुड़ः सिंहनामकः ॥
भूमुखो भूधरश्चैव श्रीजयः पृथिवीधरः ।
वृत्तायतः समुद्भूतो नवैते मालकाह्वयात् ॥*॥
वज्रं चक्रं तथान्यच्च सुष्टिकं वर्द्धमानितम् ।
वक्रः स्वस्तिकखड्गौ च गदा श्रीवृक्ष एवच ॥
विजयो नामतः श्वेतस्त्रिषिष्टप्रसमुद्भवाः ।*।
त्रिकोणपत्रमर्द्धेन्दु चतुष्कोणं द्विरष्टकम् ॥
यत्र तत्र विधातव्यं संस्थानं मण्डपस्य तु ।
राज्यश्च विजयश्चैवमायुर्व्वर्द्धनमेव च ॥
पुत्रलाभः श्रियः पुष्टिस्त्रिकोणादिक्रमाद्भवेत् ॥*॥
कुर्यात् ध्वजादिसंख्यां वा द्वारि गर्भेऽन्तथा ।
मण्डपः समसंख्याभिर्गुणितः स्वत्रतस्तथा ।
मण्डपस्य चतुर्थांशाद्भद्रः कार्य्यो विजानता ॥
सङ्गिगवाक्तकोपेतो निर्गमाच्चोऽथवा भवेत् ।
सार्द्धभित्तिप्रमाणेन भित्तिमानेन वा पुनः ॥
भित्तेर्द्वैगुण्यतो वापि कर्णेया मण्डपाः क्वचित् ।
प्रासादे मञ्जरी कार्य्या चित्रा विषमभूमिका ॥
परिमाणनिरोधेन रेखा वेद्यस्यभूमिका ।
आधारस्तु चतुर्द्वारश्चतुर्मण्डपशोभितः ॥
शृङ्गाङ्गसमायुक्तो मेरुप्रासाद उत्तमः ।
मण्डपास्तस्य कर्णेया भद्रैस्त्रिभिरलङ्कृताः ॥
घटनाकारमानानां भिन्ना भिन्ना भवन्ति ये ।
कियन्तो येषु साधारा निराधाराश्च केचन ॥
प्रतिच्छन्दकभेदेन प्रासादाः सम्भवन्ति ते ।
अन्योन्यसङ्करात्तेषां घटना नाम भेदतः ॥
देवतानां विशेषाय प्रासादा बहवः स्मृताः ।
प्रासादे नियमो नास्ति देवतानां स्वयम्भुवाम् ॥
सर्व्वेषां देवतानाञ्च पूर्व्वमानेन कारयेत् ।

चतुरस्रायतास्तत्र चतुष्कोणसमन्विताः ॥
चन्द्रशालान्विताः कार्य्या भेरीशिखरसंयुताः ।
पुरतो वाहनानाञ्च कर्णेया लघुमण्डपाः ॥
नाट्यशाला च कर्णेया द्वारदेशसमाश्रया ।
प्रासादा देवतानाञ्च कार्य्या दिक्षु विदिक्ष्वपि ॥
द्वारपालाश्च कर्णेया सुखा गत्वा पृथक् पृथक् ।
किञ्चिद्दिदूरतः कार्य्या मठास्तत्रोपजीविनाम् ॥
प्राङ्गना जगती कार्य्या फलपुष्पजलान्विता ।
प्रासादेषु सुरान् स्थाप्य पूजाभिः पूजयेन्नरः ॥
वासुदेवं सर्व्वदेवान् सर्व्वभाक् तद्गृहादिह्रत् ॥"
इति गारुड़े प्रासादकीर्त्तनं नाम ४७ अध्यायः ॥
(यथाच ।
"एतत् सामान्यसुद्दिष्टं प्रासादस्येह लक्षणम् ।
अथान्यच्च प्रवक्ष्यामि प्रासादं लिङ्गमानतः ॥
लिङ्गपूजाप्रमाणेन कर्णेया पीठिका बुधैः ।
पीठिकार्द्धेन भागः स्यात्तच्चानेन तु भित्तयः ॥
बाह्यमिति प्रमाणेन उत्सेधस्तु भवेत्ततः ।
भित्युच्छ्रायात्तद्विगुणः शिखरस्य समुच्छ्रयः ॥
शिखरस्य चतुर्भागा कर्णेया स्यात् प्रदक्षिणा ।
प्रदक्षिणायास्तु समस्वग्रतो मण्डपो भवेत् ॥
तस्य चार्द्धेन कर्त्तव्यस्वग्रतो सुखमण्डपः ।
प्रासादान्निर्गतौ कार्य्यौ कपोतौ गर्भमानतः ॥
ऊर्द्धभित्युच्छ्रयात्तस्य मञ्जरीं तु प्रकल्पयेत् ।
मञ्जर्य्याश्चार्द्धभागेन शुकनासं प्रकल्पयेत् ॥
ऊर्द्धं तथार्द्धभागेन वेदिबन्धो भवेदिह ।
वेद्याश्चोपरि यच्छेषं कण्ठमामलसारकम् ॥
एवं विभज्य प्रासादं शोभनं कारयेद्बुधः ।
अथान्यच्च प्रवक्ष्यामि प्रासादस्येह लक्षणम् ॥
गर्भमानेन प्रासादप्रमाणं शृणुत द्विजाः ।
विभज्य नवधा गर्भं मध्ये लिङ्गस्य पीठिका ॥
पादाष्टकञ्च रुचिरं पार्श्वतः परिकल्पयेत् ।
मानेनानेन विस्तारो भित्तीनान्तु विधीयते ॥
पादे पञ्चगुणं कृत्वा भित्तीनामुच्छ्रयो भवेत् ।
स एव शिखरस्यापि द्विगुणः स्यात् समुच्छ्रयः ॥
चतुर्धा शिखरं भज्य अर्द्धभागद्वयस्य वा ।
शुकनासं प्रकुर्व्वीत तृतीये वेदिका मता ॥
कण्ठमामलसारन्तु चतुर्थे परिकल्पयेत् ।
कपोलयोस्तु संहारो द्विगुणोऽस्य विधीयते ॥
शोभनैश्च प्रवक्षोभिरष्टकैश्च विभूषितः ।
प्रासादेषु तृतीयस्तु मया तुभ्यं निवेदितः ॥
सामान्यमपरं तद्वत् प्रासादं शृणुत द्विजाः ।
चैत्यं कारयेत् चैत्यं यत्र तिष्ठन्ति देवताः ॥
इत्थं कृत्वा तु मानेन बाह्यभागविनिर्गतम् ।
नेमिः पादेन विस्तीर्णा प्रासादस्य समन्ततः ॥
गर्भान्तु द्विगुणं कुर्य्यात्तेनेमिमानं भवेदिह ।
स एव भित्तिरुत्सेधो द्विगुणः शिखरो मतः ॥
प्राग्रीवपञ्चभागेन निर्यासस्तस्य शोभते ।
कारयेच्छिखरं तद्वत् प्राकारस्य विधानतः ॥
प्राग्रीवं तस्य मानेन निष्कासेन विशेषतः ।
कुर्य्याद्व्यस्य भागेन ग्रीवं कर्णसूत्रतः ॥
कारयेत् वलकं तत्र गर्भान्ते शोभनव्रतः ।
एवन्तु त्रिविधं कुर्य्यात् श्रेष्ठमध्यकनीयसम् ॥

लिङ्गमानात्तु भेदेन रूपभेदेन वा पुनः ।
एते सामान्यतः प्रोक्ता नामतः शृणुताधुना ॥
मेरुमन्दरकैलाशकुम्भसिंहगजास्तथा ।
विमानश्छन्दकस्तद्वच्चतुरस्रस्तथैवच ॥
अष्टास्रः षोड़शास्रश्च वर्त्तनः सर्व्वभद्रकः ।
वलभी नन्दनश्चैव नन्दिवर्द्धन एवच ॥
सिंहो वृषः सुपर्णश्च पद्मकोऽथ सप्तदशः ।
प्रासादानां मतः प्रोक्तो विभागं शृणुत द्विजाः ॥
शतश्छङ्गश्चतुर्द्वारो भूमिकाषोड़शोच्छ्रितः ।
नानाविचित्रशिखरो मेरुप्रासाद उच्यते ॥
मन्दरो द्वादश प्रोक्तः कैलासो नवभूमिकः ।
विमानश्छन्दकस्तद्वदनेकशिखरान्वितः ॥
स चाष्टभूमिकस्तद्वत् सप्तभिर्नन्दिवर्द्धनः ।
त्रिंशाच्छकसमायुक्तो नन्दनः सप्तदाहृतः ॥
षोड़शाच्छकसंयुक्तो नानारूपसमन्वितः ।
अनेकशिखरस्तद्वत् सर्व्वतोभद्र उच्यते ॥
चन्द्रशालासमापेतो विज्ञेयः पञ्चभूमिकः ।
वलभी छन्दकस्तद्वच्छुकनासत्रयान्वितः ॥
वृषस्योच्छ्रायतुल्यो मण्डलश्च विवर्द्धितः ।
सिंहः सिंहगतिर्ज्ञेयो गजो गजसमस्तथा ॥
कुम्भः कुम्भाकृतिस्तद्वद्भूमिकानवकोच्छ्रयः ।
अञ्जलीपुटसंस्थानपद्माच्छकविभूषितः ॥
षोड़शास्रः समन्तात्तु विज्ञेयः स सप्तदशः ।
पार्श्वयोश्चन्द्रशालास्य उच्छ्रयो भूमिकादयम् ॥
तथैकपद्मकः प्रोक्तः उच्छ्रयो भूमिकात्रयम् ।
षोड़शास्रः स विज्ञेयो विचित्रशिखरः शुभः ॥
रुचकराजस्तु विख्यातः चन्द्रशालाविभूषितः ।
प्राग्ग्रीवेन विशालेन भूमिका स षडुत्तमाः ॥
अनेकचन्द्रशालस्तु गजप्रासाद उच्यते ।
पर्य्यन्तगृहराजो वै गरुड़ो नामनामतः ॥
सप्तभूम्युच्छ्रयस्तद्वच्चन्द्रशालात्रयान्वितः ।
भूमिकास्तु षड़ग्रीतिर्व्याख्यातः सर्व्वतो भवेत् ॥
तथान्यो गरुड़स्तद्वदुच्छ्रायो दशभूमिकः ।
पद्मकः षोड़शास्रस्तु भूमिद्वयमथाधिकः ॥
पद्मतुल्यप्रमाणेन ग्रीवमष्टक इति स्मृतः ।
पद्माच्छकस्त्रिभूमिस्तु गर्भे एकश्चतुष्टयः ॥
वृषो भवति नाम्ना यः प्रासादः सार्व्वकामिकः ।
सप्तकाः पञ्चकाश्चैव प्रासादा ये त्रयोदिताः ॥
सिंहस्य ते समा ज्ञेया ये चान्योन्यप्रमाणतः ।
चन्द्रशालैः समोपेताः सर्व्वे प्राग्रीवसंयुताः ॥
वेदिका द्वारवाश्चैव श्रेणिकाश्च यतोरगाः ।
मेरुश्च शतशृङ्गः स्यान्मन्दरः पञ्चशीर्षकः ॥
चत्वारिंशत्तु कैलासश्चतुस्त्रिंशद्विमानकः ।
नन्दिवर्द्धनकस्तद्वद्वात्रिंशत् समुदाहृतः ॥
त्रिंशद्विर्नन्दनः प्रोक्तः सर्व्वतोभद्रकस्तथा ।
एते षोड़शशृङ्गास्तु सुचत्वारो देवसम्मताः ॥
कैलासो रुचकराजस्तु विमानश्छन्दको मतः ।
एते द्वादशशृङ्गास्तु सुरेतैर्यां सिंहनादकः ॥
गरुड़ोऽष्टकरो ज्ञेयः सिंहो दश उदाहृतः ।
एवमेव प्रमाणेन कर्णेयाः शुभलक्षणाः ॥
यक्षराक्षसनागानां मालशस्त्रः प्रशस्यते ।
तथा सेव्यादयः सप्त स्त्रीलिङ्गाः शुभावहाः ॥

श्रौढ़चक्रादयश्चाद्यौ मध्यमाश्च उदाहृताः।
तथा सिंहादयः पञ्च कनिष्ठाः शुभदा मताः॥"
इति विष्वक्सेनप्रकाशे ५ अध्यायः॥)

प्रासादकुक्कुटः, पुं, (प्रासादस्य देवभूषणं गृहस्य कुक्कुट इव। सर्व्वदा प्रासादविचारित्वादस्य तथात्वम्।) पारावतः। इति त्रिकाण्डशेषः॥

प्रासिकः, पुं, (प्रासः प्रहरणमस्येति। प्रास+"प्रहरणम्।" ४।४।५७। इति ठक्।) प्रासाच्छधारी। प्रासप्रहारी। तत्पर्य्यायः। कौन्तिकः २। इत्यमरः। २। ८। ७०॥

प्रास्यिकः, त्रि, (प्रस्य+"सम्भवत्यवहरति पचति।" ५।१।५२। इति ठञ्। प्रस्यपरिमितधान्यादेः समावेशकः व्यवहारकः पाचकश्च।) प्रस्यं सम्भवति प्रास्यिकः कटाहः। प्रस्यं स्वस्मिन् समावेशयतीत्यर्थः। प्रास्यिकी ब्राह्मणी। प्रस्यमवहरति पचति वेत्यर्थः। इति सिद्धान्तकौमुदी॥ (प्रस्यं परिमाणमस्येति।"तदस्य परिमाणम्।" ५।१।५७। इति ठञ्। प्रस्यपरिमितः। यथा, सुश्रुते चिकित्सितस्थाने। १२ अध्याये।
"यवकोलकुलत्थांश्च प्रास्यिकान् सलिलद्रोणे निःक्वाथ्येति॥" प्रस्येन क्रीतमिति। "तेन क्रीतम्।"५।१।३७। इति ठञ्। प्रस्यक्रीतः॥ प्रस्यस्य वापः। "तस्य वापः।" ५।१।४५। इति ठञ्। प्रस्यपरिमितव्रीह्यादिवपनयोग्ये क्षेत्रे। यथा, शब्दरत्नावल्याम्।
"द्रोणाढ़कीकुलीनां तु मानादौ द्रौणिकस्तथा।
स्यादाढ़किकखारीकौ उत्तमर्णादयस्त्रिषु।
आदिभ्यां प्रास्यिकादिश्च पाकादौ द्रौणिको ऽपि च॥")

प्राहः, पुं, वृत्योपदेशः। इति शब्दमाला॥ निर्व्विसर्गश्चेत् प्रपूर्ब्बतिवन्तभ्वादेतो रूपमप्येवम्॥ (यथा, भट्टिः।
"प्राह स्म रामं भरतोऽपि सम्यक्॥")

प्राहः, पुं, (प्रथमश्च तदर्हश्चेति। "राजाहःसखिभ्यष्टच्।" ५।४।९१। इति टच्। "अङ्गेभ्य एतेभ्यः।" ५।४।८८। इति अङ्गादेशः। "अङ्गोऽङ्गात्।" ८।३।७। इति यत्वम्।) पूर्ब्बाह्णः। इत्यमरः।१।४।३॥ (यथा, सुश्रुते। ६।१८।
"अङ्गानि यथोक्तानि प्राह्णसायाङ्गरात्रिषु॥"
तदभिमानिनी देवता च। यथा, भागवते। ७।१५।५४।
"अग्निः सूर्य्यो दिवा प्राह्णः शुक्लो राकोत्तरं खराट्॥"*॥
प्रकृष्टमह्नर्यत्रेति विग्रहे।"तिष्ठद्गुप्रभृतीनि च।" २।१।१७। इत्यव्ययीभावः। प्रकृष्टदिनयुक्ते, त्रि॥)

प्राह्णे, त्र, पूर्ब्बाह्णे। इति सिद्धान्तकौमुदी॥

प्राह्णेतनः, त्रि, (प्राह्णे भवः। "सायंचिरंप्राह्णे प्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् च।"४।३।२३। इति ट्युल् तुट् च।) पूर्ब्बाह्णसम्बन्धी। इति सिद्धान्तकौमुदी॥

प्राह्णेतरां, त्र, (द्वयोरतिशयेन प्राह्णे। प्राह्ण+"किमेत्तिङाद्व्यये घतरां घतमाम्।" ५।४५। इति सुग्धबोधसूत्रात् घतरामू।) अतिशयपूर्ब्बाह्णे। इति सुग्धबोधव्याकरणम्॥

प्रियः, पुं, (प्रीणातीति। प्री+"इगुपधज्ञाप्रीकिरः कः।" ३।१।१३५। इति कः।) भर्त्ता। इत्यमरः।२।६।३५॥ (यथा, आर्य्यासप्तशत्याम्। ३४७।
"प्रणमति पश्यति चुम्बति संश्लिष्यति पुलकसङ्कुलितैरङ्गैः।
प्रियसङ्गाय स्फुरितां वियोगिनी वामबाहुलताम्॥"
जामाता। यथा, मनुः। ३।१६८।
"राजर्त्विक्स्नातकगुरून् प्रियश्वशुरमातुलान्।
अर्हयेन्मधुपर्केण परिसंवत्सरात् पुनः॥"
कार्त्तिकेयः। यथा, महाभारते स्कन्दनामानुकीर्त्तने। ३।२३१।५।
"अमोघस्खनघो रौद्रः प्रियचन्द्राननस्तथा॥")
जटाविशेषः। इति जटाधरः॥ जीवकौषधम्। इति राजनिर्घण्टः॥ ऋद्धिनामौषधम्। वृद्धे, त्रि। इति मेदिनी॥ (यथा, महाभारते।
"सत्यं ब्रूयात् प्रियं ब्रूयात् न ब्रूयात् सत्यमप्रियम्।
प्रियञ्च नानृतं ब्रूयादेष धर्म्मः सनातनः॥")
प्रियोऽप्रियञ्च कार्य्यवशाद्भवति। यथा,—
"न हि कस्य प्रियः को वा विप्रियो वा जगत्त्रये।
काले कार्य्यवशात् सर्व्वे भवन्त्येवाप्रियाः प्रियाः॥"
इति श्रीकृष्णजन्मखण्डे ५ अध्यायः॥

प्रियंवदः, पुं, (प्रियं वदतीति। वद्+"प्रियवशे वदः खच्।" ३।२।३८। इति खच्। मुम्।) खेचरः। गन्धर्व्वभेदः। (यथा, रघुः। ५।५३।
"अवेहि गन्धर्व्वपतेस्तनूजं
प्रियंवदं मां प्रियदर्शनस्य॥")
प्रियभाषिणि, त्रि। इति शब्दरत्नावली॥ तत्कारणं यथा, दानसागरे शिवपुराणम्।
"गोसहस्रप्रदातारो भूमिदातार एव च।
ये सुवर्णप्रदातारस्तथा सर्व्वे प्रियंवदाः॥"
(छादिशाचरवृत्तौ, स्त्री। तल्लक्षणं यथा, वृत्तरत्नाकरे।
"भुवि भवेन्नभजरैः प्रियंवदा॥")

प्रियकः, पुं, (प्रिय+स्वार्थे संज्ञायां वा कन्।) प्रीतशालकः। (यथा, रामायणे। २।७१।१२-१३।
"तत्र रम्ये वने वासं कृत्वासौ प्राङ्मुखो ययौ।
उद्यानमुच्चिङ्गानायाः प्रियका यत्र पादपाः॥
शालांस्तु प्रियकान् प्राप्य शीघ्रानास्याय वाहिनीः।
अनुज्ञाप्याथ भरतो वाहिनीं त्वरितो ययौ॥")
नीपः। (यथा, हरिवंशे। ७२।१५।
"प्रियकैः पुष्पितैः गौरैः श्यामं वाणासनैः क्वचित्।
कठोरत्वगभाभाति निर्म्मयूरवतं वनम्॥")
चित्रङ्गः। (यथा, माघे। ४।३२।
"रुचिरचित्रतनूरुहशालिभिः
विचलितैः परितः प्रियकद्रुमैः॥"
पक्षिविशेषः। यथा, महाभारते।३।१५८।५२।
"प्रियकैश्चातकैश्चैव तथान्यैर्विविधैः खगैः।")
अलिः। प्रियङ्गुः। कुङ्कुमम्। इति मेदिनी॥
धाराकदम्बः। अग्निनक्षत्रम्। इति राजनिर्घण्टः॥
(स्कन्दानुचरविशेषः। यथा, महाभारते। ९।४५।६२।
"प्रियकश्चैव नन्दश्च गोनन्दश्च प्रतापवान्॥")

प्रियङ्करः, त्रि, (प्रियं करोतीति। प्रिय+ट+"क्षेमप्रियमद्रेऽण् च।" ३।२।४४। इति चकारात् खच्। मुम्।) प्रियकारकः। यथा
"महाकुलीनमैच्वाकं वंशे दाशरथिर्मम।
पितुः प्रियङ्करो भर्त्ता क्षेमकारस्तपस्विनाम्॥"
इति भट्टिः। ५।७७॥
(दानवविशेषः। यथा, कथासरित्सागरे। ४७।२४।
"महाबुद्ध्यचलाख्यौ च प्रियङ्करशुभङ्करौ।
एते महारथा यज्ञरुचिधर्म्मरुची तथा॥")

प्रियङ्करी, स्त्री, (प्रियङ्कर+गौरादित्वात् ङीष्।) वृहज्जीवन्ती। श्वेतकण्टकारी। अश्वगन्धा। इति राजनिर्घण्टः॥

प्रियङ्गुः, स्त्री, (प्रियं गच्छतीति। प्रिय+गम्+डगयुदित्वात् कुप्रत्ययेन साधुः।) खनामख्यातसुगन्धिवृक्षविशेषः। (यथा, महाभागवतपुराणे। १०।
"वामे चक्रगदाधरः स भगवान् क्रोडे प्रियङ्गोस्तले
हस्तोद्यच्छुकशालिमञ्जरिकया देव्या धरण्या सह॥")
तत्पर्य्यायः। श्यामा २ महिलाह्वया ३ लता ४ गोवन्दनी ५ गुन्द्रा ६ फलिनी ७ फली ८ विश्वक्सेना ९ गन्धफली १० कारम्भा ११ प्रियकः १२। इत्यमरः।२।४।५५॥ प्रियवल्ली १३ फलप्रिया १४ गौरी १५ वृत्ता १६ कङ्गुः १७ कङ्गुनी १८ भङ्गुरा १९ गौरवल्ली २० सुभगा २१ पर्णभेदिनी २२ सुभा २३ पीता २४ मङ्गल्या २५ श्रेयसी २६। अस्या गुणाः। शीतलत्वम्। तिक्तत्वम्। दाहपित्तासदोषभ्रमवान्तिज्वरवक्त्रजाड्यनाशित्वम्। इति राजनिर्घण्टः॥ लघुत्वम्। अनिलनाशित्वम्। रक्तातियोगदौर्गन्ध्यस्वेदगुल्मत्रिदोषमोहनाशित्वञ्च। इति भावप्रकाशः॥*॥
राजिका। पिप्पली। कङ्गुः। इति मेदिनी॥
कटुकी। इति धरणिः॥

प्रियजनः, पुं, (प्रियो जनः।) वृद्धलोकः। (यथा, आर्य्यासप्तशत्याम्। ६१६।
"सखि! दुरवगाहदहनो विदधानो विप्रियं प्रियजनेऽपि।
खल इव दुर्लक्ष्यस्तव विनतसुखस्योपरि स्थितः कोपः॥")
प्रौढ़भावज्ञः। यथा, उज्ज्वलनीलमणिः।
"प्रौढ़भावाशुविज्ञो यस्तस्य प्रियजनोऽत्र सः॥"

प्रियजीवः, पुं, (प्रियो जीवो यस्य यस्मिन् वा।) श्योनाकवृक्षः। इति राजनिर्घण्टः॥

प्रियतमः, पुं, मयूरशिखावृक्षः। इति शब्दचन्द्रिका॥ (अयमेषामतिशयेन प्रियः। प्रिय+तमप्।) अतिशयप्रिये, त्रि॥

प्रियतरः, त्रि, (अयमनयोरतिशयेन प्रियः। प्रिय+तरप्।) अनयोरतिशयेन प्रियः। इति व्याकरणम्॥ (यथा, गो० रामायणे। २। ३६। ७।

"प्राणेभ्योऽपि प्रियतरो ज्येष्ठो भ्राता गुरुश्च ते।
तस्मात्तस्य प्रयत्नेस्वं शरीरं प्रतिपालय॥")

प्रियता, स्त्री, (प्रिय+तल्।) प्रियस्य भावः। हार्द्दम्। इत्यमरः। १।७।२७॥ (यथा, मनुः। ५।५०।

"न भक्षयति यो मांसं विधिं हित्वा पिशाचवत्।
न लोके प्रियतां याति व्याधिभिश्च न पीड्यते॥")

प्रियतोषणः, पुं, (प्रियस्य तोषणं यस्मात्। यद्वा, प्रियं तोषयतीति। तुष्+णिच्+ल्युः।) षोड़शवत्सरातिरिक्तरतिबन्धविशेषः। तस्य लक्षणं यथा,—

"नारी पादौ स्वहस्तेन धारयेच्छयनोपरि।
ज्ञानापीड़करः कामी कामयेत् प्रियतोषणः॥"
इति रतिमञ्जरी॥

प्रियस्य तुष्टिकारिणि, त्रि॥

प्रियत्वं, क्ली, (प्रियस्य भावः। प्रिय+त्व।) प्रियता। तत्पर्य्यायः। प्रेम २ प्रेमा ३ स्नेहः ४ प्रणयः ५ हार्द्दम् ६ प्रियता ७ स्निग्धता ८। इति शब्दरत्नावली॥

प्रियदर्शनः, त्रि, (प्रियं दर्शनं यस्य।) सुदृश्यः। तत्पर्य्यायः। चक्षुष्यः २। इति जटाधरः॥ (यथा, रघुः। १। ४७।

"तत्तद्भूमिपतेः पथेव दर्शयन् प्रियदर्शनः।
अपि लक्षितमध्वानं बुबुधे न बुधोपमः॥")

प्रियदर्शनः, पुं, (प्रियं दर्शनं यस्य।) शुकपक्षी। चौरिकावृक्षः। इति जटाधरः॥ (गन्धर्व्वविशेषः। यथा, रघुः। ५। ५३।

"त्वयेहि गन्धर्व्वपतेरुनूजं
प्रियंवदं मां प्रियदर्शनस्य॥")

प्रियप्रायं, क्ली, (प्रियस्य प्रायो यत्र।) प्रियवाक्यम्। तत्पर्य्यायः। चटु २ चाटु ३। इति हेमचन्द्रः। २। १७८॥

प्रियप्रेप्सुः, त्रि, (प्रियं प्रेप्सतीति। प्र+आप्+सन्+उः।) इष्टार्थोद्युक्तम्। उत्सुकः। इति जटाधरः॥

प्रियमधुः, पुं, (प्रियं मधु मद्यं यस्य।) बलरामः। इति हेमचन्द्रः। २। १३९॥

प्रियवर्णी, स्त्री, (प्रियो वर्णो यस्याः। गौरादित्वात् ङीष्।) प्रियङ्गुः। इति जटाधरः॥

प्रियवल्ली, स्त्री, (प्रिया मनोज्ञा वल्ली लता।) प्रियङ्गुः। इति राजनिर्घण्टः॥

प्रियवादी, [न्] त्रि, (प्रियं मनोज्ञं वदतीति। वद+णिनिः।) मनोज्ञवक्ता। यथा, पञ्चतन्त्रे।

"स्रोतोभिः समपर्णानां किं दूरं व्यवसायिनाम्।
को विदेशः सविद्यानां कः परः प्रियवादिनाम्॥"
(यथा च पञ्चतन्त्रे। २। १७४।

"सुलभाः पुरुषा राजन्! सततं प्रियवादिनः।
अप्रियस्य च पथ्यस्य वक्ता श्रोता च दुर्लभः॥")

प्रियव्रतः, पुं, (प्रियं व्रतं यस्य।) स्वायम्भुवमनुपुत्रः। यथा,—

"प्रियव्रतोत्तानपादौ मनोः स्वायम्भुवस्य तु।
द्वौ पुत्रौ तुमहावीर्य्यौ धर्म्मज्ञौ कथितौ तव॥"
इत्यग्निपुराणम्॥

(प्रियाणि व्रतानि यस्येति विग्रहे व्रतप्रिये, त्रि। यथा, ऋग्वेदे। १०। १५०। ३।

"अग्ने देवानावह नः प्रियव्रतान्
मरुतो यजाय प्रियव्रतान्॥")

प्रियसखः, पुं, (प्रियः सखा च हितकारित्वात्। "राजाहःसखिभ्यष्टच्।"५।४।९१। इति टच्।) खदिरः। इति शब्दचन्द्रिका॥ प्रियश्चासौ सखा चेति। (प्रियवन्धुः। यथा, मेघदूते।१२।

"व्याधुच्छ्वस प्रियसखममुं तुङ्गमालिङ्ग्य शैलम्॥")

प्रियस्य सखा इति च। इति व्याकरणम्॥

प्रियसत्यं, क्ली, (प्रियं सत्यमिति कर्म्मधारयः।) सुनृतवाक्यम्। इति हेमचन्द्रः। २। १७९॥ (प्रियं सत्यं यस्येति विग्रहे सत्यप्रिये, त्रि॥)

प्रियसन्देशः, पुं, (प्रियं सन्दिश्यतीति। प्रिय+सम्+दिश+घञ्।) चम्यकवृक्षः। इति शब्दचन्द्रिका॥ (प्रियः सन्देश इति कर्म्मधारयः।) प्रियसंवादश्च॥

प्रियसालकः, पुं, (प्रियः सालः। ततः स्वार्थे कन्।) असनवृक्षः। इति राजनिर्घण्टः॥ पेयासाल इति ख्यातः॥

प्रिया, स्त्री, (प्रिय+टाप्।) नारी। इति शब्दरत्नावली॥ भार्य्या। इति हेमचन्द्रः॥ (यथा, कुमारे। २। ३९।

"पुंस्कोकिलेनोन्मदषट्पदेन
प्रियानुगं किंशुकपुष्पचुम्बि॥")

इला। इति शब्दचन्द्रिका। मल्लिका। मदिरा। इति राजनिर्घण्टः॥ वार्त्ता। इति धरणिः॥ (पञ्चाचरच्छन्दोविशेषः। इति छन्दोमञ्जरी॥)

प्रियाम्बुः, पुं, (प्रियमम्बु यस्य।) आम्रवृक्षः। इति राजनिर्घण्टः॥ तत्फले क्ली॥ (जलप्रिये, त्रि।)

प्रियालः, पुं, (प्रियाय हिताय अलति पर्य्याप्नोतीति। अल+अच्।) वृक्षभेदः। पियाल इति भाषा। अस्य बीजं चिरञ्जीनि प्रसिद्धम्। तत्पर्य्यायः। चारः २ अम्बष्ठः ३ वरस्कन्धः ४ सलनः ५ चारकः ६ बहुवल्कः ७ सम्बरः ८ तापसप्रियः ९ क्षेत्रबीजः १० उपवटः ११ मधुबीजः १२। इति राजनिर्घण्टः॥ पियालः १३। इत्यमरः। २। ४। ९५॥ बहुलवल्कलः १४ राजादनम् १५ तापसेष्टः १६ वज्रजटः १७ धनुःपटः १८। अस्य गुणाः। पित्तकफनाशित्वम्॥ तत्फलगुणाः। मधुरत्वम्। गुरुत्वम्। स्निग्धत्वम्। बलत्वम्। मलमूत्रविबन्धकरत्वम्। तत्पक्वफलगुणाः। मधुरत्वम्। हृद्यत्वम्। पित्तानिलापहृत्वम्। हृद्यत्वम्। दुर्ज्जरत्वम्। स्निग्धत्वम्। विष्टम्भित्वम्। आमवर्द्धनत्वञ्च। इति भावप्रकाशः॥ अपि च।

"चारस्य च फलं पक्वं हृद्यं गौल्यान्वकं गुरु।
तद्बीजं मधुरं हृद्यं पित्तदाघार्शिनाशनम्॥"
इति राजनिर्घण्टः॥

प्रियाला, स्त्री, (प्रियाय अलतीति। अल+अच्+टाप्।) द्राक्षा। इति राजनिर्घण्टः॥

प्रियोदितं, त्रि, (प्रियाय प्रियेण वा यदुदितम्। प्रियमुदितमिति वा।) चाटुवाक्यम्। इति शब्दरत्नावली॥ प्रियवाक्यविषयः॥ (प्रियकथितवाक्यञ्च॥)

प्री, क तर्पणे। इति कविकल्पद्रुमः॥ (चुरा० पर०-सक०-अनिट्।) क, यं प्राययन्ति कविस्फूर्त्तिरसायनानि। इति हलायुधः॥ प्रीणयत्यपीति केचित्। इति दुर्गादासः॥

प्री, ड य प्रीतौ। कान्तौ। इति कविकल्पद्रुमः॥ (दिवा०-आत्म०-अक०-अनिट्।) प्रीतिरिह प्रीतीभावः। ड य, यः प्रीयते प्रलयेषु। इति हलायुधः। इति दुर्गादासः॥

प्री, ञ तर्पणे। इति कविकल्पद्रुमः॥ (भ्वा०-उभ०-सक०-अनिट्।) ञ, प्रयति प्रयते। इति दुर्गादासः॥

प्री, ञ ग कान्तौ। तर्पणे। इति कविकल्पद्रुमः॥ (क्र्या०-उभ०-अक०-सक० चे-अनिट्।) तर्पणमिह प्रीतीभावः प्रीतीकरणञ्च। ञ ग, प्रभुः प्रीणातु विश्वभुक्। प्रीणाति बान्धवजनानिति हलायुधः। प्रीणीते। इति दुर्गादासः॥

प्रीः, स्त्री, (प्री+क्विप्।) प्रीतिः। इति कृदन्धातुटीकायां दुर्गादासः॥ प्रथमा विभक्तिः। यथा, "त्रिप्रः प्रीहीचीचीपीयीग्रः। स्यादीनि त्रीणि त्रीणि क्रमात् प्रीहीचीचीपीर्य्याप्रीसंज्ञानि स्युः।" इति मुग्धबोधव्याकरणम्॥

प्रीणः, त्रि, (प्र+"नञ्च पुराणे प्रात्।"५।४।२५। इत्यस्य वार्त्तिकोक्त्या णः।) पुरातनः। इति त्रिकाण्डशेषः॥ प्रातः। इति व्याकरणम्॥

प्रीणनं, क्ली, (प्री+स्वार्थे णिच्+ल्युट्। पृषोदरादित्वात् साधुः।) तर्पणकरणम्। तत्पर्य्यायः। तर्पणम् २ अवनम् ३। इत्यमरः। २। २। १॥ (यथा, महानिर्व्वाणतन्त्रे। २। ४७।

"तस्मिंस्तुष्टे जगत्तुष्टं प्रीणिते प्रीणितं जगत्।
तदाराधनतो देवि! सर्व्वेषां प्रीणनं भवेत्॥")

प्रीणसः, पुं, गरुडः। इति राजनिर्घण्टः॥

प्रीतः, त्रि, (प्रीञ् प्रीणने+क्तः।) प्रीतियुक्तः। तत्पर्य्यायः। हृष्टः २ मक्तः ३ क्रमः ४ प्रलमः ५ प्रमुदितः ६। इत्यमरः। ३।१।१०३। (यथा, महाभारते। ४। ४०। २।

"प्रीतोऽस्मि पुरुषव्याघ्र! न भयं विद्यते तव।
सर्व्वानुदामि ते प्रभून् रक्ष रक्षविशारद!॥")

स्त्री, गर्भः। इति मेदिनी। ते, ३३।

प्रीतिः, स्त्री, (प्रीञ् तर्पणे+भावे क्तिन्।) तृप्तिः। (यथा, रामायणे। १। ६९। १२।

"प्रतिज्ञां मम राजेन्द्र! निर्वर्तयितुमर्हसि।
पुत्रयोरुभयोरेव प्रीतिं त्वमुपलप्स्यसे॥")
सत्पर्य्यायः। सुत् २ प्रमदः ३ हर्षः ४ प्रमोदः५ आमोदः ६ सम्मदः ७ आनन्दथुः ८ आनन्दः ९ धर्म्मं १० सातम् ११ सुखम् १२। इत्यमरः। १।४।२४॥ केचित्तु। सुदादिसप्तकं प्रीतौ। आनन्दाद्यादिपञ्चकं सुखे इत्याहुः इति भरतः॥ इष्टदर्शनजन्यं सुखम्। इति मोक्षधर्म्मे नीलकण्ठः॥ कामपत्नी। इति मेदिनी। ते, ३४॥ सा पुरा अनङ्गवती वेश्या आसीत् विभूतिद्वादशीव्रतं कृत्वा रत्याः सपत्नी जाता। यथा,—
"वेश्यानङ्गवती नाम विभूतिद्वादशीव्रतम्।
उमाप्य माघमासस्य द्वादश्यां लवणाचलम्॥
निवेदयन्ती गुरवे ग्रस्याष्टोपस्करान्विताम्।
अलंकृत्य हृषीकेशं सौवर्णामरपादपम्॥
सा चानङ्गवती वेश्या कामदेवस्य सान्वतम्।
पत्नी सपत्नी संजाता रत्याः प्रीतिरिति श्रुता॥"
इति मात्स्ये ८२ अध्यायः॥
विष्कम्भादियोगविंशतियोगान्तर्गत द्वितीययोगः। तत्र जातफलम्।
"प्रकृतिकाले यदि प्रीतियोगो
नरो ह्यरोगः सुखवान् विनीतः।
रक्तानुरक्तो विदुषां प्रपन्नः
संप्राप्नुतो यच्छति वित्तमेव॥"
इति कोष्ठीप्रदीपः॥
प्रेम। इति मेदिनी। ते, ३४॥

प्रीतिजुषा, स्त्री, (प्रीतिं जुषते सेवते इति। जुष् सेवने + कः। टाप्) व्यभिचरितपत्नी। उषा। इति शब्दरत्नावली॥ (प्रीतिभाजि, त्रि॥)

प्रीतिदः, पुं, (प्रीतिं ददातीति। दा + "आतोऽनुपसर्गे कः।" ३।२।३। इति कः।) भण्डः। भाँड़ इति भाषा। तत्पर्य्यायः। वासन्तिकः २ केलिकिलः ३ वैहासिकः ४ विदूषकः ५ प्रहासी ६। इति हेमचन्द्रः॥ हर्षसुखप्रेमदातरि, त्रि॥

प्रीतिदत्तं, क्ली, (प्रीत्या दत्तमिति।) प्रीत्या दत्तवस्तु। यथा, मिताक्षरायाम्।
"प्रीत्या दत्तन्तु यत् किञ्चित् श्वश्रूा वा श्वशुरेण वा।
पादवन्दनिकञ्चैव प्रीतिदत्तं तदुच्यते॥"
भावे क्तप्रत्यये प्रीतिदानञ्च॥

प्रीतिभोज्यं, त्रि, (प्रीत्या भोज्यम।) प्रीत्या भक्षणीयमन्नादि। यथा,—
"अन्नानि प्रीतिभोज्यानि आपद्भोज्यानि वा पुनः।
न च संप्रीयसे राजन्न चैवापद्गता वयम्॥"
इति महाभारते। ५। ६१। २५॥

प्रुष, ङ सर्पणे। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-अनिट्।) रेफयुक्तः। ङ, प्रवते। इति दुर्गादासः॥

प्रुष, उ दहि। इति कविकल्पद्रुमः। (भ्वा०-पर०-सक०-सेट्। उदित्त्वात् क्त्वेट्।) उ, प्रोषित्वा प्रुष्ट्वा। दहि भस्मीकरणे। इति दुर्गादासः॥

प्रुष, ग सेके। पूर्त्तौ। स्नेहे। इति कविकल्पद्रुमः॥ (क्र्या०-पर०-सेके पूर्त्तौ च सक०-स्नेहे अक०-सेट्।) ग, प्रुष्णाति प्रुष्णोति। सेकस्थाने मोचनमिति धातुप्रदीपभट्टमल्लौ। इति दुर्गादासः॥

प्रुष्टः, त्रि, (प्रुष् दहि + क्तः।) दग्धः। इत्यमरः। ३।१।६६॥ (यथा, राजतरङ्गिण्याम् ।६।१४४।
"सा यागज्वलने राजलक्ष्मना प्रीतसर्पिषि।
पूर्णाहुत्या समं साध्वी जुहाव सहसा तनुम्।
उपर्य्यस्या निरस्ताशोः प्रुष्टाः कुसुमवृष्टयः॥")

प्रुष्वः, पुं, (प्रुष्णाति स्निह्यति सिषर्त्ति येति। प्रुष् + "अन्यूषुषिलटिकणिखटिविशिभ्यः क्वन्।" उणा० १।१५१। इति क्वन् टाप्।) ऋतुः। (प्रोषति दहतीति।) दिवाकरः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

प्रुष्वा, स्त्री, (प्रुष्णाति सिञ्चतीति। प्रुष् + "अन्यूषुषिलटिकणिखटिविशिभ्यः क्वन्।" उणा० १।१५१। इति क्वन् टाप्।) जलबिन्दुः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ (यथा, शतपथब्राह्मणे ।५।३।४।१६।। "अथ प्रुष्वा अक्षरति॥")

प्रेक्षणं, क्ली, (प्रेक्षते पश्यत्यनेनेति। प्र + ईक्ष + करणे ल्युट्।) चक्षुः। इति शब्दरत्नावली॥ (भावे ल्युट्।) दर्शनम्। यथा, रत्नमञ्जरी।
"सञ्चारो रतिमन्दिरावधि पदन्यासावधि प्रेक्षणम्॥"

प्रेक्षणकूटः, पुं, (प्रेक्षणस्य कूटः।) चक्षुर्गोलकः। यथा, पाण्डुरोगपूर्व्वरूपे माधवकरः।
"त्वक्पोटनष्ठीवनगात्रसाद-
न्दृङ्भक्षणप्रेक्षणकूटशोथाः॥"

प्रेक्षा, स्त्री (प्रकर्षेण ईक्षते ययेति। प्र + ईक्ष + "गुरोश्च हलः।" ३।३।१०३। इति अः। टाप्।) प्रज्ञा। (यथा, महाभारते ।३।१३६।७।
"सा तस्मै सर्व्वमाख्यत् यवक्रीर्याचितं शुभा।
प्रत्युक्तश्च यवक्रीतं प्रेक्षापूर्व्वं तथात्मना॥")
वृत्तिश्चेक्षणम्। इत्यमरः। ३।३।२२३॥ (यथा, मनौ। ६।८४।
"प्रतियिद्धापि चेदृया तु मद्यमभ्युदयेष्वपि।
प्रेक्षासमाजं गच्छेद्वा सा दक्षा क्षणलानि षट्॥"
प्र + ईक्ष् + भावे अः। टाप्।) ईक्षणम्। इति भरतः॥ (यथा, भागवते ।३।१६।७।
"यत्सेवया चरणपद्मपवित्ररेणुं
सद्यःक्षतात्खिलमलं प्रतिलब्धशीलम्।
न श्रीर्विरक्तमपि मां विजहाति यस्याः
प्रेक्षालवार्थमितरे नियमान् वहन्ति॥")
शाखा। इति शब्दरत्नावली॥ (शोभा। यथा, भागवते। ३। ८। २५।
"प्रेक्षां क्षिपन्तं हरितोपलाद्रेः
सन्ध्याब्धनीवेरुरुवल्कमूर्ध्नः।
रत्नोदधारौषधिसौमनस्य-
वनस्रजो वेणुसुजाङ्घ्रिपाङ्क्तेः॥"
"हरितोपलाद्रेर्मरकतशिलामयपर्व्वतस्य प्रेक्षां शोभां क्षिपन्तं स्वलावण्यातिशयेन तिरस्कुर्व्वन्तम्॥" इति तट्टीकायां स्वामी॥)

प्रेक्षन् [तृ] त्रि, (प्र + ईक्षि गतौ + शतृ।) चलनविशिष्टः। संसक्तिविशिष्टः। यथा,—
"व्याकृष्टिवह्वखटकासुखपाणिपृष्ठ-
प्रेक्षन्नखांशुपयसंवलितोऽम्बिकायाः॥"
इत्याद्यमरशतके। १॥

प्रेक्षा, स्त्री, (प्रेक्षते गम्यतेऽनयेति। प्र + ईक्षि गतौ + करणे क्वप्। टाप्।) दोला। इत्यमरः। २। ८। ५३॥ (यथा, सुश्रुते चिकित्सितस्थाने २४ अध्याये। "नाग्निगोगुरुब्राह्मणप्रेक्षादम्यत्यन्तरेणाभियायात्॥"*॥) पर्य्यटनम्। अश्वगतिः। संवेग्नानन्तरम्। इति मेदिनी। खे, ३॥ वृत्यम्। इति धरणिः॥

प्रेक्षितं, त्रि, (प्र + ईक्षि गतौ + क्तः।) काम्यतम्। इत्यमरः। ३। १। ८७॥

प्रेक्षोल, तृ क चापले। इति कविकल्पद्रुमः॥ (अदन्त चुरा०-पर०-अक०-सेट्।) अग्तः। स्थ इतीयोपधः। अपिप्रक्षोलत्। चापलं चञ्चलीभावः। इति दुर्गादासः॥

प्रेक्षोलनं, क्ली, (प्रेक्षोल्यते चल्यतेऽनेनेति। प्रेक्षोल + करणे ल्युट्।) दोला। इति हेमचन्द्रः॥ (भावे ल्युट्। कम्पनम्। यथा, सुश्रुते निदानस्थाने ८ अध्याये। "विरेचनप्रेक्षोलनाजीर्णगर्भशातनप्रभृतिभिर्विशेषैर्बन्धनान्मुच्यते गर्भः फलमिव वृन्तबन्धनादभिघातविशेषैः॥")

प्रेक्षोलितं, त्रि, (प्रेक्षोल + क्तः।) दोलितम्। तत्पर्य्यायः। तरलितम् २ लुलितम् ३ प्रेङ्खितम् ४ धुतम् ५ चलितम् ६ कम्पितम् ७ धूतम् ८ वेल्लितम् ९ आन्दोलितम् १०। इति हेमचन्द्रः॥

प्रेतः, पुं, (प्र + इ गतौ + क्तः।) नरकस्थप्राणी। इत्यमरः। १। ३। ५६॥ भूतभेदः। मृते, त्रि। इति मेदिनी। ते, ३७॥ (यथा, मनुः। २।२४७।
"आचार्य्ये तु खलु प्रेते गुरुपुत्रे गुणान्विते।
गुरुदारे सपिण्डे वा गुरुवत् वृत्तिमाचरेत्॥")
वैदिकविधानेन और्द्धदेहिकाभावात् विष्णुद्वेषाच्च बहुनरकभोगान्ते प्रेतशरीरं भवति। यथा,—
लोमश उवाच।
"ततो बहुतिथे काले स राजा पञ्चतां गतः।
वैदिकेन विधानेन न लेभे और्द्धदेहिकम्॥
विष्णुद्वेषमहात्म्येन युगानां सप्तविंशतिम्।
भुक्त्वा च यातनां यामीं निस्तीर्णनरको नृपः॥
समया गिरिराजस्तु पिप्पलोऽभूत्तदा महान्॥"
तस्य रूपं यथा,—
"देवद्युतिरधीयानः सुस्राव करुणामयः।
समागत्य ततस्तत्र तं पिप्पलं ददर्श सः॥
विकरालमुखं दीनं पिप्पलं नयनैः भृशम्।
ऊर्द्धमूर्द्धजलम्बाङ्गं यमदूतमिवापरम्॥
चलज्जिह्वं लम्बोष्ठं दीर्घचञ्चुशिराकुलम्।
दीर्घाङ्घ्रिं शुष्कतुण्डञ्च गर्गाक्षं शुष्कपक्षरम्॥"
इति पाद्मोत्तरखण्डे १६ अध्यायः॥

प्रेतत्वादिजनककर्म्माणि यथा,
"हविर्भुङ्क्ते यस्तौ वै गोविन्दं नार्चयन्ति ये।
लभन्ते नात्मविद्याञ्च सुतीर्थेष्वसुखाच्च ये॥
सुवर्णं रजतामूलं रत्नमन्नं फलं जलम्।
अर्त्तेभ्यो न प्रयच्छन्ति सर्व्वे सुकृतटारकाः॥
ब्रह्मस्वञ्च स्त्रीधनानि लोभादेव हरन्ति ये।
बलेन छद्मना वापि धूर्त्ताश्च परवञ्चकाः॥
नास्तिकाः कुटकारीरा ये चान्ये वकवृत्तयः।
बालवृद्धातुरस्त्रीषु निर्दयाः सत्यवर्জ্জিताः॥
अमिदा गरदा ये च ये चान्ये कूटसाक्षिणः।
अगम्यागामिनः सर्व्वे ये चान्ये ग्रामयाजिनः॥
आधाचरणसम्पन्ना वर्णादिधर्म्मवर्জ্জिताः।
देवोपदेवदगुरुचौर्य्यादिसेविनः॥
सर्व्वदा मादकद्रव्यपानसक्ता हरिद्विषः।
देवतोच्छिष्टपतितक्षुधार्त्तान्नभोजिनः॥
व्यसनकर्म्मरता नित्यं सर्व्वपातकप्राप्तिनः।
पाषण्डधर्म्मचरणाः पुरोधीवृत्तिजीविनः॥
पितृमातृस्नुषाभगिन्यसदारत्यागिनश्च ये।
ये कदर्य्याश्च लुब्धाश्च नास्तिका धर्म्मदूषकाः॥
व्रजन्ति स्वामिनं युद्धे त्यजन्ति शरणागतम्।
गवां भूमेश्च हर्त्तारो ये चान्ये रत्नदूषकाः॥
महार्घेषु सर्व्वेषु प्रतिग्रहरताश्च ये।
परस्वहरता ये च तथा ये प्राणिहिंसकाः॥
परापवादिनः पापा देवतागुरुनिन्दकाः।
कुप्रतिग्राहिणः सर्व्वे सम्भवन्ति पुनः पुनः॥
प्रेतराजसपैशाच्यतिर्य्यग्वृक्षकृमियोनिषु।
न तेषां सुखलेशोऽस्ति इह लोके परत्र च॥"
इति पाद्मोत्तरखण्डे १८ अध्यायः॥*॥

पञ्चप्रेतोपाख्यानं यथा.—
ब्राह्मण उवाच।
"प्रेतानां नामजातीनां युष्माकं सम्भवः कथम्।
किन्तत् कारणमुद्दिश्य यूयमीदृशनामकाः॥
प्रेता ऊचुः।
अहं स्वादु सदा भुक्त्वा दध्यां पर्य्युषितं सदा।
एतत्कारणमुद्दिश्य नाम पर्य्युषितं मम॥१॥
सञ्चिता दग्धबीजेन विप्राद्या क्षयकाङ्क्षिणः।
एतत् कारणमुद्दिश्य सक्तूनुक्षमिमं विदुः॥२॥
शीघ्रं गच्छति विप्रेण याचितः क्षुधितेन वै।
पश्चाद्भुङ्क्ते द्विजः क्षिप्रमेष क्षीरक उच्यते॥३॥
गृहोपरि सदा भुङ्क्ते स्वादु द्विजभयेन हि।
द्विजाय कुत्सितं दत्त्वा एष रोधक उच्यते॥४॥
मौनेनापि स्थिरो नित्यं याचितो विलिखेल्लङ्गीम्।
अस्माकमपि पापिष्ठो लेखको नाम एष वै॥५॥
मेढ्रेण लेखको याति रोधकः पार्श्वतः शिराः।
क्षीरकः पङ्गुतां प्राप्तः सक्तवः सक्तवोऽभवत्॥"

प्रेतानामाहारो यथा,—
द्विज उवाच।
"ये जीवा भुवि तिष्ठन्ति सर्व्वे चाहारभक्षकाः।
युष्माकमपि आहारं श्रोतुमिच्छामि तत्त्वतः॥
प्रेता ऊचुः।
अस्य आहारमार्गस्य सर्व्वमत्तविगर्हितम्।
ऐकमत्यपुरोधेन योगिनाञ्च मतेन च॥
गृहाणि त्यक्तशौचानि प्रेता भुञ्जन्ति तत्र वै॥
स्त्रीभिर्जग्धानि जीर्णानि संकीर्णापहृतानि च।
मलेनातिजुगुप्सानि प्रेता भुञ्जन्ति तत्र वै॥
भयलज्जाविहीनानि पतितैः सेवितानि च।
अन्योन्यदत्तयुक्तानि प्रेता भुञ्जन्ति तत्र वै॥
कलहान्वितशोकानि त्यक्तशोभानि मण्डनैः।
सर्व्वैरुक्तानि भाण्डानि प्रेता भुञ्जन्ति तत्र वै॥
बलिमन्त्रविहीनानि द्विजाद्यानि यानि तु।
नियमव्रतहीनानि प्रेता भुञ्जन्ति तत्र वै॥
गुरवो नैव पूज्यन्ते स्त्रीजितानि गृहाणि च।
सक्रोधान्यपवित्राणि प्रेता भुञ्जन्ति तत्र वै॥
भुञ्जन्ति भिन्नभाण्डेषु मर्य्यादारहितेषु च।
अन्योन्योच्छिष्टयुक्तेषु तत्र प्रेतास्तु भुञ्जते॥
सकेशमाक्तिकोच्छिष्टं पूतिपर्य्युषितं तथा।
सक्रोधञ्च सशोकञ्च तच्च प्रेतेषु भोजनम्॥
सनग्नं भोजनं यच्च नीत्तरीयं पदासनम्।
सोष्णीषं सासुरीकञ्च तच्च प्रेतेषु भोजनम्॥
अर्द्धग्रासं महाग्रासं सोत्तुज्जिग्नं पतितं तथा।
दुर्भुक्तं गोष्ठिकञ्चैव तच्च प्रेतेषु भोजनम्॥
सौत्तिकं हतकञ्चैव रजसं कलुषीकृतम्।
निर्द्दोषं क्षमिवच्चाग्रे यद्भुक्तं प्रेतिकन्तु तत्॥
एतत्ते कथितं सर्व्वं यत् प्रेतेष्वेव भोजनम्।
निर्विण्णाः प्रेतजात्या वै पृच्छामस्त्वां द्विजोत्तम!॥"*॥

प्रेतत्वाभावकारणं यथा,—
"न प्रेतो जायते येन येन चैवेह जायते।
एतत् सर्व्वं समासेन ब्रवीहि वदतां वर!॥
ब्राह्मण उवाच।
एकरात्रं त्रिरात्रं वा कृच्छ्रं चान्द्रायणादिकम्।
व्रतेष्वप्युधियो यस्तु न प्रेतो जायते नरः॥
मिष्टान्नपानदाताच सततं अन्नदानिनः।
देवपूजाकरो नित्यं न प्रेतो जायते नरः॥
चिरमग्निरेकपक्षाग्निर्निरग्निर्वाप्युपासकः।
सर्व्वभूतदयापन्नो न प्रेतो जायते नरः॥
तुल्यमानापमानश्च तुल्यः काञ्चनलोष्टयोः।
तुल्यः शत्रौ च मित्रे च न प्रेतो जायते नरः॥
देवतातिथिपूजासु गुरुजातिषु नित्यशः।
वेदशास्त्ररतो नित्यं न प्रेतो जायते नरः॥
जितक्रोधो मदैश्वर्य्यलज्जाभयविवर्জ্জितः।
क्षमाक्रोधसुशीलश्च न प्रेतो जायते नरः॥
देवतातिथिपूजासु पर्व्वतांश्च नदीस्तथा।
पश्येद्देवालयांश्चैव न प्रेतो जायते नरः॥"*॥

प्रेतत्वकारणं यथा,—
"भुक्त्वान्नं यो द्विजो भुङ्क्ते यः क्षामति द्विजोत्तमम्।
वृत्तिघ्ना द्विजदेवेषु च प्रेतो जायते नरः॥
मातरं पितरं वृद्धं ज्ञातिं साधुजनं तथा।
लोभात् त्यजति यः लोभं न प्रेतो जायते नरः॥
व्याध्यार्त्तायाचकञ्चैव याप्यं परिवर्জ্जयेत्।
भृत्यानुग्रहकर्त्ता च न प्रेतो जायते नरः॥
कृष्योतिथि कृषिघ्नस्तु कृषकेषु सुदेशकः।
भूदेवाकरो राज्ञो न प्रेतो जायते नरः॥
सेवकायापहर्त्ता यः सेवकस्वपरिग्रहः।
तावुभावपि जायेते प्रेतौ कालान्नकिङ्करः॥
द्विजानुमन्त्रितो भुङ्क्ते भृदानं वा द्विजस्य तु।
भूदेवेव द्विजः प्रेतो निरयानुपगच्छति॥
गीतवाद्यरतो नित्यं मद्यपस्त्रीनिषेवणात्।
द्यूतमांसप्रियो यस्तु च प्रेतो जायते नरः॥
वृथारती वृथामांसी वृथावादी वृथामतिः।
निन्दको द्विजदेवानां स प्रेतो जायते नरः॥
वृद्धं बालं गुरुं विप्रं योऽवमन्य भुनक्ति वै।
कन्यां ददाति शुल्केन स प्रेतो जायते नरः॥
न्यासापहर्त्ता मित्रघ्नक् परपाकरतस्तथा।
विश्रम्भघाती कूटश्च स प्रेतो जायते नरः॥
निर्द्दोषान् सुहृदो नारीस्त्यजेत् कालान्न याति यः।
धनमीहेत यक्षेषां स प्रेतो जायते नरः॥
एकस्यैवरथयानानि स्तनग्रन्थ्याजनादि यः।
छत्राजिनञ्च गृह्णाति त्यागापन्नस्तु गतो द्विजः॥
तथोभयसुखीं कालं सप्तैलां मेदिनीं द्विजः।
गुरुश्चैवास्य यद्दानं चाण्डालात् पतितात्तथा।
मासिश्राद्धेऽपि नवश्राद्धे भुञ्जन् प्रेतान्न तृप्यते॥
ब्रह्महा गोवधी स्त्रैयी सुरापी गुरुतल्पगः।
भूमिकन्यापहर्त्ता यः स प्रेतो जायते नरः॥
लालासङ्करकन्नित्यं वर्णसङ्करकस्तथा।
योनिसङ्करकश्चापि स प्रेतो जायते नरः॥
विक्रीणाति विषं शुक्लं तिलानां लवणस्य तु।
गवां केशरिणां क्षीरात् विक्रयात् प्रेततां व्रजेत्॥
कूटमाप्ये च तौल्येन क्रयं क्रीणाति विक्रयात्।
मद्यतक्रपयोदध्नां स प्रेतो जायते नरः॥
क्षीरक्लो मद्यपाने तु स्वगयामनुधावति।
नित्यनैमित्तिकेऽदाता स प्रेतो जायते नरः॥"
इत्यग्निपुराणम्॥*॥

मनुष्याणां आतिवाहिकदेहागन्तरं प्रेतदेहो भवति। यथा, विष्णुधर्म्मोत्तरे।
"तत्क्षणादेव गृह्णाति शरीरमातिवाहिकम्।
आतिवाहिकसंज्ञोऽसौ देहो भवति भार्गव!॥
केवलं तन्मनुष्याणां नान्येषां प्राणिनां क्वचित्।
प्रेतपिण्डैस्ततो दत्तैर्देहमाप्नोति भार्गव!॥
भोगदेहमिति प्रोक्तं क्रमादेव न संशयः।
प्रेतपिण्डा न दीयन्ते यस्य तस्य विमोक्षणम्॥
श्राद्धान्नानिकेभ्यो देवेभ्य आकल्पं नैव विद्यते।
तत्रास्य यातना घोराः शीतवातातपोद्भवाः॥
ततः सपिण्डीकरणे यान्यदेः स कृते नरः।
पूर्णे संवत्सरे देहमतोऽन्यं प्रतिपद्यते॥
ततः स नरके याति स्वर्गे वा स्वेन कर्म्मणा॥"
इति युक्तितत्त्वम्॥

प्रेतकार्य्य, क्ली, (प्रेताय प्रेतस्य वा कार्य्यम्।) मृतस्य दाहादिसपिण्डीकरणान्तं कर्म्म। यथा,
"अकृत्वा प्रेतकार्य्याणि प्रेतस्य धनहारकः।
वर्षाणां यदघं प्रोक्तं तद्व्रतं नियतश्चरेत्॥"
इति दायतत्त्वम्॥
(यथाच महाभारते। १।१०२।६५।

"धर्म्मात्मा च तु गाङ्गेयश्चिन्ताशोकपरायणः।
प्रेतकार्य्याणि सर्व्वाणि तस्य सम्यक्कारयत्॥")

प्रेतगृहं, क्ली, (प्रेतस्य गृहम्।) श्मशानम्। इति हेमचन्द्रः। ४। ५५॥

प्रेततर्पणं, क्ली, (प्रेतस्य तर्पणम्।) मरणावधि-सपिण्डीकरणपर्य्यन्तं प्रेतशब्दोल्लेखेन जलदानम्। यथा। "अत्र प्रेततर्पणे तिलांश्चिति विशेषोपादानात् क्षय्यादिवारेणापि तिलैरेव तर्पणं प्रतीयते॥ तदनुष्ठानं यथा। क्षमः सर्व्वे शुक्लाग्निनो गत्वा पिण्डपदस्थाने प्रेतपदोच्चैव द्वितीयान्तं तर्पयेयुः पिण्डशब्दोच्चारणेऽपि पिण्डहा भवति। एतेन अमुकगोत्रं प्रेतं अमुकदेवशर्म्मणां तर्पयामि। इति सामगानां प्रयोगः। यजुर्व्वेदिनान्तु अमुकगोत्र प्रेत अमुकदेवशर्म्मन् तृप्यस्व। इति सम्बोधनान्तवाक्यम्।" इति सुद्धितत्त्वम्॥

प्रेतदेहः, पुं क्ली, (प्रेतस्य देहः।) प्रेतशरीरम्। यथा,—

"क्षते सपिण्डीकरणे नरः संवत्सरात् परम्।
प्रेतदेहं परित्यज्य भोगदेहं प्रपद्यते॥"

इति तिथ्यादितत्त्वधृतविष्णुधर्म्मोत्तरीयवचनम्॥

पूरकपिण्डदानेन तदुत्पत्तिर्यथा,—

"शिरस्त्याद्येन पिण्डेन प्रेतस्य क्रियते सदा।
द्वितीयेन तु कण्ठादिनाभिकान्तु समाश्रितः॥
गलांसभुजवक्षांसि तृतीयेन यथाक्रमात्।
चतुर्थेन तु पिण्डेन नाभिलिङ्गगुदानि च॥
जानुजङ्घे तथा पादौ पञ्चमेन तु सर्व्वदा।
सर्व्वमर्म्माणि षष्ठेन सप्तमेन तु नाड्यः॥
दन्तलोमादयष्टमेन वीर्य्यञ्च नवमेन तु।
दशमेन च पूर्णत्वं क्षुत्तृषा तृप्तिपर्य्ययः॥"

इति सुद्धितत्त्वधृतकूर्म्मपुराणवचनम्॥

प्रेतनदी, स्त्री, (प्रेततरणीया नदी।) वैतरणी। इति शब्दरत्नावली॥

प्रेतपक्षः, पुं, (प्रेतप्रियः पक्षः।) गौणचान्द्राश्विनकृष्णपक्षः। तत्र मृतस्य पार्व्वणविधिना सांवत्सरिकं श्राद्धं कर्त्तव्यम्। यथा,—

"आषाढ्याः पञ्चमे पक्षे कन्यासंस्थे दिवाकरे।
यो वै श्राद्धं नरः कुर्य्यादेकस्मिन्नपि वासरे॥
तस्य संवत्सरं यावत्तृप्ताः स्युः पितरो ध्रुवम्॥
नभा वाथ नभस्यो वा मलमासो यदा भवेत्।
क्षमः पिण्डपक्षः स्यादन्यस्मिन्नेव तु पक्षमः॥" इति।

तत्र मृतस्य।

"सपिण्डीकरणादूर्द्धं यत्र यत्र प्रदीयते।
तत्र तत्र त्रयं कुर्य्यादर्घ्यमेकं तथैव च॥
अमावास्यां त्रयो यस्य प्रेतपक्षेऽथवा पुनः।
सपिण्डीकरणादूर्द्धं तस्योक्तः पार्व्वणो विधिः॥"

इति मलमासतत्त्वे॥ * ॥ तत्र निषिद्धदिनेऽपि तिलतर्पणं कर्त्तव्यम्। यथा, स्मृतिः।

"तीर्थे तिथिविशेषे च गङ्गायां प्रेतपक्षके।
निषिद्धेऽपि दिने कुर्य्यात् तर्पणं तिलसंयुतम्॥"

इति च मलमासतत्त्वम्॥

प्रेतपटहः, पुं, (प्रेतस्य पटहः।) मरणकाले वादनीयवाद्यविशेषः। तत्पर्य्यायः। भवरुत २ क्षुभङ्करकः ३। इति त्रिकाण्डशेषः॥

प्रेतपतिः, पुं, (प्रेतानां पतिः।) यमः। इति हलायुधः॥ (यथा, भागवते। १०८। ४।

"दक्षः प्रेतपतेः शक्तिर्दैवसेनापतेस्तथा।
अन्येषाञ्चैव देवानामायुधानि च विश्वकृत्।
चक्रार तेजसा भानोर्भासुराण्यरिशान्तये॥")

प्रेतपिण्डः, पुं, (प्रेताय देयः पिण्डः।) मरणावधि-सपिण्डीकरणपर्य्यन्तं प्रेतसम्बन्दानकपिण्डाकारान्नम्। यथा,—

"न स्वयञ्च प्रभुञ्जीत प्रेतपिण्डे दशाहिके।
भावेतेतच्च दे पिण्डं यन्नदत्तस्य पूरकम्॥"*॥

तत्तत्पिण्डस्य प्रेताङ्गकरणत्वं यथा, ब्रह्मपुराणे।

"शिरस्त्याद्येन पिण्डेन प्रेतस्य क्रियते सदा।
द्वितीयेन तु कण्ठादिनाभिकान्तु समाश्रितः॥
गलांसभुजवक्षांसि तृतीयेन तथा क्रमात्।
चतुर्थेन तु पिण्डेन नाभिलिङ्गगुदानि च॥
जानुजङ्घे तथा पादौ पञ्चमेन तु सर्व्वदा।
सर्व्वमर्म्माणि षष्ठेन सप्तमेन तु नाड्यः॥
दन्तलोमादयष्टमेन वीर्य्यञ्च नवमेन तु।
दशमेन तु पूर्णत्वं क्षुत्तृषा तृप्तिपर्य्ययः॥"*॥

तदकरणे दोषो यथा,—

"प्रेतपिण्डा न दीयन्ते यस्य तस्य विमोक्षणम्।
श्राद्धानिकेभ्यो देवेभ्य आकल्पं नैव विद्यते॥"*॥

पूरकपिण्डदानादेरितिकर्त्तव्यता यथा। पारस्करः। प्रेताय पिण्डं दत्त्वा अवनेजनदानप्रत्यवनेजनेषु गोत्रनाम्नी गृहीत्वा तां रात्रिं विहायसि चीरोदके निदध्युः प्रेताय त्वाहि पिब चैदं चीरमित्युच्चार्य्येति। अत्र दानशब्देन पिण्डदानमुक्तं बहुवचनात्। तेनावनेजनपिण्डदानप्रत्यवनेजनेषु गोत्रनाम्नी गृहीत्वा प्रेतपिण्डानुष्ठानं समाप्यम्। विहायसि रात्रौ चीरोदके प्रेताय त्वाहि पिब चैदं चीरमित्युच्चार्य्य निदध्युः।

"प्रथमेऽहनि यो दद्यात् प्रेतायान्नं समाहितः।
यद्यन्नवस्तु चान्येषु स एव प्रददात्यपि॥"*॥

प्रथमपिण्डकर्त्तृनियमवत् प्रथमपिण्डप्रदनियममाह स एव।

"प्रथमेऽहनि यद्दत्तं तदेव स्याद्दशाहिकम्।
सद्यःशौचेऽपि दातव्याः सर्व्वेऽपि युगपत्तथा॥
त्र्याहाशौचे प्रदातव्याः प्रथमे त्येक एव हि।
द्वितीयेऽहनि चत्वारस्तृतीये पञ्च चैव हि॥
एकस्मिन्नवसिक्तेवं पात्रमेकस्य दीयते।
द्वितीये द्वौ तृतीये त्रीन् चतुर्थे चतुरस्तथा॥
पञ्चमे पञ्च षष्ठे षट् सप्तमे सप्त एव च।
अष्टमेऽष्टौ च नवमे नवैव दशमे दश॥
येन सुः प्रथमश्राद्धन्तोयस्याञ्जलयः क्रमात्।
तोयपात्राणि तावन्ति संयुक्तानि तिलादिभिः॥"

इति सुद्धितत्त्वम्॥

प्रेतपुरं, क्ली, (प्रेतानां पुरम्।) यमालयः। यथा,

"यावच्च कन्यातुलयोः क्रमादास्ते दिवाकरः।

प्रेतशि

तावत् आद्धस्य कालः स्यात् भृग्यं प्रेतपुरं नदा॥"

इति आद्धतत्त्वम्॥

प्रेतराक्षसी, स्त्री, (प्रेतानां पिशाचभेदानां राक्षसीवापतर्पणकारित्वात्।) तुलसी। इति रत्नमाला॥

प्रेतवनं, क्ली, (प्रेतानां वनमिव।) श्मशानम्। इति हेमचन्द्रः। ४। ५५॥

प्रेतवाहितः, त्रि, (प्रेतेन वाहितः।) भूताविष्टः। इति त्रिकाण्डशेषः॥

प्रेतशिला, स्त्री, (प्रेतानां प्रेतेभ्यो वा या शिला।) पिण्डदानार्थगयास्थितप्रस्तरविशेषः। यथा,—

ब्रह्मलोकाच।

"देवं प्रेतशिला ख्याता गयायां सा शिवा स्थिता।
प्रभासे प्रेतकुण्डे च गयासुरशिरस्यपि॥
धर्म्मेण धारिता भूत्वा सर्व्वदेवमयी शिला॥
प्रेतत्वं ये गता नृणां पिशाचा वान्यवाद्यः।
तेषामुद्धरणार्थाय यतः प्रेतशिला ततः॥
अतोऽत्र सुनयो भूपा राजपत्न्याद्यः सदा।
तस्यां शिलायां आद्धादिकर्त्तारो ब्रह्मलोकगाः॥
गयासुरस्य यन्मुण्डं तस्य पृष्ठे शिला यतः।
मुण्डपृष्ठो गिरिस्तस्मात् सर्व्वदेवमयो ह्ययम्॥
मुण्डपृष्ठस्य पादेषु यतो ब्रह्मवरोसुखाः।
अरविन्दवनन्तेषु तेन वैवोऽप्यसौ स्थितः॥
अरविन्दो गिरिर्नाम क्रौञ्चपादाङ्कितो यतः।
तस्माद्गिरेः क्रौञ्चपदः पितॄणां ब्रह्मलोकदः॥
गदाधरादयो देवा आद्या आद्यौ व्यवस्थिताः।
शिलारूपेण च अक्षयवटाद्देवमयी शिला।
गयाशिरस्यादयित्वा शुचिवादास्थिता शिला॥*॥
स्नात्वा प्रेतशिलादौ तु चरणाम्बुक्षतेन च।
पिण्डं दद्यादिभिर्म्मन्त्रैरायान्तु च पितॄन् परान्॥
अज्ञातमुखे मृता ये च गतिर्येषां न विद्यते।
तेषामाप्यायिष्यामि दर्भपृष्ठे तिलोदकैः॥
पितृवंशे मृता ये च मातृवंशे च ये मृताः।
तेषामुद्धरणार्थाय इमं पिण्डं ददाम्यहम्॥
मातामहकुले ये च गतिर्येषां न विद्यते।
तेषामुद्धरणार्थाय इमं पिण्डं ददाम्यहम्॥
अजातदन्ता ये केचित् ये च गर्भेषु पीड़िताः।
तेषामुद्धरणार्थाय इमं पिण्डं ददाम्यहम्॥
बन्धुवर्गाश्च ये केचिन्नामगोत्रविवर्जिताः।
स्वगोत्रे परगोत्रे वा गतिर्येषां न विद्यते।
तेषामुद्धरणार्थाय इमं पिण्डं ददाम्यहम्॥
उद्बन्धनमृता ये च विषशस्त्रहताश्च ये।
आत्मोपघातिनो ये च तेभ्यः पिण्डं ददाम्यहम्॥
अग्निदाहे मृता ये च सिंहव्याघ्रहताश्च ये।
दंष्ट्रिभिः शृङ्गिभिर्व्वापि तेषां पिण्डं ददाम्यहम्॥
अग्निदग्धाश्च ये केचिन्नाग्निदग्धास्तथापरे।
विद्युच्चौरहता ये च तेषां पिण्डं ददाम्यहम्॥
रौरवे चान्धतामिस्रे कालसूत्रे च ये गताः।
तेषामुद्धरणार्थाय इमं पिण्डं ददाम्यहम्॥
असिपत्रवने घोरे कुम्भीपाके च ये गताः।
तेषामुद्धरणार्थाय इमं पिण्डं ददाम्यहम्॥
अन्येषां यातनास्थानां प्रेतलोकनिवासिनाम्।

तेषामुद्धरणार्थाय इमं पिण्डं ददाम्यहम् ॥
पशुयोनिगता ये च पक्षिकीटसरीसृपाः ।
अथवा वृक्षयोनिस्थास्तेभ्यः पिण्डं ददाम्यहम् ॥
असंख्ययातनासंस्था ये गीता यमशासने ।
तेषामुद्धरणार्थाय इमं पिण्डं ददाम्यहम् ॥
जात्यन्तरसहस्राणि भ्रमन्तः स्वेन कर्म्मणा ।
मानुष्यं दुर्लभं येषां तेभ्यः पिण्डं ददाम्यहम् ॥
ये बान्धवाबान्धवा वा येऽन्यजन्मनि बान्धवाः ।
ते सर्व्वे तृप्तिमायान्तु पिण्डदानेन सर्व्वदा ॥
ये केचित् प्रेतरूपेण वर्त्तन्ते पितरो मम ।
ते सर्व्वे तृप्तिमायान्तु पिण्डदानेन सर्व्वदा ॥
ये मे पितृकुले जाताः कुले मातुस्तथैव च ।
गुरुश्वशुरबन्धूनां ये चान्ये बान्धवा मृताः ॥
ये मे कुले लुप्तपिण्डाः पुत्रदारविवर्जिताः ।
क्रियालोपगता ये च जात्यन्धाः पङ्गवस्तथा ॥
विरूपाख्यामगर्भा ये ज्ञाताज्ञाताः कुले मम ।
तेषां पिण्डं मया दत्तमक्षय्यमुपतिष्ठताम् ॥
साक्षिणः सन्तु मे देवा ब्रह्मज्ञानादयस्तथा ।
मया गयां समासाद्य पितॄणां निष्कृतिः कृता ॥
आगतोऽहं गयां देव ! पितृकार्य्ये गदाधर ! ।
तत्रैते साक्षी भवत्वाद्य अनृणोऽहन्तथास्तु वै ॥"
इति गारुड़े गयामाहात्म्ये ८५-८६ अध्यायौ ॥

प्रेतशौचं, क्ली, (प्रेते सति प्रेतस्य वा शौचम् ।) मृतसंस्कारादि । यथा,—

याज्ञवल्क्य उवाच ।
"प्रेतशौचं प्रवक्ष्यामि तच्छृणुध्वं यतव्रताः ।
जनद्विवर्णे निखनेन्न कुर्य्यादुदकन्ततः ॥
आप्तप्रज्ञानादनूढ्य इतरो ज्ञातिभिर्मृतः ।
यमसूक्तं तथा जप्यं जपद्भिर्लौकिकाग्निना ॥
न दग्धस्य उपेतस्येदाहिताग्नेरुदाहृतार्थवत् ।
अग्निमादधमाद्वापि ज्ञातयो द्युपयन्त्यपः ॥
अप नः शोशुचदघमनेन पितृदिङ्मुखाः ।
एवं मातामहाचार्य्यप्रेतानाञ्चोदकक्रियाः ॥
कामोदकाः सखिपुत्रश्वसुरीयश्वशुरर्त्विजः ।
नामगोत्रेण शुद्धं सकृत् सिञ्चन्ति वाग्यताः ॥
यावज्जपतितस्त्रीणां न कुर्य्युरुदकक्रियाम् ।
न ब्रह्मचारिणो ब्राह्मा योषितः कामगास्तथा ॥
सुरापास्त्वात्मघातिन्यो नाशौचोदकभाजनाः ।
यतो न रोदितव्यं हि त्यक्त्वा जीवसंस्थितिः ॥
क्रिया कार्य्या यथाशक्ति ततो गच्छेद्यथेच्छया
प्रति ।
विदश्य निम्बपत्राणि नियता द्वारि वेश्मनः ॥
आचम्याद्भिरमुदकं गोमयं गौरसर्षपान् ।
प्रविशेयुः समालभ्य ज्वलदग्निं पदं शनैः ॥
प्रवेशनादिकं कर्म्म प्रेतसंस्पर्शिनामपि ।
ऐक्यतां तत्क्षयाच्छुद्धिः परेषां स्नानसंयमात् ॥
श्रोत्रियस्याग्निना भग्नौ स्वपुत्रे पृथक् पृथक् ।
पितृयज्ञाहृता देयं प्रेतायान्नं दिनत्रयम् ॥
यत्रैकाहमाकाशे स्थाणं चौरेण वध्यते ।
वैतालीयाश्वना कार्य्याः क्रियाश्च श्रुतिचोदिताः ॥
आदन्तजन्मनः सद्य आचूड़ान्नैशिकी स्मृता ।
त्रिरात्रमाव्रतादेशादहश्चरात्रमतः परम् ।
त्रिरात्रं दशरात्रं वा श्रावमाशौचमुच्यते ।
जनद्विवर्षे उभयोः सूतकं मातुरेव हि ।
अन्तरा जन्ममरणे श्वेषाद्दोभिर्विशुद्ध्यति ॥
दश द्वादश वर्षाणां तथा षष्ठदशैव च ।
त्रिंशद्दिनानि च तथा भवति प्रेतसूतकम् ॥
अहस्वदत्तकन्यासु बालेषु च विशोधनम् ।
गुर्व्वङ्गे वास्यानूचानमातुलश्रोत्रियेषु च ॥
अनौरसेषु पुत्रेषु भार्य्यास्वन्यगतासु च ।
निवासराजनि तथा तदहः शुद्धिकारणम् ॥
हतानां वृषगोविप्रैरन्त्यं चालघातिनाम् ।
विषाद्यैश्च हतानाञ्च नाशौचं पृथिवीपते ॥
सच्चित्रतिन्नक्षचारिदाढ्यब्रह्मविदां तथा ।
दाने विवाहे यज्ञे च संग्रामे देशविप्लवे ।
आपद्यपि हि कष्टायां सद्यःशौचं विधीयते ॥
कालोऽग्निः कर्म्मसन्दाहुर्म्मनो ज्ञानं तपो जलम् ।
पश्चात्तापो निराहारः सर्व्वेषां शुद्धिहेतवः ॥"
इति गारुड़े १०६ अध्यायः ॥

प्रेताह्नं, क्ली, (प्रेताय प्रेतोद्देश्यकं वा आह्नम् ।) प्रेतोद्देश्यकश्राद्धम् । तदनुष्ठानं यथा । तत्र मोभिलः । अथैकोद्दिष्टमेकं पवित्रमेकोर्घ्य एकः पिण्डो नावाहनं नामौकरणं नात्र विश्वेदेवाः स्वस्तिमिति ब्रह्मप्रश्नः । उपतिष्ठतामित्यत्रास्य स्थाने अभिरम्यतामिति विसर्गोऽभिरतोऽसीति प्रतिवचनमेतत् प्रेताह्नमिति । इति श्राद्धतत्त्वम् ॥ * ॥ तच्च नवश्राद्धं तत्तु सामिककर्त्तव्यं चतुर्थषष्ठमनवमैकादशाहेषु प्रेतश्राद्धम् । यथा यमः ।
"चतुर्थे षष्ठमे चैव नवमैकादशे तथा ।
तदन्नं दीयते जन्तोस्तन्नवश्राद्धमुच्यते ॥"
इति श्राद्धविवेकः ॥ * ॥
सामिनिरग्न्युभयकर्त्तव्यं आद्यश्राद्धादिसपिण्डीकरणान्तं श्राद्धम् । यथा,—
"द्वादश प्रतिमास्थानि आद्यं षाण्मासिकं तथा ।
सपिण्डीकरणञ्चैव इत्येतत् श्राद्धषोड़शम् ॥"
इति श्राद्धतत्त्वम् ॥ ॥
अम्बुघटश्राद्धम् । तत्तु संवत्सरं यावत् प्रत्यहं प्रेतोद्देश्यकान्नजलदानरूपम् । यथा । पारस्करः । अहरहरन्नमन्ते ब्राह्मणायोदकुम्भञ्च दद्यात् पिण्डमप्येके निदधन्ति । दर्शनीत्यर्थः । इति श्राद्धविवेकः ॥ * ॥ गयादितीर्थश्राद्धादिप्राप्तिनिमित्तमेकोद्दिष्टश्राद्धम् । यथा,—
"पितृयज्ञन्तु निर्व्वर्त्त्य मासिकं श्राद्ध एव तु ।
श्राद्धं प्रतिरुचौ चैव मातापित्रोर्मृताहनि ।
असपिण्डीकृतं प्रेतमेकोद्दिष्टेन तर्पयेत् ॥
तेनाम्बुघटश्राद्धे मृताहविहितमासिके तथा
विशिष्टतीर्थश्राद्धादिप्राप्तौ प्रेतश्राद्धकरणेच्छायां मातापित्रोर्मृताहनि च असपिण्डीकृतं प्रेतमेकोद्दिष्टेन तर्पयेत् ।" इति श्राद्धतत्त्वम् ॥

प्रेता, स्त्री, (प्रेत + स्त्रियां टाप् ।) प्रेतभावापन्ना । यथा । विष्णुरीम् तनु सत्यादि असुकगोत्रायाः प्रेतायाः असुकदेव्या अशौचान्तर्गतौर्द्धदैहिकं असुकगोत्रायाः प्रेतायाः प्रेतत्वविमुक्तिपूर्ब्बकस्वर्गलोकगमनकामः सोपकरणं चन्दनाङ्कितघृतोदानमहं करिष्यामि । इति मौखिकः ॥ * ॥ मृता । यथा,—
"प्रेतायाः पुत्रिकायाः न भर्त्रा धनमर्हति पुत्रायाः ।" इति दायभागे शूलपाणिः ॥

प्रेत्य, अ. (प्र + इ + ल्यप् ।) लोकान्तरम् । तत्पर्य्यायः । असुत्र २ । इत्यमरः । ३ । ४ । ८ । (यथा, मनुः । २ । ६ ।
"श्रुतिस्मृत्युदितं धर्म्ममनुतिष्ठन् हि मानवः ।
इह कीर्त्तिमवाप्नोति प्रेत्य चानुत्तमं सुखम् ॥")

प्रेम, [न्] क्ली, पुं, (प्रियस्य भावः । प्रिय + "पृथ्वादिभ्य इमनिज्वा ।" ५ । १ । १२२ । इति इमनिच् । "प्रियस्थिरेति ।" ६ । ४ । १५७ इति प्रादेशः । प्री तर्पणे + मनिन् वा ।) सौहार्द्यम् । तत्पर्य्यायः । प्रेमा २ प्रियता ३ हार्द्दम् ४ स्नेहः ५ । इत्यमरः । १ । ७ । २० । (यथा, देवीभागवते । १ । १४ । २४ ।
"दृष्ट्वा यासः सुकं प्राप्तं प्रेमपूर्णोत्थाय सत्वरम् ।
आलिलिङ्ग सुदुर्द्धर्षं मुहुर्मुहुस्तस्य चकार ह ॥")
नर्म्म । इति मेदिनी । ने, ६४ ॥

प्रेमपातनं, क्ली, (प्रेम्णः स्नेहस्य पातनं यस्मात् । प्रेम्णा पातनं यस्येति वा ।) रोदनम् । नेत्रजलम् । इति शब्दचन्द्रिका ॥

प्रेमभक्तिः, स्त्री, (प्रेम्णा भक्तिः ।) स्नेहयुक्तश्रीकृष्णसेवा । विष्णौ कान्तिकममता । तल्लक्षणं यथा, नारदपञ्चरात्रे ।
"अनन्यममता विष्णौ ममता प्रेमसंयुता ।
भक्तिरित्युच्यते भीष्म ! प्रह्लादोद्धवनारदैरिति ॥
प्रेमभक्तेश्च माहात्म्यं भक्तेर्माहात्म्यतः परम् ।
सिद्धमेव यतो भक्तेः फलं प्रेमैव निश्चितम् ॥"*॥
अथ प्रेमसम्पत्तिचिह्नानि यथा, भागवते ७ स्कन्धे ७ अध्याये श्रीप्रह्लादस्य बालानुशासने ।
"निशम्य कर्म्माणि गुणानतुल्यान्
वीर्य्याणि लीलातनुभिः कृतानि ।
यदातिहर्षोत्पुलकाश्रुगद्गदं
प्रोत्कण्ठ उद्गायति रौति नृत्यति ॥
यदा ग्रहग्रस्त इव क्वचित्तद-
त्याक्रन्दते ध्यायति वन्दते जनम् ।
मुहुः श्वसन् वक्ति हरे जगत्पते
नारायणेत्यात्ममतिर्गतत्रपः ॥
तदा पुमान् मुक्तसमस्तबन्धन-
स्तद्भावभावानुकृताशयाकृतिः ।
निर्दग्धबीजानुशयो महीयसा
भक्तिप्रयोगेण समेत्यधोक्षजम् ॥"
इति श्रीहरिभक्तिविलासे १२ विलासः ॥

प्रेमा, [न्] पुं, (प्रिय + इमनिच् । प्री तर्पणे + मनिन् वा ।) स्नेहः । इत्यमरः । १ । ७ । २० । अस्य लक्षणं यथा,—
"सर्व्वथा ध्वंसरहितं सत्यपि ध्वंसकारणे ।
यद्भावबन्धनं यूनोः स प्रेमा परिकीर्त्तितः ॥"
इत्युज्ज्वलनीलमणिः ॥
वासवः । शत्रुः । इति मेदिनी । मे, ६६ ॥

प्रेमालिङ्गनं, क्ली, (प्रेम्णा यदालिङ्गनम्।) स्नेहेन परिष्वङ्गः। नायकनायिकयोरालिङ्गनविशेषः। तल्लक्षणं यथा। नायककटिं नायिकयैकपादेन वेष्टयित्वा द्वितीयं पादं तस्य जङ्घोपरि स्थापयित्वा यदालिङ्गनं तत्। इति कामशास्त्रम्॥

प्रेमी, [न्] त्रि, (प्रेम अस्यास्तीति। इनिः।) प्रेमयुक्तः। स्नेहविशिष्टः। प्रेमशब्दादस्यर्थे इनुप्रत्ययेन निष्पन्नः। इति व्याकरणम्॥

प्रेयसी, स्त्री, (इयमनयोरतिशयेन प्रिया। प्रिय+ईयसुन्। "प्रियस्थिरेति।" ६।४।१५७। इति प्रादेशः। स्त्रियां ङीप्।) प्रियतमा नारी। तत्पर्य्यायः। दयिता २ कान्ता ३ प्राणेशा ४ वल्लभा ५ प्रिया ६ हृदयेशा ७ प्राणसमा ८ श्रेष्ठा ९ प्रणयिनी १०। इति हेमचन्द्रः॥

प्रेयान् [स्] पुं, (अयमनयोरतिशयेन प्रियः। प्रिय+ईयसुन्। प्रादेशः।) पतिः। तत्पर्य्यायः। दयितः २ कान्तः ३ प्राणेशः ४ वल्लभः ५ प्रियः ६ हृदयेशः ७ प्राणसमः ८ श्रेष्ठः ९ प्रणयी १०। इति हेमचन्द्रः॥ अतिप्रिये, त्रि। इति जटाधरः॥

प्रेरणं, क्ली, (प्र+ईर्+णिच्+ल्युट्।) प्रेषणम्। पाठान इति भाषा। यथा, नैषधे। ३। ५५।

"धिक् चापले वतसिमवत्सलत्वं
यत्प्रेरणादुत्तरलीभवन्त्या॥"

प्रेरणा, स्त्री, (प्र+ईर्+णिच्+"ण्यासश्रन्थो युच्।" ३।३।१०७। इति युच्।) चोदना। (यथा, मेघदूते। ७०।

"क्षीणेष्वहानां भवति विफला प्रेरणा चूर्णमुष्टेः॥")

फलभावना। विधिरिति यावत्। इति धर्म्मदीपिका॥

प्रेरितः, त्रि, (प्र+ईर्+क्तः।) प्रेषितः। यथा,—

"नपुंसकमिति ज्ञात्वा प्रियायै प्रेरितं मनः।
मनस्त्वयैव रमते हताः स्मः पाणिनिना वयम्॥"

इति प्राचीनाः॥

प्रेर्त्वा [न्] पुं, (प्रकर्षेण ईर्त्ते इति। प्र+ईर् गतौ+"प्र ईरश्च दोस्तुट् च।" उणा० ४।११६। इति क्वनिप् तुट्‌ागमश्च।) सखा। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

प्रेर्त्वरी, स्त्री, (प्रकर्षेण ईर्त्ते इति। प्र+ईर् गतौ+"प्र ईरश्च दोस्तुट् च।" उणा० ४।११६। इति क्वनिप् तुट् च। "वनोरच।" ४।१।७। इति ङीम् रक्षान्तादेशः।) नदी। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

प्रेष, क्ष गतौ। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।)

प्रेषः, पुं (प्र+ईष्+घञ्।) प्रेषणम्। पीड़ा। इति जटाधरः॥

प्रेषणं, क्ली, (प्रेष्+भावे ल्युट्।) प्रेरणम्। यथा, "आनीयान् प्रेषयेद् भक्त्या यान्यवान् यत्समागमे। शिवयात्रादि कार्य्ये च भार्य्याश्च विभवक्षये॥"

इति चाणक्यसंग्रहः॥

प्रेषितं, त्रि, (प्रेष्+क्तः।) प्रेरितम्। तत्पर्य्यायः। प्रस्थापितम् २ प्रतिशिष्टम् ३ प्रतिहतम् ४। इति हेमचन्द्रः॥ (यथा, देवीभागवते। १।११।४६।

"प्रेषितोऽहं महाभाग! ब्रह्मणा त्वां विवक्षया।
कथितं प्रभुणा यच्च तद् ब्रवीमि महामते!॥")

प्रेष्ठः, त्रि, (अयमेषामतिशयेन प्रिय इति। प्रिय+इष्ठन्। प्रादेशः।) अतिशयप्रियः। इत्यमरः। ३।१।१११॥

प्रेष्ठा, स्त्री, (प्रेष्ठ+टाप्।) प्रेयसी। इति हेमचन्द्रः॥ जङ्घा। इति शब्दचन्द्रिका॥

प्रेष्यः, त्रि, (प्र+ईष्+कर्म्मणि ण्यत्।) दासः। इत्यमरः। २।१०।१७॥ (यथा, मनौ। ३।१५३।

"प्रेष्यो ग्रामस्य राज्ञश्च कुनखी श्यावदन्तकः॥")

प्रेरणीयश्च॥

प्रेष्यः, पुं, (प्र+इष्+कर्म्मणि ण्यत्। "प्रादूहोढोढ्येषेष्येषु।" ६।१।८६। इत्यस्य वार्त्तिकोक्त्या वृद्धिः।) स्नेहः। मर्द्दनम्। उन्मादः। प्रेषणम्। इति मेदिनी। षे, ६॥

प्रेष्यः, पुं, (प्र+इष्+कर्म्मणि ण्यत्। "प्रादूहोढोढ्येषेष्येषु।" ६।१।८६। इत्यस्य वार्त्तिकोक्त्या वृद्धिः।) प्रेष्यः। इत्यमरटीकायां भरतः॥ (यथा, कुमारे। ६।५८।

"जङ्घमं प्रेष्यभावे वः स्थावरं चरणाङ्कितम्।
विभक्तानुग्रहं मन्ये विरूपमपि मे वपुः॥"

क्ली, प्रेष्यस्य भावः। दासकर्म्म। यथा, कथासरित्सागरे। ३०। ६५।

"गवादिरक्षकान् पुत्रान् भार्य्यां कर्म्मकरीं निजाम्।
तस्य कृत्वा गृहाभ्यर्णे प्रेष्यं कुर्व्वन्नुवास सः॥")

प्रोक्तं, त्रि, (प्रकर्षेण उच्यते स्मेति। प्र+वच्+क्तः।) कथितम्। प्रकर्षेणोक्तम्। यथा,—

"अम्बरीषप्रसूक्तं नित्यं भागवतं शृणु॥"

इति श्रीभागवतम्॥

प्रोक्षणं, क्ली, (प्र+उक्ष सेचने+ल्युट्।) यज्ञार्थपशुहननम्। इत्यमरः। २। ७। २६॥ (यथा, महाभारते। ५। १७। ६।

"य इमे ब्राह्मणाः प्रोक्ता मन्त्रा वै प्रोक्षणे गवाम्।
एते प्रमाणं भवतः उताहो नेति वासव!॥"

आहादुचितसंस्कारः। यथा, भागवते। ६। ६। ८।

"चोदितः प्रोक्षणायाह दृष्टमेतदकर्म्मकम्॥")

वधः। सेचनम्। इति मेदिनी। णे, ६४॥ (यथा, मनुः। ५। ११८।

"अद्भिस्तु प्रोक्षणं शौचं वस्त्राणां धान्यवाससाम्।
प्रक्षालनेन तल्यानामद्भिः शौचं विधीयते॥")

प्रोक्षितं त्रि, (प्र+उक्ष+क्त।) सिक्तम्। इति मेदिनी। ते, १३६॥ यज्ञार्थं मन्त्रैः संस्कृतमांसादि। यथा,—

"भक्षयेत् प्रोक्षितं मांसं सकृदभ्यर्चकाम्यया।
देवैः नियुक्तः श्राद्धे वा नियमे तु विवर्ज्जयेत्॥"

आरण्यानामिदानीन्तनप्रोक्षणापेक्षा नास्ति। यथा, महाभारते।

"आरण्याः सर्व्वदेवत्याः प्रोक्षिताः सर्व्वशो मृगाः।
अगस्त्येन पुरा राजन्! मृगया येन पूज्यते॥"

इति तिथ्यादितत्त्वम्॥

प्रोच्चाटनं, क्ली, (प्र+उद्+चट् हिंसायाम्+णिच्+ल्युट्।) मारणम्। इति हेमचन्द्रः। ३।३४॥

प्रोज्झितं, त्रि, (प्र+उज्झ+कर्म्मणि क्तः।) त्यक्तम्। यथा, श्रीभागवते। १।१।२।

"धर्म्मः प्रोज्झितकैतवोऽत्र परमो निर्म्मत्सराणां सताम्॥"

प्रोञ्छनं, क्ली, (प्र+उञ्छ+ल्युट्।) प्रवर्त्तनम्। लोपनम्। मोछा इति भाषा॥ यथा,—

"प्रोञ्छनैर्वांमपादेन दरिद्रो भवति ध्रुवम्।
वैरिनाशकरं प्रोक्तं कवचं वश्यकारकम्॥"

इति रुद्रयामले वैरिहरकालीकवचम्॥

प्रोष्ठः, पुं, (प्रकर्षेण अश्नुते निष्ठीवनादिकं प्राप्नोतीति। प्र+अशू व्याप्तौ+क्त्च्। पृषोदरादित्वात् अस्य उत्वम्।) पतद्ग्रहः। पीकदान इति भाषा। यथा,—

"स्यादाचमनकः प्रोष्ठः कटकोलः पतद्ग्रहः॥"

इति हारावली। ४७॥

प्रोतं, क्ली, (प्र+वेञ् स्यूतौ+क्तः। यङादित्वात् सम्प्रसारणम्।) वस्त्रम्। इति जटाधरः॥

प्रोतं, त्रि, (प्र+वेञ्+क्तः। यङादित्वात् सम्प्रसारणम्।) खचितम्। इति मेदिनी। ते, ३७॥ स्यूतम्। (यथा, श्रीकृष्णचरिते। १५। २५।

"नीरन्ध्रमात्तपरिरम्भविजृम्भणस्य
रम्भोरुभिः सह विलासिजनस्य कामः।
प्रोतं विधातुमिव चेतसि रागसूत्रं
रोमाञ्चसूचिनिचयं प्रचुरीचकार॥")

गुम्फितम्। इति हेमचन्द्रः॥

प्रोतोत्सादनं, क्ली, (प्रोते स्यूते सति प्रोतानां वस्त्राणां वा उत्सादनं उत्तोलनं उद्धालनं वा यत्र।) वस्त्रकुट्टिमम्। छत्रम्। इति त्रिकाण्डशेषः॥

प्रोत्फलः, पुं, (प्रकर्षेण उत्फलतीति। प्र+उत्+फल्+अच्।) वृक्षविशेषः। तत्पर्य्यायः। सिंहलाङ्गूलः २ छड़ी ३ छटा पिङ्गा ५। इति शब्दमाला॥

प्रोत्फुल्लं, त्रि, (प्रकर्षेण उत्फुल्लम्। प्र+उत्+फुल्ल विकासे+कर्म्मरि अच् वा।) विकसितम्। यथा,—

"ये वर्द्धिताः करिकपोलमदेन भृङ्गाः
प्रोत्फुल्लपङ्कजरजःसुरभीकृताङ्गाः।
ते माम्प्रति विधिवशाद्गमयन्ति कालं
निर्द्वेषु चार्कुसुमेषु करीलकेषु॥"

इति भामिनीविलासः॥

प्रोत्साहः, पुं, (प्र+उत्+सह+घञ्।) प्रहर्षोत्साहः। "कर्म्मसु सुकरप्रत्यय उत्साह इति मधुः॥ कर्म्मसु दृढ्यत्नकारको भावः उत्साह

इति रमानाथः ॥ कर्म्मसु प्रत्यय उत्साह इति नयनानन्दः। अश्वत्थे वलोदयम उत्साह इति कैश्चित्।" इत्यमरटीकायां भरतः ॥ (यथा, कथासरित्सागरे । १६ । ६७ ।

"दाहस्याः प्रोत्साहविश्लेषदुःखं यावदृश्यपोहति ।
तावत् पद्मावतीपार्श्वं प्रययुस्ते महत्तराः ॥")

प्रोथ, ऋ च पर्य्याप्तौ। इति कविकल्पद्रुमः ॥(भ्वा०-उभ०-सक०-सेट् ।) रेफयुक्तः। ऋ, प्रपुप्रोथत्। च, प्रोथति प्रोथते। पर्य्याप्तं सामर्थ्यम्। पुप्रोथास्ते न कश्चन। पर्य्याप्तं परिपूर्णता। इति गोविन्दभट्टः। इति दुर्गादासः ॥

प्रोथः, पुं, क्ली, (प्रथते इति। प्रथ् गतौ + "तिथपृष्ठगूथयूथप्रोथाः।" उणा० २ । १२ । इति थक् निपातनात् गुणः। यद्वा, प्रोथते इति। प्रोथ पर्य्याप्तौ + "पुंसि संज्ञायां घः प्रायेण।" ३ । ३ । ११८ । इति घः ।) अश्वनासिका । इत्यमरः । २ । ८ । ४६ ॥ (यथा, माघे ११ । ११ ।

"हिरण्मयीति भूयः शुष्यमग्रे विकीर्णं
पटुतरचपलौष्ठः प्रस्फुरत्प्रोथमश्वः ॥"

शूकरनासिकापि। यथा, देवीभागवते । ५ । २८ । २५ ।

"वाराणां शूकराकारा गूढ़प्रोथा सटाभृता ॥")

प्रोथः, पु, (प्रोथते इति। प्रोथ पर्य्याप्तौ + "पुंसि संज्ञायां घः प्रायेण।" ३ । ३ । ११८ । इति घः। यद्वा, प्रथ् गतौ + "तिथपृष्ठगूथयूथप्रोथाः।" उणा० २ । १२ । इति थक्। निपातनात् गुणः।) घटी। इति मेदिनी। थे, १० ॥ घाटकः। इति त्रिकाण्डशेषः ॥ स्त्रीगर्भः। इति विश्वः ॥ गर्तः। भीषणम्। स्फिक्। अश्वसुखम्। इति संक्षिप्तसारोणादिवृत्तिः ॥

प्रोथः, त्रि (प्रथते इति। प्रथ् गतौ + "तिथपृष्ठगूथयूथप्रोथाः।" उणा० २ । १२ । इति थक्। निपातनात् गुणः।) अध्वगः। इति मेदिनी। थे, १० ॥ प्रथितः। इति त्रिकाण्डशेषः ॥ ख्यापितः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

प्रोथः, पुं, (प्रथ दाहे + भावे घञ्) सन्तापः। इति राजनिर्घण्टः ॥

प्रोषितः, त्रि, (वस् + क्त। ष्टुत्वं। सम्प्रसारणम्। प्रकृष्टदूरं उषितः।) प्रवासगतः। यथा,—

"भार्य्यार्त्ते सदिता दृष्टे प्रोषिते मलिना क्षमा।
मृते म्रियेत या पत्यौ सा स्त्री ज्ञेया पतिव्रता ॥"

इति शुद्धितत्त्वम् ॥

(दूरीभूतः। यथा, कथासरित्सागरे । १ । १४ ।

"पिधित्सतश्चक्षुरधिश्रयो
रुचिरः प्रभामण्डलनिश्चयस्ते।
तीक्ष्णांशोरिव सहजः
प्रोषिततिमिरः करोत्याशाः ॥")

प्रोषितभर्तृका, स्त्री, (प्रोषितो विदेशगतो भर्त्ता यस्याः। समासान्तकप्रत्ययः।) विदेशस्थपतिका। इति शब्दरत्नावली ॥ सा यादिनायिकाभेदः। तस्या लक्षणं यथा। देशान्तरे गते भर्त्तरि सन्तापाकुला प्रोषितभर्तृका। अस्याश्चेष्टा दशावस्था। यथा। मत्यभिलाषः १ चिन्ता २ स्मृतिः ३ गुणोत्कीर्त्तनम् ४ उद्वेगः ५ विलापः ६ उन्मादः ७ व्याधिः ८ जड़ता ९ निधनम् १०। मुग्धा प्रोषितभर्तृका यथा,—

"दुःखं दीर्घतरं वहन्त्यपि सखीवर्गाय नो भाषते
प्रेम्णालेः शृणुतं रुजन्त्यपि पुनः श्वेते न वा लज्जया।
कण्ठे गद्गदवाचमस्यति दृशा धत्ते न वाप्योदकं
सन्तापं सहते यदम्बुजमुखी तद्वेद चेतोभवः ॥"

मध्या प्रोषितभर्तृका यथा,—

"वासस्तदेव वपुषो वलयन्तदेव
हस्तस्य सैव जघनस्य च रत्नकाञ्ची।
वाचालभृङ्गसुभगे सरसौ समस्त-
मन्याधिकं भवति तत् सखि किन्निदानम् ॥"

प्रगल्भा प्रोषितभर्तृका यथा,—

"माला बालाम्बुजदलमयी मौक्तिकी हारयष्टिः
काञ्ची स्थानात् प्रसरति हरौ सुभ्रुवः प्रस्थितेव।
अन्यद्भूमः किमपि धमनौ विद्यते वा नवेति
ज्ञातुं वाञ्छोरुहह वलयं पाणिमूलं प्रयाति ॥"

परकीया प्रोषितभर्तृका यथा,—

"श्वश्रूः पश्यदलं दशति तदपि भ्रूसंज्ञया गृह्यते
सद्यो मर्म्मरुगङ्कया न च तया संस्पृश्यते प्राणिना।
यातुर्वाचि सुहृज्जनस्य वचसा प्रत्युत्तरं दीयते
श्वासः किन्तु न सूच्यते हुतवहक्रूरः क्रुरङ्गीदृशा ॥"

सामान्यवनिता प्रोषितभर्तृका यथा,—

"विरहविदितमन्तःप्रेम विज्ञाय कान्तः
पुनरपि वसु तस्मादेत्य मे दास्यतीति।
मरिचनिचयमश्नोर्न्यस्य वाप्योदविन्दून्
क्षणति च पुरयोषिद्वारदेशोपविष्टा ॥"

इति रसमञ्जरी ॥

(अस्याः अकर्त्तव्यं यदुक्तं चिन्तामणौ तदृयथा,

"हास्यं परगृहे यानं समाजोत्सवदर्शनम्।
क्रीड़ां शरीरसंस्कारं त्यजेत् प्रोषितभर्तृका ॥")

प्रोष्ठः, पुं, (प्रकृष्टः ओष्ठोऽस्येति। "ओत्योष्ठयोः समासे वा।" १ । १ । ६४ । इत्यस्य वार्त्तिकोक्त्या साधुः।) प्रोष्ठीमत्स्यः इत्यमरटीकायां रायमुकुटः ॥ (जनपदविशेषः। यथा, महाभारते । ६ । ६ । ६१ ।

"शूद्रकाः कोरकाः प्रोष्ठाः समवेगवशास्तथा ॥"

गौः। इति सिद्धान्तकौमुदी। ५ । ४ । १२०१)

प्रोष्ठपदः, पुं, (प्रोष्ठौ गौस्तस्येव पादौ यस्य सः। "सुप्रातसुश्वसुदिवेति।" ५।४।१२०। इति अच् प्रत्ययेन साधुः। प्रोष्ठपदो नवत्रविशेषस्तदृयुक्ता पौर्णमासी यत्र मासे। अण्, पक्षे न वृद्धिः।) भाद्रमासः। इत्यमरः ॥ (नक्षत्रविशेषः। यथा, महाभारते । ६ । ३ । १४ ।

"शुक्रः प्रोष्ठपदे पूर्वे समारुह्य विरोचते ॥"

यथा च मार्कण्डेये । ३३ । १५ ।

"अजाविकं प्रोष्ठपदे विन्देद्वावांश्चघोत्तरे ॥"

गोतुल्यपदयुक्ते, त्रि । इति व्याकरणम् ।)

प्रोष्ठपदाः, स्त्री, (प्रोष्ठो गौस्तस्येव पादा यासाम्। "सुप्रातसुश्वेति।" ५ । ४ । १२० । इति बहुव्रीहावच् पक्षावच्च निपातितः।) पूर्व्वभाद्रपदनक्षत्रम् २५। उत्तरभाद्रपदनक्षत्रम् २६। तत्पर्य्यायः। भाद्रपदाः २। इत्यमरः। १ । ३ । २२ ॥ हे पूर्व्वभाद्रपदोत्तरभाद्रपदासु प्रोष्ठौ गौः भद्रश्च गौः तस्येव पाद यासां तासघा। पूर्व्वे प्रोष्ठपदे हे उत्तरे तु भाद्रपदे हे समुदायचासां चतुःसंख्य इति बहुवचनम्। कदा पूर्व्वे प्रोष्ठपदे कदा उत्तरे प्रोष्ठपदे इति तारकयोर्भिन्नाद्बिवचनम्। इति भरतः ॥ भाद्रपदशब्देन तारकाविशेषाणां समुदाय उच्यते तिरोहितावयवभेदपक्षे एकवचनम्। प्रोष्ठपदाशब्दस्तूद्भिन्नावयवभेदपक्षे बहुवचनमिति मैत्रेयः। इति रायमुकुटः ॥

प्रोष्ठपदी, स्त्री, (प्रोष्ठपदाभिर्युक्ता पौर्णमासी। अण्। स्त्रियां ङीप्।) भाद्री पूर्णिमा। यथा,—

"प्रोष्ठपद्यामतीतायां तथा क्षीणा त्रयोदशी।
एतांस्तु श्राद्धकालान् वै नित्यानाह प्रजापतिः॥"

इति तिथ्यादितत्त्वम् ॥

अपि च।

"लिखित्वा तत्र यो दद्याद्गोमसिंहसमन्वितम्।
प्रोष्ठपद्यां पौर्णमास्यां च याति परमां गतिम्॥"

इति श्रीभागवतटीकायां श्रीधरस्वामी ॥

प्रोष्ठपाद्, त्रि, (प्रोष्ठपद + "सन्धिवेलेति।" ४ । ३ । १६ । इत्यण्। "ये प्रोष्ठपदागाम।" ७ । ३ । १८ । इति उत्तरपदस्याचामादेरचो वृद्धिः।) प्रोष्ठपदासु जातः। इति सिद्धान्तकौमुदी ॥

प्रोष्ठी, स्त्री, पुं, (प्रकृष्टः ओष्ठो यस्याः। "ओष्ठोत्वयोः समासे वा।" नासिकोदरौष्ठेति पाते-रिति वा ङीष्।) मत्स्यभेदः। पुँटी माछ इति भाषा। तत्पर्य्यायः। शफरी २ शफरः ३। इत्यमरः ॥ श्वेतकोलः ४। इति शब्दरत्नावली ॥ तस्या गुणाः। स्निग्धत्वम्। कटुत्वम्। स्वादुत्वम्। शुक्रकारित्वम्। कफवातनाशित्वञ्च इति राजवल्लभः ॥ स्निग्धत्वम्। वात्यकफरोगनाशित्वम्। श्लेष्मत्वञ्च। इति राजनिर्घण्टः ॥

प्रोष्ठः, पुं, (प्रोच्छते वितर्क्यते विस्मयाकुलितैरिति। प्र + ऊछ् + घञ्।) दक्षिणरथः। पर्व्व। इति विश्वमेदिन्यौ। थे, ५। गजपरस्परपर्व्व। इति त्रिकाण्डशेषशब्दरत्नावल्यौ ॥

प्रोष्ठः, त्रि, (प्रकर्षेण ऊछते वितर्क्यतेऽसौ। प्र + ऊछ् + कः।) निपुणः। (प्र + ऊछ् + भावे घञ्।) तर्कः। इति मेदिनी। थे, ६ ॥

प्रौढ़, त्रि, (प्रोच्छते स्मेति। प्र + वह् + क्तः। सम्प्रसारणम्। "प्राद्वहोढ़ोढ्यवेषेषु।" इति वृद्धिः।) वर्द्धितम्। तत्पर्य्यायः। प्रवृद्धम् २ सोपचितम् ३। इत्यमरः। ३ । १ । ७६ ॥ (यथा, मेघदूते । २७ ।

"त्वत्सम्पर्कात् पुलकितमिव प्रौढ़पुष्पैः कदम्बैः।"

प्रगल्भः। इति हेमचन्द्रः। ६। १३१॥ (यथा, रघुः। ६। ५८।
"त्रासान्तिमाक्षतटुनैः स्मरतः सुनेत्रैः
प्रौढ़प्रिया नयनविभ्रमचेष्टितानि॥")
निपुणः। इति राजनिर्घण्टः॥ (यथा, भागवते। ३। २। ६।
"इन्द्रियज्ञाः पुरुप्रौढ़ा एकारामाश्च सात्वताः॥")
प्रकर्षेण ऊढ़श्च॥

प्रौढ़पादः, पुं, (प्रौढ़ः पादो यस्य।) आसनारोपितपादतलः। आसनोपरिपादतलद्वयसंयोगपूर्व्वकोपवेशः। वस्त्रादिना ऋजुपृष्ठजानुजङ्घाबन्धः। वस्त्रादिद्वारा पृष्ठजानुजङ्घाद्वयदृढ़बन्धनपूर्व्वकोपवेशः। यथा,—
"आसनारूढ़पादस्तु जानुनोर्जङ्घयोस्तथा।
ऋतावसक्थिको यस्तु प्रौढ़पादः स उच्यते॥
ज्ञानमाचमनं होमं भोजनं देवतार्चनम्।
प्रौढ़पादो न कुर्व्वीत स्वाध्यायं पितृतर्पणम्॥"
इति कात्यायनः॥ ९॥
अनेकोद्वाहे दारग्रिये भूमिसमे दृष्टकाश्च संज्ञीर्णीभूता इति बौधायनवचनात्तथाविधे आरूढ़पादोऽपि कुर्य्यात्। इत्याह्निकतत्त्वम्॥

प्रौढ़ा, स्त्री, (प्रौढ़+टाप्।) नायिकाभेदः। तत्पर्य्यायः। चिरिण्टी २ सुवया ३ श्यामा ४ दृढ़व्रता ५। इति राजनिर्घण्टः॥ यथा,—
"बाला तु तरुणी प्रौढ़ा दृढ़ा भवति नायिका।
गुणयोगेन रन्तव्या नारी वश्या भवेत्तदा॥"
त्रिंशद्वर्षादूर्द्धं पञ्चपञ्चाशद्वर्षपर्य्यन्तं प्रौढ़ावस्था। यथा,—
"त्रयोविंशी भवेद्बाला तरुणी त्रिंशता मता।
पञ्चपञ्चाशती प्रौढ़ा भवेद्वृद्धा ततः परम्॥"
अस्या वश्यत्वकारणं यथा,—
"अलङ्कारादिभिर्बाला तरुणी रतियोगतः।
प्रेमदानादिभिः प्रौढ़ा वृद्धा च दृढ़ताड़नात्॥"
तस्या रमणे दोषो यथा,—
"बाला तु प्राणदा प्रोक्ता तरुणी प्राणहारिणी।
प्रौढ़ा करोति दृढ़त्वं वृद्धा मरणदा भवेत्॥"
इति रतिमञ्जरी॥
सुग्धादिविविधान्तर्गतप्रगल्भा नायिका। तस्याः प्रौढ़ा लक्षिता यथा,—
"सानुद्वेगं विषद्यपन्नालदृशः पादाम्बुजालक्तकैरालिप्तानगमानतोऽक्षतसुखी चित्रार्पितेवाभवत्।
रुद्धं नोक्तवती न वा कृतवती निश्वासकोष्णाधरः
प्रातर्मङ्गलमङ्गला करतलादादर्शमादर्शयत्॥"
प्रौढ़ा कलहान्तरिता यथा,—
"अकरोः किमु नेत्रयोरिमानं
किमकार्षीः करपल्लवे निरोधम्।
कलहं किमधाः क्रुधा रसज्ञे
प्रियमर्थं न विदन्ति दैवदृष्टाः॥"
प्रौढ़ा उत्कण्ठिता यथा,—
"भ्रातर्मुञ्चसखियूथिरसालवल्ली
मातस्तमस्विनि पितस्त्वमिर प्रसीद।
पृच्छामि किञ्च नवनीरधराभिरामो
दामोदरः कथय किं न समाजगाम॥"
प्रौढ़ा वासकसज्जा यथा,—
"क्षतं वपुषि भूषणं चिकुरधोरणी धूपिता
कृता शयनसन्निधौ क्रमुकवीटिकासम्भृतिः।
अकारि हरिणीदृशा भवनमेत्य देहत्विषा
स्फुरत्कनककेतकीकुसुमकान्तिभिर्दुर्दिनम्॥"
प्रौढ़ाभिसारिका यथा,—
"स्फुरदुरुनिजभारभङ्गुराङ्गी
किसलयकोमलकान्तिना पदेन।
अथ कथय कथं सहेन गन्तुं
यदि न निशासु मनोरथो रथः स्यात्॥"
प्रौढ़ा प्रवत्स्यत्पतिका यथा,—
"नायं सृजति सुभ्रुवामपि तनुत्यागे वियोगज्वरस्तेनाहं विहिताञ्जलिर्यदुपते! पृच्छामि सत्यं वद।
ताम्बूलं कुसुमं पटीरमुदकं यन्नुम्भिर्दीयते
तत् स्यादत्र परत्र वा किमु विषज्वालावली-
दुःसहम्॥"
इति रसमञ्जरी॥
अन्यत् प्रगल्भाशब्दे द्रष्टव्यम्॥

प्रौढ़िः, स्त्री, (प्र+वह+क्तिन्। प्राडूहेति वृद्धिः।) सामर्थ्यम्। इति सुग्धबोधव्याकरणम्॥ तत्पर्य्यायः। उत्साहः २ प्रगल्भता ३ अभियोगः ४ उद्यमः ५ उद्योगः ६ कियदैनिका ७ अध्यवसायः ८ ऊर्জ্জ्ব ९। इति हेमचन्द्रः। २। २१४॥ (यथा, कथासरित्सागरे। १४। ६३।
"यथा यथा च दम्पत्योः प्रौढ़िं परिचयो ययौ।
तयोस्तथा तथा प्रेम नवीभावमिवाययौ॥")

प्रौढ्यः, त्रि, (प्र+ओण् अपनयने+क्यच्।) निपुणः। इति केचित्॥

प्रौष्ठपदः, पुं, (प्रोष्ठौ गौरस्त्रेव पादौ यासामिति प्रौष्ठपदा नक्षत्रविशेषाः। तद्युक्ता पौर्णमासी। प्रोष्ठपद+"नक्षत्रेण युक्तः कालः।" ४।२।३। इति अण्। ङीप्। प्रौष्ठपदी पौर्णमास्यस्मिन्। प्रौष्ठपदी+"सास्मिन् पौर्णमासीति।" ४।२।२१। इति अण्।) भाद्रमासः। इत्यमरः। १।३।२२॥ (यथा, महाभारते। १३। १०६। २८।
"प्रौष्ठपदन्तु यो मासमेकाहारो भवेन्नरः।
धनाढ्यं स्फीतमचलमैश्वर्य्यं प्रतिपद्यते॥"
प्रौष्ठपदासु भवे, त्रि। इति सिद्धान्तकौमुदी। ७। ३। १८।)

प्रौहः, पुं, (प्र+ऊह+कः। प्राडूहेति वृद्धिः।) प्रकर्षेणोहः। इति सुग्धबोधव्याकरणम्।

प्लक्ष, ञ भक्षणे। इति कविकल्पद्रुमः॥ (भ्वा०-उभ०-सक०-सेट्।) अन्तःस्थतीययुक्तः। ञ, प्लक्षति प्लक्षते। इति दुर्गादासः॥

प्लक्षः, पुं, (प्लक्ष्यते भक्ष्यते विहगादिभिरिति। प्लक्ष+कर्म्मणि घञ्।) वृक्षविशेषः। पाकुड़ इति भाषा। तत्पर्य्यायः। जटी २ पर्कटी ३। इत्यमरः॥ पर्कटिः ४ प्लक्षा ५ शीघ्रा ६ जटिः ७। इति शब्दरत्नावली॥ कपीतनः ८ क्षीरी ९ सुपार्श्वः १० कमण्डलुः ११ यज्ञी १२ अवरोहशाखी १३ गर्दभाण्डः १४ कपीतकः १५ दृढ़प्ररोहः १६ शवकः १७ शवङ्गः १८ महाबलः १९॥ वृक्षवर्गपर्य्यायः। वृक्षः २० सुशीतः २१ शीतवर्य्यकः २२ पुष्टः २३ महावरोहः २४ वृक्षपर्णः २५ पिम्बरिः २६ भिङ्गुरः २७ मङ्गलच्छायः २८। अस्य गुणाः। कटुत्वम्। कषायत्वम्। शिशिरत्वम्। रक्तदोषमूर्च्छाभ्रमप्रलापनाशित्वञ्च। इति राजनिर्घण्टः॥ व्रणयोनिगददाहपित्तकफशोथरक्तपित्तनाशित्वम्। पर्कटी च स्त्रियामपि। इति भावप्रकाशः॥ कन्दरालवृक्षः। द्वीपभेदः। अश्वत्थवृक्षः। इति मेदिनी। षे, ९७॥ पचकः। इति हेमचन्द्रः॥

प्लक्षद्वीपः, पुं, (प्लक्षतरूपलक्षितो द्वीपः।) सप्तद्वीपान्तर्गतद्वीपविशेषः। तस्य विवरणं यथा,
सूत उवाच।
"जम्बुद्वीपस्य विस्तारादिगुणेन समन्ततः।
संवेष्टयित्वा क्षीरोदं प्लक्षद्वीपो व्यवस्थितः॥
प्लक्षद्वीपे च विप्रेन्द्राः सप्तासन् कुलपर्व्वताः।
ऋज्वायताः सुपर्व्वाणः सिद्धसंघनिषेविताः॥
गोमेदः प्रथमस्तेषां द्वितीयश्चन्द्र उच्यते।
नारदो दुन्दुभिश्चैव सोमश्च ऋषभस्तथा॥
विभ्राजः सप्तमः प्रोक्तो ब्रह्मणोऽत्यन्तवल्लभः।
तत्र देवर्षिगन्धर्व्वैः सिद्धैश्च भगवानजः॥
उपास्यते स विश्वात्मा साक्षी सर्व्वस्य विश्वसृक्।
तेषु पुण्या जनपदा नाधयो व्याधयोऽपि च॥
न तत्र पापकर्त्तारः पुरुषा वा कदाचन।
तेषां नद्यः सप्त चैव वर्षाण्यासु समुद्रगाः॥
तासु ब्रह्मर्षयो नित्यं पितामहमुपासते।
अनुतप्ता शिखी चैव विपाशा त्रिदिवा ऋता॥
अन्तता सुकृता चैव गौमतः परिकीर्त्तिताः।
क्षुद्रनद्यश्च संख्याता सरांसि सुबहून्यपि॥
न वै तेषु युगावस्थाः पुरुषा वै चिरायुषः।
आर्य्यकाः कुरवश्चैव विदशा भाविनस्तथा॥
ब्रह्मक्षत्रियविट्शूद्रास्तस्मिन् द्वीपे प्रकीर्त्तिताः।
इज्यते भगवान् सोमो वर्णैश्च निवासिभिः॥
तेषाञ्च सोमसायुज्यं सारूप्यं सुनिपुङ्गवाः।
सर्व्वे धर्म्मपरा नित्यं नित्यं मुदितमानसाः॥
पञ्चवर्षसहस्राणि जीवन्ति च निरामयाः॥"
इति कौर्म्मे भुवनकोषे ४६ अध्यायः॥ *॥
अपि च "ऋषिरुवाच। अतःपरं प्लक्षादीनां प्रमाणलक्षणसंस्थानतो वर्षविभाग उपवर्ण्यते। जम्बुद्वीपो यावत्प्रमाणविस्तारस्तावता क्षारोदधिना परिवेष्टितो यथा मेरुर्जम्बूवृक्षेण। लवणोदधिरपि ततो द्विगुणविशालेन प्लक्षाख्येन परिक्षिप्तो यथा परिखा बाह्योपवनेन। प्लक्षो नामप्रमाणो द्वीपाख्यातिकरो हिरण्मय उत्थितो यत्राग्निरुपास्ते सप्तजिह्वः। तस्याधिपतिः प्रियव्रतात्मज इध्मजिह्वस्तं द्वीपं सप्तवर्षाणि विभज्य सप्तवर्षनामभ्य आत्मजेभ्य आकलय्य स्वयमात्मयोगेनोपरराम। शिवं वयसं सुभद्रं शान्तं क्षेम-

मन्दतमभयमिति वर्षाणि। तेषु गिरयो नद्यश्च सप्तैवाभिज्ञाताः। मणिकूटो वज्रकूट इन्द्रसेनो ज्योतिष्मान् सुवर्णो हिरण्यष्ठीवो मेघमाल इति सेतुशैलाः। अरुणा नृमणा आङ्गिरसी सावित्री सुप्रभाता ऋतम्भरा सत्यम्भरेति महानद्यः। यासां जलोपस्पर्शनविधूतरजस्तमसो हंसपतङ्गोर्ध्वायनसत्याङ्गसंज्ञाश्चत्वारो वर्णाः सहस्रायुषो विबुधोपमसन्दर्शनप्रजनना: स्वर्गद्वारं त्रय्या विद्यया भगवन्तं त्रयीमयं सूर्य्यमात्मानं यजन्ते। प्रत्रस्य विष्णो रूपं यत् सत्यस्य ब्रह्मणः। अन्तस्थं च मृत्योश्च सूर्य्यमात्मानमीमहीति॥ प्रज्ञादिषु पञ्चसु पुरुषाणामायुरिन्द्रियमोजः सहो बलं बुद्धिर्विक्रम इति च सर्व्वेषामौत्पत्तिकी सिद्धिरविशेषेण वर्त्तते। प्रज्ञया समानेनेच्छु रसोदेनाहृतः।" इति श्रीभागवते ५ स्कन्धे २० अध्यायः॥

स्रव, ऽ गत्याम्। (भ्वा०-आत्म०-सक०-सेट्।) अन्तःस्थलतीययुक्तः। ऽ, स्रवते। भ्रु ऽ इत्यनेनेषेऽसिद्धे अस्य पाठः स्रविष्यते स्रवते इत्यादि सिद्ध्यर्थः। इति दुर्गादासः॥

स्रवं, क्ली, (स्रवते इति। भ्रु+अच्।) कैवर्त्तीमुस्तकम्। (अस्याः पर्य्यायो यथा,—
"कुटन्नटं दासपुरं वालेयं परिपेलवम्।
स्रवगोपुरगोनर्दकैवर्त्तीमुस्तकानि च॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥) गन्धद्रव्यम्। इति मेदिनी। वे, १८॥ स्रुतगे, त्रि॥

स्रव, पुं, (भ्रु+"ऋदोरप्।" ३। ३। ५७। इत्यप्।) स्रवणम्। (यथा, हरिवंशे। १२२। १०१।
"सागरानूपविपुलां प्रागुदक्स्रवणोत्तराम्।
सर्व्वतोऽधिमध्यस्थामभेद्यां त्रिदशैरपि॥"
स्रूयतेऽनेनेति करणे अप्।) भेलः। (यथा, सुश्रुते। १। २। ७।
"स्रवा क्षते व्रणहरा यत्प्रलेपा
व्रणादशोक्तमवरं येषु कर्म्म।
एतच्छ्रेयो येऽभिनन्दन्ति मूढा
जराग्न्यर्त्तं ते पुनरेवापि यन्ति॥"
स्रवते सन्तरतीति। भ्रु+अच्।) भेकः। अविः। शशः। कपिः। जलकाकः। (यथा, सुश्रुते। १। ४६।
"स्रवानाभिष्वरसास्रवः॥")
कुलकः। प्रवणः। पर्कटीद्रुमः। कारण्डवविहगः। शब्दः। प्रतिगतिः। इति मेदिनी। वे, १६॥ प्रेरणम्। शब्दः। इति शब्दरत्नावली॥ जलान्तरम्। इति हेमचन्द्रः। ३। ५४३॥ पल्वलः। इति त्रिकाण्डशेषः॥ पोलो इति भाषा॥ जलकुक्कुटः। इति मिताक्षरा॥ (यथा, मनौ। ५। १२।
"कलविङ्कं प्लवं हंसं चक्राङ्गं ग्रामकुक्कुटम्।
सारसं रज्जुवालञ्च दात्यूहं शुकसारिके॥"
यक्षविशेषः। यथा, रामायणे। २। ११०। ३। ४३।
"रथाङ्गहंसा नद्यूहाः प्लवाः कारण्डवाः परे।
तथा पुंस्कोकिलाः क्रौञ्चा विसंज्ञा भेजिरे दिशः॥"
"प्लवा वकविशेषाः।" इति तट्टीकायां रामानुजः॥) जलचरपक्षिमात्रम्। यथा,—
"हंससारसकाचाचवकक्रौञ्चसरारिकाः।
नन्दीमुखी सकादम्बा बलाकाद्याः प्लवाः स्मृताः॥
प्लवन्ते सलिले यस्मादेते तस्मात् प्लवाः स्मृताः॥"
एतेषां मांसगुणाः।
"प्लवाः पित्तहराः स्निग्धा मधुरा गुरवो हिमाः।
वातश्लेष्मप्रदाश्चापि बलशुक्रकराः सराः॥"
इति भावप्रकाशः॥

प्लवकः, पुं, (प्लवते इवेति। प्लु+अच्। ततः स्वार्थे संज्ञायां वा कन्।) खड्गधारादिनर्त्तकः। तत्पर्य्यायः। केलकः २। इति त्रिकाण्डशेषः॥ केकलः ३ नर्त्तुः ४ केलिकोषः ५ कलायनः ६। इति शब्दरत्नावली॥ चण्डालः। इति हलायुधः॥ (सन्तरणोपजीवी। यथा, महाभारते। १३। २३। १५।
"गायना नर्त्तकाश्चैव प्लवका वादकास्तथा।
कथका योधकाश्चैव राजन्नार्हन्ति केतनम्॥")
भेकः। शशः। इति राजनिर्घण्टः॥

प्लवगः, पुं, (प्लवेन प्लुतगत्या गच्छतीति। गम+"अन्येष्वपि दृश्यते।" ३। २। १०१। इति डः।) वानरः। (यथा, रघुवंशे। १२। ७०।
"स सेतुं बन्धयामास प्लवगैर्लवणाम्भसि।
रसातलादिवोष्मागं पूर्वं स्वप्नाय शार्ङ्गिणः॥")
भेकः। सूर्य्यसारथिः। इति मेदिनी। गे, ४२॥ प्लवपक्षी। इति शब्दरत्नावली॥ शिरीषवृक्षः। इति राजनिर्घण्टः॥

प्लवगतिः, पुं, (प्लवेन गतिर्यस्य।) भेकः। इति शब्दचन्द्रिका॥ (प्लवस्य भेकादेर्गतौ प्लुतगतौ च, स्त्री॥)

प्लवङ्गः, पुं, (प्लवेन प्लुतगत्या गच्छतीति। गम+"गमश्च।" ३। २। ४७। इति खच्। "खच डिद्वा वाच्यः।" इति डित्। डित्वात् टेर्लोपः। सुमागमः।) वानरः। इत्यमरः। २। ५। ३॥ (यथा, रामायणे। २। २५। १८।
"प्लवङ्गा दंशिका दंश्या मशकाश्चैव कानने।
सरीसृपाश्च कीटाश्च मामभूवन् गहने तव॥"
"प्लवङ्गा वानराः।" इति तट्टीकायां रामानुजः॥) रुग्णः। इति शब्दचन्द्रिका॥ प्रज्ञवृक्षः। इति राजनिर्घण्टः॥

प्लवङ्गमः, पुं, (प्लवेन गच्छतीति। गम+"गमश्च।" ३। २। ४७। इति खच्। सुमागमः।) भेकः। वानरः। इत्यमरः। ३। ३। १६७॥ (यथा, रामायणे। ४। ६२। ११।
"एष्यन्ति प्रेषितास्तत्र रामदूताः प्लवङ्गमाः।
आख्येया राममहिषी त्वया तेभ्यो विशङ्कया॥")
प्लुतगतियुक्ते, त्रि॥

प्लवनः, त्रि, (प्लवते इति। प्लु+ल्यु।) प्रवणः। क्रमनिम्नभूम्यादिः। यथा,—
"प्रागुदक्प्लवनां भूमिं कारयेत् यत्नतो नरः।
इति तिथ्यादितत्त्वे मत्स्यपुराणम्॥
(क्ली, प्लु+ल्युट्। प्लवः। यथा,—
"शयनस्थासनं वापि नेच्छेद्वापि प्लवोत्तरम्।
नाप्लावितौ न प्लवनं न यानं नापि वाहनम्॥
इति सुश्रुते सूत्रस्थाने ४६ अध्यायः॥)

प्लाक्षं, क्ली, (प्लक्षस्य फलम्। "प्लक्षादिभ्योऽण्।" ४। ३। १६४। इत्यण्। विधानसामर्थ्यात् तस्य फले न लुक्।) प्लक्षवृक्षस्य फलम्। इत्यमरः। २। ४। १८॥ प्लक्षस्य विकारः। प्लक्षस्य समूहः। प्लक्षस्य भावः। प्लक्षस्येदम्। प्लक्षस्य हितम्। इत्यादि व्याकरणम्॥ (प्लक्षसम्बन्धिनि, त्रि। यथा,—
"नैयग्रोध औदुम्बर आश्वत्थ प्लाक्ष इङ्गीयो भवन्त्येते वै गान्धर्व्वाप्सरसां गृहाः स्म एव॥"
इति तैत्तिरीयसंहितायाम्। ३। ४। ८। ४।)

प्लावनं, क्ली, (प्लु+णिच्+ल्युट्।) प्लवप्रयोजकप्रापणम्। उच्चलन इति भाषा। यथा,—
"तापनं घृततैलानां प्लावनं गोरसस्य च।
तस्माच्चसुहृतं शुद्धेत् कठिनन्तु पयो दधि॥"
इति शुद्धितत्त्वम्॥ *॥
मज्जनम्। बहुतरजलसंयोगः। यथा,—
"एतत् श्रुत्वा वचो राजा प्रातिष्ठत भगीरथः।
यत्र तानि शरीराणि सागराणां महात्मनाम्।
प्लावनार्थं नरश्रेष्ठ! पुण्येन सलिलेन च॥"
इति महाभारते। ३। १११० अध्यायः॥

प्लावितं, त्रि, (प्लु+णिच्+क्तः।) जलादिमध्यानादि। यथा,—
"सुप्रसन्नां सुवदनां करुणार्द्रनिशान्तराम्।
सुधाप्लावितभूपृष्ठामुदगन्धामुपेयुषाम्॥"
इति गङ्गावाक्यावली॥
(यथा च देवीभागवते। २। ८। १०।
"पुरी सा वासुदेवस्य प्लावितोदधिना ततः॥")

श्लिष, ऽ गत्याम्। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) अन्तःस्थलतीययुक्तः। ऽ, श्लेषते। इति दुर्गादासः॥

श्लिहा, [न्] पुं, (श्लेषते वृद्धिं गच्छतीति। श्लिष+कनिन्।) प्लीहरोगः। यथा, यक्ष्मश्लिहान्त्राणि सुखादिव छिद्यन्निति वैद्यकम्। इत्यमरटीकायां भरतः॥ (यथा, याज्ञवल्क्ये। ३। ८४।
"वपावसावृषनं नाभिः क्लोम यकृत् श्लिहा।")

श्लीहन्, पुं, (श्लीहानं हन्तीति। हन+टक्।) वृक्षविशेषः। रोहिड़ा इति ख्यातः। तत्पर्य्यायः। रोही २ रोहितकः ३ श्लीहशत्रुः ४ दाडिमपुष्पकः ५ मांसदलनः ६ यज्ञहेरी ७ चक्षुष्यः ८। इति शब्दचन्द्रिका॥ रोहितेयः ९ रोहितः १० रेफीतकः ११ रोही १२। इति शब्दरत्नावली॥ (अस्य गुणाः रोहितकशब्दे द्रष्टव्याः।)

श्लीहशत्रुः, पुं, (श्लीहः शत्रुर्नाशकत्वात्।) श्लीहवृक्षः। इत्यमरः। २। ४। ६८॥ (यथा, वैद्यकरत्नमालायाम्।
"रोही रोहितकः श्लीहशत्रुर्दाडिमपुष्पकः॥")

श्लीहा, स्त्री, (श्लिह + कः। पृषोदरादित्वात् दीर्घः। स्त्रियां टाप्।) श्लिहरोगः। यथा, यशतश्लीहे च सम्बन्धे। इति बालकाश्यः। इत्यमरटीकायां भरतः॥

श्लीहा, [न्] पुं, (श्लिह + "श्वयुवचनृपूषन्श्लीहश्लिति।" उणा० १। १५८। इति कनिन् प्रत्ययेन साधुः।) कुक्षिवामपार्श्वस्थमांसखण्डम्। पिला इति ख्यातम्। तत्पर्य्यायः। गुल्मः २ प्लिहा ३। इत्यमरभरतौ॥ अस्य निदानम्।

"विदाह्यभिष्यन्दिरतस्य जन्तोः
प्रदुष्टमत्यर्थमसृक् कफश्च।
प्लीहाभिवृद्धिं कुरुतः प्रवृद्धौ
प्लीहोत्यमेतच्चतुरं वदन्ति॥
तच्छ्यामपार्श्वे परिवृद्धिमेति
विप्लेषतः सीदति चातुरोऽत्र।
मन्दज्वराग्निः कफपित्तलिङ्गै-
रुपद्रुतः क्षीणबलोऽतिपाण्डुः॥"

इति माधवकरः॥ * ॥

रक्तजस्य तस्य लक्षणम्।

"क्लमो भ्रमो विदाहश्च वैवर्ण्यं गात्रगौरवम्।
मोहो रक्तोद्गमश्च ज्ञेयं रक्तजलक्षणम्॥"*॥

पैत्तिकस्य तस्य लक्षणम्।

"सज्वरः सपिपासश्च सदाहो मोहसंयुतः।
पीतगात्रो विशेषेण प्लीहा पैत्तिक उच्यते॥"

श्लैष्मिकस्य तस्य लक्षणम्।

"प्लीहा मन्दज्वरः स्थूलः कठिनो गौरवान्वितः।
अरोचकयुतः शीतः प्लीहा कफज उच्यते॥"

वातिकस्य तस्य लक्षणम्।

"नित्यमानद्धकोष्ठः स्यान्नित्योदावर्त्तपीडितः।
वेदनाभिः परीतश्च प्लीहा वातिक उच्यते॥
दोषचित्तयरूपाणि प्लीह्नश्चासाध्ये भवन्ति हि॥"

अथ तस्य चिकित्सा।

"पानयो युक्तितः क्षारः क्षीरेणोदधिशुक्तिजः।
तथा दुग्धेन पातव्याः पिप्पल्यः प्लीहशान्तये॥१॥
अर्कपत्रं सलवणं पुटदग्धं सुचूर्णितम्।
निहन्ति मस्तुना पीतं प्लीहानमपि दारुणम्॥२॥
हिङ्गु त्रिकटुकं कुष्ठं यवक्षारश्च सैन्धवम्।
मातुलुङ्गरसापेतं प्लीहशूलहरं रजः॥३॥
पालाशक्षारतोयेन पिप्पली परिभाविता।
प्लीहगुल्मार्त्तिशमनी वह्निमान्द्यहरी मता॥४॥
रसेन जम्बीरफलस्य शुद्ध-
नाभीरजः पीतमवश्यमेव।
शाणप्रमाणं भ्रमयेदशेषं
प्लीहामयं कूर्मसमानमाशु॥५॥
शूरपुङ्खमूलकल्कसक्रियालोड़ितः पीतः।
प्लीहानं यदि न हरते शैलोऽपि तदा जले
भवते॥६॥
सुपक्वसक्षारस्य रसः क्षौद्रसमन्वितः।
पीतः शमयत्येव प्लीहानं नेह संशयः॥७॥
सुस्निग्धं शालालीपुष्पं निशापर्युषितं नरः॥
राजिकाचूर्णसंयुक्तं खादेत् प्लीहोपशान्तये॥८॥

इति भावप्रकाशः॥ * ॥

"पिप्पलीमधुपानाच्च यथा मधुरभोजनात्।
प्लीहा विनश्यते क्षिप्रं इति॥ ९॥
केतकीपत्रजं क्षारं घृतेन सह भक्षयेत्।
तक्रेण शूरपुङ्खाभ्यां पीत्वा प्लीहां विना-
शयेत्॥" १०॥

इति गारुडे १८७। १८८ अध्यायौ॥

("शोणितकफप्रसादजं हृदयं तदाश्रया हि ध्वनयः प्राणवहाः। तस्याधो वामतः प्लीहा फुप्फुसश्च॥" इति सुश्रुते शारीरस्थाने चतुर्थेऽध्याये॥ अस्य सहेतुकलक्षणादीनि यथा,—

"अग्नितस्यातिसंक्षोभाद् यानयानाभिचेष्टितैः।
अतिव्यवायभाराध्वधमनव्याधिकर्षणैः॥
वामपार्श्वाश्रितः प्लीहा क्षुतः स्थानात् प्रवर्द्धते।
शोणितं वा रसादिभ्यो विवृद्धत्वं विवर्द्धयेत्॥

इति तस्य प्लीहा कठिनोऽश्मीलेवादौ वर्द्धमानः कुक्षेरुपसंस्थान उपलभ्यते स चोपेक्षितः क्रमेण कुक्षिं जठरमन्याधिष्ठानञ्च परिक्षिपन्नुदरमभिनिर्वर्त्तयति॥

तस्य रूपाणि। दौर्ब्बल्यारोचकाविपाकवर्च्चोमूत्रग्रहतमःपिपासाङ्गमर्द्दच्छर्द्दिमूर्च्छाङ्गसादकासश्वासश्वदुज्वरानाहाग्निनाशकार्श्वांस्यवैरस्यपर्व्वभेदकोष्ठवातशूलान्यपि चोदरमरुग्यवर्णं विवर्णं वा नीलहरितहारिद्ररात्रिमद्भवति।"

चिकित्सास्य यथा,—

"पिप्पलीं तिन्तिडीकं हिङ्गु नागरं हस्तिपिप्पलीम्।
भल्लातकं शिग्रुफलं त्रिफलां कटुरोहिणीम्॥
देवदारुहरिद्रे द्वे सरलातिविषे वचाम्।
कुष्ठं मुस्तं तथा पञ्च लवणानि प्रकल्प्य च।
घृतसर्षपतैलाभ्यां युक्तानि दाहयेत्॥
अन्तर्धूममतः क्षारात् विड़ालपदकं पिबेत्।
मदिरा दधिमण्डोष्णजलारिष्टसुरासवैः॥
क्षुद्रोगं भयधुं गुल्मं प्लीहार्शो जठराणि च।
विसूचिकासुदावर्त्तं वातष्ठीलाञ्च नाशयेत्॥"

इति चरके चिकित्सास्थाने ऽष्टादशेऽध्याये॥)

प्लीहारिः, पुं, (प्लीहाया अरिः शत्रुसम्भाशकत्वात्।) अश्वत्थवृक्षः। इति शब्दचन्द्रिका॥ (प्लीहनाशकवटिकौषधविशेषः। यथा,—

"हिङ्गुं लौहभस्मापि कर्षं तार्क्ष्यं प्रदापयेत्।
शुद्धसूतं तथा गन्धं कर्षमानं भिषग्वरः॥
गवाक्षिनं पलं भस्म लिम्बाकाङ्क्षित्वचः पलम्।
एवं भागक्रमेणैव कुर्य्यात् प्लीहारिसंज्ञकम्॥
नवगुञ्जामितं खादेदथ नित्यं हि पूतवान्।
प्लीहानं यकृतं गुल्मं हन्त्यवश्यं न संशयः॥"

इति प्लीहारिरसः॥ * ॥

इति वैद्यकरसेन्द्रसंग्रहे प्लीहाधिकारे॥)

प्लीहाशत्रुः, पुं, (प्लीहायाः शत्रुः।) प्लीहशत्रुः। प्लीहघ्नवृक्षः। इति जैचित्॥

श्लुचिः, पुं, (श्लुच्यति दहतीति। श्लुच दाहे + "श्लुचिकुचिशुचिभ्यः कसिः।" उणा० ३। १५५। इति कसिः।) अग्निः। इत्युणादिकोषः। क्षेहः। दहदाहः। इति संक्षिप्तसारोणादिवृत्तिः॥

श्लुच्, ड, सपर्शे। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-अनिट्।) अन्तःस्थतृतीययुक्तः। ड, श्लवते। इति दुर्गादासः॥

श्लुतं, क्ली, (श्लु + क्तः।) अश्वगतिविशेषः। स च त्वरया भाम्येन गतिः। इत्यमरभरतौ॥ (यथा, अश्ववैद्यके। ३। १३२।

"अथ यः पुच्छतोऽस्य शब्दो विशदो ध्वनिः।
अन्तरुत्पद्यते कश्चित्तदश्वश्लुत उच्यते॥")

तिर्य्यग्गतिः। इति कलिङ्गः॥ (यथा, कथासरित्सागरे। २७। १५६।

"तिर्य्यक्चक्रिर्य्यगेवास्य पेतुर्वक्रश्लुता नगाः॥")

श्लुतः, पुं, (श्लुतं श्लुतवद्गतिरस्यास्तीति। श्लुत + अच्।) त्रिमात्रवर्णः। इति मेदिनी। ते, ३५॥ यथा,—

"एकमात्रो भवेद्ह्रस्वो द्विमात्रो दीर्घ उच्यते।
त्रिमात्रस्तु प्लुतो ज्ञेयो व्यञ्जनञ्चार्द्धमात्रकम्॥"

इति दुर्गादासादिधृतप्राचीनकारिका॥

(तथाच।

"दूराह्वाने च गाने च रोदने च प्लुतो मतः॥"

इति च दुर्गादासधृतवचनम्॥

श्लु + क्तः।) भाम्यगतियुक्ते, त्रि॥ (यथा, हरिवंशे। ६८। ८४।

"रामादनन्तरं कृष्णः प्लुतो वै वीर्य्यवत्तरः।
ताभ्यामेव प्लुताभ्याञ्च चरणैस्ताड़ितो गिरिः॥"

अन्तरिङ्गधर्म्मत्वात् ज्ञापितः। यथा, हृदृतुसंहितायाम्। ५। ७४।

"सत्यगते तमसि जगज्जलप्लुतं भवति मुदित-
मभयञ्च॥"

सिक्तः। यथा, याज्ञवल्क्ये। १। २३५।

"अग्नौ करिष्यन्नादाय पृच्छत्यन्नं घृतप्लुतम्॥"

व्याप्तः। यथा, भागवते। ३। २। १७।

"यस्यानुरागप्लुतहासरास-
लीलावलोकप्रतिलब्धमानाः।
व्रजस्त्रियो दृग्भिरनुप्रवृत्त-
धियोऽवतस्थुः किल कृत्यशेषाः॥")

श्लुष, ड दहि। भस्मीकरणे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्। क्वावेट्।) उ, श्लोषित्वा श्लुष्ट्वा। इति दुर्गादासः॥

श्लुष, ग सेके। पूर्त्तौ। स्नेहे। इति कविकल्पद्रुमः॥ (क्र्या०-परस्मै-सक०-स्नेहे चक०-सेट्।) गं, श्लुष्णाति। इति दुर्गादासः॥

श्लुष, य ल दहि। इति कविकल्पद्रुमः॥ (दिवा०-पर०-सक०-सेट्।) अन्तःस्थतृतीययुक्तः। य, श्लुष्यति। ल, अश्लुषत्। प्लुष्लोष। इति दुर्गादासः॥

श्लुषः, पुं, दहनम्। इति श्लुषधातोर्भावे अल्-प्रत्ययः॥

श्लुष्टः, त्रि, (श्लुष् + क्तः। "यस्य विभाषा।" ७। २। १५। इति इट् न।) दग्धः। इत्यमरः। ३। १। ६६॥ (यथा, ऋतुसंहारे। १। २२।

"प्रटुतरवनदाहात् श्लुष्टशष्पप्ररोहाः
प्रखरपवनवेगात् क्षिप्तसंशुष्कपर्णाः॥"

अस्य लक्षणं यथा,—
"तत्र यद्विवर्णं भ्रुव्यतेऽतिमात्रं तत् भ्रुवम् ॥
चिकित्सास्य यथा,—
"दग्धस्योपशमार्थाय चिकित्सा संप्रचक्षते ।
भ्रुवस्याग्निप्रतपनं कार्यमुष्णान्नधौषधम् ॥
शरीरे स्विन्नभूयिष्ठे स्विन्नं भवति शोणितम् ॥
प्रकृत्या क्षुद्रकं शीतं स्कन्दत्यतिशोणितम् ॥
तस्मात् सुखयति क्षिप्रं नतु शीतं कथञ्चन ॥"
इति सुश्रुते सूत्रस्थाने द्वादशोऽध्याये ॥)

भ्रुस, इर् व दाहे । विभागे । इति कविकल्पद्रुमः ॥ (दिवा०-पर०-सक०-सेट् ।) अन्तःस्थतृतीययुक्तः । इर्, अभ्रुसत् अभ्रोसीत् । य, भ्रुस्यति । इति दुर्गादासः ॥

भ्लेव, कृ ड सेवने । इति कविकल्पद्रुमः । (भ्वा०-आत्म०-सक०-सेट् ।) अन्तःस्थतृतीययुक्तः । कृ, अपिभ्लेवत् । ड, भ्लेवते । इति दुर्गादासः ॥

भ्लोषः, पुं, (भ्रुष दाहे + भावे घञ् ।) दाहः । इत्यमरः । ३ । २ । ६ ॥ (यथा, श्रीकण्ठचरिते । ४ । १७ ।
"हरीषु किन्नरीलोकं घत्ते यः भ्लोषविह्वले ।
न्यासीकृतमनङ्गेन भाण्डागारमिव स्वकम् ॥"
पित्तविकारविशेषः । तद्यथा । "पित्तविकारा-श्चत्वारिंशद्दत ऊर्द्धं व्याख्यास्यन्ते । तद्यथा क्लोमश्च भ्लोमश्च दाहश्च दवधुश्च धूमकश्चाम्लकश्च इत्यादिषु ॥" इति चरके सूत्रस्थाने विंशेऽध्याये ॥)

भ्वा, ल भक्षणे । इति कविकल्पद्रुमः ॥ (अदा०-पर०-सक०-अनिट् ।) ल, भ्वाति । इति दुर्गादासः ॥

भ्वा, स्त्री, (भ्वा + भावे क्विप् ।) भक्षणम् । इति त्रिकाण्डशेषः ॥

भ्वातं, त्रि, (भ्वा + क्तः ।) भक्षितम् । इत्यमरः । ३ । १ । ११० ॥

भ्वानं, क्ली, (भ्वा + भावे ल्युट् ।) भोजनम् । इति हेमचन्द्रः । ३ । ८८ ॥

म

म, मकारः । द्वाविंशतितमव्यञ्जनवर्णः । (पवर्गस्य द्वितीयवर्णश्च ।) अस्योच्चारणस्थानं ओष्ठः । इति व्याकरणम् ॥ (यदुक्तं सिद्धान्तकौमुद्याम् ।
"उपूपध्मानीयानामोष्ठौ ॥") तस्य तत्त्वं यथा,—
"मकारं शृणु चार्वङ्गि ! रक्तविद्युल्लतोपमम् ।
चतुर्वर्गप्रदं वर्णं पञ्चदेवमयं सदा ॥
पञ्चप्राणमयं वर्णं सदा त्रिगुणसंयुतम् ।
आत्मादितत्त्वसंयुक्तं त्रिविन्दुसहितं सदा ॥"
इति कामधेनुतन्त्रे पञ्चमपटलः ॥ * ॥
"वक्त्रा वामगता रेखा ततोऽधःसङ्गता भवेत् ।
नमार्द्धदुर्गता भूत्वा दक्षमारभ्य कुण्डली ॥
ब्रह्मा यदस्य विष्णुश्च कुण्डली त्रयरूपिणी ।
मात्रा वामोद्भवितः क्रमशः परिकीर्तिता ॥"
इति वर्णोद्धारतन्त्रम् ॥

तत्पर्य्यायः । ।
"मकारश्च महेशानि ! शिखी चैव जनार्द्दनः ॥"
इति रुद्रयामलोक्तवर्णाभिधानम् ॥
अस्य ध्यानं यथा,—
"प्रलयाम्बुदवर्णाभं ललज्जिह्वां चतुर्भुजाम् ।
भक्ताभयप्रदां नित्यां नानालङ्कारभूषिताम् ॥
एवं ध्यात्वा मकारन्तु तन्मन्त्रं दशधा जपेत् ॥"
इति वर्णोद्धारतन्त्रम् ॥ * ॥
अस्य नामानि यथा,—
"मः सखी दुर्गिणी धूम्रा वामपार्श्वो जनार्द्दनः ।
त्रया पादः शिखा रौद्री फेत्कारः शाखिनी-प्रियः ॥
उमा विहङ्गमः कालः कुञ्जिनीप्रियपावकौ ।
प्रलयाग्निर्नीलपादोऽक्षरः पशुपतिः शूली ॥
फुत्कारो यामिनी वक्त्रा पावनी मोहवह्निनः ।
निष्फलत्वागहङ्कारः प्रयागो ग्रामणीः फलम् ॥"
इति नानातन्त्रशास्त्रम् ॥
(पदादौ अस्य प्रयोगेन भयसम्भावना । यदुक्तं वृत्तरत्नाकरटीकायाम् ।
"दोषः सौख्यं सुदं नः सुखभयमरणक्लेशदुःखं पवर्गः ॥")

मं, क्ली, (मक्ष अवहसने + डः ।) रूक्षोक्तिः । फुत्कृतिः । निष्फलभाषणम् । इति मेदिनी । फे, १ ॥

मः, पुं, यज्ञसाधनम् । स्फानम् । झञ्झावातः । इति मेदिनी । फे, १ ॥ वर्द्धकः । जृम्भानिष्कारः । स्फुटः । फललाभः । इति विश्वः ॥ संज्ञाविशेषः । यथा । "हसोऽन्तः फः । हसौ विरामश्च फसंज्ञः स्यात् ।" इति सुग्धबोधव्याकरणम् ॥

फक्क, अवहसने । भ्वादौ । अनेर्गतौ । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट् ।) कोपधः । फक्कति खलः कुत्सितं अवहरतीत्यर्थः । फक्कति इन्द्रो मन्दं गच्छतीत्यर्थः । इति दुर्गादासः ॥

फक्किका, स्त्री, (फक्क + "धात्वर्थनिर्देशे ण्वुल् वक्तव्यः ।" इति वार्त्तिकोक्त्या ण्वुल् । टापि अत इत्वम् ।) अवहासः । फक्कि इति भाषा । तत्पर्य्यायः । चोद्यम् २ हेत्वम् ३ पूर्व्वपक्षः ४ । इति शब्दरत्नावली ॥ (यथा, नैषधे । २ । ६५ ।
"फणिभाषितभाष्यफक्किका
विषमा कुण्डलनामवापिता ॥")
न्यायसम्बन्धिव्याख्या । यथा,—
"श्रीमता मथुरानाथतर्कवागीशधीमता ।
विषदीकृत्य दर्श्यन्ते द्वितीयमणिफक्किकाः ॥"
इत्यनुमानखण्डटीकारम्भे मथुरानाथः ॥

फञ्जिका, स्त्री, (भनक्ति रोगानिति । भञ्ज आमर्दने + ण्वुल् । पृषोदरादित्वात् भस्य फः । टापि अत इत्वम् ।) ब्राह्मणयष्टिका । इत्यमरः । २ । ४ । ८६ ॥ (यथा, वैद्यकरत्नेन्द्रसार-संग्रहे ज्वराधिकारे दुरधृङ्गामणिरसे ।
"निर्गुण्डी फञ्जिका वासा रविमूलविकण्टकैः ॥"
"फञ्जिका ब्राह्मणयष्टिका ।" इति तट्टीका ।)
देवताड़ः । दुरालभा । इति शब्दचन्द्रिका ।

फञ्जिपत्रिका, स्त्री, (भनक्ति रोगानिति भञ्जि । पृषोदरादित्वात् भस्य फः । फञ्जि रोगहारकं पत्रं यस्याः । कप् । टाप् । अत इत्वम् ।) आखुपर्णी । इति रत्नमाला ॥ (विवृतिरस्या आखुपर्णीशब्दे ज्ञातव्या ॥)

फञ्जी, स्त्री, (भनक्ति रोगानिति । भञ्ज + अच् । पृषोदरादित्वात् भस्य फः । गौरादित्वात् ङीष् ।) भार्गी । इति राजनिर्घण्टः ॥ (यथा, वैद्यक-चक्रपाणौ श्वासाधिकारे ।
"अम्लता नागरफञ्जीव्याघ्रीपर्णासबाधितः
क्षाधः ।
पीतः सकणाचूर्णः कासश्वासौ निहन्त्याशु ।"
तथाचास्या गुणाः हारीते प्रथमस्थाने दशमे-ऽध्याये ।
"वत्सादनी तथा फञ्जी तैलपर्णी तु सिंहिका ।
चक्रमर्द्दक इत्यन्ये दुर्ज्जरा वातकोपनाः ॥")

फट्, अ, अनुकरणशब्दः । अस्त्रबीजम् । यथा । फड़स्त्रं शूलमाशुधम् । इति बीजवर्णाभिधा-नम् ॥ * ॥ भ्रान्तिकुम्भचालने अर्घ्यपात्रचालने अर्घ्यजलेन पूजोपकरणाभ्युक्षणे अन्तरीक्षग-विघ्नोत्सारणे विकिरदोषणे गन्धपुष्पाभ्यां करशोधने अघमर्षणे पापपुरुषताड़ने कराङ्ग-न्यासे नैवेद्यप्रोक्षणे होमाग्नेः क्रयादांशत्यागे होमाग्न्याहवाहने तदग्निप्रोक्षणादौ च फड़िति मन्त्रस्य प्रयोगः ॥ (यथा, भागवते । ६ । ८ । १० ।
"सविसर्गं फड़न्तं तत् सर्व्वदिक्षु विनिर्द्दिशेत् ।"
विशीर्णादौ, त्रि । यथा, वाजसनेयसंहितायाम् । ७ । ३ । "देवाश्शो यस्मै त्वेड़े ततस्तत्सुपरि प्लुता भङ्गेन हतोऽसौ फट् ॥"
"असौ द्वेष्यो हतो निहतः सन् फट् विशीर्णो भवतु निष्फला विशरणो अस्य क्रियन्तस्तेजदूषम् । फलतीति फट् डलयोरैक्यम् । स्वाहाकारस्थाने फड़ित्यभिचारे प्रयुज्यते ।" इति तद्भाष्ये वेद-दीपे महीधरः ॥)

फटः, पुं क्ली, (स्फुट विकसने + घञ्यच् । पृषो-दरादित्वात् साधुः ।) फला । इत्यमरशेषाधरौ ॥

फटा, स्त्री, (फट + स्त्रियां टाप् ।) फला । (यथा, पद्मपुराणे । ३ । ८३ ।
"निर्व्विघ्नेणापि सर्पेण कर्त्तव्या महती फटा ।
विषं भवति मा वास्तु फटाटोपो भयङ्करः ।")
दम्भः । इति मेदिनी । टे, २३ ॥ कितवः । इति हेमचन्द्रः ॥ * ॥
"स्यात् पवर्गद्वितीयादि फटायान्तु स्फटापि च ॥"
इतिभरतधृतशब्दभेदः ॥

फड़िङ्गा, स्त्री, (फड़िति शब्दं इङ्गति गच्छतीति । इङ्ग गतौ + अच् । टाप् ।) झिल्लिका । इति शब्दचन्द्रिका ॥ फड़िङ्ग इति भाषा ॥

फण, ग निःस्नेहे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट् ।) फेणतुः । फणन्तुः । निःस्नेहः अनायासेनोत्पत्तिः । फणति प्राप्तिं श्रीमताम् । अनायासेन प्राप्तम् । अस्येव आस्तस्य

निष्पायां अनायासकृतं फाणटं इत्यमरः ॥ अतएव रमानाथोऽपि घटादौ फण गतौ इत्यत्र गतेरत्यच । फाणयति जनोऽनायासेन जनयतीत्यर्थे इत्याह । इति दुर्गादासः ॥

फण, मि ग गतौ । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) मि, फणयति फाणयति । ग, फेणतुः पफणतुः । इति दुर्गादासः ॥

फणः, ञ्च, (फनति विस्तृतिं गच्छतीति । फण + अच् ।) सर्पस्य विस्तृतमस्तकम् । यथा । फटावान्तु फणा द्वयोरित्यमरः ॥ अशौचे कारणं फणम् । इति क्लीवकाण्डे चन्द्रगोमी ॥ तत्पर्य्यायः । फणा २ फणम् ३ फटा ४ फटः ५ स्फटः ६ स्फटा ७ । इत्यमरभरतौ ॥ दर्व्वी ८ भोगः ९ स्फुटः १० । इति हैमचन्द्रः ।४।३९१॥ स्फुटा ११ दर्व्विः १२ फटी १३ । इति शब्दरत्नावली ॥ (यथा, महाभारते । १२।११४।१५।

"परिवादं ब्रुवाणो हि दुरात्मा वै महाजने ।
प्रकाशयति दोषांस्तु सर्पः फणमिवोच्छ्रितम् ॥"

जत्रूर्ध्वमर्म्मविशेषः । यथा, सुश्रुते । ३ । ६ ।

"जत्रूर्ध्वं मर्म्माणि चत्वारि धमनीश्रयो मातृकाः द्वे कृकाटिके द्वे विधुरे द्वौ फणौ द्वावपाङ्गौ द्वावपाङ्गौ द्वायुत्क्षेपौ द्वौ अपाङ्गौ स्थपनी पञ्च सीमन्तास्तत्वारि षड्ङ्गाटकान्येकोऽधिपतिरिति ।")

फणकरः, पुं, (फणः कर इवास्येति । फणस्य करो वा ।) भुजङ्गः । इति शब्दरत्नावली ॥

फणधरः, -पुं, (धरतीति । धृ + अच् । फणस्य धरः ।) सर्पः । इति शब्दरत्नावली ॥

फणधरधरः, पुं, (फणधरस्य सर्पस्य धरः ।) शिवः । इति कविकल्पलता ॥

फणभृत्, पुं, (फणं बिभर्त्तीति । भृ + क्विप् तुक् च ।) सर्पः । इति हैमचन्द्रः । ४ । ३९६ ॥ (यथा, राजेन्द्रकर्णपूरे । ४ ।

"आस्यशोभनलं रणाग्रधवले निर्धौतदिङ्मण्डले
दैवत्वद्वयशुद्धि प्रशान्ततमसि प्रौढ़े जगत् प्रेयसि ।
केलासन्ति मधोभृतः फणभृतः प्रेंखन्ति
पार्थोधयः
धारोदन्ति सुरद्विपन्ति करिणो हंसन्ति
पुंस्कोकिलाः ॥")

फणवान्, [त्] पुं, (फणोऽस्यास्तीति । फण + मतुप् । मस्य वः ।) सर्पः । इति शब्दरत्नावली ॥

फणा, स्त्री, (फनति प्रसारमङ्गीचं गच्छतीति । फण गतौ + अच् । टाप् ।) सर्पफटा । इत्यमरः । २ । ८ । ६ ॥ (यथा, अभिज्ञानशाकुन्तले ६ अङ्के ।

"ज्वलति पतितेन्धनोऽग्निर्विप्रकृतः पन्नगः फणां कुरुते ।
तेजस्वी संप्रधार्य्यात्मं प्रायः प्रतिपद्यते तेजः ।")

फणाकरः, पुं, (करोतीति । कृ + अच् । फणाया करः ।) सर्पः । इति शब्दरत्नावली ॥

फणाधरः, पुं, (धरतीति । धृ + अच् । फणाया धरः ।) सर्पः । इति शब्दरत्नावली ॥

फणाभरः, पुं, (बिभर्त्ति धरतीति । भृ + पचाद्यच् । फणाया भरः ।) सर्पः । इति शब्दावली । १५ ॥

फणावान्, [त्] पुं, (फणास्यास्तीति । फणा + मतुप् । मस्य वः ।) सर्पः । इति शब्दरत्नावली ॥

फणिकेसरं, क्ली, (फणीव केसरोऽस्य ।) नागकेसरम् । इति राजनिर्घण्टः ॥ (गुणादयोऽस्य नागकेसरशब्दे ज्ञातव्याः ॥)

फणिखेलः, पुं, (फणिना सह खेलतीति । खेल + अच् ।) भारतीपक्षी । इति त्रिकाण्डशेषः ॥ भारद इति भाषा ॥

फणिचक्रं, क्ली, (फणाकारं चक्रम् ।) विवाहादिकर्म्मसु शुभाशुभज्ञानार्थं सप्तविंशतिनक्षत्रघटितसर्पाकारत्रिनाड़िकचक्रम् । यथा,—

"अश्विन्यादि लिखेच्चक्रं सर्पाकारं त्रिनाड़िकम् ।
तत्र वेधवशाज्ज्ञेयं विवाहादौ शुभाशुभम् ॥
त्रिनाड़ीवेधनक्षत्रमश्विन्यार्द्रायुगोत्तराः ।
हस्तेन्द्रमूलवारुण्यः पूर्व्वभाद्रपदास्तथा ॥
याम्यः सौम्यो गुरुर्योनिश्चित्रा मित्रजलाश्रयम् ।
धनिष्ठा चोत्तरा भाद्रा मध्यनाड़ीव्यवस्थिताः ॥
कृत्तिका रोहिणी सर्पो मघा स्वातीविशाखके ।
उत्तरा अवणा पौष्णं एतन्नाड़ीव्यवस्थिताः ॥
अश्वादिनाड़ीवेधर्क्षे षष्ठं द्वितीयकं क्रमात् ।
याम्यादितुर्य्यतुर्य्यञ्च कृत्तिकादिदिवष्टकम् ॥
एवं निरीक्ष्यवेद्धेधं कन्यामर्क्षे गुरौ सुरे ।
पण्यस्त्रीस्वामिमित्रेषु देशे ग्रामे पुरे गृहे ॥
एकनाड़ीस्थधिष्ण्यानि यदि स्युर्वरकन्ययोः ।
तदा वेधं विजानीयाद्गुर्व्वादिषु तथैव च ॥
प्रकटं यस्य जन्मर्क्षं तस्य जन्मर्क्षतो वधः ।
प्रच्छन्नं जन्मभं यस्य तस्य नामर्क्षतो भवेत् ।
द्वयोर्जन्मभयोर्भेधे न कर्त्तव्यं कदाचन ॥
एकनाड़ीस्थिता चेत् स्याद्वर्त्तृगोप्राय चाङ्गना ।
तस्मान्नाड़ीत्रयो वीक्ष्यो विवाहे शुभमिच्छता ।
प्राड्नाया वेधतो भर्त्ता मध्यनाड्यो भयन्त्यया ।
पृष्ठनाड़ीत्रये कन्या म्रियते नात्र संशयः ॥
एकनाड़ीस्थिता यत्र गुरुर्मन्त्रश्च देवता ।
तत्र वेधं रुजं मृत्युं क्रमेण फलमादिशेत् ॥
समासन्ने वधे प्रौढ़े दूरवेधे चिरेण तु ।
वेधान्तरभवानेन वर्षे दुष्टं प्रजायते ॥
प्रभुः पण्याङ्गना मित्रं देशो ग्रामः पुरं गृहम् ।
एकनाड़ीगता भद्रा अभद्रा वेधवर्ज्जिता ।
एकराश्यादियोगे तु नाड़ीदोषो न विद्यते ॥"

इति ज्योतिस्तत्त्वम् ॥

अपि च ।

"सर्पाकारो घटनविशेषः
कृत्तिकादियमर्क्षैवशेषः ।
पृष्ठे सुतधनिसुहृद्रोगः
क्रोड़े कान्तापुत्रवियोगः ।
मध्ये रेखे विहितविवाहे
उभयोर्मरणं वदति वराहः ॥
क्रोड़े पृष्ठे यत्र उदामम्
मध्ये क्रोड़े बहुसुखमानम् ।
मध्ये पृष्ठे भवति विवाहे
बहुमतवित्तमिति . मुनिराहः ॥"

इति समयप्रदीपः ॥

तस्य विन्यासो यथा,—

पृष्ठे १ ६ ७ १२ १३ १८ १९ २४ २५



मध्ये २ ५ ८ ११ १४ १७ २० २३ २६
क्रोड़े ३ ४ ९ १० १५ १६ २१ २२ २७ ॥

फणिजिह्वा, स्त्री, (फणिजिह्वेव आकृतिरस्यस्या इति अच् ।) महाशतावरी । महासमङ्गा । इति राजनिर्घण्टः ॥

फणिञ्जकः, पुं, (फणिनामञ्जकः वक्षिष्कारक उत्पादक इति यावत् । पृषोदरादित्वात् साधुः । फणितुल्यवहुपत्रपुष्पवत्त्वात् तथात्वम् ।) क्षुद्रपत्रतुलसी ॥ (रक्तवर्णतुलसी च । तत्पर्य्यायश्च यथा, वैद्यकरत्नमालायाम् ।

"सुगन्धको गन्धनामा तीक्ष्णगन्धः फणिञ्जकः ॥")

जम्बीरभेदः । इति केचित् ॥ जम्बीरसामान्यः । इति केचित् । तत्पर्य्यायः । समीरणः २ मरुवकः ३ प्रस्थपुष्पः ४ जम्बीरः ५ । इत्यमरभरतौ ॥ (यथा,—

"मारुतोऽसौ मरुवको मरुत्करुरपि स्मृतः ।
फणी फणिञ्जकश्चापि प्रस्थपुष्पः समीरणः ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

फणितः, त्रि, (फण गतौ + क्तः ।) गतः । निःसृतः ॥

फणितल्पगः, पुं, (फणी शेष एव तल्पं शयनं तल्पं तस्मिन् गच्छतीति । गम + डः ।) विष्णुः । सर्पशय्यायां गच्छति यः । इति व्युत्पत्तिः ॥

फणिप्रियः, पुं, (फणिनां प्रियः भक्ष्यत्वात् ।) वायुः । इति शब्दरत्नावली ॥

फणिफेनः, पुं, (फणिनां फेन इव उग्रगुणत्वात् ।) अहिफेनः । आफिं इति भाषा । यथा,—

"जातीफलं टङ्गणमभ्रकञ्च
छिन्नलगन्धं परिमर्द्य यामम् ।
भागद्वयं स्यात् फणिफेनकस्य
गान्धालिकापत्ररसेन मर्द्यम् ॥"

इति रत्नावली ॥

फणिवल्ली, स्त्री, (फणाव दीर्घा वल्ली ।) नागवल्ली । इति राजनिर्घण्टः ॥

फणिश्रेणी, स्त्री, (फणिनो श्रेणीति । श्रेण + अच् + ङीप् ।) गन्धनाकुली । इति राजनिर्घण्टः ॥

फणिश्रुत्, स्त्री, (फणिनो शृणोति अनेन अपमारयतीति । श्रु + क्विप् । तुगागमश्च ।) क्षुद्रदुरालभा । इति राजनिर्घण्टः ॥

फणी, [न्] पुं, (फणास्यस्येति । फणा + "अर्शआदिभ्यश्च ।" ५ । २ । १२७ । इति इनिः ।) सर्पः । इत्यमरः ॥ (यथाच सुश्रुते कल्पस्थाने ४ अध्याये ।

"श्वेता दर्व्वीकराः सर्पाः फणिनः शीघ्रगामिनः ।
मण्डलैर्विविधैश्चित्राः पृथवो मन्दगामिनः ॥"

नष्टं शूनप्रतीकारविधिर्यथा,—
"फणिनां विषवेगे तु प्रथमे शोणितं हरेत्।
द्वितीये मधुसर्पिर्भ्यां पाययेतागदं भिषक्॥
नस्यकर्म्माञ्जने युञ्ज्यात्तृतीये विषनाशने।
वान्तं चतुर्थे पूर्व्वोक्तां यवागूमथ दापयेत्॥
शीतोपचारं कृत्वादौ भिषक्पथ्यमथस्थयोः।
दापयेच्छोधनं तीक्ष्णं यवागूञ्चापि कीर्त्तिताम्॥
सप्तमे त्वव्यथेऽरिष्टं शिरस्तीक्ष्णेन शोधयेत्।
तीक्ष्णमेवाञ्जनं दद्यात्तीक्ष्णशस्त्रेण मर्द्दिं च॥
कुर्य्यात्काकपदं चर्म्म सार्द्रया पिप्पलिं क्षिपेत्॥"
इति च सुश्रुते कल्पस्थाने पञ्चमेऽध्याये॥)
सर्पिणीनामकौषधिः। इति राजनिर्घण्टः॥
(केतुः। यथा, बृहद्भावप्रकाशे।
"कविरत्यन्तधवलः फणी क्षणः शूनिस्तथा॥"
सोमकं अस्य विषयो यथा,—
"रसो गन्धश्छत्रः सोषणोऽयं
फणी पिप्पलीत्येष धुस्तूरपिष्टः
जयेत् सन्निपातं द्विगुञ्जकानुपानं
भवेद्दर्कमूलास्तु सद्योघचूर्णम्॥"
इति वैद्यकरसेन्द्रसारसंग्रहे ज्वराधिकारे पञ्चवक्त्ररसे। सप्तवकनामौषधं यथा,—
"मारुतोऽसौ सप्तवको मरुत्सप्तरपि स्मृतः।
फणी फणिञ्जकश्चापि प्रस्यप्रथ्यः समीरणः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे १ भागे॥)
फणीश्वरः, पुं, (फणिनामीश्वरः।) अनन्तः। इति शब्दरत्नावली॥
फलः, पुं, (फलति। फल गतौ + "अमन्तान् डः।" उणा० १। ११३। इति डः।) घटरम्। इत्युणादिकोषः॥
फलकारी, पुं, (फलं इत्यव्यक्तशब्दं करोतीति। कृ + णिनिः।) पक्षिमात्रम्। इति शब्दचन्द्रिका॥
फलं, क्ली, (फलतीति। फल + अच्। लस्य रत्वम्।) फलकम्। इत्यमरटीकायां भरतः॥
फलवर्द्धं, क्ली, पूगफलम्। इति हारावली।१३७॥
फर्फरीकः, पुं, (स्फुरतीति। स्फुर स्फुरणे + "फर्फरीकाद्यच्च।" उणा० ४। २०। इति ईकन् धातोः फर्फरादेशश्च।) चपेटः। माईषे, क्ली। इति मेदिनी। के, २००॥
फर्फरीका, स्त्री, (फर्फरीक + टाप्।) पाडुका। (स्फुरतीति ईकन्। टाप्। मनसि स्फुरणादेव तथात्वम्।) मदनः। इति संक्षिप्तसारोणादिवृत्तिः॥
फल, निष्पत्तौ। इति कविकल्पद्रुमः। (भ्वा०-पर०-अक०-सेट्।)
"इह नवसुकुमारा मञ्जरीनां
रविकरसन्त्रसिताः फलन्ति भासः॥
इति भारविः॥
निष्पादनेऽपि वाल्मीकिः।
फलति न यस्य परिस्रवोपाय दिशा गिरः॥"
इति दुर्गादासः॥
फल, च गतौ। इति कविकल्पद्रुमः। (भ्वा०-पर०-अक०-सेट्।) च, फालः फलः। इति दुर्गादासः॥
फल, णि च्या भिदि। इति कविकल्पद्रुमः। (भ्वा०-पर०-सक०-सेट्।) णि, फुल्लोऽस्ति। च्या, फलितं फुल्लं तेन। फलति काष्ठं कुठारः। इति दुर्गादासः॥
फलं, क्लौ, (फलतीति। फल निष्पत्तौ णि फला विशरणे वा + अच्।) लाभः। (यथा, शकुन्तलायाम्। १ अङ्के।
"शान्तमिदमाश्रमपदं स्फुरति च बाहुः
कुतः फलमिहास्य।
अथवा भवितव्यानां द्वाराणि भवन्ति सर्व्वत्र॥")
शस्यम्। (यथास्य भक्ष्यविधिः।
"फलानि सर्व्वभक्ष्यांश्च प्रदद्याद्दैवेषु च॥"
"फलानि सर्व्वभक्ष्यांश्च परिशुष्काणि यानि च।
तानि दक्षिणपार्श्वे तु भुञ्जानस्योपकल्पयेत्॥"
इति सुश्रुते सूत्रस्थाने। ४६ अध्यायः॥
यथा च शकुन्तलायाम्।
"उदेति पूर्व्वं कुसुमं ततः फलं
घनोदयः प्राक् तदनन्तरं पयः॥")
फलकम्। (शारिफलकार्थे यथा, महाभारते। ४। १। २४।
"वैदूर्य्यान् काञ्चनान् दान्तान् फलैर्ज्योतीरसैः सह।
क्षौद्राक्तान् लोहिताक्षांश्च निर्व्वर्त्तयामि मनोरमान्॥")
हेतुकृतम्। इत्यमरः। जातीफलम्। शुण्ठिः। त्रिफला। (यथा,—
"हरीतकी चामलकी विभीतकमिदं त्रयम्।
त्रिफला फलमित्युक्तं तच्च ज्ञेयं फलत्रिकम्॥"
इति वैद्यकपरिभाषायाम्॥)
कक्कोलम्। इति मेदिनी। ले, ३३॥ बाणाग्रम्। आनन्दम्। इति शब्दरत्नावली॥ फालः। इति हेमचन्द्रः॥ दानम्। इति धरणिः॥ शुल्कः। यथा,—
"अफलो सृज्यते मेघः सफलस्तु न सृज्यते।"
इति रामायणम्॥
(प्रमेयभेदः। यथा,—
"आत्मशरीरेन्द्रियार्थबुद्धिमनः प्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयम्॥" इति गोतमसूत्रम्।
तत्रैव फलसूत्रम् यथा। "प्रवृत्तिदोषजनितोऽर्थः फलम्॥" "सुखदुःखसंवेदनं फलम्। सुखविपाकं कर्म्मदुःखविपाकञ्च तत् पुनर्देहेन्द्रियविषयबुद्धिषु सतीषु भवतीति सह देहादिभिः फलमभिप्रेतम्। तथाहि प्रवृत्तिदोषजनितोऽर्थः फलमेतत् सर्व्वं भवति तदेतत् फलमुपात्तमुपात्तं हेयं त्यक्तं त्यक्तमुपादेयमिति नास्य हानोपादानयोर्निष्ठा पर्य्यवसानं वास्ति स खल्वयं हानोपादानसंक्लेशेन क्लिश्यते लोकः।" इति वात्स्यायनः।) जीवस्य कर्म्मफलभुक्तिर्यथा,—
"जीवः कर्म्मफलं भुङ्क्ते आत्मा निर्लिप्त एव च।
आत्मनः प्रतिबिम्बश्च देही जीवः स एव च॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २३ अध्यायः॥

दानफलं यथा,—
"यथा फलन्ति शस्यानि नूनानि वाधिकानि च।
क्षत्रकाणां क्षेत्रभेदे पात्रभेदे फलं तथा॥
सामान्यदिवसे विप्रे दानं समफलं भवेत्।
अमायां रविसंक्रान्त्यां फलं शतगुणं भवेत्।
चातुर्मास्यां पौर्णमास्यामनन्तं फलमेव च॥
ग्रहणे शशिनः कोटिगुणञ्च फलमेव च।
सूर्य्यस्य ग्रहणे चापि ततो दशगुणं भवेत्॥
व्यतीपातमन्वयश्चैवासंख्यं फलमश्नुते।
एवमन्यत्र पुण्याहे फलाधिक्यं भवेदिह॥
यथा दाने तथा स्नाने जपेऽन्यत्पुण्यकर्म्मसु।
एवं सर्व्वत्र बोद्धव्यं नराणां कर्म्मणां फलम्॥
सामान्यदेशे दानञ्च विप्रे समफलं भवेत्।
तीर्थे देवगृहे चैव फलं शतगुणं स्मृतम्॥
गङ्गायाञ्च कोटिगुणं क्षेत्रे नारायणे फलम्।
एवं सर्व्वत्र बोद्धव्यं फलाधिक्यं क्रमेण च॥
यथा चैव कोटिगुणं तथा च विष्णुमन्दिरे।
केदारे च लक्षगुणं हरिहारे तथा फलम्॥
पुष्करे भास्करक्षेत्रे दशलक्षगुणं फलम्।
एवं सर्व्वत्र बोद्धव्यं फलाधिक्यं क्रमेण च॥
सामान्यब्राह्मणे दानं समभेव फलं भवेत्।
लक्षं त्रिसन्ध्यपूते च पण्डिते च जितेन्द्रिये॥
विष्णुमन्त्रोपासके च-बुधे कोटिगुणं भवेत्।
एवं सर्व्वत्र बोद्धव्यं फलाधिक्यं गुणं भवेत्॥
यथा दण्डेन सूत्रेण शरावेण जवेन च।
कुम्भं निर्म्माति चक्रेण कुम्भकारो यदा शुभे।
तथैव कर्म्मसूत्रेण फलं धाता ददाति च॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ३४ अध्यायः॥
स्वप्रियफलस्य विष्णुदेयत्वं यथा,—
"भक्ष्याणि यानि पेयानि भोज्यान्यभिमतानि च।
फलञ्च वल्लभं यच्च तत्तद्देयं जनार्द्दने॥"
इत्यग्निपुराणम्॥*॥
इष्टफलद्वारा फलपातननिषेधो यथा,—
"न पातयेदिष्टकाभिः फलानि वै फलेन तु।
न शेक्षभावां शिक्षेत नार्कर्षेच्च यदासनम्॥"
इति कौर्म्मे उपविभागे १६ अध्यायः॥
कर्म्मजन्यशुभाशुभरूपस्वर्गनरकादि। तत्त्रिविधं यथा,—
"अनिष्टमिष्टं मिश्रञ्च त्रिविधं कर्म्मणः फलम्।
भवत्यत्यागिनां प्रेत्य न तु सन्न्यासिनां क्वचित्॥"
इति श्रीभगवद्गीतायाम् १८ अध्यायः॥
"अनिष्टं नारकित्वम्। इष्टं देवत्वम्। मिश्रं मनुष्यत्वम्। एवं त्रिविधं पापस्य पुण्यस्य उभयमिश्रस्य च कर्म्मणो यत् फलं प्रसिद्धं तत् सर्व्वमत्यागिनामेव प्रेत्य परत्र भवति तेषां त्रिविधकर्म्मसम्भवात् न तु सन्न्यासिनां क्वचिदपि भवति।" इति तट्टीकायां श्रीधरस्वामी॥*॥
वेदादीनां फलम्। यथा, वह्निं प्रति मरीचिवाक्यम्।
"च तं प्राह फलं ब्रूहि वेदस्य च धनस्य च।
दारस्तुतस्य विप्राद्यैः स्वर्गापवर्गहेतवे॥

वह्निरुवाच ।
अग्निहोत्रफला वेदा दत्तमुक्तफलं धनम् ।
रतिपुत्रफला दारा: शीलवृत्तफलं श्रुतम् ॥"
इति वह्निपुराणे नित्यावह्निकस्नानविधिनामाध्याय: ॥*॥ लवणादिसंयोगे फलस्याम्लत्वं यथा,
"तण्डुलोम्बुग्निसंयोगाल्लवणयोगेन पिष्टकम् ।
फलं चितयसंयोगादन्नं भवति तत्क्षणात् ॥"
इति रामार्चनचन्द्रिकाधृतवचनमिति केचित् ॥
फल:, पुं, (फलतीति । फल + अच् ।) कुटज-वृक्ष: । इति शब्दरत्नावली ॥ (यथा, सुश्रुते सूत्रस्थाने ४६ अध्याये ।
"कण्टकारिकाफलपटोलवार्त्ताकुकारवेल्लक-र्कोटिकाकेवुकोरुवूकपर्ण्यटकाकिरातातिक्तककोर्वा-कारिष्टकोशातकीवेत्रकरीराटरूषकार्कपुष्पीप्र-भृतीनि ॥")
फलकं, क्ली, पुं, (फल + संज्ञायां कन् ।) चर्म्म । इत्यमर: । २ । ८ । ६० ॥ ढाल इति भाषा ॥ (यथा, विष्णुपादादिकेशान्तवर्णनस्तोत्रे । ३३ ।
"शार्ङ्गं वार्यं क्षपाणं फलकमरिगदे पङ्कजञ्चो सहस्रम्
विभ्राणा: शुक्लजालं मम ददतु हरेर्वाहवो मोहहानिम् ॥")
फलक:, पुं, (फल + संज्ञायां कन् ।) अस्थिखण्डम् । इति जटाधर: ॥ नागकेशरम् । इति शब्द-चन्द्रिका ॥ काष्ठादिफलकम् । यथा,—
"पाण्डुलेखेन फलके भूमौ वा प्रथमं लिखेत् ।
ऊनाधिकन्तु संशोध्य पश्चात् पत्रे निवेशयेत् ॥"
इति व्यवहारतत्त्वे व्यास: ॥
(यथा, मार्कण्डेये । ८७ । ५ ।
"भृकुटीकुटिलात्तस्या ललाटफलकादद्भुतम् ।
काली करालवदना विनिष्क्रान्तासिपाशिनी ॥") रजकपट्टम् । धोपार पाट इति भाषा । यथा,
"शालाले फलके क्षत्रे निर्व्याद्वासांसि नेजक: ।
न च वासांसि वासोभिर्निर्हरेन्न च वासयेत् ॥"
इति मिताक्षरा ॥
फलकपाणि:, पुं, (फलकं पाणौ यस्य ।) चर्म्मी । इत्यमर: ॥ २ । ८ । ७१ ॥ ढाली इति भाषा ॥
फलकर्कशा, स्त्री, (फलेन कर्कशा ।) वनकोलि: । इति केचित् ॥
फलकाम:, त्रि, (फलं कामयते इति । कम + अण् ।) कर्म्मफलकामी । यथा,—
"धर्म्मवाणिजिका मूढ़ा: फलकामा नराधमा: ।
अर्चयन्ति जगन्नाथं ते कामान्नाप्नुवन्त्युत ॥"
इति मलमासतत्त्वधृतविष्णुधर्म्मोत्तरीयषष्ठतीय-काण्डीयवचनम् ।
फलकी, [न्] पुं, (फलकं फलकाकारोऽस्यस्येति । फलक + इनि: ।) मत्स्यभेद: । फलुई इति भाषा । (गुणादिकमस्य फलिशब्दे ज्ञात-व्यम् ।) फलकान्विते, त्रि । इति मेदिनी । ने, १६ ॥
फलक्षण:, पुं, (फले फलावच्छेदे क्षण: ।) पानीया-मलकम् । इति शब्दचन्द्रिका ॥
फलकेशर:, पुं, (फले केशरा इवास्य ।) नारी-केलवृक्ष: । इति जटाधर: ॥
फलकोषक:, पुं, (फलं शुष्क एव कोषो यत्र । तत: कन् ।) शुष्क: । इति त्रिकाण्डशेष: ॥ (विवृति-रस्य शुष्कशब्दे ज्ञातव्या ॥)
फलग्रहि:, त्रि, (फलं गृह्णातीति । ग्रह + इन् ।) फलेग्रहि: । यथासमयं फलधरवृक्ष: । इत्यमर-टीकायां भरत: ॥
फलग्राही, [न्] पुं, (फलं गृह्णातीति । ग्रह + णिनि: ।) वृक्ष: । इति धरणि: ॥ फलग्रहण-कर्त्तरि, त्रि ॥
फलचमस:, पुं, दधिमिश्रितवटत्वक्चूर्णम् । इति आह्निकतत्त्वम् ॥
फलचोरक:, पुं, (फलं चोर इवास्य कन् ।) चोरक-नामगन्धद्रव्यम् । इति राजनिर्घण्ट: ॥
फलत्रयं, क्ली, (फलस्य त्रयम् ।) द्राक्षापरूष-काश्मर्य्य: । (यथा,—
"द्राक्षापरूषकाश्मर्य्यै: फलत्रयमुदाहृतम् ॥"
इति वैद्यकपरिभाषायाम् ॥)
त्रिफला । इति शब्दचन्द्रिका ॥
फलत्रिकं, क्ली, (फलस्य त्रिकम् ।) त्रिफला । (यथा,—
"पथ्याविभीतधात्रीणां फलै: स्यात्त्रिफला समै: ।
फलत्रिकञ्च त्रिफला सा वरा च प्रकीर्त्तिता ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
शुण्ठीपिप्पलीमरिचानि । इत्यमर: ।२।६।११९॥
फलद:, पुं, (फलं ददातीति । दा + "आतोऽनुप-सर्गे ।" ३ । २ । ३ । इति क: ।) वृक्ष: । इति धरणि: ॥
फलद:, त्रि, (फलं ददातीति । दा + क: ।) फल-दाता । यथा,—
"विशिष्टफलदा कन्या निष्कामाणां विमुक्तिदा ॥"
इति मलमासतत्त्वधृतविष्णुपुराणवचनम् ॥
फलपक्षाम्लं, क्ली, चुक्रपक्षफलम् । इति राज-निर्घण्ट: ॥
फलपाक:, पुं, (फलेषु पाकोऽस्य ।) करमर्द्दक: । इत्यमरटीकायां भरत: ॥ पानीयामलकम् । इति शब्दचन्द्रिका ॥
फलपाकान्ता, स्त्री, (फलपाकेनान्तो नाशो यस्या: ।) ओषधि: । धान्यकदल्यादि: । इत्यमर: ।२।४।७॥
फलपाकी, [न्] पुं, (फलपाकोऽस्यस्येति । इनि: ।) गर्दभाण्ड: । इति रत्नमाला ॥ (यथास्य पर्य्याय: ।
"नन्दीवृक्षस्ताम्रपाकी फलपाकी च भीतन: ।
गर्दभाण्डो गन्धमुण्डो द्वितीय: क्षिप्रपाक्यसौ ॥"
इति च वैद्यकरत्नमालायाम्)
फलपुच्छ:, पुं, (फलं पुच्छ इव यस्य ।) वरण्डालु: । इति त्रिकाण्डशेष: ॥
फलपुष्पा, स्त्री, (फलानि पुष्पाणीवास्या: ।) पिण्ड-खर्জ্জूरी । इति राजनिर्घण्ट: ॥
फलपूर:, पुं, (फलेन पूर: पूर्ण: ।) बीजपूर: । इत्यमर: । २ । ४ । ७८ ॥ (विवरणमस्य बीज-पूरशब्दे ज्ञातव्यम् ॥)
फलपूरक:, (फलपूर + स्वार्थे कन् ।) बीजपूर: । इति भावप्रकाश: ॥
फलप्रद:, त्रि, (फलं प्रददातीति । प्र + दा + "आतश्चोपसर्गे ।" ३ । १ । १३६ । इति क: ।) फलदाता । यथा,—
"क्रीणीहि भो: फलानीति श्रुत्वा सत्वरमच्युत: ।
फलार्थी धान्यमादाय ययौ सर्व्वफलप्रद: ॥"
इति श्रीभागवते १० स्कन्धे ११ अध्याय: ॥
फलप्रिया, स्त्री, (फलेन प्रीणातीति । प्री + क: । टाप् ।) प्रियङ्गु: । इति राजनिर्घण्ट: ॥ (गुणा-दयोऽस्या प्रियङ्गुशब्दे ज्ञेया: ॥)
फलभाक्, [ज्] त्रि, (फलं भजते इति । भज + "भजो ण्विः ।" ३ । २ । ६२ । इति ण्विः ।) फलभागी । यथा,—
"मासपक्षतिथीनाञ्च निमित्तानाञ्च सर्व्वश: ।
उल्लेखनमकुर्व्वाणो न तस्य फलभाग्भवेत् ॥"
इति तिथ्यादितत्त्वधृतनारदीयभविष्यपुराण-वचनम् ॥
फलभूमि:, स्त्री, (फलाय कर्म्मफलभोगाय भूमि: ।) कर्म्मफलभोगस्थानम् । यथा,—
"भरतान्येरावतानि विदेहाश्च कुरून् विना ।
वर्षाणि कर्म्मभूम्य: स्यु: शेषाणि फलभूमय: ॥"
इति हेमचन्द्र: । ४ । १२ ॥
फलमुखा, स्त्री, (फलेन मुखा श्रेष्ठा ।) अज-मोदा । इति राजनिर्घण्ट: ॥
फलमुन्नरिका, स्त्री, (फले फलावच्छेदे मुन्नरिका क्षुद्रमुन्नर इव ।) पिण्डखर्জ্জूर: । इति शब्द-माला ॥
फललक्षणा, स्त्री, (फलहेतुका लक्षणा ।) प्रयो-जनवती लक्षणा । यथा, साहित्यदर्पणे ।
"यष्ट्यास्य गूढ़ागूढ़त्वाद्विधा स्यु: फललक्षणा: ।"
फलवर्त्तुलं, क्ली, (फलं वर्त्तुलमस्य ।) कालिङ्गम् । इति राजनिर्घण्ट: ॥
फलवान्, [त्] त्रि, (फलमस्यास्तीति । फल + मतुप् । मस्य व: ।) फलयुक्तवृक्ष: । तत्पर्य्यायः । फलिन: २ फली ३ । इत्यमर: ॥ फलित: ४ । इति राजनिर्घण्ट: ॥ (यथा, मनु: । १ । ४७ ।
"अपुष्पा: फलवन्तो ये ते वनस्पतय: स्मृता: ।
पुष्पिण: फलिनश्चैव वृक्षास्तूभयत: स्मृता: ॥")
फलविक्रयिणी, त्रि, (फलविक्रयोऽस्या अस्तीति । इनि: । ङीप् ।) फलविक्रेत्री । झुनड़ायिनी इति हिन्दी भाषा । यथा,—
"फलविक्रयिणी तस्य घृतधान्यकरद्वयम् ।
फलैरपूरयन्नन्नै: फलभाण्डमपूरि च ॥"
इति श्रीभागवते १० स्कन्धे ११ अध्याय: ॥
फलवृक्षक:, पुं, (फलप्रधानो वृक्ष: । संज्ञायां कन् ।) पनस: । इति राजनिर्घण्ट: ॥ (पनसशब्देऽस्य विशेषो व्याख्यात: ॥)
फलशाकं, क्ली, (फलमेव शाकम् ।) षड्विधशाका-न्तर्गतफलरूपशाकम् । यथा, राजवल्लभे ।
"पत्रं पुष्पं फलं नालं कन्दं संस्वेदजं तथा ।
शाकं षड्विधमुद्दिष्टं गुरु विद्यादुपोत्तरम् ॥"

फलग्राड्वः, पुं, दाड़िमः। इति त्रिकाण्डशेषः॥
फलग्राली [न्], त्रि, (फलेन ग्रालते ग्राघते इति। ग्राल्+णिनिः।) फलाढ्यः। यथा,—
"परसमवेतधात्वर्थजन्यफलग्रालित्वं कर्म्मत्वम्॥"
इति कर्म्मलक्षणे सारमञ्जरी॥
फलग्रैष्मिरः, पुं, (ग्रिष्मिरं प्राप्तमस्य ग्रण् ग्रैष्मिरम्। फलं ग्रैष्मिरं यस्य।) वदरवृक्षः। इति राजनिर्घण्टः॥
फलश्रुतिः, स्त्री, (फलस्य कर्म्मफलस्य श्रुतिः ग्रवणम्।) कर्म्मफलग्रवणम्। यथा,—
"फलश्रुतिरियं नृणां न ग्रेयो रोचनं परम्।
ग्रेयो विवक्षया प्रोक्तं यथा भैषज्यरोचनम्॥"
ग्रपि च।
"वेदोक्तमेव कुर्व्वाणो निःसङ्गोऽर्पितमीश्वरे।
नैष्कर्म्म्यां लभते सिद्धिं रोचनार्था फलश्रुतिः॥"
इति श्रीभागवते ११ स्कन्धः। इति मलमासतत्त्वम्॥
फलश्रेष्ठः, पुं, (फलानां फलवृक्षाणां ग्रेष्ठः।) ग्राम्रवृक्षः। इति शब्दचन्द्रिका॥
फलसः, पुं, पनसवृक्षः। इत्यमरटीकायां भरतः॥
फलस्नेहः, पुं, (फले स्नेहो यस्य।) ग्राखोटवृक्षः। इति राजनिर्घण्टः॥
फलहारी, स्त्री, काली। फलं हरति या ड्रात् घञिति कर्म्मण्युपपदहृञ् धातोः घञि ईप्प्रत्ययनिष्पन्नोऽयं शब्दः। सा ज्येष्ठपञ्चदग्र्यां वहुफलाद्युपहारैः पूजनीया। यथा,—
"ज्येष्ठे मासि ग्रमायां वै मध्यरात्रे महेश्वरि!।
पूजयेत् कालिकां देवीं नानाद्रव्योपहारकैः॥
तत्रैव सितपक्षे तु पञ्चदग्र्यां निग्रार्द्धके।
पूजयेच्च फलैर्नैवैः ग्रक्तितो वापि कालिकाम्॥"
इति मायातन्त्रे १७ पटलः॥
फला, स्त्री, क्ष्विक्ष्विरिष्टाच्चुपः। इति राजनिर्घण्टः॥ (ग्रमी। तत्पर्य्यायो यथा,—
"ग्रमी ग्रक्तुफला तुङ्गा केग्रहन्ती फलाग्रिवा।
मङ्गल्या च तथा लक्ष्मीः ग्रमीरः सात्त्विका स्मृता॥")
फलाढ्या, स्त्री, (फलेन ग्राढ्या सम्पन्ना।) काष्ठकदली। इति राजनिर्घण्टः॥
फलाध्यक्षं, क्लीं, (फलानामध्यक्षमिव।) राजादनवृक्षः। इत्यमरः। २। ४। ४५॥ (क्वचित्, पुं। ग्रस्य पर्य्यायः।
"राजादनः फलाध्यक्षो राजन्यः चीरिकापिच॥"
इति भावप्रकाग्रस्य पूर्व्वखण्डे प्रथमे भागे॥)
फलागामधिकृते, त्रि॥
फलादनः, पुं, (फलानामदनोभक्षकः। यद्वा, फलानां ग्रदनं भक्षणं यस्य।) शुकपक्षी। इति हेमचन्द्रः। ४। ४०१॥ फलभक्षके, त्रि॥
फलान्तः, पुं, (फलेषु सत्सु ग्रन्तो नाग्रो यस्य।) पेग्नः। इति ग्रब्दमाला॥
फलाम्लं, क्लीं, (फलमम्लं यस्य।) वृक्षाम्लम्। इति राजनिर्घण्टः॥ (यथा, सुग्रुते सूत्रस्थाने ४६ ग्र॥
"मद्यं मद्योचितानान्तु सर्व्वमांसेषु पूजितम्।
ग्रमद्यपानामुदकं फलाम्लं वा प्रग्रस्यते॥")
फलाम्लः, पुं, (फलमम्लमस्य।) ग्रम्लवेतसः॥ इति राजनिर्घण्टः॥
फलार्घी [न्], त्रि, (फलं ग्रर्घयते इति। ग्रर्घ+णिनिः।) फलकामी। यथा,—
"सर्व्वसूक्तेषु कर्त्तव्या प्रतिष्ठा विधिना बुधैः।
फलार्थिभिस्तथा प्रतिष्ठं यस्मान्निष्फलमुच्यते॥"
इति मठप्रतिष्ठातत्त्वधृतहयग्रीर्षपञ्चरात्रीयसङ्कर्षणकाण्डीयवचनम्॥
फलाग्रनः, पुं, (फलानग्नातीति। ग्रग्न+ल्युः।) शुकपक्षी। इति त्रिकाण्डशेषः॥ फलभक्षके, त्रि॥
फलासङ्गः, पुं, (फलेषु ग्रासङ्गः।) फलासक्तिः॥ यथा,—
त्यक्त्वा कर्म्मफलासङ्गं नित्यतृप्तो निराग्रयः।
कर्म्मण्यभिप्रवृत्तोऽपि नैव किञ्चित् करोति सः॥"
इति श्रीभगवद्गीतायां ४ ग्रध्यायः॥
फलिः, पु, (फल+इन्।) मत्स्यविग्रेषः। फलुइ इति भाषा। ग्रस्य गुणाः। स्वादुत्वम्। गुरुत्वम्। स्निग्धत्वम्। वलकारित्वम्। शुक्रवर्द्धनत्वञ्च। इति राजवल्लभः॥
फलिका, स्त्री, (फलमस्या ग्रस्तीति। फल+ठन्। टाप्।) निष्पावी। इति राजनिर्घण्टः॥ (फलाः स्वार्थे कनि ग्रत इत्वम्। ग्ररादेरग्रभागः। यथा, ग्रार्य्यासप्तग्रत्याम्। ३३५।
"न प्राप्यसे कराभ्यां हृदयान्नापेषि वितनुषे
वाधाम्।
त्वं मम भग्नावस्थितकुसुमायुधविग्रिख-
फलिकेव॥")
फलितं, त्रि, (फल+तारकादित्वात् इतच्।) फलमस्य जातम्। इति सग्धबोधग्राकरणम्॥ (यथा, देवीभागवते। १। १७। १२।
"संपग्यन् विविधान् देग्रान् लोकांग्च वित्त-
धर्म्मिणः।
वनानि पादपांग्चैव क्षेत्राणि फलितानि च॥")
वृक्षे, पुं। इति धरणिः॥ ग्रैलेये, क्लीं। इति राजनिर्घण्टः॥
फलिनः, त्रि, (फलानि सन्त्यस्येति। फल+"वकृलमन्यत्रापि।" उणा० २। ४६। इति इनच्।) फलवान्। इत्यमरः। २। ४। ७॥ पनसे फलवति वृक्षे च पुं। इति राजनिर्घण्टः॥
फलिनी, स्त्री, (फलमस्या ग्रस्तीति। इनिः। ङीप्।) प्रियङ्गुवृक्षः॥ (पर्य्यायोऽस्या यथा,—
"प्रियङ्गुः फलिनी कान्ता लता च महिकाह्वया।
गुन्द्रा गुन्द्रफला ग्यामा विग्वक्सेनाङ्गना
प्रिया॥"
इति भावप्रकाग्रस्य पूर्व्वखण्डे प्रथमे भागे।
यथा, रघौ। ८। ६१।
"मिथुनं परिकल्पितं त्वया
सहकारः फलिनी च नन्दिनौ
विधिनोपयमप्रदक्षिणा-
मनयो र्गमयत इत्यमाग्रुतम्॥")
ग्रग्निग्रिखावृक्षः। इत्यमरः। २। ४। १३६॥

फली, [न्] त्रि, (फलमस्यास्तीति। फल+इनिः।) फलयुक्तवृक्षादिः। इत्यमरः। २। ४। ७॥
फली, स्त्री, (फलमस्यस्या इति ग्रर्ग्र ग्रादिभ्यः ग्रच्। स्त्रियां ङीप्।) प्रियङ्गुवृक्षः। इत्यमरः। २। ४। ७॥ (यथा, वैद्यकरत्नमालायाम्।
"विग्वक्सेना प्रिया कान्ता प्रियङ्गुः फलिनी-
फली॥"
फलि+वा ङीप्।) फलिमतस्यः। इति ग्रब्दमाला॥
फलूयः, पुं, लताभेदः। इत्युणादिकोग्रः॥
फलेग्रहिः, पुं, (फलं गृह्णातीति। फल+ग्रह+"फलेग्रहिरात्मम्भरिग्च।" ३।२।२६। इति उपपदस्य ग्रदन्तत्वं ग्रहेरिन् प्रत्ययग्च निपात्यते।) यथासमयं फलधरवृक्षः। ऋतुप्राप्तौ फलानि गृह्णाति धारयतीति फलेग्रहिः ग्रहृतुस्तम्भादित्वादिना इः स्वे फले इति निर्द्देग्राात् एकारः। किंवा फले गृह्णाति इति फलेग्रहिः कर्म्मण्याधारविवक्षा निपातनात् सप्तम्या अलुक् तुकि फलग्रहिग्च फलेग्रहिः फलग्रहिरिति वाचस्पतिः। इह ग्रहिर्धारणार्थः स्वीकारार्थग्च अत्र धारणार्थे वृत्त एव रूढिः। स्वीकारार्थे तु क्रियाग्रब्दतैव यथा फलेग्रहीन् हंसि वनस्पतीनामिति भट्टिः॥ इति रायमुकुटादयः। इत्यमरटीकायां भरतः॥ फलग्रहणकर्त्तरि, त्रि॥
फलेग्राहिः, पुं, (फले गृह्णातीति। ग्रच्+इन्। पृषोदरात् वृद्धिः। निपातनात् सप्तम्या अलुक्।) फलेग्रहिः। इति ग्रब्दरत्नावली॥
फलेन्द्रः, पुं, (फलेन इन्द्रः ऐग्वर्य्यग्रालीव। वृहत्फलत्वादेवास्य तथात्वम्।) वृहच्छमुः। तत्पर्य्यायः। नन्दः २ राजग्रमुः ३ महाफलः ४ सुरभिपत्रः ५ महाग्रमुः ६। ग्रस्य गुणाः। स्वादुत्वम्। विष्टम्भित्वम्। गुरुत्वम्। रोचनत्वञ्च। इति भावप्रकाग्रः॥
फलेपुष्पा, स्त्री, (फले फलसुखे पुष्पं यस्याः। सप्तम्या अलुक्।) क्षुद्रक्षुपविग्रेषः। गूमा इति हिन्दीभाषा। तत्पर्य्यायः। द्रोणा २ द्रोणपुष्पी ३। ग्रस्या गुणाः। गुरुत्वम्। स्वादुत्वम्। रूक्षत्वम्। उष्णत्वम्। वातपित्तकारित्वम्। क्षारत्वम्। लवणत्वम्। स्वादुपाकत्वम्। कटुत्वम्। भेदकत्वम्। कफामकामलाग्रोथतमकग्वासग्लानुनाग्नित्वञ्च। इति भावप्रकाग्रः॥
फलेरुहा, स्त्री, (फले रोहतीति। रुह+कः। सप्तम्या अलुक्।) पाटलिवृक्षः। इत्यमरः। २। ४। ५४॥ (ग्रस्याः पर्य्यायो यथा,—
"पाटलालिप्रिया स्थाली ताम्रपुष्पी फलेरुहा।
कामदूती कुबेराक्षी कुक्षी तोयाधिवासिनी॥"
इति वैद्यकरत्नमालायाम्॥)
फलेसक्तः, त्रि, (फले सक्त ग्रासक्तः।) फलासक्तः। फलकामी। यथा, भगवद्गीतायाम्।
"युक्तः कर्म्मफलं त्यक्त्वा ग्रान्तिमाप्नोति नैष्ठिकीम्॥
ग्रयुक्तः कामकारेण फलेसक्तो निबध्यते॥"

'फलेसक्तः मम फलायेदं कर्म्म करोमीत्येवं फलेसक्तो नितरां बन्धं प्राप्नोति।' इति मलमासतत्त्वम्॥

फलोत्तमा, स्त्री, (फलेषु उत्तमा।) काकलीद्राक्षा। इति राजनिर्घण्टः॥ (दुग्धिका। तत्पर्य्यायो यथा,—

"उत्तमा दुग्धिका दुग्धी फलोत्तमा फलिन्यपि॥"

इति वैद्यकरत्नमालायाम्॥)

फलोत्पत्तिः, पुं, (फलाय उत्पत्तिरस्य। प्रशस्तफलानां उत्पत्तिरत्र वा।) आम्रवृक्षः। इति शब्दचन्द्रिका॥

फलोदयः, पुं, (फलस्य उदयो यत्र।) लाभः। सुरालयः। हर्षः। इति शब्दरत्नावली॥ (फलस्य उदयः।) फलोत्पत्तिः। यथा, रघुः।

"सोऽहमाजन्मशुद्धानामाफलोदयकर्म्मणाम्।
आसमुद्रक्षितीशानामानाकरथवर्त्मनाम्॥"

फल्गुः, पुं, (फल निष्पत्तौ+"ऋदोरप्फलिभ्यः कः।" उणा० ३।४०। इति कः। ऋदोरप्फलिभ्य इति पाठस्य विकल्पितत्वात् वाहुलकात् क इत्येके।) विसारिताङ्गम्। इत्युणादिकोषः॥

फल्गु, त्रि, (फल निष्पत्तौ+"फलिपाटिनमिमनिजनामिति।" उणा० १। १६। इत्युः गुणागमश्च।) असारम्। इत्यमरः। ३। १। ५६॥ (यथा, माघे। ३। ७६।

"तरीषु तत्त्यमफल्गु भाण्डं
सांयात्रिकानावपतोऽभ्यनन्दत्॥")

निरर्थकम्। इति त्रिकाण्डशेषः॥ (यथा, देवीभागवते। ५। १५। ३२।

"न फल्गुवाक्यैः प्रतिबोधनीयो
राजा तु वीरैरिति नीतिशास्त्रम्॥"

सामान्यम्। क्षुद्रम्। यथा, भागवते। १।१३।४०।

"अहन्यहनि भूतानामपदानि चतुष्पदाम्।
फल्गूनि तत्र महतां जीवो जीवस्य जीवनम्॥")

फल्गुः, स्त्री, (फल निष्पत्तौ+उः। गुणागमश्च।) गयास्थनदीभेदः। तस्या माहात्म्यादि यथा,—

सार्द्धक्रोशग्रहयं मानं गयायां परिकीर्त्तितम्।
यत्रक्रोशं गयाक्षेत्रं क्रोशमेकं गयाशिरः॥
तत्र पिण्डप्रदानेन लक्षनिर्भवति ध्रुवम्।
नगाग्ननार्द्दनाच्चैव कूपाच्चोत्तरमानसात्॥
एतत्त्रयाशिरः प्रोक्तं फल्गुतीर्थं तदुच्यते।
तत्र पिण्डप्रदानेन पितॄणां परमा गतिः॥
पृथिव्यां यानि तीर्थानि ये समुद्राः सरांसि च।
फल्गुतीर्थं गमिष्यन्ति वारमेकं दिने दिने॥"

इति गारुड़े ८३ अध्यायः॥

अन्यत् गयाशब्दे द्रष्टव्यम्॥*॥ काकोडुम्बरिका। इत्यमरः॥ काकडुसुर इति भाषा॥ (अस्याः पर्य्यायो यथा,—

"भद्रा मलपूः फल्गुः स्यात् काकडुम्बरिका च सा॥"

इति वैद्यकरत्नमालायाम्॥)

अस्या गुणाः। गुरुत्वम्। ग्राहित्वम्। शीतलत्वम्। स्वादुत्वम्। लघ्निकारित्वञ्च। इति राजवल्लभः॥ रेणुभेदः। फागु इति प्रसिद्धः। मिथ्यावाक्यम्। इति शब्दरत्नावली॥ वसन्तर्त्तुः। इति जटाधरः॥

फल्गुदा, स्त्री, (फल्गुरिति नाम ददाति धारयतीति। दा धारणे+कः।) गयानदी। यथा,

"तत्र देशे गया नाम पुण्यदेशोऽतिविश्रुतः।
नदी च फल्गुदा नाम पितॄणां स्वर्गदायिनी॥"

इति वृहद्धर्म्मपुराणे ५६ अध्यायः॥

फल्गुनः, पुं, (फलति कार्य्यादिकमस्मादिति। फल निष्पत्तौ+"फलेर्गुक् च।" उणा० ३। ५६। इति उनन् गुणागमश्च। फल्गुन्यां फल्गुनीनक्षत्रे जातः इति वा। "अविष्ठा फल्गुन्यनुराधेति।" ४।३।३४। इति जातार्थप्रत्ययस्य लुक्। "लुक् तद्धितलुकि।" १।२।४६। इति स्त्रीप्रत्ययस्य च लुक्। एतन्निरुक्तिस्तु फाल्गुनशब्दे द्रष्टव्या।) अर्জ্জुनः। फाल्गुनमासः। इत्यमरटीकायां भरतः॥ (फल्गुनीभवे, त्रि। इति सिद्धान्तकौमुदी॥)

फल्गुनाजः, पुं, (फल्गुनेन अजतीति। अज्+अच्।) फाल्गुनमासः। इति भूरिप्रयोगः॥

फल्गुनी, स्त्री, (फल्गुन+गौरादित्वात् ङीष्।) नक्षत्रविशेषः। तच्च पूर्व्वफल्गुनी उत्तरफल्गुनी च। इति भरतधृतगोवर्द्धनानन्दः॥ (यथा, महाभारते। ४। ४२। १६।

"उत्तराभ्यांच पूर्व्वाभ्यां फल्गुनीभ्यामहं दिवा।
जातो हिमवतः पृष्ठे तेन मां फाल्गुनं विदुः॥")

काकोडुम्बरिका। इति राजनिर्घण्टः॥ (फल्गुन्यां जाता। अविष्ठाफल्गुनीति अणो लुकि लुक्तद्धितलुकीति स्त्रीप्रत्ययस्य च लुकि फल्गुन्यषाढाभ्यां टानौ वक्तव्यौ इति वार्त्तिकोक्या टः। टित्वात् ङीप्॥)

फल्गुवाटिका, स्त्री, (फल्गूनां वाटीव इवार्थे कन्।) काकोडुम्बरिका॥ इति राजनिर्घण्टः॥ ("गुणादयोऽस्याः काकोडुम्बरिकाशब्दे ज्ञेयाः॥")

फल्गुवृन्ताकः, पुं, (फल्गुना वृन्तेनाकायति शोभते इति। आ+कै+कः।) श्योनाकभेदः। इति राजनिर्घण्टः॥

फल्गूत्सवः, पुं, (फल्गूनामुत्सवः।) फल्गुकरणकगोविन्दोत्सवः। दोलयात्रा इति ख्यातः। यथा, दोलयात्रापद्धतिः।

"गोविन्दानुगृहीतन्तु यात्राङ्गं तत् प्रकीर्त्तितम्।
फल्गूत्सवं प्रकुर्व्वीत पश्चाद्यानि व्रतानि वा॥"

फल्ग्वं, क्ली, (फलाय हितमिति। फल+यत्।) कुसुमम्। इति शब्दचन्द्रिका॥

फल्लकी [न्] पुं, (फल्लकः फलकस्तदाकारोऽस्त्यस्येति। इनि।) मत्स्यविशेषः। इति शब्दमाला॥ फलुइ इति भाषा।

फल्लफलः, पुं, सूर्य्यवातः। इति जटाधरः॥ कुलार वातास इति भाषा॥

फाः, पुं, सन्तापः। निष्फलभाषणम्। यथा,—

"फिः कोपे फाश्च सन्तापे तथा निष्फलभाषणे॥"

इति शब्दरत्नावली॥

दृद्धिः। वर्द्धकः। यथा "फा वृद्धौ वर्द्धके पुमान्।" इति विश्वः॥

फाटकी, स्त्री, (स्फुट+गुल्। ङीष्। पृषोदरादित्वात् साधुः।) स्फटी। इति राजनिर्घण्टः॥

फाणिः, स्त्री, (फाणयतीति। फण गतौ+णिच्+इन्।) गुड़ः। करभः। इत्युणादिकोषः॥

फाणितं, क्ली, (फण गतौ+णिच्+क्तः।) अर्द्धावर्त्तितेक्षुरसः। फेणीति ख्यातम्। इत्यमरभरतौ॥ (यथा, महाभारते। १३।६४।२३।

फल्गुनी पूर्व्वसमये ब्राह्मणानामुपोषितः।
भक्ष्यान् फाणितसंयुक्तान् दत्त्वा सौभाग्यमृच्छति॥")

अस्य गुणाः। गुरुत्वम्। अभिष्यन्दित्वम्। दृंहणत्वम्। कफशुक्रलत्वम्। वातपित्तश्रमनाशित्वम्। मूत्रवस्तिविशोधनत्वञ्च॥*॥

"इक्षो रसस्तु यः पक्वः किञ्चिन्नाढ़ो बहुद्रवः।
स एवेक्षुविकारेषु ख्यातः फाणितसंज्ञया॥"

इति भावप्रकाशः॥

(यथा च।

"शिराहर्य्योरञ्जनं कुर्य्यात् फाणितं मधुसंयुतम्॥"

इति वैद्यकचक्रपाणिसंग्रहे नेत्ररोगाधिकारे॥

"फाणितं शुक्तवः सर्पिर्दधिमण्डोऽम्बकाञ्जिकम्।
तर्पणं मूत्रकृच्छ्रघ्नमुदावर्त्तहरं पिबेत्॥"

इति चरके सूत्रस्थाने २३ अध्याये॥)

फाण्ट, त्रि, (फण्यते स्मेति। फण गतौ+"क्षुब्धस्वान्तध्वान्तेति।" ७। २। १८। इति निपातनात् साधुः।) अनायासलब्धम्। इत्यमरः। ७। १। ६४॥ कषायभेदः। यथा,—

"चिरोष्णतोये मृदितः फाण्ट इत्यभिधीयते।"

अपि च।

"क्षुण्णद्रव्यपले सम्यक् जलमुर्य्यां विनिःक्षिपेत्।
पात्रे चतुःपलमिते ततस्तु स्रावयेच्छनैः॥
सोऽयं चूर्णद्रवः फाण्टो भिषग्भिरभिधीयते॥"

इति वैद्यकपरिभाषा॥

(तथास्य प्रस्तुतविधिः।

"सद्योऽभिषु पूतस्तु फाण्टस्तत्स्नानकल्पने॥"

इति वाभटकल्पस्थाने षष्ठेऽध्याये॥)

फालं, क्ली, (फलाय हस्याय हितम्। फल+अण्। यद्वा, फल्यते विदार्य्यते भूमिरनेनेति। फल+घञ्।) हलीषकरणम्। इति मेदिनी। ले, ३४॥

फालः, पुं, (फल्यते विदार्य्यते क्षेत्रमनेनेति। फल+करणे घञ्।) लाङ्गलस्यभूमिविदारकलौहः। फल्यते विशीर्य्यते भूमिरनेन सः। तत्पर्य्यायः। क्षुरिकः २। इत्यमरः। २।८।१३॥ क्षुरकः ३। फलम् ४। इति भरतः॥ क्षुरिका ५। फालम् ६। इति मुकुटः॥ कुशिकम् ७। इति हेमचन्द्रः। ३। ५५५॥ महादेवः। बलदेवः। कार्षासवस्त्रे, त्रि। इति मेदिनी। ले, ३४॥ नवविधदिव्यान्तर्गतोऽष्टमदिव्यम्। तस्य विधिर्यथा। वृहस्पतिः।

"आयसं द्वादशपलघटितं फालमुच्यते।
अष्टाङ्गुलं भवेद्दीर्घं चतुरङ्गुलविस्तरम्॥

अग्निवर्णं ततश्चौरो जिह्वया लेढ्येत् सकृत्।
न दग्धश्चेच्छुद्धिमियादन्यथा तु स हीयते॥"
चौरोऽत्र गोचौरः। गोचौरस्य प्रदातव्यं तप्त-
फालावलेहनमिति स्मृतिरिति मेधिलाः॥
अत्रापि त्वमग्ने इत्यादिमन्त्रानन्तरं आयसं
लेलिह्यानस्य जिह्वयापि समाद्धेरिति पिता-
महोक्तेः प्राङ्विवाकशपथाभ्यामग्निमभिमन्त्रणं
कार्य्यम्॥*॥ तत्र प्रयोगः। लौकिकचत्वारिंश-
त्तोलकमितं लौहघटितमध्यमध्यात्मकाङ्गुलाष्ट-
दीर्घं तथाविधषतरङ्गुलप्रस्तारं फालमग्नौ ताप-
येत्। तत्र प्राड्विवाको धर्म्मावाहनादिहवनान्तं
कर्म्म हुत्वा दक्षिणां दत्त्वा,—
'ॐ त्वमग्ने वेदाश्चत्वारस्त्वं यज्ञेषु हूयसे।
त्वं सुखं सर्व्वदेवानां त्वं सुखं ब्रह्मवादिनाम्॥
जठरस्थोऽसि भूतानां ततो वेत्सि शुभाशुभम्।
पापं पुनासि वै यस्मात्तस्मात् पावक उच्यते॥
पापेषु दर्शयात्मानमर्चिष्मान् भव पावक!।
अथवा शुभभावेन प्रीतो भव हुताशन!॥
त्वमग्ने सर्व्वभूतानामन्तश्चरसि साक्षिवत्।
त्वमेव देव जानीषे न विदुर्यानि मानवाः॥
व्यवहाराभिशस्तोऽयं मानुषः शुद्धिमिच्छति।
तदेनं संशयादस्माद्धर्म्मतस्त्रातुमर्हसि॥'
इत्येतैः फालस्थमग्निं अभिमन्त्रयेत्। शपथस्तु
प्रतिज्ञापत्रं शिरसि निधाय।
'त्वमग्ने सर्व्वभूतानामन्तश्चरसि पावक!।
साक्षिवत् पुण्यपापेभ्यो ब्रूहि सत्यं करे मम॥'
इत्यनेनाभिमन्त्र्य अग्निवर्णं फालं जिह्वया सकृ-
ल्लिह्यात् न दग्धश्चेत्तदा शुद्धः।" इति दिव्य-
तत्त्वम्॥

फालकृष्टः, त्रि, (फालेन कृष्टः।) फालेन कर्षित-
भूम्यादिः। यथा, मानवे। ४। ४६।
"न सूत्रं पथि कुर्व्वीत न भस्मनि न गोव्रजे।
न फालकृष्टे न जले न चित्यां न च पर्व्वते॥"

फालाः, पुं, (फालयन्तीति। फल + णिच् + अच्।)
जम्बीरबीजानि। इति दुर्गटीकाटिप्पनीधृत-
शब्दचन्द्रः॥

फाल्गुनः, पुं, (फलति निष्पादयतीति। फल् +
"फलेर्गुक् च।" उणा० ३। ५६। इति उनन्
ततो गुक्। ततः प्रज्ञाद्यण्। यद्वा फल्गुन्यां
फल्गुनीनक्षत्रे जातः फल्गुनः। स एव। अण्
ततश्चिरुक्तिर्यथा, महाभारते। ४। ४२। १६।
"उत्तराभ्यां पूर्व्वाभ्यां फल्गुनीभ्यामहं दिवा।
जातो हिमवतः पृष्ठे तेन मां फाल्गुनं विदुः॥")
गुङ्गाकेशः। नदीवृक्षः। अर्জ্জुनवृक्षः। तपस्य
मासः॥ यथा,—
"फाल्गुनस्तु गुडाकेशे नदीवार्জ্জुनभूरुहे।
तपस्यसंज्ञे मासे तत्पूर्णिमायाञ्तु फाल्गुनी॥"
इति दन्त्यनान्तवर्गे मेदिनी॥
अतएव।
"फाल्गुने गगने फेने शल्मिच्छन्ति पण्डिताः।"
इति कारिका समुल्लिका। अत्र अशल्मिच्छ-
न्तीति अकारप्रश्लेषो भ्रान्तानाम्॥*॥

(फाल्गुनी पौर्णमासी अस्मिन्निति। "विभाषा
फल्गुनीश्रवणाकार्त्तिकीचैत्रिभ्यः।" ४।२।२३।
इति पक्षे अण्।)
वैशाखादिद्वादशमासान्तर्गतैकादशमासः।
फल्गुनीनक्षत्रयुक्ता पौर्णमासी यस्मिन् मासे
सः। इति तु प्रायिकाभिप्रायम्। स च त्रिविधः।
सुखचान्द्रो गौणचान्द्रः सौरश्च। यथा।
कुम्भस्थरविप्रारब्धशुक्लप्रतिपदादिदर्शान्तो मासो
मुख्यचान्द्रः। मुख्यचान्द्रफाल्गुनमासीयपौर्ण-
मास्यन्तः कृष्णप्रतिपदादिको मासो गौण-
चान्द्रः। कुम्भराशिस्थरविभोगोपलक्षितकालात्-
मको मासः सौरः। इति मलमासतत्त्वम्॥*॥
तत्पर्य्यायः। तपस्यः २ फाल्गुनिकः ३ फल्गुनः
४। इत्यमरभरतौ॥ वत्सरान्तकः ५। इति
राजनिर्घण्टः॥*॥ तत्र जातफलम्।
"प्रियंवदः सज्जनवल्लभश्च
परोपकारी विमलाशयश्च।
दाता नितान्तं प्रमदाभिलाषी
स्यात् फाल्गुने यस्य जनस्य जन्म॥"
इति कोष्ठीप्रदीपः॥
अथ फाल्गुनकृत्यम्। तत्र माघ्यनन्तरं
फाल्गुनकृष्णाष्टम्यां कालशाकवास्तुकशाकोप-
करणान्नेन श्राद्धं कर्त्तव्यम्॥*॥ गौणचान्द्र-
फाल्गुनकृष्णाचतुर्दश्यां शिवरात्रिव्रतम्। यद्दिने
प्रदोषनिशीथोभयव्यापिनी चतुर्दशी तद्दिने
व्रतमुभयव्याप्यनुरोधात्। यदा पूर्व्वेद्युर्निशीथ-
व्यापिनी परेद्युः प्रदोषमात्रव्यापिनी तदा पूर्व्वे-
द्युर्व्रतं प्रधानकालव्याप्यनुरोधात्। यदा तु
पूर्व्वेद्युर्न निशीथव्याप्तिः परदिने प्रदोषव्यापिनी
तदा परदिने प्रदोषव्यापिनीति वचनात्॥*॥
सुखचान्द्रफाल्गुनशुक्लद्वादशी गोविन्दद्वादशी।
"फाल्गुने शुक्लपक्षस्य पुण्यर्क्षे द्वादशी यदि।
गोविन्दद्वादशी नाम महापातकनाशिनी॥"
महापातकनाशकामो गङ्गायां स्नानमहं
करिष्ये। अत्र पद्मपुराणीयो मन्त्रः।
"महापातकसंज्ञानि यानि पापानि सन्ति मे।
गोविन्दद्वादशीं प्राप्य तानि मे हर जाह्नवि!॥"
फाल्गुनपौर्णमास्यां दोलयात्रा। तीर्थचिन्ता
मणौ ब्रह्मपुराणम्।
"नरो दोलागतं दृष्ट्वा गोविन्दं पुरुषोत्तमम्।
फाल्गुन्यां संयतो भूत्वा गोविन्दस्य पुरं व्रजेत्॥"
स्कन्दपुराणीयपुरुषोत्तममाहात्म्ये चिन्ताधाये।
"फाल्गुन्यां क्रीड़नं कुर्य्यात् दोलायां मम
भूपते!॥"
इति कृत्यतत्त्वम्॥

फाल्गुनागुजः, पुं, (फाल्गुनादनुपश्चात् जायते
इति। अनु + जन् + ड।) वसन्तकालः। इति
हारावली॥ अर्জ্জुनस्य कनिष्ठभ्राता च॥

फाल्गुनिकः, पुं, (फाल्गुनी पौर्णमास्यस्मिन् मासे
इति। "विभाषा फाल्गुनीश्रवणेति।" ४। २।
२३। इति ठक्।) फाल्गुनमासः। इत्यमरः।
१।४।१५॥

फाल्गुनी, स्त्री, (फल्गुनीभिर्युक्ता पौर्णमासी।
"नक्षत्रेण युक्तः कालः।" ४। २। ३। इति
अण्। ततो ङीप्।) फाल्गुनमास्य पूर्णिमा।
इति मेदिनी। ने, ६६॥ पूर्व्वफल्गुनीनक्षत्रम्।
उत्तरफल्गुनीनक्षत्रम्। इत्यमरटीकायां
भरतः॥

फिः, पुं, पापः। निष्फलवाक्यम्। इत्येकाक्षर-
कोषः। कोषः। इति शब्दरत्नावली॥

फिङ्कः, पुं, (फिङ्ग इति शब्देन कायति शब्दा-
यते इति। कै + कः।) पक्षिविशेषः। फिङ्गा
इति भाषा। तत्पर्य्यायः। कुलिङ्गः २ कलिङ्गः
३ धूम्राटः ४। इति शब्दमाला। भृङ्गः ५।
इत्यमरः॥

फिरङ्गः, पुं, (फौ पापे क्रोधे वा रङ्गोऽनुरागो
यस्य।) स्वनामख्यातश्चक्रदेशः। यथा,—
"पूर्व्वाम्नाये नवशतं षड़शीतिः प्रकीर्त्तिताः।
फिरङ्गभाषया मन्त्रास्तेषां संसाधनादृषिः॥
अधिपा मण्डलानाञ्च संग्रामेष्वपराजिताः।
इंरेजा नव षट् पञ्च लण्डजाश्चापि भाविनः॥"
इति मेरुतन्त्रे २३ प्रकाशः॥
रोगविशेषः। अथ फिरङ्गस्य निरुक्तिमाह।
"फिरङ्गसंज्ञके देशे वाहुल्येनैव यद्भवेत्।
तस्मात् फिरङ्ग इत्युक्तो व्याधिर्व्याधिविशारदैः॥"
तस्य विप्रकृष्टं निदानमाह।
"गन्धरोगः फिरङ्गोऽयं जायते देहिनां ध्रुवम्।
फिरङ्गिणोऽतिसंसर्गात् फिरङ्गिण्याः प्रसङ्गतः॥
व्याधिरागरुजो ह्येष दोषाणामत्र संक्रमः।
भवेत्ता लक्षयेत्तेषां लक्षणैर्भिषजां वरः॥"
फिरङ्गिण्याः प्रसङ्गत इति विशेषार्थम्॥*॥
रूपमाह।
"फिरङ्गस्त्रिविधो ज्ञेयो बाह्याभ्यन्तरतस्तथा।
बहिरन्तर्भवश्चापि तेषां लिङ्गानि च शृणु॥
तत्र बाह्यः फिरङ्गः स्यादिस्फोटसदृशोरुरुक्।
स्फुटितो व्रणवद्भेदः सुखसाध्योऽपि स स्मृतः॥
सन्धेराभ्यन्तरः स स्यादुभयोर्लक्षणैर्युतः।
कष्टदोऽतिचिरस्थायी कष्टसाध्यतमश्च सः॥"
उपद्रवान् आह।
"कार्श्यं बलक्षयो नासाभङ्गो वक्त्रेण मन्दता।
अस्थिशोषोऽस्थिवक्रत्वं फिरङ्गोपद्रवा अमी॥"
साध्यत्वादिकमाह।
"बहिर्भवो भवेत् साध्यो नूतनो निरुपद्रवः।
आभ्यन्तरस्तु कष्टेन साध्यः स्यादयमामयः॥
बहिरन्तर्भवो जीर्णः क्षीणस्योपद्रवैर्युतः।
बोध्यो व्याधिरसाध्योऽयमित्यूचुर्मुनयः पुरा॥"
अथ फिरङ्गस्य चिकित्सा।
"फिरङ्गसंज्ञकं रोगं रसः कर्पूरसंज्ञकः।
अवश्यं नाशयेदेतद्दृष्टः पूर्व्वे चिकित्सकाः॥
लिख्यते रसकर्पूरप्राप्तने विधिरुत्तमः।
अनेन विधिना खादन्मुखे क्षोभं न विन्दति।
गोधूमचूर्णं संनीय विदध्यात् रुग्मकूपिकाम्।
तन्मध्ये निःक्षिपेत् सूतं चतुर्गुञ्जामितं भिषक्॥
ततस्तु गुटिकां कुर्य्यादृयथा न स्यान्मुखे बहिः।

सूक्ष्मचूर्णं लवङ्गस्य तां वटीमवधूसयेत् ॥
दन्तस्थौ यथा न स्यात्तथा तामम्भसा गिलेत् ।
ताम्बूलं भक्षयेत् पश्चाच्छाकान्नलवणांस्त्यजेत् ॥
त्रयमासप्रयोगाद्धं विशेषात् स्त्रीनिषेवणम् ॥
इति कर्पूररस: ॥ १ ॥

पारदष्टङ्कमान: स्यात् खदिरश्चङ्कनंमित: ।
आसारकरभक्षापि माक्षिकश्चङ्कयोन्मित: ॥
टङ्कत्रयमितं चौद्रं खले सर्वं विनि:क्षिपेत् ।
संमर्द्य तस्य सर्वस्य कुर्यात् सप्त वटीर्भिषक् ॥
न रोगी भक्षयेत् प्रातरेकैकामनुना वटीम् ।
वर्जयेदम्लवर्गौ फिरङ्गस्य नश्यति ॥
इति सप्तप्राणिकावटी: । २ ॥

पारद: कर्षमात्र: स्यात्तावदेव हि गन्धक: ।
तद्द्वयं चूर्णमात्रा: सुक्ष्मैषां कुर्याच्च कज्जलीम् ॥
तस्या: सप्त वटी: कुर्यात्ताभिर्दूमं प्रयोजयेत् ।
दिनानि सप्त तेन स्यात् फिरङ्गान्तो न संशय: ॥
इति धूमप्रयोग: ॥ ३ ॥

पीतपुष्पबलापत्रस्वेष्टमितं रसम् ।
दृक्षाभ्यां मर्द्दयेत्तावत् यावत् स्तो न दृश्यते ॥
तत: संक्षिप्यदृक्षादेवं वासरसप्तकम् ।
त्वक्षीरवरमस्तस्य फिरङ्गस्तेन नश्यति ॥ ४ ॥

चूर्णयेन्निम्बपत्राणि पथ्यां निम्बाष्टमांशिकाम् ।
धात्रीश्च तावतीं रात्रिं निम्बपाञ्चभागिकाम् ॥
घ्राणमानमिदं चूर्णमक्षीयादम्भसा सह ।
फिरङ्गं नाशयत्येव वाह्यमाभ्यन्तरं तथा ॥ ५ ॥

तोयपीनिभं चूर्णं घ्राणमानं समाचिकम् ।
फिरङ्गव्याधिनाशाय भक्षयेल्लवणं त्यजेत् ॥
लवणं यदि वा त्यक्तुं न शक्नोति तदा जन: ।
सैन्धवं स हि भक्षीत मधुरोपरसं हि तत् ॥ ६ ॥

चूर्णकर्षमितं स्तं क्षरणष्टकरसै: सह ।
खले विमर्द्यितच्च पक्षार्द्धं गुग्गुलुं क्षिपेत् ॥
तत्रार्कक्षरमं कृष्णं त्रिफलाच्च पृथक् पृथक् ।
चूर्णकर्षमितं सर्वं चूर्णयित्वा तु नि:क्षिपेत् ॥
तत् सर्वं मधुसर्पिर्भ्यां द्विपलाभ्यां पृथक् पृथक् ।
मर्द्दयेदथ तत् खादेदर्द्धकर्षमितं रसम् ॥
क्रम: फिरङ्गरोगोत्थस्त्वावश्यं विनश्यति ।
अस्थोऽपि चिरजातोऽपि प्रशाम्यति महाव्रण: ॥
अनङ्गक्षयत: शोषो मुखस्य च न जायते ।
वर्जयेदत्र सर्वत्रमेकविंशतिवासरान् ॥ ७ ॥
इति फिरङ्गाधिकार:।" इति भावप्रकाश: ।

फिरङ्गरोटी, स्त्री, (फिरङ्गप्रिया रोटी । फिरङ्गानां रोटीति वा ।) रोटिकाविशेष: । पाओरोटी इति पौउरुटि इति च भाषा । सा तु तालस्थावा सर्ज्जूरस्य रसेन मधुरिकाचूर्णेन वा मिश्रितां गोधूमकणिकामधिककालतप्तां संमर्द्द्य गोलाकारं स्थूलं स्थूलं निर्म्माय मन्दूरपाकेन निष्पादिता भवति । इति पाकरत्नेश्वर: ॥

फिरङ्गिनी, स्त्री, (फिरङ्गदेशो जन्मस्थानत्वेनास्त्यस्या इति । फिरङ्ग + इनि । ङीप् ।) फिरङ्गदेशोद्भवनारी । यथा,—

"गन्धरोग: फिरङ्गोत्थं जायते देहिनां ध्रुवम् ।
फिरङ्गिरोगतिसंसर्गात् फिरङ्गिण्या: प्रसङ्गत: ॥"
इति भावप्रकाश: ॥

फिरङ्गी [न्] पुं, (फिरङ्ग + इनि: ।) फिरङ्गदेशोद्भवपुरुष: । अस्य प्रमाणं पूर्व्वशब्दे द्रष्टव्यम् ॥

फु:, पुं, मस्तकम् । तुच्छवाक्यम् । इति विश्व: ॥

फुक:, पुं, (फुनाति शब्दवाक्येन कायति शब्दायते इति । फु + कै + क ।) पक्षी । इति शब्दचन्द्रिका ॥

फुट:, त्रि, (स्फुटतीति । स्फुट + क: । पृषोदरादित्वात् साधु: ।) सर्षपक्या । इति हेमचन्द्र: । ४ । ३८१ ॥

फु(फू)त, य, अनुकरणशब्द: । इति फुत्कारशब्ददर्शनात् । (यथा, "बाल: पयसा दग्धो दध्यपि फुत्कृत्य भक्षयति ।" इति प्राच: ॥) तुच्छभाषणम् । इति केचित् ॥

फुत्कर:, पुं, (फुदित्यव्यक्तशब्दं करोतीति । कृ + ट: ।) अग्नि: । इति शब्दचन्द्रिका ॥

फुत्कार:, पुं, (फु + भावे घञ् । फुदित्यव्यक्तशब्दस्य कार: करणम् ।) फुत्करणम् । फु इति फुँक् इति च भाषा । फुत्कारवति पावके आहुतिनिषेधो यथा, तिथ्यादितत्त्वे ।

"अस्पे रूक्षे सस्फुलिङ्गे वामावर्त्ते भयानके ।
आर्द्रकाष्ठे: सधूमाग्ने फुत्कारवति पावके ॥
ज्वालार्चिषि सुदुर्गन्धे तथा लिहति जेटिनीम् ।
आहुतिं जुहुयाद्यस्तु तस्य नाशो भवेद्ध्रुवम् ॥"

फुत्कृति:, स्त्री, (फुदित्यव्यक्तशब्दस्य कृति: करणम् ।) फुत्कार: । यथा, काव्यचन्द्रिका ।

"स्फुर्ज्जत्फुत्कृतिभीतिसम्भ्रमचमत्कारस्फुरत्सम्भ्रमा ॥"

फुप्फुस:, पुं, पुपफ़स: । कोष्ठविशेष: । स च हृदयनाड़िकासंलग्नाश्रयविशेष: । फ्याप्ड़ा फुल्का कापासे इति च लोके । इति सुश्रुत: ॥ यथा,—

"स्थानान्यामाग्निपक्वानां रक्तस्य रुधिरस्य च ।
हृद्दुष्कृ: फुप्फुसश्च कोष्ठ इत्यभिधीयते ॥"
इति माधवकर: ।

अस्य स्थाना । "आमस्य स्थानं आमाशय: । नाभेरूर्द्धं । अग्ने: स्थानं पच्यमानाशय: नाभिमध्यम् । पक्वस्य स्थानं पक्वाशय: नाभेरध: । रक्तस्य स्थानं यकृत् प्लीहानौ । हृत् हृदयं इक्षुरसपाकसवर्ण: श्लेष्मितमलरक्त: उल्लुक: स चालर्टगैर्व्यवस्थित: पुर्य्याधानम् । फुप्फुस: हृदयस्य वामपार्श्वे फुप्फुस इति ख्यात: ।" इति विश्वरत्नि: । (यथा च ।

"तदाभे फुप्फुसं श्लेष्मा हृत्पिपाद्धे यकृन्मतम् ।
उदानवायोराधार: फुप्फुस: श्लेष्मते बुधै: ॥"
इति पूर्व्वखण्डे पञ्चमेऽध्याये शार्ङ्गधरेणोक्तम् ।)

फुल्लति:, स्त्री, (फुल्ल + क्तिन् । "ति च ।"७।४।८८। इति यत उत् ।) फुल्लनम् । इति शब्दबोधाकरयन् ।

फुल्ल, विकासे । इति कविकल्पद्रुम: ॥ (भ्वा०-पर०-अक०-सेट् ।) द्रष्टौ । लट्यान्त: । विकास इह कस ज गताविति दन्त्यान्तस्य षत्वे रूपम् । विपूर्ब्बत्वेनार्थान्तरवाचितया विकसनमित्यर्थ: । फुल्लति मल्लीकलिका । इति दुर्गादास: ॥

फुल्ल:, त्रि, (फुल्लतीति । फुल्ल + अच् । यद्वा, फलतीति । फि फला विसरणे + क्त: । "आदितश्च ।"७।२।१६। इति इड्भाव: । "ति च ।" ७ । ४ । ८१ । इति उत्वम् । अनुपसर्गात् । फुल्लक्षीवेति ।"८।२।५५। इति निष्ठातस्य ल: ।) विकसित: । इत्यमर: । २।४।८ ॥ (यथा, महाभारते । १ । १२८ । ४१ ।

"जलञ्च सुशुभे च्छन्नं फुल्लैर्जलरुहैस्तथा ॥")
पुष्पम् । फुल इति भाषा । यथा,—

"श्रीपञ्चम्यां श्रियं देवीं फुल्लै: संपूजयेत् सदा ॥"
इति कालिकापुराणम् ॥

फुल्लदाम, [न्] क्ली, (फुल्लानां पुष्पाणां दाम इव ।) छन्दोभेद: । यथा,—

"मो गौ नौ तौ गौ शरहयतुरगै: फुल्लदाम
प्रसिद्धम् ॥"

उदाहरणं यथा,—

"ग्रन्थलोकानां प्रकटितकथनं ध्वस्तमालोक्य कंसं
हृष्यच्चेतोभिरिन्दिवबसतिभिर्योगिसंस्तैर्विमुक्तम् ।
सुग्धामोदेन स्वागतदशदिशाभोगमाकृतभृङ्गं
मौलौ देव्यारेर्न्यपतदनुपमं स्वस्तरो: फुल्लदाम ॥"
इति छन्दोमञ्जरी ॥

फुल्लफाल:, पुं, (फुल्लं फलतीति । फल + अच् ।) शूर्पवात: । इति त्रिकाण्डशेष: ॥

फुल्लरीक:, पुं, (फल + "फर्फरीकादयश्च ।" उणा० ४ । २० । इति ईकनूप्रत्ययेन निपातनात् साधु: ।) देश: । सर्प: । इति संक्षिप्तसारोणादिवृत्ति: ॥

फुल्ललोचन:, पुं, (फुल्ले विकसिते लोचने यस्य ।) मृगविशेष: । इति शब्दचन्द्रिका ॥ प्रफुल्ललोचनयुक्ते, त्रि ॥

फुल्लि:, स्त्री, विकाश: । फुल्धातुकथने तिङ्वत्तिङ् वा इति संक्षिप्तसारवचनात् भावे फुल्प्रत्ययेन निष्पन्न: ॥

फेण:, पुं, (स्फायते वर्द्धते इति । स्फाय + "फेनमौनौ ।" उणा० ३ । ३ । इति नक् फे-भ्रष्टादेशश्च । मतान्तरे पत्वम् । दन्त्यनान्तपाठस्तु गरीयान् ।) फेन: । तरङ्गश्योपर्युत्थितबुद्बुदाकारवस्तु । फेना इति भाषा । यथा,—

"पय:फेननिभा शय्या दान्ता रुक्मपरिच्छदा ।"
इति पुराणम् ॥

हिण्टीर: । इत्यमर: । २ । ८ । १०५ ॥ समुद्रफेना इति भाषा । अस्य मद्देत्यनान्तस्य प्रमाणं यथा,—

"हंसश्रेण्यो नदीतीरे निवदे: संप्रतीक्षिरे ।
यथा सारस्वता मन्त्रा अन्तरे फेनमद्भना ।"
इत्यमरटीकायां रघुनाथचक्रवर्त्ती ।

फेण(न)प:, पुं, स्वयंपतितफलादिजीविमुनिविशेष:। यथा, श्रीभागवते। ३। १२। ४३।
"वैखानसा वालिखिल्यौदुम्बरा: फेणपा वने।
न्यासे कुटीचक: पूर्वे बह्वोदो हंसनिष्क्रियौ॥"
"वने स्थिताश्चत्वार:। तत्र वैखानसा: चक्रादृष्टपथवृत्तय:। वालिखिल्या: नवेऽन्ने लब्धे पूर्वसञ्चिताग्न्याधिन:। औदुम्बरा: प्रातरुत्थाय यां दिशं प्रथमं पश्यन्ति तत आहृते: फलादिभिर्जीवन्त:। फेणपा: स्वयं पतितै: फलादिभिर्जीवन्त:। कुटीचक: स्वाश्रमधर्म्मप्रधान:। बह्वोद: कर्म्मोपसर्ज्जनीकृत्य ज्ञानाभ्यासप्रधान:। हंसो ज्ञानाभ्यासनिष्ठ:। निष्क्रिय: प्राप्ततत्त्व:। एते च सर्व्वे वयोत्तरं श्रेष्ठा:।" इति तट्टीकायां श्रीधरस्वामी॥ (फेनं पिबतीति। फेन+पा+क:। फेनपानकर्त्तरि, त्रि। यथा, महाभारते। १। ६४। २२।
"फेनपांश्च तथा वत्सान् इक्ष्वाकुं स मागवा:॥")

फेणी(नी), स्त्री, (स्फायते वर्द्धते इति। स्फाय+नक्। गौरादित्वात् ङीष्।) सनामख्यातमिष्टान्नविशेष:। यथा, जीर्णमञ्जरी।
"वटो वेशवारान्नवङ्गेन फेणी-
समं पर्पट: शिग्रुवीजेन याति॥"

फेत्कारिणी, स्त्री, (फेत् करोतीति। फेत्+खिनि:। ङीप्।) तन्त्रविशेष:। यथा,—
"उन्मत्तभैरवं नारसिंहं डामरभैरवम्।
शिवाकारं मलिन्याद्यमसिताङ्गादि यामलम्॥
सिद्धयोगेश्वरं तन्त्रं योगिनीजालमम्बरम्।
दृष्ट्वा ज्ञात्वा विधिं फेत्कारिणीतन्त्रं विरच्यते॥"
इति प्रथमश्लोकदयम्॥
"फेत्कारिणीतन्त्र इदं मयोक्तं
ज्ञात्वा समस्तागमसारभूतम्।
मूर्खोविनाशाय धनाय धर्म्म-
मोक्षाय सम्यक् प्रयतो नियोज्य॥"
इति फेत्कारिणीतन्त्रस्य शेषश्लोक:॥

फेत्कारीय:, पुं, तन्त्रविशेष:। तन्त्रसारादिसंग्रहे फेत्कारीये इति शासनं लिखितम्॥

फेन:, पुं, (स्फायते वर्द्धते इति। स्फाय+"फेनमीनौ।" उणा० ३। ३। इति नक् फेशब्दादेशश्च।) फेप:। फेना इति भाषा। तत्पर्य्याय:। शिशीर: २ अब्धिकफ: ३। इत्यमर:। २। ६। १०५॥ शिशिर: ४। इति शब्दरत्नावली॥ उदुद्रकफ: ५ जलघास: ६ फेनक: ७। इति त्रिकाण्डशेष:॥ स्फायते फेन: स्फायौ च वृद्धौ नाम्नीति ऊन: निपातनात् सलुक् दन्त्यनान्त:। इत्यमरटीकायां भरत:॥ अस्य दन्त्यनान्तस्य प्रमाणान्तरं यथा,
"वानीरं गगनं फेनसूनश्च एतन्नान्वितम्।
आहुर्गगनमिच्छन्ति केचिन्मूर्द्धन्यवान्वितम्॥"
इति भरतसेनविरचितं मुग्धबोधव्याकरणम्॥
(यथा, रघु:। १६। ११।
"मानसप्रभवा: सद्यस्तीर्त्वा तत्क्षणशीतलान्।
पिबन्ति कुञ्जरास्तस्य यशोवद्धिमिवाम्भस:॥"
तरलद्रव्योपरिस्थसुस्थितबुद्बुदाकारवस्तुसाधनम्। यथा, महाभारते। १। ३। ५२।
"भो: फेनं पिबामि यमिमे वत्सा मातृणां स्तनान् पिबन्त उन्नदन्ति॥" ८॥ उशद्रथस्य पुत्र:। यथा, हरिवंशे। ३१। २६।
"उशद्रथो महाराज! फेनस्तस्य सुतोऽभवत्॥")

फेनक:, पुं, (फेन+स्वार्थे संज्ञायां वा कन्।) फेन:। इति त्रिकाण्डशेष:॥ पिष्टकविशेष:। अस्य गुणा:। लघुत्वम्। रूक्षत्वम्। शुक्रकारित्वम्। पित्तवायुनाशित्वञ्च। इति राजवल्लभ:॥ (यथा च सुश्रुते। १। ४६।
"क्षुद्रा: पथ्यतमाश्चैषां लघव: फेनकादय:॥"
साधनमस्यार्त्तवादिवत् क्रियाविशेष:। तस्य गुणा यथा, सुश्रुते चिकित्सितस्थाने २४ अध्याये।
"ऊर्व्वो: सङ्कनवत्यास्तु फेनक: स्थैर्य्यलाघवे।
कण्डूकोठानिलस्तम्भमलरोगापहश्च स:॥")

फेनका, स्त्री, (फेनेन कायतीति। के+क:। टाप्।) जलपक्वतण्डुलचूर्णम्। इति शब्दचन्द्रिका॥

फेनदुग्धा, स्त्री, (फेन इव दुग्धं यस्या:।) दुग्धफेनीक्षुप:। इति राजनिर्घण्ट:॥

फेनल:, त्रि, (फेनोऽस्यस्येति। फेन+"फेनादिलच्।" ५। २। ६६। इति मतुप् लच्।) फेनवान्। इति सिद्धान्तकौमुदी॥

फेनवान्, [त्] त्रि, (फेनोऽस्यस्येति। "फेनादिलच्।" ५। २। ६६। इत्यत्र अन्यतरस्यामित्यनुवृत्तै: पक्षे मतुप्। मस्य व:।) फेनिल:। इति सिद्धान्तकौमुदी॥ (यथा, महाभारते। ३। १४३। २०।
"तत्र सागरगा ह्याप: फेनौघमाला: समन्तत:।
प्रादुरासन् सुकलुषा: फेनवत्यो विशाम्पते!॥")

फेनवाही, [न्] पुं, (फेनवत् शुभ्रतां वहतीति। वह्+खिनि:।) वस्त्रम्। इति शब्दमाला॥

फेना, स्त्री, (फेनोऽस्ति बाहुल्येनास्या:। फेन+अच्। टाप्।) सातलाक्षुप:। इति राजनिर्घण्ट:॥

फेनाग्रं, क्ली, (फेनस्याग्रम्।) बुद्बुदम्। इति हारावली। २०५॥

फेनायमान:, त्रि, (फेनमुद्गमतीति। फेन+"फेनाय्येति वाच्यम्।" ३। १। १६। इत्यस्य वार्त्तिकोक्त्या क्यङ्। ततः शानच्।) उत्थितफेनदुग्धादि:। फेन इव आचरति य: इत्यर्थे फेनशब्दात् क्यप्रत्ययानन्तरं शानप्रत्ययेन निष्पन्न:॥ (यथा, महाभारते। ६। ३। ३४।
"प्रतिस्रोतोवहा नद्य: सरित: श्रोत्रियोदका:।
फेनायमाना: क्रुध्यन्ति दृप्तभा इव॥")

फेनाश्मनि:, पुं, (फेन इवाश्मनिर्यस्य। फेनेन इत्वाऽसुरनाशनादेवास्य तथात्वम्।) इन्द्र:। इति शब्दमाला॥ (एतद्वृत्तान्तो यथा, देवीभागवते। ६। ६। ५५—५८।
"इति चिन्त्य मनसा कर्त्तुं हन्तुं रिपुं रणे।
अशेषं सर्व्वदा सुरदैत्येन्द्र-दानवेक्षया॥
यदि वृत्रं न हन्याद्य वज्रयित्वा महाबलम्।
न श्रेयो मम नूनं स्यात् सर्व्वथा रिपुरक्षणात्॥
अपां फेनं तदापश्यन् सत्रे पर्व्वतोपमम्।
नायं शुष्को न चार्द्रोऽयं न च शस्त्रमिदं तथा॥
अपां फेनं तदा शक्रो जगाह किल लीलया।
परां शक्तिञ्च सस्मार भक्त्या परमया युत:॥
स्तवमात्रा तदा देवी स्वांशं फेने न्यधापयत्।
वज्रं तदाहृतं तत्र चकार हरिसंस्तुतम्॥
फेनाहृतं पविं तत्र शक्रश्चिक्षेप तं प्रति।
सहसा निपपातासु वज्राहत इवाचल:॥")

फेनिका, स्त्री, (फेन इवातिरस्वच्छा:। फेन+ठन्। टाप्।) पक्वान्नविशेष:। खाजा इति भाषा। यथा,—
"समिताया घृताद्याया वर्त्तीर्दीर्घा: समाचरेत्।
तास्तु सन्निहिता दीर्घा: पीठस्योपरि धारयेत्॥
वेल्लयेद् वेल्लनेनेता यथैका पर्पटी भवेत्।
ततश्छुरिकया तासु संलग्नामेव कर्त्तयेत्॥
ततस्तु वेल्लयेद्भूय: सङ्कटेन च लेपयेत्।
शालिचूर्णं घृतं तोयं मिश्रितं सङ्कटं भवेत्॥
तत: संहृत्य तां लोहीं विदधीत पृथक् पृथक्।
पुनस्तां वेल्लयेत् लोहीं यथा स्याच्चक्रलाञ्छिता:॥
ततस्तां सुपचेदाज्ये भवेयुश्च पुटा: स्फुटा:।
सुगन्धया शर्करया तदुद्धूलनमाचरेत्॥
सिद्धैषा फेनिकानाम्नी मण्डकेन समा गुणै:।
तत: किञ्चिल्लघुरियं विशेषोऽयमुदाहृत:॥"
इति भावप्रकाश:॥

फेनिलं, क्ली, (फेनोऽस्यस्येति। फेन+"फेनादिलच्।" ५। २। ६६। इति इलच्।) कोलिफलम्। (अस्य पर्य्यायो यथा,—
"पुंसि स्त्रियाञ्च कर्क्कन्धुर्बदरी कोलमित्यपि।
फेनिलं कुवलं घोटा सौवीरं बदरं मधु।
अजप्रिया कुहा कोली विषमो भवकण्टका॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥) मदनफलम्। सफेने, त्रि। इति मेदिनी॥ (यथा, महाभारते। १। १५३। १०।
"उष्णं नवं प्रपास्यामि फेनिलं रुधिरं बहु॥")

फेनिल:, पुं, (फेन+इलच्।) अरिष्टवृक्ष:। इत्यमर:। २। ४। ६१॥ दारिष्ठा इति ख्यात:॥ (अस्य पर्य्यायो यथा,—
"अरिष्टकस्तु माङ्गल्य: फेणवर्णोऽर्धसाधन:।
रक्तबीज: पीतफेन: फेनिलो गर्भपातन:॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥) बदरवृक्ष:। इति राजनिर्घण्ट:॥ (स्त्रियां टाप्। फलमस्यां। यथा, सुश्रुते उत्तरतन्त्रे ३६ अध्याये।
"अम्लपित्ते सुशीतेच फेनिलापक्वबेल्लया॥")

फेर:, पुं, (फे इति शब्दं राति गृह्णातीति। रा ग्रहणे+क:।) शृगाल:। इति शब्दरत्नावली॥

फेरण्ड:, पुं, (फे इत्यव्यक्तशब्देन रण्डतीति। रण्ड+अच्।) शृगाल:। इति जैमिनिभरत:। ४। ३५५॥

फेरवः, पुं, (फे इति रवो यस्य।) शृगालः। इत्यमरः।२।५।५॥ (यथा, कथासरित्सागरे। ४७। ५३।
"गृध्रतां तरतां रक्ते नदतां चोत्सवाय सः।
शूराणां फेरवाणाञ्च भूतानाञ्चाभवद्रणः॥")
राक्षसः। इति मेदिनी। वे, ४४॥ धूर्त्ते हिंसे च, त्रि। इति शब्दरत्नावली॥

फेरुः, पुं, (फे इति शब्देन रौतीति। रु शब्दे+ मितद्वादित्वात् डुः।) शृगालः। इत्यमरः। २।५।५॥ (यथा, भागवते।८।१६।७।
"ग्रहेषु येष्वतिघयो नार्च्चिताः सलिलैरपि।
यदि निर्व्वान्ति ते नूनं फेरुराजगृहोपमाः॥")

फेल, र्ज्ञ गतौ। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) ऋ, अपिफेलत् पिफेलतुः। इति दुर्गादासः॥

फेलं, क्ली, (फेलते दूरे निक्षिप्यते इति। फेल+ बाहुलकात् डः।) भुक्तसमुज्झितम्। उच्छिष्टम्। इति शब्दरत्नावली॥

फेलकः, पुं, (फेल+स्वार्थे संज्ञायां वा कन्।) भुक्तसमुज्झितम्। इति जटाधरः॥

फेला, स्त्री, (फेल्यते इति। फेल+"गुरोश्च हलः।" ३।३।१०३। इति अः। टाप्।) भुक्तसमुज्झितम्। इत्यमरः। २।९।५६॥

फेलिः, स्त्री, (फेल+इन्।) उच्छिष्टम्। इति जटाधरः॥

फेलिका, स्त्री, (फेलिरेव। स्वार्थे कन्।) उच्छिष्टम्। फेलाशब्दात् स्वार्थे णिकप्रत्ययेन निष्पन्ना॥

फेली, स्त्री, (फेलि+"छन्दिकारादक्तिनः।" इति पक्षे ङीष्।) भुक्तसमुज्झितम्। इति शब्दरत्नावली॥

व

व, वकारः। स च चयोविंशत्यञ्जनवर्णः। (पवर्गस्य तृतीयवर्णश्च।) तस्योच्चारणस्थानं ओष्ठः। इति शाकरणम्॥ (यदुक्तं सिद्धान्तकौमुद्याम्। "उपूपध्मानीयानामोष्ठौ॥") तस्य स्वरूपं यथा, कामधेनुतन्त्रे।
"वकारं शृणु चार्व्वङ्गि! चतुर्व्वर्गप्रदायकम्।
शरच्चन्द्रप्रतीकाशं पञ्चदेवमयं सदा॥
पञ्चप्राणात्मकं वर्णं त्रिबिन्दुसहितं सदा॥"
(वङ्गीयवर्णमालायामस्य स्वरूपमाह।)
"त्रिकोणरूपिणी रेखा विष्णोश्चक्ररूपिणी।
मात्रा शक्तिः परा ज्ञेया ध्यानमस्य प्रचक्षते॥"
अस्य ध्यानं यथा,—
"नीलवर्णां त्रिनयनां नीलाम्बरधरां पराम्।
नागहारोज्ज्वलां देवीं दिशुजां पद्मलोचनाम्॥
एवं ध्यात्वा वकारन्तु तन्मन्त्रं दशधा जपेत्॥"
तत्प्रयोगममन्त्रो यथा,—
"त्रिशक्तिसहितं वर्णं त्रिविधाम्बुजलेपितम्।
स्वयं कुण्डलिनीं देवीं सततं प्रणमाम्यहम्॥"
इति वर्णोद्धारतन्त्रम्॥

अस्य नामानि यथा,—
"वो वनी भूधरो मार्गो घर्घरी लोचनप्रियः।
प्रचेताः कलसः पक्षी स्थलगण्डः कपर्द्दिनी॥
पृष्ठवंशो भयामातुः शिखिवाहो युगन्धरः।
सुखविन्दुर्बली घण्टा योद्धा त्रिलोचनप्रियः॥
क्रौदिनी तापिनी भूमिसुरगणिन्द्रबलिप्रियः।
सुरभिर्मुखविष्णुश्च संहारो वसुधाधिपः॥
षष्ठापुरं चपेटा च मोदको गगनं प्रति।
पूर्व्वाषाढ़ामध्यलिङ्गौ शनिः कुम्भतृतीयकौ॥"
इति नानातन्त्रशास्त्रम्॥

वंहिष्ठः, त्रि, (अयमेषामतिशयेन बहुलः। बहुल+ "अतिशायने तमबिष्ठनौ।" ५।३।५५। इति इष्ठन्। "प्रियस्थिरेति।" ६।४।१५७। इति वंहि-आदेशः।) अतिशयबहुलः। इत्यमरः॥ (यथा, महाभारते। १२। ३२८। ३६।
"योऽङ्गिः संयोज्य जीवन्तान् पर्य्येत्याय प्रयच्छति।
उदहो नाम वंहिष्ठस्तृतीयः स सदागतिः॥")

वंहीयान्, [स्] त्रि, (अयमनयोरतिशयेन बहुलः। बहुल+"द्विवचनविभज्योपपदे तरबीयसुनौ।" ५।३।५७। इति ईयसुन्। "प्रियस्थिरेति।" ६।४।१५७। इति वंहि-आदेशश्च।) अतिशयबहुलः। अयमनयोरतिशयेन बहुः इत्यर्थे बहुशब्दादीयसुप्रत्ययेन निष्पन्नः। इति मुग्धबोधभरतम्॥

वः, पुं, वरुणः। कुम्भः। इति शब्दरत्नावली॥
"वः पुमान् वरुणे सिन्धौ भगे तोये गतेऽपि च।
गन्धने तन्तुसन्ताने पुंस्येव वपने स्मृतः॥"
इति मेदिनी। वे, १॥

तस्य सांङ्केतिकनामानि यथा। युगन्धरः १ सुरभिः २ सुखविष्णुः ३ संहारः ४ वसुधाधिपः ५। इति बीजवर्णाभिधानम्। भूधरः ६ दशगण्डः७। इति रुद्रयामलोक्तबीजाभिधानम्॥

अपि च।
"वो वनी भूधरो मार्गो घर्घरी लोचनप्रियः।
प्रचेताः कलसः पक्षी स्थलगण्डः कपर्द्दिनी॥
पृष्ठवंशो भयामातुः शिखिवाहो युगन्धरः।
सुखविन्दुर्बली घण्टा योद्धा त्रिलोचनप्रियः।
क्रौदिनी तापिनी भूमिसुरगणिन्द्रबलिप्रियः।
सुरभिर्मुखविष्णुश्च संहारो वसुधाधिपः॥
षष्ठापुरं चपेटा च मोदको गगनं प्रति।
पूर्व्वाषाढ़ामध्यलिङ्गौ शनिः कुम्भतृतीयकौ॥"
इति तन्त्रान्तरम्॥

व(व)क, इ ऊ कौटिल्ये। गतौ। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-अक०-सक० च-सेट्।) कौटिल्यमिह कुटिलीभावः कुटिलीकरणञ्च। इ, वक्ष्यते। ऊ, वङ्क्ते काष्ठं कुटिलं स्यादित्यर्थः। वङ्कते काष्ठं कुटिलं करोतीत्यर्थः। इति दुर्गादासः॥

व(व)कः, पुं, (व(व)ङ्क्ते कुटिलीभवतीति। वकि+ अच्। षोदरादित्वात् नलोपः।) खनामख्यातपक्षिविशेषः। तत्पर्य्यायः। कङ्कः २। इत्यमरः। २। ५। २२॥ हारबलिभुक् ३ काङ्क्षेरुः४ शुक्लवायसः ५ दीर्घजङ्घः ६ बकोटः ७ गृहबलिप्रियः८। इति शब्दरत्नावली॥ निर्घृतः ९ शिखी१० चन्द्रविघट्टकमः११। इति त्रिकाण्डशेषः॥ तीर्थसेवी १२ तापसः १३ मीनघाती १४ ध्यानाध्यायी १५ निश्चलाङ्गः १६ दाम्भिकः १७। इति राजनिर्घण्टः॥ अस्य मांसस्य गुणाः।
"शूरारिबकवाकाच्च दात्यूहाः पवनाशहाः॥"
इति रत्नावली॥

अपि च।
"हंससारसकादम्बचक्रवाकौघशरारिकाः।
नन्दीमुखीसकादम्बवलाकाद्याः प्लवाः स्मृताः॥
प्लवन्ते सलिले यस्मात् रते तस्मात् प्लवाः स्मृताः॥
कुलेचराः प्लवाद्याश्चापि कोशस्थाः पादिनस्तथा।
मत्स्या रते समाख्याताः पक्षधानूपजातयः॥
आनूपा मधुराः स्निग्धा गुरवो वह्निसादनाः।
श्लेष्मलाः पिच्छिलाश्चापि मांसपुष्टिप्रदा भृशम्॥
तथाभिष्यन्दिनस्ते हि प्रायोऽपथ्यक्षमाः स्मृताः।"
इति भावप्रकाशः॥

खनामख्यातपुष्पवृक्षः। तत्पर्य्यायः। शिववल्ली २ पाशुपत्रः ३ एकाष्ठीलः ४ वसुः ५। इत्यमरः॥ एकाष्ठीला ६ वृक्षः ७ वसुकः ८ वसूकः ९। इति तट्टीका॥ वकपुष्पः १० शिवमल्लो ११। इति शब्दरत्नावली॥ काकघ्रीवः १२ स्थूलपुष्पः १३ शिवप्रियः १४ काकनामा १५ वसुवृक्षः १६ स्वपूरकः १७ रक्तपुष्पः १८ सुनिस्तलः १९ अगस्तिः २० वङ्गसेनकः २१। इति रत्नमाला॥ अगस्त्यः २२ घ्रीघ्रपुष्पः २३ सुनिद्रुमः २४ व्रणारिः २५ दीर्घफलकः २६ वक्रपुष्पः २७ सुरप्रियः २८।
"सितपीतनीललोहितकुसुमभेदाच्चतुर्विधो-
ऽगस्तिः।
मधुरग्निशिरदोषश्रमकासविनाशनश्च भूतघ्नः॥"
तथा च।
"अगस्ति शिशिरं गौल्यं त्रिदोषघ्नं श्रमापहम्।
बलासकासवैवर्ण्यभूतघ्नञ्च बलावहम्॥"
इति राजनिर्घण्टः॥

अपि च।
"अगस्तिकुसुमं शीतं चातुर्थकनिवारकम्।
नक्तान्ध्यनाशनं तिक्तं कषायं कटुपाकि च।
पीनसश्लेष्मपित्तघ्नं वातघ्नं सुनिभिर्मतम्॥"
इति भावप्रकाशः॥

अन्यच्च।
"वासकस्य च पुष्पाणि वङ्गसेनस्य चैव हि।
कटुपाकानि तिक्तानि कासक्षयकराणि च॥"
इति राजवल्लभः॥

"वकः पाशुपतश्चैव शिवाभीष्टश्च सुव्रतः।
वसुकश्च शिवाङ्गश्च शिवेष्टः क्रमपूरकः॥
शिवमल्लिः शिवाह्वादः शम्भवो रविसंमितः।

वकोऽतिशिशिरस्निग्धो मधुरो मधुगन्धकः ॥
पित्तदाहकफश्वासश्रमहारी च दीपनः ॥"
इति च राजनिर्घण्टः ॥
"शिवमल्ली पाशुपत एकाष्ठीला वुको वसुः ।
वुकोऽगुणः कटुस्तिक्तः कफपित्तविषापहः ।
योनिशूलव्रणदाहकृच्छ्रशोथास्रनाशनः ॥"
इत्यपि भावप्रकाशः ॥
तालव्यशकारः । यथा,—
"————शो वान्तो वपरो वकः ।"
इति बीजवर्णाभिधानम् ॥ * ॥
कुबेरः । रक्षोविशेषः । इति मेदिनी । के, ३० ॥ स च भीमेन हतः । (यथा महाभारते । २ । ६५ । ७३ ।
"तस्यामण्डैकचक्रायां वकं नाम राक्षसं हत्वा पाञ्चालनगरमभिगताः ॥") अत्र कोवे पवर्गीय यकारादौ पठितोऽयं शब्दः किन्तु अमरटीकायां भरतेन अन्तःस्थवकारादिवचवकारातुभ्यां क्रमेण घप्रत्ययेन अनुप्रत्ययेन च साधितः ॥ * ॥ यन्त्रविशेषः । यथा,—
"जलकच्छपपातालदोलाभूधरवालुकाः ।
वकाद्या यन्त्रभेदाः स्युर्व्यजनान्ताद्याश्च स्त्रधिकाः ॥"
इति शब्दचन्द्रिका ॥
अस्य विवरणं यथा, वैद्यके ।
"शीर्षकण्ठकाचकूप्या गिलयेत् स्वल्पभाण्डकम् ।
तिर्यक् स्थित्वा पचेत् घुल्यां वकयन्त्रमिति स्मृतम् ॥"
असुरविशेषः । स च श्रीकृष्णेन हतः । यथा,—
"स्वं स्वं वत्सकुलं सर्व्वे पाययिष्यन्त एकदा ।
गत्वा जलाशयाभ्यासं पाययित्वा पपुर्जलम् ॥
ते तत्र ददृशुर्बाला महासत्त्वमवस्थितम् ।
तप्त सुवज्रनिर्भिन्नं गिरेः कूटमिव च्युतम् ॥
स वै वको नाम महानसुरो वकरूपधृक् ।
आगत्य तरसा कृष्णं तीक्ष्णतुण्डोऽग्रसद्बली ॥
कृष्णं महाबकग्रस्तं दृष्ट्वा रामादयोऽर्भकाः ।
बभूवुरिन्द्रियाणीव विना प्राणं विचेतसः ॥
तं तालुमूलं प्रदहन्तमग्निवद्
गोपालसूनुं पितरं जगद्गुरोः ।
चच्छर्द्द सद्योऽतिरुषाऽऽत्तं वक-
स्तुण्डेन हन्तुं पुनरभ्यपद्यत ॥
तमापतन्तं स निगृह्य तुण्डयो-
र्दोर्भ्यां वकं कंससखं सतां गतिः ।
पश्यत्सु बालेषु ददार लीलया
सदावधीद्वीरयवद्दिवौकसाम् ॥"
इति श्रीभागवते १० स्कन्धे ११ अध्यायः ॥
व(व)कचिकिका, स्त्री, मत्स्यविशेषः । तत्पर्य्यायः । वकाची २ । इति शब्दरत्नावली । १८८ ॥
व(व)कजित्, पुं, (वकं जितवान् इति । जि + क्विप् ।) भीमसेनः । इति त्रिकाण्डशेषः ॥ श्रीकृष्णश्च ॥
व(व)कपूपः, पुं, (वक इव शुभ्रवर्णो पूपः ।) एक-पूपः । इत्यमरटीका ॥
व(व)कनिसूदनः, पुं, (निसूदयति एनमिति । सूदि + ल्युः । वकस्य निसूदनो घातकः ।) भीमसेनः । इति हेमचन्द्रः । ३ । ३७२ ॥ श्रीकृष्णश्च ॥
व(व)कपक्षकं, क्लो, (वकोपलक्षिताः पक्षा तिथयो यत्र कप् । वकोऽपि तत्र नाश्नीयादिति वचनादेव तथात्वम् ।) कार्त्तिकशुक्लैकादश्यादिपञ्चतिथ्यात्मकम् । यथा,—
"तत्रैकादश्यादितिथिपञ्चकं वकपञ्चकम् ।
वकोऽपि तत्र नाश्नीयान्मत्स्यञ्चैव कदाचन ॥
इति वचनात् ।" इति कृत्यतत्त्वम् ॥
"किञ्च । कार्त्तिकमधिकृत्य ब्रह्मपुराणम् ।
'एकादश्यादिषु तथा तासु पञ्चसु रात्रिषु ।
दिने दिने च स्नातव्यं शीतलासु नदीषु च ।
वर्জ্জितव्या तथा हिंसा मांसभक्षणमेव च ॥'
ततश्च मांसभक्षणनिषेधे कार्त्तिकमासतच्छुक्ल-पक्षतदेकादश्यादिपञ्चदिनानि शुक्लाशुक्लभेदात् पापतारतम्याद्वा निषिद्धानि ।" इति तिथ्यादि-तत्त्वम् । अपि च ।
"एकादशीं समारभ्य यावत् पञ्चदशीं भवेत् ।
वकोऽपि तत्र नाश्नीयान्मीनं मांसञ्च किं नरः ॥"
इति संवत्सरकौमुदीधृतब्रह्मपुराणवचनम् ॥
व(व)कपुष्पः, पुं, (वक इव वर्णं पुष्पं यस्य ।) वक-वृक्षः । इति शब्दरत्नावली ॥ (वकस्य पुष्पम् ।) अगस्तिकुसुमे, क्लो ॥
व(व)कवृत्तिः, पुं. (वकस्येव स्वार्थसाधिका वृत्तिर्यस्य ।) वकतुल्यवर्त्तनविशिष्टः । यथा,—
"पाषण्डिनो विकर्म्मस्थान् बैडालव्रतिकान् शठान् ।
हैतुकान् वकवृत्तींश्च वाङ्मात्रेणापि नार्चयेत् ॥"
इति विष्णुपुराणे ३ अंशे १८ अध्यायः ॥
तस्य लक्षणं यथा,—
"अदृङ्मार्गदृष्टिर्नैष्कृतिकः स्वार्थसाधनतत्परः ।
शठो मिथ्याविनीतश्च वकवृत्तिरुदाहृतः ॥"
इति तट्टीकायां श्रीधरस्वामी ॥
अपि च ।
"अधोदृष्टिर्नैष्कृतिकः स्वार्थसाधनतत्परः ।
शठः शिखी विनीतश्च वकवृत्तिरुदाहृतः ॥"
इति पाद्मोत्तरखण्डे ११५ अध्यायः ॥
व(व)कवैरी, [न्] पुं, (वकस्य वैरी घातकत्वात् ।) भीमसेनः । इति जटाधरः ॥ श्रीकृष्णश्च ॥
व(व)कव्रती, [न्] पुं, (वकव्रतमस्यास्तीति इनिः ।) मिथ्याविनीतः । वकवृत्तिः । इति जटाधरः ॥ तस्य लक्षणं यथा,—
"अधोदृष्टिर्नैष्कृतिकः स्वार्थसाधनतत्परः ।
शठो मिथ्याविनीतश्च वकव्रतधरो द्विजः ॥"
इति दानसागरे मनुः ॥
व(व)काची, स्त्री, वकचिचिकामत्स्यः । इति शब्दरत्नावली । १८८ ॥
व(व)कारिः, पुं, (वकस्य अरिः ।) श्रीकृष्णः । यथा,
"तदा वकारिं सुरलोकवासिनः
समाकिरन्नन्दनमल्लिकादिभिः ।
समीडिरे चानकशङ्खसंस्तवै-
स्तद्वीक्ष्य गोपासुता विनिस्मिरे ॥"
इति श्रीभागवते । १० । ११ । ५२ ॥
(भीमसेनश्च । वकराक्षसघातकत्वात् ॥)

व(व)कुलः, पुं, (व(व)ञ्चते इति । व(व)कि कौटिल्ये + "मृदृगुरादयश्च ।" उणा० १ । ८२ । इति उरच् प्रत्ययरेफस्य लत्वं वर्णलोपश्चेत्युज्ज्वलदत्तः ।) खनामख्यातपुष्पवृक्षः । तत्पर्य्यायः । केसरः २ । इत्यमरः । २ । ४ । ६४ ॥ केशरः ३ । इति भरतः ॥ वकुलः ४ सिंहकेसरः ५ वरलक्षः ६ सौधुगन्ध्यः ७ सुकूलः ८ सकुलः ९ । इति शब्दरत्नावली ॥ स्त्रीसुख-मधु १० दोहलः ११ मधुपुष्पः १२ सुरभिः १३ भ्रमरानन्दः १४ स्थिरकुसुमः १५ शारदिकः १६ करकः १७ सीमन्तः १८ विशारदः १९ गुच्छ-पुष्पकः २० धन्वी २१ मदनः २२ मदामोदः २३ चिरपुष्पः २४ ॥ (यथा, महाभारते । १ । ६३ । ४२ ।
"पुन्नागैः कर्णिकारैश्च वकुलैर्हिन्तपाटलैः ॥")
अस्य गुणाः । शीतलत्वम् । लघुत्वम् । विष-दोषनाशित्वम् । मधुरत्वम् । कषायत्वम् । मदाढ्यत्वम् । हृद्यत्वम् । तत्पुष्पगुणाः । रुच्यत्वम् । क्षीराढ्यत्वम् । सुरभित्वम् । शीतलत्वम् । मधुरत्वम् । स्निग्धत्वम् । कषायत्वम् । मलसंग्रहकारकत्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
"वकुलो मधुगन्धश्च सिंहकेसरकस्तथा ।
वकुलस्तु वरोऽगुणः कटुः पाके रसे गुरुः ॥
कफपित्तविषश्वित्रकृमिदन्तगदापहः ॥"
इति भावप्रकाशः ॥
तत्फलगुणाः ।
"वकुलं मधुरं ग्राहि दन्तस्थैर्य्यकरं परम् ॥"
तत्पुष्पगुणाः ।
"पद्मं कषायं मधुरं शीतं पित्तकफास्रजित् ।
तद्वत् वकुलपुन्नागकङ्कारोत्पलपाटलम् ॥"
इति राजवल्लभः ॥
अस्योत्पत्तिर्यथा,—
"विचरन्तं तदा भूयो मदेशं कुसुमायुधः ।
आरात् स्थित्वाग्रतो धन्वी सन्तापयितुमुद्यतः ॥
ततस्तमग्रतो दृष्ट्वा क्रोधाशातदृशा हरः ।
स्मरमालोकयामास शिखाग्राधरशान्तिकम् ॥
आलोकितस्त्रिनेत्रेण मदनो द्युतिमानपि ।
प्रादह्यत तदा ब्रह्मन् ! पादादारभ्य कृत्स्नवत् ॥
प्रदह्यमानौ चरणौ दृष्ट्वासौ कुसुमायुधः ।
उत्ससर्ज्ज धनुः श्रेष्ठं तत्क्षणादाप मत्सधा ॥
यदाधीनमुपित्वन्यन्तद्वकमपृष्ठं मदाप्रभम् ।
स चम्पकतरुर्जातः सगुणगन्धाढ्यो गुणाकृतिः ॥
नाहस्यानं शुभाकारं यदासीद्दग्धभूषितम् ।
तज्जातं केशरारण्यं वकुलं नामतो मुने ॥
या च कोटी शुभा स्थाणोर्दिव्यनीलविभूषिता ।
जाता सा पाटला रम्या भृङ्गराजविराजिता ॥
नाहोपरि तथा सृष्टौ स्थानं चन्द्रमणिप्रभम् ।
पश्यशुल्माभवच्छाखी शुशाङ्कुरिरयोज्ज्वला ॥
कर्णं सङ्गा अधः कोशाः स्थानं विद्रुमभूषितम् ।
तस्मात् वकुपुटा मह्यां संजाता विविधा मुने ॥"
इति श्रीवामनपुराणे ६ अध्यायः ।

(शिव: । यथा, महाभारते तस्य सहस्रनाम-कीर्त्तने । १३ । १७ । १०६ ।
"वह्निको वह्निकी वृत्तो वकुलश्चन्दनच्छद: ।
मारुतीवो महाजत्रुरलोलश्च महौषध: ॥")
व(ब)कुला, स्त्री, (वकुल + टाप् ।) कटुका । इति राजनिर्घण्ट: ॥
व(ब)कुली, स्त्री, (वकुल + गौरादित्वात् ङीष् ।) काकोली । इति शब्दचन्द्रिका ॥
व(ब)कूल:, पुं. (वकुल । पृषोदरादित्वात् दीर्घ: ।) वकुलवृक्ष: । इति शब्दरत्नावली ॥
व(ब)केरुका, स्त्री, (वकानां बकसदृशानां ईरुकं गतिर्यत्र ।) बलाका । वातावर्त्तितशाखा । इति मेदिनी । के, २०२ ॥
वकोट:, पुं, वक: । इति त्रिकाण्डशेष: ॥
वठ, पेर्य्ये । इति कविकल्पद्रुम: ॥ (भ्वा०-पर०-अक०-सेट् ।) पेर्य्यमिह सामर्थ्यम् । वठति वीरो योद्धुं समर्थ: स्यादित्यर्थ: । इति दुर्गादास: ॥
व(ब)ड़वा, स्त्री, (वलं वातीति । वल + वा + क: । टाप् । डलयोरैक्यात् लस्य ड़त्वम् ।) घोटकी । इत्यमर: । २ । ८ । ४३ ॥ (यथा, महाभारते । १ । २२२ । ४५ ।
"वड़वानान्तु मुख्यानां चन्द्रांशुसमवर्च्चसाम् ।
दर्शी जनार्द्दन: प्रीत्या सहस्रं हेममूषितम् ॥"
अस्या दुग्धगुणा यथा,—
"रूक्षोष्णं वड़वाक्षीरं वल्यं श्लेष्मानिलापहम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥
वड़वारूपधारिणी सूर्य्यपत्नी संज्ञा । यथा, मार्कण्डेयपुराणे । ७७ । २३ ।
"सूर्य्यतापमनिच्छन्ती तेजसस्तस्य विभ्यती ।
तपश्चचार तत्रापि वड़वारूपधारिणी ॥"
अस्या विशेषविवरणन्तु तत्रैव विशेषतो द्रष्टव्यम् ॥
तृतीया सूर्य्यपत्नी । इति केचित् । यथा, भागवते । ८ । १३ । ८—९ ।
"विश्वतश्च दे भार्ये विश्वकर्म्मसुते उभे ।
संज्ञा छाया च राजेन्द्र ! ये प्रागभिहिते तव ॥
तृतीयां वड़वामेके तासां संज्ञासुतास्त्रय: ।
यमो यमी श्राद्धदेवश्छायायाश्च सुतान् शृणु ॥")
अश्विनीनक्षत्रम् । इति ज्योतिषम् ॥ (नारी-विशेष: । इति हेमचन्द्र: ॥ दासी । यथाह नारद: ।
"भक्तदासश्च विज्ञेयस्तथैव वड़वाकृत: ॥"
वासुदेवस्य स्वनामख्याता परिचारिका । इति हरिवंश: । ३५ । ३ ॥) वाड़वाग्नि: । अस्योत्पत्तिर्यथा,—
"अथाकाशगता देवा: क्रुद्धं दृष्ट्वा महेश्वरम् ।
प्रसीद जगतां नाथ ! कामे क्रोधं परित्यज ॥
इति स्म वदतां तेषाममराणां तदानघ: ।
ललाटचक्षुःसम्भूतो भस्माकार्षीन्मनोभवम् ॥
अथ क्रोधानलं शम्भोर्धन्तं सकलान् जनान् ।
वड़वारूपिणं चक्रे देवानां पुरतस्तदा ॥
वड़वां तां तदा देवा: सौम्यां ज्वालासुखीं शुभाम् ।
दृष्ट्वा निर्विण्णमनसो बभूवु: पूर्व्वपीड़िता: ॥
वड़वां तां समादाय तदा ज्वालासुखीं विधि: ।
सागरं प्रययौ लोकहिताय जगतां प्रभु: ॥
गत्वाथ सागरं ब्रह्मा प्रोवाच परिपूजित: ।
यथावत्तेन विप्रेन्द्रा: समयञ्च निदेशयन् ॥
अयं क्रोधो महेशस्य वड़वारूपधृक् त्वया ।
ज्वालासुख: सदा धार्य्यो यावन्न विलयाम्यहम् ॥
यदा त्वामहमागम्य वदामि सरितांपते ! ।
तदा त्वया परित्याज्य: क्रोधोऽयं वड़वासुख: ॥
भोजनं भवतस्तोयमेतस्य तु भविष्यति ।
यत्रादेव विधार्य्योऽयं यथा नो याति चान्तरम् ॥
इत्युक्तो ब्रह्मणा सिन्धुरङ्गीचक्रे तदा क्रुधम् ।
ग्रहीतुं वड़वावक्त्रं शम्भोश्चाग्न्यमप्यरम् ॥
तत: प्रविष्टो जलधौ पावको वड़वासुख: ।
धार्य्योऽविच्छिन्नसस्य ज्वालामालातिदीपित: ॥"
इति कालिकापुराणे ४१ अध्याय: ॥
(नदीविशेष: । यथा, महाभारते ।३।२२१।२४।
"तमसा नर्म्मदा चैव नदी गोदावरी तथा ।
वेणोपवेणा भीमा च वड़वा चैव भारत ! ॥"
तीर्थभेद: । यथा, महाभारते ।३ । ८२ । ८८ ।
"ततो गच्छेत वड़वां त्रिषु लोकेषु विश्रुताम् ।
पश्चिमायान्तु सन्ध्यायां उपस्पृश्य यथाविधि ॥")
व(ब)ड़वाकृत: पुं, (वड़वया दास्या कृत: ।)
पञ्चदशदासान्तर्गतदासविशेष: । यथा,—
"भक्तदासश्च विज्ञेयस्तथैव वड़वाकृत: ॥"
इति नारद: ॥
वड़वा दासी तल्लोभादङ्गीकृतदास्य: । इति दायक्रमसंग्रह: ॥ क्वचित् वड़वाभृतो वड़वाकृतोऽपि पाठ: ॥
व(ब)ड़वाग्नि:, पुं, (वड़वाया: समुद्रस्थिताया: घोटक्या मुखस्योऽग्नि: ।) समुद्रस्थाग्नि: । (अस्य विवरणन्तु वड़वानलशब्दे द्रष्टव्यम् ॥)
व(ब)ड़वानल:, पुं, (वड़वाया अनल: ।) वड़वाग्नि: । तत्पर्य्याय: । सलिलेन्धन: २ वड़वामुख: ३ काकध्वज: ४ वाणिज: ५ स्कन्दाग्नि: ६ ह्लादधुक् ७ काष्ठधुक् ८ । इति त्रिकाण्डशेष: ॥ और्व्व: ९ वाड़व: १० । इत्यमर: ।१।१।५६ ॥ उर्व्वस्य ऋचेरपत्यम् और्व्व: ष्ण: । वड़वायां विद्यमानो वाड़व: ष्ण: । वड़वाया अनलो वड़वानल: । आधाराधेयभावसम्बन्ध: । पुरा किल और्व्वेण मुनिना अयोनिजं पुत्रमिच्छता वंशो मथितं तत्र ज्वालामय: पुरुषो जात: स च समुद्रे वड़वामुखे अवस्थापित: । इति पौराणिका: ॥ इति तट्टीकायां भरत: ॥ * ॥ तस्य विवरणं यथा,—
"और्व्वस्तु तपसाविष्टो निवेश्योरुं हुताशने ।
ममन्थैकेन दर्भेण सुतस्य व्रतधारिणम् ॥
तस्योरुं सहसा भित्त्वा ज्वालामाली ह्यनिन्दन: ।
जगतो दहनाकाङ्क्षी पुत्रोऽग्नि: समपद्यत ॥
और्व्वस्योरुं विनिर्भिद्य और्व्वो नामान्तकोऽनल: ।
दिधक्षन्निव लोकांस्त्रीन् जज्ञे परमकोपन: ॥
उत्पन्नमात्रश्चोवाच पितरन्दीनया गिरा ।
क्षुधा मे बाधते तात ! जगद्भक्षे त्यजस्व माम् ॥
त्रिदिवारोहिभिर्ज्वालैर्व्याप्नुवाणो दिशो दश ।
निर्दहन् सर्व्वभूतानि ववृधे सोऽन्तकोऽनल: ॥
एतस्मिन्नन्तरे ब्रह्मा मुनिमौर्व्वं समागत: ।
उवाच वार्य्यतां पुत्रो जगतस्त्वं एवां कुरु ॥
अस्यापत्यस्य ते विप्र ! करिष्ये स्थानमुत्तमम् ।
तथ्यमेतन्मम वच: शृणु त्वं वदतांवर ! ॥
और्व्व उवाच ।
धन्योऽस्म्यनुगृहीतोऽस्मि यन्मेऽद्य भगवान् शिशो: ।
मतिमेतान्ददातीह परमानुग्रहाय वै ॥
प्रभातकाले संप्राप्ते कार्त्तिक्यां समागमे ।
भगवंस्तर्पित: पुत्र: कैर्हविर्भि: प्राप्स्यते सुखम् ॥
क्वच वास्य निवास: स्याद्भोजनन्तु किमात्मकम् ।
विधास्यतीह भगवान् वीर्य्यतुल्यं महौजस: ॥
ब्रह्मोवाच ।
वड़वामुखेऽस्य वसति: समुद्रे वै भविष्यति ।
मम योनिर्जलं विप्र ! तत्र मे तोयदं सुखम् ॥
अत्राहमासे नियतं पिबन् वारिमयं हवि: ।
तद्दहिष्यति पुत्रस्य विरहजमनागयंश्च तम् ॥
ततो युगान्ते भूतानां मेघवाहश्च पुत्रक ! ।
सहितौ विचरिष्यावो निर्य्युगाग्निकरावहि ॥
एषोऽग्निरन्तकाले तु सलिलाग्नी मया कृत: ।
दहन: सर्व्वभूतानां सदेवासुररक्षसाम् ॥
एवमस्त्विति तं सोऽग्निः संवृतज्वालमण्डल: ।
प्रविवेशार्णवसुखं विप्रनष्टान्तरप्रभम् ॥"
इति मात्स्ये १५० अध्याय: ॥
(महेनदहनाय हरनेत्रसमुद्भूतोऽग्निरपि वड़वानल: । अस्य प्रमाणादिकं वड़वाशब्दे द्रष्टव्यम् ॥) लङ्कायां दक्षिणे पृथिव्याश्चतुर्थभागरूपस्थान विशेष: । इति सिद्धान्तशिरोमणि: ॥ (वटि-कौषधविशेष: । यथा,—
"शुद्धताम्रस्य भागैकं मरिचस्य तथैव च ।
विषं तत्तुल्यकं दद्यात् तत्सर्व्वं श्लक्ष्णचूर्णितम् ॥
लाङ्गलीरससंयुक्तं तत्सर्व्वं पुटके पचेत् ।
रक्तिकादितयं वापि त्रितयं वा प्रकल्पते ॥
दोषे दोषसमायुक्तेऽदोषशमनो भवेत् ।
भक्षयेत् पवने चोग्रे वड़वानलसंज्ञितम् ॥
इति वड़वानलो रस: ॥"
इति वैद्यकरसेन्द्रसारसंग्रहे ज्वराधिकारे ॥)
व(ब)ड़वामुख:, पुं, (वड़वाया घोटक्या मुखमाश्रयत्वेनास्यास्य । अर्श आदित्वात् अच् ।) वड़वानल: । इति हेमचन्द्र: ॥ (यथा, हरिवंशे । ६० । २२ ।
"सा यथैवार्य्यगता तत्रैव वड़वामुखे ॥"
महादेवस्य सुखमित्येके । यथा, महाभारते । ७ । २०० । १११ ।
"तस्य देवस्य यद्वक्त्रं समुद्रे तदतिष्ठत ।
वड़वामुखेति विख्यातं पितृतीर्थमयं हवि: ॥"
महादेवस्य नामभेद: । यथा, महाभारते । १३ । १७ । ५५ ।

"विष्णुः प्रसादितो यज्ञः समुद्रो वड़वामुखः ॥"
कूर्मस्य दक्षिणकुक्षिस्थजनपदविशेषः । यथा, मार्कण्डेये । ५८ । ३० ।
"कूर्मस्य दक्षिणे कुक्षौ वाह्लपादस्तथापरम् ।
काम्बोजाः पह्लवाश्चैव तथैव वड़वामुखाः ॥")
वटिकौषधविशेषः । यथा,—
"गुडत्वक् समं गन्धं सृतताम्राभ्रटङ्कणम् ।
नागमुद्रञ्च यवक्षारं स्वर्जिसैन्धवनागरम् ॥
अपामार्गस्य च क्षारं पलाशवरुणस्य च ।
प्रत्येकं कृततुल्यं स्यादम्लयोगेन मर्दयेत् ॥
कृत्तिगुडीद्रवैश्चार्को मर्दयित्वा पुटेक्षवु ॥
माषमात्रः प्रदातव्यो रसोऽयं वड़वामुखः ।
ग्रहणीं विविधां हन्ति संग्रहग्रहणीं ध्रुवम् ॥
इति वड़वामुखो रसः ॥"
इति वैद्यकरसेन्द्रसारसंग्रहे ग्रहण्यधिकारे ॥)
व(व)ड़वासुतौ, पुं, (वड़वाया घोटकीरूपायाः त्वष्टृसुतायाः संज्ञायाः सुतौ ।) अश्विनीकुमारौ । यथा, हेमचन्द्रः ।
"स्वर्वैद्यावश्विनीपुत्रावश्विनौ वड़वासुतौ ॥"
(तयोरुत्पत्तिकथा यथा, हरिवंशे । ६।३६—५३।
"गच्छ देव ! निजां भार्यां कुरुं चरति सोत्तरान् ।
वड़वारूपमास्थाय वने चरति गाढले ॥
न तथा रूपमास्थाय स्वभार्यारूपलीलया ।
दर्शं योगमास्थाय स्वां भार्यां वड़वां ततः ॥
अदृश्यां सर्व्वभूतानां तपसा नियमेन च ।
वड़वावपुषा राजंश्चरन्तीमकृतोभयाम् ॥
सोऽश्वरूपेण भगवांस्तां सुखे समभावयत् ॥
मैथुनाय विवेशैनां परपूरुषशङ्कया ।
सा तन्निरस्यमच्छुक्रं नासिकायां विवस्वतः ॥
देवौ तस्यामजायेतामश्विनौ भिषजां वरौ ।
नासत्यश्चैव दस्रश्च स्मृतौ द्वावश्विनाविति ॥")
व(व)ड़वाहृतः, पुं, (वड़वया दास्या हृतः ।) वड़वाहृतः । पञ्चदशदासान्तर्गतदासविशेषः । यथा, वड़वाग्रहदासी तया हृतस्तोमेन तासुद्वाह्य दासत्वेन प्रविष्टः । इति मिताक्षरा ॥
वड़िशं, क्ली, (वलिनो मत्स्यान् श्यति नाशयतीति । शो + कः । लस्य ड़त्वम् ।) मत्स्यधरणार्थं वक्रलौहकण्टकविशेषः । वँड़शी इति भाषा । तत्पर्य्यायः । मत्स्यवेधनम् २। इत्यमरः । २ । १० । १६ ॥ वलिशम् ३ वड़िशी ४ वड़िशा ५ । इति भरतः ॥ वलिशी ६ मत्स्यवेधनी ७ । इति तट्टिकान्तरम् ॥ वलिसी ८ वलिसम् ९ वरिशी १० वलिशिः ११। इति शब्दरत्नावली ॥ मत्स्यभेदनम् १२ । इति शब्दार्थचन्द्रिका ॥ (यथा, महाभारते । १ । २८ । १० ।
"यस्ते कण्ठमनुप्राप्तो निगीर्य्यं वड़िशं यथा ।
एवैदक्षारवत् पुत्र ! तं विद्यात् ब्राह्मणर्षभम् ॥",
वड़िशी, स्त्री, (वड़िश + गौरादित्वात् ङीष् ।) वड़िशम् । इति शब्दरत्नावली ॥
वद, भाषणे । इति कविकल्पद्रुमः ॥ (भ्वा० पर०-अक०-सेट् ।) वदति । इति दुर्गादासः ॥
वद, खैर्य्ये । इति कविकल्पद्रुमः ॥ (भ्वा० पर०-अक०-सेट् ।) वदति पर्व्वतः । आदादीन् अवदीत् । इसादेः सेम इत्यादिना वा दीर्घः । व्रजवदेत्यादौ दन्त्यादिवदेरन्नहणादिति प्राचः । इति दुर्गादासः ॥
व(व)दरं, क्ली, (वदति स्थिरीभवति छिन्नेऽपि पुनः प्ररोहतीति । वद + अरः ।) सैविफलम् । इति राजनिर्घण्टः ॥ (पर्य्यायोऽस्य यथा,—
"सृष्टिप्रमाणं वदरं सैवं सिवितिकाफलम् ।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
कार्पासफलम् । कोलिफलम् । इति हेमचन्द्रः ॥ शृगालकोलिः । शेयाकुल इति भाषा । वदति स्थिरीभवति छिन्नस्यापि पुनः प्ररोहणात् । वदरं वृक्षफलेऽपि क्लीवम् । इति भरतः ॥ तत्पर्य्यायः । घोण्टा २ । इत्यमरः ॥ गोपघोण्टा ३ । इति सुभूतिः ॥ वृक्षिकोलिः ४ गोपघण्टी ५ वदरोच्छेदा ६ शृगालकोलिः ७ कर्कन्धुः ८ । इति रत्नकोषः ॥ वादिरम् ९ । इति शब्दरत्नावली ॥ अस्य विवरणं कोलशब्दे द्रष्टव्यम् ॥* ॥ वृक्षकोलिः । तत्पर्य्यायः । सौवीरम् २ । इति रत्नमाला ॥* ॥ कोलिमात्रम् । तत्पर्य्यायः । कर्कन्धुः २ वदरी ३ कोलम् ४ कोलितम् ५ कुवलम् ६ घोण्टा ७ सौवीरम् ८ अजाप्रिया ९ क्षुद्रा १० कोलिः ११ विषम् १२ भयकण्टकः १३ । इति भावप्रकाशः ॥ सौवीरकः १४ गुडफलः १५ बालेष्टः १६ फलश्रेष्ठिरः १७ वृक्षबीजः १८ वृक्षफलः १९ कण्टकी २० पक्वकण्टकः २१ सुरसः २२ सुफलः २३ सक्तुः २४ कर्कन्धूः २५ वदरः २६ कोला २७ कोली २८ कुवली २९ स्वादुफला ३० गृध्रनखी ३१ पिच्छिला ३२ कुवलः ३३ । इति च शब्दरत्नावली ॥ (यथा, भागवते । ४ । ८ । ७२ ।
"चिराच्चान्ते चिराच्चान्ते कपित्थवदराशनः ।
आत्मदत्तानुसारेण मासं निर्व्वर्त्तयन् हरिम् ॥")
अस्य गुणाः । मधुरत्वम् । कषायत्वम् । अम्लत्वञ्च ॥ परिपक्वस्य तस्य गुणाः । मधुराम्लत्वम् । उष्णत्वम् । कफकारित्वम् । पवनानिसाररक्तश्रमदोषार्त्तिविनाशित्वम् । रुच्यत्वञ्च । इति राजनिर्घण्टः ॥ राजवदरभूवदरसक्षुवदराणां पर्य्यायगुणास्तत्तच्छब्दे द्रष्टव्याः ॥ ८ ॥ अथ वदरविशेषाणां लक्षणानि गुणाश्च ।
"पक्वमानं सुमधुरं सौवीरं वदरं मधु ।
सौवीरं वदरं प्रोक्तं भेदनं गुरु शुक्लजम् ॥
दृष्टिपित्तदाहास्रक्षयश्लेष्मनिवारणम् । ९ ।
सौवीरात्तु संपक्वं मधुरं कोलमुच्यते ।
कोलन्तु वदरं प्राहुरुष्णमुष्णरुचानृतु ।
कफपित्तकरत्वात्तु गुरु सारकमीरितम् । २ ।
कर्कन्धुः क्षुद्रवदरं कथितं पूर्व्वसूरिभिः ।
अम्लं स्यात् क्षुद्रवदरं कषायं मधुरं मनाक् ।
स्निग्धं गुरु च तिक्तञ्च वातपित्तापहं स्मृतम् ।
शुष्कं भेदनमिष्टन्तु सर्व्वं लघु च कीर्त्तितम् ॥"
इति भावप्रकाशः ॥

व(ब)दरः, पुं, (वदति स्थिरीभवति छिन्नेऽपि पुनः प्ररोहणादिति। वद्+अरः।) कोलिवृक्षः। तत्पर्य्यायगुणाः।

"वदरस्य फलेपो ज्वरदाहविनाशनः।
पत्रं विस्फोटशमनं बीजं नेत्रामयापहम्॥"

इति राजनिर्घण्टः॥

अस्य पर्य्यायः फलगुणाश्च क्षीवलिङ्गवदरशब्दे द्रष्टव्याः॥ ८॥ देवतर्षयश्चः। इति राजनिर्घण्टः॥ कार्पासास्थि। इति मेदिनी॥ कापासेर बिचि इति भाषा॥ तत्र अस्थ्नःस्थवकारादिशब्दमध्ये गृहीतोऽयम्॥

व(ब)दरफली, स्त्री, (वदरस्येव फलमस्याः। वदरफल+ङीप्।) भूवदरी। इति राजनिर्घण्टः॥

व(ब)दरवल्ली, स्त्री, (वदरा वदरफलवहुला वल्ली लता।) भूवदरी। इति राजनिर्घण्टः॥

वदरा, स्त्री (वदति छिन्नायामपि पुनः प्ररोहणात् स्थिरीभवति या। वद्+वाहुलकादरः। टाप्।) वराहक्रान्तावृक्षः। (तत्पर्य्यायो यथा,

"वाराहीकन्द एवान्यैर्धर्म्मकारालुको मतः।
अनूपसम्भवे देशे वाराह इव लोमवान्।
विदारी खादुकन्दा च सा तु क्षीरी सिता स्मृता॥
इक्षुगन्धा क्षीरवल्ली क्षीरशुक्ला पयस्विनी।
वाराहवदना गृष्टिर्वदरेत्यपि कथ्यते॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥) कार्पासीवृक्षः। इत्यमरः। २। ४। ११६॥ रलापर्णी। इति मेदिनी। रे, २०७॥ विष्णुक्रान्ता। इति विश्वः॥

वदरामलकं, क्ली, (वदरफलमिवामलकम्।) प्राचीनामलकम्। इति हारावली। १०२॥

वदरिः, स्त्री, (वद+वाहुलकादरिः।) कोलिवृक्षः। इति शब्दचन्द्रिका॥

वदरिकाश्रमः, पुं,क्ली, (वदरिकाचिह्नित आश्रमः।) तीर्थविशेषः। (असौ च हिमालयपर्व्वतेकदेशे श्रीनगरसमीपे अलकनन्दानद्याः पश्चिमस्थतीरे व्यवस्थितः।) स तु नारायणस्य आसस्य आश्रमः। यथा, महाभारते। ३ धौम्यतीर्थयात्रापर्व्वणि ८०। २३—३३।

"नारायणो विष्णुर्विष्णुः शाश्वतः पुरुषोत्तमः।
तस्यातिवृहतः पुण्या विशाला वदरीमनु॥
आश्रमः स्थायते पुण्यश्चिषु लोकेषु विश्रुतः।
उष्णातोयवहा गङ्गा शीततोयवहा पुरा॥
सुवर्णसिकता राजन्! विशालां वदरीमनु।
ऋषयो यत्र देवाश्च महाभागा महौजसः॥
प्राप्य नित्यं वसन्ति नारायणमजं विभुम्।
यत्र नारायणो देवः परमात्मा सनातनः॥
तत्र सप्तर्षयो राजन्! तीर्थान्यायतनानि च।
तत् पुण्यं तत् परं ब्रह्म तत्तीर्थं तत्तपोवनम्॥
तत् परं परमं देवं भूतानां परमीश्वरम्।
शाश्वतं परमञ्चैव धातारं परमं पदम्॥
यं विदित्वा न शोचन्ति विद्वांसः शास्त्रदृष्टयः।
तत्र देवर्षयः सिद्धाः सर्व्वे चैव तपोधनाः॥
आदिदेवो महायोगी यत्रास्ते मधुसूदनः।
पुण्यानामपि तत् पुण्यं तत्र ते संश्रयोऽस्तु मा॥
एतानि राजन्! पुण्यानि पृथिव्यां पृथिवीपते!।
कीर्त्तितानि नरश्रेष्ठ! तीर्थान्यायतनानि च॥
एतानि वसुभिः साध्यैरादित्यैर्मरुद्गणैः।
ऋषिभिर्ब्रह्मकल्पैश्च सेवितानि महात्मभिः॥
चरन्नेतानि कौन्तेय! सहितैर्ब्रह्मवादिभिः।
भ्रातृभिश्च महाभागैरलक्ष्यो विहरिष्यसि॥"

(तथा च भागवते। ७। ११। ६।

"योऽवतीर्य्यात्मनोंऽशेन दाक्षायण्यान्तु धर्म्मतः।
लोकानां स्वस्तयेऽध्यास्ते तपो वदरिकाश्रमे॥")

वदरी, स्त्री, (वदर+गौरादित्वात् ङीष्। वदरि+ऋदिकारादिति पक्षे ङीष् वा।) कोलिवृक्षः। इत्यमरः। २।४।३६॥ (अस्याः पर्य्यायो वदरशब्दे द्रष्टव्यः। यथा, भागवते। १। ७। ३।

"तस्मिन् स आश्रमे आसो वदरीखण्डमण्डिते॥")

कार्पासी। इति शब्दरत्नावली॥ कपिकच्छुः। इति राजनिर्घण्टः॥ (वदर्य्याः फलम् ङरीतक्वादिभ्यश्चेति विकारार्थस्य लुक्। वदरीफलम्॥)

वदरीच्छदा, स्त्री, (वदर्य्याश्छदा इव च्छदा यस्याः।) हस्तिकोलिवृक्षः। शृङ्गनखी। इति रत्नमाला॥

वदरीपत्रः, पुं, (वदर्य्याः पत्रमिव आकृतिर्यस्य।) नखीनामगन्धद्रव्यम्। इति राजनिर्घण्टः॥ (यथा,—

"वदरीपत्रकल्कं वा घृतभृष्टं ससैन्धवम्।
स्वरोपघाते कासे च लेहमेतत् प्रयोजयेत्॥"

इति वैद्यकचक्रपाणिसंग्रहे स्वरभेदाधिकारे॥)

वदरीपत्रकं, क्ली, (वदरीपत्र+स्वार्थे कन्।) नखीनामगन्धद्रव्यम्। इति जटाधरः॥

वदरीफला, स्त्री, (वदर्य्याः फलमिव फलं यस्याः।) नीलशेफालिका। इति शब्दमाला॥

वदरीशैलः, पुं, (वदरीवहुलः शैलः पर्व्वतः।) हिमालयपर्व्वतैकदेशः। वदरीवनं वदरिकाश्रम इति च ख्यातः। स तु श्रीनगराख्यदेशे अलकनन्दानदीपश्चिमतीरे वर्त्तते। इति पुराणान्तरम्॥

वद्धं, त्रि, (वध्यते स्म इति। वन्ध+कर्म्मणि क्तः।) वन्धनयुक्तम्। वाँधा इति भाषा। तत्पर्य्यायः। सन्दानितम् २ नर्यम् ३ उद्दितम् ४ सन्दितम् ५ सितम् ६। इत्यमरः। ३। १। ६५॥ निगडितम् ७ नहम् ८ कीलितम् ९ यन्त्रितम् १० संयतम् ११। इति हेमचन्द्रः॥ (यथा, मनुः। ९। ३०८।

"वरुणेन यथा पाशैर्वद्ध एवाभिदृश्यते।
तथा पापान्निगृह्णीयात् व्रतमेतद्धि वारुणम्॥"

तथा च मेघदूते। ७६।

"तस्मिंश्च स्फटिकफलका काञ्चनीवासयष्टि-
र्मूले वद्धा मणिभिरनतिप्रौढ़वंशप्रकाशैः॥"

तथा च शाङ्गधरे २ अङ्के।

"छायावद्धकदम्बकं मृगकुलं रोमन्थमभ्यस्यतु॥")

वद्धगुदं, क्ली, (वद्धं गुदं पायुर्यत्र।) उदररोगविशेषः। तस्य निदानं यथा,—

"यस्यान्त्रमन्नैरुपलेपिभिर्वा
वालाश्मभिर्वा पिहितं यथावत्।
सञ्जीयते तस्य मलः सदोषात्
प्रत्नैः प्रत्नैः सङ्करवच्च नाध्याम्॥
निरुध्यते तस्य गुदे पुरीषं
निरेति कृच्छ्रादपि चाल्पमल्पम्।
वृत्ताभिमध्ये परिवृद्धिमेति
तस्योदरं वद्धगुदं वदन्ति॥"

इति माधवकरः॥ *॥

तस्य चिकित्सा यथा। "स्निग्धस्विन्नस्याभ्यक्तस्याधो नाभेर्वामतश्चतुरङ्गुलमपहाय रोमराज्या उदरं पाटयित्वा चतुरङ्गुलप्रमाणमन्त्राणि निष्कृष्य निरीक्ष्य वद्धगुदस्यान्तप्रतिरोधकरमश्मानं वालं वापोह्य मलजातं वा ततो मधुसर्पिर्भ्यामभ्यक्तान्त्राणि यथास्थानं स्थापयित्वा वाह्यं व्रणमुदरस्य सीव्येत् द्विव्रणीयोक्तेन विधानेन च रोपयेत्।" इति सुश्रुते चिकित्सितस्थाने १४ अध्यायः॥ (तथास्य सकारणलक्षणम्।

"पक्ववालैः सहान्नेन मुक्तैर्वद्धायने गुदे।
उदावर्त्तस्तथार्शोभिरन्तसंमूर्च्छनेन वा॥
अपानो मार्गसंरोधात् हत्वाग्निं कुपितोऽनिलः।
वर्च्चःपित्तकफान् रुद्धा जनयत्युदरं ततः॥"

तस्य रूपाणि।

"तृष्णादाहज्वरसुखतालुशोषोरुसादकासश्वास-
हिक्काविस्मारोचकाविपाकवर्च्चोमूत्रसङ्गाध्मानच्छर्दि-
च्छवथुशिरोहृन्नाभिगुदशूलान्यपि चोदरं मरुद्वातं
स्थिरमरुणनीलराजीसिरावद्धमवाजिकं वा
प्रायो नाभ्युपरिगोपुच्छवदभिनिर्व्वर्त्तयति इत्येतत्
वद्धगुदोदरमिति विद्यात्॥"

तथास्य चिकित्सा।

"स्निग्धाय वद्धोदरिणे मृदुं तीक्ष्णौषधान्वितम्।
सतैललवणं दद्यात् निरूहं सानुवासनम्॥"

इति चरके चिकित्सितस्थाने त्रयोदशेऽध्याये॥)

वद्धघ्नि, क्ली, वद्धपायिः। सुश्रुतः। इति पुराणान्तरम्॥ वद्धाघ्नीति च पाठः॥

वद्धफलः, पुं, (वद्धानि फलानि यस्येति।) करञ्जवृक्षः। इति राजनिर्घण्टः॥ (विवृतिरस्य करञ्जशब्दे ज्ञातव्या॥)

वद्धमुष्टिः, त्रि, (वद्धा दृढ़ा दानान्निवृत्ता वा मुष्टिर्यस्येति।) दृढ़मुष्टिः। कृपणः। यथा, नैषधे। ३। ८५।

"सजीवमप्यर्थिमुदे ददद्भव-
स्तव त्रया नेदृगवद्धमुष्टिः॥"

वद्धमूलं, त्रि, (वद्धं मूलं यस्येति।) दृढ़मूलम्। उत्पाटनानर्हमूलम्। यथा, माघे। २। ३८।

"त्वया विप्रकृतश्चेयो रुक्मिणी हरता हरे!।
वद्धमूलस्य मूलं हि मद्देरतरोः स्त्रियः॥"

वद्धरसालः, पुं, (वद्धो रसेन आवृतः अतएव रसालः रसवान्।) त्रिविधरसाम्रान्तर्गता-

लुप्तमात्रः । तत्पर्य्यायः । चक्रतलाढ्यः २ मध्याढ्यः ३ सितजाढ्यकः ४ वनेच्यः ५ मन्मथानन्दः ६ मदनेच्छाफलः ७ । तस्य कोमलफलगुणाः । कटुत्वम् । अम्लत्वम् । पित्तदाहदत्वञ्च । तस्य तुपक्वफलगुणाः । स्वादुत्वम् । मधुरत्वम् । पुष्टिवीर्य्यबलप्रदत्वञ्च । इति राजनिर्घण्टः ॥

वह्निशिखः, त्रि, (वह्निः शिखा चूड़ा यस्येति ।) शिखी । इति मेदिनी । खे, १५ ॥ शिखावन्धनविशिष्टः । यथा, प्रायश्चित्ततत्त्वधृतवचनम् ।

"मद्योपवीतिना भाव्यं सदा वह्निशिखेन तु ।
विशिखो युपवीतश्च यत् करोति न तत् कृतम् ॥"

वह्निशिखा, स्त्री, (वह्निः शिखा यस्याः ।) उच्चटा । इति मेदिनी । खे, १५ ॥ (वह्निः शिखा केशकलापो यस्याः ।) समवह्निकेशा च ॥

वध, क वन्धे । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) क, वाधयति । इति दुर्गादासः ॥

वध, ऽ निन्दे । वन्धे । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट् ।) ऽ, वीभत्सते खलं लोकः । वधते तत्र त्वाद्यो न प्रयुज्यन्ते । इति रमानाथः ।

'मा वधिष्ठा जटायुं मां सीतां रामाहमेचिपि ।'
इति भट्टिः । ६ । ४१ ॥ इति दुर्गादासः ॥

वधिरः, त्रि, (वध्नाति कर्णमिति । वन्ध + "इषिमदिमुदीति ।" उणा० १ । ५२ । इति किरच् ।) श्रवणेन्द्रियरहितः । श्रुतिशक्तिहीनः । काला इति भाषा । तत्पर्य्यायः । एडः २ । इत्यमरः । २ । ६ । ४८ ॥ कलः ३ श्रवणापटुः ४ । इति शब्दरत्नावली ॥ उच्चैःश्रवाः ५ । इति संक्षिप्तसारोणादिवृत्तिः ॥ (यथा, मनुः । ११ । ५२ ।

"एवं कर्म्मविशेषेण जायन्ते सद्विगर्हिताः ।
जड़मूकान्धवधिरविकृताकृतयस्तथा ॥"

वाधिर्य्यनिदानं यथा,—

"यदा शब्दवहं वायुः श्रोत्रमावृत्य तिष्ठति ।
शुद्धः श्लेष्मान्वितो वापि वाधिर्य्यं तेन जायते ॥"
इति माधवकरः ॥

अस्याध्यवाधिर्य्यमाह ।

"वाधिर्य्यं बालवृद्धोत्थं चिरोत्थञ्च विवर्जयेत् ।"
इति भावप्रकाशः ॥*॥

अस्यौषधम् ।

"कर्णशूले कर्णनादे वाधिर्य्ये चेड़ एव च ।
सर्वेष्वपि च रोगेषु सामान्यं भेषजं स्मृतम् ॥
अङ्गवेरस्य मधु च सैन्धवं तैलमेव च ।
कटूनां कल्कयोर्धार्य्यमेतत् व्याहिनाशनम् ॥१॥
कर्णशूले कर्णनादे वाधिर्य्ये चेड़ एव च ।
पूरणं कटुतैलेन हितं वातघ्नभेषजम् ॥ २ ॥
शिग्रुवरिष्टारग्वधारिमेदःकृतकल्केन साधितं तैलम् ।
अपहरति कर्णनादं वाधिर्य्यमपि पूरणतः ॥
शिग्रुरसो व्यपामार्गः ॥ ३ ॥
गवां मूत्रेण विश्वानि पिष्ट्वा तैलं विपाचयेत् ।
मूलस्य सदृशस्य तद्वाधिर्य्यहरं परम् ॥
क्षीरमज्राजं मांसम् । विल्वतैलम् ॥ ४ ॥"इति भावप्रकाशः ॥ यथा च ।

"शुष्कमूलकशुण्ठीनां चारो हिङ्गुलनागरम् ।
शुष्कं चतुर्गुणं दद्यात्तैलमेतैर्विपाचयेत् ॥
वाधिर्य्यं कर्णशूलञ्च पूयस्रावञ्च कर्णयोः ।
क्रिमयश्च विनश्यन्ति तैलस्यास्य प्रपूरणात् ॥"५
इति गारुड़े १६७ अध्यायः ॥

व(ब)धूः, स्त्री, (वध्नाति प्रेम्णा या । वन्ध + ऊः मलोपश्च । अन्तःस्थवादौ तु वहति संसारभारं उह्यते भर्त्रादिभिरिति वा । वह + "वहेर्धश्च ।" उणा० १ । ८५ । इति ऊः धत्वान्तादेशः ।) नारी । स्नुषा । वृक्षा । इत्यमरः । २ । ६ । १०१, २ । ४ । १३३ ॥ (अस्याः पर्य्यायो यथा,—

"वृक्षा स्यादुन्नाह्यनी देवी मरुन्माला लता लघुः ।
ससुद्रान्ता वधूः कोटिवर्षालङ्कापिकेत्यपि ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे १ भागे ॥)
शारिवौषधिः । शटी । (अस्याः पर्य्यायो यथा,
"शटी पलाशी षड्ग्रन्था सुव्रता गन्धमूलिका ।
गन्धारिका गन्धवधूर्वधूः पृथुपलाशिका ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)
नवोढ़ा । (यथा, रघुः । ७ । ४ ।

"वरः स वध्वा सह राजमार्गं
प्रापध्वजच्छायनिवारितोष्णम् ॥")

भार्य्या । इति मेदिनी । धे, १४ ॥ भरतेन अमरकोषटीकायां पवर्गीयवकारादिवन्धधातुना निष्पादितोऽयम् । मेदिनीकारेण तु अन्तःस्थवकारादिशब्दमर्थे संगृहीतः ॥ अथ नववध्वा द्विरागमनयात्रा । तत्राष्टमदशमद्वादशषष्ठचतुर्थवर्षाणि निषिद्धानि । मासाः मार्गशीर्षफाल्गुनवैशाखा विहिताः । पक्षः शुक्लः । पुष्यस्वाती हस्ताधनिष्ठोत्तराषाढोत्तरफल्गुन्युत्तरभाद्रपद्रेवतीन्द्राग्निरोहिणीपुनर्व्वसुपूर्व्वाषाढा एतानि नक्षत्राणि विहितानि । सोमबुधगुरुशुक्राणां वाराः विहिताः । तिथयो यात्राप्रकरणोक्ताः । चन्द्रताराशुद्धौ कालशुद्धौ च गृह्यसूर्य्यवारवेलादिकमूलादीन् परित्यज्य कर्त्तव्या । इति ज्योतिषम् ॥

"वृत्ते पाणिग्रहे गेहात् पितुः पतिगृहं प्रति ।
पुनरागमनं वध्वास्तद्विरागमनं विदुः ॥
विवाहमासि प्रथमं वध्वा नागमनं यदि ।
तदा सर्व्वमिदं चिन्त्यं युग्माब्दं विचक्षणैः ॥
सुखा पितृगृहे नारी मुक्ते स्वामिगृहे यदि ।
दौर्भाग्यं जायते तस्याः श्वश्रूश्वशुरकुलनायिकाः ॥"
इति ज्योतिस्तत्त्वम् ॥

वधूजनः, पुं, (वधूरेव जनः ।) योषित् । इति त्रिकाण्डशेषः ॥ (यथा, माघे । ३ । ५२ ।

"त्रिदिवप्रतिलोभेऽपि सुखारविन्दे-
र्वधूजनसङ्गमसक्तचेतसः ॥")

वधूटशयनं, क्ली, (वधूटीनां शयनमिव । एषोदरादिकारस्याकारः ।) गवाक्षः । यथा,—

"वातायनं गवाक्षः स्याद्वधूटशयनन्तथा ॥"
इति त्रिकाण्डशेषः ॥

वधूटिः, स्त्री, वधूटी, टिः । पक्षे ङीष् । यद्वा, वधू + "वयस्यचरम इति वाधम् ।" ४ । १ । २० । इत्यस्य वार्त्तिक० इति ङीप् ।) पुत्रभार्य्या । इति भरतधृतत्रिकोषः । सुवासिनी । इति हेमचन्द्रः ॥ अल्पा वधूः । यथा,—

"नूतनजलधररुचये गोपवधूटीदुकूलचौराय ।
तस्मै नमः कृष्णाय संसारमहीरुहस्य वीजाय ॥"
इति भाषापरिच्छेदः । १ ॥

वधूत्सवप्रसवः, पुं, (वध्वा उत्सव आर्त्तवः स इव प्रसवः पुष्पादिर्यस्य ।) रक्ताम्लानः । इति राजनिर्घण्टः ॥

वध्रं, क्ली, (वध्यतेऽनेनेति । वन्ध + "सर्व्वधातुभ्यष्ट्रन् ।" उणा० ४ । १५८ । इति ष्ट्रन् ।) सीसकम् । इत्यमरः ॥ वध्रमिति पठति स्वामी ॥ (अस्य पर्य्यायो यथा,—

"सीसं वध्रञ्च वध्रञ्च योगेष्टं नागनामकम् ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

वध्री, स्त्री, (वध्यतेऽनया । वन्ध + "सर्व्वधातुभ्यष्ट्रन् ।" उणा० ४ । १५८ । इति ष्ट्रन् पित्वात् ङीष् ।) चर्म्मरज्जुः । इत्यमरः । २ । १० । १३ ॥ वध्री द्विरेफेति केचित् । वर्द्ध्रां चर्म्मवन्धे भवा वार्द्ध्री दीर्घादिरिति ढञ् ॥

वन, द ऽ उ याचने । इति कविकल्पद्रुमः ॥ (तना०-आत्म०-द्विक०-सेट् । क्त्वेट् ।) द ऽ, वनुते । उ, वनित्वा वत्वा । इति दुर्गादासः ॥

वन्, ञौ ग वन्धे । इति कविकल्पद्रुमः ॥ (क्रया०-पर०-सक०-अनिट् ।) ञौ, अवानत्सीत् । ग वभ्राति । वस्वान्तं शठ सुप्त सुप्त शपथैः किं धूर्त्त निर्व्वन्धसे । इत्यपपाठः । निर्व्वन्धते इति पाठमिति रमानाथः । वस्तुतस्तु अस्य गत्यन्तानित्यतया भेरभावे आत्मनेपदे च सिद्धम् । इति दुर्गादासः ॥

वन्ध, क वन्धे । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) क, वन्धयति । इति दुर्गादासः ॥ (यथा, रामायणे । २ । ८३ । ४ ।

"वन्धयिष्यति वा पाशैरथवास्मान् वधिष्यति ॥"

वन्ध्यः, पुं, (वन्ध + एलचीति घप् ।) व्याधिः । वन्धनम् । इति मेदिनी । धे, ६ ॥ शरीरम् । इति हेमचन्द्रः ॥ (कर्म्मजनितादृष्टयशात् देहादेहान्तरोत्पत्तेः शरीरस्य तथात्वम् ।) गृहादिवेष्टनम् । इति शब्दरत्नावली ॥ तद्विवरणं यथा

"रूपाष्टकैर्विनिहतो भवमस्य वन्ध-
कर्त्तुः स्वरूपमिह युग्मशरैकनिघ्नम् ।
एकीकृतं रसनिधाकरयुग्मशुक्ल-
श्रेयं ततो भवति पिण्डपदं गृहस्य ॥
गृहभूमिसमाहृतपिण्डपदं
वसुलोचनरन्ध्रगवेर्गुणितम् ।
रविभूधरविंशृदृयोगहृत-
मायव्ययस्थितिश्चपदम् ॥"

रूपार्धकैरेकाशीत्या विनिहतः पूरितो भवनस्य वन्धः दीर्घप्रकारमिलितदृक्षाः स्वदृक्षं तत्संख्यानं युग्मशरैकनिघ्नं द्विपक्षाग्रदुत्तरघ्नपूरितम् एकीकृतं पूर्वार्द्धेन मिलितं रसनिघ्नाकरयुग्मसुरुपैर्यं योऽग्राधिकद्विघ्ननवनवतिशिष्टं तत्संख्यानं पिण्डपदसंज्ञं गृहस्य भवति तदृग्यभूमिसमाहतपिण्डपदं वसुलोचनरन्ध्रगुणैः। अष्टद्विनवाष्टभिर्यथाक्रमं गुणितं पूरितं यथाक्रमं रविभूधरचिन्द्वग्रयोगहतं द्वादशसप्तचिन्नवसप्तविंशतिभिर्भक्तं गृहस्य यथाक्रममायव्ययस्थितिक्षपदं भवतीत्यर्थः।

"रुद्रहृत्तमिते वन्धे भरणा योगतो यथा।
आयादयो भवन्त्यत्र वसुघट्टतिथिवुद्धिताः॥
अत्र नक्षत्रं दीयते पश्चात्तदेवायाति।
प्रत्यक्पूर्वाग्नयोर्भे द्रविणाद्यं विदिक्षु दहनादि।
पूर्वोत्तरयोर्गृह्योरश्विन्यादिभानि स्युः।
यत्र तु श्रेयो नास्ति तत्र हारकाङ्कः शेषः॥
श्रेयाङ्के फले बोध्ये श्रेयाभावे तु हारकात्।
अङ्कादेव फलं बोध्यमिति तन्त्रविदाम्मतम्॥
इत्युक्तत्वात्॥
व्ययाधिकं न कर्त्तव्यं गृहमायाधिकं शुभम्॥"
इति ज्योतिस्तत्त्वम्॥ * ॥

षोढाप्रकारा रतिवन्धा यथा, रतिमञ्जर्याम्। ४०—४१।

"पद्मासनो नागपदो लतावेष्टोर्द्धसम्पुटः।
कुलिशं सुन्दरश्चैव तथा केशर एव च॥
हिल्लोलो नरसिंहोऽपि विपरीतस्तथापरः।
चुम्बो वै धेनुकश्चैव नमुत्कण्ठस्तत: परः।
सिंहासनो रतिनागो विद्याधरस्तु षोढाग्र॥"
(एतेषां लक्षणानि तत्रैव। ४२-५७। उक्तानि। यथा,—

"हस्ताभ्याम् समालिङ्ग्य नारीं पद्मासनोपरि।
रमेद्गाढं समाकृष्य वन्धोऽयं पद्मसंज्ञकः॥
पादौ कृत्वायुगे हस्तौ क्षिपेल्लिङ्गं भगे लघु।
प्ररमेत् कामुको नारीं वन्धो नागपदो मतः॥
वाहुभ्यां पादयुग्माभ्यां वेष्टयित्वा रमेत् स्त्रियम्।
लघु लिङ्गं ताडयेद् योनौ लतावेष्टोऽयमुच्यते॥
स्त्रीपादावन्तरीक्षे तु किञ्चिद्भग्नौ च जानुनि।
स्तनयोर्मर्दनं पीड़ा वन्धोऽयं मर्दसंपुटः॥
स्त्रीपादद्वयमाकृष्य हठालिङ्गस्य ताडनम्।
योनिमापीड़येत् कामी वन्धः कुलिशसंज्ञकः॥
नारीपादद्वयं कामी धारयेदूर्द्धदेशतः।
कृत्वौ धृत्वा पीडयेद्गं वन्धोऽयं रतिसुन्दरः॥
स्त्रियो बद्धे समापीड्य दोर्भ्यां गात्रस्य मर्दनम्।
पुनः प्रपीड़येद् योनिं वन्धः केशरसंज्ञकः॥
दृढं कृत्वा स्त्रियः पादौ कराभ्यां धारयेत् करौ।
यथेष्टं ताड़येत् योनिं वन्धो हिल्लोलसंज्ञकः॥
पादौ संपीड्य योनौ च हठालिङ्गप्रवेशनम्।
रसयेद्वैरतं गाढं वन्धो नृसिंहसंज्ञकः॥
पादमेकतरौ कृत्वा द्वितीयं कटिसंस्थितम्।
नारीन्तु रमेत् कामी विपरीतस्तु वन्धकः॥
पार्श्वोपरि पदौ कृत्वा योनौ लिङ्गेन ताड़येत्।
वाहुभ्यां ताड़येद्गाढं चुम्बको वन्ध एव सः॥
सुप्तां स्त्रियं समालिङ्ग्य स्वयं सुप्तो रमेत् पुनः।
यस्मिन् चालयेत् योनौ वन्धोऽयं धेनुकः स्मृतः॥
नारीपादौ च हस्तेन धारयेत् गलके पुनः।
स्तनार्पितकरो कामी वन्धश्चोत्कण्ठसंज्ञकः॥
स्वयं जङ्घादयं वाहौ कृत्वा योषित्पदद्वयम्॥
स्तनौ धृत्वा रमेत् कामी वन्धः सिंहासनो मतः॥
पीड़येदुरुयुग्मेन कामुकः कामिनीं यदि।
रतिनागः समाख्यातः कामिनीनां मनोहरः॥
नार्याश्चोरुयुगं धृत्वा कराभ्यां ताड़येत् पुनः।
रमयेन्निर्भरं कामी वन्धो विद्याधरो मतः॥"
इति॥)

संज्ञाप्रभेदेन अन्योऽपि वन्धोऽस्ति। यथा,—

"कामप्रदो विपरीतो नागरो रतिपाशकः।
केयूरः प्रियतोषश्च ततः समपदस्तथा॥
ततश्चैकपदो ज्ञेयः सम्पुटश्चोर्द्धसम्पुटः।
ततः स्तनभवश्चैव ततो तु रतिसुन्दरः॥
ऊरुपीड़ोरुचक्रौ ततश्चोरुक्रमः स्मृतः।
वेष्टको हंसकीलस्तु ततो लीलासनस्तथा॥
अष्टादशक्रमाद्वन्धाः स्त्रीणां वहुसुखप्रदाः।
पुंसां सुखकराश्चैव कथितास्तु क्रमात्तत:॥"
इति स्मरदीपिका॥ * ॥

अनभिसन्धितकर्म्मकर्त्तृवन्धाभावो यथा,—

"पश्चर्णदानैरशुभं शुद्धतेऽनभिसन्धितैः।
फलैस्तयोपभोगेश्च पूर्व्वकर्म्मशुभाशुभैः॥
एवं न वन्धो भवति कुर्व्वतः कारणं विना।
न च वन्धाय तत् कर्म्म भवत्यनभिसन्धितम्॥"
इति मार्कण्डेयपुराणम्॥
(हठयोगप्रदीपोक्ता यौगसाधकवन्धा यथा, तत्रैव। ३। ५५—५७।

अथौड्डीयानवन्धः।

"वद्धो येन सुषुम्नायां प्राणस्तूड्डीयते यतः।
तस्माद्डुड्डीयनाख्योऽयं योगिभिः समुदाहृतः॥
उड्डीनं कुरुते यस्मादविश्रान्तं महाखगः।
उड्डीयानं तदेव स्यात् तत्र वन्धोऽभिधीयते॥
उदरे पश्चिमं तानं नाभेरूर्द्ध्वञ्च कारयेत्।
उड्डीयानो ह्यसौ वन्धो मृत्युमातङ्गकेशरी॥"
अथ मूलवन्धः। तस्यलक्षणादिकमुक्तं तत्रैव ३। ६१—६२।

"पार्ष्णिभागेन सम्पीड्य योनिमाकुञ्चयेद्गुदम्।
अपानमूर्द्ध्वमाकृष्य मूलवन्धोऽभिधीयते॥
अधोगतिमपानं वा ऊर्द्ध्वगं कुरुते वलात्।
आकुञ्चनेन तं प्राहुर्मूलवन्धं हि योगिनः॥"
अथ जालन्धरवन्धः। तस्य लक्षणादिकमुक्तं तत्रैव। ३। ७०—७१।

"कण्ठमाकुञ्च्य हृदये स्थापयेच्चिबुकं दृढम्।
वन्धो जालन्धराख्योऽयं जराव्याधिविनाशकः॥
वध्नाति हि शिराजालमधोगामि नभोजलम्।
ततो जालन्धरो वन्धः कण्ठदुःखौघनाशनः॥")

वन्धकं, क्ली, (वध्नातीति। वन्ध + ण्वुल्।) ऋणाय स्थापितं वस्तु। बँधा इति भाषा। इति आधिशब्दनानार्थे अमरः॥ इदानीमाधिनिरूप्यते। आधिर्नाम गृहीतस्य द्रव्यस्योपरि विश्वासार्थमधमर्णेनोत्तमर्णेऽधिक्रियते आधीयत इत्याधिः। स च द्विधैव। कृतकालोऽकृतकालश्च। पुनस्तैकैकशो द्विविधः गोप्यो भोग्यश्च। यथाह नारदः।

"अधिक्रियत इत्याधिः स विज्ञेयो द्विलक्षणः।
कृतकालाप्रनेयश्च यावद्देयोद्यतस्तथा॥
स पुनर्द्विविधः प्रोक्तो गोप्यो भोग्यस्तथैव चेति॥"

कृते काले आधानकाल एवासुस्मिन् काले दीयोत्सवादौ मयायमाधिर्मोक्तव्योऽन्यथा तवैवाधिर्भविष्यतीत्येवं निरूपिते कालेऽनेयः आत्मसमीपं नेतव्यो मोचनीय इत्यर्थः देयं दानं देयमनतिक्रम्य यावद्देयम् उद्यतो नियतः स्थापित इत्यर्थः। यावद्देयम् उद्यतो यावद्देयोद्यतः गृहीतधनप्रत्यर्पणावधिरनिरूपितकाल इत्यर्थः। गोप्यो रक्षणीयः। एवञ्चतुर्विधस्याधेर्विशेषमाह।

"आधिः प्रणश्येत् द्विगुणे धने यदि न मोच्यते।
काले कालकृतो नश्येन् फलभोग्यो न नश्यति॥"

प्रयुक्ते धने स्वकृतया वृद्ध्या कालक्रमेण द्विगुणीभूते यदाधिरधमर्णेन द्रव्यदानेन मोच्यते तदा नश्यत्यधमर्णस्य धनं प्रयोक्तुः स्वम्भवति। कालकृतः कृतकालः। आहिताग्न्यादिषु पाठात् कालशब्दस्य पूर्वनिपातः। स तु काले निरूपिते प्राप्ते नश्येत् देयगुण्यात् प्रागूर्द्धं वा। फलभोग्यः फलं भोग्यं यस्यासौ फलभोग्यः चेचारामादिः स न कदाचिदपि नश्यति। कृतकालस्य गोप्यस्य भोग्यस्य च तत्कालातिक्रमे नाश उक्तः। काले कालकृतो नश्येदिति। अकृतकालस्य भोग्यस्य नाशाभाव उक्तः फलभोग्यो न नश्यतीयेषा परिशेष्यादाधिः प्रणश्येदित्येतदकृतकालगोप्याधिविषयमवतिष्ठते देयगुण्यातिक्रमेण निरूपितकालातिक्रमेण च विनाशे चतुर्थ्यादिवचनप्रतीच्यं कर्त्तव्यं कृष्यतिवचनात्।

"स्थिरक्षे द्विगुणीभूते पूर्णे काले कृतावधौ।
वन्धकस्य धनी स्वामी द्विसप्ताहं प्रतीक्ष्य च।
तदन्तराधनं दत्त्वा ऋणी वन्धमवाप्नुयादिति॥"
किञ्च।

"गोप्याधिभोगे नो वृद्धिः सोपकारेऽपि स्थापिते।
नष्टे देयो विनष्टश्च देवराजकृतादृते॥"

गोप्याधेस्ताम्रकटाहादेरुपभोगेन वृद्धिर्भवति। अन्येऽप्युपभोगे सत्यपि वृद्धिर्नातया समयातिक्रमात् तथा सोपकारे उपकारकारिणि वलीवर्दताम्रकटाहादौ भोग्याधौ वृद्धिके स्थापिते स्थानि व्यवहाराक्षमत्वं गमिते नो वृद्धिरिति सम्बन्धः। नष्टे विक्रीतं गतस्ताम्रकटाहादिलिङ्गभेदादिना पूर्ववत्कृत्वा देयः तत्र गोप्याधिर्नश्येत् पूर्ववत् कृत्वा देयः। उपभुक्तोऽपि चेत् वृद्धिरपि स्थातया भोग्याधिर्यदि नष्टस्तदा पूर्ववत् कृत्वा देयः। वृद्धिसद्भावे वृद्धिर्वा स्थातया। विनष्टे व्याधिकं नाशं प्राप्तः सोऽपि देयो मूल्यादिप्रदेयं तदागे वृद्धिकं मूल्यं लभते

यदि न ददाति तदा सूक्ष्मनाशः। 'दिनष्टे सूक्ष्मनाशः स्याद्देवराज्ञस्तदष्टमे।' इति नारदवचनात्। देवराज्ञस्तदष्टमे। देवस्यभुदकदेशोपलक्षणम्। देवकृतादिनाशरहितः। तथा स्वयंराधरहितमाधमर्ण्यम्। देवराज्ञस्ते तु विनाशे सद्वृद्धिं मूलं दातव्यमधमर्णेनाधमर्णं वा यथाह।

"मोक्षयापकृते चैव राज्ञा चैवापहारिते।
आधिरन्योऽथ कर्तव्यो देयं वा धनिने धनमिति॥"

तत्र मोक्षयापकृत इति देवकृतोपलक्षणम्। अपि च।

"आधेः स्वीकरणात् सिद्धौ दृष्टनाशोऽप्यकारणम्।
यावच्चैव्य आधेर्यो धनभाग्वा धनी भवेत्॥
आधेर्मोक्षस्य सीमत्व च स्वीकरणादुपभोगादाधिग्रहणसिद्धिर्न चाधिरिक्थवत्तायैव नाणुदेशमात्रेण यथाह नारदः।

"आधिस्तु द्विविधः प्रोक्तो भोग्यः स्थावरस्तथा।
सिद्धिरस्थोभयस्यापि भोगो यद्यस्ति नान्यथा॥"

भोग्य च फलम्।

"आधौ प्रतिग्रहे क्रीते पूर्वा तु बलवत्तरेति।"

या स्वीकारात्मक क्रिया सा पूर्वा पश्चवतो स्वीकाररहिता तु पूर्वापि न बलवतीति स आधिः प्रयत्नेन दृष्टनाशोऽपि कालवशेन यद्यपारतामविज्ञत एव यद्वृद्धिकमूलप्रत्यर्पणार्थमागतं गतत्वादाधिरेव कर्तव्यः। धनिनं वा धनं देयं दृष्टनाशोऽप्यकारणमिति वदता आधिः प्रयत्नेन रक्षणीयो धनिनेति ज्ञापितम्। आधिः प्रयत्नद्विगुण इत्यत्राप्यवादमाह।

"परिच्छन्नकालं सद्वृद्धया दापयेद्धनम्।
यत्प्रकारकृतं मूल्यं द्विगुणं प्रतिदापयेत्॥"

परिच्छं शोभनाचरितम्। परिच्छेन वन्धकं परिच्छवन्धकम्। तेन यत् प्रयत्नात्मसात् कृतं मराधीनं वा कृतम्। एतदुक्तं भवति धनिनः स्वच्छाप्रयत्नेन सहसूक्ष्मनाशेऽपि प्रयत्नाधीनत्वाधमर्णेनाप्यसेव प्रयत्नात्मसात्वात् कृतम्। यदि वाधमर्णस्य राज्ञाप्यत्तेभाग्यमूल्यमाधिं गृहीत्वा वहुप्रयत्नेन धनिनाधमर्णाधीनं कृतमिति तदूनं वृधी वृद्धया सह दापयेत् व्यवसाप्यः। एवंरूपं वन्धकं द्विगुणीभूतेऽपि द्रव्ये न नश्यति किंतु प्रयत्नेव द्विगुणं दातव्यमिति। तथा यत्प्रकारकृतं करणं कारः भावे घञ् सलस्य कारः यत्प्रकारः कारे सत्यागदस्येति सुम् यत्प्रकारेण कृतं यत्प्रकारकृतम्। व्यवसिच्यतेः। यदा वन्धकाधमर्णसमय एव इत्थं परिभाषितं द्विगुणीभूतेऽपि द्रव्ये मया द्विगुणं द्रव्यमेव दातव्यम्। गाधिग्राह्य इति तदा तद्विगुणं दापयेदिति। व्यर्थोऽर्थः। परिच्छशब्देन गङ्गाक्षानाभिहोत्रादिक्रियमपूर्णमुच्यते यत्र तदेवाधीनत्व यत् प्रयत्नात्मसात् कृतम्। तत्र तदेव द्विगुणीभूतं दातव्यं नाधिग्राह्य इति। आधिप्रयत्नाद्-यदुच्यते। यत्प्रकारकृतमिति क्रयविक्रयादिव्यवस्थानिर्व्वाहार्थाय यथशुल्कीयकादिपरहस्ते कृतं तद्व्यवस्थातिक्रमे द्विगुणं दातव्यं तत्रापि येनाशुल्कीयकादर्पितं स एव चेद्व्यवस्थातिवर्त्ती तेन तदेव ज्ञातव्यम्। इतरश्चेद्व्यवस्थातिवर्त्ती तदा तदेवाशुल्कीयकादिद्विगुणं प्रतिदापयेदिति। किंच।

"उपस्थितस्य मोक्षस्य आधिः स्तेनोऽन्यथा भवेत्।
प्रयोजकोऽसति धनं कृतेऽन्यस्याधिमाप्नुयात्॥"

यदानेनाधिमोचयायोपस्थितस्याधिर्मोक्षयो धनिना वृद्धिलोभेन न स्वापयितव्यः। अन्यथा अमोचये स्तेनचौरवदृणी भवेत् असन्निहिते पुनःप्रयोक्तरि कृते तदाप्तश्चं सद्वृद्धिकं धनं निधायाधमर्णः स्वीयं वन्धकं गृहीयात्। अथ प्रयोक्ताप्यसन्निहितस्तदाप्तांश्च धनस्य ग्रहीतारो न सन्ति यदि वा असन्निहिते प्रयोक्तरि आधिक्रियेण धनदित्साधमर्णस्य तत्र किं कर्तव्यमित्यपेक्षित आह।

"तत्कालजन्मूल्यो वा तत्र तिष्ठेद्वृद्धिकः।"

तस्मिन् काले यत्स्याधिर्मूल्यं तत् परिकल्प्य तत्रैव धनिनि समाधिं वृद्धिरहितं स्थापयेन्न तत ऊर्द्धं धनं वर्द्धते यावद्धनी धनं गृहीत्वा तमाधिं मुञ्चति यावता तन्मूल्यद्रव्यमन्यत्र धनिने प्रवेशयति। यदा तु द्विगुणीभूतेऽपि धने द्विगुणं धनमेव ग्रहीतव्यं न त्वाधिनाश्च इति विचारितस्तत्र ग्रहणकाल एव तदा द्विगुणीभूते द्रव्ये असन्निहिते वाधमर्णे धनिना किं कर्तव्यमित्यत आह।

"विनाधारणकादापि विक्रीणीत तमाधिकम्।"

धारणकादधमर्णादिना अधमर्णे असन्निहिते साक्षिभिस्तदादेशेन सह तमाधिं विक्रीय तद्धनं गृहीयाद्धनी वाप्यब्दो व्यवस्थितविकल्पार्थः। यदर्थग्रहणकाले द्विगुणीभूतेऽपि धने धनमेव गृहीतव्यं न त्वाधिनाश्च इति न विचारितम्। तदा आधिः प्रयत्नेद्विगुण इत्यत्राधिनाश्चः। विचारिते त्वयं पक्ष इति॥ * ॥ भोग्याधौ विशेषमाह।

"यदा तु द्विगुणीभूतस्तदाधौ तदा खलु।
भोग्य आधिरुत्पन्ने प्रविष्टे द्विगुणे धने॥"

यदा प्रयुक्तं धनं खलतया वृद्धया द्विगुणीभूतं तदाधौ कृते तदुत्पन्ने चाधुत्पन्ने द्विगुणे धनिनः प्रविष्टे धनिनाधमर्णोक्तयः। यदि वादायेवाधादत्ते द्विगुणीभूते द्रव्ये त्वयाधिर्मोक्तव्य इति परिभाषया कारणान्तरेण वा भोगाभावेन तदा द्विगुणीभूतस्तत्क्षणादाधौ भोगार्थं धनिनि प्रविष्टे तदुत्पन्ने द्रव्ये द्विगुणे त्वयाधिर्मोक्तव्यः। अधिकोपभोगे तदपि देयम्। सर्व्वथा सद्वृद्धिकमूल्यार्पणकरणार्थंधुपभोगविषयमिदं वचनम्। तमेनं त्वयाधिमाचक्षते लौकिकाः यत्र तु वृद्धार्थं एवाधुपभोग इति परिभाषा तत्र द्वैगुण्यातिक्रमेऽपि यावन्मूल्यदानं तावदुपभुङ्क्ते एवाधिम् स्तेयेव गृहीतं दृष्टनाशिना

"——————आधौ धनमवाप्नुयात्।

फलभोग्यं पूर्णकालं दत्त्वा ग्रहणं सामकम्॥
यदि प्रकर्षितं तत् स्यात्तदा न धनभाग्धनी।
अन्यो च न लभेद्वन्धं परस्परमतं विना॥"

व्याख्यार्थः। फलं भोग्यं यस्यासौ फलभोग्यो वन्ध आधिः स च द्विविधः सद्वृद्धिकमूल्यापाकरणार्थो वृद्धिमात्रापाकरणार्थश्च तत्र च वृद्धिमूल्यापाकरणार्थं वन्धं पूर्वकालं पूर्णः कालो यस्यासौ पूर्णकालस्तमाप्नुयादाधौ। यदा सद्वृद्धिकं मूलं फलद्वारेण धनिनः प्रविष्टमतदा वन्धमवाप्नुयादित्यर्थः वृद्धिमात्रापाकरणार्थेन्तु वन्धं सामकं दत्त्वाप्नुयादाधौ। समं मूलं समयेव सामकम्। व्याख्यपवादमाह। यदि प्रकर्षितं तत् स्यात्तदन्धकं प्रकर्षितमतिग्रथितं वृद्धेरभ्यधिकपदं यदि स्यात्तदा न धनभाग्धनी। सामकं न लभेदन्धं मूल्यमदत्त्वैवर्णं वन्धमवाप्नुयादित्यावत्। अथाप्रकर्षितं तदन्धकं वृद्धयोपपर्याप्तन्तदा सामकं दत्त्वापि वन्धं लभेताधमर्णः वृद्धिशेषमदत्त्वैव लभेतेत्यर्थः। पुनरुभयत्रापवादमाह। परस्परमतं विना उत्तमर्णाधमर्ण्ययोः परस्परानुमत्यभावे यदि प्रकर्षितं इत्याद्युक्तम्। परस्परानुमतौ तूत्तरक्षणमपि वन्धकं यावन्मूल्यदानक्षणादुपभुङ्क्ते धनी विक्रयमपि मूलमाचदाने नैवाधमर्णो लभते। इति मिताक्षरा॥

वन्धकः, पुं, (वन्ध+स्वार्थे कन्।) विनिमयः। इति विश्वमेदिन्यौ॥ आधिः। इति शब्दरत्नावली॥ दृतविष्कः। इति नानार्थरत्नमाला। (यथातीति। वन्ध+ण्वुल्। वन्धनकर्त्तरि, त्रि। यथा, देवीभागवते। ५। १। ३६।

"न नारी न धनं गेहं न पुत्रा न सहोदराः।
वन्धनं प्राणिनां राजन्नपहारस्तु वन्धकः॥")

वन्धकी, स्त्री, (वन्धाति मानसमिति। वन्ध+कुए। गौरादित्वात् ङीष्।) पुंश्चली। इत्यमरः। २। ६। १०॥ (यथा, मार्कण्डेयपुराणे। ३४। ८८।

"न वन्धकीभिर्न्यूनैर्वन्धकीपतिभिस्तथा।")

वभ्रौ। इति मेदिनीहेमचन्द्रौ॥ मधुपरदगामिनी। (यथा, महाभारते। १।१२३।७४।

"नातश्चतुर्थं प्रवदमापत्स्वपि वदन्युत।
अतःपरं खेरिणी स्याद्वन्धकी पञ्चमे भवेत्॥")

वन्धनं, क्ली, (वन्ध+भावे ल्युट्।) वन्धनक्रिया। वाँधा इति भाषा। तत्पर्य्यायः। उद्दानम् २। इत्यमरः। २। ८। २५॥ कक्षनम् ३ वन्धः ४ संयमनम् ५। इति शब्दरत्नावली॥ (यथा हितोपदेशे। १। ६५।

"आपदामापतन्तीनां हितोऽप्यायाति हेतुताम्।
मातङ्गका हि वतुसस्य खन्भीभवति वन्धने॥")

वधः। इति मेदिनी। ने, ८०॥ शिक्षा। इति शब्दरत्नावली॥ रज्जुः। इति हेमचन्द्रः॥ वध्यतेऽनेनेति करणल्युट्पक्षे त्रि। (वध्यतेऽस्मिन्निति अधिकरणे ल्युट्। कारागारम्। वन्धनस्थानम्। यथा, भागवते। १२।१।

"वसुदेवस्य देवक्यां जातो भोजेन्द्रबन्धने ॥"
बन्ध+कर्मणि क्युः। महादेवस्य नामभेदे, पुं। यथा, महाभारते। १३। १७। १००।
"बन्धनो बन्धकर्त्ता च सुबन्धनविमोचनः ॥"
बन्धनकर्मणि, त्रि। यथा, तत्रैव। १३।१७।९१।
"बन्धनप्रातुरेणार्या बुधि शत्रुविनाशनः ॥")
बन्धनगेयः, पुं, (बन्धनाय बन्धनस्य वा गेयः।) कारागारम्। इत्यमरः। २। ८। ११६ ॥
बन्धनस्तम्भः, पुं, (बन्धाय स्तम्भः।) शृङ्खलबन्धनस्तम्भः। तत्पर्य्यायः। आलानम् २। इत्यमरः। २। ८। ४१ ॥ शृङ्खः ३ अयोड़ः ४। इति शब्दरत्नावली ॥
बन्धिवं, त्री, (बन्ध+इच।) कामदेवः। इत्युणादिकोषः ॥ धर्म्मार्थयाचनम्। इति संक्षिप्तसारोणादिवृत्तिः ॥
बन्धुः, पुं, (बन्ध बन्धने+"शृस्वृस्निहित्रपीति।" उणा० १।११। इति उः।) स्नेहेन मनो बध्नाति यः। तत्पर्य्यायः। सगोत्रः २ बान्धवः ३ ज्ञातिः ४ स्वः ५ स्वजनः ६। इत्यमरः। २। ६। ४४ ॥ दायादः ७ गोत्रः ८। इति शब्दरत्नावली ॥ बन्धवश्च त्रिविधाः। आत्मबन्धवः पितृबन्धवो मातृबन्धवश्च भवन्ति। यथोक्तम्।
"आत्मपितृष्वसुः पुत्रा आत्ममातृष्वसुः सुताः।
आत्ममातुलपुत्राश्च विज्ञेया आत्मबान्धवाः ॥
पितुः पितृष्वसुः पुत्राः पितुर्मातृष्वसुः सुताः।
पितुर्मातुलपुत्राश्च विज्ञेयाः पितृबान्धवाः ॥
मातुःपितृष्वसुः पुत्रा मातुर्मातृष्वसुः सुताः।
मातुर्मातुलपुत्राश्च विज्ञेया मातृबान्धवाः ॥"
तत्र पाण्डवकृष्णत्वात् प्रथममात्मबन्धवो धनभाग्यदभावे पितृबन्धवस्तदभावे मातृबन्धव इति क्रमो वेदितव्यः। बन्धूनामभावे आचार्य्यः। इति मिताक्षरा ॥ ॥ (यथा, मनुः। २।१३६।
"पिण्डं बन्धुर्यदः कर्म्म विद्या भवति पञ्चमी।
एतानि मानास्थानानि गरीयो यदुत्तरम् ॥"
"बन्धुः पितृव्यादिः।" इति तट्टीकायां कुल्लूकभट्टः ॥) बन्धूकः। (यथा, रघौ। २९।
"प्रभयर्थं बन्धुपुष्पमालयेति ॥")
मित्रम्। (यथा, मेघदूते। ३४।
"बन्धुप्रीत्या भवनशिखिभिर्दत्तनृत्योपहारः ॥")
भ्राता। इति मेदिनी ॥ (यथा, रघुः। १२।१२।
"प्रयागाधाः प्रणतयो मालवबन्धुनिवासिनम्।
मौलैरागायतामासुर्भरतं स्तम्भिताश्रुभिः ॥")
बन्धूकः, पुं, (बन्ध+ऊकः। यद्वा, बन्धुर्बन्धूकवृक्ष एव। बन्धु+स्वार्थे कन्।) बन्धूकवृक्षः। इति शब्दरत्नावली ॥
बन्धुजीवः। बन्धुरिव जीवयति रसादिनेति। बन्धु+जीव+अच्।) बन्धूकवृक्षः। इति शब्दरत्नावली ॥ (यथा, रघुः। ११। २५।
"वीक्ष्य वेदिमध रक्तबिन्दुभि-
र्बन्धुजीवकुसुमैः प्रदूषिताम् ॥")
बन्धुजीवकः, पुं, (बन्धुवत् जीवयति रसादिना इति। बन्धु+जीव+ण्वुल्। यद्वा, बन्धुजीव एव। स्वार्थे कन्।) बन्धूकवृक्षः। इत्यमरः। २। ४। ७३ ॥
बन्धुता, स्त्री, (बन्धोर्भावः बन्धूनां समूहो वा इति। "ब्राह्मणमाणवकबन्धुभ्यस्तल्।" ५।२।७३। इति तल्।) बन्धूनां समूहः। बन्धोर्भावः। इत्यमरः। २।६।३५॥ (यथा, ऋग्वेदे। ४। ४। ११।
"सखो न स्यामि वन्धुता वचोभिः ॥")
बन्धुदत्तम्, क्ली, (बन्धुना दत्तम्।) पितृमातृभ्यां दत्तं स्त्रीधनम्। यथा। याज्ञवल्क्यः।
"बन्धुदत्तं यथा सुल्कमन्वाधेयकमेव च।
अप्रणाशाप्रतीतायां दाम्पत्यात्प्रदापयेत् ॥"
बन्धुदत्तप्रदेशः कन्यादशायां यत् पितृभ्यां दत्तं तदुच्यते। इति दायभागः ॥
बन्धुरं, क्ली, (बन्ध बन्धने+"मन्धुरादयश्च।" उणा० १। ४२। इति उरप्रत्ययेन निपातनात् साधुः।) सुकृतम्। इति शब्दरत्नावली ॥ (रथबन्धनम्। यथा, महाभारते। ३। ३२। ३१।
"अन्ये कृतं वरूथञ्च बन्धुरञ्च तथापरे।
गन्धर्व्वा बहुसाहस्रास्तिलशो बधमन्वयुः ॥"
तथा च भागवते। ४। २६। १।
"दीक्षां द्विषट्कमेकादशं त्रिवेणुं पञ्चबन्धुरम् ॥")
बन्धुरः, पुं, (बन्ध+"मन्धुरादयश्च।" उणा० १।४२। इति उरः निपातनात् साधुः।) स्त्रीचिह्नम्। तिलकवृक्षम्। बन्धूकः। वधिरः। हंसः। इति मेदिनी। रे, १५६ ॥ विड़ङ्गः। इति हेमचन्द्रः ॥ ऋषभौषधम्। इति राजनिर्घण्टः ॥ बकः। विहङ्गः। इति शब्दरत्नावली ॥
बन्धुरः, त्रि, (बन्ध+उरः।) रम्यम्। (यथा, महाभारते प्रतिलोमे। १५।
"श्रेयः स्रोतः स दैयात्नाम विमलहृदो बन्धुरं सिन्धुराजः ॥")
नम्रम्। इति मेदिनी। रे, १५६ ॥ उन्नतानतम्। इत्यमरः ॥ (यथा, रघुः। १३। ४७।
"वक्षाति मे बन्धुरगात्रि! चक्षु-
र्दूरं: कक्षुज्ञानिव चित्रकूटः ॥")
बन्धुरा, स्त्री, (बन्धुर+टाप्।) परस्त्रीयोषा। इति मेदिनी। रे, १६० ॥
बन्धुराः, पुं, शत्रवः। इति मेदिनी। रे, १६० ॥ बहुवचनान्तोऽयम् ॥
बन्धुलः, पुं, (बन्धुं लातीति। बन्धु+ला+कः।) अशोकवृक्षः। इत्यमरः। २। ६। २६ ॥ (यथा, मृच्छकटिकनाटके चतुर्थे अङ्के।
"परदारललिताः परान्नपुष्टाः
परपुरुषैर्जनिताः पराङ्गनासु।
परधनिरता गुणेष्वबाधा
गजकलभा इव बन्धुला नमन्ति ॥")
बन्धूकः। इति शब्दरत्नावली ॥
बन्धुलः, त्रि, (बन्धूनां लाति क्षेपेण गृह्णातीति। बन्धु+ला+कः।) सुन्दरः। नम्रः। इत्यजयपालः ॥
बन्धूकः, पुं, (बध्नाति सौन्दर्य्येण चित्तमिति। बन्ध+"उकञ्कादयश्च।" उणा० ४। ४१। इति ऊकः।) पीतशालकः। इति मेदिनी। के, १२८॥ पुष्पवृक्षविशेषः। बाँदुली इति बङ्गभाषा। दोपहरिया इति हिन्दी भाषा। तत्पर्य्यायः। रक्तकः २ बन्धुजीवकः ३। इत्यमरः। २।४।७३॥ बन्धुकः ४ बन्धुः ५ बन्धूलः ६ बन्धुजीवकः ७ बन्धुजीवः ८ बन्धूलिः ९ बन्धुरः १०। इति शब्दरत्नावली ॥ रक्तः ११ माध्याह्निकः १२। इति भावप्रकाशः ॥ स्त्रीपुष्पः १३ अर्कबन्धुः १४ मध्यन्दिनः १५ रक्तपुष्पः १६ रागपुष्पः १७ हरिप्रियः १८। अस्य गुणाः।
"बन्धूकस्तिक्तशीतलीहितकृमिविषापहः।
स्वरहरो विबिधारिरक्तपित्तास्रनाशनः प्रसादनः सविषः स्यात् ॥"
इति राजनिर्घण्टः ॥
"बन्धूकः कफरक्तघ्नो वस्तिशिरुहरो लघुः ॥"
इति भावप्रकाशः ॥
स्वधूपे, क्ली। बन्धूक इति ख्यातम्। यथा,—
"बन्धूको बन्धुजीवे स्यात् स्वधूपे स्यान्नृपद्रुमे।
इति हेमचन्द्रः ॥
बन्धूकपुष्पः, पुं, (बन्धूकस्य बन्धुजीवस्य पुष्पमिव पुष्पं यस्य।) पीतशालः। इत्यमरः। २।४।४४॥ वीजकः। इति राजनिर्घण्टः ॥ (अस्य पर्य्यायो यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।
"वीजकः पीतसारश्च पीतशालक इत्यपि।
बन्धूकपुष्पः प्रियकः कर्कन्धूवासनः स्मृतः ॥")
बन्धूरः, पुं, (बन्ध बन्धने। बन्ध+"मन्धुरादयश्च" उणा० १। ४२। इत्यत्र खर्जूरादित्वादूरप्रत्ययेन सिद्धम् इत्युज्ज्वलदत्तः।) विवरम्। इत्युणादिकोषः ॥
बन्धूरः, त्रि, (बन्ध+खर्जूरादित्वादूरप्रत्ययः।) रम्यः। नम्रः। यथा, रभसे।
"बन्धूरजन्धुरौ रम्ये नम्रे घर्मे तु बन्धुरः ॥"
उन्नतानतम्। स्वभावात् यद्वक्रं उपाधिवशादीषन्नतं तत्। क्वचिद्वक्रं क्वचिदानतं स्यादिदम्। इति केचित्। इत्यमरटीकायां भरतः ॥
बन्धूलिः, पुं, (बन्ध बन्धने। बन्ध+ऊलि।) बन्धूकवृक्षः। इति शब्दरत्नावली ॥
बन्ध्यः, त्रि, (बन्ध+यक्।) ऋतुप्राप्तावधिफलरहितवृक्षादिः। (यथा, रघुः। १। ७०।
"सिक्तां सलिलमिव स्नेहाद्बन्ध्यमाश्रमपादपम् ॥")
तत्पर्य्यायः। अफलः २ अफलेषी ३। इत्यमरः। २। ४। ७ ॥ विफलः ४ निष्फलः ५। इति राजनिर्घण्टः ॥ बन्धनीयः। इति बन्धधातोः कर्म्मणि यप्रत्ययः ॥ (यथा, याज्ञवल्क्यः। २।२८६।
"व्यवस्यं यच्च याचति वहं यच्च प्रसुप्यति ॥"
पुं, निर्गलितवारिः सेतुः। यथा, मिताक्षरायाम्।
"सेतुश्च द्विविधो ज्ञेयः खेयो बन्ध्यस्तथैव च।
तोयप्रवर्त्तनात् खेयो बन्धः स्यान्निवर्त्तनात्।")

वन्या! स्त्री, (वन्ध+"अन्नादयश्च।" उणा० ४।१११। इति यक्।) अप्रजस्त्री। इति मेदिनी॥ बाँजा इति भाषा॥ (यथा, भागवते। ६। १४। १२।
"रूपौदार्य्यवयोजन्मविद्वैश्वर्य्यश्रियादिभिः।
संपन्नस्य गुणैः सर्व्वैश्चिन्ता वन्ध्यापतेरभूत॥"
वन्या स्त्री अष्टमे वर्षे अधिवेदनीया भवति यथाह मनुः। ९। ८१।
"वन्ध्याष्टमेऽधिवेद्याब्दे दशमे तु मृतप्रजा॥")
अपत्यमृत्यगौः। तत्पर्य्यायः। वशा २। इत्यमरः। २। ६। ६६॥ बालास्यगन्धत्रयम्। इति शब्दचन्द्रिका॥ वृषलीविशेषः। यथा,—
"वन्ध्या च वृषली ज्ञेया वृषली च मृतप्रजा।
अपरा वृषली ज्ञेया कुमारी या रजस्वला॥"
इति प्रायश्चित्तविवेके उशनसो वचनम्॥*॥
योनिरोगविशेषः। यथा,—
"उदावर्त्ता तथा वन्ध्या विप्लुता च परिप्लुता।
वातला योनिजो रोगो वातदोषेण षड्विधः॥"
तस्या लक्षणं यथा,—
"या फेनिलसुदावर्त्ता रजःकृच्छ्रेण मुञ्चति।
वन्ध्या निरार्त्तवा ज्ञेया विप्लुता नित्यवेदना॥
परिप्लुता या भवति ग्राम्यधर्म्मे रता भृशम्।
वातला कर्कशग्रास्तध्या शूलनिस्तोदपीड़िता॥"
तस्याश्चिकित्सा यथा,—
"बला सिता सातिबला मधूकं
वटस्य शुङ्गं गजकेशरश्च।
एतन्मधुक्षीरघृतैर्निपीय
वन्ध्या सुपुत्रं नियतं प्रसूते॥
अश्वगन्धाकषायेण सिद्धं दुग्धं घृतान्वितम्।
ऋतुस्नानाङ्गना प्रातः पीत्वा गर्भं दधाति हि॥
पुष्योडुनं लक्ष्मणाया मूलं दक्षेण कन्यया।
पिष्ट्वा पीत्वा ऋतुस्नाता गर्भं धत्ते न संशयः॥
कुरण्टमूलं धातक्याः कुसुमानि वटाङ्कुराः।
नीलोत्पलं पयोयुक्तमेवं गर्भप्रदं ध्रुवम्॥
या बला पिबति पार्श्वपिप्पलं
क्षीरकेण सहितं सिताम्बुना।
श्वेतया विशिखपुष्पया युतं
सा सुतं जनयतीह नान्यथा॥"
इति भावप्रकाशः॥
(चिकित्सान्तरमस्या यथा,—
"पिप्पल्याः पद्मबेरस्य मरिचं केशरस्तथा।
घृतेन सह पातव्यं वन्ध्यापि लभते सुतम्॥"
इति वैद्यकचक्रपाणिसंग्रहे योनिव्यापदधिकारे॥
"बला सातिबला यष्टिमधुकैरा मधुप्लुता।
वन्ध्यागर्भकरी पीता नाच कार्य्या विचारणा॥"
इति भैषज्यरत्नावल्यां स्त्रीरोगाधिकारे॥)
वन्ध्याकर्कोटकी, स्त्री, (वन्ध्यायाः कर्कोटकी। पुत्रदात्रीतया वन्ध्यायाः उपकारिणी स्त्रीत्वात्तथात्वम्।) तिक्तकर्कोटकी। वाँकरवल्ला इति वाँकरवेल इति वाँकरकरोल इति च हिन्दीभाषा। तत्पर्य्यायः। वन्ध्या २ देवी ३ नागारातिः ४ नागहन्त्री ५ मनोज्ञा ६ पथ्या ७ दिव्या ८ पुत्रदा ९ सकन्दा १० श्रीकन्दा ११ कन्दवल्ली १२ ईश्वरी १३ सुगन्धा १४ सर्पदमनी १५ विषकण्टकिनी १६ परा १७ कुमारी १८ भूतघ्नी १९। अस्या गुणाः। तिक्तत्वम्। कटुत्वम्। उष्णत्वम्। कफापहत्वम्। स्थावरादिविषघ्नत्वम्। रसायनत्वञ्च। इति राजनिर्घण्टः॥ तत्पर्य्यायगुणाः।
"वन्ध्याकर्कोटकी देवी कन्या योगेश्वरीति च।
नागारिर्भक्तदमनी विषकण्टकिनी तथा॥
वन्ध्याकर्कोटकी लक्ष्मी कफघ्नदुग्धगोधिनी।
सर्पदर्पहरी तीक्ष्णा विसर्पविषहारिणी॥"
इति भावप्रकाशः॥
व(व)भ्र, गतौ। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) व(व)कारादिः। ओष्ठ्यवर्गचतुर्थोपधः। व(व)भ्रति। इति दुर्गादासः॥
वभ्रवी, स्त्री. (वभ्रोः शिवस्येयं पत्नी। वभ्रु+अण्+ङीप्। न वृद्धिः।) दुर्गा। इति भूरिप्रयोगः॥
वभ्रिः, पुं, (वभ्र+इन्।) वज्रम्। इति केचित्॥ (भरणकर्त्तरि धारके च त्रि। यथा, ऋग्वेदे। ६। २३। ४।
"गन्तेयान्ति सवना हरिभ्यां
वभ्रिर्वज्रं पपिः सोमं हरिभ्यां॥")
वभ्रुः, पुं, (बिभर्त्ति भरति वा। भृ+"कुभ्रुश्च।" उणा० १। २३। इति कुदिलत्वञ्च।) अग्निः। शिवः। (यथा, महाभारते १३। महादेवस्य सहस्रनामकथने। १७। १४८।
"भ्रूभृद्भ्रूभृत्प्रियो वभ्रू राजराजो निरामयः॥")
विष्णुः। (यथा, महाभारते १३। विष्णोः सहस्रनामकथने। १४९। २६।
"रुद्रो बहुशिरा बभ्रुर्विश्वयोनिः शुचिश्रवाः॥")
विप्रालः। नकुलः। इति मेदिनी॥ (यथा, मार्कण्डेये। १५। ६।
"सञ्जायते महावक्त्रो मूषिको वभ्रुसन्निभः॥")
सन्निविशेषः। इति हेमचन्द्रः॥ देशभेदः। इति शब्दरत्नावली॥ सितावरप्राकः। इति राजनिर्घण्टः॥ खलतिः। इति हेमचन्द्रः। ३।११७॥ (कपिलो वर्णः। इति मेधातिथिः॥ तद्गुणयुक्ते तु वाच्यलिङ्गः। यथा, मनुः। ४। १३०।
"नाक्रामेत्कामतश्छायां वभ्रुणो दीक्षितस्य च॥"
सोमपादसुतः। यथा, भागवते। ६।२४।१।
"सोमपादसुतो वभ्रुर्वभ्रोः क्रतिरजायत।"
देवावृधसुतः। यथा, तत्रैव। ९। २४। ६।
"वभ्रुर्देवावृधसुतस्तयोः श्लोकौ पठन्त्यमू॥"
ययातिपुत्रस्य द्रुह्योः सुतः। यथा, तत्रैव। ९। २३। १४।
"द्रुह्योश्च तनयो बभ्रुः सेतुस्तस्यात्मजस्ततः॥"
मद्यगन्धर्व्वपतिषु अन्यतरः। यथा, रामायणे। ४। ४१। ४२।
"तत्र गन्धर्व्वपतयः पञ्च सूर्य्यसमप्रभाः।
शैलूषो नामगीः शिखः शुको बभ्रुश्चैव च॥"
विश्वामित्रपुत्रभेदः। यथा, महाभारते। १३। ४। ५०।
"अर्चीमांश्च शुक्लन्तश्च बभ्रुः कालपथस्तथा॥"
विश्वगर्भस्य पुत्रः। स तु यादवानामन्यतमः। यथा, हरिवंशे। ६४। ४८।
"वसुर्बभ्रुः सुषेणश्च सभाक्षश्चैव वीर्य्यवान्।
यदुप्रवीरा विख्याता लोकपाला इवापरे॥"
यथा च माघे। २। ४०।
"आलक्ष्यालम्बिदं वक्षोर्यत्स दारानपाहरत्॥"
स च विनष्टप्राये यादवकुले पथि गच्छन् दस्युभिर्हतः। तत्कथा च महाभारते। १६। मौषलपर्व्वणि द्रष्टव्या॥ स्त्री, कपिला गौः। सा च निघ्नि अज्ञानता दृषघ्नेण खड्गेन हता। यथा, भागवते। ६।२। ६।
"खड्गमादाय तरसा प्रलीनोडुगमे निघ्नि।
अजानन्नहनद्गोः शिरः शार्द्दूलविक्रया॥")
वभ्रुः, त्रि, (बिभर्त्तीति। भृ+"कुभ्रुश्च।" उणा० १। २३। इति कुदिलत्वञ्च।) पिङ्गलः। इत्यमरः॥ (यथा, कुमारे। ५। ८।
"ववन्द वाणारुणबभ्रुवल्कलं
पयोधरोन्नेधविभूर्णसंहतिः॥"
यथा च रघुः। १५। १६।
"धूमधूम्रो वसागन्धी ज्वालाबभ्रुशिरोरुहः॥")
वभ्रुधातुः, पुं, (बभ्रुः पिङ्गलो धातुः।) सुवर्णगैरिकम्। इति राजनिर्घण्टः॥
वभ्रुवाहनः, पुं, मणिपुरस्य राजविशेषः। स च चित्राङ्गदायां अर्জ্জুनाज्जातः। यथा,—
"करेणुमत्यां नकुलो निरमित्रं तथार्জ্জुनः।
इरावत्यसृजत्पुत्रौ ये सुतायां बभ्रुवाहनम्॥
मणिपुरपतेः सोऽपि तत्पुत्रः पुत्रिकासुतः॥"
इति श्रीभागवते। ९। २२। ३२॥
अपि च।
वैशम्पायन उवाच।
"श्रुत्वा तु नृपतिः प्राप्तं पितरं बभ्रुवाहनः।
निर्ययौ विनयेनाथ ब्राह्मणार्घपुरःसरः॥
मणिपुरेश्वरस्त्वेवमुपायातं धनञ्जयः।
नाभ्यनन्दत् स मेधावी क्षात्रधर्म्ममनुस्मरन्॥"
"भर्त्तारं निहतं दृष्ट्वा पुत्रेण पतितं भुवि।
चित्राङ्गदा परिक्लान्ता प्रविवेश रथाजिरे॥"
इति महाभारते। १४। ७६ अध्यायः॥
(अस्यार्জ্জुनादिना युद्धादिकं सर्व्वत्र विस्तरशो द्रष्टव्यम्॥)
वभ्रु, गतौ। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) वभ्रति। इति दुर्गादासः॥
वर्ब्ब, गतौ। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) वर्ब्बति। इति दुर्गादासः॥
वर्ब्बटः, पुं, (वर्ब्ब+अटन्।) राजमाषः। इति चिकित्साशास्त्रे॥ वर्ब्बटी इति ख्यातः॥ (विशेषरूपा राजमाषशब्दे ज्ञेया॥)
वर्ब्बटी, स्त्री. (वर्ब्बट+गौरादित्वात् ङीष्।) मण्डयोषा। वीरुद्भेदः। इति मेदिनी। टे, ५१॥
वर्ह, क छृतौ। हिंसायाम्। दाने। याचि। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०

मध्यकायसुवेशश्च वेदपाठी चविष्टरः ।
परिव्राड्डी हुताग्नेश्च सपत्नो व्रजेदृषेत् ॥
यज्ञार्थं याचनां कस्य करोमि कथयां मम ।
तं दृष्ट्वा सूर्यतेजोभमुक्तो विप्रेर्व्रजन् स च ॥
वसर्क्षे यज्ञनिष्पत्तिं करोति द्विजसत्तम ! ।
हेमकूटे महाशैले तिष्ठते दानवोत्तमः ॥
सर्व्वज्ञोऽपि महामायी वञ्चनाय तदा गतः ।
मोक्षिणीं जपमानस्तु विद्यां परमसिद्धिदाम् ॥
विचित्रं दनुराजस्य पुरं सर्व्वपुरोत्तमम् ।
प्राविशद्देवं वेदात्मा पटमानो जनार्द्दनः ॥
दानवस्तु पुरं रम्यं नानाविं त्वं ग्रहोत्तम ! ।
द्वारं गतोऽसुरेन्द्रस्य द्वार्य्यां प्राथ्यवनं तदा ॥
द्वारपालो वदत्येवं श्रुत्वा वेदध्वनिं शुभम् ।
पुराणि रत्नानि शुभं ददामि याचतां वर ! ॥
इष्टं दानं द्विजश्रेष्ठ ! दुर्लभञ्च महामते ! ।
तेनोक्तं दर्शनं ह्यस्य दीयतां दनुसत्तमे ॥
तदा स पूर्व्वमादिष्टः प्रेषयामास तं नृपम् ।
वलिनं वलसम्पन्नं दानवं सुरमर्द्दनम् ॥
दानोद्यतकरो भद्रं दृष्ट्वा प्रीत्यावभाषत ।
किमायातो भवांश्चात्र कार्य्यं विप्र ! तदुद्दिश ॥
मोक्षिणीं जपमानस्तु वदते द्विजकेशवः ॥
ब्रह्मोवाच ।
अहं संप्रेषयामास वह्नि मां कश्यपात्मजम् ।
यज्ञाः सेन्द्रैः समारब्धा ऋषिभिश्चासुराधिप ! ॥
तस्य निष्पत्तये नाथ ! आगतोऽहं तवान्तिकम् ।
दानं मे दीयतां राजन् ! सिध्यते येन तत्क्रतुः ॥
वल उवाच ।
येन संसिध्यते यज्ञो देवारब्धो द्विजोत्तम ! ।
तथा चार्थं धनं दारान् शिरसश्च ददामि ते ॥
ब्रह्मोवाच ।
येन संसिध्यते यज्ञो देवानामसुराधिप ! ।
तदेवं तच्च मादिष्टं वलमत्रावयोरपि ॥
वल उवाच ।
याचतां येन ते कार्य्यं सर्व्वं विप्र ! ददामि ते ।
संस्मृत्य मोक्षिणीं विद्यां वदते द्विजसत्तमः ॥
ब्राह्मण उवाच ।
न मे धनैः सदारैर्वा न भूम्या गजवाजिभिः ।
रन्तेः कार्य्यं महाबाहो ! दैत्यश्रेष्ठासुराधिप ! ॥
येन निष्पाद्यते यज्ञः सुरदेवस्य दिवौकसाम् ।
तमहं याचयिष्यामि दीयतां तद्वचनं तव ॥
एतत् कार्य्यं मम भद्रं ऋषीणाञ्च विशेषतः ।
देवार्थं तव कार्येण सिध्यते तत्क्रतोत्तमः ॥
तदा दत्ता तदुक्तेन दानवेन महात्मना ।
विष्णुनापि स्वचक्रेण शिरस्यभिहतोऽसुरः ॥
प्राप्तवं देहसुतस्यैव दिव्यकायस्वरूपधृक् ।
तस्यावयवसंजाता वज्राद्या रत्नजातयः ॥
क्षीणे सुरतेनांसि प्रहारामासि चाभवन् ।
विष्णुप्रसादतेनैव कायो रत्नाकरोऽभवत् ।"
इति देवीपुराणे ६० अध्यायः ॥

व(व)लम्, पुं, धवलः । इत्यमरः ।१।५।१३॥ वलते: क्विप् वलं व्यक्तमस्मिन् षष् वलच इति कथ संयोगवान् । इति रायमुकुटः ॥ व्यवलक्षते इति वलक्षः षष् अकारलोपः । इति खान्यादयः ॥ एतन्मते अन्तःस्थवकारादिः ॥ (यथा, माघे । ६ । ३४ ।
"स्थिरदन्तवलक्षमलक्षत
स्फुरितभ्रूभ्रुगच्छविकेतकम् ॥")
वलजं, क्ली, (वलात् जायते इति । वल + जन + ड ।) चेत्रम् । पुरद्वारम् । इत्यमरः ।३।३।११॥ शस्यम् । (धान्यराशिः । इति वैजयन्ती ॥ यथा, माघे । १४ । ७ ।
"त्वं समीरण इव प्रतीक्षितः
कर्षकेण वलजानुपूषता ॥")
वृहम् । इति मेदिनी ॥ वलजन्ये, त्रि ॥
वलजा, स्त्री, (वलात् वलक्षतसाक्षसवृहादिकात् जायते या । वल + जन + ड + टाप् ।) वरयोषा । यूथी । इति मेदिनी । ते, २६ ॥
वलनी, स्त्री, प्रासादोपरिमञ्चलिका । इति पुराणम् ॥
वलदः, पुं, (वलं ददातीति । वल + दा + कः ।) जीवकः । इति राजनिर्घण्टः । मौष्टिककर्म्माङ्गहोमाग्निः । यथा । मौष्टिके वलदः क्षतः । इति तिथ्यादितत्त्वम् ॥ (वृषभः । यथा, कथासरित्सागरे । ३७ । १५३ ।
"कन्येदुः प्रत्ययक्रीडायाताश्च मम सन्निधम् ।
गले वध्वादहं दाम्नस्तृणवं वलदोऽभवम् ॥")
वलदातरि, त्रि ॥ (यथा, ऋग्वेदे ।१।५३। १८ ।
"वलं तोकाय तनयाय जीवसे त्वं हि वलदा असि ॥")
वलदा, स्त्री, (वलद + टाप् ।) अश्वगन्धा । इति राजनिर्घण्टः ॥ (अस्याः पर्य्यायो यथा,—
"गन्धाक्ता वाजिनामादिरश्वगन्धा हयाह्वया ।
वराहकर्णी वरदा वलदा कुष्ठगन्धिनी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
वलदीनता, स्त्री, (वलस्य दीनता ।) म्लानिः । इति हेमचन्द्रः ॥
वलदेवः, पुं, (वलेन दीयतीति । दिव + अच् ।) वलरामः । तत्पर्य्यायः । वलभद्रः २ प्रलम्बघ्नः ३ अच्युताग्रजः ४ रेवतीरमणः ५ रामः ६ कामपालः ७ हलायुधः ८ नीलाम्बरः ९ रौहिणेयः १० तालाङ्कः ११ सुघनी १२ हली १३ सङ्कर्षणः १४ सीरपाणिः १५ कालिन्दीभेदनः १६ वलः १७ । इत्यमरः । १ । १ । २४ ॥ गलिदर्पः १८ मधुप्रियः १९ हलधरः २० हलभृत् २१ हालभृत् २२ सौनन्दी २३ गुप्तधरः २४ संवर्षकः २५ वली २६ । इति शब्दरत्नावली । (यथा भागवते । ६ । ३ । ६६ ।
"तद्गच्छ देवदेवांशो वलदेवो महावलः ॥")
अस्य ध्यानम् ।
"वलदेवं द्विबाहुञ्च शङ्खकुन्देन्दुसन्निभम् ।
वामे हलायुधधरं सुवलं दक्षिणे करे ॥
शालालोलं नीलवस्त्रं हेलावन्तं स्मरेत् परम् ।"
इति कालिकापुराणम् ॥
(अयं हि शेषवर्षस्यांशावतारः । यथा, महाभारते । १ । ६७ । १५१ ।
"शेषस्यांशश्च नागस्य वलदेवो महावलः ॥")
नाम्नामस्य कारणानि वसुमद्भग्रन्थे भणितानि ॥
वायुः । इति मेदिनी । वे, ६२ ॥
वलदेवा, स्त्री, वायमाणौषधिः । इति मेदिनी । वे, ६२ ॥ (गुणादयोऽस्याश्चवमाणशब्दे ज्ञातव्याः ॥)
वलप्रसः, स्त्री. (प्रसते इति प्रस + ल्युट् । वलस्य वलदेवस्य प्रसः ।) रोहिणी । वलरामस्माता । इति शब्दरत्नावली ॥
वलभद्रः, पुं. (वलं भद्रं श्रेष्ठमस्य । यद्वा, वलमस्यास्तीति वलः । अर्श आद्यच् । वली वलवानपि भद्रः सौम्यः ।) वलदेवः । इत्यमरः ।१।१।२४॥ अनन्तः । वलशाली । इति हेमचन्द्रः ।२।११६॥ लोधः । इति शब्दचन्द्रिका ॥ भवयः । इति राजनिर्घण्टः ॥ वलदेवस्य नाम्नां कारणानि यथा,—
"हतं निरूपितं नाम्नां कलिङ्गस्य यथाश्रुतम् ।
श्लेषस्य फलिनो नाम्नः सङ्कर्षणं शृणु सम्प्रति ॥
गर्भसङ्कर्षणादेव नाम्ना सङ्कर्षणः स्मृतः ।
नाम्नश्चोऽस्यैव वेदेषु तेनामस्य इति स्मृतः ॥
वलदेवो वलोद्रेकाद्वली च वलधारणात् ।
क्षितिवासी नीलवासात् सुवली सुवलाद्भुतात् ।
रेवतीवक्त्रसम्भोगाभिवतीरमणः स्वयम् ॥
रौहिणीगर्भसम्भूतो रौहिणेयो महामतिः ।
एतैर्वं श्लेषपुरुषस्य श्रुतं नाम निवेदितम् ॥"
इति ब्रह्मवैवर्ते श्रीकृष्णजन्मखण्डे १३ अध्यायः ॥
विष्णुपूजनोक्ताष्टदलपद्मस्थयोगिविशेषः । यथा,
"सर्व्वत्र मण्डलं कार्य्यं वासुदेवस्य पूजने ।
एवमेव नृपश्रेष्ठ ! निष्कलं शान्तमेवहत् ॥
वलभद्रश्च कामश्च अनिरुद्धस्तृतीयकः ।
नारायणस्तथा ब्रह्मा विष्णुः षष्ठः प्रकीर्त्तितः ॥
नरसिंहो वराहश्च योगिनीश्चैव पञ्चमीः ।
पूर्व्वादिषट्दलेष्वेतान् वर्णसो मन्त्रतः क्रमात् ॥
पूजयेत् कर्णिकामध्ये वासुदेवन्तु नायकम् ।
विमला नायिका तस्य वासुदेवस्य कीर्त्तिता ।
वलभद्रस्तु कामान्तु योगिनः प्रथमे यजेत् ॥
आदायुक्तर्क्षिणी लोया आगा वलात् क्षिवा परा ।
योगा प्रज्ञा तथेशानी वनमाली तथा खगी ॥
सर्व्वास्तु भूषणाः प्रोक्ताः पुष्पचक्रधराः ।
योगिन्यो वलभद्रस्तु कामं विधिवते क्रमात् ॥
विधे स्वयन्तु पूर्व्वोक्तं दलस्य पूजनक्रमात् ।
पूजयेत्क्रम धर्त्ते च गदां मार्त्तण्डितालयां ॥"
इति कालिकापुराणे ८२ अध्यायः ॥
(पर्व्वतविशेषः । यथा, भागवते । ५ । २० । २६ ।
"एतेषां वर्षमर्य्यादा गिरयो नद्यश्च सप्त सप्त ह्येषाम् ।
ईशान उरुद्रप्तो वलभद्रः पुरुकेशरः शतमन्यौतो देवपालो महानग इति ।")

वलभद्रा, स्त्री, कुमारी। त्रायमाणा। इति मेदिनी। दे, २८४॥ (अस्याः पर्य्यायो यथा,—
"वलभद्रा त्रायमाणा त्रायन्ती गिरिसानुजा॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

वलभद्रिका, स्त्री, (वलभद्रैव। वलभद्रा + स्वार्थे कन्। कापि अत इत्वम्।) त्रायमाणा। इत्यमरः। २। ४। १५०॥

वलराम:, पुं, (रम + भावे घञ्। वलेन रामो रमणं यस्य।) वलदेवः। यथा,—
"वलरामानुजः श्रीमान् गजेन्द्रस्तुतपादकः॥"
इति नारदपञ्चरात्रे चतुर्थरात्रीये ८ अध्यायः॥
अस्य ध्यानम्।
"अन्तरे दिव्य उद्याने हरिचन्दनसंज्ञके।
तत्राधस्तात् स्वर्णपीठे विचित्रे मणिमण्डपे॥
तन्मध्ये मणिमाणिक्यदिव्यसिंहासनोज्ज्वले।
तत्रोपरि च रेवत्या सङ्घर्षणहलायुधम्॥
ईश्वरस्याभयानन्तमभिन्नगुणरूपिणम्।
सुस्फटिकसंकाशं रक्ताम्बुजदलेक्षणम्॥
नीलपेलपरं स्निग्धं दिव्यगन्धानुलेपनम्।
कृष्णलाश्लिष्टसङ्गस्थं दिव्यस्रग्वारसेवनम्॥
मधुपाने सदासक्तं मदाघूर्णितलोचनम्।
सुवलं दक्षिणे पार्श्वे वलरामं सदा स्मरेत्॥"
इति कालिकापुराणम्॥

वलल:, पुं, (वलं लातीति। वल + ला + क।) वलरामः। इत्यमरटीकायां भरतः॥

वलवत्, त्र, (वलमस्यास्तीति। वल + मतुप्। मस्य वः।) व्यतिशयम्। इत्यमरः। ३। ४। १॥ (यथा, शाकुन्तले प्रस्तावनायां सूत्रधारस्योक्तिः।
"वलवदपि शिक्षितानामात्मन्यप्रत्ययं चेतः॥")

वलवान् [त्], त्रि, (वलमस्यास्तीति। वल + मतुप्। मस्य वः।) वलविशिष्टः। तत्पर्य्यायः। मांसलः २ अंशुलः ३। इत्यमरः। २। ६। ४४॥ वीर्य्यवान् ४ वली ५। इति शब्दरत्नावली॥ (यथा, मनुः १। ७६।
"आकाशाद्यु विशुद्धाभ्यात् सर्व्वगन्धवहः शुचिः।
वलवान् जायते वायुः स वै स्पर्शगुणो मतः॥")

वलवर्द्धिनी, स्त्री (वलं वर्द्धयतीति। वल + वृध + णिनिः। ङीप्।) जीवकौषधिः। इति शटाधरः॥

वलविन्यास:, पुं, (वलानां सैन्यानां विशेषेण न्यासः स्थापनम्।) युद्धार्थं सैन्यस्य देशविशेषे विभज्य दुर्गस्थलनिमित्तं स्थापनम्। तत्पर्य्यायः। व्यूहः २। इत्यमरः। २। ८। ७६॥ (वलविन्यासस्तु मकरपद्मादिभेदात् वहवः। तत्र संक्षेपतो मनुना युद्धयात्रार्थं कैश्चिन्निर्दिष्टः। यथा, मात्स्ये। ७। १८७—१८९।
"दण्डव्यूहेन तन्मार्गं यायात्तु शकटेन वा।
वराहमकराभ्यां वा सूच्या वा गरुडेन वा॥
यतश्च भयमाशङ्केत् ततो विस्तारयेद्वलम्।
पद्मेन चैव व्यूहेन निविशेत सदा स्वयम्॥
सेनापतिवलाध्यक्षौ सर्व्वदिक्षु निवेशयेत्।
यतश्च भयमाशङ्केत् प्राचीं तां कल्पयेद्दिशम्॥
शुक्रोशनस स्यापि देशान् कृतसंज्ञान् समन्ततः।
स्थाने युद्धे च कुशलानभीरूनविकारिणः॥
संदृतान् योधयेदल्पान् कामं विस्तारयेद्बहून्।
सूच्या वज्रेण चैवैतान् व्यूहेन व्यूह्य योधयेत्॥")

वलसूदन:, पुं, (वलं तन्नाम्ना प्रसिद्धं असुरं सूदयतीति। वल + सूद + ल्यु।) इन्द्रः। इति हलायुधः॥ (यथा, देवीभागवते ५। ३। १३।
"नोचेद्वधं ग्रहाणास्य युद्धाय वलसूदन!॥"
विष्णुः। इति देवीपुराणे ४७ अध्यायः॥)

वलस्थिति:, स्त्री, (वलानां स्थितिरवस्थानं यत्र। अभिधानात् स्त्रीत्वम्।) शिविरम्। इति त्रिकाण्डशेषः॥

वलहा, [न्], पुं, (वलं सामर्थ्यं हन्तीति। वल + हन् + क्विप्।) श्लेष्मा। इति शब्दरत्नावली॥ (वलं तन्नामानमसुरं हन्तीति। इन्द्रः॥ परवलविनाशके, त्रि। यथा, हरिवंशे। ११०। ४२।
"तत्राहं युध्यमानस्तु भ्रातास्य वलहा वली।
स्थितो ममाग्रतः शूरो गदापाणिर्हलायुधः॥")

व(व)ला, स्त्री, (कार्य्यकारित्वेन वलमस्त्यस्याः। वल + अर्श आद्यच् ततष्टाप्।) क्षुपविशेषः। वाला इति वाङ्गियाला इति भाषा। तत्पर्य्यायः। वाट्यालक: २। इत्यमरः। २। ४। १०७॥ समङ्गा ३ ओदनिका ४ भद्रा ५ भद्रौदनी ६ खरकान्तिका ७ कल्याणिनी ८ भद्रवला ९ मोटा १० पाटी ११ वलाढ्या १२। इति राजनिर्घण्टः॥ शीतपाकी १३ वाट्या १४ वाटी १५ विनया १६ वाट्याली १७ वाटिका १८। इति शब्दरत्नावली॥ अपि च।
"वाट्यालको वाट्यपुष्पी समांसा विवला वला।
श्वेतवाङ्गियाला इति भाषा॥
ऋष्यप्रोक्ता त्वतिवला पीतपुष्पी महावला।
पीतवाङ्गियाला।" इति रत्नमाला॥ अस्या गुणाः। त्वतितिक्तत्वम्। मधुरत्वम्। पित्तातिसारगाग्निमत्वम्। वलवीर्य्यप्रदत्वम्। पुष्टिकफरोगविशोधनत्व। इति राजनिर्घण्टः॥ अथ वलाचतुष्टयनामादि।
"वला वाट्यालिका वाट्या सैव वाट्यालकोऽपि च।
महावला पीतपुष्पा सहदेवी च सा स्मृता॥
ततोऽन्यातिवला ऋष्यप्रोक्ता कङ्कतिकासह।
माङ्गेरकी नागवला भाषा ज्ञेया गवेधुका॥
वलाचतुष्टयगुणाः।
वलाचतुष्टयं शीतं मधुरं वलकान्तिकृत्।
स्निग्धं वाहि समीरास्रपित्तासचतनाशनम्॥
वलामूलत्वचूर्णं शीतं सशर्करक्रम्।
सद्यातिसारं हरति दुष्टमेतन्न संशयः॥"
इति भावप्रकाशः॥
"स्निग्धापुष्पा वला तृष्या ग्राहिणी वातपित्तजित्॥"
इति राजनिर्घण्टः॥
(विद्याविशेषः। सा च ब्रह्मणः सुता। विश्वामित्रेण रामाय प्रदत्ता। अस्याः प्रभावात् क्षुधातृष्णा क्लेशनिवृत्तिर्न भवेत्। यथा, रामायणे। १। २२। ११—२२।
"अथाब्रवीन्महातेजा गत्वा सरयू दक्षिणे तटे।
रामेति मधुरां वाणीं विश्वामित्रोऽभ्यभाषत॥
गृहाण वत्स! सलिलं मा भूत् कालविपर्य्ययः।
मन्त्रग्रामं गृहाण त्वं वलामतिवलां तथा॥
न श्रमो न ज्वरो वा ते न रूपस्य विपर्य्ययः।
न च सुप्तं प्रमत्तं वा धर्षयिष्यन्ति नैर्ऋताः॥
न बाहोः सदृशो वीर्य्ये पृथिव्यामस्ति कश्चन।
त्रिषु लोकेषु वा राम! न भवेत् सदृशस्तव॥
वलामतिवलाञ्चैव पठतस्तात राघव!॥
न सौभाग्ये न दाक्षिण्ये न ज्ञाने बुद्धिनिश्चये।
नोत्तरे प्रतिवक्तव्ये समो लोके तवानघ!॥
एतद्विद्याद्वये लब्धे न भवेत् सदृशस्तव।
वला चातिवला चैव सर्व्वज्ञानस्य मातरौ॥
क्षुत्पिपासे न ते राम! भविष्येते नरोत्तम!॥
वलामतिवलाञ्चैव पठतस्तात राघव!॥
विद्याद्वयमधीयाने यशश्चाथ भवेदुवि॥
पितामहसुते ह्येते विद्ये तेजःसमन्विते।
प्रदातुं तव काकुत्स्थ। सदृशत्वं हि पार्थिव!॥
कामं बहुगुणाः सर्व्वे त्वयीते नात्र संशयः।
तपसा सम्भृते चैते बहुरूपे भविष्यतः॥
ततो रामो जलं स्पृष्ट्वा प्रहृष्टवदनः शुचिः।
प्रतिजग्राह ते विद्ये महर्षेर्भावितात्मनः॥
विद्यासमुदितो रामः शुशुभे भीमविक्रमः।
सहस्ररश्मिर्भगवान् शारदीव दिवाकरः॥")

व(व)लाकः, पुं, (वलेन वकतीति। वल + वक + घञ्वाद्यच्।) वकजातिः। इति भरतः॥ (पुरुषोत्तः। स च पीतगङ्गस्य जङ्घोः पौत्रः। यथा, भागवते। ९। १५। ३।
"जङ्घोस्तु पूरुजस्तस्य पुत्रो वलाकसंज्ञकोऽजकः॥")
वत्सग्रीपुत्रभेदः। यथा, मार्कण्डेये। ११८। २।
"तस्य तस्यां सुगन्धायां पुत्रा ह्यासन् शतत्रयम्।
प्रांशुः प्रधीरः शूरश्च सुवक्त्रो विक्रमः क्रमः॥
वत्सो वलाकचरुश्च प्रवक्ष्यश्च सुविक्रमः॥"
जातूकर्ण्यस्य मुनेः शिष्यविशेषः। यथा, श्रीभागवते। १२। ६। ५८।
"जातूकर्ण्येश्च तच्छिष्यः सनिरुक्तां स्वसंहिताम्
वलाकपैलजाबालविरजेभ्यो ददौ मुनिः॥"
राजभेदः। यथा, मार्कण्डेये। ६६। ६७।
"तां जघाराद्रितनयो वलाको नाम राजपः॥"
स्वनामख्यातो व्याधविशेषः। यथा, महाभारते। ८। ६६। ४०।
"दृगथाधोऽभवत् कश्चित् वलाको नामभारत॥")

व(व)लाका, स्त्री, (वलते इति। वल संवरणे + वलाकादयश्च।" उणा० ४। १४। इति वक। यद्वा, वलेन वकतीति। वल + वक कुटिलगतौ + पचाद्यच्।) वकजातिविशेषः। (यथा, मनुः। ५। १४।
"वकञ्चैव वलाकाञ्च काकोलं खञ्जरीटकम्॥")
तत्पर्य्यायः। विषकण्ठिका २। इत्यमरः। २। ५। २५॥ विषकण्ठी ३ वलाकी ४। इति शब्दरत्नावली॥ कारायिका ५ सिङ्घालिका ६। इति शटाधरः॥ विषकण्ठी ७ मुक्ताङ्गा ८

दीर्घकन्धरा ९ धर्म्मान्ता १० कासुकी ११ श्येना १२ मेघानन्दा १३ चलाश्रया १४। वलेन भक्षणा दूरन्तर्हमकति। वल वल्ल संवरणे वलाकादयश्चैत्याकनू वलाका। इति रायमुकुटकृतव्युत्पत्तिद्वयेन पवर्गीयवकारादिरन्तयवकारादिश्चायं शब्दः॥*॥ अस्या मांसगुणाः। वायुनाशित्वम्। स्निग्धत्वम्। हृष्यमलत्वम्। वृष्यत्वम्। कफपित्तहरत्वम्। हिमत्वञ्च। इति राजवल्लभः॥ सारस-हंसवलाकाचक्रक्रौञ्चादयो जले प्लवनात् प्लवसंज्ञाः कथितास्ते तन्मांसं गुरुञ्चाप्य वलदायि। अपि च।

"अन्ये वकवलाकाद्या गुरवः प्राणिभक्षणात्।"

इति राजनिर्घण्टः॥

अन्यच्च।

"हंससारसचकाचाच्चवकक्रौञ्चवरारिकाः।
नन्दीमुखी सकादम्बा वलाकाद्याः प्लवाः स्मृताः।
प्लवन्ते सलिले यस्मादेते तस्मात् प्लवाः स्मृताः॥
प्लवाः पित्तहराः स्निग्धा मधुरा गुरवो हिमाः।
वातश्लेष्मप्रदाश्चापि वलशुक्रकराः सराः॥"

इति भावप्रकाशः॥

(कासुकी। इति भाग्वतः॥)

वलाधिता, स्त्री, (वलेन अधिता।) रामवीणा। इति शब्दरत्नावली॥

वलाट:, पुं, (वलेन अश्यते प्राप्यते इति। अट्+वल्।) सुहृः। इति हेमचन्द्रः॥

वलात्, अ, (वलमतीति। वल+अत्+क्विप्।) हठात्। वलादिति निपातो हठार्थे इति स्वामी। इत्यमरटीकायां भरतः॥ यथा,—

"वलात् संदूषयेद्यस्तु परभार्य्यां नरः क्वचित्।
वधदण्डो भवेत्तस्य नापराधो भवेत् स्त्रियाः॥"

इति मात्स्ये २०१ अध्यायः॥

वलात्कारः, पुं, (वलात्करणम्। वलात्+कृ+भावे घञ्।) हठात्करणम्। तत्पर्य्यायः। प्रसभम् २ हठः ३। इत्यमरः। २। ८।१०८॥ हठात्कारः ४ प्रसभः ५। इति शब्दरत्नावली॥

"मत्ताभियुक्तस्त्रीबालवलात्कारकृतञ्च यत्।
तदप्रमाणं लिखितं भयोपधिकृतन्तथा॥"

इति व्यवहारे मिताक्षरोधृतनारदवचनम्॥ (यथा, रघुः। १०। ४७।

"ज्ञापयन्तिलपौलस्त्यवलात्कारकचग्रहैः॥")

वलान्विका, स्त्री, (वलमेव आत्मा स्वरूपं यस्याः।) हस्तिशुण्डीवृक्षः। इति शब्दरत्नावली॥

वलाढ्या, स्त्री, (वलाय आढ्या श्रेष्ठा।) वला। इति राजनिर्घण्टः॥ (वलाशब्देऽस्या विवरणं ज्ञातव्यम्॥)

वलानुजः, पुं, (वलस्य वलरामस्य अनुजः कनिष्ठः।) श्रीकृष्णः। इति पुरुषोत्तमः॥

वलामोटा, स्त्री, (वलमामोटयतीति। वल+ण्+मुट्+अच्। टाप्।) नागदमनी। इति भावप्रकाशः॥ (यथास्या गुणाः।

"वलामोटा कटुस्तिक्ता लघुः पित्तकफापहा।
मूत्रकृच्छ्रव्रणान् रक्तो नाशयेच्छासगर्हभान्॥
सर्व्वग्रहप्रशमनी निःशेषविषनाशिनी।
जयं सर्व्वत्र कुरुते धनदा सुमतिप्रदा॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।)

वलायः, पुं, (अयतीति अयः प्रापकः। वलस्य अयः।) वरुणवृक्षः। इति शब्दचन्द्रिका॥ (गुणादयोऽस्य वरुणशब्दे ज्ञातव्याः॥)

वलारातिः, पुं, (वलस्य तन्नाम्नो प्रसिद्धस्यासुरस्य अरातिः शत्रुः।) इन्द्रः। इत्यमरः।१।१।४६॥

वलालकः, पुं, (वलाय अलति समर्थो भवतीति। वल+अल्+खुल्।) पानीयामलकम्। इति शब्दचन्द्रिका॥

वलाशः, पुं, (वलमश्नातीति। वल+अश+अण्।) श्लेष्मा। इति हेमचन्द्रः। ३। १२६॥ (यथा,

"वलाश एवार्यतमुन्नतस्य
श्रोत्रं करोत्यन्नगतिं निवार्य्य॥"

कण्ठगतरोगविशेषः। तल्लक्षणं यथा,—

"गले च श्रोत्रं कुरुतः प्रदृद्धौ
श्लेष्मानिलौ श्वासरुजोपपन्नम्।
मन्मेच्छिदं दुस्तरमेतमाहु-
र्वलाशसंज्ञं निपुणा विकारम्॥"

इति सुश्रुते निदानस्थाने षोड़शेऽध्याये॥ दन्त्यसान्तोऽप्ययं शब्दो दृश्यते॥)

वलासमः, पुं, वृक्षः। इति चिकाण्डशेषः॥

व(व)लाहकः, पुं, (वलेन हीयते इति। वल+हा+कुन्। यद्वा, वारीणां वाहकः। पृषोदरादित्वात् साधुः।) मेघः। (यथा, कुमारे। १। ४।

"वलाहकच्छेदविभक्तरागा-
मकालसन्ध्यामिव धातुमत्ताम्॥")

मुस्तकः। इत्यमरः। १। ३। ६॥ पर्व्वतः। दैत्यविशेषः। नागविशेषः। इति मेदिनी॥ (यथा, महाभारते। २। ६। ६।

"कम्बलाश्वतरौ नागौ धृतराष्ट्रवलाहकौ॥"

वलाहकवर्गस्तु दर्व्वीकरणामन्तर्गतः। इति सुश्रुते कल्पस्थाने ४ अध्यायः॥) रसगर्भोद्भवः कल्किदेवपुत्रः। यथा,—

"तथा रसे शिते पक्षे वैशाखे द्वादशीदिने।
नामदस्माद्व्रतं चक्रे पूर्णे वर्षचतुष्टये॥
षट्शतं करे दत्त्वा भोजयित्वा द्विजान् बहून्॥
भुक्त्वा हविष्यं क्षीराक्तं समिष्टं स्वामिना सह॥
वुभुजे धृषिवीं सर्व्वामपूर्व्वां खननेर्हता।
सा पुत्रौ सुषुवे साध्वी मेघमालवलाहकौ॥
देवानासुपकर्त्तारौ यज्ञदानतपोव्रतौ।
महौत्साहौ महावीर्य्यौ सुभगौ कल्किसम्मतौ॥"

इति कल्किपुराणे ३१ अध्यायः॥

श्रीकृष्णरथाश्वविशेषः। यथा,—

"स्यन्दनस्तु शतानन्दः सारथिश्चास्य दारुकः।
तुरङ्गाः शैव्यसुग्रीवमेघपुष्यवलाहकाः॥"

इति त्रिकाण्डशेषः॥

(यथाच भागवते। १०। ५३। ३।

"स चाश्वैः शैव्यसुग्रीवमेघपुष्यवलाहकैः।
युक्तं रथमुपानीय तस्थौ प्राञ्जलिरग्रतः॥"

जयद्रथस्य भ्रातृविशेषः। यथा, महाभारते। ३। २५४। १२।

"जयद्रथो नाम यदि श्रुतस्ते
सौवीरराजः सुभगे! स एषः।
तस्यानुजा भ्रातरोऽदीनसत्त्वा
वलाहकानीकविदारणाद्याः॥"

नदविशेषः। स तु लवणसमुद्रगामी। यथा, मात्स्ये। १२०। ७२।

"वलाहकश्च ऋषभश्चक्षो मैनाक एव च।
विनिर्विष्टाः प्रतिदिशं निमग्ना लवणाम्बुधिम्॥"

क्षुद्रहीमस्यपर्व्वतविशेषः। यथा, तत्रैव। १२१। ५५।

"वलाहकस्तृतीयस्तु जात्यञ्जनमयो गिरिः॥"

तारापीड़स्य राज्ञः खनामख्यातो वलाधिकारी। यथा, कादम्बर्य्यां चन्द्रापीड़विद्याभ्यासकथने। "चन्द्रापीड़मानेतुं राजा वलाधिकृतं वलाहकनामानं आहूय दृष्टसुरावलपदातिपरिवृतमतिप्रभूतेऽहनि प्राहिणोत्।")

वलाङ्कन्दः, पुं, (वलं आङ्कयतीति वलाङ्कादयः। कन्दः।) गुलञ्चकन्दः। इति राजनिर्घण्टः॥

वलिः, पुं, (वल्यते दीयते इति। वल दाने+"सर्व्वधातुभ्य इन्।" उणा० ४। ११७। इतीन्।) करः। राजग्राह्यो भागः। (यथा, मनुः। ७। ८०।

"सांवत्सरिकमाप्तैश्च राष्ट्रादाहारयेद्वलिम्॥"

"राजा प्रकृतिरक्षार्थं साध्यादिभागमानयेत्।" इति कुल्लूकभट्टः॥) उपहारः। पूजासामग्री। इत्यमरभरतौ॥ (यथा, मार्कण्डेये। ६३। ८।

"दद्युस्तौ वलिभिश्चैव निजगात्रासृगुक्षितौ॥")

चामरदण्डः। वलिवैष्णवनामकपञ्चमहायज्ञान्तर्गतभूतयज्ञः। इति हेमचन्द्रः।३।४८६॥ (गृहस्थो हि पञ्चसूनापापेन प्रतिदिनं संवध्यते। तन्निष्कृत्यर्थं प्रत्यहं पञ्च महायज्ञाः कर्त्तव्याः। यथाह मनुः। ३। ६८—७१।

"पञ्चसूना गृहस्थस्य चुल्ली पेषण्युपस्करः।
कण्डनी चोदकुम्भश्च वध्यते यास्तु वाहयन्॥
तासां क्रमेण सर्व्वासां निष्कृत्यर्थं महर्षिभिः।
पञ्च क्लृप्ता महायज्ञाः प्रत्यहं गृहमेधिनाम्॥
अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम्।
होमो दैवो वलिर्भौतो नृयज्ञोऽतिथिपूजनम्॥
पञ्चैतान् यो महायज्ञान् न हापयति शक्तितः।
स गृहेऽपि वसन्नित्यं सूनादोषैर्न लिप्यते॥"

"पशुवधस्थानं सूना। सूना इव सूना हिंसास्थानगुण्ययोगात्। चुल्लादयः पञ्च गृहस्थस्य जीवहिंसास्थानानि। चुल्ली उद्धानी। पेषणी दृषदुपलात्मिका। उपस्करः गृहोपकरणकुण्डसंमार्জ্জन्यादिः। कण्डनी उदूखलमुसले। उदकुम्भो जलाधारकलशः।" इति तट्टीकायां कुल्लूकभट्टः॥ * ॥ गृहस्थानां यत्किञ्चभूतयज्ञस्य प्रतिदिनकर्त्तव्यतया तस्य विस्तृतिरत्रास्ते। गृहस्थः अनन्यचित्तो देवताध्यानपरः सन् होमान् कृत्वा प्राच्यादिषु दिक्षु बलिं हरेत्। तत्प्रकरणमाह। प्राच्यां इन्द्राय नमः। इत्य-

पुरुषेभ्यो नमः। दक्षिणस्यां यमाय नमः। यमपुरुषेभ्यो नमः। पश्चिमायां वरुणाय नमः। वरुणपुरुषेभ्यो नमः। उत्तरस्यां सोमाय नमः। सोमपुरुषेभ्यो नमः। ननु मनौ।३।८७। "इन्द्रान्तकाप्यनीन्दुभ्यः सानुगेभ्यो वलिं हरेत्।" इत्युक्तेः अन्तकाय नमः। अन्तकपुरुषेभ्यो नमः इत्यादिप्रयोगः साधुः स्यात्। अत उच्यते यद्यपि शब्दावगम्यत्वाद्देवतात्वस्यान्तकाप्यनीन्दुशब्दैरेवोद्देशो युक्तस्तथापि ब्रह्मणानुष्ठानसंवादाद्ब्रह्मपुराणे च यमाय यमपुरुषेभ्यो वरुणाय वरुणपुरुषेभ्यो सोमाय सोमपुरुषेभ्य इति प्रतिदिग्गमिति पाठात् यथोक्त एव प्रयोगः। मरुद्भ्यो नमः इति द्वारे वलिं दद्यात्। जले अद्भ्यो नमः। मुषलोलूखले वनस्पतिभ्यो नमः। वास्तुपुरुषस्य शिरःप्रदेशे उत्तरपूर्व्वस्यां दिशि श्रिये नमः इति वलिं दद्यात्। वास्तुपुरुषस्य पादद्वये दक्षिणपश्चिमायां दिशि भद्रकाल्यै नमः। इत्यनेन दद्यात्। केचित्तु गृहस्याप्ययनस्य शिरःस्थान-भूप्रदेशे श्रिये नमः। चरणभूप्रदेशे भद्रकाल्यै नमः इत्याहुः। ततो गृहमध्ये ब्रह्मणे पतये नमः वास्तोः पतये नमः इत्यनेन वलिं हरेत्। गृहाकाशे विश्वेभ्यो देवेभ्यो नमः। दिवाचरेभ्यो भूतेभ्यो नमः। दिवानक्तचारिभ्यो भूतेभ्यो नमः इत्यनेन दद्यात्। गृहस्योपरिस्थितगृहे सर्व्वात्मभूतये नमः इत्यनेन वलिं दद्यात्। केचित् वलिदातुः पृष्ठदेशस्याभूभागे सर्व्वात्मभूतये नम इत्यनेन दद्यादित्याहुः। ततो वलिदाता प्राचीनावीतिना दक्षिणामुखेन च सता उक्तवलिदानावशिष्टं सर्व्वमन्नं दक्षिणस्यां दिशि पितृभ्यः स्वधा इत्यनेन देयम्। ततोऽन्यदन्नं पात्रे वसुहृत्य यथा रजसा न संसृज्यते तथा भुवि शुनकैः श्वपतितचाण्डालवायसपरोगिवायसक्षमिप्रभृतिभ्यो दद्यात्। एवं नित्यं कुर्व्वन् परं स्थानमाप्नोतीति ॥ * ॥) यथा,—

"ये चैवन्ति सदा विष्णुं निश्चलेनान्तरात्मना।
न ते भूयोऽभिजायन्ते श्वेतद्वीपनिवासिनः॥
एवं पूर्व्व विधानेन अतिथिं भोजयेत्ततः।
सायं प्रातर्यदन्नं स्याद्धुत्वाग्नौ तेन तद्वलिम्॥"

इति वह्निपुराणम् ॥*॥

"ततोऽग्नौकरणं कुर्य्याद्दद्याच्च वलिमित्यथ।
ब्रह्मणे गृहमध्ये तु विश्वेदेवेभ्य एव च॥
धन्वन्तरिं वसुहृत्य प्रागुदीच्यां वलिं क्षिपेत्।
प्राच्यां शक्राय याम्यायां यमाय वलिमाहरेत्॥
प्रतीच्यां वरुणायैव सोमायोत्तरतो वलिम्।
दद्याद्वास्तवे विधात्रे च वलिं द्वारे गृहस्य च॥
ब्रह्मभूमौ च वलिं दद्यात् गृहेभ्यश्च समन्ततः।
नक्तञ्चरेभ्यो भूतेभ्यो वलिमाकाशतो हरेत्॥
पितॄणां निर्व्वपेच्चैव दक्षिणाभिमुखः स्थितः।
यज्ञोपवीतवान् भूत्वा शुचमाहितमानसः॥
ततस्तोयमुपादाय तिलैर्दत्वाचमनाय वै।
स्थानेषु निक्षिपेत् प्राज्ञस्तान्ता उद्दिश्य देवताः॥

एवं गृहवलिं दत्त्वा गृहे गृहपतिः शुचिः।
आप्यायनाय भूतानां कुर्य्याद्दुत्सर्गमादरात्॥
श्वभ्यश्च श्वपचेभ्यश्च वयोभ्यश्चावपेद्भुवि।
वैश्वदेवं हि नामैतत् सायं प्रातरुदाहृतम्॥"

इति मार्कण्डेयपुराणम् ॥*॥

अथ वलिः। वैश्वदेवपश्चाद्भूमौ जलं क्षिप्त्वा तत्क्षेत्रान्नेन साङ्गुष्ठेन दैवतीर्थेन ॐ विश्वेभ्यो देवेभ्यो नमः इति वलिं दद्यात् तदुपरि जलमनेन मन्त्रेण दद्यात् एवं सर्व्वत्र जलप्रक्षेपः। तदुत्तरे ॐ सर्व्वेभ्यो देवेभ्यो नमः। उभयोर्दक्षिणे प्राचीनावीती पानितवामजानुर्दक्षिणामुखो दक्षिणाग्रकुशोत्तरयोपरि सतिलमन्नं सुमुखकुशत्रयेण पिण्डतीर्थेन ॐ पितृभ्यः स्वधा। ततः सर्व्वेषां वलीनामुपरि सर्व्वत्र प्रत्येकं जलनिषेकः। तत उपवीती दैवतीर्थेन वलिपात्रप्रक्षालनोदकेनान्नेन ऐशान्यां ॐ यक्ष्मणेतत्ते नमस्तेऽस्तु मा माहिंसीः ॐ यक्ष्मणे नमः इत्यनेन दद्यात् जलञ्च देयम्॥ इत्यावश्यकवलिः॥*॥

अथ काम्यवलिः। वलीनां पश्चिमे जलेनोत्तरायां रेखां कृत्वा भूमौ जलं दत्त्वा,—

"ॐ देवा मनुष्याः पशवो वयांसि
सिद्धाः सयक्षोरगदैत्यसंघाः।
प्रेताः पिशाचास्तरवः समस्ता
ये चान्नमिच्छन्ति मया प्रदत्तम्॥
पिपीलिकाः कीटपतङ्गकाद्या
बुभुक्षिताः कर्म्मनिबन्धदेहाः।
प्रयान्तु ते तृप्तिमिदं मयान्नं
तेभ्यो विसृष्टं सुखिनो भवन्तु॥
येषां न माता न पिता न बन्धु-
र्नैवान्नसिद्धिर्न तथान्नमस्ति।
तत्तृप्तयेऽन्नं भुवि दत्तमेतत्
प्रयान्तु तृप्तिं सुदिता भवन्तु॥
ॐ भूतानि सर्व्वाणि तथान्नमेत-
दहञ्च विष्णुर्न यतोऽन्यदस्ति।
तस्मादहं भूतनिकायभूत-
मन्नं प्रयच्छामि भवाय तेषाम्॥
चतुर्दशो भूतगणो य एव
तत्र स्थिता येऽखिलभूतसंघाः।
तृप्त्यर्थमन्नं हि मया विसृष्टं
तेषामिदन्तोऽमुदिता भवन्तु॥"

इत्युच्चार्य्य वलिं दद्यात्।

"ॐ ऐन्द्रवारुणवायव्या सौम्या वै नैर्ऋतास्तथा।
वायवः प्रतिगृह्णन्तु भूमौ पिण्डं मयार्पितम्॥"

ॐ वायवेभ्यो नम इति पुनर्वलिं देयम्।

भूमौ जलं दत्त्वा,—

"ॐ श्वानौ द्वौ श्यावशबलौ वैवस्वतकुलोद्भवौ।
ताभ्यां पिण्डं प्रयच्छामि स्यातामेतावहिंसकौ॥"

ॐ श्वभ्यां नमः ततः पुनर्जलं देयम्। भूमौ जलं दत्त्वा ॐ पतितपापरोगिभ्यो नमः पुनर्जलं देयम्। भूमौ जलं दत्त्वा ॐ धर्म्मराजचित्रगुप्ताभ्यां नमः ततः पुनर्जलदानम्।

ततो जलं सृष्ट्वा व्यहिं विसृज्य नमस्कृत्य संप्राप्य जले क्रियमाणे वलीनामधो जले वा क्षिपेत् पिण्डवत्। अन्नाभावे केवलजलेन पात्रान्तरस्थजले कुर्य्यात्। ततः शुक्लकुसुमसहितं जलपूर्णं ताम्रादिपात्रं हस्ते निधाय महावामदेव्य ऋषिर्विराड्गायत्री छन्द इन्द्रो देवता शान्तिकर्म्मणि जपे विनियोगः। ॐ कयानश्चित्र आभुवदूती सदा वृधः सखा कया शचिष्ठया वृता। ॐ कस्त्वा सत्यो मदानां मंहिष्ठो मत्सदन्धसः दृढ़ाचिदारुजे वसु। ॐ अभीषुणः सखीनामविता जरितॄणां शतमभवास्यूतये। इति वामदेव्यं गीत्वा गानाशक्तौ त्रिः पठित्वा ॐ स्वस्तिन इन्द्रो वृद्धश्रवाः स्वस्तिनः पूषा विश्ववेदाः। स्वस्तिनस्तार्क्ष्योऽरिष्टनेमिः स्वस्तिनो बृहस्पतिर्दधातु। ॐ स्वस्तीति त्रिः पठेत्। पार्व्वणश्राद्धादिकरणे पार्व्वणादिकं कृत्वैव वैश्वदेवादिकं कार्य्यं राजावपि पाकसत्त्वे यत्किञ्चिद्द्रव्यसत्त्वे वा वैश्वदेववलिकर्म्मणी कुर्य्यात्। भृत्यस्तु ब्राह्मणाभावे मन्त्रार्थं भावयन् नमो नम इति मन्त्रेण कुर्य्यात्। अविभक्तानामेककरणादेव सर्व्वेषां सिद्धिः। इत्याह्निकाचारप्रयोगतत्त्वम्॥ * ॥ नवग्रहवलिर्यथा,—

"गुड़ौदनं रवेर्दद्यात् सोमाय घृतपायसम्।
यावकं मङ्गलायैव क्षीरान्नं सोमसूनवे॥
दध्योदनञ्च जीवाय शुक्राय तु घृतौदनम्।
शनैश्चराय कृशरमाजसांसञ्च राहवे॥
चित्रौदनञ्च केतुभ्यः सर्व्वभक्ष्यैः समर्घयेत्॥"

सर्व्वभक्ष्यैस्तु तत्तद्द्रव्याभावे यथालाभोपपन्नैर्भक्ष्यैः। इति गृह्ययज्ञतत्त्वम्॥ * ॥

दैत्यभेदः। इति मेदिनी। (अयं सावर्णस्य मन्वन्तरे इन्द्र आसीत्। यथा, मार्कण्डेये।८०।२०।
"तेषामिन्द्रो भविष्यस्तु वलिर्वैरोचनिर्मुने!॥")
स च दैत्यो विरोचनपुत्रः। तस्य अशनायां पत्न्यां बाणज्येष्ठं पुत्रशतं जातम्। इति श्रीभागवतम्॥ यथा,—

"विरोचनस्य पुत्रस्तु वलिरेकः प्रतापवान्।
वलेः पुत्रशतं जज्ञे राजानः सर्व्व एव ते॥
तेषां प्रधानाश्चत्वारो विक्रान्ताः समदर्शनाः।
सहस्रबाहुर्य्यज्ञश्च कल्पे हे च वलेः सुते॥
वलेः पुत्राच्च पौत्राच्च शतघोऽथ सहस्रशः।
बाणोयो नाम विख्यातो गवो विक्रान्तपौरुषः॥"

इत्यग्निपुराणम्॥

तस्य पूर्व्वजन्मवृत्तान्तो यथा,—

शुक्र उवाच।

"धर्म्मध्वजो नाम बभूव राजा
विदेहदेशे निजधर्म्मशीलः।
यज्वा सुवाग्मी शुभकर्म्मकर्त्ता
स विष्णुभक्तोऽनुदिनं महात्मा॥
तस्य त्वमासीर्नृपतेः सुभद्रो
देष्टा द्विजानां पितृनोऽविवेकी।
देष्टा गुरूणां सततं त्वदाता
नो साध्वसं ते वत पारलौक्यम्॥

एवंविधस्तं नृपसत्तमेन
प्रोक्तः क्रुरुष्वाधविनाशनाय ।
स्नानं हरेर्येन सुखं हि लभ्ये
लोके परे गत्यहतेन वापि ॥
श्रुत्वा भवांस्तद्वचनप्रकार
स्नानं क्रमेणापि जगार्दनस्य ।
दानं तथा गोः कृतवान् विभक्त्या
तस्मात् फलं विद्धि तवाप्रमेयम् ॥
एवं त्वया प्राप्यमशेषराज्यं
देवासुराणामहतं विपक्षैः ।
संलप्स्यसे त्वं पुनरेव सर्वं
संपूजयन् भक्तियुतः सुरेशम् ॥"
इत्यग्निपुराणम् ॥

वलिराजयज्ञे वामनदेवभिक्षा । यथा,—

लोमहर्षण उवाच ।

"सपर्वतवनामुर्वीं दृष्ट्वा संक्षुभितां वलिः ।
पप्रच्छोशनसं शुक्रं प्रणिपत्य कृताञ्जलिः ॥
आश्चर्यं क्षोभमायाति साब्धिभूभृद्वना मही ।
कस्माच्च नासुरान् भागान् प्रतिगृह्णन्ति वह्नयः ॥
इति पृष्टोऽथ वलिना काव्यो वेदविदांवरः ।
उवाच दैत्याधिपतिं चिरं ध्यात्वा महामतिः ॥
अवतीर्णो जगद्योनिः कश्यपस्य गृहे हरिः ।
वामनेनेह रूपेण परमात्मा सनातनः ॥
स नूनं यज्ञमायाति तव दानवपुङ्गव ! ।
तस्य पादप्रविक्षेपादियं प्रचलिता मही ॥
इयमस्य जगद्धातुर्माया कृष्णस्य सात्वती ।
तत्सन्निधानादसुरा भागार्हा नासुरोत्तम ! ॥
भुञ्जते नासुरान् भागानपि तेन त्रयोऽग्नयः ।
शुक्रस्य वचनं श्रुत्वा हृष्टलोमाब्रवीद्वलिः ॥
धन्योऽहं कृतपुण्यश्च यतो जगत्पतिः स्वयम् ।
तत्रमभ्यागतो ब्रह्मन् ! मत्तः कोऽन्योऽधिकः
पुमान् ।
यं योगिनः सदोद्युक्ताः परमात्मानमव्ययम् ॥
द्रष्टुमिच्छन्ति देवोऽसौ ममाध्वरमुपेष्यति ।
यन्मयाचार्य ! कर्त्तव्यं तन्ममादेष्टुमर्हसि ॥

शुक्र उवाच ।

त्यजास्य दैत्याधिपते ! स्वल्पकोऽपि हि वस्तुनि ।
प्रतिज्ञा नैव द्रोढ्या वाच्यं साम तथा फलम् ॥

वलिरुवाच ।

ब्रह्मन् ! कथमहं ब्रूयामन्येनापि हि याचितः ।
दास्यामीति किमु देवेशे संसाराघौघहारिणि ॥

लोमहर्षण उवाच ।

इत्थं वदतस्तस्य सम्प्राप्तः स जनार्दनः ।
मनोदेवमयोऽचिन्त्यो मायावामनरूपधृक् ॥
तं दृष्ट्वा यज्ञवाटस्तु प्रविष्टमसुराः प्रभुम् ।
जग्मुः प्रभावात् क्षोभन्ते नेत्रसा तस्य निष्प्रभाः ॥
स चार्घ्यमादाय वलिः प्रोद्यतपुलकत्वदा ।
पूजयामास गोविन्दं प्राह चेदं महासुरः ॥

वलिरुवाच ।

सुवर्णरत्नसंघातान् गजाश्वमहिषांस्तथा ।
स्त्रियो वस्त्राण्यलङ्कारान् गावः कृष्णाश्च पृष्ठ-
लम् ।
तद्दामि हृणुष्वेदं ममार्घं सततं प्रियः ॥
इत्युक्तो दैत्यपतिना प्रीतिगर्भान्वितं वचः ।
प्राह सस्मितगम्भीरं भगवान् वामनाकृतिः ॥
ममाग्निशरणार्थाय देहि भूमिं पदत्रयम् ।
सुवर्णग्रामरत्नादि तदर्घेभ्यः प्रदीयताम् ॥
एतच्छ्रुत्वा तु गदितं वामनस्य महात्मनः ।
ददौ तस्मै महाबाहुर्वामनाय पदत्रयम् ॥
पाणौ तु पतिते तोये वामनोऽभूद्वामनः ।
सर्वदेवमयं रूपं दर्शयामास तत्क्षणात् ॥
जित्वा लोकत्रयं कृत्स्नं हत्वा चासुरपुङ्गवान् ।
पुरन्दराय त्रैलोक्यं ददौ विष्णुरुरुक्रमः ॥
सुतलं नाम पातालमधस्ताद्दसुधातलम् ।
वलेर्दत्तं भगवता विष्णुना प्रभविष्णुना ॥
अथ दैत्येश्वरं प्राह विष्णुः सर्वेश्वरेश्वरः ।
यत्त्वया सलिलं दत्तं गृहीतं पाणिना मया ॥
कल्पप्रमाणं तस्मात्ते भविष्यत्यायुरुत्तमम् ।
वैवस्वते तथातीते वले ! मन्वन्तरे तथा ॥
सावर्णिके तु संप्राप्ते भवानिन्द्रो भविष्यति ।
इदानीं भुवनं दत्तं सर्वं शक्राय सर्वदा ॥
यदा सुरेश्च विप्रेश्च विरोधं त्वं करिष्यसि ।
बन्धिष्यति तदा पाशो वारुणो घोरदर्शनः ॥

वलिरुवाच ।

तत्रावतो मे पाताले भगवन् ! भवदाज्ञया ।
किं भविष्यत्युपादानसुपभोगोपयोगकम् ॥

श्रीभगवानुवाच ।

दानान्यविधिदत्तानि श्राद्धान्यश्रोत्रियाणि च ।
हुतान्यश्रद्धया यानि तानि दास्यन्ति ते फलम् ॥
अदक्षिणास्तथा यज्ञाः क्रियाश्चाविधिना कृताः ।
फलानि तव दास्यन्ति ह्यधीतान्यव्रतानि च ॥
उदकेन विना पूजा विना दर्भेण वा क्रिया ।
आज्येन च विना होमं फलदास्ते च ते वले !॥"

इति वामनपुराणे ३१ अध्यायः ॥*॥

ययातिर्वसुश्चैवसुतपोराजपुत्रः । यथा, विष्णु-
पुराणे । ४ । १८ । १ । "तितिक्षोरपि रुष-
द्रथः पुत्रोऽभूत् तस्यापि हैमः हैमस्य सुतपाः
सुतपसश्च वलिः ॥" (तथा च भागवते । ९ ।
२३ । ४ ।
"ततो होमोऽथ सुतपा वलिः सुतपसोऽभवत् ॥"
मुनिविशेषः । यथा, महाभारते । २ । ४ । १० ।
"अत्रिर्वसुः सुमित्रश्च मैत्रेयः सुनको वलिः ॥")
देवतोद्देशेन घातार्थोपकल्पितच्छागादिः । यथा,
भविष्ये ।
"अजानां महिषाणाञ्च मेषाणाञ्च तथा वधात् ।
प्रीयतेदृविधिवत् दुर्गा मांसशोणिततर्पणैः ॥"
इति ।
पशुघातपूर्व्वकरक्तशीर्षयोर्व्वलित्वम् । यथा,—
"स्थाने नियोजयेद्रक्तं शिरश्च सप्रदीपकम् ।
एवं दत्त्वा वलिं पूर्णं फलं प्राप्नोति साधकः ॥"
इति च दुर्गोत्सवतत्त्वम् ॥ * ॥
तच्छेदनार्घवरः शस्त्रलक्षणमाह निबन्धतन्त्रे ।
"द्वादशाङ्गुलिको मुख्या दीर्घो द्वात्रिंशदङ्गुलः ।
षड्ङ्गुलस्तु विस्तारः खड्गः कार्य्यो विधूपमः ॥
छेदयेत्तेन खड्गेन वलिं पूर्व्वमुखस्थितम् ।
अथवोत्तरवक्त्रञ्च स्वयं पूर्व्वाननस्थितः ॥"*॥
सङ्कल्पप्रहारेण वलिच्छेदनं तदभावे दोषश्च
तत्रैव ।
"हन्यादेकप्रहारेण स्वयं वा चान्यतोऽपि वा ।
यद्यप्येकेन घातेन वलिश्छेदो न जायते ।
तदर्द्धं वाप्य च महान् कर्त्तुर्हानिः पदे पदे ॥"
तन्त्रान्तरे ।
"एकखड्गप्रहारेण पशुर्यत्र न हन्यते ।
तदा विघ्नं विजानीयात् कर्त्तुर्वा क्षेत्तुरेव वा ॥"
निवन्धेऽपि ।
"यशोहानिर्ज्ञानहानिश्चार्थहानिस्ततः परम् ।
पुत्रहानिः सुते रक्ते तद्रक्ते निजरक्तम् ॥
अतः सद्यो महिषादि । तन्मांसैर्होमयेत् सुधीः ।
होमादेव भवेच्छान्तिर्मृत्वैव न संशयः ॥"*॥
प्रकारान्तरशान्तिमाह तत्रैव ।
"हन्यादेकप्रहारेण चान्यथा दोषमावहेत् ॥
तच्छान्तये जपेद्विद्यां तारादेव्याः सहस्रकम् ।
सहस्रं जुहुयान्मांसैर्द्यात्तद्वा स्वर्णमाषकम् ॥
रुधिरं तत्तु पार्व्वत्यै न तु देयं कदाचन ।
वलिमन्यं समादाय भगवत्यै निवेदयेत् ॥"*॥
निवन्धे ।
"यद्यप्येकेन घातेन महिषो नैव छिद्यते ।
तदर्द्धं महती हानिः कर्त्तुः पुत्रादिसम्पदाम् ॥
यस्मात् प्रजायते देवि ! ततः शान्तिं समाचरेत् ॥
आनीय महिषं तत्र घातयित्वा च तत्र वै ।
साम्भिर्लोमसहितैर्हुनेद्देवि ! यथाविधेः ॥
तच्छान्तये जपेद्विद्यां कालीं वा तारिणीं पराम् ।
अयुतं परमेशानि ! सहस्रं वापि साधकः ॥
सहस्रं विल्वपत्रेषु जुहुयात् संस्कृतेऽनले ।
ब्राह्मणं वा गुरुं वापि वरयेद् वसुभिः प्रिये ! ॥
पण्डितं वरयेद्वाथ बहुमानपुरःसरैः ।
ततः स्वर्णं ब्राह्मणाय तस्मै दद्यात् सुभाग्यदे ॥
एवच्छेदयजमानस्य शान्तिर्भवति निश्चयः ।
कृतस्तस्यैव शङ्का स्यात् हृद्विस्फुटनसरावधि ॥*
अथवा सर्व्वतोभद्रे नवकुम्भं निधापयेत् ।
सौवर्णं राजतं वापि ताम्रं वा तैजसन्तु वा ।
मार्त्तिकं वा चरेत्तत्र वित्तशाठ्यं न चाचरेत् ॥
तत्रैव कालिकां तारां तथा महिषमर्द्दिनीम् ।
यजेद्वा त्रिपुरां देवीं समस्तरश्मिमण्डिताम् ॥
कुलदीपैस्तथा वस्त्रैर्धनधान्यादिभिः प्रिये ! ।
पूजयेत् परमेशानीं वित्तशाठ्यविवर्ज्जितः ॥
वलिमन्यं छागलं वा तत्रस्थञ्च सुलक्षणम् ।
घातयित्वा पुरोभागे चतुर्धा शोणितं न्यसेत् ॥
अपरं शोणितं तत्र राजते सपरे न्यसेत् ।
अस्रग्भिस्तर्पयेद्देवीं वक्ष्यमाणविधानतः ॥
एकेन वटुकादींश्च तथैकेनापि भैरवान् ।
अपरेणापि चैकेन योगिनीगणम् ॥
तर्पयित्वा ततः पश्चाद्दियात्मर्म्मणमाचरेत् ।
दक्षिणान्तं ततः कृत्वा पटेनामसहस्रकम् ॥
यथाशक्ति महेशानि ! भूयो देवीं घटे यजेत् ।
घटवक्त्रे घटाधस्त्रयश्चोदरमण्डिकाम् ॥

प्रणवञ्चार्घं च निःक्षिप्य षण्णवं सफलाक्षतम् ।
विधाय कमलाकल्पं चौमेणाच्छादयेत् पुनः ॥
आत्मा नत्वा ततः साध्यं तत्रानीय सुसंवृतम् ।
मनसा पञ्चवाद्येषु सुवर्णे शोभने सुधीः ॥
अभिषिच्येन्मालकारैर्यजमानञ्च साधकः ।
सुमङ्गलाभिर्नारीभिः स्निग्धपुण्याक्षतान्वितम् ॥
अधिनानां द्विजातीनामाशीर्व्वादपरं सरम् ।
करेणास्य शिरः स्पृष्ट्वा प्रयुञ्जीताशिषं पुनः ॥
भद्रमस्तु शिवञ्चास्तु महामाया प्रसीदतु ।
रक्षन्तु त्वां सदा देवाः सम्पदः सन्तु सर्व्वदा ॥
अथोत्थायाभिषिक्तः सन् तोषयेद्ब्राह्मणान् धनैः ।

एवमेतद्यजमानस्य शान्तिर्भवति नित्यदा ॥
प्रसङ्गादलिविघ्नस्य शान्तिकर्म्म निरूपितम् ।
सर्व्वसम्पत्करं पुंसां सर्व्वसौभाग्यसिद्धिदम् ।
भूते च दुर्निमित्तादावप्येवं शान्तिमाचरेत् ॥"
इति निबन्धतन्त्रोक्तबलिविघ्नशान्तिसंग्रहः ॥*॥

अन्यच्च ।
"एकखड्गप्रहारेण पशुर्यत्र न छिद्यते ।
तदा विघ्नं विजानीयाद्दातुर्व्वा क्षेतुरेव वा ॥"

प्रायश्चित्तमाह ।
"छित्त्वादेकप्रहारेण अन्यथा दोषमावहेत् ।
तच्छान्तये जपेद्विद्यां दुर्गाबीजसहस्रकम् ।
सहस्रं जुहुयाद्धोमे प्रदद्यात् स्वर्णमाषकम् ॥"
इति कृत्यमहार्णवे वाचस्पतिमिश्रैरुक्तम् ॥*॥

अपरञ्च कालिकापुराणे ।
"चन्द्रहासेन कर्त्तारैरुक्षेदं सुखमिष्यते ।
एकेन क्षेदयेद्यत्र प्रोक्षितं साधकः पशुम् ।
पतितं वाथ राजेन्द्र ! ब्रह्महत्यामवाप्नुयात् ॥"
मत्स्यसूक्ते ।
"क्षेदयेत्तीक्ष्णखड्गेन प्रहारेण सकृद्बुधः ॥"
इति दुर्गोत्सवतत्त्वम् ॥

पश्चादिबलिदानविधिर्यथा,—
"बलिदानविधानञ्च शृणुतां मुनिसत्तम ! ।
मायातिं महिषं छागं दद्यान्मेषादिकन्तथा ॥
सहस्रवर्षं सा प्रीता दुर्गा मायातिदानतः ।
महिषेण वर्षशतं दशवर्षञ्च छागलात् ॥
वर्षमेकेन कृष्णाजैः पक्षिभिर्विंशतिस्तथा ।
दशवर्षं कृष्णसारैः सहस्रान्दश मर्य्यकैः ॥
खड्गिभिः पिष्टनिर्म्माणैः षण्मासं पशुभिस्तथा ।
मासं शुक्लादिफलैरश्वतैरिति नारद ! ॥
युवकं व्याधिहीनञ्च सदङ्गं लक्षणान्वितम् ।
स्निग्धरोमविकाराङ्गं सुवर्णं पृष्ठमेव च ॥
स्निग्धेन बलिना दातुर्व्वन्धुं पुत्रञ्च पञ्चिका ।
हन्तेनैव गुरुञ्चैनं क्षत्रियं वान्यवन्तथा ॥
कुलञ्चैवाधिकाङ्गेन हीनाङ्गेन प्रजान्तथा ।
कामिनीं भङ्गभङ्गेन कानीन भ्रातरन्तथा ॥
धार्ष्टकेन भवेन्नृत्युर्विप्रञ्च चित्रमस्तके ।
स्तब्धं स्निग्धं ताम्रदृष्टं भद्रशीः पुष्टहीनकं ॥
मायातीनाञ्च निर्म्मितं शृणुतां मुनिसत्तम ! ।
यस्यास्यस्यैवेदोक्तं फलन्तस्यैतिक्रमे ॥"*॥

अथ गरबलिः ।
"पितृमातृविहीनञ्च युवकं व्याधिवर्জ্জितम् ।
विवाहितं दीक्षितञ्च परदारविहीनकम् ॥
त्रिशारिकं विशुद्धञ्च सक्तूकं मूलकं वरम् ।
तद्बन्धुभ्यो धनं दत्त्वा क्रीतं मूल्यातिरेकतः ॥
स्नापयित्वा च तं धर्म्मो संपूज्य वस्त्रचन्दनैः ।
माल्यैर्धूपैश्च सिन्दूरैर्दधिगोरोचनादिभिः ॥
तञ्च वर्षं भ्रामयित्वा परहारेण यत्नतः ।
वर्षान्ते च समुत्तस्थ्य दुर्गायै तं निवेदयेत् ॥
अष्टमीनवमीसन्धौ दद्यान्मायातिमेव च ।
इत्येवं कथितं सर्व्वं बलिदानप्रसङ्गतः ॥"*॥

अपि च ।
"सप्तम्यां पूजनं कृत्वा बलिं दद्यादिचक्षणः ।
अष्टम्यां पूजनं शस्तं बलिदानविवर्জ্জितम् ॥
अष्टम्यां बलिदानेन विपत्तिर्जायते ध्रुवम् ।
इत्यादिचक्षणो भक्त्या नवम्यां विधिवद्बलिम् ॥
बलिदानेन विप्रेन्द्र ! दुर्गाप्रीतिर्भवेन्नृणाम् ।
हिंसाजन्यञ्च पापञ्च लभते नात्र संशयः ॥
उत्सर्गकर्त्ता दाता च क्षेत्ता पोष्टा च रक्षकः ।
व्यपपद्याग्निरोद्धा च सप्तैते वधभागिनः ॥
योऽयं एन्ति स तं एन्ति चेति वेदोक्तमेव च ।
कुर्व्वन्ति वैष्णवीं पूजां वैष्णवाज्ञेन हेतुना ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ६१-६२ । अध्यायौ ॥

श्रीभगवानुवाच ।
"क्रमन्तु बलिदानस्य स्वरूपं रुधिरादिभिः ।
यथा स्यात् प्रीतये सम्यक् तथा वक्ष्यामि पुत्रकौ ॥
वैष्णवीतन्त्रकथितः क्रमः सर्व्वत्र सर्व्वदा ।
साधकैर्व्वलिदानेषु ग्राह्यः सर्व्वसुरस्य तु ॥
पक्षिणः कच्छपा ग्राहा मत्स्या नवविधा मृगाः ।
महिषो गोधिका गोधश्छागो यश्च शूकरः ॥
खड्गश्च कृष्णसारश्च गोधिका सरभो हरिः ।
शार्दूलश्च नरश्चैव खगाश्चरुधिरन्तथा ॥
पञ्चिकाभैरवादीनां बलयः परिकीर्त्तिताः ॥
बलिभिः साध्यते मुक्तिं बलिभिः साध्यते दिवम् ।
बलिदानेन सततं जयेत् शत्रून् नृपान् नृपः ॥*॥
मत्स्यानां कच्छपानाञ्च रुधिरैः सततं शिवा ।
मासैकन्तृप्तिमायाति याहैर्मांसांस्तु चीनच ॥
मृगाणां शोणितैर्देवी नराणामपि शोणितैः ।
यतौ मासानवाप्नोति तृप्तिं कल्याणदा च सा ॥
गोगोधिकानां रुधिरैर्वार्षिकीं तृप्तिमाप्नुयात् ॥
कृष्णसारस्य रुधिरैः शूकरस्य च शोणितैः ।
आप्नोति सततं देवी तृप्तिं द्वादशवार्षिकीम् ॥
अजाविकानां रुधिरैः पञ्चविंशतिवार्षिकीम् ।
महिषाणाञ्च खड्गानां रुधिरैः शतवार्षिकीम् ।
तृप्तिमाप्नोति परमां शार्दूलरुधिरैस्तथा ॥
सिंहस्य सरभस्याथ खगस्य च शोणितैः ।
देवी तृप्तिमवाप्नोति सहस्रं परिवत्सरान् ॥
मांसैरपि तथा प्रीतो रुधिरैर्यस्य यावती ।
कृष्णसारस्तथा खड्गं तथा मत्स्यश्च रोहितम् ।
वार्द्धीनसमृगश्चापि एतं तेषां एतद् भवेत् ॥*॥
कृष्णसारस्य मांसेन तथा खड्गेन पञ्चिका ।
वर्षान् पञ्चशतान्येव तृप्तिमाप्नोति केवलाम् ॥
रोहितस्य तु मत्स्यस्य मांसैर्वार्षीणसस्य च ।
तृप्तिमाप्नोति वर्षाणां शतानि त्रीणि सप्तिया ॥
शिःपिबंखिन्नियक्षीयः श्वेतो हरिणवाजपतिः ।
वार्द्धीनसः शीर्यतेऽसौ एषं कर्ये च सप्तशतः ॥
नीलग्रीवो रक्तशीर्षः कृष्णपादः शितच्छदः ।
वार्द्धीनसः स्यात् पक्षीशो मम विष्णोरतिप्रियः ॥
नरेण बलिना देवी सहस्रं परितृप्यति ।
विधिदृष्टेन चाप्नोति तृप्तिं सप्तं शिवैर्नरैः ॥
नारेणैवाथ मांसेन त्रिसहस्राणि वत्सरान् ।
तृप्तिं प्राप्नोति कामाख्या मेरवो मम रूपधृक् ॥
मनुष्यं शोणितन्तु पीयूषं जायते सदा ।
गरुत्मत्कच्छपा नक्राश्च मांसानि यदा शिवा ॥
तस्मात्तु पूजने दद्याद्बलेः शीर्षञ्च शोणितम् ।
भोज्ये होमे च मांसानि नियुञ्जीयाद्विचक्षणः ॥
पूजासु नाम मांसानि दद्याद्वै साधकः क्वचित् ।
ऋते तु लोहितं शीर्षमन्यत् तन्तु जायते ॥*॥
कुशाण्डमिक्षुदण्डञ्च मद्यासवमेव च ।
एते बलिसमाः प्रोक्तास्तृप्तौ छागसमाः सदा ॥
चन्द्रहासेन कर्त्रा वा छेदनं सुखमिष्यते ।
दात्राखिधेनुक्रकचखड्गाभिस्तु मध्यमम् ।
क्षुरक्षुरप्रभल्लैश्चेदाधमं परिकीर्त्तितम् ॥
एभ्योऽन्यैः पक्षिबाणाद्यैर्बलिश्चेदः कदापि न ।
नाशि देवी बलिं तन्तु दाता भुङ्क्तमवाप्नुयात् ॥
एकेन छेदयेद्यत्र प्रोक्षितं साधकः पशुम् ।
पतितं वा ब्रह्महत्यां सोऽवाप्नोति सुदुःसहाम् ।
छागस्तु खड्गन्तु बलिं नियुञ्जीत विचक्षणः ॥
खड्गस्यामन्त्रणे मन्त्रा यावन्तः कथिताः पुरा ।
महामायावलौ ते वै योज्यास्तत्रोदिता बुधैः ॥
तैः सार्द्धमेते मन्त्रास्तु योज्याः खड्गाभिमन्त्रणे ।
पूजने शारदादीनां कामाख्याया विशेषतः ॥
हिः कालीति ततो दद्या वज्रेश्वरिपदन्तथा ।
ततोऽनु लौहदण्डाय नमः शेषे तु योजयेत् ॥
संपूज्यानेन मन्त्रेण खड्गमादाय पाणिना ।
कालरात्र्यास्तु मन्त्रेण तं खड्गमभिमन्त्रयेत् ॥
नेत्रबीजस्य मध्यन्तु विरावृत्य प्रयोजयेत् ।
ततोऽनु कालीति विकटदंष्ट्रेऽनु तत्पदम् ॥
हान्तादीनां ततोऽन्तेन स्वरेणैकादशेन च ।
योजितो नादबिन्दुभ्यां हौ तत्पश्चान्नियोजयेत् ॥
फेत्कारिणिपदं तस्मात् खादय छेदयेति च ।
सर्व्वदुष्टानिति ततो हिमारय सुलापकम् ॥
खड्गेन छिन्धि छिन्धीति ततः किल किलेति वै ।

ततश्चिकि चिकीत्येव ततः पिब पिबेति च ॥
ततोऽनु रुधिरेणैव स्त्रौं स्त्रौं किरि किरीति च ।
कालिकायै नम इति कालरात्र्यास्तु मन्त्रकम् ॥
इत्यनेन तु मन्त्रेण करवालेऽभिमन्त्रिते ।
कालरात्रिः स्वयं तस्मिन् प्रवीदत्यरिघातने ॥*॥
बलेः पूर्व्वोदिता मन्त्रा नित्यं ग्राह्यास्तु साधकैः ।
अयं मन्त्रस्तु वज्रस्यस्य इत्याविष्टाने ॥
यज्ञार्थे पशवः सृष्टाः स्वयमेव स्वयम्भुवा ।
अतस्त्वां घातयिष्यामि तस्मादयज्ञे वधोऽवधः ॥

ततो देवतमुद्दिश्य कामसुद्दिश्य चात्मनः ।
छेदयेत्तेन खड्गेन बलिं पूर्व्वाननं तु तम् ॥
अथवोत्तरवक्त्रन्तं स्वयं पूर्व्वमुखस्तथा ।
पूर्व्वोक्तान् सैन्धवादींस्तु रक्ते वस्त्रं नियोजयेत् ॥
सौवर्णं राजतं ताम्रं रैत्यं पत्रपुटेषु वा ।
माहेयं कांस्यमथवा यज्ञकाष्ठमयेषु वा ।
पात्रं रुधिरदानाय कर्त्तव्यं विभवावधि ॥
न लौहे वाल्कले वापि रैत्ये वाङ्गेऽथ सैसके ।
दद्यान्नक्तं बलीनान्तु भूमौ सुचि सुवेऽथवा ॥
न घटे भूतले नापि न चुल्ले पानभाजने ।
रुधिराप्तिं प्रदद्यात्तु भूतिकामो नरोत्तमः ॥
नरस्य तु सदा रक्तं माहेये तैजसेऽथवा ।
दद्यान्नरपतिस्तत्तु न पुटादौ कदाचन ॥
छागमेधगते दद्यान्न कदाचिद्धयं बलिम् ।
तथा दिक्पालमेधेषु गजं दद्यान्नराधिपः ॥
न कदाचित्तथा देये प्रदद्याद्धयहस्तिनौ ।
हयाकर्षे चामरन्तु बलिं दद्यान्नराधिपः ॥
सिंहं व्याघ्रं नरञ्चापि खगान्नरुधिरन्तथा ।
न दद्याद्ब्राह्मणो मद्यं तथा देये कदाचन ॥
सिंहव्याघ्रनरान्दत्त्वा ब्राह्मणो नरकं व्रजेत् ।
दत्तापि स्यात् सप्तजीनायुः सुखसौभाग्यवर्जितः ॥
खगान्नरुधिरं दत्त्वा चाल्पहत्यामवाप्नुयात् ।
मद्यं दत्त्वा ब्राह्मणस्तु ब्राह्मण्यादेव हीयते ।
न क्षत्रसारं वितरेद्बलिन्तु क्षत्रियः क्वचित् ।
ददतः क्षत्रसारन्तु ब्रह्महत्या भवेद्ध्रुवम् ॥
यत्र सिंहस्य व्याघ्रस्य नरस्य विहितो वधः ।
ब्राह्मणोक्तं तु वक्ष्यादौ तत्रायं विहितः क्रमः ॥
छत्वा छत्तमयं व्याघ्रं नरं सिंहञ्च भैरव ! ।
अथवा पूपविकृतं यवचोदमयञ्च वा ।
पातयेच्चन्द्रहासेन तेन मन्त्रेण संस्कृतम् ॥
प्रभूतपशुदाने तु द्वौ वा त्रीन् वापयेत् छतान् ।
पूजयेत् प्रमुखान् छत्वा सर्व्वान् तत्रैव साधकः ।
सामान्यपूजा कथिता बलीनां पूर्व्वतो मया ।
विशेषो यत्र यत्राऽस्ति तत्तत्तः शृणु भैरव ! ॥
महिषं प्रदद्यौ देये भैरवे भैरवाय वा ।
अनेनैव तु मन्त्रेण तथा तं पूजयेद्बलिम् ॥
यथा वाहं भवान् देवि यथा वहसि चण्डिकाम् ।
तथा मम रिपून् हिंस शुभं वह सुलोचक ! ॥
यमस्य वाहनत्वन्तु वरूथधरायच ! ।
आयुर्व्वित्तं यशो देहि कालराय नमोऽस्तु ते ॥
खड्गस्य तु यदादानं क्रियते तत्र मन्त्रयम् ।
जलेनाभ्युक्ष्य कुर्व्वीत गुह्यकातेति भाषयन् ॥
देवे पित्रे च सुभगः खड्गस्त्वं खड्गसन्निभः ।
छिन्धि भिन्धि महाभाग ! गुह्यकात नमोऽस्तु ते ।
प्रदाने छत्रसारस्य मन्त्रोऽयं परिकीर्त्तितः ।
छत्रसार ! ब्रह्मसर्ग ब्रह्मतेजोविवर्द्धन ।
चतुर्व्वेदमयः प्राज्ञः प्रज्ञां देहि यशो मम ॥
तथा वरमपूजायां मन्त्रमेतत् प्रकीर्त्तितम् ।
त्वमसादो विघ्नसंघचन्द्रभागवसञ्जय ! ।
वरदस्त्वं महाभाग भैरवाय नमोऽस्तु ते ॥
यथा भैरवरूपेण वराहो निहतस्त्वया ।
तथा वरमरूपेण रिपु त्वन्नाशितञ्जय ॥

हरिस्त्वं हररूपेण यथा वहसि चण्डिकाम् ।
तथाऽनुभावि मे नित्यं वहविघ्नांश्च छेदय ॥
त्वं हरिः सिंहरूपेण जगत्प्रत्यूहरूपिणम् ।
जघान येन सत्येन हिरण्यकशिपुं हरन् ।
इत्येवं सिंहपूजायां क्रम उक्तो मयानघ ! ॥
नरे खगान्नरुधिरे पर्य्यायं शृण भैरव ! ।
पीठे चैद्दीयते मर्त्यं बलिं दद्यात् श्मशानके ॥
श्मशानं हैरुकाख्यञ्च तत्पूर्व्वं प्रतिपादितम् ।
कामाख्यानिलये शैले तत्रादौ विद्धि तत्क्रमम् ॥
मम रूपं श्मशानन्तु भैरवाख्यन्तु कथ्यते ।
तत्राङ्गत्वं तपःसिद्धौ विभागन्तु भविष्यति ॥
पूर्व्वांशे भैरवाख्ये तु समुत्तस्थिर्नरस्य च ।
दक्षिणांशे शिरो दद्यात् भैरवा सुरमालया ॥
रुधिरं पश्चिमांशे तु हैरुकाख्ये नियोजयेत् ।
दत्त्वा संपूज्य च नरं विसृज्यागमनक्रमे ॥
पीठश्मशानेषु बलिं नेच्छेत्तु बलिदापकम् ।
अन्यत्रापि यतो यत्र दीयतेऽयं महाबलिः ॥
तत्राप्यन्यत्र चोत्सृज्य छित्त्वान्यत्र शिरोऽस्त-
तम् ।
निवेदयेत् साधकस्तु विसृज्य न विलोकयेत् ॥
सुस्नातं मनुजं दीप्तं पूर्व्वाह्णे नियताशनम् ।
मांसमैथुनभोग्येन हीनं सक्तचन्दनोक्षितम् ॥
छत्तोत्तरासुखं तन्तु तदङ्गेषु च देवताः ।
पूजयेत्तच्च नाम्ना तु दैवतेन च मानुषम् ॥
ब्रह्मरन्ध्रेषु ब्रह्माणं तन्नासायाञ्च मेदिनीम् ।
कर्णयोस्तु तथाकाशं जिह्वायां सर्व्वतोमुखम् ॥
ज्योतींषि नेत्रयोर्विष्णुं वदने परिपूजयेत् ।
ललाटे पूजयेच्चन्द्रं शक्रं दक्षिणगण्डतः ॥
वामगण्डे तथा वह्निं ग्रीवायां समवर्त्तिनम् ।
केशाग्रे निर्ऋतिं मध्ये भ्रुवोश्चापि प्रचेतसम् ॥
नासामूले च श्वसनं स्कन्धे चापि धनेश्वरम् ।
हृदये सर्व्वरात्मन्तु पूजयित्वा षडर्द्दिम् ॥
वरवर्ण्य ! महाभाग सर्व्वदेवमयोत्तम ।
रक्ष मां शरणापन्नं सपुत्रबलबान्धवम् ॥
सराज्यं मां सहापत्यं चतुरङ्गसमन्वितम् ।
रक्षन् परित्यज प्राणान् मरणे नियते सति ॥
महातपोभिर्दानैश्च यज्ञैर्यत् साध्यते नृणाम् ।
तन्मे देहि महाभाग ! त्वत्तोऽपि प्राप्नुहि श्रियम् ॥
राक्षसाश्च पिशाचाश्च वेतालाद्याः सरीसृपाः ।
नृपाश्च रिपवश्चान्ये न मां ते घ्नन्तु स्वतेजसे ॥
त्वत्क्षतजनालगलितैः श्रोणितैरङ्गसंयुतैः ।
व्याप्तायस्त्वत्प्रवन्दृष्ट्वा मरणे नियते सति ॥
एवं संपूज्य विधिवत् पूर्व्वतन्त्रेण पूजयेत् ।
पूजितो मनुरूपोऽयं दिक्पालाधिष्ठितो
भवेत् ॥
अधिष्ठितस्तथान्यैश्च ब्रह्मादैः सकलैः सुरैः ।
शतपापोऽपि मनुजो निष्पापात्मा च तु जायते ॥
तस्य निष्कल्मषस्यात्तु पीयूषं श्रोत्रियं भवेत् ।
प्रीयते च महादेवी जगन्माता जगन्मयी ॥
सोऽपि कायं परित्यज्य मानुषं न पिशाशृतः ।
भवेद्गणाग्रामधिपो मयापि बहुसत्कृतः ॥
इत्येवमथा पापघ्नं मन्त्रजपविधायुतम् ।

तं बलिं नहि गृह्णाति कामाख्याप्यपि नामतः ॥
अन्येषां महिषादीनां बलीनामथ पूजनात् ।
कायो मेध्यत्वमायाति रक्तं गृह्णाति वै शिवा ।
अन्येभ्योऽपि च देवेभ्यो यदा यदृयत् प्रदीयते ।
तदर्हितं प्रदद्यात्तु पूजितायै सुराय वै ॥
कार्यं यज्ञपशोर्हृद्यं रोगिणश्च गलन्नसम् ।
क्लीवं हीनाङ्गमथवा दृष्टलिङ्गं गलद्व्रणम् ॥
श्वित्रिणश्चातिदुष्टस्य महापातकिनस्तथा ।
अष्टादशकवर्षोर्ध्वं शस्तं सप्तकसंयुतम् ॥
ऊर्द्धं संवत्सराच्चापि महागुरुनिपातिनम् ।
बलिकर्म्मणि चैतांस्तु वर्ज्जयेत् पूजितानपि ॥
पशूनां पक्षिणाञ्चापि नराणाञ्च विशेषतः ।
स्त्रियं न दद्यात्तु बलिं दत्त्वा नरकमाप्नुयात् ॥
संघातबलिदानेषु योषितं पशुपक्षिणोः ।
बलिं दद्यान्नानुयोन्तु त्यक्त्वा संघातपूजितम् ॥
न त्रिमासीयकाज्यन्तं पशुं दद्यात् शिवाबलिम् ।
न च त्रिपक्षकाज्यन्तं प्रदद्याद्वै पक्षित्रयम् ॥
काणव्यङ्गादिदुष्टन्तु न पशुं पक्षिणन्तथा ।
देये दद्यादृयथा मर्त्यं तथैव पशुपक्षिणौ ॥
छिन्नलाङ्गूलकर्णादि भग्नदन्तनखैव च ।
भग्नशृङ्गादिकञ्चापि न दद्यात्तु कदाचन ॥
न ब्राह्मणं बलिं दद्यात् चाण्डालमपि पार्थिव ॥
नोत्सृष्टं द्विजदेवेभ्यो भूपतेस्तनयं तथा ॥
रणे न विजितं दद्यात्तनयं रिपुभूभृतः ।
स्वपुत्रं भ्रातरं वापि पितरञ्च विरोधिनम् ॥
विट्पतिञ्च न दद्यात्तु भागिनेयञ्च मातुलम् ।
अनुज्ञामपि दद्यात्तु तथाघ्रातान्नगन्धिनम् ॥
उक्तालाभे प्रदद्यात्तु गर्द्दभञ्चोष्ट्रमेव च ।
लाभेऽन्येषां न वितरेद्व्याघ्रसुरं खरन्तथा ॥
सम्पूज्य विधिवन्मर्त्यं पशुं पक्षिणमेव वा ।
संछिद्य चापि मन्त्रेण मन्त्रेणैव निवेदयेत् ॥
नारं सर्व्वे शिरोरक्तं देयाः सम्यङ्निवेदयेत् ।
छागस्तु वामतो दद्यान्महिषं वितरेत् पुरः ॥
पक्षिणं वामतो दद्यादग्रतो देयशोणितम् ।
कृष्णादानां पशूनान्तु पक्षिणाञ्च शिरोऽग्रतः ॥
वामे निवेदयेत् पार्श्वे जलजानाञ्च सर्व्वशः ।
छागसारस्य कूर्म्मस्य खड्गस्य शूकरस्य च ।
ग्राहयामश्च मत्स्यागामग्र एव निवेदयेत् ।
सिंहस्य दक्षिणे दद्यात् खड्गिनोऽपि च
दक्षिणे ।
दृष्टदेशे न दद्यात्तु शिरो वा रुधिरं क्वचित् ।
उपप्लवे रणे वापि यत्रेष्टं वितरेत्तरम् ॥
यः कश्चिद्राजपुरुषो नान्यस्यापि कदाचन ।
बलिदानदिनात् पूर्व्वदिवसे तु बलिं नरम् ॥
मानस्तोकेति मन्त्रेण देवीसूक्तञ्चयेत् च ।
गन्धद्वारेत्यनेनापि खड्गपूर्व्वे निधाय च ।
तस्मिन् खड्गे च गन्धादि दत्त्वा तेनाधि-
वासयेत् ।
गन्धादिकन्तु खड्गस्थं गते तस्य प्रदापयेत् ।
अमोघेऽस्मिन्नति मन्त्रेण रौद्रेण भैरवस्य च ।
एवन्तु संस्कृते मर्त्ये देवी रक्षति तं बलिम् ।
न तस्य बाधयचापि क्षुधिता रक्षनी न च ।

न खनकं दूषयेत्तं ज्ञात्वानुपात्तदादिकम् ॥
छिन्नं नरस्य श्रीर्यन्तु पतितं यत्र यत्र च ।
यत् शुभाशुभं वापि पश्वादीनाञ्च तत् शृणु ॥
छिन्नं शिरस्तथैशान्यां नारं दिश्यथ राक्षसे ।
पतितं राज्यहानिञ्च विनाशञ्च विनिर्दिशेत् ॥
पूर्व्वाग्नेयाम्यवारुण्यवायव्यादिगतं क्रमात् ।
श्रियं पुष्टिं भयं लाभं पुत्रलाभं धनं तथा ॥
क्रमाद्विनिर्दिशेन्नारं छिन्नश्रीर्यन्तु भैरव ! ।
उत्तरादिक्रमादेय महिषस्यापि मस्तकः ॥
पतितो वायुकाष्ठान्तं स्रवयेद्यत्न शृणुष्व तत् ॥
भोग्यं धानिस्तथैश्वर्य्यं वित्तं रिपुभयो भयम् ।
राज्यलाभं श्रियञ्चापि क्रमात्तद्दिहि भैरव ! ॥
पशूनाञ्चैव सर्व्वेषां छागादीनामशेषतः ।
एवं फलं क्रमाद्विद्याद्दते तलभवाद्भजौ ॥
अन्यत्र तु श्रियं दद्यात् पतितं भ्रातितं शिरः ॥
यः स्यात् कटकटाशब्दो दन्तानां छिन्नमस्तके ।
नराणां पशुपक्ष्यादिग्राहादीनाञ्च रोगदः ॥
लोतकं चक्षुषोर्यातं यदि स्रवति मस्तके ।
छिन्ने नरस्य राज्यस्य तदा हानिं विनिर्दिशेत् ॥
माहिषे मस्तके नेत्राद्यदि स्रवति लोतकम् ।
छिन्ने निवेदिते वैरिभूपस्तुं तदादिशेत् ॥
अन्येषामथ पश्वादिवलीनां शिरसोऽन्तितात् ।
निर्गतं लोतकं धत्ते परां भीतिं गदन्तथा ॥
एवति छिन्नश्रीर्यस्वेन्नारं स्यात्तु रिपुभयः ।
औष्ट्रहिराशुषो दृद्धिः सदा दातुरसंशयः ॥
यदृयद्वाक्यं निगदति तथा भवति चाचिरात् ।
भृङ्गाराद्राज्यहानिः स्यात् श्लेष्मभावाच्च
पश्यताम् ॥
देवानां यदि नामानि भाषते छिन्नमस्तकः ।
विभूतिमतुलां विन्द्यात् षण्मासाभ्यन्तरे तदा ॥
रुधिरादानकाले तु शृङ्गनृत्ते यदि स्रवेत् ।
कार्यं तदाधमर्णो वा दातुः स्यान्मरणं तथा ॥
वामेपादाग्रामपादस्य महारोगः प्रजायते ।
अन्यत्रापेपरणेः कल्याणमुपजायते ॥
महिषस्य तु रक्तस्य मानुषस्याथ साधकः ।
चतुष्ठानाभिकाभ्यान्तु किञ्चिद्वृत्य भूतले ॥
महाकौशिकमन्त्रेण निक्षिपेद्वलिमुत्तमम् ।
देवेभ्यः पूतनादिभ्यो नैर्ऋत्यां दिशि पूर्व्वतः ॥
महिषः पञ्चवर्षो यः पञ्चविंशतिवार्षिकः ।
बलिर्देयो नरो देये तस्य रक्तन्तु भूतले ॥
नेत्रबीजत्रयं कामबीजं ह्रान्तात् प्रजापतिः ।
वह्निबीजं षट्स्वराभ्यां संयुक्तश्च तथापरः ॥
स एवैतान्तथैतावदादिवर्णान्तसंयुतः ।
षष्ठस्वरशिखाविन्दुचन्द्रयुक्तस्तथापरः ॥
दिनांशिकाबीजकान्तः कौशिकीत्यभिमन्त्रणम् ।
एष बलिः स्वाहेति च मन्त्रोऽयं कौशिकः स्मृतः ॥
नृपो वैरिबलिं दद्यात् खड्गमामन्त्र्य पूर्व्वतः ॥
महिषं वाथवा च्छागं वैरिनाम्नाभिमन्त्र्य च ।
स्रवेत्र यदगं वद्वा चिधा तस्य च मस्तके ॥
छित्त्वा तस्योत्तमाङ्गन्तु देवै दद्यात् प्रयत्नतः ॥
यदा यदा रिपोर्वह्निर्व्वलिदानं तदापरम् ।
दद्यात्तथा शिरश्छित्त्वा रिपोस्तस्य क्षयाय च ॥
प्राग्वप्रतिष्ठाञ्च रिपोः कुर्य्यात्तस्मिन् पशावधं ।
तस्मिन् क्षीणे रिपुप्राणाः क्षीयन्ते विपदा युताः ॥
आदौ विश्वरूपिणी च चण्डिकेति ततः परम् ।
वैरिणन्त्वमुकक्षेति स्वाहेत्यन्ते तं पुनः ॥
वह्निभार्य्यां ततः पश्चात् खड्गमन्त्रं प्रकीर्त्तितम् ।
स्वयं स वरी यो देहि तमिमं पशुरूपिणम् ॥
विनाशय महामारि स्फें स्फें खादय खादय ॥
इत्यनेन तु मन्त्रेण वलेः शिरसि पुष्पकम् ।
दद्यात्ततस्तद्रुधिरं दाक्षराभ्यां निवेदयेत् ।
महानवम्यां शरदि यद्येवं दीयते वलिः ।
तदा तदाष्टाङ्गभवैर्मांसैर्होमं समाचरेत् ॥
दुर्गातन्त्रेण मन्त्रेण प्रणीते दहने शुचौ ।
एवं दत्त्वा वलिं मर्त्यो रिपुक्षयमवाप्नुयात् ॥
नाभेरधस्ताद्रुधिरं पृष्ठभागस्य च प्रिये ! ।
खगाक्षरुधिरं दद्यान्न कदाचन साधकः ॥
नोष्ठस्य चिबुकस्यापि नेन्द्रियाणाञ्च मानवः ।
कण्ठाधो नाभितश्चोर्द्धं बाह्वोः पाणिस्तथा ॥
प्रदद्याद्रुधिरं धातं नातिकुर्य्याच्च साधकः ।
गण्डयोश्च ललाटस्य भ्रुवोर्मध्यस्य शोणितम् ॥
कर्णाग्रस्य च बाह्वोश्च स्तनयोरुदरस्य च ।
कण्ठाधो नाभितश्चोर्द्धं हृद्भागस्य यतस्ततः ।
पार्श्वयोश्चापि रुधिरं दुर्गायै विनिवेदयेत् ॥
न गुल्फतोऽस्क् प्रदद्यात् जानोर्नापि च साधकः ।
न च रोगाविलादङ्गान्नान्यघाताच्च भैरव ! ॥
तदर्थं च क्षताघातात् सश्रद्धो क्षुब्धमानसः ।
स्रुतं रक्तं प्रदद्यात्तु पद्मपुष्पस्य पत्रके ॥
सौवर्णे राजते पात्रे कांस्ये फाले च मानवः ।
निधाय देव्यै दद्यात्तु तद्रक्तं चन्द्रमल्लके ॥
क्षणने छुरिकाखड्गं संकुलादि यदस्त्रकम् ।
घातेन हृद्रक्तस्य महाफलमवाप्नुयात् ॥
पद्मपुष्पस्य पत्रन्तु यावद्गृह्णाति शोणितम् ।
तत्प्रमाणचतुर्भागाधिकं रक्तन्तु साधकः ।
न कदाचित् प्रदद्यात्तु नाङ्गच्छेदमथाचरेत् ॥
यः स्वहृदयसंजातं मांसं माषप्रमाणतः ।
तिलसुद्गप्रमाणाद्वा देव्यै दत्त्वा तु भक्तितः ।
षण्मासाभ्यन्तरे तस्मात् काममिष्टमवाप्नुयात् ॥
बाह्वोस्तु स्कन्धयोर्वापि यो दद्यादीपवर्त्तिकाम् ।
हृदये वा स्नेहपात्रं विना भक्ष्या तु साधकः ।
क्षणमात्रेण तद्दीपप्रदानस्य फलं शृणु ॥
भुक्त्वा च विपुलान् भोगान् देवीलोके यथेच्छया ।
कल्पत्रयन्तु संस्थाय सार्व्वभौमो नृपो भवेत् ॥
महिषस्य शिरश्छिन्नं सप्रदीपं शिवापुरः ।
हस्ताभ्यां यः समादाय अहोरात्रञ्च तिष्ठति ॥
स चिरायुः पूतमूर्त्तिरिह भुक्त्वा मनोरमान् ।
भोगांस्तेन मद्गणो गणानामधिपो भवेत् ॥
नरस्य श्रीर्यमादाय साधको दक्षिणे करे ।
वामे रुधिरं पात्रं गृहीत्वा निशि चाग्रतः ॥
यावद्रात्रं स्थितो मर्त्यो राजा भवति चेह वै ।
अन्ते मम पुरं प्राप्य गणानामधिपो भवेत् ॥
चण्डमांसं वलीनां यः शिरोरक्तं करद्वये ।
गृहीत्वा चिन्तयेद्देवीं पुरस्तिष्ठति मानवः ।
स कामानिह संप्राप्य देवीलोके महीयते ॥

महामाये ! जगन्नाथे ! सर्व्वकामप्रदायिनि ! ।
ददामि देहरुधिरं प्रसीद वरदा भव ॥
इत्युक्त्वा मूलमन्त्रेण नतिपूर्व्वं विचक्षणः ।
खगाक्षरुधिरं दद्यान्मानवः सिंहसन्निभः ॥
येनात्ममांसं सत्यन दद्यामीश्वरि ! भूतये ।
निर्व्वाणं तेन सत्येन देहि हुं हुं नमो नमः ॥
इत्यनेन तु मन्त्रेण स्वमांसं वितरेद्बुधः ।
सौभाग्यं सुखसम्पन्नं प्रदीपं परमं शुचिम् ॥
दीपयन् मांसमिश्रञ्च दीपं ह्रौं ह्रौं नमो नमः ।
इत्यनेन तु मन्त्रेण दीपं दद्याद्विचक्षणः ॥
महानवम्यां शरदि रात्रौ स्कन्दविशाखयोः ।
यवचूर्णमयं कृत्वा रिपुं मृण्मयमेव वा ॥
शिरश्छित्त्वा वलिं दद्यात् कृत्वा तस्य तु मन्त्रतः ।
अनेनैव तु मन्त्रेण खड्गमामन्त्र्य यत्नतः ॥
रक्तं किलकिली घोरघोरा धारविछिंसकः ।
ब्रह्मशिखाग्निकाशिखमसुकक्षारिसक्तमम् ॥
भान्तो विसर्गसहितः स च विन्दुयुतोऽपरः ।
ब्रह्माग्नियोगचन्द्रेण विन्दुना च समन्वितः ।
शिरश्छित्त्वा वलिं दद्यात् कृत्वा तस्य तु मन्त्रतः ॥
अनेनैव तु मन्त्रेण विन्दुना च समन्वितः ।
खड्गो वलिप्रोक्तः खड्गः स्कन्दविशाखयोः ॥
रक्तह्रदैः सेचयित्वा क्षत्रिमं तं रिपुं वलिम् ।
कुचन्दनस्य तिलकं ललाटेऽभिनिवेशयेत् ॥
रक्तमाल्यधरं कृत्वा रक्तवस्त्रधरन्तथा ।
कण्ठे बद्ध्वा रक्तसूत्रेणाभौ शूलञ्च क्षत्रिमम् ।
दत्त्वोत्तरशिरः स्कन्धं कृत्वा खड्गेन छेदयेत् ॥
शिरस्तस्य ततो दद्यात् स्कन्दाय ते नमस्तुतः ।
चतुर्ब्रह्मखराग्निभ्यां संयुक्तः स परः समः ॥
परतः परतः पूर्व्वं चन्द्रविन्दुसमन्वितः ।
स्कन्दस्य मूलमन्त्रोऽयं तेन तस्मै वलिं क्षिपेत् ॥
चतुर्ब्रह्मखराग्निभ्यां पल्लवीयन्तु पूर्व्ववत् ।
प्रोक्तो विशाखमन्त्रोऽयं तेन तस्मै वलिं
क्षिपेत् ॥
कुटिलाक्षौ कृष्णपिङ्गवर्णौ रक्तांशुधारिणौ ।
त्रिशूलं करवालञ्च पाणिभ्यां दक्षिणे तथा ॥
विभ्रतौ नृकपालञ्च कर्त्तृकाञ्चापि वामतः ।
त्रिनेत्रौ नरमुण्डानां मालासुरचि ।भ्रतौ ॥
विकटौ दशनैर्भीमैर्गणेशौ द्वारपालकौ ।
ध्यानेन चिन्तयेद्देव्याः पुरतः संस्थितौ सदा ॥
चैत्रे मासि सिते पक्षे चतुर्दश्यां विशेषतः ।
वलिभिर्महिषैश्छागैर्मांसैश्च भैरवरूपिणम् ।
तोषयेन्मधुभिर्मत्स्यैस्तेन तुष्यान्मयं सुतौ ॥
चण्डिकाबलिदानेन वलेः श्रीर्यं क्षयेन तु ।
अभिषिच्य तु मन्त्रेण मूलेनैव निवेदयेत् ॥
ईषत् प्राशन्तु वहुधा चालितं पूर्व्वमर्चितम् ।
वीक्षेत् कामस्य सिद्धिन्तु सिद्धभावश्च साधकः ॥
सितप्रेतो रघस्योऽयं योगपीठस्य सन्निभः ।
ध्यावेद्यस्मिन् महामाया सिद्धिं वोधयते नृणाम् ॥
अनेनामन्त्रितं श्रीर्यं न चिरादृयदि वेपते ।
तत्कार्य्यस्य तदा सिद्धिरसिद्धिस्तु विपर्य्ययात् ॥
एवं ददलिं वीरो यथोक्तविधिनासुना ।
वलिदानादेव चतुर्व्वर्गमाप्नोत्यसंशयम् ॥

एवं बलिप्रदानस्य क्रमो रूपन्तयेव च।
कथितो रुधिराध्याय उपचारान् शृणुष्व मे ॥"
इति कालिकापुराणे ६६ अध्यायः ॥

बलिदाननिषेधो यथा,—
"जीवानुकम्पां विज्ञातुं ततो दुर्गां सदाशिवः।
पपच्छ परमप्रीत्या गृढ़मेतद्दृढो मुदा ॥
सर्व्वे विष्णुमया जीवास्तद्भक्ताश्च कथं शिवे!।
श्रुतं मया तवोद्देशे कुर्य्युः कामनया वधम्।
महान् सन्देह इति मे ब्रूहि भद्रे! सुनिश्चितम् ॥
शङ्करी तद्वचः श्रुत्वा शिववक्त्रविनिर्गतम्।
भीतात्यन्तं हि ब्रह्मर्षे! प्रत्युवाच सदाशिवम् ॥
श्रीपार्व्वत्युवाच।
ये ममार्च्चनमिच्छन्ता प्राणिहिंसनतत्पराः।
तत्पूजनं ममामेध्यं यद्दोषात्तद्दोषगतिः ॥
मदर्थे शिव! कुर्व्वन्ति तामसा जीवघातनम्।
आकल्पकोटिनिरये तेषां वासो न संशयः ॥
मम नाम्नाथवा यज्ञे पशुहत्यां करोति यः।
क्वापि तन्निष्कृतिर्नास्ति कुम्भीपाकमवाप्नुयात् ॥
देवे पैत्रे तथात्मार्थे यः कुर्य्यात् प्राणिहिंसनम्।
कल्पकोटिशतं घोरे रौरवे स वसेत् ध्रुवम् ॥
यो मोहान्मानसैर्देहिहत्यां कुर्य्यात् सदाशिव!।
एकविंशतिकल्पञ्च तत्तद्योनिषु जायते ॥
यज्ञे यज्ञे पशून् हत्वा कुर्य्यात् शोणितकर्द्दमम्।
स पचेन्नरके तावद्यावच्छोमानि तस्य वै ॥
हन्ता कर्त्ता तथोत्सर्गकर्त्ता धर्त्ता तथैव च।
तुल्या भवन्ति सर्व्वे ते ध्रुवं नरकगामिनः ॥
ममोद्देशे पशून् हत्वा सरक्तं पाचयेत्तु यः।
यो मूढ़ः स तु पूयोदे वसेद्यावन्न संशयः ॥
देवतान्तरमन्त्रामन्त्रणेन स्वेच्छया तथा।
हत्वा जीवांश्च यो भक्षेत् नित्यं नरकमाप्नुयात् ॥
यूपे बद्धा पशून् हत्वा यः कुर्य्यादक्तकर्द्दमम्।
तेन नैव प्राप्यते स्वर्गो नरकं केन गम्यते ॥
उपदेष्टा वधे हन्ता कर्त्ता धर्त्ता च विक्रयी।
उत्सर्गकर्त्ता जीवानां सर्व्वेषां नरकं भवेत् ॥
मधुस्थस्य वधायापि प्राणिनां क्रयविक्रये।
तथा दृष्ट्वा श्रुतायां कुम्भीपाको भवेद्ध्रुवम् ॥
स्वयं कामाशयो भूत्वा योऽज्ञानेन विमोहितः।
हन्यन्यान् विविधान् जीवान् कुर्य्यान्नन्नाम शङ्कर!॥
तद्राज्यवंशसम्पत्तिज्ञातिदारादिसम्पदाम्।
अचिराद्दे भवेन्नाशो मृतः स नरकं व्रजेत् ॥
देवयज्ञे पितृश्राद्धे तथा माङ्गल्यकर्म्मणि।
तस्यैव नरके वासो यः कुर्य्याज्जीवघातनम्॥"
तथा।
"महाजेन पशून् हत्वा यो भक्षेत् सह बन्धुभिः।
तद्रात्रलोमसंख्यान्दैरसियत्रवने वसेत्॥
आवयोरन्यदेवानां निन्दा च परकर्म्मणि।
यः संपोष्य पशून् हन्यात् सोऽन्धतामिस्रमाप्नुयात्॥
पशून् हत्वा तथा त्वां मां योऽर्चयेच्चामिशोत्सितैः।
तावत्तन्नरके वासो यावच्चन्द्रदिवाकरौ ॥
निर्व्वह्निभस्मतुल्यं तत् बहुदग्धेन यत् कृतम्।
यस्मिन् यज्ञे प्रभो शम्भो! जीवहत्या भवेद् ध्रुवम्॥
यज्ञमारभ्य चेत् शक्रः कुर्य्याद्वै पशुघातनम्।
स तदाधोगतिं गच्छेदिन्द्रत्वेनाथ का कथा ॥
आवयोः पूजनं मोहाद्ये कुर्व्वन्तीशशोणितैः।
पतन्ति कुम्भीपाके ते भवन्ति पशवः पुनः ॥
फलकामास्तु वेदोक्तैः पशोरालभनं मखे।
पुनस्तत्तत् फलं भुक्त्वा ये कुर्व्वन्ति पतन्त्यधः ॥
स्वर्गकामोऽश्वमेधं यः करोति निगमाज्ञया।
तद्भोगान्ते पतेद्भूयः स जन्मानि भवार्णवे ॥
ये हताः पशवो लोकैरिह स्वार्थेषु कोविदैः।
ते परत्र तु तान् हन्युस्तथा खड्गेन शङ्कर!॥
आत्मपुत्रकलत्रादिसुसम्पत्तिकुलेच्छया।
यो दुरात्मा पशून् हन्यादात्मादीन् घातयेत् स तु ॥
जानन्ति नो वेदपुराणतत्त्वं
ये कर्म्मठाः पण्डितमानयुक्ताः।
लोकाधमास्ते नरके पतन्ति
कुर्व्वन्ति मूर्खाः पशुघातनञ्चेत् ॥
येऽज्ञानिनो मन्दधियोऽकृतार्था
भवे पशुं घ्नन्ति न धर्म्मशास्त्रम्।
जानन्ति नाकं नरकं न मुक्तिं
गच्छन्ति घोरं नरकं नरास्ते ॥
श्रुत्वा अकार्य्यं न विदन्ति मूर्खा
न धर्म्ममार्गं परमार्थतत्त्वम्।
पापं न पुण्यं पशुघातका ये
पूयोदवासो भवतीह तेषाम् ॥
जीवानुकम्पां न विदन्ति मूढ़ा
भ्रान्ताश्च येऽसत्पथिनो न धर्म्मम्।
स्नात्वा भवे प्राणिवधं न कुर्य्यु-
स्ते यान्ति मर्त्त्याः खलु रौरवाख्यम्॥
ततस्तु खलु जन्तूनां घातनं नो करिष्यति।
शुद्धात्मा धर्म्मवान् ज्ञानी प्राणान्ते नैव मानवः ॥
यदीच्छेदात्मनः क्षेमं त्यक्त्वा ज्ञानं तदा नरः।
जीवान् कानपि नो हन्यात् सङ्कटापन्न एव चेत् ॥
सम्पत्तौ च विपत्तौ वा परलोकेच्छुकः पुमान्।
कदाचित् प्राणिनो हत्यां न कुर्य्यात्तत्त्ववित् सुधीः ॥
मानवो यः परत्रेह तर्त्तुमिच्छेत् सदाशिव!।
सर्व्वविष्णुमयत्वेन न कुर्य्यात् प्राणिनां वधम् ॥
वधाद्रचति यो मर्त्यो जीवान् तत्त्वज्ञधर्म्मवित्।
किं पुण्यं तस्य वक्ष्येऽहं ब्रह्माण्डं स तु रक्षति ॥
यो रक्षेत् घातनात् शम्भो! जीवमात्रं दयापरः।
कृष्णप्रियतमो नित्यं सर्व्वरक्षां करोति सः ॥
एकस्मिन् रक्षिते जीवे त्रैलोक्यं तेन रक्षितम्॥
वधात् शङ्कर! वै येन तस्माद्रक्षेन्न घातयेत्॥"
तथा।—
"पशुहिंसा विधिर्यत्र पुरारौ निगमे तथा।
उक्तो रजस्तमोभ्यां स केवलं तमसापि वा ॥
नरकस्वर्गसेवार्थं संसाराय प्रवर्त्तितः।
यतस्तत्कर्म्मभोगेन गमनागमनं भवेत्॥
सत्त्वेन सात्त्वतग्रन्थे स विधिर्नैव शङ्कर!।
प्रवृत्तिनो निवृत्तिस्तु यत्रापि सात्त्विकी क्रिया।
एवं नानाविधं कर्म्म पशोरालभनादिकम्।
कामाशयः फलाकाङ्क्षी कृत्वाज्ञानेन मानवः॥
पश्चाज्ज्ञानासिना छित्त्वा मान्यपाशं तामसं सदा।
यमभीतिहरं भक्त्या यदि गोविन्दमाश्रयेत्॥"
इति पाद्मोत्तरखण्डे। १०४।१०५। अध्यायौ।

व(ब)लिः, स्त्री, (वलति संवृणोतीति। वल संवरणे + इन्।) जरया भग्नचर्म्म। तत्पर्य्यायः। चर्म्मतरङ्गः २ त्वगूर्म्मिः ३ त्वक्तरङ्गः ४। इति राजनिर्घण्टः॥ लटरावयवः। (यथा, कुमारे। १। ३६।
"मध्येन सा वेदिविलग्नमध्या
वलित्रयं चारु बभार बाला॥")
गृहदारुप्रभेदः। इति मेदिनी। ले, ५॥ गुराङ्कुरः। यथा,—
"प्रज्ञात्मा मारुतः पित्तं कफो गुदबलित्रयम्।
सर्व्व एव प्रकुप्यन्ति गुदजानां समुद्भवे॥
तस्मादर्शांसि दुःखानि बहुव्याधिकराणि च।
सर्व्वदोषोपतापीनि प्रायः कृच्छ्रतमानि च॥
बाह्यायान्तु बलौ जातान्येकदोषोल्बणानि च।
अर्शांसि सुखसाध्यानि न चिरोत्पतितानि च॥
द्वन्द्वजानि द्वितीयायां बलौ यान्याश्रितान्यपि।
कृच्छ्रसाध्यानि तान्याहुः परिसंवत्सराणि च॥
सहजानि त्रिदोषाणि यानि चाभ्यन्तरे बलिम्।
आयन्तेऽर्शांसि संश्रित्य तान्यसाध्यानि निर्द्दिशेत्॥"
इति माधवकरः॥
(यथा च। "तत्र स्थूलान्त्रप्रतिबद्धमर्द्धपद्माकृतिं गुदमाकुञ्चयन्ति बलयस्तिस्रोऽध्यर्द्धाङ्गुलान्तरभूताः प्रवाहणी विसर्ज्जनी संवरणी चेति। चतुरङ्गुलावताः सर्व्वास्तिर्य्यगेकाङ्गुलोच्छ्रिताः। ग्रहावर्त्तनिभाश्चापि उपर्य्युपरि संस्थिताः। गजतालुनिभाश्चापि वर्णतः संप्रकीर्त्तिताः॥"
इति सुश्रुते निदानस्थाने द्वितीयेऽध्याये॥
गन्धकः। तत्पर्य्यायो यथा,—
"गन्धको गन्धिकश्चापि गन्धपाषाण इत्यपि।
सौगन्धिकश्च कथितो बलिर्नरसाय च॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

बलिका, स्त्री, (बलैव। बला + स्वार्थे कन्। टाप् अत इत्वञ्च।) अतिबला। इति राजनिर्घण्टः॥

बलिदानं, क्ली, (बलेः पूजोपकरणस्य देवतोद्देशेन संकल्पितच्छागादेर्या दानम्।) श्रीकृष्णपार्श्वदेभ्यस्तद्विद्वेदिनेवेद्यांशदानम्। यथा,—
अथ बलिदानम्।
"ततो यवनिकां विद्वानपसार्य्य यथाविधि।
विष्वक्सेनाय भगवन्नैवेद्यांशं निवेदयेत्॥
यथा च प्रपञ्चरात्रे श्रीनारदवचनम्।

विष्वक्सेनाय दातव्यं नैवेद्यं नक्तनांशकम्।
पादोदकं प्रमादघ्न लिङ्गे चण्डेश्वराय च ॥ * ॥
तद्विधिश्चोक्तः।
मुख्यादीशानतः पात्रान्नैवेद्यांशं समुद्धरेत्।
सर्व्वदेवमयरूपाय पराय परमेष्ठिने ॥
श्रीकण्ठसेनायुक्ताय विष्वक्सेनाय ते नमः।
इत्युक्त्वा श्रीहरेर्वामे तीर्थक्लिन्नं समर्पयेत्।
व्रतांगं वा महत्सांगमन्यथा निष्फलं भवेत् ॥
पश्चाच्च बलिरित्यादिप्राकाश्चार्य्य वैष्णवः।
सर्व्वेभ्यो वैष्णवेभ्यस्तं व्रतांगं विनिवेदयेत् ॥ ** ॥
तौ च श्लोकौ।
बलिर्विभीषणो भीमः कपिलो नारदोऽर्ज्जुनः।
प्रह्लादश्चाम्बरीषश्च वसुर्वायुसुतः शिवः ॥
विष्वक्सेनोद्धवाक्रूराः सनकाद्याः शुकादयः।
श्रीकण्ठस्य प्रसादोऽयं सर्व्वे गृह्णन्तु वैष्णवाः ॥ इति।
इदं यद्यपि युक्तेन दर्पणापगतं परम्।
तथापि भक्तवात्सल्यात् कृष्णस्याच्यापि सम्भवेत्।
अथ बलिदानमाहात्म्यम्। नारसिंहे।
ततस्तदन्नशेषेण पार्षदेभ्य समन्ततः।
पुण्याहतोयविमिश्रेण बलिं यस्तु प्रयच्छति ॥
बलिना वैष्णवेनाथ तृप्ताः सन्तो दिवौकसः।
शान्तिं तस्य प्रयच्छन्ति श्रियमारोग्यमेव च ॥"
इति श्रीहरिभक्तिविलासे ८ विलासः ॥
देवोद्देशेन यथाविधिपूजोपहारत्यागः। दुर्गादिदेवतोद्देशेन सङ्कल्पपूर्व्वकच्छागादिपशुघातनम्। यथा,—
"बलिदानेन मतं यत्रेच्छन् नृपान् नृप! ॥"
इति कालिकापुराणम् ॥
अस्य विधिनिषेधौ बलिशब्दे द्रष्टव्यौ ॥ * ॥
अथ बलिदानक्रमः। स्वयमुत्तराभिमुखः पूर्व्वाभिमुखं बलिं यथाभावयं सुन्दरं कृष्णपुष्टं माल्यं कण्ठे वेष्टयित्वा स्नातं समानीय क्षतासृक्तिलकः पठेत्।
"ॐ वाराही यमुना गङ्गा करतोया सरस्वती।
कावेरी चन्द्रभागा च सिन्धुर्भैरवसागरः ॥
पशुस्नानविधानाय सान्निध्यमिह कल्पय ॥"
इति तीर्थान्यावाह्य ॐ अग्निः पशुरासीत्तेनायजन्त स एतल्लोकमजयत्तस्मिन्नग्निः स ते लोको भविष्यति तं जेष्यसि पिबैना अपः। ॐ वायुः पशुरासीत्तेनायजन्त स एतल्लोकमजयत्तस्मिन् वायुः स ते लोको भविष्यति तं जेष्यसि पिबैना अपः। ॐ सूर्य्यः पशुरासीत्तेनायजन्त स एतल्लोकमजयत् तस्मिन् सूर्य्यः स ते लोको भविष्यति तं जेष्यसि पिबैना अपः। ॐ वाचस्ते मुञ्चामि प्राणांस्ते मुञ्चामि श्रोत्रस्ते मुञ्चामि मेढ्रस्ते मुञ्चामि पायुस्ते मुञ्चामि। मनस्त आप्यायतां वाक् त आप्यायतां प्राणस्त आप्यायतां चक्षुस्त आप्यायतां श्रोत्रस्त आप्यायतां यत्ते क्रूरं यदा स्थितं तत्त आप्यायतां तत्ते निष्टायतां नमस्ते मुञ्चतु नमस्तेभ्यः स्वाहा। इति मन्त्रैः स्नापयित्वा ॐ मेधाकारस्तस्मात्पशुं बध्नाय बध्नाय मद्भक्तायत्वं पशुं बध्नाय बध्नाय ब्रह्माण्डखण्डरूपस्तस्मै पशुं बध्नाय बध्नाय हूं फट् स्वाहा ॐ ह्रां ह्रीं ह्रूं चां चण्डिकायै इमं पशुं प्रोक्षामि स्वाहा। इति प्रोक्षणम्। ततः सद्भक्तायत्वं पशुं मोचं कुरु कुरु स्वाहेति मोचं कृत्वा चण्डेति ललाटे सिन्दूरं दत्त्वा ॐ छागपशवे नम इति पाद्यादिकं दत्त्वा धनदाधिपतये ॐ अग्नये नमः धनसम्पदानीयार्घे ह्रीं दुर्गायै नमः इति पुष्पं दत्त्वा पशोरङ्गदेवताः पूजयेत्। यथा, शिरसि ॐ रुधिरवदनायै नमः ललाटे ॐ घ्राङ्गिण्यै नमः भ्रूमध्ये ॐ भृङ्गायै नमः चक्षुषोः ॐ चित्रेचायै नमः कर्णयोः ॐ पार्व्वत्यै नमः घ्राणे ॐ गौर्य्यै नमः चिबुके ॐ चण्डिकायै नमः दन्तपङ्क्तौ ॐ उग्रचण्डिकायै नमः जिह्वायां ॐ चण्डचण्टायै नमः मुखे ॐ विरूपाक्षायै नमः ग्रीवायां ॐ चण्डायै नमः। पृष्ठे ॐ महाभैरव्यै नमः उदरे ॐ वैष्णव्यै नमः चतुष्पदे ॐ चण्डप्रियायै नमः पार्श्वयोः ॐ सर्व्वेश्वर्य्यै नमः कटिदेशे ॐ विरूपाक्षायै नमः खुरायै ॐ कौशिक्यै नमः लाङ्गूले ॐ प्रचण्डिन्यै नमः सर्व्वाङ्गेषु पञ्चदिक्षष्टदेवताभ्यो नमः। इति संपूज्य उत्तरेण। विष्णुः ॐ तत् सदद्यामुके मासि शुक्ले पक्षे अमुकतिथौ वार्षिकशरत्कालीनदुर्गामहोत्सवे अमुकगोत्रस्य श्रीअमुकस्य दुर्गाप्रीतिकामनया दुर्गादेव्यै इमं पशुं वह्निदैवतं तुभ्यमहं घातयिष्यामि इत्युत्सृज्य कृताञ्जलिः पठेत्।
"ॐ छाग! त्वं बलिरूपेण मम भाग्याद्उपस्थितः।
प्रणमामि ततः सर्व्वरूपिणं बलिरूपिणम् ॥
यज्ञार्थे पशवः सृष्टाः स्वयमेव स्वयम्भुवा।
अतस्त्वां घातयिष्यामि तस्माद्यज्ञे वधोऽवधः ॥
पशुयोनिप्रसूतोऽसि पूजाहोमादिकर्म्मसु।
तुष्टा भवतु सा देवी सरक्तपिशितेक्षणा ॥
चण्डिकाप्रीतिदानेन दातुरायुर्विनाशनः।
चामुण्डाबलिरूपाय बले। तुभ्यं नमोऽस्तु ते ॥"
ततः "पशुपाशाय विद्महे शिरश्छेदाय धीमहि।
तन्नः पशुः प्रचोदयात्।" इति कर्णे जपेत्।
ततः खड्गमानीय ह्रीं इति बीजाक्षरं लिखित्वा धारयेत्।
"कालं शिवाकपालिञ्च कालरात्रिस्वरूपिणम्।
उग्रं रक्तास्यनयनं रक्तमाल्यानुलेपनम् ॥
रक्ताम्बरधरञ्चैव पाशहस्तं कुटुम्बिनम्।
पिबमानञ्च रुधिरं भुञ्जानं क्रव्यसंहतिम् ॥"
एवं खड्गं ध्यात्वा गृहीत्वा,
"ॐ रसनात्वं चण्डिकायाः सुरलोकप्रसाधकः।"
इत्यभिमन्त्र्य ऐं ह्रीं खड्गाय नमः इति पाद्यादिभिः संपूज्य पुनर्मुष्टौ ॐ महादेवाय नमः। धारे ॐ यमाय नमः। अग्रे ॐ ब्रह्मणे नमः।
"ॐ त्वमिविघ्ननः खड्गस्त्वीक्षणधारो दुरासदः।
श्रीमतो विजयस्यैव धर्म्मपाल! नमोऽस्तु ते ॥
इत्यष्टौ तव नामानि मयमुक्तानि वेधसा।
नक्षत्रं कृत्तिका तुभ्यं गुरुर्देवो महेश्वरः ॥
शिरस्यस्य शरीरस्य धाता देवो जनार्द्दनः।
पिता पितामहो देवस्त्वं मां पालय सर्व्वदा ॥
नीलजीमूतसङ्काशस्तीक्ष्णदंष्ट्रः कृशोदरः।
भावशुद्धो मयैवास्तु व्रतितेजास्तथैव च ॥"
ॐ तीक्ष्णदंष्ट्राय नम इति पुष्पं दत्त्वा त्रां ह्रीं फट् इति खड्गमादाय ॐ कालि कालि व्रजेश्वरि लौहदण्डायै नम इति जपित्वा छागस्य ग्रीवायां खड्ग! त्वं शीघ्रं छिन्धि छिन्धि फट फट् स्वाहा। इति पूर्व्वाभिमुखं बलिं स्वयमुत्तराभिमुखः उत्तराभिमुखं बलिं स्वयं पूर्व्वाभिमुखो वा सकृत्प्रहारेण छिन्द्यात्। ततो रक्तमयादिपात्रे रुधिरमादाय चतुर्भागं कृत्वा ऐशान्यां ॐ विदारिकायै नमः आग्नेय्यां ॐ पूतनायै नमः नैर्ऋत्यां ॐ पापराक्षस्यै नमः वायव्यां ॐ कौशिक्यै नमः। ॐ तत् सदद्यामुके मासि अमुकपक्षेऽमुकतिथौ वार्षिकशरत्कालीनदुर्गामहोत्सवे अमुकगोत्रस्य श्रीअमुकस्य दशवर्षावच्छिन्नश्रीदुर्गाप्रीतिकामः श्रीदुर्गादेव्यै छागपशुरुधिरं दास्यामि इति सङ्कल्प्य।
ॐ कालि कालि महाकालि कालिके पापनाशिनि।
शोणितञ्च बलिं गृह्ण वरदे वामलोचने ॥"
एष रुधिरबलिः ॐ दत्तयज्ञेति मन्त्रेण दद्यात्। ततः ऐं ह्रीं श्रीं कौशिकि रुधिरेणाप्यायतामिति वदेत्। ततः शिरसि ज्वलद्भां दत्त्वा ॐ तत् सदद्यामुके मास्यमुकपक्षेऽमुकतिथौ वार्षिकशरत्कालीनदुर्गामहोत्सवे अमुकगोत्रस्य श्रीअमुकस्य श्रीमद्दुर्गादर्शनाभिवन्दनस्पर्शनाभिपूजनस्मरणनतिपूर्व्वपूर्व्वाधिकपुण्यप्राप्तिकामो दुर्गादेव्यै सप्रदीपच्छागपशुशीर्षं दास्यामीति सङ्कल्प्य एष सप्रदीपच्छागपशुशीर्षबलिः ह्रीं दुर्गायै नम इत्युत्सृजेत्।
"ॐ जय त्वं सर्व्वभूतेषु सर्व्वभूतसमाश्रिते।
रक्ष मां निजभूतेभ्यो बलिं गृह्ण नमोस्तु ते ॥"
ततः खड्गरुधिरमादाय।
"ॐ यं यं स्पृशामि पादेन यं यं पश्यामि चक्षुषा।
स स मे वश्यतां यातु यदि शक्रसमो भवेत् ॥"
इति ललाटे तिलकं कुर्य्यात्। मेषघाते तु मेषेत्यूहेन योज्यम्। मेषरुधिरदाने तु एकवर्षावच्छिन्नदुर्गाप्रीतिकामः। प्रभूतबलिदाने तु दश वा विंश वा त्रिंश वा त्रयः कृत्वा संप्रोक्ष्य नक्तपशुभ्यो नम इति संपूज्य छाग त्वमित्येकवचनानुरोधेन प्रयोगः। पश्चात्तरोक्तवत्। वाक्ये तु एतान् पशून् तुभ्यमहं घातयिष्ये। रुधिरदाने तु एतान् रुधिरबलीन् दास्यामि इति सङ्कल्प्य प्रत्येकेन दद्यात् शीर्षदानमप्येवम्। ततो मुक्तमन्त्रं यथाशक्ति जप्त्वा समर्प्य परमेश्वरीति तद्विष्णुरुद्रोक्तपद्धतिः ॥ * ॥

अथ तान्त्रिकबलिदानविधिः। "तत्र मूलमन्त्रेण पशुं देवाग्रे संस्थाप्य वक्ष्यमाणविधिना उत्सृजेत्। तदुक्तं यामले।

'देवाग्रे स्थापयित्वा तु पशुं सत्त्वसमन्वितम्।
मन्त्रसर्वस्वविद्येयात् भूतानुत्सारयेत्ततः॥'

अर्घोदकेन संप्रोक्ष्य अस्त्रेण संरक्ष्य कवचेनावगुण्ठ्य धेनुमुद्रयाऽमृतीकृत्य गन्धपुष्पाद्यैः पशुं संपूज्य मूलेन सप्तधा तत्त्वमुद्रया प्रोक्षणं कृत्वा कर्णे इमं मन्त्रं पठेत्। पशुपाशाय विद्महे विश्वकर्म्मणे धीमहि तन्नो जीवः प्रचोदयात्। ततो ह्रीं कालि कालि वज्रेश्वरि सौहृदखड्गाय नमः इति मन्त्रेण खड्गं पूजयेत्। ततः खड्गास्त्रमथमूलं क्रमेण पूजयेत्। यथा ह्रूं वागीश्वरीवल्लभाभ्यां नमः। ह्रूं लक्ष्मीनारायणाभ्यां नमः। ह्रूं उमामहेश्वराभ्यां नमः। ततो ब्रह्मविष्णुशिवशक्तियुक्ताय खड्गाय नमः। इति सर्व्वत्र पूजयित्वा प्रणमेत्।

'खड्ग गाय खरशाणाय शक्तिकार्य्यार्थतत्पर!।
पशुच्छेदक्षया शीघ्रं खड्गनाथ! नमोऽस्तु ते॥'

ततो महाबाक्यं अमुकदेवताप्रीतिकामः अमुकदेव्यै इमं पशुं तुभ्यमहं संप्रददे। ततो निवेदयेत्।

'यथोक्तेन विधानेन तुभ्यमस्तु समर्पितम्॥'

ततो बलिं छिन्द्यात्। ततो रुधिरं समांसं देव्यै दद्यात्। ततोऽवशिष्टं वटुकादिभ्यो बलिं दद्यात् यथा ह्रूं वां वटुकाय नमः। इति गन्धादिभिः संपूज्य पूर्ब्ववन्मन्त्रेण वायव्ये बलिं दद्यात्। ह्रूं यां योगिनीभ्यो नमः इति संपूज्य पूर्ब्ववन्मन्त्रेण ईशाने बलिं दद्यात्। ह्रूं क्षां क्षेत्रपालाय नमः इति संपूज्य पूर्ब्ववन्मन्त्रेण नैर्ऋत्यां बलिं दद्यात्। ह्रूं गां गणपतये नमः इति संपूज्य पूर्ब्ववन्मन्त्रेण आग्नेय्यां गणेशाय बलिं दद्यात्।" इति तन्त्रसारः॥ * ॥ (ननु "मा हिंस्यात् सर्व्वाभूतानि" "अहिंसा परमो धर्मः।" इत्यादि वचनात् कर्त्तव्येव सर्व्वथा हिंसा कथं तर्हि हिंसाप्रवृत्तिः शुभाहष्टजनकत्वेन शास्त्रोपदिष्टा अतोऽवोच्यते। अथ वैधहिंसाविचारः। 'मा हिंस्यात् सर्व्वाभूतानि' इत्यत्र सर्व्वशब्दस्य व्यापकार्थपरतया स्तदधिमनुसृत्य 'वायव्यं श्वेतमालभेत' इत्यादि विधेर्विषयाप्राप्तेरनर्थत्वं प्रसङ्गात् रुद्धविषयत्व सर्व्वाः सर्व्वाणि छन्दसि वत्यनेन सत्यद्विहम्। यद्यपि नागा दर्शनटीकाकृद्भिर्वाचस्पतिमिश्रैस्तत्त्वकौमुद्यामभिहितं न च 'मा हिंस्यात् सर्व्वाभूतानि' इति सामान्यशास्त्रं विशेषशास्त्रेण 'अग्नीषोमीय पशुमालभेत' इत्यनेन बाध्येत इति वाच्यं विरोधाभावात्। विरोधे हि बलीयसा दुर्ब्बलं बाध्यते। न चास्ति विरोधः भिन्नविषयत्वात्। तथाहि 'मा हिंस्यात्' इति निषेधेन हिंसाया अनर्थहेतुभावो ज्ञाप्यते न पुनरकर्त्तव्यत्वमपि। न चानर्थहेतुत्वकर्त्तृप्रकारकत्वयोः कश्चिदस्ति विरोधः। हिंसा हि पुरुषस्य दोषमावक्ष्यति कृतोचोपकरिष्यतीत्यन्तेन तदपि सांख्यनये। मीमांसकमते तु विरोध एव तथाहि गुरुनये न खलु सर्व्वभूतहिंसाभावविषयकं कार्य्यं इति निषेधविध्यर्थस्य बाधं विना अग्नीषोमीयपश्वालम्भनविषयकं कार्य्यमिति भावविध्यर्थ उपपद्यते। भट्टनये तु अङ्गे यथा तथास्तु। न च सुखपशुयागे पुरुषार्थैकपशुहिंसनस्यार्थसाधनत्वं अनर्थसाधनत्वञ्चोपपद्यते विरोधात्। वस्तुतस्तु अङ्गेऽपि विरोधोऽस्त्येव कृतो विधेरेष स्वभावो यः स्वविषयस्य साक्षात् परम्परया वा पुरुषार्थसाधनत्वमवगमयति अन्यथाङ्गानां प्रधानोपकारकत्वमपि नाङ्गीक्रियेत। अर्थसाधनत्वं बलवदनिष्टाननुबन्धीष्टसाधनत्वं अनर्थसाधनत्वं बलवदनिष्टसाधनत्वं न चानयोरेकत्र समावेश इति। अतएवोक्तं 'तस्मादृत्विजे वधोऽवधः' इति। नन्वेवं 'श्येनेनाभिचरन् यजेत' इत्यत्र श्येनस्य शत्रुवधरूपेष्टसाधनत्वमवगतं 'अभिचारो मूलकर्म्म च।' ११।६३। इति मनुना उपपातकगणमध्ये पाठात् अनिष्टसाधनत्वमवगतम्। तदेतत्कथमुपपद्यतामिति चैवमेवं 'आततायिनमायान्तं हन्यादेवाविचारयन्।' ८। ३५०। इत्येकवाक्यतया आततायिस्थले इष्टसाधनत्वं अनाततायिस्थले तूपपातकत्वेन बलवदनिष्टसाधनत्वमित्यविरोध एव॥" इति तिथितत्त्वम्॥)

व(ब)लिध्वंसी, [न्] पुं, (बलिं तदाख्यया प्रसिद्धं दैत्यविशेषं ध्वंसयतीति। बलि+ध्वंस+णिनि। वामनरूपेण बलेः सर्व्वस्वग्रहणादस्य तथात्वम्। यद्वा, बलिना पूजोपहारेण अविद्यां ध्वंसयितुं शीलमस्य।) विष्णुः। इत्यमरः। १। १। २१॥ (भगवता वामनरूपधरेण बलिकृतयज्ञगमनपूर्ब्वकं तत्सकाशात् सर्व्वस्वं गृहीतमित्येतत्कथा बलिशब्दे द्रष्टव्या॥)

व(ब)लिन्, त्रि, (बलिः शिथिलं चर्म्म अस्यास्तीति। बलि+वामादित्वात्नः।) बलिभः। जरया शिथचर्म्मयुक्तः। इत्यमरः। २। ६। ४५॥

व(ब)लिनन्दनः, पुं,(बलेरसुरदाख्यया प्रसिद्धस्य दैत्यस्य नन्दनः पुत्रः।) बाणासुरः। इति शब्दरत्नावली॥ (अयं खलु यादवश्रेष्ठेन भगवता कृष्णेन सह युद्धमकरोत्। तपःप्रतापवशीकृतो महादेवश्च स्वयमस्य दौवारिकत्वमकार। तद्विवरणादिकं हरिवंशे १७३ अध्यायमारभ्य १८३ अध्यायपर्य्यन्तं द्रष्टव्यम्॥ बलेः ययातिवंशीयस्य राज्ञः नन्दनः चेत्रजः पुत्रः इति व्युत्पत्त्या अङ्गवङ्गकलिङ्गाद्याः। यदुक्तं, विष्णुपुराणे। ४। १८। १। "दैमात् सुतपाक्तस्मात् बलिः यस्य किल दीर्घतमसा अङ्गवङ्गकलिङ्गसुहृपुण्ड्राणां वाक्येय क्षत्रमजनयत॥")

व(ब)लिनी, स्त्री, (बलं देवत्वेनास्त्यस्या इति इनिः। ङीप्।) वाराहकः। इति शब्दचन्द्रिका॥

व(ब)लिपुष्टः, पुं (वैश्यदेवेन बलिना पुष्टः।) काकः। इत्यमरः। २। ५। २०॥

व(ब)लिपोदकी, स्त्री, (बलेः पोदकी उपोदकी।) उपोदकी। इति राजनिर्घण्टः॥

व(ब)लिप्रियः, पुं, (बलिमुपहारं प्रीयातीति। बलि+प्री+क।) लोध्रवृक्षः। इति शब्दचन्द्रिका॥ (बलिर्वैश्वदेवबलिः प्रियो यस्य इति व्युत्पत्त्या काकः। उपहारप्रिये वाच्यलिङ्गः॥)

व(ब)लिभः, त्रि, (बलिश्चर्म्मसंकोचोऽस्यास्येति। बलि+"तुन्दिवलिवटेर्भः।" ५। २। १३६ इति भः।) वलिनः। इत्यमरः। २। ६। ४५॥

व(ब)लिभुक्, [ज्] पुं, (बलिं वैश्वदेवबलिं गृहस्थदत्तद्रव्यं वा भुङ्क्ते इति। भुज्+क्विप्।) काकः। इत्यमरः। २। ५। २०॥ (यथा, भागवते। १। १८। ३३।

"अहो अधर्म्मः पालानां पीव्नां बलिभुजामिव॥",

व(ब)लिमन्दिरं, क्ली, (बलेः स्वनामख्यातस्य राज्ञो मन्दिरमालयः। बलिर्हि वामनरूपाय विष्णवे सर्व्वस्वं दत्त्वा प्रह्लादेन सह पातालं निवसति इति पौराणिकी कथात्रानुसन्धेया।) अधोलोकः। पातालम्। इति शब्दमाला॥

व(ब)लिमान्, [मत्] त्रि, (बलिश्चर्म्म कोचोऽस्यास्येति। बलि+मतुप्।) वलिनः। जरया शिथचर्म्मयुक्तः। इत्यमरटीका॥ (बलिः पूजोपहारं विद्यतेऽस्येति व्युत्पत्त्या उपहारविशिष्टः। यथा, रघुः। १४। १५।

"बाष्पायमाणो बलिमग्निकेत-
मालेख्यशेषस्य पितुर्विवेश॥")

व(ब)लिमुखः, पुं, (बलिर्मुखे यस्य। यद्वा, बलिश्चर्म्मसङ्कोचस्तद्युक्तं मुखं यस्य।) वानरः। इत्यमरटीकायां रमानाथः॥

व(ब)लिष्ठः, पुं, (अतिशयेन बलवान्+बलवत्+इष्ठन्। विन्मतोर्लुगिति मतुपो लुक्। प्रशस्तभारवाहकत्वादस्य तथात्वम्।) उष्ट्रः। इति राजनिर्घण्टः॥ (धर्म्मसावर्णिकमन्वन्तरान्तर्गत ऋषिभेदः। यथा, मार्कण्डेये। ९४। १६।

"ऋविर्य्यांश्च बलिष्ठश्च ऋष्टिरन्यस्तथारुणिः।
निश्चरश्चानघश्चैव विशिष्टान्यो महामुनिः॥
सप्तर्षयोऽन्तरे तस्मिन्नमिदेवस्य सप्तमः॥"

रलयोरैक्यात् क्वचित् वरिष्ठश्चेति पाठो दृश्यते॥)

व(ब)लिष्ठः, त्रि, (अतिशयेन बलवान्। बलवत्+इष्ठन्। विन्मतोर्लुगिति मतुपो लुक्।) अतिशयबलवान्। यथा,—

"प्रायश्चित्तं विना पूता स्वमेव शुद्धमागमा।
अकामा या बलिष्ठेन न स्त्री शारीरेण दुष्यति॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५५ अध्यायः॥ बलिष्ठा यथा। वायुः १ विष्णुः २ गरुडः ३ हनूमान् ४ यमः ५ मघवराट्ः ६ शरभः ७ सत्यतिज्ञा ८ गजः ९ पृथुराजः १० बलरामः ११ वालो १२ बलिः १३ भीमः १४ सती १५ भीमः १६ पुराकृतम् १७। इति कविकल्पलता॥

वल्गिष्णुः, त्रि, (वल्गते वध्यते इति । वल + इष्णुच् ।) अयमानिनः । इत्युणादिकोषः ॥

व(ब)लिच्छ, [न्] क्ली, (वलेश्छदाख्यदलस्य सङ्घ निकेतनम् ।) रसातलम् । इत्यमरः ।१।८। १ ॥

व(ब)लिहा, [न्] पुं, (वलिं हन्ति इति । वलि + हन् + क्विप् । वामनरूपेण वलेः सर्व्वस्वग्रहणादस्य तथात्वम् ।) विष्णुः । इति हेमचन्द्रः ॥

व(ब)ली, [न्] पुं, (वलमस्यास्तीति । वल + "वलादिभ्यो मतुवन्यतरस्याम्" ५ । २ । १३६ । इति पक्षे इनिः ।) वलरामः । इति शब्दरत्नावली ॥ उष्ट्रः । महिषः । वृषभः । शूकरः । कपिः । कुन्दवृक्षः । इति जटाधरः ॥ माघः । (खनामख्यातो वत्सप्रीपुत्रः । यथा, मार्कण्डेये । ११८ । २ ।

"वली वलाकचरुश्च प्रचण्डश्च सुविक्रमः ॥")

वलयुक्ते, त्रि । तत्पर्य्यायः । अंशुलः २ निर्द्दिग्धः ३ मांसलः ४ उपचितः ५ । इति हेमचन्द्रः । ३ । ११२ ॥ (यथा, मार्कण्डेये । ३४ । ८६ ।

"सार्द्धं न वलिभिः कुर्य्यान्न च न्यूनैर्न निन्दितैः ॥")

व(ब)ली, स्त्री, (वलि + पक्षे ङीष् ।) वलिः । जरया शरीरधर्म्मे । इत्यमरटीकायां भरतः ॥ (यथा,—

"कृष्णं सुचूर्णितं कृत्वा घृतमाक्षिकसंयुतम् ।
भक्षयात् स्वप्नवेलायां वलीपलितनाशनम् ॥"

इति वैद्यकभैषज्यधन्वन्तरीरसायनाधिकारे ॥)

व(ब)लीकं, क्ली, (वलति संवृणोतीति । वल संवरणे + "अलीकादयश्च ।" उणा० ४ । २५ । इति कीकन् ।) पटलप्रान्तम् । इत्यमरः । २ । २ । १४ ॥ छाँपि इति भाषा ॥ (यथा, माघे । ३ । ५३ ।

"यस्यामसेवन्त नमद्वलीकाः
स्वसं वधूभिर्वलभीर्युवानः ॥")

व(ब)लीमुखः, पुं, (वलीयुक्तं मुखं यस्य ।) वानरः । इत्यमरः । २ । ५ । ३ ॥

व(ब)लीयान्, [स्] त्रि, (अतिशयेन वलवान् । वलवत् + ईयसुन् ।) अतिशयवलयुक्तः । यथा,—

"आगमादेशयोर्मध्ये वलीयानागमो विधिः ॥"

इति दुर्गादासटीका ॥

व(ब)लीवर्द्दः, पुं, (ईर्ल्लक्ष्मीः वरं वरणम् । वर् ईप्सायां क्विप् । ईश्च वर् च ईवरौ तौ ददातीति ईवर्द्दः । वलमस्यास्तीति वली । ततो वली च ईवर्द्दश्च इति ।) वृषः । इत्यमरः । २ । ९ । ५६ ॥ (यथा, कथासरित्सागरे । २० । २७ ।

"संयोज्याथ वलीवर्द्दयुगं रचितमङ्गलः ।
कृत्वा वलिं तस्य तरोरारेभे कर्षणञ्च सः ॥")

तीर्थवाचायां तदारूढस्य दोषो यथा,—

"वलीवर्द्दसमारूढः शम्भु तस्यापि यत् फलम् ।
नरके वसते घोरे गवां कोटिं हि दारुणे ॥
सलिलञ्च न गृह्णन्ति पितरस्तस्य देहिनः ॥"

इति मात्स्ये ८८ अध्यायः ॥

व(ब)ल्यं, क्ली, (वलाय हितम् । वल + "वृद्धिशरीरामयजीवनमूलविभुजादिभ्यः ।" ४ । ४ । ८० । इति यः ।) प्रधानधातुः । शुक्रम् । वलकरे, त्रि । इति मेदिनी । ये, ४० ॥ (यथा,—

"कट्वम्लवीर्य्यो लघुगो हितश्च
स्निग्धो गुरुस्त्वाढ्यरसोऽथ वल्यः ॥"

इति हारीते कल्पस्थाने तृतीयेऽध्याये ॥)

वल्यः, पुं, (वलाय शुक्राय हितः । वल + यः ।) वृद्धभिक्षुकः । इति त्रिकाण्डशेषः ॥

वल्या, स्त्री, (वलाय हिता । वल + "वृञ्हिशूस्वृ कठेति ।" ४ । २ । ८० । इति यः । ततष्टाप् ।) अतिवला । अश्वगन्धा । शिम्बीवृक्षभेदः । प्रसारिणी । इति राजनिर्घण्टः ॥

वल्ह, ड लृतौ । हिंसायाम् । दाने । वाचि । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट् । अन्तःस्थतृतीयोपधः । ङ, वल्हते । इति दुर्गादासः ॥

वल्कयणी } स्त्री, (वल्कयस्तरुरुणवतुरः । सोऽस्ति
वल्कयिणी } अस्याः । वल्कय + मादित्वात् ङीषः । पक्षे इनिः । षट्कुप्रादिति णत्वम् । ततो ङीष् ।) चिरप्रसूता गौः । इत्यमरभरतौ ॥ (यथा, सिद्धान्तकौमुद्याम् । २ । १ । ६५ ।

"गोटायुवतिस्तोककतिपयगृष्टिधेनुवशावेहद्वष्कयण्यौप्रवक्तृश्रोत्रियाध्यापकधूर्त्तेर्जातिः ॥")

वह्, त्रि, (वहते इति । वह्नि वहौ + "सहिवहोरोदवर्णस्य ।" उणा० १ । ३० । इति कुर्नलोपश्च ।) त्र्यादिसंख्या ॥ अनेकम् । विपुलः । इति मेदिनी । हे, ६ ॥ तत्पर्य्यायः । प्रभूतम् २ प्रचुरम् ३ प्राज्यम् ४ अदभ्रम् ५ वहुलम् ६ पुरुहम् ७ पुरु ८ भूयिष्ठम् ९ स्फिरम् १० भूयः ११ भूरि १२ । इत्यमरः । ३ । १ । ९३ ॥ तद्वैदिकपर्य्यायः । उरु १ तुवि २ पुरु ३ भूरि ४ भूयस् ५ विश्वम् ६ परिणसा ७ यावत् ८ शतम् ९ सहस्रम् १० सलिलम् ११ कुवित् १२ । इति द्वादश वहुनामानि । इति वेदनिघण्टौ । ३ । १ ॥ (यथा, मनुः । ७ । ८६ ।

"अल्पं वा वहु वाप्येषां दानस्यावाप्यते फलम् ॥"

तथा, तत्रैव । ८ । ७७ ।

"एकोऽलुब्धस्तु साक्षी स्याद्दश्यः सुखोऽपि न स्त्रियः ॥"

वहुमतम् । वहुमानम् । यथा, रघुः । १२ । ८६ ।

"रामस्तुलितकैलासमरातिं वहुमन्यत ॥")

वहुकः, पुं, (वहु + संज्ञायां कन् ।) कर्कटः । अर्कः । दात्यूहः । जलखातकः । इति मेदिनी । के, १२६ ॥ ("संख्यायाः अतिशदन्तायाः कन् ।" ५ । १ । २२ । इति कन् । वहुभिः क्रीते, त्रि ।)

वहुकण्टकः, पुं, (वहूनि कण्टकान्यस्य ।) क्षुद्रगोक्षुरः । पवासः । हिन्तालः । इति राजनिर्घण्टः ॥

वहुकण्टका, स्त्री, (वहूनि कण्टकान्यस्याः ।) अग्निदमनी । इति राजनिर्घण्टः ॥

वहुकण्टा, स्त्री, (वहवः कण्टाः कण्टकानि यस्याः ।) कण्टकारी । इति राजनिर्घण्टः ॥ (विवृतिरस्याः कण्टकारीशब्दे ज्ञातव्या ॥)

वहुकन्दः, पुं, (वहवः कन्दा यस्य ।) सूरणः । इति राजनिर्घण्टः ॥

वहुकन्दा, स्त्री, (वहवः कन्दा यस्याः ।) कर्कटी । इति राजनिर्घण्टः ॥

वहुकरः, पुं, (वहु कार्य्यं करोतीति । वहु + कृ + "दिवाविभानिशाप्रभेति ।" ३ । २ । २१ । इति टः ।) उष्ट्रः । इति त्रिकाण्डशेषः ॥

वहुकरः, त्रि, (वहु करोति सुवं संमार्ष्टि इति । वहु + कृ + टः ।) मार्जनकारी । तत्पर्य्यायः । खलपूः २ । इत्यमरः । ३ । १ । १७ ॥ भूमिसम्मार्ज्जकः ३ । इति शब्दरत्नावली ॥ वहुकार्य्यकर्त्ता । यथा, भट्टिः । ५ । ७८ ।

"निहन्ता वैरकाराणां सतां वहुकरः सदा ।
पारश्वधिकरामस्य शक्तेरन्तकरो रणे ॥"

वहुकरी, स्त्री, (वहु करोति सुवं संमार्ष्टि इति । वहु + कृ + टः । ङीष् ।) सम्मार्ज्जनी । इति हेमचन्द्रः । ४ । ८२ ॥

वहुकर्णिका, स्त्री, (वहवः कर्णा इव पत्राणि यस्याः ।) आखुकर्णी । इति राजनिर्घण्टः ॥

वहुकूर्चः, पुं, (वहूनि कूर्चानि यस्य ।) मधुनालिकेरिकः । इति राजनिर्घण्टः ॥

वहुगन्धं, क्ली, (वहुर्गन्धो यस्मिन् ।) त्वचम् । इति राजनिर्घण्टः ॥ (दारचिनी इति भाषा ॥)

वहुगन्धः, पुं, (वहुर्गन्धो यस्मिन् ।) कुन्दरुकः । इति राजनिर्घण्टः ॥ (उग्रगन्धे, त्रि ॥)

वहुगन्धदा, स्त्री, (वहुगन्धं ददाति या । वहुगन्ध + दा + कः ।) कस्तूरी । इति राजनिर्घण्टः ॥ (गुणादयोऽस्याः कस्तूरीशब्दे ज्ञातव्याः ॥)

वहुगन्धा, स्त्री, (वहुर्गन्धो यस्याम् ।) चम्पकलिः । यूथिका । क्षुद्रजीरकः । इति राजनिर्घण्टः ॥

वहुगर्ह्यवाक्, [च्] त्रि, (वहु गर्ह्या वहु निन्दिता वाग् यस्य ।) कुत्सितवहुवादी । इत्यमरः ॥

वहुग्रन्थिः, पुं, (वहवो ग्रन्थयो यस्य ।) झाडुकः । इति शब्दचन्द्रिका ॥ (झाउ इति भाषा ॥)

वहुच्छिन्ना, स्त्री, (वहु यथा स्यात्तथा छिद्यते स्मेति । वहु + छिद् + क्तः ।) कन्दगुडूची । इति राजनिर्घण्टः ॥

वहुतः, [स्] अ, (वहुभ्य इत्यर्थे वहुशब्दात् "पञ्चम्यास्तसिल् ।" ५ । ३ । ७ । इति तसिल्प्रत्ययः ॥) वहुभ्यः ॥

वहुतन्त्रिः, त्रि, (वहवस्तन्त्रयो यस्य ।) वहुतन्त्रविशिष्टः । यथा । वहुतन्त्रिः कायः । वहुतन्त्री ग्रीवा । वहुतन्त्रि गात्रम् । यथा च । विभज्य नक्तं दिवमस्ततन्त्रिरिति किराते हस्वेकारान्ततन्त्रिशब्दस्य प्रयोगः । इति संक्षिप्तसारः ॥

वहुतन्त्रीः, त्रि, (वहवस्तन्त्रयो यस्मिन् ।) वहुतन्त्रविशिष्टः । यथा । वहुतन्त्रीग्रीवा वहुतन्त्रीधर्मनी । इति सिद्धान्तकौमुदी ॥ एवं वहुतन्त्रीः कायः । वहुतन्त्रि गात्रम् ॥

वहुतन्त्रीकः, त्रि, (वहुतन्त्री + स्वार्थे कन् ।) वहुतन्त्रविशिष्टः । यथा । वहुतन्त्रीका ग्रीवा ।

इति सिद्धान्तकौमुदी ॥ एवं वहुतन्त्रीकः षटः । वहुतन्त्रीकं वस्त्रम् ॥

वहुतरकणिशः, पुं. (वहुतराणि कणिशानि धान्यशीर्षाणि यस्य ।) रागीधान्यम् । इति राजनिर्घण्टः ॥

वहुता, स्त्री, वहूनां भावः । वहुशब्दात् तत्वौ भावे इति तप्रत्ययः ॥

वहुतिक्ता, स्त्री, (वहुस्तिक्तो रसो यस्याः ।) काकमाची । इति राजनिर्घण्टः ॥

वहुतिथः, त्रि, (वहु + "वहुपूगगणसङ्घस्य तिथुक्" । ५ । २ । ५२ । इति तिथुक् । सुग्धबोधमते "वहुगणपूगसंघातास्तिथट् तलोपश्च ।" ७ । ४२ । इति तिथट् ।) वहूनां पूरणः । इति व्याकरणम् ॥ (यथा, मार्कण्डेयपुराणे । २२ । १ ।

"ततः काले वहुतिथे गते राजा पुनः सुतम् ।
प्राह गच्छास्य विप्राणां त्राणाय चर मेदिनीम् ॥")

वहुच, व्य, (वहु + "सप्तम्यास्त्रल् ।" ५ । ३ । १० । इति त्रल् ।) वहुषु । इति सिद्धान्तकौमुदी ॥

वहुत्वं, क्ली, वहूनां भावः । वहुशब्दात् त्वप्रत्ययेन निष्पन्नम् ॥ (यथा, महाभारते । १ । ३५ । ४ ।

"वहुत्वान्नामधेयानि पन्नगानां तपोधन ! ॥")

वहुत्वक्, [च्] पुं. (वहवस्त्वचो यस्य ।) भूर्जवृक्षः । इति शब्दरत्नमाला ॥

वहुत्वक्कः, पुं, (वहुत्वगेव । वहुत्वच् + स्वार्थे कन् ।) भूर्जवृक्षः । इति हेमचन्द्रः । ४ । २१० ॥

वहुदण्डिकः, त्रि, (वहवो दण्डाः सन्त्यस्य । वहुदण्ड + ठन् ।) वहुदण्डविशिष्टः । यथा । वहुदण्डिका नगरी वहुदण्डिको ग्रामः । इति सिद्धान्तकौमुदी ॥

वहुदुग्धः, पुं, (वहूनि दुग्धानि व्यक्तावस्थायां यस्य । यद्वा, वहूनि दुग्धानीव शुक्लवस्तूनि यस्य ।) गोधूमः । इति राजनिर्घण्टः ॥

वहुदुग्धा, स्त्री. (वहु दुग्धं यस्याः ।) वहुक्षीरा गौः । तत्पर्य्यायः । यङ्गला २ । इति हेमचन्द्रः । ४ । ३३५ ॥ (खुरीवृक्षः । वहुदुग्धविशिष्टत्वात् ॥)

वहुदुग्धिका, स्त्री, (वहुदुग्धा + स्वार्थे कन् । टाप् । अत इत्वम् ।) खुरीवृक्षः । इति शब्दचन्द्रिका ॥

वहुधा, व्य, (वहु + "विभाषा गोर्वा विप्रकृष्टकाले ।" ५ । ४ । २० । इति धा ।) वहुप्रकारम् । इति व्याकरणम् ॥ (यथा, ऋग्वेदे । १ । १६४ । ४६ ।

"एकं सद्विप्रा वहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः ॥"

तथा, गीतायाम् । ६ । १५ ।

"एकत्वेन पृथक्त्वेन वहुधा विश्वतोमुखम् ॥"

"केचित्तु विष्णो सूर्यं सर्वान्तकं मां वहुधा मन्यन्तादिरूपेणोपासते ॥" इति तट्टीकायां श्रीधरस्वामी ॥)

वहुधारं, क्ली, (वहवो धारा यस्य ।) वज्रम् । इति राजनिर्घण्टः ॥

वहुनाडिकः, त्रि, (वहुनाडि + कन् ।) कायः । इति सिद्धान्तकौमुदी ॥

वहुनाड़ीकः, त्रि, (वह्व्यो नाड्यो यस्मिन् । वहुनाड़ी + कप् ।) दिवसः । इति संक्षिप्तसारः । स्तम्भः । इति सिद्धान्तकौमुदी ।

वहुनादः, पुं, (वहुर्महान् नादः शब्दो यस्य ।) शृङ्गः । इति राजनिर्घण्टः ॥

वहुपटुः, त्रि, ईषदूनः पटुः । इति व्याकरणम् ॥ वहुषु कर्म्मसु दक्षश्च ।

वहुपत्रं, क्ली. (वहूनि पत्राण्यस्य ।) अभ्रकम् । इति राजनिर्घण्टः ॥

वहुपत्रः, पुं, (वहूनि पत्राणि दलान्यस्य ।) पलाण्डुः । इति राजनिर्घण्टः ॥ अनेकपत्रयुक्ते, त्रि ॥

वहुपत्रा, स्त्री, (वहुपत्र + टाप् ।) तरुणीपुष्पम् । इति राजनिर्घण्टः ॥ (भूम्यामलकी । तत्पर्य्यायो यथा, —

"भूम्यामलकिका प्रोक्ता शिवा तामलकीति च ।
वहुपत्रा वहुफला वहुवीर्य्याऽम्भटापि च ॥")

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

वहुपत्रिका, (वहुपत्रा + संज्ञायां स्वार्थे वा कन् । टापि अत इत्वम् ।) भूम्यामलकी । मेधिका । (अस्याः पर्य्यायो यथा,

"मेधिका मिथिनिर्मेथिर्दीपनी वहुपत्रिका ।
वोधिनी वहुवीजा च जातिगन्धफला तथा ॥
वल्लरी चैव कामन्या मिश्रपुष्पा च कैरवी ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

महाशतावरी । इति राजनिर्घण्टः ॥

वहुपत्री, स्त्री, (वहुपत्र + गौरादित्वात् ङीष् ।) लिङ्गिनी । गृहकन्या । तुलसी । जतुका । दृष्टनष्टा । गोरक्षदुग्धा । इति राजनिर्घण्टः ॥

वहुपर्णः, पुं, (वहूनि पर्णानि पत्राणि यस्य ।) सप्तच्छदवृक्षः । इति राजनिर्घण्टः ॥ अनेकपत्रयुक्ते, त्रि ॥

वहुपर्णिका, स्त्री, (वहुपर्ण + संज्ञायां कन् । टापि अत इत्वम् ।) आखुकर्णी । इति राजनिर्घण्टः ॥

वहुपर्णी, स्त्री, (वहुपर्ण + गौरादित्वात् ङीष् ।) मेधिका । इति राजनिर्घण्टः ॥ (यथा, —

"मेधिका मिथिनिर्मेथिर्दीपनी वहुपत्रिका ।
वोधिनी वहुवीजा च जातिगन्धफला तथा ॥
वल्लरी चैव कामन्या मिश्रपुष्पा च कैरवी ।
झल्लिका वहुपर्णी च पित्तनिघ्न्यायुरुद्धिदा ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

वहुपात्, [द्] पुं. (वहवः पादो यस्य । अनेकशिफावत्त्वादस्य तथात्वम् ।) वटवृक्षः । इत्यमरः । २ । ४ । ३२ ॥

वहुपादः, पुं, (वहवः पादा यस्य । अनेकशिफावत्त्वादस्य तथात्वम् ।) वटवृक्षः । इति राजनिर्घण्टः ॥ (यथा, —

"वटो रक्तफलः शृङ्गी न्यग्रोधः स्कन्धजो ध्रुवः ।
क्षीरी वैश्रवणो वासी वहुपादो वनस्पतिः ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥

अनेकपादविशिष्टे, त्रि । यथा, भागवते । ४ । २८ । ७ ।

"पुरुषं परब्रह्मं विद्यान यद्वानक्षाक्षानः परम् ।
एकद्वित्रिचतुष्पादं वहुपादमपादकम् ॥"

तथा च महाभारते । १४ । ४२ । ३७ ।

"द्विपादवहुपादानि तिर्य्यग्गतिमतीनि च ॥"

वहुपुत्रः, पुं, (वहवः पुत्रा यस्य ।) सप्तपर्णः । इति शब्दचन्द्रिका ॥ अनेकसुतविशिष्टे, त्रि ॥ (यथा, हरिवंशे । ३ । ६४ ।

"वहुपुत्रस्य विदुषस्तनयो विद्युतः स्मृतः ॥")

वहुपुत्री, स्त्री, (वहवः पुत्रा पुत्रसदृशगुणानि यस्याः ।) शतमूली । इति रत्नमाला ॥ (शतमूलीशब्देस्या विवरणं ज्ञातव्यम् ॥)

वहुपुष्पः, पुं, (वहूनि पुष्पाणि यस्य ।) पारिभद्रवृक्षः । इति राजनिर्घण्टः ॥

वहुपुष्पिका, स्त्री, (वहुपुष्पा + संज्ञायां कन् । अत इत्वम् ।) धातकी । इति राजनिर्घण्टः ॥

वहुप्रजः, पुं, (वह्व्यः प्रजा यस्य ।) सुश्लक्ष्णम् । इति राजनिर्घण्टः ॥ शूकरः । इति हेमचन्द्रः । ४ । ३५४ ॥ वहुसन्ततिविशिष्टे, त्रि । (छन्दसि तु "वहुप्रजाश्छन्दसि ।" ५ । ४ । १२० । इत्यसुभागान्तः । यथा, सिद्धान्तकौमुद्यां वैदिकप्रक्रिया ।

"वहुप्रजा निर्ऋतिमाविवेश ॥")

वहुप्रतिज्ञः, त्रि, (वह्व्यः प्रतिज्ञाः यस्मिन् ।) अनेक-पदसङ्कीर्ण-पूर्व्वपक्ष-विशिष्ट-व्यवहारः । यथा । "यस्तु अनेकपदसङ्कीर्णः पूर्व्वपक्षो न सिद्ध्यतीति । तत्र यद्यनेकवस्तुसङ्कीर्णं इष्यते तदा न दोषः । मदीयमनेन हिरण्यं वासो रूपकादि वापहृतमित्येवंविधस्याद्दृष्टत्वात् । ऋणादानपदसङ्करे पञ्चाभाच्च इति चेत् तदपि न मदीया रूपका अनेन वृद्धा गृहीताः सुवर्णञ्चास्य एक्ते निक्षिप्तं मदीयं चैत्रमपहरति चैत्रादीनां पक्षत्वमिष्यते एव । किन्तु क्रियाभेदात् क्रमेण व्यवहारो न युगपदित्येतावत् । यथाह कात्यायनः ।

'वहुप्रतिज्ञं यत् कार्य्यं व्यवहारेषु निश्चितम् ।
कामन्तदपि गृह्णीयादाद्यो तत्त्वमुपागतश्चेत् ।'

तस्मादनेकपदसङ्कीर्णः पूर्व्वपक्षो युगपन्न सिध्यतीति तस्यार्थः ।" इति मिताक्षरा ॥ अनेकप्रतिज्ञायुक्ते, त्रि ॥

वहुप्रदः, त्रि, (प्रददातीति प्रदः । प्र + दा + क । वहूनां प्रदः ।) प्रचुरदाता । तत्पर्य्यायः । वदान्यः २ मृगलक्षः ३ दानशौण्डः ४ । इत्यमरः । ३ । १ । ६ ॥ मृगलक्षः ५ दानशौण्डः ६ दानपूर्णः ७ । इति शब्दरत्नावली ॥ (पुं. महादेवः । यथा, महाभारते १३ । शिवसहस्रनामकथने । १७ । १०८ ।

"कृतज्ञः कृतकर्म्मा वहुविद्यो वहुप्रदः ॥")

वहुप्रसः, स्त्री (वहूनि प्रसूते इति । वहु + प्र + सू + क्विप् ।) वहुसन्तानप्रसवकारिणी । तत्पर्य्यायः । क्रमिला २ । इति हेमचन्द्रः ।३।२२२॥

वहुफलः, पुं, (वहूनि फलानि यस्य ।) कदम्बवृक्षः । इति मेदिनी । ले, १५० । विकङ्कतः । तेलः-फलः । इति राजनिर्घण्टः ॥

वहुफला, स्त्री, (वहूनि फलानि यस्याः ।) भल्लिका । मागधिका । काकमाची । चुपुमी । प्राग्राकुली । क्षुद्रकारवेल्ली । इति राजनिर्घण्टः । भूम्यामलकी । इति भावप्रकाशः ॥

वहुफलिका, स्त्री, (वहुफला + संज्ञायां कन् । अत इत्वम् ।) भूवदरी । इति राजनिर्घण्टः ।

वहुफली, स्त्री, (वहुफल + ङीप् ।) स्वर्णक्षीरः । इति राजनिर्घण्टः ॥ आमलकी । इति मेदिनी । ले, १५७ ॥

वहुफेना, स्त्री. (वहुः फेनो यस्याः ।) सातला । इति राजनिर्घण्टः ॥

वहुवलः, पुं, (वहु अतिशयं वलं यस्य ।) सिंहः । इति राजनिर्घण्टः ॥ अतिशयवलयुक्ते, त्रि ॥

वहुमञ्जरी, स्त्री, (वह्व्यो मञ्जर्यो यस्याः ।) तुलसी । इति भावप्रकाशः ॥

वहुमलः, पुं, (वहूनि मलानि यस्य ।) सीमकम् । इति रत्नमाला ॥ अनेकमलयुक्ते, त्रि ॥

वहुमार्गं, क्ली, (वहवो मार्गा यस्मिन् । चतुर्हित्वे पथवत्त्वात् तथात्वम् ।) चत्वरम् । इति हेमचन्द्रः । ४ । ५४ ॥ अनेकपथयुक्ते, त्रि ॥

वहुमूर्त्तिः, स्त्री, (वह्वी मूर्त्तिर्यस्याः ।) वनकार्पासः । इति शब्दचन्द्रिका ॥ नानाकारत्व ॥ (वहुमूर्त्तिधरे त्रि । पुं, शकलासवत् जन्तुविशेषः । वहुरूपी इति ख्यातः ॥ विष्णुः । यथा, महाभारते । १३ । १४८ । ६० ।

"अनेकमूर्त्तिरव्यक्तः शतमूर्त्तिः शतानन: ।"

वहुमूर्द्धा, [न्] पुं, (वह्वो मूर्द्धानो यस्य । "सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्।" इति श्रुतेस्तथात्वम् ॥) विष्णुः । इति शब्दरत्नावली ॥

वहुमूलः, पुं, (वहूनि मूलानि यस्य ।) इक्षुः । इति त्रिकाण्डशेषः ॥ (अस्य पर्य्यायो यथा,—

"इक्षुर्वहुमूलश्च वाटीदीर्घः स्वरुच्छदः ॥"

इति वैद्यकरत्नमालायाम् ॥)

शिवः । स्थूलसरः । इति राजनिर्घण्टः । स्थूलमूलयुक्ते, त्रि ॥

वहुमूलकं, क्ली, (वहुमूल + कन् ।) उशीरम् । इति भावप्रकाशः । (वीरणम् । तत्पर्य्यायो यथा,—

"स्यादीरणं वीरणकं वीरणं वहुमूलकम् ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।)

वहुमूलकः, पुं. (वहुमूल एव । वहुमूल + स्वार्थे कन् ।) इक्षुः । इति शटाधरभूरिप्रयोगौ ॥

वहुमूला, स्त्री. (वहुमूल + टाप् ।) शतावरी । इति राजनिर्घण्टः ॥

वहुमूली, स्त्री, (वहुमूल + ङीप् ।) भार्गवी । इति राजनिर्घण्टः ॥

वहुमूल्यं, त्रि, (वहूनि मूल्यानि यस्य ।) महार्घवस्तु । तत्पर्य्यायः । महाधनम् २ । इत्यमरः । २ । ६ । ११३ ॥

वहुरज्जिका, स्त्री, वहूनि रज्जवो यस्याः । वहु रज्जु + टाप् । संज्ञायां कन् । टापि अत इत्वम् ।) मेदा । इति राजनिर्घण्टः ॥

वहुरसा, स्त्री, (वहु रसो यस्याः ।) महाज्योतिष्मती । इति राजनिर्घण्टः ॥ (रसवती स्त्री ॥)

वहुरुहा, स्त्री, (वहु यथा तथा रोहतीति । रुह् + क । टाप् ।) कन्दगुडूची । इति राजनिर्घण्टः ॥

वहुरूपः, पुं, वहूनि रूपाणि यस्य ।) सर्जरसः । इत्यमरः । २ । ६ । १२८ ॥ शिवः । विष्णुः । कामदेवः । मरटः । इति मेदिनी । के, २७ ॥ ब्रह्मा । कृष्णः । इति शब्दरत्नावली ॥ (रुद्रः । यथा, भागवते । ६ । ६ । १८ ।

"अजैकपादहिर्ब्रध्नो वहुरूपो महानिति ॥"

प्रियव्रतपुत्रस्य मेधातिथेः पुत्रभेदो वर्षभेदश्च । यथा, भागवते । ५ । २० । २५ । "तस्यापि प्रेयव्रत एवाधिपतिर्नाम्ना मेधातिथिः सोऽपि विभज्य सप्त वर्षाणि पुत्रनामानि तेषु स्वात्मजान् पुरोजव-मनोजव-पवमान-धूम्रानीकचित्ररेफ वहुरूप-विश्वाधारसंज्ञान् ।" इति ॥) वहुविशेषः । इति त्रिकाण्डशेषः ॥ नानारूपयुक्ते, त्रि ॥ (यथा, मनुः । १ । ४६ ।

"तमसा वहुरूपेण वेष्टिताः कर्महेतुना ॥")

वहुरूपकः, पुं, (वहुरूप + स्वार्थे कन् ।) जाहकजन्तुः । इति राजनिर्घण्टः ॥

वहुरूपा, स्त्री, (वहुरूपस्य शिवस्य स्त्री । टाप् ।) दुर्गा । यथा,—

"अरूपा परभावत्वाद्वहुरूपा क्रियात्मिका ।
ज्ञाता त्रैलोक्यगेहे सा त्रैलोक्यजनना तनः ॥"

इति देवीपुराणे ४५ अध्यायः ॥

वहुरेखा, स्त्री, (वह्वी वहुला रेखा करस्याटि-चिह्नम् ।) प्रचुरदीर्घचिह्नम् । वहुरेखायुक्तानां दोषो यथा,—

"रेखाभिर्वहुभिः क्लेशं स्वल्पाभिर्धनहीनताम् ।
रक्ताभिः सुखमाप्नोति कृष्णाभिः प्रेष्यतां व्रजेत्॥"

इति गारुडे ६४ अध्यायः ॥

वहुरेताः, [स्] पुं, (वहु रेतो यस्य ।) ब्रह्मा । इति शब्दरत्नावली ॥

वहुरोमा, [न्] पुं. (वहूनि लोमानि यस्य ।) मेषः । इति धारावली । ८० ॥ लोमशे, त्रि ॥

वहुलं, क्ली, (वंहते वृद्धिं गच्छतीति । वहि वृद्धौ कुलच् । नलोपश्च ।) आकाशम् । इति मेदिनी । सितमरीचम् । इति राजनिर्घण्टः ।

वहुलं, त्रि, (वहूनर्थान् लातीति । वहु + ला + क ।) प्रचुरम् । (यथा, मनुः । ४ । ६० ।

"नाधार्म्मिके वसेद्ग्रामे न व्याधिवहुले भयम् ।")

कृष्णवर्त्मः । इति मेदिनी । ले, ११८ ॥

वहुलः, पुं. (वहूनर्थान् लातीति । वहु + ला + क ।) अग्निः । कृष्णपक्षः । इति मेदिनी । ले, ११८ ॥ (यथा, कुमारे । ४ । १३ ।

"वहुलेऽपि गते निशाकर-
स्तनुतां दुःखमनङ्ग ! मोक्ष्यति ॥"

महादेवः । यथा, महाभारते ।१३। १७ ।१२८।

"मन्यानो वहुलो वायुः सकलः सर्व्वलोचनः ॥")

वहुलगन्धा स्त्री, (वहुलो गन्धो यस्याः ।) रसा । इति राजनिर्घण्टः ॥

वहुलच्छदः, पुं, (वहुलानि च्छदानि यस्य ।) रक्तशिग्रुः । इति राजनिर्घण्टः ॥

वहुलवर्णं, क्ली, (वहूनि लवणानि यस्मिन् ।) औषरकम् । इति राजनिर्घण्टः ॥

वहुला, स्त्री, (वहूनर्थान् लाति या । वहु + ला + क । टाप् ।) नीलिका । रसा । (यथा,—

"रसा सूला च वहुला पृथ्वीका शिपुटापि च ।
भद्रैला वृद्धैला च चन्द्रवाला च निष्कुटिः ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

गौः । इति मेदिनी । ले, ११७ ॥ दुर्गाविशेषः । यथा,—

"इत्युक्त्वा सा तेन मुनिना निःसृत्य रविमण्डलात् ।
वहुला नाम्नता तूर्णं प्रस्थं मानसभूभृतः ॥
प्रत्यूहं तच्च सावित्री गायत्री वहुला तथा ।
सरस्वती च दृषदा पश्चिमेन मानसाचले ॥"

इति कालिकापुराणे ३३ अध्यायः ॥

(नदीभेदः । यथा, मार्कण्डेये । ५७ । ३६ ।

"वीनाश्चैव तुखाराश्च वहुला वाह्लतो नराः ॥'

स्वनामख्याता उत्तमराजपत्नी । यथा, तत्रैव । ६६ । ६ ।

"वाभ्रव्यां वहुलां नाम उपयेमे स धर्म्मवित् ।
उत्तानपादतनयः ध्रुवोमिन्द्र इवोत्तमः ॥")

वहुलाः, स्त्री, लक्षिकानक्षत्रम् । नित्यवहुवचनान्तोऽयं शब्दः । इति मेदिनी । ले, ११७ ॥

वहुलीकृतं, त्रि, (अवहुलं वहुलं कृतम् । अभूततद्भावे च्विः ।) अपनीततुषधान्यादि । वकीलान इति भाषा । तत्पर्य्यायः । पूतम् २ । इत्यमरः । २ । ६ । २३ ॥ (विस्तृतीकृतम् । यथा, मार्कण्डेये । २१ । ६७ ।

"पराक्रमवता वीर ! त्वया तद्वहुलीकृतम् ॥")

वहुवल्कः, पुं, (वहूनि वल्कानि यस्य ।) प्रियालः । इति राजनिर्घण्टः ॥

वहुवल्ली, स्त्री, द्रोणिपुष्पः । इति राजनिर्घण्टः ॥

वहुवारः, पुं, (वहूनि वारयतीति । वहु + वृ + णिच् + अण् ।) वृक्षविशेषः । वहुयार इति ख्यातः । तत्पर्य्यायः । शेलुः २ शीलः ३ शेम्नातः ४ शेम्नातकः ५ उद्दालः ६ उद्दालकः ७ । इति शब्दरत्नावली ॥ सेलुः ८ । इत्यमरटीकायां भरतः ॥ अस्य फलगुणाः । शिग्रुतुल्यम् । शैत्यलघुत्वम् । तुक्काकारित्वम् । गुरुत्वम् । दुर्जरत्वम् । मधुरत्वञ्च । इति राजवल्लभः ॥

वहुवारकः, पुं, (वहूनि रूक्षादीनि वारयतीति । वहु + वृ + णिच् + ण्वुल् ।) वृक्षविशेषः। (अस्य

गुणा वहुवारशब्दे उक्ताः। वहुवार इति ख्यातः। यथा, मनुसंहितायाः।५।६। श्लोकस्य टीकायां कुल्लूकभट्टः। "पेलुं वहुवारकफलं गोभवं पेयूषं नवप्रसूतायाः गोः क्षीरमग्निसंयोगात् कठिनं भवति एतान् यत्नतस्त्यजेत्॥")

वहुविधः, त्रि, (वहवो विधा यस्य।) नानाप्रकारः। तत्पर्य्यायः। विविधः २ नानारूपः ३ पृथग्विधः ४। इत्यमरः। ३।१।६३॥ (यथा, गीतायाम्। ४।३२।

"एवं वहुविधा यज्ञा वितता ब्रह्मणो मुखे॥")

वहुविस्तीर्णा, स्त्री, (वहु यथा स्यात् तथा विस्तीर्णा।) कुचिकाद्रुः। इति शब्दचन्द्रिका॥ कुचइ इति भाषा॥

वहुवीजं, क्ली, (वहूनि वीजानि यस्य।) गण्डगात्रम्। इति शब्दचन्द्रिका॥ आता इति भाषा॥ अस्य गुणा आलुशब्दे द्रष्टव्याः॥

वहुवीर्य्यः, पुं, (वहु वीर्य्यं तेजो यस्य।) विभीतकः। इति जटाधरः॥ तण्डुलीयशाकः। शाल्मलिवृक्षः। सरुवः। इति राजनिर्घण्टः॥

वहुवीर्य्या, स्त्री, (वहु वीर्य्यं तेजो यस्याः।) भूम्यामली। इति राजनिर्घण्टः॥

वहुव्रीहिः, पुं, षट्समासान्तर्गतसमासविशेषः। (सुखवोधमते।) अस्य साङ्केतिकसंज्ञा हः। यथा, अन्यार्थानां दानां हसंज्ञः। उदाहरणं यथा। पीतमम्बरं यस्यासौ पीताम्बरो हरिः। इति वोपदेवः॥ स च तुल्याधिकरणानां पदानां अन्यार्थत्वे स्यादिति वोध्यम्। यथा पीताम्बरादि। भिन्नाधिकरणानान्तु पुत्राय धनमस्य शिष्याय विद्या अस्य इत्यादौ न स्यात्। समासक इत्युदाहरणेन कदाचिद्भिन्नाधिकरणानाञ्च स्यात् धर्म्मो वृत्तिर्यस्यासौ धर्म्मवृत्तिः। एवं कामवृत्तिः उरसि लोमा कण्ठे काल इत्यादि। एवं पीताम्बर इत्युदाहरता विशेषणविशेष्ययोः समासे विशेषणमेव पूर्व्वं स्यादिति सूचितम्। तेन पीताम्बर इत्यत्र अम्बरपीत इति न स्यात्। एवं विलोचनः चतुर्भुजः दीर्घकेशीत्यादि। एवं पीताम्बर इत्युदाहरता क्वचित् क्तान्तविशेषणं पूर्व्वं स्यात् क्वचित् परं वा स्यात् इति सूचितम्। तेन अधाहतस्वैरगतेरिति। अधोक्षितं भर्त्तुरुपस्थितोदयमिति। स वृत्तचूड़श्चरकाकपक्षकैरित्यादि रघुः॥ सुखजातः सुरापीतो नखरो माल्यधारक इति। एवं जातदन्तः दन्तजातः जातश्मश्रुः श्मश्रुयुक्तः पीततैलः तैलपीतः पीतघृतः घृतपीतः जढ़भार्य्यः भार्य्याढ़ः गतभार्य्यः भार्य्यागतः गतार्थः अर्थगतः अग्न्याहितः आहिताग्निः पुत्रजातः जातपुत्रः जातयामः यामजातः दुःखजातः जातदुःखः गतदुःखः दुःखगतः इत्यादि वोध्यम्। अथमुत्तमश्चक्रः चक्रोत्तमः उद्यतानि अस्त्राण्यस्य उद्यतास्त्रः उद्यतगदः गदोद्यतः उद्यतखड्गः खड्गोद्यत इति। नानुपूर्व्वो नित्यं पूर्व्वमिति भीमरथः। यथा उद्यतदण्ड इत्यादि। एवं सर्व्वनामसकलात् पूर्व्वम्। सर्व्वश्वेतः। संख्यासर्व्वनाम्नोः संख्यापूर्व्वं स्यात्। द्विपरः त्रिपूर्व्वः। सप्तम्यन्तमचन्द्रादेः। सप्तम्यन्तं पदं पूर्व्वं स्यान्न चन्द्रादेः। धर्म्मे वृत्तिर्यस्यासौ धर्म्मवृत्तिः उरसि लोमा कण्ठेकाल इत्यादौ उरसिजवत् क्लेरलुक्। चन्द्रादेस्तु चन्द्रशेखरः चन्द्रचूड़ः पद्मनाभः शूलपाणिः कृष्णसर्पः। प्रियो वा। गुड़प्रियः प्रियगुड़ः। किञ्च आरूढ़ो वानरो यं स आरूढ़वानरो वृक्षः। दृष्टः क्षयो येन स दृष्टक्षयो भक्तः। दत्ता भूमिर्यस्मै स दत्तभूमिर्विप्रः। निर्गताः पक्षिणो यस्मात् वृक्षात् स निर्गतपक्षी वृक्षः। चत्वारो भुजा यस्यासौ चतुर्भुजो विष्णुः। वहूनि नक्षत्राणि यत्र तद्वहुनक्षत्रमाकाशम्। इति द्वितीयान्ताद्यन्यपदार्था वहुव्रीहयः सर्व्वैर्मन्यन्ते। समासे तु प्रथमान्तान्यपदार्थोऽपि यथा सह मात्रा वर्त्तते योऽसौ समात्रकः एवं सपक्षकः सनामकं ब्राह्मणमानीत्यादि। इति दुर्गादासः॥ * ॥ (वहवो व्रीहयो यस्येति व्युत्पत्त्या) प्रचुरधान्ययुक्ते, त्रि। यथा,—

"इन्द्रो द्विगुरपि चाहं मद्गेहे नित्यमव्ययीभावः।
तत्पुरुष! कर्म्मधारय येनाहं स्यां वहुव्रीहिः॥"
इति प्राचीनाः॥

वहुशत्रुः, पुं, (वहवः शत्रवो यस्य।) षटकः। इति शब्दचन्द्रिका॥ (वहुशत्रुविशिष्टे, त्रि। तृतीयायां तिथौ पटोलभक्षणेन वहुशत्रुः स्यात्। यथा, तिथितत्त्वे।

"कृष्णाष्टे चार्थहानिः स्याद्वृद्धौ न स्मरेद्धरिम्।
वहुशत्रुः पटोले स्यात् धनहानिस्तु मूलके॥")

वहुशः, व्य, (वहूनि ददाति करोत्यादि वा। वहु + "वहुप्रथमाच्चेश्कारकादन्यतरस्याम्।" ५।४।४२। इति शस्।) वहूनि। इति शाकरणम्॥ (यथा, मार्कण्डेये। ५२।२६।

"कथ्यन्ते वहुशश्चैते पिता पुत्रत्वमेव यत्॥")

वहुशल्यः, पुं. (वहु शल्यं यस्य।) रक्तखदिरः। इति राजनिर्घण्टः॥ अनेकशल्ययुक्ते, त्रि॥

वहुशालः, पुं, (वहुभिः शालते इति। वहु + शाल + अच्।) सुधी। इति राजनिर्घण्टः॥

वहुशिखा, स्त्री, (वह्वी शिखा यस्याः।) जलपिप्पली। इति राजनिर्घण्टः॥ (वह्वी शिखा इति कर्म्मधारयसमासः।) अनेकशिखा च॥

वहुसन्ततिः, पुं, (वह्वी सन्ततिर्विस्तारोऽन्वयो वा यस्य।) ब्रह्मयष्टिः। इति शब्दचन्द्रिका॥ वेड़ेवाँश इति भाषा॥ अनेकसन्ततियुक्ते, त्रि॥

वहुसम्पुटः, पुं, (वहुः सम्पुटो यस्य।) विष्णुकन्दः। इति राजनिर्घण्टः॥

वहुसारः, पुं, (वहुः सारः स्थिरांशो यस्य।) खदिरः। इति राजनिर्घण्टः॥ (वहुसारविशिष्टे, त्रि। यथा, शतपथब्राह्मणे। ११। ७। ३। १॥ "स य एष वहुसारः॥")

वहुसुता, स्त्री, (वहुः सुतः सन्ततिर्मूलं वा यस्याः।) शतमूली। इत्यमरः। २।४।१५॥

वहुसूः, स्त्री, (वहून् सूते या। वहु + सू + क्विप्।) शूकरी। इति शब्दरत्नावली॥ वहुप्रसवा च॥

वहुसूतिः, स्त्री, (वहुः सूतिः प्रसवो यस्याः।) वन्ध्यपत्या गौः। इत्यमरः। २।६।७॥ वहुसन्तानप्रसवा च॥

वहुस्रवा, स्त्री, (वहु यथा स्यात् तथा स्रवति या। वहु + स्रु + अच्। टाप्।) शुक्लकीवृक्षः। इति शब्दचन्द्रिका॥ अनेकक्षरणशीला च॥

वहुस्वनः, पुं, (वहुः प्रचण्डः स्वनः शब्दो यस्य।) पेचकः। इति केचित्॥ अनेकशब्दयुक्ते, त्रि॥

वह्वपत्यः, पुं स्त्री, (वहूनि अपत्यानि यस्य।) शूकरः। मूषकः। इति राजनिर्घण्टः॥ वहुसन्तानयुक्ते, त्रि॥

वह्वाशी, [न्] त्रि, (वहु अश्नातीति। वहु + अश् + णिनि।) वहुभोजनशीलः। यथा, चाणक्ये। ६६।

"वह्वाशी स्वल्पसन्तुष्टः सुनिद्रः शीघ्रचेतनः।
प्रभुभक्तश्च शूरश्च ज्ञातव्याः षट् शुनो गुणाः॥"
(वह्वी आशा यस्य।) वह्वाशाविशिष्टः॥ (धृतराष्ट्रपुत्रविशेषे, पुं। यथा, महाभारते। १।११७।१६।

"आदित्यकेतुर्वह्वाशी नागदन्तोऽयशाय्यपि॥")

वह्वृक्, स्त्री, ऋग्वेदः (वह्व्य ऋचो यस्मिन्।) सूक्ते, क्ली। इति सुग्धवोधव्याकरणम्॥ "वह्व्य ऋचोऽधीतया येन इति व्युत्पत्त्या ऋग्वेदज्ञे ब्राह्मणे, पुं। यथा, मनुः। ३।१४५।

"यत्नेन भोजयेत् श्राद्धे वह्वृचं वेदपारगम्।"

केचित् वह्वृच इत्यकारान्तमिच्छन्ति॥)

वह्वृची, स्त्री, (वह्वृचस्य ऋग्वेदज्ञस्य पत्नी। वह्वृच + ङीप्।) ऋग्वेदवेत्तुः पत्नी। इति जटाधरः॥ (वह्व्य ऋचोऽधीतया यया इति विग्रहे अधीयुनामाधीची स्त्री। अनृचवह्वृचावर्थे सर्व्वेति वचनात्। "ऋक्पूरब्धूःपथामानक्षे।" ५।४।७४। इत्यप्रत्ययः समासान्तः। "गोत्रञ्च चरणैः सह" इति जातित्वात् ङीप्। यद्यपि स्त्रीणां स्वाध्यायाध्ययनं निषिद्धं तथापि पुरा कल्पेष्वेतदासीत्। यथाह यमः।

"पुराकल्पेषु नारीणां मौञ्जीवन्धनमिष्यते।
अध्यापनञ्च वेदानां सावित्रीवचनं तथा॥"
इति॥)

वा(वा)ड़, अ ड आप्तौ। आने। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-अक०-सेट्। आप्तिः उन्मज्जनम्। इति दुर्गादासः॥) वोपदेवेन अन्तःस्थवकारादौ गणितः॥ (चारुते। अदित् चडि न ह्रस्वः। अवयाड्वयत्॥)

वा(वा)ड़वं, क्ली, (वड़वानां समूहः। वड़वा + "खरिकादिभ्यश्च।" ४।२।४५। इत्यण्।) वड़वासमूहः। इत्यमरः॥ (वड़वाया इद-

मिति । वड़वा+अण् । वड़वासम्बन्धिनि, त्रि । यथा, सुश्रुते । १ । ४५ ।
"दीपनीयमक्षुण्णं वाड़वं दधि वातलम् ॥")
वा(वा)ड़व:, पुं, (वाड़ं यज्ञाग्न्यागं याति प्राप्नोतीति । वाड़+वा+क: ।) ब्राह्मण: । (वड़वायां घोटक्यां जात: । वड़वा+अण् ।) वड़वानल:। इत्यमर: ॥ तत्पर्य्याय: । और्व: २ संवर्त्तक: ३ अब्धामि: ४ वड़वामुख: ५ । इति हेमचन्द्र: ॥ (यथा, मार्कण्डेये । ६६ । ६४ ।
"महोदधेर्मध्यगतस्य वाड़वो
भवान् विभूत्या परया करे स्थित: ॥")
वा(वा)ड़वाग्नि:, पुं, (वड़वा समुद्रस्था घोटकी तत्सम्बन्ध्यग्नि: ।) वड़वानल: । इति जटाधर: ॥ (यथा, माघे । ११ । ४५ ।
"पयसि सलिलराशेर्नक्तमन्तर्निमग्न:
स्फुटमनिशमतापि ज्वालया वाड़वाग्नि: ॥")
वा(वा)ड़वाग्र्य:, पुं, (वाड़वेषु ब्राह्मणेषु अग्र्य: श्रेष्ठ: ।) ब्राह्मणश्रेष्ठ: । यथा,—
"इत्याकर्ण्य वचस्तस्य वाड़वाग्र्यस्य धीमत: ।
पप्रच्छ कृष्णमानस्कस्तीर्थयात्राविधिं मुनिम् ॥"
इति पाद्मे पातालखण्डे १६ अध्याय: ॥
वा(वा)ड़वेयी, पुं, (वड़वाया घोटकरूपधारिण्या: सूर्य्यपत्न्या अपत्ये पुमांसौ । वड़वा+ढक् ।) अश्विनीकुमारौ । इति शब्दमाला ॥
वा(वा)ड़व्यं, क्ली, (वाड़वानां ब्राह्मणानां समूह: । वाड़व+"ब्राह्मणमाणववाड़वाद् यत् ।" ४।२। ४२ । इति यत् ।) ब्राह्मणसमूह: । इत्यमर: ॥
वाड़िङ्गन:, पुं. (वाड़् आयनं तस्मै इङ्गते इति । वाड़्+इङ्ग+क्यु ।) वार्त्ताकु: । इति रत्नमाला ॥
वाढ़ं, क्ली, (वाह प्रयत्ने+क्त: । "ह्रुह्वस्वान्ध्वान्तेति ।" ७ । २ । १८ । इति निपातनात् साधु: ।) अतिशय: । (यथा, कथासरित्सागरे । २४ । ६८ ।
"वाढ़ं मया सा नगरी दृष्टा विद्यार्थिना सता ॥")
प्रतिज्ञा । इत्यमर: । ३ । ३ । ४४ ॥ वाढ़मित्यव्ययमपीति दुर्गा: । इति भरत: ॥
"वाढ़ं त्रिषु दृढे स्त्रीक्लमनुमत्यामथ त्रिषु ॥"
इति नागार्जुनरत्नमाला ॥
(सत्यम् । यथा, रघु: । १६ । ५२ ।
"वाढ़मेषु दिवसेषु पार्थिव:
कर्म साधयति पुत्रजन्मने ॥")
वा(वा)ण:, पुं, (वर्णं वाण: शब्दस्तदस्यास्तीति । वाण+अच् ।) अस्त्रविशेष: । तिर इति भाषा । तत्पर्य्याय: । एषणक: २ विशिख: ३ अभिभाग: ४ खग: ५ आशुग: ६ कलम्ब: ७ मार्गण: ८ शर: ९ पत्री १० रोप: ११ इषु: १२ । इत्यमर: । २ । ८ । ८६ ॥ चित्रपुङ्ख: १३ सायक: १४ पौरतर: १५ तूणचेड: १६ काण्ड: १७ विपर्यय: १८ शल्य: १९ वाजी २० मर्मभिद: २१ अस्त्रजटक: २२ ॥ लौहमयबाणस्य पर्य्याय: । प्रकृष्टघ्न: १ लोहज: २ नाराच: ३ ॥ छिन्नबाणस्य पर्य्याय: । प्रक्षित: १ निरस्त: २ ॥ विषाक्तबाणस्य पर्य्याय: । तीक्ष्ण: १ किंशक: २ दिग्ध: ३ ॥ तीरो निष्फलबाणके । इति शब्दरत्नावली ॥ ७ ॥ (यथा, ऋग्वेदे । ६ । ७५ । १७ ।
"यत्र बाणा: संपतन्ति कुमारा विशिखा इव ।
तत्रा नो ब्रह्मण्वन्तिरदिति: शर्म्म यच्छतु
विश्वहा शर्म्म यच्छतु ॥")
बलिराजस्य ज्येष्ठपुत्र: । यथा,—
"बले: पुत्रशतं त्वासीद्बाणज्येष्ठमतो द्विजा: ।
बाण: सप्तसबाहु: स्यात् सर्व्वास्त्रगुणसंयुत: ॥
तपसा तोषितो यस्य पुरे वसति शूलधृक् ।
महाकालत्वमगमत् साम्यं यस्य पिनाकिन: ॥"
इति मत्स्यपुराणे ५ अध्याय: ॥
(अस्य जन्मादिविवरणन्तु बाणयुद्धशब्दे द्रष्टव्यम् । विस्तृतिस्तु हरिवंशे विष्णुपर्व्वणि १७३ अध्यायमारभ्य द्रष्टव्या ॥) गोलक्ष: । केवल: । इति मेदिनी । णे, २७ ॥ अग्नि: । इति त्रिकाण्डशेष: ॥ काण्डावयव: । इति विश्व: ॥ भद्रमुञ्ज: । इति राजनिर्घण्ट: ॥ (पुं, क्ली, नीलझिण्टी । इति वैद्यकरत्नमाला ॥ यथा, माघे । ६ । ४६ ।
"विकचपद्मवाणदलावलयोऽधिकं
रुरुचिरे रुचिरेक्षणविभ्रमा: ॥"
वणयते शब्दायते इति । वण शब्दे+"अकर्त्तरि च कारके संज्ञायाम् ।" ३ । ३ । १६ । इति घञ् । वाक् । इति निघण्टु: ॥ इक्ष्वाकुवंशीयोऽयोध्याराज: खनामख्यातो विकुक्षे: पुत्त: । यथा, रामायणे । १ । ७० । २२—२३ ।
"इक्ष्वाकोस्तु सुत: श्रीमान् कुक्षिरित्येव विश्रुत: ।
कुक्षेरथात्मज: श्रीमान् विकुक्षिरुदपद्यत ॥
विकुक्षेस्तु महातेजा बाण: पुत्त: प्रतापवान् ।
बाणस्य तु महातेजा अनरण्य: प्रतापवान् ॥"
कादम्बरीप्रणेता कविविशेष: । यथा, कादम्बर्य्यां कविवंशवर्णने ।
"सरस्वतीपाणिसरोजसम्भव-
प्रभूष्णुभोमभ्रमसीकराम्भस: ।
यशोऽनुकीर्त्तेरुत सप्तविष्टपात्
तत: सुरो बाण इति व्यजायत ॥
द्विजेन तेनाजत कण्ठकौण्ठया
महाश्मनोमोहमलीमसान्यया ।
अलब्धवैदग्ध्यविलासमुग्धया
धिया निबद्धेयमतिद्वयी कथा ॥"
अयमेव हर्षचरितप्रणेता इति केचित् ॥)
वा(वा)णगङ्गा, स्त्री, (बाणेन प्रकटिता गङ्गा नदी-विशेष: ।) रावणबाणनिर्भिन्नसोमेश्वरगिरि-भवनदीविशेष: । यथा,—
"सोमेशाद्दक्षिणे भागे बाणेनानिं विभिद्य वै ।
रावणेन प्रकटिता शतधारातिपुण्यदा ।
बाणगङ्गेति विख्याता या स्नानादघहारिणी ॥
स्नात्वा तु बाणगङ्गायां दृष्ट्वा बाणेश्वरं विभुम् ।
गङ्गासागमजं प्राप्य मोदते देववद्दिवि ॥"
इति वाराहे सोमेश्वरादिलिङ्गमहिमावर्णन-क्षेत्रमहिमा त्रिवेण्यादिमहिमा नामाधाय: ॥
वा(वा)णदण्ड:, पुं, (बाणस्य दण्ड: ।) बाणदण्ड: । तत्पर्य्याय: । वेसा २ । इति हेमचन्द्र: ॥
वा(वा)णपुङ्खा, स्त्री. (बाणस्य+पुङ्खा ।) शरपुङ्खा । इति राजनिर्घण्ट: ॥
वा(वा)णपुरं, क्ली, (बाणस्य राज्ञ: पुरं नगरम् ।) बाणराजनगरम् । तत्पर्य्याय: । देवीकोट: २ कोटीवर्षम् ३ ऊषावनम् ४ शोणितपुरम् ५ । इति त्रिकाण्डशेष: ॥ आग्नेयम् ६ उषावनम् ७ कोट्टवीपुरम् ८ । इति शब्दरत्नावली ॥
वा(वा)णभट्ट:, पुं, ग्रन्थकारविशेष: । (स तु कादम्बर्य्यादिग्रन्थप्रणेता ।) "ननु मङ्गलं कथं क्रियते मङ्गलाद्विघ्नध्वंस: विघ्नध्वंसात् प्रारिप्सितसिद्धिरिति चेन्न । बाणभट्टादेर्मङ्गले सत्यपि ग्रन्थसमाप्त्यभावात् माघादौ मङ्गलाभावेऽपि समाप्तिदर्शनात् ।" इति सुबोधटीकायां दुर्गादास: ।
वा(वा)णयुद्धं, क्ली, (बाणेन सह युद्धम् ।) बाणराजेन सह श्रीकृष्णस्य संग्राम: । तस्य विवरणम् । यथा,—
श्रीशुक उवाच ।
"बाण: पुत्रशतज्येष्ठो बलेरासीन्महात्मन: ।
सप्तसबाहुर्वाद्येन तोषयन्नृगडङ्गम् ॥
भगवान् सर्व्वभूतेश: शरण्यो भक्तवत्सल: ।
वरेण च्छन्दयामास स तं वव्रे पुराधिपम् ॥
स एकदाह गिरिशं पार्श्वस्थं वीर्य्यदुर्म्मद: ।
किरीटेनार्कवर्णेन संस्पृशंस्तत्पदाम्बुजम् ॥
नमस्ये त्वां महादेव ! लोकानां गुरुमीश्वरम् ।
पुंसामपूर्णकामानां कामपूरामराङ्घ्रिपम् ॥
दो:सहस्रं त्वया दत्तं परं भाराय मेऽभवत् ।
त्रिलोक्यां प्रतियोद्धारं न लभे त्वदृते समम् ॥
कण्डूत्या निर्भृतैर्दोर्भिर्युयुत्सुर्दिग्गजानहम् ।
आद्यायां चूर्णयन्नद्रीन् भीतास्तेऽपि प्रदुद्रुवु: ।
तत् श्रुत्वा भगवान् रुद्र: केतुस्ते भज्यते यदा ।
तदर्पघ्नं भवेन्मूढ ! संयुगं मत्समेन ते ॥
इत्युक्त: खमतिर्क्रुष्ट: स्वगृहं प्राविशन्नृप ! ।
प्रतीक्षन् गिरिशादेशं स्वकीर्य्यनाशं क्षुधी: ॥
तस्योषा नाम दुहिता स्वप्ने प्रावृणिता पतिम् ।
कन्यालभत कान्तेन प्राग्दृष्टेनानुसेन सा ॥
सा तत्र तमपश्यन्ती क्वासि कान्तेतिवादिनी ।
सखीनां मध्य उत्तस्थौ विह्वला व्रीडिता भृशम् ॥
बाणस्य मन्त्री कुम्भाण्डश्चित्रलेखा च तत्सुता ।
यद्यदृच्छत् सखीमध्यां क्रीडन्त्यौ सखमात्मन: ॥
कं त्वं मृगयसे ! सुभ्रु ! कीदृशस्ते मनोरथ: ।
एवमाहं न तेऽद्यापि रूपेणाभिप्रलक्षये ॥
ऊषोवाच ।
दृष्ट: कश्चिन्नर: स्वप्ने श्याम: कमललोचन: ।
पीतवासा बृहद्बाहुर्योषितां हृदयङ्गम: ॥
तमहं मृगये कान्तं पाययित्वाधरं मधु ।
क्वापि यात: स्पृहयतीं चित्ता मां रहिनार्हये ॥

चित्रलेखोवाच ।
यसनन्तोऽपनेष्यामि त्रिलोक्यां यदि भाव्यते ।
नमानेष्ये वरं यस्ते मनोहर्त्ता तमादिश ॥
दृत्वद्धा देवगन्धर्वसिद्धचारणपन्नगान् ।
दैत्यविद्याधरान् यक्षान् मनुजांश्च यथालिखत् ॥
मनुजेषु च सा वृष्णीञ्छूरमानकदुन्दुभिम् ।
बलिखद्रामकृष्णौ च प्रद्युम्नं वीक्ष्य लज्जिता ॥
अनिरुद्धं विलिखितं वीक्ष्योषावाङ्मुखी
ह्रिया ।
सोऽसावसाविति प्राह स्मयमाना महीपते ! ॥
चित्रलेखा तमाज्ञाय पौत्रं कृष्णस्य योगिनी ।
ययौ विहायसा राजन् ! द्वारकां कृष्णपालिताम् ॥
तत्र सुप्तं सुपर्य्यङ्के प्राद्युम्निं योगमास्थिता ।
गृहीत्वा शोणितपुरं सख्यै प्रियमदर्शयत् ॥
सा च तं सुन्दरवरं विलोक्य मुदिताननना ।
दुष्प्रेक्ष्ये स्वगृहे पुंभी रेमे प्राद्युम्निना समम् ॥
परार्द्ध्यवासः स्रग्गन्धधूपदीपासनादिभिः ।
पानभोजनभक्ष्येश्च वाक्ये: स्त्रीभूषणार्चितः ॥
गूढः कन्यापुरे श्रीमत् प्रद्युम्नस्त्रेहया तया ।
नाहर्गणान् स वुबुधे जयवापहृतेन्द्रियः ॥
तां तथा यदुवीरेण भुज्यमानां हृतव्रपाम् ।
हेतुभिर्लक्षयामासुरापीतां दुरवच्छदैः ॥
भटा आवेदयामासुरुषाया राजंस्ते दुहितुर्व्यवम् ।
विचेष्टितं लक्षयामः कन्यायाः कुलदूषणम् ॥
अनपायिभिरस्माभिर्गुप्तायाश्च गृहे प्रभो ! ।
कन्याया दूषणं पुंभिर्दुष्येच्चाया न विद्महे ॥
ततः प्रस्थापितो बाणो दुहितुः श्रुतदूषणः ।
त्वरितः कन्यकागारं प्राप्तोद्राक्षीद्यदूद्वहम् ॥
कामात्मजं तं भुवनैकसुन्दरं
श्यामं पिशङ्गाम्बरमम्बुजेक्षणम् ।
दृष्ट्वासुतं कुण्डलकुन्तलत्विषा
स्मितावलोकेन च मण्डिताननम् ॥
दीर्घायुषं तत्प्रियया मृगय्या
तदङ्गसङ्गोत्थसुकृच्छ्रसक्तम् ।
बाहोर्दधानं मधुमल्लिकाश्रितां
तस्याग्र आसीनमवेक्ष्य विस्मितः ॥
न तं प्रविष्टं व्रतमानतायिभि-
र्भटैरनेकैरवलोक्य माधवः ।
उद्यम्य मौर्वं परिघं व्यवस्थितो
यथान्तको दण्डधरो जिघांसया ॥
निरीक्षया तानु परितः प्रसर्पतः
शुनो यथा शूकरयूथपोऽहनत् ।
ते हन्यमाना भवनाद्विनिर्गता
निर्भिन्नमूर्द्धोरुभुजाः प्रदुद्रुवुः ॥
तं नागपाशैर्बलिनन्दनो बली
गाढं सुसैन्यं रुषितो ववन्ध ह ।
ऊषा भृशं शोकविषादविप्लुता
यद्वं निशम्याश्रुकलाक्षरौत्सीत् ।"

इति श्रीभागवते महापुराणे पारमहंस्यां संहितायां वैयासिक्यां दशमस्कन्धे बाणयुद्धे द्विषष्टितमोऽध्यायः ॥ ६२ ॥

श्रीशुक उवाच ।
"अपश्यतास्वानिरुद्धं तद्बन्धूनाश्च भारत ! ।
चत्वारो वार्षिका मासा व्यतीयुरनुशोचताम् ॥
नारदात्तदुपाकर्ण्य वार्त्तां बद्धस्य कर्म्म च ।
प्रययुः शोणितपुरं वृष्णयः कृष्णदेवताः ॥
प्रद्युम्नो युयुधानश्च गदः साम्बोऽथ सारणः ।
नन्दोपनन्दभद्राद्या रामकृष्णानुवर्त्तिनः ॥
अक्षौहिणीभिर्द्वादशभिः समेताः सर्व्वतो
दिशम् ।
रुरुधुर्बाणनगरं समन्तात् सात्वतर्षभाः ॥
भज्यमानपुरोद्यानप्राकाराट्टालगोपुरम् ।
प्रेक्षमाणो रुषाविष्टस्तुल्यसैन्योऽभिनिर्ययौ ॥
बाणार्थे भगवान् रुद्रः ससुतः प्रमथैर्वृतः ।
आरुह्य नन्दिवृषभं युयुधे रामकृष्णयोः ॥
आसीत् सुतुमुलं युद्धमद्भुतं लोमहर्षणम् ।
कृष्णशङ्करयो राजन् ! प्रद्युम्नगुह्ययोरपि ॥
कुम्भाण्डकूपकर्णाभ्यां बलेन सह संयुगम् ।
साम्बस्य बाणपुत्रेण बाणेन सह सात्यकेः ॥
ब्रह्मादयः सुराधीशाः मुनयः सिद्धचारणाः ।
गन्धर्वाप्सरसो यक्षा विमानैर्द्रष्टुमागमन् ॥
भूतप्रमथगुह्यकान् ।
डाकिनीर्यातुधानांश्च वेतालान् सविनायकान् ॥
भूतमातृपिशाचांश्च कुष्माण्डान् ब्रह्मराक्षसान् ।
द्रावयामास तीक्ष्णाग्रैः शरैः शार्ङ्गधनुश्च्युतैः ॥
पृथग्विधानि प्रायुङ्क्त पिणाक्यस्त्राणि
शार्ङ्गिणे ।
प्रत्यस्त्रैः शमयामास शार्ङ्गपाणिरविस्मितः ॥
ब्रह्मास्त्रस्य च ब्रह्मास्त्रं वायव्यस्य च पार्वतम् ।
आग्नेयस्य च पार्जन्यं नैजं पाशुपतस्य च ॥
मोहयित्वाथ गिरिशं जृम्भणास्त्रेण जृम्भितम् ।
बाणस्य पृतनां शौरिर्बहुधानाशिगदेषुभिः ॥
स्कन्दः प्रद्युम्नबाणौघैरर्द्यमानः समन्ततः ।
असृग्विमुञ्चन् गात्रेभ्यः शिखिना प्राद्रवद्रणात् ॥
कुम्भाण्डः कूपकर्णश्च पेततुर्मुषलार्दितौ ।
दुद्रुवुस्तदनीकानि हतनाथानि सर्व्वशः ॥
वीक्षमाणं स्वलं दृष्ट्वा बाणोऽत्यमर्षितः ।
कृष्णमभ्यद्रवत् संख्ये रथी नित्वैव सात्वतम् ॥
धनूंष्याकृष्य युगपद्बाणः पञ्चशतानि वै ।
एकैकस्मिन् शरौ द्वौ द्वौ सन्दधे रणदुर्म्मदः ॥
तानि चिच्छेद भगवान् धनूंषि युगपद्धरिः ।
सारथिं रथमश्वांश्च हत्वा शङ्खमपूरयत् ॥
तन्माता कोटवी नाम नग्ना मुक्तशिरोरुहा ।
पुरोऽवतस्थे कृष्णस्य पुत्रप्राणरिरक्षया ॥
ततस्तिर्य्यङ्मुखो नग्नामनिरीक्षन् गदाग्रजः ।
बाणस्य तावद्विरथश्छिन्नधन्वाविशत् परम् ॥
विद्राविते भूतगणे ज्वरस्तु त्रिशिराब्रिमात् ।
अभ्यधावत दाशार्हं दहन्निव दिशो दश ॥
यद्य नारायणो देवस्तं दृष्ट्वा व्यसृजत् ज्वरम् ।
माहेश्वरो वैष्णवश्च युयुधाते ज्वरावुभौ ॥
माहेश्वरः समाक्रन्दत् वैष्णवेन बलार्दितः ।
व्यसृजा भयमन्यत्र भीतो माहेश्वरो ज्वरः ॥
शरण्यौ त्र्यक्षिकृष्णौ तुष्टाव प्रयताञ्जलिः ॥

ज्वर उवाच ।
नमामि त्वामनन्तशक्तिं परेशं
सर्व्वात्मानं केवलं ज्ञप्तिमात्रम् ।
विश्वोत्पत्तिस्थानसंरोधहेतुं
यत्तद्ब्रह्म ब्रह्मलिङ्गं प्रशान्तम् ॥
कालो दैवं कर्म्म जीवः स्वभावो
द्रव्यं क्षेत्रं प्राण आत्मा विकारः ।
तत्संघातो बीजरोहप्रवाह-
स्त्वन्मायैषा तन्निषेधं प्रपद्ये ॥
नानाभावैर्लीलयैवोपपन्ने-
र्देवान् साधून् लोकसेतून् बिभर्षि ।
हंस्युन्मार्गान् हिंसया वर्त्तमानान्
जन्मैतत्ते भारहाराय भूमेः ॥
तप्तोऽहन्ते तेजसा दुःसहेन
शान्तोग्रेणात्युल्बणेन ज्वरेण ।
नावत्तापी देहिनां तेऽङ्घ्रिमूलं
नो सेवेरन् यावदाशानुबद्धाः ॥

श्रीभगवानुवाच ।
त्रिशिरस्ते प्रपन्नोऽहं यातु ते मज्वराद्भयम् ।
यो नौ स्मरति संवादं तस्य त्वन्नो भवेद्भयम् ॥
इत्युक्तोऽच्युतमानम्य गतो माहेश्वरो ज्वरः ।
बाणस्तु रथमारूढः प्रागाद्योत्स्यन् जनार्दनम् ॥
ततो बाहुसहस्रेण नानायुधधरो बली ।
सुमोच परमक्रुद्धो बाणांश्चक्रायुधे नृप ! ॥
तस्यास्यतोऽस्त्राण्यसकृच्चक्रेण क्षुरनेमिना ।
चिच्छेद भगवान् बाहूञ्शाखा इव वनस्पतेः ॥
बाहुषु च्छिद्यमानेषु बाणस्य भगवान् भवः ।
भक्तानुकम्प्युपव्रज्य चक्रायुधमभाषत ॥

श्रीरुद्र उवाच ।
त्वं हि ब्रह्म परं ज्योतिर्गूढं ब्रह्मणि वाङ्मये ।
यं पश्यन्त्यमलात्मानमाकाशमिव केवलम् ॥
नाभिर्नभोऽग्निर्मुखमम्बरेतो
द्यौः शीर्षमाशाः श्रुतिरुच्चिरण्डम् ।
चन्द्रो मनो यस्य दृगर्क आत्मा
अहं समुद्रो जठरं भुजेन्द्रः ॥
रोमाणि यस्यौषधयोऽम्बुवाहाः
केशा विरिञ्चो धिषणा गिरित्रः ।
प्रजापतिर्हृदयं यस्य धर्म्मः
स वै भवान् पुरुषो लोककल्पः ॥
तवावतारोऽयमकुण्ठधामन्
धर्म्मस्य गुप्त्यै जगतो भवाय ।
वयं च सर्व्वे भवतानुभाविता
विभाव्यामो भुवनानि सप्त ॥
त्वमेक आद्यः पुरुषोऽद्वितीय-
स्तुर्य्यः सदृग्धेतुरहेतुरीशः ।
प्रतीयसेऽथापि यथा विकारं
स्वमायया सर्व्वगुणप्रसिद्ध्या ॥
यथैव सूर्य्यः पिहितः स्वछायया
छायां च रूपाणि च सञ्चकास्ति ।
एवं गुणेनापिहितो गुणांस्त्व-
मात्मप्रदीपो गुणिनश्च भूमन् ॥

यत्नादामोदितधियः पुण्यदारगृहादिषु ।
उत्पाद्यन्ति निमज्जन्ति प्रसक्ता दुःखिनार्णवे ॥
देवदत्तमिमं मत्वा मृगोकमपितेन्द्रियः ।
यो नादिशेत स्वतपादौ च प्रोक्षो ज्ञात्म-
यजकः ॥
यस्तां विदधते मर्त्य आत्मानं प्रियमीश्वरम् ।
विपर्ययेन्द्रियार्थार्थं विषमात्मानं त्यजेत् ॥
अहं ब्रह्माथ विबुधा मुनयश्चामलाशयाः ।
सर्वात्मना प्रपन्नास्त्वामात्मानं प्रेष्ठमीश्वरम् ॥
तं त्वा जगत्स्थित्युदयान्तहेतुं
समं प्रशान्तं सुहृदात्मदैवम् ।
अनन्यमेकं जगदात्मकेतुं
भवापवर्गाय भजाम देवम् ॥
त्वयं सतोऽसि यदितोऽनुवर्तिनो
मयाभयं दत्तमसुष्य देव ! ।
सम्पाद्यतां तद्भवतः प्रसादो
यथा हि ते दैत्यपतौ प्रसादः ॥
श्रीभगवानुवाच ।
यदात्थ भगवंस्त्वमः करवाम प्रियन्तव ।
भवतो यदभिप्रेतं तन्मे साध्वनुमोदितम् ॥
अवध्योऽयं ममाप्येष वैरोचनसुतोऽसुरः ।
प्रह्लादाय वरो दत्तो न वधो मे तवान्वयः ॥
दर्पोपशमनायास्य प्रशान्त्या वाचितो मया ।
क्षिप्तश्च बहुशो भूमि यत्र भारायितं भुवः ॥
चत्वारोऽस्य सुताः शिष्टा भविष्यत्यजरामरः ।
पार्षदमुख्यो भवतो न कुतश्चिद्भयोऽसुरः ॥
इति लब्धाभयं ज्ञात्वा प्रणम्य शिरसासुरः ।
प्राप्तुमिं रथमारोप्य स वधा सममानयत् ॥
सर्वौषध्या परिहृतं सुवासःसमलङ्कृतम् ।
सपत्नीकं पुरस्कृत्य ययौ यत्रानुमोदितः ॥
स राजधानीं समलङ्कृतां ध्वजै-
र्मणोरमैर्भूषितमार्गचत्वराम् ।
विवेश शङ्खानकदुन्दुभिस्वनै-
रभ्युद्यतः पौरसुहृत्पुरोहितैः ॥
य एतत् शत्रुविजयं प्रातरुत्थाय नरः स्मरेत् ।
संयुगे तं न कश्चित्स्याद्विजेतुं जीवतः पराजयः ॥"
इति श्रीभागवते महापुराणे पारमहंस्यां संहितायां वैयासिक्यां दशमस्कन्धे बाणासुर-
सर्गे नैकविंशतितमोऽध्यायः ॥

बाणलिङ्गं, क्ली. (बाणार्थेनार्थं कृतं लिङ्गम् । तत्प्रकार निरूपिकायन्त्रा ऐमाद्रौ । यथा,—
"बाणः सदाशिवो देवो बाणो बाणान्तरो-
ऽपि च ।
तत्र यत्रे कृतं तत्राधाराख्यं सुदाहृतम् ॥")
नर्मदानदुद्भवशिवलिङ्गम् । तस्य विवरणम् । यथा,—
"नर्मदाजलसम्भूतं बाणलिङ्गमिति स्मृतम् ।
बाणलिङ्गे स्वयम्भूते चक्रकाख्यं स्थितम् ।
बाणाख्यमुद्भवं कर्म शमनीलेवेदभक्षणात् ।
बाणाख्याहविभागोऽयं बाणलिङ्गे न विद्यते ।
तदर्पितं यत्र बाणं बाणं प्रमादसंभ्रमा ।
शिवनामयं लिङ्गं सदा पूज्यं महर्षिभिः ।
यतश्च सर्वलिङ्गेभ्यस्त्वि पूज्यतमं मतम् ॥
चतुरस्रोलसच्छायं रम्यं वेदिकया युतम् ।
उत्तमं लिङ्गमाख्यातं पञ्चरत्नसुसाधितम् ॥
तदर्धं मध्यमं प्रोक्तं तदर्धमवरं स्मृतम् ।
तस्य न्यूनं पूजनीयं न कदापि न तत्फलम् ॥
तदार्द्धं शिवलिङ्गेषु स्वयम्भूलं प्रशस्यते ।
बाणग्रामो नार्मदेय सत्सरुपो विधिष्यते ॥"
पार्थिवादिलिङ्गापेक्षया बाणलिङ्गस्य श्रेष्ठत्वम् यथा,—
"कोमलेषु तु लिङ्गेषु पार्थिवं श्रेष्ठमुच्यते ।
कठिनेषु तु पाषाणं पाषाणात् स्फाटिकं परम् ॥
स्फाटिकात् पद्मरागश्च काश्मीरं पद्मरागतः ।
काश्मीरात् पुष्परागोत्थमिन्द्रनीलोद्भवं ततः ॥
इन्द्रनीलाच्च गोमेदं गोमेदाद्विद्रुमोद्भवम् ।
विद्रुमान्मौक्तिकं श्रेष्ठं तस्मात् श्रेष्ठन्तु राजतम् ॥
हैरण्यं राजतात् श्रेष्ठं हैरण्याद्वीरकं परम् ।
वीरकात् पारदं श्रेष्ठं बाणलिङ्गं ततः परम् ॥"
इति मेरुतन्त्रे ६ प्रकाशः ॥
अथ बाणलिङ्गलक्षणम् । वीरमित्रोदयधृत-कालोत्तरे ।
"बाणलिङ्गं तथा क्षेयं भुक्तिमुक्तिप्रदायकम् ।
उत्पत्तिं बाणलिङ्गस्य लक्षणं शृणुत प्रभु ॥
नर्मदादेविकायाश्च गङ्गायमुनयोस्तथा ।
सन्ति पुण्यनदीनाञ्च बाणलिङ्गानि षण्मुख ! ॥
इन्द्रादिपूजितान्यत्र तथिद्धैर्विहितानि च ।
सदा सन्निहितस्तत्र शिवः सर्वार्थदायकः ।
इन्द्रलिङ्गानि तान्याहुः साम्राज्यार्थप्रदानि च ॥"
इतीन्द्रलिङ्गलक्षणम् ॥
"बाणं क्षित्यकीलालसुवर्णार्थं करोत्यलम् ।
आग्नेयं तच्छक्तिनिभमथवा शक्तिलाञ्छितम् ।
इदं लिङ्गवरं ख्यात्य तेजसाधिपतिर्भवेत् ॥"
इत्याग्नेयलिङ्गलक्षणम् ॥
"दण्डाकारं भवेद् याम्यमथवा रसनाकृति ।
यद्यदुक्तं सह तैर्न निर्दिष्टं ज्ञायते तदा ।
निधिरक्षं निधनन्तेन क्रियते स्थापितेन तु ॥"
इति याम्यलिङ्गलक्षणम् ॥
"राक्षसं खड्गसदृशं ज्ञानयोगफलप्रदम् ।
कर्कोदरिप्रलिप्तन्तु कुष्ठकृच्छ्रियुतं तथा ।
राक्षसं निष्कृते लिङ्गं गार्हस्थ्ये न सुखप्रदम् ॥"
इति नैर्ऋतलिङ्गलक्षणम् ॥
"वारुणं वर्तुलाकारं पाशाङ्कं वालिवर्धनम् ।
वृष्टिं सुखादैवसत्वसंभोगाप्तन्तु मध्यगे ॥"
इति वारुणलिङ्गलक्षणम् ॥
"छत्रं ध्वजं नवारुण्यं ध्वजाभं ध्वजसन्नभम् ।
मस्तके स्थापितं तस्य न्यूनन्यूनमितस्ततः ॥"
इति वायुलिङ्गलक्षणम् ॥
"शूलपाशगदाकारं गुह्यकेशस्य मध्यगम् ॥"
इति कुबेरलिङ्गलक्षणम् ॥
"दिनं वाप्यथवा रात्रिं शस्त्राहतिकरैर्व्रणम् ।
खड्गशूलाङ्कितं रौद्रं शिवमुद्वासनार्चनम् ॥"
इति रौद्रलिङ्गलक्षणम् ॥
"चतुर्वर्णमयं यानि वैष्णवं ज्ञायतेऽमलः ।
वैष्णवं शङ्खचक्राङ्कगदाद्यादिविभूषितम् ।
श्रीवत्सकौस्तुभाङ्कञ्च सर्वसिद्धासनाङ्कितम् ।
वैनतेयसमाङ्कं वा तथा विष्णुपदाङ्कितम् ॥
वैष्णवं नाम तत् प्रोक्तं सर्वैश्वर्यफलप्रदम् ॥"
इति वैष्णवलिङ्गलक्षणम् ॥
"शालग्रामादिसंस्थन्तु शङ्खाङ्कं श्रीविवर्द्धनम् ।
पद्माङ्कं स्वस्तिकाङ्कं वा श्रीवत्साङ्कं विभूतये ॥"
इत्यपि वैष्णवलिङ्गलक्षणम् ॥
हेमाद्रिधृतलक्षणकाण्डे ।
नारद उवाच ।
"अथ वक्ष्यामि ते विप्रचिह्नमेकादशं परम् ।
श्रवणाद्यस्य पापानि नाशमायान्ति तत्-
क्षणात् ॥
मधुपिङ्गलवर्णाभं लक्षणकुण्डलिकायुतम् ।
स्वयम्भुलिङ्गमाख्यातं सर्वसिद्धैर्निषेवितम् ॥
नागावर्णसमाकीर्णं जटाशूलसमन्वितम् ।
स्वयम्भुलिङ्गमाख्यं लिङ्गं सुरासुरनमस्कृतम् ॥
दीर्घाकारं शुभवर्णं लक्षणबिन्दुसमन्वितम् ।
नीलकण्ठं समाख्यातं लिङ्गं पूज्यं सुरासुरैः ॥
शुक्लाभं शुक्लकेशश्च नेत्रत्रयसमन्वितम् ।
त्रिलोचनं महादेवं सर्वपापप्रणोदनम् ॥
ज्वललिङ्गं जटाजूटं कृष्णाभं स्थूलविग्रहम् ।
कालाग्निरुद्रमाख्यातं सर्वसत्त्वैर्निषेवितम् ॥
मधुपिङ्गलवर्णाभं श्वेतयज्ञोपवीतकम् ।
श्वेतपद्मसमासीनं चन्द्ररेखाविभूषितम् ।
प्रलयाख्यसमायुक्तं त्रिपुरारिसमाश्रयम् ॥
शुभ्राभं पिङ्गलजटं सुरुण्डमालाधरं परम् ।
त्रिशूलधरमीशानं लिङ्गं सर्वार्थसाधनम् ॥
त्रिशूलडमरुधरं शुभ्रवस्त्रार्द्धभागतः ।
अर्द्धनारीश्वराख्यानं सर्वदेवैरभीष्टदम् ॥
दृषद्वस्त्रमयं कान्तं स्थूलं दीर्घं सुशोभनम् ।
महाकालं समाख्यातं धर्मकामार्थमोक्षदम् ॥
एतत्तु कथितं तुभ्यं लिङ्गचिह्नं महीक्षितः ।
एकेनैव कृतार्थः स्यात् बहुभिः किमु सुव्रत ! ॥"
इति बाणलिङ्गचिह्नानि ॥
वीरमित्रोदयधृतकालोत्तरे ।
"उत्तमं श्रेयसे योग्यं शोभनमतं पिबर्त्तयेत् ।
यमवर्णन्तु यल्लिङ्गं यमाङ्कं वा क्रमस्थलम् ॥
दण्डाङ्कं खड्गचिह्नं वा ब्रह्मज्ञानान्वितं मतम् ।
शशिवर्णं महाकालं नन्दीशं पद्मरागवत् ॥
पद्मरागनिभं सर्वं महाभं शिहिपूजितम् ।
मौक्तिकाभं नीलनिभं रुद्राद्यैः प्रपूजितम् ॥
वसुदैः सेन्द्रयज्ञैश्च गुह्यकैर्यातुधानकैः ।
नानावर्णमयं नीलं शङ्खाङ्कमब्जसन्निभम् ॥"
इति बाणलिङ्गलक्षणम् ॥
वीरमित्रोदयधृतम् ।
"इत्येतत् लक्षणं प्रोक्तं परीक्षातत्त्वकोविदैः ।
त्रिःसप्तपञ्चधारं वा तुलायां न जायते ।
तदा बाणं समाख्यातं श्रेयं पाषाणसम्भवम् ।"
तुलाकरणन्तु तण्डुलेन । अपरतुलादिषु तण्डुल-
वदधिकाः सुलदा तत्रिद्धं यदियां पूज्य-
मवधार्य लिङ्गवेदधिकं यदीदासीनपूज्यता-

देति किंवदन्तीति हेमादिधृतलक्षणकाण्डे ॥
सूतसंहितायाम् ।
"मप्रकल्पसुलारूढं दृष्ट्वेति न हीयते ।
वाणलिङ्गमिति ख्यातं शैवं नार्म्मदमुच्यते ॥
त्रिपञ्चवारं यस्यैव तुलासाम्यं न जायते ।
तदा वाणं समाख्यातं शैवं पाषाणसम्भवम् ॥"
वीरमित्रोदये ।
"नद्यां वा प्रक्षिपेद्यत्नो यदा तद्दलभ्यते ।
वाणलिङ्गं तदा विद्धि नूनं सुखविवर्द्धनम् ॥"
इति वाणलिङ्गपरीक्षा ॥
वाणशब्दव्युत्पत्तिरपि तत्रैव ।
"अथ वाणं समाख्यातं यथा वक्ष्ये तथादितः ।
वाणः सदाशिवो देवो वाणो वाणान्तरोऽपि च ।
तेन यस्मै कृतं तस्माद्वाणलिङ्गमुदाहृतम् ।
सदा सन्निहितस्तत्र शिवः सर्व्वार्थदायकः ॥
कृतप्रतिष्ठं तल्लिङ्गं वाणाख्येन शिवेन च ।
पङ्कजस्य फलाकारं कुड्मलस्य समाकृति ।"
पङ्कजफलं पद्मबीजम् ॥ पङ्कजस्य फलाकारं कुड्मलाकारमित्यर्थः ।
टाङ्कसमाकृतीति हेमादिधृतलक्षणकाण्डे पाठः ।
"मुक्तिमुक्तिप्रदत्वेन वाणलिङ्गमुदाहृतम् ॥"
याज्ञवल्क्यसंहितायां देवीं प्रति शिववाक्यम् ।
"प्रशस्तं नार्म्मदं लिङ्गं पङ्कजस्य फलाकृति ।
मधुवर्णं तथा शुक्लं नीलं मरकतप्रभम् ॥
हंसडिम्बाकृति पुनः स्थापनायां प्रशस्यते ।
स्वयं संभवते लिङ्गं गिरितो नर्म्मदातटे ॥
पुरा वाणासुरेणाग्रं प्रार्थितो नर्म्मदातटे ।
अविवासं गिरौ तत्र लिङ्गरूपी महेश्वरः ।
वाणलिङ्गमपि ख्यातमतोऽर्थाज्जगतीतले ॥
अन्येषां कोटिलिङ्गानां पूजने यत् फलं लभेत् ।
तत् फलं लभते मर्त्त्यो वाणलिङ्गैकपूजनात् ॥"
तथा ।
"ताम्री वा स्फाटिकी स्वार्णी पाषाणी राजती तथा ।
दैविकी च प्रकर्षेण तत्र संस्थाप्य पूजयेत् ॥
प्रत्यहं यो नरो लिङ्गं नार्म्मदं भक्तिभावतः ।
ऐहिकं किं फलं तस्य मुक्तिस्तस्य करे स्थिता ॥"
इति प्रत्यहवाणलिङ्गपूजाफलम् ॥
सूतसंहितायाम् ।
"संस्थाप्य शैवाणलिङ्गं रत्नकोटिगुणं भवेत् ।
रसलिङ्गे ततो वाणात् फलं कोटिगुणं स्मृतम् ॥
गुणांस्तु रसलिङ्गस्य वक्तुं शक्नोति शङ्करी ।
सिद्धयः रसलिङ्गे स्युरणिमाद्याः सुसंस्थिताः ॥"
केदारखण्डे ।
"रत्नधातुमयान्येव लिङ्गानि कथितान्यपि ।
पवित्राण्येव पूज्यानि सर्व्वकामप्रदानि च ॥
एतेषामपि सर्व्वेषां काश्मीरं हि विशिष्यते ।
काश्मीरादपि लिङ्गाच्च वाणलिङ्गं विशिष्यते ॥
वाणलिङ्गात् परं नान्यत् पवित्रमिह दृश्यते ।
ऐहिकामुष्मिकं सर्व्वं पूजाकर्त्तुः प्रयच्छति ॥"
इति वाणलिङ्गप्रशंसा ॥
निन्दलिङ्गमाह तत्रैव ।
"कर्कशे वाणलिङ्गे तु पुत्रदारक्षयो भवेत् ।
चिपिटे पूजिते तस्मिन् गृहभङ्गो भवेद्ध्रुवम् ॥
एकपार्श्वस्थिते वेणुपुत्रदारधनक्षयः ।
शिरसि स्फुटिते वाणे व्याधिर्मरणमेव च ॥
छिद्रलिङ्गेऽर्चिते वाणे विदेशगमनं भवेत् ।
लिङ्गे च कर्णिकां दृष्ट्वा व्याधिमान् जायते पुमान् ।
अत्युन्नतिविलाभे तु गोधनानां क्षयो भवेत् ॥"
हेमादिधृतम् ।
"तीक्ष्णाग्रं वक्रशीर्षञ्च वाणलिङ्गं विवर्जयेत् ।
अतिस्थूलं चातिसूक्ष्मं खर्व्वं वा भूषणान्वितम् ।
गृही विवर्जयेत्ताहक् तद्धि मोक्षार्थिनो हितम् ॥"
इति दुष्टवाणलिङ्गलक्षणम् ॥
शुभलिङ्गमाह वीरमित्रोदये ।
"अर्थदं कपिलं लिङ्गं घनाभं मोक्षकाङ्क्षिणाम् ।
लघु वा कपिलं स्थूलं गृही नैवार्चयेत् क्वचित् ॥
पूजितव्यं गृहस्थेन वर्त्तुलं भ्रमरोपमम् ।
सप्तसप्तीपमपीठं वा मन्त्रसंस्कारवर्जितम् ।
सिद्धिमुक्तिप्रदं लिङ्गं सर्व्वप्रासादपीठगम् ॥"
इति शुभवाणलिङ्गलक्षणम् ॥
सूतसंहितायां भैरववाक्यम् ।
"वाणासुरः पुरा भद्रे ! शिवस्यातीव वल्लभः ।
जितः क्रोधोऽसुरक्तश्च शिवपूजाविधौ रतः ॥
वह्निशो निपुणश्चैव शिल्पज्ञो लक्षणान्वितः ।
दिने दिने स्वयं दत्त्वा लिङ्गं स्थाप्य प्रपूजयेत् ॥
एवं वर्षशतं देवि ! दिव्यमानेन पूजयेत् ।
तदा तद्भक्तिसुलभः प्रसन्नः शङ्करो भवेत् ॥
शङ्कर उवाच ।
तुष्टोऽहं तव हे वाण ! वरं ब्रूहि किमिच्छसि ।
शङ्करस्य वचः श्रुत्वा वाणो वचनमब्रवीत् ॥
यदि तुष्टोऽसि दीनाय मह्यं त्वं मन्दभागिने ।
क्लिष्टोऽहं तव देवेश ! लिङ्गं कृत्वा दिने दिने ॥
तत्तल्लक्षणसंसिद्धलक्षणं शास्त्रनिर्म्मिताम् ।
शास्त्रार्थो दुर्ल्लभो देव ! सिद्धश्चार्थश्च दुर्ल्लभः ॥
तस्मात्त्वं यदि मे तुष्टो लिङ्गं देहि सुलक्षणम् ।
सर्व्वकामकृतार्थेषु सर्व्वसत्त्वानुकम्पनम् ।
सर्व्वेषाञ्च हितार्थाय प्रसादं कुरु शङ्कर ! ॥
इत्येवं वचनं तस्य शिवः परमकारुणम् ।
श्रुत्वा कैलासशृङ्गाग्रं शङ्करेण विनिर्म्मितः ॥
लिङ्गानां कोटिसंख्याश्च तथा चैव चतुर्दश ।
सिद्धलिङ्गं तदा तत्तु सर्व्वं सदोदयं स्वयम् ॥
व्ययोऽयैवं सुसम्पूर्णं वाणस्य च समर्पितम् ॥
व्ययप्रफलदं वाणं स्थाप्यमानञ्च नित्यशः ।
संपूज्य वाणः सद्भावं कृत्वा प्रणयनन्दतः ॥
तद्भावं स्वपुरं नीत्वा गूढं चिन्तयते ऋषिः ।
व्ययं यदि संसिद्धं स्थाप्यमानं दिने दिने ॥
सत्त्वानां सिद्धिहेतुर्थं वाणस्थाने सुसंस्थिते ।
लिङ्गानां कालिकागर्त्ते सन्ति कोटयः ॥
श्रीशैले कोटयस्तिस्रः कोरेका कन्यकाश्रमे ।
माहेश्वरे च कोटिस्तु कन्यार्तीर्थे तु कोटिका ॥
महेन्द्रे चैव नेपाले एकैका कोटिरेव च ।
वाणार्थार्थं कृतं लिङ्गं वाणलिङ्गमतः स्मृतम् ॥
वाण्ये वा शिव इत्युक्तस्तत्कृतं वाणमुच्यते ॥
तस्मात्तेषु प्रदेशेषु पुण्यस्थानेषु तेषु वा ।
स्थितं तच्छिवसद्भावं शिवस्याज्ञप्तिविग्रहे ॥"
हेत्वा तदाज्ञप्तिजन्यव्यवसायेऽपि ।
"स्वयम्भुलिङ्गबाणलिङ्गं शुक्ले सुकृतये ।
सहस्रफलमन्यस्मादृषयो स्थापनपूजने ॥
श्रीशैले कालिकागर्त्ते लिङ्गाद्यो कन्यकाश्रमे ।
कन्यातीर्थे वने याने महेन्द्रे वा सुरेश्वरे ॥
स्थितानि वाणलिङ्गानि शिवेनैव कृतानि तु ॥"
सिद्धान्तशेखरे वाणलिङ्गान्यधिकृत्य ।
"तदनेकप्रकारं स्यादण्डवर्त्तुलपीठकम् ।
लक्ष्मसूत्रविहीनञ्च वाणं तत् पृथुलाश्रकम् ॥"
वाणलिङ्गे शिवावाहनादि न कर्त्तव्यम् । तदुक्तं भविष्ये ।
"वाणलिङ्गानि राजेन्द्र ! स्थितानि भुवनत्रये ।
न प्रतिष्ठा न संस्कारस्तेषामावाहनं न च ॥" इति योगसारे पञ्चमपरिच्छेदे ।
"ब्राह्मे मुहूर्त्ते चोत्थाय यः स्मरेद्वाणलिङ्गकम् ।
सर्व्वत्र जयमाप्नोति सत्यं सत्यं महेश्वर ! ॥"
अथ वाणलिङ्गध्यानं तत्रैव ।
ॐ प्रणवं शक्तिसंयुक्तं वाणाख्यं महाप्रभम् ।
कामबाणान्वितं देवं संसारदहनक्षमम् ॥
शङ्कारादिरवीशान्तं वाणाख्यं परमेश्वरम् ।
एवं ध्यात्वा वाणलिङ्गं यजेत्तं परमं शिवम् ।
मनसा गन्धपुष्पाद्यैः संपूज्यास्य मनुं स्मरेत् ॥"
तथा ।
"प्राणायामं ततः कृत्वा वाणलिङ्गन्तु तोषयेत् ।
तदिष्टदेववीरेवं विभाव्य वाग्भवं जपेत् ॥
ततो जपं समाप्याथ स्वयेनानेन तोषयेत् ॥"
अथ स्तवः ।
"ॐ वाणलिङ्ग महावाण संसाराब्धेर्हि मां प्रभो ॥
नमस्ते योगरूपाय नमस्ते भक्तयोगये ॥
संसाराकारिणे तुभ्यं नमस्ते सूक्ष्मरूपधृक् ।
प्रमत्ताय महेन्द्राय कालरूपाय वै नमः ॥
दहनाय नमस्तुभ्यं नमस्ते योगकारिणे ।
भोगिनां भोगकर्त्रे च मोक्षदात्रे नमो नमः ॥
नमः कामाङ्गनाशाय नमः कल्पयुगारिणे ।
नमो विश्वप्रदात्रे च नमो विश्वस्वरूपिणे ॥
वाणस्य वरदात्रे च रावणस्य क्षयाय च ।
रामस्यानुग्रहार्थाय राज्याय भरतस्य च ॥
मुनीनां योगदात्रे च राक्षसानां क्षयाय च ।
नमस्तुभ्यं नमस्तुभ्यं नमस्तुभ्यं नमो नमः ॥
ऐं दाहिकाशक्तियुक्ताय महामायाप्रियाय च ।
भगप्रियाय सर्व्वाय वैरिणां नित्यदाय च ॥
परिचाराय योगिनां कौलिकानां प्रियाय च ।
कुलाङ्गनानां भक्ताय कुलाचाररताय च ॥
कुलभक्ताय योगाय नमो नारायणाय च ॥
मधुपानप्रमत्ताय योगेशाय नमो नमः ॥
कुलनिन्दाप्रणाशाय कौलिकानां सुखाय च ।
कुलयोगाय निष्ठाय सुखाय परमात्मने ॥
परमात्मस्वरूपाय लिङ्गमूलालयाय च ।
सर्व्वेश्वराय सर्व्वाय शिवाय त्रिगुणाय च ॥
इत्येतत् परमं गुह्यं वाणलिङ्गस्य शङ्कर ! ।

यः पठेत् साधकश्रेष्ठो गाणपत्यं लभेत सः ॥
स्तवस्यास्य प्रसादेन योगी योगित्वमाप्नुयात् ।
राज्यार्थिनां भवेद्राज्यं भोगिनां भोग एव च ॥
साधूनां साधनं देव ! कौलिकानां कुलं भवेत् ।
यं यं कामयते मन्त्री तं तमाप्नोति लीलया ॥
वाणलिङ्गप्रसादेन सर्व्वमाप्नोति सत्वरम् ।
किमत्र बहुधामीह सर्व्वं वेत्सि कुलेश्वर ! ।
महाभये समुत्पन्ने राजद्वारे कुलेश्वर ! ॥
देशान्तरभये प्राप्ते दस्युचौरादिसङ्कुले ।
पठनात् स्तवराजस्य न भयं लभते क्वचित् ॥
वाणलिङ्गस्य माहात्म्यं संक्षेपात् कथितं मया ।
तस्य श्रवणमात्रेण नरो मोक्षमवाप्नुयात् ॥
वाणलिङ्गं सदाराध्यं योगिनां योगसाधने ।
कौलिकानां कुलाचारे पशूनां भूतनिग्रहे ॥
वेदज्ञानां वेदपाठे रोगिणां रोगनाशने ।
यो यो नाराधयेदेनं सर्व्वं तन्निष्फलं भवेत् ॥"

इति श्रीयोगसारे सर्व्वागमोत्तमे पार्व्वतीशिवसंवादे वाणलिङ्गस्तोत्रं समाप्तम् ॥

वा(वा)णवारः, पुं, (वाणं परमुत्कृष्टशरं वारयतीति । वृ + णिच् + अण् ।) भटादेरोलाकृतिसन्नाहः । तत्पर्य्यायः । वारवाणः २ वारणः ३ । इति शब्दरत्नावली ॥ चोलकः ४ । इति हारावली । १६७ ॥ (स्त्रीत्वेऽपि दृश्यते । यथा, सुश्रुते । ४ । २४ ।
"वाणवारं न्यग्रोधत्वगोबलविवर्द्धनम् ॥")

वा(वा)णसुता, स्त्री, (वाणस्य वाणासुरस्य सुता ।) ऊषा । इति शब्दरत्नावली ॥

वा(वा)णहा, [न्] पुं, (वाणं वाणासुरं हन्तीति । हन् + क्विप् ।) विष्णुः । इति हेमचन्द्रः ॥

वा(वा)णा, स्त्री, पुं, (वण्यते शब्द्यते इति । वण + घञ् । टाप् ।) नीलभिण्टी । इत्यमरः । २ । ४ । ७४ ॥

वा(वा)णा, स्त्री, वाणवृक्षम् । इति मेदिनी । णे, २७ ॥

वा(वा)णारिः, पुं, (वाणस्य वाणासुरस्य अरिः ।) विष्णुः । इति केचित् ॥

वा(वा)णाश्रयः, पुं, (वाणस्याश्रयः ।) धनुः । इति हलायुधः ॥

वा(वा)णासनं, क्ली, (वाणस्य आसनम् ।) धनुः । इति हलायुधः ॥

वा(वा)णिजः, पुं, (वणिजेव । वणिज् + अण् ।) वणिक् । इत्यमरः ॥ बाड़वाग्निः । इति त्रिकाण्डशेषः ॥

वा(वा)णिजिकः, पुं, (वणिजेव । वणिज् + ठक् ।) बाड़वाग्निः । वणिक् । इति मेदिनी ॥ (वाणिजकोऽप्यत्र । यथा, मनुः । ३ । १८१ ।
"यत्तु वाणिजके दत्तं नेह नामुत्र तद्भवेत् ॥")
चूर्णः । इति शब्दरत्नावली ॥

वा(वा)णिज्यं, क्ली, (वणिजो भावः कर्म्म वा । वणिज् + ष्यञ् ।) वैश्यवृत्तिभेदः । इत्यमरः ॥ वणिजः कर्म्म भावो वा । वाणिज्येत्यपि दृश्यते । इति भरतः ॥ तत्पर्य्यायः । सत्याकृतम् २ वाणिज्या ३ वणिक्पथः ४ । इति जटाधरः ॥ (यथा, मार्कण्डेये । ५१ । ५४ ।
"कृष्यां वाणिज्यलाभे च भ्रान्तिं कुर्व्वन्तु मे सदा ॥")

क्रयविक्रयरूपस्य तस्य विवरणादि यथा,—
"मानेन तुलया वापि योऽंशमष्टमकं हरेत् ।
दण्डं स दाप्यो द्विगुणं वृद्धौ हानौ च कल्पितम् ॥"
यः पुनर्वणिक् व्रीह्यिकार्पासादेः पण्यस्याष्टमंशं कूटमानेन कूटतुलया वान्यथापहरत्यसौ पणानां द्विगुणं दण्डनीयः । अपहृतस्य पुनर्द्रव्यस्य वृद्धौ हानौ च दण्डस्यापि वृद्धिहानी कल्प्ये ॥
"भेषजस्नेहलवणगन्धधान्यगुडादिषु ।
पण्येषु प्रक्षिपन् क्षौमं पणान् दाप्यस्तु षोड़श ॥"
भेषजसौषधद्रव्यं स्नेहो घृतादिः गन्धद्रव्यसुधीरादि व्यादिशब्दाद्विद्रुमरिचादि । एतेष्वसारद्रव्यं विक्रयार्थं मिश्रयतः षोड़शपणो दण्डः ॥
किञ्च ।
"न्यग्रोधमणिरुक्तायःकार्पासवल्कलवाससाम् ।
अजानौ जातिकरणे विक्रेयाष्टगुणो दमः ॥"
न विद्यते बहुमूल्या जातिर्यस्मिन् न्यग्रोधादिके तदजातिः तस्मिन् जातिकरणे विक्रयार्थं गन्धवर्णरसान्तरसञ्चारणेन बहुमूल्यजातीयसादृश्यसम्पादने यथा मल्लिकामोदसञ्चारणेन न्यग्रोधकाया सुगन्धामलकमिति । मार्जारचर्म्मणि वर्णोत्कर्षापादनेन व्याघ्रचर्म्मेति स्फटिकमणौ वर्णान्तरकरणेन पद्मराग इति कार्पासिके सूत्रे गुणोत्कर्षाधानेन पट्टसूत्रमिति कार्पासवस्त्रे वर्णोत्कर्षाधानेन रजतमिति विल्वकाष्ठे चन्दनामोदसञ्चारणेन चन्दनमिति कक्कोले त्वगाख्यं लवङ्गमिति कार्पासिके वाससि गुणोत्कर्षाधानेन कौशेयमिति विक्रेयस्यापादितस्य द्रव्यन्यग्रोधादेः पण्यस्याष्टगुणो दण्डो वेदितव्यः ॥
"समुद्गपरिवर्त्तेन सारभाण्डञ्च कृत्रिमम् ।
आधानं विक्रयं वापि नयतो दण्डकल्पना ॥
भिन्ने पण्ये तु पञ्चाशत् पणे तु शतमुच्यते ।
द्विपणे द्विगुणो दण्डो मूल्यवृद्धौ च वृद्धिमान् ॥"
समुद्गं पिधानं मुद्गेन सह वर्त्तत इति समुद्गं करण्डकम् । परिवर्त्तनं व्यत्ययः । योऽन्यदेव मुक्तानां पूर्णं करण्डकं दर्शयित्वा हस्तलाघवेनान्यदेव स्फटिकानां पूर्णकरण्डकं समर्पयति यश्च सारं भाण्डं कस्तूरिकादिकं कृत्रिमं कृत्वा विक्रयमाधिं वा नयति तस्य दण्डकल्पना वक्ष्यमाणा वेदितव्या । कृत्रिमकस्तूरिकादेर्मूलभूते पणे भिन्ने न्यूने न्यूनपणमूल्यमिति । यावत्तस्मिन् कृत्रिमे विक्रीयते पञ्चाशत्पणो दण्डः पणमूल्ये पुनः शतं द्विपणमूल्ये द्विशतो दण्ड इत्येवं मूल्यवृद्धौ दण्डवृद्धिरूह्या ॥ * ॥ वणिजः प्रत्याह ।
"सम्भूय कुर्व्वतामर्घं सवाधशङ्कशिल्पिनाम् ।
अर्घस्य द्रष्टुं वृद्धिं वा जानतां दम उत्तमः ॥"
राजनिरूपितार्घस्य द्रष्टुं वृद्धिं वा जानन्नोऽपि वणिजः सम्भूय मिलित्वा कारुणां रजकादीनां शिल्पिनां चित्रकरादीनां सबाधं पीड़ाकरमर्घान्तरं लाभलोभात् कुर्व्वन्तः पणसहस्रं दण्डनीयाः ॥ * ॥ किञ्च ।
"सम्भूय वणिजां पण्यमनर्घेणापहन्यताम् ।
विक्रीणतां वा विहितो दण्ड उत्तमसाहसः ॥"
ये पुनर्वणिजो मिलित्वा देशान्तरादागतं पण्यमनर्घेण हीनमूल्येन प्रार्घ्यमाना उपरुन्धन्ति महार्घेण वा विक्रीणते तेषामुत्तमसाहसो विहितो दण्डो मन्वादिभिः ॥ * ॥ केन पुनरर्घेण पणितव्यमित्याह ।
"राजनि स्थाप्यते योऽर्घः प्रत्यहं तेन विक्रयः ।
क्रयो वा निस्तरस्तस्माद्वणिजां लाभकृत् स्मृतः ॥"
राजनि सन्निहिते सति यस्मिन्नार्घः स्थाप्यते निरूप्यते तेनार्घेण प्रतिदिनं क्रयो विक्रयो वा कार्य्यः । निर्गतः सर्वो निस्तरोऽवशेषः तस्माद्राजनिरूपितार्घो निस्तरः स एव वणिजां लाभकारी न पुनः स्वच्छन्दपरिकल्पितात् । मनुना चार्घकरणे विशेषो दर्शितः ।
"पञ्चरात्रे पञ्चरात्रे पक्षे मासे तथा गते ।
कुर्व्वीत चैषां प्रत्यक्षमर्घसंस्थापनं नृप ! ॥"
इति ।
किञ्च ।
"स्वदेशपण्ये च शतं वणिक् गृह्णीत पञ्चकम् ।
दशकं पारदेश्ये तु यः सदा क्रयविक्रयी ॥"
स्वदेशप्रापपण्यं गृहीत्वा यो विक्रीणीतेऽसौ पञ्चकं शतं पणशतं पणपञ्चकं लाभं गृह्णीयात् । परदेशप्राप्ते पुनः पण्ये शतपणमूल्ये दशपणान् लाभं गृह्णीयात् । यस्य पण्यग्रहणदिवस एव विक्रयः सम्पद्यते । यः पुनः कालान्तरेऽपि विक्रीणीते तस्य कालोत्कर्षबलाल्लाभोत्कर्षः कल्प्यः । एवञ्च यथार्घे निरूपिते पणशते पञ्चपणो लाभो भवति तथैवार्घे राज्ञा स्वदेशपण्यविषये स्थापनीयः ॥ * ॥ परदेशप्रपण्ये अर्घनिरूपणप्रकारमाह ।
"पण्यस्योपरि संस्थाप्य व्ययं पण्यसमुद्भवम् ।
अर्घोऽनुग्रहतः कार्य्यः क्रेतुर्विक्रेतुरेव च ॥"
देशान्तरादागते पण्ये देशान्तरगमनप्रत्यागमनभाण्डग्रहणशुल्कादिस्थानेषु यावानुपयुक्तोऽर्थस्तावन्तमर्घं परिगण्य पण्यमूल्येन सह मेलयित्वा यथा शतपणे दशपणो लाभः सम्पद्यते तथा क्रेतृविक्रेतोरनुग्रहकार्य्योऽर्घो राज्ञा स्थापनीयः ॥ * ॥ प्रासङ्गिकं परिसमाप्याधुना विक्रीयासम्प्रदानमुक्रमते । तत्स्वरूपं नारदेनाभिहितम् ।
"विक्रीय पण्यं मूल्येन क्रेतुर्यन्न प्रदीयते ।
विक्रीयासम्प्रदानं तद्विवादपदमुच्यते ॥"
तच्च विक्रेयद्रव्यस्य चराचरभेदेन द्वैविध्यमभिधाय पुनः षड्विधत्वं तेनैव प्रत्यपादि ।
"लोकेऽस्मिन् द्विविधं पण्यं जङ्गमं स्थावरं तथा ।

षड्विधस्तस्य तु दर्शैर्दानादानविधिः स्मृतः ॥
गणिकं तुलिमं मेयं क्रियया रूपतः श्रिया ॥"
इति ॥

गणिकं क्रमुकफलादि । तुलिमं कुङ्कुमादि । मेयं घृतादि । क्रियया वाहदोहादिरूपयोपलक्षितमश्वमहिष्यादि । रूपतः पण्याङ्गनादि । श्रिया दीप्त्या मरकतपद्मरागादि ॥*॥ इत्येतत् षट्प्रकारमपि पण्यं विक्रीयासंप्रयच्छतो दण्डमाह ।

"गृहीतमूल्यं यः पण्यं क्रेतुर्नैव प्रयच्छति ।
सोदयं तस्य दाप्योऽर्धं दिगुणं वा दिगागते ॥"

गृहीतं मूल्यं यस्य पण्यस्य विक्रीय तद्गृहीतमूल्यं तद्यदि विक्रीय प्रार्थयमानाय स्वदेशगवधिके क्रेत्रे न समर्पयति । तच्च पण्यं यदि क्रयकाले बहुमूल्यं सत् कालान्तरेऽल्पमूल्यमेव लभ्यते तदार्घह्रासजनितोदयो वृद्धिः पण्यस्य स्थावरजङ्गमात्मकस्य तेन सहितं पण्यं विक्रेता क्रेत्रे दापनीयः । यदा मूल्यह्रासजनितः पण्यस्योदयो नास्ति किन्तु क्रयकाले यावदेव यतो मूल्येयत्पण्यमिति प्रतिपन्नं तावदेव तदा तत् पण्यमादाय तस्मिन् देशे विक्रीणानस्य यो लाभस्तेनोदयेन सहितं द्विकं त्रिकमित्यादि प्रतिपादितवृद्धिरूपोदयेन वा सहितं क्रेत्रे दाप्यावग्राहापनीयः ॥ *॥ यथाह नारदः ।

"अर्घच्छेदवहीयेन सोदयं पण्यमावहेत् ।
स्थानिनामेष नियमो दिग्लाभं दिविचारिणाम् ॥"
इति ॥

यदा त्वर्घमहत्त्वेन पण्यस्य न्यूनभावस्तदा तस्मिन् पण्ये वस्त्रगृहादिके य उपभोगः तदाच्छादनसुखनिवासादिरूपो विक्रेतुस्तत्सहितं पण्यमसौ दाप्यः । यथाह नारदः ।

"विक्रीय पण्यं मूल्येन यः क्रेतुर्न प्रयच्छति ।
स्थावरस्य क्षयं दाप्यो जङ्गमस्य क्रियाफलम् ॥"
इति ॥

विक्रेतुरुपभोगः क्षय उच्यते । क्रेतुः समर्पयितुं क्षीयमाणत्वात् पुनः क्रयणात्पूर्वमस्वत्वादिरूपः । तस्य तु ।

"उपहन्येत वा पण्यं दहनेनापहियेत वा ।
विक्रेतुरेव तन्मूल्यं विक्रीयासंप्रयच्छतः ॥"
इत्यनेनोक्तत्वात् ।

यदा त्वसौ क्रेता देशान्तरात् पण्यग्रहणार्थमागतस्तदा तत् पण्यमादाय देशान्तरे विक्रीणानस्य यो लाभस्तेन सहितं पण्यं विक्रेता क्रेत्रे दापयितव्यः । क्वचित् क्रीतपण्यसमर्पणनियमोऽनुशयाभावे द्रष्टव्यः । सति त्वनुशये क्रीत्वा विक्रीय वा जिगदिषादि मनूक्तं वेदितव्यम् ॥*॥ किञ्च ।

"विक्रीतमपि विक्रेयं पूर्वक्रेतर्यसंशये ।
दानिश्चेत् क्रेतृदोषेण क्रेतुरेव हि सा भवेत् ॥"

यदा पुनर्वाक्यानुशयः क्रेता पण्यं न जिघृक्षति तदा विक्रीतमपि पण्यं चान्यत्र विक्रेयम् । यदा पुनर्विक्रेता दीयमानं क्रेता न गृह्णाति तत्र पण्यं राजदैविकेनोपहतं तदा क्रेतुरेवासौ हानिर्भवेत् । पण्यागृह्यरूपेण क्रेतृदोषेण नाशितत्वात् ॥*॥ अपि च ।

"राजदैवोपघातेन पण्ये दोषमुपागते ।
हानिर्विक्रेतुरेवासौ वाचितस्यापयच्छतः ॥"

यदा पुनः क्रेत्रा प्रार्थ्यमानमपि पण्यं विक्रेता न समर्पयति अजानतानुशयोऽपि तत्र राजदैविकेनोपहतं भवति तदासौ हानिर्विक्रेतुरेवातोऽन्यदुष्टं पण्यं विनष्टसदृशं क्रेत्रे देयम् ॥ किञ्च ।

"अन्यहस्ते च विक्रीतं दुष्टं वा दुष्टवद्यदि ।
विक्रीणीते दमस्तत्र मूल्यात्तु द्विगुणो भवेत् ॥"

यः पुनर्विनैवानुशयमेकस्य हस्ते विक्रीतं पुनरन्यस्य हस्ते विक्रीणीते सदोषं वा पण्यं प्राच्छादितदोषं विक्रीणीते तदा तत्पण्यमूल्यात् द्विगुणो दमो वेदितव्यः । *। नारदेनाप्यत्र विशेषो दर्शितः ।

"अन्यहस्ते तु विक्रीय योऽन्यस्मै तत्प्रयच्छति ।
ह्रस्वं तद्द्विगुणं दाप्यो विनयं तावदेव तु ॥
निर्दोषं दर्शयित्वा तु सदोषं यः प्रयच्छति ।
स मूल्याद्द्विगुणं दाप्यो विनयं तावदेव ते ॥"
इति ॥

सञ्चयार्थं विधिदत्तमूल्ये पण्ये द्रष्टव्यः । अदत्तमूल्ये पुनः पण्ये वाङ्मात्रक्रये क्रेतृविक्रेत्रोर्नियमकारिणः समयाहते प्रवृत्तौ निवृत्तौ वा न कश्चिद्दोषः ॥*॥ यथाह नारदः ।

"दत्तमूल्यस्य पण्यस्य विधिरेष प्रकीर्तितः ।
अदत्तेऽन्यत्र समयान्न विक्रेतुरविक्रयः ॥" इति ॥

विक्रयानुशयोरभिहितः क्रीतानुशयस्वरूपं तु प्राक् प्रपञ्चितमधुना तदुभयसाधारणं धर्ममाह ।

"क्रयं वृद्धिं च वाचा पण्यानामविजानता ।
क्रीत्वा नानुशयः कार्यः कुर्वन् षड्भागदण्डभाक् ॥"

परीक्षितक्रीतपण्यानां क्रयोत्तरकालं क्रयकालपरिमाणतोऽर्घकृतां वृद्धिमपश्यता क्रेत्रानुशयो न कार्यः । विक्रेत्रा च महार्घनिबन्धनं पण्यक्रयमपश्यता नानुशयितव्यम् । वृद्धिक्षयपरिज्ञाने पुनः क्रेतृविक्रेत्रोरनुशयो भवतीति यतिरेकाद्गम्यते । अनुशयकालावधिश्च नारदेनोक्तः ।

"क्रीत्वा मूल्येन यः पण्यं दुःक्रीतं मन्यते क्रयी ।
विक्रेतुः प्रतिदेयं तत् तस्मिन्नेवाह्नि विक्षतम् ॥
द्वितीयेऽह्नि ददत् क्रेता मूल्यात्त्रिंशांशमावहेत् ।
त्रिगुणन्तु तृतीयेऽह्नि परतः क्रेतुरेव तत् ॥"
इति ॥

अपरीक्षितक्रयविक्रये पुनः पण्यवेगुण्यनिबन्धनानुशयावधिं दर्शैकपञ्चसप्ताहेत्यादिना दर्शित एव । तदनया वाचो युक्त्या वृद्धिक्षयपरिज्ञानस्यानुशयकारणत्वमवगम्यते । यथा पण्यपरीक्षाविधिबलात् पण्यदोषाणां क्रयतः मूल्यदोषे

तद्वृद्धिक्षयकारणत्वितयाभावेऽनुशयकालाभ्यन्तरेऽपि यदनुशयं करोति तदा पण्यषड्भागं दण्ड्यः । अनुशयकारणसद्भावेऽपि अनुशयकालातिक्रमेणानुशयं कुर्वतोऽप्ययमेव दण्डः । उपभोगेनाविनश्वरेषु स्थिरार्घेष्वनुशयकालातिक्रमेणानुशयं कुर्वतो मनूक्तो दण्डो द्रष्टव्यः ।

"परेण तु दशाहस्य न दद्यान्नापि दापयेत् ।
आददानो ददच्चैव राज्ञा दण्ड्यः शतानि षट् ॥"
इति मिताक्षरायां विक्रीयासम्प्रदानं नाम प्रकरणम् ॥

अथ दृष्टफलम् ।

"कृषीष्टवाणिज्यं प्रकुर्वीतालसं सदा ।
आपत्काले स्वयं कुर्वन् नैनसा लिप्यते द्विजः ॥
लब्धलाभः पितॄन् देवान् ब्राह्मणांश्चैव पूजयेत् ।
ते तुष्टास्तस्य तं दोषं शमयन्ति न संशयः ॥
वणिक् कृषीदी दद्यात्तु वस्त्रगोकाष्ठगादिकम् ।
वणिक् कृषीद्यदोषः स्यात् ब्राह्मणानां पूजनात् ॥"
इत्याह्निकतत्त्वम् ॥

वा(वा)णिज्या, स्त्री, (वाणिज्य + टाप् । अभिधानात् स्त्रीत्वम् ।) वाणिज्यम् । इति शब्दार्थः ॥

वा(वा)ध, ऋ ॐ विप्रहणे । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट् ।) ध्र, अवबाधत । ड, बाधते । ऊनं न सत्त्वेष्वधिको बबाधे । इति रघुः ॥ २ । १४ ॥ इति दुर्गादासः ॥

वा(वा)धः, पुं, (बाधनमिति । बाध + भावे घञ् ।) प्रतिबन्धकः । बाधात । (यथा, ऋग्वेदे । ६ । ५१ । ७ ।
"यदीमर्भे महति वा हिताको बाधे मघतो अक्रामदेवान् ॥")न्यायमते साध्याभाववत्पक्षः । यथा । ह्रदो वह्निमान् । इति सामान्यनिरुक्तिगादाधरी ॥

वा(वा)धकः, पुं(वा(वा)धते इति । बाध + ण्वुल् ।) स्त्रीरोगविशेषः । यथा,—

"रक्तमाक्षी तथा षष्ठी चाङ्गेरी जलकुम्भिका ।
चतुर्विधो बाधकः स्यात् स्त्रीणां मुनिविभाषितः ॥
तेषां स्वभावं वक्ष्यामि यथाशास्त्रं विधानतः ।
एतेषां पूजनं कार्यं जनैः सन्तानकाङ्क्षिभिः ॥
निःसारणं स्थापनञ्च बलिदानं जपस्तथा ।
कर्त्तव्यो गुरुवाक्येन यथाशास्त्रं विचक्षणैः ॥
चतुर्विधो बाधकस्तु जायते ऋतुकालतः ॥"
तस्य लक्षणं यथा,—

"यथा कन्यां तथा गर्भेरधः पार्श्वे स्तनेऽपि च ।
रक्तमाक्षीप्रदोषेण जायते फलहीनता ॥
मासमेकं ह्रयं वापि ऋतुयोगो भवेद्यदि ।
रक्तमाक्षीप्रदोषेण फलहीना तदा भवेत् ॥"
इति रक्तमाक्षाः ॥

"नेत्रे हस्ते भवेज्ज्वाला योगो वैव विशेषतः ।
ज्वालायुतरक्तस्य षष्ठीबाधकयोगतः ॥
मासैकेन भवेद्दृश्या ऋतुस्नानह्रयं तथा ।
मलिना रक्तयोनिः स्यात् षष्ठीबाधकयोगतः ॥"
इति षष्ठाः ॥

वाधिर्य

"उद्दीपो गुरुणा देहे रक्तमार्गो भवेद्यदि ।
नाभेरधो भवेत् मूलं चाङ्गुरः स तु बाधकः ॥
ऋतुर्द्वीणा चतुर्मासं त्रिमासं वा भवेद्यदि ।
ब्रह्माङ्गीकरपादे च ज्वाला चाङ्गुरयोगतः ॥"
इति चाङ्गुरस्य ॥
"नग्नूता च नगर्भा च शुष्कदेहाल्परक्तिका ।
बलक्षुमारस्य दोषेण घायते फलहीनता ॥
या ब्रह्माङ्गी भवेत् सूना बहुकालऋतुस्रुता ।
गुरुस्नेही स्वल्परक्ता बलक्षुमारस्य दूषणात् ॥"
इति बलक्षुमारस्य ॥
इति वैद्यकम् ॥ बाधाजनके, त्रि ॥ (यथा, मार्कण्डेये । ३४ । १६ ।
"धर्मो धर्मानुबन्धार्थो धर्मो नात्यार्थ-
बाधकः ॥")
१(वा)धर्न, क्ली, (बाध + ल्युट् ।) पीड़ा । इति शब्दरत्नावली ॥ प्रतिबन्धकत्व ॥ (बाधते इति । बाध + ल्युः । पीड़ादातरि प्रतिबन्धके च त्रि । यथा, हरिवंशे । ८५ । ५३ ।
"श्रूयतां कथयिष्यामि यत्नोभौ शत्रुबाधनौ ॥")
२(वा)धा, स्त्री,(बाध + टाप् ।) पीड़ा । इत्यमरः । १ । ८ । ३ ॥ (यथा, मार्कण्डेये । २२ । ३ ।
"दुर्वृत्ताः सन्ति शतशो दानवाः पापयोनयः ।
तेभ्यो न स्यात् यथा बाधा मुनीनां त्वं तथा
कुरु ॥")
निषेधः । इति हेमचन्द्रः ॥
३(वा)धितः, त्रि, (बाध + क्त ।) बाधायुक्तः । निवर्त्तः । यथा । सञ्जनतविप्रतिषेधेन यद्बाधितं तद्बाधितमेव । इति मुग्धबोधटीकायां दुर्गादासः ॥
वाधिर्य, क्ली, (बधिरस्य भावः । बधिर + ष्यञ् ।) बधिरस्य भावः । कर्णरोगविशेषः । तस्य निदानम् । यथा,—
"यदा शब्दवहं वायुः स्रोत आवृत्य तिष्ठति ।
शुद्धः श्लेष्मान्वितो वापि बाधिर्यं तेन जायते ॥"
इति माधवकरः ॥
अस्यौषधं यथा,—
"शुष्कमूलकमुण्डीनां क्षारो पिप्पलनागरम् ।
शुक्तं चतुर्गुणं दद्यात्तैलमेतैर्विपाचयेत् ॥
बाधिर्यं कर्णशूलञ्च पूयस्रावञ्च कर्णयोः ।
क्रमयत्व विनश्यन्ति तैलस्यास्य प्रपूरणात् ॥"
अपि च ।
"प्रस्थे द्वे गन्धमालायां क्षारवेट्टोयमम्भसाम् ।
चतुर्भागावशेषेण तैलप्रस्थं विपाचयेत् ।
क्षाञ्जिकस्याढकं दत्त्वा पिष्ट्वान्येतानि दापयेत् ॥
पुनर्नवा गोक्षुरकं वैजयन्ती वृषस्य वचा ।
मरुवं सुरदारुञ्च हपुषी कण्टकारिका ॥
नक्तमालाकरञ्जेन कर्णशूलं पुराणकम् ।
बाधिर्यं सर्वरोगञ्च जयत्येष महेश्वर ! ॥"
इति गारुडे १८८ अध्यायः ॥
(यस्मात्प्रतिकारत्वेन यथा,—
"स एव ग्रन्थिमिवहा यदा शिराः
स्नायुयातो व्यतुल्य तिष्ठति ।
तदा नरस्याप्रतिकारसेविनो
भवेत्तु बाधिर्यमसंशयं खलु ॥"
इत्युत्तरतन्त्रे विंशतितमेऽध्याये सुश्रुतेनोक्तम् ॥
अस्य चिकित्सा यथा,—
"सामान्यतो विशेषेण बाधिर्ये पूरणं हरेत् ।
गवां मूत्रेण विल्वानि पिष्ट्वा तैलं विपाचयेत् ॥
सजलेन सदुग्धेन बाधिर्ये कर्णपूरणम् ।
सितामधुकविल्वोभिः सिद्धं वाते प्रयोजयेत् ॥
सिद्धं वा विल्वनिःक्वाथे प्रीतीभूतं तदुद्धृतम् ।
पुनः पचेद्दशगुणैः सितामधुकचन्दनैः ॥
वैल्वास्तु गाढ़ं तत्तैलं बाधिर्ये कर्णपूरणम् ।
वक्ष्यते यः प्रतिश्याये विधिः सोऽप्यत्र पूजितः ।
शतपाकी यश्चोक्तो विधिः स च हितो भवेत् ॥"
इति च तत्रैकविंशतितमेऽध्याये तेनैवोक्तम् ॥)
बाधं, त्रि, (बाध + ण्यत् ।) बाधनीयम् । बाधितव्यम् । निवर्त्यम् । यथा । बाङ्मिश्रितालिङ्गदर्शनात् प्रकरणमिदं बाधम् । इति ब्रह्मसूत्रस्य समञ्जसाटीका ॥ (यथा, मार्कण्डेये । ६६ । ४० ।
"गाहं खारोचिषस्तुल्यः स्त्रीबाधो वा जले-
चरि ! ॥")
बाधता, स्त्री, (बाधस्य भावः । बाध + तल् ।) बाधत्वम् । बाधस्य भावः इत्यर्थे तप्रत्ययनिष्पन्नोऽयं शब्दः ॥
बान्धकिनेयः, त्रि, (बन्धवा अपत्यं पुमान् । बन्धकी + "कल्याण्यादीनामिनङ् ।" ४ । १ । १२६ । इति फक् इनङ् च ।) अवन्तीसुतः । इत्यमरः । २ । ६ । २६ ॥
बान्धवः, पुं, (बन्धुरेव । बन्धु + "प्रज्ञादिभ्यश्च ।" ५ । ४ । ३८ । इति स्वार्थे अण् ।) ज्ञातिः । इत्यमरः । २ । ६ । ३४ ॥ सुहृत् । इति मेदिनी । वे, ४५ ॥ (यथा, मनुः । ५ । ७० ।
"गातिर्वर्धस्य कर्त्तव्या बान्धवैरुदकक्रिया ॥")
अस्य विवरणं बन्धुशब्दे द्रष्टव्यम् ॥
बाभवी, स्त्री, (बभ्रोर्महादेवस्य पत्नी । बभ्रु + अण् + ङीप् ।) दुर्गा । इति त्रिकाण्डशेषः ॥ (यथा, मार्कण्डेये । ६१ । २१ ।
"मेधे सरस्वति वरे भूति बाभ्रवि तामसि ! ॥")
बारकीरः, पुं, द्वारग्राही । बाड़वः । यूका । वैद्यिकेधिनी । नीराजितश्चयः । इति मेदिनी । रे, २८६ ॥
बार्ब्बटीरः, पुं, चणु । आस्वाम्रि । चञ्चुरः । गणिकासुतः । इति हेमचन्द्रः ॥
बार्हस्पत्य, त्रि, बृहस्पतिसम्बन्धि । बृहस्पतेरिदं इत्यर्थे (अण्) अप्रत्ययेन निष्पन्नम् ॥
बार्हस्पत्यः, पुं, (बार्हस्पत्यं बृहस्पतिप्रोक्तं शास्त्रं अधीयमानत्वेनास्त्यस्येति । अर्श आदित्वादच् ।) नास्तिकः । यथा, हेमचन्द्रः ।
"स्याद्वादवाधार्हतः स्याच्छून्यवादी तु सौगतः ।
नैयायिकस्तपादो योगः सांख्यस्तु कापिलः ॥
वैशेषिकः स्यादौलूक्यो बार्हस्पत्यस्तु नास्तिकः ।
चार्व्वाको लौकायतिकश्चेते षडपि तार्किकाः ॥"
(बृहस्पतिना प्रोक्तमिति । बृहस्पति + अण् ।) नीतिशास्त्रे, स्त्री । इति केचित् ॥ बृहस्पतेरिदमिति वा । बृहस्पति + "दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः ।" ४ । १ । ८५ । इति ण्यः ।) बृहस्पतिसम्बन्धिनि, त्रि ॥
बालं, क्ली, पुं, (वलतीति । वल + घञ् । गन्धद्रव्यविशेषः । वाला इति ख्यातम् । इति मेदिनी ॥ तत्पर्य्यायः । हीवेरम् २ वर्हिष्ठम् ३ उशीरम् ४ वीरणमूलकम् ५ वस्तुगामकम् ६ । इत्यमरः । २ । ४ । १२२ ॥ हिवेरम् ७ वर्हिष्ठम् ८ । इति भरतः ॥ वालकम् ९ वारिष्ठम् १० इति शब्दरत्नावली ॥ वरम् ११ हीवेरकम् १२ जेयकम् १३ वल्कम् १४ पिप्पम् १५ ललनाप्रियम् १६ ललनोशीरम् १७ कृष्णमोरम् १८ । अस्य गुणाः । शीतलत्वम् । लघुत्वम् । पित्तवान्तिदाहकफकुष्ठातिसारमूत्रकृच्छ्राग्निनाशित्वम् । केशहितत्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
"बाला बाल्यालिका बाला सैव बाल्यालिका-
पि च ।
महाबला पीतपुष्पा सहदेवी च सा स्मृता ।
ततोऽल्पातिबला ह्रस्वपत्रिका कान्तिकासच ।
गान्धिकी नागबला ह्रस्वा पृथ्वी मदेथुका ॥
अस्य गुणाः ।
बलाचतुष्टयं शीतं मधुरं बलकान्तिकृत् ।
स्निग्धं वातहरं वृष्यं पीतं रक्तारुगर्करम् ।
स्वल्पातिसारं हरति दहेन्नाशु संशयः ॥
हरेन्महाबला रक्तं भवेद्वातघ्नी मुनीश्वरी ।
ह्रस्वाऽतिबला मोहं प्रयता नितरां नृप ! ॥"
इति भावप्रकाशः ॥
बाल, त्रि, (वलतीति । वल प्राणने + "स्वलि तिकटत्तेभ्यो णः ।" ३ । २ । १४० । इति णः ।) मूर्खः ॥ (यथा, मनुः । २ । १५३ ।
"अज्ञो भवति वै बालः पिता भवति मन्त्रदः ।
अज्ञं हि बालमित्याहुः पितेत्येव तु मन्त्रदम् ।"
"वैशब्दोऽवधारणे अज्ञ एव बालो भवति नत्वल्पवयाः ।" इति तट्टीकायां कुल्लूकभट्टः ।) अर्भकः । इति मेदिनी । ले, ४० ॥ द्वितीयस्य पर्य्यायः । मानवकः २ । इत्यमरः । २ । ६ । ६० ॥ बालकः ३ मानवः ४ किशोरः ५ वटुः ६ शुद्धिन्धयः ७ वटुकः ८ किशोरकः ९ । इति शब्दरत्नावली ॥ पाकः १० गर्भः ११ शिशुकः १२ शिशुः १३ शावः १४ गर्भः १५ डिम्भकः १६ डिम्भः १७ । इति राजनिर्घण्टः ॥ स तु षोड़शवर्षपर्य्यन्तः प्रथमवयस्कः । यथा,—
"आषोड़शाद्भवेद्बालस्तरुणस्तत उच्यते ।
वृद्धः स्यात् सप्ततेरूर्द्धं वर्षीयान् भवतेः परम् ।"
इति स्मृतिः । इति भरतः ।
तस्य रक्षणाः सर्व्वदेवताः । यथा,—
"अनाथबालवृद्धानां दुष्टाः सर्व्वदेवताः ।"
इति ब्रह्मवैवर्ते श्रीकृष्णजन्मखण्डे ८६ अध्यायः ।
अथ बालस्य परिचर्य्याविधिः ।
"बालमङ्के सुखं दध्यात् नैनं तर्जयेत् क्वचित् ।

सहसा बोधयेन्नैव नाधोवायुमुपवेशयेत् ॥"
अधोवायुमुपवेशनानन्तरमर्घम् ।
"नाक्षण्यं स्थापयेत् क्रोडे न चिरं शयने क्षिपेत् ।
रोदयेन्न क्वचित् कार्य्यं विधिमावश्यकं विना ॥"
आवश्यको विधिः मेषलवदानतैलाभ्यङ्गोद्वर्त्तनादि॥
तच्चित्तमनुवर्त्तेत तं सदैवानुमोदयेत् ।
मंमेवेतमना एकं नित्यमेवाभिवर्द्धयेत् ॥
बालातपतडिद्दृष्टिधूमानलजलादिनः ।
निम्बोच्चस्थानतश्चापि रक्षेद्बालं प्रयत्नतः ॥"
बालस्य स्वभावाद्विज्ञानाह ।
"अभ्यङ्गोद्वर्त्तने स्नानं नेत्रयो रक्षनं तथा ।
वसनं रुदु यत्तच्च तथा रुद्वनुलेपनम् ॥
जन्मप्रभृति पथ्यानि बालस्यैतानि सर्व्वदा ॥"
बालस्य कवलादेः समयमाह
"कवलः पञ्चमादर्वाङ्निशतेश्चैव भेषुनम् ॥"
दन्तादेरवधिमाह सुश्रुतः ।
"बयस्तु त्रिविधं बालं मध्यमं वार्द्धकं तथा ।
ऊनषोडशवर्षस्तु नरो बालो निगद्यते ॥
त्रिविध, सोऽपि दुग्धाशी दुग्धान्नाशी तथान्न-
भुक् ॥
दुग्धाशी वर्षपर्य्यन्तं दुग्धान्नाशी शरद्वयम् ।
तदूर्द्धं स्यादन्नाशी एवं बालस्त्रिधा मतः ॥
मध्ये षोडशवत्सरोर्ध्वमः कथितो बुधैः ।
चतुर्थो मध्यमं प्राहुर्युवा द्वात्रिंशतो मतः ॥
चत्वारिंशत्समा यावत्तिस्रोहीर्य्यादिपूरितः ।
ततः क्लेन्द्र क्षीणः स्याद्यावद्भवति सम्प्रतिः ॥
वीर्य्यादीत्यादिशब्देन रक्तादिसर्व्वधात्विन्द्रिय-
बलोत्साहा उच्यन्ते । क्षीणः सर्व्वधात्विन्द्रिय-
बलोत्साहैर्हीनः ।
ततस्तु क्लमतेरूर्द्धं क्षीणधातुरसादिकः ॥
क्षीयमाणेन्द्रियबलः क्षीयतेऽहो दिने दिने ।
वलीपलितखालित्ययुक्तः कर्म्मसु चाक्षमः ॥
कासश्वासादिभिः क्लिष्टो वृद्धो भवति मानवः ॥
बाल्ये विवर्द्धते श्लेष्मा पित्तं स्यान्मध्यमाश्रितम् ।
वार्द्धके वर्द्धते वायुर्विचार्य्यैतदुपक्रमेत् ॥
उपक्रमेत् चिकित्सेत् ॥ तत्रान्तरे तु ।
बाल्यं वृद्धिरुविर्मेधा त्वग्दृष्टेः शुक्रौजसी ।
वृद्धिः कर्म्मेन्द्रियं रेतो जीवितं दशतो दृशेत् ॥"
इति भावप्रकाशः ॥
(अथ बालाशौचम् ।
"गर्भादिमासत्रयजातबालस्याशौचकालाभ्यन्तर-
मरणे मातापित्रोरस्पृश्यत्वं युक्तम् । तदेव
स्वजातपुत्रजननाशौचम् । ज्ञातीनान्त्वशौचं
नास्ति । नवमादिमासत्रयजातयोस्तु कन्या-
पुत्रयोः पित्रादि सपिण्डानां मातुश्च जनना-
शौचम् । तथ ब्राह्मणानां दशाहं शूद्राणां
मासः । पुनर्जन्मनि पितुः सचैलस्नानं पुत्रमुख-
दर्शनात् परं पुनः सचैलस्नानम् । पुत्रकन्याजनने
बालस्या दशाहानन्तरं लौकिककर्म्माधिकारः ।
पुत्रजनने ब्राह्मण्या विंशतिरात्रोत्तरस्नानात्
वैदिककर्म्माधिकारः । कन्याजनने तु ब्राह्मण्या
मासोत्तरस्नानात् वैदिककर्म्माधिकारः ।
शूद्रायाः कन्यापुत्रजनने त्रयोदशाहोत्तरं
लौकिककर्म्माधिकारः वैदिककर्म्मणि तु मासो-
त्तरस्नानात् शुद्धिः । एतत् सर्व्वं कन्यापुत्रयो-
र्विद्यमानत्वे बोध्यम् ॥
जननाशौचोत्तरं षण्मासाभ्यन्तरमघातदन्त-
मरणे मातापित्रोरेकाहः । सपिण्डानान्तु सद्यः
शौचम् ॥ षण्मासाभ्यन्तरेऽपि जातदन्तस्य
मरणे मातापित्रोश्चाहः । सपिण्डानामेकाहः ।
षण्मासोपरिद्विवर्षपर्य्यन्तं पित्रोस्त्र्यहः । सपिण्डा-
नामक्षतचूडे एकाहः क्षतचूडे त्र्यहः । द्विवर्षो-
परिमासत्रयाधिकषड्वर्षपर्य्यन्तमनुपनीतबाल-
कस्य मरणे मातापित्रादिसपिण्डानां त्र्यहः ॥
तन्मध्येऽप्युपनीतस्य मरणे दशाहः । मासत्रया-
धिकषड्वर्षोपरि मरणे पित्रादिसपिण्डानां
दशाहः ॥
सूतस्य षण्मासाभ्यन्तरे अनुत्पन्नदन्तस्य मरणे
त्रिरात्रम् । उत्पन्नदन्तस्य पञ्चाहः । षण्मा-
सोपरिद्विवर्षाभ्यन्तरे लक्षतचूडमरणे पञ्चाहः ।
तत्रापि क्षतचूडमरणे द्वादशाहः । द्विवर्षापरि
षड्वर्षाभ्यन्तरे मरणे द्वादशाहः । अत्रापि
क्षतोदाहेऽपि मासो यावद्विवर्तते षड्वर्षोपरि-
मासः ॥ * ॥ "बालकजननान्तरकर्त्तव्यमाह
वैद्यके । यथा,—"अथबालं शौचपरिवृतं
शौचवस्त्रावृतायां शय्यायां शाययेत् । पीलु-
बदरीनिम्बपरूषकशाखाभिश्चैनं वीजयेत् ।
सर्पिश्चास्याहरहस्तैलपिचुमवचारयेत् ।
धूपयेच्चैनं रक्षाग्निधूपैः । रक्षोघ्नानि चास्य
पाणिपादशिरोग्रीवास्वबध्नीयात् तिलातसी-
सर्षपकणांश्चाच प्रकिरेत् । अधिष्ठानं
चास्य प्रज्वालयेत् । ब्रह्मणोपासनोद्यक्तश्चेत ।
ततो दशमेऽहनि मातापितरौ क्षतमङ्गल-
कौतुकौ स्वस्तिवाचनं कृत्वा नाम कुर्य्यातां
यदभिप्रेतं नक्षत्रनाम वा ॥
ततो यथावर्णं धात्रीमुपयाचेदध्यप्रमाणां
मध्यमवयसमरोगां प्रौढपतीमचपलामलोलु-
पामक्षपामस्थूलां प्रसन्नक्षीरामलम्बौष्ठीमल-
म्बोर्द्धस्तनीमयङ्गामयसनिनीं जीवद्वत्सां दोग्ध्रीं
वत्सलामक्षुद्रकर्म्मिणीं कुले जातामतो भूयि
ष्ठैश्च गुणैरन्वितां श्यामामारोग्यबलवृद्ध्यै
बालस्य । तच्चोर्द्धस्तनी करालं कुर्य्यात् । सम्य-
स्तनीं नासिकासुखं छादयित्वा मरुद्यमायां
दयेत् । ततः प्रसन्नायां तिथौ शिरःस्नात
मङ्गलवाचनमुदङ्मुखं शिशुमुपवेश्य धात्रीं
प्राङ्मुखीमुपवेश्य दक्षिणं स्तनं धौतमौषत्परि
स्रुतमभिमन्त्र्य मन्त्रेणानेन पाययेत् ।
चत्वारः सागरास्तुभ्यं स्तनयोः क्षीरवाहिनः ।
भवन्तु सुभगे नित्यं बालस्य बलवृद्धये ॥
पयोऽन्तरस्थं पीत्वा कुमारस्ते सुभानने ।
दीर्घमायुरवाप्नोतु देवाः प्राप्यास्तथा यथा ॥
अतोऽन्यथा नानाकल्पोपयोगस्वास्थ्यात्
व्याधिरस्य भवति । अपरिस्रुतेष्वनिष्पन्न-
क्षान्पूर्णस्तनपानादुत्सुरितस्रोतसः शिशोः

कासश्वासवमीप्रादुर्भावः । तस्मादेवं विधानं
स्तन्यं न पाययेत् ॥"
"बालं पुनर्गाढसुखं गृहीयान्न चैनं तर्ज्जयेत्
सहसा न प्रतिबोधयेद्विस्रासभयात् सहसा
नापहरेदुत्क्षिपेद्वा वातादिविघातभयान्नोपवे
शयेत् क्रौञ्चभयात् नित्यचैनमनुवर्त्तेत प्रिय-
प्रतैरविघातुः । एवमनभिहतमनाक्षमिवर्द्धन
नित्यसुदयसत्त्वसम्पन्नो नीरोगः सुप्रसन्नमनाश्च
भवति । वातातपविद्युत्प्रभापादपसतामूत्रा-
गारनिम्नस्थानगृहच्छायादिभ्यो दुर्गन्धोपसर्गं
तस्य बालं रक्षेत् ।
नाशुचौ विक्षिपेद्बालं नाकाले विसृजेन्न च ।
नोष्णमारुतवर्षेषु रजोधूमोदकेषु च ॥
क्षीरसात्म्यतया क्षीरमात्रं मद्यमथापि वा ।
दद्यादास्तन्यमन्यान्नैर्बालानां वीक्ष्यमाचयः ।"
इति सुश्रुते शारीरस्थाने दशमेऽध्याये ॥
बा(वा)लः, पुं. (वलति मस्तकं रक्षति वेष्टयतीति
वा । वल + णः ।) शिरोभवाच्छादनविशेषः ।
चुल इति भाषा । तत्पर्य्यायः । शिखरः२ कचः
३ केशः ४ कुन्तलः ५ कुञ्चरः ६ शिरोरुहः ७
शिरसिरुट् ८ शिरोरुट् ९ शिरजः १० । इति
शब्दरत्नावली ॥ घोटकशिशुः । तत्पर्य्यायः ।
किशोरः २ । इत्यमरः ॥ अश्ववालधिः । करि-
वालधिः । नारिकेलः । इति मेदिनी । ले, ३९ ॥
पञ्चवर्षोयहस्ती । यथा,—
"पञ्चवर्षो गजो बालः स्यात् पोतो दशवर्षकः ।'
इति हेमचन्द्रः ॥
(यथा, भागवते । ६ । १० । ६ ।
"यो लोकक्षीरसमितौ धनुरैशमुग्रं
सीतास्वयंवरगृहे त्रिशतोपनीतम् ।
आदाय बालगजलीलयेक्षुयष्टिं
सज्यीकृतं नृप ! विकृष्य बभञ्ज मध्ये ॥")
पुच्छः । इति शब्दरत्नावली ॥ (यथा, कुमारे ।
१ । ४८ ।
"लब्धा तिरश्चां यदि चेतसि स्या-
दसंशयं पर्व्वतराजपुत्र्याः ।
तं केशपाशं प्रसमीक्ष्य कुर्यु-
र्बालप्रियत्वं शिथिलं चमर्यः ॥")
मत्स्यविशेषः । इति शब्दचन्द्रिका ॥
बालकं, क्ली, (बाल + स्वार्थे कन् ।) क्षीरम् ।
इति राजनिर्घण्टः ॥ (अस्य गुणा यथा,—
"बालकं शीतलं रूक्षं लघुदीपनपाचनम् ।
श्लेष्मासरुचिवीसर्पकृद्रोगमातिसारजित् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
अङ्गुलीयकम् । पारिभाष्यम् । इति विश्वः ॥
बालकः, पुं, (बाल एव । बाल + स्वार्थे कन् ।)
शिशुः । (यथा, मार्कण्डेये । ५१ । ५३ ।
"भूतानां मातृभिः सार्द्धं बालकानान्तु
शान्तये ।')
नाशः । हयबालधिः । हस्तिबालधिः । अङ्गुली-
यकम् । क्षीरम् । बलयम् । इति मेदिनी ।
के, १५० । केशः । इति विश्वः ॥ ७ ॥

वालाशौचं यथा,—
"अजातदन्ता ये बाला ये च गर्भाद्विनिःसृताः।
न तेषामग्निसंस्कारो न पिण्डं नोदकक्रिया॥
यदि गर्भो विपद्येत स्रवते वापि योषितः।
यावन्मासान् स्थितो गर्भस्तावद्दिनानि सूतकम्॥
आ नामकरणात् सद्य आ चूड़ान्नादहर्निशम्।
आ व्रतस्थाच्चिरात्रेयं तद्दृष्टं दृग्भिर्दिनैः॥"
इति गारुड़े १०६ अध्यायः॥

वालरक्षा यथा,—
"आदाय कृष्णं संत्रस्ता यशोदापि ततो द्विज!।
गोपुच्छभ्रामणेनाशु बालदोषमपाकरोत्॥
गोपुरीषमुपादाय नन्दगोपोऽपि मस्तके।
कृष्णस्य प्रददौ रक्षां कुर्वन्निदमुदीरयन्॥
नन्द उवाच।
रक्षतु त्वामशेषाणां भूतानां प्रभवो हरिः।
यस्य नाभिसमुद्भूतपङ्कजाद्भवज्जगत्॥
येन दंष्ट्राग्रविधृता धारयत्यवनी जगत्।
वराहरूपधृक् देवः स त्वां रक्षतु केशवः॥
नखाङ्कुरविनिर्भिन्नवैरिवक्षःस्थलो विभुः।
नृसिंहरूपी सर्व्वत्र स त्वां रक्षतु केशवः॥
वामनो रक्षतु सदा भवन्तं यः क्षणादभूत्।
त्रिविक्रमः क्रमाक्रान्तत्रैलोक्यः स्फुरदायुधः॥
शिरस्ते पातु गोविन्दः कण्ठं रक्षतु केशवः।
मुखं जठरं विष्णुर्जङ्घापादं जनार्द्दनः॥
सर्व्वं वाङ्मय प्रवाङ्मय च मनः सर्व्वेन्द्रियाणि च।
रक्षत्वशेषैश्वर्य्यस्तव नारायणोऽव्ययः॥
प्राच्यां खड्गगदाचक्रशङ्खनादहताः क्षयम्।
गच्छन्तु प्रेतकूष्माण्डा राक्षसा ये तवाहिताः॥
त्वां पातु दिक्षु वैकुण्ठो विदिक्षु मधुसूदनः।
हृषीकेशोऽम्बरे भूमौ रक्षतु त्वां महीधरः॥
एवं कृतस्वस्ययनो नन्दगोपेन बालकः।
प्रायितः शकटाख्याधो बालपर्य्यङ्किकातले॥"
इति विष्णुपुराणे। ५। ५॥

बालकप्रिया, स्त्री, (बालकानां प्रिया।) इन्द्रवारुणी। कदली। इति राजनिर्घण्टः॥

बालकृमिः, पुं, (बालस्य केशस्य कृमिः।) केशकीटः। इति जटाधरः॥

बालक्रीड़नं, क्ली, (बालस्य क्रीड़नम्। क्रीड्+भावे ल्युट्।) बालखेला। यथा,—
"बालक्रीड़नमिन्दुशेखरधनुर्भङ्गावधि प्रक्रता॥"
इत्यादि महानाटकम्॥

बालक्रीड़नकः, पुं, (बालानां क्रीड़नकः क्रीड़नकप्रयम्। बालका हि कपर्द्दकेन क्रीड़न्तीति प्रसिद्धेस्तथात्वम्।) कपर्द्दकः। इति राजनिर्घण्टः॥

बालखिल्यः, पुं, बालखिल्यमुनिः। यथा,—
"विधिना निर्म्मिता पूर्व्वं वेदी परमपावनी।
अग्निवेश्यादिमुनयो बालखिल्यादयः स्थिताः॥"
इति हरिवंशामायणे चित्रकूटमाहात्म्ये १ वर्गः॥
(बालखिल्यास्तु अङ्गुष्ठपरिमिताः षष्टिसहस्रसंख्याकाः। यथा, मार्कण्डेये। ५२। २४।
"ऋतोस्तु सन्ततिर्भार्य्या बालखिल्यानसूयत।
षष्टिर्यानि सहस्राणि ऋषीणामूर्द्ध्वरेतसाम्॥
अङ्गुष्ठपरिमितमुक्तमेतेषान्देहपरिमाणम्।
यथा, महाभारते। १। ३१। ८—९।
"यथापप्लवदृषीन् दृष्ट्वा अङ्गुष्ठोदरवर्त्मनः।
पलाशवृन्तिकामेकां सहितान् वहतः पथि॥
क्लिश्यमानान् मन्दबलान् गोभ्यर्थे संभ्रमोदके॥")
बालगर्भिणी, स्त्री, प्रथमगर्भवती गौः। तत्पर्य्यायः। प्रष्ठौही २। इत्यमरः। २।९।७०॥ पलीक्नी ३। इति जटाधरः॥ बालगर्भवती ४। इति शब्दरत्नावली॥

बालगोपालः, पुं, (बालः श्रीमूर्त्तिधरो गोपालः।) श्रीकृष्णमूर्त्तिविशेषः। यथा,—
"तीरपयोनिधिवृत्तनिवासं
हास्यकटाक्षनवंधृनिनादम्।
श्यामलसुन्दरनृत्यविलासं
तं प्रणमामि च बालगोपालम्॥"
इति नारदपञ्चरात्रे गोपालाष्टकम्॥

बालग्रहः, पुं, (बालानां बालकानां ग्रहः।) बालकहन्तृग्रहविशेषः। (यथा, मार्कण्डेये। ९२। २७।
"बालग्रहाभिभूतानां बालानां शान्तिकारकम्॥")
एतेषां विवरणम्। यथा,—
"बालग्रहा अनाचारात् पीड़यन्ति शिशुं यतः।
तस्मात्तदुपसर्गेभ्यो रक्षेद्बालं प्रयत्नतः॥"
अथ बालग्रहाणां नामान्याह।
"स्कन्दग्रहस्तु प्रथमः स्कन्दापस्मार एव च।
शकुनी रेवती चैव पूतना गन्धपूतना॥
पूतना शीतपूर्व्वा च तथैव मुखमण्डिका।
नवमो नैगमेयश्च प्रोक्ता बालग्रहा अमी॥"
अथ ग्रहाणामुत्पत्तिमाह।
"नवस्कन्दादयः प्रोक्ता बालानां ये ग्रहा अमी।
श्रीमन्तो दिव्यवपुषो नारीपुरुषविग्रहाः॥
एते स्कन्दस्य रक्षार्थं कृत्तिकोमाग्निमूर्त्तिभिः।
सृष्टाः शरवणस्थस्य रक्षितस्य स्वतेजसा॥
स्कन्दः सृष्टो भगवता देवेन त्रिपुरारिणा।
बिभर्त्ति चापरां संज्ञां कुमार इति संग्रहः॥"
अयं हि कार्त्तिकेयादन्यः।
"स्कन्दापस्मारसंज्ञो यः सोऽग्निना तत्समद्युतिः।
स च स्कन्दसखो नाम्ना विशाख इति चोच्यते॥
ग्रहाः स्त्रीविग्रहा ये ते नानारूपाः प्रकीर्त्तिताः।
देवानां कृत्तिकानां ते भागा राजसतामसाः॥
नैगमेयस्तु पार्व्वत्या सृष्टो स्त्रीषां ततो ग्रहः।
कुमारस्य हि देवस्य गुह्यस्यात्मसमोऽस्ति वै॥
ततो भगवति स्कन्दे सुरसेनापतौ कृते।
उपतस्थुर्ग्रहा स्तुते दीप्तशक्तिधरं गुहम्॥
ऊचुः प्राञ्जलयस्तेनं वृत्तिर्नो दीयतामिति।
तेषामर्थे ततः स्कन्दः शिवं देवमचोदयत्॥
ततो ग्रहांस्तानुवाच भगवान् भगनेत्रहृत्।
तिर्य्यग्योनिं मानुषञ्च देवञ्च चितयं जगत्॥
परस्परोपकारेण वर्त्तते धार्य्यते तथा।
देवा नरान् प्रीणयन्ति तिर्य्यग्योनींस्तथैव च॥
यथाकालं प्रवृत्तास्तु उच्चवर्षाहिमानिलैः।
इत्यञ्जलिनमस्कारैर्जपहोमैस्तथैव च॥
सम्यक्प्रयुक्तैश्च नरा प्रीणयन्त्यपि देवताः।
भागधेयं विभक्तञ्च प्रेम्णा किञ्चिन्न विद्यते॥
तदुष्माकं शुभा वृत्तिर्बालेऽवैव भविष्यति॥"
अथ बालग्रहाणां बालग्रहणकारणमाह।
"कुलेषु येषु नेज्यन्ते देवाः पितर एव च।
ब्राह्मणाः साधवो वापि गुरवोऽतिथयस्तथा॥
निवृत्तशौचाचारेषु तथा कृत्सितवर्त्तिषु।
निवृत्तभिक्षाबलिषु भग्नकांस्यगृहेषु च॥
गृहेषु तेषु बालांस्तान् ग्रहा हिंसन्त्यशङ्किताः।
तत्र वो विपुला वृत्तिः पूजा चैव भविष्यति॥
एवं ग्रहाः समुत्पन्ना बालान् हिंसन्ति चाप्यथ।
ग्रहोपसृष्टा बालाः स्युर्दुश्चिकित्स्यतमास्ततः॥"
अथ सामान्यग्रहजुष्टानां बालानां लक्षणान्याह।
"त्रस्यादुद्विजते बालः त्रस्यात्त्रस्यति रोदिति।
नखैर्दन्तैर्दारयति धात्रीमात्मानमेव च॥
ऊर्द्धं निरीक्षते दन्तान् खादेत् कूजति जृम्भते।
भ्रुवौ क्षिपति दन्तौष्ठः फेनं वमति वासकृत्॥
श्वासोऽति निद्रि जागर्त्ति शूलार्त्तो भिन्नविट्स्वरः।
मत्स्यगोक्षितगन्धश्च न चाश्नाति यथा पुरा॥
दुर्ब्बलो मलिनाङ्गश्च नष्टसंज्ञोऽपि जायते।
सामान्यग्रहजुष्टस्य लक्षणं समुदाहृतम्॥"
अथ विशिष्टग्रहजुष्टानां लक्षणान्याह।
"सस्ताङ्गः क्षतजसगन्धिकस्रुतदृष्टिवक्त्रास्रो हतचरणैकपक्षनेत्रः।
उद्विग्नः सललितचक्षुरस्फुरोष्ठी
स्कन्दार्त्तो भवति च गाढ़सुप्तिवन्हः॥
निःसंज्ञो भवति पुनर्लभेत संज्ञां
संस्रब्धः करचरणैश्च वृत्यतीव।
विण्मूत्रे स्रवति विनद्य जृम्भमाणः
फेनं वा स्रवति च तत्सखाभिजुष्टः॥"
तत्सखाभिजुष्टः स्कन्दापस्मारयुक्तः।
"सस्ताङ्गो भयचकितो विहङ्गगन्धिः
सास्रावव्रणपरिपीड़ितः समन्तात्।
स्फोटैश्च प्रचिततनुः सदाहपाकै-
र्विज्ञेयो भवति शिशुः क्षतः शकुन्या॥
रक्तास्रो हरितमलोऽतिपाण्डुदेहः
श्यावो वा सुखकरपाकवेदनार्त्तः।
गृह्णात्यधिततनुश्च कर्णनासं
रेवत्या भृशमभिपीड़ितः कुमारः॥
सस्ताङ्गः स्वपिति न वासरे न रात्रौ
विड्भिन्नं विरुजति काकतुल्याङ्गगन्धिः।
क्षुद्ग्रार्त्तो क्षुषिततनूरुहः कुमार-
स्तृष्णार्त्तो भवति च पूतनागृहीतः॥
यो देहि स्नपमसि न कावहिक्का-
क्षुद्दीभिर्ज्वरसहिताभिरर्द्यमानः।
दुर्ब्बर्णः सततमघापि योऽभ्यगच्छि-
त्तं ब्रूयादभिषगघ गन्धपूतनार्त्तम्॥
आक्रन्दन् परिचकितः सुवेपमानः
संसीदो भवति यथाग्रहैर्युक्तः।

मक्षाङ्गो भृशमतिसार्यते च यो वै
तं नूयाद्विषगथ शीनपूतनार्कम् ॥
स्नानाङ्गः सरुधिरपाणिपादवक्त्रो
यक्षाक्षी कलुषशिराहनोदरो वः ।
न क्षेयः शिशुरथ रक्तमिष्टकार्तः
सोद्वेगो भवति च सत्रतुल्यगन्धिः ॥
यः फेनं वमति विगम्यते च मध्ये
सोद्वेगो विहसति वोर्ध्वमीक्षमाणः ।
कूजेच्च प्रततमधो वसासगन्धि-
र्निःसंज्ञो भवति स नैगमेयजुष्टः ॥"

अथ सामान्यग्रहजुष्टानां चिकित्सामाह ।
महासुरुडतिकोदीच्यक्षाधस्नानं ग्रहापहम् ।
सहा माषपर्णी ।
"सप्तच्छदमयनिम्बाच्चन्दनैश्चानुलेपयेत् ।
सर्षपैलक् लशुनं मूत्रा सर्षपारिष्टपत्रवा: ॥
विडालविडवालोममेषशृङ्गी वचा मधु ।
धूपः शिशोर्ग्रहोपशमनेष्वग्रहनाशनः ॥
बालग्रान्तोक्तकर्माणि कार्याणि ग्रहशान्तये ।
वचा कुष्ठं तथा ब्राह्मी सिद्धार्थकमथापि च ॥
सारिवा सैन्धवश्चैव पिप्पली घृतमष्टमम् ।
सिद्धं घृतमिदं मेध्यं पिबेत् प्रातर्दिने दिने ॥
वृद्धस्मृतिः क्षिप्रमेधा कुमारो बुद्धिमान् भवेत् ।
न पिशाचा न रक्षांसि न भूता न च मातरः ॥
न भवन्ति कुमाराणां पिबतामष्टमङ्गलम् ॥"
अष्टमङ्गलं घृतम् ॥

अथ विशिष्टग्रहजुष्टानां चिकित्सामाह ।
"सोमवल्लीमिन्द्रवृक्षं वन्दाकं विषघं शमीम् ।
नगादन्याश्च मूलानि ग्रथितानि विधारयेत् ॥"
तत्र स्कन्दग्रहजुष्टस्य चिकित्सामाह ।
"स्कन्दग्रहोपसृष्टस्य कुमारस्य प्रशस्यते ।
बालग्रदमपत्राणां क्षाथेन परिषेचनम् ॥
देवदारुणि राम्नायां मधुरेषु गणेषु च ।
सिद्धं सर्पिश्च सक्षीरं पातुमस्य प्रदापयेत् ॥
सर्पणा: सर्पनिर्मोको वचा काकादनी घृतम् ।
उष्ट्राजाविगवाश्वापि रोमाण्युद्धूपनं भवेत् ॥"
काकादनी श्वेतगुञ्जा ।
सोमवल्लीमिन्द्रवृक्षं वृन्ताकं विषघं शमीम् ।
नगादन्याश्च मूलानि ग्रथितानि विधारयेत् ।"
सोमवल्ली सोमलता । इन्द्रवृक्षं ककुभम् ।
नगादनी इन्द्रवारुणी ।

रक्तानि माल्यानि तथा पताकां
रक्तांश्च गन्धान् विविधांश्च भक्ष्यान् ।
घृतञ्च देवाय बलिं निवेद्य
सकुङ्कुमं स्कन्दगृहे विधाय ॥
स्नानं चिरार्कं निशि चत्वरेषु
कुर्यात् परं शान्तियवैर्निवेद्य ।
गायत्रियुक्ताभिरथाद्रिसिद्धं
प्रज्ञाजवेदाहुतिभिश्च धीमान् ॥
रक्षामतः प्रवक्ष्यामि बालानां पापनाशिनीम् ।
यामिरक्षिरन्ति: ।
सप्तमं तैलमाक्षेव यष्टीमधुकमेव तथा ।
निधानं घोषयो देवः स ते स्कन्दः प्रसीदतु ।

ग्रहसेनापतिर्देवो देवसेनापतिर्विभुः ।
देवसेनारिपुहरः पातु त्वां भगवान् गुहः ॥
देवदेवस्य महतः पावकस्य च यः सुतः ।
गङ्गोमाकृत्तिकानाञ्च स ते शर्म्म प्रयच्छतु ॥
रक्तमाल्याम्बरधरो रक्तचन्दनभूषितः ।
रक्तदिव्यवपुर्देवः पातु त्वां क्रौञ्चहृदनः ॥"
अथ स्कन्दापस्मारग्रहजुष्टस्य चिकित्सामाह ।
"बिल्वः शिरीषो गोलोमी सुरसादिश्च यो गणः ।
परिषेकः प्रयोक्तव्यः स्कन्दापस्मारशान्तये ॥"
गोलोमी श्वेता दूर्वा । सुरसादिगणो यथा,—
"सुरसा श्वेतसुरसा पाठा फल्गी फणिज्झकः ।
सौगन्धिकं भूस्तृणको राजिका श्वेतवर्बरी ॥
कट्फलं खरपुष्पा च कासमर्दश्च शुक्लकः ।
विडङ्गमथ निर्गुण्डी कार्ष्णिकार उडुम्बरः ॥
बला च काकमाची च तथा च विषमुष्टिका ।
कफक्रिमिहरः ख्यातः सुरसादिरयं गणः ॥"
सुरसा कृष्णतुलसी । श्वेतसुरसा श्वेततुलसी ।
फल्गी भार्गी । फणिज्झकः मरुवकः । सौगन्धिकं कह्लारम् । भूस्तृणकः सुगन्धतृणम् ।
खरपुष्पा वर्बरी । कासमर्दः कसौंदी । विषमुष्टिका वकाइनि ॥ ४ ॥
"अश्वगन्धविपक्वञ्च तैलमभ्यङ्गने हितम् ।"
मन्त्राष्टकमाह ।
"गोजाविमहिषाश्वानां खरोष्ट्रकरिणान्तथा ।
मूत्राष्टकमिति ख्यातं सर्व्वग्राह्येषु सम्मतम् ॥
क्षीरीवृक्षकषायेण काकोल्यादिगणेन च ।
विपक्वं घृतं पचाद्दातव्यं पयसा सह ॥
काकोल्यादिगणेन कल्कीकृतेन तैलं पक्तव्यम् ।
काकोल्यादिगणो यथा.—
"काकोली क्षीरकाकोली जीवकर्षभकस्तथा ।
ऋद्धिर्वृद्धिर्मेदा महामेदा गुडूचिका ॥
मुद्गपर्णी माषपर्णी पद्मकं वंशरोचना ।
यष्टी प्रपौण्डरीकश्च जीवन्ती मधुयष्टिका ।
द्राक्षा चेति गणो नाम्ना काकोल्यादिरुदीरितः ।
स्तन्यकृद्वृंहणो वृष्यः पित्तरक्तानिलापहः ।
उत्क्लादनं वचा सिद्धमुक्तमत्र प्रकीर्त्तितम् ॥
गृध्रोलूकपुरीषाणि कैशा हस्तिनखो घृतम् ।
वृषभस्य च रोमाणि योज्यान्युद्धूपने सदा ॥
अनन्ता कुकुटी विल्वी मर्कटीष्वापि धारयेत् ॥"
अनन्ता यवासा इति लोके । कुकुटी शालमली ।
"पक्वान्यामानि मांसानि प्रसन्नं रुधिरं पयः ।
सद्योदनं निवेद्याथ स्कन्दापस्मारिणे वटे ॥"
वटे वटतले बलिं निवेद्येत्यन्वयः ।
तेन स्कन्दापस्मारिणा स्नानं कारयेदित्यन्वयः ।
"चतुष्पथे कारयेच्च स्नानं तेन ततः पठेत् ।
स्कन्दापस्मारसंज्ञो यः स्कन्दस्य दयितः सखा ।
विशाखः स शिशोरस्य शिवायास्तु सुभागवः ॥"
अथ शकुनीग्रहजुष्टस्य चिकित्सामाह ।
"शकुनीग्रहजुष्टस्य कार्य्यं वैद्येन जानता ।
रेतस्वलकपित्थानां क्षाथेन परिषेचनम् ॥
दर्भेरम्बुकोशीरवारिणोत्पलपद्मकैः ।

लोध्रप्रियङ्गुमञ्जिष्ठागैरिकैः प्रदिग्धक्षितम् ।"
प्रदिहेत् लिम्पेत् । रूपसिद्धिरार्ष्यत्वात् ।
"स्कन्दग्रहोक्ता धूपाश्च हिता अत्र भवन्ति हि
स्कन्दापस्मारशमनं घृतमत्रापि पूजितम् ;
घृतावरी न्यग्रोधनागदन्तीनिदिग्धिकाः ।
लक्ष्मणां मधुदैवाह्वं वृहतीष्वापि धारयेत् ॥"
न्यग्रोधः वटी इन्द्रवारुणी । नागदन्ती नाग
हुली इति लोके प्रसिद्धा ।
"तिलतण्डुलकं माल्यं हरितालं मनःशिलाम् ।
बलिरेष निशङ्कायै निवेद्यो नियतात्मना ॥
निकटे च प्रयोक्तव्यं स्नानमस्य यथाविधि ।
श्वेतगिरीषगन्धोदकुष्ठगुग्गुलुसर्षपैः ॥
सिद्धमभ्यञ्जने तैलं धारणं पूर्व्वमेव तु ।
शकुनीग्रहशान्त्यर्थं प्रदेहं कारयेद्धितम् ॥
कुर्य्याच्च विविधां पूजां शकुन्याः कुसुमैः शुभैः ।
निशुम्भोक्तेन विधिना स्वपयेत्तं ततः पठेत् ॥
अन्तरीक्षचरा देवी सर्व्वालङ्कारभूषिता ।
अधोमुखी रुक्षतुण्डा शकुनी ते प्रसीदतु ॥
दुर्दर्शना महाकाया पिङ्गाक्षी भैरवस्वरा ।
लम्बोदरी शङ्कुकर्णी शकुनी ते प्रसीदतु ॥"
अथ रेवतीग्रहजुष्टस्य चिकित्सामाह ।
"अश्वगन्धाबलाभृङ्गी च शारिवाथ पुनर्नवा ।
सहा विदारी श्वेतासां क्षाथेन परिषेचनम् ॥
अजभृङ्गी मेढ्रशृङ्गी । सहा सेवतीपुष्पजातिः ।
तैलमभ्यञ्जने कार्य्यं कुष्ठे सर्ज्जरसे तथा ।
पलङ्कषायां नलदे तथा गौरकदम्बके ॥
सर्ज्जरसः सालः पलङ्कषा गुग्गुलुः । नलदं
लामज्जकतृणं गौरकदम्बकः । गौरकदम्बकः
हारिद्रकः । हरदुया कदम्ब इति लोके ।
धवाश्वकर्णककुभशुक्लकीतिन्दुकेषु च ।
काकोल्यादौ गणे चापि सिद्धं सर्पिः प्रदेहितम् ॥
अश्वकर्णः शाकुन इति लोके प्रसिद्धः ।
कुसुम्भाः शुक्लचूर्णश्च प्रदेहः साधुगन्धिकः ।
गृध्रोलूकपुरीषाणि यवान् यवफले घृतम् ॥
सन्ध्योरुभयोः कार्य्यमेतद्धूपनं शिशोः ।
यवफलो वंशाङ्कुरः ।
सक्तवः सुमनसो लाजाः पयःशाल्योदनं दधि ।
बलिर्निवेद्यो गोतीर्थे रेवत्यै प्रयतात्मना ॥
गोतीर्थं गोष्ठे ।
स्नानं धात्रीकुमाराभ्यां सङ्गमे कारयेद्भिषक् ।
नानावस्त्रधरा देवी चित्रमाल्यानुलेपना ।
चलत्कुण्डलिनी श्यामा रेवती ते प्रसीदतु ॥
उपासते यां सततं देवो विविधभूषणाः ।
लम्बा करालाविगता तथैव कुटपुत्रिका ।
रेवती पुष्पनासा च तुभ्यं देवी प्रसीदतु ॥
अथ पूतनाग्रहजुष्टस्य चिकित्सामाह ।
कपोतवङ्का श्येनाक्षी बलाः शारिभद्रकः ।
आस्फोता चैव योज्याः स्युर्बालानां परिषेचने ।
कपोतवङ्का ब्राह्मी इति लोके । शारिभद्रो
निम्बः । आस्फोता अपराजिता ।
नवा पयस्या गोतीर्थे हरितालं मनःशिला ।
कुष्ठं सर्ज्जरसश्चैव तैलार्थे कल्क इष्यते ॥

मवा पयस्या गृतना घोरविदारी। गोगोमी
श्वेतदूर्वा।
घृतं घृतं तगाक्षीर्या संसिद्धं मधुकेऽपि च।
कुष्ठतालीसखदिरा: स्यन्दनोऽर्जुन एव च॥
मनस: कङ्कुमस्यापि मञ्जानो वदरस्य च।
कुङ्कुटास्थि घृतस्यापि धूपनं सह सर्षपै:॥
स्यन्दन: स्यन्दन वृक्षे एव नाम्ना प्रसिद्ध:।
काकादनीं चित्रफलां विल्वीं गुञ्जाञ्च धारयेत्।
काकादनी श्वेतगुञ्जा। चित्रफला इन्द्रदिन-
वारुणी।
मनुष्यौदनं बलिं दद्यात् क्षत्रियं पलसं तथा।
सरावसंपुटं कृत्वा तस्मै मूत्रं गृहे भिषक्।
उत्सादनाभिषिक्तस्य शिशो: स्नपनमिष्यते॥
कुष्ठतालीसखदिरं चन्दनं स्यन्दनं तथा।
देवदारु वचा रिष्टं कुष्ठं गिरिकदम्बक:।
एषा हरेच्चवश्यापि योज्या उद्धूपने सदा॥
मलिनाम्बरसंवीता सलिला रूक्षमूर्द्धजा।
सूत्यागाराश्रया देवी दारकं पातु पूतना॥"
अथ गन्धपूतनाग्रहगृहीतस्य चिकित्सामाह।
तिक्तदुमाणां पत्रेषु क्षारं कार्योऽभिषेचने।
तिक्तदुमाणाह।
निम्ब: पटोल: क्षुद्रा च गुडूची वासकस्तथा।
विसर्पकुष्ठगुन् स्यातो गणोऽयं पण्डितैकक:॥
पिप्पली पिप्पलीमूलं दर्गो मधुरको मधु।
शालपर्णीद्वयौ च घृतार्धं समाहरेत्॥
सर्वगन्धै: प्रदेहश्च गात्रे चाभ्यङ्ग एव च।
सर्वगन्धै: कुङ्कुमागुरुकर्पूरकस्तूरीचन्दनै:।
अभ्यङ्गोऽतु शीतलै: चन्दनकर्पूरै: न तु कस्तूरी-
कुङ्कुमागुरुभिस्तेषामुष्णत्वात्।
पुराणं कौक्कुटं केशधर्म सर्षपभवन्तथा।
जीर्णेषाभीक्ष्णशो वासो धूपनायोपकल्पयेत्॥
कुक्कुटीं मर्कटीं विल्वीमनन्तामपि धारयेत्।
सांसमामं तथा पक्वं शोणितञ्च चतुष्पथे।
निवेद्यमन्तरं गृहे शिशो: स्नपनमिष्यते॥
करालां पिङ्गला मुक्ता कषायाम्बरसंवृता।
देवी वारुणिमं प्रीता रक्षं त्वं गन्धपूतने॥"
अथ शीतपूतनाग्रहगृहीतस्य चिकित्सामाह।
गोरक्षं बस्तमूत्रञ्च सुरासामरदारु च।
कुष्ठं सर्वगन्धांश्च तैलार्धमवधारयेत्॥
सर्वगन्धान् चन्दनादीन्।
रोहिणीनिम्बखदिरपलाशकुभत्वच:।
नि:क्वाथ्य तस्मिन्:क्वाथे सक्षीरे विपचेद् घृतम्॥
एषोत्कृष्टगुणैर्युक्तं बस्तिगन्धं सहिङ्गवम्।
निम्बपत्रापि च तथा धूपनार्थं समाहरेत्॥
धारयेदपि गृध्रास्थ बलां काकादनीं तथा।
नद्यां सुरोदनेनापि तर्पयेच्छीतपूतनाम्॥
बलाग्रयान्ते बालस्य स्नपनस्योपदिश्यते।
बलाग्रयान्ते बलाग्रयतीरे।
देवै देयस्तथोपहारो वारुणी रुधिरं तथा॥
सुरौदनाशिनी देवी सुरागोमितभाषिणी।
बलाग्रयरता नित्यं पातु त्वां शीतपूतना॥"
अथ सुखमल्लिकाग्रहगृहीतस्य चिकित्सामाह।

पक्षिपित्तं विल्वतर्कारीवासागन्धर्वहस्तका:।
कुबेराक्षी च योज्या: सुवर्णानां परिषेचने॥
तर्कारी गणियारि इति लोके। गन्धर्वहस्तक:
श्वेत एरण्ड:। कुबेराक्षी पाड़रि इति लोके।
खरसैर्भृङ्गवृक्षाणां तथैव दधिमस्तया।
तैलं वचाञ्च संयोज्य पचेदभ्यञ्जनं शिशो:॥
भृङ्गवृक्ष: भंगरा इति लोके।
वचा सर्जरसं कुष्ठं सर्षपोद्भूपने हितम्॥
वर्णकं चूर्णकं माल्यमञ्जनं पारदं तथा।
मन:शिलाक्षोपहरेत् गोष्ठमध्ये बलिन्तत:।
पायसं सपुरोडाशं तद्वत्स्यार्धसुपाहरेत्।
मन्त्रपूताभिरद्भिश्च तत्रैव स्नपनं हितम्॥
बलाभिमन्त्रणमन्त्रमाह।
अलङ्कृता कामवती सुभगा कामरूपिणी।
गोष्ठमध्यालयरता पातु त्वां सुखमल्लिका॥"
अथ नैगमेयग्रहगृहीतस्य चिकित्सामाह।
विस्फोटमन्थपूतीकै: कार्यं स्यात् परिषेचनम्।
पूतीक: घोराकरञ्ज इति लोके प्रसिद्ध:।
प्रियङ्गुश्रीरलानन्ताग्रतपुष्पाकुटन्नटै:।
पचेत्तैलं सगोमूत्रं दधिमस्तुसकाञ्जिकै:॥
कुटन्नट वितुन्नकनाम्नो वृक्षविशेषस्य त्वक्।
गुड़तजी इति लोके प्रसिद्धा। तुलाक्षति:
श्योनाको वा।
वचां वयस्यां वटिकां गोलोमीं चापि धारयेत्।
वयस्या आमलकी गुडूची वा।
उत्सादनं हितञ्चात्र स्नेहाभ्यङ्गस्नानमन्नम्॥
मर्कटीलोकधात्रीणां पुरीषाणि भिलग्रहे।
धूम: सुप्रजने कार्यो बालस्य हितमिच्छता॥
भिलग्रहे नैगमेयग्रहे।
तिलतण्डुलकं साद्यं भक्ष्यांश्च विविधानपि।
कौमारभिलमेषाय तत्समक्षे निवेदयेत्॥
मेषाय नैगमेयग्रहाय।
अथस्तात् चीरवृक्षस्य स्नपनस्योपदिश्यते॥
अजाननस्थलाचिभु: कामरूपी महायशा:।
बालं पालयिता देवो नैगमेयोऽभिरक्षतु॥"
इति भावप्रकाश:॥
(तथास्य लक्षणान्तरं चिकित्सितञ्च यथा,—
"बलिप्रान्तीष्टकर्म्माणि कार्य्याणि ग्रहशान्तये।
मन्त्रश्चायं प्रयोक्तव्यस्तत्रादौ सर्व्वकामिक:॥
ॐ नमो भगवते गरुड़ाय चाम्बकाय सत्यस्तर
स्तुत स्तुत स्वाहा। ॐ कं खं टं पं शं वैनतेयाय
नम:। ॐ ह्रीं हुं फ्रें।
बालदेहप्रमाणेन पुष्पमालान्तु सर्व्वत:।
प्रगृह्य सुच्छिकाभक्तबलिर्देयस्तु शान्तिक:।
ॐकारी सुवर्णपक्षी बालकं रक्ष रक्ष स्वाहा:
ॐ नारायणाय नम:॥"
"प्रथमे दिवसे मासे वर्षे वा गृह्णाति गन्धा
नाम मालका तया गृहीतमात्रस्य प्रथमं भवति
ज्वर:। चक्षुरुन्मीलयति गात्रमुद्वेजयति न
शेते क्रन्दति स्नन्यं न गृह्णाति। जृम्भकारश्च
भवति। बलिन्तस्य प्रवक्ष्यामि येन सम्यद्यते
शुभम्। नद्युभयतटन्मृत्तिकां गृहीत्वा पुत्त-

लिकां कृत्वा शुक्लौदन: शुक्लपुष्पं सप्तध्वजा:
सप्तप्रदीपा: सप्तस्रक्तिका: सप्तवटका:। सप्त-
सष्कुलिका: सप्तगुड़िका गन्धताम्बूलं मत्स्यमांसं
सुरासप्तभक्तञ्च पूर्व्वस्यान्दिशि चतुष्पथे मध्ये
बलिर्दातव्य: अश्वत्थपत्रं जलकुम्भे निक्षिप्य
शान्त्युदकेन स्नापयेत्। रसोनसिद्धार्थक
मेषशृङ्गनिम्बपत्रशिवनिर्म्माल्यैर्बालकं धूपयेत्।
ॐ नमो नारायणाय अमुकस्य व्याधिं हन
हन सुष्व सुष्व स्वाहा एवं त्रिवारं बलिं
दत्त्वा चतुर्थे दिवसे ब्राह्मणं भोजयेत्। तत:
सम्पद्यते शुभम्॥
द्वितीये दिवसे मासे वर्षे वा गृह्णाति शुगन्दा-
नाम मालका। तया गृहीतमात्रस्य प्रथमं
भवति ज्वर:। चक्षुरुन्मीलयति गात्रमुद्वेजयति
न शेते क्रन्दति स्नन्यं न गृह्णाति जृम्भकारश्च
भवति।
बलिन्तस्य प्रवक्ष्यामि येन सम्यद्यते शुभम्।
तण्डुलं हस्तपृष्ठैकं गृहीत्वा दधिगुड़घृतमिश्रितं
शरावैकं गन्धताम्बूलं पीतपुष्पं पीतसप्त-
ध्वजा:। चत्वार: प्रदीपा: दक्षस्रक्तिका:
मत्स्यमांसमुरास्निलचूर्णञ्च पश्चिमस्यान्दिशि
चतुष्पथे बलिर्दातव्य:। दिनानि त्रीणि त्रिसन्ध्यं
तत: शान्त्युदकेन स्नापयेत्। शिवनिर्म्माल्य-
सिद्धार्थमार्ज्जारलोम उशीरबालकघृतैर्धूपं
दद्यात्। ॐ नमो नारायणाय अमुकस्य व्याधिं
हन हन सुष्व सुष्व ह्रीं फट् स्वाहा। चतुर्थे
दिवसे ब्राह्मणान् भोजयेत् तत: सम्पद्यते शुभम्।
तृतीये दिवसे मासे वर्षे वा गृह्णाति पूतनागा-
माल्लिका तया गृहीतमात्रस्य प्रथमं भवति
ज्वर:। गात्रमुद्वेजयति स्नन्यं न गृह्णाति
सृष्टिं वमति क्रन्दति जृम्भं निरीक्षते।
बलिन्तस्य प्रवक्ष्यामि येन सम्यद्यते शुभम्।
नद्युभयतटन्मृत्तिकां गृहीत्वा पुत्तलिकां कृत्वा
रक्तचन्दनं गन्धताम्बूलं रक्तसप्तध्वजा:। सप्त-
प्रदीपा: सप्तस्रक्तिका:। पश्चिमांसमुरामत्स्य-
दक्षिणस्यान्दिशि अपराह्णे चतुष्पथे बलि-
र्दातव्य:। शिवनिर्म्माल्यगुग्गुलुसर्षपनिम्बपत्रमेष-
शृङ्गैर्दिनत्रयं धूपयेत्। ॐ नमो नारायणाय
अमुकस्य व्याधिं हन हन सुष्व सुष्व स्वाहा।
चतुर्थे दिवसे ब्राह्मणान् भोजयेत् तत: सम्प-
द्यते शुभम्॥
चतुर्थे दिवसे मासे वर्षे वा गृह्णाति सुख-
सुप्तिकानाम मालका तया गृहीतमात्रस्य
प्रथमं भवति ज्वर:। ग्रीवां नामयति चक्षुरु-
न्मीलयति स्नन्यं न गृह्णाति रोदिति स्वपिति
सृष्टिं वमति बलिन्तस्य प्रवक्ष्यामि येन सम्पद्यते
शुभम्। नद्युभयतटन्मृत्तिकां गृहीत्वा पुत्तलिकां
कृत्वा उत्पलपुष्पं गन्धं ताम्बूलं दक्षध्वजा:
दीपाश्चत्वार:। त्रयोदश स्रक्तिका: मत्स्य-
मांसमुरामत्स्यभक्तञ्च उत्तरस्यां दिशि अपराह्णे
बलिर्देय: चतुष्पथे। ॐ नमो नारायणाय अमु-
कस्य व्याधिं हन हन मथ मथ स्वाहा। चतुर्थे

दिवसे ब्राह्मणान् भोजयेत् ततः सम्पद्यते शुभम्।

पञ्चमे दिवसे मासे वर्षे वा गृह्णाति वटपूत नाम मालका। तया गृहीतमात्रेण प्रथमं भवति ज्वरः। गात्रमुद्वेजयति स्तन्यं न गृह्णाति सृष्टिं वध्नाति। बलिन्तस्य प्रवक्ष्यामि येन सम्पद्यते शुभम्। कुम्भकारचक्रस्य मृत्तिकां गृहीत्वा पुत्तलिकां विधाय गन्धताम्बूलं शुक्लपुष्पं शुक्लौदनं पञ्च ध्वजाः पञ्च प्रदीपाः पञ्चवटकाः ऐशान्यां दिशि बलिर्दातव्यः। शान्त्युदकेन स्नापयेत्। शिवनिर्म्माल्यसर्पनिर्म्मोक गुग्गुलु निम्बपत्रवालकपृतेर्धूपं दद्यात्। ॐ नमो नारायणाय अमुकस्य व्याधिं चूर्णय चूर्णय हन हन स्वाहा। चतुर्थे दिवसे ब्राह्मणान् भोजयेत् ततः सम्पद्यते शुभम्॥

षष्ठे दिवसे मासे वर्षे वा गृह्णाति शकुनिकानाम मालका तया गृहीतमात्रेण प्रथमं भवति ज्वरः। गात्रभेदं दर्शयति दिवारात्रावुत्थानं भवति। ऊर्द्धं निरीक्षते। बलिं तस्य प्रवक्ष्यामि येन सम्पद्यते शुभम्। पिष्टकेन पुत्तलिकां कृत्वा शुक्लपीतरक्तपुष्पगन्धताम्बूलानि दश दीपाः। दश पीतध्वजाः दश स्वस्तिकाः दश वटकाः। क्षीरवस्तुड़िकाः। मत्स्यमांससुरा आग्नेय्यान्दिशि निष्क्रान्ते मध्याह्ने बलिर्दातव्यः। शान्त्युदकेन स्नापयेत्। शिवनिर्म्माल्यरसोनगुग्गुलुसर्पनिर्म्मोकनिम्बपत्रधूतैर्धूपं दद्यात्। ॐ नमो नारायणाय अमुकस्य व्याधिं चूर्णय चूर्णय हन हन स्वाहा। चतुर्थे दिवसे ब्राह्मणान् भोजयेत् ततः सम्पद्यते शुभम्॥

सप्तमे दिवसे मासे वर्षे वा गृह्णाति शुष्करेवती नाम मालका। तया गृहीतमात्रेण प्रथमं भवति ज्वरः। गात्रमुद्वेजयति सृष्टिं वध्नाति रोदिति। बलिन्तस्य प्रवक्ष्यामि येन सम्पद्यते शुभम्। रक्तशुक्लपुष्पं गन्धताम्बूलरक्तौदनं ज्ञात्वारास्त्रयोदश स्वस्तिकाः त्रयोदश सप्तुलिका जम्बुटिका मत्स्यमांससुरा त्रयोदश ध्वजाः पञ्च प्रदीपाः। पश्चिमस्यान्दिशि ग्रामनिष्क्रान्तेऽपराह्णे वृक्षमाश्रित्य बलिर्दातव्यः। शान्त्युदकेन स्नापयेत्। गुग्गुलुमेषशृङ्गसर्षपोग्रौर बालकधूतैर्धूपन्दद्यात्। ॐ नमो नारायणाय दीप्ततेजसे हन हन सुष्ठ सुष्ठ स्वाहा॥ चतुर्थे दिवसे ब्राह्मणान् भोजयेत् ततः सम्पद्यते शुभम्।

अष्टमे दिवसे मासे वर्षे वा गृह्णाति अर्यका नाम मालका तया गृहीतमात्रेण प्रथमं भवति ज्वरः। शूलगन्धः पूतिगन्धश्च जायते। आहारं न गृह्णाति गात्रमुद्वेजयति। बलिन्तस्य प्रवक्ष्यामि ततः सम्पद्यते शुभम्। रक्तपीतध्वजाः चन्दनं पीतपुष्पं सप्तुलयः पर्पटिका मत्स्यमांससुराः जम्बुड़िकाः प्रत्यूषे बलिन्दद्यात्॥ ॐ नमो नारायणाय त्रैलोक्यविघ्नविनाशाय चतुर्दिग्रामोत्सवाय व्याधिं हन हन सुष्ठ सुष्ठ ज्वल ज्वल दह दह ॐ ह्रीं फट् स्वाहा। चतुर्थे दिवसे ब्राह्मणान् भोजयेत् ततः सम्पद्यते शुभम्।

नवमे दिवसे मासे वर्षे वा गृह्णाति स्फुतिका नाम मालका। तया गृहीतमात्रस्य प्रथमं भवति ज्वरः। नित्यं छर्दयति गात्रभेदं दर्शयति सृष्टिं वध्नाति। निद्रातितरा स्याद्बलिन्तस्य प्रवक्ष्यामि येन सम्पद्यते शुभम्। नद्युभयतटन्मृत्तिकां गृहीत्वा पुत्तलिकां निर्म्माय शुक्लवस्त्रेण वेष्टयेत्। शुक्लपुष्पं शुक्लौदनं गन्धताम्बूलं शुक्लाः त्रयोदश ध्वजाः त्रयोदश प्रदीपाः त्रयोदश स्वस्तिकाः त्रयोदश मत्स्यमांससुराः। उत्तरदिग्विभागे ग्रामनिष्क्रान्ते बलिं दापयेत्। शान्त्युदकेन स्नापयेत्। गुग्गुलुनिम्बपत्रगोधूमगोशृङ्गश्वेतसर्षपधूतैर्धूपं दद्यात्। ॐ नमो नारायणाय चतुर्भुजाय हन हन सुष्ठ सुष्ठ स्वाहा। चतुर्थे दिवसे ब्राह्मणान् भोजयेत्ततः सम्पद्यते शुभम्।

दशमे दिवसे मासे वर्षे वा यदि गृह्णाति निर्ऋता नाम मालका। तया गृहीतमात्रेण प्रथमं भवति ज्वरः। गात्रमुद्वेजयति ओंकारं करोति पुरीषवन्मूत्रञ्च बहु भवेत्। बलिन्तस्य प्रवक्ष्यामि येन सम्पद्यते शुभम्। पारावारस्य मृत्तिकया पुत्तलिकां कृत्वा रक्तचन्दनगन्धताम्बूलादिभिर्भूषयित्वा पञ्च वर्णाः पञ्च ध्वजाः पञ्च प्रदीपाः पञ्च स्वस्तिकाः पञ्च पुत्तलिका मत्स्यमांससुराः वायव्यान्दिशि बलिन्दद्यात्। काकविष्ठागोमांसगोशृङ्गरसोनमाञ्जरीरोमनिम्बपत्रधूतैर्धूपयेत्। ॐ नमो नारायणाय चूर्णितदुःखाय हन हन सुष्ठ सुष्ठ स्वाहा। चतुर्थे दिवसे ब्राह्मणान् भोजयेत्ततः सम्पद्यते शुभम्॥

एकादशे दिवसे मासे वर्षे वा यदा गृह्णाति पिलिपिच्छिका नाम मालका। तया गृहीतमात्रस्य प्रथमं भवति ज्वरः। आहारं न गृह्णाति। ऊर्द्धदृष्टिर्भवति गात्रभङ्गश्च भवति ओंकारश्च भवति। बलिन्तस्य प्रवक्ष्यामि येन सम्पद्यते शुभम्। पिष्टकेन पुत्तलिकां कृत्वा रक्तचन्दनरक्तं तस्या सूत्रं दुग्धेन सिञ्चेत् पीतपुष्पं गन्धताम्बूलं पञ्च प्रदीपा अष्टौ वटका अष्टौ सप्तुलिका अष्टौ पूरिका मत्स्यमांससुराः पूर्वस्यान्दिशि बलिर्दातव्यः। शान्त्युदकेन स्नापयेत्। शिवनिर्म्माल्य गुग्गुलु गोशृङ्गसर्पनिर्म्मोकधूतैर्धूपयेत्। ॐ नमो नारायणाय सुष्ठ सुष्ठ स्वाहा। चतुर्थेदिवसे विप्रान् भोजयेत्तेन सम्पद्यते शुभम्॥

द्वादशे दिवसे मासे वर्षे वा यदा गृह्णाति कासुका नाम मालका। तया गृहीतमात्रस्यादौ जायते ज्वरः। प्रसित्वा वहति अश्रुस्रावयति क्रामति निःश्वसिति। सुदुर्मुहुर्हृदयति। आहारं न करोति। बलिन्तस्य प्रवक्ष्यामि येन सम्पद्यते शुभम्। क्षीरेण पुत्तलिकां कृत्वा शुक्लकुसुमं गन्धताम्बूलं शुक्लाः सप्त ध्वजाः। सप्त सप्तुलिकाः॥ सप्त प्रदीपाः। करम्भेण दधिभक्तेन सर्व्वकर्म्मबलिं दद्यात् शान्त्युदकेन स्नापयेत्। श्वेतसर्षपगुग्गुलुशिवनिर्म्माल्यधूतैर्धूपयेत्। ॐ नमो नारायणाय व्याधिं सुष्ठ सुष्ठ हन हन स्वाहा। चतुर्थे दिवसे विप्रान् भोजयेत्। ततः सम्पद्यते शुभम्॥

इति रावणकृतं बालतन्त्रं समाप्तम्।

इति वैद्यकचक्रपाणिसंग्रहे बालरोगाधिकारः।

बालचर्य्यः, पुं, (बालस्य बालकस्येव चर्य्या यस्य।) कार्त्तिकेयः। इति त्रिकाण्डशेषः॥ बालकस्य चरित्रे, क्ली॥

बालतनयः, पुं, (बालानि नवोद्गतपत्राणि तनयादव यस्य।) खदिरवृक्षः। इत्यमरः। २।४।१६८। (गुणादयोऽस्य खदिरशब्दे ज्ञातव्याः।) बालकपुत्रश्च॥

बालतन्त्रं, क्ली, (बालाय बालकरक्षार्थं तन्त्रमुपायः ज्ञानं वा।) गर्भिणीचर्य्या। तत्पर्य्यायः। कुमारभृत्या २ गर्भिण्यवेक्षणम् ३। इति त्रिकाण्डशेषः॥ (अस्य विवरणन्तु सुश्रुते उत्तरस्थाने १ अध्याये। यथा, "ग्रह्यं ग्रालाक्यं कायचिकित्सा भूतविद्या कौमारभृत्यमगदतन्त्रं वाजीकरणतन्त्रमिति॥" कौमारभृत्यस्य वा बालतन्त्रस्य लक्षणमाह तत्रैव। "कौमारभृत्यं नाम कुमारभवनधात्रीक्षीरदोषसंशोधनार्थं दुष्टस्तन्यग्रहसमुत्थानाञ्च व्याधीनामुपशमनार्थम्॥" बालतन्त्राणि कानि तान्याह तत्रैव ३ अध्याये।

"नवग्रहाकृतिज्ञानं स्कन्दस्य च निषेधनम्।
अपस्मारग्रहाणाञ्च रेवत्याश्च पुनः पृथक्॥
पूतनाधात्रिघान्नायाः मण्डिका शीतपूतना।
नैगमेयचिकित्सा च ग्रहोत्पत्तिः सयोनिजा॥
कौमारतन्त्रमित्येतत् शारीरेषु प्रकीर्त्तितम्॥"

एतेषां विवरणन्तु बालग्रहशब्दे द्रष्टव्यम्।)

बालतृणं, क्ली, (बालं नवजातं तृणम्।) नवतृणम्। तत्पर्य्यायः। शष्पम् २। इत्यमरः। २।४।२६७। (यथा, रघौ २।२६ श्लोकटीकायां मल्लिनाथः। गङ्गायाः प्रपातस्तस्यान्ते समीपे विरूढानि जातानि शष्पाणि बालतृणानि यस्मिन् तत्।")

बालदलकः, पुं, (बालानि दलानीव दलानि यस्य। यद्वा बाल इव क्षुद्रं दलं यस्य। ततः स्वार्थे कन्।) खदिरवृक्षः। इत्यमरटीकायां भरतः॥

बालधिः, पुं, (बालाः केशाः धीयन्तेऽत्र। बाल+धा+कि।) केशयुक्तलाङ्गूलम्। इत्यमरः। २।८५०॥ (यथा, किराते। १२। ४७।

"चमरीगणैः शिववृषस्य
बलवति भयेऽप्युपस्थिते।
वंशविततिषु विषक्तदृषु-
प्रियबालबालधिभिराददे धृतिः॥")

बालपत्रः, पुं, (बाल इव क्षुद्रं पत्रं यस्य।) खदिरवृक्षः। इत्यमरटीकायां भरतः॥ यवासः। इति राजनिर्घण्टः॥ (बालं पत्रमिति विग्रहे।) क्ली। नूतनपर्णम्॥ (यवासस्य पर्य्यायः॥

"खदिरो रक्तसारश्च गायत्री दन्तधावनः।
कण्टकी बालपत्रश्च वहुशल्यश्च यज्ञियः॥"
इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे॥)

बालपत्रकः, पुं, (बालपत्र एव। स्वार्थे कन्।) खदिरवृक्षः। इति त्रिकाण्डशेषः॥

बालपाठ्या, स्त्री, (बालपाठ्ये केशसमूहे साधुः तत्र साधुरिति यत्।) सीमन्तिकास्थितस्वर्णादिरचितपट्टिका। सिंती इति भाषा। तत्पर्य्यायः। परिनह्या २। इत्यमरः।२।६।१०३॥
बालपाठ्यस्थितमणिः। इति तट्टीकायां तर्कवागीशः॥

बालपुष्पिका, स्त्री, (बालानि क्षुद्राणि पुष्पाणि यस्याः। ततः स्वार्थे कन् कापि अत इत्वम्।) यूथिका। इति रामनिर्घण्टः॥ (विवृतिरस्या यूथिकाशब्दे निर्द्देक्ष्या॥)

बालपुष्पी, स्त्री, (बालानि क्षुद्राणि पुष्पाणि यस्याः सा।) यूथिका। इति जटाधरः॥

बालभद्रकः, पुं, (बालेऽपि भद्र इव। ततः स्वार्थे कन्।) विल्वभेदः। तत्पर्य्यायः। श्रीफलः २। इति शब्दचन्द्रिका॥

बालभैषज्यं, क्ली, (बालं भैषज्यम्। यद्वा, बालस्य शिशोर्भषज्यम्।) रसाञ्जनम्। इति राजनिर्घण्टः॥ बालकस्यौषधञ्च॥ (तद्यथा,—
"भैषज्यं पूर्व्वसुहृदं नराणां यच्चुरादिषु।
कार्य्यन्तदेव बालानां मात्रा तस्य कनीयसी॥"
इति वैद्यकचक्रपाणिसंग्रहे बालरोगाधिकारे॥)

बालभोज्यः, पुं, (बालानां भोज्यः।) चणकः। इति राजनिर्घण्टः॥ बालकभक्षणीये, त्रि॥

बालमूषिका, स्त्री, (बाला क्षुद्रा मूषिका इन्दुरः।) क्षुद्रमूषिका। छिट्का इन्दुर इति भाषा। तत्पर्य्यायः। गिरिका २। इत्यमरः।२।५।१२॥ चिञ्चः ३ वेश्मनकुलः ४ चिका ५। इति शब्दरत्नावली॥

बालयज्ञोपवीतकं, क्ली, (बालं यज्ञोपवीतम्। ततः स्वार्थे कन्।) उपवीतविशेषः। तत्पर्य्यायः। उरस्कटः २ पक्षवटः ३। इति त्रिकाण्डशेषः॥

बालराजं, क्ली, (बालः स्वल्पोऽपि राजते इति। राज+पचाद्यच्।) वैदूर्य्यम्। इति शब्दरत्नावली॥ बालकश्रेष्ठे, पुं॥

बालरोगः, पुं, (बालस्य रोगः।) बालकस्य व्याधिः। तस्य निदानं लक्षणानि चाह।
"धात्र्यास्तु गुरुभिर्भोज्यैर्विषमैर्दोषजैस्तथा।
दोषा देहे प्रकुप्यन्ति ततः स्तन्यं प्रदूषयति॥
मिथ्याहारविहारिण्या दुष्टा वातादयः स्त्रियाः।
दूषयन्ति पयस्तेन जायन्ते व्याधयः शिशोः॥"
वातदुष्टं शिशुः स्तन्यं पिबन् वातगदातुरः।
श्यामखरः क्षयाङ्गः स्याद्दुष्टविण्मूत्रमारुतः॥
खिन्नो भिन्नमलो बालः कामलापित्तरोगवान्।
दह्यालुरुष्णसर्व्वाङ्गः पित्तदुष्टं पयः पिबन्॥
श्लेष्मदुष्टं पिबन् क्षीरं लालालुः श्लेष्मरोगवान्।
निद्रार्दितो जडः शून्यवक्त्राक्षश्छर्द्दनः शिशुः॥
ज्वरादा व्याधयः सर्व्वे वस्यन्ते महतान्यु ये।
बालानामपि ते तद्वद्दोषजा भिषगुत्तमैः॥
बालानामेव ये रोगा भवन्ति महतां न च।
तालुकण्टकसुख्यांस्तानवधारय यत्नतः॥"
तत्रादौ तालुकण्टकमाह।
"तालुमांसे कफः क्रुद्धः कुरुते तालुकण्टकम्।
तेन तालुप्रदेशस्य निम्नता मूर्द्ध्नि जायते॥
तालुघातात् स्तनद्वेषः शुष्कात् पानं प्रशुष्कद्रवम्।
लड्डुकिकण्ठास्यरुजा ग्रीवादुर्हरता वमिः॥"
पानं स्तन्यस्य। प्रशुष्कद्रवं द्रवरूपम्॥
अथ महापद्ममाह।
"विसर्पस्तु शिशोः प्राणनाशनः शीर्षवस्तिजः।
पद्मवर्णो महापद्मरोगो दोषत्रयोद्भवः।
शुष्काभ्यां हृदयं याति हृदयाच्च गुदं व्रजेत्॥"
पद्मवर्णः लोहितवर्णः तत्र शीर्षजो विसर्पः शुष्काभ्यां हृदयं याति हृदयात् गुदं व्रजेत्। एवं वस्तितो गुदं याति। गुदतो हृदयं हृदयाच्छिरो याति इति बोद्धव्यम्॥
अथ कुकूणकमाह।
'कुकूणकः क्षीरदोषात् शिशूनामेव वर्त्मनि।
जायते तेन तन्नेत्रं कण्डूरं प्रसवेन्मुहुः॥
शिशुः कुर्य्यान्ललाटाक्षिकूटनासाप्रघर्षणम्।
शुक्लो नार्कप्रभां द्रष्टुं न वर्त्मोन्मीलनक्षमः॥'
कुकूणकः कोचुया इति लोके ख्यातः॥*॥
अथ तुण्डिगुदपाकमाह।
'वातेनाघ्रापिता नाभिः सरुजा तुण्डिरुच्यते।
बालस्य गुदपाकाख्यो व्याधिः पित्तेन जायते॥'
अथाहिपूतनं आह।
'शुक्लमूत्रसमायुक्तेऽधौते पाने शिशोर्भवेत्।
खिन्ने वा स्नाप्यमानस्य कण्डूः रक्तकफोद्भवा॥
कण्डूयनात्ततः क्षिप्रं स्फोटाः सावश्च जायते।
एकीभूतं व्रणं घोरं तं विद्यादहिपूतनम्॥
खिन्ने स्वेदिते॥*॥ अथाजगल्लीमाह।
स्निग्धा सवर्णा ग्रथिता निरुजा सुक्षसन्निभा।
कफवातोत्थिता ज्ञेया बालानामजगल्लिका॥'
ग्रथिता गुम्फितेव। सुक्षसन्निभा। सुक्षाकृतिः॥
अथ पारिगर्भिकमाह।
'मातुः कुमारी गर्भिण्याः स्तन्यं प्रायः पिबन्नपि।
कासाग्निसादवमथुतन्द्राकार्श्यारुचिभ्रमैः॥
युज्यते कोष्ठदुष्ट्या च तमाहुः पारिगर्भिकम्।
रोगं परिभवाख्यञ्च तत्र युञ्जीत दीपनम्॥'
पिबन्नपीत्यपिशब्दादपिबन्नपि पारिगर्भिकः।
अहीड़ी इति लोके।
परिभवाख्यं परिभवेति नामान्तरम्॥*॥
अथ दन्तोद्भेदकान् रोगानाह।
'दन्तभेदः शिशोः सर्व्वरोगानां कारणं स्मृतम्।
विशेषाच्छूरविड्भेदकासच्छर्द्दिशिरोरुजम्॥
अभिष्यन्दस्य पोषक्या विसर्पस्य च जायते॥'
कारणमित्यन्वयः। पोषक्याः वर्त्मरोगविशेषस्य॥
अथ बालरोगाणां चिकित्सा।
'भैषज्यं पूर्व्वसुहृदं महतां यच्चुरादिषु।
तदेव कार्य्यं बालानां किन्तु दाहादिकं विना॥'

दाहादिकं विना अग्निदाहादिप्रकारवमनविरेचनशिरावेधादिकं विना। अहाकण्टे चोत्पन्ने वमनविरेकाद्यं दद्यात्। यत आह सुश्रुतः।
विरेकवस्तिवमनानृते क्रुर्य्याच्च नात्ययादिति।
अत्ययात् विनाशकरकष्टात् ऋते विना॥
'त एव दोषा दूष्याश्च ज्वराद्या व्याधयश्च ते।
अतस्तदेव भैषज्यं मात्रा तस्य कनीयसी॥'
अस्य बालस्य। कनीयसीमात्रामाह विश्वामित्रः।
'विड्भङ्गफलमात्रन्तु जातमात्रस्य भेषजम्।
अनेनैव प्रमाणेन मासि मासि प्रवर्द्धयेत्॥'
विड्भङ्गपरिमितं भेषजं चूर्णीकृत्य किंवा कल्कीकृत्याथवावलेहीकृत्य दद्यादित्यर्थः। तन्त्रान्तरे त्वन्यथाभिहितम्।
'प्रथमे मासि बालाय देया भेषजरक्तिका।
अवलेह्या तु कर्त्तव्या मधुक्षीरसिताप्लुतैः॥
एकैकां वर्द्धयेत्तावद्यावत् संवत्सरो भवेत्।
तदूर्द्धं मात्रवृद्धिः स्याद्यावत् षोड़शवत्सरः॥'
एकैकां रक्तिकाम् तदूर्द्धं वर्षोपरि मात्रवृद्धिः प्रतिवर्षं षष्ठगुञ्जात्मकस्य मात्रस्य वृद्धिर्भवति। गुञ्जाः पञ्चाद्यमाषक इत्यमरसिंहः॥
'ततः स्थिरा भवेत्तावद्यावद्वर्षाणि सप्ततिः।
ततो बालकवन्मात्रा ह्रासनीया शनैः शनैः॥'
ततः षोड़शवत्सरोपरि।
'चूर्णकल्कावलेहानामियं मात्रा प्रकीर्त्तिता।
कषायस्य पुनः सैव विज्ञातव्या चतुर्गुणा॥
क्षीरस्य शिशोर्देयमौषधं क्षीरसर्पिषा।
धात्र्यास्तु केवलं देयं न क्षीरेणापि सर्पिषा॥'
क्षीरान्नादस्य पूर्ववत् क्षीरसर्पिषा। प्रकारान्तरेणौषधपानमाह सुश्रुतः।
'येषां गदानां ये योगाः प्रवक्ष्यन्ते गदङ्कराः।
तेषु तत्कल्कसंसिद्धौ पाययेत शिशुं स्तनौ॥'
अवचनानां बालानामभ्यन्तरव्याधिज्ञानोपायमाह।
'अङ्गप्रत्यङ्गदेशे तु रुजा यत्रास्य जायते।
सुहुर्मुहुः स्पृशति तं स्पृश्यमानेन रोदिति॥
निमीलिताक्षो मूर्द्धस्थे रोगे नो धारयेच्छिरः।
वस्तिस्थे मूत्रसङ्गार्त्तो क्षुधालड्डपि गच्छति॥
विण्मूत्रसङ्गवैकल्याच्छर्द्याघ्राणान्नकूजनैः।
कोष्ठे व्याधीन् विजानीयात् सर्व्वत्रस्थांश्च रोदनैः॥'
अथादौ ज्वरस्य चिकित्सामाह।
'सर्व्वं निवार्य्यते वाले स्तन्यं नैव निवार्य्यते।
मात्रया लङ्घयेद्वापि शिशोरेतद्विलक्षणम्॥'
मात्रया लङ्घयेत् लघु भोजयेत्।
'भद्रमुस्ताभयानिम्बपटोलमधुकैः शृतः।
क्वाथः कोष्णः शिशोरेष निःशेषज्वरनाशनः॥'
भद्रमुस्तादिक्वाथः सर्व्वज्वरेषु॥*॥
'घनकृष्णारुणाश्वङ्गीचूर्णं चौद्रेण संयुतम्।
शिशोर्ज्वरातिसारघ्नं कासं श्वासं वमिं हरेत्॥'
अरुणा अतिविषा। चतुर्भद्रिका ज्वरातिसारेषु॥

'विल्वस्य पुष्पाणि च धातकीनां
जलं सशोधं गजपिप्पली च ।
लाजावलेहौ मधुना विमिश्रौ
बालेषु योज्यावतिसारितेषु ॥'

जलं बाला । विल्वादिक्वाथावलेहौ। अतीसारेषु॥
'समङ्गाधातकीलोध्रसारिवाभिः कृतं जलम् ।
दुर्द्धरेऽपि शिशोर्हन्यमतीसारे समाचिकम् ॥'
समङ्गा लज्जालुकलम् । समङ्गादिक्वाथो दुर्द्धरेऽतीसारे ॥ * ॥
'विड्भान्यजमोदा च पिप्पलीतण्डुलानि च ।
एषामाक्षौद्र चूर्णानि सुखं तण्डुलवारिणा ।
श्यामे प्रवृत्तेऽतीसारे कुमारं पाययेद्भिषक् ॥'
विड्भादिचूर्णमतीसारे ॥ * ॥
'मोचरसः समङ्गा च धातकी पद्मकेशरम् ।
पिष्टैरेतैर्यवागूः स्याद्रक्तातीसारनाशिनी ॥'
मोचरसकल्कालुशृङ्गबिल्वकमलकेशरसमुदितोला १ तण्डुलकीखुदीतोला १ जलतोला ११ सर्व्वमेकीकृत्य यवागूः साधनीया । मोचरसादियवागू रक्तातिसारे ॥ * ॥
'नागरातिविषामुस्तावालकेन्द्रयवैः कृतम् ।
कुमारं पाययेत् प्रातः सर्व्वातीसारनाशनम् ॥'
नागरादिक्वाथः सर्व्वातीसारे ॥ * ॥
'लाजाश्चयष्टिमधुका शर्करा क्षौद्रमेव च ।
तण्डुलोदकयोगेन क्षिप्रं हन्ति प्रवाहिकाम् ॥'
लाजादिचूर्णं प्रवाहिकायाम् ॥ * ॥
'रजनी सरलो दारुहरीतकी गजपिप्पली ।
शृङ्गिपर्णी घृताक्षा च लीढं माक्षिकसर्पिषा ॥
दीपनं ग्रहणीं हन्ति मारुतार्शःकफामलम् ।
ज्वरातीसारपाण्डूग्रं बालानां सर्व्वरोगजुत् ॥'
रजन्यादिचूर्णं ग्रहण्यादौ ॥ * ॥
'पौष्करातिविषाशृङ्गीमागधीधन्वयासकैः ।
कृतं चूर्णन्तु सक्षौद्रं शिशूनां पञ्चकासजित् ॥'
पौष्करादिचूर्णं कासेषु । * ॥
'पौष्करातिविषावासाकणाशृङ्गीरसं लिहन् ।
मधुना सुप्तने दाल: कासैः पञ्चभिरुच्छ्रितैः ॥'
सुस्तकादिरसः कासेषु ॥ * ॥
'व्याघ्रीशृङ्गसमंजानकेशरैरवलेहिका ।
मधुना चिरसंजातान् शिशोः कासान् व्यपोहति ॥'
कासे ॥ ० ॥
'धान्यं शुण्ठ्या युक्तं तण्डुलोदकसंयुतम् ।
पानमेतत् प्रशस्तं स्यात् कासश्वासामयं शिशोः ॥'
धान्यादिपानं कासश्वासयोः ॥ * ॥
'द्राक्षावासाभयाशुण्ठीचूर्णं क्षौद्रेण सर्पिषा ।
लीढ्वा स्वादु निषेव्यासु कासेषु तमकं तथा ॥'
तमकं श्वासमेदम् । द्राक्षादिचूर्णं कासश्वासयोः ॥
'चूर्णं लवणकरीषिण्या मधुना सह योजयेत् ।
हिक्कां प्रशमयेत् क्षिप्रं छर्दिश्चापि चिरोत्थिताम् ॥'
हिक्कायां छर्द्यां च ॥ ० ॥
'व्याघ्रीशिरोगवक्षिवृत्तं सक्षौद्रं छर्दिनुन्नयेत् ।'
छर्द्यां ॥ * ॥
'पीतं पीतं वमेद्यस्तु स्तन्यं तं मधुसर्पिषा ।
द्विवार्त्ताकी फलरसं पक्वकोलस्य लेहयेत् ॥'
द्विवार्त्ताकी वृन्तीद्वयम् ॥ * ॥
'पञ्चकोलानि पिप्पलीपिप्पली-
मूलचव्यचित्रकनागराणि ॥'
क्षीरच्छर्द्याम् ॥ * ॥
'क्षौद्रेणार्कराक्षौद्रं लीढं छर्द्याहरं परम् ।
घृतेन सिन्धुविल्वेलाहिङ्गुभार्गीरजोलिहन् ॥
व्यानाहं वातिकं शूलं हन्यात्तोयेन वा शिशुः॥'
व्यानाहे वातशूले च ॥ * ॥
'कणोषणासिताक्षौद्रकृष्णेलासैन्धवैः कृतः ।
मूत्रग्रहे प्रयोक्तव्यः शिशूनां लेह उत्तमः ॥'
मूत्राघाते ॥ * ॥
'यदा तु दुर्ब्बलो बालः खादन्नपि च वह्निमान् ।
विदारीकन्दगोधूमयवचूर्णं घृतप्लुतम् ॥
खादयेत्तदनुक्षीरं शृतं समधुशर्करम् ॥'
कार्श्ये ॥ * ॥
'सुस्निग्धकुमाण्डबीजानि भद्रदारुकलिङ्गकान् ।
पिष्ट्वा तोयेन संलिम्पेल्लेपोऽयं श्रोणिवङ्क्षणयोः ॥'
श्रोणि ॥ * ॥
'पटोलत्रिफलारिष्टहरिद्राक्वथितं पिबेत् ।
चतुर्वीसर्पविस्फोटज्वराणां शान्तये शिशुः ॥'
चतुर्वीसर्पविस्फोटज्वरेषु ॥ * ॥
'गृहधूमनिशाकृष्णहरालिकेन्द्रयवैः शिशोः ।
लेपस्तक्रेण हन्यात् सिध्मपामविचर्चिकाम् ॥
सारिवातिललोध्राणां कषायो मधुकस्य च ।
संसर्गिणि सुखे श्रस्तो धावनार्थं शिशोः सदा ॥'
सुखसर्गे ॥ * ॥
'अश्वत्थत्वग्दलक्षौद्रैर्मुखपाके प्रलेपनम् ॥'
मुखपाके ॥ * ॥
'पिप्पलीत्रिफलाचूर्णं घृतक्षौद्रपरिप्लुतम् ।
बालो रोदिति यस्मिंस्ते लेढुं दद्यात् सुखावहम् ॥'
रोदने ॥ * ॥
'हरीतकी वचा कुष्ठं कल्कं माक्षिकसंयुतम् ।
पीत्वा कुमारः स्तन्येन मुच्यते तालुकण्टकात् ॥'
तालुकण्टके ॥ * ॥
'फलत्रिकं लोध्रयुगन्धवे च
सक्षङ्गवेरं दृढहरीतकी च ।
आलेपनं श्लेष्महरं सुखोष्णं
कुकूणके कार्य्यमुदाहरन्ति ॥'
कुकूणके ॥ * ॥
'वृत्तिखण्डेगायितप्रेण क्षीरसिक्तेन सोष्मणा ।
स्वेदयेदुत्थितां नाभिं श्रोणिस्तेनोपशाम्यति ॥'
नाभिश्रोणि ॥ * ॥
'नाभिपाके निशालोध्रप्रियङ्गुमधुकैः कृतम् ।
तैलमभ्यङ्गने शस्तमेभिर्वाप्यवधूलनम् ॥
दग्धेन छागशृङ्गस्य नाभिपाके वचूर्णनम् ।
त्वक्चूर्णैः क्षौद्रिणा वापि कुर्य्याच्चन्दनरेणुना ॥'
नाभिपाके ॥ ० ॥
'गुदपाके तु बालानां भिषग्भी कारयेत् क्रियाम् ।
रसाञ्जनं विशेषेण पानलेपनयोर्हितम् ॥
शृङ्गयष्ट्यञ्जनैश्चूर्णं शिशूनां गुदपाकजुत् ॥'
अञ्जनं रसाञ्जनम् । गुदपाके ॥ * ॥
'शृङ्गसौवीरयष्ट्याह्वैर्लेपो देयोऽक्षिपूतने ॥'
अक्षिपूतने ॥ * ॥
'पारिगर्भिकरोगे तु पूज्यते वह्निदीपनम् ॥'
पारिगर्भिके ॥ * ॥
'दन्तपालिन्तु मधुना चूर्णेन प्रतिसारयेत् ।
धातकीपुष्यपिप्पलीधात्रीफलरसेन वा ॥
दन्तोत्थानभवा रोगाः पीडयन्ति न बालकम् ।
जाते दन्ते हि शाम्यन्ति यतस्तद्धेतुका गदाः ॥'
दन्तोद्भेदजरोगेषु ॥ * ॥
'सौवर्णं सुकृतं चूर्णं कुष्ठं मधु घृतं वचा ।
मत्स्याक्षकः शृङ्गपुष्पी मधु सर्पिः सकाञ्चनम् ।
अर्कपुष्पीमधु घृतं चूर्णितं कृतकं वचा ।
सक्षैमचूर्णं कैटर्य्यं श्वेता दूर्व्वा घृतं मधु ।
चत्वारोऽभिहिताः प्राशा अर्द्धश्लोकसमापनाः ।
कुमाराणां वपुर्मेधाबलपुष्टिकराः स्मृताः ॥'
सौवर्णचूर्णम् । चतुर्ष्वपि योगेषु मारितसुवर्णचूर्णम् । मत्स्याक्षकः भ्राक्षी इति सोमवल्कम इत्येके । अर्कपुष्पी अर्कसदृशपुष्पलता । कैटर्य्यं कट्फलम् । श्वेता दूर्व्वाविशेषस्तु वर्षोत्थ केचित् । संवत्सरं यावदेते योगाः प्रयोज्याः द्वादशवर्षादीति केचित् ॥ * ॥
'बालानाञ्च वपुर्मेधाबलपुष्टिकराः स्मृताः ।
लाजाश्चरसे समे तैलं मस्तुन्यञ्च चतुर्गुणे ॥
रास्नाचन्दनकुष्ठाश्वगन्धाभिर्गन्धनिर्य्यासैः ।
घृताक्षादारुयष्ट्याह्वसुव्रीतिक्तोशीरेणभिः ॥
संसिद्धं ज्वररक्षोघ्नं बलवर्णकरं शिशोः ॥"
लाजादितैलं बालेषु ॥ * ॥ इति भावप्रकाशे बालरोगाधिकारः ॥

बालवायसं क्ली, (बालवाये वैदूर्य्यप्रभवे देशविशेषे जायते इति । जन्+ड ।) वैदूर्य्यम् । इति त्रिकाण्डशेषः ॥ (विस्तृतिर्विशेषश्चास्य वैदूर्य्यशब्दे ज्ञेयः ॥)

बालवासः [स्] क्ली, (बालानां लोम्नां वासेर्निर्म्मितं वा वासः ।) कैशनिर्म्मितवस्त्रम् । बालकस्य वस्त्रञ्च । इति केचित् ॥

बालवाह्यः पुं, (बालाः शिशवो वाह्या यस्य । एते खलु कस्मिंश्चिदुत्सवे भये शिशून् पृष्ठे निधाय पलायन्त इति प्रसिद्धेरस्यात्मम् ।) वनच्छागः । इति शब्दरत्नावली । ८१ ॥ बालकवहनीये त्रि ॥

बालव्यजनं क्ली, (बालस्य चमरीपुच्छस्य वालेन वा निर्म्मितं व्यजनम् ।) चामरम् । तत्पर्य्यायः । रोमगुच्छः २ प्रकीर्य्यकम् ३ । इति हेमचन्द्रः ॥ (यथा, कुमारे । १ । १३ ।
"क्षीरोदविक्षोभविसर्पिणोर्मि-
रिताक्षतश्चन्द्रमरीचिगौरैः ।
यस्यार्द्धयुक्तं गिरिराजशब्दं
कुर्व्वन्ति बालव्यजनैश्चमर्य्यः ॥")

वालकस्य वचनम् ॥
"बालग्रहणमोक्षं मणिकादीन् वपोहति ।"
इति द्रव्यगुणः ॥
बालघ्नः, पुं, मङ्गल्योषनामकपूर्व्वजिनविशेषः ।
इति त्रिकाण्डशेषः ॥
बालच्छायाभः, पुं. (बालसन्ध्या इव आभा यस्य ।)
अरुणवर्णः । इति हेमचन्द्रः ॥
बालसूर्य्यं, क्ली, (बालः सूर्य्य इव) वैदूर्य्यमणिः ।
इति त्रिकाण्डशेषः ॥ प्रातःकालीनसूर्य्ये, पुं ॥
बालसूर्य्यकं, क्ली, (बालसूर्य्य इव । बालसूर्य्य+
स्वार्थे कन् ।) वैदूर्य्यम् । इति शब्दरत्नावली ॥
बालहस्तः, पुं, (बाला हस्त इव मणिकादीनां
निवारकत्वात् ।) वालधिः । सोमवल्कलाङ्कुरः
लम् । इत्यमरः ॥ (केशानां हस्तः समूहः वि ।
केशसमूहश्च हस्त्युत्तरपदः ॥)
बाला, स्त्री, (बालाः केशा इव पदार्था विद्यन्ते
यस्याः । बाल+अर्श आद्यच् ततष्टाप् ।)
नारिकेलः । हरिद्रा । मल्लिकाभेदः । अलङ्कार-
भेदः । मेथम् । त्रुटिः । स्त्री । इति सुदाहिता
मेदिनी ॥ घृतकुमारी । हीवेरम् । इति शब्द-
चन्द्रिका ॥ अम्लिका । नीलझिण्टी । इति राज-
निर्घण्टः ॥ एकवर्षवयस्का गौः । यथा,—
"वर्षमाचा तु बाला स्यादतिबाला द्विवार्षिकी ।"
इति प्रायश्चित्ततत्त्वम् ॥
षोड़शवर्षीया स्त्री । सा षोड़शवत्कालेषु च
प्रशंसनीया सर्व्वदा च । इति राजवल्लभः ॥
(यथा, रतिमञ्जर्य्याम् ।
"बाला स्त्री प्राग्दशा प्रोक्ता तरुणी प्राग्-
दारिकी ।
प्रौढ़ा करोति हृदयं हृदा मरणमादिशेत् ॥"
यथा, मेघदूते । ८३ ।
"गाढ़ोत्कण्ठां गुरुषु दिवसेष्वेषु गच्छत्सु बालां
जातां मन्ये शिशिरमथितां पद्मिनीं वान्यरूपाम् ॥"
कन्यामात्रेऽपि । यथा, मार्कण्डेये । २१ । २८ ।
"इयं मूर्च्छामगत् कारणं यत् प्रदृश्य तत् ।
त्वयि प्रीतिमती बाला दर्शनादेव मानद ! ॥"
षष्टवर्षा स्मृता बाला । इति हारीते । १ । ५१ ।
जगद्विवाहिकी कन्या । तस्याश्चूड़ायुक्तबालस्य
च चूड़िसंस्कारादिनिषेधो यथा,—
"चूड़ासस्था ये बाला ये च गर्भाद्विनिःसृताः ।
न तेषामग्निसंस्कारो न क्रिया नोदकक्रिया ॥"
इति गारुड़े १०७ अध्यायः ॥
बालाक्षी, स्त्री, (बालाः केशा इवाक्षिषक्ष्म च
पुष्पं यस्याः ।) केशपुष्पाह्वः । तत्पर्य्यायः ।
भार्गवी २ दुर्गपुष्पी ३ केशधारिणी ४ । इति
शब्दचन्द्रिका ॥
बालार्कः, पुं, (बालो नवोदितोऽर्कः सूर्य्यः ।)
प्रातःकालीनसूर्य्यः । यथा,—
"रक्तवस्त्रपरीधानां बालार्कसदृशीं तनूम् ।"
इत्यादि विद्यारम्भे सरस्वतीध्यानम् ॥
कल्याणाग्निसदृशः । यथा,—
"शुष्कमांसं स्त्रियो दृष्ट्वा बालार्कसदृशं दधि ।
प्रभाते मैथुनं निद्रा सद्यःप्राणहराणि षट् ॥"
इति चाणक्यम् ॥
बालिः, पुं (बाले केशे जातः । बाल+इञ् ।)
कपिविशेषः । तत्पर्य्यायः । ऐन्द्रः २ वाली ३ ।
इति त्रिकाण्डशेषः ॥ (अयमेव श्रीरामेण हतः ।
अस्य चरित्रादिकन्तु बालिन्-शब्दे
द्रष्टव्या ।)
बालिका, स्त्री, (बाला एव । बाल+स्वार्थे कन् ।
टाप् अत इत्वम् ।) बाला । कन्या । वाटुका ।
पत्रकाष्ठला । कर्णभूषणम् । इति मेदिनी । के,
१३० ॥ एला । इति शब्दरत्नावली ॥ कन्या-
स्वरूपलक्षणे यथा,—
"कन्या देया स्वयं प्रोक्ता कन्यारूपा तु मूलिनी ।
यावदृतुमती योनिः स्यात्तावद्देवी सुरार्चिता ॥"
इति देवीपुराणम् ॥
बालिखिल्याः, पुं, पुलस्त्यकन्यायां सन्नत्यां क्रतोः
षष्टिसहस्रसंख्यकपुत्रा ऋषिविशेषाः । यथा,—
"प्रीत्या पुलस्त्यो भगवान् दक्षात्मिमलभत प्रभुः ।
पूर्व्वजन्मनि सोऽगस्त्यः स्मृतः सायम्भुवेऽन्तरे ॥
वेदबाहुं तथा कन्यां सन्नतिर्नाम नामतः ।
पुत्रार्थां षष्टिसाहस्रं सन्नतिः सुषुवे क्रतोः ॥
ते चोर्द्ध्वरेतसः सर्व्वे बालिखिल्या इति स्मृताः ॥"
इति कौर्म्म १२ अध्यायः ॥
अपि च ।
"क्रतोश्च सन्नतिर्भार्य्या बालिखिल्यानसूयत ।
षष्टिर्यानि सहस्राणि ऋषीणामूर्द्ध्वरेतसाम् ॥"
इति मार्कण्डेयपुराणे नक्षत्रसर्गः । ५२ । २७ ॥
तेषामङ्गुष्ठपरिमाणस्य प्रमाणं यथा,—
"अथापश्यदृषीन् दक्षानङ्गुष्ठोदरवर्ष्मणः ।
पलाशपत्रवृत्तिकामेकां सक्थितान् वहतः पथि ॥
प्रलीनान् खेऽभिवाञ्छेषु निराहारांस्तपोधनान् ।
क्लिश्यमानान् मन्दबलान् गोप्यदे संभ्रमोदके ॥"
इति महाभारते । १ । ३१ ॥
बालखिल्योऽपि पाठः । यथा. "ऋग्वेदान्तर्गत-
बालखिल्यमेकादशसूक्तं बालखिल्याः शंसन्ति
प्राणा वै बालखिल्याः । इति चरणव्यूहभाष्यम् ॥
बालिनी, स्त्री, अश्विनीनक्षत्रम् । इति हेमचन्द्रः ॥
बालिप्यं, क्ली, (बालाः सन्ति यस्य इति बाली
मस्तकस्तेन पीयते यत्र । प्री+आधारे ड ।)
उपधानम् । इति शब्दमाला ॥ (ब्राह्मणादि-
राकृतिगणः । इति पाणिनिः । ५ । १ । १२४ ॥)
बालिप्रः, त्रि, (बाल+इन् । उस्य लत्वं । बालिं
वृद्धिं प्रयातीति । बालि+प्री+आतोऽनुपेति
कः ।) शिखुः । (यथा, भागवते ।४।१४।२३।
"बालिप्रा वत यूयं वा अधर्म्मे धर्ममानिनः ॥"
बालिप्रा शिशुवृत्तय इत्यर्थः ॥) सर्पः । इति
मेदिनी । प्रे, २६ ॥ (यथा, मनुः । ३ । १७६ ।
"अपाङ्क्तयो यावतः पाङ्क्तयान् सङ्कीर्त्तयेन्नरः ।
तावतां न फलं तच्च दाता प्राप्नोति बालिप्रः ॥"
"बालिप्रोऽपि ।" इति तट्टीका ॥)
बालिघ्नः, पुं, (बालिं हन्तीति बालि+हन्+टक् ।
बालिहन्तरि वा घञर्थे कः ।) श्रीरामचन्द्रः । इति शब्दरत्नावली ॥
(बालिवधकथा यथा, रामायणे । ४ । १६ ।
२७—३६ ।
"सूर्य्यपुत्रो महावीर्य्यः सुग्रीवः परिवीयत ।
बालिना भ्रातृदयितः सुग्रीवो सन्निवेशितः ॥
बालिनं प्रति सामर्षो दर्शयामास राघवम् ।
दृष्ट्वे सप्तशालेः शिखरैर्वनकोटिभिरावृतैः ॥
सुस्थिभिर्जातुभिः पद्मिर्बाहुभिष्ट मगः पुनः ।
तयोर्युद्धमभूद्घोरं वृक्षशास्त्रयोरिव ॥
तौ प्रोत्थितौ मुष्टिभिर्वज्रकल्पैर्वनचारिणौ ।
मेघाविव महाशब्दैस्तर्जमानौ परस्परम् ॥
दीयमानमघापश्यत् सूर्य्यपुत्रं तदेश्वरम् ।
प्रेक्षमाणं दिशश्चैव राघवः स मुहुर्मुहुः ॥
ततो रामो महातेजा आर्त्तं दृष्ट्वा हरीश्वरम् ।
स धुरं वीक्षते वीरो वालिनो वधकाङ्क्षया ॥
ततो धनुषि सन्धाय शरमाशीविषोपमम् ।
पूरयामास तच्चापं कालचक्रनिभाननः ॥
तस्य ज्यातलघोषेण चकम्पे पन्नगेश्वरः ।
प्रदुद्रुवुर्गजाश्चैव युगान्ता इव मोहिताः ॥
सुस्रुवु वक्त्रनिर्घोषः प्रदीप्ताग्निसन्निभः ।
राघवेण महाबाणो वालिवक्षसि पातितः ॥
ततस्तेन महातेजा भीमसृष्टः क्षणेश्वरः ।
वेगेनाभिहतो वाली निपपात धरातले ॥)
ओड्रदेशान्तर्गतसाल्वविशेषश्च ।
वाली, [न्] पुं, (बालः केश उत्पत्तिस्थानत्वेन
विद्यते यस्य । बाल+इनिः । यद्वा निशाचरत्वात्
यथा, रामायणे ।
"अमोघरेतसस्तस्य वायोस्तस्य महात्मनः ।
वालेषु पतितं वीर्य्यं वाली नाम बभूव सः ॥")
इन्द्रपुत्रवानररात्रविशेषः । स तु श्रीरामचन्द्रेण
हतः । तस्योत्पत्तिर्यथा,—
"मेरुर्नगवरः श्रीमान् काञ्चनद्रुमभूषितः ।
तस्य यन्मध्यमं शृङ्गं सर्व्वदेवतपूजितम् ॥
तस्मिन् दिव्या सभा रम्या ब्रह्मणः सुतयोगता ।
तस्यामासीत् सदा देवः पद्मयोनिश्चतुर्मुखः ॥
योगमभ्यसतस्तस्य नेत्राभ्यां यदभूत् सवत् ।
तदृक्षरजसं भगवता पाणिना चर्षितन्तु तत् ॥
निःक्षिप्तमात्रं तद्भूमौ ब्रह्मणा लोककर्त्तृणा ।
तस्मिन्नृक्षबले राम ! वानरः संबभूव ह ॥
उत्तरं मेरुशिखरं गतस्तच्च ददर्शवान् ।
नानाविहगसंघुष्टं प्रसन्नसलिलं सरः ॥
आप्लुत्य चापतत्तस्मिन् हृदे वानरसत्तमः ।
उत्प्लुत्य तस्मात् स हृदादुत्थितः प्रथमः पुमान् ॥
तस्मिन्नेव क्षणे राम ! स्त्रीत्वं प्राप स वानरः ।
तद्रूपमद्भुतं दृष्ट्वा त्यक्तजीवं शैलेयमालगः ।
ततस्तत्यां सुरेन्द्रेण सूनुं शिरसि पातितम् ॥
जगामाशैव तां नारीं सन्निकर्षमथाग्रहम् ।
ततः सा वानरपतिं पत्नी वानरमीश्वरम् ॥
अमोघरेतसस्तस्य वायोस्तस्य महात्मनः ।
वालेषु पतितं वीर्य्यं वाली नाम बभूव ह ॥
भास्करेणापि तस्यां वै वानरेणर्क्षरजसा ।

बीजं निषिक्तं ग्रीवायां विधानमनुवर्त्तत ।
ग्रीवायां पतितं बीजं सुग्रीवः समजायत ॥"
इति रामायणे उत्तरकाण्डे । ३७ सर्गः ॥
अपि च ।
"वानरेन्द्रं महेन्द्राभमिन्द्रो वालिनमात्मजम् ।
सुग्रीवं जनयामास तपनस्तपतां वरः ॥"
इति रामायणे बालकाण्डे १७ सर्गः ॥
"ततः शरेणाभिहतो रामेण रणकर्कशः ।
पपात सहसा वाली निकृत्त इव पादपः ॥"
इति किष्किन्धाकाण्डे १७ सर्गः ॥
(बालाः केशाः सन्त्यस्य ।) बालविशिष्टे, त्रि ॥
वालीशः, पुं, क्षुद्रकुष्ठरोगः । इति शब्दरत्नावली ॥
वा(वा)लुः, स्त्री, (वलते अनेन । वल प्राणने । वल + उण् ।) एलवालुकनामकगन्धद्रव्यम् । इत्युणादिकोषः ॥
वा(वा)लुकं, क्ली, (वालुरेव । स्वार्थे कन् ।) एलवालुकम् । इत्यमरः । २ । ४ । १२१ ॥
वा(वा)लुकः, पुं, पानीयालुः । इति राजनिर्घण्टः ॥
वा(वा)लुका, स्त्री, (वालुक + टाप् ।) रेणुविशेषः । बालि इति भाषा । तत्पर्य्यायः । सिकता २ सिक्ता ३ शीतला ४ सूक्ष्मशर्करा ५ प्रवाही ६ महासूक्ष्मा ७ सूक्ष्मा ८ पाण्डीयवर्षिका ९ । अस्या गुणाः । मधुरत्वम् । शीतत्वम् । सन्तापश्रमनाशित्वञ्च ।
"सैकप्रयोगतश्चैव श्रमाग्नीषानिलापहा ॥"
इति राजनिर्घण्टः ॥
शाखा हस्तपादादि ॥ कर्कटी । इति जटाधरः ॥ कर्पूरः । यन्त्रविशेषः । इति शब्दचन्द्रिका ॥
वा(वा)लुकागड़ः, पुं, (वालुकायाः गड़नीति रम्यात् शरति यः । वालुका + गड़ शरणे + पचाद्यच् । वालुकाजातत्वादस्य तथात्वम् ।) मत्स्यविशेषः । वालिया इति भाषा । तत्पर्य्यायः । सिताङ्गः २ । इति हारावली । १६० ॥
वा(वा)लुकान्विका, स्त्री, (वालुकावदात्मा स्वरूपो यस्याः । कन् अत इत्वम् ।) शर्करा । इति शब्दचन्द्रिका ॥ (वालुका आत्मा यस्य ।) वालुकामये, त्रि ॥
वा(वा)लुकाप्रभा, स्त्री, (वालुकानामुष्णरेणूनां प्रभा यस्याम् । बहुव्रीहौ वालुकापरिधानत्वादस्य तथात्वम् ।) नरकविशेषः । इति हेमचन्द्रः । ५ । ३ ॥
वा(वा)लुकामयं, त्रि, (वालुका + मयट् ।) सिकतामयम् । इति सैकतशब्दटीकायां भरतः ॥
वा(वा)लुकायन्त्रं, क्ली, (वालुकाया यन्त्रम् ।) औषधपाकार्थयन्त्रविशेषः । यथा,—
"भाण्डे विनिम्ननीरे मध्ये निहितकूपके ।
कूपिकाकण्ठपर्य्यन्तं वालुकाभिश्च पूरिते ।
मेषशृङ्गं कूपिकायां संस्थं वह्निना यत्र पच्यते ।
वालुकायन्त्रमेतद्धि यन्त्रतत्त्वविदो विदुः ॥"
इति भावप्रकाशः ।
वा(वा)लुकाखेदः, पुं, (वालुकाभिर्विहितः खेदः ।) तप्तवालुकाभिस्तापनम् । यथा,—
"वातश्लेष्मकृते खेदान् कारयेदुष्णनिर्म्मितान् ।
स्निग्धः खेदो निषिद्धोऽत्र विना केवलवातजान् ॥
खर्परश्लक्ष्णपटस्थितकाञ्जिकसंसिक्तवालुकाखेदः ।
श्रमयति वातकफामयमस्तकशूलाङ्गभङ्गादीन् ॥
स्रोतसां मार्द्दवं कृत्वा नीत्वा पावकमाशयम् ।
कृत्वा वातकफस्तम्भं खेदो ज्वरमपोहति ॥"
इति भावप्रकाशः ॥
वा(वा)लुकी, स्त्री, (वलति वालयति वा । वल-प्राणने + उक । स्त्रियां ङीप् ।) कर्कटीभेदः । तत्पर्य्यायः । बहुफला २ स्निग्धफला ३ क्षेत्रकर्कटी ४ क्षेत्ररुहा ५ काण्डिका ६ क्षुद्रफला ७ । अस्या गुणाः ।
"वालुकी वातश्रमनी शीता हृद्या श्रमापहा ।
पित्तासृश्रमनी रुच्या कृमते कासपीनसौ ॥
स्याद्वालुकी श्वरदि वर्षजदोषकर्त्री
हैमन्तला च खलु पित्तहरा च रुच्या ।
क्षिप्रं करोति खलु योनिसमुद्भवक्षा
पक्वा त्वतीवमधुरा फलकारियी च ॥"
इति राजनिर्घण्टः ॥
वा(वा)लुङ्गी, स्त्री, कर्कटी । इति त्रिकाण्डशेषः ॥
वा(वा)लुङ्गिका, स्त्री, कर्कटी । इति शब्दरत्नावली ॥
वा(वा)लुङ्गी, स्त्री, कर्कटी । इति शब्दरत्नावली ॥
वा(वा)लूकः, पुं, (वलते प्राणान् हन्ति यः । वल ड वधे + ऊक ।) विषभेदः । इति हेमचन्द्रः । ३ । २ । ३ ॥
वा(वा)लेयः, पुं, (वलये उपकरणाय साधुः । वलि + "छन्दिरुपधिवलेर्ढञ् ।" ५ । १ । १३ । इति ढञ् ।) रासभः । इत्यमरः । २ । ९ । ७७ ॥ (यथा, मार्कण्डेये । ५० । ५५ ।
"एकच्छागं द्विवालेयं त्रिगवं पञ्चमाहिषम् ।
षड्भं सप्तमातङ्गं हत्वा यज्ञाय शोभय ॥"
वलेः स्वनामख्यातस्य दैत्यस्यापत्यं पुमान् । वलि + ढञ् ।) दैत्यविशेषः । इति धरणिः ॥ (वलिः विरोचनपुत्रस्तस्य वाणप्रेष्ठं पुत्रशतं जातम् ते च वालेयनाम्ना विख्याताः । यदुक्तमग्निपुराणे ।
"विरोचनस्य पुत्रस्तु बलिरेकः प्रतापवान् ।
बलेः पुत्रशतं जज्ञे राजानः सर्व्व एव ते ॥
तेषां प्रधानाश्चत्वारो विक्रान्ताः समहाबलाः ।
सहस्रबाहुर्व्योमश्च कण्व हे च बलेः सुते ॥
बलेः पुत्रास्तु पौत्राश्च शतशोऽथ सहस्रशः ।
वालेयो नाम विख्यातो गयो विक्रान्तपौरुषः ॥"
धनमेजयवंशोद्भवस्य ततपसो राज्ञः पुरोवलिस्तस्य पञ्च पुत्राश्च वालेयाः । यथा, हरिवंशे । ३१ । ३०—३३ ।
"केनस्य सुतपा जज्ञे जज्ञे सुतपसो बलिः ।
जातो मानुषयोनौ तु स राजा काशनेगुधिः ॥
महायोगी स तु बलिर्बभूव नृपतिः पुरा ।
पुत्रानुत्पादयामास पञ्च वंशकरान् भुवि ॥
अङ्गः प्रथमतो जज्ञे वङ्गः सुह्मश्चैव च ।
पुण्ड्रः कलिङ्गश्च तथा वालेयं चक्षनुच्यते ॥
वालेया ब्राह्मणास्तेषु तस्य वंशकरा भुवि ।
बलेस्तु ब्राह्मणा दत्ता वराः क्षेत्रेण भारत ॥")
व्यङ्गारवल्लरी । इति विश्वः ॥ पाचकद्रव्यम् । इति राजनिर्घण्टः ॥
वालेयः, त्रि, (वालाय हितः । बाल + ढञ् ।) रूढः । बालहितः । इति मेदिनी ॥ (बलये उपहाराय हितः । बलि + छन्दिरुपधिवलेर्ढञ् ।"५ । १ । १३ । इति ढञ् । तद्युक्तः । यथा, सिद्धान्तकौमुद्याम् ।"वालेयाश्चतुष्पदाः ।" बलियोग्यः । यथा, रघौ ।१४ । ७७ ।
"पुण्यं फलघार्णवमाहरन्तो
बीजञ्च वालेयमलङ्करोहि ।
विनोदयिष्यन्ति नवाभिषङ्गा-
सुदारवाधो सुनिकन्यकास्ताम् ।"
वितुन्नकनाम्नो वृक्षस्य त्वचि स्त्री । तत्पर्य्यायः यथा,—
"कुटन्नटं दासपुरं वालेय परियेलवम् ।
श्लक्ष्णपुरगोनर्द्दकैवर्त्तीसुस्तकानि च ।
सुस्तावत् पेलवपुटं शुक्लाभं स्यादितुन्नकम् ।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।
वालेयशाकः, पुं, (वालेयः वलिहितः शाकः ।) ब्राह्मणयष्टिका । इत्यमरः । २ । ४ । ८० ।
वालेष्टः, पुं, (वालानां इष्टः प्रियः ।) वदरः । इति राजनिर्घण्टः ॥ बालकाभिलषिते, त्रि ।
वालोपवीतं, क्ली, (वालानां बालकानां उपवीतम् ।) बालकपरिधानवस्त्रम् । तत्पर्य्यायः पश्चावटम् २ उरस्कटम् ३ । इति हारावली ४८ ॥ द्विजबालकानां यज्ञसूत्रञ्च ॥
वाल्मीकिः, पुं, वल्मीकस्यापत्यम् । (वल्मीक + इञ् ।) वल्मीकप्रभवो यस्मात् तस्माद्वाल्मीकिरित्यसौ इति ब्रह्मवैवर्त्तोक्तेः । वल्मीकप्रभवं गौणी पुत्रादिवद्यौगिकस्य वल्मीकापत्यत्वं तस्यैव साधुरपत्यार्थः । यद्वा वल्मीक इति स्त्री विशेषस्य संज्ञेत्याहुः ॥ मुनिविशेषः । यथा-
"तपःस्वाध्यायनिरतं तपस्वी वाग्विदांवरम् ।
नारदं परिपप्रच्छ वाल्मीकिर्मुनिपुङ्गवम् ।"
इति रामायणप्रथमश्लोकः ।
अपि च । ततस्तदनुग्रहार्थं रामचरितं दृष्ट्वा तस्य निरवद्यत्वं तत्प्रसादादेव सम्यक् त्रिभूलोकवर्त्तिनां चतुर्णां वर्णानां तापप्रशमनाय ब्रह्मांशभूत एव भगवान् प्राचेतो वाल्मीकिः स्वकृतशतकोटिरामायणसारं चतुर्विंशत्यक्षरगायत्र्याम्नायरूपद्वादशाक्षरविद्याभूतं रामायणं चतुर्विंशतिसहस्रश्लोकरूपं सर्गशताभ्यामध्यायैः षड्भिः । इति नदीका । अपि च ।
"नारायणात्मकाः सर्व्वे तेषां रामोऽग्रणीर्भवान् ।
रावणान्तकरो राजा रघूणां वंशवर्द्धनः ।
वाल्मीकिर्यस्य चरितं चक्रे भार्गवसत्तमः ।"
इति मात्स्ये १३ अध्यायः ।

बाल्यं, (बालस्य भावः कर्म्म वा। बाल+"पत्यन्तपुरोहितादिभ्यो यक्।" ५।१।१२८। इति यक्।) बालस्य भावः। तत्पर्य्यायः। शिशुत्वम् २ शैशवम् ३। इत्यमरः॥ तच्च षोढ़शवर्षपर्य्यन्तम्। आषोढ़ाद्भवेद्बाल्य इत्युक्तेः। इति भरतः॥ (यथा मनुः। ५।१४८।

"बाल्ये पितुर्वशे तिष्ठेत् पाणिग्राह्यस्य यौवने॥"

"वयस्तु त्रिविधं बाल्यं मध्यमं वार्द्धकन्तथा।
ऊनषोढ़शवर्षन्तु नरो बाल्ये निगद्यते॥"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥)

बा(वा)ल्यः (ल्यः) पुं, (बाधते नेत्रे इति। बाध+"सर्व्वधिष्ण्याधारूपपदेतल्याः।" उणा०। ३।२८। इति यः। निपातनं च।) उष्ण। अम्बु। इत्यमरः। ३।३।१३०॥ (यथा, रघौ। ८। ७०।

"अकरोत् पृथिवीरक्षानपि
सुतशोकारसबाष्पकृषिनान्॥)

बाह्यः, पुं, } (बाहुरेव। पृषोदरादित्वात् साधुः।)
बाह्या, स्त्री, } बाहुः। इत्यमरटीकायां रमानाथः॥ (यथाह उज्ज्वलदत्तः। १।१८।

"अकारान्तोऽपि बाह्यशब्दो भुजवाचकः। यथा च। बाह्योरश्वभुजयोः पुमानिति हारावलीकरः। टाबन्तोऽप्ययं। बाहुवाह्या भुजाभुजः। भुजाबाह्या इति वासवदत्तायां सुबन्धुप्रयोगः॥")

बाह्यावाह्यि, य, बाहुभिर्बाह्यैः प्रदत्तं यद् युद्धं तत्। इति सुग्धबोधव्याकरणम्॥

बाहुः, पुं, स्त्री, (बाधते शत्रून् इति। बाध+"अर्त्तिहृधिकम्यमिमंसिबाधाऽन्दिभ्यश्च तुक् धुक् दीर्घश्चाकारश्च।" उणा० १।२८। इति कुप्रत्ययोऽन्तस्य उकारादेशश्च।) कक्षाटमूलाग्रपर्य्यन्तावयवविशेषः। तत्पर्य्यायः। भुजः २ प्रवेष्टः ३ दोः ४। इत्यमरः। २।६।८०। दोषः ५ बाहः ६। इति जटाधरश्चन्द्ररत्नावली॥ तद्देहिकपर्य्यायः। आयती १ अवना २ अनीशू ३ अजवाना ४ विनंशसौ ५ गभस्ती ६ कवस्ती ७ बाहू ८ भूरिजौ ९ शिपस्ती १० शुक्करी ११ भरित्रे १२। इति द्वादश बाहुनामानि। इति वेदनिघण्टौ २ अध्यायः॥

(यथा ऋग्वेदे। ५।५०।६।

"अश्वयो वो मरुतो अंसयोरधि
रथे वोवो बाह्वोर्वो बलं हितम्॥"

वृषत्वरूपकबाहुलक्षणम्। यथा,—

"निर्मांसौ चैव भग्नाग्रौ क्षिप्तौ च विपुलौ समौ।
आजानुलम्बिनौ बाहू वृत्तौ पीनौ वृषेश्वरे॥"

इति गारुड़े ६६ अध्यायः।

(अस्य शुभाशुभलक्षणमुक्तं यथा सामुद्रके।

"उद्गतबाहुः पुरुषो वधबन्धनमाप्नुयात्।
दीर्घबाहुर्भवेद्राजा सत्यव्रतवचनं यथा॥
प्रलम्बबाहुरैश्वर्य्यं प्राप्नुयाद्भुवि संशयम्।
ह्रस्वबाहुर्भवेद्दासः परप्रेष्यकरस्तथा॥
यामार्द्धभुजा ये तु ये च दीर्घसुखा नराः।
संपूर्णबाहवो ये तु राजानस्ते प्रकीर्त्तिताः॥

पुरुषस्य दक्षिणबाहुस्पन्दने स्त्रियो वामबाहुस्पन्दने शुभं तद्विपरीते तु अशुभम्। यथा शाकुन्तले १ अङ्के।

"प्रान्तमिदमाश्रमपदं स्फुरति च बाहुः कुतः फलमिहास्य।
अथवा भवितव्यानां द्वाराणि भवन्ति सर्व्वत्र॥"

बाहुर्दक्षिणबाहुः। फलं वरस्त्रीलाभरूपम्॥
"वामेतरभुजस्पन्दो वरस्त्रीलाभसूचकः॥"
इतिवचनात्।)

कूर्परस्य ऊर्द्धभागः। यथा,—

"सुखं बाहू प्रबाहू च मनः सर्व्वेन्द्रियाणि च।
रत्नलक्षणनैर्ऋत्यस्तव नारायणोऽव्ययः॥"

अस्य टीका। बाहू प्रबाहू च कूर्परस्य ऊर्द्धाधोभागौ। इति विष्णुपुराणे। ५।५॥

बाहुकः, पुं, नलराजा। तत्पर्य्यायः। पुण्यश्लोकः २ अश्वविद् ३ नैषधः ४। इति त्रिकाण्डशेषः॥ (पुष्करेण कृतराज्यो हि नलः अहर्वैगुण्यात् विपिने दमयन्तीमपहाय प्रगच्छन् दावानलपरीतमनलभयादाक्रोशन्तं कर्कोटकनामानं नागमवलोक्य तत उद्धृतवान्। अथ प्रसन्नस्यास्य पन्नगस्योपदेशात् ऋतुपर्णस्य राज्ञो नगरं गत्वा बाहुक इत्यभिधेयस्तस्यैव राज्ञः घोटकपरिचर्य्यायां नियुक्तोऽभवत्। यदुक्तं महाभारते। ३।६०।१-७।

"तस्मिन्नन्तर्हिते नागे प्रययौ नैषधो नलः।
ऋतुपर्णस्य नगरं प्राविशद्दग्धमेऽहनि॥
स राजानमुपातिष्ठत् बाहुकोऽहमितिब्रुवन्।
अश्वानां वाहने युक्तः पृथिव्यां नास्ति मत्समः॥
अर्थकृच्छ्रेषु चैवाहं प्रष्टव्यो नैपुणेषु च।
अन्नसंस्कारमपि च जानाम्यन्यैर्विशेषतः॥
यानि शिल्पानि लोकेऽस्मिन् यत्रैवान्यन्नु सुदुष्करम्।
सर्व्वं यतिष्ये तत् कर्त्तुमृतुपर्णं! भरस्व माम्॥
ऋतुपर्ण उवाच।
वस बाहुक! भद्रन्ते सर्व्वमेतत् करिष्यसि।
शीघ्रयाने सदा बुद्धिर्ध्रियते मे विशेषतः॥
स त्वमातिष्ठ योगं तं येन शीघ्रा हया मम।
भवेयुरश्वाध्यक्षोऽसि वेतनं ते शतं शताः॥
त्वामुपस्थास्यतश्चैव नित्यं वार्ष्णेयजीवलौ।
एताभ्यां रंस्यसे सार्द्धं वस त्वं मयि बाहुक!॥"

कौरव्यकुलोद्भवो नागभेदः। यथा महाभारते। १।५०।१३।

"बाहुकः शङ्खवैरश्च धृतराष्ट्रः प्रातरातकौ।
कौरव्यकुलजास्तेते प्रविष्टा हयवाहनम्॥")

बाहुकण्ठः, त्रि. (बाहौ बाह्वोर्वावयवयोः कुष्ठः।) कुष्ठिनबाहुयुक्तः। कोपा इति भाषा। तत्पर्य्यायः। कुम्भः २ दीर्घबाहुः ३ इति जटाधरः॥

बाहुकृत्यः, पुं. (बाहुरिव कृत्यानि आचरतीति। बाहु+कृत्य+अच्। यद्वा बाहुभ्यां कृत्यानि यस्य।) यज्ञः। यथा,—

"गरुत्मत्यश्च ऋतवो यज्ञं पतत्रय तनूरुहम्।
देवर्षिर्देवकोषश्च बाहुकृत्यश्च कथ्यते॥"

इति शब्दरत्नावली।

बाहुजः, पुं, (ब्रह्मणो बाहुभ्यां जायते यः। बाहु+जन्+ड। "ब्राह्मणोऽस्य मुखमासीत् बाहू राजन्यः कृतः। ऊरुतदस्य यद्वैश्यः पद्भ्यां शूद्रोऽअजायत॥" इति श्रुतेस्तथात्वम्।) क्षत्रियः। इत्यमरः। २।८।१। (यथा,—

"वत्स! वाराणसीं गच्छ त्वं विश्वेश्वरपक्षभाम्।
तत्र नाम्ना दिवोदासः काशिराजोऽस्ति-
बाहुजः॥"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥)

कीरः। स्वयंजातलिङ्गः। इति मेदिनी। ते, २०॥

बाहुजातं त्रि॥

बाहुत्राणं क्ली, (त्रै+भावे+ल्युट्। बाह्वोस्त्राणं यस्मात्।) अस्त्राघातनिवारणार्थबाहुपट्टलौहादि। तत्पर्य्यायः। बाहुत्रम् २। इति हेमचन्द्रः। ३।४३३॥

बाहुदन्ती, [न्] पुं, (बाहवो दन्ता यस्य स बाहुदन्तः। रैरावतः स एव बाहुदन्तः। स्वार्थे अण्। बाहुदन्तोऽस्यास्तीति इनिः।) इन्द्रः। इति भूरिप्रयोगः॥

बाहुदा, स्त्री, (बाहू दत्तवती या। बाहु+दा+आतोऽनुपसर्गेति।"३।२।३। इति कः। लिखितस्य सुनेर्बाहुप्रदानादस्यास्तथात्वम्।) नदीविशेषः। तत्पर्य्यायः। सेतवाहिनी २। इत्यमरः॥ कदाचिल्लिखितास्यस्य सुनेर्ज्येष्ठभ्रातुः शङ्खस्य शून्याश्रमे फलभक्षणाद्राज्ञा बाहू छिन्नौ तौ चास्यां नद्यां तपस्यतस्तस्य पुनर्जाताविति। इत्यमरटीकायां भरतः॥ ९॥ (एतत्कथा यथा, महाभारते। १२।२६। १०—४०। व्यास उवाच।

"अत्राप्युदाहरन्तीममितिहासं पुरातनम्।
शङ्खश्च लिखितश्चास्तां भ्रातरौ संशितव्रतौ॥
तयोरावसथावास्तां रम्यौ द्वौ पृथक् पृथक्।
नित्यं पुष्पफलैर्देवैरुपेतौ बाहुदामनु॥
ततः कदाचिल्लिखितः शङ्खस्याश्रममागतः।
यदृच्छयाथ शङ्खोऽपि निष्क्रान्तोऽभवदाश्रमात्॥
सोऽभिगम्याश्रमं भ्रातुः शङ्खस्य लिखितस्तदा।
फलानि पातयामास सम्यक्परिपतान्युत॥
अभ्युपादाय विप्रर्षो भक्षयामास स द्विजः।
तस्मिंश्च भक्षयत्येव शङ्खोऽप्याश्रममागतः॥
भक्षयन्तन्तु तं दृष्ट्वा शङ्खो भ्रातरमब्रवीत्।
कुतः फलान्यवाप्तानि हेतुना केन खादसि॥
सोऽब्रवीत् भ्रातरं श्लक्ष्णमुपस्पृश्याभिवाद्य च।
इत एव गृहीतानि मयेति प्रहसन्निव॥
तमब्रवीच्छङ्खस्तीव्ररोषसमन्वितः
स्तेयं त्वया कृतमिदं फलान्यादत्ता स्वयम्॥
गच्छ राजानमासाद्य स्वकर्म्म कथयस्व वै।
अदत्तादानमेवं हि कृतं प्राधिबलोत्तम!॥
स्तेनं मां त्वं विदित्वा च सधर्म्ममनुपालयन्।
शीघ्रं धारय चौरस्य मम दण्डं नराधिप!॥
इत्युक्तस्य वचनात् सुदुःखं च नराधिपम्।
अथागच्छन् महाभागो लिखितः श्रेष्ठव्रतः॥
सुदुःखरक्तनेत्राभ्यः दृष्ट्वा लिखितमागतम्।

अभ्यगच्छत् सहामात्यः पद्भ्यामेव जनेश्वरः ॥
तमब्रवीत् समागम्य स राजा धर्म्मावेत्तमम् ।
किमागमनमाचक्ष्व भगवन् ! कृतमेव तत् ॥
एवमुक्तः स विप्रर्षिः सुद्युम्नमिदमब्रवीत् ।
प्रतिश्रुत्य करिष्येति श्रुत्वा तत्कर्त्तुमर्हसि ॥
अनिष्टानि गुरुणा फलानि मनुजर्षभ ! ।
भक्षितानि महाराज ! तत्र मां प्राधि मा चिरम् ॥

सुद्युम्न उवाच ।

प्रमाणञ्चेन्मतो राजा भवतो दण्डधारणे ।
अनुज्ञायामपि तथा हेतुः स्याद्ब्राह्मणर्षभ ! ॥
स भवानभ्यनुज्ञातः शुचिकर्म्मा महाव्रतः ।
ब्रूहि कामानतोऽन्यांस्त्वं करिष्यामि हि ते वचः ॥

व्यास उवाच ।

स च्छन्द्यमानो ब्रह्मर्षिः पार्थिवेन महात्मना ।
नान्यं स वरयामास तस्माद्दण्डाद्ते वरम् ॥
ततः स पृथिवीपालो लिखितस्य महात्मनः ।
करौ प्रच्छेदयामास धृतदण्डो जगाम सः ॥
स गत्वा भ्रातरं प्रह्वमार्त्तरूपोऽब्रवीदिदम् ।
धृतदण्डस्य दुर्बुद्धेर्भवांस्तन्नृच्चन्तुमर्हसि ॥

शङ्ख उवाच ।

न कुप्ये तव धर्म्मज्ञ ! न त्वं दूषयसे मम ।
धर्म्मस्तु ते व्यतिक्रान्तस्तस्मै निष्कृतिः कृता ॥
स गत्वा वाहुदां शीघ्रं तर्पयस्व यथाविधि ।
देवानृषीन् पितॄंश्चैव मा चाधर्म्मे मनः कृथाः ॥
तस्य तद्वचनं श्रुत्वा शङ्खस्य लिखितस्तदा ।
अवगाह्यापगां पुण्यामुदकार्थं प्रचक्रमे ॥
प्रादुरास्तां ततस्तस्य करौ ज्वलनसन्निभौ ।
ततः स विस्मितो भ्रातुर्दर्शयामास तौ करौ ॥"

नदीयं पुरा प्रसेनजिद्भार्य्या गौरी नाम आसीत् । ततः क्रुद्धेन भर्त्राभिशप्ता नदीरूपा जाता । यथा, हरिवंशे । १२ । ५ ।

"सोमे प्रसेनजिद्भार्य्यां गौरीं नाम पतिव्रताम् ।
अभिशप्तां तु सा भर्त्रा नदी वै वाहुदा कृता ॥"

पूरुवंशोद्भवस्य परीक्षिन्नाम्नो नृपतेर्भार्य्येयं वाहुदा । यथा, महाभारते । १ । ९५ । ४२ ।

"परीक्षिन् खलु वाहुदासुपयेमे सुयज्ञां नाम तस्यामस्य जज्ञे भीमसेनः ॥) वाहुदाजौ च ॥

वाहुभूषा, स्त्री, (वाह्वोर्भुजयोर्भूषा भूषणम् ।) केयूरम् । इति हेमचन्द्रः । ३ । ३२९ ॥ वाहुभूषणमात्रञ्च ॥

वाहुभेदी, [न्] पुं, (वाहुं भिनत्तीति । वाहु + भिद् + णिनिः ।) विष्णुः । इति भूरिप्रयोगः । वाहुभेदके त्रि ॥

वाहुमूलं, क्लीं, (वाह्वोर्मूलम् ।) कक्षः । वगल इति भाषा । इत्यमरः । २ । ६ । ९९ ॥ (यथा साहित्यदर्पणे । ३ । १२९ ।

"कापि कुन्तलसंस्थानसंयमव्यपदेशतः ।
वाहुमूलं सखी नाभिपङ्कं दर्शयतेस्फुटम् ॥")

वाहुयुद्धं, क्लीं, (वाह्वोः वाहुभ्यां वा युद्धम् ।) भुजाभ्यां संग्रामः । मल्लयुद्धम् । तत्पर्य्यायः । निर्युद्धम् २ । तस्य क्रमो यथा,—

"क्षतप्रतिक्षतैश्चित्रैर्वाहुभिश्च सकङ्कटैः ।
सन्निपातावधूतैश्च प्रमाथोन्मथनैस्तथा ॥
क्षेपणैर्मुष्टिभिश्चैव वराहोद्धूतनिस्वनैः ।
तलैर्वज्रनिपातैश्च प्रहृष्टाभिस्तदैव च ॥
शूलाकानखपातैश्च पादोद्धूतैश्च दारुणैः ।
जानुभिश्चाभ्रनिर्घोषैः शिरोभिश्चावघट्टनैः ॥
तद्युद्धमभवद्घोरमग्र्यं वाहुतेजसा ।
वलप्राणेन शूराणां समाजोत्सवसन्निधौ ॥"

इति विराटपर्व्वणि १२ अध्यायः ॥

सकङ्कटः कङ्कटः करघर्षणजः किणस्तत्सदृशैरित्यर्थः । क्षतप्रतिक्षतैः परप्रयुक्तिप्रतिकृतैः । चित्रैर्विचित्रैर्वज्रैरिति शेषः । सन्निपातैत्यादि । एते मल्लानां शिक्षाविशेषाः । सन्निपातैः परस्परसङ्घातैः । अवधूतैर्वेडमुष्टिभुजाघातैः । प्रमाथैः पातयित्वा पेषणैः । उन्मथनैः अन्तरीक्षे भुजाभ्यां मथनैः । क्षेपणैः स्थानात् प्रथावनैः । वराहकुलिकरो मुष्टिः ।

"अवाङ्मुखं स्कन्धगतं भ्रामयित्वा तथैव यः ।
क्षिप्तस्य भूम्यः स भवेद्वराहोद्धूतनिस्वनः ॥
तर्जन्यङ्गुष्ठमथन प्रसारितकरो हि यः ।
सम्यूहारस्तलाख्यस्तु संग्रहो वक्ष्यमिष्यते ॥"

अर्द्धचन्द्रतुल्यमङ्गुष्ठर्वैक्यमित्यर्थः ।

"प्रहृताङ्गुलिहस्तेन प्रहृष्टिः प्रकृतिः स्मृता ।
द्विगुणीकृतवाहुर्यस्तदीयार्थं यथावलम् ॥
प्रहारः स शूलाकः स्यात् पादोद्धूतः पदाहतम् ॥"

जानुभिश्चाभ्रनिर्घोषैः पाषाणघोरसदृशध्वनिभिः करणैर्व्यवघट्टनानि तैः । वलप्राणेन वलोत्कर्षेण । इति तट्टीका ॥ (यथा, मार्कण्डेयपुराणे । ८३ । १३ ।

"ततः सिंहः समुत्पत्य गजकुम्भान्तरस्थितः ।
वाहुयुद्धेन युयुधे तेनोच्चैश्चिदशारिणा ॥")

वाहुलं, क्लीं, वाहुल्यम् । इति हेमचन्द्रः । ३ । ४३३ ॥ (वहुल + अण् ।) वहुलभावश्च ॥

वाहुलः, पुं, अग्निः । इति शब्दरत्नावली ॥ (वहुला कृत्तिका तया युक्ता पौर्णमासी वाहुली । वाहुली पौर्णमासी यस्मिन् । सास्मिन् पौर्णमासीत्यण् ।) कार्त्तिकमासः । इत्यमरः । १ । ४ । १८ ॥

वाहुलेयः, पुं, (वहुलानां कृत्तिकादीनामपत्यं पुमान् वहुला + ढक् ।) कार्त्तिकेयः । इत्यमरः । १ । १ । ४२ ॥

वाहुसहस्रभृत्, पुं, (वाहूनां सहस्रं विभर्त्तीति । क्विप् । "दृक्षस्य पिति कितीति तुक् । ६ । १ । ७१ । इति तुक् च ।) कार्त्तवीर्य्यार्জ্জুनः । इति त्रिकाण्डशेषः ॥ (अस्य वाहुसहस्रप्राप्तिकथा यथा, महाभारते । १३ । १५२ । ७-८ ॥

"स वरेऽभ्यर्थितस्तेन नृपो वचनमब्रवीत् ।
सहस्रवाहुभूयां वै त्वमधीष्टो यथा ॥
मम वाहुसहस्रन्तु पश्यन्तां सैनिका रणे ।
विक्रमेण मही कृत्स्ना जयेयं संशितव्रत ॥"

परशुरामो हि अस्य वाहुसहस्रं परशुना चिच्छेद । अस्य विवरणादिकं कार्त्तवीर्य्यशब्दे द्रष्टव्यम् ॥)

वाहूवाहवि य, वाहुभिर्वाहुभिर्यद् युद्धं कृतं तत् । हाताहाति इति भाषा । इति सुग्धबोधव्याकरणम् ॥

विद ट अंशे । अवयव इत्यर्थः । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) ट विन्दते । विन्दुरितिशब्दश्चुत्तत्यर्थमेवायं धातुपारायणम् । इति दुर्गादासीयटीका ॥

विल क शृ विभेदने । इति कविकल्पद्रुमः । (तुदा०-तुदा०-च-परं०-सक०-सेट् ।) क, वेल्यति । शृ विलति । इति दुर्गादासः ॥

विस ट्र य त्रासे । इति कविकल्पद्रुमः । (दिवा०-पर० सक०-सेट् ।) य विस्यति । ट्र अविसत् अवेसीत् । अस्मात् पुषादित्वान्नित्यं ङ इत्यर्थे । इति दुर्गादासः ॥

वीभत्सः, पुं (वीभत्स्यतेऽनेन । वध + सन् + करणे घञ् ।) अर्জ্জुनः । इति मेदिनी । से, २८ ।

वीभत्सः, त्रि, (वीभत्सा घृणाऽस्यास्त्यच । अर्शआद्यच् ।) क्रूरः ॥ (यथा महाभारते । १ । १ । २१० ।

"यदाशौचं मोक्षपुत्रादिभिस्ते-
र्हतान् पाञ्चालान् द्रौपदेयांश्च सुप्तान् ।
कृतं वीभत्सभयग्रस्यच कर्म्म
तदा नाशंसे विजयाय सञ्जय ! ॥")

घृणालुः ॥ (यथा, मार्कण्डेये । १६ । १८ ।

"तथापि प्रणता भार्य्या तममन्यत देवतम् ।
तं तथाप्यतिवीभत्सं सर्व्वश्रेष्ठममन्यत ॥")

विक्रतिः । इति मेदिनी । से, २८ । (यथा,—

"दुष्टैर्दोषैः पृथक्सर्व्वैर्वीभत्सालोकनादिभिः ।"

इति माधवकरकृतरुग्विनिश्चये कुष्ठाधिकारे ।

वीभत्सालोकनं विकृतिदर्शनमिति तट्टीकायां विजयरक्षितेनोक्तम् ॥) पापी । इत्यजयः । अङ्गाराद्यष्टरसान्तर्गतषष्ठरसः । तत्पर्य्यायः । विकृतम् २ । इत्यमरः ॥ तस्य लक्षणादि यथा, साहित्यदर्पणे । ३ । २५३ ।

"जुगुप्सा स्थायिभावस्तु वीभत्सः कथ्यते रसः ।
नीलवर्णो महाकालदैवतोऽयमुदाहृतः ॥
दुर्गन्धमांसपिशितमेदःस्यालम्बनं मतम् ।
तत्रैव कृमिपाताद्यस्तूद्दीपनसदाहृतम् ॥
निष्ठीवनास्यवलननेत्रसङ्कोचगादयः ।
अनुभावास्तत्र मतास्तथास्युर्व्यभिचारिणः ॥
मोहोऽपस्मार आवेगो व्याधिश्च मरणादयः ।"

अस्य रसस्योदाहरणं यथा तत्रैव ।

"उत्कृत्योत्कृत्य कृत्तिं प्रथममथ पृथूत्कोथ-
भूयांसि मांसा
न्यंसस्फिक् पृष्ठपिण्डाद्वयवसुसभान्युद्धृतानि
जगध्वा ।
अन्तःपर्य्यन्तनेत्रः प्रकटितदशनः प्रेतराट्
करालो
दृङ्मात्रादस्रिसंस्रं स्रुपुटगतमपि क्रव्यमर्थ्य-
मत्ति ।")

वेक्षतच्च। यथा। अतिशोणितपारुष्यमभिग्रथितवेक्षतमित्यभिनन्दः। इयमिदं रसे क्लीवम्। तदालम्बने तु मांसशोणितादौ त्रिषु। इति तट्टीकायां भरतः॥

वीभत्सुः, पुं, (वीभत्सतीति। वध+सन्+उ। वृद्धे न्यायपक्षेण शत्रुहननादस्य तथात्वम्। ततश्चिरक्तिरुक्ता। यथा, महाभारते ४। ४२। १८।

"न कुर्य्यां कर्म्म वीभत्सं युध्यमानः कथञ्चन। तेन देवमनुष्येषु वीभत्सुरिति विश्रुतः॥")

अर्জ্জুनः। यथा,—

अर्জ্জुनः फाल्गुनो जिष्णुः किरीटी श्वेतवाहनः।
वीभत्सुर्विजयः कृष्णः सव्यसाची धनञ्जयः॥

इति महाभारते। ४। ४२। ६॥

वुध, कि, आदिग्रन्थे। इति कविकल्पद्रुमः॥ (चुरा०-पक्षे भ्वा०-पर०-सक०-पक्षे अक०-सेट्।) पञ्चमस्वरी कोपधः। चुरादिपक्षे कथने भ्वादिपक्षे शब्दादिग्रन्थेऽयमिति रमानाथः। कि, बुध्यति वाचा बहुलोकः। बुक्कति वा। इति दुर्गादासः॥

वुक्क, त्रि, (वुक्कयति वुक्कवुक् इत्यव्यक्तशब्दं करोतीति। वुक्क+पचाद्यच्।) वक्षोऽभ्यन्तरमांसविशेषः। तत्पर्य्यायः। अग्रमांसम् २ हृदयम् ३ हृत् ४। इत्यमरः। २। ६। ६४॥ केचित्तु यकृतः पृथगेव हृदयान्तर्गतमांसविशेषे पद्माकारे हृदयादिद्वयमाहुः। धातोरनेकार्थत्वात् वुक्कते खादुत्वात् गम्यते वुक्कं वुक्क कि आदिग्रन्थे घञ्। नान्तः पुंलिङ्गोऽयम्। स्त्रीलिङ्गोऽपीत्येके। इति स्वामी॥ वुक्का स्त्री वुक्कः पुमानपि। शोणितेषु स्त्रियां वुक्का वुक्कस्तु समये द्वयोरिति रभसात्। नदादित्वात् स्त्रियां वुक्कीत्यपि। वुक्कनाम्नं क्लीबमयुत्पन्नमितिरुद्रकलिङ्गादयः॥ उरस्यपि च वुक्कायां हृदयं मांसेऽपि चेति त्रिकाण्डशेषः॥ वुक्कशब्दस्य उकारस्य ऋकारादेशे तथैव हृक्कादिरूपञ्च। अग्रञ्च तन्मांसञ्चेति अग्रमांसं वुक्कस्याग्रं संसृष्टीभूतं मांसं वुक्काग्रमांसमित्येकं नामेत्यन्ये। इति तट्टीकायां भरतः॥

वुक्कः, पुं, (वुक्कयति शब्दायते इति। वुक्क+अच्।) छागः। इति त्रिकाण्डशेषः॥ समये पुं. स्त्री। इति रभसः॥

वुक्कण, क्ली, (वुक्क कि आदिग्रन्थे+भावे ल्युट्।) फुक्कुरशब्दः। तत्पर्य्यायः। भषथम् २। इति हेमचन्द्रः। ६। ४३॥

वुक्का, स्त्री, (वुक्क+टाप्।) वुक्कम्। इत्यमरटीकायां भरतः। शोणितम्। इति रभसः॥

वुक्कृ, [न्] (वुक्क+कनिन्।) पुं, वुक्कम्। इत्यमरटीकायां भरतः॥

वुक्काग्रमांसं, क्ली. (वुक्कस्याग्रमांसं।) हृदयम्। इत्यमरटीकायां रायमुकुटः॥

वुक्कारः, पुं, (वुक्क कि आदिग्रन्थे भावे घञ्। वुक्कं निनादस्तस्य कारः करणम्। "एकवर्ण्यत्रयो यत्र मध्यमस्तत्र लुप्यते" इति न्यायात् मध्यस्य ककारस्य लोपः।) सिंहध्वनिः। इति हारावली। १६४॥

वुक्की, स्त्री, (वुक्क+गौरादित्वात् ङीष्।) वुक्कम्। इत्यमरटीकायां भरतः॥

वुट्ट, कि छिंदे। इति कविकल्पद्रुमः॥ (चुरा०-पक्षे भ्वा०-पर०-सक०-सेट्।) कि वोटयति वोटति। इति दुर्गादासः॥

वुड, शि उत्सर्गे। संवृतौ। इति कविकल्पद्रुमः॥ (क्रुटा०-तुदा०-पर०-सक०-सेट्।) शि वुड्डति अवुड्डीत् बुबोड्ड इति दुर्गादासः॥

वुद, इर् च उ निशामने। इति कविकल्पद्रुमः॥ (भ्वा०-उभ०-सक०-सेट्।) पञ्चमस्वरी। इर् अवुदत् अवोदीत्। च वोदति वोदते। उ वोदित्वा वुत्वा। निशामनमालोचनं प्रणिधानमिति यावत्। इति दुर्गादासः॥

वुद्धः, पुं, (बुध्यते स्म इति। बुध+क्त। यदा भावे क्त बुद्धं ज्ञानमस्यास्तीति अर्शआद्यच्।) भगवदवतारविशेषः। स तु दशावतारान्तर्गतनवमावतारः। यथा,—

"ततः कलौ संप्रवृत्ते संमोहाय सुरद्विषाम्।
बुद्धो नाम्नाञ्जनसुतः कीकटेषु भविष्यति॥"

इति श्रीभागवते १ स्कन्धे ३ अध्यायः॥

अञ्जनस्य सुतः। अजिनसुत इति पाठे अजिनोऽपि स एव। कीकटेषु मध्ये गयाप्रदेशे। इति श्रीधरस्वामी॥ तत्पर्य्यायः। सर्ব্বज्ञः २ सुगतः ३ धर्म्मराजः ४ तथागतः ५ समन्तभद्रः ६ भगवान् ७ मारजित् ८ लोकजित् ९ जिनः १० षड़भिज्ञः ११ दशबलः १२ अद्वयवादी १३ विनायकः १४ मुनीन्द्रः १५ श्रीघनः १६ शास्ता १७ मुनिः १८। इत्यमरः। १। १। १३॥ धर्म्मः १९ त्रिकालज्ञः २० धातुः २१ बोधिसत्त्वः २२ महाबोधिः २३ आर्य्यः २४ षष्ठज्ञानः २५ दशार्हः २६ दशभूमिगः २७ चतुस्त्रिंशच्छातकज्ञः २८ दशपारमिताधरः २९ द्वादशाङ्गः ३० त्रिकायः ३१ संगुप्तः ३२ दयाकूर्चः ३३ खजित् ३४ विज्ञानमालकः ३५ महामैत्रः ३६। इति हेमचन्द्रः। २। १४६॥ धर्म्मचक्रः ३७ महामुनिः ३८ अशमः ३९ शमः ४० मैत्री ४१ बलः ४२ गुणाकरः ४३ अकनिष्ठः ४४ त्रिशरणः ४५ बुधः ४६ वक्री ४७ वागीशः ४८ जितारिः ४९ अर्हन् ५० अर्हन् ५१ महासुखः ५२। इति शब्दरत्नावली॥ महाबलः ५३। इति जटाधरः॥*॥ ईश्वरनिरूपणे बुद्धविशेषाणां मतमाह। सर्ব্वज्ञ इति सौगताः। निरावरण इति दिगम्बराः। लोकव्यवहारसिद्ध इति चार्ব্বाकाः। शरीराण्येव चेतनानि गौरोऽहं श्यामोऽहमित्यादिज्ञानेन गौरत्वज्ञानवत्त्वयोः श्यामाधिकरण्यान्नभवादिति चार्ব্वाकाणां मतम्। तेषां मते जगतः क्षणभङ्गुरत्वं नन्वस्तु क्षणभङ्गः पूर्व्वपुङ्खोत्तरपुङ्खोत्पत्तिस्तथा च पुङ्खनिष्ठ एव क्षणध्वंसप्रत्याय्यजातिविशेषः स्मरणजनकतावच्छेदक इति न दोषः। इति कुसुमाञ्जलिप्रथमस्तबकटीकायां रामभद्रः॥*॥ बुद्धानां दशविधमतभेदमाह।

"वदन्ति बुद्ध आत्मेति १ दृढ़प्राप्ततबुद्धयः।
देह आत्मेति २ चार्ব্वाका इन्द्रियाण्यपरे ३ क्षणिकं तथा॥
तेऽन्ये प्राण ४ स्ततोऽन्ये ते मन ५ आत्मेति वादिनः।
बुद्धिरात्मेति६ बौद्धा वै शून्यमात्मेति७ तेऽपरे॥
याज्ञिका यज्ञपुरुषं सर्ব্वज्ञं ८ सौगता विदुः।
निरावरण ९ माहुर्यं दिगम्बरमतानुगाः॥
चार्ব্वाकाश्चापि लोकानां व्यवहारप्रसिद्धकम् १०॥"

इत्यात्मप्रकाशः॥*॥

पण्डितः। बुधिते, त्रि। इति मेदिनी। धे, १०॥

(बुद्धावतारस्य विवरणं यथा,—

इह खलु बौद्धशास्त्रसमूहेषु सम्प्रोक्ताः पञ्चविंशतिर्बुद्धा दृश्यन्ते। तेषां शुद्धोदनौरसान् मायादेवीगर्भजातः शाक्यसिंहसर्ব্वार्थसिद्धार्कबन्धुगौतमेति नामचतुष्टयेन प्रसिद्धोऽन्तिमतमः लोकविश्रुतो बुद्धः कपिलवस्तुनगरे कलेश्चतुःशतद्वादशसहस्रमितेषु गतेष्वब्देषु शुक्लवासरे सुरद्विषां सम्मोहनाय साक्षाद्विवेकमूर्त्तिः स्वेच्छाविग्रहेण प्रादुर्बभूव।

अथ स वयसा सह क्रमेण शीलगुणसाहसरूपौदार्य्यबलवीर्य्यादिभिर्वर्द्धते स्म। उदिते यौवने पित्राज्ञया स शाक्यान्वयजां मनोज्ञां रूपलावण्यवतीं दण्डपाणितनयां गोपागाच्छौद्धनुमतासुपयेमे।

जननसमयेऽस्य गणकाच्छ्रुतवान् नरेश्वरः शुद्धोदनः व्याधिग्रस्तजराजर्জ্জरसन्यासिन्दर्शनाच्छातवैराग्यः पुत्रस्ते गृहं सन्त्यक्ष्यतीति। तस्मात् सञ्जातशङ्को राजा शिल्पिभिरुपवनपरिवृतं सुगुप्तं रम्यं हर्म्मत्रयं भूभृद्वरं निर्म्मापयामास। तत्रासौ युवतीजनपरिवेष्टितमपच्छन्दितं विषयविसृमरचेतसं तनयं निवृत्तनिर्गमनम् स्वच्छन्देनान्ववासयत्। अथ गच्छति काले ऽस्य शिथिलीबभूव भोगसन्तर्षः। ततः कारागारमिव प्रतीयमानं निष्कुटनिकेतं विहायास्य धरण्या नानास्थानं द्रष्टुमिच्छा सञ्जाता। ततः सोऽसौ पित्रे शुद्धोदनाय सम्बोधयामास पर्य्यन्यं नगरं प्रधानान्तर्हिमवस्थाच्च विलोकयितुं वासना मे बलवतीति। राजा प्रथमं निवारयितुमिच्छेऽपि प्रलोभनेन। स नैव तु ततो विरराम। अथ विज्ञाय निर्बन्धं पुत्रस्य मन्त्रिणमादिदेश, कुमारे शाक्यसिंहे भ्रमितुमारब्धे राष्ट्रे मे चरातुरसन्यासिन्दर्शनाकाङ्क्षाः केनापि कारणेन राजवर्त्मनि गोपतिष्ठन्तामास विघोषयेति। तथानुष्ठिते कुमारः रथमारुह्य

सारथिनासह बहिर्निर्गत्य भ्रमितुमारब्धवान्। ततश्चतुर्दिक्षु प्रकृतिभिस्तारस्वरैर्जयोऽस्य प्राघोषि। नगरं वोत्यासौ मनसि परां मुदं प्राप्तवान्।

अथ स जरया जर्जरतनुं मानवमेकं दृष्टवान्। दृष्ट्वा प्राक् कदाचिदपि स प्राक्यसिंहो जगतो दुःखं नानुभूतवान् इदानीं निरीक्ष्य प्रथमं तं जराग्रस्तं विवरणमस्य विज्ञातुं कुतूहली सारथिं पप्रच्छ। तदुक्तं यथा.—

"किं सारथे! पुरुष दुर्बल अल्पसाम
उच्छुष्कमांस रुधिरत्वचस्नायुनद्धः।
श्वेतशिरो विरलदन्तकृशाङ्गरूप
आलम्ब्य दण्ड व्रजतेऽसुखं स्खलन्त॥

सारथिराह।

एषो हि देव! पुरुषो जरयाभिभूतः
स्त्रीणेन्द्रियः सुदुःखितो बलवीर्यहीनो।
बन्धुजनेन परिभूत अनाथभूतः
काष्ठोसमर्थ अपविद्ध वनेव दारुः॥

बोधिसत्त्व आह।

कुलधर्म्म एष अयमस्य हितं भणाहि
अथवापि सर्वजगतोऽस्य ध्रुवस्या।
शीघ्रं भणाहि वचनं यथभूतमेत-
च्छ्रुत्वा तथार्थमिह योनि सचिन्तयिष्ये॥

सारथिराह।

नैतस्य देव! कुलधर्म्म न राष्ट्रधर्म्मः
सर्वे जगस्य जरयौवनधर्षयाति।
तुभ्यंपि मालपिलवान्यज्ञातिसंघो
जरया अनुक्तं न हि अन्यगतिर्जनस्य॥"

बोधिसत्त्व आह।

धिक् सारथे! अबुधबालजनस्य बुद्धि-
र्यदयौवनेन मदत्त जरां न पश्यी।
आवर्तयाश्विह रथं पुनरहं प्रवेक्ष्ये
किं मह्य क्रीडरतिभिर्जरयाभितस्य॥"

इति ललितविस्तरे १४ अध्याये।

अथ शाक्यसिंहः सारथिं सन्दिदेश रथं सञ्चालयेति। गत्वा नगरस्य दक्षिणे द्वारि व्याधिग्रस्तं यातनापरीतपुरुषमेकमीक्षाञ्चक्रे। ततः स सारथिं पप्रच्छ। तदुक्तं यथा,—

"किं सारथे! पुरुष रूपविवर्णगात्रः
सर्वेन्द्रियेभि विकलो गुरु प्रश्वसन्तः।
सर्वाङ्गशुष्क उदराङ्गल प्राप्तकृच्छ्रा
रुदे पुरीष स्वकि निठति कुत्सनीये॥"

सारथिराह।

एषो हि देवपुरुषः परमं गिलानो
व्याधीभयं उपगतो मरणान्तप्राप्तः।
आरोग्यतेजरहितो बलवीर्यहीनो
अचाणवीप्रसरणो ह्यपरायणश्च॥"

बोधिसत्त्व आह।

"आरोग्यता च भवते यथ स्वप्नक्रीड़ा
व्याधिर्भयश्च इम दृष्ट्वा घोररूपम्।
को नाम विज्ञपुरुषो इम दृष्ट्व वस्यां
क्रीड़ारतिं जनयेच्छुभसंज्ञितां वा॥"

अथ खलु भिक्षवो बोधिसत्त्वः प्रतिनिवर्त्य रथवरं पुनरपि पुरवरे प्राविशत्।

इति हि भिक्षवो बोधिसत्त्वोऽपरेण कालसमयेन पश्चिमेन नगरद्वारेणोद्यानभूमिमभिनिष्क्रममाणो दृष्ट्वा सोऽद्राक्षीत् पुरुषं मृतं कालगतं मार्गे समारोपितं वेलवितानीकृतं ज्ञातिसङ्घपरिवृतं सर्वैरुदद्भिः क्रन्दद्भिः परिदेवमानैः प्रकीर्णकेशैः पार्श्वावकीर्णशिरोभिरुरांसि ताड़यद्भिरुत्क्रोशद्भिः पृष्ठतोऽनुगच्छद्भिः। दृष्ट्वा च पुनर्बोधिसत्त्वो जानन्नेव सारथिमिदमवोचत्।

"किं सारथे! पुरुष मञ्चोपरिगृहीतो
उद्धृत केशनख पांशु शिरे क्षिपन्ति।
परिचारयित्व विहरन्तुरस्ताड़यन्तो
नानाविलापवचनानि उदीरयन्तः॥"

सारथिराह।

"एषो हि देवपुरुषो मृतु जम्बुद्वीपे
न हि भूय मालपिल द्रक्ष्यति पुत्रदाराम्।
अपहाय भोगगृहमालपिलमित्रज्ञातिसङ्घं
परलोक प्रायु न हि द्रक्ष्यति भूय ज्ञातिम्॥"

बोधिसत्त्व आह।

"धिग्यौवनेन जरयो समभिद्रुतेन
आरोग्य धिग्विविधव्याधिपराहतेन।
धिग्जीवितेन पुरुषो न चिरस्थितेन
धिक्पण्डितस्य पुरुषस्य रतिप्रसङ्गैः॥
यदि जर न भवेया नैव व्याधिर्न मृत्यु-
स्त्वयि च महदुःखं पञ्चस्कन्धं धरन्तो
किं पुन जरव्याधिमृत्यु नित्यानुबद्धाः
साधु प्रतिनिवर्त्य चिन्तयिष्ये प्रमोचम्॥

अथ खलु भिक्षवो बोधिसत्त्वः प्रतिनिवर्त्य तं रथवरं पुनरपि पुरं प्राविशत्॥ इति हि भिक्षवो बोधिसत्त्वस्यापरेण कालसमयेनोत्तरेण नगरद्वारेणोद्यानभूमिमभिनिष्क्रामतस्तस्मिन् देव पुत्रेबोधिसत्त्वस्यानुभावेनैव तस्मिन् मार्गे भिक्षुरभिनिर्म्मितोऽभूत्॥ अद्राक्षीद्बोधिसत्त्वस्तं भिक्षुं प्राप्तं दान्तं संयतं ब्रह्मचारियमनति क्षिप्रचक्षुर्युगमात्रप्रेक्षिणं प्रासादिकेनैर्य्यापथेन सम्पन्नं प्रासादिकेनाभिक्रमप्रतिक्रमेण सम्पन्नं प्रासादिकेनालोकितव्यवलोकितेन प्रासादिकेन सङ्घाटीपिण्डपात्रचीवरधारणेन मार्गे स्थितम्। दृष्ट्वा च पुनर्बोधिसत्त्वो जानन्नेव सारथिमिदमवोचत्।

"किं सारथे! पुरुष प्राप्त प्रशान्तचित्तो
गोनुक्षिप्तचक्षु व्रजते युगमात्रदर्शी।
काषायवस्त्रवसनो सुप्रशान्तचारी
पात्रं गृहीत्व न च उद्धत उन्नतो वा॥

सारथिराह।

एषो हि देवपुरुष इति भिक्षुनामा
अपहाय कामरतयः सुविनीतचारी।
प्रव्रज्य प्राप्तः समसमात्मन एषमार्यो
रागाग्निदोषविगतो तिष्ठति भिक्षुचर्य्यां॥

बोधिसत्त्व आह।

साधु सुभाषितमिदं मम रोचते च
प्रव्रज्य नाम विदुषां सततं प्रशस्ता।
हितमात्मनश्च परसत्त्वहितञ्च यत्र
सुखजीवितं सुमधुरमन्तं फलञ्च॥"

इति ललितविस्तरे १४ अ:।

ततः संक्षुब्धचित्तोऽसौ स्वकीयं मुद्यानं विवेश। दिवसेऽस्मिन् राहुलनामा पुत्रोऽस्य समजनि। राजा शुद्धोदनः स्वाङ्गजस्य भ्रमणवृत्तान्तं सर्वं निशम्यास्य सन्त्रासभयहरणं प्रयतमानः चतुर्षु नगरद्वारेषु सेनाव्यूहान् सन्निवेशयति स्म तस्य परिरक्षणार्थम्।

रतिरसाभिज्ञान् युवतिजनानन्तःपुरेषु बहुतरान् प्रेषयामास बोधिसत्त्वस्य प्रमोहनाय। अथागता रजनी, सिद्धार्थस्य तु चित्तं व्याकुलितमतीव गेहान् प्रव्रज्य भैक्षचर्यग्रहणार्थम्। ततो नृत्यादिप्रमोदात् परं निद्रिताः सर्वा युवतीर्विलोक्य शयनात् शनैः शनैरुत्थितो व्यलोकयत्।

"तत्र काश्चिदूर्ध्वप्रलम्बबाह्याः काश्चिद्विधुतकेश्यः काश्चिदिकीर्णाभरणाः काश्चिद्विभ्रष्टमुकुटाः काश्चिद्विहस्तैरंगैर्विगोपितगात्राः काश्चिदिसंस्थितमुखाः काश्चिद्विपरिवर्तितनयनाः काश्चिन् प्रस्रवन्त्यो खेलाभिः काश्चिद्हसन्त्यः काश्चित् प्रहसन्त्यः काश्चित्प्रलपन्त्यः काश्चिद्दन्तान् कटकटायन्त्यः काश्चिद्विपर्यवदनाः काश्चिद्विसंस्थितरूपाः काश्चित् प्रलम्बितबाहवः काश्चिद्विक्षिप्तवदनाः काश्चिद्दुष्पाटितशीर्षाः काश्चिदवगुण्ठितशीर्षाः काश्चिद्विपरीतवर्णितमुखमण्डलाः काश्चित् प्रध्वस्तशरीराः काश्चिद्विभग्नगात्राः काश्चिन्निकुलाः खुरखुरायमानाः काश्चिन्मृष्टदन्तसुपगुप्त परिवर्तितशीर्षशरीराः काश्चिद्वीणावल्लक्याद्यपरिवृद्धपाणयः काश्चिद्देणुदन्तैः कटकटायन्त्यः काश्चित् किम्पलनकुलसम्यताड़ावकर्षितवाद्यभाण्डाः काश्चिन्निमेषोन्मेषपरिवर्जनयनाः काश्चिद्दृष्ट्वास्या एवं तद्विकृतं धरणीतलशयनमनाः पुरं निरीक्षमाणो बोधिसत्त्वः प्रमुदानसंज्ञासुत्पादयति स्म।" तच्चेदमुच्यते।

"तां दृष्ट्व उद्विग्न स लोकनाथः
करुणं विनिश्वस्य इदं अवाद।
अहो वता क्लेशगता प्रजेयं
कथं रतिं विन्दति रात्रिसीगतैः॥
अतिमोहतमावृते दुर्गतिं
कामगुणैर्निर्गुणसंज्ञिनः।
विहगपञ्जरगता यथा नहि
लभन्ति कदाचिद् विनिःसृतम्॥"

इति ललितविस्तरे। १५ अध्याये।

अतीतेऽथ निशीथे सिद्धार्थोऽश्वपालमाहूयाह "तुरगवरपञ्जरनियतसत्त्वपरिमोक्षणस्य समयो ह्युपस्थितो मे।" अतएव यशोधरामिदं सन्त्रासम्। विस्मितोऽश्वपालोऽब्रवीत् राजपुत्रस्य ते सन्त्रासभयमनुचितं न समर्थोऽहि सन्त्रासाश्रमस्य कथनि योद्धम्।

सिद्धार्थ आह।
"विवर्जिता: सर्पशिरा यथा बुधै-
र्विगर्हिता भीरुघटा यथाशुचि:।
विनाशका: सर्वसुखस्य छन्दक
ज्ञात्वा हि कामान्न विजायते रति:॥"
छन्दक शृणु यानि दु:खशतामर्षिता पूर्व्व-
जन्मान्तरे।
बन्धनारुन्धगास्ताड़नास्तर्ज्जना: कामहेतो-
र्मया नो च निर्विंदभूत॥
संक्लृतमानसं प्रमदवमगतष
मोहाकुलं दृष्टिजालावृतम्।
अन्धभूतं पुरा आत्मसंज्ञा-
यशाकारका वेदनावीतिवृत्ता इमे॥
धर्म्माज्ञानत: सम्भृता चलचपलाऽ-
नित्यमेघै: समा विद्युद्भि: संदृश्या:।
ओसविन्दूपमा अक्लृतुच्छा असारा:
अनात्मा च शून्यस्वभावा इमे सर्व्वश:॥
स्वयमक्षमभिगम्य नावामिमात्मानाऽवतीर्य
संसार ओघैरहं तारयिष्यन्नन्तं जगत्।
शोकसंसारकान्तारशोभीरुगम्यहा-
याकुले वैराकुले दुस्तरे एव चित्तं मम॥
तदात्मनोत्तीर्य्य इदं भवार्णवं
सर्वैरदृष्टिग्रहक्लेशरात्रुसम्।
स्वयं तरित्वा च अनन्तरं जगत्
स्वयेऽन्तरीक्षे अजरामरे शिवे॥"
ललितविस्तरे १५ अध्याये।

अतश्छन्दक! प्रव्रज्यामध्युनैव सत्वरमानयाश्वम्। तथानुष्ठिते सिद्धार्थोऽसौ स्त्रीतनयगुरुजनान् सर्व्वान् राज्यमैश्वर्य्यञ्च विहायाश्वमारुह्य निर्गत:। निजनगराद्गयाभिधानजनदूरस्थितं मगराज्यं प्राप्य तत्रैव वप्रिकाश्रमसन्निधौ छन्दकमश्वसहितं विसृज्य कौषेयमपहाय प्रिधाय वल्कलवाससमेकाकी वैशाली नामनगरीमुपतस्थे। तत्र आराड़कालामनामा जिनपुरुषशिष्यतकशिष्यैरवातीत्, सिद्धार्थोऽस्य शिष्योऽभूत्। आहैकदा गुरु:, पवित्रचेता अचुर्भक्तिमान् पुरुष एवालं ब्रह्मचर्य्यं ग्रहीतुम्, लब्धुञ्च सर्व्वमैश्वर्य्यम्। हृदि यस्य विमलो निर्व्वाणप्रदीप: प्रदीप्तस्तम:स्तोमशमनपटुर्भवेत्। न तस्य सुखदमैश्वर्यविजृम्भितगुरुवचनम्। ततः समग्रतीं शिष्यततिन्दधानस्य रुद्रकनाम्न: साधो: समीपं गत्वा कृत्वानेन सम्भाषणं गयशीर्षं जगाम। तत्रोज्ञावितमनेन यद् ब्राह्मणा: श्रमणाश्च बोधस्वरूपं सत्यमविमुह्यं कायमानसं नियोजयन्ति तदभिसृत्यादयितुमार्द्रकाष्ठहृद्य-घर्षणमिव वैफल्यं भजते। शुष्ककाष्ठखण्डहृद्य-घर्षणेन यथा अन्यमनोरथा मानवास्तद्वत् कायमनसोर्विमुह्यो: सतो: खतश्च बोधलाभ: सुदूर:। तत:परमसौ बोधिसत्वो गत्वा ग्रामसुरविल्वाख्यं विजनं तत्रैवोषितुं मनो दधे। परमयत्नेनात्मन: कायमुह्यिं चित्तमुह्यिञ्च विधाय घोरात्घोरं दुष्करं ध्यानं दधार। अत्रासौ कस्मिंश्चिद्दिवसे बदरीमेकिकां कस्मिंश्चिद्वा तण्डुलमेकं कदाचिदेकमाषं कलायं भक्षयित्वा कस्मिंश्चिदुपोषणेन वा कालं विलङ्घ्य शुष्कच्छविर्मंसीवर्णो बभूव। ततोऽसौ देहमित्थं निभाव्य लब्धुं सम्बोधं न समर्थोभवेयमिति विचिन्त्य पोषणकरमाहारं जग्राह।

दिवसेऽस्मिन् शुद्धोदन: स्वप्नं ददर्श प्रिय: पुत्रो मे मणिमुक्तादिविभूषितवारणरूपेण उदुम्बरतरुमारुरोह। त्रैलोक्यलोका: पूजनायास्यागच्छन्तीव, यशोधरापि गोपापरनाम्नी ददर्श स्वप्नं विविधम् स्वयं श्वाव्यसिंहश्च पक्ष, यथा जगदखिलं शून्या मे, विम्बफलमिव सुमेरुशिखरसुपधानीभूतं मे, वामदक्षिणकरद्वयं मे प्राच्यपश्चिमसमुद्रोपरि पादावुभौ मे दक्षिणाऽवौ ह्रवन्ते, नाभिकमलान् मे समुत्थितै: स्थिरिकाद्रुणैश्चापूरितमखिलं नभ:। ततश्चोत्थायासौ ऊरुविल्वोषिताय: सुजातानामिकाया नाम्या: सकाशात् भिक्षां जग्राह।

इत: सिद्धार्थो ध्यानं दधार, निर्व्वाणे पथि तस्य सततं परिपन्थी सन्नपि दुर्निवारो मार: पराजितो ध्यानवीरेण योगिसिंहेन पलायनं चक्रे। ततस्तस्यैव कन्दर्पस्य तनये यतेते तन्द्रा रतिश्च योगिप्रवरस्य मोहनाय, विफलानि तु जातान्यनयोर्मनोरथानि। तत: सर्व्वेभ्य: क्लेशेभ्यो विमुक्त: सिद्धार्थो बोधञ्च विमलं लेभे। तदासावधिरूढ़योग: मनस्तस्य मुकुरे प्रतिफलितं सकारणमखिलं जगत्। ततश्च चिन्तयामास स: जीवानां जन्म, तेषु च जीवस्य संयोगो वियोगश्चैव दु:खदु:खान्येतानि। न जानीते मानवस्तन् मोहजालेनावृतो दुर्व्विषहं दु:खं सहत इति। तत: कस्मादागतं जरामरणमिति चेतसा कृते प्रश्ने तेनैव निश्चिनोति स:, यज्जन्म एवागच्छति जरामरणमिति, कृतस्तर्हि ह्यागतं जन्म किमस्य वा कारणम्? संसारादसाध्यातिरतएव भव एव कारणमत्र। भवस्तर्हि कुत आयत: किमस्य वा कारणं? उपादानादागतो भवस्तदुपादानमेवास्य कारणम्। कस्मादुपादानमायातन्तर्हि किमस्य वा कारणं? तृष्णाया आगतसुपादानमतस्तृष्णैव कारणमस्येति। तर्हि कुत आयाता तृष्णा कारणं वा किमस्या:? वेदनाया आगता तृष्णा अतो वेदनैव कारणमस्या:। कुत आयाता वेदना, अस्या वा किं कारणम्? स्पर्शादायाता वेदना, अत: स्पर्श एव कारणं वेदनाया इति। स्पर्शस्तर्हि कुत आयात: किं वा कारणमस्य?। षड़ायतनादायत: स्पर्शस्ततोऽस्य कारणं च एवेति। कुत आयातं षड़ायतनं कारणं वा किमस्य? नामरूपाभ्यामागतं षड़ायतनम् अतएवास्य कारणमेव तदिति। कुतस्तर्ह्यायाते नामरूपे कारणं वा किमनयो:? विज्ञानादागते नामरूपेऽतोऽनयो: कारणं विज्ञानमिति। कुत आयातं विज्ञानन्तर्हि कारणं वा किमस्य? संस्कारादागतं विज्ञानमतोऽस्य कारणं स एवेति। संस्कारस्तर्हि कुत आयात: कारणं वा किमस्य? अविद्याया आगत: संस्कारस्ततोऽस्य कारणमविद्येति।

स्फुटमिदानीमविद्यैव कारणं जगतोऽखिलस्य। ततो विलोमेन प्रकटीभूतं यत् अविद्याया: संस्कार: संस्काराद् विज्ञानम्, विज्ञानान्नामरूपे ताभ्यां नामरूपाभ्यां षड़ायतनम्, षड़ायतनात् स्पर्श:, स्पर्शाद् वेदना, वेदनायास्तृष्णा तृष्णाया उपादानम् उपादानात् संसार: संसाराज्जाति: जातेर्जरामरणमिति।

प्रकारेणानेनोत्पन्नो दु:खस्कन्धो जीवानाम तदिदानीं प्रतिभातं अविद्यैव मूलमस्य पादपस्य निरस्तायामविद्यायां कृतो दु:खप्रसङ्ग: क्रमेण तस्मात् जन्मजरामरणं दु:खं चिन्ताक्लेश: पीड़ा च सर्व्वे दूरे पलायन्ते। एवं जीवानासुदेति चित्ताकाशे धर्म्मालोक:। उदिते तस्मिन् मन:संयोगेन ज्ञानं दर्शनं विद्या स्मृतिर्बुद्धिश्च सर्व्वं प्रत्यक्षीभवति। तत इदानीं सिद्धार्थो बुद्ध: सञ्जात:।

ततश्चागतोऽत्र विम्बिकानगर्य्या राजा बुद्धस्य श्रीपादपद्मसन्दर्शनाय। सोऽस्मै न्यपदिदेश "अहिंसा परमो धर्म्म:।" इत्यतस्तमनुतिष्ठ तद्धर्म्मं निर्व्वाणमोक्षस्यान्विष्येति।

ततोऽसौ बुद्धो नैरञ्जनानाम्नीं नदीं चिरिकावनञ्च त्यक्त्वा उज्ज्वलमुपवनं प्रतस्थे। अत्र स ऊनषष्ठाशद्दासरानुपोषणमङ्गीकृतवान्। तत स्तस्मात् स्थानान्निर्गत्य गयां नाहालं बुन्दहिरं लोहितवस्तुकं गन्धपुरं सारथिपुरञ्च क्रमेण गत्वा त्यक्त्वा च काशिकासुपतस्थे, अत्रास्य कौण्डिन्य: सिद्ध: शिष्योऽभूत् बुद्धस्तं नाम्ना ज्ञानकौण्डिन्यं चकार। कालेऽस्मिन् बहुसंख्यका लोका आगत्यागत्य बुद्धस्य शिष्या अभवन्।

तत: काश्यीधान्य: स ऊरुविल्वास्थितं सेनानीनामकं ग्रामं प्रययौ तत्र नैरञ्जनतीरे नाम्ना उरुविल्वाकाश्यप: शतानुकविंशतिवया: पञ्चशतशिष्यैरनुगत: प्रतिवसति स्म। लोका जानन्यसुमहन्निति। बुद्धो गत्वास्य समीपं प्रदायास्मै ज्ञानोपदेशं विमलं शिष्यं तं चकार। दृष्ट्वा शक्तिमलौलिकीं बहवो लोका विस्मिता धर्म्मं बौद्धं गृहीतवन्त:।

तदा बिम्बसारो मगधराज: शुश्राव गयशीर्षे बुद्धदेव: प्राप्त इति। गत्वा समीपं प्रपूज्य च परमया भक्त्यास्य शिष्यत्वं स्वीचकार। ततो मागधो स्वीयां नगरीं गन्तुं निमन्त्रयामास तम्। जग्राहास्य प्रणयं बुद्ध:। शारीपुत्रोऽत्र मौद्गलायनोऽस्य शिष्योऽभवत्।

श्रुतवान् कोशलपति: प्रसेनजित् बुद्धो देवो राजगृहे वेतवने प्रतिवसत्यधुनेति। गत्वा च तत्र त्वरितं बुद्धसन्निधिमुवाच, पूर्णकाश्यप: परिव्राजकगोशाल: वैरापुत्रसञ्जय: अजितकेश:

कस्यचित् इत्यते अन्ये च बहवो बुद्धपर्यायस्तिष्ठन्ति, न ते लोके कदापि बुद्धनाम्ना परिचाययितुं प्रेक्षन्तेर्हि भवान् किं न लक्ष्यते अहं बुद्ध इत्यात्मानं परिचाययितुम्। बुद्धस्तम् 'कुमार-दृष्टान्तसूत्रं, श्रावयामास तेनोन्मीलितचक्षुः शिष्योऽभूत्तस्य ततः प्रसेनजित् कोशलराजः। दीक्षिते राज्ञि कोशलेश्वरे बुद्धः शुद्धोदनाय संवादं प्रेषयामास "राजन्! पुत्रस्ते पपावि-दानीं दृष्टनिवारणमन्तम्। तेनैव सोऽखिलस्य जगतस्तृष्णां पापीयसीं वारयामास, शुद्धोदनः श्राक्यपतिराकर्ण्य वृत्तान्तं परां मुदमवाप। आनेतुं पुत्रं कपिलवस्तुनगर्यामस्मै दूतं पुनः पुनः प्रेषितवान् यो यः प्रयाति दूतोऽस्य सकाशं न स पुनः प्रतिनिवृत्तः स्थितोऽस्य दीक्षितस्तत्रैव। शुद्धोदनः साधुं कालुदायीति-नामानं पत्रेण सह प्रेषितवान्। उदायी प्राग्गमनादङ्गीचकार यदि चाहं दीक्षितोऽप्य-भविष्यम् वारमेकमपि प्रतिन्यवर्तिष्ये। उदायी बुद्धस्य समीपं गत्वैव दीक्षितः। बुद्धस्तं प्रतिज्ञा-परिपूरणाय शुद्धोदनस्यान्तिकं प्रेषयामास। उदायी गत्वाह राजानं भो भूप! देवो बुद्धो-ऽत्रागिगमिषुर्नलवस्यातुमिच्छुर्नगर्याम् विहारे-ऽवस्थातुमियेष सः। राजा जेतवनस्यमिव न्यग्रोधारामं कपिलवस्तुनगरे विरचयागमन-मस्य प्रतीक्षाञ्चक्रे। तत्रागत्य बुद्धो न्यग्रोधारामे तस्मिन्नुवास। अत्रागत्य पितरौ शुद्धोदनोऽन्त-तोदनश्चास्य सत्वं सत्वं श्राक्यसन्ततयश्च शिष्या अभूवन्। तत्रावस्थानसमये बुद्धस्य पालयित्री गौतमी वनिता यशोधरा च भैक्षाश्रमं गृहीत-वत्यौ पुत्रोऽपि राहुलोऽजातकनिष्ठो जनकेन दीक्षितः।

ततो बुद्धो गृध्रकूटमागत्य वसतिञ्चक्रे। समये-ऽस्मिन् देवदत्तोऽस्य ज्ञातिः शत्रुः शिल्पिनं दाक्षिणात्यादानिनाय। तेन च निहन्तुं बुद्धं कूटयन्त्रं निरमायि। अनेनाहतो बुद्धो यथां प्राप निक्षेपणावसरे यन्त्रस्य तं बुद्धं रिरक्षिषुः क्रमीरस्तत्प्रहारेण प्राणांस्त्यत्वाघ।

कालेऽस्मिन् विम्बसारे मागधे पञ्चत्वं गते अजातशत्रुर्नृपो दुर्दान्तो मगधं शशास, देव-दत्तोऽस्य मित्रमासीत्। एकदाजातशत्रुर्बुद्ध-सन्निधावागत्य पप्रच्छ तं "नानाकर्मसु आसक्तो मनुष्यो धनमभीप्सुपार्ज्जयितुं यतते, प्राप्य तु पार्ज्जितं धनं सुखी च भवति, धर्मं तथा तु निधाय मनस्तदूर्ध्वं सुखं प्रत्यक्षमाप्नुयात् किम्? बुद्धः प्रत्युवाच किं कर्म्मणा यागेन होमेन वा। न्यायान्यायौ विफलौ अधमानामुत्तमानाञ्च निरस्कारपुरस्कारौ च तद्वत् निष्फलौ। पितरौ नाम्नौर्यौ च योऽस्मिन् जगति प्रभवान् मद्या-मत्तम्, सर्वे पथि प्रविष्टांश्च जानाति स एव सर्व्वज्ञ एतदुदितः। सोऽस्मिन् धर्म्मदेवाद्वयो-र्ज्ञयो निर्व्वाणं मोक्षं लभते न पुनरायातिः। दृष्टेष्टादिभूतचतुष्टयेऽस्य यथाक्रमं भूतान्ये-कीभवन्ति। इत्यमुपदेशेन बुद्धस्य अजातशत्रो-र्मानसं तत् क्षणादेव प्रवणं बभूव। योऽस्य जुगुप्सापात्रमासीत् स इदानीं भक्तिपात्रमस्या-भूत्। अजातशत्रुर्बुद्धाद् दीक्षां जग्राह।

गृध्रकूटाद्बुद्धः पाटलीग्राममाजगाम। कपि-लनामात्र, साधुर्नाम्नाऽनेन श्लोकि। सम्भाष्य तं पथि गच्छन्नसौ चतुर्हिग्रं निरीक्षाञ्चक्रे, आनन्दोऽस्य परिचरो जिज्ञासयामास किमित्यं निरीक्षसे व्यापारयंश्चक्षुषेति। बुद्ध आह आनन्द! परिदास्येऽहमिमं लोकमिदानीम्। ततः स आम्रग्रामं जम्बुग्रामं भण्डग्रामं हस्ति-ग्रामम् अन्यांश्च वणिजां मल्लानाञ्च ग्रामा-नतिक्रम्य भोजनगरं प्राप्तः। स्थानादस्माच्च-लुकाख्यमहावनमागत्यावस्थितः। अत्र कुण्ड-नाम्नो धातुगालकाद् वणिग्विशेषादाहार्यं गृहीतवान्।

ततोऽवानन्दं सम्बोधयामास भो नगरीं कुशीं गन्तास्मि। अतःपरं तथागतो नगरीं पावा-मतिक्रम्य नदीं हिरण्वतीं तीर्त्वा निविड़ं वनमेकं प्राप्तः। अत्रानन्दं प्राह पार्श्वयोरहन्तीव्रवेदनया-समाक्रान्तोऽस्मि, अतोऽहमत्रैव तिष्ठामीति। आनन्दो जलमानिनाय प्रक्षाल्य पादौ बुद्धो ध्यानं समालालम्बे। कालेऽस्मिन्नागत्य पुक्कसो मल्लराजः पादौ बुद्धस्य प्रपूजयामास। बुद्धोऽस्य दीक्षां चकार। सोऽस्मै दत्तवान् सौवर्णानल-ङ्कारान् प्रणम्य च प्रस्थितः। गते मल्लराजे आनन्दं प्राह बुद्धः प्रेयान् मे आनन्द! त्वं परि-धापयालङ्कारान् सौवर्णानङ्गेष्विति। तथानु-ष्ठिते तदानीं देहस्य ज्योतिषास्याखिलं जगद् आलोकितमिवासीत्। भक्तिभरेणानन्दः प्राह भगवन्! न दृष्टं कदापि मयाचभवतामेतादृश-मौज्ज्वल्यं देहस्य। दृश्यस्य तावत् कथय कारणञ्चेति। चकार प्रत्युत्तरं बुद्धो देवो नियोध आनन्द! निर्व्वास्यतः प्रदीपस्य शिखे-वाङ्गकान्तिर्मे युगुक्रान्तेत्यत्र कारणम्।

अनन्तरमुभौ मिलित्वा हिरण्वत्यास्तीरं आग-मतुः। बुद्धस्तत्र स्वीयं समस्तं परिच्छदं परि-हार्यैकवसनो नद्या हिरण्वत्याः कुश्यास्च नगर्य्या उभययोर्मध्यदेशस्थं वनं विविक्तं विवेश। पथि प्राह चानन्दं क्लान्तस्य मे शय्यां विधत्स्वेति। आनन्दः शय्यां सञ्चीचकार, सुप्तो-त्थितो बुद्ध आनन्दाय भिक्षुकार्य्यां कर्त्तव्यं सत्रान्तं विनयं मातृकादीनि धर्म्मतत्त्वान्युप-दिदेश। आनन्दस्तत्सर्वं समाहितेन मनसा जग्राह। तत आनन्दमादिदेश शालमधि-रुहयोर्मध्ये शय्यां स्थापय निशीथेऽद्य मे शेषं विज्ञानोहीति। ततो बुद्धस्तत्रैव समाधिमाधाय रूपार्थिवं ज्योतिरवलोकयामास ततोऽसौ चिन्मयति स्म निर्व्वाणम्।

भक्तः परमानन्दो रुरोद गत्वं संज्ञावास्य विगलितबाष्पप्रवाहोऽविरलधारया तमाह बुद्ध आनन्दः! संसारोऽयमसारः सारो निर्व्वाण-मेव तदर्थं यतस्वेति। इत्थं परमकृपालुर्बुद्धदेवो निर्व्वाणं प्राप।

इत्थं स हरेरवतारः—

"विकीर्य्य विज्ञानमयीं प्रभां प्रभु-
र्जगत्प्रदीपः प्रथितः प्रभाकरः।
बुद्धः स राशिर्मरुतां महोज्ज्वलो
ज्वलंश्च निर्व्वाणपदं परं गतः॥
प्रक्षाल्य चैलोक्यमलं मलीमसं
प्रवृद्धहिंसारसदूषितं विभुः।
प्रबोधधाराधरभूरिवारिभी
रराज देवो भुवि बोधभास्करः॥"

कुशीनगरस्थिते सुकृटवन्धनचैत्येऽस्य शिष्याः देहं भस्मीभूतं चक्रुः। शिष्यवृन्दैनास्य पवित्र-देहभस्मावशेषार्थं विवदमानेव निरवधि भस्मभिरेभिरुपदेशैश्चत्वौ चैत्या निर्म्मिता भवन्तीति॥)

बुद्धद्रव्यं, क्ली, (बुद्धं स्तूपाकारतो ज्ञातं द्रव्यम्॥) स्तौपिकम्। लोत् इति भाषा। इति त्रिकाण्ड-शेषः॥

बुद्धिः, स्त्री, (बुध्यतेऽनयेति। बुध्+क्तिन्।) निश्चयात्मिकान्तःकरणवृत्तिः। इति वेदान्त-सारः॥ सविकल्पकज्ञानम्। इति चण्डी-टीकायां नागभट्टः॥ तत्पर्य्यायः। मनीषा २ धिषणा ३ धीः ४ प्रज्ञा ५ प्रेक्षणी ६ मतिः ७ प्रेक्षा ८ उपलब्धिः ९ चित् १० समित् ११ प्रतिपत् १२ ज्ञप्तिः १३ चेतना १४। इत्यमरः। १। ५। १॥ धारणा १५ प्रतिपत्तिः १६ मेधा १७ मननम् १८ मनः १९ ज्ञानम् २० बोधः २१ लक्षलेखः २२ संख्या २३ प्रतिभा २४। इति राजनिर्घण्टः॥ आत्मजा २५ पद्मा २६ विज्ञा-नम् २७। इति शब्दरत्नावली॥ * ॥ अस्याः स्वरूपं यथा,—

"बुद्धिर्विवेचनारूपा सा ज्ञानजननी स्मृता॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २६ अध्याये।

अस्या अध्यात्माधिभूताधिदैवतानि यथा,—

"अध्यात्मं बुद्धिरित्याहुः षड़िन्द्रियविचारिणी।
अधिभूतञ्च मन्तव्यं ब्रह्मा तत्राधिदैवतम्॥"

इति महाभारते आश्वमेधिकपर्व्व॥ ४॥

सा च सात्त्विकराजसतामसभेदेन त्रिविधा। सात्त्विकी यथा,—

"प्रवृत्तिञ्च निवृत्तिञ्च कार्य्याकार्य्ये भयाभये।
बन्धं मोक्षञ्च या वेत्ति बुद्धिः सा पार्थ!
सात्त्विकी॥"

राजसी यथा,—

"यया धर्म्ममधर्म्मञ्च कार्य्यञ्चाकार्य्यमेव च।
अयथावत् प्रजानाति बुद्धिः सा पार्थ!
राजसी॥"

तामसी यथा,—

"अधर्म्मं धर्म्ममिति या मन्यते तमसावृता।
सर्व्वार्थान् विपरीतांश्च बुद्धिः सा पार्थ!
तामसी॥"

इति श्रीभगवद्गीता॥

तस्याः पञ्च गुणा यथा,—
"इष्टानिष्टविपत्तिश्च व्यवसायः समाधिता।
संशयः प्रतिपत्तिश्च बुद्धेः पञ्च गुणान् विदुः॥"
इति महाभारते मोक्षधर्म्मः।

इष्टानिष्टविपत्तिः इष्टानिष्टानां वृत्तिविशेषाणां विपत्तिर्नाशः निद्रारूपा वृत्तिरित्यर्थः। व्यवसायः उत्साहः। समाधिता चित्तस्थैर्य्यं चित्तवृत्तिनिरोध इत्यर्थः। संशयः कोटिद्वयस्पृक् ज्ञानम्। प्रतिपत्तिः प्रत्यक्षादिप्रमाणवृत्तिः। इति तट्टीका॥ * ॥ तस्याः सप्त गुणा यथा—
"शुश्रूषा श्रवणञ्चैव ग्रहणं धारणन्तथा।
ऊहोपोहोऽर्थविज्ञानं तत्त्वज्ञानञ्च धीगुणाः॥"
इति हेमचन्द्रः॥ * ॥

तस्या वृत्तिः पञ्चधा यथा। प्रमाणम् १ विपर्य्ययः २ विकल्पः ३ निद्रा ४ स्मृतिः ५। इति पातञ्जलम्॥ * ॥ बुद्धिक्षयकरा यथा,—
"शोकः क्रोधश्च लोभश्च कामो मोहः परासुता।
ईर्ष्या मानो विचिकित्सा कृपास्या जुगुप्सता॥
द्वादशैते बुद्धिनाशहेतवो मानसा मलाः।"
इति कालिकापुराणे १८ अध्यायः॥ * ॥

अपि च।
"बुद्धिक्षयकरा एते मायाकासवमृत्तिका॥"

बुद्धिवृद्धिकरा यथा,—
"निम्बाटरूषवृन्ताक बुद्धिवृद्धिकरा मताः॥
बुद्धिक्षयकरान्नित्यं त्यजेद्राजा च भोजने।
भोजयेदन्नहं बुद्धिवृद्धिहेतुं नृपोत्तम!॥"
इति कालिकापुराणे ८६ अध्यायः॥ * ॥

न्यायमते सा विशेषगुणः पुनर्द्विविधा अनुभूतिः स्मृतिश्च। यथा,—
"विशेषगुणवान् बुद्धिस्तु द्विविधा मता।
अनुभूतिः स्मृतिश्च स्यादनुभूतिश्चतुर्विधा॥
प्रत्यक्षमथानुमितिस्तथोपमितिशब्दजे।"
इति भाषापरिच्छेदः॥

बुद्धिमान्, [त्] त्रि, (बुद्धिर्विद्यते यस्य। बुद्धि+मतुप्।) बुद्धियुक्तः। ज्ञानवान्। यथा,—
"तद्भुज्यते यद्विजभुक्तशेषं
स बुद्धिमान् यो न करोति पापम्॥"
इति गारुडे १५५ अध्यायः॥

बुद्धिसहायः, पुं, (बुद्ध्या बुद्धया कृते कार्य्ये इति भावः। सहायः।) मन्त्री। इति हलायुधः॥ मत्याः साहाय्यकर्त्ता च॥

बुद्धीन्द्रियं, क्ली, (बुद्धेर्बुद्धयात्मकं वा इन्द्रियम्।) ज्ञानेन्द्रियम्। यथा,—
"मनः कर्णौ तथा नेत्रे रसना त्वक् च नासिके।
बुद्धीन्द्रियमिति प्राहुः शब्दकोशविचक्षणाः॥"
इति शब्दरत्नावली॥
(यथा मनुः। २। ९०-९२।
"श्रोत्रं त्वक् चक्षुषी जिह्वा नासिका चैव पञ्चमी।
पायूपस्थं हस्तपादं वाक् चैव दशमी स्मृता॥
बुद्धीन्द्रियाणि पञ्चेषां श्रोत्रादीन्यनुपूर्व्वशः।
कर्म्मेन्द्रियाणि पञ्चेषां पायुपस्थादीनि प्रचक्षते॥

एकादशं मनो ज्ञेयं स्वगुणेनोभयात्मकम्।
यस्मिन् जिते जितावेतौ भवतः पञ्चकौ गणौ॥"

बुद्बुदः, पुं, वर्त्तुलाकारजलविकारः। जलविम्बुकी इति भाषा। इति च ख्यातः। बुद्बुदोऽम्बुष्फोट इत्यपरः। इत्यमरभरतौ॥ अन्यच्च।
"अब्भच्छाया तृणादग्नेर्नीचसेवा पथे जलम्।
वेश्यारागः खले प्रीतिः षड्ढते बुद्बुदोपमाः॥"
इति गारुडे १५ अध्यायः॥

गर्भस्यावयवविशेषः। यथा,—
"पञ्चरात्रेण कलनं बुद्बुदाकारतां व्रजेत्॥"
इति सुश्रुतः॥

(यदुक्तं यथा,—
"प्रथमेऽहनि रेतश्च संयोगात् कललञ्च यत्।
जायतेबुद्बुदाकारं शोणितञ्च दशाहनि॥"
इति हारीते शारीरस्थाने प्रथमेऽध्याये॥)

बुध, इर् न ष बोधने। इति कविकल्पद्रुमः॥ (भ्वा०-उभ०-सक०-सेट्। ज्वलादिरयम्।) इर् अबुधत् अबोधीत्। न बोधः बुधः। ष बोधति बोधते। इति दुर्गादासः॥

बुध, औ विज्ञापने। इति कविकल्पद्रुमः। (भ्वा०-पर०-सक०-अनिट्।) औ बोद्धा। बोधति गुरुः। इति दुर्गादासः॥

बुध, य ड ओं वेदने। इति कविकल्पद्रुमः॥ (दिवा०-आत्म०-सक०-अनिट्।) य ड बुध्यते शास्त्रं सुधीः। ओं बोद्धा। इति दुर्गादासः॥ (जागरार्थे अकर्म्मकोऽपि। यथा, रघौ। १०। ६।
"ते च प्रापुरुदन्वन्तं बुबुधे चादिपूरुषः॥"
"आदिपुरुषो विष्णुश्च बुबुधे योगनिद्रां जहौ इत्यर्थः॥" इति तट्टीका॥)

बुधः, पुं, (बुध्यते यः। "बुध्+इगुपधज्ञाप्रीकिरः कः।" ३। १। १३५। इति कः।) पण्डितः। तत्पर्य्यायः। विद्वान् २ विपश्चित् ३ दोषज्ञः ४ सन् ५ सुधीः ६ कोविदः ७ धीरः ८ मनीषी ९ ज्ञः १० प्राज्ञः ११ संख्यावान् १२ पण्डितः १३ कविः १४ धीमान् १५ सूरिः १६ क्षत्री १७ क्षत्रियः १८ लब्धवर्णः १९ विचक्षणः २० दूरदर्शी २१ दीर्घदर्शी २२। इत्यमरः। २। ७। ५॥ विदग्धः २३ दूरदृक् २४ सूरी २५ वेदी २६ दृढः २७ बुद्धः २८ विधानगः २९ प्रज्ञिलः ३०। इति शब्दरत्नावली॥ यक्तः ३१ प्राप्तरूपः ३२ सुरूपः ३३ अभिरूपः ३४ बुधानः ३५ कवितावेदी ३६ वप्रा ३७ विदितः ३८ कविः ३९। इति जटाधरः॥ (यथा, नवरत्ने। १।
"चतुर्भ्यं स्तुतिभिर्गुरुं प्रणतिभिर्म्मर्खं कथाभिर्बुधं
विद्याभी रसिकं रसेन सकलं श्लीलेन कुर्य्यादृशम्॥")

नवग्रहान्तर्गतचतुर्थग्रहः। स च दृहस्पतिभार्य्यातारागर्भे चन्द्राज्जातः। तत्पर्य्यायः। रौहिणेयः २ सौम्यः ३। इत्यमरः। १। ३। २६। हेमा ४ वित् ५ ज्ञः ६ बोधनः ७ इन्द्रपुत्रः ८। इति ज्योतिस्तत्त्वम्॥ * ॥ तस्य जन्मादि-

वृत्तान्तं यथा। "मदावलेपाच्च सकलदेवगुरोर्बृहस्पतेस्तारां नाम पत्नीं जहार। बहुशश्च बृहस्पतिचोदितेन भगवता ब्रह्मणा चोद्यमानः सकलैश्च देवर्षिभिर्याच्यमानोऽपि न मुमोच। तस्य बृहस्पतिद्वेषादुशना पार्ष्णिग्राहोऽभूत्। अङ्गिरसश्च सकाशादुपलब्धविद्यो भगवान् रुद्रो बृहस्पतेः साहाय्यमकरोत्। यतश्चोशना ततोऽहि जम्भकुम्भाद्याः समस्ता एव दैत्यदानवनिकाया महान्तमुद्यममक्रुः। बृहस्पतेरपि सकलदेवसैन्यसहायः शुक्रोऽभवत्। एवं तयोरतीवोग्रः संग्रामस्तारानिमित्तस्तारकामयनामाभवत्। ततश्च समस्तशस्त्रास्त्रेषु रुद्रपुरोगमा देवाः दैत्येषु चाग्नेयदानवा सुसुचुः। एवञ्च देवासुराहवक्षोभक्षुब्धहृदयमशेषमेव जगद् ब्रह्माणं शरणं जगाम। ततश्च भगवान् पुण्डरीकं शङ्करमसुरान् देवांश्च निवार्य्य बृहस्पतये तारामदात्। तान्तःप्रसवामवलोक्य बृहस्पतिराह। नैष मम क्षेत्रे भवत्यन्यसुतो धार्य्यत उत्सृजैनं ज्वलज्वलनशिखाधिष्ठानेति। सा च तेनैवमुक्ता पतिव्रता भर्त्तृवचनान्तर्मिथोकारम्भे गर्भमुत्सर्जे। स चोत्सृष्टमात्र एवातितेजसा देवानां तेजांस्याचिच्छेद। बृहस्पतिमिन्दुश्च तस्य कुमारस्यातिचारुतया साभिलाषौ दृष्ट्वा देवाः समुत्पन्नसन्देहास्तारां पप्रच्छुः। सत्यं कथयास्माकमतिसुभगे! कस्यायमात्मजः सोमस्याथ बृहस्पतेरित्युक्तापि सा तारा ह्रिया न किञ्चिदुवाच। बहुशोऽभिहिता यदाऽसौ देवेभ्यो नाचचक्षे ततः स कुमारस्तां शुशुषतः प्राह च। दुरात्मन्! कस्मान्मम तातं नाख्यासि। अद्यैव ते अलीकलज्जावत्यास्तया शान्तिमयमहं करोमि। यथा नैवमन्यापतिमन्यवचना भविष्यतीति। अथ भगवान् पितामहस्तं कुमारं सन्निवार्य्य स्वयमपृच्छत्तारां। कथय वत्से! कस्यायमात्मजः सोमस्याथ बृहस्पतेरित्युक्तापि सा लज्जावनम्रमाह सोमस्येति। ततः स्फुरदुच्छ्वसितामलकपोलकान्तिर्भगवानुडुपतिरालिङ्ग्य कुमारं साधु साधु वत्स! प्राज्ञोऽसीति बुध इति नाम चक्रे। इति विष्णुपुराणे ४ अंशे ६ अध्यायः॥ मत्स्यपुराणे चतुर्विंशाध्याये विशेषोऽयम्। सूत उवाच।
"ततः संवत्सरस्यान्ते द्वादशादित्यसन्निभः।
दिव्यपीताम्बरधरः पीताभरणभूषितः॥
सर्व्वास्त्रशास्त्रविद्विद्वान् हस्तिशास्त्रप्रवर्त्तकः।
राज्ञः सोमस्य पुत्रत्वाद्राजपुत्रो बुधः स्मृतः॥
जातमात्रः स तेजांसि सर्व्वाण्येवाच्छिपद्बली।
ब्रह्माद्यास्तत्र ते जग्मुर्देवा देवर्षिभिः सह॥
बृहस्पतिगृहे सर्व्वे जातकर्म्मोत्सवं तदा।
पप्रच्छुश्च सुरास्तारां केन जातः कुमारकः॥
ततः सा लज्जिता तेषां न किञ्चिदवदत्तदा।
पुनः पुनस्तदा पृष्टा लज्जयन्ती वराङ्गना॥
सोमस्येति चिरादाह ततोऽयज्ञाद्विभुः सुतम्।

बुध इत्यकरोन्नाम प्रादाद्राज्यञ्च भूतले ॥
अभिषेकं ततः कृत्वा प्रधानमकरोद्दिशः ।
ग्रहसाम्यं प्रदायाथ ब्रह्मा ब्रह्मर्षिसंयुतः ॥
पश्यतां सर्व्वभूतानां तत्रैवान्तरधीयत ।
इलोदरे च धर्म्मिष्ठं बुधः पुत्रमजीजनत् ॥"
अन्यत् सर्व्वमाख्यानमेकमेव ॥ * ॥ अस्य वर्णः दूर्व्वाश्यामः । स च उत्तरदिङ्नपुंसकशूद्रजात्यधर्व्ववेदरजोगुणमिश्रितरत्नमिथुनराशिमरकतमणिमगधदेशानामधिपतिः । अस्य मित्रं आदित्यः शुक्रश्च । अस्य शत्रुः शशी । अस्य राशिभोगः अष्टादश दिनानि । इति ज्योतिस्तत्त्वम् ॥ * ॥ स तु मगधदेशोद्भवः । अत्रिवंशजातः । हस्वस्थूलदीर्घः । पीतवर्णः । वैश्यजातिः । चतुर्भुजः । वामोर्द्धक्रमतश्चर्म्मवरखड्गगदाधारी । सूर्य्यासः । सिंहवाहनः । सौम्यः । पीतवस्त्रः । अस्याधिदेवता नारायणः । प्रत्यधिदेवता विष्णुः । धनिष्ठानक्षत्रयुक्तद्वादश्यां जातः । इति ग्रहयज्ञतत्त्वम् ॥ * ॥ स च ग्रामचारी । शुभग्रहः । नीलवर्णः । सुवर्णद्रव्यस्वामी । वर्त्तुलाकृतिः । शिशुः । इष्टकागृहसञ्चारी । वातपित्तकफात्मकः । क्लीवग्रहः । प्रातःकाले प्रबलः । पक्षिस्वामी । सकलरसप्रियश्च । इति ज्योतिषम् । अस्य वारे जातफलं यथा,—

"गुणी गुणज्ञः कुशलः क्रियादौ
विलासशीलो मतिमान् विनीतः ।
रूढुस्वभावः कमनीयमूर्त्ति-
र्बुधस्य वारे प्रभवो मनुष्यः ॥"

इति कोष्ठीप्रदीपः ॥*॥

सूर्य्यवंशीयराजविशेषः । यथा,—
"तस्मात् क्षतिरथस्तस्य देवाभीढस्ततो बुधः ।
यथाऽत्र त्रिदशैरेव तस्मान्महाधृतिस्ततः ॥"
इत्यग्निपुराणम् ॥
(वेगवतो राज्ञः पुत्रः । यथा, भागवते । ९ । २ । ३० ।
"तनुसुतः केवलस्तस्मात् वसुमान् वेगवांस्ततः ।
बुधस्तस्याभवद् यस्य तृणबिन्दुर्महीपतिः ॥")

बुधचक्रं, क्लीं (बुधस्य ग्रहविशेषस्य चक्रम् ।) बुधग्रहस्य स्वसञ्चारादष्टादशदिनोत्तरराश्यन्तरसञ्चारनक्षत्रावधिसप्तविंशतिनक्षत्रघटितनरशुभाशुभज्ञानार्थनराकारचक्रम् । यथा,—
"भोगो सुखैकमथ मृत्यु चतुर्थं रोगः
षष्ठाष्टमं सुखहतं सुखदं सुतेऽब्ज ।
दुःखं पदाधिसुयशो हृदि सप्तराज्यं
नाभीऽम्भे द्विभगतेति धनं बुधस्य ॥"
इति समयाग्रन्थम् ॥

बुधजातः, पुं, (बुधस्य ग्रहविशेषस्य जातः पिता ।) चन्द्रः । इति शब्दचन्द्रिका ।

बुधत्वं, क्लीं, (बुधप्रियं रत्नम् । शाकपार्थिवादित्वात् समासः ।) मरकतमणिः । इति राजनिर्घण्टः ।

बुधवारः, पुं, (बुधस्य वारः ।) बुधग्रहस्य वासरः । यथा,—
"वैः कृता श्रावणे मासि अष्टमी रोहिणी-युता ।
किं पुनर्बुधवारेण सोमेनापि विशेषतः ॥"
इति तिथ्यादितत्त्वम् ॥
(अस्मिन् जातफलं यथा, कोष्ठीप्रदीपे ।
"गुणी गुणज्ञः कुशलः क्रियादौ-
विलासशीलो मतिमान् विनीतः ।
रूढुस्वभावः कमनीयमूर्त्ति-
र्बुधस्य वारे प्रभवो मनुष्यः ॥)

बुधसानुः, पुं, पर्व्वम् । यक्षपुरुषः । इति संक्षिप्तसारोणादिवृत्तिः ॥

बुधसुतः, पुं, (बुधस्य सुतः पुत्रः ।) पुरूरवाः । इति पुराणम् ॥ (यद्वक्तं हरिवंशे । २६ । १ ।
"बुधस्य तु महाराज ! विद्वान् पुत्रः पुरूरवाः ।
तेजस्वी दानशीलश्च यज्वा विपुलदक्षिणः ॥"
अयं हि इलागर्भसंभूतः ॥ बुधस्य बृहद्देवस्य सुतः पुत्र इति विग्रहे । बृहत्पुत्रो राहुलः । स तु यशोधरायां गर्भसम्भूतः ।)

बुधा, स्त्री, (बोधयति रोगिणं या । बुध् + "इगुपधेति ।" ३ । १ । १३५ । इति कसन्तश्टाप् ।) जटामांसी । इति शब्दचन्द्रिका ॥ (गुणादिकमस्या जटामांसीशब्दे ज्ञातव्यम् ॥)

बुधान्नः, पुं, (बोधयति बुध्यते वा । बुध बोधने + बुधिबुधिदृक्षिः किच्च ।" उणा० २ । ६० । इति आनच् किच्च ।) गुरुः । विज्ञः । इति मेदिनी । ने, २६ ॥ ज्ञानवादी । प्रियवादी । इत्युणादिकोषः ॥ कविः । इति जटाधरः ॥

बुधाष्टमी, स्त्री, (बुधवारयुता अष्टमी । शाकपार्थिवादित्वात् समासः ।
"अष्टमीबुधवारेण पञ्चयोगोभयोर्यदा ।
भविष्यति तदा तस्यां व्रतमेतत् कृता पुरा ॥"
इति वचनादस्यास्तथात्वम् ।)
व्रतविशेषः यथा । बुधाष्टमीव्रतं चैत्रमौषहरिशयनादीतरकाले कर्त्तव्यम् । यदाह राजमार्त्तण्डः ।
"मतङ्गे मकरे याते देवे जागृति माधवे ।
बुधाष्टमीं प्रकुर्व्वीत वर्जयित्वा तु चैत्रकम् ॥
प्रसुप्ते च जगन्नाथे सन्ध्याकाले मधौ तथा ।
बुधाष्टमीं न कुर्व्वीत कृता हन्ति पुराकृतम् ॥"
एतद्व्रतमारब्धमपि चैत्रादौ न कर्त्तव्यमिति । यथा स्मृतिः ।
"मीने धनुषि देवेशे सुप्तेऽशुद्धदिने तथा ।
बुधाष्टमीं न कुर्व्वीत पूर्व्वविद्धामपि क्वचित् ॥"
इति व्रतकालविवेकः ॥ ६ ॥
अपि च ।
"अष्टमी बुधवारेण पञ्चयोगोभयोर्यदा ।
भविष्यति तदा तस्यां व्रतमेतत् कृता पुरा ॥
तस्यां नियमकर्त्तारो न स्युर्दुर्गतिभाजनाः ।
तस्मात्तस्यामष्टमीनां वर्जयित्वाथुलीद्वयम् ॥
भक्तं मद्भक्तिपत्राभ्यां कामनायुक्तमानवः ।
आम्रपत्रपुटे कृत्वा यो मह्यं कुसुमेष्टिते ॥
कलम्बिकान्विकोपेतं काम्यं तस्य फलं भवेत् ।
बुधं पञ्चोपचारेण पूजयित्वा जलाशये ।
भक्तितो दक्षिणां दद्यात् कर्करीं तण्डुलान्विताम् ।
बुं बुधायेति बीजार्णैः स्वार्थे वा कमलादिके ।
वाणचापधरं श्यामं दले चाङ्गानि मध्यतः ।
बुधाष्टमीकथा पुण्या श्रोतव्या व्रतिभिर्ध्रुवम् ॥१॥
पुरे पाटलिपुत्राख्ये वीरो नाम द्विजोत्तमः ।
रम्भा भार्य्या च तस्यासीत् कौशिकः पुत्र उत्तमः ।
दुहिता विजया नाम धनपालो वृषोऽभवत् ।
गृहीत्वा कौशिकस्तस्य गेहे गङ्गागतोऽरमत् ।
गोपालकैर्द्यूतकारैः क्रीड़त्यक्षतो बलात् ।
गङ्गातः स च उत्थाय वनं वव्राम दुःखितः ।
जलार्थं विजया चागात् भ्रात्रा सार्द्धञ्च साध्वगात् ।
पिपासितौ शृगालार्थौ आगतोऽथ सरोवरम् ।
दिव्यस्त्रीणाञ्च पूजादि दृष्ट्वा चाप्यथ विस्मितः ।
स च गत्वा ययाचेऽन्नं सानुजोऽहं बुभुक्षितः ।
स्त्रियोऽब्रुवन् व्रतं कर्त्तुं दास्यामश्च कुरु व्रतम् ।
पञ्चवर्षमन्नपानार्थं पूजयामासतुर्बुधम् ।
पुटकद्वयं गृहीत्वान्नं बुभुजाते प्रदत्तकम् ।
स्त्रियौ गता गतौ तौ तु धनपालमपश्यताम् ।
चौरैर्हृतं गृहीत्वाथ प्रदीप्ते प्राप्तवान् गृहम् ।
वीरश्च दुःखितं नत्वा रात्रौ सुप्ता यथासुखम् ।
लग्नश्च त्वरितं दृष्ट्वा कस्य देया सुता मया ।
यमायेत्यब्रवीद्दुःखात् स चायाद्व्रतसत्फलात् ।
स्वर्गं गतौ च पितरौ व्रतं राज्याय कौशिकः ।
चक्रेऽयोध्यामहाराज्यं दत्त्वा च भगिनीं यमे ।
यमोऽपि विजयामाह गृहस्था त्वं पुरान्तरम् ।
गोहाटयान्यत्र गते यमे सा न तथाकरोत् ।
अपश्यच्छातरं स्वां सा यामिकां प्राप्यातनात् ।
अधोदृष्टा कौशिकाय आचचक्षे विमुक्तिदम् ।
व्रतं चक्रे ततो मुक्ता माता तस्याश्चरद्व्रतम् ।"
इति गारुड़े बुधाष्टम्यादि १३३ अध्यायः ॥१॥
विस्तरस्तु ब्रह्मपुराणोक्तबुधाष्टमीव्रतप्रहतौ द्रष्टव्यः ॥

बुधितं, त्रि, (बुध्यते स्म । क्त । सेट् बुध् + क्त ।) बुद्धम् । ज्ञातम् । इत्यमरः । ३ । २ । १०८ ।

बुधिलः, त्रि, (बुध्यते यः । बुध् + किलच् ।) विद्वान् । इत्युणादिकोषः ॥

बुभ्रः, पुं, (बभ्नातीति । बन्धबन्धने "बन्धेर्ब्भिश्च ।" उणा० ३ । ५ । इति नक् बुधादेशश्च ।) वृक्षमूलम् । इत्यमरः । २ । ४ । १२ । (मूलदेशः । अग्रभागः । यथा, अथर्व्ववेदे । २ । १४ । ४ ।
"मूलस्य बुभ्र आसीनास्ता इन्द्रो वर्हयाधितिष्ठतु ।")

शिवः । यथा,—
"निवेश्य बुभ्रं चरणं सितानना
गुरुं समारोढुमथोपचक्रमुः ।"
इति हरविलासे रावणेश्वरः । इति भरतः ।

वुन्द, इर् अ उ निशामने। (इति कविकल्पद्रुमः। (भ्वा०-उभ०-सक०-सेट्।) पञ्चमस्वरी। इर् अवुन्दीत्। अ वुन्दति वुन्दते। निशामनमालोचनं प्रणिधानमिति यावत्। इति दुर्गादासः॥ (यथा, भट्टिः। १४। ७२।
"समंसे शरवर्त्मेन दिग्येनेति वुवुन्द सः॥")

वुन्ध, इर् अ उ निशामने। इति कविकल्पद्रुमः॥ (भ्वा०-उभ०-सक०-सेट्।) पञ्चमस्वरी। इर् अवुधत् अवुन्धीत्। अ वुन्धति वुन्धते। उ वुन्धित्वा वुद्धा। निशामनमालोचनं प्रणिधानमिति यावत्। इति दुर्गादासः॥

वुन्ध, क वर्त्मे। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) पञ्चमस्वरी। क वुन्धयति॥ इति दुर्गादासः॥

वुबुधानः, पुं, आचार्य्यः। देवः। पण्डितः। इति संक्षिप्तसारोणादिवृत्तिः॥ (यथा, ऋग्वेदे। ७। ४४। ३।
"दधिक्रावाणं वुबुधानो
अग्निमुषसञ्च उपसं सूर्य्यं गाम्।")

वुभुक्षा, स्त्री, (भोक्तुमिच्छा। भुज धौ भक्षे+"धातोः कर्म्मणः समानकर्त्तृकादिच्छायां वा।" ३। १। ७। इति सन्। ततः "अः प्रत्ययात्।" ३। ३। १०२। इत्यस्तटाप्।) क्षुधा। इत्यमरः। २। ६। ५४॥ (यथा, रामायणे। २। २८। १८।
"अतीववातस्तिमिरं वुभुक्षा चास्ति नित्यशः।
भयानि च महान्त्यत्र ततो दुःखतरं वनम्॥")

वुभुक्षितः, त्रि, (वुभुक्षा भोजनेच्छा सञ्जातास्य। वुभुक्षा+"तदस्य संजातं तारकादिभ्य इतच्।" ५। २। ३६। इति इतच्।) क्षुधितः। इत्यमरः। ३। १। १०॥ (यथा, मनुः। १०। १०५।
"अजीगर्त्तः सुतं हन्तुमुपासर्पदुभुक्षितः।
न चालिलेश पापेन क्षुत्प्रतीकारमाचरन्॥")

वुल, क मज्जने। इति कविकल्पद्रुमः॥ (चुरा०-पर०-अक०-सेट्।) क वोलयति प्रस्तरः पयसि। नालश्चवर्गाद्यादिरयमिति केचित्। इति दुर्गादासः॥

वुलिः, स्त्री, (वुल+इन् किच्च।) भगम्। इति हेमचन्द्रः। ३। २७३।

वुधं, क्ली, (वुध्यते उत्क्रियते यत्। वुध्रिर् उत्क्रमे+"इगुपधेति।" ३। १। १३५। इति कः। पृषोदरादित्वात् यत्वं विभाषया।) वुसम्। तुच्छधान्यम्। आगड़ा इति भाषा। यथा,—
"उन्मेषमेषतुषतोषभृषाभिलाषकुल्माषमाषवुधवेषतुषारशोषाः। इति मूर्द्धन्यमध्ये पुरुषोत्तमः। इति भरतः॥

वुष, य इर् ज्ञानौ। इति कविकल्पद्रुमः। (दिवा०-पर०-सक०-सेट्।) य वुष्यति शब्दं मेघः व्यक्तीभवतीत्यर्थः। इर् अवुषत् अवोषीत्। अस्मात् पृषादित्वान्निष्ठायां ङ इत्यन्ये। इति दुर्गादासः॥

वुसं, क्ली, (वुष्यते तुच्छत्वादुत्क्षिप्यते इति। वुस्र इर् उत्क्षेपे+"इगुपधज्ञाप्रीकिरः कः।" ३। १। १३५। इति कः।) तुच्छधान्यम्। आगड़ा इति भाषा। तत्पर्य्यायः। कड़ङ्गरः २। इत्यमरः। २। ६। २२॥ वुषम् २। इति भरतः॥ वृषम् ४। इति शब्दरत्नावली॥ (उदकम्। यथा, ऋग्वेदे। १०। २७। २४।
"आत्रिः स्वः कृणुतेगृहते वुसम्॥"
"वुसमुदकम्॥" इति सायणः॥)

वुस्त क अनादरे। आदरे। इति कविकल्पद्रुमः॥ (चुरा० पर०-सक०-सेट्।) क वुस्तयति खलं लोकः। वुस्तयति धीरं साधुः। इति दुर्गादासः॥

वुस्तं, क्ली, (वुस्यते अनाद्रियते यत्। वुस्त क अनादरे+घञ्। यद्वा वुस्यते त्यज्यते स्म इति। वुस्रिर उत्सर्गे कर्म्मणि क्तः।) मांसपिण्डकविशेषः। स्यालीभृष्टमांसम्। पनसादिफलस्यासारभागः। इत्यमरभरतौ॥ भोंता इति ख्यातः॥

वृक्कं, त्रि, (वृक्कयति शब्दायते इति। वृक्क+अच्। पृषोदरादित्वाद्दीर्घः।) हृदयम्। इत्यमरटीकायां रमानाथः॥

वृक्कं, त्रि, (वृक्कयति शब्दायते इति। वृक्क+अच्। पृषोदरादित्वाद्दीर्घः।) वृक्कम्। इत्यमरटीकायां सारसुन्दरी॥

वृ गि वृक्षान्। भृत्याम्। इति कविकल्पद्रुमः॥ (स्वादि, क्र्यादि०-पर०-सक०-सेट्।) गि वृणोति वृणुते। वृणुः। इति दुर्गादासः॥

वेकटः, पुं, मत्स्यभेदः। तरुणः। विदूषकः। इति शब्दरत्नावली॥

वोकड़ी, स्त्री, वल्गान्ती। इति राजनिघण्टः॥

वोढा, त्रि, (वुध्यते यः। वुध्+तृच्।) वोधकर्त्ता। यथा,—
"वोढारो मत्सरग्रस्ताः प्रभवः स्मयदूषिताः।
अज्ञानोपहताश्चान्ये जीर्णमङ्गे सुभाषितम्॥"
इति भर्त्तृहरिः॥

वोधः, पुं, (वोधनमिति। वुध्+भावे घञ्।) ज्ञानम्। इति चिकाण्डशेषः॥ (यथा मार्कण्डेये। २६। १।
"वर्द्धमानं सुतं सा तु राजपत्नी दिने दिने।
तमुल्लापादिना वोधमनयन्निर्ममात्मकम्॥"
अयं हि वुद्धेर्जातः। तथाहि मार्कण्डेये।५०।२७।
"वोधं वुद्धिस्तथा लज्जा विनयं वपुरात्मजम्।
अवसायं प्रजज्ञे वै क्षेमं शान्तिरसूयत॥"
ऋषिविशेषः। यथा मार्कण्डेये। ७६। २८॥
"तयात्र सक्तो हैमिन्या गृहीत्वा च सुतञ्च सा।
वोधस्य द्विजमुख्यस्य गृहे नीतवती पुनः॥"
सूर्य्यरूपभेदः। यथा, मार्कण्डेये।१०१। १६।
"वोधश्चावगतिश्चैव स्मृतिर्विज्ञानमेव च।
इत्येतानीह रूपाणि तस्य रूपस्य भास्वतः॥"
जागरणकालः। चैतन्यम्। यथा, मार्कण्डेये। ८१। ६७।
"प्रवोधञ्च जगत्स्वामी नीयतामच्युतो लघु।
वोधञ्च क्रियतामस्य हन्तुमेतौ महासुरौ॥")

वोधकः, पुं, (वोधयतीति। वुध्+णिच्+ण्वुल्।) सूचकः। इति शब्दमाला॥ पुस्तकान्तरे वोधकोऽपि पाठः। वोधजनके त्रि॥ (यथा, साहित्यदर्पणे। २। ४।
"वर्णाः पदं प्रयोगार्हान्वितैकार्थवोधकाः॥")

वोधकरः, पुं, (करोतीति करः। कृ+ट। वोधस्य प्रवोधस्य करः।) निशान्ते वोधकारकः॥ तत्पर्य्यायः। वैतालिकः२। इत्यमरः।२।८।६७॥

वोधज्ञः, पुं, (वोधं अभिप्रायं जानातीति।। वोध+ज्ञा+क।) अभिप्रायवेत्ता। श्रीकृष्णः। यथा,—
"सर्व्वभाववित्तां श्रेष्ठो वोधज्ञः कामशास्त्रवित्।
कामिनीं वोधयामास वासयामास वक्षसि॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ५३ अध्यायः॥

वोधनं, क्ली, (वुध्+णिच्+ल्युट्।) गन्धदीपनम्। इति मेदिनी। ने, ६६॥ वेदनम्। विज्ञापनम्। इति वुधधात्वर्थदर्शनात्॥ (उद्दीपनम्। यथा माघे। ६। ३४।
"समवेन तेन चिरसुप्तमनो-
भववोधनं समवोधियत॥"
"मनोभवस्य कामस्य वोधनं उद्दीपनं यस्मिन्।" इति तट्टीकायां मल्लिनाथः। ज्ञानम्। यथा, रघौ। ६। ४६।
"परिचयं चललक्ष्यनिपातने
भयरुषोश्च तदिङ्गितवोधनम्॥"
"तेषां चललक्ष्याणां इङ्गितस्य चेष्टितस्य भयादिलिङ्गभूतस्य वोधनं ज्ञानं च करोति।" इति तट्टीकायां मल्लिनाथः॥) दुर्गायाः वोधनं यथा। देवीपुराणे।
"इदे मास्यसिते पक्षे कन्याराशिगते रवौ।
नवम्यां वोधयेद्देवीं क्रीड़ाकौतुकमङ्गलैः॥"
अत्र कृष्णादित्यादिपदे इत्यपि गौणाश्विनपरम्। अतएव कालकौमुद्यादिदृष्टम्। यथा,—
"कर्कित्यर्के हरौ सुप्ते प्रक्रम्यक्रियाश्विने।
तुलायां वोधयेद्देवीं दृष्टिके तु जनार्द्दनम्॥"
इति॥
वोधयेदिति शेषः। तत्रापि नवमीवोधनं कन्यायामेव तत्रैव सम्भवात्। तेन सिंहार्के तुलार्केऽप्याश्विनत्वेन वाक्यरचना। एवं प्रतिवर्षं कर्त्तव्यत्वादार्द्रादिनक्षत्रालाभेऽपि वोधनादिकार्य्यम्। नक्षत्रयोगस्तु फलातिशयाय। तथा च लिङ्गपुराणम्।
"मूलाभावेऽपि सप्तम्यां केवलायां प्रवेशयेत्।
तथा तिथ्यन्तरेष्वेवमुत्तरेषु च फल्गुषु॥"
यथाह देवलः।
"तिथिनक्षत्रयोर्योगे ह्योरेवानुपालनम्।
योगाभावे तिथेर्ग्राह्या देयाः पूजनकर्म्मणि॥"
कृष्णनवम्यामार्द्रायोगो विधौ मन्त्रे च श्रूयते। तथा च लिङ्गपुराणम्।
"कन्यायां कृष्णपक्षे तु पूजयित्वार्द्रमे दिवा।
नवम्यां वोधयेद्देवीं महाविभववित्तरैः॥"
चतुर्थपादे गोतवादित्वनिःस्वनैरिति कालिकापुराणे पाठः।
"इदे मास्यसिते पक्षे नवम्यामार्द्रयोगतः।

श्रीहरे बोधयामित्वांयावत् पूजां करोम्यहम् ॥
ऐं रावणस्य वधार्थाय रामस्यानुग्रहाय च ।
अकाले ब्रह्मणा बोधो देयास्त्वयि कृतः पुरा ॥"
इति मन्त्रलिङ्गम् ॥

अकाल इति तु रात्रिलिङ्गेन दक्षिणायनस्य। तथाच श्रुतिः। तपस्तपस्यौ शैशिरावृतुः मधुश्च माधवश्च वासन्तिकावृतुः शुक्रश्च शुचिश्च ग्रैष्मावृतुः। अथैतदुत्तरायणं देवानां दिनं नभश्च नभस्यश्च वार्षिकावृतुः इषश्च ऊर्जश्च शारदावृतुः सहश्च सहस्यश्च हैमन्तिकावृतुः। अथैतद्दक्षिणायनं देवानां रात्रिरिति। एवञ्च रात्रावेव महामाया ब्रह्मणा बोधिता पुरा। तथैव च नरः कुर्य्युः प्रतिसंवत्सरं पृथक्त्वेतद्विषयम् ॥ अतएव लिङ्गपुराणकालिकापुरारायोर्द्वैवेयुक्तम्। एवञ्च कालिकापुराणे बोधने रात्रावितिपदं देवतारात्रिपरम्। ततश्च पूर्व्वाह्णे नवम्यामार्द्रायुक्तायां बोधनं पूर्व्वाह्णेतरकाल एव आर्द्रालाभे दिवेत्यत्र दिवाशब्दात्तत्रापि बोधनं अन्यथा दिवापदं व्यर्थं स्यात्। ज्योतिषार्णवे यत्तसुक्तं वराहेण।

"कन्यादिमीनपर्य्यन्तं यत्र संप्राप्यते शिवः।
तत्र बोधः प्रकर्त्तव्यो देया राज्ञां शुभप्रदः ॥"

शिव आर्द्रा। एवञ्चोभयदिने पूर्व्वाह्णे नवमीलाभे परत्रार्द्रालाभे परत्र बोधनं न तु युग्मात् पूर्व्वत्र। युग्मबाधकपूर्व्वाह्णस्य बाधकनक्षत्रानुरोधात् दिवा नक्षत्रलाभे तु पूर्व्वाह्ण एव नवम्यां उभयत्र पूर्व्वाह्णलाभे पूर्व्वदिन एव युग्मात्। अत्र केवलनवम्यां बोधनविधेर्नक्षत्रस्यापि गुणफलत्वाच्च।

"माघेऽथ फाल्गुने वापि भवेद्वै माघसप्तमी।
माकरीति च यत्प्रोक्तं तत्प्रायोवृत्तिदर्शनात् ॥"
इति ॥

सौरमानात् माकर्य्यादिवत् आर्द्रायोग इत्यस्य प्रायिकत्वेनाभिधानं प्रतीयते। ततश्चार्द्ररहितबोधने मन्त्रान्तरानुपदेशात् तन्मन्त्रः प्रणवयुक्तत्वेन प्रयुज्यते।

"यच्चूनमतिरिक्तञ्च यच्छिद्रं यदयज्ञियम्।
यदमेध्यमनुक्तञ्च यातयामञ्च यद्भवेत्।
तदोङ्कारप्रयुक्तेन सर्व्वमाविप्लवं भवेत् ॥"
इति योगियाज्ञवल्क्यात् षष्ठ्यां बोधनेऽप्येवम् ॥ नवमीबोधनामार्षे तु षष्ठ्यां सायं बोधनम्। तथा भविष्ये।

"षष्ठ्यां विल्वतरौ बोधं सायंसन्ध्यासु कारयेत् ॥"

सन्ध्योक्ता वराहेण।

"अर्द्धास्तमयात् सन्ध्या यावत्तीभूता न तारका
यावत् ॥"

षष्ठ्यां बोधने तु प्रागुक्तं ऐं रावणस्य वधार्थायेति अष्टम्यान्विते षष्ठ्यां सायाह्णे बोधयाम्यत इति पठेत्। यदा तु पूर्व्वदिने सायं षष्ठीलाभः परदिने सायं विना षष्ठीलाभः तदा पूर्व्वेद्युर्यां परदिने सायमामन्त्रणम्। यदा तूभयदिने सायं षष्ठ्यलाभस्तदा परेऽहनि पूर्व्वाह्णे षष्ठ्यां बोधनम्।

"बोधयेद्विल्वशाखायां षष्ठ्यां देवीं फलेषु च।
षष्ठ्यां बोधने तु नक्षत्रानुपरेशान्न तदादरः ॥"
इति तिथ्यादितत्त्वम् ॥

बोधनी, स्त्री, (बुध्+भावे ल्युट्। ङीष्। बोधः। (बोधतेऽनया। बुध्+णिच्+करणे ल्युट्। अनया हि मूर्च्छितो बोध्यते अतोऽस्य तथात्वम्।) पिप्पली। इति मेदिनी ॥ (बुध्यतेऽस्याम्। बुध्+अधिकरणे ल्युट्। स्त्रियां ङीप्। अस्यां हि योगनिद्राया हरेः प्रबोधनात्तथात्वम्।) कार्त्तिकशुक्लैकादशी। सा तु उत्थानैकादशी। यथा,—

"श्रयनीबोधनीमध्ये या कृष्णैकादशी भवेत्।
सैवोपोष्या गृहस्थेन नान्या कृष्णा कदाचन ॥"
इति तिथ्यादितत्त्वम् ॥

अपि च।

"तावन्नर्त्तन्ति सीधानि वाजिमेधादयो मखाः।
मथुरायां प्रिया विष्णोर्यावन्नायाति बोधनी ॥"
इति हरिभक्तिविलासे पद्मपुराणवचनम् ॥

बोधनीय, त्रि, (बुध्+कर्म्मणि अनीयर्।) बोध्यः। बोधितव्यः। बोधयोग्यः ॥

बोधवासरः, पुं, (बोधस्य भगवतो मायानिद्रायाः प्रबोधस्य वासरः।) भगवतः प्रबोधदिनम्। उत्थानैकादशी। यथा,—

"जन्मप्रभृति यत् पुण्यं नरैरुपार्जितं भुवि।
वृथा भवति तत् सर्व्वं न कृत्वा बोधवासरम् ॥"
इति हरिभक्तिविलासधृतस्कन्दपुराणवचनम् ॥

बोधान, पुं. (बुध्यते इति। बुध्+आनच्।) गोष्पतिः। विघ्नः। बुधभेदः। इति शब्दरत्नावली ॥

बोधिः, पुं. (बुध+"सर्व्वधातुभ्य इन्।" ४।१।११७ इति इन्।) समाधिभेदः। पिप्पलवृक्षः। इति मेदिनी। धे. १२ ॥ (यथास्य पर्य्यायः।

"पिप्पलो बोधिरश्वत्थश्चैत्यवृक्षो गजाशनः ॥"
इति वैद्यकरत्नमालायाम्।)

बोधः। इति चिकित्सारत्नम् ॥ ज्ञातरि, त्रि। इत्युणादिकोषः ॥

बोधित, त्रि, (बुध्+णिच्+क्त।) ज्ञापितम्। यथा,—

"रात्रावेव महामाया ब्रह्मणा बोधिता पुरा ॥"
इति तिथ्यादितत्त्वम् ॥

बोधितरुः, पुं, (बोधिरेव तरुः।) अश्वत्थवृक्षः। इति हेमचन्द्रः। ४। १६७ ॥ (गुणादयोऽस्याश्वत्थशब्दे द्रष्टव्याः ॥)

बोधितव्य, त्रि, (बुध+णिच्+तव्य।) ज्ञापितव्यम्। यथा। बोधितव्योऽयं पूर्व्वपक्षः। इति शाङ्करभाष्यम् ॥

बोधिद्रुमः, पुं, (बोधिरेव द्रुमः।) अश्वत्थवृक्षः। इत्यमरः। २। ४। २० ॥

बोधिवृक्षः, पुं, (बोधिरेव वृक्षः।) अश्वत्थवृक्षः। इति राजनिर्घण्टः ॥

बोधिसत्त्व, क्लो, (बोधि बोधवत् सत्त्वम्।) बुद्धविशेषः। इति हेमचन्द्रः। २। १४६ ॥ (यथा, कथासरित्सागरे। २२। ३५।

"दयालुर्बोधिसत्त्वांशः कोऽन्यो जीमूतवाहनात्।
शक्नुयादर्थिसात् कर्त्तुमपि कल्पद्रुमं कृती।")

बौद्ध, क्लो, (बुद्धेन प्रणीतम्। बुद्ध+अण्।) बुद्धकृतनिरीश्वरशास्त्रम्। तत् सर्व्वैः शास्त्रकारैः खण्डितं अग्राह्यम्। इति श्रीभागवतम्। बौद्धशास्त्रसंस्थापनकर्त्ता दृश्यते। यथा,—

"ब्राह्मं वाचस्पतिं देवः पौंड्रितोऽस्मि रजेःसुतः।
न यज्ञभागो राज्यं मे निर्जितस्य दृश्यते ॥
राज्यलाभाय मे यत्नं विधत्स्व धिषणाधिप ॥
ततो दृश्यतिः शक्रमकरोद्गलदर्पितम्।
अदृश्यान्तिविधानेन पौंड्रिकेण च कर्म्मणा ॥
गत्वाथ मोहयामास राजपुत्रान् दृश्यतिः।
जिनधर्म्मं समास्थाय वेदवाह्यं स वेदवित् ॥
वेदत्रयीपरिभ्रष्टांश्चकार धिषणाधिपः।
वेदबाह्यान् परिज्ञाय हेतुवादसमन्वितान्।
जघान शक्रो वज्रेण सर्व्वधर्म्मबहिष्कृतान् ॥"
इति मात्स्ये २४ अध्यायः ॥

(बौद्धदर्शनं यथा, सर्व्वदर्शनसंग्रहे। "अत्र बौद्धैरुभिधीयते यदभ्युपायि अविनाभावि दुर्बोध इति तदसाधीयः तादात्म्यतदुत्पत्तिभ्यामविनाभावस्य सुज्ञानत्वात्। तदुक्तम्,

"कार्य्यकारणभावाद्वा स्वभावाद्वा नियामकात्।
अविनाभावनियमो दर्शनान्नादर्शनात् ॥"
इति ।

अन्वयव्यतिरेकाविनाभावनिश्चायकाविति पक्षे साध्यसाधनयोरव्यभिचारो दुरवधारणो भवेत् भूते भविष्यति वर्त्तमाने अनुपलभ्यमानेऽपि व्यभिचाराशङ्काया अनिवारणात्। ननु तथाविधस्थले तावकैरपि मते व्यभिचाराशङ्का दूष्यतिरिति चेत् मैवं वोचः विनापि कारणं कार्य्यमुत्पद्यतामिमेवंविधायाः शङ्काया बाधातावधिकतया निवृत्तत्वात्। तदेव ह्याशङ्क्यते यस्मिन्नाशङ्क्यमाने बाधातादयो नावतरेयुः तदुक्तं बाधातावधिराशङ्केति। तस्मात्तदुत्पत्तिनिश्चयेन अविनाभावो निश्चीयते तदुत्पत्तिनिश्चयश्च कार्य्यहेत्वोः प्रत्यक्षोपलम्भानुपलम्भपक्षकनिबन्धनः। कार्य्यस्योत्पत्तेः प्रागनुपलम्भः कारणोपलम्भे सत्युपलम्भः उपलब्धस्य पश्चात् कारणानुपलम्भादनुपलम्भ इति पक्षकारणाभ्यां धूमधूमध्वजयोः कार्य्यकारणभावो निश्चीयते तथा तादात्म्यनिश्चयेनाप्यविनाभावो निश्चीयते यदि शिंशपया दृश्यत्वमतिपतेत् स्यात्तानमेव हेतुमादिति विपक्षे बाधकप्रवृत्तेः व्यभिचारशङ्काया को निवारयिता। शिंशपात्वस्यैव तादात्म्यनिश्चयो वृक्षोऽयं शिंशपेति सामानाधिकरण्यबलादुपपद्यते। न ह्यत्यन्तभेदे तत् सम्भवति पर्य्यायत्वेन युगपदपि प्रयोगायोगात् नाप्यत्यन्तभेदे गवाश्वयोरनुपलम्भात्। तस्मात्

कार्य्यात्मानौ कारणमात्मानमनुमापयत इति सिद्धम्।

यदि कश्चित् प्रामाण्यमनुमानस्य नाङ्गीकुर्य्यात् तं प्रति ब्रूयात् अनुमानं प्रमाणं न भवतीत्येतावन्मात्रमुच्यते तत्र न किञ्चन साधनमुपन्यस्यते उपन्यस्यते वा। न प्रथमः एकाकिनी प्रतिज्ञा हि प्रतिज्ञातं न साधयेदिति न्यायात्। नापि चरमः अनुमानं प्रमाणं न भवतीति त्वयोक्ते त्वया अग्निरुष्णत्वसाधनस्योपन्यासे मम माता वन्ध्येतिवद्व्याघातापातात्। किञ्च प्रमाणतदाभासयवस्थापनं तत्समानजातीयत्वादिति वदता भवतैव स्वीकृतं स्वभावानुमानम्। परगता विप्रतिपत्तिस्तु वचनलिङ्गेनेति ब्रुवता कार्य्यलिङ्गकमनुमानम् अनुपलब्ध्या कस्यचिदर्थं प्रतिषेधयतानुपलब्धिलिङ्गकमनुमानम्। तथाचोक्तं तथागतैः।

"प्रमाणान्तरसामान्यस्थितिरन्यधियां गतेः।
प्रमाणान्तरसद्भावः प्रतिषेधाच्च कस्यचित्॥"
इति॥

पराक्रान्तत्वात्र सूरिभिरिति ग्रन्थभूयस्त्वभयादुपरम्यते।

ते च बौद्धाश्चतुर्विधया भावनया परमपुरुषार्थं कथयन्ति। ते च माध्यमिकयोगाचारसौत्रान्तिकवैभाषिकसंज्ञाभिः प्रसिद्धा बौद्धा यथाक्रमं सर्व्वशून्यत्व-बाह्यशून्यत्व-बाह्यार्थानुमेयत्व-बाह्यार्थप्रत्यक्षत्ववादानातिष्ठन्ते। यद्यपि भगवान् बुद्ध एक एव बोधयिता तथापि बोद्धव्यानां बुद्धिभेदाच्चातुर्विध्यं यथा गतोऽस्तमर्क इत्युक्ते चारचौरानूचानाद्यः स्वेष्टानुसारेणाभिसरणपरस्परहरणसदाचरणादिसमयं बुध्यन्ते। सर्व्वं क्षणिकं क्षणिकं दुःखं दुःखं स्वलक्षणं स्वलक्षणं शून्यं शून्यमिति भावनाच्चतुष्टयमुपदिष्टं द्रष्टव्यम्। तत्र क्षणिकत्वं नीलादिक्षणानां सत्त्वेनानुमातव्यं यत् सत् तत् क्षणिकं यथा जलधरपटलं सन्तश्चामी भावा इति। न चायमसिद्धो हेतुः अर्थक्रियाकारित्वलक्षणस्य सत्त्वस्य नीलादिक्षणानां प्रत्यक्षासिद्धत्वात् व्यापकव्यावृत्त्या व्याप्यव्यावृत्तिन्यायेन व्यापकक्रमाक्रमव्यावृत्तावक्षणिकात् सत्त्वव्यावृत्तेः सिद्धत्वाच्च। तच्चार्थक्रियाकारित्वं क्रमाक्रमाभ्यां व्याप्तं न च क्रमाक्रमाभ्यामन्यः प्रकारः समस्ति परस्परविरोधे हि न प्रकारान्तरस्थितिः। नैकतापि विरुद्धानामुक्तिमात्रविरोधत इति न्यायेन व्याघातस्योद्भटत्वात्। तौ च क्रमाक्रमौ स्याधिनः सकाशाद्व्यावर्त्तमानौ अर्थक्रियामपि व्यावर्त्तयन्तौ क्षणिकत्वपक्ष एव सत्त्वं व्यवस्थापयत इति सिद्धम्।

नन्वक्षणिकस्यार्थक्रियाकारित्वं किं न स्यादिति चेत् तदयुक्तं विकल्पासहत्वात् तथा हि वर्त्तमानार्थक्रियाकरणकाले अतीतानागतयोः किमर्थक्रिययोः स्यायिनः सामर्थ्यमस्ति नो वा। आद्ये तयोरनिराकरणप्रसङ्गः समर्थस्य चेपायोगात् यत् यदा यत्करणसमर्थं तत् तदा तत्करोत्येव यथा सामग्री स्वकार्य्यं समर्थश्चायं भाव इति प्रसङ्गानुमानाच्च। द्वितीयेऽपि कदापि न कुर्य्यात् सामर्थ्यमात्रानुबन्धित्वादर्थक्रियाकारित्वस्य यत् यदा यन्न करोति तत् तदा तत्रासमर्थं यथा हि शिलाशकलमङ्कुरे न चेयं वर्त्तमानार्थक्रियाकरणकाले अतीतवर्त्तिष्यमाणौ अर्थक्रिये करोतीति तद्विपर्य्ययाच्च। ननु क्रमवतसहकारिलाभात् स्यायिनः अतीतानागतयोः क्रमेण क्रमणमुपपद्यते इति चेत् तर्हेदं भवान् पृष्टो व्याचष्टां सहकारिणः किं भावस्योपकुर्व्वन्ति न वा न चेत् नापेक्षणीयास्ते अकिञ्चित् कुर्व्वतां तेषां तादात्म्यायोगात्। उपकारकत्वपक्षे सोऽयमुपकारः किं भावाद्भिद्यते न वा भेदपक्षे आगन्तुकस्यैव तस्य कारणत्वं स्यात् न भावस्याक्षणिकस्य आगन्तुकातिशयान्वयव्यतिरेकानुविधायित्वात्। कार्य्यस्य। तदुक्तम्।

"वर्षातपाभ्यां किं योन्यचर्म्मण्यस्ति तयोः
फलम्।
चर्म्मोपमश्चेन् सोऽनित्यः खतुल्यश्चेदसत्फलः॥"
इति।

अथ भावस्तैः सहकारिभिः सहैव कार्य्यं करोतीति स्वभाव इति चेत् अङ्ग तर्हि सहकारिणो न जघ्नात् प्रत्युत पलायमानानपि गले पाशेन बद्ध्वा कृत्यं कार्य्यं कुर्य्यात् स्वभावस्यानपायात्। किञ्च सहकारिजन्योऽतिशयः किमतिशयान्तरमारभते न वा उभयथापि प्रागुक्तदूषणप्राप्तावर्षणप्रसङ्गः। अतिशयान्तरारम्भपक्षे बहुसुखानवस्थादौस्थ्यमपि स्यात् अतिशये जनयितव्ये सहकार्य्यन्तरापेक्षायां तत्परम्परापात इत्येकानवस्थाऽवश्येया तथाहि सहकारिभिः सलिलपवनादिभिः पदार्थसार्थैराधीयमाने बीजस्यातिशये बीजमुत्पादकमभ्युपेयम् अपरथा तदभावेऽप्यतिशयः प्रादुर्भवेत् बीजस्यातिशयमादधानं सहकारिसापेक्षमेवाधत्ते अन्यथा सर्व्वदोपकारापत्तौ अङ्कुरस्यापि सदोदयः प्रसज्येत। तस्मादतिशयार्थमपेक्षमाणैः सहकारिभिरतिशयान्तरमाधेयं बीजे तस्मिन्नप्युपकारे पूर्व्वन्यायेन सहकारिसापेक्षस्य बीजस्य जनकत्वे सहकारिसन्नाद्यबीजगतातिशयानवस्था प्रथमा व्यवस्थिता। अथोपकारः कार्य्यार्थमपेक्षमाणोऽपि बीजादिनिरपेक्षं कार्य्यं जनयति तत्सापेक्षो वा। प्रथमे बीजादेरहेतुत्वमापतेत्। द्वितीये अपेक्षमाणेन बीजादिना उपकारे अतिशय आधेयः एवं तत्र तत्रापीति बीजादिजन्यातिशयनिष्ठातिशयपरम्परापात इति द्वितीयानवस्था दुरवस्था स्यात्। अथ भावादभिन्नोऽतिशयः सहकारिभिराधीयत इत्यभ्युपगम्यते तर्हि प्राचीनो भावोऽतिशयात्मा निवृत्तः अन्यश्चातिशयात्मा क्रुद्धदृषादिपदवेदनीया जायत इति फलितं ममापि मनोरथमेव।

तस्मादक्षणिकस्यार्थक्रिया दुर्घटा नाप्यक्रमेण घटते विकल्पासहत्वात्। तथाहि युगपत्सकलकार्य्यकरणसमर्थः स भावस्तदुत्तरकालमनुवर्त्तते न वा। प्रथमे तत्कालवत् कालान्तरेऽपि तावत् कार्य्यकारणमापतेत्। द्वितीये स्यायित्वहत्तयाशा मूषिकभक्षितबीजादावङ्कुरादिजननप्रार्थनामनुहरेत्। यद् विरुद्धधर्म्माध्यस्तं तन्नाना यथा शीतोष्णे। विरुद्धधर्म्माध्यस्तश्चायमिति जलधरे प्रतिबन्धसिद्धिः। न चायमसिद्धो हेतुः स्यायिनि कालभेदेन सामर्थ्यासामर्थ्ययोः प्रसङ्गतद्विपर्य्ययसिद्धत्वात्तत्रासामर्थ्यसाधकौ प्रसङ्गतद्विपर्य्ययौ प्रागुक्तौ सामर्थ्यसाधकावभिधीयेते यद्यदा यज्जननासमर्थं तत्तदा तन्न करोति यथा शिलाशकलमङ्कुरम् असमर्थश्चायं वर्त्तमानार्थक्रियाकरणकाले अतीतानागतयोरर्थक्रिययोरिति प्रसङ्गः यद्यदा यत् करोति तत्तदा तत्र समर्थं यथा सामग्री स्वकार्य्ये करोति चायमतीतानागतकाले तत्कालवर्त्तिन्यावर्थक्रिये भाव इति प्रसङ्गप्रत्ययः विपर्य्ययः। तस्मादिपक्षे क्रमयौगपद्यव्याप्तायाः व्यापकानुपलम्भेनाधिगतव्यतिरेकव्याप्तिकं प्रसङ्गतद्विपर्य्ययबलात् यद्गीतान्वयव्याप्तिकं सत्त्वं क्षणिकत्वपक्ष एव व्यवस्थास्यतीति सिद्धम्। तदुक्तं ज्ञानश्रिया।

"यत् सत्तत् क्षणिकं यथा जलधरः सन्तश्च
भावा अमी
सत्ताशक्तिरिहार्थकर्म्मणि मिते सिद्धेषु सिद्धा
न सा।
नाप्येकेव विधान्यथा परकृतेनापि क्रियादिर्भवेत्।
द्वैधापि क्षणभङ्गसङ्गतिरतः साध्ये च विश्राम्यति॥" इति॥

न च क्रमभाक्चरणादिपक्षकक्षीकारेण सत्तासामान्ययोगित्वमेव सत्त्वमिति मन्तव्यं सामान्यविशेषसमवायानामसत्त्वप्रसङ्गात्। न च तत्र स्वरूपसत्तानिबन्धनः सद्व्यवहारः प्रयोजकगौरवापत्तेः अनुगतत्वानुगतत्वविकल्पपराहतेश्च सर्व्वमहीधरादिषु विलक्षणेषु क्षणेष्वनुगतस्याकारस्य मणिषु सूत्रवद्भूतकणेषु गुणवच्चाप्रतिभासनाच्च। किञ्च सामान्यं सर्व्वगतं स्वाश्रयसर्व्वगतं वा प्रथमे सर्व्ववस्तुसङ्करप्रसङ्गः अपसिद्धान्तापत्तिश्च यतः प्रोक्तं प्रशस्तपादेन स्वविषयसर्व्वगतमिति। किञ्च विद्यमाने घटे वर्त्तमानं सामान्यमन्यत्र जायमानेन सम्बध्यमानं तस्मादागच्छत् सम्बध्येत अनागच्छद्वा आद्ये द्रव्यत्वापत्तिः द्वितीये सम्बन्धानुपपत्तिः। किञ्च विनष्टे घटे सामान्यमवतिष्ठते विनश्यति स्थानान्तरं गच्छति वा प्रथमे निराधारत्वापत्तिः द्वितीये नित्यत्ववादो युक्तियुक्तः

तृतीये द्रव्यत्वप्रसक्तिः इत्यादि दूषणग्रहणस्य स्यात् सामान्यमप्रामाणिकम्। तदुक्तम्।

"अन्यच्च वर्त्तमानस्य ततोऽन्यस्यानवस्थिते।
तस्मादचलनः स्थानादवृत्तिरिति तूक्तता॥
यत्रासौ वर्त्तते भावस्तेन सम्बध्यते न तु।
तद्देशिनश्च यात्येति किमप्येतन्महाद्भुतम्॥
न याति न च तत्रासीदस्ति पश्चान्न चांशवत्।
जहाति पूर्वं नाधारमहो अनलमन्तिः॥"

इति॥

अनुवृत्तप्रत्ययः किमालम्बन इति चेत् अत्र अन्यापोहालम्बन एवेति सन्तोऽयमायुष्मतेति अलमतिप्रसङ्गेन।

सर्वस्य संसारस्य दुःखात्मकत्वं सर्वतीर्थकरसम्मतम् अन्यथा तन्निवृत्तयां तेषां तन्निवृत्त्युपाये प्रवृत्तानुपपत्तेः। तस्मात् सर्वं दुःखं दुःखमिति भावनीयम्। ननु क्वेदमिति दृष्टे दृष्टान्तः कथनीय इति चेन्मैवं स्वलक्षणानां क्षणानां क्षणिकतया सालक्षण्याभावात् नेतेन सदृशमपरमिति वक्तुमशक्यत्वात्। ततः स्वलक्षणं स्वलक्षणमिति भावनीयम् एवं शून्यं शून्यमित्यपि भावनीयं स्वप्ने जागरणे च न मया दृष्टमिदं रजतादीति विधिनिषेधस्योपलम्भात्। यदि दृष्टं सत् तदा तद्विशिष्टस्य दर्शनस्येदन्तायां व्यधिकरणस्य च तस्मिन्नध्यक्षस्य रजतत्वादेस्तत्सम्बन्धस्य च समवायादेः सत्त्वं स्यात् न चैतदिष्टं कस्यचिद्वादिनः। न चार्द्धजरतीयमुचितं न हि कृकुच्या एको भागः पाकाय अपरो भागः प्रसवाय कल्प्यतामिति कल्प्यते। तस्मादध्यक्षाधिष्ठानतत्सम्बन्धदर्शनदृश्यानां मध्ये एकस्यानेकस्य वा अत्यन्ते निषेधविषयत्वेन सर्वस्यासत्त्वं बलादापतेदिति भगवतोपदिष्टे माध्यमिकास्तावदुक्तमप्रज्ञा इत्यमचीकथन् भित्तुपादप्रसारणन्यायेन क्षणभङ्गाद्यभिधानमुखेन स्थायित्वानुकूलवेदनीयत्वानुगतसर्वसत्यत्वभ्रमव्यावर्त्तनेन सर्वशून्यतायामेव पर्यवसानम्। अतस्तत्त्वं सदसदुभयानुभयात्मकचतुष्कोटिविनिर्मुक्तं शून्यमेव तथाहि यदि घटादेः सत्त्वं स्वभावस्तर्हि कारकव्यापारवैयर्थ्यम्। असत्त्वं स्वभाव इति पक्षे प्राचीन एव दोषः प्रादुःस्यात्। यदोक्तम्।

"न सतः कारणापेक्षा योगादेरिव युज्यते।
कार्यस्यासम्भवो हेतुः खपुष्पादेरिवासतः॥"

इति॥

विरोधादिसरौ पक्षावनुपपन्नौ तदुक्तं भगवता अवतारे

"बुद्ध्या विविच्यमानानां स्वभावो नावधार्यते।
अतो निरभिलाप्यास्ते निःस्वभावाश्च दर्शिताः॥"

इति॥

"इदं वस्तुबलायातं यदुक्तं विपश्चितः।
यथा यथार्थाधियन्ते विशीर्यन्ते तथा तथा॥"

इति च॥

न चाप्यिदमपि पक्षे अवतिष्ठते दृश्यधर्मः। दृश्यार्थव्यवहारश्च न स्वप्नव्यवहारवत् संवृत्या सङ्गच्छते। अत एवोक्तम्

"परिव्राट्कामुकशुनामेकस्यां प्रमदातनौ।
कुणपः कामिनी भक्ष्य इति तिस्रो विकल्पना॥"

इति॥

तदेवं भावनाचतुष्टयवशान्निखिलवासनानिवृत्तौ परनिर्व्याणं शून्यरूपं सेत्स्यतीति वयं कृतार्थाः। नास्माकमुपदेश्यं किञ्चिदस्तीति। शिष्यैस्तावद्योगश्चाचार्यश्चेति द्वयं करणीयम्। तत्राप्राप्तस्यार्थस्य प्राप्तये पर्य्यनुयोगो योगः गुरूक्तस्यार्थस्याङ्गीकरणमाचारः गुरूक्तस्याङ्गीकरणादुत्तमाः पर्य्यनुयोगस्याकरणादधमाश्च अतस्तेषां माध्यमिका इति प्रसिद्धिः। गुरूक्तभावनाचतुष्टयं बाह्यार्थस्य शून्यत्वं चाङ्गीकृत्यान्तरस्य शून्यत्वाङ्गीकृतं कथमिति पर्य्यनुयोगस्य करणात् केषाञ्चिद् योगाचारप्रथा। एषा हि तेषां परिभाषा स्वयं वेदनं तावदङ्गीकार्यम् अन्यथा जगदान्ध्यं प्रसज्येत। तत् कीर्त्तिनं धर्म्मकीर्त्तिना।

"अप्रत्यक्षोपलम्भस्य नार्थदृष्टिः प्रसिध्यतीति॥"

बाह्यं बाह्यं नोपपद्यत एव विकल्पानुपपत्तेः। अर्थो ज्ञानग्राह्यो भावादुत्पन्नो भवति अनुत्पन्नो वा न पूर्वः उत्पन्नस्य स्थित्यभावात् नापरः अनुत्पन्नस्यासत्त्वात्। अथ मन्येथाः अतीत एवार्थो ज्ञानग्राह्यः तल्लक्षणत्वादिति तदपि बालभाषितं वर्त्तमानतावभासविरोधात् इन्द्रियादेरपि ग्राह्यत्वप्रसङ्गाच्च। किञ्च ग्राह्यः किं परमाणुरूपोऽर्थः अवयविरूपो वा। न चरमः कृत्स्नैकदेशविकल्पादिना तन्निराकरणात्। न प्रथमः अतीन्द्रियत्वात् षट्केन युगपद्योगस्य बाधकत्वाच्च। यदोक्तम्

"षट्केन युगपद्योगात् परमाणोः षडंशता।
तेषामष्टैकदेशत्वे पिण्डः स्यादणुमात्रकः॥"

इति॥

तस्मात् स्वव्यतिरिक्तग्राह्यविरहात्तदात्मिका बुद्धिः स्वयमेव स्वात्मरूपप्रकाशिका प्रकाशवदिति सिद्धम्। तदुक्तम्

"नान्योऽनुभाव्यो बुद्ध्यास्ति तस्या नानुभवोऽपरः।
ग्राह्यग्राहकवैधुर्य्यात् स्वयं सैव प्रकाशते॥"

इति॥

ग्राह्यग्राहकयोरभेदश्चानुमतयः यद्वेद्यते येन वेदनेन नत्ततो न भिद्यते यथा ज्ञानेनात्मा वेद्यन्ते तैश्च नीलादयः। भेदे हि सत्यधुना अनेनार्थस्य सम्बन्धित्वं न स्यात् तादात्म्यस्य नियमहेतोरभावात् तदुत्पत्तेरनियामकत्वात् यच्चायं ग्राह्यग्राहकसंवित्तीनां पृथगवभासः स एकस्मिंश्चन्द्रमसि द्वित्वावभास इव भ्रमः अत्यन्तादिरविच्छिन्नप्रवाहाभेदवासनैव निमित्तम्। यदोक्तम्।

"सहोपलम्भनियमाद्भेदो नीलतद्धियोः।
भेदश्च भ्रान्तविज्ञानैर्दृश्यतेन्द्वादिवादयः॥" इति।

"अविभागोऽपि बुद्ध्यात्मा विपर्यासितदर्शनैः।
ग्राह्यग्राहकसंवित्तिभेदवानिव लक्ष्यते॥"

इति च॥

न च रसवीर्य्यविपाकादि समानमाम्रामोदकोपार्जितमोदकानां स्यादिति वेदितव्यं वस्तुनो वेद्यवेदकाकारविधुरायाः अपि बुद्धेर्ग्रहणग्राहकपरिज्ञानानुरोधेन विभिन्नग्राह्यग्राहकाकाररूपवत्तया निमिराद्युपहतानां केशोण्डुकादीनां ज्ञानभेदवदनाद्युपप्लववासनासामर्थ्यादसदुपप्लवोपपत्तेः पर्य्यनुयोगायोगात्। यदोक्तम्

"अवेद्यवेदकाकारा यथा भ्रान्तैर्निरीक्ष्यते।
विभक्तलक्षणग्राह्यग्राहकाकारविप्लवा॥
तथा कृतयवस्थेयं केशादिज्ञानभेदवत्।
यदा तदा न सम्बोद्धा ग्राह्यग्राहकलक्षणा॥"

इति॥

तस्माद्बुद्धिरेवानादिवासनावशादनेकाकारावभासत इति सिद्धम्। ततश्च प्रागुक्तभावनाप्रचयबलान्निखिलवासनोच्छेदविगलितविविधविषयाकारोपप्लवविशुद्धविज्ञानोदयो मोक्षोदय इति। अन्ये तु मन्यन्ते यदोक्तं बाह्यं वस्तुजातं नास्तीति तदयुक्तं प्रमाणाभावात्। न च सहोपलम्भनियमः प्रमाणमिति वक्तव्यं येद्यवेदकयोरभेदसाधकत्वेनाभिमतस्य तस्याप्रयोजकत्वेन सन्दिग्धविपक्षव्यावृत्तिकत्वात्। ननु भेदे सहोपलम्भनियमात्मकं साधनं न स्यादिति चेन्न ज्ञानस्यान्तर्मुखतया च भेदेन प्रतिभासमानतया एकदेशग्रहैकालत्वलक्षणसहत्वनियमसम्भवाच्च नीलाद्यर्थस्य ज्ञानाकारत्वे अयमिति प्रतिभासः स्यात् नत्विदमिति प्रतिपत्तिः प्रत्यक्षस्य दृश्यनिरेकात्। अथोच्यते ज्ञानस्वरूपोऽपि नीलाकारो भ्रान्त्या बहिर्वद्भेदेन प्रतिभासत इति न च तत्राहमुल्लेख इति। तथोक्तम्।

"परिच्छेदान्तरायोऽयं भागो बहिरिव स्थितः।
ज्ञानस्याभेदिनो भेदप्रतिभासोऽप्युपप्लवः॥"

इति॥

"यदन्तर्ज्ञेयतत्त्वं तद्बहिर्वदवभासते॥"

इति च॥

तदयुक्तं बाह्यार्थाभावे तदुत्पत्तिरहिततया बहिर्वदित्युपमानोक्तेरयुक्तेः हि यस्मिन्नो वन्ध्यापुत्रवदवभासत इति प्रेक्षावानाचष्टे भेदप्रतिभासस्य भ्रान्तत्वे अभेदप्रतिभासस्य प्रामाण्यं तत्प्रामाण्ये भेदप्रतिभासस्य भ्रान्तत्वमिति परस्पराश्रयप्रसङ्गाच्च अविसंवादाद्यालीढादिकमेव संविदाना बाह्यमेवोपादत्ते अगत्युपेक्षन्तेऽन्तरमिति व्यवस्थादर्शनाच। एवञ्चायमभेदसाधको हेतुर्गोमयपायसीयन्यायवदाभासतां भजेत अतोबहिर्वदिति वदता बाह्यं बाह्यमेवेति भावनीयमिति भवदीय एव वादो भवन्तं प्रहरेत्।

ननु ज्ञानाभिन्नकालस्यार्थस्य बाह्यत्वमनुपपन्नमिति चेन् तदनुपपन्नम् इन्द्रियसन्निकृष्टस्य विषयस्योत्पादे ज्ञाने स्वाकारसमर्पकतया

समर्पितेन चाकारेण तस्यार्थस्यानुमेयतोपपत्तेः जनस्य पर्यनुयोगपरिहारौ समग्राधियाताम्। "भिन्नकालं कथं ग्राह्यमिति चेन् ग्राह्यनां विदुः। हेतुत्वमेव च यक्तेर्ज्ञानाकारार्पणक्षमम्॥"

इति॥

तथाच यथा पुष्पा भोजनमनुमीयते यथा च गर्भया देवः यया वा सम्भमेय क्षेमः तथा ज्ञानाकारेण क्षेयमनुमेयम्। तदुक्तम्

"व्यक्तेन घटयत्येनां न हि सूक्ष्मार्हरूपताम्। तस्मात् प्रमेयाधिगतेः प्रमाणं मेयरूपता॥"

इति॥

न हि विप्तिसत्तैव तद्वेदना युक्ता तस्याः सर्वत्राविशेषात् तान्तु सारूप्यमाविशत् सरूपयितुं घटयेदिति च। तथाच बाह्यार्थसद्भावे प्रयोगः ये यस्मिन् सत्यपि कादाचित्काः ते सर्वे तदतिरिक्तसापेक्षाः यथा अविवक्षत्यजिगमिषति मयि वचनगमनप्रतिभासा विवक्षुजिगमिषुपुरुषान्तरसन्तानसापेक्षाः तथाच विवादाध्यासिताः प्रवृत्तिप्रत्ययाः सत्यप्यालयविज्ञाने कदाचिदेव नीलाद्युल्लेखिन इति। तत्रालयविज्ञानं नामाहमास्पदं विज्ञानं नीलाद्युल्लेखि च प्रवृत्तिविज्ञानम्। यदुक्तम्

"तत् स्यादालयविज्ञानं यदभेदेऽहमास्पदम्। तत् स्यात्प्रवृत्तिविज्ञानं यन्नीलादिकसल्लिखेत्॥"

इति॥

तस्मादालयविज्ञानसन्तानातिरिक्तः कादाचित्कः प्रवृत्तिविज्ञानहेतुर्बाह्योऽर्थो ग्राह्य एव न वासनापरिपाकप्रत्ययः कादाचित्कत्वात् कदाचित्कुत्याद इति वेदितव्यम्। विज्ञानवादिनये हि वासनानामेकसन्तानवर्तिनामालयविज्ञानानां तत्तत्प्रवृत्तिजननशक्तिः तस्याश्च स्वकार्योत्पादं प्रत्याभिमुख्यं परिपाकः तस्य च प्रत्ययः कारणं स्वसन्तानवर्त्तिपूर्वक्षयः कल्पीक्रियते सन्तानान्तरनिबन्धनत्वानङ्गीकारात्। ततश्च प्रवृत्तिज्ञानजननालयविज्ञानवर्त्तिवासनापरिपाकं प्रति सर्वेऽप्यालयविज्ञानवर्त्तिनः क्षणाः समर्था एवेति पक्षार्थं न चैदेकोऽपि न समर्थः स्यादालयविज्ञानसन्तानवर्त्तित्वाविशेषात्। सर्वे समर्था इति पक्षे कार्यक्षेपानुपपत्तिः ततश्च कादाचित्कत्वनिर्वाहाय शब्दस्पर्शरूपरसगन्धविषयाः सुखादिविषयाः यद्यपि प्रत्ययाश्चतुरः प्रत्ययान् प्रतीत्योत्पद्यन्ते इति चतुरङ्गानिरूपणाध्यक्षमतिना स्वानुभवमनाद्याद्य परिच्छेत्तव्यम्। ते चत्वारः प्रत्ययाः प्रसिद्धाः आलम्बनसमनन्तरसहकार्याधिपतिरूपाः तत्र ज्ञानपदवेदनीयस्य नीलाद्यवभासस्य चित्तस्य नीलालम्बनप्रत्ययात् नीलाकारता भवति समनन्तरप्रत्ययात् प्राचीनज्ञानाद्वोधरूपता सहकारिप्रत्ययादालोकाक्षचुर्योधिपतिप्रत्ययाद्विषयरूपप्रतिनियमः विदितस्य ज्ञानस्य रूपादिसाधारण्यप्राप्तेर्नियामकं चतुरधिपतिर्भवितुमर्हति लोके नियामकस्याधिपतित्वोपलम्भात्। एवं चित्तचैत्यात्मकानां सुखादीनां चत्वारि कारणानि द्रष्टव्यानि एवं चित्तचैत्यात्मकस्कन्धः पञ्चविधः रूपविज्ञानवेदनासंज्ञासंस्कारसंज्ञकः। तत्र रूप्यन्त एभिर्विषया इति रूप्यन्त इति च युत्पत्त्या सविषयाणीन्द्रियाणि रूपस्कन्धः। आलयविज्ञानप्रवृत्तिविज्ञानप्रवाहो विज्ञानस्कन्धः। प्रागुक्तस्कन्धत्रयसम्बन्धजन्यः सुखदुःखादिप्रत्ययप्रवाहो वेदनास्कन्धः। गौरित्यादिशब्दोल्लेखिसविज्ञानप्रवाहः संज्ञास्कन्धः। वेदनास्कन्धनिबन्धना रागद्वेषादयः क्लेशा उपक्लेशाश्च मदमानादयो धर्माधर्मौ च संस्कारस्कन्धः।

तदिदं सर्वं दुःखं दुःखायतनं दुःखसाधनञ्चेति भावयित्वा तन्निरोधोपायं तत्त्वज्ञानं सम्पादयेत्। अत एवोक्तं दुःखसमुदायनिरोधमार्गाश्चत्वारः आर्यस्य बुद्धाभिमतानि तत्त्वानि। तत्र दुःखं प्रसिद्धं समुदायो दुःखकारणं तद्विधं प्रत्ययोपनिबन्धनो हेतूपनिबन्धनश्च। तत्र प्रत्ययोपनिबन्धनस्य संग्राहकं सूत्रम् इदं कार्यं ये अन्ये हेतवः प्रत्ययन्ति गच्छन्ति तेषामयमानानां हेतूनां भावः प्रत्ययत्वं कारणसमवायः तस्मात्तस्य फलं न चेतनस्य कस्यचिदिति सूत्रार्थः यथा बीजहेतुरङ्कुरो धातूनां पृथ्वां समवायाज्जायते। तत्र पृथिवी धातुरङ्कुरस्य काठिन्यं गन्धञ्च जनयति अप्धातुः स्नेहं रसञ्च जनयति तेजोधातुः रूपमौष्ण्यञ्च वायुधातुः स्पर्शनं चलनञ्च आकाशधातुरवकाशं शब्दञ्च चतुर्धातुर्यथायोगं पृथिव्यादिकम्। हेतूपनिबन्धनस्य च संग्राहकं सूत्रम् तत्प्रादाद्वा तथागतानामनुत्पादाद्वा स्थितैवेयं धर्माणां धर्मता धर्मस्थितिता धर्मनियामकता च प्रतीत्य समुत्पादानुलोमतेति। तथागतानां बुद्धानां मते धर्माणां कार्यकारणरूपाणां या धर्मता कार्यकारणभावरूपा एषोत्पादादनुत्पादाद्वा स्थिता यस्मिन् सति यदुत्पद्यते तस्य कारणस्य कार्यमिति धर्मतेत्यस्य विवरणं धर्मस्य कार्यस्य कारणानतिक्रमेण स्थितिः स्वार्थिकस्तल्प्रत्ययः धर्मस्य कारणस्य कार्यं प्रति नियामकता। नन्वयं कार्यकारणभावश्चेतनमन्तरेण न सम्भवतीति अत उक्तं कारणे सति तत्प्रतीत्य प्राप्य समुत्पादे अनुलोमता अनुसारिता या चैव धर्मता उत्पादादनुत्पादाद्वा धर्माणां स्थिता न चात्र क्वचिच्चेतनोऽधिष्ठातोपलभ्यत इति सूत्रार्थः। यथा प्रतीत्य समुत्पादस्य हेतूपनिबन्धः बीजादङ्कुरोऽङ्कुरात् काण्डं काण्डान्नालो नालान्नर्भनलः नूकं ततः पुष्पं ततः फलं न चात्र बाह्ये समुदाये कारणं बीजादि कार्यमङ्कुरादि वा चेतयति अहमङ्कुरं निर्वर्तयामि अहं बीजेन निर्वर्त्तित इति। एवमाध्यात्मिकेष्वपि कारणद्वयमवगन्तव्यम्। पुरःस्थिते प्रमेयार्थे ग्रन्थिस्तरभीरुभिरुपरभ्यते। तदुभयनिरोधः तदनन्तरं विमलज्ञानोदयो वा मुक्तिः तन्निरोधो पायो मार्गः स च तत्त्वज्ञानं तच्च प्राचीनभावनाबलाद्भवतीति परमं रहस्यं सूत्रस्यान्तं पृच्छता कथितं भवन्तश्च सूत्रस्यान्तं पृष्टवन्तः सौत्रान्तिका भवन्तीति भगवताभिहिततया सौत्रान्तिकसंज्ञा सञ्जातेति। केचन बौद्धा वाह्येषु गन्धादिषु व्यान्तरेषु रूपादिस्कन्धेषु सत्स्वपि तत्तानाख्यामुत्पादयितुं सर्वं शून्यमिति प्राथमिकान् विनेयानधीकृत्य भगवान् द्वितीयांस्तु विज्ञानमात्रप्रतिष्ठान् विज्ञानमेवैकं सदिति तृतीयानुभवं सत्यनित्याख्यितान् विज्ञेयमनुमेयमिति सैषा विरुद्धा भाषेति वर्णयन्तो वैभाषिकाख्यया ख्याताः। यथा हि तेषां परिभाषा समुन्मिषति विज्ञेयानुमेयत्ववादे प्रात्यक्षिकस्य कस्यचिदप्यर्थस्याभावेन बाह्यसंवेदनस्यानाभावेनानुमानप्रवृत्त्यनुपपत्तेः सकललोकानुभवविरोधश्च। ततश्चार्थो द्विविधः ग्राह्योऽध्यवसेयश्च तत्र ग्रहणं निर्विकल्पकरूपं प्रमाणं कल्पनापोढत्वात् अध्यवसायः सविकल्पकरूपोऽप्रमाणं कल्पनाज्ञानत्वात्। तदुक्तम्।

"कल्पनापोढमभ्रान्तं प्रत्यक्षं निर्विकल्पकम्। विकल्पो वस्तुनिर्भासादसंवादादुपप्लवः॥"

इति॥

"ग्राह्यं वस्तुप्रमाणं हि ग्रहणं यदितोऽन्यथा। न तदस्तु न तन्मानं शब्दलिङ्गेन्द्रियादिवत्॥"

इति च॥

ननु सविकल्पकस्याप्रामाण्ये कथं ततः प्रवृत्तस्यार्थप्राप्तिः संवादश्चोपपद्येयातामिति चेन्न. तद्वदं मणिप्रभाधिषयमणिविकल्पन्यायेन पारम्पर्येणार्थप्रतिलम्भसम्भवेन तदुपपत्तेः। अवशिष्टं सौत्रान्तिकप्रस्तावे प्रपञ्चितमिति नेह प्रतन्यते। न च विनेयाशयानुरोधेनोपदेशभेदः साम्प्रदायिको न भवतीति भणितव्यं यतो भणितं बौधचित्तविवरणे

"देशना लोकनाथानां सत्त्वाशयवशानुगाः। भिद्यन्ते बहुधा लोके उपायैर्बहुभिः किल॥ गम्भीरोत्तानभेदेन क्वचिच्चोभयलक्षणाः। भिन्ना हि देशना भिन्ना शून्यताद्वयलक्षणा॥"

इति॥

द्वादशायतनपूजा श्रेयस्करीति बौद्धनये प्रसिद्धम्।

"अर्घानुपार्घ्य बहुशो द्वादशायतनानि वै। परितः पूजनीयानि किमन्यैरिह पूजितैः॥ ज्ञानेन्द्रियाणि पञ्चैव तथा कर्मेन्द्रियाणि च। मनो बुद्धिरिति प्रोक्तं द्वादशायतनं बुधैः॥"

इति॥

विवेकविलासे बौद्धमतानामत्यमभ्यधायि।

"बौद्धानां सुगतो देवो विश्वश्च क्षणभङ्गुरम्। आर्यसत्त्वाख्यया तत्त्वचतुष्टयमिदं क्रमात्॥ दुःखमायतनञ्चैव ततः समुदयो मतः। मार्गश्चेत्यस्य च व्याख्या क्रमेण श्रूयतामतः॥ दुःखं संसारिणः स्कन्धास्ते च पञ्च प्रकीर्तिताः। विज्ञानं वेदना संज्ञा संस्कारो रूपमेव च॥

पञ्चेन्द्रियाणि शब्दादा विषयाः पञ्च मानसम्।
धर्म्मायतनमेतानि द्वादशायतनानि तु ॥
रागादीनां गणोऽयं स्यात् ससुदेति वृणां हृदि।
आत्मात्मीयस्वभावाख्यः स स्यात् ससुदयः पुनः ॥
अविद्या: सर्व्वसंस्कारा इति या वासना
स्थिरा।
स मार्ग इति विज्ञेयः स च मोक्षोऽभिधीयते ॥
प्रत्यक्षमनुमानञ्च प्रमाणद्वितयं तथा।
चतुःप्रस्थानिका बौद्धाः ख्याता वैभाषिकादयः॥
अर्थो ज्ञानान्वितो वैभाषिकेण बहु मन्यते।
सौत्रान्तिकेन प्रत्यक्षगम्योऽर्थो न बहिर्मतः ॥
आकारसहिता बुद्धिर्योगाचारस्य सम्मता।
केवलां संविदं स्वस्थां मन्यन्ते मध्यमाः पुनः ॥
रागादिज्ञानसन्तानवासनाच्छेदसम्भवा।
चतुर्णामपि बौद्धानां मुक्तिरेषा प्रकीर्त्तिता ॥
क्षौमं कमण्डलुर्मौञ्जी चीरं पूर्व्वाह्णभोजनम्।
सङ्घो रक्ताम्बरत्वञ्च शिश्रिये बौद्धभिक्षुभिः ॥"
इति ॥
इति सर्व्वदर्शनसंग्रहे बौद्धदर्शनम् ॥)
(बुद्धेरिदमिति युनुपत्ययो वाच्यलिङ्गः। बुद्धसम्बन्धि वस्तु ॥)

बौद्धः, पुं, (बुद्धं बुद्धशास्त्रं वेत्तीति। बुद्ध + अण्।) बुद्धशास्त्रावलम्बी। तत्पर्य्यायः। भिन्नकः २ क्षपणः ३ अर्हतः ४ वैनायिकः ५। इति त्रिकाण्डशेषः ॥

बौधः, पुं, (बुधस्यापत्यं पुमान् बुध + अण्।) बुधस्य पुत्रः। स च पुरूरवाः। इति हेमचन्द्रः। ३। ३६५ ॥

ब्रध, य औ ताड़े। इति कविकल्पद्रुमः ॥ (दिवा०-पर०-सक० अनिट्।) ब्रध्यति ब्रध्यते मूरः। ब्रौ व्यधात्सीत्। कश्चित्तु हिंभूतस्यानिकारीभूतयकारस्य वधैर्बकारो वर्ग्यः अन्यच्च दन्त्यः इति मन्वानः सनि विध्यत्सतीत्याह। इति दुर्गादासः ॥

ब्रुष, क उत्सर्गे। उत्सर्गः। (चुरा०-पर०-सक०-सेट्।) क ओषयति धनं दानात्। ओषं त्रिकटु। इति दुर्गादासकृतधातुदीपिकायां गोविन्दभट्टः।

ब्रण, शब्दे। इति कविकल्पद्रुमः ॥ (भ्वा० पर०-अक०-सेट्।) ब्रणति। इति दुर्गादासः ॥

ब्रततिः, स्त्री, (ब्रतन्ती ततिर्विस्तृतिर्यस्याः। पृषोदरादित्वात् साधुः। यद्वा, व्रतनोतीति। तनु-दुषविस्तारे "क्तिच् क्तौ च संज्ञायाम्।" ३। ३। १७४। इति क्तिच्। पृषोदरादित्वात् पस्य वः।) लता। विस्तारः। इत्यमरः ॥

ब्रह्मः, पुं, (बृंहत्यनेन + "बृंहेर्नुग्वृधी च। उणा० ४। ५। इति नक् वृधादेशश्च।) स्वर्गः। (यथा, ऋग्वेदे। १। ६। १.
"युञ्जन्ति ब्रध्नमरुषं चरन्तं परितस्थुषः।
रोचन्ते रोचना दिवि ॥")
इत्यमरभरतौ। ब्रह्मशब्दः। इत्यमरः। १। १। ११। शिवः। इति हेमचन्द्रः ॥ मेदिनीकारेणान्तःस्थ वकारादौ लिखितोऽयं शब्दः ॥ (दिगम्। ब्रघ्नः। इति निघण्टुः ॥ चतुर्दशमनोर्भौत्यस्य पुत्रभेदः। यथा, मार्कण्डेये। १००। ६२।
"गुरुर्गभीरो ब्रध्नश्च भरतोऽनुग्रहस्तथा।
तेजस्वी सुबलश्चैव भौत्यस्यैते मनोः सुताः ॥")
रोगविशेषः। तस्य लक्षणं यथा,
"अभ्यभिष्यन्दिगुर्वाम्लसेवनान्निचयं गतः।
करोति ग्रन्थिवच्छोथं दोषो बद्धरसन्धिषु ॥
ज्वरमूलाङ्गसादाढ्यं तं ब्रध्नमिति निर्दिशेत् ॥"
इति माधवकरः ॥
तस्य चिकित्सा।
"भृष्टचेरण्डतैलेन सम्यक् कल्कोऽभयाभवः।
क्षणासैन्धवसंयुक्तो ब्रध्नरोगहरः परः ॥
अजाजीहपुषाक्षुण्णं गोमेदवदरान्वितम्।
काञ्जिकेन तु संपिष्टं तत्लेपो ब्रध्नजित् परः ॥"
गोमेदं पत्रम्। तथा च निघण्टौ धन्वन्तरिः।
"पत्रं दलाङ्घ्रयं रामं गोमेदं रसनाङ्घ्रयम् ॥"
इति भावप्रकाशः ॥
(अस्य सप्तम्यामिलक्षणं यथा,—
"वस्य वायुः प्रकुपितः श्रोणिकूलकरश्चरन्
वंक्षणादूरुषण्डौ याति ब्रध्नस्योपजायते ॥"
इति चरके सूत्रस्थानेऽष्टाविंशेऽध्याये ॥)

ब्रह्म, क्ली, (बृंहति वर्द्धते निरतिशयमहत्त्वलक्षणवृद्धिमान् भवतीत्यर्थः। बृहि वृद्धौ + बृंहेर्नोऽच्।" उणा० ४। १४५। मनिन् नकारस्याकारः। रत्वञ्च।) वेदः। (यथाह श्रुतिः।
"तस्मादेतद्ब्रह्मनामरूपमन्नञ्च जायते ॥"
तथा च भागवते। १। १। १।
"जन्माद्यस्य यतोऽन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट्
तेने ब्रह्म हृदा य आदिकवये मुह्यन्ति यत् सूरयः ॥")
वेदान्तमते 'वस्तु सच्चिदानन्दाद्वयं ब्रह्म तथा अज्ञानादिसकलजड़समूहोऽवस्तु।' 'ब्रह्मैव नित्यं वस्तु तदन्यदखिलमनित्यम्।' तथाहि,—
"यत्पादाब्जैकसंवत्सरोऽब्धीभिः परिवर्त्तते।"
तदेव ज्योतिषां ज्योतिः। नित्यं विभु सर्व्वगतं सुसूक्ष्मम्। आकाशवत् सर्व्वगतञ्च नित्यः। अजो नित्यः शाश्वतः सत्यं ज्ञानमनन्तं ब्रह्म रातेर्दातुः परायणं यच्च नान्यत् पश्यति नान्यत् शृणोति नान्यद्विजानाति सभूमा यो वै भूमा तदमृतम्।" इत्यादि श्रुतिभ्यो ब्रह्मणि नित्यत्वं विशुद्धसत्त्वस्य पुंसः प्रतिभाति। तथा, नेवेह किञ्चनाग्र आसीन् मृत्युनैवेदमावृतमासीत्। आत्मा वा इदमेक एवाग्र आसीन्नान्यत् किञ्चनमिषत् सदैव सौम्येदमग्र आसीदेकमेवाद्वितीयं नेति नेतीह नानास्ति किञ्चन यन्नान्यत् पश्यति अन्यच्छृणोति अन्यद्विजानाति तदल्पम् अथ यदल्पं तन्मर्त्यम्।" इत्यादि श्रुतिवचनेभ्यो ब्रह्मणोऽन्यत्वं भेदप्रपञ्चेनित्यत्वञ्च तस्यैव पुंसः प्रतिभाति तथानुमानमपि यथा, यन्मतोऽचेतनवर्गोऽनित्यो विभक्तत्वात् घटपटस्तम्भादिवत् इति। अनेन हि विभक्तस्थानित्यत्वेऽवगते तस्मिन्नुगतप्रकाशात्मकस्य ब्रह्मणोऽविभक्तस्य नित्यत्वमपि व्यर्थादवगच्छति। इति वेदान्तसारे विद्वन्मनोरञ्जनीटीका ॥ तत्र श्रुतिवाक्यानि यथा, "सत्यं ज्ञानमनन्तं ब्रह्म। विज्ञानमानन्दं ब्रह्म।" "आनन्दो ब्रह्मेति व्यजानात् व्यानन्दरूपममृतं यद् विभाति, यतो वाचो निवर्त्तन्ते अप्राप्य मनसा सह। यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत् प्रयन्त्यभिसंविशन्ति तद् विजिज्ञासस्व तद्ब्रह्मेति।' इत्यादसंख्येयं श्रुतिवचनमनुसन्धेयम् ॥")
तत्त्वम्। तपः। इत्यमरः। २। ३। ११।
ब्रह्म चतुर्विधं यथा। विराट् १ हिरण्यगर्भः २ ईश्वरः ३ तुरीयः ४। इति वेदान्तसारः।
अस्य लक्षणम्। यथा, आत्मबोधे।
"यल्लाभान्नापरो लाभो यत्सुखान्नापरं सुखम्।
यज्ज्ञानान्नापरं ज्ञानं तद्ब्रह्मेत्यवधारयेत्।
यद्दृष्ट्वा नापरं द्रष्टव्यं यद्भूत्वा न पुनर्भवः।
यज्ज्ञात्वा नापरं ज्ञेयं तद्ब्रह्मेत्यवधारयेत्।
निर्य्यगूर्द्धमधःपूर्णं सच्चिदानन्दमद्वयम्।
अनन्तं नित्यमेकं यत्तद्ब्रह्मेत्यवधारयेत्।
अतद्व्यावृत्तिरूपेण वेदान्तैर्लक्ष्यते ह्ययम्।
अखण्डानन्दमेकं यत्तद्ब्रह्मेत्यवधारयेत्।
दृश्यते श्रूयते यद्यद्ब्रह्मणोऽन्यन्न तद्भवेत्।
तत्त्वज्ञानाच्च तद्ब्रह्म सच्चिदानन्दमद्वयम्।
सर्व्वगं सच्चिदात्मानं ज्ञानचक्षुर्निरीक्षते।
अज्ञानचक्षुर्नेक्षेत भास्वन्तं भानुमन्यवत्।"
अपि च। "सत्यमानन्दमद्वयमच्युतमेकरूपं वाङ्मनसोऽगोचरं सर्व्वगं सर्व्वात्मकं चिदेकरसं देशकालापरिच्छिन्नमपादमपि शीघ्रगमपाणि च सर्व्वग्रहमचक्षुरपि सर्व्वद्रष्टृ अश्रोत्रमपि सर्व्वश्रोतृ अचिन्त्यमपि सर्व्वज्ञं सर्व्वनियन्तृ सर्व्वशक्ति सर्व्वेषां सृष्टिस्थितिलयकर्त्तृ किमपि वस्तु ब्रह्मेति वेदा वदन्ति ॥" शुद्धबुद्धस्वभाव इत्यौपनिषदाः। १। आदिविद्वान् सिद्ध इति कापिलाः। २। क्लेशकर्म्मविपाकाशयैरपरामृष्टो निर्म्माणकायमधिष्ठाय सम्प्रदायप्रवर्त्तकोऽनुग्राहकश्चेति पातञ्जलाः। ३। लोकवेदविरुद्धैरपि निर्लेपः स्वतन्त्रश्चेति माहेशाः। ४। शिव इति शैवाः। ५। पुरुषोत्तम इति वैष्णवाः। ६। पितामह इति पौराणिकाः। ७। यज्ञपुरुष इति याज्ञिकाः। ८। सर्व्वज्ञ इति सौगताः। ९। निरावरण इति दिगम्बराः। १०। उपास्यत्वेन देशित इति मीमांसकाः। ११। लोकव्यवहारसिद्ध इति चार्व्वाकाः। १२। यावदुक्तीयमपन्न इति नैयायिकाः। १३। विश्वकर्म्मेति शिल्पिनः। १४। इति कुसुमाञ्जलिवृत्तिः ॥ योगशास्त्रमते।
"ब्रह्मतेजोमयं शुक्रं यस्य सर्व्वमिदं रसः।
एकस्य भूतं भूतस्य हृदयं स्थावरजङ्गमम्।
इति महाभारते मोक्षधर्म्मः

तस्य टीका। ब्रह्मणः स्वरूपमन्तरविमार्गार्थमाह। ब्रह्मतेजोमयमिति। तेजोमयं प्रागालम्बम्। शुक्लं शौचभूतम्। यस्य सर्व्वमिदं रसः रसनीयं ज्ञेयं सर्व्वं यच्चैकस्य भूतं सर्व्वं न तु दिक्कालादिनामिवासत्यं भूतस्य निष्कलस्य ब्रह्मणस्तस्य तथा सर्व्वं न्यायरत्नमनोपाधिवशात् द्वयं द्विधा। तच्च सगुणनिर्गुणभेदेन द्विविधं यथा,

"ब्रह्मैकं सर्व्वमेवैतत् गुणभेदेन सत्तमम्।
तद्ब्रह्म द्विविधं वस्तु सगुणं निर्गुणं शिव!॥
मायावितो यः सगुणो मायातीतश्च निर्गुणः।
स्वेच्छामयश्च भगवानिच्छया विकरोति च॥
तच्छक्तिश्च प्रकृतिः सर्व्वशक्तिप्रसूः सदा।
केचिदेवं वदन्त्येवं ब्रह्म ज्योतिः सनातनम्॥
केचिदन्ति द्विविधं ब्रह्म प्रकृतिपूर्व्वकम्।
यच्च वेद च वदन्त्येकं प्रकृतिपुरुषयोः परम्॥
तस्माद्भवति तौ द्वौ च तद्ब्रह्म सर्व्वकारणम्।
अथवैकं परं ब्रह्म द्विविधं भवतीश्वर॥
इच्छाशक्तिश्च प्रकृतिः सर्व्वशक्तिप्रसूः सदा।
तच्चासक्तश्च सगुणः स शरीरी च प्राकृतः॥
निर्गुणस्तच्च निर्लिप्तः अशरीरी निरङ्कुशः।
स चात्मा भगवान्नित्यः सर्व्वाधारः सनातनः॥
सर्व्वेश्वरः सर्व्वसाक्षी सर्व्वत्रास्ति फलप्रदः।
शरीरं द्विविधं प्रोक्तं नित्यं प्राकृतमेव च॥
नित्यं विनाशरहितं नश्वरं प्राकृतं सदा।
अहं त्वमपि भगवन्नावयोर्नित्यविग्रहः॥
आवयोरंशभूता ये प्राकृता नश्वरप्रभाः।
रुद्रादयस्तदंशाश्च मदंशा विष्णुरूपिणः॥
समाख्यैवं द्विधा रूपं द्विभुजञ्च चतुर्भुजम्।
चतुर्भुजोऽहं वैकुण्ठे पद्मया पार्षदैः सह॥
गोलोके द्विभुजोऽहञ्च गोपीभिः सह राधया।
द्विविधं मे वदन्त्येवं द्वौ प्रधानौ तु तत्सते॥
पुरुषश्च सदा नित्यौ नित्या प्रकृतिरीश्वरी।
सदा तौ द्वौ च संश्लिष्टौ सर्व्वेषां पितरौ शिव!॥
सशरीरौ निःशरीरौ स्वेच्छया सर्व्वरूपिणौ।
प्राधान्यञ्च यथा पुंसः प्रकृतेश्च तथा सदा॥"

इति ब्रह्मवैवर्त्ते शैक्षणजन्मखण्डे ४१ अध्यायः॥

नन्दपत्नीं प्रति श्रीकृष्णवाक्यं यथा,—

"सामेव परमं ब्रह्म भगवन्तं सनातनम्।
ध्यायं ध्यायं पुनर्मुक्तिं लभ्या सम परं पदम्॥"

इति तत्रैव १२० अध्यायः॥

सगुणस्य तस्य नवधा रूपं यथा,—

"योगिनो यं वदन्त्येवं ज्योतीरूपं सनातनम्।
ज्योतिरभ्यन्तरे नित्यरूपं भक्ता वदन्ति यम्॥
वेदा वदन्ति सर्व्वं यं नित्यमाद्यं विचक्षणाः।
यं वदन्ति सुराः सर्व्वे परं स्वेच्छामयं प्रभुम्॥
निर्लिप्तं सगुणः सर्व्वं सर्व्वरूपं वदन्ति यम्॥
यमात्मानं परामीशं योगीन्द्राः प्रकृतौ वदेत्॥
सर्व्वं ध्याता च प्रकृतेः सारमात्मा सारात्मनः।
पुंसो वदन्त्यतः सर्व्वे यथा रूपमीश्वरम्॥
सर्व्वात्मानं जगद्बीजं सर्व्वरूपं यथेश्वरम्।
वैष्णवाश्चैव तं वेदात्मानमेवं च॥
पुराणानामेकरूपं तमाद्यविधं स्तुतम्।
न्यायी निर्व्वक्तृकोयञ्च यस्तं प्रकृतोऽवधीत्॥
नित्यं वैशेषिकाद्यन्तं वदन्ति च विचक्षणाः।
सांख्यो वदति तं देवं ज्योतीरूपं सनातनम्॥
मीमांसा सर्व्वरूपञ्च वेदान्तः सर्व्वकारणम्।
पातञ्जलोऽनन्तञ्च वेदाः सत्यस्वरूपकम्॥
स्वेच्छामयं पुराणञ्च भक्ताश्च नित्यविग्रहम्॥"

इति तत्रैव १२८ अध्यायः॥

सगुणनिर्गुणभेदेन तस्य चतुर्धा रूपं यथा,—

"चतुर्विभागः संसृष्टो चतुर्धा संस्थितः स्थितौ।
प्रलयञ्च करोत्यन्ते चतुर्भेदो जगद्गुरुः॥
एकांशेन ब्रह्मासौ भवत्यव्यक्तसंज्ञिमान्।
मरीचिमिश्राः प्रलयाः प्रजानामग्रभागतः॥
कालस्तृतीयस्तस्यांशः सर्व्वभूतानि चापरः।
इत्थं चतुर्धा संसृष्टो वर्त्ततेऽसौ रजोगुणः॥
एकांशेन स्थितो विष्णुः करोति परिपालनम्।
मन्वादिरूपी चांशेन कालरूपी परेण च॥
सर्व्वभूतेषु चांशेन संस्थितिं कुरुते स्थितः।
सत्त्वं गुणमुपाश्रित्य जगतः पुरुषोत्तमः॥
आश्रित्य समयो वृत्तिमन्तकाले तथा प्रभुः।
रुद्रस्वरूपो भगवानेकांशेन भवत्यजः॥
अन्यान्तकादिरूपेण भागेनान्येन वर्त्तते।
कालस्वरूपो भागोऽन्यः सर्व्वभूतानि चापरः॥
विनाशं कुरुतस्तस्तः चतुर्थं वै महात्मनः॥"

इति विष्णुपुराणे १ अंशे २१ अध्यायः॥

ब्रह्मध्यानं यथा,—

"ब्रह्मध्यानं प्रवक्ष्यामि मायातत्त्वविमर्द्दकम्।
यच्छ्रुत्वाज्ञानमे प्राज्ञस्तदृद्य क्षेज्ञानमात्मनि॥
ज्ञानं मथति संयच्छेद्य इच्छेत् श्रेय आत्मनि।
देहेन्द्रियमनोबुद्धिप्राणाहङ्कारवर्जितम्॥
वर्जितं भूततन्मात्रैर्गुणकर्म्माशयादिभिः।
स्वप्रकाशं निराकारं सदानन्दमनादिमत्॥
नित्यं शुद्धं बृहद्ब्रह्म सत्यमानन्दमद्वयम्।
तुरीयमक्षरं ब्रह्म अहमस्मि परं पदम्॥
अहं ब्रह्मेत्यवस्थानं समाधिरिति गीयते।
आत्मानं रथिनं विद्धि शरीरं रथमेव तु॥
बुद्धिन्तु सारथिं विद्धि मनः प्रग्रहमेव च।
इन्द्रियाणि हयानाहुर्विषयास्तेषु गोचराः॥
आत्मेन्द्रियमनोयुक्तो भोक्तेत्याहुर्मनीषिणः।
यस्य विज्ञानवानात्मा युक्तेन मनसा सदा॥
न स तत्पदमाप्नोति युक्तेन मनसा तदा।
स तत्पदमवाप्नोति न हि भूयो न जायते।
विज्ञानसारथिर्यस्तु मनःप्रग्रहवान्नरः।
सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम्॥
अहिंसादि यमः प्रोक्तः शौचादिनियमः स्मृतः।
आसनं पद्मकादुक्तं प्राणायामो मरुज्जयः॥
प्रत्याहारो जयः प्रोक्तो ध्यानमीश्वरचिन्तनम्।
मनोऽनिधारणं स्थानं समाधिर्ब्रह्मणः स्मृतः॥"

साकारस्य तस्य ध्यानं यथा,—

"सर्व्वदेवैतु स्थिरो न स्यात्तो सर्व्वं विचिन्तयेत्।
चतुष्पद्मदलिकासने ब्रह्मचक्रमनाकुलात्।
श्रीवत्सकौस्तुभयुतो वनमाली श्रिया युतः।
नित्यः शुद्धो बुद्धियुक्तः नित्यानन्दात्मयः परः॥
आत्मानं परमं ब्रह्म परमज्योतिरेव तु।
चतुर्विंशतिमूर्त्तिः स ध्यानयोगमधिष्ठितः।
हारकादिशिखासंस्थो ध्येयः पूज्योऽपि वा हरिः।
मनसोऽभीप्सितं प्राप्य देवो वैमानिको भवेत्॥
निष्कामो मुक्तिमाप्नोति सर्व्वोर्ध्वायन स्तुवन् पठन्॥"

इति गारुडे सर्व्वोर्ध्वकथानं ४१ अध्यायः॥

ब्रह्मपदप्राप्तिकारणं यथा,—

"ब्रह्मण्याधाय कर्म्माणि निःसङ्गः कामवर्जितः।
प्रकृतेनैव मनसा कुर्व्वाणो याति तत्पदम्॥"

इति कूर्मपुराणे ३ अध्यायः॥

सर्व्वं ब्रह्म यथा,—

"ब्रह्मैवेदं जगत् सर्व्वं ब्रह्मणोऽन्यन्न विद्यते।
ब्रह्मान्यद्भाति चेन्मिथ्या यथा मरुमरीचिका॥"

इत्यात्मबोधः॥

ब्रह्मकन्यका, स्त्री, (ब्रह्मणः कन्यका सुता।) सरस्वती। इति त्रिकाण्डशेषः॥ ब्राह्मी। इति राजनिर्घण्टः॥

ब्रह्मकर्म्मसमाधिः, पुं, ब्रह्मण्येव कर्म्मात्मके समाधिश्चित्तैकाग्र्यं यस्य। यथा, श्रीभगवद्गीतायाम्। ४। २४।

"ब्रह्मार्पणं ब्रह्महविर्ब्रह्माग्नौ ब्रह्मणा हुतम्।
ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्म्मसमाधिना॥

ब्रह्मकुण्डं, क्ली, (ब्रह्मणा निर्म्मितं कुण्डं सरोवरम्।) ब्रह्मणा निर्म्मितसरोवरविशेषः। यथा,

"पाण्डुनाथस्योत्तरस्यां ब्रह्मकुण्डाख्यं सरः।
ब्रह्मणा निर्म्मितं पूर्व्वं स्नानाय स्वर्गवासिनाम्॥
आयामेन शतहस्तं विस्तीर्णेन तदर्द्धकम्।
सर्व्वपापहरं पुण्यं देवलोकात् समागतम्॥
तत्र स्नानमन्त्रः।
कमण्डलुसमुद्भूत ब्रह्मकुण्डाम्बुतत्पर।
हर मे सर्व्वपापानि पुण्यं स्वर्गञ्च साधय॥
इत्यनेन तु मन्त्रेण स्नाति तस्मिन् सरोजले।
पाण्डुनाथञ्च संपूज्य विष्णुसायुज्यमाप्नुयात्॥
ब्रह्मकुण्डजले स्नात्वा पूजयित्वा उमापतिम्।
ब्रह्मकूटं समारुह्य मुक्तिमेवाप्नुयान्नरः॥"

इति कालिकापुराणे ८१ अध्यायः॥

ब्रह्मकूटः, पु. (ब्रह्मा कूटे शिखरे यस्य।) पर्व्वतविशेषः। यथा, कालिकापुराणे ८१ अध्यायः॥

"ब्रह्मकुण्डजले स्नात्वा पूजयित्वा उमापतिम्।
ब्रह्मकूटं समारुह्य मुक्तिमेवाप्नुयान्नरः॥"

ब्रह्मकूर्च, क्ली, (ब्रह्मणो ब्राह्मणस्यैव कूर्चमिव।) व्रतविशेषः। यथा। हेमाद्रौ व्रतखण्डः।

"रजस्वले तु ये ब्राह्मणीनां स्पृशतो यदि।
सर्व्वं पञ्चगव्येन ब्रह्मकूर्चमतःपरम्॥"

पञ्चगव्यमानं ब्रह्मकूर्चे तैलोपवासः। ब्रह्मकूर्चमाह यमः,

"अक्षोराधोक्षितो भूत्वा पौर्णमास्यां विशेषतः।
मधुरमं पिबेत् प्राज्ञं ब्रह्मकूर्चविधिः स्मृतः॥"

तदशक्तौ पुराणैकं श्रावणम्। इति प्रायश्चित्ततत्त्वम्॥ (ब्रह्मपुराणेऽपि अस्य व्यवस्था यथा। नरस्तु चतुर्दश्यां पूर्णिमायाममावास्यायां वा मद्यमांसं हविष्यान्नं वा भक्षयेत्। यस्तु पौर्णमासीषु ब्रह्मकूर्चं कुर्य्यात् तस्य सर्व्वपापक्षयो भवेत्। यस्तु मासेन द्विःकुर्य्यात् स यथेष्टाङ्गतिमाप्नुयात्॥)

ब्रह्मकोशी, स्त्री, (ब्रह्मणः कोशीव।) अजमोदा। इति राजनिर्घण्टः॥ (गुणादयोऽस्या अजमोदाशब्दे ज्ञेयाः॥)

ब्रह्मगर्भा, स्त्री, (ब्रह्मैव गर्भो यस्याः।) आदित्यभक्ता। इति राजनिर्घण्टः॥

ब्रह्मगिरिः, पु, (ब्रह्मणो गिरिः पर्व्वतः।) ब्रह्मशैलः। इति शब्दरत्नावली॥ (नीलकूटाभिधेयकामाख्यानिलयस्य पूर्व्वभागे स्थितोऽयम्।) यथा, कालिकापुराणे ८९ अध्याये।

"ततस्तु नीलकूटाख्यं कामाख्यानिलयं परम्।
तत्पूर्व्वभागे वसति ब्रह्मा ब्रह्मगिरिं पुनः॥"

ब्रह्मघ्नी, स्त्री, ब्रह्मकन्या। इति राजनिर्घण्टः॥ (ब्रह्मार्णं ब्राह्मणं हन्तीति। ब्रह्म+हन्+टक्। ततो ङीप्।) ब्रह्मघातिनी च॥

ब्रह्मचर्य्य, क्ली, (ब्रह्मणे वेदार्थं चर्य्यं आचरणीयम्।) आश्रमविशेषः। यथा, गारुडे ६४ अध्याये।

"ब्रह्मचर्य्यस्थितो नैकमन्नमद्यादनापदि।
क्षारणः क्षाममश्नीयात् आद्धे व्रतमपीड्यन्॥
मधु मांसं तथाञ्जनमित्यादि परिवर्जयेत्।
प्रतिवेदं ब्रह्मचर्य्यं द्वादशाब्दानि षण्ण वा॥
यद्यनान्तिकसित्येके केशान्तश्चैव षोड्श॥"

(ब्रह्मचर्य्ये अष्टाङ्गमैथुनप्रतिषेधः। यदुक्तम्।

"स्मरणं कीर्त्तनं केलिः प्रेक्षणं गुह्यभाषणम्।
संकल्पोऽध्यवसायश्च क्रियानिर्वृत्तिरेव च॥
एतन्मैथुनमष्टाङ्गं प्रवदन्ति मनीषिणः।
विपरीतं ब्रह्मचर्य्यमेतदेवाष्टलक्षणम्॥"

एतच्च स्त्रीपुरुषयोः साधारणम्। पुंसः स्त्रीसम्भोगादि शून्यत्वम्। स्त्रियाश्च पुरुषसम्भोगादिराहित्यम् अतएवाह मनुः। ५। १६०॥

"मृते भर्त्तरि साध्वी स्त्री ब्रह्मचर्य्ये व्यवस्थिता।
स्वर्गं गच्छत्यपुत्रापि यथा ते ब्रह्मचारिणः॥"
"ब्रह्मचर्य्ये व्यवस्थिता अक्षतपुरुषान्तरमैथुना॥"
इति कुल्लूकभट्टः॥

यमभेदः। यथा, पातञ्जले। २। ३०।

"अहिंसासत्यास्तेय ब्रह्मचर्य्यापरिग्रहा यमाः॥"
"ब्रह्मचर्य्यमुपस्थनियमः।" वीर्य्यधारणञ्चेति भाष्यम्॥ एतच्च कलियुगे नास्ति। यथाह महानिर्व्वाणतन्त्रे।

"ब्रह्मचर्य्याश्रमो नास्ति वानप्रस्थोऽपि न प्रिये॥
गार्हस्थो मैथुनस्यैव आश्रमौ द्वौ कलौ युगे॥")

ब्रह्मचारिणी, स्त्री, (ब्रह्मणा वेदेन चरयति आचरतीति। ब्रह्म+चर+णौ+णिच्+कर्म्मणि ल्युः। ङीप्) भार्य्या। इति रत्नमाला॥

ब्रह्मचारिणी, स्त्री, (ब्रह्मणि वेदे चरतीति। ब्रह्म+चर्+णिनिः। स्त्रियां ङीप्।) दुर्गा। यथा, देवीपुराणे ४५ अध्याये।

"वेदेषु चरते यस्मात्तेन सा ब्रह्मचारिणी॥"

करणीहृषः। इति राजनिर्घण्टः॥ ब्रह्मीशाकः। इति रत्नमाला॥ ब्रह्मचर्य्यव्रतधारिणी। यथा,

"आसीतामरणात् क्षान्ता नियता ब्रह्मचारिणी।
यो धर्म्म एकपत्नीनां काङ्क्षन्ती तमनुत्तमम्॥"
इति मनुः। ५। १५८॥

ब्रह्मचारी, [न्] पुं, (ब्रह्म ज्ञानं तपो वा आचरति अर्जयत्यवश्यम्। ब्रह्म+चर+आवश्यके णिनिः।) प्रथमाश्रमी। इति भरतः॥ उपनयनानन्तरं नियमं कृत्वा गुरोः सन्निधौ स्थित्वा साङ्गवेदाध्ययनं करोति यः। स द्विविधः। उपकुर्व्वाणः नैष्ठिकश्च। तस्य नियमा यथा,—

"यदृश्यं विहितं चर्म्म यत् सूत्रं या च मेखला।
यो दण्डो यच्च वसनं तत्तदस्य व्रतेष्वपि॥
सेवते मांसु नियमान् ब्रह्मचारी गुरौ वसन्।
संनियम्येन्द्रियग्रामं तपोवृद्ध्यर्थमात्मनः॥
नित्यं स्नात्वा शुचिः कुर्य्यादृषितर्पणम्।
देवताभ्यर्च्चनञ्चैव समिदाधानमेव च॥
वर्ज्जयेन्मधु मांसञ्च गन्धं माल्यं रसान् स्त्रियः।
शुक्तानि यानि सर्व्वाणि प्राणिनाञ्चैव हिंसनम्॥
अभ्यङ्गमञ्जनञ्चाक्ष्णोरुपानच्छत्रधारणम्।
कामं क्रोधञ्च लोभञ्च नर्त्तनं गीतवादनम्॥
द्यूतञ्च जनवादञ्च परिवादं तथानृतम्।
स्त्रीणाञ्च प्रेक्षणालम्भमुपघातं परस्य च॥
एकः शयीत सर्व्वत्र न रेतः स्कन्दयेत् क्वचित्।
कामाद्धि स्कन्दयन्रेतो हिनस्ति व्रतमात्मनः॥
स्वप्ने सिक्त्वा ब्रह्मचारी द्विजः शुक्रमकामतः।
स्नात्वार्कमर्च्चयित्वा त्रिः पुनर्मामित्यृचं जपेत्॥
उदक्यमं सुमनसो गोव्रजनृत्तिकाक्षुप्यान्।
आहरेदुद्यदर्थानि भैक्षञ्चाहरहश्चरेत्॥
वेदयज्ञैरहीनानां प्रशस्तानां स्वकर्म्मसु।
ब्रह्मचार्य्याहरेद्भैक्षं गृहेभ्यः प्रयतोन्वहम्॥
गुरोः कुले न भिक्षेत न ज्ञातिकुलबन्धुषु।
अलाभे त्वन्यगेहानां पूर्व्वं पूर्व्वं विवर्ज्जयेत्॥
सर्व्वे वापि चरेद्ग्रामं पूर्व्वोक्तानामसम्भवे।
नियम्य प्रयतो वाचमभिशस्तांस्तु वर्ज्जयेत्॥
दूरादाहृत्य समिधः सन्निदध्याद्दिहायसि।
सायं प्रातर्ह्य जुहुयात् ताभिरग्निमतन्द्रितः॥
अकृत्वा भैक्षचरणमसमिध्य च पावकम्।
अनातुरः सप्तरात्रमवकीर्णिव्रतञ्चरेत्॥
भैक्षेण वर्त्तयेन्नित्यं नैकान्नादी भवेद्व्रती।
भैक्षेण व्रतिनो वृत्तिरुपवाससमा स्मृता॥
व्रतवद्देवदैवत्ये पित्र्ये कर्म्मण्यथर्षिवत्।
काममभ्यर्थितोऽश्नीयाद्व्रतमस्य न लुप्यते॥
ब्राह्मणस्यैव कर्म्मेदमुपदिष्टं मनीषिभिः।
राजन्यवैश्ययोस्त्वेवं नैतत् कर्म्म विधीयते॥
चोदितो गुरुणा नित्यमप्रचोदित एव वा।
कुर्य्यादध्ययने यत्नमाचार्य्यस्य हितेषु च॥
शरीरञ्चैव वाचञ्च बुद्धीन्द्रियमनांसि च।
नियम्य प्राञ्जलिस्तिष्ठेदीक्षमाणो गुरोर्मुखम्॥
नित्यमुद्धृतपाणिः स्यात् साध्वाचारः सुसंयतः।
आस्यतामिति चोक्तः सन्नासीताभिमुखं गुरोः॥
हीनान्नवस्त्रवेषः स्यात् सर्व्वदा गुरुसन्निधौ।
उत्तिष्ठेत् प्रथमश्चास्य चरमश्चैव संविशेत्॥
प्रतिश्रवणसम्भाषे शयानो न समाचरेत्।
नासीनो न च भुञ्जानो न तिष्ठन् पराङ् मुखः॥
आसीनस्य स्थितः कुर्य्यादभिगच्छंस्तु तिष्ठतः।
प्रत्युद्गम्य त्वाव्रजतः पश्चाद्धावंस्तु धावतः॥
पराङ्मुखस्याभिमुखो दूरस्यस्यैत्य चान्तिकम्।
प्रणम्य तु शयानस्य निदेशे चैव तिष्ठतः॥
नीचं शय्यासनञ्चास्य सर्व्वदा गुरुसन्निधौ।
गुरोस्तु चक्षुर्विषये न यथेष्टासनो भवेत्॥
नोदाहरेदस्य नाम परोक्षमपि केवलम्।
न चैवास्यानुकुर्व्वीत गतिभाषितचेष्टितम्॥
गुरोर्यत्र परीवादो निन्दा वापि प्रवर्त्तते।
कर्णौ तत्र पिधातव्यौ गन्तव्यं वा ततोऽन्यतः॥
परीवादात् खरो भवति श्वा वै भवति निन्दकः।
परिभोक्ता कृमिर्भवति कीटो भवति मत्सरी॥
दूरस्थो नार्च्चयेदेनं न क्रुद्धो नान्तिके स्थितः।
यानासनस्थश्चैवैनमवरुह्याभिवादयेत्॥
प्रतिवातेऽनुवाते च नासीत गुरुणा सह।
असंश्रवे चैव गुरोर्न किञ्चिदपि कीर्त्तयेत्॥
गोऽश्वोष्ट्रयानप्रासादप्रस्तरेषु कटेषु च।
आसीत गुरुणा सार्द्धं शिलाफलकनौषु च॥
गुरोर्गुरौ सन्निहिते गुरुवद्वृत्तिमाचरेत्॥
न चानिसृष्टो गुरुणा स्वान् गुरूनभिवादयेत्॥
विद्यागुरुष्वेतदेव नित्या वृत्तिः स्वयोनिषु।
प्रतिषेधत्सु चाधर्म्मान् हितेष्वेवोपदिशत्सु च॥
श्रेयःसु गुरुवद्वृत्तिं नित्यमेव समाचरेत्॥
गुरुपुत्रेषु चार्य्येषु गुरोश्चैव स्वबन्धुषु॥
बालः समानजन्मा वा शिष्यो वा यज्ञकर्म्मणि।
अध्यापयन् गुरुसुतो गुरुवन्मानमर्हति॥
उत्सादनञ्च गात्राणां स्नापनोच्छिष्टभोजने।
न कुर्य्याद्गुरुपुत्रस्य पादयोश्चावनेजनम्॥
गुरुवत् प्रतिपूज्याः स्युः सवर्णा गुरुयोषितः।
असवर्णास्तु संपूज्याः प्रत्युत्थानाभिवादनैः॥
अभ्यञ्जनं स्नापनञ्च गात्रोत्सादनमेव च।
गुरुपत्न्या न कार्य्याणि केशानाञ्च प्रसाधनम्॥
गुरुपत्नी तु युवतिर्नाभिवाद्येह पादयोः।
पूर्णविंशतिवर्षेण गुणदोषौ विजानता॥
स्वभाव एव नारीणां नराणामिह दूषणम्।
अतोऽर्थान्न प्रमाद्यन्ति प्रमदासु विपश्चितः॥
अविद्वांसमलं लोके विद्वांसमपि वा पुनः।
प्रमदा ह्युत्पथं नेतुं कामक्रोधवशानुगम्॥
माता स्वस्रा दुहित्रा वा न विविक्तासनो भवेत्।
बलवानिन्द्रियग्रामो विद्वांसमपि कर्षति॥
कामन्तु गुरुपत्नीनां युवतीनां युवा भवेत्।
विधिवद्वन्दनं कुर्य्यादसावहमितिब्रुवन्॥
विप्रोष्य पादग्रहणमन्वहञ्चाभिवादनम्।
गुरुदारेषु कुर्व्वीत नित्यं धर्म्ममनुस्मरन्॥
यथा खनन् खनित्रेण नरो वार्य्यधिगच्छति।
तथा गुरुगतां विद्यां शुश्रूषुरधिगच्छति॥

सुप्तो वा जटिलो वा स्यादथवा स्याच्छिखाजटः।
नैनं ग्रामेऽभिनिर्ब्रोधेत् सूर्य्यो नाभ्युदियात् क्वचित्॥
तत्रैवाभ्युदियात् सूर्य्यः प्रयानं कामचारतः।
निम्लोचेद्वाप्यविज्ञानात्तत्रैवोपवसेद्दिनम्॥
सूर्य्येण ह्यभिनिर्मुक्तः प्रयातोऽभ्युदितश्च यः।
प्रायश्चित्तमकुर्व्वाणो युक्तः स्यान्महतैनसा॥
आचम्य प्रयतो नित्यमुभे सन्ध्ये समाहितः।
शुचौ देशे जपन् जप्यमुपासीत यथाविधि॥"
इति मानवे। २। १७४-२२२॥

व्यास च। श्रीचौर्व्व उवाच।
"बालः क्रतोपनयनो वेदाहरणतत्परः।
गुरुगेहे वसेद्भूप! ब्रह्मचारी समाहितः॥
शौचाचारवता तत्र कार्य्यं शुश्रूषणं गुरोः।
व्रतानि चरता यात्रा वेदाश्च क्रतबुद्धिना॥
उभे सन्ध्ये इदं भूप! तथैवाग्निं समाहितः।
उपतिष्ठेत्तथा कुर्य्याद्गुरोरभ्यभिवादनम्॥
स्थिते तिष्ठेद्व्रजेद्याति नीचैरासीत चासति।
प्रियो गुरौ नृपश्रेष्ठ! प्रतिकूलं न संभवेत्॥
तेनोक्तः पठेद्वेदं नान्यचित्तः पुरःस्थितः।
अनुज्ञातश्च भिक्षान्नमश्नीयाद्गुरुणा ततः॥
अवगाह्येदमः पूर्व्वमाचार्य्येणावगाहिता।
समिज्जलादिकञ्चास्य कल्यं कल्यमुपानयेत्॥
अधीत्यैवं शास्त्रवेदञ्च ततोऽनुज्ञामवाप्य वै।
गार्हस्थ्यमावसेत् प्राज्ञो निष्पन्नगुरुनिष्कृतिः॥"
इति विष्णुपुराणे। ३। ८। १-७॥

अपि च। गारुडे ६८ अध्याये।
"भिक्षाचर्य्यांच शुश्रूषा गुरोः स्वाध्याय एव च।
सन्ध्याकर्म्माग्निकार्य्यञ्च धर्म्मोऽयं ब्रह्मचारिणः॥"
स तु द्विविधः। यथा, कौर्म्मे २ अध्याये।
"ब्रह्मचार्युपकुर्व्वाणो नैष्ठिको ब्रह्मतत्परः।
योऽधीत्य विधिवद्वेदान् गृहस्थाश्रममाव्रजेत्॥
उपकुर्व्वायको ज्ञेयो नैष्ठिको मरणान्तिकः।"
(गन्धर्व्वविशेषः। यथा महाभारते।१।१२३।५५।
"ब्रह्मचारी बहुगुणः सुवर्णश्चेति विश्रुतः।
विश्वावसुर्भूमन्युश्च सुचन्द्रश्च प्रकीर्त्तितः॥")

ब्रह्मजः, पुं, (ब्रह्मणो जायते य इति ब्रह्मजः। ब्रह्म+जन्+ड। जानातीति ज्ञः। ज्ञा+कः। ततः कर्म्मधारयः।) समष्टिस्थूलदेहाभिमानिविराट्। स च हिरण्यगर्भाख्यातः सर्व्वज्ञः। यथा, कठोपनिषदि। १। १७॥
"त्रिनाचिकेतस्त्रिभिरेत्य सन्धिं
त्रिकर्म्मकृत् तरति जन्ममृत्यू।
ब्रह्मजज्ञं देवमीड्यं विदित्वा
निचाय्येमां शान्तिमत्यन्तमेति॥"
पुनरपि कर्म्मस्तुतिमेवाह त्रिनेति। त्रिनाचिकेतः त्रिष्वग्नयो नाचिकेतोऽग्निः चितो येन स त्रिनाचिकेतः तद्विज्ञानस्तदध्ययनस्तदनुष्ठानवान् वा। त्रिभिर्मातृपित्राचार्य्यैरेत्य प्राप्य सन्धिं सम्बन्धं मानवमनुशासनं यथावत् प्राप्येत्यर्थः। तद्धि प्रामाण्यकारणं गुरुपरम्परादवगम्यते। यथा माठरमानित्यादेः। वेदस्मृतिभ्यश्चैवं प्रत्यक्षानुमागमेभ्यो हि विदुषः प्रत्यक्षा। त्रिकर्म्मकृत् दर्शाध्ययनदानानां कर्त्ता तरति अतिक्रामति जन्म च मृत्युञ्च जन्ममृत्यू। किञ्च ब्रह्मजज्ञमिति। ब्रह्मजज्ञं ब्रह्मणो हिरण्यगर्भाख्यातो ब्रह्मजः ब्रह्मजज्ञाश्चौ ब्रह्मेति ब्रह्मजज्ञः सर्व्वज्ञो ह्यसौ नं देवं द्योतनज्ञानादिगुणवन्तं ईड्यं स्तुत्यं विदित्वा प्राप्य निचाय्य दृष्ट्वा च आत्मभावेन इमां स्वबुद्धिप्रत्यक्षां शान्तिं उपरतिं अत्यन्तमेति अतिशयेनेति वैराग्यं परं ज्ञानकर्म्मसमुच्चयानुष्ठानेन प्राप्नोतीत्यर्थः। इति शङ्कराचार्य्यकृतभाष्यम्॥

ब्रह्मजटा, स्त्री, (ब्रह्मणो जटेव संहता।) दमनकवृक्षः। इति राजनिर्घण्टः॥

ब्रह्मजीवी, [न्] पुं, (ब्रह्मणा वेदेन वेदोक्तौतादिकर्म्मणा इत्यर्थः जीवतीति। ब्रह्म+जीव्+णिनिः।) द्विजकार्य्येषु सत्त्वेन परिचारकः। यथा। अनृतवाक् तस्करो राजभृत्यो वृषलीपतिर्भाण्डिको नक्षत्रोपजीवी श्ववृत्तिब्रह्मजीवी चिकित्सको देवलकः पुरोहितः कितवो मद्यपः कूटकारकोऽपत्यविक्रयी मनुष्यपशुविक्रेता चेति तानुद्वहेत् समेत्य न्यायतो ब्राह्मणव्यवस्यया सर्व्वव्रतत्यागेन चतुर्थकालाहाराः समत्सरं त्रिसवनमुपसृप्तेषुत्सन्नान्ते देवपितृतर्पणं गवाह्निकञ्चेत्येवं व्यवहार्य्याः। इति मिताचरायां प्रायश्चित्ताध्याये प्रचेतसो वचनम्॥

ब्रह्मज्ञः, पुं, (ब्रह्म जानातीति। ब्रह्म+ज्ञा+कः।) श्रीगोपालः। यथा,—
"वाग्दाता वाक्प्रदो वाणीनाथो ब्राह्मणरञ्जकः।
ब्रह्मजो ब्रह्मकृत् ब्रह्मा ब्रह्मकर्म्मप्रकाशकः॥"
इति नारदपञ्चरात्रे गोपालसहस्रनामस्तोत्रे ८ अध्यायः॥
(विष्णुः। यथा महाभारते। १३।१४८। ८४।
"ब्रह्मविद् ब्राह्मणो ब्रह्मी ब्रह्मजो ब्राह्मणप्रियः॥"
कार्त्तिकेयः। यथा, महाभारते।३।२३१।१।१।
"ब्रह्मण्यो वै ब्रह्मजो ब्रह्मवित्त्वं
ब्रह्मश्रेष्ठः ब्रह्मवतां वरिष्ठः।
ब्रह्मप्रियो ब्राह्मणसत्तमो त्वं
ब्रह्मजो वै ब्राह्मणानाञ्च नेता॥")

ब्रह्मज्ञः, त्रि, (ब्रह्म जानातीति। ब्रह्म+ज्ञा+कः।) ब्रह्मवेत्ता। यथा,—
"स ब्रह्मज्ञः स वेदज्ञः सोऽग्निहोत्री स दीक्षितः।
शौनाचारक्रमाचारैर्यो यतेचारिणीं नरः॥"
इति शौनाचारप्रयोगविधिः॥

ब्रह्मज्ञानं, क्ली, (ब्रह्मणि ब्रह्मविषये यज्ज्ञानम्।) ब्रह्मविषयकज्ञानम्। इति समञ्जसाहृत्तिः॥ ६॥
तत्त्वमस्यादिवाक्यजन्यप्रतिपत्तिसहितवृत्त्यारूढज्ञानम्। इति वेदान्तकल्पवल्लिका। "मिथ्यावासनाविरहविशिष्टमात्माभिन्नभिन्नज्ञानम्॥" इतिमुक्तिवादः॥ ७॥ "क्लेशकर्म्मविपाकाशयनिवर्त्तकहिरण्यगर्भविषयकं ज्ञानम्।" इति वैजयन्तीधृतपातञ्जलमतम्॥ ८॥ "प्रकृतिपुरुषयोर्विवेकविषयज्ञानम्।" इति तत्रैव सांख्यमतम्॥ तथा च।
सूत उवाच।
"वेदान्तसांख्यसिद्धान्तब्रह्मज्ञानं वदाम्यहम्॥
अहं ब्रह्म परंज्योतिर्विष्णुरित्येव चिन्तयन्।
सूर्य्ये हृद्योनि वह्नौ च ज्योतिरेकं त्रिधा स्थितम्॥
यथा सर्पिः शरीरस्थं गवां न कुरुते बलम्
निर्गतं कर्म्मसंयुक्तं दत्तं तासां महाबलम्॥
तथा विष्णुः शरीरस्थो न करोति हितं नृणाम्।
विनाराधनया देवः सर्व्वगः परमेश्वरः॥
आरुरुक्षुमतीनान्तु कर्म्मज्ञानसदाहृतम्।
आरूढयोगदृष्टाणां ज्ञानं त्यागः परं मतम्॥
ज्ञातुमिच्छति शब्दादीन् रागद्वेषोऽथ जायते।
लोभो मोहः क्रोध एतैर्युक्तः पापं नरश्चरेत्॥
हस्तावुपस्थसुदरं वाक् चतुर्थी चतुष्टयम्।
एतत् सुसंयतं यस्य स विप्रः कथ्यते बुधैः॥
परवित्तं न गृह्णाति हिंसां न कुरुते तथा।
नाक्षक्रीड़ारतो यस्तु तस्य हस्तौ सुसंयतौ॥
परस्त्रीवर्जनपरस्तस्योपस्थं सुसंयतम्।
अलोलुपो मितं भुङ्क्ते जठरं तस्य संयतम्॥
सत्यं हितं मितं ब्रूते यः सदा तस्य वाग् यता।
यस्य संयतान्येतानि तस्य किं तपसाध्वरैः॥
ऐक्यं यदुबुद्धिमनसोरिन्द्रियाणाञ्च सर्व्वदा।
विश्वेश्वरे परे देवे ध्यानमेतत् प्रकीर्त्तितम्॥
भ्रुवोर्मध्ये स्थितां बुद्धिं विषयेषु युनक्ति यः।
जीवो जाग्रदवस्थायामेवमाहुर्विपश्चितः॥
इन्द्रियाणामुपरमे मनसि व्यवस्थिते।
स्वप्नान् पश्यत्यसौ जीवो बाह्यानाभ्यन्तरानथ॥
हृदि स्थितः स तमसा मोहितो न स्मरत्यपि।
यदा कस्य कुतो वेत्ति सुषुप्तिरिति कथ्यते॥
जाग्रतो यस्य नो तन्द्रीर्न मोहो न श्रमस्तथा।
उत्पद्यते न जानाति शब्दादिविषयान् वशी॥
इन्द्रियाणि समाहृत्य विषयेभ्यो मनस्तथा।
बुद्ध्याहङ्कारमपि च प्रकृत्या बुद्धिमेव च॥
संयम्य प्रकृतिस्थापि चिच्छक्त्या केवले स्थितः।
पश्यत्यात्मनि चात्मानमात्मनात्मप्रकाशकम्॥
चिद्रूपमव्ययं शुद्धं निष्क्रियं व्यापकं शिवम्।
तुरीयायामवस्थायामास्थितोऽसौ न संशयः॥
शब्दादयो गुणाः पञ्च सत्त्वाद्यास्तु गुणाश्रयाः।
पुंसोऽष्टकस्य पञ्चस्य पञ्चाग्र्याणि च तानि हि॥
साम्यावस्था गुणानाञ्च प्रकृतिस्तच्च कर्षिका।
कर्षिकायां स्थितो जीवो देहे चिद्रूप एव हि॥
पुंसोऽष्टकं परित्यज्य प्रकृतिञ्च गुणात्मिकाम्।
यदा याति तदा जीवो याति मुक्तिं न संशयः॥
शरीरेण चतुर्भागः कर्म्म बुद्धीन्द्रियाणि च।
त्रिपञ्चकं विनश्येत यात्यपुंसोऽष्टकं सदा।
सन्ध्यामेवैव जीवेन योगसेवी हि मुक्तिभाक्॥

प्राणायामो जपश्चैव प्रत्याहारोऽथ धारणा ।
ध्यानं समाधिरित्येते षड्योगस्य प्रबाधकाः ॥
पापक्षयो देवतानां प्रीतिरिन्द्रियसंयमः ।
मनसः स्थिरता तेभ्यस्तत्त्वालोकश्च सर्व्वदा ॥
गायत्र्या प्रणवेनाथ मात्रया प्राणसंयमः ।
जपध्यानयुतो गर्भस्तेन हीनस्त्वगर्भकः ॥
षट्त्रिंशन्मात्रिकः श्रेष्ठश्चतुर्विंशतिमात्रिकः ।
मध्या द्वादशमात्रास्तु ॐकारं सततं जपेत् ॥
श्रुत्वा यथाक्षरं सम्यक् शब्दं गौर्याति संसुखी ।
प्रणवे च हृते तद्वत् परं ब्रह्म न संशयः ॥
चारके प्रणवे जप्ते परं ब्रह्म प्रसीदति ।
अष्टाक्षरश्च जप्तव्यो गायत्री द्वादशाक्षरा ॥
सर्व्वेषामिन्द्रियाणान्तु प्रवृत्तिर्विषयेषु या ।
निवृत्तिर्मनसा तस्यां प्रत्याहारः प्रकीर्त्तितः ॥
इन्द्रियाण्येन्द्रियार्थेभ्यः समाकृष्य स्थितो हि सः ।
मनसा यद्द्वयोर्द्वाभ्यां च प्रत्याहारेषु संस्थितः ॥
प्राणायामैर्द्वादशभिर्यावत् कालकृतो भवेत् ।
यत्तावत् कालपर्य्यन्तं मनो ब्रह्मणि धारयेत् ॥
तस्यैव ब्रह्मणा प्रोक्तं ध्यानं द्वादश धारणाः ।
तुष्टे तु नियतो युक्तः समाधिः सोऽभिधीयते ॥
ध्यायन्न चलते यस्य मनोऽभिधायते भृशम् ।
प्राप्यावधिकृतं कालं यावत् सा धारणा स्थिता ।
ध्येये सक्तं मनो यस्य ध्येयमेवानुपश्यति ।
नान्यं पदार्थं जानाति ध्यानमेतत् प्रकीर्त्तितम् ॥
ध्येये मनो निश्चलतां याति ध्येयं विचिन्तयन् ।
यत्तत् ध्यानं परं प्रोक्तं मुनिभिर्ध्यानचिन्तकैः ॥
ध्येयमेव हि सर्व्वत्र ध्येयस्तन्मयतां गतः ।
पश्यति नेतरद्यत्तं समाधिः सोऽभिधीयते ॥
मनः संकल्परहितमिन्द्रियार्थांस्तु चिन्तयन् ।
यस्य ब्रह्मणि संलीनं समाधिस्थः स कीर्त्तितः ॥
ध्यायतः परमात्मानमात्मस्थं यस्य योगिनः ।
मनस्तन्मयतां याति समाधिस्थः स कीर्त्तितः ॥
चित्तस्यास्थिरता भ्रान्तिर्दौर्मनस्यं प्रमादता ।
योगिनां कथिता दोषा योगविघ्नप्रवर्त्तकाः ॥
स्थित्यर्थं मनसः सर्व्वं स्थूलरूपं विचिन्तयेत् ।
तद्व्रतं निश्चलीभूतं सूक्ष्मस्थं स्थिरतां व्रजेत् ॥
न विना परमात्मानं किञ्चिच्चलति विद्यते ।
विश्वरूपं तमेवेह इति ज्ञात्वा न सृजति ॥
ॐकारं परमं ब्रह्म ध्यायेदक्षयिनं विभुम् ।
क्षेत्रक्षेत्रज्ञरहितं जपेन्मात्रार्धयान्वितम् ॥
हृदि सञ्चिन्तयेत् पूर्व्वं प्रधानं तस्य चोपरि ।
तमो रजस्तथा सत्त्वं मण्डलत्रितयं क्रमात् ॥
ब्रह्मरन्ध्रसितं सक्ष्मं पुरुषं जीवसंज्ञितम् ।
तस्योपरि गुणैश्वर्य्यमण्डितं सरोरुहम् ॥
जागर्त्ति कर्णिका तत्र विज्ञानं केसरं स्मृतम् ।
वैराग्यं नाल तत्कन्दो वैष्णवो धर्म्म उत्तमः ॥
कर्णिकायां स्थितं शक्तं जीवयन्निश्चलं विभुम् ।
ध्यायेदुरसि संयुक्तमोङ्कारं मुक्तिसाधकम् ॥
यस्त्रयश्चैव च पुरुषस्थिता मात्राः प्रकीर्त्तिताः ।
अर्द्धमात्रा परं ब्रह्म ज्ञेयोऽध्यात्मविदुत्तमैः ॥
ध्यायन् यदि त्यजेत् प्राणान् याति ब्रह्मण्य-
मेगिकम् ।

हरिं संस्थाप्य देहेऽस्मिन् ध्यायन् योगी च
मुक्तिभाक् ॥
आत्मानमात्मना केचित् पश्यन्ति ध्यानचक्षुषः ।
सांख्यबुद्ध्या तथैवान्ये योगेनान्ये तु योगिनः ॥
ब्रह्मप्रकाशकं ज्ञानं भववन्धविभेदकम् ।
तत्रैकचित्तता योगो मुक्तिदो नात्र संशयः ॥
जितेन्द्रियान्तःकरणो ज्ञानलग्नो हि यो भवेत् ।
स मुक्तः कथ्यते योगी परमात्मन्यवस्थितः ॥
आसनस्थानविधयो न योगस्य प्रबाधकाः ।
विलम्बजनकाः सर्व्वे विस्तारः परिकीर्त्तिताः ॥
शिशुपालः सिद्धिमागात् स्मरणाभ्यासगौरवात् ।
आश्रमाः सर्व्व एवेह पूर्व्वरात्रे परे तथा ॥
योगाभ्यासं प्रकुर्व्वन्तः पश्यन्त्यात्मानमात्मना ।
सर्व्वभूतेषु कारुण्यं विद्वेषं विषयेषु च ॥
गुप्तश्चिन्तोदरादिश्च कुर्व्वन् योगी विमुच्यते ।
इन्द्रियैरिन्द्रियार्थांस्तु न जानाति नरो यदा ॥
काष्ठवत् ब्रह्मसंलीनो योगयुक्तस्तदा भवेत् ॥
सर्व्वे वर्णाः स्त्रियः सर्व्वाः कृत्वा पापानि
भस्मसात् ।
ध्यानाग्निनामलाः सन्तो लभन्ते परमां गतिम् ।
मथनात् दृश्यते ह्यग्निस्तद्वत् ध्यानेन वै हरिः ॥
ब्रह्मात्मनोर्यदैकत्वं स योगश्चोत्तमोत्तमः ॥
वाह्येरुपायैर्मुक्तिर्न नान्तःस्थैः स्याद्यमादिभिः ।
सांख्यज्ञानेन योगेन वेदान्तश्रवणेन च ।
प्रत्यक्षतात्मनो या हि सा मुक्तिरभिधीयते ॥
अनात्मन्यात्मरूपत्वमसतः सत्स्वरूपता ।
दुःखाभावे तथा सौख्यं माया विद्यावि-
ग्निनी ॥"
इति गारुड़े ब्रह्मज्ञाने २४० अध्यायः ॥

ब्रह्मज्ञानी, त्रि, (ब्रह्मज्ञानं विद्यतेऽस्य । ब्रह्मज्ञान + इन् ।) ब्रह्मज्ञानविशिष्टः । यथा,—
"कुशलाकुशलावृत्तिरहितः समदर्शकः ।
लिङ्गाश्रमपरित्यागी ब्रह्मज्ञानी निगद्यते ॥"
इति शङ्करानन्ददीपिका ॥
तेनापि कृष्णभक्तिः कर्त्तव्या । यथा,—
ब्रह्मानन्देन पूर्णोऽहं तेनानन्देन पूर्णधीः ।
तथापि शून्यमात्मानं मन्ये कृष्णरतिं विना ॥"
इति पाद्मे पातालखण्डे जाबालिं प्रति ब्रह्मविद्यावचनम् ॥

ब्रह्मण्यः, पुं, (ब्रह्मणे हितः । ब्रह्मन् + "खलयवमाषतिलकृष्णब्रह्मणश्च ।" ५ । १ । ७ । इति यत् ।
"येचाभावकर्म्मणोः ।" ६ । ४ । १६८ । इत्यनुप्रक्रत्या ।) विष्णुः । यथा, महाभारते १३ । १४६ । ८३ ।
"ब्रह्मण्यो ब्रह्मकृद्ब्रह्मा ब्रह्म ब्रह्मविवर्द्धनः ।
ब्रह्मविद्ब्राह्मणो ब्रह्मी ब्रह्मज्ञो ब्राह्मणप्रियः ॥"
अपि च ।
"ब्रह्मण्यो देवकीपुत्रो ब्रह्मण्यो मधुसूदनः ।
ब्रह्मण्यः पुण्डरीकाक्षो ब्रह्मण्यो विष्णुरच्युतः ॥"
इत्याह्निकचन्द्रिका ॥
ब्रह्मदारुकः । इत्यमरः । २ । ४ । २१ । शुद्धछत्रम् । तूलदण्डः । इति राजनिर्घण्टः ॥

ग्नेश्वरः । (स्त्री । दुर्गा । यथा महाभारते ६ । २२ । २६ ।
"वेदस्मृतिमहापुण्ये ब्रह्मण्ये जातवेदसि ।
जम्बूकटकचैत्येषु नित्यं सन्निहितालये ।")
ब्रह्मणि साधौ च । इति मेदिनी । ये, ६६ ।

ब्रह्मण्यदेवः, पुं, (ब्रह्मण्यो देवः ।) श्रीकृष्णः । यथा,—
"नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ।"
इति नारदीयपुराणम् ।
(यथा च भागवते । ४ । २१ । ३७ ।
"ब्रह्मण्यदेवः पुरुषः पुरातनो
नित्यं हरिर्यच्चरणाभिवन्दनात् ।")

ब्रह्मतालः, पुं, चतुर्मुखतालः । स तु, द्रुतालात्मकः । तत्र ७ मात्राः । मात्रा तु, क ष ट त प इति यच्चाचराणामुच्चारणकालः । सैव लघुमात्रा । तदर्द्धं द्रुतमात्रा । तत्रार्थे ४ लघवः ६ द्रुताः । ० । ०० । ००० । यथा,—
"चतुर्मुखाभिधे ताले जगणानन्तरं द्रुतः ।"
इति सङ्गीतदामोदरः ।

ब्रह्मतीर्थं, क्ली, (ब्रह्मणस्तीर्थम् ।) पुष्करसलिलम् । इति राजनिर्घण्टः ॥ पुष्करतीर्थञ्च । (तत्र स्नानफलम् । यथा, महाभारते । ३ । ८३ । १०५ ।
"ततो गच्छेत राजेन्द्र ! ब्रह्मणस्तीर्थमुत्तमम् ।
तत्र वर्षावरः स्नात्वा ब्राह्मण्यं लभते नरः ।
ब्राह्मण्यञ्च विशुद्धात्मा गच्छेत परमां गतिम् ।")

ब्रह्मत्वं, क्ली, ब्रह्मणो भावः । ("ब्रह्मणस्त्वः ।" ५ । १ । १३६ । इति त्वः ।) तत्पर्य्यायः । ब्रह्मभूयम् २ ब्रह्मसायुज्यम् ३ । इत्यमरः । २ । ७ । ५२ । ब्रह्मसापूज्यम् ४ । इति शब्दरत्नावली ॥ (यथा मार्कण्डेये । ५७ । ६० ।
"ब्रह्मत्वममरेशत्वं देवत्वं मरुतस्तथा ।")

ब्रह्मदण्डः, पुं, (ब्रह्मणो ब्राह्मणस्य दण्डः शिक्षा यष्टिः ।) ब्राह्मणयष्टिका । इति शब्दचन्द्रिका । वशिष्ठस्य शिक्षयष्टिः । यथा,—
"धिग्बलं क्षत्रियबलं ब्रह्मतेजो बलं बलम् ।
एकेन ब्रह्मदण्डेन सर्व्वा नाशिता मम ।"
इति रामायणे विश्वामित्रवाक्यम् ।
(ब्रह्मणो ब्राह्मणस्य शास्त्ररूपो दण्डः ।) ब्रह्मशास्त्रः । यथा,—
"ब्रह्मदण्डहता ये च विद्युदग्निहताश्च ये ।
तेषामुद्धरणार्थाय इमं पिण्डं ददाम्यहम् ।"
इति तिथ्यादितत्त्वम् ।
(अयं हि राजधर्म्मे शत्रुनाशनोपायः । यदुक्तं महाभारते । २ । ५ । १२३ ।
"कश्चिदस्त्राणि सर्व्वाणि ब्रह्मदण्डञ्च नैरुज ! ।
विषयोगास्तथा सर्व्वे विदिताः शत्रुनाशनाः ।")

ब्रह्मदण्डी, स्त्री, (ब्रह्मणे ब्रह्मोपासनार्थं दण्डो यस्याः सा । ङीप् ।) चुद्रचुपविशेषः । तत्पर्य्यायः । ब्रह्मदण्डी २ कण्टपत्रफला ३ । अस्या गुणाः । कटुत्वम् । उष्णत्वम् । कफशोषानिलापहत्व

इति राजनिर्घण्टः ॥ (यथा गारुडे १८६ अध्याये ।
"ब्रह्मदत्तौ तु पुष्येण स्नाने पाने वशीकरा ॥")
ब्रह्मदत्तः, पुं, इक्ष्वाकुवंशीयराजविशेषः । तत्पर्य्यायः । ब्रह्मदत्तु २ । इति हेमचन्द्रः । ३ । ६५८ ॥ (यथा महाभारते । २ । ८ । २० ।
"ब्रह्मदत्तश्चिरार्त्तश्च राजोपरिचरस्तथा ॥"
स्वनामख्यातो नीपपुत्रः । यथा, भागवते । ९ । २१ । २५ ।
पारस्य तनयो नीपस्तस्य पुत्रशतं त्वभूत् ।
स शत्व्यां सुकृतकन्यायां ब्रह्मदत्तमजीजनत् ॥"
ब्रह्मदत्त इति विख्याते पाञ्चालिङ्गः । यथा, रामायणे । ३ । १८ । ३८ ।
"अमोघा दृष्टवंशेमे ब्रह्मदत्ताः सुतेजसः ।
दत्ता मह्यं महेन्द्रेण तूर्णौ चास्त्रयशायकौ ॥")
ब्रह्मदर्भा, स्त्री, (ब्रह्मणे स्थिती दर्भो यस्याः ।) यमानिका । इत्यमरः । २ । ४ । १४५ ॥ (यथास्याः पर्य्यायः ।
"यमानिकोग्रगन्धा च ब्रह्मदर्भाजमोदिका ।
सैवोक्ता दीप्यका दीप्या तथा स्यादृग्यवसा
ह्वया ॥"
इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे ॥)
ब्रह्मदारु, क्ली, (ब्रह्मणो ब्राह्मणस्य हितकरो दारुः ।) स्वनामख्यातवृक्षाकारवृक्षविशेषः ॥ तत्पर्य्यायः । गूदः २ पूयः ३ क्रमुकः ४ ब्रह्मगुः ५ तूलम् ६ । इत्यमरः । २ । ४ । ४१ ॥ पलाशिकम् ७ । इति वाचस्पतिः ॥ तलम् ८ । इति भरतः ॥ पूगः ९ पूयः १० । इति शब्दरत्नावली ॥ (क्रमुकार्थे पर्य्यायो यथा,
"तूलः स्थूलश्च पूगश्च क्रमुको ब्रह्मदारु च ॥"
इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे ॥)
ब्रह्मदेत्यः, पुं, (ब्रह्मा ब्राह्मणरूपी दैत्यः ।) प्रेतयोनिप्राप्तब्राह्मणः । इत्यैतिह्यम् ॥
ब्रह्मनाडं, क्ली, (ब्रह्मणो ब्रह्मलोकप्राप्तेर्नालमिव ।) काश्यां पञ्चतीर्थस्य पूर्व्वभागे पितामहेश्वरलिङ्गस्याधस्तीर्घविशेषः यथा,—
"पितामहेश्वरं लिङ्गं ब्रह्मनालोपरिस्थितम् ।
पूजयित्वा नरो भक्त्या ब्रह्मलोकमवाप्नुयात् ॥
ब्रह्मस्रोतःसमीपे तु कृतं कर्म्म शुभाशुभम् ।
परामक्षयतामेति शुभमेव ततश्चरेत् ॥
अनल्पमपि यत् कर्म्म कृतमत्र शुभाशुभम् ।
प्रलयेऽपि न तस्यास्ति प्रलयो मुनिसत्तम ! ॥
नाभितीर्थमिदं प्रोक्तं नाभीभूतं यतः क्षितेः ।
अपि ब्रह्माण्डगोलस्य नाभिरेषा शुभोदया ॥
सा मानसिकपूर्व्वैकीयं नाभिगाम्भीर्य्यभूमिका ।
ब्रह्माण्डगोलकं सर्व्वं यस्यामेति लयोदयम् ॥
ब्रह्मनालं परं तीर्थं त्रिषु लोकेषु विश्रुतम् ।
तत्सङ्गमे नरः स्नातः कोटिजन्ममलं हरेत् ॥
ब्रह्मनाडे पतेद्येषामपि कीकसमात्रकम् ।
नास्तेषां मातृभास्तस्ते न विशन्ति कदाचन ॥"
इति स्कन्दपुराणे काशीखण्डे विष्णुमाधवाभिधूर्त्तसंवादे वैष्णवतीर्थमाहात्म्ये नाम ९१ अः ॥

ब्रह्मनिर्व्वाणं, क्ली, (ब्रह्मणि परब्रह्मे निर्व्वाणं लयः ।) ब्रह्मणि निर्वृत्तिः । यथा, श्रीभगवद्गीतायाम् । २ । ७२ ।
"एषा ब्राह्मी स्थितिः पार्थ ! नैनां प्राप्य विमुह्यति ।
स्थित्वास्यामन्तकालेऽपि ब्रह्मनिर्व्वाणमृच्छति ॥"
ब्रह्मपत्रं, क्ली, (ब्रह्मणस्तदाख्यया प्रसिद्धस्य वृक्षस्य पत्रम् । पलाशपत्रम् । यथा,—
"भोजनं ब्रह्मपत्रेषु कथयालोचनं हरेः ।
दर्शनं वैष्णवानाञ्च महापातकनाशनम् ॥"
इति पाद्मोत्तरखण्डे कार्त्तिकमाहात्म्ये ११८ अः ॥
ब्रह्मपर्णी, स्त्री, (ब्रह्मेव विस्तीर्णानि आम्रलं स्थितानि पत्राणि यस्याः ।) पृश्निपर्णी । इति राजनिर्घण्टः ॥
ब्रह्मपवित्रः, पुं, (ब्रह्मणि वेदोक्तकर्म्मणि पवित्रः ।) कुशः । इति राजनिर्घण्टः ॥
ब्रह्मपादपः, पुं, (ब्रह्मा तदाख्यया प्रसिद्धः पादपः ।) पलाशवृक्षः । इति हेमचन्द्रः । ४ । २०२ ॥
ब्रह्मपुत्रः, पुं, विषभेदः । इत्यमरः । १ । ८ । १० ॥ तस्य लक्षणं यथा,—
"वर्णतः कपिलो यः स्यात्तथा भवति सारकः ।
ब्रह्मपुत्रः स विज्ञेयो जायते मलयाचले ॥"
इति भावप्रकाशः ॥
(पर्य्यायोऽस्य यथा,
"काकोली गरलः चूर्णो वत्सनाभः प्रदीपनः ।
लौकिकेयो ब्रह्मपुत्रो विषं स्याद्गरलो विषः ॥"
इति वैद्यकरत्नमालायाम् ॥
ब्रह्मणः पुत्रः । सत्यम् । धर्म्मः । मरीच्यादिः ॥ मनुः । यथा मार्कण्डेये । ६४ । ११ ।
"मन्वन्तरे च दशमे ब्रह्मपुत्रस्य धीमतः ।
सुखासीना निरुद्वाश्च त्रिःप्रकाराः सुरा स्मृताः ॥"
नारदः । वशिष्ठः ॥) चैत्रभेदः । नदभेदः । इति मेदिनी । रे, २८५ ॥ ग्रैष्मस्य पर्य्यायः । अमोघानन्दनः २ लौहित्यः ३ लोहितः ४ । इति शब्दरत्नावली ॥ * ॥ अस्य नदस्योत्पत्तिमाहात्म्ये यथा,—
सगर उवाच ।
"अमोघायां कथं जज्ञे लोहित्यो ब्रह्मणः सुतः ।
कथं शान्तनुभार्य्यायां रेतः स कमलासनः ॥
पारस्त्रैणेयपुत्रो वा कथं जज्ञे पितामहात् ।
तत् सर्व्वं श्रोतुमिच्छामि कथयस्व द्विजोत्तम ! ॥
और्व्व उवाच ।
शृणु त्वं नृपशार्दूल ! कथयामि महत्तरम् ।
आख्यानं ब्रह्मपुत्रस्य लौहित्यस्य महात्मनः ॥
हरिवर्षे महावर्षे शान्तनुर्नाम नामतः ।
मुनिरासीन्महाभागो ज्ञानवान् तपसोधनः ॥
तस्य भार्य्या महाभागा अमोघाख्या महासती ।
हिरण्यगर्भस्य सुनेस्तृणबिन्दोरमोघ्वा ॥
तया सार्द्धं स कैलासमभ्यागात्पर्व्वतेऽवसत् ।
लौहित्याख्यस्य सरसस्तीरे वै गन्धमादने ॥
एकदा स तपोनिष्ठो निजपुण्यादिगोचरे ।
जगाम वनमध्यन्तु चिन्वन् बहुफलानि च ॥
तस्मिन्नवसरे ब्रह्मा सर्व्वलोकपितामहः ।
तत्राजगाम यत्रास्ति अमोघा शान्तनोः प्रिया ॥
तां दृष्ट्वा देवगर्भाभां युवतीमतिसुन्दरीम् ।
मोहितो मदनेनाशु तथाभूद्भूपतेन्द्रिय ॥
उद्दीपितेन्द्रियो भूत्वा जिघृक्षुस्तां महासतीम् ।
अथाधावत्तदा ब्रह्मा सम्मुखो मदनार्दितः ॥
धावमानं विधातारं दृष्ट्वामोघा महासती ।
मैवं मैवमिति प्रोक्ता पर्णशालां बलीयत ॥
दृष्ट्वोवाच धातारममोघा कुपिता तदा ।
पर्णशालान्तरगता द्वारमाहत्य तत्क्षणात् ॥
अकार्य्यं न मया कार्य्यं मुनिपत्न्या विगर्हितम् ।
बलात् प्रमथ्या चाहं तत्त्वया त्वाञ्च शपाम्यहम् ॥
अमोघया चैवमुक्ते विधातुश्च तदा नृप ।
रेतश्चस्कन्द च तदैवाश्रमे शान्तनोर्मुनेः ॥
च्युते रेतसि धातापि हंसयानं समास्थितः ।
लज्जयातिपरीतात्मा द्रुतं वै स्वाश्रमं ययौ ॥*॥
गते वेधसि शान्तनुर्निजमाश्रममागतः ।
आगत्य दृष्ट्वा हंसानां पदचौभं तथा भुवि ॥
तेजश्च पतितं भूमौ विधातुर्ज्वलनोपमम् ।
अमोघां परिपप्रच्छ पर्णशालान्तरस्थिताम् ॥
किमेतदत्र सुभगे ! प्रवृत्तं दृश्यते तु यत् ।
पक्षिणाञ्च पदचौभस्तेजश्चेदृश्यम् ॥
सा तस्य वचनं श्रुत्वा शान्तनुं मुनिसत्तमम् ।
अमर्षितेव व्यगदद्दाकुला विकलानना ॥
हंसयुक्तस्यन्दनेन कोऽप्यागत्य चतुर्मुखः ।
कामरज्जुकरो भीरू रतिं मां समयाचत ॥
ततो मया भर्तृसिक्तः स कुटज्यान्तरलीनया ।
प्रच्याव्य तेजः स ज्ञातो मया शापभयार्दितः ॥
कुरु तत्र प्रतीकारं यदि शक्नोषि शान्तनो ! ।
न हि मां धर्षणां सोढुं कश्चित् शक्नोति जीव भुवि ॥
स तस्या वचनं श्रुत्वा स्वयं ब्रह्मा समागतः ।
इति निश्चित्य मनसा तत्र ध्यानपरोऽभवत् ॥
दिव्यज्ञानेन स ज्ञात्वा देवकार्य्यसुपस्थितम् ।
तीर्थावतारणञ्चापि हिताय जगतां मुनिः ।
ज्ञात्वोदकं चिन्तयित्वा स्वभार्य्यामिदमब्रवीत् ॥
इदं तेजो ब्रह्मणस्त्वं पिबामोघे ! समाज्ञया ।
हिताय सर्व्वजगतां देवकार्य्यार्थसिद्धये ॥
भवत्या निकटं ब्रह्मा स्वयमेव समागतः ।
त्वामप्राप्य स महात्मा शापवयोः स समर्थ्य च ।
गतो निजाश्रमं तत्त्वं कर्त्तुमर्हसि मद्वचः ।
तत् श्रुत्वा शान्तनोर्वाक्यममोघातीव लज्जिता ।
शान्तयन्तीव तं प्राह पतिं नत्वा महासती ॥
नान्यस्य तेजो धास्यामि न चेत्ते विमनस्कता ।
अवश्यं यदि कर्त्तव्यं पीत्वा त्वं मयि चोत्सृज ॥
ततस्तस्या वचः श्रुत्वा युक्तं तथ्यञ्च शान्तनुः ।
स्वयं पीत्वा च तत्तेजस्तस्या गर्भे यसेचयेत् ॥
संक्रामितैः शान्तनुना तेजोभिर्ब्रह्मणः सुतौ ।
गर्भं दधानामोघाख्या हिताय जगतां ततः ॥
तस्यां काले तु संप्राप्ते संजातो बलसञ्चयः ।
तन्मध्ये तनयश्चापि नीलवासाः किरीटधृक् ॥

रुद्राक्षमालाममायुक्तो रक्तगौरश्च ब्रह्मवत् ।
चतुर्भुजः पद्मविद्यावरशक्तिधरस्तथा ।
शिवमारशिरस्थश्च तुल्यकायो जलोत्करैः ॥
तं जातञ्च तथाभूतं शान्तमुर्लोकशान्ततुः ।
चतुर्णां पर्व्वतानाञ्च मध्यदेशे न्यवेशयत ॥
कैलासशोत्तरे पार्श्वे हस्तिशैले गन्धमादनः ।
जारुधिः पश्चिमे शैलः पूर्व्वे सर्व्वतकाह्वयः ॥
तेषां मध्ये स्वयं कृष्णः पर्व्वतानां विधेः सुतः ।
कृत्वातिवपुषे नित्यं शूरदीव निशाकरः ॥
तं तोयमध्यगं पुत्रमाधाद्य दृहिणः स्वयम् ।
क्रमतस्तस्य संस्कारानकरोद्दृहणुद्वये ॥
अथ काले बहुतिथे अतीते ब्रह्मणः सुतः ।
तोयराशिस्वरूपेण ववृधे पञ्च योजनान् ॥
तस्मिन् देवाः पपुः सस्तुर्द्वितीय इव सागरे ।
पीतामलजले हृद्ये देवस्त्रीसरसां गणैः ॥
तस्मिन्नवसरे रामो जामदग्न्यः प्रतापवान् ।
चक्रे मातृवधं घोरमनुजं पितुराज्ञया ॥
तस्य पापस्य मोक्षाय स्वपितुस्तोषणेच्छुतः ।
स जगाम महाकुण्डं ब्रह्माख्यं स्नातुमिच्छया ॥
तत्र स्नात्वा च पीत्वा च मातृहत्यां व्यपानयत् ।
वीर्य्यं परशुना कृत्वा तत्र ज्ञानवतारयत् ॥*॥
अपि च ।
ब्रह्मकुण्डात् स्रुतः सोऽथ कासारे लौहिता-
ह्वये ।
कैलासोपत्यकायान्तु न्यपतद्ब्रह्मणः सुतः ॥
तस्यापि सरसस्तीरं समुत्थाय महाबलः ।
कुठारेण दिशं पूर्व्वामनयद्ब्रह्मणः सुतम् ॥
ततोऽपरत्रापि गिरिं हेमशृङ्गं विभिद्य च ।
कामरूपान्तरं पीठमवाहयदमुं हरिः ॥
तस्य नाम विधिश्चक्रे स्वयं लौहितगङ्गकम् ।
लौहित्यात् सरसो जातो लौहित्याख्यस्ततोऽ-
भवत् ॥
स कामरूपमखिलं पीठमाप्लाव्य वारिणा ।
शोधयन् सर्व्वतीर्थानि दक्षिणं याति सागरम् ॥
प्रागेव दिव्ययमुनां स व्यक्ता ब्रह्मणः सुतः ।
पुनः पतति लौहित्ये गत्वा द्वादशयोजनम् ॥*॥
चैत्रे मासि सिताष्टम्यां यो नरो नियतेन्द्रियः ।
स्नाति लौहित्यतोयेषु स याति ब्रह्मणः पदम् ॥
चैत्रञ्तु सकलं मासं शुचिः प्रयतमानसः ।
लौहित्यतोये यः स्नाति स कैवल्यमवाप्नुयात् ॥"

इति कालिकापुराणे ८४ । ८५ अध्यायः ॥

अन्यच्च ।

मीने मधौ शुक्लपक्षे अशोकाख्यां तथाष्टमीम् ।
विशेषशोककलिकाः स्नायात्लौहित्यवारिणि ॥
पुनर्व्वसौ वृषे लग्ने चैत्रे मासि सिताष्टमीम् ।
लौहित्ये विरजे स्नायात् सर्व्वपापैः प्रमुच्यते ॥*॥
स्नानमन्त्रो यथा,—
"पृथिव्यां यानि तीर्थानि सरितः सागरादयः ।
सर्व्वे लौहित्यमायान्ति चैत्रे मासि सिताष्टमीम् ॥
ब्रह्मपुत्र महाभाग शान्तनोः कुलनन्दन ! ।
शमोषागर्भसम्भूत पापं लौहित्य मे हर ॥"

इति तिथ्यादितत्त्वधृतस्कन्दपुराणवचनम् ॥

ब्रह्मपुत्री, स्त्री, (ब्रह्मणः पुत्री कन्या ।) सरस्वती नदी । इति हेमचन्द्रः । ४ । १५१ ॥ वाराहीकन्दः । इति राजनिर्घण्टः ॥

ब्रह्मपुरी, स्त्री, (ब्रह्मणः पुरी ।) विधातुर्धाम । यथा । भूलोकान्तरीक्षस्वर्गलोकादि ब्रह्माण्डोदरवर्त्ति च ब्रह्मपुरीनामकं त्रैलोक्यस्वरूपं मम हृदयमध्ये वाह्ये च सूर्य्यमण्डलमध्यवर्त्ति तेजसा च एकीभूतं ज्योतिरहमिति चिन्तयन् जपं कुर्य्यात् । इति गायत्रीव्याख्या ॥ * ॥ काशी । यथा,—

"विद्याप्रबोधोदयशब्दभूमि-
र्वाराणसी ब्रह्मपुरी दुरत्यया ॥"

इति प्रबोधचन्द्रोदयनाटकम् ॥

ब्रह्मबन्धुः, पुं, (ब्रह्मणो बन्धुरिव ।) अधिक्षेपः । निन्दितब्राह्मणः । निर्द्देशः । व्यर्थब्राह्मणनामकब्राह्मणः । इत्यमरः । ३ । ३ । १०३ ॥ तथा हि । अधिक्षेपे निन्दायां गम्ये अधिक्षेप्यो ब्रह्मबन्धुः । यथा ब्रह्मबन्धो ! किमेतत्ते इति । अधिक्षिप्यतेऽसौ अधिक्षेपोऽधिक्षेप्यः कर्म्मणि घञ् वा । ब्रह्मैव बन्धुरस्य नाशः । ब्रह्मकर्म्माभावात् निन्दा अधिक्षेपे समासोऽभिधानात् । ब्रह्मबन्धुः निर्द्देशे यस्य देवाद्यनाम न गृह्यते स ब्रह्मबन्धुरितिनिर्द्दिश्यते इत्यर्थः । स्त्रियां ("ऊङुतः ।" ४ । १ । ६६ । इति ऊङ् ।) ब्रह्मबन्धूः । ब्रह्मबन्धुर्ब्राह्मणजातिविशेषे च । ब्राह्मणजातिविशेषे निर्द्देशे ब्रह्मबन्धुरधिक्षेपे इति वोपालितः । इति भरतः ॥*॥ (यथा, मार्कण्डेये । ७५ । ६० ।
"ब्रह्मबन्धोः सुता न त्वं बाले ! नैव तपस्विनः ।
सुता त्वं मम यो दैवान् कर्त्तुमन्यान् समुत्-
सहे ॥")

तस्य देहिकवधनिषेधो । यथा, भागवते १ स्कन्धे ।
"वपनं द्रविणादानं स्थानान्निर्य्यापणन्तथा ।
एष हि ब्रह्मबन्धूनां वधो नान्योऽस्ति दैहिकः ॥"

ब्रह्मभूतिः, स्त्री, (ब्रह्मणो भूतिरङ्गसम्पदिव भूतिर्यस्याः ।) सन्ध्या । इति शब्दरत्नावली । (ब्रह्मणो भूतिरुत्पत्तिर्यस्या इति विग्रहे बाहुलिङ्गः ॥)

ब्रह्मभूमिजा, स्त्री, (ब्रह्मभूमेर्जायते या । ब्रह्मभूमि + जन + ड । टाप्) सिंहली । इति राजनिर्घण्टः ॥

ब्रह्मभूयं, क्ली, (ब्रह्मणो भावः । ब्रह्म + भू + "सुपो भावे ।" ३ । १ । १०७ । इति क्यप् ।) ब्रह्मत्वम् । इत्यमरः । २ । ७ । ५२ ॥ (यथा मनुः । १२ । १०२ ।
"वेदाभ्यासोर्थतत्त्वज्ञो यत्र तत्राश्रमे वसन् ।
इहैव लोके तिष्ठन् स ब्रह्मभूयाय कल्पते ॥"
"अग्निष्वेव लोके तिष्ठन् ब्रह्मभूयाय ब्रह्मत्वाय कल्पते ।" इति तट्टीकायां कुल्लूकभट्टः ॥ मोक्षः । यथा गीतायाम् । १४ । २६ ।
"मां च योऽव्यभिचारेण भक्तियोगेन सेवते ।
स गुणान् समतीत्यैतान् ब्रह्मभूयाय कल्पते ॥"

"ब्रह्मभूयाय हृष्टभावाय मोक्षायकल्पते समर्थो भवति ।" इति तट्टीकायां स्वामी ।

ब्रह्मशीर्षभृत्, पुं, (ब्रह्मणो मूर्द्धभृत् शिरोमालिरिव ।) शिवः । इति वटुकभैरवस्य वकारादिस्वकीयनामान्तर्गतनाम ॥

ब्रह्ममेखलः, पुं, (ब्राह्मणां ब्रह्मणानां मेखला पुंवद्भावः ।) शुक्रः । इति केचित् ॥

ब्रह्मयज्ञः पुं, (ब्रह्मणे ब्रह्मणे वा यज्ञः ।) विधिना वेदस्याभ्यसनम् । शिष्याणामध्यापनञ्च । इत्यमरभरतौ ॥ यथा, मनौ । ३ । ७० ।
"अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम् ।
होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम् ॥"

ब्रह्मयष्टिः, स्त्री, (ब्रह्मणो यष्टिरिव ।) भार्ङ्गी । इति शब्दरत्नावली ॥ (वृक्षविशेषः । यथा, गारुडे १६२ अध्याये ।
"ब्रह्मयष्टिफलं पिष्टं वारिणा तेन वेपितः ।
तेन दृष्टं रक्तदोषः प्रणश्यति न संशयः ॥"

ब्रह्मयोनिः, पुं, (ब्रह्मणो योनिरुत्पत्तिस्थानम् ।) ब्रह्मगिरिः । इति शब्दरत्नावली ॥ (ब्रह्मप्राप्तिकारणब्रह्मध्यानम् । यथा मनुः । १० । ७४ ।
"ब्राह्मणा ब्रह्मयोनिस्था ये स्वकर्म्मण्यवस्थिताः ।
ते सम्यगुपजीवेयुः षट् कर्म्माणि यथाक्रमम् ॥"
"ये ब्राह्मणा ब्रह्मप्राप्तिकारणब्रह्मध्याननिष्ठा स्वकर्म्मानुष्ठाननिरताश्च ते षट्कर्म्माणि वक्ष्यमाणान्यध्यापनादीनि क्रमेण सम्यगनुतिष्ठेयुः ।" इति तट्टीकायां कुल्लूकभट्टः ॥ अपरस्य ब्रह्मणो योनिरुत्पत्तिकारणम् । यद्वा ब्रह्म सत् योनिः सर्व्वेषामुत्पत्तिकारकं ब्रह्म । यथा, शुक्लयजुर्व्वेदे । ३१ । ३ ।
"यदा पश्यः पश्यते रुक्मवर्णं
कर्त्तारमीशं पुरुषं ब्रह्मयोनिम् ।"

तीर्थविशेषः । यथा महाभारते । ३ । ८१ । ११ ।
"ब्रह्मयोनिं समासाद्य शुचिः प्रयतमानसः ।
तत्र स्नात्वा नरव्याघ्र ! ब्रह्मलोकं प्रपद्यते ॥"

ब्रह्मा योनिरुत्पत्तिकारणं यस्य इति विग्रहे बाहुलिङ्गः । यथा रघौ । १ । ६४ ।
"त्वयैवं चिन्त्यमानस्य गुरुणा ब्रह्मयोनिना ।
सानुबन्धा कथं न स्युः सम्पदो मे निरापदः ॥"

यथा च मार्कण्डेये । २३ । ३० ।
"जगद्धात्रीमहं देवीं मारिराधयिषुः शुभाम् ।
स्तोत्रं प्रारभ्य शिरसा ब्रह्मयोनिं सरस्वतीम् ॥")

ब्रह्मयोनी, स्त्री, (ब्रह्मा योनिरुत्पत्तिकारणं यस्याः । स्त्रियां पक्षे ङीप् ।) कुरुक्षेत्रे सरस्वतीतीरे पृथूदकनिकटे तीर्थविशेषः । तत्र ब्रह्मणा चत्वारो वर्णाः सृष्टाः । यथा,—
"सरस्वत्यास्तु तीरे यः संत्यजेदात्मनस्तनुम् ।
पृथूदके नरश्रेष्ठ नैनं शोचे मरं कृतम् ॥
तत्रैव ब्रह्मयोन्यस्ति ब्रह्मणा यत्र निर्म्मिताः ।
पृथूदकं समाश्रित्य सरस्वत्यास्तटे स्थिताः ।
चतुर्व्वर्णस्य सृष्ट्यर्थमात्मज्ञानपरोभवत् ।
तस्माभिधायतः सृष्टिर्ब्रह्मणोऽव्यक्तजन्मनः ।

मुखतो ब्राह्मणा जाता बाहुभ्यां क्षत्रिया-
स्तथा।
ऊरुभ्यां वैश्यजातीया: पद्भ्यां शूद्रास्ततोऽभवन्॥
भानुर्जन्मं ततो दृष्ट्वा आत्मस्थान् सुतांस्तत:।
इदं प्रतिष्ठितं लोके ब्रह्मयोनीतिसंज्ञितम्॥
तत्र स्थित्वा मुक्तिकाम: पुनर्योनिं न पश्यति।"
इति वामनपुराणे ३८ अध्याय:॥

ब्रह्मरन्ध्रं, क्ली, (ब्रह्मण: परमात्मन: अधिष्ठानाय-
रन्ध्रमाकाश:। यद्वा, ब्रह्मणि ब्रह्मप्राप्तये रन्ध्रम्। एतद्रन्ध्रेण प्राणोत्क्रमणे ब्रह्मलोकप्राप्तेरस्य तथात्वम्।) उत्तमाङ्गम्। ब्रह्मतालु इति भाषा। यथा। यं नम: ब्रह्मरन्ध्रं। इति तन्त्रसार:॥ अपि च। ब्रह्मरन्ध्रमरीमर्त्तीदरे इत्यादि गुणपादकालीक्षम्॥ (यथा च षट्चक्र-प्रकाशिकायाम्। ४। १६।
"ज्ञात्वा सुषुम्नामद्वैतं ज्ञात्वा बायुच मध्यगम्।
स्थित्वा सदैव सुस्थाने ब्रह्मरन्ध्रं निरोधयेत्।")

ब्रह्मराक्ष:, पुं, (राक्षेरयं राज्ञ:। ब्रह्मणो राज्ञ:।) ब्राह्मणकुलजे:। इति श्रीधरस्वामी। यथा,—
"ब्रह्मराज्ञ उपादत्ते वासुदेवानुमोदिता:।
अनिच्छन्तो यदुगणै: समुद्यान् भगवत्प्रिया:॥"
इति श्रीभागवते। १०। ६३। ६६॥

ब्रह्मराति:, पुं, याज्ञवल्क्यमुनि:। इति हेमचन्द्र:॥ ब्रह्मज्ञानं राति ददाति य:। ब्रह्मज्ञब्दात् राधातोर्नांश्चीति त्रिप्रत्ययनिष्पन्नोऽयम्। इति तट्टीका॥ ब्रह्मणो निशायां स्त्री। सा दैव-सहस्रयुगेन भवति। इति पुराणम्॥ (मनुष्य-कालपरिमाणतो ब्रह्मणो रात्रिपरिमाणमुच्यते। निमेषपरिस्पन्दकाली निमेष:। अष्टादशनिमे-षास्तु काष्ठा। त्रिंशत् काष्ठास्तु कला। त्रिंशत् कलास्तु क्षण:। क्षणास्तु द्वादश मिलित्वा एको मुहूर्त्त:।
"तास्तु त्रिंशत्क्षणास्ते तु मुहूर्त्तो द्वादशा-
स्त्रियाम्॥"
इत्यमर:। १। ४। ११॥
मनुमते तु त्रिंशत्कला मिलित्वा एको मुहूर्त्त: स्यात् यदुक्तं तत्रैव। १। ६६।
"त्रिंशत्कला मुहूर्त्त: स्यादहोरात्रस्तु तावत:॥"
ते त्रिंशन्मुहूर्त्ता एकोऽहोरात्र:। अहोरात्राणां षण्णवतिसंख्यका एव मास:। मासस्तु द्विधा। सौरश्चान्द्रश्च। तत्रापि सौरस्तु मेषसंक्रान्तेरारभ्य मीनसंक्रान्तिपर्य्यन्तं सौरो मास:। मासस्तु द्विधा। चान्द्रश्च सौरश्च। तत्र शुक्लप्रतिपदमारभ्य पौर्णमासीपर्य्यन्तं चान्द्रो मास:। अमान्तस्तु प्रतिपदमारभ्यामावास्यापर्य्यन्तं सौरो मास:। द्वादशमासैर्वत्सर:। स च द्विविध:। सौरश्चान्द्रश्च। तत्र मेषसंक्रान्तेरारभ्य मीनसंक्रान्तिपर्य्यन्तं सौरो वत्सर:। शुक्लप्रतिपदमारभ्य अमावास्यापर्य्यन्तं चान्द्रो वत्सर:। तत्र सौरो वत्सरो दैवे अहोरात्रे। उत्तरायणं देवानामह:। दक्षिणायनन्तु रात्रि:। मानुषाणां यत्परिमाणमहोरात्रं तदैवं युगं ज्ञेयम्। तच्च दैवयुगसहस्रेण ब्रह्मणोऽह: दैवयुगसहस्रेण च रात्रिर्भवति। तथा च मनौ। १। ७१। टीकायां कुल्लूकभट्ट:।
"विष्णुपुराणे मानुषचतुर्युगसप्तत्या ब्रह्मा-
हीर्णनाम्नामुषचतुर्युगेनैव दिव्ययुगानुगमनात्।
तथा च विष्णुपुराणम्।
"क्षतं त्रेतादापरञ्च कलिश्चेति चतुर्युगम्।
प्रोच्यते तत्सहस्रन्तु ब्रह्मणो दिवसो मुने!॥"
तथा च मनु:। १। ६८-७३।
"ब्राह्मस्य तु क्षपाह्नस्य यत्प्रमाणं समासत:।
एकैकशो युगानान्तु क्रमशस्तन्निबोधत॥
चत्वार्याहु: सहस्राणि वर्षाणान्तु कृतं युगम्।
तस्य तावच्छती सन्ध्या सन्ध्यांशश्च तथाविध:॥
इतरेषु ससन्ध्येषु ससन्ध्यांशेषु च त्रिषु।
एकापायेन वर्त्तन्ते सहस्राणि शतानि च॥
यदेतत्परिसंख्यातमादावेव चतुर्युगम्।
एतद्द्वादशसाहस्रं देवानां युगमुच्यते॥
दैविकानां युगानान्तु सहस्रं परिसंख्यया।
ब्राह्ममेकमहर्ज्ञेयं तावती रात्रिरेव च॥
तद्वै युगसहस्रान्तं ब्राह्मं पुण्यमहर्विदु:।
रात्रिञ्च तावतीमेव तेऽहोरात्रविदो जना:॥"
"यदेतदिति। एतस्य श्लोकस्यादौ यदेतन्मानुषं चतुर्युगं परिगणितं एतद्दैवानां युगमुच्यते। चतुर्युगशब्देन सन्ध्यासन्ध्यांशयोरप्राप्तिशङ्कायामाह एतद्द्वादशसाहसमिति स्पष्टार्थम्। चतु-र्युगैरेव द्वादशसहसंख्यैर्दिव्यं युगमिति तु मेधातिथेर्मतम्। मनुनानन्तरं दिव्य-युगसहस्रमेव ब्रह्मणोऽह्नत्वाभिधानात्।" इति तट्टीकायां कुल्लूकभट्ट:।)

ब्रह्मराक्षस:, पुं. (आदौ ब्रह्मा ब्राह्मण: पश्चात् राक्षस: कुकर्म्मभि: राक्षसयोनिं गत:।) भूतविशेष:। यथा,—
"संयोगं पतितैर्गत्वा परस्त्रैव च योषितम्।
व्यपकृत्य च विप्रस्वं भवति ब्रह्मराक्षस:॥"
इति मानवे। १२। ६०॥
(स च यज्ञविनाशकारी भूतयोनिगतत्वात्। यथा, रामायणे। १। ११। २१।
"अध्वरोपायुषमयं यज्ञो नाशकृतेन मही।
नचैवाश्रद्दधानेन न चाल्पद्रविणेन च।
छिद्रं हि दृष्ट्वायतस्तत्र यज्ञघ्ना ब्रह्मराक्षसा:।")
महादेवस्य गणविशेष:। यथा,—
"डाकिनीजातुधानांश्च वेतालान् सविनायकान्।
भूतमातृपिशाचांश्च कुष्माण्डान् ब्रह्मराक्ष-
सान्॥"
इति श्रीभागवते वाराहे ६३ अध्याय:॥
पारिभाषिकब्रह्मराक्षसा:। यथा,—
"मद्य: स्त्री कक्षपश्चैव वार्द्धुषी वधिरश्च य:।
मद्दोनार्थं न मन्यन्ते पञ्चैते ब्रह्मराक्षसा:॥"
इति व्यवहारप्रदीप:॥

ब्रह्मरीति:, स्त्री, (ब्रह्मणो रीति:।) पित्तलभेद:। यथा, हेमचन्द्र:। ४। १२८॥
"पित्तलन्त्वारकूटं स्यादारोरीतिश्च कथ्यते।
राजरीतिर्ब्रह्मरीति: कपिला पिङ्गलापि च॥"
इति वैद्यकरत्नमालायाम्।
ब्रह्मणो ब्राह्मणस्य रीतिश्च॥)

ब्रह्मर्षि:, पुं, (ब्रह्मा ब्राह्मण: ऋषि:। यद्वा, ब्रह्म वेदं परब्रह्म वा ऋषति वेत्ति इति। ऋषि-गतौ इत्यस्मात् इन्। यद्वा, ब्रह्मणि ऋषिरिव निष्ठादिमुनिगण:। इति हेमचन्द्र:॥ (यथा, रामायणे। १। ६३। २०—२१।
"ब्रह्मणस्तु वच: श्रुत्वा विश्वामित्रस्तपोधन:।
प्राञ्जलि: प्रणतो भूत्वा प्रत्युवाच पितामहम्॥
ब्रह्मर्षिशब्दमतुलं स्वार्जितै: कर्म्मभि: शुभै:।
यदि मे भगवान्नाह ततोऽहं विजितेन्द्रिय:॥"
तथा च महाभारते। १३। १६। ३७।
"ततो वैश्रवणोऽभ्येत्य अष्टावक्रमनिन्दितम्।
विधिवत् कुशलं पृष्ट्वा ततो ब्रह्मर्षिमब्रवीत्॥")

ब्रह्मर्षिदेश:, पुं, (ब्रह्मर्षीणां देश: वासयोग्य-स्थानम्।) कुरुक्षेत्रादिदेशचतुष्टयम्। यथा,
"कुरुक्षेत्रञ्च मत्स्याश्च पाञ्चाला: शूरसेनका:
एष ब्रह्मर्षिदेशो वै ब्रह्मावर्त्तादनन्तर:।
एतद्देशप्रसूतस्य सकाशादग्रजन्मन:।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्व्वमानवा:॥
इति मानवे। २। १६-२०॥

ब्रह्मलोक:, (ब्रह्मणो लोको भुवनम्।) ब्रह्मणो भुवनम्। यथा,—
"सत्यस्तु सप्तमो लोको ध्रुवनर्भवबासिनाम्।
ब्रह्मलोक: समाख्यातो ध्रुवप्रतीघातलक्षण:॥"
इति देवीपुराणम्॥
अपि च।
"यद्गुणेन तपोलोकात् सत्यलोको विराजते।
अपुनर्मारका यत्र ब्रह्मलोको हि स स्मृत:॥"
अस्य टीका। जनलोकापेक्षयैव यद्गुणेन द्वादशको शुक्लायेन तपोलोकानन्तरं सत्य-लोक:। न तु तपोलोकात् यद्गुणेनेति मन्त-व्यम्। तथासत्याष्टचत्वारिंशत्को शुक्लाय-त्वेन प्रसक्ते तस्यावकाशाभावात्। सूर्य्यस्य-सोमयोरन्त: कोट्य: स्यु: षष्टिर्विंशतिरिति शुक्लोक्ते:। सत्यलोक एव कक्षाभेदेन ब्रह्म-विष्णुलोकात् परं वैकुण्ठलोकादि ज्ञेयम्। एवञ्च भूमेरूर्द्धं षष्टद्यधिकशतोत्तराख्ययोविंशतिकोट्यो भवन्ति। सत्यलोकादूर्द्धञ्च षष्टद्यधिकशतोनकोटि-द्वयाष्टसप्तकटाह इति ज्ञेयम्। अपुनर्मारका: पुनर्जन्मशून्या:। इति विष्णुपुराणे २अं। ७अ:। (ब्रह्मण एव लोक:। तुरीयब्रह्मस्वरूपम्। यदुक्तं शतपथब्राह्मणे। १४। ७। १। ३१।
"सर्व्वोऽस्य परमो लोक सर्व्वोऽस्य परम आनन्द
एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुप-जीवन्ति। स यो मनुष्याणां राद्ध: समृद्धो भवति। अथैषामधिपति: सर्व्वैर्मानुषैर्भो-गै: सम्पन्नतम: स मनुष्याणां परम आनन्द:। अथ ये शतं मनुष्याणामानन्दा: स एक

कर्म्मदेवानामानन्दः ये कर्म्मणा देवत्वमभिसम्पद्यन्ते अथ ये श्रुतं कर्म्मदेवानामानन्दाः। स एक आजानदेवानामानन्दो यश्च श्रोत्रियोऽवृजिनोऽकामहतः। अथ ये श्रुतं आजानदेवानामानन्दाः। स एको देवलोक आनन्दो यश्च श्रोत्रियोऽवृजिनोऽकामहतः। अथ ये श्रुतं देवलोक आनन्दाः। स एको गन्धर्वलोक आनन्दो यश्च श्रोत्रियोऽवृजिनोऽकामहतः। अथ ये श्रुतं गन्धर्वलोक आनन्दाः। स एकः प्रजापतिलोक आनन्दो यश्च श्रोत्रियोऽवृजिनोऽकामहतः। अथ ये श्रुतं प्रजापतिलोक आनन्दाः। स एको ब्रह्मलोक आनन्दो यश्च श्रोत्रियोऽवृजिनोऽकामहतः। एषः ब्रह्मलोकः सम्राट्। इति श्रुतेः यथा, महाभारते। १३। १७। १४२।

"निर्व्वाणं शाश्वतञ्चैव ब्रह्मलोकः परागतिः।")

ब्रह्मवर्च्चं, क्ली, (ब्रह्म वेदस्यास्य वर्च्चम्। "वर्च्च सुपि वक्तव्यम्।" १३। १। १०६। इति भावे यत्।) ब्रह्मणो वाक्यम्। इति स्मृतिकरणे सुग्धबोधटीकायां दुर्गादासः।

ब्रह्मवद्या, स्त्री, (ब्रह्मणा वेदेन उद्यते या। "वदः सुपि क्यप् च।" ३। १। १०६। इति कर्म्मणि यत् स्त्रियां टाप्।) कथा। इति सुग्धबोधव्याकरणे स्त्रीप्रकरणम्।

ब्रह्मवर्च्चसं, क्ली, (ब्रह्मणो वेदस्य तपसो वा वर्च्चसेव। "ब्रह्मक्षत्रियां वर्च्चसः।" ५। ४। ७८। इति क्यप्।) ब्राह्मणस्य कृताध्ययनर्द्धेः। इत्यमरः। २। ७। ३६। अस्य टीका। वेदबोधितस्याचारस्य परिपालनं कृतम्। व्रतग्रहणपूर्व्वकं गुरुमुखेन वेदाभ्यासोऽध्ययनम्। तयोर्द्धिस्तत्परिपालनतत्त्वेन उपचयो ब्रह्मवर्च्चसं स्यात्। ब्रह्मक्षत्रिराजेति यः। इति भरतः। तपःस्वाध्यायनं यच्च तेजस्तु ब्रह्मवर्च्चसम्। इति शब्दार्थः। (तथा च मनुः।४।८४। "ऋषयो दीर्घसन्ध्यत्वाद्दीर्घमायुरवाप्नुयुः। प्रज्ञां यशश्च कीर्त्तिञ्च ब्रह्मवर्च्चसमेव च।")

ब्रह्मवर्त्तः, पुं, (ब्रह्मणां ब्राह्मणानां वर्त्तः वर्त्तनं यस्मिन्।) ब्रह्मावर्त्तदेशः। इति शब्दरत्नावली। (सरस्वतीदृषद्वत्योर्देवनद्योर्मध्यगतोयं प्रदेशः।)

ब्रह्मवर्द्धनं, क्ली, (ब्रह्मवस्तुपसो वर्द्धनं यस्मात्।) ताम्रम्। इति हेमचन्द्रः। ४। १०६।

ब्रह्मवादः, पुं, (ब्रह्मणो वेदस्य वादो वदनं पठनमिति यावत्।) वेदपाठः। तत्पर्य्यायः। श्रुताध्ययनम् २। इति शब्दरत्नावली। २२१।

(यथा भागवते। ४। २२। ५२।

"दृष्ट्वातिरंहसवादे आत्मवत्तां सतीं हरिः।")

ब्रह्मणो ब्रह्मनिर्णयस्य वादः कथनमिति विग्रहे ब्रह्माधिकारेण तत्त्वनिर्णयवाचकम्। ब्रह्मवादी वेदपाठोऽस्यास्तीति ब्रह्मवादविशिष्टे, त्रि। यथा, हरिवंशे। ८१। १६।

"ब्राह्मणैर्ब्रह्मवादैश्च पुराणोयं हि गीयते।")

ब्रह्मवादी, [न्] पुं, (ब्रह्मवादो वेदपाठोऽस्यास्तीति ब्रह्मवाद+विनि।) वेदवक्ता। तत्पर्य्यायः। वेदान्ती २। इति जटाधरः। यथा, गीतायाम्। १७। २४।

"तस्मादोमित्युदाहृत्य यज्ञदानतपःक्रियाः।
प्रवर्त्तन्ते विधानोक्ताः सततं ब्रह्मवादिनाम्।")

ब्रह्मवादिनी, स्त्री, गायत्री। यथा,—

"आयाहि वरदे देवि! त्र्यक्षरे ब्रह्मवादिनि!।"
इत्यादि गायत्र्या आवाहनम्।

ब्रह्मविद्या, स्त्री, (ब्रह्मणो ब्रह्मविषयिणी या विद्या।) ब्रह्मज्ञानम्। यथा,—

"न्यायागतधनः शान्तो ब्रह्मविद्यापरायणः।
स्वधर्म्मपालको नित्यं सोऽन्तकालाय कल्पते।"
इति कौर्म्मे ३ अध्यायः।
(दुर्गा। यथा, महाभारते। ६। २२। २७।
"त्वं ब्रह्मविद्या विद्यानां महानिद्रा च देहिनाम्।
स्कन्दमातर्भगवति! दुर्गे कान्तारवासिनि!।")

ब्रह्मविन्दुः, पुं, (ब्रह्मणो विन्दुः।) वेदपाठे सुखनिर्गतविन्दुः। इति भरतः।

ब्रह्मवृक्षः, पुं, (तदाख्यया प्रसिद्धो वृक्षः। यद्वा, ब्रह्मणे वेदकर्म्मार्थं यो वृक्षः।) पलाशवृक्षः। इति हलायुधः। उडुम्बरः। इति रत्नमाला।

ब्रह्मवृत्तिः, स्त्री, (ब्रह्मणो ब्राह्मणस्य वृत्तिर्जीवनोपायः।) ब्राह्मणस्य जीवनोपायः। यथा,—

"खदत्तां परदत्तां वा ब्रह्मवृत्तिं हरेत यः।
षष्टिवर्षसहस्राणि विष्ठायां जायते कृमिः।"
इति श्रीभागवतम्।

ब्रह्मवेदः, पुं, (ब्रह्मणो वेदः ज्ञानम्।) ब्रह्मज्ञानम्। यथा,—

"प्राणायामः परं ब्रह्म परमात्मा चतुर्मुखः।
प्राणायामः परं विष्णोर्ब्रह्मवेदस्वरूपकम्।"
इति गीताचारः।

ब्रह्मवेदिः, स्त्री, (ब्रह्मणो वेदिरिव।) देशविशेषः। यथा,—

"ब्रह्मवेदिः कुरुक्षेत्रं पञ्चरामह्रदान्तरम्।"
इति हेमचन्द्रः। ४। १६।

ब्रह्मवैवर्त्तं, क्ली, (विवृतिरेव वैवर्त्तम्। स्वार्थे अण्। ब्रह्मणो वैवर्त्तं विवर्त्तोयत्र विवृतिर्यत्र।) यथा च ब्रह्मवैवर्त्ते ब्रह्मखण्डे। १। ५८।

"विवृतं ब्रह्म कार्त्स्न्येन शक्तेश्च यत्र शौनक!।
ब्रह्मवैवर्त्तकं तेन प्रवदन्ति पुराविदः।")

अष्टादशमहापुराणान्तर्गतदशमपुराणम्। यथा,

"अष्टादशसहस्रस्य ब्रह्मवैवर्त्तमीरितम्।
सर्व्वेषाञ्च पुराणानां सारमेव विदुर्बुधाः।"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १६२ अः।

ब्रह्मशल्यः, पुं, (ब्रह्मेव शल्यं शल्यमयभागो यस्य। अतिरूपायतलाघवात्।) सोमवल्कः। इति रत्नमाला। बाबला इति भाषा।

ब्रह्मशासनं, क्ली, (ब्रह्मणः शासनं निर्णयो यत्रदेशो वा यस्मिन्।) ब्रह्मविचारस्थानम्। तत्पर्य्यायः। धर्म्मकीलकः २। इति शब्दरत्नावली। ब्रह्मण आज्ञा। नवद्वीपस्य पूर्व्वदक्षिणकोणे गङ्गायाः श्यामविशेषे, पुं। (ब्रह्मणो विधातुः शासनम्। वेदः। प्रतिपादितमेतत् दृष्टान्तदीपे ४ पादे १०१ अधिकरणे।)

ब्रह्मसंहिता, स्त्री, (ब्रह्मणः संहिता।) भगवत्सिद्धान्तसंग्रहग्रन्थविशेषः। यथा,—

"अध्यायशतसम्पन्ना भगवद्ब्रह्मसंहिता।
कृष्णोपनिषदां सारैः संहिता ब्रह्मयोदिता।"
इति ब्रह्मसंहितायां भगवत्सिद्धान्तसंग्रहे मूलरूपाख्यपञ्चमाध्यायस्य श्रीवंशीवल्लभकृतटीका।

ब्रह्मसम्भवः, पुं, द्विषष्ठ्यामकल्पभेदविशेषः। इति हेमचन्द्रः।

ब्रह्मसर्षपः, पुं, (ब्रह्म वृहान् सर्षपः।) सर्षपविशेषः। तत्पर्य्यायः। राजिकः २ राजिका ३। इति चिकित्सितशेषः।

ब्रह्मसायुज्यं, क्ली, (युनक्तीति युजः। "युजपधेति।" ३। १। १६५। कः। ततः "तेन सदृशेति।" २। २। २८। इति बहुव्रीहिः। "बोपसर्जनस्य।" ६। ३। ८२। इति सदृशस्य सः। ततः सयुजस्य भावः सायुज्यं। यद्वा, योजयतीति युक् सम्पदादित्वात् क्विप्। ततो बहुव्रीहितः सयुजो भावः। ततः ब्रह्मणः सायुज्यं योजकत्वम्।) ब्रह्मणो भावः। तत्पर्य्यायः। ब्रह्मभूयम् २ ब्रह्मत्वम् ३। इत्यमरः। २। ७। ५२। ब्रह्मसायुज्यम् ४। इति शब्दरत्नावली। (सुग्धबोधमतेऽस्य श्रुतपक्षिदेशा।) ब्रह्मणो भवनं तादृश्यं ब्रह्मभूयं ब्रह्मणः क्यविति क्यप्। त्वतौ भावे इति त्वे ब्रह्मत्वं। योजनं युक् तत्पूर्व्वकः सयुक् तद्भावः सायुज्यं ततो ब्रह्मणा विग्रहः। इति भरतः।

ब्रह्मसावर्णिः, पुं, (ब्रह्मपुत्रो सावर्णिः।) दशम मनुः। अस्मिन् मन्वन्तरे विष्वक्सेनोऽवतारः। शम्भुरिन्द्रः। सुरसेनविरुद्धाद्याः देवाः। ऋचिरादयाः सप्तर्षयः। भूरिषेणाद्या मनुपुत्रा भविष्यन्ति। इति श्रीभागवतम्।८।१३।२१-२२। अन्यच्च।

"मन्वन्तरे तु दशमे ब्रह्मपुत्रस्य धीमतः।
सुरसेना विरुद्धाश्च द्विप्रकाराश्च देवताः।
ऋतसंज्ञा हि ते देवा भविष्यन्ति च वै मनौ।
तत्पुत्राणां शतं भावि तद्देवाना तथा भवेत्।
प्राप्तिरिन्द्रस्तदा भावी सर्व्वैरिन्द्रगुणैर्युतः।
सप्तर्षींस्तु निबोध त्वं ये भविष्यन्ति वै तदा।
ऋचीमो ऋग्निरेविद्यांश्च सुक्रतो सप्त एव च।
नाभागोऽप्रतिमश्चैव वाग्विष्टश्चैव सप्तमः।
तत्रैवोक्तौमौनाश्च भूरिषेणः सुवीर्य्यवान्।
ऋतानीकोऽथ वृषभो जनमित्रो जयद्रथः।
भूरिद्युम्नः सुवर्णाश्च तस्येते तनया मनोः।"
इति ब्रह्मसावर्णिकम्।
इति मार्कण्डेयपुराणे ८४। ११-१९।

ब्रह्मन्, पुं, प्रभुः। इत्यमरः। १। १। २८। कामदेवः। इत्यमरमाला। अनिरुद्धपत्नौ ब्रह्माणं सृतवान् ब्रह्मणः। (सृजलप्रभवे। "अन्येभ्योऽपीति।" ३। २। १७८। क्विप्।) कल्पान्तरे किलानिरुद्धस्तूर्णभंगवतो ब्रह्मा जातः। तथा च ब्रह्मपुराणम्। अनिरुद्धात्ततो ब्रह्मा तन्नाभिकमलोद्भवः। कामदेवपत्नौ। ब्रह्म तपः सुवति प्रेरयति ब्रह्मणः। ब्रह्म प्रेरणे ("अन्येभ्योऽपि दृश्यते।" ३।२।१७८। इति) क्विप्। इति भरतः। (कामेनैव सर्व्वतपःसु प्रवर्त्तनादस्य तथात्वम्।)

ब्रह्मसूत्रं, क्ली, (ब्रह्मणि वेदस्य ब्रह्मकाण्डे उपनयनसमये इत्यर्थः। धृतं यत् सूत्रम्।) यज्ञसूत्रम्। तत्पर्य्यायः। पवित्रम् २ यज्ञोपवीतम् ३ द्विजायनी ४। इति त्रिकाण्डशेषः। उपवीतम् ५ सावित्रम् ६ सावित्रीसूत्रम् ७। इति शब्दरत्नावली। (यथा भागवते। ८। १८। १४।

"तस्योपनीयमानस्य सावित्रीं सविताब्रवीत्।
दधतीति ब्रह्मसूत्रं मेखलां कश्यपोऽददात्।"

तटस्थलक्षणपरं उपनिषद्वाक्यम्। ब्रह्मनिर्गमसूत्रम्। यथा गीतायाम्। १३। ४।

"ऋषिभिर्बहुधागीतं छन्दोभिर्विविधैः पृथक्।
ब्रह्मसूत्रपदैश्चैव हेतुमद्भिर्विनिश्चितैः।"

अस्य व्याख्याने श्रीधरस्वामिना यदुक्तं तदुच्यते। "ऋषिभिर्वसिष्ठादिभिर्योगशास्त्रेषु ध्यानधारणादिविषयत्वेन वैराग्यादिस्वरूपेण बहुधा गीतं निरूपितम्। विविधैर्विच्छिन्नैर्नित्यनैमित्तिककाम्यकर्म्मादिविषयैश्छन्दोभिर्वेदैर्नानापूजनीयदेवतारूपेण गीतं ब्रह्मणः सूत्रैः पदैश्च ब्रह्म सूत्र्यते सूच्यते एभिरिति ब्रह्मसूत्राणि यतो वा इमानि भूतानि जायन्त इत्यादीनि तटस्थलक्षणपराणि सर्व्वं ज्ञानमनन्तं ब्रह्मेत्यादीनि तैत्तिरीयेषु बहुधा गीतम्। किञ्च हेतुमद्भिः सदेव सोम्येदमग्र आसीत् कथमसतः सज्जायेत इति। को ह्येवान्यात् कः प्राण्यात् यदेष आकाश आनन्दो न स्यात् एष ह्येवानन्दयातीत्यादि युक्तिमद्भिः। अन्यात् अपानचेष्टां वा कः कुर्य्यात् प्राण्यात् प्राणव्यापारं वा कः कुर्य्यादिति श्रुतिपदैश्चार्थैः। विनिश्चितैरुपक्रमोपसंहारैकवाक्यतया अवसन्निश्चार्थप्रतिपादकैरित्यर्थः। तदेवमेतैर्विसरैरुक्तं दुःसंग्रहं संक्षेपतस्तुभ्यं कथयिष्यामि तत् शृण्वित्यर्थः। यद्वा "अथातो ब्रह्मजिज्ञासा" इत्यादीनि ब्रह्मशब्दानि गृह्यन्ते तान्येव ब्रह्म पदति निर्गच्छति एभिरिति पदानि तैर्हेतुमद्भिरीश्वरेणैव ब्रह्मं आनन्दमयोऽभ्यासादित्यादि युक्तिमद्भिर्विनिश्चितार्थैः।)

ब्रह्मसुतः, पुं, (ब्रह्मणः सुतः पुत्रः।) ब्रह्मपुत्रवंशोद्भवराजविशेषः। तत्पर्य्यायः। ब्रह्मदत्तः २। इति हेमचन्द्रः। ३। ३२८। (ब्रह्मपुत्रे वशिष्ठादौ च।)

ब्रह्मसूत्रं, क्ली, (ब्रह्मणो ब्राह्मणस्य सूत्रमिव सूत्रम्। तस्य धरत्वे दोषो यथा,

"ब्रह्मस्वं वा गुरुस्वं वा देवस्वं वापि यो हरेत्।
स क्षतघ्न इति ज्ञेयो महापापी च भारते॥
यावद्दोषं वसेत् सोऽपि यावदिन्द्राश्चतुर्दश।
ततो भवेत् सुरापीती ततः शूद्रस्ततः शुचिः॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ४६ अध्यायः॥

ब्रह्महत्या, स्त्री, ब्रह्मणो हननम्। (हनस्य च।३। १। १०८। इति भावे क्यप् तकारोऽन्तादेशश्च। स्त्रीत्वं लोकात्।) ब्राह्मणवधः। यथा,

"एकदा च गुरोः कोपात् प्रकृतेरवहेलनात्।
ब्रह्महत्या दयस्तो बभूव हतचेतसः॥"

तस्या रूपं यथा,—

"रक्तवस्त्रपरीधाना दृढाङ्गीवेशधारिणी।
सप्ततालप्रमाणा वा शुष्ककण्ठौष्ठतालुका॥
ईषत्प्रमाणदशना महाभीतस्य कातरम्।
धावन्तं परिधावन्ती बलिष्ठा हतचेतनम्॥
खड्गहस्ता हताशं तं श्यामीना च मुष्टिकम्॥
इन्द्रो दृष्ट्वा च तां घोरां सारं सारं गुरोः पदम्॥
विवेश मानससरो ध्यानलब्धश्चतः।
तच्च गन्तुं न शक्ता सा ब्रह्मणः शापकारणात्॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे। ४७ अः॥

अतिदेशिकब्रह्महत्या यथा,—

यम उवाच।

"श्रीकृष्णे च तथा चार्य्यां दृश्यायां प्रकृतौ यथा।
शिवे च शिवलिङ्गे वा सूर्य्ये सूर्य्यमणौ यथा॥
गणेशे वा तदर्च्चे यामेवं सर्व्वत्र सुन्दरि!।
यः करोति भेदबुद्धिं ब्रह्महत्यां लभेत्तु सः॥
स्वगुरौ स्वेष्टदेवेषु जन्मदातरि मातरि।
करोति भेदबुद्धिं यो ब्रह्महत्यां लभेत्तु सः॥
वैष्णवैश्चान्यभक्तेषु ब्राह्मणेष्वितरेषु च।
करोति समतां यो हि ब्रह्महत्यां लभेत्तु सः॥
हरेः पादोदकेष्वन्यदेवपादोदकेषु तथा।
करोति समतां यो हि ब्रह्महत्यां लभेत्तु सः॥
यो नरो विष्णुनैवेद्ये चान्यनैवेद्यके तथा।
करोति समतां यो हि ब्रह्महत्यां लभेत्तु सः॥
सर्व्वेश्वरेश्वरे कृष्णे सर्व्वकारणकारणे।
सर्व्वाद्ये सर्व्वदेवानां सेव्ये सर्व्वात्मनात्मनि॥
मायामानुषरूपे वाप्येक एव हि निर्गुणे।
करोत्यन्येन समतां ब्रह्महत्यां लभेत्तु सः॥
पितृदेवार्चनं श्रौतात्परं वेदविनिर्म्मितम्।
यः करोति निषेधञ्च ब्रह्महत्यां स विन्दति॥
ये निन्दन्ति हृषीकेशं तन्नामोपासकं तथा।
पवित्राणां पवित्रञ्च ब्रह्महत्यां लभन्ति ते॥
ये निन्दन्ति विष्णुमायां विष्णुभक्तिप्रदां सतीम्।
सर्व्वशक्तिस्वरूपाञ्च प्रकृतिं सर्व्वमातरम्॥
सर्व्वदेवीस्वरूपाञ्च सर्व्वाद्यां सर्व्ववन्दिताम्।
सर्व्वकारणरूपाञ्च ब्रह्महत्यां लभन्ति ते॥
हयगव्याष्टमीं रामनवमीं पुण्यदां पराम्।
शिवरात्रिञ्चतुर्दशीं वारं रवेश्चतुर्थीं॥
पञ्च पर्व्वाणि पुण्यानि ये न कुर्व्वन्ति मानवाः।
लभन्ते ब्रह्महत्यां ते चाण्डालाधिकपापिनः॥
चन्द्रवाच्यां भूसनयं जले शौचादिकर्म्म ये।
कुर्व्वन्ति भारते वर्षे ब्रह्महत्यां लभन्ति ते॥
गुरुञ्च मातरं तातं साध्वीं भार्य्यां सुतं सुताम्।
अनाथां यो न पुष्णाति ब्रह्महत्यां लभेत्तु सः॥
विवादी यस्य न भवेत् न पश्यति सुतन्तु यः।
हरिभक्तिविहीनो यो ब्रह्महत्यां लभेत्तु सः॥
हरेर्नैवेद्यभोजी नित्यं विष्णुं न पूजयेत्।
पुण्यं पार्थिवलिङ्गं वा ब्रह्महत्यां लभेत्तु सः॥
अवीरात्रञ्च योऽश्नीयात् योनिजीवी च ब्राह्मणः।
यज्ञिवन्ध्याविहीनश्च ब्रह्महत्यां लभेत्तु सः॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे। २०। १४४-१५६॥

तथा च मनुः। ११। ५४-५५।

"ब्रह्महत्या सुरापानं स्तेयं गुर्व्वङ्गनागमः।
महान्ति पातकान्याहुः संसर्गश्चापि तैः सह॥
असृतञ्च समुत्कर्षे राजगामि च पैशुनम्।
गुरोरालीकनिर्ब्बन्धः समानि ब्रह्महत्यया॥"

तथा च चिन्तामणिधृतदेवीभागवतवचनम्।

"निद्राभङ्गः कषायश्चेदो दम्भशो प्रीतिभेदनम्।
शिशुमारविभेदश्च ब्रह्महत्या समं स्मृतम्॥")

ब्रह्महत्याप्रायश्चित्तं प्रायश्चित्तशब्दे महापातकप्रायश्चित्तव्यवस्थायामादौ द्रष्टव्यम्॥

ब्रह्महन्, [न्] पुं, (ब्राह्मणं ब्राह्मणं हतवान्। ब्रह्म+हन्+"ब्रह्मभ्रूणवृत्रेषु क्विप्।" ३। २। ८७। इति क्विप्।) ब्रह्मणः ब्राह्मणवधकर्त्ता। यथा,—

"ब्रह्महा द्वादशाब्दानि कुष्ठी भूत्वा वने वसेत्।
भिक्षाण्डालदिसुद्धार्थं भूत्वा शवशिरोध्वजम्॥
भिक्षाशी विचरेद्ग्रामं वर्ज्जयेद्यदि न जीवति।
ब्रह्महत्यापनोदाय मितभुक् संयतेन्द्रियः॥
न सर्व्वस्वं देवदिदे ब्राह्मणायोपपादयेत्।
धनं वा जीवनायालं गृहं वा सपरिच्छदम्॥"

इति प्रायश्चित्तविवेकः॥

तस्य नरकभोगान्ते जन्मानि यथा,—

"षण्ढीकरखरोष्ट्राणां गोऽजाविध्वगपक्षिणाम्।
चण्डालपुक्कशानाञ्च ब्रह्महा योनिमृच्छति॥"

इति मानवे। १२। ५५॥

ब्रह्महविः, [स्] क्ली, (ब्रह्मणे हविरर्य्यमाणमाज्यम्।) अर्य्यमाणं हविरपि ब्रह्मणे। यथा,—

"ब्रह्मार्पणं ब्रह्महविर्ब्रह्माग्नौ ब्रह्मणा हुतम्।
ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्म्मसमाधिना॥"

इति श्रीभगवद्गीतायाम्। ४। २४॥

ब्रह्महुतं, क्ली, (ब्रह्मणि ब्राह्मणे हुतम् दत्तम्। ब्रह्मपदमत्र उपलक्षणं तेन भूमावपि बोध्यम्।) पञ्चमहायज्ञान्तर्गतयज्ञविशेषः। स तु वृद्धः। अतिथिपूजनरूपः। इति जटाधरः॥

ब्रह्मा, [न्] पुं, (बृंहति वर्द्धते यः। बृहि वृद्धौ+"बृहेर्नोऽच्।" उणा०। ४। १४५। मनिन् नकारस्याकारश्च।) ऋत्विग्भेदः। तस्य सामगविधिर्यथा। ततः प्राङ्मुखमासीनं वसिष्ठं तूष्णीमग्नौ हुत्वा ब्रह्मत्वमागं कुर्य्यात्। समाग्रपक्षाग्रतुण्डपुच्छरक्षितं दर्भचटाई दर्भवटुं दर्भमुष्टिं दर्भवटुं दर्भासनं वा दक्ष-

सुत्तरासङ्गं वा कमण्डलुं वा ब्रह्मत्वेन परिकल्प्य धारासहितसुदकपात्रं गृहीत्वा अर्घेशानतः प्रभृति दक्षिणावर्त्तेन दक्षिणदेशं गत्वा अरत्निमात्रान्तरिते देशे पूर्वाभिमुखीं वारिधारां दत्त्वा तदुपरि प्रागग्रान् कुशानास्तीर्य्य पश्चिमाभिमुखोऽनुपविश्यस्थितिष्ठेत्। वामहस्तानामिकाङ्गुष्ठाभ्यामास्तीर्णकुशमेकं गृहीत्वा प्रजापतिर्ऋषिरनुष्टुप् छन्दोऽग्निर्देवता ब्रह्मनिरसने विनियोगः। ॐ निरस्तः परावसुरित्यनेन दक्षिणपश्चिमकोणे प्रक्षिपेत्। ततः अप उपस्पृश्य दक्षिणपादेन सव्यपादमवष्टभ्य उत्तराभिमुखीभूय आस्तीर्णकुशानद्भिरभ्युक्ष्य प्रजापतिर्ऋषिरनुष्टुप् छन्दोऽग्निर्देवता ब्रह्मोपवेशने विनियोगः ॐ आवसोः सदने सीद इति। ब्राह्मणब्रह्मपक्षे तु ब्राह्मण एव सीदामीति ब्रूयात् अनेन कुशोपरि पूर्वाग्रं कुशब्राह्मणं ब्राह्मणब्रह्मपक्षे तु उत्तराभिमुखं स्थापयित्वा तदुपरि कुशान् दत्त्वा अद्भिरभ्युक्ष्य कुशकुसुमैरर्चयेत्। ततस्तेनैव पथा प्रत्यावृत्य आसनं पूर्वाभिमुख उपविशो भूमिजपादिकं कुर्य्यात्। यदि तु ब्रह्मत्वेनारोपितो ब्रह्मा अयज्ञीयवाचं वदेत् तदा इमं मन्त्रं जपेत्। प्रजापतिर्ऋषिर्गायत्रीच्छन्दो विष्णुर्देवता अयज्ञीयवाग्वचननिमित्तजपे विनियोगः। ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदं समूढमस्य पांसुले इति जपेत्। कुशादिब्रह्मपक्षे तु कर्म्मकर्त्तुरेव कृताकृतावेक्षणादिब्रह्मकार्य्यकर्त्तृत्वादयज्ञीयवाग्वचननिमित्तंस एव जपेत्। इति भवदेवभट्टः॥ * ॥

योगभेदः। स तु विष्कम्भादिसप्तविंशतियोगान्तर्गतपञ्चविंशयोगः। तत्र जातफलम्।

"नानाशास्त्राभ्याससंनीतकालो
वर्णाचारैः संयुतश्चारुकीर्त्तिः।
प्राज्ञो दान्तो जायते च शुक्लकर्म्मा
सूतौ यस्य ब्रह्मयोगप्रयोगः॥"

इति कोष्ठीप्रदीपः॥

विप्रः। इति मेदिनी॥ अर्हदुपासकविशेषः। इति हेमचन्द्रः॥ सृष्टिकर्त्तृदेवताविशेषः। ब्रूंहति प्रजा यः। ततप्रत्ययः। आत्मभूः २ हिरण्येष्ठः ३ परमेष्ठी ४ पितामहः ५ हिरण्यगर्भः ६ लोकेशः ७ स्वयम्भूः ८ चतुरानन ९ धाता १० अब्जयोनिः ११ द्रुहिणः १२ विरिञ्चिः १३ कमलासनः १४ स्रष्टा १५ प्रजापतिः १६ वेधाः १७ विधाता १८ विश्वसृक् १९ विधिः २०। इत्यमरः। १।१।१६-१७॥ द्रुहणः २१ विरिञ्चः २२ स्वयम्भुः ४३ पद्मयोनिः २४ पद्मासनः २५ विष्वङ्निधिः २६। इति भरतः॥ देवदेवः २७ पद्मगर्भः २८ गुणसागरः २९ वेदगर्भः ३० चतुरेताः ३१ सभूः ३२ सत्यारामः ३३ सुधापर्णो ३४ ऋषाङ्गेन ३५ स्वसर्पणः ३६ लोकनाथः ३७ मरीचीर्म्मः ३८ सरोषी ३९ मञ्जुवाग्ः ४० नाभिजन्मा ४१ चतुरूपः ४२ सटाधरः ४३ मनुशतरूपाः ४४ कलजः ४५ प्रभुः ४६ चिन्तामणिः ४७ पद्मयोनिः ४८ पुराणगः ४९ अष्टकर्णः ५० हंसरथः ५१ सर्व्वकर्त्ता ५२ चतुर्मुखः ५३। इति शब्दरत्नावली॥ कः ५४। इत्येकाक्षरकोषः॥ व्याः ५५ शतपत्रनिवासः ५६ स्वायम्भुवमनुपिता ५७। इति कविकल्पलता॥ मः ५८। इति प्रणवव्याख्या॥ (नाभिजन्मा ५९। अजजः ६०। पूर्व्वः ६१। निधनः ६२। कमलोद्भवः ६३। सदानन्दः ६४। रजोमूर्त्तिः ६५। सत्यकः ६६। हंसवाहनः ६७। इति कस्मिंश्चिदमरकोषे दृश्यते।१।१।१७॥)

तस्य स्वरूपं यथा,—

मार्कण्डेय उवाच।

"ततो ब्रह्माण्डसंस्थानं दर्शयामास शम्भवे।
वह्नये तोयराशिस्थं ब्रह्माण्डञ्च यथा पुरा॥
तन्मध्ये पद्मगर्भाभं ब्रह्माणं जगतः पतिम्।
ज्योतीरूपं प्रकाशार्थं रूपार्थञ्च पृथग्गतम्॥
शरीरिणं स ददृशे ब्रह्माण्डान्तर्गतं मुहुः।
चतुर्भुजं प्रकाशन्तं ज्योतिभिः कमलासनम्॥
तत्रैव च त्रिधाभूतं वपुर्ब्रह्मेशविष्णुकम्।
ऊर्द्धमध्यान्तमार्गेषु ब्रह्मविष्णुशिवात्मिकान्॥
अधोऽर्द्धभागो वपुषो ब्रह्मत्वमगमत्तथा।
मध्यो यथा विष्णुभूतां ददर्शाग्न्यस्य शम्भुताम्॥
एकमेव शरीरन्तु त्रिधाभूतं मुहुर्मुहुः।
हरो ददर्श स्वे गर्भे तथा सर्व्वमिदं जगत्॥
कदाचिद्वैष्णवं कायं ब्राह्मे काये स्वयं व्रजेत्।
ब्राह्मं तथा वैष्णवे च शाम्भवे वैष्णवं तथा॥
शाम्भवं वैष्णवे काये ब्राह्मे चाप्यथ शाम्भवम्।
गच्छन्तं लीनतां शम्भुरेकताञ्च मुहुर्मुहुः॥
ददर्श वामदेवोऽपि भिन्नं चाप्यथ गतम्।
परमात्मनि गच्छन्तं लीनतां तच्च पुंस यत्॥"

इति कालिकापुराणे १४ अध्यायः॥ * ॥

तस्य पूजाविधिर्यथा।

"शृणु राजन्नवहितो ब्रह्मणः पूजनक्रमम्॥
ब्रह्मबीजं पुरा प्रोक्तं यन्मन्त्रं पूर्व्वतश्चरेत्।
तेनैव तन्तु संपूज्य परं निर्व्वाणमाप्नुयात्॥
एतस्य चाङ्गमन्त्रन्तु यथा भर्गेण भाषितम्।
वेतालभैरवाद्यांस्तु रूपञ्च शृणु भूमिप!॥
तस्य मन्त्रोद्धारो यथा,—
"प्रणवस्तदीयञ्च वह्निञ्च शेषस्वरसमन्वितः।
चन्द्रबिन्दुसमायुक्तो ब्रह्ममन्त्रः प्रकीर्त्तितः॥
अनेनैव तु मन्त्रेण ब्रह्माणं यः प्रपूजयेत्।
स कामानिष्टं संप्राप्य ब्रह्मलोके प्रमोदते॥"

तस्य ध्यानं यथा,—

"ब्रह्मा कमण्डलुधरश्चतुर्वक्त्रश्चतुर्भुजः।
कदाचिद्रक्तकमले हंसारूढः कदाचन॥
वर्णेन रक्तगौराङ्गः प्रांशुस्तुङ्गाङ्ग उन्नतः।
कमण्डलुवामकरे स्रुचो हस्ते तु दक्षिणे॥
दक्षिणाधस्रुचा माला वामाधश्च तथा स्रुवः।
व्याख्यस्रजो वामपार्श्वे वेदाः सर्व्वेऽग्रतः स्थिताः॥
सावित्री वामपार्श्वस्था दक्षिणस्था सरस्वती।
सर्व्वे च ऋषयो ह्यग्रे कुर्य्युर्देवस्य चिन्तनम्॥
चतुष्कोणं चतुर्द्वारमष्टपत्रसमन्वितम्।
चतुष्कोणे सङ्गतन्तु शुक्लमण्डलसुकुसुदैः॥
सम्मार्জ্জनादिकं सर्व्वं यागान्याः प्रतिपत्तयः।
यागा उत्तरतन्त्रोक्ता योगपीठेऽङ्गकादिका।"

तस्य पूजाक्रमो गायत्री च यथा,—

"आधारशक्तिप्रमुखांस्तथा सर्व्वान् पूजयेत्।
अष्टपत्रेषु पद्मस्याष्टौ दिक्पालान् प्रपूजयेत्॥
पद्मासनाय विद्महे हंसारूढ़ाय धीमहि।
तन्नो ब्रह्मन्निति पदं ततश्चानु प्रचोदयात्॥
एषा तु ब्रह्मगायत्री पूजयेदनया विधिम्।
निर्म्माल्यधारी चैतस्य सनत्कुमार उच्यते॥
उपचाराः पूर्व्ववत्तु नैवेद्यञ्चनरञ्जितः।
रक्तकौषेयवस्त्रन्तु ब्रह्मप्रीतिकरं परम्॥
व्याख्यं सपायसं सर्पिस्तिलयुक्तस्य भोजनम्।
सितरक्तसमायुक्तं चन्दनं परिकीर्त्तितम्॥
पार्श्वयोः शङ्करं विष्णुं पूजने पूजयेन्नरः।
सवादीन् करसंस्थांस्तु मण्डले परिपूजयेत्॥
सरस्वतीञ्च सावित्रीं हंसं पद्मन्तथैव च।
अयं विशेषः कथितः प्रणामस्यास्य दण्डवत्॥
पद्मबीजभवा माला जपकर्म्मणि कीर्त्तिता।
पूर्णादर्व्वी तिथौ याज्ञे पूजाकर्म्मणि सर्व्वदा॥
क्षीरेणार्घं प्रदद्यात्तु सर्व्वदा ब्रह्मणे नृप!।
अयन्ते कथितो भूप! यथा भर्गेण भाषितः॥
दर्शयता स्वपुत्राभ्यां कामरूपाह्वयं शुभम्।
यत्र तत्र विधिश्चैव साधकः परिपूजयेत्॥
पीठे सम्यक् पूजयित्वा परं निर्व्वाणमाप्नुयात्।"

इति कालिकापुराणे ८२ अध्यायः॥

तस्यापूज्यत्वकारणम् यथा। मोहिन्युवाच।

"उत्तिष्ठ जगतीनाथ! पारं कुरु ममाधुना।
निमग्नां दुस्तरे घोरे कर्म्मधार! भयानके॥
अतीवनिर्জ্জनस्थाने सर्व्वजन्तुविवर्জ্জिते।
सुगन्धिवायुना रम्ये पुंस्कोकिलरुतश्रुते॥
सन्तप्तं त्वन्मनस्कामां दासीं अन्मनि जन्मनि।
क्रीणीहि रतिपण्येनामूल्यरत्नेन सत्वरम्॥
इत्युक्त्वा मोहिनी सद्यो जगत्संक्षुभ्य ब्रह्मणः।
विचकर्ष करं वस्त्रं सस्मिता कामविह्वला॥
विज्ञाय समयं धाता तामुवाच भयातुरः।
पीयूषतुल्यवचनं परं विनयपूर्व्वकम्॥"

ब्रह्मोवाच।

"शृणु भोहिनि! महाव्रतं सत्यं सारं हितं
कुटम्।
न कुरु त्वञ्च त्रैलोक्ये स्त्रीणातीनामपत्यपाम्॥
त्यज मामम्बिके! पुत्रं वृद्धं निष्कामेव च।
त्वत्कर्म्मयोग्यं रसिकं युवानं पश्य सस्मिते!॥
निषेकाद्यन्ते पत्नी गुरुर्भर्त्ता शुभाशुभम्।
मन्त्रः शिल्पमपत्यञ्च सर्व्वमेतन्न संशयः॥
त्वया सह मम रतेर्निर्व्वन्धो नास्ति सुव्रते!।
चुद्रं महदा यत् कर्म्म सर्व्वं दैवनियन्त्रकम्॥
इत्युक्त्वन्तं ब्रह्माणं मारन्तं मत्तमातुरम्।
विचकर्ष पुनर्वेणा कामेन एतचेतना॥
एतस्मिन्नन्तरे शीघ्रं स्थानं तत् सुमनोहरम्।
आगन्तुमुद्यतं, सर्व्वे व्यसनो ब्रह्मतत्परः॥
दृष्ट्वा तांश्च मनिश्चेष्टागतांश्च मनोहया।

तत्याज मोहिनी शीघ्रं व्रीड्या कमलोद्भवम् ॥
तत्रोवास जगद्धाता तद्वामपार्श्वतश्च सा ।
प्रणेतुर्मुनयश्चाथ भक्तिनम्रात्मकन्धराः ॥
आशिषं युयुजे ब्रह्मा वासयामास तान् प्रभुः ।
तेषु मध्ये प्रजग्राह यथा तारासु चन्द्रमाः ॥
पप्रच्छुर्मुनयो देवं कथमेषा तवान्तिके ।
सर्व्वेषामेव प्रवरा मोहिनीत्येवमेव च ॥
श्रुत्वा मुनीनां वचनमुवाच तान् प्रजापतिः ॥

ब्रह्मोवाच ।

अपूर्व्वं कृत्यगीतञ्च चिरं कृत्वा शुभावहा ।
उवासेयं परित्रान्ता यथा कन्या पितुः पुरः ॥
इत्युक्त्वा जगतां धाता जहास मुनिसंसदि ।
जगृहुर्मुनयः सर्व्वे सर्व्वज्ञास्तत्र राधिके ! ॥
सर्व्वं रहस्यं विज्ञाय जगत्स्रष्टुश्च मानसम् ।
सद्यश्चुकोप कुलटा हास्ययोनेश्च संसदि ॥
सर्व्वाङ्गकम्यमाना सा कुलटा कुटिलानना ।
रक्तपङ्कजनेत्रा च कोपस्फुरिताधरा ॥
उत्थाय च सभामध्ये तेषाञ्च पुरतः स्थिता ।
संशपोवाच ब्रह्माणं भ्रातुकन्या यथा रुषा ॥

मोहिन्युवाच ।

अये ब्रह्मन् ! जगन्नाथ ! वेदकर्त्ता त्वमेव च ।
किंवा वेदप्रणिहितं कर्म्म किन्तद्विपर्य्ययम् ॥
विचारं मनसा स्वेन कुरु वेदविदां गुरो ! ।
स्वकन्यायां यतस्तृष्णा स कथं हसति नर्त्तकीम् ॥
निर्म्मिताहमीश्वरेण सर्व्वेषां सर्व्वगामिनी ।
सतां कर्म्म विरुद्धं यत्तदत्यन्तविडम्बनम् ॥
दासीतुल्यां विनीताय देवेन शरणागताम् ।
यतो हससि गर्व्वेण ततोऽपूज्यो भवाचिरम् ॥
अचिराद्देवभङ्गन्ते करिष्यति हरिः स्वयम् ।
निबोध शरणं ब्रह्मन् ! वेश्यायाश्चैव साम्प्रतम् ॥
तवैव वचनं स्तोत्रं मन्त्रं यज्ञादि यो नरः ।
भविता तस्य विघ्नञ्च स वाग्यतुपहास्यताम् ॥
भविता वार्षिकी पूजा देवतानां युगे युगे ।
तव माघ्याञ्च संक्रान्त्यां न भविष्यति सा पुनः ॥
कल्पान्तरेऽत्र कल्पे वा देहे देहान्तरेऽत्र ते ।
पुनः पूजा न भविता या गता सा गतैव च ॥
इत्युक्त्वा मोहिनी शीघ्रं जगाम मदनालयम् ।
तेन सार्द्धं रतिं कृत्वा बभूव विव्वरा पुनः ॥"
इति श्रीब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे मोहिनीशाप-
ब्रह्मदर्पभङ्गप्रस्तावः ३३ अध्यायः ॥

तस्य सृष्टिक्रमो यथा । मनुरुवाच ।
"चतुर्मुखत्वमगमत् कस्मात्लोकपितामहः ।
कथञ्च लोकागस्तद्ब्रह्मा ब्रह्मविदांवरः ॥"

मत्स्य उवाच ।
"तपश्चचार प्रथममसराणां पितामहः ।
आविर्भूतास्ततो वेदाः साङ्गोपाङ्गपदक्रमाः ॥
पुराणं सर्व्वशास्त्राणां प्रथमं ब्रह्मणा स्मृतम् ।
नित्यशब्दमयं पुण्यं शतकोटिप्रविस्तरम् ॥
अनन्तरञ्च वक्त्रेभ्यो वेदास्तस्य विनिःसृताः ।
मीमांसा न्यायविद्या च प्रमाणाग्रकसम्मता ॥"
तस्य मानसदर्शनप्रसङ्गेऽथैवं,—
"वेदाभ्यासरतस्यास्य प्रजाकामस्य मानवाः ।
मनसः पूर्व्वसृष्टा वै जाता ये तेन मानसाः ॥
मरीचिरभवत् पूर्व्वं ततोऽत्रिर्भगवानृषिः ।
अङ्गिराश्चाभवत् पश्चात् पुलस्त्यस्तदनन्तरम् ॥
ततः पुलहनामा वै ततः क्रतुरजायत ।
प्रचेताश्च ततः पुत्रो वशिष्ठश्चाभवत् पुनः ॥
पुत्रो भृगुरभूत्तत्र नारदोऽपि चिरादभूत् ।
दशैमान् मानसान् ब्रह्मा जपन् पुत्रानजी-
जनत् ॥"
तस्य शारीरदर्शनप्रसङ्गेऽथैवं,—
"शारीरानथ वक्ष्यामि मात्सर्य्यहीनान् प्रजापतेः ।
अङ्गुष्ठाद्दक्षिणाद्दक्षप्रजापतिरजायत ॥
धर्म्मस्तनान्तरादभवद्धृदयात् कुसुमायुधः ।
भ्रूमध्यादभवत् क्रोधो लोभश्चाधरसम्भवः ॥
वृद्धेर्मोहः समभवदहङ्कारादभून्मदः ।
प्रमोदश्चाभवत् कण्ठान्नृत्यलीलोचनतो नृप ! ॥
रभसः करमध्यात्तु ब्रह्मणस्तुरभूत्ततः ।
एते नव सुता राजन् ! कन्या च दशमी पुनः ॥
अङ्गजा इति विख्याता दशमी ब्रह्मणः सुता ॥"
तस्य चतुर्मुखत्वस्य कारणं यथा,—
"ततः स्वदेहसम्भूतामात्मजामित्यकल्पयत् ।
दृष्ट्वा तां श्रथितस्तावत् कामबाणार्दितो विभुः ।
अहो रूपमहो रूपमिति चाह प्रजापतिः ॥
ततो वशिष्ठप्रमुखा भगिनीमिति चुक्रुशुः ।
ब्रह्मा न किञ्चिदुद्दिश्य तन्मुखालोकनादृते ॥
अहो रूपमहो रूपमिति प्राह पुनः पुनः ।
ततः प्रणामनम्रां तां पुरस्तादभ्यलोकयत् ॥
अथ प्रदक्षिणञ्चक्रे सा पितुर्वैरवर्द्धिनी ।
पुत्रेभ्यो लज्जितस्यास्य तद्दर्शनेच्छया ।
आविर्भूतं ततो वक्त्रं दक्षिणं पाण्डुगण्डवत् ॥
विस्मयस्फुरदोष्ठञ्च प्राच्यात्यसदृशात्ततः ।
चतुर्थमभवत् पश्चादामं कामशरातुरम् ॥
ततोऽन्यदभवत्तस्य कामातुरतया तथा ।
उत्पतन्त्यास्तदाकाशमालोकनकुतूहलात् ॥
स्वार्थं यत् कृतं तेन तपः परमदारुणम् ।
तत् सर्व्वं नाशमगमत् स्वसुतोपगमेच्छया ॥
तेनास्य वक्त्रमभवत् पञ्चमन्तस्य धीमतः ।
आविर्भवच्चटाभिश्च तद्वक्त्राष्टगोत्प्रभुः ॥"

इति मत्स्यपुराणे ३ अध्यायः ॥ * ॥

नव ब्रह्मणो यथा, मार्कण्डेयपुराणे ।
"भृगुं पुलस्त्यं पुलहं क्रतुमङ्गिरसन्तथा ।
मरीचिं दक्षमत्रिञ्च वशिष्ठञ्चैव मानसम् ।
नव ब्रह्माण इत्येते पुराणे निश्चयं गताः ॥"
कल्पभेदे तस्य जन्मानि यथा,—
"त्वत्तो मे मानसं जन्म प्रथमं द्विजपूजितम् ।
चाक्षुषं वै द्वितीयं मे जन्म चासीत् पुरातनम् ॥
तत्प्रसादात्तु मे जन्म तृतीयं वाचिकं महत् ।
ततः श्रवणजं चापि चतुर्थं जन्म मे विभो ! ॥
नासत्यञ्चापि मे जन्म ततः पञ्चममुच्यते ।
अण्डजं चापि मे जन्म ततः षष्ठं विनिर्म्मितम् ॥
इदञ्च सप्तमं जन्म पद्मजन्मेति मे प्रभो ! ।
सर्गे सर्गे सृष्टं पुत्रैस्त्वं विगुणवर्जित ! ।"

इति महाभारत शान्तिपर्व्वणि मोक्षधर्म्मे

व्यतिरिक्तरूपविष्णुं प्रति प्राङ्गकल्पीयब्रह्मत्वच नम् ॥ * ॥ तस्य पतनकालो यथा,—
"द्वात्रिंशद्वर्षकोट्यस्तु तथा वृन्दाष्टकं भवेत् ।
खर्व्वत्रयं निखर्व्वञ्च शङ्कुत्रययुतं तथा ॥
पद्ममेकं समुद्राश्च त्रयो ब्रह्मसमागते ।
ब्रह्मा विष्णुर्दिने चैकः पतत्येवं वदन्ति ते ॥
मनीषिणस्तथा विष्णुरुद्रस्युश्च शङ्करः ।
ईश्वरस्य तथा चासौ स सांख्यप्रकृतेस्तथा ॥
अतः परं परे धात्रि कालसंख्या न विद्यते ।
ब्रह्मणोऽतः परं संख्या नास्ति चेत्तन्नतं हि नः ॥"
अपि च ।
"एकार्णवे तु त्रैलोक्ये ब्रह्मा नारायणात्मकः ।
भोगिशय्यागतः शेते त्रैलोक्यग्रासदुःखितः ॥
जलस्थैर्योगिभिर्दैवचिन्त्यमानोऽब्जसम्भवः ।
यतीतायान्तु पूर्व्वर्य्यां स बुद्ध्या स्वपते पुनः ॥
एवन्तु ब्रह्मणो वर्षं तथा वर्षशतं भवेत् ।
गते वर्षे शते ब्रह्मा परमात्मनि लीयते ॥"
इत्यग्निपुराणम् ॥

ब्रह्मण्भूः, पुं, (ब्रह्मणोऽग्रे सम्मुखे भवतीति । भू + क्विप् । यद्वार्थे ब्रह्मणो देहाज्जातत्वात्तथात्वम् ।) घोटकः । इति हारावली । ५२ ॥

ब्रह्माञ्जलिः, पुं, (ब्रह्मणे वेदपाठार्थं कृतो योऽञ्जलिः ।) सामवेदपाठे स्वरविभागार्थं योऽञ्जलिः क्रियते सः । अध्ययनस्यादावन्ते च गुरवे प्रणवोच्चारणपूर्व्वकोऽञ्जलिः क्रियते सः । तत्पाठार्थत्वात् ब्रह्मणोऽञ्जलिः । इत्यमरटीकायां भरतः । २ । ७ । ३६ ॥ (यथा, मनुः । २ । ७०-७१ ।
"अधीष्यमाणस्त्वाचान्तो यथाशास्त्रमुदङ्मुखः ।
ब्रह्माञ्जलिकृतोऽध्याप्यो लघुवासा जितेन्द्रियः ॥
ब्रह्मारम्भेऽवसाने च पादौ ग्राह्यौ गुरोः सदा ।
संहत्य हस्तावध्येयं सहि ब्रह्माञ्जलिः स्मृतः ॥")

ब्रह्माणी, स्त्री, (ब्रह्माणमर्हति कौत्तयतीति । अण शब्दे कर्म्मण्यण् । ङीप् । यद्वा, ब्रह्माणमानयति जीवयतीति । अनद्यतुप्राणने ण्यन्तादस्मात् कर्म्मणि अणि कृते "योरनिटि ।६ । ४ । ५१ । इति लोपः "टिड्ढेति ।" ४।१।१५। इति ङीप् पूर्व्वपदादित्वञ्च ।) ब्रह्मणः पत्नी । इति शब्दमाला ॥ ब्रह्मणोऽर्द्धशरीरात् तस्या उत्पत्तिर्नामान्तरञ्च यथा,—
"ततः संजपतस्तस्य भित्त्वा देहमकल्मषम् ।
स्त्रीरूपमर्द्धमकरोद्दक्षं पुरुषरूपवत् ॥
शतरूपा च सा ख्याता सावित्री च निगद्यते ।
सरस्वत्यथ गायत्री ब्रह्माणी च परन्तप ! ॥"

इति मत्स्यपुराणे ३ अध्यायः ॥ * ॥

अपि च ।
"हंसयुक्तविमानाग्रे साक्षसूत्रकमण्डलुः ।
आयाता ब्रह्मणः शक्तिरेणाक्षी साभिधीयत ॥"

इति मार्कण्डेयपुराणे । ८८ । १४ ॥ *
(इयं हि पूर्व्वशक्तेर्दुर्गायाः कलाशक्तिः । चतुर्थं मार्कण्डेये । ६० । ६४ ।

देव्युवाच ।
"एकैवाहं जगत्यत्र द्वितीया का ममापरा ।
पश्यैता दुष्ट ! मय्येव विश्वन्यो मद्विभूतयः ॥
ततः समस्तास्ता देव्यो ब्रह्माणी-प्रमुखा लयम् ।
तस्या देहास्तनौ जग्मुरेकैवासीत्तदाम्बिका ॥")
दुर्गा । यथा,—
"ब्रह्माणी ब्रह्मजननाद्ब्रह्माक्षरपरा मता ॥"
इति देवीपुराणे ४५ अध्यायः ॥*॥
देवकानामगन्धद्रव्यम् । इति रत्नमाला ॥ राजरीतिः । इति राजनिर्घण्टः ॥
ब्राह्मण्डं, क्ली, (ब्रह्मणो जगत्स्रष्टुरण्डम् । चतुर्दशभुवनगोलकः । यद्वा, ब्रह्मणा विश्वस्रष्ट्रा कृतमण्डम्।) भुवनकोषः । विश्वगोलकः । यथा,—
"ब्रह्माण्डरचनाख्यानं शृणुतां सावधानतः ।
ब्रह्माण्डरचनार्थञ्च भक्ता जानन्ति यत्नतः ॥
सुनयश्च सुराः सन्तः किञ्चिज्जानन्ति दुःखतः ।
जानामि विश्वसर्ज्जार्थं ब्रह्मानन्तो महेश्वरः ॥
धर्म्मः सनत्कुमारश्च नरनारायणावृषी ।
कपिलश्च गणेशश्च दुर्गा लक्ष्मीः सरस्वती ॥
वेदाश्च वेदमाता च सर्ब्बज्ञा राधिका स्वयम् ।
एते जानन्ति विश्वार्थं नान्यो जानाति कश्चन ॥
वैपम्यार्थञ्च सुधियः सर्ब्बे विज्ञातुमक्षमाः ।
नित्याकाशो यथात्मा च तथा नित्या दिशो दश ॥
यथा नित्या च प्रकृतिस्तथैव विश्वगोलकः ।
गोलोकश्च यथा नित्यस्तथा वैकुण्ठ एव च ॥
एकदा मयि गोलोके रासे नृत्यं प्रकुर्ब्बति ।
आविर्भूता च वामाङ्गाद् बाला षोडशवार्षिकी ॥
श्वेतचम्पकवर्णाभा शरच्चन्द्रसमप्रभा ।
अतीवसुन्दरी रम्या रमणीनां परात्परा ॥
ईषद्धास्या प्रसन्नास्या कोमलाङ्गी मनोहरा ।
पट्टसूत्रांशुकाधाना रत्नाभरणभूषिता ॥
यथा शतदपद्मिन्यं वस्त्राभिर्विभूषिता ।
सिन्दूरबिन्दुना चारुचन्द्रचन्दनबिन्दुभिः ॥
कस्तूरीबिन्दुभिः सार्द्धं सीमन्ताधःस्थलोज्ज्वला ।
अमूल्यरत्ननिर्म्माणसुस्निग्धकिरणोज्ज्वला ॥
रत्नकुण्डलयुग्मेन गण्डस्थलसमुज्ज्वला ।
कुङ्कुमालक्तकस्तूरीचारुचन्दनपत्रके: ॥
विचित्रैश्च सुचित्रैश्च मुखपोलस्थलोज्ज्वला ।
खगेन्द्रचञ्चुविजितनासा चार्व्वी सुशोभिता ॥
गजेन्द्रगण्डनिर्म्मुक्तमुक्ताभूषणभूषिता ।
कृपया विलसन्मुक्ताभदन्तपङ्क्तिमनोहरा ॥
वलिता ललितानीव पक्वबिम्बाधरा वरा ।
शरत्पूर्णेन्दुनिन्द्यास्या पद्मनिन्दितलोचना ॥
कृष्णसारनिभोद्भिन्नसुसारकृष्णोज्ज्वला ।
अमूल्यरत्ननिर्म्माणजेयूरकटकोज्ज्वला ॥
मणीन्द्राकारकाञ्चीभिः प्रान्तभागकरोज्ज्वला ।
रत्नाङ्गुरीयकैरङ्गुलीभिर्भूषिता ॥
रत्नेन्द्रसारसारेण रत्नमञ्जीररञ्जिता ।
रत्नमालाकलापेन भारताधःस्थलोज्ज्वला ॥
गजेन्द्रगामिनी रामा कामिनी वामलोचना ।
मां दृष्ट्वा कटाक्षेण रमणी रमणोत्सुका ॥
रासे संभूय रामा सा धावं पुरतो मम ।
तेन राधा समाख्याता पुराविद्भिः प्रपूजिता ॥
प्रकृष्टप्रकृतिश्चास्याज्जेन प्रकृतीश्वरी ।
प्रकृष्टा स्यात् सर्ब्बकार्य्येषु तेन प्रकृतिः प्रकीर्त्तिता ॥
सर्ब्बाधारा सर्ब्बरूपा मङ्गलार्घा च सर्ब्बतः ।
सर्ब्बमङ्गलदक्षा सा तेन स्यात् सर्ब्बमङ्गला ॥
वैकुण्ठे सा महालक्ष्मीर्मूर्त्तिभेदे सरस्वती ।
प्रसूय वेदान् विदिता वेदमाता च सा सृष्टा ॥
सावित्री सा च गायत्री धात्री त्रिपथगामपि ।
पुरा संकल्प दुर्गेष सा दुर्गा च प्रकीर्त्तिता ॥
तेषःसु सर्ब्बदेवानामाविर्भूता पुरा सती ।
तेनाद्यप्रकृतिर्ज्ञेया सर्ब्बासुरविमर्द्दिनी ॥
सर्ब्वानन्दा च सानन्दा दुःखदारिद्र्यनाशिनी ।
शरणं भयदात्री च भक्तानां भयहारिणी ॥
दक्षकन्या सती सा च शैवला तेन पार्व्वती ।
सर्ब्बाधारस्वरूपा सा कलया सा वसुन्धरा ॥
कलया तुलसी गङ्गा कलया सर्ब्वयोषितः ।
सृष्टिं करोमि च यया तया सृष्ट्या पुनःपुनः ॥
दृष्ट्वा तां रासमध्यस्थां मम क्रीड़ा तया सह ।
बभूव सुचिरं तात ! यावद्वै ब्रह्मणः शतम् ॥
अतल्पकृतं कौतुकञ्च महाशृङ्गारमीप्सितम् ।
तयोर्द्वयोर्म्मनोराशिः सुस्राव रासमण्डले ॥
तस्मान्मनोहरं सद्यो नाम्ना कामसरोवरम् ।
पपात धर्म्मधाराधो वेगेन विश्वगोलके ॥
बभूव जलपूर्णञ्च ब्रह्माण्डानाञ्च गोलकम् ।
जलपूर्णं पुरा सर्ब्बं सृष्टिशून्यं व्रजेश्वर ! ॥
शृङ्गारान्ते च तस्याञ्च वीर्य्याधानं मया कृतम् ।
दधार गर्भं सा राधा यावद्वै ब्रह्मणः शतम् ॥
सुषाव सा तदण्डे च शिशुं तत् परमाद्भुतम् ।
शुकोपं देवी तं दृष्ट्वा रुरोद विषसाद सा ॥
पादेन प्रेरयामास तमधो विश्वगोलके ।
स पपात जले तात ! सर्ब्बाधारो महान् विराट् ॥
दृष्ट्वापतं जलञ्चाथ मया शप्ता च सा पुरा ।
अनपत्या च सा राधा मत्शापेन पुरा विभो ! ॥
तेन प्रकृता क्रमतो दुर्गा लक्ष्मीः सरस्वती ।
वचसः परिपूर्णा सा प्रकृताश्च सुनिश्चितम् ॥
देव्योऽन्याश्चापि कामिन्यो न प्रकृता व्रजेश्वर ! ।
कलया प्रभवो यासां कलांशांशेन वा ब्रज ॥
जज्ञे महान् विराट् तेन शिशुना कलयाश्रयः ।
अन्तर्ब्बाह्यं पीयूषं मया दत्तं पपौ च सः ॥
जले स्थावररूपश्च स शेते निजकर्म्मणः ।
उपाधानं जलं तल्पं तस्य योगबलेन च ।
तस्य लोमाश्च कूपानि जलपूर्णानि सन्ततम् ।
एकैकं क्रमतस्तेषु शेते क्षुद्रविराट् पुनः ॥
सहस्रपत्रं कमलं जज्ञे क्षुद्रस्य नाभितः ।
तत्र जज्ञे स्वयं ब्रह्मा तेनायं कमलोद्भवः ॥
तत्रोपविश्य च विधिश्चिन्ताग्रस्तो बभूव च ।
कस्त्वं देहः क माता मे पिता वा क्व च बान्धवः ॥
दिव्यं चिलशतवर्षञ्च बभ्राम कमलान्तरे ।
ततो दृष्ट्वा पद्मलग्नं ससार तपसा च माम् ।
तदा मया श्रुतमन्तं जगाद कमलान्तरे ।
दिव्यं सप्तवर्षशतं नियतं संयतः शुचिः ।
तदा मत्तो वरं लब्ध्वा सृष्टा सृष्टिकरो भव ।
मायया प्रतिब्रह्माण्डे ब्रह्मविष्णुशिवात्मकाः ।
दिक्पालाश्च द्वादशादित्या रुद्राश्चैकादशापि वा ।
नव ग्रहाश्च वसवो देवाः कोटित्रयरूपाः ।
ब्राह्मणक्षत्रविट्शूद्रा यज्ञगन्धर्व्वकिन्नराः ।
भूतादयो राक्षसाद्याश्चैवं सर्ब्बं चराचरम् ।
विष्णे विष्णे विनिर्म्माणं स्वर्गाः सप्त क्रमेण वै ।
सप्तसागरसंयुक्ता सप्तद्वीपा वसुन्धरा ।
काञ्चनीभूमिसंयुक्ता तमोयुक्तश्च सप्तः ।
पातालाश्च तथा सप्त ब्रह्माण्डमेभिरेव च ।
विष्णे विष्णे चन्द्रसूर्य्यौ पृथ्वीक्षेत्रञ्च भारतम् ।
तीर्थान्येतानि सर्ब्बत्र गङ्गादीनि व्रजेश्वर ! ।
यावन्ति लोमकूपानि महाविष्णोः क्रमेण च ।
विष्णवश्चैव हि तावन्ति क्षुद्रसंख्यानि पितर्भवम् ।"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८४।५८-७१।
अपि च ।
"देवीगुणमयाविष्णमण्डस्य कोटिविस्तरम् ।
ब्रह्मादिस्तम्बपर्य्यन्तसृष्टिसं चराचरम् ।
अण्डे हिरण्यगर्भस्य बहूनं गर्भसंश्रितम् ।
तत्रोत्पन्नमिदं लोमकूपाभि द्वीपसप्त भवेत् ।
अधोर्द्धं काञ्चनमयश्चतुरस्रोच्छ्रितो महान् ।
उत्पन्नः स चतुःशृङ्गो मेरुर्दैवतसंश्रयः ।
पृथिवी पद्मदिक् श्वेतं मेरुशस्य तु कर्णिका ।
युगाद्यकोटिविस्तीर्णं तत्र स्थित्वा रविः ।
देवीवशवर्तो देवैर्याति तस्य प्रदक्षिणम् ।"
इति देवीपुराणम् ।
अथ ब्रह्माण्डगोलमाह ।
"भूभूधरश्चिदशशागयसागयाद्या
ये याश्च धिष्ण्यगगनेचरचक्रसंज्ञाः ।
लोकत्रयस्थितिरयंपुरिपरिप्रिया
ब्रह्माण्डभाण्डघटरे तदिदं समस्तम् ।"
अयमन्योक्तं ब्रह्माण्डमानं पूर्व्वोक्तमपि प्रक्षादनुवदति ।
कोटिघ्नेर्नवनन्दषट्कमनघभूभृद्दृशद्दन्तिभिर्व्याप्तिः शास्त्रविदो वदन्ति नभसः कक्षामिमां बोधकैः ।
तद्ब्रह्माण्डकटाहमम्पुटतटे लेखित्युरुद्यैर्लेखित्तु प्रोच्चुरदश्यदश्यजलधिं पौराणिका सूरयः ।

करतलकलितामलकफलमतलं
सकलं विदन्ति ये गोलम् ।
दिनकरकरनिकरनिहततमसो
नभसः परिधिरदितसौ ।
ब्रह्माण्डमेतन्मितमस्तु नो वा
कल्पे शशः कामति योजनानि ।
यावन्ति पूर्व्वैरिह तत्प्रमाणं
प्रोक्तं सकलाब्रह्मिदं मतं नः ।"
इति सिद्धान्तशिरोमणौ गोलाध्याये सृष्टि

महादानविशेषः । यथा,—
मत्स्य उवाच ।
"अथातः संप्रवक्ष्यामि ब्रह्माण्डविधिमुत्तमम् ।
यच्छ्रेष्ठं सर्व्वदानानां महापातकनाशनम् ॥
पुण्यं दिनमघाद्यात्तु तुलापुरुषदानवत् ।
ऋत्विङ्मण्डपसम्भारभूदयाच्छादनादिकम् ॥
लोकेशावाहनं तद्वदधिवासनकं यथा ।
कुम्भादिस्नपनाद्धोमात्सहस्राच्च प्रकल्पितः ॥
कलशैर्घृतसंयुक्तं ब्रह्माण्डं काञ्चनं शुभः ।
हिरण्याष्टकसंयुक्तं ब्रह्मदैवाङ्गसन्वितम् ॥
लोकमाताष्टकोपेतं मध्यस्थितचतुर्मुखम् ।
ग्रिवाच्युतार्कशिखरसुमाराक्षीसमन्वितम् ॥
वस्त्रादित्यमरुद्गर्भं महारत्नसमन्वितम् ।
वितस्तिरुच्छ्रयोपेतं यावदायामविस्तरम् ॥
दौग्धियवस्त्रसंवीतं तिलद्रोणोपरि न्यसेत् ।
तथाष्टदिक्षु घाण्यानि समन्तात् परिकल्पयेत् ॥
पूर्व्वेणानन्तशयनं प्रद्युम्नं पूर्व्वदक्षिणे ।
प्रकृतिं दक्षिणे देशे सङ्कर्षणमतः परम् ॥
पश्चिमे चतुरो वेदानग्निमुद्गमतः परम् ।
अग्निनारनो हैमं वासुदेवमतःपरम् ॥
समन्ताद्गुरुपीठस्थानर्घयेत् काञ्चनान् बुधः ।
स्थापयेद्घृतसंयुक्तान् पूर्णकुम्भान् दशैव तु ॥
दशैव धेनवो देयाः सहेमाम्बरदोहनाः ।
पाटुकोपानहच्छत्रचामरासनदर्पणैः ॥
भक्ष्यभोज्यान्नदीपैश्च फलमाल्यानुलेपनैः ।
होमाधिवासनान्ते तु स्थापितो वेदपुङ्गवैः ।
ऋत्विग्वरायेच्चैनं त्रिः कृत्वाथ प्रदक्षिणम् ॥
नमोऽस्तु विश्वेश्वर ! विश्वधाम
जगत्सवित्रे भगवन्नमस्ते ।
समर्थितोकामरभूतवेश्म !
गर्भेण सार्द्धं वितरामि रक्षाम् ॥
ये दुःखितास्ते सुखिनो भवन्तु
प्रयान्तु पापानि चराचराणाम् ।
त्वद्गर्भसम्भावृतपातकानां
ब्रह्माण्डदोषाः प्रलयं प्रयान्तु ॥
एवं प्रणम्यामरविश्वगर्भं
ऋत्विजेभ्यो दशधा विभज्य ।
भाग्यं तव गुरोः प्रकल्प्य
मनं भजेच्छ्रियमतः क्रमेण ॥
त्वत्तो तु होमे गुरुरेक एव
कृत्यादधेकामिविधानयुक्ता ।
स एव संपूज्यतमोऽत्यविद्वै-
र्यथोक्तवस्त्राभरणादिकेन ॥
इत्थं य एतदखिलं पुरुषोऽत्र कुर्य्याद्
ब्रह्माण्डदानमधिगम्य महद्विमानम् ।
निर्धूतकल्मषविमुक्ततनुर्मुरारे-
रानन्दकन्दमुपगम्य सहाक्षरोभिः ॥
सन्तारयेत् पितृपितामहपुत्रपौत्रान्
बन्धुप्रियातिथिकलत्रसुताधिकः सः ।
ब्रह्माण्डदानमकलीकृतमाप्तकौघ-
मानन्दयेच्च जननीकृतमप्यशेषम् ॥

इति पठति शृणोति वा य एतत्
सुरभवनेषु सुखेषु धार्म्मिकाणाम् ।
मतिमपि च ददाति मोदतेऽसौ
त्रिदशपतेर्भवने सहाक्षरोभिः ॥"
इति मत्स्यपुराणे महादानानुकीर्त्तने ब्रह्माण्डदानको नाम २५० अध्यायः ॥ अपि च ।
"इदानीं कार्त्तिकी चेयं वर्त्ततेऽद्य नराधिप ! ।
ब्रह्माण्डं सर्व्वसम्पन्नं भूतरत्नौषधीयुतम् ॥
देवदानवयत्नेन युक्तमेतत् सदा विभो ! ।
एतद्धेममयं कृत्वा सर्व्वभोगरसान्वितम् ॥
वरञ्च पुरुषं कृत्वा कार्त्तिक्यां द्वादशीदिने ।
अथवा पञ्चदश्यां वै कार्त्तिक्यामेव नान्यतः ॥
पुरोहिताय गुरवे दाम्पत्येदृभक्तिमान्नरः ।
ब्रह्माण्डोदरवर्त्तीनि यानि भूतानि पार्थिव ! ।
तानि दत्तानि तेन स्युः समासात् कथितं तव ॥
यो यत्नेयंजते राजन् ! सहस्रवरदक्षिणैः ।
सैकोद्देशो यथोक्तस्य ब्रह्माण्डस्य विशेषतः ॥
यः पुनः सकलञ्चेदं ब्रह्माण्डं दातुमिच्छति ।
तेन यज्ञः कृतः दत्तं पठितं कीर्त्तितं भवेत् ॥"
वराह उवाच ।
"एतत् श्रुत्वा ततो राजा हेमकुम्भं प्रकल्पनम् ।
ब्रह्माण्डस्थये प्रादात् सविधानञ्च तत्त्वतः ॥
सर्व्वकामैः सुसम्पन्नो ययौ स्वर्गं नराधिपः ॥"
इति वराहपुराणम् ॥

ब्रह्मात्मभूः, पुं, (ब्रह्मण आत्मनः शरीरात् भवतीति । ब्रह्मात्मन् + भू + क्विप् ।) अत्रिः । इति शब्दमाला ॥ (अस्य ब्रह्मशरीरजातत्वमुक्तं बृहदारण्यकोपनिषदि १।२।६-७। तद् यथा,—
"प्राणा वै यशो वीर्य्यं तत्प्राणेषूत्क्रान्तेषु शरीरं श्वयितुमधिवत तस्य शरीर एव मन आवीत् । सोऽकामयत मेध्यं स्यादात्मन्वनेन स्यामिति । ततोऽत्रिः समभवद्यदत्यक्षन्मेध्यमभूदिति तदेवात्रेर्मेध्यत्रिमेक्षत्वम् ।" अत्र शाङ्करभाष्यं यथा,—
"प्राणाश्चक्षुरादयः । वै यशो यशोहेतुत्वात्तेषु हि सत्सुखातिर्भवति । तथा वीर्य्यं बलमस्मिन् शरीरे । गच्छत्सूत्क्रान्तप्राणो यशस्वी बलवान् भवति । तस्मात् प्राणा एव यशो वीर्य्यं चास्मिन् शरीरे । तदेवं प्राणलक्षणं यशोवीर्य्यमुदक्रामत् उत्क्रान्तवत् तदेवं यशोवीर्य्यभूतेषु प्राणेषूत्क्रान्तेषु शरीरान्निष्क्रान्तेषु तच्छरीरं प्रजापतेः श्वयितुमुच्छूनभावङ्गन्तुमधियतामेध्यमभवत् । तस्य प्रजापतेः शरीरान्निर्गतस्यापि तस्मिन्नेव शरीरे मन आवीत् । यथा कस्यचित् प्रिये विषये दूरङ्गतस्यापि मनो भवति तद्वत् । स तस्मिन्नेव शरीरे गतमनाः सन् किमकरोदिति । उच्यते सोऽकामयत कथं मेध्यं मेधार्हं यज्ञियं मे ममेदं शरीरं स्यात् । किंवात्मन्वी आत्मवानात्मना शरीरेण शरीरवान् स्यामिति प्रविवेश । यस्मात्तच्छरीरं महियोगाद्गतयशोवीर्य्यं सदश्वदश्वयत् ततस्तस्मादश्वः समभवत् । ततोऽत्रेर्नामा प्रजापतिरेव वाचादत्र श्रूयते । यस्माच्च पुनरुत्क्रान्तप्रवेशात् गतयशोवीर्य्यत्वादमेध्यं सन्मेध्यमभूत् तदेव तस्मादेवाश्वमेधस्याश्वमेधनामः क्रतोरश्वमेधत्वमश्वमेधनामः लाभः ॥")
ब्रह्मादनी, स्त्री, हंसपदी । इति राजनिर्घण्टः ॥
ब्रह्मादिजाता स्त्री, (ब्रह्मणः आदिजाता सम्भूता । क्वचित् ब्रह्माभिजाता इति पाठो दृश्यते ।) गोदावरी । इति राजनिर्घण्टः ॥
ब्रह्मापेतः, पुं, (ब्रह्मार्थं ब्रह्मतेजःस्वरूपं सूर्य्यमुपेत उपगतः ततः पृषोदरात् साधुः ।) माघमासे सूर्य्यनिकटस्थितराक्षसः । यथा,—
"त्वष्टा च यमदग्निश्च कम्बलोऽथ तिलोत्तमा ।
ब्रह्मापेतोऽथ घृतचिद्धृतराष्ट्रश्च सप्तमः ॥
माघमासे वसन्त्येते सप्त मैत्रेय ! भास्करे ।"
इति विष्णुपुराणे । २ । १० । १५ ॥
ब्रह्मारण्यं, क्ली, (ब्रह्मणो वेदस्य अरण्यमिव ।) वेदपाठभूमिः । इति त्रिकाण्डशेषः ॥
ब्रह्मार्पणं, क्ली, (ब्रह्मेवार्पणमितिविग्रहे यदर्पणं तद्ब्रह्मैव । यथा, गीतायाम् । ४ । २४ ॥
"ब्रह्मार्पणं ब्रह्महविर्ब्रह्माग्नौ ब्रह्मणा हुतम् ॥"
"ब्रह्मार्पणं येन करणेन प्रकारेण ब्रह्मविद्ब्रह्मावर्पयति तद्ब्रह्मैवेति पश्यति तस्यात्मव्यतिरेकेणाभावं पश्यति यथा शुक्तिकायां रजतभावं पश्यति तद्वदुच्यते ब्रह्मैवार्पणमिति यथा यद्रजतं तच्छुक्तिकैवेति । ब्रह्म अर्पणमित्यसमस्ते पदे यदर्पणवृद्ध्या रूढ्यते लोके तदस्य ब्रह्मविदो ब्रह्मैवेत्यर्थः । इति शाङ्करभाष्यम् ॥) ब्रह्मणि समर्पणम् । तत्प्रकारो यथा,
"ब्रह्मणा दीयते देयं ब्रह्मणे संप्रदीयते ।
ब्रह्मैव दीयते चैतत् ब्रह्मार्पणमिदं परम् ॥
नाहं कर्त्ता सर्व्वमेतद्ब्रह्मैव कुरुते तथा ।
एतद् ब्रह्मार्पणं प्रोक्तं ऋषिभिस्तत्त्वदर्शिभिः ॥
प्रीयतां भगवानीशः कर्म्मणानेन शाश्वतः ।
करोति सततं बुद्ध्या ब्रह्मार्पणमिदं परम् ॥
यद्वा फलानां संन्यासं प्रकुर्य्यात् परमेश्वरे ।
कर्म्मयामेतदप्याहुर्ब्रह्मार्पणमनुत्तमम् ॥"
इति कूर्म्मपुराणे २ अध्यायः ॥
ब्रह्मावर्त्तः, पुं, (ब्रह्मणां ब्रह्मनिष्ठब्राह्मणानामावर्त्त इव । बहुलब्राह्मण्यत्वादस्य तथात्वम् ।) देशविशेषः । तत्पर्य्यायः । तपोवटः २ । इति त्रिकाण्डशेषः ॥ तत्परिमाणादि यथा,—
"सरस्वतीदृशद्वत्योर्देवनद्योर्यदन्तरम् ।
तं देवनिर्म्मितं देशं ब्रह्मावर्त्तं प्रचक्षते ॥
तस्मिन् देशे य आचारः पारम्पर्य्यक्रमागतः ।
वर्णानां सान्तरालानां स सदाचार उच्यते ।
कुरुक्षेत्रञ्च मत्स्याश्च पञ्चालाः शूरसेनकाः ।
एष ब्रह्मर्षिदेशो वै ब्रह्मावर्त्तादनन्तरः ।
एतद्देशप्रसूतस्य सकाशादग्रजन्मनः ।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्व्वमानवाः ॥
इति मानवे । २ । १७-२० ॥
(वीर्य्यविशेषः । यथा, महाभारते । ३ । ८३ । ५०
"ततो गच्छेत धर्म्मज्ञ ! ब्रह्मावर्त्तं नराधिप ! ।
ब्रह्मावर्त्ते नरः स्नात्वा ब्रह्मलोकमवाप्नुयात् ॥"

व्यपरञ्च तत्रैव । ३ । ८४ । ४० ।
"ब्रह्मावर्त्तं ततो गच्छेत् ब्रह्मचारी समाहितः ।
अश्वमेधमवाप्नोति सोमलोकञ्च गच्छति ॥")

ब्रह्मासनं, क्ली, (ब्रह्मणे ब्रह्मप्राप्तेय आसनम् ।) ध्यानासनम् । योगासनम् । इत्यमरः । २ । ७ । ४० ॥ ध्यानं परमार्थचिन्तनम् । योगश्चित्तवृत्तिनिरोधमात्रम् । ध्यानं निराकारभावनम् । योगः साकारभावनमिति वा । तयोः पद्मस्वस्तिकादासनं यत् तत्र ब्रह्मासनं स्यात् । इति भरतः ॥ (आसनविशेषः । तल्लक्षणं यथा,—
"ब्रह्मासनं तदा वक्ष्ये यत्कृत्वा ब्राह्मणो भवेत् ।
एकपादसुरौ दत्त्वा तिष्ठेदूरुद्वितिर्भवेत् ॥"
ब्रह्मण आसनमितिविग्रहे ब्रह्मात्मकत्वम् ॥)

ब्रह्माख्यं, क्ली, (ब्रह्मस्वरूपमस्यम् ।) ब्रह्मस्वरूपाख्यम् । यथा, देवीपुराणे ।
"तदा रामेण क्रुद्धेन ब्रह्माख्यं प्रति रावणे ।
नारायणविघातार्थं चिन्तितं चतुराननम् ॥
सज्जमेखलदण्डाक्षसुवर्दभकृताजिनम् ।
हुङ्कारशब्दबहुलमागत्य पुरतः स्थितम् ॥"

ब्रह्मिष्ठा, स्त्री, (अतिशयेन ब्रह्म । ब्रह्म + इष्ठन् + टाप् च ।) दुर्गा । यथा,—
"ब्रह्मिष्ठा वेदमातृत्वात् गायत्री चरणाग्रजा ।
वेदेषु चरते यस्मात्तेन सा ब्रह्मचारिणी ॥"
इति देवीपुराणे ४५ अध्यायः ॥

ब्रह्मी, स्त्री, (मेधाजनकत्वात् ब्रह्मणे हिता । ब्रह्म + अण् । वाहुलकात् न वृद्धिः । ततो ङीप् ।) पद्मगरुडकमनस्यः । इति त्रिकाण्डशेषः ॥ पाँकाल इति भाषा । फल्गिकाटचः । शाकभेदः । ब्रमी इति भाषा । इति मेदिनी । ने, १६ ॥ ब्रह्मीशाकस्य पर्य्यायः । मत्स्याक्षी २ सरसा ३ वयस्या ४ ब्रह्मचारिणी ५ । इति रत्नमाला ॥ (यथा, भैषज्यरत्नावल्यां कुष्ठरोगचिकित्सायाम् ।
"तैलतुल्यं प्रदातव्यं खरसञ्च पृथक् पृथक् ।
महाकालवचाब्रह्मी तुम्बुरुग्रन्थिपूतिका ॥")
अस्या गुणाः । भेदकत्वम् । खरकारित्वम् । पित्तकफनाशित्वञ्च । इति राजवल्लभः ॥ अस्याः पर्य्यायान्तरं गुणाश्च ब्राह्मीशब्दे द्रष्टव्याः ॥

ब्रह्मीघृतं, क्ली, (ब्रह्मीजातं घृतम् ।) औषधविशेषः । सारस्वतघृतमिति ख्यातम् । यथा,—
"समूलपत्रामुत्पाट्य ब्रह्मीं प्रक्षाल्य वारिणा ।
उदूखले सोदधित्वा रसं वस्त्रेण गालयेत् ॥
रसे चतुर्गुणे तस्मिन् घृतप्रस्थं विपाचयेत् ।
दध्निश्च मातुलुङ्गस्य कुडवौ सघृतौ कृतौ ।
एतेषां पलिकैर्भागैः क्षीरास्तु कार्षिकाः स्मृताः ॥
पिप्पल्योरष्ट विद्वांसि सैन्धवे शर्करा यवाः ।
सर्व्वमेतत् समालोड्य घृतैर्दध्निश्च मर्दयेत् ॥
एतन्मेधाग्निमात्रेण वाग्मिपुष्टिः प्रजायते ।
स्मरणाक्षप्रयोगेण किन्नरैः सह गीयते ॥
अर्द्धरात्रप्रयोगेण स्वरो भवति कोकिलः ।
मासमेकं प्रयोगेण भवेत् श्रुतिधरो नरः ॥
अथ गुल्मान् प्रमेहांश्च कासं पञ्चविधं जयेत् ।
वन्ध्यानाञ्चैव नारीणां नराणामल्परेतसाम् ।
घृतं सारस्वतं नाम बलवर्णकरं परम् ॥"
इति जयनारायणकृतचिकित्सारत्नसंग्रहः ॥
(अपरञ्च ।
"क्षीरेरसे वचाकुष्ठशङ्खपुष्पीभिरेवच ।
पुराणं मेध्यतुल्यादग्रहापस्मारनाशनम् ॥"
इति वैद्यकचक्रपाणिसंग्रहेऽपस्माराधिकारे ॥)

ब्रह्मीतं, त्रि, ब्रह्मणि या सन्यक् प्रकारेण कृतं ग्रथितम् । ("लोपोऽस्योमाङोः ।" इति सूत्रेण अकार लोपः ।) इति सुग्धबोधव्याकरणम् ॥

ब्रह्मोत्तरं, त्रि, ब्रह्मा ब्राह्मणः उत्तरः प्रधानं यस्य । ब्राह्मणस्वामिकभूम्यादि । इति व्यवहार प्रसिद्धम् ॥ (देशभेदः । इति माल्यम् । १९२ । ५० ॥)

ब्रह्मोद्यं, क्ली, (ब्रह्मणो वेदस्य वदनम् । ब्रह्म + वद् + क्यप् ।) ब्रह्मणो वाक्यम् । इति सुग्धबोधव्याकरणम् ॥

ब्रह्मोद्या, त्रि, (ब्रह्म + वद् + क्यप् + टाप् ।) ब्रह्मणः कथा । इति सुग्धबोधव्याकरणम् ॥ (यथा, मनुः । २ । २३१ ।
"ब्रह्मोद्याञ्च कथाः कुर्य्यात् पितृणामेतदीप्सितम् ॥"
"परमात्मनिरूपणपराः कथाश्च कुर्य्यात् ।"
इति तट्टीकायां कुल्लूकभट्टः ॥)

ब्रह्मोपनेता, [तृ] पुं, (ब्रह्माणं ब्राह्मणं उपनयते इति । ब्रह्म + उप + नी + तृच् । उपनयनहेतुकदण्डत्वात्तथात्वम् ।) पलाशवृक्षः । इति राजनिर्घण्टः ॥ ब्राह्मणोपनयनकर्त्ता च ॥

ब्रह्मौदनं, क्ली, (ब्रह्मणे देयमोदनम् ।) यज्ञे ऋत्विग्भ्यो दत्तमन्नम् । इति वैदिकाः । (यथा, अथर्ववेदे । ४ । ३५ । ७ ।
"ब्रह्मौदनं विश्वजितं पचामि शृतन्तु मे क्षत्रधानस्य देवाः ॥")

ब्राह्मं, क्ली, (ब्रह्मण इदम् । ब्रह्मन् + "तस्येदम् ।" ५ । ३ । १२० । इत्यण् । "नक्षत्रेते ।" ६ । ४ । १४४ । इति टिलोपः ।) ब्रह्मतीर्थं । तत्तु अङ्गुष्ठस्य मूले वर्त्तते । इत्यमरः । २ । ७ । ५१ । अनेन तीर्थेन द्विजस्याचमनं यथा, आह्निकतत्त्वे ।
"अन्तर्जानुशुचौ देशे उपविश्य उदङ्मुखः ।
प्राग्वा ब्राह्मेण तीर्थेन द्विजो नित्यमुपस्पृशेत् ॥
अङ्गुष्ठोत्तरतो रेखा या पाणेर्दक्षिणस्य च ।
एतद्ब्राह्ममिति ख्यातं तीर्थमाचमनाय वै ॥"
ब्रह्मपुराणम् । यथा,—
"ब्राह्मं पाद्मं वैष्णवञ्च शैवं भागवतं तथा ॥"
इति मलमासतत्त्वधृतविष्णुपुराणवचनम् ॥
(ब्रह्मसम्बन्धिनि, त्रि । यथा; मनुः । १ । ६८ ।
"ब्राह्मस्य तु क्षपाहस्य यत्प्रमाणं समासतः ।
एकैकस्यो युगानान्तु क्रमशस्तन्निबोधत ॥"
ब्रह्मा देवतास्य इति । ब्रह्मन् + "तस्य देवता ।" ४ । २ । २४ । इत्यण् । टिलोपः । ब्रह्मदेवतासम्बन्धादि । यथा, रघुः । १२ । ६० ।
"अमोघं सन्धे बाणे धनुष्येकधनुर्द्धरः ।
ब्राह्मस्त्रं प्रियायोत्पलनिष्कम्पश्चौषधम् ॥")

ब्राह्मः, पुं, (ब्रह्मणोऽपत्यं पुमान् इति । ब्रह्मन् + "तस्यापत्यम् । ४ । १ । ६२ । इत्यण् । "नक्षत्रेते ।" ६ । ४ । १४४ । इति टिलोपः ।) नारदः । इति शब्दरत्नावली ॥ (ब्रह्मण इदमिति अण् ।) विवाहविशेषः । यथा,—
"वरमाहूय यथाशक्त्यलङ्कृता कन्या यत्र दीयते सः ।"
यथा,—
"आच्छाद्य चार्चयित्वा च श्रुतशीलवते स्वयम् ।
आहूय दानं कन्याया ब्राह्मो धर्म्मः प्रकीर्त्तितः ।"
इत्युद्वाहतत्त्वम् ।
("रात्रेश्च पश्चिमे यामे मुहूर्त्तो ब्राह्म उच्यते ।"
इति नियमात् रात्रिशेषयामार्द्धस्थितोऽरुदयात् प्राक्दण्डद्वयात्मको कालविशेषः । यथा, मनुः । ४ । ९१ ।
"ब्राह्मे मुहूर्त्ते बुद्ध्येत धर्म्मार्थौ चानुचिन्तयेत् ॥")

ब्राह्मण्यं, क्ली, (ब्रह्मन् + ष्यञ् न टिलोपः ।) ब्रह्मसंघातः । ब्राह्मणसमूहः । वेदभागः । इति मेदिनी । ने, ६ ॥

ब्राह्मणः, पुं, ब्राह्मणो विप्रस्य प्रजापतेर्वा अपत्यम् । ब्रह्म वेदमधीते वा यः । इति भरतः । (ब्रह्मन् + अण् "ब्राह्मोऽजातौ ।" ६ । ४ । १७१ । इति टिलोपः ।) तत्पर्य्यायः । द्विजातिः २ अग्रजन्मा ३ भूदेवः ४ वाडवः ५ विप्रः ६ । इत्यमरः ॥ २ । ७ । ४ ॥ द्विजः ७ सूत्रकण्ठः ८ ज्येष्ठवर्णः ९ अग्रजातकः १० द्विजन्मा ११ वक्त्रजः १२ मैत्रः १३ वेदवासः १४ नयः १५ गुरुः १६ । इति शब्दरत्नावली ॥ ब्रह्मा १७ षट्कर्म्मा १८ द्विजोत्तमः १९ । इति राजनिर्घण्टः ॥* ॥ अयं सर्ब्ववर्णश्रेष्ठः । ब्रह्मणो मुखाज्जातः । ब्रह्मद्वीपे तस्य संज्ञा ऋषयः । शाल्मलद्वीपे श्रुतिधराः । कुशद्वीपे कुशलाः । क्रौञ्चद्वीपे गुरवः । शाकद्वीपे ऋतव्रताः । पुष्करद्वीपे सर्ब्वे एकवर्णाः । अस्य शास्त्रनिरूपितधर्म्माख्यः अध्ययनं यजनं दानञ्च । जीविकात्रिधः अध्यापनं याजनं प्रतिग्रहश्च । अयमन्यवर्णचतुष्टयवान् भवति । यथा । ब्रह्मचारी गृहस्थः वानप्रस्थः सन्यासी च । क्षत्रियवैश्ययोस्तु क्रमशः एकैकपादहीनत्वमिति बोध्यम् । इति श्रीभागवतम् ॥ * ॥ ब्राह्मणीक्षत्रियावैश्यात्तु ब्राह्मणाज्जातो ब्राह्मणः । यथा,—
"ब्राह्मण्यां ब्राह्मणाज्जातो ब्राह्मणः स्यान्न संशयः ।
क्षत्रियायां तथैव स्यादैवेश्यायामपि स्मृतः ।"
इति महाभारते अनुशासने । ४० । २८ ।
तस्य लक्षणं यथा,—
"ज्ञात्वा कृत्स्नं श्रुतेनैव स्वाध्यायेन श्रुतेन च ।
अभियुक्तो हि यस्तिष्ठेन्नित्यं स द्विज उच्यते ।"
इति वह्निपुराणम् ।
अपि च ।
"न क्रुध्येन्न प्रहृष्येच्च मानितोऽमानितश्च यः ।
सर्ब्वभूतेष्वभयदस्तं देवा ब्राह्मणं विदुः ।

अङ्गैरिव गजाद्दीप्त: लौहित्यान्नरकादिव।
कुणपादिव च स्त्रीभ्यस्तं देवा ब्राह्मणं विदु:॥
येन केनचिदाच्छन्नो येन केनचिदाशित:।
यत्र क्वचन शायी च तं देवा ब्राह्मणं विदु:॥
विमुक्तं सर्वसङ्गेभ्यो मुनिमाकाशवत् स्थितम्।
अप्रमेयं चरं शान्तं तं देवा ब्राह्मणं विदु:॥
जीवितं यस्य धर्मार्थं धर्मो रत्यर्थमेव च।
अहोरात्राच्च पुण्यार्थं तं देवा ब्राह्मणं विदु:॥
निराशिषमनारम्भं निर्नमस्कारमस्तुतिम्।
अक्षीणं क्षीणकर्माणं तं देवा ब्राह्मणं विदु:॥"

इति महाभारते मोक्षधर्म:॥ * ॥

अपि च। विष्णावयुप उवाच।

"विप्रस्य लक्षणं ब्रूहि लब्धुक्ति: का च तत्कृता।
यत्तत्त्वानुग्रहेणास्य ब्राह्मणा: ब्राह्मणा: कृता:॥

कल्किरुवाच।

वेदा मामीश्वरं प्राहुरव्यक्तं व्यक्तिमत् परम्।
ते वेदा ब्राह्मणमुखे नाना धर्मा: प्रकाशिता:॥
यो धर्मो ब्राह्मणानां हि सा भक्तिर्मम पुष्कला।
तयाहं तोषित: श्रीश: संभवामि युगे युगे॥
ऊर्जेनु विहितं सत्रं सधवानिर्मितं पुरै:।
तत्तुचयमधीयत्तं यज्ञसत्रं विदुर्बुधा:॥
त्रिगुणं तद्गमित्रियुक्तं वेदप्रवरसंस्तुतम्।
शिरोधरान्नाभिमध्यात् पृष्ठार्द्धपरिमाणकम्॥
यजुर्वेदो नाभिमितं सामगानामयं विधि:।
वामस्कन्धेन विधृतं यज्ञसत्रं बलप्रदम्॥
रुद्रमन्त्रचन्दनाद्यैस्तु धारयेत्तिलकं द्विज:।
भाले त्रिपुण्ड्रं कर्माङ्गं केशपर्यन्तमुज्ज्वलम्॥
पृष्ठमङ्गुलिमानन्तु त्रिपुण्ड्रं तत्त्रिधाकृतम्।
ब्रह्मविष्णुशिवावासं दर्शनात् पापनाशनम्॥
ब्राह्मणानां करे स्वर्गो वाचो वेदा: करे हरि:।
गात्रे तीर्थानि यागाश्च नाड़ीषु प्रकृतिश्चितम्॥
सावित्री कण्ठकुहरा हृदयं ब्रह्मसङ्गतम्।
तेषां स्नानान्तरे धर्म: पृष्ठेऽधर्म: प्रकीर्तित:॥
भूदेवा ब्राह्मणा राजन्! पूज्या वन्द्या: सदुक्तिभि:।
चातुराश्रम्यकुशला मम धर्मप्रवर्तका:॥
बालास्यापि ज्ञानवृद्धास्तमोवृद्धा मम प्रिया:।
तेषां वच: पालयितुमवतारा: कृता मया॥
महाभाग्यं ब्राह्मणानां सर्वपापप्रणाशनम्।
क्षणदोषहरं श्रुत्वा मुच्यते सर्वतो भयात्॥"

इति कल्किपुराणे ४ अध्याय:॥ * ॥

अपि च।

"कर्मणा ब्राह्मणो जात: करोति ब्रह्मभावनाम्।
स्वधर्मनिरत: शुद्धस्तस्माद्ब्राह्मण उच्यते॥"

इति ब्रह्मवैवर्ते गणेशखण्डे ३५ अध्याय:॥ * ॥

अपि च।

"जातकर्मादिभिर्यस्तु संस्कारै: संस्कृत: शुचि:।
वेदाध्ययनसम्पन्न: षट्सु कर्मस्ववस्थित:॥
शौचाचारपरो नित्यं विघसाशी गुरुप्रिय:।
नित्यव्रती सत्यरत: स वै ब्राह्मण उच्यते॥
सत्यं दानमथाद्रोह आनृशंस्यं क्षमा घृणा।
तपश्च दृश्यते यत्र स ब्राह्मण इति स्मृत:॥

तस्य धर्मा यथा,—

ब्राह्मणस्य तु यो धर्मस्तं ते वक्ष्यामि केवलम्।
दमस्येव महाराज! धर्ममाहु: पुरातनम्॥
स्वाध्यायाभ्यसनस्यैव तत्र कर्म समाप्यते।
तच्छेदित्तसुपागच्छेदर्नमानं स्वकर्मणि॥
अक्षुब्धाग्नि विकर्माणि शान्तं प्रज्ञानतर्पितम्।
कुर्वीतोपेत्य सन्तानमथ दद्यादृयजेत च॥
संविभज्यापि भोक्तव्यं धनं सद्भिरितीष्यते।
परिनिष्ठितकार्यस्तु स्वाध्यायेनैव ब्राह्मण:॥
कुर्यादन्यन्न वा कुर्यान्मैत्रो ब्राह्मण उच्यते।"

इति पाद्मे स्वर्गखण्डे २६ अध्याय:॥ * ॥

तस्य माहात्म्यादि यथा,—

"सर्वेषामेव वर्णानां ब्राह्मण: परमो गुरु:।
तस्मै दानानि देयानि भक्तिश्रद्धासमन्वितै:॥
सर्वदेवात्मको विप्र: प्रत्यक्षविदृशो भुवि।
स तारयति दातारं दुस्तरे विश्वसागरे॥

हरिशर्मोवाच।

सर्ववर्णगुरुर्विप्रस्त्वया प्रोक्त: सुरोत्तम!।
तेषां मध्ये च क: श्रेष्ठ: कस्मै दानं प्रदीयते॥

ब्रह्मोवाच।

सर्वेऽपि ब्राह्मणा: श्रेष्ठा: पूजनीया: सदैव हि।
अविद्या वा सविद्या वा नात्र कार्या विचारणा॥
स्तेयादिदोषलिप्ता ये ब्राह्मणा ब्राह्मणोत्तम!।
आत्मभ्यो देवियस्तेऽपि परेभ्यो न कदाचन॥
अनाचारा द्विजा: पूज्या न च शूद्रा जितेन्द्रिया:।
अभक्ष्यभक्षका गाव: कोला: सुमतयो न च॥
माहात्म्यं भूमिदेवानां विशेषादुच्यते मया।
तव स्नेहाद्विजश्रेष्ठ! निशामय समाहित:॥
क्षत्रियाणाञ्च वैश्यानां शूद्राणां गुरवो द्विजा:।
अन्योन्यं गुरवो ज्ञेया: पूजनीयाश्च भूसुर!॥
ब्राह्मणं प्रणमेद्यस्तु विष्णुबुद्ध्या नरोत्तम:।
आयु: पुत्राश्च कीर्तिश्च सम्पत्तिस्तस्य वर्द्धते॥
न च नौति द्विजं यस्तु मूढधीर्मानवो भुवि।
सदर्शनेन तच्छीर्षं छेत्तुमिच्छति केशव:॥"

पुण्यादिदत्तब्राह्मणस्य प्रणामनिषेधो यथा,—

"पुण्यदत्तं पयोदत्तं देवदत्तञ्च भूसुर!।
न नमेद्ब्राह्मणं प्राज्ञस्तेभ्यश्चित्तविशुद्धिमान्॥
जलस्थं देवदेवेशस्य ध्यानमञ्चितचेतसम्।
देवपूजाञ्च कुर्वन्तं न नमेद्ब्राह्मणं बुध:॥
बहिष्क्रियां प्रकुर्वन्तं भुञ्जानञ्च द्विजोत्तम!।
तथा सामानि गायन्तं न नमेद्ब्राह्मणं बुध:॥
ब्राह्मणा यत्र तिष्ठन्ति बहवो द्विजसत्तम!।
प्रत्येकन्तु नमस्कारस्तत्र कार्यो न धीमता॥
कृताभिवादनं विप्रं भक्त्या यो नाभिवादयेत्।
स चाण्डालसमो ज्ञेयो नाभिवाद्य: कदापि च॥
कृतप्रणामं तनयं नमेतां पितरौ न च।
कृतप्रणामा: सर्वेऽपि नमस्कार्या द्विजैर्द्विजा:॥
कृतदोषान् द्विजान् गाश्च न द्विषन्ति विचक्षणा:।
द्विषन्ति वापि मौढ्येन तेषां रुष्ट: सदा हर:॥
याचकान् ब्राह्मणान् यस्तु कौपट्यात् प्रपश्यति।

कृच्छ्रोप्रदेषणं तस्य नेत्रयो: क्षुरते यम:॥
विप्रनिर्भर्त्सनं मूढ़ा येन वक्त्रेण कुर्वते।
तस्मिन् वक्त्रे यमस्तप्तं लौहपिण्डं ददाति वै॥"

ब्राह्मणो यदृगृहे भुङ्क्ते तदृगृहे केशव: स्वयम्।
देवता: सकला एव पितरश्च सुरर्षय:॥"

तस्य पादोदकादिमाहात्म्यं यथा,—

विप्रपादोदकं यस्तु कणमात्रं वहेद्बुध:।
देहस्थं पातकं तस्य सर्वमेवाशु नश्यति॥
कोटित्रह्मादण्डमध्येषु सन्ति तीर्थानि यानि वै।
तीर्थानि तानि सर्वाणि वसन्ति द्विजपादयो:॥
विप्रपादोदकैर्नित्यं सिक्तं स्यादृयस्य मस्तकम्।
स स्नात: सर्वतीर्थेषु सर्वयज्ञेषु दीक्षित:॥
सर्वपापानि घोराणि ब्रह्महत्यादिकानि च
सद्य एव विनश्यन्ति विप्रपादाम्बुधारणात्॥
लवाद्या व्याधय: सर्वे परमक्लेशदायका:।
गच्छन्ति विलयं सद्यो विप्रपादाम्बुभक्षणात्॥
पित्रर्थं यानि तोयानि दीयन्ते विप्रपादयो:।
तेनैव पितर: स्वर्गे तिष्ठन्त्याचन्द्रतारकम्॥
प्रक्षाल्य विप्रचरणौ पूर्वाभिर्योऽर्चयेद्बुध:।
तेनार्चितो जगत्स्वामी विष्णु: सर्वसुरोत्तम:॥
विप्राणां पादनिर्माल्यं यो मर्त्य: शिरसा वहेत्।
सत्यं सत्यमहं वच्मि तस्य मुक्तिर्हि शाश्वती॥

तस्य प्रदक्षिणफलम्।

"विप्रं प्रदक्षिणीकृत्य वन्दते यो नरोत्तम:।
प्रदक्षिणीकृता तेन सप्तद्वीपा वसुन्धरा॥"

तस्य पादसेचनफलम्।

यो दद्यात् फलताम्बूलं विप्राणां पादसेचने
इह लोके सुखं तस्य परलोके ततोऽधिकम्॥
पुत्रार्थी लभते पुत्रं धनार्थी लभते धनम्।
मोक्षार्थी लभते मोक्षं विप्रपादस्य सेचनात्॥
रोगी रोगात् प्रमुच्येत पापी मुच्येत पातकात्।
मुच्येत बन्धनाद्बद्धो विप्राणां पादसेचनात्॥
अनपत्याश्च या नार्यो मृतापत्याश्च या: स्त्रिय:।
वन्ध्यपत्या जीववत्सा: स्युर्विप्रपादसेचनात्॥"

इति पाद्मे क्रियायोगसारे २० अध्याय:॥

तस्य सन्ध्याया अकरणे दोषो यथा,—

"नोपतिष्ठति य: पूर्वां नोपास्ते यस्तु पश्चिमाम्।
स शूद्रवद्बहि: कार्य: सर्वस्माद्विजकर्मण:॥"

तस्य सन्ध्याकरणफलं यथा,—

"यावज्जीवनपर्यन्तं यस्त्रिसन्ध्यं करोति च।
स च सूर्यसमो विप्रस्तेजसा तपसा सदा॥
तत्पादपद्मरजसा सद्य: पूता वसुन्धरा।
जीवन्मुक्त: स तेजस्वी सन्ध्यापूतो हि यो द्विज:॥
तीर्थानि च पवित्राणि तस्य सस्पर्शमात्रत:।
तत: पापानि यान्त्येव वैनतेयादिवोरगा:॥

सन्ध्याया अकरणे दोषो यथा,—

"न गृह्णन्ति सुरास्तेषां पितर: पिण्डतर्पणम्।
स्वेच्छया च द्विजातिश्च विसन्ध्यरहितस्य च॥"

तस्य निन्दितकर्माणि यथा,—

"विष्णुमन्त्रविहीनश्च विसन्ध्यरहितो द्विज:।
एकादशीविहीनश्च विप्रहीनो यथाशव:॥
एतैर्वैदभवो न धावको ज्ञवाहक:।

शूद्रान्नभोजी विप्रश्च विषहीनो यथोरग: ॥
शूद्रदाही च शूद्राणां यो विप्रो वृषलीपति: ।
शूद्राणां सूपकारी च शूद्रयाजी च यो द्विज: ।
असिजीवी मसीजीवी विषहीनो यथोरग: ॥
यो विप्रोऽवीरान्नभोजी ऋतुस्नातान्नभोजक: ।
भगजीवी वार्द्धुषिको विषहीनो यथोरग: ।
य: कन्याविक्रयी विप्रो यो हरेर्नामविक्रयी ।
यो विद्याविक्रयी विप्रो विषहीनो यथोरग: ॥
सूर्य्योदये च दिवसे भोजी मत्स्यभोजी च यो
द्विज: ।
शिलापूजादिरहितो विषहीनो यथोरग: ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २१ अध्याय: ॥*॥
अपि च ।
"यदि शूद्रां व्रजेद्विप्रो वृषलीपतिरेव स: ।
स भ्रष्टो विप्रजातेश्च चाण्डालात् सोऽधम:
स्मृत: ॥
विष्ठासमश्च तत्पिण्डो मूत्रं तस्य च तर्पणम् ।
तत्पित्रूणां सुराप्राप्तं पूजने तत्समं सति ॥
कोटिजन्मार्जितं पुण्यं सन्ध्याचीतपमार्जितम् ।
द्विजस्य वृषलीभोगान्नश्यत्येव न संशय: ॥
ब्राह्मणश्च सुरापीती विड्भोजी वृषलीपति: ।
हरिवासरभोजी च कुम्भीपाकं व्रजेद्ध्रुवम् ॥"
अपि च ।
"करोत्यहन्यहन्यां सन्ध्यां वा न करोति य: ।
त्रिसन्ध्यं वर्जयेद्यो वा सन्ध्याहीनश्च स द्विज: ॥
नारायणश्चेत्यादितीर्थे तस्य प्रतिग्रहदोषो यथा,
"तत्र नारायणक्षेत्रे कुरुक्षेत्रे हरे: पदे ।
वाराणस्यां वदर्य्यां च गङ्गासागरसङ्गमे ॥
पुष्करे भास्करक्षेत्रे प्रभासे रोमकाख्ये ।
हरिद्वारे च केदारे सोमे बदरिकाश्रमे ॥
सरस्वतीनदीतीरे पुण्ये वृन्दावने वने ।
गोदावर्य्यां च कौशिक्यां त्रिवेण्यां हिमालये ॥
एतेष्वन्येषु यो दानं प्रतिगृह्णाति कामत: ।
स च तीर्थप्रतिग्राही कुम्भीपाकं प्रयाति च ॥"
पारिभाषिकमहापातकिब्राह्मणा यथा,—
"शूद्रसम्भोगिकन्यार्थी ग्रामयाजीति कीर्त्तित: ।
देवोपजीवजीवी च देवलश्च प्रकीर्त्तित: ॥
शूद्रपाकोपजीवी य: सूपकार: प्रकीर्त्तित: ।
सन्ध्यापूजाविहीनश्च प्रमत्त: पतित: स्मृत: ॥
एते महापातकिन: कुम्भीपाकं प्रयान्ति ते ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २० अध्याय: ॥*॥
विप्राणामाशौचक्षपनं पूर्णस्वस्ययनं यथा,—
"आशौचं कर्त्तुमर्हन्ति प्रसन्नमनसा शिवम् ।
पूर्णस्वस्ययनं सद्यो विप्राणामाशौचनं ध्रुवम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १३ अध्याय: ॥
ब्राह्मणस्य स्वधर्म्मो यथा,—
"ब्राह्मणस्य स्वधर्म्मस्य त्रिसन्ध्यमर्चनं हरे: ।
तत्पादोदकनैवेद्यभक्षणञ्च सुधाधिकम् ॥
यज्ञं विष्णो वत्सं सूत्रमग्निदेवं हरेर्मुख ! ।
भवन्ति ऋषय: सर्व्वे ब्राह्मणा यदि सुव्रते ॥
स्नानोर्द्धं सुव्रते विप्रा एकादश्यां न भुञ्जते ।
एकादश्यधिके चैव शिवरात्रौ सनिश्चितम् ॥

तथा रामनवम्यान्च यत्नत: पुण्यवासरे ।
ब्राह्मणानां स्वधर्म्मश्च कथितो ब्रह्मणा नृप ! ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ५६ अध्याय: ॥
गृहस्थब्राह्मणनियमा यथा,—
"वेदं वेदौ तथा वेदानधीत्य तु समाहित: ।
तदर्थमभिगम्याथ तत: स्नायाद्द्विजोत्तम: ॥
गुरवे तु धनं दत्त्वा स्नायीत तदनुज्ञया ।
चीर्णव्रतोऽथ सुस्नात: शुक्लवस्त्र: स्नातुमर्हति ॥
वेणवीन्धारयेद्यष्टिमन्तर्वासमधोत्तरम् ।
यज्ञोपवीतद्वितयं सोदकञ्च कमण्डलुम् ॥
छत्रञ्चोष्णीषममलं पादुके चाप्युपानहौ ।
रौक्मे च कुण्डले धार्य्ये छत्तकेशनख: शुचि: ॥
स्वाध्याये नित्ययुक्त: स्याद्दक्षिणार्थं न धारयेत् ।
अन्यत्र काञ्चनाद्विप्रो न रत्नं विभृयात् स्रजम् ॥
शुक्लाम्बरधरो नित्यं सुगन्ध: प्रियदर्शन: ।
न जीर्णमलवद्वासा भवेच्च विभवे सति ॥
न रक्तसुखवस्त्रास्य धृतं वासो न कुण्डिकाम् ।
नोपानहौ सजं वाथ पादुके च प्रयोजयेत् ॥
उपवीतमलङ्कारं कुर्य्यान् मुञ्जाजिनानि च ।
नाग्नेयं परीदध्यादासो न विकृतं वसेत् ॥
आहरेद्विधिवद्भैक्षमान् सदृशमात्मन: शुभाम् ।
रूपलक्षणसंयुक्तां योनिदोषविवर्जिताम् ॥
असाङ्गोत्रप्रभवामसमानार्षगोत्रजाम् ।
आहरेद्ब्राह्मणो भार्य्यां शीलशौचसमन्विताम् ॥
ऋतुकालाभिगामी स्यादावत् पुत्रोऽभिजायते ।
वर्जयेत् प्रतिषिद्धानि प्रयत्नेन दिनानि तु ॥
षष्ठाष्टमी पर्वदर्शी द्वादशी च चतुर्दशी ।
ब्रह्मचारी भवेन्नित्यं तद्भक्त्यभ्यवहारि च ॥
आदधीतावसथ्याग्निं जुहुयाच्चातिवेदसम् ।
व्रतानि स्नातको नित्यं पावनानि च पालयेत् ॥
वेदोदितं स्वकं कर्म्म नित्यं कुर्य्यादतन्द्रित: ।
अकुर्व्वाण: पतत्यासु नरकानतिभीषणान् ॥
अभ्यसेत् प्रयतो नित्यं वेदं यज्ञान्न हापयेत् ।
कुर्य्यादन्यानि कर्म्माणि सन्ध्योपासनमेव च ॥
सत्यं समाधिकै: कुर्य्यादुपेयादीश्वरं सदा ।
देवतान्यपि गच्छेत्तु कुर्य्याद्वार्य्याभिपोषणम् ॥
न धर्म्मं स्थापयेद्विद्वान् न पापं गूहयेदपि ।
कुर्व्वीतात्महितं नित्यं सर्व्वभूतानुकम्पक: ॥
वयस: कर्म्मणोऽर्थस्य श्रुतस्याभिजनस्य च ।
वेशवाग्बुद्धिसारूप्यमाचरन् विचरेत् सदा ॥
श्रुतिस्मृत्युदितं सम्यक् साधुभिर्यच्च सेवित: ।
तमाचरन्निषेवेत नेहेतान्यत्र कर्हिचित् ॥
येनास्य पितरो याता येन याता: पितामहा: ।
येन यान्ति सतां मार्गं तेन गच्छंस्तरिष्यति ॥
नित्यं स्वाध्यायशील: स्यान्नित्यं यज्ञोपवीतिमान् ।
सत्यवादी जितक्रोधो ब्रह्मभूयाय कल्पते ॥
सन्ध्यास्नानरतो नित्यं ब्रह्मयज्ञपरायण: ।
अनसूयुरदुर्दान्तो मृदुश्च: प्रत्यवर्हक: ॥
वीतरागभयक्रोधो लोभमोहविवर्जित: ।
सावित्रीजापनिरत: अप्रमादात् सुव्रतो गुरौ ॥
मातापित्रोर्हिते युक्तो गोब्राह्मणहिते रत: ।
दाता यज्ञी देवभक्तो ब्रह्मलोके महीयते ॥

त्रिवर्गसेवी सततं देवतानाञ्च पूजनम् ।
कुर्य्यादहरहर्नित्यं नमस्येत् प्रयत: सुरान् ॥
विभागशील: सततं क्षमायुक्तो दयात्मक: ।
गृहस्थस्तु समायुक्तो न गृही न गृही भवेत् ॥
क्षमा दया च विज्ञानं सत्यमेव दम: शम: ।
अध्यात्मं नित्यता ज्ञानमेतद्ब्राह्मणलक्षणम् ॥
एतस्मान्न प्रमाद्येत विप्रश्चैव द्विजोत्तम: ।
यथाशक्ति चरन् कर्म्म निन्दितानि विवर्जयेत् ॥
विधूय मोहकलिलं लब्ध्वा योगमनुत्तमम् ।
गृहस्थो सुध्यते चात्मात्र कार्य्या विचारणा ॥
विगर्हातिक्रमक्षेपहिंसावत्त्वबधात्मनाम् ।
अन्यमन्युसमुत्थानां दोषाणां वर्जनं क्षमा ॥
स्वदु:खेष्विव कारुण्यं परदु:खेषु सौहृदम् ।
दया मनुसुत: प्राहु: साक्षाद्धर्म्मस्य साधनम् ॥
चतुर्दृष्टानां विद्यानां धारणं हि यथार्थत: ।
विज्ञानमितरं विद्याद्येन धर्म्मो विवर्द्धते ॥
अधीत्य विधिवद्विद्वानर्थतश्चोपलभ्य तु ।
धर्म्मेकार्य्यान्निवृत्तश्चेन्न तद्विज्ञानमिष्यते ॥
सत्येन लोकं जयति सत्यन्तत् परमं पदम् ।
यथा भूतप्रसादस्तु सत्यमाहुर्मनीषिण: ॥
दम: शरीरावनति: शम: प्रज्ञा प्रसादज: ।
अध्यात्मचरं विद्याद्यत्र गत्वा न शोचति ।
यथा च देवो भगवान् विश्वते यत्र विश्वते ।
साक्षादेव महादेव ! तज्ज्ञानमिति कीर्त्तितम् ।
तस्मिंस्तत्परो विद्वान्नित्यमक्रोधन: शुचि: ।
महायज्ञपरो विप्रो लभते तदनुत्तमम् ॥
धर्म्मस्यायतनं यत्नाच्छरीरं परिपालयेत् ।
न हि देहं विना सूक्ष्म ! पुरुषैरिष्यते पर: ॥
नित्यं धर्म्मार्थकामेषु युक्तौ नियतो द्विज: ।
न धर्म्मवर्जितं कामसर्थं वा मनसा स्मरेत् ॥
शोदनमपि सुधर्म्मेण सत्यधर्म्मं समाचरेत् ।
सर्व्वो हि भगवान्देवो गति: सर्व्वेषु जन्तुषु ।
भूतानां प्रियकारी स्यान्न परद्रोहकर्म्मधी: ॥
न वेददेवतानिन्दां कुर्य्यात्तैश्च न सम्वदेत् ।
यस्मिन् नियतो विप्रो धर्म्माध्यायं पठेत् शुचि: ।
आध्यापयेच्छ्रावयेद्वा ब्रह्मलोके महीयते ॥"
इति कौर्म्मे उपविभागे १४ अध्याय: ॥
अपि च । सूत उवाच ।
"आनृशंस्यं क्षमा सत्यमहिंसा दममार्द्दवम् ।
ध्यानं प्रसादो माधुर्य्यमार्ज्जवं शौचमेव च ॥
इज्या दानं तप: सत्यं स्वाध्याय: स्वात्मनिग्रह: ।
अलोपवासौ सौनञ्च ज्ञानं पैशुन्यवर्जनम् ॥
एभिर्युक्तो मुनिश्रेष्ठ य: सदा वर्त्तते द्विज: ।
कृत्वा तु पावकं सर्व्वं परं ब्रह्माधिगच्छति ॥
ऋषिर्वा यदि वा विप्रो गृहस्थ: सार्म्मिकोऽपि
वा ।
यो द्विजस्तपसा युक्त: स परं स्थानमाप्नुयात् ॥
सर्व्वेषामुत्तमं श्रेष्ठं विमुक्तिफलदायकम् ।
ब्राह्मणस्य तपो वक्षे तन्मे निगदत: शृणु ।
सायं प्रातश्च य: सन्ध्यासुपास्ते सुसमाहित: ।
जपन् हि पावनीं देवीं गायत्रीं वेदमातरम् ।
तपसा भावितो देवो ब्राह्मण: पूतकिल्बिष:

त्रिर्वपेदिति विशेषावधारणकल्पना ६। एवमन्यदपि उदाहार्य्यम्॥ न च हेत्वादीनामन्यतमं ब्राह्मणमिति लक्षणम्। मन्त्रेष्वपि हेत्वादिसद्भावात्। इन्द्रोवासुप्रश्नन्निहीति हेतुः। उदानियुर्मरुतोरिति तस्मादुदकसुच्यते इति निर्वचनम्। मोघमन्नं विन्दते अप्रचेताः इति निन्दा। अग्निर्मूर्द्धादिवः इति प्रशंसा। अधः श्विदासीदुपरिस्विदासीदिति संशयः। वसन्ताय कपिञ्जलानालभत इति विधिः। सहस्रमयुतादद्दिति परकृतिः। यज्ञेन यज्ञमयजन्त देवा इति पुराकल्पः। इति करणबहुलं ब्राह्मणमिति चेत् न इत्यदा इत्यजया इत्यपच इति ब्राह्मणो गायेदित्यस्मिन् ब्राह्मणेन गातव्ये मन्त्रेऽतिव्याप्तेः। इत्याहेत्यनेन वाक्येनोपनिबद्धं ब्राह्मणमिति चेन्न राजानित्यं भगं भक्षीत्याह यो वा रुचाः शुचिरस्नीत्याह इत्यनयोर्मन्त्रयोरतिव्याप्तेः आख्यायिकारूपं ब्राह्मणमिति चेन्न यमयमीसंवादरूपाद्यावतिव्याप्तेः तस्माद्ब्राह्मणस्य लक्षणमिति प्राप्ते ब्रूमः मन्त्रब्राह्मणरूपौ द्वावेव वेदभागौ इत्यङ्गीकारात् मन्त्रलक्षणस्य पूर्व्वमभिहितत्वादवशिष्टो वेदभागो ब्राह्मणमित्येतल्लक्षणं भविष्यति। तदेतल्लक्षणद्वयं जैमिनिः सूत्रयामास तच्चोदकेषु मन्त्राख्येषु ब्राह्मणशब्द इत्यादि॥"

विष्णुः। यथा, महाभारते। १३। १४६। ८४।

"ब्रह्मविद्ब्राह्मणो ब्रह्मी ब्रह्मजो ब्राह्मणप्रियः॥"

शिवः। यथा, तत्रैव। १३। १७। १३३।

"गभस्तिब्रह्मवृद्ब्रह्मा ब्रह्मविद् ब्राह्मणो गतिः॥"

(ब्रह्म जानातीति युत्पत्त्या परब्रह्मवेत्तरि, त्रि॥)

ब्राह्मयजुवः, पुं, (ब्राह्मयवंशोत्पन्नतया वेदोक्तकर्म्माकुर्व्वन्नपि ब्राह्मणं ब्रवीतीति। ब्राह्मण + ब्रू + क + बाहुलकात् न वधादेशः।) ब्राह्मयजातिमात्रोपजीवी। यथा,—

"विप्रः संस्कारयुक्तो न नित्यं सन्ध्यादि कर्म्म यः।
नैमित्तिकन्तु नो कुर्य्यात् ब्राह्मयजुव उच्यते॥
युक्तः स्यात् सर्व्वसंस्कारैर्द्विजस्तु नियमव्रतैः।
कर्म्म किञ्चिन्न कुरुते वेदोक्तं ब्राह्मयजुवः॥
गर्भाधानादिभिर्युक्तस्त्रयीपठनयेन च।
न कर्म्मतत्त्वं बोधीते स ज्ञेयो ब्राह्मयजुवः॥
अध्यापयति नो शिष्यान्नाधीते वेदसत्तमम्।
गर्भाधानादसंस्कारैर्युतः स्याद्ब्राह्मयजुवः॥"

इति पाद्मोत्तरखण्डे १०६ अध्यायः॥

श्राद्धे दाने फलविशेषो यथा,—

"सममब्राह्मणे दानं द्विगुणं ब्राह्मयजुषे।
अधीते शतसाहस्रमनन्तं वेदपारगे॥"

इति मानवे ७। ८५॥

ब्राह्मयष्टिका, स्त्री, (ब्राह्मयस्य यष्टिरिव। ततः स्वार्थे संज्ञायां वा कन् अत इत्वञ्च।) इक्षुविशेषः। वामनघाटी इति भाषा। तत्पर्य्यायः। मधुका २ ब्राह्मणी ३ पद्मा ४ भार्गी ५ ब्रह्मदण्डी ६ ब्रह्मयष्टिका ७ दर्भरः ८ दर्भकः ९। इत्यमरः। २। ४। ८८॥ ब्रह्मयष्टिः १० ब्रह्मयष्टी ११ ब्रह्मीका १२ यष्टी १३ ब्रह्मयष्टिका १४ दुर्व्वरा १५ ब्रह्मारक्षरी १६ वाल्वेयः १७ ब्राह्मिका १८। इति शब्दरत्नावली॥ भृगुभवा १६ पथ्या २० खरशाकः २१ दण्डिका २२। अस्या गुणाः।

"भार्गी रूक्षा कटुस्तिक्ता रुष्योष्णा पाचनी लघुः।
दीपनी तुवरा गुल्मरक्तनुन्नाग्नयेदुभवम्॥
श्लीपकासकफश्वासपीनसज्वरमारुतान्।"

इति भावप्रकाशः॥

ब्राह्मयष्टी, स्त्री, (ब्राह्मयस्य यष्टीव।) भार्गी। इति राजनिर्घण्टः॥

ब्राह्मयहितः, त्रि, (ब्राह्मयस्य हितः।) ब्राह्मयस्य हितकारी। तत्पर्य्यायः। ब्राह्मण्यः २। इति शब्दार्थचन्द्रिका॥

ब्राह्मयायनः, पुं, (ब्राह्मयस्यापत्यम्। "नडादिभ्यः फक्।" ४। १। ९९। इति फक्।) बुद्धसन्तानभेदो विप्रः। इति त्रिकाण्डशेषः॥

ब्राह्मयी, स्त्री, फल्गिका। इक्षा।

("सृक्काद्वक् ब्राह्मयीदेवी सरस्वाला लता लघुः।
सप्तद्रान्ता वधूः कोटिवर्षालब्धो पिकेत्यपि॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥

भार्गी। तत्पर्य्यायो यथा,—

"पद्मा गन्धर्व्वहस्ता च काञ्ची चाङ्गारपर्ण्यपि।
भार्य्यम्बुयष्टिका ब्राह्मीः ब्राह्मयी ब्रह्मचारिणी॥"
"हरेनुरेणुका कौन्ती ब्राह्मणी हैमगन्धिनी॥"

इत्युभे वैद्यकरत्नमालायाम्॥

ब्राह्मण + ङीष्।) ब्राह्मणपत्नी। इति विश्वः। (यथा, मनुः। ८। ३७६।

"ब्राह्मयीं यद्यनुप्रान्तु गच्छेतां वैश्यशूद्रयोः।
वैश्यं पञ्चशतं कुर्य्यात् क्षत्रियन्तु सहस्रिणम्॥")

वरटी। इति त्रिकाण्डशेषः॥ पिपीलिकाभेदः। तत्पर्य्यायः। स्थूलशीर्षिका २। इति हेमचन्द्रः॥

ब्राह्मयीगमने दोषो यथा,—

"कुलटाविप्रपत्नीनां गमने सुरविप्रयोः।
ब्रह्महत्यायोऽर्द्धांशं पातकन्तु भवेद्ध्रुवम्॥
तासामुपस्थितानाञ्च गमने तच्चतुर्थकम्।
त्यागे धर्म्मो नास्ति पापमित्याह कमलोद्भवः॥
विप्रपत्नीसतीनाञ्च गमनेन बलेन चेत्।
ब्रह्महत्याशतं पापं भवेदेव श्रुतौ श्रुतम्॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ४५ अध्यायः॥

(बृहिः। इयं हि भगवता ब्राह्मयात्मना कण्विता अर्च्जुनाय कथिता। यथा, महाभारते १४। ३४। ११-१२।

अर्च्जुन उवाच।

"क्व नु सा ब्राह्मयी ब्रह्मन्! क्वासौ ब्राह्मयर्षभः।
याभ्यां विहिरियं प्राप्ता तावुभौ पद मेऽनुगतः॥

श्रीभगवानुवाच।

मनो मे ब्राह्मयं विद्धि बुद्धिं मे विद्धि ब्राह्मयीम्।
क्षेत्रज्ञ इति यत्रोक्तः सोऽहमेव धनञ्जय!॥")

तीर्थविशेषः। यथा, महाभारते। ३। ८३। ५५।

"ततो वै ब्राह्मयीं गत्वा ब्रह्मचारी जितेन्द्रियः।
पद्मवर्णेन यानेन ब्रह्मलोकं प्रपद्यते॥")

ब्राह्मयं, क्ली, (ब्राह्मयाणां समूहः। ब्राह्मय + "ब्राह्मयमानवबाडवाद्यत्।" ४। २। ४२। इति यत्।) ब्राह्मयसमूहः। इत्यमरः। ३। ३। ४१॥ ब्राह्मयत्वम्। इति मेदिनी। ये, ६७। (यथा, मनुः। ३। १७।

"शूद्रां शयनमारोप्य ब्राह्मयो यात्यधोगतिम्।
जनयित्वा सुतं तस्यां ब्राह्मयत्वादेव हीयते॥")

ब्राह्मयः, पुं, अनिग्रहः। इति शब्दमाला॥

ब्राह्मसुकृर्त्तः, पुं, (ब्राह्मो ब्रह्मदेवताको सुकृर्त्तः।) अरुणोदयकालस्य प्रथमसण्डद्वयम्। ब्राह्मसुकृर्त्तमाह पितामहः।

"रात्रेश्च पश्चिमे यामे शेषार्द्धप्रहरे बुधैः।
पश्चिमे यामे शेषार्द्धप्रहरे ब्राह्मो सुकृर्त्तः इति मदनपारिजातात्। तत्रापि सूर्य्योदयात् प्राक् चतुर्थप्रहरे द्वौ सुकृर्त्तौ तत्राद्यो ब्राह्मः द्वितीयो रौद्रः। इत्याह्निकतत्त्वम्॥ ७॥
"ब्राह्मे सुकृर्त्ते चोत्तिष्ठेत् सस्मरेद्धर्म्ममात्मनः।
शरीरचिन्तां निर्व्वर्त्त्य मैत्रं कर्म्म समाचरेत्॥"

इति राजवल्लभः।

तत्तुल्यं प्रातःशब्दशब्दे द्रष्टव्यम्। ब्रह्मणो सुकृर्त्तः। स तु एकमनुस्थितिकालः।

"दैविकानां युगानान्तु सहस्रं ब्रह्मणो दिनम्।
मन्वन्तरं तथैवैकं तस्य भागश्चतुर्दशः॥"

इति लिङ्गपुराणदर्शनात्।

ब्राह्माहोरात्रः, पुं, (ब्रह्मणोऽहोरात्रः।) ब्रह्मणो दिनयामिन्यौ। स तु दैवयुगसहस्रेण भवति। स च कृतां कल्पदयकालः। तत्र दिनसहयकल्पः रात्रिश्च तदयकल्पः। इत्यमरटीकायां भरतः॥

"दैविकानां युगानान्तु सहस्रं परिसंख्यया।
ब्राह्ममेकमहर्ज्ञेयं तावती रात्रिरेव च॥
तद्वै युगसहस्रान्तं ब्राह्मं पुण्यमहर्विदुः।
रात्रिञ्च तावतीमेव तेऽहोरात्रविदो जनाः॥"

इति मानवे १। ७३।

ब्राह्मिका, स्त्री, (ब्राह्मी एव। संज्ञायां स्वार्थे वा कन् अतइत्वञ्च।) ब्राह्मयष्टिका। इति शब्दरत्नावली॥

ब्राह्मी, स्त्री, (ब्रह्मण इयम्। ब्रह्म + अण्। टिलोपः। स्त्रियां ङीप्।) दुर्गा। यथा,—

"इदमस्मच्छरीरं यदप्रमेयं प्रमागतः।
इदमित्यीर्य्यमित्युक्तं ब्राह्मी देवी ततः स्मृता॥"

इति देवीपुराणे ४५ अध्यायः॥

शिवस्याष्टमाष्टकान्तर्गतमाष्टकाविशेषः। सा च ब्रह्मशक्तिः। सरस्वती। शाकभेदः। तत्पर्य्यायः। मत्स्याक्षी २ वयस्या ३ सोमवल्लरी ४। इत्यमरः। २। ४। १३०॥ चत्वारि सोमलतायां। ब्राह्मीशाके इति केचित्। इति तट्टीकायां भरतः॥ (यथा, मार्कण्डे १११ अध्याये।

"यथा त्रिकटुकश्चैव लवणं चूर्णसत्तमम्।
ब्राह्मीरसे भावितञ्च महर्षिपिशुनन्तितम्।

सप्ताहं भक्षितं कृष्णान्नैश्वर्यं मतिं पराम् ॥")
ब्रह्मीशाकस्य पर्य्यायान्तरं यथा। सरस्वती ५ भौम्या ६ सुरश्रेष्ठा ७ सुवर्चला ८ कपोतवेगा ९ वैधात्री १० दिव्यतेजाः ११ महौषधी १२ स्वायम्भुवी १३ सोम्यलता १४ सुरेष्टा १५ ब्रह्मकन्यका १६ मण्डूकमाता १७ मण्डूकी १८ सुरसा १९ मेधा २० वीरा २१ भारती २२ वरा २३ परमेष्ठिनी २४ दिव्या २५ शारदा २६। अस्या गुणाः। हिमत्वम्। कषायत्वम्। तिक्तत्वम्। वातास्रपित्तनाशित्वम्। बुद्धिप्रज्ञामेधाकारित्वम्। आयुर्वर्द्धकत्वञ्च। इति राजनिर्घण्टः॥ अपि च।
ब्राह्मी कपोतवल्ली स्यात् सोमवल्ली सरस्वती॥"
अथ ब्रह्ममण्डूकी।
"मण्डूकपर्णी मण्डूकी त्वाण्डी दिव्या महौषधी॥"
अस्या गुणाः।
"ब्राह्मी हिमा वरा तिक्ता लघुर्मेध्या च शीतला।
कषाया मधुरा खाद्वपाकायुष्या रसायनी॥
स्वर्य्या स्मृतिप्रदा कुष्ठपाण्डुमेहास्रकासजित्।
विषश्लीपदव्यरहरी तद्वन्मण्डूकपर्णिनी॥"
इति भावप्रकाशः॥ ८॥
षड्ङ्गिका। वामनहाटी इति भाषा। पङ्कगड़मनुसः। पाँकाल इति भाषा। सोमवल्लरी। सोमलता इति ख्याता। इति मेदिनी॥ महाज्योतिष्मती। बड़ी मालकङ्गनी इति हिन्दी भाषा। मनुस्याणी। मच्छाछी इति कृष्णछरिया इति च हिन्दी भाषा। वाराहीकन्दः। छिलमोचिका। इति राजनिर्घण्टः॥ छिंपा इति भाषा। रोहिणीनक्षत्रम्। इति हेमचन्द्रः॥ (ब्रह्म+अण्+ङीप्।) ब्रह्माधिष्ठातृदेवताकत्वात् तथात्वम्॥ सूर्य्यसूनिः। यथा, मार्कण्डेये। १०६। ७१।
"ब्राह्मी माहेश्वरी चैव वैष्णवी चैव ते तनुः।
विद्या यस्य स्वरूपन्तु भागीर्भास्वान् प्रसीदतु॥"
त्रि, ब्रह्मप्राप्तियोग्या। यथा, मनुः। २। २८।
"स्वाध्यायेन व्रतैर्होमैस्त्रैविद्येनेज्यया सुतैः।
महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुः॥")
ब्रह्मभवा। यथा गीतायाम्। २। ७२।
"एषा ब्राह्मी स्थितिः पार्थ! नैनां प्राप्य विमुह्यति॥")
ब्रीकन्दः, पुं, (ब्राह्मणः कन्द इव कन्दो यस्य।) वाराहीकन्दः। इति राजनिर्घण्टः॥
ब्रीड, स्त्री, विलयः। ह्रीडम्। इति धरणिः॥ (ब्रह्मण इदम्। ब्रह्मन्+ष्यञ्।) ब्रह्मसम्बन्धिनि त्रि। (यथा, मार्कण्डेये। ६। ३८।
"चतुर्दश गुणो ह्येष कालो ब्राह्ममयः स्मृतः॥")
निषेकादिब्राह्मशब्दार्थोऽप्यत्र॥ (यथा, रघुः। १२। ६७।
"ब्राह्मसत्रं प्रियाप्राकाम्यनिष्क्रयौषधम्॥")

ब्रुवत् [त्] त्रि, (ब्रवीतीति। ब्रू+शतृ।) कथयन्। वक्ता। यथा,—
"क्षते निःसंशये पापे न शुद्धीतानुपस्थितः।
शुद्धाशो वर्द्धयेत् पापमसत्यं संसदि ब्रुवन्॥"
इति प्रायश्चित्ततत्त्वम्॥
ब्रुवाणः, त्रि, (ब्रूते इति। ब्रू+शानच्।) वक्ता। यथा,—
"इति ब्रुवाणो मधुरं हितञ्च
तमाश्विहय्येधिलयज्ञभूमिम्।
रामं मुनिः प्रीतिमना मखान्ते
यज्ञांशि राज्ञां निजिघृक्षयिष्यन्॥"
इति भट्टिः। २। ४०॥
ब्रू ल च उक्तौ। इति क्रविकल्पद्रुमः॥ (अदा०-उभ०-सक०-सेट्।) ल च ब्रवीति। ब्रूते। विब्रूतिः कटके क्षतेत्यत्र अरविहितकार्य्यस्थानित्वान्न वचादेशः। इति दुर्गादासः॥

भ

भ भकारः। स च व्यञ्जनचतुर्विंशतितमः पवर्गीयचतुर्थो वर्णः। अस्योच्चारणस्थानं ओष्ठः। इति शाकरणम्॥ (तथा च सिद्धान्तकौमुद्याम्। उपूपध्मानीयानामोष्ठौ॥") तस्य स्वरूपादि यथा,—
"भकारं शृणु चार्वङ्गि! स्वयं परमकुण्डली।
महामोक्षप्रदं वर्णं तरुणादित्यसंप्रभम्॥
पञ्चप्राणमयं वर्णं पञ्चदेवमयं सदा।"
इति कामधेनुतन्त्रम्॥
(वर्णोच्चारणतौ) तस्य लिखनक्रमो यथा,—
"ऊर्द्धाधःक्रमतो रेखा वामे वक्रा तु कुण्डली।
पुनश्चाधोगता सैव अत ऊर्द्धगता पुनः॥
ब्रह्मा शम्भुश्च विष्णुश्च क्रमतस्तासु तिष्ठति॥"
अस्य लेखनप्रकारान्तरं यथा,—
"किञ्चिदाकुञ्चिता रेखा वामदक्षिणतो गता।
ततो वक्रा वामगता तासु वाण्यादयः क्रमात्॥
ऋजुमात्रा मध्यगता कोणादूर्द्धगता पुनः।
महाशक्तिस्वरूपा सा ध्यानमस्य प्रचक्षते॥"
तद्यथा,—
"तडित्प्रभां महादेवीं नागकुण्डलशोभिताम्॥
षड्भुजां वरदां भीमां रक्तपङ्कजलोचनाम्॥
रक्तवस्त्रपरीधानां रक्तपुष्पोपशोभिताम्।
चतुर्वर्गप्रदां देवीं साधकाभीष्टसिद्धिदाम्॥
एवं ध्यात्वा ब्रह्मरूपां तन्मन्त्रं दशधा जपेत्॥"
तन्त्रग्रामसतो यथा,—
"त्रिशक्तिसहितं वर्णं त्रिविन्दुसहितं प्रिये!।
व्यात्मादितत्त्वसंयुक्तं भकारं प्रणमाम्यहम्॥"
इति वर्णोद्धारतन्त्रम्॥
तस्य नामानि यथा,—
"भः क्षिप्रा भ्रमरो भीमो विश्वमूर्त्तिर्निशाभवम्।
द्विरण्डो भूधरो रुद्रो यज्ञश्चस्य वाचकः॥
नक्षत्रं भ्रमणा दीप्तिर्वयो भूमिः पयो नभः।
नाभिर्भद्रं महाबाहुर्विश्वमूर्त्तिर्विताक्षकः॥

भक्तं, क्ली, (भज्यते सेवते इति भजसेवायां+कर्म्मणि क्तः।) अन्नम्। इत्यमरः। २। ९। ४८॥
अथ भक्तस्य नामानि साधनं गुणाश्च।
"भक्तमन्नं तथान्नञ्च क्वचित् कूरश्च कीर्त्तितम्।
ओदनोऽस्त्री स्त्रियां भिक्षा दीदिविः पुंसि भाषितः॥"
सुधौतांस्तण्डुलान् स्फीतांल्लोके पञ्चगुणे पचेत्।
तद्भक्तं ब्रह्मणश्रेष्ठं विशदं गुणवत्तमम्॥
भक्तं वह्निकरं पथ्यं तर्पणं रोचनं लघु।
अधौतमहितं शीतं गुर्व्वरुष्णं कफप्रदम्॥"
इति भावप्रकाशः॥
हरये निवेदितान्नस्य गित्यं भक्षणे फलं यथा,
"ये विप्रा हरये दत्त्वा नित्यमन्नञ्च भुञ्जते।
उच्छिष्टभोजनास्तेषां हरेर्दास्यं लभेन्नरः॥"
हरये अदत्त्वा तद्भक्षणे दोषो यथा,—
"न दत्त्वा हरये भक्ष्यं भुञ्जते चेदबान्धवाः।
पुरीषसदृशं वस्तु फलं मूत्रसमं भवेत्॥"
शूद्रश्चेद्धरिभक्तश्च नैवेद्यभोजनोत्सुकः।
आमान्नं हरये दत्त्वा पाकं कृत्वा च खादति॥"
अन्नदानफलं यथा,—
"अन्नञ्च सर्व्वजीवेभ्यः पुण्यार्थं दातुमर्हति।
दत्त्वा विशिष्टजीवेभ्यो विशिष्टं फलमाप्नुयात्॥
अतो दत्त्वा मानुषेभ्यो लभतेऽष्टगुणं फलम्।
ततो विशिष्टभूतेभ्यो दत्त्वा तद्विगुणं फलम्॥
दत्त्वान्नं वैष्णवातिथ्यस्तत्त्वाष्टगुणं फलम्।
दत्त्वान्नं क्षत्रियेभ्योऽपि वैश्यानां द्विगुणं भवेत्॥
क्षत्रियाणां शतगुणं विप्रेभ्योऽन्नं प्रदाय च।
विप्राणाञ्च शतगुणं ब्राह्मणे ब्राह्मणे फलम्॥
ब्राह्मणानां शतगुणं भक्ते विप्रे लभेद्ध्रुवम्।
न चान्नं हरये दत्त्वा सुकृते भक्ता च सादरम्॥
विष्णवे भक्तविप्राय दत्त्वा दातुञ्च यत् फलम्।
तत् फलं लभते नूनं भक्तब्राह्मणभोजने॥
भक्ते तुष्टे हरिस्तुष्टो हरौ तुष्टे च देवताः।
भवन्ति सिक्ताः शाखाश्च यथा मूलनिषेचनात्॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे २१ अध्यायः॥

तस्य एकादश्यां यावाश्रयत्वं भक्षणे दोषश्च यथा,—
"एकादश्यामागतायां पावयन्त्यां जगत्त्रयम्।
स्यातयमन्नमाश्रित्य भक्तं वा पापपूरुष!॥
अन्नमाश्रित्य निवसन् भक्तं पापपूरुषम्।
न हनिष्यति मनुष्यैरियमेकादशी तिथिः॥
तस्मादन्नं न भोक्तव्यं कदाचिदपि सत्तमैः।
आत्मनो हितमिच्छद्भिः संप्राप्ते हरिवासरे॥
संसारे यानि पापानि तान्येवैकादशीदिने।
अन्नमाश्रित्य तिष्ठन्ति पुष्करीकेक्षणाज्ञया॥
भुञ्जतां सर्वपापानि नरकान्निष्कृतिर्भवेत्।
न निष्कृतिर्भवेत्तेषां भुञ्जतां हरिवासरे॥
मर्त्या भक्तानि यावन्ति भुञ्जते हरिवासरे।
प्रतिभक्तं ब्रह्महत्याकोटिजं पातकं लभेत्॥
सर्वपापाश्रयं भक्तं वर्जनीयं हरिवासरे।
मोहाद्ये भुञ्जते वापि ते ज्ञेयाः पापिनां वराः॥"

इति पाद्मे क्रियायोगसारे २१ अध्यायः॥

वर्जनीयान्नं यथा,—
"नाद्यात् शूद्रस्य विप्रोऽन्नं मोहाद्वा यदि वान्यतः।
स शूद्रयोनिं व्रजति यस्तु भुङ्क्ते ह्यनापदि॥
यन्मासान् यो द्विजो भुङ्क्ते शूद्रस्यान्नं विगर्हितम्।
जीवन्नेव भवेत् शूद्रो मृतः श्वा चाभिजायते॥
ब्राह्मणक्षत्रियविशां शूद्रस्य च मुनीश्वरः।
यस्यान्नेनोदरस्थेन व्रजत्यद्योनिमाप्नुयात्॥
राजान्नं नष्टजातस्य तक्षोच्छिष्टकृतस्य च।
शस्त्रान्नं गणिकान्नञ्च षण्ढान्नञ्चैव वर्जयेत्॥
चक्रोपजीविरजकतक्षस्कारध्वजिनां तथा।
गान्धर्वलोहकारान्नं सूतकान्नं विवर्जयेत्॥
कुलालचित्रकर्मान्नं वार्द्धुषेः पतितस्य च।
पौनर्भवेच्छाचिकयोरभिशस्तस्य चैव हि॥
सुवर्णकारश्लेष्मव्याधितस्यातुरस्य च।
चिकित्सकस्य चैवान्नं पुंश्चल्या दाम्भिकस्य च॥
स्तेननास्तिकयोरन्नं देवतानिन्दकस्य च।
सोमविक्रयिणश्चान्नं श्वपाकस्य विशेषतः॥
भार्य्याविक्रयिणश्चैवान्नं यस्य चोपपतिर्गृहे।
उत्सृष्टस्य कदर्यस्य तथैवोच्छिष्टभोजनः॥
व्यसनस्यन्नञ्च संधानं भ्रूणहत्याजीवस्य चैव हि।
स्त्रीवस्त्रान्त्यावसिक्तान्नं मत्तोन्मत्तस्य चैव हि॥
भीतस्य रुदितस्यान्नं व्यवकृष्टं परिक्षतम्।
अन्नन्दिषः पापरुचेः आहिताग्नेः सूतकस्य च॥
वृथामांसस्य चैवान्नं श्रावान्नं वृषलस्य च।
अप्रदानान्नु नारीणां क्षत्रस्य तथैव हि॥
कन्दकान्नं विशेषेण भ्रष्टविक्रयिणस्तथा।
शौण्डान्नं नाविकान्नञ्च भिषजामन्नमेव च॥
विप्लवप्लवनस्यान्नं परिवित्तान्नमेव च॥
पुनर्भुवो विशेषेण तथैव दिधिषूपतेः।
अवज्ञातमपाकृतं यद्दीर्घं विस्मयान्वितम्।
गुरावपि न भोक्तव्यमन्नं सत्कारवर्जितम्॥
दुष्कृतं हि मनुष्यस्य सर्वमन्नेन्द्रियस्थितम्।
योऽयस्यान्नेन जीवेत स तस्यात्रातिकिल्बिषम्॥"
"आभीरः कुलमित्रञ्च गोपालो दासनापितौ।
एते शूद्रेषु भोज्यान्ना यश्चात्मानं निवेदयेत्॥
कुशीलवः कुम्भकारः चेत्रकर्म्मक एव च।
एते शूद्रेषु भोज्यान्ना दत्त्वा स्वर्गं परं वृधेः॥"

इति कौर्म्मे उपविभागे १६ अध्यायः॥

तस्य सुखत्वं पारिभाषिकत्वञ्च यथा,—
"तण्डुलोन्मुक्तिसंयोगात्सवर्णयोगेन पिण्डकम्।
फलं चिनयसंयोगादन्नं भवति तत्क्षणात्॥"
इति रामार्चनचन्द्रिकाधृतवचनमिति कैचित्॥
(धनम्। यथा, मनौ। ११। ७।
"यस्य चैवार्थिकं भक्तं पर्य्याप्तं भृत्यवृत्तये।
अधिकं वापि विद्येत स सोमं पातुमर्हति॥"
"भक्तं धनम्।" इति तट्टीकायां मेधातिथिः।)
भक्तः, त्रि, (भजते सेवते। भज सेवायां + क्तः।)
तत्परः। इति हेमचन्द्रः॥ (यथा, महाभारते। १। १७६। १४।
"नत्वां दृष्ट्वा पुनरन्यां द्रष्टुं कल्याणि! रोचये।
प्रसीद वशगोऽत्यन्तं भक्तं मां भज भाविनि!॥"
पुण्यविषयकानुरागो भक्तिश्चांश।) अथ श्रीभगवद्भक्तलक्षणानि। लिङ्गपुराणे।
"व्रतकर्म्मगुणज्ञानभोगलक्ष्मादिमत्स्वपि।
शैवेष्वपि च लक्ष्मस्य भक्ताः सन्ति तथा तथा॥
श्रीभागवते एकादशस्कन्धे। उत्तमभक्ता यथा,
"आत्मात्मनाथ ये वै मां यावान् यश्चास्मि यादृशः।
भजन्त्यनन्य भावेन ते मे भक्ततमा मताः॥"
मध्यमभक्तो यथा,—
"ईश्वरे तदधीने वा बालिशेषु द्विषत्सु च।
प्रेममैत्रीकृपोपेक्षा यः करोति स मध्यमः॥"
प्राकृतभक्तो यथा,—
"अर्चायामेव हरये पूजां यः श्रद्धयेहते।
न तद्भक्तेषु चान्येषु स भक्तः प्राकृतः स्मृतः॥"

इति श्रीहरिभक्तिविलासः॥

अपि च।
"भक्तानां लक्षणं ब्रूहि भक्तानुग्रहकातर!।
येषां सम्भाषणात् सद्यः पूतो नरोऽधमः॥
हरिभक्तिविहीनाश्च सदाहङ्कारसंयुताः।
स्वप्रशंसारता धूर्त्ताः प्रवदन्ति साधुनिन्दकाः॥
पुनन्ति सर्वतीर्थानि येषां स्नानावगाहनात्।
येषाञ्च पादरजसा पूता पादोदकाम्बुधी॥
येषां सन्दर्शनं स्पर्शं देवा वाञ्छन्ति भारते।
सर्व्वेषां परमो लाभो वैष्णवानां समागमः॥
न स्नात्वानि तीर्थानि न देवा मृच्छिलामयाः।
ते पुनन्त्युरुकालेन विष्णुभक्ताः क्षणादहो!॥

सौतिरुवाच।

मधुरश्लक्ष्णवचः श्रुत्वा लक्ष्मीकान्तस्य सस्मितः।
निगूढतत्त्वं कथितुमधिश्रेष्ठोपचक्रमे॥

श्रीनारायण उवाच।

भक्तानां लक्षणं लक्ष्मि! गूढं श्रुतिपुराणयोः।
पुण्यस्मरूपं पापघ्नं सुखदं भक्तिमुक्तिदम्।
सारभूतं गोपनीयं न वक्तव्यं खलेषु च॥
गुरुवक्त्राद्विष्णुमन्त्रो यस्य कर्णे प्रविश्यति।
वेदान्तवेदवेदाङ्गास्तं पवित्रं वदन्ति हि॥
पुरुषाणां शतं पूर्व्वं पूतं तच्चरणाश्रयतः।
स्वर्गस्थं नरकस्थं वा मुक्तिमाप्नोति तत्क्षणात्॥
यैः कैश्चिद्यत्र वा लब्धं लब्धं येषु च यत्नतः।
जीवन्मुक्तास्ते च पूता यान्ति काले हरेः परम्॥
मद्भक्तियुक्तो मत्पूजानियुक्तो मद्गुणान्वितः।
मद्गुणश्रावणीयश्च मन्निविष्टश्च सत्तमः॥
समदृक् सामुनेत्रः स्वात्मविन्नत एव च।
न वाञ्छन्ति सुखं मुक्तिं सालोक्यादिचतुष्टयीम्॥
ब्रह्मत्वममरत्वं वा तद्वाञ्छा मम सेवनं।
इन्द्रत्वञ्च मनुत्वञ्च देवत्वञ्च सुदुर्लभम्॥
स्वर्गराज्यादिभोगञ्च स्वप्ने च नहि वाञ्छति।
ब्रह्मखण्डानि विनश्यन्ति देवा ब्रह्मादयस्तथा।
कल्पाग्यभक्तियुक्तञ्च मद्भक्तो न प्रयच्छति।
भ्रमन्ति भारते भक्ता लब्ध्वा जन्म सुदुर्लभम्॥
तेऽपि यान्ति मदीं पूजां नवं तीर्थं ममाश्रयम्।"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५ अध्यायः॥

अपि च।
"रतिः लक्ष्मकथायाञ्च यस्याश्रुपुलकोद्गमः।
मनो निमग्नं यस्यैव स भक्तः कथितो बुधैः॥
पुत्रदारादिकं सर्व्वं जानाति श्रीहरेरपि।
आत्मना मनसा वाचा स भक्तः कथितो बुधैः॥
दयास्ति सर्व्वभूतेषु सर्व्वं लक्ष्ममयं जगत्।
यो जानाति महाज्ञानी स भक्तो वैष्णवोत्तमः॥
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १ अध्यायः॥
भगवद्भक्ता यथा, तत्रैव ३ अध्याये।
मद्भक्ताश्चैव निःस्पृहाः कर्म्मनिर्मूलकारकाः।
नाहं मुक्तश्च भक्तानां संसारे नित्यदेहिनाम्॥
भक्ता समानुगा नित्यं मत्पादाब्जततत्परा।
अहं भक्तान्तिके नित्यं तेषां रक्षणहेतवे॥
सर्व्वे नश्यन्ति ब्रह्माण्डे प्रभवन्ति पुनः पुनः।
न मे भक्ताः प्रणश्यन्ति निःस्पृहाश्च निरामयाः॥
हरिभक्तिमाहात्म्यं यथा,—
द्विजानां हरिभक्तानां प्रभावो दुर्लभः श्रुतौ।
येषां पादाब्जरजसा सद्यः पूता वसुन्धरा॥
तेषाञ्च पादचिह्नं यत्तीर्थं तत् परिकीर्त्तितम्।
तेषाञ्च स्पर्शमात्रेण तीर्थपापं प्रणश्यति॥
आलिङ्गनात् सदालापात्सङ्गसुच्छिष्टभोजनात्।
दर्शनात् स्पर्शनाच्चैव सर्व्वपापात् प्रमुच्यते॥
भ्रमते सर्व्वतीर्थानां यत् पुण्यं लभते नरः।
हरिदासस्य विप्रस्य तत् पुण्यं दर्शनाल्लभेत्॥

इति तत्रैव २१ अध्यायः॥

त्रिविधभक्तलक्षणं यथा,—
भक्तानां त्रिविधानाञ्च लक्षणं श्रूयतामिति।
लक्षण्यारतो भक्तो मध्यमगुरुकीर्त्तिनः॥
मनो निवेशयेद्यस्तु संसारसरकारणम्।
हार्दं विना न हीच्छन्ति सालोक्यादिचतुष्टयम्॥
नैव निर्व्वाणमुक्तिञ्च सुधापानमभीप्सितम्।
ध्यायते मत्पदाब्जञ्च पूजयेद्भक्तिभावतः॥
श्रीहेतुः किं तस्य देवः सङ्कल्पदहनस्य च।
सर्व्वचिह्नं न वाञ्छन्ति तेऽणिमादिकमीप्सितम्॥

ब्रह्मत्वममरत्वं वा सुरत्वं सुखकारणम् ।
प्रार्थयन्ति नरा भक्तिं मदीयामतुलामपि ॥
स्त्रीपुंविभेदो नास्त्येव सर्व्वजीवेषु भिन्नता ।
तेषां निर्द्वेषरागाद्य प्रवराणां नरेश्वर ! ॥
क्षुत्पिपासादिकां निद्रां लोभमोहादिकं रिपुम् ।
त्यक्ता दिवानिशं माद्य ध्यायते च दिगम्बरः ॥
न मद्भक्तोत्तमो नन्द ! श्रूयतां मध्यमादिकम् ॥"
"ज्ञानतः कर्म्मतः शुद्धौ पूर्व्वप्राक्तनतः शुचिः ॥
करोति सततंयेव पूर्व्वकर्म्मनिकृन्तनम् ।
न करोत्यपरं यस्मात् सद्भक्त्यरहितस्य यः ॥
सर्व्वं कृतस्य यत्किञ्चिन्नाशं कर्त्ता च कर्म्मणः ।
कर्म्मणा मनसा वाचा सततं चिन्तयेद्धरिं ॥
न्यूनभक्तस्य तस्यैनः स च प्राकृतिकः स्मृतौ ।
यमं वा यमदूतं वा स्वप्नेन च न पश्यति ॥
पुरुषाणां सहस्रस्य पूर्व्वं भक्तः समुद्धरेत् ।
पुंसां शतं मध्यमस्य तत्तुर्य्यस्य प्राकृतः ॥
भक्तस्य त्रिविधस्यात ! कथितस्य तवाज्ञया ॥"
इति तत्रैव ८४ अध्यायः ॥

कृष्णभक्तशरीरे तीर्थादीनि यथा,—
"पृथिव्यां यानि तीर्थानि पुण्यान्यपि च जाह्नवि ! ।
मद्भक्तानां शरीरेषु सन्ति पूतेषु सन्ततम् ॥
सङ्कल्पपादरजसा सद्यः पूता वसुन्धरा ।
सद्यः पूतानि तीर्थानि सद्यः पूतं जगत्तथा ॥
मन्मन्त्रोपासका विप्रा ये मद्दुच्छिष्टभोजिनः ।
सार्द्धमेव निवं धायन्ते ते मत्प्राणाधिकाः प्रियाः ।
तद्पत्यर्थमात्रेण पूतो वायुश्च पावकः ।
कोटेर्दशसहस्राणि सङ्कल्पाः सन्ति भूतले ॥
एकवर्णा भविष्यन्ति सङ्कल्पेषु गतेषु च ।
सङ्कल्पशून्या पृथिवी कलिग्रस्ता भविष्यति ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १२८ अः ॥

भगवद्भक्तमाहात्म्यं यथा,—
"संस्तुतः कीर्त्तितो वापि दृष्टः स्पृष्टोऽपि वा प्रिये ! ।
पुनाति भगवद्भक्तश्चाण्डालोऽपि यदृच्छया ॥"
इति वाराहे उपविभागे प्रबोधिनीमाहात्म्यम् ॥

हरिभक्तकर्त्तव्यानि यथा,—
"हरेश्चरितमीशस्य सर्व्वलोकेषु कीर्त्तनम् ।
वैष्णवेषु च कार्य्येषु भक्तः कुर्य्यादहर्निशम् ॥
दासीदासांश्च यत्किञ्चित् स्वकीयं वस्तु चात्मनः ।
कृष्णभक्तस्य गार्हस्थ्ये सर्व्वं कृष्णे निवेदनम् ॥"
भक्तस्य लक्षणान्तरं यथा,—
"प्रेम्णा संजातया भक्त्या तनुरुत्पुलकाङ्कितः ।
बिभर्त्तीलौकिकं भक्तो यदेदृक्षति हृष्यति ॥
परमानन्दयुक्तोऽसौ क्वचिद्गायति नन्दति ।
क्रन्दत्यच्युतभावेन गद्गदेन पुनः पुनः ॥
अनुशीलयति भक्तेषु गोविन्दमनुमोदते ।
तरत्येव विष्णुमायां दुस्तरां मुनिमोहिनीम् ॥
सर्व्वेश्वरगुणा यो मद्देहेऽस्मिन् जगत्तनम् ।
स तत्त्ववादी भक्तश्च सर्व्वभूतसुहृत्तमः ॥"
इति पाद्मोत्तरखण्डे १०१ अध्यायः ॥

भक्तत्यागे दोषो यथा,—
"ब्रह्महत्या गुरोर्घातो गोवधः स्त्रीवधस्तथा ।
तुल्यमेभिर्महापापं भक्तत्यागादुदाहृतम् ॥
भजन्तं भक्तमत्यास्यमदुष्टं त्यजतः सुखम् ।
नेह नामुत्र पश्यामि तस्मात् शक्र ! दिवं व्रज ॥"
इति मार्कण्डेयपुराणे हरिश्चन्द्रोपाख्यानम् ॥
(कृतविभागः । यथा, लीलावत्याम् ।
"भक्तो हरः सुधाति यदृगुग्रः स्यात् ।")

भक्तकरः, पुं, (भक्तं भजनं करोतीति । क + टः ।) क्षत्रियमधुपः । यथा, शब्दचन्द्रिकायाम् ।
"वृकधूपं भक्तकरी गिरिः स्यात् सप्तगन्धकः ॥"
भक्तकारके त्रि ॥

भक्तकारः, त्रि, (भक्तमन्नं करोतीति । क + "कर्म्मण्यण् ।"३ । २ । १ । इत्यण् ।) पाचकः । भक्तसन्नं करोति पचति यः । तत्पर्य्यायः । सूदः २ औदनिकः ३ गुणः ४ भक्ष्यंकारः ५ सूपकारः ६ सूपः ७ आरालिकः ८ वल्लवः ९ । इति हैमचन्द्रः ॥

भक्तता, स्त्री, भक्तत्वम् । भक्तस्य भाव इत्यर्थे (तल्) तप्रत्ययेन निष्पन्ना ॥

भक्तपूर्य्य, क्ली, (भक्तस्य तद्भोजनकालस्यावेदकं यद्वा भक्ते तद्भोजनकाले वादनीयत्वात्तूर्य्यम् ।) भोजनकाले वादनीयतूर्य्यम् । तत्पर्य्यायः । नृपमानम् २ । इति त्रिकाण्डशेषः ॥

भक्तदासः, पुं, (भक्तेनान्नमात्रेण दासः ।) पञ्चदशदासान्तर्गतदासविशेषः । यथा,—
"भक्तदासश्च विज्ञेयस्तथैव वडवाहृतः ।
सुभिक्षेऽपि भक्तेनाङ्गीकृतदासः । इति दायक्रमसंग्रहः ॥ (यथा, मनौ । ८ । ४१५ ।
"ध्वजाहृतो भक्तदासो गृहजः क्रीतदत्रिमौ ।
पैत्रिको दण्डदासश्च सप्तैते दानयोनयः ॥")

भक्तमण्डः, पुं, क्ली, (भक्तस्यौदनस्य मण्डः ।) अन्नाग्रसः । भातेर माड़ इति भाषा । तत्पर्य्यायः । मासरः २ आयामः ३ निःसावः ४ । इत्यमरः ॥ (भक्तस्य भजनशीलस्य सङ्घीभूषणम् ।) पिच्छा ५ । इति जटाधरः ॥

भक्तिः, स्त्री, (भज्यते इति । भज + क्तिन् ।) विभागः । सेवा । इति मेदिनी । ते, ३६ ॥ गौणवृत्तिः । भङ्गी । (अनुरागविशेषः । पूर्व्वेष्वनुरागो भक्तिरित्युपदेशः ॥ ईश्वरे परानुरक्तिः ।
"अथातो भक्तिजिज्ञासा वा परानुरक्तिरीश्वरे ।" इति शाण्डिल्यसूत्रम् ॥ उपासना ॥ परमेश्वरविषये परमप्रेम । उपास्याकाराकारितचित्तवृत्त्यावृत्तिरूपा परियत्ननिदिध्यासनाख्या श्रवणमननाभ्यासफलभूता अनुरक्तिः ॥
"नष्टोष्टदेवात् परमस्ति किञ्चित् ।" इति बुद्धिपूर्व्विका चित्तवृत्तिः । सा च परमप्रीत्यधीना ॥ यथा, विष्णुपुराणे । १ । २० । १८-१९ ।
"नाथ ! योनिसहस्रेषु येषु येषु व्रजाम्यहम् ।
तेषु तेष्वच्युता भक्तिरच्युतास्तु सदा त्वयि ।
या प्रीतिरविवेकानां विषयेष्वनपायिनी ।
त्वामनुस्मरतः सा मे हृदयान्मापसर्पतु ॥"
"हे अच्युत ! त्वयि मे अच्युता ऐकान्तिकी भक्तिरस्तु । एकान्तभक्तिः परमप्रीत्यधीनेति तां प्रीतिं प्रार्थयते येति यादृशी प्रीतिर्विषयेषु आसक्तानां सा तादृशी प्रीतिर्मे हृदयात् मापसर्पतु मापयातु हृदये सदा तिष्ठत्वित्यर्थः ॥"
इति तट्टीकायां श्रीधरस्वामी ॥ चन्दनादिभिस्तिलकादिरचना । यथा, रघौ । १३ । ५५ ।
क्वचित् खगानां प्रियमानसानां
कादम्बसंसर्गवतीव पंक्तिः ।
अन्यत्र कालागुरुदत्तपत्रा
भक्तिर्भुवश्चन्दनकल्पितेव ॥")
अङ्गा । इति हैमचन्द्रः ॥ (भक्तिविवरणं यथा,—
"भज इत्येष वै धातुः सेवायां परिकीर्त्तितः ।
तस्मात् सेवा बुधैः प्रोक्ता भक्तिः साधनभूयसी ॥
इति गारुड़े २३१ अध्यायः ॥)
अथ श्रीमद्भक्तिलक्षणं तृतीयं श्रीकापिलेये ।
"देवानां गुणलिङ्गानामानुश्रविककर्म्मणाम् ।
सत्त्व एवैकमनसो वृत्तिः स्वाभाविकी तु या ॥
अनिमित्ता भागवती भक्तिः सिद्धेरीयसी ।
अथ विशेषलक्षणानि । श्रीगौतमीयतन्त्रे ।
"देवतायाश्च मन्त्रे च तथा मन्त्रप्रदे गुरौ ।
भक्तिरष्टविधा यस्य तस्य लक्षणः प्रवीदति ॥
तद्भक्तजनवात्सल्यं पूजायाश्चानुमोदनम् ।
सुमना अर्च्चयेन्नित्यं तदर्थे दम्भवर्জ্জনम् ॥
तत्कथाश्रवणे रागस्तदर्थे चाङ्गनिक्रिया ।
तदनुस्मरणं नित्यं [illegible] ॥
भक्तिरष्टविधा ह्येषा यस्मिन् म्लेच्छेऽपि वर्त्तते ।
स मुनिः सत्यवादी च कीर्त्तिमान् स भवेन्नरः ॥'
सप्तमस्कन्धे श्रीप्रह्लादोक्तौ ।
"श्रवणं कीर्त्तनं विष्णोः स्मरणं पादसेवनम् ।
अर्च्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम् ॥
इति पुंसार्पिता विष्णौ भक्तिश्चेन्नवलक्षणा ।
क्रियते भगवत्यद्धा तन्मन्येऽधीतमुत्तमम् ॥"
तत्रैव श्रीनारदयुधिष्ठिरसंवादे ।
"श्रवणं कीर्त्तनञ्चास्य स्मरणं महतां गतेः ।
सेवेज्यावनतिर्दास्यं सख्यमात्मनिवेदनम् ॥"
पाद्मे कार्त्तिकमाहात्म्ये श्रीसत्यभामाकृष्णसंवादे ।
"श्रवणं कीर्त्तनं पूजा सर्व्वकर्म्मार्पणं स्तुतिः ।
परिचर्य्या नमस्कारः प्रेम स्वात्मार्पणं हरौ ॥"
तत्रैवोत्तरखण्डे शिवपार्व्वतीसंवादे ।
"आद्यन्तु वैष्णवं प्रोक्तं शक्तिचक्राङ्कनं हरेः ।
धारणञ्चोर्द्धपुण्ड्राणां तन्मन्त्राणां परिग्रहः ॥
अर्च्चनञ्च जपो ध्यानं तन्नामस्मरणं तथा ।
कीर्त्तनं श्रवणञ्चैव वन्दनं पादसेवनम् ।
तत्प्रादैकसेवा च तन्निवेदितभोजनम् ॥
तदीयानाञ्च संसेवा द्वादशैताः सनिष्ठताः ।
तुलसीरोपणं विष्णोर्दीक्षादेवस्य शार्ङ्गिणः ।
भक्तिः षोड़शधा प्रोक्ता भववन्धविमुक्तये ॥"
इति च ।
किञ्च ।
"दर्शनं भगवन्मूर्त्तेः स्पर्शनं चैवसेवनम् ।

चान्द्राणं घृतपेषादेर्निर्माल्यस्य च धारणम् ॥
नृत्यं भगवदग्रे च तथा वीणादिवादनम् ।
कृष्णलीलाद्यभिनयः श्रीभागवतसेवनम् ॥
पञ्चाङ्गमालादिधृतिरेकादश्यादिजागरः ।
प्रासादरचनाद्यन्यज्ज्ञेयं शास्त्रानुसारतः ॥
लिखिता भगवद्धर्मा भक्तानां लक्षणानि च ।
तानि ज्ञेयानि सर्वाणि भक्तैर्वै लक्षणानि च ॥
तेषु ज्ञेयानि गौणानि सुखानि च विवेकिभिः ।
बहिरङ्गान्तरङ्गाणि प्रेमसिद्धौ च तानि
यत् ॥
भेदास्तु विविधा भक्तेर्भक्तभावादिभेदतः ।
सुक्ताफलादिग्रन्थेभ्यो ज्ञेयास्तल्लिखनैरलम् ॥
प्रेमभक्तौ च सिद्धायां सर्व्वेऽर्थाः सेवकाः स्वयम् ॥
भगवांश्चाविवश्यः स्यात्तिस्रोऽस्याः शुल-
क्षणम् ॥"

अथ प्रेमभक्तिलक्षणम् । नारदपञ्चरात्रे ।
"अनन्यममता विष्णौ ममता प्रेमसङ्गता ।
भक्तिरित्युच्यते भीष्म ! प्रह्लादोद्धवनारदैः ॥
प्रेमभक्तेश्च माहात्म्यं भक्तेर्माहात्म्यतः परम् ।
सिद्धमेव यतो भक्तेः फलं प्रेमैव निश्चितम् ॥
चिह्नानि प्रेमसम्पत्तेर्बाह्याभ्यन्तराणि च ।
क्रियन्त्युल्लिखितान्यस्या महिमैव विलिख्यते ॥"
अथ प्रेमसम्पत्तिचिह्नानि सप्तमस्कन्धे श्रीप्रह्लादस्य वाक्यानुशासने ।
"निशम्य कर्माणि गुणानतुल्यान्
वीर्याणि लीलातनुभिः कृतानि ।
यदातिहर्षोत्पुलकाश्रुगद्गदं
प्रोत्कण्ठ उद्गायति नृत्यते च ॥
यदा ग्रहग्रस्त इव क्वचिद्धस-
त्याक्रन्दति ध्यायति वन्दते जनम् ।
मुहुः श्वसन् वक्ति हरे ! जगत्पते !
नारायणेत्यात्ममतिर्गतत्रपः ॥
तदा पुमान् मुक्तसमस्तबन्धन-
स्तद्भावभावानुकृताशयाकृतिः ।
निर्दग्धबीजानुशयो महीयसा
भक्तिप्रयोगेण समेत्यधोक्षजम् ॥"
एकादशे च श्रीकवियोगीश्वरोत्तरे ।
"स्मरन्तः स्मारयन्तश्च मिथोऽघौघहरं हरिम् ।
भक्त्या संजातया भक्त्या बिभ्रत्युत्पुलकां तनुम् ॥
क्वचिद्रुदन्त्यच्युतचिन्तया क्वचि-
द्धसन्ति नन्दन्ति वदन्त्यलौकिकाः ।
नृत्यन्ति गायन्त्यनुशीलयन्त्यजं
भवन्ति तूष्णीं परमेत्य निर्वृताः ॥

श्रीभगवद्गुद्धवसंवादे च ।
"कथं विना रोमहर्षं द्रवता चेतसा विना ।
विनानन्दाश्रुकलया शुद्ध्येद्भक्त्या विनाशयः ॥
वाग्गद्गदा द्रवते यस्य चित्तं
रोदित्यभीक्ष्णं हसति क्वचिच्च ।
विलज्ज उद्गायति नृत्यते च
मद्भक्तियुक्तो भुवनं पुनाति ॥
यथोक्तभक्त्यशक्तौ तु भगवच्चरणाम्बुजम् ।
शरणागतभावेन कृतज्ञभीतिन्नमाश्रयेत् ॥"
इति हरिभक्तिविलासे १२ विलासः ॥
अपि च । उत्तमभक्तेर्लक्षणं यथा,—
"अन्याभिलाषिताशून्यं ज्ञानकर्म्माद्यनावृतम् ।
आनुकूल्येन कृष्णानुशीलनं भक्तिरुत्तमा ॥
तथा नारदपञ्चरात्रे ।
"सर्व्वोपाधिविनिर्मुक्तं तत्परत्वेन निर्म्मलम् ।
हृषीकेण हृषीकेशसेवनं भक्तिरुच्यते ॥"
श्रीभागवतस्य तृतीयस्कन्धे च ।
"अहैतुक्यव्यवहिता या भक्तिः पुरुषोत्तमे ।
सालोक्यसार्ष्टिसामीप्यसारूप्यैकत्वमप्युत ॥
दीयमानं न गृह्णन्ति विना मत्सेवनं जनाः ।
स एव भक्तियोगाख्य आत्यन्तिक उदाहृतः ॥"
इति ॥
सा उत्तमा भक्तिः षड्विधा यथा,—
"क्लेशघ्नी शुभदा मोक्षलघुताकृत् सुदुर्लभा ।
सान्द्रानन्दविशेषात्मा श्रीकृष्णाकर्षणी च सा ॥"
तत्राद्यस्याः क्लेशघ्नत्वम् ।
"क्लेशास्तु पापं तद्बीजमविद्या चेति ते त्रिधा ॥"
शुभदत्वं यथा,—
"शुभानि प्रीणनं सर्व्वजगतामनुरक्तता ।
सद्गुणाः सुखमित्यादीन्याख्यातानि मनी-
षिभिः ॥"
मोक्षलघुताकृद्यथा,—
"मनागेव प्ररूढायां हृदये भगवद्रतौ ।
पुरुषार्थास्तु चत्वारस्तृणायन्ते समन्ततः ॥"
सुदुर्लभा यथा,—
"साधनौघैरनासङ्गैरलभ्या सुचिरादपि ।
हरिणा चाशु देयेति द्विधा सा स्यात् सुदुर्लभा ॥"
सान्द्रानन्दविशेषात्मा यथा,—
"ब्रह्मानन्दो भवेदेष चेत् परार्द्धगुणीकृतः ।
नेति भक्तिसुखाम्भोधेः परमाणुतुलामपि ॥"
श्रीकृष्णाकर्षणी यथा ।
"ज्ञात्वा हरिम्मे भाजन्मियवर्गसमन्वितम् ।
भक्तिर्वशीकरोतीति श्रीकृष्णाकर्षणी च सा ॥"
सा उत्तमा भक्तिस्त्रिधा यथा,—
"सा भक्तिः साधनं भावः प्रेमा चेति त्रिधो-
दिता ॥"
साधनभक्तिर्यथा,—
"श्रुतिसाध्या भवेत् साध्यभावा सा साधनाभिधा ।
नित्यसिद्धस्य भावस्य प्राकट्यं हृदि साध्यता ॥"
भावभक्तिर्यथा,—
"सुदुष्करक्रियारूपा प्रेमसर्व्वस्वसाम्यभाक् ।
रुचिभिश्चित्तमास्रण्यकृदसौ भाव उच्यते ॥"

प्रेमभक्तिर्यथा,—
"सम्यङ्मसृणितस्वान्तो ममत्वातिशयाङ्कितः ।
भावः स एव सान्द्रात्मा बुधैः प्रेमा निगद्यते ॥"
इति भक्तिरसामृतसिन्धौ पूर्वविभागः ॥
भक्तिमान् [न्] त्रि. (भक्तिरस्यास्तीति । भक्ति+
"तदस्यास्त्यस्मिन्निति मतुप् ।" ५ । २ । ९४ ।
इति मतुप् ।) भक्तियुक्तः । यथा,—
"गुणवान् पुण्यवान् श्रीमान् कीर्त्तिमान् भक्ति-
मान् भवेत् ।
ऐहिके परमैश्वर्य्यमन्ते नाथपदं व्रजेत् ॥"
इति ग्राम्यवीतन्नान्तर्गतमघाकालभैरवस्तोत्रम् ।
अपि च ।
"अन्येऽपि ये विकर्म्मस्था: शूद्राद्या नीचजातयः ।
भक्तिमन्तः प्रमुच्यन्ते कालेन मयि सम्मताः ॥"
इति कौर्म्मे ४ अध्यायः ।
भक्तियोगः, पुं, (भक्तेर्योगः भक्त्या यो योग इति
वा ।) परमेश्वरे भजनसम्बन्धः । यथा,—
"भक्तियोगप्रकाशाय लोकस्यानुग्रहाय च ।
सन्यासाश्रममाश्रित्य कृष्णचैतन्यनामभृक् ॥"
इति चैतन्यभागवतम् ।
अपि च ।
"वासुदेवे भगवति भक्तियोगः प्रयोजितः ।
जनयत्याशु वैराग्यं ज्ञानञ्च यदहैतुकम् ॥"
इति श्रीभागवते १ स्कन्धे १ अध्यायः ।
(भक्तियोग उच्यते । यथा, गीतायाम् । १२ ।
१-२ । १४-२० ।
"एवं सततयुक्ता ये भक्तास्त्वां पर्य्युपासते ।
ये चाप्यक्षरमव्यक्तं तेषां के योगवित्तमाः ॥१॥
श्रीभगवानुवाच ।
मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते ।
श्रद्धया परयोपेतास्ते मे युक्ततमा मताः ॥२॥
सन्तुष्टः सततं योगी यतात्मा दृढनिश्चयः ।
मय्यर्पितमनोबुद्धिर्यो मे भक्तः स मे प्रियः ॥१४॥
यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः ।
हर्षामर्षभयोद्वेगैर्मुक्तो यः स च मे प्रियः ॥१५॥
अनपेक्षः शुचिर्दक्ष उदासीनो गतव्यथः ।
सर्व्वारम्भपरित्यागी यो मे भक्तः स मे
प्रियः ॥ १६ ॥
यो न हृष्यति न द्वेष्टि न शोचति न काङ्क्षति ।
शुभाशुभपरित्यागी भक्तिमान् यः स मे
प्रियः ॥ १७ ॥
समः शत्रौ च मित्रे च तथा मानापमानयोः ।
शीतोष्णसुखदुःखेषु समः सङ्गविवर्जितः ॥१८॥
तुल्यनिन्दास्तुतिर्मौनी सन्तुष्टो येन केनचित् ।
अनिकेतः स्थिरमतिर्भक्तिमान् मे प्रियो
नरः ॥ १९ ॥
ये तु धर्म्मामृतमिदं यथोक्तं पर्य्युपासते ।
श्रद्दधाना मत्परमा भक्तास्तेऽतीव मे
प्रियाः ॥" २० ॥
भक्तिरसः, पुं, भक्तिरेव रसः । यथा,—
"विभावैरनुभावैश्च सात्त्विकैर्व्यभिचारिभिः ।
स्वादत्वं हृदि भक्तानामानीता श्रवणादिभिः ।

यथा ह्यरतिः स्थायीभावा भक्तिरसो भवेत् ॥"
इति भक्तिरसामृतसिन्धुः ॥

भक्तिकः, पुं, (भक्तिं भङ्गीं जातीति । सा + कः ।) साधुघोटकः । यथा,—
प्रभुभक्ता भक्तिकाश्च कुलीनेषु कुलोत्कटाः ।
इति शब्दचन्द्रिका ॥
भक्तिदातरि च ॥

भक्ष क भक्षे । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) क भक्षयति । इति दुर्गादासः ॥

भक्ष च भक्षणे । इति कविकल्पद्रुमः ॥ (भ्वा०-उभ० सक०-सेट् ।) च भक्षति भक्षते । इति दुर्गादासः ॥

भक्षकः, त्रि, (भक्षयतीति । भक्ष + "खुलृचौ ।" ३ । १ । १३३ । इति खुल् ।) खादकः । भक्षणपरः । तत्पर्य्यायः । घस्मरः २ अद्मरः ३ । इत्यमरः । १ । १ । १२० ॥ (यथा, हितोपदेशे । १ । १३५ ।
"भक्ष्यभक्षकयोः प्रीतिर्विपत्तेः कारणं महत् ।
मृगमांसात् पाशबद्धोऽसौ मृगः काकेन रक्षितः ॥")

भक्षटकः, पुं, (भक्ष + अटन् । ततः संज्ञायां कन् ।) क्षुद्रगोक्षुरकः । इति राजनिर्घण्टः ॥

भक्षणं, क्ली, (भक्ष + भावे ल्युट् ।) द्रवेतरद्रव्यगलाधःकरणम् । तत्पर्य्यायः । न्यादः २ खादनम् ३ खादनम् ४ अशनम् ५ निघसः ६ वल्गनम् ७ अभ्यवहारः ८ जक्षिः ९ जक्षणं १० लेढः ११ प्रत्यवसानम् १२ घसिः १३ आहारः १४ प्राशनम् १५ अवद्यायम् १६ विद्याणम् १७ भोजनम् १८ जेमनम् १९ अदनम् २० । इति हेमचन्द्रः ॥ द्रव्यविशेषस्य भक्षणनिषेधो यथा, कर्म्मलोचने ।
"शुष्कशाकं दृषामांसं करेण मथितं दधि ।
तर्जन्या दन्तधावञ्च सद्यो गोमांसभक्षणम् ॥"

भक्षणीयं, त्रि, (भक्ष + अनीयर्) भक्ष्यद्रव्यम् । भक्षणयोग्यम् । इति भक्षधातोः कर्म्मण्यनीयप्रत्ययेन निष्पन्नम् । इति व्याकरणम् ॥ (यथा, पद्मतन्त्रे । ४ । २५ । "तन्न मेतथ्यम् । त्वद्वचनेन भक्षणीयास्ते दायादाः ।") तत्स्थापनविधिर्यथा, पाकराजेश्वरे ।
"पुरस्ताद्विमलं पात्रं सुविस्तीर्णं मनोरमम् ।
तत्र भक्तं परिण्यस्तं मध्यभागे सुसंयुतम् ॥
सूपं सर्पिः पलं शाकं पिष्टमन्नन्तु मस्त्यकम् ।
स्थापयेद्दक्षिणे पार्श्वे भुञ्जानस्य यथाक्रमम् ॥
पेयेक्षाद्याः द्रवाः सर्व्वे पानीयं पानकं पयः ।
चोष्यं सन्धानकं लेह्यं सव्यपार्श्वे निधापयेत् ॥
सर्व्वान् इक्षुविकारांश्च पक्वान्नं पायसं दधि ।
पुरतः स्थापयेद्भोक्तुरुदयोः पंक्तयोश्च मध्यतः ॥"

भक्ष(क्ष्य)पत्रा, स्त्री, (भक्षं वा भक्ष्यं भक्षणीयं पत्रमस्याः ।) नागवल्ली । इति राजनिर्घण्टः ॥ (गुणादिविवृतिरस्या नागवल्लीशब्दे ज्ञातव्या ॥)

भक्षितं, त्रि, (भक्ष्यते स्मेति । भक्ष + कर्म्मणि क्तः ।) क्षतभक्षणवस्तु । (यथा, हितोपदेशे । १ ।
"भक्षितेनापि भवता नाहारो मम पुष्कलः ॥")
तत्पर्य्यायः । चर्व्वितम् २ लिप्तम् ३ प्रत्यवसितम् ४ गिलितम् ५ खादितम् ६ पीतम् ७ अभ्यवहृतम् ८ अन्नम् ९ जग्धम् १० भक्तम् ११ ग्लस्तम् १२ अशितम् १३ भुक्तम् १४ । इत्यमरः । ३ । २ । ११० ॥ जक्षितम् १५ । इति शब्दरत्नावली ॥

भक्ष्यं, त्रि, (भक्ष्यते इति । भक्ष + ण्यत् ।) भक्षितव्यम् । भक्षणीयम् । यथा । 'प्रतिपदि कुष्माण्डं न भक्ष्यम् । दृश्यां कलम्बी न भक्ष्या ।' इति स्मृतिसर्व्वस्वम् ॥ अपि च, हितोपदेशे ।
"मासमेकं नरो याति द्वौ मासौ मृगसूकरौ ।
अहिरेकदिनं याति अद्य भक्ष्यो धनुर्गुणः ॥"
(भक्ष्यद्रव्याणि तेषां गुणादिकञ्च यथा,—
"वल्ल्याश्चतः परं भक्ष्यान् रसवीर्य्यविपाकतः ।
भक्ष्याः क्षीरकृतावल्या दृष्या वृष्या गुरुस्निग्धाः ॥
अदाहिनः पुष्टिकराः दीपनाः पित्तनाशनाः ॥
तेषां प्रायकरा वृष्या घृतपूराः कफावहाः ।
वातपित्तहरा दृष्या गुरवो रक्तमांसलाः ॥
दृंहण्या गौड़िकाभक्ष्या गुरवोऽनिलनाशनाः ।
अदाहिनः पित्तहराः शुक्रलाः कफवर्द्धनाः ॥
मधुमस्तकसंयावाः पूपाः क्षीरे विशेषतः ।
गुरवो दृंहणाश्चैव मोदकास्तु सुदुर्ज्जराः ॥
रोचनो दीपनः स्वर्य्यः पित्तघ्नः पवनापहः ।
गुरुर्भृष्टतमश्चैव सक्तुकः प्राणवर्द्धनः ॥
वृष्याः सुगन्निर्मधुरः स्निग्धः कफकरो गुरुः ।
वातापहस्तृप्तिकरो बल्यो विष्यन्दनः स्मृतः ॥
दृंहण्या वातपित्तघ्ना भक्ष्या बल्यास्तु सामिताः ।
वृष्याः पथ्यतमास्तेषां लघवः फेनकादयः ॥
सुन्नादिवेष्टवाराणां पूर्णा विष्टम्भिनो मताः ।
वेसवारैः सर्पिषिते सम्पूर्णा गुरवृंहणाः ॥
पाललाः श्लेष्मजननाः शुष्कुल्याः कफपित्तलाः ।
वीर्य्योल्बणाः पेशिका भक्ष्याः कफपित्तप्रकोपणाः ॥
विदाहिनो नातिबला गुरवश्च विशेषतः ।
वेदला लघवो भक्ष्याः कषायाश्चरुमारुताः ॥
विष्टम्भिनः पित्तसमाः श्लेष्णा भिन्नवर्च्चसः ।
बल्या वृष्यास्तु गुरवो विज्ञेया माषसाधिताः ॥
कूर्च्चिका विकृता भक्ष्या गुरवो नातिपित्तलाः ।
विरूढकृता भक्ष्या गुरवोऽनिलपित्तलाः ॥
विदाहोत्क्लेशजननाः रूक्षा दृष्टिप्रदूषणाः ।
वृष्याः सुगन्धिनो वृष्या लघवो घृतभाविताः ॥
वातपित्तहरावल्या वर्ण्यदृष्टिप्रसादनाः ।
विदाहिनस्तैलकृता गुरवः कटुपाकिनः ॥
उष्णा मारुतदृष्टिघ्नाः पित्तलाः कफप्रदूषणाः ।
फलमांसेक्षुविकृतितिलमाषोपसंस्कृताः ॥
भक्ष्या बल्यास्तु गुरवो दृंहणा हृदयप्रियाः ।
कपालाङ्गारपक्वास्तु लघवो वातकोपनाः ॥
सुपक्वास्तनवश्चापि भूविल्वं लघवो मताः ।
सकिलाटादयो भक्ष्या गुरवः कफवर्द्धनाः ॥")
"आमान्वितमसंकीर्णं शुचिकार्य्यं महानसम् ।
तत्राप्तैर्गुणसम्पन्नमन्नं भक्ष्यं सुसंस्कृतम् ।
सुचौ देशे सुसंगुप्तं सुपस्थापयेद्विधक् ॥"
"घृतं कार्य्यायसे देयं मेया देया तु राजते ॥

फलानि सर्व्वभक्ष्यांश्च प्रदद्याद्दैवतेषु च ।
परिशुष्कप्रदिग्धानि सौवर्णेषु प्रकल्पयेत् ॥
प्रदद्याच्च रसांश्चैव राजतेषूपहारयेत् ।
कट्वाम्लं खड्गांश्चैव सर्व्वान् शैलेषु दापयेत् ॥
काचस्फटिकपात्रेषु शीतलेषु शुभेषु च ।
दद्याद्दैवूर्य्यपात्रेषु रागषाड़वसङ्कुलान्
पुरस्ताद्विमले पात्रे सुविस्तीर्णे मनोरमे ।
सूदः सूपौदनं दद्यात् प्रदेशांश्च सुसंस्कृतान् ॥
फलानि सर्व्वभक्ष्यांश्च परिशुष्कानि यानि च ।
तानि दक्षिणपार्श्वे तु भुञ्जानस्योपकल्पयेत् ॥
प्रदद्याच्च रसांश्चैव पानीयं पानकं पयः ।
खड्गान् यूषांश्च पेयांश्च सव्ये पार्श्वे प्रदापयेत् ॥
सर्व्वान् गुड़विकारांश्च रागषाड़वसङ्कुलान् ।
पुरस्तात् स्थापयेत् प्राज्ञो दयोरपि च मध्यतः ॥
एवं विज्ञाय मतिमान् भोजनस्योपकल्पनाम् ।"
इति सुश्रुते सूत्रस्थाने ४६ अध्यायः ॥)

भक्ष्यकारः, त्रि, (भक्ष्यं भक्ष्यद्रव्यं करोतीति । कृ + "कर्म्मण्यण् ।" ३ । २ । १ । इति अण् ।) पिष्टकविक्रयजीवी । पिष्टकशिल्पी । इतिभरतः ॥ तत्पर्य्यायः । आपूपिकः २ कान्दविकः ३ । इत्यमरः । २ । ९ । २८ ॥ पूपिकः ४ पूपविक्रयी ५ मोदकादिविक्रयी ६ । इति शब्दरत्नावली ॥

भक्ष्याभक्ष्यं, क्ली, (भक्ष्यमभक्ष्यञ्च ।) खाद्याखाद्यद्रव्यम् । यथा,—
"भक्ष्याभक्ष्याण्यनेकानि ब्राह्मणस्य विशेषतः ।
अत्र शिष्टा यथा ब्रूयुस्तथा कार्य्यविनिर्णयः ॥"
इत्येकादशीतत्त्वे शङ्खवचनम् ॥ * ॥
नारद उवाच ।
"भक्ष्यं किंवाप्यभक्ष्यञ्च द्विजानां गृहिणां प्रभो ! ।
यतीनां वैष्णवानाञ्च विधवाब्रह्मचारिणाम् ॥
किं कर्त्तव्यमकर्त्तव्यमभोग्यं भोग्यमेव च ।
सर्व्वं कथय सर्व्वज्ञ ! सर्व्वेश ! सर्व्वकारण ! ॥"
श्रीमहेश्वर उवाच ।
"कश्चित्तपस्वी विप्रश्च निराहारी चिरं मुनिः ।
कश्चित् समीरणाहारी फलाहारी च कश्चन ॥
अन्नाहारी यथा लोके गृही च गृहिणीयुतः ।
येषामिच्छा च या ब्रह्मन् ! रुचीनां विविधा गतिः ॥
हविष्यान्नं ब्राह्मणानां प्रशस्तं गृहिणां सदा ।
नारायणोच्छिष्टमिश्रनिवेद्यमभक्ष्यकम् ॥
अन्नं विष्ठा जलं मूत्रं यद्विष्णोरनिवेदनम्
विण्मूत्रं सर्व्वमेवोक्तमन्नञ्च हरिवासरे ॥
ब्राह्मणः कामतोऽन्नञ्च यो भुङ्क्ते हरिवासरे ।
त्रैलोक्यजनितं पापं सोऽपि भुङ्क्ते न संशयः ॥
न भोक्तव्यं न भोक्तव्यं न भोक्तव्यञ्च नारद ! ।
गृहिभिर्ब्राह्मणैरन्नं संप्राप्ते हरिवासरे ॥
गृही शैवश्च शाक्तश्च ब्राह्मणो ज्ञानदुर्ब्बलः ।
प्रयाति कालसूत्रञ्च भुक्त्वा च हरिवासरे ॥
क्रमिभिः भ्रालमानेच्च भक्षितस्तच्च तिष्ठति ।
विण्मूत्रभक्षणं कृत्वा यावदिन्द्राश्चतुर्दश ॥
जन्माष्टमीदिने रामनवमीदिवसे हरेः ।
शिवरात्रौ च यो भुङ्क्ते सोऽपि द्विगुणपातकी ॥

उपवासासमर्थश्चेत् फलमूलजलं पिबेत् ।
नष्टे शरीरे स भवेदन्यथा चात्मघातकः ॥
सकृद्गुरुक्ते हविष्यान्नं विष्णोर्नैवेद्यमेव च ।
न भवेत् प्रत्यवायी स चोपवासफलं लभेत् ॥
एकादश्यामनाहारी गृही विप्राश्च भारत ! ।
ते च तिष्ठन्ति वैकुण्ठे यावद्वै ब्रह्मणो वयः ॥
गृहिणां शैवशाक्तानामिदमुक्तञ्च नारद ! ।
विशेषतो वैष्णवानां यतीनां ब्रह्मचारिणाम् ॥
नित्यं नैवेद्यभोजी च श्रीकृष्णस्य च वैष्णवः ।
नित्यं व्रतोपवासानां जीवन्मुक्तो लभेत् फलम् ॥
वाञ्छन्ति तस्य संस्पर्शं तीर्थानि सर्व्वदेवताः ।
आलापं दर्शनञ्चैव सर्व्वपापप्रणाशनम् ॥
द्विस्विन्नमन्नं पृथुकं गुडं देशविशेषके ।
नात्यन्तशुष्कं विप्राणां भक्षणे च निवेदने
अभक्ष्यञ्च यतीनाञ्च विधवाब्रह्मचारिणाम् ।
ताम्बूलञ्च यथा ब्रह्मन् ! तथैते वस्तुनी ध्रुवम् ॥
ताम्बूलं विप्रवाक्षीणां यतीनां ब्रह्मचारिणाम् ।
तपस्विनाञ्च विप्रेन्द्र ! गोमांससदृशं ध्रुवम् ॥
सर्व्वेषां ब्राह्मणानाञ्च अभक्ष्यं शृणु नारद ! ।
यदुक्तं सामवेदे च हरिणा चाङ्गिरःक्रमे ॥
ताम्रपात्रे पयःपानं उच्छिष्टे घृतभोजनम् ।
दुग्धं लवणसार्द्धञ्च सद्यो गोमांसभक्षणम् ॥
नारिकेलोदकं कांस्ये ताम्रपात्रे स्थितं मधु ।
श्वेतवर्णञ्च तालञ्च मद्यरं मत्स्य एव च ।
सर्व्वेषां ब्राह्मणानाञ्च त्याज्यञ्च सर्व्वदेशतः ॥
मत्स्यांश्च कामतो भुक्त्वा चोपवासं चान्द्रं चरेत् ।
प्रायश्चित्तं ततः कृत्वा शुद्धिमाप्नोति ब्राह्मणः ॥
प्रतिपत्सु च कूष्माण्डमभक्ष्यमर्घनाशनम् ।
द्वितीयायाञ्च बृहतीभोजको न स्मरेद्धरिम् ॥
अभक्ष्यञ्च पटोलञ्च शत्रुवृद्धिकरं परम्
तृतीयायाञ्चतुर्थ्यां च मूलकं धननाशकम् ॥
कलङ्कारञ्चैव पञ्चम्यां बिल्वभक्षणम्
तिर्य्यग्योनिं प्रापयेत्तु षष्ठ्याञ्च निम्बभक्षणम् ॥
रोगवृद्धिकरञ्चैव सप्तम्यां तालभक्षणम् ।
नारिकेलफलं भक्ष्यमष्टम्यां वृद्धिनाशनम् ॥
तुम्बी नवम्यां गोमांसं दशम्याञ्च कलम्बिका ।
एकादश्यां तथा शिम्बी द्वादश्यां पूतिका तथा ॥
त्रयोदश्यान्तु वार्त्ताकीभक्षणं पुत्रनाशनम् ।
चतुर्दश्यां मांसभक्षं महापापकरं परम् ॥
पञ्चदश्यां तथा मांसमभक्ष्यं शृणु नारद ! ।
अक्षिजं श्रोणितं मांसं भक्ष्यमन्यदिने दिने ॥
मांसञ्च रक्तशाकञ्च कांस्यपात्रे च भोजनम् ।
निषिद्धं प्रथमे चैव कूर्म्ममांसञ्च श्रोणितम् ॥
रात्रौ च दधिभक्तञ्च प्रथमं सन्ध्ययोर्दिने ।
रक्तमूलीरात्रञ्च पुंस्त्रीणामभक्षणम् ॥
शूद्राणां बालकानाञ्च शूद्रश्राद्धान्नमेव च ।
अभक्ष्याणाञ्च विप्रर्षे ! यदन्नं वृषलीपतेः ॥
ब्रह्मन् ! वार्द्धुषिकान्नञ्च गणकानामभक्ष्यकम् ॥
अग्रदानीद्विजानाञ्च चिकित्सकारकस्य च ।
हस्ताच्चिताहरौ तैलमग्राह्यञ्चाष्टभक्ष्यकम् ।
मूले मृगे भाद्रपदे मांसं गोमांसतुल्यकम् ॥"
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे २७ अध्यायः पाद्मे स्वर्गखण्डे ६१ अध्यायश्च ॥

नारद उवाच ।

"वर्णानाञ्च चतुर्णाञ्च भक्ष्याभक्ष्यञ्च साम्प्रतम् ।
विपाकं कर्म्मणाञ्चैव सर्व्वेषां प्राणिनामपि ॥
कथयस्व महाभाग ! कारणानाञ्च कारण ! ।
त्वत्तोऽन्यं कञ्च पृच्छामि नितान्तं सन्त-
मीश्वर ! ॥

श्रीभगवानुवाच ।

भक्ष्याभक्ष्यं चतुर्णाञ्च वर्णानाञ्च यथोचितम् ।
वेदोक्तं श्रूयतां तात ! सावधानं निशामय ॥
पयःपाने पयःपानं गव्यं सिद्धान्नमेव च ।
भक्ष्यादिकं मधु गुडं नारिकेलोदकं तथा ॥
फलं मूलञ्च यत्किञ्चिदभक्ष्यं मनुरब्रवीत् ।
दग्धान्नं तप्तसौवीरमभक्ष्यं ब्रह्मणा मतम् ॥
नारिकेलोदकं कांस्ये ताम्रपात्रे स्थितं मधु ।
गव्यञ्च ताम्रपात्रस्थं सर्व्वं मद्यं घृतं विना ॥
ताम्रपात्रे पयःपानमुच्छिष्टे घृतभोजनम् ।
दुग्धं लवणञ्चैव सद्यो गोमांसभक्षणम् ॥
अभक्ष्यं मधुमिश्रञ्च घृतं तैलं गुडं तथा ।
आर्द्रकं गुडसंयुक्तमभक्ष्यं श्रुतिसम्मतम् ॥
पीतशेषं जलञ्चैव माघे च मूलकं तथा ।
द्विर्भोजनञ्च दिवसे सन्ध्ययोर्भोजनं तथा ॥
भक्ष्यञ्च रात्रिशेषे च ध्रुवं प्राज्ञः परित्यजेत् ।
पानीयं पायसं चूर्णं घृतं लवणमेव च ॥
खल्लिकं लवणञ्चैव क्षीरं तक्रं तथा मधु ।
हस्ताहृतगृहीतञ्च सद्यो गोमांसभक्षणम् ॥
कर्पूरं रौप्यपात्रस्थमभक्ष्यं श्रुतिसम्मतम् ।
परिवेषनकारी चेद्भोक्तारं स्पृशते यदि ॥
अभक्ष्यञ्च तदन्नञ्च सर्व्वेषामेव सम्मतम् ।
नकुलानां गण्डकानां महिषाणाञ्च पक्षिणाम् ॥
सर्पाणां शूकराणाञ्च गर्द्दभानां विशेषतः ।
मार्जारानां शृगालानां कुक्कुराणां ब्रजेश्वर ! ॥
व्याघ्राणामपि सिंहानां त्याज्यं मांसं पृथा सदा ।
शशौकसाञ्च नक्राणां गोधिकानां तथैव च ॥
मण्डूकानां कर्कटीनां चञ्चुकानाञ्च निश्चितम् ।
गवाञ्च चमरीणाञ्च कलौ मांसमभक्ष्यकम् ॥
हस्तिनां घोटकानाञ्च वृषाणामेव च रक्तसाम् ।
दंशस्य मशकस्यैव मक्षिका च पिपीलिका ॥
अन्येषाञ्च निषिद्धानां लोके वेदे ब्रजेश्वर ! ।
वानराणां भल्लूकानां शरभाणां तथैव च ॥
निषिद्धं खगनाभीनां गर्द्दभानाञ्च मांसकम् ।
अभक्ष्यं महिषाणाञ्च दुग्धं दधि घृतं तथा ॥
खल्लिकञ्च तथा चक्रं विप्राणां नवनीतकम् ।
मांसत्यैः श्रवसकं तस्य दुग्धादिकं तथा ॥
वर्णानाञ्च चतुर्णाञ्चाप्यभक्ष्यञ्च घृतौ हुतम् ।
अभक्ष्यमार्द्रकञ्चैव सर्व्वेषाञ्च रवेर्दिने ॥
पर्य्युषितं जलक्षारं विप्राणां दुग्धमेव च ।
वर्णानाञ्च चतुर्णाञ्चावीरान्नस्य च भक्षणम् ।
तदन्नञ्च सुरातुल्यं गोमांसाधिकमेव च ।
अवीरान्नञ्च यो भुङ्क्ते ब्राह्मणो ज्ञानदुर्ब्बलः ।
पितृदेवार्च्चनं तस्य निष्फलं मनुरब्रवीत् ॥
ब्राह्मणानां वैष्णवानामभक्ष्यं मत्स्यमेव च ।
इतरेषामभक्ष्यञ्च पक्षपर्व्वसु निश्चितम् ॥
पितृदेवावशेषे च भक्ष्यं मांसं न दूषितम् ।
पक्षपर्व्वसु त्याज्यञ्च सर्व्वेषां मनुरब्रवीत् ॥
असंस्कृतञ्च लवणं तैलञ्चाभक्ष्यमेव च ।
भक्ष्यं पवित्रं सर्व्वेषां शुद्धने वह्निसंस्कृतम् ॥
एकहस्ते घृतं तोयमभक्ष्यं सर्व्वसम्मतम् ।
आविलं क्षमियुक्तञ्चापरिशुद्धत्वनिर्म्मलम् ॥
अभक्ष्यं ब्राह्मणानाञ्च वैष्णवानां विशेषतः ।
अनिवेद्यं हरेरेव यतीनां ब्रह्मचारिणाम् ॥
पिपीलिकाभिश्रितञ्च मधु गव्यं गुडं तथा ।
यत्किञ्चिदन्नं वा तात ! न भक्ष्यञ्च श्रुतौ श्रुतम् ॥
पचिभक्ष्यं कीटभक्ष्यं शुद्धं पक्वफलन्तथा ।
शाकभक्ष्यमभक्ष्यञ्च सर्व्वेषां दग्धमेव च ।
घृतपक्वं तैलपक्वं मिष्टान्नं शूद्रसंस्कृतम् ।
अभक्ष्यं ब्राह्मणानाञ्च शूद्रभक्ष्यं पिपीटकम् ।
सर्व्वेषामनुचीनाञ्च जलमन्नं परित्यजेत् ।
अशौचान्तात् परदिने शुद्धमेव न संशयः ।
विपाकः कर्म्मणामेव दुष्करः श्रुतिसम्मतः ।
भक्ष्याभक्ष्यञ्च कथितं यथाज्ञानं ब्रजेश्वर !।"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे पूर्व्वभागे ।

"भक्ष्याभक्ष्यञ्च हे शिष्य ! वेदोक्तं तदनन्तरं ।
करीरस्य वधः श्रेष्ठः फलान्यौदुम्बरस्य च ।
सद्यो भक्षी भवेत्तेन अभक्ष्या पूतिवासिका ।
न भक्षणीयं वाराहं मांसं मत्स्यस्य सर्व्वतः ।
अभक्ष्या ब्राह्मणैर्ज्ञातैर्दोषितैर्हि न संशयः ।"
इति वाराहे ।

भक्ष्याभक्ष्यं, क्ली, (भक्ष्या भक्ष्यार्हा अजाद्याः । राजादाद्यः । इति यत्प्रत्ययनिष्पन्नः ।

भगं, क्ली, पुं, (भज्यते अनेनासिन् वेति भज + घञ्यर्थे कन्प्रत्ययेन सेवते इति भावः । भजेर्घः यामु + "पुंसि संज्ञायां घः प्रायेण ।" ३ । ३ । ११८ । इति घः । "खनो घ च ।" ३।३।१७। इति घिनुणरणमन्यतोऽप्ययमिति विज्ञापनार्थं इति दुर्गादासभट्टोजीदीक्षितः ।) स्त्रीचिह्नम् । इत्यमरः । पर्य्यायः । योनिः २ । इत्यमरः ।२।६।७। इत्यजम् ३ उदयः ४ सारमन्दिरम् ५ । इति राजनिर्घण्टः । (भजन्त्यनेनेति भगो मेढ्रम् । भग सेवायामिति धातोः । भगो योनिः । अत्र भगशब्दो दण्डमपि कथ्यते । इति भावप्रकाशस्य मध्यमे चतुर्थे भागे ॥

"ब्रह्मा दक्षप्रतिविष्णुः सोमः सर्व्वज्ञधातवः ।
भगोऽथ मित्रावरुणौ वीरं ददतु मे सुतम् ।"
इति वामटे शारीरस्थाने प्रथमोऽध्यायः ।

रतिसुखम् २ धर्म्मवर्त्म ३ अधरम् ४ कामदेवः ५ सूर्य्यः ६ प्रकृतिः १० अधर्मम् ११ कटाक्षः ।

अप्रदेशः १३ प्रकृतिः १४ पुण्यो १५ संसारमार्गः १६ गुह्यम् १७ सरागागारम् १८ सरध्वजम् १९ रत्यङ्गम् २० रतिकुहरम् २१ फलत्रम् २२ अधः २३। इति शब्दरत्नावली॥ तस्य लक्षणम्। यथा,—

"विस्तीर्णं च गभीरं च द्विविधं भगलक्षणम्।"

तद्गुणा यथा,—

"कूर्मपृष्ठं गजस्कन्धं पद्मगन्धं सुकोमलम्।
अकोमलं सुविस्तीर्णं पश्चैते च भगोत्तमाः॥"

तद्दोषा यथा,—

"शीतलं निम्नमयुग्मं गोजिह्वासदृशं परम्।
इत्युक्तं कामशास्त्रज्ञैर्भगदोषचतुष्टयम्॥
विस्तीर्णं सुफलं योन्यं गभीरं वंशबीजकम्।"

इति रतिमञ्जरी॥

तस्य शुभाशुभलक्षणम्। यथा,—

"शुभः कमठपृष्ठाभो गजस्कन्धोपमो भगः।
वामोन्नतस्तु कन्यायाः पुत्रजो दक्षिणोन्नतः॥
श्यामरोमा गूढमणिः स्वाश्लिष्टः संवृतः पृथुः।
तुङ्गः कमलवर्णाभः शुभोऽत्यदलाकृतिः॥
कुरङ्गखुरवक्त्रो यश्चुल्लिकोदरसन्निभः।
रोमशो विवृतास्यश्च दृश्यनासोऽतिदुर्भगः॥
शशायर्क्षो भगो यस्याः सा गर्भमिह नेच्छति।
चिपिटः कर्पराकारः किंकुरीपदृशो भगः॥
वंशवेतसपत्राभो गजरोमोच्चनासिकः।
विकटः कुटिलाकारो लम्बगल्लस्तथाशुभः॥"

इति स्कान्दे काशीखण्डे ३७ अध्यायः॥

श्रीः। वीर्यम्। इच्छा। ज्ञानम्। वैराग्यम्। कीर्त्तिः। माहात्म्यम्। ऐश्वर्य्यम्। (यथा भागवते। २। ७। ६।

"यद्वैकुण्ठसुपथगतं द्विजवाक्यवज्र-
निष्पुष्टपौरुषभगं निरये पतन्तम्॥"

"निष्पुष्टं दग्धं पौरुषं भगमैश्वर्य्यञ्च यस्य।" इति तट्टीकायां स्वामी॥) यत्नः। धर्म्मः। मोक्षः। इति मेदिनी। गे, १४॥ पुंसां गुदसुष्क-मध्यभागः। इति राजनिर्घण्टः॥ श्रीः। यशः। सौभाग्यम्। (यथा, भागवते। १। १७। १०।

"यस्य राष्ट्रे प्रजाः सर्व्वास्त्रस्यन्ते साध्वसाधुभिः।
तस्य मत्तस्य नश्यन्ति कीर्त्तिरायुर्भगो गतिः॥"

"भगो भाग्यम्।" इति तट्टीकायां स्वामी॥) कान्तिः। सूर्य्यः। प्रभुविशेषः। चन्द्रः। इत्य-नेकार्थध्वनिमञ्जरी॥ पूर्व्वफल्गुनीनक्षत्रम्। यथा, ज्योतिस्तत्त्वे।

"यत्तताभाययुक्तास्थ भगे सर्पिस्तदुत्तरे॥"

गः पुं, (भज्यते इति। भजसेवायां+"पुंसि संज्ञायां घ प्रायेण।" ३। ३। ११८। इति घ। "स्नो घ च।" ३। ३। १२५। इति धिषुकरणाद् वा घ।) रविः। इति मेदिनी। गे, १४। ज्ञानवैराग्ययोर्योनौ भगमध्यौ तु भास्करे।" इति रुद्रः॥

(भक्तनीये, त्रि। यथा, ऋग्वेदे। १। ३६। ५।

"इन्द्रो भगो वाजदा अस्य गावः
प्रजायन्ते दक्षिणा अस्य पूर्वीः॥"

"भगः सर्व्वैर्भजनीयः स इन्द्रः।" इति तद्भाष्ये सायणः॥ द्वादशादित्यभेदः। यथा, ऋग्वेदे। २। २७। १।

"इमा गिरः आदित्येभ्यो घृतस्नूः
सनाद्राजभ्यो जुह्वा जुहोमि।
शृणोतु मित्रो अर्य्यमा भगो नस्तुविजातो वरुणो दक्षो अंशः॥"

यथा च महाभारते। १। ६५। १५-१६।

"धाता मित्रोऽर्य्यमा शक्रो वरुणस्त्वंश एव च।
भगो विवस्वान् पूषा च सविता दशमस्तथा॥
एकादशस्तथा त्वष्टा द्वादशो विष्णुरुच्यते।
जघन्यजस्तु सर्व्वेषामादित्यानां गुणाधिकः॥"

रुद्रांशो वीरभद्रोऽस्य भगस्य दक्षयज्ञे नेत्रे उत्-पाटितवान्। यथा, भागवते। ४। ५। १८।

"भगस्य नेत्रे भगवान् पातितस्य रुषा भुवि।
उच्चचार सदस्योच्चैः शपन्तमरुषच्चत्॥"

ऐश्वर्य्यादिषट्कम्। यदुक्तम्।

"ऐश्वर्य्यस्य समग्रस्य वीर्य्यस्य यशसः श्रियः।
ज्ञानवैराग्ययोश्चैव षण्णां भग इतीङ्गना॥"

भोगास्पदत्वम्। यथा, भागवते। १। १७। १८।

"प्रागल्भ्यं प्रश्रयः शीलं सह ओजो बलं भगः।
गाम्भीर्य्यं स्थैर्य्यमास्तिक्यं कीर्त्तिर्मानोऽनहंकृतिः॥"

"भगः भोगास्पदत्वम्।" इति तट्टीकायां श्रीधर-स्वामी॥ स्थूलमण्डलाभिमानी। यथा, रामा-यणे। ३। १२। १८।

"विष्णोः स्थानं महेन्द्रस्य स्थानञ्चैव विवस्वतः।
सोमस्थानं भगस्थानं स्थानं वैश्रवणस्य च॥"

"भगः स्थूलमण्डलाभिमानी।" इति तट्टीकायां रामानुजः॥)

भगण:, पुं, (भानां नक्षत्राणां गणः समूहः।) नक्षत्रसमूहः। शीघ्रगामिनां ग्रहाणामल्पेन कालेन मन्दगामिनां ग्रहाणां महता कालेन पूर्व्वगत्या पातानां पश्चिमगत्या परिवर्त्तनेनाश्वि-न्यादिरेवत्यन्तनक्षत्रभोगकालः। षष्टिविकलाभिः कला षष्टिकलाभिर्भागस्त्रिंशद्भागैरार्शिर्द्वादश-राशिभिर्भगणः। यथा,—

"शीघ्रगस्तान्यथाल्पेन कालेन महताल्पगः।
तेषान्तु परिवर्त्तेन पौष्णान्ते भगणः स्मृतः॥
विकलानां कलायष्ट्या तत्षष्ट्या भाग उच्यते।
तत्त्रिंशता भवेद्राशिर्भगणो द्वादशैव ते॥
युगे सूर्य्यशशुक्राणां खचतुष्करदार्णवाः।
४३२०००० ।
कुजार्किगुरुशीघ्राणां भगणाः पूर्व्वयायिनाम्॥
इन्दो रसाग्निवित्तीयुसप्तभूधरभागणाः।
५७७५३३३६।
दस्रत्र्यरसाङ्काग्निलोचनानि कुजस्य तु
२२६८३२॥
बुधशीघ्रस्य भूचन्द्रखाग्निचन्द्राङ्कनेत्रवः
१७६३७०६०।

दृङ्नखाः खदसाग्निवेदगुणवह्नयस्तथा
६६४२२०॥
सितशीघ्रस्य वटसप्तत्रियमाग्निखभूधराः
७०००३७६।
गुणेर्भुजङ्गषट्पक्षरसवेदनिशाकराः १६६५१८॥
चन्द्रोच्चस्याग्निभून्याग्निवसुसर्पार्णवा
४८८२०३ युगे।
वामं पातस्य सर्पाग्नियमाग्निशिखिदस्काः
२३२२३८॥

इति सूर्य्यसिद्धान्तः॥ *॥

अपि च। ग्रहाणां मन्दोच्चानां चलोच्चानां ग्रहपातानाञ्च भगणान् श्लोकषट्केनाह। चन्द्रेन्दुरुद्रबुधपर्य्यया विधेरग्नि कोटिगुणिता रदा-ब्धयः। ४३२०००००० एत एव भूनिजोच्च-भूभुवां कीर्त्तिताश्च भगणैकश्लोचनाः॥ १॥

खाब्धिखाब्धिभगणाम्बरेन्द्रियक्षाधरादिविषया
५७७५३३०००० द्विमद्युतेः।
युग्मयुग्मशरनागलोचनाशलक्षवयमाग्निनो-
ऽब्जः २२६८८५२२॥ २॥

सिन्धुसिन्धुरगवाष्टगोऽङ्कषट्चाङ्कसप्तशशिनो
१७६३६६८८८४ शशीग्रजाः।
पक्षपक्षयुगषट्कलोचनद्व्यब्धिषड्गुणमिता
३६४२२६४५५ गुरोर्मताः॥ ३॥

द्विनन्दवेदाङ्कगजाग्निलोचनद्विभून्यशैलाः
७०२२३८६६२ सितशीघ्रपर्य्ययाः।
भुजङ्गनन्दद्विनगाङ्कवाणषट्कृतेन्दवः
सूर्य्यसुतस्य पर्य्ययाः १४६५६७२८॥ ४॥

खाष्टाब्धयो४८०२०चन्द्रगतेर्युदिग्विषद्विपाब्धयो
४८०१०५८५८ द्वाङ्कयमा २६२ रदाग्नयः३३२।
शूरेन्दिभाः८५५क्षाच्चरसाः६५३कुसागराः४१
स्युः पूर्व्वगत्या तरणेर्म्दुक्षगाः॥ ५॥

गजाष्टिभर्गत्रिरदाश्विनः२ ३२ ३१११६८कुभद्र-साश्विनः२६७ कुद्विशराः ५२१ क्रमर्क्षवः ६३।
त्रिनन्दनागा ८६३ युगकुञ्जरेषवो ५८४
निशाकराद्यस्तगपातपर्य्ययाः॥ ६॥"

इति सिद्धान्तशिरोमणिः॥*॥

ग्रहाणां पूर्व्वगमनेन कल्पे यते पर्य्ययाः। तथा मन्दोच्चानाञ्च प्राग्गत्या एतावन्तः। पातानां पश्चिमगत्या एतावन्तो भवन्ति। अत्रोपपत्तिः सा तु तद्भाषाकुशलेन तत्तच्चित्तसंस्थानज्ञेन श्रुत-गोलेनैव श्रोतुं शक्यते नान्येन। अस्मदादीनां ग्रहपाताः स्वस्वमार्गेषु गच्छन्त एतावतः पर्य्ययान् कल्पे कुर्व्वन्तीत्यागम एव प्रमाणम्। इति तट्टीका॥

भगदत्तः, पुं, (भगमैश्वर्य्यं दत्तमस्मै इति।) नरकराजस्य ज्येष्ठपुत्रः। स तु प्राग्ज्योतिषपुराधिपः। यथा,

"ऋतुमत्यान्तु जायायां कालेन गरुडः क्रमात्।
भगदत्तं महाशौर्य्यं मदवन्तं सुमालिनम्॥
चतुरो जनयामास पुत्रांस्तांश्च क्षितेः सुतः॥"

श्रीभगवानुवाच।

"भारावतरणे देवि! नरकस्य वधः पुरा।
त्वयैव प्रार्थितो यस्मात् तेनासौ निहतो मया॥

पालयिष्येऽस्य सन्तानं देवि ! त्वद्वचनादहम् ।
प्राग्ज्योतिषेऽभिषेक्ष्यामि नप्तारं भगदत्तकम् ॥
पृथिव्यां नारदेनैव सहितः केशवस्तदा ।
भगदत्तं भौमसुतं प्राग्ज्योतिषपुरोत्तमे ।
अभिषिच्य तदा भूपं पुरमध्ये न्यवेशयत् ॥"
इति कालिकापुराणे ३६ अध्यायः ॥
(यथा च महाभारते । २ । २६ । ८ ॥
"स तानपि महेष्वासान् विजित्य भरतर्षभ ! ।
तैरेव सहितैः सर्व्वैः प्राग्ज्योतिषमुपाद्रवत् ॥"
तत्र राजामहानासीद्भगदत्तो विशाम्पते ! ।
तेनासीत् सुमहद्युद्धं पाण्डवस्य महात्मनः ॥")

भगदेवतं, क्ली, (भगो योनिर्देवतं देवता यस्य ।) पूर्व्वफल्गुनीनक्षत्रम् । तत्तु दृहस्पतेर्जन्मनक्षत्रम् । यथा, ज्योतिस्तत्त्वे ।
"विशाखानलतोयानि वैष्णवं भगदेवतम् ।
पुष्या पौष्णो यमः सर्पो जन्मभान्यर्कतः क्रमात् ॥"

भगन्दरः, पुं, (भगं गुह्यसुष्कमध्यस्थानं दारयतीति । "इ + यिच् + पूः सर्व्वधोर्दारिसहोः ।" ३ । २ । ४१ । इत्यत्र । "भगे च दारेरिति वक्तव्यम् ।" इति काशिकोक्तेः खच् । "खचि ह्रस्वः ।" ६ । ४ । ६४ । इति ह्रस्वः । सुश्रुत ।) व्यापदभेदे व्रणरोगविशेषः । तस्य रूपमाह ।
"गुदस्य द्व्यङ्गुले चैव पार्श्वतः पिड़कार्त्तिकृत् ।
भिन्नो भगन्दरो ज्ञेयः स च षड्विधो भवेत् ॥"
अर्त्तिकृत् पीड़ाकृत् । षड्विधः वातकफपैत्तिकश्लैष्मिकसान्निपातिकशल्यजभेदैः ॥ भगन्दरशब्दस्य निरुक्तिमाह भोजः ।
"भगं परिसमन्ताद्यो गुदवस्तौ तथैव च ।
भगवद्दारयेद्यस्मात्तस्मादेष भगन्दरः ॥"
भजन्त्यनेनेति भगं मेहनम् । भजन्त्यस्मिन्निति भगं योनिः । अत्र भगशब्देन द्वयमपि कथ्यते । भगवत् योनिवत् ॥ पूर्व्वरूपादीनि यथा,—
"कटीकपालनिस्तोददाहकण्डूरुजादयः ।
भवन्ति पूर्व्वरूपाणि भविष्यति भगन्दरे ॥"
कटीकपालमत्र कटीफलकम् ॥ वातिकं शतपोनकसंज्ञं भगन्दरमाह ।
"कषायरूक्षैरतिकोपितोऽनिल-
स्त्वपानदेशे पिड़कां करोति याम् ।
उपेक्षणात् पाकमुपैति दारुणं
रुजाश्च भिन्नारुणफेनवाहिनीम् ॥
तत्रागमो मूत्रपुरीषरेतसां
व्रणैरनेकैः शतपोनकं वदेत् ।
दारुणं अतिदारुणात् । व्रणैरनेकैः सूक्ष्ममुखैः । शतपोनकवासनो तत्तुल्याम् ॥ पैत्तिकसङ्ग्रहमाह ।
"प्रकोपनैः पित्तमतिप्रकोपितं
करोति रक्तां पिड़कां गुदे गताम् ।
तदाशुपाकाऽतिमसूतिवाहिनीं
भगन्दरं पोऽशिरोधरं वदेत् ॥
आशुपाकातिमसूतिवाहिनीम् । शीघ्रपाकाम् अतिदुर्गन्धवाहिनीञ्च । तदा तं भगन्दरं उष्ट्रग्रीवसंज्ञं वदेत् । उष्ट्रग्रीवसंज्ञञ्च । पिड़काकालीनवक्रतयोष्ट्रग्रीवाकारत्वेन ॥ श्लैष्मिकपरिस्रावित्वसंज्ञमाह ।
"कण्डूयनो घनस्रावी कठिनो मन्दवेदनः ।
श्वेतावभासः कफजः परिस्रावी भगन्दरः ॥"
कठिनः पिड़कावस्थायां परिस्रावी निरन्तरं स्रवणशीलः ॥ सान्निपातिकशम्बूकावर्त्तसंज्ञमाह ।
"बहुवर्णरुजास्रावाः पिड़का गोस्तनोपमाः ।
शम्बूकावर्त्तवन्नाड़ी शम्बूकावर्त्तको मतः ॥"
बहुवर्णरुजास्रावाः बहुशब्दो वर्णादिभिः प्रत्येकं सम्बध्यते । नाड़ी स्रावमार्गः ॥ शल्यजसुन्मार्गसंज्ञमाह ।
"क्षताद्गतिः पायुगताद्विवर्द्धते
क्षुपेक्षणात् क्षुः क्षमयो विदार्य्यते ।
प्रकुर्व्वते मार्गमनेकधा सुखे-
ष्वंसेक्षसुन्मार्गभगन्दरं वदेत् ॥
क्षताद् कण्टकादिना नखेन
कण्डूयनादिना वाभिघातात् ।
गतिः स्रावः उन्मार्गभगन्दरम् । एतस्य क्षमिक्षतमार्गैः पुरीषादिनिर्गमादुन्मार्गसंज्ञा ॥"
कष्टसाध्यमसाध्यत्वाह ।
"घोराः साधयितुं दुःखाः सर्व्व एव भगन्दराः ।
तेष्वसाध्यस्त्रिदोषोत्थः क्षतजश्च विशेषतः ॥
वातमूत्रपुरीषाणि शुक्रञ्च क्षमयस्तथा ।
भगन्दरात् स्रवन्त्यस्तु नाशयन्ति तमातुरम् ॥"
अथ भगन्दरस्य चिकित्सा । यथा,—
"अथास्य पिड़कामेव तथा यत्नादुपाचरेत् ।
शुद्धास्रसुतिसेकार्त्तैर्यथा पाकं न गच्छति ॥
पुनर्नवाम्बताम्रोपिष्टिकावदरैः कृतः ।
लेपाय पिड़कावस्थे कल्कः श्लक्ष्णो भगन्दरे ॥
पयःपिष्टैस्त्रिलारिष्टमधूकैः शीतलैः कृतः ।
लेपो भगन्दरे शस्तः पैत्तिके वेदनावति ॥"
अरिष्टो निम्बः ॥
"सुमनायाश्च पत्राणि गुडूची विश्वभेषजम् ।
सैन्धवं तक्रसंपिष्टं लेपाद्धन्ति भगन्दरम् ॥"
सुमना जातिस्तस्याः पत्रम् ।
"पिड़कानामपक्वानामपतर्पणपूर्व्वकम् ।
कर्म्म कुर्य्यादिरेकान्तं भिन्नानां व्रणवत् क्रिया ॥
निशार्कक्षीरसिन्धूत्थपुराम्बहननच्छदैः ।
सिद्धमभ्यञ्जने तैलं भगन्दरहरं परम् ॥"
पुरो गुग्गुलुः । अम्बहननच्छदाः करवीरपत्राणि । निशादितैलम् ॥ ॥
"त्रिफलापुरुषाणानां त्रिपर्णीश्लेष्मयोगिता ।
गुटिका शोथगुल्मार्शोभगन्दरवतां हिता ॥"
नवबाधिको गुग्गुलुः ॥ ॥
"शस्त्रक्रियापि कथिता शस्त्रसाध्ये भगन्दरे ।
सा च तेनैव कर्त्तव्या शस्त्रशास्त्रमवेत्य यः ॥
व्यायामं मैथुनं गुर्वं दृष्ट्वानं गुरूणि च ।
रूक्षव्रणेऽपि यत्नेन वर्जयेत्तत्तरं नरः ॥"
इति भावप्रकाशे भगन्दराधिकारः ॥

अपि च ।
"लङ्घनं स्वेदनं लेपविस्रावणविरेचनैः ।
रक्तमोक्षादिभिः शीघ्रं गुदजां पिड़कां जयेत् ।
तथा यत्नं भिषक् कुर्य्यादयथा पाकं नियच्छति ।
अपक्वं वाथ पक्वं वा जलौकापातनं हितम् ।
तदभावे तु शृङ्गाभ्यामिदं रक्तस्य मोक्षणम् ।
वटपञ्चाष्टकाशुण्ठीगुडूच्यः सपुनर्नवाः ।
पिष्ट्वा तु पिड़कारम्भे लेपः शस्तो भगन्दरे ।
श्यामावस्थाक्रिया प्रोक्ता पक्वावस्थाक्रियोच्यते ।
त्रुटयश्वपाटलाक्षारवह्निदाहादिकं क्रमम् ।
विधाय व्रणवत् कार्य्यं यथा दोषो यथावसम् ।
क्षुद्रार्कदुग्धदार्व्वीभिर्वर्त्तिं कृत्वा भगन्दरे ।
दद्यात् सर्व्वशरीरस्था नाड़ीर्हन्यात् प्रयोगराट् ।
तिलाभयालोध्रमरिष्टपत्रं
निशा वचा कुष्ठमगारधूमः ।
भगन्दरे नाशुपदंशयोऽयं
दुष्टव्रणे शोधनरोपणोऽयम् ॥
शुनोऽस्थिदग्धं त्रिफलारसेन
विड़ालकास्थि त्वथवा विलेपनात् ।
चिरप्रभूतं व्रणरोगदुष्टं
भगन्दरं नाशुमुपैति नूनम् ॥ ॥
जम्बूकमांसं भुञ्जीत प्रकारैर्यत्नतादिभिः ।"
शृगालमांसयत्नेन खाद्यम् । अथवा शूकरमांसयत्नेन खाद्यम् ॥
"त्रिकटु त्रिफला मुस्तं विड़ङ्गान्यतिविषकम् ।
ग्रन्थेला पिप्पलीमूलं हपुषा सुरदारु च ।
तुम्बुरुं पुष्करं चव्यं विशाला रजनीद्वयम् ।
विड़ं सौवर्च्चलक्षारौ सैन्धवं गजपिप्पली ।
यावन्त्येतानि चूर्णानि तावद्गुग्गुलुः ।
कोलप्रमाणां गुटिकां खादेन्मधुना सह ।
भगन्दरं श्वासकासं च्यवं जीर्णज्वरोदरम् ।
नाड़ीदुष्टव्रणानार्शकुष्ठोन्मादाश्मरीक्रमीन् ।
मेहान्तर्हृद्विद्रधीगुल्मं शीपदमेव च ।
सप्तविंशतिको हन्ति गुग्गुलुः सर्व्वरोगहा ।"
हृद्रोगशूलमित्यत्र हृत्पार्श्वशूलमित्यपि पाठः ।
सप्तविंशतिगुग्गुलुः ॥ ॥
"चित्रकार्कौ चित्रकपाठौ मलपूरयमारकौ ।
सुधा वचा लाङ्गलिकी हरितालं सुवर्चलाम् ।
ज्योतिष्मतीञ्च संचूर्त्य तैलं वैद्यो विपाचयेत् ।
एतद्विस्रन्दनं नाम तैलमुक्तं भगन्दरे ।
शोधनं रोपणञ्चैव सुवर्णकरणं स्मृतम् ।"
विस्रन्दनतैलम् ॥ ॥
"क्षतस्य द्विगुणेन गुडवल्लिना कल्कापयोभिः
क्वाथं
पिष्ट्वा ताम्रमयं समस्ततुलितं पात्रं विधार्योर्ध्वं
स्वेद्यं यामकृतं सभस्मपिठरे शमूलकैः सप्तभिः
साद्धं तत्पुटपक्वमेव भगन्दरहरो गुग्गुलोरिति ।
स्यादिति ।
जम्बूफलैरित्यत्र निम्बफलैरिति च पाठः ।
भगन्दरहरो रसः ॥ ॥
"शुद्धसूतं समं गन्धं रजतस्य गतुल्यकम् ।
गौरकं सैन्धवं तुल्यं तिक्तकोयातकार्कदैः ।

पिट्टा गर्दभनाड्यां भक्षयेच्च भगन्दरम् ।
रसः कालाग्निरुद्रोऽयं गृञ्जैकं तत्प्रशिक्षयेत् ॥"
कालाग्निरुद्रो रसः ॥ ८ ॥
इति गारुडीपिकायां भगन्दरचिकित्साध्यायः ॥
अपि च । गारुडे १८८ अध्याये ।
"गुग्गुलुं त्रिफलायुक्तं पीत्वा नश्येत् भगन्दरः ॥"
(अस्य सकारयलक्षणचिकित्सितं यथा,—
क्रिम्यग्नि रक्ष्यालक्षणव्यवाय-
प्रवाहणाद्युत्कटकाश्वदृष्टेः ।
गुदस्य पाके त्रिफला भगार्तिः
पक्वप्रभिन्ना तु भगन्दरः स्यात् ॥
विरेचनक्षेपणपाटनैश्च
विशुद्धमार्गस्य च तैलदाहः ।
स्यात् क्षारसूत्रेण सुपाचितेन
छिन्नस्य चास्य व्रणवच्चिकित्सा ॥'
इति चरके चिकित्सास्थाने सप्तदशोऽध्याये ।)
भगभक्षकः, पुं, (भगं योनिस्तामुपाश्रित्य भक्षयति जीविकां निर्व्वाहयतीति । भक्ष + ण्वुल् ।) कुष्ठाणौ । इति महाभारते दानधर्म्मः ॥ कोट्टना इति भाषा ॥ तस्यान्नभक्षणनिषेधो यथा,—
"यो बान्धवैः परित्यक्तः साधुभिर्ब्राह्मणैरपि ।
कुष्ठाणौ यश्च तस्यान्नं भुक्त्वा चान्द्रायणं चरेत् ॥"
इति मार्कण्डेयपुराणे सदाचाराध्यायः ॥
भगवती, स्त्री, (भगः ऐश्वर्य्यस्य समग्रस्य वीर्य्यस्य यशसः श्रियः । ज्ञानवैराग्ययोश्चैव षण्णां भग इतीङ्गना ॥" इत्युक्तलक्षणम् षड्ऐश्वर्य्यमस्यास्तीति । भग + "तदस्याऽस्त्यस्मिन्निति मतुप् ।" ५ । २ । ९४ । इति मतुप् । मस्य वः । "भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने । संसर्गेऽस्ति विवक्षायां भवन्ति मतुवादयः ॥" इति काशिकोक्तेर्नित्ययोगेऽत्र मतुप्प्रत्ययः । ततः स्त्रियां ङीप् ।) पृथ्वी । गौरी । इति मेदिनी । ते, २१४ ॥ (सा च प्रकृतिरूपिणी महामाया देवी । यथा, मार्कण्डेये । ८१ । ४२ ।
"ज्ञानिनामपि चेतांसि देवी भगवती हि सा ।
बलादाकृष्य मोहाय महामाया प्रयच्छति ॥")
सरस्वती । यथाह पौराणिकाः ।
"सा मां पातु सरस्वती भगवती निःशेष-
जाड्यापहा ॥"
गङ्गा । यथा, शङ्कराचार्य्यकृतगङ्गास्तोत्रे ।
"भगवति ! भवतीनामौन्मिषाले तवाम्भः-
कणमनुपरिमाणं प्राणिनो ये स्पृशन्ति ॥"
तस्याः गरुडं यथा,—
"यथा नित्यो हि भगवान् नित्या भगवती तथा ।
समायया तिरोभूता तत्रैवे प्राप्यते त्वया ॥
आत्मशक्तिसमुत्पन्नं सर्गे मिथ्येव क्षत्रियम् ।
दुर्गा सत्यस्वरूपा सा प्रकृतिर्भगवान् यथा ॥
सिद्धौषधादिकं सर्व्वं यस्यामस्ति युगे युगे ।
भिषगादिर्भगो ज्ञेयस्तेन भगवती स्मृता ॥"
इति गरुडेमहापुराणे प्रकृतिखण्डे ५४ अध्यायः ॥
अपि च ।
"मैथते या हरेः सर्व्वैस्तस्यैव भजते यतः ।
धातुर्भमेति सेवायां भगवत्येव सा स्मृता ॥"
इति देवीपुराणे ४५ अध्यायः ॥
तस्याः प्रतिमाविशेषस्य पूजने फलविशेषो यथा,
ब्रह्मोवाच ।
"शृणु तस्याः सुराध्यक्ष ! आराधनविधिं परम् ।
यथा सा तोषिता पूर्व्वं शङ्कराद्यैः फलैप्सुभिः ॥
कर्म्मयज्ञेन देवेश ! तथा त्वमपि पूजय ।
शृणु पूजयते देवीं मन्त्रशक्तिमयीं शुभाम् ॥
अक्षमालाकरो नित्यं तेनासौ विबुधाधिपः ।
अहं शैलमयीं देवीं यजामि सुरसत्तम ! ॥
तेन ब्रह्मत्वमेवेदं मया प्राप्तं सुदुर्लभम् ।
इन्द्रनीलमयीं देवीं विष्णुरर्च्चयते तदा ॥
विष्णुत्वं प्राप्तवांस्तेन अच्युतैकं सनातनम् ।
देवीं हेममयीं कान्तां धनदोऽर्च्चयते सदा ॥
तेनासौ धनदो देवो धनेशत्वमवाप्तवान् ।
विश्वेदेवा महात्मानो रौप्यां देवीं मनोहराम् ।
यजन्ति विधिवद्भक्त्या तेन विश्वत्वमाप्नुयुः ॥
वायुः पूजयते भक्त्या देवीं पित्तलसम्भवाम् ।
वायुत्वं तेन तत् प्राप्तमनौपम्यं गुणावहम् ॥
वसवः कांस्यिकां देवीं पूजयन्ते विधानतः ।
प्राप्नुवन्तो महात्मानो वसुत्वं सुमहोदयम् ॥
अश्विनौ पार्थिवां देवीं पूजयन्तौ विधानतः ।
तेन तावश्विनौ देवौ दिव्यदेहं गतावुभौ ॥
स्फाटिकां शोभनां देवीं वरुणोऽर्च्चयते सदा ।
वरुणत्वं हि संप्राप्तं तेन ऋद्ध्या समन्वितम् ॥
देवीमभ्रमयीं पुण्यामग्निर्यजति भावितः ।
अग्नित्वं प्राप्तवांस्तेन तेजोरूपसमन्वितम् ॥
ताम्रां देवीं सदाकारां भक्त्या देवो दिवाकरः ।
अर्च्चते तत्र संप्राप्तं तेन सूर्य्यत्वमुत्तमम् ॥
सुक्ताशैलमयीं देवीं सोमः पूजयते सदा ।
तेन सोमोऽपि संप्राप्तः सोमत्वं सततोज्ज्वलम् ॥
प्रवालकमयीं देवीं यजन्ते पन्नगोत्तमाः ।
तेन नागास्तु भोगाढ्याः प्रयान्त्येते परं पदम् ॥
कृष्णायसमयीं देवीं पूजयन्त्यसुरोत्तमाः ।
राजसाश्च महात्मानस्तेन वैरमितविक्रमाः ॥
त्रपुसीसमयीं देवीं पिशाचाः पूजयन्ति ताम् ।
तेन ऋद्धिबलोपेताः प्रयान्ति परमं पदम् ॥
त्रैलोक्यिकां सदा देवीं यजन्ते गुह्यकादयः ।
तेन भोगबलोपेताः प्रयान्तीश्वरमन्दिरम् ॥
वज्रलौहमयीं देवीं यजन्ते मातरः सदा ।
मातृत्वं प्राप्य ताः सर्व्वाः प्रयान्ति परमं पदम् ॥
एवं देवाः समस्तैस्तैः पिशाचोरगराक्षसाः ।
पूजयन्ते सदाकालं चर्चिकां सुरनायिकाम् ॥
तथा त्वमपि देवेन्द्र ! यदीच्छसि परां गतिम् ।
शिवां मन्मिमयीं पूज्य लभसे मनसेप्सितान् ॥
कामान् सुरवराध्यक्ष ! कामिकैः पूजितैः सदा ।
ददाति सर्व्वलोकानां चिन्तामण्यर्च्चया शिवा ॥"
इत्याद्ये देवव्रतारे द्रव्यविधिपूजामाहात्म्ये ३८ अध्यायः ॥ तस्यै गरुदागस्य फलं यथा,—
ईश्वर उवाच ।
"देव्या गृह्णन्तु यः शुक्लकरीषं शोभनम्
सर्व्वोपकरणैर्युक्तं सकपाटार्गलान्वितम् ॥
तस्मिन् गत्वा ध्वजं छत्रं वितानं दर्पणानि च
दत्त्वा सुरवर्य्यादि नित्यं सङ्गीतकानि च ॥
देवीशास्त्रार्थवेत्तारं पूजनं भवने शुभम् ।
एवं प्रवर्त्तते यस्तु तस्य पुण्यफलं शृणु ॥
दशपूर्व्वापरांस्तात ! आत्मनश्चैकविंशतिम् ।
उद्धृत्य च कुलं पापाद्ब्रह्मलोके महीयते ॥
गच्छते भगवती यत्र परा परमपूजिता ।
तत्र कल्पान्तरं यावद्भुक्त्वा भोगान् मनोरमान् ॥
पुनः कालादिहायातः पृथिव्यामेकराड्भवेत् ।
सप्तत्यवाहनोपेतः श्रान्तः पुरपरिच्छदः ॥
पुनर्देव्या द्विजातीनां तद्भक्तानां प्रियो भवेत् ॥
कन्यासम्भूतको नित्यं देवीशास्त्रार्थपारगः ।
लभते परमद्वारं तदन्ते शिवतां व्रजेत् ॥
देव्या गृह्णन्तु यः शुक्लं ! सम्मार्ज्जयति नित्यशः ।
स भवेद्बलवान् सौख्यसर्व्वसम्पत्तिसंयुतः ॥
तदागच्छेच्छिवालोकं सर्व्वकालफलप्रदम् ।
देव्या गृह्णन्तु यः शुक्लं ! गोमयेनानुलेपयेत् ॥
स्त्रियो वा यदि वा पुंसः पक्षासन्तु निरन्तरम् ।
स लभेदीप्सितान् कामान् देव्या लोकञ्च गच्छति ॥"
इत्याद्ये देवव्रतारे ४२ अध्यायः ॥
भगवद्भक्तः, पुं, (भगवती भगवत्या वा भक्तः ।) श्रीकृष्णभक्तियुक्तः । अथ भगवद्भक्तानां लक्षणानि । सामान्यतः लैङ्गे ।
"विष्णुरेव हि यस्येह देवता वैष्णवः स्मृतः ॥"
अत्र विशेषः ।
"व्रतकर्म्मसुभज्ञानभोगवस्त्रादिमत्स्वपि ।
शैवेष्वपि च लिङ्गस्य भक्ताः सन्ति तथा तथा ॥"
तत्र व्रतेषु मध्ये भगवद्भक्तिहेतुव्रतपरता भगवद्भक्तलक्षणम् । तथा च स्कान्दे श्रीमार्कण्डेयभगीरथसंवादे ।
"दशमीशेषसंयुक्तं दिनं वैष्णववल्लभम् ।
सुपास्यते महीपाल ! ते वै भागवता नराः ॥
प्राणत्यये न चाश्नन्ति दिनं प्राप्य हरेर्नराः ।
कुर्व्वन्ति जागरं रात्रौ सदा भागवता हि ते ॥
उपोष्य द्वादशीं शुद्धां रात्रौ जागरणान्विताम् ।
अश्नन्तु माधवेदृश्यस्तु स वै भागवतो नरः ॥
भक्तिर्न विष्णुता त्रेया न श्रुतानि व्रतानि च ।
सुप्रियः श्रीपतिर्यैषां ते स्युर्भागवता नराः ॥"
कर्म्मसु भगवदर्पणादिना तदाज्ञानुष्ठा वा भक्तिहेतुसदाचारपरता तत्रैव ।
"धर्म्मार्थं जीवितं येषां सन्तानार्थञ्च मैथुनम् ।
भोजनं विष्णुशेषार्थं शेषाशे वैष्णवा नराः ॥
अध्वगस्य पथि श्रान्तं काष्ठेऽत्र गृहमागतम् ।
योऽतिथिं पूजयेच्छ्रद्धा वैष्णवः स न संशयः ॥
सदाचारस्थिताः शिष्टाः सर्व्वभूतानुकम्पकाः ।
अप्रयत्नकृतारागा ये सदा भागवता हि ते ॥"

पाद्मे वैशाखमाहात्म्ये श्रीनारदाम्बरीषसंवादे। यथा,—
"जीवितं यस्य धर्म्मार्थे धर्म्मो हर्य्यर्थमेव च।
अहोरात्रादि पुण्यार्थं तं मन्ये वैष्णवं जनम्॥"
लैङ्गे च।
"विष्णुभक्तिसमायुक्तान् श्रौतस्मार्त्तप्रवर्त्तकान्।
प्रीतो भवति यो दृष्ट्वा वैष्णवोऽसौ प्रकीर्त्तितः॥"
गुणवत्सु भक्तिहेतुकृपालुत्वादिसद्गुणशीलता तत्रैव।
"परदुःखेनात्मदुःखं मन्यन्ते ये नृपोत्तम!।
भगवद्धर्म्मनिरतास्ते नरा वैष्णवा नृप!॥"
भागवतदशमीयस्कन्धे श्रीकपिलदेवभूतिसंवादे। यथा,—
"तितिक्षवः कारुणिकाः सुहृदः सर्व्वदेहिनाम्।
अजातशत्रवः शान्ताः साधवः साधुभूषणाः॥"
पञ्चमस्कन्धे ऋषभदेवस्य पुत्रानुशासने। यथा,
"महत्सेवां द्वारमाहुर्विमुक्ते-
स्तमोद्वारं योषितां सङ्गिसङ्गम्।
महान्तस्ते समचित्ताः प्रशान्ता
विमन्यवः सुहृदः साधवो ये॥"
एकादशस्कन्धे श्रीभगवदुद्धवप्रश्नोत्तरे। यथा,—
"क्षमाशुरक्षतद्रोहस्तितिक्षुः सर्व्वदेहिनाम्।
सत्यसारोऽनवद्यात्मा समः सर्व्वोपकारकः॥
कामाद्यनुद्धतधीर्दान्तो मृदुः शुचिरकिञ्चनः।
अनीहो मितभुक् शान्तः स्थिरो मच्छरणो मुनिः॥
अप्रमत्तो गभीरात्मा धृतिमान् जितषड्गुणः।
अमानी मानदः कल्पो मैत्रः कारुणिकः कविः॥"
विष्णुपुराणे यमदूतभटसंवादे। यथा,—
"न चलति निजवर्णधर्म्मतो यः
समममतिरात्मसुहृद्विपक्षपक्षे।
न हरति न चलति किञ्चिदुच्चैः
स्थिरमनसं तमवेहि विष्णुभक्तम्॥"
ज्ञानिषु भक्तिहेतुज्ञानवत्ता एकादशे। यथा,—
"सर्व्वभूतेषु यः पश्येद्भगवद्भावमात्मनः।
भूतानि भगवत्यात्मन्येष भागवतोत्तमः॥
न यस्य स्वः पर इति वित्तेष्वात्मनि वा भिदा।
सर्व्वभूतसमः शान्तः स वै भागवतोत्तमः॥
ज्ञात्वाज्ञात्वाथ ये वै मां यावान् यश्चास्मि
यादृशः।
भजन्त्यनन्यभावेन ते मे भक्ततमा मताः॥
ईश्वरे तदधीनेषु बालिशेषु द्विषत्सु च।
प्रेममैत्रीकृपोपेक्षा यः करोति स मध्यमः॥
अर्च्चायामेव हरये पूजां यः श्रद्धयेहते।
न तद्भक्तेषु चान्येषु स भक्तः प्राकृतः स्मृतः॥"
भोगवत्सु भक्तिहेतुभोगानासक्तता हरियोगेश्वरोत्तरे। यथा,—
"गृहीत्वापीन्द्रियैरर्थान् यो न द्वेष्टि न काङ्क्षति।
विष्णोर्मायामिदं पश्यन् स वै भागवतोत्तमः।"
सम्बन्धविषयादिमत्सु भक्तिहेतुनिरभिमानिता तत्रैव। यथा,—
"न यस्य जन्मकर्म्मभ्यां न वर्णाश्रमजातिभिः।
सज्जतेऽस्मिन्नहंभावो देहे वै स हरेः प्रियः॥
भावाः कथञ्चिद्भक्त्यैव ज्ञानाद्यासक्तमानिता।
भक्तिनिष्ठापका जाताश्चतो मुक्ततमोदिता॥"
निष्ठापकाः परिपाकं प्रापकाः॥*॥
ग्रन्थेषु श्रीग्रन्थिवक्तृभेदकता दृष्टान्तादौ।
"ग्रन्थे च परमेष्ठाने विष्णौ च परमात्मनि।
समबुद्ध्या प्रवर्त्तन्ते ते वै भागवतोत्तमाः॥"
इति॥*॥
"अन्यच्च तेषां भगवच्छास्त्रार्थपरतादिकम्।
साक्षाद्दृष्ट्यात्मकं सुखं लक्षणं लिख्यतेऽधुना॥"
श्रीभागवतशास्त्रपरता स्कान्दे।
"येषां भागवतं शास्त्रं सदा तिष्ठति सन्निधौ।
पूजयन्ति च ये नित्यं ते स्युर्भागवता नराः॥
येषां भागवतं शास्त्रं जीवितादधिकं भवेत्।
महाभागवताः श्रेष्ठा विष्णुना कथिता नराः॥"
वैष्णवसम्माननिष्ठा लैङ्गे।
"विष्णुभक्तमधायातं यो दृष्ट्वा सुमुखप्रियः।
प्रणामादि करोत्येव वासुदेवे यथा तथा।
स वै भक्त इति ज्ञेयः स पुनाति जगत्त्रयम्॥
रूक्षाक्षरा गिरः स्रवन् तथा भागवतेरिताः।
प्रणामपूर्व्वं चन्वा यो वदेद्वै वैष्णवो हि सः॥
भोजनाच्छादनं सर्व्वं यथाशक्त्या ददाति यः।
विष्णुभक्तस्य सततं स वै भागवतः स्मृतः॥"
गारुडे।
"येनसर्व्वात्मना विष्णुभक्त्या भावो निवेशितः।
वैष्णवेषु कृतात्मत्वान्महाभागवतो हि सः॥*॥
श्रीतुलसीसेवानिष्ठा वृहन्नारदीये श्रीभगवन्मार्कण्डेयसंवादे।
"तुलसीकाननं दृष्ट्वा ये नमस्कुर्व्वते नराः।
तत्काष्ठाङ्कितकर्णा ये ते वै भागवतोत्तमाः॥
तुलसीगन्धमाघ्राय सन्तोषं कुर्व्वते तु ये।
तन्मूलमृदृतं येषु ते वै भागवतोत्तमाः॥"*॥
श्रीभगवतः कथापरता वृहन्नारदीये श्रीभगवन्मार्कण्डेयसंवादे।
"मत्कथाश्रवणे येषां वर्त्तते सात्त्विकी मतिः।
तदक्तरि सुभक्ताश्च ते वै भागवतोत्तमाः॥"
स्कान्दे श्रीभगवद्दुर्व्वासःसंवादे।
"मत्कथां कुरुते यस्तु मत्कथाश्च शृणोति यः।
स्मर्य्यते मत्कथायाश्च स वै भागवतोत्तमः॥"
चतुर्थस्कन्धे तत्रैव।
"मदाश्रया कथा मृष्टाः शृण्वन्ति कथयन्ति च।
तपन्ति विविधास्तापा नैतान्मद्गतचेतसः॥"*॥
नामपरता वृहन्नारदीये तत्रैव।
मन्नामकीर्त्तनासक्ता मद्भक्तजनसेविनः।
मन्नामश्रवणासक्तास्ते वै भागवतोत्तमाः॥
येऽभिनन्दन्ति नामानि हरेः शृण्वन्ति कीर्त्तयन्तः।
रोमाञ्चितशरीराश्च ते वै भागवतोत्तमाः॥"
तत्रैवान्यच्च।
"अन्योन्यसङ्गमं दृष्ट्वा येऽभिनन्दन्ति मानवाः।
हरिनामपरा ये च ते वै भागवतोत्तमाः॥"
स्मरणपरता। तत्र स्वधर्म्मनिष्ठया रागद्वेषादिनिवृत्त्या स्मरणं श्रीविष्णुपुराणे यमदूतभटसंवादे।
"न चलति निजवर्णधर्म्मतो यः
समममतिरात्मसुहृद्विपक्षपक्षे।
कलिकलुषमलेन यस्य नात्मा
विमलमतेर्मलिनीकृतस्तमेनम्।
मनसि कृतजनार्द्दनं मनुष्यं
सततमवेहि हरेरतीव भक्तम्॥
कनकमपि रहस्यवेद्य बुद्ध्या
लशुनमिव यः समवैति वै परत्वम्।
भवति च भगवत्यनन्यचेताः
पुरुषवरं तमवेहि विष्णुभक्तम्॥
स्फटिकगिरिशिलामलः क्व विष्णु-
र्मनसि नृणां क्व च मत्सरादिदोषः।
न हि तुहिनमयूखरश्मिपुञ्जे
भवति हुताशनदीप्तिवत् प्रतापः॥
विमलमतिरमत्सरः प्रशान्तः शुचि-
चरितोऽखिलसत्त्वमित्रभूतः।
प्रियहितवचनोऽनुमानमायो
वसति सदा हृदि तस्य वासुदेवः॥
वसति हृदि सनातने च तस्मिन्
भवति पुमान् जगतोऽस्य सौम्यरूपः।
चितिरसमतिरन्यमात्मनोऽन्तः
कथयति चारुतयैव शास्त्रयोनेः॥
अन्यविजयेन वैराग्यादिना च स्मरणं श्रीहरियोगेश्वरोत्तरे।
"देहेन्द्रियप्राणमनोधियां यो
जन्माप्ययक्षुद्भयतर्षकृच्छ्रैः।
संसारधर्म्मैरविमुह्यमानः
स्मृत्या हरेर्भागवतप्रधानः॥
त्रिभुवनविभवहेतवेऽप्यकुण्ठ-
स्मृतिरजितात्मसुरादिभिर्विमृग्यात्।
न चलति भगवत्पदारविन्दा-
ल्लवनिमिषार्द्धमपि स वैष्णवाग्र्यः॥
भगवत उरुविक्रमाङ्घ्रिशाखा-
नखमणिचन्द्रिकया निरस्ततापे।
हृदि कथमुपसीदतां पुनः स
प्रभवति चन्द्र इवोदितेऽर्कतापः॥"
पूजापरता स्कान्दे तत्रैव।
"येऽर्चयन्ति सदा विष्णुं यज्ञेशं वरदं हरिम्।
देहिनः पुण्यकर्म्माणः सदा भागवता हि ते॥"
लैङ्गे।
"विष्णुचैत्ये शुभान्येव करोति स्नेहसंयुतः।
प्रतिमाश्च हरेर्नित्यं पूजयेत् प्रयतात्मवान्॥
विष्णुभक्तः स विज्ञेयः कर्म्मणा मनसा गिरा।
नारायणपरो नित्यं भूप! भागवतो हि सः॥"
वैष्णवधर्म्मनिष्ठतादि पाद्मोत्तरखण्डे।
"तापादिपञ्चसंस्कारी नवेज्याकर्म्मकारकः।
अर्थपञ्चकविद्विप्रो महाभागवतो हि सः॥"
तापः तप्तमुद्राधारणं तदादिपञ्चसंस्कारयुक्तः।
पञ्चसंस्काराश्च तत्रैवोक्ताः। [इति।
"तापः पुण्ड्रत्रया नाम मन्त्रो यागस्तु पञ्चमः।

यस्यार्थः। नाम श्रीकृष्णदासेत्यादि। मन्त्रः श्रीगुरोः सकाशात् मन्त्रग्रहणम्। यागः होमपूर्व्वकयथाविधिदीक्षाग्रहणमित्यर्थः। नव इज्याकर्म्माणि पूजासम्बन्धिकृत्यानि अवणादीनि पाद्योपचारार्चनादीनि वा सर्व्वेषां तेषां पूजाङ्गत्वात्। तानि च तत्रैवोक्तानि। यथा —

"अर्चनं मन्त्रपठनं यागयोगौ महात्मनः।
नामसङ्कीर्त्तनं सेवा तच्चिह्नैरङ्कनं तथा।
तदीयाराधनं चर्य्या नवधा भिद्यते शुभे!॥"

अर्थपञ्चकं चत्वारो चत्वारो धर्म्मादयः पुरुषार्थाः पञ्चमपुरुषार्थश्च भक्तिः। यदा पञ्चतत्त्वानि त्वनात्मात्मपरमात्मपरमेश्वरतद्भक्तानां याथार्थ्यानि। इति तट्टीका॥ * ॥

एकान्तिता गारुड़े।

"एकान्तेन सदा विष्णौ यस्माद्दैवे परायणाः।
तस्मादैकान्तिनः प्रोक्तास्तद्भागवतचेतसः॥"

तद्विज्ञानेनानन्यपरता एकादशे उद्धवप्रश्नोत्तरे।

"ज्ञात्वाज्ञात्वाथ ये वै मां यावान् यश्चास्मि
यादृशः।
भजन्त्यनन्यभावेन ते वै भागवता मताः॥"

भागवते। ११। ३। ५०।

"न कामकर्म्मबीजानां यस्य चेतसि सम्भवः।
वासुदेवैकनिलयः स वै भागवतोत्तमः॥"

सा च एकान्तिता चतुर्द्धा। तत्र धर्म्मानादरेण श्रीमदुद्धवप्रश्नोत्तर एव।

"अन्वयैवं गुणान् दोषान् मयादिष्टानपि
स्वकान्।
धर्म्मान् सन्त्यज्य यः सर्व्वान् मां भजेत् स च
सत्तमः॥"

गीतायाञ्च।

सर्व्वधर्म्मान् परित्यज्य मामेकं शरणं व्रज।
अहं त्वां सर्व्वपापेभ्यो मोक्षयिष्यामि मा शुचः॥

यदा यस्यानुगृह्णाति भगवानात्मभावितः।
स जहाति मतिं लोके वेदे च परिनिष्ठताम्॥"

अन्यसर्व्वनिरपेक्षता भागवते श्रीमद्भगवदुद्धवसंवादे ऐलोपाख्याने।

"सन्तोऽनपेक्षा मच्चित्ताः प्रशान्ताः समदर्शिनः।
निर्म्ममा निरहङ्कारा निर्द्वन्द्वा निष्परिग्रहाः॥"

तत्रैव तृतीये श्रीकपिलदेवभूतिसंवादे।

"त एते साधवः साध्वि! सर्व्वसङ्गविवर्जिताः।
सङ्गस्तेष्वथ ते प्रार्थ्यः सङ्गदोषहरा हि ते॥"

विघ्नाकुलत्वेऽपि मनोरतिपरता स्कान्दे।

"यस्य कृष्णगतस्यापि क्षणे रमते मनः।
न विच्युता च भक्तिर्वै स वै भागवतो नरः॥
व्यापन्नतस्य यस्येह भक्तिरव्यभिचारिणी।
नान्यत्र रमते चित्तं स वै भागवतो नरः॥"

प्रेमैकपरता च भागवते पञ्चमस्कन्धे श्रीऋषभदेवस्य पुत्रानुशासने।

"ये वा मयीश कृतसौहृदार्था
जनेषु देहम्भरवार्त्तिकेषु।
गृहेषु जायात्मजरातिमत्सु
न प्रीतियुक्ता यावदर्थाश्च लोके॥"

रातिं मित्रं धनं वा।

"त्रिधा प्रेमैकपरता प्रेम्नः स्यात्तारतम्यतः।
उत्तमा मध्यमा चासौ कनिष्ठा चेति भेदतः॥"

तत्रोत्तमा यथा एकादशे हरियोगेश्वरोत्तरे।

"सर्व्वभूतेषु यः पश्येद्भगवद्भावमात्मनः।
भूतानि भगवत्यात्मन्येष भागवतोत्तमः॥
स्वेष्टदेवस्य भावं यः सर्व्वभूतेषु पश्यति।
भावयन्ति च तान्यस्मिन्नित्यर्थः सम्मतः सताम्॥"

तृतीये श्रीकपिलदेवभूतिसंवादे।

"मय्यनन्येन भावेन भक्तिं कुर्व्वन्ति ये दृढ़ाम्।
मत्कृते त्यक्तकर्म्माणस्त्यक्तस्वजनबान्धवाः॥"

एकादशे श्रीहरियोगेश्वरोत्तरे च।

"विलसति हृदयं न यस्य साक्षा-
द्धरिरवशाभिहितोऽप्यघौघनाशः।
प्रणयरसनया धृताङ्घ्रिपद्मः
स भवति भागवतप्रधान उक्तः॥"

तत्रैव मध्यममाह हरियोगेश्वरोक्तावेव।

"ईश्वरे तदधीनेषु बालिशेषु द्विषत्सु च।
प्रेममैत्रीकृपोपेक्षा यः करोति स मध्यमः॥"

कनिष्ठता तत्रैव।

"अर्चायामेव हरये पूजां यः श्रद्धयेहते।
न तद्भक्तेषु चान्येषु स भक्तः प्राकृतः स्मृतः॥"

श्रद्धया पूजनं प्रेमबोधकं भक्त इत्यपि।

प्रेमणो हि करणात्तत्तु स्वलं भक्तानपेक्षणात्॥

लक्षणानि च यान्यत्र भक्तैर्लेखानि तान्यपि।
वन्दनादीनि विद्यन्ते येषु भागवता हि ते॥

एतानि लक्षणानीत्थं गौणमुख्यादिभेदतः।
ऊह्यानि लक्षणान्येवं विवेक्यानि परैरपि॥

ईदृग्लक्षणवन्तः स्युर्दुर्लभा बहवो जनाः।
दिष्ट्या हि मयको यक्तं न वर्त्तन्ते इतस्ततः॥"

अतएवोक्तं मोक्षधर्म्मे नारदीये।

जायमानं हि पुरुषं यं पश्येन्मधुसूदनः।
सात्त्विकः स तु विज्ञेयो भवेन्मोक्षार्थनिश्चयः॥"

इति श्रीहरिभक्तिविलासे १० विलासः॥

भगवान्, [त्] (भागः "ऐश्वर्य्यस्य समग्रस्य वीर्य्यस्य यशसः श्रियः। ज्ञानवैराग्ययोश्चैव षण्णां भग इतीङ्गना॥" इत्युक्तलक्षणं षड़ैश्वर्य्यमस्यास्तीति। भग+नित्ययोगे मतुप् मस्य वः।) पुं वृद्धः। इत्यमरः। १। १। १३॥ श्रीकृष्णः। यथा,—

"भगवानपि ता रात्रीः शारदोत्फुल्लमल्लिकाः।
वीक्ष्य रन्तुं मनश्चक्रे योगमायामुपाश्रितः॥"

इति श्रीभागवते १० स्कन्धे २९ अध्यायः॥

पूज्ये च। इति मेदिनी॥ भगवत्स्वरूपं यथा,

"मनुरुवाच वेदार्थं स्मृत्वा यन्मुनिसत्तम!।
तद्वेत्तु श्रूयतामत्र संबन्धे गदतो मम॥
द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परञ्च यत्।
शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति॥
द्वे विद्ये वेदितव्ये वै इति चाथर्ब्वणी श्रुतिः।
परया त्वक्षरप्राप्तिर्ज्ञेदादिमयापरा॥
यत्तदव्यक्तमजरमचिन्त्यमजमव्ययम्।
अनिर्देश्यमरूपञ्च पाणिपादाद्यसंयुतम्॥
विभुं सर्व्वगतं नित्यं भूतयोनिमकारणम्।
व्याप्यव्याप्यं यतः सर्व्वं तं वै पश्यन्ति सूरयः॥
तद्ब्रह्म तत् परं धाम तद्ध्येयं मोक्षकाङ्क्षिणा।
श्रुतिवाक्योदितं सूक्ष्मं तद्विष्णोः परमं पदम्।
तदेव भगवद्वाच्यं स्वरूपं परमात्मनः॥
वाचको भगवच्छब्दस्तस्यापि स्थाधरात्मनः।
एवं निगदितार्थस्य स तत्त्वं तस्य तत्त्वतः॥
ज्ञायते येन तज्ज्ञाने परनन्यत्रयीमयम्॥
अशब्दगोचरस्यापि तस्येव ब्रह्मणो द्विज!।
पूजायां भगवच्छब्दः क्रियते ह्यौपचारिकः।
शुद्धे महाविभूत्याख्ये परे ब्रह्मणि वर्त्तते।
मैत्रेय! भगवच्छब्दः सर्व्वकारणकारणे॥
संभर्त्तेति तथा भर्त्ता भकारोऽर्थद्वयान्वितः।
तेनागमयिता स्रष्टा गकारार्थस्तथा शृणु!॥
ऐश्वर्य्यस्य समग्रस्य वीर्य्यस्य यशसः श्रियः।
ज्ञानवैराग्ययोश्चैव षण्णां भग इतीङ्गना॥
वसन्ति यत्र भूतानि भूतात्मन्यखिलात्मनि।
स च भूतेष्वशेषेषु वकारार्थस्ततोऽव्ययः॥
एवमेव महाबाहो! भगवानिति सत्तम!।
परमब्रह्मभूतस्य वासुदेवस्य नान्यगः॥
तत्र पूज्यपदार्थोक्तिपरिभाषासमन्वितः।
शब्दोऽयं नोपचारेण अन्यत्र ह्युपचारतः॥
उत्पत्तिं प्रलयञ्चैव भूतानामागतिं गतिम्।
वेत्ति विद्यामविद्याञ्च स वाच्यो भगवानिति॥
ज्ञानशक्तिबलैश्वर्य्यवीर्य्यतेजांस्यशेषतः।
भगवच्छब्दवाच्यानि विना हेयैर्गुणादिभिः॥"

इति विष्णुपुराणे ६ अंशे ५ अध्यायः॥

अपि च।

"परमात्मा च भगवान् विष्वक्सेनो जनार्द्दनः।
तद्भक्तिमान् भागवतो नाख्यपुरुषैर्हि जायते॥
भगवच्छासनालम्बी भगवच्छासनप्रियः।
भगवद्भक्तिमास्थाय वत्स! भागवतो भव॥
भगवान् भूतभव्येशो भूतादिप्रभवोऽव्ययः।
भावेन तं भजस्वेशं भवभङ्गकरं हरिम्॥
भजस्व भावेन विभुं भगवन्तं भवेश्वरम्।
ततो भागवतो भूत्वा भवबन्धात् प्रमोक्ष्यसि॥"

इत्यादौ वह्निपुराणे वैष्णवक्रियायोगे यमानुशासनो नामाध्यायः॥ अन्यच्च।

"महतां क्षुद्रजन्तूनां सर्व्वेषां जीविनां सदा।
स्रष्टा पाता च शास्ता च भगवान् करुणानिधिः॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे २५ अध्यायः॥

षड़ैश्वर्य्यान्वितः। स च परमेश्वरः। तन्नामविशेषस्य सेवनं यथा,—

"अथ श्रीभगवन्नाम सदा सेवेत सर्व्वतः।
तन्माहात्म्यञ्च विख्यातं सङ्क्षेपेणात्र लिख्यते॥
अथ श्रीभगवन्नामविशेषस्य च सेवनम्।
ऋषिभि. कृपयादिष्टं तत्तत्कामहतात्मनाम्॥"

अथकामविशेषेण श्रीभगवन्नामविशेषसेवामाहात्म्यम्। तत्र पापक्षयार्थं कौर्म्मे। यथा,—

"श्रीशब्दपूर्व्वं जयशब्दपूर्व्वं
जयद्वयादुत्तरतस्तथा हि।
चिः सप्तम्यन्तो नरसिंहनाम
मन्त्रं निहन्यादपि विघ्नसङ्घान्॥"

महाभयनिवारणार्थं तत्रैव ।
"श्रीपूर्व्वो नरसिंहो द्विर्व्वयाड्भारतस्तु सः ।
त्रिःसप्तकृत्वो जप्तस्तु महाभयनिवारणः ॥"
कालविशेषे तु मङ्गलार्थं विष्णुधर्म्मोत्तरे
श्रीमार्कण्डेयवज्रसंवादे ।
"पुरुषं वासुदेवञ्च तथा सङ्कर्षणं विभुम् ।
प्रद्युम्नमनिरुद्धञ्च क्रमादन्देषु कीर्त्तयेत् ॥"
अब्देषु संवत्सरादिषु पञ्चसु ॥
"बलभद्रं तथा कृष्णं कीर्त्तयेदयनद्वये ।
माधवं पुष्करीकाक्षं तथा वै भोगशायिनम् ॥
पद्मनाभं हृषीकेशं तथा देवं त्रिविक्रमम् ।
क्रमेण राजशार्दूल ! वसन्तादिषु कीर्त्तयेत् ॥
विष्णुञ्च मधुहन्तारं तथा देवं त्रिविक्रमम् ।
वामनं श्रीधरञ्चैव हृषीकेशं तथैव च ॥
दामोदरं पद्मनाभं केशवञ्च यदूत्तमम् ।
नारायणं माधवञ्च गोविन्दञ्च तथा क्रमात् ॥
चैत्रादिषु च मासेषु देवदेवमनुस्मरेत् ।
प्रद्युम्नमनिरुद्धञ्च पक्षयोः कृष्णशुक्लयोः ॥
सर्व्वः शर्व्वः शिवः स्थाणुर्भूतादिर्निधिरव्ययः ।
आदित्यादिषु वारेषु क्रमादेवमनुस्मरेत् ॥
विश्वं विष्णुर्वषट्कारो भूतभव्यभवत्प्रभुः ।
भूतभृद् भूतकृद् भावो भूतात्मा भूतभावनः ॥
पूतात्मा पुरुषोत्तमो विश्वकर्म्मा शुचिश्रवाः ।
सम्भवो भावनो भर्त्ता प्रभवः प्रभुरीश्वरः ॥
अप्रमेयो हृषीकेशः पद्मनाभोऽमरप्रभुः ।
विश्वकर्म्मा मनुस्त्वष्टा धाता कृष्णश्चैतान्यनुस्मरेत् ॥
देवदेवस्य नामानि कृत्तिकादिषु यादव ! ।
ब्रह्माणं श्रीपतिं विष्णुं कपिलं श्रीधरं प्रभुम् ॥
दामोदरं हृषीकेशं गोविन्दं मधुसूदनम् ।
भूधरं गदिनं देवं शङ्खिनं पद्मिनं तथा ॥
चक्रिणञ्च महाराज ! प्रथमादिषु संस्मरेत् ॥"
प्रथमादिषु प्रतिपदादिषु ।
"सर्व्वं वा सर्व्वदा नाम देवदेवस्य यादव ! ॥
नामानि सर्व्वाणि जनार्दनस्य
कालश्च सर्व्वः पुरुषप्रवीरः ।
तस्मात् सदा सर्व्वगतस्य नाम
गाह्यं यथेष्टं वरदस्य राजन् ! ॥"
विविधकामसिद्धये च पुनरन्योक्तौ ।
"कामः कामप्रदः कान्तः कामपालस्तथा हरः ।
आनन्दो माधवश्चैव कामसंसिद्धये जपेत् ॥
रामः परशुरामश्च नृसिंहो विष्णुरेव च ।
विक्रमश्चैवमादीनि जप्यान्यरिजिगीषुभिः ॥
विद्याभ्यस्यता नित्यं जप्यः पुरुषोत्तमः ।
दामोदरं बन्धगतो नित्यमेव जपेन्नरः ॥
केशवं पुष्करीकाक्षमनिशं हि तथा जपेत् ।
नेत्रबाधासु सर्व्वासु हृषीकेशं भजेत च ॥
अच्युतश्चान्तकाले च जपेदौषधकर्म्मणि ।
संग्रामाभिमुखो गच्छन् संस्मरेदपराजितम् ॥
चक्रिणं गदिनञ्चैव शार्ङ्गिणं खड्गिनं तथा ।
चैत्राद्यौ प्रथमे दिक्षु प्राच्यादिषु स्मरेत् ॥
अधिपत्याधिपत्ये च सर्व्वं सर्व्वेश्वरं तथा ।
संस्मरेत् पुरुषो भक्त्या यथाधारेण सर्व्वदा ॥

नारायणं सर्व्वकालं च्युतस्खलनादिषु ।
ग्रहनक्षत्रपीडासु देवबाधासु सर्व्वतः ॥
दस्युवैरिनिषेधेषु व्याघ्रसिंहादिसङ्कटे ।
अन्धकारे तमस्तीव्रे नरसिंहमनुस्मरेत् ॥
अग्निदाहे समुत्पन्ने संस्मरेज्ज्वलशायिनम् ।
गरुडध्वजानुस्मरणाद्विषवीर्य्यं व्यपोहति ॥
स्नाने देवार्च्चने होमे प्रणिपाते प्रदक्षिणे ।
कीर्त्तयेद्भगवन्नाम वासुदेवेति तत्परः ॥
स्थापने वित्तधान्यादेरपध्याने च दुष्टचे ।
कुर्व्वीत तत्मना भूत्वा अनन्ताच्युतकीर्त्तनम् ॥
नारायणं शार्ङ्गधरं श्रीधरं पुरुषोत्तमम् ।
वामनं खड्गिनञ्चैव दुःस्वप्ने सदा स्मरेत् ॥
महार्णवादौ पर्य्यङ्कशायिनञ्च नरः स्मरेत् ।
बलभद्रं सन्महार्घं सर्व्वकर्म्मसु संस्मरेत् ॥
जगत्पतिमपत्यार्थी स्तुवन् भक्त्या न सीदति ।
श्रीघ्रं सर्व्वाभ्युदयिके कर्म्मण्यासु प्रकीर्त्तयेत् ॥
अरिष्टेषु च घोरेषु विघ्नोक्तञ्च सदा जपेत् ।
मरुत्पपाताग्निजलबन्धनादिषु च क्रमात् ॥
स्वतन्त्रपरतन्त्रेषु वासुदेवं जपेद्बुधः ।
सर्व्वार्थशक्तियुक्तस्य देवदेवस्य चक्रिणः ॥
यथाभिरोचते नाम तत् सर्व्वार्थेषु कीर्त्तयेत् ।
सर्व्वार्थसिद्धिमाप्नोति नाम्नामेकार्थता यतः ॥
सर्व्वाण्येतानि नामानि परस्य ब्रह्मणो हरेः ॥"
एवं विष्णुधर्म्मोत्तरे च मार्कण्डेयवज्रसंवादे ॥
किञ्च ।
"कूर्म्मं वराहं मत्स्यं वा जलप्रतरणे स्मरेत् ।
भाजिष्णुमग्निजनने जपेन्नाम त्वखण्डितम् ॥
गरुडध्वजानुस्मरणादापदो तृप्यते नरः ।
ज्वरज्वष्टशिरोरोगविषवीर्य्यञ्च शाम्यति ॥
बलभद्रन्तु गृह्यार्थी कृष्यारम्भे हलायुधम् ।
उत्तारणं वाणिज्यार्थी राममभ्युदये नृप ! ॥
माङ्गल्यं मङ्गलं विष्णुं माङ्गल्येषु च कीर्त्तयेत् ।
उत्तिष्ठन् कीर्त्तयेद्विष्णुं प्रस्वपन् माधवं नरः ॥
भोजने चैव गोविन्दं सर्व्वत्र मधुसूदनम् ॥"
तत्रैवान्यत्र ।
"श्रीधरं चिन्तयेद्विष्णुं भोजने च जनार्दनम् ।
शयने पद्मनाभञ्च मैथुने च प्रजापतिम् ॥
याने चक्रिणं कृच्छ्रे स्थानभंशे त्रिविक्रमम् ।
नारायणं विषोत्सर्गे श्रीधरं प्रियसङ्गमे ॥
जलमध्ये वराहञ्च पावके जलशायिनम् ।
कानने नरसिंहञ्च पर्व्वते रघुनन्दनम् ॥
दुःस्वप्ने स्मर गोविन्दं विपत्तौ मधुसूदनम् ।
मायासु वामनं देवं सर्व्वकार्य्येषु माधवम् ॥"
किञ्च ।
"कीर्त्तयेद्वासुदेवञ्च सुकृच्छ्रेष्वपि यादव ! ।
कार्य्यारम्भे तथा राजन् ! यथेष्टं नाम कीर्त्तयेत् ॥
सर्व्वाणि नामानि हि तस्य राजन् !
सर्व्वार्थसिद्धौ तु भवन्ति पुंसः ।
तस्मादभीष्टं खलु कृष्णनाम
सर्व्वेषु कार्य्येषु जपेत भक्त्या ॥"
इति श्रीहरिभक्तिविलासे ११ विलासः ॥

भगवद्वशीकारित्वम् । यथा, महाभारते भगवद्वाक्यम् ।
"कृष्णमेनं प्रहृष्टं मे हृदयान्नापसर्पति ।
यद्गोविन्देति चुक्रोश कृष्णे ! मां दूरवासिनम् ॥"
आदिपुराणे श्रीकृष्णार्জ্জুनसंवादे ।
"गीत्वा तु मम नामानि नर्त्तयेन्मम सन्निधौ ।
इदं ब्रवीमि ते सत्यं क्रीतोऽहं तेन चार्জ্জुन ! ॥
गीत्वा च मम नामानि रुदन्ति मम सन्निधौ ।
तेषामहं परिक्रीतो नान्यक्रीतो जनार्দ্দनः ॥"
एवं श्रुत्वा च मम नामानीत्यादि ॥ विष्णुधर्म्मे प्रह्लादेन ।
"जितं तेन जितं तेन जितं तेनेति निश्चितम् ।
जिह्वाग्रे वर्त्तते यस्य हरिरित्यक्षरद्वयम् ॥"
इति तत्रैव ११ विलासः ।
भगवत्सान्निध्यलक्षणानि यथा । हयशीर्षे ।
"तस्मिन्नेव मुहूर्त्ते तु हर्षो वा भयमेव च ।
चक्षुर्भ्रमो विभ्रमो वा त्रासो वा जायते यदि ।
यामोहः परमोहो वा स्तनितं परमं तथा ।
अश्रुतानां श्रुतिर्वा स्यात् गात्राणां वाथ
वेपथुः ॥"
यामोहो मौढ्यविशेषः । परमोहो मूर्च्छा ।
"वैराग्यं नेत्रयोर्वा स्याद्दर्पः कन्दर्प एव वा ।
परमो विस्मयो वाथ हियो वा श्रूयते ध्वनिः ।
दिव्यवाद्यादिघोषो वा गन्धर्व्वनगरस्य वा ।
दर्शनं जायते काले तस्मिन् सुरगणार्चितम् ।
नरा नार्य्योऽथ दृश्यन्ते गायन्तोऽथ हर्षिताः ।
नन्दितूर्य्यरवो वापि श्रूयते छन्दसां ध्वनिः ।
दिव्यगन्धा रसा वापि एकस्यापि भवन्ति हि ।
लिङ्गैरेतैर्विजानीयात् तत्र सन्निहितं हरिम् ।
प्रभा चैव विशेषेण ज्वलतीव च दृश्यते ।
स्फुरन्तीव च दृश्यन्ते प्रतिमा च विशेषतः ।
स्फुरन्निव जनः कश्चित् लक्ष्यमाण इव क्वचित् ।
वीक्ष्यमाणो जनस्तत्र प्रहृष्ट इव लक्ष्यते ।
एतेषु लक्षणेष्वेषु तत्र सन्निहितो हरिः ।
विशेषादथवा पश्येच्चक्रचापोपमं क्वचित् ।
क्वचिं वज्रप्रभां पश्येत् पद्मरागप्रभां यथा ।
सौदामिनीप्रभां पश्येत् प्रतिमायां क्वचिद्धरिः ।
एतैर्लिङ्गैस्तु बोद्धव्यस्तत्र सन्निहितो हरिः ।
बधिरा इव केचित्तु मूका इव तथापरे ।
विभ्रान्ता इव केचिच्च जड़ा इव तथापरे ।
धावन्त इव केचित्तु पतन्त इव चापरे ।
वृत्यन्त इव चाप्यन्ये मत्ता इव तथा परे ।
चित्रस्था इव केचित्तु विवशा इव केचन ।
भवन्ति तत्र चोन्मत्ताः प्रमत्ता इव चापरे ।
लिङ्गैरेतैस्तु बोद्धव्यस्तत्र सन्निहितो हरिः ।"
इति श्रीहरिभक्तिविलासे १८ विलासः ।
(शिवः । यथा, महाभारते । १३ । १७।१२०।
"निवेदनः सुखाजातः सुगन्धारो महाधरः ।
गन्धपाली च भगवान् उत्थानः सर्व्व-
कर्म्मणाम् ।")
भगालं, क्ली, (भजति सुखदुःखादिकं कर्म्मफलमनेनेति भण्यते अनेनेति वा । भज + "सृजि-

क्षिभ्यां कालनिति।" उणा० ३।७६। बाहुलकाद् भजेरपीति उज्ज्वलदत्त:; इति कालन्। नङ्कादित्वात् कुत्वञ्च।) वृकरोटि:। यथा। भगालं नरमस्तकम्। इति कश्चित् जटाधर:॥ भगस्य महादेवस्य अलं भूषणमिति युंवत्पत्ति:॥

भगाली, [न्] पुं, (भगालं वृकपालं भूषणत्वेनास्त्यस्येति इनि:।) शिव:। इति त्रिकाण्डशेष:॥ (चण्डीकान्तो भगाली च। इति उज्ज्वलदत्तधृतो राजशेखरश्च।)

भगिनी, स्त्री; सहोदरा। तत्पर्य्याय:। स्वसा २। इत्यमर:।२।६।२६॥ भगं यत्र: पित्रादितो द्रव्यदाने विद्यतेऽस्या इति इनिप्रत्ययेन भगिनी। इति तट्टीकायां भरत:। (भगं योनिरस्या अस्तीति। भग+इनि: ङीप्।) स्त्रीमात्रम्। यथा,—

"परिणेता च वामाक्षी भगिनी प्रकृतिर्नरी॥"
इति शब्दचन्द्रिका॥

भगिनीपति:, पुं, (भगिन्या: पति:।) स्वभर्त्ता। तत्पर्य्याय:। आवुत्त: २ भाम: ३। यथा,—

"भगिनीपतिरावुत्तो भावो विज्ञानघावुक:॥"
इति नाममालावमर:।२।७।१२॥

"अहो भगिन्यहो भाम! मया वां बत पाप्मना।
पुरुषाद इवापत्यं सुहृदोऽहिंसिता: सुता:॥"
इति श्रीभागवते १० स्कन्धे ४ अध्याय:॥

भगीरथ:, पुं, (भं ज्योतिश्चक्रमण्डलं गीर्वाङ्मयं तच्च रथ इन्द्रियाणि रथ इवास्य।) दिलीपराजपुत्र:। कपिलशापेन भस्मीभूतानामध:पतितानां पितॄणामुद्धरणायानेन मर्त्यलोके गङ्गा आनीता। यथा, मात्स्ये १२ अध्याय:।

"असमञ्जसस्तनयो ह्यंशुमान्नाम विश्रुत:।
तस्य पुत्रो दिलीपस्तु दिलीपात्तु भगीरथ:॥
येन भागीरथी गङ्गा तप: कृत्वावतारिता।
भगीरथस्य तनयो नाभाग इति विश्रुत:॥"

भगो:, पुं, } हे भगवन्!। इति सुग्धबोधव्याकरणम्। संक्षिप्तसारश्च॥ (सम्बोधनवाचकावमौ।)

भगोल:, पुं, (भानां नक्षत्राणां गोल:। नक्षत्रसङ्घेन विरचित: गोलाकार: पदार्थ इत्यर्थ:।) अपञ्चरम्। नक्षत्रचक्रम्। यथा। इदानीं भगोलमाह।

"याम्योत्तरक्षितिजवत् सुदृढं विदध्या-
दाधारवृत्तयुगलं ध्रुवयष्टिबद्धम्।
षष्ट्यङ्गभत्र सममण्डलवृत्ततीयं
नाध्याश्रयञ्च विषुवद्वलयं तदेव॥"

यथा खगोले क्षितिजं याम्योत्तरञ्च तदाकारमपरमाधारवृत्तद्वयं ध्रुवयष्टिमयं कृत्वा तदुपरि अन्यत्तृतीयं सममण्डलाकारं घटीषष्ट्या चाङ्कितं कार्य्यं तन्नाड़ीवृत्तं विषुवद् वृत्तसंज्ञम्॥ * ॥

इदानीं क्रान्तिवृत्तमाह।

"क्रान्तिवृत्तं ग्रहाङ्कं विधेयं समन्यच्च भानुच्च भार्द्धे कुभा भागत:।
क्रान्तिपात: प्रतीपं तथा प्रस्फुटा
क्षेपपातश्च तत्स्थानकान्यङ्कयेत्॥

यथान्यत्तत्प्रमाणमेव वृत्तं कृत्वा तत्र मेषादीन् प्रकल्प्य द्वादशराशयोऽङ्का:॥"

तत्क्रान्तिवृत्तसंज्ञम्। तस्मिन् वृत्ते रविर्धमति तथा रवेर्भाद्धान्तरे भूभा च। तथा तत्र क्रान्तिपातो मेषादिर्विलोमं भ्रमति। तथा ग्रहाणां विक्षेपपाता: प्रस्फुटा विलोमं भ्रमन्ति। यत: क्रान्तिपातादीनि स्थानानि तत्राङ्कानि॥

इदानीं क्रान्तिवृत्तनिवेशमाह।

"क्रान्तिपाते च पाताङ्कषट्कान्तरे
नाड़िकावृत्तलग्नं विदध्यादिदम्।
पातत: प्राक् त्रिभे विह्नभागेऽवदग्
दक्षिणे तैव भागैर्विभागेऽपरे॥"

क्रान्तिपातचिह्नात् षड्भेऽन्तरेऽन्यचिह्नं कार्य्यम्। ते चिह्ने नाड़ीवृत्तेन संसक्ते कृत्वा पातचिह्नादयत: त्रिभेऽन्तरे नाड़ीवृत्ताङ्गानि चतुर्विंशत्या उत्तरतो यथा भवति। अपरभागे त्रिभेऽन्तरे दक्षिणतश्च तैर्भागैर्यथा भवति तथा वक्ष्यीयात्॥ * ॥ इदानीं विमण्डलमाह।

"नाड़िकामण्डले क्रान्तिवृत्तं यथा
क्रान्तिवृत्ते तथा क्षेपवृत्तं न्यसेत्।
क्षेपवृत्तन्तु राश्यङ्कितं तच्च च
क्षेपपातेषु चिह्नानि कृत्वोक्तवत्॥
क्रान्तिवृत्तस्य विक्षेपवृत्तस्य च
क्षेपपाते समड्भे च कृत्वा युतिम्।
क्षेपपातात्ततः पृष्ठतश्च त्रिभे
क्षेपभागै: स्फुटै: सौम्ययाम्ये न्यसेत्॥
शीघ्रकर्णेन भक्ताच्चिभज्या गुणा:
स्यु: परक्षेपभागा ग्रहाणां स्फुटा:।
क्षेपवृत्तानि यस्यां विदध्यात् पृथक्
स्वस्ववृत्ते भ्रमन्तीन्दुपूर्व्वा ग्रहा:॥"

अस्य श्लोकस्य समग्रस्य व्याख्यानम्। यथा क्रान्तिवृत्तं पृथक् कृतं एवं विमण्डलमपि राश्यङ्कं पृथक् पृथक् कृत्वा तत्र मेषादेर्यत्रं स्फुटक्षेपपातं दत्त्वाग्रे चिह्नं कार्य्यम्। अथ क्रान्तिवृत्तस्य विमण्डलस्य च क्षेपपातचिह्नयो: सम्पातं कृत्वा तस्मात् षड्भेऽन्तरे अन्यच्च सम्पातं कृत्वा क्षेपपाताग्रतश्चिभेऽन्तरे क्रान्तिवृत्ताद्दक्षत: स्फुटै: क्षेपभागै: पृष्ठतश्च त्रिभेऽन्तरे तैरेव भागैर्दक्षिणत: स्थिरं कृत्वा विमण्डलं निवेशनीयम्। अथ पठिता ये विक्षेपभागास्ते विज्या गुणा: शीघ्रकर्णेन भक्ता: स्फुटा ज्ञेया:॥ * ॥ अथानुपात:। यदि कर्णाग्रं एतावदन्तरं तर्हि विज्याग्रे कियदिति। यतो भगोले विज्यैव व्यासार्द्धम्। एवं चन्द्रादीनां षट् विमण्डलानि कार्य्याणि। स्वस्वविमण्डले ग्रहा भ्रमयन्ति॥ इदानीं क्रान्तिं विक्षेपञ्चाह।

"नाड़िका मण्डला तिर्यगत्रापम:
क्रान्तिवृत्तावधि: क्रान्तिवृत्ताच्छर:।
क्षेपवृत्तावधितिर्यगेव स्फुटो
नाड़िकावृत्तखेटान्तरालेऽपम:।
क्रान्तिवृत्ते स्फुटग्रहस्थानं तस्य
नाड़ीवृत्तादयत्तिर्यगन्तरं सा क्रान्ति:॥

अथ विमण्डले च यद्ग्रहस्थानं तस्य क्रान्तिवृत्तात् यत्तिर्यगन्तरं स विक्षेप:। अथ विमण्डलस्थग्रहस्य नाड़ीवृत्तादयत्तिर्यगन्तरं सा स्फुटा क्रान्ति:॥ * ॥ इदानीं क्रान्तिपातमाह। विषुवत्क्रान्तिवलययो: संपात: क्रान्तिपात: स्यात्। तद्गगणा: सौरोक्ता यस्मा अयुतत्रयं कल्पे॥ अयनचलनं यदुक्तं सङ्गालाद्यै: स एवायम्। तत्पक्षे तद्गगणा: कल्पे गोऽङ्कर्तुनन्दगोचन्द्रा: १९९६९९॥ तत् सङ्गातं पातं क्षिप्त्वा खेटोऽपम: साध्य:। क्रान्तिवृत्तात्तच्चरसुदयाश्चरदललग्नापमे तत: क्षेप्या:। क्रान्त्यन्तर्गतं: क्रान्तिपात:। पातो नामसम्पात: कयो: विषुवत्क्रान्तिवलययो:। नहि तयोर्मेषादावेव सम्पात:। किन्तु तस्यापि चलनमस्ति। ये अयनचलनभागा: प्रसिद्धास्त एव विलोमगस्य क्रान्तिपातस्य भागा:। मेषादे: पृष्ठतस्त्रावङ्गागान्तरे क्रान्तिवृत्ते विषुवद्वृत्तं लग्नमित्यर्थ:। नहि क्रान्तिपातोऽस्तीति वक्तुं न शक्यते। प्रत्यक्षेण तस्योपलब्धत्वात्। उपलब्धिप्रकारमग्रे वक्ष्यति। स कथं ब्रह्मगुप्तादिभिर्निपुणैरपि नोक्त इति चेत्। तदा स्वल्पत्वात्तेनोपलब्ध:। इदानीं बहुत्वात् साम्प्रतैरुपलब्ध:। अतएव तस्य गतिरस्तीत्यवगतम्। यद्येवमप्यनुपलब्धोऽपि सौरसिद्धान्तोक्तत्वादागमप्रामाण्येन भगणपरिधादिवत् कथं तैर्नोक्त:। सत्यम्। अत्र गणितस्कन्धे उपपत्तिमानेवागम: प्रमाणम्। तर्हि मन्दोच्चपातभगणा आगमप्रामाण्येनैव कथं तैरुक्ता इति न वक्तव्यम्। यतो ग्रहाणां मन्दफलाभावस्थानानि प्रत्यक्षेणैवोपलभ्यन्ते तान्येव मन्दोच्चस्थानानि यान्येव विक्षेपाभावस्थानि तान्येव पातस्थानानि किन्तु तेषां गतिरस्ति नास्ति वेति सन्दिग्धम्। तत्र मन्दोच्चपातानां गतिरस्ति। चन्द्रमन्दोच्चपातवदित्यनुमानेन सिद्धा। सा च कियती तदुच्यते। यैर्भगणैरुपलब्धिस्थानानि तानि गणितेनागच्छन्ति। तद्गगणसम्भवा वार्षिकी दैनन्दिनी वा गतिर्ज्ञेया। नैवम्। यदन्यैरपि भगणैस्तान्येवस्थानानि आगच्छन्ति। तदा कतरस्यागते: प्रामाण्यम्। सत्यम् तर्हि साम्प्रतोपलब्ध्यनुसारिणी काचिद्गतिरङ्गीकर्त्तव्या। यदा पुनर्महता कालेन महदन्तरं भविष्यति तदा महामतिमन्तो ब्रह्मगुप्तादीनां समानधर्म्मिण एव उत्पत्स्यन्ते। तदुपलब्ध्यनुसारिणीं गतिमररीकृत्य ग्राह्याणि आकरिष्यन्ति। अतएवायं गणितस्कन्धो महामतिभिर्दृष्ट: सन् अनाद्यनन्ते कालेऽपि खिलत्वं न याति। अतोऽस्य क्रान्तिपातस्य भगणा: कल्पेऽयुतत्रयं तावत् सूर्य्यसिद्धान्तोक्ता:। तथा सङ्गालाद्यैर्यदयनचलनसूक्तं स एव क्रान्तिपात:। ते गोऽङ्कर्तुनन्दगोचन्द्रा उत्पद्यन्ते। अथ च ते वा ये वा भगणा भवन्तु। यदा ये वा निपुणैरुपलभ्यन्ते तदा त एव क्रान्ति-

पात इत्यर्थः। तं विलोमं क्रान्तिपातं ग्रहे प्रक्षिप्य क्रान्तिः साध्या। इदानीं विक्षेपभातानाह। एवं क्रान्तिविमण्डलसम्पातात् क्षेपपातात् स्फुटात् चन्द्रादीनां यत्ताः क्षेपानयने तु ते योज्याः।

"मन्दस्फुटो ह्राक् प्रतिमण्डले खे
ग्रहो भ्रमत्यत्र च तस्य पातः।
पातेन युक्ता गणितागतेन
मन्दस्फुटात् खेचरतः ग्रहोऽसात्॥
पातेऽथवा शीघ्रफलं विलोमं
कृत्वा स्फुटान्तेन युताच्छरोक्तः।
चन्द्रस्य कक्षावलये हि पातः
स्फुटाद्विधोर्मध्यमपातयुक्तात्॥"

तथा क्रान्तिवृत्तविमण्डलयोः सम्पातः क्षेपपातः। तं ग्रहे प्रक्षिप्य क्षेपः साध्यः। एतदुक्तं भवति क्रान्तिपातः प्रसिद्धः। यथा तं ग्रहे प्रक्षिप्य क्रान्तिः साध्यत एव क्षेपपातं ग्रहे प्रक्षिप्य क्षेपः साध्य इत्यर्थः। अथ विक्षेपपातो मन्दस्फुटे तत् प्रक्षिप्यते तत्कारणमाह। मन्दस्फुटो ह्राक् प्रतिमण्डल इत्यादि। यतः शीघ्रप्रतिमण्डले मण्डलस्फुटगत्या ग्रहो भ्रमति तत्र च वृत्ते पातः। अतो गणितागतपातं मन्दस्फुटे प्रक्षिप्य क्षेपः साध्यते। शेषं स्पष्टार्थम्॥ * ॥ इदानीं शनुक्रयोर्विशेषमाह।

"ये चात्र पातभगणाः कथिता ग्रहाणां
ते शीघ्रकेन्द्रभगणैरधिका यतः स्युः।
स्वल्पाः सुखार्थमुदिताश्चलकेन्द्रयुक्तौ
पातौ तयोः पठितचक्रभवौ विधेयौ॥
चलाद्विशोध्याः किल केन्द्रविद्वै-
केन्द्रे सपाते युचरस्तु योज्यः।
अतश्चलात् पातयुताद् ग्रहस्य
सुधीभिरादेः ग्रहविक्षिप्तता।"
"स्फुटोनशीघ्रोच्चयुतौ स्फुटौ तयोः
पातौ भगोले स्फुट एव पातः॥"

ननु शनुक्रयोः शीघ्रोच्चपातयुतिं केन्द्रं कृत्वा यो विक्षेप आनीतः स शीघ्रोच्चस्थान एव भवितुमर्हति न ग्रहस्थाने। यतो ग्रहोऽन्यत्र वर्तते। अत इदमनुपपन्नमिव प्रतिभाति। तथा ब्रह्मसिद्धान्तभाष्ये। शनुक्रयोः शीघ्रोच्चस्थाने यावान् विक्षेपस्तावानेव यत्ततस्तस्यापि ग्रहस्य भवत्युपलब्धिरेव वासना। नान्यत् कारणं वक्तुं शक्यत इति चतुर्वेदे गाथनध्यवसायोऽत्र कृतः। अत्रोच्यते। यैरत्र शनुक्रयोः पातभगणाः पठितास्ते शीघ्रकेन्द्रभगणैर्यतः सकाशाद्भगणा भवन्ति। तथा च माधवीये सिद्धान्तचूड़ामणौ पठिताः। अतोऽप्यभगणभवः पातः स्वशीघ्रकेन्द्रेण युतः कार्यः। शीघ्रोच्चादृग्ये शोधिते शीघ्रकेन्द्रं तस्मिन् स पाते क्षेपकेन्द्रकरणार्थं ग्रहः क्षेप्यः। अतस्तुल्यशोधक्षेपकयोः पाते कृते शीघ्रोच्चपातयोग एवावशिष्यत इत्युपपन्नम्। किञ्च। मन्दस्फुटोनं शीघ्रोनं प्रतिमण्डले चलकेन्द्रं तत्पाते क्षेपुं युज्यते। एवं कृते सति क्षेपकेन्द्रं मन्दफलेनान्तरितं स्यात्। तदशुद्धतम्। इतरकेन्द्रस्यानुपपत्तेः। यतो मन्दफलं पाते यत्तं देयम्। यतोऽनुपातसिद्धं चलकेन्द्रं मध्योनं शीघ्रोच्चं भवति। यत्तु भगोले क्रान्तिवृत्तं तत् कक्षावृत्तं तच्च यद्विमण्डलं तत्र स्फुटग्रहः। ततस्फुटपातयोगो हि विक्षेपकेन्द्रं यतः स्फुटपातस्थौ सम्पातं कृत्वा ततस्तिर्भेदान्तरे स्फुटीकृते परमक्षेपांशैः प्राग्वदुत्तरे दक्षिणे च विन्यस्यम्। तथा न्यस्ते विमण्डले स्फुटग्रहस्थाने विक्षेपः स्फुटविक्षेपेण गणितागतेन तुल्यो दृश्यते नान्यथेत्यर्थः॥ * ॥ इदानीं ग्रहगोले विशेषमाह।

"ग्रहस्य गोले कथितापमण्डलं
प्रकल्प्य कक्षावलयं यथोदितम्।
निबध्य शीघ्रप्रतिवृत्तमस्मिन्
विमण्डलं तत् पठितैः ग्रशांशैः॥
मध्योच्च पातौ युगतां ग्रभगवोः
स्वशीघ्रकेन्द्रेण युतौ तु योज्यौ॥"

भगोल एव तावद्ग्रहगोलः कल्प्यः तच्च स्फुट एव पातः। अथ यदि तदन्तर्ग्रहगोलोऽन्यो निबध्यते तदा तत्र यथोक्तविधुवद्वृत्तं क्रान्तिवृत्तस्य वक्षा कक्षामण्डलं प्रकल्प्य तत्र क्षेपकोक्तविधिना शीघ्रप्रतिमण्डलं वक्षा तत्र प्रतिमण्डले गणितागतपातं मेषादेर्विलोमं गणयित्वा तत्र चिह्नं कार्यम्। अथ विद्या यासार्धमेवान्यद्वृत्तं राश्यङ्कं विमण्डलाख्यं कृत्वा तत्रापि मेषादेर्यत्तं पातात्रे चिह्नं कृत्वा प्रतिमण्डलविमण्डलयोः सम्पातचिह्ने प्रथमं सम्पातम्। ततो भाद्वान्तरं द्वितीयं कृत्वा पातादृगतः पृष्ठतश्च चिह्नेऽन्तरे परमविक्षेपांशैः पठितैः प्रतिवृत्तादुत्तरे दक्षिणे च विमण्डलं न्यस्यम्। तत्र मन्दस्फुटगत्या पारमार्थिको ग्रहो भ्रमति। यतो मेषादेरनुलोममन्दस्फुटो विमण्डले देयः। स तत्रस्थः प्रतिमण्डलात् यावतान्तरेण विक्षिप्तस्तावान् ततूप्रदेशे विक्षेपः। यतो वृत्तसंपातस्थे ग्रहे विक्षेपाभावः चिह्नेऽन्तरे परमो विक्षेपो मध्येऽनुपातेन। यतो वृत्तसम्पातग्रहयोरन्तरं ज्ञेयम्। तदन्तरं पातग्रहयोगे कृते भवति। पातस्य विलोमगत्वात्। संयोगः ग्रार्धं केन्द्रम्। यदि चिह्नयातुल्यया केन्द्रज्यया परमग्रस्तदाभीष्टयागया क इति फलं प्रतिमण्डलविमण्डलयोरित्यंगन्तरं स्यात्। विमण्डलस्थग्रहाद्भूमध्यगं सूत्रं तद्भूमध्यग्रहान्तरं च च शीघ्रकर्णः। यदि भूमध्यात् कर्णाग्रे एतावान् विक्षेपस्तदा चिह्नाग्रे कियानिति द्वितीयत्रैराशिकम्। आद्ये चिह्ना हरो द्वितीये गुणः। तयोर्गुणे हृते केन्द्रज्यायाः परमग्रस्तज्यायाः कर्णो हरः फलं कक्षावृत्तसूत्रयोरित्यंगन्तरं स्फुटग्रहः॥ * ॥ इदानीमहोरात्रवृत्तमाह। रेखितक्रान्तिवृत्तैकान्तरे सर्वतो नाड़िकाव्यहोरात्रवृत्ताक्षरं तच्च कृत्वा। षष्टीनाञ्च षष्यादृष्येवस्य विष्कम्भखण्डं द्युजीवा मता। नाड़ीवृत्ताद्वृत्तरतो दक्षिणतो वा सर्वत्रैक्रान्तितुल्यान्तरे यद्वृत्तं निबध्यते तदहोरात्रवृत्तं तेन वृत्तेन तस्मिन् दिने रविर्भमतीत्यर्थः। तस्य वृत्तस्य व्यासार्धं द्युज्या॥ * ॥ इदानीमन्यदाह। अथ कल्प्या मेषादौ क्रान्तिपाताद्भात् यथा मेषादीनां दुरावृत्तानि वक्ष्यीयात्। नाड़ीवृत्तोभयतस्त्रीणि त्रीणि क्रमोत्क्रमाणि। क्रान्तिमाताराग्रं त्रिंशत्त्रिंशद्भिर्भागैरन्यान् मेषादीन् प्रकल्प्य तदग्रेषूक्तवदहोरात्रवृत्तानि वक्ष्यीयात्। तानि च नाड़ीवृत्तोभयतस्त्रीणि त्रीणि भवन्ति तान्येव क्रमोत्क्रमतः सायनांशार्कस्य राश्यराधीनाच्च॥ * ॥ इदानीमस्योपसंहारः। एवं भगोलः कथितः खेचरगोलोऽयमेव विक्षेपः। इति सिद्धान्तशिरोमणौ॥

भग्नं, त्रि, (भनज्+क्तः। संघाद् विश्लिष्टत्वात् तथात्वम्।) पराजितम्। इति हेमचन्द्रः। त्रुटितम्। चूर्णितम्। भाङ्गा इति भाषा। यथा, भट्टिः।

"चिरकालोषितं जीर्णं कीटनिष्पुषितं धनुः।
किं चित्रं यदि रामेण भग्नं क्षत्रियकान्तिवत्।"

भग्नं, क्ली, (भज्यते व्यामर्द्यते विशिष्यते रोगी। भज्+क्तः) रोगविशेषः। अथ भग्नाधिकारः। तत्र भग्नस्य भेदमाह।

"भग्नं समासाद्विविधं द्रुताग्र!
काण्डे च सन्धावपि तत्र सन्धौ।
उत्पिष्टविश्लिष्टविवर्तितानि
तिर्यग्गतं क्षिप्तमधश्च षड्धा।"

भज्यमन्न भावार्थे क्तप्रत्ययेन भग्नं भङ्गः स चात्र विशेषोऽभिप्रेतः। तेन भग्नमत्रास्थिविश्लेषलक्षणम्। समासात् संक्षेपात्। द्रुताग्र! हे अग्निवेश्य!। यतश्चरकेऽग्निवेश्यस्य द्रुताग्निरिति नामान्तरमुक्तम्। काण्डे सन्धिपर्यन्ते दण्डे। अस्थिसन्धौ द्वयोरस्थ्नोः सन्धावपि। तत्र सन्धौ उत्पिष्टादिभेदैः षट्प्रकारं भग्नं भवति। स्वल्पवक्तव्यत्वेन सन्धिभग्नस्यादौ निरूपणम्। उत्पिष्टेत्यादि। अधः अधोभग्नम्॥ सन्धिभग्नस्य सामान्यं लिङ्गमाह।

"प्रसारणाक्षेपनवर्तनोत्था-
वक्ष्यमाणविद्वेषयमेतदुक्तम्।
सामान्यतः सन्धिगतस्य लिङ्गं
सृत्पिष्टसन्धेः त्रयधुः समन्तात्।
विशेषतो रात्रिभवा रुजश्च
विश्लिष्टके तौ च रुजा च नित्यम्।"

वर्तनं परिवर्तनम्॥ * ॥ उत्पिष्टस्य लिङ्गमाह। उत्पिष्टसन्धेः उत्पिष्टः द्वाभ्यामस्थ्नां भिन्नः सन्धिर्यस्य तस्य। समन्तात् उभयभागतः। विश्लिष्टमाह विश्लिष्ट इत्यादि। तौ उत्पिष्टौ। रुजा च नित्यं सदा रुजाधिका भग्नो द्रुत्पिष्टादेः॥ विवर्तितविक्षिप्तगतान्याह।

"विवर्तिते पार्श्वरुजस्य तीव्रा-
स्तिर्यग्गते नीव्रुजो भवन्ति।
सन्धेरनिष्टं विषमस्य सक्थ्नो:
क्षिप्ते तथो रुक् विघटश्च सन्धे:॥"

विवर्तिते सन्धावमुक्ते। अस्थिद्वयोपरिवर्तिते पार्श्वरुज:। सन्धिस्थितास्थिखण्डद्वयपार्श्वयो रुज:। तिर्यग्गते सन्धिगते। एकस्मिन्नस्थि सन्धिस्थानं त्यक्त्वा तिर्यग्गते क्षिप्ते सक्थ्नो: ऊरुसन्ध्यो:। एकस्मिन्नस्थि परस्यास्थ्नि उपरिगते। सक्थ्नो: अतिन्यूनं तच्च विषमं कदाचिदधिकं कदाचिन्न्यूनम्। अध:क्षिप्ते सन्धिगते एकस्मिन्नस्थि अधोगते। रुक् सन्धेर्विघट: विघटनञ्च॥ ६॥ काष्ठभग्नमाह। भग्नञ्च काष्ठे बहुधा प्रयाति विशेषतो नामभिरेव तुल्यम्। भग्नं काष्ठे काष्ठविषये बहुधा बहुभि: प्रकारै: प्रयाति। अत्र बहुविधत्वं द्वादशविधत्वं बोद्धव्यम्। बहुविधस्य काष्ठभग्नस्य पृथक् लक्षणं नोक्तं किन्तु काष्ठनामभिरेव तुल्यत्वम्। कर्कटकादिनामानुरूपमेव लक्षणं किन्तु नामभिरेव बोद्धव्यम्॥ ७॥ तान् प्रकारानाह।

"काष्ठं स्यात: कर्कटकाश्वकर्णौ
विचूर्णितं पिच्छितमस्थि क्षुण्णितम्।
काष्ठेषु भग्नं क्षतिपातितञ्च
मध्यागतं विस्फुटितञ्च वक्रम्॥"

छिन्नं द्विधा द्वादशधा च काष्ठे। अत: सन्धिभग्नानन्तरं काष्ठे काष्ठभग्नं तदाह। कर्कटक: अस्थिविशेषपूर्वको मध्ये प्रोन्नत: पार्श्वयोरवनत: कर्कटतुल्यरूपत्वात् कर्कट:। अश्वकर्ण: अश्वकर्णवदुपलास्थिनिर्गमादश्वकर्ण:। विचूर्णितं चूर्णितमस्थि तच्च शब्दसंज्ञाभ्यां बोद्धव्यम्। पिच्छितमस्थि नियन्त्रितं बहुशोधम्। क्षुण्णितं विशिष्टं सम्यक्कृतम्। काष्ठेषु भग्नं काष्ठभग्नम्। यद्यपि कर्कटकादि सर्वमेव काष्ठभग्नं तथापि इदं काष्ठभग्नसंज्ञाविशिष्टं। अत्र भग्नं भङ्ग: त्रुटि: तेन सर्वथा त्रुटितं पृथग्भूतं तच्च स्यात् यत्र काष्ठं तनुकाष्ठभग्नम्। क्षतिपातितं अन्येषेण छित्त्वा पातितमस्थि। मध्यागतं अस्थ्नोरुभयोरस्थिमध्ये प्रविष्टं मध्यानं गतम्। विस्फुटितं स्फोटविदीर्णं वक्रं स्थानं त्यक्त्वा कुत्रीभूतम्। छिन्नं द्विधा एकं विदीर्णं तत् गतं अपरं विदीर्णं द्विधाभूतम्। द्वादशधा च काष्ठे। काष्ठे च भग्नं द्वादशधेत्यत्र:। तत्रोक्तमेव कर्कटकादि॥ ७॥ काष्ठभग्नस्य सामान्यं लक्षणमाह।

"सक्थ्नोरुभा स्फोटरुजातिरुग्र:
संवीक्ष्यमाणे भवतीह भग्न:।
तत्सन्धिभग्नं सदृशस्फुटत्वं
सर्वास्वसन्धास्वपि भग्नलाभ:॥"
भग्नञ्च काष्ठे तदुभग्नमेतत्॥"

सक्थ्नोरुभयोरित्यत्र काष्ठभग्नस्य विशेषणं सक्थ्नो: सन्धौ स्फुटत्वं भूयं भूयेव यथा। तथा सामान्या पीड़ा। सर्वास्वसन्धास्वपि शयनासनादिषु॥ कश्यपमाह।

"अस्थ्नाग्निनोरुनालवती पन्नोर्यातात्मकस्य च।
उपद्रवैर्या दुष्टस्य भग्नं कृच्छ्रेण सिध्यति॥"

अनात्मवतो रोगप्रतीकारे यत्नरहितस्य। वातात्मकस्य च वातप्रकृते:। उपद्रवै: ज्वराध्मानमोहश्वासपुरीषसङ्गादिभि:॥ ८॥ असाध्यमाह।

"भिन्नं कपालं कथ्यासु सन्धिमुक्तं तथा
श्रुतम्।
लघनं प्रतिषिद्धञ्च वर्जयेत्तच्चिकित्सक:॥"

कपालं शातुनितमांसगण्डतालुशङ्खवङ्क्षणशिरो ऽस्थीनि कपालानि तथा श्रुतं तथा क्षिप्तम्। प्रतिषिद्धं उक्तिरूपम्॥ पुनरसाध्यमाह।

"असंक्षिप्तकपालञ्च ललाटे चूर्णितञ्च यत्।
भग्नं गुदे स्तने एष्टे ग्रीवे मर्म्मणि वर्जयेत्॥"

असंक्षिप्तकपालमिति भग्नविशेषणम्। स्तने स्तनयोरन्तरे उरसि। मर्म्मणि चूड़स्थाने॥ ९॥ अपरमप्यसाध्यमाह।

"सम्यक्संहितमप्यस्थि दुर्न्यासादुष्टबन्धनात्।
संक्षोभादपि यत्कृच्छ्रक्रियां तच्च वर्जयेत्॥"

सम्यक्संहितमपि सम्यग्योजितमपि अस्थि दुर्न्यासात् दुःस्थापनात् संक्षुभमपि दुष्टबन्धनात् सुबद्धमपि संक्षोभात् अभिघातादिना क्षुभनात् यत्कृच्छ्रक्रियां गच्छेत् विघटितं भवति तदसाध्यं वर्जयेत्॥ अस्थिविशेषेण भग्नविशेषमाह।

"तरुण्यास्थीनि नम्यन्ते भिद्यन्ते नलकानि तु।
कपालानि विभज्यन्ते स्फुटन्ति रुचकानि च॥
तरुण्यास्थीनि प्रायेणाधिगुदेषु कोमलास्थीनि नम्यन्ते वक्रीभवन्ति। तेनात्र वक्रतालक्षणं भग्नम्। नलकानि नलादीनि नाड़ीवत् सरन्ध्राण्यस्थिपर्व्वाणि भिद्यन्ते अस्थ्यन्तराङ्गप्रवेशादिदीर्य्यन्ते। कपालानि जानुनितमांसगण्डतालुशङ्खशिरोऽस्थीनि विभज्यन्ते स्फुटन्ति रुचकानि दन्ता: स्फुटन्ति त्रुटन्ति। अस्थीनि तरुणानलककपालरुचकवलयभेदात् षड्विधानि। तत्र रुचकानि चेति। चकाराद्वलयान्यपि त्रुटन्तीति बोद्धव्यम्।

"पार्श्वयो: पार्श्वयुगे एष्टे वक्षोजठरपायुषु।
पादयोरपि चास्थीनि वलयानि बभाषिरे॥"

अथ भग्नस्य चिकित्सा।

"भग्ने क्षेपाय मञ्जिष्ठामधुकाम्बुपेषितम्।
घृतयौतैस्तिलैर्लिप्तं श्लाक्ष्णिकं श्लेपणम्॥"

क्षेपात् पिष्टिकलवणैरलीका फलरसाभ्यां वा। मद्योभिघातजनिता रागरुजा क्षयमुपयान्ति।

"मञ्जिष्ठाम्बुसमंशं लाक्षागोधूममस्तुनम्।
सक्षिभल्लैरक्षिसमं पिबेत् क्षीरेण वा पुन:॥"

एतेन पिबेत् क्षीरेण वेत्यर्थ:। अक्षिसंहार: अक्षसंहार इति लोके।

"रसोनामधुसाक्षाक्षिलाक्षकं समभाग:।
छिन्नभिन्नक्षुताम्राक्ष रक्तमक्षिराड्भवेत्॥"

"लाक्षाक्षिसंक्षुत् कटभाक्षगन्धा
पूर्णोदना गालवका पुरश्च।
संभक्षमुक्ताक्षिरुजो निहन्या-
दृक्षाणि दुर्ग्रात् कुलिशोपमानि॥"

अक्षिसंक्षुत् अक्षसंहार। लाक्षादिगुग्गुलु:॥

"मांसं मांसरस: क्षीरं सर्पिर्मूल: कलायक:।
इक्षुरसश्चानुपानञ्च देयं भग्नाय जानता॥
लवणं कटुकं क्षारं मद्यं मैथुनमातपम्।
रूक्षमम्लं श्रमञ्चापि भग्न: सेवेत न क्वचित्॥"

इति भावप्रकाशे भग्नाधिकार:॥

(अथास्य निदानं यथा। पतनपीड़नप्रहारादिभिरन्यतमाद्दर्शनप्रभृतिभिरभिघातविशेषैरन्यैर्वाधिष्ठस्यो मनुष्यस्तिष्ठति तस्य भङ्गजातमनुसार्य्यसाध्यं विविधमेवौषधमुच्यते सन्धिमुक्तं काष्ठभग्नञ्च। इति सुश्रुते निदानस्थाने पञ्चदशेऽध्याये॥

अथ भग्नचिकित्सा।

"भग्नाक्षिणञ्च नरं ज्ञात्वा तस्य वक्ष्यामि भेषजम्।
अस्थिन्यथे कूर्परे च जानौ भग्ने कटौ तथा॥
एतेषु विभग्ने च साध्यान्येतानि सत्तम!।
ग्रीवादेशे जत्रुवक्षो रोहिण्यां कूर्परादय:॥
स्कन्धकूर्परमध्ये च तथा च त्रिकसक्थत:।
उरसि श्रोणितटे चैव विभग्नं तदसाध्यकम्॥
विभग्नञ्च नरं ज्ञात्वा वेदनाक्षेपलक्षणैः।
स्वयमेवानतीर्नैरुपायैश्चैनं प्रयोजयेत्॥
उत्तानमथवा शेषेष्वेष वक्षसि वा पुनः।
शयानमुपकर्त्तव्यो वस्त्रकैः कार्पासिकैस्तु॥
पिष्ट्वा पिष्टं प्रलेपञ्च तेन सौख्यं प्रजायते।
स्वेदयेत्तानि योगेन आवार्य्य कारयेत् पुनः॥
एवं क्रिया समाप्तौ ततो बन्धं विमोचयेत्।
एकाहान्तरिते नापि पूर्ववत्तत् प्रबन्धयेत्॥
यावद्बन्धिर्न याति तावन्न त्यागयेन्नरम्॥"

इति हारीते चिकित्सितस्थाने ५६ अ:॥

अथ बन्धविधि:।

"घृतानुभेदनं बन्धप्रदेशे वन्धनक्रिया।
श्लाक्ष्णिप्रियङ्गुगोधूमा यूषो सुश्लक्ष्णतीक्ष्णयो:॥
नवनीतं घृतं क्षीरं तैलं माक्षरसो मधु।
पटोलं लवणं स्निग्धं पक्वरो वालमूलकम्॥
द्राक्षा धात्री बदरजी द्राक्षा यद्यपि दुर्लभम्।
तत्सर्व्वं भिषजा नित्यं देयं भग्नाय जानता॥"

अथाहारविधि:।

"लवणं कटुकं क्षारमम्लं मैथुनमातपम्।
व्यायामञ्च न सेवेत भग्नो रूक्षान्नमेव च॥"

इत्यायुर्व्वेदसंग्रहाख्यस्य भग्नाधिकार:॥)

भग्नपादर्क्ष, क्ली, (भग्नपदं भग्नम्।) पुष्करास्थ्यनक्षत्रचक्रम्। यथा,—

"पुनर्वसूत्तराषाढ़ा श्रविष्ठा च रसाश्विनौ।
पूर्व्वभाद्रं विशाखा च भग्नर्क्षे शुभदा: स्मृता:॥
भग्नभादर्क्षसंयोगात् द्वितीया दशमी यदि।
नवमी चार्कसंस्थाने भवते भारवो ध्रुवम्॥"

इति ज्योतिस्तत्त्वम्॥

भग्नपृष्ठः, पुं, (भग्नं पृष्ठमस्मात् ।) सम्मुखः । इति त्रिकाण्डशेषः ॥ सुटितमेरुदण्डः । यथा,—
"भग्नपृष्ठकटिग्रीवं लम्बहस्तं लघोदरम् ।
कष्टेन लिखितं पुत्रं यत्नेन परिपालयेत् ॥"
इति प्राचीनवाक्यम् ॥
(भग्नं पृष्ठं यस्य । सुटितमेरुदण्डे, त्रि ॥)

भग्नसन्धिः, पुं, (भग्नः सन्धिरत्रासाद् वा ।) शरीरस्य सन्धिस्थानभङ्गरोगविशेषः । तस्यौषधं यथा,—
"अभया त्रिफला योषः सर्व्वरेभिः समीकृतैः ।
तुल्यो गुग्गुलुना योज्या भग्नसन्धिप्रसारकः ॥"
इति गारुडे १७५ अध्यायः ॥

भग्नसन्धिकं, क्ली, (भग्नो विश्लिष्टः दग्धः सन्धिः संघातोऽत्र ।) घोलम् । इति शब्दचन्द्रिका ॥

भग्नात्मा, पुं, (भग्नः क्रमेण हीन आत्मा देहो यस्य । क्षणप्रतिपदादिक्रमेणैकैककलाक्षयेण भग्नदेहत्वादस्य तथात्वम् ।) चन्द्रः । इति शब्दचन्द्रिका ॥

भग्नाग्रः, त्रि, (भग्ना अग्रा यस्य । छिन्नाग्रः । दीर्घैरग्राभङ्गयुक्तः । यथा,—
"अतिघिर्यस्य भग्नाग्रो गृहात् प्रतिनिवर्त्तते ।
न तस्मै दुष्कृतं दत्त्वा पुण्यमादाय गच्छति ॥"
इत्याह्निकतत्त्वम् ॥

भङ्गी, स्त्री, (भङ्गिनी । पृषोदरादित्वात् साधुः ।) भङ्गिनी । इति हिरूपकोषः ॥

भङ्गारी, स्त्री, (भङ्गित्यव्यक्तशब्दं करोतीति । कृ + अण् । गौरादित्वात् ङीष् ।) दंशः । इति त्रिकाण्डशेषः ॥

भङ्क्ता. [क्तृ] त्रि, भङ्गकर्त्ता । भञ्जधातोः कर्त्तरि तृन्प्रत्ययेन निष्पन्नः ॥ (यथा, मनौ । ८।२८८।
"प्राकारस्य च भेत्तारं परिखानाञ्च पूरकम् ।
द्वाराणाञ्चैव भङ्क्तारं क्षिप्रमेव प्रवासयेत् ॥"

भङ्गः, पुं, (भज्यते इति । भञ्ज + कर्म्मणि घञ् ।) तरङ्गः । इत्यमरः । २ । १० । ५ ॥ पराजयः । (भञ्ज् + भावे घञ् ।) भेदः । रोगविशेषः । इति मेदिनी । गे, १६ ॥ (रोगविशेषार्थे यथा,—
"पातघातादिभिर्हेधा भङ्गोऽस्यां सन्धयस्त्वचः ।
प्रसार्य्याकुञ्चनयोरशक्तिः सन्धिसक्तता ॥
इतरस्मिन् भृशं शोफः सर्व्वावस्थास्वतिव्यथा ।
अशक्तत्वेऽतिरुग्णेऽपि पीड्यमाने सशब्दता ॥
समासादिति भङ्गस्य लक्षणं बहुधा तु तत् ।
भिद्यते भङ्गभेदेन तस्य सर्व्वस्य साधनम् ॥
यथास्वादुपयोगाय तथा तदुपदेक्ष्यते ।
प्राप्याणुहारि यत्सन्धि सर्व्वं शब्दं करोति यत् ।
यच्चास्थिशेषः प्रविशेन्मध्यमस्थो विदारितः ।
भग्नं यत्राभिघातेन किञ्चिदेवावशेषितम् ॥
उन्नम्यमानं नतवत् यच्च मज्जति मज्जति ।
तद्बाह्यं क्षणाग्रक्तवातलाक्षाधिनामपि ॥
भिन्नं कपालं यत्कृत्वा सन्धिसक्तं श्रुतञ्च यत् ।
साधनं प्रतिषिद्धञ्च भग्नं यत्तदिवर्ज्जयेत् ॥
अक्षोभ्यरूपमास्यञ्च ललाटं पूर्णचन्द्रवत् ।
यत्र भग्नं भवेच्छस्त्रैः पृष्ठसन्धावलक्षणे ।
सन्यग्यमितमप्यस्थि दुर्न्यासाद्दुर्निबन्धनात् ॥
संशोभादपि यन्नच्छेद्विक्रियां तद्विवर्ज्जयेत् ।
आदितो यच्च दुर्न्यासमस्थिसन्धिरथापि वा ॥
तरुणास्थीनि भुज्यन्ते भज्यन्ते नलकानि तु ॥
कपालानि विभिद्यन्ते स्फुटन्त्यन्यानि भूयसा ।
अधावनतसुन्नम्यसुन्नतस्थावपीड़येत् ॥
आञ्छेदतिक्षिप्तमधो गतस्योपरि वर्त्तयेत् ।
आञ्चनोत्पीड़नोन्नामचर्म्मसंक्षपनैर्नरैः ॥
सन्धीन् शरीरगान् सर्व्वान् चलानप्यचलानपि ।
इत्येतैः स्थापनोपायैः सम्यक् संस्थाप्य निश्चलम् ॥
पट्टैः प्रभूतसर्पिर्भिर्वेष्टयित्वा सुखेरितः ।
कदम्बोदुम्बराश्वत्थसर्ज्जार्জ্জुनपलाशजैः ॥
वंशोद्भवैर्वा पृथुभिस्तनुभिः सुनिवेशितैः ।
सुश्लक्ष्णैः सुप्रतिस्तम्भैर्वल्कलैरपि वा ॥
कुशाश्मये समं बन्धं पट्टस्योपरि योजयेत् ।
शिथिलेन हि बन्धेन सन्धेः स्थैर्य्यं न जायते ।
गाढ़ेनातिरुजादाहशोफश्यायुसम्भवः ।
त्राहात्राहतौ धर्म्मे सप्ताहाच्चोच्यते हिमे ॥
साधारणे तु पञ्चाहाद्बन्धदोषवशेन वा ।
न्यग्रोधादिकषायेण ततः शीतेन सेचयेत् ॥
तं पञ्चमूलपक्केन पयसा तु सवेदनम् ।
सुखोष्णं वावचार्य्य स्नाचक्रतैलं विजानता ॥
विभज्य देशं कालञ्च वातघ्नौषधसंयुतम् ।
प्रतप्तं सेकलेपाभ्यां विदध्याद्भग्नशीतलान् ॥
गुडिचीरं स सर्पिष्कं मधुरौषधसाधितम् ।
प्रातः प्रातः पिबेद्बल्यं शीतलं लाक्षया युतम् ॥
सन्नस्य तु भग्नस्य व्रणे मधुघृतोत्तरैः ।
कषायैः प्रतिसार्य्योऽथ शेषो भङ्गोदितः क्रमः ॥
लम्बानि व्रणमांसानि प्रलिप्य मधुसर्पिषा ।
सन्दधीत व्रणान् वैद्यो बन्धनेनोपपादयेत् ॥
तान् समान् सुस्थितान्ज्ञात्वा फलिनीरोध्र-
कट्फलैः ।
समङ्गाधातकीयुक्तैश्चूर्णितैरवचूर्णयेत् ॥
धातकीरोध्रचूर्णैर्वा रोहन्त्याशु तथा व्रणाः ।
इति भङ्ग उपक्रान्तः स्थिरधातोर्ऋतौ हिमे ॥
मांसलस्याल्पदोषस्य सुसाध्यो दारुणोऽन्यथा ।
पूर्व्वमध्यान्तवयसामेकद्वित्रिगुणैः क्रमात् ॥
मासैः स्थैर्य्यं भवेत् सन्धेर्यथोक्तं भजतो विधिम् ।
कटीजङ्घोरुभग्नानां कपाटशयनं हितम् ॥
यन्त्रणार्थं तथाकीलाः पञ्च कार्य्या निबन्धनाः ।
जङ्घोर्व्वोः पार्श्वयोर्द्वौ द्वौ तलस्यैकश्च कीलकः ॥
श्रोण्यां वा पृष्ठवंशे वा वक्षस्याचक्रयोस्तथा ।
विमोक्षे भग्नसन्धीनां विधिमेवं समाचरेत् ॥
सन्धींश्चिरविमुक्तांश्च स्निग्धस्विन्नान् मृदूकृतान् ।
उक्तेनैवविधानेन वृत्त्या च यथास्वं स्थानमाचरेत् ॥
अवसन्नभग्ने रूढ़े तु विभग्नोक्तेन साधिते ।
आमोक्ष्य भङ्गं यमयेत्ततो भग्नवदाचरेत् ॥
भग्नं नेति यथा पाकं प्रयतेत तथा भिषक् ।
पक्वमांसशिरास्नायुसन्धिः शेषं न गच्छति ॥
वातव्याधिविनिर्हीनान् शेषान् भग्नस्य
योजयेत् ॥"
इति वाभटे उत्तरस्थाने । २० अध्यायः ।)

कौटिल्यम् । भयम् । विच्छित्तिः । इति हेमचन्द्रः ॥ (विच्छित्त्यर्थे व्यवहारो यथा,—
"षड्धातुविभागो वियोगः सञ्जीवायत्तः सप्राणनिरोधः स भङ्गः खलीकस्वभावः । इति चरके शारीरस्थाने षष्ठेऽध्याये ॥)
रोगमात्रम् । इति राजनिर्घण्टः ॥ गमनम् । जलनिर्गमः । इत्यजयपालः ॥ (नागभेदः । यथा, महाभारते । १ । ५७ । ६ ।
"उच्छिखः शरभो भङ्गो विल्वतेजा विरोहणः ॥")

भङ्गवासा, स्त्री, (भङ्गेन वासः सौरभमस्याः ।) हरिद्रा । इति शब्दरत्नावली ॥

भङ्गसार्थः, त्रि, (भङ्गं वक्रभावं व्यनक्त्यर्थवत्तमित्यर्थः स्यति व्यवस्यति यत् या क्रिया इति षोऽन्त भङ्गसमर्थयतीति वार्थ + अच् । कौटिल्यव्यवसायक्रियार्थित्वादस्य तथात्वम् ।) कुटिल । इति हारावली ॥

भङ्गा, स्त्री, (भज्यते इति । भञ्ज् + "इगुपध" । ३ । १ । १२१ । इति वाहुलकात् कः टाप् । वृक्षविशेषः । तत्पर्य्यायः । मातुलानी २ । इत्यमरः । २ । ६ । २० ॥ (अस्याः पर्य्याया गुणाश्च यथा
"भङ्गा गजा मातुलानी मादिनी विजया तथा ।
भङ्गा कफहरी तिक्ता ग्राहिणी पाचनी लघुः ।
तीक्ष्णोष्णा पित्तला मोहमन्दवाग्वह्निवर्द्धिनी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
हे भङ्गायां भङ्गा काश्मीरेषु खनामख्याता ।
इति भूम्न्यादयः । इति भरतः ॥ एतस्याः फलं कलायपरिमाणमिति सर्व्वस्वम् । इति सारसुन्दरी ॥ शृङ्गाख्यशस्यम् । यथा,—
भङ्गा शस्ये शृङ्गाढ्ये । इति सुकुटधृतसंज्ञाः ।
त्रिभण्डी । तेउड़ी इति भाषा । यथा,—
"त्रिभण्डी रेचनी भङ्गा कलिङ्गा परिपाकिनी ॥"
इति शब्दचन्द्रिका ॥
औषधविशेषः । भाङ इति सिद्धि इति च भाषा । यथा,—
"त्रैलोक्यविजया भङ्गा विजयेन्द्राह्वया तथा ॥"
इति शब्दचन्द्रिका ॥
अस्या गुणाः विजयाशब्दे द्रष्टव्याः ॥

भङ्गारः, पुं, (भङ्गेन व्यनक्तीति । व्यञ्ज् + अण् ।) मत्स्यविशेषः । भाङ्गन इति भाषा । तत्पर्य्यायः । दीर्घजङ्घलः २ । इति शब्दमाला ॥

भङ्गारी, स्त्री, (भङ्गारी पृषोदरात् साधुः ।) दंशः । इति त्रिकाण्डशेषः ॥

भङ्गिः, स्त्री, (भज्यतेऽसौ । भञ्ज् + इन् । ङ्गादित्वात् कुत्वम् ।) विच्छेदः । (यथा, रघौ । १३ । ८ ।
"यानादवातरदूरमधीतवेदः
मार्गेण भङ्गिरचितस्फटिकेन रामः ॥")
कौटिल्यभेदः । इत्यमरभरतौ ॥ विन्यासः । इति कलिङ्गः ॥ (भङ्गं करोतीति । भञ्ज् + क्विप् । ङ्गादेशः ।) कणोलः । इत्यत्नदत्तः ॥ भङ्गः । इत्यमरः । व्याघ्रः । इलनिभः । इति रभसः ॥

भङ्गिमा, [न्] पुं, (भङ्ग + वाहुलकात् मार्गे इमनिच् ।) भङ्गिः । यथा,—

स्यस्येति । अण् ।) तुलातभट्टमतं न्यायग्राह्यम् उदयनाचार्यमतं न्यायग्राह्यम् एतदुभयग्राह्यवेत्ता । एतदुभयमतं जानाति यः इत्यर्थे छ्वेकादिति कारकात् कर्त्तरि ञ्णिता ण्यप्रत्ययेन निष्पन्नः ॥

भट्टारः, त्रि, (भटतीति । भट्+क्विप् । भट् चासौ तारश्चेति कर्म्मधारयः । पृषोदरादित्वात् साधुः । यद्वा भर्त्तृ स्वामित्वं हरतीति । अण् ।) पूज्यः । इति त्रिकाण्डशेषः ॥ (यथा, राजतरङ्गिण्याम् । ७ । ८६७ ।
"नोनसिङ्गारभट्टारप्रभृत्तकलसादयः ।
वद्धाय हर्षदेवेन कारागारं प्रवेशिताः ॥")

भट्टारकः, पुं, (भट्टार । संज्ञायां कन् ।) नाव्योक्तौ राजा । इत्यमरः । १ । ७ । १३ ॥ देवः । तपोधनः । इति मेदिनी । के, २५० ॥ पूज्ये, त्रि । इति जटाधरः ॥ (यथा, राजतरङ्गिण्याम् । ६ । २४० ।
"प्रविष्टेषु ततः कोषात् पुरं शुभधरादिषु ।
भट्टारकामठेदिद्दा भूयः पुत्तं यसर्ज्जयत् ॥")

भट्टारकवारः, पुं, (भट्टारः संज्ञायां कन् । भट्टारकः सूर्य्यः तस्य वारः ।) रविवारः । यथा,—
"वत्से ! त्वायुनिर्म्मितपाशात्तदद्य भट्टारकवारे कथमेतान् दन्तैः खण्डयामि ॥" इति हितोपदेशे १ परिच्छेदे नगं प्रति जम्बूकवाक्यम् ॥

भट्टिः, पुं, स्वनामख्यातरामकथात्मकमहाकाव्यम् । तत्तु वलभीवास्तव्यश्रीस्वामिसुतभट्टमहात्राह्मणमहावैयाकरणेन कृतम् । इति जयमङ्गलकृता तट्टीका ॥ एतत् काव्यं भर्त्तृहरिणा कृतमिति भरतमल्लिकेन लिखितम् ॥

भट्टिनी, स्त्री, (भट्टं स्वामित्वमस्या अस्तीति । भट्ट+इनिः+ङीप् ।) नाव्योक्तौ अक्षताभिषेका राजपत्नी । इत्यमरः । १ । ७ । १३ ॥ ब्राह्मणभार्य्या । इति मेदिनी । ने, ३१ ॥

भड इक् शिवे । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-अक०-सेट् । इदित् ।) शिवं कल्याणक्रिया वेदेष्वेव । प्रतारणे प्रसिद्धोऽयम् । इक् भण्डयति प्रतारको सुग्धं धनदानाङ्गीकारेण । इति दुर्गादासः ॥

रड इ ड वाचि । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट् ।) परिभाषण इति गोविन्दभट्टः । परिहास इति चतुर्भुजः । इ भण्डते ड भण्डते भिड्गौ लोकः । इति दुर्गादासः ॥

भड़ः, पुं, (भड़तीति । भड़ इड परिहासे परिभाषणे वा+अच् ।) वर्णसङ्करजातिविशेषः । स तु वेटात् तीवरकन्यायां जातः । यथा,—
"वेटस्तीवरकन्यायां जनयामास यत्सुतान् ।
गाङ्गं मत्सं मातरञ्च भड़ं कोलञ्च कन्दरम् ॥"
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे १० अध्यायः ॥

भण्डिलः, पुं, (भड़तीति । भड़+"खलिकल्यनिमधिभड़िभण्डीति ।" उणा०-१ । ५५ । इति इलच् ।) सेवकः । शूरः । इत्युणादिकोषः ॥

भद कल्याणे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सिद्ध०-सेट् ।) कल्याणं भवत् भवभाव्यं च चैष यक्तवाक्यम् । श्रीजयदेवकृतहरिसेवं भणति परमरमणीयम् । इति दुर्गादासः ॥

भणितं, क्ली, (भण+क्तः ।) शब्दितम् । कथितम् । यथा,—
"श्रीजयदेवभणितमिदमद्भुतकेशवकेलिरहस्यम् ।"
इति गीतगोविन्दः ॥

भणितिः, स्त्री, (भण्यते इति । भण+क्तिन् ।) वाक्यम् । इति भूरिप्रयोगः त्रिकाण्डशेषश्च ॥ (यथा, राजतरङ्गिण्याम् । ४ । ५४ ।
"नियन्त्रिता यद्भणितिस्तदृगुणोदीरणादियम् ।
अतिप्रसङ्गभङ्गात्तन्नेयक्तावाप्तिः पुनः ॥")

भण्टाकी, स्त्री, (भण्यते भण्यते वा । भट् भर्त्सो भण्डशब्दे वा+"पिनाकादयश्च ।" उणा० । ४ । १५ । इति आक । निपात्यते च । गौरादित्वात् ङीष् ।) वार्त्ताकी । इत्यमरः । २ । ४ । १२४ ॥ वृन्ताकी । इति रत्नमाला ॥ (वृन्ताकम् । तत्पर्य्यायो यथा,—
"वृन्ताकं स्त्री तु वार्त्ताकुर्भण्टाकी भाण्टकापि च ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

भण्डुकः, पुं, (भड़तीति । भड़ि-उकन् ।) श्लेष्मातकवृक्षः । इति रत्नमाला ॥ क्वचित् भण्डुकोऽपि पाठः ॥

भण्डः, पुं, (भण्डते इति । भड़ि प्रतारणे+अच् ।) अश्लीलभाषी । भाँड़ इति भाषा । इति संक्षिप्तसारोणादिवृत्तिः ॥ तत्पर्य्यायः । चाटुपटुः २ । इति भूरिप्रयोगः ॥

भण्डकः, पुं, (भण्ड+संज्ञायां कन् ।) खञ्जनपक्षी । इति जटाधरः ॥

भण्डनं, क्ली, (भड़ि+भावादौ ल्युट् ।) खलीकारः । कवचम् । युद्धम् । इति मेदिनी । ने, १०० ॥

भण्डहासिनी, स्त्री, (भण्डेन खलीकारेण हसति या । हस्+णिनिः । ङीप् ।) गणिका । इति शब्दरत्नावली ॥

भण्डिः, स्त्री, (भड़ि+इन् ।) वीचिः । इति हारावली ॥

भण्डिका, स्त्री, मञ्जिष्ठा । इति शब्दरत्नावली ॥

भण्डिरः, पुं, (भण्डिल+रलयोरैक्यम् ।) शिरीषवृक्षः । यथा । भण्डिलो भण्डिरो नेमीति भरतधृतवाचस्पतिः ॥

भण्डिलः, पुं, (भण्डते परिहसतीवेति भाषते इवेति वा । भड़ि+"खलिकल्यनिमधिभड़िभण्डीति ।" उणा० १ । ५५ । इति इलच् ।) शिरीषवृक्षः । इत्यमरः । २ । ४ । ६३ ॥ (तत्पर्य्यायो यथा,—
"शिरीषो भण्डिलो भण्डी भण्डीरश्च कपीतनः ।
शुकपुष्पः शुकतरुर्म्मृदुपुष्पः शुकप्रियः ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

भण्डिलः, त्रि, (भड़ि+इलच् ।) शुभः । धूर्त्तः । इत्युणादिकोषः ॥ शिल्पी । इति संक्षिप्तसारोणादिवृत्तिः ॥

भण्डी, स्त्री, (भण्डते इति । भड़ि-इन् ।) ङीष्कारादिति पक्षे ङीप् ।) मञ्जिष्ठा । इत्यमरः । २ । ४ । ६१ ॥ (पर्य्यायोऽस्या यथा,—
"मञ्जिष्ठा विकसा जिङ्गी समङ्गा कालमेषिका ।
मण्डूकपर्णी भण्डीरी भण्डी योजनवल्लयपि ॥
रसायन्यरुणा काला रक्ताङ्गी रक्तयष्टिका ।
भण्डीतकी गण्डीरी च मञ्जूषा वरुणराजिनी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
शिरीषवृक्षः । इति राजनिर्घण्टः ॥ (पर्य्यायोऽस्या यथा,—
"शिरीषो भण्डिलो भण्डी भण्डीरश्च कपीतनः ।
शुकपुष्पः शुकतरुर्म्मृदुपुष्पः शुकप्रियः ॥"
श्वेतचित्रता । तत्पर्य्यायो यथा,—
"श्वेताचित्रता भण्डी स्यात् चित्रा चित्रपुटापि च ।
सर्व्वाङ्गभूतिः सरला निर्गुण्डी रेचनीति च ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

भण्डीतकी, स्त्री, (भण्डी सती तकतीति । तक+अच् । गौरादित्वात् ङीष् ।) मञ्जिष्ठा । इति भावप्रकाशः ॥

भण्डीरः, पुं, (भण्डि+बाहुलकात् ईरन् ।) समङ्गलक्षुपः । तण्डुलीयशाकः । (यथा,—
"तण्डुलीयो मेघनादः काण्डेरस्तण्डुलेरकः ।
भण्डीरस्तण्डुली बीजो विषघ्नश्चाप्यमारिषः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
शिरीषवृक्षः । इति राजनिर्घण्टः ॥ (वटवृक्षः । यथा, रामायणे । ३ । ७५ । २४ ।
"मालतीकुन्दगुल्मांश्च भण्डीरैर्निचुलैस्तथा ।
अशोकैः सप्तपर्णैश्च केतकैरतिमुक्तकैः ॥"
"भण्डीरो वटः ।" इति तट्टीकायां रामानुजः ॥)

भण्डीरलतिका, स्त्री, (भण्डीर इव लतति इति । लतिः सौत्रो धातुः+अच् । स्वार्थे कन् । टाप् अत इत्वम् ।) मञ्जिष्ठा । इति राजनिर्घण्टः ॥

भण्डीरी, स्त्री, (भण्डीर । गौरादित्वात् ङीष् ।) मञ्जिष्ठा । इत्यमरः ॥

भण्डीलः, पुं, (भण्डीर । रलयोरैक्यम् ।) मञ्जिष्ठा । इति शब्दरत्नावली ॥

भण्डूकः, पुं, (भड़ि+ऊक ।) मत्स्यविशेषः । भाकुर इति भाषा । अस्य गुणाः । मधुरत्वम् । शीतत्वम् । हृद्यत्वम् । श्लेष्मकरत्वम् । गुरुत्वम् । विष्टम्भित्वम् । रक्तपित्तहरत्वञ्च । इति भावप्रकाशः ॥ श्लेष्मातकवृक्षः । इति रत्नमाला ॥

भद इक् शुभे । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-अक०-सेट् ।) इक् भन्दयति शुभं कल्याणक्रिया । इति दुर्गादासः ॥

भद इ ड हर्षे । प्रीतौ । शुभे । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट्-इदित् ।) इ भन्दते । ड भन्दते पण्डितः सदा । इति दुर्गादासः ॥

भद्दन्तः, पुं, (भन्दते इति । भदि कल्याणे+"भन्दिनंलोपश्च ।" उणा० ३ । १३० । इति झच् । नलोपश्च ।) सौगतादिवृद्धः । इति हेमचन्द्रः । मायादेवीसुतः । सुतेजाः । पूजिते, त्रि । इत्युणा-

दित्योः। (भरणः प्रवर्त्तिनः। इत्युणादौ। ४। ११०। मृगवालाख्यो उच्चस्थः। यथा, बृहज्जातके। ६८। १७९।

"तत्कालिकः यदाधत्ते भद्रत्वमभिगम्य च। प्रतिलोमगतौ भद्रा चीर्णि वर्षाण्यजीवनः॥")

भद्रः, पुं, क्लीं, (भद्रते इति। भदि + "भिदा-दिभ्यश्च।" उणा०। ३। १५। इति रक्। यद्वा भदि कल्याणे + "कृदिकारादक्तिनः।" उणा०। २। ७८। इति रन्। निपातनं च।) मङ्गलम्। इत्युणादिकोषः।

भद्रं, क्लीं, (भद्रते इति। भदि कल्याणे + "कृदिकारादक्तिनः।" उणा०। २। ७८। इति रन्। निपातनं च।) मङ्गलम्। (यथा, ऋग्वेदे। १। २४। २।

"वयन्त वीर! प्रविदि मनायतो भद्रं मनः कृणुष्व वृत्रतूर्ये॥"

यथा च कामन्दकीयनीतिसारे। १३। १०।

"शिरोटमलिपिर्वेषु सर्वेषु शास्त्रसारिषु। नाकृता विदिषो पादं पूरणी भद्रमश्नुते॥")

सुखम्। कल्याणम्। इति मेदिनी। रे, ७१।

भद्रं, क्लीं, स्त्रीं, (भदि + रन् निपातनात्ते च।) करणविशेषः। इति मेदिनी। रे, ७२। तच्च विष्टिभद्रात्वेन प्रसिद्धमद्भुतम्। इति ज्योतिषम्।

भद्रः, पुं, (भन्दते इति भदि + रन् निपातनात्त च।) शिवः। सङ्करोटः। वृषभः। कदम्बकः। करिशावविशेषः। इति मेदिनी। रे, ७०। नदभुजावलाम्बतनिनभेदः। रामशरः। सुमेरुः। इति हेमचन्द्रः। शुद्धौ। इति राजनिर्घण्टः। (चन्दनम्। तत्पर्य्यायो यथा,—

"श्रीखण्डं चन्दनं गन्धो भद्रः श्रीखण्डमित्यपि। मलयागारो मलयजस्तथा चन्द्रजलिश्च सः॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥) साधुशीलिकायां वणिग्विशेषः। यथा,—

"विद्युन्नामः शिवश्चित्रगुप्तश्चन्द्रो गुप्तः पालो भद्रः। इति पुत्राश्चैवंकारिका॥ (वसुदेवस्य पुत्रभेदः। यथा, भागवते। ९। २४। ४०।

"सुभद्रो भद्रबाहुश्च दुर्मदो भद्र एव च। भद्रकालयशा ऋक्षे भूताश्चा दारुणाभवन्॥"

नरोत्तमविशेषः। यथा, मत्स्यपुराणे। १९०। १९८।

"अश्वत्थोदं मालवश्च शिलोदं भद्रमल्लिकम्। तैलाक्षुरिः चमारि सप्तमि च वनानि च॥"

दुर्गोत्सवप्रयोगतन्त्रान्तरे देवतभेदे बहुवचनान्तोऽयम्। यथा, भागवते। ८। १। २४।

"चक्षिन्नक्षयः भद्र क्षयः प्रमदाक्षयः। एता देवयुता भद्रा देवा इन्द्रमु मन्त्रिणम्॥"

वास्तुशास्त्रान्तरे शिलोदेषिशालभेदात् तुषिनशास्त्रे तत्रभेदः। यथा, भागवते। ९। १। ९-०।

"सा शालग्रामो भगवान्नाद वृक्षो वनि। तुलसी सोमसावर्णे तत्पत्नीकालान्तरात्॥ तीव्रः प्रतीपः स्वाक्षी भद्रः शालिशिरस्तथा। एते शालिशिरोभेदाः। यथा, ब्रह्मवैवर्त्तपुराणे। प्रकृतिखण्डे। ४० अध्याये।

"अरुणः शिखिरौलश्च सकौ वैदूर्य्यपर्व्वतः। कपिलः पिङ्गलो भद्रः सुरसश्च महाचलः॥"

एकादशद्वादशपर्व्वतो महेश्वरस्य अधिष्ठानत्वात् विशेषः। यथा, ब्रह्मवैवर्त्ते। २० अध्याये।

"एकादशद्वादशे तु यामस्तु विष्णवी यदा। तदाप्यहं भविष्यामि गङ्गाद्वारे युगान्तिके॥ भद्रो नाम महादेवोऽप्यहमि मम पुत्रकाः। भविष्यन्ति महाकायो सुहृत्ता वेदपारगाः॥")

भद्रः, त्रि, (भन्दते इति। भदि कल्याणे रन्। निपातनात्त च।) श्रेष्ठः। साधुः। इति मेदिनी। रे, ७२। (यथा, ऋग्वेदे। १। २६।

"भद्र! कण्टक! त्वयं तावदस्मत्स्वामी पिङ्गलक उदकपदनार्थं यमुनाकच्छमवतीर्ण स्थितः॥")

भद्रकं, क्लीं, (भद्र + संज्ञायां स्वार्थे वा कन्।) भद्रमुस्तकम्। इति रत्नमाला। (देवदारुशब्दस्य विषयोऽभिहितः।) मनोज्ञे, त्रि। इति त्रिकाण्डशेषः।

भद्रकः, पुं, (भद्र + संज्ञायां कन्।) देवदारुः। इति शब्दरत्नावली॥

भद्रकटः, पुं, (भद्रः कटो यस्य।) गोखुरः। इति राजनिर्घण्टः॥

भद्रकाली, स्त्री, (भद्रा मङ्गलमयी चासौ काली चेति कर्म्मधारयः। यद्वा, भद्रं कल्याणं कालयतीति। भद्र + कै + कः।" ३। २। १। इति ष्यञ्। ङीप्।) गन्धोली। कात्यायनी। इति मेदिनी। ले, १५८। तस्या उत्पत्तिर्यथा,—

श्रीयौवन उवाच।

"अस्तु त्वं वृषभारूढा भद्रकाली यथा पुरा। प्रादुर्भूता महाभागा महिषेण सहैव तु॥ महिषासुर एवासौ निहतो निशि पर्व्वते। स्वप्नं प्रदर्शयेत् वीरो दारुणं घोरदर्शनम्॥ महामाया भद्रकाली छित्वा मद्भुजकाश्चरम्। पपौ रक्तञ्च रक्तानि चादित्यास्यानिभीषणा॥ ततः प्रातर्भययुतः स दैत्यो महिषासुरः। तामेव पूजयामास सुचिरं भक्तिसंयुतः॥ आराधिता सदा देवी महिषेणासुरेण वै। प्रादुर्भूता भद्रकाली मुनेः पौरुषभियेणा॥ ततः प्रणम्य महिषो महामायां जगन्मयीम्। उवाचेदं यथो नम्रमतिभक्तियुतोऽसुरः॥

महिष उवाच।

देवि! मद्भुजेन संछिन्नं मौलिजानि शिरो मम। त्वया सुखानि दत्तानि मया स्वप्ने सुनिश्चितम्॥ त्वत्तः सत्यमा कार्य्यं मया स्वप्नं प्रमादतः। एतद्दुरितपाशं मे मर्षयेह देहि मे वरम्॥ यथाऽहमाद्यं नाशानि संसृतेः परमेश्वरि!। ममापि तव नो दुःखं निधनेः जेन जायते॥ किन्तु त्वदेव महिषः प्रभुरासीत्पुरा मम। मम पिता महादेव्याः यथाहं तव॥ त्वत्पादाराधिनः प्रभुः प्राप्तोऽसौ त्वत्प्रसादतः। तत्कारणं मया दानवं राज्यमुत्तमम्॥ अकण्टकं मया भुक्तमद्यापि न विद्यते। त्वत्प्रसादेन सुचिरा इमोदं दिव्यकारणात्।

सीमन्तिनी विनाशं ते करिष्यति न संशयः॥ पुरा मुनिं तपस्यन्तं रौद्राख्यं नाम चोत्तमम्। मुनेः कात्यायनाख्यस्य शिष्यं हिमवदन्तिके॥ दिव्यकौशेयमतुलं दृष्ट्वाहं यौतुकात्तदा। मया संमोहिनी विप्रोऽकरुणदृष्टया तपः॥ न दूरात् संस्थितेनाहं मुनिना कात्यरूपिणा। ज्ञात्वा मायां तदा शप्तः शिष्यार्थे क्रोधपूरितः॥ यस्मात्त्वया मे शिष्योऽयं मोहितस्तमसाधुना। तस्मात्त्वया चौरदोषं ततस्तौ वधिष्यति॥ इति मां शप्तवान् पूर्व्वं मुनिः कात्यायनः पुरा। तस्य शापस्य कालोऽयमागतः समुपस्थितः॥ देवैरुक्तं मया प्राप्तं सुक्तं धिषणवर्त्म यत्। किञ्चित्र शोचं तत्रापि वाञ्छनीयं हि यत्नया॥ तस्माच्चां वै प्रपन्नोऽहं प्राप्तं शैलं हि यत्नया। तन्हेहि देवि दुर्गे! त्वं भयस्तुभ्यं नमो नमः॥

श्रीदेव्युवाच।

"प्रार्थनीयो वरो यस्ते तं वृणु त्वं महासुर!। दास्यामि ते वरं प्रार्थ्यं संशयो नात्र विद्यते॥"

महिष उवाच।

"यज्ञभागमहं भोक्तुमिच्छामि त्वत्प्रसादतः। यथा यज्ञेषु सर्व्वेषु पूज्योऽहं स्यां तथा कुरु॥ त्वत्पादसेवां न त्यक्ष्ये यावत् सर्गः प्रवर्त्तते। इदं वरद्वयं देहि यदि देयो वरो मम॥"

श्रीदेव्युवाच।

"यज्ञभागाः सुरेभ्यश्च कल्पिता वै पृथक् पृथक्। भागो न विद्यते भाग्यो यद्दास्यामि तवासुना॥ किन्तु त्वयि मया युद्धे निहते महिषासुर!। नैव लप्स्यसि मत्पादं सत्यं नात्र संशयः॥ मम प्रपन्नैः पृथा यत्र यत्र च तत्र वै। पूज्यन्तिस्यन्ति तत्रैव कार्य्योऽयं तव दानवः॥ इति श्रुत्वा वचस्तस्याः प्रहृष्टो महिषासुरः। वरं प्राप्येह मुदितः प्रणम्यैवमुवाच ह॥ उवाच च। भद्रकालि! दुर्गे देवि! नमोऽस्तु ते। प्रभूता शक्तयो देवि! भक्ता: सकलास्त्रिजगा:॥ काश्चिद्धि शक्तिभिः पूज्यो यज्ञेऽहं परमेश्वरि!। तत् क्षमाचक्षु यदि मे भवेद्देव कृपा कृता॥"

श्रीदेव्युवाच।

"यानि नामानि लोकानि लभेथ महिषासुर!। तासु संस्तुत्य संस्तुत्य पूज्यो लोके भविष्यति॥ उवाचेति या सन्निभंकालो दुर्गं पुरः। यथा सर्व्वा त्वां धनिष्ये सा दुर्गेति प्रथोत्तिता॥ दनासु सप्तसु सदा पाहरन्तो दृढा मदा। पूज्यो भविष्यसि त्वं वै देवानामपि दुर्गमम्॥ त्वामिदानीं उवाचाहमेवं त्वं विद्धि पुरा। हिंसोद्यतौ तु भवान् भक्तत्राता मया पुनः॥ दुर्गात्तेनासुरा त्वां दनिष्यामि महासुरम्। किन्तु दुर्गे न मर्त्यास्त्वां मया पाहरोऽन्ते॥ यस्मात् प्राणिनरो नरोः दुर्गे त्वामयी॥ यद्योगयक्ष यद्यार्थं यज्ञभागोऽस्तु ते॥"

इति कालिकापुराणे ५८ अध्यायः। ७।

भद्रागः यद्धिते गौरे सामविशेषश्च।

भद्रकाशी, स्त्री, (भद्राय काशते इति। काश+ क्विप्। गौरादित्वात् ङीष्।) भद्रसुस्ता। इति राजनिर्घण्टः॥

भद्रकुम्भः, पुं, (भद्रस्य भद्राय वा कुम्भोऽथवा भद्रः कुम्भः।) पूर्णकुम्भः। इत्यमरः। २। ८। ३२॥

भद्रगन्धिका, स्त्री, (भद्रो गन्धोऽस्यास्तीति। ठन्। टाप्।) सुस्तकम्। इति रत्नमाला॥

भद्रङ्करः, त्रि, (भद्रं करोतीति। कृ+"वाहुलकात् खच्। सुम् च।) मङ्गलकारकः। तत्पर्य्यायः। क्षेमङ्करः २ क्षेमकारः ३ भद्रङ्करः ४ शुभङ्करः ५ अरिष्टतातिः ६ शिवतातिः ७ शुङ्करः ८। इति भूरिप्रयोगः॥

भद्रचूड़ः, पुं, (भद्रा चूड़ास्य।) लङ्गूरस्थायी। इति शब्दचन्द्रिका। लङ्गासिन इति भाषा॥

भद्रजः, पुं, (भद्राय जायते इति। जन+डः।) इन्द्रयवः। इति राजनिर्घण्टः॥ (गुणादयोऽस्येन्द्रयवशब्दे ज्ञातव्याः॥)

भद्रतरुणी, स्त्री, (भद्रा तरुणीव।) कुलकट्टचः। इति राजनिर्घण्टः॥ (तथास्या अन्यतरः पर्य्यायः।

"कुलको भद्रतरुणी दृढपुष्पोऽतिकेसरः।
मञ्जा सञ्जा कण्टकाढ्या नीलालिकुलसङ्कुला॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

भद्रतुरगं, क्ली, (भद्रा तुरगा यत्र।) जम्बूद्वीपस्य नववर्षान्तर्गतवर्षविशेषः। यथा,—

"माल्यवच्चलधिमध्यवर्त्ति यत्तु भद्रतुरगं जगुर्बुधाः।"

इति सिद्धान्तशिरोमणौ गोलाध्यायः॥

भद्रदन्तिका, स्त्री, (भद्रा दन्तिका।) दन्तीवृक्षभेदः। भद्रदन्ती इति ख्याता। तत्पर्य्यायः। केशुरुहा २ भिषग्भद्रा ३ जयावहा ४ आवर्त्तकी ५ ज्वराङ्गी ६ जयाह्वा ७। अस्या गुणाः। कटुत्वम्। उष्णत्वम्। रेचनत्वम्। कृमिशूलकुष्ठमेदोदोषतुन्दामयनाशित्वञ्च। इति राजनिर्घण्टः॥

भद्रदारु, क्ली, पुं, (भद्रं दारु।) देवदारु। इत्यमरभरतौ॥ सरलकाष्ठम्। इति रत्नमाला॥

भद्रदार्व्यादिकः, पुं, (भद्रदारु आदौ यस्य कप्।) औषधगणविशेषः। यथा। भद्रदारुकुष्ठहरिद्रावत्सकमेषशृङ्गीवलातिवलार्ष्टगलकच्छुरासप्तकीकुवेराक्षीवीरतरुसहचराग्निमन्थवत्सादन्यैरक्षाभ्रमेदकालर्कार्कपुनर्नवावासुकवसिरकाष्फलकभार्गीकाण्डार्द्धोद्धिकालीपत्तूरवदरयवकोलकुशरात्यभ्रतीनि। इति सुश्रुतसूत्रस्थानस्य संशोधनसंग्रहनीयाध्यायः॥ ८॥

यथिष।

"देवदारु हरिद्रे द्वे वत्सकः कुष्ठमेव च।
मधूनिम्बं नागबला श्यामला गरलोपरः।
पाटला चाकगुप्ता च मुण्डी पाषाणभेदिका।
शतावरी चार्कमूलं गुडूची गणिकारिका।
पुनर्नवा च पाठा कुरण्टार्कैकतानतम्।
गोक्षुरं शूरमूलञ्च कुशमूलं समांसिकम्॥
ऊनचत्वारिंशदृद्रव्यैर्भद्रदार्व्यादिको गणः॥"

इति शब्दचन्द्रिका॥ ८॥

एतन्मध्ये चतुर्दशद्रव्याणि न प्राप्यानि॥

भद्रनामा, [न्] पुं, (भद्रं नाम यस्य।) काष्ठकुट्टपक्षी। इति त्रिकाण्डशेषः। काट्‌ठोकरा इति भाषा॥

भद्रनामिका, स्त्री, (भद्रं नामास्याः। कप्। टाप्। अत इत्वम्।) चायन्तीवृक्षः। इति रत्नमाला। वहला इति भाषा॥

भद्रनिधिः, स्त्री, (भद्रा निधयोऽत्र।) महादानविशेषः। यथा,—

इन्द्र उवाच।

"विधानं ब्रूहि मे ब्रह्मन्! दानस्यास्य महानिधेः।
यथा देव! विशेषेण विष्णोरानन्दकारकम्॥"

ब्रह्मोवाच।

"पुण्यां तिथिं प्राप्य तु पौर्णमास्यां
तथोपरागे शशिसूरयोर्वा।
चतुर्युगादिव्ययनद्वये वा
प्रबोधने प्रस्वपनेऽथ विष्णोः॥
कुर्य्यादथौड़ुम्बरमेव कुम्भं
हिरण्यमानेन यथात्मशक्त्या।
तथा पिधानञ्च सुराजतं स्याद्-
हिरण्यभारेण तु पूरयेत्तत्॥
तदर्द्धतोऽर्द्धेन तदर्द्धतो वा
स्वशक्तितः स्वर्णपलैः शतेन।
तदर्द्धमध्येन तु वित्तशक्त्या
पलत्रयादूनमथो न कुर्य्यात्॥
तत्ताम्रभाण्डे कनकं निधेयं
शवच्छनीलोत्तमपद्मरागम्।
शुशुक्तवैदूर्य्यसविद्रुमञ्च
तद्राजतं पात्रमधोसुखं स्यात्॥
एवन्तु तं भद्रनिधिं सुविद्वान्
कृत्वासने प्रावरणोपयुक्ते।
कृष्णोत्तरे दर्भगणोत्तमाढ्ये
सपादुकोपानहच्छत्रयुक्तम्।
तं चौमवस्त्रोत्तमयुग्मयुक्तं
सम्पूजयेन्मन्त्रवरैरयेतम्।
आदौ तु पश्चान्नतमाप्य विष्णुं
संस्नाप्य संसारतरं समर्च्य।
तथेश्वरं पावकमेव हुत्वा
धामन्तवेद्यन्निधिं ततस्तम्॥
श्रीखण्डकर्पूरसकुङ्कुमेन
पद्माक्षरं नाम श्रियः प्रलिख्य।
नमस्तथोङ्कारयुतञ्च पात्रे
तद्राजतेऽप्येवमथार्च्चयेत्ताम्॥
त्वया समस्तामरसिद्धयक्ष-
विद्याधरेन्द्रोरगकिन्नरेन्द्रैः।
गन्धर्व्वदित्यासुरदानवेन्द्रै-
र्धृतं ततं विश्वमिदं नमस्ते॥
समस्तसंसारकरी त्वमेव
विभोः सदानन्दमयी च माया।
समस्तकल्याणनिधिः समाधि-
र्हरिप्रिये! भद्रनिधे! नमस्ते॥
एवं संपूज्य विधिना ततो विप्रमथार्च्चयेत्।
किरीटाङ्गदनिष्काग्र्यकुण्डलाङ्गुलिभूषणैः॥
अलंकृत्य हरिं वदन् पीताम्बरधरं ततः।
पूजयेदच्युतं ध्यात्वा मन्त्रेणानेन भक्तिमान्॥
भूदेवोऽसि विभो! नित्यं नित्यानन्दमयो हरे!।
हर मे दुष्करं कृष्ण! कृपाकर! नमोऽस्तु ते॥
भूदेव! भगवान् भर्ग भवभङ्गकरेश्वर!।
भवभूतिकरो विष्णो! प्रभविष्णो नमोऽस्तु ते॥
एवं पूज्य हृदि ध्यात्वा तं द्विजं ब्रह्मरूपिणम्।
ततो भद्रनिधिं दद्यान्मन्त्रेणानेन वासव!॥
स्वगोत्रोच्चारणेनादौ विप्रनाम तथात्मनः।
यवदर्भतिलैः सार्द्धसुदकं संपरित्यजेत्॥
पितृसन्तारणार्थाय नित्यानन्दविवृद्धये।
सर्व्वाघौघविघाताय विष्णोर्दानं मया कृतम्॥
तदनेन सरत्नेन धातुत्रययुतेन च।
सच्चौमाम्बरयुक्तेन सादर्शपादुकेन च॥
सासनेन सच्छत्रेण चामरोपानहेन च।
सदानन्दनिधानेन प्रीयतां विष्णुरीश्वरः॥
एवमुच्चार्य्य तं दद्याद्विजाय हरिरूपिणे।
गोप्येन विधिना दद्याद्धेमसंख्यां न कीर्त्तयेत्।
प्रकीर्त्तिते कोटियुगायुतं फलं
प्रगोपिते कल्पशतेन संचयः।
इतीयमुक्तो न तु कीर्त्तयेत् सुधी-
र्निधानमध्ये निहितञ्च यद्वसु॥
एवं कृते स्यान्नृजः कृतात्मा
तपेन्न च स्वामरगं कदाचित्।
प्रयाति विष्णोः पदमक्षयं तत्
शिवात्मकानन्दमयं सदाख्यम्॥"

इत्याद्ये वह्निपुराणे भद्रनिधिदाननामाध्यायः।

भद्रपदा, स्त्री, (भद्रं पदमस्याम्।) भाद्रपदा। पूर्व्वभाद्रपदोत्तरभाद्रपदानक्षत्रम्। इत्यमरटीकायां रायमुकुटः॥ (यथा, हरिवंशे तृतीयायाम्। ६। २।

"नगा तु पवनवाम्या
नलानिषेतामघात् त्रिभाक्षिसः।
गोवीथ्यामश्विन्यः
पौष्णं दे चापि भद्रपदे॥",

भद्रपर्णा, स्त्री, (भद्राणि पर्णान्यस्याः। टाप्।) कटम्भरावृक्षः। इति शब्दमाला॥ (गुणादिरस्याः कटम्भराशब्दे विवृतम्॥)

भद्रपर्णी, स्त्री, (भद्राणि पर्णान्यस्याः। गौरादित्वात् ङीष्।) गाम्भारी। इत्यमरः। २। ४। ११। (अस्याः पर्य्यायो यथा,—

"गाम्भारी भद्रपर्णी च श्रीपर्णी मधुपर्णिका।
काश्मरी काश्मरी धीरा काश्मर्य्यः पीतरोहिणी।
कण्टकल्पा मधुरसा महाकुसुमिकापि च।
प्रसारिणी। इति जटाधरः॥ अस्याः प्रभावो यथा,—

प्रसारणी राजबला भद्रपर्णी प्रतापनी।
सरणी सारणी भद्रा बला चापि कटम्भरा॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥
"प्रसारणी च गन्धाली भद्रपर्णी कटम्भरा॥"
इति वैद्यकरत्नमालायाम्॥
यथा, शतपथब्राह्मणे।३।४।१।१६। इत्यस्य भाष्ये
"काश्मर्य्यो भद्रपर्णी प्रकृतौ पलाशवैकङ्कता-
दीनामेच्छिकत्वादत्र नियमविधिः॥")
भद्रबलः, पुं, (भद्रं महद्बलं बलमस्य।) बलरामः। इति शब्दमाला॥
भद्रमल्लिका, स्त्री, (भद्रा मल्लिका।) गवाची। इति शब्दमाला॥
भद्रमुञ्जः, पुं, (भद्रो मुञ्ज इति कर्म्मधारयः।) मुञ्जभेदः। रामशर इति शरपत इति च भाषा। तत्पर्य्यायः। शरः २ बाणः ३ तेजनः ४ इक्षुवेष्टनः ५। अथ मुञ्जस्य पर्य्यायः। मुञ्जः १ मुञ्जातकः २ वाणः ३ स्थूलदर्भः ४ मुमेधसः ५। इतयोर्गुणाः।
"मुञ्जद्वयन्तु मधुरं तुवरं शिविरं तथा।
दाहतृष्णाविषर्षासमूत्रवस्त्यरुचिरोगजित्॥
दोषत्रयहरं दृष्यं मेखलासूत्रमुच्यते॥"
इति भावप्रकाशः॥
भद्रमुस्तकः, पुं, (भद्रो मुस्तकः।) नागरमुस्तकः। इत्यमरः।२।४।१६०॥ (तत्पर्य्यायो यथा,—
"मेघाख्यं मुस्तकं मुस्ता गार्ङ्गेयं भद्रमुस्तकम्॥"
इति वैद्यकरत्नमालायाम्॥)
भद्रमुस्ता, स्त्री, (भद्रा मुस्ता।) नागरमुस्तकः। तत्पर्य्यायः। वराही २ गुन्द्रा ३ गन्धिः ४ भद्रकाशी ५ कपोतः ६ क्रोड़िष्टा ७ कुरुविन्दाख्या ८ सुगन्धिः ९ गन्धिला १० हिमा ११ वल्या १२ राजकपोतः १३ कच्छोत्या १४ मुस्ता १५ वर्षोदः १६ वारिदः १७ अम्भोदः १८ मेघः १९ जीमूतः २० अब्दः २१ नीरदः २२ अभ्रम् २३ घनः २४ गार्ङ्गेयः २५। अस्या गुणाः। कषायत्वम्। तिक्तत्वम्। शीतत्वम्। वाचनत्वम्। पित्तज्वरकफनाशित्वम्। संग्राहित्वञ्च। इति राजनिर्घण्टः॥ अपि च।
"मुस्तकं न स्त्रियां मुस्तं त्रिषु वारिदनामकः।
कुरुविन्दश्च संज्ञातोऽपरः क्रोड़कपोतकः॥
भद्रमुस्तश्च गुन्द्रा च तथा नागरमुस्तकः।
मुस्तं कटु हिमं ग्राहि तिक्तं दीपनपाचनम्॥
कषायं कफपित्तास्रदाहज्वरविनाशनम्।
अनूपदेशे यज्जातं मुस्तकं तत् प्रशस्यते॥
तच्चापि मुनिभिः प्रोक्तं वरं नागरमुस्तकम्॥"
इति भावप्रकाशः॥
भद्रयवः, पुं, क्ली, (भद्रः शुभदो यवः।) इन्द्रयवम्। इत्यमरः।२।४।६७॥ (विवरणमस्य इन्द्रयवशब्दे ज्ञातव्यम्॥)
भद्ररेणुः, पुं, (भद्रा रेणुर्यस्य।) ऐरावतहस्ती। इति त्रिकाण्डशेषः॥
भद्रवर्च,क्ली,(भद्रमस्त्यस्मिन्निति। मतुप् मस्य वः।) देवदारु। इति राजनिर्घण्टः॥

भद्रवती, स्त्री, (भद्रं विद्यतेऽस्याम्। भद्र+मतुप्। मस्य वः। ङीप्।) भद्रपर्णी। इति चटाधरः॥ (कट्फलः। अस्य पर्य्यायो यथा,—
"कट्फलः सोमवल्कश्च कैटर्य्यः कुम्भिकापि च।
श्रीपर्णी काश्मरी भद्रा भद्रवतीति च॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥
कल्याणविशिष्टे, त्रि। यथा, महाभारते। ४। २४। १८।
"इमाश्च नः प्रियां वीर! वाचं भद्रवतीं
शृणु॥"
श्रीकृष्णस्य नामजितीगर्भजाता कन्या। यथा, हरिवंशे। १६०। १०-११।
"मित्रवाहुः सुनीथश्च नामचित्या: प्रजाः शृणु।
भद्रकालो भद्रविन्दः कन्या भद्रवती तथा॥"
सर्षोमांता। यथा, हरिवंशे। ३६। ३।
"आचीन्मरुत्वतः पुत्रः पुरुहान् पुरुषोत्तमः।
मधुर्जज्ञेऽथ वैदर्भ्यां भद्रवत्यां कुरूद्वह!॥")
भद्रवर्म्मा, [न्] पुं, (भद्रेण वर्म्मणाति आत्मानमिति विग्रहे। वृ+मनिन्।) नवमल्लिका। इति शब्दचन्द्रिका॥ (विषयोऽस्य नवमल्लिकाशब्दे ज्ञातव्यः॥)
भद्रवल्ला, स्त्री, (भद्रा वल्ला।) लताविशेषः। गन्धभादालिया इति भाषा। तत्पर्य्यायः। सरला २ प्रसारणी ३ कटम्भरा ४ राजबला ५। इत्यमरः। २। ४। १५३॥ अस्याः पर्य्यायान्तरं गुणाश्च प्रसारिणीशब्दे द्रष्टव्याः॥ बला। इति राजनिर्घण्टः॥
भद्रवल्लिका, पुं, (भद्रा वल्लिका।) गोपवल्ली। इति रत्नमाला। ब्यगन्तमूल इति भाषा॥
भद्रवल्ली, स्त्री, (भद्रा चासौ वल्ली चेति कर्म्मधारयः।) मल्लिका। माधवीलता। इति राजनिर्घण्टः॥ लताविशेषः। मदनमाली इति छापरमाली इति च भाषा। तत्पर्य्यायः। ज्ञातभीरुः २ भूमिमण्डा ३ छत्रमादिका ४। इति रत्नमाला॥
भद्रश्रेयं, क्ली, (भद्राय श्रीयते यद्यते इति। श्रि+कर्म्मणि यच्।) चन्दनम्। इति रत्नमाला॥
भद्रश्रीः, पुं, (भद्रा श्रीरस्य।) चन्दनवृक्षः। इत्यमरः। २। ६। १३१॥
भद्रसोमा, स्त्री, (भद्रः सोम इवास्या इव इति। टाप्।) गङ्गा। इति शब्दमाला॥ (कुरुवर्षस्थनदीविशेषः। यथा, मार्कण्डेये। ५८। २३।
"तस्मिन् कुलाचलौ वर्षे तस्मध्ये च महानदौ।
भद्रसोमा प्रयात्युर्व्वीं पुण्यामलजलौघिनी॥")
भद्रा, स्त्री, (भद्र+अजादित्वात् टाप्।) रात्रा। छाया। सोमनदी। तिथिभेदः। सा तु द्वितीया सप्तमी द्वादशी च॥ प्रसारिणी। (अस्याः पर्य्यायो यथा,—
"प्रसारिणी राजबला भद्रपर्णी प्रतापनी।
सरणी सारणी भद्रा बला चापि कटम्भरा॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
कट्फलम्। अनन्ता। इति मेदिनी। रे, ७१॥ जीवन्ती। अपराजिता। नीली। बला। भ्रमी। वचा। दन्ती। हरिद्रा। श्वेतदूर्व्वा। काश्मरी। (पर्य्यायोऽस्या यथा,—
"श्रीपर्णी काश्मरी भद्रा गान्धारी गोपभद्रिका।
कुसुदा च सदाभद्रा कट्फला छत्रदन्तिका॥"
इति वैद्यकरत्नमालायाम्॥
चन्द्रसूरः। तत्पर्य्यायो यथा,—
"चन्द्रिका चर्म्महन्ती च पशुमेहनकारिका।
नन्दिनी कारवी भद्रा वासपुष्पा सुवासरा॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
सारिवाविशेषः। गौः। इति राजनिर्घण्टः॥ काकोदुम्बरिका। इति रत्नमाला॥ (भद्राश्ववर्षस्थनदीभेदः। यथा, मार्कण्डेये। ५६। ७।
"शीता शङ्खावती भद्रा चक्रावर्त्तादिका-
स्तथा॥")
गङ्गायास्त्रिस्रोतोऽन्तर्गतस्रोतोविशेषः। तत्तु उत्तरे कुरुवर्षोपगङ्गा। इति पुराणं शब्दमाला च॥ वृहच्छक्तिविशेषः। तत्पर्य्यायः। तारा २ महाश्रीः ३ ओङ्कारा ४ स्वाहा ५ श्रीः ६ मनोरमा ७ तारिणी ८ जया ९ अनन्ता १० शिवा ११ लोकेश्वरात्मजा १२ खदूरवासिनी १३ वेश्या १४ नीलसरस्वती १५ अग्निजिह्वा १६ महातारा १७ वसुधारा १८ धनन्ददा १९ त्रिलोचना २० लोचना २१। इति त्रिकाण्डशेषः॥ छायागर्भजाता सूर्य्यकन्या। यथा,—
"यमस्तौ तु ततस्तस्यां जनयामास भास्करः।
शनैश्चरश्च भद्राञ्च छायायाममितद्युतिः॥
तथा च तेजसा विष्णोस्तस्य चक्रमवर्त्तयत्।
तदप्रतिहते युद्धे दानवान्तविकीर्षया।
तद्भगिनी सुखतो भद्रा निर्वृत्तेवं विगर्हिता॥"
इति वह्निपुराणे वैवस्वतानुकीर्त्तनम्॥
सुभद्रा। यथा,—
"आषाढ़स्य सिते पक्षे द्वितीया पुण्यसंयुता।
तस्यां रथे समारोप्य रामं मां भद्रया सह॥"
इति स्कान्दे भगवद्वाक्यम्॥*॥
विष्टिभद्रा यथा,—
"एकादश्यां चतुर्थ्यान्तु शेषार्द्धे शुक्लपक्षके।
अष्टमीपौर्णमास्योस्तु पूर्व्वार्द्धे विष्टिसम्भवः॥
तृतीयायाश्च दशम्याश्च परार्द्धतः।
सप्तम्याश्च चतुर्दश्याः पूर्व्वार्द्धे विष्टिरीरिता॥
विहाय विषरोद्राणि विष्टिं सर्व्वत्र वर्जयेत्।
विष्टिशेषे त्रिदण्डे हि पुच्छे कार्य्यं जयावहम्॥"
कर्म्मप्रकाशे तस्या अङ्गविशेषो यथा,—
"नाभस्तु पञ्चवदनं गलकस्तस्थैका
वक्षो दशैकसहिता नियतं चतस्रः।
नाभिः कटिः षड़पि पुच्छलता च तिस्रो
विष्टेर्भुवं निगदितोऽङ्गविभाग एषः॥"
अङ्गविशेषे कार्य्यध्वंसादिफलम् यथा,—
"मुखे कार्य्यध्वंसो भवति मरणञ्चाथ गलके
धनध्वंसोऽक्षस्थश्च कलहस्तद्वैर्हृदिविलयः।

कलिनामीदृशे विजयमघ पुच्छे च जगदुः शरीरे भद्रायाः पृथगिति फलं सर्व्वसुनयः ॥"
मनुवसुमुनितिथियुगदृग्शिवगुणसंख्यासु तिथिषु पूर्व्वाद्यास्यम्। आवाति विधिरेषा दृङ्मे शुभदा पुरस्त्रयुभा ॥ चतुर्दृग्यादिषु पूर्व्वाग्राहिमुखं भवतीत्यर्थः। इति ज्योतिस्तत्त्वम् ॥

भद्राकरणं, क्ली, (भद्र+डाच्। कृ+ल्युट्।) सुखनम्। इति हेमचन्द्रः ॥

भद्रात्मजः, पुं, (भद्रः हितकर आत्मज इव रक्षाकरत्वात्।) खड्गः। इति त्रिकाण्डशेषः ॥

भद्रारकः पुं, अष्टादशचतुरब्धीपान्तर्गतद्वीपविशेषः। इति शब्दमाला ॥

भद्रालपत्रिका, स्त्री, (भद्राय अलति पर्य्याप्नोतीति। अल्+अच्। भद्रालं पत्रं यस्याः। कप्। टाप्। अत इत्त्वम्।) गन्धाली। इति शब्दमाला ॥

भद्राली, स्त्री, (भद्र+अल्+अच्। भद्राल+गौरादित्वात् ङीष्।) गन्धाली। इति शब्दमाला ॥

भद्रावती, स्त्री, (भद्रमस्या अस्तीति। मतुप्। मस्य वः। संज्ञायां पूर्व्वपदस्य दीर्घः।) कट्फलवृक्षः। इति राजनिर्घण्टः ॥

भद्राश्रयः, पुं, (भद्रस्याश्रयः।) चन्दनम्। इति शब्दचन्द्रिका ॥

भद्राश्वं, क्ली, (भद्रा अश्वा यत्र।) भुवि जम्बुद्वीपस्य नववर्षान्तर्गतवर्षविशेषः। इति त्रिकाण्डशेषः ॥ तद्विवरणं यथा। माल्यवतः पूर्व्वपार्श्वे पूर्व्वगणिका एकपञ्चाशद्योजनसहस्राणि मानन्तत्र च भद्राश्वा नाम जनपदाः भद्रशालवनञ्च तत्र व्यवस्थितं कालाभ्रवृषाः पुरुषाः श्वेताः पद्मवर्णिन्यः स्त्रियः कुमुदवर्णाः दशवर्षसहस्राणि च तेषामायुस्तत्र च पञ्च कुलपर्व्वताः तद्यथा, श्वेतवर्णः मालाख्यको वरजम्बः त्रिपर्णीगौरशैलेति तद्विनिर्गता वङ्क्षो नद्यस्तदम्भःस्थितानां देशानां तान्येव नामानि ते च देशाः स्रवन्ताः नद्यः पिबन्ति। तद्यथा, सीता सुवाहिनी हंसवती कावेरी सरसा शाखावती इन्द्रनदी अङ्गारवाहिनी हरिनोया सोमावर्त्मा शृतहृदा वनमाला वसुमती हंसा पर्णा पद्मगङ्गा धनुष्मती मणिवप्रा सुवक्षभागा विलासिनी कृष्णनोया पुण्योदा नागवती शिवा शैवालिनी मणितटा चीरोदा वरुणावती विष्णुपदी महानदी हिरण्यरूप्यवाहा सुरावती वामोदा पलाकावेत्रवती महानद्यः एताश्च गङ्गासमाः कीर्त्तिताः व्याख्यानं पापं विनाशयन्ति चूतनदस्य कोटिगङ्गाश्च नद्यैर्य्ये पिबन्ति ते दशवर्षसहस्रायुषः सदोमाभक्ता इति। इति वाराहे भुवनकोषे पद्मगीता ॥ अपि च। तथैवेक्षुरतमरेण पूर्व्वेण च माल्यवन्मादनावानीलनिषधायतौ द्विसहस्रं पप्रथतुः केतुमालभद्राश्वयोः सीमानं विदधाते। मन्दरो मेरुमन्दरः सुपार्श्वः कुमुद ऋक्षयुक्तयोजनविस्तारोच्छ्राया मेरोश्चतस्रो ध्वजयूपगिरय उपकल्पाः। चतुर्ष्वेतेषु चूतजम्बूकदम्बन्यग्रोधाश्चत्वारः पादपप्रवराः पर्व्वतकेतव इवाधिसहस्रयोजनोन्नाहास्तावद्विटपवितयः शतयोजनपरिणाहाः। हृदाश्चत्वारः पयोमधिक्षुरसन्दृब्जलाः यदुपस्पर्शिन उपदेवगणा योगैश्वर्य्याणि स्वाभाविकानि भरतर्षभ! धारयन्ति। देवोद्यानानि च भवन्ति चत्वारि नन्दनं चैत्ररथं वैभ्राजकं सर्व्वतोभद्रमिति। येष्वमरपरिवृढाः सहसुरललनाललामयूथपतय उपदेवगणैरुपगीयमानमहिमानः किल विहरन्ति। मन्दरोन्मथ एकादशशतयोजनोत्तुङ्गदेवचूतशिरसो गिरिशिखरस्थूलानि फलान्यरुणरसानि निपतन्ति। तेषां विशीर्य्यमाणानां अतिमधुरसुरभिसुगन्धि बहुलारुणरसोदेनारुणोदा नाम नदी मन्दरगिरिशिखरान्निपतन्ती पूर्व्वेणोत्तरकुरूनुपप्लावयति। यदुपजोषणाङ्गवान्या अनुचरीणां पुण्यजनवधूनामवयवस्पर्शसुगन्धिवातो दशयोजनं समन्तादनुवासयति। एवं जम्बूफलानामत्युच्चनिपातविशीर्णानामनस्थिप्रायाणामभिमहाकायनिभानां रसेन जम्बूनदी नाम नदी मेरुमन्दरगिरिशिखरादयुतयोजनादवनितले निपतन्ती दक्षिणेनात्मानं यावदिलावृतमुपस्यन्दयति। तावदुभयोरपि रोधसोर्य्या मृत्तिका तद्रसेनानुविध्यमाना वायुसंयोगविपाकेन सदामरलोकाभरणं जाम्बूनदं नाम सुवर्णं भवति यदुहवाव विबुधादयः सह युवतिभिर्मुकुटकटकवाटिकाद्याभरणरूपेण खलु धारयन्ति। यस्तु महाकदम्बः सुपार्श्वपार्श्वनिरूढस्तस्य कोटरेभ्यो विनिःसृताः पञ्चायामपरिणाहाः पञ्च मधुधाराः सुपार्श्वशिखरात् पतन्त्योऽपरेणात्मानमिलावृतमनुमोदयन्ति यो ह्युपयुञ्जानानां सुखनिश्वासितो वायुः समन्तात् शतयोजनमनुवासयति। एवं कुमुदनिरूढो यः शतवल्शो नाम वटस्तस्य स्कन्धेभ्यो नीचीनाः पयोदधिमधुघृतगुडान्नाद्यम्बरगुणासवाभरणादयः सर्व्व एव कामदुघा नदाः कुमुदाग्रात् पतन्त्यस्तमुत्तरेणेलावृतमुपयोजयन्ति यानुपजुषाणानां न कदाचिदपि प्रजानां वलीपलितक्लमस्वेददौर्गन्ध्यजराऽऽमयापदादयो दुष्टोष्णवैवर्ण्योपसर्गादयस्तापविशेषा भवन्ति यावज्जीवं सुखनिरतिशयमेव कुरङ्गकुररकुसुम्भवैकङ्कविकङ्कशिखिशिरपतङ्गरुचकनिषधशितिवासकपिलशबलबैदूर्य्यहारिद्रसर्षभनागकालञ्जरनीरदादयो गिरयो मेरोः कर्णिकाया इव केसरभूता सकलदेशे परित उपकल्पाः। जठरदेवकूटौ मेरुं पूर्व्वेणाष्टादशयोजनसहस्रमुदगायतौ द्विसहस्रपृथुतुङ्गौ भवतः एवमपरेण पवनपारियात्रौ दक्षिणेन कैलासकरवीरौ प्रागायतौ एवमुत्तरतस्त्रिशृङ्गमकरौ यथाभिरेतैः परिवृतोऽग्निरिव परिनिष्ककाक्षो काञ्चनगिरिः। मेरोर्म्मूर्द्धनि भगवत आत्मयोनेर्म्महत उपकल्पां पुरीमयुतयोजनसाहस्रीं समचतुरस्रां शातकौम्भीं वदन्ति यामनुपरितो लोकपालानामष्टानां यथादिशं यथारूपं तुरीयमानेन पुरोऽष्टावुपकल्पाः। इति श्रीभागवते ५ स्कन्धे सुवनकोषवर्णने २६ अध्यायः ॥

भद्रासनं, क्ली, (भद्राय लोकहिताय आसनम्।) नृपासनम्। इत्यमरः। २। ८। २१ ॥ (योगिनामासनविशेषः। यथा, तन्त्रसारे।
"सीवन्याः पार्श्वयोर्न्यस्येदृगुल्फयुग्मं सुनिश्चलम्।
भद्रासनं समुद्दिष्टं योगिभिः परिकल्पितम्॥")

भद्रेश्वरः, पुं, (भद्रः शुभदश्चासावीश्वरश्चेति भद्रात्मकः मङ्गलमय ईश्वरो वेति।) कल्पग्रामस्थशिवः। यथा,—
"उत्तिष्ठ कान्त! गच्छावः कल्पग्रामं सुशोभनम्।
तया सार्द्धं जगामाथ कल्पग्रामं वसुन्धरे!॥
भद्रेश्वरनिमित्तं हि व्रतञ्च कथितं शुभम्।
नित्यञ्च भुञ्जते यत्र पात्रद्वयं समर्पितम्॥
दृष्ट्वा भद्रेश्वरं देवं चक्रतीर्थफलं लभेत्।
कल्पग्रामाच्छतगुणं चक्रतीर्थं वसुन्धरे!॥"
इति वाराहे मथुरामाहात्म्ये चक्रतीर्थप्रभावे नामाध्यायः ॥

शिवप्रार्थ्यं दुर्गाराधितहिमालयस्थपार्थिवशिवलिङ्गम्। यथा,—
"तवार्थाय गृहीष्यामि महर्षीन् हिमवद्गुरुः।
यस्येह रुद्रमीहन्त्या स्तम्भयेश्वरः कृतः॥
अयं भद्रेश्वरस्तेति स्थाता लोके भविष्यति।
देवदानवगन्धर्व्वा यक्षकिन्नुररोरगाः॥
पूजयिष्यन्ति सततं मानवाश्च शुभेक्षवः॥
इति वामनपुराणे ४६ अध्याये उमां प्रति शिववाक्यम्॥ गङ्गायाः पश्चिमतीरे गरिष्ठाख्यग्रामस्योत्तरे पाषाणमयशिवलिङ्गविशेषो यामविशेषश्च ॥

भद्रैला, स्त्री, (भद्रा एला।) सूक्ष्मैला। इति राजनिर्घण्टः ॥ (अस्याः पर्य्यायो यथा,—
"एला स्थूला च बहुला स्थूलैलाचिपुटापि च।
भद्रैला दृढदेला च चन्द्रबाला च निष्कुटिः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।)

भद्रोदनी, स्त्री, (भद्रं उदनिति अनयेति। उन्द्+अनि+अच्। गौरादित्वात् ङीष्।) बला। नागबला। इति राजनिर्घण्टः ॥
(भनुध, ञो ध ञौ मोटने। इति कविकल्पद्रुमः। रुधा०-पर०-सक०-अनिट्। ध, भनद्धि॥)

भन्दिलं, क्ली, (भदि+इलच्।) शुभम्। इत्यादिकोषः॥ कम्बः। दूतः। इति संक्षिप्तसारोणादिवृत्तिः॥

भनुधुकः, पुं, भारतवर्षान्तर्गतदेशविशेषः। यथा,
"सप्ताधत्वार एवापि ग्रामाणां भनुधुकाः स्मृताः॥"
इति स्कन्दे कुमारिकाखण्डे वक्रेश्वरमाहात्म्यनामाध्यायः॥

भपञ्जरं, क्ली, (भानां नक्षत्राणां पञ्जरम्।) नक्षत्रचक्रम्। इति सिद्धान्तशिरोमणिः॥

भपतिः, पुं, (भानां नक्षत्राणां पतिः ।) चन्द्रः । इति हेमचन्द्रः ॥

भस्मः, पुं (भस् इत्यव्यक्तशब्देन भातीति । भा + कः ।) मक्षिका । धूमः । इति त्रिकाण्डशेषः ॥

भस्मरालिका, स्त्री, (भस्मित्यव्यक्तशब्दस्य भरं बाहुल्यमालाति गृह्णातीति । या + ला + कः । गौरादित्वात् ङीष् । ततः स्वार्थे कन् टाप् पूर्व्वस्य ह्रस्वत्वम् ।) भङ्गारी । इति त्रिकाण्डशेषः ॥ डाँश इति भाषा ॥

भस्मरालो, स्त्री, (भस्मित्यव्यक्तशब्दस्य भरमालातीति । या + ला + कः । गौरादित्वात् ङीष् ।) मक्षिका । इति त्रिकाण्डशेषः ॥

भस्मासारः, पुं, मगधराजविशेषः । तत्पर्य्यायः । श्रेणिकः २ । इति हेमचन्द्रः ॥

भयं, क्ली, (भी + "अरच्" ३ । ३ । ५६ । इत्यत्र "भयादीनामुपसंख्यानं नपुंसके क्त्वादिनिवृत्त्यर्थम् ।" इति वार्त्तिकोक्त्या अपादाने अच् ।) विभेत्यस्मात् ततः । इति भरतः ॥ अस्य लक्षणं यथा,

"रात्रिग्रक्ष्या तु जनितं चित्तवैक्लव्यदं भयम् ॥"

इति साहित्यदर्पणे ३ परिच्छेदः ॥

अपि च । रागविषयस्य विनाशके वस्तुपस्थिते तन्निवारणासामर्थ्यमात्मनो मन्यमानस्य दैन्यात्मकक्षित्तवृत्तिविशेषो भयम् । इति भगवद्गीतायां २ अध्याये मधुसूदनसरस्वती ॥ अन्यच्च । परतः स्वानिष्टसम्भावना भयम् । यथा । व्याघ्रादिभीति व्याघ्राधीनत्वेन स्त्रीयमरणं सम्भावयति । इति २ व्युत्पत्तिवादे गदाधरभट्टाचार्य्यः । तत्पर्य्यायः । दरः २ त्रासः ३ भीतिः ४ भीः ५ साध्वसम् ६ । इत्यमरः । १ । ७ । २१ ॥ रुद्रासः ७ साधुसंभवः ८ प्रतिभयम् ९ । इति शब्दरत्नावली ॥ आतङ्कः १० प्राग्रुक्ष ११ भिया १२ । इति हेमचन्द्रः ॥ आगते भये अभीतवत् स्थातव्यम् । यथा,—

तावद्भयस्य भेतव्यं यावद्भयमनागतम् ।
उत्पन्ने तु भये तीव्रे स्थातव्यं तैरभीतवत् ॥"

इति गारुड़े नीतिसारे ११५ अध्यायः ॥ कुलकपुष्पम् । घोरे, त्रि । इति मेदिनी । ये, ४१ ॥ पुं रोगः । इति राजनिर्घण्टः ॥ (निर्ऋतेः पुत्रभेदः । यथा, महाभारते । १ । ६६ । ५५-५६ ।

"तस्यापि निर्ऋतिर्भार्य्या नैर्ऋता येन राक्षसाः ।
घोरास्तस्यात्मजाः पुत्राः पापकर्म्मरताः सदा ॥
भयो महाभयश्चैव मृत्युर्मृतान्तकस्तथा ।
न तस्य भार्य्या पुत्रो वा कश्चिदस्यन्तको हि सः ॥"

द्रोणस्य वसोरभिमतिनामिकायां पत्न्यां जातः पुत्रभेदः । यथा, भागवते । ६ । ६ । ११ ।

"द्रोणस्याभिमतेः पत्न्या हर्षशोकभयादयः ॥"

यवनराजविशेषः । यथा, भागवते ।८।२३।२३।

"ततो विदूरतस्कन्या कन्यका यवनेश्वरम् ।
भयोपदिष्टमासाद्य वव्रे नाम्ना भयं पतिम् ॥")

भयङ्करं, त्रि, (भयं करोतीति । भय + कृ + "भेषजात्तिभयेषु क्रुञः ।" ३ । २ । ३३ । इति खच् । मुम् च ।) भयजनकम् । तत्पर्य्यायः । भैरवम् २ दारुणम् ३ भीषणम् ४ भीष्मम् ५ घोरम् ६ भीमम् ७ भयानकम् ८ प्रतिभयम् ९ । इत्यमरः । १ । ७ । २० ॥ भयावहम् १० । इति हेमचन्द्रः ॥ (यथा, मार्कण्डेयपुराणे । १४ । ८६ ।

"दृक्कैर्भयङ्करैः पृष्ठं नित्यमस्योपभुज्यते ॥")

पुं. कुण्डलपर्व्वा । इति राजनिर्घण्टः ॥

भयडिण्डिमः, पुं, (भयाय शत्रुभयजननाय डिण्डिमः ।) संग्रामपटहः । इति पुराणम् ॥

भयद्रुतः, त्रि, (द्रु + कर्त्तरि क्तः । भयेन द्रुतः ।) भीत्या पलायितः । तत्पर्य्यायः । कान्दिशीकः २ । इत्यमरः । ३ । १ । ४२ ॥

भयनाशिनी, स्त्री, (भयं रोगभयं नाशयतीति । भय + नश् + णिच् + णिनिः ।) व्यायमाणा लता । इति राजनिर्घण्टः ॥ भयनाशकर्त्री च ॥

भयभीतः, त्रि, (भयेन भीतः ।) त्रासेनातङ्कितः । यथा, वह्निपुराणे शिविराजोपाख्याने ।

"एकतो भयभीतस्य प्राणिनः प्राणरक्षणम् ।
नातो गुरुतरो धर्म्मः कश्चिदन्योऽस्ति खेचर ! ॥

भयभ्रष्टः, त्रि, (भयेन भ्रष्टः ।) भयद्रुतः । इति जटाधरः ॥

भयानकः, पुं, (विभेत्यस्मादिति । भी + "आनकः प्रीड्भियः ।" उणा० । ३ । ८२ । इति आनकः ।) व्याघ्रः । राहुः । रसविशेषः । इति मेदिनी । के, २०५ ॥ स तु ग्रहङ्कारात्मकरसान्तर्गतषष्ठरसः । तस्य लक्षणं यथा,—

"भयानको भयस्थायिभावः कालाधिदैवतः ।
स्त्री नीचप्रकृतिः कृष्णो मतस्तत्त्वविशारदैः ॥
यस्मादुत्पद्यते भीतिस्तदत्रालम्बनं मतम् ।
चेष्टा घोरतरास्तस्य भवेदुद्दीपनं पुनः ॥
अनुभावोऽत्र वैवर्ण्यं गद्गदस्वरभाषणम् ।
प्रलयस्वेदरोमाञ्चकम्पदिक्प्रेक्षणादयः ॥
जुगुप्सावेगसंमोहसंत्रासग्लानिदीनताः ।
शङ्कापस्मारसंभ्रान्तिमृत्व्याद्या व्यभिचारिणः ॥"

उदाहरणं यथा,—

"नष्टं वर्षवरैर्मनुष्यगणनाभावादपास्य त्रपा-
मन्तः कञ्चुकिकञ्चुकस्य विशति त्रासादयं वामनः ॥"

इति साहित्यदर्पणे ३ परिच्छेदः ॥

भयानकः, त्रि, (भी + आनकः ।) भयङ्करः । इत्यमरः । १ । ७ । २० ॥ (यथा, भगवद्गीतायाम् । ११ । २७ ।

"वक्त्राणि ते त्वरमाणा विशन्ति
दंष्ट्राकरालानि भयानकानि ।
केचिद्विलग्ना दशनान्तरेषु
संदृश्यन्ते चूर्णितैरुत्तमाङ्गैः ॥"

भयापहः, पुं, (भयं अपहन्तीति । हन् + "अन्येभ्योऽपि दृश्यते ।" ३ । २ । १०१ । इति डः ।) राजा । इति त्रिकाण्डशेषः ॥ (भयनाशके, त्रि ॥)

भयावहः, त्रि, (आवहतीति । आ + वह् + अच् । भयस्यावहः इति ।) भयङ्करः । इति हेमचन्द्रः ॥ (तथा, भगवद्गीतायाम् । ३ । ३५ ।

"श्रेयान् स्वधर्म्मो विगुणः परधर्म्मात् स्वनुष्ठितात् ।
स्वधर्म्मे निधनं श्रेयः परधर्म्मो भयावहः ॥")

भरः, पुं, (भरतीति । भृ + घञ्वाद्यच् ।) अतिशयः । इत्यमरः । १ । २ । ६६ ॥ (यथा, गीतगोविन्दे । ४१ ।

"पीनपयोधरभारभरेण हरिं परिरभ्य सरागम् ॥"

भारः । यथा, भागवते । १ । ३ । २३ ।

"एकोनविंशे विंशतिमे वृष्णिषु प्राप्य जन्मनी ।
रामकृष्णाविति भुवो भगवानहरद्भरम् ॥")

भरणकर्त्तरि, त्रि । (यथा, ऋग्वेदे ।१०।१००।२।

"भराय सु भरत भागमृत्वियं
प्र वायवे शुचिपे क्रन्ददिष्टये ॥"

"भराय सर्व्वेषां पोषकाय ।" इति तद्भाष्ये सायनः ॥ संग्रामः । यथा. ऋग्वेदे ।४।३८।५।

"उत स्मैनं वस्त्रमथिं न तायुं
मनुक्रोशन्ति क्षितयो भरेषु ॥"

"भरेषु संग्रामेषु ।" इति तद्भाष्ये सायनः ॥)

भरटः, पुं, (बिभर्त्तीति । भृ + "जनिदाच्युक्लृपदिशमिनमिभृञ्भ्य इत्वनिति ।" उणा० । ४ । १०४ । इति अटच् ।) कुम्भकारः । इत्युणादिकोषः ॥

भरणं, क्ली, (भ्रियतेऽनेनेति । भृ + करणे ल्युट् ।) वेतनम् । भृतिः । इति मेदिनी । णे, ६८ ॥ (भृ + भावे ल्युट् ।) पोषणम् । यथा,—

"भरणं पोष्यवर्गस्य प्रशस्तं स्वर्गसाधनम् ।
नरकं पीड़ने चास्य तस्मादयत्नेन तं भरेत् ॥"

इति दायभागः ॥

भरणः, पुं, (भरतीति । भृ + ल्यु ।) भरणीनक्षत्रम् । इति शब्दरत्नावली ॥

भरणी, स्त्री, (भरण + गौरादित्वात् ङीष् ।) धात्रीकन्या । इति मेदिनी । णी, ६८ ॥ अश्विन्यादिसप्तविंशतिनक्षत्रान्तर्गतद्वितीयनक्षत्रम् । तत्पर्य्यायः । यमदैवता २ । इति हेमचन्द्रः ॥ सा तारकात्रयमितत्रिकोणाकृतिः । तस्या अधिष्ठात्री दैवता यमः । यथा,—

"तारकात्रयमिते त्रिकोणके
मध्यगे दिविषदध्वनो यमे ।
पङ्क्तजाच्छिगणिताः क्रुलीरतः
सायकाक्षिभुजसंख्यकाः कलाः ॥

दं ३ । ४५ । इति ज्योतिस्तत्त्वम् ॥ तत्र जातफलम् ।

"सदाप्रकीर्त्तिर्हि महाप्रवादो
नानाधिनोदेषु विनीतकालः ।
चले विलासी चपलः खलः स्यात्
प्राणिप्रणीतो भरणीषु जातः ॥"

इति कोष्ठीप्रदीपः ॥

भरणीभूः, पुं, (भरणी भूरुत्पत्तिस्थानं यस्य।) राहुग्रहः। इति हेमचन्द्रः॥

भरणीयः, त्रि, भरणयोग्यः। पोष्यः। भृघातोः कर्म्मणि अनीयप्रत्ययेन निष्पन्नः॥ (यथा, महाभारते। ५। १५०। १७।

"सर्व्वं भवतु ते राज्यं पञ्च ग्रामान् विसर्ज्जय। अवश्यं भरणीया हि पितुस्ते राजसत्तम!॥")

भरण्डः, पुं, (बिभर्त्तीति। भृ+"अण्डनृक्षरृभृ-दृजः।" उणा०। १। १२८। इति अण्डन्।) स्वामी। । भूपालः। वृषः। इत्युणादिकोषः॥ भूः। क्षमिः। इति संक्षिप्तसारोणादिवृत्तिः॥

भरण्यं, क्ली, (भरणे साधु।"तत्र साधुः।"४। ४। ९८। इति यत्।) मूल्यम्। वेतनम्। इत्यमरः। २। १०। ३१॥

भरण्यभुक्, त्रि, (भरण्यं वेतनं भुनक्ति इति। भुज्+क्विप्।) कर्म्मकरः। मूल्यं गृहीत्वा कर्म्मकारकः। इत्यमरः। ३। १। १६॥

भरण्या, स्त्री, (भरण्य+अजादित्वात् टाप्।) वेतनम्। इत्यमरटीकायां स्वामी॥

भरण्याजा, स्त्री, (भरण्या आजा आख्या यस्याः।) पर्व्वपुष्पी। इति शब्दचन्द्रिका॥ रामदूतीति ख्याता॥

भरण्युः, पुं, (कण्ड्वादिगणीयभरण्यधातुः। ततो बाहुलकात् उण्।) शरण्युः। मित्रम्। इति शब्दमाला॥ अग्निः। चन्द्रमाः। ईश्वरः। इति संक्षिप्तसारोणादिवृत्तिः॥

भरतः, पुं, (बिभर्त्ति स्वाङ्गमिति। बिभर्त्ति लोकानिति वा। भृ+"भृञ्जिधारिसहितनिदीङ्भ्यः कतच्।" उणा० ३। ११०। इति अतच्।) नाट्यशास्त्रम्। सुन्निविशेषः। स तु अलङ्कारादिशास्त्रस्य सूत्रकर्त्ता। (भरतस्य शिष्यः। तस्येदमित्यण्। अणो लुक्।) नटः। रामानुजः। दौष्मन्तिः। इति मेदिनी। ते, १३७-३८॥ शबरः। तन्तुवायः। इति विश्वः॥ क्षेत्रम्। भरतात्मजः। इति हेमचन्द्रः॥ दुष्मन्तराजपुत्रभरतस्य पर्य्यायः। शाकुन्तलेयः २ दौष्मन्तिः ३ सर्व्वदमनः ४। इति त्रिकाण्डशेषः॥ यस्यत्रिंशच्छतमश्वमेधं क्रतवान्। पञ्चाशद्भालसूर्य्यं अश्वमन्यान् नानाविधान् यज्ञानकरोत्। सप्तत्रिंशतिसहस्रवत्सरानेकच्छत्रं राज्यं क्रतवान्। तस्योत्पत्तादिर्यथा,—

"दुष्मन्तो मृगयां यातः कण्वाश्रमपदं गतः। लतार्यौनां स्वप्रभया मरुत्यन्तीं रमामिव॥ विलोक्य सहसा मुमुहे दैवमायामिव स्त्रियम्। बभाषे तां वरारोहां भद्रैः कतिपयैर्वृतः॥ तद्दर्शनप्रमुदितः संनिरुद्धपरिश्रमः। पप्रच्छ कामसन्तप्तः प्रहसन् श्लक्ष्णया गिरा॥ का त्वं कमलपत्राक्षि! कस्यासि हृदयङ्गमे!। किं सिध्यिकीर्षितं त्वत्र भवत्या निर्ज्जने वने॥ यत्नं राजन्यकन्यायां देवार्हं त्वां सुमध्यमे!। न हि चेतः पौरवाणामधर्म्मे रमते क्वचित्॥

श्रीशकुन्तलोवाच।

विश्वामित्रात्मजेवाहं त्यक्ता मेनकया वने। वेदेतद्भगवान् कण्वो वीर! किं करवाम ते॥ आस्तां क्षरविन्दाक्ष! गृह्यतामर्घ्य इत्यपि नः। भुज्यन्तां सन्ति नीवारा उह्यतां यदि रोचते॥

श्रीदुष्मन्त उवाच।

उपपन्नमिदं सुभ्रु! जातायाः कुशिकान्वये। स्वयं हि वृणुते राज्ञां कन्यका सदृशं वरम्॥ ओमित्युक्ते यथाधर्म्ममुपयेमे शकुन्तलाम्। गान्धर्व्वविधिना राजा देशकालविधानवित्॥ अथोचवीर्य्यो राजर्षिर्महिष्यां वीर्य्यमादधे। श्वोभूते स्वपुरं यातः कालेनासूत सा सुतम्॥ कण्वः कुमारस्य वने चक्रे समुचिताः क्रियाः। वव्रे स्वगेन्द्र तरसा क्रीड़ति स्म स बालकः॥ तं दुरत्यविक्रान्तमादाय प्रमदोत्तमा। हरेरंशांशसम्भूतं भर्त्तुरन्तिकमागमत्॥ यदा न जगृहे राजा भार्य्यापुत्रावनिन्दितौ। श्रृण्वतां सर्व्वभूतानां खे वागाहाशरीरिणी॥ माता भस्त्रा पितुः पुत्रो येन जातः स एव सः। भरस्व पुत्रं दुष्मन्त! मावमंस्थाः शकुन्तलाम्॥ रेतोधाः पुत्रो नयति नरदेव! यमक्षयात्। त्वन्नास्य धाता गर्भस्य सत्यमाह शकुन्तला॥ पितर्य्युपरते सोऽपि चक्रवर्त्ती महायशाः। महिमा गीयते तस्य हरेरंशसवो भुवि॥ चक्रं दक्षिणहस्तेऽस्य पद्मकोषोऽस्य पादयोः। ईजे महाभिषेकेण सोऽभिषिक्तोऽधिराड्विभुः॥ पञ्चपञ्चाशता मेध्यैर्गङ्गायामनु वाजिभिः। मामतेयं पुरोधाय यमुनामनु च प्रभुः॥ अष्टसप्ततिमेध्याश्वान् ववन्व प्रददद्वसु। भरतस्य हि दौष्मन्तेरग्निः साचीगुणे चितः॥ सहस्रं बद्धपो यस्मिन् ब्राह्मणा गा विभेजिरे। त्रयस्त्रिंशच्छतं त्वश्वान् बद्धा विस्मापयन् नृपान्॥ दौष्मन्तिरत्यगाच्चायां देवानां गुरुमाययौ। शतानि शुक्लदतः कृष्णान् हिरण्येन परीवृतान्॥ ददान् कर्म्मणि मघवन् नियुतानि चतुर्दश। भरतस्य महत् कर्म्म न पूर्व्वे नापरे नृपाः॥ नैवापूर्णैव प्राप्नुवन्ति बाहुभ्यां त्रिदिवं यथा। किरातहूनान् यवनान् पौण्ड्रान् कङ्कान् खशान्छकान्॥ अन्ध्रान्ध्रमण्डपृथांश्चाहन् म्लेच्छान् दिग्विजये खिलान्। जित्वा पुरासुरा देवान् ये रसौकांसि भेजिरे॥ देवस्त्रियो रसां नीताः प्रागिभिः पुनराहरत्। सर्व्वान् कामान् दुदुहतुः प्रजानां तस्य रोदसी॥ समास्त्रिनवसाहस्रीर्दिक्षु चक्रमवर्त्तयत्। ससम्राट् लोकपालाख्यमैश्वर्य्यमधिराट्श्रियम्॥ चक्रञ्चास्खलितं प्राणान्त्यजेत्वपरराम ह। तस्यासन् नृप! वैदर्भ्यः पत्न्यस्तिस्रः सुसम्मताः। यासूत्स्यागमयान् पुत्रान्नानुरूपा इतीरिते॥"

इति श्रीभागवते ९ स्कन्धे २० अध्यायः॥

ऋषभदेवात् इन्द्रदत्तायन्यां कन्यायां जातभरतपुत्रान्तर्गतश्रेष्ठपुत्रः। यथा। "ऋषभं भगवान्

ऋषभदेवः स्वं वर्षं कर्म्मक्षेत्रमनुमन्यमानः पुत्रैर्शितगुरुकुलवासो लब्धवरैर्गुरुभिरनुज्ञातो राज्यं मेधिनां धर्म्मानननुशिक्षमाणो जयन्तामित्र दत्तायासुभयविधं कर्म्म समाम्नायमभियुञ्जानो जानामात्मसमानानां शतं जनयामास। येषां खलु महायोगी भरतो ज्येष्ठः श्रेष्ठगुण आसीद् येनेदं वर्षं भारतमिति व्यपदिशन्ति।" इति श्रीभागवते ५ स्कन्धे ४ अध्यायः॥ ॥ पायसपुत्रः। यथा,—

"पावनो लौकिको ह्यग्निः प्रथमो ब्राह्मणः सुतः। ब्रह्मौदनाग्निस्तत्पुत्रो भरतो नाम विश्रुतः॥"

इति मात्स्ये अग्निवंशो नाम ४८ अध्यायः। रामानुजभरतस्य जन्म यथा,—

"भरतो नाम कैकेय्यां जज्ञे सत्यपराक्रमः। साक्षाद्विष्णोश्चतुर्भागः सर्व्वैः समुदितो गुणैः॥"

तस्यानुगतः शत्रुघ्नः। यथा,—

"भरतस्यापि शत्रुघ्नो लक्ष्मणावरजो हि सः। प्राणैः प्रियतरो नित्यं तस्य चासीत्तथा प्रियः॥"

स कुशध्वजकन्यां माण्डवीं परिणीतवान्। यथा,

"भ्राता यवीयान् धर्म्मज्ञ एष राजा कुशध्वजः। अस्य धर्म्मात्मनो राजन्! रूपेणाप्रतिमं भुवि। सुताद्वयं नरश्रेष्ठ! पत्न्यर्थं वरयामहे। तमेवमुक्त्वा जनको भरतस्याभ्यभाषत। गृहाण पाणिं माण्डव्याः पाणिना रघुनन्दन!॥"

स नन्दिग्रामे राज्यं कृतवान्। यथा,—

"सवल्कलजटाधारी मुनिवेशधरः प्रभुः। नन्दिग्रामेऽवसद्वीरः ससैन्यो भरतस्तदा। सबालव्यजनं छत्रं धारयामास स स्वयम्। भरतः शासनं सर्व्वं पादुकाभ्यां निवेदयन्। तनस्तु भरतः श्रीमानभिषिच्यार्य्यपादुके। तदधीनस्तदा राज्यं कारयामास सर्व्वदा॥"

इति रामायणे बालकाण्डे। १८। ७२। ४१ अध्यायः। अयोध्याकाण्डे २४ अध्यायः। तस्य द्वौ पुत्रौ। यथा,—

"भरतस्यात्मजौ वीरौ तक्षः पुष्कल एव च। मातुलेन सगुप्तौ तु धर्म्मेण तुसमाहितौ। भरतस्याग्रतः कृत्वा कुमारौ सबलाङ्गदौ। निहत्य गन्धर्व्वसुतान् दे पुरे विभजिष्यतः॥"

इति रामायणे उत्तरकाण्डे १०१ अध्यायः।

भरतखण्डं, क्ली, भारतवर्षान्तर्गतकुमारिकाखण्डम्। यथा,—

"कुमारिकेति विख्याता यस्या नाम्ना प्रकल्पितं। इदं कुमारिकाखण्डं चतुर्वर्गफलप्रदम्। यथा कृतावनीयत्व नानायामादिकल्पना। इदं भरतखण्डस्य यथा सम्यक् प्रकल्पितम्।"

इति स्कान्दे कुमारिकाखण्डे भूसंस्थितिनामाध्यायः॥

भरतपुत्रकः, पुं, (भरतस्य नाट्यशास्त्रप्रवेतुः पुत्रकः।) नटः। इति हेमचन्द्रः॥

भरतप्रसः, स्त्री, (प्रसूते इति। प्र+सू+क्विप्। प्रसः। भरतस्य प्रसः।) कैकयी। इति शब्दरत्नावली॥

भरताग्रजः, पुं, (भरतस्य अग्रजः।) श्रीरामचन्द्रः। यथा, वोपदेवः।
"ग्रीते स चित्तशयने मम मोनकूर्म्मे-
कोलोऽभवन्नृहरिवामनजामदग्न्याः।
योऽभूद्बभूव भरताग्रजलक्ष्मणब्रुद्धः
कल्की सताश्च भविता प्रहरिष्यतेऽरीन्॥"

भरथः, पुं, (विभर्त्तीति। भृञ्+"भृञश्चित्।" उणा० ३।११५। इति अथप्रत्ययः। स च चित्।) लोकपालः। इत्युणादिकोषः॥

भरद्वाजः, पुं, (द्वाभ्यां जायते इति। जन्+डः। ततः पृषोदरादित्वात् द्वाजः सङ्करः। भियते भरद्भिरिति। भृ+अप्। भरः। भरद्वासौ द्वाजश्चेति कर्म्मधारयः।) मुनिविशेषः। स च उतथ्यपत्न्यां ममतायां बृहस्पतिवीर्य्याज्जातः। तस्य जन्मविवरणं यथा। "ततोऽस्य वितथे पुत्रजन्मनि पुत्रार्थिने मरुत्सोमयाजिने दीर्घतमसा पार्ष्ण्याघातात्तद्बृहस्पतिवीर्य्यादुतथ्यपत्नी-ममतासमुत्पन्नो भरद्वाजाख्यो नाम पुत्रो मरुद्भिर्दत्तः। अस्यापि नामनिर्व्वचनश्लोकः पठ्यते।
'मूढ़े भर द्वाजमिमं भर द्वाजं बृहस्पते!।
यातौ यदुक्त्वा पितरौ भरद्वाजस्ततस्त्वयम्॥' इति।
भरद्वाजश्च तस्य वितथे पुत्रजन्मनि मरुद्भिर्दत्तो वितथसंज्ञामवाप॥"* अस्य टीका। वितथे अर्थे सति। अत्रैवमितिहासः। बृहस्पतेरग्रजस्योतथ्यस्य ममताख्या पत्नी गर्भिण्यासीत्। तस्यां बृहस्पतिः कामाभिभूतो वीर्य्यं यक्षजत्। तच्च गर्भं प्रविशद्गर्भस्थेन स्थानसङ्कोचभयात् पार्ष्णिप्रहारेणापास्तं बहिः पतितमपि अमोघवीर्य्यतया बृहस्पतेर्भरद्वाजनामपुत्रोऽभूत्। गर्भस्थश्च बृहस्पतिना तस्मादेवापराधादन्धो भवेति श्रमो दीर्घतमा नामाभवत्। तत्र भरद्वाजनामनिरुक्तिपरः ततुपित्रोर्विवादकरोऽयं श्लोको देवैः पठितः। हे मूढ़े ममते द्वाजं द्वाभ्यामावाभ्यां जातमिमं पुत्रं त्वं भर रक्ष। एवं बृहस्पतिनोक्तेन ममता तमाह हे बृहस्पते! द्वाजं द्वाभ्यां जातमिममेकाकिनी किमित्यहं भरिष्यामि। त्वमिमं भरेति परस्परशुक्ला तं पुत्रं त्यक्त्वा यस्मात् पितरौ ममताबृहस्पती ततो यातौ। ततो भरद्वाजाख्योऽयम्। पाठान्तरे एवं विवदमानौ। यद्दुःखात् यन्निमित्ताद् दुःखात् पितरौ यातावित्यर्थः। तदेवं ताभ्यां त्यक्तो मरुद्भिर्भृतः। मरुत्सोमाख्येन च यागेनाराधितैर्मरुद्भिस्तस्य वितथे पुत्रजन्मनि सति दत्तत्वाद्वितथसंज्ञाभावाप। इति विष्णुपुराणे ४ अंशे १९ अध्यायः॥ * ॥
(द्वादशद्वापरेऽसावेव व्यासः। यथा, देवीभागवते। १।३।२६।
"एकादशेऽथ त्रिवृषो भरद्वाजस्ततःपरम्।
त्रयोदशे चान्तरिक्षो धर्म्मश्चापि चतुर्दशे॥"
यथा च भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।
"रोगाः कार्श्यकरा बलक्षयकरा देहस्य चेष्टाहराः

दृष्टा इन्द्रियशक्तिसंक्षयकराः सर्व्वाङ्गपीड़ाकराः।
धर्म्मार्थाखिलकाममुक्तिषु महाविघ्नस्वरूपा बलात्
प्राणानाशु हरन्ति सन्ति यदि ते क्षेमं कुतः प्राणिनाम्॥
तत्तेषां प्रशमाय कञ्चन विधिञ्चिन्वन्ती भवद्भिर्बुधैर्योग्यैरित्यभिधाय संसदि भरद्वाजं मुनिं तेऽब्रुवन्।
त्वं योग्यो भगवन्! सहस्रनयनं याचस्व लब्धुं क्रमादायुर्व्वेदमधीत्य यं गदभयाक्रुक्ता भवामो वयम्॥")

पक्षिविशेषः। भारुइ इति भाषा। तत्पर्य्यायः। व्याघ्राटः २। इत्यमरः। २।५।१५॥ भरद्वालकः ३। इति शब्दरत्नावली॥ (गोत्रभेदः। यथा, मनौ।
"प्राङ्गिरस्याः काश्यपश्चैव वात्सः सावर्णकस्तथा।
भरद्वाजो गौतमश्च सौकालीनस्तथापरः॥"
इत्यादि गोत्रशब्दे द्रष्टव्यम्॥ भृ+शल।
भरत्+वाजः। संभ्रियमाणहविर्लक्षणान्ने यजमानादौ, त्रि। यथा, ऋग्वेदे। १।११६।१८।
"यदयातं दिवोदासाय वर्त्तिर्भरद्वाजायाश्विना हयन्ता॥"
"भरद्वाजाय संभ्रियमाणहविर्लक्षणान्नाय यजमानाय।" इति तद्भाष्ये सायनाचार्य्यः॥)

भरद्वाजकः, पुं, (भरद्वाज+स्वार्थे कन्।) व्याघ्राटपक्षी। इति शब्दरत्नावली॥

भरिणी, स्त्री, (भरो विभर्त्ति हरतीति। भृ+णिनिः। गौरादित्वात् ङीष्। पृषोदरादित्वात् पूर्व्वादीर्घे साधुः।) हरिद्वर्णः। इत्युणादिकोषः॥

भरित्र, त्रि, (हरितः। पृषोदरादित्वात् हस्य भः।) हरिद्वर्णः। इत्युणादिकोषः॥ पुंसः। भारयुक्तः। भरोऽस्य जात इत्यर्थे इतप्रत्ययेन निष्पन्नः॥

भरिमा, [न्] पुं, (भृ+"हृभृहसृस्तृभ्य इमनिच्।" उणा० ४।१४७। इति भावे इमनिच्।) भरणम्। इत्युणादिकोषः॥ (भ्रियते इति। कुटुम्बः। इत्यव्वुलदत्तः॥)

भरुः, पुं, (भरति विभर्त्ति जगदिति। भृञ् भरणे+"भृञ्दृशीङ्चरित्सरितनिधनिमिमसृजिभ्य उः।" उणा० १।७। इति उः।) विष्णुः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः। ससुरः। स्वामी। इति संक्षिप्तसारोणादिवृत्तिः॥ स्वर्णम्। शिवः। इति मेदिनी। रे, ६६॥

भरुजः, पुं, (भिनत्ति शब्देन रुजतीति। रुज्+क।) क्षुद्रशृगालः। इति हेमचन्द्रः॥

भरुटवं, क्ली, (भृ+वाहुलकात् उट। संज्ञायां कन्।) श्रोणाभिवम्। इति हेमचन्द्रः॥

भर्गः, पुं, (भृज्यते कामादिरनेनेति। भृज्+"हृजश्च।" इति घप्।) शिवः। इत्यमरः॥ (यथा, कथासरित्सागरे। १।३४।
"प्रत्युवाच ततो भर्गः पुरा दक्षप्रजापतेः।
देवि! त्वञ्च तथान्याश्च वभ्रोरजायन्त कन्यकाः।
स मह्यं भवतीं प्रादात् धर्म्मादिभ्योऽपराश्च ताः॥
वीतिहोत्रस्य पुत्रः। यथा, भागवते।६।१७।६।
"वीतिहोत्रोऽस्य भर्गोऽतो भार्गभूमिरभून्नृप!॥")
आदित्यान्तर्गततेजः। यथा,—
"आदित्यान्तर्गतं वर्च्चो भर्गाख्यं तन्मुनिभिः।
जन्ममृत्युविनाशाय दुःखस्य चिन्तयस्व च॥
ध्यानेन पुरुषो यस्य द्रष्टव्यः सूर्य्यमण्डले॥"
इत्याह्निकतत्त्वम्॥

भर्गः, [स्] क्ली, (भर्जते इति। भृज भर्जने+"अर्ज्जिदृशिकम्यमिभ्यः कुच्च।" उणा० ४।२५५। इति असुन् कवर्गश्चान्तादेशः।) ज्योतिः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ (यथा, ऋग्वेदे। ३।६२।१०।
"तत् सवितुर्वरेण्यं भर्गो देवस्य धीमहि॥")

भर्ग्यः, पुं, (भृज्+"ऋहलोर्ण्यत्।" ३।१।१२४। इति ण्यत्। चर्जोरिति कुत्वम्।) भर्गः। इत्यमरटीकायां भरतरायमुकुटौ॥

भर्जनं, क्ली, (भृज्+ल्युट्।) भृष्टिः। इति शब्दमाला॥ भाजा इति भाषा॥

भर्त्तव्यं, त्रि, (भृ+तव्य।) भरणीयम्। पोषणीयम्। यथा, दायभागटीकाधृतवचनम्।
"वृद्धौ च मातापितरौ साध्वी भार्य्या सुतः शिशुः।
अप्यकार्य्यशतं कृत्वा भर्त्तव्या मनुरब्रवीत्॥"

भर्त्ता, [र्त्तृ] पुं, (विभर्त्ति पुष्णाति पालयति धारयतीति वा। भृञ् धारणपोषणयोः+"तृच् वृन्दौ।"३।१।१३३। इति तृच्।) अधिपतिः। (यथा, रघौ। १।७४।
"सोऽपश्यत् प्रणिधानेन सन्ततेः स्वमकारणम्।
भावितात्मा सुतो भर्त्तुरर्घेनं प्रत्यबोधयत्॥")
तत्पर्य्यायः। अधिपः २ ईशः ३ नेता ४ परिवृढः ५ अधिभूः ६ पतिः ७ इन्द्रः ८ स्वामी ९ नाथः १० आर्य्यः ११ प्रभुः १२ ईश्वरः १३ विभुः १४ ईशिता १५ इनः १६ नायकः १७। इति हेमचन्द्रः॥ (विष्णुः। प्रपञ्चाधिष्ठानत्वेन भरणात्॥) धानरि पोषरि च त्रि। इति मेदिनी। ते, ३८॥ (यथा, ऋग्वेदे। १०।२२।३।
"भर्त्ता वचस्य दृक्षोः पिता पुत्रमिव प्रियम्॥")
विवाहितायाः पतिः। यथा, महाभारते।१।१०४।२८।
"भार्य्याया भरणाद्भर्त्ता पालनाच्च पतिः स्मृतः।
अहं त्वां भरणं कृत्वा भार्य्यत्वं वसुतं सदा।
नित्यकालं अमेणार्त्ता न भरेयं महातपः॥")

भर्तृघ्नी, स्त्री, (भर्त्तारं हन्तीति। हन्+टक्। ङीप्।) पतिघातिनी। इति महाभारतम्।

भर्तृदारकः, पुं, (भर्त्ता म्रियते इति। दॄ आदरे+कर्म्मणि घञ्। ततः स्वार्थे कः।) नाट्योक्तौ युवराजः। इत्यमरः। १।७।१२॥

भर्तृदारिका, स्त्री, (भर्तृदारक+टापि अत इत्वम्।) नाट्योक्तौ राजसुता। इत्यमरः। १।७।१३॥

भर्तृहरिः, पुं, स्वनामख्यातः काव्यकर्त्ता राजविशेषः। इति जटाधरः। स च विक्रमादित्यभ्राता॥ (अयमेव गन्धर्वसेनात् दासीगर्भजातः। यथा, राजावल्याम्। ४। १-२।
"अथ कालेन कियता रममाणो महीतले।
दास्यां गन्धर्वसेनस्तु पुत्रमेकमजीजनत्॥
तस्य भर्तृहरीत्येव नाम चक्रे महामतिः।")

भर्त्स, क ड च भर्त्सै। इति कविकल्पद्रुमः॥ (चुरा०-आत्म०-उभ० च-सक०-सेट्।) रेफयुक्तः। दन्त्यवर्णोपधः। भर्त्सो भर्त्सनम्। भर्त्सनन्त्वपकारगीरित्यमरः। १। ६। १४॥ क ड, भर्त्सयते खलं राजा। च, भर्त्सयति भर्त्सयते। अयमात्मनेपदीत्यन्ये। कदाचित् परस्मैपदार्थो चकारः। इति दुर्गादासः॥

भर्त्सनं, क्ली, (भर्त्स+ल्युट्।) अपकारगीः। इत्यमरः। १। ६। १४॥ चौरोऽसि त्वां घातयिष्यामि इत्याद्यपकारार्थं वचनम्। इति भरतः॥ तत्पर्य्यायः। कुत्सा २ निन्दा ३ जुगुप्सा ४ गर्हा ५ गर्हणम् ६ निन्दनम् ७ कुत्सनम् ८ परिवादः ९ परीवादः १० जुगुप्सनम् ११ व्याक्षेपः १२ अवर्णः १३ निर्व्वादः १४ अपक्रोशः १५। इति शब्दरत्नावली॥ (भर्त्स+युच्। भर्त्सनाप्यत्रार्थे। यथा, कथासरित्सागरे। ३२। ५३।
"इत्यादि भर्त्सनां कृत्वा गच्छद्भिस्तैः समं स च।
विबुधैः प्रययौ विष्णुदत्तलक्ष्मीं बभूव च॥")

भर्त्सपत्रिका, स्त्री, (भर्त्स्यते स्मैति। भर्त्स+घञ्। भर्त्सं निन्दितं पत्रं यस्याः। कप्। टाप्। अत इत्वम्।) महानीली। इति राजनिर्घण्टः॥ (भर्त्स्यपत्रिकापि पाठः॥)

भर्म्म क्ली, (भ्रियतेऽनेनेति। भृ+बाहुलकात् मन्।) स्वर्णम्। भृतिः। नाभिः। इति द्विरूपकोषः।

भर्म्मन्, [न्] क्ली. (भरति भ्रियते वेति। भृञ्+"सर्व्वधातुभ्यो मनिन्।" उणा० ४।१४४। इति मनिन्।) वेतनम्। इति हेमचन्द्रः॥ स्वर्णम्। भृत्तूरम्। इत्यमरः। २।६।८४॥ नाभिः। इति त्रिकाण्डः॥ (भरणम्। यथा, ऋग्वेदे। १०।८८।१।
"इयिष्यन्मधरं यविष्ठ दिविमृग्वाहनं
वृत्रमर्यो।
तस्य भर्म्मंये भुवनाय देवा धर्म्मंये कं स्वधया
पप्रथन्त॥"
"भर्म्मंये भरणाय।" इति तद्भाष्ये सायनः॥)

भर्म्मण्या, स्त्री, (भर्म्मणि भरणे साधुरिति। भर्म्मन्+यत्। टाप्।) वेतनम्। इति हेमचन्द्रः।

भर्म्मि, [न्] त्रि। इति कविकल्पद्रुमः॥ (भ्वा०-परस्मै०-सक०-सेट्।) रेफोपधः। भर्म्मति। इति दुर्गादासः।

भर्व्व, हिंसे। इति कविकल्पद्रुमः॥ (भ्वा० पर०-सक०-सेट्।) भर्व्वति। अन्तःस्थवान्तोऽयम्। इति दुर्गादासः॥

भल, क ड निरूपणे। इति कविकल्पद्रुमः॥ (चुरा०-आत्म०-सक०-सेट्।) क ड, भालयते। इति दुर्गादासः॥

भल, ड दानवधनिरूपणेषु। इति कविकल्पद्रुमः॥ (भ्वा० आत्म०-सक०-सेट्।) ड, भलते। इति दुर्गादासः॥

भलता, स्त्री, (भातीति। भा+बाहुलकात् डः। भा चासौ लता चेति कर्म्मधारयः।) राजबला। इति शब्दरत्नावली॥

भलन्दनः, पुं, कान्यकुब्जदेशीयनृपविशेषः। यथा,
"कलावती कान्यकुब्जे बभूवायोनिसम्भवा।
जातिस्मरा महासाध्वी सुन्दरी कमला कला॥
कान्यकुब्जे नृपश्रेष्ठो भलन्दन उरुक्रमः।
स तां संप्राप योगान्ते यज्ञकुण्डसमुत्थिताम्॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १७ अध्यायः॥

भल्ल, ड दानवधनिरूपणेषु। इति कविकल्पद्रुमः॥ (भ्वा० आत्म०-सक०-सेट्।) लघ्वन्तः। ड, भल्लते। इति दुर्गादासः॥

भल्लः, पुं, (भल्लते इति। भल्ल+अच्।) भल्लूकः। इत्यमरः। २। ५। ४॥ (देशभेदः। यथा, बृहत्संहितायाम्। १४। ३०।
"ब्रह्मपुरदार्व्वाभीर-
वनराज्यकिरातचीनकौलिन्दाः।
भल्लाधमोलजटासुर-
कुनटखसखोधकुक्षिकाख्याः॥")

भल्लः, पुं क्ली, (भल्लते हन्तीति। भल्ल+अच्।) शस्त्रभेदः। इति मेदिनी शब्दमाला च। भाला इति भाषा॥ (यथा महाभारते। १।१४०।६।
"प्रगाढदृढमुष्टित्वे लाघवे वेधने तथा।
क्षुरनाराचभल्लानां विपाटानाञ्च तत्त्ववित्॥"
अनेन दृढविद्धशल्योद्धरणमुद्धरति। यथा,—
"स च शल्योद्धरणकः प्रोच्यते वैद्यकागमे।
नाराचवाणशूलासिभल्ल. कुन्तेषु तोमरे॥"
इति हारीते प्रथमे स्थाने द्वितीयेऽध्याये॥)

भल्लकः, पुं, (भल्ल+स्वार्थे कन्।) भल्लूकः। इति द्विरूपकोषः॥ (पक्षिभेदः। यथा, भागवते। ३। १०। २३।
"काकगृध्रबकश्येनभासभल्लकबर्हिणः।
हंससारसचक्राङ्काः कोलूकाश्च खगाः॥")

भल्लगुक्की, स्त्री, (भल्लस्य गुच्छमिव पृथ्वी यस्याः।) गवेधुका। इति शब्दचन्द्रिका॥ गोरक्षतण्डुला इति ख्याता॥

भल्लाटं, क्ली, ग्रामिष्ठचराङ्गपुरम्। यथा,—
"सेनाग्रैः परिवृतः कल्किर्नगरायगः प्रभुः।
भल्लाटनगरं प्रायात् सल्लक्षक्ष्मिपाहतः॥"
इति भविष्यपुराणे। २२ अध्यायः॥
(दक्षसैन्यस्य पूर्व्वे, पु। यथा, हरिवंशे। २०।७२।
"विक्रमसैन्यस्य पूर्व्वोऽभूत् दक्षसैन्यो महीपतिः।
भल्लाटो नलकूबरोऽभूद्दक्षिणेन इतः पुरा॥")

भल्लातः, पुं, (भल्लं भल्लास्त्रमिव अतति आकारं आपयतीति। अत+अच्।) भल्लातकवृक्षः। इति रत्नमाला॥ (यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।
"भल्लाताभावतश्चित्रं नलक्षेत्रोरभावतः॥")

भल्लातकः, पुं, (भल्ल इवातति इति। अत+कुन्। यद्वा, भल्लात+स्वार्थे कन्।) वृक्षविशेषः। भेला इति भाषा। तत्पर्य्यायः। अरुष्करः २ भल्लातः ३ श्रीवृक्षकः ४ वह्निनामा ५ वीरतरुः ६ अग्निकः ७ भूतनाशनः ८। इति रत्नमाला। भल्लातकी ९ अग्निसखी १० वीरवृक्षः ११। इत्यमरः॥ निर्दहनः १२ तपनः १३ अनलः १४ क्रमिघ्नः १५ श्रेयसीफलः १६ वातारिः १७ स्फोटबीजकः १८ पृथग्बीजः १९ धनुर्बीजः २० बीजपादपः २१ वह्निः २२। (यथा, सुश्रुते सूत्रस्थाने। ४६।
"उष्णोदकानुपानन्तु स्नेहानामथ शस्यते।
ऋते भल्लातकस्नेहात् स्नेहास्तौवरकात्तथा॥")
अस्य गुणाः। कटुत्वम्। तिक्तत्वम्। कषायत्वम्। उष्णत्वम्। कृमिकफवातोदरानाहमेहदुर्नामनाशित्वञ्च। तत्फलगुणाः। कषायत्वम्। मधुरत्वम्। कोष्णत्वम्। कफार्शित्रमन्थवासनाह विबन्धशूलजठराध्मानकृमिनाशित्वञ्च। तन्मज्जगुणाः। त्रिदोषघ्न दाहशमनत्वम्। पित्तापहत्वम्। तर्पणत्वम्। वातारोचकहारित्वम्। दीपिजनकत्वम्। मित्तनाशित्वञ्च। इति राज निर्घण्टः॥ अपि च।
"भल्लातकं त्रिषु प्रोक्तमरुष्कं रुष्करोऽग्निकः।
तथैवाग्निसखो भल्लो वीरवृक्षश्च शोफघ्नः॥
भल्लातकफलं पक्वं स्वादुपाकरसं लघु।
कषायं प्राचनं स्निग्धं तीक्ष्णोष्णं छेदि भेदनम्।
मेध्यं वह्निकरं हन्ति कफवातव्रणोदरम्।
कुष्ठार्शोग्रहणीगुल्मशोफानाहज्वरक्रमीन्॥
नव्यच्छा मधुरो दृष्यो वृंहणो वातपित्तहा।
वृत्तमारुष्करं स्वादु पित्तघ्नं केशमञ्जनम्॥
भल्लातकः कषायोष्णः शुक्लो मधुरो लघुः।
वातघ्नो गुदरानाहकुष्ठार्शोग्रहणीगदान्॥
हन्ति गुल्मज्वरं चित्रवह्निमान्यकृमिव्रणान्॥"
इति भावप्रकाशः॥

अन्यच्च।
"भल्लातकफलं स्निग्धं क्रिमिदुर्नामनाशनम्।
दन्त्यग्नेयकरं याहि कषायं मधुरञ्च तत्॥
भल्लातवृन्तं मधुरं कषायं वातकोपनम्॥"
इति राजवल्लभः॥

भल्लातकी, स्त्री, (भल्लातक+गौरादित्वात् ङीष्।) भल्लातकवृक्षः। इत्यमरः॥

भल्लिका, स्त्री, (भल्ल+अच्। स्वार्थे कन्। टाप्। अत इत्वम्।) भल्लातकः। इति शब्दचन्द्रिका॥

भल्ली, त्रि, (भल्ल+गौरादित्वात् ङीष्।) भल्लातकः। इति शब्दरत्नावली। (अस्याः पर्य्यायः।

"भल्लातकं चिपु प्रोक्तमरुष्कोऽरुष्करोऽग्निकः। तर्षेवाग्निमुखी भल्ली वीरवृक्षश्च शोफक्षत्॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

भल्लुकः, पुं, (भल्लुक+एषोदरादित्वात् हस्वः।) भालूकः। इत्यमरः॥

भल्लूकः, पुं. (भल्लते इति। भल्ल+"उलूकादयश्च।" उणा० ४। ४१। इति ऊकप्रत्ययेन साधुः।) ऋक्षविशेषः। भालूक इति भाषा। तत्पर्य्यायः। ऋक्षः २ भल्लः ३ सप्तास्यः ४ दुर्धर्षः ५ भल्लुकः ६ एकदृष्टिः ७ द्राक्षिष्ठः ८ दीर्घकेशः ९ चिरायुः १० दृशरः ११ दीर्घदर्शी १२। इति राजनिर्घण्टः॥ भालुकः १३ भालूकः १४ अक्षः १५ भल्लूकः १६ भीलुकः १७। इति शब्दरत्नावली॥ (यथा, महाभारते। १२। ११६। ६।
"सिंहव्याघ्रगणाः क्रूरा मत्ताश्चैव महागजाः। द्वीपिनः खड्गभल्लूका ये चान्ये भीमदर्शनाः॥"
कोशस्थप्राणिविशेषः। तद्यथा,—
"शृङ्गशृङ्गनखयुक्तिशल्यूकभल्लूकप्रभृतयः कोशस्थाः।"इति सुश्रुते सूत्रस्थाने ३९ अध्यायः॥)
श्वेतार्कप्रभेदः। (यथास्य पर्य्यायः।
"श्वेतार्को भूतपुष्पश्च पूतिदृष्टो सुरिन्दमः।
दीर्घदन्तश्च कट्फलो भल्लूकपुरटकोऽरुणः॥"
इति वैद्यकरत्नमाला॥)
कुक्कुरः। इति राजनिर्घण्टः॥

भवं, क्ली, (भवति भूयते वा। भू+अच् अप् वा।) भयम्। इति राजनिर्घण्टः॥ चालता। इति भाषा॥

भवः, पुं, (भूयते इति। भू+भावे अप्।) जन्म। (यथा, याज्ञवल्क्ये। ३। १६४।
"भवो जातिषु सर्व्वेषु प्रियाप्रियविपर्य्ययः॥"
भवत्यस्मादिति। भू+अपादाने अप्। शिवः। इत्यमरः॥ यथा, शतपथब्राह्मणे। ६।२।३।१५।
"तमब्रवीद् भवोऽसीति तद्यदस्य तन्नामाकरोत्पर्जन्यस्तद्रूपमभवत् पर्जन्यो वै भवः॥")
स च चलमूर्त्तिः। यथा,—
"भवाय चलमूर्त्तये नमः।"
इति पार्थिवशिवलिङ्गपूजाप्रयोगः॥
(भवति प्रभवत्यनेनेति। भू+अप्।) क्षेमः। (यथा, महाभारते। १। २२१। २८।
"को हि नाम भवेनार्थी साधुसेव समाचरेत्॥"
भवति उत्पद्यतेऽस्मिन्निति। भू+आधारे अप्।) संसारः। (यथा, मार्कण्डेये। १६। ७।
"अनघस्य तवैवेयं देवी सर्व्वभवस्थितिः॥")
सत्ता। प्राप्तिः। इति मेदिनी॥

भवकः, पुं, (भवतादिति। भू+ण्वुल्।) व्याघ्रीवंशकः। इति संक्षिप्तसारः॥

भवकक्षारः, पुं, (भवस्य वनस्य क्षारः क्षंसकारकः।) दावानलः। इति शब्दमाला॥

भवत्, त्रि, (भाति विद्यते इति। भा+उवतुप्रत्ययः।) युष्मदर्थम्। अत्र भाधातोर्उवतुप्रत्ययेन निष्पन्नम्। तस्य स्त्रिलिङ्गत्वे रूपं भवत् भवन्तौ भवतः॥ (यथा, मनौ। १२। ६७।
"चातुर्व्वर्ण्यं त्रयो लोका चत्वारश्चाश्रमाः पृथक्।
भूतं भवद्भविष्यच्च सर्व्वं वेदात् प्रसिध्यति॥")

भवती, स्त्री, (भवत्+ङीप्।) वाग्भेदः। स तु विधाक्तः। इति शब्दरत्नावली॥ दीप्तिमती। यथा। वाल्मीकिकृतगङ्गास्तोत्रम्।
"स्वर्गारोहणवेलयन्ति भवतीं भागीरथीं प्रार्थये॥"

भवदारु, क्ली, (भवार्थं भवप्रियं वा दारु।) देवदारुवृक्षः। इति राजनिर्घण्टः॥

भवदीयं, त्रि, (भवत्+"भवतष्ठक्छसौ।" ४।२। ११५। इति छस्।) भवत इदम्। युष्मत्सम्बन्धि। यथा, उद्भटे।
"श्रुत्वातिदूरं भवदीयकीर्त्तिं
कर्णौ च तृप्तौ न च चक्षुषी मे।
हृत्वेव वासं परिहर्त्तुमिच्छन्
समागतोऽहं तव दर्शनाय॥"
(यथा, भागवते। ६। १८। ३६।
"वयसा भवदीयेन रंस्ये कतिपयाः समाः॥")

भवनं, क्ली, (भवत्यस्मिन्निति। भू+अधिकरणे ल्युट्।) गृहम्। (यथा, मनौ। ११। १८।
"स त्वन्तु तं घटं प्राप्य प्रविश्य भवनं स्वकम्॥"
प्रासादः। यथा, महाभारते। ३।५४।१३।
"देवराजस्य भवनं विविशाते सुपूजितौ॥"
भू+भावे ल्युट्।) भावः। इति मेदिनी॥ (यथा, "ननु प्रागसतो घटस्य भवनं दृश्यते॥"
इति तार्किकाः॥)

भवनाशिनी, स्त्री, (भवं संसारं जन्मादिकं वा नाशयति उत्सारयति नाशयितुं शीलमस्येति वा। नश्+णिच्+णिनिः।) सरयूनदी। इति पुराणम्॥

भवनीयं, त्रि, (भवितुमर्हमिति। भू+अनीयर।) भवितव्यम्। भव्यम्। उत्पत्तार्हम्। इति मुग्धबोधव्याकरणम्॥

भवन्तः, पुं. (भवत्यत्रेति। भू+"तॄभूवहिवसीति।" उणा० ३।१२८। इति झच्। स च णिद्भवति।) कालभेदः। स तु वर्त्तमानः। इत्युणादिकोषः॥ (भान्ति इति। भा+उवतु प्रत्ययः।) भवच्छब्दस्य प्रथमाबहुवचनान्तरूपोऽप्ययम्॥ (यथा, महाभारते। ३। ५४। २।
"के वै भवन्तः कस्यासौ यस्याहं दूत ईप्सितः॥")

भवन्तिः, पुं, (भू+"सुवो झिच्।" उणा० ३। ५०। इति झिच्।) वर्त्तमानकालः। इत्युणादिकोषः संक्षिप्तसारोणादिवृत्तिश्च॥

भवभूतिः, पुं, (भवेन शिवेन भूतिरैश्वर्य्यादिकं यस्य भव एव भूतिर्यस्येति वा। शिवोपासन-

येवास्य विदाद्युत्पत्तिश्चात्वम्।) कविविशेषः स च भोजराजस्य पण्डितः। मालतीमाधवादिनाटककर्त्ता च। तत्पर्य्यायः। भूमगर्भः २। इति जटाधरः॥ (यथा, राजतरङ्गिण्याम्। ४। १४४।
"कविर्वाक्पतिराजश्रीभवभूत्यादिसेवितः॥"
भवस्य महादेवस्य भूतिरिति विग्रहे तु।) महादेवस्य ऐश्वर्य्यञ्च॥

भवरुत्, [द्] स्त्री, (भवे जन्मादिप्रदे संसारे रोदिति अर्त्तिनेति भवे जन्मान्ते रोदित्यनेन वेति। रुद्+क्विप्।) प्रेतपटहः। इति त्रिकाण्डशेषः॥

भवात्मजा, स्त्री, (भवस्य शिवस्य आत्मजेति।) मनसादेवी। इति शब्दमाला॥

भवाद्दृक्, भवाद्दृग्, भवाद्दृश्, [दृश्] त्रि, युष्मद्दृक्। भवानिव दृश्यते य इति युत्पत्त्या भवच्छब्दपूर्व्वकदृशधातोः कर्म्मणि क्विप्टक्सक्प्रत्ययेन निष्पन्नः। इति व्याकरणम्॥

भवानी, स्त्री, भवस्य भार्य्या। (भव+"इन्द्रवरुणभवशर्व्वेति।" ४। १। ४९। इति स्त्रियां ङीष् ततः आनुक् चागम इति।) दुर्गा। इत्यमरः। १।१।३१॥ एतन्नामकारणं यथा,—
"रुद्रो भवः समाख्यातो भवः संसारसागरः।
भवः कामस्तथा स्त्रिभवानी परिकीर्त्तिता॥"
इति देवीपुराणे ४५ अध्यायः॥
(यथा, हरिवंशे भविष्यपर्व्वणि। १६। ६।
"भवानी तत्र मे देव! परिचर्य्यां तदाभवत्॥")।

भवानीगुरुः, पुं, (भवान्याः शिवपत्न्या गुरुः पिता।) हिमालयपर्व्वतः। इति हेमचन्द्रः॥

भवाभीष्टः, पुं. (भवे अभीष्टः।) गुग्गुलुः। इति राजनिर्घण्टः॥

भवाब्धिः, पुं (भवः अब्धिरिवेत्युपमितसमासः भव एव अब्धिर्वा।) संसाररूपमसुद्रः। यथा,
"ध्येयं सदा परिभवघ्नमभीष्टदोहं
तीर्थास्पदं शिवविरिञ्चिनुतं शरण्यम्।
भृत्यार्त्तिहं प्रणतपालभवाब्धिपोतं
वन्दे महापुरुष! ते चरणारविन्दम्॥"
इति श्रीभागवते ११ स्कन्धे ५ अध्यायः॥

भवायना, स्त्री, (भवः शिव एवायनमाश्रयस्थलमस्याः। शिवशिरसि स्थितत्वादस्यास्तथात्वम्।) गङ्गा। इति शब्दरत्नावली॥ (भवायनी लोके॥)

भविकं, क्ली, (भवः प्रभव ऐश्वर्य्यादिकमित्यर्थः उत्पाद्यत्वेनास्यास्तीति ठन्।) मङ्गलम्। तद्वति च। इत्यमरः॥

भवितः, त्रि, (भवो मङ्गलं जातोऽस्येति तारकादित्वात् इतच्।) अतीतोत्पत्तिकः। भूतः इति जटाधरः॥

भवितव्यं, त्रि, भवनीयम्। भव्यम्। इति भविष्यत्काले कर्म्मणि भावे प्रवाहार्थेप्याद्यवयवकालार्थे च भूधातोस्तव्यप्रत्ययेन निष्पन्नम्। इति दाकारत्वम्॥ यथा, वह्निपुराणे।

"न भवद्भ्यामहं द्रोग्धो नायं राजापराध्यति।
भवितव्यमनेनैव येनाहं निधनं गतः॥"

भवितव्यता, स्त्री, (भवितव्य+भावे तल्।) भाग्यम्। इति घटाघरः॥ (यथा, कथासरित्सागरे। २७। ८६।

"तन्ममाप्यच्च तावत् त्वं कथयिष्याम्यहञ्च ते।
यदस्तु कोऽन्यथा कर्त्तुं शक्तो हि भवितव्यताम्॥")

भविता; [ऋ] त्रि, (भू+शीलार्थे तृच्।) भवनशीलः। इति भरतः॥ साधु भवनशीलः। इति सङ्क्षिप्तः। तत्पर्य्यायः। भूष्णुः २ भविष्णुः ३। इत्यमरः॥ (भविष्यदर्थेऽपि तृच्प्रत्ययः स्यात् यथा, मार्कण्डेये। २४। २६।

"नान्या भार्य्या भवित्रीति वर्ज्जयित्वा मदालसाम्।")

भविन्, पुं, (भवाय कार्य्यादिप्रकाशाय इनः सूर्य्यः इव। ततः पृषोदरादित्वात् साधुः।) कार्य्य कर्त्ता। इति त्रिकाण्डशेषः॥

विलः, पुं, (भू+"सलिकल्यनिमहिभड़िभण्डिग्रण्डिपिण्डितुण्डिकुकिभूभ्य इलच्।" उणा०। १। ५५। इलच्।) पिङ्गः। इति त्रिकाण्डशेषः। भयः। इति सिद्धान्तकौमुद्यामुणादिपादः॥

भविष्णुः, त्रि, (भू+"सुवच।" ३।२।१३८। इति इष्णुच्। भवतेर्धातोरुन्दसि विषये तच्छीलादिषु इष्णुच् प्रत्ययो भवतीति काशिका।) भविता। इत्यमरः॥

भविष्यः, त्रि, (भू+लट: सद्देति शृलस्यट् च ततो विभाषायां पृषोदरात् तस्य लोपः।) भविष्यत्कालः। इति हेमचन्द्रः॥ (यथा, हरिवंशे। ८१। २८।

"अयं भविष्ये कथितो भविष्यपुराणविद्भिर्द्विजैः॥")

पुराणविशेषे, क्ली। यथा,—

"चतुर्दशं भविष्यं स्यात्तथा पञ्चशतानि च॥"
इति श्रीभागवते १२ स्कन्धे १३ अः॥
(ग्रन्थविशेषे, क्ली॥)

भविष्यत्, त्रि, (भू+लटः शृलस्यट् च।) कालविशेषः। तस्य लक्षणम्॥ वर्त्तमानप्रागभावप्रतियोगित्वम्। इति सारमञ्जरी॥ वर्त्तमानकालोत्तरकालीनोत्पत्तिकत्वम्। इति शिरोमणिदीधितिगदाधरटीकाखण्डनम्॥ तत्पर्य्यायः। आगामुकम् २ अनागतम् ३ प्रगेतनम् ४ वर्त्स्यत् ५ पर्णेष्यमानम् ६ आगामि ७ भावि ८। इति राजनिर्घण्टः॥ अद्यतने भव्ये श्वो दूरभव्ये परश्वो। इति सांप्रदायिकः। यथा श्वो भविता वर्षान्तरे भविष्यति। इति दुर्गादासः॥

भव्य, क्ली, (भवतीति भूयते इति वा। भू+"भव्य गेयेति।" ३। १। ९८। इति यत्। भव्यादयः शब्दाः कर्त्तरि वा निपात्यन्ते। इति काशिका।) धनविशेषः। चालता इति भाषा। तत्पर्य्यायः। भवम् २ भावव्यम् ३ भावनम् ४ बलशोधनम् ५ लोमशकम् ६ पिच्छिलबीजम् ७। अस्य गुणाः। अम्लत्वम्। कटुत्वम्। उष्णत्वञ्च। वातस्य तस्य गुणः। वातकफापहत्वम्। पक्वस्य तस्य गुणः। मधुराम्लत्वम्। रुचिकारित्वम्। अमसूलहरत्वञ्च। इति राजनिर्घण्टः॥ अपि च।

"भव्यं स्वादु कषायाम्लं हृद्यमास्यविशोधनम्।
तदेव पक्वं दोषघ्नं गुरु ग्राहि विषापहम्॥"
इति राजवल्लभः॥

अस्थि। इति मेदिनी। ये, ४३॥

भव्य, त्रि, (भवतीति। भू+कर्त्तरि निपातनात् वा यत्।) शुभम्। (यथा, भागवते। ४। १४। ३०।

"भग्नायां भव्यया च्यायां तस्यै विदुर! चुक्रुधुः॥")

सत्यम्। योग्यम्। भावि। इति मेदिनी शब्दरत्नावली च॥ (यथा, मार्कण्डेये। ७६। ७।

"भूतभव्यभवन्नाथाः शृण्वन्तु चेतत्त्रयं द्विज!॥")

श्रेष्ठम्। यथा, भागवते। १। १५। १७।

"यत्पादपङ्कजभवाय भजन्ति भव्याः॥"

"भव्याः श्रेष्ठाः।" इति तट्टीकायां स्वामी॥
प्रसन्नम्। यथा, रामायणे। १। ६२। ७।

"स मे नाथो रघुनाथस्य भव भव्येन चेतसा।"

भव्येन प्रसन्नेन चेतसेति तट्टीकायां रामानुजः॥)

भव्यः, पुं, (भवति उत्पद्यते भू+निपातनात् कर्त्तरि वा यत्।) कर्म्मरङ्गवृक्षः। इति मेदिनी। ये, ४२॥ रसभेदे, पुं क्ली। इति शब्दरत्नावली॥

भव्या, स्त्री, (भव्य+टाप्।) उमा। गजपिप्पली। इति मेदिनी। ये, ४२॥

भष, भक्षे। पिशुनोक्तौ। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सकर्म्मकशब्दे चक० पिशुनोक्त्यादौ सक०-सेट्।) कुक्कुरः कुक्कुरादिकर्त्तृकशब्दः। भषति श्वा। भषत्यन्यदोषं खलः सूचयतीत्यर्थः। भर्त्सने इति प्राचः। भषति श्वा पान्थं शब्देन निर्भर्त्सयतीत्यर्थः। इति रमानाथः। इति दुर्गादासः॥

भषः, पुं, (भषतीति। भष कुक्कुरादि शब्दे+अच्।) कुक्कुरः। इत्यमरः। २। १०। २२॥

भषणं, क्ली, (भष्+ल्युट्।) कुक्कनम्। कुक्कुरशब्दः। इति हेमचन्द्रः॥

भषा, स्त्री, सर्य्यशोरी। इति रत्नमाला॥

भषी, स्त्री, (भष+स्त्रियां जातित्वात् ङीष्।) शुनी। इति शब्दरत्नावली॥

भस, र लि दीप्तौ। भर्त्सने। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सक० च सेट्।) र वैदिकः। सि, बभस्ति। इति दुर्गादासः॥

भसत्, स्त्री, (बभस्तीति। भस्+"शृदृभसोऽदिः।" उणा०। १। १२६। इति अदिः।) काष्ठम्। अन्नमांसम्। वधनम्। इति सिद्धान्तकौमुद्यामुणादिपादः॥

भसत्, [द्] स्त्री, (भस+अदिः।) भास्करः। योनिः। इति मेदिनी॥ मांसम्। कारण्डवपक्षी। शवः। इत्युणादिकोषः॥ कालः। इति त्रिकाण्डशेषः॥

भसनः, पुं, (बभस्तीति। भस्+ल्युः।) भ्रमरः। इति भूरिप्रयोगः॥

भसन्तः, पुं, (बभस्तीति। भस+बाहुलकात् झच्।) कालः। इति त्रिकाण्डशेषः॥

भसितं, क्ली, (भस्+क्तः।) भस्म। इति हेमचन्द्रः॥ (यथा, शिवपुराणे वायुसंहितायाम् २६। ४१।

"चन्दनं वामदेवाख्ये हरितालञ्च पौरुषे।
ईशाने भसितं केचिदालेपनमितीदृशम्॥")

भस्त्रचकः, पुं, (भानां नक्षत्राणां चक्रः।) देवज्ञः। इति शब्दरत्नावली॥

भस्त्रका, स्त्री, (भस्त्रते इति। भस दीप्तौ+बृ+टाप्। भस्त्रा ततः स्वार्थे कन्। "भस्त्रैषाजाज्ञेति।" ७।३।४७। इति इत्वं न। यतः स्थाने योऽकारस्तस्य इत्वं न भवति उदीचामाचार्य्याणां मतेन। इति काशिका।) चर्म्मप्रसेविका। इति शब्दरत्नावली॥

भस्त्रा, स्त्री, (भस्त्रतेऽनयेति। भस+"हुयमाशुभसिभ्यस्त्रन्।" उणा० ४। १६७। इति त्रन् अजादित्वात् टाप्।) अग्निदीपकचर्म्मनिर्म्मितयन्त्रविशेषः। भाथी इति भाषा। तत्पर्य्यायः। चर्म्मप्रसेविका २। इत्यमरः। २। १०। ३३॥ चर्म्मप्रसेवकः ३। इति भरतः॥ भस्त्राका ४ भस्त्रका ५ भस्त्री ६। इति शब्दरत्नावली॥ भस्त्रिका ७। इति व्याकरणम्॥ (यथा, भागवते। ६। २०। २१।

"माता भस्त्रा पितुः पुत्रो येन जातः स एव सः।
भरस्व पुत्रं दुष्मन्त! मावमंस्थाः शकुन्तलाम्॥")

भस्त्राका, स्त्री, भस्त्रा। इति शब्दरत्नावली॥

भस्त्री, स्त्री, (भस्त्रतेऽनयेति। भस्+त्रन्। गौरादित्वात् ङीष्।) भस्त्रा। इति शब्दरत्नावली॥

भस्म, [न्] क्ली, (बभस्तीति। भस् भर्त्सनदीप्त्योः+"सर्व्वधातुभ्यो मनिन्।" उणा० ४। १४४। इति मनिन्॥ दग्धकाष्ठादिविकारः।) शिवाङ्गभूषणम्। छाइ इति भाषा। यथा,—

"अस्याङ्गभूषणं भस्म विभूतिर्भूतिरस्य तु।"
इति शब्दरत्नावली॥

तद्यस्य कामदेवशरीरजम्। यथा,—

"प्रसीद सर्व्वभूतेश! भक्ता त्वत्प्रणता वयम्।
इति स्म वदतां तेषाममराणां तदानघः।
ललाटचक्षुःसम्भूतो भस्माकार्षीन्मनोभवम्।
दृष्ट्वा कामं तदा वह्निर्ज्वालामालातिदीपितः।
संक्रमितोऽथ विधिना हरं गन्तुं प्रचक्रमे॥
मघादेवोऽथ तद्यस्य मनोभवशरीरजम्।
आदाय सर्व्वगात्रेषु भूतिवेषं तदाकरोत्।
वेषयेषामि भस्मानि समादाय तदा हरः।
सगणोऽन्तर्दधे कालो विधाय विधिमञ्जसा॥"
इति कालिकापुराणे ६१ अध्यायः॥

भागधेयः, पुं, (भागेन धीयते इति। धा + कर्म्मणि यत्।) राजकरः। इत्यमरः। २। ८। २७॥ दायादः। इत्यजयपालः॥

भागवतं, क्ली, (भगवती भगवत्या वेदम्। भगवत् + तस्येदमित्यण्।) अष्टादशपुराणान्तर्गतमहापुराणविशेषः। स च वेदव्यासकृतद्वादशस्कन्धद्वात्रिंशत्त्रिशताध्यायसमन्वितद्वादशसहस्रश्लोकसंख्याक-भगवन्माहात्म्यवर्णन-प्रधानको ग्रन्थः। यथोक्तं मत्स्यपुराणे पुराणदानप्रस्तावे।

"यत्राधिकृत्य गायत्रीं वर्ण्यते धर्म्मविस्तरः।
वृत्रासुरवधोपेतं तद्भागवतमिष्यते॥
लिखित्वा तच्च यो दद्याद्धेमसिंहसमन्वितम्।
प्रौष्ठपद्यां पौर्णमास्यां स याति परमं पदम्॥
अष्टादशसहस्राणि पुराणं तत् प्रकीर्त्तितम्॥"

पुराणान्तरे च।

"ग्रन्थोऽष्टादशसाहस्रो द्वादशस्कन्धसम्मितः।
हयग्रीवब्रह्मविद्या यत्र वृत्रवधस्तथा॥
गायत्र्या च समारम्भस्तद्वै भागवतं विदुरिति॥"

पद्मपुराणे च अम्बरीषं प्रति गौतमवचनम्॥

"अम्बरीष! शुकप्रोक्तं नित्यं भागवतं शृणु।
पठस्व स्वसुखेनापि यदीच्छसि भवक्षयमिति॥"

इति श्रीभागवतटीकायां श्रीधरस्वामी॥

(तत्र तावत् पुराणेषु भागवतद्वयं प्रसिद्धम्। एकं महापुराणान्तर्गतमपरमुपपुराणान्तर्गतम्। लोकेऽप्युपलभ्यो द्वयोर्देवीभागवतनाम्ना विष्णुभागवतनाम्ना चास्त्येव। तत्रैकं महापुराणान्तर्गतमन्यदुपपुराणान्तर्गतमित्यपि निर्विवादमेव। तथापि किं देवीभागवतं महापुराणमन्यदुपपुराणमथवा विष्णुभागवतं महापुराणमन्यदुपपुराणमिति संशये केचित् विष्णुभागवतमेव महापुराणमिति वदन्ति। केचित् देवीभागवतमेव महापुराणमिति वदन्ति। तत्र प्रथमपक्षैकदेशिनः केचिदुपपुराणेषु द्वितीयं भागवतं नास्त्येव महापुराणेष्वेवैकं भागवतं प्रसिद्धम्। तच्च विष्णुभागवतमेव न देवीभागवतम्। देवीभागवतन्तु निर्मूलमेवेति वदन्ति। द्वितीयपक्षैकदेशिनोऽपि विष्णुभागवतं वोपदेवकृतमिति वदन्ति। वस्तुतस्तूभयोरपि पुराणयोः पुराणमतभेदेन महापुराणत्वमुपपुराणत्वञ्च। नन्वेवं महापुराणेष्वेवैकं भागवतं प्रसिद्धम्। नतूपपुराणेषु द्वितीयमस्तीति चेन्न। कूर्म्मगरुडपाद्मादिमुपपुराणेषु द्वितीयस्य सत्त्वपरिगणनात्। तथाहि देवीभागवते दानप्रस्तावे कूर्म्मपुराणेऽष्टादशपुराणान्युक्त्वा,—

"अन्यान्युपपुराणानि मुनिभिः कथितानि तु।
व्यासं सनत्कुमारोक्तं नारसिंहमतः परम्॥"

इत्यादि॥

"पराशरोक्तं प्रवरं तथा भागवताह्वयम्॥" इति। तथा गारुडे तत्सारधृते द्वितीयांशे धर्म्मकाण्डे प्रथमाध्याये प्रथमतो महापुराणानां सात्त्विकादिभेदेन विभागमुक्त्वा लघुपुराणानां सात्त्विकादिभेदेन विभागप्रदर्शनपरे ग्रन्थेऽप्युक्तम्।

"पुराणं भागवतं दौर्गं नन्दिप्रोक्तं तथैव च।
पाशुपत्यं रैणुकञ्च भैरवञ्च तथैव च॥"

इति॥

तथा तत्पूर्व्वमपि।

"विष्णुधर्म्मोत्तरे चैव तत्र भागवतं तथेति॥"

तत्र भागवतं तथेति पाठे तत्र भागवतमित्यर्थः। तद्विशेषणेन चोत्तमत्वं सूचितम्। तथा पाद्मे शकुनपरीक्षायाम्।

"ब्राह्मं पाद्मं वैष्णवञ्च शैवं भागवतं तथा।"

इत्यादि॥

"तथैव गदितं राम! पुराणं कापिलं तथा।
वाराहं ब्रह्मवैवर्त्तं शकुनेषु प्रशस्यते।
शैवं भागवतं दौर्गं भविष्योत्तरमेव च॥" इति॥

तथा पाद्मे भागवतमाहात्म्ये एकोनविंशेऽध्याये उपपुराणेषु।

"शैवमादिपुराणञ्च देवीभागवतं तथा॥" इति॥

तथा मधुसूदनसरस्वतीकृतसर्व्वशास्त्रार्थसंग्रहेऽप्युपपुराणमध्ये भागवतं परिगणितम्। नागोजीभट्टादिभिश्च धर्म्मशास्त्रग्रन्थेष्वेवमन्यैरपि निबन्धकारैरिति। नतु देवीभागवतस्य।

"तत्र भागवतं पुण्यं पञ्चमं वेदसम्मितम्॥"

इति प्रथमाध्यायस्थवचनेनाष्टादशमहापुराणेषु पञ्चममिदं पुराणमिति स्वस्य महापुराणत्वं बोधयतः कथमन्यपुराणमुपपुराणत्वं बोधयेन्नैवं क्वचिदृष्टचरमिति चेन्न। नारदीयशिववायव्यादित्यपुराणानां स्वसुखेनान्यसुखेन वा महापुराणत्वेन ज्ञायमानानामन्यपुराणैरुपपुराणत्वस्य व्यवस्थापनात्। पुराणमतभेदेन कस्यापि पुराणस्य महापुराणत्वोपपुराणत्वसिद्धेस्तदिरोधाभावात् पुराणभेदेन मतभेदस्तु बहुशः प्रसिद्धः। वैष्णवपुराणेषु सात्त्विकत्वं शैवपुराणेषु तामसत्वं वैष्णवपुराणमतेन। शैवपुराणेषु सात्त्विकत्वं वैष्णवपुराणेषु तामसत्वम्।

"दश शैवपुराणानि सात्त्विकानि विदुर्बुधाः।
तामसानि च चत्वारि वैष्णवानि प्रचक्षते॥"

इति स्कान्दे॥

शैवपुराणमतेनैवं प्रकारेणेति। तथाहि नारदीयस्य पुराणस्य स्वान्तर्गतमहापुराणग्रन्थसङ्ख्या स्वसुखेनैव स्वात्मनो महापुराणत्वं बोधयतः।

"मद्वयं भद्वयं चैव ब्रत्रयं वचतुष्टयम्।
अलिंपामिपुराणानि कूस्कंगारुडमेव च॥"

इति वचनेन वक्ष्यमाणसूतपुराणवचनेन च महापुराणावहिर्भूतत्वं बोधयते। अलिंपार्षीयाग्नेयाष्टसाहस्रेनादित्यपुराणं तथा शैवपुराणस्य स्वसुखेन स्वस्य महापुराणत्वं बोधयतो मद्वयं भद्वयमित्येव वचनं तदहिर्भूतत्वं बोधयति। नन्वेवं वायव्यं पुराणमेव शैवं शिवप्रतिमादकत्वात्तस्य च वचतुष्टयपदेन संग्रहात्तदुदाहरणं न सम्भवतीति चेन्न। सूतपुराणे।

"ब्राह्मस्य वैष्णवं पाद्मं शैवं भागवतं तथा।
भविष्यं नारदीयञ्च मार्कण्डेयस्य वामनम्॥
वाराहं कौर्म्मं मात्स्यं गारुडं ब्रह्मकं तथा।
ब्रह्माण्डं चेति विज्ञेयं पुराणं तत्त्वदर्शिभिः॥"

इति॥

अत्र शैवं भागवतं तथेति पाठे शैवं भागवतमिति पदद्वयं पृथक्। तत्र शैवं शिवप्रतिमादकत्वात् वायव्यपुराणस्य स्ववचनेन स्वस्य महापुराणत्वं बोधयतो वक्ष्यमाणशैवपुराणवचनं महापुराणवहिर्भूतत्वं बोधयति। तथादित्यपुराणस्यापि चालिंपामिपुराणानीति क्वचित् पुराणसम्मतपाठेन महापुराणत्वम्। अनाप्रलिङ्गकूस्काख्यमिति क्वचित् पुराणसम्मतपाठेन महापुराणवहिर्भूतत्वं यथा चैतेषां चतुर्णां क्वचित् पुराणेषु महापुराणत्वेन क्वचिदुपपुराणत्वेन ग्रहणम्। तथा देवीभागवतस्यापि भविष्यतीति को विरोधः। मतभेदेनोभयोरपि वचनयोः प्रमाणत्वात्। ननु अन्यान्युपपुराणानि मुनिभिः कथितानि त्वित्यादिवचनैरुपपुराणानि व्यासान्यमुनिकृतान्येव सन्ति। देवीभागवतं तु व्यासकृतमेवेति। तस्य कथमुपपुराणेष्वन्तर्भाव इति चेन्न। नारदशैववायव्यादित्यपुराणेषु व्यासकृतत्वेऽपि कस्यचित् पुराणमते उपपुराणत्वदर्शनात्तादृशनियमस्यास्वीकारात् प्रायशस्तथा सत्त्वाभिप्रायेण तु तदुक्तम्। इत्थं भागवतद्वयस्य महापुराणमध्ये उपपुराणमध्ये च सत्त्वसिद्धौ कस्य पुराणस्य मते किं भागवतं महापुराणान्तर्गतमिति चेदुच्यते। शैवपुराणमते मात्स्यपुराणमते च देवीभागवतमेव महापुराणमिति। तथाहि शैवपुराणे उत्तरखण्डे मध्यमेश्वरमाहात्म्ये शिवाल्लब्धवरेण व्यासेन महापुराणानि प्रणीतानीत्युक्त्वनन्तरं तेषां नामान्यष्टादशोक्ता तेषां योगरूढानां नाम्नां निर्व्वचनं तत्रैव कृतम्। तद्यथा,—

"यत्र वक्ता स्वयं तत्रे! ब्रह्मा साक्षाच्चतुर्मुखः।
तस्माद्ब्राह्मं समाख्यातं पुराणं प्रथमं मुने!॥"

तत्रे इति मुनिसम्बोधनम्।

"पद्मकल्पस्य माहात्म्यं तत्र यस्मादुदाहृतम्।
तस्मात् पाद्मं समाख्यातं पुराणं द्वितीयकम्॥
पराशरकृतं यत्तु पुराणं विष्णुबोधकम्।
तदेव व्यासकथितं पुत्तप्पित्रोरभेदतः॥
यत्र पूर्व्वोत्तरे खण्डे शिवस्य चरितं महत्।
शैवमेतत् पुराणं हि पुराणज्ञा वदन्ति च॥
भागवत्याश्च दुर्गायाश्चरितं यत्र विद्यते।
तत्तु भागवतं प्रोक्तं नतु देवीपुराणकम्॥
नारदोक्तं पुराणन्तु नारदीयं प्रचक्षते॥
यत्र वक्ताभवत्तत्रे! मार्कण्डेयो महामुनिः।
मार्कण्डेयपुराणं हि तदाख्यातञ्च सप्तमम्॥
अग्नियोगात्तदाग्नेयं भविष्योक्तैर्भविष्यकम्।
विवर्त्तनाद्ब्रह्मणस्तु ब्रह्मवैवर्त्तमुच्यते॥
लिङ्गस्य चरितोक्तत्वात् पुराणं लैङ्गमुच्यते।
वराहस्य च वाराहं पुराणं द्वादशं मुने!॥
यत्र स्कन्दः स्वयं वक्ता श्रोता साक्षात्महेश्वरः।
तत्तु स्कान्दं समाख्यातं वामनस्य तु वामनम्॥
कौर्म्मं कूर्मस्य चरितं मात्स्यं मत्स्यस्य कीर्त्तितम्॥

गरुडस्तु स्वयं वक्ता यत्तद् गारुडसंज्ञकम् ॥
ब्रह्माण्डचरितोक्तत्वाद् ब्रह्माण्डं परिकीर्तितम् ॥"

अत्र क्वचिद्वक्तृसम्बन्धः क्वचिच्छ्रोतृसम्बन्धः क्वचित्प्रतिपाद्यमुख्यदेवताचरितसम्बन्धः। प्रवृत्तिनिमित्तमिति स्पष्टमेव दर्शितम्। तत्र भागवतनाम्नो निर्वचनवाक्यमेतत्।

"भगवत्याश्च दुर्गायाश्चरितं यत्र विद्यते।
तत्तु भागवतं प्रोक्तं न तु देवीपुराणकम् ॥"

अनेन च वाक्येन भगवत्या इदं भागवतमिति व्युत्पत्त्या ग्रन्थप्रतिपाद्यमुख्यदेवताचरितसम्बन्धः। प्रवृत्तिनिमित्तमिति स्पष्टमेव दर्शितम्। का सा भगवतीत्यपेक्षायामाह दुर्गाया इति। तत्तु भागवतं तु शब्दो निश्चयार्थकः। तदेव भागवतपदवाच्यं प्रोक्तमित्यर्थः। न तु पुराणान्तरमतप्राप्तं विष्णुभागवतं महापुराणान्तर्गतं भागवतमित्यर्थ इति शैवपुराणेन स्वमतं प्रदर्शितम्। कश्चिदेतत् पुराणान्तरमतेन उपपुराणं जानीयात्तत्राह न तु देवीपुराणकमिति। पुराणकमित्यत्र कप्रत्ययोऽल्पार्थकः। अल्पे इति सूत्रात् पुराणकमल्पं पुराणमिति यावत्। देव्याः पुराणकं देवीपुराणकम्। यदिदमुक्तं तद्देव्या उपपुराणं नैवास्तीत्यर्थः। अनेन च वाक्येनान्यस्य महापुराणत्वनिषेधेन स्वाभिप्रेतस्य च उपपुराणत्वनिषेधेन श्रीमद्देवीभागवतस्यैव महापुराणत्वं बोधयति व्यासः। मुख्यत्वेन भगवतीचरितप्रतिपादकस्य महापुराणमध्ये कस्यचिन् पुराणस्यान्यस्याभावात्। ननु नारदादिपुराणवचनबलात् विष्णुभागवतस्य महापुराणान्तर्गतत्वे निर्विघ्नं निश्चिते तद्बलात् भागवतद्वयस्य मतभेदेन महापुराणत्वकल्पनापेक्षया यत्किञ्चिन् भगवतीचरितस्यास्मिन्वचने ग्रहणेनानेन वचनेन विष्णुभागवतनाम्न एव निरुक्तिः कृतेति कुतो न कल्प्यते। वर्ण्यते च विष्णुभागवते दशमस्कन्धे किञ्चिदिन्यवास्नियाचरितमिति चेन्न। तथा सति मुनेर्विष्णुभागवतविषय एव तात्पर्यसत्त्वे भगवत इदं भागवतमित्येव व्युत्पत्तिं कुर्यान्नहि केनचिन्मुनेः शिरसि भारः स्थापितो यत् स्वाभिप्रेतां युक्तियुक्तां निरुक्तिं त्यक्त्वा निष्प्रयोजनोऽनभिप्रेतां निरुक्तिं करोति। किञ्च सर्वत्रैतद्वचनप्रकरणे

"यत्र पूर्वोत्तरे स्कन्धे शिवस्य चरितं बहु।
शैवमेतत् पुराणं हि पुराणज्ञा वदन्ति च ॥"

इति बहुवचनैर्बहुचरितसुखचरितसम्बन्धरूपप्रवृत्तिनिमित्तस्यैवाभिप्रेतत्वं मुनेरवगम्यते। मतभेदेन पुराणभेदकल्पना तु नाचैव नवीनास्ति। पूर्वोक्तयुक्त्या नारदशैववायवादित्यपुराणेष्वन्यत्रापि सत्त्वात्। अस्तु वा गौरवं नहि तद्बलात् मुनेस्तात्पर्यमन्यथाकर्तुं कश्चिदीष्टे। तस्मात् पूर्वोक्तं तात्पर्यं विहायान्यतात्पर्यस्यान्यार्थकरस्य महाशाठ्यमेव। ननु सत्यत्वान्यमेतत्। ततश्च दुर्गाचरितं यत्र वर्ण्यते तद्भागवतमित्यर्थः। तच्च न देवीभागवतं भवितुमर्हति। तस्य तल्लक्षणलक्ष्यत्वे न तु देवीपुराणकमिति निषेधविषयत्वेन निषेधविधोः समानविषयत्वापत्तेः। किन्तु विष्णुभागवतमेव। ननु तथाऽपि तल्लक्षणमन्यपुराणेष्वतिप्रसक्तमिति चेन्न। यथा वृत्रासुरवधलक्षणमन्यपुराणेषु प्रसक्तमपि यथा लक्षणत्वेन गृहीतम्। तद्वदत्रापि सत्त्वादिति चेन्न। पूर्वोक्तनिरुक्तिवचनप्रकरणस्थत्वविरोधात्। किञ्च लक्षणवाक्यमेतदिति पक्षेऽप्येतस्य लक्षणस्य महापुराणोद्देशेनैव सत्त्वादुपपुराणेष्वस्य प्रसक्त्यभावाद्देवीपुराणकालिकापुराणयोरुपपुराणत्वस्य निश्चितत्वात् तत्रैतल्लक्षणस्य प्रसक्तिरेव नास्तीति न तु देवीपुराणकमिति निषेधो व्यर्थ एव स्यात्। तस्मादेव तद्वचनस्य पूर्वोक्त एवार्थः। किञ्च लक्षणवाक्यमेतदिति पक्षे यत् किञ्चिच्चरितं श्रूयते उत यावच्चरितम्। यत्किञ्चिच्चरितस्य सर्वमहापुराणेषु सत्त्वाद्देवीपुराणमात्रनिषेधेन न निर्वाहः। तस्माद्देवीपुराणस्यैव निषेधसारस्याद्यावच्चरितं मुख्यत्वेन भगवतीचरित्रमेव ग्राह्यम्। तदा तव नाभीष्टार्थसिद्धिः। मुख्यत्वेन विष्णुभागवते दुर्गाचरितस्याभावात्तस्मैव त्वभीष्टार्थसिद्धिः। निषेधविधोः समानविषयकत्वरूपं दूषणन्तु नैव सम्भवति। प्रकरणबलात् तात्पर्ये निश्चिते तद्विषयं विहायैव निषेधप्रवृत्तेः। वृत्रासुरवधोपेतत्वलक्षणं तु गायत्र्यारम्भविशिष्टमिति न तदतिप्रसक्तं तस्मात् पूर्वोक्त एव तद्वचनार्थ इति तद्वचनाद्देवीभागवतं महापुराणं न तु विष्णुभागवतमिति शिवपुराणमतम्। अत्र च नियमद्वयस्य पूर्वोक्तस्य सत्त्वाद्विष्णुभागवतविषये तथा नियमद्वयाभावादिदं शिवपुराणमतमेव सुखमन्यपुराणमतं त्वेकदेशीति नियमद्वयप्रदर्शकव्यासवाक्येन स्पष्टमेव बोधितमिति सुधियो विभावयन्तु। किञ्च।

"शैवमादिपुराणञ्च देवीभागवतं तथा।"

इति पाद्मवचनसंवादितया,—

"नवरात्रे तु देवेशि! दौर्गं भागवतं पठेत्।
जपेत् सप्तशतीं चण्डीं नियमेन समाहितः॥"

इति दुर्गातरङ्गिणीधृतयामलवचनेन तथा,—

"देवीभागवतं नित्यं पठेद्भक्त्या समाहितः।
नवरात्रे विशेषेण श्रीदेवीप्रीतये सदा॥"

इति महेशठक्कुरकृतदुर्गाप्रदीपधृतदेवीयामलवचनेन च सप्रमाणस्य देवीभागवतस्य सर्वोपपुराणमध्ये एव निवेशात्।

"तत्र भागवतं पुण्यं पञ्चमं वेदसम्मितम्।"

इति प्रथमस्कन्धस्थस्य महापुराणेषु पञ्चममिदं पुराणमित्यर्थकस्य देवीभागवतोक्तवचनस्य निरालम्बनत्वादप्रामाण्यापत्तेः। मन्यते तु तस्य विषयलाभान्नाप्रामाण्यं तद्वचनप्रामाण्यादपि देवीभागवतमेव महापुराणमिति। किञ्च देमाद्रौ कालिकापुराणे।

"यदिदं कालिकाख्यं तन्मूलं भागवतं स्मृतम्।"

इति वचनं तदपि देवीभागवतस्यैव महापुराणत्वं बोधयति। तथाहि।

"अष्टादशभ्यस्तु पृथक् पुराणं यत् प्रदृश्यते।
विजानीध्वं द्विजश्रेष्ठास्तथा तेभ्यो विनिर्गतम्॥"

इति मात्स्यवचनेनोपपुराणानां महापुराणमूलकत्वनियमादिदं कालिकापुराणं किमुपपुराणमूलकमित्याकाङ्क्षायां तस्यानिर्वक्तृकमिदं वाक्यं यदिदं कालिकाख्यं पुराणं तन्मूलं तस्य मूलं भागवतं विदुरिति हि तस्यार्थो निबन्धकारैर्दर्शितः। यथान्यान्युपपुराणान्येकैकस्मान्महापुराणान्निर्गतानि तद्वदिदं भागवतादुत्पन्नमिति यावत्। तच्च भागवतं न वैष्णवं तन्मूलं भवितुमर्हति। वैष्णवोपपुराणस्य देवीपुराणमूलकत्वे एव सामञ्जस्यात्। शैवोपपुराणानां शैवेभ्य एव वैष्णवोपपुराणानां वैष्णवेभ्य एवोत्पत्तिदर्शनादिति देवीभागवतमेव तन्मूलमिति तस्य महापुराणत्वं सिद्धम्। यत्र तु क्वचित् क्वचिन् महापुराणमूलकत्वमप्रसिद्धं तत्र यथायोग्यमनुमेयमिति। किञ्चादित्यपुराणदृष्ट्यापि देवीभागवतमेव महापुराणम्। तथाहि आदित्यपुराणे रक्तासुरवधप्रस्तावे:

"या जन्ने महिषं दैत्यं क्रूरं वृत्रासुरं तथा।
साद्य रक्तासुरं हत्वा स्वाराज्यं ते प्रदास्यति॥"

इति वचनम्। अनेन वचनेन देवीभागवते स्वसम्मतिर्दर्शिता। न हि देवीभागवतातिरिक्तसर्वपुराणेषु देवीकृतो वृत्रासुरवधः क्वचिदुपलभ्यते। इन्द्रकृतस्यैव तस्य सत्त्वात् केवलं देवीभागवत एव देवीकृतः सोऽस्ति। तदुपबृंहणेन तु देवीभागवते स्वसम्मतिर्दर्शितेति युक्तमेव। अनन्तरञ्च तत्रैव पुराणदानप्रस्तावे।

"ददाति सूर्यभक्ताय यस्तु भागवतं द्विजाः
सर्वपापविनिर्मुक्तः सर्वव्याधिविवर्जितः॥
जीवेद्वर्षशतं साग्रमन्ते त्रैवस्वतं पदम्॥"

इति पठितम्॥

अत्र च स्वसम्मतं भागवतमेव ग्रहीतुमुचितम्। किञ्चेदं वचनं देवीभागवतपक्षे एव स्वरसतः सङ्गच्छते। प्रथमश्लोके एकादशद्वादशस्कन्धयोश्च सविस्तरं गायत्रीविधानसहस्रनामादेः कथनात् सूर्यस्य गायत्रीदेवतात्वात्। तद्भागवतपक्षे तु वैकुण्ठं गच्छेदित्येव वदेदिति। किञ्च

"यत्राधिकृत्य गायत्रीं वर्ण्यते धर्मविस्तरः।
वृत्रासुरवधोपेतं तद्भागवतमिष्यते॥"

इति मात्स्यवचनमपि देवीभागवतस्यैव महापुराणत्वं बोधयति। वेदे त्रिपदा गायत्रीति गायत्रीलक्षणं श्रूयते। तेन च त्रिपाच्छन्दोऽधिकृत्य यत्र धर्मविस्तरो वर्ण्यते तद्भागवतमिति तदर्थः। त्रिपाच्छन्दश्च देवीभागवते प्रथमश्लोके।

"सच्चिदेकस्वरूपां तामाद्यां विद्यां च धीमहि।
बुद्धिं या नः प्रचोदयात्॥" इति श्रूयते।

ग विष्णुभागवते तच्छन्दोऽस्ति सुखार्थसम्भवे गायत्रीपदस्य लक्षणया धीमहीत्यर्थकरणेन विष्णुभागवतपरत्वकल्पनमस्य वचनस्य तु साहसमेव। क्वचित्पुराणेषु यदि तादृशान्येव विष्णुभागवतपराणि वचनानि सन्ति। तत्र गत्यन्तराभावादस्तु लक्षणा। उदासीने मात्स्यवाक्ये तु सुखविषयसम्भवे सानुचिता। यत्र-प्याधुनिकपुस्तकेषु क्वचिच्चतुश्चरणश्लोकोऽपि दृश्यते तथापि सप्तशत्यां गुप्तवतीटीकाकारादिभिश्चिपातृश्लोकस्यैव व्याख्यातत्वेन स एव सांप्रदायिकः पाठ इति बोध्यम्। यत्तु गायत्र्यर्थश्च विष्णुध्यानं न तु शिवशक्तिसूर्यादिध्यानमित्युक्तं तत्तु नास्तिकत्वमूलकमेव।

"मैत्रायणीयानां भर्गो वै रुद्रः।" इति श्रुतौ प्रपञ्चसारादिमन्त्रतन्त्रेषु पुराणादिषु च शिवसूर्यशक्त्यादिरूपार्थस्योक्तत्वाच्च तदुदाहृतमात्स्यवाक्यन्तु विरोधत्वे नापेक्षं स्यादसति त्वनुमानमिति न्यायात् स्तावकमेवेति। किञ्च।

"हयग्रीवब्रह्मविद्या यत्र वृत्रवधस्तथा।
गायत्र्या च समारम्भस्तद्वै भागवतं विदुः॥"

इति पुराणान्तरवाक्यमपि देवीभागवतस्यैव महापुराणत्वबोधकम्। तथा हि हयग्रीवनामासुरो देवीभागवते प्रथमस्कन्धे प्रसिद्धस्तेनोपासिता ब्रह्मप्रतिपादिका विद्या स्त्रीदेवत्यो मन्त्रः। सा विद्या यत्र वर्णते तद्भागवतमित्यर्थः। सा देव्यसदुपासिता विद्या चेत्तुभयमपि तत्रैव प्रथमस्कन्धे दर्शितम्।

"अपञ्चेकाक्षरं मन्त्रं मायाबीजात्मकं मम॥"
इत्यादिना॥

ननु विष्णुभागवते प्रथमस्कन्धेऽपि हयग्रीवमन्त्रस्य सत्त्वादिदं वचनमुभयभागवतसाधारणमिति चेन्न। नारदीये प्रारदातिलकादिनिबन्धेषु च।

"मन्त्राः पुंदेवताः प्रोक्ता विद्याः स्त्रीदेवताः स्मृताः॥"

इत्यादिवचनैः स्त्रीदेवत्यमन्त्रेष्वेव विद्यापदप्रयोगो न पुंदेवत्यमन्त्रेष्विति प्रतिपादनात्। क्वचित् पुंदेवत्यमन्त्रे तथाप्रयोगस्तु गौणः। न च गौणार्थमादाय तद्वचनस्य विष्णुभागवतपरत्वं कल्पितुमुचितम्। लक्षणारूढदोषापत्तेः। तस्मात् तद्वचनमुभयसाधारणमिति देवीभागवतस्यैव महापुराणत्वं बोधयति। किञ्च सारस्वतस्य कल्पस्येति मात्स्यवचनादपि देवीभागवतमेव महापुराणम्। अत्र स्त्रैवं प्रकरणसङ्गतिः।

ऋषय ऊचुः।

"पुराणसंख्यामाचक्ष्व सूत! विस्तरतः क्रमात्।"

इति सूतिप्रश्नोत्तरं मत्स्यादभिहितं पूर्वं यत्तद्ब्राह्मं पद्मकल्पवृत्तान्ताश्रयं पाद्मं वराहकल्पवृत्तान्ताश्रयं वैष्णवं वैष्णवकल्पवृत्तान्ताश्रयं शैवशैवकल्पवृत्तान्ताश्रयमिति तत्तत्कल्पवृत्तान्ताश्रयाणि पुराणान्युक्त्वा तदुत्तरम्।

"यत्राधिकृत्य ग्रन्थकोटी वर्ण्यते धर्मविस्तरः।
वृत्रासुरवधोपेतं तद्भागवतमिष्यते॥" इति॥

"सारस्वतस्य कल्पस्य मध्ये ये स्युर्नरामराः।
तद्वृत्तान्तोद्भवं लोके तद्भागवतमिष्यते॥"

इत्युक्त्वा ततोऽन्यान्यपि महापुराणान्येव तत्तत्कल्पवृत्तान्ताश्रयाणि दर्शितानि। पश्चादुपपुराणकथनार्थमुपभेदान् प्रवक्ष्यामीति प्रतिज्ञाय पद्मपुराणान्नारसिंहं निर्गतमेवं नन्दिसाम्बादित्यसंज्ञकान्युक्त्वा अन्योपपुराणान्यपि महापुराणेभ्य एव निर्गतानीति।

"अष्टादशभ्यस्तु पृथक् पुराणं यत् प्रदृश्यते।
विजानीध्वं द्विजश्रेष्ठास्तदा तेभ्यो विनिर्गतम्॥"

इति वचनेन सूतऋषिरुक्तवान्॥ ततः।

"सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च॥"

इत्यादिना पुराणलक्षणान्युक्त्वा,—

"सात्त्विकेषु च कल्पेषु महात्म्यमधिकं हरेः।
राजसेषु च कल्पेषु माहात्म्यं ब्रह्मणो विदुः।
तद्वदग्नेश्च माहात्म्यं तामसेषु शिवस्य च।
सङ्कीर्णेषु सरस्वत्याः पितॄणां च निगद्यते॥"

इति वचनेन पुराणप्रतिपाद्यहरिब्रह्माग्निहरसरस्वतीपितॄणां माहात्म्यसम्बन्धात् कल्पानां सात्त्विकराजसतामसत्वसङ्कीर्णत्वभेदेश्चातुर्विध्यमुक्तवानिति। तत्र कल्पानां तत्तद्देवतासम्बन्धज्ञानन्तु तत्तत्कल्पाश्रिततत्तत्पुराणप्रतिपाद्यमुख्यदेवताज्ञानेनैव बोध्यम्। अन्यप्रकारस्य क्वचिदपि पुराणेष्वनुपलम्भात्तत्रैव सति।

"सारस्वतस्य कल्पस्य मध्ये ये स्युर्नरामराः।
तद्वृत्तान्तोद्भवं लोके तद्भागवतमिष्यते॥"

इति वचनं भागवतस्य लक्षणप्रतिपादकं प्रतिपादितम्। तदर्थस्तु यथा गारुडकल्प इत्यत्र गरुडस्यायं गारुडः। यथा वा वाराहकल्प इत्यत्र वराहस्यायं वाराह इति व्युत्पत्तिः प्रसिद्धा। तद्वदेव सरस्वत्या अयं सारस्वत इति विग्रहः।

"सरस्वत्यास्तथा कल्पो गौरीकल्पस्तथैव च॥"

इति कल्पनामसु सरस्वतीकल्पत्वेनैव कथितत्वाच्च। मत्स्यपुराणे उपन्याधाये।

"सङ्कीर्णेषु सरस्वत्याः पितॄणां कल्प उच्यते॥"

इति वचनेन तथैवोक्तत्वाच्च ब्रह्मविष्णुरुद्राणां कल्पवद्गौरीलक्ष्म्योः कल्पवच्च सरस्वतीकल्पस्यार्थप्राप्तत्वाच्च तादृशसारस्वतकल्पसम्बन्धिनो ये देवमनुष्यास्तद्वृत्तान्तमुद्भव उत्पत्तिर्यस्मात् तत्पुराणं भागवतं विदुः। तद्वृत्तान्तप्रदर्शकं यत् पुराणं तद्भागवतसंज्ञकमिति यावत्। अत्र च तत्तद्देवतानामाविर्भावाश्रया ये ये कल्पास्ते तन्नाम्ना व्यवह्रियन्ते। एतच्च तन्नामककल्पाश्रितेषु पुराणेषु तत्तद्देवतायाः एव मुख्यत्वेनोत्पत्तिप्रदर्शकवाक्यैर्लक्ष्मीकल्पादिकल्पाश्रितस्कन्दपुराणादिषु सर्वत्र प्रसिद्धमेव। तथा च सुखत्वेन सरस्वत्या आविर्भावप्रतिपादकं पुराणं यत् तद्भागवतमित्यतिरहस्यार्थः। तत्र सारस्वतस्य इति पदेनैव कल्पस्य सरस्वतीसम्बन्धे बोधिते तस्य सङ्कीर्णत्वं सङ्कीर्णेषु सरस्वत्या इति वचनेनेश्वरप्रेरणां विनापि ग्रहणमेव। अस्मिंश्च वचने भागवतपदेन विष्णुभागवतस्य ग्रहणं वन्ध्यापुत्रोपममेव। तत्र सुखत्वेन सरस्वत्याविर्भावस्यासक्तत्वात्। विष्णुभागवते द्वितीयस्कन्धे। "पाद्मं कल्पमथो शृणु।" इति वचनेन स्वसुखेनैव स्वस्य पाद्मकल्पकथाश्रयत्वस्योक्तत्वात्। तादृशोधाच्च न च पाद्मकल्प एव सारस्वतः। सरस्वान् ससुद्भवस्साख्यातं कंमलं सारस्वतं तस्य कल्प इति व्युत्पत्तेरिति वाच्यम्।

"पद्मकल्पस्य वृत्तान्तं तत्र यस्मादुदाहृतम्।
तस्मात् पाद्मं समाख्यानम्॥"

इति पूर्वोदाहृतशिवपुराणवचनेन।

"एतदेव यदा पाद्ममभूद्वैरण्यमं जगत्।
तद्वृत्तान्ताश्रयं तद्वत् पाद्ममित्युच्यते बुधैः॥
पाद्मं तत् पञ्चपञ्चाशत्सहस्राणीह कथ्यते॥"

इति मत्स्यपुराणवचनेन।

"सारस्वतस्य कल्पस्य मध्ये ये स्युर्नरामराः।"

इति वचनेन च पाद्मकल्पसारस्वतकल्पयोः पृथक्कथनात्। किञ्च सारस्वतकल्पपाद्मकल्पयोरैक्ये पद्मकल्पस्य प्रतिपादकं पुराणद्वयं पाद्मं भागवतञ्चेत्येव वदेत् किञ्च पद्मकल्पस्य वृत्तामित्यत्राभिधेयकल्पदार्थो ये स्वतन्त्रा लोकविश्रुता इति न्यायेन पूर्वं बुद्ध्यारूढं प्रसिद्धं पाद्मग्रन्थं विहायाप्रसिद्धं सारस्वतग्रन्थं पाद्मग्रन्थस्य वाचकं कृत्वा सारस्वतपदघटितकल्पने प्रयोजनाभावः। किञ्च सरस्वत्यास्तथा कल्प इत्यादेः। पूर्वोक्तस्य सारस्वतपदनिरुक्त्यर्थकस्य वचनसमूहस्य विरोधश्च। न च पाद्मकल्पसारस्वतकल्पयोः पृथक्त्वे त्रिंशत्कल्पेषु मत्स्यपुराणान्तिमाध्याये कीर्तितेषु सारस्वतपदेन पाद्मस्य ग्रहणं न स्यादिति वाच्यम्। प्रभासखण्डे त्रिंशत्कल्पेषु विष्णुभवकल्पार्चिककल्पसुमानकल्पानां ग्रहणेऽपि तेषां कल्पानां यथा मात्स्यान्तिमाध्याये न ग्रहणं तथा पाद्मस्यापि न ग्रहणमित्यस्य तुल्यत्वात्। यदि तेषां पर्यायत्वेन क्वचिदन्तर्भावः क्रियते तर्ह्यस्यापि क्वचिदन्तर्भावोऽस्तु अतएव विष्णुभागवतस्य प्रवन्धटीकाकारेण पिङ्गकल्पे एव पूर्वार्द्धान्ते पद्मस्योद्भवात् पिङ्गकल्पपदेन पाद्मसंग्रहो वेदितव्य इत्युक्तम्। पुराणकल्पकथनप्रस्तावे सारस्वतकल्पपाद्मकल्पयोः पृथक्करणेन सारस्वतपदेन पाद्मस्य सर्वथा न ग्रहणम्। वस्तुतस्तु त्रिंशत्कल्पा ब्रह्मणस्त्रिंशत्तिथ्यात्मकाः त्रिंशत्तिथिषु प्रतिपदादिपूर्णपद्मान्ते। भूर्भुवःसुवः भूर्भुवःसुव इत्यादयश्चतस्त्रिंशत्कल्पाः। पाद्मादयश्च वायुपुराणोक्ता दिनकल्पा ब्रह्मणः प्रतिदिवसेपूत्पद्यन्ते इति दिनकल्पतिथिकल्पानां सुतरां भेदात्तिथिकल्पेषु दिनकल्पानां पाद्मादीनां न ग्रहणमिति सिद्धान्तः।

यत्तु विष्णुभागवतस्यारम्भतः पाद्मकल्पाश्रयत्वेऽपि छन्दसस्सप्तस्वेव सारस्वतत्वमभणनं तस्य च दशमस्कन्धे सत्त्वात्।

"सारस्वतस्य कल्पस्य मध्ये ये स्युर्नरामराः ॥"
इति वचनस्य विष्णुभागवतं विषयोऽस्तीत्याहुस्तदसत्। कल्पलक्षणसद्भावस्य सारस्वतकल्पभवत्व-प्रतिपादकानां वचनानां निर्मूलत्वात् सप्तस्वपि यस्मिन् पुराणे यस्य कल्पस्य प्रथमतः प्रतिपादनं तत्कल्पप्रतिपादकमेव तत्पुराणमिति नियमः सर्वपुराणे तथा दृष्टत्वात्। तथा च कल्पलक्षणसद्भावस्य दशमस्कन्धे विद्यमानत्वेऽपि प्रथमतस्तत्कथाया अभावात्पाद्मकल्पकथायाः प्रथमतो विद्यमानत्वस्य स्वेनैवोक्तत्वाच्च। न सारस्वतस्य कल्पस्येति वचनस्य विष्णुभागवतं विषयः। किञ्च कल्पलक्षणसद्भावस्य यथा दशमस्कन्धे कथनं तदा सर्वपुराणेषु तत्कथनं वर्णत एवेति सर्वपुराणानां तद्वचनविषयत्वं स्यात्तथा च सर्वपुराणानि भागवतपदवाच्यानि स्युरुक्तस्मात्सारस्वतकल्पस्य यत्र प्रथमतः प्रतिपादनं स एव तद्वचनस्य विषयो वक्तव्यस्तादृशश्च देवीभागवतमेवास्तीति देवीभागवतमेव तद्विषयो वक्तव्य इति। किञ्च शिवपुराणे उमासंहितायाम्।

"ब्रह्मणा संस्तुता सेयं मधुकैटभनाशने।
महाविद्या जगद्धात्री सर्वविद्याधिदेवता॥
द्वादश्यां फाल्गुनस्येव शुक्लायां समभून्नृप!॥"
इति वचनात् फाल्गुनशुक्लद्वादश्यां देव्या उद्भवस्तद्दिने एव सारस्वतकल्पोद्भवस्तदुक्तं हेमाद्रौ कल्पारम्भप्रकरणे नागरखण्डे।

"सारस्वतस्तु द्वादश्यां शुक्लायां फाल्गुनस्य च।" इति॥

तथा च सरस्वत्याः कल्प इत्यर्थकस्य।

"सारस्वतस्य कल्पस्य मध्ये ये स्युर्नरामराः॥"
इति वचनस्य सर्वथा देवीभागवतमेव विषयो न विष्णुभागवतमिति बोध्यम्। किञ्च तस्य यशसे तस्य परिमाहात्म्यप्रतिपादकत्वात्। तदाश्रितकल्पस्य सात्त्विकत्वमेवायास्यति।

"सात्त्विकेष्वथ कल्पेषु माहात्म्यमधिकं हरेः।"
इति वचनात्। ततश्च संकीर्णेषु सरस्वत्या इति वचनेन सारस्वतकल्प इति लाभाच्च पारम्पर्यसंख्यासामग्र्या कल्पेषा स्यात्। अतो विष्णुभागवतं विहाय देवीभागवतमेवास्य वचनस्य विषयोऽनिच्छतापि वक्तव्यस्तस्मात् सारस्वतस्य कल्पस्येति वचनाद्देवीभागवतमेव महापुराणम्। यस्मिन् वाग्देवतायाविर्भावप्रतिपादकं वचनम्। यदुक्तं देवीभागवते प्रथमस्कन्धे।

"तस्यास्तु सात्त्विकी शक्तिः राजसी तामसी तथा।
महाकाली महालक्ष्मीति सा त्रिधा स्त्रियः।
तासां तिसृणां शक्तीनां देव्याख्योत्पत्तयः।
एतदर्थं समाम्नातः सर्गः शास्त्रविशारदैः॥"
इति।

"सरस्वत्युपपन्नं नित्यं भागवतं श्रुतम्।"
इति वचनमपि मुख्यं प्रोक्तमिति युक्तमतो देवीभागवतमेवेदमपि उच्यते। भवति हि देवीभागवतं शुक्लायेव प्रोक्तं व्यासेनेति। किञ्च
"अष्टादशपुराणानि कृत्वा सत्यवतीसुतः।
भारताख्यानमखिलं चक्रे तदुपबृंहणम्॥"
इति मात्स्यवचनमपि देवीभागवतस्यैव महापुराणत्वं बोधयति। अष्टादशपुराणोत्तरं भारतस्य जातत्वात्। भारतोत्तरञ्च विष्णुभागवतस्य जातत्वात्। भारतोत्तरकालं निर्विण्णो व्यासश्चकारेति विष्णुभागवते एवोक्तत्वात्। ननु
"वेदशाखाः पुराणानि वेदान्तं भारतन्तथा।
कृत्वा सम्मोहसंमूढोऽभवं राजन्! मनस्यपि॥"
इति देवीभागवते तृतीयस्कन्धे एवोक्तत्वात्तत्रापि सविरोधस्तदवस्थ एवेति चेन्न। मन्यते तदानीं ग्रन्थो नैव जातः किन्तु जनमेजयं प्रति एवं वक्तास्मीति ज्ञानचक्षुषा ज्ञात्वा भारतात् पूर्वमेव देवीभागवतं कृतमित्यर्थस्य कल्पनात्। त्वन्मते तु तथा कल्पयितुं न शक्यते। यतः श्लोकीभागवतोपदेशस्य जायमानत्वात्। उपदेशात् पूर्वं तज्ज्ञानाभावस्यावश्यं कल्पनीयत्वात्। यदि तत्रापि पूर्वं व्यासस्य ज्ञानमस्तीति स्वीक्रियते तदा वक्ष्यमाणः सर्वोऽप्यर्थवादः स्यात्। ततश्च ग्रन्थसारस्यभङ्गप्रसङ्ग इत्यास्तां तावत्। वस्तुतस्तु वेदशाखाः पुराणानीति पाठोऽशुद्ध इति वक्ष्यते तृतीयस्कन्धे तदा न कोऽपि विरोधः। यत्तु पाद्मे भागवतमाहात्म्ये श्रीमद्भागवतकथाश्रवणाय समागतानां परिगणनप्रसङ्गे।

"वेदान्तानि च वेदाश्च मन्त्रास्तन्त्राणि संहिताः।
दशसप्तपुराणानि षट्शास्त्राणि समाययुः॥"
इत्युक्तम्। तत्र व्यासकृतपुराणानामष्टादशत्वाद्दशसप्तेति वक्तव्ये सप्तदशत्वोक्तिः श्रीमद्भागवतस्याष्टादशत्वं गमयति तस्याष्टादशानन्तर्गतत्वे देवीभागवतस्याष्टादशान्तर्गतत्वे वाष्टादशानां श्रोतृत्वसम्भवेन श्रोतृमागतानां पुराणानामष्टादशत्वानुक्तेर्निर्वीजत्वप्रसङ्गात्। एवं पाद्मे
"सप्तदशपुराणानि कृत्वा सत्यवतीसुतः।
नाप्नुवन्मनसा तोषं भारतेनापि भामिनि!॥
चकार संहितामेतां श्रीमद्भागवतीं पराम्॥"
इति सप्तदशत्वोक्तिः श्रीमद्भागवतस्यैवेतां संहितामिति निर्दिष्टस्याष्टादशत्वं गमयति। देवीभागवतस्याष्टादशत्वेऽष्टादशपुराणानीत्यनुक्तेर्निर्वीजत्वप्रसङ्गादित्याहुस्तदसत्। तेषामेव वचनेर्विष्णुभागवतस्याष्टादशपुराणान्तर्गतत्वं न सिध्यति। किन्तु देवीभागवतस्यैवेति वार्तुधिकत्वं कुर्वाणो मूलमेव विनाशितवानिति न्याय आगतः। तथा हि भारतं व्यासकृत्वा तत्र सन्दिग्धानः श्रीशुकिमार्कण्डेयं प्रस्तावं सन्देष्टं दृष्टवान् ततो मार्कण्डेयो मार्कण्डेयपुराणमुक्तवान्। तदुक्तं मार्कण्डेयपुराणे
"तदिदं भारताख्यानं कृष्णद्वैपायनकृतम्।
तत्त्वतो ज्ञातुकामोऽहं भगवन्तमुपस्थितः॥"
इति।

तथा च भारतोत्तरं मार्कण्डेयपुराणमभवत्। तथैव तदुक्तरीत्यैव विष्णुभागवतमपि। तथा च भारतात् पूर्वं षोडशपुराणान्येव सिद्धानि। तथा च पूर्वोक्तवचनमध्ये षोडशेत्येव वक्तव्ये सप्तदशेत्युक्तत्वात्। देवीभागवतमेव महापुराणमन्यथा सप्तदशत्वपूर्तिर्न स्यात्। तस्मात्तद्वचनप्रामाण्याद्देवीभागवतमेव महापुराणमिति सिध्यति न तु विष्णुभागवतम्। भारतात् पूर्वं सप्तदशसंहीयभागवतसहितानि मार्कण्डेयसप्तदशसुभयमतसिद्धमेव विष्णुभागवतस्य भारतोत्तरं जायमानत्वेन तन्मध्ये तस्यावस्थानस्यासाभावादित्येवं लाघवेनापि दोषाभावादिति सुधियो विभावयन्तु। यत्तु किञ्च पाद्मे।

"वैष्णवं नारदीयञ्च तथा भागवतं शुभम्।
गारुडञ्च तथा पाद्मं वाराहं शुभदर्शने!।
सात्त्विकानि पुराणानि विज्ञेयानि शुभानि वै॥"
इत्युक्त्वा च भागवतस्य सात्त्विकत्वमुक्तम्। सात्त्विकेषु पुराणेष्विति कौर्मोक्त्या च सात्त्विकपुराणानां विष्णुपरत्वमुक्तम्। अतो विष्णुपरमेव भागवतमष्टादशपुराणान्तर्गतं न तु देवीभागवतमिति। अपि च स्कान्दे प्रभासखण्डे।

"चतुर्भिर्भगवान् विष्णुर्ब्राह्मा तथा रविः।
अष्टादशपुराणेषु त्रयेषु भगवान् भवः॥"
इत्युक्तम्। स्कान्दे सौरसंहितायाञ्च।

"कथ्यते दशभिर्विप्राः पुराणैः परमेश्वरः।
चतुर्भिर्भगवान् विष्णुर्ब्राह्मा प्रकीर्तितः॥
एकेनाग्निस्तथैकेन भगवांश्चण्डभास्करः॥"
इत्युक्तमतोऽपि विष्णुभागवतमष्टादशान्तर्गतं नवत्यदित्याहुस्तदसत्। त्वन्मते मत्स्योक्तसात्त्विकराजसतामससङ्कीर्णपुराणेषु मध्ये त्रयाणां त्रयाणां पूर्ववचनैरुक्तयोक्ता। सङ्कीर्णपुराणानान्तु नोक्ता। तेषां केषु पुराणेष्वन्तर्भाव इति वद। करिष्यामि कुत्रचिदिति वन्मम मतेऽपि श्रीभगवत्या विष्णुशक्तित्वाभिमानेन मन्त्राधिष्ठात्री देवतां वेदमानो दुर्गां दुर्बोधध्वान्तभानुं गुरुञ्च इति श्रीक्रमदीपिकोक्तप्रकारेण विष्णुमन्त्राणां दुर्गायाः अधिष्ठातृत्वेन तयोरैक्याद्वा तत्प्रतिपादकभागवतस्य वैष्णवेष्वेवान्तर्भावात्। अतएव

"एकाक्षरैर्द्व्यक्षरैश्च द्वाभ्यां चक्षुर्विभावकौ।
द्वाभ्यां ब्रह्मा समाख्यातः त्रयेषु भगवान् शिवः॥"
इति वचनं सङ्गच्छते। वस्तुतस्तु द्वयोरपि भागवतयोरस्तुते प्रमाणत्वात्। विष्णुभागवतपक्षपातिनां वचनागमन्नाकं विरोधाभावेन समाधाने प्रयोजनाभाव एव। तथा च नारदीयादिपुराणमतेन श्रीविष्णुभागवतं महापुराणं तद्वचनानि प्रविहाय्येवेति न लिखितानि। देवीभागवतन्तु तन्मते उपपुराणम्। शैव-

मात्यपुराणादिमते तु देवीभागवतं महापुराणम्। विष्णुभागवतमर्थाद्विष्णुपुराणमिति सिद्धम्। यत्र क्वचिद्देवीभागवतसन्निवेशेन देवीयामलतन्त्रस्यम्।

"श्रीमद्भागवतं नाम पुराणं वेदसम्मितम्।
पारीक्षितायोपदिष्टं सत्यवत्यङ्गजन्मना॥
तत्र देयव्रताराध्य बहवः प्रतिपादिताः॥"

इति।

तथा

"इदं रहस्यचरितं राधोपासनमुत्तमम्।
व्यासाय मम भक्ताय प्रोक्तं पूर्वं मयाद्रिजे!॥
मत्तो रहस्यं ज्ञात्वैव राधामाहात्म्यमुत्तमम्।
ततस्य विस्तरं चक्रे श्रीमद्भागवते तथा॥
नारदे ब्रह्मवैवर्ते लोकानां हितकाम्यया॥"

इति।

सौभाग्यकल्पलतायां संहारभैरवतन्त्रस्थं वचनं लिखन्ति। तत्र परे विवदन्ते। तदुभयमपि गौरवभिया न लिख्यत इति॥ * ॥)

तत्र विष्णुभागवते प्रथमस्कन्धे परिक्षिन्नारदयोरुपाख्यानम्। विप्रशापात् परीक्षितस्य प्रायोपवेशः। शुकपरीक्षितसंवादश्च ॥१॥*॥ द्वितीयस्कन्धे। योगधारणयोत्क्रान्तिः। नारदब्रह्मयोः संवादः। अवतारानुगीतम्। महदादिक्रमेण सृष्टिश्च॥ २॥ * ॥ तृतीयस्कन्धे। विदुरोद्धवसंवादः। क्षत्तृमैत्रेययोः संवादः। पुराणसंहिताप्रश्नः। महापुरुषसंस्थितिः। प्राकृतिकः सर्गः। वैकृतिकाः षड् सर्गाः। ब्रह्माण्डसम्भूतिः। विराट्पुरुषोत्पत्तिः। कालस्य स्थूलसूक्ष्मस्य गतिः। पाद्मसम्भवः। ब्रह्मणोऽर्भव उद्गमः। हिरण्याक्षवधः। ऊर्ध्वतिर्यगवाक्सर्गः। रुद्रसर्गः। अर्धनारीनरस्य सर्गः। यतः स्वायम्भुवमनुः स्त्रीणां आद्या प्रकृतिः। अतरूपा च। कर्दमप्रजापतेर्धर्मपत्नीनां सन्तानः। भगवत्कपिलावतारः। कपिलेन देवहूतिसंवादश्च ॥३॥*। चतुर्थस्कन्धे। नवब्रह्मसमुत्पत्तिः। दक्षयज्ञविनाशनम्। ध्रुवचरितम्। पृथोः प्राचीनबर्हिषश्च चरितम्। नारदस्य संवादश्च ॥४॥*॥ पञ्चमस्कन्धे। प्रियव्रतचरितम्। द्वीपसमुद्रादिवर्णनद्युपवर्णनम्। ज्योतिश्चक्रस्य संस्थानम्। पातालनरकस्थितिश्च॥ ५॥ * ॥ षष्ठस्कन्धे। दक्षजन्म। सत्पुत्रीणां सन्ततिः। यतः देवासुरनरतिर्यङ्नगखगादयः। त्वाष्ट्रस्य जन्म च॥ ६॥ * ॥ सप्तमस्कन्धे। दितेः पुत्रयोर्निधनम्। प्रह्लादचरितञ्च॥ ७॥ * ॥ अष्टमस्कन्धे। मन्वन्तरानुचरितम्। गजेन्द्रविमोचनम्। मन्वन्तरावतारः। एयशीर्षादयोऽवतारः। जगत्पतेः कौर्मसात्स्वनारसिंहवामनरूपाणि। क्षीरोदमथनम्। देवासुरयुद्धञ्च॥ ८॥ * ॥ नवमस्कन्धे। राजवंशानुकीर्तनम्। इक्ष्वाकुजन्म तदंशः। सुमुखवंशः। इलोपाख्यानम्। तारोपाख्यानम्। सूर्यवंशानुकथनम्। ऋष्यशृङ्गकन्यारुणार्तिककुत्स्थखट्वाङ्गमान्धातृसौभरिरामाणां चरितम्। निमेरङ्गपरित्यागः। जनकानां सम्भवः। परशुरामजन्म। सुधो निःक्षत्रीकरणम्। ययातिनहुषभरतशान्तनुततसुतयदूनां वंशानुकीर्तनञ्च॥ ९॥ * ॥ दशमस्कन्धे। श्रीकृष्णस्य वसुदेवगृहे जन्म। गोकुले तस्य वृद्धिः। तस्य पूतनापयःपानम्। शकटोच्चाटनम्। तृणावर्तवधः। बकवत्सयोर्वधः। अघासुरवधः। धात्रा वत्सपालावगूहनम्। धात्रा सह धेनुकस्य वधः। प्रलम्बवधः। गोपालानां दावाग्नेः परित्राणम्। कालीयदमनम्। महाहेर्नन्दमोचनम्। कन्यानां व्रतचर्या। यज्ञपत्नीभ्यः प्रसादः। विप्राणामनुपालनम्। गोवर्धनोद्धारणम्। शक्रसुरभिकर्तृकतत्कृष्णस्य यज्ञाभिषेकः। रात्रिषु स्त्रीभिः क्रीड़ा। शङ्खचूड़स्य वधः। केशिवधः। अक्रूरागमनम्। रामकृष्णयोर्मथुराप्रस्थानम्। व्रजस्त्रीणां विलापः। मथुरालोकनम्। गजमुष्टिकचानूरकंसादीनां वधः। सान्दीपनेर्मृतपुत्रानयनम्। उद्धवरामाभ्यां सह हरिणा यदुचक्रस्य प्रियकरणम्। जरासन्धसमानीतबहुसैन्यवधः। यवनेन्द्रस्य घातनम्। कुशस्थल्या निवेशनम्। पारिजातहरणम्। रुक्मिणीहरणम्। बाणेन सह युद्धम्। प्रागज्योतिषपतिं हत्वा कन्यानां हरणम्। चैद्यपौण्ड्रकशाल्वदन्तवक्रशम्बरद्विविदपीठमुरपञ्चजनानां माहात्म्यं वधश्च। वाराणस्या दाहः। पाण्डवान् निमित्तीकृत्य भूमेर्भारावतरणञ्च॥ १०॥ * ॥ एकादशस्कन्धे। विप्रशापापदेशेन स्वकुलसंहारः। उद्धवसंवादः। उद्धवाय आत्मविद्यात्मकर्मविनिर्णयकथनम्। आत्मयोगानुभावतो मर्त्यपरित्यागश्च॥ ११॥ * ॥ द्वादशस्कन्धे। युगलक्षणवृत्तिः। कलौ नृणामुपप्लवः। चतुर्विधप्रलयः। त्रिविधोत्पत्तिः। परिक्षितदेहत्यागः। व्यासकर्तृकशाखाप्रणयनम्। मार्कण्डेयस्य सत्कथा। सूर्यस्य विभासश्च॥१२॥*॥ इति श्रीभागवते १२ स्कन्धे अनुक्रमणिकाध्यायः॥

भागवतः, त्रि, (भगवान् हरिः भगवती दुर्गा वास्य देवतेति। भगवत्+"तस्य देवता।"४।२।२४। इति अण्।) भगवद्भक्तः। तस्य लक्षणम्। यथा,

"सर्वदेवान् परित्यज्य नित्यं भगवदाश्रयः।
ततस्तदीयसेवायां स भागवत उच्यते॥"

इति पाद्मोत्तरखण्डे ६६ अध्यायः॥ * ॥

स च यमदूतैस्त्याज्यः। यथा,—

"ये तु भागवता लोके तच्चित्तास्तत्परायणाः।
पूजयन्ति सदा विष्णुं ते च त्याज्याः सुदूरतः॥"

इति वह्निपुराणे दूतान् प्रति यमवचनम्॥

स्कान्दे श्रीमार्कण्डेयभगीरथसंवादे।

"दशमीशेषसंयुक्तं दिनं वैष्णववल्लभम्।
उपासते महीपाल! ते वै भागवता नराः॥
प्रायात्यये न खादन्ति दिनं प्राप्य हरेर्नराः।
कुर्वन्ति जागरं रात्रौ सदा भागवता हि ते॥
उपोष्य द्वादशीं तद्वा रात्रौ जागरणान्विताम्।
अश्वां तु लाधयेद्यस्तु स वै भागवतो वरः॥
भक्तिर्न विद्युता येषां न च्युतानि व्रतानि च।
सुप्रियः श्रीपतिर्येषां ते स्युर्भागवता नराः॥
सदाचाररताः शिष्टाः सर्वभूतानुकम्पकाः।
शुचयस्त्यक्तरागा ये सदा भागवता हि ते॥"

एकादशस्कन्धे।

"सर्वभूतेषु यः पश्येद्भगवद्भावमात्मनः।
भूतानि भगवत्यात्मन्येष भागवतोत्तमः॥
न यस्य स्वपर इति वित्तेष्वात्मनि वा भिदा।
सर्वभूतसमः शान्तः स वै भागवतोत्तमः॥"

हरियोगेश्वरोत्तरे।

"गृहीत्वापीन्द्रियैरर्थान् यो न द्वेष्टि न काङ्क्षति।
विष्णोर्मायामिदं पश्यन् स वै भागवतोत्तमः॥"

बृहन्नारदीये।

"शिवे च परमेशाने विष्णौ च परमात्मनि।
समबुद्ध्या प्रवर्तन्ते ते वै भागवतोत्तमाः॥"

स्कान्दे।

"येषां भागवतं शास्त्रं सदा तिष्ठति सन्निधौ।
पूजयन्ति च ये नित्यं ते स्युर्भागवता नराः॥
येषां भागवतं शास्त्रं जीवितादधिकं भवेत्।
महाभागवताः श्रेष्ठा विष्णुना कथिता नराः॥"

लैङ्गे।

"भोजनाच्छादनं सर्वं यथाशक्त्या ददाति यः।
विष्णुभक्तस्य सततं स वै भागवतः स्मृतः॥"

गारुड़े।

"येन सर्वात्मना विष्णुभक्त्या भावो निवेशितः।
वैष्णवेषु कृतात्मत्वान्महाभागवतो हि सः॥"

बृहन्नारदीये।

"तुलसीकाननं दृष्ट्वा ये नमस्कुर्वते नराः।
तत्काष्ठाद्भिन्नकर्णा ये ते वै भागवतोत्तमाः॥
तुलसीगन्धमाघ्राय सन्तोषं कुर्वते तु ये।
तन्मूलमृद्धृता येच ते वै भागवतोत्तमाः॥
मत्कथाश्रवणे येषां वर्तते सात्त्विकी मतिः।
तद्वक्तरि सुभक्ताश्च ते वै भागवतोत्तमाः॥"

स्कान्दे।

"मत्कथां कुरुते यस्तु मत्कथाश्च शृणोति च।
कथ्यते मत्कथायाश्च स वै भागवतोत्तमः॥"

बृहन्नारदीये।

"मन्मानसाश्च मद्भक्ता मद्भक्तजनसेवकाः।
मन्नामश्रवणासक्तास्ते वै भागवतोत्तमाः॥
येऽभिनन्दन्ति नामानि हरेः शृण्वन्ति हर्षिताः।
रोमाञ्चितशरीराश्च ते वै भागवतोत्तमाः॥
अन्येभ्यस्तदवं दृष्ट्वा येऽभिनन्दन्ति मानवाः।
हरिनामपरा ये च ते वै भागवतोत्तमाः॥"

स्कान्दे।

"येऽर्चयन्ति सदा विष्णुं यज्ञेशं वरदं हरिम्।
देहिनः पुण्यकर्माणः सदा भागवता हि ते॥"

लैङ्गे।

"विष्णुक्षेत्रे शुभान्येव करोति स्नेहसंयुतः।
प्रतिमाश्च हरेर्नित्यं पूजयेत् प्रयतात्मवान्॥
विष्णुभक्तः स विज्ञेयः कर्मणा मनसा गिरा।
नारायणपरो नित्यं भूप! भागवतो हि सः॥

पाद्मोत्तरखण्डे ।
"तापादिपञ्चसंस्कारी नवेज्याकर्म्मकारकः ।
अर्थपञ्चकविद्विप्रो महाभागवतो हि सः ॥
एकान्तेन सदा विष्णौ यस्माद्देवे परायणाः ।
तस्मादेकान्तिनः प्रोक्तास्तद्भागवतचेतसः ॥"
एकादशस्कन्धे ।
"ज्ञात्वाज्ञात्वाथ ये वै मां यावान् यश्चास्मि
यादृशः ।
भजन्त्यनन्यभावेन ते वै भागवता मताः ॥
न कामकर्म्मबीजानां यस्य चेतसि सम्भवः ।
वासुदेवैकनिलयः स वै भागवतोत्तमः ॥"
स्कान्दे ।
"यस्य क्षणार्द्धगतस्यापि कैशवे रमते मनः ।
न विद्युता च भक्तिर्वै स वै भागवतो नरः ॥
व्यापन्नतस्य यस्येह भक्तिरव्यभिचारिणी ।
नान्यत्र रमते चित्तं स वै भागवतो नरः ॥"
हरियोगेश्वरोत्तरे ।
"विद्रवति हृदयं न यस्य साक्षा-
द्धरिरवशाभिहितोऽप्यघौघनाशः ।
प्रणयरसनया धृताङ्घ्रिपद्मः
स भवति भागवतप्रधान उक्तः ॥"
मध्यममाह तत्रैव ।
"ईश्वरे तदधीनेषु बालिशेषु द्विषत्सु च ।
प्रेममैत्रीकृपोपेक्षा यः करोति स मध्यमः ॥"
कनिष्ठस्त्वाह तत्रैव ।
"अर्च्चायामेव हरये पूजां यः श्रद्धयेहते ।
न तद्भक्तेषु चान्येषु स भक्तः प्राकृतः स्मृतः ॥"
इति श्रीहरिभक्तिविलासे १० विलासः ॥

भागिकं, त्रि, (भाग+"भागाद्यच् ।"५।१।४६। इति पक्षे ठन् ।) दृढ्यर्थदत्तसुद्रादि । सुदी टीका इत्यादि भाषा । यथा । भागो दृढ्यादिरस्मिन् दीयते भाग्यं भागिकं धृतम् । भाग्या भागिका विंशतिः । इति सिद्धान्तकौमुदी ॥

भागिनेयः, पुं, (भगिन्या अपत्यम् । भगिनी+"स्त्रीभ्यो ढक् ।"४ । १ । १२० । इति ढक् ।) भगिनीपुत्रः । तत्पर्य्यायः । स्वसीयः २ । इत्यमरः ।२ ।६।३२ ॥ स्वस्रियः ३ । इति शब्दरत्नावली ॥ स च सुखप्रतिनिधिः । यथा,—
"ऋत्विक् पुत्रो गुरुर्भ्राता भागिनेयोऽथ
विट्पतिः ।
एभिरेव हुतं यत्तु तद्धुतं स्वयमेव हि ॥"
इति तिथ्यादितत्त्वम् ॥ * ॥
तस्यावश्यपोष्यत्वम् यथा,—
"पितृव्यगुरुदौहित्रान् भर्तुः स्वसीयमातुलान् ।
पूजयेत् कन्यपुत्राभ्यां वृद्धानाथातिथीन् स्त्रियः ॥"
इत्यपूजनाधिकारे दायभागः ॥ * ॥
भागिनेयदत्तककरणं शूद्रस्यैव न तु द्विजानाम् । यथा, दत्तकचन्द्रिकायां शौनकवचने ।
"दौहित्रो भागिनेयश्च शूद्रेषु क्रियते सुतः ।
ब्राह्मणादित्रये नास्ति भागिनेयः सुतः क्वचित् ॥"
तन्मरणे मातुलस्य पत्नित्रयशौचम् । यथा ।
"पत्नित्रयी योनिसम्बन्धे बान्धवेषु तथैव च ।
योनिसम्बन्धे मातृष्वसृीयपितृष्वसृीयमागिनेयेषु ।
मातुलमरणे भागिनेयस्यापि पत्नित्रयशौचम् ।"
इति शुद्धितत्त्वम् ॥

भागिनेयी, स्त्री, (भगिनी+ढक् । स्त्रियां ङीप् ।) भगिन्याः स्त्रीअपत्यम् । भाषा । भगिनीशब्दात् स्त्र्यपत्यार्थे घेये स्त्रित्वादीप्-प्रत्ययनिष्पन्ना । इति व्याकरणम् ॥

भागीरथी, स्त्री, (भगीरथेयम् । भगीरथ+अण् । ङीप् ।) गङ्गा । इत्यमरः । १ । १० । ३१ ॥ पृथिव्यां तस्यावतरणम् । यथा,—
सूत उवाच ।
"ततो भगीरथो राजा तपः परमदुश्चरम् ।
कृत्वा सन्तोषयामास उमाकान्तं महेश्वरम् ॥
धारणायाशुमत्वा तं जगाम ब्रह्मणोऽन्तिकम् ।
ततो भगीरथः प्राह गङ्गा ब्रह्मन्! विसृज्यताम् ॥
स तच्छ्रुत्वा वचस्तस्य सम्मान्य विबुधप्रियम् ।
गङ्गां प्रस्थापयामास सापतद्ब्रह्मणोऽन्तिकात् ॥
वायुना प्रेर्य्यमाणापि आकाशपथगा नदी ।
विख्याताकाशगङ्गेति तत्र संसेविता गजैः ॥
विष्णोः पदं समायाता तस्माद्विष्णुपदीति सा ।
पूज्यमाना सुरैः सिद्धैर्मुनिविद्याधरोरगैः ॥
सुरालयमनुप्राप्ता तस्माद्देवनदी तु सा ।
तस्मात् प्रपतिता गङ्गा शम्भोः शिरसि संस्थिता ॥
धृतैकेनैव तेनापि शम्भुना योगमायया ।
दिव्यं वर्षशतं साग्रं पुनराराधितेन वै ॥
मुक्ता भगीरथेनैव मलहन्त्री विनिर्गता ।
जटाजूटात् पपातोर्द्धं मेरोस्तस्मात्ततोऽगमत् ॥
देवैः परिवृता गङ्गा हेमकूटञ्च पर्व्वतम् ।
मन्दरञ्चैव कैलासं हिमवन्तञ्च पर्व्वतम् ॥
तामायान्तीं तु रोधाय खलीनो नाम दानवः ।
पार्व्वतं रूपमास्थाय वर्षाणान्तु शतैर्द्विजाः ॥
ततो भगीरथो राजाराधयामास कौशिकम् ।
स तुष्टः प्रददौ नागं वाहनं वै भगीरथः ॥
तमारुह्यागमत्तत्र यत्र वृद्धा भगीरथी ।
तेन नागेन तं दैत्यं संविदार्य्य न सङ्गतः ॥
धृतधा तां समाधाय मूर्द्धन्येरावणो गजः ।
महीतलं समापेदे स यावन्नागसाह्वयम् ॥
तस्माद्यावटनाद्विप्रा अभून्नागपुरं वरम् ।
प्लावयन्ती महीं गङ्गा जह्नोराश्रममभ्यगात् ॥
तां दृष्ट्वाथ पपौ सोऽपि प्रहृत्य कुपितो मुनिः ।
जह्नुना नाशितां दृष्ट्वा गङ्गां त्रिपथगां नदीम् ॥
सशोकस्तोषयामास जह्नुं भगीरथो मुनिम् ।
मुमोच कर्णरन्ध्रेण गङ्गा स दक्षिणेन ताम् ॥
एतस्माज्जाह्नवी भूता सुता तस्य मुनेस्तथा ।
ततः सा विविधान् देशान् पर्व्वतांश्च तथाश्रमान् ॥
सञ्चाय वारणा क्षुब्धा जगाम पूर्व्वसागरम् ॥
यत्र तत्रोदकं तस्यौ तस्याः पुण्यमभूद्विजाः ।
सतीर्थं सर्व्वमर्त्यानां तारणं पापनाशनम् ॥
ततः सम्पूरयामास समुद्रं सर्व्वतो दिशम् ।
प्रपन्नं सागरैः सर्व्वं ततः पातालमाविशत् ॥
सागराणां ततोत्तस्मात् सञ्चाय वारिणा ततः ।
देवैः संपूज्यमानापि जगाम ब्रह्मणोऽन्तिकम् ॥
जग्मुस्ते सागराः स्वर्गं ब्रह्मणोपहृताश्च ये ।
रक्षकास्ते विनिर्दिष्टा गङ्गाया ब्रह्मणा स्वयम् ॥
भवद्भिरनिशं नद्यां कर्त्तव्यं विघ्ननाशनम् ॥
सूत उवाच ।
एतद्वः कथितं सर्व्वं यथावतरणं दिवः ।
गङ्गायास्त्वेव माहात्म्यं शृणुतां गदतो मम ॥"
इत्यादे वह्निपुराणे गङ्गावतरणनामाध्यायः ॥
तस्या सुखनामानि यथा,—
वराह उवाच ।
"धर्म्मस्तु द्रवरूपेण ब्रह्मणा निर्म्मितः पुरा ।
यद्वै गङ्गेति विख्याता शृणु स्तोत्रं वसुन्धरे ! ॥
किन्तेनामसहस्रेस्तु सुखासुखैः सुविस्तरैः ।
यानि नामानि सुख्यानि तानि वक्ष्याम्यनुक्रमात् ॥
गङ्गा भागीरथी पुण्या जाह्नवी सुरनिम्नगा ।
विष्णुपादाब्जसम्भूता शम्भोः शिरसि संस्थिता ॥
सुमेरुगह्वरसंसृष्टा हिमाचलसुताश्रया ।
शुक्लकुन्देन्दुधवला महापातकनाशिनी ॥
नदीश्वरी त्रिपथगा वैष्णवी सुरसप्रिया ।
धर्म्मद्रवी भोगवती विन्ध्यपाषाणदारिणी ॥
क्षमा शान्तिः प्रजाशान्तिः पुण्यदा पूतिका शिवा ।
महानदी शुभसखी शुक्ला मकरवाहिनी ॥
ब्रह्महत्यात् परिभ्रष्टा सौम्यरूपातिशोभना ।
मुनिभिः पूजिता सर्व्वैः सर्व्वैर्देवैर्नमस्कृता ॥
महायज्ञमयी देवी मर्त्यानामुपकारिणी ।
सर्व्वत्र दुर्लभा गङ्गा त्रिभिः स्थानैर्विशेषतः ॥
गङ्गाद्वारे प्रयागे च गङ्गासागरसङ्गमे ॥
इदं स्तोत्रं मया ख्यातं पूर्व्वसूक्तं स्वयम्भुवा ।
यः पठेत् प्रातरुत्थाय तस्य नश्यति दुर्गतिः ॥
यत् पापं यौवने बाल्ये कौमारे वार्द्धके च यत् ।
तत् सर्व्वं विलयं याति तोयस्थं लवणं यथा ॥
कीर्त्तिं प्रीतिं महालक्ष्मीमायुरारोग्यसन्ततिम् ।
ददाति जाह्नवी तुष्टा सर्व्वभावेन माधवि ! ॥"
इति वाराहे सर्व्वपापप्रशमनगङ्गास्तवः ॥
अपि च ।
ब्रह्मोवाच ।
"श्रोतुमिच्छामि देवेश ! लक्ष्मीकान्त ! जगत्
प्रभो ! ।
विष्णो ! विष्णुपदीस्तोत्रं पापघ्नं पुण्यकारणम् ॥
श्रीनारायण उवाच ।
शिवसंगीतसंमुग्ध श्रीकृष्णाङ्घ्रवोद्भवाम् ।
राधाङ्घ्रवसंयुक्तां तां गङ्गां प्रणमाम्यहम् ॥
या जन्महेतोरादौ च गोलोके रासमण्डले ।
सन्निधानं शुद्धरूपं तां गङ्गां प्रणमाम्यहम् ॥
गोपैर्गोपीभिराकीर्णैः शुभे राधामहोत्सवे ।
कार्त्तिकीपूर्णिमाजातां तां गङ्गां प्रणमाम्यहम् ॥
कोटियोजनविस्तीर्णा दैर्घ्ये सप्तगुणा ततः ।
समावृता या गोलोकं तां गङ्गां प्रणमाम्यहम् ॥
षष्टिलक्षयोजनां या ततो दैर्घ्ये चतुर्गुणा ।
समावृता या वैकुण्ठं तां गङ्गां प्रणमाम्यहम् ॥
विंशतिलक्षयोजना या ततो दैर्घ्ये चतुर्गुणा

आवृता ब्रह्मलोकं या तां गङ्गां प्रणमाम्यहम् ॥
त्रिंशल्लक्षयोजना या दैर्घ्ये पञ्चगुणा ततः ।
आवृता शिवलोकं या तां गङ्गां प्रणमाम्यहम् ॥
लक्षयोजनविस्तीर्णा दैर्घ्ये सप्तगुणा ततः ।
आवृता-ध्रुवलोकं या तां गङ्गां प्रणमाम्यहम् ॥
लक्षयोजनविस्तीर्णा दैर्घ्ये शतगुणा ततः ।
आवृता चन्द्रलोकं या तां गङ्गां प्रणमाम्यहम्॥
षष्टिसहस्रयोजना या दैर्घ्ये दशगुणा ततः ।
आवृता सूर्य्यलोकं या तां गङ्गां प्रणमाम्यहम् ॥
लक्षयोजनविस्तीर्णा दैर्घ्ये च षड्गुणा ततः ।
आवृता सत्यलोकं या तां गङ्गां प्रणमाम्यहम् ॥
दशलक्षयोजना या दैर्घ्ये पञ्चगुणा ततः ।
आवृता या तपोलोकं तां गङ्गां प्रणमाम्यहम्॥
सहस्रयोजनायामा दैर्घ्ये दशगुणा ततः ।
आवृता जनलोकं या तां गङ्गां प्रणमाम्यहम् ॥
सहस्रयोजनायामा दैर्घ्ये सप्तगुणा ततः ।
आवृता या च कैलासं तां गङ्गां प्रणमाम्यहम्॥
शतयोजनविस्तीर्णा दैर्घ्ये दशगुणा ततः ।
मन्दाकिनी येन्द्रलोके तां गङ्गां प्रणमाम्यहम् ॥
पाताले या भोगवती विस्तीर्णदशयोजना ।
ततो दशगुणा दैर्घ्ये तां गङ्गां प्रणमाम्यहम् ॥
क्रोशैकमात्रविस्तीर्णा ततः क्षीणा च कुत्रचित् ।
क्षितौ चालकनन्दा या तां गङ्गां प्रणमाम्यहम्॥
सत्ये या क्षीरवर्णा च त्रेतायामिन्दुसन्निभा ।
द्वापरे चन्दनाभा च तां गङ्गां प्रणमाम्यहम् ॥
जलप्रभा कलौ या च नान्यत्र पृथिवीतले ।
स्वर्गे च नित्यं क्षीराभा तां गङ्गां प्रणमाम्यहम् ॥
यस्याः प्रभावमतुलं पुराणे च श्रुतौ श्रुतम् ।
या पुण्यदा पापहन्त्री तां गङ्गां प्रणमाम्यहम्॥
यत्तोयकणिकास्पर्शैः पापिनाञ्च पितामह ! ।
ब्रह्महत्यादिकं पापं कोटिजन्मार्जितं दहेत् ॥
इत्येवं कथितं ब्रह्मन् ! गङ्गापद्येकविंशतिः ।
स्तोत्ररूपञ्च परमं पापघ्नं पुण्यकारकम् ॥
नित्यं यो हि पठेद्भक्त्या संपूज्य च सुरेश्वरीम् ।
अश्वमेधफलं नित्यं लभते नात्र संशयः ॥
अपुत्रो लभते पुत्रं भार्य्याहीनो लभेत् प्रियाम् ।
रोगात् प्रमुच्यते रोगी बद्धो मुच्येत बन्धनात् ॥
अस्यकीर्त्तिः त्रयग्रा स्वर्गे भवति पण्डितः ॥
यः पठेत् प्रातरुत्थाय गङ्गास्तोत्रमिदं शुभम् ॥
शुभं भवेत्तु दुःस्वप्नं गङ्गास्नानफलं लभेत् ॥"

इति गङ्गास्तोत्रम् ॥

नारायण उवाच ।

"भगीरथेनेन स्तोत्रेण स्तुत्वा गङ्गाञ्च नारद ! ।
जगाम तां गृहीत्वा च यत्र नष्टाश्च सागराः ।
वैकुण्ठं ते ययुस्तूर्णं गङ्गायाः स्पर्शवायुना ॥
भगीरथेन सानीता तेन भागीरथी स्मृता ।
इत्येवं कथितं सर्व्वं गङ्गोपाख्यानमुत्तमम् ॥
मुक्तिदं मोक्षदं सारं किं भूयः श्रोतुमिच्छसि ॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे गङ्गोपाख्यानेऽष्टमः ॥

आयुरिः, पुं, स्तुतिपाठकरथादिकर्मकृन्मनिविशेषः । तत्पर्य्यायः । शुनस्तुत्यकः २ । इति षटाधरः ॥

(यथा । "वहि भागुरिरल्लोपमवाप्योरुपसर्गयोः ।" इति सिद्धान्तकौमुदी ॥)

भाग्यं, क्ली, (भज्यतेऽनेन इति । भज + "सृहृलोर्ण्यत् ।" ३ । १ । १२४ । इति ण्यत् । "चजोः कु घिण्ण्यतोः ।" ७ । ३ । ५२ । इति कुत्वम् ।) प्राक्तनशुभाशुभकर्म्म । तत्पर्य्यायः । दैवम् २ दिष्टम् ३ भागधेयम् ४ नियतिः ५ विधिः ६ । इत्यमरः । १ । ४ । १८ ॥ प्राक्तनकर्म्म ७ भागः ८ भवितव्यता ९ । इति जटाधरः ॥ अदृष्टम् १० । इति शब्दरत्नावली ॥ फलोन्मुखीभूतपूर्व्वदेहिकशुभाशुभं कर्म्म । इति मलमासतत्त्वम् ॥ (यथा,—

"समुद्रमन्थने लेभे हरिर्लक्ष्मीं हरो विषम् ।
भाग्यं फलति सर्व्वत्र न विद्या न च पौरुषम् ॥"

इति प्राचः ॥

उत्तरफल्गुनीनक्षत्रम् । यथा, बृहत्संहितायाम् । १० । १ ।

"श्रवणानिलहस्तार्द्रा-
भरणीभाग्योपगः सुतोऽर्कस्य ।
प्रचुरसलिलोपगूढां
करोति धात्रीं यदि स्निग्धः ॥"

भागो बृहादिरस्त्यिन् दीयते इति । भाग + "भागाद्यच् ।" ५ । १ । ४६ । इति यत् ।) भागिके, त्रि । इति सिद्धान्तकौमुदी ॥ (भागमर्हति । भाग + "दण्डादिभ्यो यत् ।" ५ । १ । ६६ । इति यत् ।) भागार्हम् । (भज + ण्यत् । भजनीयम् ॥)

भाङ्गीनं, त्रि, (भङ्गाया भवनं क्षेत्रमिति । "विभाषा तिलमाषोमाभङ्गाणुभ्यः ।" ५ । २ । ४ । इति यच् ।) भङ्गाक्षेत्रम् । तत्पर्य्यायः । भाङ्गम् २ । इत्यमरहेमचन्द्रौ ॥ (यथा, शब्दरत्नावल्याम् ।

"एवं माष्यन्तु माषीणं कौद्रवं कोद्रवीणवत् ।
तथा भाङ्गञ्च भाङ्गीनमुष्यमौमीनमित्यपि ॥")

भाङ्ग, त्रु क एकत्वे । इति कविकल्पद्रुमः ॥ (अदन्तधुरा०-परः-सकः-सेट् ।) अवभाजनघनं भाङ्गवर्गः । इति दुर्गादासः ॥

भाजनं, क्ली, (भाज्यते इति । भाज एकत्वकरणे + ल्युट् ।) पात्रम् । इत्यमरः । २ । ६ । ६३ ॥ (यथा, महाभारते । १३ । १११ । १०२ ।

"राजतं भाजनं कृत्वा कपोतः संप्रणायते ॥")

योग्यम् । इति मेदिनी । ने, १०१ ॥ (यथा, कथासरित्सागरे । ३४ । २०५ ।

"तस्माच्चिताताप्रा राजा स्यादयुक्तदण्डो विशेषवित् ।
प्रजानुरागादेवं हि स भवेद्भाजनं श्रियः ॥")

"यः संवादयते नित्यं योऽभिवादांस्तितिक्षति ।
यश्च तप्तो न तपति दृढं सोऽर्घस्य भाजनम् ॥"

इति मत्स्यपुराणम् ॥

व्याकरणपरिभाषा ॥

भाजितं, त्रि, (भाज्यते स्मेति । भाज + क्त ।) पृथक्कृतम् । विभक्तम् । इति भाजधातोः कर्म्मणि क्तप्रत्ययेन निष्पन्नम् ॥ (भाजे + क्त ।) भागे, क्ली ॥

भाजी, स्त्री, (भाज्यते इति । भाज + कर्म्मणि घञ् । भाज + "जानपदकुण्डगोणस्थलभाजनागेति ।" ४ । १ । ४२ । इति ङीष् ।) यज्ञन विशेषः । अन्यत्र भाजा । इति स्त्रीत्यटीकायां दुर्गादासः ॥

भाज्यं, त्रि, भागार्हम् । भाजनीयम् । इति भाज धातोः कर्म्मणि यप्रत्ययेन निष्पन्नम् ॥

भाटकः, पुं, क्ली, (भटतीति । भट पोषणे + ण्वुल् । व्यवहारार्थं दत्तशुल्कादिलभ्यधनम् । इति हलायुधः ॥ भाड़ा इति भाषा ॥ अथ गृहादि भाटकम् ।

"परभूमौ गृहं कृत्वा भाटयित्वा वसेत्तु यः ।
स तद्गृहीत्वा निर्गच्छेत्तृणकाष्ठेष्टकादिकम् ॥
स्तोमं विना वसित्वा तु परभूमावनिच्छतः ।
निर्गच्छंस्तृणकाष्ठानि न गृह्णीयात् कथञ्चन ॥"

कात्यायनः ।

"गृहवाप्यापणादीनि गृहीत्वा भाटकेन यः ।
स्वामिनो नार्पयेद्यावत्तावद्देयः स भाटकम् ॥"

वापी परकृता प्रतिष्ठितेति विवक्षितम् ।

"हस्त्यश्वगोखरोष्ट्रादीन् गृहीत्वा भाटकेन यः ।
स्वामिनो नार्पयेद्यावत् तावद्देयः स भाटकम् ॥"

बृहन्मनुः ।

"यो भाटयित्वा शकटं नीत्वा नान्यत्र गच्छति ।
भाटं न दद्याद्दाप्योऽसावनूढ्यापि भाटकम् ॥"

शकटं शयनौकादेरप्युपलक्षणम् । अनूढ्यावाहितस्यापि शकटादेः । इति विवादचिन्तामणिः ॥

भाणः, पुं, (भण्यतेऽत्रेति । भण + अधिकरणे घञ् ।) नाटकादिदशरूपकान्तर्गतरूपकविशेषः । इति हेमचन्द्रः । २ । १८८ ॥ तस्य लक्षणादि यथा,—

"भाणः स्याद्धूर्त्तचरितो नानावस्थान्तरात्मकः ।
एकाङ्क एक एवात्र निपुणः पण्डितो विटः ॥
रङ्गे प्रकाशयेत् स्वेनाशुभूतमितरेण वा ।
सम्बोधनोक्तिप्रत्युक्तौ कुर्य्यादाकाशभाषितैः ॥
सूचयेद्वीररङ्गारौ शौर्य्यसौभाग्यवर्णनैः ।
तत्रेतिवृत्तमुत्पाद्यं वृत्तिः प्रायेण भारती ॥
सुखनिर्व्यहणे सन्धी लास्याङ्गानि दशापि च ।
आकाशभाषितरूपं परवचनमपि स्वयमेवानुवदनुत्तरप्रत्युत्तरे कुर्य्यात् । शृङ्गारवीररसौ च सौभाग्यशौर्य्यवर्णनया सूचयेत् । प्रायग्रहणात् कौशिक्यपि वृत्तिर्भवति । उदाहरणं यथा मधुकरः ।" इति साहित्यदर्पणे ६ परिच्छेदः ॥

भाण्डं, क्ली, (भण्यते भवति वेति । भण् शब्दे + "अमन्ताड्डः ।" उणा० १ । ११३ । इति डः । ततः प्रज्ञादित्वादण् ।) पात्रम् । (यथा, महाभारते । १३ । १११ । १०२ ।

"कृत्वा तु काञ्चनं भाण्डं क्षमियोनौ प्रजायते ॥")

धनिष्ठमूलधनम् । भूषा । अन्नभूषा । इति मेदिनी । डे, २१ ॥ (यथा, महाभारते । ७ । ६६ । २३ ।

"विप्रविद्वत्कृपाचन्द्रसन्निभाक्षाः परात्मवः ।
मार्गेष्वासुरमाः वेनुर्मथिना: पार्थमार्गगे: ॥")
नक्षत्रान्तस्य दर्शादिविधिर्यथा.—
"अराकृष्टेविकं नष्टं भाद्रं दाक्षस्य वाचक: ।
प्रस्थानविग्रहक्षेत्र प्रदाधौ द्विगुणं भृतिम् ॥
भाद्रं श्रवणमासाद्य यदि वाचकदीयत: ।
दाधौ यत् तत्र नश्येत्तु देवराजकृताद्दते ॥"
इति मिताक्षरायां नारद: ॥
नर्दीकृतश्रवणमश्रम् । इति हेमचन्द्र: । ४ । ६२ ॥
(भद्रस्य इति । भद्र + अण् । भद्रस्यास्य भाव: इत्यर्थ: ।) भद्रवृत्ति: । इत्यमरपाल: ॥ भाँड़ामि इति भाषा ॥
भाण्ड:, पुं, गर्दभाण्डवृक्ष: । इति शब्दचन्द्रिका ॥
भाण्डपट:, पुं, (भाण्डे पटो यस्य ।) नापित: । इति जटाधर: ॥
भाण्डपुच्छ:, पुं, सर्पविशेष: । तत्पर्य्यायः । कौकुटिकन्दल: २ । इति त्रिकाण्डशेष: ॥
भाण्डागार:, पुं, (भाण्डानां पात्राद्दीनामागार: ।) गृहविशेष: । भाँड़ार इति भाषा ॥ तत्पर्य्यायः । मन्दुर: २ । इति शब्दमाला ॥ (यथा, महाभारते । १२ । ६८ । ५४ ॥
"भाण्डागारानुधागारान् कोधागारांश्च सर्व्वश: ।
अश्वागारान् गजागारानुबलाधिकरणानि च ॥")
भाण्डारी, [न्] पुं, (भाण्डारोऽधिकारित्वेनास्यास्तीति । भाण्डार + इनि: ।) भाण्डाराध्यक्ष: । भाँड़ारी इति भाषा । यथा, अवदानशतके ।
"क्षुधितस्तृषितः कामी विद्यार्थी क्षयिकारक: ।
भाण्डारी च प्रवासी च सप्त सुप्तान् प्रबोधयेत् ॥
भाण्डि:, पुं, (भण्ड् + इन् । पृषोदरादित्वात् साधु: ।) नापितस्य क्षुराद्याधार: । भाँड़ि इति भाषा । इति भाण्डिवाद्यशब्ददर्शनात् ॥
भाण्डिल:, पुं, (भाण्डिरस्यास्तीति । भाण्डि + अच् ।) नापित: । इति शब्दमाला ॥
भाण्डिवाद्य:, पुं. (भाण्डिं क्षुराद्याधारं वहतीति । वह् + अण् ।) नापित: । इति शब्दमाला ॥
भाण्डीर:, पुं, (भण्ड् + ईरच् । पृषोदरादित्वात् साधु: ।) वटवृक्ष: । इति जटाधर: ॥ व्रजमण्डलान्तरे गोऽश्वटवनमध्ये द्वितीयवटवनम् । यथा, —
"वटेऽश्वत्थवटाद्यौ तु भाण्डीराख्यं वटं हृयम् ।"
इति नारायणभट्टकृतव्रजभक्तिविलास: ॥
भाति, क्ली, (भा + क्तिन् ।) प्रभा । इति राजनिर्घण्टः ॥ (यथा, श्रीमद्भागवते । ८ । १८ । १२ ।
"यत्कृपाभीतिविभ्रष्टरागुधे-
रक्तचित्तद्रुसमधारयद्धरि:
दम्भ तन्नेव स यामनो वटु:
संवत्सरादिदृगतिर्यथा वट: ।")
भातृ:, पुं (भातीति । भा + "कमिमनिजनिगाभाभ्यस्थच्छ ।" उणा० १ । ७३ । इति तृ: ।)

सूर्य्य: । इति त्रिकाण्डशेष: ॥ दीप्त: । इति संक्षिप्तसारोणादिवृत्ति: ॥
भाद्र:, पुं, (भाद्री पौर्णमास्यस्मिन्नस्ति । भाद्री + "तस्मिन् पौर्णमासीति ।" ४ । २ । २१ । इत्यण् ।) भाद्रपदनक्षत्रयुक्ता पौर्णमासी यस्मिन् मासे स: । वैशाखादिद्वादशमासान्तर्गतपञ्चममास: । तत्पर्य्याय: । नभस्य: २ प्रौष्ठपद: ३ भाद्रपद: ४ । इत्यमर: । १ । ४ । २७ ॥ स च द्विविध: । सिंहस्थरविकाल: सौर: । १ । सिंहस्थरव्यारब्धशुक्लप्रतिपदादिदर्शान्तो मुख्यचान्द्र: । कृष्णप्रतिपदादिपौर्णमास्यन्तो गौणचान्द्र: । २ । इति मलमासतत्त्वम् ॥ ॥ तत्र जातफलम् ।
"नभस्यमासे खलु जन्म यस्य
घोरो मनोज्ञस्य वराङ्गनानाम् ।
रिपुप्रमार्गी कुटिलं रतिमर्म्मा
प्रपन्नभर्त्ता स भवेत् सहास: ।"
इति कोष्ठीप्रदीप: ॥ ० ॥
तत्र गो: प्रसवे नारद: ।
"भानौ सिंहगते चैव यस्य गौ: सम्प्रसूयते ।
मरणं तस्य निर्दिष्टं षड्भिर्मासैर्न संशय: ॥
तत्र शान्तिं प्रवक्ष्यामि येन सम्पद्यते शुभम् ।
प्रसूतां तत्क्षणादेव तां गां विप्राय दापयेत् ॥
ततो होमं प्रकुर्व्वीत घृताक्तै राजसर्षपै: ।
आहुतीनां घृताक्तानामयुतं जुहुयात्तत: ॥"
आहुतिभिश्चायं होम: ।
"सोपवास: प्रयत्नेन दद्याद्विप्राय दक्षिणाम् ॥"
इति ॥
तथा ।
"सिंहराशौ गते सूर्य्ये गो: प्रसूतिर्यदा भवेत् ।
पौत्रे च महिषी सूते दिवैवाश्वतरी तथा ।
तदानिष्टं भवेत् किञ्चित् तच्छान्त्यै शान्तिकं चरेत् ॥
यस्य वामेतिसूक्तेन तद्विष्णोरिति मन्त्रत: ।
जुहुयाच्च तिलाज्येन शतमष्टोत्तराधिकम् ॥
रुद्रसूक्तविधानेन जुहुयाच्च तथायुतम् ।
श्रीसूक्तेन तत: स्नायात् शान्तिसूक्तेन वा पुन: ॥
मथुराचौ निशीथे वा यदा गौ: क्रन्दते तदा ।
ग्रामे वास्य गृहे वापि शान्तिकं पूर्व्ववद्दिशेत् ॥"
संक्रमणोत्तरगोऽश्वदण्डात्मकपुण्यकालाभ्यन्तरे गो: प्रसवे विप्रसम्प्रदानकगोप्रदानपूर्व्वकशान्ति: कार्य्या इति विशेष: । तदतिरिक्तसिंहस्थरवौ गो: प्रसवे शान्तिमात्रं कर्त्तव्यं न गो: प्रदानम् । निर्णयसिन्धुधृतादृसुतसागरन्यायवचनजातमीमांसानुसारादिति ॥ ॥ अथ भाद्रकृत्यम् । तत्र जन्माष्टमीव्रतप्रमाणन्तिथितत्त्वेनुसन्धेयम् । आवणपौर्णमास्यनन्तरितभाद्रकृष्णाष्टम्यां रात्रिमध्ये सुकृष्णाष्टमीरोहिणीयोगरूपजयन्तीसामे तत्रैवोपवास: । उभयदिने चेत्तदा परदिने । यद्यप्यसामे तु रोहिणीयुक्ताष्टम्यां तदा उभयदिने रोहिणीयुताष्टमीसामे परदिने । रोहिण्यसामे तु निशीथसमन्यिन्यामष्टम्याम् । उभयदिने निशीथसमत्वे तदसमत्वे वा परदिने इति ।

तत्र प्रयोग: पूर्व्वदिने संयमं विधाय तद्दिने स्नानप्रात:स्नानादिराचान्त: । ॐ सूर्य्य: सोम इति पठित्वा ॐ तद्विष्णो: परमं पदमित्यादिमन्त्रेण नारायणं संस्मृत्य ॐ तत् सत् इत्युच्चार्य्य उदङ्मुखो दर्भहस्तस्ताम्रपात्रे कुशतिलजलान्यादाय ॐ अद्य भाद्रे मासि कृष्णे पक्षे अष्टम्यां तिथौ अमुकगोत्र: श्रीअमुकदेवशर्म्मा विष्णुलोकप्राप्तिकाम: श्रीविष्णुप्रीतिकामो वा श्रीकृष्णजन्माष्टमीव्रतमहं करिष्ये इति संकल्पयेत् । यद्युपवासदिने प्रात: सप्तमी तदाष्टम्यां तिथौ इत्यत्र सप्तम्यां तिथावारभ्य इति वक्तव्यम् । तत: सामगस्तु ॐ देवो वो द्रविणोदा पूर्णां विवष्टासिचं उद्दासिच्यध्वमुपवा प्रणुधमादिदेवो देव ओहते । इति पठेत् । ॐ धर्म्माय धर्म्मेश्वराय धर्म्मपतये धर्म्मसम्भवाय गोविन्दाय नमो नम: । इत्युच्चार्य्य
"ॐ वासुदेवं सङ्कर्षणं प्रद्युम्नमनिरुद्धं हरिं ।
उपवासं करिष्यामि कृष्णाष्टम्यां नभस्यहम् ॥
अद्य कृष्णाष्टमीं देवीं नभश्चन्द्रसरोहिणीम् ।
अर्च्चयित्वोपवासेन भोक्ष्येऽहमपरेऽहनि ॥
एनसो मोक्षकामोऽस्मि यज्ञोविन्द त्रियोनिजम् ।
तन्मे क्षमतु मां चाहि पतितं शोकसागरे ॥
आजन्ममरणं यावद्यन्मया दुष्कृतं कृतम् ।
तत् प्रणाशय गोविन्द ! प्रसीद पुरुषोत्तम ! ॥"
इति पठेत् ।
तत आह्निकं समाप्यार्द्धरात्रे तत्तत्प्रतिमासु पटादिषु वा आवाहनविसर्জ্জনसहितं शालग्रामे घटादिस्थजले वा आवाहनविसर्জ্জनरहितं पूजयेत् । ततो ध्यानम् ।
"माद्यापि बालकं सुप्तं पर्य्यङ्के स्तनपायिनम् ।
श्रीवत्सवक्ष:पूर्णाङ्गं नीलोत्पलदलच्छविम् ॥"
इति ध्यात्वा श्रीकृष्ण स्वागतं इति पृच्छेत् । इदमासनं ॐ कृष्णाय नम: । इत्यासनं दत्त्वा एतत् पाद्यम् ॐ श्रीकृष्णाय नम: ॐ यज्ञाय यज्ञेश्वराय यज्ञपतये यज्ञसम्भवाय गोविन्दाय नमो नम: । इत्युच्चार्य्य इदमर्घ्यम् ॐ श्रीकृष्णाय नम: । इदमाचमनीयम् ॐ श्रीकृष्णाय नम: । इदमाचमनीयम् ॐ श्रीकृष्णाय नम: । ततो दधिमधुघृतात्मकं मधुपर्कमानीय एष मधुपर्क: ॐ श्रीकृष्णाय नम: । इदमाचमनीयम् ॐ श्रीकृष्णाय नम: । लौकिकपञ्चाधिकशतत्रयतोलकपरिमितान्नूनं जलमानीय ॐ योगाय योगेश्वराय योगपतये योगसम्भवाय गोविन्दाय नमो नम: । इदं स्नानीयजलम् ॐ श्रीकृष्णाय नम: । इदं वस्त्रं इदमाभरणम् एष गन्ध: इदं पुष्पम् एष धूप: एष दीप: इदं नैवेद्यम् ॐ विश्वाय विश्वेश्वराय विश्वपतये विश्वसम्भवाय गोविन्दाय नमो नम: । इत्यनेन नैवेद्यं दत्त्वा स्वापयेत् । ततो नमो देव्यै श्रियै नम: । इति मन्त्रेण श्रियं पूजयेत् । तत: स्वयोक्तविधिनाग्निं संस्थाप्य घृतलाजाभ्याम् । ॐ धर्म्माय धर्म्मेश्वराय धर्म्मपतये धर्म्मसम्भवाय

गोविन्दाय नमो नमः स्वाहा। इत्यनेनाष्टोत्तरशतमष्टाविंशतिमष्टौ वा जुहुयात्। ततो गुडघृतेन वसोर्धारां भित्त्वा दद्यात्। ततो नाड़ीच्छेदं भावयेत्। ॐ षष्ठ्यै नम इति षष्ठीं पूजयेत्। ततो भगवतः श्रीकृष्णस्य नामकरणान्नप्राशनचूड़ाकरणोपनयनोद्वाहसंस्कारान् भावयेत्। ततः प्रणवादिनमोन्तेन तत्तन्नामभिः पूजयेत्। ॐ देवक्यै नमः एवं वसुदेवाय यशोदायै नन्दाय रोहिण्यै चण्डिकायै बलदेवाय दन्ताय गर्गाय चतुर्भुजाय इत्यनेन यथाशक्ति षोडशोपचारैः पूजयेत्। ततः शुक्लेन कुशपुष्पचन्दनजलान्यादाय भूमौ जानुनी पातयित्वा,

ॐ क्षीरोदार्णवसंभूत अत्रिनेत्रसमुद्भव!।
गृहाणार्घ्यं शशाङ्केदं रोहिण्या सहितो मम॥
ॐ सोमाय सोमेश्वराय सोमपतये सोमसम्भवाय गोविन्दाय नमो नमः। इत्यर्घ्यं दद्यात्। ततः प्रणाममन्त्रौ।

"ॐ ज्योत्स्नायाः पतये तुभ्यं ज्योतिषां पतये नमः।
नमस्ते रोहिणीकान्त! सुधावास नमोऽस्तु ते॥
नभोमण्डलदीपाय शिरोरत्नाय धूर्जटेः।
कलाभिर्वर्द्धमानाय नमश्चन्द्राय चारवे॥"

ततश्च।

"अनघं वामनं शौरिं वैकुण्ठं पुरुषोत्तमम्।
वासुदेवं हृषीकेशं माधवं मधुसूदनम्॥
वराहं पुष्करीकाक्षं नृसिंहं दैत्यसूदनम्।
दामोदरं पद्मनाभं केशवं गरुड़ध्वजम्॥
गोविन्दमच्युतं देवमनन्तमपराजितम्।
अधोक्षजं जगद्बीजं स्वर्गस्थित्यन्तकारिणम्॥
अनादिनिधनं विष्णुं त्रिलोकेशं त्रिविक्रमम्।
नारायणं चतुर्बाहुं शङ्खचक्रगदाधरम्॥
पीताम्बरधरं नित्यं वनमालाविभूषितम्।
श्रीवत्साङ्कं जगन्नेतुं श्रीकृष्णं श्रीधरं हरिम्।
प्रपद्येऽहं सदा देवं सर्वकामप्रसिद्धये॥"

इति स्तवः॥

ततः प्रणमेत्।

"प्रणमामि सदा देवं वासुदेवं जगत्पतिम्।
त्राहि मां सर्वदेवेश हरे! संसारसागरात्॥"

ततः प्रार्थयेत्।

"ॐ त्राहि मां सर्वपापघ्न दुःखशोकार्णवाहरे!।
सर्वलोकेश्वर त्राहि पतितं मां भवार्त्तवे॥
देवकीनन्दन श्रीश हरे संसारसागरात्।
त्राहि मां सर्वदुःखघ्न रोगशोकार्णवाहरे!॥
दुर्गतोऽस्म्यहमे विष्णो ये स्मरन्ति सकृत् सकृत्।
सोऽहं देवातिदुर्नम्रस्त्राहि मां दुःखसागरात्॥
पुष्करात्र निमग्नोऽहं मायाविज्ञानसागरे।
त्राहि मां देवदेवेश! त्वत्तो नान्योऽस्ति रक्षिता॥"

इति प्रार्थयेत्॥

"बाल्ये यशोदाकौमारे पार्थेऽथ यौवने।
तत्तत्कृत्यं कृतिमाप्नोतु पार्थं हर हृषीकेश!॥"

इति पठेत्॥

ततो नृत्यगीतवादित्रस्तवैः कालं नयेत्। परदिने प्रातःस्नानादिकं कृत्वा भगवन्तं श्रीकृष्णं यथाविधि संपूज्य दुर्गायाश्च महोत्सवः कार्यः। ततो ब्राह्मणान् भोजयेत् तेभ्यो दक्षिणां दद्यात् सुवर्णादि यत् किञ्चिदिष्टतमं श्रीकृष्णो मे प्रीयतामिति।

"ॐ यं दैवं देवकी देवी वसुदेवादनोजनत्।
भौमस्य ब्रह्मणो गुप्त्यै तस्मै ब्रह्मात्मने नमः॥
सत्यब्रह्मवासुदेवाय गोब्राह्मणहिताय च।
शान्तिरस्तु शिवञ्चास्तु इत्युच्चार्य विसर्जयेत्॥"

ततश्चोपवासपरदिने तिथिनक्षत्रयोरवसाने पारणम्। यदा तु महानिशायाः पूर्व्वमेकतरस्यावसानं अन्यतरस्य महानिशायां तदनन्तरं वा तदेकतरावसाने पारणम्। यदा तु महानिशायासुभयस्थितिः तदा उत्तरवान्ते पारणं कुर्य्यात्। तत्र मन्त्रः। ॐ सर्व्वाय सर्व्वेश्वराय सर्व्वपतये सर्व्वसम्भवाय गोविन्दाय नमो नमः। पारणानन्तरन्तु समापनमन्त्रः। ॐ भूताय भूतेश्वराय भूतपतये भूतसम्भवाय गोविन्दाय नमो नमः। इत्यनेन व्रतं समापयेत्॥ * ॥

भाद्रशुक्लपञ्चमीमधिकृत्य भविष्योत्तरे।

"तथा भाद्रपदे मासि पञ्चम्यां श्रद्धयान्वितः।
यस्त्वालिख्य नरो भक्त्या कृष्णवर्णादिवर्णकैः।
पूजयेद्गन्धपुष्पैश्च सर्पिर्गुग्गुलुपायसैः॥
तस्य तुष्टिं समायान्ति पन्नगास्तक्षकादयः।
व्यालघ्नात् कुलात्तस्य न भयं सर्पतो भवेत्।
तस्मात् सर्व्वप्रयत्नेन नागान् संपूजयेन्नरः॥
इयमेवालेख्यनागपञ्चमीति वाचस्पतिमिश्राः।
आलेख्यनागाः कर्कोटकादयः पूर्व्वलिखिताः पूजा च श्रावणपञ्चमीविहितेति बोध्यम्॥ * ॥

अथ हरेः पार्श्वपरिवर्त्तनम्। तच्च द्वादश्यां सन्धिसमये नक्षत्राणामसम्भवे। ज्याभाकासितपक्षेषु श्रुयनावर्त्तनादिकमिति ब्रह्मपुराणात्॥ भाद्रशुक्लद्वादश्यां श्रवणमध्ययुक्तायां सन्ध्यासमये द्वादश्यास्तत्त्वाभावे एकादश्यादिषु पादयोगे तदभावेऽपि द्वादश्यां केवलायां वा कृताह्निकः सायं सन्ध्यायां देवं संपूज्य।

"ॐ वासुदेव जगन्नाथ प्राप्तेयं द्वादशी तव।
पार्श्वेन परिवर्त्तस्व सुखं स्वपिहि माधव!॥"

इति प्राञ्जलिः पठेत्॥

"त्वयि सुप्ते जगन्नाथ! जगत् सुप्तं भवेदिति।
प्रबुद्धे त्वयि बुध्येत जगत सर्व्वं चराचरम्॥"

इत्यनेन पूजयेत्॥ * ॥

अथ सिंहार्के चतुर्थ्यां चन्द्रदर्शनप्रायश्चित्तम्। सिंहार्कमधिकृत्य ब्रह्मपुराणम्।

"नारायणोऽभिशप्तस्तु निशाकरमरीचिषु।
स्थितश्चतुर्थ्यामद्यापि मनुष्यानापतेच्च सः॥
अतश्चतुर्थ्यां चन्द्रन्तु प्रमादाद्दृश्य मानवः।
पठेत्तात्रेयिकावाक्यं प्राङ्मुखो वाप्युदङ्मुखः॥"

अभिशप्तो मिथ्यापरीवादविषयीभूतः। सोऽभिशापः अद्यापि मनुष्यान् पतेत्। ततश्च प्राङ्मुखः उदङ्मुखो वा कृष्णनिम्बजलान्यादाय

ॐ अद्येत्यादि सिंहार्कचतुर्थ्याश्चन्द्रदर्शनजन्यपापक्षयकामो धात्रेयीवाक्यमहं पठिष्ये। इति संकल्प्य।

"ॐ सिंहः प्रसेनमवधीत् सिंहो जाम्बवता हतः।
सुकुमारक! मा रोदीस्तव ह्येष स्यमन्तकः॥"

इति विष्णुपुराणोक्तं धात्रेयीवाक्यं पठेत्॥ * ॥

अथानन्तव्रतम्। तत्र यदिने पूर्व्वाह्णलाभस्तदिने व्रतम्। उभयदिने चेत् परदिने युग्मात्। व्रतानुष्ठानविधिस्तु पद्मनौ ज्ञेयः॥ * ॥ अथागस्त्यार्घ्यदानम्। प्रमाणन्तु तिथितत्त्वेनुसन्धेयम्। सिंहस्थरविकर्कटस्थचन्द्रेण सौरमासादरः। कन्यार्कसंक्रान्तिपूर्व्वदिनत्रयाभ्यन्तरे कृतस्नानादिकृताह्निकस्तिलकुशजलान्यादाय ॐ सत् सदित्युच्चार्य ॐअद्येत्यादि सर्व्वाभिलषितसिद्धिकामोऽगस्त्यपूजनमहं करिष्ये इति संकल्प्य भालयाने जले वा दक्षिणामुखः एतत् पाद्यम् ॐ अगस्त्याय नमः। सितपुष्पाक्षतयुक्तं जलं शुक्लेन गृहीत्वा इदमर्घ्यम्।

ॐ काशपुष्पप्रतीकाश अग्निमारुतसम्भव।
मित्रावरुणयोः पुत्र कुम्भयोने नमोऽस्तु ते॥
ॐ अगस्त्याय नमः। एवमाचमनीयस्नानीयगन्धपुष्पधूपदीपनैवेद्यादिकं दद्यात्।

ॐ आतापिर्भक्षितो येन वातापिश्च महासुरः।
समुद्रः शोषितो येन स मेऽगस्त्यः प्रसीदतु॥"

इति प्रार्थयेत्॥ इति शुक्लपक्षम्।

भाद्रपदः, पुं, (भाद्रपदानक्षत्रयुक्ता पौर्णमासी भाद्रपदी सा यत्र मासे सः। भाद्रपदी + अण्।) भाद्रमासः। इत्यमरः। १। ४। १७॥ (यथा,—"ते तु भाद्रपदाद्येन द्विमासेन व्यवस्थिताः। तद्यथा। भाद्रपदाश्वयुजौ वर्षाः।" इति सुश्रुते शरीरस्थाने षष्ठेऽध्याये।)

भाद्रपदा, स्त्री, पूर्व्वभाद्रपदानक्षत्रम्। उत्तरभाद्रपदानक्षत्रम्। तत्पर्य्यायः। प्रौष्ठपदा २। इत्यमरः। १। ३। २२॥

भाद्रमातुरः, पुं, (भद्रमातुरपत्यमिति। भद्रमातृ + "मातुरुत्संख्यासम्भद्रपूर्व्वायाः।" ४। १। १२५। इति अण्। "उकाराद्यन्तादेशः।" इति काशिका।) सनीतनयः। "सत्यास्तु तनये सात्राजितवद्भद्रमातुरः।" इति हैमचन्द्रः। ३। २१०॥

भानुः, पुं, (भाति चतुर्दशभुवनेषु स्वप्रभया दीप्यते इति। भा + "दाभाभ्यां नुः।" उणा० १। ३०। इति नुः।) सूर्य्यः। (यथा, महाभारते। ३। ३। २४।

"अनन्तः कपिलो भानुः कामदः सर्व्वतोमुखः।"

विष्णुः। यथा, तत्रैव। १३। १४८। २०।

"सर्व्वगः सर्व्ववित्भानुर्विष्वक्सेनो जनार्द्दनः।"

प्राधायाः पुत्रभेदः। यथा, तत्रैव। १।६५।८८।

"विश्वावसुश्च भानुश्च शुचिश्चो दशमस्तथा।
इत्येता देवगन्धर्व्वा प्राधायाः परिकीर्त्तिताः।"

अङ्गिरःस्वरूपसुतः पुत्रभेदः। यथा, तत्रैव। ३। २२०। ८।

"तपसञ्च मनुं पुत्रं भानुञ्चाप्यङ्गिराः सृजत्।"
यादवविशेषः। यथा, हरिवंशे। १४७। २।
"कन्यां भानुमतीं नाम भानोर्दुहितरं नृप!।
जघारात्मवधाकाङ्क्षी निकुम्भो नाम दानवः॥")
किरणः। (यथा, ऋग्वेदे। ६। ६४। २।
"भद्रादह्नऽउविया विभास्युत्ते शोचिर्भानवो
द्यामपप्रन्॥"
"भानवो रश्मयः।" इति तद्भाष्ये सायनः।)
अर्कवृक्षः। इत्यमरः। २। ४। ३३॥ प्रभुः।
राजा। इति धरणिः॥ वृत्ताक्षरपिङ्गलविशेषः।
इति हेमचन्द्रः। २। १४॥
भानुः, स्त्री, (भातीति। भा+नुः) भानुमती।
इति शब्दरत्नावली॥ (दक्षकन्याभेदः। यथा,
मत्स्यपुराणे। ५। १५।
"ह्रद्गुश्चं देवमातॄणां प्रजाविस्तरमादितः।
मरुत्वती वसुर्यामी लम्बा भानुररुन्धती॥")
भानुफला, स्त्री, (भानुरिव दीप्तिमत् फलमस्याः।)
कदली। इति जटाधरः॥
भानुमती, स्त्री, (भानु+मतुप्+ङीप्।) विक्रमादित्यराजपत्नी। यथा,—
"देवगुरोः प्रसादेन जिह्वाग्रे मे सरस्वती।
तेनाहं नृप! जानामि भानुमत्याश्चितं यथा॥"
इति वररुचिः॥
(कृतवीर्य्यस्य दुहिता। सा च अर्जुनातेः पत्नी।
"यथा, महाभारते। १। ६५। १५।
"अर्जुनातेः खलु कृतवीर्य्यदुहितरमुपयेमे भानुमतीं नाम। तस्यामस्य जज्ञे मार्त्तभामः॥"
अङ्गिरसः प्रथमा सुता। यथा, महाभारते।
३। २१७। ३।
"प्रजासु तासु सर्वासु रूपेणाप्रतिमाभवत्।
देवी भानुमती नाम प्रथमाङ्गिरसः सुता॥"
यादवभानोः कन्या। यथा, हरिवंशे। १४७।२।
"कन्यां भानुमतीं नाम भानोर्दुहितरं नृप!॥"
दुर्य्योधनपत्नी। यथा, वेणीसंहारनाटके २ अङ्के।
"आर्य्ये! एषा भानुमती देवी पत्युः समरविजयासंशया निर्वर्त्तितगुरुपादवन्दनान्यप्रभृति व्यारब्धनियमा बालोद्याने तिष्ठतीति॥"
गङ्गा। यथा, काशीखण्डे। २६। १२६।
"भुक्तिमुक्तिप्रदा मेधौ भक्तस्वर्गापवर्गदा।
भागीरथी भानुमती भाग्यं भोगवती श्रुतिः॥")
भानुमान्, [न्] पुं (भानवः सन्त्यस्येति। भानु+मतुप्।) सूर्य्यः। इति शब्दरत्नावली॥ (यथा, कुमारसम्भवे। ३। ६५।
"अधोपनिन्ये गिरिशाय गौरी
तपस्विने ताम्ररुचा करेण।
विशोषितां भानुमतो मयूखै-
र्मन्दाकिनी पुष्करबीजमालाम्॥"
कलिङ्गदेशनृपतिविशेषः। यथा, महाभारते।
६। ५१। ३२।
"भानुमांस्तु ततो भीमं शरवर्षेण दारयन्।
नदन् ननादादित्यानो नभस्तलम्॥"
ऋक्षिध्वजस्य पुत्रः। यथा, भागवते। ६।१३।२१।
"भानुमांस्तस्य पुत्रोऽभूच्छतद्युम्नस्तु तत्सुतः॥")
दीप्तियुक्ते, त्रि॥ (यथा, महाभारते। १।३०।४७।
"चर्म्माण्यपि च गात्रेषु भानुमन्ति दृढानि च॥")
भानुवारः, पुं, (भानोर्वारः।) रविवारः। यथा,—
"अमाशास्या दादशी च संक्रान्तिश्च विशेषतः।
एताः प्रशस्तास्तिथयो भानुवारस्तथैव च॥
अत्र स्नानं जपो होमो देवतानाञ्च पूजनम्।
उपवासस्तथा दानमेकैकं पावनं स्मृतम्॥"
इति तिथितत्त्वे स्मृत्यर्थवचनम्॥
भानेमिः, पुं, (भानां प्रभाचक्राणां नेमिरिव।)
सूर्य्यः। इति त्रिकाण्डशेषः॥
भाम, ड क्रोधे। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-अक०-सेट्।) ड, भामते। इति दुर्गादासः॥
भाम, नृ क कोपने। इति कविकल्पद्रुमः॥ (अदन्त-चुरा०-पर०-अक०-सेट्।) अवभामत्। इति दुर्गादासः॥
भामः, पुं, (भामनमिति। भाम क्रोधे+घञ्।)
क्रोधः। (यथा, ऋग्वेदे। ५। २। १०।
"मदेचिदस्य प्ररुजन्ति भामा
न वरन्ते परिबाधो अदेवीः॥"
"भामाः क्रोधा दीप्तयो वा।" इति तद्भाष्ये सायनः॥ भातीति। भा+"अर्त्तिस्तुसुहुसृधृक्षिक्षुभायावापदीति।" उणा० १। १३६। इति मन्।) सूर्य्यः। (भा+भावे मन्।) दीप्तिः। इति मेदिनी। मे, २१॥ भगिनीपतिः। इति शब्दरत्नावली॥ (यथा, देवीभागवते। ६।१६।४६।
"गुरुं मित्रं तथा भामं पुत्रञ्च भगिनीं तथा॥")
भामकः, पुं, (भाम एव। स्वार्थे कन्।) भगिनीपतिः। इति शब्दरत्नावली॥
भामा, स्त्री, (भामते इति। भाम्+अच्+टाप्।)
कोपना स्त्री। इति शब्दरत्नावली॥
भामिनी, स्त्री, (भामते इति। भाम्+णिनिः+ङीप्।) कोपना स्त्री। इत्यमरः। २। ६। ४॥
स्त्रीमात्रम्। इति राजनिर्घण्टः॥ (यथा, भागवते। ६। १८। ६।
"एकदा दानवेन्द्रस्य ऊर्ज्जिष्ठा नाम कन्यका।
सखी सहस्रसंयुक्ता गुरुपुत्री च भामिनी॥"
तुनयनामकगन्धर्व्वस्य दुहिता। यथा, मार्कण्डेयपुराणे। १०८। ७।
"राजपुत्र! सुतेयं मे भामिनी नाम मानिनी।
अभिशापादगस्त्यस्य विशालतनयाभवत्॥")
भामिनीविलासः, पुं, (भामिन्या विलासो यत्र।)
जगन्नाथमिश्रपण्डितराजकृतकाव्यग्रन्थविशेषः।
तस्याद्यश्लोकोऽयम्।
"दिगन्ते श्रूयन्ते मदमलिनगण्डाः करटिनः
करिण्यः कारुण्यास्पदमसमशीलाः खलु मृगाः।
इदानीं लोकेऽस्मिन्नुपमगिरिशानां पुनरयं
नराणां पाण्डित्यं प्रकटयतु कस्मिन् नृपतिः॥
तस्य पुष्पिका। इति श्रीमत्पण्डितराजजगन्नाथविरचिते भामिनीविलास प्राक्तनिकः प्रथमो विलासः। शृङ्गारवर्णनं द्वितीयो विलासः। श्रीकृष्णगुणानुवर्णनं तृतीयो विलासश्च॥
भामी, [न्] त्रि, (भामः क्रोधोऽस्यास्तीति। भाम+"अत इनिठनौ।" ५। २। ११५। इति इनि।)
क्रोधी। (तेजस्वी। यथा, ऋग्वेदे। १।७७। १।
"कथा दाशेमाग्नये कास्मै देवजुष्टोच्यते भामिने गीः॥"
"भामिने तेजस्विने।" इति तद्भाष्ये सायनः॥)
भारः, पुं, (भ्रियते इति। भृञ् भरणे+"अकर्त्तरि च कारके संज्ञायाम्।" ३। ३। १६। इति घञ्।) विंशतितुलापरिमाणम्। इत्यमरः॥ तच्च अष्टसहस्रतोलकात्मकमिति यावत्। वैद्यकम्। यथा,—
"अविश्रामं वहेद्भारं शीतोष्णञ्च न विन्दति।
ससन्तोषस्तथा नित्यं त्रीणि शिक्षेत गर्द्दभात्॥"
इति चाणक्यम्॥*॥
विष्णुः। इति मेदिनी। रे, ७२॥ गुरुत्वञ्च॥
(गुरुत्वगुणवद्वस्तु॥)
भारण्डः, पुं, उत्तरकुरुदेशजशकुनपक्षी। इति पुराणम्॥
भारतं, क्ली, (भरतान् भरतवंशीयानधिकृत्य कृतो ग्रन्थ इत्यण्। यद्वा, भारं चतुर्वेदादिशास्त्रेभ्योऽपि सारांशं तनोतीति। तनु+डः।) ग्रन्थभेदः। इति मेदिनी। ते, १३८॥ तच्च व्यासप्रणीतलक्षश्लोकात्मकमहाभारतसंज्ञकेतिहासः। तस्य श्रवणादिफलं यथा,—
"भारतं शृणुयान्नित्यं भारतं परिकीर्त्तयेत्।
भारतं भवने यस्य तस्य हस्तगतो जयः॥
यो गोशतं कनकशृङ्गमयं ददाति
विप्राय वेदविदुषे सुवृत्तशुताय।
पुण्याञ्च भारतकथां शृणुयाच्च नित्यं
तुल्यं फलं भवति तस्य च तस्य चैव॥
नवनीतं यथा दध्नो द्विपदां ब्राह्मणो यथा।
हृदानामुदधिः श्रेष्ठो गौर्वरिष्ठचतुष्पदाम्॥
यथैतानीतिहासानां तथा भारतमुच्यते॥
यश्चैनं श्रावयेत् श्राद्धे ब्राह्मणान् पादमन्ततः।
अक्षय्यमन्नपानं वै पितॄंस्तस्योपतिष्ठते॥
इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्।
बिभेत्यल्पश्रुताद्वेदो मामयं प्रहरिष्यति॥
कार्ष्णं वेदमिमं विद्वान् श्रावयित्वार्थमश्नुते।
भ्रूणहत्याकृतञ्चापि पापं तत्क्षणादपोहति॥"
इति महाभारतम्॥*॥
तदुत्पत्तिर्यथा,—
ब्रह्मोवाच।
"भारतं संप्रवक्ष्यामि भारावतरणं भुवः।
चक्रे कृष्णो युध्यमानः पाण्डवाहितमित्रतः॥
विष्णुनाभ्यसनो ब्रह्मा ब्रह्मपुत्रोऽत्रिरर्चितः।
सोमस्ततो बुधस्तस्मादैलश्चान्तु पुरूरवाः॥
तस्मादायुस्तस्य पुत्रोऽभूदयातिर्भरतः कुरुः।
प्राक्तनुस्तस्य वंशेऽभूद्गङ्गायां शान्तनोः सुतः॥

भीष्मः सर्व्वगुणैर्युक्तो ब्रह्मवेवर्त्तपारगः ।
शान्तनोः सत्यवत्याञ्च द्वौ पुत्रौ संबभूवतुः ॥
चित्राङ्गदस्तु गन्धर्व्वः पुत्रं चित्ररथोऽवधीत् ।
अन्यो विचित्रवीर्य्योऽभूत् काशिराजसुतायतिः ॥
विचित्रवीर्य्ये म्रियते यासात्तत्क्षेत्रतोऽभवन् ।
धृतराष्ट्रोऽम्बिकापुत्रः पाण्डुरम्बालिकासुतः ॥
भुजिष्यायान्तु विदुरो गान्धार्य्यां धृतराष्ट्रतः ।
दुर्य्योधनप्रधानास्तु शतसंख्या महाबलाः ॥
पाण्डोः कुन्त्याञ्च माद्र्याञ्च पञ्च पुत्राः प्रजज्ञिरे ।
युधिष्ठिरो भीमसेनः अर्জ্জुनो नकुलस्तथा ।
सहदेवश्च पञ्चैते महाबलपराक्रमाः ॥
कुरुपाण्डवयोर्वैरं दैवयोगादभूत् ह ।
दुर्य्योधनेन वीरेण पाण्डवाः समुपद्रुताः ।
इत्था जतुगृहे वीरास्ते सुप्ताः सुधियामलाः ॥
ततस्तु एकचक्रायां ब्राह्मणस्य निवेशने ।
विप्रवेषा महात्मानो निहत्य बकराक्षसम् ॥
ततः पाञ्चालविषये द्रौपद्यास्ते स्वयंवरम् ।
विज्ञाय वीर्य्यशुल्कां तां पाण्डवा उपयेमिरे ॥
द्रोणभीष्मानुमत्या च धृतराष्ट्रः समानयत् ।
अर्द्धं राज्यं ततः प्राप्य इन्द्रप्रस्थे पुरोत्तमे ॥
राजसूयं ततश्चक्रुः सभां कृत्वा यतव्रताः ।
अर्জ্জुनो द्वारवत्यान्तु सुभद्रां प्राप्तवान् प्रियाम् ॥
वासुदेवस्य भगिनीं मित्रं देवकिनन्दनम् ॥
गाण्डीवं नाम तद्दिव्यं त्रिषु लोकेषु विश्रुतम् ।
अक्षयान् शायकांश्चैव तथामेद्यञ्च दंशनम् ॥
स तेन धनुषा वीरः पाण्डवो जातवेदसम् ।
कृष्णद्वितीयो वीभत्सुस्तर्पयन् वीर्य्यवान् ॥
नृपान् दिग्विजये जित्वा रत्नान्यादाय वै ददौ ।
युधिष्ठिराय महते भ्रात्रे नीतिविदे मुदा ॥
युधिष्ठिरोऽपि धर्म्मात्मा भ्रातृभिः परिवारितः ।
जितो दुर्य्योधनेनैव मायादूतेन पापिना ।
कर्षद्दुःशासनमते स्थितेन शकुनेर्मते ।
अथ द्वादशवर्षाणि वने तेपुर्महत्तपः ॥
सधौम्या द्रौपदीसत्या मुनिवृन्दाभिसंवृताः ।
ययुर्विराटनगरं गुप्तरूपेण संस्थिताः ॥
वर्षमेकं महाप्राज्ञा गोग्रहादिमपालयन् ।
ततो ज्ञाताः स्वकं राष्ट्रं प्रार्थयामासुराहृताः ॥
पञ्च ग्रामानर्द्धराज्यं वीरा दुर्य्योधनं नृपम् ।
नाप्नवन्तः कुरुक्षेत्रे युद्धश्रद्धुर्बलान्विताः ॥
अक्षौहिणीभिर्दिशभिः सप्तभिः परिवारिताः ।
एकादशभिरुद्युक्तास्तेऽपि दुर्य्योधनादयः ॥
आसीद्युद्धं स्वर्गमार्गं देवासुरबलोपमम् ।
भीष्मः सेनापतिरभूदादौ दौर्य्योधने बले ॥
पाण्डवानां शिखण्डी च तयोर्युद्धं बभूव ह ।
अस्त्राग्निभिर्महाघोरं दशरात्रं शरात्मनि ॥
शिखण्डार्জ্জुनवाक्येन भीष्मः शरशितेक्षितः ।
उत्तरायणमीक्षाद्य ध्यात्वा देवं गदाधरम् ॥
उक्त्वा धर्म्मान् बहून् वर्षांसर्पयित्वा पितॄन् बहून् ।
आमन्त्र्य तु पदे तीर्त्वा विमले सुरकिल्बिषे ॥
ततो द्रोणो ययौ योद्धुं धृष्टद्युम्नेन वीर्य्यवान् ।
दिनानि पञ्च तद्युद्धमासीत् परमदारुणम् ।

य एते पृथिवीपाला हताः पार्थाङ्कसागरे ।
श्लोकमासाद्य पुत्रेण द्रोणोऽपि स्वर्गमाप्नुयात् ॥
ततः कर्णो ययौ योद्धुमर्জ্জुनेन महात्मना ।
दिनद्वयं महद्युद्धं कृत्वा पार्थाङ्कसागरे ॥
निमग्नः सूर्य्यलोकन्तु ततः प्राप स वीर्य्यवान् ।
ततः शल्यो ययौ योद्धुं धर्म्मराजेन धीमता ॥
दिनार्द्धेन हतः शल्यो वाणैर्व्वज्रनिभैः ।
दुर्य्योधनोऽथ वेगेन गदामादाय वीर्य्यवान् ॥
अभ्यधावत वै भीमं कालान्तकयमोपमम् ।
अथ भीमेन वीरेण गदया विनिपातितः ॥
अश्वत्थामा ततो द्रौणिः सुप्तं सैन्यं ततो निशि ।
जघान बाहुवीर्य्येण पितुर्व्वधमनुस्मरन् ॥
धृष्टद्युम्नं जघानाथ द्रौपदेयांश्च वीर्य्यवान् ।
द्रौपद्यां रोदमानायामश्वत्थाम्नः शिरोमणिम् ।
ऐषीकास्त्रेण तं जित्वा जग्राहार्জ্জुन उत्तमम् ॥
युधिष्ठिरः समाश्वास्य स्त्रीजनं शोकसङ्कुलम् ।
स्नात्वा सन्तर्प्य देवांश्च पितॄनथ पितामहान् ।
आश्वासितोऽथ भीष्मेण राज्यञ्चैवाकरोन्महत् ॥
विष्णुभीजेऽश्वमेधेन विधिवद्दक्षिणावता ।
राज्ये परिष्ठितं स्थाप्य यादवानां विनाशनम् ॥
श्रुत्वा तु मौषले राजा जग्मौ नामसहस्रकम् ।
विष्णोः स्वर्गं जगामाथ भीमाद्यैर्भ्रातृभिर्युतः ॥"

इति गारुडे १५० अध्यायः ॥*॥

वर्षभेदः । इति मेदिनी ॥ स तु जम्बुद्वीपस्य नववर्षान्तर्गतनवमवर्षः । तद्विवरणं यथा,—
"उत्तरं यत् समुद्रस्य हिमाद्रेश्चैव दक्षिणम् ।
वर्षं तद्भारतं नाम भारती यत्र सन्ततिः ॥
नवयोजनसाहस्रो विस्तारोऽस्य महामुने ! ।
कर्म्मभूमिरियं स्वर्गमपवर्गञ्च गच्छताम् ॥
महेन्द्रो मलयः सह्यः शुक्तिमानृक्षपर्व्वतः ।
विन्ध्यश्च पारियात्रश्च सप्तात्र कुलपर्व्वताः ॥
अतः संप्राप्यते स्वर्गो मुक्तिमस्मात् प्रयान्ति च ।
तिर्य्यक्त्वं नरकं चापि यान्त्यतः पुरुषा मुने ! ॥
इतः स्वर्गश्च मोक्षश्च मध्यञ्चान्तश्च गम्यते ।
न खल्वन्यत्र मर्त्यानां कर्म्मभूमौ विधीयते ॥
भारतस्यास्य वर्षस्य नव भेदान्निशामय ।
इन्द्रद्वीपः कशेरुश्च ताम्रपर्णो गभस्तिमान् ॥
नागद्वीपस्तथा सौम्यो गान्धर्व्वस्तथ वारुणः ।
अयन्तु नवमस्तेषां द्वीपः सागरसंवृतः ॥
योजनानां सहस्रन्तु द्वीपोऽयं दक्षिणोत्तरात् ।
पूर्व्वे किराता यस्यान्ते पश्चिमे यवनाः स्थिताः ॥
ब्राह्मणाः क्षत्रिया वैश्या मध्ये शूद्राश्च भागशः ।
इज्यायुद्धवणिज्याद्यैर्व्वर्त्तयन्तो व्यवस्थिताः ॥
शतद्रुचन्द्रभागाद्या हिमवत्पादनिःसृताः ।
वेदस्मृतिसुखाद्याश्च पारियात्रोद्भवा मुने ! ॥
नर्म्मदासुरसाद्याश्च नद्यो विन्ध्यविनिःसृताः ।
तापी पयोष्णी निर्विन्ध्याप्रमुखा ऋक्षसम्भवाः ॥
गोदावरी भीमरथी कृष्णवेण्यादिकास्तथा ।
सह्यपादोद्भवा नद्यः स्मृताः पापभयापहाः ॥
कृतमाला ताम्रपर्णी प्रमुखा मलयोद्भवाः ।
त्रिसामा ऋषिकुल्याद्या महेन्द्रप्रभवाः स्मृताः ॥
ऋषिकुल्या कुमार्य्याद्याः शुक्तिमत्पादसम्भवाः ।

आसां नदनदीनाञ्च सन्त्यन्याश्च सहस्रशः ॥
ताम्बिमे कुरुपाञ्चालमध्यदेशादयो जनाः ।
पूर्व्वदेशादिकाश्चैव कामरूपनिवासिनः ॥
ओड्राः कलिङ्गा मगधा दाक्षिणात्याश्च सर्व्वशः ।
तथापरान्ताः सौराष्ट्राः शूराभीरास्तथार्बुदाः ॥
मारुका मालवाश्चैव पारियात्रनिवासिनः ।
सौवीराः सैन्धवा हूणाः शाल्वाः शाकलवासिनः ॥
मद्रा रामास्तथाम्बष्ठाः पारसीकादयस्तथा ।
आसां पिबन्ति सलिलं वसन्ति सरितां सदा ॥
सर्व्वेषां मुने ! भाग ! हृष्टपुष्टजनाकुलाः ।
चत्वारि भारतं वर्षं युगान्यत्र महामुने ! ॥
कृतं त्रेता द्वापरञ्च कलिश्चान्यत्र न क्वचित् ।
तपस्यन्ति यतयो जुह्वते चात्र यज्विनः ॥
दानानि चात्र दीयन्ते परलोकार्थमादरात् ।
पुरुषैर्यज्ञपुरुषो जम्बुद्वीपे सदेज्यते ॥
यज्ञैर्यज्ञपतिर्विष्णुरन्यद्वीपेषु चान्यथा ।
तत्रापि भारतं श्रेष्ठं जम्बुद्वीपे महामुने ! ॥
यतो हि कर्म्मभूरेषा ततोऽन्या भोगभूमयः ।
अत्र जन्मसहस्राणां सहस्रैरपि सत्तम ! ॥
कदाचिल्लभते जन्तुर्मानुष्यं पुण्यसञ्चयात् ।
गायन्ति देवाः किल गीतकानि
धन्यास्तु ये भारतभूमिभागे ।
स्वर्गापवर्गास्पदमार्गभूते
भवन्ति भूयः पुरुषाः सुरत्वात् ॥
कर्म्माण्यसङ्कल्पिततत्फलानि
संन्यस्य विष्णौ परमात्मरूपे ।
अवाप्य तां कर्म्ममहीमनन्ते
तस्मिल्लयं ये त्वमला प्रयान्ति ॥
नानीम नेतत् क वयं विसीमे
स्वर्गप्रदं कर्म्मणि देहबन्धम् ।
प्राप्स्याम धन्याः खलु ते मनुष्या
ये भारते नेन्द्रियविप्रहीनाः ॥
नववर्षन्तु मैत्रेय ! जम्बुद्वीपमिदं मया ।
कथितं योजनविस्तारं संक्षेपात् कथितं तव ॥
जम्बुद्वीपं समावृत्य लक्षयोजनविस्तरः ।
मैत्रेय ! वलयाकारः स्थितः क्षारोदधिर्महान् ॥"

इति श्रीविष्णुपुराणे २ अंशे ३ अध्यायः ॥*॥

आसन् वर्षे जन्मकारणं तत्साफल्यञ्च यथा,—
"श्रुतजन्मतपः कृत्वा जन्मेहं भारते लभेत् ।
करोति सफलं जन्म मुक्त्वा परिकथाश्रमम् ।
अर्चनं वन्दनं मन्त्रजपः सेवनमेव च ।
सारङ्गं कीर्त्तनं श्रवणद्वयं नवविधं हरेः ।
निवेदनं स्वस्य दास्यं नवधा भक्तिलक्षणम् ।
करोति सफलं जन्म कृतेतानि च भारते ॥"*॥
अस्य पुण्यस्यफलं कर्म्मभूमित्वं परिमाणञ्च यथा,—
"कर्म्मणां फलभोगश्च सर्व्वेषां सुरसुन्दरि ! ।
नैव स्वर्गे न पातालेऽन्यद्वीपे सुतौ कृतम् ।
कृत्वा शुभाशुभं कर्म्म पुण्यक्षेत्रे च भारते ।
अन्यत्र तत्फलं भुङ्क्ते कर्म्मणां कर्म्मनिबन्धनात् ।

इन्द्रकीलः कामगिरिरिति चान्ये मूतसहस्रशृङ्गः शैलास्तेषां नितम्बप्रभवा नद्यश्च सन्त्यसंख्याताः। एतासामपो भारत्यः प्रजा नामभिरेव पुनन्तीनामात्मना चोपस्पृशन्ति चन्द्रवसा ताम्रपर्णी अवटोदा कृतमाला वैहायसी कावेरी वेणा पयस्विनी प्रकरावर्त्ता तुङ्गभद्रा कृष्णवेणा भीमरथी गोदावरी निर्विन्ध्या पयोष्णी तापी रेवा सुरसा नर्म्मदा चर्म्मण्वती अन्धः शोणश्च नदौ महानदौ वेदस्मृतिर्ऋषिकुल्या त्रिसामा कौशिकी मन्दाकिनी यमुना सरस्वती दृशद्वती गोमती सरयूरोधवती यक्षवती सप्तवती सुषोमा शतद्रुचन्द्रभागा मरुद्वृधा वितस्ता असिक्नी विश्वेति महानद्यः। अस्मिन्नेव वर्षे पुरुषैर्लब्धजन्मभिः शुक्लोहितकृष्णवर्णेन स्वरूपेण कर्म्मणा दिष्टमानुषनारकगतयो बह्व्य आत्मन आनुपूर्व्येण सर्व्वा एव सर्व्वेषां विधीयन्ते। यथावर्णविधानमपवर्गश्चापि भवति। योऽसौ भगवति सर्व्वभूतात्मनि अनात्मेऽनिरुक्तेऽनिलयने परमात्मनि वासुदेवे अनन्यनिमित्तभक्तियोगलक्षणो नानागतिनिमित्ताविद्याग्रन्थिबन्धनदाहेन यदा हि महापुरुषपूरुषप्रसङ्गः। एतदेव हि देवा गायन्ति।

"अहो बतैषां किमकारि शोभनं
प्रसन्न एषां स्विदुत स्वयं हरिः।
यैर्जन्म लब्धं नृषु भारताजिरे
मुकुन्दसेवौपयिकस्पृहा हि नः॥
किं दुष्करैर्नः क्रतुभिस्तपोव्रतै-
र्दानादिभिर्वा द्युजयेन फल्गुना।
न यत्र नारायणपादपङ्कज-
स्मृतिः प्रमुष्णात्ययेन्द्रियोत्सवात्॥
क्षणायुषां म्यानलयात् पुनर्भवात्
क्षणायुषां भारतभूजयो वरः।
क्षणेन मर्त्येन कृतं मनस्विनः
संन्यस्य संयान्त्यभयं पदं हरेः॥
न यत्र वैकुण्ठकथा सुधापगा
न साधवो भागवतास्तदाश्रयाः।
न यत्र यज्ञेशमखा महोत्सवाः
सुरेशलोकोऽपि न वै स सेव्यताम्॥
प्राप्ता नृजातिस्त्विह ये च जन्तवो
ज्ञानक्रियाद्रव्यकलापसम्भृताम्।
न चेदयतेरन्न पुनर्मृनायते
भूयो वनौका इव यान्ति बन्धनम्॥
यैः श्रद्धया वर्हिषि भागशो हवि-
र्निरूप्तमिष्टं विधिमन्त्रवस्तुतः।
एकः पृथङ्नामभिराहुतो मुदा
गृह्णाति पूर्णः स्वयमाशिषां प्रभुः॥
सत्यं दिशत्यर्थितमर्थितो नृणां
नैवार्थदो यत् पुनरर्थिता यतः।
स्वयं विधत्ते भजतामनिच्छता-
मिच्छापिधानं निजपादपल्लवम्॥
यदञ्च नः स्वर्गसुखावशेषितं
स्विष्टस्य सूक्तस्य कृतस्य शोभनम्।
तेनाजनाभे स्मृतिमज्जन्मनः स्या-
दर्थे हरिर्यद्भजतां शं तनोति॥

श्रीशुक उवाच। जम्बूद्वीपस्य च राजन्नुपद्वीपानष्टौ हैक उपदिशन्ति सागरान्तरेश्वान्तरेण इमां महीं परितो निवनद्विरूपलक्षितान्। तद्यथा। स्वर्गप्रस्थचन्द्रशुक्लावर्त्तनो रमणको नन्दहरिणः पाञ्चजन्यः सिंहलो लङ्केति। एवं तव भारतोत्तमजम्बूद्वीपवर्षविभागो यथोपदेशमुपवर्णितः।" इति श्रीभागवते महापुराणे ५ स्कन्धे द्वीपवर्षवर्णनं नाम १९ अध्यायः॥ (विष्णुपुराणे च। २ अंशे ३ अध्याये।

"उत्तरं यत् समुद्रस्य हिमाद्रेश्चैव दक्षिणम्।
वर्षं तत् भारतं नाम भारती यत्र सन्ततिः॥१॥
नवयोजनसाहस्रो विस्तारोऽस्य महामुने।
कर्म्मभूमिरियं स्वर्गमपवर्गञ्च गच्छताम्॥"२॥

अपरञ्च।

"अतः संप्राप्यते स्वर्गो मुक्तिमस्मात् प्रयान्ति वै।
तिर्य्यक्त्वं नरकञ्चापि यान्त्यतः पुरुषा मुने!॥४॥
इतः स्वर्गश्च मोक्षश्च मध्यमन्तश्च गम्यते।
नखल्वन्यत्र मर्त्यानां कर्म्मभूमौ विधीयते॥"५॥

अपि च।

"चत्वारि भारते वर्षे युगान्यत्र महामुने!।
कृतं त्रेता द्वापरञ्च कलिश्चान्यत्र न क्वचित्॥१९॥
तपस्यन्ति मुनयो जुह्वते चात्र यज्विनः।
दानानि चात्र दीयन्ते परलोकार्थमादरात्॥"२०॥

"अत्रापि भारतं श्रेष्ठं जम्बुद्वीपे महामुने!।
यतो हि कर्म्मभूरेषा ततोऽन्या भोगभूमयः॥२२॥
अत्र जन्म सहस्राणां सहस्रैरपि सत्तम!।
कदाचिल्लभते जन्तुर्मानुष्यं पुण्यसञ्चयात्॥२३॥
गायन्ति देवाः किल गीतकानि
धन्यास्तु ते भारतभूमिभागे।
स्वर्गापवर्गास्पदमार्गभूते
भवन्ति भूयः पुरुषाः सुरत्वात्॥२४॥
कर्म्माण्यसङ्कल्पिततत्फलानि
संन्यस्य विष्णौ परमात्मभूते।
अवाप्य तां कर्म्म महीमनन्ते
तस्मिल्लयं वेत्समलाः प्रयान्ति॥२५॥
जानीम नैतत् क्व वयं विलीने
स्वर्गप्रदे कर्म्मणि देहबन्धम्।
प्राप्स्याम धन्याः खलु ते मनुष्या
ये भारते नेन्द्रियविप्रहीणाः॥"२६॥)

भारती, स्त्री, (भृ+अतच्। स्त्रियां ङीप्।) वचनम्। (यथा, कुमारे। ६। ७६।

"तमर्थमिव भारत्या सुतया योक्तुमर्हसि॥")

सरस्वती। (यथा, कालिदासः।

"वीणापुस्तकरञ्जितहस्ते
भगवति भारति देवि! नमस्ते॥")

पत्तिभेदः। वृत्तिभेदः। इति मेदिनी। ने, १३८। यथा,—

"शृङ्गारे कौशिकी वीरे सात्वत्यारभटी पुनः।
रसे रौद्रे च वीभत्से वृत्तिः सर्व्वत्र भारती।"

भारती वृत्तिस्तु भारती संस्कृतप्रायो वाग्-व्यापारो नराश्रयः। इति साहित्यदर्पणस्य परिच्छेदः॥ वाक्। इति राजनिर्घण्टः। (शङ्कराचार्य्यशिष्यसोटकस्य शिष्यायामन्तमस्य उपाधिविशेषः। यथा, प्राणतोषिण्यामवधूतप्रकरणे।

"विद्याभारेण सम्पूर्णः सर्व्वभारं परित्यजेत्।
दुःखभारं न जानाति भारती परिकीर्त्तिता॥"
नदीविशेषः। यथा, महाभारते। ३।२२१।७५।
"भारती सुप्रयोगा च कावेरी सुस्मरायणा।")

भारद्वाज, क्ली, अस्थि। इति हेमचन्द्रः। ३।२८६।

भारद्वाजः, पुं. (भरद्वाजस्य अपत्यं गोत्रापत्यमिति वा। भरद्वाज+"अत्रियवाभ्यो दृष्टादिभ्योऽञ्।" ४। १। १०४। इति अञ्।) द्रोणाचार्य्यः। (यथा, महाभारते। ७।६। २३।

"ततः प्रयाते सहसा भरद्वाजे महारथे।
आर्त्तनादेन घोरेण वसुधा समकम्पत॥")

ऋषिभेदः। इति मेदिनी। जे, ३४। अगस्त्यमुनिः। इति शब्दरत्नावली॥ मङ्गलग्रहः। इति ग्रहयज्ञतत्त्वम्॥ व्याघ्रीटपक्षी। इति हेमचन्द्रः॥ (देशभेदः। यथा, "कुकणपर्णाट्टभारद्वाजे।" ४। २। १४५। इति सूत्रे "भारद्वाजशब्दोऽपि देशवचन एव नगोत्रशब्दः।" इति काशिका। भरद्वाजवंशीये, त्रि॥ यथा, महाभारते। १। १३१। ३।

"इति सञ्चिन्त्य गाङ्गेयस्तदा भारतसत्तम!।
द्रोणाय वेदविदुषे भारद्वाजाय धीमते।
पाण्डवान् कौरवांश्चैव ददौ शिष्यान्नरर्षभ!॥")

भारद्वाजी, स्त्री. वनकार्पासी। इति शब्दरत्नावली॥ (नदीभेदः। यथा, महाभारते। ६। ९। २६।

"शोणाश्च पिच्छिलाश्चैव भारद्वाजीश्च निम्नगाम्।
कौशिकीं निम्नगां शोणां बाहुदामथ चन्द्रमाम्॥")

भारयः, पुं. (भां दीप्तिं रयते प्राप्नोतीति। रय गतौ+पदाद्यच्।) भारद्वाजपक्षी। इति शब्दचन्द्रिका॥ भारद्व इति भाषा॥

भारयष्टिः, स्त्री, (भारस्य यष्टिः।) भारवहनदण्डः। बाँक इति भाषा। तत्पर्य्यायः। विष्टम्भिका २। द्व्यमरः। २। ९०। ३०॥

भारवं, क्ली, (भारं वातीति। भार+वा+"आतोऽनुपसर्गे कः।" ३। २। ३। इति कः।) धनुर्गुणः। इति त्रिकाण्डशेषः॥

भारवाहः, पुं, (भारं वहतीति। वह+"कर्म्मण्यण्।" ३। २। १। इत्यण्।) भारिकः। इत्यमरः। २।१०। १५॥ (यथा, महाभारते। ३। १३३। १।

"अन्धस्य पन्था बधिरस्य पन्थाः
स्त्रियाश्च पन्था भारवाहस्य पन्थाः।")

भारवाही, स्त्री, (भारवाह+गौरादित्वात् ङीष्।) नीली। इति राजनिर्घण्टः॥

भारविः, पुं, कविविशेषः। स च किरातार्जुनीय-नामकग्रन्थकर्त्ता। तत्पर्य्यायः। शुतपुष्पः २। इति चिकाण्डशेषः॥ तस्य ग्रन्थस्य प्रथम-श्लोकोऽयम्।

"श्रियः कुरूणामधिपस्य पालनीं
प्रजासु वृत्तिं यमयुङ्क्त वेदितुम्।
स वर्णिलिङ्गी विदितः समाययौ
युधिष्ठिरं द्वैतवने वनेचरः॥"

भारवृक्षः, पुं, काञ्चीनामकगन्धद्रव्यम्। इति शब्दचन्द्रिका॥

भारहरः, पुं, (हरतीति। हृ + पदाद्यच्। भारस्य हरः।) भारवाहकः। इति शब्दरत्नावली॥

भारहारः, पुं, (भारं हरतीति। हृ + अण्।) भारवाहकः। इति शब्दरत्नावली॥

भारिः, पुं, (द्रुमस्य अरिः। पृषोदरादित्वात् डलोपः।) सिंहः। इति हेमचन्द्रः॥

भारिकः, पुं, (भारोऽस्ति वाह्यतयास्य। "अत इनिठनौ।" ५। २। ११५। इति ठन्।) भार-वाहकः। भारी इति ख्यातः। तत्पर्य्यायः। भारवाहः २। इत्यमरः। २। १०। १५॥ भारहरः ३ भारहारः ४। इति शब्दरत्ना-वली॥ (यथा, कथासरित्सागरे। ३०। ५६।

"तत्र चाग्रागताः केचित् तस्थुः काष्ठ-भारिकाः॥")

भारिटः, पुं, पक्षिविशेषः। तत्पर्य्यायः। श्याम-चटकः २ श्रेणिरः ३ कणभक्षकः ४। इति राजनिर्घण्टः॥

भारी, [न्] पुं, (भारोऽस्यस्यास्मिन् वेति। भार + इनिः।) भारवाहकः। इत्यमरटीकायां रमा-नाथः॥ (यथा, मनौ। २। १३८।

"चक्रिणो दशमीस्थस्य रोगिणो भारिणः स्त्रियाः।
स्नातकस्य च राज्ञश्च पन्था देयो वरस्य च॥")

भारयुक्ते, त्रि॥

भारोही, स्त्री, (भारं वहतीति। वह + णिच्। स्त्रियां ङीप्। ततः प्रसादावञ्चाङ्गौ ऊट्। भारवाहिका। इति मुग्धबोधव्याकरणम्॥

भार्गवः, पुं, (भृगोरपत्यम् तदुगोत्रापत्यमिति। भृगु + अण्।) परशुरामः। शुक्राचार्य्यः। (यथा, महाभारते। १। ६६। ४५।

"तस्मिन्नियुक्ते विधिना योगक्षेमाय भार्गवे।
अन्यसुनृपदायामास पुत्रं भृगुरनिन्दितम्॥")

धन्वी। गजः। इति मेदिनी। वे, ४५॥ भारत-वर्षमध्ये प्राच्यदेशान्तर्गतदेशविशेषः। यथा,—

"ब्रह्मोत्तराः प्रविजया भार्गवा त्रेयमङ्काः॥"

इति मार्कण्डेयपुराणम्॥

(कुलालः। यथा, महाभारते। १। १६२। १।

"गत्वा तु तां भार्गवकर्म्मशालां
पार्थौ पृथां प्राप्य महानुभावौ॥"

"भृगुः स्वपाकवृत्तिः शौनिकार्थं भृगुणा व्यव-हरतीति भार्गवः कुलालः।" इति तट्टीकायां नीलकण्ठः॥ मार्कण्डेयः। यथा, महाभारते। १३। २२। १५।

"इत्युक्त्वा ते जग्मुराशु चत्वारोऽमिततेजसः।
पृथिवीकाश्यपस्वामिः प्रणष्टायुश्च भार्गवः॥"

शौनकः। यथा, महाभारते। १। १८। ६।

"तथेति चाब्रवीद्विष्णुर्ब्रह्मणा सह भार्गवः॥"

भृगुवंशीये, त्रि॥ (यथा, महाभारते। ३। ६६। ४१।

"शृणु रामस्य राजेन्द्र! भार्गवस्य च धीमतः॥")

भार्गवप्रियः, पुं, (भार्गवस्य प्रियः।) हीरकः। शुक्राधिष्ठातृदेवताकत्वात्॥

भार्गवी, स्त्री, (भार्गव + ङीप्।) पार्व्वती। (भृगोरपत्यं स्त्री। भृगु + अण् + ङीप्।) लक्ष्मीः। (अस्या भृगुसुतात्वमुक्तं यथा, विष्णु-पुराणे। १। ६। १४६।

"एतत् ते कथितं ब्रह्मन्! यन्मां त्वं परि-पृच्छसि।
क्षीराब्धौ श्रीर्यथा जाता पूर्ब्बं भृगुसुता सती॥")

दूर्ब्बा। इति मेदिनी। वे, ४५॥ (यथा, वैद्यक-रत्नमालायाम्।

"सहस्रवीर्य्या दूर्ब्बा तु मङ्गल्या भार्गवी स्मृता॥")

नीलदूर्ब्बा। इति शब्दरत्नावली॥ (यथास्याः पर्य्यायः.

"नीलदूर्ब्बा सहस्रान्ता भार्गवी शतपर्ब्बिका।
शूरा सहस्रवीर्य्या च शतवल्ली च कीर्त्तिता॥"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥) श्वेतदूर्ब्बा। इति राजनिर्घण्टः॥ (भृगुवंशीय-स्त्रीमात्रे। यथा, महाभारते। १। ७३। ३३।

"कस्माच्चिरायितोऽसीति पृष्टस्तामाह भार्ग-वीम्।
वृतोऽहमिति चाचख्यौ पृष्टो ब्राह्मण-कन्यया॥")

भार्गी, स्त्री, (भृज् + घञ्। भर्गोऽस्यस्या इति। "ज्योत्स्नादिभ्य उपसंख्यानम्।" ५। २। १०३। इत्यस्य वार्त्तिके। इति अण्। ततो ङीप्।) वृक्षविशेषः। वामनहाटी इति भाषा। तत्-पर्य्यायः। गर्दभाण्डी २ भण्डी ३ अङ्गार-वल्लरी ४ ब्राह्मी ५ ब्राह्मणयष्टिः ६ वान्तारिः ७ भृङ्गजा ८ पद्मा ९ यष्टिः १० भारङ्गी ११ वातारिः १२ कामजित् १३ सुरूपा १४ भ्रमरेष्टा १५ शुक्रमाता १६। अस्या गुणाः। कटुत्वम्। तिक्तत्वम्। उष्णत्वम्। कासश्वास-श्लीपदव्रणकृमिदोषज्वरनाशित्वञ्च। इति राज-निर्घण्टः॥ अन्यत् ब्राह्मणयष्टिकाशब्दे द्रष्टव्यम्॥

भार्द्वाजी, स्त्री, (भारद्वाजी। पृषोदरादित्वात् साधुः।) भारद्वाजी। वनकार्पासी। इति शब्दरत्नावली॥

भार्य्या, स्त्री, (भरणीया इति। भृ + "ऋहलो-र्ण्यत्।" ३। १। १२४। इति ण्यत्। टाप्। यद्वा भया दीप्ता आर्य्या।) वेदविधा-नेनोढ़ा। विधिपूर्ब्बकविवाहिता। तत्पर्य्यायः। पत्नी २ पाणिगृहीती ३ द्वितीया ४ सह-धर्म्मिणी ५ जाया ६ दाराः ७ सहधर्म्मिणी ८ धर्म्मचारिणी ९ दारः १० कलत्रम् ११ कलत्रकम् १२॥ इति शब्दरत्नावली॥ अस्याः प्रशंसा यथा,—

"सा भार्य्या या प्रियं ब्रूयात् स पुत्रो यस्तु जीवति।
स जीवति गुणो यस्य धर्म्मो यस्य स जीवति॥
गुणधर्म्मविहीनो यो निष्फलं तस्य जीवनम्॥
सा भार्य्या या गृहे दक्षा सा भार्य्या या प्रियंवदा॥
सा भार्य्या या पतिप्राणा सा भार्य्या या पति-व्रता।
नित्यस्नाता सुगन्धा च नित्यञ्च प्रियवादिनी॥
स्वल्पभुक् स्वल्पभाषी च सततं मङ्गलैर्युता।
सततं धर्म्मचतुरा सततञ्च पतिप्रिया॥
सततं प्रियवक्त्री च सततं ऋतुकामिनी।
पितृदेवक्रियायुक्ता सर्व्वसौभाग्यवर्द्धिनी॥
यस्येदृशी भवेद्भार्य्या देवेन्द्रो न स मानुषः॥"

अस्या दोषा यथा,—

"यस्य भार्य्या विरूपाक्षी कक्षसक्षा कलहप्रिया।
उत्तरोत्तरवादा स्यात् सा जरा न जरा जरा॥
यस्य भार्य्याश्रितान्यत्र परवेश्माभिकाङ्क्षिणी।
कुक्रिया त्वक्तलज्जा च सा जरा न जरा जरा॥"
"यस्य भार्य्या गुणज्ञा च भर्त्तारमनुगामिनी।
अल्पाल्पेन तु सन्तुष्टा सा प्रिया न प्रिया प्रिया॥
दुष्टा भार्य्या शठं मित्रं भृत्याश्चोत्तरदायकाः।
ससर्पे च गृहे वासो मृत्युरेव न संशयः।
आपत्सु मित्रं जानीयात् युद्धे शूरं वने शुचिम्।
भार्य्याञ्च विभवे क्षीणे दुर्भिक्षे च प्रियातिथिम्॥"

इति गारुड़े नीतिसारे १०८।१०९ अध्यायौ॥ (तथा च महाभारते। १। ७४। ३६—४५।

"सा भार्य्या या गृहे दक्षा सा भार्य्या या प्रजावती।
सा भार्य्या या पतिप्राणा सा भार्य्या या पतिव्रता॥
अर्द्धं भार्य्या मनुष्यस्य भार्य्या श्रेष्ठतमः सखा।
भार्य्यामूलं त्रिवर्गस्य भार्य्यामूलं तरिष्यतः॥
भार्य्यावन्तः क्रियावन्तः सभार्य्या गृहमेधिनः।
भार्य्यावन्तः प्रमोदन्ते भार्य्यावन्तः श्रियान्विताः॥
सखायः प्रविविक्तेषु भवन्त्येताः प्रियंवदाः।
पितरो धर्म्मकार्य्येषु भवन्त्यार्त्ताश्च मातरः॥
कान्तारेष्वपि विश्रामो जनस्याध्वनिकस्य वै।
यः सदारः स विश्वास्यस्तस्माद्दाराः परा गतिः॥
संसरन्तमपि प्रेतं विषमेष्वेकपातिनम्।
भार्य्यैवान्वेति भर्त्तारं सततं या पतिव्रता।
प्रथमं संस्थिता भार्य्या पतिं प्रेत्य प्रतीक्षते।
पूर्ब्बं मृतञ्च भर्त्तारं पश्चात् साध्वनुगच्छति॥")

दक्षसंहितायाञ्च।

"यस्य नास्ति सती भार्य्या गृहेषु प्रियवादिनी।
अरण्यं तेन गन्तव्यं यथारण्यं तथा गृहम्॥
सुशीला सुन्दरी शान्ता गता यस्य गृहोदरात्।
अरण्यं तेन गन्तव्यं यथारण्यं तथा गृहम्॥
भावानुरक्ता वनिता हृता यस्य च शत्रुणा।

अरण्यं तेन गन्तव्यं यथारण्यं तथा गृहम् ॥
दैवेनापहृता यस्य पतिसाध्वी पतिव्रता ।
अरण्यं तेन गन्तव्यं यथारण्यं तथा गृहम् ॥
यस्य माता गृहे नास्ति भार्य्या चाप्रियवादिनी ।
अरण्यं तेन गन्तव्यं यथारण्यं तथा गृहम् ॥
प्रियाशून्यं गृहं यस्य पूर्णं स्त्रीधनबन्धुभिः ।
अरण्यं तेन गन्तव्यं यथारण्यं तथा गृहम् ॥
भार्य्याशून्या वनसमाः सभार्य्याश्च गृहा गृहाः ।
गृहिणी च गृहं प्रोक्तं न गृहं गृहसुच्यते ॥
अशुचिः स्त्रीविहीनश्च देवे पैत्रे च कर्म्मणि ।
यदङ्गं कुरुते कर्म्म न तस्य फलभाग्भवेत् ॥
दाक्षिकाग्निक्रियाहीनश्च यथा मन्त्रो हुताशनः ।
प्रभाहीनो यथा सूर्य्यः शोभाहीनो यथा शशी ॥
शक्तिहीनो यथा जीवो यथात्मा च तनूं विना ।
विनाधारं यथा घेयो यथेशः प्रकृतिं विना ॥
न च शुक्लो यथा यज्ञः फलदो दक्षिणां विना ।
कर्म्मणे च फलं दातुं सामग्रीमूलमेव च ॥
विना स्वर्णं स्वर्णकारो यथाशक्तः स्वकर्म्मणि ।
यथाशक्तः कुलालश्च नक्तिकाघटनां विना ॥
तथा गृही न शक्तश्च सन्ततं सर्व्वकर्म्मणि ।
भार्य्यामूलाश्च पुत्राश्च भार्य्यामूला गृहास्तथा ॥
भार्य्यामूलं सुखं शश्वद्गृहस्थानां गृहे सदा ।
भार्य्यामूलः सदा हर्षो भार्य्यामूलश्च मङ्गलम् ॥
भार्य्यामूलश्च संसारो भार्य्यामूलश्च सौरतम् ।
यथा रथश्च रथिनां गृहिणाञ्च तथा गृहम् ।
सारथिस्तु यथा तेषां गृहस्थानां तथा प्रिया ॥
सर्व्वरत्नप्रधानश्च स्त्रीरत्नं दुष्कुलादपि ।
सा गृहीता गृहस्थेनैवेत्याह कमलोद्भवः ।
यथा जलं विना पद्मं पद्मं शोभां विना यथा ।
तथैव च गृहं शश्वद्गृहिणीं गृहिणीं विना ॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५६ अध्यायः ॥

तस्या अत्याज्यत्वं यथा,—

"अनपत्याञ्च युवतीं कुलजाञ्च पतिव्रताम् ।
त्यक्त्वा भवेद्यः सन्न्यासी ब्रह्मचारी यतीति वा ॥
वाणिज्ये वा प्रवासे वा चिरं दूरं प्रयाति यः ।
तीर्थाय तपसे वापि मोक्षार्थं यज्ञ खण्डितुम् ॥
न मोक्षस्तस्य भवति धर्म्मस्य स्खलनं ध्रुवम् ।
अभिशापेन भार्य्याया नरकञ्च परत्र च ॥
इहैव च यशोनाशं लभते कमलोद्भवः ॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ११२ अः ॥

बहुभार्य्यस्यैकस्या भरणे दोषादि यथा,—

"गदतो मम पुत्रं पूर्व्वं नारदाय पितुर्मुखे ।
इत्यस्य धर्म्मशास्त्रार्थं तत् शृणुष्व निशामय ॥
बहुदारः पुमान् यस्तु रागादेकां भजेत् स्त्रियम् ।
स पापभाक् स्त्रीजितश्च तस्यार्थौघं सनातनम् ॥
बहूदरं जायते स्त्रीणां स्वाम्यसम्भोगजं यथा ।
न तस्य सदृशं दुःखं किञ्चिदन्यद्धि विद्यते ॥
सतीमनुमतीं जायां यो नेयान् पुरुषाधमः ।
ऋतुवत्सु शुक्लेषु भूयश्चा स हि जायते ॥
भार्य्या स्यादयवदात्रेयी तावत् कालं विरोधकम् ।
तस्यास्तु सङ्गमे किञ्चित् विहितत्वापि नाचरेत् ॥
बहुभार्य्यस्य भार्य्यायास्तुमैथुनाद्गमम् ।
न किञ्चिदिच्छते कर्त्तुं श्राद्धेऽपि यदीरितम् ॥
तोषयेत् सततं भार्य्या विधिवत् पाणिपीड़िताः ।
तासां तुष्टा तु कल्याणमकल्याणमतोऽन्यथा ॥
सन्तुष्टो भार्य्यया भर्त्ता भर्त्रा भार्य्या तथैव च ।
यस्मिन्नेतत्कुले नित्यं कल्याणं तत्र वै ध्रुवम् ॥
यया विरुध्यते स्वामी सौभाग्यमदहङ्कया ।
सपत्नीसङ्गमं कर्त्तुं सा स्यादेषा भवान्तरे ॥
इहापि लोके वाच्यत्वमधर्म्मञ्चापि विन्दति ।
न च पितृकुलं स्वामिकुलं तस्याः प्रमोदते ॥
विरुध्यमाने पत्यौ यत् सपत्न्या वा प्रवर्त्तिते ।
अतीव दुःखं भवति तदकल्याणकृत्तयोः ॥"

इति कालिकापुराणे २० अध्यायः ॥

रजस्वला भार्य्या अत्याज्या । यथा,—

"न क्षितोतीह यो दारान् रजसा कलुषीकृतः ।
प्रेतपैत्राद्धते कुर्य्ये रेतसाच्च पितृत्यसौ ॥
यो जहाति रजः ज्ञात्वा पित्र्यं स्वं तेजसा नरः ।
सोऽश्नाति फलमप्येवं यो न दद्याद्धुतं पुनः ॥
यो बिभर्त्ति स मत्तो वै बहूनां रजसि स्थितः ।
रेतः पिबति तन्मग्नो पितृभ्यो योऽप्यपिण्डदः ॥
यो जहाति हि निर्दोषां भार्य्यामेव रजस्वलाम् ।
मुह्यमानं संवृतः क्षत्तगर्भस्य दुरितं वहेत् ॥"

इति वह्निपुराणम् ॥

कालविशेषे तद्गमननिषेधो यथा,—

"न दिवापि स्त्रियं गच्छेत् कदाचिदिच्छयापि च ।
न पर्व्वसु न सन्ध्यासु नात्यर्त्तुं चतुरात्रिषु ॥
नोदक्यां न दिवा गच्छेत् न सगर्भां न व्रतस्थिताम् ।
अभिगच्छेदविज्ञानं यस्तदायुःक्षयमेव च ॥
वन्ध्यास्वमे परित्याज्या नवमे च मृतप्रजा ।
एकादशे स्त्रीजननी सद्यस्त्वप्रियवादिनी ॥
न वक्त्रेऽभिगमं कुर्य्यात् पाणिग्राही तु योषितः ।
कुर्य्याच्चेत् पितरस्तस्य पतन्ति रेतसोभुवः ॥
भार्य्याधीनं सुखं पुंसां भार्य्याधीनो धनागमः ।
भार्य्याधीना मखोत्पत्तिर्भार्य्याधीनः सुखोदयः ॥
यत्र भार्य्या गृहं तत्र भार्य्याधीनो गृही वसेत् ।
न गृहेण गृहस्थः स्यात् भार्य्यया कथ्यते गृही ॥"

इति पराशरस्मृतिः ॥

भार्य्याटः, पुं, (भार्य्यया अटति वर्त्तते इति । अट गतौ + पचाद्यच् ।) अन्यार्थे स्त्रीदासः । इति त्रिकाण्डशेषः ॥

भार्य्याटिकः, पुं, (अट गतौ + भावे घञ् । भार्य्यया अटो मतिर्भ्रमं वा अस्यास्येति । भार्य्याट + ठन् ।) स्त्रीजितः । इत्यमरविशेषः । इति मेदिनी । के, २०५ ॥ (सुनिविशेषः । इति हेमचन्द्रः ॥)

भार्य्यापतौ, पुं, (भार्य्या च पतिश्च तौ । "राजदन्ताादिषु परम् ।" २ । २ । ३१ । इति साधुः ।) योषित्पतौ । नित्यद्विवचनान्तोऽयं शब्दः । तत्पर्य्यायः । दम्पती २ जम्पती ३ जायापती ४ । इत्यमरः । २ । ६ । ३८ ॥

भार्य्यारः, पुं, (भार्य्यां ऋच्छतीति । ऋ गतौ + उण् ।) रतभेदः । क्रीड़या परभार्य्यायां पुंसोऽपादकः । श्लेषभेदः । इति मेदिनी । रे, १६२ ॥

भार्य्यादृष्यः, पुं, (भार्य्यावत् प्रियो दृष्यः ।) पत्नीदृष्यः । इति राजनिर्घण्टः ॥

भाल, क्ली, (भाल दीप्तौ + भावे घञ् । भां लाति गृह्णातीति । ला + "आतोऽनुपसर्गे कः ।" ३ । २ । ३ । इति कः ।) भ्रुवोरूर्द्ध्वभागः । कपाल इति भाषा । तत्पर्य्यायः । ललाटम् २ अलिकम् ३ गोधि ४ । इति राजनिर्घण्टः ॥ (यथा साहित्यदर्पणे ३ परिच्छेदे ।

"स्वामिन् भङ्गुरयालकं सतिलकं भाल विला-
सिनू कुरु
प्राणेश ! त्रुटितं पयोधरतटं हारं पुन-
र्योजय ॥")

तत्रः । इति मेदिनी । ले, ४२ ॥

भालदर्शनं, क्ली, (भाले ललाटे दर्शनमस्यति ।) सिन्दूरम् । इति शब्दचन्द्रिका ॥

भालदृक्, [ग्] पुं, (भाले ललाट दृक् नेत्रं यस्य ।) शिवः । इति हेमचन्द्रः । २ । ११० ॥

भालाङ्कः, पुं, (भालस्थेव अङ्को यत्र भाले अङ्को यस्येति वा ।) करपत्रम् । शाकभेदः । रोहितमत्स्यः । महालक्षणसम्पन्नपुरुषः । कच्छपः । हरः । इति मेदिनी । के, १३३ ॥ (भालस्थ अङ्कः ।) ललाटचिह्नञ्च ॥

भाललोचनः, पुं, (भाले ललाटे लोचनं नेत्रं यस्य ।) शिवः । इति भालदृक्शब्ददर्शनात् । (यथा, काशीखण्डे । २६ । १३० ।

"भाललोचनभावञ्च भूतभव्यभवत्प्रभुः ॥")

भालुकः, पुं, (भलते हिनस्ति प्राणिनः इति । भल हिंसायाम् + बाहुलकात् उकः । ततः प्रज्ञाद्यण् ।) भल्लूकः । यथा, भरतधृतकोषान्तरे ।

"भालूको भालुको भल्लोऽच्छभल्लोऽच्छोऽपि
भल्लुकः ॥"

भालूकः, पु, (भलते हिनस्ति जीवानिति । भल + "ऊलूकादयश्च ।" उणा० । ४ । ४१ । इति ऊकः । ततः प्रज्ञाद्यण् ।) भल्लूकः । यथा,—

"भालूको भालुको भल्लोऽच्छभल्लोऽच्छोऽपि
भल्लुकः ॥"

इति भरतधृतकोषान्तरम् ॥

भाल्लुकः, पुं, भल्लूकः । इत्यमरटीकायां भरतः ॥

भाल्लूकः, पुं, भल्लूकः । इत्यमरटीकायां भरतः ॥

भावः, पुं, (भावयति चिन्तयति पदार्थानिति । भू + णिच् + घञ्वाद्यच् । भवतीति । भू + "भव तेरिति वक्तव्यम् ।" इति काशिकोक्तेर्वा ।) नाट्योक्तो विदान् । मानसविकारः । सत्ता । (यथा, श्रीमद्भगवद्गीतायाम् । २ । १६ ।

"नासतो विद्यते भावो नाभावो विद्यते सतः ।
उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः ॥")

स्वभावः । अभिप्रायः । (यथा, रामायणे २ । २ । १६ ।

"तस्य धर्म्मार्थविद्वुषो भावमाज्ञाय सर्व्वेषः।
त्राक्षया वलसुख्याच्च पौरजानपदैः सह ॥")
चेष्टा। आत्मा। जन्म। इत्यमरः। ३।३।२०६॥
(चित्तम्। यथा, मनुः। ४। २२७।
"दानधर्म्मं निषेवेत नित्यमैहिकपौत्तिकम्।
परिपुष्टेन भावेन पात्रमासाद्य शक्तितः॥")
क्रिया। लीला। पदार्थः। (यथा, रघुः। ३।४१।
"अतीन्द्रियेष्वप्युपपन्नदर्शनो
वभूव भावेषु दिलीपनन्दनः॥")
विभूतिः। बुधः। जन्तुः। रत्यादिः इति मेदिनी। वे, २१॥ गौरवितः। अभिनयान्तरम्। इति त्रिकाण्डशेषः॥ (विषयः। यथा, हितोपदेशे।
"अवश्यम्भाविनो भावा भवन्ति महतामपि।
नग्नत्वं नीलकण्ठस्य महाहिशयनं हरेः॥"
पर्य्यालोचना। यथा मनुः। ६। ८०।
"यदा भावेन भवति सर्व्वभावेषु निस्पृहः।
तदा सुखमवाप्नोति प्रेत्य चेह च शाश्वतम्॥"
प्रेम। यथा, गीतायाम्। १०। ८।
"इति मत्वा भजन्ते मां बुधा भावसमन्विताः॥")
धातवर्थः। (यथा, मुग्धबोधे वोपदेवः।
"देशाध्वकालभावे वाटेः।" क्रियान्तरापेक्षि-क्रियाविशिष्टः तत्र सप्तमी विहिता तथा च मुग्धबोधटीकायां रामतर्कवागीशः। "यस्य क्रियया क्रियान्तरमपेक्ष्यते स इह भावः॥")
योनिः। उपदेशः। इति धरणिः॥ संचारः। इत्यनेकार्थकोषः॥ नवग्रहाणां शयनादिद्वादशचेष्टाः। यथा,—
"शयनश्चोपवेशश्च नेत्रपाणिः प्रकाशनम्।
गमनं गमनेच्छा च सभायां वसतिस्तथा॥
आगमनं भोजनञ्च तृषलिप्सा च कौतुकम्।
निद्रा ग्रहाणां भावाश्च द्वादशैते प्रकीर्त्तिताः॥"
भावानयनक्रमो यथा,—
"यद्राशौ विद्यते खेटस्तेन तं परिपूरयेत्।
पुनरंशेन संपूर्य्य खर्त्वं तत्र नियोजयेत्॥
ज्ञातदृष्टं तथा लग्नमेकीकृत्य सदा बुधैः।
रविणा भागहारेण शेषं कार्य्ये नियोजयेत्॥
अंशेन नवसंख्यया। खर्त्वं ग्रहाणां जन्मनक्षत्रम्। तद्यथा,—
"विशाखानलतोयानि वैष्णवं भगदैवतम्।
पुष्या पौष्णोऽयमः सर्पो जन्मभान्यर्कतः क्रमात्॥"
ऋक्षो राशिः। यदा मेषे ग्रहस्तदा १ एकपूरितग्रहसंख्याङ्कः। यदा वृषे ग्रहस्तदा २ द्विपूरितो ग्रहसंख्याङ्कः कार्य्यः॥ * ॥ जायातुनन्दस्थुतुङ्गस्वगृहत्रिकोणस्थानस्थितपापग्रहाणां निद्राशयनभावयोः फलम्।
"निद्रायाञ्च यदा पापो जायास्थाने शुभं वदेत्।
यदि पापः शुभैर्दृष्टो नाशुभैश्च कदाचन॥
यदि वा शुक्रभेदी स्याच्छयने यदि वेक्षितः।
तदा नारीसमं तस्य नाशो भवति निश्चितम्॥
शुभाशुभैर्यदा दृष्टः शुभग्रहसमन्वितः।
नारी च म्रियते तस्य प्रथमा च विशेषतः॥
सुतस्थाने स्थितः पापो निद्रायां शयनेऽपि वा।
तदाशुभं भवेत्तस्य नात्र कार्य्या विचारणा॥
तुङ्गस्थाने स्वगेहे वा त्रिकोणे वा यदा भवेत्।
अपत्यस्य तदा नाशो जायते नात्र संशयः॥
शुभग्रहो यदा तत्र क्रूरो वा यदि वेक्षितः।
तदा प्रथमापत्यस्य नाशो भवति निश्चितम्॥
सुतस्थाने स्थितः पापो निद्रायां शयनेऽपि वा।
तदात्मनोऽपत्यतुः स्यादाजनोऽपरतोऽपि वा॥
शुभग्रहो यदा तत्र सुतस्थानेऽपि संस्थितः।
तदा च मरणं तस्य सुतस्थाने विशेषतः॥
पापग्रहैर्यदा दृष्टः शुभो वा शत्रुवीक्षितः।
तदा तस्य शिरश्छेदो मुनिना परिकीर्त्तितः॥
एवं क्रमेण बोद्धव्यं ग्रहभावे सुबुद्धिना।
बलाबलविचारेण जायते च शुभाशुभम्॥
ज्योतिर्विदस्तु च सर्व्वेषु परिहारः कृतो मया।
शयनादिकभावेषु ज्ञातव्यश्चोपदेशतः॥
एकादशे वा दशमालये वा
धनालये वा यदि वा विलग्ने।
पापेन युक्तो न शुभग्रहश्चे-
त्तथापि सिद्धिं महतीं वदन्ति॥"
फलं यथा,—
"मन्दाग्निः पित्तशूली च जायते शयने नरः॥१॥
उपवेशे भवेच्छिल्पी श्यामवर्णस्तथा नरः॥२॥
नेत्रपाणौ भवेत् क्रूरो जलदोषो भवेन्नरः॥३॥
पुण्यवान् धार्म्मिकश्चैव धनवांश्च प्रकाशने॥४॥
गमने च रवेर्जातः क्षयरोगी धनच्युतः।
बहुभाषी क्षमी क्रोधी लुब्धचित्तः सदा भवेत्॥ ५॥
अल्पभोक्ता शीघ्रगामी दीर्घायुर्नृपवल्लभः।
शूरः श्रीमान् सुशीलश्च गमनेच्छाभवो नरः॥६॥
सभायाञ्च रवेर्जातः खलो दाता क्षमी भवेत्।
दयालुः पण्डितो धीमान् गुणवान् पण्डितप्रियः॥ ७॥
आगमने भवेन्मूर्खः कुरूपो धनवान् भवेत्॥८॥
भोजने भक्षको मांसलुब्धो महाबलपूर्व्वकी॥९॥
तृषलिप्सौ सुन्दरो वाग्मी पण्डितस्य गृहाधिपः॥१०॥
उत्साही च महाभोगी कौतुके च दिवाकरे॥११॥
दाता भोक्ता प्रियः पुत्रकलत्राणां न संशयः।
लिङ्गे देहे करे चैव गुदे रोगी तथैव च।
निद्रायाञ्च भवेज्ज्ञानीः क्रोधनो रक्तनेत्रकः॥१२॥
इति रवेस्तृतीयक्षेत्रे बलाबले वा बोध्यम्॥*॥
"शयने च विधौ क्रोधी दरिद्रो बहुलम्पटः॥१॥
उपवेशे महारोगी धनवांश्च भवेन्नरः॥२॥
नेत्रपाणौ नेत्ररोगी क्षीपदी बहुभाषकः।
क्रूरः खलोऽतिशूरश्च जायते च विधौ तदा॥३॥
प्रकाशने निशानाथे धनवांश्च भवेन्नरः।
दक्षो बुद्धिमान् दाता च परदारेषु लम्पटः॥४॥
व्ररोगी वित्तहा चैव क्रूरकर्म्मा धनान्वितः।
शिरोरोगी दन्तशूली जायते गमने विधौ॥५॥
नानामतिर्महाक्रोधी लम्पटी च भवेन्नरः।
गमनेच्छुविधौ जातो धनहीनो भवेत्तदा॥६॥
दाता च धार्म्मिकश्चैव राजपात्रो भवेत् सदा।
सभायाञ्च विधौ नित्यं जायते पुरुषोत्तमः॥७॥
नित्यक्रोधी महादुःखी भवेदागमने विधौ॥८॥
भोजने च भवेल्लुब्धो भक्षकश्च महासुरः॥९॥
यो जातो तृषलिप्सायां गुणवान् धार्म्मिको भवेत्।
बहुपात्रो धनी दाता जायते नात्र संशयः॥१०॥
कौतुके च भवेद्रोगी नानाविद्यासु तत्परः।
उत्साही च महाक्रोधी जायते च सुनिश्चितम्॥११॥
निद्रायां दद्रुरोगी स्यात् श्लेष्मपापरुजान्वितः।
पुत्रशोकमहादुःखी नित्यं भ्रमति मेदिनीम्॥१२
इति चन्द्रस्य॥ * ॥
शयने च कुजे जातो लक्ष्मीवहुकुरङ्गकः।
क्षणक्रोधी महादक्षः क्षयरोगो जायते नरः॥१॥
उपवेशे यदा भौमे जायते च नराधमः।
धनवान् क्रूरकर्म्मा च निष्ठुरो जातिवर्ज्जितः॥२॥
नेत्रपाणौ च यो जातः अक्षिरोगी भवेन्नरः।
पुत्रदारधनैर्युक्तो दारिद्र्येणैव दह्यते॥ ३॥
प्रकाशने कुजे जातो धनवान् पण्डितः सुधीः।
नारी च म्रियते तस्य प्रथमा च विशेषतः॥ ४॥
गमने च यदा जातः प्रवासी नित्यदुःखितः।
शरीरे च भवेद्रोगः कण्डूदिकुष्ठदृक्॥५॥
प्रवासी गमनेच्छायां गुदरोगी भवेच्च सः।
धनहीनः कुकर्म्मा च जायते क्षितिजस्य च॥६
सभायाञ्च यदा जातो धार्म्मिको बहुसम्मतः।
गुणवांश्च महादाता शिरोरोगी भवेद्ध्रुवम्॥७
कुजस्यागमने नित्यं खञ्जो भवति नान्यथा।
कर्णरोगी पित्तशूली जायते च नराधमः॥८॥
भोजने भूमिजस्यापि यो जातो मांसलुब्धकः।
दृढकायो महाक्रोधी नित्योत्साही धनान्वितः॥ ९॥
कुजस्य तृषलिप्सायां यो जातो धनवान् भवेत्।
दाता भोक्ता सदा मानी राजपात्रो भवेच्च सः॥ १०॥
कौतुके क्षितिजस्यापि जातो भवति पण्डितः।
नानाधनेन संयुक्तो बहुपुत्रो द्विभार्य्यकः॥११॥
निद्रायां भूमिपुत्रस्य यो जातो भूर्ख एव सः।
कलहो बान्धवैः सार्द्धं शोकक्लेशरुजान्वितः॥१२
इति मङ्गलस्य॥
"बुधस्य शयने जातो धनवान् क्षुधितः सदा।
अङ्गच्छेदो भवेदापि खञ्जो भवति नान्यथा॥१॥
उपवेशे च यो जातः प्रवासी जायते ध्रुवम्।
कवितागुणधीयुक्तो गौरवर्णो महाशयः॥२॥
नेत्रपाणौ च यो जातः क्षीपदादिरुजान्वितः।
चक्षूरोगी विशेषात् स्यात् पुत्रनाशो भवेद्ध्रुवम्॥ ३॥
प्रकाशने भवेज्जातो राजपात्रो धनान्वितः।
नानाधनेन संयुक्तो जायते वेदपारगः॥ ४॥
गमने यो नरो जातः प्रवासी नित्यदुःखितः
शरीरे क्षतमाप्नोति नित्यक्षयी भवेच्च सः॥५॥
यो जातो गमनेच्छायां लम्पटो दुष्टचित्तकः।
स्त्रीवशो दुष्टभार्य्यश्च कामुको बहुभाषकः॥ ६॥

भावः

सभायाञ्च बुधे जातो मूर्खो भवति पण्डितः।
धनवान् धार्मिकश्चैव चिररोगी भवेत्तु सः ॥७॥
क्रूरः खलो मृतमूर्खः पापशीलो भवेन्नरः।
बुधस्यागमने नित्यं जायते च नराधमः ॥८॥
भोजने च भवेत् सौख्यं धनहीनो भवेन्नरः।
परद्वेषी प्रवासी च शोकगात्रव्यथान्वितः ॥९॥
यो जातो वृत्यलिप्सायां धनवान् पण्डितः कविः।
उत्साही च महादुष्टो भुनक्ति सुख-
मद्भुतम् ॥ १० ॥
कौतुके च यदा जातो भवेत् सर्व्वजनप्रियः।
अर्शोरोगी दृढयुक्तो धनवानल्पशुक्रकः ॥११॥
निद्रायाञ्च यदा जातः सर्व्वदुःखं पाप्नुयात्।
नानाक्लेशमवाप्नोति रोगशोकयमन्वयम् ॥१२॥"

इति बुधस्य ॥ * ॥

"धनवान् लम्पटः श्यामः स्थूलो व्रणसमन्वितः।
जीवस्य शयने जातो मानवो नात्र संशयः ॥१॥
उपवेशे गुरोर्जातो बहुभाषी च रोगवान्।
पशुघाती महाश्लिष्टो क्षीणदेही रोगसंयुतः ॥२॥
नेत्रपाणौ गुरोर्जातः काणरोगी धनी भवेत्।
पतादिश्वरणे नित्यं जायते नात्र संशयः ॥३॥
गुरोः प्रकाशे धनवान् लिङ्गगुह्ये व्रणान्वितः।
दन्तो लम्पटपायी च श्यामवर्णो व्रणान्वितः ॥४॥
सर्पभीतो गूढकर्म्मा साहसी गमनोन्मुखे।
परविक्तेन धनवान् पुमान् भवति वाक्पटुः ॥५॥
गुरोश्च गमनेच्छायां जातो भवति मानवः।
शूली धनी प्रवासी च सेवाकर्म्मणि तत्परः ॥६॥
वक्ता दाता च धनवान् राजसेवान्वितो नरः।
शूलरोगी भवेन्नित्यं सभायां वाक्पटुः स्थिते ॥७॥
धार्मिकस्तीर्थविज्ञानी धनी चागमने गुरोः।
परदारेषु संलुब्धो जायते नात्र संशयः ॥८॥
भोजने बहुसौख्याढ्यो मांसलुब्धो महासुरः।
कासुकः प्रियवाक्यश्च जायते नात्र संशयः ॥९॥
वृत्यलिप्से श्लिष्टो वाग्मी धनवान् सात्त्विकस्तथा।
मधुदेहसंयुक्तो जीवस्य च भवेन्नरः ॥१०॥
कौतुके च गुरोर्जातो धनवान् धार्मिकः सदा।
वृत्योत्साही महत्सङ्गो भुनक्ति सुखमद्-
भुतम् ॥ ११ ॥
निद्रायाञ्चैव यो जातश्चरोगी भवेच्च सः।
क्षपणो बहुभाषी च दुःखितो भ्रमते
महीम् ॥ १२ ॥"

इति गुरोः ॥ ८ ॥

"शुक्रस्य शयने जातो लम्पटो बहुभाषकः।
दन्तरोगी महाक्रोधी नीचो भवति निश्चयः ॥१॥
उपवेशे तथा जातो यशवान् दाम्भिकः सदा।
नित्यप्रवासी रोगी च जायते नीचसंस्थिते ॥२॥
नेत्रपाणौ भृगोर्दुःखी रोगशोकसमन्वितः।
धनहीनो महारोगी मानवः स्यान्न संशयः ॥३॥
भृगोः प्रकाशने जातो विद्याधनसमन्वितः।
दाता च धार्मिकश्चैव कीर्त्तिमान् जायते नरः ॥४॥
शुक्रस्य गमने जातः पादस्थले व्रणान्वितः।
नित्योत्साही महाश्लिष्टो भवेत्तीर्थगतौ
रतः ॥ ५ ॥

भावः

गमनेच्छौ यदा जातो भ्राडनाशो भवेद्ध्रुवम्
माता च म्रियते तस्य शैशवे व्याधिसंयुतः ॥६॥
सभायाञ्च भृगोर्जातो राजपात्रो महाधनी।
कुलशीली महादक्षः केवलं शूलरोगवान् ॥७॥
भृगोरागमने जातो दुःखितो बहुलम्पटः।
दद्रुरोगी पुत्रशोकी जायते च नराधमः ॥८॥
शुक्रस्य भोजने जातो बलवान् दाम्भिकः सदा।
महाधनी भवेन्नित्यं वाणिज्येन विशेषतः ॥९॥
यो जातो वृत्यलिप्सायां स वाग्मी जायते ध्रुवम्।
पाण्डित्यं कविता चैव वर्द्धते च दिने दिने ॥
यदि चैव भवेन्नीचे मूर्खो भवति निश्चितम्।
तुङ्गस्थाने विशेषेण राजपात्रो महाधनी ॥
कासुको बहुकान्तश्च परयोषित्प्रियः सदा।
श्यामवर्णस्तथा मानी याज्ञिको बहुभा-
षकः ॥१०॥
शुक्रस्य कौतुके जातो धनवान् सात्त्विकः सदा।
महाक्षुद्रो महाबन्धुः कौतुकी च भवेत् सदा ॥
बहुपुत्रकलत्रश्च नानासुखसमन्वितः।
नीचे तद्विपरीतः स्यात् दुःखशोकसम-
न्वितः ॥ ११ ॥
निद्रायाञ्च भृगोर्जातो भवेद्रोगी च निश्चितम्।
नित्यक्लेशी महादुःखी जायते नात्र संशयः ॥
जायायाञ्च सुतस्थाने यदि निद्रा भृगोर्भवेत्।
तदा सर्व्वविनाशः स्याद्विघ्नैः परिकी-
र्त्तितः ॥१२॥"

इति शुक्रस्य ॥ * ॥

"शयने च शनेर्जातो लम्पटो बहुभाषकः।
गुह्यस्थाने भवेद्रोगी कोषवृद्धिश्च जायते ॥
तस्मात् सप्तमके चैव शयनस्थः शनैश्चरः।
तदा नित्यप्रवासी स्याच्छुचयी भवेच्च सः ॥१॥
उपवेशे यदा जातः क्षीणदेही दृढसंयुतः।
धनहीनो भवेत्तस्य पीड़ा भवति नित्यशः ॥२॥
नेत्रपाणौ यदा जातो मूर्खो भवति पण्डितः।
धनवान् धार्मिकश्चैव द्विभार्य्यो बहुभाषकः ॥३॥
प्रकाशने च यो जातो राजपात्रो भवेच्च सः।
नानागुणेन गुणवान् धार्मिकः पण्डितः शुचिः॥"

मतान्तरे।

छायास्थाने च तस्मे च प्रकाशने यदा शनिः।
तदा सर्व्वविनाशः स्याज्ज्ञातिध्वंसो भवेद्
ध्रुवम् ॥ ४ ॥
गमने च यदा जातः पादस्थले व्रणान्वितः।
तीर्थे च रतिमाप्नित्यं पुत्रदारैर्विवर्ज्जितः ॥५॥
यो जातो गमनेच्छायां क्षीणदेही रोगसंयुतः।
दन्तरोगी महाक्रोधी क्षपणः परनिन्दकः ॥६॥
सभायाञ्च शनेर्जातः पुत्रदारधनैर्युतः।
सर्व्वत्र लभते वित्तं नानारत्नसमन्वितम् ॥७॥
छागमने यदा जातो महाक्रोधी व्रणान्वितः।
सर्पादिभिश्च संदष्टो भ्राडनाशो भवेद्ध्रुवम् ॥८॥
भोजने चैव यो जातो मन्दाग्निश्च महागदः।
अर्शोरोगी तथा मूर्खो नेत्ररोगी भवेच्च सः ॥९॥
यो जातो वृत्यलिप्सायां गर्व्वितो बहुभाषकः।
जीवनो दुःखितश्चैव प्रवासी परसेवकः ॥१०॥

भावः

कौतुके च शनेर्जातो राजपुत्रो महाशयः।
दाता भोक्ता महादक्षो धार्मिकः पण्डितः
शुचिः ॥ ११ ॥
निद्रायाञ्च शनेर्जातो धनवान् पण्डितः शुचिः।
नेत्ररोगी पित्तशूली द्विभार्य्यो बहुपुत्रकः ॥
विशेषतश्च धर्म्मस्थे कर्म्मस्थे च कदाचन।
यदि देवाद्भवेन्निद्रा नाशो भवति निश्चितम्।
कर्म्मनाशो धर्म्मनाशः क्षुधार्त्तो दुःखितः सदा।
नित्यप्रवासी रोगी च कार्य्यनाशः पदे पदे।
खमित्रगेहे यष्ठे वा केन्द्रे वा स्वगृहे पुनः।
तदा सर्व्वं विचार्य्यैव वैपरीत्येन चिन्तनम्।
जायायाञ्च सुतस्थाने यदि निद्रा भवेत् पुनः।
तदा सर्व्वं शुभं विद्याद्विघ्नुना परि-
कीर्त्तितम् ॥ १२ ॥
इति शनेः ॥ ॥

शयने च यदा राहोर्जन्म यस्य भवेत् पुनः।
तस्य क्षीणो महादुःखं जायते च न संशयः ॥१॥
उपवेशे च यो जातः क्षीणदेही रोगसंयुतः।
बहुहानिर्नरेन्द्रस्य पीड़ा भवति नित्यशः ॥२॥
नेत्रपाणौ यदा जातश्चरोगी भवेद्ध्रुवम्।
सर्पाघाती महाभीतिर्द्विभार्य्यो बहुभाषकः ॥३॥
प्रकाशने च यो जातो धनवान् धार्मिकः पुनः।
नित्यप्रवासी चोत्साही सात्त्विको धार्मिकः
शुचिः ॥ ४ ॥
गमने चैव यो जातो नानारोगैर्धनक्षयः।
दन्ताघाती महाक्रोधी पिशुनः परनिन्दकः ॥५॥
यो जातो गमनेच्छायां बहुपुत्रो महाधनः।
पण्डितो गुणवान् दाता जायते च नरोत्तमः ॥६॥
सभायाञ्च यदा जातः क्षपणो धनसंयुतः।
नानागुणेन गुणवान् धार्मिकः पण्डितः
शुचिः ॥ ७ ॥
आगमने च यो जातो लम्पटो बहुभाषकः।
सुहृद्बन्धुविनाशः स्यान्नानारोगैश्च जायते ॥८॥
भोजने च महादुष्टो मन्दाग्निश्च व्रणान्वितः।
क्षपणः कलहाढ्यश्च दुःखितो नित्यसेवकः ॥९॥
यो जातो वृत्यलिप्सायां खञ्जो भवति नाम्नया।
पुत्रनाशो भवेत्तस्य जायानाशो भवेद्ध्रुवम् ॥१०॥
कौतुके च यदा जातो गुणैः सर्व्वैः समन्वितः।
नानाधनेन धनवान् राजसेवासु तत्परः ॥
यदि देवाद्भवेत्तुङ्गे स्वगृहे वा कदाचन।
तदा सर्व्वं वैपरीत्यं जायते च न संशयः ॥११॥
यो जातो राहुनिद्रायां दुःखितः सर्व्वतस्तथा।
नानास्थाने गतो वापि धनपुत्रविवर्ज्जितः ॥
जायायाञ्च सुतस्थाने यदि निद्रां विधुन्तुदः।
तदा सर्व्वं वैपरीत्यं व्रतक्षायासमन्वितः ॥१२॥
नानाशास्त्रं समालोक्य क्रियते ग्रन्थसंग्रहः।
फलाबलविचारेण युक्त्या सञ्चिन्तयेद्बुधः ॥"

इति महर्षि शयनादिद्वादशभावविवेकः समाप्तः ॥ इति जातरत्नः कोष्ठीप्रदीपश्च ॥

अथ तत्त्वादिद्वादशभावाः।

ते च नराणां जन्मसमयधिकृद्वादशलग्नादि।

यथा,—

भावः

"सामर्थ्यं तनु कल्प्यते वसुदये वित्तं कुटुम्बं ततो
विक्रान्तिं सहजं तृतीयभवने योधश्च सच्चि-
न्तयेत् ।
बन्धुं वाह्यसुखालयानपि ततो धीमन्नपुत्रांस्तत:
षष्ठेऽथ क्षतविद्विषौ मदगृहे कामं स्त्रियं वर्त्म च॥
रन्ध्रायुर्व्ययतोऽस्मे गुरुतपो भाग्यानि चित्तन्ततो
मानाज्ञास्वदकर्मणां दशमभे कुर्यात्ततश्चिन्त-
नम् ।
प्राप्त्याद्यावथ चिन्तयेद्व्ययगृहे ऋक्षे तु मन्त्रि-
व्ययौ
सौम्यस्वामियुतीक्षणैरुपचयस्तेषां क्षतिस्त्वन्यथा॥
इति द्वादशभावविवेकः ॥
व्ययारिलग्नयोः षष्ठे चाष्टमे मृत्युरन्ध्रयोः ।
व्ययस्य द्वादशस्थाने वैपरीत्येन चिन्तनम् ॥"
व्ययाद्यादिभावापवादः ॥
अथ तन्द्वादिद्वादशभावस्वग्रहफलम् ।
"लग्ने सूर्येऽस्थिरोगी शशिनि बलयुतो रूप-
वान् वित्तयुक्तो
भौमे यङ्गः सुवाग्मी बुधधरतनये सर्व-
शास्त्रार्थवेत्ता ।
जीवे दाता पवित्रः सुकविरथ गते भार्गवे
मल्लखेलः
शौरौ कण्डूतिगात्रस्तमसि च नियतं वञ्चितो
धर्महीनः ॥ १ ॥
वित्तेऽर्के चैव रोगी सततगदयुतो राचिनार्धे
धनाढ्यो
भौमे नित्यं प्रवासी क्षपितसुतधनवान् सोमपुत्रे
प्रधानः ।
जीवे लक्ष्मीप्रमोदी विलसति भृगुजे दर्पितः
स्त्रीनिकेतः
सौरौ हीनोऽति नित्यं तमसि च नियतं चौरि-
काविद्यजीवी ॥ २ ॥
भ्रातर्यर्के सधर्मः स भवति नियतं भाटहा
रात्रिनार्धे
हिंसो भौमेऽनुजानां सपदि वधकरो भूमिका-
वृत्तिजीवी ।
सौम्ये बन्धस्य हन्ता भवति सुरगुरौ कामदेव-
स्वरूपः
शुक्रे राज्याधिकारी रविजदनुजयोर्भाटहन्ता
धनाढ्यः ॥ ३ ॥
अर्के बन्धौ सुदुःखी स्वजनपरिवृतः प्रीतगौ
जानुरोगी
भौमे कृष्णामवासी भवति शशिसुते भाटपुत्रा-
न्वितोऽपि ।
जीवे रत्नोपभोगी त्रिदशरिपुगुरौ सर्वसौख्या-
धिकारी
सौरौ गेहे निवासी भवति शशिरिपौ मन्द-
कर्मा कुचेलः ॥ ४ ॥
पुत्रस्थेऽर्के नरोऽसौ प्रथमसुतहतः सिंहराशौ
सुपुत्रः
सोमे सर्वाधिकारी भवति धरणिजे पुत्रशोका-
कुलोऽसौ ।
सौम्ये सुस्थः सुदेहः प्रचुरधनयुतो देवपूज्ये
सुपुत्रः
कन्यायुक्तो हि शुक्रे रविजदनुजयोः पुत्रपौत्रै-
र्विहीनः ॥ ५ ॥
षष्ठेऽर्के शत्रुहन्ता रिपुगणरहितः क्षीणचन्द्रे
गतायुः
पूर्णे शत्रुश्च हन्याद्भवति धरणिजे हीनदेहो-
ऽतिदीनः ।
सौम्ये भाग्यार्थयुक्तस्त्रिदशपतिगुरौ राज्य-
सौख्योपभोगी
दैत्याचार्येऽतिरोगी रविजदनुजयोः पापयुङ्-
नित्यदुःखी ॥ ६ ॥
सप्तमार्के च जायापतिरतिविमुखो प्रीतरश्मौ
सुपुत्रः
सुस्थो भूयान्नरोऽसौ भवति धरणिजे हीन-
भार्यश्च नूनम् ।
सौम्ये सुस्थः सुदेहस्त्रिदशपतिगुरौ भाग्यवेत्ता
शतायुः ।
शुक्रे पुत्रप्रमोदी रविजदनुजयोर्हीनभार्यश्च
नूनम् ॥ ७ ॥
मृत्यौ चार्के सदृत्युर्भवति च नियतं प्रीतरश्मौ
गतायु-
र्भूमेः पुत्रे सुरोगी शशिधरतनये मूलरोगी
विकर्मा ।
जीवे तीर्थे च मृत्युर्भवति भृगुसुते धार्मिक-
स्तीर्थगोऽसौ
सौरौ शूली गतायुर्भवति विधुरिपौ वेदसुक्तो
गतायुः ॥८॥
धर्मे चार्के नरोऽसौ विविधधनयुतः प्रीतगौ
पुण्यकर्मा
लक्ष्मीवान् पुण्यचेता भवति धरणिजे देव-
विप्रापहारी ।
सौम्ये धर्मज्ञः सुशीलस्त्रिदशपतिगुरौ राज-
तुल्यः सुकर्मा
शुक्रे तीर्थानुरागी रविजदनुजयोः पापशीलः
सुदुःखी ॥९॥
कर्मण्यर्के प्रतापी प्रचुरधनयुतः द्वीपदी
क्रोधदृष्टिः
सोमे श्वेताम्बितोऽसौ विविधधनयुतो भूमिजे
बन्धुहीनः ।
नित्योत्साही च सौम्ये प्रचुरधनयुतो देव-
पूज्येऽभिमानी
दित्यक्ष्मीशोऽपि शुक्रे नृपतिसमधनः सौरिदैत्ये
सुखी च ॥१०॥
आये चार्के नरोऽसौ पिठधनसहितः प्रीतगौ
चारुशीलो
भौमे नित्यं च रोगी शशिधरतनये सर्वदा
क्रोधयुक्तः ।
जीवे श्रीमान् प्रदाता करितुरगपतिर्भार्गवे
शास्त्रविज्ञः
क्षयी रत्नादियुक्तो रविजदनुजयोः क्रूरकर्मा
कुचैलः ॥११॥

भावः

व्यर्के संस्थे व्ययेऽसौ पुरधनरहितः सर्वरोगी
सुदुःखी
सोमे खेदान्वितोऽसौ भवति धरणिजे द्यूतरक्तो
विबुद्धिः ।
सौम्ये धर्मार्थकारी दिनकररहिते देवपूज्ये-
ऽभिमानी
शुक्रे शास्त्रानुरागी रविजदनुजयोः क्रूरकर्मा
कुचेलः ॥१२॥
इति ज्योतिस्तत्त्वम् ॥*॥
स्त्रीणां यौवनकाले स्वभावजाश्चाविंशत्यलङ्कारा-
न्तर्गताङ्गजप्रथमालङ्कारः । यथा,—
"यौवने सत्त्वजाश्चासामष्टाविंशतिसंख्यकाः ।
अलङ्कारास्तु भावहावहेलाश्चोङ्गजाः ॥"
तत्र भावः ।
"निर्विकारात्मके चित्ते भावः प्रथमविक्रिया ॥"
जन्मतः प्रभृति निर्विकारे मनसि उद्बुद्धमात्रो
विकारो भावः । यथा,—
"स एव सुरभिः कालः स एव मलयानिलः ।
सैवेयमबला किन्तु मनोऽन्यदिव दृश्यते ॥"
इति साहित्यदर्पणे तृतीयपरिच्छेदः ॥*॥
भावस्य लक्षणान्तरं यथा,—
"शरीरेन्द्रियवर्गस्य विकाराणां विधायकाः ।
भावा विभावजनिताश्चित्तवृत्तय ईरिताः ॥
पुराणे नाट्यशास्त्रे च द्वयोस्तु रतिभावयोः ।
समानार्थतया चात्र द्वयमेवैक्येन लक्ष्यते ॥"*॥
पूर्व्वोक्तमानसविकाररूपभावस्य विवरणं यथा,
रजःसत्त्वतमोमयचित्तविकारो भावः । चित्त-
वृत्तिविशेषो भाव इत्यन्ये । अतएव मनो-
विकारो रत्यादिर्भाव उक्तः । भावयति जनयति
रसान् भावः घञ् । तथा च भरतः ।
"नानाभिनयसम्बन्धान् भावयन्ति रसानिमान् ।
यस्मात्तस्मादमी भावा विज्ञेया नाटकोक्तिषु ॥"
भावाश्च त्रिविधाः स्थायिनो व्यभिचारिणः
सात्त्विकाश्च । तत्र स्थायिनो यथा,—
"रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयन्तथा ।
जुगुप्सा विस्मयश्चेति स्थायिभावाः प्रकीर्त्तिताः ॥
व्यभिचारिणो यथा,—
"निर्व्वेदग्लानिशङ्काख्यास्त्रयस्त्रिंशदमी क्रमाः ।
आलस्यञ्चैव दैन्यञ्च चिन्ता मोहो धृतिः स्मृतिः॥
व्रीड़ा चपलता हर्ष आवेगो जड़ता तथा ।
गर्व्वो विषाद औत्सुक्यं निद्रापस्मार एव च ॥
सुप्तो विबोधोऽमर्षश्चाप्यवहित्थमथोग्रता ।
मतिर्व्याधिस्तथोन्मादस्तथा मरणमेव च ॥
त्रासश्चैव वितर्कश्च विज्ञेया व्यभिचारिणः ।
त्रयस्त्रिंशदमी भावाः प्रयान्ति रसतां स्थितम् ॥"
सात्त्विका यथा,—
"स्वेदः स्तम्भोऽथ रोमाञ्चः स्वरभङ्गोऽथ वेपथुः ।
वैवर्ण्यमश्रु प्रलय इत्यष्टौ सात्त्विका मता इति॥
रत्यादयः स्थायिनोऽष्टौ निर्व्वेदाद्या व्यभि-
चारिणस्त्रयस्त्रिंशत् स्वेदादयः सात्त्विका अष्टौ
चेति ऊनपञ्चाशद्भावाः पञ्चाशद्भावा इत्यन्ये ।
इत्यमरटीकायां भरतः ॥

(प्रधानयभिचारिप्रभृतयो भावशब्देनोच्यन्ते । यदुक्तं साहित्यदर्पणे तृतीयपरिच्छेदे ।
"सञ्चारिणः प्रधानानि देवादिविषया रतिः । उद्बुद्धमात्रः स्थायी च भाव इत्यभिधीयते ॥")
भगवद्भावो यथा,—
"शुद्धसत्त्वविशेषात्मा प्रेमसूर्य्यांशुसाम्यभाक् । रुचिभिश्चित्तमासृण्यकृदसौ भाव उच्यते ॥"
इति भक्तिरसामृतसिन्धुः ॥*॥

भावकः, पुं, (भाव एव स्वार्थे कन् ।) भावः । मानसो विकारः । इति हलायुधः ॥ (भवतीति । भू + कर्त्तरि ण्वुल् ।) सत्ताश्रये, त्रि । इति संक्षिप्तसारः ॥

भावतः, त्रि, (भवत अयमिति । भवत् + अण् ।) भवदीयः । युष्मदन्तभवच्छब्दाट्टक्प्रत्ययनिष्पन्नः । इति सिद्धान्तकौमुदी ॥

भावत्कः, त्रि, (भवतामयमिति । भवत् + "भवत छक्छसौ ।" ४ । २ । ११५ । इति छक् ।) भवदीयः । भवच्छब्दात् टक्प्रत्ययनिष्पन्नः । इति सिद्धान्तकौमुदी ॥ यथा भट्टिकाव्यसर्गे ।
"भावत्कं दृष्टवत्स्वेतदस्मासन्धि सुजीवितम् ॥"

भावनं क्ली, (भू + णिच् + ल्युट् ।) भवम् । इति राजनिर्घण्टः ॥ चालना इति भाषा ॥ (भावे ल्युट् ।) भावना । इति मेदिनी । ने, १०१ ॥ (यथा, साहित्यदर्पणे ३ परिच्छेदे ।
"सुखदुःखादिभिर्भावैर्भावस्तद्भावभावनम् ॥"
भावयतीति । भू + णिच् + ल्युः । उत्पादके, त्रि । यथा, महाभारते । १ । २२४ । ४५ ।
"दृष्ट्वैव च स राजानं शुक्रो लोकभावनः । उवाच परमप्रीतः श्वेतकिं नृपसत्तमम् ॥")

भावना, स्त्री, क्ली, (भू + णिच् + युच् ।) ध्यानम् । यथा, गीतायाम् । २ । ६६ ।
"नास्ति बुद्धिरयुक्तस्य न चायुक्तस्य भावना । न चाभावयतः शान्तिरशान्तस्य कुतः सुखम् ॥")
पर्य्यालोचनम् । अधिवासनम् । इति मेदिनी । ने, १०१ ॥ त्रिविधा भावना यथा,—
"त्रिविधा भावना विप्र ! विश्वमेतन्निबोध मे । ब्रह्मारूपा कर्म्मसंज्ञा च तथा चैवोभयात्मिका ॥ ब्रह्मभावात्मिका ह्येका कर्म्मभावात्मिकापरा । उभयात्मिका तयोरन्या त्रिविधा भावभावना ॥ सनन्दनादयो ब्रह्मभावभावनया युताः । कर्म्मभावनया चान्ये देवाद्याः स्थावरान्ताः ॥ हिरण्यगर्भादिषु च ब्रह्मकर्म्मात्मिका द्विधा । बोधाधिकारयुक्तेषु विद्यते भावभावना ॥"
इति विष्णुपुराणे ६ अंशे ७ अध्यायः ॥
त्रिविधभावनाश्रयजीवात्मकत्वात्तदुपचारेण त्रिविधा भावनेत्युच्यते । एतद्धि हरेः स्थूलं रूपम् । अतः परस्परूपप्राप्त्युपायत्वात् तत्र प्रथमं मनः सन्धार्य्यमिति भावः । भावना नाम ज्ञानविशेषजा वासना । तां त्रिविधामपि संज्ञामात्रेणाह ब्रह्मारूपेति । तामेव विषयभेदेनैवेनक्ति ब्रह्मभावनात्मिकेति । भावभावना भावो वस्तु तद्विषया भावना त्रिविधा । तत्र वयं ब्रह्मैव भावयामः । वयं कर्म्मैव कुर्म्मः । वयन्तूभयमिदमनुसन्दध्म इत्येवं त्रिविधा भावना । भावनायुक्तान् जीवानुदाहरति सनन्दनादय इति द्वाभ्याम् । इति तट्टीका ॥

भावबोधकः, पुं, (भावस्य रत्यादेर्बोधकः अनुभावकः ।)अनुभावः। इत्यमरः।२।७।२१॥ भावस्य रत्यादेर्बोधकः सूचको गुणक्रियादिरनुभावः । अनुभाव्यते प्रतीतियोग्यतां नीयते रत्यादिरनेनेति अनुभावः घञ् । तत्र रतेरनुभावाः लोचनचातुर्य्यभ्रूक्षेपादयः । हासस्य च कपोलाकुञ्चनानासोन्मुञ्जनादयोऽनुभावा एवं अन्यत्रानुमन्तव्यम् । किंवा भावाननुभावयन्तीति अनु अनुभावो सुखरागादिः । इति तट्टीकायां भरतः ॥

भावभृत्तः, पुं, (भावः सत्ता भृत्तः प्रवृत्तोऽस्मादिति । यद्वा, भावः सृष्टिः तत्र भृत्तः प्रवृत्तः ।) ब्रह्मा । इति सन्ध्याख्यायां स्मृतिः ॥

भावाटः, पुं, (भावं भावेन वाटतीति । अट् + अण् अच् वा ।) भावकः । साधुः । निवेशः । कामुकः । नटः । इति मेदिनी । टे, ५२ ॥

भावानुगा, स्त्री, (भावं मूलपदार्थमनुगच्छतीति । अनु + गम् + डः । टाप् ।) छाया । इति राजनिर्घण्टः ॥ (भक्त्यादिना अनुगते, त्रि ॥)

भावालीना, स्त्री, (भावेषु मूलपदार्थेषु आलीना ।) छाया । इति राजनिर्घण्टः ॥

भावितः, त्रि, (भाव्यते स्मेति । भू + णिच् + क्तः ।) वासितः । प्राप्तः । इति मेदिनी । ते, १४० ॥ विशोधितः । (यथा, महाभारते ।१३।१६।३८।
"ये चैनं प्रतिपद्यन्ते भक्तियोगेन भाविताः । तेषामेवात्मनात्मानं दर्शयत्येष कृच्छ्रतः ॥")
चिन्तितः । मिश्रितः । भू क सुहृच्चिन्तयोर्मिश्रणे च इत्यस्मात् क्तान्तात् स्वार्थे कप्रत्ययनिष्पन्नोऽयम् ॥ (समर्पितः । यथा, महाभारते । १ । ५ । ३० ।
"एतत् संसूचितं ब्रह्मंस्तापत्रयचिकित्सितम् । यदीश्वरे भगवति ! कर्म्म ब्रह्मणि भावितम् ॥"
"भगवति भावितं समर्पितम् ।" इति तट्टीकायां श्रीधरस्वामी ॥ सिक्तः । यथा, सुश्रुते चिकित्सितस्थाने । १ अध्याये ।
"भल्लातकान् वासयेत्तु जारे प्राक्शुद्ध-भाजिनम् ॥")

भावित्रं, क्ली, (भवतीति । भू + "भूवादिगृधिभ्यो णित्रन् ।" उणा० ४ । १७० । इति णित्रन् ।) चैलोत्तरीयम् । स्वर्गमर्त्यपातालम् । इत्युणादिकोषः ॥

भाविनी, स्त्री, स्त्रीविशेषः । इत्यमरः ॥ भावः प्रङ्गारचेष्टाविशेषो विद्यतेऽस्याः भाविनी । इति तट्टीकायां भरतः ॥ (यथा, हरिवंशे ।११७।३६।
"सा हि तस्याभवत्प्रेष्ठा पत्नी ह्यस्य भाविनी । पतिव्रता गुणोपेता रूपशीलगुणान्विता ॥")
स्त्रीमात्रम् । इति राजनिर्घण्टः ॥ (स्कन्दस्य मातृगणानामन्यतमा । यथा, महाभारते । ९ । ४६ । ११ ।
"श्रुतघण्टा प्रतानन्दा भगनन्दा च भाविनी । वपुष्मती चन्द्रकीर्त्ता भद्रकाली च भारत ! ।")
वर्त्तमानप्रागभावप्रतियोगिनी च ॥

भावी, [न्] त्रि, (भविष्यतीति । भू + "भुवश्च ।" उणा० ४ । ८ । इति इनिः । स च दृष्टभवति ।) भविष्यत्कालादिः । वर्त्तमानप्रागभावप्रतियोग्युत्पत्तिकः । यथा,—
"वीरप्रतिपदा नाम तव भावी महोत्सवः ॥"
इति कार्त्तिकशुक्लप्रतिपदमधिकृत्य बलिं प्रति भगवद्वाक्यम् । इति तिथ्यादितत्त्वम् ॥

भावुकं, क्ली, (भवतीति । भू + "लषपतपदस्थाभूवृषेति ।"३।२। १५४ । इति उकञ् ।)मङ्गलम् । (यथा, प्रद्युम्नविजये १ अङ्के ।
"शुक्र ! सर्व्वत्र कुशलमस्माकम् । अपि भावुकं वः सुराणाम् ॥")
तद्वति, त्रि । इत्यमरः । १ । ४ । २६ ॥

भावुकः, पुं, (भू + उकञ् ।) नाट्योक्तौ अभिनीपतिः । इति हेमचन्द्रः ॥

भावुकः, त्रि, भवनाश्रयः । भवति यः । इति कर्त्तरि भूधातोर्ण्वुकप्रत्ययेन निष्पन्नः । रसविशेषभावनाच्चतुरः । इति श्रीधरस्वामी ॥ यथा,—
"निगमकल्पतरोर्गलितं फलं शुकमुखादमृतद्रवसंयुतम् । पिबत भागवतं रसमालयं महुरहो रसिका भुवि भावुकाः ॥"
इति श्रीभागवते । १ । १ । ३ ॥
लग्नपलितप्रियान्यस्थूलसुभगाढ्यशब्दोपपदभूधातोरभूततद्भावार्थे कर्त्तरि वार्थे ण्वुकण्प्रत्ययेन लग्नभावुक इत्यादयश्च निष्पन्नाः ॥

भाव्यं, क्ली, अवश्यभवितव्यम् । इति भूधातोरवश्यम्भावार्थे भावे ण्यत्प्रत्ययेन निष्पन्नम् । यथा । विप्रेण शुचिना भाव्यम् । इति सुबोधशाकरणम् ॥ प्रयोगदर्शनात् कर्त्तरि च तत्र त्रि । यथा —
"श्रुतस्य करणं नास्ति दैवाधिष्ठितकर्म्मणः । भावीत्वावश्यं यद्वाक्यं तच्च ब्रह्माप्यबाधकः ॥"
इति कालिकापुराणे ३८ अध्यायः ॥

भाष, ङ वाक्ये । इति कविकल्पद्रुमः ॥ (भ्वा० आत्म०-सक० सेट् ।) ऽ,भाषते । अक्, अवीभषत् अवभाषत् । इति तट्टीकायां दुर्गादासः ॥

भाषणं, क्ली, (भाष् + भावे ल्युट् ।) कथनम् । यथा । "संलापो भाषणं मिथः ।" इत्यमरः ॥ (यथा, सङ्गीतदर्पणसंग्रहे । आर्द्रनदर्शने ।
"हास्यशोकभयक्रोधप्रत्याख्यानेर्ष्यसम्भ्रमैः । आलोक्य भाषणेनापि भाषयेत् मूर्च्छितं जनम् ॥")

भाषा, स्त्री, (भाष्यते प्राक्षव्यवहारादिना प्रयुज्यते इति । भाष् + "गुरोश्च हलः ।" ३ । ३ । १०२ । इत्यप्रत्ययः । टाप् ।) रागिणीविशेषः । इति हलायुधः ॥ वाक्यम् । वाग्देवता । पर्य्यायः । ब्राह्मी २ भारती ३ गीः ४ वाक् ५ वाणी ६ सरस्वती ७ धाधारः ८ उक्तिः ९ लपितम् १० भाषितम् ११ वचनम् १२ वचः

१३। इत्यमरः।२।६।१॥ त्रयोदशवचने। पूर्वसप्तकं वागधिकृतायां देवतायाञ्च। इति तट्टीकायां भरतः॥ ग्राम्यीयाष्टादशभाषा यथा। संस्कृतम् १ प्राकृता २ उदीची ३ महाराष्ट्री ४ मागधी ५ मिथार्द्धमागधी ६ शकाभीरी ७ अवन्ती ८ द्राविड़ी ९ ओड्रीया १० पाञ्चाल्या ११ प्राच्या १२ वाह्लीका १३ रन्तिका १४ दाक्षिणात्या १५ पैशाची १६ चावन्ती १७ शौरसेनी १८। एतासां लक्षणोदाहरणानि प्राकृतलक्षेश्वर-याकरणे द्रष्टव्यानि॥

अथ भाषाविभागः।

"पुरुषाणामनीचानां संस्कृतं स्यात् कृतात्मनाम्।
शौरसेनी प्रयोक्तव्या तादृशीनाञ्च योषिताम्॥
आसामेव तु गाथासु महाराष्ट्रीं प्रयोजयेत्।
अत्रोक्ता मागधी भाषा राजान्तःपुरचारि-णाम्॥
चेटानां राजपुत्राणां श्रेष्ठिनाञ्चार्द्धमागधी।
प्राच्या विदूषकादीनां धूर्त्तानां स्यादवन्तिका॥
योधनागरिकादीनां दाक्षिणात्या हि दीव्यताम्।
शकाराणां शकादीनां शाकारीं संप्रयोजयेत्॥
वाह्लीकभाषा दियानां द्राविड़ी द्रविड़ादिषु।
आभीरेषु तथाभीरी चाण्डाली पुक्कसादिषु॥
आभीरी शाबरी चापि काष्ठपत्रोपजीविषु।
तथैवाङ्गारकारादौ पैशाची स्यात् पिशाच-वाक्।
चेटीनामप्यनीचानामपि स्यात् शौरसेनिका॥
बालानां षण्ढकानाञ्च नीचसङ्घविचारिणाम्।
उन्मत्तानामातुराणां सैव स्यात् संस्कृतं क्वचित्॥
ऐश्वर्य्येण प्रमत्तस्य दारिद्र्योपस्कृतस्य च।
भिक्षुवल्कधरादीनां प्राकृतं संप्रयोजयेत्॥
संस्कृतं संप्रयोक्तव्यं लिङ्गिनीयुक्तमासु च।
दैवीमभिसृतावेश्यास्वपि केचित्तथोदितम्॥
यद्देशो नीचपात्रन्तु तद्देशे तस्य भाषितम्।
कार्य्यतश्चोत्तमादीनां कार्य्यो भाषाविपर्य्ययः॥
योषित्सखीबालवेश्याकितवाक्षरसां तथा।
वैदग्ध्यार्थं प्रदातव्यं संस्कृतञ्चान्तरान्तरा॥
एषामुदाहरणान्याकारेषु द्रष्टव्यानि। भाषा-लक्षणानि भाषार्णवे। इति साहित्यदर्पणे ६ परिच्छेदः॥

अथ भाषापादः।

तत्र भाषास्वरूपमाहतुः कात्यायनदक्षसुतौ।
"प्रतिज्ञादोषनिर्मुक्तं साध्यं सत्कारणान्वितम्।
निश्चितं लोकसिद्धञ्च पक्षं पक्षविदो विदुः॥
स्वल्पाक्षरः प्रभूतार्थो निःसन्दिग्धो निराकुलः।
विरोधिकारणैर्मुक्तो विरोधिप्रतिरोधकः॥
यदा त्वेवंविधः पक्षः कथितः पूर्ववादिना।
दद्यात्तत्पक्षसम्बद्धं प्रतिवादी ततोत्तरम्॥
प्रतिज्ञा साध्याभिधायिका वाक्। तस्या दोषैः परस्परविरुद्धार्थपदादिभिरुक्तं साध्यं साधनार्हमभिमतं पक्षं विदुः। अन्यथा प्रतिज्ञादोषैरप्य साध्यदोषः स्यात्। अतएवोक्तम्।
"वचनस्य प्रतिज्ञात्वं तदर्थस्य च पक्षता
असङ्करेण वक्तव्ये अवहारेषु वादिभिः॥"
वक्तव्ये पक्षप्रतिज्ञे पूर्व्वोक्ते। नारदेनापि।
"सारस्तु अवहाराणां प्रतिज्ञा सप्रदाहृता।
तद्हानौ हीयते वादी तरंस्तासुत्तरो भवेत्॥"
उत्तरो विजयी। यद्यप्यत्रत्र साध्यं सद्-विशिष्टधर्म्मोधर्म्मी पक्ष इति भेदः तथाप्यत्र वाक्प्रत्यायकधर्म्मादिधर्म्मविशेषविशिष्टतया धर्म्मि-णोऽधर्मणपदेरेव साध्यत्वात् साध्यपक्षयोरभेदा-भिधानम्। उपसंहारे च एवंविधः पक्ष इति। मिताक्षरायान्तु। भाषा प्रतिज्ञा पक्ष इति नार्थान्तरमित्युक्तम्। भाषार्थसूक्ता भाषास्वरूप-प्रपञ्चमाह। स्वल्पाक्षर इति। निराकुलः पौर्व्वापर्य्यविपर्य्यासादिशून्यः। तत्र।
"द्यूते च अवहारे च प्रवृत्ते यत्कर्म्मणि।
यानि पश्यन्त्युदासीनाः कर्त्ता तानि न पश्यति॥"
इति गृह्यसंग्रहवचनादुदासीनेभ्यो ज्ञात्वा शोधयेत्॥ *॥ तच्छोधनमाह दक्षसुतः।
"न्यूनाधिकं पूर्व्वपक्षं तावदादौ विशोधयेत्।
न ह्यादुत्तरं यावत् प्रत्यर्थी सभ्यसन्निधौ॥"
तल्लिखनप्रकारमाह व्यासः।
"पाण्डुलेखेन फलके भूमौ वा प्रथमं लिखेत्।
न्यूनाधिकन्तु संशोध्य पश्चात् पत्रे निवेशयेत्"
फलकं काष्ठादिपट्टकम्। कात्यायनः।
"पूर्व्वपक्षं स्वभावोक्तं प्राड्विवाकोऽथ लेखयेत्।
पाण्डुलेखेन फलके ततः पत्रेऽभिलेखयेत्॥
शोधयेत् पूर्व्वपक्षन्तु यावन्नोत्तरदर्शनम्।
उत्तरेणावरुद्धस्य निवृत्तं शोधनं भवेत्॥
अन्यदुक्तं लिखेद्योऽन्यदर्थिप्रत्यर्थिनां वचः।
चौरवच्छासनेत्तन्तु धार्म्मिकः पृथिवीपतिः॥"
स्वभावोक्तमकृत्रिमम्। एतच्च स्वरविशेषादिना सुज्ञेयम्। अतएव याज्ञवल्क्यः।
"छलं निरस्य भूतेन व्यवहारान्नयेन्नृपः।
भूतमप्युपन्यस्तं छीयते व्यवहारतः॥"
भूतं तत्त्वार्थसम्बन्धम्। नारदः।
"भूतं तत्त्वार्थसम्बन्धं प्रमादाभिहितं छलम्।
किन्तु राज्ञा विशेषेण स्वधर्म्ममभिरक्षता॥
मनुष्यचित्तवैचित्र्यात् परीक्षा साध्यसाधु वा।
सर्व्वेष्वर्थविवादेषु वाक्छलेनावसीदति॥
पशुस्त्रीभूम्यलादाने शास्त्रोऽप्यर्थान्न हीयते॥"
सर्व्वेष्वर्थविवादेषु प्रमादाभिधानेऽपि नावसी-दति। अत्रोदाहरणं पशुस्त्रीत्यादि। अर्थ-विवादग्रहणान्मनुकृतविवादेषु प्रमादाभिधाने प्रकृतार्थादप्यर्थाद्धीयत इति गम्यते। यथाह-मनेन शिरसि पादेन ताडितः इत्यभिधाय केवलं हस्तेन ताडितः इति वदन्न केवलं दण्ड्यः पराजीयते च। ततश्च त्वं मद्धनरत्नं धारयसि मत्त ऋणत्वेन गृहीतताद्धनकत्वादिति भावा-र्थशरीरम्। एतच्च संस्कृतदेशभाषान्यतरेण यथा-बोधं वक्तव्यं लेख्यं वा। स्त्रीणामपि वादिप्रति-वादितादर्शनात्। अतएवाध्यापनेऽपि तथोक्तं विष्णुधर्म्मोत्तरे।
"संस्कृतैः प्राकृतैर्वाक्यैः शिष्यमनुरूपतः।
देशभाषाद्युपायैश्च बोधयेत् स गुरुः स्मृतः॥
इति व्यवहारतत्त्वम्॥

भाषापरिच्छेदः, पुं, विश्वनाथन्यायपञ्चाननकृत-न्यायपरिभाषाग्रन्थः। अस्य आद्यश्लोकः।
"नूतनजलधररुचये गोपवधूटीदुकूलचौराय।
तस्मै नमः कृष्णाय संसारमहीरुहस्य बीजाय॥"
तस्यायमन्वयश्लोकः।
"सोऽयं क इति बुद्धिस्तु साक्षात्मवलम्बते।
तद्वैधर्म्यमित्यादौ सजातीयेऽपि दर्शनात्॥"
अस्य टीका सिद्धान्तमुक्तावली॥

भाषापादः, पुं, (भाषायाः पादः।) चतुष्पाद्व्य-वहारान्तर्गतप्रथमभागः। तस्य लक्षणं यथा,—
"अर्थवद्धर्म्मसंयुक्तं परिपूर्णमनाकुलम्।
साध्यवद्वाचकपदं प्रकृतार्थानुबन्धि च॥
प्रसिद्धमविरुद्धञ्च निश्चितं साधनक्षमम्।
संक्षिप्तं निखिलार्थञ्च देशकालाविरोधि च॥
वर्षर्त्तुमासपक्षाह्नोवेलादेशप्रदेशवत्।
स्थानावसथसाध्याख्याजात्याकारवयोयुतम्॥
साध्यप्रमाणसंख्यावदात्मप्रत्यर्थिनाम च।
परात्मपूर्व्वजानेकराजनामभिरङ्कितम्॥
क्षमालिङ्गात्मपीड़ावत्कथिताहर्हृदायकम्।
यदावेदयते राज्ञे तद्भाषेत्यभिधीयते॥"
इति मिताक्षरायां व्यवहाराध्यायः॥
अस्य विवरणं भाषाशब्दे द्रष्टव्यम्॥

भाषितं, क्ली, (भाष्यते इति। भाष्+भावे क्तः।) वचनम्। इत्यमरः।१।६।१२॥(यथा, मनौ।८।२३।
"आकारैरिङ्गितैर्गत्या चेष्टया भाषितेन च।
नेत्रवक्त्रविकारैश्च गृह्यतेऽन्तर्गतं मनः॥"
भाष्यते सेति। भाष्+कर्म्मणि क्तः।) कथिते च॥ (यथा, कामन्दकीये नीतिसारे।५।२४।
"प्रविश्य सानुरागस्य चित्तं चित्तज्ञसम्मतः।
समर्थयंश्च तत्पक्षं साधु भावेत भाषितः॥")

भाष्यं, क्ली, (भाष्यते विस्तृततया वर्ण्यते इति। भाष+ण्यत्।) चूर्णिः। इति स्वामी॥ सूत्र-विवरणग्रन्थः। तस्य लक्षणम्।
"सूत्रार्थो वर्ण्यते यत्र पदैः सूत्रानुसारिभिः।
स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः॥"
इति लिङ्गादिसंग्रहटीकायां भरतः॥ सूत्रो-क्तार्थप्रपञ्चकम्। इति हेमचन्द्रः॥ (भाष्यते अर्च्यते। ण्यत्।) गृहविशेषः। इति माध-वीयः मधुरेशः॥ (भाष्+ण्यत्।) कथ-नीये च॥

भाष्यकारः, पुं, (भाष्यं चूर्णिं करोतीति। क+"कर्म्मण्यण्।" ३।२।१। इत्यण्।) महा-भाष्यकर्त्ता मुनिः। तत्पर्य्यायः। गोनर्दीयः २ पतञ्जलिः ३ चूर्णिकृत् ४। इति त्रिकाण्डशेषः॥
"अहञ्च भाष्यकारश्च कुशाग्रीयधियावुभौ।
नेव शब्दाम्बुधेः पारं किमन्ये बहुबुद्धयः॥"
इति दुर्गसिंहः॥

भाव ऋ ट भावि। दीप्तौ। इति कविकल्प-द्रुमः॥ (भ्वा०-आत्म०-अक०-सेट्।) ऋ

भिदकं, क्ली, (भिनत्तीति । भिद्+"वहुलमन्यत्रापि ।" उणा० २।३७। इति कुन् ।) वज्रम् । खड्गे, पुं । इत्युणादिकोषः ॥

भिदा, स्त्री, (भेदनमिति भिद्+"षिद्भिदादिभ्योऽङ् ।" ३।३ ।१०४। इति । अङ् । टाप् ।) वस्त्रादेर्विदारणम् । चेरा इति भाषा । तत्पर्य्यायः । विदरः २ स्फुटनम् ३ । इत्यमरः । ३।१।५॥ धन्याकम् । इति शब्दचन्द्रिका ॥ भेदः । यथा । प्रायश्चित्तस्य पूर्व्वार्द्धार्द्धं वाल्यभिदा तथा । इति प्रायश्चित्ततत्त्वम् ॥

भिदिः, पुं, (भिनत्तीति । भिद्+"कृगृहृपृकुटिभिदिच्छिदिभ्यश्च ।" उणा०४। १४२। इति इः । स च कित् ।) वज्रम् । इति द्विरूपकोषः ॥

भिदिरं, क्ली, (भिनत्ति विदारयतीति । भिद्+"इषिमदिसुदिखिदिच्छिदिभिदिमन्दीति ।" उणा० १ । ५२ । इति किरच् ।) वज्रम् । इत्यमरटीकायां भरतः त्रिकाण्डशेषश्च ॥

भिदुः, पुं, (भिनत्ति विदारयतीति । भिद्+"गृभिदिस्वधिगृधिधृषिक्षिधृक्षिभ्यः ।" उणा० १ । २४ । इति कुः ।) वज्रम् । इति त्रिकाण्डशेषः ॥

भिदुरं, क्ली, (भिनत्तीति । भिद्+"विदिभिदिच्छिदेः कुरच् ।"३। २ ।१६२। इति । कुरच् ।) वज्रम् । इत्यमरः । १ । १ । ५० ॥ अश्वत्थे पुं । इति राजनिर्घण्टः ॥

भिद्यः, पुं, (भिनत्ति कूलमिति । भिद्+"भिदो हृद्यौ नदे ।"३ । १ । ११५ । इति क्यप् । निपातितश्च ।) नदः । इति हेमचन्द्रः ॥ सुखबोधव्याकरणञ्च ॥ (यथा, भट्टौ । ६ । ५६ ।
"समुत्तरन्तावथयौ नदान् भिद्योद्वासन्निभान् ।
सिध्मनारामिव ख्यातां ध्रुवरीमापतुर्वने ॥")

भिन्नः, पुं, क्ली, (भिनत्तीति । भिद् "स्फायितञ्चिवञ्चिवाशिगमिकमियमिरिक्तिविचिपिलपीति ॥" उणा० ३ । १३ । इति रक् ।) वज्रम् । इति त्रिकाण्डशेषः उणादिकोषश्च ॥

भिन्दिपालः, पुं, (भिदि+इन् । भिन्दिं विदारणं पालयतीति पालि+अण् ।) हस्तप्रमाणकाष्ठः । नालिकास्त्रमिति ख्यातम् । इति भरतः ॥ एरण्डवृक्षगुरुः । इति स्वामी ॥ तत्पर्य्यायः । खगः २ । इत्यमरः । २ । ८ ।८१॥ (यथा, वैद्यप्रायश्चित्तसंहितायाम् । १ ।
"भिन्दिपालन्तु वक्राग्रो नम्रग्रीवो दृढच्छिराः ।
दृढमाकोटयेद्धनुष्कः करसम्मितमण्डलः ॥"
भिन्दिवालः भिन्दिवालश्चापि इत्येवं पाठद्वयं दृश्यते ।)

भिन्नः, त्रि, (भिद्यते स्मेति । भिद्+क्तः ।) भेदविशिष्टः । भाङ्गा इति भाषा । तत्पर्य्यायः । दारितः २ । भेदितः ३ । इत्यमरः । ३।१।१००॥ विदारितः ४ । इति शब्दरत्नावली ॥ (यथा, हरिवंशे । भविष्यपर्व्वणि । ५३ । १६ ।
"भाग्यानुद्भाग्यमापन्नं प्रविष्टं गहनान्तरम् ।
आकरं विकरं भिन्नं निर्मर्यादमसादयम् ॥")

सङ्कटः । व्यग्रः । क्षुब्धः । इति मेदिनी । ने, १४॥ चतरोगविशेषः । तल्लक्षणं यथा,—
"शुक्तिकुन्तेषु खड्गाग्रविषाणेराशयो हतः ।
यत्किञ्चित् प्रस्रवेत्तद्धि भिन्नमित्यभिधीयते ॥"
आशयः कोष्ठः । तस्यौषधं यथा,—
"छिन्ने भिन्ने तथा विद्धे क्षते वाह्वगतिस्रवेत् ।
रक्तक्षयात्तत्र रुजः करोति पवनो भृशम् ॥
स्नेहपानपरीषेकलेपांस्तत्रोपनाहनम् ।
कुर्व्वीत स्नेहवस्तिञ्च मारुतघ्नौषधैर्भिषक् ॥
खड्गादिच्छिन्नगात्रस्य तत्कालं पूरितो व्रणः ।
गाङ्गेरुकीमूलरसैः सद्यः स्याद्गतवेदनः ॥
कषायमधुरा घृताः क्रियाः सर्व्वाः प्रयोजयेत् ।
सद्यो व्रणानां सन्धानात् पश्चात् पूर्व्वोक्तमाचरेत् ॥
आमाशयस्थे रुधिरे विदध्यादूर्द्धमं नरः ।
तस्मिन् पक्वाशयस्थे तु गृह्णीयात् सविरेचनम् ॥
क्षतो वंशगवेरखड्गभ्रदंष्ट्राश्मभिदा कृतः ।
छिन्नुसैन्धवसंयुक्तः कोष्ठस्थं स्रावयेद्रक्तम् ।
यवकोलकुलत्थानां निःस्नेहेन रसेन च ।
सुक्तीताम्रं यवागूं वा पिबेत् सैन्धवसंयुताम् ॥
जातीनिम्बपटोलपत्रकटुकाद्राव्वीनिशाशारिवा
सञ्छिन्नाभयतिक्ततुत्थमधुकैर्नक्ताह्वबीजैः समैः ।
सर्पिःसिद्धमनेन लक्ष्यवदना मर्म्माश्रिता
स्रावियो
गम्भीराः सरुजो व्रणाः सगतिकाः सुध्यन्ति
रोहन्ति च ॥
वृक्षवैद्योपदेशेन पारम्पर्य्योपदेशतः ।
जातीष्टते तु संसिद्धे चैतयं सिक्थकं वुधैः ॥"
जात्यादिघृतम् । इति भावप्रकाशः ॥ * ॥
(अथोपाङ्गचिकित्सा ।
"छिन्नं भिन्नं तथा भग्नं क्षतं पिच्छितमेवच ॥
दग्धन्तेषां प्रतीकारः प्रोक्तश्चोपाङ्गसंज्ञकः ॥"
इति हारीते प्रथमे स्थाने द्वितीयेऽध्याये ॥)

भिन्नकः, पुं,(भिन्न+संज्ञायां कन् ।) बौद्धः । यथा,
"भिन्नकः क्षपणोऽर्हतको बौद्धो वैनायिकः
स्मृतः ॥"
इति त्रिकाण्डशेषः ॥
(भिद्+"अनत्यन्तगतौ क्तात् ।" ५ । ४ । ४ । इति कन् । इदित् भिन्दे, त्रि ।)

भिन्नगात्रिका, स्त्री, (भिन्नं गात्रमस्याः । कप् । टाप् । अत इत्वम् ।) कर्कटी । इति शब्दचन्द्रिका ।

भिन्नभिन्नात्मा, [न्] पुं, (भिन्नभिन्नो भेदयुक्त आत्मा यस्य ।) चणकः । इति शब्दचन्द्रिका ॥

भिन्नयोनी, स्त्री, (भिन्नं योनिवयतीति । युज्+णिच्+णिनिः । ङीप् ।) पाषाणभेदकवृक्षः । इति भावप्रकाशः ॥

भिन्नार्थकः, त्रि, (भिन्नोऽर्थो यस्य । कप ।) अन्यः । इत्यमरः । ३ । १ । ८२ ॥

भिया, स्त्री, (भीयते इति । भी+"षिद्भिदादिभ्योऽङ् ।"३। ३ । १०४ । इति अङ् । इयङ् । टाप् ।) भयम् । इति हेमचन्द्रः । २ । ३०१ ॥

भिरिण्टिका, स्त्री, श्वेतगुञ्जा । इति राजनिर्घण्टः ।

भिल्ल, पुं, (भेलयति भिलतीति वा । भिल्+वाहुलकात् । लक् ।) म्लेच्छजातिविशेषः । भील इति भाषा । यथा, हेमचन्द्रे ।
"माला भिल्लाः किरातास्च सर्व्वेऽपि म्लेच्छजातयः ॥"
अपि च ।
"रजकस्चर्म्मकारस्च नटो वरुड एव च ।
कैवर्त्तभेदभिल्लास्च सप्तैते अन्त्यजाः स्मृताः ।"
इति प्रायश्चित्ततत्त्वम् ।
स च ब्राह्मणकन्यायां तीवराज्जातः । यथा,—
"पुलिन्दभेदभिल्लास्च पुल्को मल्लस्च धावकः ।
कुन्दकारो डोखलो वा नटपो हस्तिपस्तथा ।
एते वै तीवराज्जाताः कन्यायां ब्राह्मणस्य च ॥"
इति पराशरपद्धतिः ॥

भिल्लगवी, स्त्री, (भिल्लानां गवी ।) गवयी । इति राजनिर्घण्टः ॥

भिल्लतरुः, पुं, (भिल्लप्रियतरुः । लोध्रपुष्पेण हि भिल्लादयोऽङ्गभूषणादिकं कुर्व्वन्तीति प्रसिद्धेरस्य तथात्वम् ।) लोध्रः । इति राजनिर्घण्टः ॥

भिल्ली, स्त्री, (भिल्ल+ङीप् । भिल्लानां प्रियत्वादस्यास्तथात्वम् ।) लोध्रः । इति राजनिर्घण्टः ॥

भिष्, रुग्जये । सौत्रधातुरयम् । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) भिषक् भेषजं भेषति । इति दुर्गादासः ॥

भिषक्, [ज्] विभेति रोगो यस्मादिति । भीलि भीत्याम्+"भियः युक् च ह्रस्वश्च ।" उणा० १ । १३७ । इति अजिः युगागमो ह्रस्वत्वञ्च ।) वैद्यः । इत्यमरः । २ । ६ । ५७ ॥ (अस्य प्राशस्त्यादिकं यथा,—
"भिषग्विभूषुर्मतिमान् यतः स्वगुणसम्पदि ।
परं प्रयत्नमातिष्ठेत् प्राणदः स्यादृणां यथा ।
तदेव युक्तं भैषज्यं यदारोग्याय कल्पते ।
स चैव भिषजां श्रेष्ठो रोगेभ्यो यः प्रमोचयेत् ।
सम्यक् प्रयोगं सर्व्वेषां सिद्धिराख्यातिकर्म्मणाम् ।
सिद्धिराख्यातिसर्व्वेश्च गुणैर्युक्तं भिषक्तमम् ।"
इति चरके सूत्रस्थाने प्रथमेऽध्याये ।
"एतदवश्यमधीयमधीत्य च कर्म्माण्यवश्यमुपासितव्यमुभयज्ञो हि भिषग्व्याधार्त्तो भवति ।"
यस्तु केवलशास्त्रज्ञः कर्म्मस्वपरिनिष्ठितः ।
स मुह्यत्यातुरम्प्राप्य प्राप्य भीरुरिवाहवम् ।
यस्तु कर्म्मसु निष्णातो धार्य्याच्छास्त्रबहिष्कृतः ।
स मनुष्यु पूजां नाप्नोति वधस्चार्हति राजतः ।
उभावेतावनिपुणावसमर्थौ स्वकर्म्मणि ।
अहंवैद्यधरावेतावैकपक्षाविव द्विजौ ।
ओषधीरुद्धृतकल्पास्तु शस्त्राग्निविषोपमाः ।
भवन्त्यज्ञेरुपहृताः स्वादेतौ विवर्ज्जयेत् ।
छेद्यादिष्वनभिज्ञो यः स्नेहादिषु च कर्म्मसु ।
स निहन्ति जनं लोभात् कुवैद्यो वृषदोषतः ।
यस्तूभयज्ञो मतिमान् स समर्थोऽर्थसाधने ।
आहवे कर्म्मनिर्व्वोढुं द्विपक्षः स्यन्दनो यथा ।"
इति सुश्रुते सूत्रस्थाने प्रथमेऽध्याये ।)

दष्टनीयभिषग् यथा,—
"अज्ञातौषधिमन्त्रस्तु यश्च याचेरतत्त्ववित्।
रोगिभ्योऽर्थं समादत्ते स दण्ड्यश्चौरवद्भिषक्॥"
इति ज्योतिस्तत्त्वम्॥
तस्यान्नस्याभोज्यत्वं यथा,—
"शूद्रान्नं ब्राह्मणो भुक्त्वा तप्तकृच्छ्रावतारिणः।
चिकित्सकस्य क्रूरस्य तथा स्त्रीभगजीविनाम्॥
शौण्डिकान्नं सूतिकान्नं भुक्त्वा मासव्रती भवेत्॥"
व्रतो यावकेन। तत्र धेनुद्वयम्। इति प्रायश्चित्तविवेकः॥ अपि च।
"पूयचिकित्सकस्यान्नं पुंश्चल्यास्त्वन्नमिन्द्रियम्।
विष्ठा वार्द्धुषिकस्यान्नं शस्त्रविक्रयिणो मलम्॥"
इति मानवे ४ अध्यायः॥
(घृतधन्वनः क्षेत्रजः पुत्रः। यथा, हरिवंशे। ३८। ६।
"क्षत्रवर्म्मांग्रजस्तस्य घृतधन्वा तु मध्यमः।
देववर्षेस्तपोवनात् तस्य भिषक्तेतरणश्च यः॥"
औषधम्। यथा, ऋग्वेदे। १। २७। ६।
"शतं ते राजन् भिषजः सहस्रमुर्वी
गभीरा सुमतिष्टे अस्तु॥"
"हे राजन्! वरुण! ते तव शतं भिषजः सहस्रं वन्यनिवारकाणि शतसहस्रसंख्याकान्यौषधानि वैद्या वा सन्ति॥" इति तद्भाष्ये सायणः॥)
भिषक्प्रिया, स्त्री, (भिषजः प्रिया।) गुडूची। इति राजनिर्घण्टः॥
(विवृतिरस्या गुडूचीशब्दे ज्ञातव्या॥)
भिषग्जितं, क्ली, (भिषजा जितम्।) औषधम्। इति चिकित्साशेषः॥ (चिकित्सा॥ अथास्य पर्य्यायः।
"चिकित्सितं प्रतीकारश्चिकित्सा च भिषग्जितम्॥"
इति वैद्यकरत्नमालायाम्॥)
भिषग्भद्रा, स्त्री, (भिषजि औषधे वैद्ये वा भद्रा शुभदायिका।) भद्रदन्तिका। इति राजनिर्घण्टः॥
भिषङ्माता, [ऋ] स्त्री, (भिषजां मातेव।) वासकः। इति राजनिर्घण्टः॥ (अस्याः पर्य्यायः।
"वासको वाजिका वासा भिषङ्माता च सिंहिका।
सिंहास्यो वाजिदन्ता स्यादटरूषोऽटरूषकः॥
आटरूषो वृषस्तस्मात्॥ सिंहपर्णश्च स स्मृतः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।)
भिसृटा, स्त्री, (भिस्सामन्नं टीकते इति। टीक गतौ + "अन्येभ्योऽपीति डः। ततः पृषोदरादित्वात् साधुः।) दग्धान्नम्। इत्यमरः। २। ६। ६६॥ अस्य रूपान्तरम्। भिस्सिटा। भिस्सिटा। भिस्सिडा। भिस्सिका। इति तट्टीकायां भरतः॥
भिस्सा, स्त्री, (बभस्तीति। भस दीप्तौ + बाहुलकात् सः। छन्दसि बहुलमितीत्वम्। ब्राह्मण-भिक्षेति भाष्यप्रयोगात्तीकेऽपि। यद्वा, भेदनमिति भिद्। भिद् + क्विप्। भिदं स्यतीति। सो + "आतोऽनुपसर्गे कः।" इति कः। पृषोदरादित्वात् साधुः।) अन्नम्। इत्यमरः। २। ६। ४८॥ (अस्याः पर्य्यायो यथा,—
"भक्तमन्नं तथान्नञ्च क्वचित् कूरश्च कीर्त्तितम्।
ओदनोऽस्त्री स्त्रियां भिस्सादीदिविः पुंसि-भाषितः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे॥)
भिस्सिटा, स्त्री, (भिस्सामन्नं टीकते इति। टीक गतौ + डः। पृषोदरादित्वात् साधुः।) दग्धान्नम्। इत्यमरटीकायां भरतसेनः॥
भी, ग गि भृत्याच्च। इति कविकल्पद्रुमः॥ (क्रया॰-पर॰सक॰-अनिट्।) ग, भीनाति। गि, भिनाति। भीनः भीनिः। गिनेव क्रयादित्वसिद्धौ गग्रहणं पृषादित्वविकल्पार्थं चकारात् भीत्याच्च। इति दुर्गादासः॥
भी, णि लि भीत्याम्। इति कविकल्पद्रुमः॥ (क्रया॰-पर॰-अक॰-अनिट्।) णि, भीतोऽस्ति। लि, बिभेति। इति दुर्गादासः॥
भीः, स्त्री, (भी भीत्याम् + सम्पदादित्वात् क्विप्।) भयम्। इत्यमरः। १। ७। २१॥ (यथा, आर्य्यासप्तशत्याम्। ३८७।
"पूर्व्वाधिको ग्रहिष्यामि बहुमानः प्रेमनर्म्म-विश्वासः।
भीरधिकेयं कथयति रागं बालाविभक्तमिव॥")
भीतं, क्ली, (भी लि भीत्याम् + क्तः।) भयम्। भययुक्ते, त्रि। इति मेदिनी। ते, ४०॥ (यथा, मनुः। ७। ६४।
"यस्तु भीतः परावृत्तः संग्रामे हन्यते परैः।
भर्त्तुर्यद्दुष्कृतं किञ्चित् तत्सर्व्वं प्रतिपद्यते॥")
भीतिः, स्त्री, (भी + क्तिन्।) भयम्। इत्यमरः। १। ७। २१॥ (यथा, मार्कण्डेये। ८४। १६।
"दुर्गे! स्मृता हरसि भीतिमशेषजन्तोः
स्वस्थैः स्मृता मतिमतीव शुभां ददासि॥")
कम्पः। इति विश्वः॥
भीमं, त्रि, (बिभेत्यस्मादिति। भी + "भियः क्रुग्वा।" उणा॰ १। १४७। बिभेतेर्मक् धातोर्वा युगागमश्च। इति मक्।) भयहेतुः। तत्पर्य्यायः। भैरवम् २ दारुणम् ३ भीषणम् ४ भौम्यम् ५ घोरम् ६ भयानकम् ७ भयङ्करम् ८ प्रतिभयम् ९। इत्यमरः। १। ७। २०॥ (यथा, रघुः। १। १६।
"भीमकान्तैर्नृपगुणैः स बभूवोपजीविनाम्।
अधृष्यश्चाभिगम्यश्च यादोरत्नैरिवार्णवः॥")
भीमः, पुं, (बिभेत्यस्मादिति। भी + मक्।) भयानकरसः। यथा,—
"भयानको भयस्थायिभावः कालाधिदेवतः।
स्त्री नीचप्रकृतिः कृष्णो मतस्तत्त्वविचारदैः॥"
इत्यमरटीकायां भरतः॥
शिवः। (यथा, मार्कण्डेये। ५२। ७।
"भवं सर्व्वं तथेशानं तथा पशुपतिं प्रभुः।
भीमसुग्रं महादेवमुवाच स पितामहः॥"
विष्णुः। यथा, महाभारते। १३। १४८। ५२।
"अतुलः शरभो भीमः समयज्ञो हविर्हरिः॥")
मध्यमपाण्डवः। (यथा, महाभारते। १। १२३। १३।
"तस्माज्जज्ञे महाबाहुर्भीमो भीमपराक्रमः॥"
अस्य विवरणादिकं भीमसेनशब्दे द्रष्टव्यम्॥)
अम्बष्ठेतरः। इति मेदिनी। मे, २१॥ महादेवस्याष्टमूर्त्यन्तर्गताकाशमूर्त्तिः। यथा। भीमाय आकाशमूर्त्तये नमः। इति तिथ्यादितत्त्वे शिवपूजाप्रयोगः॥ (गन्धर्व्वविशेषः। यथा, महाभारते। १। ६५। ४३।
"भीमश्चित्ररथश्चैव विख्यातः सर्व्वविद्वरौ॥"
पुरुवंशीयस्य ईलिनस्य पुत्रः। यथा, तत्रैव। १। ६४। १८।
"ईलिनो जनयामास दुष्मन्तप्रमुखान् नृपान्।
दुष्मन्तं शूरभीमौ च प्रवसुं वसुमेव च॥")
भीमनादः, पुं, (भीमो भैरवो नादो यस्य।) सिंहः। इति शब्दचन्द्रिका॥ (भीमो नादः शब्दः। इति विग्रहे भयानकशब्दः। यथा, पातकाष्टके। १।
"वातैर्विधूनय विभीषय भीमनादैः
सम्पूरयैव त्वमथवा करकाभिघातैः।
त्वद्वारिविद्रुतपरिप्लुतजीवितस्य
नान्या गतिर्भवति वारिद! पातकस्य॥"
भयानकशब्दविशिष्टे, त्रि। यथा, महाभारते। १। १५६। ३१।
"भीमनादं सुतान्बोढुं तीक्ष्णदंष्ट्रं महारवम्॥")
भीमरथः, पुं, (भीमो भयानको रथोऽस्य।) तामसमनुवंशजातासुरविशेषः। स च कूर्म्मरूपिणा हरिणा हतः। यथा,—
"हरिणा कूर्म्मरूपेण हतो भीमरथोऽसुरः॥"
इति गारुड़े गयामाहात्म्ये ८६ अध्यायः॥
(धृतराष्ट्रस्य पुत्रभेदः। यथा, महाभारते। १। ११७। ११।
"उग्रभीमरथौ वीरौ वीरबाहुरलोलुपः॥")
भीमरथी, स्त्री, (भीमरथस्यापत्यम्। भीमरथ + इञ्।) नदीभेदः। यथा राजनिर्घण्टे।
"सप्तसप्ततिकाख्या च भीमरथी च षष्ठगा
प्रथमा च कृष्णा चतसृष्वगा गुणैः॥"
भीमरथी, स्त्री, (भीमरथस्यापत्यम्। भीमरथ + इञ्।) नदीभेदः। यथा राजनिर्घण्टे।
"सप्तसप्ततिवर्षाणां सप्तमे मासि सप्तमी।
रात्रिर्भीमरथी नाम नराणामतिदुस्तरा॥
तामतीत्य नरो योऽसौ दिनानि यानि जीवति॥
क्रतुभिस्तानि तुल्यानि सुवर्णशतदक्षिणैः।
गतिः प्रदक्षिणं विष्णोश्चरणं मन्त्रभावनम्।
ध्यानं निद्रा सुधा चान्नं भीमरथ्याः फलश्रुतिः॥"
इति वैद्यकम्॥
नदीभेदः। यथा राजनिर्घण्टे।
"सप्तसप्ततिकाख्या च षष्ठगा
भीमरथी च
प्रथमा च कृष्णा चतसृष्वगा गुणैः॥"

(इयं हि सप्तपर्वतोद्भवा। यथा, विष्णुपुराणे। २। ३। ११।
"गोदावरी भीमरथी कृष्णवेण्यादिकास्तथा।
सप्तपादोद्भवा नद्यः स्मृताः पापभयापहाः॥")
भीमविक्रान्तः, पुं, (भीमश्चासौ विक्रान्तश्चेति।) सिंहः। इति त्रिकाण्डशेषः॥ भयानकविक्रमविशिष्टे, त्रि॥
भीमशासनः, पुं, (भीमं शासनं यस्य।) यमः। इति शब्दरत्नावली॥
भीमसेनः, पुं, मध्यमपाण्डवः। स च कुन्तीगर्भे पवनाख्यातः। तत्पर्य्यायः। भीमः २ वीरवेणुः ३ वृकोदरः ४ वृकजित् ५ कीचकजित् ६ किर्म्मीरजित् ७ जरासन्धजित् ८ हिडिम्बजित् ९ कटप्रणः १० नागबलः ११ गुणाकरः १२। इति शब्दरत्नावली॥ तस्य जन्मविवरणं यथा,
"धार्म्मिकस्तं सुतं लब्ध्वा प्राह तुष्टा पुनरब्रवीत्।
प्राहुः क्षात्रं बलं ज्येष्ठं बलज्येष्ठं सुतं कुरु॥
ततस्तथोक्ता भर्त्रा तु वायुमेवाजुहाव सा।
तस्माज्जज्ञे महाबाहुर्भीमो भीमपराक्रमः॥
तमप्यतिबलं जातं वागुवाचाशरीरिणी।
सर्व्वेषां बलिनां श्रेष्ठो जातोऽयमिति भारत!॥
इदमत्यद्भुतञ्चासीज्जातमात्रे वृकोदरे।
यदङ्कात् पतितो मातुः शिलां गात्रैरचूर्णयत्॥
कुन्ती धात्रभयोद्विग्ना सहसोत्पतिता किल।
नान्वबुध्यत तं सुप्तसुतञ्च स्वे वृकोदरम्॥
वज्रसंहननः सोऽथ कुमारो न्यपतद्गिरौ।
पतता तेन गुरुधा शिला गात्रैर्विचूर्णिता॥"
इति महाभारते आदिपर्व्वणि पाण्डवोत्पत्तिनामाध्यायः॥
(गन्धर्व्वविशेषः। यथा, महाभारते। १।१२३।५२।
भीमसेनोग्रसेनौ च ऋष्यायुरनघस्तथा॥")
कर्पूरभेदः। यथा,—
"पीतासौ भीमसेनस्तदनुसितकरः शङ्करावासशृङ्गः
पांसुः पिङ्गोऽजसारस्तदनु हिमयुता वालुका जूटिका च।
पश्चादस्मात्सुसारस्तदुपरि सहिमः शीतलः पञ्चिकाख्या
कर्पूरस्येति भेदा गुणरसमहसा वेसवाख्येन दृष्टाः॥"
इति राजनिर्घण्टः॥
भीमदारु, क्ली, (भीमे ग्रीष्मादौ दारु प्रकाशो यस्य।) इन्द्रतूलम्। इति शब्दरत्नावली॥ वुड्डिर तता इति भाषा॥ भीमग्रासमपि पाठः॥
भीमा, स्त्री, (भी+मक्+स्त्रियां टाप्।) दुर्गा। इति शब्दरत्नावली॥ रोचनाख्यगन्धद्रव्यम्। इति शब्दचन्द्रिका॥ कृष्णा। इति शब्दमाला॥ (नदीविशेषः। तद्यथा,—
"कावेरी वीरकाञ्ची च भीमा चैव पयोष्णिका।
विभावरी विशाला च गौरीदा मदनस्वसा॥
पार्व्वती चापरा नद्यो दक्षिणाद्रिगमा इमाः॥"
इति हारीते प्रथमे स्थाने सप्तमेऽध्याये॥)
भीमादेवी, स्त्री, दुर्गा। यथा,—
"पुनश्चाहं यदा भीमं रूपं कृत्वा हिमाचले।
रक्षांसि क्षययिष्यामि मुनीनां त्राणकारणात्॥
तदा मां मुनयः सर्व्वे स्तोष्यन्त्यानम्रमूर्त्तयः।
भीमादेवीति विख्यातं तन्मे नाम भविष्यति॥"
इति मार्कण्डेयपुराणे देवीमाहात्म्यम्॥
भीमैकादशी, स्त्री, (भीमेनोपासिता एकादशी। प्राक्पार्थिववत् समासः।) भैमी। सा च माघशुक्लैकादशी। भीमद्वादशीत्वेन ख्याता च। यथा,—
मत्स्य उवाच।
"पुरा रथन्तरे कल्पे परिष्टो महात्मना।
मन्दरस्थो महादेवः पिनाकी ब्रह्मणा स्वयम्॥
ब्रह्मोवाच।
कथमारोग्यमैश्वर्य्यमनन्तममरेश्वर!।
स्वल्पेन तपसा देव! भवेन्मोक्षोऽथ वा नृणाम्॥
किमज्ञातं मया देव! त्वत्प्रसादादधोक्षज!।
स्वल्पकेनापि तपसा महत् फलमिहोच्यते॥
मत्स्य उवाच।
इति पृष्टः स विश्वात्मा ब्रह्मणा लोकभावनः।
उमापतिरुवाचेदं मनसः प्रीतिकारकम्॥
ईश्वर उवाच।
व्यक्षाद्रथन्तरात् कल्पात् त्रयोविंशतिमो यदा।
वाराहो भविता कल्पस्तस्य मन्वन्तरे शुभे॥
वैवस्वताख्ये संजाते सप्तमे सप्तलोकधृक्।
द्वापराख्यं युगं तस्मिन् सप्तविंशतिमे तदा॥
तस्यान्ते स महानीलो वासुदेवो जनार्द्दनः।
भारावतरणार्थाय त्रिधा विष्णुर्भविष्यति॥
द्वैपायनो मुनिस्तद्वौ हिंशयोश्च केशवः।
कंसादिदर्पमथनः केशवः श्लोकनाशनः॥
पुरी द्वारवती नाम सांप्रतं वा कुशस्थली।
दिव्यानुभावसंयुक्तामधिवासाय प्रार्ङ्गिणः॥
स्रष्टा ममाज्ञया ब्रह्मन्! करिष्यति जगत्पतेः॥
तस्यां कदाचिदासीनः सभायामसितद्युतिः।
भार्य्याभिर्ऋषिभिः सार्द्धं भूभृद्भिर्भूरिदक्षिणैः॥
कुरुभिर्देवगन्धर्व्वैरभितः कैटभार्द्दनः।
प्रवृत्तासु पुराणीषु धर्म्मसम्बन्धिनीषु च॥
कथासु भीमसेनेन परिष्टः प्रतापवान्।
त्वया पृष्टस्य धर्म्मस्य रहस्यस्यास्य भेदकृत्॥
भविता स तदा ब्रह्मन्! कर्त्ता चैव वृकोदरः।
प्रवर्त्तकोऽस्य धर्म्मस्य पाण्डुसूनुर्महाबलः॥
तस्य तीक्ष्णो वृको नाम जठरे हव्यवाहनः।
मया दत्तः स धर्म्मात्मा तेन चासौ वृकोदरः॥
अतीवाग्न्यादशीलश्च नामायुतबलो महान्।
भविष्यत्यजरः साक्षात् कन्दर्प इव बुद्धिमान्॥
धार्म्मिकस्याप्यशक्तस्य तीव्राग्नित्वादुपोषणे।
इमं व्रतमशेषाणां व्रतानामधिकं यतः॥
कथयिष्यति विश्वात्मा वासुदेवो जगद्गुरुः।
अशेषयज्ञफलदमशेषापचिनाशनम्॥
अशेषदुरितध्वंसमशेषसुरपूजनम्॥
पवित्राणां पवित्रञ्च मङ्गलानाञ्च मङ्गलम्।
भविष्यञ्च भविष्याणां पुराणानां पुरातनम्॥
वासुदेव उवाच।
यद्यष्टमीचतुर्द्दश्यां द्वादशीञ्चैव भारत!।
अन्येष्वपि दिनर्क्षेषु न भक्तस्त्वमुपोषितुम्॥
ततः पृच्छामिमां भीम! तिथिं पापप्रणाशिनीम्।
उपोष्य विधिनानेन गच्छेद्विष्णोः परं पदम्॥
माघमासस्य दशमी यदा शुक्ला भवेत्तदा।
घृतेनाभ्यञ्जनं कृत्वा तिलैः स्नानं समाचरेत्॥
तथैव विष्णुमभ्यर्च्य नमो नारायणाय च।
कृष्णाय पादौ संपूज्य शिरः सर्व्वात्मनेति च॥
वैकुण्ठायेति वै कण्ठमुरः श्रीवत्सधारिणे।
प्रद्युम्ने चक्रिणे तद्वदनिरुद्धाय वै नमः॥
सर्व्वे नारायणस्येवं संपूज्या बान्धवाः क्रमात्।
दामोदरायेत्युदरं मेढ्रं पद्मशूराय वै॥
ऊरू सौभाग्यनाथाय जानुनी भूतधारिणे।
नमो नीलाय वै जङ्घे पादौ विश्वमले पुनः॥
नमो देव्यै नमः शान्त्यै नमो लक्ष्म्यै नमः श्रिये।
नमः पुष्ट्यै नमस्तुष्ट्यै तुष्ट्यै तथा श्रियै॥
नमो विहङ्गनाथाय वायुवेगाय पक्षिणे।
विषप्रमाथिने नित्यं गरुडायाभिपूजयेत्॥
एवं संपूज्य गोविन्दमुमापतिविनायकौ।
गन्धैर्माल्यैस्तथा धूपैर्भक्ष्यैर्नानाविधैस्तथा॥
गव्येन पयसा सिद्धां कृशरामथ वाग्यतः।
सर्पिषा सह भुक्त्वा च गत्वा घृतपदं बुधः॥
न्यग्रोधन्दन्तधावनमथवा खादिरं बुधः।
गृहीत्वा धावयेद्दन्तानाचान्तः प्रागुदङ्मुखः॥
भूयात् सायन्तनीं कृत्वा सन्ध्यामस्तमिते रवौ।
नमो नारायणायेति त्वामहं शरणं गतः॥
एकादश्यां निराहारः समभ्यर्च्य च केशवम्।
रात्रिञ्च सकलां स्थित्वा स्नानञ्च पयसापि च॥
सर्पिषा विग्रदहनं हुत्वा ब्राह्मणपुङ्गवैः।
सहैव पुण्डरीकाच! द्वादश्यां क्षीरभोजनम्॥
करिष्यामि यतात्माहं निर्विघ्नास्तु तव मे।
एवमुक्त्वा खपेद्भूमावितिहासकथां पुनः॥
श्रुत्वा प्रभाते संजाते नदीं गत्वा विशाम्पते!।
स्नानं कृत्वा ततः पापघ्नानभिवर्ज्जयेत्॥
उपास्य सन्ध्यां विधिवत् कृत्वा च पितृतर्पणम्।
प्रणम्य च हृषीकेशममलाम्बुनीश्वरम्॥
गृहस्य पुरतो भक्त्या मण्डपं कारयेद्बुधः।
दशहस्तमथार्द्धं वा कारयेत् कुर्य्याद्विशाम्पते!॥
चतुर्हस्तां शुभां कुर्य्याद्वेदीमरिनिसूदन!।
चतुर्हस्तप्रमाणञ्च विन्यसेत्तत्र तोरणम्॥
आरोप्य कलसं तत्र दिक्पालान् पूजयेत्ततः।
मासमात्रेण संपूर्णमधःकृष्णाजिने स्थितः॥
तस्य धाराश्च शिरसा धारयेत् सकलां निशाम्।
धाराभिर्भूरिभिर्भूरिफलं वेदविदो विदुः॥
यस्मात्तस्मात् कुरुश्रेष्ठ! धारा धार्य्याः स्वशक्तितः।
तथैव विष्णोः शिरसि क्षीरधाराः प्रमानवेत्॥
अरत्निमात्रं कुरुश्च कृत्वा तत्र त्रिमेखलम्।
योनिवक्त्रञ्च तं कृत्वा ब्राह्मणैर्वेदपारगैः॥
तिलांश्च विष्णुदैवत्यैर्मन्त्रैरेकाग्रमानसः।

कृत्वा च वेणवं सम्यक् चरुं गोक्षीरसंयुतम् ॥
निष्पावार्द्धप्रमाणां वै धारामाज्यस्य पातयेत् ॥
जलकुम्भान् महावीर! स्थापयित्वा त्रयोदश ।
भक्ष्यैर्नानाविधैर्युक्तान् सितवस्त्रैरलङ्कृतान् ।
घृतानोदुम्बरैः पात्रैः पञ्चरत्नसमन्वितान् ॥
चतुर्भिर्वेदमन्त्रैर्होमस्तत्र कार्य्य उदक्सुखैः ।
रुद्रशापश्चतुर्भिश्च यजुर्वेदपरायणैः ॥
वैष्णवानि च सामानि चतुरः सामवेदिनः ।
ऋग्भिश्चतुर्भिः सहितान्यभितः परिपाठयेत् ॥
एवं द्वादश तान् विप्रान् वस्त्रमाल्यानुलेपनैः ।
पूजयेदङ्गुलीयैश्च कटकैर्हेमसूत्रकैः ॥
वासोभिः प्रणतीयैश्च वित्तशाठ्यविवर्जितः ।
एवं चपातिवाह्या वै गीतमङ्गलनिस्वनैः ।
उपाध्यायस्य च पुनर्दद्याद्गुरुं सर्व्वमेव तु ॥ * ॥
ततः प्रभाते विमले समुत्थाय त्रयोदश ।
गा वै दद्यात् कुरुश्रेष्ठ! सौवर्णसुखसंयुताः ॥
पयस्विनीः शीलवतीः कांस्यदोहनसंयुताः ।
रौप्यखुराः सवस्त्राश्च चन्दनेनाभिषेचिताः ॥
तांस्तु तेषां ततो भक्त्या भक्ष्यभोज्येन तर्पितान् ।
कृत्वाथ ब्राह्मणान् सर्व्वानन्नैर्नानाविधैस्तथा ॥
भुक्त्वा चाचारलवणमात्मना च विसर्जयेत् ॥
अनुगम्य पदान्यष्टौ पुत्रभार्य्यासमन्वितः ।
प्रीयतामत्र देवेशः केशवः क्लेशनाशनः ॥
शिवस्य हृदये विष्णुर्विष्णोश्च हृदये शिवः ।
यथान्तरं न पश्यामि तथा मे स्वस्ति चायुषः ॥
एवमुक्त्वार्य्य तान् कुम्भान् गां चैव शयनानि च ।
वासांसि चैव सर्व्वेषां गृहाणि प्रापयेद्गृहः ॥
अभावे बहुभार्य्यानामेकामपि सुसंस्कृताम् ।
भार्य्यां दद्याद्गुरौ भीम! सर्व्वोपस्करसंयुताम् ॥
इतिहासपुराणानि वाचयित्वातिवाहयेत् ।
तद्दिनं नरशार्दूल! य इच्छेद्विपुलां श्रियम् ॥
तस्मात्त्वं सत्त्वमालम्ब्य भीमसेन! विमत्सरः ।
कुरु व्रतमिदं सम्यक् स्नेहाद्यदवोचमीरितम् ।
त्वया कृतमिदं वीर! त्वन्नाम्नाख्यं भविष्यति ।
सा भीमद्वादशी ह्येषा सर्व्वपापहरा शुभा ।
या तु कल्याणिनी नाम पुरा कल्पेषु पठ्यते ॥"

त्वमादिकर्त्ता भव भूकरेऽस्मिन्
कल्पे महावीरवरप्रधान! ।
यस्याः स्मरणकीर्त्तनमप्यशेषं
विनष्टपापक्षिदधाधिपः स्यात् ॥
दृष्ट्वा च यामश्वरसामपौष्ण-
वैश्याक्षतामप्यभवान्तरेषु ।
व्याभीरकन्येति कुतूहलेन
सेवोर्व्वशी संप्रति नाकपृष्ठे ॥
जातापि सा वैश्यकुलोद्भवापि
पुलोमकन्या पुरुहूतपत्नी ।
तत्रापि तस्याः परिचारिकेयं
मम प्रिया संप्रति सत्यभामा ॥
ज्ञातः पुरा मण्डलमेष तद्व-
त्तेजोमयं देवगुरोरमाप ।
अस्याश्च कल्याणतिथौ विवस्वान्
बृहन्मयूखैश्च बृहत्सरश्मिः ॥
इदमेव कृतं महेन्द्रसद्मे-
र्वसुभिश्चैव पुरा सुरादिभिश्च ।
फलमत्र न शक्यतेऽभिवक्तुं
यदि जिह्वाकोटयो मुखे स्युः ॥
कलिकल्मषविदारिणीमनन्ता-
मिति कथयिष्यति यादवेन्द्रसूनुः ।
अपि नरकगतान् पितॄनशेषा-
नलमुद्धर्त्तुमिहैव यः करोति ॥
य इदमनघं शृणोति चातिभक्त्या
परिपठतीह परोपकारहेतोः ।
तिथिमिह सकलार्घभाङ्नरेन्द्र-
स्तव चरणेन स साम्यतामुपैति ॥
कल्याणिनी नाम पुरा बभूव
या द्वादशी माघदिनेऽभिपूज्या ।
सा भीमपुत्रेण कृता भविष्य-
त्यनन्तपुण्यानघ! भीमपूर्व्वा ॥"

इति मत्स्यपुराणे भविष्यद्ब्रह्मोद्देशे भीमद्वादशी नाम ६५ अध्यायः ॥

भीरुः, त्रि, (बिभेतीति। भी भये + "भियः क्रुक्रुकनौ।" उ। २। १७४। इति क्रुः।) भयशीलः। (यथा, मनौ। ७। ६२।
"तेषामर्थे नियुञ्जीत शूरान् दक्षान् कुलोद्गतान्।
शुचीनाकरकर्म्मान्ते भीरूनन्तर्निवेशने ॥")
तत्पर्य्यायः। त्रस्नुः २ भीरुकः ३ भीलुकः ४। इत्यमरः। ३। १। २६ ॥ भीलुः ५। इति शब्दरत्नावली ॥

भीरुः, स्त्री, (बिभेतीति। भी + "भियः क्रुक्रुकनौ।" उ। २। १७४। इति क्रुः।) भयशीला स्त्री। भयप्रकृतिका। इत्यमरभरतौ ॥ (यथा, विष्णुपुराणे। १। १५। ३३।
"सत्यं भीरु! वदस्येतत् परिहासोऽथवा शुभे!।
दिनमेकमहं मन्ये त्वया सार्द्धमिहासितम् ॥")
शुतावरी। इति धरणिः, अमरश्च ॥ (यथा,—
"बहुपुत्री वरा भीरुः शतमूली शुतावरी।
महापुरुषदन्ता च पीवरीन्दीवरी वरी ॥"
इति वैद्यकरत्नमालायाम् ॥)
कण्टकारी। इति शब्दचन्द्रिका ॥ शुतपादिका। इति शब्दरत्नावली ॥ छाया। छाया। स्त्री। इति राजनिर्घण्टः ॥

भीरुः, पुं, (बिभेतीति। भी + क्रुः।) शृगालः। इति शब्दमाला ॥ व्याघ्रः। इति राजनिर्घण्टः ॥ इक्षुभेदः। इति रत्नमाला ॥ अस्य गुणाः। क्षयकारित्वम्। स्वादुत्वम्। अविदाहित्वम्। गुरुत्वञ्च। इति राजवल्लभः ॥

भीरुकं, क्ली, (भीरु + संज्ञायां कन्।) वनम्। इति शब्दरत्नावली ॥

भीरुकः, पुं, (भीरु + स्वार्थे संज्ञायां वा कन्।) मेषकः। इति शब्दरत्नावली ॥ इक्षुभेदः। भोरनी इति हिन्दीभाषा ॥ (यथा, सुश्रुते सूत्रस्थाने। ४५ अध्याये।
"पौण्ड्रको भीरुकश्चैव वंशकः शुतपोरकः।
कान्तारस्तापसेक्षुश्च काष्टेक्षुः सूचिपत्रकः ॥")

अस्य गुणाः। यथा, भावप्रकाशे।
"वातपित्तप्रशमनो मधुरो रसपाकयोः।
सुशीतो दृंहणो बल्यः पौण्ड्रको भीरुकक्षया ॥"

भीरुकः, त्रि, (बिभेतीति। भी भये + "भियः क्रुकन्।" उणा० २। ३१। इति क्रुकन्।) भययुक्तः। इत्यमरः ॥ कातरः। इति संक्षिप्तसारोणादिवृत्तिः ॥

भीरुपत्नी, स्त्री, (भीरूणीव पत्राण्यस्याः। गौरादित्वात् ङीष्।) शुतमूली। इत्यमरः। २। ४। १०१ ॥

भीरुहृदयः, पुं, (भीरु हृदयमस्य।) मृगः। इति जटाधरः ॥

भीरूः, स्त्री, (भीरु + "ऊङुतः।" ४। १। ६६। इति ऊङ्।) भयशीला नारी। इत्यमरटीकायां भरतः ॥

भीलभूषणा, स्त्री, (भूषयतीति। भूष् + कर्त्तरि ल्युः। टाप्। भीलानां भूषणा।) गुञ्जा। इति राजनिर्घण्टः ॥

भीलुः, त्रि, (बिभेतीति। भी + क्रु।) भीरुः। भयशीलः। इति शब्दरत्नावली ॥

भीलुकः, पुं, (बिभेतीति। भी + "भियः क्रुक्रुकनौ।" उ। २। १७४। इति क्रुकन्।) भीरुः। इत्यमरः। ३। १। २६ ॥ (यथा, कथासरित्सागरे। ३२। ५२।
"एतदेवानिमित्तं नः किमन्येनाध्वभीलुक!।
यत्त्वमस्माभिरानीतः काकशङ्की पदे पदे ॥")
भल्लुकः। इति शब्दरत्नावली ॥

भीषणः, पुं, (भीषयते इति। भी + णिच् + "भियो हेतुभये षुक्।" उ। ३। ४०। इति षुक्। भीषिधातुश्चुरादौ नन्द्यादित्वात् ल्युः।) भयानकरसः। इत्यमरटीकायां भरतः, मेदिनी च ॥ कुक्कुरुकः। कपोतः। हिन्तालः। इति राजनिर्घण्टः ॥ शिवः। इति शब्दरत्नावली। शल्लकी इति मेदिनी ॥ (भयोत्पादने क्ली, । यथा, महाभारते। १५। ७। ४।
"व्यसनं भेदनञ्चैव शूद्रणां कारयेत्ततः।
कर्षणं भीषणञ्चैव युद्धे चैव बलक्षयम् ॥")

भीषणः, त्रि, (भीषयते इति। भी + णिच् + ततो नन्द्यादित्वात् ल्युः। युगागमश्च।) गाढ़ः। दारुणः। इति मेदिनी। षे, ६६ ॥ (यथा, रघौ। १२। ४० ॥
"पर्णशालामथ क्षिप्रं विकृष्यासिः प्रविश्य सः।
वैरूप्यपौनरुक्त्येन भीषणां तामयोजयत् ॥")

भीष्मं, त्रि, (बिभेत्यस्मादिति। भी + "भियः ष्मुग् वा।" उणा०। १। १४७। इति ष्मक्। वा युगागमश्च।) भयानकम्। इत्यमरः। १। ७। २० ॥ (यथा, शुतपथब्राह्मणे। १२। ६। १। १।
"सहोवाच भीष्मं वत भोः पुरुषान् वा।"
"भीष्मं भयङ्करं।" इति तद्भाष्ये माधवः ॥)

भीष्मः, पुं, (बिभेत्यस्मादिति। भी + मक। यद्वा भीषयति पचे षुक्।) भयानकरसः। इत्यमरटीकायां भरतः ॥ शिवः। राक्षसः। हेमचन्द्रः। गाङ्गेयः। स च शान्तनुराज-

चक्रवर्त्तिनो गङ्गायां भार्य्यायां जातः। स परमधर्म्मात्मा महावीरः। येन पितुर्दाशकन्याविवाहार्थं पितराज्यं त्यक्तं, यश्च स्वस्य विवाहं त्यक्त्वा ऊर्द्धरेता जातः। इति श्रीभागवतम्॥
तस्योत्पत्तिर्यथा,—
"अथ तामप्यमे जाते पुत्रे प्रहसतीमिव।
उवाच राजा दुःखार्त्तः परीक्षन् सुतमात्मनः॥
मा वधीः कासि कस्यासि किञ्च हंसि सुतानिति।
पुत्रघ्नि! सुमहत् पापं संप्राप्तं ते सुगर्हिते!॥"
स्त्र्यवाच।
"पुत्रकाम! न ते ह्यस्मि पुत्रं पुत्रवतांवर!।
जौर्णस्तु मम वासोऽयं यथा स समयः कृतः॥
अहं गङ्गा जह्नुसुता महर्षिगणसेविता।
देवकार्य्यार्थमिद्यार्थमुषिताहं त्वया सह॥
अष्टौ ये वसवो देवा महाभागा महौजसः।
वशिष्ठशापदोषेण मानुषत्वमुपागताः॥
तेषां जनयिता नान्यस्त्वदृते भुवि विद्यते।
मद्विधा मानुषी धात्री लोके नास्ति कदाचन॥
तेषाञ्च जननीहेतोर्मानुषत्वमुपागता।
जनयित्वा वसूनष्टौ जिता लोकास्त्वयाऽचिरात्॥
देवानां समयस्त्वेष वसूनां संश्रुतो मया।
जातं जातं मोचयिष्यं जल्पतो मानुषादिति॥
तत्ते शापाद्विनिर्मुक्ता आपवस्य महात्मनः।
स्वस्ति तेऽस्तु गमिष्यामि पुत्रं पाहि महाव्रतम्॥
एष पर्य्यायवासो मे वसूनां सन्निधौ कृतः।
मत्प्रसूतं विजानीहि गङ्गादत्तमिमं सुतम्॥"
इत्यादिपुराणे भीष्मोत्पत्तिनाम १००अध्यायः॥
भीष्मजननी, स्त्री (भीष्मस्य जननी माता।) गङ्गा। इति राजनिर्घण्टः॥
भीष्मपञ्चकं, क्ली, (भीष्मेण कृतमुपदिष्टं वा पञ्चकं एकादश्यादिपूर्णिमान्तपञ्चतिथिकर्त्तव्यम्।) कार्त्तिकशुक्लपक्षीयैकादश्यादिपूर्णिमान्तपञ्चतिथिकर्त्तव्यव्रतविशेषः। यथा,—
श्रीनारद उवाच।
"भगवन्! यत् त्वया प्रोक्तं भीष्मस्य च हितं महत्।
माहात्म्यं श्रोतुमिच्छामि तस्य मे कथय प्रभो!॥
कथं स्नानञ्च किं दानं को विधिः कस्य पूजनम्।
किं पठ्यं केन वाकारि तन्मे कथय विस्तरात्॥"
ब्रह्मोवाच।
तद्भीष्मपञ्चकस्येदं माहात्म्यं विधिपूर्ब्बकम्।
वक्ष्यामि फलसंयुक्तं येनेदञ्च कृतं पुरा॥
अयोध्या नगरी वा च कलिकल्मषनाशिनी।
वैष्णवी सुरम्या च कलिकल्मषनाशिनी॥
हरण्यवरपक्षाद्या विष्णुचक्रपरिष्कृता।
तस्यामासीन्नरवरः सूर्य्यवंशोद्भवो सुने!॥
व्यलिपिनाम धैर्य्यः धर्म्मात्मा नैकयज्वजन्।
तेन दत्तं पुरा राज्ञा कृतं यज्ञमनुत्तमम्॥
भार्य्यया चन्द्रभाविद्या सार्द्धं भीष्मस्य पञ्चकम्।
विधीयः परिपप्रच्छ वशिष्ठं तन्निधौ द्विज!॥"

वशिष्ठ उवाच।
"शृणु राजन्! प्रवक्ष्यामि व्रतं सौभाग्यदायकम्।
रहस्यं भीष्मपञ्चाख्यं विष्णुतुष्टिप्रदायकम्॥
कार्त्तिके मासि राजेन्द्र! प्रारभ्येकादशीतिथिम्।
यावत् पञ्चदशी रम्या भविता चन्द्रपूरिता।
पञ्चभीष्ममिति ख्यातं तिथयः पुण्यदाः स्मृताः॥
प्रातःकाले समुत्थाय शौचं कृत्वा यथाविधि।
स्नात्वा सभार्य्यः पुरुषो नद्यादौ विमले जले॥
तर्पयेद्भीष्मवर्म्माणं कुरुवंशपितामहम्।
पितृभिस्सलयुक्तेन जलाञ्जलिभिरुद्धृतैः॥
वैयाघ्रपद्यगोत्राय साङ्कृतिप्रवराय च।
तिलतोयाञ्जलिं तस्मै प्रयच्छेद्भीष्मवर्म्मणे॥
सन्तर्प्य कौरवश्रेष्ठं कुर्य्यादाचमनं ततः।
अर्च्चयित्वा विधानेन चन्दनादिभिरादृतः।
अर्घ्यं दद्यादतात्मा च मन्त्रेणानेन भूपते!॥
वसूनामवताराय शान्तनोरात्मजाय च।
अर्घ्यं ददामि भीष्माय आजन्मब्रह्मचारिणे॥
इत्थं समापयेद्वत्स! भीष्मपञ्चविधिं नरः।
नियमेनोपवासेन पञ्चगव्येन वा पुनः॥
पयोमूलफलाहारैर्हविष्येणानाविधैरपि।
नरो वा यदि वा नारी सुकृतापो दिवं व्रजेत्॥
भुक्त्वा स विपुलान् भोगान् कार्त्तिकं न त्यजेद्धि यः।
अतोऽशक्तो नयेत् पञ्चभीष्माख्यं हरिपूरितम्॥
शृत्वेतद्विष्णुभक्तोऽसौ भक्त्या त्वत्सलया सह।
रम्यतो च यथा भीष्मं लब्ध्वा तौ तु महाफलम्॥
स्वल्पायासेन विप्रेन्द्र! कृतं ताभ्यां हि तत् पुरा।
प्राप्तं राज्यं महीमेतां समुद्रवलयान्विताम्॥
प्रभुज्य प्रचुरान् कामान् व्रतकामौ यथा सुने!।
दिव्याम्बराभरणौ तौ दिव्यमाल्यानुलेपितौ॥
दिव्यदेहविमानेन सर्व्वकिन्नरसेवितौ।
अप्सरोगीतनृत्येन स्तुतौ देवमहर्षिभिः।
सम्प्राप्तौ विष्णुलोकञ्च भीष्मपञ्चव्रतान्वितौ!॥"
ब्रह्मोवाच।
"इत्येतत् कथितं वत्स! माहात्म्यं कार्त्तिकोद्भवम्।
भीष्मपञ्चकमाहात्म्यं सेतिहासं पुरातनम्॥
तत् सर्व्वं कुरु विप्रेन्द्र! यदि ते भक्तिरच्युते।
निश्चलः कायमनसा वचसा सुमनीभव॥"
"शृण्वन्ति मर्त्याश्च पठन्ति ये वै
भूत्वञ्चमध्ये भगवद्गुणान् सुने!।
मतिश्च लभ्या भगवत्प्रणेयतः
कथासुपेन्द्रस्य पुरं प्रयान्ति।
कलिमलमपहृत्य प्राणिनो देवदेवं
सुभगमकलभोगान् भोजयित्वा च यान्ति।
हरिपुरममरेशैर्गीतवादैर्विशाले-
र्विधिसनकसनन्दस्तोत्रयन्ते हरिं ये॥
इत्यत्र कार्त्तिकमाहात्म्यं भक्त्या यः शृणुयान्नरः।
सर्व्वपापविनिर्मुक्तः स शुद्धिं लभते रतिम्॥"
इति पाद्मोत्तरखण्डे कार्त्तिकमाहात्म्ये १३२ अध्यायः॥

अपि च।
"सदा हरेर्व्रतं श्रेष्ठं ततः स्याद्विष्णुयाचने।
चातुर्म्मास्ये ततस्तस्मात् कार्त्तिके भीष्मपञ्चकम्॥
ततः श्रेष्ठतमं शुक्ल एकादश्यां समाचरेत्।
स्नायात्त्रिकालं पित्रादीन् यवादेरर्घ्यमेद्धरिम्॥
यजेन्मासौ घृताद्यैस्तु पञ्चगव्येन वारिभिः।
स्नापयित्वाथ कर्पूरसुखैश्चैवानुलेपयेत्॥
घृताक्तगुग्गुलोर्धूपं द्विजः पञ्चदिनं दहेत्।
नैवेद्यं परमान्नन्तु जपेदष्टोत्तरं शतम्॥
ॐ नमो वासुदेवाय घृतव्रीहितिलोदकम्।
षड्क्षरेण मन्त्रेण स्वाहान्तेन तु होमयेत्॥
प्रथमेऽह्नि हरेः पादौ यजेत् पञ्चेर्द्वितीयके।
विल्वपत्रैर्जानुदेशं नाभिं भृङ्गेण चापरे॥
स्कन्धौ विल्वैर्जवाभिश्च पञ्चमेऽह्नि शिरोऽर्चयेत्।
मालत्या भूमिशायी स्यान्नीमयं प्राशयेत् क्रमात्॥
गोदुग्धदधिघृतं च पञ्चमे पञ्चगव्यकम्।
नक्तं कुर्य्यात् पञ्चदश्यां व्रती स्याद्भुक्तिमुक्तिभाक्॥"
इति गारुडे भीष्मपञ्चादिव्रतं नाम १२३अध्यायः॥
वकपञ्चकम्। यथा,—
"आरभ्येकादशीं पञ्च दिनानि व्रतमाचरेत्।
भगवत् प्रीतये भीष्मपञ्चकं यदि शक्नुयात्॥
तथा धात्रीव्रतं पौर्णमास्यां कुर्व्वीत कार्त्तिके।
तथा नवम्यां शुक्लायामक्षयं नवमीव्रतम्॥
एतानष्टादशकृत्वः मासोपोषणमेव च।
समर्थः कार्त्तिके कुर्य्यात् ज्ञात्वा पाद्मादितो विधिम्॥"
इति श्रीहरिभक्तिविलासे १६ विलासः॥
भीष्मरत्नं, क्ली, (भीष्मं भयानकं रत्नं दुर्लभत्वात्।) हिमालयोत्तरदेशजातशुक्लवर्णप्रस्तरविशेषः। तस्योत्पत्त्यादि यथा,—
ईश्वर उवाच।
"हिमवत्युत्तरे देशे वौर्य्यं पतितं सुरद्विषस्तस्य।
सम्प्राप्तसत्त्वमानामाकरतां भीष्मरत्नानाम्॥
शुक्लाः शङ्खनिभाः श्लोनाकसन्निभाः प्रभावन्तः।
प्रभवन्ति ततस्तरुणा वज्रनिभा भीष्मपाषाणाः।
हिमाद्रिप्रतिबद्धं शुद्धमपि अहया विधत्ते यः।
भीष्मार्घ्यं शीर्षादिषु स सम्यदं सर्व्वदा लभते॥
गुणयुक्तस्य तस्यैव धारणाच्छृणिपुङ्गव!।
विषाणि तानि नश्यन्ति सर्व्वाण्येव महीतले॥"
विषमानाबाधन्ते ये तमरण्यनिवासिनः समीपेऽपि।
दीपिदृक्षशरभभल्लरसिंहव्याघ्रादयो हिंसाः॥
तस्योत्कवलितशक्तिनो भवन्ति भयं न चापि यस्मात्।
भीष्मार्घ्यशीर्षयुक्तः सम्यक् संप्राप्नाकृतिश्चितयः।
पितृतर्पणे पितॄणां तृप्तिर्भवुवार्षिकी भवति॥
ग्राम्यस्तुदृभृगाण्यपि सर्पाश्चापदृक्षिकविषाणि।
सलिलाग्निविरस्करभयानि भीमानि नश्यन्ति॥

सेवलवलाहकाभं परुषं पीतप्रभं प्रभाहीनम्।
मलिनद्युतिं विवर्णं दूरात् परिवर्जयेत् प्राज्ञः॥
मूल्यं प्रकल्पमेषां विबुधवरैर्देशकालविज्ञानात्।
दूरे भूतानां बहु किञ्चिन्निकटप्रस्तुतानाम्॥"
इति गारुडे भीष्मरत्नपरीक्षा नाम ७६ अः॥

भीष्मः, क्ली, (भीष्मं स्रुते प्रसूते इति। स्रु प्रसवे + क्विप्।) गङ्गा। इत्यमरः। १। १०। ३१॥

भीष्माष्टमी, स्त्री, (भीष्मस्य अष्टमी भीष्मनाम्निका अष्टमी वा।) माघशुक्लाष्टमी। तत्र भीष्मस्य तर्पणादिकं कर्त्तव्यम्। यथा, भविष्योत्तरे।
"शुक्लाष्टम्यान्तु माघस्य दद्याद्भीष्माय यो जलम्।
संवत्सरकृतं पापं तत्क्षणादेव नश्यति॥"
धवलधृता स्मृतिः।
"अष्टम्यान्तु सिते पक्षे भीष्माय तु तिलोदकम्।
अन्नञ्च विधिवद्दद्युः सर्व्वे वर्णा द्विजातयः॥"
सर्व्वे वर्णा इत्युपादानात् ब्राह्मणशूद्रयोरप्यधिकारः। द्विजातय इति सम्बोधनम्॥ स्मृतिरत्नाकरे विष्णुधर्म्मोत्तरम्।
"मध्याह्नव्यापिनी ग्राह्या आहे भीष्माष्टमी तिथिः।
स्नाने च तर्पणे दाने ग्राह्या सूर्य्योदयी परा॥
यदा कदाचित् कुर्म्मांशं गता सूर्य्योदयी परा।
पूर्व्वस्यामेव कर्त्तव्यं तर्पणं आह्निकञ्च॥
यदैकस्मिन् भवेन्मासि कदाचिन्माकरी द्वयम्।
भीष्माष्टमी द्वयं वापि तदा ग्राह्या परा तिथिः॥
ब्राह्मणस्वन्यवर्णानां यः करोत्यौर्द्धदेहिकम्।
तद्वर्णत्वमसौ याति इह लोके परत्र च॥"
इति मरीचिवचनन्तु भीष्मकल्पेतरपरम्॥
तथा च स्मृतिः।
"ब्राह्मणाद्यास्तु ये वर्णा दद्युर्भीष्माय नो जलम्।
संवत्सरकृतं पुण्यं तत्क्षणादेव नश्यति॥
अस्वर्ग्यखलदाननिषेधस्तु प्रकरणबलादपि भ्रात्रादिविषय इति श्रीदत्तः॥ तर्पणमन्त्रस्तु।
"वैयाघ्रपद्यगोत्राय सांकृतिप्रवराय च।
अपुत्राय ददाम्येतत् सलिलं भीष्मवर्म्मणे॥
भीष्मः शान्तनवो वीरः सत्यवादी जितेन्द्रियः।
आभिरद्भिरवाप्नोतु पुत्रपौत्रोचितां क्रियाम्॥"
इत्याश्वलायनः। पुत्रपौत्रोचितामित्यभिधानात् पितृकर्म्मरीत्या। ब्राह्मणः पितृतर्पणानन्तरं क्षत्रियस्तु ततः पूर्व्वं तर्पयेत्। इति संवत्सरप्रदीपादयः॥ इति तिथ्यादितत्त्वम्॥

भुक्त, त्रि, (भुज् + कर्म्मणि क्तः।) भक्षितम्। इत्यमरः। ३। २। ११॥ (यथा, मनुः। २।५५।
"पूजितं ह्यशनं नित्यं बलमूर्জ্জञ्च यच्छति।
अपूजितन्तु तद्भुक्तमुभयं नाशयेदिदम्॥"
उपभुक्तम्। यथा, रघुः। ४। ७।
"मनुप्रभृतिभिर्मान्यैर्भुक्ता यद्यपि राजभिः।
तथाप्यनन्यपूर्ब्बेव तस्मिन्नासीदनुन्धरा॥"
भावे क्तः।) भक्षणे, क्ली। इति विकाण्डशेषः॥ (यथा, रामायणे। २। ५८। १२।
"व्याप्तं ग्रथितं भुक्तं स्तुतं रामस्य कीर्त्तय।
कौविष्याग्नेयमेतेन ययातिरिव चाप्नुयु॥")

भुक्तसमुज्झितं, त्रि, (ह्यादौ भुक्तं पश्चात् समुज्झितं परित्यक्तम्। खातासुलिप्तवत्समासः।) पूर्व्वं भुक्तं तत् पेयं पश्चात् समुज्झितं त्यक्तम्। तत्पर्य्यायः। फेला २। इत्यमरः। २। ६।५६॥ पिण्डम् ३ फेलिः ४। इति भरतधृतरभसः॥

भुक्तिः, स्त्री, (भुज् + क्तिन्।) भोजनम्। इति शब्दरत्नावली॥ भोगः। यथा,—
"भुक्तिस्त्रिपुरुषी सिद्धेदपरेषां न संशयः।
अनिर्वृत्ते सपिण्डत्वे सकुल्यानां न सिद्ध्यति॥
आहर्त्ता श्रोत्रियेदुक्तिमागमश्चापि संवदि।
ततस्तुतो भुक्तिमेवैकां पौत्रादिषु न किञ्चन॥"
इति दायतत्त्वम्॥
(यथा, मनुः। ८। २५२।
"एतैर्लिङ्गैर्नयेत् सीमां राजा विवदमानयोः।
पूर्व्वभुक्त्या च सततमुदकस्यागमेन च॥")
रविभुक्तिर्यथा,—
"साढ्वेऽम्भसि मेषे वसुः साढ्वो घटे वृषे।
दशैव मकरे द्वन्द्वे पलानि प्रतिवासरम्।
कुलीरसिंहकन्यादातुलालिकार्म्मुकेषु च।
पलान्येकादश तथा रविभुक्तिं प्रचक्षते॥"
इति ज्योतीरत्नमालायाम्॥
भोगः। दखल इति पारस्यभाषा। सा च प्रमाणचतुष्टयान्तर्गतप्रमाणविशेषः। यथा। लिखितात्यभावे द्वियमाह याज्ञवल्क्यः।
"प्रमाणं लिखितं भुक्तिः साक्षिणश्चेति कीर्त्तितम्।
एषामन्यतमाभावे द्वियान्यतममुच्यते॥"
इति व्यवहारतत्त्वम्॥
तद्विवरणं यथा। अथ भुक्तिः। तच्च याज्ञवल्क्यः।
"पश्यतोऽब्रुवतो हानिर्भूमेर्विंशतिवार्षिकी।
परेण भुज्यमानाया धनस्य दशवार्षिकी॥"
विवादमकुर्व्वतः समक्षं भूस्वामिनः परेणासपिण्डादिना भुज्यमानाया भूमेर्विंशतिवर्षनिर्वृत्ता स्वत्वहानिः। अत्र लोकव्यवहारकर्म्मत्वाद्वर्षगणना सावनेन। यथा च विष्णुधर्म्मोत्तरम्।
"सत्त्वाख्युपास्यान्यत्र सावनेन
लौक्यञ्च यत् स्याद्व्यवहारकर्म्म॥"
तत्रैव।
"सावने च तथा मासि विंशत्या सूर्य्योदयाः स्मृताः॥"
इति॥
विशेषयति व्यासः।
"वर्षाणि विंशतिं यस्य भूर्भुंक्ता तु परैरिह।
सति राज्ञि समर्थस्य तस्य सेह न सिध्यति॥"
समर्थस्य बालत्वादिदोषरहितस्य। धनस्य दशवर्षनिर्वृत्ता स्वत्वहानिः। तथा च मनुनारदौ।
"यत्किञ्चिद्दशवर्षाणि सन्निधौ प्रेक्षते धनी।
भुज्यमानं परैरस्थिरो न च तल्लब्धुमर्हति॥"
यत्किञ्चिद्धनजातं समक्षमेव प्रीत्यादियतिरेकेण परैर्दशवर्षाणि भुज्यमानं स्वामी तूष्णीं प्रेक्षते मा भुज्यतामिति प्रतिषेधं न रचयति नासौ तल्लब्धुं योग्यो भवति तच्च तस्य स्वाम्यं नश्यतीत्यर्थः। गौतमः। अजडापौगण्डधनं दशवर्षभुक्तं परैः सन्निधौ भोक्तुरिति। जडो विकलेन्द्रियः। पौगण्डः पूर्णोऽनुत्पन्नश्मश्रुर्गण्डः कपोलो यस्य सः। तदाह नारदः—
"बाल आषोड़शाद्वर्षात् पौगण्डश्चापि
ग्रन्थते॥"
अत्रापौगण्डः प्रकीर्त्तित इति कुल्लूकभट्टेन लिखितम्। तत्पाठेऽपि अपौगण्डस्तु पौगण्ड इति द्विरूपकोषादविरोधः। तस्माद्याज्ञवल्क्यादिरिव वचनाद्दशवर्षविंशतिवर्षादिकालैर्भोग एव स्वत्वं जनयति। यथा कालप्राप्तिवशेन बीजमङ्कुरं जनयति तरवश्च कुसुममिति। स्वामिना चापरित्यक्तेऽपि ग्राह्योक्तकालीनभोगात् स्वाम्यमन्यस्य भवति। यथा जयेन राज्ञः परराष्ट्रधन इति। एवमेव श्रीकरवालोकजोग्लोकभवदेवभट्टशूलपाणिकुल्लूकभट्टचण्डेश्वरनयवर्द्धमानोपाध्यायप्रभृतयः॥ व्यवहारोऽप्येतादृगेव। एतद्विरुद्धवचनान्यन्यथा व्याख्येयानि। तत्रोपेक्षया स्वत्वहानिं भुक्त्वा च स्वत्वमाह नारदः—
"भुज्यमानान् परैरर्थान् यस्तान्मोहादुपेक्षते।
समक्षं तिष्ठतोऽप्यस्य तान् भुक्तिः कुरुते बले॥"
यत्तमाह बृहस्पतिः—
"स्थावरं विंशतिं प्राप्तो भुक्त्वा हानिमुपेक्षया।"
उपेक्षया क्षमया। तत्कारणञ्च स्वामिनः सुशीलत्वमहेच्छत्वदयालुत्वादि। एवञ्च विंशतिवर्षात् पूर्व्वं स्वकृतिसाध्यकर्षणपालनाद्यैरुत्पन्नस्य एव स्वत्वम्। एवं दशवर्षात् पूर्व्वं स्वकृतिसाध्यदोहनपालनाद्यैरुत्पन्नदुग्धादौ एव स्वत्वम्। तत्तत्कालपरतस्तु भूमौ गवादिधने च स्वत्वमिति। पूर्व्वं तत्तन्नाशकभोगे तु चौर्य्यदोषो भवत्येव॥ * ॥ भोगे तु स्वत्वहानिमाधादीनां व्यावर्णयति पश्यतोऽब्रुवत इत्यभिधाय याज्ञवल्क्यः—
"आधिसीमोपनिःक्षेपजड़बालधनैर्विना।
तथोपनिधिराजस्त्रीश्रोत्रियाणां धनैरपि॥"
आधिर्बन्धकद्रव्यम्। उपनिःक्षेपः।
"वासनस्यमनाख्याय समुद्रं यन्निधीयते॥"
इति नारदोक्तेः॥
वासनस्यं निःक्षेपाधारभूतसमुदादिद्रव्यम्। समुद्रं मञ्जूषादिद्रव्यम्। जड़ो बुद्धिविकलः। बालोऽप्राप्तषोड़शवर्षः। उपनिधिः प्रीत्या भोगार्थमर्पितः। ततश्च आधादिभिर्जड़ादिधनैश्च विना अन्यानि धनानि उक्तभोगकालेन स्वामिनो नश्यन्ति एतानि तु स्वामिनो न नश्यन्ति न वा भोक्तुर्भवन्ति॥ * ॥ मिताक्षरायां स्मृतिः—
"द्वारमार्गक्रियाभोगबलवाद्यादिषु क्रिया।
भुक्तिरेव तु गुर्व्वी स्यान्न दिवं न च साक्षिणः॥"

भुक्तिः

याज्ञवल्क्यः ।
"आगमो ह्यधिको भोगादिना पूर्व्वक्रमागतात् ।
नागमः कारणं तत्र भुक्तिः स्तोकापि यत्र नो ॥
आगमस्तु कृतो येन सोऽभियुक्तस्तदुद्धरेत् ।
न तत्सुतस्तत्सुतो वा भुक्तिस्तत्र गरीयसी ॥
योऽभियुक्तः परेत: स्यात्तस्य रिक्थी तदुद्धरेत्।
न तत्र कारणं भुक्तिरागमेन विना कृता ॥"
भूम्यादावागमः पूर्व्वपुरुषक्रमादागतभोगाद्-बलवान् । यतः क्रमागतभोग आगमादबलवान् ।
तथा च बृहस्पतिः—
"अनुमानाद्गुरुः साक्षी साक्षिभ्यो लिखितं गुरु ।
तथाप्यहता त्रिपुरुषी भुक्तिस्तेभ्यो गरीयसी ॥"
त्रिपुरुषभोगमाह व्यासः—
"प्रपितामहेन यद्भुक्तं तत्पुत्रेण विना च तम् ।
तौ विना यस्य पित्रा च तस्य भोगस्त्रिपौरुषः॥
पिता पितामहो यस्य जीवेच्च प्रपितामहः ।
तयाणां जीवतां भोगो विज्ञेयस्त्रैकपूरुषः ॥"
आगमोऽपि बलवान् भवति यत्र स्तोकापि भुक्तिर्नास्ति । तथा च नारदः ।
"विद्यमानेऽपि लिखिते जीवत्स्वपि च साक्षिषु ।
पित्रोपेतः स्थावराणां यन्न भुक्तं न तत् स्थिरम् ॥"
इति दीपकलिका ॥
यत्र वादिन्यौ स्वस्वागमबलप्रवृत्तौ आगमयोश्च पूर्व्वापरभावो न निश्चीयते तत्र यस्य भुक्तिस्तस्यागमो बलीयान् न त्वन्यस्येत्यर्थ इति मिताक्षरा ॥ अर्थात् यत्रागमपौर्व्वापर्य्यनिश्चयस्तत्र ।
"सर्व्वेष्वेव विवादेषु बलवत्युत्तरा क्रिया ।
आधौ प्रतिग्रहे क्रीते पूर्व्वा तु बलवत्तरा ॥"
इति याज्ञवल्क्यवचनान्निर्णयः ॥
आगम्यतेऽनेन वा सम्यगुगम्यते प्राप्यते स्वं भवति येन क्रयादिना स आगम इति व्यवहारमालिकाः । आगमः साक्षिपत्रादिकमिति याज्ञवल्क्यदीपकलिका ॥ आगमो धनोपार्জ্জनोपायः क्रयादिरिति मैथिलाः ॥ तत्रान्येनाभियुक्त आगमकर्त्ता तत्कूटतासुद्धरेत्तत्पुत्रपौत्रौ नागमसुद्धरेतां किन्तु भुक्तिरेव तत्र प्रमाणम्। विज्ञापयति बृहस्पतिः ।
"आहर्त्ता शोधयेद्भुक्तिमागमस्यापि संसदि ।
ततस्ततो भुक्तिमेवैकां पौत्रादिषु न किञ्चन ॥"
इति मूलपाणिधृतम् ॥
तत्पुत्रादौ न किञ्चनेति मैथिलधृतम् ॥ आहर्त्ता अर्জ্জनकर्त्ता । अत्र पुत्रस्य भुक्तिशोधनमात्रम् । भुक्तिशोधनमाहतुर्व्यासकात्यायनौ ।
"आगमो दीर्घकालस्य निन्दितोऽल्पश्च भोक्तृतः ।
प्रत्यर्थिसन्निधानस्य पश्चाद्भोग इष्यते ॥"
प्रमाणमिति शेषः । आगमः क्रयादियुक्तः । एष च भूमिविषयकविंशतिवर्षधनविषयकदशवर्षान्यूनकालभोगपरः । योऽभियुक्त इति यो भोगे क्रियमाणे परेणाभियुक्तः परेतो मृतः न्यूनागमसमुद्धरणात् तदा तत्पुत्रादिरेव तदुद्धरेत् । तथाह नारदः ।
"अधारूढविवादस्य प्रेतस्य व्यवहारिणः ।
पुत्रेण सोऽर्थः संशोध्यो न तु भोगो निवर्त्तयेत् ॥
भोगः केवलभोगः । तथा च स एव । आदौ तु कारणं दानं पश्चाद्भुक्तिस्तु सागमेति । एष स विवादभोगः षष्ठाब्देतरपरः । तथाविधभोगस्यागमं विनापि प्रामाण्यात् । तथा च व्यासः ।
"वर्षाणि विंशतिं भुक्ता स्वामिनाध्याहता सती ।
भुक्तिः सा पौरुषी भूमेर्द्विगुणा तु द्विपौरुषी ॥
त्रिपौरुषी तु त्रिगुणा न तत्रान्वेष्य आगमः ॥"
एतद्वचनमसमञ्जभोगविषयकमिति समञ्जविंशतिवर्षभोगविषयकवचनेनाविरुद्धम् । एतादृक्क्षुद्भुक्तकाश्च एव कात्यायनः ।
"साम्प्रतेकाले क्रिया भूमेः सागमा भुक्तिरिष्यते ।
असार्त्ते त्वागमाभावात् क्रमात्त्रिपुरुषागता ॥"
षष्टिवर्षैकपुरुषभुक्तौ त्रिपुरुषभुक्तिव्यपदेशस्य फलमाह न तत्रेत्यादि । अतएव नारदः ।
"अन्यायेन तु यद्भुक्तं पित्रा पूर्व्वतरैरपि ।
न तच्छक्यमपाकर्त्तुं क्रमात्त्रिपुरुषागतम् ॥"
अन्यायेनत्यत्रानागमेमिति शूलपाणिधृतपाठः । तुरुष्यर्थः । पित्रा सह पितरमादा त्रिभिरित्यर्थः । यत्तु ।
"अनागमन्तु यो भुङ्क्ते वर्षाण्यब्दशतान्यपि ।
चौरदण्डेन तं पापं दण्डयेदवनीपतिः ॥"
इति दण्डविधायकव्यासवचनं तदुर्म्मग्राह्यविरोधात् न सुग्राह्यार्थपरम् । तदाह स एव ।
"यत्र विप्रतिपत्तिः स्याद्धर्म्मग्राह्यार्थग्राह्ययोः ।
अर्थग्राह्यार्थसत्यस्य धर्म्मग्राह्यार्थमाचरेत् ॥"
एवमेव शूलपाणिः । वस्तुतस्तु अनागममिति दण्डविधायकवचनं स्त्रीधननरेन्द्रधनपरम् ।
"स्त्रीधनञ्च नरेन्द्राणां न कदाचन जीर्य्यति ।
अनागमं भुज्यमानमपि वर्षशतैरपि ॥"
इति स्मृत्यनिषेधकनारदवचनैकवाक्यत्वात् । यत्र विप्रतिपत्तिः स्यादिति वचनस्यार्थतदुदाहरणम् । यत्रैकस्य भवेदवधार्य्यमाणे मित्रलब्धिरपरस्य भवेदवधार्य्यमाणे धनलब्धिश्च ।
"हिरण्यभूमिलाभेभ्यो मित्रलब्धिर्वरा यतः ।
अतो यतेत तत्प्राप्तावित्ति वेदविदां मतम् ॥"
इति याज्ञवल्क्योक्तार्थग्राह्यसत्यस्य क्रोधलोभविवर्জ্জित इति धर्म्मग्राह्यमवलम्ब्य व्यवहारं पश्येत् । अतएव ।
"सभ्यैरावश्यवक्तव्यं धर्म्मार्थसहितं वचः ॥"
इति कात्यायनोक्तमिति । भवदेवस्तु व्यासवचनन्तु प्रतिवादिनोऽसन्निधाने पुरुषैकदृश्यभोगाभिप्रायं त्रैपुरुषिकभोगस्य तत्रापि प्रमाणत्वादित्याहुः ॥

अथ भुक्तिस्वत्वापवादः ।

तत्र बृहस्पतिः ।
"भुक्तिस्त्रैपुरुषी सिद्धेदपरेषां न संशयः ।
अनिवृत्तौ सपिण्डत्वे सकृत्यागान्न सिध्यति ॥
अस्वामिना च यद्भुक्तं गृहक्षेत्रोपधादिकम् ।
सकृद्दृष्टमसङ्कल्पं न तद्भोगेन सीयते ॥

भुक्तिः

विवाह्य श्रोत्रियेभ्यश्च राज्ञामात्येभ्य एव च ।
सुदीर्घेणापि कालेन तेषां तत्तु न सिद्ध्यति ॥"
आपणो विक्रयस्थानम् । विवाह्यो जामाता ।
इति च व्यवहारतत्त्वम् ॥

भुज्

भुक्तिप्रदः, पुं, (भुक्तिं भोगं प्रददातीति । प्र+दा+"आतश्चोपसर्गे ।" ३ । १ । १३६ । इति कः ।) सुहृत् । इति राजनिर्घण्टः ॥ भोगदातरि, त्रि ॥

भुग्नः, त्रि, (भुज मोटने+क्तः । "ओदितश्च ।" ८ । २ । ४५ । इति निष्ठातस्य नः ।) रोगादिना कुटिलीकृतः । तत्पर्य्यायः । रुग्नः २ । इत्यमरः । ३ । १ । ६१ ॥ वक्रः । इति भुजधात्वर्थदर्शनात् । (यथा,—
"साम्रगणी कलुषे रक्ते भुग्ने लुलितपक्ष्मणी ।
अक्ष्णी पिण्डिकापार्श्वस्पर्शपर्व्वास्थिरुग्भ्रमः ॥"
इति वाभटे निदानस्थाने द्वितीयेऽध्याये ॥
यथा, च भट्टिः । ११ । ८ ।
"पीने भटस्योरसि वीक्ष्य भुग्नां
स्तनुत्वचः पाणिरुहान् सुमध्या ॥")

भुज, ओ प्र औ वक्रगौ । इति कविकल्पद्रुमः ॥ (तुदा०-पर०-सक०-अनिट् ।) वक्रयमिति वक्रं करोतीति औ रूपम् । ओ, भुग्नः । प्र, भुजति लतां वायुः । औ, भोक्ता । इति दुर्गादासः ॥

भुज, ध औ त्राणे । भक्षे । इति कविकल्पद्रुमः ॥ (रुधा०-पर०-सक०-अनिट् ।) ध, भुनक्ति । औ, अभौक्षीत् । त्राणं पालनम् उपभोगश्च तस्मात् पालने परस्मैपदम् । इति बोधम् । भुनक्ति पृथिवीं राजा पालयतीत्यर्थः । उपभोगे तु दृष्टो जनो दुःखप्लुतानि भुङ्क्ते इति । दिवं मरुत्वानिव भोक्ष्यते महीमिति रघुः । एवं सुखमुपभुङ्क्ते इत्यादि च बोध्यम् । भुजोऽभ्यूने इत्यत्र भक्षणमात्रस्य गृहीतोऽपि उपभोगस्य भक्षणजन्यतृप्तिजनकत्वविवक्षया सिद्धिरिति विद्यानिवासः । इति दुर्गादासः ॥

भुजः, पुं स्त्री, (भुजति वक्रो भवतीति । भुज+"इगुपधज्ञेति ।" ३ । १ । १३५ । इति कः । यद्वा, भुज्यतेऽनेनेति । भुज+"हलश्चेति ।" ३ । ३ । १२१ । इति घञ् । इत्यत्र काशिकोक्तेः घञ् । "भुजन्युजौ पाण्युपतापयोः ।" ७ । ३ । ९१ । इति घञि गुणाभावः कुत्वाभावश्च निपात्यते ।) तत्पर्य्यायः । बाहुः २ प्रवेष्टः ३ दोः ४ । इत्यमरः । २ । ६ । ८० ॥ बाहुः ५ बाहा ६ भुजा ७ दोषः ८ दोया ९ । इत्यमरटीकायां भरतः ॥ करः १० । इति मेदिनी । ले, १३ ॥ (यथा, रघुः । २ । ७४ ।
"भुग्ने भुजङ्गेन्द्रसमागसारे
भूयः स भूमेर्धुरमासमङ्क ॥")
तस्य शुभाशुभलक्षणम् यथा,—
"कक्षा बाहुदला श्रेष्ठा लग्नन्यूनैरोमिका ।
अन्यथा अर्थहीनानामसौ निःस्वस्य रोमशौ ।
निर्मांसौ वैद्य सुमार्गौ द्विधौ च विधनौ भुजौ ।

भुजङ्गः

आजानुलम्बिनौ बाहू दृष्टौ यौनौ नृपेश्वरे ।
निःमानां सोमसूनौ द्वन्द्वौ श्रेष्ठौ करिकरप्रभौ ।"
इति गारुडे ६६ अध्यायः ।

(दक्षिणभुजः । यथा, महाभारते ।३।२०।२१।
"नकुलस्य नागस्य समीपपरिवर्त्तिनः ।
नविषार्थं भुजं स्पृष्टे खड्गेन निरकृन्तत ।")
सर्पस्पर्शीकरणार्थं राशित्रयादूनकेन्द्रगृहादिः ।
राशित्रयादधिकनवपर्य्यन्तषड्लग्नादिगतग्रहः ।
नवराशिभ्योऽधिकं चेत् तदा द्वादशराशिभ्यः
शीर्षश्च भुजः स्यात् । यथा,—
"दीक्षितभोगं त्रिभोर्द्वं विप्रेष्यं रसे-
षुक्रतोऽष्टाधिकं स्याद्भुजोनं त्रिभम् ।
कोटिरेकैकं त्रिभैः स्यात् पदं
सर्व्वमन्दोच्चमष्टाद्यो वा भवेत् ॥"
इति ग्रहलाघवम् ॥
क्षेत्रस्य परिमाणविशेषः । यथा,—
"कोटिश्चतुर्थ्यं यत्र दोःक्षयं तत्र का श्रुतिः ।
कोटिं दोः कर्णतः कोटिश्रुतिभ्यां भुजं वद ॥
इष्टो बाहुर्यः स्यात्तत्सहितां दिशोतरो बाहुः ।
त्रासे चतुरस्रे वा या कोटिः कीर्त्तिता तज्ज्ञैः ॥
तत्कृत्योर्योगपदं कर्णः दोः कर्णवर्गयोर्विवरात् ।
मूलं कोटिः तच्छ्रुतिकृत्योरन्तरात् पदं बाहुः ॥"
इति लीलावत्यां क्षेत्रव्यवहारः ॥

भुजकोटरः, पुं, (भुजस्य कोटर इव ।) कक्षः ।
इति हेमचन्द्रः । ५ । २५३ ॥

भुजगः, पुं, (भुजं वक्रं गच्छतीति । गम् + डः । ३ । २ । ३८ । इत्यत्र "खच डिदवाद्यः ।" वार्त्तिकोक्तेः डित् । ततः टिलोपः ।) सर्पः । इत्यमरः । १ । ८ । ६ ॥ (यथा, मेघदूते । ६२ ।
"तस्मिन् हित्वा भुजगवलयं शम्भुना दत्तहस्ता ।
क्रीड़ाशैले यदि च विचरेत् पादचारेण गौरी ॥")

भुजगदारयः, पुं, (भुजगं दारयतीति । दृ + णिच् + ल्युः ।) गरुड़ः । इति राजनिर्घण्टः ॥

भुजगाभोजी, [न्] पुं, (भुजगं व्या सम्यक्प्रकारेण भुङ्क्ते इति । भुजग + व्या + भुज + णिनिः ।) मयूरः । इति राजनिर्घण्टः ॥

भुजगाशनकः, पुं, (भुजगस्य अशनकः ।) गरुड़ः । इति राजनिर्घण्टः ॥

भुजगाशनः, पुं, (भुजगमश्नातीति । अश + ल्युः । भुजगः अशनं यस्येति वा ।) गरुड़ः । इति त्रिकाण्डशेषः ॥

भुजङ्गः, पुं. (भुजं वक्रं गच्छतीति । गम + खच् । "खच डिदाद्य" इति वार्त्तिं डित्त्वपक्षे टिलोपः ।) सर्पः । (यथा, रघुः । ६ । ७६ ।
"आक्रान्तपूर्व्वमिव सूक्ष्मविषं भुजङ्गं
प्रोवाच कोशलपतिः प्रथमापराद्धः ।")
शिवगुरुः । इत्यमरः । १ । ८ । ६ । मेदिनी च ॥
(नीलम् । तद्यथा,—
"नीलं यशश्च वपुश्च योगेशं नागनामकम् ॥"
नागनामकम् । नागः भुजङ्ग इत्यादि ।)
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
अश्वत्थ वृक्षे ।

भुजङ्गा

"त्रिंशद्भागा भुजङ्गस्य गत्यपाद्यार्य्यपञ्चकम् ॥
सुरताख्यकयोर्द्वौ द्वौ वङ्क्षस्थोऽङ्गनाह्वयम् ।
अन्यस्थीकृतं घातं पक्षं विमलमङ्गनम् ॥"
इति वाभटे उत्तरतन्त्रे त्रयोदशोऽध्याये ॥)

भुजङ्घातिनी, स्त्री, (भुजङ्गं सर्पं तद्विषं वा हन्तीति । हन + णिनिः । स्त्रियां ङीप् ।) वृक्षविशेषः । कट्वालिका इति ख्यातः । तत्पर्य्यायः । खरिः २ सर्पाक्षी ३ क्षुत्करी ४ सूक्ष्मा ५ । इति शब्दचन्द्रिका ॥ सर्पनाशिनी च ॥

भुजङ्गजिह्वा, स्त्री, (भुजङ्गस्य जिह्वेव आकृतिर्यस्याः ।) महासमङ्गा । इति राजनिर्घण्टः ॥ (भुजङ्गस्य जिह्वा ।) सर्परसना च ॥ (विवरणमस्या महासमङ्गाशब्दे ज्ञातव्यम् ॥)

भुजङ्गप्रयातं, क्ली, (भुजङ्गवत्प्रयातं गतिरिव भङ्गीमान् शब्दविन्यासो यस्य ।) द्वादशाक्षरपादच्छन्दः । यथा, कालिदासकृतश्रुतबोधे ।
"यदाद्यचतुर्थैन्तथा सप्तमेषु-
तथैवाक्षरं ह्रस्वमेकादशाद्यम् ।
शरेन्द्रविद्वेषिवक्त्रारविन्दे
तदुक्तं कवीन्द्रैर्भुजङ्गप्रयातम् ॥"
(अधिकन्तु छन्दःशब्दे ज्ञातव्यम् ।)

भुजङ्गभुक्, [ज्] पुं, (भुजङ्गं भुङ्क्ते इति । भुज् + क्विप् ।) गरुड़ः । इति शब्दरत्नावली ॥ मयूरः । इत्यमरः । २ । ५ । ३० ॥ (मयूरार्थे पर्य्यायो यथा,—
"मयूरचन्द्रकी केकी मेघनादो भुजङ्गभुक् ।
शिखी शिखावलो बर्हो शिखण्डी नीलकण्ठकः ॥
रुक्मोपाङ्गः कलापी च मेघनादः कलाप्यपि ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥)

भुजङ्गभोजी, [न्] पुं, (भुजङ्गं भुङ्क्ते इति । भुज् + णिनिः ।) राजसर्षः । इति हेमचन्द्रः ॥

भुजङ्गमः, पुं, (भुज कौटिल्ये + द्युप्रधेति कः । भुजः कुटिलीभवन् गच्छतीति । भुज + गम् + "गमेः सुपि वाच्यः ।" ३ । १ । ३८८ । इत्यस्य वार्त्तिकात् खच् । "खचडिदाद्यः ।" इति डिद्भावे टिलोपाभावः ।) सर्पः । इत्यमरः । १ । ८ । ६ । (यथा, रघुः । ६ । ७७ ।
"आरूढमदोद्धतं वितीर्य्य
भुजङ्गमानां वसतिं प्रविष्टम् ॥")
सीसके, क्ली । इति राजनिर्घण्टः ॥

भुजङ्गलता, स्त्री, (भुजङ्गवत् कुटिला तत्प्रिया वा लता ।) नागवल्ली । इति राजनिर्घण्टः ॥

भुजङ्गहा, [न्] पुं, (भुजङ्गं हन्तीति । हन् + क्विप् ।) गरुड़ः । इति त्रिकाण्डशेषः ॥

भुजङ्गाक्षी, स्त्री, (भुजङ्गस्य अक्षीव पृथ्वी यस्याः । "अक्ष्णोदर्शनात् ।" ५ । ४ । ७६ । इति अच् । गौरादित्वात् ङीप् ।) रास्ना । इत्यमरः । २ । ४ । ११५ ॥ (रास्ना भेदनाद इति लोके । तथास्याः पर्य्यायान्तरम् ।
"नाकुली सरसा नागगन्धा गन्धनाकुली ।
रक्तपेढा सुगन्धाली सर्पाक्षी विषनाशिनी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

भुजिष्या

भुजङ्गाक्षः, पुं, (भुजङ्गस्य अक्षीव अक्षी यस्य ।) नागकेशरः । इति शब्दमाला सर्पनामकोषे, त्रि ॥

भुजशिरः, [स्] क्ली, (भुजस्य शिर इव ।) स्कन्धः । इत्यमरः ॥ २ । ६ । ७८ ॥

भुजा, स्त्री, (भुज + टाप् ।) बाहुः । करः । इति मेदिनी । जे, १३ ॥ (यथा, शिशुपालवधे ।७।७१।
"अविरतकुसुमावचायखेदा
न्निहितभुजालतयैकयोपकण्ठम् ॥")

भुजाकण्टः, पुं, (भुजायाः करस्य कण्ट इव ।) हस्तनखः । इति हेमचन्द्रः ॥

भुजादलः, पुं, (भुजाया बाहोर्दल इव ।) हस्तः । इति त्रिकाण्डशेषः ॥

भुजान्तरं, क्ली, (भुजयोरन्तरं मध्यम् ।) क्रोड़म् । इत्यमरः । २ । ६ । ७७ ॥ (वक्षः । यथा, रघुः । ३ । ५४ ॥
"दिलीपसूनोः स बृहद्भुजान्तरं
प्रविश्य भीमासुरशोणितोचितः ।
पपावनास्वादितपूर्व्वमाशुगः
कुतूहलेनेव मनुष्यशोणितम् ॥")
भुजस्यान्तरं प्रभेदः ।) हस्तप्रभेदश्च ॥

भुजिः, पुं, (भुनक्ति भुङ्क्ते वा सर्व्वानिति । भुज + "भुजेः किच्च ।" उणा० ४ । १४१ । इति इः । स च कित् । सर्व्वभक्षकत्वादस्य तथात्वम् ।) वह्निः । इत्युणादिकोषः ॥ (भुज + भावे इः । भोगः । यथा, ऋग्वेदे । ८ । ६१ । ६ ।
"आसवं सवितुर्यथा भगस्येव भुजिं हुवे ।
अग्निं समुद्रवाससम् ॥"
"सवितुः प्रेरकस्य देवस्य सवं यथा प्रसवमिव भगस्येव भुजिं भगाख्यस्य देवस्य भोगमिव च समुद्र वाससमग्निं आहुवे आह्वयामि ।" इति तद्भाष्ये सायनः ॥ * ॥ भोक्तरि, त्रि । यथा, ऋग्वेदे । ८ । ८ । २ ।
"भुजी हिरण्यपेशसा कवी गम्भीरचेतसा ॥"
"हे भुजी हविषां भोक्तारौ ।" इति तद्भाष्ये सायनः ॥)

भुजिष्यः, पुं, (भुङ्क्ते स्वाम्युच्छिष्टमिति भुज्यते इति वा भुज + "रुचिभुजिभ्यां किष्यन् ।" उणा० ४ । १७८ । इति किष्यन् ।) स्वतन्त्रः । हस्तस्थत्रम् । दासः । इति मेदिनी । षे, ६८ ॥ (यथा, माघे । १५ । ६३ ।
"किमहो नृपाः सममसौमि-
रुपपतिसूतेन पञ्चभिः ।
वधमभिहत भुजिष्यमसुं
सह चानया स्वविरराजकन्यया ॥")
रोगः । इति संक्षिप्तसारोणादिवृत्तिः ॥

भुजिष्या, स्त्री, (भुजिष्य + टाप् ।) दासी । (यथा, रघुः । ६ । ५३ ।
"अथाङ्गदाश्लिष्टभुजं भुजिष्या
हेमाङ्गदं नाम कलिङ्गनाथम् ।
आसेदुषीं सादितशत्रुपक्षं
बालामवाचेन्दुमुखीं बभाषे ॥")
गणिका । इति मेदिनी । षे, ६८ ॥

भुज्युः, पुं, (भुज्यतेऽत्रेति। भुज भक्षणे + "भुजि न्दृभ्यां युक्तुकौ।" उणा० ३। २१। इति युक्।) भाजनम्। इत्युणादिकोषः। २। २०३॥ भाजनम्। (भुङ्क्ते सर्व्वानिति। भुज + कर्त्तरि युक्।) अग्निः। इति संक्षिप्तसारोणादिवृत्तिः॥ (स्वनामख्यातराजविशेषः। यथा, ऋग्वेदे। ४। २७। ४।

"अजिष्य इन्द्रावतो न भुज्युं
श्येनो जभार दृहतो अधिष्णोः॥"

भुनक्ति पालयतीति। भुज पालने + युक्। रक्षके, त्रि। यथा, ऋग्वेदे। ८। २२। २।

"पूर्व्यापूर्व्यं सुहवं पुरुस्पृहं भुज्युं वाजेषु पूर्व्यम्॥"

"भुज्युं भुजपालने सर्व्वस्य रक्षकम्॥" इति तद्भाष्ये सायनः॥)

भुञ्जन्, [त्] त्रि, (भुज् + शतृ।) भोगकर्त्ता। भुजधातोः शतृप्रत्ययनिष्पन्नोऽयम्॥

भुञ्जानः, पुं, (भुज् + शानच्।) भोगकर्त्ता। यथा,—

"भुञ्जानो वर्द्धयेत् प्राममसत्यं संवदन् ब्रुवन्।"
इति प्रायश्चित्ततत्त्वम्॥

(तथा च।

"अग्नितप्तोदकं पीत्वा भुञ्जानश्चान्तरा पिबेत्॥"
इति सुश्रुते शारीरस्थाने। ४६ अ,॥)

भुरिक्, [ज्] स्त्री, (भरति सर्व्वं धरतीति। भृञ् + "भृञ उच्च।" उणा० २। ७२। इति इजिः। धातोरुकारान्तादेशः।) पृथिवी। इत्युणादिकोषः॥ (द्विवचनान्तत्वे। बाहू। द्यावापृथिव्यौ च। यथा, ऋग्वेदे। ४। २। १४।

"रथं न क्रन्तो अपसा भुरिजो
र्ऋतं येमुः सुध्य आशुषाणाः॥"

"भुरिजोः विभृतः कर्म्मकरणसामर्थ्यं पदार्थान् येति भुरिजौ बाहू तयोः। यद्वा, भुरिजोः द्यावापृथिव्योः देवान् मनुष्यांश्च बिभृत इति भुरिजौ द्यावापृथिव्यौ।" इति तद्भाष्ये सायनः॥)

भुवर्, क्ली, (भवन्त्यस्मिन् भूतानीति। भू + "भूरुधृभ्रसृभ्यश्छन्दसि।" उणा० २। ८०। इत्यत्र बहुलवचनाद्डायामपि प्रयुज्यते।" इत्युज्ज्वलः। लोका वसुः।) जगत्। (यथा, भट्टिः। १। १।

"गुणैर्वरं भुवनहितक्षमेण यं
सनातनः पितरमुपागमत् स्वयम्॥")

सलिलम्। गगनम्। जनः। इति मेदिनी। ने, १०२॥ चतुर्दशभुवनानि यथा,—

"चतुर्दशविधं ह्येतद् भूतसर्गं प्रकीर्त्तितम्।
भूर्भुवः स्वर्महश्चैव जनश्च तप एव च॥
सत्यलोकश्च सप्तैते लोकास्तु परिकीर्त्तिताः।
अम्भः शाकः कुशः क्रौञ्चः शाल्मलो मेदपुष्करः॥
सप्तद्वीपाः प्रधानानि क्षुपद्वीपेषु संयुताः॥
लवणः क्षीरसंज्ञश्च घृतोदो दधिसंज्ञकः।
सरोदेक्षुरसोदौ च स्वादूदः सप्तमो भवेत्।
चत्वारः सागराः स्यातः पुष्करिण्यश्च ताः स्मृताः॥
उत्तराः कुरवो रम्यं वर्षं हैमवतं तथा।
भद्राश्वं केतुमालञ्च तथा वर्षमिलावृतम्॥
भारतं हरिवर्षञ्च तथा किंपुरुषाह्वयम्।
एतान्यष्टौ तु वर्षाणि पुण्यानि कथितानि तु॥
इन्द्रद्युम्नः कसेरुश्च ताम्रवर्णो गभस्तिमान्।
नागद्वीपो तथा सौम्यो गन्धर्व्वो वारुणस्तथा॥
सागराख्यस्तु नवमो मेदभारतवार्षिकः।
इदन्तु भारतं वर्षं कर्म्मभूमिरिति स्मृतम्॥
शेषाणि द्वीपवर्षाणि भोगस्थानानि सन्त्यपि।
भागीरथी पावनी च हरदिनी हरादिनी तथा॥
सीता वंक्षुश्च सिन्धुश्च सप्त गङ्गाः प्रकीर्त्तिताः।
सुप्रभा काञ्चनी चैव विशाला सुमनोहरा॥
सरस्वतीघनादा च सुवेणुर्विमलोदका।
एता गङ्गास्तु विख्याताः सप्त पुण्यप्रदाः शुभाः॥
हिमवान् हेमकूटश्च निषधो नीलपर्व्वतः।
श्वेतश्च शृङ्गवान्मेरुर्माल्यवान् गन्धमादनः॥
महेन्द्रो मलयः सह्यः शुक्तिमाञ्ऋक्षवानपि।
विन्ध्यश्च पारियात्रश्च कैलासो मन्दरस्तथा॥
लोकालोको महांश्चैव तथैवोत्तरमानसः।
एते विंशतिर्विख्याताः पर्व्वतास्तत्र वराः॥
अतलं सुतलञ्चैव वितलञ्च गभस्तिमत्।
महातलं रसातलं पातालं सप्तमं स्मृतम्॥
रक्तभौमं शिलाभौमं पातालं नीलसंज्ञितम्।
रक्तपीतसितश्यामभौमानि च भवन्त्यपि॥
पातालानाञ्च सप्तानां लोकानाञ्च यदन्तरम्।
सुषिरं तानि कथ्यन्ते भुवनानि चतुर्दश॥"
इति वह्निपुराणम्॥

(भूतजातम्। यथा, ऋग्वेदे। १। १५०। ५।

"युवं ह गर्भं जगतीषु धत्थो युवं विश्वेषु भुवनेष्वन्तः।"

तथा च वाजसनेयसंहितायाम्। ६। ५।

"यस्यामिदं विश्वं भुवनमाविवेश तस्यां नो देवः सविता धर्म्म साविषत्॥" * ॥ भावनम्। यथा, ऋग्वेदे। १०। ८८। १।

"तस्य भर्म्मणे सुवनाय देवा धर्म्मणे कं स्वधया पप्रथन्त॥" * ॥ पुं, सुनिविशेषः। यथा, महाभारते। १३। २६। ८।

"नितम्भूर्भुवनो धौम्यः शतानन्दोऽक्षतव्रणः॥")

भुवनकोष(ष)ः, पुं, (भुवनस्य कोष इव।) भूगोलः। (अस्य विवरणं श्रीभागवते पञ्चमस्कन्धे। १६। १७। १८। अध्याये द्रष्टव्यम्॥ तथाच।

"जम्बुप्लक्षशाल्मलकुशक्रौञ्च-
शाकपुष्करसंज्ञाः सप्त द्वीपाः।
लक्षयोजनप्रमाणाश्चैषु-
द्वीपाद्दशगुणोत्तरद्विगुणाः॥ १॥
लवणसुरासर्पिर्दधिदुग्धसक्षौद्रकमंबुभिः परि-
खरदिगुणैः।
सप्तसप्तभिर्वलयाकारैस्ते द्वीपाः परिक्षिप्ताः॥
योऽसौ मनुपुत्रः प्रियव्रतो नाम स सप्तद्वीपाधिपतिर्बभूव। तस्य ह्यग्नीध्रादयो दश पुत्रा बभूवुः॥३॥ तेषां प्रजाविताः। विरक्तानां सप्तानां सप्त द्वीपाः पित्रा दत्ताः। तत्र जम्बुद्वीपाधिपतेराग्नीध्रस्य नव पुत्रा जाताः॥४॥

नाभिः किंपुरुषस्यैव हरिवर्षं ददौ नृपः।
रम्यो हिरण्मयस्यैव कुरुभद्रस्य केतुमान्॥५॥
नववर्षाणि विभज्य पुत्रेभ्यः पित्रा दत्तानि तानि प्रविशता। अग्नीध्रेयं हिमाह्वयम्। यस्याधिपतिर्नाभेः ऋषभः पुत्रो बभूव॥६॥ ऋषभाद्भरतो भरेतन चिरकालं धर्म्मेण पालितत्वादिदं भारतं वर्षमभूत्। इलावृतस्य मध्ये मेरुः सुवर्णमयश्चतुरशीतिसहस्राणि योजनानि तस्योच्छ्रायः। षोड़शसहस्रमप्यधस्तादवगाढः। तद्विगुणो मूलविस्तारः॥६॥ तस्य मध्ये ब्रह्मणः पुरी। ऐन्द्रमिन्द्रस्य चामरावती। आग्नेय्यामग्नेर्ज्वलिता। याम्यां यमस्य संयमनी। नैर्ऋत्यां निर्ऋतेर्भयंकरी। वारुण्यां वरुणस्य विभावती। वायव्यां वायोर्गन्धवती। उदीच्यां सोमस्य विभावरीति नववर्षान्वितं जम्बूद्वीपं पुण्यपर्व्वतैः पुण्यनदीभिरन्वितम्॥७॥ किंपुरुषादीन्यष्टवर्षाणि पुण्यवतां भोगस्थानानि साक्षाद्भारतवर्षमेकं कर्म्मभूमिश्चातुर्वर्ण्ययुतम्॥ ८॥

तत्रैव कर्म्मभिः स्वर्गं क्षीते प्राप्नुवन्ति मानवाः।
मुक्तिञ्चात्रैव निष्कामैः प्राप्यते ज्ञानकर्म्मभिः॥९॥
अधोगतिमितो विप्र! यान्ति ये पापकारिणः।
ये पापकारिणस्तान् विद्धि पातालतले नरके कोटिसमन्वितान्॥ १०॥ अथ सप्तकुलपर्व्वताः कथ्यन्ते। माहेन्द्रः। मलयः शुक्तिमान् ऋक्षपर्व्वतः सह्यपर्व्वतः विन्ध्यः पारियात्रः। इत्येते भारते कुलपर्व्वताः॥ ११॥ नर्म्मदासुरसाऋषिकुल्याभीमरथीकृष्णावेणीचन्द्रभागातामपर्णी इत्येता सप्त नद्यः गङ्गायमुनागोदावरीतुङ्गभद्राकावेरीसरयूरित्येता महानद्यः पापघ्न्यः॥ १२॥

जम्बुनाम्ना च विख्यातं जम्बुद्वीपमिदं शुभम्।
लक्षयोजनविस्तीर्णमिदं श्रेष्ठं तु भारतम्॥१३॥
अन्यद्वीपादिपुण्या जनपदाः निष्कामा ये स्वधर्म्मेण नरसिंहं यजन्ति ते तत्र निवसन्ति अधिकारक्षयात् मुक्तिं च प्राप्नुवन्ति॥१४॥ जम्बायाः खादूदकान्ताः सप्त पयोधयः। ततः परा हिरण्मयी भूमिः। ततो लोकालोकपर्व्वतः। एष भूर्लोकः॥ १५॥ अस्योपरि अन्तरिक्षलोकः खेचराणां रक्षस्तदूर्द्ध्वं स्वर्गलोकः॥१६॥
स्वर्गस्थानं महापुण्यं प्रोच्यमानं निबोध मे।
भारते कृतपुण्यानां देवानामपि वासयम्॥१७॥
मध्ये पृथिव्यामिलावृतेन्द्रो भास्वान् मेरुर्हिरण्मयः।
योजनानां सहस्राणि चतुरशीतिसुच्छ्रितः॥१८॥
प्रविष्टः षोड़शाधस्ताद्धरण्यां धरणीधरः।
तावन्मात्रा पृथिवी पूर्व्वतश्च समन्ततः॥ १९॥
तस्य शृङ्गत्रयं मूर्द्धि स्वर्गो यत्र प्रतिष्ठितः।
नानाद्रुमलताकीर्णं नानापुष्पोपशोभितम्॥२०॥
मध्यमं पक्षिमं पूर्व्वं मेरोः शृङ्गाणि वीर्य्यवै।
मध्यमं स्फाटिकं शृङ्गं वैदूर्य्यमखिलात्मयम्॥२१॥
इन्द्रनीलमयं पूर्व्वं माणिक्यं पक्षिमं स्मृतम्।
योजनानां सहस्राणि नियुतानि चतुर्दश॥२२॥
उच्छ्रितं मध्यमं शृङ्गं स्वर्गो यत्र त्रिविष्टपः।
चतुर्भान्तरितं शृङ्गं सर्व्वं रत्नाकरान्वितम्।

पूर्व्वसुत्तरयोर्म्मध्यानां अन्तरं मध्यमस्य च ।
त्रिविष्टपो नाकपृष्ठे ह्यमरा: सन्ति निर्वृता: ॥२४॥
आनन्दोऽथ प्रमोदश्च स्वर्गाग्रे तु मध्यमे ।
श्वेतश्च पौष्टिकश्चैव उपरोभनमध्यगौ ॥ २५ ॥
आग्नाद: स्वर्गराजा वै स्वर्गाग्रे तु पश्चिमे ।
निर्ममो निरहङ्कार: सौभाग्यद्यातिनिर्म्मल: ॥२६॥
स्वर्गाश्चैव द्विजश्रेष्ठ ! पूर्व्वाग्रे समाश्रिता: ।
एकविंशानि स्वर्गा वै निर्दिष्टा मेरुमूर्द्धनि ॥२७॥
अहिंसादानकर्त्तारो यज्ञानां तपसां तथा ।
तस्मिंस्तु निवसन्ति स्म जना: क्रोधविवर्जिता: ॥२८॥
अग्निप्रवेशे चानन्दं प्रमोदं वह्निसाहसे ।
भृगुप्रपाते सौख्यं च रणं चैवास्य निर्म्मलम् ॥२९॥
अनाशके तु संन्यासे गतो गच्छेत्त्रिविष्टपम् ।
क्रतुयाजी नाकपृष्ठं अग्निहोत्री च निर्वृतिम् ॥ ३० ॥

तड़ागकूपकर्त्ता च लभते पौष्टिकं द्विज: ।
सुवर्णदायी सौभाग्यं लभन् स्वर्गतप:फलम् ॥३१॥
प्रीतकाले महावह्निं प्रज्वालयति यो नर: ।
सर्व्वसत्त्वहितार्थाय स्वर्गं सोश्वरसं लभेत् ॥३२॥
हिरण्यगोप्रदाने हि निरहङ्कारमाप्नुयात् ।
भूमिदानेन सुस्थेन लभते शान्तिकं पदम् ॥३३॥
रौप्यदानेन स्वर्गे तु निर्मलं लभते नर: ।
अश्वदानेन पुण्याढ्यं कन्यादानेन मङ्गलम् ॥३४॥
द्विजेभ्यस्तर्पणं कृत्वा दत्वा वस्त्राणि भक्तित: ।
स्वेतं तु लभते स्वर्गं यत्र गत्वा न शोचते ॥३५॥
कपिलागोप्रदानेन परमार्थे महीयते ।
गोत्रयस्य प्रदानेन स्वर्गे मन्वथमाप्नुयात् ॥३६॥
माघमासे सरित्स्नायी तिलधेनुप्रदस्तथा ।
छत्रोपानद्दाता च स्वर्गे यात्युपशोभनम् ॥३७॥
देवतायतनं कृत्वा द्विजभुग्भूषकस्तथा ।
तीर्थयात्रापरश्चैव स्वर्गराज्ये महीयते ॥ ३८ ॥
एकान्नभोजी यो मर्त्यो नक्तभोजी च नित्यश: ।
उपवासी त्रिरात्राद्यै: शान्त: स्वर्गं शुभं लभेत् ॥ २३ ॥

सारतृस्नाया जितक्रोधो ब्रह्मचारी दृढ़व्रत: ।
निर्मलं स्वर्गमाप्नोति यथाभूतहिते रता: ॥४०॥
विद्यादानेन मेधावी निरहङ्कारमाप्नुयात् ।
येन येन हि भावेन यद्यद्दानं प्रयच्छति ॥४१॥
तत्तत्स्वर्गमवाप्नोति यद्यदिच्छति मानव: ।
चत्वारि अतिदानानि कन्या गौर्भू: सरस्वती ॥४२॥
नरकादुद्धरन्त्येते जपवाह्यनदोहनात् ।
यस्तु सर्व्वाणि दानानि ब्राह्मणेभ्य: प्रयच्छति ॥ ४३ ॥

संप्राप्य न निवर्त्तेत स्वर्गं ब्रह्मसनामयम् ।
ब्रह्मे तु पश्चिमे यत्र ब्रह्मा तत्र स्थित: स्वयम् ॥४४॥
पूर्व्वभद्रे स्वयं विष्णु: मध्ये चैव शिव: स्थित: ।
ततः परं तु विप्रेन्द्र ! स्वर्गाध्यानमिमं शृणु ॥४५॥
विमलं विपुलं शुद्धसुपर्य्युपरिसंस्थितम् ।
प्रथमे तु कुमारास्तु द्वितीये मातर: स्थिता: ॥४६॥
तृतीये सिद्धगन्धर्वा तुर्य्ये विद्याधरा द्विज ॥
पञ्चमे नागराजा च षष्ठे तु विनतासुत: ॥४७॥
सप्तमे श्रियमिश्रस्तु धर्म्मराजस्त्वष्टमे ।
नवमे तु तथा दक्ष आदित्यो दशमे पथि ॥४८॥
भूर्लोकाच्छतसाहस्राद्यूर्द्धं चरति भास्कर: ।
योजनानां सहस्रे द्वे विष्कम्भसमं तत: ॥ ४९ ॥
त्रिगुणं परिणाहेन सूर्य्यबिम्बं प्रमाणत: ।
सोमपुर्य्यां विभावर्य्यां मध्याह्ने चार्य्यमा यदा ।
महेन्द्रस्यामरावत्यां तदा तिष्ठति भास्कर: ॥५०॥
मध्याह्ने त्वमरावत्यां यदा भवति भास्कर: ।
तदा संयमनेयाम्ये तत्रोदेतुं प्रदृश्यते ॥५१॥
मेरुं प्रदक्षिणं कुर्व्वन् भात्येव सविता सदा ।
ध्रुवाधारस्तथोत्तिष्ठन् वालिखिल्यादिभि: स्तुत: ॥ ५२ ॥

इति श्रीनरसिंहपुराणे भूवनकोशे त्रिंशोध्याय: ॥ ३० ॥)

भुवन्यु:, पुं, (भवतीति। "कन्युच् त्रिषेच्च ।" उणा० ३ । ५१ । इति चकारात् भूधातोरपि कन्युच् ।) सूर्य्य: । वह्नि: । चन्द्र: । इति मेदिनी । ये, ६८ ॥ प्रभु: । इत्यादिकोष: ॥

भुवर्लोक:, पुं, (भुवश्चासौ लोकश्चेति ।) भूरादिसप्तलोकान्तर्गतद्वितीयलोक: । यथा,—
"भूमिसूर्य्यान्तरं यच्च सिद्धादिसुनिसेवितम् ।
भुवर्लोकस्तु सोऽप्युक्तो द्वितीयो मुनिसत्तम ! ॥"
इति विष्णुपुराणे । २ अंशे ७ अध्याय: ॥
(यथा च भागवते । २ । ५ । ८ ।
"भूर्लोक: कल्पित: पद्भ्यां भुवर्लोकोऽस्य नाभित: ।
हृदा स्वर्लोक उरसा महर्लोको महात्मन: ॥")

भुव:, [स्] ब, (भवतीति । भू+"भूरुक्षिभ्यां किन् ।" उणा० ४ । २१६ । इति असुन् च च कित् ।) आकाश: । इति हेमचन्द्र: ॥ (महाव्याहृतिभेद: । यथा, मनु: । २ । ७६ ।
"अकारञ्चाप्युकारञ्च मकारञ्च प्रजापति: ।
वेदत्रयान्निरदुहत् भूर्भुव: स्वरितीति च ॥")

भुवि:, [स्] स्त्री, (भवतीति भवत्यस्मिन् रत्नादीनि वा । भू+"भुव: किन् ।" उणा० २ । ११३ । इति इसिन् । च च कित् ।) वसुन्धरा: । इत्युणादिकोष: ॥

भू, सत्तायाम् । इति कविकल्पद्रुम: ॥ (भ्वा०-पर०-अक०-सेट् ।) सत्तैव द्विविधा । उत्पत्तिर्विद्यमानता च । भवति मनुष्योऽथवा विष्णु: । इति दुर्गादास: ॥

भू, क्र हृद्विचिन्तयो: । मिश्रणे । इति कविकल्पद्रुम: । (चुरा०-पर०-सक०-सेट् ।) क, हृदयङ्गमं भावयति द्विष: सर्व्वान् । चयोऽर्था: । इति दुर्गादास: ॥

भू, क ड प्राप्तौ । इति कविकल्पद्रुम: ॥ (चुरा०-आत्म०-सक०-सेट् ।) क ड, भावयते । इति दुर्गादास: ॥

भू, च प्राप्तौ । इति कविकल्पद्रुम: । (भ्वा०-उभ०-सक०-सेट् ।) च, भवति भवते स्वर्गं धीर: । भवत्येव सत्तायां प्राप्तिसमानशब्दत्वेति भट्टमल्ल: । भवते दुरितक्षयं यथोक्तकृद्भिर्भावयते च नाकलोकमिति हलायुध: । केचिदसं

भाव्यात्मनेपदिनं मत्वा प्राप्तौ परस्मैपदं सत्तार्थस्यैवानेकार्थत्वात् समाधत्ते । इति दुर्गादास: ॥

भू, थ, (भू+क्विप् ।) रसातलम् । इति हेमचन्द्र: ॥

भू:, स्त्री, (भवत्यस्मिन्निति । भू+अधिकरणे क्विप् ।) पृथिवी । इत्यमर: । २ । १ । २ ॥ (यथा, मनु: । ७ । ६ ।
"न चैनं भुवि शक्नोति कश्चिदप्यभिवीक्षितुम् ॥"
यथा च वैद्यकरत्नमालायामस्या: पर्य्याय: ।
"भूर्भूमि: पृथिवी पृथ्वी मेदिनी वसुधावनि: ।
क्षितिरुर्व्वी मही क्ष्मा धरा कुर्वसुन्धरा ॥")
स्थानमात्रम् । इति मेदिनी । मे, १ ॥ (यथा, भागवते । ६ । ४ । ३१ ।
"यच्छक्तयो वदतां वादिनां वै
विवादसंवादभुवो भवन्ति ॥"
यच्छक्तय: । इति जटाधर: ॥

भूकं, क्ली, (भवतीति । भू+"स्फायितञ्चिवञ्चिलूधूसूखनसहचरिभ्य: कक् ।" उणा० ३ । ४१ । इति कक् ।) छिद्रम् । काल: । इति मेदिनी । के, ३० ॥

भूक:, पुं, (भू+कक् ।) अन्धकार: । इति शब्दमाला ॥

भूकदम्ब:, पुं, (भुवि कदम्ब इव ।) अलम्बुषवृक्ष: । इति रत्नमाला ॥ कोकसीम । इति भाषा ॥

भूकदम्बक:, पुं, (भूकदम्ब+संज्ञायां कन् ।) यवानी । इति राजनिर्घण्टे: ॥ (विवृतिविशेषोऽस्य यवानीशब्दे ज्ञातव्य: ॥)

भूकन्द:, पुं, (भुव: पृथिव्या: कन्द इव ।) महाआवणिका । इति राजनिर्घण्टे: ॥ थुलकुड़ी । इति भाषा ॥

भूकम्प:, पुं, (भुव: पृथिव्या: कम्प: ।) भूमिकम्पनम् । स च अद्भुतविशेष: । यथा, अद्भुतसागरे ।
"मेघे वृश्चिकभे गज: प्रचलति व्याघादिभि: कथ्यते
चापे मीनकुलीरभे च वृषभे सत्यं चलेत् कच्छप: ।
यूके कुम्भधरे सगेन्द्रमिथुने कन्यान्गे पन्नग-
स्वेषामेकतमो यदि प्रचलति क्ष्मा तदा कम्पते ॥
"कच्छपे मरणं ज्ञेयं मरणञ्चापि पन्नगे ।
सर्व्वत्र सुखदश्चैव पृथिव्यां चलिते गजे ॥
प्रथितनरेश्वरमरणं व्यसनान्यामेयमारुतयो: ।
क्षुद्भयमतिवृष्टिभिरुपजीव्यन्ते जनाद्याश्च ॥
त्रिचतुर्थपञ्चमदिने मासे षष्ठे त्रिपञ्चके ।
भवति यदा भूकम्प: प्रधानवृषनाशनं कुरुते ॥"
स च भूमिशोतृपातविशेष: । यथा
"धरस्थिरभवं भौमं भूकम्पमपि भूमिजम् ।
धातुप्रभवानां वैकल्यं भौमन्तदपि कीर्त्तितम् ॥
भौमं नाम्यफलं ज्ञेयं विरेचं परिपच्यते ।"
इति ष्टीतिक्तत्वम् ॥

भूकर्व्वुदारक: पुं, वृक्षविशेष: । छोटापलोटा इति हिन्दी भाषा । तत्पर्य्याय: । क्षुद्रदेणु-

न्तकः २ भूगोलुः ३ लघुगोलुः ४ लघुपिच्छिलः५ लघुप्रीतः ६ सूच्यफलः ७ लघुभूतद्रुमः ८ भूकर्ब्बुदारः ९। अस्य गुणाः। मधुरत्वम्। क्रमिमूलनाशित्वम्। वातप्रकोपणत्वम्। किञ्चित् प्रीतत्वम्। स्वर्णमारकत्वञ्च। इति राजनिर्घण्टः॥

भूकलः, पुं, (भुवः पृथिव्याः कलः।) दुर्विनीताश्वः। इति राजनिर्घण्टः॥

भूकश्यपः, पुं, (भुवि पृथिव्यां कश्यप इव भुवः कश्यप इति वा।
"तदस्य कश्यपस्यांशुस्तेजसा कश्यपोपमः।
वसुदेव इति ख्यातो गोषु तिष्ठति भूतले॥"
इति हरिवंशीयवचनेनास्य कश्यपांशुसम्भूतत्वात् तथात्वम्।) वसुदेवः। इति त्रिकाण्डशेषः॥

भूकाकः, पुं, (भुवि ख्यातः काकः।) खल्पकङ्कः। क्रौञ्चः। नीलकपोतः। इति शब्दरत्नावली॥

भूकुम्भी, स्त्री, (भुवि कुम्भीव।) भूपाटली। इति राजनिर्घण्टः॥

भूकुष्माण्डी, स्त्री, (भुवि कुष्माण्डीव।) विदारी। इति राजनिर्घण्टः॥

भूकेशः, पुं, (भुवः पृथिव्याः केश इव।) श्वेतवटः। इति मेदिनी। शे, २६॥

भूकेशा, स्त्री, (भूकेश+टाप्।) राक्षसी। इति शब्दरत्नावली॥

भूकेशी, स्त्री, (भूकेश+स्त्रियां ङीप्।) बलगुडूचः। इति मेदिनी। शे, २७॥

भूक्षित्, पुं, (भुवं क्षितिं क्षिणोतीति+क्षिद्+क्विप्।) शूकरः। इति त्रिकाण्डशेषः॥

भूखर्ब्बूरी, स्त्री, (भूसंलग्ना खर्ब्बूरी। शाकपार्थिवादिवत् समासः।) क्षुद्रखर्ब्बूरी। तत्पर्य्यायः। भूयुक्ता २ वसुधाखर्ब्बूरिका ३ भूमिखर्ब्बूरी ४। अस्या गुणाः। मधुरत्वम्। स्निग्धरत्वम्। दाहपित्तहरत्वञ्च। इति राजनिर्घण्टः॥

भूगरं, क्ली, (भुवः पृथिव्या गरम्।) विषम्। इति राजनिर्घण्टः॥

भूगर्भः, पुं, भवभूतिः। स च मालतीमाधवादिनाटककर्त्ता। इति जटाधरः॥ (भूः सर्व्वभूतात्रयभूता पृथ्वी गर्भे कुक्षौ यस्येति। विष्णुः। यथा, महाभारते। १३। १४८। २१।
"हिरण्यगर्भो भूगर्भो माधवो मधुसूदनः॥")

भूगोलः, पुं. (भूर्गोलो मण्डलमिव।) भुवनकोषः। (यदुक्तं सूर्य्यसिद्धान्ते।
"मध्ये समन्तादण्डस्य भूगोलो व्योम्नि तिष्ठति।
बिभ्रत्यः परमां शक्तिं ब्रह्मणो धारणाख्यिकाम्॥")
तस्य विवरणम्। यथा,—
"प्रकृतस्तु महान् ज्ञानोऽहङ्कारो मदनः पुनः।
तन्मात्राणि शब्दादीनि शब्दः स्पर्शश्च रूपकम्॥
रसो गन्धश्च पञ्चैव गुणा नाम प्रकीर्त्तिताः।
पञ्चेमानि महाभाग! महाभूतानि संग्रहात्।
तेभ्य एव प्रजातानि सर्व्वाणि गुणवन्ति च॥
भूमिरापस्तथा वायुरग्निराकाशमेव च।
गुणोत्तराणि सर्व्वाणि तेषां भूमिः प्रधानतः॥
शब्दः स्पर्शश्च रूपञ्च रसो गन्धश्च पञ्चमः।
भूमावेते गुणाः प्रोक्ता इत्यन्ति परतः क्रमात्॥
चत्वारोऽप्सु गुणा ब्रह्मन्! गन्धस्तत्र न वर्त्तते।
शब्दः स्पर्शश्च रूपञ्च त्रय एव हि तेजसि॥
शब्दः स्पर्शोऽथ वायोस्तु आकाशे शब्द एव हि।
एते पञ्च गुणाः प्रोक्ता महाभूतेषु पञ्चसु॥
वर्त्तन्ते सर्व्वभूतेषु येषु लोकाः प्रतिष्ठिताः।
अन्योन्यं नातिवर्त्तन्ते सम्यग्भवति वै तदा॥
यदा तु विषमं भावमाविशन्ति परस्परम्।
तदा देहवियोगः स्याद्देहिनां नान्यथा द्विज!॥
अनुपूर्व्वा विनश्यन्ति जायन्ते चापि सर्व्वशः।
सर्व्वाण्यपरिमेयानि तदेषां रूपमैश्वरम्॥
तत्र तत्र हि दृश्यन्ते धातवः पाञ्चभौतिकाः।
तेषां मनुष्यास्तर्केण प्रमाणानि प्रचक्षते॥
अचिन्त्याः खलु ये भावा न तांस्तर्केण योजयेत्।
प्रकृतिभ्यः परं यत्तु तदचिन्त्यस्य लक्षणम्॥*॥
जम्बुद्वीपं प्रवक्ष्यामि वातस्यायन महामुने!॥
परिमण्डलो महाभाग! द्वीपोऽसौ चक्रवत् स्थितः।
नदीगिरिप्रतिच्छन्नो विविधैः पत्तनैरपि॥
वनैश्चैनपदैर्वृक्षैस्तथा पुष्पफलोपगैः।
लवणेन समुद्रेण समन्तात् परिवारितः॥
प्रागायता महाभाग! षड्वेते रत्नपर्व्वताः।
अवगाढा ह्युभयतः सागरौ पूर्व्वपश्चिमौ॥
हिमवान् हेमकूटश्च निषधश्च नगोत्तमः।
नीलः श्वेतः शृङ्गवांश्च रत्नधातुविचित्रिताः॥
अयुतानि योजनानि उच्छ्रायास्तेषु कीर्त्तिताः।
पृथुत्वे च द्विसाहस्रयोजनास्ते च पर्व्वताः॥
तेषामन्तरविष्कम्भे नवसाहस्रयोजनः।
वर्षे वर्षे प्रमाणन्तु वर्षाणि चैषां दक्षिणे॥
तत्र पुण्या जनपदास्तेषु वर्षेषु तापस!।
वसन्ति तेषु सर्व्वाणि सत्त्वानि विविधानि च॥
दक्षिणे भारतं वर्षमुत्तरे लवणोदधेः।
कूलादेव महाभाग! तस्य सीमा हिमालयः॥
ततः किंपुरुषं वर्षं हेमकूटादधस्ततः।
हरिवर्षं ततो ज्ञेयं निषधोऽवधिरुच्यते॥
एवमेवोत्तरे चैषां वर्षाणि च तपोधन!।
कुरुवर्षं सिन्धुकूलात् शृङ्गवानवधिः स्मृतः॥
हिरण्मयं ततो वर्षं श्वेतावधि निगद्यते।
रम्यकञ्च ततो वर्षं नीलस्तस्यावधिः स्मृतः॥
दक्षिणेन तु नीलस्य निषधस्योत्तरेण तु।
प्रागायतौ महाभाग! माल्यवान्नाम पर्व्वतः॥
पश्चिमे तु तथैवास्ते पर्व्वतो गन्धमादनः॥
पूर्व्वे सलिलकूलात्तु भद्राश्वं नाम वर्षकम्॥
माल्यवानवधिस्तस्य केतुमालस्य पश्चिमे।
गन्धमादनसीमान्तं नवसाहस्रयोजनम्॥
परिमण्डलस्तयोर्मध्ये मेरुः कनकपर्व्वतः।
आदित्यतरुणाभासो विधूम इव पावकः॥
लक्षयोजन उच्छ्रायो मूर्द्ध्नि द्वात्रिंश एव च।
योजनानां सहस्राणि मूले षोडश तु॥
विस्तृतः स महाभाग! भूमिष्ठं मूलमस्य तु।
प्रविष्टमन्तर्भूम्यां वै षोडशैव सहस्रकम्॥
ऊर्द्धमन्तश्च तिर्य्यक् च लोकानावृत्य तिष्ठति।
तस्य चैलावृतं वर्षं सर्व्वतः परिकीर्त्तितम्॥
विहगः सुमुखो यस्तु सुपर्णस्यात्मजः किल।
स वै विचिन्तयामास सौवर्णान् प्रेक्ष्य वायसान्॥
मेरुरुत्तममध्यानामवराणाञ्च पक्षिणाम्।
अविशेषकरो यस्मात्तस्मादेनं त्यजाम्यहम्॥
तमादित्योऽनुपर्य्येति सततं ज्योतिषां वरः।
चन्द्रमाश्च सनक्षत्रो वायुश्चैव प्रदक्षिणम्॥
स पर्व्वतो महाभाग! दिव्यपुष्पसमन्वितः।
भवनैरावृतः सर्व्वैर्नानारत्नमयैः शुभैः॥
तत्र देवगणा ब्रह्मन्! गन्धर्व्वाप्सरसां गणाः।
अप्सरोगणसंयुक्ताः क्रीडे क्रीडन्ति सर्व्वदा॥
अवष्टम्भकरास्तस्य मन्दरो मेरुमन्दरः।
सुपार्श्वः कुमुदश्चेति चतुर्दिक्षु स्थिता द्विज!॥
अयुतयोजनोन्नाहास्तावद्विस्तारसंयुताः।
चतुर्व्वेतेषु धर्म्मज्ञ! चूतजम्बूकदम्बकाः॥
न्यग्रोधाश्चापि चत्वारः पादपा ब्राह्मणर्षभ!।
सहस्रयोजनोन्नाहास्तावद्विटपविस्तृताः॥
केतुभूताः पर्व्वतानां विशालाः शतयोजनम्।
ह्रदाश्च तत्र चत्वारः पयोमधुघृतोदकाः॥
देवोद्यानानि चत्वारि ह्यैरावतनन्दने।
सर्व्वतोभद्रमित्येवं तथा वैभ्राजकं वनम्॥
तेषु देवस्त्रियो नित्यं विहरन्ति सुरैः सह।
गन्धर्व्वाः किन्नराश्चैव तथान्ये सिद्धचारणाः॥
गायन्तो मधुरं दिव्यं स्त्रीभिः क्रीडन्ति तापस!।
चूतो यो मन्दरोत्सङ्गे अयुतयोजनोच्छ्रितः॥
फलानामन्तकल्पानि पतन्त्यस्य सदूरतः।
तेषां विशीर्य्यमाणानां रसेनाक्षनि या नदी॥
अरुणोदा नाम सैव वहते मन्दराचलात्।
यज्जलस्पर्शमात्रेण भयानीन्द्रियवैगजाः॥
स्वदेहसौरभेणापि समन्ताद्दशयोजनम्।
सुगन्धयन्ति वातेन वातस्यायन! तद्भुतम्॥
एवं जम्बुफलानाञ्च पततां मेरुमन्दरे।
हस्तिकायप्रमाणानां रसेनाता महानदी॥
सैव जम्बुनदी नाम दक्षिणेन इलावृतम्।
तीरयोरुभयोरेव जम्बूरसपरिप्लुता॥
मृत्तिकैव सुवर्णं स्यात् वार्य्यर्कोष्मसमन्वयात्।
तत्र जाम्बूनदं हेम नानाभरणभूषितम्॥
देवोपदेवगन्धर्व्वा धारयन्ति सह स्त्रिया।
यो वै मेरुकदम्बस्य सुपार्श्वोपरि तापस!॥
तत्कोटरेभ्यः पद्मेव मधुधाराः स्रवन्ति वै।
पयायामपरीणाहाः पक्षिभिः फलाहृतम्॥
यामां रसांश्च भक्षाणाः सुगन्धोद्गारवायुना।
सुगन्धयन्ति धर्म्मज्ञ! समन्तात् शतयोजनम्॥
कुसुदाग्रनिरूढो यः शतवल्शो वटो महान्।
स्कन्धेभ्यस्तस्य तदसु उपरोह इलावृतम्॥
पयस्तिग्मोदधिप्रख्यैस्तत्फलामधुस्रवाः।

मूलमेरोस्तु यत्रैव यामो रजनिरेव च ।
वर्षीयस्त्रिगुणं तत्र दिवसो न विद्यते ।
पूर्वपूर्वतः शुक्लः कुमुदः शिखरस्तथा ।
वैकङ्कः त्रिकूटश्च पर्वतौ रजतप्रभौ ।
शतशृङ्गिवर्षौ तावुत्तरेणाभिकूटकाः ।
शृंगवैकङ्कविख्यौ द्वौ कालसूर्यप्रभौ ।
शिखरौ सप्तदीप्तौ तु सुमेरोः परिकल्पितौ ।
अष्टमो वैकूटश्च द्वौ तयोर्मेरुपर्वतः ।
अष्टाशीतिसहस्राणि योजनानां समायतौ ।
एतयोर्द्वौ हिमाद्रेश्च योजनं तावदन्तरम् ।
पवनः पावितश्चैव मेरोः पश्चिमतः स्थितौ ।
तथा प्रमाणौ वैश्राजकरौरौ तु दक्षिणे ।
प्रागायतावुत्तरेण विद्युत्प्रभकरौ तथा ।
अष्टाभिरेभिर्गिरिभिर्भाति काञ्चनपर्वतः ।
मेरोर्मध्ये हि विप्राग्र्य ! मध्ये विश्वसृजः पुरी ।
चतुरस्रा शातकौम्भी योजनायतविस्तृता ।
दिक्पालानां तथा पुण्यैः पूर्वादिषु यथाक्रमम् ।
अष्टपुण्योपभुक्तेन भागेन परिकल्पिता ।
तत्र ब्रह्मा च रुद्रश्च शक्रश्चापि सुरेश्वरः ।
सभेल विविधैर्वेश्मैर्भान्ति भूरिदक्षिणैः ।
तुमुरुनारदश्चैव विश्वावसुहाहाहूहूः ।
अभिगम्यामरश्रेष्ठं स्तुवन्ति विविधैः स्तवैः ।
सप्तर्षयो महात्मानः कश्यपश्च प्रजापतिः ।
तत्र गच्छन्ति भद्रं ते सदा पर्वनि पर्वनि ।
रत्नैश्च सहस्रगुणा काञ्ची हैमैर्मयोच्यते ।
तस्य हैमानि रत्नानि तस्यैमे रत्नपर्वताः ।
तस्मात् कुबेरो भगवांश्चतुर्थं भागमद्भुतं ।
तत: कल्पांशं वित्तस्य मनुष्येभ्यः प्रयच्छति ।
पार्श्वे तस्योत्तरे दिव्यं सर्वर्तुकुसुमान्वितम् ।
कलिंगारवनं रम्यं शिलाप्राससमुद्गतम् ।
तत्र साक्षात्सदादेवो भीमेभूतैः समावृतः ।
पार्वत्या सह देवेशो रमते भूतभावनः ।
हस्तिचर्ममयीं मालां दधदापादलम्बिनीम् ।
तस्य शैलस्य शिखरात् क्षीरधारा महाशुभे ! ।
विश्वरूपा परिमिता भीमनिर्घोषनिस्वना ।
पुण्या पुण्यजलैर्जुष्टा गङ्गा भागीरथी शुभा ।
सा धारयामास सदा दुहितॄ पर्वतैरपि ।
शतं वर्षसहस्राणां शिखरेण विनाधृक् ।
शैलास्तु शिखराद्यैर्वो भिद्यमाना चतुर्विधा ।
गौरा: शाक्लकरेणि पद्मभेदेति कौर्तिता ।
भोगा तु ब्रह्मणस्तानु शैलादिमधारयत् ।
क्षत्रियस्य प्रमदनो मनसादत्तसंज्ञितः ।
वाहनं विद्धि । पश्चेश भागं पूरतो क्रमात् ।
प्राप्तो [illegible] महाभाग ! प्रविष्टा सप्तमोदधिम् ।
माल्यवन्तिमतादृष्ट्वा पतिता केतुमालके ।
[illegible] विद्धि विप्रेन्द्र ! प्रविवेश सरित्पतिम् ।
भद्रा माल्यवते शैलायतरात् पतिता तितोः ।
माल्यवत: शृङ्गवत: शृङ्गाद्वैश्रवणालयात् ।
[illegible] पर्वतेन्द्रं च [illegible] ।
[illegible] ।

मेरोस्तु पश्चिमे पार्श्वे केतुमाली महामते ! ।
आयुर्दशसहस्राणि वर्षाणां तत्र मानवे ।
सुवर्णवर्णाश्च नरा: स्त्रियश्चाप्सरसोपमा: ।
योनरोगशोकभया नित्यमानन्दपूर्जिन: ।
जायन्ते मानवाश्चात्र प्रजापतिसमप्रभा: ॥ ७ ॥
गन्धमादनशृङ्गेषु कुबेर: सह राक्षसैः ।
रमतीभगणस्यार्धमीडितो गुह्यकाधिप: ॥
गन्धमादनपार्श्वे तु गन्धर्वा: सप्तसप्त: ।
एकादशसहस्राणि वर्षाणां परमायुष: ॥
तत्र पुष्टा नरा: सर्वे बलवीर्यपराक्रमा: ।
स्त्रियश्चोत्पलपत्राभा: सर्वा: सुप्रियदर्शना: ॥
उत्तरा: कुरवश्चैव भारतस्य महामते ! ।
धनुर्मध्ये महाभाग ! दिवसे दक्षिणोत्तरे ॥
एतावत्तं मध्यमन्तु पश्चवर्षाणि चैव हि ।
उत्तरोत्तरमेतेभ्यो वर्षमुद्दिश्यते गुरोः ॥
अपरेषु च वर्षेषु सर्वेषु भारतं विना ।
आयु:प्रमाणं लोकानां दशवर्षसहस्रकम् ॥
एवमेषा महाभाग ! पृथिवी पर्वतैश्चिता ।"
इति पद्मपुराणे भूमिखण्डे भूगोलवर्णने १२८ अध्याय: ॥

शेष उवाच ।

"नवस्वेतेषु वर्षेषु भगवान् भूतभावन: ।
अनुग्रहाय लोकानामास्ते मायाविभूतिभि: ॥
एकादशे तु भगवान् भव एक: सहोमया ।
आस्ते विहारनिरतो नान्यस्तत्र पुमान् द्विज ! ॥
भवानीशापतो ब्रह्मन् ! प्रविशेत् कदाचन ।
यत्र प्रविष्टो मोहेन सुतो वैवस्वतस्य वै ॥
इल: स्त्रीभावमापन्नो यस्यां जात: पुरूरवा: ।
तत्र सङ्कर्षणं देवं कला विष्णोर्महात्मन: ।
भवो भवान्या सहित: स्तौति भक्तिसमन्वित: ॥
भद्राश्वे द्विज ! वर्षे तु हयशीर्षाऽतिहरि: ।
वसते वर्षपुरुषाख्यं स्तुवन्ति जगदुद्गुरुम् ॥७॥
हरिवर्षे तु भगवान्नरसिंहवपुर्धर: ।
स्तूयते दैत्यपतिना प्रह्लादेन महात्मना ॥
केतुमाले च भगवान् कामदेवस्वरूपवान् ।
प्रजापतेर्दुहितृभि: सप्तैव रमया सदा ॥
स्तूयते परया भक्त्या जगन्मोहनरूपधृक् ॥७॥
रम्यके भगवानास्ते मत्स्यरूपी दयापर: ।
मनुर्वैवस्वतश्चैव स्तौति भक्त्या कृते: स्तवैः ॥७॥
हिरण्मये तु भगवानास्ते कूर्मवपुर्धरः ।
पितृभिरार्यकैश्चैव स्तौति भक्त्या परमया युत: ॥
कुरुवर्षे च भगवान् वराह: सेव्यते सदैः ।
तं देवी सं क्षिति: स्तौति सङ्कर्षणसखि: सह ॥
वर्षे किंपुरुषे ब्रह्मन् ! भगवानादिपूरुष: ।
सीतया सिद्धसङ्घास्ते सततं ब्रह्मवादिन: ॥
तत्र किंपुरुषै: सार्द्धं भक्त्या मारुतनन्दन: ।
मार्टिसेनेन च सह स्तौति भक्त्या विभावित: ॥
भारते च तथा वर्षे नरनारायणाश्रयौ ।
नर: स्तौति भगवान् भक्तयो ज्ञानतो हरिम् ॥
ईजेऽस्मिन् वर्षप: क्रतुभि: पुरुषं हरिमीश्वरम् ।
इन्द्रद्युम्नेन राजर्षे ! स्तुतो भगवानीश्वरः ॥
मेरोस्तु दक्षिणे पार्श्वे वर्षं नैषधसंज्ञितम् ।
आयुर्दशसहस्राणि वर्षाणां तत्र मानवे ।
सुवर्णवर्णाश्च नरा: स्त्रियश्चाप्सरसोपमा: ।
सर्वे कामदुघा वृक्षा सता: कामप्रपूरिका: ॥
अपरे चौरिणो नाम तरवो मुनिपुङ्गव ! ।
ये स्रवन्ति सदा क्षीरं रसैरन्नसमन्वितम् ॥
वस्त्राणि च प्रसूयन्ते फलेष्वाभरणानि च ।
सर्वा मणिमयी भूमि: सप्तशृङ्गाटकायुता ॥
सर्वर्तुसुखदा नित्यं पद्मगन्धरजश्चिता ।
सर्वभोगावगेधिन्य आयन्ते तत्र मानवा: ॥
सुरूपाभिजनस्थाना: सर्वे चारुसुखासुखा: ।
मिथुनानि च जायन्ते स्त्रिय: सुरसुतोपमा: ॥
तेषान्ते चौरिणां क्षीरं पिबन्त्यञ्जलिभिर्नरा: ।
मिथुनं जायते काले समन्तात् प्रवर्तते ॥
तुल्यरूपगुणोपेतं तुल्यमित्रवयस्कथा ।
निरामया निराबाधा: सदानन्दविवर्धिन: ॥
एकादशसहस्राणि तत्र वर्षाणि वै नृणा: ।
जीवन्ति ते महाभाग ! न चान्योन्यं घ्नन्ति च ॥
भारुण्डा नाम शकुनास्तीक्ष्णतुण्डा महाबला: ।
तान्निर्हरन्तीह शवान् हरीषु प्रक्षिपन्ति च ॥
उत्तरा: कुरवो ब्रह्मन् ! आख्यातास्ते समासत: ॥ ८ ॥
हिरण्मये रम्यके च वर्षे धर्म: प्रकीर्तित: ॥
मेरो: पार्श्वमथं पूर्वं वर्षे ब्रह्मन् ! यथातथम् ।
भद्राश्वे भद्रश्रवा नाम तत्र ब्रह्मन् ! महीपति: ॥
भद्रशालवनं यत्र कालाम्रश्च महाद्रुम: ।
कालाम्रो नाम वृक्षोऽसौ सिद्धचारणसेवित: ॥
योजनैकशतोत्सेधो नित्यपुष्पफल: शुभ: ।
तत्र ते पुरुषा: श्वेताकेशोपेता महाबला: ॥
कुसुदाभा: स्त्रियश्चात्र चारुनासा: सुलोचना: ।
चक्राभचारुवक्त्राश्च पूर्णेन्दुसदृशानना: ॥
वृत्यगीतकलाभिज्ञाश्चन्द्रगीतसकान्तय: ।
दशवर्षसहस्राणि तत्रायुर्मानवानम ! ॥
कालाम्रस्यफलेनैव नित्यं सुस्थिरयौवना: ।
दक्षिणेन तु नीलस्य निषधस्योत्तरेण तु ॥
सुदर्शनो नाम महान् जम्बूवृक्ष: सनातन: ।
सर्वकामफल: पुण्य: सिद्धचारणसेवित: ॥
दीर्घत्वात्तिपरः श्रीमान् सह्यर्योजनोच्छ्रित: ।
अरत्नीनां सहस्रञ्च शतानि दश पञ्च च ॥
परिणाहस्तु वृक्षस्य रसानां रसवेदिनाम् ।
तस्मादादित्यवर्णानि जायन्ते तत्र मानवा: ॥
तथा माल्यवत: शृङ्गे दक्षिणे फलभोजन: ।
नाम्ना सभ्यर्णको नाम कालाग्निः प्रजापतेः ॥
तथा माल्यवत: शृङ्गे पूर्वे पूर्वेन्दुसन्निभा: ।
योजनानां सहस्राणि दशोच्छ्रायान् द्विज ॥
महारत्नसमुद्भासा जायन्ते तत्र मानवा: ।
अक्षयोकसुता: सर्वे जायन्ते तत्र वै नरा: ॥
तपसाऽऽप्ति ते सौम्यं भक्ति सुदृढेन च ।
रक्षकार्थं मनुष्याणां न क्रियन्ति क्रियाक्रमम् ।
[illegible] ।
[illegible] ।

षष्टिं वर्षसहस्राणि षष्टिमेव शतानि च ।
आदित्यसप्तास्ते सर्वे विशन्ति ग्रहिमक्षयम् ॥"
इति पाद्मे भूमिखण्डे भूगोले १२६ अध्यायः ॥

पुलह उवाच ।
दक्षिणेन तु श्वेतस्य निषधस्योत्तरेण तु ।
वर्षं रम्यकं नाम यायजते तत्र मानवाः ॥
शुक्लाभिजनसम्पन्नाः सर्वे सुप्रियदर्शनाः ।
दशवर्षसहस्राणि शतानि दश पञ्च च ॥
जीवन्ति ते महाभाग ! नित्यं मुदितमानसाः ।
दक्षिणेन तु नीलस्य निषधस्योत्तरेण तु ॥
वर्षं हिरण्मयं नाम तत्र हैमवती नदी ।
तत्र चायं महाभाग ! पक्षिराट् पतगोत्तमः ॥
यज्ञानुगाश्च बहवो धनिनश्च महाबलाः ।
एकादशसहस्राणि वर्षाणां ते महामते ! ॥
आयुःप्रमाणं जीवन्ति शतानि दश पञ्च च ।
षड्वाणि च विचित्राणि चीर्णेव ब्राह्मणर्षभ ! ॥
एकं मणिमयं तत्र द्वितीयं रौक्ममद्भुतम् ।
सर्वरत्नमयश्चैव तृतीयं तत्र शोभते ॥
यत्र स्वयम्भुवा देवी नित्यं वसति शाश्वती ।
हैमकूटस्तु सुमहान् कैलासो नाम पर्वतः ॥
यत्र वै धनदो राजा गुह्यकैः सह मोदते ।
अस्युत्तरेण कैलासं मैनाकं पर्वतं प्रति ॥
हिरण्यशृङ्गः सुमहान् दिव्यो मणिमयो गिरिः ।
तस्य पार्श्वे महद्दिव्यं शुभ्रकाञ्चनवालुकम् ॥
रम्यं विन्दुसरो नाम यत्र राजा भगीरथः ।
दृष्ट्वा पुण्यापगां गङ्गामुवास बहुलाः समाः ॥
यूपा मणिमयास्तत्र चैत्याश्चापि हिरण्मयाः ।
तत्रेष्ट्वा तु गतः सिद्धिं सगरश्चाप्तो महाक्रतुः ॥
स्रष्टा भूतपतिर्यत्र सर्वलोकैः सनातनः ।
उपास्यते तीव्रतेजा यत्र भूतैः समन्ततः ॥
नरनारायणौ ब्रह्मा मनुः स्थाणुश्च पञ्चमः ।
तत्र दिक्षा त्रिपथगा प्रथमन्तु प्रतिष्ठिता ॥
ब्रह्मलोकादपक्रान्ता सप्तधा प्रतिपद्यते ।
वसोर्धारा या नलिनी पावनी च सरस्वती ॥
जम्बूनदी च सीता च गङ्गा सिन्धुश्च सप्तमी ।
अधिष्ठिता दिवसङ्घाता प्रभावेश्च समन्विता ॥
उपास्यते यत्र सदा सहस्रयुगपर्यये ।
ब्रह्मात्मजा च भवति तत्र तत्र सरस्वती ॥
एता दिशः सप्त गङ्गाभिधुं लोकेषु विश्रुताः ।
एषापि ये दिवसति हैमकूटे तु गुह्यकाः ॥
सर्वा भोगाश्च निधयो लोकपालैश्च तोषिताः ।
देवासुराणां सर्वेषां श्वेतपर्वत उच्यते ॥
गन्धर्वा जन्मि नित्यं नीले ब्रह्मर्षयस्तथा ।
ब्रह्मणश्च महाभाग ! देवानां प्रतिसञ्चरः ॥
एतेषां सप्तभागः ! सप्त वर्षाण्यनुक्रमात् ॥
भूतान्यपि निवसन्ति गतिमन्ति ध्रुवाणि च ॥
तेषामन्तर्विधा दृष्टते दैवमानुषी ।
अष्टका परिसंख्यातुं शक्यते तु मुहूर्तगा ॥
एतावत्तु समासेन भवाभौ तव मोदते ।
एतेषामपरे वर्षाणि कथितानि तवानघ ! ॥
सप्तानां सकलानां भारतं श्रेष्ठ संश्रितम् ।
दिवसन्निशं दृष्ट्य मनोर्वंशसंभवा

पृथोस्तु ब्रह्मन् ! वैण्यस्य तथैवाकोर्महात्मनः ।
ययातेरम्बरीषस्य मान्धातुर्नहुषस्य च ॥
तथैव शुचुकुन्दस्य त्रिवेरौशीनरस्य च ।
सोमकस्य च राजर्षेर्गाधेश्चैव महात्मनः ॥
ऋषभस्य तथैलस्य दिलीपस्य महात्मनः ।
कुक्षिकस्य च धर्मज्ञ ! नृगस्य नृपतेस्तथा ॥
अन्येषाञ्च महाभाग ! क्षत्रियाणां बलीयसाम् ॥
श्रोतुं मे गदतो ब्रह्मन् ! सर्वपापप्रणाशनम् ॥
महेन्द्रो मलयः सह्यः शुक्तिमानृक्षवानपि ।
विन्ध्यश्च पारियात्रश्च सप्तैते कुलपर्वताः ॥
तेषां सहस्रशो ब्रह्मन् ! गिरयस्तु समीपतः ।
धातुचित्राः सत्त्ववन्तो महात्मचित्रसानवः ॥
आर्या म्लेच्छाश्च धर्मज्ञ ! तैर्मिश्राः पुरुषा द्विज ! ॥
नदीं पिबन्ति विपुलां गङ्गां सिन्धुं सरस्वतीम् ॥
शतद्रुं चन्द्रभागाञ्च विपाशां स्थूलवालुकाम् ।
गोदावरीं नर्मदाञ्च यमुनाञ्च महानदीम् ॥
दृषद्वतीं विपाशाञ्च बाहुदां सरितांवराम् ।
नदीं वेत्रवतीञ्चैव पयोष्णीं देविकामपि ॥
वेदस्मृतिं वेदवतीं त्रिदिवामिक्षुलां क्रमिम् ।
इरावतीं वितस्ताञ्च चन्द्रवेणां सुपुण्यदाम् ॥
गोमतीं धूतपापाञ्च निचितां लोहितावनीम् ॥
कौशिकीं त्रिदिवां क्षय्यां सरयूञ्च महानदीम् ॥
चर्मण्वतीं वेत्रवतीं चन्दनाञ्च महानदीम् ॥
रहस्यां शतकुम्भाञ्च दक्षिणेमां दिशं तथा ।
इरावतीं पयोष्णीञ्च वारिणीं पुरमालिनीम् ॥
पूर्वाभिरामां धीराञ्च वामीं शीतवतीमपि ।
पलाशिनीं पापहरां सुप्रयोगां महामते ! ॥
कावेरीञ्चुलुकाञ्चापि वेण्णां भीमरथीमपि ।
रहस्यां शतकुम्भाञ्च कृष्णवेरां महानदीम् ॥
पलाशिनीं पापहरां हेमां हतवतीं तथा ।
मरुतीं प्रवरां मेलां महेन्द्रां पाटलावतीम् ॥
पुरावतीमनुग्राह्यां कृष्णधारां महानदीम् ।
सदानीरामधृष्याञ्च तथा वीरवतीमपि ॥
कारीषिणीमग्निजीञ्च विपुलां सरिदग्र्यां ।
सदाकान्तां शिवाञ्चैव पञ्चमीञ्च महानदीम् ॥
विश्वां वीरकराञ्चापि विश्वामित्रां कपिञ्जलाम् ।
वसुं सुवर्णां गौरीञ्च कुवेरामम्बुवाहिनीम् ॥
रथचित्रां ज्योतिरथां तुङ्गवेणां महानदीम् ।
वेत्रवतीं पिङ्गलाञ्चैव तुङ्गवेणां महानदीम् ॥
विदिशां कृष्णवेणाञ्च चरित्रांशां महापगाम् ।
सन्ध्यां समासां वेदाख्यां भारद्वाजीञ्च निम्नगाम् ॥
शोणाञ्च पिङ्गिलाञ्चैव कौशिकीं निम्नगामपि ।
दुर्गां मन्दाकिनीञ्चैव ब्रह्मवेद्यां दृषद्वतीम् ॥
परोक्षामथ रोहीञ्च सामान्यां वरवर्णिनीम् ।
सरसां तरसां शर्वां पर्णाञ्च महानदीम् ॥
मालतीं दृषभां भासां ब्रह्मवेद्यां दृषद्वतीम् ।
पलाशान्याञ्च वप्रां वै महानदीं द्विजर्षभ ! ॥
सदा निरामया क्षय्या मन्दगा मन्दवाहिनी ।
विशालाक्षा विशोका दुर्गापि पापहारिणी ॥
पलाशी च महानीरा कोपा चापि महानदी ।

शुक्तिमती मनङ्गा च मङ्गला वाहिनी तथा ।
कुमारी ऋषिकुल्या च नदी मन्दाकिनी तथा ।
सुवर्णा च तथा गङ्गा मारिषा च सरस्वती ॥
लौहित्यं करतोया च तथैव हरकाक्षया ।
विश्वस्य मातरश्चैताः सर्वाश्चैव महानदाः ॥
तथा नद्यस्तथाप्रख्याः शतशश्च सहस्रशः ।
एतेषां सरितो ब्रह्मन् ! समाख्यातास्तवानघ ॥
वक्ष्यामि पर्वतांश्चापि भारते सन्ति ये द्विज ! ।
मलयो मङ्गलप्रस्थो मैनाकश्च त्रिकूटकः ॥
ऋषभः कूटकः कोलः सह्यो देवगिरिस्तथा ।
श्रीशैलो ऋष्यमूकश्च शुक्तिमानृक्ष एव च ॥
रोधश्च पारियात्रश्च रैवतः ककुभस्तथा ।
गोवर्धनश्चित्रकूटो नीलो गोकर्ण एव च ॥
कोकामुख इन्द्रकीलस्तथा कामगिरिर्द्विज ! ।
अतः परं जनपदान् वक्ष्यामि द्विजसत्तम ! ॥
विख्याताः कुरुपाञ्चालाः शाल्वा मात्स्येय-जाङ्गलाः ।
मत्स्याः कुशट्टा मौल्या भोजाः सिन्धुकुलिन्दकाः ॥
शूरसेनाः पुलिन्दाश्च कुन्तयः कोशिकोशलाः ।
पाञ्चालाः कौशलाश्चैव बोधा माल्लास्तथैव च ॥
चेदिमत्स्यकरूषाश्च नैकपृष्ठा युगन्धराः ।
उत्तमाश्च दशार्णाश्च काशयोऽपरकाशयः ।
कुन्तयोऽवन्तयश्चैव मलजा विजयास्तथा ।
आधिराज्याः सकुट्टाश्च सक्तयक्रातयः शकाः ॥
मानवास्तोपवाहाश्च यक्षलोमान एव च ।
वाल्हीका वाटधानाश्च पुरुषाश्वर्ममेचकाः ॥
मल्लाः सुदेष्णाः प्रह्लादा मद्रिषाः क्षुद्रिकास्तथा ।
अम्बरान्ताः परान्ताश्च आभीराः कालतोयकाः ॥
पटवौशिखराश्चैव मेरुभूताश्च मारिष ! ।
उपविन्ध्यानुविन्ध्याश्च जङ्गलाः कुक्कुरास्तथा ॥
कुहाः परान्ता मार्देया मागधा मालवण्टाः ।
अन्ध्राश्च बहवो ब्रह्मन् ! कथाः सासुद-निष्कुटाः ॥
वाह्निर्मिथोऽङ्गमलदा अन्तर्गिर्यास्तथैव च ।
सप्तोत्तराः प्रावृषेया सुदेष्णा यामुनास्तथा ॥
शूका गिरादा निषधा भागवाश्च द्विजर्षभ ! ।
पुक्का भोगाः किरातास्तथैवानर्तनैर्ऋताः ॥
वीरयशाः शूरसेनाः कुलालाः कुन्तलास्तथा ।
तिलभावा मसावाश्च गान्धारा एधकास्तथा ॥
काश्मीराः सिन्धुसौवीरा दरिका कुण्डलागमाः ।
अभीसाहा कुलूताश्च मधुमन्ता कुतुम्बकाः ॥
दवकृष्टाश्च धर्मज्ञ ! शौचका वाटिकास्तथा ।
दर्वीवरा खसा दर्व्या सुहामाः समालिकाः ॥
वगायवो दशाः पार्श्वरोमाश्च कुक्षिकास्तथा ।
दवकृष्टाश्च धर्मज्ञ ! वाटधानरथोरगाः ॥
रन्ध्राः करीषकाश्चापि कुलिन्दोपत्यकास्तथा ।
पल्ला सीमाकलाश्चैव सल्विका वालवासिकाः ॥
किराता बर्बराः सिद्धाः पार्वतीयाश्च मारिष ॥

ओड्रमेच्छाः सवैदेह्यास्ताम्रलिप्तकाः ॥
तथापरे जनपदा दक्षिणा ब्राह्मणर्षभ ! ।।
द्रविड़ाः केरलाः प्राच्या विकल्पन्ध्यकास्तथा ॥
कोवेट्टकास्तथा चोलाः सौहृदा मलका मलाः ।
ध्वजिन्युत्सवसंकेता कोङ्कवेङ्कटमालवाः ॥
रट्टकाः कोरकाः प्राच्याः कुक्कुराङ्गार-
मारिकाः ।
तथैव विन्ध्यचूलिकाश्चिमत्ताः साञ्जसेनयः ॥
समङ्गाः कवकाश्चैव तथैवापरवर्णकाः ।
नूपकाञ्जनयालाश्च पुलिन्दा बर्बरैः सह ॥
सुनिवाटाः शिवाटाश्च सरा वेगवशास्तथा ।
विदर्भा ऋषिकाः काकवनाश्च ब्राह्मणर्षभ ! ॥
यवनाश्च शकाम्भोजास्तङ्गणाः परतङ्गणाः ।
सल्लहूणाः कुलत्थाश्च दारुणा म्लेच्छजातयः ॥
उत्तराश्चापरे म्लेच्छा हूणाः पारसिकैः सह ।
तथैव च मलाचीना दशार्णा दशमालिकाः ॥
अङ्गवङ्गकलिङ्गाश्च पह्लवा गिरिगह्वराः ।
खासीकाश्चान्तचाराश्च वैश्यशूद्रकुलानि च ॥
भूमाभीराश्च दरदा ये चान्ये म्लेच्छभूमयः ।
आत्रेयाश्च भरद्वाजास्तथैव स्तनपोषकाः ॥
शैवलाश्च कणिङ्गाश्च किरातानाश्च जातयः ।
तोमरा हूयमानाश्च तथैव करभञ्जकाः ॥
एते चान्ये जनपदाः प्राच्योदीच्यास्तथैव च ।
उद्देशेन मया देशास्तव संकीर्त्तिता द्विज ! ॥
वर्षं तु भारतं ब्रह्मन् ! विवर्गस्य फलं भवेत् ।
दुह्यते कामधुग्येषुभूमिः सम्यगनुष्ठिता ॥
तस्मिन् शुभाशुभं कर्म्म यथोक्तफलदं नृणाम् ।
अन्यानि यानि वर्षाणि भूमिस्वर्गाणि तानि वै ॥
भारते विहितं कर्म्म यागध्यानादिलक्षणम् ।
फलं जनयते सम्यक् विकर्म्म नरकाण्यपि ॥
तत्र सिद्धा नरा ब्रह्मन् ! तपसाराधनेन च ।
प्रयान्ति परमं लोकमपवर्गञ्च मारिष ! ॥
कृतं त्रेता द्वापरञ्च कलिश्च ब्राह्मणर्षभ ! ।
भारते तु क्रमेणैवं भवन्ति हि युगानि वै ॥
चत्वारि च सहस्राणि वर्षाणां ब्राह्मणर्षभ ! ।
आयुःसंख्या कृतयुगे संख्याता भारते द्विज ! ॥
त्रीण्येव तु सहस्राणि त्रेतायां भारते नृणाम् ।
द्वे सहस्रे द्वापरे तु शतमेकं कलौ स्मृतम् ॥
तत्रापि च स्थितिर्नास्ति कलौ ब्राह्मणसत्तम ! ।
गर्भस्थाश्च म्रियन्ते च तथा जाता म्रियन्ति च ॥
महायशा महासत्त्वा ज्ञानिनो धर्म्मतत्पराः ।
तपस्विनो ध्याननिष्ठाः कृते जायन्ति मानवाः ॥
त्रेतायां सर्ववर्णाश्च स्वधर्म्मनिरता सदा ।
द्वापरे च महाभाग ! क्रूराश्च परहिंसकाः ॥
तुल्याश्चातृतिकाश्चैव क्रोधना दुष्कृते रताः ।
कलौ खलु भविष्यन्ति भारते तापस ! प्रजाः ॥
सर्वेषामपि वर्षाणां भारतं प्रवरं द्विज ! ।
सिध्यन्ति मानवा ह्यत्र हरिभक्तिपरायणाः ॥
प्रायो भागवताः सर्व्वे भारते द्विजसत्तम ! ।
नानारूपाणि तीर्थानि फलदानि नृणामपि ॥
जम्बूद्वीपो मया प्रोक्तो लक्षयोजनविस्तृतः ।
समानेन प्रमाणेन वेष्टितो लवणाम्भसा ॥

अष्टावत्र उपद्वीपा सुनिभिः परिकीर्त्तिताः ।
सिन्धुमध्ये महाभाग ! नानाविधजनाश्रिताः ॥
नामानि तेषां वक्ष्यामि शृणु वात्स्यायन
द्विज ! ।
सगरस्य सुतैरन्वेषणे परितो महीम् ॥
खनद्भिः कल्पिता विप्र ! द्वीपा अष्टौ महार्णवे ।
स्वर्णप्रस्थश्चन्द्रशुक्लः आवर्त्तनो यथा ॥
पञ्चजन्यस्तथा मन्दहरिणो रमणकाह्वयः ।
शङ्खेति कथिता विप्र ! जम्बुद्वीपस्य तेऽन्तरा ॥"
इति पाद्मे भूमिखण्डे भूगोलवर्णने १३०
अध्यायः ॥ * ॥

शेष उवाच ।

"शृणु द्वीपं प्रवक्ष्यामि शृणु वात्स्यायन द्विज ! ।
यन्मानं जम्बुद्वीपस्य तथैव लवणोदधेः ॥
ततो द्विगुणमानोऽसौ शङ्खद्वीपो महामते ! ।
जम्बुद्वीपस्य च यथा वेष्टनं लवणाम्भसा ॥
समानेन प्रमाणेन पुरः परिखया यथा ।
परिखाया उपवनं यथा भवति वेष्टनम् ॥
शङ्खद्वीपस्तथैवायौ संवेष्ट्य लवणोदधिम् ।
द्विलक्षयोजनायामो वर्णते द्विजसत्तम ! ॥
तत्र जम्बूप्रमाणोऽस्ति द्वीपख्यातिकरस्तरुः ।
शङ्खो नाम महाभाग ! स्वर्णवर्णोऽभिधाम च ॥
तत्र वर्षाणि सप्तैव सुभद्रं यवसं शिवम् ।
अन्यतान्यमप्यान्तानि क्रमादभयमित्यपि ॥
सप्तैव सीमागिरयो नद्यः सप्त च कीर्त्तिताः ।
मणिकूटो वज्रकूटो ज्योतिष्मानिन्द्रसेनकः ॥
हिरण्यष्ठीवो मेघमालः सुपर्णः सेतुशैलका ।
अरुणकृष्णश्च सावित्रसिवमौ तथा ॥
सत्यभवा सुप्रभा च वात्स्यायन ! घृतम्भवा ।
रुता सप्त महानद्यो दर्शनादेव पावनाः ॥
वर्णानां ब्राह्मणादीनां तत्र नामान्यनुक्रमात् ।
हंसश्चैव पतङ्गश्चोर्द्धायनश्च तृतीयकः ॥
सत्याङ्गश्च चतुर्थो वै सर्व्वे धर्म्मार्थकोविदाः ।
अन्ये च पर्व्वतास्तत्र नद्यश्चैव महाफलाः ॥
प्रागायतो महाभाग ! मलयो नाम पर्व्वतः ।
ततो मेघाः प्रवर्त्तन्ते प्रभवन्ति च सर्व्वतः ॥
ततः परेण विप्रेन्द्र ! जलधारस्तु पर्व्वतः ।
तस्मादृच्छति वै तोयं वासवः पृथिवीऋते ॥
वर्षासु हि ततो वृष्टिस्ततः प्रस्यन्दते जलम् ।
रैवतो नाम तत्रोच्च गिरिर्यत्र प्रतिष्ठितः ॥
रैवती नाम नक्षत्रं दृश्यते दिवि मोदितं ।
उत्तरेण तु तस्याथ श्यामो नाम गिरिर्महान् ॥
प्रांशुः श्रीमान्घनश्यामेघप्रभयोज्ज्वलविग्रहः ।
यस्य स्त्रिया श्यामवर्णाः प्रजास्तत्र महामते ! ॥
अतःपरं महाभाग ! दुर्गो नाम महागिरिः ।
केशरी केशरयुतो यस्मादात्तः प्रवर्त्तते ॥
शङ्खो नाम महाद्वीपो यत्र पुण्यस्तु शङ्करः ।
तत्र गच्छन्ति सिद्धाश्च चारणा देवतानि च ॥
धार्मिकाश्च प्रजा ब्रह्मन् ! जरामृत्युविवर्जिताः ।
दीर्घायुषः सत्यपरा वर्द्धन्ते भोगवर्द्धिताः ॥
तत्रत्या महापुण्या मद्रा च बहुधा मता ।
महानदी मणिजला सीतासी वेत्रिका तथा ।

सहस्राणां शतान्येवं नद्यः संख्या न शक्यते ।
तत्र पुण्या जनपदाश्चत्वारो लोकसम्मताः ॥
मगाश्च मशकाश्चैव मानसा मन्दगास्तथा ।
मगा ब्राह्मणभूयिष्ठाः स्वकर्म्मनिरता द्विज ! ।
मशकेषु तु राजन्या धार्म्मिकाः सर्व्वकामदाः ।
मानसे च महाभाग ! वैश्यधर्म्मनिषेविणः ।
मन्दगेषु तथा शूद्राः शूरा धर्म्मार्थनिश्चिताः ।
न तत्र राजा विप्रेन्द्र ! न दण्डो न च दण्डिता
स्वधर्म्मेणैव ते सर्व्वे रक्षन्ति च परस्परम् ॥*
शङ्खद्वीपसमानेन सप्तद्वेण वृतो बहिः
इक्षुरसवलेनैव नानारत्नवता द्विज ! ॥
शाल्मलोऽपि तथा द्वीपः शङ्खाद्विगुणमानतः ।
चतुर्लक्षयोजनेन सुरोदेनावृतो महान् ॥
यत्र वै शाल्मली नाम द्विलक्षयोजनोच्छ्रितः ।
द्वीपख्यातिकरो वृक्षः सुपर्णेन कृतालयः ॥
तत्र वर्षाणि सप्तैव कथ्यन्तेऽत्र सुरोचनम् ।
सौमनस्यं रमणकं देववर्षमिति क्रमात् ॥
पारिभाद्रमाप्यायनमभिज्ञातमिति द्विज ! ।
सेतुशैलाश्च सप्तैव सुरसः घृतपृङ्गकः ॥
वामदेवश्च कुन्दश्च पुष्पवर्षकः ।
सहस्रुतिरिति ब्रह्मन् ! नद्यः सप्तैव कीर्त्तिताः ॥
अनुमतिः सिनीवाली नन्दा राका सरस्वती ।
रजनी च कुहूश्चैव महानद्यः सुपुण्यदाः ॥
तत्र विप्रादयो वर्णाः क्रमान्नामानि विभ्रति ।
आद्यः श्रुतधरो वर्णस्ततो वीर्य्यधरः स्मृतः ।
वसुन्धरस्तृतीयस्तु चतुर्थस्तु इषुन्धरः ।
सर्व्वे ते सोममात्मानं भगवन्तं यजन्ति हि ॥
सुरोदं परिवेष्ट्योऽथ ततो द्विगुणमानतः ॥
कुशद्वीपो घृतोदेन समानेनावृतो द्विज ! ।
कुशस्तम्बो महांस्तत्र द्वीपख्यातिं करोति च ।
जाज्वल्यमानो दीप्तेन महाज्वलनरूपिणा ॥
तत्र वर्षाणि सप्तैव समानानि प्रमाणतः ।
वसुदानं दृढरुचिर्नाभिगुप्तं महामते ! ॥
सत्यव्रतं विप्रनाम देवगर्भेति सप्तमम् ।
सप्तैव सीमागिरयः कीर्त्तिता द्विजसत्तम ! ॥
वभ्रुश्चैव चतुःशृङ्गः कपिलश्चित्रकूटकः ।
देवानीक ऊर्द्धरोमा द्रविणश्चेति सप्तमः ॥
महानद्यश्च सप्तैव सर्व्वपापप्रणाशनाः ।
रसकुल्या मधुकुल्या मित्रविन्दा च मागध ! ॥
श्रुतविन्दा देवगर्भा मन्त्रमाला घृतच्युता ।
तत्र विप्रादयो वर्णा नामान्तरभृतो द्विज ! ॥
कुशलः प्रथमो वर्णः कोविदस्तृतीयकः ।
अतिसुक्तस्तृतीयस्तु चतुर्थः कुलकः स्मृतः ॥
ते सर्व्वे ज्ञानसम्पन्ना ज्ञातवेदस्वरूपिणः ।
भजन्ते भगवन्तं वै कर्म्मकौशलयोगिनः ॥*॥
घृतोदश्च तथा द्वीपो द्विगुणः क्रौञ्चसंज्ञकः ।
क्षीरोदेन समानेन वेष्टितो ब्राह्मणर्षभ ! ॥
क्रौञ्चो नाम गिरिर्यत्र द्वीपख्यातिकरो महान् ।
महासेनगुहाघातक्षतच्छिद्रो महामते ! ॥
क्षीरोदेनाभिषिक्तश्च सततं वीचिवर्षये ।
वर्षाणि तत्र सप्तैव तेषां नामानि मे शृणु ।
आद्यो मधुरुहो मेघपृष्ठश्चापि वनस्पतिः ।

लोहितार्णः सुधामा च भाजिष्ठश्चापि सप्तमः।
गिरयश्चापि सप्तैव वर्षसीमाकरा द्विज!।
शुक्लोऽथ वर्द्धमानश्च भोजन उपबर्हणः॥
नन्दनो नन्दनश्चैव सर्वतोभद्र इत्यपि।
सप्त तत्र महानद्यः पावना ब्राह्मणर्षभ!॥
अभया चाम्रतोया च लघिरूपवती तथा।
तीर्थवत्यार्यका शुक्ला पवित्रवत्यपि स्मृता॥
विप्रादयस्तथा वर्णाः ख्याता नामान्तरेण तु।
पुरुषः प्रथमो वर्णो द्वितीयो ऋषभः स्मृतः॥
तृतीयो द्रविणो नाम देवसंज्ञश्चतुर्थकः।
मूर्त्तिं जलमयीं विष्णोर्ध्यायन्ति च यजन्ति च॥*॥
एवं परस्तात् क्षीरोदात् शाकद्वीपो द्विजर्षभ!।
आयामेन स विज्ञेयो द्वात्रिंशल्लक्षयोजनः॥
दधिमण्डोदकेनैव समानेन स सिन्धुना।
परीतो भाति तत्रास्ति शाको नाम महीरुहः॥
द्वीपख्यातिकरः श्रीमान् वासयन् द्वीपमेव तम्।
वर्षाणि तत्र सप्तैव पुरोजवमनोजवौ॥
धूम्रानीको वेपमानो विश्वाधारश्च मारिष!।
बहुरूपश्चित्ररैको गिरयोऽपि च सप्त वै॥
ईशान उरुशृङ्गश्च बलभद्रो महानसः।
शतकेशवनामा च सहस्रस्रोत एव च॥
देवपालोऽपि सप्तैते वर्षसीमप्रवर्त्तकाः।
नद्यः सप्तैव विख्याता आयुर्ह्यापनघा द्विज!॥
सुकृतिः पवनदी निर्ऋतिरपराजिता।
विख्यातोभयसृष्टिश्च महापुण्या महाफलाः॥
विप्रादयस्तथा वर्णा ख्याता नामान्तरेण तु।
आद्यो ऋतव्रतो नाम तनः सत्यव्रतः स्मृतः॥
दानव्रतानुव्रतौ च तृतीयश्च चतुर्थकः।
भगवन्तं वायुरूपं भजन्ते च यजन्ति च॥*॥
तथैव दधिमण्डोदात् परस्तात् पुष्करो महान्।
द्विगुणेन प्रमाणेन द्वीपः स्वादूदकेन तु॥
परिवीतः समानेन सिन्धुना ब्राह्मणर्षभ!।
यत्र पुष्करमत्युच्चं ज्वलज्ज्वलनसन्निभम्॥
द्वीपख्यातिकरं पत्रसहस्रायुतशोभितम्।
यदाहुरासनं विश्वसृजस्तस्य प्रजापतेः॥
द्वीपमध्येऽवधिगिरिरेक एव महामते!।
स मानसोत्तरो नाम प्राकार इव वेष्टकः॥
तस्य पूर्व्वापरौ पार्श्वौ देवर्षे! तत्र मारिष!।
सिन्धोर्वेष्टनमप्येकं गिरेर्वेष्टनकं परम्॥
रमणकं धातकश्च ह वर्षे नामतः स्मृते।
मानं तस्य गिरेर्विप्रायुतयोजनसङ्ख्यितम्॥
तावदेव तथायामस्तस्योपरि पुराणि च।
चत्वारि लोकपालानामिन्द्रादीनां द्विजर्षभ!॥
यः परिक्रममाणस्य मेरुं विप्र! विवस्वतः।
स्फुटां विभर्त्ति शैलेन्द्रचक्रं समतलरात्मकम्॥
अध्यासते च तौ पार्श्वौ प्रजानस्य महाबलाः।
तत्र संज्ञान्तरं नास्ति वर्णानां ब्राह्मणर्षभ!॥
स्वादूदकस्य परतो लोकालोकाचलो महान्।
तोयस्य पार्श्वतोऽस्य मध्ये गिरिवरः स्थितः॥
प्राकार इव संक्षेप्ता लोकान् सर्व्वान्महामते!।
लोकालोकाचलो नाम तेनासौ परिकीर्त्तितः॥
मानसोत्तरमेर्वोस्तु यत्तरे यावती मही।

तावता काञ्चनी भूमिर्लोकालोकात्परे द्विज!॥
यत्र प्रणिहितं वस्तु कथञ्चिन्नोपलभ्यते।
सौवर्णी कान्तिरुद्दीप्ता सर्व्ववर्णप्रभाविनी॥
यतः सर्व्वाणि सत्त्वानि तां भूमिं वर्जयन्ति हि।
लोकालोको गिरिर्यस्तु लोकान्ते वर्णते महान्॥
आवृणोति स तेजांसि सूर्य्यादीनामपि द्विज!।
तमतिक्रम्य ज्योतींषि शमन्ते न प्रवर्त्तितुम्॥
तावद्भ्राम्यद्वात् ब्रह्मन्यायामेन च तादृशः।
आयामविस्तरे पृथ्वी पञ्चाशत्कोटियोजना॥
तस्याश्चतुर्थभागोऽयं लोकालोकाचलो गिरिः।
तस्योपरिष्टाच्चत्वारो गजेन्द्राः सुमहाबलाः॥
नियुक्ता ब्रह्मणा भूमिं करेराक्षय्या संस्थिताः।
भगवानपि तत्रैव विष्वक्सेनादिभिर्वृतः॥
पार्षदप्रवरैर्ब्रह्मन्! भुजैर्बहुभिरुच्छ्रितैः।
धारयन् जगतीमास्ते व्याकल्यमपि मारिष!॥
योऽन्तर्विस्तार एतस्या भूम्यास्ते परिवर्त्तितः।
तावती भूर्लोकाख्या सान्द्रसत्तमसावृता॥
ततो योगेश्वरगतिर्योगिनां प्राप्यसत्तमम्।
स्थानं भगवतः साक्षात् श्वेतद्वीप इतीर्य्यते॥
इति ते कथितं ब्रह्मन्! भूगोलस्योपवर्णनम्॥

व्यास उवाच।

य इदं शृणुयात् सूत! भूगोलस्यानुवर्णनम्।
प्रदक्षिणीकृता तेन सशैलवनकानना।
ससागरा च सद्वीपा सवर्षा च वसुन्धरा॥
इति श्रीपद्मपुराणे भूमिखण्डे भूगोलवर्णनं नाम १३१ अध्यायः॥*॥ ज्योतिषशास्त्रोक्तभूगोलम्॥
यथा,—
"सिद्धिं साध्यसुपैति यत्सरयतः क्षिप्रं प्रसादात्तथा
यस्याश्चित्रपदास्खलंकृतिरलं लालित्यलीलावती।
वृत्यन्ती सुखरङ्गेव कृतिनां स्याद्भारती भारती
तं तां च प्रणिपत्य गोलममलं बालावबोधं ब्रुवे॥"
गोलग्रन्थकथने कारणमाह।
'मध्याद्यं दुःसदां यदत्र गणितं तस्योपपत्तिं विना
प्रौढिं प्रौढसभासु नैति गणको निःसंशयो न स्वयम्।
गोले सा विमला करामलकवत् प्रत्यक्षतो दृश्यते
तस्मादस्युपपत्तिबोधविधये गोलप्रबन्धोद्यतः॥'
अथ गोलप्रशंसया गोलानभिज्ञगणकोपहासमाह।
'भोज्यं यथा सर्व्वरसं विनाज्यं
राज्यं यथा राजविवर्ज्जितञ्च।
सभा न भातीव सुवक्तृहीना
गोलानभिज्ञो गणकस्तथैव॥
यादी व्याकरणं विनैव विदुषां दृष्टः प्रविष्टः सभां

अल्पबुद्धिमतिः स्वयं पटुवटुर्भूभङ्गवक्रोक्तिभिः।
हीतः सन्नुपहासमेति गणको गोलानभिज्ञस्तथा
ज्योतिर्विन्न सदसि प्रगल्भगणकप्रश्नप्रपञ्चोक्तिभिः॥'
अथ गोलस्वरूपमाह।
'दृष्टान्त एवावनिभग्रहाणां
संस्थानमानप्रतिपादनार्थम्।
गोलः स्मृतः खेचरविग्रह एव
प्राज्ञैरतः स्याद्गणितेन गम्यः॥'
अथ गणितप्रशंसामाह।
'ज्योतिःशास्त्रफलं पुराणगणकैरादेश इत्युच्यते
नूनं लग्नबलाश्रितः पुनरयं तत्साधखेटाश्रयम्।
तं गोलाश्रयिणोऽन्तरेण गणितं गोलोऽपि न ज्ञायते
तस्मात् यो गणितं न वेत्ति स कथं गोलादिकं ज्ञास्यति॥'
अथ ज्योतिषशास्त्रश्रवणाधिकारिलक्षणमाह
'द्विविधगणितसूक्तं व्यक्तमव्यक्तसंज्ञं
तदवगमननिष्ठः शब्दशास्त्रे पटिष्ठः।
यदि भवति तदेदं ज्योतिषं भूरिभेदं
प्रपठितुमधिकारी सोऽन्यथा नाधिकारी॥'
व्याकरणवर्णनमाह।
'यो वेद वेदवदनं सदनं हि सत्यग्ब्राह्मं सवेदमपि वेद किमन्यशास्त्रम्।
यस्मादतः प्रथममेतदधीत्य धीमान्
शास्त्रान्तरस्य भवति श्रवणेऽधिकारी॥'
अथ गोलग्रन्थस्य प्रवृत्तार्थमुक्तप्रकारेणाह
'गोलं श्रोतुं तव यदि मतिर्भास्करीयं प्रगुं त्वं
नो संक्षिप्तो न च बहु तथा विस्तरः शास्त्रतत्त्वम्।
लीलागम्यः सुललितपदः प्रश्नरम्यः स यस्माद्विद्वन्! विद्वत्सदसि पठतां पल्लितोक्तिं व्यनक्ति॥'
अथ भूसंस्थान प्रश्नश्लोकद्वयेन आह।
'भ्रमद्भचक्रवक्रान्तर्गगने गगनेचरैः।
धृता धृता धरा केन येन नेयमियादधः॥
किमाकारा कियन्माना नानाशास्त्रविचारणात्।
कीदृग्द्वीपकुलाद्रीन्द्रसमुद्रैर्मुद्रितोच्यताम्॥'
अथ प्रश्नस्फुटीकरणोपपत्तिप्रश्नं श्लोकद्वयेनाह।
'संक्षिप्तो युगणाद्युगादिभगणैः खेटोऽनुयातेन य
स्यात्तस्यास्फुटता कथं कथमभूत् सर्व्वोक्तितोऽनैकधा।
किं देशान्तरसङ्गमान्तरमयो वाक्यान्तरं किंवरं
किंवोपंगदृङ् चक्षुषश्च तदिदं कस्मात्? ब्रूहि मातः श्रुतः॥
किं केन्द्रं किल केन्द्रणं किमु चलं किंवाचलं तत्फलं
कस्मात्तत्सहितः कृतश्च राहुणा खेटस्फुटो जायते

किं दृक् कर्म तयोदयास्तसमये देया विदश्चुर्बुधाः
सर्वं मे विमलं यदामलमलं गोलं विजानासि चेत् ॥'

अथ चिप्रश्नोदितदिनमानभेदप्रश्नं श्लोकद्वयेनाह।

'मद्दृष्टेः किमहो रजनी तनु-
र्दिनमणौ गणकोत्तरगोलगे।
नतु तनुर्दिवसो मघती निशा
यद पिचत्तण ! दक्षिणदिग्गते ॥
भवति किं द्युनिशं द्युनिवासिनां
द्युमणिवर्षमितश्च सुरद्विषाम्।
पितृषु किं शशिमासमितं तथा
युगसहस्रयुगं दृष्टिगस्य किम् ॥

अथ राश्युदयमानकालभेदप्रश्नाह।

'भवलयस्य किलार्कलवाः समाः
किमसमैः समये खलु राशयः।
ससुषयान्युदयं किमु गोलवि-
ज्ञविषयेष्वखिलेष्वपि ते समाः ॥'

अथ द्युष्याकुष्यादिसंस्थानप्रश्नं वृत्तार्धेनाह।

'द्युष्याकुष्यापमसमनराग्राग्रलम्बादिकानां
विद्वन्! गोले वियति हि यथा दर्शय क्षेत्र संस्थाम् ॥'

अथ चन्द्रार्कग्रहणयोः दिक्कालभेदाद्युपपत्तिप्रश्नान् श्लोकोत्तरार्धेनाह।

'तिग्मांशे चेत् ग्रह उडुपतेः किन्न भानात्तदानीं
इन्दोः प्राच्यां भवति हि रवेः प्रग्रहः किं प्रतीच्याम् ॥'

लम्बनं वद किं का च नतिमातमतां वर!।
नतसंस्कृतिस्तिथौ वाच्ये किं ते सिद्धे श्रुतः श्रुतः ॥'

अथ ग्रहशृङ्गोन्नतौ चन्द्रस्य शुक्रस्य क्षयवृद्धिप्रश्नमाह।

शुक्रस्य द्विगुणाग्र एष महसो हान्याः कृतः कृतः
तद्वृत्तत्वगतोऽप्यहो भ्रमवशाद्दोषातिसङ्गादिव।
संप्राप्याथ पुनस्त्वयोक्तमुभतस्तस्यात्र्यवे नैव किं
शुक्रस्य क्रमशस्तथैव महसो वृद्धेरिति सद्वृत्तताम् ॥'

अथ प्रथमप्रश्नस्य पृथिवीसंस्थानोपपत्तेरुत्तरं विबुधादिसर्गे पृथिव्यादीनां तत्त्वानामादितत्त्वं निखिलजगज्जननैकबीजं परं ब्रह्म मनसा प्रणिपत्यादौ तावत् तत्त्रयमाह।

'यस्मात् चुम्बकप्रकृतिपुरुषाभ्यां महागस्य गर्भेऽयं कारोऽभूत् सकलश्रियखिलोर्वस्ततः संहतेश्च।
ब्रह्माण्डं यत्तदगमहीपृष्ठनिष्ठो विरिञ्चि-
र्विश्वं पश्यत् स्वजनि परमं नत्र तत्त्वमाद्यम् ॥'

अथ भूमेः स्वरूपमाह।

भूमः पिण्डः ग्रहाद्यभ्रकविरविकुजेज्यार्किनक्षत्रचक्रक्षा
दृष्टेर्मृषो हृतःस्वगुरुदनिलसलिलव्योमतेजोमयोऽयम्।
नान्याधारः स्वशक्त्या वियति च नियतं तिष्ठतीहास्य एष्ठे
निष्ठं विश्वस्य शश्वत् सदगुणमगुणादित्यदेयं समन्तात् ॥
सर्वतः पर्वतारामग्रामक्षेत्रसमेधितः।
कदम्बकुसुमग्रन्थिः केसरप्रकरैरिव ॥'

अथ पुराणेषु भूमेराधारपरम्परा या पठिता तां निराकुर्वन्नाह।

मूर्त्तो धर्त्ता चेद्धरित्र्यास्तदन्य-
स्तस्याप्यन्योऽप्येवमज्ञानवस्था।
अन्ये कल्प्या चेत् स्वशक्तिः किमाद्ये
किं नो भूमिः साऽस्तूर्ध्वमूर्ध्वं ॥'

अथ कथमियं भूमेः स्वशक्तिरित्याशङ्कां परिहरन्नाह।

'यद्योगान्तार्कानलयोश्च प्रीततां
विधौ द्रुतिः कैः कठिनत्वमश्नुते।
मरुच्चलो भूरचला स्वभावतो
यतो विचित्राः खलु वस्तुशक्तयः ॥
आकृष्टशक्तिश्च मही तया यत्
स्वस्थं गुरु स्वाभिमुखं स्वशक्त्या।
आकृष्यते तत् पततीव भाति
समे समन्तात् कुरियं यतः खे ॥'

अथ बौद्धानां युक्तिमाह।

'भपञ्जरस्य भ्रमणावलोका-
दाधारशून्या क्षुरितिप्रतीतिः।
स्वस्थं न दृष्टं गुरु च क्षमातः
खेऽधः प्रयातीति वदन्ति बौद्धाः ॥
द्वौ द्वौ रवीन्दू भगणौ च तद्व-
देकान्तरौ तादृदयं ब्रवीताम्।
यदद्यवन्नेवमनर्थपादान्
ब्रवीम्यतस्तान् प्रतियुक्तियुक्तम् ॥'

अथ तेषां युक्तिभङ्गमाह।

'भूः खेऽधः खलु यातीति बुद्धिर्बौद्ध! सुधा कथम्।
यातायातश्च दृष्ट्वापि खेयत् चित्रं गुरु क्षितिम् ॥'

अथ जिनानां युक्तिभङ्गमाह।

'किं गण्यं तव वैगुण्यं दैगुण्यं यो दृशाक्षया:।
भार्केन्दूनां विलोक्याङ्गा ध्रुवमत्यपरिभ्रमम् ॥'

भूगोलस्य समतां निराकर्तुमाह।

'यदि समा सुकुरोदरसन्निभा
भगवती धरणी तरणिः क्षितेः।
उपरि दूरगतोऽपि परिभ्रमन्
किमु नरैरमरैरिव नेक्षते ॥
यदि निशाजनकः कनकाचलः
किमु तदन्तरगः स न दृश्यते।
उदगयं नतु मेरुरयंगुमान्
कथमुदेति च दक्षिणभागतः ॥

अथ प्रत्यक्षविरोधशङ्कां निरस्यन्नाह।

'समो यतः स्यात् परिधिः शनांशः
पृथ्वी च पृथ्वी गितरां तरीयान्।
नरश्च तत्पृष्ठगतस्य कृत्स्ना
समेव तस्य प्रतिभाऽतः सा ॥'

खोल्कस्य भूपरिधिप्रमाणस्य उपपत्तिमाह।

'पुरान्तरं चेद्दशयोजनं स्यात्
तदा विशेषलवैक्षणा किम्।
चक्रांशकैरित्यनुपातयुक्त्या
युक्तं निरुक्तं परिधेः प्रमाणम् ॥'

तदेव दृढीकुर्वन्नाह।

'गिरिदेशात् क्षितियोरङ्गांशै
भवेदवन्ती गणितेन यस्मात्।
तदन्तरं गोलयुगं स्याद्
भमानमस्माद्वद किं तदुक्तम् ॥
शृङ्गोन्नतिग्रहयुतिग्रहणोदयास्त-
च्छायादिकं परिधिना घटतेऽमुना हि।
नान्येन तेन गुरुणोक्तमहीप्रमाण-
प्रामाण्यमन्वयबुधा यतिरेकतश्च ॥'

अथ भूगोलपुरनिवेशमाह।

'लङ्का कुमध्ये यमकोटिरस्याः
प्राक्पश्चिमे रोमकपत्तनञ्च।
अधस्ततः सिद्धपुरं सुमेरुः
सौम्येऽथ याम्ये वडवानलश्च ॥
कुवृत्तपादान्तरितानि तानि
स्थानानि षड्गोलविदो वदन्ति।
वसन्ति मेरौ सुरसिद्धसंघा
यौर्वे च सर्वे नरकाः सदैत्याः ॥
यो यत्र तिष्ठत्यवनीतलस्य-
मात्मानमस्या उपरिस्थितञ्च।
स मन्यतेऽतः कृतचतुर्थसंस्था
मिथश्च ते तिर्यगिवामनन्ति ॥
अधःशिरस्का कुदलान्तरस्था
च्छाया मनुष्या इव नीरतीरे।
अनाकुलाकीर्यगधःस्थिताश्च
तिष्ठन्ति ते तत्र वयं यथाच्च ॥'

अथ द्वीपानां समुद्राणाञ्च संस्थानमाह।

'भूमेरर्द्धं चारसिन्धोरुदक्स्थं
जम्बूद्वीपं प्राहुराचार्यवर्याः।
अर्द्धेऽन्यस्मिन् द्वीपषट्कस्य याम्ये
क्षारक्षीराद्यम्बुधीनां निवेशः ॥
लवणजलधिरादौ दुग्धमिक्षुश्च तस्मा-
दृतमथ तदनन्तरञ्च श्रीश्च यस्माद्बभूव।
महितचरणपद्मः पद्मजन्मादिदेवै-
र्वसति सकलवासो वासुदेवश्च यत्र ॥
दध्नो घृतस्येक्षुरसस्य तस्मात्
मद्यस्य च स्वादुजलस्य चान्धेः।
स्वादूदकान्तर्वडवानलोऽसौ
पातालसंज्ञाः पृथिवीप्रदाहि ॥
चक्षुत्फणा मणिगणांशुलतप्रकाशा
रत्नेषु सासुरगणाः फणिनो वसन्ति।
दीप्यन्ति दिग्दरमणीरमणीयदेहैः
विद्युच्च तत्र हि लसत्कनकावभासैः ॥
शाकं ततः शाल्मलमत्र कौशं
क्रौञ्चञ्च गोमेदकपुष्करं च।
द्वयोर्द्वयोरन्तरमेकमेकं
चतुष्टयोर्द्वीपसदाहरन्ति ॥

भूगोलः

अथ जम्बुद्वीपमध्ये गिरिनिवेशवशेन नवखण्डान्याह ।

'लङ्कादेशाद्धिमगिरिहदक् हेमकूटश्च तस्मात्
तस्मादन्यो निषध इति ते सिन्धुपर्यन्तदेर्घ्याः ।

एवं सिद्धादुदगपि पुरात् पद्मवच्चक्रनीलावर्षाख्येषां जगुरिह बुधा अन्तरे त्रीणिदेशान् ॥

'भारतवर्षमिदं खुदगस्तात्
क्षिन्नरवर्षमतो हरिवर्षम् ।
सिद्धपुराच्च तथा कुरु तस्माद्-
विद्धि हिरण्मयरम्यकवर्षे ॥
माल्यवांश्च यमकोटिपत्तनाद्-
रोमकाच्च किल गन्धमादनः ।
नीलशैलनिषधावधी च तौ
अन्तरालमनयोरिलावृतम् ॥
माल्यवच्चलधिमध्यवर्त्ति
यत्तु भद्रतुरगं जगुर्बुधाः ।
गन्धशैलजलराशिमध्यगं
केतुमालकमिला कलाविदः ॥
निषधनीलसुगन्धसुमाल्य-
कैरलमिलावृतमावृतमावभौ ।
अमरकेलिकुलाय समाकुलं
रुचिरकाञ्चनचित्रमहीतलम् ॥'

अथ मेरुसंस्थानमाह ।

'वृत्त हि मेरुगिरिः किल मध्यगः
कनकरत्नमयस्त्रिदशालयः ।
दृष्टिरुजन्मकुपद्मजकर्णिः-
केति च पुराणविदः समवर्णयन् ॥
विष्कम्भशैलाः खलु मन्दरोऽस्य
सुगन्धशैलो विपुलः सुपार्श्वः ।
तेषु क्रमात् सन्ति च केतुवृक्षाः
कदम्बजम्बूवटपिप्पलाख्याः ॥
जम्बूफलामलगलदसतः प्रवृत्ता
जाम्बूनदीरसयुता वृहदभूत् सुवर्णम् ।
जाम्बूनदं हि तदतः सुरसिद्धसंघाः
प्रपिबन्त्यवन्ततपानपराङ्मुखास्ते ॥
वनं तथा चित्ररथं वशिष्ठं
तेम्बरीनन्दननन्दनञ्च ।
वृत्याश्रयं यत् वृतिवृत् सुराणां
भाषिष्णु वैभ्राजमिति प्रसिद्धम् ॥
सरांस्यघेतेऽरुणकञ्च मानसं
महाहृदं शेतजलं यथाक्रमम् ।
सरःसु रामारमणक्रमाक्षमाः
सुरा रमन्ते खलकेलिलालसाः ॥
सद्रत्नकाञ्चनमयं शिखरत्रयञ्च
मेरौ सुराग्निपुरारिपुराणि तेषु ।
तेषामधः शतमखक्षयलालनान्तकानां
रक्षोऽम्बुवानिलधनेशपुराणि चाष्टौ ॥'

अत्र अन्तर्द्वीपमाह ।

'त्रिंशत्पदोत्त्रिंशपुरात् पतित्वा मेरौ चतुर्द्वीपवितीर्णभागाः ।
त्रिंशत्पदोत्त्रिंशदसङ्ख्यसंख्याः संगता गता यियति ।

भूगोलः

सीताख्या भद्राश्वं खण्डयन्ती च भारतं वर्षम्
चक्षुश्च केतुमालं भद्राख्या चोत्तरान् कुरून्
याता ॥
या दर्शिताभिलषिता दृष्टा सृष्टावगाहिता
पीता ।
उक्ता स्मृता स्तुता वा पुनाति वपुषापि पापिनः
पुरुषान् ॥
यां चलिते दलिताखिलबन्धो
गच्छति वल्गति तत्पितृसंघः ।
प्राप्ततटो विनिवान्तकदूतो
याति नरो निरयात् सुरलोकम् ॥'

अथ भारतवर्षमध्ये नव खण्डानि सप्त कुलाचलांश्चाह ।

'ऐन्द्रं कसेरुसकलं किल ताम्रपर्ण-
मत्यन्नभक्तिमदतच्च कुमारिकाख्यम् ।
नागञ्च सौम्यमिह वारुणमन्त्यखण्डं
गान्धर्वसंज्ञमिति भारतवर्षमध्ये ॥
वर्षव्यवस्थितिरिहैव कुमारिकाख्ये
म्लेच्छेषु चान्त्यजनना निवसन्ति सर्वे ।
माहेन्द्रशुक्तिमलयर्क्षकपारिपात्राः
सह्यः सविन्ध्य इह सप्त कुलाचलाख्याः ॥'

अथ लोकव्यवस्थामाह ।

'भूर्लोकाख्यो दक्षिणे यच्चदेशा-
दस्मात् सौम्योऽयं भुवः खच्च मेरुः ।
लभ्यः पुण्यैः खे मरुद्भिः स्याच्चनोऽतो-
ऽनल्पानन्दैः खेचरैः सत्यमन्त्यैः ॥'

दिग्व्यवस्थामाह ।

'लङ्कापुरेऽर्कस्य यदोदयः स्या-
त्तदा दिनार्द्धं यमकोटिपुर्य्याम् ।
अधस्ततः सिद्धपुरेऽस्तकालः
स्यादर्द्धरात्रं खलु रोमके राद्धिदलं सदैव ॥
यत्रोदितोऽर्कः किल तत्र पूर्व्वा
तत्रापरा यत्र गतः स चास्तम् ।
तन्मत्यतोऽन्ये च ततोऽखिलाना-
मुदक्स्थितो मेरुरिति प्रसिद्धम् ॥'

अथ विशेषमाह ।

'अधोऽक्षविन्याः कुजचुर्थभागे
प्राच्यां दिशि स्यादयमकोटिरेव ।
ततश्च पश्चान्न भवेदवन्ती
लङ्कैव तस्याः ककुभि प्रतीच्याम् ॥
तथैव सर्व्वत्र यतो हि यत् स्यात्
प्राच्यां ततस्तन्न भवेत् प्रतीच्याम् ।
निरक्षदेशादितरत्र तस्मात्
प्राच्यप्रतीच्यौ च विचित्रसंज्ञे ॥'

अथ भचक्रभ्रमव्यवस्थामाह ।

'निरक्षदेशे क्षितिमध्यलोपगौ
ध्रुवौ नरः पश्यति दक्षिणोत्तरौ ।
तदाश्रितं ज्योतिरनन्तयन्त्रवत्
भ्रमद्भचक्रं निजमस्तकोपरि ॥
उदग्ध्रुवं प्रत्यति योजनं क्षिते-

भूगोलः

स्तदन्तरे योजनजाः प्रसंग्रहाः ॥
योजनसंख्या भांशैर्३६०गुणिता
कुपरिधिहृता ९६६७ भवन्त्यंशाः ।
भूमौ कक्षायां वा
भागेभ्यो योजनानि च यत्नम् ॥'

अथ देवदैत्यानां ध्रुवर्क्षसंस्थानमाह ।

'सौम्यं ध्रुवं मेरुगताः खमध्ये
यान्यन्य दैत्या निजमस्तकोर्द्धे ।
सपाप्रसर्पं भ्रमदब्जचक्रं
विलोकयन्ति क्षितिजप्रसक्तम् ॥'

उत्तरगोले क्षितिजादूर्द्धं परितो भ्रमन्तमादित्यम् ।
सर्वं चिदभाः सततं पश्यन्त्यसुरा अपसर्पं याम्ये ॥

दन्दान्तमारोहति यैः क्रमेण
तैरेव दृष्टैरवरोहती नः ।
यच्चैव दृष्टः प्रथमं स दैवै-
स्तच्चैव तिष्ठन्न विलोक्यते किम् ॥
दिनं सुराणामयनं यदुत्तरं
निशेतरत् सांक्षितिकैः प्रकीर्त्तितम् ।
दिनोन्मुखेऽर्के दिनमेव तन्मतं
निशा तथा तत्फलकीर्त्तनाय वै ॥
विधूर्द्धभागे पितरो वसन्तः
स्वाधःसुधादीधितिमामनन्ति ।
पश्यन्ति तेऽर्कं निजमस्तकोर्द्धे
दर्शे यतोऽस्मादुगलं तदेषाम् ।
कृष्णे दले पक्षदलेऽभ्युदेति
शुक्लेऽस्तमेत्य तत एव सिद्धम् ।
भाह्नान्तरत्वान्न विधोरधःस्थं
तस्मान्निशीथः खलु पौर्यमास्याम् ॥
यदसिदूरगतो दृष्टिः क्षितेः
सततमाप्रलयं रविमीक्षते ।
भवति तावदयं प्रथितस्य तद्-
युगसहस्रयुगं दुनिशं विधेः ॥'

अथ भूपरिधिमानं प्राक्थितमपि विशेषार्थमाह ।

'प्रोक्तो योजनसंख्यया कुपरिधिः सप्ताब्धनन्दाब्धय ९९९०

खद्व्यासः कुभुजङ्गशायकभुवः सिद्धांशके ९
नाधिकः । १५८१।२।३

एवंविधफलं यथा भुगणयविंशत्यक्षराद्यदयो ०८५३।१४

भूमेः कन्दुकगोलवत् कुपरिधिर्यासाद्दते: प्रस्फुटम् ।'

भूपृष्ठफलस्य स्फोटस्य दूषणमाह ।

'दृष्टं कन्दुकपृष्ठकालवदिलागोले फलं साधितं
सर्वेणास्य मतांशकोऽपि न भवेदृष्यन्नातुष्कं
याखदम् ।
तत् प्रत्यक्षविरुद्धसंस्कृतमिदं नैवास्तु वा चास्तु वा
हे प्रौढ़ा गणका विचारयत तत्सर्वाभ्यनुज्ञा
मुहुम् ।'

अथ मदुक्तिमाह ।
'यत् परिध्यर्द्धविष्कम्भं वृत्तं कृत्वा किलांशुकम् ।
तेनार्द्धं क्षात्यते गोलः किञ्चिदन्यच्च शिष्यते ॥
गोलक्षेत्रफलाद्यस्माद्वृत्तक्षेत्रफलं यतः ।
सार्द्धद्विगुणितासन्नं नावदेवापरे दले ॥
एवं पञ्चगुणात् क्षेत्रफलात् पृष्ठफलं खलु ।
नाधिकं जायते तेन परिधिघ्नं कुतः कृतम् ॥
वृत्तक्षेत्रफलं यस्मात् परिधिघ्नं न युक्तिमत् ।
दुष्टत्वादृणितस्यास्य दुष्टं भूपृष्ठजं फलम् ॥"
अथान्यथा प्रतिपाद्यते ।
'गोलस्य परिधिः कल्पो वेदघ्नव्यासिसैर्मितः ।
सुखयुग्नगरेखाभिर्यद्दामलके स्थितः ॥
दृश्यन्ते वप्रकास्तद्वत् प्रागुक्तपरिधेर्मितात् ।
ऊर्द्धाधःकृतरेखाभिर्गोले वप्रान् प्रकल्पयेत् ॥
तत्रैकवप्रकक्षेत्रफलं खण्डैः प्रसाध्यते ।
सर्व्वत्रैवं त्रिभव्यार्द्धहीनं त्रिव्यार्द्धभाजितम् ॥
एवं वप्रफलं तत् स्याद्गोलव्यासषष्ठं यतः ।
परिधिव्यासघातोऽयं गोलपृष्ठफलं स्फुटम् ॥'
अथ भूमेः प्रलयमेदान् प्रलयञ्चाह ।
'वृद्धिविधेरृद्धि भुवः समन्तात्
स्यादूर्द्धयोजनं भूभवभूतिपूर्व्वैः ।
ब्राह्मं लयं योजनमात्रवृद्धे-
र्नाशो भुवः प्राकृतिकोऽखिलायाः ॥
दिने दिने यन्म्रियते हि भूते-
र्दैनन्दिनं तं प्रलयं वदन्ति ।
ब्राह्मं लयं ब्रह्मदिनान्तकाले
भूतानि यद्ब्रह्मतनुं व्रजन्ति ॥
ब्रह्माव्यये यत् प्रकृतिं प्रयान्ति
सर्व्वाण्यतः प्राकृतिकं क्षतीन्द्राः ।
लीनान्यतः कर्म्मपुटान्तरत्वात्
पृथक् क्रियन्ते प्रकृतेर्विकारैः ॥
ज्ञानाग्निदग्धाखिलपुण्यपापा
मनः समाधाय हरौ परेशे ।
यद्योगिनो यान्ति निवृत्तिमस्मा-
दात्यन्तिकं चेति लयश्चतुर्द्धा ॥'
अथ ब्रह्माण्डगोलमाह ।
'भूभूधरश्चिदग्रदानवमानवाद्या
ये याच्च धिष्ण्यगगनेचरचक्रकक्षाः ।
लोकत्रयस्थितिरुपर्य्यपरिप्रदिष्टा
ब्रह्माण्डभाण्डजठरे तदिदं समस्तम् ॥"
अथान्योदितं ब्रह्माण्डमानं पूर्व्वोक्तमपि प्रसङ्गादनुवदति स्म ।
कोटिघ्नैर्नवनन्दषट्कनखभूभूभूदृभुजङ्गेन्दुभि-
र्ज्योतिःशास्त्रविदो वदन्ति नभसः कक्षामिमां योजनैः ।
१८७१२०६८२०००००००० ।
तद्ब्रह्माण्डकटाहसम्पुटतटे केचिच्चतुर्वेष्टनं
केचित् प्रोचुरदश्चदश्चकगिरिं पौराणिकाः सूरयः ॥

करतलकलितामलक-
वदमलं सकलं विदन्ति ये गोलम् ।
दिनकरकरनिकरनिहत-
तमसो नभसः परिधिरदितस्तैः ॥

ब्रह्माण्डमेतन्मितमस्तु नो वा
कल्पे ग्रहः क्रामति योजनानि ।
यावन्ति पूर्व्वैरिह तत्प्रमाणं
प्रोक्तं खकक्षाख्यमिदं मतं नः ॥"
इति सिद्धान्तशिरोमणौ गोलाध्याये भुवनकोषः समाप्तः ॥

भूच्छायं, क्ली, स्त्री, (भुवश्छाया । "विभाषासेनासुराच्छायाशालानाम् ।" २ । ४ । २५ । इति ततपुरुषे विभाषया नपुंसकम् । छायावाचकत्वे तु केवलं क्लीवत्वं) अन्धकारः । इति शब्दमाला ॥

भूजन्तुः, पुं, (भुवो जन्तुरिव ।) उपरसविशेषः । इति राजनिर्घण्टः ॥ (विशेषोऽस्य भूनागशब्दे द्रष्टव्यः ॥)

भूजम्बूः, स्त्री, (भूवो जम्बूरिव सादृश्यात्) विकङ्कतफलम् । गोधूमः । इति मेदिनी । वे, १४ ॥ भूमिजम्बूः । इति राजनिर्घण्टः ॥

भूतं, क्ली, (भू + क्तः ।) युक्तम् । न्यायः । क्ष्मादिः । पृथिव्यप्तेजोवायुाकाशपञ्चकम् । (यथा, मनुः । १२ । १४ ।
"तावुभौ भूतसम्पृक्तौ महान् चैवाज एव च ॥
उच्चावचेषु भूतेषु स्थितं तं व्याप्य तिष्ठतः ॥"
"स च त्रिविधो वैकारिकस्तैजसो भूतादिरिति । भूतादेरपि तैजससहायात्तन्मात्रद्रव्याण्येव पञ्चतन्मात्राण्युत्पद्यन्ते । तद्यथा । शब्दतन्मात्रं स्पर्शतन्मात्रं रूपतन्मात्रं रसतन्मात्रं गन्धतन्मात्रमिति । तेषां विशेषाः शब्दस्पर्शरूपरसगन्धास्तेभ्यो भूतानि व्योमानिलानलजलोर्व्वः ।" इति सुश्रुते शारीरस्थाने प्रथमेऽध्याये ।)
ऋतम् । सत्यम् । इत्यमरभरतौ ॥ पिशाचादि । (यथा, श्रीभागवते । ३ । १४ । २१ ।
"एषा घोरतमा वेला घोराणां घोरदर्शना ।
चरन्ति यस्यां भूतानि भूतेशानुचराणि ह ॥") जन्तुः । इति मेदिनीशब्दरत्नावल्यौ ॥ (यथा, मनुः । ६ । ८ ।
"स्वाध्याये नित्ययुक्तः स्याद्दान्तो मैत्रः समाहितः ।
दाता नित्यमनादाता सर्व्वभूतानुकम्पकः ॥"
स्थावरजङ्गमात्मकं द्रव्यम् । यथा, मनुः । ८ । ३०६ ।
"रक्षन् धर्म्मेण भूतानि राजा वध्यांश्च घातयन् ।
यजतेऽहरहर्यज्ञैः सहस्रशतदक्षिणैः ॥")
वस्तुतत्त्वम् । यथा,—
"छलं निरस्य भूतेन व्यवहारान्नयेन्नृपः ।
भूतमप्यनुपन्यस्तं छीयते व्यवहारतः ॥
छलं प्रमादाभिहितम् । निरस्य परित्यज्य । भूतेन वस्तुतत्त्वानुसरणेन । व्यवहारान्नयेदन्तं नृपः । यस्माद्भूतमपि वस्तुतत्त्वमपि व्यनुपन्यस्तमनभिहितं छीयते छानिमुपगच्छति व्यवहारतो व्यवहारेण साक्ष्यादिभिः । तस्माद्भूतानुसरणं कर्त्तव्यम् । यथार्थिप्रत्यर्थिनौ सत्यमेव वदतस्तथा सभ्येन सभापतिना यतितव्यं सामादिभिरुपायैस्तथा यथा साक्ष्यादिनैरपेक्ष्यैव निर्णयो भवतीति ॥ अथ सर्व्वथापि भूतानुसरणं न शक्यते कर्त्तुं तथा सति साक्ष्यादिभिर्निर्णयः कार्य्य इत्यनुकल्पः । यथोक्तम् । भूतच्छलानुसारित्वाद्विगतिः समुदाहृता । भूतन्तत्त्वार्थयुक्तं यत् प्रमादाभिहितं छलमिति ॥ तत्र भूतानुसारी व्यवहारो मुख्यः । छलानुसारी त्वनुकल्पः ।
इति मिताक्षरायां व्यवहाराध्यायः ॥

भूतं, त्रि, (भाव्यते स्मेति । "आदृधाङ्क्षेति णिजभावः । भू + क्तः । भूनिरस्यस्येति वा । अर्श्आद्यच् । अभवदिति वा । भुवो गत्यर्थ इति । भूतार्थे कर्त्तरि क्तः ।) प्राणी । जन्तुः । (यथा, ऋग्वेदे । ३ । २७ । ६ ।
"धिया चक्रे वरेण्यो भूतानां गर्भमादधे ॥"
यथा च चरके शारीरस्थाने तृतीयेऽध्याये ॥
"भूतानाञ्चतुर्व्विधा योनिर्जरायुण्डस्वेदोद्भिदः ।") अतीतम् । (यथा, कथासरित्सागरे । १ । २४ ।
"भूतं भवद् भविष्यद् वा किं तत् स्यात् जगति प्रिये ।
भवती यन्न जानीयादिति गर्व्वोऽप्युवाच ताम् ॥") वृत्तम् । (यथा, सुश्रुते चिकित्सितस्थाने । १० अध्याये ।
"गोश्वद्भूतानां वा यवानां शक्तून् कारयित्वा ।")
समम् । सदृशम् । इत्यमरभरतौ ॥ प्राप्तम् । (यथा, महाभारते । १३ । ३४ । १५ ।
"यद् ब्राह्मण्यसुखात् प्राप्तं प्रतिगृह्णन्ति वै वचः ।
भूतात्मानो महात्मानस्ते न यान्ति परां भवम् ॥"
"भूतः प्राप्तो वशीकृत आत्मा चित्तं येन ॥"
इति तट्टीकायां नीलकण्ठः ।) सत्यम् । इति मेदिनीशब्दरत्नावल्यौ ॥ (यथा श्राद्धतत्त्वे । प्रथमाङ्के । "छत्रधारः । सस्मितम् । आर्य्ये ! कथयामि ते भूतार्थम् ।") भूतकालस्य पर्य्यायो यथा । वृत्तम् २ अतीतम् ३ लक्षणम् ४ निश्चितम् ५ गतम् ६ । इति राजनिर्घण्टः ॥ उत्तरपदस्य एव भूतशब्दः समार्थे इति शाब्दिकाः । यथा देवभूतोऽयम् । इति भरतः ॥ (उत्तरपदस्य भूतशब्दः सदृशार्थोऽपि । यथा, मनुः । १ । ५ ।
"आसीदिदं तमोभूतमप्रज्ञातमलक्षणम् ।
अप्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्व्वतः ॥")

भूतः, पुं, (भू + कर्त्तरि क्तः ।) देवयोनिविशेषः । स च अधोमुखोर्द्धमुखादिः पिशाचभेदो रुद्रानुचरो बालग्रहः । इत्यमरभरतौ ॥ (यथा, मार्कण्डेयपुराणे । ५१ । ५३ ।
"विच्छिन्द्युच्छ्वासेवानलं मिलेत्य कौमेयेत् ।
भूतानां माद्भिः सार्द्धं बालकानान्तु शान्तये ॥") कुमारः । इति मेदिनी । ते, ४१ ॥ योगीन्द्रः । इति शब्दरत्नावली ॥ क्षत्रियचतुर्थ्यौ । इति विकाण्डशेषः ॥ * ॥ भूतनागकौशिकम् । यथा,
"श्वेतापराजितामूलं पिष्टं तण्डुलवारिणा ।
तेन गण्डप्रदागं स्याद्भूतहन्तस्य विग्रहम् ।

भूतघ्नी

अगस्त्यपुष्पनस्यो वे समरीचच्च भूतहृत् ।
भृङ्गवर्म्म वे हिङ्गु निम्बपत्राणि वे यवाः ।
गौरसर्षप एभिः स्यात्लेपो भूतहरः कृतः ॥
गोरोचना मरीचानि पिप्पली सैन्धवं मधु ।
अञ्जनं क्षतमेभिः स्याद् ग्रहभूतहरं शिव ! ॥
अपि च ।
"वचा त्रिकटुकश्चैव करञ्जं देवदारु च ।
मञ्जिष्ठा त्रिफला श्वेता शिरीषो रजनीद्वयम् ॥
प्रियङ्गुनिम्बत्रिकटुगोलत्रैगावधूनितम् ।
नस्यमालेपनञ्चैव स्नानमुद्वर्त्तनं तथा ॥
अपस्मारविषोन्मादशोषालक्ष्मीक्षयापहम् ।
भूतेभ्यश्च भयं हन्ति राजद्वारे च ज्ञाननम् ॥"

इति गारुडे १६० । १६६ अध्यायः ॥

शम्भुगणभूता यथा,—
"हते वराहरूपे गते भर्गमासाद्य ते गणाः ।
चतुर्भागाः स्वयं भूत्वा भूतं कर्म्मेति वै जगुः ॥
भूतत्वमभवत्तेषां चतुर्भागवतां तदा ।
वचनात् पञ्चजातस्य भूतग्रामास्तनो मताः ॥
यो लोकविहितः पूर्व्वं भूतग्रामश्चतुर्विधः ।
यतस्तेभ्योऽधिका यत्नैस्तद्भूतग्राम उच्यते ॥
इति वः सर्व्वमाख्यातं भूताः शम्भुगणा यथा ।"

इति कालिकापुराणे २६ अध्यायः ॥

(वसुदेवस्य पौरवीगर्भजातद्वादशपुत्राणां ज्येष्ठतमः । यथा, भागवते । ६ । २४ । ४७ ।
"पौरव्यामनया क्षितेर्भूताद्या द्वादशाभवन् ॥")

भूतकेशः, पुं, (भूतस्य केश इव ।) स्वनामख्यातक्षुपम् । तत्पर्य्यायः । गोलोमी २ । इत्यमरः । २ । १० । १११ ॥ भूतकेशी ३ अल्पकेशी ४ केशी ५ । इति रत्नमाला ॥ भूतानां केश इव भूतकेशः क्लीबत्वेति केचित् । स्त्री चेत्यन्ये । अथ द्वयोर्भूतकेशी गोलोमी भूतकेशिकेति वाचस्पतिः । इति भरतः ॥

भूतकेशी, स्त्री, (भूतकेश + गौरादित्वात् ङीष् ।) भूतकेशः । इति रत्नमाला ॥ (यथा, सुश्रुते उत्तरतन्त्रे । ६० अध्याये ।
"गोलोमी चाजलोमी च भूतकेशी जटा तथा ॥")

श्वेतकालिका । नीलसिन्धुवारः । इति राजनिर्घण्टः ॥

भूतक्रान्तिः, स्त्री, (भूतानां क्रान्तिः ।) भूतावेशः । इति राजनिर्घण्टः ॥

भूतगन्धा, स्त्री, (भूतः मद्यं विनापि प्रकटितो गन्धोऽस्याः ।) सुरानामगन्धद्रव्यम् । इति जटाधरः ॥

भूतघ्नः, पुं, (भूतं हन्तीति । हन् + टक् ।) उशवः । इति हेमचन्द्रः ॥ लशुनः । भृङ्गराजः । इति राजनिर्घण्टः ॥ भूतनाशके त्रि ॥ (यथा, तन्त्रसारे ।
"भूतघ्नेषु त्रिकोणेषु विद्वता क्रूरचेतसः ।
भूतप्रेतपिशाचाश्च वेतालाः भैरवादयः ॥")

भूतघ्नी, स्त्री, (भूतं हन्तीति । हन् + टक् + ङीप् ।) तुलसी । इति राजनिर्घण्टः ॥ शुण्ठिनिका । इति रत्नमाला ॥

भूतच

भूतचतुर्दशी, स्त्री, (भूतप्रिया भूतोद्देशे क्रिया कर्त्तव्या वा चतुर्दशी । मध्यपदलोपी समासः ।) कार्त्तिककृष्णचतुर्दशी १ सा एव यमचतुर्दशी । तत्कृत्यं यथा, पाद्मे ।
"चतुर्दश्यां धर्म्मराजपूजा कार्य्या प्रयत्नतः ।
स्नानमावश्यकं कार्य्यं नरैर्नरकभीरुभिः ॥
अरुणोदयतोऽन्यत्र रिक्तायां स्नाति यो नरः ।
तस्याब्दिकभवो धर्म्मो नश्यत्येव न संशयः ॥"

स्कान्दे च तत्रैव ।
"कार्त्तिके कृष्णपक्षे तु चतुर्दश्यां विधूदये ।
अवश्यमेव कर्त्तव्यं स्नानं नरकभीरुभिः ॥"

किञ्च पाद्मे तत्रैव ।
"ततश्च तर्पणं कार्य्यं धर्म्मराजस्य नामभिः ।
जीवत्पिता न कुर्वीत तर्पणं यमभीरुयोः ॥
यज्ञोपवीतिना कार्य्यं प्राचीनावीतिना तथा ॥
दैवत्वञ्च पितृत्वञ्च यमस्यास्ते हि रूपता ॥
नक्तं यमचतुर्दश्यां यः कुर्य्याच्छिवसन्निधौ ।
न तन् क्रतुशतेनापि प्राप्यते पुण्यमीदृशम् ॥
कुमारीवटुकान् पूज्य तथा श्रेवतपोधनान् ।
राजसूयफलं तेन प्राप्यते नात्र संशयः ॥
कार्त्तिके भौमवारेण चित्रा कृष्णा चतुर्दशी ।
तस्यां भूतेशमभ्यर्च्य नरश्चेच्छिवपुरं नरः ॥

किञ्च ।
अमावास्यासु चतुर्दश्याः प्रदोषे दीपदानतः ।
यममार्गान्धकारेभ्यो मुच्यते कार्त्तिके नरः ॥"

इति श्रीहरिभक्तिविलासः ॥

अपि च । लैङ्गे ।
"कार्त्तिके कृष्णपक्षे च चतुर्दश्यां दिगोदये ।
अवश्यमेव कर्त्तव्यं स्नानं नरकभीरुभिः ॥
अपामार्गपल्लवञ्च भ्रामयेच्छिरसोपरि ।
ततश्च तर्पणं कार्य्यं धर्म्मराजस्य नामभिः ॥
नरकाय प्रदातव्यो दीपः संपूज्य देवताः ।
नरकाय नरकनिवृत्तये ।
अर्थोऽभिधेयो वै वस्तु प्रयोजननिवृत्तिषु ॥
इति निवृत्तावपि तादर्थ्य इत्यनेन चतुर्थीविधानात् । अपामार्गश्चामलकमन्त्रः ।
श्रीतलोष्णसमायुक्तसकण्टकदलान्वित ।
हर पापमपामार्ग ! भ्राम्यमाणः पुनः पुनः ॥
ततः प्रदोषसमये दीपान् दद्यात् प्रयत्नतः ।
ब्रह्मविष्णुशिवादीनां भवनेषु मठेषु च ॥
भविष्ये ।
कार्त्तिके भौमवारे च चित्रा कृष्णचतुर्दशी ।
तस्यामाराधितः स्वामुर्नरैर्नैवेह्यिवपुरं ध्रुवम् ॥
यां कांचित् सरितं प्राप्य कृष्णपक्षे चतुर्दशीम् ।
यमुनायां विशेषेण नियतस्तर्पयेद्यमान् ॥
यमाय धर्म्मराजाय मृत्यवे चान्तकाय च ।
वैवस्वताय कालाय सर्व्वभूतक्षयाय च ॥
औदुम्बराय दध्नाय नीलाय परमेष्ठिने ।
वृकोदराय चित्राय चित्रगुप्ताय वै नमः ॥
एकैकस्य तिलैर्मिश्रांस्त्रींस्त्रीन् दद्याज्जलाञ्जलीन् ।
सक्तनस्तरतं याम्यं तत्तत्क्षयादेव गच्छति ॥"

भूतभा

आचाराद्यत्चतुर्दशशाकभक्षणं कर्त्तव्यम् । तन्निर्णयाद्यत्तम् ।
"ओलं केमुकवास्तुकं सरघपं कालञ्च निम्बं जयन्तीञ्च हिलमोचिकाञ्च पटुकं शौलुकं गुडूचीन्तथा ।
भण्टाकीं सुनिषण्णकं शिवदिने खादन्ति ये मानवाः
प्रेतत्वं न च यान्ति कार्त्तिकदिने कृष्णे च भूते तिथौ ॥"

जयां जयन्तीं पटुकं पटोलं शौलुकं शुलफा इति ख्यातम् । सुनिषण्णकं सुफणिया इति ख्यातम् । इति तिथ्यादितत्त्वम् ॥

भूतजटा, स्त्री, (भूतस्य जटेव तन्तुसदृशत्वात् ।) जटामांसी । इति शब्दमाला ॥ (पर्य्यायो यथा,
"जटामांसी भूतजटा जटिला च तपस्विनी ।"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।) गन्धमांसी । इति राजनिर्घण्टः ॥

भूतद्रावी, [न्] पुं, (भूतान् पिशाचान् द्रावयतीति । द्रु + णिच् + णिनिः ।) भूताङ्कुशवृक्षः । रक्तकरवीरः । इति राजनिर्घण्टः ॥

भूतद्रुमः, पुं, (भूतप्रियो द्रुमः ।) श्मशानकदम्बः । इति राजनिर्घण्टः ॥

भूतधात्री, स्त्री, (भूतानि धरतीति । धृ + क्विप् । + ङीप् ।) पृथिवी । इति त्रिकाण्डशेषः ॥ (यथा, बृहन्नंहितायाम् । ८ । ३० ।
"निष्पन्नशालीक्षुयवादिशस्यां
भयेर्वसुक्तामुपशान्तवैराम् ।
संकूजलोकां कलिदोषमुक्तां
चक्रं तदा शास्ति च भूतधात्रीम् ॥")

भूतनाथः, पुं, (भूतानां नाथः ।) शिवः । इति शब्दरत्नावली ॥ (यथा, रघुः । २ । ५८ ।
"तद्भूतनाथानुग ! नार्हसि त्वं ॥")

भूतनायिका, स्त्री, (भूतानां नायिका नियामिका ।) दुर्गा । इति हेमचन्द्रः ॥

भूतनाशनं, क्ली, (भूतानि प्राणिघातानि नाशयन्ति अनेनेति । नश् + णिच् + ल्युट् ।) रक्तचन्दनम् । इति राजनिर्घण्टः ॥

भूतनाशनः, पुं, (भूतान् नाशयतीति । नश् + णिच् + ल्युः ।) भल्लातकः । इति रत्नमाला ॥ सर्षपः । इति राजनिर्घण्टः ॥

भूतपत्री, स्त्री, (भूत इव कृष्णं पत्रं यस्याः । ङीष् ।) तुलसी । इति राजनिर्घण्टः ॥

भूतपुष्पः, पुं, (भूतयुक्तं प्राणिविघ्नकरं पुष्पं यस्य ।) ज्योनाकवृक्षः । इति रत्नमाला ॥

भूतपूर्णिमा, स्त्री, (भूतानां पूर्णिमा ।) आश्विनी पूर्णिमा । तत्पर्य्यायः । शारदी २ कौमुदी ३ आश्वयुजी ४ शुद्धपक्षा ५ रजभृतिः ६ कोजागरा ७ । इति शब्दरत्नावली ॥

भूतप्रज्ञा, [न्] पुं, (भूतात्मनो ब्रह्मणः प्रज्ञम् ।) देवलः । इति शब्दमाला ॥

भूतभावनः, पुं, (भूतानि चित्राद्दीनि भावयति जनयतीति । भू + णिच् + ल्युः ।) विष्णुः ॥

(यथा, महाभारते। १३। १४६। १४।
"भूतभृद्भूतभृद्भावो भूतात्मा भूतभावनः॥"
महादेवः। यथा, महाभारते।१३।१७।३३।
"अभिवाद्यो महाकर्म्मा तपस्वी भूतभावनः॥")
वटुकभैरवः। इति विश्वसारतन्त्रोक्तं तस्याष्टोत्तरशतनामान्तर्गतनाम॥ (भूतानि भावयति पालयतीति। भूतपालके, त्रि। इति श्रीधरस्वामी॥ यथा गीतायाम्। ६। ५।
"भूतभृन्न च भूतस्थो ममात्मा भूतभावनः॥")

भूतभृत्, पुं, (भूतानि बिभर्त्तीति। भृ+क्विप्। तुगागमश्च) विष्णुः। यथा, महाभारते।१३।१४६।१४।
भूतभृद् भूतभृद्भावो भूतात्मा भूतभावनः। इति तस्य सहस्रनामस्तोत्रम्॥ (भूतधारके, त्रि। यथा, गीतायाम्। ६। ५।
"भूतभृन्न च भूतस्थो ममात्मा भूतभावनः॥")

भूतमारी, स्त्री, (भूतानि मारयतीति। भूत+मृ+णिच्+णिनिः।) चीड़ानामगन्धद्रव्यम्। इति राजनिर्घण्टः॥

भूतयज्ञः, पुं, (भूतार्थो यज्ञः। भूतानि काकादिप्राणिजातानि तान्युद्दिश्य यो यज्ञ इति वा नित्यं गार्हस्थ्याकरणीय पञ्चयज्ञेषु यज्ञभेदः।) भूतबलिः। तै तु पञ्चमहायज्ञान्तर्गतबलिवैश्वदेवकर्म्मणी। यथा, भूतेभ्यो बलिहरणं भूतयज्ञः। इति हारीतसूत्रम्॥ अस्यानुष्ठानं बलिशब्दे द्रष्टव्यम्। (यथा, मनुः। ४। २२।
"ऋषियज्ञं देवयज्ञं भूतयज्ञञ्च सर्व्वदा।
नृयज्ञं पितृयज्ञञ्च यथाशक्ति न हापयेत्॥")

भूतलिका, स्त्री, (भूतलं पृथ्वीतलं आधारत्वेन अस्त्यस्या इति। भूतल+ठन् टाप्।) पृक्का। इति राजनिर्घण्टः॥

भूतवासः, पुं, (भूतानां वासो यत्र।) कलिद्रुमः। इत्यमरः। २। ४। ५८॥ (तथा च पर्य्यायः।
"विभीतकस्त्रिफलिङ्गः स्यान्नाक्षः कर्षफलस्तु सः।
कलिद्रुमो भूतवासस्तथा कलियुगालयः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमेभागे॥
महादेवः। यथा, हरिवंशे उत्तरभविष्ये। १५। ३३।
"भूतवास! नमस्तुभ्यं सर्व्ववास! नमोऽस्तुते॥")

भूतविक्रिया, स्त्री, (भूतानामिव विक्रियास्याम्।) अपस्मारोगः। इति राजनिर्घण्टः॥

भूतवृक्षः, पुं, (भूतप्रियो वृक्षः।) प्राखोटवृक्षः। श्योनाकवृक्षः। इति मेदिनी। षे, ५६॥

भूतवेशी, स्त्री, (भूतानामिव वेशोऽस्याः। गौरादित्वात् ङीष्।) श्वेतशेफालिका। इत्यमरः। २। ४। ७१॥ (विशेषोऽस्याः श्वेतशेफालिकाशब्दे द्रष्टव्यः॥)

भूतशुद्धिः, स्त्री, (भूतानां देहारम्भकपृथिव्यादिपञ्चभूतानां शुद्धिः शोधनम्।) पूजादौ बीजविशेषद्वारावामकुक्षिस्थितपापपुरुषदहनपूर्व्वकशरीरशोधनम्। तत्प्रयोगो यथा। रमिति जलधारया वह्निप्राकारं विचिन्त्य स्वाङ्गे क्षालनं करौ क्षालयित्वा सोऽहमिति जीवात्मानं हृदयस्थं दीपकलिकाकारं मूलाधारस्थकुलकुण्डलिन्या सह सुषुम्नावर्त्मना मूलाधारस्वाधिष्ठानमणिपूरकानाहतविशुद्धाज्ञाख्यषट्चक्राणि भित्त्वा शिरोऽवस्थिताधोमुखसहस्रदलकमलकर्णिकान्तर्गतपरमात्मनि संयोज्य तत्रैव पृथिव्यप्तेजोवायुाकाशगन्धरसरूपस्पर्शशब्दनासिकाजिह्वाचक्षुस्त्वक्श्रोत्र वाक्पाणिपादपायूपस्थप्रकृतिमनोबुद्ध्यहङ्काररूपचतुर्व्विंशतितत्त्वानि लीनानि विभाव्य यमिति वायुबीजं धूम्रवर्णं वामनासापुटे चिन्तयित्वा तस्य षोड़शवारजपेन वायुना देहमापूर्य्य नासापुटौ धृत्वा तस्य चतुःषष्टिवारजपेन कुम्भकं कृत्वा वामकुक्षिस्थकृष्णवर्णपापपुरुषेण सह देहं संशोष्य तस्य द्वात्रिंशद्वारजपेन दक्षिणनासया वायुं रेचयेत्। दक्षिणनासापुटे रमिति वह्निबीजं रक्तवर्णं ध्यात्वा तस्य षोड़शवारजपेन वायुना देहमापूर्य्य नासापुटौ धृत्वा तस्य चतुःषष्टिवारजपेन कुम्भकं कृत्वा पापपुरुषेण सह देहं मूलाधारोत्थितवह्निना दग्ध्वा तस्य द्वात्रिंशद्वारजपेन वामनासया भस्मना सह वायुं रेचयेत्। लमिति चन्द्रबीजं शुक्लवर्णं वामनासायां ध्यात्वा तस्य षोड़शवारजपेन ललाटे चन्द्रं नीत्वा नासापुटौ धृत्वा वमिति वरुणबीजस्य चतुःषष्टिवारजपेन तस्माल्ललाटस्थचन्द्राद्गलितसुधया मातृकावर्णात्मिकया सकलदेहं विरचय्य लमिति पृथ्वीबीजस्य द्वात्रिंशद्वारजपेन देहं सुदृढ़ं विचिन्त्य दक्षिणेन वायुं रेचयेत्। मातृकासंख्यया वा॥*॥ तदुक्तं गौतमीये।
"सुषुम्नावर्त्मना सोऽहमिति मन्त्रेण योजयेत्।
सहस्रारे शिवस्थाने परमात्मनि देशिकः॥
धूम्रवर्णं ततो वायुबीजं षड्विन्दुलाञ्छितम्।
पूरयेद्दक्षिया वायुं सुधीः षोड़शमात्रया॥
मात्रया तु चतुःषष्ट्या कुम्भयेच्च सुषुम्नया।
द्वात्रिंशन्मात्रया मन्त्री रेचयेत् पिङ्गलाख्यया॥
पूरयेदनया चैव सञ्चिन्त्य नीलमारुतम्।
रक्तवर्णं वह्निबीजं त्रिकोणं स्वस्तिकान्वितम्॥
तेन पूरकयोगेन मात्रया षोड़शाख्यया।
चतुःषष्ट्या मात्रया च निर्दहेत् कुम्भकेन च।
वामपार्श्वस्थितं पापपुरुषं कज्जलप्रभम्।
ब्रह्महत्याशिरस्कञ्च स्वर्णस्तेयभुजद्वयम्॥
सुरापानहृदा युक्तं गुरुतल्पकटिद्वयम्।
तत्संसर्गि पदद्वन्द्वमङ्गप्रत्यङ्गपातकम्॥
उपपातकरोमाणं रक्तश्मश्रु विलोचनम्।
खड्गचर्म्मधरं क्रुद्धमेवं कुक्षौ विचिन्तयेत्॥
मूलाधारोत्थितेनैव वह्निना निर्दहेच्च तम्।
एवं संदह्य परितो द्वात्रिंशन्मात्रया ततः॥
भस्मना सहितं मन्त्री रेचयेद्दक्षिया पुनः।
वामनाद्यां चन्द्रबीजं कुन्देन्दुद्युतसप्रभम्॥
भालेन्दुरावे संयोज्य ततः षोड़शमात्रया।
सुषुम्नया चतुःषष्टिमात्रया तोयबीजकम्॥
ध्यात्वामृतमयीं दृष्टिं पक्षाग्रह्मर्गरूपिणीम्।
तया देहं विचिन्त्यैवं मनसा पिङ्गलाख्यया॥
द्वात्रिंशन्मात्रया मन्त्री सं बीजेन दृढ़ं नयेत्।
स्वस्थाने हंसमन्त्रेण पुनस्तेनैव वर्त्मना॥
जीवं तत्त्वानि चानीय स्वस्थाने स्थापयेत्ततः।
इति ज्ञात्वा भूतशुद्धिं मातृकान्यासमाचरेत्॥*॥
संक्षेपभूतशुद्धिर्यथा। पुरश्चरणचन्द्रिकायाम्।
"अथवान्यप्रकारेण भूतशुद्धिर्विधीयते।
धर्म्मकन्दसमुद्भूतं ज्ञाननालसमुद्गमम्॥
ऐश्वर्य्याष्टदलोपेतं परं वैराग्यकर्णिकम्।
स्वीयहृत्कमले ध्यात्वा प्रणवेन विकासितम्॥
ज्ञात्वा तत्कर्णिकासंस्थं प्रदीपकलिकानिभम्।
जीवात्मानं हृदि ध्यात्वा मूले सञ्चिन्य कुण्डलीम्।
सुषुम्नावर्त्मनात्मानं परमात्मनि योजयेत्॥"
इति तन्त्रसारः॥

भूतसञ्चारः, पुं, (भूतस्य सञ्चारः।) भूतोष्माज्वरोगः। तत्पर्य्यायः। आवेशः २ भूतक्रान्तिः ३ ग्रहागमः। इति राजनिर्घण्टः॥

भूतसञ्चारी, [न्] पुं, (भूतेषु सञ्चरति इति भूत+सम्+चर णिनिः।) दावानलः। इति शब्दमाला॥

भूतसर्गः, पुं, (सृज्यते इति। सृज+भावे घञ्। भूतानां सर्गः।) भूतसृष्टिः। (यथा, मार्कण्डेयपुराणे। ४७। ३१।
"अथमो महतः सर्गो विज्ञेयो ब्रह्मणस्तु सः।
तन्मात्राणां द्वितीयस्तु भूतसर्गः स उच्यते॥")
"ब्राह्मं प्रजापतीयञ्च सौम्यमैन्द्रन्तथैव च।
गान्धर्व्वमथ कौबेरं रक्षःपैशाचमासुरम्॥
स्थावरं प्राग्भवं मार्गं सार्पं शाकुनिकन्तथा।
चतुर्दशविधं ह्येतद्भूतसर्गं प्रकीर्त्तितम्॥"
इति वह्निपुराणोक्तं क्रीवत्वमार्षम्॥

भूतसारः, पुं, (भूतः गतः सारो यस्य।) श्योनाकवृक्षभेदः। इति राजनिर्घण्टः॥

भूतहन्त्री, स्त्री, (भूतानि हन्तीति हन+क्तृच्+ङीप्।) वन्ध्याकर्कोटकी। नीलदूर्व्वा। इति राजनिर्घण्टः॥

भूतहरः, पुं, (भूतानि हरतीति हृ+अच्।) गुग्गुलुः। इति राजनिर्घण्टः॥

भूतहारि, [न्] क्ली, (भूतानि हरतीति हृ+णिनिः।) देवदारु। इति राजनिर्घण्टः॥

भूता, स्त्री, (भूत+टाप्।) लक्षणचतुर्दशी। यथा स्कान्दे।
"ब्रह्मखोदरमध्ये तु यानि तीर्थानि सन्ति वै।
पूजितानि भवन्तीह भूतायां पारणे कृते॥"
अपि च।
"शिवरात्रिव्रतं भूतां कामविद्धां विवर्ज्जयेत्॥"
इति तिथ्यादितत्त्वम्॥

भूताङ्कुशः, पुं, (भूतानामङ्कुश इव निवारकत्वात्।) खनामख्यातवृक्षः। तत्पर्य्यायः। चवकः २ चुरकः ३ तीक्ष्णः ४ क्रूरः ५ चवः ६ राजीहेदनसंज्ञः ७ भूतद्रावी ८ ग्रहाह्वयः ९। अस्य गुणाः। तीव्रगन्धत्वम्। उत्कटत्वम्। उष्णत्वम्। कटुत्वम्। भूतग्रहादिदोषघ्नत्वम्। कफवातनिहन्तृत्वञ्च। इति राजनिर्घण्टः॥

भूतात्मा, [त्मन्] पुं, (भूतानामात्मा ।) देहः । (यथा, मनुसंहितायाम् । १२ । १२ ।
"यः करोति तु कर्म्माणि स भूतात्मोच्यते बुधैः ॥"
"यः पुनरेव व्यापारान् करोति शरीराख्यः स पृथिव्यादिभूतारब्धत्वात् भूतात्मेति पण्डितैरुच्यते ॥" इति तट्टीकायां कुल्लूकभट्टः ॥)
परमेष्ठी । इति मेदिनी । ने, २०० ॥ शिवः । गुह्यम् । इति शब्दरत्नावली ॥ विष्णुः । यथा,
"भूतकृत् भूतभृत् भावो भूतात्मा भूतभावनः ॥"
इति महाभारते दानधर्म्मः ॥
(जीवात्मा । यथा, मनुसंहितायाम् । ५ । १०६ ।
"अद्भिर्गात्राणि शुध्यन्ति मनः सत्येन शुध्यति ।
विद्यातपोभ्यां भूतात्मा बुद्धिर्ज्ञानेन शुध्यति ॥"
यथा च चरके शारीरस्थाने प्रथमेऽध्याये ।
तस्मिंश्चरमसंन्यासे सफलाः सर्व्ववेदनाः ।
समग्रा ज्ञानविज्ञाना निवर्त्तिं यान्त्यशेषतः ॥
यतःपरं ब्रह्मभूतो भूतात्मा नोपलभ्यते ।
निःसृतः सर्व्वभावेभ्यश्चिह्नं यस्य न विद्यते ॥
गतिर्ब्रह्मविदां ब्रह्म तच्चाक्षरमलक्षणम् ।
ज्ञानं ब्रह्मविदाश्चात्र नाज्ञस्तज्ज्ञातुमर्हति ॥")

भूतारिः, क्ली, (भूतानां अरिः तन्निवारकत्वात् अभिधानात् क्लीवत्वम् ।) हिङ्गु । इति राजनिर्घण्टः ॥

भूतार्त्तः, त्रि, (भूतेन ऋतः) भूताविष्टः । इति हैमचन्द्रः । ३ । १५५ ॥

भूतालो, स्त्री, (भूतानामालीव) भूपाटली । सुमली । इति राजनिर्घण्टः ॥

भूतावासः, पुं, (भूतानामावासः) विभीतकवृक्षः । इति राजनिर्घण्टः ॥ विष्णुः । यथा,—
"भूतावासो वासुदेवः सर्व्वासुनिलयो लयः ॥"
इति महाभारते दानधर्म्मः ॥ (शरीरम् । यथा, मनुसंहितायाम् । ६ । ७७ ।
"जराशोकसमाविष्टं रोगायतनमातुरम् ।
रजस्वलमनित्यञ्च भूतावासमिमं त्यजेत् ॥"
शाखोटः । तत्पर्य्यायो यथा,—
"शाखोटः पीतकनको भूतावासः खरच्छदः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

भूताविष्टः, त्रि, (भूतेन आविष्टः) पिशाचग्रस्तः । तन्नाशकक्रमः यथा,—
"पक्षरेखाः समुल्लिख्य तिर्य्यगूर्द्धक्रमेण हि ।
पदानि षड्दशापाद्य लिखेन्मार्द्दे मुनौ त्रयम् ॥
नवमे सप्त दत्त्वात्तु वर्णं पञ्चदशे तथा ।
द्वितीयेऽष्टादशे षट् दिशि द्वौ पौरुषे स्मृतिः ॥
एकादिना समं ज्ञेयमिच्छाद्यार्द्धे विलोमके ।
तदा द्वात्रिंशदादिः स्यादष्टोत्तेषु सर्व्वतः ॥
दर्शनाहारयोस्तासां शुभं स्यादेषु कर्म्मसु ।
द्वात्रिंशत् प्रथमे नार्य्यश्चतुस्त्रिंशक्रमे शुभाम् ॥
भूताविष्टेषु पक्षाग्रनृत्यतापत्यासु वै घृतम् ।
दाघ्नमिस्तु चन्द्रायां चतुःषष्टौ रवाश्वनि ॥
विषे विंशो धान्यकीटेष्वष्टाविंशतिरेव च ।
चतुरश्रौ च यावानां रोदने परिकीर्त्तिताः ॥"
इति ज्योतिस्तत्त्वम् ॥

१	८	१८	२३
२०	२१	३	६
७	२	२४	१७
२२	१६	५	४
५०	५०	५०	५०

भूताविष्टः, त्रि, (भूतेन आविष्टः ।) भूतक्रान्तः । भूतादिना रोगग्रस्तः । (यथा,—
"भूताविष्टेषु पक्षाग्रनृत्यतापत्यासु वै घृतम् ।"
इत्यादि ज्योतिस्तत्त्वम् ॥ भूतविशेषाणामावेशसमयाः । यथा,—
"देवग्रहाः पौर्णमास्यामसुराः सन्ध्ययोरपि ।
गन्धर्व्वाः प्रायशोऽह्न्यां यक्षाश्च प्रतिपद्यथ ॥
कृष्णपक्षे च पितरः पक्षान्तामपि चोरगाः ।
रक्षांसि निशि पैशाचाश्चतुर्दश्यां विशन्ति च ॥
दर्शनादीन् यथाच्छाया शीतोष्णं प्राणिनो यथा ।
खमणिं भास्कराच्चैव यथा देहश्च देहभृत् ॥
विशन्ति च न दृश्यन्ते ग्रहस्तद्वच्छरीरिणम् ।"
इति सुश्रुते उत्तरतन्त्रे षष्टितमेऽध्याये ॥)

भूतावेशः, पुं, (भूतानामावेशः) भूतसञ्चारः । भूते पाओया इति भाषा । अस्य पर्य्यायः आवेशशब्दे द्रष्टव्यः ॥

भूतिः, स्त्री, (भवत्यनयेति । भू + "क्तिच्क्तौ च संज्ञायाम् ।" ३ । ३ । १७४ । इति क्तिच् ।) महादेवस्य अणिमाद्यष्टप्रकारवैभवम् । इत्यमरः । १ । १ । ३८ ॥ श्मशानभस्म । इत्यमरटीकायां भरतः ॥ भस्म ॥ (यथा, शिशुपालवधे । १ । ४ ।
"चयं चयोत्तृप्तिमगजेन्द्रकृत्तिना
स्फुटोपमं भूतिसितेन शम्भुना ॥")
सम्पत्तिः । (उत्तरोत्तरवृद्धिः । यथा, भगवद्गीतायाम् । १८ । ७४ ।
"यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्द्धरः ।
तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ॥")
हस्तिशृङ्गारः । इति मेदिनी ते, ४० ॥ (हस्तिशृङ्गारोऽत्र गजमदनम् । यथा, मेघदूते । १६ ।
"रेवां द्रक्ष्यस्युपलविषमे विन्ध्यपादे विशीर्णां ।
भक्तिच्छेदैरिव विरचितां भूतिमङ्गे गजस्य ॥")
जातिः । इति विश्वः ॥ (पितृगणभेदः । यथा मार्कण्डेयपुराणे । ८६ । ४३ ।
"विश्वो विश्वभुगाराध्यो धर्म्मो धन्यः सुभानवः ।
भूतिदो भूतिकृद् भूतिः पितॄणां ये गणा नव ॥"
लक्ष्मीः । यथा, भागवते । ४ । १ । ४ ।
"यस्तयोः पुरुषः साक्षाद् विष्णुर्यज्ञस्वरूपधृक् ।
या स्त्री सा दक्षिणा भूतेरंशभूतानपायिनी ॥"
भूतेर्लक्ष्म्याः । इति तट्टीकायां श्रीधरस्वामी ॥) दहिनामौषधम् । रोहिषतृणम् । भूतृणम् । इति राजनिर्घण्टः । (भवनमिति । भू + क्तिन्) उत्पत्तिः । सत्ता । इति भूधातोर्भावे क्तिप्रत्ययेन निष्पन्नम् ॥

भूतिकं, क्ली, (भू + क्तिच् । संज्ञायां कन् ।) भूनिम्बः । कट्तृणम् । इत्यमरः । ३ । ६ । ८ ।

भूतृणः

कट्फलम् । यमानी । घनसारः । इति हेमचन्द्रः ।

भूतिकः, पुं, (भूति । संज्ञायां कन् ।) यमानी । इति रत्नमालाराजनिर्घण्टौ ॥

भूतिकामः, पुं, (भूतिं कामयते इति । कम् + "कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् ।) राजमल्ली । इहसतिः । इति केचित् । ऐश्वर्य्याभिलाषिणि, त्रि । यथा । वायवं श्वेतमालभेत भूतिकामः । इत्यधिकरणमालायां द्वितीयपादे काम्यपशुकाण्डे विधयर्थवादबोधिका श्रुतिः ॥

भूतिकीलः, पुं. (भूतेः शूलादिसम्पत्तेः कील इव जलदत्वात् ।) भूखातः । इति शब्दमाला । खाना इति भाषा ॥

भूतिगर्भः, पुं, (भूतिः कवित्वसम्पत्तिर्गर्भेऽन्तर्यस्य । यद्वा भूतिशब्द उपाधिनाम्नोऽन्तर्यस्य ।) भवभूतिकविः । इति भूरिप्रयोगः ॥

भूतिनिधानं, क्ली, (निधीयतेऽस्मिन्निति । नि + धा + अधिकरणे + ल्युट् । ततः भूत्या निधानमिति, षष्ठीसमासः ।) धनिष्ठानक्षत्रम् । इति जटाधरः ॥

भूतिमान्, [त्मन्] त्रि, ऐश्वर्य्ययुक्तः । भूतिरस्त्यस्य । इत्यर्थे मतुप्रत्ययेन निष्पन्नः ॥ (यथा, महाभारते । ३ । २०३ । ४३ ।
"आयुष्मान् भूतिमांश्चैव श्रुत्वा भवति मर्त्यसु ॥")

भूतीकं, क्ली, (भूतिक । पृषोदरात् साधुः ।) भूनिम्बः । यमानी । भूतृणम् । कट्तृणम् । इति मेदिनी । के, १३५ ॥ (यथा, सुश्रुते उत्तरतन्त्रे । ३६ अध्याये ।
"वचां पर्पटकं मुस्तं भूतीकमथ कट्फलम् ॥"
यथा च भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।
"कट्तृणं रोहिषं देवनखं सौगन्धिकन्तथा ।
भूतीकं धामपौरुष श्यामकं धूमगन्धिकम् ॥")

भूतृणं, क्ली, (सुवक्त्रत्वम् ।) गन्धखडम् । गन्धखड इति भाषा । तत्पर्य्यायः । गन्धखेडम् २ रौहिषम् ३ गोमयप्रियम् ४ । इति रत्नमाला ॥ पटम् ५ रामकर्पूरम् ६ सक्तृणम् ७ शरम् ८ श्यामकम् ९ धामकम् १० पौरम् ११ देवनखकम् । इति रत्नमालान्तरम् ॥ (यथास्य पर्य्यायः ।
"गुल्मबीजन्तु भूतीकं सुगन्धं वस्तुकप्रियम् ।
भूतृणन्तु भवेच्छत्रा मालातृणकमित्यपि ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

भूतृणः, पुं, (भुवस्तृणः ।) भूस्तृणम् । सुगन्ध रोहिष इति परिमलदगन्धनि च अस्यैवैते प्रसिद्धाः । तत्पर्य्यायः । रोहिषः २ भूतिः ३ भूतिकः ४ कुटुम्बकः ५ मालातृणः ६ समालम्बी ७ छत्रः ८ अतिछत्रकः ९ गुल्मबीजः १० सुगन्धः ११ गुच्छालः १२ पुंसविषः १३ वधिरः १४ अतिगन्धः १५ भद्ररोहः १६ करेणुकः १७ । अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । वातसमूहभूतयथावेशप्रदारुणविषदोषनाशित्वञ्च । इति राजनिर्घण्टः ॥

भूतेशः, पुं, (भूतानां प्राण्यादीनां प्रमथादीनां वा ईशः।) शिवः। इत्यमरः। १।१।३३॥ (यथा, राजतरङ्गिण्याम्। १। १०७।
"निष्ठैः मन्त्रादिते देवी स तदुचिताये नृपः। ततः सन्तोषितात्तस्मै भूतेशात् सुकृती सुतम्॥")
भूत्तमं, क्ली, (भुवि उत्तमम्।) सुवर्णम्। इति हेमचन्द्रः। ४।११०॥
भूदरीभवा, स्त्री, (भूदर्य्यां भूविवरे भवतीति। भू + अच्। टाप्।) शालपर्णी। इति भावप्रकाशः॥
भूदारः, पुं, (भुवं दारयतीति। दृ + कर्म्मण्यण्। ३।२।१। इत्यण्।) शूकरः। इत्यमरः। २।५।२॥
भूदेवः, पुं, (भुवो भुवि वा देवः।) ब्राह्मणः। इत्यमरः। २।७।४॥
भूधनः, पुं, राजा। भूरेव धनं यस्य सः। इति केचित्॥
भूधरः, पुं, (धरतीति। धृ + पचाद्यच्। भुवां धरः इति षष्ठीसमासः।) पर्व्वतः। इति हेमचन्द्रः॥ (यथा, मार्कण्डेयपुराणे। ५७। ११।
"तेषां सहस्रशश्चान्ये भूधरा ये समीपगाः॥")
यन्त्रभेदः। यथा,—
"जलकच्छपपातालडोलाभूधरवालुकाः।
पर्काद्या यन्त्रभेदाः स्युर्वात्याद्याश्च सपकाः॥"
इति शब्दचन्द्रिका॥
(यथास्य व्यवहारः।
"हिमगं शुद्धसूतस्य समांशं गन्धकं तथा।
कन्यानीरेण संमर्द्य दिनमेकं निरन्तरम्॥
तद्वा तद्भूधरे यन्त्रे दिनैकं मारयेत् पुटे॥"
इति वैद्यकरसेन्द्रसारसंग्रहे पारदमारणाधिकारे॥
शिवः। यथा, महाभारते। १३।१७।१५१।
"भूधरो नागमौञ्जी च नागकुण्डलकुण्डली॥"
कृष्णः। यथा, भागवते। ३। १३। ४०।
"दंष्ट्राग्रकोट्या भगवंस्त्वया धृता
विराजते भूधर ! भूः सभूधरा।
यथा वनान्निःसरतो दता धृता
मतङ्गजेन्द्रस्य सपत्रपद्मिनी॥")
भूधात्री, स्त्री, (भूम्या धात्री।) भूम्यामलकी। इति राजनिर्घण्टः॥ (यथास्य गुणाः।
"भूधात्री वातकृत्तिक्ता कषाया मधुरा हिमा।
पिपासाकासपित्तास्रकफकण्डूक्षतापहा॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
बटुकभैरवः। इति विश्वसारतन्त्रे तस्य सहस्रनामस्तोत्रम्॥
भूध्रः, पुं, (भुवं धरतीति। धृ + मूलविभुजादित्वात्। ३।२।५। इत्यस्य वार्त्तिकोक्त्या कः।) पर्व्वतः। इति हेमचन्द्रः। ४।९३॥
भूनागः, पुं, कृमिविशेषः। तत्पर्य्यायः। किञ्चुलकः २ भूलताः ३ रक्तजन्तुकः ४ शिलिकः ५ शिलिजन्तुः ६ रक्तगुण्डूः ७। अस्य गुणाः। [illegible]। [illegible]॥

रसनारञ्जनत्वम्। तद्रसस्य विपाकदत्वञ्च। इति राजनिर्घण्टः॥
भूनिम्बः, पुं, क्षुपविशेषः। चिरता इति भाषा। (यथा, सुश्रुते चिकित्सितस्थाने ९ अध्याये।
"मधुकभूनिम्बगुडिका इति समभागाः कल्कः स्यात्।")
तत्पर्य्यायः। अनार्य्यतिक्तः २ कैरातः ३ रामसेनकः ४ किराततिक्तः ५ हैमः ६ काण्डतिक्तः ७ किरातकः ८। इति राजनिर्घण्टः॥ कटुतिक्तः ९। इति भावप्रकाशः॥ (तथाचास्य पर्य्यायान्तरम्। वैद्यकरत्नमालायाम्।
"किराततिक्तं कैरातं भूनिम्बः काण्डतिक्तकः॥")
अस्य गुणाः। वातिकत्वम्। तिक्तत्वम्। कफपित्तज्वरापहत्वम्। व्रणसंरोपणत्वम्। पथ्यत्वम्। कुष्ठकण्डूतिशोफनाशित्वञ्च। इति राजनिर्घण्टः॥ अपि च।
"किरातकोऽन्यो नैपालः सोऽर्द्धतिक्तो ज्वरान्तकः।
किरातः सारको रूक्षः शीतलस्तिक्तको लघुः॥
सन्निपातज्वरश्वासकफपित्तास्रदाहनुत्।
कासशोथतृषाकुष्ठज्वरव्रणकृमिप्रणुत्॥"
इति भावप्रकाशः॥
अस्य गुणपर्य्यायान्तरे किराततिक्तशब्दे द्रष्टव्ये॥
भूनीपः, पुं, (भूमिलग्नो नीपः। शाकपार्थिवादिवत् समासः।) भूमिकदम्बः। इति राजनिर्घण्टः॥
भूनेता, [ऋ] पुं, (भुवो नेता नायकः।) राजा। इति केचित्॥
भूपः, पुं, (भुवं पाति रक्षतीति। पा + "आतोऽनुपसर्गे कः।" ३।२।३। इति कः।) राजा। इत्यमरः। २।८।१॥ अर्थलोभेन प्रजादण्डकरणे तस्य पापं यथा।
"अर्थलोभेन यो भूपः प्रजादण्डं करोति च।
वृश्चिकानाञ्च कुण्डे स तल्लोमानाब्दं वसेद्ध्रुवम्॥
ततो वृश्चिकजातिश्च सप्तजन्मसु भारते।
ततो नरश्चाङ्गहीनो व्याधी शूद्रो भवेन्नरः॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २७ अध्यायः॥
भूपतिः, पुं, (भुवः पतिः।) बटुकभैरवः। यथा,
"भूधरो भूधराधीशो भूपतिर्भूधरात्मकः।"
इति विश्वसारतन्त्रोक्तभैरवस्तोत्रम्॥
राजा। यथा,—
भूपुत्री यस्य पत्नी स तु भवति कथं भूपती रामचन्द्रः।
इति रामायणे [illegible]॥
शीतभीरुम्। इति राजनिर्घण्टः॥
भूपदः, पुं, (भुवि पदानि मूलान्यस्य।) वृक्षः। इति शब्दचन्द्रिका॥
भूपदी, स्त्री, (भुवि पदं यस्याः। कुम्भपद्यादित्वात् ङीष्।) मल्लिका। इत्यमरः। २।४।७०॥ (यथास्याः पर्य्यायः।
"मल्लिका मदयन्ती च शीतभीरुश्च भूपदी॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

भूपलाशः, पुं, (भुवि पलाश इव।) तृणभेदः। पिप्राली इति भाषा। यथा,—
"गत्वोदकः शुकस्तथा भूपलाशो विषघ्नहृत्।"
इति रत्नमाला॥
भूपाटली, स्त्री, (भुवि जाता पाटलीव।) तृणविशेषः। भूपाताली इति जैनपादश्च इति च हिन्दीभाषा। तत्पर्य्यायः। भूकुम्भी २ भूताली ३ रक्तपुष्पिका ४। अस्या गुणाः। कटुत्वम्। उष्णत्वम्। पारदे प्रयोगकत्वञ्च। इति राजनिर्घण्टः॥
भूपालः, पुं, (भुवं पालयतीति। पालि रक्षणे + "कर्म्मण्यण्।" ३।२।१। इत्यण्।) राजा। इति शब्दमाला॥ (यथा, मार्कण्डेये। १८।४।
"यदर्थं गृह्यते शुल्कं तदनिष्पादयन् वृथा।
पण्यानां द्वादशं भागं भूपालाय वणिग्जनः॥"
सोमपालस्य पुत्रः। यथा, राजतरङ्गिण्याम्। ८। ३४९५।
"सोमपालात्मजो भूत्यद् भूपालः प्राशत-
जया॥")
भूपुत्री, स्त्री, (भुवः पुत्री।) सीता। इति शब्दरत्नावली॥
("भूपुत्री यस्य पत्नी स भवतु कथं भूपती रामचन्द्रः॥"
इति रामायणम्॥)
भूपेष्टः, पुं, (भूपानामिष्टः।) राजादनीवृक्षः। इति राजनिर्घण्टः॥
भूभर्त्ता, [ऋ] पुं, (भुवो भर्त्ता। "याजकादिभिश्च।" २।२।९। इति षष्ठीसमासः।) पृथिवीपतिः। इति सिद्धान्तकौमुद्यां तत्पुरुषसमासः॥ (यथा, राजतरङ्गिण्याम्। ३।२९१।
"तस्मिन्नहनि भूभर्त्ता शोकाग्निःस्वसुता-
निशम्॥")
भूभुक्, [ज्] पुं, (भुवं भुनक्ति पालयतीति। भुज् + "सत्सूद्विषेति।" ३।२।६१। इति क्विप्।) राजा। इति जटाधरः॥ (यथा, कामन्दकीयनीतिसारे। ४। ६१।
"आपत्काराणि दुर्गाणि भुवः सारवलान्विताः।
निराजाय प्रयच्छन्ति भूभुजो भूतिमिच्छताम्॥")
भूभृत्, पुं, (भुवं बिभर्त्तीति। भृ + क्विप्। "ह्रस्वस्य पिति कृति तुक्।" ६।१।७१। इति तुगागमश्च।) राजा। (यथा, रघौ। ११। ८१।
"तेन भूमिनिहितैककोटि तत्
कार्म्मुकञ्च बलिनाधिरोपितम्।
निष्प्रभश्च रिपुरास भूभृतां
धूमशेष इव धूमकेतनः॥")
पर्व्वतः। इति मेदिनी। ते, १९०॥ (यथा, कुमारसम्भवे। ६। १।
"अथ विश्वात्मने गौरी सन्दिदेश मिथः सखीम्।
दाता मे भूभृतां नाथः प्रमाणीक्रियतामिति॥")
भूमयी, स्त्री, (भू + मयट् + ङीप्।) छाया। सा तु सूर्य्यपत्नी। इति त्रिकाण्डशेषः॥ [illegible]॥

भूमिः

भूमा, [न्] पुं, बहुत्वम्। यथा। "भूयोभूम-भूयिष्ठाः।" बहोरीयस्विमन् इष्ठान्तस्य एते निपात्यन्ते। इति सुग्धबोधव्याकरणम्॥ ईयसेर्यस् ईयस्वादौ बंह्बोर्भूरादेशः। ईयस्विष्ठोरादिलोपः। इष्ठे यकारागमश्च निपात्यन्ते। अतिशयेन बहुः भूयान्। बहोर्भावः भूमा। अतिशयेन बहुः भूयिष्ठः। इति तट्टीकायां दुर्गादासः॥ बहुत्वविशिष्टः। तत्र वाच्यलिङ्गः। यथा। भूयः भूम। इति प्रभूतशब्दपर्य्यायेषु अमरटीकायां रमानाथः॥*॥ विराट्पुरुषः। यथा। "यत्र नान्यत् पश्यति नान्यत् शृणोति नान्यद्विजानाति स भूमा यो भूमा तदमृतम्।" इत्यादि श्रुतिभ्यो ब्रह्मनित्यत्वं सत्त्वसुखस्य प्रतिभाति। इति वेदान्तसारटीका॥

भूमिः, स्त्री, (भवन्ति भूतान्यस्यामिति। भू+ "भुवः किति।" उणा० ४। ४५। इति मिः। स च कित्।) पृथिवी। स्थानमात्रम्। इति मेदिनी। मे, २२॥ (यथास्या पर्य्यायः।

"भूर्भूमिः पृथिवी पृथ्वी मेदिनी वसुधावनिः।
क्षितिरुर्व्वी मही क्ष्मौषी क्ष्मा धरा कुर्वसुन्धरा॥"

इति वैद्यकरत्नमालायाम्॥)

जिह्वा। इति संक्षिप्तसारोणादिवृत्तिः॥ योगिनामवस्थाविशेषः। यथा,—

"निरूढे चेतसि पुरा सविकल्पसमाधिना।
निर्विकल्पसमाधिस्तु भवेदत्र त्रिभूमिकः॥
युक्तिश्लिष्टे स्वतस्त्राद्ये द्वितीये परबोधितः।
अन्ते युक्तिश्लिष्टे नैव सदा भवति तन्मयः॥
एवं प्राग्भूमिसिद्धावप्युत्तरोत्तरभूमये।
विधेया भगवद्भक्तिस्तां विना सा न सिध्यति॥"

इति गीतागूढार्थदीपिकायां मधुसूदनसरस्वती॥

भूमेः पर्य्यायादयः पृथिवीशब्दे द्रष्टव्याः। अस्या गुणाः।

"भूमेः स्थैर्य्यं गुरुत्वञ्च काठिन्यं प्रसवार्थता।
गन्धो गुरुत्वं प्रक्तिश्च संघातः स्थापना धृतिः॥"

इति महाभारते मोक्षधर्म्मः॥

अस्यार्थः। स्थैर्य्यमचाञ्चल्यम् १। गुरुत्वं पतनप्रतियोगी गुणः २। काठिन्यम् ३। प्रसवार्थता धान्याद्युत्पत्तिसदर्थता ४। गन्धः ५। गुरुत्वं भिन्नपुष्टिः ६। प्रक्तिः गन्धग्रहणसामर्थ्यम् ७। संघातः शिथिलावयवत्वम् ८। स्थापना मनुष्याद्याश्रयम् ९। धृतिः पाञ्चभौतिके मनसि यो धृत्यंशः। इति तट्टीका॥*॥

भूमिदानमाहात्म्यम् यथा,—

"सर्व्वेषामेव दानानां भूमिदानमनुत्तमम्।
यो ददाति महीं राजन्! विप्रायाकिञ्चनाय वै॥
अमुष्मात्तमघवा स भवेत् पृथिवीपतिः।
न भूमिदानसदृशं प्रतिष्ठमिह विद्यते॥
भूमिं यः प्रतिगृह्णाति भूमिं यश्च प्रयच्छति।
उभौ तौ पुण्यमाप्नौ नियतं स्वर्गगामिनौ॥
यत्किञ्चिद्भूमिदानन्तु सर्व्वदानोत्तमोत्तमम्।
महीपते! नरः कोऽपि भूमिदो भूमिमाप्नुयात्॥
भूमिदानसमं दानं नास्यत्र पृथिवीतले।
तस्मादल्पमलञ्चैव मुक्तिमुक्तिसुखप्रदम्॥
यथा तथा प्रकारेण भूमिदाता तु भूमिपः।
सुखी स्यात् सर्व्वकालेषु चान्ते स्वर्गमवाप्नुयात्॥
दृढदत्ततरं वापि भूमिदानं महत्तमम्।
यः कश्चिद्ब्राह्मणे दत्त्वा भवतीह महीपतिः॥
सर्व्वथा सर्व्वदा देया धस्त्री ब्राह्मणस्य तु।
प्राणान्तेनैव न क्वापि हरणीया कदेरपि॥
कृत्वा खातादिकं कर्म्म विप्रभूमिं नरो बलात्।
करोति यदि राजेन्द्र! तत् सर्व्वं निष्फलं भवेत्॥
ब्राह्मणाद्दानग्रहणं विनानुज्ञाञ्च पार्थिव!।
तथा तत्परितोषञ्च तत्तन्मूल्यादिकं विना॥
विप्रभूमौ भूसुरोऽपि देवं नैवं तथाध्वरम्।
हरिश्च तथारामप्रासादमण्डपं गृहम्॥
खातादिखननं सेतुबन्धनं भवनं गवाम्।
सधान्यफलमूलादिशाकादिक्षेत्रमेव च॥
पुष्पाम्रवपनं पुष्पोद्यानं वृक्षादिरोपणम्।
सवटाश्वत्थतुलसीधात्रीबिल्वादिरोपणम्॥
नित्यं नैमित्तिकं काम्यं स्नानसन्ध्यादिकं तथा।
पञ्चयज्ञं तथेष्टापूर्त्तादिकमेतत्तु चापरम्॥
श्रीकृष्णसेवनं भक्तभक्तियोगपुरःसरम्।
का कथा वेतरेषान्तु न कुर्य्यात् पारमार्थिकः॥
यः कर्म्मफलकामेप्सुर्न करोत्यत्र कर्म्म च।
करुते मत्तनामोच्चादज्ञानाद्वा भ्रमादितः।
नृपते! कुर्व्वतामेतत् सर्व्वं स्यान्निष्फलं ध्रुवम्॥
यज्ञैरिष्ट्वा तस्य संपूर्णं फलमेव च।
अतो लोके हि धर्म्मात्मा ज्ञानी च सर्व्वधर्म्मवित्॥
विवेकी धर्म्मशास्त्रज्ञः पुराणागमवेदवित्।
वेदान्तज्ञो मुनिः साधुः कार्य्यादिर्वा महीपते!।
न कुर्य्याद्भूमिहरणं ब्राह्मणीहरकल्मषम्॥"

इति पाद्मोत्तरखण्डे ३६ अध्यायः॥*॥

अपि च। वृहस्पतिः।

"षष्टिं वर्षसहस्राणि स्वर्गे तिष्ठति भूमिदः।
आच्छेत्ता चानुमन्ता च तावन्ति नरके वसेत्॥

तथा।

भूमिं दत्त्वा तु यः पत्रं कुर्य्याच्चन्द्रार्ककालिकम्।
अनाच्छेद्यमनाहार्य्यं दानमेवन्तु तद्विदुः॥

महाभारते।

अपि पापकृतो राज्ञः प्रतिगृह्णन्ति साधवः।
पृथिवीं नान्यदिच्छन्ति पावनीं जननीं यथा॥
नामास्याः प्रियदत्तेति गुप्तं देयाः सनातनम्।
दाने वाप्यथवादाने नामास्याः परमं प्रियम्॥"

दानादानकाले यत् प्रियदत्ता नामास्याः परमं प्रियमित्युक्तं तेन प्रियदत्तामित्युच्चार्य्य दातव्या प्रतिगृहीतव्या च। भूमेः पूजायां दानवाक्ये च प्रियदत्तेति विशेषणम्। भूमिर्विष्णुदेवताका। यद्विधर्वनदत्तावच्छिन्नस्वर्गवासः फलम्। प्रतिग्रहे तद्भूमेः प्रदक्षिणमात्रम्। भूमेरसन्निधाने सान्निध्ये प्रदक्षिणम्। इति तिथितत्त्वम्॥*॥ आदांदपादगे रवौ भूमौ रजोयुक्ता भवति तत्काले पाटादिनिषेधो यथा ज्योतिषे।

"रजोयुक् क्ष्माम्बुवाहो च रौद्राद्यपादगे रवौ।
तस्यां पाटो बीजवापो नाहिभीर्दुग्धपानतः।
रजोयुक् क्ष्मा ऋतुमती पृथ्वी। ज्योतिषे।
यस्मिन् वारे सहस्रांशुर्यत्काले मिथुनं व्रजेत्।
क्ष्मम्बुवाचौ भवेन्नित्यं पुनस्तत्कालवारयोः॥"

मत्स्यसूक्ते।

"धरण्याश्चतुमत्याश्च भूमिकर्म्मे तथैव च।
अन्तरागमने चैव विद्यां नैव पठेद्बुधः॥"

इति तिथ्यादितत्त्वम्॥*॥

"न स्वाध्यायं वषट्कारं न देवमिष्टपूजनम्।
हलानां योजनञ्चैव बीजानां वपनं तथा।
दिनत्रयं न कुर्व्वीत यावत् पृथ्वी रजस्वला॥
यतिनो व्रतिनश्चैव विधवा च द्विजस्तथा।
क्ष्मम्बुवाचीदिनेनैव पाकं कृत्वा न भक्षयेत्॥
स्वपाकं परपाकं वा क्ष्मम्बुवाचीदिने तथा।
भक्षणं नैव कुर्व्वीत चाण्डालान्नसमं स्मृतम्॥"

इति राजमार्त्तण्डः॥

अशुद्धां भूमिमाह देवलः।

'सा अमेध्या मलिना दुष्टा एतत्त्रितयान्वितमा भवति।' अत्रामेध्या यथा,—

"प्रसूते गर्भिणी यत्र म्रियते यत्र मानुषः।
चाण्डालैरुषितं यत्र यत्र विन्यस्यते शवः॥
विण्मूत्रोपहतं यत्तु कृमयो यत्र दृश्यते।
एवं कश्मलभूयिष्ठा भूरमेध्येति लक्ष्यते॥"

कृमयः शवः। दुष्टा यथा,—

"कृमिकीटपदक्षेपैर्दूषिता यत्र मेदिनी।
क्षयापकर्षणैः क्षिप्तैर्वान्तैश्च दुरतां व्रजेत्॥"

क्षया वनीभूतक्षेत्रा। मलिना यथा,—

"नखदन्ततृणत्वक्तुषांशुरजोमलैः।
भस्मपङ्कटलैर्वापि प्रच्छन्ना मलिना भवेत्॥"

तासाञ्च शुद्धिमाह।

"दहनं खननं भूमेरुपलेपनवापने।
पर्य्यन्ववर्षणञ्चैव शौचं पञ्चविधं स्मृतम्॥"

वापनं गृहान्तरेण पूरणम्। अत्रामेध्यायाश्चतुष्कं पञ्चकं वा। दुष्टायाः द्विकं त्रिकं वा। मलिनायाः दहनादीनामेकधा शोधनमाह देवलः।

"पञ्चधा वा चतुर्द्धा वा भूरमेध्या विशुध्यति।
द्विधा दुष्टा त्रिधा वापि शुध्यते मलिनैकधा॥"

अन्यपक्षप्रकारमाह मनुः।

"सम्मार्जनेनाक्षनेन सेकेनोल्लेखनेन च।
गवाञ्च परिवासेन भूमिः शुद्धति पञ्चधा॥"

सम्मार्जनं झटाद्यपनयनम्। अक्षनं गोमयेनोपलेपनम्। सेको जलेन प्रक्षालनम्। उल्लिखनं तक्षणम्। परिवासो गवोषण्यासनम् अत्र सेकपरिवासयोर्निर्लेपन्यासनविषयत्वम् अन्येषामेध्यनिम्नविषयत्वम्। ब्रह्मपुराणे।

"ग्रामाद्दशगतं त्यक्त्वा नगराच्च चतुर्गुणम्।
भूमेः सर्व्वत्र शुद्धिः स्यादत्र लोको न विद्यते॥"

दशं चतुर्दशः। नगरं महाग्रामः। इति गोपालपक्षाननशुद्धिनिर्णयः॥*॥ भूमौ वर्णलेखनादिनिषेधो यथा,—

"न भूमौ लिखनेद्वर्णं मन्त्रं न पुस्तके लिखेत्।

न मुक्ता पुस्तकं स्याद्यं न मुक्तमाहरेत्तु तत् ॥
भूकम्पे ग्रहणे चैव यत्रचरं वाथ मुक्तकम् ।
भूमौ तिष्ठति देवेशि ! जन्मजन्मसु मूर्खता ।
तदा भवति देवेशि ! तस्मात्तत् परिवर्जयेत् ॥"
इति योगिनीतन्त्रे तृतीयभागे ७ पटलः ॥

भूमिकदम्बः, पुं, (भूमिजातः कदम्बः । प्राकपार्थिवादिवत् समासः ।) कदम्बविशेषः । तत्पर्य्यायः । भूनीपः २ भूमिजः ३ भृङ्गवल्लभः ४ लघुपुष्पः ५ वृत्तपुष्पः ६ विषघ्नः ७ व्रणहारकः ८ । अस्य गुणाः यथा, राजनिर्घण्टे ।
"त्रिकदम्बाः कटूष्णाश्च वृष्या दोषहरा हिमाः ।
कषायतिक्ताः पित्तघ्ना वीर्य्यवृद्धिकराः पराः ॥"

भूमिका, स्त्री, (भूमिरिव कायतीति । कै + कः । स्त्रियां टाप् । यद्वा । भूमिरेव स्वार्थे कन् । टाप् ।) रचना । वेशान्तरपरिग्रहः । इति मेदिनी ॥
पात्राणि नाट्येऽधिकृतास्तत्तद्वेशास्तु भूमिकाः ।
इति हेमचन्द्रः ॥
भूमिः । भूमिरेव भूमिका स्वार्थे कप्रत्ययेन निष्पन्ना । इति व्याकरणम् ॥ वेदान्तमते चित्तस्यावस्थाविशेषः । यथा । क्षिप्तं मूढं विक्षिप्तं एकाग्रं निरुद्धं इति पञ्चभूमयः । आसुरसम्पत्लोकशास्त्रदेहवासनासु वर्त्तमानं चित्तं क्षिप्तभूमिका । १ । निद्रातन्द्रादिग्रस्तं चित्तं मूढभूमिका । २ । कदाचिद्ध्यानयुक्तं चित्तं क्षिप्तादिग्रिष्टतया विक्षिप्तभूमिका । ३ । तच्च क्षिप्तमूढयोः समाधित्वशङ्कैव नास्ति विक्षिप्ते तु समाधित्वशङ्का तदितरत् भूमिद्वयं समाधिः । एकाग्रे मनसि सम्भूतमर्थं प्रद्योतयति क्षिणोति च क्लेशान् कर्म्मबन्धनानि शथयति निरोधमभिमुखीकरोतीति यः प्रज्ञानो योग एकाग्रभूमिका । ४ । सर्व्ववृत्तिनिरोधरूपा संप्रज्ञातसमाधिर्निरुद्धभूमिका । ५ । इति वेदान्तसंज्ञानिरूपणग्रन्थः ॥

भूमिखर्ज्जूरिका, स्त्री, (भूमिजाता खर्ज्जूरिका ।) क्षुद्रखर्ज्जूरी । तत्पर्य्यायः । खादी २ दुरारोहा ३ मृदुच्छदा ४ । अस्या भेदाः गुणाश्च ।
"भूमिखर्ज्जूरिका खादी दुरारोहा मृदुच्छदा ।
अथ स्वल्पफला काककर्कटी खादुमस्तका ॥
पिण्डखर्ज्जूरिका त्वन्या सा देशे पश्चिमे भवेत् ।
खर्ज्जूरी गोस्तनाकारा परादीपादिहागता ॥
जायन्ते पश्चिमे देशे सा क्षोहोरेति कीर्त्तिता ॥
खर्ज्जूरीत्रितयं शीतं मधुरं रसपाकयोः ।
स्निग्धं रुचिकरं हृद्यं वृंहणं गुरु ॥
तर्पणं रक्तपित्तघ्नं पुष्टिविष्टम्भिशुक्रदम् ।
कोष्ठमारुतकृद्वल्यं बाल्यवातकफापहम् ॥
ज्वराभिघातक्षुत्तृष्णाकासश्वासनिवारणम् ।
मदमूर्च्छाभ्रमस्तृपित्तमद्योद्भूतगदान्तकृत् ॥
मधूतीभ्यां गुणैरूना स्वल्पखर्ज्जूरिका स्मृता ॥
खर्ज्जूरीतरुतोयन्तु मदपित्तकरं भवेत् ।
वातश्लेष्महरं रुच्यं दीपनं बलशुक्रकृत् ॥"
इति भावप्रकाशः ॥

भूमिखर्ज्जूरी, स्त्री, (भूमिजाता खर्ज्जूरी ।) भूमिखर्ज्जूरिका । इति राजनिर्घण्टः । अस्या गुणपर्य्यायाः भूखर्ज्जूरीशब्दे द्रष्टव्याः ॥

भूमिचम्पकः, पुं, (भूमिजातश्चम्पकः ।) पुष्पवृक्षविशेषः । भूँइचाँपा इति भाषा । तत्पर्य्यायः । ताम्रपुष्पः २ सन्धिबन्धः ३ द्रुवर्णः ४ । इति शब्दचन्द्रिका ॥ अस्य मूलं व्रणपाककारकम् ॥

भूमिज, क्ली, (भूमेर्जायते इति । जन् + डः ।) गौरसुवर्णम् । इति राजनिर्घण्टः ॥

भूमिजः, पुं, (भूमेः पृथिव्या जायते इति । जन् + डः ।) मङ्गलग्रहः । नरकराजः । इति मेदिनी । जे, २७ ॥ भूमिकदम्बः । मनुष्यः । इति राजनिर्घण्टः ॥ (भूमिजाते, त्रि । यथा, विष्णुधर्म्मोत्तरे ।
"वरस्त्रिरभवं भौमं भूकम्यमपि भूमिजम् ॥")

भूमिजगुग्गुलुः, पुं, (भूमिजो गुग्गुलुः ।) आशापुरगुग्गुलुः । तत्पर्य्यायः । दैत्यभेदजः २ दुर्गाङ्गः ३ आशापुरसम्भवः ४ मच्छारः ५ मेदजः ६ महिषासुरसम्भवः ७ । अस्य गुणाः । तिक्तत्वम् । कटुत्वम् । कफवातनाशित्वम् । उमाप्रियत्वम् । भूतघ्नत्वम् । मेध्यत्वम् । सौरभ्यदत्वञ्च । इति राजनिर्घण्टः ॥

भूमिजम्बुः, स्त्री, (भूमिजाता जम्बुः ।) क्षुद्रजम्बुः । तत्पर्य्यायः नादेयिका २ नादेयी ३ भूजम्बुः ४ भूमिजम्बुका ५ । इति शब्दरत्नावली ॥ काकजम्बुः ६ शीतपल्लवा ७ । इति रत्नमाला ॥ नादेयिका च नादेयी भूजम्बुर्भूमिजम्बुका । भूमिजम्बुलतायां स्यात् केचित्तु भूमिचम्पके ॥ इति शब्दरत्नावली ॥

भूमिजम्बूः, स्त्री, (भूमिजाता जम्बूरिति मध्यपदलोपी समासः ।) भूजम्बुः । क्षुद्रजम्बुः । तत्पर्य्यायः । दृढफला २ भृङ्गवल्लभा ३ दृढा ४ भूजम्बुः ५ भ्रमरेष्टा ६ पिकभक्षा ७ काष्ठजम्बुः ८ । अस्या गुणाः । कषायत्वम् । मधुरत्वम् । श्लेष्मपित्तनाशित्वम् । रुच्यत्वम् । संग्राहित्वम् । हृत्कण्ठदोषनाशित्वम् । वीर्य्यपुष्टिदत्वञ्च । इति राजनिर्घण्टः ॥

भूमिजम्बूका, स्त्री, (भूमिजम्बू + स्वार्थे कन् । टाप् ।) भूमिजम्बुः । इत्यमरः । २ । ४ । ३८ ॥

भूमिजा, स्त्री, (भूमेर्जायते इति । जन् + डः । टाप्) सीता । इति त्रिकाण्डशेषः मेदिनी च । जे, २७ ॥

भूमिजीवी, [न्] पुं, (भूम्या तत्कर्षणादिना जीवतीति । जीव् + णिनिः ।) वैश्यः । इति शब्दरत्नावली ॥

भूमिदेवः, पुं, (भूमौ देव इव भूम्या देवो वा ।) ब्राह्मणः । इति हलायुधः ॥ (यथा, किरातार्জ্জুनीये । ३ । ६ ।
"यद्य क्रियाः कामदुघाः क्रतूनां
सत्याशिषः सम्पति भूमिदेवाः ।
आसंहतेरस्मि जगत्सु जात
स्वयागते यद्वहुमानपात्रम् ॥")

भूमिपः, पुं, (भूमिं पाति रक्षतीति । पा + "आतोऽनुपसर्गे कः ।" ३ । २ । ३ । इति कः ।) राजा । इति जटाधरः ॥ (यथा, महाभारते । १ । १०० । ८ ।
"वीतशोकभयाबाधाः सुखस्वप्नविबोधनाः ।
पतिं भारतगोप्तारं समपद्यन्त भूमिपाः ॥")

भूमिपक्षः, पुं, (भूमिः पक्ष इव यस्य ।) वाताश्वः । इति हारावली ॥

भूमिपिशाचः, पुं, (भूमौ पिशाच इव तद्वदाकृतिमत्त्वात् ।) तालवृक्षः । इति हारावली ॥ (विषयोऽस्य तालवृक्षशब्दे ज्ञेयः ॥)

भूमिमण्डः, पुं, (भूमिं मण्डयति भूषयतीति । मण्डि + अण् ।) अट्टपादिका । इति रत्नमाला ॥ मदनलालीति हापरमाली इति च भाषा ॥

भूमिमण्डपभूषणा, स्त्री, (भूमिमण्डपं भूषयतीति । भूषि + ल्युः + टाप् ।) माधवीलता । इति राजनिर्घण्टः ॥

भूमिरचकः, पुं, (रचतीति । रच + ण्वुल् । भूमेः रचकः । गमनकाले भूमेरुपरि पादाग्रदानात् तथात्वम् ।) वाताश्वः । इति भूरिप्रयोगः ॥

भूमिलाभः, पुं, (भूमेर्लाभोऽत्र ।) क्षत्युः । इति भूरिप्रयोगः ॥ (भूमेर्लाभः ।) भूमिप्राप्तिश्च ॥

भूमिलेपनं, क्ली, (भूमिर्लिप्यतेऽनेनेति । लिप् + ल्युट् ।) गोमयम् । इति हेमचन्द्रः । ४ । ३३८ ॥ (भूमेर्लेपनम्) भूमेर्लेपश्च ॥

भूमिवर्द्धनः, पुं, क्ली, (भूमिर्वर्द्धतेऽनेनेति । वृध् + णिच् + ल्युट् । स्त्रीयपार्थिवांशप्रदानेन भूमेर्वर्द्धनादस्य तथात्वम् ।) शुवः । इति हेमचन्द्रः ॥

भूमिसम्भवा, स्त्री, (भूमेः सम्भव उत्पत्तिर्यस्याः ।) सीता । इति जटाधरः ॥

भूमिसृक्, [ज्] पुं, (भूमिं सृजतीति । सृज् + "सृजोऽनुदके क्विन् ।" ३ । २ । ५८ । इति क्विन् ।) मानुषः । वैश्यः । इति मेदिनी । गे, ३८ ॥ चौरविशेषः । अन्धः । खञ्जः । इति शब्दरत्नावली ॥

भूमी, स्त्री, (भूमिः । "ङादेकारादक्लिनः ।" इति पक्षे ङीष् ।) भूमिः । इति भरतदिरूपकोषः ॥

भूमीन्द्रः, पुं, (भूम्यामिन्द्र इव । भूमेः इन्द्र ईश्वरो वा ।) राजा । इति शब्दरत्नावली ॥

भूमीरुहः, पुं, (भूम्यां रोहतीति । रुह + कः ।) वृक्षः । यथा, —
"दीर्घास्तापयुता यथा विरहिणीश्वासास्तथा वासरा
यामिन्यश्चपला यथा कुलवधूदृष्टिः सरोषा प्रिये !।
छाया वाञ्छिततमा नवोढ़वनितावाणीव भूमीरुहः
निष्यन्दाः सुचिरादृथा मिलितयोर्यूनोर्मिथो दृष्टयः ॥"
इत्युद्भटः श्लोकः ॥

भूमीसहः, पुं, (भूमेः सहते उत्सहते उत्पद्यत इति सह + अच् । वृक्षविशेषः । भूरसह इति

हिन्दी भाषा। तत्पर्य्यायः। द्वारदातुः २ वरदातुः ३ खरच्छदः ४। अस्य गुणाः। शिशिरत्वम्। रक्तपित्तप्रसादनत्वञ्च। इति भावप्रकाशः॥

भूम्यामलकी, स्त्री, (भूमिलग्ना आमलकी प्राक् पार्थिवादित्वात् समासः) क्षुपविशेषः। भूँइ आमला इति भाषा। तत्पर्य्यायः। बहुपुष्पी २ जड़ा ३ अधखडा ४ तालिः ५ तामलकी ६ अजटा ७ क्षुद्रफला ८ क्षेत्रामलकी ९। इति रत्नमाला॥ वितुन्नकः १० झाटा ११ अमला १२ अजझाटा १३ तालो १४ शिवा १५। इत्यमरः। २।४।१२७॥ झाटा १६ मला १७ झाटामला १८ अमलाजझाटा १९। इत्यमरटीकायां भरतः॥ भूम्यामलकिका २० शिवामलकी २१ बहुपुत्रा २२ बहुफला २३ बहुवीर्य्या २४ भूधात्री २५। अस्या गुणाः। वातकारित्वम्। तिक्तत्वम्। कषायत्वम्। मधुरत्वम्। हिमत्वम्। पिपासाकासपित्तास्रकफपाण्डुक्षतनाशित्वञ्च। इति भावप्रकाशः॥

भूम्यामली, स्त्री, (भूम्या आमलते आत्मानं धारयतीति। आ+मल्+अच्।) भूम्यामलकी। अरनेली इति हिन्दी भाषा। भूँइ आमला इति बङ्गभाषा। तत्पर्य्यायः। तमाली २ तालो ३ तमालिका ४ उच्चटा ५ दृढ़पादी ६ वितुन्ना ७ वितुन्निका ८ भूधात्री ९ चारटी १० वृष्या ११ विषघ्नी १२ बहुपत्रिका १३ बहुवीर्य्या १४ अहिभयदा १५ विश्वपर्णी १६ हिमालया १७ अजझाटा १८ वीरा १९। अस्या गुणाः। कषायत्वम्। अम्लत्वम्। पित्तमेहदाहनाशित्वम्। शिशिरत्वम्। स्रंसरोधार्शिःशमनत्वञ्च। इति राजनिर्घण्टः॥

भूम्याडुल्यं, क्ली, (भूमिमाडोलति आच्छादयतीति। आ+डुल+कः। ततः यत्।) क्षुपविशेषः। भूजितखड़ इति हिन्दी भाषा। तत्पर्य्यायः। कुशकेतु २ मार्कण्डीयम् ३ मधौषधम् ४। अस्य गुणाः। तिक्तत्वम्। कटुत्वम्। व्रणकुष्ठामसिध्मनाशित्वञ्च। इति राजनिर्घण्टः॥

भूयः, [स्] अ, (भुवे भावाय यस्यति यतते इति। भू+यसु+क्विप्।) पुनरर्थम्। इति शब्दरत्नावली॥ (यथा, विष्णुपुराणे। १।४।२४।
"यद्गीतं यच्च नैवोक्तं मयात्र परमेश्वर!।
तत् सर्व्वं त्वं नमस्तुभ्यं भूयो भूयो नमो नमः॥"

भूयान्, [स्] त्रि, (अयमनयोरतिशयेन बहुरिति बहु+"द्विवचनविभज्योपपदे तरबीयसुनौ।" ५। ३। ५७। इति ईयसुन्। "बहोर्लोपोभू च बहोः।" ६।४।१५८। इतीयसुन ईलोपः भूरादेशश्च।) बहुतरः। इति मेदिनी। से, ३०॥ (यथा, मनुसंहितायाम्। २।१३७।
"पथां त्रिषु वर्णेषु भूयांसि गुणवन्ति च।"

भूयिष्ठं, त्रि, (अयमेषामतिशयेन बहुरिति। बहु+इष्ठन्। "इष्ठस्य यिट् च।" ६। ४। १५६। इति यिड़ागमो बहोः स्थाने भूरादेशश्च।) प्रचुरः। इत्यमरः। ३।१।६३॥ (यथा, ऋग्वेदे। ८। ८५। ३।
"इन्द्रस्य वज्र आयासो निमिश्र इन्द्रस्य बाहोर्भूयिष्ठमोजः॥")

भूयुक्ता, स्त्री, (भुवा+युक्ता।) भूमिखर्জ্জুरी। इति राजनिर्घण्टः॥

भूरि, क्ली, (भवति भूयते वेति। भू+"आदिभूदिभूसुभिभ्यः क्रिन्।" उणा०। ४।६५। इति क्रिन्।) स्वर्णम्। इत्यमरः। ३। १। ६३॥

भूरिः, पुं, (भवतीति। भू+"आदिभूदिभूसुभिभ्यः।" उणा०। ४।६५। इति क्रिन्।) विष्णुः। ब्रह्मा। शिवः। इति मेदिनी। रे, ७३॥ वासवः। इति शब्दरत्नावली॥ (सोमदत्तस्य पुत्रभेदः। यथा, महाभारते। १। १८७। १४।
"कौरव्यः सोमदत्तश्च पुत्राश्चास्य महारथाः।
समवेताश्चयः शूरा भूरिर्भूरिश्रवाः शलः॥")

प्रचुरे, त्रि। इत्यमरः। ३। १। ६३॥ (यथा, ऋग्वेदे। ७। ४। २।
"संयोवनायुवते सुचिदनभूरि
चिदन्नासमिदत्ति सद्यः॥")

भूरिक्, [च्] स्त्री, (भरति सर्व्वं धरतीति भृञ्। भृञ उच्च।" उणा०। २। ७२। इति इञिः स च कित् धातोरुकारान्तादेशश्च। पृषोदरादित्वात् साधुः।) पृथिवी। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

भूरिगव्या, स्त्री, (भूरिः प्रचुरो गव्योऽस्याः। ततष्टाप्।) पुराणामगन्धनम्। इति राजनिर्घण्टः॥ (गव्याद्यायाश्च, त्रि॥)

भूरिगमः, पुं, (भूरिभिर्भारैर्गच्छतीति। भूरि+गम+"गमहनजनखनघसां लोपः क्ङिति च।" ३। ३। ५८। इति अप्।) गर्द्दभः। इति राजनिर्घण्टः॥

भूरिदावा, [न्] पुं, भूरि ददाति यः। (भूरि+दा+वनिप्।) प्रचुरदाता। इति सुग्धबोधव्याकरणम्॥ (यथा, ऋग्वेदे। २। २७। १७।
"माहं मघोनो वरुणप्रियस्य भूरिदावृण
व्यादिदं शूनमापेः॥")

भूरिदुग्धा, स्त्री, (भूरीणि दुग्धानि निर्य्यासा यस्याः।) वृश्चिकाली। इति राजनिर्घण्टः॥ (गुणादयोऽस्या वृश्चिकालीशब्दे ज्ञातव्याः॥)

भूरिपत्रः, पुं, (भूरीणि पत्राण्यस्य।) उखर्ब्बलक्षम्। इति राजनिर्घण्टः॥

भूरिपलितदा, स्त्री, (भूरि पलितं केशपाकं दायति शोधयति इति दैप्+कः। टाप्।) पाण्डुरफली। इति राजनिर्घण्टः॥

भूरिपुष्पा, स्त्री, (भूरीणि पुष्पाण्यस्याः।) अतपुष्पा। इति राजनिर्घण्टः॥

भूरिप्रेमा, [न्] पुं, (भूरिः प्रेमा प्रेयस्त्वं यस्य।) चक्रवाकः। इति राजनिर्घण्टः॥

भूरिफेना, स्त्री, (भूरयः फेना यस्याः।) सप्तलाक्षः। इत्यमरः। २। ४। १४३॥ शामारकषा इति भाषा॥

भूरिबला, स्त्री, (भूरि बलं यस्याः।) बलिका। इति राजनिर्घण्टः॥

भूरिमल्ली, स्त्री, (भूरि मलते इति। मल+अच्+ङीष्।) अम्लवेता। इति राजनिर्घण्टः॥

भूरिमायः, पुं, स्त्री, (भूरी माया यस्य।) शृगालः। इत्यमरः। २। ५। ५॥

भूरिशः, [स्] अ, बहुशः। बहुत्वार्थात् कारकभूरिशब्दात् दृशस्प्रत्ययनिष्पन्नोऽयं शब्दः। इति सुग्धबोधव्याकरणम्। (भूरीणि भूरीणि इति वीप्सायां शस्। यथा, महानिर्व्वाणतन्त्रे। १। ५२।
"बहुप्रश्नासनादीनि गदितान्यपि भूरिशः।")

भूरिश्रवाः, [स्] पुं, (भूरि श्रवो यस्यादि श्रवितं यशो यस्य सः। चन्द्रवंशीयसोमदत्तराजपुत्रः। यथा, महाभारते। १। १८७। १४।
"समवेताश्चयः शूरा भूरिर्भूरिश्रवाः शलः।")

स तु अर्জ্জुनसात्यकिभ्यां हतः। इति महाभारतम्॥ (बहुयशोविशिष्टे, त्रि॥)

भूरुण्डी, स्त्री, (भुवं पृथिवीं रुणद्धि सुवि रोहतीति वा। भू+"रुधः+वा रुहः+कः पृषोदरादित्वात् नकार उकारो गौरादित्वात् ङीष्।) श्रीवल्लिनी वृक्षः। इत्यमरः। २। ४। ५६॥ (भूरण्डीति च सर्व्वानन्दः।) हातिशुंड़ा इति भाषा॥

भूरुहः, पुं, (भुवि रोहति प्रादुर्भवतीति भू+रुह+कः।) वृक्षः। इति शब्दमाला॥ (यथा, माघे। ७। ५०।
"इदमिदमिति भूरुहाम्यसूने:।")

भूर्জः, पुं, (ऊर्জ+घञ्। भूः ऊर्জो बलं यस्य। भुवि ऊर्জ्जयते इति भू+ऊर्জ+अच् वा।) स्वनामख्यातवृक्षविशेषः। भोजपत्र इति हिन्दी भाषा। (यथा, रघौ। ३। ७३।
"भूर्জेषु मर्म्मरीभूताः कीचकध्वनिहेतवः।")

तत्पर्य्यायः। वल्कदुमः २ भुर्जः ३ सुचर्म्मा ४ भूर्জपत्रकः ५ चित्रत्वक् ६ विन्दुपत्रः ७ रक्षापत्रः ८ विचित्रकः ९ भूतघ्नः १० गण्डुमत्रः ११ शैलेन्द्रस्यः १२। इति राजनिर्घण्टः॥ भूर्জपत्रः १३ चर्म्मी १४ बहुलवल्कलः १५। इति भावप्रकाशः॥ छत्रपत्रः १६ शिवः १७ स्थिरच्छदः १८। इति रत्नमाला॥ गण्डुत्वक् १९। इत्यमरः। २। ४। ४६। पत्रपुष्पकः २०। इति भरतधृतमधु॥ भुजः २१ बहुपटः २२ बहुत्वकः २३ गण्डुत्वचः २४। इति भरतधृतस्वामी॥ अस्य गुणाः। वलकारित्वम्। कफरक्तनाशित्वञ्च। इति राजवल्लभः॥ कटुत्वम्। कषायत्वम्। उष्णत्वम्। भूतरक्षाकरत्वम्। त्रिदोषशमनत्वम्। पथ्यत्वम्। दुष्टकौटिल्यनाशित्वञ्च। इति राजनिर्घण्टः॥ कर्म्मरोगपित्तराक्षसमेदविषघ्नत्वञ्च। इति भावप्रकाशः॥ (यथा, वाभटे शरीरस्थाने प्रथमेऽध्याये॥
"भूर्জलाङ्गलिकीतुम्बीसर्षपत्वक्कुशसर्षपैः।
पृथक् द्वाभ्यां समक्षैर्वा योनिरोपनधूपनम्॥")

भूभृयः

भूजंकराटकः, पुं, वर्णसङ्करजातिविशेषः। इति शब्दार्णवः॥ (यथा, मनौ। १०। २१।
"ब्राह्मात्तु जायते विप्रात् पापात्मा भूर्जकण्टकः॥")

भूर्जपत्रः, पुं, (भुवि ऊर्ज्जस्वलेभ्यः उपदेवजातिभ्यः पत्राण्यस्य।) भूर्जवृक्षः। इति रत्नमाला॥ (यथा, रामायणे। २। ८१। २४।
"कुथास्तरपुन्नागभूर्जपत्रोत्तरच्छदान्॥")
तथा चास्य पर्य्यायः।
"भूर्जपत्रः स्तनो भूर्जधर्म्मी बहुलवल्कलः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥

भूर्त्तिः, स्त्री, (बिभर्त्ति सर्व्वमिति। भृ+"पृथिपृथिभार्ज्जिचूर्ज्जिभूर्ज्जिः।" उणा० ४। ५२। इति निः निपातनादूत्वञ्च।) पृथिवी। मरुभूमिः। इत्युणादिकोषः॥ (भर्त्ता। यथा, ऋग्वेदे। ७।८७।२।
"त्वात्मा ते वायो रज्यानवीनोत्-
पशुर्न भूर्त्तिर्वयसे स सवान्।"
"भूर्त्तिर्भर्त्ता।" इति तद्भाष्ये सायणः॥)

भूर्लोकः, पुं, (भूः संज्ञको लोकः। प्राक्पार्थिवादिवत् समासः।) अन्तरीक्षादधो लोकः। मर्त्यलोकः। तस्य लक्षणं यथा,—
"पादगम्यश्च यत्किञ्चित् वस्तुस्ति पृथिवीमयम्।
स भूर्लोकः समाख्यातो विस्तारोऽस्य मयोदितः॥"
इति विष्णुपुराणे। २ अंशे ५ अध्यायः॥
चरणसञ्चारयोग्यं गिरिग्रिखरादि यावत् तावदुत्सेधो भूर्लोक इत्यर्थः। विस्तारो मयोदितः सर्व्वतो लोकालोकावधिः पञ्चविंशतिकोटिप्रमाणः। इति तट्टीकायां स्वामी॥ अस्य विवरणं तत्रैव द्वितीयादिचतुर्थाध्यायेषु भूर्गोलशब्दे च द्रष्टव्यम्। (यथा, भागवते। २। ५। ३८।
भूर्लोकः कल्पितः पद्भ्यां भुवर्लोकोऽस्य नाभितः॥")

भूलता, स्त्री, (भुवि लता इव।) किंशुकः। इति हेमचन्द्रः। ४। २६६॥

भूवदरी, स्त्री, (भूलता वदरी प्राक्पार्थिवादिवत् समासः।) क्षुद्रकोली। झड़बेर इति हिन्दीभाषा। तत्पर्य्यायः। क्षितिवदरी २ वल्लीवदरी ३ वदरवल्ली ४ बहुफलिका ५ लघुवदरी ६ वदरफली ७ सत्यावदरी ८। अस्या गुणाः। मधुराम्लत्वम्। कफवातविकारघ्नत्वम्। पथ्यत्वम्। दीपनत्वम्। पाचनत्वम्। किञ्चित् पित्तासक्रारित्वम्। रुच्यत्वञ्च। इति राजनिर्घण्टः॥

भूशयः, पुं, (भुवि शेते इति। भू+शीङ्+"अधिकरणे शेतेः।" ३। २। १५। इति अच्।) गण्डूलगोधादिः। एतेषां मांसगुणाः। गुरुत्वम्। उष्णत्वम्। मधुरत्वम्। स्निग्धत्वम्। वायुनाशित्वम्। शुक्रकारित्वञ्च। इति राजवल्लभः॥ विष्णुः।

भूषणं

यथा,—
"भृशयो भूषणो भूतिर्विशोकः शोकनाशनः॥"
इति महाभारते तस्य सहस्रनामस्तोत्रम्॥

भृशेलुः, पुं. (भुवि स्थाता शेलुः प्राक्पार्थिवादिवत् समासः।) भूकर्ब्बुदारकः। इति राजनिर्घण्टः॥

भृश किं भूषणे। इति कविकल्पद्रुमः॥ (चुरा० परं० सक० सेट्।) किं भूषयति भूषति हारो जनम्। इति दुर्गादासः॥

भूषणं, क्ली, (भूष्यते अनेनेति। भूष+करणे ल्युट्।) अलङ्कारः। इति हेमचन्द्रः। ३। ३१३॥ (यथा, चाणक्यसंग्रहे। ८।
"नक्षत्रभूषणं चन्द्रो नारीणां भूषणं पतिः॥")
देवदेवभूषणादि यथा,—
"भोग्यभूषोत्तमं नित्यं भूषणानि शृणुष्व मे।
किरीटञ्च शिरोरत्नं कुण्डलञ्च ललाटिका॥
तालपत्रञ्च हारञ्च ग्रैवेयकमधोर्म्मिका।
प्रालम्बिका रत्नसूत्रमुत्तुङ्गोऽथर्च्चमालिका॥
पार्श्वद्योतो नखद्योतो ह्यङ्गुलीच्छादकस्तथा।
कटिलम्बं माणवको मूर्द्धतारा ललन्तिका॥
अङ्गदो बाहुवलयः शिखाभूषणमिङ्गिका।
प्रागण्डबन्धं तद्भागं नाभिपूरोऽथ मालिका॥
सप्तकी ह्यङ्गलञ्चैव दन्तपत्रञ्च वर्णकः।
ऊरुसूत्रञ्च नीवी च सुश्लिष्टं प्रकीर्णकम्॥
पादाङ्गदं हंसकञ्च नूपुरं क्षुद्रघण्टिका।
सुखपट्टमिति प्रोक्ता अलङ्कारा: सुशोभनाः॥
चत्वारिंशदमी प्रोक्ता लोके वेदे च सौख्यदाः।
अलङ्काराः प्रदानेन चतुर्व्वर्गप्रदायकाः॥
एतेषां पूजनं कृत्वा प्रदद्यादिष्टसिद्धये।
तेषां दैवतमुच्चार्य्य पूजयेत्तु विचक्षणः॥
शिरोगतानि चादद्यात् सौवर्णानि तु सर्व्वदा।
चूड़ारत्नादिकानीह भूषणानि तु भैरव!॥
ग्रैवेयकादि हंसान्तं सौवर्णं राजतञ्च वा।
निवेदयेत्तु देवेभ्यो नान्यतेजससम्भवम्॥
रीतिवङ्गादिसंजातं पात्रोपकरणादिकम्।
दद्यादायसवर्জ्জन्तु भूषणं न कदाचन॥
घण्टाचामरकुम्भादि पात्रोपकरणादिकम्।
तदभूषणान्तरे दद्याद् यस्मात्तदुपभूषणम्॥
सर्व्वं ताम्रमयं दद्यादृतेकिञ्चिद्भूषणादिकम्।
सर्व्वञ्च स्वर्णवत्ताम्रमर्घ्यपात्रे ततोऽधिकम्॥
पूजार्घ्यपात्रं नैवेद्याधारपात्रञ्च पानकम्।
औड्डरं सदा विष्णोः प्रीतिदं तोषदं तदा॥
ताम्रे देवाः प्रमोदन्ते ताम्रे देवाः सदा स्थिताः।
सर्व्वप्रीतिकरं ताम्रं तस्मात्ताम्रं प्रयोजयेत्॥
स्रोपयोगे नरः कुर्य्यादेवानामपि भैरव!॥
ग्रीवोर्द्ध्वदेशे रौप्यन्तु न कदाचिच्च भूषणम्॥
प्रावारः पानपात्रञ्च गेण्डुकं शृङ्खलैव च।
पर्य्यङ्कादि यदन्यच्च सर्व्वं तदुपभूषणम्॥
त्रयोमयन्ते कांस्यन्ते यद्भूषणं भवेत्।
स्वर्णरौप्यस्य चाभावे तथः कांसे नियोजयेत्॥
एतेषां भूषणादीनां यद्दातुं शक्यते नरैः।
तत्तद्दद्यात् समर्थे तु सर्व्वमेव प्रदापयेत्॥

भूषितः

चतुर्व्वर्गप्रदं नित्यं भूषणं सर्व्वसौख्यदम्।
तुष्टिपुष्टिप्रीतिकरं यथाशक्तीष्टये सृजेत्॥
इदं ते भूषणं प्रोक्तं सर्व्वदेवस्य तुष्टिदम्।"
इति कालिकापुराणे ६८ अध्यायः॥
यथालङ्कारयुक्तिः। तद्धारणादिनसुखते।
"रेवत्यश्विधनिष्ठासु हस्तादित्येषु पञ्चसु।
गुरुशुक्रबुधस्वाहि वस्त्रालङ्कारधारणम्॥
अनिष्टेष्वपि निर्द्दिष्टं वस्त्रालङ्कारधारणम्।
उदाहे राजसम्माने ब्राह्मणानाञ्च सम्मते॥
शिरस्त्रं सुकुटं हारः कुण्डलस्वाङ्गदन्तथा।
कङ्कणं वालकञ्चैव मेखलाद्याविति क्रमात्॥
प्रधानभूषणान्येषु यथा स्त्रं याति निश्चयः।
पद्मरागञ्च वज्रञ्च विजयो गोविदस्तथा॥
सुक्तावैदूर्य्यनीलञ्च यथा मरकतं क्रमात्।
आदित्यादिदशाजानां सर्व्वसम्पत्तिदायकाः॥
सुवर्णनापि घटना सर्व्वेषामुपयुज्यते।
प्रधानभूषणेष्वेवमप्रधाने न निर्णयः॥
प्रधानभूषणं प्रायः शिरसो ह्यभिधीयते।
तस्य प्रधानभूतत्वादित्याह भृगुनन्दनः।
सुखदा मणयः सृष्टा दुःखदा दोषशालिनः॥"
इति युक्तिकल्पतरुः॥
तद्धारणफलम् यथा,—
"भूषणं भूषयेदङ्गं यथायोग्यविधानतः।
सुश्रिसौभाग्यसन्तोषदायकं काञ्चनं स्तुतम्॥
अहृद्यहृद्यरं पुष्टिकरं दुःखप्रणाशनम्।
पापदौर्भाग्यशमनं रत्नाभरणधारणम्॥
माणिक्यं तरणेः सुजात्यममलं मुक्ताफलम्
शीतगोर्मांङ्गल्यस्य च विद्रुमो निगदितः सौम्यस्य गारुत्मतम्।
दैवेज्यस्य च पुष्यरागमसुराचार्य्यस्य वज्रं शनेर्नीलं निर्म्मलमन्ययोच्च गदिते गोमेदवैदूर्य्यके॥
वासः सगन्धरत्नानां धारणं प्रीतिवर्द्धनम्।
रक्षोघ्नमर्थ्यमोजस्यं सौभाग्यकरसुत्तमम्॥"
इति भावप्रकाशः॥
भूषणः, पुं, (भूषयति भक्तहृन्मिति भूष्यतेऽनेनेति वा। भूष+ल्युः वा ल्युट्।) विष्णुः। यथा,—
"भृशयो भूषणो भूतिर्विशोकः शोकनाशनः।"
इति तस्य सहस्रनामस्तोत्रम्॥
(राजविशेषः। यथा, कथासरित्सागरे। ६७। १३।
"वसुदत्तादयश्चैते राघानोऽधरघा इमे।
अङ्कुरो सविशालश्च दण्डिभूषणसोमिलाः॥")
भूषा, स्त्री, (भूष+भावे घञ् टाप् च।) अलङ्क्रिया। इत्यमरः। २। ६। १०१॥ (यथा, भागवते। ३। २२। २२।
"दम्पत्योः पर्य्यदात् प्रीत्या भूषावासःपरिच्छदान्॥")
भूषितः, त्रि, (भूष+क्तः।) अलङ्कृतः। इत्यमरः। २। ६। १००॥ (यथा, भट्टिः। ६। ७६।
"भृङ्गालीकोकिलकुरुविकाभिर्वनैः पद्म सद्मव॥
रौचनैर्भूषितां पश्यामक्षार्कं हृदयाविधम्॥")

भृष्णुः, त्रि, (भू+ग्नुः।) भवनशीलः। तत्पर्य्यायः। भविष्णुः २ भविता ३। इत्यमरः। ३।१। २६॥ साधुभवनशीलः। इति तट्टीकायां रायमुकुटः॥ (यथा, मनौ। ४। १३५।
"क्षत्रियं चैव नर्पं च ब्राह्मणश्च बहुश्रुतम्।
नावमन्येत वै भृष्णुः क्षत्रज्ञानपि कदाचन॥"
"भृष्णुः, धनायुरादिना वर्द्धनशीलः।" इति तट्टीकायां कुल्लूकभट्टः॥)

भृसुनः, पुं, (सुवः पृथिव्याः सुतः।) मङ्गलग्रहः। इति शब्दमाला॥ (यथा, सूर्य्यसिद्धान्ते। २। ५५।
"मङ्गलाङ्गीरपरिधेः सप्तमे भृगुभूसुतौ॥")
सीतायाम् स्त्री॥

भृसृणं, क्ली, (भृसृणं हरं भवत्यृगमिति वा। पारस्करादित्वात् सुट्।) भूहरम्। इत्यमरः। २। ५। १६७॥ (यथा, मनौ। ६। १४॥
"वर्जयेन्मधुमांसञ्च भौमानि कवकानि च।
भूसृणं शिग्रुकञ्चैव श्लेष्मातकफलानि च॥")
अस्य पर्य्यायगुणा यथा,—
"गुच्छबीजञ्च भूतीकं सुगन्धं गोमयप्रियम्।
भूसृणन्तु भवेच्छ्वेता मालातगकमित्यपि॥
भूसृणं कटुकं तिक्तं लीक्ष्णोष्णं रोचनं लघु।
विदाहि दीपनं रूक्षमनेत्र्यं सुखशोधनम्।
अहृद्यं बहुविट्कञ्च पित्तरक्तप्रदूषणम्॥"
इति भावप्रकाशः॥

भृसृक्, [ग्] पुं, (भृवं सृग्नातीति सृग्+क्विन्।) मनुष्यः। इति हेमचन्द्रः। ३। १॥

भृ स्वर्गः, पुं, (भृवि स्वर्ग इव अमरलोकधारणात्।) सुमेरुपर्व्वतः। इति जटाधरः॥

भृञ्, भृञि, टुभृञ्, डुभृञ् } भृतिपुष्टोः। इति कविकल्पद्रुमः॥ (भ्वा०-उभ०-सक०-अनिट्। लि-भ्वा०-उभ०-सक०-अनिट्।) भृतिर्भरणं पुष्टिः पोषणम्। लि च "बिभर्त्ति शुश्रिणं शुभ्रमुद्भिन्ते जनकः सुतम्। टुभरयुः। डुभृञ् भृत्रिमम्। भ्वादिपक्षे भृनिः पूरणम्। च भरति कुम्भमङ्गिरुचनः। भरते। इति दुर्गादासः॥

भृङ्गः, पुं, (भृङ्गि+अच्। भृङ्गो भावदीपनम्। पृषोदरादित्वात् सस्य शत्वम्। भुवा भृङ्गो भावप्रकाश इङ्गितज्ञापनं यस्य। निपातनात् सम्प्रसारणम्।) भृङ्गः। स्त्रीवेषधारी नटपुरुषः। इत्यमरटीकायां रमानाथः॥

भृङ्गकः, पुं, (भृङ्ग एव स्वार्थे कन्।) भृङ्गः। इति शब्दरत्नावली॥

भृकुटिः, स्त्री, (कुट कौटिल्ये इति कुट+इन्। भ्रुवः कुटिः कौटिल्यं निपातनात् वा सम्प्रसारणम्।) भृकुटिः। यथा,—
"रचितभृकुटिवक्त्रं नन्दिना द्वारि रुद्धे।"
इति भरतधृतहरविलासः॥

भृकुटी, स्त्री, (भृकुटि। ह्रस्वादिकारादिति ङीष्।) भृकुटिः। इत्यमरटीकायां भरतः॥ भृकुटीकुटिलाननौ। इति मार्कण्डेयपुराणे देवीमाहात्म्यञ्च॥

भृगुः, पुं, (तपसा भृज्यते पक्वतपादिभिर्वेति। भ्रस्ज+"प्रथिम्रादिभ्रस्जां सम्प्रसारणं सलोपश्च।" उणा० १। २६। इति कुः सम्प्रसारणं सलोपः, न्यङ्कादित्वात् कुत्वञ्च। यद्वा भृज्यतीति किप्। भृक् ज्वाला तया सहोत्पन्न इति उः।) मुनिविशेषः। स तु ब्रह्मणस्त्वचो जातः। (यथास्योत्पत्तिर्नामनिरुक्तिश्च महाभारते। १३। ८५। १०५—१०६।
"पुरुषा वपुषा युक्ताः स्वैः स्वैः प्रसवधर्मिणैः।
भृगुरेव भृगुः पूर्व्वमङ्गरेभ्योऽङ्गिराभवत्।
अङ्गारसंश्रयाच्चैव कविरित्यपरोऽभवत्।
सह ज्वालाभिरुत्पन्नो भृगुस्तस्माद् भृगुः स्मृतः॥")
अस्य भार्य्या कर्दमसुनिकन्या ख्यातिः। पुत्रः धाता विधाता च। कन्या श्रीः। इति श्रीभागवतम्॥ अपि च।
सुनय ऊचुः।
"कथितस्ते यदा सर्गः पृष्टः सूत त्वयाधुना।
भृगुसर्गात् प्रभृत्येव सर्गो नः कथ्यतां पुनः॥"
सूत उवाच।
भृगोः ख्यात्यां समुत्पन्ना श्रीः पूर्व्वसुदधेः पुनः।
तथा धाता विधाता च तस्यां जातौ भृगोः सुतौ॥
आयतिर्नियतिश्चैव मेरुकन्ये महाप्रभोः।
धातुर्विधातुस्ते भार्य्ये ययोर्जातौ सुतावुभौ॥
प्राणश्चैव मृकण्डुश्च मार्कण्डेयो मृकण्डुतः।
ततो वेदशिरा जज्ञे प्राणस्य द्युतिमान् सुतः॥
ततो वेणो पुनिर्जज्ञे विक्रमे भार्गवो गतः।
इत्यादौ वह्निपुराणे वरसर्गनामाध्यायः॥*॥
शिवः। शुक्रग्रहः। इति मेदिनी। गे, १५॥ शनुः। यमदग्निः। इति हेमचन्द्रः। अरण्यकण्टकथाम्रगिरिपार्श्वोच्चदेशः। निरवलम्बनपर्व्वतादिपार्श्वः। आरुढ़ इति ख्यातम्। यस्मात् पतने व्यवस्थानक्रियाविशेषो नास्ति। अतएव भृगुपतनमित्यादिप्रयोगो दृश्यते। इति भरतः॥ तत्पर्य्यायः। प्रपातः २ अवटः ३। इत्यमरः। २। ३। ४॥ दरट् ४। इति जटाधरः॥ पतनस्थानम् ५। इति शब्दरत्नावली॥

भृगुपतिः, पुं, (भृगूणां तद्वंशीयानां पतिः।) परशुरामः। इति शब्दरत्नावली॥ (यथा, गीतगोविन्दे। १। १०।
"क्षत्रियरुधिरमये जगदपगतपापं स्नपयसि पयसि शमितभवतापं।
केशव धृतभृगुपतिरूप जय जगदीश हरे॥

तथा च मेघदूते। १। ५६।
"हंसद्वारं भृगुपतियशो वर्त्म यत् क्रौञ्चरन्ध्रम्।")

भृगुसुतः, पुं, (भृगोः सुतः।) शुक्रः। इति शब्दरत्नावली॥ परशुरामश्च॥

भृगुलाम्पतिः, पुं, परशुरामः। इति शब्दरत्नावली॥ भृगूणाम्पतिरित्यपि पाठः॥

भृङ्ग, क्ली, (बिभर्त्तीति। डुभृञ् भरणे। "भृञः किन् नुट् च।" उणा० १। १२४। इति गन्। स च किन् नुडागमश्च।) लक्ष्म। गुड़त्वक् इति ख्यातम्। इत्यमरः। २। ५। १६॥ (यथा,—
"त्वक्पत्रञ्च वराङ्गं स्याद्भृङ्गर्षिचन्तथोत्कटम्।")
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥) अभ्रकम्। इति राजनिर्घण्टः॥

भृङ्गः, पुं, (बिभर्त्तीत्यनुरागमिति। भृञ्+"भृञः किन् नुट् च।" उणा० १। १२४। इति गन्। स च किन् नुट् च।) भ्रमरः। कलिङ्गपक्षी। इत्यमरः। २। ५। १६। झिङ्गा इति भाषा॥ (अस्य पर्य्यायाः धूम्राटशब्दे द्रष्टव्याः।) अस्य मांसगुणाः। मधुरत्वम्। स्निग्धत्वम्। कफशुक्रविवर्द्धनत्वञ्च। इति राजनिर्घण्टः॥ झिङ्गः। भृङ्गराजः। इति मेदिनी गे, १५॥ (यथास्य पर्य्यायः।
"भृङ्गराजः केशराजो भृङ्गः पत्रङ्ग मार्कवम्॥
इति वैद्यकरत्नमालायाम्॥
तथा च पर्य्यायान्तरम्।
"भृङ्गराजो भृङ्गरजो मार्कवो भृङ्ग एव च।
अङ्गारकः केशराजो भृङ्गारः केशरञ्जनः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
भृङ्गारः। भृङ्गरोलः। इति शब्दरत्नावली॥

भृङ्गकः, पुं, (भृङ्ग। संज्ञायां कन्।) राजवासनपक्षी। यथा,—
"अथ भृङ्गो भृङ्गराजो भृङ्गको राजवासनः।"
इति शब्दरत्नावली॥

भृङ्गजं, क्ली, (भृङ्ग इव जायत इति। जन+डः।) अगुरु। इति रत्नमाला॥ (गुणाश्चास्यागुरुशब्दे विधिताः॥)

भृङ्गजा, स्त्री, (भृङ्गज+स्त्रियां टाप्।) भार्गी। इति राजनिर्घण्टः॥

भृङ्गपर्णिका, स्त्री, (भृङ्ग इव काष्णत्वात् भृङ्गवर्णं पर्णमस्याः इति ङीष्। ततः स्वार्थे कन् टाप्। अत इत्वञ्च। ईकारस्य ह्रस्वत्वम्।) सूक्ष्मैला। इति शब्दचन्द्रिका॥

भृङ्गप्रिया, स्त्री, (भृङ्गाणां प्रिया। प्रचुरमधुत्वात्।) माधवीलता। इति राजनिर्घण्टः॥

भृङ्गमल्लिका, स्त्री, (भृङ्गस्य भृङ्गराजस्येव मूलमस्याः कः। अजातित्वचनत्वात् टाप्। कापि अत इत्वञ्च।) भ्रमरचूर्णी। इति राजनिर्घण्टः॥

भृङ्गरजः, पुं, (भृङ्गान् रञ्जयतीति अन्तर्भूतण्यर्थाद् रञ्जेरच्। पृषोदरादित्वात् न लोपः।) भृङ्गराजः। इति भावप्रकाशः॥ (यथा,—

"भृङ्गरजश्चिफलोत्पलशारि-
लौहपुरीषसमन्वितकारि॥"

इति वैद्यकचक्रपाणिसंग्रहे क्षुद्राधिकारे॥)

भृङ्गरसः, [स्] पुं, (रञ्जयतीति। अन्तर्भूतण्यर्थात् रञ्जे "सर्व्वधातुभ्योऽसुन्।" उणा० ४। १८८। इति असुन्। ततो "रञ्जेश्च।" ६।४।२६। इति नलोपः। ततो भृङ्गाणां रजाः रञ्जकः। अथवा भृङ्ग इव कृष्णवर्णं रजः परागोऽस्य।) भृङ्गराजः। इत्यमरटीकायां भरतः॥

भृङ्गराजः, पुं, (भृङ्गइव राजते इति। भृङ्ग+राज्+अच्। द्वयङ्गारेण भृङ्गवत् केशकृष्णीकरणात्तथात्वम्।) क्षुपविशेषः। कैसुरिया इति वङ्गभाषा। भेंगरिया इति हिन्दीभाषा। तत्पर्य्यायः। केशराजः २ भृङ्गः ३ पत्तङ्गः ४ मार्कवः ५। इति रत्नमाला॥ भृङ्गाङ्गः ६ केशरञ्जनः ७ पिङ्गप्रियः ८ अङ्गारकः ९ केश्यः १० कुन्तलवर्द्धनः ११। अस्य गुणाः। तिक्तत्वम्। उष्णत्वम्। चक्षुष्यत्वम्। केशरञ्जनत्वम्। कफामशोफश्चित्रनाशित्वम्। तत्र नीलो रसायनः। इति राजनिर्घण्टः॥ अपि च।

"भृङ्गराजो भृङ्गरजः मार्कवो भृङ्ग एव च।
भृङ्गारकः केशराजो भृङ्गारः केशरञ्जनः॥
भृङ्गराजः कटुस्तिक्तो रूक्षोष्णः कफवातनुत्।
केश्यस्तथ्यः कृमिश्वासकासव्रणोषामयापहृत्॥
दन्त्यो रसायनो बल्यः कुष्ठनेत्राग्निरोगहृ-
ज्जिन्॥"

इति भावप्रकाशः॥

पक्षिविशेषः। (यथा, महाभारते ३।१०८।७।
शकुनैश्च विचित्राङ्गैः कूजद्भिर्विविधा गिरः।
भृङ्गराजैस्तथा हंसैर्दात्यूहैर्जलकुक्कुटैः॥")

भ्रमरः। इति मेदिनी। जे, ३४॥ यज्ञभेदः। इति धरणिः॥

भृङ्गरिटिः, पुं, (भृङ्ग इव रटति इति। भृङ्ग+रट+इन्। पृषोदरादित्वादिकारागमः।) शिवद्वारपालः। इति भरिप्रयोगः॥

भृङ्गरीटः, पुं, (भृङ्गरिटि। पृषोदरात् ईत्वम्।) शिवद्वारपालः। इति भरिप्रयोगः॥

भृङ्गरोलः, पुं, (भृङ्ग इव रौति। भृङ्ग+रु+आडुलकात् व्योसच्। अस्य भृङ्गतुल्यशब्दत्वात्तथात्वम्।) कीटविशेषः। भौंमरुल इति भाषा। तत्पर्य्यायः। विषरुक्षा २ वरोलः ३ दलपदः ४। इति विकाण्डशेषः॥

भृङ्गवल्लभः, पुं, (भृङ्गाणां वल्लभः प्रियः।) धारावटवृक्षः। भूमिकदम्बः। इति राजनिर्घण्टः॥

भृङ्गवल्लभा, स्त्री, (भृङ्गाणां वल्लभा।) भूमिजम्बूः। इति राजनिर्घण्टः॥

भृङ्गसोदरः, पुं, (भृङ्गाणां सोदरस्तुल्यः।) केशराजः। इति विकाण्डशेषः॥

भृङ्गानन्दा, स्त्री, (भृङ्गाणामानन्दो यस्याः षष्ठी तत्पुरुषः। भृङ्गाणां वानन्दा आनन्दकरी वा।) यूथिका। इति राजनिर्घण्टः॥

भृङ्गाभीष्टः, पुं, (भृङ्गाणां अभीष्टः प्रियः। मधु दाडुल्यात्।) आम्रवृक्षः। इति राजनिर्घण्टः॥ तत्सुकुलफलयोः क्लीं॥

भृङ्गारं, क्ली, (डुभृञ् धारणपोषणयोरिति। भृ+"भृङ्गारभृङ्गारौ।" उणा० ३। १३६। इति आरन् निपातनात् नुम् गुक् च।) लवङ्गम्। सुवर्णम्। इति राजनिर्घण्टः॥

भृङ्गारः, पुं, (भृ+आरन् नुम् गुक् च। अथवा "भृङ्गं जलमियर्त्तीनेनेति।" भृङ्ग+ऋ+करणे घञ्। इत्यमरटीकायां रघुनाथः॥ स्वर्णघटितपारिपात्रम्।(यथा मार्कण्डेयपुराणे ।८।२०३।
"नाद्य पश्यामि ते कृत्तं भृङ्गारमथवा पुनः॥")
तत्पर्य्यायः। कनकालुका २ इत्यमरः॥ गुडुकः ३ गडुकः ४। इति शब्दरत्नावली॥ भृङ्गराजः। इति जटाधरः॥ अथ भृङ्गारोद्देशः।
"राज्ञोऽभिषेकपात्रं यद्भृङ्गार इति तन्मतम्।
तदष्टधा तस्य मानमाकृतिश्चापि चाष्टधा॥
सौवर्णं राजतं भौमं ताम्रं स्फाटिकमेव च।
चान्दनं लौहजं शार्ङ्गमेतदष्टविधं मतम्॥
भानुदिङ्नवसप्ताष्टरुद्रलोकसुरोम्मिताः।
अष्टावर्थौ समाख्याता व्यासमपरिणाहयोः॥
द्विचतुर्बाणवेदाब्धिबाणसप्तात्मवृत्तिता।
यथाक्रमं मुनिदृष्टमादित्यादिदृशा भुवाम्॥
पद्मरागस्तथा वज्रं वैदूर्य्यमौक्तिकन्तथा।
नीलं मारकतञ्चैव मुक्ता च सप्त कीर्त्तिताः॥
भृङ्गारसप्तके न्यास्या न भौमो मणिमर्हति।
कानकं मरकतं वापि सर्व्वेषासुपयुज्यते॥
कानकन्तु क्षितीशानां मरकतं सार्व्वयोगिकम्।
शङ्खपद्मेन्द्रकुन्दारं प्रत्यसं विन्यसेत् क्रमात्॥
चतुर्व्विधानां भूपानां चान्द्रं सर्व्वत्र शस्यते।
श्वेतं रक्तं तथा पीतं कृष्णं चन्दनमुच्यते॥
एतेषां सलिलैः सेकश्चतुर्णां स्यान्महीभुजाम्॥
मल्ली पद्मञ्च नीलञ्च तथा कृष्णापराजिता।
एषां पुष्पाणि क्रमेण चतुर्जातिमहीभुजाम्॥
हीरकं पद्मरागश्च वैदूर्य्यं नीलमेव च।
चत्वारो मणयो ज्ञेयाश्चतुर्णां सेचनाम्भसि॥
इत्थं निश्चित्य यः कुर्य्यान् नृपतिः सेकमात्मनः।
न चिरायुर्भवेद्रोगी इत्योऽन्यच्चाचरन्॥"

इति युक्तिकल्पतरौ भृङ्गारोद्देशः॥

भृङ्गारिः, स्त्री, (भृङ्गं भृङ्गवद्वर्णमृच्छतीति। ऋ+इन्।) केविकापुष्पम्। इति राजनिर्घण्टः॥

भृङ्गारिका, स्त्री, (भृङ्ग+ऋ+"कर्म्मण्यण्"३। २। १। इति अण्। भृङ्गार+ततः कन्। टाप् च। अत इत्वञ्च।) झिल्लिका। यथा,—

"झिल्लीका झिल्लिका वर्षकरी भृङ्गारिका
च सा।"

इति हेमचन्द्रः। ४। ८२॥

भृङ्गारी, स्त्री, (भृङ्गमियर्त्ति रूपेणानुकरोति "कर्म्मण्यण्।"३।२। १। इति अण्। भृङ्गार+ततः गौरादित्वात् ङीप्। रस्य लत्वे भृङ्गाली च।) झिल्ली इत्यमरः। २। ५। २८॥

भृङ्गाह्वः, पुं, (भृङ्गमाह्वयते सर्व्वते इति। आ+ह्वे+कः।) जीवकः। भृङ्गराजः। इति राजनिर्घण्टः॥ (विकृतिरस्य जीवकभृङ्गराजशब्दयोर्ज्ञातिश्च॥

भृङ्गाह्वा, स्त्री, (भृङ्गमाह्वयते सर्व्वते। भृङ्ग+आ+ह्वे+कः स्त्रियां टाप्।) भ्रमरच्छली। इति राजनिर्घण्टः॥

भृङ्गिः, पुं, (बिभर्त्तीति। भृ+बाहुलकात् गिक् नुट् च।) भृङ्गी। यथा,—

"प्राप्ता गणाधिपत्यं त्वं नाम्ना भृङ्गिरिति
स्मृतः।"

इति वामनपुराणे ४५ अध्यायः॥

भृङ्गिणी, स्त्री, (भृङ्गवत् वर्णोऽस्या अस्तीति इनिः। ङीप्।) वटीवृक्षः। इति राजनिर्घण्टः॥

भृङ्गी, स्त्री, (भृ+गक्+नुट्+गौरादित्वात् ङीष्।) अतिविषा। इति राजनिर्घण्टः॥

भृङ्गी, [न्] पुं, (भृङ्गः भृङ्गवद्वर्णोऽस्यास्तीति। इनिः।) वटवृक्षः। इति राजनिर्घण्टः॥ शिवद्वारपालविशेषः। तत्पर्य्यायः। भृङ्गेरिटिः २ भृङ्गरीटः ३ शूलः ४ नाड़ीदेहः ५ अस्थिविग्रहः ६। इति त्रिकाण्डशेषः॥ भृङ्गरिटिः ७। इति भूरिप्रयोगः॥ तस्य जन्मकारणं यथा,—

ईश्वर उवाच।

"रतिमात्रेण नीमायां मनुपुत्रः संभविष्यति।
महामैथुनसंत्यागात् स्वादपुत्री च पार्व्वती॥
तस्मादहन्तु देवानां वचनाद्ब्रह्मणस्तथा।
त्यक्ष्ये महामैथुनन्तु किन्त्वेकं कुरुतामराः!॥
येन मे समहत्तेजो महामैथुनकारणम्।
धार्य्यं तेजस्विनं देवमानवन्त्वमरास्तु तम्॥
यो निष्कम्पो निर्व्विकारो भूत्वा तेजो ग्रहीष्यति।
तस्मै यदन्तु चिदृशास्यक्ष्ये तेजः शरीरजम्॥"

श्रीब्रह्मोवाच।

"इत्यध्वजवचः श्रुत्वा देवा ब्रह्मपुरोगमाः।
हरतेजोग्रहायाथ वीतिहोत्रं ययुर्द्दिवा॥
अथ ब्रह्माणमामन्त्र्य तथानुज्ञाप्य पावकम्।
सेन्द्रा देवगणाः सर्व्वे हरमत्वरिदं वचः॥"

श्रीदेवा ऊचुः।

"अयं वैश्वानरः श्रीमान् भूरितेजोमयो बली।
महामैथुनवीजन्तु त्वत्तेजः संग्रहीष्यति।
इत्युक्ता चिदृशाः सर्व्वे वीतिहोत्रं पुरःस्थितम्।
तस्मै निदिग्धयामासुः शम्भवे सर्व्वहेतवे।
ततः षड्गं स्वं रेतो वादिते दहनानने।
उत्सस्रुर्ज महावाहुर्महामैथुनकारणम्॥
अथात्मनुरुध्यमानस्य तेजसः शुभ्रभद्भुतः।
अगृह्णयमतिस्वल्पं गिरिशस्य प्रमाण च॥
तयोः कारणयोः सद्यः सम्भूतौ शङ्करात्मजौ।
एको भृङ्गसमः कृष्णो भिन्नाञ्जननिभोऽपरः॥
भृङ्गी तस्य तदा ब्रह्मा नाम भृङ्गेति चाकरोत्।

महाकालैकरूपस्य महाकालेति लोकभृत् ॥
ततस्तौ लालयामास भृङ्गरः प्रमथोत्करैः ।
अपर्णया चापि तथा क्रमात्तावभिवर्द्धितौ ॥
प्रवृद्धौ तौ महात्मानौ हरोमाप्रतिपालितौ ।
समाहूयेशौ कृत्वा तौ हरौ हारि न्ययोजयत् ॥"

इति कालिकापुराणे ४५ अध्यायः ॥

तस्य वानरमुखत्वकारणं तच्छापेन हरपार्श्वे लोपापिमनुष्यजन्मग्रहणं यथा,—

"यदा सा नर्म्मणे याता गौरी स्मरहरान्तिकम् ।
तदा भृङ्गिमहाकालौ द्वाःस्थौ हारि प्रतिष्ठितौ ।
गर्म्मावसाने सा देवी सुस्नातमिच्छवन्यना ।
निःसृता रतिसङ्केतगृहाया जलजानना ॥
तां निःसरन्तीं सहसा तथाभूतामनिन्दिताम् ।
अयोग्यां वीक्षितुं चान्यैर्दृष्ट्वजन्मने प्रियम् ॥
दधर्षतुर्महात्मानौ नातिहृष्टात्ममानसौ ।
भृङ्गो चापि महाकालः प्राप्तकालञ्च कोपतः ॥
दृष्ट्वा तौ मातरं दीनौ तदा भूतावधीसुखौ ।
चिन्ताञ्च जग्मतुस्तीव्रां निश्वसन्तुरुक्तमम् ॥
तौ पश्यन्तौ तदा देवी ददर्श हिमवत्सुता ।
सुकोप च तदापर्णा वाक्यमेतदुवाच ह ॥
एवम्भूतान्तु मां कस्मादसम्बद्धामपश्यताम् ।
भवन्तौ तनयौ शुद्धौ श्रीमर्य्यादाविवर्जितौ ॥
तस्मादिमाममर्य्यादां भवन्तौ निरपत्रपौ ।
अकुर्व्वतां ततो भूयाद्भवतोर्जन्म मानुषे ॥
मानुषीं योनिमासाद्य ममावेक्षणदोषतः ।
भविष्यतो भवन्तौ तु शाखान्दगमुखौ भुवि ॥
तौ प्राप्तदुःखौ तु तदा विमनस्कौ हरात्मजौ ।
शापं तस्या न सेहाते प्रोचतुश्चेदमद्रिजाम् ॥
नियोजितौ यया हारि महेशेन त्वया सह ।
यथा नियोगं कुर्व्वन्तौ तिष्ठावो हारि संयतौ ।
दृष्टाग्निःसरणं गेहात्तवैव न हि युज्यते ॥
तस्मात्तच्च प्रतीकारं शृणु मातरनिन्दिते !।
त्वं मानुषी स्थितौ भूया हरौ भवतु मानुषः ॥
मानुषस्य हरस्यावां जायायां हरतेजसा ।
भवत्यापापि मानुष्या भविष्यावस्तयोदरे ॥
अथ काले यतीते तु सर्व्वज्ञो वृषभध्वजः ।
तद्वार्त्ति कर्म्म ज्ञात्वैव मानुषो ह्यभवत् स्वयम् ॥
ब्रह्मणो दक्षियाङ्गुष्ठाद्दक्षो ब्रह्मसुतोऽभवत् ।
अदितिस्तत्सुता जाता ततः पूषाऽभवोऽभवत् ॥
पूष्णः पूषोऽभवत् पौष्यः सर्व्वशास्त्रार्थपारगः ।
यस्य तुल्यो नृपो भूमौ न भूतो न भविष्यति ॥
स पुत्रहीनो राजाभूत् पौष्यो नृपतिसत्तमः ।
यज्ञे वयसि संप्राप्ते भार्य्याभिस्तिसृभिः सह ॥
पौष्यः परमया भक्त्या ब्रह्माणं पर्य्यतोषयत् ।
ततः प्रसन्नो भगवान् ब्रह्मा लोकपितामहः ॥

ब्रह्मोवाच ।

शृणु पौष्य ! यथा भावी पुत्रस्तव कुलोद्वहः ।
तदहं ते वदिष्यामि भार्य्याभिस्तव सम्मतः ॥
इदं फलं यजाग्रे त्वं मया दत्तं नृपोत्तम ! ।
अनेनैव तवोत्कृष्टे काले प्राप्तेऽपि सत्तमे ॥
एतदेतत् समादाय गत्वा संवत्सरद्वयम् ।
आराधय महादेवं सुप्रसन्नो भविष्यति ॥
यथा संभाषते भर्गः फलमेतत्तथा भवान् ।
करिष्यति फलं राजन् ! भार्य्याभिस्तिसृभिः सह ॥
इत्युक्त्वा प्रययौ ब्रह्मा राजापि सह भीरुभिः ।
हरं यष्टुं समारेभे भक्त्या परमया युतः ॥
स तु वर्षद्वयेनेति महादेवो जगत्पतिः ।
पौष्यस्य नृपतेः सम्यक् प्रसादार्थमिच्छया ॥
ततः पुत्रार्थिनं भूपं प्रसन्नो वृषभध्वजः ।
ब्रह्मदत्तफलं हस्ते कृत्वेदं तमुवाच ह ॥

ईश्वर उवाच ।

इदं फलं ब्रह्मदत्तं । त्वं नृपते ! त्रिधा ।
भोजयेस्ताः स्वजायास्त्वं प्रहृष्टः सुस्थमानसः ॥
एकस्या जठरे पुत्रो भार्य्यायास्ते भविष्यति ।
अपरस्यास्तथा कुक्षौ मध्यभागो भविष्यति ।
अधो नाभ्यास्तु यो भागः सोऽपरस्यां भविष्यति ॥
ततः खण्डत्रयं भूप ! यथास्थानं पृथक् पृथक् ।
योजयिष्यति पश्चात्ते पुत्र एको भविष्यति ॥
ततः फले स्वयं देवः प्रविवेश वृषध्वजः ।
तत्क्षणात् तत् फलं भूतं त्रिभागं स्वयमेव हि ।
ततः समुचिते काले प्राप्ते ताभिस्तु भक्षितम् ॥
तत् फलं नृपशार्दूल ! गर्भाश्चाप्याहिताः शुभाः ।
सम्पूर्णे गर्भकाले तु गर्भेभ्यः समजायत ॥
खण्डत्रयं पृथक् राजा यथा भर्गेण भाषितम् ।
तच्च खण्डत्रयं पौष्यो यथास्थानं नियोज्य च ॥
एकं पिण्डं चकाराशु तत्र पुत्रो व्यजायत ।
तस्य शीर्षे तदा राजन् ! सहजेन्दुकला शुभा ॥
तस्य नामाकरोद्राजा ब्राह्मणैः स्वैः पुरोहितैः ।
चन्द्रशेखर इत्येवं कान्त्या चन्द्रसमप्रभः ॥
एवं तिस्रृणामम्बानां गर्भे जातो यतो हरः ।
अतस्त्र्यम्बकनामाभूत् प्रथितो देवलोकयोः ॥"

इति कालिकापुराणे ४६ अध्यायः ॥

"अवतीर्णे महादेवे पौष्यजायासु स्वेच्छया ।
मानुषेण प्रमाणेन तेन सम्वत्सरद्वये ।
गिरिजापि ककुत्स्थस्य राज्ञो भार्य्यास्वजायत ॥"
"इक्ष्वाकुवंशजो राजा ककुत्स्थो नाम धार्म्मिकः ।
तस्य भार्य्या महाभागा भगदेवस्य पुत्रिका ॥
सा मनोरमधिनी नाम्ना पूजिता पतिवल्लभा ।
पुत्री न विद्यते तस्यास्तदर्थे सा गृहान्तरे ।
निष्टंतं स्थण्डिलं कृत्वा चण्डिकां समपूजयत् ॥
पूज्यमाना महादेवी चण्डिका राजभार्य्यया ।
पार्व्वत्यपि स्वयं तस्या गर्भे काले विवेश ह ॥
सा मनोरमधिनी देवी सुषुवे तनयां शुभाम् ।
तां दृष्ट्वा हारसंयुक्तां हरज्योत्स्नोपमां सुताम् ॥
ककुत्स्थो भार्य्यया सार्द्धमत्यन्तसुदितोऽभवत् ॥
तेनैव हारचिह्नेन तस्यां तारावतीति वै ।
नाम्नाकरोत् पिता काले यथोक्ते नृपसत्तम ! ॥
तस्यास्तु यौवनोद्भेदं दृष्ट्वा राजा सुतैः सह ।
ककुत्स्थः कारयामास स्वयंवरमथ स्वयम् ॥
स्वयं सा पार्व्वती देवी वव्रे च चन्द्रशेखरम् ॥
इति स्वयं महादेवो मानुषीं योनिमाश्रितः ।
पार्व्वती च स्वयं जाता नरयोनावनिन्दिता ॥
यथा भृङ्गी महाकाल एतयोरभवत् सुतः ।
तथा त्वं शृणु राजेन्द्र ! कथयामि समुद्भवम् ॥
अथोमया समं देवो वियता चन्द्रशेखरः ।
आजगाम तदा गच्छन् प्रासादं प्रतितं नृप ! ॥
दृष्ट्वोच्च चरन्तौ तामुमायाः सहगौ गुणैः ।
सर्व्वलक्षणसम्पूर्णां माधवस्येव माधवीम् ॥
सां दृष्ट्वा त्यगदद्देवीं गौरीं वृषभकेतनः ।
इयं ते मानुषी मूर्त्तिः प्रिये ! तारावतीति या ॥
भृङ्गी महाकालयोस्ते जन्मने विहिता स्वयम् ।
त्वत्तो ह्यनन्यकान्तोऽहं नान्यां गन्तुमिहोत्सहे ॥
त्वामदाना स्वयञ्चास्यां मूर्त्तेर्यां प्रविश भाविनि ! ॥
तत उत्पादयिष्यामि महाकालञ्च भृङ्गिणम् ॥

श्रीदेव्युवाच ।

ममैव मानुषी मूर्त्तिरियं वृषभकेतन ! ॥
विशामि तेऽहं वचनादुत्पादय सुतद्वयम् ॥
प्रविवेश ततो देवी स्वयं तारावतीतनौ ।
महादेवोऽपि तस्यान्तु कामार्थं समुपस्थितः ॥
ततः सापर्णयाविष्टा देवी तारावती सती ।
कामयानं महादेवं स्वयमेवाभवन्मुदा ॥
कामावसाने तस्यान्तु सद्योजातं सुतद्वयम् ।
अभवन् नृपशार्दूल ! तथा शाखान्दगाननम् ॥
ततस्तयोर्नाम चक्रे नारदो वचनान् नृप ! ।
ज्येष्ठो भैरवनामाभूत् भीरोः पुत्रो भयङ्करः ॥
वेतालसदृशः कृष्णो वेतालोऽभूत्तथापरः ।
इति चक्रे तयोर्नाम देवर्षिर्ब्रह्मणः सुतः ॥
अन्यांश्च सर्व्वसंस्कारान्नारदो मुनिसत्तमः ।
चकार क्रमशो वाक्याच्चन्द्रशेखरभूभृतः ॥"

इति कालिकापुराणे ४७ । ४८ । ४९ अध्यायेभ्यः संकलितम् ॥ तस्य जन्मनः प्रकारान्तरं यथा,

वेण उवाच ।

प्रपद्ये देवमीशानं त्वामजं चन्द्रभूषणम् ।
महादेवं महात्मानं विश्वस्य जगतः पतिम् ॥
अथैनमब्रवीद्देवस्त्रैलोक्याधिपतिर्भवः ।
आश्वासनकरश्चास्य वाक्यविद्वाक्यमुत्तमम् ॥
अहो तुष्टोऽस्मि ते राजन् ! स्तवेनानेन सुव्रत ! ।
बहुनात्र किमुक्तेन मत्समीपे वसिष्यसि ॥
उषित्वा सुचिरं कालं मम गात्रोद्भवः पुनः ।
असुरो ह्यन्धको नाम भविष्यसि सुरान्तकृत् ॥
हिरण्याक्षगृहे जन्म प्राप्य वृद्धिं गमिष्यसि ।
पूर्व्वार्धर्म्मेण घोरेण वेदनिन्दाकृतेन च ॥
साभिलाषो जगन्मातुर्भविष्यसि यदा तदा ।
देहं मूलेन हत्वा ते पातयिष्यामि साध्वसम् ॥
तत्राप्यकल्मषो भूतः स्तुत्वा मां भक्तितः पुनः ।
प्राप्य गणाधिपत्यं त्वं नाम्ना भृङ्गिरिति स्मृतः ।
मत्सन्निधाने स्थित्वा त्वं ततः सिद्धिं गमिष्यसि ॥"
ततः कालान्तरे अन्धकवधतत्क्षणानन्तरं महादेववाक्यम् यथा,—
"सिद्धोऽसि दानवपते ! परितुष्टोऽस्मि तेऽन्धक ! ।
वरं वरय भद्रं ते यमिच्छसि विनाम्बिकाम् ॥

अम्बक उवाच ।
अम्बिका जननी मह्यं भगवांस्त्र्यम्बकः पिता ।
अहमस्मि भगवतो मातुर्वन्दनीया ममाम्बिका ॥
वरदोऽसि यदीशान ! तदेतु वितथं मम ।
प्रार्थितं मानसं यागं दक्षस्य दुर्विचिन्तितम् ॥
तथा मे दानवो भावो व्यपयातु महेश्वर ! ।
स्थिरा स्यात्तव भक्तिस्तु वरमेनं प्रयच्छ मे ॥
महेश्वर उवाच ।
एवं भवतु दैत्येन्द्र ! पापं ते यातु संक्षयम् ।
मुक्तोऽसि दैत्यभावाच्च भक्तो गणपतिर्भव ॥
इत्येवमुक्त्वा वरदः सुरासाम्रादवनार्थं तम् ।
निर्मोच्य निजहस्तेन चक्रं निर्नेगमत्यकम् ॥
ततः स्वदेहतो देवान् ब्रह्मादीनाजुहाव सः ।
ते निरीक्ष्य महात्मानो नमस्यन्त्यखिलोचनम् ॥
गणानू स नन्दी चाकृष्य सन्निवेश्य तदग्रतः ।
भृङ्गिणं दर्शयामास ब्रुवन्नयोऽन्यकेति हि ॥
ते दृष्ट्वा दानवपतिं संशुष्कशिरसं रिपुम् ।
गणाधिपत्यमापन्नं प्रणेमुर्वृषध्वजम् ॥"
इति वामनपुराणे ।४४।२५।६७ अध्यायेभ्यः संकलितम् ॥
भृङ्गीफलः, पुं, (भृङ्गाः व्याधिविशेषाः फलमिव फलं यस्य ।) आम्रातकवृक्षः । इति राजनिर्घण्टः ॥
भृङ्गीशः, पुं, (भृङ्गिणो भृङ्गेर्वा ईशः ।) महादेवः । इति शब्दरत्नावली ॥
भृङ्गेरिटिः, पुं, (भृङ्गे भृङ्गविषये रिटति । अभिलषतीति । भृङ्गे + रिट् कर्मणि टः । अलुक् समासः ।) भृङ्गी । इति त्रिकाण्डशेषः ॥
भृङ्गेष्टा, स्त्री, (भृङ्गागमिष्टा ।) धृतकुमारी । भार्गी । तरुणी । काकजङ्घा । इति राजनिर्घण्टः ॥
भृज भृं ऽ भर्जने । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक० सेट् ।) भर्जनं पाकविशेषः । इं भृक्तः । ऽ भर्जते तण्डुलान् जनः । इति दुर्गादासः ॥
भृञ्जनः, पुं, (भृज्यते तण्डुलादयोऽस्मिन्निति । भृज् + "भृञ्जभृञ्जिभ्यश्चन्दसि ।" उणा० २ । ८० । इति युन् ।) भ्रमरीपः । इति उणादिकोषः । भाजना खोला इति भाषा ॥
भृतः, त्रि, भरणीयः । इत्याद्धिकतत्त्वम् । पुष्टः । इति भृधातोः कर्मणि क्तप्रत्ययेन निष्पन्नम् ॥
भृतकः, पुं, (भियते इति । भृ + कर्मणि क्तः । ततः स्वार्थे कन् । यद्वा, भृतेन वेतनेन उपजीवतीति कन् ।) वेतनोपजीविकर्मकरः । तत्पर्य्यायः । भृतिभुक् २ कर्मकरः ३ वैतनिकः ४ । इत्यमरः । ८ । १० । १५ ॥ (यथा, मनौ ।३।१५६। "भृतकाध्यापको यश्च भृताध्यापितस्तथा ।")
भृतिः, स्त्री, (भियते अनयेति । भृ + क्तिन् ।) वेतनम् । इत्यमरः । २ । १० । ३८ ॥ मल्लम् । भरणम् । इति मेदिनी । ते, ६२ ॥ भृतिर्वेतनं भरणमित्यर्थः । तच्च भरणविषयदृष्टान्तभेदेन भरणविधेः । यथा नारदेन च । दृष्टं सम्यविधं प्रोक्तमदृष्टं षोढ़शात्मकमिति प्रतिपाद्य दृष्टादृष्टयोः स्वरूपं विवृतम् ।
"पण्यमल्पं भृतिमुष्टा सेवान् प्रत्युपकारतः ।
स्त्रीशुल्कानुग्रहार्थं च दत्तं दानविदो विदुः ॥"
इति मिताक्षरा ॥
भृतिभुक्, [ज्] पुं, (भृत्या भुङ्क्ते उपजीवतीत्यर्थः । भुज् + कर्त्तरि क्विप् ।) भृतकः । इत्यमरः । २ । १० । १५ ॥
भृत्यः, पुं, (भियते इति । भृ + "भृञोऽसंज्ञायाम् ।" ३ । १ । ११२ । इति क्यप् । "दृभृस्थ पितीति क्तिच् तुक् ।" ६ । १ । ७१ । इति तुगागमश्च ।) दासः । इत्यमरः । २ । १० । १७ ॥ (तथास्य पर्य्यायान्तरम् ।
"परिकर्म्मा परिचरः सहायः परिचारकः ।
प्रेष्यो भृत्य उपस्थाता सेवकोऽभिधवोऽनुगः ॥"
इति वैद्यकरत्नमालायाम् ।)
तस्य लक्षणं यथा,—
सूत उवाच ।
"भृत्या बहुविधा ज्ञेया उत्तमाधममध्यमाः ।
नियोक्तव्या यथार्हेषु त्रिविधेष्वेव कर्म्मसु ॥
भृत्यपरीक्षणं वक्ष्ये यस्य यस्य हि यो गुणः ।
तमिमं संप्रवक्ष्यामि यदृयदा कथितानि च ॥
यथा चतुर्भिः कनकं परीक्ष्यते
तुलाघर्षणच्छेदनतापनैन ।
तथा चतुर्भिर्भृतकः परीक्ष्यते
श्रुतेन शीलेन कुलेन कर्म्मणा ।"
कुलशीलगुणोपेतः सत्यधर्म्मपरायणः ।
रूपेण सुप्रसन्नश्च राज्ञाध्यक्षो विधीयते ॥
सत्यरूपपरीक्षाकृद्ववैद्यरूपपरीक्षकः ।
बलाबलपरिज्ञाता सेनाध्यक्षो विधीयते ॥
इङ्गिताकारतत्त्वज्ञो बलवान् प्रियदर्शनः ।
अप्रमादी प्रमाथी च प्रतीहारः स उच्यते ॥
मेधावी वाक्पटुः प्राज्ञः सत्यवादी जितेन्द्रियः ।
सर्व्वशास्त्रसमालोकी स्मृत्य साधुः स लेखकः ॥
बुद्धिमान् मतिमांश्चैव परचित्तोपलक्षकः ।
क्रूरो यथोक्तवादी च स्मृत्य दूतो विधीयते ॥
समस्तशास्त्रतत्त्वज्ञः पण्डितोऽथ जितेन्द्रियः ।
शौर्य्यवीर्य्यगुणोपेतो धर्म्माध्यक्षो विधीयते ॥
पिङ्गलेतामधो दृष्टः शास्त्रज्ञः सत्यवाचकः ।
शौचयुक्तः सदाचारी स्मृत्यकारः स उच्यते ॥
आयुर्व्वेदज्ञताभ्यासः सर्व्वज्ञः प्रियदर्शनः ।
आर्य्यशीलगुणोपेतो वैद्य एष विधीयते ॥
वेदवेदाङ्गतत्त्वज्ञो जपहोमपरायणः ।
आशीर्व्वादपरो नित्यमेष राजपुरोहितः ॥
इति गारुड़े ११२ अध्यायः ॥
भृत्या, स्त्री, (भियतेऽनया भरणमिति वा । भृ + "संज्ञायां समजनिषदनिपतमनविदमुज् शीङ् भृञिभ्यः ।" ३ । ३ । ९९ । इति क्यप् । स्त्रियां टाप् ।) वेतनम् । इत्यमरः । २ । १० । ३८ ॥ (भरणक्रिया । यथा, ऋग्वेदे । १ । ८४ । १६ ।
"आसत्रिषून् शतक्रतूमोमयो भृदय
रयां भक्षीमहि तस्य दावान ।")

भ्रमिः, पुं, (भ्रमति भ्राम्यति वेति । भ्रम् + "भ्रमेः संप्रसारणञ्च ।" उणा० ४।१२० । इति इन् कित् सम्प्रसारणञ्च ।) वायुविशेषः । घूरणा वातास इति भाषा । जलादिभ्रमणम् । इत्युणादिकोषः ॥ (त्रि, कर्म्मनिर्व्वाहकः । यथा, ऋग्वेदे । १ । ३१ । १६ ।
"आपिः पिता प्रमतिः सोम्यानां
भृमिरस्यृषिकृन्मर्त्तानाम् ॥"
"भृमिर्भ्रामकः कर्म्मनिर्व्वाहक इत्यर्थः ।" इति तद्भाष्ये सायनः ॥ भ्रमणशीलः । यथा, ऋग्वेदे । ३ । ६२ । १ ।
"इमा उ वां भृमयो मन्यमाना
युवावते न तुज्या अभूवन् ॥"
"भृमयः भ्रमणशीलाः ॥" इति तद्भाष्ये सायनः ॥ वीणाविशेषे स्त्री । यथा, ऋग्वेदे ।७।३३।१ ।
"अग्मयो न शुशुचाना ऋतीषिणो भृमिं धमन्तो अपगा अवृक्षत ॥"
"यद्वा, भृम्याख्यो वीणाविशेषस्तं धमन्तो वादयन्तः ॥" इति तद्भाष्ये सायनः ॥)
भृश, इर् य उ अधःपतने । इति कविकल्पद्रुमः ॥ (दिवा०-पर० अक०-सेट् ।) इर् अभृशत् अभर्शीत् । पुषादित्वान्नित्य ङ इत्यन्ये । य अभृश्यति भृश्यत्यरिपताकिनीमिति एलायुधः ॥ उ भर्शित्वा भृष्ट्वा । इति । दुर्गादासः ॥
भृशं, क्ली, (भृश्यति प्रायुर्म्येण क्लेशते इति भृश + कः ।) आतिशयः । तडति, त्रि । इत्यमरः । १ । ७० ॥ (यथा, भारवौ । १५ । ३६ ।
"भृशमाराधने यत्तः स्वाराध्यस्य मरुत्वतः ॥"
भृशम्, य, (भृश + कः ।) प्रकर्षार्थः । सुष्ठुरर्थः । शोभनम् । इति शब्दरत्नावली ॥
भृष्यन्, [ट्] पुं, पाषाणः । इति शब्दरत्नावली ॥
भृष्टः, त्रि, (भ्रस्ज + कर्म्मणि क्तः ।) तैलोपसेकं विना पक्वः । इति हेमचन्द्रः ॥ भाजा इति भाषा ॥
भृष्टतण्डुलः, पुं, (भृष्टाश्चासौ तण्डुलश्चेति कर्म्मधारयः ।) भर्জনবিশিষ্টধান্যবিকারः । चाल भाजा इति भाषा ॥ अस्य गुणाः ।
"सुगन्धिः कफपित्तघ्नः पित्तलो भृष्टतण्डुलः ।"
इति राजवल्लभः ॥
भृष्टयवः, पुं, (भृष्टाश्चासौ यवश्चेति ।) भर्জनविशिष्टयवः । यव भाजा इति भाषा । तत्पर्य्यायः । धानाः २ । इत्यमरः ॥ वाटकम् ३ । इति शब्दचन्द्रिका ॥ अस्य गुणा धानाशब्दे द्रष्टव्याः ॥
भृष्टान्नं, क्ली, (भृष्टं अन्नम् ।) भृष्टतण्डुलः । मुड़ि इति भाषा । तत्पर्य्यायः । कुधरम् २ व्याषम् ३ । इति शब्दचन्द्रिका ॥
भृष्टिः, स्त्री, (भ्रस्ज् + भावे क्तिन् ।) भर्জनम् । भ्रज्जवाटिका । इति मेदिनी । टे, २५ ॥
भृमि भृमौ । भृमि । भर्म्मे । इति कविकल्पद्रुमः ॥ (जुहो०-पर०-सक०-सेट् ।) मि भृमाति भर्मः । भृमिः । भृमि भर्मणे । इति दुर्गादासः ॥

भेकः, पुं, (विभेति इति। भी+"इषिभीकापाशल्यतीति।" उणा० । ३ । ४३। इति कन्। चन्तुविशेषः। व्याङ् इति भाषा। तन्त्र पर्य्यायः। मण्डूकः २ वर्षाभूः ३ प्लावरः ४ प्लवः ५ दर्दुरः ६। इत्यमरः।१।१०।२४॥ वृष्टिभूः ७ मालूरः ८। इति तट्टीका॥ प्रवङ्गमः ९ प्लवङ्गः १० प्लवगः ११ प्लक्षः १२ नन्दनः १३ गूढपर्व्वाः १४ अजिरः १५ जिष्णुमोदनः १६। इति शब्दरत्नावली॥ नन्दकः १७ क्षेत्रालयः १८ रेकः १९। इति त्रिकाण्डशेषः॥ मण्डः २० हरिः २१ लुलुकः २२। क्वचित् पुस्तके लूलकोऽपि पाठः। प्लालूकः २३ कटुरवः २४। अस्य मांसगुणाः। सद्योबलकरत्वम्। अम्लदाहप्रमेहक्षयकुष्ठक्षर्दिनाशित्वञ्च। इति राजनिर्घण्टः॥ मेघः। इति मेदिनी। के, ३०॥ (यथा, आर्य्यासप्तशत्याम्। ४५१।

"संवृणुतेऽम्बीनुदधिर्निदाघनद्यो न भेकमपि॥")

भेकटः, पुं, (भेक इव टनति। भेक+टल+डः।) मत्स्यभेदः। यथा। तुल्यौ भकटवेकटौ। इति द्विरूपकोषः॥

भेकनिः, पुं, मत्स्यविशेषः। भाङ्गन इति भाषा। अस्य गुणाः। मधुरत्वम्। शीतत्वम्। दृष्यत्वम्। श्लेष्मकरत्वम्। गुरुत्वञ्च। इति राजवल्लभः। भेकलिः। इति च पाठः॥

भेकपर्णी, स्त्री, (भेकाकृतिः पर्णमस्याः ङीष्।) मण्डूकपर्णी। इति केचित्॥ (यथा,—

"तत्सर्व्वं कन्यकाद्रावैर्मर्दयेद्भावयेत्तथा।
भेकपर्णीरसेनैव गुञ्जाद्वयवटीं पिबेत्॥"

इति वैद्यकरत्नसारसंग्रहे दृष्टलोमनाथरसे॥)

भेकभुक् [ज्] पुं, (भेकं भुङ्क्ते इति। भुज्+क्विप्। सर्पः। इति त्रिकाण्डशेषः॥

भेकी, स्त्री, (भेक+"जातेरस्त्रीविषयादयोपधात्।" ४। १। ६३। इति ङीष्।) भेकप्रिया। तन्त्रपर्य्यायः। झिल्ली २ मण्डुपदी ३ वर्षाभ्वी ४ इत्यमरः। १। १०। २४॥ अन्येऽपीवन्तभेकपर्य्याया एतद्वाचकाः। मण्डूकपर्णीवृक्षः। इति रत्नमाला॥ (यथास्याः पर्य्यायान्तरम्।

"भेकी मण्डूकपर्णी च मण्डूकी सलपर्ण्यपि॥"

इति रत्नमालायाम्॥)

भेदः, पुं, (भी—बाहुलकात् दः। अस्येत्त्वम् न गुणत्वं च।) भेषः। इति हेमचन्द्रः।४।३४३। अस्य भाषा भेड़ा॥

भेदी, स्त्री, (भेद+ङीष्।) भेदभाङ्गा। अम्बी। अस्या इन्धगुणाः।

"आक्षिकं लवणं स्वादु त्रिदोषघ्नाश्मरीप्रणुत्।
अल्पं तर्षकरं रुच्यं गुल्मपित्तकफप्रदम्॥
गुरुकासेऽनिलोद्भूते केचिदाहुरिदं परम्।"

इति भावप्रकाशः।

भेत्ता, [त्र्] त्रि, (भिनत्तीति। भिद+तृच्।) भेदकर्त्ता। यथा, चाणक्यसूत्रे।

"दुर्गाणामादिरेतेषां सेतुभेत्ता समीपतः॥"

भेदः, पुं, (भिद्+घञ्।) शत्रुवशीकरणोपायचतुष्टयान्तर्गततृतीयोपायः। तत्पर्य्यायः। उपजापः २। इत्यमरः। २। ८। २१॥ परतो विश्लेष्य आत्मसात् करणं भेदः। इति भरतः॥ तद्विशेषो यथा,—

मनुरुवाच।

"परस्परन्तु ये दृष्टाः क्रुद्धा भीतावमानिताः।
तेषां भेदं प्रशंसन्ति भेदसाध्या हि ते मताः॥
ये तु येनैव दोषेण परस्मान्नापि बिभ्यति।
ते तु तद्दोषपातेन भेदनीया भृशं तनः॥
आत्मीयां दर्शयेदार्द्धां परस्मादर्द्धमेव च।
एवं हि दर्शयेद्विज्ञान् यथावद्वशमानयेत्॥
संहता हि विना भेदं शक्रेणापि सुदुःसहाः।
भेदमेव प्रशंसन्ति तस्मान्नयविशारदाः॥
स्वमुखेनात्मवेश्मेदं भेदं परसुखेन च।
परीक्ष्य साधु मन्येत भेदं परसुखाच्छ्रुतम्॥
भेद्याः स्वकार्य्यसहिष्णु कुशलैर्ये हि भेदिताः।
भेदितास्ते विनिर्दिष्टा नैव राजार्थवादिभिः॥
अन्तःकोपो बहिःकोपो यत्र स्यातां महीक्षिताम्।
अन्तःकोपो महांस्तत्र नाशकः पृथिवीक्षिताम्॥
सामन्तकोपो वाह्यस्तु कोपः प्रोक्तो मनीषिभिः।
महिषीयुवराजाभ्यां तथा सेनापतेर्नृप!॥
अमात्यमन्त्रिणाचैव राजपुत्रात्तथैव च।
अन्तःकोपो विनिर्दिष्टो दारुणः पृथिवीक्षिताम्॥
वाह्यकोपे समुत्पन्ने सुमहत्यपि पार्थिवः।
सुखान्तस्तु महाभाग! शीघ्रमेव जयी भवेत्॥
अपि शक्रसमो राजा अन्तःकोपेन नश्यति।
सोऽन्तःकोपःप्रयत्नेन तस्माद्रक्ष्यो महीक्षिता॥
परतः कोपमुत्पाद्य भेदेन विजिगीषुणा।
ज्ञातीनां भेदनं कार्य्यं परेषां विजिगीषुणा॥
रक्षणीयं प्रयत्नेन ज्ञातिभेदस्वयात्मनः।
ज्ञातयः परितप्यन्ते सततं परितप्य यम्॥
तथापि तेषां कर्त्तव्यं सुगम्भीरेण चेतसा।
सङ्गं दानमानाभ्यां भेदस्तेभ्यो भयङ्करः॥
न ज्ञातिरनुगृह्णाति न ज्ञातिर्दुष्यमिच्छति
ज्ञातिभिर्भेदनीयास्तु रिपवस्तेन पार्थिवैः॥
भिन्ना हि सुखया रिपवः प्रभूताः
स्वल्पेन सैन्येन निहन्तमार्चाः।
समंहतानां हि ततस्तु भेदः
कार्य्यो रिपूणां नयशास्त्रविद्भिः॥"

इति मात्स्ये राजधर्म्मे २२२ अध्यायः॥२॥

भेदः। विशेषः। विदारणम्। इति मेदिनी। दे, १२॥ (तथा च कामन्दकीये। १५। १६।

"पुरस्य पश्चाच्च यदा समर्थ-
कदाभियायान्मदते प्रसह्य।
पुनः प्रसर्पन्नविषह्यदृष्टः
प्राप्नोति तीव्रं खलु पार्ष्णिभेदम्॥")

विरेकः। यथा, हास्यार्णवनाटके।

"काश्मीरधूमसुषवीवलतिमरुते स्वेदभेदोपधावा
यष्टेर्मान्द्ये च पिष्टं वपिगितमनिशं वारिमानं कफर्त्तौ॥"

भेदकः, त्रि, (भिद्+ण्वुल्।) विदारकः। यथा, मनौ। ६। २५॥)

("संक्रमध्वजयष्टीनां प्रतिमानाञ्च भेदकः।
प्रतिगृह्णाच्च तत् सर्व्वं पञ्च दद्याच्छतानि च॥"

विरेचकौषधादिः। (विरेचकौषधे विषयो यथा,

"नवज्वरे च ये योगा भेदकाः परिकीर्त्तिताः।
ते तथैव प्रयोक्तव्या वीक्ष्य देहमलादिकम्॥"

इति वैद्यकरत्नसारसंग्रहे विरेकाधिकारे॥)

पृथक्कारकः। यथा। "भेदयति अन्यपदार्थं पृथक् करोतीति भेदकं नाम्ना शिवः गोत्रेण गार्ग्यः।" इति कारकटीकायां दुर्गादासः॥

अपि च।

"भेद्यभेदकयोः शिष्टं सम्बन्धोऽन्योन्यमिष्यते।
शिष्टो यद्यपि सम्बन्धः षष्ठ्युत्पत्तिस्तु भेदकात्॥"

इति कलापटीकाधृतभर्तृहरिकारिका॥

("सामान्यस्य भेदको विशेषः प्रकारः।" इति च ५। ३। ६८। इत्यस्य। काशिकावृत्तिः॥)

भेदनं, क्ली, (भिद्यतेऽनेनेति भिद्+ल्युट्।) छिङ्गु। इति राजनिर्घण्टः॥ विदारणम्। इति भिदादातोर्भावेऽनट् प्रत्ययेन निष्पन्नम्॥ (भेदकारके, त्रि॥ यथा, भागवते। ३। २६। २।

"यदाहुर्वर्णये तत् ते हृदयग्रन्थिभेदनम्।
"अहङ्कारनिवर्त्तकमिति स्वामिव्याख्यानम्॥"

विरेचनकारके च। यथा च सुश्रुते। २। ४८। १४॥

सर्व्वं पित्तकरं मद्यमम्लं दीपनरोचनम्।
भेदनं कफवातघ्नं हृद्यं वस्तिविशोधनम्॥")

भेदनः, पुं, ("भिद्यतेऽनेनेति।" भिद्+ल्युट्।) अम्लवेतसः॥ (भिनत्ति भूमिमिति। ल्युः॥ शूकरः। इति राजनिर्घण्टः॥

भेदितः, त्रि, (भिद्+णिच्+कर्म्मणि क्तः।) भिन्नः। दारितः। इत्यमरः। ३। १। १००॥

भेदी, [न्] पुं, (भेत्तुं शीलमस्येति। भिद+णिनिः।) अम्लवेतसः। इति राजनिर्घण्टः॥ (गुणादयोऽस्याम्लवेतसशब्दे विज्ञेयाः॥)

भेदकर्त्तरि तद्विशिष्टे च त्रि॥ (यथा भागवते ३। १५। ३३।

"श्रुतादिनं श्रुतद्रविण भेदं यतीनस्य॥")

भेदुरं, क्ली, (भिदुर+पृषोदरादित्वात् साधुः।) भिदुरम्। वज्रम्। इति द्विरूपकोषः॥

भेरः, पुं, (विभेत्यस्मादिति। भी+अर्त्तेरिन्नञ्चेति। उणा०। २। २८। इति रन्।) पटहः। भेरी। दुन्दुभिः। इति संक्षिप्तसारोणादिवृत्तिः॥

भेरिः, स्त्री, (बिभर्त्ति शब्दवोऽस्या इति। भी+"वहिकाद्यश्च।" उणा०। ४। ६६। इति किन्। बाहुलकाद् गुणः।) दृष्टदृष्टका। तन्त्रपर्य्यायः। आनकः २ दुन्दुभिः ३। इत्यमरः। २। ७। ६॥ भेरी ४ आनकदुन्दुभिः ५ आनकदुन्दुभी ६। इति तट्टीकायां भरतः॥ (यथा, "यतो भेरि वेरुवीणाम्बुदध्वनितालपटहशङ्खकाहलादिभेदेन शब्दा अनेकविधाः।" इति पञ्चतन्त्रे प्रथमतन्त्रम्॥)

भेरी, स्त्री, (बिभेत्यस्मात्प्रत्यवोत्स्या इति । भी+क्विन् । ह्रस्वादिकारादिति पक्षे ङीष् ।) भेरी । इत्यमरटीकायां भरतः ॥

वराह उवाच ।

"भेरीशब्दमशृत्वा तु यस्तु मां प्रतिबोधयेत् ।
बधिरो जायते भूमे ! जन्मैकञ्च न संशयः ॥
तस्य वक्ष्यामि सुश्रोणि ! प्रायश्चित्तं मम प्रियम् ।
किल्बिषाद्येन मुच्येत भेरीताडनमोहितः ॥
यस्य कस्यचिन्मासस्य शुक्लपक्षे तु द्वादशीम् ।
आकाशशयनं कृत्वा श्रोत्रं सूर्य्यस्य किल्बिषात् ॥
य एतेन विधानेन वसुधे ! कर्म्म कारयेत् ।
अपराधं न गच्छेत मम लोकाय गच्छति ॥"

इति वराहपुराणे भेरीताडनापराधप्रायश्चित्तम् ॥

(यथा च, सुश्रुते । २ । २७ । ८ ।

"एतेन भैक्ष्यः पटहाश्च दिग्धा
नाताड्यमाना विषमाशु हन्युः ॥")

भेरुण्डं, क्ली, गर्भधारणम् । भयानके, त्रि । इति शब्दरत्नावली ॥

भेरुण्डा, स्त्री, (भेरुण्ड+टाप् ।) देवताविशेषः । यक्षिणीभेदः । इति मेदिनी । डे, ३४ ॥ सा देवता काली । यथा,—

"त्रिकोणनिलया नित्या परमाद्भुतरञ्जिता ।
महाविद्येश्वरी श्वेता भेरुण्डा कुलसुन्दरी ॥"

इति कालीकुलसर्ब्बस्वे श्रीशिवपरशुरामसंवादे द्याद्याया: सहस्रनामस्तोत्रम् ॥

भेर्ल, त्रि, (भी+"अर्जेन्द्राग्रवज्रेति ।" उणा० २ । २८ । इति रन् रस्य लत्वम् ।) भीरुः । सर्ल: । इति मेदिनी । ले, ४२ ॥ चपलः । इति शब्दरत्नावली ॥

भेल:, पुं, (भी+रन् लत्वम् ।) ज्वरः । सन्निपातभेदः । इति मेदिनी । ले, ४६ ॥ भेलकम् । इति संक्षिप्तसारोणादिवृत्तिः ॥

भेलक:, पुं, क्ली, (भेल+स्वार्थे कन् ।) नद्यादितरणसाधनवस्तु । भेला इति भाषा । तत्पर्य्यायः । प्लवः २ कोलः ३ उडुपम् ४ उडुपम् ५ तरणः ६ तारणः ७ तारकः ८ । इति शब्दरत्नावली ॥ तरीषः ९ । इति जटाधरः ॥

भेष, भट्ट भये । इति कविकल्पद्रुमः ॥ (भ्वा०-उभ०-सक०-सेट् ।) भट्ट अबिभेषत् । भ्ट भेषति बिभेषे । इति दुर्गादासः ॥

भेषजं, क्ली, (भिषजोवैद्यस्येदमित्यण् नपातनादेत्वम् । यद्वा, भेषं रोगं जयतीति । जि+डः । औषधम् । इत्यमरः । २ । ६ । ५० ॥ ("व्यक्ति भेषजीजलाप्यः ।" इति चरकसंहिता । २ । ३३ । ७ ।) अथ भेषजभक्षणसमयाः ।

"भेषज्यमभ्यवहरेत् प्रभाते प्रायशो बुधः ।
कषायांस्तु विशेषेण तत्र भेदस्तु दर्शितः ॥
ज्ञेयः षड्विधः कालो भेषज्यग्रहणे नृणाम् ।
किञ्चित् सूर्य्योदये जाते तथा दिवसभोजने ।
जायमाने भोजने च मुहुर्त्तादपि तथा निशि ॥"

तत्र प्रथमः कालः ।

'प्रायः प्रिक्तकफोद्रेके विरेकवमनार्थयोः ।
लेखनार्थे च भेषज्यं प्रभाते नात्रमाहरेत् ॥'

अथ द्वितीयः कालः ।

'भेषज्यं विगुणेऽपाने भोजनाग्रे प्रशस्यते ।
अरुचौ चित्रभोज्येषु मित्रं रुचिरमाहरेत् ॥
समानवाते विगुणे मन्देऽग्नौ वह्निदीपनम् ।
दद्याद्भोजनमध्ये च भेषज्यं कृशलो भिषक् ॥
व्यानकोपे तु भेषज्यं भोजनान्ते समाहरेत् ।
क्षिप्रकारीपककफेष्वेषु पूर्व्वमन्ते च भोजनात् ॥'

अथ तृतीयः कालः ।

'उदाने कुपिते वाते स्वरभङ्गादिकारिणि ।
ग्रासग्रासादिकं देयं भेषज्यं साध्यभोजने ॥
प्राणे प्रदुष्टे साध्यस्य सुप्तस्यान्ते प्रदीयते ।
औषधं प्रायशो धीरैः कालोऽयं स्यात् तृतीयकः ॥'

अथ चतुर्थः कालः ।

सुहुर्मुहुश्च छर्द्दिहिक्काश्वासगदेषु च ।
सान्नस्य भेषजं दद्यादिति कालचतुर्थकः ॥'

अथ पञ्चमः कालः ।

'ऊर्द्धगेषु विकारेषु लेखने बृंहणे तथा ।
पाचने प्रथने देयमनन्नं भेषजं निशि ॥'

इति पञ्चमः कालः ॥

निरन्नस्य भेषजस्य गुणमाह ।

'वीर्य्याधिकं भवति भेषजमन्नहीनं
पुंस्त्वात्तदामयमसंशयमाशु हन्ति ।
तद्बालवृद्धयुवतीष्वतुभिश्च पीतं
ग्लानिं परां नयति चाशु बलक्षयञ्च ॥'

सान्नस्य भेषजस्य गुणमाह ।

'शीघ्रं विपाकमुपपत्तिबलं न हिंस्या-
दन्नात्तदं न च सुहुर्वदनान्निरेति ।
एतद्धितं स्थविरबालकृशाङ्गनाभ्यः
प्राग्भोजनाद्यदशितं किल तच्च तद्वत् ॥'

तद्वत् अन्नात्तवत् भेषजमिति शेषः ।

'औषधशेषे भुक्ते भोजनशेषे यदौषधं पीतम् ।
न करोति यदोषशमं प्रकोपयत्यन्यरोगांश्च ॥'

पीतमित्यनुषङ्गः । लीढ़ादि च ।

'अनुलोमोऽनिलः स्वास्थ्यं क्षुत्तृष्णासमता ऋतुः ।
लघुत्वमिन्द्रियोल्लासः शुद्धिर्जीर्णौषधस्य तु ॥
क्रमो दाहोऽङ्गसदनं भ्रमस्तृष्णाशिरोरुजः ।
अरतिर्बलहानिश्च सावशेषौषधस्य तु ॥'

अथ भेषजभक्षणविधिमाह चरकः ।

'देवान् गुरूंस्तथा विप्रान् पूजयित्वा प्रणम्य च ।
आशिषश्च समादाय श्रद्धया भेषजं भजेत् ॥
रसायनमिवर्षीणां देवानामिव चामृतम् ।
सुधेवोत्तमनागानां भेषज्यमिदमस्तु ते ॥
ब्रह्मदक्षाश्विरुद्रेन्द्रभूचन्द्रार्कानिलानलाः ।
ऋषयः सौषधिग्रामा भूमिदेवाश्च पान्तु वः ॥'

इत्याद्याशिषः ॥

'औषधं हेमरजतताम्रभाजनपरिस्थितम् ।
पिबेदात्मजनस्यास्ये प्रसन्नवदनेक्षणः ॥
प्रशान्तक्लमविश्रान्तः पीत्वा पात्रमधोमुखम् ।
निःक्षिप्याचम्य सलिलं ताम्बूलादुपयोजयेत् ॥'

अथ भेषजानां विधानानि ।

'स्वरसश्च तथा कल्कः क्वाथश्च हिमफाण्टकौ ।
ज्ञेयाः कषायाः पञ्चैते लघवः स्युर्यथोत्तरम् ॥'

तत्रादौ स्वरसविधिः ।

'आर्द्रतात्तत्क्षणाज्जातात् द्रव्यात् क्षुण्णात् ससुस्रवे ।
वस्त्रनिष्पीड़ितो यश्च स्वरसो रस उच्यते ॥'

अथ कल्कविधिः ।

'द्रव्यमार्द्रं शिलापिष्टं शुष्कं वा सजलं भवेत् ।
प्रक्षिप्य गालयेद्वस्त्रे तन्मानं कर्षसम्मितम् ॥
कल्के मधु घृतं तैलं देयं द्विगुणमात्रया ।
सितां गुड़ं समं दद्याद्द्रवा देयाश्चतुर्गुणाः ॥'

अथ क्वाथविधिः ।

'पानीयं षोड़शगुणं क्षुण्णे द्रव्यपले क्षिपेत् ।
स्थित्वार्द्धं क्वाथयेद्यावन्नवमांशावशेषितम् ॥
कर्षादौ तु पलं यावद्द्यात् षोड़शिकं जलम् ॥
षोड़शिकं षोड़शगुणम् ॥ * ॥

अथ हिमविधिः ।

'क्षुण्णं द्रव्यपलं सम्यक् षड्भिर्नीरपलैः प्लुतम् ।
निशीषितं हिमः स स्याच्छीतकषायकः ॥'

अथ फाण्टविधिः ।

'क्षुण्णद्रव्यपले सम्यक् जलमुष्णं विनिःक्षिपेत् ।
स्थित्वार्द्धं कुड़वोन्मानं ततस्तु आवयेत् पुटात् ॥
स स्यात् चूर्णद्रवः फाण्टस्तन्मानं द्विपलोन्मितम् ।
क्षौद्रं सिता गुड़ादींस्तु कर्षमात्रान् विनिःक्षिपेत् ॥'*॥

अथ तण्डुलजलविधिः ।

'कण्डितं तण्डुलपलं जलेऽष्टगुणिते क्षिपेत् ।
भावयित्वा जलं ग्राह्यं देयं सर्व्वत्र कर्म्मसु ॥'

अथ मन्थविधिः ।

'जले चतुष्पले पीते क्षुण्णं द्रव्यपलं क्षिपेत् ।
स्थित्वार्द्धं मन्थयेत् सम्यक् तस्माच्च द्विगुणं पिबेत् ॥'

अथ चूर्णविधिः ।

'अत्यन्तशुष्कं यद्द्रव्यं सुपिष्टं वस्त्रगालितम् ।
तत् स्याच्चूर्णं रजःक्षोदस्तन्मात्रात्कर्षसम्मितं ॥
चूर्णे गुड़ः समो देयः शर्करा द्विगुणा मता ।
चूर्णेषु भर्जितं क्षिप्तं देयं नोत्क्लेदजन्मवेत् ॥'

अथ भावनाविधिः ।

'द्रवेण यावता सम्यक् चूर्णं सर्व्वं प्लुतं भवेत् ।
भावनायाः प्रमाणन्तु चूर्णं प्रोक्तं भिषग्वरैः ॥'

अथ पुटपाकविधिः ।

'पुटपक्वस्य कल्कस्य स्वरसो गृह्यते यतः ।
अतस्तु पुटपाकानां युक्तिरत्रोच्यते मया ॥
पुटपाकस्य पाकोऽयं लेपस्याङ्गारवर्णता ।
लेपश्च द्व्यङ्गुलं स्थूलं कुर्य्याद्वृक्षुष्कमात्रकम् ॥
काश्मरीवटजम्ब्वादिपत्रैर्वेष्टनमुत्तमम् ।
पलमात्रो रसो ग्राह्यः कर्षमात्रं मधु क्षिपेत् ॥
कल्कचूर्णद्रवाद्यास्तु देयाः कोलमिता बुधैः ।'

अथोष्णोदकविधिः ।

'अष्टमेनांशशेषेण चतुर्थेनार्द्धकेन वा ।'

अथवा क्वाथनेनैव सिद्धमुष्णोदकं वदेत् ॥'

अथ क्षीरपाकविधिः ।

'क्षीरमष्टगुणं द्रव्यात् क्षीरात्क्षीरं चतुर्गुणम् ।
क्षीरावशेषं तत्पीतं मूलमामोद्भवं जयेत् ॥'

अथावलेहविधिः ।

'क्वाथादेर्यत् पुनः पाकात् घनत्वं सा रसक्रिया ।
सोऽवलेह्यश्च लेहश्च तस्मात्सा स्यात् पलोन्मिता ॥'

अथ वटिकाविधिः ।

'वटिका अथ कथ्यन्ते तन्नामवटिका वटी ।
मोदको गुटिका पिण्डी गुडो वर्त्तिस्तथोच्यते ॥
लेहवत् साध्यते वह्नौ गुडो वा शर्करापि वा ।
गुग्गुलुं वा क्षिपेत्तत्र चूर्णं तन्मिश्रिता वटी ॥'

अथ सन्धानविधिः ।

'द्रवेषु चिरकालस्थं द्रव्यं यत् सन्धितं भवेत् ।
आसवारिष्टमैरेयत् प्रोच्यते भेषजोचितम् ॥'

अथ धातूनां शोधनमारणविधिः । तत्र शोधनविधिः ।

'पत्तलीकृत्य पत्राणि हेम्नो वह्नौ प्रतापयेत् ।
निषिञ्चेत्तप्ततप्तानि तैले तक्रे च काञ्जिके ॥
गोमूत्रे च कुलत्थानां कषायेतु त्रिधा त्रिधा ।
एवं हेम्नः परेषाञ्च धातूनां शोधनं भवेत् ॥'

अथ स्वर्णस्य मारणविधिः ।

'स्वर्णस्य द्विगुणं सूतमग्निना सह मर्द्दयेत् ।
तन्नोलकसमं गन्धं निर्दध्यादधरोत्तरम् ॥
गोलकञ्च ततो रुद्ध्वा सरावद्वयसंपुटे ।
त्रिंशद्दिनोपलेर्दद्यात् पुटान्येवं चतुर्दश ।
निरुत्थं जायते भस्म गन्धो देयः पुनः पुनः ॥"

अथ लेहपानविधिः ।

लेहश्चतुर्विधः प्रोक्तो घृतं तैलं वसा तथा ।
मज्जा च तत्र पित्तेष्मर्त्तुः किञ्चिदभ्युदिते रवौ ॥

अथ पञ्चकर्म्माणि ।

प्रथमं वमनं पश्चाद्विरेकश्चानुवासनम् ।
एतानि पञ्च कर्म्माणि निरूहैर्योजयेत् तथा ॥

अथ फलवर्त्तिविधिः ।

घृताभ्यक्ते गुदे क्षिप्ता श्लक्ष्णा स्याद्बुष्टनिभा ।
मलप्रवर्त्तिनी वर्त्तिः फलवर्त्तिश्च सा स्मृता ॥

अथ नस्यप्रयोगविधिः ।

नस्यं तत्कथ्यते धीरैर्नासायाञ्च यदौषधम् ।
लावणं गन्धकर्म्मेति तस्य नाम त्रयं मतम् ॥

अथ धूमपानविधिः ।

धूमस्तु षड्विधः प्रोक्तः शमनो दोषजस्तथा ।
रेचनः स्नायुजश्चैव वामनो मधुधूमनः ॥

अथ गण्डूषकवलप्रतिसारणविधिः ।

तत्र गण्डूषः ।

क्षेद्यक्षीरकषायादिद्रवैः सम्पूर्त्तमाननम् ।
आपूर्णं स्थीयते तावद्विधिर्गण्डूषधारणे ॥

अथ कवलः ।

घनक्षिप्तौषधद्रव्यस्य द्रव्यस्य कवलं मुखे ।
चर्व्वित्वा संचरं निर्द्दोषेत् कवले विधिः ॥

अथ प्रतिसारणम् ।

रक्तलिङ्गासृजानां यद्भूमिकल्कावलेहकैः ।
भूनैर्घर्षणमङ्गस्य तदुक्तं प्रतिसारणम् ॥

अथ स्वेदविधिः ।

स्वेदश्चतुर्विधः प्रोक्तस्तापोष्मस्वेदसंज्ञितः ।
उपनाही द्रवः स्वेदः सर्व्वे वातार्त्तिहारिणः ॥

अथ कर्णपूरणविधिः ।

स्नेहयेत् कर्णदेशन्तु किञ्चित्तु पार्श्वशायिनः ।
स्नेहैः स्नेहे रसैरुक्तैः कोष्णैः श्रोत्रं प्रपूरयेत् ॥
कर्णश्च पूरितं स्नेहैरुक्तं पञ्चगुणानि वा ।
सप्तरात्रं वापि मात्रागां श्रोत्रकण्ठशिरोगदैः ॥
रसादेः पूरणं कर्णे भोजनात् प्राक् प्रशस्यते ।
तैलादेः पूरणं कर्णे भास्करेऽस्तमुपागते ॥*॥

अथालेपविधिः ।

अथालेपस्य नामानि लेपलेपनलिम्पयः ।
दोषघ्नो विषहा वर्ण्यः स च लेपस्त्रिधा मतः ।
न रात्रौ लेपनं कुर्य्यात् सुप्तमार्गन्न धारयेत् ॥

अथ शोणितस्रावणविधिः ।

शोणितं स्रावयेच्छस्त्रैरामयं प्रसमीक्ष्य च ।
प्रस्थं प्रस्थार्द्धमथवा प्रस्थार्द्धार्द्धमथापि वा ॥
प्रस्तुतकाले स्वभावेन शोणितं स्रावयेन्नरः ।
लग्नदोषग्रन्थिशोथाद्या न स्युः रुधिरपातनात् ॥

अथाच्छोतनविधिः ।

क्षाराच्छौद्रासवक्षेद्यविन्दूनां यत्तु पातनम् ।
द्वाङ्गुलोन्मीलिते नेत्रे प्रोक्तमाच्छोतनं हितम् ॥

अथ विड्डालकविधिः ।

विड्डालको वह्निलेपो नेत्रे पक्ष्मविवर्द्धिते ।
तस्य मात्रा परिज्ञेया मुखालेपविधानवत् ॥

अथ तर्पणविधिः ।

वातातपरजोहीने वेश्मन्युत्तानशायिनः ।
आधारौ माषचूर्णेन क्लिन्नेन परिमण्डितौ ॥
समौ दृढावसम्बाधौ कर्णयौ नेत्रकोषयोः ।
पूरयेद्घृतमण्डेन विलीनेन सुखोदके ॥

अथाञ्जनविधिः ।

"अथ सम्यग्दोषस्य प्राग्मञ्जनमाचरेत्।
अञ्जनं क्रियते नेत्रे तद्द्रव्यञ्चाञ्जनं मतम् ॥

अथ प्रत्यञ्जनविधिः ।

गतदोषमपेतास्रं प्रपश्यत् सम्यगम्भसा ।
प्रक्षाल्याक्षि यथादोषं कार्य्यं प्रत्यञ्जनं ततः ॥

इति भावप्रकाशः ॥*॥

अथ भेषजकरणभक्षणदिनम् । तत्र तिथयः विष्टिभिन्नाः शोभनाः । वाराः रविसोमबुधबृहस्पतिशुक्रवाराणाम् । नक्षत्राणि पूर्व्वफल्गुनीपूर्व्वाषाढापूर्व्वभाद्रपदमघाभरण्यश्लेषाविशाखार्द्राभिन्नानि । लग्नञ्चैषु निषिद्धम् ।

"लग्नानि मिथुनकन्याधनुर्मीनसंज्ञकानि ।
तत्र गुरुबुधचन्द्रशुक्रेषु सत्सु प्रशस्तानि ॥"

इति ज्योतिषतत्त्वम् ॥

(करणं पुनर्भेषजम् । भेषजं नाम तत् यदुपकरणाय उपकल्पते भिषजो धातुसाम्याभिनिर्वृत्तौ प्रयतमानस्य विशेषतश्चोपायार्त्तेभ्यः । तद्विविधं अपाश्रयभेदात् दैवव्यपाश्रयं युक्तिव्यपाश्रयञ्च । तत्र दैवव्यपाश्रयं मन्त्रौषधमणिमङ्गलबल्युपहारहोमनियमप्रायश्चित्तोपवासस्वस्त्ययनप्रणिपातगमनादि । युक्तिव्यपाश्रयं संशोधनोपशमने चेष्टाश्च दृष्टफलाः । एतच्चैव भेषजमङ्गभेदादपि द्विविधं द्रव्यभूतमद्रव्यभूतञ्च, . तत्र यद्द्रव्यभूतं तदुपायाभिधुतम् । उपायो नाम भयदर्शनविस्मापनक्षोभणहर्षणभर्त्सन वधबन्धस्वप्नसंवाहनादिरनेकधा भावः यथोक्ताः सिद्धुपायाश्च । यत्तु द्रव्यभूतं तदमनादिषु योगमुपैति । तस्यापीयं परीक्षा, इदमेवं प्रकृत्या एवंगुणमेवंप्रभावमस्मिन् देशे जातमस्मिन् ऋतौ एवं गृहीतमेवं निहितमेवमुपस्कृतमनया मात्रया युक्तमस्मिन् ऋतौ एवंविधस्य पुरुषस्यैतावन्तन्दोषमपकर्षयति उपशमयति वा अन्यदपि चैवंविधं भेषजमभूत्तत्रानेनानेन वा विशेषेण युक्तमिति ।

इति चरके विमानस्थानेऽष्टमेऽध्याये ॥)

भेषजाङ्गं, क्ली, (भेषजस्य औषधस्य अङ्गमवयवइव ।) अनुपानम् । इति शब्दचन्द्रिका ॥

भैक्षं, क्ली, (भिक्षाणां समूह इति । भिक्षा+ "भिक्षादिभ्योऽण् ।" ४ । २ । ३८ । इत्यण् ।) भिक्षासमूहः । इत्यमरः । २ । ७ । ३७ ॥ अपि च ।

"भिक्षाशनमनुद्योगात् प्राक्तनाप्यनिमन्त्रितम् ।
अयाचितन्तु तद्भैक्षं भोक्तव्यं मनुरब्रवीत् ॥"

इति प्रायश्चित्ततत्त्वधृतोशनसो वचनम् ॥

(भिक्षैव स्वार्थे अण् । भिक्षा ॥ भिक्षाभवे भिक्षालब्धे वा त्रि॥)

भैक्षजीविका, स्त्री, (भैक्षेण जीविका ।) भिक्षया जीवनोपायः । तत्पर्य्यायः । भैक्ष्यम् २ । इति त्रिकाण्डशेषः ।

भैक्षभुक् [ज्] त्रि, भैक्षाशी । भिक्षाशी । भैक्षं भुङ्क्ते यः । इति कर्त्तरि क्विप्प्रत्ययेन । निष्पन्नं ॥ (यथा, महाभारते १२ । ४६ । ६ ।

"गुरुणा समनुज्ञातो भुञ्जितान्नमकुत्सयन् ।
हविष्यभैक्षभुक् चापि स्यानासनविहारवान् ॥")

भैमी, स्त्री, (भीमेनोपासिता भीमस्य इयं वेति । भीम+अण् ङीप् ।) भीमैकादशी । यथा, अथ भैमी । विष्णुधर्म्मोत्तरे ।

"नृगशीर्षे प्रयत्नेन माघे मासि प्रजापते ! ।
एकादश्यां सिते पक्षे सोपवासो जितेन्द्रियः ।
द्वादश्यां षट्तिलाचारं कृत्वा पापात् प्रमुच्यते ।
तिलस्नायी तिलोदर्त्ती तिलहोमी तिलोदकी ।
तिलस्य दाता भोक्ता च षट्तिली नावमीदृति ।"

मत्स्यपुराणे ।

"यदृक्षे चतुर्द्दश्यां द्वादश्यामथ भारत ! ।
अन्येष्वपि दिनर्क्षेषु न प्रकृत्यनुपोषितुम् ।
ततः पुण्यामिमां भीमतिथिं पापप्रणाशिनीम् ।
उपोष्य विधिनानेन गच्छ विष्णोः परं पदम् ।
भीमतिथिं भैमीत्वेन ख्यातां एकादशीम् ।

इत्येकादशीतत्त्वम् ॥*॥

अपि च ।

शिवामह उवाच ।

"शापमासं मुखदर्शे सर्वसैव पुरा पुरा ।
ब्रह्मादयो यथा देवा भीमेन समुपोषिता ।
आराधयन्तु इमं रूपा त्रिपुरान्तदहो भवेत् ।
भीमदाहहरीति विख्याता प्राणिनां पुण्यवर्द्धिनी ।
नक्षत्रेण त्रिशाखेण ब्रह्महत्यादि नाशयेत् ।
त्रिसिद्धिलि महाघोरं कुरुषी त्रिपथं यथा ।
दुष्टघ्नन्तु दुर्गं यद्वत् दुर्भाग्यं च यतिं यथा ।
अधर्मश्च यथा धर्मः कुमतौ च यथा दृढम् ।
अज्ञानेन यथा ज्ञानं क्रौर्यभावौर्यता यथा ।
अवद्रुया यथा आर्द्रं सत्यैवानृतेयथा ।
द्विजं यथोच्चनादादनर्घार्घसचयः ।
यथा प्रकीर्तनाद्दानं नयो वै विजयाद्यथा ।
अक्षिक्षया यथा पुंसो नाशो दूरगतेर्यथा ।
क्रोधेन च यथा ज्ञानं यथा विषमवर्द्धनात् ।
यथा मनीषितज्ञानं दानाच्च धनवत्ता ।
सर्वेण यावताद्याय प्रोक्तेयं तारणी शुभा ।
अक्षद्यया सुरापानं स्तेयं गुरुतल्पगामम् ।
गुरुद्रव्यापहारादि नहि शुद्धि विधुष्करम् ।
न चापि तेमिथनेन दुष्कृतेन प्रभाषकम् ।
काशिन्यां यमुना गङ्गा न रेवा न सरस्वती ।
न चैव सप्तगोदोषि सकाशया: समानि च ।
न दानं न जपो होमो न शास्त्रमुक्तं क्वचित् ।
एकस्य: पृथिवीदानैकतो वृत्तिवासर: ।
तसोःफेरा महापुण्या एकैकादशी परा ।
अतिरुद्र वराहस्य कृत्वा देहस्य घाटकम् ।
षष्टीपक्षे तथा चार्वे कृत्वा वै तालभाजने ।
गन्धोदकस्तु ते दिवा: शिवलक्षावमूर्धनि ।
सहिरण्यफलैर्वाक्यै: कथा पूजां प्रयत्नत: ।
वराहाय नम: पादौ क्रोडाकृति नम: कटिम् ।
नाभिं नमोरुधोराय उर:श्रीवत्सधारिणे ।
बाहूं सहस्रशिरसे मौलिं सर्वेश्वराय च ।
मुखं सर्वात्मने तुभ्यं ललाटं प्रभवाय च ।
केशा: शतमुखायेति पूजा देवस्य कर्तिन: ।
विधिना पूजयित्वा तु कथा श्रावणं लिखि ।
कृत्वा पुराणं देवस्य साधकाय निवेदयेत् ।
ब्राह्मणाय तथा गुरु साधवाय शुभाय च ।
कनकेनैकदानेन संप्रीतो वरदो हरि: ।
यथातु भारतं दुर्गोद्धारितस्य: सुखदृढ: ।
एवं कृत्वा नरो विद्वान न भय: क्षत्रयो भवेत् ।
उपोषितस्तदा पूजा सुखते वै शुकव्रतात् ।
मनोभिलषितान्कामान् कृत्वा सर्वेश्वरादिकम् ।"

इति भारते एकादशीमाहात्म्ये १२० अध्याय: । (भीमस्य नाम: अस्त्रं अस्त्र ङी । भीमाद्यस्त्रिणी एतत्संज्ञी । यथा, महाभारते । १ । ६२ । ११ ।

"कार्त्तवीर्य स दुर्बुद्धि भैरवो नाशयत् बलम् ।
भिनत् ।")

भैरव, त्रि (भीरोर्भिदं भाषणम् । भीरु + अण् ।) भयानकम् । इत्यमर: । १ । ७ । २१ । (यथा महाभारते । १ । १४३ । २७ ।

"क्षत्रियेण च कर्तव्यो यज्ञ पालनि यादव: ।
तदर्थो हिगुणं चक्रे स्वयं भैरवं रवम् ।")

अस्य पर्य्यायो: भयङ्करस्तन्दे प्रत्यया: ।

भैरव:, पुं, (भीर्भयङ्करो रवो यस्य । इति भीरव । ततः स्वार्थे अण् ।) शङ्कर: । इति मेदिनी । वे ४६ । भयानकरस: । इत्यमरटीकायां भरत: । नदविशेष: । इति शब्दरत्नावली । रागभेद: । इति हैमचन्द्र: ।१।

अष्टभैरवोत्पत्तिसंख्या,
"हैलाधिप: समुत्पत्य हरीरमि गदां क्षिपन् ।
संक्षिपन्तु महायोगी सर्व्वाधार: प्रजापति: ।
गदापातलतादभूरि चतुर्धास्यगयापतत् ।
पूर्व्वधारासमुद्भूतो भैरवोऽसितप्रभ: ।
विचाराजेति विख्यात: पद्ममालाविभूषित: ।
तथा दक्षिणधारोत्थो भैरव: प्रेतवाहन: ।
कामराजेति विख्यात: कृष्णाञ्जनसमप्रभ: ।
नागराजेति विख्यातकृतमालाविभूषित: ।
पश्चाद्धारोद्भवो भैरव: शूलभूषित: ।
सङ्क्रन्दराजेति विख्यात इन्द्रायुधसमप्रभ: ।
भूषिष्ठाधारसम्भूतो भैरव: खड्गभूषित: ।
स्थाणो सम्भिनराजेति शोभाञ्जनसमप्रभ: ।
तनोऽभद्वैरराजेति भैरव: शतजादय ।
उत्तराशो यज्ञनाथ शतजाद्वैरवोत्तर: ।
एवं हि सप्तरूपोऽसौ कथ्यते भैरवो मुने ! ।
विप्रराजोऽष्टम: प्रोक्तो भैरवाष्टकमुच्यते ।"

इति वामनपुराणे अन्धकासुरप्रहाने भैरवप्रादुर्भावे ४० अध्याय: । ० ।

शारदीयदुर्गापूजायां अष्टौ पूज्यभैरवा यथा,
"आदौ महाभैरवश्च संहारभैरवं तथा ।
असिताङ्गभैरवश्च रुरुं भैरवमेव च ।
तत: कालं भैरवश्च क्रोधभैरवमेव च ।
ताम्रचूडं चन्द्रचूडं अन्ते च भैरवद्वयम् ।
एतान् संपूज्य मध्ये च नवशक्तीश्च पूजयेत् ।"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे दुर्गोपाख्याने ४१ अध्याय: ।

तामसकृष्णचतुर्द्दश्यो: स्याने कपालभैरवरूपभैरवौ क्रियौ । इति सर्व्वत्र तन्त्रसारे ४१ अध्याय: ।१।

अपि च ।

"असिताङ्गो रुरुश्चण्ड: क्रोध उन्मत्तसंज्ञक: ।
कपाली भीषणश्चैव संहारश्चाष्टम: स्मृत: ।"

इति तन्त्रसार: ।१।

त्रिपुरसाधिपभैरवो यथा,—
"नन्दी भृङ्गी महाकालो वेतालो भैरवस्तथा ।
अष्टौ मया समादिष्टस्य दीक्षाभीतास्तथोद्यता: ।
वैसोदुष्करवीरेण प्राप्तिर्ये तपसो दृढात् ।
तत्कालासाधिवक्तुं ते शक्नुवन्ति परं परम् ।"

इति कालिकापुराणे ८२ अध्याय: ।१।

अस्यैवपुराणान्तरोक्तभैरवीसाधनप्रसङ्गे
महादेवोक्तासनयो: । स च पुरा भृङ्गी बभूव
पार्व्वतीशापात् पारश्यमुनी भूत्वा भैरव इति
कथा ख्यात: । यथा,—
"प्रविश्य तत्र देवी सर्वं तारावतीरणी ।
महादेवोऽपि महात्मा जगामाशु यथासुखम् ।
कालावनाने तस्यान्तु मठो पातं शुतदृढम् ।
अभवद्यज्ञशार्दूल ! तथा शास्त्रमाननम् ।
तत्तत्सयोगाम चक्रे नारदो वचनाद्रुप ! ।
ऋषिर्भैरवनामाभूत् भीरो: पुत्रो भयङ्कर: ।
वेतालनटज: श्रीमो वेतालोऽभूत्तथापर: ।"

इति कालिकापुराणे ४८ अध्याय: ।१।

अपि च ।

"योगीशो भृङ्गी एवमुनो महाकालोऽपिभर्गज: ।
तावेव गौरीशापेन समभ्य नरयोनिषौ ।
वेतालभैरवौ जातौ ऋषिश्चां दृषवेक्षणे ।
यथा भृङ्गिमहाकालावुभौ पाक् तथा शम्भु ।
योगीशो महाभैरवाख्य: सकाय: शारभो हर: ।
भैरव: पृथगेवायं मनाथश्चो हराख्य: ।"

इति कालिकापुराणे ४५ अध्याय: ।१।

दर्जयारण्यगिरिस्थभैरवो यथा,—
"तत्रार्ज्जे भैरवो देवो भर्गसङ्गसमभव: ।
दुर्जयाख्ये वरगिरौ सर्व्वयोगसमन्वित: ।
योगीशो शरभरूपस्य मध्यस्थलाधिभैरव: ।
स एव भैरवाख्योऽयं पञ्चवक्त्रस्य मन्त्रकै: ।
संपूज्य तत्र मतिमान् न याति शिवलोकताम् ।"

इति कालिकापुराणे ८१ अध्याय: ।१।

भैरवस्य मन्त्रो यथा,—
"केवल: सपरो वादि: षष्ठस्वरसमन्वित: ।
चन्द्रबिन्दुसमायुक्त एषयोवस्य बीजकम् ।
भैरवं पादुनाथन्तु वनमालिसरूपिणम् ।
वाराद्यैस्तु बीजैस्तु पूजयेत्तु विधानत: ।
सपरौ हावन्नवारविसर्गाभ्यां समन्वितौ ।
महाभैरवमन्त्रोऽयं भैरवं तेन पूजयेत् ।"

इति कालिकापुराणे ६२ अध्याय: ।१।

अस्य ध्यानं यथा,—
"भैरव: पादुनाथश्च रक्तगौरवपुर्भुज: ।
गदां पद्मञ्च खड्गञ्च चक्रञ्चापि करैश्च ।
बिभ्रद्देया: पुरोभागे पूज्योऽयं त्रिपुरेश्वर: ।"

इति तत्रैव ६० अध्याय: ।१।

अस्य गायत्री यथा,—
"महाभैरव विद्महे वैरिध्वंसाय धीमहि ।
तन्न: कालो भैरवस्तु देवो निजं प्रचोदयात् ।
एषा भैरवस्यस्य गायत्री वै प्रतिष्ठिता ।
यद्वैष्टमांसमद्यादिभोजनाय सदा भुव: ।
महाभैरवमन्त्रोऽयं तथा स्त्रीरतिकर्म्मके ।
अयन्तु वाग्भवादेन पूर्व्वो महादिभि: सदा ।"

इति कालिकापुराणे ७७ अध्याय: ।

अथ महाविद्यादीनां भैरवनिरूपणं यथा,—

शिव उवाच ।

"शृणु चार्वङ्गि मुग्धे ! कालिकायाश्च भैरवम् ।
महाकालं दक्षिणाया: दक्षभागे प्रपूजयेत् ।
महाकालेन वै सार्द्धं दक्षिणा रक्षते सदा ।
तारायाश्च दक्षिणे भागे अक्षोभ्यं परिपूजयेत् ।
शृणुष्वमद्रे देवि ! तासामुद्धं समुद्भिवम् ।
सर्वे देवा: महाकाल महाकालीमनाद्भुत: ।
शोभाविरहितं दृष्ट्वा शोभं कालाख्यं शिवम् ।
अवतीर्य महीतले । तत्रोपविश्य: ।

तेन सार्द्धं महामाया तारिणी रमते सदा।
महात्रिपुरसुन्दर्यो दक्षिणे पूजयेत् शिवम्॥
पञ्चवक्त्रं त्रिनेत्रञ्च प्रतिवक्त्रे सुरेश्वरि!।
तेन सार्द्धं महादेवी सदा कामकुतूहला॥
अतएव महेशानि! पञ्चमीति प्रकीर्त्तिता।
श्रीमद्भुवनसुन्दर्य्या दक्षिणे वामके यजेत्॥
स्वर्गे मर्त्ये रसातले वा वाथा भुवनेश्वरी।
रत्या रमते तेन वामकस्तेन कथ्यते॥
सप्तकोट्य समाख्याताः सर्व्वतन्त्रे प्रपूजिताः।
भैरव्या दक्षिणे भागे दक्षिणामूर्त्तिसंज्ञकम्॥
पूजयेत परयत्नेन पञ्चवक्त्रं तमेव हि।
छिन्नमस्ताद्दक्षिणांशे कबन्धं पूजयेत शिवम्॥
कबन्धपूजनादेवि। भवत्यैश्वरी भवेत्।
धूमावत्यो महाविद्या विधवारूपधारिण्यो॥
बगलाया दक्षभागे एकवक्त्रं प्रपूजयेत्।
महारुद्रेति विख्यातं जगत्संहारकारकम्॥
मातङ्गीदक्षिणांशे च मतङ्गं पूजयेत् शिवम्।
तमेव दक्षिणामूर्त्तिं जगदानन्दकारकम्॥
कमलाया दक्षिणांशे विष्णुरूपं सदाशिवम्।
पूजयेत् परमेशानि! न सिद्धो नात्र संशयः॥
पूजयेदग्रपूजायां दक्षिणांशे च रूपकम्।
महामोक्षपदं देवं दशवक्त्रं महेश्वरम्॥
दुर्गाया दक्षिणे देवे नारदं परिपूजयेत्।
नकारः सृष्टिकर्त्ता च दकारः पालकः सदा।
रेफः संहाररूपत्वान्नारदः परिकीर्त्तितः॥
अन्यासु सर्व्वविद्यासु ऋषयः परिकीर्त्तिताः॥
स एव तस्या भर्त्ता च दक्षभागे प्रपूजयेत्॥"

इति तोड़लतन्त्रप्रथमपटले॥

(भैरवबलिविषयः। यथा, कालिकापुराणे।
पक्षिणः कच्छपाग्राह्या मत्स्या नवविधा मृगाः।
महिषो गोधिका गावश्छागो वभ्रुस्तथा शूकरः।
खड्गश्च कृष्णसारश्च गोधिका शरभो हरिः।
शार्दूलश्च गरश्चैव स्वगात्ररुधिरान्वधा॥
षष्टिकाभैरवादीनां बलयः परिकीर्त्तिताः।
बलिभिः साध्यते मुक्तिर्बलिभिः साध्यते दिवम्॥)

अथ भैरवरागस्य विवरणम्। हनूमन्मते षड्-रागमध्ये प्रथमरागः। महादेवसुखान्निर्गतः। अस्य जातिः औडवः। अर्थात् धैवतनिषाद-षड्जगान्धारमध्यममिति षण्स्वरमिलितः। अस्य वादी धैवतस्वरः। प्रहरद्वयं प्रातःकालः अस्य गानसमयः। रागमालायाम् अस्याकारः महादेवाकारवत्। अर्थात् सुन्दर-सन्न्यासी। भस्मच्छन्नितवदनः। जटामण्डितकः। जटापतद्गङ्गाजलः। कण्ठभूषितसर्पः। बालार्द्धचन्द्रः। त्रिनेत्रः। सर्व्वदेहेतिरुद्राक्षवान्। भालतिलकः। रुद्राक्षभूषितवर्म्मा। अथवा शीर्षिकर्मान्वितः। गलमुण्डमालः। त्रिशूल-हस्तः। अथवा समुद्यद्बोधितचित्रभूः। मार्त्तण्डरूपः। अस्य रागिण्यः षट्। यथा। भैरवी वैराटी मधुमाधवी सिन्धवी बङ्गाली च। अस्याष्टौ पुत्राः। यथा। हर्षः तिलकः गुरोवः सागरः सरः कालेहः मधुः मधुमच्च। कल्पिनाथमते तु भैरवश्चतुर्थरागः। अस्य रागिण्यः षट्। यथा। भैरवी गुज्जरी भाषा वेलावली कर्णाटी रामतंसा वङ्गवंशीति च केचित्। एतन्मते पूर्ब्बवत् अष्टौ पुत्राः। किन्तु तिलकपरीयपञ्चमसूक्ष्मानेषु देवग्राखललित-मालकौशविलावला लिखिताः। सोमेश्वर-मतेऽपि रागिण्यः षट्। यथा। भैरवी गुज्जरी रेवा गुणकली बङ्गाली बहुली च। तन्मते रागिण्या सहास्य गानसमयो ग्रीष्मर्त्तुः॥ भरतमते तु अस्य रागिण्यः षट् यथा। मधु-माधवी ललिता वरारी वाहाकली भैरवी च। तन्मतेऽपि अस्याष्टौ पुत्राः। यथा देवग्राखः ललितः हर्षः विलावलः माधवः बङ्गालः वेभासः पञ्चमश्च। एषामष्टौ भार्य्या यथा। रूढा वेलावली सोरठी कुम्भारी बन्दाही बहुलगुज्जरी षटमञ्जरी सिरवी च। इति सङ्गीत-ग्राह्यम्॥ ९॥ मतान्तरे भैरवरागस्य भार्य्या यथा। भैरवी बङ्गाली वरारी मध्यमा मधु-माधवी सिन्धवी च। तत्पुत्रा यथा। कोशकः अजयपालः श्यामः खरनामः शुद्धः छोलश्च। तत्पुत्रवध्वो यथा। अष्टौ रेवा बहुला सोहिनी रम्भेली रूढा च। अत्र शोभा इति साधुः पाठः। इति नारदपुराणम्॥

(नागभेदः। यथा, महाभारते। १।५७।१६।
"भैरवो मुण्डवेदाङ्गः पिशङ्गश्चोग्रपारकः॥")

भैरवी, स्त्री, (भैरव+ङीप्।) चासुण्डा। यथा,
"चासुण्डा चर्चिका चर्म्मसुण्डा मार्जारकर्णिका।
कर्णमोटी महागन्धा भैरवी च कपालिनी॥"

इति हेमचन्द्रः। २।१२०॥

भैरवीविशेषा यथा। त्रिपुरभैरवी १ सम्पत्-प्रदा भैरवी २ कौलेशभैरवी ३ सकलसिद्धिदा भैरवी ४ भयविध्वंसिनी भैरवी ५ चैतन्यभैरवी ६ कामेश्वरी भैरवी ७ षट्कूटा भैरवी ८ नित्या भैरवी ९ रुद्रभैरवी १० भुवनेश्वरी भैरवी ११ त्रिपुरबाला भैरवी १२ नवकूटा भैरवी १३ अन्नपूर्णा भैरवी १४। आसां मन्त्रा यथा,—

अथ त्रिपुरभैरवी।

"विवृद्धभृगुतुताग्रस्थो भौतिको बिन्दुशेखरः।
वियत्तदादिकेन्द्राग्निस्थितं वामाक्षिबिन्दुमत्॥
व्याकाशभृगुवह्निस्थो मनुः सर्गैश्चखड्गवान्।
पञ्चकूटात्मिका विद्या वेद्या त्रिपुरभैरवी॥"१॥

अथ सम्पत्प्रदा भैरवी।

यथासौ त्रिपुरा बाला तथा त्रिपुरभैरवी।
सम्पत्प्रदा नाम तस्याः श्रृणु निर्म्मलमानसे॥
शिवचन्द्रौ वह्निसंस्थौ वाग्भवं तदनन्तरम्।
कामराजं तथा देवि! शिवचन्द्रान्वितं ततः॥
दृग्बीवीजान्तवह्न्याढ्यं तार्त्तीयं श्रृणु वल्लभे!।
अक्षिबीजे महेशानि! शिवचन्द्रौ नियोजयेत्॥
कूर्म्मार्णः परमेशानि! हित्वा सर्गान्तु वेन्दवम्।
त्रिपुरा भैरवी देवी महासम्पत्प्रदा प्रिये!॥२॥

अथ कौलेशभैरवी।

सम्पत्प्रदाभैरवीवदस्यापि कौलेशभैरवीम्।
एषाद्या सैव देवेशि! त्रिषु वीजेषु पार्ब्बति!।
इयन्तु सहराद्या स्यात् पूजाध्यानादिकं तथा॥३॥

अथ सकलसिद्धिदा भैरवी।

एतस्या एव विद्याया आद्यन्ते रेफवर्জिते।
तदेयं परमेशानि! नाम्ना सकलसिद्धिदा।
सम्पत्प्रदाभैरवीवत् ध्यानपूजादिकं तथा॥४॥

अथ भयविध्वंसिनी भैरवी।

सम्पत्प्रदा भैरवी आद्यन्ते रेफरहिता चेत्तदा भयविध्वंसिनी भैरवी भवति। दक्षिणामूर्त्तौ तथादर्शनात्। पूजादिकन्तु सम्पत्प्रदावत्॥५॥

अथ चैतन्यभैरवी।

"वागभवं बीजमुच्चार्य्य जीवप्राणसमन्वितम्।
सकला भुवनेशानी द्वितीयं बीजमुद्धृतम्॥
जीवं प्राणं वह्निसंस्थं शक्तिस्वरसमन्वितम्।
विसर्गाढ्यं महेशानि! विद्या त्रैलोक्यमालिका॥"
ऋष्यादिन्यासः। शिरसि दक्षिणामूर्त्तये ऋषये नमः। मुखे पङ्क्तिच्छन्दसे नमः। हृदि चैतन्यभैरव्यै देवतायै नमः॥६॥

अथ कामेश्वरी भैरवी।

कामेश्वरी च रुद्राणी पूर्ब्बसिंहासने स्थिता।
एतस्या एव विद्याया बीजत्रयमुदाहृतम्॥
तदन्ते परमेशानि! नित्यक्लिन्ने मदद्रवे।
एतस्या एव तार्त्तीयं रुद्राणी परमेश्वरि!॥७॥

अथ षट्कूटा भैरवी।

ह्राकिनी राकिणी बीजे लाकिनी काकिनी-युगम्।
शाकिनी हाकिनी बीजे आद्यन्ते सुरसुन्दरि!॥
आद्यमेकारसंयुक्तमन्दीकारमण्डितम्।
शक्तिस्वरान्वितं देवि! तार्त्तीयं बीजमालिखेत्।
बिन्दुनादकलाक्रान्तं त्रितयं शैलसम्भवे!॥८॥

अथ नित्या भैरवी।

एतस्या एव विद्यायाः षड्वर्णान् क्रमशः स्थितान्।
विपरीतान् वद प्रौढ़े! विद्येयं भोगमोक्षदा।
न्यासपूजादिकं सर्व्वमस्याः पूर्ब्ववदाचरेत्॥९॥

अथ रुद्रभैरवी।

शिवचन्द्रौ मादनान्तं फान्तं वह्निसमन्वितम्।
शक्तिभिन्नं बिन्दुनादकलाढ्यं वाग्भवं प्रिये!॥
सम्पत्प्रदाया भैरव्याः कामराजं तदेव हि।
सदाशिवस्य बीजन्तु महासिंहासनस्य च।
एषा विद्या महेशानि! वर्णितुं नैव शक्यते॥१०॥

अथ भुवनेश्वरी भैरवी।

एषाद्यं वाग्भवाद्यं च कान्ते सुरेश्वरि!।
भूबीजं भुवनेशानी द्वितीयं बीजमुद्धृतम्।
शिवचन्द्रौ महेशानि! भुवनेशी च भैरवी॥११॥

अथ त्रिपुरबाला भैरवी।

अधरो बिन्दुनामाद्यं ब्रह्मेन्द्रस्थः शशी युतः।
द्वितीयं भृगुसंगाढ्यो मनुस्तार्त्तीयमीरितम्।
एषा बालेति विख्याता त्रैलोक्यवशकारिणी॥१२॥

अथ नवकूटा बाला।

बालाबीजत्रयं देवि! कूटत्रयं नवाक्षरी।
वियत्कूटत्रयं देवि! भैरव्या नवकूटकम्॥१३॥

अथान्नपूर्णा भैरवी ।
प्रणवं भुवनेशानि ! श्रीबीजं कामबीजकम् ।
हृदन्ते भगवत्यन्ते माहेश्वरिपदं ततः ।
अन्नपूर्णे ठयुगलं विन्यसेयं विंशदक्षरी ॥ १४ ॥"
इति तन्त्रसारे भैरवीमन्त्रपरिच्छेदः ॥ रागिणी-विशेषः । सा च भैरवरागस्य पत्नी । यथा,—
"भैरवी कौशिकी चैव भाषा वेलावली तथा ।
वङ्गाली चेति रागिण्यो भैरवस्यैव वल्लभाः ॥"
मतान्तरे मालवरागस्य पत्नी । यथा,—
धानसी मालसी चैव रामकीरी च सिन्धुड़ा ।
आशावरी भैरवी च मालवस्य प्रिया इमाः ॥"
अस्या ध्यानं यथा,—
"सरोवरस्था स्फाटिकस्य मन्दिरे
सरोरुहैः शङ्करमर्चयन्ती ।
तालप्रयोगप्रतिबद्धगीतिः
गौरीतनूर्नारद भैरवीयम् ॥"
अस्या गानसमयः पूर्ब्वाह्णकालः । यथा,—
"विभाषा ललिता चैव कामोदी पटमञ्जरी ।
रामकीरी रामकेली वेलोयारी च गुज्जरी ॥
देशकारी च शुभगा पञ्चमी च गड़ा तुड़ी ।
भैरवी चाथ कौमारी रागिण्यो दश पञ्च च ।
इताः पूर्ब्वाह्णकाले तु गीयन्ते गायनोत्तमैः ॥"
इति सङ्गीतदामोदरः ॥ * ॥
हनूमत्मते एषा सम्पूर्णजातिः । अस्याः सप्तस्वरविन्यासक्रमः मध्यमपञ्चमधैवतनिषादषड़्-जर्षभगान्धारान्तः । अस्या गृहं मध्यमस्वरः । प्रत्यूषौ प्रभाते अस्या गानसमयः । रागमालायां अस्याः स्वरूपम् । अल्पवयस्का । सुरूपा । सुनेत्रा । विस्तारवदना । पिङ्गलकेशा । कोमलाङ्गी । रक्तवर्णा । श्वेतवसना । गलशोभितचम्पकमाला । प्रफुल्लपद्मयुक्तपर्ब्वतगुहायां शिवपूजापरायणा । तत्र मञ्जीरवादका गायन्ति च ॥ * ॥ कल्लिनाथसोमेश्वरभरतमतेष्वेवम् ॥

भैषजं, क्लो, (भेषजमेव संज्ञायां स्वार्थे वा अण् ।) लावकपक्षी । इति जटाधरः ॥ भेषजञ्च ॥

भैषज्यं, क्लो, (भेषजमेवेति । भेषज + "अनन्तावसथेतिहभेषजात् ष्यञ्ः ।" ५ । ४ । २३ । इति ष्यञ्ः ।) औषधम् । इत्यमरः । २ । ६ । ५० ॥ (अस्य पर्य्यायो यथा,—
"भैषज्यं भेषजञ्चायुर्द्वयमगदमौषधम् ॥"
इति वैद्यकरत्नमालायाम् ॥
"तदेव युक्तं भैषज्यं यदारोग्याय कल्पते ।"
इति चरके सूत्रस्थाने द्वितीयेऽध्याये ॥)

भोः, [स्] अ, (भातीति । भा + बाहुलकाद् ओसिः ।) सम्बोधनम् । तत्पर्य्यायः । प्याट् २ पाट् ३ अङ्ग ४ हे ५ है ६ । इत्यमरः । ३ । ४ । ७ ॥ हंहो ७ हुम् ८ हो ९ अरे १० अये ११ अयि १२ । इति भरतः ॥ (यथा, मार्कण्डेये । ३ । ५२ ।
"भो भो विप्रेन्द्र ! बुध्यस्व बुद्ध्या बोधं बुधात्मक ! ।")
भ्रमः । विषादः । इति शब्दरत्नावली ॥

भोक्तव्यं, त्रि, (भुज + कर्म्मणि तव्यत् ।) भोजनीयम् । भोज्यम् । यथा,—
"यत्नेन भगिनीहस्ताद्भोक्तव्यं पुष्टिवर्द्धनम् ।"
इति तिथ्यादितत्त्वम् ॥
"अलाबू वर्त्तुलाकारा वार्त्ताकी दुग्धवर्णिका ।
प्राणान्तेऽपि न भोक्तव्या दुग्धवर्णा कलम्बिका॥"
इति कर्म्मलोचनञ्च ॥
(कर्म्मजन्ये अनुभवनीये । यथा च देवीभागवते । ११ । ७ । २८ ।
"प्रारब्धं किल भोक्तव्यं शुभं वाप्यथवा शुभम् ।
उद्यमस्तद्वशे नित्यं कारयत्येव सर्व्वथा ॥")

भोक्ता [क्तृ] त्रि, (भुज् + कर्त्तरि तृच् ।) भोजनकर्त्ता । यथा,—
"यज्ञेश्वरो हव्यसमस्तकव्य-
भोक्ताव्ययात्मा हरिरीश्वरोऽत्र ।"
इति श्राद्धप्रयोगतत्त्वम् ॥
सुखादिभोगकर्त्ता यथा,—
"कर्त्ता च देही भोक्ता च आत्मा भोजयिता सदा ।
भोगो विभवभेदश्च निष्कृतिर्मुक्तिरेव च ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २३ अध्यायः ॥
अथ भोक्तुर्लक्षणं यथा, पाकरात्रेश्वरे ।
"स्नातः सुधौतचारुदुसुन्दरशुक्लवासा-
स्तत्कालधौतचरणः सह पुत्रमित्रैः ।
सुखी प्रसन्नहृदयो रसपाकवेद्यां
भोक्ता विप्रेण सततं हि सहात्मवेद्यैः ॥
मृदुतूलमये स्थूले चारुरत्नावगुण्ठिते ।
आसने प्राङ्मुखो भोक्तोपविशेद्दक्षाणुदङ्मुखः ॥"
(भोजनकर्त्तरि यथा,—
"यदा कारणमासाद्य भोक्तृणां छन्दतोऽपि वा ।
अनेकद्रव्ययोनित्वाच्छास्त्रतस्तान् विनिर्दिशेत् ॥"
इति सुश्रुते सूत्रस्थाने ४६ अध्यायः ॥
"भोक्तारं विजने रम्ये निःसम्बाधे शुभे शुचौ ।
सुगन्धिपुष्पचिते रम्ये देशेऽथ भोजयेत् ॥"
इति च तत्रैव तदध्याये ॥
यथा च सांख्यशास्त्रे भोक्ता भोगकर्त्ता पुरुषः । सति भोगज्ञाने भोक्तृज्ञानं भवतीति तल्लक्षणमाह । "चिदवसानो भोगः ।" इति सांख्यसूत्रम् । १ । १०४ ॥ पुरुषस्वरूपे चैतन्ये पर्य्यवसानं यस्यैतादृशो भोगः सिद्धिरित्यर्थः । राज्ञो भृत्यवर्गः यथा, स्वामिने भोग्यजातमर्पयति; तथा, इन्द्रियाणि विषयजातं स्वस्वग्रहया गृहीत्वा अन्तःकरणप्रतिबिम्बिताय पुरुषाय अर्पयति, स च पुरुषः प्रतिबिम्बग्रहणमात्रेण विषयजातं भुङ्क्ते प्रकाशयतीत्यर्थः । पुरुषस्य भोगः प्रतिबिम्बादानमात्रं अन्येषान्तु पुष्ट्यादिः । ईदृशः परिणामरूपो भोगः पुरुषे निषिध्यते । "बुद्धे र्भोग इवात्मनि ।" इत्यादिभिरिति । एतादृक् तया पुरुषः भोगकर्त्ता वा भोक्ता ॥" इति तत्त्वज्ञे विज्ञानभिक्षुः ॥

भोक्ता [क्तृ] पुं, (भुङ्क्ते जीवरूपेणेति, भुनक्ति पालयतीति वा भुज + ल्वच् ।) विष्णुः । यथा,—
"भोक्तापां शैलूषः" इत्यादि ।
"भोक्ता यज्ञतपसां सर्व्वलोकमहेश्वरः ।
इति मां यो विजानाति स कर्म्मभिर्न बध्यते ॥"
इति श्रीभगवद्गीतायाम् ॥
"भोक्ता भोजयिता हर्त्ता पालयिता पतिः प्रभुः ।
अक्षयः पुरुषः साक्षी क्षेत्रज्ञोऽक्षर एव च ॥"
इति महाभारते तस्य सहस्रनामस्तोत्रम् ॥
भर्त्ता । इति हेमचन्द्रः । ३ । ६१ ॥

भोगः, पुं, (भुज्यतेऽसौ इति । भुज + घञ् ।) सुखम् । स्त्र्यादिभुक्तिः । पण्यस्त्रीणां भृतिर्भाड़िः । आदिना छत्रस्रग्वादिकर्म्मकराद्याश्च भृतिः । सर्पस्य फटा । सर्पशरीरम् । इत्यमरभरतौ । ३ । ३ । २३ ॥ (यथा, रघौ । १९ । ५६ ।
"लक्ष्यते स्म तदनन्तरं रविः
बहुभीमपरिवेषभण्डलः ।
वैनतेयपरिमृष्टभोगिभिः
भोगवेष्टित इव क्षुतो मणिः ।")
धनम् । (यथा, ऋग्वेदे । ३ । ३४ । ६ ।
"हिरण्ययममृतभोगं सखाय हत्वी दस्युन् प्रार्य्यं वर्णमावत् ॥"
"हिरण्ययं सुवर्णमयं भोगं धनम् ॥" इति तद्भाष्ये सायनः ॥) गृहम् । (यथास्मिन्नेव सूक्ते । "भोगशब्दश्चास्याने भुज्यतेऽस्मिन्निति भोगो गृहं वा सखाय अर्थिभ्यो ददौ ।" इति सायनः ॥) पालनम् । अभ्यवहारः । इति मेदिनी । गे, १६ ॥ सर्पः । देहः । मानम् । इति शब्दरत्नावली ॥ * ॥ पुण्यपापफलननियोग्यकालः । यथा,—
"अतीतानागतौ भोगौ नाधः पञ्चदशं स्मृतः ॥"
इति तिथ्यादितत्त्वे संक्रान्तिप्रकरणम् ॥
(पुरम् । यथा, ऋग्वेदे । ५ । २६ । ६ ।
"नव यदस्य नवतिश्च भोगान्
साकं वज्रेण मघवा विवृश्चत् ।"
भोगान् पुराणि । इति तद्भाष्ये सायनः ।)
भूम्यादीनां भोगो यथा । त्रिपुरुषभोगमाह व्यासः ।
"प्रपितामहेन यद्भुक्तं ततपुत्रेण विना च तत् ।
तौ विना यस्य पित्रा च तस्य भागस्त्रिपौरुषः ॥
पिता पितामहो यस्य जीवेच्च प्रपितामहः ।
त्रयाणां जीवतां भोगो विज्ञेयस्त्रैकपूरुषः ॥
नारदः ।
तथारूढविवादस्य प्रेतस्य व्यवहारिणः ।
पुत्रेण सोऽर्थः संशोध्यो न तं भोगो निवर्त्तयेत् ॥"
इति व्यवहारतत्त्वम् ॥
विभवभेदः । यथा,—
"कर्त्ता च देही भोक्ता च आत्मा भोजयिता सदा ।
भोगो विभवभेदश्च निष्कृतिर्मुक्तिरेव च ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २३ अध्यायः ॥
(बृहद्भेदः । यथा, कामन्दकीयनीतिसारे । १६ । अध्याये । ४१ । ४८ । ५४ । श्लोकेषु ॥
"यदि स्याद्दण्डवाच्युत्यं तदा चायः प्रकीर्त्तितः ।
मण्डलोऽसंहतो भोगो दण्डश्चेति मनीषिभिः ॥
गोमूत्रिका हि सप्तारी प्रकटो मकरस्तथा ।
भोगभेदाः समाख्याताश्चत्वारः परिपन्थकः ॥
असंहतास्तु षड्व्यूहा भोगव्यूहाश्च पञ्चधा ॥")

भोगगृहं, क्ली, (भोगार्थं गृहम्।) वासगृहम्। यथा,—
"वासागारं भोगगृहं कन्यापत्न्याटनिष्कुटाः।"
इति हेमचन्द्रः॥

भोगदेहः, पुं, (भोगहेतुको भोगसाधको वा देहः।) स्वर्गनरकभोगार्थं सूक्ष्मशरीरम्। यथा,—
"क्षते सपिण्डीकरणे नरः संवत्सरात् परम्।
प्रेतदेहं परित्यज्य भोगदेहं प्रपद्यते॥"
इति श्राद्धतत्त्वम्॥

अपि च।
"शृणु देहविवरणं कथयामि यथागमम्।
पृथिवी वायुराकाशस्तेजस्तोयमिति स्फुटम्।
देहिनां देहबीजस्य सृष्टिः सृष्टिविधौ परम्॥
पृथिव्यादिपञ्चभूतैर्यो देहो निर्म्मितो भवेत्।
न क्षत्रियो नश्वरश्च भस्मसाच्च भवेदिह॥
वृद्धाङ्गुष्ठप्रमाणश्च यो जीवपुरुषः स्मृतः।
बिभर्त्ति सूक्ष्मदेहन्तं तद्रूपं भोगहेतवे॥
स देहो न भवेद्वह्नौ ज्वलदग्नौ यमालये।
जले न नष्टो देहो वा प्रहारे सुचिरे कृते॥
न शस्त्रे च न चास्त्रे च न तीक्ष्णकण्टके तथा।
तप्तव्रते तप्तलोहे तप्तपाषाण एव च॥
प्रतप्तप्रतिमाश्लेषेष्यत्यूसूपतनेऽपि च।
न च दग्धो न भग्नश्च भुङ्क्ते सन्तापमेव च।
कथितं देहवृत्तान्तकारणञ्च यथागमम्॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २६ अध्यायः॥

भोगपालः, पुं, (भोगं भोगसाधनमश्वादिकं पालयतीति। भोग+पालि+अण्।) अश्वरक्षकः। इति शब्दमाला॥ भोगरक्षके त्रि॥

भोगपिशाचिका, स्त्री, (भोगे पिशाचिका इव, तद्वदत्यन्तत्वात्।) क्षुधा। इति हारावली॥

भोगभूमिः, स्त्री, (भोगार्थैव भूमिः।) सुखस्थानम्। भारतवर्षातिरिक्तवर्षम्। यथा,—
"तत्रापि भारतं श्रेष्ठं जम्बुद्वीपे महामुने!।
यतो हि कर्म्मभूरेषा ततोऽन्या भोगभूमयः॥"
इति विष्णुपुराणे २ अंशे ३ अध्यायः॥

भोगवती, स्त्री, (भोगः सर्पशरीरं भूत्वा अस्त्यस्या इति। भोग+मतुप् मस्य वः। "आर्द्रवाद्यश्चो ङीन्।" ४।१।७३। इति ङीन्।) पातालगङ्गा। नागपुरी। इति मेदिनी। ते, २१४॥ (नागपत्नी। यथा महाभारते। १।२१७।३२।
"नवभोगवतीं मन्ये न गन्धर्वीं न मानुषीम्।"
गङ्गा। यथा, स काशीखण्डे। २६।१२८॥
"भवा भोगवती भद्रा भवानी भूतभाविनी।"
नीलभेदः। यथा, महाभारते। ३।८५।७५॥
"सीधे भोगवती चैव वेदिरेषा प्रजापतेः।")

भोगवान्, [त्] पुं, (भोगः फटः कायो वा भूत्वा अस्त्यस्येति। भोग+मतुप् मस्य च वत्वम्।) सर्पः। इति मेदिनी। ते, २१४॥ नाट्यम्। गानम्। इति त्रिकाण्डशेषः॥ भोगविशिष्टे त्रि।

भोगमन्द्र, [न्] क्ली, (भोगार्थं उपभोगार्थं सद्म।) वासगृहम्। यथा,—
"गर्भागारं वासगृहं भोगसद्मोपबाधकम्।"
इति शब्दरत्नावली॥

भोगार्ह्यं, क्ली, (भोगाय अर्ह्यते इति अर्ह+"कृहलोर्ण्यत्।" ३।१।१२४। इति ण्यत्।) धान्यम्। इति राजनिर्घण्टः॥

भोगावली, स्त्री, (भोगानां आवली श्रेणिर्यस्याम्।) स्तुतिपाठकस्य स्तुतिः। इति जटाधरः॥ (यथा माघे। ५। ६७।
"भोगावलीः कलगिरोऽवसरेषु पेटुः।"
भोगावलीः प्रवचनान्। इति तट्टीकायां मल्लिनाथः॥) नागपुरी। इति हेमचन्द्रः॥

भोगावासः, पुं, (आवसत्यस्मिन् इति। आ+वस्+अधिकरणे घञ्। भोगार्थो वा आवासः।) वासगृहम्। इति हारावली॥

भोगिकः, पुं, (भोगे अश्वभोगे नियुक्त इति। भोग+वाहुलकात् ठन्।) अश्वरक्षकः। इति शब्दमाला॥

भोगिकान्तः, पुं, (भोगिनां कान्तः प्रियः।) वायुः। इति त्रिकाण्डशेषः॥

भोगिनी, स्त्री, (भोगः अस्या अस्तीति। भोग+इनिः। ङीप्।) महिषीभिन्नभूपपत्नी। इत्यमरः। २। ६। ५॥

भोगिवल्लभं, क्ली, (भोगिनां वल्लभं प्रियम्।) चन्दनम्। इति राजनिर्घण्टः॥

भोगी, [न्] पुं, (भोगोऽस्यास्तीति। भोग+इनिः।) सर्पः। इत्यमरः। १। ७। ८। (यथा, विष्णुपुराणे। १। ३। २३।
"एकार्णवे तु त्रैलोक्ये ब्रह्मा नारायणात्मकः।
भोगिशय्यागतः शेते त्रैलोक्यग्रासदंहितः॥"
भोगयुक्तः। यथा, आर्य्यासप्तशत्याम्। ४१४।
"भवतालिङ्गि भुजङ्गी जातः किल भोगिचक्रवर्त्ती त्वम्॥")
ग्रामपालः। नृपः। इति मेदिनी। ने। १०२। नापितः। इति विश्वः॥ वेश्यावृत्तिकरः। इति हेमचन्द्रः॥

भोगीन्द्रः, पुं, (भोगिनामिन्द्रः।) अनन्तदेवः। इति शब्दरत्नावली॥

भोगीशः, पुं, (भोगिनामीशः।) अनन्तदेवः। इति शब्दरत्नावली॥

भोग्यं, क्ली, (भुज+ण्यत्।) धनम्। धान्यम्। इति राजनिर्घण्टः॥ भोगमर्हतीति। भोग+यत्। भोगार्हे त्रि॥ (यथा, कामन्दकीये। ५।८१।
"यथा रक्षेच्च निपुणं शस्यं कण्टकिशाखया।
फलाय सगुणः कार्य्यस्तद्वद्भोग्यमिदं जगत्।")
व्याधिभेदः। यथाह नारदः।
"विद्यमानहेतू द्वावत्र प्रतिभूराधिरेव च।
अधिक्रियत इत्याधिः स विज्ञेयो द्विलक्षणः॥
कृतकालोपनेयश्च यावद्देयोऽवतस्तथा।
स पुनर्द्विविधः प्रोक्तो गोप्यो भोग्यस्तथैव च॥"
गोप्यो रक्षणीयः। भोग्यस्यार्थः फलभोग्यपदे द्रष्टव्यः। तद्यथा,—
"काले कालकृतो नश्येत् फलभोग्यो न नश्यति।"
फलं भोग्यं यस्यासौ फलभोग्यः क्षेत्रारामादिः स न कदाचिदपि नश्यति। इति मिताक्षरायां व्यवहाराध्यायः॥

भोग्या, स्त्री, (भुज+कर्म्मणि ण्यत् टाप्।) देश्या। इति राजनिर्घण्टः॥ भोग्या भूः। इति वोपदेवः॥ (तत्र त्रि।)

भोजः, पुं, (भोजस्येदमिति। भोज+"तस्येदम्।" ४। ३। १२०। इत्यण्। अणो लोपः।) स्वनामख्यातदेशः। भोजपुर इति भाषा। तत्पर्य्यायः। भोजकटः २। इति शब्दरत्नावली॥ धारानगरस्य राजविशेषः। तस्य वृत्तान्तो यथा। धारानामनगर्य्यां सिन्धुलसंज्ञो राजा आसीत्। तस्य राज्ञी सावित्री, तयोर्वृद्धावस्थायां भोजनामपुत्रो जातः। स यदा पञ्चवर्षवयस्कस्तदा तत्पिता स्वामरणकालं विदित्वा भ्रात्रे मुञ्जाय राज्यं ददौ, तदुत्सङ्गे भोजञ्च समोच। ततो राजि परलोकं प्राप्ते कियत्कालानन्तरं सभायां कश्चिदुदरम्भरिर्ज्योतिर्विदागत्य मुञ्जं प्राह राजन्! भोजस्य भाग्योदयं वक्तुं विरिञ्चिरपि न समर्थः कोऽहं वराक उदरम्भरिर्ब्राह्मणः तथापि वदामि भोजमिनः प्रेषय। ततो राजाज्ञया भोजेऽध्ययनशालां प्राप्ते आह यथा,—
"पञ्चाशत्पञ्चवर्षाणि सप्तमासा दिनत्रयम्।
भोगराजेन भोक्तव्यं सगौडं दक्षिणापथम्॥"
इति श्रुत्वा मुञ्जराजोऽचिन्तयत्, यदि राजलक्ष्मीर्भोजं गमिष्यति ततोऽहं जीवन्नपि मृतः। ततो राजा मन्त्रयित्वा वङ्गाधीश्वरं मन्त्रबलं वत्सराजमाकार्य्य निर्जने तं प्राह, वत्सराज! त्वया भोजक्षितिभुवनेश्वरीविपिने हन्तव्यः। वत्सराजः भोजकुमारोपाध्यायमाकार्य्य प्राह, विप्र! भोजमानय। ततो विदितवृत्तान्तो भोजः क्षुभितः प्राह, आः पाप! राज्ञः कुमारं बहिरानेतुं तव का शक्तिः, ततो वामकरस्थमादुकामादाय भोजेन भालदेशे हतो वत्सराजः प्राह, भोजकुमार! वयं राजादेशकारिणः। इत्युक्त्वा वधार्थं बलात् वत्सराजेन निशायां विपिनं भोजे नीते वत्सराजस्य भ्राता भोजस्य वधोद्यमसमये।
"एक एव सुहृद्धर्म्मो निधनेऽप्यनुयाति यः।
शरीरेण समं नाशं सर्व्वमन्यच्च गच्छति॥"
इत्युक्तं निशम्य वत्सराजो वैराग्यमापन्नो भोजं क्षमस्वेत्युक्त्वा प्रणम्य तं रथे निवेश्य गृहमागत्य भूमिगृहान्तरे भोजं रक्षित्वा कृत्रिमं भोजमस्तकं कारयित्वा राजानमागत्य नत्वा प्राह श्रीमता यदादिष्टं तन्मया कृतम्। राजपुत्रवधं श्रुत्वा राजा तं प्राह वत्सराज! पुत्रेण खड्गप्रहारावसरे किमपि उक्तम्। वत्सराजः प्राह देव! किमपि मत्रं प्रेषितमस्ति तदिदं गृहाण शिरश्च दर्शयति। ततो भोजमस्तकं दृष्ट्वा राजा रुरोद।

"मान्धातेति महीपतिः कृतयुगेऽलङ्कारभूतो गतः
सेतुर्येन महोदधौ विरचितः क्वासौ दशास्या न्तकः।
अन्ये चापि युधिष्ठिरप्रभृतयो याताः दिवं भूपते!
केनापि समं गता वसुमती मन्ये त्वया यास्यति॥"

इति भोजकृतश्लोकं पठित्वा पपात च। ततो राजा पण्डितमानीय मया पुत्री हतः प्रायश्चित्तमनुशमितुमुवाच। ततस्ते ऊचुः राजन्! सवासा वह्निमाविश। ततो राज्ञो वह्निप्रवेशे निश्चिते सति तद्वार्त्तां श्रुत्वा नृपद्वारमागत्य वत्सराजो बुद्धिसागरं प्राह तात! मया भोजो न मारितः बुद्धिसागरश्च तस्य कर्णे किमपि कथयति। ततो वत्सराजो निष्क्रान्तः। ततस्त्वत्कर्षेण साक्षात्कैलासेश्वर इव एकः कापालिक आगतः। तं वीक्ष्य बुद्धिसागरः प्राह योगिन्! कुत आगम्यते कापालिके त्वयि क्रमत्रमत्कारी कलाविशेषश्चौषधिविशेषो वा अस्ति। ततो राजाप्याह मया सहसा हतं पुत्रं रत्नं। कापालिकः प्राह राजन्! मा भैषीः पुत्रस्ते नाथप्रसादेन न मरिष्यति प्रातस्तव गृहं स्वयमेव समेष्यति परं श्मशानभूमौ बुद्धिसागरमन्त्रिणा सह होमद्रव्यं प्रेषय। कापालिकेन यदुक्तं तत् सर्वं राज्ञा सम्यक् बुद्धिसागरः प्रेषितः ततश्च राज्ञो गृहत्वया वत्सराजगृहात् भोजस्तत्र नदीपुलिनं नीतः योगिना भोजकुमारो जीवित इति किमद्भुतं सर्व्वतोऽभ्यजायत। ततः पौरामात्यैः परिवृतो भोजो राजभवनमागतः। ततस्तमालिङ्ग्य रुदन्तं सुतं निवार्य्य भोजः स्तौति। ततो राजा लज्जावनतग्रीवः सन् निजसिंहासने भोजमुपवेश्य राज्यं दत्त्वा वनं गतः। ततो भुक्ते वनं प्राप्ते बुद्धिसागरं सुखामात्यं विधाय भोजः स्वं राज्यसुखं बुभुजे। ततो राजसभायां सहसाऽयं वृषवरः दिगभ्रं समागमत्; ततो राजा श्यामलमाह।

"तत्त्वं महाकविर्देवं तदहं विदुषस्य च।
देवं श्यामकविर्वेत्सु! तस्माद्यूयं त्वयानहम्॥"

इति॥

ततः क्रमेण वररुचिसुबन्धुबाणमयूरामरसिंहदेवहरिवंशभट्टारकालिङ्कपूरविनायकमदनविद्याविनोदकोकिलतारेन्द्रप्रसूखाः सर्व्वशास्त्रविचक्षणाः सर्व्वज्ञा इव राजसभामहर्निशमलंकुर्व्वन्ति। कियत्कालानन्तरं कालिदासकवौ समागते तेन सार्द्धं राज्ञः परमा प्रीतिरजायत। अन्ये विद्वांसः कालिदासं वैद्यालम्भटं विदित्वा सर्व्वभावेन वैरचक्रुः न कश्चित् सभायां सुधति न कोऽपि वदति। किन्तु भोजनृपतिस्तेन सार्द्धं परमप्रीतो बभूव। अन्येषां पण्डितानामागमनं तेषां पद्यानि समस्यापूरणानि तेभ्यो बहुलवस्त्रादानादिवर्णनञ्च ग्रन्थगौरवभयान्त न लिखितम्। इति भोजप्रबन्धपुस्तकात् सङ्कलितम्॥ ऐन्द्रजालिकविद्यां भोजविद्यां वदन्ति।

भोजकटः, पुं, भोजदेशः। इति शब्दरत्नावली॥ (रुक्मिनिर्म्मिते पुरे, क्ली। यथा, विष्णुपुराणे। ५। ३१। १३।

"इत्युक्तेन परित्यक्तः कन्यागालिष्टकर्म्मणा।
रुक्मी भोजकटं नाम पुरं कृत्वावसत्तदा॥")

भोजनं, क्ली, (भुज्+"ल्युट् च।" ३। ३।११५। इति भावे ल्युट्।) भक्षणम्। कटिनद्रव्यस्य गलाधःकरणम्। तत्पर्य्यायः। जग्धः २ जेमनम् ३ लेपः ४ आहारः ५ निवसः ६ न्याद्यः ७। इत्यमरः।२। ६। ५५॥ जमनम् ८ विषसः ९। इति तट्टीका॥ अभ्यवहारः १० प्रत्यवसानम् ११ अशनम् १२ खादनम् १३ निगरः १४। इति राजनिर्घण्टः॥ *॥

अथ भोजनगुणविधानादि।

"भोजनाग्रे सदा पथ्यं जिह्वाकण्ठविशोधनम्।
अग्निसन्दीपनं हृद्यं लवणार्द्रकभक्षणम्॥
आयुर्हरते गृद्धे रोगा म्लेच्छुलींनो विदाहिषु।
आरोग्यं कटुतिक्तेषु बलं मांसे पयःसु च॥
अन्नादष्टगुणं पिष्टं पिष्टादष्टगुणं पयः।
पयसोऽष्टगुणं मांसं मांसादष्टगुणं घृतम्॥
घृतादष्टगुणं तैलं महेनान्न च भक्षणात्।
आहारः प्रीणनः सद्यो बलकृद्देहधारणः॥*॥
आयुष्यं प्राङ्मुखो भुङ्क्ते यशस्यं दक्षिणामुखः।
श्रियं प्रत्यङ्मुखो भुङ्क्ते ऋतं भुङ्क्ते
ह्युदङ्मुखः॥
कुक्षेरन्नेन भागौ द्वावेकं पानेन पूरयेत्।
वायोः सञ्चारणार्थञ्च चतुर्थमवशेषयेत॥
दग्धे चावगते चान्नं सौचैनैवाहरेच्चलेः।
कुर्य्यादनिर्गतं तद्धि सुखस्यानिष्टगन्धताम्॥
शुक्ता पाचितलं दृष्ट्वा चक्षुर्घोर्यदि दीयते।
अचिरेणैव तद्वारि विमिराणि व्यपोहति॥
भुक्त्वाचम्य करं वामं दत्त्वा कुक्षौ ततः पठेत्।
भुक्तं महेन्द्रदत्तेन वैश्वानरसुखेन च॥
गरुडस्य च कण्ठेन वसुदत्तस्य च वह्निना।
वातापिर्भक्षितो येन पीतो येन महोदधिः॥
यत्कया खादितं पीतं तदगस्त्यो जरियति।
पठित्वैतत् सुखासीनः चर्यं तिष्ठेदनाकुलः॥
शुक्ता पादशतं गत्वा वामपार्श्वेन संविशेत्।
एवं ह्यधोगतं चान्नं सुखं तिष्ठति जीर्य्यति॥
शुक्लोपविशतस्तुन्दं शयानस्य वपुर्भवेत्।
आयुश्चंक्रमणस्य म्लेच्छुर्धावति धावतः॥"

इति राजवल्लभः॥ *॥

अपिच।

"ततो भोजनवेलायां कुर्य्यान्मङ्गलदर्शनम्।
तस्य प्रदक्षिणं नित्यमायुर्धर्म्मविवर्द्धनम्॥
लोकेऽस्मिन् मङ्गलान्यष्टौ ब्राह्मणो गौर्हुताशनः।
हिरण्यं सर्पिरादित्य आपो राजा तथाष्टमः॥
पादप्रक्षालनं कुर्य्यात् पूर्वं भोजनतः परम्।
पादरोगहरं दृष्यं चक्षुष्यं चायुषे हितम्॥*॥
शरीरे जायते नित्यं वाञ्छा नृणां चतुर्विधा।
बुभुक्षा च पिपासा च सुप्तिः सुरतस्पृहा॥
भोजनेच्छाविघातात् स्यादङ्गमर्द्दोऽरुचिः श्रमः।
तन्द्रा लोचनदौर्ब्बल्यं धातुदाहो बलक्षयः॥
विघातेन पिपासायाः शोषः कण्ठास्ययोर्भवेत्।
श्रवणस्यावरोधश्च रक्तशोषो हृदि व्यथा॥
निद्राविघाततो जृम्भा शिरोलोचनगौरवम्।
अङ्गमर्द्दस्तथा तन्द्रा स्यादजापाक एव च॥
बुभुक्षितो न योऽश्नाति तस्याहारेन्धनक्षयात्।
मन्दीभवति कायाग्निर्यथा चाग्निर्निरिन्धनः॥
आहारं पचति शिखी दोषानाहार एव पचति।
दोषक्षये च धातून् पचति धातुक्षये प्राणान्॥
आहारः प्रीणनः सद्यो बलकृद्देहधारणः।
स्वल्पायुःशक्तिवर्णौजःसत्त्वशोभाविवर्द्धनः॥
यथोक्तगुणसम्पन्नमुपसेवेत भोजनम्।
विचार्य्य दोषकालादीन् कालयोरुभयोरपि॥"

उभयोः कालयोः प्रातः सायञ्च। तथा च।

"सायं प्रातर्मनुष्याणामशनं श्रुतिबोधितम्।
नान्तरा भोजनङ्कुर्य्यादग्निहोत्रसमो विधिः॥"

प्रातः प्रथमयामात् उपरि द्वितीययामात् अर्व्वाक्। तथा च।

"याममध्ये न भोक्तव्यं यामयुग्मं न लङ्घयेत्।
याममध्ये रसोत्पत्तिर्यामयुग्मादबलक्षयः॥"

अन्यच्च।

"क्षुत् सम्भवति पक्वेषु रसदोषसमेषु च।
काले वा यदि वाकाले सोऽन्नकाल उदाहृतः॥"

रसादीनां पाकं धातुमाह।

"उदारमुद्धरत्याहो वेगोत्सर्गे यथोचितः।
लघुता क्षुत्पिपासा च यदा कालः स भोजने॥"

स्नानमाह।

"आहारं विजने कुर्य्यान्निहारमपि सर्व्वदा।
उभाभ्यां लक्ष्यते पातः स्नातः प्रकाशे हीयते
श्रिया॥

निहारो मलमूत्रोत्सर्गः। अन्यच्च।

"आहारनिहारविहारयोगाः
सर्व्वेऽपि सङ्क्षिप्तविधेया इति॥" *॥

भोजने येषां दृष्टिर्निवारणीया तानाह।

"हीनदीनक्षुधार्त्तानां पापण्डेऽन्यरोगिणाम्।
कुक्कुटादिशुनां दृष्टिर्भोजने नैव शोभना॥"

येषां दृष्टिः शुभदा तानाह।

"पिप्पलालसुहृद्वैद्यापापकृद्गर्व्वहीनाम्।
सारसस्य चकोरस्य भोजने दृष्टिरुत्तमा॥"

कथञ्चित्तद्दुष्टदृष्टिपाते तद्दोषशान्तये ब्रह्मादीन् स्मरेत्। तद्यथा,—

"अन्नं ब्रह्म रसो विष्णुर्भोक्ता देवो महेश्वरः।
इति सञ्चिन्त्य भुञ्जानो दृष्टिदोषो न बाधते॥
अञ्जनागर्भसम्भूतं कुमारं ब्रह्मचारिणम्।
दृष्टिदोषविनाशाय हनूमन्तं स्मराम्यहम्॥"

भाजनमाह।

"दोषघ्नदृष्टदृष्टिदं पथ्यं हैमं भोजनभाजनम्।
रौप्यं भवति चक्षुष्यं पित्तघ्नं कफवातकृत्॥

कांस्यं बुद्धिप्रदं रुच्यं रक्तपित्तप्रसादनम् ।
पैत्तलं वातकृच्छ्रघ्नं कृमिकफप्रणुत् ॥
आयसे कान्तपात्रे च भोजनं सिद्धिकारकम् ।
शोथपाण्डुहरं बल्यं कामलाप्रहणोत्तमम् ॥
श्लैष्मले रूक्षपात्रे भोजनं त्रीनिवारणम् ।
दारुजपात्रे विषेषेण रुचिदं श्लेष्मकारि च ॥
पात्रं पत्रमयं रुच्यं दीपनं विषपापणुत् ॥
चलपात्रन्तु ताम्रस्य तदभावे स्टदो हितम् ॥
पवित्रं शीतलं पात्रं घटितं स्फटिकेन यत् ।
क्रमेण रचितं तद्वत्तथा वैदूर्यसम्भवम् ॥ ९ ॥
भोजनाग्रे सदा पथ्यं लवणार्द्रकभक्षणम् ।
अग्निसन्दीपनं रुच्यं जिह्वाकण्ठविशोधनम् ॥"
लवणं सैन्धवं ज्ञेयम् । आर्द्रकन्तु कटुकमपि न पित्तविरोधि मधुरपाकित्वात् ॥
"अग्नीयात्तन्मना भूत्वा पूर्व्वन्तु मधुरं रसम् ।
मध्येऽम्ललवणौ पश्चात् कटुतिक्तकषायकान् ॥
फलान्यादौ समश्नीयात् दाडिमादीनि बुद्धिमान् ॥
बिना मोचाफलं तद्वद्वर्ज्जनीया च कर्कटी ॥
श्यामालविषशालूककन्देक्षुप्रभृतीन्यपि ।
पूर्व्वमेव हि भोक्ष्यानि न तु भुक्त्वा कदाचन ॥
गुरु पिष्टमयं द्रव्यं तण्डुलान् पृथुकानपि ।
न खादेत् भुक्तवान् क्षुद्वान्नाचां खादेद्बुभुक्षितः ॥
घृतपूर्व्वं समश्नीयात् कठिनं प्राक् ततो मृदु ।
अन्ते पुनर्द्रवाश्नी तु बलारोग्ये न मुञ्चति ॥"
अयमर्थः । प्राक् घृतपूर्व्वं कठिनं समश्नीयात् । यथा काश्यादिवासिनः प्रथमं सक्तूनां घृतपूर्व्वां रोटिकां भुञ्जते । ततो मृदुसूपादिकमोदनं भुञ्जते । अन्ते पुनर्द्रवाश्नी भोजनान्ते दधितक्रदुग्धादि भुञ्जते ।
"यद्यत् स्वादुतरं तद्धि विद्ध्यादुत्तरोत्तरम् ।
भुक्त्वा यत् प्रार्थ्यते भूयस्तदुक्तं स्वादु भोजनम् ॥"
स्वादस्य गुणमाह ।
"सौमनस्यं बलं पुष्टिस्तस्याहं रसनासुखम् ।
स्वादु सङ्गतयत्नमस्वादु च विपर्य्ययम् ॥
अत्युष्णान्नं बलं हन्ति पीतं शुष्कञ्च दुर्ज्जरम् ।
अतिस्निग्धं ग्लानिकरं युक्तियुक्तं हि भोजनम् ॥
अतिद्रुताशिताहारो गुणान् दोषान्न विन्दति ।
भोक्ष्यं शीतमकृत्वञ्च स्वादिष्टमितमश्नतः ॥"
गुरु विपक्वं तन्निवारयन्नाह ।
"मन्दाग्नेरो नरो द्रव्यं मात्रागुरु विवर्ज्जयेत् ।
स्वभावतश्च गुरु यत्तथा संस्कारतो गुरु ॥
मात्रागुरुस्तु मुद्गादिर्मांसादिः प्रकृतेर्गुरुः ।
संस्कारगुरु पिष्टान्नं प्रोक्तमित्युपलक्षणम् ॥ ९ ॥
आहारं षड्विधं चूष्यं पेयं लेह्यं तथैव च ।
भोज्यं भक्ष्यं तथा चर्व्यं गुरु विद्यादुत्तरोत्तरम् ॥"
चूष्यं इक्षुदाडिमादि । पेयं पानकशर्करोदकादि । लेह्यं रसालाघनादि । क्षपिता स्टदो इति लोके । भोज्यं भक्तसूपादि । भक्ष्यं मण्डकमण्डकादि । चर्व्यं चिपिटचणकादि ।
स्वभावगुरुसंस्कारगुरुयोः स्वभावलघुनश्च भक्ष्यस्य भोजनपरिमाणमाह ।

"गुरूणामर्द्धसौहित्यं लघूनां तृप्तिरिष्यते ।"
अयमर्थः । माषपिष्टान्नादिभिरर्द्धं सौहित्यं कर्त्तव्यं मुद्गादिभिः स्वाभाविक्या मात्रया तृप्तिः कर्त्तव्येत्यर्थः ।
"द्रवो द्रवोत्तरश्चापि न मात्रागुरुरिष्यते ।"
द्रवः पेयादि । द्रवोत्तरः तक्राद्यधिक ओदनादिर्मात्रातोऽधिकोऽपि मात्रागुरुर्न मन्तव्यः । पेयस्य सर्व्वतो लघुत्वात् । उक्तञ्च सुश्रुतेन । पेयलेह्याद्यभक्ष्याणां गुरु विद्याद्यथोत्तरमिति ।
पेयं पय आदि । लेह्यं रसालादि । अन्नं ओदनरूपादि । भक्ष्यं मोदकादि ।
"द्रवाद्यमपि शुष्कन्तु सम्यगेवोपपद्यते ।
विशुष्कमन्नमभ्यस्तं न पाकं साधु गच्छति ॥"
अयमर्थः । शुष्कमपि सोनोरोधकरमपि द्रवाद्यं सम्यक् पाकं याति । केवलस्य शुष्कस्यान्नस्य दोषमाह । विशुष्कमन्नमित्यादि ॥
अपक्वं तत् किं भवतीत्यपेक्षायामाह ।
"पिण्डीकृतमसंक्लिन्नं विदाहमुपगच्छति ।"
पिण्डीकृतं यष्टीलावद्भूतम् । असंक्लिन्नं असम्यगार्द्रम् । विदाहमुपगच्छति विदग्धं भवतीत्यर्थः ॥ शुष्कादीनां वैगुण्यमाह ।
"शुष्कं विरूक्षं विष्टम्भि वह्निव्यापादमावहेत् ।"
शुष्क चिपिटादि । विरूक्षं चीरमत्स्यादि । विष्टम्भि चणकमसूरादि वह्निमान्द्यं कुर्य्यात् ।
"न भुक्त्वा न स्पृष्ट्वा न निशायां न वा वक्त्रम् ।
न जलान्तरितान्न हिः शक्तूनद्यान्न केवलान् ॥
पुनर्दानं पृथक् पानं सामिषं पयसा निशि ।
दन्तक्लेदनमुष्णाच्च सप्त भक्तेषु वर्ज्जयेत् ॥"
विषमाशनस्य लक्षणमाह ।
"बहुस्तोकमकाले वा ज्ञेयं तद्विषमाशनम् ।"
बहुलाल्पस्य भक्षितस्य दोषमाह ।
"आलस्यगौरवाटोपशून्द्यांश्च कुरुतेऽधिकम् ।
हीनमात्रं तनोः कार्श्यं करोति च बलक्षयम् ॥"
अधिकं अन्नम् । अकाले भुक्तस्य दोषमाह ।
"अप्राप्तकालो भुञ्जानोऽप्यसमर्थतनुर्नरः ।
तांस्तान् व्याधीनवाप्नोति मरणञ्चाधिगच्छति ॥"
अप्राप्तकालः कालादतिप्राक् भुञ्जानोऽसमर्थशरीरो भवति । तथा सति तांस्तान् व्याधीन् शिरोरुग्याविसूचिकालसकविलम्बिकादीन् प्राप्नोति । तेषामाधिक्ये मरणमपि प्राप्नोतीत्यर्थः ।
"कालेऽतीतेऽग्नौ जातोर्जायुनाप्यतेऽनले ।
क्षुत्क्षामदेहयते भुक्तं न स्याद्भोक्तुं पुनः क्षुधा ॥
कुक्षेर्भागद्वयं भोज्यैस्तृतीयं वारि पूरयेत् ।
वायोः सञ्चरणार्थाय चतुर्थमवशेषयेत् ॥
रसनानाम्न्य रसना प्रथमेनोपतर्पिता ।
न तथा स्वादमाप्नोति ततः सैव्यामुनान्तरा ॥
अत्यन्नपानान्न विपद्यतेऽन्न-
मनम्बुपानाच्च स एव दोषः ।
तस्मान्नरो वह्निविवर्द्धनाय
मुहुर्मुहुर्वारि पिबेदभूरि ॥

भुक्त्वादौ वलं पीतं कार्श्यमन्ताग्निदीपकृत् ।
मध्येऽग्निदीपनं श्रेष्ठमन्ते स्थौल्यकफप्रदम् ॥"
अन्यच्च ।
"समस्थूलकृशा भुक्तमध्यान्तप्रथमामुपाः ।"
इति वाग्भटः ॥ भुक्तं भोजनम् ।
"क्षपितस्तु न चाश्नीयात् क्षुधितो न पिबेज्जलम
क्षपितस्तु भवेद्गुल्मी क्षुधितस्तु जलोदरी ।"
ननु शिष्टा भोजनान्ते दुग्धं पिबन्ति तत् कथं सुचितम् । यतस्क्षिधा विभक्तस्य भोजनकालस्य प्रथमो भागो वातस्य द्वितीयः पित्तस्य तृतीयः कफस्य । अतस्तदाह ।
"अग्नीयात्तन्मना भूत्वा पूर्व्वन्तु मधुरं रसम् ।
मध्येऽम्ललवणौ पश्चात् कटुतिक्तकषायकान् ॥"
अस्यायमभिप्रायः । भोजने पूर्व्वं भुक्तो मधुरो रसो बुभुक्षितस्य वातपित्तयोः शमको भवति ।

"भोजनमध्ये भुक्तावम्ललवणौ
पित्ताग्नये च वह्निवृद्धिं कुरुतः ।
भोजनान्त्यसमये भुक्ताः कटुतिक्त-
कषाया रसा कफं शमयन्तीति ।"

अतो भोजनावसानसमयस्य कफकालत्वात्तत्र कथं श्लेष्मजनकं दुग्धं यातुमुचितं भवति । यत उक्तम् ।
"दुग्धं स्वादुरसं स्निग्धमोजस्यं धातुवर्द्धनम् ।
वातपित्तहरं रुच्यं श्लेष्मलं गुरु शीतलमिति ।"
उच्यते ।
"विदाहीन्यन्नपानानि यानि भुङ्क्ते हि मानवः ।
तद्विदाहप्रशान्त्यर्थं भोजनान्ते पयः पिबेत् ॥"
अतएव ब्रह्मपुराणे ।
"कुर्य्यात् क्षीरान्नमाहारं दध्यन्नं न कदाचनेति ॥
लवणाम्लकटून्यानि विदाहीन्यति यानि तु ।
तद्दोषं दुग्धमाहारं मधुरेण समापयेत् ॥"
भोजनावसानसमये दुग्धादिमधुरभोजनेनैव वह्नितकफौ लवणाम्लकटुभोजनजनितां पित्तस्य वृद्धिं नाशयति पित्तवृद्धिनाशनेन कफस्यापि वृद्धिरूपक्षीणा भवति क्षीणकफवृद्धिरग्निमान्द्यादीन् व्याधीन् उत्पादयितुं न शक्नोति ॥
"एवं भुक्त्वा समाचामेत् रुच्यैरुष्णपूर्व्वकम् ।
भोजने दन्तलग्नानि निर्हृत्याचमनञ्चरेत् ॥
दन्तलग्ननिहार्य्यं ज्ञेयं मन्येत दन्तवत् ।
न तत्र बहुशः कुर्य्यादयं निर्हरणं प्रति ॥
आचम्य जलयुक्ताभ्यां पाणिभ्यां चक्षुषी स्पृशेत् ।
भुक्त्वा पाणितले दृष्ट्वा चक्षुषोर्यदि दीयते ।
अचिरेणैव तद्वारि तिमिराणि व्यपोहति ॥
भुक्त्वा च संस्मरेन्नित्यमगस्त्यादीन् सुखावहान् ।
विष्णुरात्मा तथैवान्नं परिणामश्च वै यथा ।
सत्येन तेन यदुक्तं जीर्य्यत्वन्नमिदं तथा ॥

अगस्तिरग्निर्वडवानलश्च
भुक्तं ममान्नं चरयत्वशेषम् ।
सुखञ्च मे तनु परिणाममस्यं
यच्छत्वरोगं मम चाग्रदृष्टे ॥

अङ्गारकमगस्तिञ्च पावकं सूर्य्यमग्निनौ ।
यश्चैतान् संस्मरेन्नित्यं भुक्तं तस्यापि जीर्य्यति ॥

इत्युचार्य स्वदक्षेण परिमार्ज्य तथोदरम्।
अनायासप्रदायीनि कुर्य्यात् कर्म्माण्यतन्द्रितः॥"
अतन्द्रितः प्रायश्चित्तेन तु सुप्यात्। भुक्तमात्रस्य तु स्वप्नान्मन्दाग्निः कुपितः कफ इति वचनात्।
"कोष्ठेऽग्नौ वर्द्धते वायुर्विदग्धे पित्तमेधते।
भुक्तमात्रे कफश्चापि क्रमोऽयं भोजनोपरि॥"
विदग्धे किञ्चिदपक्वे पित्तमेधते किञ्चिदपक्वे कफः॥
भुक्तमात्रे संजातकफस्य प्रतीकारमाह।
"धूमेनाशीत्य वृद्धेर्वा कषायकटुतिक्तकैः॥
पूगकर्पूरकस्तूरी लवङ्गसुमनःफलैः।
फलैः कटुकषायैर्वा सुखवेद्यकारिभिः।
ताम्बूलमत्र चर्वन्ति नृगन्धैर्वा विचक्षणाः॥"
धूमेन अगुर्वादिधूमेन। अशीत्य कर्षं दूरीकृत्य। कषायकटुतिक्तकैः फलैः कर्पूरकस्तूरीलवङ्गादिभिः। पूगैः क्रमुकैः। सुमनःफलैः पालीफलैः॥ फलैः एलाहरीतक्यादिफलैः।
"रते सुप्तोत्थिते स्नाते भुक्ते वान्ते च सङ्गरे।
सभायां विदुषां राज्ञां कुर्य्यात्ताम्बूलभक्षणम्॥
भुक्त्वा घृतपदीं गच्छेच्छतेनैव तु जायते।
अन्नसंघातशैथिल्यं ग्रीवाजानुकटीसुखम्॥
भुक्तोपविष्टस्तन्दं प्रयातस्य तु पृष्टता।
आयुश्चंक्रममाणस्य वज्रधावति धावतः॥"
चंक्रममाणस्य पदशतं गच्छतः॥ ॥
"वामपार्श्वं समुत्तानस्तान् हि: पार्श्वं तु दक्षिणे।
तत्रस्थिद्गुल्मान् वामे पक्वान् सुप्यान् यथासुखम्।
वामदिग्गायामनलो नाभेरूर्द्धोऽस्ति चन्द्रनाम्।
तस्मात्तु वामपार्श्वे शयीत भुक्तप्रथमार्द्धम्॥
त्रिदोषशमनो ह्येषा तूली वातकफापहा।
भूशय्या दंष्ट्रिणी हन्या काष्ठपट्टी तु वातुला॥"
इति भावप्रकाशः॥ ॥

अन्यच्च।
"स्नातो यथावत् कृत्वा च देवर्षिपितृतर्पणम्।
प्रशस्तरत्नवासिस्तु भुञ्जीत प्रयतो गृही॥
हुते वह्नौ हुते विप्रे भुक्तवत्यग्रधरो नृप!।
दत्त्वातिथिभ्यो विप्रेभ्यो गुरुभ्यः संश्रिताय तु॥
पुण्यगन्धधरः शुक्लमाल्याधारी नरेश्वर!।
नैकवस्त्रधरोऽपादप्राणिपादो नरेश्वर!॥
विशुद्धवदनः प्रीतो भुञ्जीत न विदिङ्मुखः।
प्राङ्मुखोदङ्मुखो वापि न चैवान्यमना नरः॥"
"अन्नं प्रशस्तं पथ्यं च प्रोक्षितं प्रोक्षणोदकैः।
न क्षुत्पिपासार्त्तवेव बुभुक्षापदसंस्कृतम्॥
दृष्ट्वा तु भक्तं श्रियेद्भः क्षुधितेभ्यस्तथा गृही।
प्रशस्तशुक्लवासाश्च भुञ्जीताकुपितो नृप!॥
गायत्रीसंस्थिते पात्रे नादेये च नरेश्वर!।
नाकाले नातिसङ्कीर्णे दत्त्वाग्रयञ्च नरोऽग्नये॥
आसनस्थो दारुमयविष्टरे।
"मनोभिमतितं श्रेष्ठं न च मनुचितं नृप!।
अन्यत्र कामसिद्धेभ्यः शक्तुभाकादिकात्तथा॥
तद्दृष्टसिद्धेश्च गुरुदत्तेभ्य एव च।
शुक्लोत्तमान्नमाद्यादि न कदाचिन्नरेश्वर!॥"
परिवेष्टैः अपरैर्दासादिभिः॥

"नाग्नेयं पुरुषोऽश्नीयादन्यत्र जगतीपते!।
मध्वस्तुदधिसर्पिभ्यः शक्तुभ्यश्च विवेकवान्॥
अश्नीयात्तन्मयो भूत्वा पूर्वन्तु मधुरं रसम्।
लवणाम्ले तथा मध्ये कटुतिक्तादिकांस्ततः॥
प्राक् द्रवं पुरुषोऽश्नीयान्मध्ये च कठिनाशनम्।
अन्ते पुनर्द्रवाशी तु बलारोग्ये न मुञ्चति।
अनिन्द्यं भक्षयेदित्थं वाग्यतोऽन्नमकुत्सयन्।
पञ्चग्रासं महासौनं प्राणाद्याप्यायनादि तत्॥
भुक्त्वा सम्यगथाचम्य प्राङ्मुखोदङ्मुखोऽपि वा।
यथावत् पुनराचामेत् पाणी प्रक्षाल्य मूलतः॥
स्वस्थः प्रशान्तचित्तश्च कृतासनपरिग्रहः।
अभीरुर्देवतानाञ्च कुर्वीत स्मरणं नरः॥
अग्निराप्याययत्वन्नं पार्थिवं पवनेरितः।
दत्तावकाशं नभसा तरत्वस्तु मे सुखम्॥
अन्नं बलाय मे भूमेरपामग्नानिलस्य च।
भवत्वेतत्परिणतौ ममास्त्वयाहतं सुखम्॥
प्राणायानसमानानामुदानव्यानयोस्तथा।
अन्नं पुष्टिकरञ्चास्तु ममास्त्वयाहतं सुखम्॥
अग्निस्तिरश्चिर्वडवानलश्च
भुक्तं मयान्नं तरयत्वशेषम्।
सुखञ्च मे तत्परिणामसम्भवं
यच्छत्वरोगं मम चास्तु देहे॥
विष्णुः समस्तेन्द्रियदेहदेहि-
प्रधानभूतो भगवान् यथैकः।
सत्येन तेनान्नमशेषमेत-
दारोग्यदं मे परिणाममेतु॥
विष्णुरुक्त्वा तथैवान्नं परिणामञ्च वै तथा।
सत्येन तेन मे भुक्तं वीर्य्यवन्नमिदं तथा॥
इत्युचार्य स्वदक्षेण परिमृज्य तथोदरम्।
अनायासप्रदायीनि कुर्य्यात् कर्म्माण्यतन्द्रितः॥
सच्छास्त्रादिविनोदेन सन्मार्गादविरोधिना।
दिनं नयेत्ततः सन्ध्यामुपतिष्ठेत् समाहितः॥"
इति विष्णुपुराणे ३ अंशे ११ अध्यायः॥ ॥
अपरञ्च।
"भुञ्जीत प्रयतो नित्यं वाग्यतोऽनन्यमानसः।
भैक्षेण वर्त्तयेन्नित्यं नैकान्नादी भवेद्व्रती॥
भैक्षेण हविनो हुतिरुपवाससमा स्मृता।
पूजयेदन्नं नित्यमद्याच्चैतदकुत्सयन्॥
दृष्ट्वा हृष्येत् प्रसीदेच्च प्रतिनन्देच्च सर्व्वशः।
अनारोग्यमनायुष्यमस्वर्य्यञ्चातिभोजनम्।
अपुण्यं लोकविद्विष्टं तस्मात्तत् परिवर्जयेत्॥
प्राङ्मुखोऽन्नानि भुञ्जीत सूर्य्याभिमुख एव वा।
नाद्यादुदङ्मुखो नित्यं विधिरेष सनातनः॥
प्रक्षाल्य पाणी पादौ च भुञ्जानो हि यमस्पृशेत्।
दृष्ट्वा देवे समासीनो भुक्त्वा च हि रुपस्पृशेत्॥
नाश्नीयाद्भार्य्यया सार्द्धं नैनामीक्षेत चेष्टतीम्।
न भक्षयेदभक्ष्याणि नार्षेयं वा विदेद्विजः॥"
अभक्ष्यान्नन्तु भक्तग्रन्थे द्रष्टव्यम्॥ ॥
"भुञ्जीत बन्धुभिः सार्द्धं वाग्यतोऽन्नमकुत्सयन्।
अकृत्वा तु द्विजः पञ्च महायज्ञान् द्विजोत्तम!॥
भुञ्जीत योऽन्नमज्ञात्वा तिर्य्यग्योनिं स गच्छति॥
वैश्वाग्नौ होतव्यं कृत्वा मन्त्रक्रियाक्षया।

नाश्नीयत्वाशु पापानि देवानामर्च्चनन्तथा॥
या मोहादथवालस्यादकृत्वा देवतार्च्चनम्।
भुङ्क्ते स याति नरकान् सूकरेष्वभिजायते॥
तस्मात् सर्व्वप्रयत्नेन कृत्वा कर्म्माणि वै द्विजः।
भुञ्जीत स्वजनैः सार्द्धं स याति परमां गतिम्॥
इति कौर्म्मे उपविभागे १७ अध्यायः॥ ॥
व्यास उवाच।
"प्राङ्मुखोऽन्नानि भुञ्जीत सूर्य्याभिमुख एव वा।
आसीनस्त्वासने शुद्धे भूम्यां पादौ निधाय तु॥
आयुष्यं प्राङ्मुखो भुङ्क्ते यशस्यं दक्षिणामुखः॥
श्रियं प्रत्यङ्मुखो भुङ्क्ते ऋतं भुङ्क्ते उदङ्मुखः॥
पश्चार्द्धौ भोजनं कुर्य्याद्भूमौ पात्रं निधाय तु।
उपवासेन तत्तुल्यं मनुराह प्रजापतिः॥
उपलिप्ते शुचौ देशे पादौ प्रक्षाल्य वै करौ।
आचम्यार्द्रेण पाणिना क्रोधः पश्चार्द्धौ भोजनञ्चरेत्॥
महाव्याहृतिकं भिन्नं परिधायोदकेन तु।
अन्तरोपस्तरणमसीत्यापोऽश्नानक्रियाञ्चरेत्॥
स्वाहाप्रणवसंयुक्तां प्राणापानाहुतिन्ततः।
अपानाय ततः कृत्वा व्यानाय तदनन्तरम्॥
उदानाय ततः कुर्य्यात् समानायेति पञ्चमीम्।
विज्ञाय तत्त्वमेतेषां जुहुयादात्मनि द्विजः॥
शेषमन्नं यथोक्तञ्च भुञ्जीत व्याहृतैर्युतम्।
ध्यात्वा तन्मनसा देवमात्मानं वै प्रजापतिम्॥
अन्तरापिधानमसीत्युपरिष्टादपः पिबेत्।
आचान्तः पुनराचामेदायं गौरीतिमन्त्रतः॥
द्वयं वा चिरवाक्यं सर्व्वपापप्रणाशिनीम्।
प्राणानां ग्रन्थिरसीत्यालभेद्धृदयन्ततः॥
आचम्याङ्गुष्ठमात्रेति पादाङ्गुष्ठेऽथ दक्षिणे।
निःसावशेषमुच्छलं मूर्द्धस्थः समाहितः॥
हुत्वान्नमन्त्रयं कुर्य्यात् सन्ध्यायामिति मन्त्रतः।
अथाचरेच्च स्वात्मानं योगवेदाक्षणोऽपि हि॥
सर्व्वेषामेव योगानामात्मयोगः परः स्मृतः।
योऽनेन विधिना कुर्य्यात् स याति ब्रह्मणः
क्षयम्॥
यज्ञोपवीती भुञ्जीत स्रग्गन्धाक्षतो नरः।
सायं प्रातर्नान्तरा वै सन्ध्यायान्तु विशेषतः॥
नाद्यात् सूर्य्यग्रहात् पूर्व्वमस्ति सायं ग्रहियहात्।
ग्रहकाले तु नाश्नीयात् स्नात्वाश्नीयात्तु सुक्तयोः॥
सुक्ते ग्रस्तेऽपि भुञ्जीत यदि न स्यान्महानिशा॥
असुक्तयोरसं गत्वोः स्नात्वा दृष्ट्वा परेऽहनि।
नाश्नीयात् प्रेतभागानामदायैव दुर्म्मतिः॥
गायत्र्यधिष्ठादन्यदृचा न क्रुष्टो नान्यमानसः॥
आत्मार्थं भोजनं यस्य रत्यर्थं यस्य मैथुनम्।
कृत्यार्थं यस्य चाधीतं निष्फलं तस्य जीवितम्॥
यद्भुङ्क्ते वेष्टितशिरा यच्च भुङ्क्ते उदङ्मुखः।
सोपानत्कश्च यद्भुङ्क्ते सर्व्वं विद्यात्तदासुरम्॥
नार्द्धरात्रे न मध्याह्ने नासीर्ये नार्द्धवस्त्रधृक्।
न च भिन्नासनगतो न शयानः स्थितोऽपि वा॥
न भिक्षाजनने चैव न भूम्यां न च पाणिषु।
नोच्छिष्टो घृतमादद्याद्न्नं सूर्य्येऽपि॥
न ब्रह्म कीर्त्तयेद्यापि न निःशेषं न भार्य्यया।
नान्धकारे च नाकाशे न च देवालयादिषु॥

नैकवस्त्रस्तु भुञ्जीत न च यानस्थितोऽपि वा।
न पादुकानुगतो वा न हसन् विलपन्न हि॥
भुक्त्वैवं सम्यगाचम्य तदन्नं परिणामयेत्॥"

इति कूर्मे उपविभागे १८ अध्यायः॥ * ॥

अपरञ्च।

"दत्त्वा च हुत्वा पितृदेवताभ्यो
भृत्वानिधीन् भृत्यजनावशिष्टम्।
तुष्टः शुचिः श्रद्दधानोऽक्ति योऽन्नं
तस्यान्नं स्यात् स पुमान् भुनक्ति॥

मायं प्रातर्मनुष्याणामशनं देवनिर्मितम्।
वैदिके लौकिकेऽग्नौ तु प्रत्यक्षे जाठरे तथा॥
उपलिप्ते समे देशे शुचिः श्रद्धासमन्वितः।
पात्रेष्वर्घ्यानुरूपेषु पुत्रशिष्यादिभिर्वृतः॥
सुसंस्कृतं हितं स्निग्धं भुञ्जीतान्नमकुत्सयन्।
यवगोधूमशाल्यान्नं मांसशाकादिभिर्युतम्॥
कटुम्ललवणोत्तिक्तैर्व्यञ्जनैस्तु सुगन्धिभिः।
भक्ष्यप्रकारान् विविधान् कन्दमूलफलानि च॥
पात्रं भूमौ प्रतिष्ठाप्य योऽश्नक्ति वाग्यतः शुचिः।
भोजने भोजने चैव त्रिराचमनमुत्तमे॥
यत्नेन धारयेद्विप्रः पवित्रं दक्षिणे करे।
भुञ्जानस्तु विशेषेण अन्नदोषैर्न लिप्यते॥
यातुधानाः पिशाचाश्च असुरा राक्षसास्तथा।
घ्नन्ति केवलमन्नस्य मण्डलस्य विवर्जनात्॥
आदित्या वसवो रुद्रा ब्रह्मा चैव पितामहः।
मण्डलान्युपजीवन्ति तस्मात् कुर्वीत मण्डलम्॥
चतुष्कोणं द्विजाग्र्यस्य त्रिकोणं क्षत्रियस्य तु।
द्विकोणाकृति वैश्यस्य शूद्रस्य वर्तुलं सदा॥
न लौहे स्रुक्स्रुवे पात्रे भिन्नेऽन्नीयान कदाचन।
आपः पुनन्तीतिमन्त्रेण सुधाकृत्वा समाशनम्॥"

धृत्वा दक्षिणमुपविश्य पात्रं प्रक्षाल्य मण्डलं त्रिकोणमितिमितिपात्रमभिमन्त्र्य भूम्याद्यस्त्रायनेति भूमौ पात्रं प्रतिष्ठापयेत्। आर्द्रवासाः शुष्कवासा वा पवित्रात्मा शान्तात्मा प्राङ्मुख आसीनः पाणी प्रक्षाल्य दशशीर्षाणमग्निमुद्वेति ध्यायेदयक्तं पुरुषम्। तत ओजोऽसीत्यन्नाद्यमाधियमाणं प्रतिपत्तयेत्। ओजोऽसीत्यादिना प्रतिगृह्य अष्टमन्त्राभिरग्नीषोमाभ्यामभिमन्त्रयेत्। उदृत्युध्वमेति चाष्टरात्रमन्तरस्थं प्रबोधयेत्। भूतपतये नमः भुवनपतये नमः भूतानां पतये नमः इति नमस्कारान्ते बलिदेयं भूमौ दद्यात्। अथात्मानं चिन्तयेत्।

"प्राणस्य हृदयं स्थानमपानस्य गुदं स्मृतम्।
समानो नाभिदेशे तु उदानः कण्ठमाश्रितः॥
व्यानः स तु विज्ञेयो व्यानः सर्वाङ्गसन्धिषु।
राजोपसर्जनः प्राणो हृदये नित्यसंस्थितः॥
तस्याधस्ताद्वसेदग्निस्तु स वै गोक्षीरसन्निभः।
नाभ्या मध्ये समानस्तु विद्युज्ज्वालासमप्रभः॥
प्राणस्योपसुदानस्तु इन्द्रनीलसमप्रभः।
उभाभ्यामथ प्राणाभ्यामग्न्याप्येकशाखया।
अन्नं पात्रं कुर्वीत एवं दोषैर्न लिप्यते॥
अन्तश्चरसि भूतेषु गुहायां विश्वतोमुखः।
त्वं यज्ञस्त्वं वषट्कारस्त्वं विष्णोः परमं पदम्॥"

व्यस्तोपस्तरणमसीत्यपः स्पृष्ट्वोपस्पृश्य वाचं नियच्छेत्। न्यस्तं महाव्याहृतिभिरद्भिः प्रदक्षिणं परिषिच्य सव्येन पाणिना पात्रमविसृजन्नन्नोपस्तरणमसीति पुरस्तादपः पीत्वा पञ्चभिस्तैः प्राणाहुतीर्जुहोति। प्राणे निविष्टोऽन्नं जुहोमि शिवोमाविशाप्रदाहाय प्राणाय स्वाहा। अपाने निविष्टोऽन्नं जुहोमि शिवोमाविशाप्रदाहायापानाय स्वाहा। व्याने निविष्टोऽन्नं जुहोमि शिवोमाविशाप्रदाहाय व्यानाय स्वाहा। इति तूष्णीं भूयो व्रतयेत्। प्रजापतिं मनसा ध्यायेत्॥ * ॥ प्राणाय स्वाहेति प्राणस्तृप्यति। प्राणे तृप्यति चक्षुस्तृप्यति। चक्षुषि तृप्यति आदित्यस्तृप्यति। आदित्ये तृप्यति द्यौस्तृप्यति। दिवि तृप्यन्त्यां यत्किञ्चिद्द्यौश्चादित्यश्चाधितिष्ठतस्तत्तृप्यति तस्यानुतृप्तिमनुतृप्यति। व्यानाय स्वाहेति व्यानस्तृप्यति। व्याने तृप्यति श्रोत्रं तृप्यति। श्रोत्रे तृप्यति चन्द्रमास्तृप्यति। चन्द्रमसि तृप्यति दिशस्तृप्यन्ति। दिक्षु तृप्यन्तीषु यत्किञ्चिद्दिशः खं चन्द्रमाश्चाधितिष्ठन्ति। तत्तृप्यति तस्यानुतृप्तिमनुतृप्यति प्रजया पशुभिरन्नाद्येन तेजसा ब्रह्मवर्चसेनेति। अपानाय स्वाहेत्यपानस्तृप्यति। अपाने तृप्यति वाक् तृप्यति। वाचि तृप्यन्त्यां अग्निस्तृप्यति। अग्नौ तृप्यति पृथिवी तृप्यति। पृथिव्यां तृप्यन्त्यां यत्किञ्चिन् पृथिवी वाग्निश्चाधितिष्ठतस्तत्तृप्यति तस्यानुतृप्तिमनुतृप्यति। तृप्यति प्रजया पशुभिरन्नाद्येन तेजसा ब्रह्मवर्चसेनेति। समानाय स्वाहा इति समानस्तृप्यति। समाने तृप्यति मनस्तृप्यति। मनसि तृप्यति पर्जन्यस्तृप्यति। पर्जन्ये तृप्यति विद्युत्तृप्यति। विद्युति तृप्यन्त्यां यत्किञ्चिद्विद्युत्पर्जन्यश्चाधितिष्ठतस्तत्तृप्यति तस्यानुतृप्तिमनुतृप्यति प्रजया पशुभिरन्नाद्येन तेजसा ब्रह्मवर्चसेनेति। उदानाय स्वाहेति उदानस्तृप्यति। उदाने तृप्यति वायुस्तृप्यति। वायौ तृप्यति आकाशस्तृप्यति। आकाशे तृप्यति यत्किञ्चिदाकाशश्चाधितिष्ठतस्तत्तृप्यति। तस्यानुतृप्तिमनुतृप्यति प्रजया पशुभिरन्नाद्येन तेजसा ब्रह्मवर्चसेनेति॥ * ॥

"भुक्तेऽन्ने केचित् काङ्क्षन्ति सुक्तशेषं भुवि क्षिपेत्।
केचित् काङ्क्षन्त्यनाजीवाः केचित् कर्मफलानुगाः॥
भुञ्जन्तु मम चोच्छिष्टं पात्रे वाथ भुवि स्थिते।
व्यस्तापिधानमसीत्युपरिष्टात् पयः पिबेत्॥
यदि पूर्वोपरिष्टाच्च वस्त्रं प्राशस्य निर्णेजेत्।
भुक्त्वा पीत्वा च यः कश्चिन् नूत्नं पात्रं समुत्सृजेत्॥
स पुनः क्षुत्पिपासार्त्तो भवेज्जन्मनि जन्मनि।
अस्तापिधानमसीत्युपरिष्टादपः पिबेत्॥"

अपः पीत्वाचान्तः प्राणस्थानान्यद्भिः स्पृशति। प्राणानां ग्रन्थिरसीति हृदयमालभ्य जपति प्राणानां ग्रन्थिरसि इति प्राणदेशम्। विष्णोर्जठरमसीतिनाभिदेशम्। यो देवानामधिपतीति पुनरपि हृदयदेशमालभ्य जपति। सावित्रीञ्चानुभाष्य त्रिरापो रसानां रसभुक् तत्रात्मा कर्मभिः प्रीयतां विश्वमुगिति ध्यायेदयक्तं पुरुषम्॥ * ॥

"आहिताग्निरनड्वांश्च ब्रह्मचारी च ते त्रयः।
अश्नन्त एव सिद्ध्यन्ति नैषां सिद्धिरनश्नताम्॥
गृहस्थो ब्रह्मचारी च योऽनश्नंस्तु तपश्चरेत्।
प्राणाग्निहोत्रलोपेन अवकीर्णी भवेत्तु सः॥
अन्तराप्यन्तराश्नंश्च सायमाश्नन्तथैव च।
सदोपवासी भवति यो न भुङ्क्ते कदाचन॥
प्राणाग्निहोत्रमन्त्राणां निरुद्धे भोजने जपेत्।
वैश्वानरहोत्रमन्त्रांस्तु हव्यालाभेन तर्पयेत्॥
यथाहि नलमेधैकमग्निप्रोतं प्रदूषते।
तद्वत् सर्वाणि पापानि निर्दहत्यात्मयाजिनः॥
यथेह क्षुधिता बाला मातरं पर्युपासते।
एवं सर्वाणि भूतानि अग्निहोत्रमुपासते॥"

इति॥ * ॥

"भोजनस्य निषेधन्तु प्रवक्ष्याम्यनुपूर्वशः।
नोच्छिष्टो भक्षयेत् किञ्चिन्न गच्छन् वा कदाचन॥
खड्गारूढो न भुञ्जीत न पाणिस्थं कदाचन।
चन्द्रसूर्योपरागे च ग्रस्तास्ते चन्द्रसूर्ययोः॥
गोब्राह्मणोपवासेन न वार्लीर्णे तु भोजने।
निर्ग्रीषे नैकवासास्तु न लग्नोच्छिष्टभाजने॥
न रात्रौ तिलसम्बद्धं दधि भुक्त्वान्न माचिकम्॥
कोविदारबटाश्वत्थफलानि न कदाचन।
चणकञ्च कौसुम्भं करमर्दितञ्च यद्दधि॥
वैद्या बहिः पुरोडाशं तुल्यं गोमांसभक्षणे।
नोच्छिष्टेन घृतं यायाद् भक्तुं वापद्गतोऽपि सन्॥
पलाण्डुं लशुनं वापि भुञ्जंस्तत्पापमाप्नुयात्।
नानार्द्रसख्यपाणिस्तु चन्द्रतारार्कमीक्षयेत्॥
भुञ्जन् कुर्वन् स्वमूर्द्धानं सूर्यादृ ब्रह्म न कीर्त्तयेत्॥
नार्द्रवासाः शिरःस्निग्धः सोपानत्को निरासनः।
प्रयानः प्रौढपादश्च कृत्वा चैवावमर्कधिकम्॥
नाग्नीयान्न पिबेच्चैव कृत्वा पर्य्यस्तिकां नरः।
पादप्रसारणं कृत्वा न च वेष्टितमस्तकः॥
न च आर्द्रस्य यच्छिष्टं गृहे पर्युषितञ्च यत्।
दम्पत्योर्भुक्तशेषन्तु न भुञ्जीत कदाचन॥
नातिचिरितमश्नीयान् भक्त्वा क्षीरं विवर्जयेत्।
न भक्षयेत्तु निःक्षीरमन्यत्र दधिसर्पिषोः॥
पयसो मधुशक्तूनां तिलानामोदनस्य च।
न चैको मिश्रमश्नीयान्न बहूनाञ्च पण्डिताः॥
बहवस्तु न भुञ्जन्ति तथा चैकस्य पण्डितः।
ओष्ठौ च न लिहेत् पाणिं नाद्भिः पात्रमेव च॥
भूम्यादीनां अभिज्ञाताया देवागारे तथैव च।
आयुर्निरश्नते तस्य सिद्धैकस्य बुभुक्षतः॥
अदत्त्वा गोऽग्निविप्रेभ्यः कुमारायानुयायिषु।
एकोऽन्नं मिश्रमश्नाति ततोऽन्यो नास्त्यधोगतः॥

यस्त्वेकषड्भ्यां विषमं ददाति
स्नेहाद्भयाद्वा यदि वार्थहेतोः।
वेदेन दृष्टान्यभिसंहितां गतां
तां ब्रह्महत्यां मुनयो वदन्ति॥

एकपङ्क्त्युपविष्टानां दृष्टानां दुरात्मनाम् ।
सर्व्वेषां तन्नमं नावदृष्टावत् पङ्क्तिनं भिद्यते ॥
एवं यो ब्राह्मणो भुङ्क्ते सन्तर्प्य पितृदेवताः ।
स दृष्टे कुले समुद्धृत्य ब्रह्मसायुज्यमाप्नुयात् ॥"

इति वह्निपुराणे भोजनविधानम् ॥ * ॥

त्रिविधभोजनं यथा,—

"उच्छिष्टमवशिष्टं वा पर्य्युषितमभोजितम् ।
भक्तानां भोजनं विष्णोर्नैवेद्यं सात्त्विकं मतम् ॥
इन्द्रियप्रीतिजननं शुक्रशोणितवर्द्धनम् ।
भोजनं राजसं शुद्धमायुरारोग्यवर्द्धनम् ॥
अतः परं तामसानां कङ्कगोमायुविड्वाहिकम् ।
पूतिपर्य्युषितं ज्ञेयं भोजनं तामसप्रियम् ॥"

इति कल्किपुराणे २५ अध्यायः ॥ * ॥

आद्यादिषु निमन्त्रितस्यान्यत्र भोजने दोषो यथा,—

"निमन्त्रितोऽन्यतो भुङ्क्ते आद्धे दैवे सपैतृके ।
स द्विजो नरके वासं लभते नात्र संशयः ॥"

दैवतादिव्यभुक्तवतस्तु भोजने दोषा यथा,—

"दैवतापित्र्यमर्त्येषु महत्सु ब्राह्मणेषु च ।
अभुक्तवत्सु येऽश्नन्ति बालपित्रशिमाहयः ॥
दुष्टास्ते पूर्वनिचये निपतन्त्यधमाधमाः ।
सूचीमुखाश्च जायन्ते क्षुधार्त्ताः क्रिमिविग्रहाः ॥"
"एकपङ्क्त्युपविष्टाश्च वसत्याद्य प्रयान्ति ये ।
विड्भोजनं राक्षसेन्द्र ! नरकन्ते प्रयान्ति हि ॥
एकसार्द्धप्रयातश्च तथान्यश्चार्द्धिन नराः ।
असंविभज्य भुञ्जन्ति ते यान्ति ग्रासभोजनम् ॥
पायसं कृसरं मांसं दृषा भुक्तञ्च यैर्नरैः ।
तेषामयोगुडास्तस्मात् क्षिप्यन्ते वदनेऽद्भुताः ॥"

इति वामनपुराणे १२ अध्यायः ॥ * ॥

औषधादिरिक्तकिञ्चिद्भोजनवतो नित्यनैमित्तिक-क्रियानिषेधो यथा,—

"दध्ये भुक्ते त्वजीर्णे च नैव भुक्ता च किञ्चन ।
कर्म्म कुर्य्यान्नरो नित्यं सूतके मृतके तथा ॥
पत्रं पुष्पञ्च ताम्बूलं भेषजत्वेन कल्पितम् ।
कणादिपिण्यन्तञ्च फलं भुक्ता न चाचरेत् ॥
जलस्यापि नरश्रेष्ठ ! भोजनाङ्गेषजादृते ।
नित्यक्रिया निवर्त्तेत सह नैमित्तिकैः सदा ॥"

इति कालिकापुराणे ५४ अध्यायः ॥

भोजने पाकविधौ दिङ्नियमो यथा,—

"पूर्व्वाशाभिमुखो भूत्वा उत्तराशामुखेन वा ।
पचेदन्नञ्च मध्याह्ने सायाह्ने च विवर्ज्जयेत् ॥
अन्नाशाभिमुखे पक्त्वा अन्नतान्नं विनाशयेत् ।
पूर्व्वास्यो धर्म्मकामः श्रीकामश्चोत्तरास्यके ॥
श्रीकामश्चोत्तरमुखे पतिकामश्च पश्चिमे ।
ऐशान्याभिमुखे पक्त्वा दरिद्रो जायते नरः ॥"

पाकपात्रनिरूपणं यथा,—

"यदा तु कांस्यके पात्रे पक्त्वा अन्नाति वै द्विजः ।
स पापिष्ठोऽपि भुङ्क्तेऽन्नं रौरवे परिपच्यते ॥
ताम्रे पक्त्वा चक्षुषोर्निर्भयौ भवति वै क्षयः ।
पित्तभ्यां पक्वमन्नञ्च पित्तरोगञ्च यच्छति ॥
पुण्डरीकस्य यज्ञस्य लभते फलमीप्सितम् ।
वातुलेन तु यत् पक्वं भग्निया च कनिष्ठया ।
श्वमांसेन च यत् पक्वं श्लेष्मितं तदपि स्मृतम् ॥
अभक्तेन च यत् पक्वं स्त्रिया पक्वं नपुंसेन च ।
पक्वपात्रे च यत् पक्वं तत् सर्व्वं निष्फलं भवेत् ॥"

पाककाष्ठनिरूपणं यथा,—

"उदुम्बरेण काष्ठेन कदम्बस्य दलेन च ।
शालेन करमर्दैन उदरावर्त्तकेन च ॥
पक्वान्नं नैव भुञ्जीत भुक्ता राक्षसमाप्नुयात् ॥"

निषिद्धान्नं यथा,—

"गर्हितान्नमवीरान्नं भुक्ता चान्द्रायणञ्चरेत् ।
अप्रजा या तु वनिता नाश्नीयादेव तद्गृहे ॥
शालकाष्ठस्य पक्वान्नं शिरीषकस्य चैव हि ।
कालचण्डालकस्यैव वज्रवारणकस्य च ॥
मेरण्डशाल्मलेर्वापि पक्वान्नं गर्हितं स्मृतम् ॥"

पाकपात्रत्यागकालो यथा,—

"यदा त्वन्नमयपात्रे तु पक्वं वै सार्व्वकालिकम् ।
मासे पक्षे तथाष्टासु तत्पात्रं विसृजेद् गृही ॥
धनुःपाके तथा सिंहे मीने चैव वरानने ! ।
यः कुर्य्याद्भोजनं देवि ! क्षुच्छ्लेष्मैव विमुञ्चति ॥"

पाकार्थजलदानं यथा,—

"एकदा तु जलं दद्याद् द्विवारं न प्रदापयेत् ।
त्रिभागं पूरयेत् पात्रं पश्चात्तोयं न दापयेत् ॥"

भोजनस्थानादि यथा,—

"उपलिप्ते शुचौ देशे पादौ प्रक्षाल्य वाग्यतः ।
प्राङ्मुखोऽन्नानि भुञ्जीत शुचिः पीठमवस्थितः ॥"

पीठनिरूपणं यथा,—

"सार्द्धहस्ते चतुष्कोणे सहकारविनिर्म्मिते ।
चामभद्रदारुमये प्रादेशोच्छ्रायसंयुते ॥
वरुणासने भवेद्वृद्धिर्भद्रके श्रियमाप्नुयात् ।
चामे धनविवृद्धिः स्याद्धर्म्मवृद्धिस्तु भद्रके ।
शालासने कपीरुके किंशुके मरणं भवेत् ॥"

भोजने दीपनिरूपणं यथा,—

"घृतदीप्ता यज्ञफलं तैले धेनुफलं लभेत् ॥"

भोजने चाण्डालादिदृष्टिनिषेधो यथा,—

"यदा भोजनकाले तु चाण्डालैः पतितैस्तथा ।
श्वकुक्कुटवराहैश्च खेचरैश्च अन्त्यजैरपि ।
अन्नं वाप्यथ पानं वा दृष्टमात्रं परित्यजेत् ॥"
"रजस्वलायाः संस्पृष्टीर्वाचं श्रुत्वा प्रमादतः ।
व्रतस्थो वर्ज्जयेद्देवि ! व्रते प्रोक्षणञ्चरेत् ॥
देवालये तथा तीर्थे सिद्धक्षेत्रे च शूकरि ! ।
ब्राह्मणानां समाजे तु भुक्ता क्रतुफलं लभेत् ॥
आचान्तो भोजनं कुर्य्यादनामायां हिरण्ययुक् ।
सवर्णेन सृणेदन्नं तदन्नमन्नदं विदुः ॥
रजःस्पृष्टं यदन्नञ्च भुक्ता भवति किल्बिषी ।
पौष्यकेण सृणेदन्नमन्नं विलासमं भवेत् ॥
वैदूर्य्येण मार्गिकेन स्फटिकेन सृणेदपि ।
स्वर्णेन संसृणेदन्नं तदन्नं शुचितामियात् ॥"

भोजने दिङ्नियमो यथा,—

"आयुष्यं प्राङ्मुखो भुङ्क्ते राजौ चैव उदङ्मुखः ।
यशस्वी दक्षिणे चैव पश्चिमे तु विवर्ज्जयेत् ॥"

भोजने मण्डलानि यथा,—

"मण्डलं भोजने काले चतुष्कोणं द्विजस्य च ।
क्षत्रियस्य भवेद्वृत्तं वैश्यस्य कूर्म्मपृष्ठकम् ।
स्त्रीशूद्राणां भवेद्वृत्तं शकटाकारमेव वा ॥"

अथ भोजनकालः ।

"सायं प्रातर्द्विजातीनामशनं देवनिर्म्मितम् ।
नित्यमह्नि तमस्विन्यां सार्द्धप्रहरयामतः ॥
रात्रौ यामत्रयान्ते च सन्ध्ययोर्न कदाचन ।
अकालभोजनं कृत्वा प्राणायामेन शुद्ध्यति ।
अहोरात्रेऽपि सन्ध्यायां भुक्ता कृच्छ्रं समाचरेत् ॥"

मोदकादिभक्षणानन्तरमन्नभोजनविधिर्यथा,—

"मोदकं कन्दुपक्वञ्च गव्याढ्यं घृतसंयुतम् ।
पुनः पुनर्भोजने च पुनरन्नं न दुष्यति ।
त्रिसन्ध्यं भुक्तवान् यस्तु न स स्वार्घं द्विजः क्वचित् ॥
भुक्ता रात्रिमुपगमे क्षुच्छ्लेष्मेणैव शुद्ध्यति ॥
कोलं हरिद्रा सौवीरं मरीचं जातिकोषकम् ॥
ग्रन्थिपर्णादिकं सर्व्वं गन्धद्रव्यं तथौषधिः ।
प्रशस्तमेषामामान्नं खिन्नस्यापि न दुष्यति ॥
कुटुम्बभरणार्थाय पाकं पश्चान्निवेदयेत् ।
वैश्वदेवान्नमुद्धृत्य भोजयेन्न विचारयेत् ॥
नाश्नीयात् केवलं रात्रौ विल्वस्यैव तथा दधि ।
अङ्गेन लवणयुक्तेन काष्ठखण्डेन वह्निना ॥
पङ्क्तिभेदं ततः कुर्य्यात् पश्चाद्भुञ्जीत वाग्यतः ।
हस्तदत्तं यदन्नञ्च शूद्रादत्तं न भक्षयेत् ॥
घृततैलञ्च लवणं पानीयं पायसं दधि ।
रविवारे तथा षष्ठ्यां भौमवारे दिनक्षये ।
पर्व्वकाले च द्वादश्यां द्विजस्त्रिक्तं न भक्षयेत् ॥
न वामेन पिबेत्तोयं न रसं तक्रमेव च ।
भेकाखुश्वित्रशुभाच्चारैस्तथा पारावतैरपि ॥
कलविङ्कैः पन्नगैश्च पाके सृष्टैरपि सुन्दरि ! ।
गोधया वनमार्জ্জारैः पाकं न विसृजेत् क्वचित् ॥
स्वर्णरौप्यमये पात्रे पाषाणे ब्रह्मपक्वके ।
सकृद्भुक्ता तु देवेशि ! परान्नस्य फलं लभेत् ॥
पूर्व्वायां स्वर्णपात्रे च भोजनं यः समाचरेत् ।
पुण्डरीकस्य यज्ञस्य लभते फलमीप्सितम् ॥
स्वर्णपात्रे पश्चिमायां उत्तराभिमुखेन वा ।
तदन्नं शौकरं मांसं भुक्ता चान्द्रायणञ्चरेत् ॥
सर्व्वकामः स्वर्णपात्रे यशस्वी खर्परेषु च ।
पद्मपत्रे भवेत् पृथ्वीविद्याधी तु पुण्यवान् ॥
क्षयी भवति ताम्रे च काचपात्रे दरिद्रता ।
तूतपत्रे भवेदायुः कदले कीर्त्तिमाप्नुयात् ॥
मधुपत्रे च रोगः स्यादृटपत्रे तु वैष्णवः ।
शालपत्रे भवेत्कामी पनसे चैव सद्गतिः ।
निम्बपत्रे प्ररोहे च पुनः संस्कारमर्हति ॥"

इति मत्स्यसूक्ततन्त्रे ४२ पटलः ॥

अथ स्नेयुक्तभोजनविधिः । वह्निःप्रक्षालित-पाणिपादवदनो रक्तपाणिर्द्विवासा द्विराचान्तो गोमयोपलिप्ते प्रावृते देशे शुद्धः शुद्धनीचासनोपविष्टो धर्म्मवृद्धिकामः प्राङ्मुख उदङ्मुखो वा यशस्कामो जीवत्पितृमातृकेतरो दक्षिणामुखो धनकामः प्रत्यङ्मुखो भूमिसृष्टदक्षिणपाद आसनारूढस्वयमपादोऽन्तर्जानुकरो दक्षि-

यदिकृतपानीयपात्री दक्षिणावर्त्तेन चतुष्कोणमण्डलं कृत्वा लोहताम्रस्रुवभवादिदुष्टभस्मकांस्यकदल्यादिपत्रपुष्पपलाशपत्रेतरपात्रं विधाय प्रक्षाल्य च आत्मानं पात्रञ्च दक्षिणक्रमेण जलेन वेष्टयित्वा तदुपरि लोहेतरपात्रान्तरेण दत्ताभ्यां प्रतिषिद्धेतरमन्नादिकं स्थापयित्वा अन्नं दृष्ट्वा प्रहृष्येत्। अस्माकं नित्यमेवास्तु इत्यभिलप्य संप्रोक्ष्य आचाराचतुष्कोणमण्डलाभ्यन्तरे जललिखितचक्रोपरि ॐ नारायणाय नम इत्यन्नं सकलं मध्ये दद्यात्। तत्पार्श्वे ॐ भुवः पतये स्वाहा ॐ भुवनपतये स्वाहा ॐ भूतानां पतये स्वाहा। इति बलिचतुष्टयं दद्यात्। तदिदं सोपकरणमन्नं ॐ विष्णवे नम इत्युच्चार्य्य तदग्रं किञ्चित् ॐ विश्वक्सेनाय नम इति दत्त्वा अन्नोपरि विष्णुनिर्म्माल्यतुलसीपत्रं प्रक्षिप्य विष्णुपादोदकं पुरा न गृहीतञ्चेदिदानीम्।

"ॐ क्षण क्षण महाबाधो भक्तानामार्त्तिनाशन!।
सर्व्वपापप्रशमनं पादोदकं प्रयच्छ मे॥"

इति गृहीत्वा इष्टदेवतानामपरैरितं श्रुत्वा स्वयं विरच्यार्य्य वा ॐ अमृतोपस्तरणमसि स्वाहा इत्यनेन पीत्वा

"ॐ अकालमृत्युहरणं सर्व्वव्याधिविनाशनम्।
विष्णोः पादोदकं पुण्यं शिरसा धारयाम्यहम्॥"

इत्यनेन पादोदकशेषं शिरसि दद्यात्।

"ॐ उच्छिष्टभोजिनस्तस्य वयमुच्छिष्टकाङ्क्षिणः।
येन लीलावराहेण शिरण्याक्षो निपातितः॥"

इत्युक्त्वा अङ्गुष्ठागामिकाभ्यां घृतमुतस्रोकमन्नमादाय मध्यमौनी सांगुष्ठसर्व्वाङ्गुलिभिर्व्वा ॐ प्राणाय स्वाहा इत्यनेन मुखे दत्त्वा यदन्नञ्चिन्नं निगिरेत्। एवं ॐ अपानाय स्वाहा ॐ समानाय स्वाहा ॐ उदानाय स्वाहा ॐ व्यानाय स्वाहा। ततो वीर्य्यकामो मौनी भुञ्जीत। ततः प्रथमं द्रवयुक्तमधुरं मध्ये कठिनाम्लवणानि अन्ते द्रवयुक्तकटतिक्तानि यथाभाग क्षीरान्तं सांगुष्ठैरुत्तरसर्व्वाङ्गुलिभिः अनतिद्रुतं भुञ्जीत। पश्चादधिकं जलादिकं न पातव्यम्। जलक्षीरदधिघृतमधुशाकशुक्तमांसेतरद्रव्याणां शेषं रक्षणीयम्। भोजने संपूर्णे तु मांसभोजने करं प्रक्षाल्य तदभोजने तु करमप्रक्षाल्यैव सव्येन हस्तेन जलं गृहीत्वा ॐ अमृतापिधानमसि स्वाहा इति जलगण्डूषं गृहीत्वा, सान्नं तज्जलशेषं ॐ क्षीरोदार्णवनिलये पद्मान्तर्निवासिनां। उच्छिष्टभागिनामन्नमत्तव्यमुपतिष्ठतामिति भूमौ निक्षिपेत्। भोजनकाले तु विड्वालकर्म्मकरणमेत्यागः। विड्वालकृकलासौ न दोषः। ततः स्थानान्तरं न गच्छेत्। पराङ्मुखदृष्टिर्मुखश्चेत्यमपनीय वस्त्रादिना शिरोवर्णमर्थार्द्धं दन्तेभ्यो गृहीत्वा मध्यं रक्षपानघृतादिकं विना आचमनेत्। यज्ञे कृते यदि न निःसरति तदा न दोषः।

ततो विघ्नाश्च संहृत्य जलगण्डूषैर्मुखाभ्यन्तरं संशोध्य पाणी पादौ च प्रक्षाल्य आसनस्य एव भूमौ पादौ दत्त्वा हिराचम्य सुखं तुलसीपत्रादिना संशोध्य दक्षिणपादाङ्गुष्ठे दक्षिणहस्तेन—

"ॐ अङ्गुष्ठमात्रपुरुषो ह्यङ्गुष्ठश्च समाश्रितः।
ईशः सर्व्वस्य जगतः प्रभुः प्रीणातु विश्वभृक्॥"

इति मन्त्रेण जलं दद्यात्। ततो मह्यीमार्ज्जनाभावे अशुचित्वादविलम्बमेव भोजनपात्रमुद्धृत्य तत् स्थानं उच्छिष्टमपनीय गोमयोदकाभ्यां संगृह्य सिञ्चेत्। सुस्थः प्रशान्तचित्त आसने उपविश्याभीष्टदेवतानाम स्तुत्वा—

"ॐ अग्निराप्याययत्वन्नं पार्थिवं पवनेरितः।
दत्तावकाशो नभसा जरयत्वस्तु मे सुखम्॥
अन्नं बलाय मे भूमेरपामग्नेर्निलस्य च।
भवत्वेतत्परिणतौ ममास्त्वयाहतं सुखम्॥
प्राणापानसमानानामुदानव्यानयोस्तथा।
अन्नं तुष्टिकरञ्चास्तु ममास्त्वयाहतं सुखम्
अगस्तिरग्निर्व्वडवानलश्च
भुक्तं ममान्नं जरयत्वशेषम्।
सुखं ममैतत्परिणामसम्भवं
यच्छत्वरोगं मम चास्तु देहे॥
विष्णुः समस्तेन्द्रियदेहदेहि-
प्रधानभूतो भगवान् यथैकः।
सत्येन तेनान्नमशेषमेत-
दारोग्यदं मे परिणाममेतु॥
विष्णुरत्ता तथैवान्नं परिणामञ्च वै यथा।
सत्येन तेन मद्भुक्तं चीर्य्यत्वन्नमिदं तथा॥"

इत्युच्चार्य्य वामहस्तेनोदरं परिस्पृशेत्। ततः पादप्रक्षालनानन्तरं वामपार्श्वेन किञ्चित्कालं शयितव्यम्। ततस्ताम्बूलादि सुखवासनार्थं भोक्तव्यम्॥ * ॥ अथ भोजनादिदानफलम्।

"भोजनाच्छादनं दत्त्वा दत्त्वा चोपानहौ द्विज!।
स स्वर्गलोकं संभुज्य सर्व्वकामोऽत्र जायते॥
विद्यां भक्त्या प्रयच्छेद्यः परंब्रह्मक्षयक्षौ विदे।
विद्यार्थिने च विप्राय यो दद्याद्भोजनं नरः॥
अन्नं प्राणो जलं प्राणः प्राणश्चौषधसूयते।
तस्मादौषधदानेन दत्ताः स्युरसवो द्विजाः॥
इति पराशरस्मृतिः॥

भोजने प्रतिषेधो यथा,—

"ताम्रपात्रे पयःपानमुच्छिष्टे घृतभोजनम्।
दुग्धे च लवणं दद्यान्मद्यो गोमांसभक्षणम्॥
यः शूद्रेण समाकृष्टो भोजनं कुरुते द्विजः।
सुरापश्च न विज्ञेयः सर्व्वधर्म्मबहिष्कृतः॥
स्नानं रजकवर्गेषु भोजनं गणिकालये।
शयनं पूर्व्वपादे च ब्रह्महत्या दिने दिने॥"
इति कर्म्मलोचनम्॥

अथ शिशूनां प्रथमान्नभोजनादिकादि। यथा, यमः।

"ततोऽन्नं षष्ठे मासि षष्ठे कार्य्यं यथाविधि।
कर्णे वाथ कर्त्तव्यं यदेष्टं मङ्गलं कुले॥"

षष्ठ इति सुखः कल्पः प्रागुक्तन्यायात्। कृत्यचिन्तामणौ।

"अन्नस्य प्राशनं प्रोक्तं मासि षष्ठेऽष्टमे बुधैः।
क्षीरान्नं पञ्चमे मासि सप्तमे प्रजगौ मुनिः॥
द्वादशीसप्तमीनन्दारिक्तासु पञ्चपर्व्वसु।
बलमायुर्यशो हन्यात् शिशूनामन्नभोजनम्॥"

भुजबलभीमे।

"षष्ठे मासि निशाकरे शुभकरे रिक्तेतरे वै तिथौ
सौम्यादित्यसितेन्दुजीवदिवसे पक्षे च कृष्णेतरे।
प्राजेशादितिपौष्णवैष्णवयुगे हैस्तादिपञ्चोत्तरे-
राग्नेयाप्यतिपित्र्यभैश्च नितरामन्नादिभक्षे शुभम्॥"

युगैरिति प्राजेशादौ प्रत्येकं सम्बध्यते अत्रापि तिथ्यृक्षादिविशुद्धिं विवर्जयेत्।

"दृषद्वन्द्वधनुर्मीनकन्यालग्नेऽन्नभक्षणम्।
त्रिकोणाष्टकयुकान्त्यगृहा यद्वत्तया फलम्॥
दुष्टः शुक्षधरो लग्नात् षष्ठाष्टस्थोऽन्नभक्षणे॥"

मार्कण्डेयपुराणम्।

"देवतापुरतस्तस्य पितुरङ्कगतस्य च।
बलङ्कृतस्य दातव्यमन्नं पात्रे च काञ्चने॥
मध्याह्नक्षणकोपेतं प्राशयेत् पायसन्ततः।
कृतप्राशनमुत्सङ्गे मातुर्बालन्तु तं त्यजेत्॥
देवाग्नेयोऽथ विन्यस्य शिल्पभाञ्जानि सर्व्वशः।
शास्त्राणि चैव शस्त्राणि ततः पश्येत्तु लक्षणम्॥
प्रथमं यत् सृगेद्वालः शिल्पभाण्डं स्वयं तथा।
जीविका तस्य बालस्य तेनैव तु भविष्यति॥"

सोमवारे दोषमाह भोजराजः।

"वाचालो बलवान् दिने दिनपतेरत्यन्तदीप्राननो
देही हीनहुताशनः शिशिरगौ कौले रुजा पीड़ितः।
बौधे भोगसुखोदयी प्रथमभुग्जीवे चिरायुः सुखी
शुक्रे सौख्यबलान्वितोऽतिसुभगो मन्दे च मन्दानलः॥"
इति ज्योतिस्तत्त्वम्॥

तद्दैदिकपर्य्यायाः। आवयति १ भवति २ बभस्ति ३ वेति ४ वेवेष्टि ५ अविष्यन् ६ वष्टि ७ भनयः ८ वक्ष्यामः ९ क्षरति १० इति दशाग्निकर्म्मागः। इति वेदनिघण्टौ २ अध्यायः॥

(तथा च सुश्रुते सूत्रस्थाने ४६ अध्याये।

"वक्ष्याम्यतः परं क्षुद्रक्षमाहारस्योपकल्पनाम्।
घृतं काणांयसे देयं पेया देया तु राजते॥
फलानि सर्व्वभक्ष्यांश्च प्रदद्याद्दैदलेषु च।
परिशुष्कप्रदिग्धानि मौद्गलेषु प्रकल्पयेत्॥
प्रदद्याच्च रसांश्चैव राजतेषूपहारयेत्।
कट्वराणि खड़ांश्चैव सर्व्वान् शैलेषु दापयेत्॥
दद्यात्ताम्रमये पात्रे सुशीतं सुव्रतं पयः।
पानीयं पानकं मद्यं स्फटिकपात्रेषु शीतलेषु शुभेषु च।
दद्याद्वैदूर्य्यपात्रेषु रागषाड़वसङ्कटान्॥

पुरस्तादिमले पात्रे सुविस्तीर्णे मनोरमे ।
सूदः सूपौदनं दद्यात् प्रदेहांश्च सुसंस्कृतान् ॥
फलानि सर्व्वभक्ष्यांश्च परिशुष्काणि यानि च ।
तानि दक्षिणपार्श्वे तु भुञ्जानस्योपकल्पयेत् ॥
प्रदद्यादपि रसांश्चैव पाणीयं पानकं पयः ।
खड्डान् यूषांश्च पेयांश्च सर्व्वे पार्श्वे प्रदापयेत् ॥
सर्व्वान् गुडविकारांश्च रागषाड्वसदृक्तान् ।
पुरस्तात् स्थापयेत्प्राज्ञो द्वयोरपि च मध्यतः ॥
एवं विज्ञाय मतिमान् भोजनस्योपकल्पनाम् ।
भोक्तारं विजने रम्ये निःसम्बाधे सुभे शुचौ ॥
सुगन्धिपुष्पररचिते समे देशेऽथ भोजयेत् ।
पूर्व्वं मधुरमश्नीयात्तथैवाम्ललवणौ रसौ ॥
पश्चात्तेषान् रसान् वैद्यो भोजनेष्ववचारयेत् ।
आदौ फलानि भुञ्जीत दाडिमादीनि बुद्धिमान् ॥
ततः पेयांस्ततो भोज्यान् भक्ष्यांश्चित्रांस्ततःपरम् ।
घनपूर्व्वं समश्नीयात् केचिदाहुर्विपर्य्ययम् ॥
आदावन्ते च मध्ये च भोजनस्य तु शस्यते ।
अतीवायतयामासु चपा वेष्वृतुषु स्मृताः ॥
तेषु तत्प्रत्यनीकाणि भुञ्जीत प्रातरेव तु ।
वेषु चापि भवेद्युक्त दिवसा भृशमायताः ॥
तेषु तत्कालविहितमपराह्णे प्रशस्यते ।
रजन्यो दिवसाश्चैव येषु चापि समाः स्मृताः ॥
क्षचासममहोरात्रं तेषु भुञ्जीत भोजनम् ।
तस्मात् सुसंस्कृतं युक्त्या दोषैरेतैर्विवर्ज्जितम् ।
यथोक्तगुणसम्पन्नमुपसेवेत भोजनम् ॥"

भोजनपात्रं, क्ली, (भोजनस्य पात्रम् ।) भक्ष्यद्रव्याधारः । यथा,—

"तिष्ठन्ति यत्र नवकाञ्चननिर्म्मितानि
श्रेणीकृतानि परितस्तु कटोरकाणि ।
राकाशशाङ्कनवमण्डलभास्करं यत्
क्षौणीभृतां रजतनिर्म्मितथालकं स्यात् ॥
यथोर्द्धप्रतिमादर्शिकांस्यमादर्शवत् शुचि ।
पात्रं दृढं सुविस्तीर्णं स्त्रीणामत्यन्तदुर्लभम् ॥
पत्रावली भवति वा नृपभोजनाय
निर्लुनुजालरहितामलवारिधौता ।
पालाशभूरुहदलैरचिता मनोज्ञा
ताडिन्यपर्णकगणैः परिवेष्टिता च ॥"

इति पाकराजेश्वरः ॥

भोजपतिः, पुं. (भोजानां भोजवंशीयानां पतिः ।) कंसराजः । यथा,—

"मल्लानामशनिर्नृणां नरवरः स्त्रीणां स्मरो मूर्त्तिमान्
गोपानां स्वजनोऽसतां क्षितिभुजां शास्ता स्वपित्रोः शिशुः ।
मृत्युर्भोजपतेर्विराडविदुषां तत्त्वं परं योगिनां
वृष्णीनां परदेवतेति विदितो रङ्गगतः साग्रजः ॥"

इति श्रीभागवते १०स्कन्धे ४३ अध्याये १७ श्लोकः ॥

भोजपुरं, क्ली, (भोजस्य भोजराजस्य पुरम् ।) स्वनामख्यातदेशः ।

"आचिरभूद्भोजपुरे साकमसुरवरैः ।
हरे रेवापारे सबली नूनं ते बधीयांसः ॥"

इति विदग्धमुखमण्डनम् ॥

भोजयिता, [तृ] त्रि, (भुज्+णिच्+कर्त्तरि तृच् ।) भोजनकारयिता । भोगप्रयोजकः । यथा,

"कर्त्ता च देही भोक्ता च आत्मा भोजयिता सदा ।
भोगो विभवभेदश्च निष्कृतिर्मुक्तिरेव च ॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २३ अध्याये ॥

भोजाधिपः, पुं, (भोजस्य अधिपः ।) कंसराजः । इति शब्दरत्नावली ॥

भोज्यं, त्रि, (भुज्यते इति । भुज्+कर्म्मणि+ण्यत् । "भोज्यं भक्ष्ये ।" ७ । ३ । ६९ । इति निपातनात् न क्रुत्वम्) भोजनीयद्रव्यम् । यथा,

"भोज्यं भोजनशक्तिश्च रतिशक्तिर्वरा स्त्रियः ।
विभवो दानशक्तिश्च नाल्पस्य तपसः फलम् ॥"

इति चाणक्ये ५१ श्लोकः ॥

अपि च ।

"आहारं षड्विधं चूष्यं पेयं लेह्यं तथैव च ।
भोज्यं भक्ष्यं तथा चर्व्व्यं गुरु विद्यादधोत्तरम् ॥"

चूष्यं इक्षुदण्डादि । पेयं पानकशर्करोदकादि । लेह्यं रसालाक्षयितादि । भोज्यं भक्तरूपादि । भक्ष्यं लड्डुकमण्डकादि । चर्व्व्यं चिपिटचणकादि । इति भावप्रकाशः ॥ (पितॄणां क्षमार्थं देये अन्नादौ च ॥)

भोज्यदानस्यैतिकर्त्तव्यता यथा । ॐ अद्यामुकेमासि अमुके पक्षे अमुकतिथौ अमुकगोत्रस्य पितुरमुकदेवशर्म्मणः एकोद्दिष्टविधिकसाम्वत्सरिकश्राद्धवासरे अमुकगोत्रस्य पितुरमुकदेवशर्म्मणोऽत्यन्तस्वर्गकाम इदं सघृतसवस्त्रोपकरणामान्नभोज्यमर्च्चितं श्रीविष्णुदैवतं यथासम्भवगोत्रनाम्ने ब्राह्मणायाहं ददानि । ततो दक्षिणा । ॐ अत्रेत्यादि कृतैतत्सघृतसवस्त्रोपकरणामान्नभोज्यदानकर्म्मणः साङ्गतार्थं दक्षिणामिदं काञ्चनमूल्यं श्रीविष्णुदैवतं यथासम्भवगोत्रनाम्ने ब्राह्मणायाहं ददानि । कृतैतत्सघृतसवस्त्रोपकरणामान्नभोज्यदानकर्म्माच्छिद्रमस्तु । इति श्राद्धप्रयोगतत्त्वम् ॥

भोज्यसम्भवः, पुं, (सम्भवत्यस्मादिति सम्भव उत्पत्तिकारणम् । भोज्यं सम्भवोऽस्य ।) शरीरस्यरसधातुः । इति शब्दचन्द्रिका ॥

भोटाङ्गः, पुं, (भोटस्तज्जातिरङ्गमस्य ।) देशविशेषः । इति शब्दरत्नावली । भोटान् इति भाषा ॥ (भोटान्तोऽपि पाठः ॥)

भोभो, व, सम्बोधनम् । इति हलायुधः ॥ (यथा, महानाटके । १ । १४ ।

"भोभो भुजङ्ग ! तरुपल्लवलोलजिह्व ! ॥")

भोलानाथः, पुं, शिवः । यथा,—

"ब्रह्मणो वचनं श्रुत्वा भोलानाथः कृपानिधिः ।
संहृत्य तां महाज्वालां सगणोऽन्तरगान्मुने ! ॥"

इति श्रीशिवपुराणोत्तरखण्डे तुण्डिवामदेवसंवादे वाराणसीमाहात्म्ये पञ्चक्रोशीयात्रायां महाकालगणोत्पत्तिर्नाम २५ अध्यायः ॥ * ॥

पुस्तकान्तरे भोलानाथ इत्यत्र महादेव इति पाठः ॥

भौलिः, पुं, उष्ट्रः । इति त्रिकाण्डशेषः ॥

भौतः, पुं, (भूतानि प्राणिनोऽधिकृत्य प्रवृत्तः । भूत+अण् ।) भूतयज्ञः । बलिकर्म्म । यथा,—

"होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम् ॥"

इत्याह्निकतत्त्वम् ॥ देवलः । इति शब्दमाला ॥ (भिक्षादिभ्योऽण् । भूतसङ्घः । तस्येदमित्यण् ।) भूतसम्बन्धिनि, त्रि ॥

भौतिकं, क्ली, (भूतानां विकार इति ठक् ।) सुक्ता । इति राजनिर्घण्टः ॥ त्रि, भूतसम्बन्धि ॥ (भूतानि चित्यादीनि तद्विकारश्च गोघटवृक्षादयः ।

"आहङ्कारिकत्वश्रुतेर्नं भौतिकानि ।" इति । २ । २० । सांख्यसूत्रम् ॥ सृष्टिविशेषश्च । तथाच । "ईश्वरकृष्णकृतसांख्यकारिकायाम् । अष्टविकल्पो दैवस्तैर्य्यग्योनश्च पञ्चधा भवति । मानुष्यश्चैकविधः समासतो भौतिकः सर्गः ॥ अत्र च सर्गे चैतन्योत्कर्षापकर्षविशेषात् तारतम्यम् । यथा, तत्रैव । ऊर्द्धं सत्त्वविशालस्तमोविशालश्च मूलतः सर्गः । मध्ये रजोविशालो ब्रह्मादिस्तम्बपर्य्यन्तः ॥

भौतिकः, पुं, महादेवः । इति त्रिकाण्डशेषः ॥ (उपद्रवः । व्याधादिः । चक्षुरादि । शरीरादि ॥ (भूतेषु महदादिचित्यन्तेषु आत्मबुद्ध्या उपासकाः भौतिकाः । बौद्धविशेषाः ।

"भौतिकास्तु शून्यं पूर्णं महासन्तानाभिमानिकाः ॥"

इति पातञ्जलयोगसूत्रव्यासभाष्यटीकायां वाचस्पतिमिश्रधृतवचनम् । १ । १६ ॥)

भौती, स्त्री, (भूतानां भूतयोनीनामियमिति । भूत+अण् । ङीप् । तस्यां भूतानामधिकारित्वविद्यमानत्वात्तथात्वम् ।) रात्रिः । इति हेमचन्द्रः । १४२ ॥

भौत्यः, पुं. (भूतेरपत्यं पुमान् । भूतिः+अपत्यार्थे ष्यञ् ।) भृतिमुनिपुत्रश्चतुर्दशो मनुः । यथा,—

मार्कण्डेय उवाच ।

"अतः परन्तु भौत्यस्य त्वसुतृप्तिं निशामय
देवान्नृपांस्तथा पुत्रांस्तथैव वसुधाधिपान् ॥
बभूवाङ्गिरसः पुत्रो भूतिर्नाम्नातिकोपनः ।
तस्य भ्राता सुवर्चाभूद् यज्ञे तेन निमन्त्रितः ॥
ययासुः शान्तिनामानं शिष्यमाह महामुनिः ।
सदोद्युक्तं सदाचारसुदारं मुनिसत्तमम् ॥
भूतिरुवाच ।
अहं यज्ञं गमिष्यामि भ्रातुः शान्ते ! सुवर्चसः ।
तेनाहूतस्त्वया चेह यत् कर्त्तव्यं ब्रूहि तत् ॥
अतिजागरणं वह्नेस्त्वया कार्य्यं ममाश्रमे ।
तथा तथाप्रमत्तेन यथाग्निर्न शमं व्रजेत् ।
इत्याज्ञप्तो तथेत्युक्तः स तु शिष्येण शान्तिना ।
जगाम यज्ञं तं भ्रातुराहूतः सन् यवीयसः ॥
प्रशान्तस्तावदनलो योऽसौ भूतिपरिग्रहः ।
तं दृष्ट्वा सोऽनलं शान्तं शान्तिरत्यन्तदुःखितः ।
भीतश्च भूतेर्बहुधा चिन्तयन् स महामुनिः ॥

भौत्यः

मार्कण्डेय उवाच ।
बहुधैवं विचिन्यासौ भौतस्तस्य तदा गुरोः ।
ययौ मतिमतां श्रेष्ठः शरणं जातवेदसम् ॥
न चकार ततः स्तोत्रं समाहितमनाः ।
भूत्वैकचित्तो मेदिन्यां न्यस्तजानुः कृताञ्जलिः ॥
न तूष्णीं संस्तुतस्तेन भगवान् हव्यवाहनः ।
ज्वालामालावृततनुस्तस्यावीदयतो मुने ! ॥
परितुष्टोऽस्मि ते विप्र ! भक्त्या यत्ते स्तुतिः कृता ।
वरं ददामि भवतः प्रार्थ्यतां यत्तवेप्सितम् ॥
भगवन् ! कृतकृत्योऽस्मि यत्त्वां पश्यामि रूपिणम् ।
तथापि भक्तिनम्रस्य भगवन् ! श्रूयतां मम ॥
समाराधात् संयक्ते यत्तोऽधिष्ठां विभावसो ! ।
तत्त्वयाधिष्ठितं सोऽद्य पूर्ववत् पश्यतां द्विजः ॥
तथान्यदपि मे देव ! प्रसादं कुरुते यदि ।
पुत्रो विशिष्टो भवतु निरपत्यस्य मे गुरोः ॥
यथा च मैत्रीं तनये स करिष्यति मे गुरुः ।
तथा समस्तसत्त्वेषु भवत्वस्य मनो मृदु ॥

अग्निरुवाच ।
गुरोरर्घं त्वया ब्रह्मन् ! याचितं यदरद्दृढम् ।
नात्मार्थं तेन मे प्रीतिस्त्वय्यतीव महामुने ! ॥
भविष्यत्येतदखिलं गुरोर्यत्न प्रार्थितं त्वया ।
मैत्री समस्तभूतेषु पुत्रस्तस्य भविष्यति ॥
मन्वन्तराधिपः पुत्रो भौत्यो नाम भविष्यति ।
महाबलो महावीर्यो महाप्राज्ञो गुरोस्तव ॥
इत्युक्त्वा भगवानग्निः पश्यतस्तस्य वै मुने ! ।
प्रभूतादर्शनः सद्यः प्रदीप्तो निर्ययौ यथा ॥
तस्मिन्नन्तरे सोऽपि गुरुस्तस्य महात्मनः ।
भानुर्यवीयसो वज्राद्राजगाम स्वमाश्रमम् ॥
तस्यागतस्य शिष्योऽसौ चक्रे पादाभिवन्दनम् ।
गृहीतासनपूजश्च तमाह स तदा गुरुः ॥
वत्सानिष्टाहुतिं त्वयि मे तथान्येष्वपि जन्तुषु ।
न वेद्मि किमिदं त्वत्तेऽनृतेनैतत् कथयाशु मे ॥
ततः स प्राञ्जलिस्तस्मै सर्वमाचार्याय महात्मने ।
अग्निनाशादिकं विप्र ! समाचष्ट यथातथम् ॥
तच्छ्रुत्वा स परिष्वज्य स्नेहार्द्रनयनो गुरुः ।
शिष्याय प्रददौ वेदान् साङ्गोपाङ्गान् महात्मने ॥
भौत्यो नाम मनुस्तस्य पुत्रो भूतिरजायत ।
तस्य मन्वन्तरे देवानृषींश्च भृणु मे मुने ॥
भविष्यस्य भविष्यांस्तु गदतो मम विस्तरात् ।
त्रैयेन्द्रो यश्च भविता तस्य विख्यातकर्मणः ॥
चाक्षुषाश्च कनिष्ठाश्च पवित्रा भानिरात्मजाः ।
मनोरुक्षाश्च इत्येते पञ्च देवगणाः स्मृताः ॥
शुचिरिन्द्रसखा तेषां त्रिदशानां भविष्यति ।
महाबलो महावीर्यः सर्वैरिन्द्रगुणैर्युतः ॥
अग्नीध्रयज्ञबाहुश्च शुचिर्युक्तोऽथ माधवः ।
शुक्रो जितश्च सप्तैते तदा सप्तर्षयः स्मृताः ॥
गुरुर्गभीरो ब्रह्मश्च भरद्वाजस्तथैव च ।
स्त्रीमानी च प्रवीरश्च विष्णुः संक्रन्दनस्तथा ॥
तेजस्वी सबलश्चैव भौत्यस्यैते मनोः सुताः ।
चतुर्दशं मयैतत्ते मन्वन्तरमुदाहृतम् ॥"
इति मार्कण्डेयपुराणे मन्वन्तरानुवर्णननामाध्यायः ।

भौमिकः

भौमः, पुं, (भूमेरपत्यं । भूमि + शिवादित्वादण् ।) मङ्गलग्रहः । (यथा, बृहत्संहितायाम् । ५।६०।
"पश्यन् यस्तं सौम्यो
घृतमधुतैलक्षयाय राज्ञां च ।
भौमः समरविमर्दं
शिबिकोपं तस्करभयञ्च ॥")
नरकराजः । (यथा, हरिवंशे । १२० । १४ ।
"तासां पुरवरं भौमोऽकारयन्मणि-
पर्व्वतम् ॥")
तस्येदमित्यण् । भूमिभवे, त्रि । इति मेदिनी । मे, २२ ॥ (यथा, महाभारते । १ । १३६ । २० ।
"भौमेन प्राविशद्भूमिं पार्व्वतेनाभवद्गिरिः ।
अन्तर्धानेन चास्त्रेण पुनरन्तर्हितोऽभवत् ॥")
अमरः । इति धरणिः ॥ रक्तपुनर्नवा । इति राजनिर्घण्टः ॥

भौमजलं, क्ली, (भूमि + अण् ।) भूमिसम्बन्धिसलिलम् । तत् त्रिविधं यथा,—
"भौममम्भो निगदितं प्रथमं त्रिविधं बुधैः ।
जाङ्गलं परमानूपं ततः साधारणं क्रमात् ॥"
तेषां लक्षणानि गुणाश्च ।
"अल्पोदकोऽल्पवृक्षश्च पित्तरक्तामयान्वितः ।
देशोऽनूप इति ख्यात आनूपं तद्भवं जलम् ॥
मिश्रवृक्षस्तु यो देशः स हि साधारणः स्मृतः ।
तस्मिन् देशे यदुदकं तत्तु साधारणं स्मृतम् ॥
जाङ्गलं सलिलं रूक्षं लवणं लघु तत्तनु ।
वह्निकृत् कफहृत् पथ्यं विकारान् कुरुते बहून् ॥
आनूपं वार्य्यभिष्यन्दि स्वादु स्निग्धं घनं गुरु ।
वह्निकृत् कफकृन्नित्यं विकारान् कुरुते बहून् ॥
साधारणन्तु मधुरं दीपनं शीतलं लघु ।
तर्पणं रोचनं तृष्णादाहदोषक्षयप्रणुत् ॥"
अथ भौमानामेव नादेयादीनां लक्षणानि गुणाश्च । तत्र नादेयस्य लक्षणं गुणाश्च ।
"नद्या नदस्य वा नीरं नादेयमिति कीर्त्तितम् ।
नादेयमुदकं रूक्षं वातलं लघु दीपनम् ।
अनभिष्यन्दि विशदं कटुकं कफपित्तनुत् ॥
नद्यः शीघ्रवहा लघ्वः सर्व्वा याश्चामलौदकाः ।
गुर्व्व्यः शैवलसंछन्ना मन्दगाः कलुषाश्च याः ॥
नदीसरस्तडागस्थं कूपप्रस्रवणादिजं ।
उदकं देशभेदेन गुणान् दोषांश्च लक्षयेत् ॥"
इति भावप्रकाशः ॥

भौमनः, पुं. (आदिसर्गे भवतीति भू + कर्मणि मनु । भूमा ब्रह्मा । तस्यापत्यम् । अण् । मनन्तत्वात् न टेर्लोपः ।) विश्वकर्म्मा । इति पुराणम् ॥ (यथा, महाभारते । १।२२६ । १२ ।
"सर्व्वज्ञं तं तपसा भौमनो भुवनप्रभुः ।
प्रजापतिरनिर्देश्यं यस्य रूपं रविरिव ॥")

भौमरत्नं, क्ली, (भूमौ जातं । भूमि + अण् । तादृशं रत्नम् ।) प्रवालम् । इति राजनिर्घण्टः ॥

भौमिकः, त्रि, भूम्यधिकारी । भूमिमधिकरोतीति यः । इत्यर्थे ठिकप्रत्ययेन निष्पन्नः ॥ (भूमिस्थितः । यथा, मनौ । ५ । १२२ ।
"सृष्टन्ति विन्दवः पादौ य आचामयतः परान् ।
भौमिकैस्ते समा ज्ञेया न तैरप्रयतो भवेत् ॥")

भौमी, स्त्री, (भूम्यां जाता । भूमिः + अण् + स्त्रीत्वात् ङीप् ।) सीता । इति शब्दरत्नावली ॥

भौरिकः, पुं, (भूरि सुवर्णमधिकरोतीति ठक् ।) कनकाध्यक्षः । इत्यमरः । २ । ७ ॥

भ्राश, ऋ ग ट ड भासि । इति कविकल्पद्रुमः ॥ (भ्वा० आत्म०-अक०-सेट् ।) ऋ अवभ्राशत् । ग भ्राशे अवभ्राशे । ट भ्राशथुः । ड भ्राशते । इति दुर्गादासः ॥

भ्राश, य ड भासि । इति कविकल्पद्रुमः ॥ (दिवा० आत्म०-अक०-सेट् ।) य ड भ्राश्यते । इति दुर्गादासः ॥

भ्राम, ऋ ग ड ट भासि । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट् ।) ऋ अवभ्रामत् । ग भ्रामे अवभ्रामे । ड भ्रामते । ट भ्रामथुः । इति दुर्गादासः ॥

भ्राम, य ड भासि । इति कविकल्पद्रुमः ॥ (दिवा० आत्म०-अक०-सेट् ।) य ड भ्राम्यते । इति दुर्गादासः ॥

भ्यस, ड भये । इति कविकल्पद्रुमः ॥ (भ्वा० आत्म०-अक०-सेट् ।) अन्तःस्थाद्युक्तः । ड भ्यसते । इति दुर्गादासः ॥

भ्रंशः, पुं, (भ्रंश + भावे घञ् ।) अधःपतनम् । यथा । भ्रंशो भ्रंशो यथोचितात् । इत्यमरः । २ । १८६ । २३ ॥ यथोचितात् यथाप्राप्तात् भ्रंशोऽधःपतनम् । इति भरतश्रुटीकायां भरतः ॥ (यथा, कामन्दकीये नीतिसारे ।२।३६।
"उद्वेजनादधर्म्मस्तु तस्माद् भ्रंशो महीपतेः ॥")
नाशः । यथा, बृहत्संहितायाम् । ४६ । २५ ।
"शाखाभङ्गैकक्षात्
वृक्षाणां निर्हेतुप्ररोद्यागम् ।
ध्वनने देशभ्रंशं
रुदिते च व्याधिबाहुल्यम् ॥")

भ्रकुंशः, पुं, (भ्रुवा कुंसो भाषणं यस्य । पृषोदरादित्वात् सस्य शः ।) स्त्रीवेशधारी नर्त्तकपुरुषः । इत्यमरटीकायाम् ॥ (अस्य विशेषो भ्रकुंसशब्दे द्रष्टव्यः ॥)

भ्रकुंसः, पुं, (भ्रुवा कुंसो भाषणं शोभा वा यस्य सः ।६। ३ । ६१ । इत्यस्य "भ्रुकुंसादीनामकारो भवतीति वक्तव्यम् ।" इति वार्त्तिकोक्त्या उकारस्यात्वम् ।) स्त्रीवेशधारी नर्त्तकपुरुषः । तत्पर्य्यायः । भुकुंसः २ भृकुंसः ३ । इत्यमरः । १।७४४॥ भृकुंसः ४ भ्रकुंशः ५ । इति तट्टीका ॥

भ्रकुटिः, स्त्री, (भ्रुवोः कुटिः कौटिल्यम् । "भ्रुकुंसादीनामकारो भवतीति वक्तव्यम् ।" ६।३।६१ । इत्यस्य वार्त्तिकोक्त्या । उकारस्यात्वम् ।) क्रोधादिना भ्रुवः कौटिल्यम् । इत्यमरः ।१।७। ६० ॥ अस्या रूपान्तराणि । भुकुटिः । भृकुटिः । भ्रुकुटिः । भ्रकुटी । भ्रुकुटी । (यथा, माघे ।१५।८।
"भ्रुकुटीकुटीरितललाटमाननम् ।")
भृकुटी । भ्रुकुटी । इति भरतः ॥

भ्रम, भ्रन्ट्टे । इति कविकल्पद्रुमः । (भ्वा०-पर०-सक०-सेट् ।) रेफयुक्तः । भ्रमति । इति दुर्गादासः ।

भ्रम्, ऋ य उ अधःपते । इति कविकल्पद्रुमः । (दिवा०-पर०-अक०-सेट् ।) भ्रम्यति । ऋ अभ्रमत् । अभ्रंक्षीत् ।

भ्रम्, ऋ उ ऌ अधःपते । इति कविकल्पद्रुमः । (भ्वा०-आत्म०-अक०-सेट् ।) ऋ अभ्रमत् । उ भंक्षिला भङ्क्ता । ऌ भंक्षते । इति दुर्गादासः ।

भ्रम, ऋ चारे । इति कविकल्पद्रुमः । (भ्वा०-पर०-अक०-सेट् ।) ऋ अभ्रमत् अभ्रमीत् । इति दुर्गादासः ।

भ्रम, भ य चारे । इति कविकल्पद्रुमः । (दिवा०-पर०-सक०-सेट् ।) भ य भाम्यति । इति दुर्गादासः ।

भ्रम, उ य ग चारे । इति कविकल्पद्रुमः । (भ्वा०-पर०-अक०-सेट् ।) उ भ्रमित्वा भ्रान्त्वा । ण भ्रामः भ्रमः । ज्वलादित्वात्णप्रत्ययेऽपि अनयप इत्यादिना घञ्यै भ्रम इत्येव । तेन ज्वलादावस्य पाठो निष्फल इति धातुप्रदीपादयः । वस्तुतस्तु । ज्वलादिपाठसामर्थ्यान्न घञ्यः । ण भ्रमेतुः बभ्रमतुः । य भ्रम्यति भ्रमति । चारः इह पादविक्षेपणम् ।

"न जाने को हेतुर्भ्रमति विषिने भिक्षुक इव ।"

भ्रमेतुः श्रिशोषधात् भीमादित्वच्च गत्यर्थविवक्षया सकर्मकत्वम् । इति दुर्गादासः ।

भ्रमः, पुं, (भ्रम अनवस्थाने इति । भ्रम+भावे घञ् ।) मिथ्याज्ञानम् । (यथा, राजतरङ्गिण्याम् । ३ । ४२३ ।

"देवी जगाद तं भद्र ! कौर्यं ते मनसि भ्रमः ।")

गत्यर्थायः । भ्रान्तिः २ मिथ्यामतिः ३ । इत्यमरः । १ । ५ । ४ । अमुनिर्गमः । क्लीवः । (यथा, रघौ । ९ । ३० ।

"व्यपत्रिनाथोऽपसृतस्य वायु-
र्विप्रात्मवत्त्वाक्षनुरुत्तमश्वः ।
चारीव चक्रभ्रमणप्रतेजाः
तदैव दक्षोत्तिरिवो विभाति ।"

"चक्रभ्रमं चक्राकारगत्योर्भावकर्म ।
अमोऽमुनिर्गमे भ्रान्तौ कुन्दादौ क्लिबियक्लवे ।"

इति मेदिन्यां मल्लिनाथः ।)

भ्रमणम् । इति मेदिनी । मे, २०६ । (यथा, कथासरित्सागरे । २८ । १६ ।

"इत्य दिशोऽवलोक्यन्तं भ्रमाय चक्रिकं-
सुतम् ।")

आपतते भ्रमरः नानात्मकं स्वप्नम् । भ्रमोद्विग्नः । विषयेषु संशयश्च । आदौ यथा । दैवे व्याकुलधीः । अन्तर्दी पीतलालसिः । सा दिङ्मात्रतया । द्वितीयो यथा । किंस्विन्नरो वा स्यादुतैवादिदुःखितस्तु संशयः । तदभावप्रकारो धीरेकतरप्रकारो तु निश्चयः । स संशयो भवेद् वा धीरेकत्राभावभावयोः । साधारण्यादिधर्मस्य ज्ञानं संशयकारणम् । दोषोऽप्रमाया जनकः प्रमायास्तु गुणो भवेत् । पित्तदूरत्वादिरूपो दोषो नानाविधः स्मृतः ।"

इति भाषापरिच्छेदः । १२० — १३२ ।

(भ्रमणशीले, त्रि । यथा, ऋग्वेदे । ६ । ६ । ४ ।

"अधभ्रमस्य उर्विया विभाति
यातयमानो अधिमानुषेषु ।"

"भ्रमो भ्रमणशीलो ज्वालासमूहः ।" इति तद्भाष्ये सायणः । रोगविशेषः । तद्यथा,—

"मूर्च्छा पित्ततमःप्राया रजःपित्तानिलाद्भ्रमः ।
चक्रवद्भ्रमतो गात्रं भूमौ पतति सर्व्वदा ।
भ्रमरोग इति ज्ञेयो रजःपित्तानिलात्मकः ।"

इति वैद्यकमाधवकृतनिदाननिश्चये मूर्च्छाधिकारे ।

तथाचास्य चिकित्सा ।

"शतावरी वराम्लद्राक्षासिद्धं पयः पिबेत् ।
सर्पिषं भ्रमनाशाय वीर्यं बाह्यालकस्य च ।
पिबेदुराभ्रभाक्षार्धं मधुकं भ्रमशान्तये ।
त्रिफलायाः प्रयोगो वा प्रयोगः पयसोऽपि वा ।

इति वैद्यकचक्रपाणिसंग्रहे मूर्च्छाद्यधिकारे ।)

भ्रमणं, क्लीं, (भ्रम+भावे ल्युट् ।) गमनविशेषः । पर्य्यटनम् । (यथा, भाषापरिच्छेदे । ७ ।

"भ्रमणं रेचनं स्यन्दनोर्द्ध्वज्वलनमेव च ।"

पुनःपुनर्गमनम् । यथा, देवीभागवते । १ । १ । ४ । ६ ।

"संसारेऽस्मिन्महाघोरे भ्रमणं नभचक्रवत् ।"

तथाच, कामन्दकीये । १ । २ ।

"नयाभिधूमसंरोधो दिङ्मोहो भ्रमणानि च ।"

"भ्रमणानि दिग्भ्रमान् दुर्गमप्रदेशेषु चंक्रमणानि"

भ्रमत्यस्मिन्नेनेति वा । भ्रम+ल्युट् ।) मण्डलम् । यथा, सूर्य्यसिद्धान्ते । १२ । ७६ ।

"कालेनाल्पेन भ्रमणं शुक्लेरुषभ्रमणान्वितः ।
यदः कालेन महता मण्डले मण्डति भ्रमन् ।"

अत्यभ्रमणं मण्डलपरिधिमण्डलमानमित्यर्थः । उत्तरघटे मण्डले मण्डतीति दर्शनात् ।") एतन्नरघटीयादिद्वारा भ्रमणगुणाः । वातकोपनत्वम् । अङ्गर्म्मर्दकरत्वम् । बलाग्निविवर्द्धनत्वम् । इति राजवल्लभः ।

भ्रमरी, स्त्री, (भ्राम्यति अनयेति भ्रम+करणे ल्युट् । ङीप् ।) कारणिका । अर्थोग्निः क्रीडाद्रा । इति मेदिनी । रे, ६८ ।

भ्रमरकुटी, स्त्री, (भ्रमरी भ्रमरी कुटी क्षुद्रगृहमिव ।) लताविशेषवत् । तत्पर्य्यायः । आवारी २ भ्रमरकुटी । इति त्रिकाण्डशेषः ।

भ्रमरः, पुं, (भ्रमति प्रतिकुसुममिति । भ्रमि-कमीत्यादिना । "उणा० १ । १०७ । इति अरः ।) कीटविशेषः । (यथा, रघुवंशे । ८ । ६८ ।

"भ्रमरैः कुसुमानुसारिभिः ।")

तत्पर्य्यायः । मधुव्रतः २ मधुकरः ३ मधुलिट् ४ मधुपः ५ अलीः ६ द्विरेफः ७ पुष्पलिट् ८ भृङ्गः ९ षट्पदः १० अलिः ११ । इत्यमरः । २ । ५ । २९ ।

कलालापः १२ झिल्लीसुखः १३ पुष्पलयः १४ मधुव्रतः १५ द्विपः १६ भमरः १७ चञ्चरीकः १८ गुञ्जाली १९ मधुलीढः २० इन्दिन्दिरः २१ मधुमारकः २२ । इति राजनिर्घण्टः । मधुकरः २३ रमः २४ पुष्पकीटः २५ मधुसूदनः २६ भृङ्गराजः २७ मधुलिट् २८ रेणुवासः २९ । इति शब्दरत्नावली । कामुकः । इति मेदिनी । रे, १६१ ।

भ्रमरकः, पुं, (भ्रमर इवेति भ्रमर+"इवे प्रतिकृतौ ।" ५ । ३ । ९६ । इति कन् ।) ललाटलम्बितचूर्णकुन्तलः । इत्यमरः । २ । ६ । ९९ ॥ (स्वार्थे कन् । भृङ्गः । बालगणिकः । इति । मेदिनी । के, २०४ ॥ अमुभ्रमः । इति विश्वः ।

भ्रमरकीटः, पुं, (भ्रमर इव कीटः ।) कीटविशेषः । कुमरे पोका इति भाषा ॥ यथा,—

"जीवन्मुक्तिस्तु तद्विद्वान् पूर्व्वोपाधिगुणांस्य-
जेत् ।
सच्चिदानन्दधर्म्मत्वाद्भवेद्भ्रमरकीटवत् ॥"

इत्यात्मबोधः ॥

भ्रमरचली, स्त्री, (भ्रमरान् चलयतीति । चल+णिच्+अच् । गौरादित्वात् ङीष् ।) लताविशेषः । तत्पर्य्यायः । भृङ्गाह्वा २ भ्रमरा ३ भृङ्गवल्लिका ४ । अस्या गुणाः । यथा, राजनिर्घण्टे ।

"भृङ्गचली च कटुका तिक्ता दीपनरोचनी ।"

भ्रमरप्रियः, पुं, (भ्रमरस्य प्रियः ।) धात्रीवृक्षः । इति रत्नमाला ॥

भ्रमरमारी, स्त्री, (भ्रमरान् मारयति गन्धोत्कर्षेण व्याकुलयतीति । मृ+णिच्+अच् । गौरादित्वात् ङीष् ।) मालतीदृश्यप्रसिद्धपुष्पवृक्षविशेषः । तत्पर्य्यायः । भ्रमरारिः २ भृङ्गारिः ३ भृङ्गमारी ४ मालपर्णिका ५ कुरारिः ६ भ्रमरी ७ यष्टिलता ८ । अस्या गुणाः । तिक्तत्वम् । पित्तश्लेष्मज्वरनाशित्वम् । शोफकण्डूतिकुष्ठव्रणदोषविदोषनाशित्वञ्च । इति राजनिर्घण्टः ॥

भ्रमरा, स्त्री, (भ्रमर+अजादित्वात् टाप् ।) भ्रमरस्त्री । इति राजनिर्घण्टः ॥

भ्रमरातिथिः, पुं, (भ्रमरः अतिथिरभ्यागतो यस्य ।) चम्पकः । इति राजनिर्घण्टः ।

भ्रमरानन्दः, पुं, (मधुगन्धाकृष्टात् भ्रमरं यावानन्दो यस्मात् सः ।) मदनः । अतिमुक्तकः । रक्तजातः । इति राजनिर्घण्टः ॥

भ्रमरालकः, पुं, (भ्रमर इव अलति भूषयतीति । अल+ण्वुल् ।) ललाटलम्बितचूर्णकुन्तलः । तत्पर्य्यायः । अलकः २ कुरलः ३ । इति हेमचन्द्रः । २ । २३६ ॥

भ्रमरी, स्त्री, (भ्रमर+ङीष् ।) अतुला । वृक्षदार्वी । षट्पदी । इति राजनिर्घण्टः ॥

भ्रमरेष्टः, पुं, (भ्रमराणामिष्टः ।) क्षोभजप्रभेदः । इति राजनिर्घण्टः ॥

भ्रमरेष्टा, स्त्री, (भ्रमरागामिष्टा।) भार्गी। भूमिजम्बः। इति राजनिर्घण्टः॥
भ्रमरोत्सवा, स्त्री, (भ्रमराणां उत्सवः प्रमोदो यस्याः।) माधवी। इति राजनिर्घण्टः॥
भ्रमासक्तः, पुं, (भ्रमे भ्रमरे आसक्तः युक्तः।) शुक्लमार्जकः। इति हेमचन्द्रः। ३। ५८॥
भ्रमिः, स्त्री, (भ्रम+बाहुलकात् इः।) भ्रमणम्। तत्पर्य्यायः। भ्रमः २। इत्यमरः।३।२।८॥ भ्रमी ३। इति भरतः॥ (मण्डलाकारगतिः ४। तथाच नैषधचरिते। १। ७३।
"अधीकरचारुहयेन या भ्रमा-
निजातपत्रस्य तलस्थले नलः।")
मण्डलाकारसैन्यरचना। यथा.—
"वीरान् सहस्रशो दृष्ट्वा भ्रमिभिः पर्य्यवस्थितान्।
सवो लवेन सन्धाय शूरान् रोषपूरितः॥
भ्रमिराद्या सहस्रेण द्वितीयायुतसङ्ख्यया।
तृतीयायुतयुग्मेन तुरीयायुतषट्कभिः॥
पञ्चमी लक्षयोधानां षष्ठी योधायुताधिकैः।
सप्तमी लक्षयुग्मेन सप्तभिर्भ्रमिभिर्युतान्॥
मध्ये लवो भ्रमियाम्रः सञ्चरन् पश्चिमत्तदा।
दाहयामास सर्व्वान् वै सैनिकान् भ्रमिकारकान्॥"
इति पाद्मे पातालखण्डे ६१ अध्यायः॥
भ्रमी, [न्] त्रि, (भ्रम+इनि।) भ्रमविशिष्टः। भ्रमो विद्यते अस्येति अस्त्यर्थे इनिप्रत्ययेन निष्पन्नः॥
भ्रंश व उ अधःपतने। इति कविकल्पद्रुमः॥ (दिवां-परः-अकः-सेट्।) व भ्रश्यति। उ भ्रंशित्वा भ्रष्ट्वा। इति दुर्गादासः॥
भ्रष्ट, त्रि, (भ्रंश्+कर्त्तरि+क्तः।) च्युतम्। अस्य पर्य्यायो गलितशब्दे द्रष्टव्यः॥
"अर्थाद्भ्रष्टोऽर्थयात्रान्तु गच्छेत्
सत्याद्भ्रष्टो रौरवं वै व्रजेच्च।
योगभ्रष्टः सत्यधृतिञ्च गच्छेत्
राज्याद्भ्रष्टो मृगयां वै व्रजेच्च॥"
इति गारुडे नीतिसारे १०८ अध्यायः॥
भस्त्र, क्यौ स भ्र पाके। इति कविकल्पद्रुमः॥ (तुदा०-उभ०-सक०-अनिट्।) रेफयुक्तादिदन्त्योपधः। क्विपि संयोगादिलोपे भट्। पाक इह भर्त्सनम्। यथा भृच्छति भृच्छते मनुष्यं उपकारः। क्यौ अभार्क्षीत्। इति दुर्गादासः॥
भाण, ड ण ण्ट भाभि। इति कविकल्पद्रुमः॥ (भा०-आत्म०-अक०-सेट्।) रेफयुक्तः। ड भ्राणते ण भ्रेणे बभ्राणे। अनुबन्धबलात् संयोगादित्वेऽप्याकारस्यैत्वम्। ण अबिभ्रणत् अबभ्राणत्। ट भ्राणयुः। इति दुर्गादासः॥
भ्राष्टकं, क्ली, (भ्राश्+"स्फुट्टृषौ।" ३। १। १३३। इति स्फुन्।) पित्तम्। इति शब्दचन्द्रिका॥
भ्राष्णुः, त्रि, (भ्राश्+स्फुच्।) अलङ्काराद्दीप्तियुक्तः। इत्यमरः। २। ६। १०१॥ (यथा, भागवते। २। ६। १२।
"भ्राजिष्णुभिर्यः परितो विराजते
लसद्विमानावलिभिर्महात्मनाम्॥")
विष्णौ, पुं। यथा, तस्य सहस्रनामस्तोत्रे।
भ्राजिष्णुर्भोजनं भोक्ता सहिष्णुर्जगदादिजः॥
भ्रातरौ, पुं, (भ्राता च भगिनी च। भ्रातृस्वसोरित्यादिना शकन्ध्वादिः।) भ्रातृभगिन्यौ। नित्यद्विवचनान्तोऽयम्। इत्यमरः। २। ६। ३६॥
भ्राता, [तृ] पुं. (भ्राजते इति। भ्राज+"नप्तृनेष्टृत्वष्टृहोतृपोतृप्रशास्तृभ्रातृजामातृमातृपितृदुहितृयातृश्वशुरादयश्च।" उणा०। २। ९६। इति तृन्। निपात्यते च।) एकगर्भजातः। "भाइ" इति भाषा। तत्पर्य्यायः। सहोदरः २ समानोदर्य्यः ३ सोदर्य्यः ४ सगर्भः ५ सहजः ६ सोदरः ७। इति हेमचन्द्रः॥ पितरि मृते ज्येष्ठभ्रातुः पितृतुल्यत्वम्। यथा,—
"ज्येष्ठो भ्राता पितृतुल्यो मृते पितरि शौनक!।
सर्व्वेषां स पिता हि स्यात् सर्व्वेषामनुपालकः॥
कनिष्ठस्तेषु नर्च्चेषु समत्वेनानुवर्त्तते।
समोपभोगजीवित्वे यथैव तनयस्तथा॥"
इति गारुडे २२४ अध्यायः॥
तस्य भार्य्याहरणे तस्मै दायादाने च दोषो यथा, ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५६ अध्याये।
"भ्रातृजायापहारी च भ्रातृगामी भवेन्नरः।
ब्रह्महत्यासहस्रञ्च लभते नात्रसंशयः॥
स याति कुम्भीपाकञ्च यावच्चन्द्रदिवाकरौ।
तस्माद्भुक्त्वा च पापी च विष्ठायां जायते कृमिः॥
वर्षकोटिसहस्राणि तत्र स्थित्वा च पातकी।
ततो भवेन्महापापी वर्षकोटिसहस्रकम्॥
पुंश्चलीयोनिगर्भे च कृमिश्चैव पुरन्दर!।
गृध्रः कोटिसहस्राणि शृगजन्मानि कुक्कुरः।
भ्रातृजायापहरणात् शूकरः॥"
"यो ददाति न दायञ्च बलिष्ठो दुर्ब्बलाय च।
स याति कुम्भीपाकञ्च यावच्चन्द्रदिवाकरौ॥
भ्रातुरन्वेषणे भ्राता न गच्छेत्। यथा,—
नारद उवाच।
"हे हर्य्यश्वा महावीर्य्याः प्रजा यूयं करिष्यथ।
इदृशो लक्ष्यते यत्नो भवतां श्रूयतामिदम्॥
बालिशा बत यूयं वै नास्या जानीत वै भुवः।
अन्तरूर्द्धमधश्चैव कथं सृष्टय वै प्रजाः॥
ऊर्द्धं तिर्य्यगधश्चैव यदाप्रतिहता गतिः।
तदा कस्माद्भवो नान्तं सर्व्वे द्रक्ष्यथ बालिशाः॥
ते तु तद्वचनं श्रुत्वा प्रयाताः सर्व्वतो दिशम्।
अद्यापि न निवर्त्तन्ते समुद्रेभ्य इवापगाः॥
हर्य्यश्वेष्वथ नष्टेषु दक्षः प्राचेतसः पुनः।
वैरिण्यामथ पुत्त्राणां सहस्रमसृजद्विभुः॥
विवर्द्धयिषवस्ते तु सवलाश्वाः प्रजाः पुनः।
पूर्व्वोक्तं वचनं ब्रह्मन्नारदेन प्रचोदिताः॥
अन्योन्यमनुसर्त्तुं सर्व्वे समगाद महासनिः।
भ्रातॄणां पदवीं चैव गन्तवा नात्र संशयः॥
भ्रात्वा प्रमार्य्यं मृत्युस्तु प्रथाः सृष्यामहे पुनः।
तेऽपि तेनैव मार्गेण प्रयाताः सर्व्वतो दिशम्॥
अद्यापि न निवर्त्तन्ते समुद्रेभ्य इवापगाः॥
ततः प्रभृति वै भ्राता भ्रातुरन्वेषणे द्विज!।
प्रयातो नश्यति तथा तन्न कार्य्यं विजानता॥"
इति विष्णुपुराणे १ अंशे १६ अध्यायः॥
अपि च, मात्स्ये ५ अध्याये।
"ततः प्रभृति न भ्रातुः कनीयान् मार्गमिच्छति।
अन्विष्य दृष्ट्वा भ्रातरं प्राप्नोति तेन तं परिवर्जयेत्॥"
ज्येष्ठभ्रात्रादेर्गुरुत्वं यथा,—
"उपाध्यायः पिता ज्येष्ठो भ्राता चैव महीपतिः।
मातुलः श्वशुरश्चाथ माताममहपितामहौ।
बन्धुर्ज्येष्ठः पितृव्यश्च पुंस्येते गुरवः स्मृताः॥"
इति कौर्म्मे उपविभागे ११ अध्यायः॥
विभक्तानां तेषां धर्म्मवृद्धिर्यथा,—
व्यासः।
"भ्रातॄणां जीवतोः पित्रोः सहवासो विधीयते।
तदभावे विभक्तानां धर्म्मस्तेषां विवर्द्धते॥
भ्रातॄणां यस्तु नेहेत धनं शक्तः स्वकर्म्मणा।
स निर्भाज्यः स्वकादंशात् किञ्चिद्दत्त्वोपजीवनम्॥"
ज्येष्ठभ्रातृप्रशंसा यथा,—
"विभ्यद्भिरिच्छतः सर्व्वान् ज्येष्ठो भ्राता यथा पिता।
भ्राता शक्तः कनिष्ठो वा शक्त्यपेक्षा कुले स्थितिः॥
कुटुम्बार्थेषु चोद्युक्तस्तत् कार्य्यं कुरुते तु यः।
स भ्रातृभिर्हितैषीयो यावच्छ्राद्धनवाहनैः॥
अन्योन्यभेदो भ्रातॄणां सुहृदां वा बलान्तक!।
भवत्यानन्दहृद्देव! हियतां नात्र संशयः॥"*॥
भ्रातृसंस्कारस्यावश्यकत्वम्। यथा, नारदः।
"येषान्तु न कृताः पित्रा संस्कारविधयः क्रमात्।
कर्त्तव्या भ्रातृभिस्तेषां पैतृकादेव तद्धनात्॥
अविद्यमाने पित्र्यं वै स्वांशाद्दत्त्वा धनं पुनः।
अवश्यकार्य्याः संस्कारा भ्रातृभिः पूर्व्वसंस्कृतैः॥"
विभक्तानां तेषां साचिव्यादि यथा,—
"साचिव्यं प्रतिभाव्यञ्च दानं ग्रहणमेव च।
विभक्ता भ्रातरः कुर्य्युर्नाविभक्ताः परस्परम्॥"
इति दायतत्त्वम्॥
भ्रातृकः, त्रि, (भ्रातुरागत इति। भ्रातृ+"अतश्छण्।" ४। ३। ७८। इति ठण्। भ्रातुरागतधनादि।) भ्रातृयोग्यः। इति सिद्धान्तकौमुदी॥
भ्रातृजः, पुं, (भ्रातुः सहोदरात् जायते इति। जन्+"पञ्चम्यामजातौ।" ३।२।९८। इति डः।) भ्रातुरपत्यम्। तत्पर्य्यायः। भ्रात्रीयः २। इत्यमरः। २। ६। ३६॥ भ्रातृव्यः ३ भ्रातृपुत्त्रः ४। इति शब्दरत्नावली॥ (स्त्रियां टाप्। भ्रातृजा। भ्रातुष्पुत्त्राम्॥)
भ्रातृजाया, स्त्री, (भ्रातुर्जाया।) भ्रातृभार्य्या। (यथा, मेघदूते। १। १०।
"त्वय्यायत्तं कृषिफलमिति भ्रूविकारानभिज्ञा
प्रीतिस्निग्धैर्जनपदवधूलोचनैः पीयमानः।
सद्यःसीरोत्कषणसुरभि क्षेत्रमारुह्य मालं
किञ्चित्पश्चाद्व्रज लघुगतिर्भूय एवोत्तरेण॥")
तत्पर्य्यायः। प्रजावती २। इत्यमरः। २। ६। ४०॥
भ्रातृद्वितीया, स्त्री, (भ्रातृमङ्गलार्थं भ्रातृभोजनार्थं वा द्वितीया इति मध्यपदलोपी कर्म्मधारयः।) कार्त्तिकशुक्लद्वितीया। तद्विवरणं यथा। यमद्वितीया तु प्रतिपद्युता ग्राह्या-

तुक्तं निर्णयामृतादौ। यमद्वितीया मध्याह्न-व्यापिनी पूर्व्वविद्धा चेति हेमाद्रिः। अत्र विशेषो हेमाद्रौ स्कान्दे।
"कार्त्तिके शुक्लद्वितीयायामपराह्णेऽर्च्चयेत् यमम्।
स्नानं कृत्वा भानुजायां यमलोकं न पश्यति॥
कार्त्तिके शुक्लद्वितीयायां पूजितस्तर्पितो यमः।
वैद्यिनः किन्नरैर्दृष्टैस्तस्मै यच्छति वाञ्छितम्॥"
तथा भविष्ये।
"प्रथमा श्रावणे मासि तथा भाद्रपदेऽपरा।
तृतीयाश्वयुजे मासि चतुर्थी कार्त्तिके भवेत्॥
श्रावणे कलुषा नाम तथा भाद्रे च गोमती।
आश्विने प्रेतसञ्चारा कार्त्तिके यामुका मता॥"
इत्युक्ता प्रथमायां व्रतं द्वितीयायां सरस्वती-पूजा तृतीयायां श्राद्धमुक्ता चतुर्थ्यामुक्तम्।
"कार्त्तिके शुक्लपक्षस्य द्वितीयायां युधिष्ठिर!।
यमो यमुनया पूर्व्वं भोजितः स्वगृहेऽर्चितः॥
अतो यमद्वितीयेयं त्रिषु लोकेषु विश्रुता।
अस्यां निजगृहे विप्र! न भोक्तव्यं ततो नरैः॥
स्नेहेन भगिनीहस्तात् भोक्तव्यं पुष्टिवर्द्धनम्।
दानानि च प्रदेयानि भगिनीभ्यो विधानतः॥
स्वर्णालङ्कारवस्त्रान्नपूजासत्कारभोजनैः।
सर्व्वा भगिन्यः संपूज्या अभावे प्रतिपन्नकाः॥
प्रतिपन्ना मातृभगिन्य इति हेमाद्रिः॥
पितृव्यभगिनीहस्तात् प्रथमायां युधिष्ठिर!।
मातुलस्य सुताहस्तात् द्वितीयायां तथा नृप!॥
पितुर्ज्ञातुः स्वसुः कर्त्ते तृतीयायां तयोः करात्।
चतुर्थ्यां सहजायाश्च भगिन्या हस्ततः परम्।
सर्व्वासु भगिनीहस्तात् भोक्तव्यं बलवर्द्धनम्॥
यस्यां तिथौ यमुनया यमराजदेवः
सम्भोजितः प्रतिजगत्सुखसौहृदेन।
तस्यां स्वसुः करतलादिह यो सुनक्ति
प्राप्नोति रत्नसुखधान्यमनुत्तमं सः॥
गौड़ास्तु।
यमञ्च चित्रगुप्तञ्च यमदूतांश्च पूजयेत्।
अर्घ्यञ्चात्र प्रदातव्यो यमाय सहजद्वये॥
मन्त्रस्तु।
एह्येहि मार्त्तण्डज! पाशहस्त!
यमान्तकालोकधरामरेश!।
भ्रातृद्वितीयाकृतदेवपूजां
गृहाण चार्घ्यं भगवन्नमस्ते॥
भ्रातस्तवानुजातार्घं मुङ्क्ष्व भक्तमिदं शुभम्।
प्रीतये यमराजस्य यमुनाया विशेषतः॥"
व्यवहारतत्त्वे यदेदिति स्मार्त्ताः॥ इत्यत्र-दानमित्यध्याहुः। ब्रह्मपुराणेऽपि।
"या तु भोजयते नारी भ्रातरं युग्मके तिथौ।
अर्घ्येणापि तामूर्जेन सा वैधव्यमाप्नुयात्॥
भ्रातुरायुःक्षयो राजन्! न भवेत्तच्च कर्हिचित्॥"
इति निर्णयसिन्धौ २ परिच्छेदः॥

भ्रातृपत्नी, स्त्री, (भ्रातापतिर्यस्या इति भ्रातृ+पतीति वा। ऋन्नेभ्यो ङीप्। इति ङीप्। ततः+"नित्यं सपत्न्यादिषु।" इति नान्तादेशः।) भ्रातृजाया। इति शब्दरत्नावली॥

भ्रातृपुत्रः, पुं, स्त्री, (भ्रातुः पुत्रः।) भ्रातृजः। इति शब्दरत्नावली। भाइपो इति भाषा॥

भ्रातृभगिन्यौ, स्त्री, (भ्राता च भगिनी च। इति इतरेतरद्वन्द्वसमासः।) भ्रातरौ। द्विवचनान्तोऽयम्। इत्यमरः। २। ६। ३६॥

भ्रातृव्यः, पुं, (भ्रातुरपत्यमिति। "भ्रातुर्व्यच्च।" ४। १। १४४। इति व्यत्।) भ्रातृपुत्रः। (यथा. राजतरङ्गिण्याम्। ८। २८४२।
"जयराजानुजं राज्ञा यशोराजं निवेशितम्।
तत्सुतेनावचस्कन्द भ्रातृव्यं राजकाभिधः॥"
भ्रातृ+"व्यत् सपत्ने।" ४। १। १४५। इति व्यत्।) शत्रुः। इति हेमचन्द्रः॥ (यथा, भागवते। ५। ११। १७।
"भ्रातृव्यमेनं त्वमदभ्रवीर्य-
सुपेक्षयाधेधितमप्रमत्तः॥"
"तस्माद् भ्रातृव्यम् शत्रुम्।" इति तट्टीकायां स्वामी॥)

भ्रातृश्वशुरः, पुं, (पत्युर्ज्येष्ठभ्राता श्वशुर इव पूज्यत्वात्।) पतिज्येष्ठभ्राता। भाशुर इति भाषा। तत्पर्य्यायः। श्वशुरकः २। इति शब्दरत्नावली॥ (भ्रातुः श्वशुरः।) भ्रातुःपत्न्याः पिता च॥

भ्रातृव्यः, पुं, (भ्रातुरपत्यं पुमानिति। भ्रातृ+"भ्रातुर्व्यच्च।" ४। १। १४४। इत्यत्र 'चकाराच्च च।' इति काशिकोक्तेः छः।) भ्रातृपुत्रः। इत्यमरः। २। ६। ३६॥ भ्रातृसम्बन्धिनि, त्रि॥

भ्रान्तः, त्रि, भ्रमणयुक्तः। भ्रान्तिविशिष्टः। (यतीन्द्रियमिन्द्रियं भ्रान्तानामधिष्ठाने॥" इति सांख्यसूत्रम्। २। २३॥)
भ्रमधातोः कर्त्तरि क्तप्रत्ययेन निष्पन्नः॥ भ्रमणे, क्ली। यथा, वाभटपशुपतिभ्यां याख्यातम्।
"भ्रान्तं देशमनेकदुर्गविषमं प्राप्तं न किञ्चित् फलम्।"

भ्रान्तः, पुं, (भ्रम्+कर्त्तरि क्तः। "अनुनासिकस्येति। ६। ४। १५। इति दीर्घः।) राजधूस्तूरः। मत्तधुस्तो। इति राजनिर्घण्टः॥

भ्रान्तिः, स्त्री, (भ्रम्+क्तिन्। "अनुनासिकस्य क्विझलोः क्ङिति। ६। ४। १५। इति दीर्घः।) भ्रमः। इत्यमरः। १। ५। ४॥
("युक्तिहीनप्रकाशत्वाद् भ्रान्तेर्नास्ति लक्षणम्। यदि स्याल्लक्षणं किञ्चिद्भ्रान्तिरेव न सिध्यति॥" इति तार्किकाः॥)
सा तु नराणां षण्मासे जायते। यथा,—
"षाण्मासिके तु संप्राप्ते भ्रान्तिः संजायते यतः।
धावाचराणि रूपाणि पत्राण्युत्पान्यत. पुरा॥"
इति ज्योतिस्तत्त्वम्॥
भ्रमणम्। इति मेदिनी॥ अनवस्थितिः। इति विश्वः॥

भ्रान्तिहरः, पुं, (भ्रान्तिं हरतीति। हृ+कर्त्तरि पचाद्यच्।) मन्त्री। इति शब्दमाला॥ भ्रमनाशके, त्रि॥

भ्रामकः, पुं, (भ्रामयति भ्रमं जनयतीति। भ्रम्+ण्वुल्। "वुल् तृचौ।" ३। १। १३३। इति वुल्।) प्रधानः। धूर्त्तः। सुवर्णवर्णः। प्रस्तरभेदः। इति मेदिनी। के, १३३॥ चुम्बक पाथर इति भाषा। भ्रमजनके, त्रि॥

भ्रामरं, क्ली, (भ्रमरैः कृतं सम्भृतमिति। भ्रमर+"चुद्राभ्रमरवटरपादपादण्।" ४। ३। १३९। इति अण्।) मधु। इति मेदिनी। रे, १६२॥ तत्तु भ्रमरजमधु। तस्य गुणाः। पिच्छिलत्वम्। रूक्षत्वम्। मधुरत्वम्। सुखजाड्यनाशित्वञ्च। इति राजनिर्घण्टः॥ अपि च।
"पैच्छिल्यात् स्वादु भूयस्त्वात् भ्रामरं गुरु कीर्त्तितम्।"
इति राजवल्लभः।
अन्यच्च।
"किञ्चित् रूक्षैः प्रसिद्धेभ्यः षट्पदेभ्योऽलिभिः क्षितम्।
निर्म्मलं स्फटिकाभं यत्तन्मधु भ्रामरं स्मृतम्॥
भ्रामरं रक्तपित्तघ्नं सूत्रजाड्यकरं गुरु।
स्वादुपाकमभिष्यन्दि विशेषात् पिच्छिलं हिमम्॥"
इति भावप्रकाशः॥
वृत्यविशेषः। तत्पर्य्यायः। रासः २ मण्डलवृत्यम् ३ हल्लीसम् ४। इति शब्दमाला॥ भ्रमरसम्बन्धिनि त्रि। यथा,—
"तदाहं भ्रामरं रूपं कृत्वासंख्येयषट्पदम्।"
इति देवीमाहात्म्यम्॥
(यथा च हारीते प्रथमे स्थाने एकादशेऽध्याये मधूर्द्धं लक्षणं गुणाश्च।
"शीतं कषायं मधुरं लघु स्यात्
सन्दीपनं लेखनमेव शस्तम्।
संशोधनन्तु व्रणशोधनञ्च
संरोपणं क्षुद्यतमञ्च वल्यम्॥
त्रिदोषनाशं कुरुते च पुष्टिं
कासे क्षये वा क्षतजे च छर्द्दौ
हिक्काश्मसे शोषसपीनसानां
रक्तप्रमेहे च तथातिसारे॥
रक्तातिसारे च सरक्तपित्ते
व्रणोपदंशे तु पार्श्वगदेऽपि शस्तम्।
नेत्रामये वा ग्रहणीगदे वा
विषे प्रशस्तं भ्रमरैश्चितं यत्॥
भ्रामरं सघनं जाड्यं भूविष्ठं मधुरञ्च यत्।
रूक्षं विशेषतो ज्ञेयं शीतलं लघुलेखनम्॥")

भ्रामरः, पुं, (भ्रामयति लोहमिति। भ्रामि+"अर्त्तिकमिभ्रमिदेवीति।" उणा० ३। १३२। इति अरः। बाहुलकात् दीर्घश्च।) प्रस्तरभेदः। मेदिनी। रे, १६१॥ चुम्बक पाथर इति भाषा॥ (अपस्मारराोगः। इति भ्रामरी त्रि। यथा, मनौ। ३। १६१। [त्यजेत्॥"
"भ्रामरी गण्डमाली च श्वित्र्यर्शो पिशुन-
"भ्रामरी अपस्मारी।" इति तद्भाष्ये मेधातिथिः॥)

भ्रामरी, स्त्री, (भ्रमरस्यायं भ्रामरो भ्रमरवद्वर्णः। सोऽस्या अस्तीति। अर्श आदित्वात्।

ङीप्।) पार्व्वती। इति विकाण्डशेषः॥
यथा, मार्कण्डेये। ६१। ४७-६६।
"यदारुणाक्षस्त्रैलोक्ये महावाधां करिष्यति।
तदाहं भ्रामरं रूपं कृत्वासंख्येयषट्पदम्॥
त्रैलोक्यस्य हिताधाय वधिष्यामि महासुरम्।
भ्रामरीति च मां लोकास्तदा स्तोष्यन्ति सर्व्वतः॥"

भ्राश्, ऋ ड य टु } भाषि। इति कविकल्पद्रुमः॥
भ्राश्, य ड } (भ्वा०-आत्म०-अक०-सेट्।
हितोयस्तु दिवा०-आत्म०-अक०-सेट्।) य ड भाश्यते। ऋ अबभ्राशत्। स्वमते अनयोर्नाडि दृम्बिकल्पनेऽपि सप्तमस्वरानुबन्धोऽन्येषामनुरोधात्। य भेशे बभ्राशे। टु भाशयुः। ड भाशते। भाशि दीप्तौ। इति दुर्गादासः॥

भाष्टं, क्ली, (भस्त्र+ष्ट्रन्।) आकाशम्। अमरीषम्। इति संक्षिप्तसारोणादिवृत्तिः॥

भाष्ट्रः, पुं, (भृज्जते अत्रेति। भ्रस्ज+"भ्रस्जिगमिनमिहनिविश्यां ट्रक्ष्निच्।" उणा०। ४। १५६। इति। ष्ट्रन्।) यत्र कलायचणकादिकं भृज्यते सः। भाजना खोला इति ख्यातः। (यथा, नैषधचरिते। ३। १२८।
"रौद्रे चक्षुषि तञ्चितस्तनुमनुभ्राष्टं च यच्चिक्षिपे॥"
"अनुभ्राष्टं भर्ज्जनपात्रसङ्गेन।" इति तट्टीका।)
तत्पर्य्यायः। अमरीषम्२। इत्यमरः।२।६।३०॥

भास, ऋ ड य टु } भासि। इति कविकल्पद्रुमः॥
भास, य ड } भा० आत्म० अक०-सेट्।
हितोयस्तु दिवा०-आत्म०-अक०-सेट्।) य ड भास्यते। ड भासते। ऋ अबभासत्। ण भेसे बभासे। टु भासयुः। इति दुर्गादासः॥

भुकुंसः, पुं, (भक्कुंसः। भुक्कुंसः। भुक्कुंसः। भुक्कुंसः। इति रूपचतुष्टयम्। "चुरादौ षष्ठपुटेत्यादिना कुमिर्भाषार्थः। यः स्त्रीवेषं धारयित्वा भुवः कुंसयतीति। एरच् प्रत्ययः। दृस्वश्च वा। इति अमरटीकायां रघुनाथचक्रवर्त्ती॥) स्त्रीवेषधारिनर्त्तकपुरुषः। इत्यमरः।१।७।११॥

भ्रुकुटिः, स्त्री, (भ्रुवः कुटिः कौटिल्यमिति षष्ठीसमासः। अभ्रुकुंसादीनामिति वा दृस्वः।) क्रोधादिना भ्रुवः कौटिल्यम्। इत्यमरः। १। ७। ३७॥ (यथा, महाभारते।७। ७६२।
"भ्रुवा च भ्रुकुटिं वक्त्रे क्रोधस्य परिलक्षणम्॥")

भ्रुकुटी, स्त्री, (भ्रुकुटि। ङीदिकारादिति पक्षे ङीष्।) क्रोधादिना भ्रुवः कौटिल्यम्। इत्यमरः। १। ७। ३७॥ (यथा, माघे। १५। ६।
"भ्रुकुटीकुटीरनिलयलाटभाननम्॥")

भ्रूः, स्त्री, (भ्राम्यति नेत्रोपरि इति। भ्रम्+"भ्रमेरूः।" उणा०। २। ६८। इति ऊः।) ललाटस्थरोमभागः। तत्पर्य्यायः। लिलिका २ अर्द्धेन्दुभागरोमराजीह्। इति राजनिर्घण्टः॥ तल्लक्षणम् यथा, गारुडे ६६ अध्याये।
"विशालोन्नता सुस्निग्धा दरिद्रा विषमभ्रुवः।
भग्नौ दीर्घा संयुक्तभ्रूर्विद्युतसभ्रुवः।
आज्ञा निस्वस्य सङ्गभ्रूर्मध्याच्छिन्नभ्रुवः।"

अत्र षट्चक्रान्तर्गताज्ञाख्यचक्रमस्ति। तच्च हक्षवर्णद्वयवृक्तद्विदलपद्माकारम्। तस्मध्ये मनस्तिष्ठति। यथा,—
"आज्ञानामाम्बुजं तद्विमकरसदृशं ध्यानधामप्रकाशं
हक्षाभ्यां वै कलाभ्यां प्रविलसितवपुर्नेत्रपत्रं सुशुभ्रम्।
तन्मध्ये डाकिनी सा शशिसमधवला वक्त्रषट्कं दधाना
विद्यां सुद्रां कपालं डमरुजपवटीं बिभ्रती शुद्धचित्ता॥
एतत्पद्मान्तराले निवसति च मनः सत्त्वरूपं प्रसिद्धम्॥"
इति श्रीतत्त्वचिन्तामणौ षष्ठप्रकाशः॥
(विषयोऽस्या यथा,—
"भुवोर्वा यदि वा मूर्द्ध्नि सीमन्तावर्त्तकान् बहून्।
अपूर्व्वानद्भुतान् वक्त्रान् दृष्ट्वा मरणमादिशेत्॥
आहुमेते न जीवन्ति लक्षणैर्नातुरा नराः।
अरोगाणां पुनस्त्वेतत् षड्भ्यं परमुच्यते॥"
इति चरके इन्द्रियस्थाने अष्टमेऽध्याये॥
कर्णनेत्रनासाभ्रूशंखगण्डकक्षस्तनवृषणपार्श्वस्फिग्जानुबाहूरुप्रभृतयो द्वे द्वे विंशतिरङ्गुलयः। इति सुश्रुते शारीरस्थाने पञ्चमेऽध्याये॥)

भ्रूकुंसः, पुं, (भ्रू+कुंस+अच्। स्त्रीवेषधारी नर्त्तकपुरुषः। इत्यमरः। १। ७। ११।

भ्रूकुटिः, स्त्री, (भ्रुवः कुटिः कौटिल्यम्। क्रोधादिना भ्रुवः कौटिल्यम्। इत्यमरः॥

भ्रूण, क्ड आशाविश्वङ्क्ष्योः। इति कविकल्पद्रुमः॥ (चुरा०-आत्म०-सक०-सेट्।) रेफयुक्तषष्ठस्वरी। क ड भ्रूणयते भद्रं लोकः। आज्ञाविषयं करोतीत्यर्थः। इति दुर्गादासः॥

भ्रूणः, पुं, (भ्रूणयते आज्ञप्यते इति। भ्रूण+घञ्।) बालकः। स्त्रीगर्भः। इत्यमरः २।६।३६॥ (स्त्रीक्लिबमपि। यथा, ऋग्वेदे। १०। १५५। २।
"चत्तो इतश्चत्तासतः सञ्जभ्रूणान्यारुषी॥")
अथ गर्भाधानदिनम्। रजोदर्शनावधिषोड़शदिनपर्य्यन्तं ऋतुकालः। तत्राद्यास्तत्रो निशाः परित्यज्य चतुर्दश्यष्टमी अमावास्या पूर्णिमा सूर्य्यसंक्रान्तिः पर्व्वाण्येतानि परित्यज्य च अन्यासु रात्रिषु चन्द्रादिशोभने काले भार्य्यासुपगच्छेत्। युग्मरात्रिषु गमने पुत्रो भवेत्। अयुग्मरात्रियुगमने कन्या भवेत्। तत्र प्रथमचतुर्थाष्टम्यः पुष्यः हस्तः मृगशिरा आर्द्रा पुनर्व्वसुः पूर्व्वाषाढ़ा उत्तराषाढ़ा श्रवणा पूर्व्वभाद्रपदोत्तरभाद्रपत्। तत्र निषिद्धनक्षत्राणि। ज्येष्ठाश्लेषा मघा मूला रेवती कृत्तिकाश्विनी उत्तरफल्गुनी। तत्र तिथयः नन्दा भद्राः प्रशस्ताः। रिक्ता निषिद्धाः। तत्र रविमङ्गलवृहस्पतिवाराः प्रशस्ताः। इति समयप्रदीपः॥

भ्रूणहत्या, स्त्री, (हननं हत्या। हन्+भावे क्यप्। भ्रूणस्य हत्या इति। षष्ठीसमासः।) गर्भस्थबालकहननम्। यथा,—
"चिविवाहं कृतं येन न करोति चतुर्थकम्।
कुलानि पातयेत् सप्त भ्रूणहत्याव्रतञ्चरेत्॥"
इत्युद्वाहतत्त्वम्॥

भ्रूणहा, [न्] त्रि, (भ्रूणं हन्तीति। भ्रूण+हन्+"ब्रह्मभ्रूणवृत्रेषु।" ३। २। ८७। इति क्विप्।) गर्भस्थबालकहन्ता। भ्रूणं हन्ति इति भ्रूणशब्दोपपदहनधातोष्टप्रत्ययेन निष्पन्नः। इति संक्षिप्तसारव्याकरणम्॥ (यथा, महाभारते। १। ८३। ३४।
"ऋतुं वै याचमानाया न ददाति पुमान्नृतम्।
भ्रूणहेत्युच्यते ब्रह्मन्! स इह ब्रह्मवादिभिः॥")
तस्य प्रायश्चित्तम्। तत्र पुंस्त्वेन ज्ञाते पुंवधप्रायश्चित्तम्। स्त्रीत्वेन ज्ञाते स्त्रीवधप्रायश्चित्तम्। अविज्ञाते तु पुंवधप्रायश्चित्तमाह मनुः।
"हत्वा गर्भमविज्ञातमेतदेव व्रतञ्चरेत्।
गर्भहा च यथावर्णं तथाचैवीनिसूदनः॥'
इति प्रायश्चित्तविवेकः॥
(ब्रह्महन्ता। यथा, मनुः। ८। ३२७।
"अन्नादे भ्रूणहा मार्ष्टि पत्यौ भार्य्यापचारिणी॥"
"भ्रूणहा ब्रह्महा।" इति तद्भाष्ये मेधातिथिः॥)

भ्रूभङ्गः, पुं, (भ्रुवो भङ्गः।) भ्रुवः कौटिल्यम्। यथा,
"क्षुद्राः सन्त्रासमेते विजहति हरयो भिन्नशक्रेभकुम्भा
युष्मद्वैरेषु लज्जां दधति परममी शायकाः
निर्व्यतन्तः।
सौमित्रे तिष्ठ पात्रं त्वमपि नहि रुषां नन्वहं
मेघनादः
किञ्चिद्भ्रूभङ्गलीलानियमितजलधिं रामममन्वेषयामि॥"
इति काव्यप्रकाशः॥

भ्रेज, ऋ ड भाषि। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-अक०-सेट्।) रेफयुक्तः। ऋ अबिभ्रेजत्। ड बिभ्रेजे। इति दुर्गादासः॥

भ्रेष, ऋ ष चले। भ्रेषे। इति कविकल्पद्रुमः॥ (भ्वा०-उभ०-अक०-सेट्।) रेफयुक्तः। ऋ अबिभ्रेषत्। ष भ्रेषति भ्रेषते वर्त्मनि स्खलः। बिभ्रेषे। इति दुर्गादासः॥

भ्रेषः, पुं, (भ्रेष् चलने+भावे घञ्।) तथाच यथोचिताद्भ्रंशः। इत्यमरः॥ (यथा, पातञ्जलभाष्ये। ३।१२। "ग्रासमाप्नुयात्।" इति।) चलनम्। इति भ्रेषधात्वर्थदर्शनात्॥

भ्रेषणं, क्ली, (भ्रेष्+भावे ल्युट्।) चलनम् इति भ्रेषधातोर्भावेऽनट्प्रत्ययेन निष्पन्नम्॥

भ्रेष्ठ, च भ्रेष्ठणे। इति कविकल्पद्रुमः॥ (भ्वा०-उभ० सक०-सेट्।) अन्तःस्थलतीयोपधः। च भ्रेष्ठति। भ्रेष्ठते। स्थाने सप्तमस्वर इति दुर्गासिंहः। इति दुर्गादासः॥

म

म मकारः। स तु पवर्गीयपञ्चमवर्णः। अस्योच्चारणस्थानमोष्ठः। इति व्याकरणम्॥ ("उपूपध्मानीयानामोष्ठौ।" इति सिद्धान्तकौमुदी॥) अस्य स्वरूपं यथा,—

"मकारं शृणु चार्वङ्गि! स्वयं परमकुण्डली।
तरुणादित्यसङ्काशं चतुर्वर्गप्रदायकम्॥
पञ्चदेवमयं वर्णं पञ्चप्राणमयं सदा।"

इति कामधेनुतन्त्रम्॥

(वर्णोद्धारतन्त्रे) अस्य लेखनप्रकारः। यथा,—

"ऊर्द्ध्वाधःक्रमतो रेखा वामे वक्रा तु कुण्डली।
पुनराधोगता सैव तत ऊर्द्ध्वंगता पुनः।
ब्रह्मा प्रभुश्च विष्णुश्च क्रमशस्तासु तिष्ठति॥"

अस्य ध्यानं यथा,—

"कृष्णां दशभुजां भीमां पीतलोहितलोचनाम्।
कृष्णाम्बरधरां नित्यां धर्मकामार्थमोक्षदाम्।
एवं ध्यात्वा मकारन्तु तन्मन्त्रं दशधा जपेत्॥"

तत्प्रणाममन्त्रो यथा,—

"त्रिशक्तिसहितं वर्णं त्रिबिन्दुसहितं सदा।
त्रयाणादित्यसंयुक्तं प्रदिश्यं प्रणमाम्यहम्॥"

इति वर्णोद्धारतन्त्रम्॥

तस्य नामानि।

"मः कालो लोभितः कालो महाकालो महान्तकः।
वैकुण्ठो वसुधा चन्द्रो रविः पुरुषराजकः॥
हालाभद्रो जया मेधा विश्वदा दीप्तसंज्ञकः।
जठरश्च भ्रमा मानं लक्ष्मीर्मातोग्रबन्धनी॥
विषं शिखी महावीरः शशिप्रभा जनेश्वरः।
प्रमत्तः प्रियः रुद्रः सर्वाङ्गो वह्निमण्डलम्।
मानङ्गमालिनी विन्दुः श्रवणा भरणी वियत्॥" ३९॥

इति तन्त्रोक्तवर्णाभिधानम्॥

मः, पुं, (माति निर्म्मिमाति जगदिति। मा + कः।) शिवः। चन्द्रमाः। ब्रह्मा। इत्येकाक्षरकोषः॥ यमः। समयः। विषम्। मधुसूदनः। इति मेदिनी। मे, १॥

मक, इ ङ भूषे। गतौ। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) इ मङ्क्ते। ङ मङ्कते हारी जनम्। गत्यर्थोऽप्ययमिति रामः। इति दुर्गादासः॥

मकरः, पुं, (मकरोति। कृ हिंसायाम्। कृ + अच्। ततः मकुप्रादौ करः हिंसकः। यद्वा, मुखं किरतीति। मुख + कृ + कः। उभयथापि पृषोदरादित्वात् साधुः। इति अमरटीकायां रघुनाथचक्रवर्त्ती।) जलजन्तुविशेषः। इत्यमरः। १। १०। २०॥ (मादिरा अस्य मांसगुणो यथा,—

"कूर्म्मनक्रमकरश्च गोधानकरमद्गुराः।
घण्टिकः शिशुमारश्चेत्यादयः पादिनः स्मृताः॥"

इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे। मत्स्य गणः।

"मत्स्यानां मकरः श्रेष्ठो दीपनो वातनाशनः।
रुचिप्रदः शुक्रकरो ग्राही चोष्णविकारहा।
रक्तामयविनाशनो गुल्मातीसारनाशनः॥"

इति हारीते प्रथमस्थाने एकादशेऽध्याये॥) मकर इति गङ्गाया वाहनत्वेन ख्यातः। इति मागसुन्दरी। यथा। सितमकरनिषण्णां शुभ्रवर्णां त्रिनेत्रामित्यादि गङ्गाध्यानम्॥ स च कामदेवस्य ध्वजचिह्नम्। मकरध्वज इत्यमरकोषदर्शनात्। मेषादिद्वादशराश्यन्तर्गतो दशमराशिः। तत्पर्य्यायः। आकोकेरः २। अस्य अधिष्ठातृदेवता स्वगात्रमकरः। उत्तराषाढायाः शेषपादत्रयं श्रवणासमुदायः धनिष्ठायाः पूर्व्वार्द्धं एतन्नवपादेन भवति। स च पृष्ठोदयः भूमिराशिः चरसंज्ञकः दक्षिणदिक्स्वामी पिङ्गलवर्णः रूक्षः भूमिचारी शीतलस्वभावः अल्पसन्तानः अल्पस्त्रीसङ्गः वातप्रकृतिः वैश्यवर्णः ग्रथाङ्गश्च। अत्र जातस्य फलम्। मदानन्दः। पित्तमात्रभक्तः अवरामकरजातस्य बहुविवाहः। इति जातकादयः॥ अथ, रवियुक्तमकरजातफलम्।

"सदाटनो मित्रगणो विपच्चर्ता
प्रयाति नूनं धनवर्ज्जितः स्यात्।
यद्युष्णरश्मिर्मकरोपगः स्यात्
प्रसूतिकाले स तु भाग्यहीनः॥"

अथ चन्द्रयुक्तमकरजातफलम्।

"कलितशीतभयः किल गीतवित्-
तमसया सहितो मदनातुरः।
निजकुलोत्तमवृत्तिकरः परं
हिमकरे मकरे पुरुषो भवेत्॥"

अथ मङ्गलयुक्तमकरजातफलम्।

"पराक्रमप्राप्तवरः प्रतिष्ठः
सन्तानप्राप्तिवराङ्गनः स्यात्।
श्रिया समेतो मकरे महीजे
प्रसूतिकाले कुलपालकश्च॥"

अथ बुधग्रहान्वितमकरजातफलम्।

"रिपुभयेन युतः कुमतिर्नरः
खरविदीनगरः परकर्म्मठः।
मकरगे यदि शीतकरात्मजे
व्यसनतः स नतः पुरुषो भवेत्॥"

अथ गुरुसंश्रितमकरजातफलम्।

"न मनोरथसिद्धिमुपैति नरो
धनमानविधिर्मकरोपगते।
भययुक् कुमतिः परकर्म्मरतो
बहुलोऽपगुणो मदनाभरतः॥"

अथ शुक्राश्रितमकरजातफलम्।

"अतिदरिद्रतरो खलनन्दनः दृढो
व्ययभयं प्रकृता बहुचिन्तया।
भृगुसुते मकराश्रितते यदा
वशिनि विनयेऽपि सन्निभेत्॥"

अथ शनिग्रहान्वितमकरजातफलम्।

"मकरोपगतो ननु भानुसुतः
स्वयमः पतितो दृढमायनुतः।

परगन्धविभूषणभूषितगात्र-
स्तरुणीरमणः पटुनेत्रः॥"

इति कोष्ठीप्रदीपः॥

(व्यूहभेदः। यथा, कामन्दकीये नीतिसारे। १९। ४९।

"यायाद्व्यूहेन महता मकरेण पुरो भये॥")

मकरकुण्डलं, क्ली, (कुण्डलम् मकर इवेत्युपमितसमासः।) मकराकृतिकर्णभूषणम्। यथा,

"वनमालानिवीताङ्गो लसत्पीतपटः कौस्तुभः।
महाकिरीटकटकः स्फुरन्मकरकुण्डलः॥"

इति श्रीभागवते ६स्कन्धे ४अध्यायः ३७ श्लोकः॥ स्फुरती मकरकुण्डले यस्य सः। इति तट्टीकायां श्रीधरस्वामी॥

मकरकेतनः, पुं, (मकरेण चिह्नितं केतनं ध्वजो यस्य।) कन्दर्पः। इति मीनकेतनशब्दटीकायां भरतेन धृतम्॥

मकरध्वजः, पुं, (मकरेण चिह्नितो ध्वजो यस्य।) कामदेवः। इत्यमरः। १। १। २७॥ (यथा, माघे। ३। ६१।

"शरीरिणा जैत्रशरेण यत्र
निशङ्कमूषे मकरध्वजेन॥")

रससिन्दूरविशेषः। तस्य नामान्तरं चन्द्रोदयः। तस्य करणप्रकारो यथा,—

"पलं मृदु स्वर्णदलं रसेन्द्रं
पलाष्टकं षोड़शगन्धकस्य।
शोणैः सुकार्पासभवप्रसूनैः
सर्व्वं विमर्द्दाथ कुमारिकाद्भिः॥
तत् काचकुम्भे निहितं सुगाढ़े
मृत्कर्पटैस्तद्दिवसत्रयञ्च।
पचेत् क्रमाग्नौ सिकताख्ययन्त्रे
ततो रसः पल्लवरागरम्यः।
निगृह्य चैतस्य पलं पलानि
चत्वारि कर्पूररजस्तथैव।
जातीफलं मोषणमिन्द्रपुष्पं
कस्तूरिकायाश्च इह शाणमेकः॥
चन्द्रोदयोऽयं कथितोऽस्य मात्रा
भुक्तोऽहिवल्लीदलमध्यवर्त्ती॥"

अस्य गुणाः।

"मदोन्मदानां प्रमदाशतानां
गर्व्वाधिकत्वं श्लथयत्यकाण्डे।
मृतं घनीभूतमतीव दग्धं
मृदूनि मांसानि समस्तकानि।
मांसानि नित्यानि भवन्ति यस्य
मानन्ददायी स्मरदानि चात्र॥
वलीपलितनाशनस्तनुभृतां वयस्तम्भनः
समस्तगदहारकः प्रचुरयोगपञ्चाननः।
गृहेषु रसराड़यं भवति यस्य चन्द्रोदयः
स पञ्चशरदर्पितो मृगदृशां भवेद्वल्लभः॥"

इत्यृतुपर्णं स्वकृतम्। उत्तप्तनिकामनत्तमृगसमुत्पन्नम्। दाक्षिणात्याः सोमनाथेषु पूजया एव बुद्धमन्ति। पाश्चात्त्याः निर्द्दिष्टनतमुष्टिकेन यावदर्थं मर्द्दयन्ति। उभयमेव निष्फलीरकोऽपः।

तथैवेति सर्व्वत्रान्वयः ।*। शास्त्रान्तरादिष्टेयो निरूप्यते ।
"रतिकाले रतानां च पुनः सेव्यो रसोत्तमः ।
स्थावरं जङ्गमविषं जङ्गमं विषवारि वा ।
न विकाराय भवति साधकेन्द्रस्य वत्सरात् ॥
स्वल्पक्षयो यथाभ्यासात् स्वल्पं जयति देहिनः ।
तथाय साधकेन्द्रस्य जरामरणनाशनः ॥"
शास्त्रान्तरे मकरध्वजो नाम । इति चन्द्रोदयः ।
इति रसेन्द्रचिन्तामणिः ॥

मकरन्दः, पुं, (मकरमपि चन्दति बभाति धारयतीति वा । अदि चन्दे + अण् ततः शकन्ध्वादित्वात् साधुः ।) पुष्परसः । इत्यमरः । २ । ४ । १७ ॥ (यथा, रघौ । ३ । ८८ ॥
"प्रस्थानप्रणतिभिरङ्गुलीषु तस्य
मौलिस्रक्च्युतमकरन्दरेणुगौरम् ॥")
कुन्दपुष्पवृक्षः । किञ्जल्के क्लीं । इति राजनिर्घण्टः ॥

मकरन्दवती, स्त्री, (मकरन्दस्तत्सदृशोऽस्या अस्तीति । मकरन्द + मतुप् । मस्य वः ङीप् ।) पाटलापुष्पम् । इति शब्दचन्द्रिका ॥ मधुविशिष्टे त्रि ॥

मकरयूथः, पुं, (मकरः मकराकारः यूथः ।) मकराकारभेदन्यायः । इति महाभारतम् ॥

मकराकरः, पुं, (मकराणामाकरः । षष्ठीतत्पुरुषः ।) समुद्रः । इति हेमचन्द्रः । १०७४ ॥ (यथा, कथासरित्सागरे । ४३ । १३० ।
"मकराकरमुलङ्घ्य ग्राम तत्तीरवर्त्तिनः ॥")
मकराकारः, पुं, (मकरस्येवाकारो यस्य ।) षड्ग्रन्थः । इति शब्दचन्द्रिका ॥ कोटाकरञ्ज । इति भाषा ॥ मकरमत्स्याकृतिश्च ॥

मकराङ्कः, पुं, (मकरश्चिह्नाकारोऽङ्कश्चिह्नं यस्य ।) कामदेवः । (मकरो यद्धेरस्य ।) समुद्रः । इत्यजयपालः ॥

मकरालयः, पुं (आलीयते अस्मिन्निति आलयः । मकराणामालयः ।) समुद्रः । इति त्रिकाण्डशेषः ॥ (यथा, महाभारते । १४ । ७६ । १२ ॥
"ततस्तं वारणं कृत्वा शरजालेन पाण्डवः ।
निवारयामास तदा वेलेव मकरालयम् ॥")

मकरी, [न्] पुं, समुद्रः । मकरोऽस्यास्तीति-युत्पत्त्या इनुप्रत्ययनिष्पन्नोऽयम् ॥

मकुटं, क्लो, (मकते अनेनेति । मकि भूषणे + बाहुलकात् उटः । आगमशास्त्रस्यानित्यत्वात् न नुम् ।) मुकुटम् । इति भरतधृतत्रिरूपकोषः ॥

मकुनिः, स्त्री, (मकि + उनिः । पृषोदरादित्वात् साधुः ।) कुक्कुराशनम् । इति त्रिकाण्डशेषः ॥

मकुरः, पुं, (मकते इति । मकि + "मकुर दकुरौ ।" उणा० । १ । ४१ । इति उरच् ।) कुक्कुरः । कोरकः । व्याघ्रः । इति हेमचन्द्रः । ३ । ३८८ ॥

मकुलः, पुं, क्लो, (मकते भूष्यते वृक्षम् । मकि + बाहुलकादुलच् ।) वकुलः । मकुलः । इति शब्दरत्नावली ॥

मकुष्कः, पुं, (मकि भूषायां + उषः । पृषोदरादित्वात् साधुर्मकुः । मकुं भूषां स्कते प्राप्नोतीति । स्कै + पचाद्यच् ।) वनजातनुद्रः । मोट इति हिन्दी भाषा ॥ सुगानि इति बङ्गभाषा । तत्पर्य्यायः । मयष्टः २ वनसुद्गः ३ कर्मोलकः ४ चन्दतः ५ अरण्यमुद्गः ६ वल्लीमुद्गः ७ । अस्य गुणाः । कषायत्वम् । मधुरत्वम् । रक्तपित्तज्वरदाहहरत्वम् । पथ्यत्वम् । रुचिकारित्वम् । सर्व्वदोषजयकारित्वञ्च । इति राजनिर्घण्टः ॥
"मकुष्टो वातलो ग्राही कफपित्तहरो लघुः ।
वान्तिजिन्मधुरः पाके कृमिकृज्ज्वरनाशनः ॥"
इति भावप्रकाशः ॥

मकुष्ठः, पुं, (मकते मक्यते इति वा । बाहुलकात् उषः मकुः । तिष्ठतीति स्था + कः स्थः । मकुः स्थाने स्थेति मकुष्ठः । पूर्व्वपदादिति । ८ । ३ । १०६ । षत्वम् ।) व्रीहिभेदः । मत्स्यरे त्रि । इति मेदिनी । ठे, १६ ।
"मकुष्ठो वनमुद्गः स्यान्मकुष्ठकमुकुष्ठकौ ।
(व्रीहिभेदार्थे यथा, पर्य्यायो गुणाश्च ।
मकुष्ठो वातलो ग्राही कफपित्तहरो लघुः ।
वह्निजिन्मधुरः पाके कृमिकृज्ज्वरनाशनः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

मकुष्ठकः, पुं, (मकुष्ठ + स्वार्थे कन् ।) वनमुद्गः । इति भरतः ॥ (तथाच पर्य्यायाः ॥
मकुष्ठो वनमुद्गः स्यान्मकुष्ठकमुकुष्ठकौ ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
अस्य गुणा यथा, सुश्रुते सूत्रस्थाने ४६ अः ।
"मकुष्ठकाः कृमिकराः कलायाः प्रचुरानिलाः ॥")

मकूलकः, पुं, (मकि मण्डने + पिच्छादित्वादूलच् बाहुलकादनुपसर्गलोपः । स्वार्थे कन् ।" इत्यमरटीकायां रघुनाथः ।) सुकूलकः । इत्यमरटीकायां रमानाथः ॥ (पर्य्यायोऽस्य यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।
"लघुदन्ती विशल्या च स्यादुदस्परपर्ण्यपि ।
तर्व्वेरुफला शीता श्वेतपुष्पा वृणप्रिया ।
वाराह्यौ चैव कथिता निकुम्भश्च मकूलकः ॥")

मक्क, ङ गतौ । इति कविकल्पद्रुमः ॥ (भ्वा० आत्म० सक० सेट् ।) कोपश्च । ङ मक्कते । इति दुर्गादासः ॥

मक्काः, पुं, (मक्कं गमनं आत्यन्तिकगतिं मरणं वाति आदत्ते योजयतीत्यर्थः । वा + कः पृषोदरात् ककारागमे साधुः ।) मूत्ररोगविशेषः । यथा,
"सुतायां कृच्छिरोपेतमूत्रं मक्काख्यसंज्ञितम् ।
यत्रधारं पिबेत्तत्र मन्त्रणोष्णोदकेन वा ॥"
इति चक्रपाणिदत्तः ॥

मक्षुलं, क्लो, (मक्ष् + उलच् ।) शिलाजतु । इति शब्दरत्नावली ॥
(विवरणमस्य शिलाजतुशब्दे ज्ञातव्यम् ॥)

मक्कोलः, पुं, वटिका । यथा,—
"मक्कोलो वनजेला च कठिनी कक्खटी खटी ।
इति हेमचन्द्रे त्रिकाण्डशेषः ॥

अदैविकं प्रत्याब्दिकैकोद्दिष्टम्। अन्यत्र ब्राह्मणप्रजादौ नाधिकारः न नित्याधिकारः सपिण्डीकरणान्तानि यानि आद्धानि षोडश। पृथङ्नैव सुताः कुर्युः पृथग्द्रव्या अपि क्वचिदित्यत्रापिना समुच्चितस्याप्यृथग्द्रव्यस्य पुंसः सपिण्डीकरणान्तानीति विशेषणात्तदुत्तरश्राद्धानां पृथक्त्वमपि प्रतीयते॥ * ॥ मघात्रयोदशीनिमित्तके श्राद्धे पुत्रवता पिण्डा न देयाः।

"भौजङ्गीं तिथिमासाद्य यावच्चन्द्रार्कसङ्गमम्।
तत्रापि महती पूजा कर्त्तव्या पितृदैवते।
ऋक्षे पितृप्रदानन्तु व्यत्येऽपुत्री विवर्जयेत्॥"

इति देवीपुराणात्। भौजङ्गी पञ्चमी। चन्द्रार्कसङ्गमोऽमावास्या। पितृदैवते ऋक्षे मघायाम्।

ज्ञातातपः।

"पिण्डनिर्व्वापरहितं यत्तु श्राद्धं विधीयते।
न्यधावाचनलोपोऽत्र विकिरस्तु न लुप्यते॥
अक्षय्यं दक्षिया सस्ति सौमनस्यं यथास्ति।

इति तिथ्यादितत्त्वम्॥

मघाभवः, पुं, (मघायां भवः।) शुक्रग्रहः। इति हेमचन्द्रः॥ मघानक्षत्रजाते त्रि॥

मघाभूः, पुं, (मघायां मघासमीपस्यपूर्व्वफल्गुन्यां भवतीति भू+क्विप्।) शुक्राचार्य्यः। इति त्रिकाण्डशेषः॥

मघो, स्त्री, (मघा तदाख्यनक्षत्रं उत्पत्तिकारणत्वेनास्त्यस्या इति। मघा+अर्शआद्यच्। गौरादित्वात् ङीष्।) धान्यभेदः। इति मेदिनी। घे, ३॥

मघोनी, स्त्री, (मघोनः पत्नीति। मघवन्+स्त्रियां ङीष्। वकारस्य च सम्प्रसारणम्।) इन्द्राणी। इति मुग्धबोधव्याकरणम्॥

मङ्कुरः, पुं, (मङ्कयति भूषयतीति। मकि+वाहुलकादुरच्।) सुकुरः। इत्यमरटीकायां भरतः॥

मङ्क्ता, [क्तृ] त्रि, (मज्जति स्नाति इति। मस्ज्+तृच्। "मस्जिनशोर्झलि।" ७। १। ६०। इति नुम्।) स्नानकर्त्ता। इति मस्जधातोः कर्त्तरि व्युत्पत्त्येन निष्पन्नम्॥

मङ्क्षः, पुं, (मङ्क्षति सर्पतीति मगि+अच्।) गौरशिरः। इति हेमचन्द्रः॥

मङ्गल्यं, क्ली, (मङ्गति हितार्थं सर्पति मङ्गति दुरदृष्टमनेनागच्छतीति। मगि+"मङ्गेरलच्।" उणा० ५। ७०। इत्यलच्।) अभिप्रेतार्थसिद्धिः। इति तिथ्यादितत्त्वम्॥ तद्युक्ते, त्रि। इत्यमरः। यथा, रामायणे। २। २३। २०।

"मङ्गलैरभिषिक्तस्त्वं यास्यसे भव॥"

तत्पर्य्यायः। भाव्यम् २ भग्यम् ३ कल्याणम् ४ भविकम् ५ शुभम् ६। क्षेमम् ७ प्रशस्तम् ८ भद्रम् ९ सत्क्रियसम् १० शिवम् ११ अरिष्टम् १२ कुशलम् १३ रिष्टम् १४ भद्रम् १५ शुस्तम् १६। इति शब्दरत्नावली॥ (यथा, भागवते। ५। १८। ३२।

"मङ्गलाय च लोकानां क्षेमाय च भवाय च।"

कल्याणं मङ्गलं क्षेमं शर्म्म शिवं शुभम्।
इति वैद्यकरत्नमालायाम्॥

शिखिहयगजगोधा राक्षसो भृङ्गराजो
मुखरपिककपोतो पोतकी शूकरी वा।
तदनु विहगराजो मङ्गलाश्वंखिनः सु-
र्वदति शकुनवेत्ता वामतो निर्गमे वः॥"

इति हारीते द्वितीयस्थाने सप्तमेऽध्याये।)

सर्व्वार्थरत्नम्। इति मेदिनी। ले, १२०॥*॥

मङ्गलत्वं यथा,—

"प्रशस्ताचरणं नित्यमप्रशस्तविवर्জ্জनम्।
एतद्धि मङ्गलं प्रोक्तं ऋषिभिस्तत्त्वदर्शिभिः॥"

इत्येकादशीतत्त्वम्॥ * ॥

मङ्गलजनकद्रव्याणि। यथा,—

"पूर्णकुम्भं द्विजं वेश्यां शुक्लधान्यञ्च दर्पणम्।
दध्याज्यं मधु लाजञ्च पुण्यं दूर्व्वाक्षतं सितम्॥
दृषं गजेन्द्रं तुरगं ज्वलदग्निं सुवर्णकम्।
पर्णञ्च परिपक्वानि फलानि विविधानि च॥
पतिपुत्रवतीं नारीं प्रदीपं मणिमुत्तमम्।
सुक्तां प्रसूनमालाञ्च सद्योमांसञ्च चन्दनम्॥
ददर्शैतानि वस्तूनि मङ्गलानि पुरो सुनेः।
श्रृङ्गालं नकुलं चाशं ध्रुवं वामे शुभावहम्॥
राजहंसं मयूरञ्च खञ्जनञ्च शुकं पिकम्।
पारावतं शङ्खचिल्लं चक्रवाकञ्च मङ्गलम्॥
कृष्णसारञ्च सुरभीं चमरीं श्वेतचामरम्।
धेनुं वत्सप्रयुक्ताञ्च पताकां दक्षिणे शुभाम्॥
नानाप्रकारवाद्यञ्च शुश्राव मङ्गलध्वनिम्।
हरिशब्दस्य सङ्गीतं घण्टाशङ्खध्वनिन्तथा।
दृष्ट्वा श्रुत्वा स जगाम हर्षेण तात! मन्दिरम्॥"

इति ब्रह्मवैवर्त्ते गणपतिखण्डे कार्त्तिकागमनं नाम १६ अध्यायः॥ * ॥ अपि च:

"ददर्श वह्निन्यैवञ्च मङ्गलार्हं शुभप्रदम्।
वाञ्छाफलप्रदं रम्यं पुरो मङ्गलशुचकम्॥
वामे ध्रुवं शिवां पूर्णकुम्भं नकुलमेव च।
पतिपुत्रवतीं साध्वीं दिव्याभरणभूषिताम्॥
शुक्लपुष्पञ्च माल्यञ्च धान्यञ्च खञ्जनं शुभम्।
दक्षिणे ज्वलदग्निञ्च विप्रञ्च वृषभं गजम्॥
वत्सप्रयुक्तां धेनुञ्च श्वेताश्वं राजहंसकम्।
वेश्याञ्च पुष्पमालाञ्च पताकां दधि पायसम्॥
मणिं सुवर्णं रजतं मुक्तामाणिक्यमौक्तिकम्।
सद्योमांसं चन्दनञ्च माध्वीकं घृतमुत्तमम्॥
कृष्णसारं फलं लाजान् स्निग्धान्नं दर्पणन्तथा।
विचित्रितं विशालञ्च सुदीप्तं प्रतिमान्तथा॥
क्षणं ददर्श देवेशं पञ्चवक्त्रं त्रिलोचनम्।
शुद्धस्फटिकसङ्काशं नागराजैर्विराजितम्॥
शुक्लोत्पलं पद्मवनं शुक्लचित्तञ्च कोरकम्।
मार्जारं पर्व्वतं मेघं मयूरशुकसारसम्॥
शुक्लकोकिलवाद्यानां ध्वनिं शुश्राव मङ्गलम्।
विचित्रं कृष्णसङ्गीतं हरिशब्दं जयध्वनिम्॥
सर्व्वभूतं शुभं दृष्ट्वा श्रुत्वा प्रहृष्टमानसः।
प्रविवेश हरिं स्तुत्वा पुण्यं वृन्दावनं वनम्॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ७० अध्यायः।

अन्यच्च।

"लोकेऽस्मिन् मङ्गलान्यष्टौ ब्राह्मणो गौर्हुताशनः।
हिरण्यं सर्पिरादित्य आपो राजा तथाष्टमः॥
एतानि शततं पश्येन्नरस्योर्द्धञ्चेक्षतः।
प्रदक्षिणन्तु कुर्व्वीत तथा चायुर्न हीयते॥
दूर्व्वा दधि सर्पिरथोदकुम्भं
धेनुं सवत्सां वृषभं सुवर्णम्।
अग्नीमयं स्वस्तिकमक्षतानि
लाजा मधु ब्राह्मणकन्यकाश्च॥
श्वेतानि पुष्पाणि तथा शमीञ्च
हुताशनं चन्दनमर्कबिम्बम्।
अश्वत्थवृक्षञ्च समालभेत
ततश्च कुर्य्याद्विजजानिधर्म्मम्॥"

इति मत्स्यसूक्तमहातन्त्रे ४३ पटलः॥

वर्णभेदे मङ्गलग्रन्थभेदो यथा,—

"ब्राह्मणान् कुशलं पृच्छेत् क्षत्त्रबन्धुमनामयम्।
वैश्यं क्षेमं समागम्य शूद्रमारोग्यमेव तु॥"

इति कौर्म्मे उपविभागे ११ अध्यायः॥

मङ्गलः, पुं, (मगि+"मङ्गेरलच्।" उणा० ५। ७०। इति अलच्।) ग्रहविशेषः। तस्योत्पत्तिः। अङ्गारकः २ भौमः ३ कुजः ४ वक्रः ५ महीसुतः ६ वर्षार्चिः ७ लोहिताङ्गः ८ खोन्मुखः ९ ऋणान्तकः १०। इति शब्दरत्नावली॥ आरः ११ क्रूरदृक् १२ आवनेयः १३। इति ज्योतिषतत्त्वम्॥ स च रक्तगौरभिन्नितवर्णः। दक्षिणदिक्पुरुषक्षत्रियजातिसामवेदतमोगुणतिक्तरसमेषराशिप्रवालावन्तिदेशानामधिपतिः। मेषवाहनः। चतुरङ्गुलप्रमाणः। आरक्तमाल्यवसनः। भरद्वाजसुनिसन्तानः। चतुर्भुजः। शक्तिवराभयगदाधारी। क्षुर्य्याभिमुखः। अस्याधिदेवता कार्त्तिकेयः। प्रत्यधिदेवता पृथिवी। स तु पित्तप्रकृतिः। युवा। क्रूरः। वनचारी। मध्याह्नकाले प्रबलः। गैरिकादिधातुस्वामी। चतुष्पदानां प्रभुः। चतुष्कोणाकृतिः। सुवर्णकारादीनां स्वामी। ज्वलितभूमिचारी। किञ्चिदङ्गहीनः। कटुरसप्रियः। ताम्रवर्णरक्तद्रव्यस्वामी च। इति गणयागतत्त्वम्। सुजातकादयः॥ * ॥ अस्योत्पत्तिर्यथा,—

"उपेन्द्रवीर्य्यात् पृथ्व्याञ्च मङ्गलः समजायत।
वसुन्धरायां बलवान् तन्मे आख्यातुमर्हसि॥

सौतिरुवाच।

उपेन्द्ररूपमालोक्य कामार्त्ता च वसुन्धरा।
विधाय सुन्दरी वेशमचला प्रौढ़यौवना॥
सस्मिता तस्य तल्पे च सहसा समुपस्थिता।
सुरम्यां मालतीमालां ददौ तस्मै वरानना॥
उपेन्द्रस्तस्याश्च ज्ञात्वा कामी मन्मथपीड़ितः।
नानाप्रकारशृङ्गारं चकार च तया सह॥
तदङ्गसङ्गमासक्ता मूर्च्छां प्राप सती तदा।
मृतेव निश्चिता वार्त्ता वीर्य्याधानकृते हरौ॥
विधाय तत्र रहसि जगाम पुरुषोत्तमः।
उर्व्वशीं पथि गच्छन्तीं बोधयामास तां मुने!॥
सा च पप्रच्छ वृत्तान्तं कथयामास भूपतिम्।
वीर्य्यं समरणं कर्त्तुं सा चाशक्ता च दुर्म्मदा॥
प्रयान्त्याकरे तस्या वीर्य्यन्यासं चकार सा।

तेन प्रयाप्यवंशेन कुमार: समजायत ।
तेजसा सूर्यसदृशो नारायणसुतो महान् ।"
इति ब्रह्मवैवर्तपुराणे, ८ अध्याय: ॥
अपि च ।
"नमोऽङ्गारकलोको हि समस्तत्र महीसुत: ।
उत्पत्तिञ्चास्य वक्ष्यामि यथायं भूसुतोऽभवत् ॥
पुरा हि श्रमतो विष्णो: स्वेदबिन्दु: पपात ह ।
महीतल: कुमारोऽभौ लोहिताङ्गो महो-
तलात् ॥
जात: खेदेन मेदिन्या वर्द्धित: पृथिवीपते ! ।
तपसाराध्य ब्रह्माणं यद्यत्सुपसेदिवान् ॥"
इति पाद्मे सर्गखण्डे ११ अध्याय: ॥
अपरञ्च ।
"पुरा दक्षविनाशाय कुपितस्य त्रिशूलिन: ।
अपतद्भौमवक्त्रस्य स्वेदबिन्दुर्ललाटज: ॥
भित्त्वा समस्तपातालानदहत् सप्त सागरान् ।
अनेकवक्त्रनयनो ज्वलज्ज्वलनभीषण: ॥
वीरभद्र इति ख्यात: करपादायुतैर्युत: ।
कृत्वा च यज्ञमथनं पुनर्भूतलसम्भव: ॥
त्रिशूलमिन्द्रदत्तं भूय: शिवेन विनिवारित: ।
श्रुतं त्वया वीरभद्र ! दक्षयज्ञविनाशनम् ॥
इदानीमसमेतेन लोकदाहेन कर्मणा ।
शान्तिप्रदानात् सर्व्वेषां ग्रहाणां प्रथमो भव ॥
लेखिष्यन्ति जना: पूजां करिष्यन्ति मतं मम ।
अङ्गारक इति ख्यातिं गमिष्यसि धरात्मज ! ॥
देवलोके द्वितीयश्च तव रूपं भविष्यति ।
ये च त्वां पूजयिष्यन्ति चतुर्थ्यां त्वद्दिने नरा: ।
रुग्णमारोग्यमैश्वर्य्यं तेष्वनन्तं भविष्यति ।
रुग्णसक्तसदा शान्तिमगमत् कामरूपधृक् ।
संजातस्तत्सुतश्चाभात् ! ग्रहत्वमगमत् पुन: ॥"
इति मत्स्यपुराणे अङ्गारकव्रतं नाम ९८ अ: ॥
रूपभेदे अन्धकासुरवधकाले तस्योत्पत्तिर्यथा,
"यो भूम्यां न्यपतद्विप्र ! स्वेदबिन्दु: शिवान-
नात् ।
तस्मादङ्गारपुत्राभो बालक: समजायत ।
स दानवकृतोत्पर्यं पपौ रुधिरमात्मकम् ।
कन्या चोत्पेदसंज्ञाता मातृभिलिलिहेऽद्भुता ॥
तनसामाद्य दाक्षाकेप्रभां मेरवमूर्द्धिमान् ।
अङ्गारो वरदो लोकत्रयोत्पाय वधो महत् ॥
त्वां पूजयिष्यन्ति सुरा ग्रहय: पितरस्तथा ।
यज्ञविद्याधरांश्चैव मानवाश्च शुभङ्करि ! ॥
त्वां स्तोष्यन्ति सदा देवि ! वसिपुष्पोत्करै: करै: ।
चर्चिकेति शुभं नाम यस्माद्रुधिरचर्चिता ॥
रक्तेयमुक्ता वरदेन चर्चिका
भूताद्यया वा परिवर्त्तनशीलिनी ।
महीं समस्तामधिचार सुन्दरी
कृत्वा तलाघैर्भुवमाहतोत्तमम् ।
तस्यां तलाघो वरद: कुजस्य
प्रादाद्वरं सर्व्वसुरोत्तमं पर: ।
यद्यधिपत्यं ग्रहत: शुभाशुभं
भविष्यति त्वद्दिवसं महाबलम् ।
इति कालिकापुराणे ९८ अध्याय: ॥

अस्य स्तोत्रं यथा,—
"धरणीगर्भसंभूतं विद्युत्पुञ्जसमप्रभम् ।
कुमारं शक्तिहस्तञ्च लोहिताङ्गं नमाम्यहम् ॥"
इति यामोक्तनवग्रहस्तोत्रान्तर्गतम् ॥
अस्यपरिशोधनार्थमस्तोत्रं यथा,—
"मङ्गलो भूमिपुत्रश्च ऋणहर्त्ता धनप्रद: ।
स्थिरासनो महाकाय: सर्व्वकर्म्माविरोधक: ॥
लोहितो लोहिताक्षश्च सामगानां कृपाकर: ।
धरात्मज: कुजो भौमो भूमिजो भूमिनन्दन: ॥
अङ्गारको यमश्चैव सर्व्वरोगापहारक: ।
वृष्टिकर्त्ता च हर्त्ता च सर्व्वकामफलप्रद: ॥
एतानि कुजनामानि प्रातरुत्थाय य: पठेत् ।
ऋणं न जायते तस्य धनमाप्नोति पुष्कलम् ॥
रक्तपुष्पैश्च गन्धैश्च धूपदीपादिभिस्तथा ।
मङ्गलं पूजयेद्यस्तु मङ्गलेऽहनि सर्व्वदा ॥
ऋणरेखा: प्रकर्त्तव्या अङ्गारेण सदा बुधै: ।
प्रोच्यतेदामपादेन ऋणं तस्य विनश्यति ॥
मङ्गलाय नमस्तुभ्यं नमस्ते ऋणहारिणे ।
पुत्रपौत्रप्रदात्रे च मङ्गलाय नमो नम: ॥
ऋणार्त्तो त्वत्प्रपन्नोऽहमतस्त्वं कुरु मे विभो ! ।
एतत् श्रुत्वा न सन्देहो ऋणं हत्वा धनी भवेत् ।
इति स्कन्दपुराणम् ॥ * ॥
मङ्गलवारे जातस्य फलं यथा.—
"उग्र: प्रतापी क्षितिपालमन्त्री
रणप्रियो वक्रवचा: सरोष:।
सत्त्वान्वित: शूरगणप्रणेता
कुजस्य वारे प्रभवो मनुष्य: ॥"
इति काशीप्रदीप: ॥
मङ्गलचण्डिका, स्त्री, (मङ्गला मङ्गलदायिका चासौ चण्डिका चेति। यद्वा, रुद्रौ मङ्गला प्रलये चण्डिका। अथवा मङ्गले चण्डिका दक्षा।) मङ्गलचण्डी। यथा, कालिकापुराणे।
"यैषा ललितकान्ताख्या देवी मङ्गलचण्डिका।
वरदाभयहस्ता च द्विभुजा गौरदेहिका ॥
रक्तपद्मासनस्था च रक्तकुण्डलमण्डिता।
रक्तकौषेयवस्त्रा च स्मितवक्त्रा शुभानना ॥
नवयौवनसम्पन्ना चार्व्वङ्गी ललितप्रभा।
उमया भाषितं सत्यं यत् पूर्व्वन्त्वेकमक्षरम्।
सत्यमस्त्वतु तत्त्वेयं तेन देवीं प्रपूजयेत् ॥"
एकमक्षरं शक्तिबीजरूपम्।
"अष्टम्याञ्च नवम्याञ्च पूजा कार्य्या विशेषत:।
पटेवु प्रतिमायां वा घटे मङ्गलचण्डिकाम् ॥
य: पूजयेद्धौमदिने शुभदूर्व्वाक्षतै: शुभाम्।
सततं साधक: सोऽपि कामानिष्टमवाप्नुयात् ॥"
मङ्गलवारे कृष्णाष्टमीचतुर्दश्यौ चेत् पुण्यतरे भवत:। यथा,—
"अग्नेश्वरस्य वारेण वारेणाङ्गारकस्य च।
कृष्णाष्टमीचतुर्दश्यौ पुण्यात् पुण्यतरे स्मृते ॥"
मङ्गलवारे शुक्ला चतुर्थी वेदशुभा भवति। यथा,—
"सोमवारेऽश्वभाचार्द्रा स्वातिश्चैव शुभा तथा।
चतुर्थ्यङ्गारके वारे तद्भौमी च हरप्रिया ॥

अत्र यत् क्रियते पापमथवा धर्म्मसञ्चय:।
षष्टिवर्षसहस्राणि प्रतिजन्म तदश्नुयम् ॥"
इति तिथ्यादितत्त्वम् ॥
मङ्गलचण्डी, स्त्री, (मङ्गला चासौ चण्डी चेति यद्वा, देवानां सुखादिभक्तानां मङ्गलाय दुर्गेयासुरादिमारणे चण्डी अत्यन्तकोपना। मङ्गलेचण्डी दक्षेति वा। अथवा रुद्रौ मङ्गला प्रलये चण्डी। भागवतेऽस्या नामनिरुक्तिर्यथा,—
"रुद्रौ मङ्गलरूपा च संहारे कोपरूपिणी।
तेन मङ्गलचण्डी सा पण्डितै: परिकीर्त्तिता ॥")
दुर्गा। यथा,—
नारायण उवाच।
"कथितं पशुपाख्यानं ब्रह्मपुत्र ! यथागमम्।
देवी मङ्गलचण्डी या तदाख्यानं निशामय ॥
तस्या: पूजादिकं सर्व्वं धर्म्मवक्त्रेण यच्छ्रुतम्।
मुनिसम्मतमेवेदं सर्व्वेषां विदुषामपि ॥
दक्षायां वर्त्तते चण्डी कल्पेषु च मङ्गलम्।
मङ्गलेषु च या दक्षा सा च मङ्गलचण्डिका ॥
पूज्यायां वर्त्तते चण्डी मङ्गलेऽपि महीसुत:।
मङ्गलाभीष्टदेवी या सा वा मङ्गलचण्डिका ॥
मङ्गलो मघुवंशश्च सप्तद्वीपधरापति:।
तस्य पूज्याभीष्टदेवी तेन मङ्गलचण्डिका ॥
मूर्त्तिभेदेन सा दुर्गा मूलप्रकृतिरीश्वरी।
कृपारूपानिशब्दाच्चा योषितामिष्टदेवता ॥
प्रथमे पूजिता सा च शङ्करेण पुर: पुरा।
त्रिपुरस्य वधे घोरे विष्णुना प्रेरितेन च ॥
ब्रह्मन् ! ब्रह्मोपदेशेन दुर्गप्रस्थेन सङ्कटे।
व्याकाशात् पतिते याने दैत्येन पातिते रथा ॥
ब्रह्मविष्णूपदिष्टश्च दुर्गो तुष्टाव शङ्कर:।
सा च मङ्गलचण्डी च बभूव रूपभेदत: ॥
उवाच पुरत: शम्भोर्भयं नास्तीति ते विभो !।
भगवान् हररूपश्च सर्व्वेषाञ्च बभूव ह ॥
युद्धशक्तिस्वरूपाहं भविष्यामि तदाज्ञया।
मयासुना च हरिणा सहायेन हरध्वज ! ॥
वधिष्ये दैत्यश्च शत्रुञ्च सुराणां पदघातकम्।
इत्युक्त्वान्तर्हिता देवी शम्भो: शक्तिर्बभूव सा ॥
विष्णुदत्तेन शस्त्रेण जघान तत्पतिं पति:।
मुनीन्द्र ! पतिते दैत्ये सर्व्वे देवा महर्षय: ॥
तुष्टुवु: शङ्करं देवं भक्तिनम्रात्मकन्धरा:।
तत: शिरसि शम्भोश्च पुष्पवृष्टिर्बभूव च।
ब्रह्मा विष्णुश्च मनुश्च ददौ तस्मै शुभाशिषम् ॥
ब्रह्मविष्णूपदिष्टश्च सुरात: शङ्कर: शुचि:।
पूजयामास तां शक्तिं देवीं मङ्गलचण्डिकाम् ॥
पाद्यार्घ्याचमनीयैश्च बलिभिर्विविधैरपि।
पुष्पचन्दनवेद्यैश्च भक्त्या नानाविधैर्मुने ! ॥
धूपैर्दीपैश्च मधुपर्कैर्गन्धैर्मालतिमिश्रया।
दध्यालभनकैश्चैव पायसै: पिष्टकैरपि ॥
नृभिश्च सुरभिश्च पक्वैर्नानाविधै: फलै:।
संगीतनर्त्तकैर्वाद्यैरतुलै: स्तवकीर्त्तनै: ॥
ध्यात्वा माध्यन्दिनोक्तेन ध्यानेन भक्तिपूर्व्वकम्।
दद्यौ ध्यात्वा मूलेन मन्त्रेणैव च नारद ! ॥

ॐ श्रीं ह्रीं क्लीं सर्व्वपूज्ये देवि मङ्गलचण्डिके।
हुं हुं फट् स्वाहेत्येवमाद्यैकविंशाक्षरो मनुः॥
पूज्यः कल्पतरुश्चैव भक्तानां सर्व्वकामदः।
दशलक्षजपेनैव मन्त्रसिद्धिर्भवेन्नृणाम्।
मन्त्रसिद्धिर्भवेद्यस्य स विष्णुः सर्व्वकामदः॥
ध्यानञ्च श्रूयतां ब्रह्मन्! वेदोक्तं सर्व्वसम्मतम्॥
देवीं षोडशवर्षीयां शश्वत्सुस्थिरयौवनाम्।
सर्व्वरत्नगुणाढ्याञ्च कोमलाङ्गीं मनोहराम्॥
शोभितां सुदतीं शुद्धां शश्वत्पद्मनिभाननाम्॥
बिभ्रतीं कबरीभारं मल्लिकामाल्यभूषितम्।
विम्बोष्ठीं सुदतीं शुद्धां शश्वत्पद्मनिभाननाम्॥
ईषद्धास्यप्रसन्नास्यां सुनीलोत्पललोचनाम्।
जगद्धात्रीञ्च दात्रीञ्च सर्व्वेभ्यः सर्व्वसम्पदाम्।
संसारसागरे घोरे पोतरूपां वरां भजे॥
देयाच्च ध्यानमित्येवं स्तवनं श्रूयतां मुने!।
श्रुत्वा सङ्कटयस्तो येन तुष्टाव शङ्करः॥

श्रीशङ्कर उवाच।

रक्ष रक्ष जगन्मातर्देवि मङ्गलचण्डिके!।
हारिके विपदां राशिं हर्षमङ्गलदायिके!॥
हर्षमङ्गलदक्षे च हर्षमङ्गलचण्डिके!।
शुभे मङ्गलदक्षे च शुभे मङ्गलचण्डिके!॥
मङ्गले मङ्गलार्हे च सर्व्वमङ्गलमङ्गले!।
सतां मङ्गलदे देवि! सर्व्वेषां मङ्गलालये!॥
पूज्ये! मङ्गलवारे च मङ्गलाभीष्टदेवते!।
पूज्ये मङ्गलभूपस्य मनुवंशस्य सन्ततम्॥
मङ्गलाधिष्ठातृदेवि! मङ्गलानाञ्च मङ्गले!।
संसारमङ्गलाधारे मोक्षमङ्गलदायिनि!॥
सारे च मङ्गलाधारे पारे च सर्व्वकर्म्मणाम्।
प्रतिमङ्गलवारे च पूज्ये च मङ्गलप्रदे!॥
स्तोत्रेणानेन शम्भुश्च स्तुत्वा मङ्गलचण्डिकाम्।
प्रतिमङ्गलवारे च पूजां कृत्वा ययौ शिवः॥
देयाच्च मङ्गलं स्तोत्रं यः शृणोति समाहितः।
तस्य मङ्गलं भवेत् ध्रुवञ्च भवेत्तस्य मङ्गलम्॥
प्रथमे पूजिता देवी शिवेन सर्व्वमङ्गला।
द्वितीये पूजिता देवी मङ्गलेन ग्रहेण च॥
तृतीये पूजिता भद्रा मङ्गलेन नृपेण च।
चतुर्थे मङ्गले वारे सुन्दरीभिश्च पूजिता॥
मङ्गले मङ्गलाकाङ्क्षैर्नरैर्मङ्गलचण्डिका।
पूजिता प्रतिविश्वेषु विश्वेशपूजिता सदा॥
ततः सर्व्वत्र संपूज्या सा बभूव सुरेश्वरी।
देवादिभिश्च मुनिभिर्मनुभिर्मानवैर्मुने!॥
पठेन्नित्यमुपाख्यानं मङ्गलञ्च दिने दिने॥"
इति ब्रह्मवैवर्त्ते महापुराणे प्रकृतिखण्डे नाना-
व्रतनारदीये मङ्गलचण्डिकोपाख्यानं ततस्तोत्र-
स्तवनं नाम ४१ अध्यायः॥

मङ्गलच्छायः, पुं, (मङ्गला मङ्गलनिशा छायास्य।) नक्षत्रम्। इति राजनिर्घण्टः॥

मङ्गलगोरोचनं, क्लीं, (मङ्गलं मङ्गलकरं मङ्गलाय वा गोरोचनम्।) शाक्तमुक्तैकर्कश मङ्गलकारकम्। मङ्गल यारनी इति भाषा। यथा,—

"पठित्वाथ प्रियान् श्लोकान् महावादित्र-
निःस्वनैः।
प्रभोर्नीराजनं कुर्य्यान्मङ्गलाख्यं जगद्धितम्॥
नीराजनन्त्विदं सर्व्वैः कर्त्तव्यं शुचिविग्रहैः।
परमश्रद्धयोत्थाय दृष्टश्च सदा नरैः॥
स्त्रीणां पुंसाञ्च सर्व्वेषामेतत् सर्व्वेष्टपूरकम्।
समस्तदैन्यदारिद्र्यदुरितार्त्युपशान्तिकृत्॥"
इति श्रीहरिभक्तिविलासे ३ विलासः॥

मङ्गलपाठकः, पुं, (पठतीति। पठ+ण्वुल्। मङ्गलस्य पाठकः।) वन्दी। इति हेमचन्द्रः। ७। ६४॥ (यथा, वेणीसंहारनाटके। १, अङ्के
'आः पाप! दुरात्मन्! दृष्टमङ्गलपाठक!।'

मङ्गलप्रदा, स्त्री, (मङ्गलं प्रददातीति। प्र+दा+"आतश्चोपसर्गे।" ३। १। १३६। इति कः। टाप्।) हरिद्रा। इति कैचित्॥ मङ्गलदातरि त्रि॥

मङ्गला, स्त्री, (मङ्गलमस्या अस्तीति। मङ्गल+अर्श आद्यच्। टाप्।) पार्व्वती। शुक्लदूर्व्वा। पतिव्रता। इति शब्दरत्नावली॥ करञ्जभेदः। इति शब्दचन्द्रिका॥ वृत्तार्हेन्द्राणविशेषः। इति हेमचन्द्रः॥ हरिद्रा। नीलदूर्व्वा। इति राजनिर्घण्टः॥

मङ्गलागुरु, क्लीं, (मङ्गलश्च तत् अगुरु चेति। नित्यकर्म्मधारयः।) अगुरुचतुष्टयान्तर्गतागुरु-विशेषः। यथा, राजनिर्घण्टः।
"मङ्गल्या मल्लिकागन्धा मङ्गलागुरुवाचकाः।
मङ्गल्या गुरुशिखिरा गन्धाढ्या योगवाहिका॥"

मङ्गल्यं, क्लीं, (मङ्गलाय साधु इति। मङ्गल+"तत्र साधुः।" ४। ४। ९८। इति यत्।) दधि। इति मेदिनी। ये, १०२॥ चन्दनम्। मङ्गल्यागुरु। स्वर्णम्। सिन्दूरम्। इति राजनिर्घण्टः॥

मङ्गल्यं, त्रि, (मङ्गलाय साधु। मङ्गल+यत्।) शिवकरम्। इति मेदिनी। ये, १०२॥ (यथा, उत्तरचरिते। ७ अङ्के।
"यामभ्यच्च पुनाति वर्द्धयति च श्रेयांसि येषं कथा।
मङ्गल्या च मनोहरा च जगतो मातेव मङ्गेव च॥"
यथाच, महाभारते। १। १। २४।
मङ्गल्यं मङ्गलं विष्णुं वरेण्यमनघं शुचिम्।
नमस्कृत्य हृषीकेशं चराचरगुरुं हरिम्॥")
रुचिरम्। इति हेमचन्द्रः॥ साधुः। इति धरणिः॥

मङ्गल्यः, पुं, (मङ्गलाय साधुः। मङ्गल+"तत्र साधुः।" ४। ४। ९८। इति यत्।) छाग-मांसः। अश्वत्थः। बिल्वः। मरुरुकः। इति मेदिनी। ये, १०२॥ नीवकः। नारिकेलः। कपित्थः। रोहाजरुजः। इति राजनिर्घण्टः॥ (नीव इति ख्यातः शाकविशेषः। तत्पर्य्यायो यथा,—
"जीवन्ती जीवनी जीव्या जीवनीया मधुस्रवा।
मङ्गल्यनामधेया च शाकश्रेष्ठा पयस्विनी।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

मङ्गल्यकः, पुं, (मङ्गल्य+संज्ञायां कन्। यद्वा मङ्गलस्य मङ्गलग्रहस्य प्रियः इति यत्। ततः स्वार्थे कन्।) मसूरः। इत्यमरः। २। ६। १७॥ (तथास्य पर्य्यायः।
"मङ्गल्यको मसूरः स्यान्मङ्गल्या च मसूरिका।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

मङ्गलकुसुमा, स्त्री, (मङ्गल्यानि कुसुमानि यस्याः।) शङ्खपुष्पी। इति भावप्रकाशः॥

मङ्गल्यनामधेया, स्त्री, (मङ्गलं मङ्गलजनकं नामधेयं यस्याः।) जीवन्ती। इति जटाधरः॥

मङ्गल्या, स्त्री, (मङ्गलाय साधुरिति यत्। टाप्।) मल्लिकागन्धयुक्तागुरु। इत्यमरः। २।६।१२७॥ शमी। अधःपुष्पी। मिसी। शुक्लवचा। रोचना। इति मेदिनी। ये, १००॥ प्रियङ्गुः। शङ्खपुष्पी। इति हेमचन्द्रः॥ माषपर्णी। जीवन्ती। ऋद्धिः। वचा। हरिद्रा। चोड़ा। इति राजनिर्घण्टः॥ दूर्व्वा। इति रत्नमाला॥ दुर्गा। यथा,—
"शोभनानि च श्रेष्ठानि यो देवी ददते हरे।
भक्तानामार्त्तिहरणी मङ्गल्या तेन सा स्मृता॥"
इति देवीपुराणे ४२ अध्यायः॥
(वचार्थे पर्य्यायो यथा,—
"तीक्ष्णोग्रगन्धा जटिला मङ्गल्या विजया वचा।
षड्ग्रन्थोग्रा च रास्नोग्री सिता हैमवती तु सा॥
मिस्यर्थे यथा,— [मिसी।"
"अवाक्पुष्पी च कृष्णा स्याक्कृष्णा मधुरा हिमपुष्पी। तत्पर्य्यायो यथा,—
"अवाक्पुष्पी लघुःपुष्पी मङ्गल्यामरपुष्पिका॥
इति च वैद्यकरत्नमालायाम्॥
रोचनार्थे पर्य्यायो यथा,—
"गोरोचना तु मङ्गल्या वन्द्या गौरी च रोचना।"
शमीवृक्षे पर्य्यायो यथा,—
"शमी शङ्खफला तुङ्गा केशहन्त्री फला शिवा।
मङ्गल्या च तथा लक्ष्मीः शमीरः साल्विका स्मृता।"
मसूरः। तत्पर्य्यायो यथा,—
"मङ्गल्यको मसूरः स्यान्मङ्गल्या च मसूरिका।'
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।)

मङ्गिनी, स्त्री, (मङ्गो गौशिरस्तदस्या अस्तीति इनिः ङीप् च।) नौका। इति हेमचन्द्रः॥

मङ्गुलं, क्लीं, (मङ्गुलनेनेति। मङ्गु+क्लुट्।) चक्षुश्चागम्। इति शब्दरत्नावली। १६८॥

मङ्गु, अ, मङ्गतीति। मङ्गु+बहुलवचनात् डुः। "ममुविनशोर्कलि।" ७। १। ६०। इति डुम्। "क्ङिः संयोगाद्योरन्ते च।" ८। २। २८। इति सलोपः।) हृतम्। इत्यमरः। ३। ४। २। (यथा, माघे। ५। ६०।
"यद्वल्गितः कटकटाहतटाग्निमङ्गु-
मङ्गुष्पतति परितः पटलैरलीनाम्।")
शुभार्थम्। इति मेदिनी। अच्चे। ये, ७८।

मज्जन्, क्ली, (मज्जन । पृषोदरादित्वात् साधुः ।) मज्जायाम् । इति त्रिकाण्डशेषः ।

मज्ज, ट ठ उच्चारणार्थोभाः सु । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-एतौ अर्थायाच अक०-दीप्तौ उपसर्गाभावे च अक०-सेट् ।) ट मज्जते । ठ मज्जते । उच्चाय उच्चौभाय: । इति दुर्गादासः ॥

मज्ज, ड च कल्कने । दम्भे । आर्द्रे । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-दम्भे आर्द्रे च । अक०-कल्कने-सक०-सेट् ।) कल्कनमिति कल्कं करोतीति णौ रूपं चूर्णीकरणमित्यर्थः । ड मज्जते तमुनं शिला चकारान्त मपि ड । इति दुर्गादासः ॥

मज्जर्धिका, स्त्री, (मं ज्ञभुं चर्चनीयेति । चर्च् + ण्वुल् । टाप् । अत इत्वम् । वस्तुतस्तु रूढ्योयं शब्दः ।) प्रशस्तम् । इत्यमरः ।२।४।२७१ (यथा, प्रशस्तो ब्राह्मणो ब्राह्मणमर्चयति । "प्रशंसा यर्चनेच । २ । १ । ६६ । इति समासः ।)

मज्जः, पुं, (माद्यति सतिनेनेति । मद् + क्विप् । तथा मनु धातते इति । धौ । दः ।) मद्यम् । इति शब्दरत्नावली ॥

मज्जनृ, क्ली, (मज्जानं करोतीति । कृ + क्विप् । तुगागमश्च ।) अस्थि । इति हैमचन्द्रः ॥

मज्जनं, क्ली, (मज्ज् + ल्युट् ।) स्नानम् । इति भटाधरः । (यथा, राजतरङ्गिण्याम् ।३।४७ । आदरोमज्जनप्रीतिं न जानन्ति मलिम्लुचाः ।") मज्जा । इति शब्दचन्द्रिका ॥

मज्जमज्जुलं, क्ली, (मज्जा मज्जुत्व उत्पत्तिस्थानं यस्य ।) शुक्रम् । इति हैमचन्द्रः ॥

मज्जा, [न्] पुं, (मज्जति अस्थिन्निति । मज्ज् + "अन् उणादि पृषद् प्रीषन् क्लेदन् क्षेपन् रक्षेन् मज्जतिसादि ।" उणा० । १ । १५८ । इति कनिन् निपात्यते च ।) पृषोदरादेराकृतिगणत्वात् । सार इति ख्यातः । इत्यमरभरतौ । कर्मण्यगुणो यथा,—

"यस्य यस्य यत्सस्नेह धैर्यं भवति यादृशम् ।
तस्य तस्येह धैर्यस्य मज्जानमभिनिर्दिशेत् ॥"

इति राजवल्लभः ॥

अस्थिमध्यस्नेहविशेषः । तत्पर्य्यायः । कौशिकः २ शुक्रधरः ३ अस्थिस्नेहः ४ अस्थिसम्भवः ५ । इति हैमचन्द्रः । ३।२८ ३ अस्थिसारः ४ तेजः ७ धीवसम् ८ अस्थिसम् ९ ओजनम् १० देहसारः ११ । इति राजनिर्घण्टः । अथ मज्जसरूपमाह ।

"अस्थि यत् स्नायुना पर्व तस्य सारो ह्यो घनः ।
यः स्नेहवत् पृथग्भूतः स मज्जेत्यभिधीयते ॥"

अथ मज्जस्थानमाह ।

"मूर्द्धास्थिषु विशेषेण मज्जा तत्परे स्थितः ।"

इति भावप्रकाशः ॥

अथ गुणाः ।

"मज्जा विशेषतोऽभ्याश बलशुक्र स्नेहने हितः ।"

इति चरकः ॥

मज्जाशब्द व्यावस्तोरपि । यथा । प्रणातमो मूलकशिमुसिङ्गे: पियालमज्जामसिते रितीति सुश्रुतः । इयमेवाह त्रिकाण्डे भागुरिः ॥

"लज्जाबद्राजवम्मज्जा मांसमारास्थिमारयोः ।"

इत्यमरटीकायां भरतः ॥

मज्जा, स्त्री, (मज्जतीति । मज्ज् + अच् । अजादित्वात् टाप् ।) अस्थिसारः । इत्यमरटीकायां भरतः ॥ अस्य गुणाः । वातनाशित्वम् । वलपित्तकफप्रदत्वम् । मांसतुल्यमस्यरूपत्वञ्च । कुर्मीरमधिपमज्जागुणाः । मधुरत्वम् । स्नेहगत्वम् । बलत्वञ्च । मज्जसत्त्वगुणौ यथा । शैत्यम् । उष्णत्वञ्च । इति राजवल्लभः ॥

मज्जाजः, पुं, (मज्जाया जायते इति । जन् + डः ।) भृमिजगुग्गुलुः । इति राजनिर्घण्टः ॥

मज्जासारः, पुं, (मज्जाया रसः ।) शुक्रम् । इति राजनिर्घण्टः ॥

मज्जासारं, क्ली, (मज्जायां सारो यस्य ।) जातीफलम् । इति राजनिर्घण्टः ॥

मज्जूषा, स्त्री, (मज्जन्ति द्रव्याण्यत्र । मज्ज् + ऊषन् । टाप् निपा० ।) मञ्जूषा । इत्यमरटीकायां रायमुकुटः ॥

मञ्चः, पुं, (मञ्चति । उच्चीभवतीति । मञ्च् + घञ् ।) खट्वा । इत्यमरः । २ । ७ । १३८ ॥ कर्म्मवंशः । माचा इति भाषा ॥ इति धारावली । उच्चमञ्चविशेषः । यथा,—

"दोलायमानं गोविन्दं मञ्चस्थं मधुसूदनम् ।
दृष्ट्वा वामनं दृष्ट्वा पुनर्जन्म न विद्यते ॥"

इति पुराणम् ॥

मञ्चकः, पुं, (मञ्च + स्वार्थे कन् ।) खट्वा । इति हैमचन्द्रः । ६ । ८३ ॥ (यथा, कथासरित्सागरे । २७ । ६१ ।

"वारिधानी तु कुम्भश्च मार्ष्टनी मञ्चकूर्चका ।
अर्घश्च मत्पतित्रेति तुम्बत्रितयमेव नौ ।")

इन्द्रकोषः । उच्चमञ्चः । इति त्रिकाण्डशेषः ॥

मञ्चकाश्रयः, पुं, (मञ्चकः खट्वादिराश्रयो यस्य ।) मनुष्यः । इति राजनिर्घण्टः ॥

मञ्चमरुपः, पुं, (मञ्चो मञ्चरूप इव ।) शस्यरक्षार्थकुटिरम् । टं इति भाषा ॥ तत्पर्य्यायः । कूटङ्गः । इति धारावली ॥

मञ्जरं, क्ली, (मञ्जयति दीप्यते इति । मञ्ज् + अरप्रत्ययः ।) मुक्ता । तिलकवृक्षः । वल्ली । इति शब्दरत्नावली ॥

मञ्जरिः, स्त्री, वल्लरिः । इत्यमरः । २ । ४ । १६ ॥ वलते वर्द्धते नवं वल्लरिः वलमि वल् + ऊरी गौरादित्वात् ङीः । मञ्जु मनोज्ञं राति ददाति मञ्जरिः पृषोदरादित्वादकारस्य अकारः यद्वा मञ्जयति दीप्यते इति मञ्जरी वाहुलकात् ङीः । वल्लिमञ्जरिरित्योरिति दात्यिकः । वलीमुन्निद्राय ।

"मञ्जरिमञ्जरी मञ्जिर्मञ्जरं त्रिषु वल्लरी ।
वलरं त्रिषु वलिश्च वल्लरिः पवनालिका ।"

इति शब्दचन्द्रः ॥

लतामात्रेऽपि वल्लरिः । यतो वाहुवल्लरीति प्रयोग इति सुकुटाद्यः ॥ वल्लरीमञ्जर्योर्भेदमप्याहुः । यथा अभिनवनिर्गता आयता सुकुमारा सकुसुमा अकुसुमा च मञ्जरिः । यथा चूतमञ्जरिः कदलीमञ्जरिः । वल्लरिः पुनश्चिरभूतापि । यथा तालमञ्जरिः गुवाकवल्लरिरिति इयमेव नवे चिरन्तनेऽपीति क्षणसाङ्गौ । इति भरतः ॥

मञ्जरी, स्त्री, (मञ्जरि । ऋदिकारादिति पक्षे ङीष् ।) मुक्ता । तिलकवृक्षः । लता । इति शब्दरत्नावली ॥ (यथा, राजतरङ्गिण्याम् । १ । २०७ ।

"निर्गते मञ्जरीकुञ्जादपश्यत् पुरतस्ततः ।
कर्णे नीलनिचोलिन्यौ स कैचिच्चारलोचने ॥")

मञ्जरिः । इत्यमरटीकायां भरतः ॥ (यथा, व्यायोगसप्तशत्याम् । ५३३ ।

"वापीकच्छे वासः कण्टकवृतयः सजागरा भ्रमराः ।
केतकविटप किमेतैर्नतु वाराय मञ्जरीगन्धम् ॥")

तुलसी । इति राजनिर्घण्टः ॥

मञ्जरीनम्रः, पुं, (मञ्जर्यां मञ्जर्यवस्थायामपि नम्रः ।) वेतसवृक्षः । इति राजनिर्घण्टः ॥

मञ्जा, स्त्री, (मञ्जि + पचाद्यच् । टाप् ।) छागी । इति त्रिकाण्डशेषः ॥ मञ्जरी । इति हैमचन्द्रः । ११ । २२ ॥

मञ्जिः, पुं, (मञ्जि + इन् ।) मञ्जरी । इति त्रिकाण्डशेषः ॥

मञ्जिका, स्त्री, (मञ्जयतीति । मञ्ज + ण्वुल् । टाप् । अत इत्वञ्च ।) वेणी । इति धारावली ॥

मञ्जिफला, स्त्री, (मञ्जिर्मञ्जरी फलेऽस्याः ।) कदली । इति त्रिकाण्डशेषः ॥

मञ्जिष्ठा, स्त्री, (अतिशयेनेयं मञ्जिमती । मञ्जिमती + इष्ठः । मतुपो लोपः स्त्रियां टाप् ।) स्वनामख्यातरक्तवर्णलताविशेषः । मजीट इति हिन्दी भाषा । तत्पर्य्यायः । विकसा २ शिग्रुः ३ समङ्गा ४ कालमेषिका ५ मरुकपर्णी ६ भण्डीरी ७ भण्डी ८ योजनवल्ली ९ । इत्यमरः । २ । ४ । ८० ॥ कालमेषी १० कामा ११ शिग्रुः १२ भण्डिरी १३ भण्डिका १४ भण्डिः १५ । इति शब्दरत्नावली ॥ कृमिघ्नी १६ रक्ता १७ गौरी १८ योजनवल्लिका १९ वरा २० गोपिनी २१ चित्रलता २२ चित्रा २३ चित्रालता २४ जनवी २५ विशला २६ मञ्जिका २७ रक्तयष्टिका २८ छत्रिणी २९ रागाढ्या ३० कालभाविका ३१ चारुता ३२ अरुणवल्ली ३३ कृमिघ्नी ३४ कामकुम्भाख्या ३५ भण्डीरस्त्रिका ३६ रागाढ्या ३७ वरुणभूता ३८ । (यथा-वामनं यथा —

'मञ्जिष्ठा विकसा शिग्रुः कामा योजनवल्लिका ।

ताम्रवल्ली चित्रपर्णी कान्तारी रक्तयष्टिका ।"
इति रत्नमाला ॥)
अस्या गुणाः । मधुरत्वम् । कषायत्वम् । उष्णत्वम् । गुरुत्वम् । व्रणमेहज्वरश्लेष्मविषनेत्रामयनाशित्वञ्च । सा चतुर्विधा । चोलः१ योजनी२ कौन्ती ३ सिंहली च ४ । इति राजनिर्घण्टः ।
क्षुस्वरभङ्गशोथनाशित्वम् । वर्णाग्निकारित्वञ्च ।
इति राजवल्लभः ॥ अपि च ।
"मञ्जिष्ठा मधुरा तिक्ता कषाया स्वर्णवर्णकृत् ।
गुरुष्णा त्रिदोषघ्नी शोथयोन्यर्शिकर्णरुक् ।
रक्तातिसारकुष्ठासाविसर्पव्रणमेहनुत् ॥"
इति भावप्रकाशः ॥
मञ्जी, स्त्री, (मञ्जयति दीप्यते इति । मञ्जि + इन् । ङीदिकारादिति ङीष् ।) मञ्जरी । इति हेमचन्द्रः त्रिकाण्डशेषश्च ॥
मञ्जीरः, पुं, क्ली, (मञ्जति मधुरं शब्दायते । इति मनुञ् ध्वनौ सौत्रधातुः + वाहुलकात् ईरन् ।) नूपुरः । इत्यमरः । २ । १०६ ॥ मञ्जीरोऽस्त्री च नूपुरः । इति रभसः ॥ (यथा, गीतगोविन्दे । ५ । ११ ।
"सुखरमधीरं त्यज मञ्जीरं
रिपुमिव केलिषु लोलम् ॥")
मञ्जीरः, पुं, (मञ्ज + ईरन् ।) मन्थानदण्डरज्जुबन्धनार्थस्तम्भः । तत्पर्य्यायः । विष्कम्भः २ कुटरः २ । इति हेमचन्द्रः ॥
मञ्जु, त्रि. (मञ्जतीति । मञ्ज ध्वनौ सौत्रधातुः । "ऋगयादयश्च ।" उणा० । १ । ३८ । इति कुः ।) मनोज्ञम् । इत्यमरः । ३ । १ । ५२ ॥ (यथा, पद्मपुराणे । १ ।
"व्रजन्ती गेहं झटिति यसुगमञ्जुकुञ्जं जगाम ।")
मञ्जुकेशी, [न्] पुं, (मञ्जवो मनोहराः केशाः मन्तस्य । इनि ।) शोभनाः । इति शब्दरत्नावली ॥
सुन्दरकेशयुक्तेऽपि त्रि ॥
मञ्जुगमना, स्त्री, (मञ्जु मनोहरं गमनं यस्याः । स्त्रियां टाप् ।) हंसी । इति राजनिर्घण्टः ॥
सुन्दरगामिनि त्रि ॥
मञ्जुघोषः, पुं, (मञ्जुर्मनोहरो घोषः शब्दोऽस्य ।) पूर्ब्बतिनभेदः । इति त्रिकाण्डशेषः ॥ उपास्य देवताविशेषः । अस्य मन्त्रादि यथा,—
"नार्यौघतिमिरध्वंसी संसारार्णवतारकः ।
श्रीमञ्जुघोषो जयतां साधकानां सुखावहः ॥"
तन्त्रागमोत्तरे ।
"माटकादि चतुष्कञ्च बहिर्वीजं चतुष्टरेत् ।
वामांसं कूर्म्मसंयुक्तं ततो मेषेशमुद्धरेत् ॥
सौनेशञ्च ततः कुर्य्यात् वामनेत्रेन्दुसंयुतम् ।
षड्वरो मनुः प्रोक्तो मञ्जुघोषस्य शम्भुना ॥
एवन्तु दीपनी प्रोक्ता मूलमन्त्रन्तु कथ्यते ।
षड्वरं शक्तिबीजञ्च रमायीजं ततः प्रिये ! ॥
शोषद्वयान्तको मन्त्रो नार्यौघध्वान्तनाशनः ।
शक्तिबीजं रमाबीजं कामबीजं तथा प्रिये ! ॥
विद्या श्रुतिधरी प्रोक्ता एषा वर्णत्रयात्मिका ।
एकारो वह्निमारूढो वामनेत्रेन्दुभूषितः ।
प्रोक्ता सार्व्वज्ञविद्येयं एकवर्णात्मिका प्रिये ! ॥
सिद्धः साध्यः सुसिद्धो वा साधकस्य रिपुश्च वा ।
तदा मन्त्रो भवेद्व्यर्था शुभदो बुद्धिदो भवेत् ॥
मध्याह्ने सलिले चैव भोजने भावने तथा ।
गोमये तु बहिर्देशे मैथुने रमणीकुचे ॥
गोष्ठे च निशि गोसुखे यन्त्रं डमरुसन्निभम् ।
विलिख्य मन्त्रवर्णांश्च त्रिधा ऊर्द्धं अधस्तथा ।
लिखेच्चन्दनलेखन्या प्रयत्नात् साधकोत्तमः ।
उच्चाटने लिखेद्यन्त्रं गोचर्म्मणि विशेषतः ।
सलिले विजयी नित्यं भजने च महेश्वरः ॥
गोमये वावटुकः स्याद्गोष्ठे सर्व्वज्ञतां व्रजेत् ।
कुचे श्रुतिधरो नित्यं गोसुखे च महाकविः ॥
गोरुचं वदरीमूलं चन्दनं पांशुमेव च ।
एकीकृत्याथवा जन्मा तिलकं धारयेत् सदा ॥
नमस्कृत्य वरं श्रेष्ठं प्रार्थयेद्भक्तितत्परः ।
वरं प्राप्य च तस्माद्वै विहरेत्तु यथासुखम् ॥
नान्यदेवार्चनं स्नानं प्रणवोच्चारणं न तु ।
वस्त्राञ्चलेन दन्तानां शोधनं लवणेन वा ॥
रात्रिवासो न सुप्येत न शुचिः स्यात् कदाचन ।
एवं कृत्वा प्रयत्नेन ज्ञात्वा गुरुमुखात् सुधीः ॥
मासैकेन कवीन्द्रः स्यात् द्विमासेनेव ईश्वरः ।
त्रिभिर्मासैर्भवेन्मर्त्यः सर्व्वशास्त्रविशारदः ॥
पुत्रार्थी लभते पुत्रं धनार्थी विपुलं धनम् ।
आयुरारोग्यकामस्तु सर्व्वान् कामानवाप्नुयात् ॥
ततः कराङ्गन्यासौ ।
त्रां त्रीं त्रुं त्रुं त्रां त्रीं त्रः । इत्यादि एवं हृदयादिषु । तथा च तन्त्रे ।
"सप्तवर्णो वकेशश्च द्वौ वर्णौ कथितौ प्रिये ! ।
षड्दीर्घभागभाग्भ्यामेताभ्यां षड्ज्ञानि समाचरेत् ॥
सप्तर्णः चकारः वकेशः शुकारः ॥ ध्यानम् ।
"शुभ्रशरभमिव शुभ्रं खड्गपुस्ताङ्कपाणिं
सुरुचिरमतिशान्तं पञ्चचूडं कुमारम् ।
पृथुतरवरसुखं पद्मपत्रायताक्षं
कुमतिदहनदक्षं मञ्जुघोषं नमामि ॥
पीठपूजां ततः कुर्य्यादाधाराद्यादिशक्तितः ।
भूतप्रेतादिभिः कुर्य्यात् पीठासनमनन्तरम् ॥
ज्ञानदात्रे नमः पाद्यं बुद्धिकर्त्रे तथाचमम् ।
आद्यनाशाय गन्धः स्यादर्घ्यं स्याद् यजपाय वै ॥
सर्व्वसिद्धिप्रदात्रेति पुष्पं दद्यादिचक्षयः ।
कुन्दपुष्पं समादाय भैरवान् पूजयेत्ततः ॥
क्षतिताङ्गो वरत्रासः क्रोध उन्मत्तसंज्ञकः ।
कपाली भीषणश्चैव संहारश्चाष्टमः स्मृतः ॥
ततो धूपादिकं दत्त्वा प्रणमानि विसर्जयेत् ।
तैः पुष्पैः पूजयेद्देवीं यक्षिणीञ्च विशेषतः ॥
सुरारिसुन्दरी चैव मनोहारिण्यनन्तरम् ।
कनकावती तथा कामेश्वरी च रतिकर्म्मच ॥
पद्मिनी च वटी चैव चतुरङ्गिण्यनन्तरम् ।
पूज्या एतास्तु योगिन्यो दलेष्वावीनपूर्व्विकाः ॥
एवं संपूज्य देवेशं जपेत्षट्कं जपेच्छतम् ।
दशांशकुन्दपुष्पैश्च एकादशशतानि च ॥
जुहुयादेषिते वह्नौ कान्तारे पिल्पवेल्लनि ।
एवं सिद्धमनुर्मन्त्री महायोगीश्वरो भवेत् ॥"
इति तन्त्रसारः ॥
प्रकारान्तरं कुक्कुटादितन्त्रे द्रष्टव्यम् ॥
मञ्जुपाटकः, पुं, (मञ्जु मनोहरं पठतीति पठ + ण्वुल् ।) शुकपक्षी । इति राजनिर्घण्टः ॥
सुन्दरपाठकर्त्तरि त्रि ॥
मञ्जुप्राणः, पुं, (मञ्जवः प्राणाः यस्य । सर्व्वप्राणकतया महाप्राणत्वादस्य तथात्वम् ।) ब्रह्मा । इति जटाधरः ॥
मञ्जुभद्रः, पुं, (मञ्जु मनोहरं भद्रं मङ्गलं यस्य ।) जिनविशेषः । तत्पर्य्यायः । मञ्जुश्रीः २ ज्ञानदर्शनः ३ मञ्जुघोषः ४ कुमारः ५ अष्टारचक्रवान् ६ शिरचक्रः ७ वज्रधरः ८ प्रज्ञाकायः ९ वादिराट् १० नीलोत्पली ११ महाराजः १२ नीलः १३ शार्दूलवाहनः १४ धियाम्पतिः १५ पूर्ब्बजिनः १६ खड्गी १७ दण्डी १८ विभूषणः १९ बालव्रतः २० पञ्चचीरः २१ सिंहकेलिः २२ शिखाधरः २३ वागीश्वरः २४ । इति त्रिकाण्डशेषः ॥
मञ्जुलं, क्ली, (मञ्जु मञ्जुत्वमस्त्यस्येति । "सिध्मादिभ्यश्च ।" ५ । २ । ९७ । इति मञ्जुशब्दात् लच् ।) जलाशयजलम् । निष्कुञ्जम् । इति मेदिनी । ले, १ । २२ । ॥ शबलः । इति त्रिकः ॥
मञ्जुलः, पुं, (मञ्जु मञ्जुत्वमस्त्यस्मीति । मञ्जु + सिध्मादित्वात् लच् ।) जलकुक्कुटपक्षी । इति मेदिनी । १ । २२ ॥ सुन्दरे त्रि । इत्यमरः । ३ । १ । ५२ ॥ (यथा, कालिकापुराणे ४०अध्याये ।
"मञ्जुलं यौवनोद्भेदं प्राप श्रीरिव माधवे ।"
नदीभेदे स्त्री । यथा, महाभारते । ६ । ६ । ३४ ।
"चित्रोपलां चित्रवर्षां मञ्जुलां वाहिनीं तथा ॥")
मञ्जुश्रीः, पुं, (मञ्जुर्मनोहरा श्रीः शोभा यस्य ।) मञ्जुघोषः । इति त्रिकाण्डशेषः ॥
मञ्जूषा, स्त्री, (मञ्जू षा । पृषोदरादित्वात् हस्वः ।) मञ्जूषा । पेटरा इति भाषा । यथा,—
"मञ्जूषापि च मञ्जूषा पेटा च पेटिकेत्यपि ।"
इति शब्दरत्नावली ॥
मञ्जूषा, स्त्री. (मज्जति द्रव्यमस्मिन् । "मसूरोनूमूच ।" उणा० । ४ । ७७ । इति मस्ज् + ऊषन् । नुम् च स चाचोऽन्त्यात् परः । ततो जश्त्वचुत्वे मध्यमस्य लोपात् साधुः ।) पिटकः । इत्यमरः । २ । १० । ३० ॥ (यथा, देवीभागवते । २ । ६ । ३५ ।
"मञ्जूषायां सुतं कृत्वा सुप्तवन्तीं वाक्यमब्रवीत् ।")
भाषायाः । इत्युणादिकोषः ॥ मञ्जिष्ठा । इति राजनिर्घण्टः । (मञ्जिष्ठार्थे पर्य्यायो यथा,—
"मञ्जिष्ठा विकसा निड्गी समङ्गा कालमेषिका ।
मण्डूकपर्णी भण्डीरी भण्डी योजनवल्लिपि ॥
इसावन्यरसा काला रक्ताङ्गी रक्तयष्टिका ।
भण्डीतकी च गण्डीरी मञ्जूषा वस्त्ररञ्जिनी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
मट, सादे । इति कविकल्पद्रुमः । (भ्वा०-पर०-अक०-सेट् ।) सौत्रधातुरयम् । अस्य प्रयोगः । मटयः । इति दुर्गादासः ॥

मठनी, स्त्री, (मठनं मठः। मठ् अवस्थाने + भावे घञ् मठः धीयते प्रयोगे धीयते हमिहिनि। मठ + नि + बाहुलकात् डिः। मठधिः। ततः गौरादित्वात् ङीष्।) सर्वेषामागारादत्वा दन्यान्यत्वम्।) हरावर्णचन्द्रपक्षिविशेषः। मारावन्दटव्यः। यथा, गोविन्दभाष्यधृत-छान्दोग्ये। १।१०।१। ("मटचीहतेषु कुरुष्वाटिक्या सह जाययोषस्तिर्ह चाक्रायण इभ्यग्रामे प्रद्राणक उवास। इति॥)

मटस्फटिः, पुं, (मटं अवमार्दं स्फटति निरा करोति। स्फट् + इः।) दर्पारम्भः। इति जटाधरः॥

मट्टकं, क्ली, (मठति वसत्यत्रेति। मठ + अप्। पृषोदरादित्वात् टात्वे साधुः। मट्टः। मट्टस्य कं शिरः।) गृहस्य शिरोभागः। इति केचित्। मट्का इति भाषा॥

मठ, धाम मर्दयोः। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-वासे सक०-मर्दने सक०-सेट्।) मठति। वासो निवासः। मर्दः कौटिल्य मन्यते। इति दुर्गादासः॥

मठ, इ ङ आध्याने। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) इ मण्ठ्यते। आध्यानं स्तु स कौतुकं स्मरण माध्यानम्। इति दुर्गादासः॥

मठः, पुं, छात्रादिनिलयः। इत्यमरः।२।२।८॥ मठन्ति वसन्ति छात्रादयोऽत्र मठः। मठ वासमर्दयो. घञ्। छात्रशाला विद्यार्थिगृहाणाः। छात्रेण गुरुधर्मा स्मरति गुरुदोषच्छादनात् छत्रं तच्छीलत्वात् छात्रः निकारसंघेति णः। आदिना परिव्राजकतपस्व्यादीनां ग्रहः। छात्रादीनां निलयो गृहं छात्रादिनिलयः। अर्थकथनमेतत्। नासाप्येनाथि चैपित्। छात्रशाला प्रतिश्रय-स्थानेव। इति भरतः॥ मन्दिरम्। इति धाराचली॥ ... ॥ अथ मठादिप्रतिष्ठाप्रयोगः।

यदि तद्दिने प्रतिमादिप्रतिष्ठा क्रियते तदा तत्रैव वृद्धिश्राद्धादिकं विधाय देवप्रतिष्ठानन्तोक्त-विधिना देवप्रतिष्ठां विधाय गृहप्रतिष्ठा कर्त्तव्या। यदि गृहप्रतिष्ठामात्रं तदा प्रातः कृतनित्यक्रियः प्रक्षालितपाणिपाद आचान्तः प्राङ्मुख उदङ्मुखो वा कुशहस्ताङ्क उपविश्य नारायणं गन्धादिना परिपूज्य अस्मिन् विष्णुवेश्मप्रतिष्ठा-कर्मणि ॐ पुण्याहं भवन्तोऽधिब्रुवन्तु इति त्रिः वाचयेत्। ॐ पुण्याहमिति त्रिर्वैकाले अस्मिन् विष्णुवेश्मप्रतिष्ठाकर्मणि ॐ स्वस्ति भवन्तोऽधि-ब्रुवन्तु इति त्रिः वाचयेत्। ॐ स्वस्तीति त्रिर्वैकाले अस्मिन् विष्णुवेश्मप्रतिष्ठाकर्मणि ॐ ऋद्धिं भवन्तोऽधिब्रुवन्तु इति त्रिः वाचयेत्। ॐ ऋध्यताम् इति त्रिर्वदेयुः। यजुर्वेदिनां ॐ स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः स्वस्ति नस्तार्क्ष्योऽरिष्टनेमिः स्वस्ति नो बृहस्पति-र्दधातु। इत्यनेनाप्यमत्र ... । सामगानान्। ॐ स्वस्ति सोमोऽयं सुतः। विश्वतस्य मरुतः। उतस्वराजो अश्विना। स्वस्ति सोमोऽयं सुतः। विश्वस्य मरुतो पाहि। उतस्वराजो वा पाहि नो पाहि। इति गीयमानेनाक्षतान् क्षिपेत्। गायत्र्या त्रिधा पदं वाचयेत्। ततः।

"सूर्य्यः सोमो यमः कालः सन्ध्ये भूतान्यहः क्षपा।
पवनो दिक्पतिर्भूमिराकाशं खचरामराः।
ब्राह्मं शासनमास्थाय कल्पध्वमिह सन्निधिम्॥"

इति पठित्वा। तत ॐ तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः। दिवीव चक्षुराततम्। इति विष्णुं स्तुत्वा नारायणं नमस्कृत्य ॐ तत सदित्युच्चार्य्य कुशत्रयजलफलद्रव्याण्यादाय ॐ अद्यामुके मासि अमुकपक्षेऽमुकतिथौ अमुकगोत्रः श्रीअमुकदेवशर्म्मा एतत्तृणकाष्ठादिमयवेश्मपरमाणुसमसंख्यवर्षसहस्रावच्छिन्नस्वर्गलोकमहितत्वकामः श्रीविष्णुप्रीतिकामो विष्णुलोकप्राप्तिकामो वा विष्णुवेश्मप्रतिष्ठामहं करिष्ये। इति संकल्पयेत् इष्टकादिमये तु एतदिष्टकादिमय वेश्मपरमाणुसमसंख्यकवर्षसहस्रदशगुणकालावच्छिन्नस्वर्गलोकमहितत्वकाम इति विशेषः। पाषाणवेश्मनि तु तद्दशगुणकालावच्छिन्नस्वर्गलोकेति विशेषः। देवतान्तरगृहप्रतिष्ठायान्तु तद्रूपेण प्रयोगः॥ ॥ ततः संकल्पसूक्तं पठेत्। सामवेदोक्तं तद्यथा ॐ देवो वो द्रविणोदाः पूर्णां विवष्ट्वासिचम्। उद्वासिञ्चध्वमुपवा पृणध्वमादिद्वो देव ओहते॥ यजुर्वेदोक्तं यथा,—

"ॐ यज्जाग्रतो दूरमुदैतु दैवं
तदुसुप्तस्य तथैवैति।
दूरङ्गमं ज्योतिषां ज्योतिरेकं
तन्मे मनः शिवसङ्कल्पमस्तु॥"

ततः गणाधिपगौर्य्यादिषोडशमातृकापूजा-वसोर्धारासम्पातनायुष्यमन्त्रजपाभ्युदयिकश्राद्धानि कर्त्तव्यानि॥ ॥ आयुष्यमन्त्रो यथा। ॐ आयुर्विश्वायुर्विश्वं विश्वमायुरन्तिः। सहि प्रजा-न्त्वष्टाधिनिधे अस्मे शतं जीवेम शरदो वयन्ते॥ ॐ आयुषो मे पवस्व वर्च्चसो मे पवस्व विद्भ्यः पृथिव्या दिवो जनित्रा ... अपोऽपः अरन्तौ सोमोऽद्गाय ममायुषे मम नक्तवर्च्चसाय यजमानस्यङ्गा अमुकस्य राष्ट्राय॥ ॥ तत्र विष्णुवेश्मप्रतिष्ठाभ्युदयार्थमिति वाक्ये विशेषः। एवमन्यवेश्मनि। ततः उत्तराभिमुखं गृहगृहमुपवेश्य तत्समीपे आसनमानीय प्राङ्मुखो यजमानः प्राञ्जलिर्वदेत्। ॐ साधु भवानास्ताम्। ॐ साध्वहमासे इति प्रतिवचनं दत्त्वा तदासने उदङ्मुख उपविशति। ततो यजमानः ॐ अर्च्चयिष्यामो भवन्तं इति वदेत्। ॐ अर्च्चयेति प्रतिवचनम्। ततो गन्धपुष्पताम्बूलालङ्कारैरभ्यर्च्य दक्षिणं जानु स्पृष्ट्वा ॐ अद्येत्यादि अमुकगोत्रममुकप्रवरममुकदेवशर्म्माणं भवन्तं अस्मिन् तद्विष्णुवेश्मप्रतिष्ठाकर्म्मणि कृताकृतावेक्षणरूपब्रह्मकर्म्मकरणाय ब्रह्मत्वेन भवन्तमहं वृणे। ॐ वृतोऽस्मीति प्रतिवचनम्। यथाविहितं ब्रह्मकर्म्म कुरु। ॐ यथाज्ञानं करवाणीति प्रतिवचनम्। स्वयं होमासामर्थ्ये होतुर्वरणमपि तथैव कार्य्यम्। तदाधारकत्वेन आचार्य्यस्यापि तथैव कार्य्यम्। प्रकृते सदस्यस्यापि। गुरोर्वरणे तु संकल्पितेऽस्मिन् विष्णुवेश्मप्रतिष्ठाकर्म्मणीति वक्तव्यम्॥ ॥ ततो यजमानः गुरोः पादौ धृत्वा पठेत्।

"नारायणस्वरूपस्त्वं संसारात्त्राहि मां प्रभो!।
त्वत्प्रसादात् गुरो! यज्ञं प्राप्नोमि यन्मयोदितम्॥
त्राहि नाथ! प्रपन्नं मां भीतं संसारसागरात्।
देवतास्थापने त्वद्य मम शान्तिं कुरु प्रभो!॥"

ततो गुरुः।

"ॐ उत्तिष्ठ वत्स भद्रन्ते मत्प्रसादात्त्वयानघ!
प्राप्तव्यं धर्म्मकामार्थं दुष्प्राप्यं यत् सुरासुरैः॥"

ततो गुरुः।

"ॐ पावमानीः स्वस्त्ययनीः सुदुघा हि घृतश्चुतः।
ऋषिभिः सम्भृतो रसो ब्राह्मणेष्वमृतं हितम्॥"

इति पावमानीसूक्तम्॥

"अभयं पुरस्तान्नः शिवं दक्षिणतः कृधि।
अभयं सततं पश्चात् भद्रमुत्तरतो गृहे॥"

इति शाकुनसूक्तम्॥

ॐ रक्षोहणो वलगहनः प्रोक्षामि वैष्णवान् रक्षोहणो वलगहनोऽवनयामि वैष्णवान् रक्षोहणो वलगहनोऽवस्तृणामि वैष्णवान्। रक्षोहणौ वलगहनावुपदधामि वैष्णवी। रक्षोहणौ वलगहनौ पर्य्यूहामि वैष्णवमसि वैष्णवाः स्थः। इति रक्षासूक्तम्। इति पठित्वा।

"वेतालाश्च पिशाचाश्च राक्षसाश्च सरीसृपाः।
अपसर्पन्तु ते भूता ये भूता भुवि संस्थिताः॥
विनायका विघ्नकरा महोग्रा
यज्ञद्विषो ये पिशिताशनाश्च।
सिद्धार्थकैर्वज्रसमानकल्पै-
र्मया निरस्ता विदिशः प्रयान्तु॥"

इति श्वेतसर्षपान् विकीर्य्य स्वैः सर्वैर्मन्त्रैः पञ्चगव्यं शोधयेत्॥ ॥ तच्छोधनमन्त्रा यथा।

"ॐ तत् सवितुर्वरेण्यं भर्गो देवस्य धीमहि
धियो यो नः प्रचोदयात्।"

इति गोमूत्रम्।

"ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्।
ईश्वरीं सर्व्वभूतानां तामिहोपह्वये श्रियम्॥"

इति गोमयम्।

"ॐ आप्यायस्व समेतु ते विश्वतः सोमवृष्ण्यं
भवा वाजस्य सङ्गथे।"

इति दुग्धम्।

"ॐ दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः।
सुरभिनो मुखाकरत् प्रण आयूंषि तारिषत्॥"

इति दधि।

तास्रवल्ली चित्रपर्णी कान्तारी रक्तयष्टिका ।"
इति रत्नमाला ।)
अस्या गुणाः । मधुरत्वम् । कषायत्वम् । उष्णत्वम् । गुरुत्वम् । व्रणमेहज्वरश्लेष्मविषनेत्रामयनाशित्वञ्च । सा चतुर्विधा । घोसः१ योजनी२ कौन्ती ३ निंसली च ४ । इति राजनिर्घण्टः । कृमिज्वरभङ्गशोथनाशित्वम् । वर्णाग्निकारित्वञ्च । इति राजवल्लभः ॥ अपि च ।
"मञ्जिष्ठा मधुरा तिक्ता कषाया स्वर्णवर्णकृत् ।
गुरुरुष्णा विषश्लेष्मन्नी शोथयोन्यर्शिकर्शरुक् ।
रक्तातिसारकुष्ठासाविसर्पव्रणमेहनुत् ॥"
इति भावप्रकाशः ॥

मञ्जी, स्त्री, (मज्जयति दीप्यते इति । मज्ज + इन् । ङीदिकारादिति ङीष् ।) मञ्जरी । इति हेमचन्द्रः चिकाण्डशेषश्च ॥

मञ्जीरः, पुं, क्ली, (मञ्जति मधुरं शब्दायते । इति मनुज् ध्वनौ औचधातुः + बाहुलकात् ईरन् ।) नूपुरः । इत्यमरः । २ । १०६ ॥ मञ्जीरोऽस्त्री च नूपुरः । इति रभसः ॥ (यथा, गीतगोविन्दे । ५ । ११ ।
"सुचरमधीरं त्यज मञ्जीरं
रिपुमिव केलिषु लोलम् ॥")

मञ्जीरः, पुं, (मञ्ज + ईरन् ।) मन्थानदण्डरज्ज्वबन्धनार्थस्तम्भः । तत्पर्य्यायः । विष्कम्भः २ कुटरः २ । इति हेमचन्द्रः ॥

मञ्जु, त्रि, (मञ्जतीति । मज्ज ध्वनौ औचधातुः । "रञ्जयादयश्च ।" उणा० । १ । ३८ । इति कुः ।) मनोज्ञम् । इत्यमरः । ३ । १ । ५२ ॥ (यथा, पदाङ्कदूते । १ ।
"व्याला गेयं झटिति यसुगामञ्जुकुञ्जं जगाम ॥")

मञ्जुकेशी, [न्] पुं, (मञ्जवो मनोहराः केशाः सन्त्यस्य । इनि ।) शिवः । इति हेमायुधः ॥ सुन्दरकेशविशिष्टे त्रि ॥

मञ्जुगमना, स्त्री, (मञ्जु मनोहरं गमनं यस्याः । स्त्रियां टाप् ।) पंक्षी । इति राजनिर्घण्टः ॥ सुन्दरगामिनि त्रि ॥

मञ्जुघोषः, पुं, (मञ्जुर्मनोहरो घोषः शब्दोऽस्य ।) पूर्ब्बदिग्भेदः । इति चिकाण्डशेषः ॥ उमास्य देवताविशेषः । अस्य मन्त्रादि यथा,—
"मायौघतिमिरध्वंसी संसारार्णवतारकः ।
श्रीमञ्जुघोषो जयतां साधकानां सुखावहः ॥"
तन्त्रागमोत्तरे ।
"मालकादि वसुदलं यन्त्रिवीजं समुद्धरेत् ।
वामाक्षं कूर्चसंयुक्तं ततो मेषमुद्धरेत् ॥
सोमेशश्च ततः कुर्य्यात् वामनेत्रेन्दुसंयुतम् ।
षड्क्षरो मनुः प्रोक्तो मञ्जुघोषस्य शम्भुना ॥
एवमुं दीपनी प्रोक्ता सकलमन्तु कथ्यते ।
आकूतं शक्तिबीजञ्च रमाबीजं ततः प्रिये ! ॥
घोषयामलको मन्त्रो माद्यौषधानलानुगः ।
शक्तिबीजं रमाबीजं कामबीजं तथा प्रिये ! ॥
विद्या मतिधरी प्रोक्ता रथा वर्णत्रयात्मिका ।
एकारो बहिमःरूढो वामनेत्रेन्दुभूषितः ।
प्रोक्ता सार्व्वज्ञविद्येयं एकवर्णात्मिका प्रिये ! ॥
सिद्धः साध्यः सुसिद्धो वा साधकस्य रिपुस्य वा ।
तदा मन्त्रो भवेद्वश्या शुभदो बुद्धिदो भवेत् ॥
मध्याह्ने सलिले चैव भोजने भाजने तथा ।
गोमये तु वहिर्देशे मैथुने रमणीकुचे ॥
गोष्ठे च निशि गोसुप्ते यन्त्रं स्मरसन्निभम् ।
विलिख्य मन्त्रवर्णांश्च विशन् जपेत् अधस्तथा ।
लिखेच्चन्दनलेखन्या प्रयत्नात् साधकोत्तमः ।
उच्चाटने लिखेदूर्ध्वं गोचर्म्मणि विशेषतः ।
सलिले विजयी नित्यं भजने च महेश्वरः ॥
गोमये वाक्पटुः स्याद्गोष्ठे सर्व्वज्ञतां व्रजेत् ।
कुचे स्मृतिधरो नित्यं गोसुप्ते च महाकविः ॥
गोमूत्रं वदरीमूलं चन्दनं पांशुमेव च ।
एकीकृत्याथवा लग्ना तिलकं धारयेत् सदा ॥
नमस्कृत्य वरं श्रेष्ठं प्रार्थयेदुक्तितत्परः ।
वरं प्राप्य च तस्मादे विहरेत्तु यथासुखम् ॥
नान्यदेवार्चनं स्नानं प्रणवोच्चारणं न तु ।
वस्त्राञ्चलेन दन्तानां शोधनं लवणेन वा ॥
रात्रिवासो न सुञ्चेत न शुचिः स्यात् कदाचन ।
एवं ज्ञात्वा प्रयत्नेन ज्ञात्वा गुरुमुखात् सुधीः ॥
मासैकेन कवीन्द्रः स्यात् द्विमासेनैव ईश्वरः ।
त्रिभिर्मासैर्भवेन्मर्त्यः सर्व्वशास्त्रविशारदः ॥
पुत्रार्थी लभते पुत्रं धनार्थी विपुलं धनम् ।
आयुरारोग्यकामस्तु सर्व्वान् कामानवाप्नुयात् ॥
ततः करादिन्यासौ ।
ह्रां ह्रीं वज्रकुठाभ्यां नमः । इत्यादि एवं हृदयादिषु । तथा च तन्त्रे ।
"सम्वर्त्तको वकेशश्च द्वौ वर्णौ कथितौ प्रिये ! ।
षड्दीर्घभागन्यासेताभ्यां षड्ज्ञानि समाचरेत् ॥
सम्वर्त्तः चकारः वकेशः शकारः ॥*॥ ध्यानम् ।
"शशधरमिव शुभ्रं खड्गपुस्ताक्षपाशं
सुरुचिरमतिशान्तं पञ्चचूडं कुमारम् ।
पृथुतरवरसुखं पद्मपत्रायताक्षं
प्रणमतिदृढदक्षं मञ्जुघोषं नमामि ॥
पीठपूजां ततः कुर्य्यादाधारादिशक्तितः ।
भूतप्रेतादिभिः कुर्य्यात् पीठासनमनन्तरम् ॥
आगदार्च्चे नमः पाद्यं वृद्धिकर्त्रे तथाचमम् ।
आचमनाय गन्धः स्यादर्घ्यं स्याद् यजनाय वै ॥
सर्व्वसिद्धिप्रदायेति पुष्पं दद्यादिचक्षयः ।
कुन्दपुष्पं समादाय भैरवात् पूजयेत्ततः ॥
अग्निताग्नौ रुरुक्षयः क्रोध उन्मत्तसंज्ञकः ।
कपाली भीषणश्चैव संहारश्चाष्टमः स्मृतः ॥
ततो धूपादिकं दत्त्वा प्रणमानि विसर्जयेत् ।
तैः पुष्पैः पूजयेद्दूतीं यक्षिणीञ्च विशेषतः ॥
सुरारिसुन्दरी चैव मनोहारिण्यनन्तरम् ।
कनकावती तथा कामेश्वरी च रतिकर्कशा ॥
पद्मिनी च नटी चैव सुतरागिण्यनन्तरम् ।
पूर्व्वा एतास्तु योगिन्यो दूतिरूपाश्चपूर्व्विकाः ॥
एवं संपूज्य देवेशं सकलषट्कं समुद्धरेत् ।
घृताक्तकुन्दपुष्पेण एकादशशतानि च ॥
जुहुयादेषिणे वह्नौ कान्तारे सिद्धयेन्नरः ।
एवं सिद्धमनुर्मन्त्री मन्त्रयोगीश्वरो भवेत् ॥"
इति तन्त्रसारः ॥
प्रकारान्तरं कुक्कुटादितन्त्रे द्रष्टव्यम् ॥

मञ्जुपाटकः, पुं, (मञ्जु मनोहरं पटतीति पट + ण्वुल् ।) शुकपक्षी । इति राजनिर्घण्टः ॥ सुन्दरपाटकवैरि त्रि ॥

मञ्जुप्राणः, पुं, (मञ्जवः प्राणाः यस्य । सर्व्वव्यापकतया महाप्राणत्वादस्य तथात्वम् ।) ब्रह्मा । इति जटाधरः ॥

मञ्जुभद्रः, पुं, (मञ्जु मनोहरं भद्रं मङ्गलं यस्य ।) जिनविशेषः । तत्पर्य्यायः । मञ्जुश्रीः २ ज्ञानदर्पणः ३ मञ्जुघोषः ४ कुमारः ५ चतुरचक्रवान् ६ स्थिरचक्रः ७ वज्रधरः ८ प्रज्ञाकायः ९ वादिराट् १० नीलोत्पली ११ महाराजः १२ नीलः १३ शार्दूलवाहनः १४ धियाम्पतिः १५ पूर्व्वजिनः १६ खड्गी १७ दण्डी १८ विभूषणः १९ बालव्रतः २० पद्मचीरः २१ सिंहकेलिः २२ शिखाधरः २३ वागीश्वरः २४ । इति चिकाण्डशेषः ॥

मञ्जुलं, क्ली, (मञ्जु मञ्जुत्वमस्त्यस्येति । "सिध्मादिभ्यश्च ।" ५ । २ । ९७ । इति मञ्जुशब्दात् लच् ।) जलाशयम् । निकुञ्जम् । इति मेदिनी । ले, १ । २२ । ॥ शुक्लः । इति त्रिकः ॥

मञ्जुलः, पुं, (मञ्जु मञ्जुत्वमस्त्यस्मादिति । मञ्जु + सिध्मादित्वात् लच् ।) जलरङ्कपक्षी । इति मेदिनी । १ । २२ ॥ सुन्दरे त्रि । इत्यमरः । ३ । १ । ५२ ॥ (यथा, कालिकापुराणे ४०अध्याये ।
"मञ्जुलं यौवनोद्भेदं प्राप श्रीरिव माधवे ।"
नदीभेदे स्त्री । यथा, महाभारते । ६ । ८ । ३४ ।
"चित्रोपलां चित्रवर्णां मञ्जुलां वाहिनीं तथा ॥")

मञ्जुश्रीः, पुं, (सुष्ठु मनोहरा श्रीः शोभा यस्य ।) मञ्जुघोषः । इति चिकाण्डशेषः ॥

मञ्जूषा, स्त्री, (मञ्जति । पृषोदरादित्वात् ह्रस्वः ।) मञ्जूषा । पेटरा इति भाषा । यथा,—
"मञ्जुषापि च मञ्जूषा पेटा च पेटिकेत्यपि ।"
इति शब्दरत्नावली ॥

मञ्जूषा, स्त्री, (मज्जति द्रव्यमस्मिन् । "मसृजेर्नुम् च ।" उणा० । ४ । ७७ । इति मस्ज् + ऊषन् । नुम् च स चाचोऽन्त्यात् परः । ततो जश्त्वचुत्वे मध्यमस्य खोपात् साधुः ।) पिटकः । इत्यमरः । २ । १० । ३० ॥ (यथा, देवीभागवते । २ । ६ । ३६ ।
"मञ्जूषायां सुतं कृत्वा सुप्तवती वाक्यमब्रवीत् ॥")
पाषाणः । इत्युणादिकोषः ॥ मञ्जिष्ठा । इति राजनिर्घण्टः । (मञ्जिष्ठार्थे पर्य्यायो यथा,—
"मञ्जिष्ठा विकसा चित्रा समङ्गा कालमेषिका ।
मण्डूकपर्णी भण्डीरी भण्डी योजनवल्लिका ॥
रक्तायन्यरुणा काला रक्तङ्गी रक्तयष्टिका ।
भण्डीतकी च गण्डीरी मञ्जूषा वस्त्ररञ्जिनी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

मट, माद्दे । इति कविकल्पद्रुमः । (भ्वा०-पर०-अक०-सेट् ।) औचधातुरयम् । अस्य प्रयोगः । मटदः । इति दुर्गादासः ॥

ॐ वैष्णवीरसि शुक्रमस्यन्तमसि धामनामासि प्रियन्देवानामनाधृष्टं देवयजनमसि ।

इति घृतम् ।

ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रतिगृह्णामि । इति कुशोदकम् ॥ ॐ देवा बर्हिः समाध्यन्ते बर्हिषा बर्हिरिन्द्रियम् । वसोन यूप आप्यते प्रयतो अग्निरग्निना । इति मन्त्रेण बर्हिः संप्रोक्ष्य पञ्च घटान् घटस्थापनक्रमेण संस्थाप्य ॥ १ ॥ घटस्थापनमन्त्रा यथा । सामगानाम् । ॐ महिषीगामवोस्तुद्रुचं मित्र स्थार्यन्तः दुरामर्वं वनगस्य । इति भूमेः । ॐ शानावतीं करीषिणीमपूपवतीमुदुम्बरिणीं इन्द्र प्रातर्जुषस्व नः । इति धान्यस्य । ॐ आविष्टं वनस्पते सुतो विश्वा अभिष्टिरिन्द्रायेन्दो परिस्रव । इति फलस्य ।

"ॐ यज्ञस्यायंवतो वृक्ष उर्जीव फलिनी भव । पर्णं वनस्पते सु त्वा सु त्वा च सूदयतां रयिं ॥"

इति पल्लवस्य ।

ॐ घासोमित्रावरुणा हृतेर्गयुतिसुचतं मघा रत्नानि सुक्रतु । इति जलस्य । ॐ इन्द्रस्तरो मेमधिता धृषन्ते यतुर्याया युनयते धियस्ताः स्त्रो दृषानाश्वस्य नाम आगोमतिव्रजे भजात्वद्रिः । इति क्षारस्य । ॐ सिन्धोरुक्षासि पवयस्तुषारं शिरण्यावाः पशुमाशु भिभूते । इति सिन्दूरस्य । ॐ त्वावतः पुरुवसो वयमिन्द्र प्रणेतः सधमादेरीमहि । इति स्थिरीकरणस्य । ॐ पवमानो अजीजनद्दिव्यानि धर्मसातये । दधाना कीरिणो नुवीर्यम् । इति पुष्पस्य ॥ २ ॥ यजुषाम् । ॐ भूरसि भुवनस्य धितिरसि विश्वस्य भुवनस्य धात्री । पृथिवीं यच्छ पृथिवीं दृंह पृथिवीं मा हिंसीः । इतिभूमेः । ॐ धान्यमसि धिनुहि देवान् धिनुहि यज्ञं धिनुहि यज्ञपतिं धिनुहि मां यज्ञन्यम् । इति धान्यस्य । ॐ आपिन्वस्व मरुत्वाँ इन्द्रायेन्दुरव्ययः पुनर्नो गिर्वणः सखा । सहस्रं धारा पयस्वतीमाविश्वतादधि । इति घटस्य । ॐ वनस्पतेऽयमानमसि वनस्पतेः स्कम्भः सर्जनीस्थः वनस्पतेः क्षत्र सदनमसि वनस्पतेः क्षत्र सदनमसीद । इति फलस्य । ॐ धन्वनागा धन्वना जिगाय धन्वना तीव्राः समदो जयेम । धनुःशत्रोरपकामं कृणोतु धन्वना सर्वाः प्रदिशो जयेम । इति पल्लवस्य । ॐ याः फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः सहसतिप्रसूतास्ता नो मुञ्चन्त्वंहसः ।

इति फलस्य ।

"ॐ सर्वतीर्थमयं वारि सर्वदेवसमन्वितम् ।
इमं घटं समाश्रित्य तिष्ठ देवगणैः सह ॥"

इति घटं दद्यात् । ॐ स्थिरो भव विष्णुना वातूर्णेन वायुर्भव रघुर्भव सुसदस्त्वमदो पुरीषवाहणः । इति स्थिरीकरणस्य । ॐ सिन्धोरिव प्राध्वने शूघनासो वातप्रमियः । पतयन्ति यद्भा एषां परा अरासो अधीषमाः सिन्दूः

भिभिः पित्र्यानाः इति सिन्दूरस्य । ॐ श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपं अश्विनौ व्यात्तं इष्णन्निषाणा सर्वलोकं मनीषाण । इति पुष्पस्य ॥ ३ ॥ ततः फलपुष्पयुतं विनायकम् । ॐ विभान एष दिवो मध्य आस्त आपप्रथानो महिमा सजोषसौ अन्तरीयते । सविस्ताचीरभिचष्टे घृताचीरन्तरा पूर्वमपरं कृतुम् ॥ सामगानाम् । ॐ ऊर्जं ऊषु ण ऊतये तिष्ठा देवो न सविता ऊर्ध्वो वाजस्य सनिता यदञ्जिभिर्वाघद्भिर्विह्वयामहे । इति मन्त्रेण वक्षीयात् । ॥ । "ॐ हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् । सदाधारपृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम । इति मन्त्रेण मण्डलमध्ये सुवर्णपद्मं दत्त्वा स्वर्णशलाकया दलान्युत्कीर्य मण्डलमध्ये राजतीं प्रतिमां ॐ रुद्रमाशुं पृथिवीं द्यामनेहसं सुशर्माणमदितिं सुप्रणीतिम् । देवीं नावं स्वरित्रामनागसमस्रवन्तीं मारुहेमा स्वस्तये । इति मन्त्रेण निःक्षिप्य घटेषु देवान् पूजयेत् । ॥ । प्रथमघटे गणेशं सूर्यं द्वितीयघटे शिवं दुर्गां तृतीयघटे विष्णुं लक्ष्मीं सरस्वतीं चतुर्थे अग्निं वास्तुपुरुषं क्षेत्रपालान् कार्त्तिकेयसश्विनीकुमारौ पञ्चमे ग्रहान् लोकपालांश्च स्वैः स्वैर्मन्त्रैरावाह्य पूजयेत् ॥ । ततो गुरुदेवं प्रतिमायां ज्ञानयामे वा यथोक्तविधिना स्नापयेत् ।

"ॐ भद्रं कर्णेभिः शृणुयाम देवा
भद्रं पश्येमाक्षभिर्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभि-
र्व्यशेमहि देवहितं यदायुः ॥"

इति मन्त्रेण निवेद्य ॐ श्रीतोन्निद्रश्चक्षुषाम् शुद्धं शुद्धेन साना । शुद्धे रक्ते वा दृष्ट्वा संशुद्ध आपोविन्नमन्तु । इति मन्त्रेण शुद्धोदकेन स्नापयेत् । ॐ घृतवतीति घृतेनाभ्यज्य । ॐ यतो देवा अवन्तु नो यतो विष्णुर्विचक्रमे । पृथिव्याः सप्तधामभिः । इति मरुत्पूर्णेनोदुम्बरेण । ॐ सप्त ते अग्ने समिधः सप्तजिह्वाः सप्त ऋषयः सप्त धामप्रियाणि सप्त होत्राः सप्तधा त्वा यजन्ति । सप्त योनीरापृणस्वा घृतेन । इति उष्णोदकेन क्षालयेत् । ॐ द्रुपदादिव मुमुचानः स्विन्नः स्नातो मलादिव पूतं पवित्रेणेव वाज्यापः शुन्धन्तु मैनसः इति चन्दनेनानुलिप्य ॐ आपोहिष्ठामयो भुवः स्थान ऊर्जे दधातनः महेरणाय चक्षसे । इति नवीतोयेन स्नापयेत् । ॐ प्रमो देवीरभिष्टये आपो भवन्तु पीतये शंयोरभिस्रवन्तु नः । इति तीर्थमृत्कलशेन स्नापयित्वा गायत्र्या गन्धयुक्तजलेन स्नापयेत् । ॐ हिरण्यवर्णाः शुचयः पावकाः यासु जातः कश्यपो यास्विन्द्रः । अग्नीया गर्भन्दधिरे विरूपास्तान् आपः शग्मीना भवन्तु ॥ इति पञ्चप्रतिकया । ॐ इमं मे गङ्गे यमुने सरस्वति शुतुद्रि स्तोमं सचता परुष्ण्या । असिक्न्या मरुद्वृधे वितस्तयार्जीकीये शृणुह्या सुषोमया

इति मन्त्रेण सिकताजलेन । ॐ तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः । दिवीव चक्षुराततम् । इति वल्मीकतोयेन । ॐ या ओषधीः सोमराज्ञीर्विष्ठिताः पृथिवीमनु । तासामस्मिन्नासनेऽच्छिद्रं शर्म यच्छत । इति सर्वौषधिजलेन । ॐ यज्ञा यज्ञा वो अग्नये गिरा गिरा च दक्षसे । प्रप्रवयममृतञ्जातवेदसं प्रियं मित्रन्न शंसिषम् । इति कषायमुक्तजलेन । पञ्चगव्येन स्वैः स्वैर्मन्त्रैः सेचयेत् । ॐ पयः पृथिव्यां पय ओषधीषु पयो दिव्यन्तरिक्षे पयोधाः । पयस्वतीः प्रदिशः सन्तु मह्यं सम्राजो यज्ञमिह पयसा घृतेन सम्रा इज्ञाम्यपः ॥ इति पञ्चगव्येन । ॐ तस्माद्यज्ञात् सर्वहुतः ऋचः सामानि जज्ञिरे । छन्दांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत ॥ इति पञ्चामृतेन । ॐ याः फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः । बृहस्पतिप्रसूतास्ता नो मुञ्चन्त्वंहसः । ॐ सहस्रशीर्षेति वक्ष्यमाणमन्त्रेण सहस्रधारया । ॐ एतोन्निन्द्रमिति पूर्वोक्तमन्त्रेण तुलसीचन्दनयुक्तजलेन । ॐ यासां राजा वरुणो याति मध्ये सत्यानृते अवपश्यञ्जनानाम् । मधुश्चुतः शुचयो याः पावकास्ता आपो देवीरिह मामवन्तु ॥ इत्यनेन वेदादि चतुष्टयेन । तद्यथा ॐ अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजं होतारं रत्नधातमम् । १ । ॐ इषेत्वोर्जेत्वा वायवस्थदेवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मणे ।२। ॐ अग्न आयाहि वीतये गृणानो हव्यदातये निहोता सत्सि बर्हिषि ।३। ॐ शन्नो देवीरभिष्टये शन्नो भवन्तु पीतये शंयोरभिस्रवन्तु नः । ४ । वक्ष्यमाणपुरुषसूक्तेन च एकाशीतिघटैः स्नापयेत् । अशक्तौ अष्टाविंशतिघटैरष्टघटैर्वा स्नापयित्वा धौतवाससा जलमपनीय यथोपचारैः संपूज्य मण्डले आधारशक्त्यादीनि पूजयेत् । ॥ । ॐ आधारशक्तये नमः । एवं सर्वत्र प्रणवादिनमोन्तेन । प्रकृतये कूर्माय अनन्ताय पृथिव्यै क्षीरसमुद्राय रत्नद्वीपाय रत्नोप्पलसहितमहामणिमण्डपाय कल्पवृक्षाय रत्नवेदिकायै रत्नसिंहासनाय । आग्नेय्यां धर्माय नैर्ऋत्यां ज्ञानाय वायव्यां वैराग्याय ऐशान्यां ऐश्वर्याय पूर्वस्यां अधर्माय पश्चिमायां अवैराग्याय उत्तरस्यां अनैश्वर्याय । मध्ये सं सूर्यमण्डलाय उं सोममण्डलाय मं वह्निमण्डलाय । सं सत्वाय रं रजसे तं तमसे । आं आत्मने ईं अन्तरात्मने पं परमात्मने क्षीं ज्ञानात्मने । पूर्वादिदिक्षु प्रादक्षिण्येन ॐ विमलायै नमः । एवं उत्कर्षिण्यै ज्ञानायै क्रियायै योगायै प्रह्वै सत्यायै ईशानायै । कर्णिकायां अनुग्रहायै । कर्णिकोपरि ॐ नमो भगवते विष्णवे सर्वभूतात्मने वासुदेवाय सर्वात्मसंयोगयोगपीठात्मने नमः ॥ ॥ ततो मण्डले देवं संस्थाप्य पौरुषिकमन्त्रेण पुरुषसूक्तेन वा षोडशोपचारैः पूजयेत् । तद्यथा । ॐ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् । स भूमिं सर्वतो वृत्वा अत्यतिष्ठद्दशाङ्गुलम् ।१

मर्च्चनः स्थाने विष्णवे हृत्वा स्थाने सृष्ट्वा इत्यपि पाठः। इति पठित्वा भगवन् विष्णो इहागच्छ इहागच्छ इह तिष्ठ इह तिष्ठ इह सन्निरुद्धस्व मम पूजां गृहाण। ततो यथाविधासनमानीय वमिति वरुणबीजेनार्घाम्भसा संप्रोक्ष्यासनमभ्यर्च्य ओं पुरुष एवेदं सर्वं यद्भूतं यच्च भाव्यं उतामृतत्वस्येशानो यदन्नेनातिरोहति २। इति पठित्वा इदमसुकासनं ओं नमो भगवते वासुदेवाय श्रीविष्णवे नमः। एवं सर्वत्र दाने। ओं भगवन् विष्णो स्वागतम्। इति स्वागतप्रश्नः। ततस्ताम्रपात्रस्थं पद्मश्यामाकदूर्व्वापराजितादियुक्तं जलं गृहीत्वा ओं एतावानस्य महिमातो ज्यायांश्च पूरुषः पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ३। इति पठित्वा इदं पाद्यं पूर्व्ववन्मूलेन पादयोर्दद्यात्। ततो गन्ध-पुष्पाक्षतयवकुशाग्रतिलसर्षपदूर्व्वायुक्तजलं गृहादिपात्रे हृत्वा ओं त्रिपादूर्द्ध उदैत् पुरुषः पादोऽस्येहाभवत् पुनः। ततो विष्वङ्व्यक्रामत् साशनानशने अभि ४॥ ततः स्थाने तस्मादित्यपि पाठः। इति पठित्वा सामगानामिदमर्घ्यमन्येषामेषः अर्घः इति शिरसि दद्यात्। जातीलवङ्गकक्कोलयुक्तं केवलं वा पात्रस्थं जलं गृहीत्वा ओं ततो विराड्जायत विराजोऽधिपुरुषः स जातोऽत्यरिच्यत पश्चाद्भुविमथो पुरः ५॥ इति पठित्वा इदमाचमनीयं ओं नमो भगवते वासुदेवाय श्रीविष्णवे स्वधा इति दद्यात्। ततः कांस्यपात्रस्थं दधिमधुघृतात्मकं कांस्येन पिहितं मधुपर्कं गृहीत्वा ओं तस्माद्यज्ञात् सर्व्वहुतः संभृतं पृषदाज्यं पशूंस्ताँश्चक्रे वायव्यानारण्या ग्राम्याश्च ये ६॥ इति पठित्वा एष मधुपर्कः ओं नमो भगवते वासुदेवाय श्रीविष्णवे स्वाहा इति दद्यात्। ततः पूर्व्वमन्त्रं पठित्वा पुनराचमनीयञ्च दद्यात्। कर्पूरवासितजलं गृहीत्वा ओं तस्माद्यज्ञात् सर्व्वहुत ऋचः सामानि जज्ञिरे। छन्दांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत ७॥ इति पठित्वा इदं स्नानीयजलं मूलेन दद्यात्। पूर्व्ववत् पुनराचमनीयं दत्त्वा वस्त्रं गृहीत्वा ओं तस्मादश्वा अजायन्त ये के चोभयादतः। गावो ह जज्ञिरे तस्मात्तस्माज्जाता अजावयः ८॥ इति पठित्वा इदं वस्त्रं मूलेन दद्यात्। एवमुत्तरीयवस्त्रं यज्ञोपवीतं पूर्व्ववदाचमनीयं दत्त्वा आभरणं गृहीत्वा ओं तं यज्ञं बर्हिषि प्रौक्षन् पुरुषं जातमग्रतः। तेन देवा अयजन्त साध्या ऋषयश्च ये ९॥ इति पठित्वा मूलेन दद्यात्। ओं यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन् मुखं किमस्यासीत् किं बाहू किमूरू पादा उच्येते १०। ऋग्वेदस्याश्वलायनशाखायान्तु मुखं किमस्य को बाहू काबूरू पादा उच्येते इति भेदः। इति पठित्वा मूलेन गन्धं दद्यात्। ओं ब्राह्मणोऽस्य मुखमासीत् बाहू राजन्यः कृतः। ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत ११॥ इति पठित्वा मूलेन पुष्पं दद्यात्। ओं चन्द्रमा मनसो जातश्चोः सूर्य्यो अजायत। श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत १२॥ मुखादिन्द्रश्चाग्निश्च प्राणाद्वायुरजायत इति च पाठः। इति पठित्वा मूलेन धूपं दद्यात्। ओं नाभ्या आसीदन्तरिक्षं शीर्ष्णो द्यौः समवर्त्तत। पद्भ्यां भूमिर्द्दिशः श्रोत्रात्तथा लोकाँअकल्पयन् १३॥ इति पठित्वा मूलेन दीपं दद्यात्। ततो नैवेद्योपरि मत्स्यमुद्रया मूलमन्त्रं दशधा जप्त्वाभ्यर्च्य धेनुमुद्रां प्रदर्श्य ओं यत्पुरुषेण हविषा देवा यज्ञमतन्वत। वसन्तोऽस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः १४॥ इति पठित्वा नैवेद्यं मूलेन दद्यात्। ओं सप्तास्यासन् परिधयस्त्रिः सप्त समिधः कृताः। देवा यद्यज्ञं तन्वाना अबध्नन् पुरुषं पशुम् १५॥ इति पठित्वा कर्पूरादिवासितं पानीयं ताम्बूलं पुनराचमनीयं दर्पणञ्च दद्यात्। ओं यज्ञेन यज्ञमयजन्त देवास्तानि धर्म्माणि प्रथमान्यासन्। ते ह नाकं महिमानः स चन्त यत्र पूर्व्वे साध्याः सन्ति देवाः १६। इति पठित्वा अञ्जलित्रयं पुष्पं दत्त्वा आवरणानि संपूज्य मूलमन्त्रं यथाशक्ति जप्त्वा प्रणमेत्॥ ॥ ऋग्वेदस्याश्वलायनशाखायान्तु यत्पुरुषेण हविषा इत्यादिना स्नानीयं ६ तं यज्ञं बर्हिषीत्यादिना वस्त्रं ७ तस्मात् यज्ञात् सर्व्वहुतः संभृतमित्यादिना यज्ञोपवीतम् ८ तस्मात् यज्ञात् सर्व्वहुत ऋचः सामानीत्यादिना चन्दनम् ९ तस्मादश्वा अजायन्त इत्यादिना पुष्पं १० यत्पुरुषं व्यदधुरित्यादिना धूपम् ११ ब्राह्मणोऽस्य मुखमासीदित्यादिना दीपम् १२ चन्द्रमा मनसो जात इत्यादिना नैवेद्यम् १३ नाभ्या आसीदन्तरिक्षमित्यादिना ताम्बूलम् १४ सप्तास्यासन् परिधय इत्यादिना नीराजनम् १५ इति भेदः अन्यत् समानम्। *। ततो गुरुः कुण्डपश्चिमे उपविश्य कुण्डे स्थण्डिले वा ब्राह्मविधिना तदग्नेः स्वगृह्योक्तविधिना साङ्गसनामानमग्निं संस्थाप्य ब्रह्मस्थापनानन्तरं अभिषेकार्थं ऐशान्यां नवमव्रणमभ्यर्च्य बर्हिर्दर्भास्तृतभूमितं चूताश्वत्थन्यग्रोधोदुम्बरप्लक्षपल्लवच्छन्नसुखं फलवच्छ्रुतं अन्तःक्षिप्तपञ्चरत्नं निर्म्मलजलपूर्णं दृढ़कलसं अक्षतानासुपरि ओं आजिघ्र कलसमित्यादिमन्त्रेण स्थापयेत्। तत्र वरुणस्योत्तम्भनमसीति वरुणं न्यसेत्।

"ओं गङ्गाद्याः सरितः सर्व्वाः समुद्राश्च सरांसि च।
सर्व्वे समुद्राः सरितस्तीर्थानि जलदा नदाः।
आयान्तु यजमानस्य दुरितक्षयकारकाः॥"

इति तीर्थानि च न्यसेत्। तत्रैव कलसे अश्वस्थानाद्गजस्थानात् पद्मीकात् सङ्गमात् हृदात्। गोव्रजात् रथ्याया आनीय सप्त मृदः क्षिपेत्॥ सर्व्वौषधीश्च॥ *॥ ततश्चरुश्रपणं कुर्य्यात्। अग्नेरुत्तरे हस्तकुलविस्तारायां प्रादेशपरिमितोदुम्बरनिर्म्मितदर्व्वीं साष्टाङ्गुलविस्तारायाप्रादेशपरिमितोदुम्बरनिर्म्मितमेचकं चरुस्थालीं आज्यस्थाली उदूखलमुसले सुवं पूर्णहोमार्थं सुचं समिधं आज्यादीनि उदगग्राणि प्राचं प्राचं विनियोगक्रमेणासादयति। संस्थाप्य यवान् त्रीहीन् वा तदभावे तण्डुलान् चूर्णे निधाय। सामगः। ओं विष्णवे त्वा जुष्टं निर्व्वपामि। इति यवादिप्रस्तरमेकं चरुस्थाल्यां हृत्वा उदूखलमध्ये स्थापयेत्। यजुर्व्वेदी तु ओं विष्णवे त्वा जुष्टं गृह्णामि ओं विष्णवे त्वा जुष्टं निर्व्वपामि चमसस्थजलेन ओं विष्णवे त्वा जुष्टं प्रोक्षामीति त्रयं कुर्य्यात्। ऋग्वेदी तु ओं विष्णवे त्वा जुष्टं निर्व्वपामि ओं विष्णवे त्वा जुष्टं प्रोक्षामीति निर्व्वापप्रोक्षणमात्रम्। यस्य गृहप्रतिष्ठा तस्यादौ जुह्वग्रहणम्। एवं सर्व्वत्र। एवमग्न्यादिषु। ओं अग्नये त्वा जुष्टं निर्व्वपामि एवं वायवे सूर्य्याय हरिः विष्णवे हरिः अग्नये वायवे पुनरग्नये वरुणाय पुनरपि अग्नये सूर्य्याय प्रजापतये अन्तरीक्षाय त्वष्ट्रे ब्रह्मणे पृथिव्यै महाराजाय सोमाय इन्द्राय अग्नये यमाय नैर्ऋताय वरुणाय वायवे कुबेराय ईशानाय ब्रह्मणे अनन्ताय आदित्याय सोमाय मङ्गलाय बुधाय बृहस्पतये शुक्राय शनैश्चराय राहवे केतुभ्य इत्यं नवविंशत् प्रकृतीः स्थापयेत्। द्विगुणीं उपरिस्थतदर्व्याघासुष्टिभ्यां तण्डुलेनावघट्य मूलेन प्रस्फोटयेत्। एवमपरवारद्वयमवघट्य मूलेन प्रस्फोटयेत्। यथा कर्त्तव्यं यथा वारत्रयेण तण्डुलनिष्पत्तिर्भवेति। तदग्रतो संस्कारमात्रार्थं तण्डुलान् क्षिपेत्। ततस्तण्डुलान् निः प्रक्षाल्य चरुस्थाल्यामासनकं दत्त्वोत्तरार्द्धे पवित्रं निःक्षिप्य तत्र तण्डुलान् निधाय कपिलाया दुग्धं निःक्षिप्य तदभावे अन्यधेनोर्दुग्धं निःक्षिप्य दर्व्या प्रागादिप्रदक्षिणमीषद्दृढमवघट्टयंस्त्रिधा पचेत् यथा दाहकालित्यातिश्लेष्मलमङ्गालनरहितोऽन्तरग्रपक्वश्चरुर्भवति जलदुग्धतण्डुलेन स्थालीमध्यस्थं चरुं दृष्ट्वा ओं तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः दिवीव चक्षुराततमित्यनेन मन्त्रेण ओमित्यनेन च घृतेन सिक्त्वा दर्व्या दक्षिणावर्त्तेन संमिश्रयेत्। ततोऽग्नेरुत्तरतोऽवतार्य पुनर्जलदुग्धतण्डुलेन स्थालीमध्यस्थं चरुं दृष्ट्वा पुनर्घृतेनाभिघारयेत्। ततः पर्युक्षणान्तां कृत्वाग्निकां समाप्य सामगस्तु काम्यकर्म्माङ्गत्वेन तपश्च तेजश्च श्रद्धा च ह्रीश्च सत्यञ्चाक्रोधश्च त्यागश्च धृतिश्च धर्म्मश्च यत्तश्च वाक् च मनश्चात्मा च ब्रह्म च तानि प्रपद्ये तानि मामवन्तु। इति जपित्वा विरूपाक्षमर्च्य कुर्य्यात्। ततः प्रकृते कर्म्मणि।

"ओं पिङ्गभ्रूश्मश्रुकेशाक्षः पीनाङ्गजठरोरगः।
छागस्थः साक्षसूत्रोग्निः शक्त्यर्च्चिः शक्तिधारकः॥"

इत्यादिपुराणीयं ध्यात्वा विष्णुदेवप्रतिष्ठाकर्म्मणि अयं तं सोमसंगमासीति नाम हृत्वाग्नेः संपूज्य प्रादेशप्रमाणां घृताक्तां समिधं

गृहीमर्षो कृत्वा मेक्षणेन स्रुवं गृहीत्वा ॐ तद्विष्णोरित्यादिभिराहवनीये जुहुयात् सर्वत्र सामान्यं मन्त्रान्ते देवतोद्देशो नास्ति। अन्येषां इदं विष्णवे इति। ॐ भूः स्वाहा इदमग्नये ॐ भुवः स्वाहा इदं वायवे ॐ स्वः स्वाहा इदं सूर्याय ॐ भूर्भुवः स्वः तत् सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात् स्वाहा इदं सूर्याय। ॐ तद्विप्रासो विपन्यवो जागृवांसः समिन्धते विष्णोर्यत् परमं पदं स्वाहा इदं विष्णवे। ॐ विश्वतश्चक्षुरुत विश्वतो मुखो विश्वतो बाहुरुत विश्वतस्पात् संबाहुभ्यां धमति संपतत्रैर्द्यावा भूमी जनयन् देव एकः स्वाहा इदं विष्णवे। ॐ अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजं होतारं रत्नधातमं स्वाहा इदमग्नये। ॐ इषेत्वोर्जेत्वा वायवस्थदेवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मणे स्वाहा इदं वायवे। ॐ अग्न आयाहि वीतये गृणानो हव्यदातये निहोता सत्सि बर्हिषि स्वाहा इदमग्नये। ॐ अग्नो देवीरभीष्टये अग्नो भवन्तु पीतये शंयोरभिस्रवन्तु नः स्वाहा इदं वरुणाय। ॐ भूरग्नये स्वाहा ॐ सूर्याय स्वाहा ॐ प्रजापतये स्वाहा ॐ अन्तरीक्षाय स्वाहा ॐ द्यौः स्वाहा ॐ ब्रह्मणे स्वाहा ॐ पृथिव्यै स्वाहा ॐ महाराजाय स्वाहा एष्वपि सामगैतरैरुक्तदेवतोद्देशः प्रयात् कार्यः। ॐ सोमं राजानं वरुणमग्निमन्वारभामहे आदित्यं विष्णुं सूर्यं ब्रह्माणञ्च बृहस्पतिं स्वाहा इदं सोमाय। ॥ ततो दिक्पालहोमः। ॐ त्रातारमिन्द्रमवितारमिन्द्रं हवे हवे सुहवं शूरमिन्द्रं ह्वयामि शक्रं पुरुहूतमिन्द्रं स्वस्ति नो मघवा धात्विन्द्रः स्वाहा इदमिन्द्राय। ॐ अग्निं दूतं वृणीमहे होतारं विश्ववेदसं अस्य यज्ञस्य सुक्रतुं स्वाहा इदमग्नये। ॐ नाके सुपर्णमुपयन्तं बृहन्तं हिरण्यपक्षं वरुणस्य दूतं यमस्य योनौ शकुनं भुरण्यं स्वाहा इदं यमाय। ॐ वेत्था हि निर्ऋतीनां वज्रहस्तः परिवृजं जरहृषः निमृणरिष्टवामिव स्वाहा इदं निर्ऋतये। ॐ पृतनाषाट् युजानामभीषिग्योजां पृथ्वी मधुदुघे सुवेदसा द्यावा पृथिवी वरुणस्य धर्मणा विष्कभिते अजरे भूरिरेतसा स्वाहा इदं वरुणाय। ॐ आन आयातु भेषजं शम्भुमयो भुवो हवे प्रय आयूंषि तारिषत् स्वाहा इदं सोमाय। ॐ सोमं राजानं वरुणमग्निमन्वारभामहे आदित्यं विष्णुं सूर्यं ब्रह्माणञ्च बृहस्पतिं स्वाहा इदं सोमाय। ॐ अभित्या सप्त धेनवः। ईशानमस्य जगतः स्वर्दृशमीशानमिन्द्र तस्थुषः स्वाहा इदमीशानाय। ॐ ब्रह्म यज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचो वेन आवः। सुबुध्या उपमा अस्य विष्ठाः सतश्च योनिमसतश्च विवः स्वाहा इदं ब्रह्मणे। ॐ पर्यगीद्धृतं मध वानसुक्त्यामिन्द्रं गिरो बृहतीरभ्यनूषत वावृधानं पुरुकृतं सुवृक्तिभिरमर्त्यं जवमानं दिवे दिवे स्वाहा। इदमनन्ताय। इति सामगो जुहुयात्। तत्तद्देवतोद्देशस्तु न कर्तव्यः। तत्तद्देवताप्रकाशनाय च देवताविशेषा उक्ताः॥ यजुर्वेदी तु। ॐ त्रातारमिन्द्रमवितारमिन्द्रꣳ हवे हवे सुहवꣳ शूरमिन्द्रं ह्वयामि शक्रं पुरुहूतमिन्द्रꣳ स्वस्तिनो मघवा धात्विन्द्रः स्वाहा इदमिन्द्राय। ॐ वैश्वानरो न ऊतय आप्रयातु परावतः अग्निरुक्थेन वाहसा उपयामगृहीतोऽसि वैश्वानराय त्वैषते योनिर्वैश्वानराय त्वा स्वाहा इदमग्नये। ॐ अग्नियमोऽस्यादित्योऽव्यन्नसित्रितो गुह्येन व्रतेन असि सोमेन समयाविष्टक्त आहुस्ते त्रीणि दिवि बन्धनानि स्वाहा इदं यमाय। ॐ यस्ते देवी निर्ऋतिराबबन्ध दामग्रीवा सविच अर्तं इदन्ते तदिष्यामायुषो न मध्यादथा जीवः पितुमद्विप्रमुक्त स्वाहा इदं निर्ऋतये। ॐ वरुणस्योत्तम्भनमसि वरुणस्य स्कम्भसर्जनीस्थः वरुणस्य ऋतसदन्यसि वरुणस्य ऋतसदनमसि वरुणस्य ऋतसदनी मासीद स्वाहा इदं वरुणाय। ॐ वातो वायो मनो वा गन्धर्वाः सप्तविंशतिस्तेऽग्ने समयुजꣳस्तेऽस्मिन् यवमादधुः स्वाहा इदं वायवे। ॐ कुविदङ्गयवमन्तो यवञ्चिद्यथा दान्त्यनुपूर्वं वियूय इदे हैषां क्रणुहि भोजनानि ये बर्हिषो नमो उक्तिं न जग्मुः स्वाहा इदं कुबेराय। ॐ तमीशानं जगतस्तस्थुषस्पतिं धियं जिन्वमवसे हूमहे वयं पूषा नो यथा वेद सामसदृधे रक्षिता पायुरदब्धस्वस्तये स्वाहा इदमीशानाय। ॐ ब्रह्म यज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचो वेन आवः। सुबुध्या उपमा अस्य विष्ठाः सतश्च योनिमसतश्च विवः स्वाहा इदं ब्रह्मणे। ॐ नमोऽस्तु सर्पेभ्यो ये के च पृथिवीमनु येऽन्तरीक्षे ये दिवि तेभ्यः सर्पेभ्यो नमः स्वाहा इदमनन्ताय॥ ततो नवग्रहहोमः। ॐ आकृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यञ्च हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् स्वाहा। ॐ आप्यायस्व समेतु ते विश्वतः सोमवृष्ण्यं भवावाजस्य सङ्गथे स्वाहा। ॐ अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयं अपाꣳ रेताꣳसि जिन्वति स्वाहा। ॐ अग्ने विवस्वदुषसश्चित्रं राधोऽमर्त्य आदाशुषे जातवेदो वहा त्वमद्या देवां उषर्बुधः स्वाहा। ॐ हृषीते परिदीया रथेन रक्षोहा मित्रां अपबाधमानः प्रभञ्जन्सेना प्रमृणो युधा जयन्नस्माकमेध्यविता रथानां स्वाहा। ॐ शुक्रन्तेऽन्यद्यजतं अन्यदिषुरूपे अहनी द्यौरिवासि विभा हि माया अवसि स्वधावन् भद्राते पूषन्निह रातिरस्तु स्वाहा। ॐ अग्नो देवीरभीष्टये अग्नो भवन्तु पीतये शंयोरभिस्रवन्तु नः स्वाहा। ॐ कयानश्चित्र आभुव दूती सदा वृधः सखा कया शचिष्ठया वृता स्वाहा। ॐ केतुं कृन्नकेतवे पेशो मर्या अपेशसे समुषद्भिरजायथाः स्वाहा। यजुर्वेदी तु। ॐ आकृष्णेनेत्यादि इदं सूर्याय। ॐ इमं देवा असपत्नꣳ सुवध्वं महते क्षत्राय महते ज्यैष्ठाय इममसुमसुष्य पुत्रमसुष्यै पुत्रमस्यै विशे स्वाहा। इदं सोमाय। ॐ अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयं अपाꣳ रेताꣳसि जिन्वति स्वाहा। इदं मङ्गलाय। ॐ उदुत्तमं वरुण पाशमस्मदवाधमं विमध्यमꣳ श्रथाय। अथा वयमादित्य व्रते तवानागसो अदितये स्याम स्वाहा। अस्मिन् सधस्थे अध्युत्तरस्मिन् विश्वेदेवा यजमानश्च सीदत स्वाहा। इदं बुधाय। ॐ दृषन्ते शति यदयो व्रश्चांशुमद्विभाति क्रतुमच्चनोधुः। यद्दीदयच्छवस

ऋत प्रजात तदस्मासु द्रविणं धेहि चित्रꣳ स्वाहा। इदं हविषऋतये। ॐ अन्नात् परिस्रुतो रसं ब्रह्मणा व्यपिबत् क्षत्रं पयः सोमं प्रजापतिः। ऋतेन सत्यमिन्द्रियं विपानꣳ शुक्र मन्धसः। इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु स्वाहा। इदं शुक्राय। ॐ मन्नो देवीरभीष्टय आपो भवन्तु पीतये शंयोरभिस्रवन्तु नः स्वाहा। इदं मन्थिने श्वराय। ॐ काण्डात् काण्डात् प्ररोहन्ती परुषः परुषः परि एवानो दूर्वे प्रतनु सहस्रेण शतेन च स्वाहा। इदं दूर्वाये। ॐ केतुं कृण्वन्नकेतवे पेशो मर्या अपेशसे समुषद्भिरजायथाः स्वाहा। इदं केतुभ्यः। ऋग्वेदी तु ऋग्भिरेव मन्त्रैर्जुहुयात् ॥ * ॥ ततो मेक्षणमग्नौ प्रक्षिपेत्। एवं चरुहोमं समाप्य चरुस्थालीस्थेन दिग्भ्यो बलिन्दद्यात्। तद्यथा। एष पायमबलिः ॐ प्राच्यै दिशे नमः। एवमग्नेय्यै अवाच्यै निर्ऋत्यै प्रतीच्यै वायव्यै उदीच्यै ऐशान्यै ऊर्ध्वदिशे अधोदिशे ॥ * ॥ ततो घृताक्तपलाशसमिधा अष्टोत्तरशतं जुहुयादनेन मन्त्रेण। ॐ तद्विष्णोरित्यादि स्वाहा इदं विष्णवे। ततः पूर्वोक्तैश्चरुहोममन्त्रैस्तत्तद्देवताभ्यः सुवेणाज्याहुतीर्जुहुयात्। तत आज्येन पुरुषसूक्तनवभिर्मन्त्रैः सामगो जुहुयात्। यथा। ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदं स मूढस्य पांसुले स्वाहा। १। ॐ प्रत्नस्य विष्णो अरुषस्य नूनहः प्रणवोचं विदथा जातवेदसः। वैश्वानराय मतिर्नव्यसि शुचिः सोम इव पवते चारुरग्नये स्वाहा। २। ॐ प्रकाव्यमुशनेव ब्रुवाणो देवो देवानां जनिमा विवक्ति महिव्रतः शुचिबन्धुः पावकः पदा वराहो अभि सप्तरेतति स्वाहा। ३। ॐ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्। स भूमिं सर्वतो वृत्वा अत्यतिष्ठद्दशाङ्गुलं स्वाहा। ४। ॐ त्रिपादूर्ध्वमुदैत् पुरुषः पादोऽस्येहाभवत् पुनः। ततो विष्वं व्यक्रामत् साशनानशने अभि स्वाहा। ५। ॐ पुरुष एवेदꣳ सर्वं यद्भूतं यच्च भव्यं उतामृतत्वस्येशानो यदन्नेनातिरोहति स्वाहा। ६। ॐ एतावानस्य महिमातो ज्यायांश्च पुरुषः पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि स्वाहा। ७। ॐ ततो विराड्जायत विराजो अधिपूरुषः। स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः स्वाहा। ८। ॐ कयानश्चित्र आभुवदूती सदा वृधः सखा कया शचिष्ठया वृता स्वाहा। ९। ॐ। यजुर्वेदी तु षोडशोपचारपूजोक्तपुरुषसूक्तषोडशमन्त्रैराज्येन षोडशाहुतीर्जुहुयात्। ऋग्वेदिनामप्येवम् ॥ ० ॥ तत आज्यमित्रितान् तिलान् गृहीत्वा ॐ इरावती धेनुमती हि भूतं सूयवसिनी मनवे दशस्या। व्यस्कभ्ना रोदसी विष्णवेते राधत्त पृथिवीमभितो मयूखैः स्वाहा। इदं विष्णवे। इति सप्तत जुहुयात्। ॐ प्रजानुयायिभ्यः स्वाहा। ॐ विश्वानुयायिभ्यः स्वाहा। ॐ ईशानानुयायिभ्यः स्वाहा। एवं पूर्वोक्तैर्नवग्रहमन्त्रैर्दशदिक्पालमन्त्रैश्च सप्तत सप्तत जुहुयात्। एवं पर्वतेभ्यः स्वाहा। ॐ नदीभ्यः स्वाहा। ॐ समुद्रेभ्यः स्वाहा। एवं तिलहोमं समाप्य सुवेण महाव्याहृतिभिराज्यं जुहुयात्। * । ततः प्रायश्चित्तहोमसङ्ख्यं कृत्वा ॐ अग्नेत्वं विधुनामासीति नाम कृत्वा आवाह्य पूजयित्वा परिभाषासिद्धं स्वशाखोक्तं प्रायश्चित्तहोमादि कृत्वा पूर्णाहुत्यां रुद्रनामानमग्निं पूजयित्वा घृतपूर्णस्रुचा उत्थाय यजमानेनान्वारब्धः ॐ तद्विष्णोः परममित्यादि वौषट् इत्युच्चार्य पूर्णाहुतित्रयं दद्यात्। ततः आचारात् ऐशान्यां पृथ्वि त्वं शीतला भव इत्युच्चार्य दुग्धादि चिह्ना सुवलयभस्मना ॐ कश्यपस्य त्र्यायुषं इति शिरसि। ॐ यमदग्नेस्त्र्यायुषं कण्ठे। ॐ यद्देवानां त्र्यायुषं बाहुमूलयोः। ॐ तन्नोऽस्तु त्र्यायुषं हृदि। अन्यकर्तृकपक्षे तु तत्तोऽस्तु त्र्यायुषमिति विशेषः। ततो यजमानः पञ्चगव्यं चरुशेषञ्च प्राश्य प्राश्य वा पूर्णपात्रादिकां दक्षिणां ब्रह्मणे दद्यात् ततो हेमयुक्तं सवस्त्रतिलपात्रं जलकृतगवीं तन्मूल्यं वा एतद्होमकर्म्मप्रतिष्ठार्थमाचार्य्याय दद्यात्। अन्यद्होत्रपक्षे होत्रे दद्यात्। एतत्कृतकर्म्मणा प्रीयतां भगवान् विष्णुरिति विष्णवे समर्पयेत्। *। ततः प्रासादसम्मुखे ॐ उत्तिष्ठ ब्रह्मणस्पते देवा यज्ञन्तस्ते महे उपप्रयन्तु मरुतः सुदानव इन्द्रः प्रासुर्भवासचा इतिमन्त्रेण देवतामानीय विष्णुगृहस्य सम्मुखे गरुडं शिवगृहस्य वृषं दुर्गागृहस्य सिंहं स्थापयेत्। ततो गन्धमाल्यवस्त्रादिना स्थपतिं परितोष्य ॐ इदं विष्णुर्विचक्रमे इत्यादि पठित्वा ॐ चक्राय नमः इति चक्रं संपूज्य गृहोपरि यथायोग्यं चक्रादिकं विन्यस्य गृहं वस्त्रेणाच्छाद्य गृहद्वारानुरूपं तोरणं विधाय गृहानुरूपध्वजाचामरकिङ्किणीजालवर्हिपत्रोपेतं सवस्त्रयष्टिसमेतं ध्वजं गृहस्येशानकोणे वायुकोणे वा स्थापयेत्। * । ततो विष्णुशालग्रामादौ यथार्हं गृहसमीपे नीत्वा पञ्चविंशतिघटैर्नारिकेलोदकैः पञ्चगव्यपञ्चामृतैस्तीर्थोदकैः स्नानं कारयित्वा षोडशोपचारादिभिः पूजयेत्। वक्ष्यमाणमन्त्राणां पौराणिकत्वेन शूद्रादीनामप्यधिकारः। अत्रार्घ्यपात्राभ्यां प्रोक्षितं आसनं गृहीत्वा इदमासनं ॐ सर्वान्तर्यामिणे देव सर्ववीजमयं ततम्। आत्मस्थाय परं शुद्धमासनं कल्पयाम्यहम् ॥ ॐ विष्णवे नमः इति मूलेन दद्यात् १। ततः कृताञ्जलिः।

"ॐ यस्य दर्शनमिच्छन्ति देवाः स्वाभीष्टसिद्धये।
तस्मै ते परमेशाय स्वागतं स्वागतञ्च मे ॥
कृतार्थोऽनुगृहीतोऽस्मि सफलं जीवितं मम।
आगतो देवदेवेश! सुस्वागतमिदं वपुः ॥"

विष्णो स्वागतमिति स्वागतम्रः २। ताम्रपात्रस्थं शालग्रामाद्यर्घ्यपात्रादिताद्भक्तजलं गृहीत्वा।

"ॐ यद्भक्तिलेशसम्पर्कात् परमानन्दसम्भवः।
तस्मै ते चरणाब्जाय पाद्यं शुद्धाय कल्पये ॥"

इत्युच्चार्य मूलेन पादयोर्दद्यात् ३। इदमासनमितीव मन्त्रस्य पूर्व्वमेतत् पाद्यमिति प्रयोज्यमेवमुत्तरत्र यथायोग्यमुह्यम्। गन्धपुष्पाक्षततुलसीदूर्व्वाग्रतिलश्वेतसर्षपद्रूर्व्वात्मकं अर्घ्यं गृहस्थं गृहीत्वा।

"ॐ तापत्रयहरं दिव्यं परमानन्दलक्षणम्।
तापत्रयविनिर्मुक्तं तवार्घ्यं कल्पयाम्यहम् ॥"

इति मूलेन शिरसि दद्यात् ४। जातीलवङ्गकक्कोलयुक्तं केवलं वा जलं गृहीत्वा।

"ॐ देवानामपि देवाय देवानां देवतात्मने।
आचामं कल्पयामीश शुद्धानां शुद्धिहेतवे ॥"

इति मूलेन दद्यात् ५। कांस्यस्थं दधिमधुघृतात्मकं कांस्यपिहितं मधुपर्कं गृहीत्वा।

"ॐ सर्वकल्मषहीनाय परिपूर्णसुखात्मने।
मधुपर्कमिमं देव कल्पयामि प्रसीद मे ॥"

इति मूलेन दद्यात् ६। पुनराचमनीयं गृहीत्वा।

"ॐ उच्छिष्टोऽप्यशुचिर्वापि यस्य स्मरणमात्रतः।
शुद्धिमाप्नोति तस्मै ते पुनराचमनीयकम् ॥"

इति मूलेन दद्यात् ७। लौकिकषड्गुणाधिकशतत्रयतोलकान्यूनं तीर्थजलं गृहीत्वा।

"ॐ परमानन्दबोधाब्धिनिमग्ननिजमूर्तये।
बाह्योपाङ्गमिदं स्नानं कल्पयाम्यहमीश ते ॥"

ॐ तद्विष्णोरिति मूलेन दद्यात् ८। पूर्ब्बरीत्या पुनराचमनीयञ्च दद्यात्। अर्घ्याम्भसा प्रोक्षितं वस्त्रं गृहीत्वा।

"ॐ मायाचित्रपटच्छन्ननिजगुह्योरुतेजसे।
निरावरणविज्ञाय वाससे कल्पयाम्यहम् ॥"

इति मूलेन दद्यात् ९। उत्तरीयवस्त्रं गृहीत्वा।

"ॐ यमाश्रित्य महामाया जगत्संमोहिनी सदा।
तस्मै ते परमेशाय कल्पयाम्युत्तरीयकम् ॥"

इति मूलेन दद्यात् ९। ततः पूर्ब्बवत् पुनराचमनीयञ्च दद्यात्। सुवर्णाद्याभरणमर्घ्याम्भसा प्रोक्ष्य।

"ॐ स्वभावसुन्दराङ्गाय नानाशक्त्याश्रयाय ते।
भूषणानि विचित्राणि कल्पयाम्यमरार्चित ॥"

इति मूलेन दद्यात् १०। प्रोक्षितं गन्धं गृहीत्वा।

"ॐ परमानन्दसौरभ्यपरिपूर्णदिगन्तर।
गृहाण परमं गन्धं कृपया परमेश्वर ॥"

इति मूलेन दद्यात् ११। तत्तद्देवताप्रियपुष्पमादाय।

"ॐ तुरीयवनसम्भूतं नानागुणमनोहरम्।
आनन्दसौरभं पुण्यं गृह्यतां परमेश्वर ॥"

इति मूलेन दद्यात् १२। धूपं प्रोक्ष्य धृत्वा संपूज्य।

"ॐ वनस्पतिरसो दिव्यो गन्धाढ्यः सुमनोहरः।
आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम् ॥"

इत्युच्चार्य वामहस्तेन घण्टां वादयन् मूलेन दद्यात् १३। ततो घृतादिप्रदीपमादाय।

"ॐ सुप्रकाशो महादीपः सर्वतस्तिमिरापहः।

सवत्साभ्यन्तरं ज्योतिर्दोषोऽयं प्रतिगृह्यताम्।"
इति मूलेन दद्यात् १४। प्रोक्षितनानाविधनैवेद्योपरि मनुष्यमुद्रया मूलं दृशधा चम्राभ्यां धेनुमुद्रयाऽमृतीकृत्य।
"ॐ सत्पात्रसिद्धं सुरभिर्विविधानेकभक्षणम्।
निवेदयामि देवेश सानुगाय गृहाण तत्॥"
इति मूलेन दद्यात् १५। जलमादाय।
"ॐ ननन्तदेवदेवेश सर्व्वतृप्तिकरं परम्।
अखण्डानन्दसम्पूर्णं गृहाण जलमुत्तमम्॥"
इति मूलेन दद्यात् १५। पूर्व्ववत् पुनराचमनीयञ्च। ताम्बूलं गृहीत्वा।
"ॐ ताम्बूलं देवदेवेश कर्पूरादिसुवासितम्।
करुणयानि तवेशान वदनाम्भोजभूषणम्॥"
इति मूलेन दद्यात् १५। ततस्तत्तद्देवतानमस्कारमन्तर्वन्दनं कुर्य्यात्। १६। उपचारद्रव्याधारदाने साधारणत्वेनोल्लेखः पृथग्वा तद्दानम्। १७। तत ॐ विष्णवे नमः इति चिः संपूज्य घण्टावितानतोरणयुक्तं वस्त्रादिच्छादितं वेश्म प्रोक्ष्य ॐ विष्णवे नमः इति चिः संपूज्य ॐ तद्विष्णोरित्यनेन विष्णुं स्मृत्वा ॐ तत् सदित्युच्चार्य वामहस्तेन धृत्वा कुशतिलजलान्यादाय अद्येत्यादि अमुकगोत्रः श्रीअमुकदेवशर्म्मा मदीयपातकादिदुरापक्षयकामो विष्णुप्रीतिकामो वा विष्णुवेश्मनि इमं ध्रुवं विष्णुदैवतं विष्णवे तुभ्यमहं सम्प्रददे। इत्युत्सृज्य एतत्प्रतिष्ठार्थं दक्षिणां विष्णवे दद्यात्। पश्चादाचार्य्यादौ प्रतिपत्तिः। ततो गरुडस्तम्भं समारोप्य ॐ सुपर्णोऽसि गरुत्मांस्त्रिवृत्ते शिरो गायत्रं चक्षुर्बृहद्रथन्तरे पक्षौ। स्तोम आत्मा छन्दांस्यङ्गानि यजूंषि नाम सामते तनूर्वामदेव्यं यज्ञायज्ञियं पुच्छं धिष्ण्याः शफाः सुपर्णोऽसि गरुत्मान्दिवं गच्छ स्वःपते। यजुर्वेदी तु। ॐ सुपर्णोऽसि गरुत्मान् त्रिवृत्ते शिरो गायत्रं चक्षुस्तोम आत्मा साम ते तनूर्वामदेव्यं बृहद्रथन्तरे पक्षौ यज्ञायज्ञियं पुच्छं छन्दांस्यङ्गानि धिष्ण्याः शफाः यजूंषि नाम। सुपर्णोऽसि गरुत्मान्दिवं गच्छ सुवः पत इति पठित्वा। ॐ गरुडाय नम इति त्रिःसंपूज्य ॐ नमस्ते पतगश्रेष्ठ पन्नगान्तकर प्रभो। त्वत्प्रसादान्मयावाप्तो मोदेयं दिवि देववत्॥ यथा त्वं संपुटकरः सततं नतकन्धरः। तथैव पुरतो विष्णोस्तिष्ठेयं प्रणतोऽस्म्यहम्॥ इति पुटाञ्जलिः प्रार्थयेत्॥ * ॥ ततः पिष्टप्रदीपादिना निर्म्मञ्छनं कुर्य्यात्। ततो विघ्नान्यूनब्राह्मणेभ्यो भोज्यानि दद्यात्। दीनानाथकृपणबधिरेभ्यो यथाशक्ति दद्यात्। ततः प्रीयतां पुण्डरीकाक्षसर्व्वयज्ञेश्वरो हरिः। तस्मिंस्तुष्टे जगत्तुष्टं प्रीणिते प्रीणितं जगत्॥ ततो कृत्यगीतवादित्रनिस्वनमहोत्सवं कृत्वा अच्छिद्रावधारणं कृत्वा वैगुण्यसमाधानार्थं तद्विष्णोरिति विष्णुं स्मरेत्। * । एवं रुद्रादिमठादिप्रतिष्ठायां आसनादिकन्तु तत्तन्मन्त्रं विहाय केवलं प्रणवादिनमोऽन्तेन तत्तन्नाम्ना दत्त्वा यथायोग्यं तत्तत्कर्म्मशेषं समापयेत्। * । एवं गोपथादि प्रतिष्ठायां ततुसमीपे वेदिकां कृत्वा तत्तत्फलकामो विष्णुप्रीतिकामो वा तत्तत्प्रतिष्ठां करिष्ये इति सङ्कल्प्य वृद्धिश्राद्धादिकं विधाय प्रागुक्तविधिनाग्निस्थापनादि एतत्कर्म्मणा प्रीयतां भगवान् विष्णुरित्यन्तं कर्म्म कृत्वा कूपादिवत् सर्व्वभूतेभ्य उत्सृज्य दक्षिणां दद्यात्। * । नियमव्रतादिप्रतिष्ठायान्तु विष्णुरित्यन्तं कर्म्म कृत्वा व्रतानुष्ठानं कृत्वा दक्षिणादिकं कुर्य्यात्। * । ततो घटस्थजलेन यजमानमभिषिञ्चेत्। तद्यथा,—
"ॐ सुरास्त्वामभिषिञ्चन्तु ब्रह्मविष्णुमहेश्वराः।
वासुदेवो जगन्नाथस्तथा सङ्कर्षणो विभुः।
प्रद्युम्नश्चानिरुद्धश्च भवन्तु विजयाय ते॥
आखण्डलोऽग्निर्भगवान् यमो वै नैर्ऋतस्तथा।
वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः।
ब्रह्मणा सहिताः सर्व्वे दिक्पालाः पान्तु ते सदा॥
कीर्त्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्षमा मतिः।
बुद्धिर्लज्जा वपुः शान्तिस्तुष्टिः पुष्टिस्त्वया सह॥
एताभिः सहितः सर्व्वैर्देवपत्न्यः समागताः॥

आदित्यचन्द्रमा भौमो बुधजीवसितार्कजाः।
ग्रहास्त्वामभिषिञ्चन्तु राहुः केतुश्च तर्पिताः॥
देवदानवगन्धर्व्वा यक्षराक्षसपन्नगाः।
ऋषयो मुनयो गावो देवमातर एव च॥
देवपत्न्योऽप्सरा नागा दैत्याश्चासुरसंघगाः।
अस्त्राणि सर्व्वशस्त्राणि राजानो वाहनानि च॥
औषधानि विचित्राणि कालस्यावयवाश्च ये।
सरितः सागराः शैलास्तीर्थानि जलदा नदाः॥
एतास्त्वामभिषिञ्चन्तु धर्म्मकामार्थसिद्धये॥"*॥

इति मठादिप्रतिष्ठाप्रयोगतत्त्वं समाप्तम्॥

(पक्वखाद्यवस्तुविशेषः। अस्य पाकप्रकारो यथा,
"समिता मर्दयेद्दध्नाजेनापि च सन्नयेत्।
तस्यास्तु वटिकां कृत्वा पचेत् सर्पिषि नीरसम्॥
श्रुला लवङ्गकर्पूरमरीचाद्यैरलङ्कृते।
मज्यित्वा सितापाके ततस्तञ्च समुद्धरेत्॥
अयमुत्कारः संसिद्धो मठ इत्यभिधीयते॥"
[सन्नयेन्मर्दयेत्] तस्यास्य गुणाः॥
"मठस्तु हृद्यो रुच्यो बल्यः सुमधुरो गुरुः।
पित्तानिलहरो रुच्यो दीप्ताग्नीनां नृपूजितः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

मठरः, पुं, (मन्यते मनुतेऽवबुध्यते इत्यर्थः। मन + "वचिमनिभ्यां चित्र।" उणा० ५। ३६। इति अरच्चित् टश्चान्तादेशः।) मुनिविशेषः। इत्युणादिकोषः॥ (प्रौढः। मठरो मुनिप्रौढयोरित्युज्ज्वलदत्तः॥)

मड इ क मोदे। इति कविकल्पद्रुमः॥ (चुरा०-पर०-अक०-सेट्।) इ मण्डयति। इति दुर्गादासः॥

मड इ कि भूषे। इति कविकल्पद्रुमः॥ (चुरा०-पक्षे भ्वा०-पर०-सक०-सेट्।) मण्डयति मण्डति हारो वनम्। इ मण्डते। इति दुर्गादासः।

मड इ ड विभागे। वेष्टे। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) इ मण्डते ए मण्डते। इति दुर्गादासः॥

मड्कः, पु, (मण्डयति भूषयति चेत्यमिति। मडि + "कुन् शिल्पिसंज्ञयोरपूर्व्वस्यापि।" उणा० २। ३२। इति कुन्। पृषोदरादित्वान्नलोपः।) शस्यभेदः। मेडुया इति भाषा। इति चटाधरः॥

मड्डुः, पुं, वाद्यविशेषः। इत्यमरः। १। ७। ८॥ घुघूक इति ख्यातः। विघुलो डमरुर्मेरुरिति कोषः॥ मरु इति रौति इति मड्डुः पृषोदरादित्वात्। मध्नन्ति शब्दा अनेनेति मध्नातेर्निपातो वा। इति भरतः॥

मड्डुकः, पुं, (मड्डुरेवेति मड्डु + स्वार्थे कन्।) मड्डुवाद्यम्। इति त्रिकाण्डशेषः॥

मण्ड भूषे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) मण्डति। भूषितोऽयमर्थः। इति दुर्गादासः॥

मण्डिः, पुं, स्त्री, (मण्ड + "मण्डेर्धातुभ्य इन्।" उणा० ४। ११०। इतीन्।) अग्निज्वालिः।

मणिक

(यथा, रघौ। १। ४।
"मणौ वज्रसमुत्कीर्णे सूत्रस्येवास्ति मे गतिः।")
मुक्तादिकम्। तत्पर्य्यायः। रत्नम् २ मणी ३। इत्यमरः। २। ६। ६३। (तथास्य पर्य्यायः।
"रत्नं क्लीवे मणिः पुंसि स्त्रियामपि निगद्यते।
तत्तु पाषाणभेदोऽस्ति मुक्तादि च तदुच्यते॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे।)
अस्य गुणाः।
"मणिरत्नं परं प्रीतं कषायं स्वादु लेखनम्।
चक्षुष्यं धारणात्तच्च पापालक्ष्मीविनाशनम्॥"
इति राजवल्लभः॥
(तथास्य गुणाः।
"मुक्ताविद्रुमवज्रेन्द्रवैडूर्य्यस्फटिकादयः।
चक्षुष्या मणयः प्रीता लेखना विषसूदनाः।
पवित्रा धारणाद्यास्च पापालक्ष्मीमलापहाः॥"
इति सुश्रुते सूत्रस्थाने ४६ अध्याये।)
अजायाः कण्ठस्थिनस्तनः। लिङ्गाग्रम्। अलिञ्जरः। इति मेदिनी। २४॥ योन्यग्रभागः। इति शब्दरत्नावली॥ नागविशेषः। इति जटाधरः॥
मणिबन्धः। इति हेमचन्द्रः॥ (मुनिभेदः। यथा, महाभारते। २। ११। २२।
"असितो देवलश्चैव जैगीषव्यश्च तत्त्ववित्।
ऋषभो जितमूत्रुच्च महावीर्य्यस्तथा मणिः॥")
मणिक, क्ली, (मणिरेवेति मणि+"तावादिभ्यः कन्।" ५। ३। २६। इति स्वार्थे कन्। अलिञ्जरः। इत्यमरः। २। ६। ३१॥ (यथा, मात्स्ये। १। २१।
"स तमादाय मणिके प्राक्षिपच्चलचारिणम्॥")
मणिकर्णः, पुं, कामरूपस्थशिवलिङ्गभेदः। यथा,
"भस्मकूटस्य चैशान्यां मणिकूटो महागिरिः।
मणिकर्णो नाम हरस्तत्र तिष्ठति लिङ्गकः॥
स सद्योजातरूपस्तु मणिकर्ण इतीरितः।
सद्योजातस्य मन्त्रेण पूजितव्यः सदा शिवः॥"
इति कालिकापुराणे ८१ अध्यायः॥
मणिकर्णिका, स्त्री, (कर्णे भवा इति। कर्ण+"कर्णललाटात् कनलङ्कारे।" ४।३।६५। इति कन्। टाप्। अकारस्य इत्वम्। मणिमयी कर्णिका मूलकपार्थिवादिवत् समासः। सा विद्यते यत्रेति वा। विष्णोस्तपस्याप्रचयदर्शनात् विस्मिततया शिवस्य मणिमयकुण्डलपतनादस्यास्तथात्वम्।) काशीस्थतीर्थविशेषः। तदुत्पत्तिर्यथा। विष्णुं प्रति शिववाक्यम्।
"त्वदीयस्यास्य तपसो महोपचयदर्शनात्।
यन्मयान्दोलितो मौलिरस्मिन्नवणभूषणः॥
तदान्दोलनतः कर्णात् पपात मणिकर्णिका।
मणिभिः खचिता रम्या ततोऽस्तु मणिकर्णिका॥
चक्रपुष्करिणीतीर्थं पुरा ख्यातमिदं शुभम्।
त्वया चक्रेण खननाच्चक्रगदाधर॥
मम कर्णात् पपातेयं यदा च मणिकर्णिका।
तदा प्रभृति लोकेऽत्र ख्यातास्तु मणिकर्णिका॥

मणिका

श्रीविष्णुरुवाच।
मुक्ताकुण्डलपातेन तवादितनयाप्रियम्।
तीर्थानां परमं तीर्थं मुक्तिक्षेत्रमिहास्तु वै॥
काशतेऽत्र यतो ज्योतिस्त्वदनाख्येवमीश्वर!।
अतो नामापरञ्चास्तु काशीति प्रथितं विभो!॥
अन्यं वरं वरे देव! देयः सोऽप्यविचारितम्।
स ते परोपकारार्थं जगद्रक्षामणे शिव!॥
आब्रह्मस्तम्बपर्य्यन्तं यत्किञ्चिज्जन्तुसंज्ञितम्।
चतुर्थं भूतग्रामेषु काश्यां तन्मुक्तिमाप्नुयात्॥
तस्मिंस्तीर्थवरे शम्भो! मणिश्रवणभूषणे।
सन्ध्यां स्नानं जपं होमं वेदाध्ययनमुत्तमम्॥
तर्पणं पिण्डदानञ्च देवतानाञ्च पूजनम्।
गोभूतिलहिरण्याश्वदीपान्नाम्बरभूषणम्॥
कन्यादानं प्रयत्नेन सप्ततन्तूननेकशः।
व्रतोत्सर्गं वृषोत्सर्गं लिङ्गादिस्थापनं तथा॥
करोति यो महाप्राज्ञो ज्ञात्वायुः क्षणभङ्गुरम्।
विपत्तिं विपुलाञ्चापि सम्पत्तिमतिभङ्गुराम्॥
अक्षया सुकृतिरेकास्तु विपाकस्तस्य कर्म्मणः।
अन्यच्चापि शुभं कर्म्म यद्दत्तं अहुया हुतम्॥
विनात्मघातमीशान त्यक्त्वा प्रायोपवेशनम्।
नैःश्रेयस्याः श्रियो हेतुस्त्वदस्तु जगदीश्वर!॥
नानुशोचति नाश्नाति श्रुत्वा कालान्तरेऽपि यत्।
तदिहाक्षयतामेतु तस्येश! त्वदनुग्रहात्॥
तव प्रसादात्तस्येह सर्व्वमक्षयमस्तु तत्।
यदस्ति यज्ञविध्यञ्च यज्ञतन्त्र सदाशिव!॥
तस्मादेतच्च सर्व्वस्मात् क्षेत्रमस्तु शुभोदयम्।"
इति काशीखण्डे मणिकर्णिकाख्यानं नाम २६ अध्यायः॥
मणिकर्णीश्वरः, पुं, (मणिकर्णी मणिकर्ण्या वा ईश्वरः।) काशीस्थशिवलिङ्गविशेषः। यथा,—
"ओङ्कारं प्रथमं पश्येत् मनुस्तोदर्य्यां ततोदकः।
त्रिपिष्टपमहादेवं ततो वै क्षत्तिवाससम्॥
रत्नेशञ्चाथ चन्द्रेशं केदारञ्च ततो व्रजेत्।
धर्म्मेश्वरञ्च वीरेशं गच्छेत् कामेश्वरं ततः॥
विश्वकर्म्मेश्वरञ्चाथ मणिकर्णीश्वरं ततः।
अविमुक्तेश्वरं दृष्ट्वा ततो विश्वेशमर्चयेत्॥
एषा यात्रा प्रयत्नेन कर्त्तव्या क्षेत्रवासिभिः।"
इति काशीखण्डे १०० अध्यायः॥
मणिकर्णेश्वरः, पुं, (मणिकर्णस्तदाख्य ईश्वरः।) कामरूपस्थशिवलिङ्गविशेषः। यथा,—
"सर्व्वतीर्थजले स्नात्वा सृष्ट्वा चन्द्रं सवासवम्।
मणिकर्णेश्वरं दृष्ट्वा मुक्तिर्भस्माचलं गते॥"
इति कालिकापुराणे ८१ अध्यायः॥
मणिकानन, क्ली, (मणीनां काननमिव। बहुमणिधारणादस्य तथात्वम्।) कण्ठः। इति शब्दरत्नावली॥ रत्नवनञ्च॥
मणिकारः, पुं, (मणिं करोतीति। कृ+अण्।) मणिनिर्म्मितालङ्कारादिकर्त्ता। जौहरि इति भाषा। तत्पर्य्यायः। वैकटिकः २। इति हेमचन्द्रः॥ न्यायचिन्तामणिकर्त्ता च॥

मणिद्वी

मणिकूटः, पुं, (मणेरिव मणिमयानि कूटानि शिखराणि यस्य सः।) कामरूपस्थपर्व्वतभेदः। यथा,—
"भस्मकूटस्य चैशान्यां मणिकूटो महागिरिः।
मणिकर्णो नाम हरस्तत्र तिष्ठति लिङ्गकः॥"
इति कालिकापुराणे ८१ अध्यायः॥
"मणिकूटस्याथ गिरेर्गन्धमादनकस्य च।
मध्ये सवति लोहित्यो ब्रह्मपुत्रः समास्थितः॥
हत्वा ज्वरं तथा विष्णुस्तत्र वासमथाकरोत्।
नरदेवासुरादीनां यथा भवति वै हितम्॥
ज्वरेणापीड़िततनुज्वरं हत्वा महासुरम्।
सर्व्वलोकहितार्थाय सोऽगदत्तानमाचरत्॥
अगदत्तानसंभूतं संजातञ्च महासरः।
तस्य स्वयं नाम चक्रे हयग्रीवोऽपुनर्भवम्॥
न पुनर्जायते यस्मात् ततः स्नात्वा नरोत्तमः।
अपुनर्भवसंज्ञं तत् सरस्तु परिकीर्त्तितम्॥
मणिकूटाचले विष्णुर्हयग्रीवस्वरूपधृक्।
स च यामप्रमाणेन विस्तारेणैव संस्थितः॥"
इति कालिकापुराणे ८० अध्यायः॥
मणिखनिः, पुं, (मणीनां खनिः।) मणेराकरः। यथा। मणेः खनिः॥ इति सुग्धबोधव्याकरणम्॥
मणिग्रीवः, पुं, (मणयो ग्रीवायां कन्धरायां यस्य।) कुबेरपुत्रः। इति शब्दरत्नावली॥ रत्नकन्धरे च॥ (यथा, ऋग्वेदे। १। १२२। १४।
"हिरण्यकर्णं मणिग्रीवमर्यस्त्रजो
विश्वे वरिवस्यन्तु देवाः॥"
"मणिग्रीवं रत्नाद्युपेतकण्ठम्।" इति तद्भाष्ये सायनः॥)
मणिच्छिद्रा, स्त्री, (मणेरिव छिद्रमस्याम्।) मेदानामौषधम्। ऋषभाख्यौषधम्। इति मेदिनी। रे, २६०॥ (तथास्याः सलक्षणपर्य्यायः।
"महामेदाभिधो ज्ञेयो मेदालक्षणमुच्यते।
शुक्लकन्दो नखच्छेद्यो मेदोधातुमिव स्रवेत्॥
यः स मेदेति विज्ञेयो जिह्वासातत्परैर्जनैः।
मूलपर्णी मणिच्छिद्रा मेदा मेदोभवाश्वरा॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥)
मणितं, क्ली, (मण्+भावे क्तः।) मैथुनकालीनवाक्यम्। "स्खलितमणितादि सुरते।" इति साहित्यदर्पणे।) तत्पर्य्यायः। रतकूजितम् १। इति हेमचन्द्रः॥ (यथा, शिशुपालवधे। १०। ७५।
"शीत्कृतानि मणितं करुणोक्तिः
स्निग्धसुक्तमलमर्थवचांसि॥")
मणितारकः, पुं, (मणेरिव दीप्तिमती तारका यस्य।) चारसपक्षी। इति राजनिर्घण्टः॥
मणिद्वीपः, पुं, क्ली, (मणिप्रचुरो द्वीपः।) क्षीरसमुद्रमध्ये पद्मरागादिमणिमयान्तरीपः। स च त्रिपुरसुन्दरीवासस्थानम्। यथा,—
"सुधासिन्धोर्मध्ये सुरविटपिवाटीपरिसरे
मणिद्वीपे नीपोपवनवति चिन्तामणिगृहे।
शिवाकारे मञ्चे परमशिवपर्य्यङ्कनिलयां
भजन्ति त्वां धन्याः कति च न चिदानन्दलहरीम्॥"
इत्यानन्दलहरी॥

मणिपर्व्वतः, पुं, (मणीनां पर्व्वतः।) गिरिविशेषः। यथा,—
"ततोऽन्यया गिरिश्रेष्ठमभितो मणिपर्व्वतम्।
तत्र पुष्पा वसुधारा रम्भवंचामलाः प्रभाः॥
मणीनां हेमवर्णानामभिभूय दिवाकरम्।
तत्र हेमूलवर्णानि ददर्श मधुसूदनः॥
सतोरणपताकानि द्वाराणि शिखराणि च।
विद्युद्भ्रथितमेघाभः प्रभौ मणिपर्व्वतः॥
हेमचित्रवितानैश्च प्रासादैरुपशोभितः।
तत्र ता हेमवर्णाभा ददर्श मधुसूदनः॥
गन्धर्व्वासुरसुराणां प्रिया इष्टितरक्षणा।
ददर्श एकुन्योनीः संवृता गिरिकन्दरे॥
नरकैश्च समागीता रक्षमाणाः समन्ततः॥"
इति महाभारते हरिवंशे नरकवधाध्यायः॥

मणिपूरं, क्ली, षट्चक्रान्तर्गतनाभिमण्डलस्थतृतीयपद्मम्। यथा,—
"तदूर्द्धे नाभिदेशे तु मणिपूरं महाप्रभम्।
मेघाभं विद्युदाभञ्च वह्नितेजोमयं ततः।
मणिवद्भिन्नं तत् पद्मं मणिपूरं तथोच्यते॥
दशभिश्च दलैर्युक्तं डादिफान्ताक्षरान्वितम्।
शिवेनाधिष्ठितं पद्मं विश्वालोकनकारणम्॥"
इति तन्त्रम्॥

तत्तु स्वाधिष्ठानपद्मस्योर्द्धदेशे तिष्ठति। यथा,—
"एतत्पद्मस्योर्द्धदेशे महापद्मं सुदुर्लभम्।
दशपत्रं नीलवर्णं सजलं घोररूपकम्।
डादिफान्तैः सचन्द्रेश पद्मजस्यातिशोभनम्॥
तन्मध्ये बीजकोषे निवसति सततं वह्निबीजं सुसिद्धं
यस्मिंस्तत्त्रिपुराख्यं नवतपनिभं स्वस्तिकं तत्त्रिभागे॥
सर्व्वकार्य्यमिदं देवि! सर्व्वदेवप्रपूजितम्।
साकारं वह्निबीजञ्च नदेव मेघवाहनम्॥
स्वयम्भुवं हि तत्रैव महाभोगस्य कारणम्।
भक्तानां सर्व्वविद्या वामभागे सुशोभिता।"
इति निर्व्वाणतन्त्रे ६ पटलः॥

तच्च देवतीर्थं यथा, वह्निपुराणे।
मणिपूरे देवतीर्थं पवित्रं वरोवरम्।
तत्र स्नात्वा नरो याति यो मुक्तिमिच्छति॥"
(मणीनां पूरोऽत्र।) स्वनामख्यातदेशश्च॥ (यथा, महाभारते १। २१८। २३।
"[५] ततो गत्वा पुनर्गर्त्तं मणिपूरपुरं ययौ॥")

मणिबन्धः, पुं, (मणिर्बध्यते यत्र। अधिकरणे घञ्।) प्रकोष्ठपार्श्वयोः सन्धिस्थानम्। इत्यमरटीकायां भरतः। कला इति भाषा। स च करस्यादिभागः। (यथा, अभिज्ञानशाकुन्तले ६ अङ्कः।
"मणिबन्धान्नपतितमिदं संगान्तोषीरपरिमलं तस्याः।")
तत्पर्य्यायः। मणिः २। इति हेमचन्द्रः॥ करभिः ३ करभशिफः ४। इति शब्दरत्नावली। अस्य शुभाशुभलक्षणं यथा,—
"मणिबन्धैर्निगूढैश्च सुश्लिष्टशुभसन्धिभिः।

नृपा होनैः करश्चेदैः सशब्दैर्धनवर्ज्जिताः॥"
इति गारुडे ६५ अध्यायः॥

मणिभद्रः, पुं, (मणिषु भद्रः, यद्वा मणिभिर्भद्रमस्य। मणिसुक्तादिधनाधिक्यादस्य तथात्वम्।) जिनानां पूर्व्वयक्षविशेषः। तत्पर्य्यायः। जम्भलः २ पूर्व्वयक्षः ३ अलेन्द्रः ४। इति त्रिकाण्डशेषः॥ (प्रधानवज्रभेदः। यथा, महाभारते। ३। ६४। १२७।
"ऋते त्वां मानुषं मर्त्यं न पश्यामि महाबले।
तथा नो वज्रराड्वज्र मणिभद्रः प्रसीदतु॥"
यथा च कथासरित्सागरे। १३। १६५।
"अस्तद्दैत्ये पुरस्यान्तर्मणिभद्र इति श्रुतः।
पूर्व्वैः कृतप्रतिष्ठोऽस्ति सहायश्चः प्रभावितः॥")

मणिभूमिः, स्त्री, (मणीनां भूमिः आकरः। मणिमयी भूमिरिति वा।) रत्नस्य खनिः। तत्पर्य्यायः। कुट्टिमम् २। इति शब्दरत्नावली॥

मणिमण्डपः, पुं, (मणिमयः मण्डपः।) रत्नमयगृहम्। यथा, रत्नमालायां वसन्तोत्सवे।
"मध्ये सुधाब्धिमणिमण्डपरत्नवेदी-
सिंहासनोपरिगतां परिपीतवर्णाम्।
पीताम्बराभरणमाल्यविभूषिताङ्गीं
देवीं नमामि धृतसुद्गरवैरिशिक्षाम्॥"

मणिमन्थं, क्ली, (मणिरिव मथ्यते इति मणि+मन्थ+कर्म्मणि घञ्।) सैन्यबलवगम्। इति राजनिर्घण्टः॥ (मणयः मथ्यन्ते उपलान् विदार्य्य गृह्यन्ते यत्रास्माद्वेति। मन्थ+अधिकरणादौ घञ्।) पर्व्वतविशेषः। इति साणिमन्थशब्दटीकायां भरतः॥ (यथा, महाभारते। १३। १८। ३३।
"मणिमन्थेऽथ शैले वै पुरा सन्धुतिजो मया॥")

मणिमान्, [न्] त्रि, मणिविशिष्टः। रत्नभूषितः। (यथा, भागवते। ३। १५। ४१।
"विद्युत्पिशङ्गकरकुण्डलसङ्गताई-
गण्डस्थलोल्लसदसुं मणिमत्किरीटम्॥")
मणिरत्नीति मतुप्प्रत्ययेन निष्पन्नः॥ (पुं, नागविशेषः। यथा, महाभारते। २। ६।
"मणिमान् कुण्डधारश्च कर्कोटकधनञ्जयौ॥"
राक्षसभेदः। स च ध्रुवेरस्य सखा। यथा, महाभारते। ३। १३०। ५७।
"सखा वैश्रवणस्यापीत्यमणिमानाम राक्षसः॥"
मणिमत्यदेशभेदः। यथा, हरचरितचिन्तायाम्। १४। २०।
"अपरस्यां मणिमान् मेघवान् वर्णोघः सुरा-
पर्णोऽस्तगिरिः॥"
स्त्री, पुरभेदः। यथा, महाभारते। ३। ६६। ४।
"एकचक्रां नाम देवीं व्याजहार कौरवनन्दन!।
मणिमत्यां पुरि पुरा बातापिसुतस्य धीमतः॥")

मणिमाला, स्त्री, (मणिनिर्म्मिता माला शाकपार्थिवादिवत् समासः।) हारः। रत्नखचितविशेषः। इति मेदिनी। ले, १६०॥ (मणिनिर्म्मिता माला यस्याः।) लक्ष्मीः। इति शब्दरत्नावली॥ दीप्तिः। इतिशब्दमाला॥ (छन्दोभेदः। यथा, छन्दोमञ्जर्य्याम्। "यौ यौ मणिमाला छिन्ना गुरुवक्त्रे।" अधिकन्तु छन्दःशब्दे द्रष्टव्यम्॥)

मणिरागं, क्ली, (मणेरिव रागो वर्णोऽस्त्यस्य।) सिन्दूरम्। इति राजनिर्घण्टः॥ (मणेः रागः।) मणिवर्णे पुं॥ (गुणादयोऽस्य सिन्दूरशब्दे विधेयाः॥)

मणिवः, पुं, नागविशेषः। मणिशब्दादस्यार्थे यप्रत्ययेन निष्पन्नः। इति सिद्धान्तकौमुदी॥

मणिबीजः, पुं, (मणिरिव दर्शनीयं बीजं यस्य।) दाडिमवृक्षः। इति राजनिर्घण्टः॥

मणिसरः, पुं, (मणिभिः सियते गम्यते यत्र इतिभावः। सि+कर्म्मणि अप्।) मुक्ताहारः। यथा, गीतगोविन्दे ७ सर्गः।
"घटयति सघने स्तनयुगगगने रतमदरुचि-
रूषिते।
मणिसरममलं तारकपटलं नखदशशशि-
भूषिते॥"

मणी, स्त्री, (मणि+ऋदिकारादिति मत्वे ङीष्।) मणिः। इति भरतविरूपकोषः॥

मणीचकं, क्ली, (मणीन् चकते प्रतिफलति दीप्त्या इति। चक+अच्।) चन्द्रवर्णरूप्यम्। तत्पर्य्यायः। इन्दुकान्तः २। इति त्रिकाण्डशेषः॥ (शाकद्वीपस्य वर्षविशेषः। यथा, भागवते। १२१। २३।
"श्यामपर्व्वततटे तु मणीचकमिति स्मृतम्॥")

मणीचकः, पुं, (मणी+चक्+अच्।) मतुष्यरक्षपक्षी। यथा,—
"भक्ष्याशी मत्सरः स्वाक्षमदगुर्मणीचकः।"
इति शब्दरत्नावली॥

मणीव, य, मणितुल्यम्। मणिशब्देन सह इवशब्दस्य षष्ठीतत्पुरुषसमासः। प्रथमाद्विवचनान्तमणिशब्दात् इवार्थेवशब्देन वाशब्देनाप्येवं रूपम् यथा,—
"मणीवोष्ट्रस्येति तु इवार्थे वशब्दो वाशब्दो
वा बोध्यः।"
इति सिद्धान्तकौमुदी॥

मणीवकं, क्ली, (मणीव+संज्ञायां कन्।) पुष्पम्। इति हेमचन्द्रः॥

मण्डपी, स्त्री, (मण्डमुन्मादं पाति रक्षतीति मण्ड+पा+कः। टाबौ संज्ञायां वा ङीष्।) क्षुद्रोपोदकी। इति राजनिर्घण्टः॥

मण्डः, पुं, (मण्डते इति मडि+घञ्।) वटवृक्षविशेषः। माड़ा इति हिन्दी भाषा। यथा,—
"चमितां मर्द्दयेदाद्यैर्जलेनापि च सप्तयेत्।
अस्यान्तु वटकं कृत्वा पचेत् सर्पिषि नीरसम्॥
सुगन्धवह्निकर्पूरमरिचाद्यैरलङ्कृते।
भक्षयित्वा पिताभक्ते ततस्तस्य समुद्धरेत्।
अयं प्रकारः संक्षिप्तो मण्डस्य परिभीर्यते॥"
अस्य गुणाः।
"मण्डस्तु हृद्यो वृष्यो बल्यः सुमधुरो गुरुः।
पित्तानिलहरो रुच्यो दीप्ताग्नीनां सुपूजितः॥"

मण्डः

प्रकारान्तरं यथा,—
"समिता गुर्करासर्पिर्निर्मिता अपरेऽपि ये।
प्रकारा अमुना तुल्यास्तेऽपि चैतद्गुणाः स्मृताः॥"
इति राजनिर्घण्टः॥

मण्डं, क्ली, पुं, (मन्यते ज्ञायते अनेन अन्नादिकमिति। मन + "चमन्तात् डः।" उणा० २।११३। इति डः।) सर्व्वेषामन्नदध्यादीनामग्रभागः। इत्यमरभरतौ। माड़ इति मात इति च भाषा॥ (यथा, उत्तररामचरिते ४ अङ्के। १।
"नीवारौदनमण्डसुण्डमधुरं सद्यःप्रसूताप्रियापीतादप्यधिकं तपोवनगवां पर्य्याप्तमाचामति॥")
सारः। पिच्छम्। इति मेदिनी। डे, २१॥

मण्डं, क्ली, (मण्डतीति। मडि भूषादौ + अच्।) मस्तु। इति मेदिनी। डे, २१॥ (यथा, भागवते। ५। २०। २४।
"समानेन दधिमण्डोदेन परितः॥")

मण्डः, पुं, (मण्डयति चेत्रं भूषयतीति मडि + अच्।) एरण्डवृक्षः। प्राकभेदः। इति मेदिनी। ते, २१॥ मस्तु। भूषा। सारः। पिच्छम्। हेमचन्द्रः॥ (मण्डति वर्षागमे दृश्यतीति मडि + अच्।) दर्दूरः। भक्तादिभवरसः। तस्य लक्षणम्।
"भक्तैर्विना द्रवो मण्डः पेयं भक्तसमन्वितम्।"
इति राजनिर्घण्टः॥
("तत्राल्पघुतरो मण्डः।" इति च, सुश्रुते सूत्रस्थाने ४५ अध्यायः।) अथ मण्डस्य लक्षणं विधिर्गुणाश्च।
"तण्डुलानां सुसिद्धानां चतुर्दशगुणे जले।
रसः सिक्थैर्विरहितो मण्ड इत्यभिधीयते॥
शुण्ठी सैन्धवसंयुक्तो दीपनः पाचनश्च सः।
अन्नस्य सम्यक् सिद्धाच्च ज्ञेया मण्डस्य सिद्धता॥
पेया यूषयवागूनां विलेपीभक्तयोरपि॥"
तस्य गुणाः।
"मण्डो ग्राही लघुः शीतो दीपनो धातुसाम्यकृत्।
ज्वरघ्नस्तर्पणो बल्यः पित्तश्लेष्मश्रमापहः॥"
इति भावप्रकाशः॥

अपि च।
"क्षुद्बोधनो वस्तिविशोधनश्च
प्राणप्रदः शोणितवर्द्धनश्च।
ज्वरापहारी कफपित्तहन्ता
वायुं जयेदष्टगुणो हि मण्डः॥
वातमण्डोऽग्निजननो दाहतृष्णानिवारणः।
ज्वरातीसारशमनो ग्लेषदोषामपाचनः॥
वाल्यमण्डोऽग्निजननः शूलानाहविनाशनः।
पाचनो दीपनो हृद्यः पित्तश्लेष्मानिलापहः॥"
वाल्यमण्डो भृष्यवमण्डः। इति राजवल्लभः॥
(धान्यादिकृतमण्डगुणाः। क्लीवत्वं विवक्षितम्।
"धान्यमण्डं पित्तहरं श्रमनाशमरोचिहरम्।
वातलं रक्तशमनं ग्राहि सन्दीपनं परम्॥"
इति धान्यमण्डगुणाः॥

मण्डकः

"युगन्तराणां मण्डन्तु श्लेष्मलघातलं मतम्।
पित्तसंशमनीयञ्च सृष्टलं ग्राहणञ्च तत्॥"
इति युगन्तरमण्डगुणाः॥
"रक्तशाल्युद्भवं मण्डं मधुरं ग्राहि शीतलम्।
प्रमेहानशरीं हन्ति वातलं पित्तकृत्तथा॥"
इति रक्तशालिमण्डगुणाः॥
"मधुरं शीतलं किञ्चित् श्लेष्मलं शोषनाशनम्।
अक्षरीमेहसंछेदी वातलं श्वेततण्डुलम्॥"
इति श्वेततण्डुलमण्डगुणाः॥
"यवमण्डं कषायं स्याद् ग्राहि चोष्णं विपाकि च।"
इति यवमण्डगुणाः॥
"तद्वत् गोधूमसंभूतं मधुरं पित्तवारणम्।"
इति गोधूममण्डगुणाः॥
"ग्लानिमूर्च्छाकरं सद्यः कोद्रवाद्यकृतं लघु।"
इति कोद्रवमण्डगुणाः॥
"तद्वच्च क्षुद्रधान्यानां वातलं पित्तकारकम्।
करोति श्लीपदं गुल्मं प्रतिश्यायादिकोपनम्॥"
इति क्षुद्रधान्यमण्डगुणाः॥
इति हारीते प्रथमे स्थाने नवमेऽध्याये॥
"मण्डस्तु दीपयत्यग्निं वातश्लाघ्यनुलोमयेत्।
मृदूकरोति स्रोतांसि स्वेदं सञ्जनयत्यपि॥
लङ्घितानां विरिक्तानां जीर्णे स्नेहे च हृद्यताम्।
दीपनत्वाल्लघुत्वाच्च मण्डः स्यात् प्राणधारणः॥
तृष्णातीसारशमनो धातुसाम्यकरः शिवः।
लाजमण्डोऽग्निजननो दाहमूर्च्छानिवारणः॥
मन्दाग्निविषमाग्नीनां बालस्थविरयोषिताम्।
देयश्च सुकुमाराणां लाजमण्डः सुसंस्कृतः।
तृष्णिप्रासासहः पथ्यः शुद्धानान्तु मलापहः॥"
इति चरके सूत्रस्थाने सप्तविंशेऽध्याये॥
"लाजमण्डो विशुद्धानां पथ्यः पाचनदीपनः।
वातानुलोमनो हृद्यः पिप्पलीनागरायुतः॥"
इति सुश्रुते सूत्रस्थाने ४६ अध्यायः॥)

मण्डकः, पुं, (मण्डेन कृतः इति। मण्ड + संज्ञायां कन्।) पिष्टकविशेषः। माँड़ा इति हिन्दी भाषा॥ यथा,—
"गोधूमा धवला धौताः कृत्तिताः शोषितास्ततः।
प्रोक्षिता यन्त्रनिष्पिष्टाश्चालिताः समिताः स्मृताः॥
वारिणा कोमलां कृत्वा समितां साधु मर्द्दयेत्।
दृढचालेन या तस्याः लोष्ठी सम्यक् प्रसारयेत्॥
अधोमुखघटस्थेतद्विस्तृतं प्रक्षिपेद्दृढि।
दृढेना वह्निना साध्यः सिद्धो मण्डक उच्यते॥"
लोष्ठी लेची इति लोके।
"दुग्धेन साज्यखण्डेन मण्डकं भक्षयेन्नरः।
अथवा सिद्धमांसेन सतक्रवटकेन वा॥"
तस्य गुणाः।
"मण्डको दृंहणो हृद्यो बल्यो रुचिकरो गुरुः।
पक्वोऽपि मधुरो ग्राही लघुर्दीपनवर्णदः॥"
इति भावप्रकाशः॥

मण्डयं

(माधवीलता। तत्पर्य्यायो। यथा,—
"माधवी स्यात्तु वासन्ती पुष्पको मण्डकोऽपि च।
अतिमुक्तो विमुक्तश्च कामुको भ्रमरोत्सवः॥"
इति च भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
गीताङ्गविशेषः। यथा,—
"जयश्रियः कलापश्च कमलः सुन्दरस्तथा।
मङ्गलो वल्लभश्चेति मण्डकाः षट् प्रकीर्त्तिताः॥
जयश्रियो हंसतालो लघुर्मध्ये यदा गुरुः।
ऊनविंशत्यचरैर्युक्तो रसे वीरे स वर्त्तते।
लघुर्गुरुर्लघुर्यत्र हंसतालः स उच्यते॥ १॥
कलापो रङ्गतालेन युक्तो रौद्ररसे हि सः।
द्वाविंशत्यचरैर्युक्तो लघुरादौ गुरुद्वयम्।
लघुरादौ गुरुर्द्वन्द्वं रङ्गताल इतीरितः॥ २॥
लघुर्द्वन्द्वं गुरुश्चैको ऽनिलोऽन्त्य सगणात्मकः।
पञ्चविंशत्यचरैः स्यात् कमलः श्रान्तहास्यदः॥
गुरुरेको लघुर्द्वन्द्वं त्रिपुटे भगणात्मके।
अष्टाविंशत्यचरैस्तु भृङ्गारे सुन्दरे मतः॥ ४॥
आदौ गुरुर्लघुर्मध्ये प्लुतोऽन्ते भृङ्गतालके।
एकविंशत्यचरैस्तु वीरे मङ्गलमण्डकः॥ ५॥
षट्पितापुत्रके ताले गलसागलगात्मके
चतुस्त्रिंशदक्षरोऽयं वल्लभो रौद्रके रसे॥ ६॥
इति सङ्गीतदामोदरः॥

मण्डनं, क्ली, (मण्ड्यते अनेन इति। मडि भूषे + करणे ल्युट्।) भूषणम्। यथा, अभिज्ञानशाकुन्तले। १। १४।
"किमिव हि मधुराणां मण्डनं नाकृतीनाम्।"
अलङ्करिष्णुरि च। इतिमेदिनी। ने, १०५।
"चतुर्धा मण्डनं वासोभूषाभाल्लाप्तुलेपने:।"
इति महाभारते मोक्षधर्म्मः।

मण्डपः, पुं क्ली, (मडि + भावे घञ् मण्डः। मण्डं पाति। पा + कः।) जनविश्रामगृहम्। तत्पर्य्यायः। जनाश्रयः २। इत्यमरः। २। २। ६॥ (यथा, देवीभागवते। २। ११। ५०।
"गङ्गातीरे शुभां भूमिं मापयित्वा द्विजोत्तमैः।
कुर्व्वन्तु मण्डपं रम्यं शातकुम्भं मनोरमम्॥")
देवादिदत्तवेश्म। इति शब्दरत्नावली॥ (यथा-विश्वकर्म्मप्रकाशे ६ अध्याये
"प्रदक्षिणायासु समस्तगतो मण्डपो भवेत्।
तस्य चार्द्धेन कर्त्तव्यस्तगतो सुखमण्डपः॥"
इत्यादिमण्डपविवरणम् तत्रैव विस्तरेणो द्रष्टव्यम्॥ मण्डं पिबतीपि। पा + कः।) मण्डपानकर्त्तरि च॥

मण्डपा, स्त्री, निष्पावी। इति राजनिर्घण्टः॥ (मण्डपीत्यपि दृश्यते।)

मण्डयन्तः, पुं, (मण्डयति भूषयतीति। मडि + "तृभूवहिवसिभासिसाधिमडि मण्डिजि, गन्दि-, भ्यश्च।" उणा०। ३। १२८। इति झच् स च ञित्।) अग्नम्। वसूसंघः। नटः। अलङ्कारः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

मण्डयन्ती, स्त्री, (मण्डयतीति। मडि + झच् स्त्रियां ङीप्।) योषित्। इति त्रिकाण्डशेष॥

मण्डली, स्त्री, (मण्डयति भूषयतीति। मण्ड+ अरप्रत्ययः। स्त्रियां ङीप्।) चुर्णरी। इति शब्दरत्नावली।

मण्डलं, क्ली, (मण्डयति भूषयतीति। मण्ड+ "कसस्तृषच।" उणा०। १।१०६। इति कलः।) चन्द्रसूर्ययोर्वेष्टिवेष्टनम्। चन्द्रसूर्ययोरुत्पातचक्रम्। यथा,—

"वातेन मण्डलीभूता सूर्याचन्द्रमसोः करा।
माला भा कोणि तन्वन्ते परिवेषः प्रकीर्त्तितः॥"

इति लघुपाराशरः।

तत्पर्य्यायः। परिवेषः २ परिधिः ३ उपसूर्य्यकम् ४। इत्यमरः। १। ३।३२। परिवेषः नर्त्तयान्तोऽपि। यथा,—

"पुंसिङ्गः परिवेषः स्यात् परिधौ परिवेषणे।"

इति रुद्रोन्यान्ते रुद्रः॥

सूर्य्यमुपगतं उपसूर्यं स्वार्थे कः। उपसूर्य्यकम्। चन्द्रपक्षे उपसूर्य्यमिव उपसूर्य्यकं स्वार्थे कः। इति भरतः॥ ७॥ चक्रवालम्। इत्यमरः। १। ३।६॥ तनु मण्डलाकारेण परिणतं समूहमात्रम्। मण्डलाकारदिक्समूहः। इति माधवी॥ चक्रस्येव वालो वलनमस्य चक्रवालं वलेर्वेति वालः मनीषादित्वात् लस्य ऊत्वे चक्रवाऊच। किंवा चक्रेण चक्राकारेण वाऊते चक्रवालं वाऊड आज्ञावे यत्। इति भरतः॥ ७॥ कोटरोगः। द्वादशराजकम्। इति मेदिनी। १ वे, २१॥ (उक्तञ्च तन्त्रान्तरे कामन्दकीये नीतिसारे। ४। १—२२।

"उपेतः कोषदण्डाभ्यां सामात्यः सह मन्त्रिभिः।
दुर्गस्थश्चिन्तयेन्नित्यं मण्डलं मण्डलाधिपः।
स्थो विगाहते राजा विशुद्धे मण्डले चरन्।
अशुद्धे मण्डले सर्पन् ग्रीवेते रथचक्रवत्॥
रोधते सर्वभूतेभ्यः ग्रसीवाखण्डमण्डलः।
सम्पूर्णमण्डलस्तस्मादधिगोपुः सदा भवेत्॥
अमात्यराष्ट्रदुर्गाणि कोषो दण्डस्य पञ्चमः।
एषां प्रकृतयस्तज्ज्ञैर्विजिगीषोरुदाहृताः॥
एषां पञ्च तदा सिद्धं सम्यक् पृथिवीपतिः।
सम्यक्प्रकृतिकं राज्यमनुभूय च दृश्यति॥
सम्यक्तु प्रकृतिभिर्हीनाद्यः क्रमशः।
नैसर्गिकस्तथोत्तम विजिगीषुरिति स्मृतः॥
यौनिकं दृष्टसम्बन्धात् सूत्रसञ्चिता।
चिरकालं दृढमित्रं प्राणभूतं सत्यवादिता॥
अदीर्घसत्रताशौचं प्रश्रयः सम्प्रधानता।
देशजातिकुलाचारैः सर्वज्ञत्वमनुद्धता॥
सन्धिविग्रहिता शक्तं सदा संहतमन्त्रता।
अविसंवादिता शौर्यं भक्तिश्चेति कृतज्ञता॥
प्रकृतीनामयं कृत्स्नः समासेन विधिः स्मृतः।
अस्य सम्पदुपायज्ञं दक्षिणं शौर्यसंयुता॥
विनयज्ञं प्रतिष्ठत्यमदृष्टपरिचारता।
प्रकृतिभ्योऽमी नैति विजिगीषुगुणाः स्मृताः॥
सन्धिं कुर्वीत कोपेऽपि न राजा यः प्रतापवान्।
प्रतापक्षये क्षयेऽपि परान् हिंसा समाचरेत्॥
प्रतापसिद्धौ नृपतिः प्राप्नोति महतीं श्रियम्।
तस्मादुत्थानयोगेन प्रतापं जनयेत्परम्।
एकार्थाभिनिवेशित्वमविलम्बश्च शस्यते।
दाक्ष्यन्तु स्मृतः शत्रुविजिगीषुगुणान्वितः॥
शूरः क्रूरोऽलसोऽसत्यः प्रमादी भीरुरस्थिरः।
मूढो योधावमन्ता च सुखकेलो रिपुः स्मृतः॥
अरिर्मित्रमरेर्मित्रं मित्रमित्रमतःपरम्।
तथारिमित्रमित्रञ्च विजिगीषोः पुरः स्थिताः॥
पार्ष्णिग्राहः स्मृतः पश्चादाक्रन्दस्तदनन्तरम्।
आसारावनयोश्चैव विजिगीषोस्तु मण्डलम्॥
अरेस्तु विजिगीषोस्तु मध्यमो भूम्यनन्तरः।
अनुग्रहे संहतयोः समर्थो यत्नयोर्वधे॥
मण्डलत्वे हि चैतेषामुदासीनो बलाधिकः।
अनुग्रहे संहतानां यत्नानाञ्च वधे प्रभुः॥
मूलप्रकृतयस्त्वेताश्चतस्रः परिकीर्त्तिताः।
आहैव मन्त्रकृच्चतुष्कं मण्डलं मयः॥
विजिगीषुररिर्मित्रं पार्ष्णिग्राहोऽथ मध्यमः।
उदासीनः पुलोमेन्द्रौ षट्कं मण्डलमूचतुः॥
उदासीनो मध्यमश्च विजिगीषोस्तु मण्डलम्।
उशना मण्डलमिदं प्राह द्वादशराजकम्॥") देशः। स च देशः समन्ताद्विंशतियोजनं चत्वारिंशद्योजनं वा। इति केचित्॥ गोलम्। इत्यमरैकार्थकोषः॥ चक्रम्। इति त्रिकाण्डशेषः॥ संघातः। इति हेमचन्द्रः॥ नखाघातः। इति शब्दमाला॥ धन्विनां स्थानपक्षकान्तर्गतस्थितिविशेषः। यथा,—

"मण्डलाकारपादाभ्यां मण्डलं स्थानमीरितम्।"

इति शब्दरत्नावली॥

आग्नेयखाण्डवन्द्रयम्। इति शब्दचन्द्रिका॥ वृत्तविशेषः। यथा,—

"तिर्य्यग्वृत्तिश्च दण्डः स्याद्योगोऽन्योन्यावृत्तिरेव च।
मण्डलं सर्व्वतोवृत्तिः पृथग्वृत्तिरसंहतः॥"

इति भरतधृतकामन्दकिः॥

(अस्य पुंस्त्वमपि। यथा, महाभारते। ६। ७८। २०।

"भीष्मेण धार्त्तराष्ट्राणां व्यूढः प्रत्यङ्मुखो ययौ।
मण्डलः समहाव्यूहो दुर्भेद्योऽमित्रघातिनाम्॥")

ग्रहादीनां मण्डलसंस्थानं तत्परिमाणञ्च यथा,

"सर्व्वेषान्तु ग्रहाणां वै अधस्ताच्चरते रविः।
रवेरधस्तु स्थितः सोमः सोमाच्चक्रन्मण्डलम्॥
नक्षत्रेभ्यो बुधश्चूर्द्धं बुधाच्चूर्द्धन्तु भार्गवः।
तस्मादङ्गारकश्चोर्द्धं तस्य चोर्द्धं दृश्यते॥
तस्मात् शनैश्चरश्चोर्द्धं तस्योर्द्धन्तिमण्डलम्।
अतिभ्यश्च ध्रुवश्चोर्द्धमायान्तं चिदिवं ध्रुवे।
आदित्यनिलयो राहुः कदाचित् सोममार्गतः॥
सूर्य्यमण्डलसंस्थस्तु नित्यं वैतुः प्रसर्पति।
नवयोजनसहस्राणि विस्तारो भास्करस्य तु॥
विस्तारात्त्रिगुणात्तस्य परिक्षेपे तु मण्डलम्।
त्रिगुणः सूर्य्यविस्तारात्तस्मिन्नः स्मृतः॥
त्रिगुणं मण्डलञ्चास्य यथैव सवितुस्तथा।
चन्द्रतः षोड़शो भागो भार्गवस्य विधीयते॥
भार्गवात् पादहीनस्तु विज्ञेयो वै दृश्यतिः।
दृश्यतेः पादहीनौ वक्रसौरावुदाहृतौ॥
विस्तारमण्डलाभ्यान्तु पादहीनस्तयोर्बुधः।
बुधतुल्यानि ऋचायि सर्व्वे दृश्यानि यानि तु॥
योजनार्द्धप्रमाणानि तेभ्यो दृश्यं न विद्यते।
राहुः सूर्य्यप्रमाणस्तु कदाचित् सोमसन्निभः।
तस्मात् ग्रहप्रमाणस्तु केतुस्तनियतः स्मृतः॥"

इति देवीपुराणे ग्रहगतिनामाध्यायः॥

क्षत्रियमण्डलविधिर्यथा,—

"चतुर्हस्तं समारभ्य यावद्धस्तशतं भवेत्।
मण्डलं तत्र कर्त्तव्यमतः ऊर्द्धं न कारयेत्॥
विमलं विजयं भद्रं विमानं शुभदं शिवम्।
वर्द्धमानञ्च देवेष्ट जनाढ्यं कामदायकम्।
रुचकं स्वस्तिकाख्यञ्च हृदयं इति मण्डलाः॥
सितादिहरितान्ताश्च रेखाः कार्य्याः सुशोभनाः।
शालियष्टिककौसुम्भरजनीहरिपत्रजाः॥
मणिविद्रुमरागाश्च भस्मना अभिमन्त्रिताः।
सितसर्षपधूपाघ्रा रेखाः कृत्वा तु पातयेत्॥
अक्षराजं न्यसेन्मन्त्री सम्भवेति पदं पि वा।
समीत्यानं शुभं कृत्वा गोमयेनोपलेपितम्॥
चन्दनागुरुकर्पूरचोदधूपाधिवासितम्।
भूभागं समितं सिद्धं पूर्व्वपश्चिमकोत्तरम्॥
याम्यं स्वस्तिकमत्यङ्गैः सूत्रैर्वर्णैश्चपत्रजैः।
पञ्चपत्राष्टकं मन्ये द्विगुणं त्रिगुणं पि वा॥
द्वाराणि समरूपाणि कर्णिकाकेशरोज्ज्वलम्।
पद्मं तथावशेषाणि स्वस्तिकान्युत्पलानि च॥
सर्व्वावसम्बद्धसूत्रं रजःपातं समाचरेत्।
मध्यमानामिकाङ्गुष्ठैरपरिद्रव्यमेव च॥
अधोमुखाङ्गुलिं कृत्वा पातयेत्तु विचक्षणः।
समा रेखा तु कर्त्तव्याविच्छिन्ना पृथिवर्त्विता॥
अङ्गुलपर्व्वनैपुण्या समा कार्य्या विभागतः।
संसक्तं विषमं स्थूलं विच्छिन्नं क्षयरावृतम्॥
पर्य्यन्तवर्त्तितं दृश्यमालिखेन्न कदाचन।
संसक्ते कलहं विद्याद्रेखरेखे तु विग्रहम्॥
व्यतिस्थाने भवेद्व्याधिर्नित्यं पीड़ा विमिश्रिते।
विन्दुभिर्भयमाप्नोति शत्रुपक्षात् संशयः॥
क्षयायाधार्घहानिः स्यात् विच्छिन्ने मरणं ध्रुवम्।
वियोगात्तु भवेत्तस्य दृश्यस्यतस्य वा॥
अविदित्वा लिखेद्दृश्यं मण्डलन्तु यथेच्छया।
सर्व्वदोषानवाप्नोति ये दोषाः पूर्व्वभाषिताः॥"

इति देवीपुराणे पुण्याभिषेकचिन्तानामाध्यायः॥

सूर्य्यमण्डले देवानां स्थितिर्यथा,—

"अर्घयन् पूजयन् देवं अर्चयेच्च रविमण्डले।
आदित्यमण्डले देवं ध्यात्वा विष्णुमुपैति सः॥"

भोजनमण्डलं यथा,—

"यातुधानाः पिशाचाश्च असुरा राक्षसास्तथा।
भुञ्जन्ति केवलमन्नस्य मण्डलस्य विवर्ज्जनात्॥
आदित्या वसवो रुद्रा ब्रह्मा चैव पितामहः।
मण्डलान्युपजीवन्ति तस्मात् कुर्व्वन्ति मण्डलम्॥

चतुःकोणं द्विजाग्रस्य त्रिकोणं क्षत्रियस्य तु।
द्विकोणाकृति वैश्यस्य शूद्रस्य वर्त्तुलं सदा॥"
इत्यादौ वह्निपुराणे आह्निकतत्त्वनामाध्यायः॥
मण्डलं, त्रि, विस्तृतम्। इत्यमरः। १।३।१५॥ द्वे चन्द्रस्य शरीरे उपचाराद्रादित्यस्य च। वेति शोभते विम्बः शोभकान्तिगत्योर्वा नाम्नीति विम्बः। विम्बति भाति विम्बः। बिम्बोऽयमिति स्वामी। मण्डयति मण्डं नाम्नीति अलः स्त्रियां गौरादित्वात् मण्डली च। इति भरतः॥
मण्डकः, पुं, (मण्डं खाति गृह्णातीति। खा+कः।) कुक्कुरः। इति मेदिनी। के, १२१॥ सर्पविशेषः। इति विश्वः॥ (देहस्थाष्टप्रकारसन्ध्यन्तर्गतसन्धिविशेषः। "त एते सन्धयोऽष्टविधाः। कोरोदूखल-घासघ्न-प्रतर-तुन्नसेवनीवायसतुण्ड-मण्डल-शङ्खावर्त्ताः।" 'कण्ठकूदवनेचक्रोमनाड़ीषु मण्डलाः।' इति सुश्रुते शारीरस्थाने पञ्चमेऽध्याये॥)
मण्डलकं, क्ली, (मण्डल। स्वार्थे कन्।) विम्बम्। कुष्ठभेदः। धर्म्यम्। इति मेदिनी। के, २०७॥ मण्डलाकारवृक्षः। इति जटाधरः॥
मण्डलकः, पुं, (मण्डल। स्वार्थे कन्।) कुक्कुरः। इति धरणिः॥
मण्डलवृत्तं, क्ली, (मण्डलेन मण्डलाकारेण प्रवर्त्तितं वृत्तमिति नित्यसमासः।) मण्डलाकारवृत्तम्। तत्पर्य्यायः। वृत्तीयः २॥ इति शब्दमाला॥
मण्डलपत्रिका, स्त्री, (मण्डलं मण्डलाकारं पत्रं यस्याः। कन्। टाप्। अत इत्त्वम्।) रक्तपुनर्नवा। इति राजनिर्घण्टः॥ (गुणादयोऽस्या रक्तपुनर्नवाशब्दे ज्ञातव्याः॥)
मण्डलाग्रः, पुं, (मण्डलं गोलाकारं अग्रं यस्य।) खड्गः। इत्यमरः। २।८।८६॥ (यथा, सुश्रुते सूत्रस्थाने अष्टमेऽध्याये॥ तत्र मण्डलाग्रकरपत्रे स्थातां च्छेदने लेखने च।)
मण्डलायितं, क्ली, (मण्डलवदाचरितमिति। मण्डल+क्यङ्। क्तः। मण्डलाय नामधातुः क्तः।) वर्त्तुलम्। इति शब्दरत्नावली॥
मण्डलाधीशः, पुं, (मण्डलस्य अधीशः।) मण्डलेश्वरः। तत्पर्य्यायः। मध्यमः २। इति हेमचन्द्रः॥
मण्डली, [न्] पुं, (मण्डलं कुण्डलनं कुण्डलाकारेण शरीरवेष्टनमस्यास्तीति। मण्डल+इनि।) सर्पः। इति त्रिकाण्डशेषः॥ विड़ालः। इति शब्दमाला॥ चातकः। इति हेमचन्द्रः॥ खट्टाश इति भाषा॥ वटवृक्षः। गोनाशसर्पः। इति राजनिर्घण्टः॥
मण्डली, स्त्री, (मण्डलमस्त्यस्य। इति। अर्श आद्यच्। गौरादित्वात् ङीष्।) दूर्व्वा। इति शब्दरत्नावली॥ (स्त्री, गुडूची॥ तत्पर्य्यायो यथा, "गुडूची मधुपर्णी स्यादमृतामृतवल्लरी। छिन्ना त्रिपत्रिका त्रिपत्रिका वत्सादनीति च॥ चक्रलक्षणिकाधीरा विशल्या च रसायनी॥ चन्द्रहासी वयस्था च मण्डली देवनिर्म्मिता॥" इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
मण्डलेशः, पुं, (मण्डलस्य ईशः।) मण्डलेश्वरः। तत्पर्य्यायः। एकजन्मा २ भयापहः ३। इति त्रिकाण्डशेषः॥
मण्डलेश्वरः, पुं, (मण्डलस्य ईश्वरः।) भूम्येकदेशाधिपः। अन्यो भूम्येकदेशाधिपो मण्डलेश्वरः स्यात् मण्डलस्य चरित्रित्रादिरूपस्य देशस्य ईश्वरो मण्डलेश्वरः। एकदेशाधिप इत्यर्थः। स्यान्मण्डलं द्वादशराजके च देशे च बिम्बे च कदम्बके च। इति विश्वः॥ इत्यमरटीकायां भरतः॥ तस्य लक्षणान्तरम्।
"चतुर्योजनपर्य्यन्तमधिकारं नृपस्य च।
यो राजा तच्छतगुणः स एव मण्डलेश्वरः॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८६अध्यायः॥
मण्डहारकः, पुं, (मण्डं हरति आहरति गृह्णातीति। हृ+"खुलृचौ।" ३।१।१३३। इति खुल्। सुरासम्पादनार्थं मण्डग्रहणादस्य तथात्वम्।) शौण्डिकः। इत्यमरः। १।२।१०॥
मण्डा, स्त्री, (मण्डः कारणत्वेनास्ति यस्या इति अर्शादिभ्योऽच्। टाप्।) सुरा। इति हारावली॥ (मण्डयतीति। मडि+घञ्। टाप्।) आमलकी। इति मेदिनी। डे, २२॥
मण्डितः, पुं, बौद्धगणाधिपविशेषः। इति हेमचन्द्रः। (मडि+कर्म्मणि क्तः।) भूषिते त्रि। इत्यमरः। ६।२।१००॥ (यथा, गीतगोविन्दे। २। ७।
"मणिमयमकरमनोहर-
कुण्डलमण्डितगण्डमुदारम्।")
मण्डूकः, पुं, (मण्डयति भूषयति जलाशयमिति मडि+"शृलिमण्डिभ्याम्कन्" उणा०४।४२। इति ऊकण्।) भेकः। इत्यमरः। १।१०। २४॥ (यथा, मनुः। ६।१२६।
"पशुमण्डूकमार्জ্জারश्वसर्पनकुलाखुभिः।
अन्तरागमने विद्यादनध्यायमहर्निशम्॥"
भेकार्घे पर्य्यायो गुणाश्च यथा,—
"मण्डूकः प्लवगो भेको वर्षाभूर्दर्दुरो हरिः।
मण्डूकः शीतलो नातिपित्तलो बलकारकः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे॥)
शोणकः। मुनिविशेषः। इति मेदिनी। के, १२६॥ गाढ़तेजाः। इति शब्दरत्नावलि॥ वस्त्रविशेषे क्ली। इति विश्वः॥ (अश्वजातिभेदः। यथा, महाभारते। २। २-। ६।
"तत्र तित्तिरिकल्माषान् मण्डूकाख्यान् हयोत्तमान्।")
मण्डूकपर्णः, पुं, (मण्डूकाकृति पर्णमस्य। यद्वा, मण्डूक इवोत्तानोदरं पर्णमस्य।) शोणाकवृक्षः। इत्यमरः। ४। २।५६॥ (तथाचास्य पर्य्यायः॥
"शोणाकः शोणकश्च स्यान्नटकट्टनटुण्डकः।
मण्डूकपर्णश्चोर्यशुकनासकुटन्नटाः॥
दीर्घवृन्तोरुपत्राश्च पृथुशिम्बः कटम्भरः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।)
शोणकः। इति मेदिनी। णे, ११५॥
मण्डूकपर्णी, स्त्री, (मण्डूकपर्ण। गौरादित्वात् ङीष्।) मञ्जिष्ठा॥ (यथास्या पर्य्यायः।
"मञ्जिष्ठा विकसा जिङ्गी समङ्गा वाजमेधिका
मण्डूकपर्णी भण्डीरी भण्डी योजनवल्लिपि॥
रसायन्यरुणा काला रक्ताङ्गी रक्तयष्टिका।
भण्डीतकी च गण्डीरी मञ्जुषा वल्लरञ्जिनी॥")
ब्राह्मणी इति मेदिनी। णे, ११५॥ आदित्यभक्ता। इति राजनिर्घण्टः॥ ओषधिविशेषः। घुसकुड़ी इति भाषा। तत्पर्य्यायः। भेकी २ भण्डकी ३ कुलपर्णी ४। इति रत्नमाला॥ मण्डूकपर्णिका ५। अस्या गुणाः। मण्डूकपर्णिका लघ्वी स्वादुपाका रसा हिमा। (मण्डूकपर्ण्यां पर्य्यायान्तरं यथा,—
"मण्डूकपर्णी भाण्डकी लघ्वी हिमा भण्डीभधी।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥
तथाचास्या गुणाः॥
कषाया तु हिता पित्ते स्वादुपाकरसा हिमा।
लघ्वी मण्डूकपर्णी तु तद्वन्नोशिक्किका मता॥
इति सुश्रुते सूत्रस्थाने ४६ अध्याये।)
पाठान्तरम्। मण्डूकपर्णिका लघ्वी रूक्षा वातविबन्धनुत्। इति राजवल्लभः॥
मण्डूकमाता, [ऋ] स्त्री, (मण्डूकस्य मातेव मण्डूकपोषकत्वादस्याक्तत्वात्।) ब्राह्मी। इति राजनिर्घण्टः॥ भेकमाता च॥
मण्डूका, स्त्री, (मण्डूक+स्त्रियां टाप्।) मञ्जिष्ठा। यथा, शब्दमालायाम्।
"मण्डूका च लता यष्टिर्मधुपर्णी च भण्डिरी।"
मण्डूकी, स्त्री, (मण्डूक+स्त्रियां ङीष्।) मण्डूकपर्णी। इति मेदिनी। के, १२७॥ आदित्यभक्ता। ब्राह्मी। इति राजनिर्घण्टः॥ क्षुपविशेषः। इति रत्नमाला। घुसकुड़ी। इति भाषा। पृषोदरादित्वात् इयोभिन्। इति शब्दरत्नावली॥
मण्डूर, क्ली, पुं, लौहमलम्। तत्पर्य्यायः। शिल्पागमम् २। इत्यमरः। २। ६। ६८॥ सिंहाणं ३। सिंहाणं ४। मण्डते लोहं वेष्टते अग्निदाहे लोहाद्विभजते वा मण्डयति भूषयति लौहमत्वाद्रोगिणमिति वा मण्डूरं कि मडि भूषे मडि ढ विभागे वेष्टे नाम्नीति ऊरः। इति तट्टीकायां भरतः॥ अस्य गुणः। लौहगुणतुल्यः। शतवर्षोर्द्धं मण्डूरमुत्तमम्। अशीतिवर्षीयं मध्यमम्। षष्टिवर्षीयमधमम्। अतो न्यूनं विषतुल्यम्। यथा,—
"यल्लोहं यद्गुणं प्रोक्तं तत्तिद्दूषणमपि तद्गुणम्।
शतोर्द्धमुत्तमं किट्टं मध्यमाशीतिवार्षिकम्॥
अधमं षष्टिवर्षीयं ततो हीनं विषोपमम्॥"
इति रत्नेन्द्रचिन्तामणिः॥
(तथा चास्य पर्य्यायान्तरम्। मण्डूरं लौहजं किट्टम्। इति वैद्यकरत्नमालायाम्॥ अस्य उत्पत्तिर्गुणाश्च यथा,—

मतिः

"भाग्यमानस्य लोहस्य मलं मण्डूरमुच्यते ।
लोहनिर्द्धावनिर्यो निर्द्धारणस्य निगद्यते ॥
यत्तोयं यद्गुणं प्रोक्तं तत्तक्रमपि तद्गुणम् ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥

"ये गुणा मारिते मुण्डे ते गुणा मण्डकल्पिते ।
तस्मात् सर्व्वत्र मण्डूरं रोगशान्त्यै प्रयोजयेत् ॥"

अथास्य मारणविधिर्यथा,—

"दग्धाजकाष्ठैर्मलमायसन्तु
गोमूत्रनिर्व्वापितमष्टवारान् ।
विचूर्ण्य तोयं मधुनाचिरेण
कुम्भाख्यं पाण्डुरुगं निहन्ति ॥"

इति वैद्यवरेन्द्रसारसंग्रहे भारणमारणाधिकारे ॥)

मण्डोदकं, क्ली. (मण्ड इव उदकमस्य मण्डमिश्रितमुदकमवेति वा ।) चित्रराग: । विचित्रवर्ण: । व्यातपंगम् । व्यालिम्बना । इति मेदिनी । के, २०७१ (यथा, सुश्रुते सूत्रस्थाने ४४ अध्याये ।

"तस्य पिण्डस्य भागांस्त्रीन् किण्वभागविमिश्रितान् ।
मण्डोदकार्थे गृह्णस्व दद्यात् तत्सर्व्वमेकतः ॥")

मत् श्व चनङ्मतुम् । सत्वं त्वं भवति तद्वति त्वनङ्मतुं मद्वतीति संक्षिप्तसारव्याकरणम् ॥ अस्मच्छब्दाच्छिप्रत्यये कृते तस्मिंश्च अस्मच्छब्दस्य मदादेशोऽप्यस्ति । इति तट्टीकायां गोयीचन्द्रः ॥

मतं, क्ली, (मन् + भावे क्तः ।) सम्मतम् । तत्पर्य्यायः । छन्दः २ अभिप्रायः ३ आकूतम् ४ भावः ५ आशयः ६ । इति हेमचन्द्रः ॥

मत्तः, त्रि, (मद् + कर्म्मणि क्तः ।) सम्मतः । ज्ञातः । इति मेदिनी । ते, ४२ ॥ (यथा, रघौ । २ । ५७ ।

"किमप्यहिंस्यस्तव पैन्नतोऽहं
यतः शरीरे भव मे दयालुः ॥")

अभिमतः । इति हेमचन्द्रः ॥

मत्तङ्गः, पुं, (माद्यति माद्यत्यनेन वेति । मद् + "मदोभिर्यश्च हर्षे । इत्युणादिकोष टीकोक्तसूत्रेण । दस्य तः ।) सुनिभेदः । (यथा, रघौ । ५ । ५३ ।

"मत्तङ्गजायादवलेपमत्ता-
दवानवानस्मि मतङ्गजत्वम् ॥")

मेघः । इत्युणादिकोषः । १ । २७ ॥

मतङ्गजः, पुं, (मतङ्गः मेघ इव यायते तदाख्यसुरेणास्मिन् वेति । यन + ड ।) एरावतः । इत्यमरः । २ । ८ । ६१ (यथा, कामन्दकीये नीतिसारे । १५ । ७ ।

"सौम्ये प्रभूतासुखदेन यावान्
निर्व्वासनार्थं करिणां यथा तु ।
क्रोधः समर्थो योगयुक्तात् प्रतापान्
अपहन्ति कृत्स्नान् मतङ्गजानाम् ॥")

मतल्लिका, स्त्री, मञ्चस्थम् । इत्यमरः । २ । ८ । २७ ।

मति, स्त्री, (मन्यतेऽनयेति । मन् + क्तिन् ।) बुद्धिः । इत्यमरः । १ । ५ । १ ॥ (यथा, देवीभागवते । १ । १० । ५८ ।

"मतिस्तु द्विविधा लोके युक्तायुक्तेति सर्व्वथा ।") इच्छा । स्तुतिः । इति मेदिनी । ते, ४३ ॥ आर्य्यम् । शाकभेदः । इत्यजयपालः ॥ ८ ॥

"विप्रेन्द्र ! का प्रशंसेयं जन्म ते ब्रह्ममानसे ।
यस्य यत्र कुले जन्म तन्मतिस्तादृशी भवेत् ॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १ अध्यायः ॥

मतिकरौषधम् । यथा,—

"पाठा दे जीरके कुष्ठमम्बष्ठान्नागमोदकम् ।
वचा चिकटुकश्चैव लवणं चूर्णसुत्तमम् ॥
क्षीरसैर्भावितञ्च सर्पिर्मधुसमन्वितम् ।
सप्ताहं भक्षितं कुर्य्यान्मेधां मतिं
परामृ ॥"

इति गारुडे १८८ अध्यायः ॥

मतिदा, स्त्री, (मतिं ददातीति । दा + कः ।) ज्योतिष्मती । शिरड्डीचुपः । इति राजनिर्घण्टः ॥ (मतिदातरि, त्रि ।)

मतिभ्रमः, पुं, (मतेर्बुद्धेर्भ्रमः ।) बुद्धिभ्रंशः । ("अस्थान एवास्य मतिभ्रमः ।" इति पातञ्जलयोगसूत्रभाष्ये वेदव्यासः ।) तत्पर्य्यायः । भ्रमः २ मिथ्यामतिः ३ भ्रान्तिः ४ । इति शब्दरत्नावली ॥

मतिभ्रान्तिः, स्त्री, (मतेर्बुद्धेर्भ्रान्तिः ।) बुद्धिभ्रंशः । तत्पर्य्यायः । भ्रमः २ मिथ्यामतिः ३ भ्रान्तिः ४ । इति शब्दरत्नावली ॥

मतिविभ्रंशः, पुं, (मतेर्बुद्धेर्विभ्रंशः ।) उन्मादरोगः । इति राजनिर्घण्टः ॥

मतिष्ठः, त्रि, (अयमनयोरयमेषामतिशयेन मनिमान् येति । मतिमत् + इष्ठन् । मतुपो लोपः ।) अतिशयबुद्धिमान् । इति सुग्धबोधव्याकरणम् ॥

मत्कः, पुं, (माद्यतीति । मद् + क्विप् । ततः स्वार्थे कन् ।) मत्कुणः । इति शब्दमाला ॥ (मम अयम् । अस्मद् शब्दादिदमर्थे कन् । मदादेशश्च ।) मत्सम्बन्धिनि त्रि । इति व्याकरणम् ॥ (यथा, भट्टिः । ३ । ३० ।

"नेतन्मतं मत्कमिति ब्रुवाणः
सहस्रशोऽसौ अपधानमध्यात् ॥")

मत्कुणः, पुं, (माद्यतीति । मद् + क्विप् कुणति इति कुण् + क । ततः । मत्कार्य्यौ कुणश्चेति ।) कीटविशेषः । छारपोका इति भाषा ॥ तत्पर्य्यायः । रक्तपायी २ रक्ताङ्गः ३ मत्कुणाश्रयः ४ । इति राजनिर्घण्टः ॥ उद्दंशः ५ । (यथा, शिशुपालवधे । १४ । ६८ ।

"मत्कुणाविव पुरा परिस्रवौ
सिन्धुनाथशयने निवेदृशः ।
मन्मनः स मधुकैटभौ विभो-
र्यस्य नेत्रमुरविघ्नतां गतम् ॥")

निर्लिमान्यङ्गी । निःसम्बुपुरुषः । माकुन्दा इति भाषा । नारिकेलः । इति मेदिनी । ने, ७० । अणुजातीयम् । इति हेमचन्द्रः । ४ । २०५ ॥

मत्कुणा, स्त्री, अणुजातलोमभेदम् । इति शब्दरत्नावली ॥

मत्कुण

मत्कुणारिः, पुं. (मत्कुणस्य अरिः । मत्कुणनाशकत्वादस्य तथात्वम् ।) इन्द्राशनः । सिहि इति भाषा । इति शब्दमाला ॥

(विवृतिरस्य इन्द्राशनशब्दे विहिता ॥)

मत्तः, पुं, (माद्यतीति । मद् + कर्त्तरि क्तः ।) धत्तूरवृक्षः । मातखोयाला इति भाषा ॥ तत्पर्य्यायः । प्रभिन्नः २ गर्ज्जितः ३ । इत्यमरः । २ । ८ । ३६ ॥ मतङ्गः ४ धत्तूरकः ५ । इति शब्दरत्नावली ॥ घुसूरः । कोकिलः । महिषः । इति राजनिर्घण्टः ॥

मत्तः, त्रि, मत्ततायिशिष्टः । सुरापाने विकलान्तःकरणः । तत्पर्य्यायः । धौरः २ उत्कटः ३ चीवः ४ । इत्यमरः । ३ । १ । २३ ॥ मदोद्धतः ५ । इति शब्दरत्नावली ॥ (यथा, देवीभागवते । २ । ८ । ४ ।

"ते पीत्वा मदिरां मत्ताः कृत्वा युद्धं परस्परम् ।"

यथाच माधवकृतरुग्विनिश्चये मदात्ययाधिकारे ।

"मद्येन मत्तः पुरुषो मदेन ।")

हृष्टः । मदीभिर्य्यन्ति हर्षे क्तः । इत्यमरभरतौ ॥ अविवेकी । (यथा रामायणे । १ । ४४ । १० । "बलान्मत्तो महाबलः ।"

"मत्तोऽविवेकी ।" इति तट्टीकायां रामानुजः ॥)

मत्तकाशिनी, स्त्री, उत्तमस्त्री । इत्यमरः । २ । ६ । ४ ॥ मत्त इव चीव इव कसति गच्छति मत्तकाशिनी कस च गतौ गृहादित्वाणिन् दन्त्यमध्या । मत्तेव काशते भाति मत्तकाशिनी तालव्यमध्यापि । इति भरतः ॥ (यथा, महाभारते । १ । १७३ । ३६ ।

"न तासां सदृशीं मन्ये त्वामहं मत्तकाशिनि ! ।")

मत्तकीशः, पुं, (मत्तः सन् कीशो वानर इव ।) धत्तूरः । इति शब्दमाला ॥

मत्तरः, पुं, ममाधिकः । मत्तोऽतिशयः । अस्मच्छब्दात् उतरप्प्रत्ययेन निष्पन्नः । इति सिद्धान्तकौमुदी ॥

मत्तवारणं, क्ली, (मत्तं वारयतीति । वृ + णिच् ल्युः ।) प्रासादवीथीनां वरण्डः । कोठार वारान्डा इति भाषा ॥ (यथा, कुट्टनीमते ८ ।

"दिग्यवराधरभूरिव राजति मत्तवारणोपेता ॥"

"प्रासादवीथीनां वरण्डकः ।" इति तट्टीका ॥) आश्रयः । प्राङ्गणावरणम् । इति हेमचन्द्रः । ४ । ७८ । विश्वश्च ॥ प्रासादवीथीनां कुट्टनीवृत्तिः । कुन्दवृत्तिरिति च पाठः । इति मेदिनी । थे, ११४ । पूगवृक्षः । इति शब्दमाला ॥

मत्तवारणः, पुं, (वार्य्यते संवार्य्यते ग्रहणादिभिः इति वारणः । वृ + णिच् कर्म्मणि ल्युट् । मत्तश्चासौ वारणश्चेति ।) प्रक्षिप्तकटङ्करः । मत्तवृक्षः । इति मेदिनी । णे, ११ । हेमचन्द्रश्च । ४ । ७८ ॥

मत्ता, स्त्री, (माद्यति मादयतीति । अन्तर्भूतण्यर्थोऽत्तदधातोः + क्तः + स्त्रियां टाप् ॥ मदिरा

इति राजनिर्घण्टः ॥ (षड्ऋन्तर्गतः दशाक्षरः छन्दोविशेषः । तल्लक्षणं यथा, छन्दोमञ्जर्याम् ।
"ज्ञेया मत्ता मभसगसख्या ।"
अधिकन्तु छन्दःशब्दे द्रष्टव्यम् ॥)

मत्तालम्बः, पुं, (आलम्बते असाविति आलम्बः । आ + लम्ब + कर्म्मणि घञ् । मत्तस्यालम्बः आश्रयः ।)' प्राङ्गनावरणम् । तत्पर्य्यायः । अपाश्रयः २ प्रग्रीवः ३ मत्तवारणम् ४ । इति हेमचन्द्रः । ४ । ७८ ॥

मत्तेभगमना, स्त्री, (मत्तेभस्य गमनमिव गमनं यस्याः ।) स्त्रीविशेषः । मत्तगजगामिनी । इति हेमचन्द्रः । ३ । १७० ॥

मत्यं, क्ली, (मतं ज्ञानं तस्य करणमिति । मत + "मतजनहलात् करणजल्पकर्षेषु ।" ४ । ४ । ६७ । इति यत् । क्षुरस्य क्षेत्रस्य समीकरणादिसाधनफलकम् । यथा, ताण्ड्यमहाब्राह्मणे । २ । ६ । २ ।
"भालव्यवांस्त्रवीत यथा सप्तास्थितेन मत्येन ।
मतीकरोत्येवं प्राणानं भालव्यं प्रस्तुवति ॥"
"मत्यं नाम क्षुरस्य क्षेत्रस्य समीकरणादिसाधनफलकम् ।" इति तद्भाष्ये सायनः ॥)
दाक्षादीवां सृष्टिः । तत्पर्य्यायः । वसुः २ । इति हेमचन्द्रः । ३ । ५५६ ॥

मत्र, ङ ङ कण्ड्वादौ । इति कविकल्पद्रुमः ॥ (चुरा०-आत्म०-सक०-सेट् ।) इन्धवर्गान्तोपधः । इ क ङ इति भ्रुवं मन्त्रयते कण्ड्वोऽयमिति सरारिः ॥ मन्त्र इत्यनेनैवेऽपि सिद्धौ इदमुक्तमा वेदेषूच्चारणभेदार्थः । इति दुर्गादासः ॥

मत्सः, पुं, (माद्यतीति । मद् + वाहुलकात् सन् ।) मत्स्यः । इत्युणादिकोषः ॥

मत्सगण्डः, पुं, (मत्स्यानां गण्डोऽत्र एषोदरादित्वात् साधुः ।) यञ्जनविशेषः । मत्स्यखण्ड इति ख्यातः । तत्पर्य्यायः । गलग्रहः २ । इति शब्दचन्द्रिका ॥

मत्सरः, पुं, (मद्यते इति मद् + "क्षधूमदिभ्यः कित् ।" उणा० । ३ । ७३ । इति सरन् । स च कित् । यद्वा । मदा सरतीति अमरटीका ।) अन्यशुभद्वेषः । इत्यमरः । ३ । ३ । १०२ ॥ (यथा, कथासरित्सागरे । ४१ । ६५ ।
"ग्रीष्मान्ताङ्कचयामास द्वितीयमपि तत्फलम् ।
निसर्गविद्वो नारीणां सपत्नीषु हि मत्सरः ॥")
क्रोधः । इति मेदिनी । रे, १६३ ॥

मत्सरः, त्रि, (माद्यतीति । मद् हर्षे + "क्षधूमदिभ्यः कित् ।" उणा० । ३ । ७३ । इति सरन् । स च कित् ।) असह्यपरसम्पत्तिः । मात्सर्य्ययुक्तः । (यथा, महानिर्व्वाणतन्त्रे । १ । २ ६ ।
"न मत्सरा नातिरुषा नातिलुब्धा न कामुकाः ।")
कपणः । इत्यमरमेदिनीकरौ ॥ आत्मधिक्कारविशेषः । यथा,—
"निन्दन्ति मां सदा लोका धिगस्तु मम जीवनम् ।
इत्यात्मनि भवेद्यस्तु धिक्कारः स च मत्सरः ॥"
इति पाद्मे क्रियायोगसारे १६ अध्यायः ॥

मत्सरा, स्त्री, (मद् + सरन् । स्त्रियां टाप् ।) मक्षिका । इति मेदिनी । रे, १६३ ।

मत्सरी, [न्] त्रि. (मत्सरोऽन्यशुभद्वेषोऽस्यास्तीति मत्सरः + इनिः ।) अन्यशुभद्वेषी । तत्पर्य्यायः । कर्णेजपः २ दुर्ज्जनः ३ पिशुनः ४ सूचकः ५ नीचः ६ द्विजिह्वः ७ खलः ८ । इति हेमचन्द्रः ॥ (यथा, मनौ । २ । २०१ ।
"परिभोक्ता कृमिर्भवति कीटो भवति मत्सरी॥")

मत्स्यः, पुं स्त्री. (माद्यन्ति लोका अनेनेति । मद् + "ऋतन्यञ्जीति ।" उणा० । ४ । २ इति स्यन् ।) खनामख्यातजलजन्तुः । माछ इति भाषा ॥ तत्पर्य्यायः । पृथुरोमा २ झषः ३ मीनः ४ वैसारिणः ५ अण्डजः ६ विसारः ७ शकली ८ । इत्यमरः । १ । १० । १७ ॥ शल्की ९ झषः १० आत्माशी ११ संवरः १२ शूकः १३ जलेशयः १४ कण्टकी १५ शल्की १६ मत्स्यः १७ अनिमिषः १८ । इति शब्दरत्नावली ॥ शुक्लीः १९ । इति जटाधरः ॥ तस्य गुणाः । दृंहणत्वम् । गुरुत्वम् । शुक्रवर्द्धनत्वम् । बल्यत्वम् । स्निग्धत्वम् । उष्णत्वम् । मधुरत्वम् । कफपित्तकरत्वम् । व्यायामाध्वरतदीप्ताग्नीनां पूजितत्वम् । वातरोगहरत्वञ्च ॥ * ॥ दृढमत्स्यगुणाः । गुरुत्वम् । शुक्रलत्वम् । मलबद्धकारित्वञ्च ॥ * ॥ क्षुद्रमत्स्यगुणाः । लघुत्वम् । ग्राहित्वम् । ग्रहणीरोगे हितत्वञ्च ॥ * ॥ कृष्णमत्स्यगुणाः । लघुत्वम् । स्निग्धत्वम् । वातघ्नत्वम् । वह्निवर्द्धनत्वञ्च ॥ * ॥ पाण्डुरमत्स्यगुणाः । दोषलत्वम् । स्निग्धत्वम् । गुरुत्वम् । मलभेदित्वञ्च ॥ * ॥ कथितमत्स्यस्य अर्थात् पूतिमत्स्यस्य गुणाः । दोषलत्वम् ॥ * ॥ शुष्कमत्स्यगुणौ । विष्टम्भित्वम् । दुर्ज्जरत्वञ्च ॥ * ॥ लवणभावितमत्स्यगुणाः । कफपित्तकरत्वम् । सारकत्वम् ॥ सामुद्रमत्स्यगुणाः । लघुत्वम् । दृष्यत्वम् । मधुरत्वम् । स्वल्पमलकारित्वञ्च ।
"सामुद्रा गुरवो दृष्याः स्निग्धोष्णा वातनाशनाः ।"
इति पाठान्तरम् ॥ * ॥
(तथास्य पर्य्यायाः गुणाश्च ।
"मत्स्यो मीनो विकारश्च उग्रो वैसारिणोऽण्डजः ।
शकुलः पृथुरोमा च स सुदर्शन इत्यपि ॥
रोहिताद्यास्तु ये जीवास्ते मत्स्याः परिकीर्त्तिताः ।
मत्स्याः स्निग्धोष्णमधुरा गुरवः कफपित्तलाः ॥
वातघ्ना दृंहणा दृष्या रोचका बलवर्द्धनाः ।
मद्यव्यायसक्तानां दीप्ताग्नीनाञ्च पूजिताः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥
"मत्स्या रोहितपाठीनङ्कुर्म्मकुम्भीरकर्कटाः ।
शुक्तिशङ्खोडुशम्बूकशफरीवर्म्मचन्द्रिकाः ॥
चुलूकीनक्रमकरशिशुमारतिमिङ्गिलाः ।
राजीवाः चिलिचिमाद्याश्च ॥"
इति वाभटे शत्रस्थाने षष्ठेऽध्याये ॥
मत्स्यास्तु द्विविधा नादेयाः सामुद्राश्च । तत्र नादेयाः । रोहित-पाठीन-पाँटला-राजीव-वर्म्मिगोमत्स्य-कृष्णमत्स्य-वागुड्डार-सुरल-सहस्र-दंष्ट्रप्रभृतयो नादेयाः ॥
"नादेया मधुरा मत्स्या गुरवो मारुतापहाः ।
रक्तपित्तकराश्चोष्णा वृष्याः स्निग्धाल्पवर्च्चसः ॥
कषायानुरसस्नेहां शुष्यशैवालभोजनाः ।
सरस्तडागसम्भूताः स्निग्धाः स्वादुरसाः स्मृताः ।
महाह्रदेषु बलिनः स्वल्पेऽम्भस्यबलाः स्मृताः ।"
तिमितिमिङ्गिलकुलिशपाकमत्स्यनिरालक-नन्दिवारलकमकरगर्गरकचन्द्रकमहामीन-राजीवप्रभृतयः सामुद्राः ॥
"सामुद्रा गुरवः स्निग्धा मधुरा नातिपित्तलाः ।
उष्णावातहरा वृष्या वर्च्चस्याः श्लेष्मवर्द्धनाः ॥
बलावहा विशेषेण मांसाश्रित्वात् सस्मृताः ।
तेषामप्यनिलघ्नत्वाच्छौक्ष्यात्कौर्य्यौ गुणोत्तरौ ॥
स्निग्धत्वात् स्वादुपाकत्वात् तयोर्वाप्या गुणोत्तराः ।
नादेया गुरवो मध्ये यस्मात् पुच्छास्यचारिणः ।
सरस्तडागजानान्तु विशेषेण शिरो लघु ॥
अदूरगोचरा यस्मात्तस्मादुत्सोदपानजाः ।
किञ्चिन्मुक्ता शिरोदेशमत्यर्थं गुरवस्तु ते ॥
अधस्तद्गुरवो ज्ञेया मत्स्याः सरसिजाः स्मृताः ।
उरो विचरणात्तेषां पूर्व्वमङ्गं लघु स्मृतम् ॥"
इति सुश्रुते सूत्रस्थाने ४६ अध्यायः ॥)
नादेयमत्स्यगुणाः । श्लेष्मलत्वम् । दृष्यत्वम् । मधुरत्वम् । अल्पमलभेदकत्वञ्च ॥ * ॥ सरस्तडागभवमत्स्यगुणौ । स्निग्धत्वम् । स्वादुरसत्वम् ॥ * ॥ महाह्रदभवमत्स्याः बलिनः । अल्पजलभवाः अबलाः ॥ * ॥ दग्धमत्स्यगुणाः । गुरुत्वम् । दृष्यत्वम् । दृंहणत्वम् । बलवर्द्धनत्वञ्च ॥ तैललवणयुक्तदग्धमत्स्यगुणाः । क्षीणशुक्रभग्नजर्ज्जरितनित्यस्त्रीसेविक्षीणतेजसां हितकारित्वञ्च ॥ * ॥ पलाण्डुवेष्टितकर्दमलेपिताङ्गारदग्धसलवणवेशवारपुरस्कृतसार्द्रककटुतैलसन्तोलितमत्स्यगुणाः । स्वादुत्वम् । कफवातहरत्वम् । शुक्रलत्वम् । बलवर्द्धनत्वञ्च ॥ * ॥ शाकमत्स्याख्यव्यञ्जनगुणाः । हृद्यत्वम् । दृष्यत्वम् । पुष्टिदत्वञ्च ॥ मत्स्यषण्डगुणाः । बलकरत्वम् । वातहरत्वम् । अतिशुक्ररोचनत्वञ्च ॥ शिरसि खड्गकेशधारिमत्स्यगुणाः । सुखप्रियत्वम् । हृद्यत्वम् । पुंस्त्वघातकत्वञ्च । इति राजवल्लभः ॥ * ॥ अपि च ।
"निःशल्का निन्दिता मत्स्याः सर्व्वे शल्कयुता हिताः ।
वपुःस्थैर्य्यकरा वीर्य्यबलपुष्टिविवर्द्धनाः ॥
हृदकुल्याजलनिर्झरतडागवापीजलेषु ये मत्स्याः ।
तेऽतिजड़ा नादेया यथोत्तरं लघुतरास्तु नादेयाः ॥
पारावतमत्स्या गुरवो विदाहिनो
विष्टम्भदास्ते लवणार्द्रवादिजाः ।
नानाश्रिताः स्वादुजलस्थिता अपि
ज्ञेया जड़ास्तेऽपि तथाश्रिता इमे ॥"
इति राजनिर्घण्टः ॥

अथ क्षुद्रमत्स्यगुणाः ।
"क्षुद्रमत्स्याः सादरसा दोषत्रयविनाशनाः ।
लघुपाका रुचिकराः सर्व्वदा ते हिता मताः ।
अथातिक्षुद्रमत्स्यगुणाः ।
अतिसूक्ष्माः पुंस्त्वहरा रुक्षाः कासानिलापहाः ।
अथ मत्स्याण्डगुणाः ।
मत्स्यगर्भो गुरुः स्निग्धः पुष्टिकरो गुरुः ।
कफमेदप्रदो बल्यो ग्लानिकृन्मेहनाशनः ॥
अथ शुष्कमत्स्यगुणाः ।
शुष्कमत्स्या न बल्याः स्युर्दुर्जरा विष्टिबन्धिनः ॥
अथ दधिमत्स्यगुणाः ।
दधिमत्स्यो गुरुः श्लेष्मः पुष्टिकृद्बलवर्द्धनः ॥
अथ कूर्मादिमत्स्यगुणाः ।
कूर्ममत्स्याः शुक्रसृक्कुष्ठश्लेष्मविवर्द्धनाः ।
सरोला मधुराः स्निग्धा बल्या वातविनाशनाः ॥
नादेया दृंहणा मत्स्या गुरवोऽनिलनाशनाः ।
रक्तपित्तकरा रुक्षाः स्निग्धोष्णाः स्वप्नवर्द्धनाः ॥
चौड्राः पित्तहराः स्निग्धा मधुरा लघवो हिमाः ।
ताड़ागा गुरवो रुक्षाः शीतला बलमूत्रदाः ।
ताड़ागवन्निर्झरजा बलायुर्मतिदुन्दराः ॥
अथ ऋतुविशेषे मत्स्यविशेषगुणाः ।
हेमन्ते कूर्मजा मत्स्याः शिशिरे सारसा हिताः ।
वसन्ते ये तु नादेया ग्रीष्मे चौड्रसमुद्भवाः ॥
तड़ागजाता वर्षासु तास्वल्पा नदीभवाः ।
निर्झराः शरदि श्रेष्ठा विशेषोऽयमुदाहृतः ॥"
इति भावप्रकाशः ॥
मत्स्योत्पत्तिकारणं यथा,—
"ततस्तु मित्रावरुणौ भ्रातरौ ब्रह्मचारिणौ ।
तन्तु देशं गतौ देवौ विचरन्तौ यदृच्छया ॥
ताभ्यां तत्र तदा दृष्टा उर्व्वशी तु वराप्सराः ।
क्रीयन्तीं रुचिरान्याभिः सखीभिः सा वरानना ॥
गायन्ती च हसन्ती च विभ्रमा निर्जने वने ॥
गौरी कमलगर्भाभा स्निग्धकुञ्चितमूर्द्धजा ।
पद्मपत्रविशालाक्षी रक्तोष्ठी मृदुभाषिणी ॥
शुद्धकुन्देन्दुधवलैर्दन्तैरविरलैः समैः ।
सुभ्रूः सुनासा सुमुखी सुललाटा मनस्विनी ॥
सिंहवत् सूक्ष्ममध्याङ्गी पीनोरुजघनस्तनी ।
मधुरालापचतुरा सुमधा चारुहासिनी ॥
रक्तोत्पलकरा तन्वी सुपर्दो विनयान्विता ।
पूर्णचन्द्रनिभा बाला मत्तद्विरदगामिनी ॥
दृष्ट्वा तस्यास्तु तद्रूपं तौ देवौ विस्मयं गतौ ।
यस्या वासेन वासेन क्षितेन ललितेन च ॥
रूपेण यौवनेनैव शीतानिलसुगन्धिना ।
मत्तभ्रमरगीतेन पुंस्कोकिलरुतेन च ॥
सुन्दरेण हि गीतेन उर्व्वश्या मधुरेण च ।
रेचितौ च कटाक्षैश्च स्कन्दतुस्तावुभावपि ॥
तस्मिन्ना पतितं रेतः कमलेऽथ मुनौ ततो ।
कमलोऽथ वह्निस्थ जातो हि मुनिसत्तमः ॥
तयोः सकाशात् सम्भूतौ पुत्रौ मत्स्यौ महामते ! ॥"
इति नारसिंहपुराणे ९ अध्यायः ॥
मत्स्यभक्षणविधिर्यथा,—
"यो यस्य मांसमश्नाति स तन्मांसाद उच्यते ।
मत्स्यादः सर्व्वमांसादस्तस्मान्मत्स्यान् विवर्ज्जयेत् ॥
इति मानवे ५ अध्यायः ॥
चलस्थलचरा ये च प्राणिनस्तान् हतानपि ।
न भक्षेन्मानवो ज्ञानी हत्वा तेषां भवेन्न हि ॥
हत्वा हत्वा तु मत्स्यादी सर्व्वेषां यो विशेषतः ।
मांसादः प्राणिनां सोऽपि तस्मान्मत्स्यं परित्यजेत् ॥"
इति पाद्मोत्तरखण्डे १०५ अध्यायः ॥
वर्জ्जनीयमत्स्या यथा,—
"शृणु देवि ! प्रवक्ष्यामि मांसभेदान्निबोध मे ।
नाद्यं तिलकमठं पशुश्वङ्गिणमेव च ॥
गोमीनं चक्रशकुलं वड़ालं राजवं तथा ।
वामीनं चलकर्णञ्च सचक्रं चेङ्गमेव च ॥
भूविलञ्चानिरुद्धञ्च गाङ्गेयानि विवर्ज्जयेत् ॥"
इति मत्स्यसूक्तमहातन्त्रम् ॥
रविवारे मत्स्यभक्षणनिषेधो यथा,—
"यामिषं रक्तशाकञ्च यो भुङ्क्ते च रवेर्दिने ।
सप्तजन्म भवेत् कुष्ठी दरिद्रश्चोपजायते ॥"
इति भविष्यपुराणम् ॥
"माषमामिषमांसञ्च मसूरं निम्बपत्रकम् ।
भक्षयेद् यो रवेर्वारे सप्तजन्मान्यपुत्रकः ॥"
इति तिथ्यादितत्त्वम् ॥
कार्त्तिके मत्स्यभक्षणनिषेधो यथा,—
"न मात्स्यं भक्षयेन्मांसं न कौर्म्मं नान्यदेव हि ।
चण्डाली जायते राजन् ! कार्त्तिके मांसभक्षणात् ॥"
इति नारदीयपुराणम् ॥
माघवैशाखयोर्हविष्यन्नचर्य्याविधानात् मत्स्यभक्षणं नितरां निषिद्धमिति ज्ञायतत्त्वदर्शनात् ॥
श्रावणिषौ मत्स्यभक्षणनिषेधो यथा,—
"यामिषं कलहं हिंसां वर्ज्जयेद्धौ विवर्জ्जयेत् ॥"
अपि च ।
"भुङ्क्ते यस्तु निरामिषं स हि भवेज्जन्मान्तरे पण्डितः ॥"
इति तिथ्यादितत्त्वम् ॥
श्रावणस्य मत्स्यभक्षणनिषेधो यथा,—
"क मद्यं क शिवे भक्तिः क मांसं क शिवार्चनम् ।
मत्स्यमांसरतानां वै दूरे तिष्ठति शङ्करः ॥"
इति काशीखण्डम् ॥
मा भक्षं नैवेद्यार्थे भक्षेज्जामदग्नीक्षीरं वर्জ्जयेत् । पञ्चनखमत्स्यवराहमांसानि च । इत्याह्निकतत्त्वधृतविष्णुसूत्रम् ॥ * ॥ विन्ध्यपर्व्वतस्य पश्चिमे मत्स्यभक्षणनिषेधो यथा,—
"विन्ध्यस्य पश्चिमे भागे मत्स्यभुक् पतितो नरः ।"
इति पुराणम् ॥
कामतो मत्स्यभक्षणप्रायश्चित्तं यथा,—
"मत्स्यांस्तु कामतो भुक्त्वा सोपवासस्त्र्यहं पिबेत् ॥"
अज्ञानतस्तदर्द्धन्तु । इति प्रायश्चित्तविवेकः ॥
मत्स्यभक्षणप्रतिप्रसवो यथा,—
"मत्स्यान् सशल्कान् सक्रीत मांसं रौरवमेव च ।
निवेद्य देवताभ्यश्च ब्राह्मणेभ्यश्च नान्यथा ॥
सफरं सिंहतुण्डञ्च तथा पाठीन-रोहितौ ।
मत्स्याख्येते समुद्दिष्टा भक्षणाय तपोधनैः ॥
प्रोक्षितं भक्षयेदेषां मांसञ्च द्विजकाम्यया ।
यथाविधिनियुक्तञ्च प्राणानामपि चात्यये ॥"
इति कौर्म्मे उपविभागे १६ अध्यायः ॥
अपि च ।
"पाठीनरोहितावाद्यौ नियुक्तौ हव्यकव्ययोः ।
राजीवान् सिंहतुण्डांश्च सशल्कांश्चैव सर्व्वशः ॥"
इति मानवे ५ अध्यायः ॥
"अनिवेद्य न भोक्तव्यं मत्स्यं मांसञ्च यद्भवेत् ।
अन्नं विष्ठा पयो मूत्रं यद्विष्णोरनिवेदितम् ॥"
इत्याह्निकतत्त्वम् ॥
प्रेतश्राद्धे मत्स्यदानविधिर्यथा,—
"सपिण्डीकरणं यावत् प्रेतश्राद्धन्तु षोड़शम् ।
पक्वान्नेनैव कर्त्तव्यं सामिषेण द्विजातिभिः ॥"
इति श्राद्धतत्त्वधृतकामधेनुवचनम् ॥
मत्स्यः, पुं, (जलं प्राप्य माद्यतीति मद् + "ऋत्यन्यञ्जीति ।" उणा० । ४।२ । इति स्यन् ।) मीनविशेषः । विराटदेशः । नारायणः । इति हेमचन्द्रः । ।४।४०६ ॥ देशविशेषे बहुवचनान्तः । इति मेदिनी । ये, ४५ ॥ द्वादशराशिः । यथा,
"मत्स्यौ घटौ वृश्चिधुनं मगदं सवीणम् ॥"
इत्यादि ज्योतिस्तत्त्वम् ॥
अष्टादशपुराणान्तर्गतपुराणविशेषः ॥ (मत्स्यरूपेणावतीर्णेन भगवता उक्तत्वात् अस्य तदाख्या ।) यथा,—
"पुण्यं पवित्रमायुष्यमिदानीं शृणुत द्विजाः ।
मात्स्यं पुराणमखिलं यज्जगाद गदाधरः ॥"
इति मत्स्यपुराणे १ अध्यायः ॥
दशावतारान्तर्गतप्रथमावतारः । यथा,—
सूत उवाच ।
"पुरा राजा मनुर्नाम चीर्णवान् विपुलं तपः ।
पुत्रे राज्यं समारोप्य क्षमावान् रविनन्दनः ॥
मलयस्यैकदेशे तु सर्व्वात्मगुणसंयुतः ।
समदुःखसुखो धीरः प्राप्तवान् योगमुत्तमम् ॥
बभूव वरदस्यास्य वर्षायुतशते गते ।
वरं वृणीष्व भोवाच प्रीतः स कमलासनः ।
एवमुक्तोऽब्रवीद्राजा प्रणम्य स पितामहम् ।
एकमेवाहमिच्छामि त्वत्तो वरमनुत्तमम् ॥
भूतग्रामस्य सर्व्वस्य स्थावरस्य चरस्य च ।
भविता रक्षणे यानं प्रलये समुपस्थिते ॥
एवमस्त्विति विश्वात्मा तत्रैवान्तरधीयत ।
पुण्यवृष्टिश्च महती खात् पपात सुरार्पिता ॥
कदाचिदाश्रमे तस्य कुर्व्वतः पितृतर्पणम् ।
पपात पाणौरुपरि झषरी जलसंयुता ॥
दृष्ट्वा तच्छफरीरूपं स दयासुमहीपतिः ।
रक्षणायाकरोद्यत्नं स तस्मिन् करकोदरे ॥
अहोरात्रेण चैकेन षोड़शाङ्गुलविस्तृतः ।
सोऽभवन्मत्स्यरूपेण पाहि पाहीति चाब्रवीत् ॥
स तमादाय सलिले प्राक्षिपच्चलचारिणम् ।
तत्रापि चैकरात्रेण हस्तत्रयमवर्द्धत ॥

मत्स्यः

पुनः प्राहासनादेन सहसाकिरणात्मजम् ।
स मत्स्यः पाहि पाहीति त्वामहं शरणं गतः ॥
ततः स कूपे तं मत्स्यं प्राहिणोद्रविनन्दनः ।
यदा न माति तत्रापि कूपे मत्स्यः सरोवरे ॥
क्षिप्तोऽयौ एयुतामागात् पुनर्योजनसम्मितः ।
तत्राप्याह पुनर्दीनः पाहि पाहि नृपोत्तमम् ॥
ततः स मनुना क्षिप्तो गङ्गायामप्यवर्द्धत ।
यदा तदा समुद्रे तं प्राक्षिपन्महिनीपतिः ॥
यदा समुद्रमखिलं व्याप्यासौ समुपस्थितः ।
तदा प्राह मनुर्भीतः कोऽपि त्वमसुरेश्वरः ॥
अथवा वासुदेवस्त्वमन्य ईदृक् कथं भवेत् ।
योजनायुतविंशत्या कस्य तुल्यं भवेदपुः ॥
ज्ञातस्त्वं मत्स्यरूपेण मां खेदयसि केशव ! ।
हृषीकेश ! जगन्नाथ ! गदाग्रज ! नमोऽस्तु ते ॥
एवमुक्तः स भगवान् मत्स्यरूपी जनार्दनः ।
साधु साध्विति होवाच सम्यक् ज्ञातस्त्वयानघ ! ॥
अचिरेणैव कालेन मेदिनी मेदिनीपते ! ।
भविष्यति जले मग्ना सशैलवनकानना ॥
नौरियं सर्व्वदेवानां निकायेन विनिर्म्मिता ।
महाजीवनिकायस्य रक्षणार्थं महीपते ! ॥
स्वेदाण्डजोद्भिजो यैर्यैः ये च जीवा जरायुजाः ।
अस्यां निधाय सर्व्वांस्तानन्नाद्यान् पाहि
सुव्रत ! ॥
युगान्तवाताभिहता यदा भवति नौर्नृप ! ।
मद्रूपेऽस्मिन् मम राजेन्द्र ! तदेमां संयमिष्यसि ॥
ततो लयान्ते सर्व्वस्य स्थावरस्य चरस्य च ।
प्रजापतिस्त्वं भविता जगतः पृथिवीपते ! ॥
एवं कृतयुगस्यादौ सर्व्वज्ञो धृतिमान् नृपः ।
मन्वन्तराधिपश्चैव देवपूज्यो भविष्यसि ॥"
इति मत्स्यपुराणे मनुविष्णुसंवादे प्रथमे सर्गे प्रथमोऽध्यायः ॥ विस्तारस्तु श्रीभागवते ८ स्कन्धे २४ अध्याये द्रष्टव्यः ॥*॥ तस्य मन्त्रध्यानपूजादि यथा,—

शङ्कर उवाच ।
"एक एवाभवन्मत्स्यावतारः कल्प आदिमे ।
तस्य मन्त्रं प्रवक्ष्यामि मुक्तिमुक्तिप्रदायकम् ॥
तारो नमो भगवते मं मत्स्याय रमां वदेत् ।
दादशाक्षरमन्त्रोऽयं सुनिर्व्वाणः समीरितः ॥
गायत्री च्छन्द उदितं देवता मीनविग्रहः ।
भगवान् प्रणवबीजानि श्रीपत्त्रकीलकम् ॥
नाभ्यधो रोहितसम आकण्ठस्य नराकृतिः ।
घनश्यामश्चतुर्बाहुः शङ्खचक्रगदाधरः ॥
प्रह्वीमत्स्यनिभो मूर्द्धा लक्ष्मीवक्षोविराजितः ।
पद्मचिह्नितसर्व्वाङ्गः सुन्दरश्चारुलोचनः ॥
जपेदष्टसहस्रं वा विमध्याक्तैलिलैर्घृतैः ।
प्रत्यहं तद्दशांशेन वैशाखे कार्त्तिके तथा ।
माघे च मासगूर्षे च पवित्राशी जितेन्द्रियः ॥
आरभ्य भाद्रबहुलमष्टं वा षोडशाहकम् ।
लक्ष्मीमनुं जपेन्नित्यमिदमापि कलाप्रतम् ॥
तर्पयेद्दोमः कर्त्तव्यस्तथान्यद्विधिषु तु ।
तर्पयेदष्टसहस्रं तिलतण्डुलचन्दनैः ॥
आज्यप्लुतया शताणौ च तर्पयेच्च तथा त्रयम् ।

मत्स्यग

रक्तोत्पलैर्वा पद्मैर्वा मालत्यादैः सुगन्धिभिः ।
एवं कृते वर्षमेकं मन्त्रसिद्धिः प्रजायते ॥
लिखेद्दादशविप्रांश्च श्रीरूपाश्च सुवासिनीम् ।
भोजयेत् पूजनस्यास्य चरेत्तौ याममेत् सदा ॥
षट्पत्रकर्णिकायाञ्च श्रीयुतं देवमर्च्चयेत् ।
षट्पत्रेषु षडङ्गानि यजेदृ[illegible]चतुर्दले ॥
मत्स्यं मकरं कूर्म्मं शिशुं च पूर्व्वतः ।
तद्वाह्येऽष्टदले पूज्याः शार[illegible]शाः सप्त सिन्धवः ॥
तद्वाह्येऽष्टदले पूज्या वासुक्याद्याः फणीश्वराः ।
तस्य वाह्ये शक्रदले रत्नानि तु चतुर्दश ॥
समुद्रजानि पूज्यानि लक्ष्मीकौस्तुभकानि च ।
गङ्गाद्याः षोड़श ततो महानद्यः प्रपूजयेत् ॥
ततश्चाष्टदले वेदानुपवेदसमन्वितान् ।
दिगीशांश्च तदस्त्राणि नवावरणपूजनम् ।
एवं सिद्धमनुर्मन्त्री जायते सिद्धिभाजनम् ॥
एतदुक्तमृतं मन्त्रं जपेदयोत्तरं शतम् ।
तद्दैवतादिनं सिद्धः पुस्तकादेव जायते ॥
अकुण्ठितप्रयोगेषु न पुनस्तस्य संस्कृतिः ।
एतत्पल्लविता मन्त्रा मम सिद्धन्ति पार्व्वति ! ॥
एतत्संपुटिताः सर्व्वे वैदिकाः सिद्धिदाः कलौ ।
अनेन ग्रथिता जप्ताः कलौ च दृतसिद्धिदाः ॥"
इति मेरुतन्त्रे २६ प्रकाशः ॥

मत्स्यकरण्डिका, स्त्री, (मत्स्यस्य करण्डिकेव) मत्स्यरक्षणपात्रम् । खालुइ इति भाषा । तत्पर्य्यायः मत्स्यधानी २ कुवेणी ३ । इति जटाधरः ॥

मत्स्यगन्धा, स्त्री, (मत्स्यस्येव गन्धो यस्याः । छान्दसादित्वाभावः ।) लाङ्गलीवृक्षः । स च जलपिप्पली । इति जटाधरः राजनिर्घण्टश्च ॥ व्यासमाता ॥ (अस्या उत्पत्तिकथा यथा, एकदा चेदीश्वरो वसुराजः पितृगणनियोजितो मृगयेर्थुवनं गत्वा स्वपत्नीं गिरिकां ऋतुस्नातां स्मरन् आस्ते । इत्यवसरे कामोद्दीपकवसन्तवायुना प्रेर्य्यमाणस्य तस्य रेतः प्रचस्कन्द । ततस्तद्वीर्य्यं सपत्रपुटे स्थापितवान् । एतत्तु मृगया न स्खलितमिति निश्चित्य अभिमन्त्र्य च तत् स्वपालित-श्येनेन प्रियायै प्रेषयामास । तदादाय उड्डीयमानस्य अन्येन च श्येनेन सह विहायसि युध्यतस्तस्य पदात् भ्रष्टं कालिन्दीजले पपात वीर्य्यम् । अथ तदेतः ब्रह्मशापान्मत्स्यरूपिणी अद्रिका नाम्नी काचिदप्सरा भक्षितवती धीवरास्तु तां पूर्णगर्भां मत्स्यीं ववन्धुः ततस्तेतु तस्या उदरात् एकां स्त्रियमेकञ्च पुरुषमुच्चक्रुः । सयोस्तु पुरुषो मत्स्यो नाम राजा, सा कन्या च मत्स्यगन्धेति ख्यातासीत् ॥ इत्युषाः तत्पर्य्यायो यथा,—
"तन्मत्स्ये प्रथमं फलं मत्स्यसदृशं द्वितीयमत्स्यफलसदृशं मत्स्यगन्धं तयोर्नामानि ।
"इत्युषा पुण्यवस्त्रा च परावत्यफला मता ।
मत्स्यगन्धा शीतशिवी विषघ्नी व्याघ्रनासिका ॥"
मत्स्यादनी । तत्पर्य्यायो यथा,—
"मत्स्यादनी वाह्लिका मत्स्यगन्धा मत्स्याशनीति च ।"

मत्स्यघा

जलपिप्पल्यर्थे पर्य्यायो यथा,—
"जलपिप्पल्यभिहिता शारदी शकलादनी ।
मत्स्यादनी मत्स्यगन्धा लाङ्गलीत्यपि
कीर्त्तिता ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥

मत्स्यघण्टः, पुं, (मत्स्यानां घण्टः विभिन्नार्थं यत्नः ।) स्वनामख्यातमत्स्यबन्धनम् । तत्पर्य्यायः । गलग्रहः २ । इति शब्दचन्द्रिका ॥

मत्स्यजालं, क्ली, (मत्स्यधारणार्थं जालं शाकपार्थिववत् समासः ।) आनायः । इति हेमचन्द्रः । ३ ।५६३ । माछधरा जाल इतिभाषा ॥

मत्स्यखण्डिका, स्त्री, (मद्यं मधुररसं स्यन्दते इति । स्यन्द + घञ् + टाप् । अत इत्वञ्च । पृषोदरादित्वात् साधुः । शर्करावि[illegible]षः । मिछरि इति भाषा । यथा,—
"लसीकाफाणितगुड़खण्डमत्स्यण्डिकासिताः ।
निर्म्मला लघवो ज्ञेयाः शीतवीर्य्या यथोत्तरम् ।
यथा यथेषां वैमल्यं भवेच्छैत्यं तथा तथा ॥"
इति राजवल्लभः ॥
राव इति हिन्दीभाषा । तस्य लक्षणं यथा,—
"इक्षोरसो यः संपक्को घनः किञ्चिद्द्रवान्वितः ।
मन्दं यत् स्यन्दते यस्मान्मत्स्यण्डीति निगद्यते ॥"
अस्य गुणाः ।
"मत्स्यण्डी मेदिनी वल्या लघ्वी पित्तानिलापहा ।
मधुरा हृद्या रक्तदोषापहा स्मृता ॥"
इति भावप्रकाशः ॥

मत्स्यण्डी, स्त्री, खण्डविकारः । इत्यमरः । २ । ९ । ४३ ॥ इक्षुविशेषस्य रसपाके खण्डयोग्ये सारभूते या गुड़िकाकारा जायते सा मत्स्यण्डी । खण्डशालूकं मिछरि इति ख्याते नवात इति ख्याताः । मत्स्यण्डीति केचित् । मत्स्याण्डाकारत्वात् मत्स्यण्डी मनीषादित्वादङ्कच् गदादित्वादीप् मत्स्यमनिति मत्स्यण्डी अत्र प्राग्वत् ङीः इत्यन्ये । मद्यं स्यन्दते मत्स्यण्डीति केचित् । इति भरतः ॥ (यथास्या लक्षणं गुणाश्च ।
राबकाकव खण्डराव इति लोके ।
"इक्षो रसो यः सम्पक्को घनः किञ्चिद्द्रवान्वितः ।
मन्दं यत् स्यन्दते यस्मात्तन्मत्स्यण्डी निगद्यते ॥
मत्स्यण्डी मेदिनी वल्या लघ्वी पित्तानिलापहा ।
मधुरा हृद्या रक्तदोषापहा स्मृता ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥

मत्स्यधानी, स्त्री, (मत्स्या धीयन्ते यत्रेति मत्स्य + धाञ् + ल्युट् ङीप् ।) मत्स्यरक्षणपात्रम् । खारयी इति खालुइ इति च भाषा । तत्पर्य्यायः । कुवेणी २ । इत्यमरः । २ । १० । १६ ॥ मत्स्यकरण्डिका३ खारयिका४ मत्स्यबन्धनी ५ कुवेणिः ६ कुवेणा ७ कुपिनी८ कुपिनिः ९ । इतिभरतः ॥ सा खल्पा चेत् कुपिनी भवेत् इति शब्दरत्नावली ॥

मत्स्यघ्न

मत्स्यघ्नः, पुं, (नाशयतीति नश् + णिच् + ल्युट्। मत्स्यानां नाशकः। सदैव मत्स्यभक्षकत्वास्य तथात्वम्।) क्रौञ्चपक्षी। इति भूरिप्रयोगः। मत्स्यनाशकर्त्तरि त्रि॥

मत्स्यनाशनः, पुं, (नाशयतीति नश् + णिच् + ल्युः। मत्स्यस्य नाशनः।) क्रौञ्चपक्षी। इति हेमचन्द्रः। ४। ४०१॥

मत्स्यपित्ता, स्त्री, (कटुरोहिणी। इत्यमरः। २। ४। ८६॥ (तथा चास्याः पर्य्यायाः।

"कट्वी तु कटुका तिक्ता शल्यभेदा कटुम्भरा।
अशोका मत्स्यशकला चक्राङ्गी शकुलादनी॥
मत्स्यपित्ता काण्डरुहा रोहिणी कटुरोहिणी॥"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥)

मत्स्यबन्धी, [न्] पुं, (मत्स्यान् बन्धुं शीलमस्य। मत्स्य + बन्ध + इनिः।) धीवरः। यथा,

"कैवर्त्तो धीवरो दाशो मत्स्यबन्धी च कालिकः॥"

इति हलायुधः॥

("अथान्येद्युर्ब्बलेर्यमकिङ्करामेर्मत्स्यबन्धिभिः
प्रभात आगत्य जालैराच्छादितो ह्रदः।"

इति पञ्चतन्त्रे। ५। २६।)

मत्स्यबन्धिनी, स्त्री, (मत्स्यबन्धिन् + स्त्रियां ङीप्।) मत्स्यधानी। इति हलायुधः॥

मत्स्यरङ्गः, पुं, (मत्स्यरङ्ग। पृषोदरादित्वात् साधुः।) मत्स्यरङ्गपक्षी। इति भूरिप्रयोगः॥

मत्स्यरङ्गः, पुं, (मत्स्यान् रङ्गति भक्षणार्थं तत्समीपं गच्छतीति। मत्स्य + रङ्ग + अच्।) पक्षिविशेषः। माछराङ्गा इति भाषा। (यथा, "त्रिभुवनविदितो घा मत्स्यरङ्गे कलङ्कः।" रत्नभट्टः॥)

तत्पर्य्यायः। भस्माशी २ जलमद्गुः ३ मत्स्यीचकः ४। इति शब्दरत्नावली॥ मत्स्याशनः ५ मीनरङ्गुः ६ मत्स्यरङ्गः ७ तुण्डिचकः ८। इति शब्दरत्नावली॥

मत्स्यराजः, पुं, (मत्स्येषु राजा श्रेष्ठः समासात्टच्।) रोहितमत्स्यः। इति त्रिकाण्डशेषः। विराटराजः।

("तस्य तद्वचनं श्रुत्वा मत्स्यराजः प्रतापवान्।"

इति महाभारते। ४। ६८। २१।)

मत्स्यविद्या, स्त्री, कटुका। इति वैद्यकम्॥

मत्स्यवेधः, स्त्री, (मत्स्यीविध्यतेऽनेनेति मत्स्य + विध + करणे घञ्। मत्स्यानां वेधनमिति वा।) वडिशम्। इत्यमरः। २। १०। १४॥

मत्स्यवेधनी, स्त्री, (मत्स्यवेधन + ङीप्।) मद्गुपक्षी। इति जटाधरः। वडिशम्। इति शब्दरत्नावली॥

मत्स्यसन्तानिकः, पुं, (मत्स्यानां सन्तानिकाश्च।) मत्स्यशल्यविशेषः। यथा,—

"इक्षोरुद्धारे मत्स्यण्डी वेत्राग्रे मत्स्यसन्तानिकः।
दार्वेकः कटुतैलेन मत्स्यसन्तानिकी भवेत्॥"

इति शब्दचन्द्रिका॥

मत्स्याद

मत्स्याक्षी, स्त्री, (मत्स्यानां अक्षीणीव अक्षीणि पुष्परूपाणि चक्षूंषि यस्याः। मत्स्याक्षि + "बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच्।" ५। ४। ७३। इति षच् ङीष् च।) ब्राह्मी। इत्यमरः। २। ४।१३७॥ सा च सोमलतायाम्। ब्राह्मीशाके इति केचित्। इति भरतः॥ यथा,

"ब्राह्मी वयस्या मत्स्याक्षी मीनाक्षी सोमवल्लरी।
मत्स्याक्षी शिशिरा रुद्रा ब्रह्मदोषक्षयापहा॥"

इति राजनिर्घण्टः॥

गण्डदूर्ब्बा। इति राजनिर्घण्टः॥

छिलमोचिका। ब्राह्मीशाकः। इति रत्नमाला॥

(गण्डदूर्ब्बार्थे पर्य्यायो यथा,—

"गण्डदूर्ब्बा तु गण्डाली मत्स्याक्षी शकुलाचकः॥"

मत्स्यादनी॥ तत्पर्य्यायो गुणाश्च यथा। मछेछी छद्मकरी चाइतिच। इति लोके।

"मत्स्याक्षी वालिका मत्स्यगन्धा मत्स्यादनीति च।
मत्स्याक्षी ग्राहिणी प्रीता कुष्ठपित्तकफास्रजित्॥
लघुस्निग्धा कषाया च स्वादी कटुविपाकिनी।"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥)

मत्स्याक्षी, स्त्री, (मत्स्यानां अक्षमिवाक्षं यस्याः।) छिलमोचिका। इति त्रिकाण्डशेषः॥

मत्स्यादनी, स्त्री, (मत्स्यैरद्यते इति मत्स्य + अद + ल्युट् गौरादित्वात् ङीष्।) जलपिप्पली। इति राजनिर्घण्टः॥ (तथा च पर्य्यायः॥

"जलपिप्पल्यभिहिता शारदी शकुलादनी।
मत्स्यादनी मत्स्यगन्धा साङ्गलीत्यपि कीर्त्तिता॥"

मत्स्याक्षी। मछेछी इति लोके॥ तत्पर्य्यायो यथा, भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे।

"मत्स्याक्षी वालिकामत्स्यगन्धा मत्स्यादनीति च।")

मत्स्याशनः, पुं, (मत्स्यानश्नातीति मत्स्य + अश + ल्युः।) मत्स्यरङ्गपक्षी। इति त्रिकाण्डशेषः॥ मत्स्यभक्षके त्रि॥

मत्स्यी, स्त्री, (मत्स्य + जातौ ङीष्।) स्त्रीमत्स्यजातिः। इति सुग्धबोधव्याकरणम्॥

मत्स्योदरी, स्त्री, (मत्स्यस्य उदरं उत्पत्तिस्थानं यस्याः। मत्स्यगर्भे जातत्वादस्यास्तथात्वम्।) सत्यवती या च व्यासमाता। इति जटाधरः॥ (यथा देवीभागवते। २। १। ३८।

"कालिका वसुना दत्ता तरसा जालजीविने।
नाम्ना कालीति विख्याता तथा मत्स्योदरीति च॥")

(मत्स्या उदरे गर्भे यस्याः।) काश्मीरस्थतीर्थविशेषः। यथा,—

"कैलासाद्रेः समायाताः सप्तकोटिमिताः प्रभो!।
दुर्गाभिः तैः कृतानीह सप्तस्वर्गसमानि च।
सप्तद्वाराणि सप्तानि कवाटविकटानि च।

मथितं

कोटिकोटिभटान्यानि सर्व्वैर्हैवहितान्यपि।
ततः शैलं महादुर्गं तैः काश्मीपरितः कृतम्
परिखा निर्म्मलतालिन्दा मत्स्योदर्य्या जलाविला।
मत्स्योदरी द्विधा जाता बहिरन्तश्चरा पुनः।
तस्य तीर्थं महत् ख्यातं मिलितं गाङ्गवारिणि।
यदा संहारमार्गेण गङ्गाम्भः प्रसरेदिह
तदा मत्स्योदरीतीर्थं लभ्यते पुण्यगौरवात्॥
सूर्य्याचन्द्रमसोः पर्व्व तदा कोटिगुणं श्रुतम्।
सर्व्वपर्व्वाणि तत्रैव सर्व्वतीर्थानि तत्र वै।
तत्रैव सर्व्वलिङ्गानि गङ्गा मत्स्योदरी यतः॥
मत्स्योदर्य्याश्च ये स्नाता यत्र कुत्रापि मानवाः।
कृतपिण्डप्रदानास्ते न मातुरुदरेशयाः॥
अविमुक्तमिदं चेत्रं मत्स्याकारत्वमाप्नुयात्।
परितः स्वर्धुनीवारि संसारे परिवीक्षते॥
मत्स्योदर्य्यां कृतस्नाना ये नरास्ते नरोत्तमाः।
कृत्वापि बहुपापानि नेक्षन्ते भास्करेः पुरीम्॥
किं स्नात्वा बहुतीर्थेषु किं तप्त्वा दुष्करं तपः।
यदि मत्स्योदरीं स्नाताः कुतो गर्भभयं ततः॥
यत्र यत्र हि लिङ्गानि मुनिभिर्यानि कृतान्यपि।
तत्र मत्स्योदरीं प्राप्य मुक्तात्मा मोक्षभाजनम्॥
सन्ति तीर्थान्यनेकानि भूर्भुवःस्वर्गतान्यपि।
न समानि परं तानि कोट्यंशेनापि निश्चितम्॥
इत्थं तीर्थं कृतं तेन विभो! कैलासवासिना।
गणाधिपेन सुमहत् सुमहोदरकर्म्मणा॥"

इति काश्मीरखण्डे ६६ अध्यायः॥

मथ ह कुत्सने। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-वधे-सक०-क्ष्वेडे अक०-सेट्।) ह मन्थति। कुत्सो वधक्ष्वेडौ। इति दुर्गादासः॥

मथ च ह गाहे। इति कविकल्पद्रुमः॥ भ्वा०-पर०सक०-सेट्।) ज मन्थः मथः। ह अमथीत्। इति दुर्गादासः॥

मथनं, क्ली, (मथ्यते इति मथ + भावे ल्युट्।) विलोड़नम्। मथ्योया इति भाषा। यथा,—

"क्वाहं मन्दमतिः क्वेदं मथनं क्षीरवारिधेः।
किं तत्र परमाणुर्वै यत्र मथ्यति मन्दरः॥"

इति भागवते। १।१।२। टीकायां श्रीधरस्वामी॥ अस्य विशेषः। यथा, हरिवंशे। २३६।१०।

"ऐषीकमस्त्रमैन्द्रस्य आग्नेयं शैलशिरं तथा।
वायव्यं मथनं नाम कापालमथ किङ्करम्॥")

मथनः, पुं, (मथति रोगानिति मथ + कर्त्तरि ल्युः।) गणिकारिकावृक्षः। इति रत्नमाला॥ (मथनकारके, त्रि। केशिमथनसूक्तमथन्यादिदर्शनात्।)

मथितं, क्ली, (मथ + क्तः।) निर्ज्जलघोलम्। इत्यमरः। २। ९। ५३॥ यथा, वृहत्संहितायाम्। ५०। ४६।

"क्षारे कदल्यामथितेन युक्ते
दिनोषिते पाचितमायसं यत्॥")

अस्य गुणाः। कफपित्तनाशकत्वम्। रोचनत्वम्। धातुपुष्टिदत्वञ्च। इति राजवल्लभः॥ विलोड़िते, त्रि। (तथा च पर्य्यायान्तरं प्रकारान्तरञ्च यथा,—

"घोलनु मथितं तक्रतद्वस्त्रिच्छिक्किकापि च।

समरं निर्मलं घोरं मथितन्त्वनरोदकम् ।
तत्र प्राप्तवतं प्रोक्तमुद्धाविष्यद्वैवारिकम् ।
कुक्षिजा नारदीना स्यात् सप्ता प्रथुर-
वारिका ।"

इति भागवतस्य पूर्वखण्डे द्वितीये भागे ।
"समरं निर्मलं घोरं मथितं नरवर्जितम् ।"
इति च हारीते प्रथमस्थाने अष्टमेऽध्याये ।)

मथुरा, स्त्री, (मथ्यते पामरार्द्रियेति । मथ + "मन्थिवन्दीत्यादि ।" उणा० । १ । ६६ । इति उरच् ।) सप्तमोक्षपुरी । अधुना आगरा इति ख्यातस्याम्बरस्य नगरम् । (यथा, रघौ । ६ । ६८ ।

"यस्यावरोधस्तनचन्दनानां
प्रक्षालनाद्वारिविहारकाले ।
कलिन्दकन्या मथुरां गतापि
गङ्गोर्मिसंसक्तजलेव भाति ।")

तत्पर्य्यायः । मधुपवनम् २ । इति त्रिकाण्डशेषः ।
मधुपुरी ३ मधुरा ४ । इति शब्दरत्नावली ।
सा च मोक्षदायकतीर्थम् । यथा,—

"अयोध्या मथुरा माया काशी काञ्ची अव-
न्तिका ।
पुरी द्वारवती चैव सप्तैता मोक्षदायिकाः ॥
अयोध्या रामजननी मथुरा कृष्णपालिता ।
एतास्तु पृथिवीमध्ये न गच्छन्ति कदाचन
श्रीरामधनुरग्र्यस्था अयोध्या सा महापुरी ।
मथुरा केशवोत्तप्तसुदर्शनविधारिता ।"
इत्यादिभूतशुद्धितन्त्रम् ।१०।

तत्र विष्णुदर्शनमाहात्म्यं यथा,

"यज्ञैरुच्चावचैर्दत्त्वा स्नात्वा वै यमुनाजले ।
मथुरायां हरिं दृष्ट्वा प्राप्नोति परमां गतिम् ॥
यमुनाजलसिक्ते स्नातः पुरुषो मुनिसत्तम ! ।
पौष्कराद्यानि तीर्थानि द्वादश्यामुपवासकृत् ॥
समभ्यर्च्याच्युतं सम्यक् मथुरायां समाहितः ।
वाजपेयस्य यज्ञस्य प्राप्नोत्यधिकं फलम् ॥
कलिन्दकन्यासुदृशे स्नातः कालिन्दीसलिलाप्लुतः ।
अर्चयिष्यति गोविन्दं मथुरायामुपोषितः ॥
पौष्कराद्यानि तीर्थानि तेनैवं वयमप्युत ।
परान्यहिमवाद्यामस्तारिताः सङ्कलोद्भवैः ॥"
इति विष्णुपुराणे ६ अंशे ८ अध्यायः ।१७।

तस्या माहात्म्यं यथा,—

वराह उवाच ।

"न विद्यते च पाताले नान्तरीक्षे न मानुषे ।
समं मथुरया हि प्रियं मम वसुन्धरे ! ।"

भूत उवाच ।

"तच्छ्रुत्वा वचनं तस्य प्रभोस्तस्य गिरेः सदा ।
पुनरेवं परं पुण्यं पृच्छन्तमवदत् ॥

पृथिव्युवाच ।

पुष्करं नैमिषं चैव पुरी वाराणसी तथा ।
एता दित्वा महाभाग ! मथुरां किं प्रशंससि ॥

वराह उवाच ।

शृणु देवि ! प्रवक्ष्यामि यन्मां त्वं परिपृच्छसि ।
मथुरेति च विख्यातं यस्मिन् क्षेत्रे परं मम ।
सा रम्या च सुरम्या च मम भूमिः प्रिया मम ॥
शृणु देवि ! यथा स्तौमि मथुरां पापहारि-
णीम् ।
तस्मिन्नामी नरो याति मोक्षं नास्त्यत्र संशयः ॥
महामाघ्यां प्रयागे तु यत् फलं लभते नरः ।
तत् फलं लभते देवि ! मथुरायां दिने दिने ॥
काशिन्यामेव यत् पुण्यं पुष्करे तु वसुन्धरे ! ।
तत् फलं लभते देवि ! मथुरायां दिने दिने ॥
पूर्णे वर्षसहस्रे तु वाराणस्यान्तु यत् फलम् ।
तत् फलं लभते देवि ! मथुरायां क्षणेन हि ॥
मथुरायाः परित्यज्य योऽन्यत्र कुरुते रतिम् ।
मूढो भ्रमति संसारे मोहितो मायया मम ॥
यः प्रयाति वरारोहे ! माथुरं मम मण्डलम् ।
अश्वमेधादिकं पुण्यं सोऽपि प्राप्नोति मानवः ॥
पृथिव्यां यानि तीर्थानि वासमुद्रसरांसि च ।
मथुरायां गमिष्यन्ति सुप्ते चैव जनार्द्दने ॥
मथुरां समनुप्राप्य वासं कृत्वा यथाविधि ।
स्नानं यान्तीह पितरो यावत् स्थित्यब्जजन्मनः ॥
ये वसन्ति महाभागे ! मथुरामितरे जनाः ।
तेऽपि यान्ति परां सिद्धिं मत्प्रसादान्न संशयः ॥
कृष्णाब्दके शौकरवे मथुरायां विशेषतः ।
विना सांख्येन योगेन मुच्यते नात्र संशयः ॥
मथुरायां महापुर्य्यां ये वसन्ति शुचिव्रताः ।
बलिभिक्षाप्रदातारो ये वा ते नरविग्रहाः ॥
भविष्यामि वरारोहे ! द्वापरे युगसंस्थिते ।
ययातिभूपवंशाश्च क्षत्रियः कुलवर्द्धनः ॥
भविष्यामि वरारोहे ! मथुरायां न संशयः ।
मूर्त्तिं चतुर्विधां कृत्वा स्थास्यामि ऋषिभिः
स्तुतः ॥
स्थास्यामि वत्सरशतं युद्धेषु कृतनिश्चयः ।
एका पद्मसहस्राभा द्वितीया कनकप्रभा ॥
अशोकसदृशः वर्णा अन्या चोत्पलसन्निभा ।
तत्र गुह्यानि नामानि भविष्यन्ति मम प्रिये ! ॥
पुण्यानि च पवित्राणि संसारोच्छेदनानि च ।
यत्राहं घातयिष्यामि द्वाविंशति वसुन्धरे ! ॥
दैत्यान् वीरान् महाभागे ! कंसादीन् वीर-
दर्पितान् ।
यमुना यत्र सुभगा नित्यं सन्निहिता ध्रुवम् ।
वैवस्वतस्वसा रम्या यमुना यत्र विश्रुता ।
तां नदीं यमुनां गङ्गां प्रयागे सङ्गविश्रुताम् ॥
गङ्गाशतगुणा पुण्या मथुरे मम मण्डले ।
यमुना विश्रुता देवि ! नात्र कार्य्या विचारणा ॥
तत्र तीर्थानि गुह्यानि भविष्यन्ति ममानघे ! ।
येषु स्नातरो देवि ! मम लोके महीयते ॥
अपापा मुच्यते प्राणान् मम कर्मपरायणः ।
न जायते न मर्त्येषु जायते च चतुर्भुजः ॥
अविमुक्ते नरः स्नातो मुक्तिं प्राप्नोत्यसंशयम् ।
तथात्र मुच्यते प्राणान्मम लोकं न गच्छति ॥
विश्रान्तिसंज्ञकं नाम तीर्थं त्रैलोक्यविश्रुतम् ।
यस्मिन् स्नातो नरो देवि ! मम लोके महीयते ॥
सप्ततीर्थेषु यत् स्नानं सप्ततीर्थेषु यत् फलम् ।
तत् फलं लभते देवि ! दृष्ट्वा देवं गतश्रमम् ॥

न च यज्ञेन तपसा न ध्यानेनैव संयमैः ।
तत् फलं लभते देवि ! स्नातो विश्रान्तिसंज्ञके ॥
कालत्रयन्तु वसुधे ! यः पश्यति गतश्रमम् ।
कृत्वा प्रदक्षिणं वै तु विष्णुलोकं स गच्छति ॥
अस्ति चान्यत् परं गुह्यं सर्वसंसारमोचनम् ।
यस्मिन् स्नातो नरो देवि ! मम लोके महीयते ॥
प्रयागं नाम तीर्थन्तु देवानामपि दुर्लभम् ।
तस्मिन् स्नातो नरो देवि ! अश्विमेधफलं लभेत् ॥
इन्द्रलोकं समासाद्य नरो वै तत्र मोदते ।
अपापा च मुच्यते प्राणान् मम लोकं स गच्छति ॥
तथा कनखलं तीर्थं नाम गुह्यं परं मम ।
स्नानमात्रेण तत्रापि नाकपृष्ठे स मोदते ॥
अस्ति चैवं परं गुह्यं तिन्दुकं नाम नामतः ।
तस्मिन् स्नातो नरो देवि ! मम लोके महीयते ॥
अस्मिंस्तीर्थे पुरावृत्तं तच्छृणुष्व वसुन्धरे ! ।
पाञ्चालविषये देवि ! काम्पिल्यश्च पुरोत्तमम् ॥
धनधान्यसमायुक्तं ब्रह्मदत्तेन पालितम् ।
तस्मिंस्तु वसते देवि ! तिन्दुको नाम नामतः ॥
तस्मिंस्तु वसतस्तस्य नापितस्य पुरोत्तमे ।
कालेन महता तस्य कुटुम्बः क्षयमागतः ॥
क्षीणे कुटुम्बे तु तदा शुभगं दुःखपीडितः ।
सर्वसङ्गपरित्यागी यो गच्छन् मथुरापुरीम् ।
ब्राह्मणावसथे सोऽपि वसमानो वसुन्धरे ! ॥
तत्र कर्म्मशतं कृत्वा स्नात्वैव यमुनां नदीम् ।
तत्र दानञ्च कुरुते नित्यकालं दृढव्रतः ॥
ततः कालेन महता पञ्चत्वं वसुमागतः ।
तस्य तीर्थप्रभावेण स्नातोऽसौ ब्राह्मणोत्तमः ॥
तस्मिन् वरारुहे देवि ! ब्राह्मणो योगिनां वरः ।
जातिस्मरो महाप्राज्ञो विष्णुभक्तो वसुन्धरे ! ॥
तस्य तीर्थप्रभावेण प्राप्ता मुक्तिः सुदुर्लभा ॥
ततः परं सप्ततीर्थं सर्वपापप्रमोचनम् ।
वैरोचनेन बलिना सप्तस्वाराधितः पुरा ॥
भूराज्येन बलिना धनकामेन वै पुरा ।
कर्त्तवाहुर्निराधारसप्तावृत्तमं तपः ॥
साग्रं संवत्सरं देवि ! ततः काममवाप्नुयात् ।
तस्य प्रसन्नो भगवान् दुमणिः प्रत्यभाषत ॥
किं कारणं वदे ! ब्रूहि तप्यसे महत्तपः ॥"

यतिरुवाच ।

"भूराज्योऽस्मि देवेश ! पातालेऽहं निवसाम्यहम् ।
विभवेनापि विहीनस्य कुटुम्बभरणं कुतः ॥
सङ्कटापन्नस्य वै सख्यौ दत्तौ चिन्तामणिं ततः ।
चिन्तामणिं समासाद्य पातालमगमत्तदा ॥
तस्मिंस्तीर्थे नरः स्नात्वा सर्वपापैः प्रमुच्यते ।
तथापि मुच्यते प्राणान् मम लोकं स गच्छति ॥
आदित्येऽपि संक्रान्तौ मधुमे चन्द्रसंक्षये ।
तस्मिन् स्नातो नरो देवि ! राजसूयफलं लभेत् ॥
यत्र पुत्रेण सप्तप्तं दृष्ट्वा परमं तपः ।
अत्र वै स्नानमात्रेण ध्रुवलोके महीयते ॥
तत्रापि मुच्यते प्राणान् मम लोके महीयते ॥
ध्रुवतीर्थे च वसुधे यः श्राद्धं कुरुते नरः ।
पितॄंस्तारयते सप्त पितृपक्षे विशेषतः ॥
दक्षिणे ध्रुवतीर्थस्य तीर्थराजं प्रकीर्तितम् ।

तस्मिन् स्नातो नरो देवि! मम लोके महीयते।
तत्राप्य सुखते प्राणान्मम लोकं स गच्छति॥
तद्दक्षिणे महादेवि! ऋषितीर्थं परं मम।
तत्र स्नातो नरो देवि! ऋषिलोकं प्रपद्यते॥
अथाच सुखते प्राणान्मम लोके महीयते।
दक्षिणे ऋषितीर्थस्य सौपनीर्थं परं मम॥
स्नानमात्रेण वसुधे! सौम्यं प्राप्नोति मानवः।
तत्रापि सुखते प्राणान् मम लोके महीयते॥
तत्रैव कोटितीर्थं हि तीर्थानामपि दुर्लभम्।
तत्र स्नानेन दानेन मम लोके महीयते॥
कोटितीर्थे नरः स्नातः सप्तार्षे पितृदेवताः।
तारिताः पितरस्तेन तत्रैव प्रपितामहाः॥
कोटितीर्थे नरः स्नातो ब्रह्मलोके महीयते।
तत्रैव वायुतीर्थन्तु पितृणामपि दुर्लभम्॥
पिण्डं दद्यात्तु वसुधे! पितृलोकं स गच्छति।
गयापिण्डप्रदानेन यत् फलं लभते नरः॥
तत् फलं लभते देवि! ज्येष्ठे दानान्न संशयः।
द्वादशैतानि तीर्थानि देवानां दुर्लभानि च॥
स्नानं दानं जपो होमः सप्तसप्तगुणितं भवेत्।
एषां स्मरणमात्रेण सर्व्वपापैः प्रमुच्यते॥
श्रुत्वा तीर्थस्य माहात्म्यं सर्व्वान् कामानवाप्नुयात्॥"

इत्यादि वराहपुराणे मथुरातीर्थप्रभावः॥७॥

इतः प्रभृति सप्तविंशाध्यायेषु मथुरामाहात्म्यं ज्ञेयम्॥

मधुरेशः, पुं, (मधुरायाः ईशः।) श्रीकृष्णः। इति शब्दरत्नावली॥

मधुरा, स्त्री, (मधु+बाहुलकात् ऊरः टाप्।) मथुरा। इति त्रिरूपकोषः॥

मद, ए ट स्वप्ने। पाठे। मदे। मोदे। स्तुतौ। गतौ। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) मन्यते। ट मन्दते जनः स्वपिति पठति भवति माद्यति मोदते स्तौति गच्छति वा इत्यर्थः। इति दुर्गादासः॥

मद, ई भ य ए र् णि हर्षे। इति कविकल्पद्रुमः॥ (दिवा०-पर०-अक० सेट्।) ईं मि मोदति। भ य माद्यति। ए र् अमदत् अमादीत्। अस्मात् पुषादित्वात् नित्यं ङ इत्यपि। इति दुर्गादासः॥

मद, क ड क्षिप्योगे। इति कविकल्पद्रुमः॥ (चुरा०-आत्म०-सक०-सेट्।) क ड मनो मादयते यस्य ग्राह्याध्यासरसायनात्। इति दुर्गादासः॥

मद, म गर्व्वे। स्तोभने। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) गर्व्वितोद्गारः। स्तोभनं हिंसनम्। म मदयति गर्व्वं सम्पत्तिः। मंदयति पुत्रं शूरः। इति दुर्गादासः॥

मदः, पुं. (मदयतीति। मद्+अच्।) हस्तिमदजलम्। (यथा, भारवौ। २। १८।

"मदलिप्तगुणैर्मृगाधिपः
करिभिर्लंघयते सखं इवैः।")

तत्पर्य्यायः। दानम् २॥ (मद्यते इति। मद्+"मदोऽनुपसर्गे।" ३। ३। ६७। इति अप्।) हर्षः। (यथा, ऋग्वेदे। १। ४। २।

"उप नः सवना गहि सोमपाः सिबगोदा इदेवतो मदः।" "मदो हर्षः।" इति तद्भाष्ये सायनः।) तत्पर्य्यायः। आमोदः २। इत्यमरः। ३। २। १७।) रेतः। कस्तूरी। (पर्य्यायो यथा,—

"नाभिर्मृगमदो मदः कस्तूरिकाखजः॥"

इति वैद्यकरत्नमालायाम्॥

रोगविशेषः। उन्मादस्य प्रथमावस्थायां यथा,

"रूक्षाप्रवृद्धस्वरणो मदनंज्ञां बिभर्त्ति च।"

इति माधवकरविनिश्चये उन्मादाधिकारे॥

विशेषोऽस्य यथा.—

यदा तु रक्तवाहीनि रससंज्ञावहानि च।
पृथक् पृथक् समस्ता वा सोतांसि कुपिता मलाः॥
मलिनाहारशीलस्य रक्तोमोहाहृतात्मनः।
प्रतिहत्यावतिष्ठन्ते जायन्ते व्याधयस्तदा॥
मदमूर्च्छायसंन्यासास्तेषां विद्याद्विचक्षणः।
यथोत्तरं बलाधिक्यं हेतुलिङ्गौषधान्तिषु॥
दुर्ब्बलचेतसः स्थानं यदा वायुः प्रपद्यते।
मनो विचोभयन् जन्तोः संज्ञां संमोहयेत्तदा॥
पित्तमेवं कफश्चैवं मनो विचोभयन् नृणाम्।
संज्ञां नयत्याकुलतां विशेषश्चात्र वक्ष्यते॥
स्वप्नागमश्चदुताभाश्चलस्खलितचेष्टितम्।
विद्याद्वातमदाविष्टं रूक्षश्यावारुणाकृतिम्॥
सक्रोधपरुषाभाषं संप्रहारकलिप्रियम्।
विद्यात् पित्तमदाविष्टं रक्तपीतासिताकृतिम्॥
स्वप्नसस्वप्नवचनं तन्द्रालस्यसमन्वितम्।
विद्यात् कफमदाविष्टं पाण्डुं प्रध्यानतत्परम्॥
सर्व्वाण्येतानि रूपाणि सन्निपातकृते मदे।
जायन्ते ग्राम्यति त्वाशु मदो मद्यमदाकृतिः॥
यच्च मद्यमदः प्रोक्तो विषजो रौधिरश्च यः।
सर्व्व एते मदास्तत्र वातपित्तकफाश्रयात्॥"

इति चरके सूत्रस्थाने चतुर्व्विंशेऽध्याये॥)

गर्व्वः। इति मेदिनी। दे, १२॥ (यथा, भारवौ। २। ६६।

"मदमानसमुद्धतं नृपं
न विभुङ्क्ते नियमेन मूढ़ता॥")

मद्यम्। चैषम्। मत्ततेति यावत्। इति हेमचन्द्रः। २। २२६॥ (यथा, मनौ। ७। ४७।

"मृगयाक्षो दिवास्वप्नः परिवादः स्त्रियो मदः।"
"तौर्य्यत्रिकं वृथाट्या च कामजो दशको गणः॥")

नदः। कल्याणवस्तु। इति धरणिः॥ ८॥

मदलक्षणं यथा,—

"यदहं मदमत्तो धनवान् मनुजः कोऽस्ति भूतले।
इति यस्यायते चित्तं मदः प्रोक्तः स कोविदैः॥"

इति प्राप्ते क्रियायोगसारे १६ अध्यायः॥

तस्य उत्पत्तिर्यथा।

"दुर्हर्षोदः समभवदहङ्कारादभूमदः।"

इति मात्स्ये ३ अध्यायः॥

(दानभेदः। यथा, हरिवंशे। ३। ८६।

"अश्विसोमा सुकेशी च गृहश्च मदकौ मदः॥"

मदकटः, पुं, (मदं कटति प्रकटयतीति। कट्+अच्।) षण्ढः। हाँड़ इति भाषा॥ यथा। इड्चरो इट्वरो गोपतिः षण्ढो वृषो मदकटो वृषलः। इति हेमचन्द्रः। ४। ३२५॥

मदकलः, पुं, (मदेन कलोऽव्यक्तमधुरध्वनिर्यस्य।) मत्तहस्ती। तत्पर्य्यायः। मदोत्कटः २। इत्यमरः। २। ८। ३५॥ अव्यक्तप्रलापी। इति शब्दरत्नावली॥ मदाव्यक्तवाचिनि त्रि। इति मेदिनी। ले, १५६॥ (यथा, उत्तरचरिते २अङ्के।

"मदकलमयूरकण्ठच्छविभिरवकीर्णानि।")

मदगन्धः, पुं, (मदस्य दानस्येव गन्धोऽस्य।) सप्तच्छदवृक्षः। इति राजनिर्घण्टः॥ (विवरणन्तु सप्तच्छदशब्दे द्रष्टव्यम्।)

मदगन्धा, स्त्री, (मदः मादनः गन्धोऽस्याः।) मदिरा। अतसी। इति राजनिर्घण्टः॥

मदनी, स्त्री, (मदं मत्ततां हन्तीति। मद्+हन् टक् ङीप्।) पूतिका। इति जटाधरः॥

मदनः, पुं, (मदयतीति।मद्+णिच् ल्युः।) कामदेवः। इत्यमरः। १। १। २६॥

तस्य नाम्नां व्युत्पत्तिर्यथा। ऋषय ऊचुः।

"यस्मात् प्रमथ्य चेतस्तं जातोऽसाकं तथा विधेः।
तस्मान्मन्मथनाम्ना त्वं लोके ख्यातो भविष्यसि॥
जगत्सु कामरूपस्त्वं त्वत्समो न हि विद्यते।
अतस्त्वं कामनाम्नापि ख्यातो भव मनोभव!॥
मदनान्मदनाख्यस्त्वं शम्भोर्दर्पात् सदर्पकः।
तथा कन्दर्पनाम्नापि लोके ख्यातो भविष्यसि॥"

इति कालिकापुराणे २ अध्यायः॥

ब्रह्मणस्तस्योत्पत्तिर्यथा,—

"प्रहृष्टमानसः पुत्रं कन्येकाच्च ससर्ज्ज ह।
हृदयस्य कामिनः पुत्रः कामदेवो बभूव ह॥
कन्या षोड़शवर्षीया रत्नभूषणभूषिता॥
उवाच पुत्रं स विधिः सुदीप्तं पुरतः स्थितम्।
दुर्निवार्य्यं मत्कन्यां स्वात्मारामं मनोहरम्॥

ब्रह्मोवाच।

स्त्रीपुंसोः क्रीड़नार्थाय सदा त्वच्च विनिर्म्मितः।
हृदि योगेन सर्व्वेषामधिष्ठानं करिष्यसि॥
सम्मोहनं ससुदृग्बीजं स्मितकारणम्।
उन्मत्तबीजं ज्वलनं शुभ्रचेतनहारकम्॥
प्रगृह्येतान्मया दत्तान् सर्व्वान् सम्मोहनं कुरु।
दुर्निवार्य्यो मम वराद्भव वत्स! भवेषु च॥
यावान्हरश्चैवसुता च प्रहृष्टश्च जगद्विधिः।
दृष्ट्वा वाचं दुहितरं वरं दातुं समुद्यतः॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ३५ अध्यायः॥

(योगाचार्य्यरूपः शिवस्यावतारविशेषः। यथा, शिवपुराणे वायुसंहितायाम्। २। १०। १—२।

श्रीकृष्ण उवाच।

"युगावर्त्तेषु सर्व्वेषु योगाचार्य्यस्वरूपेण तु।
अवतारादि सर्व्वस्य शिष्यांश्च भगवन्! वद॥"

उपमन्युरुवाच।

"श्वेतः सुतारो मदनः सुहोत्रः कंक एव च॥"

महादेवः। मदयति भक्तानां मनः इति

मद+ल्युः। मनसि आनन्दजनकत्वादस्य तथात्वम्। यथा, महाभारते। १३। १७। ६६।
"उन्मादो मदनः कामो रम्यत्वोर्ध्वकरो यथः॥"
मत्तता। वरारोहाणां कामिनीनां भावविशेषः इति यावत्। यथा, महाभारते। ३। ४६। १३।
"सीधुपानेन चाल्पेन तुष्टाव मदनेन च।
विलासनेश्च विविधैः प्रेक्षणीयतरा भवत्॥")
वसन्तः। धुस्तूरः। सिक्थकम्। इति मेदिनी। मे। १०३॥ वृक्षभेदः। मयना इति भाषा। तत्पर्य्यायः। पिचुकः२ सुचुकन्दः३ कण्टकी४। इति रत्नमाला॥ पिण्डीतकः५। (तथाचास्य पर्य्यायान्तरं गुणाश्च।
"मदनः छर्दनः पिण्डो नटः पिण्डीतकस्तथा।
करहाटो मरुवकः शल्यको विषपुष्पकः॥
मदनो मधुरस्तिक्तो वीर्य्योष्णो लेखनो लघुः।
वान्तिकृद्विद्रधिहरः प्रतिश्यायव्रणान्तकः॥
रूक्षः कुष्ठकफानाहशोथगुल्मव्रणापहः॥"
धुस्तूरार्थे पर्य्यायो यथा,—
"धत्तूरधूर्त्तधुत्तूरा उन्मत्तः कनकाह्वयः।
देवता क्षितवस्तूरो महामोहः शिवप्रियः॥
मातुलो मदनश्चास्य फले मातुलपुत्रकः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
मरुवकः६ श्वसनः७ करहाटकः८ शल्यः९। इत्यमरः। २। ४। ५२—५३॥ भरतः। इति जटाधरः॥ माघः। इति हेमचन्द्रः॥ खदिरवृक्षः। इति शब्दचन्द्रिका॥ मङ्गोटवृक्षः। वकुलवृक्षः। वृक्षविशेषः। मयना-फल इति भाषा। तत्पर्य्यायः। शल्यः२ कैटर्यः३ पिण्डः४ धाराफलः५ तगरः६ करहाटः७ पिण्डीतकः८ श्वसनः९ मरुवकः१०। अस्य गुणाः। वमिकारकत्वम्। तिक्तत्वम्। उष्णवीर्य्यत्वम्। लेखनत्वम्। लघुत्वम्। रूक्षत्वम्। कुष्ठकफानाहशोथगुल्मव्रणापहत्वञ्च। इति राजनिर्घण्टः॥ आलिङ्गनविशेषः। तल्लक्षणम्। नायको नायिकायाः कण्ठे हस्तं दत्त्वा द्वितीयहस्तं तस्या मध्यदेशे दत्त्वा यदाश्लिषति। इति कामशास्त्रम्॥ ("अथ मयनम्।" मम इति भाषा।
"मयनन्तु मधूच्छिष्टं मधुश्रेष्ठञ्च सिक्थकम्।
मध्याधारो मदनकं मधूच्छितमपि स्मृतम्॥
मदनं मदुमुस्तिग्धं भूतघ्नं व्रणरोपणम्।
भग्नसन्धानकृद्वातकफवीसर्परक्तजित्॥"
इति च भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे॥
मण्डलिसर्पान्तर्गतसर्पविशेषः॥ "शिखको मदनः पार्व्वतीहरः इत्यादि।" इति सुश्रुते कल्पस्थाने चतुर्थोऽध्यायः॥)
मदनकः, पुं, (मदयतीति मद+णिच्+ल्युः स्वार्थे कः।) दमनकवृक्षः। इति रत्नमाला॥ सिक्थकार्थे क्ली। तत्पर्य्यायो यथा,—
"मयनन्तु मधूच्छिष्टं मधुश्रेष्ठञ्च सिक्थकम्।
मध्याधारो मदनकं मधूच्छितमपि स्मृतम्॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे॥)
मदनकारुरवः, पुं, (मदनेन हेतुना कारुः कामचन्यो विकृतो रवः अस्फुटध्वनिर्यस्य।) पारावतः। इति राजनिर्घण्टः॥
मदनगोपालः, पुं, (मदनश्चासौ गोपालश्चेति। भक्तचित्तोन्मादकारित्वादस्य तथात्वम्।) श्रीकृष्णः। यथा,—
"वन्दे मदनगोपालं केशोराकारमद्भुतम्।"
इति पाद्मे पातालखण्डे ६ अध्यायः॥
मदनचतुर्दशी, स्त्री, (मदनोत्सवात्मिका चतुर्दशी।) चैत्रशुक्लचतुर्दशी। यथा। अथ मदनचतुर्दशी तत्र मदनस्य पूजा कार्य्या। स्कन्दपुराणसौरागमयोः।
"मधुमासे तु संप्राप्ते शुक्लपक्षे चतुर्दशी।
प्रोक्ता मदनभङ्गीति सिद्धिदा तु महोत्सवे॥
पूजयिष्यन्ति ये मर्त्यास्तदङ्गभवपल्लवैः।
ते यान्ति परमं स्थानं मदनस्य प्रभावतः॥
चैत्रे मासि चतुर्दश्यां मदनस्य महोत्सवः।
श्रुतिस्मृतीतिहासैश्च गीतवाद्यादिभिर्नृणाम्।
भगवांस्तुष्यते कामः पुत्रपौत्रसमृद्धिदः॥
बलिं प्रति भगवद्वाक्यम्।
न मानयन्ति ये पर्व्व मादनं मानवाधमाः।
तेषां पुण्यं फलं दत्तं मया ते चैत्रमासिकम्॥
देवलः।
चैत्रशुक्लचतुर्दश्यां यः स्नायाच्छिवसन्निधौ।
पिशाचत्वं न तस्य स्यात् गङ्गायाश्च विशेषतः॥"
इति तिथितत्त्वम्॥
मदनत्रयोदशी, स्त्री, (मदनपूजार्था त्रयोदशी।) चैत्रशुक्लत्रयोदशी। तत्र मदनस्य व्रतं कर्त्तव्यम्। यथा भविष्ये।
"चैत्रशुक्लत्रयोदश्यां मदनं दमनात्मकम्।
कृत्वा संपूज्य विधिवद्दीजयेद्व्यजनेन तु॥
तत्र सन्तुष्टतः कामः पुत्रपौत्रविवर्द्धनः।
कामदेवस्त्रयोदश्यां पूजनीयो यथाविधि।
रतिप्रीतिसमायुक्तो स्त्रयोकमणिभूषितः॥"
दमनो दमनकवृक्षः। सन्तुष्टः प्रीयितः। कामदेवश्चानन्तु।
"चापेषुधृक् कामदेवो रूपवान् विश्वमोहनः।"
तत्र स्तुतिमन्त्रः।
"पुष्पधन्वन्! नमस्तेऽस्तु नमस्ते मीनकेतन!।
सुरीणां लोकपालानां धैर्य्यच्युतिकृते नमः॥
माधवात्मन्! कन्दर्प! स्मरारे! रतिप्रिय!।
नमस्तुभ्यं जिताशेषभुवनाय मनोभुवे॥
व्याधयो मम नश्यन्तु व्याधयश्च शरीरजाः।
सम्पद्यतामभीष्टं मे सम्पदः सन्तु मे स्थिराः॥
नमो माराय कामाय देवदेवस्य मूर्त्तये।
ब्रह्मविष्णुशिवेन्द्राणां मनःक्षोभकराय च॥
एवं यः कुरुते पूजामनङ्गस्य महात्मनः।
भवन्ति नापदस्तस्य तस्मिन्वर्षे कदाचन॥"
इति विधितत्त्वम्॥
मदनत्रयोदशी, स्त्री, (मदनपूजाविषयिणी त्रयोदशी।) चैत्रशुक्लत्रयोदशी। अत्र मदनव्रतं कार्य्यम्। यथा,
ऋषय ऊचुः।
"श्रोतुमिच्छामहे सूत! मदनत्रयोदशीव्रतम्।
सुतानेकोनपञ्चाशत् येन लेभे दितिः पुनः॥
सूत उवाच।
यद्वशिष्ठादिभिः पूर्व्वं दितेः कथितमुत्तमम्।
विस्तरेणैतदेवेदं मत्सकाशान्निबोधत॥
चैत्रे मासि सिते पक्षे त्रयोदश्यां नियतव्रतः।
स्थापयेदग्रतः कुम्भं सिततण्डुलपूरितम्॥
नानाफलयुतं तद्वद्दिव्यदर्भसमन्वितम्।
सितवस्त्रयुगच्छन्नं सितचन्दनचर्चितम्॥
नानाभक्ष्यफलोपेतं सहिरण्यञ्च शक्तितः।
ताम्रपात्रं शुभोपेतं तस्योपरि निवेदयेत्॥
तस्मादुपरि कामन्तु कदलीदलसंस्थितम्।
कुर्य्याच्छर्करयोपेतां रतिं तस्य च वामतः॥
गन्धधूपं ततो दद्यात् गीतवाद्यञ्च कारयेत्।
तद्भावे कथां कुर्य्यात् कामकेशवयोर्नरः॥
कामनाम्ना हरेरर्च्चां स्नापयेद् गुडवारिणा।
शुक्लपुष्पाक्षतैर्लेपैरर्च्चयेन्मधुसूदनम्॥
कामाय पादौ संपूज्य जंघे सौभाग्यदाय च।
ऊरू स्मरायेति पुनर्मन्मथायेति वै कटिम्॥
स्वच्छोदरायेत्युदरं पद्मनाभायेत्युरो हरेः।
मुखं पद्मसुखायेति बाहू पञ्चशराय वै॥
नमः सर्व्वात्मने मौलिमर्च्चयेदिति केशवम्।
ततः प्रभाते तं कुम्भं ब्राह्मणाय निवेदयेत्॥
ब्राह्मणान् भोजयेद्भक्त्या स्वयञ्च लवणाहते।
शुक्लाय दक्षिणां दद्यादिमं मन्त्रमुदीरयेत्॥
प्रीयतामत्र भगवान् कामरूपी जनार्द्दनः।
हृदये सर्व्वभूतानामात्मन्यो यो विधीयते॥
अनेन विधिना सर्व्वं मासि मासि समाचरेत्।
उपवासी त्रयोदश्यामर्च्चयेद् विष्णुमव्ययम्॥
फलमेकञ्च संप्राश्य द्वादश्यां भूतले स्वपेत्।
ततस्त्रयोदशे मासि धृतं धेनुसमन्वितम्॥
शय्यां दद्यादनङ्गाय सर्व्वोपस्करसंयुताम्।
काञ्चनं कामदेवञ्च शुक्लां गाञ्च पयस्विनीम्॥
वासोभिर्भूषिताम्यर्च्यं पूज्य शुक्ला विभूषणैः।
शय्यां गवादिकं दद्यात् प्रीयतामित्युदीरयेत्॥
होमं शुक्लैस्तिलैः कुर्य्यात् कामनामानि कीर्त्तयन्।
गव्येन सर्पिषा चैव पायसेन च धर्म्मवित्॥
विप्रेभ्यो भोजनं दद्यादिक्षुशाल्यविवर्जितः।
इक्षुदण्डानथो दद्यात् पुष्पमालाश्च शक्तितः॥
यः कुर्य्यादिधिनानेन मदनद्वादशीमिमाम्।
सर्व्वपापविनिर्म्मुक्तः प्राप्नोति हरिसान्निध्यताम्।
इह लोके वरान् पुत्रान् सौभाग्यञ्च समश्नुते॥"
इति मत्स्यपुराणे ७ अध्यायः॥
मदनपाटकः, पुं, (मदनं तद्दीपकं पटतीति। पट+ण्वुल्। खरेण कामोद्दीपनात्तथात्वम्।) कोकिलः। इति राजनिर्घण्टः॥
मदनमोहनः, पुं, (मदन उन्मादकश्चासौ मोहनश्चेति कर्म्मधारयः। तुद्+णिच्+ल्युः।) श्रीकृष्णः। यथा,—

"वन्दे मदनगोपालं केशोराकारमद्भुतम्।
यमाहुर्यौवनोद्भिन्ने श्रीमन्मदनमोहनम्।"
इति माद्ये पातालखण्डे ६ अध्यायः॥

मदनशलाका, स्त्री, (मदनोद्दीपिका शलाकेव। अस्याः कामोद्दीपकत्वात्तथात्वम्।) कामोद्दीपकौषधम्। सारिकाशली। इति मेदिनी। के, २३५। कोकिला। इति शब्दरत्नावली॥

मदनसारिका, स्त्री, (मदनोद्दीपनाय सारिका।) पक्षिभेदः। सालिक् इति भाषा॥ तत्पर्य्यायः। शलाका २ सारिका ३ चित्रलोचना ४ कुरुण्टी ५। इति धटाधरः॥

मदना, स्त्री, (मदयति मत्ततां जनयतीति। मद्+णिच्+युः। यद्वा, माद्यति अनया। मद्+युट्। स्त्रियां टाप्।) सुरा। इति हेमचन्द्रः। ३। ५६७॥

मदनाङ्कुशः, पुं, (मदनस्य कामस्य अङ्कुश इव।) लिङ्गम्। इति त्रिकाण्डशेषः॥ नखम्। इति कामाङ्कुशशब्ददर्शनात्। यथा,—
"कामाङ्कुशाङ्कुशितकामिमनङ्गलेन्द्रे।"
इति श्रुतबोधे कालिदासः॥

मदनायकः, पुं, (मदनं उन्मादकं अयं शिरोभागो यस्य।) कोद्रवः। इति राजनिर्घण्टः॥ (विवरणमस्य कोद्रवशब्दे ज्ञातव्यम्॥)

मदनायुधः, पुं, (मदनस्यायुधः।) भगम्। इति शब्दचन्द्रिका॥

मदनायुषः, पुं, (मदनस्यायुर्जीवनं इव समानान्तोऽच्। निपातनात् साधुः।) कामवर्द्धकत्वात्तथात्वम्। कामवर्द्धिचुपः। इति राजनिर्घण्टः॥

मदनालयः, पुं, (आलीयतेऽस्मिन्निति आ+ली+अधिकरणे अच्। मदनस्यालयः।) षष्ठीसमासः।) भगम्। मदनपर्य्यायकशब्दोत्तरग्रहपर्य्यायकशब्देन भगस्योक्तत्वात्। यथा,—
"स्मृष्ट्वेराकौरगं कुसुमधनुषो मन्दिरमधो
पुरो ध्यायन् ध्यायन् यदि जपति भक्तस्तव
मनुम्॥"
इति कर्पूरस्तवः॥

अन्यसमावधिसप्तमस्थानम्। तच्च आयास्थानम्। यथा,—
"स्वर्णानुषान् क्रियकृष्णगवीक्षीरान्वयूके
दिग्वर्द्धीस्त्रियधिपशरान् शशविंशांच विप्रान्।
संग्रामेसान् वदति यवनक्षान्यतुन्नान् सुतुन्नान्
तानेवांशान् मदनभवनेष्वाह नीचान् सुनीचान्॥"
इति ज्योतिषिकायां मदनभवनशब्ददर्शनात्॥

मदनावस्था, स्त्री, (मदनस्यावस्था।) कामावस्था। सा तु उद्वेगरूपा। विरुद्ध इति भावः। यथा। ततः प्रभृति मदनावस्थो राजा निरूप्यते।
"आशे तस्मै गौरी सा बाला प्रहर्षीति मे
चित्तम्।
न च निस्नादिव सलिलं निवर्त्तते मे ततो हृदयम्॥"
इत्यभिज्ञानशाकुन्तले ३ अङ्कः॥ मदनावस्थ इति राज्ञोऽच उद्वेगरूपा पञ्चमी कामावस्था। यदाह भरतः। उद्वेगः पञ्चमः प्रोक्त इति। सचिन्तमिति केनोपायेन मम शकुन्तलालाभो भविष्यति। इति तट्टीका॥

मदनी, स्त्री, (माद्यति अनया इति। मद्+करणे ल्युट्। स्त्रियां ङीप्।) सुरा। इति हारावली॥ कस्तूरी। अतिमुक्तकः। इति राजनिर्घण्टः॥

मदनेच्छाफलः, पुं, (मदनेच्छां फलति जनयतीति अच्।) वट्टरसालः। इति राजनिर्घण्टः॥

मदनोत्सवः, पुं, (मदनाय उत्सवः।) उत्सवविशेषः। होलाका इति ख्याता। तत्पर्य्यायः। सुवसन्तकः २। इति हारावली॥

मदनोत्सवा, स्त्री, (मदनाय उत्सवो यस्याः।) स्वर्गवेश्या। इति शब्दरत्नावली॥

मदप्रयोगः, पुं, (मदस्य प्रयोगः।) करिणां मदोद्गमः। तत्पर्य्यायः। वस्तारम्२। इति त्रिकाण्डशेषः॥

मदभञ्जिनी, स्त्री, (मदं उन्मत्ततां भनक्ति दूरीकरोतीति। मद+भनज्+"नन्द्यहिपचादिभ्यो ल्युणिन्यचः।" ३।१।१३४। इति णिनिः। स्त्रियां ङीप्।) शतमूली। इति शब्दचन्द्रिका॥ (गुणादयोऽस्याः शतमूलीशब्दे ज्ञातव्याः॥)

मदयन्तिका, स्त्री, (मदयन्ती+ततः कन् टाप्। पूर्व्वह्रस्वश्च।) मल्लिका। इति शब्दरत्नावली॥ (यथा, सुश्रुते चिकित्सितस्थाने ६ अध्याये।
"त्रिफलालक् त्रिकटुका सुरसा मदयन्तिका।
वायस्यारग्वधाग्नाश्च तुलां कुर्य्यात् पृथक्
पृथक्॥")

मदयन्ती, स्त्री, (मद्+झच्+ङीप्।) वनमल्लिका। इति रत्नमाला॥ काटमल्लिका इति भाषा॥ मल्लिका। इतिराजनिर्घण्टः॥ (तथाचास्याः पर्य्यायो यथा,—
"मल्लिका मदयन्ती च प्रीतभीरुश्च भूपदी।"
इतिभावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥
"मदयन्त्यद्रिजः काथस्तदत् समधुशर्करः।"
इति च वैद्यकचक्रपाणिसंग्रहे रक्तपित्ताधिकारे॥)

मदयित्नु, स्त्री, (मदयतीति। मद्+णिच्।
"स्त्रनिकृषिपुषिगदिसदिभ्यो यीरित्नुच्।" उणा० ३। २८। इति मद्+इत्नुच्। "अयामन्ताण्वाय्येत्नुषु।" ६।४।५५। इति ईकारादेशः।) मद्यम्। इति मेदिनी। ने, २०२॥

मदयित्नुः, पुं, (मदयतीति। मद्+णिच्।
"स्त्रनीति।" उणा०। २। २८। इति इत्नुच्। ईकारादेशश्च।) कामदेवः। औषिकः। इति शब्दरत्नावली॥ मदयुक्तः। इति मेदिनी। ने, २०२॥ क्लेषः। इति त्रिकाण्डशेषः॥

मदविक्षिप्तः, पुं, (मदेन विक्षिप्तचलितमनाः।) मत्तहस्ती। इति शब्दचन्द्रिका॥

मदशाकः, पुं, (मदकरः शाकोऽस्य।) उपोदकी। इति राजनिर्घण्टः॥

मदसारः, पुं, (मदं सारयति दूरीकरोति। इति मद+ट+णिच्+अण्।) तूलवृक्षः। इति राजनिर्घण्टः॥

मदहस्तिनी, स्त्री, (मदेन हस्तिनीव।) महाकरञ्जः। इति राजनिर्घण्टः॥

मदहेतुः, पुं, (मदस्य हेतुः कारणम्।) धातकी। इति वैद्यकम्। मत्तताकारणञ्च। (मदरोगस्य हेतुः यथा,—
"यदा तु रक्तवाहीनि रससंज्ञावहानि च।
पृथक् पृथक् समस्ता वा स्रोतांसि कुपिता
मलाः॥
मलिनाहारशीलस्य रजोमोहावृतात्मनः।
प्रतिहत्यावतिष्ठन्ते जायन्ते व्याधयस्तदा॥
मदमूर्च्छाश्च संन्यासास्तेषां विद्याद्विचक्षणः।
यथोत्तरं बलाधिक्यं हेतुलिङ्गोपशान्तिषु॥"
इति चरके सूत्रस्थाने चतुर्विंशेऽध्याये॥)

मदस्थलं, क्ली, (मदस्य स्थलम्।) मदस्थानम्। यथा, शब्दरत्नावली।
"अवदंशः सुरापानं शुण्डापानं मदस्थलम्।"

मदस्थानं, क्ली, (मदस्य स्थानम्।) मद्यपानस्थानम्। तत्पर्य्यायः। शुण्डापानम्२। इत्यमरः। २।१०।४१।

मदाढ्यः, पुं, (मदेन मदजनकरसेन ताड्यते इति ख्यातेन आढ्यः युक्तः।) तालवृक्षः। इति राजनिर्घण्टः॥ (गुणादिविवृतिरस्य तालशब्दे ज्ञातव्या॥) मदयुक्ते, त्रि॥

मदाढ्या, स्त्री, (मदेन आढ्या।) लोहितभिण्टी। इति शब्दचन्द्रिका॥

मदातङ्कः, पुं, (मदजनितः आतङ्कः रोगः।) मदात्ययरोगः। इति राजनिर्घण्टः॥

मदात्ययः, पुं, (मदेन अत्ययो नाशोऽस्मुखताच्च।) मद्यपानादिजन्यरोगविशेषः। तत्पर्य्यायः। मदातङ्कः२ पानात्ययः३ मदव्याधिः४ मदः५। इति राजनिर्घण्टः॥ अथ मदात्ययादीनां निदानान्याह।
"विषस्य ये गुणा दृष्टाः सन्निपातप्रकोपणाः।
त एव मद्ये दृश्यन्ते विषे तु बलवत्तराः॥
तस्मादविधिपीतेन तथा मात्राधिकेन च।
युक्तेन चाहितैरन्नैरकाले सेवितेन च॥
मदेन खलु जायन्ते मदात्ययसुखा गदाः॥"
अविधिप्रयुक्तं मद्यं विकारान्तरमप्युत्पादयतीत्याह।
"निभक्तमेकान्तत एव मद्यं
निषेव्यमाणं मनुजेन नित्यम्।
उत्पादयेत् कष्टतमान् विकारा-
नुत्पादयेच्चापि शरीरभेदम्॥
एकान्ततो नैरन्तर्य्येण विकारान् मदात्ययादीन्।
शरीरस्य भेदं नाशम्॥ ॰॥ मदात्ययादीनां
इत्यन्तरमप्याह।

"क्षुद्येन भीतेन पिपासितेन
शोकाभितप्तेन बुभुक्षितेन।
व्यायामभाराध्वपरिक्षतेन
वेगावरोधाभिहतेन चापि॥
अत्यम्लरूक्षावततोदरेण
साजीर्णशुक्तेन तथाबलेन।
उष्णाभितप्तेन च सेव्यमानं
करोति मद्यं विविधान् विकारान्॥"

तानेव विकारान् विवृणोति।

"पानात्ययं परमदं पानाजीर्णमथापि वा॥"

पानविकारान् विवृणोति।

"पानविभ्रममुग्रञ्च तेषां वक्ष्यामि लक्षणम्।"

तत्र मदात्ययस्य सामान्यं लक्षणमाह।

"शरीरदुःखं बलवत् प्रमोहो हृदयव्यथा।
अरुचिः प्रततं तृष्णा ज्वरः प्रीतोष्णलक्षणः॥
शिरःपार्श्वास्थिसन्धीनां वेदना विक्षते यथा।
जायतेऽतिबलात् जृम्भा स्फुरणं वेपनं श्रमः॥
उरोविबन्धः कासश्च श्वासो हिक्का प्रजागरः।
शरीरकम्पः कर्णाक्षिसुखरोगाश्चिकित्सकग्रहः॥
हृद्दिविड्भेदावुत्क्लेशौ वातपित्तकफात्मकः।
भ्रमः प्रलापो रूपाणामसतां चैव दर्शनम्॥
लवणभस्मलताप्रख्यैः पांशुभिश्चावपूरितम्।
प्रधर्षणं विहङ्गैश्च भ्रान्तचेताः स मन्यते॥
व्याकुलानामशस्तानां स्वप्नानां दर्शनानि च।
मदात्ययस्य रूपाणि सर्व्वाण्येतानि लक्षयेत्॥"

अथ मदात्ययस्य वातिकस्य निदानमाह।

"स्त्रीशोकभयभाराध्वकर्म्मभिर्योऽतिकर्षितः।
रूक्षाल्पप्रमिताशी च यः पिबत्यतिमात्रया॥
रूक्षं परिणतं मद्यं निशि निद्रां निहन्ति च।
करोति तस्य तच्छीघ्रं वातप्रायं मदात्ययम्॥"

तत् मद्यम्॥*॥ अथ तस्य लक्षणमाह।

"हिक्काश्वासशिरःकम्पपार्श्वशूलप्रजागरैः।
विद्याद्दुष्प्रलापस्य वातप्रायं मदात्ययम्॥"

अथ पैत्तिकस्य निदानमाह।

"तीक्ष्णोष्णं मद्यमम्लञ्च योऽतिमात्रं निषेवते।
अम्लोष्णतीक्ष्णभोजी च क्रोधनोऽत्यातपप्रियः।
तस्योपजायते तीव्रः पित्तप्रायो मदात्ययः॥"

अथ तस्य लक्षणमाह।

"तृष्णादाहज्वरस्वेदमोहातीसारविभ्रमैः।
विद्याद्धरितवर्णस्य पित्तप्रायं मदात्ययम्॥"

अथ श्लैष्मिकस्य मदात्ययस्य निदानमाह।

"मधुरस्निग्धगुर्व्वाशी यः पिबत्यतिमात्रया।
व्यायामदिवास्वप्नप्रसक्त्याशनसुखे रतः।
मदात्ययं कफप्रायं स नरो लभते ध्रुवम्॥"

अथ तस्य लक्षणमाह।

"छर्द्यरोचकहृल्लासतन्द्रास्तैमित्यगौरवैः।
विद्याच्छीतपरीतस्य कफप्रायं मदात्ययम्।"

अथ सान्निपातिकस्य मदात्ययस्य निदानं लक्षणञ्चाह।

"त्रिदोषहेतुभिः सर्व्वैः सर्व्वैर्लिङ्गैर्मदात्ययः।"

अथ परमदमाह।

"श्लेष्मोत्क्लेशोऽङ्गगुरुता विरसास्यता च
विण्मूत्रसक्तिरथ तन्द्रिररोचकश्च।
लिङ्गं परस्य तु मदस्य वदन्ति तज्ज्ञा
स्तृष्णा रुजा शिरसि सन्धिषु चापि भेदः॥"

तन्द्रिस्तन्द्रा॥*॥ पानाजीर्णमाह।

"आध्मानसुप्तमथवोद्गिरणं विदाहः
पाने त्वजीर्णमुपगच्छति लक्षणानि।"

उद्गिरणं वान्तिः उद्गारो वा। पीयत इति पानं मद्यम्॥*॥ पानविभ्रममाह।

"कृष्णाक्षनीलकफसंस्रवकण्ठधूम-
मूर्च्छाविभीष्वरशिरोरुजनप्रदेहाः।
द्वेषः सुरान्नविकृतेषु च तेषु तेषु
तं पानविभ्रममुशन्त्यखिलेषु धीराः॥"

कण्ठधूमः कण्ठाद्धूमनिर्गम इव। प्रदेहः कफेन लिप्तास्यता। द्वेषः सुरान्नविकृतेषु सुराविकारेषु अन्नविकारेषु च द्वेषः।

अखिलेषु मद्यविकारेषु॥*॥ असाध्यानां मदात्ययादीनां लक्षणमाह।

"दीनोत्तरोष्ठमतिशीतममन्दताहं
तैलप्रभास्यमतिपानहतं त्यजेच्च।
जिह्वोष्ठदन्तमसितन्त्वथवापि नीलं
पीते च यस्य नयने रुधिरप्रभे च॥
हिक्का ज्वरो वमथुवेपथुपार्श्वशूलाः
कासभ्रमावपि च पानहतं त्यजेत्तम्॥"

अथ मदात्ययादीनां चिकित्सा।

"मदोत्यानान्तु रोगाणां मद्यमेव हि भेषजम्।
यथा दहनदग्धानां दहनस्वेदनं हितं।
मिथ्यातिहीनमदेन यो व्याधिरुपजायते।
समेनैव निपीतेन मद्येन स हि शाम्यति॥
बीजपूरकदृक्चाम्लकोलदाडिमसंयुतम्।
यवानीहबुधाजाजीशृङ्गवेरावचूर्णितम्॥
सक्षौद्रैः शुक्तभिर्युक्तमवदंशैश्चिरोत्थितम्।
दद्यात् सलवणं मद्यं पैत्तिकं वातशान्तये॥
मद्यं सौवर्चलाद्योषयुक्तं किञ्चिच्चलान्वितम्।
जीर्णमद्याय दातव्यं वातपानात्ययापहम्॥
चव्यं सौवर्चलं हिङ्गु पूरकं विश्वदीप्यकम्।
चूर्णं मद्येन पातव्यं पानात्ययरुजापहम्॥
लावतित्तिरिदक्षाणां रसैश्च शिखिनामपि।
पक्षिणां लघ्वम्लशाकानामानूपानां तथोदनैः॥
स्निग्धोष्णलवणाद्यैश्च वेसवारैर्मुखप्रियैः।
स्निग्धैर्गोधूमिकैरन्नैर्व्वातमद्यात्ययं जयेत्॥
नारीणां यौवनोन्मानां निर्दयैरुपगूहनैः।
श्रोण्यूरुकुचभारैश्च संरोधोद्यत्सुखप्रदैः॥
शयनाच्छादनैरुष्णैरुष्णैश्चान्तर्गृहैः सुखैः।
उत्पन्नो मारुतात् शीघ्रं प्रशाम्यति मदात्ययः॥

पित्तपानात्यये योज्याः सर्व्वतश्च क्रिया हिमाः।
सितामाक्षिकसंयुक्तं मद्यमर्द्धोदकं पिबेत्॥
मद्यं खर्জ্জूरमृद्वीकापरूषकरसैर्युतम्।
सदाडिमरसं शीतं शुक्तभिश्चावचूर्णितम्॥
सशर्करं वा माध्वीकं संयुक्तमधवापरम्।
दद्यात् प्रकृष्टकं काले पातुं पित्तमदात्यये॥

शशान् कपिञ्जलानेणान् लावानसिनपुच्छकान्।
मधुराम्लान् प्रयुञ्जीत भोजने शालिषष्टिकान्॥
पटोलयूषमिश्रं वा छागलं कल्पयेद्रसम्।
सतीलं सुन्नमिश्रं वा दाडिमामलकान्वितम्।
द्राक्षामलकखर्জ্জूरपरूषकरसेन च।
कल्पयेत् तर्पणान् यूषान् रसांश्च विविधात्मकान्॥
शीतानि चान्नपानानि शीतशय्यासनानि च।
शीतवातजलस्पर्शाः शीतान्युपवनानि च॥
क्षौमपद्मोत्पलानाञ्च मणीनां मौक्तिकस्य च।
चन्दनोदकशीतानां स्पर्शाश्चन्द्रांशुशीतलाः।
रूक्षतर्पणसंयुक्तं यवानीशोषसंयुतम्।
यवगोधूमकं चान्नं रूक्षयूषैश्च भोजयेत्॥
कुलत्थानाञ्च शुष्काणां मूलकानां रसेन वा।
प्रभूतकटुसंयुक्तं यावान्नं वा प्रदापयेत्॥
छागमांसरसं रूक्षमम्लं वा जाङ्गलं रसम्।
क्षौद्रयूषं मनागम्लं पिबेत् कफमदात्यये॥
स्थाल्यामथ कपाले वा भृष्टं कृत्वा तु नीरसम्।
कट्फलवर्गं मांसं खादेन कफमदात्यये॥
पाचकद्रव्ययुक्तेन मद्येनोल्लेखनं मतम्।
मदात्यये कफोद्भूते लङ्घनञ्च यथाबलम्॥
यदिदं कर्म्म निर्द्दिष्टं वातपित्तकफान् प्रति।
सर्व्वे सर्व्वमेवेदं प्रयोक्तव्यं चिकित्सकैः॥"

इति भावप्रकाशः॥

गरुड़पुराणोक्तमदात्ययनिदानादिकं तत्रैव १६० अध्याये द्रष्टव्यम्॥ (तथाचास्य सकारणलक्षणचिकित्सादिकं यथा,—

"हालाहलाहलसमं भजते वियोगात्
सेव्यं न शिष्यमुनेः कथितं सुरेन्द्रैः।
तृष्णा वमिः श्वसनमोहनदाहतृष्णा
संजायतेऽतिसरणं विकलेन्द्रियत्वम्॥
ये नित्यसेवनादुष्टा मद्यस्य मनुजा भृशम्।
विषमाहारसदृशी सुरा मोहनकारिणी॥
यथा विषं प्राणहरं वियोगाद्
योगेन तच्चाप्यमृतं वदन्ति।
तथा सुरा योगयुता हिता स्या-
दयोगतश्चारभतेऽतिकष्टम्॥
क्षुधातुरे तृषाक्रान्ते सुरा वा भोजनं विना।
न च क्षीणैर्विना भक्ता विनाहारातिपानकम्॥
अत्यश्नतोऽप्यजीर्णेऽपि सुरा पीता रुजाकरी।
यस्य प्रलपनञ्चापि न च वातमदात्ययः।
दाहमूर्च्छातिसारश्च ज्वरः पित्तमदात्यये॥
छर्द्यरोचकहृल्लासतन्द्रास्तैमित्यगौरवम्।
शीतता च प्रतिश्यायः कफजे च मदात्यये।
त्रिषु दोषेषु समता लिङ्गैर्येषामुपक्रमः।
स त्रिदोषसमुद्भूतो मद्यमूर्च्छा भिषग्वर!॥
वमनञ्च प्रशस्तञ्च निद्रासंसेवनं पुनः।
स्नानं हितं पयःपानं भोजने सगुडं दधि॥
मस्तुखण्डं सखर्জ্জूरं मृद्वीका दाडिमान्विका।
श्यामला च परूषञ्च श्रेष्ठो घ्नन्ति मदात्ययम्॥
द्राक्षामलकखर्জ্জूरपरूषकरसेन वा।
कल्कयेत् पयसा तनु पानं सर्व्वमदात्यये॥

पथ्या क्षौद्रेण संयुक्तं पयःपानं मदात्यये ।"
इति मदात्ययचिकित्सा ॥

अथ पूतीपलमदात्ययचिकित्सारभ्यते ।
"पूतीपलमदे कम्पो मोहो मूर्च्छा क्लमस्तमः ।
प्रस्वेदो विधुरत्वञ्च लालास्रावश्च जायते ॥
भ्रमस्तमपरीतत्वं विज्ञेयं पूतिपर्च्छिते ।
मानवो लक्षणैरेभिर्ज्ञेयः पूतिमूर्च्छितः ॥
तस्य शीतं जलं पीतं वस्तिवातहितं भवेत् ।
शर्करामक्षये देया सुरा वा शर्करान्विता ॥
कोद्रवाद्यां भवेन्मूर्च्छा देयं क्षीरं सुशीतलम् ।
धुस्तूरकमदे देयं शर्करासहितं दधि ॥
कलिनी करवीरश्च मोहिनी मदयन्तिका ।
अन्येषामपि कन्दानां वमनञ्चाशु कारयेत् ॥
पाययेत् शर्करायुक्तं क्षीरं वा दधि शर्कराम् ।"
इति श्रीमदृषभदेवप्रणीते हारीतोक्तरे तृतीयस्थाने मदात्ययचिकित्सानाम सप्तदशोऽध्यायः ॥)

मदाम्बातः, पुं, (मदाय मत्ततोद्रेकाय आम्नायते वाद्यते सेति । आ + म्ना + कर्म्मणि क्तः ।) गजघण्टा । इति हारावली । २०४ । हाती उपरेर घण्टा इति भाषा ॥

मदाम्बरः, पुं, (मदो दानवारि अम्बरमिवाच्छादकत्वात् ।) मत्तहस्ती । इति त्रिकाण्डशेषः ॥

मदारः, पुं, (माद्यति मत्तो भवतीति । मद् + "अन्निमदिमन्दिभ्य आरन् ।" उणा० । ३ । १३४ । इति आरन् ।) एरण्डी । धूर्त्तः । इति विश्वः ॥ शूकरः । कासुकः । गन्धभेदः । मत्तहस्ती । नृपभेदः । रत्नुपादिकोषः ॥

मदार्म्मदः, पुं, (मदार्म्म मदजन्यं अर्म्म नेत्ररोगविशेषं ददातीति । दा + कः ।) मसकमत्स्यः । इति त्रिकाण्डशेषः ॥

मदालापी, [न्] पुं, (मदेन मत्ततया आलपतीति । आ + लप् + णिनिः ।) कोकिलः । इति शब्दमाला ॥

मदाष्टः, पुं, (मदो मृगमद आष्टाख्या यस्य । इषः ।) कस्तूरी । इति त्रिकाण्डशेषः ॥ (कस्तूरीशब्दस्य विवरणं ज्ञातव्यम् ॥)

मदिरः, पुं, (मद् + किरच् ।) रक्तखदिरः । इति शब्दरत्नावली ॥ मदकरे, त्रि । यथा, ऋग्वेदे । ५ । ६१ । ११ ।
"य ईं चकार न्याभुः पिबन्तो मदिरं मधु ।"
"मदिरं मदकरं मधु ।" इति तद्भाष्ये सायणः ।)

मदिरा, स्त्री (माद्यतीति । मद् + किरच् । अजादित्वात् टाप् ।) मत्तखञ्जनः । इति शब्दरत्नावली ॥ (यथा, प्राङ्मन्त्रे । ३ । ५ ।
"यदि मदिरायतनयनां
कामयितुमयं प्रधरतीति ।"
माद्यत्यनयेति । मद् + "इषि मदीति । उणा० । १ । ५२ । इति किरच् ।) मादकद्रव्यविशेषः । मद इति भाषा । (यथा,—
"पिष्टका-धात्र-पनिशाय-द्राक्षा-खर्জ্জूरजा परा ।
सम्भाराधिक्यतोऽत्यन्तं वारुणी मदिरा स्मृता ।"
इति परे सप्तस्थाने १० अध्यायः ॥

यथाच भ्रान्तिशतके । ४ । २४ ।
"पीत्वा मोहमयीं प्रमोदमदिरामुन्मत्तभूतं जगत् ।")

तत्पर्य्यायः । सुरा २ वल्लिप्रिया ३ हाला ४ परिस्रुत् ५ वरुणात्मजा ६ गन्धोत्तमा ७ प्रसन्ना ८ इरा ९ कादम्बरी १० परिस्रुता ११ कश्यम् १२ मद्यम् १३ । इत्यमरः । २ । १० । ४० ॥ मानिका १४ । इति शब्दरत्नावली ॥ कपिशी १५ गन्धमादनी १६ माधवी १७ कलोयम् १८ मदः १९ कापिशायनम् २० । इति जटाधरः ॥ वारुणी २१ मत्ता २२ सीता २३ चपला २४ कामिनी २५ प्रिया २६ मदगन्धा २७ माध्वीकम् २८ मधु २९ सन्धानम् ३० आसवः ३१ अम्लता ३२ वीरा ३३ मेधावी ३४ मदनी ३५ सुप्रतिभा ३६ मनोज्ञा ३७ विधाता ३८ मोदिनी ३९ हली ४० गुणारिष्टम् ४१ सरकः ४२ मधूलिका ४३ मदोत्कटा ४४ मदगन्धा ४५ । इति राजनिर्घण्टः ॥ सीधुः ४६ मैरेयम् ४७ वलवल्लभा ४८ । इति भावप्रकाशः ॥ कारणम् ४९ । तत्त्वम् ५० इति कैवल्यतन्त्रम् ॥ मदिरा ५१ परिप्लुता ५२ कल्यम् ५३ स्वादुरसा ५४ शूण्डा ५५ हारहूरम् ५६ माद्वीकम् ५७ मदना ५८ देवरुधा ५९ कापिशम् ६० चन्द्रिका ६१ । इति हेमचन्द्रः । ३ । ५६६ ॥ सा द्वादशविधा यथा,—
"माध्वीकं पानसं द्राक्षं खार्জ্জूरं तालमैक्षवम् ।
मैरेयं माक्षिकं टाङ्कं मधूकं नारिकेलजम् ॥
सुखमन्नविकारोत्थं मद्यानि द्वादशैव च ॥"
इति जटाधरः ॥

अस्याः सामान्यगुणाः । सुमधुरास्वत्वम् । कफमारुतनाशनत्वम् । लघुत्वम् । पुष्टिकरत्वम् । हृद्यत्वम् । सारकत्वम् । मदावहत्वञ्च ॥ * ॥ धातकीरसगुड़ादिप्लुता मदिरा गौड़ी । तद्गुणा यथा । तीक्ष्णत्वम् । उष्णत्वम् । मधुरत्वम् । वातनाशित्वम् । पित्तबलकारित्वम् । दीपनत्वम् । पथ्यत्वम् । कान्तिवह्निकारित्वञ्च ॥ पुष्पफलादिमधुसारमयी मदिरा माध्वी । तद्गुणा यथा । मधुरत्वम् । गात्रोष्णत्वम् । पित्तवातनाशित्वम् । पाण्डुकामलगुल्मार्शःप्रमेहशमनत्वञ्च ॥ * ॥ विविधधान्यजाता मदिरा पैष्टी । तद्गुणा यथा । कटुत्वम् । अम्लत्वम् । तीक्ष्णत्वम् । गौड़ीसमत्वम् । वातहरत्वम् । कफकरत्वम् । ईषत्पित्तकरत्वम् । मोहनञ्च ॥ तालादिरसनिर्य्यासप्लुता मदिरा सैन्धी हाला च । तद्गुणा यथा । शीतत्वम् । कषायत्वम् । अम्लत्वम् । पित्तहरत्वम् । वातदाहत्वञ्च ॥ * ॥ सर्व्वद्रव्यरसनिर्य्यासरूपमदिरागुणाः । शीतलत्वम् । गुरुत्वम् । मोहनत्वम् । बलदत्वम् ॥ हृद्यत्वम् । क्लान्तसन्तापनाशकत्वञ्च ॥ * ॥ नानाद्रव्यकृतप्लुता मदिरा कादम्बरी । तद्गुणा यथा । सुमधुरत्वम् । पित्तश्रमहरत्वम् । मदकारित्वञ्च ॥ * ॥ ऐक्षवमदिरागुणाः । स्निग्धत्वम् । मदोत्कटत्वञ्च ॥ * ॥ यवधान्यकृत-

मदिरागुणाः । गुरुत्वम् । विष्टम्भदायकत्वञ्च ॥ शर्करामधातकीतोयकृतमदिरागुणाः । शीतत्वम् । मनोहरत्वञ्च ॥ * ॥ शार्करमद्यगुणाः । हृद्यत्वम् । दीपनत्वम् । मोहनत्वञ्च । इति नानामद्यगुणाः ॥ * ॥ ऋतुविशेषे पेयमदिरा यथा,
"गौड़ी तु शिशिरे पेया पैष्टी हेमन्तवर्षयोः ।
शरद्ग्रीष्मवसन्तेषु माध्वी ग्राह्या न चान्यथा ॥
कादम्बरीशर्करजादिमद्यं
सुशीतलं हृद्यकरं मदाढ्यम् ।
माध्वीसमं स्यात् लघुहृद्यजातं
मद्यं सुशीतं गुरु तर्पणञ्च ॥
अन्यथा कुरुते पानं मद्यं सन्तापशोषदम् ।
अन्नदोषमदात्यादिकारकं मूर्च्छनञ्च यत् ॥"
नवजीर्णमद्ययोर्गुणाः ।
"मद्यं नवं सर्व्वविकारहेतुः
सर्व्वन्तु वातादिकदोषदायि ।
जीर्णन्तु सर्व्वं सकलामयघ्नं
धूर्णप्रदं हृद्यकरञ्च दीपनम् ॥"
अन्यच्च ।
"पर्य्युषितमल्पमेलनमम्लं वा पिच्छिलं विगन्धं वा ।
दोषावहमविशेषान्मद्यं हृद्यं विवर्জ্জयेत् ॥
मद्यप्रयोगं कुर्व्वन्ति शूद्रादिषु महार्त्तिषु ।
द्विजेष्वित्थिषु न ग्राह्यं यद्यप्युज्जीवयेन् मृतम् ॥"
इति मद्यवर्জ্জ्यावर्জ্জ्यम् ॥ * ॥
"अन्ये द्वादशधा मद्यभेदानाहुर्मनीषिणः ।
उक्तस्यान्तर्भवन्तीति नान्येषां पृथगीरितम् ॥"
इति राजनिर्घण्टे मद्यप्रकरणम् ॥

अथ मतान्तरे मद्यस्य लक्षणं गुणाश्च ।
"पेयं यन्मादकैर्लोकैस्तन्मद्यमभिधीयते ।
यथारिष्टं सुरा सीधुराश्ववाद्यमनेकधा ॥
मद्यं सर्व्वं भवेदुष्णं पित्तकृत् वातनाशनम् ।
भेदनं शीघ्रपाकञ्च रूक्षं कफहरं परम् ॥
अस्रघ्नं दीपनं रुच्यं पाचनं चाशुकारि च ।
तीक्ष्णं सूक्ष्मञ्च विशदं व्यवायि च विकाशि च ॥"

अथारिष्टलक्षणं गुणाश्च ।
"पक्वौषधाम्बुसिद्धं यन्मद्यं तत् स्यादरिष्टकम् ।"
अरिष्टं मद्यमिति लोके । यथा, द्राक्षारिष्टम् । दशमूलारिष्टम् । बब्बूलारिष्टमिति ।
"अरिष्टं लघुपाकेन सर्व्वं तच्च गुणाधिकम् ।
अरिष्टस्य गुणा ज्ञेया बीजद्रव्यगुणैः समाः ॥"

अथ सुराया लक्षणं गुणाश्च ।
"शालिषष्टिकपिष्टादिकृतं मद्यं सुरा स्मृता ।
सुरा गुर्व्वी बलघ्न्यपुष्टिभेदःकफप्रदा ।
वाह्निदी शीघ्रगुल्मार्शोग्रहणीमूत्रकृच्छ्रजित् ॥"

अथ सुराभेदो वारुणी तस्या लक्षणं गुणाश्च ।
"पुनर्नवाग्निलापिष्टैर्विहिता वारुणी स्मृता ।
संहितैस्तालखर्জ্জूररसैर्या सापि वारुणी ॥
सुरावद्गारुणी लघ्वी पीनसाध्मानमूलजित् ॥"
सुरातो भेदार्थं लक्षीति । * ।

अथ सीधुद्वयस्य लक्षणं गुणाश्च ।
"इक्षोः पक्वे रसे सिद्धः सीधुः पक्वरसश्च सः ।

आमंस्तीरेव यः सीधुः स च शीतरसः स्मृतः ॥
सीधुः पक्वरसः श्रेष्ठः सरामिदलवर्गकृत् ।
वातपित्तकरो हृद्यः स्नेहनो रोचनो हरेत् ॥
विबन्धमेदःशोषार्शःशोफोदरकफामयान् ।
तस्मादल्पगुणः शीतरसः संलेखनः स्मृतः ॥"
अथासवस्य लक्षणं गुणाश्च ।
"यदपक्वौषधाम्भोभ्यां सिद्धं मद्यं स आसवः ।
आसवस्य गुणा ज्ञेया बीजद्रव्यगुणैः समाः ॥"
अथ नवपुराणमद्यगुणाः ।
"मद्यं नवमभिष्यन्दि त्रिदोषजनकं सरम् ।
अरुच्यं दृष्टिघ्नं दाहि दुर्गन्धं विष्टम्भि गुरु ॥
जीर्णं तदेव रोचिष्णु क्षमिमेधाग्निबलाप्रदम् ।
हृद्यं सुगन्धि गुरुबस्तिवृषोनोविशोधनम् ॥"
अथ सात्विकानां मद्यं पिबतां चेष्टाविशेषाः ।
सात्विके गीतहास्यादि राजसे साहसादिकम् ।
तामसे निन्द्यकर्म्मादि निद्राश्च मदिराचरेत् ॥"
आचरेत् कुर्य्यात् ।
"विधिना माचया काले हितैरन्नैर्यथाबलम् ।
प्रकृष्टो यः पिबेन्मद्यं तस्य स्यादमृतं यथा ॥
किन्तु मद्यं स्वभावेन यद्येवान्नं तथा स्मृतम् ।
अयुक्तियुक्तं रोगाय युक्तियुक्तं यथामृतम् ॥"
अथ मद्यगन्धनाशनोपायः ।
"सुरौलवालगद्जीरकधान्यकैला-
वल्क्वैर्यवान् सदसि वाचमभिव्यनक्ति ।
स्वाभाविकं सुरभसञ्जयति पूतिगन्धं
गन्धश्च मद्यजनुषादिभवश्च नूनम् ॥"
इति भावप्रकाशः ॥

अपि च ।
"प्रकृत्या मद्यमत्युष्णमम्लक्षोष्णं विपाकतः ।
सर्वसामान्यतस्तस्य विशेष उपदेक्ष्यते ॥
क्षतानां वक्त्रमूत्राणां ग्रहण्यर्शोविकारिणाम् ।
सुरा प्रशस्ता वातेषु रक्तपित्तक्षयेषु च ॥
प्रसन्ना गुल्मवातार्शोविबन्धानाहनाशिनी ।
मूलप्रवाहिकाटोपकफवातार्शसां हिता ॥"
जगलो ग्राहिरूक्षोष्णः शोषघ्नो भक्तप्राचनः ।
शोषार्शोग्रहणीदोषान् हन्त्यरिष्टः कफामयान् ॥"
अरिष्टो मद्यविशेषः ॥
"प्रायशोऽभिनवं मद्यं गुरु दोषलमीरितम् ।
सोतसां शोधनं जीर्णं दीपनं लघु रोचनम् ॥
हर्षणं प्रीणनं वल्यं मद्यं शोकश्रमापहम् ।
प्रागल्भ्यप्रतिभापुष्टिवीर्य्यतुष्टिस्वरप्रदम् ॥"
इति राजवल्लभः ॥
अन्यत् मद्यशब्दे द्रष्टव्यम् ॥
(वसुदेवपत्नी । यथा, श्रीमद्भागवते । ९ । २४ । ४५ ।
"पौरवी रोहिणी भद्रा मदिरा रोचना इला ।
देवकीप्रमुखाश्चासन् पत्न्य आनकदुन्दुभेः ॥")
मदिराक्षी, स्त्री, (मदिरे इव अक्षिणी यस्याः इति अक्षि+"अच्क्षोरदर्शनात् ।" ५।४।७६ । इति अच् । स्त्रियां ङीप् ।) मत्तलोचना । यथा,—
"अविदितसुखदुःखं निर्गुणं वस्तु किञ्चि-
ज्जडमतिरिह कश्चिन्मोच इत्याचचक्षे ।
मम तु मतमनङ्गक्लेशतारुण्यधूर्त-
न्मदकलमदिराक्षीनीविमोक्षो हि मोक्षः ॥"
इत्युद्भटः ॥
(पुं, विराटराजस्य भ्राता । यथा, महाभारते । ४ । ३० । ११—१२ ।
सवर्म्मायमगर्भन्तु कवचं तप्रकाशनम् ।
विराटस्य प्रियो भ्राता शतानीकोऽभ्यहारयत् ॥
सर्व्वपारशवं वर्म्म कल्याणपटलं दृढम् ।
शतानीकादवरजो मदिराक्षोऽभ्यहारयत् ॥)
मदिरागृहं, क्ली, (मदिरायाः गृहम् ।) मद्यस्य गृहम् । मद्यसन्धानगृहम् । तत्पर्य्यायः । गञ्जा२ इत्यमरः । २ । २ । ८ ॥ गुञ्जा ३ । यथा,—
"भाण्डागारे विडुर्गर्भं खनौ खड्गा सुरागृहे ।
मद्यभाण्डे स्रुता गुञ्जा गुञ्जा स्यात् काक-
कुक्षिका ॥"
इति भरतधृतहड्डचन्द्रः ॥
मदिरासखः, पुं, (मदिरायाः सखा सगन्धत्वादिति। मदिरा+सखि+"राजाहःसखिभ्यष्टच् ।" ५ । ४ । ९१ । इति टच् ।) आम्रवृक्षः । इति जटाधरः ॥
मदिष्ठा, स्त्री, (मदोऽस्या अस्तीति । मद्+इनिः । इयमतिशयेन मदिनीति । इष्ठन् । इनोलोपः ।) मदिरा । इति हेमचन्द्रः । ३ । ५६६ ॥
मदी, स्त्री, (स्यदनाति चूर्णीकरोति क्षुदचैत्र-लोष्टादिकमिति । स्यद्-इन् । क्षुदिकारादिति पक्षे ङीष् । पृषोदरादित्वात् साधुः ।) चषक-वस्तु । इति नानार्थे हेमचन्द्रः । क्षुकवस्तु । इति वैद्यवर्गे जटाधरः ॥
मदीयं, त्रि, मम इदम् । आमार इति भाषा ॥ अस्मच्छब्दादीयप्रत्यये एकवचनार्थे मदादेशेन निष्पन्नमिदम् । इति सुग्धबोधव्याकरणम् ॥ (यथा, कथासरित्सागरे । २८ । ६० ।
"हे देवतात्तपोंशेन मदीयेनेव भूपतिः ॥")
मदोत्कटः, पुं. (मदेन दानवारिणा उत्कटः ।) मत्तहस्ती । इत्यमरः । २ । ८ । ३४ ॥ (यथा, महाभारते । ३ । ६५ । ८ ।
"ते तान् ग्राम्यगजान् दृष्ट्वा सर्व्वे वनगजास्तदा ।
समाद्रवन्त वेगेन जिघांसन्तो मदोत्कटाः ॥")
मदोत्कटा, स्त्री, (मदेन मत्ततया उत्कटः उद्भटो जनः अस्याः । स्त्रियां टाप् ।) मदिरा । इति राजनिर्घण्टः ॥ (मदेन गर्व्वादिना उत्कटः । मदोन्मत्ते, त्रि ।)
मदोद्धतः, त्रि, (मदेन मत्ततया उद्धतः ।) मत्तः । इति जटाधरः ॥ (यथा, वेणीसंहारे १ अङ्के ।
"सत्यप्रधा मधुरगिरः प्रसाधिताशा मदोद्धता-
रम्भाः ॥")
मदोदग्रा, स्त्री, (मदेन उदग्रा ।) नारी । इति शब्द-माला ॥ (मदोद्धते, त्रि । यथा. रघौ । ४ । २२ ।
"मदोदग्राः कक्षुभ्यन्तः सरितां कुलसुद्रुचाः ।")
मद्गुः, पुं, (मज्जतीति । मस्ज+"भृञ्मृद्गृत्वरित्वरितधनिनिमिममसृजिभ्य उः ।" उणा० । १ । ७ । इति उः ।) पक्षिविशेषः । इत्यमरः । २ । ५ । ३४ ॥ पानकौड़ि इति भाषा ॥ अस्य मांसगुणाः । वातुनाशित्वम् । स्निग्धत्वम् । भेदकत्वम् । शुक्रकारित्वम् । रक्तपित्तनाशित्वम् । शीतत्वञ्च । इति राजवल्लभः ॥ (पर्य्यन्तरभेदः । यथा, सुश्रुते सूत्रस्थाने ४६ अध्याये ॥
"मद्गुरधिकदृक्शक्तिकारी वक्त्रशूतिघ्रासवानर-प्रभृतयः पर्य्यन्तगाः ॥")
मद्गुरः, पुं, (माद्यति जलं प्राप्य हृष्यतीति । मद्+"मद्गुरादयश्च ।" उणा० । १ । ४२ । इति उरच् निपातितश्च ।) मत्स्यविशेषः । इत्यमरः । १ । १० । १६ ॥ माशुर इति भाषा । (यथा । ललितविस्तरे । ३२० । ७ ।
"श्रमणो गौतमः श्यामको वत भो
श्रमणो गौतमो मद्गुरच्छविः ।")
अस्य गुणाः । मधुरत्वम् । स्निग्धत्वम् । संग्राहित्वम् । शुक्लत्वम् । गुरुत्वञ्च । इति राजवल्लभः ॥ यथाच भावप्रकाशपूर्व्वखण्डे द्वितीयभागे ।
"मद्गुरो वातकृद्वल्यो हृद्यः कफकरो लघुः ॥"
वर्णशङ्करजातिविशेषः । यथा, महाभारते । १३ । २५ । ८३ ।
"निषादं सुद्गुरं सूते दाशं नावोपजीविनम् ।"
"मद्गून् मीनविशेषान् राति आदत्ते इति रा+कः । तम् ।" इति तट्टीकायां नीलकण्ठः ।)
मद्गुरकः, पुं, (मद्गुरः+स्वार्थे कन् ।) मद्गुरमत्स्यः । इति शब्दरत्नावली ॥
मद्गुरसी, स्त्री, (मद्गौ पक्षिविशेषे रसो यस्याः ङीप् ।) शङ्खी मत्स्यः । इति शब्दरत्नावली ॥
मद्यं, क्ली, (माद्यति जनोऽनेन । मद्+"गदमदचमशमनुपसर्गे ।" ३ । १ । १०० । इति करणे यत् ।) सुरा । इत्यमरः । २ । १० । ४० ॥
(यथा, साहित्यदर्पणे ।
"भिक्षो ! मांसनिषेवणं प्रकुरुषे किं तेन मद्यं विना
मद्यस्यापि तव प्रियं प्रियमहो वाराङ्गनाभिः सह ।
वेश्याप्यर्थरुचिः कृतघ्नव धनं दूतेन चौर्य्येण वा,
इत्यावानपि संग्रहोऽस्ति भवतो नष्टस्य कान्या गतिः ॥")
अस्य गुणपर्य्यायौ मादराशब्दे द्रष्टव्यौ ॥ * ॥
तत् द्वादशविधं यथा पुलस्त्यः ।
"पानसं द्राक्षमाधूकं खार्ज्जूरं तालमैक्षवम् ।
माध्वीकं टाङ्कमाध्वीकं मैरेयं नारिकेलजम् ॥
समानानि विजानीयान्मद्यान्येकादशैव तु ।
द्वादशस्तु सुरा मद्यं सर्व्वेषामधमं स्मृतम् ॥"
अनेन एकादशानां सुरात्वं निषेधयति मद्यशब्दो मदहेतुद्रव्यवचनः । अस्मादेव वचनात् ननु मद्यमात्रं सुराशब्दार्थः । यथा स्मृतिः ।
"गौड़ीं माध्वीं सुरां पैष्टीं पीत्वा विप्रः समाचरेत् ।

मद्यं

तप्तकृच्छ्रं पराकश्च चान्द्रायणमनुक्रमात् ॥"
क्षत्रियादीनां सुरात्वे क्रमेण प्रायश्चित्तत्रयं न स्यात्।
तथा भविष्ये।
"सुरा तु पैष्टी गुल्योक्ता न तस्यास्तितरे समे।"
पैष्टीति तण्डुलविकारमात्रोपलक्षणं इतरे
गौड़ीमाध्वौ अतोऽन्नविकार एव सुराशब्दस्य
मुख्यत्वात् त्रिविधा सुरेति गौड़ीमाध्वोर्गौण-
सुरात्वज्ञापनार्थम्। तेन एतत्पानेऽपि महा-
पातकत्वमतिदिशति यद्वैक्षा तथा सर्वा इति
पैष्टीं पूर्वप्रसिद्धिं दर्शयति। यथा पैष्टी सुरा
तथा सर्वा गौड़ी माध्वी चेति पूर्ववचनोक्ता
तु पैष्टी दृष्टान्तत्वेनात्र दर्शिता। न पातया
द्विजोत्तमैरिति ब्राह्मणैरित्यर्थः। वैवर्णिकपरत्वे
उत्तमपदानर्थक्यात् बहुवचनानर्थक्यपरी-
हारार्थमुत्तमपदानिपदिकानर्थक्यमयुक्तं अतो
ब्राह्मणस्य त्रिविधैव सुरा महापातकहेतुः।
क्षत्रियवैश्ययोस्तु सुरा वै मलमन्नानामिति
वचनेन पैष्टीव इति स्थितम्। अतएव।
"एका माध्वी च गौड़ी च पैष्टी च त्रिविधा
सुरा।
द्विजातिभिर्न पातव्या कदाचिदपि कर्हिचित्॥"
इति यमवचने द्विजातिपदं ब्राह्मणपरमेव।
अत एव द्विविधसुरापाने न क्षत्रियादीनां
महापातकम्॥*॥ तावदस्तु। दोषाभावमेवाह
वृद्धयाज्ञवल्क्यः।
"कामादपि हि राजन्यो वैश्यो वापि कथञ्चन।
मद्यमेव सुरां पीत्वा न दोषं प्रतिपद्यते॥"
तदेवं पैष्टीनिषेधस्त्रैवर्णिकानां गौड़ीमाध्वीनि-
षेधस्तु ब्राह्मणानामेव॥*॥ तच्चातिः स्त्रीणा-
मपि सुरापाननिषेधः। यथा भविष्ये।
"तस्मान्न पेयं विप्रेण सुरा मद्यं कथञ्चन।
ब्राह्मण्यापि न पेया वै सुरा पापभयावहा॥"
"या ब्राह्मणी सुरापी स्यात्
न तां देवाः पतिलोकं नयन्ति॥"
इति श्रुतिः॥
"पतत्यर्धशरीरेण भार्या यस्य सुरां पिबेत्।
पतिनार्धशरीरस्य निष्कृतिर्नोपपद्यते॥"
न चैवं क्षत्रियवैश्यस्त्रीणामनिषेधः। ब्राह्मणी-
घटस्य निषिद्धसुरापानकर्तृभार्योपलक्षणत्वाद्-
भार्या यस्य सुरां पिबेदिति सामान्यवचनाच्च।
पानञ्च दर्वीभूतस्याभ्यवहारः। न च कण्ठदेशा-
दधोनयनं न तु वक्त्रान्तःप्रवेशः। निर्णयनार्थं
कथोलधारणे पानशब्दप्रयोगात्। यदुक्तम्।
"शिष्टैरपि सुरा कश्चित् पिबतीत्यभिधीयते।
यावन्न क्रियते वक्त्रे गण्डूषस्य प्रवेशनम्॥
अस्य मद्यप्रमाणं व्यवस्थितम्। गण्डू-
षोपनेऽपि तोये पानशब्दप्रयोगात्। अतएव
सुरागण्डूषं ब्राह्मणस्य चित्तं किन्तु सुरागण्डूषे
कण्ठादधोनयनं भवति अतस्तदेवोपपद्यते।
अतएव कोरमाद्येऽपि न पानशब्दः। अत-
स्तत्रोत्तमाङ्गस्थोपपातकम्॥*॥
अथ सुरामात्रप्रायश्चित्तम्। तत्र मदः।

"सुरां पीत्वा द्विजो मोहादग्निवर्णां सुरां पिबेत्।
तया स काये निर्दग्धे मुच्यते किल्बिषात्ततः॥
गोमूत्रमग्निवर्णं वा पिबेदुदकमेव वा।
पयो घृतं वामरणात् गोशकृद्रसमेव वा॥"
अग्निवर्णां अग्निसमस्पर्शाम्। पयो घृतं गोरेव
व्यावर्त्तते च गोः कीर्त्तनात्। मोहशब्दोऽत्र
वृद्धिपरः। देवलः। सुरापाने ब्राह्मणो रूप्य-
ताम्रवीसकानामन्यतममग्निकल्पं पीत्वा शरीर-
त्यागात् पूयते। रूप्यादयोऽत्र द्रवीभूताः
पीतेति निर्देशात्। स्वयमशक्तावन्येरपि मुखे
सेचनीया। यथा गौतमः। सुरापस्य ब्राह्मणस्य
उष्णामासिञ्चेयुः सुरामास्ये नतः शुष्कैः। सुरा
अतएव न मेचकानां वधो विहितत्वात् स्वयं
पान एव। एतच्च मरणप्रायश्चित्तं कामकृते।
यथा, वृद्धशातिः।
"सुरापाने कामकृते ज्वलन्तीं तां विनिःक्षिपेत्।
मुखे स हि विनिर्दग्धो मृतः शुद्धिमवाप्नुयात्॥"
कथञ्चिदिति सकृदित्यर्थः। अङ्गिराः।
सुरापानं सकृत् कृत्वा योऽग्निवर्णां सुरां पिबेत्।
स पावयेदात्मानमिह लोके परत्र च॥"
भविष्ये।
"मतिपूर्व्वं सुरापाने प्राणान्तिकमुदाहृतम्।
पैष्टीपाने तु ऋषिभिर्नैतरासां कथञ्चन॥
शूद्रेणापि महाबाहो! प्रायश्चित्तमुदाहृतम्।
सुरायाः कामतः पाने नृण्यायाः प्राणनाशनम्॥"
पुनः पुनः पैष्टीविषयलाभिधानम्। त्रिविधा सुरा
सुरेति भ्रमनिरासार्थम्। कथञ्चन सकृ-
दित्यर्थः॥*॥ इतरासां असुरागां गौड़ी-
माध्वीप्रभृतीनां ज्ञानतः सकृत्पाने मरणान्तिकं
न भवति गौड़ीमाध्वीषु ज्ञानतोऽभ्यासपाने
गौड़ीमाध्वीव्यतिरिक्तावास्वसुराया अभ्यास-
पाने मरणमुक्तं भविष्ये।
"गौड़ीमाध्वीसुराभ्यासे प्राणान्तिकमुदा-
हृतम्।
अभ्यासे त्वसुरायास्तु तामेवाग्निनिभां पिबेत्॥"
तथेति ज्ञानत इत्यर्थः। अतएव।
"असकृत् ज्ञानतः पीत्वा वारुणीं पतति द्विजः।
मरणं तस्य निर्द्दिष्टं प्रायश्चित्तं विधीयते॥"
इति यमवचनमपि एतद्विषयमेव अत्राभ्यासे
मरणविधानात् द्वितीयवार एव मरणं कार्य्यम्।
गौड़ीमाध्वोः कामतः सकृत्पाने भविष्ये।
"असुरामद्यपाने तु कृते विप्रस्तु कामतः।
चान्द्रायणं समभ्यस्येत् शुद्धिकामः समुद्यतः॥
यद्वाग्निवर्ण विषये मानवीयं प्रकल्पयेत्।
कणान् वा भक्षयेदब्दं पिण्याकं वा सकृन्निशि॥
सुरापानामदुत्सर्गे वालवासा जटी ध्वजी।"
पिण्याकं खलिम्॥*॥ उक्तमसुरापानं व्याय-
सेन पात्रेण इत्याह यमः।
"व्यायसे भाजने तप्तां ब्राह्मणीं वारुणीं पिबेत्॥"
गोवालक्षीरवासा तत्कर्त्तव्यं व्याह उशनाः।
गोवालक्षीरवासाः सुरापः सुरामग्निवर्णां
पीत्वा पूतो भवति॥*॥ व्यासः सकृत्-

मद्यं

पेष्टीपाने ब्राह्मणस्य द्वादशवार्षिकम्। यथा
ब्रह्महत्याव्रतानुवृत्तौ यमः।
"चरेतामेतदेवौभौ सुरापगुरुतल्पगौ।
सगोत्राडूमकश्चैव सुवर्णस्तेयकृन्नरः॥"*॥
भविष्ये।
"व्यकामतः सुरां पीत्वा पैष्टीं मनुकुलनन्दन!।
कृच्छ्रातिकृच्छ्रौ कृत्वा वै पुनःसंस्कारतः शुचिः॥
कणान् वा भक्षयेदब्दं पिण्याकं वा सकृन्निशि।
सुरापानापनुत्यर्थं वालवासा जटी ध्वजी॥"
सुरापानमात्रापनेयरोगस्य रोगिणोऽज्ञानतः
पानविषयमिदं इत्युक्तं भविष्ये। यथा,—
"तथास्त्रिन्नेव विषये वाग्निष्टं परिकीर्त्तितम्।
यदि रोगैर्भवेद्दुःखी नेतरस्य कदाचन॥
कृच्छ्राच्च सुरश्रेष्ठ! तप्तकृच्छ्रं उदाहृतः।"
कृच्छ्रातिकृच्छ्रावित्यत्र कृच्छ्रपदं न प्राजापत्य-
परं किन्तु तप्तकृच्छ्रपरम्॥*॥ अज्ञानतो
गौड़ीमाध्वोः सकृत्पाने उक्तं भविष्यपुराणे।
"सकृत् पीत्वा तथा गौड़ीमज्ञानात् सुरसत्तम!।
कृच्छ्रातिकृच्छ्रौ विहितौ घृतप्राशनमेव च॥"
अज्ञानाभ्यासे तत्रैवोक्तम्।
"गौड़ीमज्ञानतः पीत्वा ब्राह्मणो ब्राह्मणप्रिय!।
तप्तकृच्छ्रन्तु वै कृत्वा पुनःसंस्कारतः शुचिः॥
माध्वीं पीत्वा महाबाहो! अज्ञानाद् द्विज-
सत्तमः।
शुद्ध्येत तप्तकृच्छ्रेण विकर्म्माभ्यसनात्तथा॥
रेतोमूत्रपुरीषाणां गौड़ीमाध्व्योश्च प्राशने।
क्रव्यादपशुविष्ठानां संस्काराच्छुद्धिरिष्यते॥"
प्राणान्तिके च पादहानेरभक्ष्यभक्षणे क्षत्रिय-
वैश्ययोरपि यथोक्तं मरणान्तिकं प्रायश्चित्तमेव।
द्वादशवार्षिकादौ पादपादहानिरभक्ष्यभक्षणे
क्षत्रियादीनां ज्ञानदर्शनात्।
"विप्रे तु सकलं देयं पादोनं क्षत्रिये मतम्।
वैश्येऽर्द्धं पादशेषन्तु शूद्रजातिषु शस्यते॥"
पानमादिमद्यपाने तु कामनाज्ञाननैकसमया-
भ्यस्ते प्राणान्तिकं युक्तं ब्राह्मणस्य कामनया
सकृत्कृते तु पराशरः।
"अगम्यागमने चैव मद्यगोमांसभक्षणे।
शुद्ध्यै चान्द्रायणं कुर्य्यात् नदीं गत्वा समुद्गगाम्॥
चान्द्रायणे ततश्चीर्णे कुर्य्याद्ब्राह्मणभोजनम्।
अनड्वान्सहितां गाञ्च दद्यादित्राय दक्षिणाम्॥"
व्यकामतः सकृत्पाने विष्णुः।
"पीत्वा प्रमादतो मद्यमतिकृच्छ्रं चरेद्द्विजः।
कारयेत् पुनःसंस्कारं भक्ष्यं विप्रांश्च भोजयेत्॥"
कामतोऽकामतश्चाभ्यासे व्रतावृत्तिमाह यमः।
"गोघ्नवद्विहितः कृच्छ्रश्चान्द्रायणमथापि वा।
अभ्यासे तु तयोर्भूयः कृतः शुद्धिमवाप्नुयात्॥"
अपर्युषितपानसाद्योक्तादशविधमद्यपाने विरा-
चम्। पानसं द्राक्षमधूकमित्याद्यभिधाय
पुलस्त्यः।
"द्राक्षेक्षुटङ्खर्ज्जूरपनसादेच यो रसः।
सद्योजातन्तु तं पीत्वा व्रजेत् शुद्धिन् द्विजो-
त्तमः॥"

प्रयोक्तकादीनां पादपादप्रदानिर्देश्या। बाल-वृद्धस्त्रीणामर्द्धादिकं प्रायश्चित्तम्। इति प्रायश्चित्तविवेकः॥ * ॥ अथ पुराणे ब्राह्मणस्य मद्यपानादिनिषेधो यथा,—

"अपेयञ्चाप्यपेयञ्च तथैवासृग्यमेव च।
द्विजातीनामनालोच्यं नित्यं मद्यमिति स्थितम्॥
तस्मात् सर्व्वं प्रयत्नेन मद्यं नित्यं विवर्ज्जयेत्।
पीत्वा पतति कर्म्मभ्यस्वसम्भाव्यो द्विजोत्तमः॥
भक्षयित्वाप्यभक्ष्याणि पीत्वापेयान्यपि द्विजः।
नाधिकारी भवेत्तावद्यावत्तन्न जहात्यधः॥
तस्मात् परिहरेन्नित्यमभक्ष्याणि प्रयत्नतः।
अपेयानि च विप्रो वै पीत्वा तद्यातिरौरवम्॥"

इति श्रीब्रह्मपुराणे उपविभागे १६ अध्यायः॥

मद्यस्य विष्णूपसर्पणे दोषादि यथा,—

वराह उवाच।

"मद्यं पीत्वा वरारोहे! यस्तु मामुपसर्पति।
तत्र दोषं प्रवक्ष्यामि शृणु सुन्दरि! तत्त्वतः॥
दत्त्वा वर्षसहस्राणि दरिद्रो जायते पुनः।
ततो भवेत् स चूतात्मा मद्भक्तश्च न संशयः॥
यस्तु भागवतो भूत्वा कामरागेण मोहितः।
सौत्रितो पिबते मद्यं प्रायश्चित्तं न विद्यते॥
अन्यच्च ते प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे!।
अग्निवर्णां सुरां पीत्वा तेन सुध्येत किल्बिषात्॥
एवञ्चेवापराधानि येन सुध्यन्ति किल्बिषात्।
य एतेन विधानेन प्रायश्चित्तं समाचरेत्।
न स लिप्यति पापेन संसारञ्च न गच्छति॥

इति वराहपुराणे मद्यपानापराधप्रायश्चित्तम्॥

अपि च।

"अगम्यागमनं कृत्वा मद्यगोमांसभक्षणम्।
शुद्ध्येच्चान्द्रायणाद्विप्रः प्राजापत्येन भूमिपः।
वैश्यः सान्तपनाच्छूद्रः पक्षाद्धोभिर्विशुद्ध्यति॥"

इति गारुड़े २२ अध्यायः॥

एतद्गौड़ीमाध्व्योः कामतः सकृत्पानविषयमिति प्रायश्चित्तविवेकदर्शनात्॥*॥ द्विजस्य पूजादौ मद्यदानविध्यनुकल्पनिषेधा यथा,—

"मदिरां दृष्टतो दद्यात् अन्यत् पानन्तु वामतः।
अवश्यं विहितं यत्र मद्यं तत्र द्विजः पुनः॥
नारिकेलजलं कांस्ये ताम्रे च विदलेन्मधु।
नापद्यपि द्विजो मद्यं कदाचित् विदलेदपि॥
ऋते पुण्याहवादुक्ताद्यज्ञनाद्वा विशेषतः।
राजपुत्रस्तथा मन्त्रैः सचिवः सौत्रिकादयः॥
दद्युर्नरबलिं भूपसम्मत्या विभवाय च।
भूपालानुमते मद्यं दत्त्वा पापमवाप्नुयात्॥"

इति कालिकापुराणे ६६ अध्यायः॥

अथ ब्राह्मणस्य मद्यपाननिषेधकशुक्रशापो यथा,

वैशम्पायन उवाच।

"सुरापानाद्वयनां प्राप्य विद्वान्
संज्ञानाशं प्राप्य चैवातिघोरम्।
दृष्ट्वा कचश्चापि तथाभिरूपं
पीतं तथा सुरया मोहितेन॥
समन्युरुत्थाय महानुभाव-
स्तदोशना विप्रहितं चिकीर्षुः।
काव्यः स्वयं वाक्यमिदं जगाद
सुरापानं प्रति वै जातमन्युः॥
यो ब्राह्मणोऽद्यप्रभृतीह कश्चित्
मोहात् सुरां पास्यति मन्दबुद्धिः।
अपेतधर्म्मो ब्रह्महा चैव स स्या-
दस्मिँल्लोके गर्हितः स्यात् परे च।
मया चेमां विप्रधर्म्मोक्तसीमां
मर्य्यादां वै स्थापितां सर्व्वलोके।
सन्तो विप्राः शुश्रुवांसो गुरूणां
देवा लोकाश्चोपशृण्वन्तु सर्व्वे॥"

इति महाभारते आदिपर्व्वणि ७६ अध्यायः॥

अथ तन्त्रे मद्यपाननिषेधो यथा,—

"नारिकेलञ्च खार्ज्जूरं पानसञ्च तथैव च।
ऐक्षवं मधुकं टाङ्गं तालञ्चैव च माक्षिकम्॥
द्राक्षन्तु दशमं ज्ञेयं गौड़ं चैकादशं स्मृतम्।
पैष्टन्तु द्वादशं प्रोक्तं सर्व्वेषामधमं स्मृतम्॥
मध्यमं मधुजं गौड़ं श्रेष्ठमौत्तमिकं स्मृतम्।
एतत् द्वादशकं मद्यं न पातव्यं द्विजैः क्वचित्।
क्षत्रियादिः पिबेत् सर्व्वं पैष्टीमेकान्तु वर्ज्जयेत्॥
सुरां पीत्वा द्विजो मोहात् कामात् तक्रादि-
मिश्रिताम्।
त्रैवार्षिकं व्रतं कुर्य्यादौषस्मिन्ने तु वार्षिकम्॥
तक्रादिमिश्रितां किञ्चित् सुरां पीत्वा ह्यकामतः।
कृच्छ्राब्दपादमुचर्य्य पुनः संस्कारमर्हति॥
सुखप्रवेशमात्रन्तु प्रायश्चित्तार्द्धमाचरेत्।
अनुपनीतो देवेशि! व्रतं त्रैवार्षिकं चरेत्॥
चतुर्थकालाहारी स्याद्ब्रह्मचर्य्यमथापि वा।
आ षष्ठ वर्षं वृद्धं वा ज्ञानादर्द्धं विनिर्दिशेत्॥
शूद्रस्य च विशेषेण अतिकृच्छ्रद्वयं चरेत्।
स्वजातिसाधिते तस्मिन् तदर्द्धं व्रतमाचरेत्॥
पैष्टीपाने ब्राह्मणस्य मरणान्तिकमुच्यते।
माध्वीगौड़ीसुरापाने द्वादशाब्दं विधीयते॥
इतरेषान्तु पानेन शुद्धिश्चान्द्रायणेन तु।
राजन्यवैश्ययोश्चापि गौड़ी माध्वी न शस्यते।
मोहात् क्षत्रश्च वैश्यश्च पीत्वा कृच्छ्रद्वयं चरेत्॥
शूद्रोऽपि गौड़ीं पैष्टीञ्च न पिबेद्धीनसंस्कृताम्।
कामात् पीत्वा सुरां विप्रो मरणान्तिकमाचरेत्॥
चरेच्चान्द्रायणं ज्ञानात् क्षत्रियो वैश्य एव च।
पैष्टीपाने तु शूद्रस्य प्राजापत्यं विनिर्दिशेत्॥
ज्ञानाद्भ्यासयोगे तु चान्द्रायणत्रयं स्मृतम्।
नारिकेलं तथा ज्ञानादिप्रश्चान्द्रायणेन तु।
क्षत्रियश्चैव वैश्यश्च प्राणायामेन शुध्यति॥
अपक्वं पनसञ्चैव आम्रञ्च वदरं तथा।
स्थापयित्वा घटे नित्यं दद्यादामयः पलम्॥
त्रैलोक्यविजयाचैव मातुलङ्गं तथैव च।
समेऽहनि ततो दद्यात् सन्धानात् सत्वमीरितम्॥
दधि मधु घृतञ्चापि माक्षिकं विक्तकं तथा।
अनुपाने तु देवेशि! ब्राह्मं मद्यं सुनिश्चितम्॥
विड़ङ्गं शालवो मूलं————।
मधुना सह संस्राव्य श्रेष्ठपाकं समाचरेत्॥
पिप्पलीलवणं दत्त्वा मधुना मद्यमीरितम्।
पानसं पक्वखर्ज्जूरं आर्द्रं सोमलतारसम्।
एकीकृत्यामिसन्धानात् खार्ज्जूरं मद्यमीरितम्॥
पक्वतालं दन्तिशाकं कङ्कुभस्य तथैव च।
एतैरेव सुसन्धानात् तालमद्यं प्रकीर्त्तितम्॥
इक्षुदण्डं मरीचञ्च वदरञ्च तथा दधि।
श्रेष्ठे तु लवणं दत्त्वा इक्षु मद्यं प्रकीर्त्तितम्॥
नवं मधु तथा बिल्वं पक्वं शर्करया सह
सन्धानाज्जायते मद्यं माध्वीकं श्रुतौ रसम्॥
घृतावरी टङ्कमूलं लक्ष्मणं पद्ममेव च।
मधुना सह सन्धानात् टङ्कमाध्वीकमीरितम्॥
माषमूलं वदरी शर्करा च तथैव च।
एषामेकत्र सन्धानात् मैरेयं मद्यमीरितम्॥
इन्द्रलिङ्गा पक्वधात्री नारिकेलजलन्तथा।
कदलीफलसन्धानाज्जातं तन्नारिकेलजम्॥
दधि चैलोक्यविजया तथैव च करीकणा।
गुड़ेन सह सन्धानात् गौड़ीमद्यं प्रकीर्त्तितम्॥
शर्करुलीमर्द्धसिद्धान्नपुष्पोदकसमन्वितम्।
वह्नौ सन्तापयेत् किञ्चित् स्थापयित्वा दिनद्वयम्॥
श्रेष्ठेऽहनि तु संप्राप्ते जीवनं तत्र निःक्षिपेत्।
शृङ्गवेरं मरीचञ्च मातुलङ्गं तथैव च।
एतेषामेव सन्धानात् पैष्टीमद्यं प्रकीर्त्तितम्॥"

इति श्रीमत्सुरुद्रे महातन्त्रे चतुर्विंशतिसाहस्रे ३६ पटलः॥*॥ अपि च।

"सिद्धमन्त्री भवेद्वीरो न वीरो मद्यपानतः।
कलौ तु भारते वर्षे लोका भारतवासिनः॥
गृहे गृहे सुरां पीत्वा वर्णभ्रष्टा भवन्ति हि॥"

इति उत्पत्तितन्त्रे ६४ पटलः॥*॥

"दिव्यवीरमयो भावः कलौ नास्ति कदाचन।
केवलं पशुभावेन मन्त्रसिद्धिर्भवेन्नृणाम्॥"

इति महानिर्व्वाणतन्त्रम्॥*॥

श्रीक्रमे।

"न दद्याद् ब्राह्मणो मद्यं मद्यादेये कथञ्चन।
वामकामो ब्राह्मणो हि मद्यं मांसं न भक्षयेत्॥

भैरवतन्त्रे।

"नारिकेलोदकं कांस्ये ताम्रे गव्यं तथा मधु।
राजन्यवैश्ययोर्देयं न द्विजस्य कदाचन॥
एवं प्रदानमात्रेण हीनायुर्ब्राह्मणो भवेत्।

इति आगमतत्त्वविलासः॥*॥

स्मृतौ कलौ मद्यपानादिनिषेधो यथा, याज्ञवल्क्यादीपकलिकायां ब्रह्मपुराणम्।

"नराश्वमेधौ मद्यञ्च कलौ वर्ज्ज्या द्विजातिभिः॥"

निषेधविषयं स्पष्टयति उशनाः। "मद्यमदेयमपेयमनिर्ग्राह्यम्।" अनिर्ग्राह्यमस्वीकार्य्यमिति कल्पतरुः॥ कालिकापुराणेऽपि।

"स्वगात्ररुधिरं दत्त्वा आत्मश्यामवाप्नुयात्।
मद्यं दत्त्वा ब्राह्मणस्तु ब्राह्मण्यादेव हीयते॥"

स्मृतिः।

"ताम्रे चेक्षुरसो मद्यं पयसा यवचूर्णकम्।
शयञ्च ताम्रपात्रस्थं मद्यतुल्यं घृतं विना॥

अतो मद्यप्रतिनिधिदानमपि न युक्तम्। इति तिथ्यादितत्त्वम्॥*॥ मद्यतुल्यं यथा,—

"नारिकेलोदकं कांस्ये ताम्रपात्रे स्थितं

गव्यञ्च ताम्रपात्रस्थं मद्यतुल्यं घृतं विना ॥"
इति कर्म्मलोचनः ॥ ७ ॥
अथ मद्यपानं तुरीयं कौलानां मद्यपानविधिर्लिख्यते ।
"कुलाचाररतो वीरः कुलसङ्गी सदा भवेत् ।
सन्दिशेवनं कुर्य्यात् सोमपानं महेश्वरि ! ॥
सर्व्वथा कुरुते देवि ! वीरश्चोद्धतमानसः ।
दिश्यन्तु देवताप्रायश्चन्दनागुरुलेपनैः ॥
रक्तचन्दनगन्धेन सुदिग्धो नात्र संशयः ।
भस्माङ्गधूसरो वीर उन्मत्तवच्चेष्टितः ॥
सुरापानरतो नित्यं बलिपूजापरायणः ।
नरश्चागश्च महिषो मेषः शूकर एव च ॥
शशकः शाकी गोधा खड्गी कूर्म्मो दश स्मृताः ।
वानरश्च सरश्चैव गणाश्वादिविहङ्गमाः ॥
एभ्यादेषु बलेर्दानैः पूजयेत् स्वेष्टदेवताम् ।
नित्यं नैमित्तिकं काम्यं प्रकुर्य्याच्च दिने दिने ॥
कुलवारे कुलर्क्षे च तिथौ च कुलके तथा ।
भैरवाः कल्पितं चक्रं संस्थाप्य पूर्ब्बवत् प्रिये ! ॥
सुरागां शोधनं कुर्य्यादृषयावत् परमेश्वरि ! ॥
प्रकृष्टे भैरवीचक्रे सर्व्वे वर्णा द्विजोत्तमाः ।
निकृष्टे भैरवीचक्रे सर्व्वे वर्णाः पृथक् पृथक् ॥
विषयाणामनुत्कर्षः द्विजो दद्याद्युगे युगे ॥"
इति उत्पत्तितन्त्रे ६२ पटलः ॥
"द्रव्याभावे चानुकल्पैः पूजयेत् परदेवताम् ।
सुराभावे च गोक्षीरं द्विजो दद्याद्युगे युगे ॥"
इति निरुत्तरतन्त्रे ५ पटलः ॥*॥
"धर्म्मसृष्टां सुरां पीत्वा ब्राह्मणो ब्रह्मवद् भवेत् ।
संस्कृतान्तु सुरां पीत्वा ब्राह्मणो ज्वलदग्निवत् ॥
सौत्रामण्यां कुलाचारे ब्राह्मणः प्रपिबेत् सुराम् ।
अन्यत्र कामतः पीत्वा ब्राह्मण्यादेव हीयते ॥"
इति उत्पत्तितन्त्रम् ॥ * ॥
"ब्राह्मणस्य मद्यमोक्षं मद्यपाने प्रियंवदे ! ।
ब्राह्मणः परमेशानि ! यदि पानादिकं चरेत् ।
तत्क्षणात् शिवरूपोऽसौ सत्यं सत्यं हि शैलजे ! ॥
तोये तोयं यथा क्षीरं तैजसं तैजसे यथा ।
घटे भग्ने यथाकाशं वायौ वायुर्यथा प्रिये ! ॥
तथैव मद्यपानेन ब्राह्मणो ब्रह्मणि प्रिये ।
लीयते नात्र सन्देहः परमात्मनि शैलजे ! ॥
सायुज्यादिमहामोक्षं निर्युक्तं क्षत्रियादिषु ।
मद्यपानं विना देवि ! तत्त्वज्ञानं न लभ्यते ॥
अतएव हि विप्रस्तु मद्यपानं समाचरेत् ।
वेदमार्गापवर्गेण ब्राह्मणो यदि शैलजे ! ।
ब्रह्मज्ञानं यदा देवि ! तदा ब्राह्मण उच्यते ।
दैवानामग्रजं ब्रह्म तदेव लौकिकी सुरा ।
नरत्वं भोगमाश्रित्य सुरा तेन प्रकीर्त्तिता ॥
मद्यपत्वं यदा प्राप्तं ब्रह्मणापादिमोचनम् ।
प्रकुर्य्यात्तु हि वैदेव यदा ब्रह्ममयी सुरा ।
चरित्रारोपमाश्रित्य यद्वद्दीक्षा यथा भवेत् ।
द्रव्यमोक्षमाश्रित्य तथा मुक्तिप्रदायिनी ।
अतएव हि देवेशि ! ब्राह्मणः पानमाचरेत् ॥
स ब्राह्मणः स वेदज्ञः सोऽग्निहोत्री स दीक्षितः ।
बहु किं कथ्यते देवि ! स एव निर्गुणात्मकः ॥
मुक्तिमार्गमिदं देवि ! गोप्यं पशुजनैः कुटे ।
प्रकाशात् सिद्धिहानिः स्यात् निन्दनीयो न चान्यथा ॥"
इति मालिकाभेदतन्त्रे ३ पटलः ॥*॥
"कुलस्त्रीसेवनं कुर्य्यात् सर्व्वथा परमेश्वरि ! ।
रमते युवतीं रम्यां कामोन्मत्तविलासिनीम् ॥
नटीं कापालिकां वेश्यां हट्टिपानां वराङ्गनाम् ।
शूद्राणीं स्वैरिणीं नवनीं परमेश्वरि ! ॥
मालयोनिविचारोऽस्ति मालयोनिं विना प्रिये ! ।
कुलाचारपरो वीरः कुलपूजापरायणः ॥
भगलिङ्गसमायोगादाक्षय्यं जपमाचरेत् ।
निश्चलन्तु भवेच्चित्तं कोटिसूर्य्यग्रहेण किम् ॥
चले चित्ते भवेद्व्याधिर्निश्चले निश्चलं यथा ।
ध्यानानां साधनं देवि ! लतासाधनमुत्तमम् ॥
चिताया साधनं देवि ! सिद्धिरस्ति कलौ युगे ॥
इत्युत्पत्तितन्त्रम् ॥
कालिकातारिणीदीक्षां गृहीत्वा मद्यसेवनम् ।
न करोति नरो यस्तु स कलौ पतितो भवेत् ॥
वैदिके तान्त्रिके चैव जपहोमविधिष्कृतः ।
अब्राह्मणः स एवोक्तः स एव हस्तिचर्म्मकः ॥
शुनीमूत्रसमं तस्य तर्पणं यत् पितॄष्वपि ।
कालीतारामनुं प्राप्य वीराचारं करोति न ॥
शूद्रत्वं तच्छरीरेण प्राप्नुयात् स न चान्यथा ॥
इति कामाख्यातन्त्रे ५ पटलः ॥
मद्यशोधनप्रकारो यथा । शिव उवाच ।
शृणु पार्व्वति ! वक्ष्यामि तेषां वै शोधनक्रियाम् ।
पद्मासनेन संविश्य करपुटं समाचरेत् ॥
वामे गुरूनमस्कृत्य दक्षिणे गणपतिं स्मरेत् ।
मध्ये देवीं नमस्कृत्य प्राणायामत्रयञ्चरेत् ॥
शरीरे मालिकां न्यस्य ऋष्यादिन्यासमाचरेत् ।
स्वकल्पोक्तविधानेन षड़ङ्गन्यासमाचरेत् ॥
पश्चाद्भूमौ त्रिकोणं वा षट्कोणं वा महेश्वरि ! ।
विलिख्य मण्डलं शुद्धं तस्योपरि घटं न्यसेत् ॥
बहुधा प्रोक्षणं कृत्वा फट्कारेण पुनः पुनः ।
ततस्तस्मिन् कारणन्तु मूलेनैव च स्थापयेत् ॥
मालिकार्च्चेन देवेशि ! विपरीतेन चैव हि ।
पुनः फट्कारमन्त्रेण प्रोक्षणं कारयेत् सुधीः ॥
ततो वियच्चक्रिबीजं चतुर्दशस्वरान्वितम् ।
नादबिन्दुयुतं कृत्वा तस्योपरि गतं जपेत् ॥
ततो मूलं जपेन्मन्त्रं मायाबीजं ततः परम् ।
धेनुं योनिं गालिनीञ्च त्रिखण्डं मीनसंज्ञकम् ।
दर्शयित्वा वरारोहे ! घटं दृष्ट्वा पटेन्मनुम् ॥
ॐ एकमेव परं ब्रह्म स्थूलसूक्ष्ममयं ध्रुवम् ।
कलौ शूद्रा ब्रह्महत्या तेन ते नाशयाम्यहम् ॥
ॐ सूर्य्यमण्डलसम्भूते वरुणालयसम्भवे
अमार्वीजमये देवि ! शुक्रशापादिमुक्तताम् ॥
ॐ वेदानां प्रणवो बीजं ब्रह्मानन्दमयं यदि ।
तेन सत्येन ते देवि ! ब्रह्महत्यां व्यपोहतु ॥
ततः षड़ङ्गयुक्तेन वकारं बिन्दुसंयुतम् ।
एवं सकारकेणापि वर्णाक्षरसमन्वितम् ॥
जप्त्वा मन्त्रौ ततो ध्यायेत् स्वमन्त्रं कुलसुन्दरि ! ।
ध्यानन्त्वेवं ध्यायेद्यथा तन्त्रानुसारतः ॥
रक्तवर्णं चतुर्बाहुं त्रिनेत्रं वरदं शिवम् ।
जटाजूटधरं देवं वासुकीकण्ठभूषितम् ॥
डमरुञ्च कपालञ्च सुहरं पाशसुत्तमम् ।
धारिणं तं यजेद्देवं व्याघ्रचर्म्माम्बरं शिवम् ॥
एवं ध्यात्वा महेशानि ! तस्य मध्ये प्रपूजयेत् ।
मायाबीजं ततो हुं फट्मन्त्रेणानेन संस्पृशेत् ॥
ततस्तस्मिन्महेशानि ! आनन्दभैरवीं स्मरेत् ।
आनन्दभैरवीं देवीं वराभयसत्करां ॥
घोररूपां वरारोहां त्रिनेत्रां रक्तवाससम् ।
रक्तवर्णां महारौद्रीं सहस्रभैरवान्विताम् ॥
ब्रह्मविष्णुमहेशाद्यैः स्तूयमानां शिवां भजे ।
इति ध्यात्वा महेशानि ! तेनैव मनुना यजेत् ॥
तयोरेवं विभागेन गायत्रीं दशधा जपेत् ।
भैरवं डेऽन्तकण्ठोक्ता विद्महे तदनन्तरम् ॥
महादेवेति ततः पश्चाद्धीमहीति ततो वदेत् ।
तन्नो देवी ततः पश्चात्तदन्ते च प्रचोदयात् ॥
इति ते कथिता देवी गायत्री परमाक्षरी ।
तस्याः स्मरणमात्रेण द्रव्यशुद्धिश्च जायते ॥
तस्य प्रसादादीशोऽहं सत्यं सत्यं न संशयः ।
तस्य मध्ये मूलमन्त्रं विखदण्डैर्लिखेत् सकृत् ।
रक्तवर्त्तेन संपूज्य सुधां वर्त्तेन गोपयेत् ॥*॥
धर्म्मार्थकाममोक्षाणां विषयाणाञ्च पार्व्वति ! ।
सर्व्वेषां कारणं यस्मात् कारणं परिकीर्त्तितम् ॥
अस्माकञ्च महेशानि ! शरीरकारणं हि तत् ।
मृत्युञ्जयोऽहं वीरेशि ! वीरकार्य्यप्रसादतः ॥
निर्व्विकारेण देवेशि ! निर्व्विकल्पेन चेतसा ।
सेव्यमानं कुलं भद्रे ! मुक्तिमुक्तिप्रदायकम् ॥
निर्व्विकल्पो महेशानि ! मुक्तिभागी न संशयः ।
सविकल्पो वरारोहे ! रौरवं याति निश्चितम् ॥"
इति कैवल्यतन्त्रे २ पटलः ॥
(वैद्यकोक्तदोषादि यथा,—
"तीक्ष्णोष्णरूक्षसूक्ष्माम्लं व्यवायाशुकरं लघु ।
विकाशि विशदं मद्यमोजसोऽस्याद्विपर्य्ययः ॥
तीक्ष्णादयो विषेऽप्युक्ताश्चित्तोपप्लाविनो गुणाः ।
जीवितान्ताय जायन्ते विषे तूत्कर्षवृत्तितः ॥
तीक्ष्णादिभिर्गुणैर्मद्यं मन्दादीनोजसो गुणान् ।
दशभिर्दशसंक्षोभ्य चेतो नयति विक्रियाम् ॥
आद्ये मदे द्वितीये स प्रमादायतने स्थितः ।
दुश्चिकित्स्यतनौ मूढः सुखमित्यधिशय्यते ॥
मध्यमोत्तमयोः सन्धिं प्राप्य राजसतामसः ।
निरङ्कुश इव व्यालो न किञ्चिन्नाचरेज्जडः ॥
इयं भूमिरवद्यानां दौःशील्यस्येदमास्पदम् ।
एकोऽयं बहुमार्गाया दुर्गतेर्दैशिकः परम् ॥
निश्चेष्टः शववच्चेष्टे क्षतीये तु मदे स्थितः ।
मरणादपि पापात्मा गतः पापतरां दशाम् ॥
धर्म्माधर्म्मसुखं दुःखमर्थानर्थं हिताहितम् ।
यदासक्तो न जानाति कथं तत्त्वोनवेद्बुधः ।
मदे मोहो भयं शोकः क्रोधो मृत्युश्च संश्रितः ।

सोन्मादमदमूर्च्छायाः सापस्मारापतानकाः ॥
यच्चैकः क्षुतिविभ्रंशस्तत्र सर्व्वमसाधु यत् ।
अयुक्तियुक्तमन्नं हि व्याधये मरणाय वा ॥
मद्यं त्रिवर्गधीधैर्य्यबलघ्नादेरपि नाशनम् ।
नाति माद्यन्ति बलिनः क्षताहारा महाशनाः ॥
स्निग्धाः सत्त्ववयोयुक्ता मद्यनित्यास्तदन्वयाः ।
मेदःकफाधिकामन्दवातपित्ता दृढाशयाः ॥
विपर्य्ययेऽतिमाद्यन्ति विभ्रष्टाः कुपिताश्च ये ।
मद्येन चान्नरूपेण साजीर्णे बहु नाति च ॥"
इति वाभटे निदानस्थाने षष्ठेऽध्याये ॥)
एतानि श्रुतिस्मृतिविरुद्धत्वान्मोहनार्थानि शिष्टैः कदाचिदपि नाचरणीयानि ॥

मद्यद्रुमः, पुं, (मद्योत्पादको द्रुमः ।) माड़रवृक्षः । इति राजनिर्घण्टः ॥

मद्यपङ्क्तिः, पुं, (मद्यानां पङ्क्त इव ।) सुराकल्कः । मेया इति भाषा ॥ तत्पर्य्यायः । मेदकः २ आगलः ३ । इति हेमचन्द्रः । ३ । ५६८ ॥

मद्यभाजनं, क्ली, (मद्यमेरश्यते भुज्यते इति । अश् + कर्म्मणि ल्युट् ।) पानरुचकभक्ष्यम् । तत्पर्य्यायः । उपदंशः २ अवदंशः ३ चक्षणम् ४ । इति हेमचन्द्रः । ३ । १७१ ॥

मद्यपुष्पा, स्त्री, (मद्यानि मदसाधनानि पुष्पाण्यस्याः ।) धातकी । इति राजनिर्घण्टः ॥
(गुणादिविवृतिरस्या धातकीशब्दे ज्ञातव्या ॥)

मद्यमण्डः, पुं, (मद्यस्य मण्डः ।) मद्यफेनः । तत्पर्य्यायः । कारोत्तमः २ । इति हेमचन्द्रः । ३ । ५६६ ॥ कारोत्तरः ३ सुरामण्डः ४ । इत्यमरः । २ । १० । ४३ ॥

मद्यवासिनी, स्त्री, (मद्यानामिव वासो गन्धोऽस्या अस्तीति । इनिः ङीष् ।) धातकीवृक्षः । इति रत्नमालाराजनिर्घण्टौ ॥

मद्यबीजं, क्ली, (मद्यस्य बीजम् ।) नानाद्रव्यकृतसुराबीजम् । तत्पर्य्यायः । किण्वम् २ नग्नहूः ३ नग्नहु ४ । इति हेमचन्द्रः । ३ । ५६६ । वाखर इति भाषा ॥

मद्यसन्धानं, क्ली, (मद्यस्य सन्धानमुत्पादनार्थं आयोजनम् ।) सुरासञ्जीकरणम् । वंशाङ्कुरफलादीनां बहुकालं सन्धाय यत् क्रियते तत् । तत्पर्य्यायः । व्यासुतिः २ आसवः ३ अभिषवः ४ । इति हेमचन्द्रः । ३ । ५६६ ॥

मद्यामोदः, पुं, (मदस्येवामोदो गन्धो यस्य ।) वकुलवृक्षः । इति राजनिर्घण्टः ॥

मद्रः, पुं, (मन्दते इति । मदि मोदादौ + "स्फायितञ्चीति ।" उणा० २ । १३ । इति रक् ।) देशविशेषः । हर्षः । इत्युणादिकोषः ॥ तद्देशविवरणं यथा,—
"वैराटपाण्डव्योर्मध्ये पूर्व्वदक्षक्रमेण तु ।
मद्रदेशः समाख्यातो मान्द्रीहा तत्र तिष्ठति ॥"
इति भक्तिसङ्गमतन्त्रे ७ पटलः ॥
(भद्रे, क्ली । यथा, चतुर्थी चाग्निष्याग्नुष्य-भद्रभद्रकुलसुखार्थेषु ते: । २ । ३ । ७३ । इत्यत्र सूत्रे। भद्रं देवदत्तस्यभूयात् । इति काशिका।
मद्रभद्रयोः पर्य्यायत्वादन्यतरो न पठनीयः । इति सिद्धान्तकौमुदी च ॥)

मद्रकः, त्रि, (मद्रेषु जातः इति । मद्र + "मद्रवृज्योः कन् ।" ४ । २ । १३१ । इति कन् ।) मद्रदेशभवः । इति सिद्धान्तकौमुदी ॥ (देशभेदः । यथा, मत्स्यपुराणे । ११३ । ४१ ॥
"गान्धारा यवनाश्चैव सिन्धुसौवीरमद्रकाः ॥")

मद्रकारः, त्रि, (मद्रं करोतीति । कृ + "क्षेमप्रियमद्रादण् च ।" ३ । २ । ४४ । इति पक्षे अण् ।) मद्रङ्करः । यथा क्षेमप्रियमद्रात् कुर्व्वति सुग्धबोधव्याकरणम् ॥

मद्रङ्करः, त्रि, (मद्रं भद्रं करोतीति । कृ + "क्षेमप्रियमद्रादण् च ।" ३ । २ । ४४ । इति चकारात् खच् । सुम् च ।) मङ्गलकारकः । यथा क्षेमङ्करोऽरिष्टतातिः स्यान्मद्रङ्करशङ्करौ । इति त्रिकाण्डशेषः ॥

मद्रसुता, स्त्री, (मद्रस्य सुता ।) मद्रराजकन्या । सा पाण्डुराजस्य द्वितीया भार्य्या नकुलसहदेवजननी च । इति शब्दरत्नावली ॥

मद्रगौण्यः, मद्रगौण्यः, मद्रगर्ण्यः, } त्रि, (मद्रगर्ग्यस्यापत्यमिति । "अश्वघ्न्यादिभ्यश्च" ४ । १ । ९४ । इतिक्रमेण खञ्यञ्प्रत्ययाः ।) मद्रगर्गसम्बन्धी । इति सिद्धान्तकौमुदी ॥

मद्रा, [न्] पुं, (माद्यतीति । मद् + "स्वामदिपद्यर्त्तिभृकिभ्यो वनिप् ।" उणा० ४ । ११२ । इति वनिप् ।) शिवः । इति सिद्धान्तकौमुदीव्याख्यायां सुबादिवृत्तिः ॥ (मदनशीले, त्रि । यथा, ऋग्वेदे । ८ । ८१ । १६ ।
"इन्द्राय मद्वने सुतं परिष्टोभन्तु नो गिरः ॥")
"मद्वने मदनशीलाय ।" इति तद्भाष्ये सायणः ॥

मधु, क्ली, (मन्यन्ते विशेषेण जानन्ति जना यस्मिन् । मन् + "फलिपाटिनमिमनिजनां गुक्पटिनाकिधतच्च । उणा० १ । १६ । इति उः धश्चान्तादेशः । मद्यम् । (यथा, आर्य्यासप्तशत्याम् । ४२५ ।
"मधुमदवीतव्रीड़ा यथा यथा लपति सम्मुखं बाला ॥")
क्षीरम् । जलम् । इति विश्वः हेमचन्द्रश्च ॥ रसभेदः । मधुररसः इति यावत् । इति शब्दरत्नावली ॥ पुष्परसः । फुलेर मौ इति भाषा ॥ तत्पर्य्यायः । मकरन्दः २ । इत्यमरः । २ । ४ । १७ ॥ मरन्दः ३ मरन्दकः ४ । इति शब्दरत्नावली ॥ क्षुद्राभिर्मक्षिकाभिः कृतम् । मौ इति भाषा । क्षौद्रम् २ माक्षिकम् ३ । इत्यमरः । २ । ९ । १७ ॥ माक्षीकम् ४ कुसुमासवम् ५ पुष्पासवम् ६ पवित्रम् ७ पित्र्याम् ८ पुष्परसाह्वयम् ९ । इति राजनिर्घण्टः ॥ माक्षीकम् १० सारघम् ११ मक्षिकावान्तम् १२ वरटीवान्तम् १३ भृङ्गवान्तम् १४ पुष्परसोद्भवम् १५ । इति भावप्रकाशः ॥ (तथास्य पर्य्यायः ।
"मधु पुष्परसं क्षौद्रं मकरन्दश्च माक्षिकम् ॥"
इति वैद्यकरत्नमालायाम् ॥

मधु तु मधुरं कषायानुरसं रूक्षं शीतमग्निदीपनं वर्ण्यं बल्यं लघु सुकुमारं लेखनं हृद्यं सन्धानं शोधनं रोपणं वाजीकरणं संग्राहि चक्षुःप्रसादनं सूक्ष्ममार्गानुसारि पित्तश्लेष्ममेदोमेहहिक्काश्वासकासातिसारच्छर्द्दिव्रणाक्षमिविषप्रशमनं क्षतादिव्रिदोषप्रशमनञ्च तच्च लघुत्वात् कफघ्नं पेच्छिल्यान्माधुर्य्यात् कषायभावाच्च वातपित्तघ्नम् ।
"दृंहणीयं मधु नवं नातिश्लेष्महरं सरम् ।
मेदःस्थौल्यापहं ग्राहि पुराणमतिलेखनम् ॥
दोषत्रयहरं पक्वमाममस्रं त्रिदोषकृत् ।
तद्युक्तं विविधैर्योगैर्निहन्यादामयान् बहून् ॥
नानाद्रव्यात्मकत्वाच्च योगवाहि परं मधु ॥"
तच्च नानाद्रव्यरसगुणवीर्य्यविपाकविरुद्धानां पुष्परसानां सविषमक्षिकासम्भवत्वाद्वाह्यगुणोपचारम् ।
"उष्णैर्विरुध्यते सर्व्वं विषान्वयतया मधु ।
उष्णार्तुसुखैरुष्णैर्वा तं निहन्ति यथा विषम् ॥
तत् सौकुमार्य्याच्च तथैव शीत्या-
ज्ञानौषधीनां रससम्भवाच्च ।
उष्णैर्विरुध्येत विशेषतश्च
तथान्तरीक्षेण जलेन चापि ॥
उष्णेन मधु संयुक्तं वमनेष्ववचारितम् ।
अपाकादनवस्थानान्न विरुध्येत पूर्व्ववत् ॥
मध्वामात् परतस्त्वन्यदामं कष्टं न विद्यते ।
विरुद्धोपक्रमत्वात्तत् सर्व्वं हन्ति यथा विषम् ॥"
इति सुश्रुते सूत्रस्थाने ४५ अध्याये ॥)
अस्य सामान्यगुणाः । शीतत्वम् । रूक्षत्वम् । स्वादुत्वम् । त्रिदोषव्रणनाशित्वम् । कषायानुरसत्वम् । रूक्षत्वम् । चक्षुष्यत्वम् । श्वासकासनाशित्वञ्च ॥ * ॥ तदष्टविधं यथा । पौत्तिकम् १ भ्रामरम् २ क्षौद्रम् ३ माक्षिकम् ४ छात्रम् ५ अर्घ्यम् ६ औद्दालकम् ७ दालम् ८ । एतेषां लक्षणानि यथा,—
"पिङ्गला मक्षिका ज्ञेया महत्यल्पा च सा द्विधा ।
महती पुत्तिकानाम्नी खल्पा क्षुद्रेति कथ्यते ॥
मध्यमा मक्षिका नीला माक्षिकेत्यभिधीयते ।
पुत्तिकाभ्रमरक्षुद्रामक्षिकासम्भवं मधु ॥
पौत्तिकादुच्यते क्षौद्रं वरटीक्षौद्रसम्भवम् ।
तपोवने चरनकारोरर्घ्यं मधुतरुद्भवम् ॥
औद्दालकन्तु वल्मीककारिकीटविनिर्म्मितम् ।
दालमित्यभिनिर्द्दिष्टं वृक्षकोटरकीटजम् ॥"
एतेषां वर्णा यथा,—
"माक्षिकं तैलवर्णं स्यात् घृतवर्णन्तु पौत्तिकम् ।
क्षौद्रं कपिलवर्णं स्याच्छ्वेतं भ्रामरसंज्ञितं ॥"
एतेषां गुणा यथा,—
पौत्तिकं तेषु वीर्य्योष्णं कषायानुरसान्वयात् ।
वातास्रकृपित्तकृद्भेदि विदाहि मदकृन्मधु ॥
"पेच्छिल्यात् स्वादुभूयस्त्वाद् भ्रामरं गुरु कौर्त्तितम् ।
क्षौद्रं विशेषतो ज्ञेयं शीतलं लघु लेखनम् ॥
तस्मात्परतरं रूक्षं माक्षिकं प्रवरं स्मृतम् ।

श्वासादिषु च रोगेषु प्रयुक्तं तद्विशेषतः ॥
छात्रं त्रिदोषशमनं रक्तपित्तहरं गुरु ।
नात्यर्थं चक्षुष्यमायुष्यं कफपित्तामवातजित् ॥
सौद्रालकं कषायोष्णं कटुकं विषनाशनम् ।
दाल्यं कफहरं रूक्षं दीपनं हृद्विमेहजित् ॥
उष्णमुष्णार्तसुप्तेषु हन्यान्मधु विषान्वयात् ।
मधुमक्षैर्विरच्यन्ते वर्च्चयित्वार्ध्यसञ्ज्ञितम् ॥"
उष्टैः रौक्षैः करभैः उष्णं मधु उष्णार्त्ते रौद्रपीड़ितं जनं विषान्वयात् विषतुल्यत्वात् हन्यात् ॥ ० ॥ नवपुराणमधुगुणाः ।
"हृद्यमीषं मधु नवं वातश्लेष्महरं परम् ।
पुराणं लघु संग्राहि निर्दोषं सौम्यनाशनम् ॥
दोषत्रयहरं पक्वमाममत्यं त्रिदोषकृत् ॥"
यत्र केचिन्मधुनोऽग्निसंयोगाभावात् कालपक्वतामाहुः ॥ ० ॥ मधुजातशर्करागुणाः ।
"मधुजा शर्करा रूक्षा लघ्वी च्छर्द्यतिसारजित्।"
इति राजवल्लभे मधुवर्गः ॥ ० ॥

अपि च ।
"माक्षिकं भ्रामरं क्षौद्रं पौत्तिकं छात्रकं तथा ।
आर्घ्यमौद्दालकं दालमित्यष्टौ मधुजातयः ॥
नानापुष्परसाहाराः कपिला वनमक्षिकाः ।
याः स्युस्ताभिरुत्पन्नं मधु माक्षिकमुच्यते ॥
ये स्निग्धाञ्जनगोलाभाः पृथ्वासवपरायणाः ।
भ्रमरैर्जनितं तेषु भ्रामरं मधु भण्यते ॥
पिङ्गला मक्षिकाः सूक्ष्माः क्षुद्रा इति हि विश्रुताः ।
ताभिरुत्पादितं यत्तु तत् क्षौद्रं मधु कथ्यते ॥
महत्यो मक्षिकाः पिङ्गाः पुत्तिका इति कीर्त्तिताः ।
तज्जातं मधु धीमद्भिः पौत्तिकं खलु दाहृतम् ॥
एडकारण्यपटलं सरघाः पीतपिङ्गलाः ।
ये कुर्व्वन्ति तदुत्पन्नं मधुच्छात्रकमीरितम् ॥
मक्षिकाक्षीक्षुतुल्या याः पीताः षट्पदसन्निभाः ।
तदुद्भूतं यदार्घ्यं तदार्घ्यं मधु भण्यते ॥
उद्दालकाः कपिलाः कीटा भूमेरुद्दलनाः स्मृताः ।
वल्मीकान्तरुदुत्पन्नमौद्दालकमुदीर्य्यते ॥
इक्षुनीरदलाकाराः सूक्ष्माश्चिन्वन्ति मक्षिकाः ।
यदृक्षकोटरान्तस्थं मधु दालमिदं क्रमात् ॥
इत्येतत्षड्विधा भेदैरुत्पत्तिः कथिता क्रमात् ।
अथ वर्ण्यन्ते तेषां वर्णवीर्य्यादिकं क्रमात् ॥"
तद्यथा,—
माक्षिकं तैलवर्णं स्यात् श्वेतं भ्रामरमुच्यते ।
क्षौद्रन्तु कपिलाभासं पौत्तिकं घृतसन्निभम् ॥
आर्घ्यनामं भवेत् रूक्षं स्यात् पिङ्गलमार्घ्यनामकम् ।
क्षौद्रालं सर्व्वसाधारणमापीतं दालमुच्यते ॥
माक्षिकं मधुरं रूक्षं लघु श्वासादिदोषजित् ।
भ्रामरं पित्तजं रूक्षं मधुरं सुरसाधयित् ॥
क्षौद्रन्तु शीतं मधुरं पित्तजं पित्तवातजित् ।
पौत्तिकं मधु रूक्षोष्णं कफपित्तविदाहजित् ॥
त्रिदोषदमिदञ्च विद्याच्छ्वासं गुरूत्तरम् ।
आर्घ्यं मधुनिगदितं कफपित्तादिदोषजित् ॥
क्षौद्रालन्तु कफादिघ्नं सर्व्वसिद्धिदम् ।
दालं कटु कषायाम्लं मधुरं पित्तदाधि च ॥
नवं मधु भवेत् स्थौल्यं नातिश्लेष्महरं परम् ।
देहस्थौल्यापहं प्राहि पुराणं मधु लेखनम् ॥
पक्वं दोषत्रयघ्नं मधु विविधरुजाजाड्यनिष्ठामयादि-
ध्वंसं धत्ते च रूक्षं बलमतिपुष्टिदं वीर्य्यवृद्धिं विधत्ते ।
श्यामश्वेदामगुल्मामयपवनरुजापित्तदाहासदोष-
नाशं नूनं विशोषं जनयति नयति ध्वंसमध्यक्षदृष्टेः ॥
व्रणशोधनसन्धाने व्रणसंरोपणादिषु ।
साधारण्यान्मधु हितं तत्तुल्या मधुशर्करा: ॥
उष्णं सहोष्णं काले वा स्वयमुष्णमथापि वा ।
आमं मधु मनुष्याणां विषवत्तापदायकम् ॥
कीटकादियुतमन्यदूषितं
यच्च पर्य्युषितकं मधु स्मृतं ।
कण्ठकोटरगतञ्च मेचकं
तच्च गेहजनितञ्च दोषकृत् ॥
दृष्ट्वा निरूप्य यदुपात्तमपास्य दंशां-
स्तादृग्विधं मधु रसायनयोगयोग्यम् ।
शिक्षागुदाङ्कुरविशोफकफव्रणादि-
दोषापहं भवति दोषदमन्यथा चेत् ॥
माक्षी सिता मधूत्पन्ना मधुला मधुशर्करा ।
माक्षीकशर्करा चैषा क्षौद्रजा क्षौद्रशर्करा ॥
यद्गुणं यन्मधु प्रोक्तं तद्गुणास्तस्य शर्करा: ।
विशेषाल्लघ्व्या च तर्पणं क्षौद्रदेहिनाम् ॥"
इति राजनिर्घण्टः ॥०॥०॥

मतान्तरे मधुगुणाः ।
"मधु शीतं लघु स्वादु रूक्षं श्वासे विलेखनम् ।
चक्षुष्यं दीपनं मेध्यं व्रणशोधनरोपणम् ॥
सौक्ष्म्यार्थकरं उष्णं परं स्रोतोविशोधनम् ।
कषायानुरसं प्राहि प्रवाहणकरं परम् ॥
वल्यं मेधाकरं रूक्षं विषदं रोचनं हरेत् ।
मुखार्शःकासपित्तासकफमेहकृमिक्लमान् ।
नेत्रसूत्रावमिच्छर्दिहिक्कातीसारविड्ग्रहान् ।
दाहं चतसृषु योगवाह्यरूपवाल्लभम् ॥"०॥

अथ मधुभेदाः ।
"माक्षिकं भ्रामरं क्षौद्रं पौत्तिकं छात्रमित्यपि ।
आर्घ्यमौद्दालकं दालमित्यष्टौ मधुजातयः ॥"०॥

अथ तेषां लक्षणानि गुणाश्च । तत्र माक्षिकस्य ।
"मक्षिकाः पिङ्गवर्णास्तु महत्यो मधुमक्षिकाः ।
ताभिः कृतं तैलवर्णं माक्षिकं तत् प्रचक्षते ॥
माक्षिकं मधुरं श्रेष्ठं नेत्रामयहरं लघु ।
कामलार्शःकफश्वासकासघ्नञ्च विनाशनम् ॥"०॥

अथ भ्रामरस्य ।
"किञ्चित् रक्तोः प्रसिद्धेभ्यः पुष्पेभ्यः सञ्चितं कृतम् ।
निर्म्मलं स्फटिकाभं यत्तन्मधु भ्रामरं स्मृतम् ॥
भ्रामरं रक्तपित्तघ्नं मूत्रकृच्छ्रहरं गुरु ।
स्वादुपाकञ्च विज्ञेयान् पित्तघ्नं हिमम् ॥"

अथ क्षौद्रस्य ।
"मक्षिकाः कपिलाः सूक्ष्माः क्षुद्राख्यास्तन्मृतं मधु ।
मुनिभिः क्षौद्रमित्युक्तं सद्वर्णात् कपिलं भवेत् ॥
गुणैर्माक्षिकवत् क्षौद्रं विशेषान्नेत्रगदापनम् ॥"

अथ पौत्तिकस्य ।
"याः कृष्णा मशकोपमा लघुतराः प्रायो महापिच्छितं
वृक्षाणां तरुकोटरान्तरगताः पुष्पासवं कुर्व्वते ।
तासञ्ज्ञेरिह पुत्तिका निगदितास्ताभिः कृतं सर्पिषा
तुल्यं यन्मधु तद्वनेचरजनैः संकीर्त्तितं पौत्तिकम् ॥
पौत्तिकं मधु रूक्षोष्णं पित्तदाहास्रवातजित् ।
विदाहि नेत्रकृच्छ्रघ्नं गुल्मार्शश्चितशोषि च ॥"

अथ छात्रस्य ।
"वरटाः कपिलाः पीताः प्रायो हिमवतो वने ।
कुर्व्वन्ति वृत्तकाकारं तच्छत्रं छात्रं मधु स्मृतम् ॥
छात्रं कपिलपीतं स्यात् पिच्छिलं शीतलं गुरु ।
स्वादुपाकं क्रिमिश्चित्ररक्तपित्तप्रमेहजित् ।
भ्रमहृल्लोमहर्षघ्नं तर्पणञ्च गुणाधिकम् ॥"

अथार्घ्यस्य ।
"मधूकवृक्षा निर्यासं जरत्कार्व्वाश्रमोद्भवाः ।
सवन्त्यार्घ्यं तदा स्यातं श्वेतकं मालवे पुनः ॥
तीक्ष्णतुण्डास्तु याः पीता मक्षिकाः षट्पदोपमाः ।
अर्घ्यास्तासन्मृतं यत्तदार्घ्यं नित्यपरे जगुः ॥
आर्घ्यं मधुत्रितच्चक्षुष्यं कफपित्तहरं परम् ।
कषायं कटुकं पाके तिक्तञ्च बलपुष्टिकृत् ॥"०॥

अथौद्दालकस्य ।
"प्रायो वल्मीकमध्यस्थाः कपिलाः सूक्ष्मकीटकाः ।
कुर्व्वन्ति कपिलं स्वल्पं तत् स्यादौद्दालकं मधु ॥
औद्दालकं रुचिकरं स्वर्य्यं कुष्ठविषापहम् ।
कषायमुष्णमम्लञ्च कटुपाकञ्च पित्तकृत् ॥"०॥

अथ दालस्य ।
"संसृज्य पतितं पुष्पात् यत्तु पत्रोपरि स्थितम् ।
मधुराम्लकषायञ्च तद्दालं मधु कीर्त्तितम् ॥
दालं मधु लघु प्रोक्तं दीपनीयं कफापहम् ।
कषायानुरसं रूक्षं रक्तं हृद्विप्रमेहजित् ॥
अधिकं मधुरं स्निग्धं दृष्टयं गुरुभारिकम् ॥"
लघु पाके । गुरुभारिकं तुलितम् ॥ ० ॥ अथ नवपुराणमधुगुणाः ।
"नवं मधु भवेत् पुष्टेः नातिश्लेष्महरं परम् ।
पुराणं गाढकं रूक्षं मेदोघ्नमतिलेखनम् ॥
मधुनः शर्करायाश्च गुरुत्वापि विशेषतः ।
एकसंवत्सरेऽतीते पुराणत्वं स्मृतं बुधैः ॥'
अथ मधुनः शीतस्य गुणाधिक्यसुप्तताया निषेधः ।
"विषपुष्पादपि रसं सविषा भ्रमरादयः ।
गृहीत्वा मधु कुर्व्वन्ति तच्छीतं गुरुवन्मधु ॥

विधान्वयात्तदृष्ट्यन्तु द्रवैर्योगेन वा सह ।
उष्णार्त्तस्योष्णकाले च क्षुतं विषसमं मधु ॥"
इति भावप्रकाशः ॥

मधुः, पुं, (मन्+उ । नस्य धः ।) मधुद्रुमः । मौलगाछ इति भाषा ॥ वसन्तर्त्तुः । (यथा, कुमारसम्भवे । ३ । २७ ।
"निवेशयामास मधुर्दिरेफान्
नामाक्षराणीव मनोभवस्य ॥")
दैत्यभेदः । (यथा, देवीभागवते । १ । ६ । १५ ।
"मधुश्च कुपितस्तत्र हरिणा सह संयुगे ॥")
इमं हत्वा विष्णुर्मधुरुदनोऽभूत् ॥ चैत्रमासः । इति मेदिनी । धे, १२ ॥ (यथा, रघुः । ११ । ७ ।
"रेजतुर्गतिवश्यात् प्रवर्त्तिनौ
मारुतस्य मधुमाधवाविव ॥")
अशोकवृक्षः । इति हैमचन्द्रः । २ । १५३ ॥ यष्टिमधु । इति शब्दरत्नावली ॥ असुरविशेषः । (यथा, भागवते । ६ । ११ । १४ ।
"शतघ्नश्च मधोः पुत्रं लवणं नाम राक्षसम् ।
हत्वा मधुवने चक्रे मथुरां नाम वै पुरीम् ॥")
स च शत्रुघ्नेन हतः । यस्य नाम्ना मथुरा मधुपुरीति ख्याता ॥

मधुः, स्त्री, (मन्+उ । नस्य धः ।) चीवन्तीवृक्षः । इत्यमरः । २ । ४ । १४२ ॥

मधुकं, क्ली, (मध्विवेति । मधु+"संज्ञायां च ।" ५ । ३ । ६७ । इति कन् । यद्वा, मधु मधुरं कायतीति । कै+कः ।) यष्टिमधुका । इत्यमरः । २ । ४ । १०६ ॥ (यथास्य पर्य्यायः ।
"यष्ट्याह्वं मधुकं यष्टि क्लीतकं मधुयष्टिका ।
यष्टिमधु स्यलेजाता जलजातिरसा पुरा ॥"
इति वैद्यकरत्नमालायाम् ॥)
वसु । इति हैमचन्द्रः ॥

मधुकः, पुं, (मधु मधुरं कायतीति । कै+कः ।) वन्हिभेदः । यष्ट्याह्वः । विहगान्तरः । इति विश्वः ॥

मधुकण्ठः, पुं, (मधुर्मधुरः कण्ठः कण्ठस्वरो यस्य ।) कोकिलः । इति त्रिकाण्डशेषः ॥

मधुकरः, पुं, (करोति सञ्चिनोतीति । कृ+अच् । मधुनः करः ।) भ्रमरः । इत्यमरः । २ । ५ । २६ ॥ (यथा, श्रीमद्भागवते । ४ । १८ । २ ।
"सर्व्वतः सारमादत्ते यथा मधुकरो बुधः ॥")
कामी । इति धरणिः ॥ भृङ्गराजवृक्षः । इति शब्दमाला ॥

मधुकर्कटिका, स्त्री, (मधुर्मधुरा कर्कटिकेव ।) मधुरजम्बीरविशेषः । मउकंदी इति भाषा । तत्पर्य्यायः । कुम्भा २ । इति शब्दचन्द्रिका ॥ (पर्य्यायोऽस्या गुणाश्च यथा,—
"बीजपूरोऽपरः प्रोक्तो मधुरो मधुकर्कटी ।
मधुकर्कटिका खट्टी रोचनी शीतला गुरुः ।
रक्तपित्तक्षयश्वासकासहिक्काश्रमापहा ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।)
मधुखर्जूरिका । इति राजनिर्घण्टः ॥

मधुकर्कटी, स्त्री, (मधुर्मधुरा कर्कटी) मधुबीजपूरः । इति राजनिर्घण्टः ॥

मधुका, स्त्री, (मधुक+टाप् ।) मधुयष्टिका । इत्यमरः । २ । ४ । १०६ ॥ मधुपर्णीवृक्षः । इति मेदिनी । के, १३५ ॥ क्षीणवर्णकफघ्नी । इति हैमचन्द्रः । ४ । २४२ ॥

मधुकुक्कुटिका, स्त्री, मधुकुक्कुटी, स्त्री, (मधुः मधुरा कुक्कुटीव । मधुकुक्कुट+स्त्रियां ङीष् । स्वार्थे कन् । स्त्रियां टाप् । पूर्व्वस्य ह्रस्वत्वञ्च ।) जम्बीरविशेषः । मखुर इति मधुर इति च भाषा । तत्पर्य्यायः । मातुलुङ्गा २ सुगन्धा ३ गिरिजा ४ पूतिपुष्पिका ५ अत्यम्बा ६ देवदूती ७ । इति रत्नमाला ॥ अस्या गुणाः । शीतत्वम् । स्वादुत्वम् । गुरुत्वम् । स्निग्धत्वम् । वातपित्तविनाशित्वञ्च । इति राजवल्लभः ॥

मधुकृत्, पुं, (मधु करोति सञ्चिनोतीति । कृ+क्विप् तुगागमश्च ।) भ्रमरः । इति हैमचन्द्रः ॥ (यथा, छान्दोग्योपनिषदि । ३ । १ । २ ।
"अथ योऽस्य दक्षिणा रश्मयस्ता ऋचोऽस्य दक्षिणा मधुनाड्यो यजूंष्येव मधुकृतो यजुर्व्वेद एव पुष्पं ता अन्वता आपः ॥")

मधुकैटभः, पुं, (मधुनः पुष्परसस्य कै शिरसि अग्रभागे भटति गच्छतीति । भट्+कर्त्तरि घञ् ।) भ्रमरः । इति त्रिकाण्डशेषः ॥

मधुकैटभौ, पुं, (मधुश्च कैटभश्च तौ । इतरेतरद्वन्द्वः ।) असुरविशेषौ । तयोरुत्पत्त्यादि यथा,
"दैनन्दिने तु प्रलये प्रसुप्ते गरुडध्वजे ।
तस्य श्रवणविड्जातावसुरौ मधुकैटभौ ॥
कूर्म्मपृष्ठगता पृथ्वी विलीनेवाभवज्जले ।
तां विज्ञीर्णां योगनिद्रा महामाया वलोकयत् ॥
तां वै दृढतरां कर्त्तुं पृथ्वीं प्रति तदेश्वरी ।
उपायं चिन्तयामास कथं पृथ्वी भवेद्दृढा ॥
इदानीमाप्यवत् पृथ्वी प्रवृत्ता कोमला जले ।
सृष्टिकाले जनान् बोढुं कथं शक्ता भविष्यति ॥
इति सञ्चिन्त्य सा माता जगतां सृष्टिकारिणी ।
उपगम्य तदा विष्णुमाससाद सुनिद्रितम् ॥
तनु सुप्तं समासाद्य जगन्नाथं जगत्पतिम् ।
वामहस्तकनिष्ठाग्रं तस्य कर्णे न्यवेशयत् ॥
निवेश्य नखराग्रेण प्रोद्धृत्य श्रवणं मलम् ।
चूर्णोचकार सा देवी योगनिद्रा जगत्प्रभुः ॥
तत्कर्णमलचूर्णेभ्यो मधुनामासुरोऽभवत् ।
ततो दक्षिणहस्तस्य कनिष्ठाग्रन्तु दक्षिणे ॥
कर्णे न्यवेशयद्देवी तस्मादप्युद्धृतं मलम् ।
तत्रापि चोदयामास करशाखाग्रजेन तु ॥
ततोऽभूत् कैटभो नाम बलवानसुरो महान् ॥
उत्पन्नः स च पानार्थं यस्मान् रुदितवान्मधु ।
अतस्तस्य महादेवी मधुनामाकरोत्तदा ॥
उत्पन्नः कीटवज्ञाति महामायाकरे यतः ।
अतस्तं कैटभाख्यन्तु स्वयं देवी तदाकरोत् ॥
ताडयाञ्च महामाया युध्यतां हरिणा सह ।
युवानौ अवध्यौवान्य भवन्तौ निहनिष्यति ॥
यदा युवां प्रभावेषु आवां विष्णो ! वधान तौ ।
तदैवायं युवां हन्ता नान्यथा हरिरप्यथ ॥
महामायामोहितौ तौ विष्णुगात्रे तदा मुहुः ।

भ्रममाणौ ददृशतुर्नाभिपद्मस्थितं विधिम् ॥
तमूचतुस्तौ धातारं हनिष्यावोऽद्य नामितम् ।
त्वं जागरय वैकुण्ठं यदि जीवितुमिच्छसि ॥
ततो ब्रह्मा महामायां योगनिद्रां जगत्प्रसूम् ।
प्रसादयामास तदा स्तुतिभिर्नतिभिर्मिया ॥
चिरं स्तुताथ सा देवी ब्रह्मणा जगदात्मना ।
प्रसन्नाभवदत्यर्थमुवाच च तथा विधिम् ॥
किमर्थं संस्तुता चाहं किं करिष्याम्यहं तव ।
तद्वद त्वं महाभाग ! करिष्याम्यहमद्य ते ॥
ततस्तेन महामाया प्रोक्ता धात्रा महात्मना ।
प्रबोधय जगन्नाथं यावन्नो मां हनिष्यतः ।
संमोहयैतौ दुर्द्धर्षावसुरौ मधुकैटभौ ॥
इत्युक्ता सा तदा देवी ब्रह्मणा जगदात्मना ।
बोधयामास वैकुण्ठं मोहयामास तौ तदा ॥
ततः प्रबुद्धः कृष्णः स ददर्शं भयशालिनम् ।
ब्रह्माणं तौ तदा घोरावसुरौ मधुकैटभौ ॥
ततस्ताभ्यां स युयुधे ह्यसुराभ्यां जनार्द्दनः ।
नाशकद् बाधितुं वीरावसुरौ मधुकैटभौ ॥
अनन्तोऽपि रणाग्रेण तान्नो धर्त्तुं क्षमोऽभवत् ।
युध्यमानान्महावीरान् वैकुण्ठमधुकैटभान् ॥
अथ ब्रह्मा शिलारूपां स्थितिशक्तिं तदाकरोत् ।
अर्द्धयोजनविस्तीर्णां सार्द्धयोजनमायताम् ॥
तस्यां शिलायां वैकुण्ठो युयुधे नृपसत्तम ! ।
सह ताभ्यां शिला सा तु प्रविवेश जलान्तरम् ॥
तस्यान्तु शक्त्यां मायायां तोयेषु युयुधे हरिः
पञ्चवर्षसहस्राणि बाहुयुद्धेर्निरन्तरम् ॥
यदा नैवाशकद्धन्तुं तौ विष्णुर्जगतां पतिः ।
परां चिन्तां तदावाप विधातापि भयान्वितः ॥
ततस्तावेव तं विष्णुमूचतुर्ब्बलदर्पितौ ।
पुनः पुनस्तौ गर्জन्तौ महामायाविमोहितौ ॥
तुष्टौ स्वस्तन्नियुद्धेन वरं वरय माधव ! ।
तवेदं संप्रदास्यावः सत्यमेतदराधुना ॥
तयोस्तद्वचनं श्रुत्वा भगवान् गरुडध्वजः ।
उवाच तौ युवां वध्यौ भवेतां मे महाबलौ ।
इति देहि वरं मह्यं दातव्यं यदि विद्यते ॥
तौ तदा प्राह युग्मत्तो योग्यो नौ शोभनो वधः ।
तत्रावां जहि नो यत्र तोयं सम्प्रति विद्यते ॥
तयोस्तद्वचनं श्रुत्वा माधवो जगतां पतिः ।
ब्रह्माणं माह शीघ्रेण प्राहैदचात्मसंज्ञया ॥
ब्रह्मशक्तिशिलां शीघ्रमुद्धृत्य क्षीयतां यथा ।
तत्र स्थित्वा महाधारे हनिष्यामि महाबलौ ॥
ततो ब्रह्मा ह्यहञ्चैव उद्धार शिलान्तु ताम् ॥
तस्या मध्ये पूर्व्वभागे ह्यहं पर्व्वतरूपधृक् ।
ऊर्द्धं स्थित्वा शिलां भित्त्वा प्रविवेश रसातलम् ॥
शैलान्यामभवन् कूर्म्मः पर्व्वतश्चाग्रहीत् शिलाम् ।
वायव्याश्च तथानन्तो नैर्ऋत्याश्च सुरेश्वरी ॥
महामाया जगद्धात्री शैलरूपप्रधारिणी ।
आग्नेय्याश्च स्वयं विष्णुरेकरूपेण संस्थितः ॥
ब्रह्मशक्तिशिलां गृह्णन् भगवान् परमेश्वरः ।
मध्ये ब्रह्मा त्वहञ्चैव वराहश्च तथापरः ।
ततो वराहरूपस्य चरमे जगतां पतिः ।
स्थित्वा शिलामवष्टभ्य ब्रह्मशक्तिमधोगताम् ॥

वामे मलयपर्वते यदादारोह्य शिरसी तयोः ।
जगदाधारभूतः स सर्वयत्नेन संस्तुतः ॥
सर्वैर्नेत्रैः समाक्रम्य चिच्छेद न पृथक् पृथक् ।
मधुकैटभयोः सम्यक् वीरयोः पृथिवीपते ॥
तस्य नाभ्रस्य संस्पर्शादूर्ध्वमभ्रक्तिरधोगता ।
म्रियमाणापि दैत्यैर्यत्सादपि सुदुर्मुदः ॥
ततस्तयोस्तु रुचयोः शरीरे जगतां पतिः ।
अकरोत्तिं तनुत्राणं यथावत्तस्य प्रयत्नतः ।
उद्भूतायां पृथिव्यान्तु तयोर्मेदोविलेपनैः ।
चतुरश्रमकरोत् पृथ्वीं क्षेत्रिणां तोयराशिभिः ॥
मेदोनिलेपिता यस्माद् गीयते मेदिनीति सा ।
यस्मात् पृथिवी देवी देवमानुषराक्षसैः ॥"
इति कालिकापुराणे ६१ अध्यायः ॥
(तनयोनामनिरुक्तिर्यथा, महाभारते । १२ । ३४० । २४—२६ ।
"मत्तस्यः परमेष्ठी स ततो भूतगणान् सृजन् ।
पूर्वमेव च पद्मस्य पत्रे सूर्यांशुसप्रभे ॥
नारायणस्तनौ विष्णू अपामास्तां गुणोत्तरौ ।
तावपश्यत् स भगवाननादिनिधनोऽच्युतः ॥
रक्तास्ताभवह्निसंस्पर्शाभौ रुचिरप्रभः ।
स तामसौ मधुर्यातस्तथा नारायणाह्वया ।
कठिनत्वमरौ विष्णुः कैटभो राजनस्तु सः ॥")
मधुकोषः, पुं, (मधवे क्षतः कोषः मध्याधारः कोषो वा ।) मधुमक्षिकाकृतकोषः ॥ मौचाक् इति भाषा । तत्पर्यायः । मधुकम् २ । इति शब्दचन्द्रिका ॥ (यथा,—
"भ्रमरेणेव मयायं व्याख्यामधुकोष आरब्धः ।"
इति वाचस्पतिमिश्रविरचितायां सांख्यतत्त्वकौमुद्यां प्रथमसूत्रटीकायाम् ॥) छागसुष्क इति मांसाशिनो वदन्ति ॥
मधुक्रमः, पुं, (मधुनः क्रमः ।) पुनः पुनर्मधुपानक्रमः । तत्पर्यायः । मधुवारः २ । इत्यमरः । २ । ९० । ४१ ॥ मधुकोषः । इति शब्दरत्नावली ॥
मधुक्षीरः, पुं, (मधुवत् क्षीरं निर्यासोऽस्य ।) स्वर्जूवृक्षः । इति शब्दमाला ॥
मधुक्षुरिका, स्त्री, (मधुर्मधुरा क्षुरी । ततः कन् टाप् । पूर्वस्य ह्रस्वत्वम् ।) स्वर्जूरविशेषः । तत्पर्यायः । मधुकर्कटिका २ क्षीरकर्कटिका ३ क्षुरफलिनी ४ मधुफलिका ५ माधवी-मधुरा ६ मधुरस्वर्जूरी ७ मधुस्वर्जूरी ८ । अस्या गुणाः । मधुरत्वम् । गुरुत्वम् । सन्तापपित्तशान्तिकारित्वम् । शिशिरत्वम् । वातकृत्त्वम् । वमनोर्ध्वविरेचनत्वञ्च । इति राजनिर्घण्टः ॥
मधुगायनः, पुं, (मधु गायतीति । गै + "गायतेरीक्षायां युट् च ।" ३ । २ । १८७ । इति युट् । यद्वा, मधौ वसन्ते गायन इति वसन्तीयमानः ।) कोकिलः । इति राजनिर्घण्टः ॥
मधुगुडः, पुं, (मधु मधुरं गुडवत्कस्य । यवनेरितपुष्पकालवत्त्वात् मधुरत्वात् तथात्वम् ।) कोशातकवृक्षः । इति शब्दमाला ॥
मधुगोः, पुं (मधुमेधरो गोर्यस्य ।) कोकिलः । इति शब्दरत्नावली ॥
मधुच्छदा, स्त्री, (मधुः मधुरच्छदः पर्णमस्याः । यद्वा मधु छादयति रसाधिक्येन पराभवतीति छद + णिच् । घः । धे छस्य च ।) मयूरशिखा । इति भावप्रकाशः ॥ (तथास्या गुणाः ।
"नीलकण्ठशिखा लघ्वी पित्तश्लेष्मातिसारजित्॥"
इति च भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे ॥)
मधुजं, क्लीं. (मधुनो जातम् इति । जन् + डः ।) शिक्थकम् । इति राजनिर्घण्टः ॥
मधुजम्बीरः, पुं, (मधुर्मधुरो जम्बीरः ।) मधुरजम्बीरः । इति राजनिर्घण्टः ॥
मधुजा, स्त्री, (मधोः मधुमेदसो जाता प्रादुर्भूता इति । जन् + डः टाप् ।) पृथिवी । इति शब्दचन्द्रिका ॥ (मधुनो जायते सा इति । जन + डा ।) मिता । तत्पर्यायः । महाश्वेता २ । इति त्रिकाण्डशेषः ॥
मधुजित्, पुं, (मधुं मधुनामानं दैत्यं जितवानिति । जि + क्विप् । तुगागमश्च ।) विष्णुः । इति शब्दरत्नावली ॥ (यथा, देवीभागवते । १ । ५ । ६२ ।
"शिवे ! किं वा ज्ञात्वा विविदिषसि शक्तिं मधुजितः ॥")
मधुतृणं, क्लीं, (मधुरं तृणम् ।) इक्षुः । इति त्रिकाण्डशेषः ॥ (गुणादयोऽस्य इक्षुशब्दे ज्ञातव्याः ॥)
मधुतृणः, पुं, (मधुर्मधुरस्तृणः ।) इक्षुः । इति राजनिर्घण्टः ॥ (अस्य पर्यायो यथा,—
"महारसोऽसिपत्रः स्यान्नलपुष्पो मधुतृणः ।
इक्षुर्वंशककान्तारभिरुपौण्ड्रादिभेदवान् ॥"
इति वैद्यकरत्नमालायाम् ॥
"इक्षुर्दीर्घच्छदः प्रोक्तस्तथा भूरिरसोऽपि च ।
गुडनालोऽसिपत्रश्च तथा मधुतृणः स्मृतः ॥"
इति च भावप्रकाशस्य पूर्वखण्डे द्वितीये भागे ॥)
मधुत्रयं, क्लीं, (मधूनां मधुरद्रव्याणां त्रयम् ।) मधुरत्रयम् । इति राजनिर्घण्टः ॥ (मधुघृततैलत्रयम् ॥)
मधुदीपः, पुं, (मधौ वसन्ते दीप्यत इति । दीप् + कः ।) कामदेवः । इति हेमचन्द्रः । २ । १४१ ॥
मधुद्रुतः, पुं, (मधोर्वसन्तस्य द्रुत इव । वसन्तागमनात् प्रागस्य सुकुलोद्गमदर्शनात् तथात्वम् ।) आम्रवृक्षः । इति त्रिकाण्डशेषः ॥ (तथास्य पर्यायः ।
"आम्रः प्रोक्तो रसालश्च सहकारोऽतिसौरभः ।
कामाङ्गो मधुदूतश्च माकन्दः पिकवल्लभः ॥"
इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे ॥)
मधुद्रुती, स्त्री, (मधोर्वसन्तस्य द्रुतीव ।) पाटलावृक्षः । इति भावप्रकाशः ॥ (पर्यायादि विवरणमस्याः पाटलाशब्दे द्रष्टव्यम् ॥)
मधुपः, पुं, (मधुनि क्षीणे पुष्पात् पुष्पं गच्छतीति । गा + कः ।) भ्रमरः । इति त्रिकाण्डशेषः ॥
मधुपत्रः, पुं, (मधुर्मधुरो द्रवो निर्यासोऽस्य ।) रक्तशिग्रुः । इति शब्दरत्नावली ॥
मधुपर्कः, पुं, (मधवे मधार्थं मधूनादको वा दधिः तत्पुरुषो मध्यमपदलोपस्तथात्वम् ।)
वृक्षविशेषः । सौलगाछ इति भाषा ॥ तत्पर्यायः । मधूकः २ गुडपुष्पः ३ । इत्यमरः । २ । ४ । २७ ॥ (पर्यायान्तरमस्य यथा, वैद्यकरत्नमालायाम् । "मधुपुष्पो मधूकश्च गुडपुष्पो मधुद्रुमः ॥")
मधुधातुः, पुं, (मधुना तत्पर्यायेणाख्या प्रसिद्धो धातुः ।) माक्षिकम् । इति राजनिर्घण्टः ॥ (तथास्य पर्यायः ।
"स्वर्णमाक्षिकमाख्यातं तापीजं मधुमाक्षिकम् ।
ताप्यं माक्षिकधातुश्च मधुधातुश्च स स्मृतः ॥"
इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे ॥)
मधुधूलिः, स्त्री, (मधुर्मधुरा धूलिरिव ।) खण्डः । इति हेमचन्द्रः । ३ । ६ ॥ खाँड़ इति भाषा ॥
मधुधेनुः, स्त्री, (मधुरचिता धेनुः ।) दानार्घमध्यादिनिर्म्मितसवत्सा गौः । यथा,—
होतोवाच ।
"मधुधेनुं प्रवक्ष्यामि सर्व्वपातकनाशिनीम् ।
अतुलिप्ते मही पृष्ठे कृष्णाजिनकुशोत्तरे ॥
धेनुं मधुमयीं कृत्वा संपूर्णां घटयोऽशीम् ।
चतुर्थेन तथांशेन वत्सकं परिकल्पयेत् ॥
सौवर्णन्तु सुखं कृत्वा शृङ्गाग्यगुरुचन्दनैः ।
पृष्ठं ताम्रमयं कृत्वा साक्षां पट्टमयीं तथा ॥
पदानिक्षुमयान् कृत्वा सितकम्बलकम्बलाम् ।
सुखं गुडमयं कृत्वा जिह्वां शर्करया तथा ।
क्षौमौ पुण्यमयौ तस्या दन्तौ फलमयौ स्मृतौ ।
दर्भरोमधरा देवी रौप्यचक्षुरविभूषिता ॥
प्रशस्तपत्रशयना प्रमाणात् परिवर्त्तिता ।
सर्व्वलक्षणसंयुक्ता सप्तधान्यान्विता तथा ॥
चत्वारि तिलपात्राणि चतुर्दिक्षु पि स्थापयेत् ।
छादितां वस्त्रयुगेन घण्टाभरणभूषिताम् ।
कांस्योपदोहनां कृत्वा गन्धपुष्पैस्तु धूपिताम् ॥
अयने विषुवे पुण्ये यतीपाते दिनक्षये ।
संक्रान्त्यानुपरागे च सर्व्वकालं यदृच्छया ॥
द्रव्यब्राह्मणसम्पत्तिं दृष्ट्वा तान्तु प्रदापयेत् ।
ब्राह्मणाय दरिद्राय श्रोत्रियायार्थितायये ॥
आर्य्यावर्त्ते समुत्पन्ने वेदवेदाङ्गपारगे ।
तादृशाय प्रदातव्या मधुधेनुर्नरोत्तम ! ॥
पुच्छदेशोपविष्टन्तु गन्धपुष्पादिपूजिताम् ॥
आच्छाद्य वस्त्रयुग्मेन सद्विजाकर्षपत्रकैः ॥
स्वशक्त्या दक्षिणां दत्त्वा विप्रमाद्यविवर्जितः ।
जलपूर्णन्तु कर्त्तव्यं पञ्चादानं समर्पयेत् ॥
रसज्ञा सर्व्वदेवानां सर्व्वभूतहिते रता ।
प्रीयन्तां पितृदेवाश्च मधुधेनो ! नमोऽस्तु ते ॥
एवमुक्त्वार्घ्यं तां धेनुं ब्राह्मणाय निवेदयेत् ॥
अर्घं गृह्णामि त्वां देवि ! क्षुद्रभार्घ्य विमोचनात् ।
कामं कामदुघे कामां मधुधेनो ! नमोऽस्तु ते ॥
मधुवातेतिमन्त्रेण दद्यादाशु विचक्षणः ।
दत्त्वा धेनुं मधाराज ! क्षत्रकोपानलौ तथा ॥
एवंयः कुरुते भक्त्या मधुधेनुं नराधिप ! ।
दत्त्वा दानं पायसेन मधुना च दिनं नयेत् ॥
ब्राह्मणोऽपि चिरात्तस्मै मधुपायससंयुतम् ।
एवं कृते तु यत् पुण्यं तन्निबोध नराधिप ! ॥
यत्र नद्यो मधुकरा यत्र पायसकर्दमाः ।

ऋषयो सुनयः सिद्धास्तत्र गच्छन्ति धेनुदाः ॥
तत्र भोगानथो भुङ्क्ते ब्रह्मलोके च तिष्ठति ।
क्रीड़ित्वा सुचिरं कालं पुनर्मर्त्यमुपागतः ।
च सुक्ला विपुलान् भोगान् विष्णुलोकं च
गच्छति ॥
दशपूर्व्वान् दशपरानात्मानञ्चैकविंशतिम् ।
नयते विष्णुसायुज्यं मधुधेनुप्रसादतः ॥
य इदं शृणुयाद्भक्त्या श्रावयेदापि मानवः ।
सर्व्वपापविनिर्मुक्तो विष्णुलोकं च गच्छति ॥"
इत्यादि वराहपुराणे श्वेतोपाख्याने मधु-
धेनुमाहात्म्यम् ॥

मधुनालिकेरकः, पुं, (मधुर्मधुरो नारिकेलः स्वार्थे कन् । रलयोरैक्यात् रस्य लत्वं लस्य च रत्वम् ।) मधुनारिकेलः । हरनारिकेल इति लोकख्ये प्रसिद्धम् । मोहानारल इति च ख्यातम् । तत्-पर्य्यायः । माध्वीकफलः २ मधुफलः ३ अमि-तफलः ४ माक्षिकफलः ५ नटुफलः ६ बहु-कूर्चः ७ क्षुखफलः ८ । अस्य गुणाः । मधु-रत्वम् । शिशिरत्वम् । दाहतृष्णार्त्तिपित्तहारि-त्वम् । बलपुष्टिश्रेष्ठकान्तिकारित्वम् । वीर्य्य-विवर्द्धनत्वम् । रुच्यत्वञ्च । अपि च ।
"माध्वीकं नारिकेरं फलमतिमधुरं दुर्ज्जरं
जन्तुकारि
स्निग्धं वातातिसारश्रमशमनमथ ध्वंसनं
वह्निदीप्तेः ।
श्यामश्लेष्मप्रकोपं जनयति कुरुते चारुकान्तिं
बलञ्च
स्थैर्य्यं देहस्य धत्ते घनमदनकलावर्द्धनं पित्त-
नाशम् ॥"
इति राजनिर्घण्टः ॥

मधुनी, स्त्री, क्षुपविशेषः । माकड़ छाता इति माकड़ चाउली इति च भाषा ॥ तत्पर्य्यायः । घृतमण्डा २ वायसोली ३ सुमङ्गला ४ । इति रत्नमाला ॥

मधुनेता, [तृ] पुं, (मधु नयति पुष्पेभ्यः संगृह्णा-तीति । नी+तृच् ।) भ्रमरः । इति शब्द-चन्द्रिका ॥

मधुपः, पुं, (मधु पिबतीति । पा+कः ।) भ्रमरः । इत्यमरः । २ । ५ । २६ ॥ (यथा, राजतर-ङ्गिण्याम् । ३ । ४०६ ।
"गव्यूतिमात्रमासन्ने देवीधामनि धैर्य्यवान् ।
धुन्वन् करास्यां मधुपान् धावति स्म स धीरधीः ॥"
मधु जलं पातीति । पा+कः । वारिरक्षके, त्रि । यथा, ऋग्वेदे । ५ । ३२ । ८ ।
"त्वं चिदत्र मधुपं शयानमिन्द्र वज्रं मघवन्
दृढ़यः ।"
"मधुपं मधुनोऽम्बुनः पातारं पालयितारम् ।"
इति तद्भाष्ये सायनः ॥ मधुपानकर्त्तरि च, त्रि । यथा, ऋग्वेदे । १ । १८० । २ ।
"स्वसा यद्वां विश्वगूर्त्तीरुराति वाजायेट्टे मधु-
पाविषे च ।" "हे मधुपौ मधुरस्य सोमरसस्य
पातारौ ।" इति तद्भाष्ये सायनः ॥)

मधुपर्कं, क्ली, (पृष्+घञ् । मधुना पर्को योगो-ऽत्र ।) दधिसंयुक्तमधु । तत्पर्य्यायः । महोदयः २ । इति हेमचन्द्रः । ३ । ४६७ ॥ अपि च ।
"मधुपर्कं दधिमधुघृतमर्पिहितं कांस्येनेति ।
अर्पिहितमाच्छादितम् ।" इत्येकादशीतत्त्वे-
काल्यायनसूत्रम् ॥

मधुपर्कः, पुं, (पृची+घञ् । मधुना पर्कः सम्पर्को यस्य मधुना संयोजनात् तथात्वम् ।) षोड़शोपचारपूजान्तर्गतषष्ठोपचारः । तस्य प्रमाणं यथा,—
"दधि सर्पिर्ज्वलं चौद्रं सितेताभिस्तु पञ्चभिः ।
प्रोच्यते मधुपर्कस्तु सर्व्वदेवौघतुष्टये ॥
जलन्तु सर्व्वतः स्वल्पं सिता दधि घृतं समम् ।
सर्व्वेषामधिकं चौद्रं मधुपर्के प्रयोजयेत् ॥
तद्दद्यात् कांस्यपात्रेण रौक्मेणैतभवेन वा ।
ज्योतिष्टोमाश्वमेधादौ पूर्त्ते त्रेष्टे प्रपूजने ॥
मधुपर्कः प्रतिष्ठोऽयं सर्व्वदेवौघतुष्टिदः ।
धर्म्मार्थकाममोक्षाणां साधकः परिकीर्त्तितः ॥
मधुपर्कः सौख्यभोग्यतुष्टिपुष्टिप्रदायकः ॥"
इति कालिकापुराणे ६७ अध्यायः ॥
अपि च ।
"आज्यं दधिमधुमिश्रं मधुपर्कं विदुर्बुधाः ॥"
इति तत्त्वसारः ॥
तद्दाने सुद्रा यथा,—
"संयुक्तानामिकाङ्गुष्ठा तिस्रोऽन्याः संप्र-
सारिताः ।
मधुपर्के च सा मुद्रा विहङ्गैः परिकीर्त्तिता ॥"
इति हरिभक्तिविलासः ॥

मधुपर्णिका, स्त्री, (मधिव हितं पर्णमस्याः । ततः स्वार्थे कन् टाप् । अत इत्वञ्च ।) गम्भारीवृक्षः । (अस्याः पर्य्यायो यथा,—
"गम्भारी भद्रपर्णी च श्रीपर्णी मधुपर्णिका ।
काश्मीरी काश्मरी हीरा काश्मर्य्यः पीत-
रोहिणी ॥
क्षुद्रवृन्ता मधुरसा महाकुसुमिकापि च ॥")
नीलीवृक्षः । इत्यमरः । २ । ४ । ३५ ॥ (अस्याः पर्य्यायो यथा,—
"नीली तु नीलिनी तूली कालदोला च
नीलिका ।
रञ्जनी श्रीफली तुङ्गा श्यामीला मधुपर्णिका ॥
क्लीतका कालकेशी च नीलपुष्पा च सा
स्मृता ॥")
वराहक्रान्ता । इति शब्दचन्द्रिका ॥ गुड़ूची । सुदर्शना । इति राजनिर्घण्टः ॥ (यथा, सुश्रुते शारीरस्थाने १० अध्याये ।
"पृश्निपर्णी बलामिश्रुद्वृंहणा मधुपर्णिका ॥"
अस्याः पर्य्यायो यथा,—
"सुदर्शना सोमवल्ली चक्राङ्गा मधुपर्णिका ।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

मधुपर्णी, स्त्री, (मधु इव हितं पर्णं यस्याः । गौरादित्वात् ङीष् ।) गुड़ूची । इत्यमरः । २ । ४ । ८४ ॥ (अस्याः पर्य्यायो रत्नमालायां यथा,
"वत्सादनी छिन्नरुहा मधुपर्य्यमृतामरा ।
कुण्डल्यमृतवल्ली च गुड़ूची चक्रलक्षणा ॥")
गम्भारीवृक्षः । नीलीवृक्षः । इति मेदिनी । ने, १०५ ॥ मधुवीजपूरः । इति राजनिर्घण्टः ॥ (विकङ्कतवृक्षः । तत्पर्य्यायो यथा,—
"विकङ्कतः खादुकण्टः शृङ्गदारु मधुपर्ण्यपि ॥"
इति वैद्यकरत्नमालायाम् ॥)

मधुपाका, स्त्री, (पाकेन मधुर्मधुरा । राजदन्ता-दित्वात् पूर्व्वनिपातः । टाप् ।) षड्ग्रन्था । इति राजनिर्घण्टः ॥

मधुपायी, [न्] पुं,(मधु पिबतीति । पा+णिनिः । तत्: "आतोयुक् चिण्कृतोः ।" ७ । ३ । ३३ । इति युक् ।) भ्रमरः । इत्यमरटीकायां रामा-श्रमः ॥ मधुपानकर्त्तरि, त्रि ॥

मधुपालिका, स्त्री, (मधु पालयतीति । पालि+ ण्वुल् । टाप् । अत इत्वम् ।) गम्भारी । इति शब्दमाला ॥ (विषयोऽस्या गम्भारीशब्दे द्रष्टव्यः ॥)

मधुपीलुः, पुं, (मधुर्मधुरः पीलुः ।) महापीलुः । इति राजनिर्घण्टः ॥

मधुपुरी, स्त्री, (मधूक्तनाम्नो दैत्यस्य पुरी ।) मथुरा । इति शब्दरत्नावली ॥ (यथा, भाग-वते । २ । १३ । ३१ ।
"नैमिषं फाल्गुनं सेतुः प्रभासोऽथ कुशस्थली ।
वाराणसी मधुपुरी पम्पा बिन्दुसरस्त्रथा ॥")

मधुपुष्पः, पुं, (मधुप्रचुराणि पुष्पाण्यस्य ।) मधु-द्रुमः । इति रत्नमाला ॥ (मधूकः । तत्पर्य्यायो यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।)
"मधूको गुड़पुष्पः स्यान्मधुपुष्पो मधुस्रवः ।
वानप्रस्थो मधुष्ठीलो जलजेष्ठश्च मधूलकः ॥")
शिरीषवृक्षः । अशोकवृक्षः । वञ्जुलवृक्षः । इति राजनिर्घण्टः ॥

मधुपुष्पा, स्त्री, (मधुपुष्प+स्त्रियां टाप् ।) दन्ती-वृक्षः । नागदन्तीवृक्षः । इति राजनिर्घण्टः ॥

मधुप्रियः, पुं, (मधु मद्यं प्रियमस्य ।) बलरामः । इति त्रिकाण्डशेषः ॥ भूमिजम्बुः । यथा,—
"नादेयी स्त्री नागरङ्गस्त्वक्सुगन्धो मधुप्रियः ॥"
इति जटाधरः ॥ (मद्यप्रिये, त्रि ॥)

मधुफलः, पुं, (मधु मधुरं फलमस्य । यद्वा, मधु मद्यं फलाद् यस्य ।) मधुनारिकेलः । इति राजनिर्घण्टः ॥ विकङ्कतवृक्षः । इति शब्द-चन्द्रिका ॥ (मधुरफलविशिष्टे, त्रि ॥)

मधुफलिका, स्त्री, (मधु मधुरं फलं यस्याः । मधुफल+संज्ञायां कन् । टाप् । अत इत्वम् ।) मधुखर्ज्जूरिका । इति राजनिर्घण्टः ॥ (गुणा-दयोऽस्या मधुखर्ज्जूरिकाशब्दे ज्ञातव्याः ॥)

मधुबल्ली, स्त्री, (मधुना मद्येन वा बल्ली ।) वासन्तीलता । इति राजनिर्घण्टः ॥

मधुभित्, [द्] पुं, (मधुं तन्नामानं दैत्यं भिनत्ति नाशयतीति । भिद्+क्विप् । तुगागमश्च ।) विष्णुः । इति शब्दरत्नावली ॥ (यथा, भाग-वते । ४ । २६ । ४० ।

"सलिलं मधुमधुरिता मधुभिश्चरन्ति-
पीयूषपेशलरितः परितः सवन्ति ॥")

मधुमक्षिका, स्त्री, (मधुमक्षायिका मक्षिका।) कीटविशेषः। मौमाछी इति भाषा। तत्पर्य्यायः। मक्षा २। इत्यमरः। २। ५। २६॥

मधुमण्डा, [न्] पुं, (मधुर्मधुरो मद्या यस्य।) न्यग्रोधवृक्षः। इति राजनिर्घण्टः॥

मधुमती, स्त्री, (मधुर्मधुररसोऽस्त्यस्यामिति मतुप्। ङीप्।) कामरूपस्थः। नदीविशेषः। तस्या पर्य्यायगुणाः। यथा, राजनिर्घण्टे।

"चन्द्रभागागुणसाम्यदं बलं
किञ्च माधुमतमग्निदीपनम्॥"

उपाख्यानायिकाविशेषः। यथा,—

"तथा मधुमती चिह्नितायते नात्र संशयः।
दैवज्ञैर्दी धृतगर्भं तस्य वक्षा भवन्ति ह॥
स्वर्गे मर्त्ये च पाताले च यत्र गन्तुमिच्छति।
तत्रैव चेटिका सर्व्वा नयन्ति नात्र संशयः॥"

इति कालिकापुराणे ३ पटलः॥

(छन्दोभेदः। अस्या लक्षणं यथा, छन्दोमञ्जर्य्याम्। २। १।

"नगिः मधुमती।" अधिकं छन्दःशब्दे द्रष्टव्यम्॥ समाधिसिद्धिभेदः। यथा, सर्व्वदर्शनसंग्रहे पातञ्जलदर्शने। "तत्र मधुमती नामाभ्यासवैराग्यादिसहादपात्तरजस्तमोलेशमुखप्रकाशमयसत्त्वभावनयानवद्यवैशारद्यविद्योतनरूपऋतम्भराप्रज्ञाख्या समाधिसिद्धिः॥ गङ्गा। यथा, काशीखण्डे। २८। १३३।

"मधोट्या मधुमती महापुण्या तदाकरी॥"

दनुनामकपुरुषस्यैकस्य भार्य्या सा च मधोर्दैत्यस्य सुता। यथा, हरिवंशे। ६३। १२—१३।

"आसीद्राजा मनोर्वंशे श्रीमानिक्ष्वाकुसम्भवः।
दण्ड इति विख्यातो महेन्द्रसमविक्रमः॥
तस्यार्य्यो दयिता भार्य्या मधोर्दैत्यस्य वै सुता।
देवी मधुमती नाम यद्वेन्द्रस्य प्रभौ तथा॥"

मधुरसविशिष्टे, त्रि। यथा, ऋग्वेदे। ७।६८।३।

"सखायःसायातमश्वाद्यानिधिं मधुमन्तं
पिबाथः॥")

मधुमथनः, पुं, (मधुं तन्नामानं दैत्यं मथ्नातीति। मथ्+ल्यु।) विष्णुः। इति हलायुधः॥ (यथा, भागवते। १। ८। ३६।

"मर्म्मोद्भिन्दि दुरन्तदुःखमनसः कस्यासु या दत्ते मध्यमधन! पुनः स्वार्थैकुशला कृपालघुहृदः साधारणस्त्वत्कथा-
सुन्दारस्वरसामृतानलमयीं विस्रन्ति ते यत्र पल्वलयं संसारमध्यावटैः॥")

मधुमती, स्त्री, (मधुप्रधाना मतिः।) मालती। इति शब्दमाला॥

मधुमस्तकं, क्ली, (मधुर्मधुररसः मस्तके उपरिभागे यस्य।) विष्णुविशेषः। यथा,—

"मधुनेत्यादिभिर्मन्त्रैर्विधिना यः समिद्धाग्नौ याः।
मधुमस्तकमुद्दिष्टं सर्व्वयज्ञफलप्रदम्॥"

इति शब्दचन्द्रिका।

अस्य गुणाः विष्णुशब्दे द्रष्टव्याः।

मधुमाध्वीकं, क्ली, (मधु माधुर्य्ययुक्तं माध्वीकम्।) मद्यम्। इत्यमरटीकायां भरतः॥

मधुमारकः, पुं, (मधूनां मारकः। भक्षकत्वात्तथात्वम्य।) भ्रमरः। इति राजनिर्घण्टः॥

मधुमूलं, क्ली, (मधु मधुरं मूलम्।) चालुकम्। इति शब्दचन्द्रिका। मौ चालु इति भाषा॥

मधुयष्टिः, स्त्री, (मधुर्मधुरा यष्टिः।) इक्षुः। इति शब्दचन्द्रिका॥

मधुयष्टिका, स्त्री, (मधुर्मधुरा यष्टिः। ततः कन् टाप्।) यष्टिमधु। तत्पर्य्यायः। मधुकम् २ क्लीतकम् ३ यष्टिमधुका४। इत्यमरः। २। ४। १०६॥ मधुयष्टी ५। इति भरतः॥ (तथास्याः पर्य्यायान्तरम्।

"यष्टाह्वं मधुकं यष्टि क्लीतकं मधुयष्टिका।
यष्टिमधु स्वले जाता जलजातिरसा पुरा॥"

इति वैद्यकरत्नमालायाम्॥)

मधुयष्टी, स्त्री. (मधुयष्टि। ऋदिकारादिति पक्षे ङीप्।) मधुयष्टिका। इति शब्दमाला॥

मधुरं, क्ली, (मधु+रः।) वङ्गम्। इति राजनिर्घण्टः॥ विषम्। इति मेदिनी। रे, १६५॥ (वङ्गशब्दे विषशब्दे च विवरणमस्य ज्ञातव्यम्॥)

मधुरः, पुं, (मधु माधुर्य्यं राततीति। रा+कः। यद्वा, मधुमाधुर्य्यमस्यास्तीति। "ऊषसुषिमुष्कमधो रः।" ५। २। १०७। इति रः।) मिश्ररसः। इत्यमरः। १। ५। ६॥ स च इक्ष्वादौ लक्ष्यते। तत्पर्य्यायः। गौड्यः २। इति राजनिर्घण्टः॥ रसज्येष्ठः ३ गुड्यः ४ स्वादुः ५ मधूलकः ६। इति हेमचन्द्रः। ६।२४॥ तस्य गुणाः। प्रीणनत्वम्। बल्यत्वम्। दृंहणत्वम्। वायुपित्तनाशित्वम्। रसायनत्वम्। गुरुत्वम्। स्निग्धत्वम्। चक्षुष्यत्वम्। तर्पणत्वम्। वरत्वञ्च। अन्यच्च।

"रसो मधुरकः प्रीतो धातुस्तन्यबलप्रदः।
चक्षुष्यो वातपित्तघ्नः कुर्य्यात् स्थौल्यकफक्रमौ॥
सोऽतियुक्तो ज्वरष्यासगलगण्डादिरोगकृत्॥"

इति राजवल्लभः॥

अपि च।

"मधुरस्तु रसश्चिनोति केशान्
वपुषः स्थैर्य्यबलौजोवीर्य्यदायी।
धृतिसेवनतः प्रमेहपीड-
पडतामान्यसहान् करोति दोषान्॥"

इति राजनिर्घण्टः॥

(यथा च वाभटे सूत्रस्थाने दशमेऽध्याये।

"रसानामिति रूपाणि कर्म्माणि मधुरो रसः।
बालवृद्धक्षतक्षीणवर्ण्यैर्न्द्रियौजसाम्॥
प्रशस्तो दृंहणो कण्ठ्यः स्तन्यमेदोनरुद्गुरुः।
आयुष्यो जीवनः स्निग्धः पित्तानिलविषापहः॥
कफमेदोपयोगेन सम्भेदःकृच्छ्रतान् गदान्।
स्थौल्यालस्यासदसंन्यासमेहगण्डार्बुदादिकान्॥"

अपिच।

"तत्र मधुरो रसः शरीरबलाज्ञसरुधिरमांसमेदोऽस्थिमज्जौजःशुक्राभिवर्द्धनः आयुष्यः यद्दि-

न्द्रियप्रसादनो बलवर्णकरः पित्तविषमारुतप्रसृष्णाप्रशमनः त्वच्यः केश्यः कण्ठ्यः प्रीणनो जीवनस्तर्पणः स्नेहनः स्थैर्य्यकरः शीघ्रघातसन्धानकरः प्राणसुखकण्ठोष्ठतालुप्रह्लादनो दाहमूर्च्छाप्रशमनः षट्पदपिपीलिकानामिष्टतमः स्निग्धः प्रीतो गुरुश्च।

स एवंगुणोऽप्येक एवात्यर्थसेव्यमानः स्थौल्यं माईवमालस्यमतिस्वप्नं गौरवमनग्न्याभिलाषमर्म्मेन्द्रीयवल्यमास्यकण्ठमांसाभिवृद्धिं श्वासकासप्रतिश्यायासकशीतज्वरानाहास्यमाधुर्य्यवमथुसंज्ञाक्षरप्रणाशगलगण्डमालाश्लीपदगलशोफवस्तिक्लेदमेदोगुदोपलेपाप्त्यासयानभिष्यन्दित्वेवंप्रभृतीन् कफजान् विकारानुपजनयति।

"स्नेहनप्रीणनाह्लादमार्द्दवैरुपलभ्यते।
सुखस्त्री मधुरश्चास्यं व्याप्नुवँल्लिम्पतीव च॥"

इति चरके सूत्रस्थाने २६ अध्याये॥)

जीवकः। रक्तशिग्रुः। राजाम्रः। रक्तेक्षुः। गुडः। शालिः। इति च राजनिर्घण्टः॥ (बीजपूरविशेषः। तत्पर्य्यायो यथा,—

"बीजपूरोऽपरः प्रोक्तो मधुरो मधुकर्कटी।"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥ स्कन्दस्यसैनिकभेदः। यथा महाभारते। ६। ४५। ६६।

"मधुरः सुप्रसादश्च किरीटी च महाबलः॥")

मधुरः, त्रि, (मधु माधुर्य्यमस्यास्तीति। "ऊषसुषिमुष्कमधो रः।" ५। २। १०७। इति रः।) मधुररसविशिष्टः। स्वादुः। (यथा, हितोपदेशे। १। ७६।

"न धर्म्मशास्त्रं पठतीति कारणं
न चापि वेदाध्ययनं दुरात्मनः।
स्वभाव एवात्र तथातिरिच्यते
यथा प्रकृत्या मधुरं गवां पयः॥")

प्रियः। इति मेदिनी। रे, १६५॥ पारिभाषिकमधुरादि यथा। विदग्धोक्तिः। प्रियाधरकुचादिः। स्त्री। स्त्रियः। वाग्भोक्तिः। इति कविकल्पलता॥

मधुरकः, पुं, (मधुर+संज्ञायां कन्।) जीवकवृक्षः। इत्यमरः। २। ४। १४२॥ (यथा, सुश्रुते चिकित्सितस्थाने ४ अध्याये।

"विपचेन्मधुरकप्रतीवापम्॥")

मधुरकण्टका, स्त्री, (मधुराः कण्टका यस्याः।) मत्स्यविशेषः। तत्पर्य्यायः। कञ्चली कञ्चला३ अनन्ता ४ माध्वी ५। इति शब्दरत्नावली॥

मधुरगम्भीरः, पुं, (मधुरो गम्भीरः। नित्यकर्म्मधारयः।) मधुगम्भीरः। तत्पर्य्यायः। मधुगमः २ मधुलमलः ३ रसद्रावी ४ शर्करकः ५ पित्तद्रावी ६। अस्य गुणाः। मधुरत्वम्। शिशिरत्वम्। कफपित्तशोषत्रमनाग्नित्वञ्च। इति राजनिर्घण्टः॥

मधुरत्वचः, पुं, (मधुरा त्वचा यस्य।) धववृक्षः। इति त्रिकाण्डशेषः॥ (गुणादयोऽस्य धवशब्दे ज्ञातव्याः॥)

मधुरत्रयं, क्ली, (मधुराणां त्रयम्।) सिता माक्षिकं सर्पिश्च। इति राजनिर्घण्टः॥

मधुरत्रिफला, स्त्री, (मधुरा त्रिफला।) द्राक्षाफलं काश्मर्य्यफलं खर्ज्जूरीफलञ्च। इति राजनिर्घण्टः॥

मधुरनिस्वना, स्त्री, (मधुरो निस्वनो यस्याः।) मधुरस्वरयुक्ता नारी। इति त्रिकाण्डशेषः॥

मधुरफलः, पुं, (मधुरं फलमस्य।) राजबदरः। इति राजनिर्घण्टः॥

मधुरवल्ली, स्त्री, (मधुरा वल्लीति निल्कर्म्मधारयः।) मधुवीजपूरः। इति राजनिर्घण्टः॥

मधुरसः, पुं, (मधुर्मधुरो रसोऽस्य।) इक्षुः। इति शब्दमाला॥ तालः। इति राजनिर्घण्टः॥

मधुरसा, स्त्री, (मधुर्मधुरो रसो यस्याः।) मूर्व्वा। इत्यमरः। २।४। ८३॥ (अस्याः पर्य्यायो यथा,
"तेजनी पिलुनी देवी तिक्तवल्ली पृथक्त्वचा।
मधुरेणी मधुरसा मूर्व्वा निर्द्दहनीति च॥"
इति वैद्यकरत्नमालायाम्॥
"मूर्व्वा मधुरसा देवी मोरटा तेजनी सुवा।
मधूलिका मधुरेणी गोकर्णी पीलुपर्ण्यपि॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
द्राक्षा॥ (तत्पर्य्यायो यथा,—
"द्राक्षा खादुफला प्रोक्ता तथा मधुरसापि च।
गोस्तनी हारहूरा च गोस्तनी चापि कीर्त्तिता॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
दुग्धिका। इति मेदिनी। से, ६०॥ गम्भारी। इति भावप्रकाशः॥

मधुरसवा, स्त्री, (मधुरस्य मधुररसस्य सवो यस्याः।) पिण्डखर्ज्जूरी। इति राजनिर्घण्टः॥

मधुरा, स्त्री, (मधुर+टाप्।) घृतपुष्पा। (अस्याः पर्य्यायो यथा,—
"घृतपुष्पा घृताङ्गा च मधुरा कारवी मिसिः।
अतिलम्बी सितच्छत्रा संहिता छत्रिकापि च।
छत्रा शालेयशालीनौ मिश्रेया मधुरा मिधिः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
मिश्रेया। मधुरागगरी। मधुकर्कटिका। मेदा। मधूली। मधुयष्टिका। इति मेदिनी। रे, १६८॥ काकोली। घृतावरी। दृढच्छोदनी। पालङ्क्यशाकम्। इति राजनिर्घण्टः॥

मधुराम्लकः, पुं, (मधुरश्चासौ अम्लश्चेति नित्यकर्म्मधारयः। ततः स्वार्थे कन्।) आम्रातकः। इति शब्दचन्द्रिका॥

मधुरास्रफलः, पुं, (मधुरं मिष्टं आम्रवत् फलं यस्य।) रेफलः। तत्पर्य्यायः। आरः २। इति रत्नमाला॥

मधुरालापा, स्त्री, (मधुरः श्रुतिसुखकरः आलापः शब्दो यस्याः।) शारिका। इति राजनिर्घण्टः॥

मधुरालाबुनी, स्त्री, (अलाबू+वाहुलकात् नक्। पृषोदरादित्वात् ह्रस्वः लौम् च। ततः मधुरा चासौ अलाबुनी चेति नित्यकर्म्मधारयः।) राजालाबुः। इति राजनिर्घण्टः॥

मधुरिका, स्त्री, (मधुर+स्वार्थे कन्+स्त्रियां टाप् अत इत्वञ्च।) क्षुपविशेषः। मौरी इति भाषा। तत्पर्य्यायः। शालेयः २ शीतशिवः ३ क्षुद्रा ४ मिश्री ५ मिश्रेया ६। इत्यमरः। २।४।९०५॥ शालेयः ७ मिसिः ८ मिसी ९ मिश्रिः १०। इति तट्टीका॥ अवाक्पुष्पी ११ मङ्गल्या १२ मधुरा १३। इति रत्नमाला॥ मधुरी १४। इति शब्दरत्नावली॥ अस्या गुणाः। रोचकत्वम्। शुक्रकारित्वम्। दाहरक्तपित्तनाशित्वञ्च। इति राजवल्लभः॥

मधुरिपुः, पुं, (मधोरसुरविशेषस्य रिपुर्नाशकत्वात्।) विष्णुः। इत्यमरः। १। १। २०॥ (यथा गीतगोविन्दे। २। ६।
"श्रीजयदेवभणितमतिसुन्दरमोहनमधुरिपु-
रूपम्॥)

मधुरेणुः, पुं,. (मधुर्मधुरो रेणुरस्य।) कटभीवृक्षः। इति राजनिर्घण्टः॥

मधुरोदकः, पुं, (मधुराणि उदकानि यस्य।) लवणसमुद्रः। स तु स्वादूदकमयः पुष्करद्वीपवेष्टितः सप्तसमुद्राणां प्रथमसमुद्रः। इति जटाधरः॥

मधुलं, क्ली, (मधु पुष्परसादिकं लाति स्वकारणत्वेन गृह्णातीति। ला+कः।) मद्यम्। इति शब्दचन्द्रिका॥ (निर्विषीकर्त्रां मधुविद्यायां स्त्री। यथा, ऋग्वेदे। १। १६१। १०।
"सोचिष्मुनमरातिनो वयं मरामारे
अस्य योजनं हरिष्ठामधुलामधुला चकार॥"
"हे विष! त्वा त्वां मधु अस्मदं चकार विषस्य विषभावं दूरेऽपनोद्यान्तीचकारेति एवेव मधुला मधुदात्री निर्विषीकर्त्रीं मधुविद्या यद्वेतदादित्यस्य मण्डले विषयोजनं तेन चान्तीकरणं यदस्ति एषा मधुविद्या॥" इति तद्भाष्ये सायनः॥)

मधुलगः, पुं, (मधुर्मधुररसो लगोऽत्र।) रक्तशोभाञ्जनः। इति रत्नमाला॥

मधुलता, स्त्री, (मधुप्रधाना लतेति मध्यलोपी कर्म्मधारयसमासः।) मूलीलक्षणम्। इति राजनिर्घण्टः॥

मधुलिका, स्त्री, (मधुल+संज्ञायां कन्। टाप् अत इत्वञ्च।) राजिका। इति राजनिर्घण्टः॥ (विवृतिरस्या राजिका शब्दे ज्ञातव्या॥ स्वन्वानुचरमालगणविशेषः। यथा, महाभारते। ६। ४६। १६।
"पृथुवक्त्रा मधुलिका मधुकुम्भा तथैव च॥")

मधुलिट्, [ह्] पुं, (मधु लेढि आस्वादयतीति। लिह्+क्विप्।) भ्रमरः। इत्यमरः। २। ५। २६॥ (यथा, रघुवंशे। ६। २६।
"मधुलिड्भिः मधुदानविशारदा
कुरवका रवकारवतां ययुः॥")

मधुलेही, [न्] पुं, (मधु लेढीति। मधु+लिह्+णिनिः।) भ्रमरः। इति शब्दरत्नावली॥ (यथा, भट्टिकाव्ये। २। ७।
"दत्तावधानं मधुलेहिगीतौ
प्रशान्तचेष्टं हरिणं जिघांसुः॥")

मधुलोलुपः, पुं, (मधुनि लोलुपः।) भ्रमरः। इति राजनिर्घण्टः॥

मधुवनं, क्ली, (मधुना तन्नाम्ना दैत्येन क्षतं वनम्। मध्यपदलोपी कर्म्मधारयः।) मथुरायाः वनविशेषः। यथा, श्रीभागवते ४। ८। ४२।
"तत्तात! गच्छ भद्रं ते यमुनायास्तटं शुचि।
पुण्यं मधुवनं यत्र सान्निध्यं नित्यदा हरेः॥"
(मधुप्रधानं वनमिति।) किष्किन्धायां सुग्रीवस्य वनविशेषः। इति रामायणे किष्किन्धाकाण्डम्॥ (यथा, महाभारते। ३। २८१। २७।
"वालिना रक्षितं यत्तत् स्फीतं मधुवनं महत्।
त्वया च प्लवगश्रेष्ठ! तद्भुङ्क्ते पवनात्मजः॥")

मधुवनः, पुं, (मधौ वनति शब्दायते इति। वन+अच्।) कोकिलः। इति शब्दचन्द्रिका॥

मधुवल्ली, स्त्री, (मधुप्रधाना वल्ली।) यष्टीमधु। क्लीतनकम्। इति राजनिर्घण्टः॥ (कारवेल्लकम्। तत्पर्य्यायो यथा,—
"तोयवल्ली राजवल्ली मधुवल्ली कारवेल्लकम्॥"
इति वैद्यकरत्नमालायाम्॥)

मधुवारः, पुं, (मधुनो मद्यस्य वारः समयः पर्य्यायो वा।) मधुक्रमः। इत्यमरः। २।४०।४१॥ स च पुनः पुनर्मद्यपानपरिपाटी। इति तट्टीकायां भरतः॥

मधुवीजः, पुं, (मधु मधुरं वीजं यस्य।) दाड़िमः। इति राजनिर्घण्टः॥ (गुणादिविवरणमस्य दाड़िमशब्दे द्रष्टव्यम्॥)

मधुवीजपूरः, पुं, (मधूनां मधुपूर्णानां वीजानां पूरः समूहो यत्र।) मधुकर्कटिका। मीठा विजौरा इति हिन्दी भाषा। तत्पर्य्यायः। मधुपर्णी २ मधुरकर्कटी ३ मधुरवल्ली ४ मधुकर्कटी ५ मधुरफला ६ महाफला ७ वर्द्धमाना ८। अस्य गुणाः। मधुरत्वम्। स्निग्धिरत्वम्। दाहनाशित्वम्। त्रिदोषश्रमनत्वम्। रुच्यत्वम्। पथ्यत्वम्। गुरुत्वम्। दुर्ज्जरत्वञ्च। इति राजनिर्घण्टः॥

मधुव्रतः, पुं, (मधु मधुसदृशो व्रतं व्रतमिव सततानुशीलनीयं यस्य। यद्वा, मधु व्रतमस्ति नियतं भुङ्क्ते इति। व्रति+अण्।) भ्रमरः। इत्यमरः। २।५।२६॥ (यथा, भागवते। ३।२८।२८।
"मालां मधुव्रतवरूथगिरोपघुष्टाम्॥"
मध्वर्थं व्रतं कर्म्म यस्य। उदकार्थकर्म्मणि, त्रि। यथा, ऋग्वेदे। ६। ७०। ५।
"मधुनो द्यावापृथिवी मिमिक्षतां मधुश्चुता
मधुदुघे मधुव्रते॥"
"मधुव्रते उदकार्थकर्म्मणी।" इति तद्भाष्ये सायनः॥)

मधुशर्करा, स्त्री, (मधुजाता शर्करा।) मधुजातशर्करा। सिताखण्ड इति भाषा॥ यथा,—

मधुसू

"गार्द्धी सिता मधूत्पन्ना मधुजा मधुशर्करा।
माक्षीकशर्करा चैवा क्षौद्रजा क्षौद्रशर्करा॥
यद्गुणं यत्तथा प्रोक्तं तद्गुणा तस्य शर्करा।
विशेषाद्गुणवृद्धया च तर्पणं क्षीणदेहिनाम्॥"
इति राजनिर्घण्टः॥
("मधुशर्करा पुनस्तत्फेनजातीसारपरी रुच्याहृद्यनी प्रसादनी दाहमधुरा मधुरविपाका च।"
इति सुश्रुते चिकित्सास्थाने ४५ अध्याये॥)

मधुशाखः, पुं, (मधुमक्षिकाभिर्युक्ता शाखा यस्य।) मधूकवृक्षः। इति शब्दचन्द्रिका॥ (मधुरशाखाविशिष्टे, त्रि। यथा, वाजसनेयसंहितायाम्। २८। २०। "मधुशाखः सुपिप्पलः।"
"मधुरा रसवती शाखा यस्य।"
इति तद्भाष्ये महीधरः।)

मधुश्रिमुः, पुं, (मधुप्रधानः श्रिमुः।) रक्तशोभाञ्जनवृक्षः। इत्यमरः। २। ४। ३१॥ (श्रिमिणा। इति स्यातः। यथा, सुश्रुते। १।३७। "वरुणार्कनक्तश्रिमुमुश्रिमुतकारीत्यादि।"
तत्पर्य्यायो यथा,—
"सुरक्ता स्वादुगन्धा स्यान्मधुश्रिमुः शोभाञ्जनः।"
इति वैद्यकरत्नमालायाम्॥
तद्गुणा यथा, सुश्रुते सूत्रस्थाने ४६ अध्याये।
"मधुश्रिमु रस्तिक्तः शोफघ्नो दीपनः कटुः।")

मधुशेषं, क्लं मधुनः शेषो यत्र।) श्रिक्थकम्। इति राजनिर्घण्टः॥

मधुश्रेणी, स्त्री, (मधूनां मधुररसानां श्रेणिर्यत्र।) मूर्व्वा। इत्यमरः। १।८।८३॥ (अस्याः पर्य्यायो यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।
"मूर्व्वा मधुरसा देवी गोरटा तेजनी स्मृता।
मधुश्रेणी मधुश्रेणी गोकर्णी पीलुपर्ण्यपि॥")

मधुश्वासा, स्त्री, (मधुर्मधुरः श्वासोऽस्यात्।) जीवन्तीवृक्षः। इति राजनिर्घण्टः॥ (विवरणमस्या जीवन्तीशब्दे ज्ञातव्यम्।)

मधुस्रोसः, पुं, (मधु मकरन्दं स्रौति निःक्षिपतीति। स्रौ+प्रसुपधत्वात् कः। पृषोदरादित्वादुस्य लत्वम्।) मधूकवृक्षः। इत्यमरः। २। ४। २८॥ (अस्य पर्य्यायो यथा,—
"मधुकी गुडपुष्पः स्यान्मधुपुष्पो मधुद्रमः।
वानप्रस्थो मधुष्ठीलो जलजश्च मधूलकः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

मधुस्रवः, पुं, (मधोर्मद्यस्य स्रवा इति। "राजाहःसखिभ्यष्टच्।" ५। ४। ९१। इति टच्।) कामदेवः। इति हलायुधः॥

मधुस्रविः, पुं, (मधुर्मद्यस्रवोऽस्त्यस्य।) कामदेवः। इति विश्वप्रकाशः॥

मधुस्निग्धः, पुं, (स्निग्धतीति स्निहेः स्नक्। मधौ स्नक् मधुः मधुरत्वं स्निग्धत्वं यस्य।) मधूकवृक्षः। इति हेमचन्द्रः। ४। २६४॥

मधुस्रुक्, [च्] पुं, (मधोर्मद्यस्य स्रुक्।) कामदेवः। इति हेमचन्द्रः॥

मधुस्रुत्, पुं, (मधु पुष्परसं स्रवति भक्षयतीति। स्रु+क्विप्+क्युः।) भ्रमरः। इति

मधुहा

शब्दार्थचन्द्रिका॥ (मधुं तन्नामानं चासुरं स्रवति नाशयतीति। स्रु+णिच्+क्युः।) श्रीकृष्णः। इत्यमरटीकायां भरतः॥ (पद्यमत्रैव एकः शिष्टश्लोको यथा, छन्दोमञ्जर्य्याम्। ११। ३।
"वनेषु कृत्वा सुरभिप्रचारं
प्रकामसुप्तो मधुवासरेषु।
गायन् कलं क्रीड़ति पद्मिनीषु
मधूनि पीत्वा मधुसूदनोऽसौ।")
श्रीकृष्णपक्षे व्युत्पत्तिर्यथा,—
"सूदनं मधुदैत्यस्य यस्मात् स मधुसूदनः।
इति सन्तो वदन्तीमं वेदैर्भिन्नार्थमीप्सितम्॥
मधु क्षीरेक्षु माध्वीके कृतकर्म्मशुभाशुभे।
भक्तानां कर्म्मणाचैव सूदनं मधुसूदनः॥
परिणामशुभं कर्म्म भान्तानां मधुरं मधु।
करोति सूदनं यो हि स एव मधुसूदनः॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ११० अध्यायः॥
तस्य स्मरणफलम्।
"महाविपत्तौ संसारे यः स्मरेन्मधुसूदनम्।
विपत्तौ तस्य सम्पत्तिर्भवेदित्याह शङ्करः॥"
तत्रैव प्रकृतिखण्डे ३४ अध्यायः॥
(सरस्वत्युपनामकः कविविशेषः। यथा, श्रीमद्भगवद्गीताटीकायाम्। "व्याख्यातं भगवत्पदैः प्रतिपदं श्रीशङ्कराख्यैः पुनर्व्विस्पष्टं मधुसूदनेन सुधिना स्वज्ञानसिद्ध्यै कृतम्॥" अयं हि अद्वैतसिद्धिप्रस्थानभेदभगवद्गीताटीकामहिम्नस्तवटीकासिद्धान्तबिन्दुटीकादयनेकग्रन्थकर्त्ता॥)

मधुसूदनी, स्त्री, (मधु सूदयतीति। मधु+सूद+णिच्+ल्युः। स्त्रियां ङीप्।) पालङ्क्यशाकम्। इति हेमचन्द्रः। ४। २५२॥

मधुस्रवः, पुं, (मधूनां मकरन्दानां स्रवः क्षरणं यस्मादिति।) मधूकवृक्षः। मोरटलता। इति राजनिर्घण्टः॥

मधुस्रवा, स्त्री, (मधुनः स्रवो यस्याः।) मधुयष्टिका। इति जटाधरः॥ जीवन्ती। इति शब्दचन्द्रिका॥ (अस्याः पर्य्यायो यथा,—
"जीवन्ती जीवनी जीवा जीवनीया मधुस्रवा।
मङ्गल्यनामधेया च शाकश्रेष्ठा पयस्विनी॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
मूर्व्वा। हंसपदी। इति राजनिर्घण्टः॥

मधुस्रवः, [स्] पुं, (मधूनि स्रवति निःक्षिपतीति। स्रु+कर्त्तरि क्विप्।) मधूकवृक्षः। इति जटाधरः॥

मधुस्वरः, पुं, (मधुर्मनोहरः स्वरो ध्वनिर्यस्य।) कोकिलः। इति शब्दरत्नावली॥

मधुहा, [न्] पुं, (मधुं तन्नामानमसुरं हन्तीति। हन्+क्विप्।) विष्णुः। इति हेमचन्द्रः॥ (मधु हन्तीति। हन्+क्विप्। मधुनाशके त्रि। यथा, महाभारते। ३। ३३। ६८।
"सर्व्वथा मंक्षुनैरेव दुर्म्मनैर्बलवानपि।
क्षमित्रः क्षयते क्षुद्रं मधुहा भ्रमरैरिव॥"

मधूत्थ

प्रसह्यजातिप्राधिविशेषः॥ यथा,—
"भ्रमन्नी भासकुररगधोलूककुलिङ्गकाः।
धूमिका मधुहा चेति प्रसह्या रुगपक्षिणः॥"
इति वाभटे सूत्रस्थाने षष्ठेऽध्याये॥)

मधूकं, क्लीं, (मह्यतीति। मह्+"ऊलूकादयश्च।" उणा० ४। ४१। इति ऊकः निपातितश्च।) यष्टिमधु। इति राजनिर्घण्टः॥ (गुणादयोऽस्य यष्टिमधुशब्दे विज्ञेयाः॥)

मधूकः, पुं, (मह्यते मन्यते वेति। मह्+मन् वा+"ऊलूकादयश्च।" उणा० ४। ४१। इति ऊकप्रत्ययो निपातितश्च।) वृक्षविशेषः। महुल इति मौल इति महुआ इति च भाषा॥ तत्पर्य्यायः। गुडपुष्पः २ मधुद्रुमः ३ वानप्रस्थः ४ मधुष्ठीलः ५। इत्यमरः। २। ४। २८॥ मधुकः ६ मधुः ७ मधुपुष्पः ८। इति शब्दरत्नावली॥ मधुस्रवः ९। इति जटाधरः॥ मधुवृक्षः १० रोधपुष्पः ११ माधवः १२। (यथा, महाभारते। १५। २५। ११।
"चित्राङ्गदा चैव नरेन्द्रकन्या
चैत्रा सवर्णाग्रमधूकपुष्पैः॥")
अस्य गुणाः। मधुरत्वम्। शीतत्वम्। पित्तदाहश्रमापहत्वम्। वातलत्वम्। बलदोषघ्नत्वम्। वीर्य्यपुष्टिविवर्द्धनत्वञ्च। अस्य पुष्पगुणाः। मधुरत्वम्। हृद्यत्वम्। स्निग्धत्वम्। पित्तविदाहकारित्वञ्च। अस्य फलगुणाः। वातामयपित्तनाशित्वम्। शैत्यं मधूकद्वयमेवमेतत्। इति राजनिर्घण्टः॥ अपि च।
"मधूकपुष्पं मधुरं शीतलं गुरु वृंहणम्।
बलशुक्रकरं प्रोक्तं वातपित्तविनाशनम्॥
फलं शीतं गुरु स्वादु शुक्रलं वातपित्तनुत्।
क्षतक्षयं हन्ति तृष्णासदाहश्वासजत-
क्षयान्॥"
इति भावप्रकाशः॥
अपरञ्च।
"मधूकपुष्पञ्चाक्षौद्रं तर्पणं वृंहणं परम्।
मधूकस्य फलं पक्वं वातपित्तप्रणाशनम्॥"
तन्मज्जगुणास्तत्फलगुणवत्। यथा,—
"यस्य यस्य फलस्यैव वीर्य्यं भवति यादृशम्।
तस्य तस्यैव वीर्य्येण मज्जानमभिनिर्दिशेत्॥"
तस्य त्वग्गुणाः।
"मधूकं रक्तपित्तघ्नं व्रणशोधनरोपणम्॥"
इति राजवल्लभः॥

मधूच्छिष्टं, क्लीं, (मधुनः उच्छिष्टमवशिष्टम्।) मधुवशिष्टम्। मोम इति भाषा॥ (यथा, वृहत्संहितायाम्। १६। २५।
"श्लेष्मैरण्डकमांसीतगरकुष्ठरसस्नेहवादिवल्लीकम्।
मधुरसमधूच्छिष्टानि चोरकश्चेति जीवस्य॥")
तत्पर्य्यायः। सिक्थकम् २। इत्यमरः। २। ६। १०७॥ शिक्थकम् ३ शिक्थम् ४। इति शब्दरत्नावली॥

मधूत्थितं, क्लीं, (मधुनः उत्थितम्।) सिक्थकम्। इति राजनिर्घण्टः॥

मधूकवः, पुं, (मधोश्चैत्रस्य उत्सवो यत्र।) चैत्री पूर्णिमा। इति शब्दार्णवः॥ (यथाभिज्ञान-शाकुन्तले। ६।
"स्त्रीकृते। प्रियम्। मन्त्रोधम्। मा तावदनाकर्षे! दैवेन प्रतिषिद्धेऽपि मधूत्सवे चूत-कलिकाभक्षणारम्भे॥")

मधूत्पन्नं, क्ली, (मधोरुत्पन्नाम्नो दैत्यस्य उत्पन्नः आश्रयः। अभिधानात् क्लीबत्वम्।) मथुरा। इति हेमचन्द्रः। ४। ४४॥

मधूत्पन्नः, पुं, (मधोरुत्पन्नाम्नो दैत्यस्य उत्पन्नः आश्रयः।) मथुरा। इति शब्दार्णवः॥ (यथा, रघुवंशे। १५। १५।
"स च प्राप मधूत्पन्नं कुमीनस्याथ कुक्षिजः। वनान् करमिवादाय सत्वराग्निमुपस्थितः॥")

मधूलः, पुं, (मधु उरति प्राप्नोतीति। मधु+उर गतौ औणादिकः+कः। रस्य लत्वम्।) चलनगिरिनामवृक्षश्च। इति शब्दार्णवः॥ (अस्य पर्य्यायो यथा, वैद्यकरत्नमालायाम्।
"गौरश्राको मधूलोऽन्यो गिरिजः स्वल्प-पत्रकः॥")

मधूलकः, पुं, (मधूल+स्वार्थे कन्।) चलनवृक्षः। तत्पर्य्यायः। दीर्घपत्रकः २। इति शब्दार्णवः॥ गौरश्राकः ३ मधूलः ४ स्वल्पपत्रकः ५। इति रत्नमाला॥
"स्यान्मधूके तु चलने गिरिजेऽपि मधूलकः॥"
इति शब्दरत्नावली॥
(पर्य्यायान्तरस्य यथा,—
"मधूको गुडपुष्पः स्यान्मधुपुष्पो मधुस्रवः। वानप्रस्थो मधुष्ठीलो चलजेऽपि मधूलकः॥"
इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे॥)
अस्य गुणाः। मधूककषायतुल्याः। मधुररसः। इति हेमचन्द्रः। ६। २४॥ (क्लीबलिङ्गेऽपि दृश्यते। यथा, अथर्ववेदे। १। ३४। २।
"निशाया व्यये मधु मे निशामले मधूलकम्॥")
तद्धर्त्ति, त्रि॥

मधूलिका, स्त्री, (मधूल+कन्। स्त्रियां टाप् अत इत्त्वञ्च।) सञ्ज्ञा। इत्यमरः। २। ४। ८४॥ (अस्याः पर्य्यायो यथा,—
"सञ्ज्ञा मधुरसा देवी मोरटा तिक्तशी सुधा। मधूलिका मधुश्रेणी गोकर्णी पीलुपर्ण्यपि॥"
यष्टीमधु। तत्पर्य्यायो यथा,—
"यष्टीमधु तथा यष्टी मधुकं क्लीतकन्तथा। अत्यन्तक्लीतनकन्तु भवेत्तोये मधूलिका॥"
इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे॥)

मधूली, स्त्री, (मधुक+गौरादित्वात् ङीष्।) क्लीतकम्। मधुकवृक्षी। आम्रः। इति राजनिर्घण्टः॥

मध्यं, क्ली, (मन्यते इति। मन्+"अन्नादयश्च।" उणा० ४।१२१। इति यक्प्रत्ययेन निपातितः।) इक्षुसंज्ञा। इतिमालासंज्ञा। इति हेमचन्द्रः॥ (यथा, महाभारते। २। ६१। ६।
"मध्येन पराहृष्य सपरिवाद परस्वताम्॥")

अवसानम्। तत्पर्य्यायः। विरामः २। इति विकाण्डशेषः॥ मन्दत्वशीघ्रत्वोभयेतरत्वयुक्त-कृत्यविषयकगमनविशेषः। इति भरतः॥ लय-विशेषः। इति मधुः॥ मध्यमावृत्तिः। इति साङ्गः॥ यथा, अमरे। २। ६। ७६।
"विलम्बितं द्रुतं मध्यं तत्त्रयोवो घनं क्रमात्॥"

मध्यः, पुं, क्ली, (मन्+यक्। नस्य च धः।) देह-मध्यभागः। माजा इति भाषा॥ तत्पर्य्यायः। मध्यमम् २ अवलग्नम् ३। इत्यमरः। २। ६। ७६॥ विलग्नम् ४। इति मेदिनी। मे, ४४॥ (यथा,भट्टिकाव्ये। ४। १६।
"दधाना बलिभं मध्यं कर्णजाहविलोचना।"
मध्यभागमात्रम्। यथा, मनुः। ४। ३७।
"नेक्षेतोद्यन्तमादित्यं नास्तं यान्तं कदाचन। नोपसृष्टं न वारिस्थं न मध्यं नभसो गतम्॥"
"आयुष्कालस्य मध्यमावस्थाविशेषः कालः। षोड़शसप्तत्योरन्तरे मध्यं वयसस्य विकल्पो वृद्धिर्यौवनं सम्पूर्णता हानिरिति। तत्राविंशति-वृद्धिराविंशतो यौवनमाचत्वारिंशतः सर्व-धात्विन्द्रियबलवीर्य्यसम्पूर्णता। अत ऊर्द्धमीषत् परिहानिर्यावत् सप्ततिरिति॥" इति सुश्रुते सूत्रस्थाने ३५ अध्याये॥)

मध्यः, पुं, (मन्+यक्। नस्य धः।) ग्रहस्फुट-साधकाङ्कविशेषः। स च ग्रहगणज्ञातदेशा-न्तरादिसंस्काररहिताङ्कस्वरूपग्रहः। इति ज्योतिषम्॥

मध्यः, त्रि, (मन्यते इति। मन्+यक्। नस्य च धः।) न्याय्यः। अन्तरः। अधमः। इति शब्दरत्नावली॥ मध्यमः। यथा,—
"उत्तमाधममध्यानि बुद्ध्वा कार्य्याणि पार्थिवः। उत्तमाधममध्येषु पुरुषेषु नियोजयेत्॥"
इति मात्स्ये २८ अध्यायः॥

मध्यगत्वः, पुं, (मध्ये फलाभ्यन्तरे गन्तोऽस्य।) न्यायवृक्षः। इति शब्दचन्द्रिका॥

मध्यतः, [स्] अ, (मध्य+तसिल्।) मध्यात्। मध्ये। इति सिद्धान्तकौमुदी॥ स्यादेः स्यानि तसादयो ये आदेशास्तेषामदन्तत्वमव्ययत्व-मिति प्राचः। तेन कृतः कृतः आगतं कौत-स्कृतम्। इत्यत्राव्ययत्वात् टिलोपः। इति दुर्गा-दासः॥

मध्यदेशः, पुं, (मध्यश्चासौ देशश्चेति।) देश-विशेषः। तत्पर्य्यायः। मध्यमः २। इत्यमरः॥ तस्य सीमा यथा, मनुः। २। २१।
"हिमवद्विन्ध्ययोर्मध्यं यः प्राक्विनशनादपि। प्रत्यगेव प्रयागाच्च मध्यदेशः प्रकीर्त्तितः॥"
विनशनं तीर्थभेदः। मां श्वावति स्मरतीति केनति मद्रो दकारवानिति साङ्गे। मनो धश्चेति यप्रत्यये नस्य धे कृते चतुर्थमाश्रयान-तीति स्वरूपकारः। इति तट्टीकायां भरतः॥

मध्यदेश्यः, त्रि, (मध्यदेशे भवः इति यत्।) मध्यदेशोद्भवः। यथा, वामनपुराणे १३ अः॥
"प्रकाशेव संस्कृता मध्यदेश्या नगालिमे॥"

मध्यन्दिनः, पुं, (दिनस्य मध्यं राजदन्तादित्वात् मध्यशब्दस्य पूर्वनिपातः। पृषोदरादित्वात् नकारागमः। मध्यन्दिनं पुण्यविकासकत्वेना-स्त्यस्तीति। अच्।) वन्यूकवृक्षः। इति राज-निर्घण्टः॥ (मध्याह्ने, क्ली, यथा, मनुः। ४। १२१।
"मध्यन्दिनेऽर्द्धरात्रे च आद्धं श्रद्धा च सामि-यम्॥")

मध्यपद्मसूलकं, क्ली, (मध्यं मध्यमं पद्मसूलकम्।) पद्मसूलभाजनविशेषः। यथा,—
"बला पुनर्नवैरण्डस्वर्पणीदृयेन तु।
एकत्र योजितेनैव स्यान्मध्यं पद्मसूलकम्॥"
इति राजनिर्घण्टः॥

मध्यमं, पुं, क्ली, (मध्ये भवः। मध्य+"मध्यान्मः।" ४। ३। ८। इति मः।) देहमध्यभागः। इत्य-मरः। २। ६। ७६॥

मध्यमः, पुं, (मध्ये भवः। मध्य+मः।) सप्त-स्वराणां मध्ये पञ्चमस्वरः। इत्यमरः। १। ७। १॥ गानशास्त्रमते चतुर्थस्वरः। स तु क्रौञ्चस्वर-तुल्यः। अस्योच्चारणस्थानं वक्षः। व्याकरणमते अधरः। अयं विप्रवर्णः। अस्य संज्ञा अन्तरः। अर्थात्चतुःस्वरमिलितः। तस्य ताना-श्चतुर्विंशतिः तेषां प्रत्येकं द्वाविंशद्भेदेन ७६८ ताना भवन्ति। इति संगीतशास्त्रम्॥ उपपति-भेदः। तस्य लक्षणम्। प्रियायाः प्रकोपे यः प्रकोपमनुरागं वा न प्रकटयति वेश्या मनो-भावं गृह्णाति च मध्यमः। यथा,—
"आस्यं यद्यपि दाक्ष्यवर्जितमिदं लास्येन हीनं वचो
नेत्रे श्रोणसरोजकान्तिरुचिरे कापि चर्चं स्थीयते।
मालायाः करणोद्यमे मकरिकारम्भः कुचा-भोगयो-
र्धूपः कुन्तलधोरणीषु सुतनोः सायन्तनो दृश्यते॥"
इति रसमञ्जरी॥
मध्यदेशः। इत्यमरः॥ यज्ञानां सामयिक-संज्ञाविशेषः। यथा,—
"द्युचरचक्रहता दिनसञ्चयः
क्व च हनो भगलादिकृतं मखः।
दशशिरःपुरमथनभास्करे
क्षितिजसन्निधिगे सति मध्यमः॥"
इति सिद्धान्तशिरोमणिः॥
नृपभेदः। रागभेदः। इति धरणिः॥

मध्यमः, त्रि, (मध्ये भवः। मध्य+"मध्यान्मः।४। ३। ८। इति मः।) मध्यभवः। इति मेदिनी। मे, ४६॥ (यथा, मनौ। ६। ११२।
"ततोऽर्द्धं मध्यमस्य स्यात् तुरीयन्तु वर्षीयसः॥")
तत्पर्य्यायः। माध्यमम् २ मध्यमीयम् ३ माध्यन्दिनम् ४। इति हेमचन्द्रः॥ (वयोमध्य-मवः।
"वयस्तुर्विधं प्रोक्तं मध्यमाधमोत्तमम्।
षोडशं दशपञ्चाशत् तानि वक्ष्यामि साम्प्रतम्॥

मध्यम

पथिश्रान्तः श्रमक्षीणः बालश्रीः सुकुमारकः ।
एतेषां मध्यमा संज्ञा प्रोच्यते वैद्यकागमे ।
मध्यमः सप्ततिं यावत् परतो वृद्ध उच्यते ।"
इति धारीते प्रथमे स्थाने पञ्चमेऽध्याये ॥
"वाते विवर्द्धते क्षिप्रा मध्ये पित्तमेव तु ।
भूयिष्ठं वर्द्धते वायुर्द्वयं तद्वीक्ष्य योजयेत् ॥"
इति च सुश्रुते सूत्रस्थाने ३५ अध्याये ॥)

मध्यमपाण्डवः, पुं, (मध्यमश्चासौ पाण्डवश्चेति । तस्य पूर्व्वापरयोर्द्वयोर्मध्यवर्त्तित्वात्तथात्वम् ।) अर्জ্জুनः । इति जटाधरः ॥ (यथा, किरातार्জ্জुनीये । १ । ३६ । श्लोकस्य टीकायां मल्लिनाथः ।
"नेता मध्यमपाण्डवो भगवतो नारायण-
स्यांशजः ॥")

मध्यमलोकः, पुं, (मध्यमश्चासौ लोकश्चेति कर्म्मधारयः ।) पृथिवी । इति त्रिकाण्डशेषः ॥ (यथा, रघुः । २ । १६ ।
"तां देवता पित्रतिथिक्रियार्था-
मन्वक् ययौ मध्यमलोकपालः ॥"
"मध्यमलोकपालः भूपालः ।" इति तट्टीकायां मल्लिनाथः ।)

मध्यमशतकः, पुं, (मध्यमश्चासौ शतकश्चेति ।) कपीदलशतकः । कपाग इति भाषा ॥ यथा,—
"उत्तमश्चानुधीरोऽत्र मध्यमस्तु कपीवलः ।
अधमो भारवाही स्यादित्येष त्रिविधो भृतः ॥"
इति मिताक्षरा ॥

मध्यमसंग्रहः पुं, (मध्यमश्चासौ संग्रहश्चेति ।) स्त्रीसंग्रहणाख्यविवाहविशेषः । स तु गन्धमाल्यवस्त्रभूषादिप्रेरणरूपः । यथा । प्रथमसाहसादिदण्डप्राप्त्यर्थं वेधा तत्स्वरूपं वाक्येन विवृतम् ।
"त्रिविधं तत् समाख्यातं प्रथमं मध्यमोत्तमम् ।
अदेशकालभाषाभिर्निर्ज्ञाने च परस्त्रियाः ।
पटाभावेऽथवा हास्यं प्रथमं साहसं स्मृतम् ॥
प्रेषणं गन्धमाल्यानां धूपभूषणवाससाम् ।
प्रलोभनार्थमानेर्मध्यमं तदुदाहृतम् ॥
सहासनं विविक्तेषु परस्परमपाश्रयः ।
कैशाकर्षियहश्चैव सम्यक् संग्रहणं स्मृतम् ॥"
इति मिताक्षरायां स्त्रीसंग्रहणप्रकरणम् ॥

मध्यमसाहसं, क्ली, (सहसा क्रियमाणं कृतं वा । सहसा + अण् । मध्यमश्चासौ साहसञ्चेति ।) धनविनाशेन वाक्पारुष्यप्रहारादीनामन्यतमेनोत्तमदण्डादिरूपं सहसा क्रियमाणं कर्म्म । यथा,
"धनस्य दण्डादानार्थं वैरोपकरणस्य च ।
भङ्गार्थमेषामन्येषां प्रथमं साहसं स्मृतम् ॥
वाक्पारुष्यप्रहाराणां दण्डोपकरणस्य च ।
तथैवैव प्रकारेण मध्यमं साहसं स्मृतम् ॥"
इति मिताक्षरा ॥

मध्यमसाहसः, पुं, (मध्यमश्चासौ साहसश्चेति ।) तथाविधः । स तु वधप्रहारपरस्त्रियः । यथा,—
"प्रहारो दे पुने वार्द्धौ प्रथमः साहसः स्मृतः ।
मध्यमं वध एवैकः परस्त्रीष्वेव चोत्तमः ॥

लोभात् सहस्रं दण्ड्यस्तु मोहात् पूर्व्वन्तु साहसम् ।
भयाद्वा मध्यमौ दण्डौ मैत्रात् पूर्व्वं चतुर्गुणम् ॥"
इति मानवे साक्षिप्रकरणे ८ अध्यायः ॥

मध्यमा, स्त्री, (मध्यम + टाप् ।) हस्वरज्जुका नारी । कर्णिका । अङ्गुलिभेदः । व्याघरच्छन्दः । इति मेदिनी । मे, ५० ॥ हृदयोत्थितवृद्धियुतनादरूपवर्णः । यथा, अलङ्कारकौस्तुभः ॥
"पश्चात् पश्यन्त्यथ हृदयगो बुद्धियुङ्मध्यमाख्यः ।"
स्त्रीयाद्यन्तर्गतनायिकाभेदः । तस्या लक्षणम् । हिताहितकारिण्यपि प्रियतमे हिताहितकारिणी या सा । अस्यास्तु व्यवहारानुसारिणी चेष्टा । इति रसमञ्जरी ॥ (जम्बुभेदः । तत्पर्य्यायो यथा,—
"वृक्षाम्लफलाजम्बुर्दीर्घपत्रा च मध्यमा ॥"
इति वैद्यकरत्नमालायाम् ॥)

मध्यमिका, स्त्री, (मध्यमैव । कन् टापि अत इत्वञ्च ।) हस्वरज्जुका नारी । इति रत्नावली ॥

मध्यमीयं, त्रि, (मध्यमे भवं मध्यमस्येदं वेति । "गहादिभ्यश्च ।" ४ । २ । १३८ । इति छः ।) मध्यमम् । इति हेमचन्द्रः । ६ । ६६ ॥

मध्यमेश्वरः, पुं, (मध्यमस्य स्थानस्य ईश्वरः ।) काशीस्थशिवलिङ्गविशेषः । यथा,—
"धन्यास्तु खलु ते विप्रा मन्दाकिन्यां कृतोदकाः ।
अर्चयन्ति महादेवं मध्यमेश्वरमीश्वरम् ॥
स्नानं दानं तपः श्राद्धं पिण्डनिर्व्वापणं त्विह ।
एकैकशः कृतं विप्राः पुनन्त्यासप्तमं कुलम् ॥
तन्निधिला वपस्पृश्य राहुग्रस्ते निशाकरे ।
यत् फलं लभते मर्त्यस्तस्माद्गुणितं त्विह ॥
एवमुक्ता महायोगी मध्यमे शान्तिके प्रभुः ।
उवास सुचिरं कालं पूजयन् वै महेश्वरम् ॥"
इति कौर्म्मे ३१ अध्यायः ॥

मध्ययवः, पुं, (मध्यो मध्यमो यवः ।) षट्त्रैतसर्षपपरिमाणम् । इति केचित् ॥

मध्यरात्रः, पुं, (मध्यं रात्रेः "पूर्व्वापराधरेति ।" २ । २ । १ । इति समासः । "अहःसर्व्वैकेति ।" इति ५ । ४ । ८७ । समासान्तोऽच् पुंवत्त्वञ्च ।) निशीथः । अर्द्धरात्रः । इति हलायुधः ॥ (यथा मनौ । ४ । १०६ ।
"उदके मध्यरात्रे च विण्मूत्रस्य विसर्জ্জने ।
उच्छिष्टः श्राद्धभुक् चैव मनसापि न चिन्तयेत् ॥")

मध्यलोकः, पुं, (मध्यश्चासौ लोकश्चेति ।) पृथिवी । मर्त्यलोक इति यावत् । वधमाणशब्दार्थदर्शनात् ॥

मध्यलोकेशः, पुं, (मध्यलोकानां मर्त्यानां ईशः ।) राजा । इति हेमचन्द्रः । ३ । ३५३ ॥

मध्यस्थः, त्रि, (मध्ये वादिप्रतिवादिनोरुदासीने तिष्ठतीति । स्था + कः ।) मध्यस्थायी । तत्पर्य्यायः । निष्टङ्कः २ । इति त्रिकाण्डशेषः ॥ (यथा कथासरित्सागरे । १० । १८१ ।

मध्यस्थः

"निविष्टवत्या मध्यस्थान्दस्यूनानन्दपूर्णया ।
स श्रीदत्तस्तया सार्द्धं तस्मिन्दिरमधाविशत् ॥"
यथा च भागवते । ६ । १६ । ५ ।
"वस्तुन्यात्मरिमध्यस्थमिवोदासीनविद्विषः ।
सर्व्व एव हि सर्व्वेषां भवन्ति क्रमशो मिथः ॥")
उभयपक्षहीनः । यथा,—
"श्रुत्वा युद्धोद्यमं रामः कुरूणां सह पाण्डवैः ।
तीर्थाभिषेकव्याजेन मध्यस्थः प्रययौ किल ॥"
इति श्रीभागवते १० स्कन्धे ७८ अध्यायः ॥
स्वार्थाविरोधेन परार्थघटकः । यथाह प्राचः ।
"ते ते सत्पुरुषाः परार्थघटकाः स्वार्थस्य
बाधेन ये
मध्यस्थाः परकीयकार्य्यकृशलाः स्वार्थाविरो-
धेन ये ।
तेऽमी मानुषराक्षसाः परहितं ये: स्वार्थतो
घ्नन्ति ये
ये तु घ्नन्ति निरर्थकं परहितं ते के न जानी-
महे ॥"

मध्यस्थं, क्ली, (मध्यं स्थलम् । शरीरमध्यवर्त्तित्वात्तथात्वम् ।) कटिदेशः । यथा,—
"कुचौ मरिचसन्निभौ सुरतमध्यमध्यस्थली ।
चहो तिमिरमञ्जरी सहचरी नरीनृत्यते ॥"
इत्युद्भटः ॥

मध्या, स्त्री, (मध्य + टाप् ।) मध्यमाङ्गुलिः इति हेमचन्द्रः ॥ नायिकाविशेषः । अस्या लक्षणम् । समानलज्जामदना । रूपेव चातिप्रश्रयादतिविश्रब्धनवोढ़ा ॥ अस्याश्चेष्टा । सागसि प्रेयसि धैर्य्ये वक्रोक्तिरधैर्य्ये परुषवाक् । यथा,—
"स्वापे प्रियाननविलोकनहानिरेव
स्वापच्युतौ प्रियकरग्रहणप्रसङ्गः ।
इत्थं सरोरुहसखी परिचिन्तयन्ती
स्वापं विधातुमपि हातुमपि प्रपेदे ॥"
मध्याप्रगल्भे मानावस्थायां प्रत्येकं त्रिविधे । धीरा अधीरा धीराधीरा चेति । इति रसमञ्जरी ॥

मध्याङ्गः, पुं, (मध्यं अङ्गः समाहारान्तः टच् । "अङ्गोऽङ्ग एतेभ्यः ।" ५ । ४ । ८८ । इत्यङ्गादेशः पुंवत्त्वञ्च ।) अङ्गोऽष्टमसङ्कटकालकमध्यभागः । स च कृतपकालस्य संज्ञाविशेषः । यथा,—
"अङ्गो सङ्कटो विख्यातो दश पञ्च च सर्व्वदा ।
तत्राष्टमो सङ्कटो यः सः कालः कृतपः स्मृतः ।
मध्याङ्गे सर्व्वदा यस्मान्मन्दीभवति भास्करः ।
तस्मादनन्तफलदस्तत्रारम्भो विशिष्यते ॥
मध्याङ्गः खड्गपात्रञ्च तथा नेपालकम्बलम् ।
रौप्यं दर्भास्तिला गावो दौहित्रं पाणिः स्मृतः ॥
पापं कुत्सितमित्याहुस्तस्य सन्तापकारिणः ।
अणतीति यतस्तस्मात् कृतपा इति संस्मृताः ॥"
इति मत्स्यपुराणे आद्धकल्पे २२ अध्यायः ॥
त्रिधाविभक्तदिनमध्यभागः । स च दशदण्डपरं दशदण्डरूपः । इति शुक्लयजुर्व्वेदीयकात्यायनः ॥ पञ्चधाविभक्तदिनतृतीयभागः । स तु षोडश

दृष्टात् परमदृष्टात्मकः। इति स्मार्तधृतमत्स्य-पुराणम्॥ एष नियमस्त्रिंशद्दण्डदिनाभिप्रायेण न्यूनाधिके न्यूनाधिककालो ज्ञेयः॥*॥ मध्याह्न-कृत्यं यथा,—

"ततो मध्याह्नसमये स्नानार्थं मृदमाहरेत्।
पुण्यान्तं कुशतिलान् गोमयं शुद्धमेव च॥
नदीषु देवखातेषु तड़ागेषु सरित्सु च।
स्नानं समाचरेन्नित्यं गर्भप्रस्रवणेषु च॥
परकीयनिपानेषु न स्नायादे कदाचन।
पञ्च पिण्डान् समुद्धृत्य स्नायादा समये पुनः॥
मृदेकया शिरः स्नात्वा द्वाभ्यां नाभेस्तथोपरि।
अथ च त्रिभिः कार्य्यं पादौ षड्भिस्तथैव च॥
मृत्तिका च समुद्दिष्टा स्नानांमलकमानिका।
गोमयस्य प्रमाणन्तत्तेनार्द्धं लेपयेत्ततः॥
लेपयित्वाथ तीरस्यस्तस्त्रिर्द्धनेव मन्त्रतः।
प्रक्षाल्याचम्य विधिवत्ततः स्नायात् समाहितः॥
अभिमन्त्र्य जलं मन्त्रैस्त्रिर्द्धनेवांरुणैः शुभैः।
भावपूतस्तदथस्तं ध्यायन् वै विष्णुमव्ययम्॥
आपो नारायणोद्भूतास्ता एवास्यायनं पुनः।
तस्मान्नारायणं देवं स्नानकाले स्मरेद्बुधः॥
प्रेक्ष्य ओंकारमादित्यं त्रिर्निमज्ज्योज्जलाशये।
पुनः पुनरघाचानेत् मन्त्रेणानेन मन्त्रवित्॥
अन्तश्चरसि भूतेषु गुहायां विश्वतोमुखः।
त्वं यज्ञस्त्वं वषट्कार आपो ज्योती रसोऽमृ-तम्॥
दिवारं वा त्रिरभ्यस्येत् व्याहृतिप्रणवान्विताम्।
सावित्रीं वा जपेद्विद्वांस्तथा चैवाघमर्षणम्॥
ततः सम्मार्जनं कुर्य्यादापोहिष्ठामयो भुवः।
इदमापः प्रवहत व्याहृतिभिस्तथैव च॥
ततोऽभिमन्त्र्य तत् तीर्थमापोहिष्ठादिमन्त्रकैः।
अन्तर्जले त्रिरावर्त्त्य सर्व्वपापात् प्रमुच्यते॥
अपः पाणौ समादाय जघ्रा वै मार्ज्जने कृते।
विन्यस्य मूर्द्धि तत्तोयं मुच्यते सर्व्वपातकैः॥
यथाश्वमेधः क्रतुराट् सर्व्वपापापनोदनः।
तथाघमर्षणं सूक्तं सर्व्वपापापनोदनम्॥
अथोपतिष्ठेदादित्यं मूर्द्धि पुण्यान्विताञ्जलिम्।
प्रचिप्यालोकयन्देवमदृश्यं वैदिकैः परम॥
उदुत्यं चित्रं देवानामित्यादिभिरनन्यधीः।
हंसः शुचिषदेतेन सावित्र्या च विशेषतः॥
अन्यैश्च वैदिकैर्मन्त्रैः सौरैः पापप्रणाशनैः।
सावित्रीं वै जपेत् पश्चाज्जपयज्ञः स वै स्मृतः॥
विविधानि पवित्राणि गुह्यविद्यास्तथैव च।
अनङ्गन्यिमघर्षणं शिरः सौरमन्त्रांश्च शक्तितः॥
प्राक्कूलेषु समासीनः कुशेषु प्राङ्मुखः शुचिः।
तिष्ठन्वेदीसमायोर्के जाप्यं कुर्य्यात् समा-हितः॥
स्नादिक्केन्द्राग्नेयाच्युत्तरजीवसहद्भवैः।
कर्त्तव्या जपमाला वा उत्तरादुत्तमा स्मृता॥
जपकाले न भाषेत नान्यानि प्रेक्षयेद्बुधः।
न कन्धयेच्छिरोग्रीवान्नात्मानं प्रेक्षयेत्तथा॥
गुह्यका राक्षवाः सिद्धा हरन्ति प्रसभमन्यतः।
एकान्तेषु शुभे देशे तस्माज्जप्यं समाचरेत्॥
चण्डालाशौचपतितान् दृष्ट्वाचम्य पुनर्जपेत्।
तेरेव भाषणं कृत्वा स्नात्वा चैव जपेद्बुधः॥
आचम्य प्रयतो नित्यं जपेदशुचिदर्शने।
सौरान् मन्त्रान् शक्तितो वै पावमानीस्तु कामतः॥
यदि स्यात् क्लिन्नवासो वै वारिमध्यगतो जपेत्।
अन्यथा तु शुचौ भूम्यां दर्भेषु सुसमाहितः॥
प्रदक्षिणं समावृत्य नमस्कृत्वा ततः स्थितौ।
आचम्य च यथाशास्त्रं शक्त्या स्वाध्यायमाच-रेत्॥
ततः सन्तर्पयेद्देवानृषीन् पितृगणान् क्रमात्।
आदावोङ्कारसुच्चार्य्य नमोऽन्ते तर्पयामि च॥
देवान् ब्रह्मऋषींश्चैव तर्पयेदक्षतोदकैः।
तिलोदकैः पितॄन् भक्त्या स्वस्वगोक्तविधानतः॥
अन्नारब्धेन सर्पिषा माषिना दधियेन च।
देवर्षीं स्तर्पयेद्धीमानुदकाञ्जलिभिः पितॄन्॥
यज्ञोपवीती देवानां निवीती ऋषितर्पणम्।
प्राचीनावीती पैत्र्यं तु स्वेन तीर्थेन भावतः॥
नापीह स्नानवस्त्रं वै समाचम्य च वाग्यतः।
स्वैर्म्मन्त्रैरर्चयेद्देवान् पुष्पैः पत्रैरथाम्बुभिः॥
ब्रह्माणं शङ्करं सूर्य्यं तथैव मधुसूदनम्।
अन्यांश्चाभिमतान् देवान् भक्त्या चाक्लोधनो-ऽत्वरः॥
प्रदद्यादाथ पुष्पाणि सूक्तेन पुरुषेण तु।
आपो वा देवताः सर्व्वास्तेन सम्यक् समर्चिताः॥
नमस्कारेण पुष्पाणि विन्यसेद्वै पृथक् पृथक्।
न विष्णुराधनात् पुण्यं विद्यते कर्म्म वैदिकम्।
तस्मादनादिमध्यान्तं नित्यमाराधयेद्धरिम्॥
तद्विष्णोरितिमन्त्रेण सूक्तेन पुरुषेण तु।
नैताभ्यां सदृशो मन्त्रो वेदेषूक्तश्चतुर्ष्वपि॥
निवेदयेत् स्वमात्मानं विष्णावमलतेजसि।
तदात्मा तन्मनाः शान्तस्तद्विष्णोरितिमन्त्रतः॥
अथवा देवमीशानं भगवन्तं सनातनम्॥
आराधयेन्महादेवं भावपूतो महेश्वरम्॥
मन्त्रेण रुद्रगायत्र्या प्रणवेनाथ वा पुनः।
ईशानेनाथवा रुद्रैस्त्र्यम्बकेण समाहितः॥
पुष्पैः पत्रैरथाद्भिश्च चन्दनाद्यैर्महेश्वरम्।
अघोरम्पः शिवावेति मन्त्रेणानेन योजयेत्॥
नमस्कुर्य्यान्महादेवन्तं सत्यमितीश्वरम्।
निवेदयेत् स्वात्मानं यो ब्राह्मणमितीश्वरे॥
प्रदक्षिणं द्विजः कुर्य्यान् पञ्च ब्राह्मण वै जपन्।
ध्यायेत्तं देवमीशानं व्योममध्यगतं शिवम्॥
अथावलोकयेदर्कं हंसः शुचिषदित्यृचा।
कुर्य्यात् पञ्च महायज्ञान् गृहं त्यक्त्वा समाहितः॥
देवयज्ञं पितृयज्ञं ऋषियज्ञं तथैव च।
मानुष्यं ब्रह्मयज्ञश्च पञ्चयज्ञान् प्रचक्षते॥
यदि स्यात् तर्पणादर्वाक् ब्रह्मयज्ञः कृतो न हि।
हुत्वा मनुष्ययज्ञं वै ततः स्वाध्यायमाचरेत्।
अग्नेः पश्चिमतो देशे भूतयज्ञान्त एव वा।
कुशासनसमासीनः कुशपाणिः समाहितः॥
शूलाग्नौ लौकिकाग्नौ वा जले भूत्वामथापि वा।
वैश्वदेवनिमित्तं वै देवयज्ञः स वै स्मृतः॥
यदि स्याल्लौकिके पक्वं ततोऽन्नं तत्र हूयते।
शूलाग्नौ तत्र देवान्नं विधिरेष सनातनः॥
देवेभ्यश्च हुतान्दद्यात् शेषान् भूतबलिं हरेत्।
भूतयज्ञः स वै ज्ञेयो भूतिदः सर्व्वदेहिनाम्॥
श्वभ्यश्च श्वपचेभ्यश्च वयोभ्यो नित्यमेव च।
दद्याद्भूमौ बलिं त्वन्नं पक्षिभ्योऽथ द्विजोत्तमः॥
सायं चान्नस्य सिद्धस्य कुर्य्यादेवमतन्द्रितः।
भूतयज्ञः स्वयं नित्यं सायं प्रातर्विधीयते॥
एकन्तु भोजयेद्विप्रं पितॄनुद्दिश्य सत्तमम्।
अथवायं यथाशक्ति किञ्चिदन्नं समाहितः।
वेदतत्त्वार्थविदुषे द्विजाये वोपपादयेत्॥
पूजयेदतिथिं नित्यं नमस्येदर्चयेद्द्विजम्।
मनोवाक्कर्म्मभिः प्राप्तमागतं स्वगृहन्तु तम्॥
हन्तकारमथार्घ्यं वा भिक्षां वा शक्तितो द्विजः।
दद्यादतिथये नित्यं बुद्धा तं परमेश्वरम्॥
भिक्षामाहुर्यावमाचमग्रं स्यात् तच्चतुर्गुणम्।
पुष्कलं हन्तकारन्तु तच्चतुर्गुणमुच्यते॥
गोदोहमात्रं कालं वै प्रतीक्ष्यो ह्यतिथिः स्वयम्।
अभ्यागतान् यथाशक्ति पूजयेदतिथिं यथा॥
भिक्षां वै भिक्षवे दद्याद्विधिवद् ब्रह्मचारिणे।
दद्यादन्नं यथाशक्ति त्वर्पिभ्यो लोभवर्ज्जितः॥
सर्व्वेषामप्यलाभे तु अन्न गोभ्यो निवेदयत्।
भुञ्जीत बन्धुभिः सार्द्धं वाग्यतोऽन्नमकुत्सयन्॥
अकृत्वा तु द्विजः पञ्च महायज्ञान् द्विजोत्तमाः।
भुञ्जीत चेत् कृमिर्भूत्वा तिर्य्यग्योनिं स गच्छति॥
वेदाभ्यासोऽन्वहं शक्त्या महायज्ञक्रियाक्षमाः।
नाशयन्त्याशु पापानि देवानामर्च्चनं तथा॥
यो मोहादथवालस्यादकृत्वा देवतार्च्चनम्।
भुङ्क्ते च याति नरकान् शूकरेष्वभिजायते॥
तस्मात् सर्व्वप्रयत्नेन कृत्वा कर्म्माणि वै द्विजः।
भुञ्जीत स्वजनैः सार्द्धं स याति परमां गतिम्॥"

इति कौर्म्मे उपविभागे १७ अध्यायः॥

अत्र भोजनविधिर्भोजनशब्दे द्रष्टव्यः॥

मध्वरः, (मधु तत्सम्पर्कायं अलतीति। अल्+अच्। संज्ञापूर्व्वकत्वात् वृद्ध्यभावः।) मधुसारः। इति शब्दचन्द्रिका॥

मध्वालु, क्ली, (मधु मधुरं आलु। मधुवन्निरूपत्वात् तथात्वम्।) मूलविशेषः। मौ आलु इति भाषा॥ अस्य गुणाः। रक्तपित्तनाशित्वम्। गुरुत्वम्। स्वादुत्वम्। शीतत्वम्। स्नेह्यमूत्र-कारित्वञ्च। इति राजवल्लभः॥

मध्वालुकं, क्ली, (मध्वालु+स्वार्थे कन्।) कन्द-विशेषः। इति शब्दचन्द्रिका॥ मौ आलु इति भाषा॥ (यथा, सुश्रुते सूत्रस्थाने ४६ अध्याये। "विदारीकन्दशतावरीविसन्नालशृङ्गाटक-कशेरुकपिण्डालुकमध्वालुकहस्त्यालुककाष्ठा-लुकशूकालुकरक्तालुकेन्दीवरोत्पलकन्द-प्रभृ-तीनि॥")

मध्वासवः, पुं, (मधु मधूकपुष्परसस्तेन कृत आसवः।) मधूकपुष्पकृतमद्यम्। तत्पर्य्यायः।

माधवकः २ मधु ३ माध्वीकम् ४। इत्यमरः। २।१०।८१॥ (यथा, मनुते १।४५ अध्याये।
"सुखप्रियः स्थिरमतिर्विज्ञेयोऽनिलनाशनः।
मधु मध्यासवक्षौद्रो मैरेयकुसुमासवः॥"
विवरणमस्य माध्वीकशब्दे ज्ञातव्यम्।)

मध्वासवनिकः, पुं. (मध्वासवमुत्पादत्वेनास्त्यस्येति। मध्वासवक+ठन्।) शौण्डिकः। इति शब्दमाला॥

मधुजा, स्त्री, (मधु इंजते प्राप्नोति कारणत्वेनेति। इंज+कः। पृषोदरादित्वात् ह्रस्वः।) मदिरा। इति हेमचन्द्रः।३।५६७॥ (गुणादिविषयोऽस्या मदिराशब्दे ज्ञातव्यः॥)

मन, अर्च्चे। गर्व्वे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-गर्व्वे अक०-सेट्।) मनति। इति दुर्गादासः॥

मन, क ङ गर्व्वके। इति कविकल्पद्रुमः॥ (चुरा०-आत्म०-अक०-स्तम्भने सक०-सेट्।) क ङ, मानयते। गर्व्वकोऽहङ्कारः। मनस्तम्भने। इति प्राचः। मानयते शत्रुं बली स्तम्भनातीत्यर्थः। इति रमानाथः। इति दुर्गादासः॥

मन, त क थ्वनौ। इति कविकल्पद्रुमः॥ (अदन्त चुरा०-पर०-सक०-सेट्।) दन्त्यनोपधः। मनयति। इति दुर्गादासः॥

मन, द ङ बोधे। इति कविकल्पद्रुमः॥ (तना०-आत्म० सक०-सेट्।) द ङ, मनुते। इति दुर्गादासः॥

मन, य यौ ङ बोधे। इति कविकल्पद्रुमः॥ (दिवा-आत्म०-सक०-अनिट्।) य ङ, मन्यते। यौ, यमंस्त। इति दुर्गादासः॥

मनआपः, त्रि, (आप्नोतीति। आप्+अच्। मनस आपः।) मनोज्ञः। इति त्रिकाण्डशेषः॥

मनः, पुं, (मन्यते सुरभित्वादिगुणेन आद्रियत इति। मन्+षः।) जटामांसी। इति शब्दचन्द्रिका॥

मनः, [स्] क्ली, (मन्यते बुध्यतेऽनेनेति। मन्+"सर्व्वधातुभ्योऽसुन्।" उणा० ४। १८८। इति असुन्।) लिङ्गशरीरावयवविशेषः। यथा। सप्तदशैकादशं मनः। सप्तदशावयवानि लिङ्गशरीराणि। अवयवास्तु ज्ञानेन्द्रियपञ्चकं बुद्धिमनसी कर्म्मेन्द्रियपञ्चकं वायुपञ्चकञ्चेति। मनो नाम सङ्कल्पविकल्पात्मिका अन्तःकरणवृत्तिः। मनस्तु कर्म्मेन्द्रियैः सहितं सत् मनोमयकोशो भवति। इति वेदान्तसारः॥ ज्ञानेन्द्रियविशेषः। तन्तु बुद्धीन्द्रियाणां मध्ये प्रधानं श्रीकृष्णोऽभिनत्। यथा,—
"इन्द्रियाणां मनश्चास्मि भूतानामस्मि चेतना॥"
इति भगवद्गीता॥
तच्च गर्भस्थस्य सप्तमे मासि जायते। इति सुश्रुतः। "सप्तमे मनः प्रतिबुद्धतरं भवति।" इति सुश्रुते शारीरस्थाने तृतीयेऽध्याये १०॥)
मनोजवः। दिवसम् २ दैनः ३ हृदयम् ४ स्वान्तम् ५ हृत् ६ मानसम् ७। इत्यमरः। १।४।३१॥ अनङ्गकम् ८ अङ्गम् ९। इति शब्दरत्नावली॥ अपि च।
"मनो महान् मतिर्ब्रह्मा पूर्व्वबुद्धिः ख्यातिरीश्वरः।
प्रज्ञा संविच्चितिश्चैव स्मृतिश्च परिपठ्यते।
पर्य्यायवाचकाः शब्दा मनसः परिकीर्त्तिताः॥"
इति महाभारते मोक्षधर्म्मे॥ * ॥
न्यायमते अस्य गुणाः। परत्वम्। अपरत्वम्। संख्या। परिमितिः। पृथक्त्वम्। संयोगः। विभागः। वेगश्च। मनोयोगाख्यानि यथा। सुखम्। दुःखम्। इच्छा। द्वेषः। मतिः। यत्नश्च। इदं परमाणुस्वरूपम्। शिरोमणिमते वायवीयपरमाणुरूपम्। यथा,—
"परापरत्वं संख्याद्याः पञ्च वेगश्च मानसे।
मनोयोगाख्यं सुखं दुःखमिच्छा द्वेषौ मतिः कृतिः॥
अयोगपद्याज्ज्ञानानां तस्याणुत्वमिहेष्यते॥"
इति भाषापरिच्छेदः॥
अन्यज्ञानसामान्यं प्रति लक्षणयोगः कारणम्। यथा, तत्रैव।
"त्वचो योगी मनसा ज्ञानकारणम्॥"
तस्य नवगुणा यथा,—
"धैर्य्योपपत्तिर्यक्तिश्च विसर्गः कल्पना क्षमा।
सदसच्चाप्युता चैव मनसो नव वै गुणाः॥"
इति मोक्षधर्म्मः॥
अस्य व्याख्या। धैर्य्यम् १ उपपत्तिः ऊहापोहकौशलम् २ युक्तिः स्मरणम् ३ विसर्गः विपरीतसर्गो भ्रान्तिः ४ कल्पना मनोरथवृत्तिः ५ क्षमा ६ सत् वैराग्यादि ७ असत् रागद्वेषादि ८ व्याप्तता अस्थिरत्वम् ९। इति तट्टीका॥ * ॥
अस्य चातुर्विध्यं यथा,—
"मनोबुद्धिरहङ्कारश्चित्तं करणमान्तरम्।
संशयो निश्चयो गर्व्वः स्मरणं विषया अमी॥"
इति वेदान्तः॥
तस्य अध्यात्मत्वादि यथा,—
"अध्यात्मं मन इत्याहुः पञ्चभूतात्मधारकम्।
अधिभूतञ्च सङ्कल्पश्चन्द्रमाश्चाधिदैवतम्॥"
इति महाभारते आश्वमेधिकपर्व्व॥
तस्य स्वरूपं यथा,—
"अनिरूप्यमदृश्यञ्च ज्ञानमेतन्मनः स्मृतम्॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २३ अध्यायः॥
तस्य प्राशस्त्याप्राशस्त्यानुमापकानि यथा,—
"प्रमाणां हृदयं सद्यः सुपक्वं वचनेन वै।
शिष्ये क्लबे कन्यायां दौहित्रे बान्धवेऽपि च॥
पुत्रे पौत्रे च वचसि प्रतापे यशसि स्त्रियाम्।
बुद्धौ वारिणि विद्यायां जायते हृदयं मृदुम्॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १ अध्यायः॥
तस्य बन्धमोक्षहेतुत्वं यथा,—
"मन एव मनुष्याणां कारणं बन्धमोक्षयोः।
बन्धस्य विषयासक्ति मुक्तेर्निर्विषयं स्मृतम्॥"
इति विष्णुपुराणे ६ अंशे ७ अध्यायः॥
("अतीन्द्रियं पुनर्मनः मनस्संज्ञकं चेत्याद्युक्तेः

तदधीनसम्पदायत्तचेष्टम्। चेष्टाप्रत्ययभूतमिन्द्रियाणाम्। स्वार्थेन्द्रियार्थसङ्कल्पाभिचरणाच्चानेकमेकस्मिन् पुरुषे सत्त्वरजस्तमः सत्त्वगुणयोगाच्च नचानेकत्वं नानेकं लोककालमनेकेषु प्रवर्त्तते॥ तस्मान्नैककाला सर्व्वेन्द्रियप्रवृत्तिः। यद्गुणमाभीक्ष्णं पुरुषमनुवर्त्तते सक्त तत्सत्त्वमेवोपदिशन्ति ऋषयो बाहुल्यानुशयात्। मनःपुरःसराण्येन्द्रियाण्यर्थग्रहणसमर्थानि भवन्ति॥"
"मनसस्तु चिन्त्यमर्थः। तत्र मनसो बुद्धेश्च त एव समानातिहीनमिथ्यायोगाः प्रकृतिविकृतिहेतवो भवन्ति॥" इति चरके सूत्रस्थाने अष्टमेऽध्याये॥
"लक्षणं मनसो ज्ञानस्याभावो भाव एव वा।
सति ह्यात्मेन्द्रियार्थानां सन्निकर्षेण वर्त्तते॥
वैधृत्यान्मनसो ज्ञानं सान्निध्यात्तच्च वर्त्तते।
अणुत्वमथचैकत्वं द्वौ गुणौ मनसः स्मृतौ॥
चिन्त्यविचार्य्यमूह्यञ्च धैर्य्यं सङ्कल्पमेव च।
यत्किञ्चिन्मनसो ज्ञेयं तत् सर्व्वं ह्यर्थसंज्ञकम्॥
इन्द्रियाभिग्रहः कर्म्म मनसस्तस्य निग्रहः।
ऊहो विचारश्च ततः परं बुद्धिः प्रवर्त्तते॥
इन्द्रियेणेन्द्रियार्थो हि समनस्केन गृह्यते।
कल्प्यते मनसाप्यूहं गुणतो दोषतो यथा॥
जायते विषये तत्र या बुद्धिर्निश्चयात्मिका।
अवस्यते तथा वक्तुं कर्त्तुं वा बुद्धिपूर्व्वकम्॥
या यदिन्द्रियमाश्रित्य जन्तोर्बुद्धिः प्रवर्त्तते।
याति सा तेन निर्देशं मनसा च मनोभवा॥
बुद्धीन्द्रियमनोर्थानां विद्याद् योगधरं परम्॥"
इति चरके शारीरस्थाने प्रथमेऽध्याये॥
सत्त्वगुणयुक्तस्य मनसो गुणा यथा,—
"आस्तिक्यं प्रविभज्य भोजनमनुत्तापश्च तथ्यं वचो
मेधाबुद्धिधृतिक्षमाश्च करुणा ज्ञानञ्च निर्हेतुता।
कर्म्मानिन्दितमस्पृहत्व विनयो धर्म्मः सदैवादरा-
देते सत्त्वगुणान्वितस्य मनसो गीता गुणा ज्ञानिभिः॥"
अस्ति धर्म्ममोक्षपरलोकादिकमिति बुद्ध्या चरतीत्यास्तिकस्तस्य भाव आस्तिक्यं अनुत्तापः अक्रोधः धृतिः भूतप्रेतस्मरक्रोधलोभादावेधरादित्यं ज्ञानमात्मज्ञानम्। निर्हेतुता कपटाभावः कर्म्म अनिन्दितं यत्नसृष्टं निष्फलञ्च। रजोगुणयुक्तस्य मनसो गुणा यथा,—
"क्रोधस्ताड्नशीलता च बहुलं दुःखं सुखेऽधिका
दम्भः कामुकताप्यलीकवचनं चाधीरता-
हङ्कृतिः।
ऐश्वर्य्यादभिमानितातिग्रथितानन्दोऽधिकक्षा-
टनं
प्रख्याता हि रजोगुणेन सहितस्तेते गुणा-
श्चेतसः॥"

अलीकवचनं मिथ्याकथनं अटनं पृथ्वीपरिभ्रमणम् ॥ अथ तमोगुणयुक्तस्य मनसो गुणा यथा.—

"नास्तिक्यं सुविषन्नतातिग्रथितालस्यञ्च दुष्टा मतिः
प्रीतिर्निन्दितकर्म्मसूद्यमिषु सदा निद्रालुताहर्निशम् ।
अज्ञानं किल सर्व्वतोऽपि सततं क्रोधान्धता मूढ़ता
प्रख्याता हि तमोगुणेन सहितस्यैते गुणाश्चेतसः ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥*॥

सर्व्वे सान्ता अदन्ताश्चेति प्रमाणात् अकारान्तमनशब्दोऽप्यस्ति । यथा, उत्तरगीतायाम् । १३ अध्याये ।

"मनसं मनमध्यस्थं मध्यस्थं मनवर्ज्जितम् ।
मनसा मनमालोक्य स्वयं सिद्धन्ति योगिनः ॥")

मनःशिलः, पुं, (मनो मानसं शिलति आकर्षति स्वगन्धेनेति । शिल + कः ।) मनःशिला । यथा,

"टङ्कैर्मनःशिलगुहैरविदार्य्यमाणा ॥"

इत्यमरटीकायां भरतः ॥

मनःशिला, स्त्री, (मनः शिलति आददाति आकर्षति गन्धेनेति । शिल + कः । स्त्रियां टाप् । यद्वा, मनःप्रसादिका शिला धातुविशेषः ।) रक्तवर्णधातुविशेषः । मञ्जल इति भाषा ॥ (यथा, कुमारे । १ । ५५ ।

"मनःशिलाविच्छुरिता निषेदुः
शैलेयनद्धेषु शिलातलेषु ॥")

सा तु लक्ष्मीवीर्य्यम् । इति वैद्यकम् ॥ तत्पर्य्यायः । कुनटी२ मनोज्ञा३ नागजिह्विका ४ । इत्यमरः । २ । ६ । १०८ ॥ नेपाली ५ शिला ६ । इति रत्नमाला ॥ मनोज्ञा ७ नेपालिका ८ मनोगुप्ता ९ कल्याणिका १० रोगशिला ११ । इति राजनिर्घण्टः ॥ गोला १२ दिव्यौषधिः १३ । इति भावप्रकाशः ॥ अस्या गुणाः । कटुत्वम् । स्निग्धत्वम् । लेखनत्वम् । विषभूतावेशभयोन्मादनाशित्वम् । वश्यकारित्वञ्च । इति राजनिर्घण्टः ॥ अपि च । तिक्तत्वम् । कफनाशित्वम् । सारकत्वम् । कुष्ठिकारित्वम् । कुष्ठज्वरपाण्डुकाश्वासनाशित्वम् । शुक्रमङ्गलकारित्वञ्च । इति राजवल्लभः ॥ अन्यच्च ।

"मनःशिला गुरुर्ज्ञेया सरोष्णा लेखनी कटुः ।
तिक्ता स्निग्धा विषश्वासकासभूतकफापहा ॥
मनःशिला मन्दबलं करोति
जन्तुं ध्रुवं शोधनमन्तरेण ।
मलानुबन्धं किल सञ्चरोधं
सशर्करं कृच्छ्रगदञ्च कुर्य्यात् ॥"

इति भावप्रकाशः ॥

(अस्याः पर्य्यायः शोधनं गुणाश्च यथा.—

"मनःशिला च नेपाली शिलाह्वा नागजिह्विका ।
मनोज्ञा कुनटी गोली करञ्जी करवीरिका ॥
मनोज्ञा शोधपुष्पाभा शस्यते सर्व्वकर्म्मसु ॥"
"जयन्ती भृङ्गराजोत्थे रक्तागस्त्यरसे: शिला ॥
दोलायन्त्रे दिनं पाच्या यामं छागस्य मूत्रके ।
चालयेदारनालेन सर्व्वरोगेषु योजयेत् ॥"

मतान्तरे मनःशिलाशुद्धिर्यथा.—

"अगस्त्यपत्रतोयेन भाविता सप्तवासरम् ।
भृङ्गवेररसैर्वापि विशुध्यति मनःशिला ।
कटुः स्निग्धा शिला तिक्ता कफघ्नी लेखनी सरा ।
भूतावेशभयं हन्ति कासश्वासहरा शुभा ॥"

इति वैद्यकरसेन्द्रसारसंग्रहे नारणमारणाधिकारे ॥)

मनन, क्ली, (मन्यत इति । मन् + ल्युट् ।) श्रुतस्याद्वितीयवस्तुनो वेदान्तार्थानुगुणयुक्तिभिः अनवरतमनुचिन्तनम् । इति वेदान्तसारः ॥ बोधनम् । (यथा, गायत्रीतन्त्रे । १ । ४ ।

"मननात् पापतस्त्राति मननात् स्वर्गमश्नुते ।
मननात् मोक्षमाप्नोति चतुर्व्वर्गमयो भवेत् ॥")

धारणम् । इति मनधात्वर्थदर्शनात् । वृद्धिः । इति राजनिर्घण्टः ॥

मनसा, स्त्री, (मनः भक्ताभीष्टपूरणाय मननं अस्त्यस्या इति । मनस् + अर्श आदित्वादच् । ततष्टाप् । यद्वा, मनं मननमहङ्कारमिति यावत् स्यति नाशयतीति । सो + कः ।) देवीविशेषः । तत्पर्य्यायः । कद्रूः २ मनसादेवी ३ विषहरी ४ । इति जटाधरः ॥ अस्याः प्रणाममन्त्रः ।

"आस्तीकस्य मुनेर्माता भगिनी वासुकेस्तथा ।
जरत्कारुमुनेः पत्नी मनसादेवि ! नमोऽस्तु ते ॥"

इति तस्याः पूजापद्धतिः ॥

तस्या नाम्नां व्युत्पत्तिर्यथा,—

श्रीनारायण उवाच ।

"शृणुतां मनसाख्यानं यत् श्रुतं धर्म्मवक्त्रतः ।
कन्या सा च भगवती कश्यपस्य च मानसी ॥
तेनेयं मनसादेवी मनसा या च दीव्यति ।
मनसा ध्यायते या वा परमात्मानमीश्वरी ॥
तेन सा मनसादेवी योगेन तेन दीव्यति ।
आत्मारामा च सा देवी वैष्णवी सिद्धयोगिनी ॥
त्रियुगञ्च तपस्तप्त्वा कृष्णस्य परमात्मनः ।
जरत्कारुशरीरञ्च दृष्ट्वा यत् स्त्रीगमीश्वरः ॥
गोपीपतिर्नाम चक्रे जरत्कारुरिति प्रभुः ।
वाञ्छितञ्च ददौ तस्यै कृपया च कृपानिधिः ॥
पूजाञ्च कारयामास चकार च पुनः पुनः ।
स्वर्गे च नागलोके च पृथिव्यां ब्रह्मलोकतः ॥
भूयं जगत्सु गौरी सा सुन्दरी च मनोहरा ।
जगद्गौरीति विख्याता तेन सा पूजिता सती ॥
शिवशिष्या च सा देवी तेन शैवीति कीर्त्तिता ।
विष्णुभक्तातीव श्रद्धेयवी तेन नारद ! ॥
नागानां प्राणरक्षित्री यज्ञे जन्मेजयस्य च ।
नागेश्वरीति विख्याता सा नागभगिनीति च ॥
विषं संहर्त्तुमीशा सा तेन विषहरीति सा ।
सिद्धं योगं हरात् प्राप तेनातिसिद्धयोगिनी ।
महाज्ञानञ्च गोप्यञ्च मृतसञ्जीवनीं पराम् ।
महाज्ञानयुतां तान्त्र प्रवदन्ति मनीषिणः ॥
आस्तीकस्य मुनीन्द्रस्य माता सा च तपस्विनः ॥
आस्तीकमाता विख्याता जगत्सु सुप्रतिष्ठिता ॥
प्रिया मुनेर्जरत्कारोर्मुनीन्द्रस्य महात्मनः ।
योगिनो विश्वपूज्यस्य जरत्कारुप्रिया ततः ॥
जरत्कारुर्जगद्गौरी मनसा सिद्धयोगिनी ।
वैष्णवी नागभगिनी शैवी नागेश्वरी तथा ॥
जरत्कारुप्रियास्तीकमाता विषहरीति च ।
महाज्ञानयुता चैव सा देवी विश्वपूजिता ॥
द्वादशैतानि नामानि पूजाकाले च यः पठेत् ।
तस्य नागभयं नास्ति तस्य वंशोद्भवस्य च ॥
नागभीते च शयने नागग्रस्ते च मन्दिरे ।
नागक्षते महादुर्गे नागवेष्टितविग्रहे ।
इदं स्तोत्रं पठित्वा तु मुच्यते नात्र संशयः ।
नित्यं पठेद् यस्तं दृष्ट्वा नागवर्गः पलायते ॥
दशलक्षजपेनैव स्तोत्रसिद्धिर्भवेन्नृणाम् ।
स्तोत्रसिद्धिर्भवेद्यस्य स विषं भोक्तुमीश्वरः ॥
नागभूषणं कृत्वा स भवेन्नागवाहनः ।
नागासनो नागतल्पो महासिद्धोभवेन्नरः ॥"

इति ब्रह्मवैवर्त्ते महापुराणे प्रकृतिखण्डे नारायणनारदीये मनसोपाख्याने मनसास्तोत्रं नाम पञ्चचत्वारिंशत्तमोऽध्यायः ॥ * ॥ तस्याः पूजामन्त्रादि यथा,—

श्रीनारायण उवाच ।

"पूजाविधानं स्तोत्रञ्च शृणुतां मुनिपुङ्गव ! ।
ध्यानञ्च सामवेदोक्तं देवीपूजाविधानकम् ॥
श्वेतचम्पकवर्णाभां रत्नभूषणभूषिताम् ।
वह्निशुद्धांशुकाधानां नागयज्ञोपवीतिनीम् ॥
महाज्ञानयुताञ्चैव प्रवरां ज्ञानिनां सतीम् ।
सिद्धाधिष्ठातृदेवीञ्च सिद्धां सिद्धिप्रदां भजे ॥
इति ध्यात्वा तु तां देवीं मूलेनैव प्रपूजयेत् ।
नैवेद्यैर्विविधैर्दिव्यैः पुष्यधूपानुलेपनैः ॥
मूलमन्त्रञ्च वेदोक्तो भक्तानां वाञ्छितप्रदः ।
मुने ! कल्पतरुर्नाम सुसिद्धो द्वादशाक्षरः ॥
ॐ ह्रीं श्रीं क्लीं ऐं मनसादेवि स्वाहेति कीर्त्तितः ।
पञ्चलक्षजपेनैव मन्त्रसिद्धिर्भवेन्नृणाम् ॥
मन्त्रसिद्धिर्भवेद्यस्य स सिद्धो जगतीतले ।
सुधाचर्म्म विषं तस्य धन्वन्तरिसमो भवेत् ॥
ब्रह्मन्नाषाढ़संक्रान्त्यां स्नुहीशाखासु यत्नतः ।
आवाह्य देवीमीशान्तां पूजयेद् यो हि भक्तितः ॥
पञ्चम्यां मनसाख्यायां देयै दद्याच्च यो बलिम् ।
धनवान् पुत्रवांश्चैव कीर्त्तिमांश्च भवेद्ध्रुवम् ॥
पूजाविधानं कथितं तदाख्यानं निशामय ।
कथयामि महाभाग ! यत् श्रुतं धर्म्मवक्त्रतः ॥"

तस्या जन्मकारणं यथा,—

"पुरा नागभयाक्रान्ता वसुधर्मानवा भुवि ।
यान् यान् खादन्ति नागाश्च ते न जीवन्ति नारद ! ॥
मन्त्रांश्च सञ्चले भीतः कश्यपः ब्रह्मणार्थितः ।
वेदबीजानुसारेण चोपदेशेन ब्रह्मणः ॥

मन्त्राधिष्ठातृदेवीन्तां मनसां वक्ष्ये ततः ।
तपसा मनसा तेन बभूव मनसा च सा ॥"
तस्यास्तपस्यादि यथा,—
"कुमारी सा च सम्भूय जगाम शङ्करालयम् ।
भक्त्या संपूज्य कैलासे तुष्टाव चन्द्रशेखरम् ॥
शतं वर्षसहस्राणि तं विवेद मुनेः सुता ।
आशुतोषो महेशश्च तां तुष्टो बभूव ह ॥
महाज्ञानं ददौ तस्यै पाठयामास सामं च ।
कृष्णमन्त्रं कल्पतरुं ददावष्टाक्षरं मुने ! ॥
रासेश्वरीमायाकामबीजं ङेऽन्तं कृष्णपदन्तथा ।
वेदोदयमङ्गलं नाम कवचं पूजनक्रमम् ॥
सर्वपूज्यस्य स्तवनं ध्यानं भुवनपावनम् ।
पुरश्चर्याक्रमञ्चापि वेदोक्तं सर्वसम्मतम् ॥
प्राप्ता स्तम्भनयाद्यज्ञानं परं स्तम्भनक्षयं सती ।
जगाम तपसे साध्वी पुष्करं शङ्कराज्ञया ॥
चिरुवर्षं तपस्तप्त्वा कृष्णस्य परमात्मनः ।
सिद्धा बभूव सा देवी ददर्श पुरतः प्रभुम् ॥
दृष्ट्वा कृष्णाङ्गजां बालां कृपया च कृपानिधिः ।
पूजाञ्च कारयामास चकार च स्वयं हरिः ॥
वरञ्च प्रददौ तस्यै पूजिता त्वं भवे भव ।
वरं दत्त्वा च कल्याण्यै सद्यश्चान्तर्दधे विभुः ॥
प्रथमे पूजिता सा च कृष्णेन परमात्मना ।
द्वितीये शङ्करेणैव कश्यपेन सुरेण च ॥
मनुना मुनिना चैव नागेन मानवादिना ।
बभूव पूजिता सा च त्रिषु लोकेषु सुव्रता ॥"
तस्या विवाहः स्वामिकर्तृकत्यागश्च यथा,—
"परत्कारमुनीन्द्राय कश्यपस्तां ददौ पुरा ।
याचितो मुनिश्रेष्ठो जग्राह ब्रह्मणाज्ञया ॥
दत्त्वोदाहं महायोगी विश्रान्तस्तपसा चिरम् ।
सुष्वाप देशा जघने वटमूले च पुष्करे ॥
निद्रां जगाम च मुनिः स्मृत्वा निर्देशमीश्वरम् ।
जगामास्तं दिनकरः सायंकाल उपस्थितः ॥
संचिन्त्य मनसा तत्र मनसा सा प्रतिष्ठिता ।
धर्मसन्ध्योपभयेनैव चकारालोचनं सती ॥
अकृत्वा पश्चिमां सन्ध्यां नित्यां द्विजजनानाम् ।
ब्रह्महत्यादिकं पापं लभिष्यति पतिर्मम ॥
नोपतिष्ठति यः पूर्वां नोपास्ते यस्तु पश्चिमाम् ।
स च शवाशुचिर्नित्यं ब्रह्महत्यादिकं लभेत् ॥
वेदोक्तमपि संचिन्त्य बोधयामास तं मुनिम् ।
स च पुरा मुनिश्रेष्ठश्चुकोप तां दृष्ट्वा मुनिः ॥

परत्कारुरुवाच ।

कथं मे सुव्रते ! साध्वि ! निद्राभङ्गः कृतस्त्वया ।
धर्मं ब्रह्मादिकं तस्या या भर्तुश्चापकारिणी ॥
तपश्चानशनञ्चैव व्रतं दानादिकञ्च यत् ।
भर्तुरप्रियकारिण्याः सर्वं भवति निष्फलम् ॥
यया प्रियः पूजितश्च श्रीकृष्णः पूजितस्तया ।
पतिव्रताव्रतार्थेन पतिरूपी हरिः स्वयम् ॥
सर्वदानं सर्वयज्ञः सर्वतीर्थनिषेवणम् ।
सर्वं व्रतं तपः सर्वमुपवासादिकञ्च यत् ॥
सर्वधर्मश्च सत्यञ्च सर्वदेवप्रपूजनम् ।
तत्सर्वं कामिसेवायाः कलां नार्हन्ति षोडशीम् ॥

सुपुण्ये भारते वर्षे पतिसेवां करोति या ।
वैकुण्ठं स्वामिना सार्द्धं सा याति ब्रह्मणः शृणु ॥
विप्रियं कुरुते भर्तुर्विप्रियं वदति प्रियम् ।
असतकुलप्रजाता या तत्फलं शृणु सति ! ॥
कुम्भीपाकं व्रजेत् सा च यावच्चन्द्रदिवाकरौ ।
ततो भवति चाण्डाली पतिपुत्रविवर्जिता ॥
इत्युक्त्वा च मुनिश्रेष्ठो बभूव स्फुरिताधरः ।
चकम्पे मनसा साध्वी भयेनोवाच तं पतिम् ॥

मनसोवाच ।

सन्ध्यालोपभयेनैव निद्राभङ्गः कृतस्तव ।
क्षमस्व क्षान्तिं महाभाग ! दृष्टाया मम सुव्रत ! ॥
ब्रह्मारात्रावहोरात्रायां यश्च भङ्गं करोति च ।
स व्रजेत् कालसूत्रञ्च स्वामिनश्च विशेषतः ॥
इत्युक्त्वा मनसादेवी स्वामिनश्चरणाम्बुजे ।
पपात भक्त्या भीता च रुरोद च पुनः पुनः ॥
कुपितञ्च मुनिं दृष्ट्वा शीघ्रं सूर्यः शमुसुद्यतम् ।
तत्राजगाम भगवान् सन्ध्यया सह नारद ! ॥
तत्रागत्य मुनिश्रेष्ठमुवाच भास्करः स्वयम् ।
विनयेन च भीतश्च तया सह यथोचितम् ॥

श्रीसूर्य उवाच ।

सूर्यास्तसमयं दृष्ट्वा धर्मसन्ध्योपभयेन च ।
बोधयामास त्वां विप्र ! गाढमन्युं गतस्तदा ॥
क्षमस्व भगवन् ! ब्रह्मन्मां शप्तुं नोचितं मुने ! ॥
ब्राह्मणानाञ्च हृदयं नवनीतसमं तथा ।
तेषां क्रोधाग्निं क्रोधश्च ततो भस्म भवेच्छगत् ॥
पुनः सृष्टुं द्विजः शक्तो न तेजस्वी द्विजात् परः ।
ब्राह्मणो ब्रह्मणो वंशः प्रज्वलन् ब्रह्मतेजसा ॥
श्रीकृष्णं भावयेन्नित्यं ब्रह्मज्योतिः सनातनम् ।
सूर्यस्य वचनं श्रुत्वा द्विजः शान्तो बभूव ह ॥
सूर्यो जगाम स्वस्थानं गृहीत्वा ब्राह्मणाशिषम् ।
तत्याज मनसां विप्रः प्रतिज्ञापालनाय च ॥
रुदन्ती शोकयुक्ता च हृदयेन विदूयता ।
सा सस्मार गुरुं शम्भुमिष्टदेवं हरिं विधिम् ॥
कश्यपं जन्मदातारं विपत्तौ भयकर्षिता ।
तत्राजगाम भगवान् योगीशः शम्भुरेव च ।
विधिश्च कश्यपश्चैव मनसा परिचिन्तितः ॥
दृष्ट्वा विप्रोऽभीष्टदेवं निर्गुणं प्रकृतेः परम् ।
तुष्टाव परया भक्त्या प्रणनाम मुहुर्मुहुः ॥
नमस्कार शम्भुश्च ब्रह्माणं कश्यपन्तदा ।
कथमागमनं देवा इति प्रश्नं चकार सः ॥
ब्रह्मा तद्वचनं श्रुत्वा सहसा समयोचितम् ।
सस्मुवाच नमस्कृत्य दुर्वीकेशपदाम्बुजम् ॥

ब्रह्मोवाच ।

यदि त्यक्ता धर्मपत्नी धर्मिष्ठा मनसा सती ।
कुरुष्वास्यां सुतोत्पत्तिं स्वधर्मपालनाय वै ॥
यती वा ब्रह्मचारी वा भिक्षुर्वानप्रस्थोऽपि वा ।
जायायाश्च सुतोत्पत्तिं कृत्वा पश्चात् त्यजेन्मुने ! ॥
अकृत्वा तु सुतोत्पत्तिं वैरागी स्यात्यजेत् प्रियाम् ।
सयेषायस्तपुरुषस्य चाक्षय्याश्च यथा क्षयम् ॥'
तस्याः पुत्रोत्पत्तिर्यथा,—

"ब्रह्मणो वचनं श्रुत्वा जरत्कारुर्मुनीश्वरः ।
चकार तत्राभिलाषं योगेन मन्त्रपूर्वकम् ॥
तस्मै शुभाशिषं दत्त्वा ययुर्देवा मुदान्विताः ।
मुदान्विता च मनसा जरत्कारुर्मुदान्वितः ॥
मुनेः करस्पर्शमात्रात् सद्यो गर्भो बभूव ह ।
मनसायां मुनिश्रेष्ठ ! मुनिश्रेष्ठ उवाच ताम् ॥

जरत्कारुरुवाच ।

गर्भेणानेन मनसे ! तव पुत्रो भविष्यति ।
जितेन्द्रियाणां प्रवरो धार्मिको वैष्णवाग्रणीः ॥
तेजस्वी च तपस्वी च यशस्वी गुणान्वितः ।
वरो वेदविदाञ्चैव ज्ञानिनां योगिनान्तथा ॥
स च पुत्रो विष्णुभक्तो धार्मिकः कुलसुन्दरेः ।
तृप्यन्ति पितरः सर्वे यज्ञन्नमात्रतो मुदा ॥
पतिव्रता सुशीला या सा प्रिया प्रियवादिनी ।
धर्मिष्ठपुत्रमाता च कुलजा कुलमालिका ॥
हरिभक्तिप्रदो वन्धुस्त्वमिदं तत्सुखप्रदम् ।
यो बन्धच्छित् स च पिता हरेर्वर्त्म प्रदर्शकः ॥
सा गर्भधारिणी या च गर्भवासविमोचनी ।
विष्णुमन्त्रप्रदाता च स गुरुर्विष्णुभक्तिदः ॥
गुरुश्च ज्ञानदाता च तज्ज्ञानं कृष्णभावनम् ।
आब्रह्मस्तम्बपर्यन्तं यतो विश्वं चराचरम् ॥
आविर्भूतं तिरोभूतं किं वा ज्ञानं तदन्यतः ।
वेदज्ञं योगजं यदृयत्तत्सारं हरिसेवनम् ॥
तत्त्वानां सारभूतश्च हरिरन्यद्विडम्बनम् ।
दत्तं ज्ञानं मया तुभ्यं स स्वामी ज्ञानदो हि यः ।
ज्ञानात् प्रसूयते बन्धात् स रिपुर्यो हि बन्धदः ॥
विष्णुभक्तियुतं ज्ञानं न ददाति हि यो गुरुः ।
स रिपुः शिष्यघाती च यो हि बन्धान्न मोचयेत् ॥
जननीगर्भजात् क्लेशाद् यमताडनजात्तथा ।
न मोचयेद् यः स कथं गुरुस्तातो हि बान्धवः ॥
परमानन्दरूपञ्च कृष्णमार्गमनश्वरम् ।
न दर्शयेद् यः स कथं कोटिशो बान्धवो वृथा ॥
भज साध्वि ! परं ब्रह्माच्युतं कृष्णञ्च निर्गुणम् ।
निर्मूलञ्च पुरा कर्म्म भवेद् यत्सेवया ध्रुवम् ॥
मया च्छलेन त्वं त्यक्ता क्षम देवि ! मम प्रिये ! ।
क्षमायुक्तानां साध्वीनां कुतात् क्रोधो न विद्यते ॥
पुष्करं तपसे यामि गच्छ देवि ! यथासुखम् ।
श्रीकृष्णचरणाम्भोजध्यानविच्छिदकातरः ॥
धनादिषु स्त्रियां प्रीतिः प्रवृत्तिवर्त्म गच्छताम् ।
श्रीकृष्णचरणाम्भोजे निवृत्तानां मनोरथाः ॥
जरत्कारुवचः श्रुत्वा मनसा शोककातरा ।
सा साश्रुनेत्रा विनयादुवाच प्राणवल्लभम् ॥

मनसोवाच ।

दोषेणानेन त्यक्ता निद्राभङ्गेन ते प्रभो ! ।
यत्र स्मरसि त्वं बन्धो ! तत्र मामागमिष्यसि ॥
बन्धुभेदः स्त्रीगतमः पुत्रभेदस्ततः परः ।
प्राणेशभेदः प्राणानां विच्छेदात् सर्वतः परः ॥
प्रतिः पतिव्रतानान्तु मृतपुत्राधिकः स्मृतः ।
सर्वस्मात् प्रियः स्त्रीणां प्रियस्तेनोच्यते बुधैः ॥
पुत्रे यथैकपुत्राया वैष्णवानां यथा हरौ ।
नेत्रे यथैकनेत्राणां क्षुधितानां यथान्नके ।
सुधितानां यथान्ने च कामुकानां यथा स्त्रियाम्

यथा परस्त्रे चौराणां यथा जारे कुयोषितम् ॥
विदुषाञ्च यथा शास्त्रे वाणिज्ये वणिजां यथा ।
तथा शश्वत्तनः कान्ते साध्वीनां योषितां प्रभो ! ॥
इत्युक्त्वा मनसा देवी ययात स्वामिनः पदे ।
क्रोडं चकार क्रोडे तां कृपया स कृपानिधिः ॥
नेत्रोदकेन मनसां स्नापयामास तां मुनिः ।
मार्जुणा च मुनेः क्रोडं सिषेच भेदकातरा ॥
तदा ज्ञानेन तौ द्वौ च विप्रोक्तौ च बभूवतुः ।
स्मारं स्मारं पदाम्भोजं कृष्णस्य परमात्मनः ॥
जगाम तपसे विप्रः स्वकान्तां सुप्रबोध्य च ।
जगाम मनसा शम्भोः कैलासं मन्दिरं गुरोः ॥
पार्वती बोधयामास मनसां शोककर्षिताम् ।
शिवस्यातीव ज्ञानेन शिवेन च शिवालये ॥
सुप्रशस्तदिने साध्वी सुस्थे मङ्गलचण्डे ।
नारायणांशं पुत्रञ्च ज्ञानिनां योगिनां गुरुम् ॥
गर्भस्थितो महाज्ञानं स्मृत्वा शङ्करवक्त्रतः ।
स बभूव च योगीन्द्रो योगिनां ज्ञानिनां गुरुः ॥
जातकं कारयामास वाचयामास मङ्गलम् ।
वेदांश्च पाठयामास शिवाय च शिवः शिशोः ॥
रत्नचिकोटिसङ्ख्यञ्च ब्राह्मणेभ्यो ददौ शिवः ।
पार्वती च गवां सङ्घं रत्नानि विविधानि च ॥
शम्भुश्च चतुरो वेदान् वेदाङ्गानीतराणि च ।
बालकं पाठयामास ज्ञानं मृत्युञ्जयं परम् ॥
भक्तिरस्ति स्वकान्ते चाभीष्टदेवे गुरौ हरौ ।
यस्माच्च तेन स्वतपुत्रो बभूवास्तीक एव च ॥
जगाम तपसे विष्णोः पुष्करं शङ्कराज्ञया ।
संप्राप्य च महामन्त्रं तपश्च परमात्मनः ॥
दिव्यं वर्षत्रिलक्षञ्च तपस्तप्त्वा तपोधनः ।
आजगाम महायोगी नमस्कर्तुं शिवं प्रभुम् ॥
शङ्करश्च नमस्कृत्य कृत्वा च बालकं पुरः ।
सा चाजगाम मनसा कश्यपस्याश्रमं पितुः ॥
तां सपुत्रां सुतां दृष्ट्वा सुदं प्राप प्रजापतिः ।
मूतलक्षञ्च रत्नानां ब्राह्मणेभ्यो ददौ मुने ! ॥
ब्राह्मणान् भोजयामास षोडशंख्यान् श्रेयसे शिशोः ।
अदितिश्च दितिश्चान्या सुदं प्रापुः परन्तथा ॥
सा सपुत्रा च सुचिरं तस्थौ तातालये तदा ।
तदीयं पुनराख्यानं वक्ष्यामि तन्निशामय ॥"
तस्या माहात्म्यं यथा,—
"अथाभिमन्युतनये ब्रह्मशापः परीक्षिते ।
बभूव सहसा ब्रह्मन् ! दैवदोषेण कर्म्मणा ॥
सप्ताहे समतीते तु तक्षकस्त्वाञ्च भोक्ष्यति ।
शशाप ब्रह्मणो नृपतिं कौशिक्याञ्च जलेन च ॥
राजा श्रुत्वा तत्प्रवृत्तिं गङ्गाद्वारं जगाम सः ।
तत्र तस्थौ च सप्ताहं शुश्राव धर्मसंहिताम् ॥
सप्ताहे समतीते तु गच्छन्तं तक्षकं पथि ।
धन्वन्तरिर्नृपं भोक्तुं ददर्श गारुडो नृपम् ॥
तयोर्बभूव संवादः सुप्रीतिश्च परस्परम् ।
धन्वन्तरिर्मणिं प्राप तक्षकः स्वेच्छया ददौ ॥
स ययौ तं गृहीत्वा च तुष्टः प्रफुल्लमानसः ।
तक्षको भक्षयामास नृपञ्च मन्त्रकल्पितम् ॥
राजा जगाम वैकुण्ठं सारं सारं हरिं गुरुम् ।
सत्कारं कारयामास पितुर्जन्मेजयः शुचा ॥
राजा चकार यज्ञञ्च सर्पसत्रं ततो मुने ! ।
प्रागांस्तत्याज सर्पाणां समूहो ब्रह्मतेजसा ॥
स तक्षकञ्च भीतञ्च महेन्द्रं शरणं ययौ ।
सेन्द्रञ्च तक्षकं हन्तुं विप्रवर्गः समुद्यतः ॥
अथ देवाश्च मुनयश्चाययुर्मनसान्तिकम् ।
तानुत्थाय महेन्द्रश्च भयकातरविह्वलः ॥
तत आस्तीक आगत्य यज्ञञ्च मातुराज्ञया ।
महेन्द्रतक्षकप्राणान् ययाचे भूमिपं वरम् ॥
ददौ वरं नृपश्रेष्ठः कृपया ब्राह्मणाज्ञया ।
यज्ञं समाप्य विप्रेभ्यो दक्षिणाञ्च ददौ मुदा ॥
विप्राञ्च मुनयो देवा गत्वा च मनसान्तिकम् ।
मनसां पूजयामासुस्तुष्टुवुश्च पृथक् पृथक् ॥
शक्रः सम्भृतसम्भारो भक्तियुक्तः सदा शुचिः ।
मनसां पूजयामास तुष्टाव परमादरम् ॥
दत्त्वा षोडशोपचारं बलिञ्च तत्पुरं तदा ।
प्रददौ परितुष्टश्च ब्रह्मविष्णुशिवाज्ञया ॥
संपूज्य मनसादेवीं प्रययुः स्वालयञ्च ते ।
इत्येवं कथितं सर्व्वं किं भूयः श्रोतुमिच्छसि ॥"
इन्द्रकृतमनसापूजास्तोत्रे यथा,—
नारद उवाच ।
"केन तुष्टाव स्तोत्रेण महेन्द्रो मनसां सतीम् ।
पूजाविधिक्रमं तस्याः श्रोतुमिच्छामि तत्त्वतः ॥
श्रीनारायण उवाच ।
स्नातः शुचिराचान्तो धृत्वा धौते च वाससी ।
रत्नसिंहासने देवीं वासयामास भक्तितः ॥
स्वर्गगङ्गाजलेनैव बहुकुम्भस्थितेन च ।
स्नापयामास मनसां महेन्द्रो वेदमन्त्रतः ॥
वाससी वासयामास वह्निशुद्धे मनोहरे ।
सर्व्वाङ्गे चन्दनं दत्त्वा पाद्यार्घं भक्तिसंयुतः ॥
गणेशञ्च दिनेशञ्च वह्निं विष्णुं शिवं शिवाम् ।
संपूज्यादौ देवषट्कं पूजयामास तां सतीम् ॥
ॐ ह्रीं श्रीं मनसादेव्यै स्वाहेत्येवञ्च मन्त्रतः ।
दशाक्षरेण मूलेन ददौ सर्व्वं यथोचितम् ॥
दत्त्वा षोडशोपचारं दुर्लभं दुर्लभां हरिः ।
भक्त्या च पूजयामास ब्रह्मणा प्रेरितो मुदा ॥
वाद्यं नानाप्रकारञ्च वादयामास तत्र वै ।
बभूव पुष्पवृष्टिश्च नभसो मनसोपरि ॥
देवविप्राज्ञया तत्र ब्रह्मविष्णुशिवाज्ञया ।
तुष्टाव साश्रुनेत्रश्च पुलकाञ्चितविग्रहः ॥
महेन्द्र उवाच ।
देवि ! त्वां स्तोतुमिच्छामि साध्वीनां प्रवरां वराम् ।
परात्परञ्च परमां नहि स्तोतुं क्षमोऽधुना ॥
स्तोत्राणां लक्षणं वेदे स्वभावाख्यानतत्परम् ।
न क्षमः प्रकृतं वक्तुं गुणानां तव सुव्रते ! ॥
शुद्धसत्त्वस्वरूपा त्वं कोपहिंसाविवर्ज्जिता ।
न च श्रमो मुनिस्तेन त्यक्तया च त्वया यतः ॥
त्वं मया पूजिता साध्वी जननी च यथादितिः ।
दयारूपा च भगिनी क्षमारूपा यथा प्रसूः ॥
त्वया मे रक्षिताः प्राणाः पुत्रदारा सुरेश्वरि ! ।
अहं करोमि त्वां पूज्यां प्रीतिश्च वर्द्धते मम ।
नित्या यद्यपि पूज्या त्वं भवेऽत्र जगदम्बिके ! ।
तथापि तव पूजाञ्च वर्द्धयामि न सर्व्वतः ॥
ये त्वामाषाढसंक्रान्त्यां पूजयिष्यन्ति भक्तितः ।
पञ्चम्यां मनसाख्यायामीशां त्वां वा दिने दिने ॥
पुत्रपौत्रादयस्तेषां वर्द्धन्ते च धनानि च ।
यशस्विनः कीर्त्तिमन्तो विद्यावन्तो गुणान्विताः ॥
ये त्वां न पूजयिष्यन्ति निन्दन्त्यज्ञानतो जनाः ।
लक्ष्मीहीना भविष्यन्ति तेषां नागभयं सदा ॥
त्वं स्वयं स्वर्गलक्ष्मीश्च वैकुण्ठे कमलालया ।
नारायणांशो भगवान् जरत्कारुर्मुनीश्वरः ॥
तपसा तेजसा त्वाञ्च मनसा सस्रजे पिता ।
अस्माकं रक्षणायैव तेन त्वं मनसाभिधा ॥
मनसा देवितुं शक्ता स्वात्मना सिद्धयोगिनी ।
तेन त्वं मनसादेवी पूजिता वन्दिता भवे ॥
यां भक्त्या मनसा देवाः पूजयन्त्यनिशं मुदम् ।
तेन त्वां मनसां देवीं प्रवदन्ति पुराविदः ॥
सत्त्वरूपा च देवि ! त्वं शश्वत्सत्त्वनिषेवया ।
यो हि यद्भावयेन्नित्यं स तत् प्राप्नोति तत्समः ॥
इन्द्रश्च मनसां ज्ञात्वा गृहीत्वा भगिनीञ्च तां ।
प्रजगाम स्वभवनं भूषावासःपरिच्छदाम् ॥
पुत्रेण सार्द्धं सा देवी चिरं तस्थौ पितुर्गृहे ।
भ्रातृभिः पूजिता शश्वन्मान्या वन्द्या च सर्व्वतः ॥
गोलोकात् सुरभी ब्रह्मन् ! तत्रागत्य सुपूजितां ।
तां स्नापयित्वा क्षीरेण पूजयामास सादरम् ॥
ज्ञानञ्च कथयामास गोप्यं सर्व्वसुदुर्लभम् ।
तया देव्या पूजिता सा स्वर्लोकञ्च पुनर्ययौ ॥
इदं स्तोत्रं पुण्यबीजं तां संपूज्य च यः पठेत् ।
तस्य नागभयं नास्ति तस्य वंशोद्भवस्य च ॥
विषं भवेत् सुधातुल्यं सिद्धस्तोत्रो यदा भवेत् ।
पक्षलक्षजपेनैव सिद्धस्तोत्रो भवेन्नरः ।
सर्पग्रामी भवेत् सोऽपि निश्चितं सर्पवाहनः ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ४६ अध्यायः ॥
धन्वन्तरिकृतमनसाध्यानपूजादि यथा,—
धन्वन्तरिरुवाच ।
"इहागच्छ जगद्गौरि ! गृहाण मम पूजनम् ।
पूज्या त्वं विश्व लोकेषु परा कश्यपकन्यके ! ॥
त्वया जितं जगत् सर्व्वं देवि ! विष्णुस्वरूपया ।
तेन तेऽस्त्रप्रयोगञ्च न कृतो रणभूमिषु ॥
इत्युक्त्वा संयतो भूत्वा भक्तिनम्रात्मकन्धरः ।
गृहीत्वा शुक्लकुसुमं ध्यानं कर्त्तुं समुद्यतः ॥
चारुचम्पकवर्णाभां सर्व्वाङ्गसुमनोहराम् ।
ईषद्धास्यप्रसन्नास्यां शोभितां सूक्ष्मवाससा ॥
कबरीभारशोभाढ्यां रत्नाभरणभूषिताम् ।
सर्व्वाभयप्रदां देवीं भक्तानुग्रहकातराम् ॥
सर्व्वविद्याप्रदां शान्तां सर्व्वविद्याविशारदाम् ।
नागेन्द्रवाहिनीं देवीं भजे नागेश्वरीं पराम् ॥
ध्यात्वैवं कुसुमं दत्त्वा नानाद्रव्यसमन्वितम् ।
दत्त्वा षोडशोपचारं पूजयामास तां प्रिये ! ॥
स्तोत्रमुवाच भक्त्या च पुलकाञ्चितविग्रहः ।
पुटाञ्जलियुतो भूत्वा भक्तिनम्रात्मकन्धरः ॥

धन्वन्तरिरुवाच ।
नमः सिद्धिस्वरूपायै सिद्धिदायै नमो नमः ।
नमः कश्यपकन्यायै वरदायै नमो नमः ॥
नमः शङ्करकन्यायै शङ्कराये नमो नमः ।
नमस्ते नागवाहिन्यै नागेश्वर्यै नमो नमः ॥
नमो नागभगिन्यै च योगिन्यै च नमो नमः ।
नमोऽस्तीकजनन्यै च जगन्यै जगतां नमः ॥
नमो जरत्कारुनाग्ने जरत्कारुस्थिये नमः ॥
नमश्चिरं तपस्विन्यै सुखदायै नमो नमः ।
नमस्तपःस्वरूपायै फलदायै नमो नमः ॥
सुशीलायै च साध्व्यै च शान्तायै ते नमो नमः ।
इत्येवमुक्ता भक्त्या च प्रणनाम प्रयत्नतः ॥
तुष्टा देवी वरं दत्त्वा सत्वरं स्वालयं ययौ ॥"
इति ब्रह्मवैवर्ते श्रीकृष्णजन्मखण्डे धन्वन्तरिदर्प-भङ्गमनसाविजयो नाम ५१ अध्यायः ॥ * ॥
(कामरूपस्थितनदीविशेषः । यथा, कालिका-पुराणे । ७१ । ३३ ।
"ततस्तु मनसा नाम नदी पुण्यतमा परा ।
चरित्वा मनसाख्या तु लक्ष्यित्वावतारिता ॥
वैशाखं सकलं मासं यस्यां स्नात्वा नरोत्तमः ।
विष्णुलोकमवाप्नैव ततो मोक्षमवाप्नुयात् ॥")
मनसादेवी, स्त्री, (मनसा चासौ देवी चेति । यद्वा, मनसा दीव्यतीति । दिव् + अच् । ङीप् । "मनसः संज्ञायाम् ।" ६ । ३ । ४ । इति विभक्त्यलुक् च ।) मनसा । इति शब्दार्थः ॥ (यथा, ब्रह्मवैवर्ते प्रकृतिखण्डे । ४६ । ११८ ।
"सम्पूज्य मनसादेवीं प्रययुः स्वालयञ्च ते ॥")
अस्या विवरणं मनसाशब्दे द्रष्टव्यम् ॥
मनसिज, पुं, (मनसि जायत इति । जन् + डः । "सप्तम्यां जनेर्डः ।" ६ । ३ । ९ । इत्यलुक् ।) कामदेवः । इत्यमरः । १ । १ । २० ॥ (यथा, श्राद्धतत्त्वे द्वितीयाङ्के ।
"कामं प्रिया न सुलभा मनस्तु तद्भावदर्शनाश्वासि ।
अकृतार्थेऽपि मनसिजे रतिरुभयप्रार्थना कुरुते ॥")
मनोजाते, त्रि ॥
मनसिशयः, पुं, (मनसि शेते इति । शी + "अधिकरणे शेतेः ।" ३ । २ । १५ । इति अच् । "सप्तम्यां सज्ञायाम् ।" ६ । ३ । ९ । इत्यलुक् ।) कामदेवः । इति शब्दरत्नावली ॥
मनस्कारः, पुं, (मनसि मनसो वा कारो निश्चय इति । यद्वा, कृ + भावे घञ् । मनसः कारो-विकारः करणमिति वा ।) मनसः सङ्कल्पादिः । तत्पर्य्यायः । चित्ताभोगः २ । इत्यमरः । १ । ५ । ५ ॥ हे मनसः सङ्कल्पादौ तत्परत्वे एकस्मिन् विषये मनसः पुनः पुनः प्रवृत्तिरित्याभोगः । आभोगस्तावत्त्वमिति मेदिनी । स्त्रियामिति टीकायां भरतः । आदर इत्यपरे । चित्तस्य वस्तु-प्राप्त्या विषयस्य निरालम्बता । आभोगः परिपूर्णतेति परे । अनालम्बितगाढिरूपो मनस्कार इत्यपरे । मनसो मनसि वा कारो निश्चयो मनस्कारः सेतु कथेति सः । मनसि करणं मनसि कारः इत्यपि दृश्यते अत्र बाहु-ल्यात् सप्तम्या अलुक् । इति तट्टीकायां भरतः ॥
मनस्तापः, पुं, (मनसः तापः पीड़ा ।) मनः-पीड़ा । यथा, गारुड़े २११ अध्याये ।
"मनस्तापं न कुर्व्वीत व्यापदं प्राप्य पार्थिवः ।
समबुद्धिः प्रसन्नात्मा सुखदुःखे समो भवेत् ॥"
अनुतापः । यथा, प्रायश्चित्ततत्त्वे ।
"ब्राह्मणेन यदा देवात् छिन्नं यज्ञोपवीतकम् ।
मनस्तापेन सुद्धिः स्यादापस्तम्बोऽब्रवीन्मुनिः ॥"
मनस्तालः, पुं (तल्यत इति । तल प्रतिष्ठायाम् + घञ् । मनसि तालः प्रतिष्ठा यस्य ।) दुर्गायाः सिंहः । इति त्रिकाण्डशेषः ॥ (हरितालः । तत्र क्लीवत्वमपि । यथा, वैद्यकरत्नमालायाम् ।
"हरितालं मनस्तालं वर्णकं नटभूषणम् ॥")
मनस्यं, त्रि, (मने मनसि वा तिष्ठतीति । स्था + कः । पक्षे विसर्गस्य लोपः ।) मनोऽवच्छिन्नम् । अन्तःकरणस्थितम् । यथा,—
"मनस्यं मनमध्यस्थं मध्यस्थं मनवर्च्जितम् ।
मनसा मनमालोक्य स्वयं सिद्धन्ति योगिनः ॥"
इति श्रीमदुत्तरगीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्জ্জুनसंवादे ब्रह्मनिरूपणं नाम १ अध्यायः ॥ "तादृग्ब्रह्मापरोक्षेण मुच्यते इत्याह मनस्यमित्यादि । मनस्यं मनोऽव-च्छिन्नम् । मनमध्यस्थं मनःसाक्षीभूतम् । मध्यस्थं सर्व्वसाक्षीभूतम् । मनवर्च्जितं सङ्कल्पविक-ल्पादिरहितम् । मनसमबोधात्मकम् । तदेवं मनसा परिशुद्धान्तःकरणेन । आलोक्य तद् गोचरापरोक्षचरमवृत्तिं लब्ध्वा । योगिनः ज्ञानिनः । स्वयमेव सिद्धन्ति निवृत्ताविद्यका मुक्ता भवन्तीत्यर्थः ।" इति श्रीमदुत्तरगीतायाः सुबोधिन्यां टीकायां श्रीगौड़पादाचार्य्यविर-चितायां १ अध्यायः ॥ * ॥ सर्व्वे सान्ता अद-न्ताश्चेति प्रमाणादत्र मनश्शब्दोऽकारान्तः । मनःस्थितम् । यथा,—
"व्याघस्यं मम्मनस्यं यदपि मम मनोमथतः
क्वापि नाभूत्
तत्ते पुण्यप्रतापादिह यदि सतः सिद्धमाभूत् सुखेन ॥"
इत्युद्भटः ॥
मनस्विनी, स्त्री, (प्रशस्तं मनोऽस्यस्याः इति । मनस् + विनि । ङीप् ।) प्रशस्तमनाः स्त्री । यथा, कुमारसम्भवे । ३ । ३२ ।
"मनस्विनीमानविघातदक्षं
तदेव जातं वचनं स्मरस्य ॥"
रुद्राणीः पत्नी । यथा, मार्कण्डेयपुराणे । ५२ । १७ ।
"प्रायश्चैव रुद्रस्य प्रिया मम महाप्रभाः ।
मनस्विन्यामहं तस्मात् पुत्री वेदशिरा मम ॥"
प्रजापतिपत्नी । सा च सोमस्य वसोर्धर्म्मनी । यथा, महाभारते । १ । ६६ । १८ ।
"धृत्वायास्तु धरः पुत्रो ब्रह्मविद्यो ध्रुवस्तथा ।
चन्द्रमास्तु मनस्विन्यां वसायां वसुनस्तथा ॥")
मनस्वी, [न्] पुं, (प्रशस्तं मनोऽस्यस्येति । मनस् + विनिः ।) शरभः । इति राजनिर्घण्टः ॥ प्रशस्तमनोयुक्ते, त्रि । यथा,—
"मनस्विभिर्हितः पन्थाः समारोढुमसाम्प्रतम् ॥"
इति कारकटीकायां दुर्गादासः ॥
मनाक्, व्य, (मन्यते इति । मन ज्ञाने + बाहुल-कात् आक्प्रत्ययः ।) अल्पम् । इत्यमरः । ३ । ४ । ८ ॥ (यथा, भागवते । १ । १० । ३५ ।
"मरुधन्वमतिक्रम्य सौवीराभीरयोः परान् ।
आनर्त्तान् भार्गवोपागाच्छ्रान्तवाहो मनाग्-विभुः ॥")
मन्दः । इति मेदिनी । अव्यय-के, ११ ॥
मनाका, स्त्री, (मन्यत इति । मन + "बलाका-दयश्च ।" उणा० ४ । १४ । इत्याकः । टाप् ।) हस्तिनी । इत्युणादिकोषः ॥
मनाकृतं, क्ली, (मनाक् यथा तथा करोतीति कृ + क्यच् ।) मङ्क्षा । मल्लिकागन्धयुक्तागुरु । इति शब्दचन्द्रिका । (मनाक् अल्पस्य करः ।) इषत्कारके, त्रि ॥
मनायी, स्त्री, (मनोः पत्नीति । मनु + "मनोरौ वा ।" ४ । १ । ३९ । इति ङीप् उदात्तैकारश्च ।) मनोः पत्नी । इति जटाधरः ॥
मनावी, स्त्री, (मनोः स्त्री । मनु + "मनोरौ वा ।" ४ । १ । ३९ । इति ङीप् औकारश्चान्तादेशः ।) मनुपत्नी । इति मुग्धबोधव्याकरणम् । (यथा, शतपथब्राह्मणे । १ । १ । ४ । १६ ।
"सा मनोरेव जायां मनावीं प्रविवेश ॥")
मनितं, त्रि, (मन बोधे + क्तः ।) ज्ञातम् । इत्य-मरः । ३ । १ । १० ॥
मनीकं, क्ली, (मन्यते शोभार्थमाद्रियते इति । मन् + "अर्त्तीकादयश्च ।" उणा० ४ । २५ । इति कीकन्प्रत्ययेन निपातनात् साधुः ।) व्यञ्जन-नम् । इत्युणादिकोषः ॥
मनीषा, स्त्री, (ईष् + अः । टाप् । मनस ईषा गमनम् । "ग्रहवृन्दादिभ्यः परस्वरूपं वाच्यम् ।" १ । १ । ६४ । इत्यस्य वार्त्तिकोक्त्या साधुः ।) बुद्धिः । इत्यमरः । १ । ७ । ५ ॥ (यथा, ऋग्वेदे । १ । ५४ । ८ ।
"अक्षन्नमीमदन्त ह्यव प्रिया अधूषत ।
अस्तोषत स्वभानवो विप्रा नविष्ठया मती योजान्विन्द्र ते हरी ॥"
स्तुतिः । यथा, ऋग्वेदे । ५ । ८३ । १० ।
"उत प्रजाभ्योऽविदो मनीषाम् ॥"
"मनीषां स्तुतिमविद प्राप्नवानसि ॥" इति तद्भाष्ये सायनः ॥)
मनीषी, [न्] पुं, (मनीषा अस्यास्तीति । मनीषा + ब्रीह्यादित्वात् इनिः ।) पण्डितः । इत्यमरः । २ । ७ । ५ ॥ (यथा च मनौ । १ । १० ।
"यस्मूर्त्तयवयवैः सूक्ष्मैस्त्रयाणामपि तत्त्वतः ।
तस्माच्छरीरमित्याहुस्तस्य मूर्त्तिं मनीषिणः ॥")
बुद्धियुक्ते, त्रि ॥ (यथा, ऋग्वेदे । १ । १६४ । ४५ ।
"चत्वारि वाक् परिमिता पदानि
तानि विदुर्ब्राह्मणा ये मनीषिणः ॥"
"मनीषिणो मेधाविनः ।" इति तद्भाष्ये सायनः ॥)

मनुः, स्त्री, (मन्+"मृसृकृहीति।" उणा० १।११। इति उः।) एका। इति राजनिर्घण्टः॥ (मनोः पत्नीति। मनु+"मनोरौ वा।"४।१।३८। इत्यत्र "वा यङ्लुगन्त इत्यपि विकल्प्यते। तेन नैरूप्यं भवति। मनोः स्त्री मनायी मनावी मनुः।" इति काशिकोक्तेः पक्षे ङीवभावः।) मनुपत्नी। इति लिङ्गादिसंग्रहे अमरः॥

मनुः, पुं, (मन्यते इति। मन+"मृसृकृहीति।" उणा० १।११। इति उः।) ब्रह्मणः पुत्रः। स च प्रजापतिर्धर्मशास्त्रवक्ता च। इति लिङ्गादिसंग्रहे अमरः॥ मनुष्यः। इति शब्दरत्नावली॥ (यथा, ऋग्वेदे। ८।४७।४।
"मनोर्विश्वस्य घेदिम आदित्याराय ईशते।
ईहेहसो वजतयः सुजतयो वजतयः॥"
"मनोः मनुष्यस्य।" इति तद्भाष्ये सायणः॥) विनयभेदः। इति त्रिकाण्डशेषः॥ मन्त्रः। इति जटाधरः॥ (यथा, गौतमीयतन्त्रे। ७।५।
"गोप्तिरन्यकवक्त्राद्वैस्तोषयेद् गुरुमात्मनः।
यथा ददाति सन्तुष्टः प्रसन्नवदनो मनुम्॥"*॥)
प्रतिकल्पे चतुर्दश मनवो भवन्ति तेषां नामानि यथा। स्वायम्भुवः १ स्वारोचिषः २ उत्तमः ३ तामसः ४ रैवतः ५ चाक्षुषः ६ एते गताः। वैवस्वतः ७। वर्त्तमानोऽयम्। सावर्णिः ८ दक्षसावर्णिः ९ ब्रह्मसावर्णिः १० धर्म्मसावर्णिः ११ रुद्रसावर्णिः १२ देवसावर्णिः १३ इन्द्रसावर्णिः १४ एते भविष्यन्ति। इति श्रीभागवते ८ स्कन्धे १ अध्यायः॥ * ॥
एतेषामुत्पत्तिर्यथा,—
"आद्यो मनुर्ब्रह्मपुत्रः शतरूपापतिर्व्रती।
धर्म्मिष्ठानां वरिष्ठश्च गरिष्ठो मनुषु प्रभुः॥
स्वायम्भुवः शम्भुशिष्यो विष्णुव्रतपरायणः।
जीवन्मुक्तो महाज्ञानी भवतः प्रपितामहः॥
संप्राप कृष्णदास्यञ्च गोलोकञ्च जगाम सः।
दृष्ट्वा सुतं स्वपुत्रञ्च प्रहृष्टश्च प्रजापतिः॥
तुष्टाव शङ्करं तुष्टः सस्त्रे मनुमन्वकम्।
स च स्वयम्भूपुत्रश्च पुरः स्वायम्भुवो मनुः॥
स्वारोचिषो मनुश्चैव द्वितीयो वह्निनन्दनः।
राजा वदान्यो धर्म्मिष्ठः स्वायम्भुवसमो महान्॥
प्रियव्रतसुतावन्यौ द्वौ मनू धर्म्मिणां वरौ।
तौ च तृतीयचतुर्थौ च वैष्णवौ तामसोत्तमौ॥
तौ च शङ्करशिष्यौ च कृष्णभक्तिपरायणौ।
धर्म्मिष्ठानां वरिष्ठश्च रैवतः पञ्चमो मनुः॥
षष्ठश्च चाक्षुषो ज्ञेयो विष्णुभक्तिपरायणः।
आदित्यदेवः सूर्य्यसुतो वैष्णवः सप्तमो मनुः॥
सावर्णिः सूर्य्यतनयो वैष्णवो मनुरष्टमः।
नवमो दक्षसावर्णिर्विष्णुव्रतपरायणः॥
दशमो ब्रह्मसावर्णिर्ब्रह्मज्ञानविशारदः।
ततश्च धर्म्मसावर्णिर्मनुरेकादशः स्मृतः॥
धर्म्मिष्ठश्च वरिष्ठश्च वैष्णवानां सदा व्रती।
ज्ञानी च रुद्रसावर्णिर्मनुश्च द्वादशः स्मृतः॥
धर्म्मात्मा देवसावर्णिर्मनुरेव त्रयोदशः।
चतुर्दशो महाज्ञानी चेन्द्रसावर्णिरेव च॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५१ अध्यायः॥
अपि च। स्वायम्भुवः १। स च गायत्र्यां ब्रह्मणो जातः। अस्य पुत्राः दश। अग्निधः। अग्निबाहुः। रिपुः। सवलः। ज्योतिष्मान्। द्युतिमान्। हव्यः। मेधाः। मेधातिथिः। वसुश्च। स्वारोचिषः २। अस्य पुत्राश्चत्वारः। नभः। नभस्यः। प्रहृतिः। भावनश्च। औत्तमिः ३। अस्य पुत्राः दश। ईषः। ऊर्ज्जः। भूर्ज्जः। शुचिः। शुक्रः। मधुः। माधवः। नभस्यः। नभः। सहश्च। तामसः ४। अस्य पुत्रा दश। अकल्मषः। तपोधन्वी। तपोमूलः। तपोधनः। तपोरतिः। तपस्यः। तपोद्युतिः। परन्तपः। तपोभागी। तपोयोगी च। रैवतः ५। तस्य पुत्राः दश। अरुणः। तत्त्वदर्शी। वित्तवान्। हव्यपः। कपिः। सुक्तः। निरुत्सुकः। सत्यः। निर्म्मोहः। प्रकाशकश्च। चाक्षुषः ६। स च ध्रुवपौत्रात् रिपुञ्जयात् ब्रह्मदौहित्र्यां वीरणकन्यायां वैरिण्यां जातः। तस्य भार्य्या नड्वला। तस्य पुत्राः दश। उरुः। पुरुः। शतद्युम्नः। तपस्वी। सत्यवाक्। कविः। अग्निष्टुप्। अतिरात्रः। सुद्युम्नः। अभिमन्युश्च। वैवस्वतः ७। स च सूर्य्यात् संज्ञायां जातः। तस्य पुत्राः दश। इलः। इक्ष्वाकुः। कुशनाभः। अरिष्टः। धृष्टः। नरिष्यन्तः। करूषः। शर्य्यातिः। पृषध्रः। नाभागश्च। सावर्णिः ८। स च सूर्य्यात् छायायां जातः। तस्य पुत्राः दश। धृतिः। वरीयान्। यवसः। सुवर्णः। दृष्टिः। चरिष्णुः। ईड्यः। सुमतिः। वसुः। शुभ्रश्च। रौच्यः ९। असौ रुचेः प्रजापतेः पुत्रः। भौत्यः १०। असौ भूतिनामकप्रजापतेः पुत्रः। मेरुसावर्णिः ११। असौ ब्रह्मणः पुत्रः। ऋतुः १२। ऋतुधामा १३। विष्वक्सेनः १४। इति मात्स्ये नवमाध्यायावधि एकविंशत्यध्यायपर्य्यन्तम्॥ क्रमश्चैषां विवरणानि यथा, १स्वायम्भुवः। यथा, मार्कण्डेये ५२ अध्याये॥
"मनोः स्वायम्भुवस्यासन् दश पुत्रास्तु तत्समाः।
यैरियं पृथिवी सर्व्वा सप्तद्वीपा सपर्व्वता।
ससमुद्रा करवती प्रतिवर्षं निवेशिता॥"
२ स्वारोचिषः। यथा, तत्रैव ६७ अध्याये।
मार्कण्डेय उवाच।
"ततः स्वारोचिषं नाम्ना द्युतिमन्तं प्रजापतिम्।
मनुत्वकार भगवांस्तस्य मन्वन्तरं शृणु॥
तत्रान्तरे तु ये देवा सुनयस्तत्सुताश्च ये।
औपाला! क्रौष्टुके! ये तान् गदतस्तं निशामय॥
देवाः पारावतास्तत्र तत्रैव तुषिता द्विज!।
स्वारोचिषेऽन्तरे चेन्द्रो विपश्चिदिति विश्रुतः॥
ऊर्ज्जस्तम्बस्तथा प्राणो दत्तोलिर्ऋषभस्तथा।
निश्चरश्चार्ववीरांश्च तत्र सप्तर्षयोऽभवन्॥
चैत्र-किंपुरुषाद्याश्च सुतास्तस्य महात्मनः।
सप्तासन् सुमहावीर्याः पृथिवीपरिपालकाः॥
तस्य मन्वन्तरं यावत्तावत्तद्वंशविस्तरे।
मुक्तेयमवनिः सर्व्वा द्वितीयं वै तदन्तरम्॥
स्वरोचिषस्तु चरितं जन्म स्वारोचिषस्य तत्।
निशम्य मुच्यते पापैः श्रद्दधानो हि मानवः॥"
अस्यान्यद्विवरणं तत्रैव ६१ अध्यायमारभ्य ६६ अध्यायपर्य्यन्तं द्रष्टव्यम्॥ ३ औत्तमः। यथा, तत्रैव ७३ अध्याये।
मार्कण्डेय उवाच।
"मन्वन्तरे तृतीयेऽस्मिन् औत्तमस्य प्रजापतेः।
देवानिन्द्रगणान् भूपान् निबोध गदतो मम॥
सुधामानस्तथा देवा यथानामानुकारिणः।
सत्याश्च द्वितीयेऽन्यस्तिद्वशानां तथा गणः॥
तृतीये तु गणे देवाः शिवाख्या मुनिसत्तम!।
शिवाः स्वरूपतस्ते तु स्मृताः पापप्रशमनाः॥
प्रतर्दनाख्यश्च गणो देवानां मुनिसत्तम!।
चतुर्थस्तत्र कथित औत्तमस्यान्तरे मनोः॥
वशवर्त्तिनः पञ्चमेऽपि देवास्तत्र गणे द्विज!।
यथाख्यातस्वरूपास्तु सर्व एव महामुने!॥
एते देवगणाः पञ्च स्मृता यज्ञभुजस्तथा।
मन्वन्तरे मनुश्रेष्ठे सर्वे द्वादशका गणाः॥
तेषामिन्द्रो महाभागस्त्रैलोक्ये स गुरुर्भवेत्।
शतं क्रतूनामाहृत्य सुशान्तिर्नाम नामतः॥
यस्योपसर्गनाशाय नामाचरविभूषिता।
अद्यापि मानवैर्गाथा गीयते तु महीतले॥
सुशान्तिर्देवराट् कान्तः सुशान्तिं स प्रयच्छति।
सहितः शिवस्त्र्याद्यैस्तथैव वशवर्त्तिनः॥
अजः परशुचिर्दिव्यो महाबलपराक्रमाः।
पुत्रास्तस्य मनोरासन् विख्याताश्चित्रदंशोपमाः॥
तत्सुतिसम्भवैर्भूमिः पालिताभून्नरेश्वरैः।
यावन्मन्वन्तरं तस्य मनोरुत्तमतेजसः॥
चतुर्युगानां संख्याता साधिका लक्षसप्ततिः।
कृतत्रेतादिसंज्ञानां यान्युक्तानि युगे मया॥
स्वतेजसा हि तपसो वशिष्ठस्य महात्मनः।
तनयाश्चान्तरे तस्मिन् सप्त सप्तर्षयोऽभवन्॥
तृतीयमेतत्कथितं तव मन्वन्तरं मया॥"
अस्यान्यद्विवरणं तत्रैव ६८ अध्यायमारभ्य ७२ अध्यायपर्य्यन्तं द्रष्टव्यम्॥ ४ तामसः। यथा, तत्रैव ७४ अध्याये।
"तामसाख्यो मनुरभूत्तस्य मन्वन्तरं शृणु।
ये देवा यत्पतिर्यश्च देवेन्द्रो ये तथर्षयः।
ये पुत्राश्च मनोस्तस्य पृथिवीपरिपालकाः॥
सत्यास्तथान्ये सुधियः सुरूपा हरयस्तथा।
एते देवगणास्तत्र सप्तविंशतिका मुने!॥
महाबलो महावीर्यः शतयज्ञोपलक्षितः।
शिखिरिन्द्रस्तथा तेषां देवानामभवद्विभुः॥
ज्योतिर्धामा पृथुः काव्यश्चैत्रोऽग्निरेवलकस्तथा।
पीवरश्च तथा ब्रह्मन्! सप्त सप्तर्षयोऽभवन्॥
नरः क्षान्तिः श्रान्तदान्तज्ञानुजङ्घादयस्तथा।
पुत्रास्तु तामसस्यासन् राजानः सुमहाबलाः॥"
अस्यान्यद्विवरणं तत्रैव द्रष्टव्यम्॥ ५ रैवतः। यथा, तत्रैव ७५ अध्याये।

मार्कण्डेय उवाच ।
"तामादाय ततो भूपः स्वमेव नगरं ययौ ।
तस्मादजायत सुतो रेवत्यां रैवतो मनुः ॥
समेतः सकलैर्धर्मैर्ज्ञानवैराग्यराजितः ।
विज्ञानाखिलशास्त्रार्थो वेदविद्यार्थपारगः ॥
तस्य मन्वन्तरे देवान् सुनिदेवेन्द्रपार्थिवान्
कथ्यमानान्मया ब्रह्मन् ! निबोध सुसमाहितः ॥
सुमेधसश्च देवास्तथा भूपतयो द्विज ! ।
वैकुण्ठश्चामिताभश्च चतुर्दश्य चतुर्दश ॥
तेषां देवगणानान्तु चतुर्णामपि चेश्वर ! ।
नाम्ना विभुरभूदिन्द्रः शतयज्ञोपलक्षकः ॥
हिरण्यलोमा वेदश्रीरूर्ध्वबाहुस्तथापरः ।
वेदबाहुः सुधामा च पर्जन्यश्च महामुनिः ॥
वशिष्ठस्य महाभागो वेदवेदान्तपारगः ।
ऋते सप्तर्षयश्चासन् रैवतस्यान्तरे मनोः ॥
बलबन्धुर्महावीर्यः सुयशस्तथापरः ।
सत्यकाद्यास्तथैवासन् रैवतस्य मनोः सुताः ॥
रैवतान्तास्तु मनवः कथिता ये मया तव ।
सांप्रतञ्चाक्षुषे क्षेते स्वारोचिषगते मनुम् ॥"
अस्यान्यद्विवरणं तत्रैव द्रष्टव्यम् ॥ ६ चाक्षुषः ।
यथा, तत्रैव ७६ अध्याये ।
"तस्य मन्वन्तरेशस्य येऽन्तरत्रिदशा द्विज ! ।
ये चर्षयस्तथेन्द्रो ये सुताद्यास्य तान् शृणु ॥
आप्या नाम सुरास्तत्र तेषामेकोऽष्टको गणः ।
प्रख्यातकर्मणां विप्र ! यज्ञे हव्यभुजामयम् ॥
प्रख्यातवलवीर्याणां प्रभामण्डलदर्शिनाम् ।
द्वितीयश्च प्रसूताख्यो देवानामष्टको गणः ॥
तथैवाष्टक एवान्यो भव्याख्यो देवतागणः ।
चतुर्थश्च गणस्तत्र यशस्याख्यस्तथाष्टकः ॥
देवसंज्ञास्तथैवान्ये तत्र मन्वन्तरे द्विज ! ।
पञ्चमे च गणे देवास्तनूसंज्ञा ह्यकल्पिताः ॥
शतं क्रतूनामाहृत्य यस्तेषामधिपोऽभवत् ।
मनोजवस्तथेवेन्द्रः संख्यातो यज्ञभागभुक् ॥
सुमेधा विरजाश्चैव हविष्मान्नघतो मधुः ।
अतिनामा सहिष्णुश्च सप्तासन्निति चर्षयः ॥
उरुपुरुषसद्मप्रमुखाः समहाबलाः ।
चाक्षुषस्य मनोः पुत्राः पृथिवीपतयोऽभवन् ॥"
अस्यान्यद्विवरणं तत्रैवाध्याये द्रष्टव्यम् । ७ वैवस्वतः । यथा, तत्रैव ७६ अध्याये ।
मार्कण्डेय उवाच ।
"आदित्या वसवो रुद्राः साध्या विश्वे मरुद्गणाः ।
भृगवोऽङ्गिरसश्चार्ष्टौ यत्र देवगणाः स्मृताः ॥
आदित्या वसवो रुद्रा विज्ञेया कश्यपात्मजाः ।
साध्याश्च वसवो विश्वे धर्मपुत्रगणास्त्रयः ॥
भृगोस्तु भृगवो देवाः पुत्रा ह्यङ्गिरसः सुताः ।
एष सर्गश्च मारीचो विज्ञेयः साम्प्रताधिपः ॥
एकर्षिर्नाम चैवेन्द्रो महात्मा यज्ञभागभुक् ।
ऋतोस्तनयता ये च वर्षन्ते साम्प्रतञ्च ये ॥
सर्वे ते सिद्धिकैलास्तु विज्ञेयास्तुल्यलक्षणाः ।
सदृक्षाताः सुतिग्मिनः सर्वे रूपपुरस्कराः ॥
सदृक्षनो रुपाः सर्वे सङ्गिनो गतगामिनः ।
ते ह्यतन्द्रश्च सर्वे भूताभिगमनेरताः ॥

धर्माद्यैः कारणैः शुद्धैराधिपत्यगुणान्विताः ।
भूतभव्यभवन्नाथाः शृणु चैतत् त्रयं द्विज ! ॥
भूर्लोकोऽयं स्मृता भूमिरन्तरीक्षं दिवः स्मृतम् ।
दिशाख्यश्च तथा स्वर्गस्त्रैलोक्यमिति गद्यते ॥
अत्रिश्चैव वशिष्ठश्च काश्यपश्च महामुनिः ।
गौतमश्च भरद्वाजो विश्वामित्रोऽथ कौशिकः ॥
तथैव पुत्रो भगवान्ऋचीकस्य महात्मनः ।
जमदग्निस्तु सप्तैते सुनयोऽत्र तथान्तरे ॥
इक्ष्वाकुनाभगश्चैव धृष्टशर्मातिरेव च ।
नरिष्यन्तश्च विख्यातो नाभगो दिष्ट एव च ॥
कुरूषश्च पृषध्रश्च वसुमान् लोकविश्रुतः ।
मनोर्वैवस्वतस्यैते नव पुत्राः प्रकीर्तिताः ।
वैवस्वतमिदं ब्रह्मन् ! कथितन्ते मयान्तरम् ।
अस्मिन् श्रुते नरः सद्यः पठिते चैव सत्तम ! ।
मुच्यते पातकैः सर्वैः पुण्यञ्च महदश्नुते ॥"
अस्यान्यद्विवरणं ७७-७८ अध्याययोर्द्रष्टव्यम् ॥
८ सावर्णिः । यथा, तत्रैव ८० अध्याये ।
मार्कण्डेय उवाच ।
"कथितस्तव सावर्णिश्छायासंज्ञासुतश्च यः ।
पूर्व्वजस्य मनोस्तुल्यः स मनुर्भविताष्टमः ॥
रामो व्यासो गालवश्च दीप्तिमान् कृप एव च ।
कृष्यश्वत्थाम्नस्तथा द्रोणिस्तत्र सप्तर्षयोऽभवन् ॥
सुतपास्तामिताभाश्च मुख्याश्चैव त्रिधा सुराः ।
विंशकः कथितास्तेषां त्रयाणां त्रिगुणो गणः ॥
तपस्तपश्च शुक्रश्च द्युतिर्ज्योतिः प्रभाकरः ।
प्रभासो दयितो धर्मस्तेजोरश्मिश्च वक्रतुः ॥
इत्यादिकस्तु सुतपा देवानां विंशको गणः ।
प्रभुर्विभुर्विभावाद्यस्तथान्यो विंशको गणः ॥
सुराणाममितानान्तु तृतीयमपि मे शृणु ।
दमो दान्तो ऋतः सोमो विन्ताद्याश्चैव विंशतिः ॥
मुख्या ह्येते समाख्याता देवा मन्वन्तराधिपाः ॥
मारीचस्यैव ते पुत्राः काश्यपस्य प्रजापतेः ॥
भविष्याश्च भविष्यन्ति सावर्णस्यान्तरे मनोः ।
तेषामिन्द्रो भविष्यस्तु बलिर्वैरोचनिर्मुने ! ।
पाताल आस्ते योऽद्यापि दैत्यः समयबन्धनः ।
विरजाश्चार्ववीरश्च निर्मोहः सत्यवाक् कृतिः ॥
विष्वाख्यश्चैव तनयाः सावर्णस्य मनोर्नृपाः ॥"
अस्यान्यद्विवरणं तत्रैव ८१-८३ अध्यायेषु द्रष्टव्यम् ॥ ६ दक्षसावर्णिः । यथा, तत्रैव ८४ अध्याये ।
"दक्षपुत्रश्च सावर्णो भावी यो नवमो मनुः ।
कथयामि मनोस्तस्य ये देवा सुनयो नृपाः ॥
पारामरीचिभर्गाश्च सुधर्माणस्तथा सुराः ।
एते त्रिधा भविष्यन्ति सर्व्वे द्वादशका गणाः ॥
तेषामिन्द्रो भविष्यस्तु सदृक्षाख्यो महाबलः ।
साम्प्रतं कार्त्तिकेयो यो वह्निपुत्रः षडाननः ॥
अद्भुतो नाम शक्रोऽसौ भावी तस्यान्तरे मनोः ।
मेधातिथिर्वसुः सत्यो ज्योतिष्मान् द्युतिमांस्तथा ॥
सप्तर्षयोऽत्र सदृक्षस्तथान्यो हव्यवाहनः ।
धृष्टकेतुर्धृतेः पुत्रः पञ्चहस्तो निरामयः ।
दृढ्यश्वास्तथाधिष्मान् भूतरिष्मो दृढाश्रयः ॥
एते नृपसुतास्तस्य दक्षपुत्रस्य वै नृपाः ॥"

१० ब्रह्मसावर्णिः । यथा, तत्रैव ८४ अध्याये ।
"मनोस्तु दशमस्यान्यच्छृणु मन्वन्तरं द्विज ! ॥
मन्वन्तरे च दशमे ब्रह्मपुत्रस्य धीमतः ।
सुखासीना विरुद्धाश्च त्रिःप्रकाराः सुराः स्मृताः ।
शतसंख्या हि ते देवा भविष्या भाविनो मनोः ।
यत् प्राणिनां शतं भावि तद्देवानां तदा शतम् ॥
शान्तिरिन्द्रस्तथा भावी सर्व्वैरिन्द्रगुणैर्युतः ।
सप्तर्षींस्तान् निबोध त्वं ये भविष्यन्ति वै तदा ॥
व्यासोऽत्रिर्हविष्मांश्च सुकृती सत्य एव च ।
नाभागोऽप्रतिमश्चैव वाशिष्ठश्चैव सप्तमः ॥
सुचेत्राश्चोत्तमौजाश्च भूमिसेनश्च वीर्य्यवान् ।
शतानीकोऽथ दृढमो ह्यनमित्रो जयद्रथः ॥
भूरिद्युम्नः सुपर्व्वा च तस्यैते तनया मनोः ॥"
११ धर्म्मसावर्णिः । यथा, तत्रैव ।
"भविष्या धर्मपुत्रस्य सावर्णस्यान्तरं शृणु ॥
विहङ्गमाः कामगाश्च निर्माणरतयस्तथा ।
त्रिःप्रकारा भविष्यन्ति एकैकस्मिंश्चतो गणाः ॥
मासतुर्दिवसा ये तु निर्माणपतयस्तु ते ।
विहङ्गमा रात्रयोऽथ मौहूर्त्ताः कामगा गणाः ॥
इन्द्रो वृषाख्यो भविता तेषां प्रख्यातविक्रमः ।
हविष्मांश्च वरिष्ठश्च ऋषिरन्यस्तथारुणिः ॥
निश्चरश्चानघश्चैव विष्वक्सेनो महामुनिः ।
सप्तर्षयोऽन्तरे तस्मिन्नमिदेवश्च सप्तमः ॥
सर्व्वत्रगः सुधर्म्मा च देवानीकः पुरुद्वहः ।
हेमधन्वा दृढायुश्च भाविनस्तत्सुता नृपाः ॥"
१२ रुद्रसावर्णिः । यथा, तत्रैव ।
"द्वादशे रुद्रपुत्रस्य प्राप्ते मन्वन्तरे मनोः ।
सावर्णाख्यस्य ये देवा सुनयश्च शृणुष्व तान् ॥
सुधर्माणः सुमनसो हरिता रोहितास्तथा ।
सुवर्णाश्च सुरास्तत्र पञ्चैते दशका गणाः ॥
तेषामिन्द्रस्तु विज्ञेय ऋतधामा महाबलः ।
सर्व्वैरिन्द्रगुणैर्युक्तः सप्तर्षीनपि मे शृणु ॥
द्युतिस्तपस्वी सुतपास्तपोमूर्त्तिस्तपोनिधिः ।
तपोरतिस्तथैवान्यः सप्तमस्तु तपोधृतिः ॥
देववानुपदेवश्च देवश्रेष्ठो विदूरथः ।
मित्रवान् मित्रविन्दश्च भाविनस्तत्सुता नृपाः ॥"
१३ रौच्यः । यथा, तत्रैव ।
"त्रयोदशस्य पर्य्याये रौच्याख्यस्य मनोः सुतान् ।
सप्तर्षींश्च नृपांश्चैव गदतो मे निशामय ॥
सुधर्माणः सुरास्तत्र सुकर्माणस्तथापरे ।
सुमर्माणः सुरा ह्येते समस्ता मुनिसत्तम ! ॥
महाबलो महावीर्य्यस्तेषामिन्द्रो दिवस्पतिः ।
भविष्यानथ सप्तर्षीन् गदतो मे निशामय ॥
धृतिमानव्ययश्चैव तत्त्वदर्शी निरुत्सुकः ।
निर्मोहः सुतपास्यश्च निष्प्रकम्पश्च सप्तमः ॥
चित्रसेनो विचित्रश्च नयतिर्नियमो दृढः ।
सुनेत्रः शत्रुहृच्चैव सुव्रतश्चैव तत्सुताः ॥"
१४ भौत्यः । यथा, तत्रैव १०० अध्याये ।
"भौत्यो नाम मनुस्तस्य पुत्रो भूतिरजायत ।
तस्य मन्वन्तरे देवानृषींश्च भूपांश्च मे शृणु ॥

भविष्यस्य भविष्यांस्तु गदतो मम विस्तरात्।
देवेन्द्रो यश्च भविता तस्य विख्यातकर्मणः॥
चाक्षुषाश्च कनिष्ठाश्च पवित्रा भाजिरास्तथा।
धारातृकाश्च इत्येते पञ्च देवगणाः स्मृताः॥
ऋषिरिन्द्रस्तदा तेषां चिदग्नानां भविष्यति।
महाबलो महावीर्यः सर्व्वैरिन्द्रगुणैर्युतः॥
अग्नीध्रश्चाग्निबाहुश्च शुचिर्मुक्तोऽथ माधवः।
शुक्रोऽजितश्च सप्तैते तदा सप्तर्षयः स्मृताः॥
गुरुर्गभीरो बुद्धश्च भरतोऽनुग्रहस्तथा।
श्रीमानी च प्रतीरश्च विष्णुः संक्रन्दनस्तथा॥
तेजस्वी सुबलश्चैव औत्तमेयस्तेते मनोः सुताः।
चतुर्दश मयैतत्ते मन्वन्तरमुदाहृतम्॥"

मन्वन्तरकथाश्रवणफलमाह तत्रैव१००अध्याये।
"श्रुत्वा मन्वन्तराण्येवं क्रमेण मुनिसत्तम!।
पुण्यमाप्नोति मनुजस्तथाचीर्णाश्च सन्ततिम्॥
श्रुत्वा मन्वन्तरं पूर्व्वं धर्म्ममाप्नोति मानवः।
खारोपितस्य अवणात् सर्व्वकामानवाप्नुते॥
औत्तमेर्धनमाप्नोति ज्ञानञ्चाप्नोति तामसे।
रैवते च श्रुते बुद्धिं सुरूपां विन्दते स्त्रियम्॥
आरोग्यञ्चाक्षुषे पुंसां श्रुते वैवस्वते बलम्।
गुणवत्पुत्रपौत्रन्तु सूर्य्यसावर्णिके श्रुते॥
माहात्म्यं ब्रह्मसावर्णे धर्मसावर्णिके शुभम्।
मतिमाप्नोति मनुजो रुद्रसावर्णिके जयम्॥
ज्ञातिश्रेष्ठो गुणैर्युक्तो दक्षसावर्णिके श्रुते।
निग्रातयत्यरिबलं रौच्यं श्रुत्वा नरोत्तम!॥
देवप्रसादमाप्नोति भौत्ये मन्वन्तरे श्रुते।
तथाग्निष्टोत्रं पुत्रांश्च गुणयुक्तानवाप्नुते॥
सर्व्वाण्येतानुक्रमादयश्च शृणोति मुनिसत्तम!।
मन्वन्तराणि तस्यापि शृयतां फलमुत्तमम्॥
तत्र देवाऋषीनिन्द्रान्मनूंस्तत्तनयान्नृपान्।
वंशांश्च श्रुत्वा सर्व्वेभ्यः पापेभ्यो विप्रमुच्यते॥
देवर्षीन्द्रनृपाचार्य्ये ये तन्मन्वन्तराधिपाः।
ते प्रीयन्ते तथा प्रीताः प्रयच्छन्ति शुभां मतिम्॥
ततः शुभां मतिं प्राप्य कृत्वा कर्म्म तथा शुभम्।
शुभां गतिमवाप्नोति यावदिन्द्राश्चतुर्दश॥
सर्व्वे सुकृतयः क्षेत्र्याः सर्व्वे सौख्यास्तथा यज्ञाः।
भवत्यसंशयं श्रुत्वा क्रमान्मन्वन्तरस्थितिम्॥"*॥
विष्णुः। यथा, महाभारते। १३। १४६।१६।
"विश्वकर्म्मा मनुस्त्वष्टा स्वविष्ठो स्वविरोध्रुवः॥"
मननप्रधानो विद्वान्। यथा, वाजसनेयसंहितायाम्। १५। ६६।
"तस्मिन्महे निदधे नाकेऽग्निं यमाहुर्मनवस्त्रीर्ण्यवर्हिषम्॥"
"मनवः मननप्रधाना विद्वांसः।" इति तद्भाष्ये महीधरः॥*॥ अन्तःकरणम्। यथा, भागवते। ६। ४।२५।
"देहोऽसवोऽक्षा मनवो भूतमात्रा नाक्षागमन्मुनय विदुः परं यत्॥"
"मनवोऽन्तःकरणानि।" इति तट्टीकायां श्रीधरः॥
ब्रह्मणस्य पुत्रभेदः। यथा, भागवते।६।६।२०।
"ब्रह्मणोऽपि भुवो भार्य्यायां धूमकेतुमथोऽजनत्।
पिप्पलायां वेदशिरः देवलं वसुनं मनुम्॥")

मनुजः, पुं, (मनोर्जात इति। जन+डः।) मनुष्यः। इत्यमरः। २। ६। १॥ (यथा, विष्णुपुराणे। १। ६। १०।
"स्वर्गापवर्गौ मानुष्यात् प्राप्नुवन्ति नरा सुने!।
यथाभिरुचितं स्थानं तद्यान्ति मनुजा द्विज!॥")
मनुजी, स्त्री, (मनुज+गौरादित्वात् ङीष्।) मानुषी। इति जटाधरः॥ (टाप् इत्येके। यथा, हरिवंशे। १७६। २३।
"विद्याधराणां नारीषु साध्वीषु मनुजासु च॥")
मनुभूः, पुं, (मनीर्भवतीति। भू+क्विप्। मनुर्भूरुत्पत्तिस्थानं यस्येति वा।) मनुष्यः। इति शब्दचन्द्रिका॥
मनुराट्, [ज्] पुं, (मनुः मानव इव राजते इति। राज्+क्विप्। मनुष्यवदाचारवत्त्वादस्य तथात्वम्।) कुबेरः। इति त्रिकाण्डशेषः॥
मनुषी, स्त्री, (मनुष्यस्य स्त्री। मनुष्य+"हयगवयमनुष्यमत्स्यानामप्रतिषेधः।"४। १। ६३। इत्यस्य वार्त्तिकोक्त्या ङीष्। "हलस्तद्धितस्य।" ६। ४। १५०। इति यलोपः।) मानुषी। इति शब्दरत्नावली॥
मनुष्यः, पुं, (मनोरपत्यमिति। मनु+"मनोर्जातावञ्यतौ सुक्च।" ४। १। १६१। इति यत् सुगागमश्च।) मनोरपत्यम्। तत्पर्य्यायः। मानुषः २ मर्त्यः ३ मनुजः ४ मानवः ५ नरः ६। इत्यमरः। ३। ६। १॥ भूमिजः ७ द्विपदः ८ चेतनः ९ भूस्पृः १०। इति राजनिर्घण्टः॥ मनुः ११ पञ्चजनः १२ पुरुषः १३ पूरुषः १४ पुमान् १५ नृ १६। इति शब्दरत्नावली॥ मर्त्यः १७ विट् १८। इति जटाधरः॥*॥
(यथा, मनुः। १। ४३।
"रक्षांसि च पिशाचाश्च मनुष्याश्च जरायुजाः॥")
स तु अर्व्वाक्स्रोतो ब्रह्मणो नवमः सर्ग एकविधश्च। यथा,—
"अर्व्वाक्स्रोतस्तु नवमः चत्तरेकविधो नृणाम्।
रजोऽधिकाः कर्म्मपरा दुःखे च सुखमानिनः॥"
इति श्रीभागवते। ३। १०। २८।
अपि च।
"तस्यापि ध्यायतः सर्गं सत्याभिध्यायिनस्ततः।
प्रादुर्बभूव चायत्नादर्व्वाक्स्रोतस्तु साधकः॥
यस्मादर्व्वाक् प्रवर्त्तन्ते ततोऽर्व्वाक्स्रोतसस्तु ते।
ते च प्रकाशबहुलास्तमोद्रिक्तरजोऽधिकाः॥
तस्मात्ते दुःखबहुला भूयो भूयश्च कारिणः।
प्रकाशा बहिरन्तश्च मनुष्याः साधकास्तु ते॥"
इति वह्निपुराणे सर्गकथननामाध्यायः॥*॥
मनुष्यजन्मसुक्तिकारणं यथा,—
"विमुक्तिहेतुकान्या तु नरयोनिः कृतात्मनाम्।
नासुषन्ति हि संसारे विभ्रान्तमनसो गताः॥
जीवा मानुष्यतां मत्वे जन्मनामशतैरपि।
तदीदृक् दुर्लभं प्राप्य मुक्तिद्वारं विचेतसः॥
पतन्ति भूयः संसारे विष्णुमायाविमोहिताः।
सुदुस्तरापि दुःसाध्या मायाऽनुग्रहस्य मोहिनी॥"
इति तत्रैव सुव्रिव्रतनामाध्यायः॥*॥
"मनुष्याणां पिता माता भ्राता च श्रीहरिर्यथा।
विशेषतो मनुष्याणां पिता माता जगार्द्दनः।
भ्राता च सर्व्वलोकानां वात्सल्यगुणसागरः॥"
इति पाद्मोत्तरखण्डे ७८ अध्यायः॥*॥
स त्रिविधो यथा,—
"यजन्ते सात्विका देवान् यक्षरक्षांसि राजसाः।
प्रेतान् भूतगणांश्चान्ये यजन्ते तामसा जनाः॥
इति श्रीभगवद्गीतायां १७ अध्यायः॥
"ऊर्द्धं गच्छन्ति सत्त्वस्था मध्ये तिष्ठन्ति राजसाः।
जघन्यगुणवृत्तिस्था अधो गच्छन्ति तामसाः॥"
इति तत्रैव १४ अध्यायः॥
(त्रि, स्तुतिकारकः। यथा, ऋग्वेदे।१।५६।४।
"होता मनुष्यो न दक्षः॥"
"मनुष्यो लौकिको वन्दी दातारं प्रशंसति बहुविधया स्तुत्या स्तौति।" इति तद्भाष्ये सायनः।
मनुष्यसम्बन्धी। यथा, ऋग्वेदे। १। ६२। ११।
"प्रमिनती मनुष्या युगानि॥"
"मनुष्या मनुष्याणां सम्बन्धीनि युगानि कृतत्रेतादीनि प्रमिनती स्वगमनागमनाभ्यां प्रकर्षेण हिंसन्ती॥" इति तद्भाष्ये सायनः॥ मनुष्यहितः। यथा, ऋग्वेदे। २। १८। १।
"दक्षारित्रो मनुष्यः स्वर्वाः॥"
"मनुष्यो मनुष्याणां हितः स्वर्वाः स्वर्गस्य दाता।" इति तद्भाष्ये सायनः॥)
मनुष्यधर्म्मा, [न्] पुं, (मनुष्यस्येव धर्म्म आचारो यस्य। "धर्म्मादनिच् केवलात्।" ५।४।१२४। इति समासान्तोऽनिच्।) कुबेरः। इत्यमरः।२।६।१।
मनुष्ययज्ञः, पुं, (मनुष्येभ्यो मनुष्यार्थं यो यज्ञः।) अतिथिपूजनम्। इति हृयज्ञशब्ददर्शनात्॥ (यथा, शतपथब्राह्मणे। ११। ५। ६। १।
"तान्येव महासत्राणि भूतयज्ञो मनुष्ययज्ञः पितृयज्ञो देवयज्ञो ब्रह्मयज्ञ इति॥")
मनुष्यी, स्त्री, (मनुष्य+गौरादित्वात् ङीष्। योपधप्रतिषेधे "हयगवयसुकयमनुष्यमत्स्यानामप्रतिषेधः।"इति ङीषि यलोपाभावः।) मानुषजातिः। तत्पर्य्यायः। मानुषी २ नारी ३ मानवी ४। इति शब्दरत्नावली॥ मर्त्या ५ मनुजी ६ नरी ७। इति जटाधरः॥
मनोगुप्ता, स्त्री, (मनसा मनःशब्देन गुप्तैव।) मनःशिला। इत्यमरः। २। ६। १०८॥
मनोजन्मा, [न्] पुं, (मनसो जन्म यस्य।) कन्दर्पः। इति त्रिकाण्डशेषः॥
मनोजवः, पुं, (मनस इव जवोऽस्य। एकदेव सर्व्वगामित्वात् तथात्वम्।) विष्णुः। यथा, महाभारते दानधर्म्मे सहस्रनामस्तोत्रम्। १३। १४६। ८७।
"मनोजवस्तीर्थकरो वसुरेता वसुप्रदः॥"
(मनसश्चित्तस्य जवः।) मनसो वेगः। इति व्याकरणम्। (अनिलपत्न्याः शिवायाः पुत्रः। यथा, हरिवंशे। ३। ४२।

"अनिलस्य शिवा भार्य्या यस्याः पुत्रो मनोजवः ॥")
रुद्रस्य पुत्रभेदः । यथा, मार्कण्डेये । ५२ । ११ ।
"अनेश्वरसखा शुक्लो लोहिताङ्गो मनोजवः ॥"
तीर्थभेदः । यथा, महाभारते । ३ । ८३ । ८५ ।
"मनोजवे नरः स्नात्वा गोसहस्रफलं लभेत् ॥"
षष्ठमन्वन्तरस्येन्द्रः । यथा, मार्कण्डेये । ७६ । ५३ ।
"मनोजवस्तथैवेन्द्रः संख्यातो यज्ञभागभुक् ॥"
मेधातिथेः पुत्रभेदः । यथा, भागवते । ५ । २० ।
२५ । "तस्य प्रियव्रत एवाधिपतिर्नाम्ना मेधातिथिः। योऽपि विभज्य सप्तवर्षाणि पुत्रनामानि तेषु स्वात्मजान् पुरोजवमनोजवपवमानधूम्रानीकचित्ररेफबिन्धाधारसंज्ञान् निधाप्याधिपतीन् स्वयं भगवत्यनन्त आवेशितमतिस्तपोवनं प्रविवेश ॥")
मनोजवः, त्रि, (मनो जवं वेगवदस्यास्मिन् । यद्वा, मनो भवति पितायमिति कृत्वा धावत्यस्मिन् इति । जु सौत्रधातुः + अच् ।) पितृतुल्यः । तत्पर्य्यायः । पितृसन्निभः ७ । इत्यमरः । ३ । २ । १३ ॥ अतिशयवेगवान् । (यथा, मार्कण्डेये । २१ । ८ ।
"तमन्वधावद्वेगेन तुरगोऽसौ मनोजवः ॥")
मनोजवसः, त्रि, (मनो जवत्यस्मिन् । जु + बाहुलकात् असच् ।) पितृसन्निभः । इत्यमरटीकायां स्वामी । ३ । १ । १३ ॥
मनोजवा, स्त्री, (मनो जवत्यनेति । जु + अच् टाप् ।) अग्निशिखावृक्षः । इति शब्दरत्नावली ॥ (गुणादिविवृतिरस्या अग्निशिखाशब्दे ज्ञातव्या ॥ यद्विशिखाविशेषः । यथा, मार्कण्डेये । ८८ । ५४ ।
"मनोजवा च या शिष्टा लघिमा गुणलक्षणा ।
तया नः पाहि पापेभ्यो रौद्रिकाच्च महाभयात् ॥"
स्कन्दस्य मातृगणभेदः । यथा, महाभारते । ९ । ४६ । १६ ।
"मनोजवा कण्टकिनी प्रघसा पूतना तथा ॥"
कौशिकीपुत्र्या नदीविशेषः । यथा, मात्स्ये । १२१ । ८० ।
"गौरी कुमुदती चैव सन्ध्या रात्रिर्मनोजवा ॥"
मन इव जवो यस्याः । वेगविशिष्टायां स्त्रियाम् । यथा, महाभारते । १ । १५६ । १८ ।
"अथः स्तु विहरानेन यथाकामं मनोजवा ॥")
मनोजवृद्धिः, पुं, (मनोजस्य कामस्य वृद्धिर्यस्मात् ।) कामवृद्धिहेतुः । इति राजनिर्घण्टः ॥
मनोज्ञं, क्ली, (मनो जानाति ज्ञापयति तोषयतीति । अन्तर्भूतण्यर्थे ज्ञा + कः । यद्वा, मनः ज्ञापयति तोषयतीति । अन्तर्भूतण्यर्थज्ञातोः कः ।) मनोहरम् । तत्पर्य्यायः । सुन्दरम् २ रुचिरम् ३ चारु ४ रुचिरम् ५ साधु ६ शोभनम् ७ कान्तम् ८ मनोरमम् ९ रम्यम् १० मञ्जु ११ मञ्जुलम् १२ । इत्यमरः । ३ । १ । ५२ । मनोहरम् १३ मनोरम् १४ वक्त्रम् १५ पेशलम् १६ पेशलम् १७ सुमनम् १८ वामम् १९ अभिरामम् २० नन्दितम् २१ । इति शब्दरत्नावली ॥ (यथा, सुश्रुते । १ । ४६ । अध्याये ।
"मनोज्ञं सुचि नात्युष्णं प्रत्यग्रमशुनं हितम् ।
पूर्व्वं मधुरमश्नीयात् मध्येऽम्ललवणौ रसौ ॥")
मनोज्ञा, स्त्री, (मनोज्ञ + स्त्रियां टाप् ।) मनःशिला । इति रत्नमाला ॥ (यथा, सुश्रुते उत्तरतन्त्रे त्रयोदशाध्याये ।
"स्निग्धं मनोज्ञाकासीसयोषाञ्जनकसैन्धवैः ॥")
राजपुत्री । इति जटाधरः ॥ वन्ध्याकर्कोटकी । आवर्त्तकी । स्थूलजीरकः । जाती । मदिरा । इति राजनिर्घण्टः ॥
मनोभवः, पुं, (मनसः मनसि वा भवतीति । भू + अच् । मनसः भव उत्पत्तिर्यस्येति वा ।) कन्दर्पः । इति हलायुधः ॥ (यथा, मार्कण्डेये । १८ । ४१ ।
"ते तां दृष्ट्वागतो दैत्याः साभिलाषा मनोभवम् ।
न शेकुरुद्धतं धैर्य्यान्मनसा वोढुमातुराः ॥"
मनोजन्ये, त्रि । यथा, भागवते । ६ । १५ । २४ ।
"दृश्यमाना विनार्थेन न दृश्यन्ते मनोभवाः ।
कर्म्मभिर्ध्यायतो नाना कर्म्माणि मनसोऽभवन् ॥")
मनोभूः, पुं, (मनसः मनसि वा भवतीति । भू + क्विप् ।) कामदेवः । इति शब्दरत्नावली ॥ (यथा, कलाविलासे । १ । ३३ ।
"श्यामा शुशुभे शुशिना तया मनोभूर्मधूत्सवस्त्रेन ।
मदमुदितमानसानां तेनापि स्त्रीगीतगां लीला ॥")
मनोयोनिः, पुं, (मन एव योनिरुत्पत्तिस्थानमस्य ।) कामदेवः । इति हेमचन्द्रः । २ । १४२ ॥
मनोरथः, पुं, (मनसः रथ इव । मन एव रथोऽत्रेति वा ।) इच्छा । इत्यमरः । १ । ७ । २७ ॥ (यथा, रघौ । ११ । ५६ ।
"इतस्ततश्च वैदेहीमन्वेषुं भर्तृचोदिताः ।
कपयश्चेरुरार्क्षस्य रामस्येव मनोरथाः ॥"
कविविशेषः । यथा, राजतरङ्गिण्याम् । ४ । ५६ । ६ ।
"मनोरथः शुक्लदत्तचटकः सन्धिमांस्तथा ।
बभूवुः कवयस्तस्य वामनाद्याश्च मन्त्रिणः ॥")
मनोरमं, त्रि, (मनो रमयतीति । रम् + णिच् + अच् ।) मनोज्ञम् । इत्यमरः । ३ । १ । ५२ ॥ (यथा, सुश्रुते । १ । ४६ । अध्याये ॥
"पुरस्तादिमले पात्रे सुविस्तीर्णे मनोरमे ।
सूदः सर्पीषदन्नं दद्यात् प्रदेशांश्च सुसंस्कृतान् ॥")
मनोरमा, स्त्री, (मनोरम + स्त्रियां टाप् ।) गोरोचना । इति राजनिर्घण्टः । वृद्धिशक्तिविशेषः । तत्पर्य्यायः । तारा २ मद्यश्रीः ३ श्रीद्वारा ४ स्वाधा ५ श्रीः ६ तारिणी ७ दया ८ अनन्ता ९ शिवा १० लोकेश्वरात्मजा ११ सदूरवासिनी १२ भद्रा १३ वैष्णवा १४ नीलसरस्वती १५ मुद्रिनी १६ महातारा १७ वसुधारा १८ धनन्ददा १९ त्रिलोचना २० लोचना २१ । इति त्रिकाण्डशेषः ॥ (स्त्रीवराख्यविद्याधरस्य कन्या । यथा च मार्कण्डेये । ६२ । १३ ।
"अहमिन्दीवराख्यस्य सुता विद्याधरस्य वै ।
नाम्ना मनोरमा जाता सुतायां मरुधन्वनः ॥"
सप्तसरस्वतीनामेकतमा । यथा, महाभारते । ६ । ३८ । ४ ।
"सुप्रभा काञ्चनाक्षी च विशाला च मनोरमा ।
सरस्वती चौघवती सुरेणुर्विमलोदका ॥"
तथा च तत्रैव । ६ । ३८ । २४—२५ ।
"उद्दालकेन यत्ता पूर्व्वं ध्याता सरस्वती ।
आजगाम सरिच्छ्रेष्ठा तं देशमृषिकारणात् ॥
पूज्यमाना मुनिगणैर्व्वल्कलाजिनसंवृतैः ।
मनोरमेति विख्याता सा हि तैर्मुनिभिर्गता ॥"
छन्दोविशेषः । तल्लक्षणमुदाहरणञ्च यथा, छन्दोमञ्जर्य्याम् ।
"नरजगैर्भवेन्मनोरमा ।"
"तरणिजातटे विहारिणी व्रजविलासिनी विलासतः ।
सुररिपोस्तनुः पुनातु वः सुकृतशालिनां मनोरमा ॥")
मनोहृतः, त्रि, (मनसा मनसि वा हृतः ।) प्रतिहृतः । इत्यमरः । ३ । १ । ४१ ॥
मनोहरं, त्रि, (हरतीति । हृ + अच् । मनसो हरमिति ।) मनोज्ञम् । इति शब्दरत्नावली ॥ (यथा, मनौ । २ । ३३ ।
"स्त्रीणां सुखोत्पमक्रूरं विषयार्थं मनोहरम् ॥"
यथा च मार्कण्डेये । ९१२ । ३ ।
"स ददर्श तदा तत्र होमधेनुं मनोहराम् ॥")
कुन्दवृक्षे, पुं । सुवर्णे, क्ली । इति राजनिर्घण्टः ॥
मनोहरा, स्त्री, (मनोहर + टाप् ।) जाती । स्वर्णयूथी । इति राजनिर्घण्टः ॥ (धरस्य वसोः पत्नी । यथा, विष्णुपुराणे । १ । १५ । ११४ ।
"मनोहरायाः शिशिरः प्राणोऽथ वरुणस्तथा ॥"
अप्सरोविशेषः । यथा, महाभारते । १३ । १६८ । ४५ ।
"मनोहरा सुकेशी च सुसखी हासिनी प्रभा ॥")
मनोहर्ष्मा, [र्ष्मन्] त्रि, (मनो हरतीति । हृ + असुन् ।) मनोहरगर्व्वी । यथा,—
"व्यसनं तेऽपनेष्यामि त्रिलोक्यां यदि भाव्यते ।
तमानेष्ये वरं यस्ते मनोहर्ष्मा तमादिश ॥"
इति श्रीभागवते १० स्कन्धे ६२ अध्यायः ॥
मनोहारि, [न्] त्रि, (मनो हरति मनो हर्षं शीलमस्येति वा । हृ + णिनिः ।) मनोहरम् । इत्यमरटीकायां स्वामी । तथाहि ।
"गाङ्गं वारि मनोहारि मुरारिचरणच्युतम् ।
त्रिपुरारिशिरश्चारि पापहारि पुनातु माम् ॥"
इति वाल्मीकिकृतगङ्गास्तोत्रम् ॥
मनोह्वा, स्त्री, (मनः ह्वयति आह्वयतीवेति । ह्वे + "आतोऽनुपसर्गे कः ।" ३ । २ । ३ । इति कः । टाप् ।) मनःशिला । इत्यमरः । २ । ६ । १०८ ॥ (अस्याः पर्य्यायो यथा,—

"मनःशिला मनोगुप्ता मनोज्ञा नागजिह्विका।
नेपाली कुनटी गोला शिला दिव्यौषधिः
स्मृता ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

मन्तव्य, त्रि, (मन्यते इति। मन + तव्य।) मननीयम्। भाव्यम्। यथा। "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः।" इत्यादि छान्दोग्योपनिषत्

मन्ता, [ऋ] त्रि, (मन्यते जानातीति। मन् + "वहुलमन्यत्रापि।" उणा० २। ६५। इति तृच्।) विद्वान्। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (मननकर्त्ता। यथा। "स हि हेतुः कारणं निमित्तमक्षरं कर्त्ता मन्ता वेदिता बोद्धा द्रष्टा धाता ब्रह्मा विश्वकर्म्मा विश्वरूपः पुरुषः प्रभवोऽव्ययो नित्यः गुणी ग्रहणं प्राधान्यमर्थतः जीवो ज्ञः प्रकृतश्चेतनावान् विभुर्भूतात्मा चेन्द्रियात्मा चान्तरात्मा चेति।" इति चरके शारीरस्थाने चतुर्थेऽध्याये ॥)

मन्तुः, पुं, (मन्यते इति। मन् + "कमिमनिजनिगाभायाहिभ्यश्च।" उणा० १। ७३। इति तुन्।) अपराधः। (यथा, नैषधचरिते। ६।११०।
"सतीव्रतैस्तीव्रमिमन्तु मन्तु-
मन्तर्वरं वञ्चिषि मार्ज्जितासि ॥")

मनुष्यः। प्रजापतिः। इति मेदिनी। ते, ४३ ॥

द्वाविंशत्यपराधा यथा। भगवद्भक्तानां चक्रिवसिद्धान्नभोजनम् १ अनिधिदृष्टे दन्तधावनमकृत्वा विष्णोरुपसर्पणम् २ मैथुनं कृत्वा अस्नात्वा विष्णोरुपसर्पणम् ३ मृतं नरं स्पृष्ट्वा अस्नात्वा विष्णुकर्म्मकरणम् ४ रजस्वलां स्पृष्ट्वा अस्नात्वा विष्णुगृहप्रवेशनम् ५ मानवं शवं स्पृष्ट्वा अस्नात्वा विष्णुसन्निधाववस्थानम् ६ विष्णुं स्पृशतः पापुवायुप्रयोगः ७ विष्णोः कर्म्म कुर्वतः पुरीषत्यागः ८ विष्णुशास्त्रमनादृत्य शास्त्रान्तरप्रशंसा ९ अतिमलिनं वासः परिधाय विष्णुकर्म्माचरणम् १० अविधानेनाचम्य विष्णोरुपस्पर्शनम् ११ विष्णोरपराधं कृत्वा विष्णोरुपसर्पणम् १२ क्रुद्धस्य विष्णुस्पर्शनम् १३ निषिद्धपुष्पेण विष्णोरर्च्चनम् १४ रक्तं वासः परिधाय विष्णुकर्म्माचरणम् १५ अन्धकारे दीपेन विना विष्णोः स्पर्शनम् १६ कृष्णं वस्त्रं परिधाय विष्णोः कर्म्माचरणम् १७ वायसोद्धृतवस्त्रं परिधाय विष्णोः कर्म्माचरणम् १८ विष्णवे कुक्कुरोच्छिष्टदानम् १९ वराहमांसं भुक्त्वा विष्णोरुपसर्पणम् २० चाण्डालपादशरीरिमांसं भुक्त्वा विष्णोरुपसर्पणम् २१ दीपं स्पृष्ट्वा हस्तप्रक्षाल्य विष्णोः स्पर्शनं कर्म्माचरणं वा २२ श्मशानं गत्वा अस्नात्वा विष्णोरुपसर्पणम् २३ पित्र्याकं भुक्त्वा विष्णोरुपसर्पणम् २४ विष्णवे वराहमांसनिवेदनम् २५ मद्यमादाय स्पृष्ट्वा पीत्वा वा विष्णुगृहप्रवेशनम् २६ परकीयेणाशुचिना वा वस्त्रेण परिहितेन विष्णुकर्म्माचरणम् २७ विष्णवे नवान्नमप्रदाय तद्भोजनम् २८ गन्धपुष्पे अप्रदाय धूपदीपदानम् २९ उपानद्भ्यामारुह्य विष्णुस्थानप्रवेशनम् ३० भेरीशब्देन विना विष्णोः प्रबोधनम् ३१ अशौचे सति विष्णोरुपसर्पणम् ३२। एतदष्टफलकं तथा च नरसिंहपुराणे।
"अपराधसहस्राणि अपराधशतानि च।
पद्मनेकेन देवेशः क्षमते हेलयार्चितः ॥"
इत्याह्निकाचारतत्त्वे चतुर्थयामार्द्धकृत्यम् ॥
अपि च।

वराह उवाच।

"भुक्त्वा तु परकीयान्नं तत्परस्त्रीनिवर्त्तनः।
प्रथमश्चापराधोऽयं धर्म्मविघ्नाय वै भवेत् ॥
अभुक्त्वा दन्तकाष्ठानि यस्तु मामुपसर्पति।
द्वितीयश्चापराधस्तु कर्म्मविघ्नाय विद्यते ॥
गत्वा मैथुनसंयोगे योऽनु मां स्पृशते नरः।
तृतीयमपराधन्तु कल्पयामि वसुन्धरे ! ॥
स्पृष्ट्वा रजस्वलां नारीमसाकं यः प्रपद्यते।
चतुर्थमपराधन्तु दृष्टे नैव क्षमाम्यहम् ॥
स्पृष्ट्वा तु मृतकञ्चैव असंस्कारकृतन्तु वै।
पञ्चमश्चापराधश्च न क्षमामि वसुन्धरे ! ॥
स्पृष्ट्वा तु मृतकं यस्तु नाचम्य स्पृशते तु माम्।
षष्ठकश्चापराधन्तु न क्षमामि वसुन्धरे ! ॥
मामेवार्च्चनकाले तु पुरीषं यस्य गच्छति।
सप्तमश्चापराधन्तु कल्पयामि वसुन्धरे ! ॥
यस्तु नीलेन वस्त्रेण प्रावृतो मां प्रपद्यते।
अष्टमश्चापराधन्तु कल्पयामि वसुन्धरे ! ॥
मामेवार्च्चनकाले तु यस्त्वसत्यं प्रभाषते।
नवमश्चापराधन्तु न रोचामि वसुन्धरे ! ॥
अविधानेन मां स्पृष्ट्वा यस्तु मां प्रतिपद्यते।
दशमश्चापराधन्तु मम चाप्रियकारकम् ॥
क्रुद्धस्त्वन्यानि कर्म्माणि कुरुते कर्म्मकारकः।
एकादशापराधन्तु कल्पयामि वसुन्धरे ! ॥
अकर्म्मण्यानि पुण्यानि यस्तु मामुपकल्पयेत्।
द्वादशश्चापराधन्तु कल्पयामि वसुन्धरे ! ॥
यस्तु रक्तेन वस्त्रेण कौसुम्भेनोपगच्छति।
त्रयोदशापराधन्तु कल्पयामि वसुन्धरे ! ॥
अन्तकालेऽपि मां देवि ! यः स्पृशेत कदाचन।
चतुर्दशापराधन्तु कल्पयामि वसुन्धरे ! ॥
यस्तु कृष्णेन वस्त्रेण मम कर्म्माणि कारयेत्।
पञ्चदशापराधन्तु कल्पयामि वरानने ! ॥
अधौतेन च वस्त्रेण यस्तु मामुपकल्पते।
षोड़शस्त्वपराधानां कल्पयामि वरानने ! ॥
स्वयमश्नन्तु यो दद्यादज्ञानाय च माधवि !।
सप्तदशापराधन्तु कल्पयामि वसुन्धरे ! ॥
यस्तु मत्स्यानि मांसानि भक्षयित्वा वरानने !।
अष्टादशापराधानि अनुज्ञातानि माधवि ! ॥
चाण्डालं भक्षयित्वा यस्तु मामुपसर्पति।
एकोनविंशापराधं प्रतिजानामि सुन्दरि ! ॥
यस्तु मे दीपकं स्पृष्ट्वा यो मां स्पृशति माधवि !।
विंशकश्चापराधानां कल्पयामि वरानने ॥
श्मशानं यस्तु वै गत्वा यो मामेवाभिगच्छति।
एकविंशापराधानि कल्पयामि वसुन्धरे ! ॥
पित्र्याकं भक्षयित्वा तु यो मामेवोपचक्रमे।
द्वाविंशत्यपराधानां तान्यहं चोपकल्पये ॥
यस्तु वाराहमांसानि प्राश्नीयोपपादयेत्।
अपराधं त्रयोविंशं कल्पयामि वसुन्धरे ! ॥
सुरां पीत्वापि यो मर्त्यः कदाचिदुपसर्पति।
अपराधं चतुर्विंशं कल्पयामि वसुन्धरे ! ॥
यः कुसुम्भश्च मे शाकं भक्षयित्वोपचक्रमे।
अपराधं पञ्चविंशं कल्पयामि वसुन्धरे ! ॥
परप्रावरणेनैव यस्तु मामुपसर्पति।
अपराधेषु षड्विंशं कल्पयामि वरानने ! ॥
नवान्नं यस्तु भक्षेत न स देवान् पितॄन् यजेत् ॥
सप्तविंशापराधानि कल्पयामि गुणान्विते ! ॥
उपानद्भ्यां च प्रपदे तथा मे नोपचक्रमे।
अष्टाविंशापराधानि कल्पयामि गुणान्विते ! ॥
शरीरं मर्द्दयित्वा तु यो मामाप्नोति माधवि !।
एकोनत्रिंशमपराधं स स्वर्गेषु न गच्छति ॥
अशौचेन समाविष्टो यस्तु मामभिगच्छति।
त्रिंशकश्चापराधानां कल्पयामि वसुन्धरे ! ॥
गन्धपुष्पाण्यदत्त्वा तु यस्तु धूपं प्रयच्छति।
एकत्रिंशापराधन्तु कल्पयामि यशस्विनि ! ॥
विना भैर्य्यादिशब्देन द्वारस्योद्घाटनं मम।
महापराधं विद्यात तद्वात्रिंशापराधकम् ॥"
इति वाराहे द्वात्रिंशदपराधाध्यायः ॥

(त्रि, ज्ञाता। यथा, ऋग्वेदे। १०। ६३। ८।
"य ईशिरे भुवनस्य प्रचेतसो
विश्वस्य स्थातुर्जगतश्च मन्तवः।")
"मन्तवः सर्व्वस्य वेदितारः।" इति तद्भाष्ये सायनः ॥ मननीयः। यथा, ऋग्वेदे। १। १५२। १।
"युवोरच्छिद्रा मन्तवोह सर्गाः।"
"मन्तवोह मननीयाश्च।" इति सायनः ॥)

मन्त्रः, पुं, (मन्त्र्यते गुप्तं परिभाष्यते इति। मत्रि गुप्तभाषणे + घञ्। यद्वा, मन्त्रयते गुप्तं भाषते इति। मत्रि गुप्तभाषणे + घञ्।) वेदभेदः। स च मन्त्रस्वरूपभागः ॥ (यथा, ऋग्वेदे। ६७। ४। ७४।
"प्रनूनं ब्रह्मणस्पतिर्मन्त्रं वदत्युक्थ्यम् ॥"
यथा च मनुः। २। १६।
"निषेकादिश्मशानान्तो मन्त्रैर्यस्योदितो विधिः।
तस्य शास्त्रेऽधिकारोऽस्मिन् ज्ञेयो नान्यस्य
कस्यचित् ॥"
तन्त्रादावुक्तमन्त्रभागश्च। यथा, मनौ। ७।२१७।
"सुपरीक्षितमन्त्राद्यमद्याभ्मन्त्रैर्विषापहैः ॥")
गुप्तिवादः। स तु रहसि कर्त्तव्यावधारणं मन्त्रयेति स्थानम्। इत्यमरभरतौ ॥ परामर्शः। मन्त्रणा। (यथा, माघे। २। २६।
"मन्त्रो योघ इवाधीरः सर्व्वाङ्गैः संहतैरपि।
चिरं न सहते स्थातुं परेभ्यो भेदशङ्कया ॥")
यक्षादिभ्यो मन्त्रयागग्रहणस्य निषेधो यथा,—
"यक्षाङ्गहीना बधिराः कुयोनिषु रताश्च ये।
तेषां मन्त्रो न सुखदः प्रोक्तः कविभिरेव च ॥
कासकानां जड़ानाञ्च स्त्रीजितानां तथैव च।
श्वशुरस्य गृहे नित्यं जामाता कर्म्मकारकः।

मन्त्रः

तस्यापि न भवेन्मन्त्रः कार्य्यसिद्धौ कदाचन ।"
इति वैजयन्तिभाषिते आग्नेयेऽधिकपर्व्वणि २ अः ।
अन्यत् मन्त्रशब्दे द्रष्टव्यम् । * । देवादीनां
साधनम् । इति मेदिनी । रे, ७४ ॥
"तन्मन्त्रायतनं नीतं यत् तृतीयादगोचरम् ।
रहस्यालोचनं मन्त्रो रहस्यमनुपङ्करम् ॥"
इति हेमचन्द्रः ॥

मन्त्रशास्त्रादेकनवतृषयो यथा,—
"एते मन्त्रकृतः सर्व्वे इत्यतश्शृणु निबोधत ।
भृगुः काश्यः प्रचेताश्च दधीचो ह्यात्मवानपि ॥
कौत्सोऽथ वामदेवश्च विदः शारद्वतस्तथा ।
पाराशर्य्यो गालवश्च वीतहव्यः सवेधसः ॥
वेश्यः पृथुर्हिरण्याक्षो वल्मीकः सप्तसौभरिः ।
एकोनविंशति र्ह्येते भार्गवा मन्त्रकृत्तमाः ॥१८॥
अङ्गिरा वेधसश्चैव भरद्वाजो नभालकः ।
तथा त्रयारुणो गर्ग्गः सितः सुङ्कृतिरेव च ॥
युवनीतश्च मान्धाता अमरीषश्चैव च ।
युवनाश्वः पुरुकुत्सः सुमदद्युः सदस्यवान् ॥
अजमीढो सुदासश्च तक्षकः कविरेव च ।
पृषदश्वो विरूपश्च कक्षसेवाथ सुहृत्सः ॥
उतथ्यश्च शरद्वांश्च तथा वाजिश्रवा अपि ।
अयस्योऽथ सुचित्तिश्च वामदेवश्चैव च ॥
सौचिको दृढमुक्तिश्च ऋष्टिर्दीर्घतया अपि ।
काक्षीवांश्च अयस्त्रिंशत् स्तुता ह्याङ्गिरसा
वराः ॥ ३३ ॥
एते मन्त्रकृतः सर्व्वे काश्यपांस्तु निबोधत ।
काश्यः सप्तवत्साश्वो निध्रुवो वेद एव च ।
असितो देवलश्चैव षड़ेते ब्रह्मवादिनः ॥ ६ ॥
ऋक्षैर्दृश्यसखश्चैव श्यावाश्वोऽथ गविष्ठिरः ।
पर्व्वतश्च ऋषिः सिद्धस्तथा पूर्व्वातिथिश्च यः ।
इत्येते ऋषयः प्रोक्ता मन्त्रकृत्सु महर्षयः ॥७॥
वशिष्ठश्चैव शक्तिश्च तृतीयश्च पराशरः ।
ततस्तु ऋक्षप्रमतिः षष्ठस्तु भवदत्तः ॥
षष्ठस्तु मित्रायुवश्च सप्तमः कृष्णसखा ।
इत्येते सप्त विप्रेया वाशिष्ठा ब्रह्मवादिनः ॥७॥
विश्वामित्रश्च गाधेयो देवश्रवसश्चौद्दलः ।
तथा विद्वान् मधुच्छन्दो ऋषिश्चान्यो घमर्षणः ।
अघमर्षो लौहित्यश्चैव भूतकीलश्च तादृशौ ।
देवरातो देवरातः पुराणश्च धनञ्जयः ।
विश्वामित्रस्य महातेजाः सात्यदृग्यश्च एव च ।
अष्टौदयेते विप्रेया ऋषिणा कौशिका वराः॥१२॥
वामदेवोऽथ ऋष्टिश्च ऋक्षबाहुश्चैव च ।
सप्तविंशतयो ह्येते ऋषयः परमकीर्त्तयः ॥ १३ ॥
मनुर्वैवस्वतश्चैव इलो राजा पुरूरवाः ।
कुशिकानां वरा ह्येते विप्रेया मन्त्रवादिनः ॥१४॥
भरद्वाजश्च भक्तश्च वक्षसश्चैव ते त्रयः ।
एते मन्त्रकृतो ज्ञेया वैश्यानां प्रवराः स्मृताः॥१५॥
इत्येवमृषयः प्रोक्ता मन्त्रकृत्वैव सप्तिकृताः ।
शूद्राणां ऋषयो वेद्या ऋषिपुत्रास्तथा स्मृताः॥
अगोत्राश्च सुता ज्ञेया ऋषिपुत्राः सुनिश्चयः ।"
इति मात्से १९५ अध्यायः ।

एकनवतिमन्त्रकृतां यथा,—
"तावन्निवद्धः संसारकारागारे विधेर्जनः ।
न यावत् शब्दमन्त्रञ्च प्राप्नोति गुरुवक्त्रतः ॥
शतकर्म्मभोगरूपनिगड़ोच्छेदकारणम् ।
मायाजालोच्छेदकरमाशापाशनिकृन्तनम् ॥
गोलोकमार्गसोपानं निस्तारबीजकारणम् ।
भक्तद्रुरस्वरूपञ्च नित्यं दृढमनश्वरम् ॥
सारञ्च सर्व्वतपसां योगानाञ्च तथैव च ।
विहीनां वेदपाठानां व्रतादीनाञ्च निश्चितम् ॥
दानानां तीर्थस्नानानां यज्ञादीनां पुरन्दर ! ।
जपानामुपवासानामित्याह कमलोद्भवः ॥
पुंसां लक्षं पितृणाञ्च शतं मातामहस्य च ।
पूर्व्वं परञ्च ततसंख्यं पितरं मातरं गुरुम् ॥
सहोदरं कलत्रञ्च बन्धुं शिष्यञ्च किङ्करम् ।
श्वशुरञ्चैव श्वश्रूं श्वश्रूं कन्याञ्च तत्सुतम् ॥
आत्मानञ्च सतीर्थञ्च गुरुपत्नीं गुरोः सुतम् ।
उद्धरेद्बलवान् भक्तो मन्त्रग्रहणमात्रतः ॥
मन्त्रग्रहणमात्रेण जीवन्मुक्तो भवेन्नरः ।
तत्सप्तपूर्व्वपुरुषैः सद्यः पूता वसुन्धरा ॥
अनेकजन्मपर्य्यन्तं दीक्षाहीनो भवेन्नरः ।
तदान्यदेवमन्त्रञ्च लभते पुण्यगौरवात् ॥ * ॥
सप्तलक्षोपदेवानां ज्ञात्वा सेवां स्वकर्म्मतः ।
लभते च स्वर्वेमन्त्रं वाञ्छितः सर्व्वकर्म्मणाम् ॥
जन्मत्रयं भास्करञ्च निसेव्य मानवः शुचिः ।
लभेदृगग्नेश्चमन्त्रञ्च सर्व्वविघ्नहरं परम् ॥
जन्मत्रयं तं निसेव्य निर्विघ्नञ्च भवेन्नरः ।
विघ्नेशस्य प्रसादेन दिव्यज्ञानं लभेन्नरः ॥
तदा ज्ञानप्रदीपेन समालोक्य महामतिः ।
अज्ञानान्धतमो हित्वा महामायां भवेन्नरः ॥
विष्णुमायाञ्च प्रकृतिं दुर्गां दुर्गतिनाशिनीम् ।
सिद्धिदां सिद्धिरूपाञ्च परमां सिद्धयोगिनीम् ॥
वाणीरूपाञ्च पद्माञ्च भद्रां लक्ष्मीप्रियात्मिकाम् ।
गायत्र्यां तां निसेव्य यत्नतः शृणुकं नरः ॥
तत्प्रसादाद्भवेत् ज्ञानी ज्ञानानन्दं ततो भजेत् ।
लक्ष्मज्ञानाधिदेवस्य महाज्ञानं सनातनम् ॥
शिवं शिवस्वरूपस्य शिवदं शिवकारणम् ।
परमानन्दरूपस्य परमानन्ददायिनम् ॥
सुखदं मोक्षदञ्चैव दातारं सर्व्वसम्पदाम् ।
अमरत्वप्रदञ्चैव दीर्घायुष्प्रदं परम् ॥
इन्द्रत्वञ्च मनुत्वञ्च दातुं शक्तश्च लीलया ।
राजेन्द्रत्वप्रदञ्चैव ज्ञानदं हरिभक्तिदम् ॥
जन्मत्रयं समाराध्य चाशुतोषप्रसादतः ।
सर्व्वस्य वरेण्यश्च निर्म्मलं ज्ञानमालभेत् ॥
निर्म्मलज्ञानदीपेन सुप्रदीपेन तत्त्ववित् ।
ब्रह्मादिस्तम्बपर्य्यन्तं सर्व्वं मिथ्यैव पश्यति ॥
दयानिधेः प्रसादेन शङ्करस्य महात्मनः ।
परस्य परमेणैव हरिभक्तिं लभेत् ध्रुवम् ॥
तदा तद्भक्तसंसर्गात् कृष्णमन्त्रं लभेत् ध्रुवम् ।
तदा निर्व्वाणमाप्नोति नारायणं परात्परम् ॥
यत्र देवे कर्म्मजन्मं तत्रैवावधि भारते ।
तत् पापभौतिकं त्यक्त्वा विभर्त्ति दिव्यरूपकम् ॥
करोति दास्यं गोलोके वैकुण्ठे वा हरेः पदे ।
परमानन्दसंयुक्तो मोक्षादिषु विचक्षणः ।

मन्त्रः

न विद्यते पुनर्जन्म पुनरागमनं सुर ! ।
पुनश्च न पिबेत् क्षीरं हित्वा मातृस्तनं परम् ॥
विष्णुमन्त्रोपासकानां गङ्गादितीर्थसेविनाम् ।
स्वधर्म्मिणाञ्च भिक्षूणां पुनर्जन्म न विद्यते ।"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ३३ अध्यायः ।

शिवमन्त्रा यथा,—
"प्रथमं ह्रस्व तन्मन्त्रं ततोऽनुध्यानगोचरम् ।
ततः क्रमन्तु पूजायाः क्रमाद्वित्तं नरर्षभौ ।
समस्तानां स्वराद्यानु दीर्घाः शेषाः सबिन्दुकाः ।
ऋ ऌ क् शून्याः सार्द्धचन्द्रा उपान्ते नाभि-
संहिताः ।
एभिः पञ्चाक्षरैर्मन्त्रः पञ्चवक्त्रस्य कीर्त्तितः ।
क्रमात् सम्मदसन्दोहमादगौरवसंज्ञकाः ॥
प्रासादस्तु भवेत् शेषः पञ्चमन्त्राः प्रकीर्त्तिताः ।
एकैकेन तथैवैकं वक्त्रं मन्त्रेण पूजयेत् ॥
एकं वसुदितं कृत्वा पञ्चभिर्वा प्रपूजयेत् ।
प्रासादेनाथवा पञ्चवक्त्रं देवं प्रपूजयेत् ।
सम्मदादिषु मन्त्रेषु प्रासादस्तु प्रशस्यते ॥
शम्भोः प्रसादनैनैव यस्मादुक्तस्तु मन्त्रकः ।
तेन प्रासादसंज्ञोऽयं कथ्यते मुनिपुङ्गवैः ।
तस्मात् सर्व्वेषु मन्त्रेषु प्रासादः प्रीतिदः प्रभोः ॥
आमोदकारकः शम्भोर्मन्त्रः सम्मद उच्यते ।
मनःप्रपूरकश्चापि सन्दोहः परिकीर्त्तितः ॥
आकर्षको भवेन्मादो गुरुत्वाद्गौरवाह्वयः ।
एतद्गुह्यं समस्तेषु मन्त्रं शम्भोः प्रकीर्त्तितम् ॥
पञ्चाक्षरेषु यन्मन्त्रं पञ्चवक्त्रस्य कीर्त्तितम् ।
युवां तेनैव मन्त्रेण आराधय तमीश्वरम् ।"
इति कालिकापुराणे ५० अध्याये वेताल-
भैरवौ प्रति वशिष्ठवाक्यम् ॥ * ॥
मन्त्रस्य त्रिविधत्वं यथा,—
"वाचिकश्च उपांशुश्च मानसश्च त्रिधा स्मृतः ।
त्रयाणां जपयज्ञानां श्रेयान् स्याद्वुत्तरोत्तरः ॥
यदुच्चनीचस्वरितैः स्पष्टशब्दपदैः ।
मन्त्रोच्चारणयज्ञं तमीषदोष्ठौ प्रचालयन् ।
किञ्चित् शब्दं स्वयं विद्याद्वुपांशुः स जपः स्मृतः ॥
धिया यदक्षरश्रेण्या वर्णात्वर्णं पदात् पदम् ।
शब्दार्थचिन्तनाभ्यासः स उक्तो मानसो जपः ॥
तेन स्वरादिसुयुक्तवर्णोच्चारणजात् वाचिकः ।
स्वयंशब्दग्रहणमात्रयोग्यकिञ्चिच्छब्दवानुपांशुः ॥
जिह्वौष्ठचालनमन्तरेण वर्णानुसन्धात्मको-
मानसः ॥"* ॥
वाचिकोपांशुभेदेनापि निषेधमाह शङ्खः ।
"नोच्चैर्जपं बुधः कुर्य्यात् सावित्र्यास्तु विशेषतः ।"
योगियाज्ञवल्क्यः ।
"न चंक्रमन् न विहसन् न पार्श्वमवलोकयन् ।
नोपाश्रितो न कथंचन न प्राहृतशिरास्तथा ॥
न यदा पादमाक्रम्य न वै बहिः करौ क्षुनौ ।
नैवंविधं जपं कुर्य्यात् न च संध्यावधेरक्षयम् ॥
उत्तिष्ठन् वीक्षमाणोर्कमासीनः प्राङ्मुखो
यतेत् ।
प्राक् कृष्णमेवमासीनो वसानो वाससी शुभे ।"

वृहन्नारदः ।
"यदि स्यात् छिद्रवासा वै दारिद्र्यमुपगो भवेत् ।
कन्यया तु कृतौ भूम्यां दृष्ट्वोपरि समाहितः ।"
व्यासः ।
"कपर्दके च भाले च प्रणवोमादिषु च ।
दक्षेणैवाग्रहस्तेन यद्यालभेत् द्विजोत्तमः ।
अभिशप्तो वसेत् विप्रं योगविघ्नं च कारयेत् ।"
दीक्षितस्वरूपम् ।
"यदि यागव्रतोपः स्यात् जपादिषु कदाचन ।
आचार्येण पुनर्मन्त्रं गृहीत्वा विधिवत्ततः ।"
गौतमः ।
"क्रोधं लोभं भयं निद्रां निष्ठीवनविजृम्भितम् ।
दर्शनं पतितादीनां वर्जयेज्जपकर्मणि ।
आचार्येण समादेशं स्मरेद्विघ्नं सुरार्चितम्।"
बौधायनः ।
"नामेरधस्तं संस्पृश्य कर्मकाले विवर्जयेत् ।"
इत्याह्निकाचारतत्त्वम् ॥ * ॥
मन्त्रशुद्धस्य पुनस्तिथयः.—
"मन्त्रदोषाश्चयत्नेन यत्नात्सन्त्यक्ता: प्रकीर्तिताः ।"
मन्त्रदोषरहितानां दोषो यथा, मत्स्यसूक्ते ।
"अदीक्षितानां मर्त्यानां दोषं शृणु वरानने ! ।
सर्वं विद्यामयं तस्य सर्वं सत्यमयं स्मृतम् ।
सदुःखं तस्य वा वाक्यं सर्वं याति शुभो-
गतिम् ।"
अस्य मन्त्रविशेषनिषेधमाह तत्रैव ।
"प्रणवाद्यं न शातव्यं मन्त्रं गुरुमृते सदा ।
कालमन्त्रं गुरोर्मन्त्रं मन्त्रं चाजपसंज्ञकम् ॥
साध्यप्रणवसंयुक्तं यदि मन्त्रं ददाति सः ।
गुरुः शिष्यमाप्नोति प्राक्तनो यत्प्रयोगतिम् ॥"
मुनिरपि ।
"सावित्रीं प्रणवं यजुर्वर्णां स्त्री शूद्रयोनिगाम् ।
सावित्रीं प्रणवं यजुर्वर्णां स्त्री शूद्रो यदि जानीयात् स तस्योधो गच्छति ।"
विशेषमाह वाराहीये ।
"गोपालस्य मदर्चायो मद्भक्तस्य तु पादतः ।
तत्पत्न्याश्चापि सर्वस्य गणेशस्य मनुस्तथा ।
सर्वा दीक्षाधिकारी स्यादन्यथा पापभाग्-
भवेत् ॥"
मन्त्रदीक्षाप्रशंसा यथा, गोविन्दवृन्दावने ।
"अदीक्षितस्य मरणे प्रेतत्वं न च हीयते ॥"
नरसिंहे ।
"सर्वासामपि दीक्षाणां मुक्तिः फलमवस्थितम्।
अविरोधाद्बलत्वेव प्राप्तिश्चित्यस्तु भक्तयः ॥"
तथा ।
"उपवासकृतक्लेशान्महापातककोटयः ।
क्षणाद्दहति देवेशि ! दीक्षा हि विधिना कृता ॥"
अत्राण्डकूर्ममन्त्रं दीक्षेत ।
"खतारराशिकोष्ठानामनुकूलात् भवेन्मनूः ॥"
वाराहीये ।
"ताराचक्रं राशिचक्रं नामचक्रं तथैव च ।
अत्र चेत् सगुणो मन्त्रो नान्यचक्रं विचारयेत् ॥"
इति प्राधान्यतया बोध्यम् ॥
तथा च ।
"धनिमन्त्रस्तु गृहीयादनुकूलत्वमेव च ।"
इत्यादिदर्शनात्तत्तच्चक्रविचारस्य आवश्यकत्वात् प्रथमं तन्निरूप्यते । सिद्धसारस्वते ।
"तत्र वृत्तिश्चार्कवराहाद्यां प्रासादप्रथवस्य च ।
सप्तिष्टाक्षरमन्त्राणां सिद्धादीन्नैव शोधयेत् ॥
स्वप्नसंज्ञे क्रियादक्षे मालामन्त्रे च चाक्षरे ।
वैदिकेषु च मन्त्रेषु सिद्धादीन्नैव शोधयेत् ॥"
मालामन्त्रस्तु वाराहीये ।
"विंशत्यधिका मन्त्रा मालामन्त्राश्च कीर्तिताः ।
नपुंसकस्य मन्त्रस्य सिद्धादीन्नैव शोधयेत् ।
एकाक्षरस्य मन्त्रस्य मालामन्त्रस्य पार्वति ! ।
वैदिकस्य च मन्त्रस्य सिद्धादीन्नैव शोधयेत् ॥"
तथा वासुदेवतन्त्रे ।
"कालो तारा महाविद्या षोढ़शी भुवनेश्वरी ।
भैरवी छिन्नमस्ता च विद्या धूमावती तथा ॥
बगला सिद्धविद्या च मातङ्गी कमलात्मिका ।
एता दश महाविद्याः सिद्धविद्याः प्रकीर्तिताः ॥
नाच सिद्धादिचक्रादि न नक्षत्रविचारणा ।
कालादिशोधनं नास्ति न चामित्रादिदूषणम् ॥
सिद्धविद्यातया नाच युगसेवापरिश्रमः ।
नास्ति किञ्चिन्महादेवि ! दुःसाध्यं कथञ्चन ॥"
एषिया पूर्वफलप्रदा महाविद्या । यथा, मालिनीविजये ।
"अथ वक्ष्याम्यहं या या महाविद्या मतीतले ।
दोषजालैरसंस्पृष्टास्ता: सर्वा हि फलैः सदृ ॥
काली नीला महादुर्गा त्वरिता छिन्नमस्तका ।
वाग्वादिनी चान्नपूर्णा तथा प्रत्यङ्गिरा पुनः ॥
कामाख्या वासली बाला मातङ्गी शैलवासिनी ।
इत्याद्याः सकला विद्याः कलौ पूर्वफलप्रदाः ॥
सिद्धमन्त्रतया नाच युगसेवापरिश्रमः ।
तथा चैता महाविद्याः कलिदोषान्न बाधिताः ॥"
इत्यादिवचनादेषु विचारो नास्ति । वस्तुतस्तु इदं प्रमादसागरम् । सर्वत्र विचारस्यावश्यकत्वम् । दुरदृष्टवशात् कदाचिदेरिमन्त्रस्य सम्प्राप्तौ प्राप्ता तत्तद्दोषस्य दुरत्यात् । इति तु साम्प्रदायिकाः ॥ * ॥ मन्त्रोद्धारार्थषट्चक्रप्रमाणानि चक्रग्रन्थे द्रष्टव्यानि । तेषां लेखनप्रकारो यथा,

कुलाकुलचक्रम् ।


वायुः	अग्निः	भूमिः	जलम्	आकाशः
य आ	ट ठ	उ ऊ	अ ऋ	ल ळ
र	ऐ	ओ	औ	अं
ल	ग	ग	घ	ङ
व	ट	त	झ	प
ट	ट	न	ढ	र
त	थ	द	ध	न
द	थ	न	म	म
ध	ब	प	य	श
न	ल	ळ	व	ष

वायुः	अग्निः	भूमिः	जलम्	आकाशः


अकथहचक्रम् ।

अ क च ट	उ ढ प	आ य द	ऊ श ष
ओ ढ व	ख झ म	औ ठ ह	ल क्ष य
ई च र	ऋ ञ भ	ए ग ध	ऋ ड द
अः त स	ऐ ट ण	अं ब ह	ङ ट र

चक्रव्यूहचक्रम् ।



राशिचक्रम् ।



नक्षत्रचक्रम् ।

अ आ १ देवः	इ २ मानुषः	ई उ ऊ ३ राक्षसः	ऋ ॠ ऌ ॡ ४ मानुषः	ए ५ देवः	ऐ ६ मानुषः	ओ औ ७ देवः	क ८ देवः	ख ग ९ राक्षसः
घ ङ १० राक्षसः	च ११ मानुषः	छ ज १२ मानुषः	झ ञ १३ देवः	ट ठ १४ राक्षसः	ड १५ देवः	ढ ण १६ राक्षसः	त थ द १७ देवः	ध १८ राक्षसः
न प फ १९ राक्षसः	ब २० मानुषः	भ २१ मानुषः	म २२ देवः	य र २३ राक्षसः	ल २४ राक्षसः	व श २५ मानुषः	ष स ह २६ मानुषः	अं अः क्ष त्र २७ देवः

ऋणिधनिचक्रम् ।

१	१	१	०	३	४	४	०	०	०	३
अ आ	इ ई	उ ऊ	ऋ ॠ	ऌ ॡ	ए	ऐ	ओ	औ	अं	अः
क	ख	ग	घ	ङ	च	छ	ज	झ	ञ	ट
ठ	ड	ढ	ण	त	थ	द	ध	न	प	फ
ब	भ	म	य	र	ल	व	श	ष	स	ह
२	२	५	०	०	२	१	०	१	१	१

देवतामेदे चक्रविचारस्यावश्यकत्वमाह वारा-
हीतन्त्रे यामलादौ च ।
"तारशुद्धिर्वैष्णवानां कोलशुद्धिः शिवस्य च ।
राशिशुद्धिस्त्वेपुरे च गोपालैकड़मः स्मृतः ॥
अकड़मो वामने च गणेशे च तथैव च ।
कोलचक्रं वराहस्य महालक्ष्म्याः कुलाकुलम् ॥
नामादिचक्रे सर्व्वेषां भूतचक्रे तथैव च ।
त्रैपुरं तारचक्रे तु शुद्धमन्त्रं जपेद्बुधः ॥"
तथा ।
"वैष्णवं राशिसंशुद्धं शैवञ्चाकड़मं स्मृतम् ।
कालिकायाश्च तारायास्तारचक्रं शुभावहम् ॥
चण्डिकायास्तारकोष्ठे गोपालैकड़मः स्मृतः ।
हरचक्रे सर्व्वमन्त्रं धनाधिक्ये न चाश्रयेत् ॥
ऋणाधिक्ये शुभं विद्यात् धनाधिक्ये च नो
विधिम् ।
दोषान् संशोध्य गृह्णीयान्मध्यदेशोद्भवस्य च ॥
मन्त्रस्तूक्तो शुभफलोऽप्यशुभो धनी च
तुल्यं यदा समफलः कथितो मुनीन्द्रैः ॥"
अन्यत्रापि ।
"शून्ये स्वल्पमवाप्नोति धने च विफलं भवेत् ।
ऋणे च प्राप्निमाप्नेति सर्व्वसिद्धिस्तु जायते ॥"
अथ मन्त्राणां दश संस्काराः । गौतमीये ।
"जननं जीवनं पश्चात् ताड़नं बोधनन्तथा ।
अथाभिषेको विमलीकरणाप्यायने पुनः ॥
तर्पणं दीपनं गुप्तिर्दशैता मन्त्रसंस्कृयाः ।
स्वर्णादिपात्रे संलिख्य मातृकायन्त्रमुत्तमम् ।
काश्मीरचन्दनेनापि भस्मना वाथ सुव्रत ! ॥
काश्मीरं शक्तिसंस्कारे चन्दनं वैष्णवे मनौ ।
शैवे भस्म समाख्यातं मातृकायन्त्रलेखने ॥
मन्त्राणां मातृकायन्त्राद्दुद्धारो जननं स्मृतम् ।
पंक्तिक्रमेण विधिना मुनिभिस्तच्च निश्चितम् ॥१॥
योमेन्दौ रसनार्णकर्णिकमथो वह्नेः स्फुरत्
केशरं
वर्गोल्लासिवसुच्छदं वसुमतीगेहेन संवेष्टितम् ।
आशाखश्रिशु लान्तलाङ्लियुजा चौर्णीपुरे-
णावृतं
यन्त्रं वर्णतनोः परं निगदितं सौभाग्यसम्पत्-
करम् ॥"
यन्त्रस्य दिक्षु वं विदिक्षु ठं लिखेत् । तथा च
गौतमीये ।
"कादिमान्ताः पञ्चवर्गा दिक्षु पूर्व्वादितो
न्यसेत् ।
यादिवान्ताः प्रादिहान्ता लक्षभीशे प्रविन्यसेत्॥
चतुरस्रं चतुर्द्वारं दिक्षु वं ठं विदिक्षु च ॥"
इति मातृकायन्त्रम् ॥
"प्रणवान्तरितान् कृत्वा मन्त्रवर्णान् जपेत् सुधीः ।
प्रत्येकं शतवारन्तु जीवनन्तदुदाहृतम् ॥ २ ॥
मन्त्रवर्णान् समालिख्य ताड़येच्चन्दनाम्भसा ।
प्रत्येकं वायुबीजेन पूर्व्ववत्ताड़नं मतम् ॥ ३ ॥
विलिख्य मन्त्रवर्णांस्तु प्रसूनैः करवीरजैः ।
तन्मन्त्रवर्णसंख्याकैर्हन्याद्देवेन बोधनम् ॥" ४ ॥
"तत्तन्मन्त्रोक्तविधिना अभिषेकः प्रकीर्त्तितः ।"
तन्त्रान्तरे ।
"मन्त्रस्य चासुकं वर्णमभिषिञ्चामि हृद्गतम् ।"
इति वचनात् प्रत्येकमभिषिञ्चेत् ।
"अश्वत्थपल्लवैः सिञ्चेत् मन्त्री मन्त्रार्णसंख्यया ॥५॥
सञ्चिन्त्य मनसा मन्त्रं सुधामृणाम्बुलमध्यतः ।
ज्योतिर्मन्त्रेण विधिवत् दहेन्मलत्रयं यती ॥
तारं योमाग्निमनुयुक् दण्डी ज्योतिर्मनुर्मतः ॥"
तारं प्रणवः योम हकारः अग्नी रेफः मनु-
रौकारः दण्डी अनुस्वारः ॥ ६ ॥
"स्वर्णेन कुशतोयेन पुष्पतोयेन वा तथा ।
तेन मन्त्रेण विधिवदाप्यायनविधिः स्मृतः ॥७॥
मन्त्रेण वारिणा मन्त्रं तर्पणं तर्पणं मतम् ।
मधुना शक्तिमन्त्रेषु वैष्णवे चेन्दुमञ्जले ॥
शैवे घृतेन दुग्धेन तर्पणं सम्यगीरितम् ॥"
अभिषेकेऽपि तथा ॥ ८ ॥
"तारमायारमायोगो मनोर्दीपनमुच्यते ॥ ९ ॥
जप्यमानस्य मन्त्रस्य गोपनं त्वप्रकाशनम् ॥१०॥
संस्कारा दश संप्रोक्ताः सर्व्वतन्त्रेषु गोपिताः ।
यान् कृत्वा सम्प्रदायेन मन्त्री वाञ्छितमाप्नु-
यात् ।"
मलत्रयमिति आनयं मायिकं कार्म्मणञ्च ।
प्रपञ्चसारे ।
"मायिकं नाम योगोत्थं पौरुषं कार्म्मणं मलम् ।
आनयं तद्द्वयं प्रोक्तं निषिद्धं तन्मलत्रयम् ॥"
न नवं अनवं तस्य भावः आनयं दृढ़त्वमित्यर्थः ।
तारमायारमायोग इति । तारमायारमा-
बीजपुटितम् मन्त्रमष्टोत्तरशतं जपेत् इत्यर्थः ।
तथा च विश्वसारे ।
"तारमायारमाबीजपुटितेन मनुं जपेत् ।
शतमष्टोत्तरञ्चैव दीपयेत् साधकोत्तमः ॥" * ॥
अथ दुर्गामन्त्रः ।
"अथ दुर्गामनुं वक्ष्ये दृष्टादृष्टफलप्रदम् ।
मायान्द्रिः कर्णविन्द्वाढ्यो भूयोऽसौ सर्गवान्
भवेत् ॥
पञ्चान्तकः प्रतिष्ठावान् मारुतो भौतिकासनः ।
तारादिहृदयान्तोऽयं मन्त्रो वसुचरात्मकः ॥"
अद्रिर्दकारः । कर्ण उकारः । पञ्चान्तको
गकारः । प्रतिष्ठा आकारः । मारुतो यकारः ।
भौतिक ऐकारः । ॐ ह्रीं दुं दुर्गायै नमः ॥*॥
अथ विष्णुमन्त्रः ।
"तारं नमःपदं ब्रूयात् नरौ दीर्घसमन्वितौ ।
पवनो णायमन्तोऽयं प्रोक्तो वसुचरः परः ॥"
ॐ नमो नारायणाय ॥*॥ अथ शिवमन्त्रः ।
"सान्तमौकारसंयुक्तं विन्दुभूषितमस्तकम् ।
प्रासादाख्यो मनुः प्रोक्तो भजतां कामदो मनुः॥"
हौं ॥ * ॥ अथ गणेशमन्त्रः ।
"पञ्चान्तकं शशिधरं बीजं गणपतेर्विदुः ॥"
पञ्चान्तको गकारः । गँ ॥*॥ अथ सूर्य्यमन्त्रः ।
"तारो हृषिर्भृगुः पञ्चादामकर्णविभूषितः ।
वह्निस्थानो मरुत्प्रेयः सनेत्रोऽन्त्यस्थपश्चिमः ॥
अष्टाक्षरो मनुः प्रोक्तो भानोरभिमतः परः ॥"
ॐ घृणि सूर्य्य आदित्य ॥ * ॥

पञ्चदेवतानामेक एको मन्त्रो लिखितः ।
एतासामन्यासाद्यान्यमन्त्रा ग्रन्थविस्तारभयान्न
लिखिताः ॥ कलावागमोक्तमन्त्रजपविधि-
र्यथा,—
"आगमोक्तविधानेन कलौ मन्त्रं जपेत् सुधीः ।
नहि देवाः प्रसीदन्ति कलौ चान्यविधानतः ॥"
तथा ।
"कृते श्रुत्युक्तमार्गः स्यात् त्रेतायां स्मृतिसम्भवः ।
द्वापरे तु पुराणोक्तः कलावागमसम्भवः ॥
मन्त्राणां देवताः प्रोक्ता देवता गुरुरूपिणी ।
तेषां भिदा न कर्त्तव्या यदीच्छेच्छुभमात्मनः ॥"
पित्रादिनो मन्त्रग्रहणनिषेधो यथा,—
"पितुर्मन्त्रं न गृह्णीयात् तथा मातामहस्य च ।
सोदरस्य कनिष्ठस्य वैरिपक्षाश्रितस्य च ॥
न पत्नीं दीक्षयेद्भर्त्ता न पिता दीक्षयेत् सुताम् ।
न पुत्रञ्च तथा भ्राता भ्रातरं न च दीक्षयेत् ॥
सिद्धमन्त्रो यदि पतिस्तदा पत्नीं स दीक्षयेत् ।
शक्तित्वेन वरारोहे ! न च सा कन्यका भवेत् ॥"
तथा गणेशविमर्षिण्याम् ।
"यतेर्दीक्षा पितुर्दीक्षा दीक्षा च वनवासिनः ।
विविक्ताश्रमिणां दीक्षा न सा कल्याण-
दायिका ॥"
इत्यादिनिषेधवचनादेभ्यो मन्त्रं न गृह्णीयादि-
त्यर्थः । इति तन्त्रसारः ॥ (ज्वरादिनाशक-
मन्त्रो यथा,—
"वानराकृतिमालिख्य खटिकाभिः पुनः शुभे ।
गन्धपुष्पाक्षतैर्धूपैरर्च्चयेच्छिखिजां वरः ॥
मन्त्रः ।
ॐ ह्रां ह्रीं श्रीं सुग्रीवाय महाबलपराक्रमाय
सूर्य्यपुत्राय अमिततेजसे ऐकाहिक-द्व्याहिक-
त्र्याहिक-चातुर्थिक-महाज्वर-भूतज्वर-भय-
ज्वर-शोकज्वर-क्रोधज्वर-वेलाज्वर-प्रभृति-
ज्वराणां दह दह हन हन पच पच अवतर
अवतर किलिकिलि वानरराजज्वराणां बन्ध
बन्ध ह्रां ह्रीं ह्रूं फट् स्वाहा ।" इति हारीते
चिकित्सितस्थाने द्वितीयेऽध्याये ॥)

मन्त्रकृत्, पुं, (मन्त्रं कृतवान् । मन्त्र + कृ + क्विप् । तुगागमश्च ।) मन्त्री । मन्त्रणाकारकः ।
इति सिद्धान्तकौमुदी ॥ (दैत्यकारी । यथा,
श्रीमद्भागवते । ३ । १ । २ ।
"यदा अयं मन्त्रकृद्वो भगवानखिलेश्वरः ।
पौरवेन्द्रगृहं हित्वा प्रविवेशात्मसातकृतम् ॥"
"मन्त्रकृत् दैत्यकर्म्मा सन् ।" इति तट्टीकायां
श्रीधरस्वामी ॥*॥ त्रि, मन्त्रप्रयोगकारी । यथा,
रघुवंशे । १ । ६१ ।
"तव मन्त्रकृतो मन्त्रैर्दूरात् प्रशमितारिभिः ।
प्रत्यादिश्यन्त इव मे दृष्टलक्ष्यभिदः शराः ॥"
"मन्त्रकृतः मन्त्राणां स्रष्टुः प्रयोक्तुर्वा ।" इति
तट्टीकायां मल्लिनाथः ॥)

मन्त्रगण्डकः, पुं, (मन्त्रप्रधानो गण्डकः मध्य-
पदलोपी कर्म्मधारयः ।) विद्या । इति हारा-
वली । १६६ ॥

मन्त्रणा

मन्त्रगूढः, पुं, (मन्त्रे मन्त्रणाविषये गूढः गुप्तः।) चरः। इति शब्दरत्नावली॥

मन्त्रगृहं, क्ली, (मन्त्रस्य मन्त्रणायाः गृहम्।) मन्त्रणागारम्। (यथा, महाभारते। १५। ५। २२।

"तसंवृत्तं मन्त्रगृहं स्थलं चारुल्य मन्त्रये:।
अरण्ये निःशूलाके वा न च रात्रौ कथञ्चन॥")

मन्त्रज्ञा, स्त्री, (मन्त्रात् जायते इति। मन्त्र+जन्+डः। टाप्।) मन्त्रशक्तिः। इति पुराणम्॥

मन्त्रजिह्वः, पुं, (मन्त्र एव जिह्वा यस्य।) अग्निः। इति हेमचन्द्रः। १।१६५॥ (यथा, माघः। २।१०।

"अन्तर्तं नाम यत् सन्तो मन्त्रजिह्वेषु जुह्वति।
श्रीभेव मन्दरक्षुभ्यक्षुभितामोघिवर्त्तना॥")

मन्त्रज्ञः, पुं, (मन्त्रं जानातीति। मन्त्र+ज्ञा+कः।) चरः। इति हलायुधः॥ मन्त्रज्ञातरि, त्रि। (यथा, मनुसंहितायाम्। ८। ४।

"व्यवहारान् दिदृक्षुस्तु ब्राह्मणैः सह पार्थिवः।
मन्त्रज्ञैर्मन्त्रिभिश्चैव विनीतः प्रविशेत् सभाम्॥")

मन्त्रणं, क्ली, (मन्त्र+ल्युट्।) मन्त्रणा। मन्त्र-धातोर्भावे अनट्प्रत्ययेन. निष्पन्नम्॥ (यथा, मार्कण्डेयपुराणे। ५०। ८७।

"अवस्करे मन्त्रणञ्च यच्चैतदुपकल्पितम्॥")

मन्त्रणा, स्त्री, (मन्त्र+भावे युच्। टाप्।) रहसि कर्त्तव्यावधारणम्। इति मन्त्रशब्द-टीकायां भरतः॥ मन्त्रः। यथा,—

"वादी मूकति रङ्कति क्षितिपतिर्वैश्वानरः शीतति
क्रोधी शाम्यति दुर्जनः सुजनति क्षिप्रागुगः खञ्जति।
गर्व्वो खर्व्वति सर्व्वविच्च जड़ति त्वन्मन्त्रणा-यन्त्रितः
श्रीनित्ये बगलामुखि! प्रतिदिनं कल्याणि तुभ्यं नमः॥"

इति तन्त्रसारे बगलामुखीक्रमः॥ ९॥

मन्त्रणायां वर्जनीयानि यथा,—

"मन्त्रे पञ्चाङ्गताशक्तिर्यादृग्योपायसिद्धयः।
उदयाधिगतीयाश्च मैत्र्यभिन्नादिसिद्धयः॥"

इति कविकल्पलता॥ ९॥

मन्त्रिणश्चाधिकमन्त्रणायां दोषो यथा,—

"षट्कर्णो भिद्यते मन्त्रश्चतुष्कर्णश्च धार्य्यते।
द्विष्कर्णस्य तु मन्त्रस्य ब्रह्माप्येको न बुध्यते॥"

इति गारुड़े २१९ अध्यायः॥

मन्त्रणा विद्यादिगुणयुक्तैः मन्त्रिभिः कार्य्या। यथा,—

"मन्त्रिणस्तु दृढ़ान् दृष्ट्वान् विप्रान् विद्याविशारदान्।
विदुषश्च कुलीनांश्च धर्म्मार्थकुशलान्शुचीन्॥
मन्त्रयेत् सह तैर्नित्यं मन्त्रं तु विनिश्चयम्।
तैश्चैव समयेच्चैव राज्यस्य सपरिग्रहः।
स्वयं दृष्ट्वा मन्त्रयेत् मन्त्रं मन्त्रयेत्॥

अरण्ये निःशूलाके वा न यामिन्यां कदाचन।
स्त्रिभ्यून् शाखाशृगान् पक्षान् शुकान् वैश्वा-रिकांस्तथा॥
वर्जयेन्मन्त्रगेहेषु मनुष्यानुद्धतांस्तथा।
दूषणं मन्त्रभेदेषु नृपाणां यत्र जायते॥
न तत् सम्यक् समाधातुं दक्षैर्नृपगुरोरपि॥"

इति कालिकापुराणे ८५ अध्यायः॥

अथ मन्त्रनिर्णयः।

"मन्त्रमूलं यतो राज्यं ततो मन्त्रं सुरक्षितम्।
कुर्य्याद्राजा सदा मन्त्रान् कर्म्मणामाफलोदयात्॥
अर्थानर्थौ हि यत्नोभौ संशृणुश्च परीक्षते।
स मन्त्र इति विज्ञेयः श्रेषाच्च खलु विभ्रमः॥
एकमेव विषं हन्ति मूढ़ञ्चैवैकञ्च वर्द्धते।
सराष्ट्रं सप्रदं हन्ति राजानं मन्त्रविप्लवः॥
करिष्यन् न प्रभाषेत कृतान्येव तु दर्शयेत्।
धर्म्मार्थकामकार्य्याणि कृतो मन्त्रो न भिद्यते॥
गिरिपृष्ठमुपारुह्य प्रासादं वा रहोगतः।
अपार्थे निःशूलाके वा तत्र मन्त्रो विधीयते॥
तत्र साम प्रयोक्तव्यं कार्य्येषु गुरुवत्स्वपि।
दानं तुल्येऽपि भेदश्च दण्डितेष्वपि निश्चयः॥
जड़मूकान्धबधिरान् तिर्य्यग्योनीन् वयोऽधिकान्।
स्त्रीम्लेच्छव्याधितव्यङ्गान् मन्त्रकाले निषेधयेत्॥
इति सम्यतः प्रोक्तो राजनीतिरियं मया॥
यच्चिरगोचिरुद्धं स्याद्राजनीतिस्तदुच्यते॥"

इति युक्तिकल्पतरौ नीतियुक्तिः॥

मन्त्रतः, [स्] अ, (मन्त्रादिति। मन्त्र+"पञ्चम्यास्तसिल्।" ५।३।७। इति पञ्चमी-स्थाने तसिल्।) मन्त्रात्। इति सिद्धान्त-कौमुदी॥

मन्त्रदः, पुं, (मन्त्रं ददातीति। मन्त्र+दा+कः।) शिष्यकर्णे तदिष्टदेवमन्त्रप्रदानकर्त्ता। मन्त्र-दाता गुरुः। यथा,—

"परापरगुरूणाञ्च निर्णयं शृणु पार्व्वति!।
आदौ सर्व्वत्र देवेशि! मन्त्रदः परमो गुरुः।
परापरगुरुत्वं हि परमेष्ठी त्वहं गुरुः।"

इति दक्षिणामूर्त्तिसंहितायां २ पटलः॥

तत्पितृप्रभृतीनामपि परमगुरुत्वादिर्यथा,—

"मानवस्य महेशानि! कर्णेपाशिगदामि ते।
गुरुः परमगुरुश्चैव परापरगुरुस्तथा।
स्वगुरुः परमेशानि! साक्षाद्ब्रह्म न संशयः॥
तत्पिता परमगुरुः स्वयं विष्णुः शिवो सदा।
तत्पिता परापरगुरुर्ब्रह्मेश्वरसमः सदा॥"

इति श्रीकालीतन्त्रोक्तदक्षिणमूर्त्तिसंहितायां गुरु-तत्त्वम्॥

मन्त्रदाता, [तृ] पुं, (मन्त्रं ददातीति। मन्त्र+दा+तृच्।) मन्त्रदानकर्त्ता। गुरुः। यथा,—

"सर्व्वेषाञ्च गुरूणाञ्च जन्मदाता परो गुरुः।
पितुः शतगुणैर्मान्या पूज्या वन्द्या गरीयसी॥
विद्यादाता मन्त्रदाता प्राणदो भयभिद्वरः।
पूज्यो यथा च श्वशुर एवं मातुः शतगुणैर्गुरुः॥
मन्त्रसारोद्धारेण गुरुरिमुच्यते बुधैः।

मन्त्रदा

अन्यो वन्द्यो गुरुरयमन्यश्चारोपितो गुरुः॥
अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः॥
अदीक्षितस्य मूर्खस्य निष्कृतिर्नास्ति निश्चितम्।
सर्व्वकर्म्मक्षमार्हस्य नरके तत्पशोः स्थितिः॥
जन्मदाताऽन्नदाता वा माताऽन्ये गुरवस्तथा।
पारं कर्त्तुं न शक्तास्ते घोरे संसारसागरे॥
विद्यामन्त्रज्ञानदाता निपुणः पारकर्म्मणि।
न शक्तः शिष्यसुहृत्तुंभीश्वरेश्वरोऽपरः॥
गुरुर्विष्णुर्गुरुर्ब्रह्मा गुरुर्देवो महेश्वरः।
गुरुर्धर्म्मो गुरुः श्रेष्ठः सर्व्वात्मा निर्गुणो गुरुः॥
सर्व्वतीर्थाश्रमश्चैव सर्व्वदेवाश्रयो गुरुः।
सर्व्ववेदस्वरूपश्च गुरुरूपी हरिः स्वयम्॥
अभीष्टदेवे रुष्टे च गुरुः शक्तो हि रक्षितुम्।
गुरौ रुष्टेऽभीष्टदेवो नहि शक्तश्च रक्षितुम्॥
सर्व्वे ग्रहाश्च यं रुष्टा यं रुष्टा देवब्राह्मणाः।
तमेव रुष्टो भवति गुरुरेव हि देवतः॥
न गुरोश्च प्रियश्चात्मा न गुरोश्च प्रियः सुतः।
धनं प्रियं न च गुरोर्न च भार्य्या प्रिया तथा॥
न गुरोश्च परो धर्म्मो न गुरोश्च परन्तपः।
न गुरोश्च परं सत्यं न पुण्यञ्च गुरोः परम्॥
गुरोः परो न त्राता च नहि बन्धुर्गुरोः परः।
देवो राजा च त्राता च शिष्यायाश्च सदा गुरुः॥
यावत् शक्तो दातुमन्नं तावत् त्राता तदम्बदः।
गुरुः त्राता च शिष्यायां प्रति जन्मनि जन्मनि॥
मन्त्रो विद्यागुरुर्देवः सर्व्वत्रत्रो यथा पतिः।
प्रतिजन्मनिबन्धेन सर्व्वेषामुपरि स्थितः॥
पिता गुरुश्च बन्धश्च यत्र जन्मनि जन्मदः।
गुरुर्बोध्ये तथा माता गुरुश्च प्रतिजन्मनि।"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ग्रथीकृतगुरु-स्तोत्रकथनं नाम ५६ अध्यायः॥ अपि च।

"मान्यः पूज्यश्च सर्व्वेभ्यः सर्व्वेषां जनको भवेत्।
यद्दो यस्य प्रसादेन सर्व्वान् पश्यति मानवः॥
जनको जन्मदाता च रक्षणाच्च पिता पृणाम्।
ततो विस्तीर्णकरणात् कलया स प्रजापतिः॥
पितुः शतगुणैर्मान्या गोपणाद्गर्भधारणात्।
वन्द्या पूज्या च मान्या च प्रकृरूपा वसुन्धरा॥
मातुः शतगुणैर्वन्द्यः पूज्यो मान्योऽन्नदायकः।
यद्दिना नश्वरो देहो विष्णुश्च कलयान्नदः॥
अन्नदातुः शतगुणोऽभीष्टदेवः परः स्मृतः।
गुरुस्तस्माच्छतगुणो विद्यामन्त्रप्रदायकः॥
अज्ञानतिमिराच्छन्नं ज्ञानदीपेन चक्षुषा।
यः सर्व्वार्थं दर्शयति तत्परः कोऽपि बान्धवः॥
गुरुदत्तेन मन्त्रेण तपसेष्टसखं लभेत्।
सर्व्वज्ञत्वं सर्व्वसिद्धिं तत्परः कोऽपि बान्धवः॥
सर्व्वं जयति सर्व्वत्र विद्यया गुरुदत्तया।
तस्मात् पूज्यो हि जगति को वा बन्धुस्ततोऽधिकः॥
विद्वान्वो वा धनाढ्यो वा यो मूढ़ो न भजेद्-गुरुम्।
ब्रह्मक्षत्रादिभिः शापैः स शिष्यो नात्र संशयः।

हरिद्रं पतितं क्षुद्रं नर-ब्रह्माचरेत्तुरुम् ।
सोऽशुचिस्तीर्थस्नातोऽपि नाधिकारी च कर्म्मसु॥
पितरं मातरं भार्य्यां गुरुपत्नीं गुरुं परम् ।
यो न पुष्णाति कापथ्यात् स महापातकी शिव ! ॥
गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वरः ।
गुरुरेव परं ब्रह्म गुरुर्भास्करस्रूपधृक् ॥
गुरुश्चन्द्रस्तथेन्द्रश्च वायुश्च वरुणोऽनलः ।
सर्व्वरूपो हि भगवान् परमात्मा स्वयं गुरुः ॥
नास्ति वेदात् परं शास्त्रं नहि ज्ञानात् परः सुरः ।
नास्ति गङ्गासमं तीर्थं न पुष्पं तुलसीपरम् ॥
नास्ति क्षमावती भूमेः पुत्रान्नास्ति परः प्रियः ।
न च देवात् परा भक्तिर्व्रतं नैकादशीं विना ॥
ग्रामग्रामात्परो यन्तो न क्षेत्रं भारतात् परम् ।
परं पुण्यस्थलानाञ्च पुण्यं वृन्दावनं यथा ॥
मोक्षदानां यथा काशी वेद्यानां यथा शिवः ।
न पार्व्वतीपरा साध्वी न गणेशात् परो वशी ॥
न च विद्यासमो बन्धुर्नास्ति कश्चिद्गुरोः परः ।
विद्यादातुः पुत्रदारौ तत्समौ नात्र संशयः ॥"
इति ब्रह्मवैवर्त्तपुराणे गणपतिखण्डे ४४ अध्यायः ॥

मन्त्रदीधितिः, पुं, (मन्त्रेण दीधितिर्दीप्तिर्यस्य ।) वह्निः । इति त्रिकाण्डशेषः ॥

मन्त्रपूतः, त्रि, (मन्त्रेण पूतः ।) मन्त्रेण पवित्रीकृतः । यथा, मार्कण्डेयपुराणे देवीमाहात्म्ये । ८६ । ३६ ।
"ब्रह्माणीमन्त्रपूतेन तोयेनान्ये निराकृताः ॥"

मन्त्रपूतात्मा, [न्] पुं, (मन्त्रेण पूतः आत्मा यस्य ।) गरुड़ः । इति धरणिः ॥

मन्त्रवित्, [द्] (पुं, मन्त्रं षष्ठाङ्गमन्त्रणं वेत्तीति । विद् + क्विप् ।) चरः । इति हेमचन्द्रः । ३ । ३६७ ॥ (यथा, महाभारते । ५ । १६३ । ५ ।
"एतत् श्रुत्वा द्रुपदो यज्ञसेनः
सर्व्वं तत्त्वं मन्त्रविद्भ्यो निवेद्य ।
मन्त्रं राजा मन्त्रयामास राजन् :
यथायुक्तं रक्षणे वै प्रजानाम् ॥")
मन्त्रज्ञातरि, त्रि ॥ (यथा, छान्दोग्योपनिषदि । ७ । १ । ३ ।
"सोऽहं भगवतो मन्त्रविदेवास्मि ॥"
मन्त्रं वेदार्थं वेत्तीति । विद् + क्विप् । वेदार्थवित् । यथा, मनौ । ३ । १३१ ।
"सहस्रं हि सहस्राणामनृचां यत्र भुञ्जते ।
एकस्तान् मन्त्रवित् प्रीतः सर्व्वानर्हति धर्मतः ॥")

मन्त्रस्रुक्, [ग्] त्रि, (मन्त्रेण स्रृणतीति । "स्रृणोऽनुदके क्विन् ।" ३ । २ । ५८ । इति क्विन् ।) मन्त्रकरणकस्रग्कर्त्ता । इति सिद्धान्तकौमुदी ॥

मन्त्रितः, त्रि, मन्त्रेण संस्कृतः । अभिमन्त्रितः । मन्त्रोऽस्य जातः । इति मन्त्रिधातोः क्तप्रत्ययेन मन्त्रशब्दात् इतप्रत्ययेन च निष्पन्नः ॥ (यथा, निषधे ।
"शिष्यं स्वलङ्कृतं वेद्यासुपाग्निमुपवेशयेत् ।
मन्त्रितं प्रोक्षणीतोयैः प्राक्तिदुग्मजलैस्तथा ।
मूलमन्त्रेणाष्टशतं मन्त्रितैरभिषेचयेत् ॥")

मन्त्री, [न्] पुं, (मन्त्रो गुप्तभाषणमस्यास्ति । मन्त्र + इनिः । यद्वा, मन्त्रयते इति । मन्त्र + "नन्दिग्रहीति ।" ३ । १ । १३४ । इति णिनिः ।) मन्त्रजातकर्त्तव्यनिश्चयकर्त्ता । तत्पर्य्यायः । धीसचिवः २ अमात्यः ३ । इत्यमरः । २ । ८ । ४ ॥ सचिवः ४ धीसखः ५ सामयायिकः ६ । इति हेमचन्द्रः । ३ । ३८३ ॥ तस्य लक्षणं यथा,—
"मन्त्री भक्तः शुचिः शूरोऽनुनतो बुद्धिमान् क्षमी ।
व्यावीक्षिक्यादिकुशलः परिच्छेदी सुदेशजः ॥"
इति कविकल्पलता ॥
"बहुभिर्म्मन्त्रयेत् कामं राजा मन्त्रं पृथक् पृथक् ।
मन्त्रिणामपि नो कुर्य्यान्मन्त्री मन्त्रप्रकाशनम् ॥
न क्वचित् कस्य विश्वासो भवतीह सदा नृणाम् ।
निश्चयश्च सदा मन्त्रे कार्य्य एकेन सूरिणा ॥
भवेद्धि निश्चयाद्वाप्तिः परब्रह्मानुजीवनात् ।
एकस्यैव महीभर्त्तुर्भूयः कार्य्यो विनिश्चयः ॥"
इति मत्स्यपुराणे १८६ अध्यायः ॥

मन्थ, कुत्सने । गाहे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) मन्थति । कुत्सयति केचिन्न मन्यते । इति दुर्गादासः ॥

मन्थ, ग गाहे । इति कविकल्पद्रुमः ॥ (क्रया०-पर०-सक०-सेट् ।) गाहो विलोड़नम् । ग, मथाति दधि वल्लवी । रथं ममन्थ सहयम् । इति दुर्गादासः ॥

मन्थः, पुं, (मथ्यतेऽनेन । मन्थ + करणे घञ् ।) मन्थदण्डकः । इत्यमरः । २ । ६ । ७४ ॥ (यथा, महाभारते । १२ । ३४३ । ११ ।
"आमथ्य मतिमन्थेन ज्ञानोदधिमनुत्तमम् ।
नवनीतं तथा दध्नो मलयाच्चन्दनं यथा ॥"
मथ्यते विलोड्यते इति । मन्थ + कर्म्मणि घञ् ।) साक्तवः । (मथ्नाति स्वकरेण त्रिभुवनं पीड़यतीति । मन्थ + अच् ।) दिवाकरः । इति मेदिनी । थे, ११ ॥ साक्तवो यथा,—
"सक्तुभिः सर्पिषाभ्यक्तैः प्रीतवारिपरिप्लुतैः ।
नात्यच्छो नातिसान्द्रश्च मन्थ इत्यभिधीयते ॥"
इति राजनिर्घण्टः ॥
पेयविशेषः । तस्य विधिर्यथा,—
"जले चतुर्गुणे प्रीते चूर्णं द्रव्यं पलं क्षिपेत् ।
क्षुत्पात्रे मन्थयेत् सम्यक् तस्माच्च द्विपलं पिबेत् ॥"
चूर्णं चूर्णीकृतम् । मन्थयेत् मृद्नीयात् । इति भावप्रकाशः ॥ (मन्थ + भावे घञ् ।) मारणम् । इति त्रिकाण्डशेषः ॥ नेत्रमलम् । इति धरणिः ॥ नेत्रामयः । इति विश्वः ॥ अंशुः । इति शब्दरत्नावली ॥ क्षुब्धनम् । विलोड़नम् । इति मन्थधात्वर्थदर्शनात् ॥ (यथा, रघौ । १० । ३ ।
"अतिष्ठत् प्रत्ययापेक्षस्तस्मिन् न चिरं नृपः ।
प्राक्षुब्धादनभिव्यक्तरत्नोत्पत्तिरिवार्णवः ॥")

मन्थजं, क्ली, (मन्थेन मन्थनेन जायते इति । जन् + डः ।) नवनीतम् । इति रत्नमाला ॥ (विस्तरोऽस्य नवनीतशब्दे ज्ञातव्यम् ॥)

मन्थदण्डकः, पुं, (मन्थाय मन्थनाय यो दण्डः । ततः स्वार्थे कन् ।) मन्थानदण्डः । छाँचुनी इति घोलमौनी इति खड़ेन् इति च भाषा ॥ तत्पर्य्यायः । वैशाखः २ मन्थः ३ मन्थानः ४ मन्थाः ५ । इत्यमरः । २ । ६ । ७४ ॥ करहर्षकः ६ मन्थनः ७ भक्ताटः ८ । इति शब्दरत्नावली ॥ तक्राटः ६ । इति जटाधरः ॥

मन्थनं, क्ली, (मन्थ + ल्युट् ।) विलोड़नम् । क्षुब्धनम् । इति मन्थधातोर्भावे अनट्प्रत्ययेन निष्पन्नम् ॥ (यथा, महाभारते । १ । १८ । ३० ।
"चिरारब्धमिदं स्थाप्यं सागरस्यापि मन्थनम् ॥")

मन्थनः, पुं, (मथ्नात्यनेनेति । मन्थ + करणे ल्युट् । यद्वा, मथ्नातीति । मन्थ + ल्युः ।) मन्थानदण्डः । इति शब्दरत्नावली ॥ (यथा, हरिवंशे । ८२ । ३६ ।
"गोभिश्च समकीर्णासु व्रजनिर्य्याणभूमिषु ।
मन्थनावर्त्तपूर्णेषु गर्गरेषु नदत्सु च ॥")

मन्थनघटी, स्त्री, (अल्पो घटः । अल्पार्थे ङीष् । मन्थनार्था मन्थनस्य वा घटी ।) दधिमन्थनपात्रम् । यथा,—
"कलसी मन्थनघटी मन्थनी चापि गर्गरी ॥"
इति जटाधरः ॥

मन्थरं, क्ली, (मन्थति क्लेशयतीति । मन्थ + बाहुलकात् अरन् ।) कुसुम्भी । इति मेदिनी । रे, १६८ ॥

मन्थरः, पुं, (मन्थ + बाहुलकात् अरन् ।) कोषः ॥ फलम् । बाधः । मन्थानः । इति मेदिनी । रे, १६८ ॥ खुचकः । इति विश्वः ॥ मन्दगामियोद्धा । इति क्षत्रियवर्गे अमरः । २ । ८ । ७२ । कोषः । इत्यजयः ॥

मन्थरः, त्रि, (मन्थति पादाविति । मथि + अरन् ।) मन्दः । (यथा, साहित्यदर्पणे । ३ । ६८
"दत्ते बालसमन्थरं भुवि पदं निर्याति गान्तःपुरात् ॥")
पृथुः । वक्रः । इति मेदिनी । रे, १६८ ॥ (निश्चलः । यथा, आर्य्यासप्तशत्याम् । ४८८ ।
"राज्याभिषेकसलिलक्षालितमौलेः कपालस्य ।
गर्वभरमन्थराक्षी पश्यति पदपङ्कजं राधा ॥")
जड़ः । इति शब्दरत्नावली ॥ नीचः । इति हेमचन्द्रः । ६ । ६५ ॥ (मन्दगामी । इति हेमचन्द्रः । ३ । १५६ ॥)

मन्थरा, स्त्री, (मन्थर + स्त्रियां टाप् ।) कैकेय्या दासी । यथा,—
"रामाभिषेके विघ्नार्थं यतस्व ब्रह्मवाक्यतः ।
मन्थरां प्रविशस्वादौ कैकेयीञ्च ततः परम् ॥"
इत्यध्यात्मरामायणे अयोध्याकाण्डे २ अध्यायः ॥

मन्थरुः, पुं, (मन्थ + बाहुलकात् उरुः ।) चामरवातः । तत्पर्य्यायः । कुटेरुः २ । इति त्रिकाण्डशेषः ॥

मन्दः

मन्थशैलः, पुं. (मन्थाय समुद्रमन्थनाय कल्पितः शैलः ।) मन्दरपर्व्वतः । इति चटाधरः ॥

मन्था, स्त्री, (मथ्यते इति । मन्थ + घञ् । ततः स्त्रियां टाप् ।) मेथिका । इति राजनिर्घण्टः ॥ (यथा, भावप्रकाशे पूर्व्वखण्डे ।

"वल्ली चन्द्रिका मन्था मिश्रपुष्पा च केरली ॥")

मन्थाः, [थिन्] पुं, (मन्थ + "मन्थः ।" उणा० ४ । ११ । इति इनिः । स च किन् ।) मन्थानदण्डः । इत्यमरः । २ । ६ । ७४ ॥ (यथा, किरातार्জ্জुनीये । ४ । २६ ।

"मुहुः प्रगुह्येषु मथां विवर्त्तने-
नेदृक्तु कुम्भेषु स्तदङ्गमन्थरम् ॥")

मन्थानः, पुं, (मथ्यते अनेनेति । मन्थ + बाहुलकात् थानच् ।) मन्थदण्डकः । इत्यमरः । २ । ६ । ७४ ॥ (यथा, देवीभागवते । १ । २० । २५ ।

"मन्थानारणिसंयोगान्मन्थनाच्च समुद्भवः ।
पावकस्य यथा तद्वत् कर्म्म मे स्यात् सतोद्भवः ॥")

ज्ञानमथः ॥ इति राजनिर्घण्टः ॥ (समुद्रमन्थनदण्डकत्वादस्य तथात्वम् । मन्दरपर्व्वतः । यथा, रामायणे । १ । ४५ । २७ ।

"प्रविवेशाथ पातालं मन्थानः पर्व्वतोत्तमः ॥" महादेवः । यथा, महाभारते । १३ । १७ । १२८ ।

"मन्थानो बहुलो वायुः सकलः सत्रलोचनः ॥")

मन्थानकः, पुं, (मन्थान इवेति । "इवे प्रतिकृतौ ।" ५ । ३ । ९६ । इति कन् ।) लवणभेदः । तत्पर्य्यायः । हरितः २ दृढमूलः ३ लवणाढ्यः ४ । अस्य गुणाः । स्निग्धत्वम् । दीप्तीनां प्रियत्वम् । मधुरत्वम् । बहुवीर्य्यत्वञ्च । इति राजनिर्घण्टः ॥

मन्थिनी, स्त्री, (मन्थो मन्थनमस्त्यस्याम् । मन्थ + इनिः । ङीप् ।) दधिमन्थनपात्रम् । तत्पर्य्यायः । गर्गरी २ कलसी ३ । इति हेमचन्द्रः । ४ । ८८ ॥

मन्थोदधिः, पुं, (मथ्यतेऽसौ । मन्थ + कर्म्मणि घञ् । मन्थश्चासौ उदधिश्चेति । मन्थाय उदधिरिति वा ।) क्षीरसमुद्रः । इति केचित् ॥

मन्दः, पुं, (मन्दते इति । मदि + अच् ।) शनिः । (यथा, ज्योतिषे ।

'शुक्रेज्यबुधचौराणां वाराः सर्व्वत्र शोभनाः ।
भानुभूसुतमन्दानां शुभकर्म्मसु केष्वपि ॥")

पक्षिजातिविशेषः । इति मेदिनी । दे, १३ ॥ यमः । इति त्रिकाण्डशेषः ॥ (यथा, कथासरित्सागरे । ९२ । १५५ ।

"तत्र मन्दमियालोक्य साभिप्रायः स मां नृपः ।
पप्रच्छ रे किमीदृक्त्वं संवृत्तास्ताः कथ्यतामिति ॥")

नयः । दक्षतयः ॥ (पटरानसविशेषः । यथा, त्रीतो चिकित्सितस्थाने ९ अध्याये ।

"नीरुक् पित्ताधिकत्वेन जायते पटरानिकः ।
पालङ्गाधिकत्वेन जायते मन्दगन्धकः ॥")

मन्दः, त्रि, (मदि + अच् ।) अलसः । मूर्खः । (यथा, रघुवंशे । १ । ३ ।

"मन्दः कवियशःप्रार्थी गमिष्याम्युपहास्यताम् ॥")

क्षुद्रः । अभाग्यः । रोगी । अल्पः । इति मेदिनी । दे, १३ ॥ (यथा, मेघदूते । १ । ४ ।

"मन्दं मन्दं नुदति पवनश्चानुकूलो यथा त्वाम् ॥"

अलसः । यथा, श्रीमद्भागवते । १ । २ । १० ।

"प्रायेणाल्पायुषः सभ्य ! कलावस्मिन् युगे जनाः ।
मन्दाः सुमन्दमतयो मन्दभाग्या ह्युपद्रुताः ॥"

"मन्दाः अलसाः ।" इति तट्टीकायां श्रीधरस्वामी ॥)

मदरतः । खलः । इति हेमचन्द्रः । ३ । ४८ ॥

मन्दगः, त्रि, (मन्दं अल्पं गच्छतीति । गम् + डः ।) मन्दगामी । यथा,—

"मन्दगाश्च शनिज्ञानिद्वषड्हंसगजस्त्रियः ॥"

इति कविकल्पलता ॥

(पुं. प्राकद्वीपस्थजनपदभेदः । यथा, महाभारते । ६ । ११ । ३३ ।

"तत्र पुण्या जनपदाश्चत्वारो लोकसम्मताः ।
मगाश्च मशकाश्चैव मानसा मन्दगास्तथा ॥")

मन्दगामी, [न्] त्रि, (मन्दं गच्छतीति । गम् + णिनिः ।) मन्दगमनशीलः । तत्पर्य्यायः । मन्थरः २ । इत्यमरः । २ । ८ । ७२ ॥ खेरगामी ३ मन्दः ४ । इति शब्दरत्नावली ॥

मन्दजननी, स्त्री, (मन्दस्य शनेर्জ্জननी माता ।) शनैश्चरमाता । सूर्য্যपत्नी । इति त्रिकाण्डशेषः ॥

मन्दटः, पुं, (मन्दमटतीति । अट् + अच् । प्रकृत्यादित्वात् साधुः ।) पारिभद्रवृक्षः । इति शब्दरत्नावली ॥

मन्दता, स्त्री, (मन्दस्य भावः । मन्द + भावार्थे तल् । स्त्रियां टाप् ।) आलस्यम् । इति राजनिर्घण्टः ॥ (यथा, सुश्रुते शारीरस्थाने ।

"दुर्म्मेधस्त्वं मन्दता च स्वप्ने मैथुननित्यता ।
निराकरिष्णुता चैव विज्ञेयाः पाप्मना गुणाः ॥")

मन्दत्वम् । (यथा, चन्द्रालोके । २ । १ ।

"उच्चैरस्यति मन्दतामरसतामिति ॥"

क्षीणता । यथा, साहित्यदर्पणे । ३ । ६८ ।

"मध्यस्य प्रथिमानमेति जघनं वचोऽयो-
मन्दतां
दूरं यात्युदरञ्च रोमलतिका नेत्रार्द्धवं
धावति ॥")

मन्दनं, क्ली, (मन्दते स्तौति अनेन । मन्द् + "हृषृदृशिमन्दिनिधाञः क्युः । उणा० २ । ८१ । इति करणे क्युः ।) स्तोत्रम् । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

मन्दरः, पुं, (मन्द् + बाहुलकात् अरः ।) मन्थशैलः । (यथा, महाभारते । १ । १८ । १३ ।

"मन्थानं मन्दरं कृत्वा तथा नेत्रञ्च वासुकिम् ॥")

मन्दारपादपः । इति मेदिनी । रे, १८६ । सर्गः । हारभेदः । इति हेमचन्द्रः । १ । ८६ । तरुः । इति शब्दरत्नावली ॥ (कुब्जकोपस्थ-

मन्दरः

पर्व्वतविशेषः । यथा, मात्स्ये । १२१ । ६१ ।

"मन्दरः सेव विज्ञेयः सर्व्वधातुमयः शुभः ।
मन्द इत्येष यो धातुरुपामर्थे प्रकाशकः ॥
अर्थां विदारणात् चैव मन्दरः स निगद्यते ॥")

मन्दरः, त्रि, (मन्द् + अरः ।) बहुलः । मन्दः । इति मेदिनी । रे, १८६ ॥

मन्दसानः, पुं, (मन्दते स्तुत्यादिकं प्राप्नोतीति । मन्द् + "ऋज्रिवृधिमन्दिसहिभ्यः कित् ।" उणा० २ । ८७ । इति असानच् ।) अग्निः । प्राज्ञः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ निद्रा । इत्युणादिकोषः ॥ (त्रि, मोदमानः । यथा, ऋग्वेदे । १ । १०० । १४ ।

"मन्दसानो मरुत्वान् ।"

"मन्दसानो मोदमानः सन् ॥" इति तद्भाष्ये सायणः ॥)

मन्दसानुः, पुं, (मन्दं मन्दतां सनोति ददातीति । मन्द् + सन् + बाहुलकात् उण् ।) स्वप्नः । जीवः । इति संक्षिप्तसारोणादिवृत्तिः ॥

मन्दा, स्त्री, (मन्द् + स्त्रियां टाप् ।) संक्रान्तिविशेषः । सा उत्तरफल्गुन्युत्तराषाढोत्तरभाद्रपदारोहिणीनक्षत्रेषु रविसंक्रान्तिश्चेत्तदा भवति । तस्याः सन्निहितदण्डत्रयस्य पुण्यतमत्वम् । यथा,—

"मन्दा मन्दाकिनी भ्रांक्षी घोरा चैव महोदरी ।
राक्षसी मिश्रिता प्रोक्ता संक्रान्तिः सप्तधा नृप ! ॥
मन्दा ध्रुवेषु विज्ञेया रुद्रौ मन्दाकिनी तथा ।
क्षिप्रे भ्रांक्षी विजानीयादुग्रे घोरा प्रकीर्त्तिता ॥
चरेषु सहोदरी ज्ञेया क्रूरैर्क्षेषु तु राक्षसी ।
मिश्रिता चैव विज्ञेया मिश्रैर्क्षेषु संक्रमः ॥"

इत्येतेष्वेव संक्रान्तिषु ध्रुवादिनक्षत्रयोगात् मन्दादिरूपतया सप्तधा भिन्नासु त्रिचतुःपञ्चसप्ताष्टनवद्वादश एव च । क्रमेण घटिका ज्ञेयास्तत् पुण्यं पारमार्थिकमिति देवीपुराण एव त्रिचतुरादिघटिकानां पुण्यत्वसूक्तम् । इति तिथ्यादितत्त्वम् ॥

मन्दाकं, क्ली, (मन्द्यते स्तूयते इति । मन्द् + बाहुलकात् आकः ।) स्तवनम् । इत्युणादिकोषः ॥ (स्रोतः । इत्युज्ज्वलदत्तः । ४ । १३ ।)

मन्दाकिनी, स्त्री, (मन्दाकानि स्रोतांसि सन्त्यस्याः इति । मन्दाक + इनिः । यद्वा, "मन्द्रमकितुं शीलमस्याः । इनिः । यद्वा, मन्दनाम्नः सरसः अकति गच्छतीति । नयनानन्दः ।" इत्यमरटीकायां रघुनाथचक्रवर्त्ती ।) स्वर्गगङ्गा । तत्पर्य्यायः । वियद्गङ्गा २ स्वर्नदी ३ सुरदीर्घिका ४ । इत्यमरः । १ । १ । ५२ ॥ स्वर्गङ्गा ५ देवभूतिः ६ स्वर्गपद्मा ७ सुरेश्वरी ८ । इति शब्दरत्नावली ॥ (यथा, नैषधचरिते । ६ । ८२ ।

"मन्दाकिनीनन्दनयोर्विहारे
देवे भवद्देवरि माधवे वा ॥")

तस्या विवरणं यथा,—

मन्दाग्निः

"प्रधानधारा या स्वर्गे सा च मन्दाकिनी स्मृता।
योजनायुतविस्तीर्णा प्रस्थेन योजना स्मृता॥
चीरतुल्यजला शश्वदत्युत्तुङ्गतरङ्गिणी।
वेकुण्ठाद्ब्रह्मलोकञ्च ततः स्वर्गं समागता॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे जाह्नवी-जन्मप्रस्तावे ३४ अध्यायः॥ * ॥ संक्रान्ति-विशेषः। अस्य प्रमाणं मन्दाग्निशब्दे द्रष्टव्यम्॥ (चित्रकूटस्थनदीविशेषः। यथा, महाभारते। ३। ८५। ५८।
"ततो गिरिवरश्रेष्ठं चित्रकूटं विशाम्यते।
मन्दाकिनीं समासाद्य सर्व्वपापप्रणाशिनीम्॥"
द्वारकास्थनदीविशेषः। यथा, महाभारते। हरिवंशपर्व्वणि। १५५। २२।
"वैदूर्य्यपत्रैर्जलजैस्तथा मन्दाकिनी नदी।
भाति पुष्करिणी रम्या पूर्व्वस्यां दिशि भारत!॥"
छन्दोविशेषः। यथा, छन्दोमञ्जर्य्याम्।
"न न र र-घटिता तु मन्दाकिनी॥"
उदाहरणादिकन्तु छन्दःशब्दे द्रष्टव्यम्॥)

मन्दाक्रान्ता, स्त्री, (मन्दं यथा तथा आक्रान्ता।) छन्दोविशेषः। यथा,—
"चत्वारः प्राक् सुतनु गुरवो ह्यौ दशैकादशौ चे-न्मुख्यौ वर्णौ तदनु कुसुदामोदिनि! द्वादशान्त्यौ। तद्वच्चान्त्यौ युगरसहयैर्यत्र कान्ते! विरामो मन्दाक्रान्ता प्रवरकवयस्तन्वि! तां संगिरन्ते॥"
इति श्रुतबोधः॥
(अल्पाक्रान्ता। यथा,—
"मन्दाक्रान्ता वितरति रसं नेक्षुयष्टिः समग्रम्॥"
इत्युद्भटः॥)

मन्दाक्षं, क्ली,(मन्दे सङ्कुचिते अक्षिणी नेत्रे यस्मात्। "अक्ष्णोऽदर्शनात्।"४। ४। ७६। इति समासान्तः अच्।) लज्जा। इत्यमरः। १।७।२३॥ (यथा, नैषधचरिते। ३। ६१।
"मन्दाक्षमन्दाचरसुभ्रसङ्गा
तस्यां समाकुञ्चितवाचि हंसः।
तच्छंसिते किञ्चन संशयालु-
र्गिरा सुखाम्भोजमयं बुयोज॥")

मन्दाग्निः, पुं, (मन्दः पाचनासमर्थश्चासावग्निश्चेति।) कफद्वाराल्पजठरानलः। तस्य निदानादि यथा,—
"मन्दस्तीक्ष्णोऽथ विषमः समश्चेति चतुर्व्विधः।
कफपित्तानिलाधिक्यात्तत्साम्याच्चाठरोऽनलः॥
विषमो वातजान् रोगांस्तीक्ष्णः पित्तसमुद्भवान्।
करोत्यग्निसमो मन्दो विकारान् कफसम्भवान्॥
समा समाग्नेरग्नितां मात्रा सम्पद्यते।
अल्पापि नैव मन्दाग्नेर्विषमाग्नेस्तु देहिनः।
कदाचित् पच्यते सम्यक् कदाचिच्च न पच्यते॥"
इति माधवकरः॥*॥
तस्यौषधं यथा,—

मन्दाग्निः

"चित्रकस्याष्टभागानि शूरणस्य च षोड़श।
शुण्ठ्याश्चत्वारि भागानि मरीचानां द्वयं तथा॥
पिप्पली पिप्पलीमूलं विड़ङ्गानां चतुष्टयम्।
अष्टौ सुपलिभागाश्च त्रिफलायाश्चतुष्टयम्॥
द्विगुणेन गुड़ेनैषां मोदकानि हि कारयेत्।
तद्भक्षणमजीर्णं हि पाण्डुरोगञ्च कामलाम्।
अतिश्लोणितमन्दाग्निप्लीहाद्यञ्च निवारयेत्॥"
इति गारुड़े १८८ अध्यायः॥*॥

अथ जठराग्निविकाराधिकारः। तत्र सन्निदानपूर्व्वकान् उदराग्निविकारानाह।
"कफपित्तानिलाधिक्यात्तत्साम्याच्चाठरोऽनलः।
मन्दस्तीक्ष्णोऽथ विषमः समश्चेति चतुर्व्विधः॥"
तत्र मन्दस्याग्नेर्लक्षणमाह।
"स्वल्पापि नैव मन्दाग्नेर्मात्रा भुक्तापि पच्यते।
छर्द्दिर्दाहः प्रसेकः स्याच्छिरोगौरवजाठरम्॥"
मन्दाग्निजन्यान् विकारानाह।
"मन्दोऽग्निर्देहिनां कुर्य्यादविकारान् कफसम्भवान्॥" *॥

अथ चिकित्सा।
"हरीतकी तथा शुण्ठी भक्ष्यमाणा गुड़ेन वा।
सैन्धवेन युता वा स्यात् सातत्येनाग्निदीपनी॥१॥
गुड़ेन शुण्ठीमथवोपकुल्यां
पथ्याष्टतीयामथ दाड़िमं वा।
आमेष्वजीर्णेषु गुदामयेषु
वर्च्चोविबन्धेषु च नित्यमद्यात्॥२॥
श्लोषं दन्ति त्रिवृच्चित्रं कृष्णाश्लं विचूर्णितम्।
तच्चूर्णं गुड़संमिश्रं भक्षयेत् प्रातरुत्थितः॥
एतद्गुड़ाष्टकं नाम बलवर्णाग्निवर्द्धनम्।
श्लोथोदावर्त्तशूलघ्नं प्लीहपाण्डामयापहम्॥"
सर्व्वचूर्णसमो गुड़ो देयः। गुड़ाष्टकम्॥ ३॥
"दहनाजमोदसैन्धवनागरमरिचानि चाम्ल-तक्रेण।
सप्ताहादग्निकरं पाण्डुरोगिणाश्नं परमम्॥"*॥
वैश्वानरः चारः।
"सामुद्रलवणं ग्राह्यमष्टकर्षमितं बुधैः।
सौवर्चलं पञ्चकर्षं विड़सैन्धवधान्यकम्॥
पिप्पली पिप्पलीमूलं पत्रकं कृष्णजीरकम्।
तालीशं केशरं चव्यमम्लवेतसकं तथा।
द्विकर्षमात्राण्येतानि प्रत्येकं कारयेद्-बुधः॥ ५॥
मरिचं जीरकं विश्वमेकैकं कर्षमात्रकम्।
दाड़िमं स्याच्चतुष्कर्षं लवणे वाह्लकर्षके।
एतच्चूर्णीकृतं सर्व्वं लवणं भास्कराभिधम्॥
भक्षयेच्छाद्यमानं तन् तक्रमस्तुकाञ्जिकैः।
वातश्लेष्मभवं गुल्मं प्लीहानमुदरं चयम्॥
अर्शांसि ग्रहणीं कुष्ठं विबन्धञ्च भगन्दरम्।
मूलं श्लोथं श्वासकासावामदोषञ्च हृद्रुजम्॥
अक्षमरीं शर्करामाषामपि पाण्डुरोगं क्षमीनपि।
मन्दाग्निं नाशयेदेतद्दीपनं पाचनं परम्॥
हिताय सर्व्वलोकानां भास्करेणेदमीरितम्।
हन्यात् सर्व्वाण्यजीर्णानि सूक्तमात्रमसंशयम्॥

मन्दारः

निम्बुरसादिकं दत्त्वा गुटिकामप्येकं कुर्व्वन्ति॥६॥
टङ्कणं रसगन्धौ च समं भागं चयं विधात्।
कपर्दैः सर्ज्जिकाक्षारो मागधी विश्वभेषजम्॥
पृथक् पृथक् कर्षमात्रं वसुभागमिहोच्यते॥
जम्बीराम्लेर्दिनं पृष्टं भवेदग्निकुमारकः॥
विशुचीशूलवातादिवह्निमान्द्यप्रशान्तये॥"
क्षारो यवक्षारः। अग्निकुमारो रसो विश्व क्षाद्यजीर्णे॥ ७॥
"पारदाष्टतलवङ्गगन्धकं
भागयुग्ममरिचेन मिश्रितम्।
तत्र जातिफलमर्द्धभागिकं
तिन्तिड़ीफलरसेन मर्द्दितम्॥
वह्निमान्द्यदशवक्त्रनाशनो
रामबाण इति विश्रुतो रसः।
संग्रहग्रहणिकुम्भकर्णकं
सामवातखरदूषणञ्जयेत्॥
दीयते तु चणकानुमानतः
सद्य एव जठराग्निदीपनः।
रोचकः कफकुलान्तकारकः
श्वासकासवमिजन्तुनाशनः॥"८॥
पारदभागः १ विषभागः १ लवङ्गभागः १ गन्धकभागः १ मरिचभागः २ जातीफलभागः ॥०। रामबाणो रसोऽजीर्णे। इति भावप्रकाशः॥ (विवरणमस्य यथा,—
"अग्निश्चतुर्व्विधः प्रोक्तः समो विषमतीक्ष्णकः।
मन्दश्चेदापरः प्रोक्तः शृणु चिह्नानि साम्प्रतम्॥
वातपित्तकफे साम्यात् समत्वं जायतेऽनलः।
तैरेव विषमं प्राप्ते विषमो जायतेऽनलः॥
तीक्ष्णः पित्ताधिकत्वेन जायते जठराग्निकः।
वातश्लेष्माधिकत्वेन जायते मन्दसंज्ञकः॥"
इति हारीते चिकित्सितस्थाने षष्ठेऽध्याये॥
"अन्नमखं पिबेदुष्णं हिङ्गुसौवर्चलान्वितम्।
विषमोऽपि समस्तेन मन्दो दीप्येत पावकः॥"
"चिन्चूत्यहिङ्गुत्रिफलायमानी-
योर्यैर्गुड़ांशैर्गुड़िकां प्रकुर्य्यात्।
तैर्भक्षितैस्तृप्तिमवाप्नुवन्ना
भुञ्जीत मन्दाग्निरपि प्रभूतम्॥"
इति वैद्यकचक्रपाणिसंग्रहेऽग्निमान्द्याधिकारे॥
मन्दः अग्निर्यस्येति। अल्पाग्निविशिष्टे, त्रि। यथा, मार्कण्डेये। १५। १३६।
"सोऽजीर्णव्याधिदुःखार्त्तो मन्दाग्निः संप्रजायते।
परनिन्दा कृतघ्नत्वं परमर्म्मावघट्टनम्॥")

मन्दायुः, [स्] त्रि, (मन्दमल्पमायुर्यस्य।) अल्पायुः। यथा, श्रीभागवते। १। १६। १०।
"मन्दस्य मन्दप्रज्ञस्य वयो मन्दायुषश्च वै।
निद्रया ह्रियते नक्तं दिवा च व्यर्थकर्म्मभिः॥"

मन्दारः, पुं, (मन्यते स्तूयते प्रशस्यते वेति। मदि + "अङ्गिमदिमन्दिभ्य आरन्।" उणा० ३। १३४। इति आरन्।) स्वर्गीयपञ्चवृक्षान्तर्गतदेवतरुविशेषः। यथा, अमरकोषे। १।१५६।
"पञ्चैते देवतरवो मन्दारः पारिजातकः।

मन्दानः कल्पवृक्षश्च पुंसि वा हरिचन्दनम् ॥"
(यथा, अभिज्ञानशाकुन्तले ७ अङ्के ।
"अन्तर्गतप्रार्थनमन्तिकस्थं
जयन्तमुद्दीप्य क्षतस्मितेन ।
व्याप्तश्चीहरिचन्दनाङ्गा
मन्दार-माला हरिणा विनद्धा ॥"
पारिभद्रवृक्षः । पालिता मादार इति भाषा ।
यथा, अमरकोषे । २ । ४ । २६ ।
"पारिभद्रे निम्बतरुर्मन्दारः पारिजातकः ॥"
अर्कवृक्षः । आकन्द इति भाषा । यथा,—
"अर्कोऽपक्वसुकास्फोतगन्धरूपविकीरणाः ।
मन्दारश्चार्कपर्णेऽथ सुस्फोटार्कप्रतापसौ ॥"
इत्यमरः । २ । ४ । ८१ ॥
हर्षः । धूर्तः । इति मेदिनी । रे, १६७ ॥
शैवविशेषः । यथा,—
वराह उवाच ।
"शृणु सुन्दरि ! यत्नेन यन्मां त्वं परिपृच्छसि ।
कथयिष्यामि ते गुह्यं मन्दारस्य महाक्रियाम् ॥
क्रीडमानोऽम्बुगर्भं तत्र दृष्ट्वा मन्दारपुष्पितम् ।
मन्दारपुष्पमादाय मनोज्ञं न्यस्य वै हृदि ॥
तत्रैकादशकुल्यानि निःसृतानि गिरौ धरे ।
विन्ध्ये च मत्प्रभावेन मन्दारस्य महाद्रुमः ॥
स्थितोऽहं तत्र सुभगे ! भक्तानुग्रहकाम्यया ।
दर्शनीयतमं स्थानं मनोज्ञं तु शिलातलम् ॥
यत्र तिष्ठाम्यहं देवि ! मन्दारद्रुममाश्रितः ।
विन्ध्यं पश्यसि सुश्रोणि ! मन्दारोऽस्मिन् द्रुमे तथा ॥
दृष्ट्वाऽपि चतुर्दश्यां स पुष्यति द्रुमोत्तमः ।
तत्र मध्याह्नवेलायां बीजमात्रो जनेश्वरि ! ।
ततोऽन्यदिनमासाद्य दृश्यते न कदाचन ॥
तस्मिन् मन्दारकुण्डे तु एकभक्तोषितो नरः ।
स्नानं करोति शुद्धात्मा स गच्छेत् परमां
गतिम् ॥
अथ प्राणान् प्रमुञ्चेत कुण्डे मन्दारसंस्थिते ।
तपः कृत्वा वरारोहे ! मम लोकाय गच्छति ॥
तस्य दक्षिणपार्श्वे तु प्राग्रं नाम तं गिरिम् ।
निर्गो धाराः पतन्त्यत्र दक्षिणां दिशमाश्रिताः ।
स्नानकुण्डमिति ख्यातं तस्मिन् क्षेत्रे परं मम ।
दक्षिणे पतते धारा वहते दक्षिणामुखम् ॥
तत्र स्नात्वा वरारोहे ! एकरात्रोषितो नरः ।
मोदते दक्षिणे भद्रे तस्मिन् मेरौ शिलोच्चये ॥
तथाच सुव्रते प्राणान् मम कर्म्मपरायणः ।
सर्व्वसङ्गं परित्यज्य मम लोकं प्रपद्यते ॥
नाकपृष्ठं समासाद्य मोदते देवतैः सह ।
तथाच सुव्रते प्राणान् क्षतक्षयः सुनिश्चितः ।
सारयित्वा कुलं सर्व्वं मम लोकं प्रपद्यते ॥
तस्य दक्षिणपूर्व्वेण समन्तो वरवर्णिनि ! ।
प्रवहते विन्ध्यशैले अगाधश्च महाह्रदः ॥
तत्र स्नात्वा नरः पूर्व्वादेकभक्तोषितो नरः ।
मोदते पूर्व्वपार्श्वे तु तस्मिन्मेरौ शिलोच्चये ॥
तथाच सुव्रते प्राणान् मम चित्तव्यवस्थितः ।
त्यक्त्वा ते सर्व्वसङ्गं मम लोकाय गच्छति ॥
मन्दारस्य तु पूर्व्वेण गुह्यं कोटरसंस्थितम् ।
यत्र धारा पतत्येका सुवर्णेन समन्विता ॥
तत्र स्नानं प्रकुर्व्वीत पञ्चभक्तोषितो नरः ।
मोदते पूर्व्वपार्श्वे तु तस्मिन् मेरौ शिलोच्चये ॥
तत्राथ सुव्रते प्राणान् हुत्वा कर्म्म सुदुष्करम् ।
मेरुशृङ्गं समुत्सृज्य मम लोकञ्च गच्छति ॥
तस्य दक्षिणपार्श्वे तु गुह्यं विन्ध्यविनिःसृतम् ।
पञ्च धाराः पतन्त्यत्र सुवर्णेन समन्विताः ॥
तत्र स्नानन्तु कुर्व्वीत अहोरात्रोषितो नरः ।
मोदते दक्षिणे भद्रे महामेरौ शिलोच्चये ॥
अथात्र सुव्रते प्राणान् हुत्वा कर्म्म सुदुष्करम् ।
मेरुशृङ्गं परित्यज्य मम लोकं प्रपद्यते ॥
दक्षिणे पश्चिमे भागे मन्दारस्य यशस्विनि ! ।
तत्र धारा पतत्येका आदित्यसमतेजसा ॥
तत्र स्नानन्तु कुर्व्वीत अहोरात्रोषितो नरः ।
मोदते पश्चिमे भागे ध्रुवो यत्र प्रवर्त्तते ॥
अथात्र सुव्रते प्राणान् मम कर्म्मव्यवस्थितः ।
सर्व्वपापविनिर्मुक्तो मम लोके च मोदते ॥
तस्य पश्चिमपार्श्वे तु गुह्यं देवसमन्वितम् ।
चक्रावर्त्त इति ख्यातमगाधञ्च महाह्रदः ॥
स्नानं करोति यस्तत्र पञ्चभक्तोषितो नरः ।
मोदते सर्व्वशृङ्गेषु स्वच्छन्दगमनालयः ॥
अथ वै सुव्रते प्राणान् चक्रावर्त्ते महाह्रदे ।
शृङ्गान् सर्व्वान् परित्यज्य मोदते मम सन्निधौ ॥
देहं वायवमाश्रित्य तस्मिन् विन्ध्यशिलोच्चये ।
तिस्रो धाराः पतन्त्यत्र सुवर्णाक्षतयः शुभाः ।
तत्र स्नानं प्रकुर्व्वीत मम चित्तव्यवस्थितः ।
मोदते सर्व्वशृङ्गेषु एकचित्तसमाश्रितः ।
तथात्र सुव्रते प्राणांस्त्यक्त्वा गुह्ये यशस्विनि ! ।
सर्व्वसङ्गं परित्यज्य मम लोकाय गच्छति ॥
तस्य चिक्कोशमात्रेण दक्षिणां दिशमाश्रितः ।
गुह्यं गम्भीरकं नाम अगाधश्च महाह्रदम् ॥
तत्र स्नानन्तु कुर्व्वीत अष्टभक्तोषितो नरः ।
मोदते सर्व्वद्वीपेषु सर्व्वत्र गमनालयः ॥
अथैवं सुव्रते प्राणान् मम कर्म्मव्यवस्थितः ।
सर्व्वद्वीपान् परित्यज्य मम लोकं प्रपद्यते ॥
तस्य पश्चिमपार्श्वे तु गुह्यं मे परमं महत् ।
सप्त धाराः पतन्त्यत्र अगाधश्च महाह्रदः ॥
तत्र स्नानन्तु कुर्व्वीत अहोरात्रोषितो नरः ।
मोदते शुक्ललोकन्तु स्वच्छन्दगमनालयः ॥
अथ वै सुव्रते प्राणान् स्वकर्म्मपरिनिष्ठितः ।
सर्व्वसङ्गं परित्यज्य मम लोकं प्रपद्यते ॥
मण्डलं तस्य क्षेत्रस्य कथ्यमानं मया शृणु ।
स्यमन्तपञ्चकस्येव मन्दारस्य गिरौ मम ॥
तत्र तिष्ठामि सुश्रोणि ! विन्ध्यस्य गिरिमूर्द्धनि ।
मन्दारे परमं गुह्यं तस्मिन् गुह्यशिलोच्चये ॥
दक्षिणे संस्थितं चक्रं वामे स्थाने च वै गदा ।
साङ्गुष्ठं सुतलस्थेव शुद्धं तिष्ठति चायतः ॥
य एतत् शृणुयान्नित्यं गुह्यं मन्दारसंस्थितम् ।
तस्य चैव प्रियार्थाय मम भक्तसुखावहम् ॥
एतन्न ज्ञायते कस्मिन्नम मायाविमोहितः ।
तस्य भाग्यवतान् गुह्यान् ये च वाराहसंस्थिताः ॥"

इत्यादि वाराहपुराणे भगवच्छास्त्रं मन्दार-गुह्यवर्णनं नामाध्यायः ॥
मन्दारं, क्ली, (मन्दं आस्यमस्यादिति ।) लज्जा ।
इति शब्दरत्नावली ॥
मन्दिकुक्कुरः, पुं, मत्स्यविशेषः । इति भूरि-प्रयोगः ॥ अन्यत्र मन्दिकुक्कुड़ोऽपि पाठः ॥
मन्दिरं, क्ली, (मन्यते सुप्यतेऽत्र मन्यते स्तूयते इति वा । मदि ङ स्वप्ने स्तुतौ + "इषि मदिमुदीति ।" उणा० १।१५२। इति किरच् ।) गृहम् । इत्यमरः । २ । २ । ५ ॥ "मन्यते सुप्यतेऽत्र मन्दिरम् । मदि ङ स्वप्ने जाड्ये मदे मोदे स्तुतौ गतौ नाम्नीति हरः । नगरं मन्दिरं पुरमिति पुंनपुंसकयोरुशीनरी प्रयते । स्त्रियां मन्दिरा च प्रयोगश्च मन्दिरायास्त्वरावानिति मधुसूदनादयः ।" इति तट्टीकायां भरतः ॥*॥
अथ भगवन्मन्दिरनिर्म्माणमाहात्म्यम् ।
"यः कारयेन्मन्दिरं केशवस्य
पुण्यांल्लोकान् स जयेच्छाश्वतान् वै ।
दत्त्वावासान् पुण्यफलाभिपन्नान्
भोगान् भुङ्क्ते कामतः शाश्वतीयान् ॥
त्रासप्तमं पितृकुलं तथा मातृकुलं नरः ।
तारयेदात्मना सार्द्धं विष्णोर्म्मन्दिरकारकः ॥
इमाश्च पितरो दैत्यगाथा गायन्ति योगिनः ।
पुरतो यदुसिंहस्य त्र्यम्बकस्य तपस्विनः ॥
अपि नः कुलजे कश्चिद्विष्णुभक्तो भविष्यति ।
हरिमन्दिरकर्त्ता यो भविष्यति सुचिव्रतः ॥"
इति वामने शैवाधाये ॥ *॥
अपि च । अग्निपुराणे ।
"ये ध्यायन्ति सदा बुद्ध्या करिष्यामो हरे-र्गृहम् ।
तेषां विलीयते पापं पूर्व्वजन्मशतोद्भवम् ॥"
किञ्च ।
"समतीतं भविष्यञ्च कुलानामयुतं नरः ।
विष्णुलोकं नयत्याशु कारयेद्धि हरेर्गृहम् ॥"
किञ्च ।
"लक्षेणाथ सहस्रेण शतेनाद्रेण वा हरेः ।
तुल्यं फलं समाख्यातमिश्वरदरिद्रयोः ।"
विष्णुधर्म्मोत्तरे द्वितीयकाण्डे ।
"श्रुत्वा वासगृहं तस्य देवस्य परमेष्ठिनः ।
राजसूयाश्वमेधानां फलेन सह युज्यते ॥
प्रासादे त्वक्षये पुण्यं मयैतत् कथितं
द्विजाः ।
तस्माद्दारुमये पुण्यं शतगुणं भवेत् ॥
ततो दशगुणं पुण्यं तथा शैलमये भवेत् ।
ततो दशगुणं शैले ताम्रे शतगुणं ततः ॥
सहस्रगुणितं रौप्ये तस्मात् फलमवाप्नुते ।
ततः शतसहस्रं वै सौवर्णे द्विजसत्तमाः ॥
अनन्तं फलमाप्नोति रत्नचित्रे मनोहरे ॥"
स्कान्दे ।
"आरम्भे कर्म्मणोऽध्यक्षस्य सम्भवन्ति यतो हतम् ।
पापं विलयमाप्नोति नरकादुद्धरेत् पितॄन् ॥
प्रासादादौ क्षयस्य यावत्तिष्ठति रेणुका ।

तावद्वर्षसहस्राणि वसते विष्णुसद्मनि ॥
प्रासादे क्षणदेवस्य चित्रकर्म्म करोति यः ।
वसते विष्णुलोके तु यावत्तिष्ठन्ति सागराः ॥"
नारसिंहे ।
"यः कुर्य्याच्छोभनं वेश्म नरसिंहस्य भक्तिमान् ।
सर्व्वपापविनिर्म्मुक्तो विष्णुलोकमवाप्नुयात् ॥"
हयशीर्षे ।
"देवागारं करोमीति मनसा यस्तु चिन्तयेत् ।
तस्य कायगतं पापं तदह्ना विप्र ! नश्यति ।
कृते तु किं पुनस्तस्य प्रासादे विधिनैव तु ॥
अष्टैकाशसमायुक्तं यः कुर्य्याद्देवतं गृहम् ।
न तस्य फलसम्पत्तिर्व्वक्तुं शक्यते केनचित् ॥
अनेनैवानुमेयन्तु फलं प्रासादमिश्वरात् ।
मरणञ्च जनेर्म्मर्त्यो रः कृत्वा प्रथमेष्टकाम् ॥
न समाप्तस्य यज्ञस्य फलं प्राप्नोत्यसंशयम् ॥"
विष्णुरहस्ये ।
"बाल्ये च क्रीड़माना ये पांशुभिर्भवनं हरेः ।
वासुदेवस्य कुर्व्वन्ति तेऽपि तल्लोकगामिनः ॥"
आदिपुराणे ।
"लेपनाच्छादनाद्वैव यः करोति पुनर्नरः ।
देवस्यायतनं कृत्वा न भवेत् कीटजं भयम् ॥"
अथ मन्दिरनिर्म्माणकालः । मात्स्ये ।
"चैत्रे व्याधिमवाप्नोति यो गृहं कारयेन्नरः ।
वैशाखे धनरत्नानि ज्येष्ठे नृत्यं तथैव च ॥
आषाढ़े भृत्यरत्नानि पशुवर्गमवाप्नुयात् ।
श्रावणे मित्रलाभन्तु हानिं भाद्रपदे तथा ॥
पत्नीनाशमृषाश्वयुगे कार्त्तिके धनधान्यकम् ।
मार्गशीर्षे तथा भक्तं पौषे तस्करजं भयम् ।
लाभन्तु बहुशो विद्यादग्निं माघे विनिर्द्दिशेत् ॥
काञ्चनं फाल्गुने पुत्रानिति कालबलं स्मृतम् ।
अश्विनी रोहिणी मूलमुत्तरा-त्रयमैन्द्रवम् ॥
स्वाती हस्तानुराधा च गृहारम्भे प्रशस्यते ।
आदित्यभौमवर्ज्यञ्च सर्व्वे वाराः शुभावहाः ॥
वज्रव्याघातशूलानि यतीपातातिगण्डके ।
विष्कम्भगण्डपरिघान् वर्ज्य योगेषु कारयेत् ॥
श्वेतमैत्रे च माहेन्द्रे गान्धर्व्वाभिजिदौहिणे ।
तथा वैराजसावित्रे मुहूर्त्ते गृहमारभेत् ॥
चन्द्रादित्यबलं लब्ध्वा लग्नं शुभनिरीक्षितम् ।
लग्नोच्चादि प्रकर्त्तव्यमन्यत्र परिवर्ज्जयेत् ॥"
हयशीर्षे ।
"वास्तुकर्म्म न चारभ्यं वर्षाकाले विजानता ।
शुक्लपक्षे त्रिभागान्ते शुक्लपादौ द्वितीयके ॥
चतुर्थी नवमी वर्ज्या तिथिष्वापि चतुर्दशी ।
भौमस्य तु दिनं वर्ज्यं करणं विष्टिसंज्ञितम् ॥
त्रिलग्नरीफदृग्दोषत्यक्तैर्भेषपीड़ितम् ।
उपसूर्यं ग्रहैर्भेद्य मतिपातहतं तथा ॥
चन्द्रतारादुष्टले च कार्य्यं कर्म्म विजानता ।
ध्रुवाणि चात्र स्थानानि नैर्ऋतं शक्रदैवतम् ॥
पुष्यं पौष्णञ्च सावित्रं वायव्यं वैष्णवं तथा ।
स्थिरांशे च स्थिरे लग्ने कर्त्तुश्चोपचयात्मके ॥
केन्द्रे सौम्यग्रहो यस्य त्रिकोणे तु सुरोत्तम ! ।
यावश्चोपचयस्थाने तदा कार्य्यं समारभेदिति ॥"

अथ प्रासादस्थानम् । हयशीर्षे ।
"पूर्व्वं देवकुलं पीठ्य प्रासादं खल्वकन्तथा ।
समं वाप्यधिकं वापि न कर्त्तव्यं विजानता ॥
उभयोर्द्दिगुणां सीमां त्यक्त्वा चोच्छ्रायसंमिताम् ।
प्रासादं कारयेद्यत्नं नाभयं पीड़येद्बुधः ॥" ॥
अथ स्थानशोधनानि । देवीपुराणे ।
"देवो विष्णुस्तथा रुद्रो ब्रह्माद्याः सुरसत्तमाः ।
प्रतिष्ठाप्याः शुभे स्थाने अन्यथा ते भयावहाः ॥
गर्त्तादिलक्षणा धात्री गन्धस्वादेन या भवेत् ।
वर्णेन च सुरश्रेष्ठ ! सा मही सर्व्वकामदा ॥"
मात्स्ये ।
"पूर्व्वं भूमिं परीक्षेत पश्चात् वास्तुं प्रकल्पयेत् ।
श्वेता रक्ता तथा पीता कृष्णा चैवानुपूर्व्वशः ॥
विप्रादेः प्रशस्ते भूमिरतः कार्य्यं परीक्षणम् ।
विप्राणां मधुरास्वादा कषाया क्षत्रियस्य च ॥
कषाये कटुना तद्वद्वैश्यशूद्रेषु प्रशस्यते ।
अरत्निमात्रे वै गर्त्ते खनुलिप्ते च सर्व्वतः ॥
घृतमामशरावस्थं कृत्वा वर्त्तिचतुष्टयम् ।
ज्वालयेद्भूपरीक्षार्थं पूर्णं तत् सर्व्वदिङ्मुखम् ॥
दीप्ता पूर्व्वादि गृह्णीयाद्वर्णानामनुपूर्व्वशः ।
वास्तुः समूहिको नाम दीप्यते सर्व्वतस्तु यः ॥
शुभदः सर्व्ववर्णानां प्रासादेषु गृहेषु च ।
अरत्निमात्रकं गर्त्तं परीक्ष्यं खातपूरणे ॥
अधिके म्रियमाणोति न्यूने हानिं समे समम् ।
फालकृष्टेऽथवा देशे सर्व्वबीजानि रोपयेत् ॥
त्रिपक्षसप्तरात्रेण यत्र रोहन्ति तान्यपि ।
ज्येष्ठा मध्या कनिष्ठा भूर्व्वर्ज्जनीयेतरा सदा ॥"
हयशीर्षे ।
"सुरभीणां रतिर्यत्र सवत्सानां वृषैः सह ।
सुन्दरीणां रतिर्यत्र पुरुषैः सह सत्तम ! ॥
राज्ञां पूर्व्वं गृहं यस्यामन्यासां यच्चिनां तथा ।
काश्मीरचन्दनामोदा कर्पूरागुरुगन्धिनी ॥
कमलोत्पलगन्धा च जातीचम्पकगन्धिनी ।
पाटलामल्लिकागन्धा नागकेशरगन्धिनी ॥
दधिक्षीराज्यगन्धा च मदिरासवगन्धिनी ।
सुगन्धिस्निग्धगन्धा च शुभद्रव्यखना च या ॥
सर्व्वेषां वर्णिनां भूमिः सर्व्वसाधारणा मता ।
दुर्गन्धा दुःखदा या च नानावर्णा च दुर्भगा ॥
वृत्तार्द्धचन्द्रसदृशा विस्तारादद्विगुणायता ।
विवर्णा वर्णहीना च वक्रा शुचिमुखी तथा ॥
द्विवर्णा सूर्पसदृशी गोमुखी च त्रिकोणिका ।
षड़स्रा मूलसदृशी दन्तिपृष्ठोपमा च या ॥
सरीसृपसमा या च दिङ्मुखा शकटाकृतिः ।
एवं प्रकारा या भूमिर्व्वर्ज्या यत्नेन देशिकैः ॥"
किञ्च ।
"प्रासादस्य विशेषेण प्रोक्ता भूमिश्चतुर्व्विधा ।
सुभद्रा भद्रिका पूर्णा धूम्रा रागिण्यपापरा ॥
तिलकैर्नारिकेलैश्च वप्रैः काश्मैश्च शोभिता ।
पद्मेन्दीवरसंयुक्ता सा सुपद्मेति विश्रुता ॥
नदीसमुद्रायतनतीर्थपर्य्यन्तशोभिता ।
पुष्पवृक्षसमाकीर्णा क्षीरवृक्षोपशोभिता ॥
वनोद्यानलतागुल्मफुल्लस्तम्बसमावृता ।
यज्ञीयवृक्षसुक्षेत्रयुक्ता भद्रेति कीर्त्तिता ॥
वकुलाशोकबहुला तथा प्रक्षाम्रशोणितैः ।
माधवीवेष्टिता या च सुन्दनिम्बावकोदवैः ॥
शुकधान्येश्च पुन्नागैर्गिरिपार्श्वगता च या ।
तोयञ्च स्वल्पकं यस्यां सा पूर्णा परिकीर्त्तिता ॥
विल्वार्कसुरिपीलूनां वनैर्य्या परितो वृता ।
सशर्करा च कठिना युक्ता कण्टकिभिर्द्रुमैः ॥
गृध्रगोमायुकाकानां श्वेनानां या कुलाकुलैः ।
धूम्रेति कीर्त्तिता सातु तां यत्नात् परिवर्ज्जयेत् ॥
ततो भूमिं परीक्षेत पूर्व्वोदक्प्रवणां शुभाम् ।
असङ्कटां तथाच्छभास्वतोयां परिश्रुताम् ॥
संपूर्य्यमाणे खाते तु तथाधिकसदृशं शुभाम् ।
कुसुम्भसदृशं वर्णं यस्यां न म्लानिमृच्छति ॥
न निर्व्वाति तथा दीपस्तोयं शीघ्रं न जीर्य्यते ।
श्वेतारुणा पीतकृष्णा विप्रादीनां प्रशस्यते ॥
आज्यमन्नमन्नानां तुल्यगन्धा तु या भवेत् ।
मधुरा च कषाया च अम्ला च कटुका च या ॥
कुर्य्यैः शरैस्तथा काशैः दूर्व्वाभिर्या च संवृता ।
तस्यां पुण्येऽथ नक्षत्रे कुर्य्याद्भूमिपरिग्रहम् ॥"
अथ भूमिपरिग्रहः । तत्रैव ।
"प्राकारसीमापर्य्यन्तं ततो भूतबलिं हरेत् ।
मांसं हरिद्राचूर्णञ्च सलाजदधिशुक्तवः ॥
एभिर्भूतबलिं दत्त्वा क्षत्रमष्टाक्षरेण तु ।
पातयित्वा ततः शङ्कूनष्टदिक्षु निवेशयेत् ॥
राक्षसाश्चापि भूताश्च ये चासिंस्तिष्ठन्ति भूतले ।
ते सर्व्वे अपगच्छन्तु स्थानं कुर्य्यामहं हरेः ॥
इत्यनुज्ञाप्य भूताद्यान् तां भूमिं परिशोधयेत् ।
आदित्यादिग्रहाणाञ्च लोकपालैः समं क्षती ॥
आर्य्यमिष्टविधानेन ततो वै होममाचरेत् ।
चतुर्होमं ततः कुर्य्यान्मूलमन्त्रेण देशिकः ॥
दद्यात् पूर्णाहुतिं पश्चात् वौषड़न्तेन देशिकः ।
वृषभौ कपिलौ वृद्धौ सवर्णौ वा विचक्षणैः ।
योजनार्थं हलस्यैव गृह्णीयादसनोद्भवम् ॥
प्राङ्मुखं योज्य मन्त्रज्ञो वस्त्रालङ्कारभूषितः ।
आसनीं यष्टिमादाय द्वादशाक्षरविद्यया ॥
संमर्द्देन समीकृत्य शुभबीजानि वापयेत् ।
संप्राप्ते शुभकाले तु गोभिस्तत् खादयेद्वृषैः ।
पुनस्तं कर्षयित्वा तु समीकृत्य गृहं गुरुः ॥"
मात्स्ये च ।
"हीनाधिकां गतां वास्तोः सर्व्वतः परिवर्ज्जयेत् ।
नगरग्रामदेशेषु सर्व्वत्रैव विवर्ज्जयेत् ॥" ॥
अथ दिक्साधनम् । हयशीर्षे ।
"वास्तुवास्तु समं कृत्वा चतुरस्रं समन्ततः ।
भूमिं तोयसमां कृत्वा दर्पणोदरसन्निभाम् ॥
द्वादशाङ्गुलमानेन पाणौ वारांस्तु भ्रामयेत् ।
मध्ये सुनिश्चलं शङ्कुं स्थाप्य च्छायां निरीक्षयेत् ॥
प्रवेशे निष्क्रमे तस्यां शङ्कुच्छायां निरूपयेत् ।
वैयुवे विमले सोमि शङ्कुना साधयेद्दिशम् ॥
शरदृश्यन्तयोरेवमादित्यात् साधयेद्दिशम् ।
प्राचीं वा पुष्यवेधेन विचित्रामन्तरेण वा ॥

उदीचीं भुवनेशेन मध्ययोगेन चोन्नयेत् ।
चतुरस्रां शिलां गुरु इष्टकां वा सुशोभनाम् ॥
चतुर्दिक्षु निवेश्याथ सूत्रचिह्नन्तु कारयेत् ।
एवं कृत्वा सूत्रचिह्नं ब्राह्मणांश्च भोजयेत् ।
वैष्णवान् पायसेनान्यान् वाहयेद्वै समाहितः ॥"
अथ शल्योद्धरणम् । मात्स्ये ।
"गृहारम्भेति कर्तृणां स्वाग्नेये यत्र जायते ।
शल्यन्तत्परिवेत्तव्यं प्राग्वाटे भवनेऽथवा ।
सशल्यं भयदं यस्मादशल्यं भयनाशनम् ॥"
अथ गर्गे ।
"आदित्येऽहन्यनुः शल्यं गृहिणोऽङ्गविकारतः ।
शकुनो दृश्यते वापि यस्य वा श्रूयते ध्वनिः ।
कीर्त्यते यस्य वै नाम शल्यं तस्य विनिर्दिशेत् ॥"
अथ वास्तुमण्डलम् । मात्स्ये ।
"प्रागग्रयोपधिभिः परीक्षित्वावसेचयेत् ।
एकाशीतिपदं कुर्यादृषिभिः कनकेन तु ॥
पञ्चाशैर्यैव चालिख्य सूत्रैर्वालोक्य सर्वतः ।
दश पूर्वायता रेखा दश चैवोत्तरायताः ॥
सर्ववास्तुविभागेषु विज्ञेया नवका नव ।
एकाशीतिपदं ह्येवं वास्तुवित् सर्ववास्तुषु ॥
पदस्थान् पूजयेद्देवान् विंशत् पञ्चपदांश्च ये ।
द्वात्रिंशद्बाह्यतः पूज्याः पूज्याधारास्त्रयोदश ॥
नामतस्तान् प्रवक्ष्यामि स्थानानि च निबोध मे ।
ईशकोणादिषु सुरान् पूजयेच्च विधानतः ॥
शिखी चैवाथ पर्जन्यो जयन्तः कुलिशायुधः ।
सूर्यः सत्यो भृशश्चैव व्योमाग्नी वायुरेव च ॥
पूषा च वितथश्चैव गृहक्षतयमावुभौ ।
गन्धर्वो भृङ्गराजश्च मृगाः पितृगणस्तथा ॥
दौवारिकोऽथ सुग्रीवः पुष्पदन्तो जलाधिपः ।
असुरः शोषरोगौ च नागोऽथ मुख्य एव च ॥
भल्लाटः सोमसर्पौ च अदितिश्च दितिस्तथा ।
बहिर्द्वात्रिंशदेते तु तदन्तश्च सुरान् शृणु ॥
ईशानादिचतुष्कोणे संस्थितान् पूजयेद्बुधः ।
आपश्चैवाथ सावित्रो जयो रुद्रश्चतुर्थकः ॥
मध्ये नवपदो ब्रह्मा तस्याधौ च समीपगाः ।
सर्वानेकोत्तरान् विद्यात् पूर्वादीन्नामतः शृणु ॥
अर्यमा सविता चैव विवस्वान् विबुधाधिपः ।
मित्रोऽथ राजयक्ष्मा च तथा पृथ्वीधरः क्रमात् ॥
अष्टमध्यापवत्सश्च परितो ब्रह्मणः स्मृताः ।
अर्यमा च विवस्वांश्च मित्रः पृथ्वीधरस्तथा ॥
ब्रह्मणः परितो दिक्षु त्रिपदास्ते तु सर्वतः ।
आपश्चैवापवत्सश्च पर्जन्योऽग्निर्दितिस्तथा ॥
बहिस्तानथ वक्ष्यामि क्रमेणैवं क्रमेण तु ।
तत्रार्के तु बहिर्द्वात्रिंशद्दिपदास्ते तु सर्वतः ॥
अर्यमा च विवस्वांश्च मित्रः पृथ्वीधरस्तथा ।
ब्रह्मणः परितो दिक्षु त्रिपदास्ते तु सर्वतः ॥
यद्यन्नामादयो वक्ष्यामि रूपतश्च पृथक् पृथक् ।
वायुं यावत्तथा रोगात् पितृगणस्तथा ।
मृगाद्भल्लं तथा शोषाद्दितिं यावदेव तु ।
सुग्रीवादहिनं यावत् भृङ्गात् पर्जन्यमेव च ॥
एते वंश्याः समाख्याताः क्षत्रिद्रव्य एव तु ।
एतेषां वस्तु सम्भूतं पदमर्धं समं तथा ॥
समं चेतत् समाख्यातं त्रिमूलं कोणगञ्च यत् ।
सप्तसन्यासेषु वर्ज्यानि तुलाविधिषु सर्वदा ॥
कीलोलूखलयोर्यानादि वर्ज्यवेद्दयवतो नरः ।
सर्वत्र वास्तुनिर्दिष्टः पिप्पलश्चोत्तरायतः ॥
मूर्द्धन्यग्निः समाविष्टो मुखे चापः समाश्रितः ।
पृथ्वीधरोऽर्यमा चैव स्तनयोस्तावधिष्ठितौ ॥
वक्षःस्थले त्वापवत्सः पूजनीयः सदा बुधैः ।
नेत्रयोर्हितिपर्जन्यौ श्रोत्रे तिति जयन्तकौ ॥
सर्पेन्द्रा वंशसंस्थौ तु पूजनीयौ प्रयत्नतः ।
सूर्यः सोमादयस्तद्वाह्यो पञ्च च पञ्च च ॥
रुद्रश्च राजयक्ष्मा च वामहस्तं समाश्रितौ ॥
सावित्रः सविता तद्वद्दक्षिणमाश्रितौ ।
विवस्वानथ मित्रश्च जठरे संव्यवस्थितौ ।
पूषा च वितथश्चैव ऊरुसन्धौ समाश्रितौ ॥
तथैवासुरशोषौ च वामपार्श्वे समाश्रितौ ।
पार्श्वे तु दक्षिणे तद्वद्विनयः सप्तरुक्षतः ॥
ऊर्ध्वोर्ध्वमानुपूर्व्या तु ज्ञेयौ जानोर्गन्धर्वपुष्पकौ ।
जङ्घयोर्मृगसुग्रीवौ स्फिक्स्थौ दौवारिको मृगः ॥
जयः शुक्लतया भेद्यः पादयोः पितरस्तथा ।
मध्ये नवपदो ब्रह्मा हृदये तु स पूज्यते ॥
चतुःषष्टिपदो वास्तु प्रासादे ब्रह्मणः स्मृतः ।
ब्रह्मा चतुष्पदस्तद्वत् कोणेष्वेकपदास्तथा ॥
बहिःकोणेषु चार्यौ तु सार्द्धाश्चोभयतः स्मृताः ।
विंशतिर्द्विपदास्तेषां चतुःषष्टिपदे स्मृतः ॥"*॥
अथ गर्गे ।
"वास्तुज्ञं सूचयेत् प्राज्ञः श्वेताम्बरधरः शुचिः ।
श्वेतगन्धानुलिप्ताङ्गः सर्वालङ्कारभूषितः ॥
चतुःषष्टि तु प्रासादे एकाशीतिं गृहे सदा ।
चतुरशीतिके चैव अशीतौ भयभाजिते ॥
कोणरेखां ततो दत्त्वा सुरभागांस्तु कल्पयेत् ।
शिवः कोणार्द्धतो ज्ञेयः पर्जन्यः पदसंस्थितः ॥
द्विपदस्तो जयो ज्ञेयः सुरेशश्चैकपादिकः ।
भास्करस्तु पदे ज्ञेयो द्विपदः सत्य इष्यते ॥
भृशः पदस्थो विज्ञेयो व्योमश्चैव पदार्द्धगः ।
हुताशनः पदार्द्धश्च पूषा च पदसंस्थितः ॥
वितथो द्विपदस्थश्च पदैकश्च गृहक्षतः ।
यमश्चैकपदः प्रोक्तो गन्धर्वो द्विपदस्थितः ॥
भृङ्गश्चैकपदो ज्ञेयो मृगश्चार्द्धपदे स्थितः ।
पितरश्चार्द्धतो ज्ञेयाः पदे दौवारिकस्तथा ॥
सुग्रीवश्च पदे ज्ञेयो ह्येकस्यः पुष्पदन्तकः ।
वारुणस्त्रिपदः प्रोक्तो असुरस्तु द्वि संस्थितः ॥
शोषश्चैकपदे ज्ञेयो रुद्रोगः पाप उच्यते ।
रोगश्चार्द्धपदे ज्ञेयो नागश्चापि पदे स्थितः ॥
मुख्यश्च द्विपदे ज्ञेयो भल्लाटः पदसंस्थितः ।
यक्षेश्वरः पदे ज्ञेयो नागस्तु द्विपदे स्थितः ॥
पदस्था क्षीमसर्पार्द्धा अदितिश्चार्द्धसंस्थिता ।
आपो ज्ञेयास्तु पदगा वत्सो द्विपदसंस्थितः ॥
चतुष्पदस्था विज्ञेयस्त्वर्यमा पूर्वमध्यगः ।
सविता तु पदे ज्ञेयः सावित्रो च पदे स्थितः ॥
ततो विवस्वान् विज्ञेयश्चतुष्पदे स्थितः ।
इन्द्रश्चन्द्रो जयश्चैव एकैके संव्यवस्थिताः ॥
मित्रश्चतुष्पदस्थश्च पश्चिमे तु व्यवस्थितः ॥
रुद्रः पदैकसंस्थो वै यक्ष्मा वैकपदे स्थितः ।
धराधरश्च विज्ञेयो ह्युत्तरे च चतुष्पदः ।
चतुर्मुखश्चतुष्कस्थो मध्ये ज्ञेयः प्रजापतिः ॥"
अथ वास्तुपूजा । मात्स्ये ।
"अथातः संप्रवक्ष्यामि प्रासादविधिनिर्णयम् ।
वास्तौ परीक्षिते सम्यक्वास्तुदेहविचक्षणः ॥
वास्तुपशमनं कुर्यात् पूर्वमेव विचक्षणः ।
एकाशीतिपदं लिख्य वास्तुमध्ये तु पिप्पलैः ॥
होमखिमेखले कार्ये कुण्डे एकप्रमाणके ।
यवैः कृष्णतिलैश्चरुं समिद्भिः क्षीरवृक्षजैः ॥
मालाद्यैः खादिरैर्वापि मार्गोदुम्बरजैर्वृतैः ।
कृशदूर्वामयैर्वापि मधुसर्पिःसमन्वितैः ॥
कार्यस्तु पञ्चभिर्विप्रैर्विप्रवीरैरथापि वा ।
होमान्ते भक्ष्यभोज्यैश्च वास्तुदेवे बलिं हरेत् ॥
तद्वद्दिग्पवनेशेभ्यः इदं दद्यात् क्रमेण तु ।
ईशकोणे घृतान्नन्तु शिखिने विनिवेदयेत् ॥
क्षीरान्नं सकलं दद्यात् पर्जन्याय घृतान्वितम् ।
जयन्ताय ध्वजं गीतं पैष्टं कूर्मस्य संन्यसेत् ॥
इन्द्राय पञ्च रत्नानि पैष्टकं कुलिशं तथा ।
वितानञ्च सूर्याय धूम्रं रक्तं तथैव च ॥
सत्याय घृतगोधूमं मल्यान् दद्याद्भृशाय च ।
शुष्कुलीं चान्तरीक्षाय दद्याच्छुक्लं च वायवे ॥
पूषे लाजास्तु दातव्या वितथे पायसौदनम् ।
गृहक्षताय मध्वन्नं यमाय पिष्टतैलान्नम् ॥
गन्धौदनञ्च गन्धर्वे भृङ्गे मेघस्य शृङ्गकम् ।
मृगाय यावकं दद्यात् पितृभ्यः क्षीरसा मताः ॥
दौवारिके दन्तकाष्ठं पैष्टं क्षीरं घृतं तथा ।
सुग्रीवे पूपकं दद्यात् पुष्पदन्ताय मायसम् ॥
कृशरञ्चैव सहितं दद्यात् पक्षाय वारुणे ।
पैष्टं चिरञ्चयं दद्यादसुराय सुरा मता ॥
घृतौदनं च शोषाय गोधां तैः पायसं क्षिपेत् ।
घृतलड्डुकांश्च रोगाय नागे पुष्पं फलान्वितम् ॥
मुख्याय दातव्यं सक्षौद्रगुडपायसम् ।
भल्लाटाय ततो दद्यात् सोमाय घृतपायसम् ॥
सर्पाय पैष्टं शालूकमद्भिः सोपस्कारकम् ।
दित्यै तु पूरिकां दद्यात् इत्येवं नागतो बलिम् ॥
क्षीरमापाय दातव्यमापवत्साय वै दधि ।
सविते सक्तुकान् दद्यात् समरीषाग्र्यशर्करम् ॥
सवितुर्गुरुपूषांश्च जयाय घृतचन्दनम् ।
विवस्वते तथा दद्यात् रक्तचन्दनपायसम् ॥
हरितालौदनं दद्यादिन्द्राय घृतसंयुतम् ।
घृतौदनञ्च मित्राय रुद्राय घृतपायसम् ॥
क्षामं मद्यं तथा मांसं देयं स्याद्यक्ष्मणे ।
पृथ्वीधराय मांसानि कृशराद्याय च दापयेत् ॥
सशर्करान्नं संदद्यादर्यम्णे सर्वतः क्रमात् ।
नमस्कारान्तमुक्त्वैव मन्त्रेण पुनरेव च ॥
पयसान्नं यवांश्चैव तिलाक्षतसमन्वितम् ।
भक्तं भोज्यञ्च विविधं ब्रह्मणे विनिवेदयेत् ।

एवं सम्पूजिता देवाः शान्तिं कुर्वन्ति ते सदा।
सुरेभ्यः कायनं दद्याद्ब्रह्मणे गां पयस्विनीम्॥
राक्षसीनां बलिर्देयः अपि याचक तथा यजु।
मांसौदनं घृतं वर्षं क्षीरं दधिघृतान्वितम्।
ईशानभागमाश्रित्य चरुके विनिवेदयेत्॥
एधोदनं गुरुधिरमग्निमांसैश्च संयुतम्।
पीतरक्तबलिं दद्यात् पूतना या तु राक्षसी॥
वायवे पापराक्षस्यै सक्थमांसमुरागवम्।
पायसं वापि दातव्यं गवांया सर्वतः क्रमात्।
समस्तान्नसमायुक्तेन प्रस्थाढ्येन सर्वतः॥" ॥
ततः सर्वौषधिस्नानं यजमानस्य कारयेत्।
द्विजांस्तु पूजयेद्भक्त्या ये चान्ये गृहमागताः॥
एतद्वास्तुयागमनं ज्ञात्वा कर्म समारभेत्।
प्रासादभवनोद्यानप्रारम्भे परिवर्तने॥
प्रवेशप्रवेशेषु सर्वदोषापशान्तये।
इति वास्तुयागमनं कृत्वा सर्वेण वेष्टयेत्॥
रक्षोघ्नपवमानेन सर्वेण भवनादिकम्।
वृत्तमन्त्रजपादेन कुर्याद्ब्राह्मणवाचनम्॥
अनेन विधिना यस्तु प्रतिसंवत्सरं बुधः।
गृहे वायतने कुर्यान्न स दुःखमवाप्नुयात्॥
न च व्याधिभयं तस्य न च वन्धुधनक्षयः।
जीवेद्वर्षशतं सर्वं कल्पमेकं वसेन्नरः॥" ॥
इत्यग्नीयपुराणे।
"एवं प्रकृत्य कालानि रक्षमापूर्य देशिकः।
एतेषामेव देवानां बलिं दद्यात्तु कामिकम्॥
ईशानाय प्रदातव्यं पायसं मधुना सह।
मन्त्रेभ्यः पलं देयं पुष्पगन्धादिवासितम्॥
जयन्ताय प्रदातव्या पताका पीतवर्णिका।
सुरेशाय च रक्तानि भास्कराय घृतं तथा॥
पुष्पकं पीतवर्णं वा सत्ये दद्याद्विताम्बकम्।
दद्याद्भृशे पश्चिमांसं व्योमाय त्वक्षमग्नये॥
पूषे धानाः सलाजास्तु सुवर्णं वितथे तथा।
गृहक्षताय मध्यान्नं यमाय पिशितौदनम्॥
गन्धं गन्धर्वदेवाय भृङ्गे दद्यात्तु शाकुनम्।
मृगे तिलयवांश्चैव पितृभ्यः क्षीरं तथा॥
दौवारिके दन्तकाष्ठं सुग्रीवे यावकं तथा।
पुष्पदन्ते कृशा देया वरुणे पक्षमुत्पलम्॥
असुरायैवमं देयं रक्षं शैलेषु घृतौदनम्।
यक्षास्तु देवाः पापाय रोगाय घृतमण्डकम्॥
नागाय नागपुष्पाणि भल्लान् मुख्याय दापयेत्।
पित्रौदनच भल्लाटे सोमाय मधुपायसम्॥
नागाय वापि शालूकं त्रिये सरसपायसम्।
अदितये पूरिका देया क्षीरं पाद्मो दितेर्बलिम्॥
दधि क्षीरं चापवत्से अर्यम्णे सक्तुकं बलिम्।
कृशोदकं सविते च सावित्रे गुडपूर्वकम्॥
विवस्वते रक्तपुष्पं रक्तचन्दनमेव च।
हरिद्रां तवष्ट्रे दद्यात् माषान्तु धनाय च॥
घृतपूरान् मित्राय दद्याद्राजगवाय च।
सामवाद्यानि मांसानि प्रदद्याद्वायवे बलिम्॥
इन्द्रोदयाममांसं रक्तमांसं बलिं हरेत्।
पाशं सक्थिचैव पशवे तथा चरुम्॥
दद्यात् सर्पं तथा पुष्पं भल्लाटे निवेदयेत्।

श्याममांसं पूर्वभागे सर्वस्मै तुण्डिकम्॥
सितपक्षं घृतं मांसं विदार्ये पाश्चिमोत्तरे।
कृष्णं वा पूषकं मांसमंशुमत्येव दक्षिणे॥
पित्र्ये च तथा रक्तं पूतने नैर्ऋते तथा।
सारङ्गांसं प्रदातव्यं जृम्भकायेव पश्चिमे॥
अमिषेण सहितं रक्तपिण्डेन मिश्रितम्।
प्रदेयं पापराक्षस्यै वायवे मांसमेव च॥
उत्तरे पितृपिशाचाय सान्नं रक्तं बलिं हरेत्।
वाराहे छागमांसानि ऐशान्यां दिशि दापयेत्॥
ततो भूतगणानान्तु राक्षसानां सुरोत्तम!।
पिशाचानां गणानान्तु बलिर्देयस्तु कामिकः॥
स्नानं वा पूजयेत् सर्वान् कृष्णपुष्पाक्षतैर्बुधः।
एवं संपूजिता देवाः शान्तिपुष्टिप्रदा नृणाम्॥
अपूजिता विहिंसन्ति कारकं स्थापकं तथा।
तस्मादेतांस्तु संपूज्य गन्धपुष्पैर्मनोहरैः।
प्रासादं कारयेद्विद्वान् गृहं वा सुरसत्तम!॥"
अथ प्रासादसंरम्भः। तत्रैव।
"ब्रह्मस्थाने ततः कुर्याद्वासुदेवस्य पूजनम्।
श्रियः संपूजनं कुर्यात् हृषीकेशगणस्य च॥
पूजनन्तु ततः कुर्याद्वासुदेवगणस्य च।
गन्धाद्यपुष्पनैवेद्यधूपदीपैः सुरोत्तम!॥
ततः संपूजयेत्तस्मिन् सर्वलोकधरां महीम्।
सरूपां प्रमदारूपां विद्याभरणभूषिताम्॥
ध्यात्वा समर्चयेद्देवीं परितुष्टां क्षितानगाम्।
ततः प्रगम्य विज्ञाप्य तन्मयत्वेन चिन्तयेत्॥
ततः स्वनाममन्त्रेण सर्वदेवमयं परम्।
ध्यात्वा समर्चयेत्तत्र यत्तद्वास्तुमयं नरः॥
ब्रह्मस्थाने ततो विद्वान् कुर्यादाधारमुत्तमम्।
तस्मिन् संस्थापयेत् कुम्भं वर्द्धन्या सह पूर्णितम्॥
हैमं वा राजतं वापि राजसं वा दृढं नवम्।
सर्वबीजौषधीयुक्तं सुवर्णरत्नसंयुतम्॥
रत्नगर्भं सुसंपूर्णं वस्त्रपूतेन वारिणा।
प्रशस्तपल्लवोपेतं श्वेतचन्दनचर्चितम्॥
पुष्पैः सुमालितं कृत्वा गन्धपुष्पैरभिधूपितम्।
आदित्येन च शुक्लेन वस्त्रयुग्मेन वेष्टितम्॥
ब्रह्मस्थाने ततो मन्त्री कलसं स्थाप्य पूजयेत्।
तस्मिंश्चतुर्मुखं देवं प्रत्येकं मन्त्रविग्रहम्॥
गन्धपुष्पैश्च नैवेद्यैः पूजयेत् सुमनोहरैः।
ततो मण्डलबाह्ये तु प्राच्यां वा प्राङ्मुखः स्थितः॥
आचार्यो गुरु संभारान् गणादीन्कल्पयेत्ततः।
सुरान्।
एतैस्तैस्तैर्यथैर्मन्त्रैर्गणादीन्कल्पयेत्ततः॥
प्रत्येकं तर्पयेद्विद्वानाहुतीनां शतेन च।
दशान् दशभिर्दशानाहुतिभिः प्रतर्पयेत्॥
दद्यात् पूर्णाहुतिं पश्चात् दीपदानेन मन्त्रवित्।
तत्र प्रणम्य विज्ञाप्य क्षमा वै स्वस्तिवाचनम्॥
प्रणम्य कर्करीं सम्यक्प्रार्थनं प्रदक्षिणम्।
एवमादिभिर्दिव्यैर्वाद्यघोषान्तु भ्रामयेत्॥
पूर्ववत्तेन मार्गेण सर्वतीर्थानि भ्रामयेत्।
सुशोभनं शुभं स्नानं तथा स्नातस्य कारयेत्॥

ततो गर्भं स्तनोच्चाधे रक्तमात्रप्रमाणकम्।
चतुरङ्गुलमात्रं तदधः सन्यात् सुशोभितम्॥
गोमयेनोपलिप्याथ चन्दनेन च भूषयेत्।
मध्ये दत्वा तु पुष्पाणि शुक्लान्यक्षतमेव च॥
आचार्यः प्राङ्मुखो भूत्वा ध्यायेदेवं चतुर्भुजम्।
तूर्यमङ्गलघोषेण ब्रह्मघोषरवेण च॥
अर्घ्यं दद्यात् सुरश्रेष्ठ! कुशतोयेन मन्त्रवित्।
प्रणम्य कर्करीं तावच्छुभं पूरयेज्जलैः॥
सर्वरत्नसमायोगैर्विमलैः सुरसन्निभैः।
तस्मिन् शुक्लानि पुष्पाणि प्रक्षिपेदीशमिति स्मरन्॥
तदावर्णं परीत्येन वेदाक्षैर्नाक्षतं क्षिपेत्।
शुभं स्याद्दक्षिणावर्तेऽशुभं वामे भवेत्ततः॥
बीजैः प्रलिप्तवादीनां तं गर्भं पूरयेद्बुधः।
चक्षताभिः पवित्राभिर्मृद्भिर्गर्भं प्रपूरयेत्॥
एवं पुष्पाद्यविधिना चार्घदानं सुरोत्तम!।
सवर्सं गां वस्त्रयुगमाचार्याय निवेदयेत्॥
कालज्ञस्यमतौ पूज्यौ वेदज्ञान् शक्तितोऽर्चयेत्।
ब्राह्मणान् भोजयित्वा च गेयवृत्तादि कारयेत्॥
ततस्तं स्नातवेद्यभाच्चलानां वापदेव तु।
पुरुषाधः स्थितं ग्रस्यं न गृहे दोषदं भवेत्॥
प्रासादे दोषदं ग्रस्यं भवेद्यावच्चलान्तिकम्।
तस्मात् प्रासादिकी भूमिः शोध्या यावच्चलान्तिकम्॥
शिवान्तं कर्करान्तं वा जाग्रत् भूः कुमारिका।
आकोष्टतां समीक्ष्यैव ततो योगं समाचरेत्॥"
किञ्च।
"पूरयेत् खातकं यत्नात् पादं पादं यथाक्रमम्।
आकाशुकं शक्तिकया स्वस्तिकं चेष्टिकादिभिः॥
खिद्वा खिद्वा तु तोयेन कलसैः काञ्चनादिभिः।
आकोटनं ततः कुर्यात् सुरैर्ब्रह्मशिलैः॥
पादोनं पूरयेत् खातं सुघनं चैव कारयेत्।
देशिकः पञ्चगव्येन तां भूमिं प्रोक्षयेद्बुधः॥
सुवर्णप्रोक्षिणीभेद्य घृतमण्डलधारिणा।
तीर्थतोयसुपूर्णेन स्वर्णताम्रमयेन वा॥
सेचयेदभिमन्त्रेण वारिणा कलसेन तु।
ततः शुद्धा भवेद्भूमिर्दोषयुक्तापि या भवेत्॥"
अथ शिलालक्षणं माह्ये।
"आदावेवं समाख्येन शिलालक्षणमुत्तमम्।
शिलान्यासविधानञ्च प्रोच्यते तदनन्तरम्॥
शिला वाथेष्टका वापि चतस्रो लक्षणान्विताः।
प्रासादादौ विधानेन न्यसेया सुमनोहराः॥
चतुरस्राः समाः कृत्वा समन्तादथ वेष्टकाः।
शिलारूपाः स्मृता विद्वान्नन्द्यावर्तेष्टकाकृतिकाः॥
संपूर्णाः सुतलाः स्निग्धाः सुघना लक्षणान्विताः।
कुमकुर्व्यादिना धन्याः मधुपक्षत्वचामराः॥
साधुगोरोचनोपेताः कृष्णसत्पक्षसान्विताः।
एवंजा इष्टिकाद्याश्च ग्रस्यन्ते न्यासकर्मणि॥
गृहप्रविष्टगाद्याश्च शुभदाः सर्वदा स्मृताः।

स्यात्का वेदिका युक्ता नन्द्यावर्तकलाञ्छिता: ।
पद्मादिलक्षणोपेता: शिला: सर्व्वार्थसिद्धिदा: ।
तथा गोवाजिपादाढ्या: शिला धन्या: सुखावहा: ॥
क्रव्यादन्नागपादाढ्या न शस्ता: पक्षिणस्तथा ।
दिङ्मूढ़ा दिग्विहीनाश्च दीर्घह्रस्वा: क्षतान्विता: ॥
भिन्ना: स्फुटिता भग्ना: संख्याज्या लक्षणच्युता: ।
प्रशस्तपार्श्वरूपाढ्या: प्रशस्तद्रव्यलाञ्छिता: ॥
यथोक्तलक्षणोपेता: शिला नित्यहितावहा: ॥"
अथ इष्टकालक्षणम् । तत्रैव ।
"इष्टकानां समासेन लक्षणं शृणु साम्प्रतम् ।
एकवर्णा: सुपक्वाश्च सुप्रमाणा मनोरमा: ॥
नन्द्यावर्त्तेष्टका: कार्य्याश्चतुरस्रा: सुसंमिता: ।
अस्याङ्गारान्विता नेष्टा: कृष्णवर्णा: सकर्करा: ॥
मन्दपक्वा विषक्वाश्च बहुदिग्भाश्च वर्ज्जिता: ।
भग्नाश्च विषमा हीना वर्ज्जनीया: प्रयत्नत: ॥"
एषशीर्षपञ्चरात्रे ।
"इष्टकानां प्रमाणश्च लक्षणं साम्प्रतं शृणु ।
सुतला लक्षणोपेता द्वादशाङ्गुलसम्मिता: ॥
सुविस्तारविभागेन नैगुण्येन च सम्मिता: ।
सुपक्वा: सुप्रमाणास्ता एकवर्णा मनोहरा: ।
विमला इष्टका: कार्य्याश्चतुरस्रा: सुसम्मिता: ।
छिन्नकर्णाश्चाप्रशस्ता: प्राग्विपादविवर्ज्जिता: ॥
सकर्करा: कृष्णवर्णा अस्याङ्गारचिताश्च या: ।
विवर्णा मन्दपक्वाश्च या: पीना: पिष्टिकाश्च या: ॥
हीनाश्च विषमा भग्ना वर्ज्जनीयाश्च विवर्ज्जिता: ॥"
अथ शिलादिन्यासयवस्था । मात्स्ये ।
"शिलान्यासस्तु कर्त्तव्य: प्रासादे तु शिलामये ।
इष्टकानान्तु विन्यास: प्रासादे चेष्टकामये ॥
शैलजे शैलज: पीठ ऐष्टिके ऐष्टिक: स्मृत: ।
शिलान्यासादिको भद्रे मूलपादो विधीयते ॥"
एषशीर्षपञ्चरात्रे ।
"कर्त्तव्यश्चेष्टकान्यास: प्रासादे चेष्टकामये ।
शैले शिलानां विन्यास: कार्य्ये कर्करा न्यसेत् ॥
कृत्वा शिलादिन्यासे च प्राक्शिलाभ्यधिवासनम् ।
इष्टकानां प्रतिष्ठाञ्च गर्भाधानञ्च कारयेत् ।
गुरवे दक्षिणां दत्त्वा पीठबन्धञ्च साधयेत् ।
स्वयं श्रीएषशीर्षेण प्रोक्तलक्षविधि: स्फुटम् ॥"
अथ पीठबन्धनम् । एषशीर्षे ।
"पीठबन्धं ततः कुर्य्यान्मञ्चपासादमानत: ।
पीठोत्तमं चोच्छ्रयेण प्रासादस्योर्द्धमानत: ॥
पादहीनं मध्यमं स्यात् कनिष्ठं चार्द्धमानत: ।
उत्तमं वास्तुदेवस्य कुर्य्यात् पीठं विचक्षण: ॥
अथ प्रासादलक्षणानि । मात्स्ये ।
सर्वं वास्तुबलिं कृत्वा भजेत् पीठशुभागिकम् ।
तस्य मध्ये चतुर्भिस्तु भागैर्गर्भञ्च कारयेत् ॥
भागादशकं तच्च भित्तार्थं परिकल्पयेत् ।
पञ्चभागेन भित्तीनामुच्छ्राय: स्यात् प्रमाणत: ॥
द्विगुण: शिखरोच्छ्रायो भित्तुच्छ्रायात् प्रमाणत: ।
शिखरार्द्धस्य चार्द्धेन विधेया तु प्रदक्षिणा ॥
चतुर्दिक्षु तदा ज्ञेयो निर्गमस्तु तथा बुधै: ।
गर्भसूत्रद्वयं भागो विस्तारो मण्डपस्य तु ॥
आयत: स्यात्त्रिभिर्भागैर्भद्रयुक्त: सुशोभन: ।
पञ्चभागेन संभज्य गर्भमानं विचक्षण: ॥
भागमेकं गृहीत्वा तु प्राग्ग्रीवं कल्पयेद्बुध: ।
गर्भसूत्रसमो भागादग्रतो सुखमण्डप: ।
एतत् सामान्यमुद्दिष्टं प्रासादस्येह लक्षणम् ॥
किञ्च ।
मेरुमन्दरकैलासकुम्भसिंहनगास्तथा ।
विमानच्छन्दकस्तद्वच्छ्रीवृक्षोऽथ नगाधिप: ॥
वलभिच्छन्दकस्तद्वद्वृत्तुंल: सर्व्वभद्रक: ।
गजश्च नन्दनश्चैव नन्दिवर्द्धन एव च ॥
हंसो वृष: सुपर्णश्च पद्मकोऽथ सप्तनक: ।
प्रासादा नामत: प्रोक्ता विभागं शृणुत द्विजा: ॥
शतसङ्ख्यचतुर्द्वारो भूमिकाषोड़शोच्छ्रित: ।
नानाविचित्रशिखरो मेरुप्रासाद उच्यते ॥
मन्दरो द्वादश: प्रोक्त: कैलासो दशभूमिक: ।
विमानच्छन्दकस्तद्वदनेकशिखरानन: ॥
स चाष्टभूमिकस्तद्वत् सप्तभिर्नन्दिवर्द्धन: ।
विंशाण्डकसमायुक्तो नन्दन: समुदाहृत: ॥
षोड़शाण्डकसंयुक्तो नानारूपसमन्वित: ।
अनेकशिखरस्तद्वत् सर्व्वतोभद्र उच्यते ॥
चन्द्रशालसमोपेतो विज्ञेय: पञ्चभूमिक: ।
वलभिच्छन्दकस्तद्वच्चुकनासान्वयान्वित: ॥
वृषस्योच्छ्रयतुल्यो मण्डलश्चासिवर्ज्जित: ।
सिंह: सिंहगतिर्ज्ञेयो नगो नगसमस्तथा ॥
कुम्भ: कुम्भाकृतिस्तद्वद्भूमिकानवकोच्छ्रय: ।
अङ्गुलीपुटसंस्थानपञ्चाण्डकविभूषित: ॥
षोड़शाम: समन्तात्तु विज्ञेय: स सप्तनक: ।
पार्श्वयोश्चन्द्रशालस्य उच्छ्रायो भूमिकाद्वयम् ॥
षोड़शास्र: स विज्ञेयो विचित्रशिखर: शुभ: ।
नगराजस्तु विख्यातश्चन्द्रशालाविभूषित: ॥
प्राग्ग्रीवेण विशालेन भूमिकास्तु षड़ुन्नत: ।
अनेकचन्द्रशालस्तु गज: प्रासाद उच्यते ॥
पर्य्यन्तगृहराजौ द्वौ गरुड़ो नाम नामत: ।
सप्तभूम्युच्छ्रयस्तद्वच्चन्द्रशालान्वयान्वित: ॥
भूमिकाषड़्गीतिस्तु वाहृत: सर्व्वतो भवेत् ।
तथान्यो गरुड़स्तद्वदुच्छ्रायाद्दशभूमिक: ॥
पद्मक: षोड़शास्रस्तु भूमिद्वयसमन्वित: ।
पद्मतुल्यप्रमाणेन श्रीवृक्षक इति स्मृत: ॥
पञ्चाण्डकस्त्रिभूमिस्तु गर्भे हस्तचतुष्टयम् ।
वृषो भवति नाम्ना य: प्रासाद: सर्व्वकामिक: ॥
समाश्चौ पञ्चकाश्चैव प्रासादा ये मयोदिता: ।
सिंहस्य ते समा ज्ञेया ये चान्ये तत्प्रमाणत: ॥
चन्द्रशाले: समोपेता: सर्व्वे प्राग्ग्रीवसंयुता: ।
ऐष्टका दारवाश्चैव शैला वा स्यु: सुतोरणा: ॥
मेरु: पञ्चाशहस्त: स्यात् मन्दर: पञ्चहीनक: ।
चत्वारिंशत्तु कैलासश्चतुस्त्रिंशद्विमानक: ॥
नन्दिवर्द्धनकस्तद्वद्वात्रिंशत् समुदाहृत: ।
त्रिंशता नन्दन: प्रोक्त: सर्व्वतोभद्रकस्तथा ॥
वर्त्तुल: पद्मकश्चैव त्रिंशद्धस्त उदाहृत: ।
नग: सिंहश्च कुम्भश्च वलभिच्छन्दकस्तथा ॥
एते षोड़शहस्ता: स्युश्चत्वारो देववल्लभा: ।
श्रीवृक्षो नगराजश्च समुद्गकगजौ तथा ॥
एते द्वादशहस्ता: स्युरेतेषां हंसक: समृ: ।
गरुड़ोऽष्टकरो ज्ञेयो वृषो दश उदाहृत: ॥
एवमेते प्रमाणेन कर्त्तव्या: शुभलक्षणा: ।
यक्षराजमनागानां मानहस्त: प्रशस्यते ॥
तथा मेर्व्वादय: सप्त व्येकलिङ्गे सुखावहा: ।
श्रीवृक्षकादयश्चाष्टौ मध्यमस्य उदाहृता: ॥
तथा हंसादय: पञ्च कन्यसे सुभदा मता: ।"
एषशीर्षपञ्चरात्रे ।
"प्रासादं संप्रवक्ष्यामि सर्व्वसाधारणं शृणु ।
चतुरश्रीकृतं क्षेत्रं भवेत् षोड़शधा पुन: ॥
मध्ये तस्य चतुर्भिस्तु कुर्य्यादायसमन्वितम् ।
द्वादशैव तु भागानि भित्तार्थं परिकल्पयेत् ॥
भद्रोच्छ्रायन्तु कुर्व्वीत चतुर्भागेण चायतम् ।
भद्रोच्छ्रयाद्द्विगुणोच्छ्रायं मञ्चमर्य्या: प्रकल्पयेद्बुध: ॥
चतुर्भागेन मञ्चर्य्या: कार्य्या सम्यक् प्रदक्षिणा ।
तस्मान्निर्गमं कार्य्यमुभयो: पार्श्वयो: समम् ॥
शिखरेण समं कार्य्यमग्रे जगति विस्तरम् ।
त्रिगुणेनापि कर्त्तव्यं यथाशोभानुरूपत: ॥
विस्तरं मण्डपस्याग्रे गर्भसूत्रद्वयेन तु ।
दैर्घ्यात् पादाधिकं कुर्य्यान्मध्ये स्तम्भैर्विभूषितम् ॥
प्रासादगर्भमानं वा कुर्व्वीत सुखमण्डपम् ।
एकाशीतिपदैर्वास्तु यद्वा मण्डपमारभेत् ॥
शुकाद्यद्वारि विन्यासे पादान्तस्थान् यजेत् सुरान् ।
तथा प्राकारविन्यासे यजेद्वास्तिंशद्गणान् ॥
सर्व्वसाधारणश्चैतत् प्रासादस्य तु लक्षणम् ।
मानेन प्रतिमाया वा प्रासादमपरं शृणु ॥
प्रतिमाया: प्रमाणेन कर्त्तव्या पिण्डिका शुभा ।
गर्भस्तु पिण्डिकार्द्धेन गर्भमानात्तु भित्तय: ॥
भित्तेरायाममानेन उच्छ्रायन्तु प्रकल्पयेत् ।
भित्तुच्छ्रायात्तद्विगुणं शिखरं कल्पयेद्गुरु ! ॥
शिखरस्य तु तुर्य्येण भ्रमणं परिकल्पयेत् ॥
शिखरस्य चतुर्थेन अग्रतो सुखमण्डपम् ।
अष्टकांशेन गर्भस्य रथकानान्तु निर्गमः ॥
परिधेर्गुणभागेन रथकांश्च कल्पयेत् ।
तत्तृतीयेन वा कुर्य्यात्रयकानान्तु निर्गमम् ॥
वासत्रयं स्थापनीयं रथकत्रितये सदा ।
शिखरार्धेन शृङ्गाणि रङ्गाणि विनिपातयेत् ॥
शिखरस्यार्द्धभागस्थं सिंहं तत्र च कारयेत् ।
शुकनासां स्थिरीकृत्य मध्यसन्धौ विवर्ज्जयेत् ॥
अपरे च तथा पार्श्वे तद्वत् शृङ्गं निधापयेत् ॥
तदर्द्धन्तु भवेद्ग्रीव: कण्ठे श्यामलसारवान् ।
स्कन्धभग्नन्तु कर्त्तव्यं विकरालं तथैव च ।
ऊर्द्धन्तु वेदिकामानात् कलसं परिकल्पयेत् ॥
किञ्च ।
"गरुत्मन्तं तथा कुर्य्यादुपरिष्टाच्चतुर्गुणम्

ऋक्षाद्रिकृतिमायामान् दिक्षु चाष्टासु
चोपरि ॥
महावराहमैन्द्रान्तु नरसिंहन्तु दक्षिणे ।
प्रतीच्यां श्रीधरं देवसुदीच्यां हयशीर्षकम् ॥
आग्नेय्यां यामदग्न्यञ्च नैर्ऋते राममेव च ।
वामनञ्चैव वायव्यां वासुदेवमथापरे ॥" *॥
किञ्च ।
"पूर्व्वभूमौ तु शयनं द्वितीये चासनं भवेत् ।
स्थानमेव तृतीये तु चतुर्थे यानमेव च ॥
पञ्चमे योगनिद्रा तु षष्ठे योगासनं भवेत् ।
स्थानं योगसमायुक्तं सप्तमे परिकल्पयेत् ॥
नानागवाक्षकैर्युक्तात् पत्रवल्ल्यादिभूषितम् ।
नानाप्रकारपुष्पाद्यैर्यथाशोभं प्रकल्पयेत् ॥
कनिष्ठमध्यश्रेष्ठानां प्रासादानां यथाक्रमम् ।
वसुभागा च ऋत्विग्भिः प्रदेया रचना बुधैः ॥
द्वारस्य चाष्टमे युक्ते नवमे दशमे तथा ।
ललाटवेधो नैवं स्यादायस्य शुभ्रं साम्प्रतम् ॥
यावद्भूरेरभिप्रेतः प्रासादकर्तृणानघ ! ।
तावद्विरङ्गुलैरायो वसुभागेन वा भवेत् ॥
एकस्तम्भो ध्वजो ज्ञेयो द्विस्तम्भा वेदिका मता ।
दशभूम्यन्तरे नित्यं चतुस्तम्भं प्रकल्पयेत् ॥"*॥
अथ मण्डपलक्षणविशेषः । मात्स्ये ।
"अथातः सम्प्रवक्ष्यामि मण्डपानान्तु लक्षणम् ।
मण्डपान् प्रवरान् वक्ष्ये प्रासादस्यानुरूपतः ॥
विविधा मण्डपाः कार्य्या ज्येष्ठमध्यकनीयसः ।
नामतस्तान् प्रवक्ष्यामि शृणुध्वं द्विजसत्तमाः ! ॥
पुष्पकः पुष्पभद्रश्च सुवृत्तो रुतनन्दनः ।
कौशल्यो वृद्धिसञ्ज्ञीर्णो राजभद्रो जयावहः ॥
श्रीवृक्षो विजयश्चैव वास्तुजीर्णः शृतिं धरः ।
यज्ञभद्रो विशालश्च संक्षिप्तः शत्रुमर्द्दनः ।
भागपक्षो नन्दनश्च मानवो मानभद्रकः ।
सुग्रीवो हर्षणश्चैव कर्णिकारः पदार्द्धकः ॥
सिंहश्च श्यामभद्रश्च सुभद्रश्च तथैव च ।
सप्तविंशतिर्व्याख्याता लक्षणं शृणुत द्विजाः ॥
स्तम्भा यत्र चतुःषष्टिः पुष्पकः स उदाहृतः ।
द्वाषष्टिः पुष्पभद्रस्तु षष्टिः सुवृत्त उच्यते ॥
अष्टपञ्चाशत्कस्तम्भः कथ्यते रुतनन्दनः ।
कौशल्यः षट्पञ्चाशच्चतुःपञ्चाशता पुनः ॥
नाम्ना तु वृद्धिसञ्ज्ञीर्णो द्विहीनो राजभद्रकः ।
जयावहस्तु पञ्चाशच्छ्रीवृक्षस्तु द्विहीनकः ॥
विजयस्तद्विहीनः स्यात् वास्तुसञ्ज्ञीर्णकस्तथा ।
द्वाभ्यामेव प्रहीयेत ततः शृतिधरोऽपरः ॥
चत्वारिंशद्दयज्ञभद्रो द्विहीनोऽथ विशालकः ।
षट्त्रिंशच्चैव संक्षिप्तो द्विहीनः शत्रुमर्द्दनः ॥
द्वात्रिंशद्भागपक्षस्तु त्रिंशता नन्दनः स्मृतः ।
अष्टाविंशन्मानवस्तु मानभद्रो द्विहीनकः ॥
चतुर्व्विंशस्तु सुग्रीवो द्वाविंशद्धर्षणो मतः ।
विंशतिः कर्णिकारः स्यादष्टादशः पदार्द्धकः ।
सिंहो भवेद्विहीनस्तु श्यामभद्रो द्विहीनकः ॥
सुभद्रस्तु तथा प्रोक्तो द्वादशस्तम्भसंयुतः ।
मण्डपाः कथिता ह्येते यथावल्लक्षणान्विताः ।
त्रिकोणं वृत्तमर्द्धेन्दुमष्टकोणं द्विरष्टकम् ॥
चतुष्कोणञ्च कर्त्तव्यं संस्थानं मण्डपस्य तु ।
राज्यञ्च विजयश्चैवमायुर्व्वर्द्धनमेव च ॥
पुत्रलाभः श्रियः पुष्टिस्तासादिषु भवेत् क्रमात् ।
एवन्तु शुभदाः प्रोक्ता अन्यथा तु भयावहाः ॥"
अथ तत्र द्वारनिर्णयः । हयशीर्षपञ्चरात्रे ।
"ग्राममध्ये च पूर्व्वे च प्रत्यगुद्वारं प्रकल्पयेत् ।
विदिक्षासु च सर्व्वासु तथा प्रत्यङ्मुखं भवेत् ॥
दक्षिणे चोत्तरे चैव पश्चिमे प्राङ्मुखं भवेत् ॥"
किञ्च ।
"विस्तारादिगुणं द्वारं कर्त्तव्यन्तु सुशोभनम् ।
जातरूपं सरत्नं तद्दद्युम्बरेर्द्दृतम् ॥
औडुम्बरोर्द्धतः स्वर्णं दत्त्वा शाखां न्यसेद्बुधः ।
तूर्य्यमङ्गलघोषेण ब्राह्मणान् स्वस्तिवाच्य च ।
द्वारस्य च चतुर्थांशे कार्य्यौ चण्डप्रचण्डकौ ।
दण्डहस्तौ तु कर्त्तव्यौ विष्वक्सेनोपमावुभौ ॥
शाखोर्द्धे न्यस्य रत्नानि न्यसेदूर्द्धमुडुम्बरम् ।
तस्य मध्ये स्थिता देवी साक्षाल्लक्ष्मीः सुरेश्वरी ॥
कर्त्तव्या दिग्गजैः सा तु स्नाप्यमाना घटैन तु ।
शाखोडुम्बरकौ कार्य्यौ पत्रवल्ल्यादिभूषितौ ॥
एकशाखं त्रिशाखं वा षट्शाखं द्वारमिष्यते ।
नवशाखञ्च कुर्व्वीत अत ऊर्द्धं न कारयेत् ।
विष्णुवतारूपाद्यैः शाखां रत्नैन भूषयेत् ॥"
मात्स्ये ।
"चतुःषष्टिपदं कृत्वा मध्ये द्वारं प्रकल्पयेत् ।
विस्तारादिगुणोच्छ्रायस्तत्त्रिभागा कटिर्भवेत् ॥
विस्तारार्द्धे भवेद्गर्भो भित्तयोऽन्याः समन्ततः ।
गर्भपादेन विस्तीर्णं द्वारं द्विगुणमायतम् ॥
उच्छ्रायात् पादविस्तीर्णा शाखा तद्दद्युम्बरः ।
विस्तारपादप्रतिमं बाहुल्यं शाखयोः स्मृतम् ॥
त्रिपञ्चसप्तनवभिः शाखाभिर्द्वारमिष्यते ।
कनिष्ठं मध्यमं ज्येष्ठं यथायोगं प्रकल्पयेत् ॥
अङ्गुलानां शतं सार्द्धं चत्वारिंशद्विरुत्तमम् ।
धन्यसुत्तममायुष्यं धनधान्यदमेव च ॥
शतं चाशीतिसहितं वातनिर्गमनं भवेत् ।
अधिकं दशभिस्तद्वत्तथा षोड़शभिः शतम् ॥
शतमानं द्वितीयन्तु भवत्यशीतिभिस्तथा ।
दशद्वाराणि चैतानि क्रमेणोक्तानि सर्व्वदा ॥
अन्यानि वर्ज्जनीयानि मानसोद्वेगदानि तु ।
द्वारवेधन्तु यत्नेन सर्व्ववास्तुषु वर्ज्जयेत् ॥
वृक्षकोणाच्च भूद्वारात् स्तम्भकूपध्वजादपि ।
शल्याम्बुभेद्य वा विद्धं न द्वारं शुभदं भवेत् ॥
क्षयश्च दुर्गतिश्चैव प्रवासः क्षुद्भयं तथा ।
दौर्भाग्यं बन्धनं रोगो दारिद्र्यं कलहं तथा ।
विरोधश्चार्थनाशश्च सर्व्वं वेधे भवेत् क्रमात् ॥"
अथ प्राकारादिनिर्णयः । हयशीर्षपञ्चरात्रे ।
"प्रासादस्य चतुर्भागैः प्राकारस्योच्छ्रयो भवेत् ।
पञ्चहस्तस्य देवस्य एकहस्ता तु पीठिका ॥
तस्मात्तु द्विगुणः प्रोक्तस्तथा गरुड़मण्डपः ।
एकहस्तादि कुर्व्वीत त्रिंशद्धस्तान्तमेव च ॥"
अथ वृक्षरोपणविधयः । मात्स्ये ।
"पूर्व्वेण फलिनो वृक्षाः क्षीरवृक्षास्तु दक्षिणे ।
पश्चिमेन जलं श्रेष्ठं पद्मोत्पलविभूषितम् ।
उत्तरेण नलेक्षाद्यैः शुभा स्यात् पुष्पवाटिका
सर्व्वतस्तु जलं श्रेष्ठं स्थिरमस्थिरमेव च ॥
सर्व्वतश्चापि कर्त्तव्यं परिखावलयादिकम् ।
याम्ये तपोवनस्थानमुत्तरे मातृकागृहम् ॥
महानसं तथाग्नेये नैर्ऋते तु विनायकः ।
वारुणे श्रीनिवासश्च वायव्ये गृहमालिका ॥
उत्तरे यज्ञशाला तु निर्म्माल्यस्थानमुत्तरे ।
वारुणे सोमदेवत्ये बलिनिर्व्वपणं स्मृतम् ॥
पुरतो गरुड़स्थानं तथान्येषां यथोचितम् ।
एवमायतनं कृत्स्नमाच्छुभमण्डपसंयुतम् ॥
वप्रप्रावितानकसतोरणचित्रयुक्तं
नित्योत्सवप्रमुदितेन जनेन सार्द्धम् ।
यः कारयेत् सुरगृहं विविधध्वजाढ्यं
श्रीस्तं न मुञ्चति सदा दिवि पूज्यते च ॥"
अथ जीर्णोद्धारः । विष्णुधर्म्मे तृतीयकाण्डे ।
"यस्य राज्ञस्तु विषये देवेशः विशीर्य्यते ।
तस्य सीदति तद्राज्यं देवेशः यथा तथा ॥
ज्ञात्वा जीर्णस्य संस्कारं तथा देवेशवेश्मनः ।
द्विगुणं फलमाप्नोति नात्र कार्य्या विचारणा ॥"
विष्णुरहस्ये ।
"पतितस्य च यः कर्त्ता पतमानस्य रक्षिता ।
विष्णोरायतनस्येह स नरो विष्णुलोकभाक् ॥"
अग्निपुराणे ।
"पतितं पतमानन्तु तथार्द्धस्फुटितं नरः ।
समुद्धृत्य हरेर्धाम द्विगुणं फलमाप्नुयात् ॥"
देवीपुराणे ।
"मूलाच्छतगुणं पुण्यं प्राप्नुयाज्जीर्णकारकः ।
तस्मात् सर्व्वप्रयत्नेन जीर्णस्योद्धारमाचरेत् ॥"
हयशीर्षपञ्चरात्रे ।
"वापीकूपतड़ागानां सुरधाम्नां तथानघ ! ।
प्रतिमानां सभानाञ्च संस्कर्त्ता यो नरो भुवि ।
पुण्यं शतगुणं तस्य भवेन्मूलान्न संशयः ॥
प्रतिष्ठाया विधिः कार्य्यस्तथा मन्दिरनिर्म्मिते ।
प्रायः श्रीहयशीर्षोक्तैरनुसारेण वैष्णवैः ॥
देवालयप्रतिष्ठा च ख्याता तल्लिखनेन किम् ।
श्रीमूर्त्तिस्थापनेनैव संपूर्णा सा विशेषतः ॥"

इति श्रीहरिभक्तिविलासे २० विलासः ॥

मन्दिरं, क्ली, पुं. (मन्द्यन्ते मोद्यन्ते लोका यत्र । मदि + "इषिमदिमुदीति ।" उणा० १ । ५२ । इति किरच् ।) नगरम् । इति मेदिनी । रे, १६७ ॥ पुंलिङ्गोऽप्ययं शब्दः । यथा । नगरं मन्दिरं पुरमिति पुंनपुंसकयोररुरेन भण्यते । इत्यमरटीकायां भरतः ॥ (अश्वजानुपश्चिमभागः । यथा, अश्ववैद्यके । २ । २१ ।
"अधरे च ततो जानु निर्द्दिष्टं शास्त्रकोविदैः ।
मन्दिरं पश्चिमो भागः कक्षाची जानुनोऽग्रिमः ॥")

मन्दिरः, पुं, (मदि + किरच् ।) वसुदः । इति मेदिनी । रे, १६७ ॥ जानुपश्चाद्भागः । इति हेमचन्द्रः । ३ । २७८ ॥

मन्दिरपशुः, पुं, (मन्दिरचरः मन्दिरपालितो वा पशुः । मध्यपदलोपी कर्म्मधारयः ।) विड़ालः । इति शब्दचन्द्रिका ॥

मन्मथः

मन्दिरा, स्त्री, (मन्दिर+स्त्रियां टाप्।) मन्दिरम्। यथा, मन्दिरायास्तरावानिति मधुसूदनटीकायाः।

मन्दुरा, स्त्री, (मन्दन्ति सथन्ति मोदन्ते वा अश्वा यत्र। मन्द्+"मन्दिखाशिभ्यश्चेति।" उणा० १। ३८। इति उरच्। स्त्रियां टाप्।) वाजिशाला। इत्यमरः। २। २। ७१ (यथा, नैषधचरिते। १। ५७।

"उपाहरन्नम्भजमत्यचञ्चलैः
चुराचलैः कौमितमन्दुरोदरम्।")

अश्वबन्धनार्थवस्तु। इति मेदिनी। रे, २००। माड़र इति भाषा।

मन्दोदरी, स्त्री, (मन्दं उदरं यस्याः। स्त्रियां ङीष्।) रावणमहिषी। सा तु मयदानवकन्या। इति रामायणम्। (यथा, महाभारते। ३। २८०। १६।

"भार्य्या मे भव सुश्रोणि! यथा मन्दोदरी तथा॥")

कुमारानुचरमातृगणभेदः। यथा, महाभारते। ६। ४६। १७।

"मन्दोदरी तुहुण्डी च कोटरा मेघवाहिनी॥")

मन्दोदरीशः, पुं, (मन्दोदर्य्याः ईशः पतिः।) रावणः। इति त्रिकाण्डशेषः॥

मन्दोदरीसुतः, पुं, (मन्दोदर्य्याः सुतः।) इन्द्रजित्। इति जटाधरः॥

मन्दोष्णं, क्ली, (मन्दं अल्पं च तदुष्णञ्चेति।) ईषदुष्णम्। तद्गुणि, त्रि। इत्यमरः। १। ४। २५॥

मन्द्रः, पुं, (मन्द्यते तुष्यते अनेन। मदि+"स्फायितञ्चीति।" उणा० २। १३। इति रक्।) गम्भीरध्वनिः। इत्यमरः। १। ७। २॥ (यथा, मेघदूते। १००।

"मन्द्रस्निग्धैर्ध्वनिभिरबलावेणिमोक्षोत्सुकानि॥")

वाद्यविशेषः। तत्पर्य्यायः। मद्गुः २ मदङ्गकः ३। इति शब्दरत्नावली॥ (त्रि, हृष्टः। यथा, ऋग्वेदे। १। ५। ७।

"घोता मन्द्रो वरेण्यः।"

"मन्द्रो हृष्टः।" इति तद्भाष्ये सायणः॥ मादनशीलः। यथा, ऋग्वेदे। १। १४१। ७।

"अग्ने! तुभ्यं व्रतपतेऽवतो
मन्द्र स्वधावन्नवतजातं सुक्रतो।'

"मन्द्र! मादनशील!।" इति तद्भाष्ये सायणः।)

मन्मथः, पुं, (मनो मथ्नाति विकरोतीति। मन्थ्+घञ्। पृषोदरादित्वात् साधुः। अस्य नामनिरुक्तिर्यथा, ब्रह्मवैवर्ते। १। ४। ७।

"मनो मथ्नाति सर्व्वेषां प्रथमारोहेण कामिनाम्।
तस्मात् मन्मथनामेति प्रवदन्ति मनीषिणः।")

कामदेवः। (यथा, नैषधचरिते। ८। २८।

"न मन्मथस्यैव हि नाभिकाकिः।")

अनिरुद्धः। इत्यमरः। १। १। २१॥ कामचिन्ता। इति मेदिनी। थे, २२। ४॥ कामदेवस्योत्पत्तिर्यथा,—

"एवं चिन्तयतस्तस्य ब्रह्मणो मुनिसत्तमाः।
मनसः पुरुषो बलगुराविर्भूतो विनिःसृतः॥
काञ्चनीचूर्णपीताभः पीनोन्नतसुनासिकः।
सुवृत्तोरुकटीजङ्घो नीलावक्षितकेशकः॥
लम्बभ्रूयुगलो लोलः पूर्णचन्द्रनिभाननः।
कपाटविस्तीर्णहृदि रोमराजीविराजितः॥
शुभ्रमानङ्करवत्पीननिरुत्तबाहुकः।
आरक्तपाणिनयनसुखपादकरौष्ठवः॥
क्षौममध्यचारुदन्तः प्रमत्तगजकन्धरः।
प्रफुल्लपद्मपत्राक्षः केशरश्मश्रुपर्णवः॥
कम्बुग्रीवो मीनकेतुः प्रांशुर्मकरवाहनः।
पञ्चपुष्पायुधो योगी पुष्पकोदण्डमण्डितः॥
कान्तः कटाक्षपातेन भ्रामयन्नयनद्वयम्।
सुगन्धिमारुताभ्रान्तं भृङ्गाररवसेवितम्॥
वीक्ष्य तं तादृशं दक्षप्रमुखा मानसाश्च ते।
मरीच्याद्या दश ततो विस्मयाविष्टचेतसः॥
यौनसुखं परमं जग्मुरापुर्व्वैकारिकं मनः।
स चापि वेधसं वीक्ष्य सरारं जगतां पतिम्।
प्रणम्य पुरुषः प्राह विनयावनतकन्धरः॥

श्रीपुरुष उवाच।

किं करिष्याम्यहं कर्म्म ब्रह्मंस्त्वञ्च नियोजय।
मानार्थे पुरुषो यस्मादुचिते शोभिते विधे॥
अभिधानञ्च यदयोग्यं स्थानं पत्नी च या मम।
तन्मे कुरुष्व लोकेश! सृष्टा त्वं जगतां यतः॥

मार्कण्डेय उवाच।

एवं तस्य वचः श्रुत्वा पुरुषस्य महात्मनः।
उवाच किञ्चिन् प्रोवाच स्वदृष्टावपि विस्मितः॥
ततो मनः सुसंयम्य सम्यगुन्मृज्य विस्मयम्।
उवाच पुरुषं ब्रह्मा तत्कर्म्मादेशमावहन्॥

ब्रह्मोवाच।

अनेन चारुरूपेण पुष्पबाणेन पञ्चभिः।
मोहयन् पुरुषांश्चैव कुरु सृष्टिं सनातनीम्॥
न देवा न च गन्धर्व्वा न किन्नरमहोरगाः।
नासुरा न च दैत्या वा न विद्याधरराक्षसाः॥
न यक्षा न पिशाचाश्च न भूता न विनायकाः।
न गुह्यका न सिद्धाश्च न मनुष्या न पक्षिणः॥
पशवो न मृगाः कीटाः पतङ्गा जलजाश्च ये।
न ते सर्व्वे भविष्यन्ति न लक्ष्या ये शरस्य ते॥
अहं वा वासुदेवो वा स्थाणुर्वा पुरुषोत्तम!।
भविष्यामस्तव वपुः किमन्यैः प्राणधारिभिः॥
प्रच्छन्नरूपो जन्तूनां प्रविशन् हृदये सदा।
सुखहेतुः स्वयं भूत्वा कुरु सृष्टिं सनातनीम्॥
त्वत्पुष्पबाणस्य सदा सुखं लक्ष्यं मनोरुजं च।
सर्व्वेषां प्राणिनां नित्यं मदमोदकरो भवान्॥
इति ते कर्म्म कथितं सृष्टिप्रवर्त्तकं पुनः।
नामानि च वदिष्यामि यत्ते योग्यं भविष्यति॥

मार्कण्डेय उवाच।

इत्युक्त्वा सुरश्रेष्ठो मानसानां सुखानि च।
आलोक्य चासने पद्मे सुपविष्टोऽभवत् ततः॥"
इति कालिकापुराणे कामप्रादुर्भावो नाम १ अध्यायः॥

मन्मथः

मन्मथः, पुं, (मन्मथ+अण्।) कामदेवः। इति हेमचन्द्रः। ३। ४४॥ (यथा, रघुवंशे। ३। ३।

"मन्मथेन मधुना च योजितः
सोऽनयत् सह वसन्तमाश्रमम्॥")

मन्मथकेतनं, क्ली, (मन्मथस्य केतनमिव।) पुरुषलिङ्गम्। इति हेमचन्द्रः। ४। ३४२॥

मन्मथगृहं, क्ली, (मन्मथस्य गृहमिव।) योनिः। इति हेमचन्द्रः। ४। ३४२॥

मन्मथतीर्थं, क्ली, (मन्मथस्य तीर्थमिव।) योनिः। इति हेमचन्द्रः। ४। ३४२॥

मन्मथदीपनः, पुं, (मन्मथं दीपयतीति। दीप्+णिच्+ल्युः।) कामवर्द्धकत्वात् तस्य तथात्वम्।) मदनवृक्षः। इति राजनिर्घण्टः॥

मन्मथनिधिः, पुं, (मन्मथस्य निधिरिव।) योनिः। इति हेमचन्द्रः। ४। ३४२॥

मन्मथपीठं, क्ली, (मन्मथस्य पीठमिव।) योनिः। इति हेमचन्द्रः। ४। ३४२॥

मन्मथमन्दिरं, क्ली, (मन्मथस्य मन्दिरमिव।) योनिः। इति हेमचन्द्रः। ४। ३४२॥

मन्मथमन्दिरा, स्त्री, (मन्मथस्य मन्दिरमिव।) योनिः। इति हेमचन्द्रः। ४। ३४२॥

मन्मथमन्दिरी, स्त्री, (मन्मथस्य मन्दिरमिव।) योनिः। इति हेमचन्द्रः। ४। ३४२॥

मन्मथमन्दुरा, स्त्री, (मन्मथस्य मन्दुरेव।) योनिः। इति हेमचन्द्रः। ४। ३४२॥

मन्मथमन्दुरी, स्त्री, (मन्मथस्य मन्दुरेव।) योनिः। इति हेमचन्द्रः। ४। ३४२॥

मन्मथमन्दोदरी, स्त्री, (मन्मथस्य मन्दोदरीव।) योनिः। इति हेमचन्द्रः। ४। ३४२॥

मन्मथमन्दोदरीसुतः, पुं, (मन्मथस्य मन्दोदरीसुतः।) इन्द्रजित्। इति हेमचन्द्रः। ४। ३४२॥

मन्मथमन्द्रा, स्त्री, (मन्मथस्य मन्द्रेव।) योनिः। इति हेमचन्द्रः। ४। ३४२॥

मन्मथमन्द्री, स्त्री, (मन्मथस्य मन्द्रीव।) योनिः। इति हेमचन्द्रः। ४। ३४२॥

मन्मथमन्द्रिका, स्त्री, (मन्मथस्य मन्द्रिकेव।) योनिः। इति हेमचन्द्रः। ४। ३४२॥

मन्मथमन्द्रिकी, स्त्री, (मन्मथस्य मन्द्रिकीव।) योनिः। इति हेमचन्द्रः। ४। ३४२॥

मन्मथमन्दिरं, क्ली, (मन्मथस्य मन्दिरमिव।) योनिः। इति हेमचन्द्रः। ४। ३४२॥

मन्मथमन्दिरा, स्त्री, (मन्मथस्य मन्दिरेव।) योनिः। इति हेमचन्द्रः। ४। ३४२॥

मन्मथमन्दिरी, स्त्री, (मन्मथस्य मन्दिरीव।) योनिः। इति हेमचन्द्रः। ४। ३४२॥

मन्मथमन्दुरा, स्त्री, (मन्मथस्य मन्दुरेव।) योनिः। इति हेमचन्द्रः। ४। ३४२॥

मन्मथमन्दुरी, स्त्री, (मन्मथस्य मन्दुरीव।) योनिः। इति हेमचन्द्रः। ४। ३४२॥

मन्मथमन्दोदरी, स्त्री, (मन्मथस्य मन्दोदरीव।) योनिः। इति हेमचन्द्रः। ४। ३४२॥

मन्मथमन्दोदरीसुतः, पुं, (मन्मथस्य मन्दोदरीसुतः।) इन्द्रजित्। इति हेमचन्द्रः। ४। ३४२॥

मन्मथमन्द्रा, स्त्री, (मन्मथस्य मन्द्रेव।) योनिः। इति हेमचन्द्रः। ४। ३४२॥

मन्मथमन्द्री, स्त्री, (मन्मथस्य मन्द्रीव।) योनिः। इति हेमचन्द्रः। ४। ३४२॥

मन्मथमन्द्रिका, स्त्री, (मन्मथस्य मन्द्रिकेव।) योनिः। इति हेमचन्द्रः। ४। ३४२॥

मन्मथमन्द्रिकी, स्त्री, (मन्मथस्य मन्द्रिकीव।) योनिः। इति हेमचन्द्रः। ४। ३४२॥

मन्युः

मार्कण्डेय उवाच।

"ततस्ते मुनयः सर्व्वे तदभिप्रायवेदिनः।
चक्रुस्तदुचितं नाम मरीच्यत्रिमुखास्तदा॥
मुखावलोकनादेव ज्ञात्वा वृत्तान्तमन्यतः।
दक्षाद्यश्च सरारः स्थानं पत्नीश्च ते ददुः॥
ततो निश्चित्य नामानि मरीचिप्रमुखा द्विजाः।
ऊचुः सङ्गतमेतस्मै पुरुषाय द्विजोत्तमाः॥

ऋषय ऊचुः।

यस्मात् प्रमथ्य चेतस्त्वं जनोऽस्माकं तथा विधेः।
तस्मान्मन्मथनामा त्वं लोके गेयो भविष्यसि॥
जगत्सु कामरूपस्त्वं त्वत्समो न हि विद्यते।
यतस्त्वं कामनाम्नापि ख्यातो भव मनोभव!॥
मदनान्मदनाख्यस्त्वं शम्भोर्दर्पात् सदर्पकः।
तथा कन्दर्पनाम्नापि लोके ख्यातो भविष्यसि॥
त्वदाभुगानां यद्वीर्य्यं तद्वीर्य्यं न भविष्यति।
वैष्णवानाञ्च रौद्राणां ब्रह्मास्त्राणाञ्च तादृशम्॥
स्वर्गो मर्त्यश्च पातालं ब्रह्मलोकः सनातनः।
व्याप्तानि सर्व्वाणि सर्व्वथा यो भवान् यतः॥
किंवा चापि विशेषेण सामान्ये नास्ति ते समः।
यत्र यत्र भवेत् प्राणी प्राङ्मलास्त्रवशोऽथवा॥
तत्र तत्र तव ज्ञानमस्त्रब्रह्मसदोदयम्।
दक्षोऽयं भवतः पत्नीं स्वयं दास्यति शोभनाम्॥"

इति कालिकापुराणे २ अध्यायः॥

मन्मथानन्दः, पुं, (मन्मथं आनन्दयतीति। आ+नन्द+णिच्+पचाद्यच्। कामवर्द्धकत्वादस्य तथात्वम्।) महाराजचूतः। इति राजनिर्घण्टः॥

मन्मथालयः, पुं, (मन्मथस्य आलय इव। कामवर्द्धकत्वादेवास्य तथात्वम्।) आम्रः। इति राजनिर्घण्टः॥

मन्मनः, पुं, गद्गदध्वनिः। इति त्रिकाण्डशेषः॥ (दम्पत्योः कथनविशेषः। यथा, चिन्तामणिधृतवचनम्।

"सुरते कर्णमूले तु निजदेशीयभाषया।
दम्पत्योः कथनं यत्तु मन्मनं तं विदुर्बुधाः॥")

मन्या, स्त्री, (मन्यते ज्ञायते सम्भृःखादिकमनया। मन्+करणे क्यप्। स्त्रियां टाप्।) ग्रीवायाः पश्चात् शिरा। इत्यमरः। २। ६। ६५॥ (यथा, सुश्रुते उत्तरतन्त्रे २५ अध्यायः।

"दोषास्तु दुष्टास्त्रय एव मन्यां
संपीड्य घाटां सुरचां सुनीराम्।
कुर्व्वन्ति साक्षिभुवशङ्खदेशे
स्थितिं करोत्याशु विशेषतस्तु॥")

मन्याका, स्त्री, (मन्यैवेति। मन्या+स्वार्थे कन्। स्त्रियां टाप्। सुकन्याक इति वन् न विभाषया ह्रस्वः।) मन्या। इति शब्दरत्नावली॥

मन्युः, पुं, (मन्यते ज्ञायतेऽसौ। मन+"यजिमनिशुन्धिदसिजनिभ्यो युच्।" उणा० ३। २०। इति युच्।) शोकः। (यथा, भट्टिकाव्ये। ६। ६०।

"मन्युर्मन्ये ममास्मीहितादोरुभटुय-
तिम्॥")

इक्ष्वाकुः। (यथा. राजतरङ्गिण्याम्। १। १७४।
"आविर्भूवाभिमन्युः शतमन्युरिवापरः॥")
क्रोधः। इत्यमरः। ३। ३। १५३॥ (यथा, महाभारते। १। १७६। ५।
"यः सचार्यते मन्युं योऽतिवादांस्तितिक्षते।
यच्च तप्तो न तपति दृढं सोऽर्थस्य भाजनम्॥")
अहङ्कारः। इति शब्दरत्नावली॥ (क्रोधाभिमानिदेवः। यथा, ऋग्वेदे। १०। ८३। १।
"यस्ते मन्यो! विधद्वज्र सायक
सह ओजः पुष्यति विश्वमानुषक्॥"
वितथपुत्रः। यथा, भागवते। ६। २१। १।
"वितथस्य सुतान् मन्योर्दृढव्रतो जयत्सेनः॥"
रुद्रदेवः। यथा, भागवते। ४। १। ५।
"आत्मन्न एव कुपितेन मन्युना
स देवदेवः परिचक्रमे विभुम्॥")
मन्वन्तरं, क्ली, (मनोरन्तरमस्मिन्निति।) दिव्यानां युगानामेकसप्ततिः। इत्यमरः। १। ४। २२॥ देवमानेनैकसप्ततियुगानि मन्वन्तरमुच्यते मनोरन्तरमवकाशोऽवधिर्वा अस्मिन्निति मन्वन्तरम्।
"एवं चतुर्युगाख्यानां साधिका ह्येकसप्ततिः।
कृतत्रेतादियुक्तानां मनोरन्तरमुच्यते॥"
इति लिङ्गपुराणम्॥
भगवतः स्वायम्भुवादयस्तेषामन्तरमवकाशोऽवधिर्वा मन्वन्तरमिति वा। एकसप्ततिरिति यद्यपि गणनया अर्द्धयुगेनाधिका।
"दैविकानां युगानान्तु सहस्रं ब्रह्मणो दिनम्।
मन्वन्तरं तथैवैकं तस्य भागाश्चतुर्दश॥"
तत्किञ्चिदधिका दिव्ययुगानामेकसप्ततिरिति गणविधाने सर्व्वज्ञनारायणेनोक्तत्वात् तथापि अख्यत्वादिह नोक्तम्। मन्वन्तरस्य संख्यातवर्षाणि यथा,—
"त्रिंशत्कोट्यस्तु वर्षाणां मानुषेण द्विजोत्तमाः।
सप्तषष्टिस्तथान्यानि नियुतान्यधिकानि तु॥
विंशतिस्तु सहस्राणि कालो यः साधिकां विना।
मन्वन्तरस्य संख्येयं लिङ्गेऽस्मिन् कथिता द्विजाः॥"
एतदङ्का यथा, ३०६,७२०,००० । एवं चतुर्दशमन्वन्तरैर्ब्रह्मदिनम्। युगानि यथा लैङ्गे।
"पूर्व्वं कृतयुगं नाम ततस्त्रेता विधीयते।
द्वापरञ्च कलिश्चैव युगान्येतानि सुव्रताः॥"
युगमानानि यथा,—
"चत्वारि त्रीणि द्वे चैक कृतादिषु यथाक्रमम्।
दिव्याब्दानां सहस्राणि युगेष्वाहुः पुराविदः॥"
इति॥
अन्यत्र च।
"चत्वार्याहुः सहस्राब्द वर्षाणान्तु कृतं युगम्।
तस्य तावत् शती सन्ध्या सन्ध्यांशश्च तथाविधः॥
इतरेषु ससन्ध्येषु ससन्ध्यांशेषु च त्रिषु।
एकापायेन वर्त्तन्ते सहस्राणि शतानि च॥"
इति॥

अस्यार्थः। देवमाने सत्यस्य वर्षाणि ४००० चतुःसहस्राणि सन्ध्यावर्षाणि ४०० चत्वारि शतानि सन्ध्यांशवर्षाणि ४०० चत्वारि शतानि। एवं देवमाने सत्यस्य वर्षाणि अष्टशताधिकचतुःसहस्राणि १८०० एवं त्रेतायाः षट्शताधिकत्रिसहस्रं ३६०० एवं द्वापरस्य चतुःशताधिकं द्विसहस्रम् २४०० एवं कलेः शतद्वयाधिकमेकसहस्रम् १२०० समुदायेन द्वादशसहस्राणि १२०००। मानुषमानेन सत्यादीनां मानं यथा, ज्योतिषे।
"वस्वम्बिमैत्रा ऋतुरन्ध्रमासा
वेदा रसाष्टौ भुजवह्निवेदाः।
एतानि शून्यत्रयताडितानि
युगाब्दसंख्याः परिकीर्त्तितानि॥"
एतदङ्कैर्दृश्यते सत्यस्य यथा, १,७२८,०००। त्रेतायाः यथा, १,२९६,०००। द्वापरस्य यथा, ८६४,०००। कलेर्यथा, ४३२,००० समुदायेन ४,३२०,०००। अपरं ब्राह्मवर्षादिमानं बाहुल्यभिया नोक्तम्। इति तट्टीकायां भरतः॥
अपि च। ब्रह्मणो दिनमध्ये चतुर्दशमन्वन्तराणि भवन्ति। एको मनुर्यावदधिकारी भवति स कालो मन्वन्तरसंज्ञको भवति। तत्र मनूनां नामानि। प्रथमः स्वायम्भुवो मनुः। द्वितीयः स्वारोचिषो मनुः। तृतीय उत्तमो मनुः। चतुर्थस्तामसो मनुः। पञ्चमो रैवतो मनुः। षष्ठश्चाक्षुषो मनुः। सप्तमो वैवस्वतो मनुः। वर्त्तमानोऽयम्॥ अष्टमः सावर्णिर्मनुः। नवमो दक्षसावर्णिर्मनुः। दशमो ब्रह्मसावर्णिर्मनुः। एकादशो धर्म्मसावर्णिर्मनुः। द्वादशो रुद्रसावर्णिर्मनुः। त्रयोदशो देवसावर्णिर्मनुः। चतुर्दश इन्द्रसावर्णिर्मनुः। प्रतिमन्वन्तरं भगवदवतारेन्द्रदेवगणसप्तर्षिमनुमनुपुत्रादयः पृथक् पृथगभवन्ति। यथा। स्वायम्भुवे मन्वन्तरे यज्ञोऽवतारः स एवेन्द्रः। यमादयो देवाः। मरीचिप्रभृतयः सप्तर्षयः। स्वायम्भुवो मनुः। प्रियव्रतोत्तानपादौ मनुपुत्रौ॥ १॥ स्वारोचिषे विभुरवतारः। रोचन इन्द्रः। देवास्तुषितादयः। ऊर्ज्जस्तम्बादयः सप्तर्षयः। अग्निसुतः स्वारोचिषो मनुः। द्युमत्सुषेणरोचिष्मत्प्रमुखा मनुपुत्राः॥ २॥ उत्तमे सत्यसेनोऽवतारः। सत्यजिदिन्द्रः। सत्यवेदश्रुतभद्रादयो देवाः। वशिष्ठसुताः सप्तर्षयः प्रमदादयः। प्रियव्रतसुत उत्तमो मनुः। पवनरञ्जययज्ञहोत्राद्यास्तनुसुताः॥ ३॥ तामसे हरिरवतारः। त्रिशिख इन्द्रः। वैधृतादयो देवाः। ज्योतिर्धामादयः सप्तर्षयः। तामसो मनुः। पृथख्यातिनरादयस्तत्सुताः॥ ४॥ रैवते विक्रमोऽवतारः। विभुरिन्द्रः। भूतरयादयो देवाः। हिरण्यरोमादयः सप्तर्षयः। रैवतो मनुः। बलिविन्ध्यादयस्तत्सुताः॥ ५॥ चाक्षुषे अजितोऽवतारः। मन्द्रुम इन्द्रः। आप्यादयो देवाः। हविष्मद्वीरकादयः सप्तर्षयः। चाक्षुषो मनुः। पुरुषसम्भवादयस्तत्सुताः॥ ६॥ वैवस्वते वामनोऽवतारः। पुरन्दर इन्द्रः। आदित्या वसवो रुद्रा विश्वेदेवा मरुद्गणा अश्विनावृभव इत्याद्या देवाः। कश्यपोऽत्रिर्वशिष्ठो विश्वामित्रो गौतमो जमदग्निर्भरद्वाज एते सप्तर्षयः। वैवस्वतो मनुः। इक्ष्वाकुः, नृगः, धृष्टिः, दृष्टः, धृष्टः, करूषकः, नरिष्यन्तः, पृषध्रः, नाभागः, कविः, एते मनुपुत्रा दश॥ ७॥ अथ भविष्याणि। सावर्णिके सार्व्वभौमोऽवतारः। बलिरिन्द्रः। सुतपसो विरजा अमृतप्रभा देवाः। गालवः, दीप्तिमान् परशुरामः, अश्वत्थामा कृपः, ऋष्यशृङ्गः व्यासः, एते सप्तर्षयः। सावर्णिर्मनुः। निर्म्मोकविरजस्काद्यास्तत्सुताः॥ ८॥ दक्षसावर्णिके ऋषभोऽवतारः। शुत्र इन्द्रः। पारमरीचिगर्भाद्या देवाः। द्युतिमदाद्याः सप्तर्षयः। दक्षसावर्णिर्मनुः। भूतकेतुर्दीप्तिकेत्वाद्यास्तत्सुताः॥ ९॥ ब्रह्मसावर्णिके विष्वक्सेनोऽवतारः। शम्भुरिन्द्रः। सुरसेनविरुद्धाद्या देवाः। हविष्मदाद्याः सप्तर्षयः। ब्रह्मसावर्णिर्मनुः। भूरिसेनाद्यास्तत्सुताः॥ १०॥ धर्म्मसावर्णिके धर्म्मसेतुरवतारः। वैधृत इन्द्रः। विहङ्गमकामगमाद्या देवाः। अरुणादयः सप्तर्षयः। धर्म्मसावर्णिर्मनुः। सत्यधर्म्मादयस्तत्सुताः॥ ११॥ रुद्रसावर्णिके। सुधामाख्योऽवतारः। ऋतधामा इन्द्रः। हरितादयो देवाः। तपोमूर्त्यादयः सप्तर्षयः। रुद्रसावर्णिर्मनुः। देववदुपदेवादयस्तत्सुताः॥ १२॥ देवसावर्णिके योगेश्वरोऽवतारः। दिवस्पतिरिन्द्रः। सुकर्म्मसूत्राद्या देवाः। निर्म्मोकतत्त्वदर्शाद्याः सप्तर्षयः। देवसावर्णिर्मनुः। चित्रसेनविचित्राद्यास्तत्सुताः॥ १३॥ इन्द्रसावर्णिके बृहद्भानुरवतारः। शुचिरिन्द्रः। पवित्रचाक्षुषादयो देवाः। अग्निबाहुशुचिशुद्धमागधाद्याः सप्तर्षयः। इन्द्रसावर्णिर्मनुः। उरुगम्भीरबुधाद्यास्तत्सुताः॥ १४॥ अथैतेषां कर्म्मोच्यते। इन्द्रो देवराट् यथावर्षं च। मनुरादौ पृथिव्यां राजा भवति तत्पुत्रपौत्रादयो मन्वन्तरसमाप्तिपर्य्यन्तं राजानो भवन्ति। देवताः प्रजानां यज्ञादिकर्म्मतुष्टास्तत्फलं प्रयच्छन्ति। सप्तर्षयो धर्म्मशास्त्राणि प्रकाशयन्ति। भगवदवतारा एतान् स्वस्वकर्म्मणि नियोजयन्ति दैत्यराजादीन् धर्म्मद्रुहो घ्नन्ति च। चतुर्दशमन्वन्तरैर्ब्रह्मण एकं दिनं भवति तन्मनुष्यमानेनैकः कल्पः। त्रिंशत्कल्पैर्ब्रह्मण एको मासो भवति। इति श्रीभागवतमतम्॥ * ॥ अन्यच्च।
"वर्षलक्षाणि चत्वारि भवेत् कलियुगं क्रमे।
द्वात्रिंशत्या सहस्रैस्तु सहितान्यपि संख्यया॥
चतुःषष्टिसहस्राणि लक्षाण्यष्टौ च संख्यया।
वर्षाणां द्वापरं प्रोक्तं युगं पूर्व्वनिदर्शनात्॥
त्रेता द्वादशलक्षाणि वर्षाणां परिकीर्त्तिता।
षण्णवत्या सहस्रैस्तु संयुक्तानि भवन्ति हि।
दशलक्षञ्च लक्षाणां वर्षाणाञ्च कृतं युगम्।

मनुभिरेतैर्विंशत्या संयुतान्यपि संख्यया ॥
त्रिंशत्त्वारिंशलक्षाणि षष्टिसाणि च विंशतिः ।
मानुषेण प्रमाणेन भवेत् चातुर्युगं क्रमात् ॥
सप्तषष्टिश्च लक्षाणि विंशतिकोत्यस्तथैव च ।
विंशतिश्च सहस्राणि मन्वन्तरमिहोच्यते ॥
चतुर्युगैकसप्तत्या मन्वन्तरमिति स्मृतिः ।
कल्पो मन्वन्तरैरेभिश्चतुर्दशभिरुच्यते ॥
कोटी द्वादश षट्त्रिंशल्लक्षाण्यधि तु भवन्ति च ।
अष्टाशीतिश्च सहस्राणि जीवेत् स्वायम्भुवो मनुः ॥"

इति वह्निपुराणम् ॥

अपरच्च ।

मार्कण्डेय उवाच ।

"मन्वन्तरं मनोः कालो यावत् पालयते प्रजाः ।
एको मनुः स कालस्तु मन्वन्तरमिति स्मृतम् ॥
तद्दिव्यसप्तयुगकैर्देवानामिह जायते ।
तैश्चतुर्दशभिः कल्पो दिनमेकन्तु वेधसः ॥"

इति कालिकापुराणे २७ अध्यायः ॥

अन्यदपि ।

"मन्वन्तराण्यशेषाणि श्रोतुमिच्छाम्यनुक्रमात् ।
मन्वन्तराधिपांश्चैव शक्रदेवपुरोगमान् ।
भवता कथितानेतान् श्रोतुमिच्छाम्यहं गुरो ! ॥

श्रीपराशर उवाच ।

अतीतानागतानीह यानि मन्वन्तराणि वै ।
तान्यहं भवतः सम्यक् कथयामि समासतः ॥
स्वायम्भुवो मनुः पूर्व्वं मनुः स्वारोचिषस्तथा ।
औत्तमिस्तामसश्चैव रैवतश्चाक्षुषस्तथा ॥
सप्तैते मनवोतीताः साम्प्रतन्तु रवेः सुतः ।
वैवस्वतोयं तस्यैतत् सप्तमं वर्त्ततेन्तरम् ॥
स्वायम्भुवस्य कथितं कल्पादावन्तरं मया ।
देवान्वयर्षयश्चैव यथावत् कथिता मया ॥ १ ॥
अतः ऊर्द्धं प्रवक्ष्यामि मनोः स्वारोचिषस्य तु ।
मन्वन्तराधिपान् सम्यग्देवर्षींस्तत्सुतांस्तथा ॥
पारावताः सतुषिता देवाः स्वारोचिषेन्तरे ।
विपश्चित्तश्च देवेन्द्रो मैत्रेयासीन्महाबलः ।
ऊर्जस्तम्भस्तथा प्राणो दत्तोलिर्ऋषभस्तथा ।
निश्चरश्चार्वरीवांश्च तत्र सप्तर्षयोभवन् ॥
वैश्वकिपुरुषाद्याश्च सुताः स्वारोचिषस्य तु ।
द्वितीयमेतदाख्यातमन्तरं शृणु चोत्तमम् ॥ २ ॥
तृतीयेप्यन्तरे तत्रौत्तमिर्नाम यो मनुः ।
सत्यजित्नाम तत्रेन्द्रो मैत्रेयाभूत् सुरेश्वरः ॥
सुधामानस्तथा सत्याः शिवाद्याश्च प्रतर्दनाः ।
सप्तर्षिश्च पवित्रे गणा द्वादशका स्मृताः ॥
वसिष्ठतनयास्तत्र सप्त सप्तर्षयोभवन् ।
ऊर्जं परञ्जयाद्यास्तौत्तमिमनोः सुताः ॥ ३ ॥
तामसस्यान्तरे देवाः सरूपा हरयस्तथा ।
सुधाश्च सुधियश्चैव सप्तविंशतिका गणाः ॥
त्रिशिखिर्नाम यामोक्षत्तत्रेन्द्रोभूत्प्रतापवान् ।
सप्तर्षयस्तु ये तत्र तेषां नामानि मे शृणु ॥
ज्योतिर्धामा पृथुः काव्यश्चैत्रोग्निर्वनकस्तथा ।
पीवरश्चैत्रको रैते सप्त तत्रापि चान्तरे ॥
नरः ख्यातिः प्रधानश्च मानुषाद्यास्तथा ।

पुत्रास्तु तामसस्यासन् राजानः सुमहाबलाः ॥ ४ ॥
पञ्चमे चापि मैत्रेय ! रैवतो नाम नामतः ।
मनुर्विभुश्च तत्रेन्द्रो देवांश्चैवान्तरे शृणु ॥
अमिताभा भूतरया वैकुण्ठाश्च सुमेधसः ।
एते देवगणास्तत्र चतुर्दश चतुर्दश ॥
हिरण्यरोमा वेदश्रीरूर्द्धबाहुस्तथापरः ।
वेदबाहुः सुधामा च पर्ज्जन्यश्च महामुनिः ।
एते सप्तर्षयो दिव्याः तत्रासन् रैवतान्तरे ॥
बलबन्धुः सुसम्भाव्यः सत्यकामाश्च तत्सुताः ।
नरेन्द्राः सुमहावीर्या बभूवुर्मुनिसत्तम ! ॥
खारोचिषश्चौत्तमिस्तु तामसो रैवतस्तथा ।
प्रियव्रतान्वया ह्येते चत्वारो मनवः स्मृताः ॥
विष्णुमाराध्य तपसा स राजर्षिः प्रियव्रतः ।
मन्वन्तराधिपानेतान् लब्धवानात्मवंशजान् ॥ ५ ॥
यस्मे मन्वन्तरे चासीच्चाक्षुषाख्यस्तदा मनुः ।
मनोर्जज्ञे ततेवेन्द्रो देवानपि निबोध मे ॥
आर्य्याः प्रसूता भव्याच्च पृथुगाच्च दिवौकसः ।
महानुभावा लेखाश्च पञ्चैतेऽप्यगका गणाः ॥
सुमेधा विरजाश्चैव हविष्मानुत्तमो मधुः ।
अतिनामा सहिष्णुश्च सप्तासन्निति चर्षयः ॥
ऊरुः पूरुः शतद्युम्नप्रमुखाः सुमहाबलाः ।
चाक्षुषस्य मनोः पुत्राः पृथिवीपतयोभवन् ॥ ६ ॥
विवस्वतः सुतो विप्र ! श्राद्धदेवो महाद्युतिः ।
मनुः स वर्त्तते धीमान् साम्प्रतं सप्तमेन्तरे ॥
आदित्यवसुरुद्राद्या देवाश्चात्र महामुने ! ।
पुरन्दरश्चैवात्र मैत्रेय ! त्रिदशेश्वरः ॥
वशिष्ठः कश्यपोत्रिश्च जमदग्निः सगौतमः ।
विश्वामित्रभरद्वाजौ सप्त सप्तर्षयोत्र च ॥
इक्ष्वाकुश्चैव नाभागो धृष्टः शर्य्यातिरेव च ।
नरिष्यन्तश्च विख्यातो नाभ उद्दिष्ट एव च ॥
करूषश्च पृषध्रश्च वसुमान् लोकविश्रुतः ।
मनोर्वैवस्वतस्यैते नव पुत्रास्तु धार्म्मिकाः ॥ ७ ॥
विष्णुशक्तिरनौपम्या सत्त्वोद्रिक्ता स्थितौ स्थिता ।
मन्वन्तरेष्वशेषेषु देवत्वेनाधितिष्ठति ॥
अंशेन तस्य यज्ञोऽसौ जज्ञे स्वायम्भुवेन्तरे ।
आकूत्यां मानसो देव उत्पन्नः प्रथमेन्तरे ॥
ततः पुनः स वै देवः प्राप्ते स्वारोचिषेन्तरे ।
तुषितायां ससुत्पन्नो स्तुवितस्तुषितैः सह ॥
औत्तमेरन्तरे चापि तुषितस्तु पुनः स वै ।
सत्यायामभवत् सत्यः सत्यैः सह सुरोत्तमैः ॥
नाममस्यान्तरे चैव संप्राप्ते पुनरेव हि ।
हर्य्यायां हरिभिः सार्द्धं हरिरेव बभूव ह ॥
रैवतेऽप्यन्तरे देवः सम्भूत्यां मानसोभवत् ।
सम्भूतो राजसे सार्द्धं देवैर्देववरो हरिः ॥
चाक्षुषे चान्तरे देवो वैकुण्ठः पुरुषोत्तमः ।
विकुण्ठायामसौ जज्ञे वैकुण्ठैः दैवतैः सह ॥
मन्वन्तरे तु संप्राप्ते तथा वैवस्वते द्विजः ।
वामनः कश्यपादिदितौ संबभूव ह ॥
त्रिभिः क्रमैरिमान् लोकान् जित्वा येन महात्मना ।
पुरन्दराय त्रैलोक्यं दत्तं निहतकण्टकम् ॥

इत्येतास्तनवस्तस्य सप्तमन्वन्तरेषु वै ।
सप्तस्वेवाभवन् विप्र ! याभिः संरक्षिताः प्रजाः ॥
यस्मादिदमिदं सर्व्वं तस्य शक्त्या महात्मनः ।
तस्मात् संपोष्यते विष्णुर्विश्वेषां घातोः प्रवेशनात् ॥
सर्व्वे च देवा मनवः समस्ता
सप्तर्षयो ये मनुसूनवश्च ।
इन्द्रश्च यो यश्चिदशेशभूतो
विष्णोरशेषास्तु विभूतयस्ताः ॥"

इति विष्णुपुराणे ३ अंशे मन्वन्तराख्यानं नाम १ अध्यायः ॥ ॥

श्रीमैत्रेय उवाच ।

प्रोक्तान्येतानि भवता सप्त मन्वन्तराणि वै ।
भविष्याण्यपि विप्रर्षे ! ममाख्यातुं त्वमर्हसि ॥

श्रीपराशर उवाच ।

"छायासंज्ञासुतो योऽसौ द्वितीयः कथितो मनुः ।
पूर्व्वजस्य सवर्णोऽस्य सावर्णिस्तेन कथ्यते ॥
तस्य मन्वन्तरं ह्येतत् सावर्णिकमथोत्तमम् ।
तत्कृणुष्व महाभाग ! भविष्यं कथयामि ते ॥
सावर्णिस्तु मनुर्योऽसौ मैत्रेय ! भविता ततः ।
सुतपाश्चामिताभाश्च मुख्याश्चापि तदा सुराः ।
तेषां गणस्तु देवानामेकैको विंशकः स्मृतः ।
सप्तर्षीनपि वक्ष्यामि भविष्यांश्च सप्त च ॥
दीप्तिमान् गालवो रामः कृपो द्रौणिस्तथापरः ।
मनुपुत्रश्च तथा व्यास ऋष्यशृङ्गश्च सप्तमः ॥
विष्णुप्रसादादनघः पातालान्तरगोचरः ।
विरोचनसुतस्त्वेषां बलिरिन्द्रो भविष्यति ॥
विरजाश्चार्वरीवांश्च निर्मोहाद्याश्चथापरे ।
सावर्णस्य मनोः पुत्रा भविष्यन्ति नरेश्वराः ॥
नवमो दक्षसावर्णिर्मैत्रेय ! भविता मनुः ।
पारा मरीचिगर्भाश्च सुधर्म्माणस्तथा त्रिधा ।
भविष्यन्ति तदा देवा एकैको द्वादशो गणः ।
तेषामिन्द्रो महावीर्य्यो भविष्यत्यद्भुतो द्विज ! ॥
सवनो द्युतिमान् भव्यो वसुर्मेधातिथिस्तथा ।
ज्योतिष्मान् सप्तमः सत्यस्तत्रैते च महर्षयः ॥
धृतिकेतुर्दीप्तिकेतुः पञ्चहस्तो निरामयः ।
पृथुश्रवाद्याश्च तथा दक्षसावर्णिकासुताः ॥
दशमो ब्रह्मसावर्णिर्भविष्यति सुनेः ! मनुः ।
सुधामानोनिरुद्धाश्च भूतसंज्ञास्तथा सुराः ॥
तेषामिन्द्रश्च भविता शान्तिर्नाम महाबलः ।
सप्तर्षयो भविष्यन्ति ये तदा तान् शृणुष्व च ॥
हविष्मान् सुकृतिः सत्यो ज्योतिर्मूर्त्तिस्तथापरः ।
नाभागो प्रतिमौजाश्च सत्यकेतुस्तथैव च ॥
सुचेचश्चौत्तमौजाश्च भूरिषेणादयो दश ।
ब्रह्मसावर्णिपुत्राश्च रक्षिष्यन्ति वसुन्धराम् ॥
एकादशश्च भविता धर्म्मसावर्णिको मनुः ।
विहङ्गमाः कामगमा निर्म्माणरुचयस्तथा ।
गणास्त्वेते तदा मुख्या देवानां हि भविष्यताम् ।
एवैकस्त्रिंशकस्तेषां गणश्चेन्द्रश्च वै नृप ॥
निश्चरश्चार्मितेजाश्च वपुष्मान् वृषिवाकपिः ।
हविष्मानवशश्चैव भाव्याः सप्तर्षयस्तथा ॥
सर्व्वत्रगः सर्व्वधर्म्मा देवानीकादयस्तथा ।

भविष्यन्ति मनोस्तस्य तनयाः पृथिवीश्वराः॥११॥
रुद्रपुत्रस्तु सावर्णिर्भविता द्वादशो मनुः।
ऋतधामा च तस्येन्द्रो भविता शृणु मे सुरान्।
हरिता लोहिता देवास्तथा सुमनसो द्विज!।
सुकर्म्माणः सुरापाश्च दशकाः पञ्च वै गणाः॥
तपस्वी सुतपास्चैव तपोमूर्त्तिस्तपोरतिः।
तपोधृतिर्दुतिश्चान्यः सप्तमस्तु तपोधनः॥
देववानुपदेवश्च देवश्रेष्ठादयस्तथा।
भविष्यन्ति मनोस्तस्य महावीर्य्याः सुता नृपाः॥१२॥
त्रयोदशो रौच्यनामा भविष्यति सुने! मनुः।
सुत्रामणि: सुकर्म्माणः सुधर्म्माणस्तथापरः॥
त्रयस्त्रिंशद्गणभेदास्ते देवानां ये तु वै गणाः।
दिवस्पतिर्महावीर्य्यस्तेषामिन्द्रो भविष्यति॥
निर्मोहस्तत्त्वदर्शी च निष्कम्पो निरुत्सुकः।
धृतिमानव्ययश्चान्यः सप्तमः सुतपा मुनिः॥
सप्तर्षयस्त्विमे तस्य पुत्रानपि निबोध मे।
चित्रसेनविचित्राद्या भविष्यन्ति महीक्षितः॥१३॥
भौत्यस्तुदशमश्चात्र मैत्रेय! भविता मनुः।
शुचिरिन्द्रः सुरगणास्तत्र पञ्च शृणुष्व तान्॥
चाक्षुषस्य पवित्रश्च कनिष्ठा भाजिनस्तथा।
वाताद्याश्च वै देवाः सप्तर्षीनपि मे शृणु॥
अग्निबाहुः शुचिः शुक्रो मागधोऽतीव्र एव च।
युक्तस्तथाजितश्चान्यो मनुपुत्रास्तु शृणु॥
उरुगम्भीरबुद्ध्याद्या मनोस्तस्य सुता नृपाः।
कथिता मुनिशार्दूल! पालयिष्यन्ति मेदिनीम्॥१४॥
चतुर्युगान्ते वेदानां जायते किल विप्लवः।
प्रवर्त्तयन्ति तानेत्य भुवि सप्तर्षयो दिवः॥
कृते कृते स्मृतेर्विप्र! प्रणेता जायते मनुः।
देवा यज्ञभुजस्ते तु यावन्मन्वन्तरन्तु तत्॥
भवन्ति ये मनोः पुत्रा यावन्मन्वन्तरं हि ते:।
तदन्वयोद्भवैश्चैव तावद्भूः परिपाल्यते॥
मनुः सप्तर्षयो देवा भूपालाश्च मनोः सुताः।
मन्वन्तरे भवन्त्येते शक्रश्चैवाधिकारिणः॥
चतुर्दशभिरेतेषु गतेर्मन्वन्तरैर्द्विज!।
सहस्रयुगपर्य्यन्तः कल्पो निःशेष उच्यते।
तावत्प्रमाणा च निशा ततो भवति सत्तम!॥"
इति विष्णुपुराणे ३ अंशे २ अध्यायः॥*॥

मन्वन्तरश्रवणफलं यथा,—
"शृते मन्वन्तरे पूर्व्वं धर्म्ममाप्नोति मानवः।
स्मारोग्नियस्य श्रवणात् सर्व्वान् कामानवाप्नुयात्॥
औत्तमे धनमाप्नोति ज्ञानञ्चाप्नोति तामसे।
रैवते च शृते बुद्धिं सुरूपां विन्दते स्त्रियम्॥
चाक्षुषे चाक्षुषे पुंसां शृते वैवस्वते बलम्।
शृणुयात् पुत्रपौत्रांश्च सूर्य्यसावर्णिके शृते॥
माहात्म्यं ब्रह्मसावर्णेर्धर्म्मसावर्णिके शुभाम्।
मतिमाप्नोति मनुजो रुद्रसावर्णिके जयम्॥
त्रातिरैक्षो गुणैर्युक्तो दक्षसावर्णिके शृते।
विप्रालयत्वमरिवर्गे रौच्यं शृत्वा मनूत्तमम्॥
देवप्रासादमाप्नोति भौत्ये मन्वन्तरे शृते।
तथाग्निदीप्तिं पुत्रांश्च गुणयुक्तानवाप्नुते॥
सर्व्वाण्यशुक्रमादृश्यं शृणोति मुनिसत्तम!।
मन्वन्तराणि तस्यापि शृयतां फलमुत्तमम्॥
तत्र देवानृषीन् विप्रान्मनूंस्तत्तनयान् नृपान्।
इन्द्रांश्च शृत्वा सर्व्वेभ्यः पापेभ्यो विप्रमुच्यते॥
देवेन्द्रर्षिनृपाद्यान्ये ये तन्मन्वन्तराधिपाः।
ते प्रीयन्तां तथा प्रीताः प्रयच्छन्तु शुभां मतिम्॥
ततः शुभां मतिं प्राप्य शृत्वा कर्म्म तथा शुभम्।
शुभां गतिमवाप्नोति यावदिन्द्राश्चतुर्दश॥
सर्व्वे स्युरुर्क्षतवः सौम्याः सर्व्वे सौम्यास्तथा ग्रहाः।
भवन्त्यसंशयं शृत्वा क्रमान्मन्वन्तरस्थितिम्॥"
इति मार्कण्डेयपुराणे मन्वन्तरानुवर्णनं नामाध्यायः॥

मयटः, पुं, (मयुष्कः। पृषोदरादित्वात् साधुः।) वनमुद्गः। इत्यमरटीकायां भरतः।२।६।२७॥

मयष्टकः, पुं, (मयष्ट एव। मयष्ट+स्वार्थे कन्।) वनमुद्गः। इत्यमरटीकायां भरतः।२।६।२७॥

मयुष्कः, पुं, (मयुष्कः। पृषोदरादित्वात् साधुः।) वनमुद्गः। इत्यमरटीकायां भरतः।२।६।२७॥

मभ्र, गतौ। इति कविकल्पद्रुमः। (भ्वा०-पर०-सक०-सेट्।) ओष्ठ्यवर्गचतुर्थोपधः। मभ्रति। इति दुर्गादासः॥

मम, य, मदीयम्। आमार इति भाषा। यथा,
"ममत्वं मम राज्यस्य राज्याङ्गेष्वखिलेष्वपि।
जानतोऽपि यथाज्ञस्य किमेतन्मुनिसत्तम!॥"
इति मार्कण्डेयपुराणे देवीमाहात्म्यम्॥
"तेषु ममदीयत्वं जानतोऽपि मम यथाज्ञस्य अज्ञस्येव राज्यादिषु ममत्वमेतत् किं किं निबन्धनमित्यर्थः।" इति तट्टीकायां नागोजीभट्टः॥
अस्याश्रयत्वेन सप्तम्यन्तं ममत्वशब्दे द्रष्टव्यम्। अस्माच्छब्दस्य षष्ठ्येकवचनान्तस्येदं रूपं तत्तदं त्रिषु लिङ्गेषु सदृशम्॥

ममता, स्त्री, (मम+भावे तल्। टाप्।) दर्पः। अभिमानः। इति हेमचन्द्रः। २। २३१॥
ममत्वम्। यथा,—
"तथापि ममतावर्त्ते मोहगर्त्ते निपातितः॥"
इति देवीमाहात्म्यम्॥
(उतथ्यपत्नी। सा तु दीर्घतमोमाता। यथा, ऋग्वेदे। ६। १०। २।
"सोमं यमस्ये ममतेव शूषं
घृतं न शुचि मतयः पवन्ते॥"
"ममता नाम ब्रह्मवादिनी दीर्घतमसो माता।" इति तद्भाष्ये सायणः॥)

ममतायुक्तः, पुं, (ममतया युक्तः।) कृपणः। इति शब्दमाला॥ अभिमानादिविशिष्टे, त्रि॥

ममत्वं, क्ली, (मम+भावे त्व।) मदीयत्वम्। यथा, मार्कण्डेयपुराणे।
"दुःखायतनभूतो हि ममत्वालम्बनो गृही॥"
स्नेहः। यथा,—
"सोऽचिन्तयदा तत्र ममत्वाकृष्टचेतनः।"
इति देवीमाहात्म्यम्॥

"ममत्वेन स्नेहेन आकृष्टा चेतना मतिर्यस्य।
ममेति षष्ठ्यन्तरूपमव्ययं तस्य भावः ममत्वम्॥"
इति तट्टीकायां काश्मीरामः॥

ममापतालः, पुं, (मयति बध्नाति जनानिति। मय बन्धने+"मयतेर्यलोपो मश्चापतुट् चालः।" उणा० ५। ५०। इति आलप्रत्ययः। धातोर्यलोपः मकारश्चान्तस्य प्रत्ययस्यापतुड़ागमश्च।) विधयः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

मय, ङ गतौ। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) ङ, मयते। इति दुर्गादासः॥

मयः, पुं, (मयते इतं गच्छतीति। मय्+पचाद्यच्।) उशनाः। इत्यमरः।२।८।७५॥ अश्वतरः। दानवविशेषः। स तु दैत्यानां शिल्पी। इति मेदिनी। ये, ४४॥ (अयं हि युधिष्ठिरस्य राज्ञः सभां विरचितवान्। यथा, शिशुपालवधे। १३। ५०।
"उपनीय विन्ध्यसरसो मयेन या
मणिदारुचारु किल वार्षपर्वणम्।
विदधेऽवधूतसुरसङ्गसम्पदं
सभुपासदत् सपदि संसदं स ताम्॥")
तस्य सन्तानपत्यानि यथा, वह्निपुराणे।
"मयस्य जाता दैमायां पुत्राः सप्त महाबलाः।
मायावी दुन्दुभिश्चैव तृणश्च महिषस्तथा।
वालिका वज्रकन्या च कन्या मन्दोदरी तथा॥"
(सुखम्। चि, गन्ता। यथा, वाजसनेयसंहितायाम्। २२। १६।
"द्रयोऽस्यत्योऽसि मयोऽस्यर्वाचि।" "मयोऽसि मयते गच्छति मयः मय गतौ पचाद्यच्। यद्वा मय इति सुखनाम सुखरूपोऽसि।" इति तद्भाष्ये महीधरः॥)

मयटः, पुं, (मयते गच्छत्यत्रेति। मय+"शृकादिभ्योऽटन्।" उणा० ४। ८१। इति अटन्।) लवणयुक्तद्रव्यं। इति हारावली॥ इलन्तश्चेत् तद्वपार्थे प्राचुर्य्यार्थे च मयट् इति प्रत्ययो भवति॥

मयष्टकः, पुं, (मयुष्कः। पृषोदरादित्वात् साधुः।) वनमुद्गः। इत्यमरटीकायां भरतः॥

मया, स्त्री, (मयते गच्छति रोगोऽनया। मय्+कः। स्त्रियां टाप्।) चिकित्सा। इति शब्दचन्द्रिका॥ त्रि, तृतीयैकवचनान्तास्मच्छब्दस्य रूपम्॥ (यथा, हितोपदेशे। १। २२१।
"इदैव दृष्टानि मयैव तानि
जन्मान्तराणीव दृशान्तराणि॥")

मयी, स्त्री, (मय+"गुणोगादिति।" ४। १। ४८। इति ङीष्।) मयस्य स्त्रीजातिः। उशनी। इति व्याकरणम्॥

मयुः, पुं,(मयड् गतौ+न्यङ्क्वादित्वात् कुः। इत्यमरटीकायां रघुनाथः॥ यद्वा, मिनोति शब्दं करोतीति। मि+"भृञ्मृशीङृचरित्वरितनिधिमिमसूजिभ्य उः।" उणा०१।७। इति उः।)

मयूरः

किन्नरः। इत्यमरः। १। १। ७४॥ नगः। इति मेदिनी। मे, ४३॥ (यथा. वाजसनेयसंहितायाम्। १३। ४०।
"मयुं पशुं मेधमग्ने! जुषस्व
तेन चिन्वानस्तन्वो निषीद।"
"मयुं पशुं तुरङ्गवदनं किम्पुरुषं पशुं मयुं छाग्यङ्गं वा जुषस्व।" इति तद्भाष्ये महीधरः॥)

मयूराजः, पुं, (मयूनां किन्नराणां राजा। "राजाहःसखिभ्यष्टच्।" ५। ४। ९१। इति टच्।) कुबेरः। इति शब्दरत्नावली॥

मयूखः, पुं, (मयून् सुखान् सुखकरान् प्रीणयतीति। सुख+अच्। सुडागमः। यत्वम्।) घनसुहृत्। इत्यमरटीका॥

मयूरः, पुं, (मापयन् गगनं प्रमाणयन् व्योम्नि गच्छतीति। पृषोदरादिः। इत्यमरटीकायां रघुनाथः। यद्वा, माति परिमातीव। मा+"माङ ऊखो मय च।" उणा० ५। २५। इति ऊरयः। मयादेशश्च।) किरणः। (यथा, महाभारते। ३। ३६। ४३।
"अरङ्गच्छतथा राजन्! मयूखानिव भास्करः॥")

दीप्तिः। ज्वाला। इत्यमरः। १। ४। ३३॥ (यथा, रघौ। २। ४६।
"अथान्धकारं गिरिगह्वराणां
दंष्ट्रामयूखैः शकलानि कुर्वन्।
भूयः स भूतेश्वरपार्श्ववर्त्ती
किञ्चिद्विहस्यार्धपतिं बभाषे॥")

शोभा। इति मेदिनी। खे, ११॥ कीलः। इत्यजयः॥ (पर्व्वतः। यथा, ऋग्वेदे। ७।८८।३।
"दाधर्ष पृथिवीमभितो मयूखैः॥"
"मयूखैः पर्व्वतैः।" इति तद्भाष्ये सायनः॥")

मयूरः, पुं, (मयुरिव राति शब्दायते इति। रा+कः। पृषोदरादित्वात् साधुः। यद्वा, मीनाति हन्ति सर्पानिति। मी+"मीनातेरूरन्।" उणा० १।९८। इति ऊरन्।) स्वनामख्यातपक्षिविशेषः। तत्पर्य्यायः। बर्हिणः २ बर्ही ३ नीलकण्ठः ४ भुजङ्गभुक् ५ शिखावलः ६ शिखी ७ केकी ८ मेघनादानुलासी ९। इत्यमरः। २। ५।३०१ प्रघसाशी १० चन्द्री ११ शिलाघाटः १२। इति शब्दरत्नावली॥ ध्वजी १३ मेघानन्दी १४ कलापी १५ शिखण्डी १६ चित्रपिच्छिलः १७ सुभगभोगी १८ मेघनादानुरागकः १९। तस्य पक्षस्य विचित्रतालङ्कारं यथा,—
"प्रविष्टायां कुलाग्रन्तु वेदवत्यां स रावणः।
पुष्पकन्तु समारुह्य परिचक्राम मेदिनीम्॥
ततो मरुत्तं दृष्ट्वा यज्ञन्तं सह दैवतैः।
उशीरच्छन्नमानाद्य दृष्ट्वा स तु रावणः॥
संवर्त्तो नाम नाम्नाहं याजयाम्यमरैः सह।
याजयामास पुत्रेण सर्व्वैर्देवगणैर्वृतः॥
तच्छ्रुत्वा तमथो वरदानेन दुर्म्मदम्।
निर्जगाम पुनर्वीरो यत्रास्ते धर्म्मवत्सलः॥

मयूरः

इन्द्रो मयूरः संवृत्तो धर्म्मराजस्तु वायसः।
शकलाशो धनाध्यक्षो हंसश्च वरुणोऽभवत्॥" इत्यादि॥
"इत्युक्तदाम्नवीदिन्द्रो मयूरं नीलबर्हिणम्।
प्रीतोऽस्मि तव धर्म्मज्ञ! सुखगाह्नि न ते भयम्॥
इदं नेत्रसहस्रन्तु यत्तवाङ्गे भविष्यति।
वर्षमात्रे मयि सदं प्राप्तासे प्रीतिलक्षणम्॥
एवमिन्द्रो वरं प्रादान्मयूरस्य सुरेश्वरः।
नीलाः किल पुरा वर्हा मयूराणां नराधिप!॥
सुराधिपादरं प्राप्य गताः सर्व्वे विचित्रताम्॥"
इत्यन्तं वाल्मीकीये रामायणे उत्तरकाण्डे १८ सर्गः॥ अस्य मांसगुणाः।
"मयूरः श्रोत्रनेत्राग्निमेधावर्णस्वरायुषाम्।
हितो वल्यो गुरुश्चोष्णो वातघ्नः शुक्रमांसदः॥
हेमन्तकाले शिशिरे वसन्ते
सेयं हि मायूरमुशन्ति मांसम्।
उष्णो हि वर्षां विषभोजनेषु
वर्षाशरद्ग्रीष्मसुखेष्वपथ्यः॥"
इति राजनिर्घण्टः॥
एतन्मांसमेरण्डतैलभृष्टं विषतुल्यम्। इति राजवल्लभः॥ मयूरशिखाद्युपः। तत्पर्य्यायः। खराश्वा २ कारवी ३ दीपः ४ लोचमस्तकः५। इत्यमरः। २। ४। २११॥ अपामार्गः। इति मेदिनी। रे, १६६॥ (यथा, सुश्रुते चिकित्सितस्थाने २३ अः। "पिप्पलीपिप्पलीमूलं चव्यचित्रकमयूरवर्षाभूमिह्वं वा क्षीरं पिबेत्॥" असुरविशेषः। यथा, महाभारते। १।६७।३६।
"मयूर इति विख्यातः श्रीमान् यस्तु महासुरः।
स विश्व इति विख्यातो बभूव पृथिवीपतिः॥"
सुमेरोरुत्तरवर्त्ती पर्व्वतविशेषः। यथा, मार्कण्डेये। ५५। १३।
"स्वर्णशृङ्गो ज्ञातशृङ्गो पुष्पको मेघपर्व्वतः।
विरजाश्चो वराहाद्रिर्मयूरो दारुधिस्तथा॥"
कविविशेषः। स च मयूरभट्ट इति लोके प्रसिद्धः। अयं खलु बाणभट्टस्य श्वशुरः। उज्जयिन्यां हर्षभोजसभापतेः सभायामासीदिति मानतुङ्गाचार्य्यप्रणीतभक्तामरस्तोत्रटीकाप्रारम्भे मेरुतुङ्गप्रणीतप्रबन्धचिन्तामणौ च समुपलभ्यते। प्रबन्धचिन्तामणौ बाणभट्टो मयूरस्य भगिनीपतिरासीदित्युक्तमस्ति। अथ च।
"आसीत् प्रभाकरो बाणदेवो यस्यातनूद्भवः।
श्रीहर्षस्याभवन् सख्यः समो बाणमयूरयोः॥"
इति शार्ङ्गधरपद्धत्यादिप्रसिद्धराजश्रीहर्षपदवीनामपि बाणमयूरयोः समनामत्वं प्रतीयते।
अयं हि कुष्ठरोगग्रस्तः सूर्य्यमाराध्य सूर्य्यशतकं नाम स्तोत्रमेकं प्रणीय ततः सद्यः निष्कृतिमवाप। सूर्य्यशतकस्यान्तिमः श्लोको यथा,—
"श्लोका श्लोकस्य भूयो मयतमिति रचिता
श्रीमयूरेण भक्त्या

मयूर

युक्तश्चैतान् पठेद् यः सकृदपि पुरुषः सर्व्वथापेर्विमुक्तः।
आरोग्यं सत्कवित्वं मतिमतुलबलं कान्तिमायुःप्रकर्षं
विद्यामैश्वर्य्यमर्थं सुखमपि लभते सोऽच सूर्य्यप्रसादात्॥")

मयूरकं, क्ली, (मयूरः मयूरग्रीवेव प्रतिकृतिरिति मयूर+"इवे प्रतिकृतौ।" ५। ३। ९६। इति कन्। अस्य मयूरकण्ठकान्तितुल्यद्युतित्वात्तथात्वम्।) अञ्जनविशेषः। तुतिया इति भाषा। तत्पर्य्यायः। तुत्थाञ्जनम् २ शिखिग्रीवम् ३ वितुन्नकम् ४। इत्यमरः। २। ६। १०१॥ (यथा, भावप्रकाशे। १।
"तुत्थं वितुन्नकं चापि शिखिग्रीवं मयूरकम्॥")

मयूरकः, पुं, (मयूर+स्वार्थे कन्।) अपामार्गः। इत्यमरः। २। ६। १०१॥ (यथा, सुश्रुते सूत्रस्थाने। ३६। १६।
"मयूरको राजवृक्षो निम्बः कोशातकी तिलाः॥")

तुत्थकम्। (स्वार्थे कन्।) मयूरः। इति विश्वः॥ मयूरशिखा। इति जटाधरः॥

मयूरग्रीवकं, क्ली, (मयूरस्य ग्रीवायाः कन्धरस्य वर्ण इव वर्णो यस्य। बहुव्रीहौ कन्। ह्रस्वश्च।) तुत्थम्। इति राजनिर्घण्टः॥

मयूरचटकः, पुं, (मयूर इव चटकः।) गृहकुक्कुटः। इति हारावली। ६०॥

मयूरचूड़ं, क्ली, (मयूरस्येव चूड़ा अग्रभागो यस्य तत्।) स्त्रौणेयकम्। इति राजनिर्घण्टः॥

मयूरचूड़ा, स्त्री. (मयूरस्य चूड़ेव चूड़ा शिखा यस्याः।) मयूरशिखा। इति वैद्यकम्॥

मयूरजङ्घः, पुं, (मयूरस्य जङ्घेव जङ्घा यस्य।) श्योनाकः। इति राजनिर्घण्टः॥

मयूरतुल्यं, क्ली, (मयूर इव तुल्यम्। मयूरवर्णत्वादस्य तथात्वम्।) तुत्थम्। इति राजनिर्घण्टः॥

मयूरपदकं, क्ली, (मयूरस्येव पदकं स्थानम्।) नखाघातः। यथा, शब्दमालायाम्।
"तथावकैरकोलौ च नखाघाते तु सक्थनम्।
मयूरपदकं व्याघ्रनखकोत्पलपत्रके॥"

मयूरविदला, स्त्री, (मयूराद् विशेषेण दलति खण्डयादिशोभया तिरस्करोतीति। वि+दल+अच्। स्त्रियां टाप्।) अम्लशा। इति वैद्यकम्॥

मयूरशिखा, स्त्री, (मयूरस्य शिखेव शिखा अग्रं यस्याः।) स्वनामख्यातक्षुपविशेषः। तत्पर्य्यायः। बर्हिचूड़ा २ शिखिनी ३ शिखाजु ४ सुशिखा ५ शिखा ६ शिखावला ७ केकिशिखा ८। अस्या गुणाः। रसे स्वादुत्वम्। शूलक्षुद्रकृमिबालग्रहादिदोषनाशित्वम्। वशीकर्म्मणि प्रशस्तत्वञ्च। इति राजनिर्घण्टः॥ अपि च।
"मयूराख्या शिखा प्रोक्ता चक्षुष्याऽग्निकरोदया।
नीलकण्ठशिखातुल्यो पित्तश्लेष्मातिसारजित्॥"
इति भावप्रकाशः।

मयूरिका, स्त्री, (मयूरवत् वर्णोऽस्यस्याः। मयूर + टन्। टाप्।) अमरुष्ठा। इति राजनिर्घण्टः॥

मयूरी, स्त्री, (मयूर + स्त्रियां ङीप्।) मयूरस्त्रीजातिः। इति व्याकरणं लिङ्गादिसंग्रहश्च॥ (यथा, उत्तररामचरिते। ३। ८।

"किमयं त्वेऽपि निनदे कृतस्येऽपि त्वमीदृशी।
स्तनयित्नोर्मयूरीव चकितोत्कण्ठिता स्थिता॥")

मरकः, पुं, (म्रियन्ते जना यस्मात्। मृ + अपादाने अप्। ततः स्वार्थे संज्ञायां वा कन्। यद्वा, मृ + भावे अप्। मरो मरणमिति शब्देन कायति शब्दायते इति। के + कः।) मारिः। इति हेमचन्द्रः। २। २३६॥ मड़क इति भाषा। तत्पर्य्यायः। मारी २ मारकः ३। इति जटाधरः॥ (यथा, कामन्दकीयनीतिसारे। १३। २०।

"हुताग्नयो जलं व्याधिर्दुर्भिक्षो मरकस्तथा।
इति पञ्चविधं दैवं व्यसनं मानुषं परम्॥")

तस्य कारणादि यथा,—

"यावन्मार्त्तण्डशुक्रौ वितनुषि झषे मन्मथे
वास्ति नार्य्यां
तावद्दुर्भिक्षपीड़ा भवति च मरकं संभ्रयं
यान्ति लोकाः।
हाहाकारा तथोर्व्वी मनुजभयकरी फेरवावेद्य
भीमैः
शून्यग्रामा भवेद्धुर्नरपतिरहिता भूरिकङ्काल-
माला॥
वक्रं करोति रविजो धरणीसुतो वा
मूलर्क्षहस्तमघरेवतिमैत्रभेषु।
क्षुद्रोपभङ्गपतनानि च सैनिकानां
सर्व्वत्र लोकमरणं जलधौतदेशः॥
मांसास्थीनि समादाय श्मशानादग्न्यवायसाः।
श्वा शृगालोऽथवा मध्ये पुरस्य प्रविशन्ति चेत्॥
विकिरन्ति गृहादौ च श्मशानं सा मही
भवेत्।
चौरेण हन्यते लोकः परचक्रसमागमः॥
संग्रामश्च महाघोरो दुर्भिक्षं मरकस्तथा।
अद्भुतानि प्रदृश्यन्ते तस्य देशस्य विद्रवः॥"
इति ज्योतिस्तत्त्वम्॥

अपि च।

"साधिष्ठ्यमिश्रयं गैरिकरूपे च युद्धानि।
दूर्व्वाकाण्डश्यामे हारिद्रे चापि निर्दिशेन्
मरकम्॥"
इति ग्रहणप्रकरणे तिथ्यादितत्त्वम्॥

अन्यदपि।

"रवाविन्दौ गजारूढ़ा शस्यङ्गारे तुरङ्गमे।
नौकया गुरुशुक्राभ्यां दोलया बुधवासरे॥
गले च जलदा देवी क्षुद्रभङ्गस्तुरङ्गमे।
नौकायां शस्यवृद्धिः स्यात् दोलायां मरकं
भवेत्॥"
इति पञ्जिकाप्रवेशफलकथने ज्योतिषम्॥ *॥

अस्य शान्तिः। देवीमाहात्म्यपाठः। बटुक भैरवस्तवपाठः। तुलस्या विष्णुपूजनञ्च। यथा,

"उपसर्गानशेषांस्तु महामारीसमुद्भवान्।
तथा त्रिविधमुत्पातं माहात्म्यं शमयेन्मम॥"
इति मार्कण्डेयपुराणम्॥

"मारीभये राजभये तथा चौराग्निजे भये।
व्यौत्पातिके महाघोरे तथा दुःस्वप्नदर्शने।
बन्धने च तथा घोरे पठेत् स्तोत्रं समाहितः॥"
इति विश्वसारोद्धारतन्त्रे व्यापदुद्धारकल्पः॥

"ग्रहयज्ञैः शान्तिकैश्च किं क्लिश्यन्ति नरा
द्विज!॥
महाशान्तिकरः श्रीमांस्तुलस्या पूजितो हरिः॥
उत्पातान् दारुणान् पुंसां दुर्निमित्तान्यशेषतः।
तुलस्या पूजितो भक्त्या महाशान्तिकरो
हरिः॥"

अत्र ब्रह्मपुराणीयो मन्त्रः।

"ॐ नमस्ते वटुरूपाय विष्णवे परमात्मने
स्वाहेति।"
इति ज्योतिस्तत्त्वम्॥

(जातिविशेषः। यथा, मार्कण्डेये। ५८। ५१।

"दार्व्वादा मरकाश्चैव कुरटाश्चान्ध्रदारकाः।
एकपादाः खशा घोषाः खर्गभोजनवद्यकाः॥")

मरकतं, क्ली, (मरकं मारिभयं तरत्यनेन। तॄ + डः। यद्वा, मरकं मरणं तनोतीति। लोभान्मरणमनादृत्य तस्मिन् रत्ने प्रवर्त्तते इति मरकतमिति स्मरन्तीति वृद्धाः। इत्यमरटीकायां भरतः।) हरिद्वर्णमणिविशेषः। पान्ना इति भाषा॥ तस्य देवता बुधः। इति ज्योतिषम्॥ तत्पर्य्यायः। गारुत्मतम् २ अश्मगर्भम् ३ हरिन्मणिः ४। इत्यमरः। २। ९। ९२॥ मरक्तम् ५ राजनीलम् ६ गरुड़ाङ्कितम् ७। इति शब्दरत्नावली॥ रौहिणेयम् ८ सौपर्णम् ९ गरुड़ोन्नीर्णम् १० बुधरत्नम् ११ अश्मगर्भजम् १२ गरत्मारिः १३ वापवोलम् १४ गारुड़म् १५। क्वचित् पुस्तके गरुड़ोन्नीर्णस्थाने गरुड़ोत्तीर्णं वापवोलस्थाने वाप्रवालं इति च पाठः॥ अस्य गुणाः। विषघ्नत्वम्। नग्नीतलत्वम्। रसे मधुरत्वम्। श्यामपित्तहरत्वम्। रुच्यत्वम्। पुष्टिदत्वम्। भूतनाशकत्वञ्च॥ *॥ अस्य लक्षणम्।

"स्वच्छञ्च गुरु सच्छायं स्निग्धं गात्रञ्च मार्द्दवसमेतम्।
अयङ्गं बहुरङ्गं शङ्कारी मरकतं शुभं विभ्रयात्॥"

तस्य कुलक्षणम्।

"शर्करिलकलिलरूक्षं मालनं लघुहीनकान्ति
कल्माषम्।
त्रासयुतं विकृताङ्गं मरकतममरोऽपि नोपभुञ्जीत॥"* ॥

तस्य परीक्षा।

"यच्छैवालशिखण्डशाद्वलहरित्काचेच्च बाधच्छदैः
खद्योतेन च बालकीरवपुषा शैरीषपुष्पेण च।
छायाभिः समतां दधाति तदिदं निर्दिष्टमश्मात्मकं
जात्यं यत्तपनातपेष्वपरितो गारुत्मतं रक्षयेत्॥"
इति राजनिर्घण्टः॥ * ॥

ग्रन्थान्तरे तस्य परीक्षादि यथा,—

सूत उवाच।

"दानवाधिपतेः पित्तमादाय भुजगाधिपः।
द्विधा कुर्व्वन्निव व्योम सत्वरं वासुकिर्ययौ॥
स तदा खशिरोरत्नप्रभादीप्ते नभोऽम्बुधौ।
राजतः स महानेकः खण्डसेतुरिवाबभौ॥
ततः पक्षनिपातेन संहरन्निव रोदसी।
गरुत्मान् पन्नगेन्द्रस्य प्रहर्त्तुंसुपचक्रमे॥
सहसैव सुमोच ततः फणीन्द्रः
सुरासाद्युक्ततुरङ्गपादपायाम्।
नलिकावनगन्धवासितायां
वरमाणिक्यगिरेरुपत्यकायाम्॥
तस्य प्रपातसमनन्तरकालमेव
तद्वद्वरालयमतीत्य रमासमीपे।
स्थानं क्षितेरुपपयोनिधितीरलेख
तत्प्रत्ययान्मरकताकरतां जगाम॥
तत्रैव किञ्चिन् पतितस्तु पित्ता
दुत्पत्य जग्राह ततो गरुत्मान्।
मूर्च्छापरीतः सहसैव घोणा-
रन्ध्रद्वयेन प्रसुमोच सर्व्वम्॥
तत्राकटोरशुककण्ठशिरीषपुष्प-
खद्योतशष्पचरशाद्वलशैवलानाम्।
कङ्कारशस्यकभुजङ्गभुजाश्च पत्र-
प्रान्तत्विषो मरकताः शुभदा भवन्ति॥
तदूर्द्ध्वं भोगीन्द्रभुजा विसृष्टं
पपात पित्तं दितिनाथिपस्य
तस्याकरस्यातितरां स देशो
दुःखोपलभ्यश्च गुणैश्च युक्तः॥
तस्मिन्मरकतस्थाने यत्किञ्चिदुपजायते।
तत्सर्व्वं विषरोगाणां प्रशमाय प्रकीर्त्तितं॥
सर्व्वमन्त्रौषधिगणैर्यन्न शक्यं चिकित्सितुम्
महाहिदंष्ट्राप्रभवं विषन्तत्तेन शाम्यति॥
अन्यमप्याकरे तत्र यद्दोषैरुपवर्ज्जितम्।
जायते तत् पवित्राणामुत्तमं परिकीर्त्तितम्॥
अत्यन्तहरितवर्णं कोमलमर्च्चिर्व्विभेदजटिलञ्च।
काञ्चनचूर्णस्यान्तःपूर्णमिव लक्ष्यते यच्च॥
युक्तं संस्थानगुणैः समरागं गौरवेण विहीनम्।
सवितुः करसंस्पर्शाच्छुरयति सर्व्वाश्रमं दीप्त्या॥
हित्वा च हरितभावं यस्यान्तर्व्विनिहिता
भवेद्दीप्तिः।
अचिरप्रभाप्रभाहतनवशाद्वलसन्निभा भाति॥
यच्च मनसः प्रसादं विदधाति निरीक्षितमति-
मात्रम्।
तन्मरकतं महागुणमिति रत्नविदां मनोवृत्तिः॥
यस्तु भास्करसंस्पर्शात् दृश्यश्चो महामणिः॥
रत्नवेदालयादेस्तु महामरकतं हि तत्॥
चतुर्धा जातिभेदस्तु महामरकते मतः।
छायाभेदेन विज्ञेया चतुर्वर्णस्य लक्षणैः॥" *॥

अथ छाया।
"भवेदष्टविधच्छाया मणेर्मरकतस्य च।
वर्षिपुच्छसमाभासा शाखपक्षसमापरा॥
हरिद्रोचनिभा चान्या तथा शैवालसन्निभा।
शुकोलूकसंकाशा बालकीरसमा तथा॥
नवग्राहणसच्छाया शिरीषकुसुमोपमा।
एवमष्टौ समाख्यातास्छाया मरकताश्रयाः॥
छायाभिर्युक्तमेताभिः श्रेष्ठं मरकतं भवेत्।
पद्मरागगतः स्वच्छो जलबिन्दुर्यथा भवेत्।
तथा मरकतच्छाया श्यामला हरितामला॥"
अथ दोषगुणाः।
"दोषाः सप्त भवन्त्यस्य गुणाः षष्ठविधो मतः।
स्निग्धं रूक्षमिषुक्तं याधिस्तस्य धृते भवेत्॥
विस्फोटः स्यात् सपिडके तच्च ग्रस्तधृतिर्भवेत्।
सपायादौ भवेद्दिनाशो मरकते धृते॥
विच्छायं मरकतं प्राहुर्वार्ध्यते न तु धार्यते।
शर्करं कर्करायुक्तं पुत्रशोकप्रदं धृतम्॥
जटरं कान्तिहीनन्तु दंष्ट्रिवद्भिभयावहम्।
कुल्माषवर्णं धवलं ततो मृत्युभयं भवेत्॥
इति दोषाः समाख्याता वर्णगतोऽथ महागुणाः।
निर्मलं कथितं स्वच्छं गुरु स्यादगुरुतायुतम्॥
स्निग्धं रूक्षविनिर्मुक्तमरजस्कमरेणुकम्।
सुरागं रागबहुलं मणेः पञ्च गुणा मताः॥
एतैर्युक्तं मरकतं सर्वपापभयापहम्।
गजवाजिरथान्दत्त्वा विप्रेभ्यो वित्तराढ्ये मे॥
तत् फलं समवाप्नोति शुद्धे मरकते धृते।
धनधान्यादिकरणी तथा सैन्यक्रियाविधौ॥
विषरागोपशमने कर्मस्वाथर्वणेषु च।
प्रस्यते सुविभिर्यस्मादयं मरकतो मणिः॥"
तथा च।
"स्वच्छता गुरुता कान्तिः स्निग्धत्वं पित्तकारणम्।
परिणिरङ्गकत्वेव सप्त मरकते गुणाः॥"
अथ कृत्रिमाकृत्रिमपरीक्षा।
"कृत्रिमत्वं सहजत्वं दृश्यते स्फटिकैः क्वचित्।
घर्षयेत् प्रस्तरे यत्नात्ततस्तस्मादिपद्यते॥
लेखयेल्लोहदण्डेन चूर्णेनाथ विलेपयेत्।
सहजः कान्तिमाप्नोति कृत्रिमो मलिनायते॥
घर्षणस्यानिवृत्तत्वात् यस्मात्तः स्वच्छकिरणपरिवाहनम्।
स्निग्धस्निग्धमिषुक्तं कोमलरूपं प्रभादिसमकान्तिः।
श्लक्ष्णोज्ज्वलया कान्त्या सान्द्राकारं विभासया भाति।
तदपि गुणयुक्तं स्यामाप्नोति हि याद्यपि पूर्वम्॥
शुक्लच्छटोरं मलिनं रूक्षं पाषाणकर्करोपेतम्।
स्निग्धच्छिन्नासनुता मरकतमेवंविधं विगुणम्॥
एवमित्रैर्मितं रत्नमन्यन्मरकताद्यत्।
क्रेयमानैर्न तद्ग्राह्यं क्रेतव्यं वा कदाचन।
भवत्यरुषिदा च मरणसमयोगतः।
मरणैरन्यरत्नैस्ते सर्वलोका निवासयः॥
दोषेण यस्मा दृष्टा दोषं मुञ्चति पुरिषतः।
लाघवेनैव काचस्य ग्रहणा कर्तुं विभावना॥
कस्यचिदनेकरूपैर्मरकतमनुगच्छतोऽपि गुणवर्गैः।
भक्षातकस्य निर्मेतुर्वैग्रह्यसुपैति वर्णस्य॥
वक्ष्यामि सुक्ष्माः सत्यर्थे ये च केचिद्विज्ञातयः।
तेषामप्रतिबद्धानां भा भवत्यूर्ध्वगामिनी॥
शुक्लत्वाच्चैव कैषाञ्चित्कचिदुपजायते।
तिर्यग्गालोक्यमानानां सद्यश्चैव प्रणश्यति॥
स्नानाचमनजप्येषु रक्षामन्त्रक्रियाविधौ।
दक्षिणोत्तरिरण्यानि कुर्वद्भिः साधनानि च॥
देवपित्रातिथेयेषु गुरुसंपूजनेषु च।
बाध्यमानेषु विषमैर्दोषज्ञानैर्विशेषवैः॥
दोषैर्हीनं गुणैर्युक्तं काञ्चनप्रतियोजितम्।
संग्रामे विचरद्भिश्च धार्यं मरकतं बुधैः॥"
अथ मूल्यम्।
"तुलया पद्मरागस्य यन्मूल्यमुपजायते।
लभतेऽभ्यधिकं तस्मात् गुणैर्मरकतं स्मृतम्॥
तथा च पद्मरागाणां दोषैर्मूल्यं प्रलीयते।
ततोऽस्याभ्यधिका हानिर्दोषैर्मरकते भवेत्॥
गुरुपिच्छसमायुक्ते हरितश्यामभास्वरे।
मूल्यं द्वादशकं प्रोक्तं जातिभेदेन सूरिभिः॥
यवैकेन धृतं पंचसहस्रं हितये यवे।
त्रिभिश्चैव सहस्रे द्वे चतुर्भिश्च चतुर्गुणम्॥"
इति गारुडे मरकतपरीक्षा ७१ अध्यायः
युक्तिकल्पतरुश्च॥

मरकतपत्री, स्त्री, (मरकतमिव पत्रं यस्याः। ङीष्। तद्वर्णसादृश्यादेवास्यास्तथात्वम्।) पाची। इति राजनिर्घण्टः॥

मरकतं, क्ली, (मरकतम। पृषोदरादित्वात् साधुः।) मरकतमणिः। इति शब्दरत्नावली॥

मरणं, क्ली, (म्रियतेऽनेनेति। मृ+करणे ल्युट्।) वत्सनाभः। इति राजनिर्घण्टः॥ (भावे ल्युट्।) विशातीयात्मनःसंयोगध्वंसः। इति न्यायमतम्॥ तत्पर्य्यायः। पञ्चता २ कालधर्म्मः ३ दृष्टान्तः ४ प्रलयः ५ क्षयः ६ अन्तः ७ नाशः ८ मृत्युः ९ निधनम् १०। इत्यमरः। २। ८। ११६॥ भूमिलाभः ११ निपातः १२ आत्यन्तिकम् १३ मृतिः १४। इति शब्दरत्नावली॥ कीर्त्तिशेषः १५ महानिद्रा १६ मधापगमः १७ संक्षानम् १८। इति जटाधरः॥ करणदुःखाच्च।
"मरणे यानि दुःखानि प्राप्नोति ह्यशुभान्यपि।
अपस्मारोन्मादरोगो याम्यो वैषणुना नरः॥
सुहृज्ज्ञानिः परिक्षीणो सुहृज्ज्ञानपरान्वितः।
हिरण्यधान्यतनयभार्य्याभृत्यगृहादिषु।
एते कथं भविष्यन्तीत्यसौ ममतासकुलः॥
मर्मभिर्भिर्मशारोगैः प्रकर्षरिव दारुणैः।
शरैरिवाग्निकल्पैर्योक्ष्यमानासुबन्धनः॥
विदर्शमानदारारिक्षिप्तपादं सुतः क्षिपन्।
संशुष्यमाणतालोष्ठपुटो घुरघुरायते॥
निरुद्धवाक्यो दीर्घोष्णवातश्वासपरीक्षितः।
तावेव नयनं याम्यदूतौ कालेन चोदितौ॥
क्लेशादुत्क्रान्तिमाप्नोति याम्यकिङ्करपीडितः।
ततश्च यातनादेहं क्लेशेन प्रतिपद्यते।
एतान्यन्यानि घोराणि दुःखानि मरणे नृणाम्॥"
इति विष्णुपुराणे ६ अंशे ५ अध्यायः॥ * ॥
सुहृन्मरणश्रावणनिषेधो यथा,—
"अग्नौ न निक्षिपेदग्निं नाद्भिः प्रशमयेत्तथा।
सुहृन्मरणमार्त्तिं वा न स्वयं श्रावयेत् परान्॥"
इति कौर्म्मे उपविभागे १५ अध्यायः॥*॥
अथ धार्म्मिकमरणलक्षणम्।
सोमशर्म्मोवाच।
"धर्म्मो हि कीदृशो मृत्युर्जन्म चैव वदस्व मे।
उभयोर्लक्षणं कान्ते! त्वमेवं हि वदस्व मे॥
समनोवाच।
सत्यं शौचं क्षमा प्राप्तिस्तीर्थं पुण्यादिकं तथा।
धर्म्मश्च पालितं येन तस्य मृत्युं वदाम्यहम्॥
रोगो न जायते तस्य न च पीड़ा कलेवरे।
न श्रमो वै नच ग्लानिर्न च खेदो भवेत्तथा॥
दिव्यरूपधरा भूत्वा गन्धर्व्वा ब्राह्मणास्तथा।
वेदपाठसमायुक्ता गतिज्ञानविशारदाः॥
तस्य पार्श्वं समायान्ति स्तुतिं कुर्व्वन्ति चातुलाम्।
सुस्थो हि आसने युक्तो देवपूजारतः किल॥
तीर्थञ्च लभते प्राज्ञः स्नानार्थं धर्म्मतत्परः।
अग्निगारे च गोष्ठे च देवतायतनेषु च॥
आरामे च तड़ागे च यत्राश्वत्थो वटस्तथा।
ब्रह्मवृक्षं समाश्रित्य श्रीवृक्षन्तु तथा पुनः॥
अश्वस्थानं समाश्रित्य गजस्थानं ततो नरः।
अशोकं चूतवृक्षञ्च समाश्रित्य यदा स्थितः॥
सन्निधिं ब्राह्मणानाञ्च राजवेश्मगतोऽपि वा।
रणभूमिं समाश्रित्य पुरा यत्र हता भटाः॥
मृत्युस्थानानि पुण्यानि केवलं धर्म्मकारणम्।
गोव्रजन्तु समं प्राप्य तथा समरमूर्द्धनम्॥
शुद्धधर्म्मकरो नित्यं धर्म्मतो धर्म्मवत्सलः।
एवं स्थानं समाप्नोति यदा मृत्युं समाश्रितः॥
मातरं पञ्चमे पुण्यं पितरञ्च नरोत्तमम्।
भ्रातरं श्रेयसा युक्तमन्यं स्वजनयान्वयम्॥
बन्धिनं तथा पुण्यं स्तूयमानं पुनः पुनः।
पापिष्ठं नैव पश्येत मातृपित्रादिकं पुनः॥
गीतं गायन्ति गन्धर्व्वाः स्तुवन्ति स्तावकाः कवेः।
मन्त्रपाठैस्तथा विप्रा मासा स्नेहेन पूजयेत्॥
पिता स्वजनवर्गञ्च धर्म्मात्मानं महामतिम्।
एवंभूताः समाख्याताः पुण्यस्थानानि ते विभो!।
प्रत्यक्षान् पश्यते भूतान् हास्यस्नेहसमाविलान्॥
न च स्वप्नेन मोहेन क्लेशरक्तेन वै वत॥
धर्म्मराजो महाप्राज्ञो दूरात्तन्तु समाश्रयेत्।
एतैर्हि त्वं महाभाग! यत्र धर्म्मः स तिष्ठति॥
तस्य मोहो न च भ्रान्तिर्न ग्लानिर्न च विक्रिया।
आस्ते गत्य च सन्देहः प्रसन्नात्मा प्रतिष्ठते॥
ज्ञानविज्ञानसम्पन्नः स्मरणे जनार्द्दनम्।

तेन सार्द्धं प्रयात्येवं सन्तप्तो भृशमानसः ।
शुभमङ्गारमाश्रित्य आत्मा तस्य हि गच्छति ।
शिविका तस्य चायाति सुयानं सुमनोहरम् ॥
विमानेरेव यात्येष वायोर्वेगेन चोत्तमः ॥
छत्रेण ध्रियमाणेन चामरव्यजनेस्तथा ।
घोष्यमाणः स धर्मात्मा पुण्यैरेव समन्ततः ॥
गीयमानस्तु धर्मात्मा स्तूयमानस्तु पण्डितैः ।
वन्दिभिश्चामरैर्दिव्यैर्मांङ्गल्यैर्वेदपारगैः ॥
साधुभिः स्तूयमानस्तु सर्वसौख्यसमन्वितः ।
यथादानप्रभावेण फलमाप्नोति तत्र सः ॥
आरामवाटिकामध्ये स प्रयाति सुखेन वै ।
अमरोभिः समाकीर्णो दिव्याभिर्मङ्गलैर्युतः ॥
देवैस्तु स्तूयमानस्तु धर्मराजं प्रपश्यति ।
देवाश्च धर्मसंयुक्ता ऊचुः सांमुख्यमेव ते ॥
एह्येहि त्वं महाभाग ! भुङ्क्ष्व भोगान्मनोरमान् ।
एवं संपश्यते धर्मं सौम्यरूपं महामतिः ॥
अस्य पुण्यस्य भावेन भुक्त्वा स्वर्गमनुत्तमम् ।
भोगक्षयात् स धर्मात्मा पुनर्जन्म प्रयाति च ॥
निजधर्मप्रसादात् स कुलं पुण्यं प्रयाति च ।
ब्राह्मणस्य सुपुण्यस्य क्षत्रियस्य तथैव च ॥
धनाढ्यस्य सुपुण्यस्य वैश्यस्य च महामते ! ।
धर्मेण मोदते भद्रं पुनः पुण्यं करोति सः ॥"
इति श्रीपद्मपुराणे भूमिखण्डे सुमनोपाख्याने १५ अध्यायः ॥ * ॥

अथ पापिनां मरणलक्षणम् ।

सोमशर्मोवाच ।

"पापिनां मरणं भद्रे ! कीदृग्भिर्लक्षणैर्युतम् ।
तन्मे त्वं विस्तराद्ब्रूहि यदि जानासि भाविनि ! ॥

सुमनोवाच ।

शृणुतामभिधास्यामि तस्मात् सिद्धात् श्रुतं मया ।
पापिनां मरणं कान्त ! यादृग्भं लिङ्गमेव च ॥
महापातकिनाश्चैव स्थानमेषां वदाम्यहम् ।
लिप्तामेध्यसंकीर्णैर्भूमिं पापसमन्विताम् ॥
स तां प्राप्य सुदुष्टात्मा प्राणान् दुःखेन मुञ्चति ।
चाण्डालभूमिं संप्राप्य मरणं याति दुःखितः ॥
गर्दभाचरितां भूमिं वैश्यागारं समाश्रितः ।
मद्यपानगृहं गत्वा नैघण्यमुपगच्छति ।
अस्थिचर्मनखैः पूर्णामाश्रितां पापकिल्बिषैः ॥
तामवाप्य स दुष्टात्मा दुःखं प्राप्नोति निश्चितम् ।
अन्यो पापसमाचारो प्राप्य दुःखं स गच्छति ॥
अथ चेष्टां प्रवक्ष्यामि दूतानां प्रिय ! निश्चिताम् ॥
भैरवान् दारुणान् घोरानतिक्रूरान्महोदरान् ।
पिङ्गाक्षान् पीतनीलांश्च अतिश्वेताम्रहोदरान् ॥
अतुलांश्च करालांश्च शुष्कमांसबलोपमान् ।
रौद्रदंष्ट्राकरालांश्च सिंहास्यान् सर्पहस्तकान् ॥
स तान् दृष्ट्वा प्रकम्पेत खिद्येत च मुहुर्मुहुः ।
शिवासंवादवद्घोराम्पहारावाक्यहामते ! ॥
सन्ति दूतकाः सर्वे सर्वसत्वे तु तस्य हि ।
गच्छे प्राप्यप्रवृत्ते दक्षे महाक्रूरोदरे ॥
समाक्रम्य गर्जन्येते धावन्ति रदतो मुहुः ।
म्रियमाणस्य या चेष्टा तामेवं प्रवदाम्यहम् ।
परद्रव्यापहरणं परभार्याविडम्बनम् ।
कृतं परस्य सर्वस्वं गृहीतं वैरु पापिभिः ॥
पुनर्नैव प्रदत्तं हि लोभास्वादविमोहितैः ।
अन्यदेव महापापं कृतप्रतिग्रहमेव च ॥
कण्ठमायान्ति ते सर्वे म्रियमाणस्य तस्य च ।
यानि कानि च पापानि पूर्वमेव कृतानि च ॥
आयान्ति कण्ठमूलं हि महापापस्य नान्यथा ।
दुःखमुत्पादयन्त्येते कफवन्धेन दारुणम् ॥
पीड़ाभिर्दारुणाभिश्च कण्ठो घुरघुरायते ।
रोदते कम्पते चैव मातरं पितरं पुनः ।
स्मरति भ्रातरं तत्र भार्यां पुत्रं पुनः पुनः ॥
पुनर्विस्मरणे याति महापापेन मोहितः ।
तस्य प्राणा न गच्छन्ति बहुपीड़ासमाकुलाः ॥
पतते कम्पते चैव मूर्च्छते च पुनः पुनः ।
एवं पीड़ासमायुक्तो दुःखं भुङ्क्तेऽतिमोहितः ॥
तस्य प्राणा सुदुःखेन महाकष्टैः प्रचालितः ।
अपानं मार्गमाश्रित्य म्रियन्ते कान्त ! प्रयान्ति ते ॥
एवंप्राया दुरात्मानो लोभमोहसमन्विताः ।
नीयन्ते च महाभूतैस्तेषां दुःखं वदाम्यहम् ॥"
इति पाद्मे भूमिखण्डे सुमनोपाख्याने पापिमरणं नाम १६ अध्यायः ॥ * ॥

पापिनां यमालयगमननानायोनिप्राप्तिविवरणं यथा,—

सुमनोवाच ।

"अङ्गारसञ्चये मार्गे क्षय्यमाणो हि नीयते ।
दह्यमानः स दुष्टात्मा चेष्टमानः पुनः पुनः ॥
यत्तापो महातीव्रो द्वादशादित्यतापितः ।
नीयते तेन मार्गेण सन्तप्तः सूर्यरश्मिभिः ॥
पङ्कतेष्विव दुर्गेषु क्षाधाहीनेषु दुर्मतिः ।
नीयते तेन मार्गेण क्षुधाक्षामादिपीड़ितः ॥
स दूतैर्हन्यमानस्तु पदा दण्डैः परश्वधैः ।
कशाभिस्ताड्यमानस्तु निन्द्यमानस्तु दूतकैः ॥
ततः शीतमये मार्गे वायुना सेव्यते पुनः ।
तेन शीतेन दुःखी स भूत्वा याति न संशयः ॥
आक्षिप्यमाणो दूतेषु नानादुःखेन नीयते ।
एवं पापी स दुष्टात्मा देवब्राह्मणनिन्दकः ॥
सर्वपापसमायुक्तो नीयते यमकिङ्करैः ।
यमं पश्यति दुष्टात्मा क्षणाञ्जनचयोपमम् ।
तनुयं दारुणं भीमं यमदूतैः समावृतम् ।
सर्वव्याधिसमाकीर्णं चित्रगुप्तसमन्वितम् ॥
आरूढमहिषं देवं धर्मराजं द्विजोत्तम ! ।
दंष्ट्राकरालमत्युग्रं लम्बास्यं कालसन्निभम् ॥
पीतवासं महादण्डं रक्तगन्धानुलेपनम् ।
रक्तमालाक्षताभूषं गदादण्डं भयङ्करम् ॥
एवंविधं महाकायं यमं पश्यति दुर्मतिः ।
तं दृष्ट्वा समनुप्राप्तं सर्वधर्मबहिष्कृतम् ॥
यमः पश्यति तं दुष्टं पापिष्ठं धर्मकण्टकम् ।
प्रातयेत्सु महादुःखैः पीड़ाभिर्दारुणैरैः ॥
यावद्युगसहस्राणां तावत् कालं प्रपच्यते ।
नानानरकदेशेषु पच्यते च पुनः पुनः ॥
नरकेषु प्रयात्येवं कृमिकीटेषु पापकृत् ।
अमेध्ये पच्यते नित्यं दाहाभूतो विचेतनः ॥
मरणेष्वेव पापात्मा एवं याति सुनिश्चितम् ।
एवं पापस्य सम्भोगं भुङ्क्ते चैव सुदुर्मतिः ॥
पुनर्जन्म प्रवक्ष्यामि यासु योनिषु जातिषु ।
श्वयोनिं समनुप्राप्य भुञ्जते पातकं पुनः ॥
व्याघ्रो भवति दुष्टात्मा रासभं याति वै पुनः ।
मार्ज्जारमूषिकीं योनिं सर्पयोनिमतश्चैव च ॥
नानाभेदासु सर्वासु तिर्यक्षु च पुनः पुनः ।
पापपक्षिषु संयाति अन्यासु गर्हितासु च ।
चाण्डालभिल्लजातिषु पुलिन्दीं याति पापकृत् ॥
एतत्ते सर्वमाख्यातं पापिनां कर्म चैव हि ।
पापपुण्यसमाचारस्वर्गे कथितो मया ॥"
इति पाद्मे भूमिखण्डे सुमनोपाख्याने पापपुण्यविवेको नाम १७ अध्यायः ॥ * ॥

शालग्रामशिलास्पर्शे मरणफलम् । यथा,—

राजान ऊचुः ।

"युवां नारायणस्यास्य कक्षेः श्वशुरतां गतौ ।
वयं नृपा इमे लोका ऋषयो ब्राह्मणाश्च ये ॥
प्रेक्ष्य भक्तिविनाशं वां हरौ विक्षिप्तमानसाः ।
पृच्छामस्वामियं भक्तिः क लब्धा परमात्मनः ॥
कस्य वा शिक्षिता राजन् ! किं वा नैसर्गिकी तव ।
श्रोतुमिच्छामहे राजन् ! त्रिजगज्जनपावनीम् ।
कथां भागवतीं तत्त्वः संसाराश्रमनाशिनीम् ॥

शङ्खध्वज उवाच ।

स्त्रीपुंसोरावयोर्यूयं शृणुतामोघविक्रमाः ।
वृत्तं यज्ञस्मकर्मादिस्तुतिं तद्भक्तिलक्षणाम् ॥
पुरा युगसहस्रान्ते गृध्रोऽहं पूतिमांसभुक् ।
गृध्रीयं मे प्रियारण्ये कृतनीड़ो वनस्पतौ ॥
चकार कामं सर्वत्र वनोपवनसंकुले ।
हतानां पूतिपलले: प्राणिनां वृक्षिकल्पकौ ॥
एकदा क्षुब्धकः क्रूरो क्षुलोभ पिशिताग्निनौ ।
चावां वीक्ष्य गृहे पुष्टं गृध्रं तत्राप्ययोजयत् ॥
तं वीक्ष्य जातविश्रान्तौ क्षुधया परिपीड़ितौ ।
स्त्रीपुंसौ पतितौ तत्र मांसशोणितचेतसौ ॥
बद्धावावां वीक्ष्य शिक्षा हर्षादागत्य क्षुब्धकः ।
जग्राह कण्ठे तरसा चक्षुग्राघातपीड़ितः ॥
चावां गृहीत्वा गण्डक्या: शिलायां सलिलान्तिके ।
मस्तिष्कं चूर्णयामास क्षुब्धकः पिशिताशनः ॥
चक्राङ्कितशिलास्पृष्टान्मरणादपि ततृक्षणात् ।
व्योतिर्मयविमानेन सद्यो भूत्वा चतुर्भुजौ ॥
प्राप्तौ वैकुण्ठनिलयं सर्वलोकनमस्कृतम् ।
ततः स्थित्वा युगशतं ब्रह्मणो लोकमागतौ ॥
ब्रह्मलोके चतुःशतं युगानामुपभुज्य वै ।
देवलोके कालचक्राद्दशं युगचतुःशतम् ॥
ततो भुवि नृपात्मानौ बहुसन्तुरङ्गं स्मरन् ।
हरेरनुग्रहं लोके शालग्रामशिलाश्रयम् ॥
जातिस्मरत्वं गण्डक्याः किं तस्याः कथयान्यदम् ।

मरिचं

यस्तस्याग्रमात्रेण मात्राकां मक्षयद्धुतम् ॥
कृत्वाद्रितन्निमाग्र्यं मरणक्लेशवर्जं फलम् ।
न जाने वासुदेवस्य सेवया किं भविष्यति ॥"
इति कल्किपुराणे २५ अध्यायः ॥ * ॥
मरणजनकवस्तूनि यथा,—
"अग्निरापः स्त्रियो मर्त्यः सर्पा राजकुलानि च ।
नित्यं परोपसेव्यानि सद्यःप्राणहराणि षट् ॥"
इति गारुड़े ११४ अध्यायः ॥
("मरणं प्राप्नुयात्तत्र शुक्लस्थानगते ज्वरे ।
श्लेष्मणः स्तब्धता मोहः शुक्रस्य तु विशेषतः ॥"
इति माधवकरकृतनिदाने ज्वराधिकारे ।
"अपानः कर्षति प्राणं प्राणोऽपानन्तु कर्षति ।
श्लेष्मणी तु यदा भिन्ना तदैव मरणं ध्रुवम् ॥"
इति वैद्यकम् ॥)

मरणः, पुं, (मृ मरणे + "भृञ्जृहृशिवधीति ।" उणा० ३ । ११० । इति अनच् ।) मरणम् । इत्युणादिकोषः ॥

मरन्दः, पुं, (मरं मरणं ददाति खण्डयति भ्रमराणां जीवनहेतुत्वात् । दो + कः । यद्वा, मकरन्दः । पृषोदरादित्वात् साधुः ।) मकरन्दः । इति शब्दरत्नावली ॥ (यथा,—
"माकन्दशुकुलस्यन्दि मरन्दस्यन्दिमन्दिरे ।
केलितल्पे सुकुन्देन कुन्दवृन्देन मण्डिता ॥"
इति स्तवावली ॥)

मरन्दकः, पुं, (मरन्दः । स्वार्थे कन् ।) मकरन्दः । इति शब्दरत्नावली ॥

मराकाली, स्त्री, (मरं मरणदुःखं अकति प्राप्नोत्यनेनेति । अक् + करणे घञ् । स इव व्रजति पर्य्याप्नोतीति । व्रज् + अच् । गौरादित्वात् ङीष् ।) हस्तिकाली । इति रत्नमाला । विहाटी इति भाषा ॥ (विहतिरस्या हस्तिकालीशब्दे ज्ञातव्या ॥)

मरारः, पुं, (मरं मरणमश्नाति निवारयतीति । अश् + अण् । लस्य रत्वम् ।) शस्त्रस्वरूपज्ञानम् । इति जटाधरः । मराड़ इति भाषा ।

मरालः, पुं, (मृ + आलच् ।) राजहंसः । इति जटाधरः । (यथा, नैषधे । ६ । ७२ ।
"भैमीसमीपे स निरीक्ष्य यत्र
ताम्बूलनाम्नूनदहंसमर्त्यौ ।
कृतप्रियाकृत्यमधोपकार-
मरालमोघद्रुमिमानमूहे ॥")
कज्जलम् । कारण्डवः । तुरङ्गमः । वारिवाहः । हस्तिमोविशिनम् । खरः । इति त्रिकाण्डशेषः ॥
मरालके, त्रि । इति त्रिकाण्डशेषः ॥

मरालकः, पुं, (मराल इव प्रतिकृतिरिति । मराल + कन् ।) कलहंसः । इति राजनिर्घण्टः ॥

मरिचं, क्लीं, (म्रियते नश्यति श्लेष्मादिकमनेनेति । मृ + बाहुलकात् इचः ।) कङ्कोलकम् । स्वनामख्यातकटुद्रव्यविशेषः । तत्पर्य्यायः । वेल्लजम् २ कोलकम् ३ कृष्णम् ४ ऊषणम् ५ धर्म्मपत्तनम् ६ । इत्यमरः । २।६।३६ ॥ मरिचम् ७ श्यामम् ८ वरिष्ठम् ९ । इति जटाधरः ॥ आर्द्रस्य तस्य गुणाः । पाके स्वादुत्वम् । गुरुत्वम् । श्लेष्मप्रसेकित्वञ्च । शुष्कस्य तस्य गुणाः । रूक्षत्वम् । अग्निदत्वम् । रूक्षत्वम् । कटुत्वम् । उष्णत्वम् । लघुत्वम् । शुक्रनाशित्वञ्च । इति राजवल्लभः ॥ अन्यत् मरिचशब्दे द्रष्टव्यम् ॥

मरीचिः, पुं, (म्रियते पापराशिर्यस्मिन्निति । मृ + "सृकृमृभ्यामीचिः ।" उणा० ४ । ७० । इति ईचिः । तपःप्रभावादस्य तथात्वम् ।) मुनिविशेषः । स तु ब्रह्मणो ध्येयमानसपुत्रः । अस्य भार्य्या कर्द्दमसुनिकन्या कला, पुत्रः कश्यपः पूर्णिमासश्च । इति श्रीभागवतम् ॥ (अस्य भार्य्या सम्भूतिरिति नाम्नापि ख्याता । यथा, मार्कण्डेये । ५२ । १६ ।
"पत्नी मरीचेः सम्भूतिः पौर्णमासमसूयत ॥")
सूर्य्यः । इति हेमचन्द्रः ॥ (दनुपुत्रः । यथा, हरिवंशे । ३ । ८२ ।
"मरीचिर्मघवांश्चैव इरा शङ्कुशिरा हकः ॥"
मरुद्गणानामन्यतमः । यथा, श्रीभगवद्गीतायाम् । १० । २१ ।
"मरीचिर्मरुतामस्मि नक्षत्राणामहं शशी ॥"
प्रियव्रतवंशीयस्य सम्राजः पुत्रः । यथा, श्रीमद्भागवते । ५ । १५ । १४—१५ । "चित्ररथादूर्ण्यायां सम्राड़जनिष्ट । ततः उत्कलायां मरीचिर्मरीचिर्बिन्दुमत्यां बिन्दुमानुदपद्यत । तस्मात् सरघायां मधुनामाभवत् ॥")

मरीचिः, पुं, स्त्री, (म्रियन्ते नश्यन्ति क्षुद्रजन्तवस्तमांसि वानेन । मृ + ईचिः ।) किरणः । इत्यमरः । १ । ४ । ३३ ॥ (यथा, रघौ । १३ । ४ ।
"गर्भं दधत्यर्कमरीचयोऽह्नाद्
विवृद्धिमत्राप्नुवते वसूनि ॥"
यथा च ।
"मरीचीनसतो मेघान् मेघान् वाप्यसतोऽम्बरे ।
विद्युतो वा विना मेघैः पश्यन् मरणमृच्छति ॥"
इति चरके इन्द्रियस्थाने चतुर्थेऽध्याये ॥)
षट्त्रसरेणुपरिमाणम् । इति वैद्यकपरिभाषा ॥ (स्त्री, म्रियन्ते इव देवा यद्दर्शनादिति । मृ + ईचिः । अक्षरोविशेषः । यथा, महाभारते । १ । १२३ । ५६ ।
"मरीचिः शुचिका चैव विद्युद्वर्णा तिलोत्तमा ।
अम्बिका लक्षणा क्षेमा देवी रम्भा मनोरमा ॥"
म्रियते वारिभ्रमेण जीवा यस्याः । मृ + अपादाने ईचिः । मरीचिका । यथा, कथासरित्सागरे । ५७ । ६१ ।
"वेश्याप्रेमणि सद्भावो यदस्मिन् बुध्यते त्वया ।
सत्यं भवति किं जातु जलं मरुमरीचिषु ॥")

मरीचिका, स्त्री, (मरीचिरेव । स्वार्थे कन् । टाप् ।) मृगतृष्णा । इत्यमरः । १ । ३ । ३५ ॥ (यथा, प्रबोधचन्द्रोदये । १ । १ ।
"मध्याह्नार्कमरीचिकासिव पयःपूरो यदज्ञानतः ॥")
"मरीचिरिव मरीचिका स्वार्थे संज्ञायां वा इत्यादिना इवार्थे कः । ग्रीष्मे मरुदेशसिकतादिवर्त्तकराः प्रतिफलिताः दूरस्थानां जलत्वेनाभान्ति तद्दाचिका मृगतृष्णेति टीकाकारः । उत्कटरविरश्मिजन्यचित्तविनाशनाले मरीचिका । दूरभूम्यै यन्मयूखैर्जलमिव दृश्यते इत्यपरे ।" इति भरतः ॥

मरुः, पुं, (म्रियतेऽस्मिन्निति । मृ + "भृमृशीति ।" उणा० १ । ७ । इति उः ।) निर्जलदेशः । (यथा, महाभारते । १३ । १५४ । २० ।
"व्रजस्व गच्छ भीरु ! त्वं सरस्वति ! मरून् प्रति ॥")
पर्व्वतः । इत्यमरः । ३ । ३ । १६२ ॥ यथा महाभारते । ५ । ६३ । १८ ।
"तत्रापश्याम वै गर्त्ते मधु पीतममाक्षिकम् ।
मरुप्रपाते विषमे निविष्टं कृष्णमस्मितम् ॥"
देशैकदेशः । तत्पर्य्यायः । धन्वा २ । इत्यमरः । २ । १ । ५ ॥ यथा, हेमचन्द्रः ।
"शाल्वास्तु कारस्करीया मरवस्तु दशैरकाः ॥"

मरुत्वकवृत्तः। इति भावप्रकाशः॥ (निमिवंशीयहर्य्यश्वपुत्रः। यथा, श्रीमद्भागवते। ९। २३। १५।

"तस्माद्बृहद्रथस्तस्य महावीर्य्यः सुतस्तपिता।
नृपतेर्धृष्टकेतुर्वै हर्य्यश्वोऽथ मरुत्ततः॥")

सूर्य्यवंशीयभाविराजविशेषः। तस्य विवरणं यथा,—

"रामात् कुशोऽभूदतिथिस्ततोऽभून्निषधाह्वयः।
तस्मादभूत् पुण्डरीकः क्षेमधन्वाभवत्ततः॥
देवानीकस्ततो हीनः पारिपात्रोऽथ हीनतः।
बलाहकस्ततोऽर्कश्च रत्नाभस्ततोऽभवत्॥
खगणाह्विधृतस्तस्माद्धिरण्यो नाभसंज्ञितः।
ततः पुष्पार्णवस्तस्मान्नुदगलोऽथाग्निवर्णकः॥
तस्मात् शीघ्रोऽभवत् पुत्रः पिता मेऽतुलविक्रमः।
तस्मात् मरुं मां कोऽपीह बुधद्वार्षि सुमिच्चकम्॥
कलापग्राममासाद्य विद्धि सत्तपसि स्थितम्।
तवावतारं विज्ञाय व्यासात् सत्यवतीसुतात्॥
यतीस्य कालं लक्षाब्दं कालप्राप्तस्तवान्तिकम्।
कल्किरुवाच।
मरा! त्वामभिषेक्ष्यामि निजायोध्यापुरेऽधुना।
हत्वा म्लेच्छानधर्म्मिष्ठान् प्रजाभूतविहिंसकान्॥
विशाखयूपभूपालस्तनयां विनयान्विताम्।
विवाहे रुचिरापाङ्गीं सुन्दरीं त्वां प्रदास्यति॥"

इति काल्किपुराणे १८ अध्यायः॥

(वसुनामन्यतमः। यथा, हरिवंशे। १९६।४७।

"वासवानुगता देवी जनयामास वै सुतान्।
मरुं वै प्रथमं देवं द्वितीयं ध्रुवमव्ययम्॥")

मरुजः, पुं, (मरौ निर्ज्जलदेशे जायते इति। जन्+डः।) नखीनामगन्धद्रव्यम्। इति शब्दचन्द्रिका॥ (वंशाङ्कुरे, क्ली। तत्पर्य्यायो यथा,

"करीरं मरुजं फलम्————।"

इति वैद्यकरत्नमालायाम्॥)

मरुदेशजाते, त्रि॥

मरुजा, स्त्री, (मरुज+स्त्रियां टाप्।) रुगेलोरुः। इति राजनिर्घण्टः॥

मरुटा, स्त्री, उच्चललाटयुक्तस्त्री। इति शब्दरत्नावली॥

मरुड्डा, स्त्री, उच्चललाटा नारी। इति त्रिकाण्डशेषः॥

मरुतः, पुं, (म्रियन्ते प्राणिनो यद्भावादिति। मृ+बाहुलकात् उतः।) वायुः। (यथा, अभिज्ञानशकुन्तले।

"तदेनां सुखमरुतेन विशदां करवाणि॥")

देवः। इति भरतधृतत्रयाङ्गिः॥ वणिग्भेदः। इति शब्दचन्द्रिका॥

मरुत्, पुं, (म्रियते प्राणी यस्याभावादिति। मृ+"मृङ्मरुतिः।" उणा० १। ६४। इति उत्।) वायुः। इत्यमरः। १। १। ६५॥ (यथा, नैषधचरिते। २। ५६।

"भ्रुगतापभृता मया भवान्
मरुदासादि तुषारसायकान्॥")

मरुत्वकः। इति भावप्रकाशः॥ (अस्य गुणा यथा,—

"मरुदग्निप्रदौ हृद्यस्तीक्ष्णोष्णपित्तलौ लघुः।
वृश्चिकादिविषश्लेष्मवातकृष्टक्रिमिप्रणुत्।
कटुपाकरसो रुच्यस्त्रिदोषो रूक्षः सुगन्धिकः॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥) देवः। (यथा, रघुः। १२। १०१।

"मरुतां पश्यतां तस्य शिरांसि पतितान्यपि।
मनो नातिविशश्वास पुनः सन्धानशङ्किनाम्॥"

साध्यविशेषः। यथा, हरिवंशे। १९६। ४५।

"धर्म्माल्लक्ष्मुद्भवः कामः साध्या साध्यान् अजायत।
प्रभवं चवनञ्चैवमीशानं सुरभिं तथा।
अरण्यं मरुतञ्चैव विश्वावसुबलधुवौ॥")

भागवतसलदेवताविशेषः। यथा,—

"भानूनां प्रायणं भाता योऽनुतिष्ठति धर्म्मवित्।
स पुण्यबन्धुः पुरुषो मरुद्भिः सह मोदते॥"

इति श्रीभागवते ६ स्कन्धे ५ अध्यायः॥

"प्रायणं प्रकृष्टं गमनम्। पुण्यमेव बन्धुर्यस्य मरुद्भिर्भागवतसलैर्देवैः।" इति तट्टीकायां श्रीधरस्वामी॥ (हिरण्यम्। इति निघण्टुः। १। २॥ ऋत्विक्। इति तत्रैव। ३। १८॥) ग्रन्थिपर्ण्णे, क्ली। इति मेदिनी। ते, १४३॥

एकायां, स्त्री। इति शब्दरत्नावली॥

मरुत्करः, पुं, (करोतीति। कृ+अच्। मरुतोऽपानवायोः करः।) राजमाषः। इति शब्दचन्द्रिका॥ (मरुत्कारिणि, त्रि। यथा,—

"कषायमधुराः शीताः कटुपाका मरुत्कराः।
बहुमूत्रपुरीषाश्च पित्तश्लेष्महरास्तथा॥"

इति सुश्रुते सूत्रस्थाने ४६ अध्यायः॥)

मरुत्क्रिया, स्त्री, (मरुतः क्रिया।) अपानोत्सर्गः। वातकर्म्म इति ख्यातः। इति केचित्॥

मरुत्त, पुं, (मरुद्दत्तेति। मरुत्+"तप्तपर्व्वमरुद्भ्याम्।" ५। २। १२२। इत्यत्र काशिकोक्त्या तप्।) चन्द्रवंशीयराजविशेषः। स च अवीक्षिद्राजपुत्रः। यथा—

क्रोष्टुकिरुवाच।

"अवीक्षितस्य नृपतेर्मरुत्तस्य महात्मनः।
श्रोतुमिच्छामि चरितं श्रूयते सोऽतिचेष्टितः॥
चक्रवर्त्ती महाभागः शूरः शान्तो महामतिः।
धर्म्मविद्धर्म्मज्ञश्चैव सम्यक् पालयिता भुवः॥

मार्कण्डेय उवाच।

स पित्रा समनुज्ञातो राज्यं प्राप्य पितामहात्।
धर्म्मतः पालयामास प्रजाः पुत्रानिवौरसान्॥
इयाज सुमहायज्ञान् यथावत् प्राप्यदक्षिणान्।
ऋत्विक्पुरोहितादेशादनिर्विण्णो महीपतिः॥
तस्याप्रतिहतं चक्रमासीद्दीर्घेषु चक्षुषु।
गतयश्चाप्यविच्छिन्नाः स्वःपातालबलादिषु॥"

इति मार्कण्डेयपुराणे १०३ अध्यायः॥

(यदुवंशीयः करन्धमपुत्रः। यथा, श्रीमद्भागवते। ९। २३। २०।

"त्रिभानुस्तत्सुतोऽस्यापि करन्धम उदारधीः।
मरुत्तस्तत्सुतोऽपुत्रः पुत्रं पौरवमन्वभूत्॥"

शिबेर्युवराजपुत्रः। यथा, महाभारते। हरिवंशपर्व्वणि। ३६। ७।

"शिबेर्युवरभवत् पुत्र उशतः शत्रुतापनः।
मरुत्तस्तस्य तनयो राजर्षिरभवत्नृप!॥")

मरुत्तकः, पुं, (मरुदिव तकति हसतीति। तक्+अच्।) मरुवकः। इति भावप्रकाशः॥

मरुत्पथः, पुं, (मरुतां पन्थाः। "ऋक्पूरब्धूःपथामानक्षे।" ५। ४। ७४। इत्यः।) आकाशम्। इति हेमचन्द्रः॥

मरुत्पालः, पुं, (मरुतो देवान् पालयतीति। पालि+अच्। देवराजत्वादस्य तथात्वम्।) इन्द्रः। इति केचित्॥

मरुत्पुत्रः, पुं, (मरुतो वायोः पुत्रः।) भीमसेनः। इति हेमचन्द्रः। ७०७॥ (अस्य मरुत्पुत्रत्वे विवरणम्। यथा। पुरा किल पाण्डुर्नाम महीपतिर्मृगयार्थं वनं गत्वा ब्राह्मणमेकं मृगरूपधारिणं हरिणया रममाणं काममोहितं जघान। ततस्तेनाभिशप्तो निजपत्नीं रन्तुमसौ न शक्तः। अथ गच्छति काले कुन्ती पुत्रकामस्य स्वभर्त्तुः पाण्डुराजस्यानुज्ञया इन्द्रादीन् देवानाहूय तैरुत्पन्नं सुतं। तेषां मरुतो भीमसेनो जात इति पौराणिकी वार्त्ताचानुसन्धेया। अस्य विशेषस्तु महाभारते। १।११८—१२३। अध्यायेषु द्रष्टव्यः॥) हनूमांश्च॥

मरुत्स्रवः, पुं, (मरुदिव स्रवते द्रुतं गच्छतीति। स्रु+अच्।) सिंहः। इति त्रिकाण्डशेषः॥

मरुत्फलं, क्ली, (मरुतां वायूनां फलमिव।) घनोपलः। इति शब्दमाला॥

मरुत्वान्, [त्] पुं, (मरुतो देवाः पालनीयत्वेन सन्त्यस्य इति। मरुत्+"मध्वादिभ्यश्च।" ४। २। ८६। इति मतुप् मस्य वः। संज्ञायां प्रत्ययवकारे परे न तस्य दः।) इन्द्रः। इत्यमरः। १। १। ४४॥ (यथा, रघौ। ३। ४।

"दिवं मरुत्वानिव भोक्ष्यते भुवं
दिगन्तविश्रान्तरथो हि तत्सुतः॥"

धर्म्मपुत्रदेवगणभेदः। यथा, महाभारते। १२। २०७। २३।

"धर्म्मस्य वसवः पुत्रा रुद्राश्चामिततेजसः।
विश्वे देवाश्च साध्याश्च मरुत्वन्तश्च भारत!॥"

मरुच्छब्दकत्वेनास्यास्येति। मतुप्। मस्य वः।) हनूमान्। इति शब्दरत्नावली॥ (वायुविशिष्टे, त्रि। सर्व्वादाहरणं यथा, भट्टौ। १०। २६।

"बभौ मरुत्वान् विकृतः चतुर्भुजो
बभौ मरुत्वान् विकृतः चतुर्भुजः।
बभौ मरुत्वान् विकृतः चतुर्भुजो
बभौ मरुत्वान् विकृतः चतुर्भुजः॥"

स्त्री, दक्षस्य प्रसूतिभेदः कन्या। सैव धर्म्मस्य पत्नी। यथा, भागवते। ६। ६। ६।

"भारतेनाऽऽकृद्दयामिविन्दा माध्या मरुत्वती।
यमुमूर्णा संकल्पा धर्मपत्न्याः सुतान् मनु॥")

मरुत्सखः, पुं, (मरुतां देवानां सखा। "राजाहः सखिभ्यष्टच्।" ५।४।९१। इति टच्।) कुबेरः। इति धरणिः॥ (मरुतां वायोः सखा।) अग्निः। वायुसख इत्यमरटीकायाम्। (वायुसखे, त्रि। यथा, ऋग्वेदे। ११।३।

"तावद्वायु विदथे मरुत्सखे:
सा सप्तध्यन्त्वध्वभिर्देवेभिः॥")

मरुदान्दोलः, पुं, (मरुत् वायुरान्दोल्यतेऽनेनेति। आङ्+दोल+करणे घञ्।) धवित्रम्। इति शब्दमाला॥

मरुदिष्टः, पुं, (मरुतां देवानामिष्टः प्रियः।) गुग्गुलुः। इति राजनिर्घण्टः॥ (विशेषोऽस्य गुग्गुलुशब्दे वक्ष्यते।)

मरुद्रजः, स्त्री, (मरुत्सु वायुषु ध्वजः पताकेव। नभसि वायुवद्गच्छतित्वादस्य तथात्वम्।) वातनृत्तम्। पुडीर सुना इति भाषा। यथा,—

"ग्रीष्मेऽहं वंशकार्यं वाततूलं मरुद्रजम्॥"
इति हारावली। २३॥

मरुद्भवा, स्त्री, (मरुद्भ्यो भवं उत्पत्तिकारणं यस्याः।) ताम्रसलाचुयः। इति रत्नमाला। सिरार इति भाषा॥

मरुद्रथः, पुं, (मरुद्वायुर्रथो यानमिवास्य। ऊर्ध्वं स्रोकं क्षियति यद्दूरं गच्छतीति तथात्वम्।) अश्वः। इति त्रिकाण्डशेषः॥ देवरथः। इति हेमचन्द्रः। ३। ४१६॥

मरुद्रुमः, पुं, (मरोर्निर्जलदेशस्य द्रुमः। मरुजातो द्रुमो वा।) पिट्खदिरः। इति रत्नमाला॥

मरुद्वर्त्मन्, क्ली, (मरुतां वायूनां देवानां वा वर्त्म पन्थाः।) आकाशम्। इति त्रिकाण्डशेषः॥

मरुद्वाहः, पुं, (मरुता वायुना उह्यतेऽसौ इति। वह+कर्मणि घञ्। यद्वा, मरुद्वायुर्वाह इव यस्य।) धूमः। इति त्रिकाण्डशेषः॥ अग्निः। इति शब्दमाला॥

मरुद्विषः, पुं, (मरौ निर्जलदेशे द्विषो यस्मादिव।) उष्ट्रः। इति त्रिकाण्डशेषः॥

मरुन्माला, स्त्री, (मरुद्भिर्मीयते धार्य्यते इति। मस धारणे+कर्मणि घञ्। टाप्।) एका। इत्यमरः। २।४।१३३॥ पिड्डिंशाक इति भाषा॥ (पर्य्यायोऽस्य यथा,—

"पृश्निपर्णी शाकपर्णी देवी मरुन्माला मता लघुः।
मरुमाला पृथुः कोटिपर्णी सहाचरेऽपि॥"
इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे॥)

मरुप्रियः, पुं, (मरुर्निर्जलदेशः प्रियोऽस्य।) उष्ट्रः। इति हेमचन्द्रः। ४। ३१६॥

मरुभूः, स्त्री, (मरुर्निर्जला भूर्भूमिः।) दाक्षेरदेशः। इति त्रिकाण्डशेषः॥ मारवोयार इति भाषा॥ निर्जलभूमिश्च॥

मरुमयः, पुं, (मरुषि रोहिषि मायते इति। रुह+"इगुपधज्ञाप्रीकिरः कः।" ३।१।१३५। इति कः।) करीरवृक्षः। इति भावप्रकाशः॥ मरुभूमिजाते, त्रि॥ (यथा, आर्य्यासप्तशत्याम्। ६७६।

"सत्पुंसो मरुभूरुह इव जीवनमात्रमाश्रास्यम्॥")

मरुलः, पुं, (म्रियते जलं विनेति। मृ+उलः।) कारण्डवपक्षी। इति हेमचन्द्रः। ४। ४०७॥

मरुवः, पुं, (मरुं निर्जलदेशं वाति प्राप्नोतीति। वा+कः।) वृक्षविशेषः। मरुया इति नागदाना इति च भाषा॥ तत्पर्य्यायः। खरपत्रः २ गन्धपत्रः ३ फणिज्झकः ४ बहुबीजः ५ श्रीतुलकः ६ सुराजः ७ समीरणः ८ जम्बीरः ९ प्रस्थकुसुमः १० मरुवकः ११ आजन्मसुरभिपत्रः १२ मरिषः १३। अस्य गुणाः। कटुत्वम्। तिक्तत्वम्। उष्णत्वम्। कृमिकुष्ठविषद्रव्यबाधामूलमान्द्यत्वगदोषनाशित्वञ्च। इति राजनिर्घण्टः॥ अपि च।

"मरुत्तको मरुवको मरुस्मरोऽपि स्मृतः।
फणी फणिज्झकश्चापि प्रस्थपुष्पः समीरणः॥
मरुदग्निप्रदो वृष्यस्तिक्तोष्णः पित्तलो लघुः।
दृष्टिकादिविषश्लेष्मवातकृष्णकृमिप्रणुत्।
कटुपाकरसो रुच्यस्तिक्तो रूक्षः सुगन्धिकः॥"
इति भावप्रकाशः॥

मरुवकः, पुं, (मरुव+स्वार्थे इवार्थे वा कन्।) कण्टकिवृक्षविशेषः। मयना इति भाषा। तत्पर्य्यायः। पिण्डीतकः २ श्वसनः ३ करहाटकः ४ शूलः ५ मदनः ६। (पर्य्यायान्तरं यथा,—

"मदनश्छर्दनः पिण्डो नटः पिण्डीतकस्तथा।
करहाटो मरुवकः शूल्यको विषपुष्पकः॥")
स्वल्पपत्रतुलसी। तत्पर्य्यायः। समीरणः २ प्रस्थपुष्पः ३ फणिज्झकः ४ जम्बीरः ५। इत्यमरः। २।४।७६॥ (एतत्पर्य्यायो यथा,—

"मरुत्तको मरुवको मरुस्मरोऽपि स्मृतः।
फणी फणिज्झकश्चापि प्रस्थपुष्पः समीरणः॥"
इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे॥)
सम्भीरभेदः। इत्यमरटीकायां भरतः॥ पुष्पवृक्षविशेषः। मरुयाफुल इति भाषा। तत्पर्य्यायः। शुक्लपुष्पः २ तिलकः ३ कुलकः ४। क्षुपविशेषः। नागदाना इति भाषा। तत्पर्य्यायः। खरपत्रः २ गन्धपत्रः ३। इति रत्नमाला॥ व्याघ्रः। राहुः। भयानके, त्रि। इति मेदिनीधरः॥

मरुसम्भवं, क्ली. (मरुः सम्भव उत्पत्तिस्थानमस्य।) षारकक्षमूलकम्। इति राजनिर्घण्टः॥ (पर्य्यायोऽस्य यथा,—

"मूलकं द्विविधं प्रोक्तं तत्रैकं वन्यमूलकम्।
ग्रामसम्भवकं विप्रं ग्रालेयं मरुसम्भवम्॥
षारवक्त्रमूलकं तीक्ष्णं तथा मूलकपोतिका।
नेपालमूलकश्चान्यत् तद्भेदैरुदितवत्॥"
इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे॥)

मरुसम्भवा, स्त्री. (मरौ सम्भवो यस्याः। टाप्।) महेन्द्रवारुणी। क्षुद्रदुरालभा। इति राजनिर्घण्टः॥

मरुस्था, स्त्री, (मरौ तिष्ठतीति। स्था+कः। स्त्रियां टाप्।) क्षुद्रदुरालभा। इति राजनिर्घण्टः॥

मरूकः, पुं. (म्रियते इवेति। मृ+"मृकृगिभ्यामूकोकणौ।" उणा० ४। ३६। इति ऊकः। भयशीलत्वादस्य तथात्वम्।) मृगविशेषः। इत्युणादिकोषः॥ मयूरः। शुटी। इति संक्षिप्तसारोणादिवृत्तिः॥

मरूद्भवा, स्त्री, (मरौ धन्वप्रदेशे उद्भवतीति। उद्+भू+अच्। स्त्रियां टाप्।) कार्पासी। यवासः। क्षुद्रखदिरः। इति राजनिर्घण्टः॥

मरोलिः, पुं, (मरौ निर्जलदेशे लीयते म्रियते इति। मृ+ली+इन्। पृषोदरादित्वात् साधुः।) मकरः। यथा,—

"जलरूपस्तु मकरो मरोलिरसिदंष्ट्रकः॥"
इति त्रिकाण्डशेषः॥

मरोलिकः, पुं, (मरोलि+स्वार्थे कन्।) मकरः। इति शब्दरत्नावली॥

मर्क, सर्वे। सौत्रधातुरयम्। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) मर्कटः। इति दुर्गादासः॥

मर्कः, पुं, (मर्चति चेष्टते इति। मर्च्+"इगुपधज्ञाभीकापाशल्यतिमर्चिभ्यः कन्।" उणा० ३। ४३। इति कन्। यद्वा, मर्कति सर्पतीति। मर्क+अच्।) देहः। वायुः। इत्युणादिकोषः॥ (शुक्रपुत्रः। यथा, वाजसनेयसंहितायाम्। ७।१६।

"उपयामगृहीतोऽसि मर्काय त्वा॥"
"मर्कः शुक्रपुत्रोऽसुरपुरोहितः।" इति तद्भाष्ये महीधरः॥) वानरः। इति शब्दरत्नावली॥ (यथा, श्रीमद्भागवते। १०।८।२६।

"मर्कान् भोक्ष्यन् विभजति स चेन्नात्ति भाजं भिनत्ति॥"
"मर्कान् मर्कटान्।" इति तट्टीकायां श्रीधरस्वामी॥ त्रि, मार्ज्जयिता। यथा, ऋग्वेदे। १०।२७।२०।

"सूरश्च मर्क उपरो बभूवान्॥"
"मर्को मार्ज्जयिता।" इति तद्भाष्ये सायणः॥)

मर्कः, पुं, (मर्क+इवार्थे संज्ञायां वा कन्।) गलगण्डपक्षी। इति शब्दरत्नावली॥ हाड़गिल इति भाषा॥

मर्कटः, पुं. (मर्कति गच्छतीति। मर्क+"मृकाटिभ्योऽटन्।" उणा० ४। ८१। इति अटन्।) वानरः। इत्यमरः। २।५।३॥ (यथा, वाजसनेयसंहितायाम्। २४।३०।

"यमाय क्षत्रो मनुष्यराजाय मर्कटः॥")
अर्जुनाभः। (यथा आर्य्यासप्तशत्याम्। ३००।

"अयसदृग्गतिनक्षिप्तः कर्कट इव मर्कटः पुरतः॥"

"मर्कटी लूता ।" इति तट्टीका ।) लूतावरविशेषः । इति हेमचन्द्रः । मशेरुत्पत्तौ । इति त्रिकाण्डशेषः । काड़िगिड इति भाषा ॥

मर्कटकः, पुं, (मर्कट + स्वार्थे संज्ञायां वा कन् ।) वानरः । लूता । मशकभेदः । इति मेदिनी । के, २०८ (यथा, विष्णुपुराणे । १ । ६ । २५ ।

"ग्रामाकादाय गोधारा वर्षिलाः सगवेधुकाः ।
तथा देवधवाः प्रोक्ताश्चान् मर्कटका मुने ! ॥")

मत्स्यभेदः । दैत्यः । इति शब्दरत्नावली ॥

मर्कटकिण्वकः, पुं, (मर्कटप्रियकिण्वकः । मध्यपदलोपी कर्म्मधारयः ।) कपीतुः । इति भावप्रकाशः ॥

मर्कटपिप्पली, स्त्री, (मर्कटस्य पिप्पलीव ।) अपामार्गः । इति राजनिर्घण्टः ॥ (विवरणमस्या अपामार्गशब्दे ज्ञातव्यम् ॥)

मर्कटप्रियः, पुं, (मर्कटस्य प्रियः ।) क्षीरवृक्षः । इति शब्दमाला ॥

मर्कटबासः, पुं, (मर्कटः कर्पूरनामकस्य बासः आकाशस्थानम् ।) लूतातनुः । माकड़शारताल इति भाषा ॥ तत्पर्य्यायः । आकाशतन्तवः २ । इति शब्दरत्नावली ॥

मर्कटश्रोणिः, स्त्री, (मर्कटस्य श्रोणिरिव तद्वर्णत्वादेरस्य तथात्वम् ।) शिग्रुवृक्षः । इति रत्नमाला ॥ (यथा, वैद्यकरत्नमालायाम् ।

"रक्तं मर्कटश्रोणेश्च शिग्रुवं दरदो रसः ॥")

मर्कटाख्यं, क्ली, (मर्कटस्य आख्यमिव तद्वर्णत्वादेरस्य तथात्वम् ।) ताम्रम् । इति हेमचन्द्रः । ४ । १०६ ॥ (मर्कटस्याख्यम् ।) वानरसुखम् । (मर्कटस्याख्यमिवाख्यं यस्य ।) वानरसुखे, त्रि ॥

मर्कटी, स्त्री, (मर्कति वायुवेगेन इतस्ततो गच्छतीति । मर्क + अटन् । स्त्रियां ङीप् ।) कपिकच्छुः । (यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।

"कपिकच्छुरातगुप्ता कृष्णा प्रोक्ता च मर्कटी ।
अजरा कण्डुरा वल्ली दुःस्पर्शा प्रावृषायणी ॥
शूकशिम्बी च सैव प्रोक्ता मधुरिभिः ॥")

अपामार्गः । (यथा,—

'अपामार्गस्तु शिखरी कृष्णः शुक्लो मयूरकः ।
मर्कटी दुर्ग्रहा चापि किणिही खरमञ्जरी ॥'

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।) अजमोदा । इति राजनिर्घण्टः ॥ (यथा, सुश्रुते उत्तरतन्त्रे । ३३ । ५ ।

"कृष्णटी मर्कटी शिग्रुमूलत्वापि धारयेत् ।
मांसमांसं तथा मद्यं शोणितञ्च चतुष्पदे ॥")

कण्डूभेदः । इत्यमरः । २ । ४ । ८० ॥ माकड़ा इति भाषा ॥ (अपामार्गः । यथा, भावप्रकाशस्य पूर्व्वखण्डे १ भागे ।

"उदरीकेशवल्लीयोगः शङ्खिन्या इक्षिवारकी ।
मर्कटी वायसी चापि इन्द्रवल्ली कृष्णशिखा ॥"

मर्कट + ङीप् ।) वानरी च ।

मर्कटेन्द्रः, पुं, (मर्कटे उपविशेषे इन्द्रवत् ।) काकतिन्दुकवृक्षः । यथा,—

"काकेन्दुः कृष्णकः काकपीलुकः काकतिन्दुके ।
मर्कटेन्द्रः क्षिप्रपुष्पो द्वावेतौ तत्र कीर्त्तितौ ॥"

इति शब्दचन्द्रिका ॥

मर्करः, क्ली, (मर्कति गच्छतीति । मर्क + बाहुलकात् अरः ।) भङ्गराजः । इति शब्दरत्नावली ॥ (गुणादयोऽस्य भृङ्गराजशब्दे ज्ञातव्याः ॥)

मर्करा, स्त्री, (मर्कर + स्त्रियां टाप् ।) दरी । भाण्डम् । सुरङ्गा । निष्फला स्त्री । इति विश्वः ॥

मर्क्ष, क अदने । सौत्रोऽयं धातुः । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) तालव्यवर्णप्रथमान्तः । मर्कः । इति दुर्गादासः ॥

मर्क्षूः, स्त्री, (मृज्यते इति । मृज् शुद्धौ + "मृजेर्गुणश्च ।" उणा० १ । ८१ । इति ऊः । गुणश्च ।) मृत्तिः । इति मेदिनी । क्षे, १६ ॥

मर्क्षूः, पुं, (मार्ष्टि शोधयति वसनमिति । मृज् + ऊः ।) रजकः । इति हेमचन्द्रः ॥ पीठमर्दः । इति शब्दरत्नावली ॥

मर्त्तः, पुं, (म्रियतेऽसौ इति । मृ + "दृसिमृत्रिभ्यिति ।" उणा० ३ । ८६ । इति तन् ।) मनुष्यः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (यथा, मार्कण्डेये । १०० । १८ ।

"मौर्ख्यमास्थाममावस्यां पर्व्वस्वग्नेषु प्रस्तवः ।
ममेष संश्रुतो मर्त्तेभविता पावनाग्रनः ॥")

मायपकः । इति संक्षिप्तसारोणादिवृत्तिः ॥ (म्रियतेऽत्रेति । भूलोकः । इत्युज्ज्वलदत्तः । ३ । ८६ ॥)

मर्त्यः, पुं, (म्रियतेऽत्रेति । मर्त्ता भूलोकस्तत्र भवः । मर्त्त + यत् । यदा, मर्त्त एव यदित्यमरटीकायां भरतः ।) मनुष्यः । इत्यमरः । २ । ६ । १ ॥ (यथा, ब्रह्मवैवर्त्ते । २ । १ । २६ ।

"यदि च सफलश्चीरा मर्त्यानां रुचिरा तथा ॥")

मध्यलोकः । इति जटाधरः ॥ (क्ली, शरीरम् । यथा, भागवते । ३ । ३१ । ३१ ।

"तस्मात्सदृग्योगविधुतमार्त्यं मर्त्यमभूत् सरित् ॥")

मर्द्दनं, क्ली, (मृद् + भावे ल्युट् ।) अन्नमर्द्दनम् । गाटेपा इति भाषा ॥ तत्पर्य्यायः । संघाटनम् २ । इत्यमरः । ३ । २ । २२ ॥ समरम् ३ । इति शब्दरत्नावली ॥ (यथा, "यत् पुनर्यदिः सर्ज्जनाश्रित्याभ्यङ्गसेदप्रदेहपरिषेकोन्मर्द्दनावेरामयान् प्रमार्ष्टि तद्वृद्धिः परिमार्ज्जनम् ।" इति चरके सूत्रस्थाने ११ अध्यायः ॥) अस्य गुणाः । श्रमहरत्वम् । निद्राशुक्रसुखप्रदत्वम् । मांसरक्तत्वक्प्रसन्नकारित्वम् । वायुकफनाशित्वञ्च । इति राजवल्लभः ॥ चूर्णनम् । इति शब्दमालायां दर्शनात् ॥ (कदनम् । यथा, भागवते । ३ । ६ । २ ।

"तेषां मैरेयदौष्ट्रेय विषमीक्षणघस्मराम् ।
निर्लोपति रवावार्गात् वेणूनामिव मर्द्दनम् ॥"

मृद् + ल्युट् । मर्द्दनकारके, त्रि । यथा, महाभारते । १६ । १४ । १०२ ।

"हस्ते क्षितिसहस्राणां मर्द्दनं विरजेश्वरम् ॥")

मर्द्दलः, पुं, (मर्द्दं मर्द्दनं लातीति । ला + कः ।) वाद्यविशेषः । इत्यमरः । २ । ७ । ८ ॥ मादल इति भाषा । तत्पर्य्यायः । गुरुः २ । इति शब्दरत्नावली ॥ (यथा, महाभारते । ८ । ४४ । २८ ।

"शब्दङ्गानकशङ्खानां मर्द्दलानाञ्च निस्वनैः ।
खरोष्ट्राश्वतरैश्चैव सेना यास्यामहे सुखम् ॥")

मर्द्दितं, त्रि, (मृद् + कर्म्मणि क्तः ।) मन्थितम् । इति विश्वप्रकाशमर्त्तीकायां भरतः ॥ चूर्णितम् । यथा,—

"तिन्तिडीफलरसेन मर्द्दितो
रामठाख्य इति विश्रुतो रसः ॥"

इति भावप्रकाशः ॥

मर्द्म, गत्याम् । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) मर्द्मति । इति दुर्गादासः ॥

मर्म्म, [न] क्ली, (मृ + "सर्व्वधातुभ्यो मनिन्" उणा० ४ । १४४ । इति मनिन् ।) स्वरूपम् । तत्त्वम् । यथा, नैषधे । २ । ६ ।

"मृगया न विगर्हितं नृपै-
रपि धर्म्मागममर्म्मपारगैः ।
स्मरसुन्दर ! मां यदत्यज
स्तव धर्म्मः सदयो दयोज्ज्वलः ॥"

सन्धिस्थानम् । इति लिङ्गादिसंग्रहे अमरभरतौ ॥ जीवस्थानम् । इति राजनिर्घण्टः ॥ ॥ अथ मर्म्माणि ।

"सन्निपातः शिरास्नायुसन्धिमांसास्थिसम्भवः ।
मर्म्माणि तेषु तिष्ठन्ति प्राणाः खलु विशेषतः ॥
सप्तोत्तरं शतं सन्ति देहे मर्म्माणि देहिनाम् ।
तान्येकादश मांसे स्युरष्टावस्थिषु सन्ति हि ॥
सप्तानां विंशतिस्तानि स्नायूनां सप्तविंशतिः ।
चत्वारिंशच्चैकञ्च शिरामर्म्माणि तत्र तु ॥
सार्द्धविंशतिः सक्थियुगे तावन्त्येव भुजद्वये ।
द्वादशोरसि कुक्षौ च पृष्ठदेशे चतुर्दश ॥
ग्रीवायां सप्तभागे तु सप्तत्रिंशन्मतानि हि ॥
मर्म्माणि तानि सन्ति पञ्चधा भवन्ति ।
तान्याह ।
सद्यःप्राणहराणि स्युर्म्मांससन्धिगोचराणि हि ॥
मर्म्मदेशाश्रयत्वेन स्नायुः कालान्तरात्मकाः ॥
चत्वारिंशच्च चत्वारि वैकल्यं जनयन्ति हि ।
मर्म्माण्यष्टौ रुजाकारि विशल्यघ्नं त्रिकं मतम् ॥
ललाटकान्यधिपतिः शङ्खौ कक्षशिरास्तथा ।
हृदयं वस्तिनाभ्यौ च सद्यो घ्नन्ति हतानि वै ॥
ललाटकानि प्राग्ग्रीवाधिपतिभागसंस्थितानां
शिरासन्धीनां शिरसो मध्ये संयोगस्थानं तानि
चत्वारि शिरामर्म्माणि चतुरङ्गुलप्रमाणानि
हतानि सन्ति सद्योमारकाणि । अधिपतिः ।
मस्तकस्याभ्यन्तरे सन्धिशिरयोः सन्निपात
उपरिष्टाद्रोमावर्त्तः स एषः सन्धिर्म्मर्म्म अर्द्धां-
गुलप्रमाणं सद्योमारकम् । अक्षी भ्रुवोरूर्द्ध्वं
कर्णललाटमध्ये ते द्वे अक्षिमर्म्मणी अर्द्धां-
गुले सद्योमारके । कक्षशिराः मालक्षाः
ग्रीवाया उभयपार्श्वयोजनसन्धितः शिराक्षा
सद्यो शिरामर्म्माणि चतुरङ्गुलानि सद्योमार-

कानि। गुदं प्रति मांसमर्म्म चतुरङ्गुलं सद्योमारकम्। गुदवं वस्त्योर्मध्यमामाशयदारभूतं शिरामर्म्म चतुरङ्गुलं सद्योमारकम्। वस्तिः नाभिपृष्ठवंशमुष्कगुदेषङ्गुलेषु मध्ये वस्तिकर्त्तव्यः स्त्रीणां तथोत्तरः स्यात्। मर्म्मेदं चतुरङ्गुलं सद्योमारकम्। नाभिः प्रसिद्धा। शिरामर्म्मेदं चतुरङ्गुलं सद्योमारकम्। सद्योमर्म्मानि सीमन्तास्तनाधिपतिवस्तयः। हृदयौ पार्श्वौ गुदौ कटीकतरुणौ च वै। नितम्बाविति चैतानि कालान्तरहराणि तु। सद्योमर्म्मानि स्तनमूलस्तनरोहितापलापास्तम्भाः स्तनमूले स्तनयोरधस्ताद्यङ्गुलं यावत् ये शिरामर्म्मणी द्वयङ्गुले कफपूर्णकोष्ठतया कालान्तरमारके। स्तनरोहिते स्तनयोरुपरि द्वयङ्गुलं यावत् ये मांसमर्म्मणी रक्तपूरितकोष्ठतया कालान्तरमारके। अपलापौ अंशकूटयोरधस्तात् पार्श्वयोरुपरि द्वौ शिरामर्म्मणी अर्द्धाङ्गुले रक्तेन पूर्यमाणे न कालान्तरमारके। अपस्तम्भौ उरस उभयतो नाड्यौ वातपूर्णकोष्ठतया कासश्वासाभ्यां कालान्तरमारके। सीमन्ताः शिरसि पञ्च सन्धयः सन्धिमर्म्माणि चतुरः, तानि उन्मादभयशिक्षितिनाशैः कालान्तरमारकाणि। तलानि मध्याङ्गुलिमनुक्रम्य हस्तमध्ये तलं ह्यमपरस्य हस्तस्य पादयोश्च चत्वारि तलानि मांसमर्म्माण्यर्द्धाङ्गुलानि रुजाभिः कालान्तरमारकाणि। क्षिप्राणि अङ्गुष्ठाङ्गुल्योर्मध्ये क्षिप्रं तच्च हस्तयोर्द्वे पादयोर्द्वे एवमत्वारि स्नायुसन्धिमर्म्माण्यर्द्धाङ्गुलान्याक्षेपकैश्च कालान्तरमारकाणि। इन्द्रबस्तयः प्रदेशिन्यङ्गुष्ठयोर्मध्ये द्वे अङ्गुष्ठयोर्मध्ये द्वे एवं चत्वारि मांसमर्म्माणि द्वयङ्गुलानि शोणितक्षयेण कालान्तरमारकाणि। हृदयौ स्तनमूलाभ्यन्तरः पृष्ठवंशं यावत् शिरामर्म्मणी अर्द्धाङ्गुले शोणितानिप्रवृत्तिनिमित्तैरुपद्रवैः कालान्तरमारके। पार्श्वसन्धी वचनपार्श्वयोः सन्धी शिरामर्म्मणी अर्द्धाङ्गुले शोणितपूर्णकोष्ठतया कालान्तरमारके। कटीकतरुणे विकत्तसन्निधाने उभयतः श्रोणिकाष्ठे सक्थीकृत्यास्थिनी अस्थिमर्म्मणी अर्द्धाङ्गुले शोणितक्षयात् पाण्डुविवर्णरूपं जन्तुं कालान्तरमारके। नितम्बौ प्रसिद्धौ। ये सन्धिमर्म्मणी अर्द्धाङ्गुले अधःकायशोषेण दौर्ब्बल्येन च कालान्तरमारके॥ ७॥

शोणितात्मिकानूलोत्क्लेशविटपकूर्पराः।
कृकाटिके कण्धरे विधुरे रक्तकाटिके॥
अंसौ अंसफलकाभ्यां नीले मन्ये फणे तथा।
वैकल्यकारकाण्यष्टावर्द्धौ द्वौ तथैव च॥

शोणितात्मानि कुत्सितैरुष्णमधोवहनमन्यैर्नीलितानां नव ये बाह्यैर्ज्ञेयानि तानि चत्वारि शिरामर्म्माण्यर्द्धाङ्गुलानि वैकल्यकारकाणि तत्र शोणितस्रावेण प्रमादात्। सद्यः प्राणहराणि वा। आमयः आहत अर्द्धमर्म्मयोः पार्श्वयोरङ्गुलं रक्षिणि जानुनि ये अपरस्मिन् ये एवं चतसः स्नायुमर्म्माण्यर्द्धाङ्गुला वैकल्यकर्म्मः तत्र शोणितमिश्रैः सकृच्छल्यमथ। जानुनी अष्ठीव्नोः सन्धी सन्धिमर्म्मणी द्वयङ्गुले वैकल्यकरे। तत्र खञ्जता। जङ्घे: द्वे जङ्घामर्म्मणी द्वे प्रगण्डयोर्म्मध्ये एवं चतसः शिरामर्म्माण्येकाङ्गुला वैकल्यकर्म्मः तत्र शोणितक्षयात् सकृच्छोषः। कूर्चौ: पादयोरङ्गुष्ठाङ्गुल्योर्म्मध्ये तयोरङ्गैमध्य एवं चत्वारः। स्नायुमर्म्माणि वैकल्यकराणि तत्र पादयोर्भग्नवेपने भवतः। विटपे द्वे वङ्क्षणवृषणयोर्म्मध्ये स्नायुमर्म्मणी एकाङ्गुले वैकल्यकरे तत्र वाय्वाग्नेयशुक्रता वा। कूर्परौ कफोणी तौ द्वौ सन्धिमर्म्मणी द्वयङ्गुलौ वैकल्यकरौ तत्र बाहुमध्ये सङ्कोचः। कृकाटिके निम्नकूपके द्वे सन्धिमर्म्मणी अर्द्धाङ्गुले वैकल्यकरे तत्र स्वप्नाज्ञानमधःकाये चेष्टोपघातश्च। कक्षधरे वक्षःकक्षयोर्म्मध्ये द्वे स्नायुमर्म्मणी एकाङ्गुले वैकल्यकरे तत्र पक्षाघातः। विधुरे कर्णपृष्ठतोऽधःसंश्रिते किञ्चिन्निम्नाकारे द्वे स्नायुमर्म्मणी अर्द्धाङ्गुले वैकल्यकरे तत्र बाधिर्य्यम्। कण्ठाटिके शिरोग्रीवयोरुभयतः सन्धी द्वे सन्धिमर्म्मणी अर्द्धाङ्गुले वैकल्यकरे तत्र शिरःकम्पः। अंसौ स्कन्धौ स्नायुमर्म्मणी अर्द्धाङ्गुलौ वैकल्यकरौ तत्र बाहुस्तम्भः। अंसफलके पृष्ठोपरि पृष्ठवंशसुभयतस्त्रिकसक्थ्नन्धी ग्रीवाया अंसद्वयस्य च संयोगो यत्र तच्चिकं अस्थिमर्म्मणी अर्द्धाङ्गुले वैकल्यकरे तत्र बाहोः शून्यता शोषश्च। अपाङ्गौ नेत्रयोरन्तौ सिरामर्म्मणी अर्द्धाङ्गुलौ वैकल्यकरौ तत्रान्ध्यं दृष्ट्युपघातो वा। नीले मन्ये च कण्ठनाडीसुभयतस्तस्तो धमन्यौ द्वे नीले द्वे मन्ये तत्र एका नीला एका मन्या एकस्मिन् पार्श्वे। अन्या मन्या अन्या नीला अपरस्मिन् पार्श्वे। द्वे द्वे शिरामर्म्मणी द्वयङ्गुले द्वयङ्गुले वैकल्यकरे तत्र मूकता विक्लवस्वरता रसाग्राहिता च। फणे प्राणमार्गसुभयतः अभ्यन्तरे शिरामर्म्मणी अर्द्धाङ्गुले वैकल्यकरे तत्र गन्धाज्ञानम्। आवर्त्तौ भ्रुवोरुपरि निम्नयोः सन्धिमर्म्मणी अर्द्धाङ्गुलौ वैकल्यकरौ तत्रान्ध्यं दृष्ट्युपघातो वा॥ ८॥

गुल्फौ द्वौ मन्यिवन्तौ द्वौ तथा कूर्चशिरांसि च।
रुजाकराणि जानीयादष्टावेतानि बुद्धिमान्॥

गुल्फौ घुटिके सन्धिमर्म्मणी द्वयङ्गुलौ रुजाकरौ तत्र रुजा पादस्तम्भः खञ्जता वा। मन्थिवन्तौ एषप्रकोष्ठसन्धी सन्धिमर्म्मणी द्वयङ्गुलौ रुजाकरौ तत्र हस्तयोः क्रियाराहित्यम्। कूर्चशिरांसि गुल्फसन्धिरुभयतः एकस्मिन् पादे द्वे द्वे च द्वितीये एवं चत्वारि स्नायुमर्म्माण्येकाङ्गुलानि रुजाकराणि तत्र रुजा शोफश्च॥ ९॥ विशल्यघ्नानि।

उत्क्षेपौ स्नायनौ चैव विशल्यघ्नं त्रिकं मतम्।
उत्क्षेपौ हृदयोरुपरि कक्षान्तं यावत् स्नायुमर्म्मणी अर्द्धाङ्गुले तयोर्विद्धयोः सशल्यो जीवेत् पाकात् पतितशल्यो वा उद्धृतशल्यस्तु म्रियेत अतएव विशल्यमुद्धृतशल्यं एतीति विशल्यघ्नं मर्म्म। स्नायनौ एका भ्रुवोर्म्मध्ये शिरामर्म्मेदमर्द्धाङ्गुलं विशल्यघ्नम्।

सद्यस्त्राणान्तरे हन्युः सद्यः प्राणहराणि हि।
कालान्तरप्राणहरं पक्षे मासे च मारकम्॥
सद्यःप्राणहरं प्राज्ञे विद्धं कालेन मारयेत्।
कालान्तरप्राणहरमन्ते विद्वान् दुःखदम्॥

अन्ते मर्म्मसमीपे।

मर्म्मांग्यधिष्ठाय हि ये विकारा
मूर्च्छन्ति काये विविधा नराणाम्।
प्रायेण ते कृच्छ्रतमा भवन्ति
वैद्येन यत्नैरपि साध्यमानाः॥"

इति भावप्रकाशः॥ ७॥

मर्म्मस्पर्शनिषेधो यथा,—

"परक्षेत्रे गां चरन्तीं न चाचक्षीत कस्यचित्।
न संवसेत् सतर्कं च न कं वै मर्म्मणि स्पृशेत्॥"

इति कूर्म्मपुराणे उपविभागे १५ अध्यायः॥

("सप्तोत्तरं मर्म्मशतम्। तानि मर्म्मांणि पञ्चात्मकानि। तद्यथा मांसमर्म्माणि। सिरामर्म्माणि। स्नायुमर्म्माणि। अस्थिमर्म्माणि। सन्धिमर्म्माणि चेति। न खलु मांससिरास्नायुस्थिसन्ध्यतिरेकेणान्यानि मर्म्माणि भवन्ति यस्मान्नोपलभ्यन्ते॥ तत्रैकादशमांसमर्म्माणि। एकचत्वारिंशत्सिरामर्म्माणि। सप्तविंशतिः स्नायुमर्म्माणि। अष्टावस्थिमर्म्माणि। विंशतिः सन्धिमर्म्माणि। तदेतत् सप्तोत्तरं मर्म्मशतम्॥" इति सुश्रुते शारीरस्थाने षष्ठेऽध्याये॥)

मर्म्मकीलः, पुं, (मर्म्म कीलति विध्यतीति। कील + कः। यद्वा, मर्म्मणि गूढविषये कीलः शङ्कुरिव।) भर्त्ता। इति जटाधरः॥

मर्म्मज्ञः, त्रि, (मर्म्म तत्त्वं जानातीति। ज्ञा + कः।) मर्म्मवित्। तत्त्वज्ञः। मर्म्म स्वरूपं सन्धिस्थानं वा तज्जानाति यः सः॥ (यथा, महाभारते। ७। ६५। २०।

"तेषामाततां वीरः शीघ्रं पूर्व्वमथो दृढम्।
क्षिप्राज्ञो व्यधीद्बाणान्मर्म्मज्ञो मर्म्मभेदिभिः॥")

मर्म्मरः, पुं, (मर्म्म तत्त्वं मर्म्मेत्यशब्दं वा राति ददातीति। रा + कः।) वस्त्रस्य पत्रस्य च ध्वनिः। इत्यमरः। १। ७। २५॥ मड़मड़ शब्द इति भाषा॥ (यथा, रघुवंशे। ४। ५६।

"व्यभ्रभूयत याद्भानां चरतां गात्रशिञ्जितैः।
मर्म्मरः पवनोद्धूतराजतालीवनध्वनिः॥")

मर्म्मरी, स्त्री, (मर्म्मर + गौरादित्वात् ङीष्।) पीतदारु। दारुहरिद्रा इति ख्याता। इति मेदिनी। रे, २०॥

मर्म्मरीकः, पुं, (म्रियत इवासाविति। मृ + "मर्म्मरीकादयश्च।" उणा० ३। २०। इति ईकन् प्रत्ययेन निपातनात् साधुः।) दीनः। इत्युणादिकोषः॥

मलिम्लुचः २ अधिमासः ३ असंक्रान्तमासः ४ नपुंसकः ५ । तस्य लक्षणं यथा । रविसंक्रान्त्यभावविशिष्टचान्द्रमासत्वं मलमासत्वम् । इति श्रीदत्तपैठीनसिकुलप्रदीपश्रीकृष्णभट्टविरचितायां मलमासतत्त्वटीकायां श्रीकृष्णभट्टकृतायां मलमासतत्त्वटीकायां प्रथमः किरणः ॥

अपि च । ज्योतिषे ।

"अमावास्याद्वयं यत्र रविसंक्रान्तिवर्जितम् ।
मलमासः स विज्ञेयो विष्णुः स्वपिति कर्कटे ॥

अमावास्याद्वयम् अमावास्याद्वयान्तर्गतचतुर्दशद्वयम् । रविसंक्रान्तिभ्यां रविक्रियोत्पत्तिरूपोत्तरसंयोगरूपाभ्यां यथाक्रमं वर्जितं तेन दर्शद्वयान्तर्गतचतुर्दशद्वयपूर्व्वापरयोरेव रवेः क्रियोत्पत्तिरूपोत्तरसंयोगाभ्यां यथाक्रमं योगेनाधिमासः । संक्रान्तेरेकस्यां क्रियोत्पत्तिरपरस्यां पूर्व्वसंयोगनाशः उत्तरसंयोगोत्पत्तिश्चेति चतुर्दशद्वयान्तर्गतत्वमिति मीमांसकसिद्धान्तात् । गृह्यपरिशिष्टज्योतिःपराशरौ ।

रविणा रहितो मासश्चान्द्रः ख्यातो मलिम्लुचः ।
तत्र यद्दिष्टं कर्म्म उत्तरे मासि कारयेत् ॥

पराशरः ।

पक्षद्वयेऽपि संक्रान्तिर्यदि न स्यात् सितासिते ।
तदा तन्नामविहितमुत्तरे मासि कारयेत् ॥

अत्र लक्षणसमन्वयश्च रवेस्तदा भवति यदा तन्मासनामपूर्व्वमासान्तचतुर्दशयोरेकराश्यवस्थितस्य रवेस्तन्मासानन्तरमेव राश्यन्तरसंयोगः नत्वेकराशिस्थितस्य मासस्यापनमासं तथात्वे चतुर्दश्यामेकराशौ संक्रान्तस्य प्रतिपत्प्रथमक्षणेऽपरराशौ तत्परराशौ च द्वितीयायां प्रतिपदि वा रवेः संयोगेऽपरस्यापि मलमासता स्यात् अतश्च ज्योतिषे ,

अमावास्यापरिच्छिन्नं रविसंक्रान्तिवर्जितम् ।
मलमासं विजानीयाद्गर्हितं सर्व्वकर्म्मसु ॥
तस्यार्थो दर्शकस्यैकराशौ दर्शद्वयातिगः ॥
अत्रैकराशिग्यार्कस्य दर्शद्वयातिगत्वमुक्तम् ॥
अतश्च पूर्व्वापरर्क्षस्थितयोर्मासयोः पूर्व्वस्यैव सम्भवति न परस्य ॥ मलमासकारणन्तु ज्योतिषे ।

दिवसस्य परस्यार्कः षष्टिभागस्थितौ ततः ।
करोत्येदमहश्चैदं तदैवैकश्च चन्द्रमाः ॥
अमार्हतीयानामन्यानामधिमासकम् ।
सौम्ये अयनतः पूर्व्वं पक्षान्ते तु पश्चिमम् ॥
तेन दिवसस्य निशेः षष्टिभागं दग्धमेकं रविः परति क्षेदयति उत्तरे क्षेदमित्यभिधानात् । अतश्च यतौ मासद्वये षष्टिनाड्यूनाधिकदग्धनिशेक्षेदमाकर्षणं करोति । एवं चन्द्रोऽपि । अतश्चक्रमेण वर्षे द्वादशतिथ्यात्मककालगा कर्म्मार्हतीयानामन्यानामन्ते अर्हं द्वितीयं येषां ते तथा सौम्ये माधवादिमृदौ पूर्व्वं माधवादिचित्रमितं पक्षान्ते तु पश्चिमं श्रावणादिपित्रवसितं मलमासं चन्द्रार्कौ जनयतः । सौम्ये माधवादिमृदौ इति यदुक्तं तत् अस्तमाह मिहिरः ।

माधवादिषु षट्सु मासि दर्शद्वयं यदा ।
विराधाढ़ः स विज्ञेयः शेते तु श्रावणोऽद्भुतः ।
विराधाढो विराधाढ़ादिः । श्रावणे सौरश्रावणे । तथा च ज्योतिषे ।
मिथुनस्थो यदा भानुरमावास्याद्वयं स्पृशेत् ।
विराधाढ़ः स विज्ञेयः विष्णुः स्वपिति कर्कटे ॥
अमावास्याद्वयं तदन्यचतुर्दशद्वयं स्पृशेत् संयुङ्क्ष्यात् न तत्रार्के राश्यन्तरसंयोग इत्यर्थः ॥ * ॥ नन्वेवं कर्कटादित्रिके अधिमासपाते तत्पूर्व्वं मिथुन एव हरिशयनं तत् कथं माधवादिषट्कमात्रे कर्कटे तत् । तत्राह राजमार्त्तण्डः ।

कन्यासिंहकुलीरेषु यदा दर्शद्वयं भवेत् ।
आगामिनि तदा वर्षे कुलीरे माधवः स्वपेत् ॥

माधवादित्रिकश्रावणादित्रिकाधिमासविवेचनमप्येतदर्थम् । इदन्तु सार्द्धवर्षद्वयाधिमासपातमौचित्यक्रमाद्दुक्तं क्वचित्तिथीनां ह्रासवाहुल्येन दृक्पक्षाधिकन्यूनदर्शनादुक्तकालन्यूनाधिककालेऽपि मलमासो भवतीति समयप्रकाशकृत् । वस्तुतस्तु वैपरीत्यं यतो न्यूनदृक्तिथेः प्राधिकत्वे तत्र तिथिक्षयस्य झटित्युपलभ्यमानत्वात् स्वल्पकालेन तिथ्यन्तरसम्बन्धात् शीघ्रं रविलङ्घनप्रतीतेः शीघ्रमेव मलमासो भवतीति अधिकदृक्तिथेः प्राधिकत्वे तत्र तिथिक्षयस्य झटित्युपलभ्यमानत्वेनाधिकेनैव कालेन तिथ्यन्तरसम्बन्धात् विलम्बेनैव रविलङ्घनप्रतीतेस्तिरेक्षेव मलमासो भवतीति । तथा च विष्णुधर्म्मोत्तरम् ।

सौरसंवत्सरस्यान्ते मानेन ग्रथितेन तु ।
एकादशातिरिच्यन्ते दिनानि भृगुनन्दन ! ॥
समाहृत्य तु सोमासे तस्मान्मासोऽतिरिच्यते ।
स चाधिमासकः प्रोक्तः काम्यकर्म्मसु गर्हितः ॥

इदन्तु नियतमेकस्मादधिमासात्तृतीयान्दे अधिमासान्तरमिति । यद्यपि ।

यां तिथिं समनुप्राप्य तुलां गच्छति भास्करः ।
तयैव सर्व्वसंक्रान्त्यावस्मेयं न गच्छति ॥

इति राजमार्त्तण्डवचनात्तुलादियुग्मासे तिथिवृद्धाभावाद्गर्हे द्वादशतिथिवृद्धिरनुपपन्नातथापि ।

मध्ये विषुवतोर्भानुर्यान्यर्क्षाणि तु वर्द्धयेत् ।
तैः सम्भृताधिको मासः पतत्येव त्रयोदशः ॥

इति गृह्यपरिशिष्टवाक्ये विषुवतोर्मेषतुलासंक्रान्त्योर्मध्ये मेषादियुग्मास एव तिथिवृद्धिरुक्ता । अहर्गणने मेषादियुग्मासे मन्दसङ्ख्या सप्तदिनवृद्धितुलादौ शीघ्रसङ्ख्या दिनद्वयवृद्धा इति । तथा च ज्योतिःशास्त्रम् ।

मेषादीनामहर्वृन्दं यस्यां सम्प्राप्यचक्रकम् ।
तुलादीनामहस्तत्रचक्रन्तु लिखेत् पृथक् ॥
चक्रं एकः । अङ्कस्य वामा गतिरित्यङ्कविदां समयात् युगक्रमेण अङ्का बोध्याः । तेन दिनवृद्धिक्रमसङ्ख्याभ्यां मेषादिषट्क एव एकादशादितिथिवृद्धिः । एवञ्च ।

मेषोऽन्दवृद्धितिथे सार्द्धे पञ्चमके दिनद्वये ।
दिवसस्याष्टमे भागे पतत्येकोऽधिमासकः ॥

इति राजमार्त्तण्डोक्तः सप्तदशदिनाधिकाष्टमासाधिकवर्षद्वये अधिमासः । स सौरे मासि सप्तदशदिनोत्तरं चान्द्रमासस्तुनासम्भवात् सावनमानेन ज्ञेयः । तथा च विष्णुधर्म्मोत्तरप्रथमकाण्डम् ।

सौरेणाब्दस्तु मानेन यदा भवति भार्गव ! ।
सावनेन च मानेन दिनषट्कं प्रपूर्य्यते ॥
सौरसंवत्सरे दिनषट्काधिकः सावनसंवत्सरो भवतीति । सौरमासाष्टकाधिकवर्षद्वये सप्तदश दिनानि वर्द्धन्ते सावनक्रमेणेति पूर्व्वोक्तविष्णुधर्म्मोत्तरोक्तसमानविषयतास्येति ॥""ज्योतिषे ।

दर्शानां फाल्गुनादीनां प्रायो माघस्य च ।
क्वचित् ।
नपुंसकत्वं भवति न पौषस्य कदाचन ॥

नपुंसकत्वं मलमासत्वम् । तथा चोक्तम् ।

असंक्रान्तो हि यो मासः कदाचित्तिथिवृद्धितः ।
कालान्तरात् समायाति स नपुंसक इष्यते ॥

प्राजिरल्योऽपि ।

प्रायशो न शुभः सौम्यो ज्येष्ठाषाढ़कृतया ।
मध्यमौ चेत्त्वेशाखावधिकौऽन्यः सुभिक्षकृत् ॥
सौम्यो मार्गशीर्षः । अधिकोऽधिमासः ।"* ॥
"तदयं संक्षेपः । शुक्लप्रतिपदादिरमावास्यान्तो रविसङ्क्रान्तिको मासो मलमासः । स च माधवादौ औत्सर्गिकः कदाचित् कार्त्तिकादावपि । अयञ्चानिष्कृत् माधवादि कार्त्तिकादियट्कयोरपि तत्तल्लक्षणयोगे माधवादावेव तुलादियट्क एवोभयमासे तत्तल्लक्षणयोगे पूर्व्व एव । आश्विनवैशाखयोस्तत्तल्लक्षणयोगे पर एव मलमासः तदभिज्ञस्तु भानुलङ्घितः । मलमासे आषाढ़ादेर्हित्वम् । भानुलङ्घिते तु नैवमिति विस्तरः ॥*॥

मलमासे निषिद्धानि यथा, काठकगृह्यम् ।

चूड़ां मौञ्जीबन्धनञ्च अग्न्याधेयं महालयम् ।
राजाभिषेकं काम्यञ्च न कुर्य्यादधिमासके ॥

चूड़ां मौञ्जीबन्धनञ्च अग्न्याधेयं महालयम् ।
राजाभिषेकं काम्यञ्च न कुर्य्याद्भानुसङ्क्रमे ॥

महालयं कन्यार्कश्राद्धम् । भीमपराक्रमेऽपि ।

अधिमासे दिनपाते धनुषि रवौ भानुसङ्क्रमे मासि ।
चक्रिणि सुप्ते कुर्य्यान्नो माङ्गल्यं विवाहश्च ॥

दिनपाते दिनक्षये ।

अधिमासे विवाहं यात्रां चूड़ां तथोपनयनादि ।
कुर्य्यान्न सावकाशं माङ्गल्यं न तु विशेषेण्याम् ॥ इति ॥

अत्र विवाहादिकीर्त्तनं निरवकाशत्वेऽपि निषेधार्थम् । अन्यथा सावकाशग्रहणेनैव सिद्धेः । सावकाशश्च सम्भवत्कालान्तरं कर्म्म यतो निरवकाशस्यानन्यगतिकस्य प्रतिप्रसवोऽर्थात् सूचितः । तथा च मलमासाधिकारे काठकगृह्यम् ।

कालेऽनन्यगतिं नित्यां कुर्य्यान्नैमित्तिकीं क्रियाम् ॥"
इति मलमासतत्त्वम् ॥*॥

अपि च,
"अग्न्याधानं प्रतिष्ठाश्च यज्ञदानव्रतानि च ।
देवव्रतव्रतोत्सर्गचूड़ाकरणमेखलाः ।
माङ्गल्यमभिषेकश्च मलमासे विवर्ज्जयेत् ॥"
इति गारुड़े १२८ अध्यायः ॥*॥

अथ मलमासकर्त्तव्यव्रतादि । "चातुर्मास्यव्रतमाषाढ़ादुल्लेखेन विहितं तदप्यारब्धं आवणादिमलमासेऽपि कर्त्तव्यं आषाढ़ादिप्रतिदिनकर्त्तव्यत्वेन निरवकाशात् ।
'यष्ठ्या तु दिवसैर्मासः कथितो बादरायणैः ॥'
इति ज्योतिःशास्त्रे पितामहेन एकमासत्वाभिधानाच्च । यथ ।
'संवत्सरन्तु यः पूर्णमेकभक्तेन तिष्ठति ।'
इत्यादौ माघाद्यनुल्लिखितसंवत्सरव्रतमारब्धं तन्मलमासेऽपि कर्त्तव्यम् ।
'ऋक्षित्रयोदशमासाः संवत्सर इति श्रुतेः ॥'
इत्यत्र प्रतिमासविहितं नमाघादुल्लेखेन तन्मलमासेऽपि कर्त्तव्यम् । तथा च रम्भातृतीयाव्रते शिवरहस्यम् ।
'मासे मलिम्लुचेऽप्येवं यजेद्देवीं सशङ्कराम् ।
किन्तु नोद्यापनं कार्य्यमित्याह भगवान् शिवः ॥'
उद्यापनं प्रतिष्ठा । व्रतारम्भोऽपि निषिद्धः । पूर्व्वोक्तकाम्यव्रतवचनात् । ज्येष्ठादिमासविशेषविहितं सावित्रीव्रतादिकन्तु सावकाशत्वान्मलमासे न कार्य्यम् । किन्तु प्रकृत एव ज्येष्ठादौ कर्त्तव्यमिति । हरिस्मृतिः ।
'नित्यनैमित्तिके कुर्य्यात् प्रयतः सन् मलिम्लुचे ।
तीर्थस्नानं गजच्छायां प्रेताहं तथैव च ॥'
नित्यमहरहः पुरस्कारविहितं स्नानसन्ध्यापञ्चमहायज्ञादि काम्यमपि तथाविधं संकल्पितं यत्किञ्चिद्दयदानाग्निशूलादि । उक्तं भविष्ये ।
'कुर्य्यात् प्रात्यहिकं कर्म्म प्रयतः सन् मलिम्लुचे ।
नैमित्तिकञ्च कुर्व्वीत सावकाशं न यत्नवेत् ॥'
कालमाधवीये मत्स्यपुराणम् ।
'वर्षे चाहरहः श्राद्धं दानञ्च प्रतिवासरम् ।
गोभूतिलहिरण्यानां मासेऽपि स्यान्मलिम्लुचे ॥'
काठकगृह्यपरिशिष्टम् ।
'प्रदत्तं मलमासात् प्राक् यत् कर्म्म न समापितम् ।
आगते मलमासेऽपि तत् समाप्यमसंशयम् ॥'
ब्रह्मसिद्धान्ते ।
'आरब्धं कर्म्म यत्किञ्चित्तत्कार्य्यं हि मलिम्लुचे ॥'
नैमित्तिकं माससंवत्सरदिवसादिविशेषनियमशून्यावश्यककर्त्तव्यकादाचित्कनिमित्तोत्पन्नम् ॥ जातकर्म्मादयोऽपि मलमासे कार्य्यम् ।
'जातकर्म्मान्यकर्म्माणि नवश्राद्धं तथैव च ।
मघात्रयोदशीश्राद्धं श्राद्धान्यपि च षोड़श ॥
चन्द्रसूर्य्यग्रहे स्नानं दानश्राद्धक्रियादिकम् ।
कार्य्यं तन्मलमासेऽपि नित्यं नैमित्तिकं तथा ॥'
स्मृतिः ।
'श्राद्धजातकनामानि ये च संस्कारमाश्रिताः ।
मलिम्लुचेऽपि कर्त्तव्याः काम्या इष्टीश्च वर्ज्जयेत् ॥'
संस्कारा अन्नप्राशननिष्क्रमणादयः । इति माधवाचार्य्यः । अन्त्यकर्म्मणि वहनदहनोदकदानपिण्डदानास्थिसञ्चयादीनि । नवश्राद्धम् ।
'चतुर्थे पञ्चमे चैव नवमैकादशे तथा ।
यदत्र दीयते जन्तोस्तन्नवश्राद्धसञ्ज्ञितं ॥'
इति यमोक्तम् ॥

अत्र चतुर्थाद्यादिग्रहणं मरणदिनावधीति । बालग्रहभूतग्रहनराधिपप्रबलशत्रुदुःसहरोगाभिभवाङ्गनदुःस्वप्नग्रहदौस्थ्यादिनिमित्तं शान्तिकर्म्मापि मलमासेऽपि कर्त्तव्यम् । विष्णुना शान्तिस्वस्त्ययनैर्देवोपघातान् शमयेत् परचक्रोपघातांश्च इत्युक्तम् ।" इति मलमासतत्त्वम् ॥

मलयः, पुं, (मलते धरति चन्दनादिकमिति । मल् + "वलिमलितनिभ्यः कयन् ।" उणा० ४ । ६६ । इति कयन् ।) स्वनामख्यातपर्व्वतः । तत्पर्य्यायः । आषाढ़ः २ दक्षिणाचलः ३ । इति हेमचन्द्रः ।४ । ६५ ॥ चन्दनाद्रिः ४ मलयाचलः ५ । इति शब्दरत्नावली ॥ (स च सह्यकुलाचलान्तर्गतः । यथा, मार्कण्डेये । ५७ । १०—११ ।
"महेन्द्रो मलयः सह्यः शुक्तिमानृक्षपर्व्वतः ।
विन्ध्यश्च पारिपात्रश्च सप्तैवात्र कुलाचलाः ॥")
श्रीखण्डम् । देशविशेषः । (यथा, मात्स्ये । ११३ । ४४ ।
"अङ्गा वङ्गा मद्गुरका अन्तर्गिरिबहिर्गिरी ।
ततः प्रवङ्गमातङ्गमलयामलवर्त्तिकाः ॥")
आरामः । इति मेदिनी । ये, ६६ ॥ नन्दनवनम् । इति धरणिः ॥ अष्टादशोपद्वीपान्तर्गतद्वीपविशेषः । इति शब्दमाला ॥ ऋषभदेवस्य शतपुत्रान्तर्गतपञ्चमपुत्रः । (यथा, श्रीभागवते । ५ । ४ । १० । "तमनु कुशावर्त्त इलावर्त्तो ब्रह्मवर्त्तो मलयः केतुभद्रसेन इन्द्रस्पृक् विदर्भः कीकट इति नव नवतिप्रधानाः ॥"
गरुड़वंशीयानामन्यतमः । यथा, महाभारते । ५ । १०१ । १४ ।
"सुस्वरो मधुपर्कश्च हेमवर्णस्तथैव च ।
मलयो मातरिश्वा च निशाकरदिवाकरौ ॥")

मलयगन्धिनी, स्त्री, (मलयस्य गन्धः अस्त्यस्याः । मलयगन्ध + इनिः । स्त्रियां ङीप् ।) उमासखीविशेषः । इति शब्दमाला ॥

मलयजं, पुं, क्ली, (मलयात् जायते इति । जन् + डः ।) चन्दनम् । इत्यमरः । २ । ६ । १३१ ॥ (यथा, गीतगोविन्दे । ३ । ११ ।
"क्षुदि विमलताहारो नायं भुजङ्गमनायकः
क्षवलयदलश्रेणी कण्ठे न सा गरलद्युतिः ॥
मलयजरजो नेदं भस्म प्रियारहिते मयि
प्रहर न हरभ्रान्त्यानङ्ग ! क्रुधा किमु धावसि ॥"
मलयजाते, त्रि । यथा, महाभारते । १ । २७ । ६ ।
"उत्पतद्भिरिवाकाशं वृक्षैर्मलयजैरपि ॥")
यथा च ।
"राहुं मलयजं शूद्रं पैठीनं द्वादशाङ्गुलम् ।
कृष्णं कृष्णाम्बरं सिंहासनं ध्यात्वा तथार्च्चयेत् ॥"
इति ग्रहयज्ञतत्त्वम् ॥

मलया, स्त्री, (मल + कयन् । टाप् ।) चिरता । इति मेदिनी । ये, ६६ ॥

मलयाचलः, पुं, (मलयश्चासावचलश्चेति ।) मलयपर्व्वतः । इति शब्दरत्नावली ॥ (यथा, सुश्रुते उत्तरतन्त्रे । ४७ अध्याये ।
"पुन्नागनागकरवीरकृतोपकारे
तस्मिन् गृहे कमलरेणुरुणे शयीत ।
यत्राहृतानिलविकम्पितपुष्पदाम्नि
हैमन्तविन्ध्यहिमवन्मलयाचलानाम् ॥")

मलयानिलः, पुं, (मलयस्यानिलः ।) वसन्तकालीनवायुः । तत्पर्य्यायः । वासन्तः २ । इति त्रिकाण्डशेषः ॥ (यथा, साहित्यदर्पणे । ३ । १२६ ।
"स एव सुरभिः कालः स एव मलयानिलः ।
सैवेयमबला किन्तु मनोऽन्यदिव दृश्यते ॥")

मलयूः, स्त्री, (मलपूः । पृषोदरादित्वात् पस्य यत्वम् ।) मलपूः । इति शब्दरत्नावली ॥

मलयोद्भवं, क्ली, (मलयः उद्भव उत्पत्तिकारणं यस्य ।) चन्दनम् । इति राजनिर्घण्टः ॥

मलविनाशिनी, स्त्री, (मलं विनाशयतीति । वि + नश् + णिच् + णिनिः । स्त्रियां ङीप् ।) शूद्रपुण्ड्री । इति राजनिर्घण्टः ॥

मलहन्ता, [तृ] पुं, (मलं हन्तीति । हन् + तृच् ।) शालमलीवृक्षः । इति राजनिर्घण्टः ॥

मला, स्त्री, (मल + अच् । टाप् ।) भूम्यामलकी । इति शब्दचन्द्रिका ॥

मलाकर्षी, [न्] पुं, (मलं विष्ठां आकर्षति स्थानात् स्थानान्तरं नयतीति । आ + कृष् + णिनिः ।) घुड़िकः । इति शब्दमाला । घाड़ि इति भाषा ॥

मलाक्ता, स्त्री, (मलेन मनोमालिन्येन अक्तति क्रुटिलं गच्छतीति । अक् + अच् । स्त्रियां टाप् ।) कामिनी । दूतिका । दूती । इति संक्षिप्तसारोणादिवृत्तिः ॥

मलापकर्षणं, क्ली, (अप + कृष् + भावे ल्युट् । मलस्यापकर्षणम् ।) पापमोचनम् । मलदूरीकरणम् । इति केचित् ॥

मलापहा, स्त्री, (मलमपहन्तीति । अप + हन् + डः । स्त्रियां टाप् ।) नदीविशेषः । यथा,—
"मलापहा भीमरथी च वट्टगा
यथा च कृष्णा जलसान्वगा गुणैः ।
मलापहावट्टगयोस्तथापि
पथ्यं लघु स्वादुतरं सुकान्तिदम् ॥"
इति राजनिर्घण्टः ॥

मलावहं, क्ली, (मलं व्यावहतीति । आ + वह् + अच् ।) नवविधपापान्तर्गतपापविशेषः । यथा, मानवे । ११ । ७१ ।

क्षामकाऽवयोद्दृत्या मद्यानुगतभोजनम्।
पलैलधःकुसुमक्लेयमर्घेऽर्घ्यं मलावृहम्॥"

मलारिः, पुं, (मल्लस्यारिर्मल्लको रेचकत्वात्।) गन्धसारः। इति राजनिर्घण्टः॥

मलिलं, त्रि, (मलते धारयतीति। मल+"दृक्लमग्यश्चापि।" उणा० २। ४८। इति इलच्। यद्वा, "ज्योत्स्नातमिस्रेति।" ५। २। ११४। इत्यत्र। "मलश्चन्द्रादिनलीमसर्चौ प्रत्ययौ निपात्येते।" इति काशिकोक्त्या इनच्।) मलयुक्तवस्तु। तत्पर्य्यायः। मलीमसम् २ कश्मलम् ३ मलदूषितम् ४। इत्यमरः। ३। १। ५५॥ (यथा, मघानिर्व्वाणतन्त्रे। १। ४३।
"परस्त्रीपरस्वे पापग्रहाभयविवर्जिताः।
निर्धना मलिना दीना दरिद्राश्चिररोगिणः॥")
दूषितम्। (यथा, चाणक्यशतश्लोक्याम्। ४०२।
"परपट एव रक्तस्त्रीभिर्मलिनो शुक्लापि निर्दयं ताभिः।
अर्थग्रहणेन विना वचन्य! मुक्तोऽसि कुलटाभिः॥")
क्लेद्यम्। इति मेदिनी। ने, १०४॥ नित्यनैमित्तिककर्म्मक्रियात्यागी। इति मार्कण्डेयपुराणम्॥ (निकृष्टम्। यथा, शिशुपालवधे। ६। २३।
"द्युतिमग्नदृशां दृशो लघवः
प्रकटीभवन्ति मलिनाश्रयतः॥"
"मलिनाश्रयतः निकृष्टाश्रयत्वात्।" इति तट्टीकायां मल्लिनाथः॥)

मलिनं, क्ली, (मलते धरति दोषमिति। मल+इनच्।) घोलम्। इति शब्दचन्द्रिका॥ दोषः। इति हेमचन्द्रः॥ टङ्गणः। इति राजनिर्घण्टः॥

मलिनसखः, पुं, (मलिनं सखमग्रभागो यस्य।) अग्निः। गोलाङ्गुलः। इति मेदिनी। खे, १८॥ प्रेतः। इति हेमचन्द्रः॥

मलिनसखः, त्रि, (मलिनं दूषितं सखं यस्य।) क्रूरः। खलः। इति मेदिनी। खे, १८। हेमचन्द्रश्च॥ त्यागवदगश्च॥

मलिनाम्बु, क्ली, (मलिनं कश्मलवर्णं अम्बु तदिव।) मसी। इति हेमचन्द्रः। ३। ४८॥

मलिनाम्बः, त्रि, (मलिनं दूषितमाम्बं यस्य।) खलः। इति शब्दमाला॥

मलिनी, स्त्री, (मलमस्या अस्तीति। मल+इनिः। स्त्रियां ङीप्।) रजस्वला नारी। इत्यमरः। २। ६। २०॥

मलिम्लुचः, पुं, (मलो मलं म्लोचतीति। म्लुच् इत्यस्मात्+कः।) मलमासः। यथा,—
"समतिक्रम्य तु रविर्यदा गच्छेत् कथञ्चन।
आदौ मलिम्लुचो ज्ञेयो द्वितीयः प्रथमः स्मृतः॥
यदा तं दशाब्दमासमतिक्रम्य तत्पूर्व्वमासाश्वयुजसङ्क्रान्तिराक्रम्य सन् सङ्क्रान्तिमाक्रम्य गच्छेत् मासान्तरे राशन्तरसंयोगं गच्छेत् तदा आदौ निक्रान्तमासो मलिम्लुचो ज्ञेयः। मलो मलं म्लोचति गच्छतीति मलिम्लुचः। द्वितीयस्तु प्रथमः शुद्धः सङ्क्रान्त्यभावात्।" इति मलमासतत्त्वम्॥ अग्निः। चौरः। इति मेदिनी। चे, २१॥ (यथा, माघे। १। ५२।
"प्रहितः प्रधनाय माधवा-
नहमाकारयितुं महीभृता।
न परेषु महौजसस्त्वला-
दयकुर्व्वन्ति मलिम्लुचा इव॥")
वायुः। इति शब्दमाला॥ (पक्षयत्नपरिभ्रष्टः। इति हेमचन्द्रः। ३। ५२२॥)

मलिष्ठा, स्त्री, (अतिशयेन मलिनी। मलिनी+इष्ठः। स्त्रियां टाप्।) रजस्वला नारी। इति त्रिकाण्डशेषः॥

मलीमसं, क्ली, (मलमस्यास्तीति। मल+"ज्योत्स्नातमिस्रेति।" ५। २। ११४। इति ईमसच् प्रत्ययेन निपातितः।) लौहम्। पुष्पकासीसम्। इति मेदिनी। से, ५६॥

मलीमसः, त्रि, (मलमस्यास्तीति। मल+ईमसच्। निपात्यते।) मलिनः। इत्यमरः। ३। १। ५५॥ (यथा, माघे। १। ३८।
"उपप्लुतं पातुमदो महीरुहै-
स्त्वमेव विघ्नम्भर! विघ्नमीक्षसे।
ऋते रवेः क्षालयितुं क्षमेत कः
क्षपातमस्काण्डमलीमसं नभः॥"
क्षाम्यवर्णः। यथा, श्रीकण्ठचरिते। ६। ३८।
"मलीमसश्रीर्मधुपानसक्तो
भेजे लता: पुष्पवतीः स्फुटं यः।
स एव चैत्रेय वत द्विरेफः
पुष्पेषुराज्ये विहितः पुरोधाः॥")

मलूकः, पुं, (मल+बाहुलकात् ऊकः।) क्षमिविशेषः। इत्युणादिकोषः॥

मल्ल, ङ धृतौ। इति कविकल्पद्रुमः॥ (भ्वा० आत्म० सक० सेट्।) ङ, मल्लते। इति दुर्गादासः॥

मल्लः, पुं, (मल्लते धरति बलमिति। मल्ल+अच्।) बाहुयोधी। इत्यमरभरतौ। माल इति भाषा॥ (यथा, श्रीमद्भागवते। १०। ४३। १७।
"मल्लानामशनिर्नृणां नरवरः स्त्रीणां स्मरो मूर्त्तिमान्॥")
वर्णसङ्करजातिविशेषः। माला इति भाषा। स च ब्राह्मण्यक्षत्रियात् सवर्णायां जातः। इति मानवे १० अध्यायः॥ स च लेटात् तीवरकन्यायां जातः। इति ब्रह्मवैवर्त्तपुराणम्॥ तन्तुवाय्या कुन्दकाराच्च जातः। इति पराशरपद्धतिः॥ पाचम्। कपोलम्। मस्तकभेदः। इति मेदिनी। ले, ४४॥ देशविशेषः। यथा,—
"दशार्णा नवराष्ट्रञ्च मल्लाः शाल्वा युगन्धराः॥"
इति विराटपर्व्वणि १ अध्यायः॥

मल्लकः, पुं, (मल्ल एव। मल्ल+कन्। ह्रस्वादस्य तथात्वम्। यद्वा, मल्ल धारणे+ण्वुल्।) दण्डः। इति हेमचन्द्रः। ३। २८४॥ (ब्राह्मणविशेषः। यथा, राजतरङ्गिण्याम्। ८। २३२०।
"विलोक्य चैकत्यगतौ यशौ तौ स्वामिनौ तथा।
तस्याधिपेनुरुक्तस्तौ द्विजस्या मल्लकाभिधः॥")

मल्लकः, पुं, स्त्री, (मल्लते धारयति प्रदीपमिति। मल्ल+ण्वुल्।) दीपाधारः। नारिकेलफलावयवशरावविशेषः। माला इति भाषा। स्त्रियां मल्लिका। इत्यमरभरतौ॥ प्रदीपः। इति मधुरेशः॥

मल्लजं, क्ली, (मल्ले तदाख्यदेशे जायते इति। जन+डः।) मरिचम्। इति शब्दार्थरत्नाकरः॥

मल्लतूर्य्यं, क्ली, (मल्लैर्वाद्यमानं तूर्य्यम्। मल्लाय तूर्य्यमिति वा।) वाद्यविशेषः। तत्पर्य्यायः। मल्लडम्बरः २। इति त्रिकाण्डशेषः॥

मल्लनागः, पुं, (नागो हस्तीव मल्लः। पूर्व्वनिपातः।) वात्स्यायनमुनिः। (मल्लो बलीयान् नागः।) अभ्रमातङ्गः। इति मेदिनी। गे, ५७॥ (मल्लो नाग इव।) लेखकारः। इति शब्दरत्नावली॥ कामशास्त्रविशेषः। इति धरणिः॥

मल्लभूः, स्त्री, (मल्लानां भूर्भूमिः।) मल्लभूमिः। इति जटाधरः॥

मल्लभूमिः, स्त्री, (मल्लानां भूमिः स्थानम्।) मल्लक्रीड़ास्थानम्। तत्पर्य्यायः। अक्षवाटः २ रङ्गभूमिः ३ रणस्थली ४। इति शब्दरत्नावली॥ मल्लभूः ५ अक्षपाटः ६। इति जटाधरः॥ देशविशेषश्च॥ (यथा,—
"अयःपात्रे पयःपानं शालपत्रे च भोजनम्।
शयनं तालपत्रे च मल्लभूमेरियं गतिः॥"
इत्युद्भटः॥)

मल्लयात्रा, स्त्री, (मल्लानां यात्रा।) मल्लानां युद्धार्थयात्रा। तत्पर्य्यायः। माल्लवी २। इति शब्दरत्नावली॥

मल्लयुद्धं, क्ली, (मल्लानां युद्धम्।) मल्लानां संग्रामः। तत्पर्य्यायः। नियुद्धम् २ बाहुयुद्धम् ३। इति शब्दरत्नावली॥ तत्प्रकारा यथा,—
"अथ क्रुद्धेन तं मल्लं योधयामास मत्सराट्।
योध्यमानस्ततो भीमो दुःखेनैवाकरोन्मतिम्॥
नहि शक्नोति विवृतं प्रत्याख्यातुं नराधिपम्।
ततः स पुरुषव्याघ्रः शार्दूलग्रथितस्वरम्॥
प्रविवेश महारङ्गं विराटमभिपूजयन्।
ववन्द कृष्णां कौन्तेयस्ततः संहर्षयन् जनान्।
ततस्तं वृत्तसङ्काशं भीमो मल्लं समाह्वयत्॥
जीमूतं नाम तं मल्लं तत्र प्रख्यातविक्रमम्।
तावुभौ सुमहोत्साहावुभौ तीव्रपराक्रमौ॥
मत्ताविव महाकायौ वारणौ षष्टिहायनौ।
ततस्तौ नरशार्दूलौ बाहुयुद्धे समीयतुः॥
वीरौ परमसंहृष्टावन्योन्यजयकाङ्क्षिणौ।
आसीत् सुभीमः सम्पातो वज्रपर्व्वतयोरिव॥१०॥
उभौ परमसंहृष्टौ बलेनातिबलावुभौ।
अन्योन्यमन्तरप्रेप्सू परस्परजयैषिणौ॥
उभौ परमसंहृष्टौ मत्ताविव महागजौ।
क्षतप्रतिक्षतैश्चित्रैर्बाहुभिश्च सकृद्भटैः॥ ११॥
सन्निपातावधूतैश्च प्रमाथोन्मथनैस्तथा।
पेषणैर्मुष्टिभिश्चैव वराहोद्धूननिस्वनैः॥
तलैर्वज्रनिपातैश्च प्रसृताभिक्षणैश्च च।
एकाकानखपातैश्च पादोद्धूतैश्च दारुणैः॥

मल्लयु

आजानुभरानिर्घातैः शिरोभिश्चापघट्टितैः ।
तद्वृषभमयहोरमभग्नं मार्दुतैरभवत् ॥
बलप्राप्तेन मुरारिणा समालोक्यमानमल्लिभौ ।
स्फुरत्तन्नक्तः सर्वैः सोत्कृष्टनिनदोल्लितः ।
बलिनो संयुगे राजन् ! कृतायासयोरिव ।
प्रकर्षनाकर्षणयोरभ्याकर्षविकर्षणैः ॥
आकर्षतामथाप्योनं बाहुभिश्चाभिजघ्नतुः ॥१२॥
ततः प्रहृष्टेन मदेन मत्तौ परस्परम् ।
कृष्णोरस्कौ दीर्घभुजौ निघ्नन्तौ कृष्णमायुधौ ॥
बाहुभिः समसज्जेतामायसैः परिघैरिव ।
प्रकर्षं दोर्भ्यामुत्पाट्य भौमौ मल्लमभिद्रुतौ ॥
विनदन्तमभिक्रोशन् शार्दूल इव वारणम् ।
समुदस्य महाबाहुर्भ्रामयामास वीर्यवान् ॥
ततो मल्लाय मल्लाय विसृजं चक्रिरे परम् ।
भ्रामयित्वा शतगुणं गगनस्थमचेतनम् ।
प्रक्षिपेत्सुमहाबाहुर्मल्लं भुवि वृकोदरः ॥१३॥
तस्मिन् विनिहते मल्ले क्षीयते लोकविश्रुते ।
विराटः परमं हर्षमगच्छद्भान्धवैः सह ॥
स हर्षात् प्रददौ वित्तं बहु राजा मदामनाः ॥"
इति विराटपर्वणि १२ अध्यायः ॥

अस्य टीका यथा ।"दुःखेन स्वप्रकटनरणाच्छास्त्रकुशलत्वेन । विहृतं लोकक्षमक्षम् । शार्दूलश्चिथिलः सिंह इव व्याघ्र इव वा श्लथिलः मांसलः । स्यात् सिंहेऽपि च शार्दूल इति दर्शनात् । कक्षां कक्षम् । सम्पातः संघर्षः ॥ १० ॥ सकटुटैः कटुट करघर्षणः किण कड़ा इति प्रसिद्धः । दातप्रतिघातैः परप्रयुक्तप्रतिघातैः । त्रिभिर्विविधैर्भेदैरिति शेषः ॥ ११ ॥ सन्निपातेत्यादि । एते मल्लानां श्लिष्टाविशेषाः । सन्निपातैः परस्परसंघातैरवधूतैर्वंहसुत्क्षिप्तैर्घातैः प्रमाथैः पातयित्वा पेषणैः । उन्मथनैः व्यत्ययेन भुजाभ्यां मथनैः । क्षेपणैः स्थानात् प्रच्यावनैः । बलाक्षुब्धिकरो सृष्टिः ।
'व्यावाङ्मुखं स्वन्यगतं भ्रामयित्वा तथैव यः ।
क्षिप्तस्य भूमेः स भवेद्राक्षोभूतनिसूदनः ॥
तर्जनभ्रुकुटमधीन प्रसारितकरो हि यः ।
संप्रहारस्तलाख्यस्तु संघर्षो बलमिष्यते ॥'
अहं चक्रतुल्यमाक्षसुदर्शनमित्यर्थः ।
'प्रहृताक्षुतिरुक्षेन प्रहृष्टिः प्रकृतिः स्मृता ।
द्विगुणीकृतबाहुर्यत्सदीर्घार्थं यथाबलम् ॥
प्रहारः सप्रयोक्ता स्यात् पाशोद्भूतः प्रदानकम् ॥'
बाहुभिरायसनिर्घातैःबाणायसोपसदृशध्वनिभिः करजैर्नखैश्चपदृशानि तैः । बलप्राप्तेन बलोत्कर्षेण । सोत्कृष्टनिनदोल्लितः उत्क्रोशन निनदोल्लासयुक्तः । प्रकर्षं बाहुर्बलसाध्यं प्रकृष्टाकर्षं तदेवाकर्षणमीषत्सम्मुखाकर्षणम् । अभ्याकर्षः समन्ततः कर्षणम् । विकर्षं पश्चात् गमनं तदेव विपरीतकर्षणमुच्यते उपसर्गभेदादर्थभेदोऽपीति ॥ १२ ॥ शतगुणं प्रसवारम् ॥ १३ ॥" इत्यर्जुनमिश्रकृतभारतार्थदीपिका ॥

मल्लः

मल्ला, स्त्री, (मल्लते धारयति विलासादिकमिति । मल्ल धारणे + अच् । स्त्रियां टाप् ।) नारी । पत्रवल्ली । मल्लिका । इति शब्दरत्नावली ॥ (लोठनरासपत्नी । यथा, राजतरङ्गिण्याम् । ८ । १६९० ।
"तमेव पुत्रा शोचन्ती शोकशङ्कुसमाहया ।
ततः प्रपेदे प्रलयं मल्ला लोठनवल्लभा ॥")

मल्लारः, पुं. (मल्लं अच्छति प्राप्नोतीति । अच् + अण् ।) रागविशेषः । स तु षण्णां रागाणां मध्ये द्वितीयः । यथा,—
"आदौ मालवरागेन्द्रस्ततो मल्लारसंज्ञितः ।
श्रीरागस्तस्य पश्चाद्वै वसन्तस्तदनन्तरम् ॥
हिन्दोलश्चाथ कर्णाट एते रागाः प्रकीर्तिताः ॥"
अस्य षट्रागिण्यो यथा,—
"वेलावली पूरवी च कानड़ा माधवी तथा ।
कोड़ा केदारिका चैव मल्लारस्य प्रिया इमाः ॥"
अस्य गानसमयः ।
"मेघमल्लाररागस्य गानं वर्षासु सर्व्वदा ॥"
अस्य स्वरूपं यथा,—
"प्रलम्बदन्तं पलितं दधानः
प्रलम्बकर्णः कुसुदेन्दुवर्णः ।
कौपीनवासाः सविचारचारी
मल्लाररागः शुचिशान्तमूर्त्तिः ॥"
इति सङ्गीतदामोदरः ॥
(तथा च सङ्गीतदर्पणे रागाध्याये ।
"भैरवः पञ्चमो नाटो मल्लारो गौड़मालवः ।
देशाख्यश्चेति षड्रागाः प्रोच्यते लोकविश्रुताः ॥"
"मेघमल्लारिका मालकौशिकः षटमञ्जरी ।
आश्वावरीति विज्ञेया रागा मल्लारसंज्ञया ॥"
इति रागार्णवमतम् ॥)

मल्लारी, स्त्री. (मल्लार + ङीप् ।) वसन्तरागस्य रागिणी । यथा,—
"आन्दोलिता च देशाख्या लोला प्रथम-
मञ्जरी ।
मल्लारी चेति रागिण्यो वसन्तस्य वशानुगाः ॥"
इति सङ्गीतदामोदरः ॥
मेघरागस्य रागिणी । इति हेमायुधः ॥
(अस्या उदाहरणादिकं यथा संगीतदर्पणे ।
"मल्लारी सपदीना स्यात् षड्जग्रामाश्रयेवता ।
गौड़वा गौरवीयुक्ता वर्षासु सुखदा सदा ॥"
ध नि रि ग म ध । अस्या ध्यानं यथा,—
"गौरी कृष्णा कोकिलकण्ठनादा
गीतप्रीत्यालम्पतिं स्मरन्ती ।
आदाय वीणां मलिना वदन्ती
मल्लारिका यौवनदूनचित्ता ॥")

मल्लिः, पुं, (मल्लते धारयति विद्यागमिति । मल्ल + "सर्व्वधातुभ्य इन्" उणा० ४ । ११७ । इति इन् ।) चतुर्विंशतितीर्थङ्कराणां मध्ये एकोनविंशतितमः । इति हेमचन्द्रः ॥ । २८ ।

मल्लिः, स्त्री, (मल्ल + इन् ।) मल्लिका । इति शब्दरत्नावली ।

मल्लिकः, पुं, (मल्लाते धार्य्यतेऽसौ । मल्ल + इन् । स्वार्थे कन् ।) मल्लिकापुष्पतरुविशेषः । मल्लिनः किञ्चिन्न्यूनवर्णो राजोपलक्षितेक्षुपर्वणो रूपलक्षितः शुकहंसः । इत्यमरटीकायां भरतः ॥ (यथा, भरतमल्लिकः । तथा च भट्टिकाव्यटीकायां भट्टसाधरस्य-श्लोकः ।
"नत्वा शङ्करमम्बुजगौराङ्गमल्लिकात्मजः
भट्टिटीकां प्रकुरुते भरतो सुखबोधिनीम् ॥")

मल्लिका, स्त्री, (मल्लिरेवेति । मल्लि + स्वार्थे कन् । स्त्रियां टाप् । यद्वा, मल्लिर्इव शुक्लत्वात् । मल्ल + इवार्थे कन् ।) स्वनामख्यातपुष्पवृक्षः । वेलफुल इति भाषा ॥ (यथा, काव्यादर्शे । २ ।
"मल्लिकामुकुले यद्वि ! भाति गुञ्जन्मधुव्रतः ।
प्रयाणे पञ्चबाणस्य शुक्लमापूरयन्निव ॥"
तत्पर्य्यायः । हृष्यगन्धम् २ भूमती ३ शुक्लभीरुः ४ । इत्यमरः । २ । ४ । ६६ ॥ हृष्यगन्धा ५ शुक्लभीरुः ६ । इति भरतः ॥ मधुवती ७ गौरी ८ वनचन्द्रिका ९ प्रिया १० सौम्या ११ नारीष्टा १२ गिरिजा १३ सिता १४ मल्ली १५ मदयन्ती १६ चन्द्रिका १७ मौदिनी १८ । अस्या गुणाः । कटुत्वम् । तिक्तत्वम् । वक्तृव्यत्वम् । सुखपाककुष्ठविस्फोटकण्डूतिविषव्रणनाशित्वञ्च । इति राजनिर्घण्टः ॥ कफनाशित्वम् । इति राजवल्लभः ॥ उष्णत्वम् । लघुत्वम् । हृद्यत्वम् । वातपित्तासृग्दाहव्रणनाशित्वञ्च । इति भावप्रकाशः ॥ ७ ॥
अस्या उत्पत्तिर्यथा,—
"विचरन्तं तदा भूयो मदेशं शुम्भमायुधः ।
धारात् स्त्रिवाग्यतो धन्वी सन्तापयितुमुद्यतः ॥
ततस्तमयतो दृष्ट्वा क्रोधाद् धातहृता परः ।
सारमालोक्ययामास श्रियाधारस्थान्मिकम् ॥
आलोकितस्त्रिनेत्रेण मदनो द्युतिमानपि ।
प्रादहत्तत्र भगवन् ! पादाङ्गुष्ठ कक्षवत् ॥
प्रदह्यमानौ चरणौ दृष्ट्वासौ शुम्भमायुधः ।
उत्सर्ज्ज धनुः श्रेष्ठं त्यक्तसंग्राम पद्यधा ॥
यदासीन्मुखिवर्च्चं तद्रूपनष्टं महाप्रभम् ।
स च कल्पतरुर्जातः सुगन्धाढ्यो गुच्छवान् ॥
गात्रस्थानं शुभाकारं यदासीदप्यभूषितम् ।
सञ्जातं केशवारण्यं बहुलं गोमतो नगे ॥
या च कोटी शुभा ह्यासीदिन्द्रनीलविभूषिता ।
जाता सा पाटला रम्या भृङ्गराजविभूषिता ॥
गात्रोपरि तथा सुप्तौ स्थानं चन्द्रमयिप्रभम् ।
पद्मगुल्माभवज्जाती पुष्पाढ्यकिरणोज्ज्वला ॥
कर्णे सुरा अपः कक्षा स्थानं विद्रुमभूषितम् ।
सप्तावद्भुपुटा मल्ली सञ्जाता विविधा सुने ! ॥"
इति वामनपुराणे ६ अध्यायः ॥
मत्सरविशेषः । रत्नपात्रभेदः । इति मेदिनी । के, १६७ ॥ पानपात्रम् । इति हेमचन्द्रः ॥

मल्लिकाक्षः, पुं, (मल्लिकापुष्पमिव श्वेतमक्षिणी यस्येति । "अक्ष्णोदर्शनात् ।" ५ । ४ । ७५ ।

मसिनं, क्ली, (मस्यते परिमीयते गण्यतेति। मस् + "बहुलमन्यत्रापि।" उणा० २। ४६। इति इनच्।) सपिण्डकम् २। इत्यमरादिकोषः॥

मसिपण्यः, पुं, (मसिः कालौ पण्यमस्य।) लेखकः। इति त्रिकाण्डशेषः॥

मसिप्रसः, स्त्री, (मसिं प्रकर्षेण सूते उद्गिरतीति। प्र + सू + क्विप्।) मस्याधारः। इति हारावली॥ लेखनी। इति केचित्॥

मसिमञ्जिः, स्त्री, (मस्याधारो मञ्जिरिवेति।) मस्याधारः। इति शब्दरत्नावली॥

मसिवर्द्धनं, क्ली, (मसिं वर्द्धयतीति। वृध् + णिच् + ल्युः।) रसगन्धः। इति त्रिकाण्डशेषः॥

मसी, स्त्री, (मसि + ऋदिकारादिति ङीष्।) कालौ। (यथा, नैषधचरिते। ६। ६३।
"त्वदास्य निर्य्यन्मदलीकदुर्यशो-
मसीमयं सल्लिपिरूपभागिव।")
पेषालिकाद्रव्यन्तम्। इति शब्दरत्नावली॥

मसीजलं, क्ली, (मस्या जलम्। राहोः शिर इतिवत् अभेदे षष्ठी।) मसी। कालौ। इति त्रिकाण्डशेषः॥

मसीधानी, स्त्री, (मस्या धानी पात्रम्।) मस्याधारः। इति त्रिकाण्डशेषः॥

मसीना, स्त्री, (मस् + "बहुलमन्यत्रापि।" उणा० २। ४६। इति। इनच्। पृषोदरादित्वाद्दीर्घः। स्त्रियां टाप्।) खनामख्यातग्रन्थम्। यथा, शब्दचन्द्रिकायाम्।
"मसीना चातसी चित्रा चुमोमामालिका
मिता॥"

मसुरः, पुं, (मस्यते परिमीयतेऽसौ। मस् + "मसेश्च।" उणा० १। ४४। इति। उरन्।) मसुरकलायः। इति त्रिकाण्डशेषः॥

मसुरा, स्त्री, (मस्यति परस्परेण परिणमत्यसाविति। मस् + उरन्। स्त्रियां टाप्।) वेश्या। द्वीहिप्रभेदः। इति मेदिनी। रे, २०१॥

मसूरः, पुं स्त्री, (मस्यते परिमीयतेऽसौ। मस् + "मसेरूरन्।" उणा० ५। ३। इति ऊरन्।) द्वीहिभेदः। मसुरी कलाइ इति भाषा॥ (अस्याधिपतिर्मेषराशिः। यथा, बृहज्जातकसंहितायाम्। ४१। २।
"वस्त्राविकक्षुतुपानां
मसूरगोधूमरालकयवानाम्।
स्थलसम्भवौषधीनां
कनकस्य च कीर्त्तितो मेषः॥")
तत्पर्य्यायः। मङ्गल्यकः २। इत्यमरः। २। ६। १७॥ मसूरः ३ द्वीहिकाञ्चनः ४। इति त्रिकाण्डशेषः॥ मसूरा ५ मसुरा ६। इति मेदिनी। रे, २०१॥ रागदालिः ७ मङ्गल्यः ८ पृथुबीजकः ९ शूरः १० कल्याणबीजः ११ गुडबीजः १२ मसूरकः १३। इति राजनिर्घण्टः॥ मङ्गल्या १७ मसूरका १५। इति भावप्रकाशः॥ अस्य गुणाः। मधुरत्वम्। शीतत्वम्। संग्राहित्वम्। कफपित्तनाशित्वम्। वातामयकरत्वम्। मूत्रकृच्छ्रहरत्वम्। सङ्ग्रहणत्वञ्च। इति राजनिर्घण्टः॥ अस्रहरत्वम्। रूक्षत्वम्। ज्वरनाशित्वञ्च। इति भावप्रकाशः॥ तस्य यूषगुणाः। संग्राहित्वम्। स्वादुपाकित्वम्। प्रमेहपित्तश्लेष्मज्वरातीसारनाशित्वञ्च। इति राजनिर्घण्टः॥

मसूरकः, पुं, (मसूर इव प्रतिकृतिरिति। मसूर + कन्। संज्ञायां कन् वा।) उपवर्हविशेषः। गोल वालिश इति भाषा। तत्पर्य्यायः। चतुरः २ चातुरः ३ अङ्केऽः ४ चक्रगण्डुः ५। इति शब्दरत्नावली॥ (क्लीवेऽपि दृश्यते। यथा, बृहत्संहितायाम्। ४३। ४३।
"अष्टाश्रि नीलरक्तं
तृतीयमिन्द्रेण भूषणं दत्तम्।
असितं यमश्चतुर्थं
मसूरकं कान्तिमदयच्छत्॥")

मसूरविदला, स्त्री, (मसूरस्येव विशिष्टं दलमस्याः। स्त्रियां टाप्।) कृष्णत्रिवृत्। इत्यमरः। २। ४। १०६॥ (यथा, राजनिर्घण्टे।
"मसूरविदलाकारतूलाक्लिन्नकलेवरः।
पौषे चार्द्रे चतुस्त्रिंशे नवमेऽब्दे सिते मृतः॥")
श्यामलता। इति रत्नमाला॥

मसूरा, स्त्री, (मस्यति परिणमतीति। मस् + ऊरन्। स्त्रियां टाप्।) वेश्या। मसूरकलायः। इति मेदिनी। रे, २०१॥

मसूरिका, स्त्री, (मसूरेव। मसूरा + कन्। स्त्रियां टाप्। अत इत्वञ्च।) कुष्ठभेदः। इति शब्दमाला॥ * ॥ वसन्तरोगः। तस्योत्पादनक्रिया टीका इति ख्याता। सा तु गोरुतज-नरगाजज-मसूरिकापूयेन भवति। यथा,—
"धेनुस्तन्यमसूरिका नराणाञ्च मसूरिका।
तज्जलं बाहुमूलाच्च ग्रस्ताङ्गेन गृहीतवान्॥
बाहुमूले च ग्रस्ताङ्गे रक्तोत्पत्तिकराणि च।
तज्जलं रक्तमिलितं स्फोटकज्वरसम्भवम्॥"
इति धन्वन्तरिकृतग्रन्थस्य॥
तत्पर्य्यायः। पाषरोगः २ रक्तवटी ३ मसूरी ४। इति शब्दरत्नावली॥ * ॥ अथ मसूरिकाधिकारः। "तत्र मसूरिकाविप्रकृष्टनिदानपूर्व्विकां संप्राप्तिमाह।
'कट्वम्ललवणक्षारविरुद्धाध्यशनाशनैः।
दुष्टनिष्पावशाकाद्यैः प्रदुष्टपवनोदकैः॥
कुद्धयद्वैचणाद्यापि दोषे दोषाः समुद्भवाः।
जनयन्ति शरीरेऽस्मिन् दुष्टरक्तेन सङ्गताः॥
मसूराकृतिसंस्थाना पिडकाः स्युर्मसूरिकाः॥'
क्षारो यवक्षारः। विरुद्धाध्यशनाशनैः कट्वादिविरुद्धान्नानामश्नैः। अथ च अध्यशनाशनं अधिकमश्नं अध्यशनम्। दुष्टनिष्पावशाकाद्यैः दुष्टैर्निष्पावशाकाद्यैः। आद्यशब्दात्कुलत्थादितैः। प्रदुष्टपवनोदकैः सविषकुसुमादिसंसर्गात् कुद्धयद्वैचणाद्यापि दोषे दोषे कुद्धयद्वा राहुग्रनैश्चरादयस्तेषामीक्षणादृष्टैः यस्मिन् दोषे कुद्धयद्दृष्टिः तत्रापि मसूरिकोत्पत्तिरित्यर्थः।
मसूराकृतिसंस्थाना मसूरस्य या आकृतिस्तद्वत्संस्थानमाकृतिर्यासां ताः॥ * ॥ अथ पूर्व्वरूपमाह।
'तासां पूर्व्वं ज्वरः कण्डूर्गात्रभङ्गोऽरतिर्भ्रमः।
त्वचि शोफः सवैवर्ण्यो नेत्ररागस्तथैव च॥'
वातजामाह।
'स्फोटाः कृष्णारुणा रूक्षास्तीव्रवेदनयान्विताः।
कठिनाश्चिरपाकाश्च भवन्त्यनिलसम्भवाः॥
'सन्ध्यस्थिपर्व्वणां भेदः कासः कम्पोऽरतिर्भ्रमः।
शोषस्तास्वोष्ठजिह्वानां तृष्णा चारुचिसंयुता॥'
पैत्तिकामाह।
'रक्ताः पीताः सिताः स्फोटाः सदाहास्तीव्रवेदनाः।
भवन्त्यचिरपाकाश्च पित्तकोपसमुद्भवाः॥
'विड्भेदश्चाङ्गमर्दश्च दाहस्तृष्णारुचिस्तथा।
सुखपाकोऽचिपाकश्च ज्वरस्तीव्रः सुदारुणः॥'
रक्तजामाह।
'रक्तजायां भवन्त्येते विकाराः पित्तलक्षणाः॥'
अथ कफजामाह।
'श्वेताः स्निग्धाः शूयं स्यूलाः कण्डूरा मन्दवेदनाः।
मसूरिकाः कफोद्भूताश्चिरपाकाः प्रकीर्त्तिताः॥
कफप्रसेकः स्तैमित्यं शिरोरुग्गात्रगौरवम्।
हृल्लासः सारुचिर्निद्रा तन्द्रालस्यसमन्विताः॥'
सान्निपातिकीमाह।
'नीलाश्चिपिटविस्तीर्णा मध्ये निम्ना महारुजः।
पूतिस्रावाश्चिरं पाकाः प्रभूताः सर्व्वदोषजाः॥'
सप्तधातुगतामाह।
'मसूरिकास्त्वचं प्राप्तास्तोयबुद्बुदसन्निभाः।
सत्वदोषाः प्रजायन्ते भिन्नास्तोयं स्रवन्ति च॥'
त्वचं प्राप्ताः त्वच्छब्देनात्र रस उच्यते रसाश्रयत्वात्॥ * ॥ रक्तस्थामाह।
'रक्तस्था लोहिताकाराः शीघ्रपाकास्तनुत्वचः।
साध्या नात्यर्थदुष्टासु भिन्ना रक्तं स्रवन्ति च॥'
साध्या रक्तस्था इत्यर्थः। नात्यर्थदुष्टासु अत्यर्थदुष्टशोणिताः पुनर्न साध्याः किन्तु कृच्छ्रसाध्याः॥ * ॥ मांसस्थामाह।
'मांसस्थाः कठिनाः स्निग्धाश्चिरपाकास्तनुत्वचः।
गात्रशूलानिधं कण्डूर्मूर्च्छादाहज्वरान्विताः॥'
मेदस्थामाह।
'मेदोजा मण्डलाकारा मृदवः किञ्चिदुन्नताः।
घोरज्वरपरीताश्च शूलाः स्निग्धाः सवेदनाः।
सम्मोहारतिसन्तापाः कञ्चिदाभ्यो विनिस्सरेत्॥'
अस्थिमज्जागते प्राह।
'क्षुद्रा गात्रसमा रूक्षाश्चिपिटाः किञ्चिदुन्नताः।
मज्जस्था भृशसम्मोहवेदनारतिसंयुताः॥
भ्रमरैरेव विद्वानि कुर्व्वन्त्यस्थीनि सर्व्वतः।
छिन्दन्ति मर्म्मधामानि प्राणानाशु हरन्ति ताः॥'
गात्रसमाः गात्रतुल्यवर्णाः। चिपिटाः चिपिटाकाराः। मज्जास्थस्थानस्थोऽपि यदुक्तं

नदाधारत्वात्। अतएवाग्ने भ्रमरैरेव विद्धानि कुर्वन्त्यन्योन्यं सञ्चेन इति। मर्म्मधामानि मर्म्मस्थानानि। ● ॥ शुक्रगतामाह।

'पक्वाभाः पिड़काः स्निग्धाः श्लक्ष्णाश्चायर्थ-वेदनाः।
स्तम्भितारतिसम्मोहदाहोन्मादसमन्विताः॥
शुक्रजाया मसूर्य्यास्तु लक्षणानि भवन्ति हि।
निर्द्दिष्टं केवलं चिह्नं जीवनन्तु न दृश्यते॥'

पक्वाभाः पक्वाकाराः न तु पक्वाः। श्लक्ष्णाः कोमलाः। निर्द्दिष्टं केवलं चिह्नं नत्वस्याश्चिकित्सा युक्ता यतो जीवनं न दृश्यते। सन्निपातेना दोषैर्हेतुं विना न भवन्ति। दोषमन्तरेण रसादिदुष्टेरभावादित्यत आह।

'दोषमिश्रास्तु सन्नेता ज्ञेया दोषलक्षणैः॥'

चर्म्मजामाह।

कण्डरोधारुचौ तन्द्रा प्रलापारतिसंयुताः।
दुश्चिकित्साः समुद्दिष्टाः पिड़काश्चर्म्मसंश्रिताः॥'

रोमान्तिकामाह।

'रोमकूपोन्नतिसमा रागिण्यः कण्डपित्तजाः।
कासारोचकसंयुक्ता रोमाण्यच्छरपूर्व्विकाः॥'

साध्याः प्राह।

'त्वग्जा रक्तजाश्चैव पित्तजाः श्लैष्मजास्तथा।
श्लैष्मपित्तकृताश्चैव सुखसाध्या मसूरिकाः।
रमा विनापि क्रियया प्रशाम्यन्ति प्रशैरिणाम्॥'

त्वग्जाता रक्तजाताः।● ॥ कष्टसाध्यतमाः प्राह।

'वातजा वातपित्तोत्था वातश्लैष्मकृताश्च याः।
कष्टसाध्यतमास्तासु यत्नादेना उपाचरेत्॥'

असाध्याः प्राह।

'असाध्याः सन्निपातोत्थास्तासां वक्ष्यामि लक्षणम्।
प्रवालसदृशाः काश्चित् काश्चिज्जम्बुफलोपमाः।
लोहजाम्बवसमाः काश्चिदतसीफलसन्निभाः॥
व्याप्ता यहुविधा वर्णा जायन्ते दोषभेदतः॥'

प्रवालसदृशा इत्यादि। व्याप्ता प्रवालजम्बुफललोहगुटिकातसीफलसादृश्यं वर्णेन। अनुक्तवर्णसंग्रहार्थमाह। व्याप्ता बहुविधा वर्णा इति। ● ॥ अपरानसाध्याः प्राह।

'कासो हिक्का प्रमोहश्च ज्वरस्तीव्रः सुदारुणः।
प्रलापारतिमूर्च्छाश्च लक्षणा दाहोन्निर्घृणता।'

दाहस्थाने दौर्ग्रन्थ्य इति च पाठः।

'सुखेन प्रसवेद्यस्तु तथा प्राणेन चक्षुषा।
दृष्ट्वा सूर्य्यं दृष्ट्वा अग्निमत्यर्थदारुणम्।
मसूरिकाभिभूतस्य यस्येतानि भिषग्वरैः।
लक्षणानीह दृश्यन्ते न दद्यात्तस्य भेषजम्॥'

मसूरिकासंरिष्टमाह।

'मसूरिकाभिभूतो यो भक्तं प्राणेन निश्वसेत्।
स भक्तं लभते प्राप्तान् लक्षणानी वायुदूषितः॥'

वायुदूषितः अपतानकादिलक्षणयोगिदूषितः।

मसूरिकाहेतुक औषधिनियमाह।

'मसूरिकासु दोषः स्यात् दूषणे भक्षितस्यके।
तथागस्त्ये वापि दुश्चिकित्सः समुदाहृतः॥'

दुश्चिकित्सः कष्टसाध्यः। दुःशब्दोऽत्र निषेधे तेनासाध्य इत्येके।

'काश्चिदिनापि यत्नेन सिध्यन्त्यासु मसूरिकाः।
दृष्टाः कृच्छ्रतराः काश्चित् काश्चित् सिध्यन्ति वा नवा॥
काश्चिन्नैव तु सिध्यन्ति साध्यमानाः प्रयत्नतः॥'

अथ मसूरिकायाश्चिकित्सा।

'मसूरिकायां कुशोक्ता लेपनादिक्रिया हिता।
पित्तश्लेष्मविसर्पोक्तक्रिया चात्र प्रशस्यते॥
श्वेतचन्दनकल्कोक्तं घिसमोचीभवं द्रवम्।
पिबेन्मसूरिकारम्भे नैव वा केवलं रसम्॥'

घिसमोचिका प्राकाविशेषः। घुरघुर इति लोके।

'द्वे पञ्चमूल्यौ राज्ञा च धान्यकं दुरालभा।
सारिवं धान्यकं मुस्तं जयेदातमसूरिकाम्॥
मञ्जिष्ठा वटपादुम्बराश्वत्थशिरीषोडुम्बरत्वचः।
वातजायां मसूर्य्यां स्यात् प्रलेपः सघृतो हितः॥'

बहुपादटः।

'गुडूची मधुकं द्राक्षा मोरटं दाड़िमैः सह।
पाककाले प्रदातव्यं भेषजं गुड़संयुतम्॥
तेन कुप्यति नो वायुः पाकं यान्ति मसूरिकाः।
मसूरिकासु सञ्जीत प्राणान् सन्तान् मसूरकान्॥

रसं मधुरमेवाद्यात् सैन्धवक्षाण्यमात्रकम्।
पटोलमूलं कथितं मोरटं सुरसं तथा॥'

पटोलमूलं कथितमित्यत्र पटोलं कथितश्चेवेति वा पाठः।

'व्याधावेव मसूर्य्यासु पित्तजायां प्रयोजयेत्।
निम्बपर्पटकः पाठा पटोलश्चन्दनद्वयम्॥
उशीरं कटुका धात्री तथा वासा दुरालभा।
एषां पानं शुभं शीतसुत्तमं शर्करान्वितम्।
मसूर्य्यां पित्तजायास्तु प्रयोक्तव्यं विजानता॥
दाहे ज्वरे विसर्पे च मदे पित्ताधिक्येऽपि च।
मसूर्य्यो रक्तजा नाशं यान्ति शोणितमोक्षणैः॥
वासासुस्तकभूनिम्बत्रिफलेन्द्रयवासकम्।
पटोलारिष्टकं वापि क्वाथयित्वा समाक्षिकम्।
पिबेत्तेन प्रशाम्यन्ति मसूर्य्यः कफसम्भवाः॥'

इन्द्रः इन्द्रयवः। ● ॥

'शिरीषोडुम्बरत्वग्भ्यां खदिरारिष्टजैर्जलैः।
कफोत्थासु मसूरीषु लेपः पित्तोत्थितासु च॥'● ॥

निम्बपर्पटकः पाठा पटोलः कटुरोहिणी।
चन्दनं द्वे उशीरञ्च धात्री वासा दुरालभा॥
एष निम्बादिकः क्वाथः पीतः शर्करयान्वितः।
मसूरीं सर्व्वसां हन्ति ज्वरदीसर्षसंयुताम्॥●॥
उत्थिता प्रविशेद्या च नां पुनर्न्नाशतो नयेत्।
कांचनारत्वचः क्वाथकल्कचूर्णावचूर्णितः॥'

ताम्रं सुवर्णसाधिकम्।

'वातोल्वणं समधुकं कथितं मधुसंयुतम्।
सर्व्वे कण्डे व्रणे जाते गण्डूषार्थं प्रशस्यते॥●॥
व्रणेषु सैकं प्रशंसन्ति गवेधुमधुकान्वितम्।
गवेधुर्गवेदुका। गवदुका इति लोके।
मधुकं त्रिफला मूर्व्वा खदः शीतसुतण्डुलम्।
उशीरलोध्रमञ्जिष्ठा प्रलेपात्क्षोतने हिताः।
नष्टान्यनेन दृग्जाता मसूर्य्यो न भवन्ति च॥
प्रलेपं चक्षुषोर्दद्याद्दुवारस्य यत्कले।
पयसल्कलचूर्णेन क्षौद्रेणोमवधूनयेत्।
भस्मना केचिदिच्छन्ति केचिद्गोमयरेणुना॥
सुखवीपत्रनिर्यासं हरिद्राचूर्णसंयुतम्।
रोमजव्यरसंयुक्तप्रणानां प्रशान्तये पिबेत्॥'

निर्यासं द्रवम्। ● ॥ अथ मसूरिकाभेदस्य शीतलाया अधिकारः। तत्र शीतलाया रूपमाह।

'देवी शीतलयाक्रान्ता मसूर्य्येव हि शीतला।
ज्वर एव तथा भूताधिष्ठितो विषमज्वरः।
सा च सप्तविधा ख्याता तासां भेदान् प्रचक्षते॥
ज्वरपूर्व्वा दृषत्स्फोटैः शीतला दृषती भवेत्।
सप्ताहान्निःसरत्येषा सप्ताहात् पूर्व्वतां व्रजेत्॥
ततस्तृतीये सप्ताहे शुष्यति स्खलति स्वयम्।
तासां मध्ये यदा काचित् पाकं गत्वा स्फुटं स्रवेत्॥

तत्रावधूननं कुर्य्यादनगोमयभस्मना।
निम्बसत्यत्रशाखाभिर्मक्षिकामपसारयेत्॥
जलञ्च शीतलं दद्यात् ज्वरेऽपि न तु वारयेत्।
स्थापयेत्तं स्थले पूते रम्ये वृक्षे शीतले॥
नाशुचिः संस्पृशेत्तन्तु न च तस्यालिकं व्रजेत्।
बहवो भिषजो नात्र भेषजं योजयन्ति हि॥
केचित् प्रयोजयन्त्येव मतस्तेषामथ ब्रुवे॥ ● ॥
ये शीतलेन सलिलेन विधिप्य सम्यक्
चिञ्चाजबीजसहितां रजनीं पिबन्ति।
तेषां भवन्ति न कदाचिदपीह देहे
पीड़ाकरा जगति शीतलिका विकाराः॥
मोचारसेन सहितं सितचन्दनेन
वासारसेन मधुकं मधुकेन वाथ।
आदौ पिबन्ति सुमनाःस्वरसेन मिश्रं
ते नाप्नुवन्ति भुवि शीतलिकाविकारान्॥'

मोचारसेन कदलीस्तम्भजलेन। मधुकेन वाथ अथवा मधुना। आदौ पूर्व्वरूपे ज्वरागमनमात्रे। सुमनाःस्वरसेन जातीपत्ररसेन।

'शीतलासु क्रिया कार्य्या शीतला रचया सह।
वक्ष्यायाम्रिमपत्राणि परिसो भवनान्तरे॥
कदाचिदपि नो कार्य्यसुक्तिकस्य प्रवेशनम्।
स्फोटेष्वधिकदाहेषु रचारेणूत्करो हितः॥
तेन ते शीघ्रमायान्ति प्रपाकं न भवन्ति च।
रचारेणूत्करः शुष्कगोमयभस्मचूर्णतः॥
चन्दनं वासकौ मुस्तं गुडूची द्राक्षया सह।
एषां शीतकषायस्तु शीतलाज्वरनाशनः॥'

शीतकषायो हिमः।

'जपहोमोपहारेण दानस्वस्ययनार्चनैः।
विप्रगोशस्त्रगौरीणां पूजनैस्तां शमं नयेत्॥
स्त्रीणाञ्च शीतलादेव्याः पठेत् शीतलिनोऽन्तिके।
प्राणदः श्रद्धया युक्तस्तेन शाम्यति शीतला॥

स्कन्द उवाच।

भगवन्! देवदेवेश! शीतलायाः स्तवं शुभम्।
वक्तुमर्हस्यशेषेण विस्फोटकभयापहम्॥

ईश्वर उवाच ।
नमामि शीतलां देवीं रासभस्थां दिगम्बरीम् ।
मार्जनीकलशोपेतां शूर्पालङ्कृतमस्तकाम् ॥
वन्देऽहं शीतलां देवीं सर्व्वरोगभयापहाम् ।
यामासाद्य निवर्त्तेत विस्फोटकभयं महत् ॥
शीतले शीतले चेति यो ब्रूयाद्दाहपीड़ितः ।
विस्फोटकभयं घोरं क्षिप्रं तस्य प्रणश्यति ॥
यस्त्वामुदकमध्ये तु ध्यात्वा संपूजयेन्नरः ।
विस्फोटकभयं घोरं कुले तस्य न जायते ॥
शीतले ज्वरदग्धस्य पूतिगन्धयुतस्य च ।
प्रनष्टचक्षुषः पुंसस्त्वामाहुर्जीवनौषधम् ॥
शीतले तनुजान् रोगान् नृणां हरसि दुस्तरान् ।
विस्फोटकविशीर्णानां त्वमेकामृततर्षिणी ॥
गलगण्डग्रहा रोगा ये चान्ये दारुणा नृणाम् ।
त्वदनुध्यानमात्रेण शीतले यान्ति ते क्षयम् ॥
न मन्त्रो नौषधं किञ्चित् पापरोगस्य विद्यते ।
त्वमेका शीतले ! धात्री नान्यां पश्यामि देवताम् ॥
वटशालतनुसदृशीं नाभिदघ्नमध्यसंस्थिताम् ।
यस्त्वां विचिन्तयेद्देवीं तस्य गृत्युर्न जायते ॥
अष्टकं शीतलादेव्या यः पठेन्मानवः सदा ।
विस्फोटकभयं घोरं कुले तस्य न जायते ॥
श्रोतव्यं पठितव्यञ्च नरैर्भक्तिसमन्वितैः ।
उपसर्गविनाशाय परं स्वस्ययनं महत् ॥
शीतलाष्टकमेतद्धि न देयं यस्य कस्यचित् ।
दातव्यं हि सदा तस्मै भक्तिश्रद्धान्वितो हि यः ॥'

इति श्रीस्कन्दपुराणे काशीखण्डे शीतलाष्टक स्तोत्रं समाप्तम् ॥" इति भावप्रकाशे मध्यखण्डे चतुर्थो भागः ॥

मस्करिका, स्त्री, मशहरी । मशारि इति भाषा । यथा—
"दंशांश्च मशकांश्चैव वर्षाकाले निवारयेत् ।
मस्करिकाभिः प्रावृत्य मत्स्यशायिनमच्युतम् ॥"
इति पाद्मे क्रियायोगसारे १२ अध्यायः ॥

मस्करी, स्त्री, (मस्कर + स्त्रियां ङीष् ।) पापरोगः । इति मेदिनी । रे, २०१ ॥ स तु वसन्तरोग इति प्रसिद्धः । त्रिवृत् । रक्तत्रिवृत् । इति राजनिर्घण्टः ॥

मस्कर्य, त्रि, (मन्दयति दीप्यते इति । मस्क दीप्तौ + इगुपधेति कः । पृषोदरादित्वात् साधुः ।) अकर्कशम् । स्निग्धम् । इति मेदिनी । ये, ७० ॥ (यथा, रघुवंशटीकारम्भे मल्लिनाथः ।
"करुणामस्कृशैः कटाक्षपातैः
कुरु मामम्ब ! कृतार्थमार्यधन्याम् ॥")

मस्का, स्त्री, (मस्क + स्त्रियां टाप् ।) उमा । इति मेदिनी । के, ७० । मसीना इति भाषा ॥

मस्ज, ङ गतौ । इति कविकल्पद्रुमः ॥ (भ्वा० आत्म० सक० सेट् ।) दन्त्यमध्य इति दुर्गादासः । क्विप् संयोगादेर्लोपे मक् । मृर्द्धन्यमध्य इत्येके । क्विप् संयोगान्तलोपे मट् । ङ, मस्जते । इति दुर्गादासः ॥

मस्करः, पुं, (मस्कते गच्छत्यनेनेति । मस्क + बाहुलकादरः । यद्वा, मकर + "मस्करमस्करिणौ वेणुपरिव्राजकयोः ।" ६ । १ । १५४ । इति सुट् निपात्यते । इति काशिका ।) वेणुः । इत्यमरः । २ । ४ । १६१ ॥ रत्नवंशः । इति राजनिर्घण्टः ॥

मस्करी, [न्] पुं, (मस्कते इतस्ततो गच्छत्यनेनेति । मस्क + बाहुलकादरः । मस्करो दण्डः सोऽस्यास्तीति । मस्कर + इनिः । यद्वा, मा कर्त्तुं कर्म्म निषेद्धुं शीलमस्य । "मस्करमस्करिणौ वेणुपरिव्राजकयोः ।" ६ । १ । १५४ । इति इनिर्निपात्यते ।) भिक्षुः । इत्यमरः । २ । ७ । ४७ ॥ (यथा, भट्टिकाव्ये । ५ । ६६ ।
"अधीयन्नात्मविद्विद्यां धारयन् मस्करिव्रतम् ।
वदन् वक्तृकुलिस्फोटं भूचेपञ्च विलोकयन् ॥")
चन्द्रः । इति शब्दचन्द्रिका ॥

मस्ज, ञ्यो शुद्धौ स्नाने । इति कविकल्पद्रुमः ॥ (तुदा० पर० अक० अनिट् ।) दन्त्यमध्यः क्विप् संयोगादिलोपे मक् । ञ्यो, मग्नः । शुद्ध, मज्जतौ मज्जन्ती । टु, मज्ज्यौ । अमाङ्क्षीत् । स्नायतेऽनेनेति स्नानमिह जलान्तःप्रवेशः । मज्जति प्रस्तरो जले । इति दुर्गादासः ॥

मस्त, क्ली, (मस्यते परिमीयते । मस् परिमाणे + क्तः ।) मस्तकम् । इति द्विरूपकोषः ॥ (यथा, अमरटीकायां मनुष्यवर्गे । ६५ । रघुनाथचक्रवर्त्तिधृतश्लोकः ॥
"दण्डकमण्डलुमण्डितहस्तः
सुललिततिलकविभूषितमस्तः ॥")

मस्तक, पुं, क्ली, (मस्यते परिमीयते । मस् + "इष्यशिभ्यां तकन् ।" उणा० ३ । १४८ । इत्यत्र । "बाहुलकात् मस्तेरपि तकन् ।" इत्युज्ज्वलदत्तोक्त्या तकन् ।) प्रधानाङ्गम् । माथा इति भाषा ॥ (यथा, मार्कण्डेयपुराणे । १४ । ७८ ।
"बिभर्त्ति क्लेशमवाप्नोति सोऽप्येवं शिरसा शिलाम् ।
क्षुत्क्षामोऽहर्निशं भारपीड़ाश्रथित-मस्तकः ॥")
तत्पर्य्यायः । उत्तमाङ्गम् २ शिरः ३ शीर्षम् ४ मूर्द्धा ५ । इत्यमरः । २ । ६ । ६४ ॥ सुण्डम् ६ शिरम् ७ । इति शब्दरत्नावली ॥ वराङ्गम् ८ । इति जटाधरः ॥ कम् ९ पुण्ड्रम् १० मौलिः ११ कपालम् १२ केशभूः १३ । इति राजनिर्घण्टः ॥ (मस्तम् १४ । इति द्विरूपकोषः ।) तस्य शुभाशुभलक्षणं यथा,—
"छत्राकारैः शिरोभिस्तु नृपा निस्त्रिंशिरा धनी ।
चिपिटैश्च पितुर्मृत्युर्गवाढ्याः परिमण्डलैः ॥
घटनद्धा पापरुचिर्धनाढ्यैः परिवर्च्चितः ॥"
इति गारुड़े ६६ अध्यायः ॥
मस्तके अधोमुखसहस्रदलकमलमस्ति तत् कर्णिकायां परमात्मा तिष्ठति । यथा । स्वाङ्गे उत्तानौ करौ कृत्वा सोऽहमिति जीवात्मानं हृदयस्थं दीपकलिकाकारं मूलाधारस्थकुण्डलिन्या सह सुषुम्नावर्त्मना मूलाधारस्थाधिष्ठानमणिपूरानाहतविशुद्धाज्ञाख्यषट्चक्राणि भित्त्वा शिरोऽवस्थिताधोमुखसहस्रदलकमलकर्णिकान्तर्गतपरमात्मनि संयोज्येत्यादि तन्त्रसारः ॥ तथा च ।
"सुषुम्नावर्त्मना सोऽहमिति मन्त्रेण योजयेत् ।
सहस्रारे शिरःस्थाने परमात्मनि देशिकः ॥"
इति गौतमीयतन्त्रम् ॥

मस्तकस्नेहः, पुं, (मस्तकस्य स्नेहः ।) शिरोमज्जा । यथा,—
"गोदन्तु मस्तकस्नेहो मस्तिष्को मस्तुलुङ्गकः ॥"
इति हेमचन्द्रः । ३ । २८६ ॥

मस्तकाख्यः, पुं, (मस्तकमिति आख्या यस्य ।) वृक्षशिरः । इति शब्दचन्द्रिका ॥

मस्तदारु, क्ली, (मस्त मस्तकमिव दृश्यं दारु ।) देवदारु । इति भावप्रकाशः ॥

मस्तमूलकं, क्ली, (मूलमेव मूलकं स्वार्थे कन् । मस्तस्य मूलकम् ।) शिरोऽधः । इति शब्दचन्द्रिका । घाड़ इति भाषा ॥

मस्तिष्कं, क्ली, (मस्तं मस्तकं स्नेहयति स्वाधारत्वेन प्रीणयतीति । स्निह गतौ + कः । पृषोदरादित्वात् साधुः ।) मस्तकभवघृताकारस्नेहः । मगज इति पारस्यभाषा ॥ तत्पर्य्यायः । गोर्दम् २ । इत्यमरः । ३ । ६ । ६५ ॥ गोदम् ३ मस्तकस्नेहः ४ मस्तुलुङ्गकः ५ । इति हेमचन्द्रः । ३ । २८६ ॥ (यथा, ऋग्वेदे । १० । १६३ । १ ।
"यत्ते शीर्षण्यं मस्तिष्काज्जिह्वाया विवृहामि ते ॥")

मस्तु, क्ली, (मस्नति परिणमतीति । मस् + "सितनिगमिमसिसध्यविधाभ्रुक्षुभ्यस्तुन् ।" उणा० १ । ७० । इति तुन् ।) दधिभवमण्डम् । दधिर मात् इति भाषा ॥ इत्यमरः । २ । ६ । ६४ ॥ दधिगलम् । द्विगुणवारियुतं दधि । अस्य गुणाः ।
"उष्णाम्लं रुचिपित्तदं श्रमहरं वल्यं कषायं सरं
शुक्लिच्छर्द्दिकरं क्षयोदरगदग्लीहार्शसां नाशनम् ।
श्रोतःशुद्धिकरं कफानिलहरं विष्टम्भमूलापहं
पाण्डुश्वासविकारगुल्मशमनं मस्तु प्रशस्तं लघु ॥"
इति राजनिर्घण्टः ॥
अपि च ।
"मस्तु क्लमहरं स्वल्पं क्षतु भक्तोपलाघकृत् ।
श्रोतोविशोधनं स्नादि कफक्षयाविलापहम् ॥
अतृष्यं प्रीणनं शीघ्रं भिनत्ति मलसंग्रहम् ॥"
इति भावप्रकाशः ॥

मस्तुलुङ्गः, पुं, (मस्तु इव लिङ्गं सादृश्यमस्य । पृषोदरादित्वात् इकारस्य उकारः ।) मस्तिष्कम् । इति त्रिकाण्डशेषः ॥ (यथा, सुश्रुते सूत्रस्थाने २३ अध्याये । "भिन्ने वा शिरःकपाले यत्र मस्तुलुङ्गदर्शनं चिरोपसिक्तप्राड्भावः कासश्वासौ वा यस्येति ॥")

मस्तुलुङ्गकः, पुं, (मस्तुलुङ्ग + स्वार्थे कन्।) मस्तिष्कम्। इति हेमचन्द्रः। ३। २८९॥

मह, पूजे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) महति। इति दुर्गादासः॥

मह, इ क त्विषि। इति कविकल्पद्रुमः॥ (चुरा०-पर०-अक०-सेट्।) इ क मंहयति। त्विषि दीप्तौ। इति दुर्गादासः॥

मह, इ ङ वृद्धौ। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-अक०-सेट्।) इ, मंहते। ङ, मंहते। इति दुर्गादासः॥

मह, त क पूजे। इति कविकल्पद्रुमः॥ (अदन्त चुरा०-पर०-सक०-सेट।) महयति। इति दुर्गादासः॥

महः, पुं, (मह्यते पूज्यतेऽस्मिन्निति। मह + "पुंसि संज्ञायां घः प्रायेण।" ३। ३। ११८। इति घः। मह + अप् इत्युज्ज्वलदत्तः।४।१८८।) उत्सवः। इत्यमरः। १। ७। १८८॥ (यथा, माघे। ६। १९।
"न खलु दूरगतोऽप्यतिवर्त्तते
महमसाविति बन्धुतयोदितैः॥"
मह्यते पूज्यते इति।) तेजः। इति मेदिनी। हे ७॥ यज्ञः। इति शब्दरत्नावली॥ (यथा, हरिवंशे। ७१। १८।
"तस्मात् प्रावृषि राजानः सर्व्वे शक्रं मुदा युताः।
महैः सुरेशमर्च्चन्ति वयमन्ये च मानवाः॥")
महिषः। इति हेमचन्द्रः॥ (त्रि, महत्। यथा, ऋग्वेदे। १०। ६१। ८।
"महे क्षयते नान्यं त्वत्॥"
"महे महते।" इति तद्भाष्ये सायनः॥)

महः, [स्] क्ली, (मह्यते पूज्यतेऽस्मिन्निति। मह + "सर्व्वधातुभ्योऽसुन्।" उणा० ४।१८८। इति असुन्।) उत्सवः। (मह्यते पूज्यते इति। मह + असुन्।) तेजः। इति मेदिनी। से,१०॥ (यथा, रघुटीकारम्भे मल्लिनाथः।
"अन्तरायतिमिरोपशान्तये
शान्तपावनमचिन्त्यवैभवम्।
तं नरं वपुषि कुञ्जरं मुखे
मन्महे किमपि तुन्दिलं महः॥"
मह्यन्ते पूज्यन्ते देवादयोऽस्मिन्निति। मह + असुन्।) यज्ञः। इति शब्दरत्नावली॥ (उदकम्। इति निघण्टुः।१।१२॥ पूज्यमाने, त्रि। यथा, वाजसनेयसंहितायाम्। २०। ६।
"जिह्वा मे भद्रं वाङ्महो मनो मन्युः स्वराट्
भामः॥"
"वाक् वागिन्द्रियं महः पूज्यमानास्तु।" इति तद्भाष्ये महीधरः॥ महति। यथा, ऋग्वेदे। ८। २३। १६।
"महो राये तमुत्वा समिधीमहि।" "महो महते राये धनाय।" इति तद्भाष्ये सायनः॥)

महकः, पुं, (महः कान्तिं प्रकाशयतीति। महस् + कै + कः। पृषोदरादित्वात् साधुः।) कच्छपविशेषः। इति जटाधरः॥

महत्, क्ली, (मह + अति। निपातितश्च।) राज्यम्। इति मेदिनी। ते, १४०॥ (यथा, छान्दोग्योपनिषदि। ५। २। ४।
"अथ यदि महज्जिगमिषेदमावास्यायां दीक्षित्वा पौर्णमास्यां रात्रौ इत्यादि॥" ब्रह्म। यथा, महाभारते। ३। ३१२। ४४।
"श्रुतेन श्रोत्रियो भवति तपसा विन्दते महत्॥"
उदकम्। इति निघण्टुः। १। १२॥)

महत्, त्रि, (मह्यते पूज्यतेऽसौ इति। मह + "वर्त्तमाने पृषद्बृहन्महज्जगच्छतृवच्च।" उणा० २। ८४। इति अतिः निपात्यते।) महान्। महती। बृहत्। इति मेदिनी। ते, १४०॥ तत्पर्य्यायः। विशङ्कटम् २ पृथु ३ बृहत् ४ विशालम् ५ पृथुलम् ६ बृहत् ७ उरु ८। विपुलम् ९। इत्यमरः। २। १। ६०॥ पुलम् १० विस्तीर्णम् ११। इति शब्दरत्नावली॥ (यथा, रघौ। १२। ४०।
"तस्मिन् रामशरोत्कृत्ते बले महति रक्षसाम्॥")
तद्वैदिकपर्य्यायः। भ्रः २ ऋष्वः ३ बृहत् ४ उक्षितः ५ तवसः ६ तविषः ७ महिषः ८ अभ्वः ९ ऋभुक्षाः १० उक्षा ११ विहायाः १२ यह्वः १३ ववक्षिथ १४ विवक्षसे १५ अम्भृणः १६ माहिनः १७ गभीरः १८ ककुहः १९ रभसः २० व्राधन् २१ विरप्शी २२ अद्भुतम् २३ वंहिष्ठः २४ बर्हिषत् २५। इति पञ्चविंशतिर्म्महन्नामानि। इति वेदनिघण्टौ ३ अध्यायः॥ * ॥ (प्रकृतेराद्योविकारः। यथा, सांख्यसूत्रम्। १। ६१।
"सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः प्रकृतेर्महान् महतोऽहङ्कारः॥" इति॥) महच्छब्दस्य शब्दादिशब्दविशेषाणां पूर्व्वं प्रयोगनिषेधो यथा,—
"शब्दे तैले तथा मांसे वैद्ये ज्योतिषिके द्विजे।
यात्रायां पथि निद्रायां महच्छब्दो न दीयते॥"
इति भट्टिप्रथमसर्गीयचतुर्थश्लोकटीकायां भरतः॥

महती, स्त्री, (महत् + ङीप्।) वल्लकीभेदः। इति मेदिनी। ते,१४०॥ नारदवीणा। बृहत्प्रमाणा। इत्यमरटीकायां भरतः॥ (यथा, शिशुपालवधे। १। १०।
"स्फुटीभवद्ग्रामविशेषमूर्च्छना-
मवेक्षमाणं महतीं मुहुर्मुहुः॥")
बृहती। वार्त्ताकी। इति राजनिर्घण्टः॥ (कुशद्वीपस्थनदीविशेषः। यथा, मात्स्ये। १२१। ७४।
"महती सप्तमी प्रोक्ता पुनश्चैता धृतिः स्मृता।
अन्यास्ताभ्योऽपि सञ्जाता शतशोऽथ सहस्रशः॥"
पारिपात्रनिर्गतनदीविशेषः। यथा, मात्स्ये। ११३। २३—२४।
"वर्णाशा चन्दना चैव कावेरी महती तथा।
पारा चर्मण्वती पुण्या विदुशा वेणुमत्यपि।
शिप्रा ह्यवन्ती कुन्ती च पारियात्राश्रिताः स्मृताः॥")

महतीद्वादशी, स्त्री, (महतीति ख्याता द्वादशी।) श्रवणद्वादशी। यथा,—
"मासि भाद्रपदे शुक्ले द्वादशी श्रवणान्विता।
महती द्वादशी ज्ञेया उपवासे महाफला॥"
इति गारुडे १४१ अध्यायः॥

महत्तत्त्वं, क्ली, (महच्च तत् तत्त्वञ्चेति।) चतुर्विंशतितत्त्वान्तर्गतद्वितीयतत्त्वम्। तत्तु प्रकृतेरुत्पन्नम्। समष्टिबुद्धिस्वरूपम्। तत्पर्य्यायः। यथा,—
"महानात्मा मतिर्व्विष्णुर्जिष्णुः शम्भुश्च वीर्य्यवान्।
बुद्धिः प्रज्ञोपलब्धिश्च तथा ख्यातिर्धृतिः स्मृतिः।
पर्य्यायवाचकैः शब्दैर्म्महानात्मा विभाव्यते।
तं जानन् ब्राह्मणो विद्वान् प्रमोहं नाधिगच्छति॥"
इति महाभारते आश्वमेधिकपर्व्व॥
अपि च।
"एका मूर्त्तिस्त्रयो भागा ब्रह्मविष्णुमहेश्वराः।
सविकारात् प्रधानात्तु महत्तत्त्वं प्रजायते॥
महानिति यतः ख्यातिर्लोकानां जायते सदा।
अहङ्कारश्च महतो जायते मानवर्द्धनः॥"
इति मात्स्ये ३ अध्यायः॥

महत्तरः, पुं, स्त्री, (अयमनयोरतिशयेन महान्। महत् + तरप्।) शूद्रः। यथा,—
"शूद्रः स्यात् पादजो दासो ग्रामकूटो महत्तरः।"
इति त्रिकाण्डशेषः॥
(यथा, कथासरित्सागरे। ५। ३४।
"केनायं रचितोऽत्रेति सोऽपृच्छच्च महत्तरान्।
ते च न्यवेदयंस्तस्मै कर्त्तारं तिलकस्य माम्॥")
अतिशयमहति, त्रि॥ (यथा, महाभारते। ७। १९९। ५९।
"ददर्श भगवद्देशं सर्व्वदेवैरभिष्टुतम्।
अणीयासमणुभ्यश्च बृहद्भ्यश्च महत्तरम्॥")

महत्त्वं, क्ली, (महत् + त्व।) महतो भावः। यथा, भाषापरिच्छेदे।
"महत्त्वं षड्विधे हेतुरिन्द्रियं करणं मतम्॥"
"महत्त्वं षड्विध इति। द्रव्यप्रत्यक्षे महत्त्वं समवायसम्बन्धेन कारणम्। द्रव्यसमवेतानां गुणकर्म्मसामान्यानां प्रत्यक्षे स्वाश्रयसमवायसम्बन्धेन। द्रव्यसमवेतसमवेतानां रूपत्वादीनां प्रत्यक्षे स्वाश्रयसमवेतसमवायसम्बन्धेन कारणम्।" इति सिद्धान्तमुक्तावली॥ (श्रेष्ठत्वम्। यथा, रामायणे। १। १। १०१।
"जनश्च शूद्रोऽपि महत्त्वमीयात्॥"
"महत्त्वं श्रैष्ठ्यम्।" इति तट्टीका।)

महर्लोकः, पुं, (महश्चासौ लोकश्चेति। कर्म्मधारयः।) भूरादिसप्तलोकान्तर्गतचतुर्थलोकः। यथा,—
"भूर्भुवः स्वर्म्महश्चैव जनश्च तप एव च।
सत्यलोकश्च सप्तैते लोकास्तु परिकीर्त्तिताः॥
चतुर्मुखदिनस्यान्ते जगदेतच्चराचरम्॥

तदा हि दह्यते सर्व्वं त्रैलोक्यं भूर्भुवादिकम्।
जनं प्रयान्ति तापार्त्ता महर्लोकनिवासिन: ॥"
इति वह्निपुराणम् ॥
"चतुर्थे तु महर्लोके तिष्ठन्ते कल्पवासिन: ॥"
इति देवीपुराणम् ॥

महर्षभौ, स्त्री, (महती चासौ ऋषभी चेति कर्म्मधारय:।) कपिकच्छु:। इति राजनिर्घण्ट: ॥

महर्षि:, पुं, (महांश्चासौ ऋषिश्चेति।) शास्त्रादि:। इति त्रिकाण्डशेष: ॥ अस्य व्युत्पत्त्यादिर्यथा,—
"ऋषिर्हिंसागतौ धातुर्ब्रह्मविद्यासत्यतप:श्रुते:।
एष सन्निचयो यस्माद् ब्राह्मणश्च ततस्त्वृषि: ॥
विवृत्तिसमकालन्तु ब्रह्मा व्यक्तिन्दधित्सयम्।
ऋषते परमं यस्मात् परमर्षिस्तत: स्मृत: ॥
गत्यर्थाद्दृषतेर्धातोर्नामनिर्वृतिकारणम्।
यस्मादेष स्वयम्भूतस्तस्माच्च ऋषिता मता ॥
तेनेश्वरा: स्वयम्भूता ब्रह्मणो मानसा: सुता:।
विवर्द्धमानैस्तैर्ब्रह्मा महान् परिगत: पर: ॥
यस्माद्दृषि: परत्वेन महांस्तस्मान्महर्षय:।
ईश्वराणां सुतास्तेषां मानसाश्चौरसाश्च वै ॥
ऋषयस्तत्परत्वेन भूतादिर्ऋषयस्तत:।
ऋषिपुत्रा ऋषीकास्तु मैथुनाद्गर्भसम्भवात् ॥
परत्वेनर्षयस्ते वै भूतादिर्ऋषिकास्तत:।
ऋषीकाणां सुता ये वै विज्ञेया ऋषिपुत्रका: ॥
श्रुत्वा ऋषं परत्वेन नाम तस्मात् श्रुतर्षय:।
अयक्तात्मा महानात्माहङ्कारात्मा तथैव च ॥
भूतात्मा चेन्द्रियात्मा च तेषान्तु ज्ञानमुच्यते।
इत्येवन्दधिजात्यस्तु पञ्च तान् नामभि: शृणु ॥
भृगुर्म्मरीचिरत्रिश्च अङ्गिरा: पुलह: क्रतु:।
मनुर्दक्षो वशिष्ठश्च पुलस्त्यश्चेति ते दश ॥
ब्रह्मणो मानसा ह्येते उत्पन्ना: स्वयमीश्वरा:।
परत्वेनर्षयस्तस्माद्भूतात्तस्मान्महर्षय: ॥"
इति मात्स्ये १२० अध्याय: ॥

महल्लक:, पुं, (महत: क्षीरचादिरूपान् विपुलान् भारानित्यर्थ: लाति गृह्णातीति। ला+ "आतोऽनुपसर्गे क:।" ३। २। ३। इति क:। तत: स्वार्थे कन्। यद्वा, महान्तं चरित्रगुणं लकति आस्वादयतीति। लक् आस्वादने+अच्।) अन्त:पुररक्षक:। तत्पर्य्याय:। सौविदल्ल:२ कञ्चुकी३ स्थापत्य:४ सौविद:५ विदाङ्ग:६। इति जटाधर: ॥ सौविदल्लक: ७ अन्तर्वैंशिक: ८। इति शब्दरत्नावली ॥

महल्लिक:, पुं, (महान्तं चरित्रगुणं लिखतीवेति। महत्+लिख+क:। पृषोदरादित्वात् साधु:।) अन्त:पुररक्षक:। खोजा इति भाषा। तस्य लक्षणं यथा,—
"शुष्कशून्योऽनुपस्थो य: स्त्रीस्वभावो महल्लिक: ॥"
इति शब्दमाला ॥

महस्, क्ली, (मह्यते पूज्यतेऽनेनेति। मह+ "अर्त्तिविचमितमिनमीति।" उणा० ३।११७। इति असच्।) ज्ञानम्। प्रकार:। इत्युणादिकोष: ॥

महा, स्त्री, (मह्यते पूज्यते इति। मह्+घ। स्त्रियां टाप्।) गोपवल्ली। इति शब्दचन्द्रिका। गोरचचाकुलिया इति भाषा ॥ क्षीरबली। इति शब्दरत्नावली ॥

महाकच्छ:, पुं, (महान् विपुल: कच्छो जलप्रायदेशोऽस्य।) समुद्र:। वरुण:। इति मेदिनी। छे, ६ ॥ पर्व्वत:। इति शब्दरत्नावली ॥

महाकण्टकिनी, स्त्री, (महती चासौ कण्टकिनी चेति।) विश्वसारकम्। इति शब्दचन्द्रिका। फणिमनसा इति भाषा ॥

महाकन्द:, पुं, (महांश्चासौ कन्दश्चेति।) रसोनक:। इत्यमर:। २। ४। १४८ ॥ मूलकम्। इति शब्दरत्नावली ॥ चाणक्यमूलकम्। रक्तलशुनम्। राजपलाण्ड:। इति राजनिर्घण्ट: ॥

महाकपित्थ:, पुं, (महांश्चासौ कपित्थश्चेति।) बिल्ववृक्ष:। इति त्रिकाण्डशेष: ॥

महाकरञ्ज:, पुं, (महांश्चासौ करञ्जश्चेति।) करञ्जविशेष:। बड़ करञ्जा इति भाषा ॥ तत्पर्य्याय:। षड्ग्रन्था २ हस्तिचारिणी ३ उत्कीर्य्य: ४ विघ्नो ५ काकघ्नी ६ मदहस्तिनी ७ प्रारङ्गिष्टा ८ मधुमती ९ रसायनी १० हस्तिरोहणक: ११ हस्तिकरञ्जक: १२ सुमना: १३ काकभाण्डी १४ मधुमत्ता १५। अस्य गुणा:। तीक्ष्णत्वम्। उष्णत्वम्। कटुत्वम्। विषकण्डूविचर्च्चिकाकुष्ठवर्गदोषव्रणनाशित्वञ्च। इति राजनिर्घण्ट: ॥

महाकर्णिकार:, पुं, (महांश्चासौ कर्णिकारश्चेति।) आरग्वध:। इति राजनिर्घण्ट: ॥

महाकाय:, पुं, (महान् कायोऽस्य।) नन्दी। स च शिवद्वारपाल:। इति त्रिकाण्डशेष: ॥ (यथा, महाभारते। १३। १५०। २४।
"नन्दीश्वरो महाकायो गणेशो वृषभध्वज: ॥") हस्ती। इति केचित् ॥ (महान् काय: शरीरमिति।) बृहत् शरीरम् ॥ तद्वति, त्रि ॥ (यथा, महाभारते। १। १५६। ३२।
"महाजवं महाकायं महामायमरिन्दमम् ॥"
स्त्रियां टाप्। कुमारानुचरमातृगणविशेष:। यथा, महाभारते। ९। ४६। २४।
"रोहिताक्षी महाकाया हरिपिङ्गा च भूमिप ! ॥")

महाकार्त्तिकी, स्त्री, (महती चासौ कार्त्तिकी चेति।) रौहिणीनक्षत्रयुक्ता कार्त्तिकीपूर्णिमा। यथा,—
"प्राजापत्यं यदा ऋक्षं तत्रैतस्यां नराधिप !।
सा महाकार्त्तिकी प्रोक्ता देवानामपि दुर्लभा ॥"
इति पाद्मे २ खण्डे ३ अध्याय: ॥

महाकाल:, पुं, (महांश्चासौ कालश्चेति।) विष्णुस्वरूपाखण्डदण्डायमानसमय:। यथा। कालो घटवान् महाकालत्वात्। इति सिद्धान्तलक्षणम् ॥ महादेव:। (तन्निरुक्तिर्यथा महानिर्व्वाणतन्त्रे। ४। ३१।
"कलनात् सर्व्वभूतानां महाकाल: प्रकीर्त्तित:।
महाकालस्य कलनात् त्वमाद्या कालिका परा ॥")
प्रमथगणविशेष:। इति मेदिनी। ले, १५६ ॥ (उज्जयिनीस्थशिवलिङ्गविशेष:। यथा, कथासरित्सागरे। ११। ३१—३२।
"अस्तीहोज्जयिनी नाम नगरी भूषणं भुव: ।
हसन्तीव सुधाधौतै: प्रासादैरमरावतीम् ॥
यस्यां वसति विश्वेशो महाकालवपु: स्वयम्।
शिथिलीकृतकैलासनिवासव्यसनो हर: ॥")
तीर्थविशेष:। यथा, महाभारते। ३।८२।४७।
"महाकालं ततो गच्छेत् नियतो नियताशन:।
कोटितीर्थसमुपस्पृश्य हयमेधफलं लभेत् ॥")
लताविशेष:। माकाल इति भाषा ॥ तत्पर्य्याय:। उरुकाल: २ किम्पाक: ३ काकमर्द्दक: ४। इति रत्नमाला ॥ काकमर्द्द: ५ देवदालिका ६ दाला ७ दालिका ८ जलङ्ग: ९ घोषकाकृति: १०। इति राजनिर्घण्ट: ॥ (यथा
"अन्तर्मलिनदेहेन बहिराडम्बरकारिणा।
महाकालफलेनेव क: खलेन न वञ्चित:॥"
इत्युद्भट: ॥)

शिवपुत्रविशेष:। तस्य जन्मवृत्तान्तं यथा,—
श्रीदेवा ऊचु:।
"एष वैश्वानर: श्रीमान् भूरितेजोमयो बली।
महामैथुनबीजन्तु त्वत्तेज: संग्रहीष्यति ॥
इत्युक्ता चिदग्ना: सर्व्वे बीतिहोत्रं पुर:स्थितम्।
तस्मै निदेशयामासु: सम्भवे सर्व्वहेतवे ॥
तत: षड्ङ्गं स्वं रेतो वाह्नि दहनानने।
उत्सस्र्ज्ज महाबाहुर्महामैथुनकारणम् ॥
अग्नावुत्सृज्यमानस्य तेजस: शुभ्रभद्रभृत:।
अशुद्धयमतिस्वल्पं गिरिप्रस्थे पपात ह ॥
तयो: कारणयो: सद्य: संभूतौ शुक्रशात्मजौ।
एको भृङ्गसम: कृष्णो भिन्नाञ्जननिभोऽपर: ॥
भृङ्गी तस्य तदा ब्रह्मा नाम भृङ्गीति चाकरोत्।
महाकृष्णोकरूपस्य महाकालेति लोकभृत् ॥
ततस्तौ पालयामास शुक्र: प्रमथोत्करै:।
अपर्णया चापि तथा क्रमात्तावभिवर्द्धितौ ॥
प्रवृद्धौ तौ महात्मानौ हरोमाप्रतिपालितौ।
क्रमाद्गणेशौ कृत्वा तौ हरौ हरि न्ययोजयत् ॥"
इति कालिकापुराणे ४५ अध्याय: ॥
तस्य वानरमुखकारणं जन्मान्तरञ्च यथा,—
"अथैकदोमया सार्द्धं निगूढ़े रतिमन्दिरे।
नर्म्माकरोन्महादेवो मोदयुक्तो रतिप्रिय: ॥
यदा सा नर्म्मणे याता गौरी सुरहरान्तिकम्।
तदा भृङ्गिमहाकालौ द्वास्थौ द्वारि प्रतिष्ठितौ॥
नर्म्मावसाने सा देवी सुरतश्रमखिन्नधी:।
ग्रन्थिहीनगलद्वस्त्रा वस्त्रमालम्ब्य पाणिना ॥
अस्तव्यस्तकचा गन्धपुष्पैराकुलनीतिशोभना।
विलुप्तकुङ्कुमा दृष्टदशनच्छदबिम्बमा ॥
नि:श्वसन्ती रतिश्रान्तश्वासाया जलजानना।
ईषदापूर्णनयना निचिता स्वेदबिन्दुभि: ॥

तां निःसरन्तीं महसा तथाभूतामनिन्दिताम् ।
अयोग्यां वीक्षितुं चान्यैर्ध्यायन्तं प्रियम् ॥
दृष्ट्वातुमंशजातानां नातिदुष्टात्मनां सतां ।
भङ्गी चापि महाकालः प्राप्तकालश्च कोपनः ॥
दृष्ट्वा तौ मातरं दीनौ तदा भूतावधीक्षकौ ।
शिलाशकलमुत्सृज्य निश्चक्रमतुरुत्तमम् ॥
तौ पश्यन्तौ तदा देवी ददर्श हिमवत्सुता ।
चुकोप च तदापर्णा वाक्यं चैतदुवाच ह ॥
एवंभूतान्तु मां कस्मादसम्भाष्यमपश्यताम् ।
भवन्तौ तनयौ क्षुद्रौ क्षीमर्य्यादाविवर्जितौ ॥
तस्मादिमाममर्य्यादां भवन्तौ निरपत्रपौ ।
अकुर्व्वातां ततो भूयाद्भवतोर्जन्म मानुषे ॥
मानुषीं योनिमासाद्य मातुरीक्षणदीक्षितः ।
भविष्यतो भवन्तौ तु ज्ञानवान्ङ्गसुखौ सुधि ॥
इति तामुमया शप्तौ हरपुत्रौ महामतौ ॥"
"अथोमया समं देवो विचरन् चन्द्रशेखरः ।
आजगाम तदा गच्छन् प्रासादं प्रति तं नृप ! ॥
दृष्ट्वोच्च चरन्तीं तामुमायाः सदृशीं गुणैः ।
सर्व्वलक्षणसम्पूर्णां माधवस्येव माधवीम् ॥
तां दृष्ट्वा न्यगदद्देवीं गौरीं वृषभकेतनः ।
स्मितप्रसन्नवदनः प्रहसन्निव भाविनीम् ॥
ईश्वर उवाच ।
इयं ते मानुषी मूर्त्तिः प्रिये तारावतीति या ।
भङ्गीमहाकालयोस्तु जन्मने विहिता स्वयम् ॥
त्वयी ज्ञानवतीकान्तोऽहं नान्यां गन्तुमिहोत्सहे ।
त्वमिदानीं स्वयं चास्यां मूर्त्तौ प्रविश
भाविनि ! ॥
तत उत्पादयिष्यामि महाकालञ्च भङ्गिनम् ॥
श्रीदेव्युवाच ।
मयैव मानुषी मूर्त्तिरियं वृषभकेतन ! ।
विशामि तेऽत्र वचनादुत्पादय सुतद्वयम् ॥
प्रविवेश ततो देवी स्वयं तारावतीतनौ ।
महादेवोऽपि तस्यान्तु कामार्थं समुपस्थितः ॥
ततः सायंसंध्याविधा देवी तारावती सती ।
कामयानं महादेवं स्वयमेवाभ्यनन्दत ॥
तस्मिन् काले भवद्गर्भः कार्त्तिकी चास्यमाल्य-
धृक् ।
कामायमाने तस्यान्तु सद्यो जातं सुतद्वयम् ।
अभवद्गणपादूंस ! तथा ज्ञानवान्गाननम् ॥"
इति कालिकापुराणे ४६—४६ अध्यायाः ॥
बाणासुरस्य महाकालत्वं यथा,—
व्यास उवाचः ।
"कथितो भवता सर्गः संक्षया अपि भूतिना ।
तस्मादाख्याहि भागं ! कृतकृत्या वयं गुरो ! ॥
भूयश्च श्रोतुमिच्छामो यथेतद्विश्वोत्तम ! ।
कोऽग्नौ भङ्गी महाकालो जातो वेताल भैरवौ ॥
वेतालस्य महाकालं भैरवं भङ्गिनं तथा ।
कथं मे विस्तराद्ब्रूस ! कथमेषां चतुष्टयम् ॥
मार्कण्डेय उवाच ।
भृगौ गते महाकाले मानुषत्वे च भङ्गिनि ।
वेतालभैरवाख्यः स तथाभूते द्विजोत्तमाः ॥
तस्मिन् च वेतालो भैरवे तेन संगते ।
व्यन्धकं तपसा युक्तं भङ्गिनञ्चाकरोद्धरः ॥
व्यन्धकस्तु हरं पूर्व्वं विरुध्यापदमागतः ।
प्रसाद्य समाराध्य पुत्रोभूत्तस्य सोऽसुरः ॥
भङ्गिखेदाद्भङ्गिणं तं संज्ञया चाकरोद्धरः ।
स्नेहेन तु महाकालं वाणं बलिसुतं हरः ॥
विष्णुना च्छिन्नबाहुं तं महाकालमथाकरोत् ।
एवं मुनिवरश्रेष्ठा संजातश्च चतुष्टयम् ॥
वेतालो भैरवो भङ्गी महाकालेत्यनुक्रमात् ॥"
इति कालिकापुराणे ५५ अध्यायः ॥*॥
तस्य ध्यानादि यथा,—
"महाकालं यजेद्देव्या दक्षिणे धूम्रवर्णकम् ।
बिभ्रतं दण्डखट्वाङ्गौ दंष्ट्राभीममुखं शिशुम् ॥
व्याघ्रचर्म्मावृतकटिं तुन्दिलं रक्तवाससम् ।
त्रिनेत्रमूर्द्धकेशञ्च मुण्डमालाविभूषितम् ॥
जटाभारलसच्चन्द्रखण्डमुग्रं ज्वलन्निभम् ॥
तथा च कुमारीकल्पे ।
देव्यास्तु दक्षिणे भागे महाकालं प्रपूजयेत् ।
हुं क्षौं यां रां लां वां क्रौं महाकालभैरव
सर्व्वविघ्नान्नाशय नाशय ह्रौं श्रीं फट् स्वाहा ।
इत्यनेन पाद्यादिभिराराध्य चिरन्तर्पयित्वा मूलेन
देवीं पञ्चोपचारैः पूजयेत् । तथा च काली-
तन्त्रे ।
महाकालं यजेदृयत्नात् पश्चाद्देवीं प्रपूजयेत् ।
कालीकल्पे ।
कवचं क्षौं समुद्धृत्य यां रां लां वाञ्च क्रोन्ततः ।
महाकालभैरवेति सर्व्वविघ्नान्नाशयेति च ॥
नाशयेति पुनः प्रोच्य मायां लक्ष्मीं समुद्धरेत् ।
फट् स्वाहया समायुक्तो मन्त्रः सर्व्वार्थसाधकः ॥"
इति तन्त्रसारः ॥
महाकाली, स्त्री, (महाकाल + पत्न्यर्थे ङीष् ।)
महाकालस्य पत्नी । सा तु पञ्चवक्त्राष्टभुज-
कालीविशेषः । इति तन्त्रम् ॥ (इयमेव पराशक्तेः
तामसी शक्तिः । यथा, देवीभागवते ।१।२।२०।
"तस्यास्तु सात्त्विकी शक्तिः राजसी तामसी
—तथा ।
महालक्ष्मीः सरस्वती महाकालीति ताः
स्त्रियः ॥")
अथ महाकालीमन्त्रः ।
"ॐ फ्रें फ्रें क्रीं क्रीं पशून् गृहाण ह्रूं फट्
स्वाहा । श्मशानभैरवीमन्त्रेण यावत् क्रूर-
कर्म्मणि प्रयोगः कर्त्तव्यः । अथ महाकाली-
मन्त्रप्रयोगः । तत्र न्यासशुद्ध्यादिकं न कर्त्त-
व्यम् । तथा च ।
न्यासशुद्ध्यादिकं किञ्चिन्नात्र कार्य्या विचारणा ।
कृष्णतोयेन संपूर्णे कृष्णकुम्भेन कालिकाम् ॥
पञ्चवक्त्रां महारौद्रीं प्रतिवक्त्रत्रिलोचनाम् ।
शक्तिकृपाणधनुर्बाणखड्गखेटवराभयान् ॥
दधानदशभिर्दोर्भिर्वां विभ्राणां भूरिभूषणाम् ।
ध्यात्वैवं साधकः साध्यं साधयेन्मनसेप्सितम् ॥
माहेशी माहेश्वरी चैव कौमारी वैष्णवी तथा ।
वाराही च तथा चैन्द्री चामुण्डा चण्डिका-
दण्डौ ।
पूर्व्वादीशानपर्य्यन्तं कुम्भस्थाने स्थिता इमाः ॥
तत्र क्रमः । देवीं ध्यात्वा यथाविभवोपचारेण
संपूज्य ब्राह्म्याद्यष्टशक्तीः पूर्व्वादिक्रमेण पूज-
येत् । तथा ।
नामोच्चारणसंरब्धं वह्नौ प्रज्वलितेऽम्बरे ।
जुहुयाद्धेरिणं शुद्धौ देवीमन्त्रं शमंकुशः ॥
समिधः पिचुमर्द्दस्य तथा विभीतकाष्ठिकाः ।
गृहधूमश्मशानास्थिविभीताङ्गारहोमतः ॥
सप्ताहाद्धेरिणं हन्ति कालिकामन्त्रयोगतः ।
उच्चाटनं चापराह्णे सन्ध्यायां मारणं तथा ॥
दक्षिणस्यां दिशि स्थित्वा ग्रामादेर्दक्षिणा-
मुखः ॥"
इति तन्त्रसारः ॥
जिनानां चतुर्विंशतिशासनदेवतान्तर्गतदेवी-
विशेषः । इति हेमचन्द्रः ॥ *॥
महाकाव्यं, क्ली, (महच्च तत्काव्यञ्चेति ।) काव्य-
शास्त्रविशेषः । तत्पर्य्यायः । सर्गबन्धः २ । इति
त्रिकाण्डशेषः ॥ तस्य लक्षणं यथा,—
"सर्गबन्धो महाकाव्यं तत्रैको नायकः सुरः ।
सद्वंशः क्षत्रियो वापि धीरोदात्तगुणान्वितः ॥
एकवंशभवा भूपाः कुलजा बहवोऽपि वा ।
शृङ्गारवीरशान्तानामेकोऽङ्गी रस इष्यते ॥
अङ्गानि सर्व्वेऽपि रसाः सर्व्वे नाटकसन्धयः ।
इतिहासोद्भवं वृत्तमन्यद्वा सज्जनाश्रयम् ॥
चत्वारस्तत्र वर्गाः स्युस्तेष्वेकञ्च फलं भवेत् ।
आदौ नमस्क्रियाशीर्वा वस्तुनिर्द्देश एव वा ॥
क्वचिन्निन्दा खलादीनां सताञ्च गुणकीर्त्तनम् ।
एकवृत्तमयैः पद्यैरवसानेऽन्यवृत्तकैः ॥
नातिह्रस्वा नातिदीर्घाः सर्गा अष्टाधिका इह ।
नानावृत्तमयः क्वापि सर्गः कश्चन दृश्यते ॥
सर्गान्ते भाविसर्गस्य कथायाः सूचनं भवेत् ।
सन्ध्यासूर्य्येन्दुरजनीप्रदोषध्वान्तवासराः ॥
प्रातर्मध्याह्नमृगयाशैलर्त्तुवनसागराः ।
सम्भोगविप्रलम्भौ च मुनिस्वर्गपुराध्वराः ॥
रणप्रयाणोपयममन्त्रपुत्रोदयादयः ।
वर्णनीया यथायोगं साङ्गोपाङ्गा अमी इह ॥
कवेर्वृत्तस्य वा नाम्ना नायकस्येतरस्य वा ।
नामास्य सर्गाधादेयकथया सर्गनाम तु ॥"
इति साहित्यदर्पणे ६ परिच्छेदः ॥ *॥
महाकाव्यग्रन्था यथा, कालिदासकृतकुमार-
सम्भवरघुवंशप्रभृतयः । भर्त्तृहरिकृतभट्टि-
काव्यम् । भारविकृतकिरातार्জ্জুनीयम् । श्रीहर्ष-
कृतनैषधीयचरितम् । माघकृतशिशुपालवध-
श्चेत्यादयः ॥
महाकुमुदा, स्त्री, (महती चासौ कुमुदा चेति ।)
काश्मरी । इति राजनिर्घण्टः ॥
महाकुम्भी, स्त्री, (महती चासौ कुम्भी चेति ।)
कट्फलः । इति राजनिर्घण्टः ॥
महाकुलः, त्रि, (महत् कुलं वंशोऽस्य ।) उत्तम-
कुलजातः । तत्पर्य्यायः । कुलीनः २ आर्य्यः ३
सभ्यः ४ सज्जनः ५ साधुः ६ । इत्यमरः । २ ।
७ । ३ ॥ कुल्यः ७ अभिजातः ८ कौलेयकः ९

महाग

ज्ञात्यः १०। इति हेमचन्द्रः। ३। १६६॥ महाकुलः ११ कौलेयः १२ कोलेयकः १३। इत्यमरटीका॥ कुलजः १४ साधुजः १५ कुलश्रेष्ठः १६। इति शब्दरत्नावली॥ (यथा, बृहत्संहितायाम्। १७। ४।

"भेदे वृष्टिविनाशो भेदः सुहृदां महाकुलानाञ्च॥"

क्ली, उत्तमं कुलम्। यथा, राजतरङ्गिण्याम्। ३। ६१।

"दृग्गोरालोकितं चित्रं जन्मैकस्मिन् महाकुले॥")

महाकुलीनः, त्रि, (महाकुलस्य अपत्यम्। महाकुल+"महाकुलादञ्खञौ।" ४। १। १४१। इति पक्षे खः।) महाकुलः। यथा,—

"महाकुलीन ऐक्ष्वाके वंशे दाशरथिर्मम।
पितुः प्रियङ्करो भर्त्ता हैमकारस्तपस्विनाम्॥"

इति भट्टिः। ५। ७७ श्लोकः॥

(स्त्रियां टाप्। यथा, रामायणे। २। २८। ३।

"सीते! महाकुलीनासि धर्म्मे च निरता सदा॥")

महाकुष्ठं, क्ली, (महच्च तत् कुष्ठञ्चेति।) बृहत्कुष्ठरोगः। तच्च सप्तविधं यथा,—

"पूर्ब्बत्रिकं तथा सिध्मं ततः काकणकं तथा।
पुण्डरीकर्ष्यजिह्वे तु महाकुष्ठानि सप्त च॥
पूर्ब्बत्रिकं कपालौदुम्बरमण्डलाख्यम्। सिध्मशब्दोऽकारान्तो नपुंसकलिङ्गः। तच्च कथं सिध्मस्य महाकुष्ठेषु गणना सुश्रुतेन क्षुद्रकुष्ठेषूक्तत्वात्। उच्यते। त्वङ्मात्रगता सिध्मपुष्पिका सुश्रुतेन च क्षुद्रकुष्ठेषूक्ता धातुषु प्रविष्टस्तु सिध्मं महाकुष्ठमेव। एवंविधस्य सिध्मस्य चरकेण महाकुष्ठेषु दर्शितत्वात्। एषां महाकुष्ठत्वञ्च श्रीघ्रमुत्तरोत्तरधात्ववगाहनात् उत्तरदोषजन्यत्वात् चिकित्सावाहुल्याच्च।" इति भावप्रकाशः॥ (एषां चिकित्सा क्षुद्रकुष्ठशब्दे द्रष्टव्या॥)

महाकूपः, पुं, (महांश्चासौ कूपश्चेति।) बृहत्कूपः। तत्पर्य्यायः। अरघट्टः २। इति जटाधरः॥

महाकूलः, पुं, (महत् कूलमस्य।) महाकुलः। बृहत्कुलः। इति द्विरूपकोषः।

महाकोशफला, स्त्री, (महान् कोशः फले यस्याः।) देवदाली लता। इति राजनिर्घण्टः॥

महाकोशातकी, स्त्री, (महती चासौ कोशातकी चेति।) हस्तिघोषा। इति राजनिर्घण्टः॥ (अस्याः पर्य्यायो यथा,—

"महाकोशातकी प्रोक्ता हस्तिघोषा महाफला।
धामार्गवो घोषकश्च हस्तिपर्णश्च स स्मृतः॥"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥)

महागदः, पुं, (महांश्चासौ गदश्चेति।) ज्वरः। इति राजनिर्घण्टः॥ (महारोगः। यथा, सुश्रुते। १। ३३ अध्याये।

"वातव्याधिः प्रमेहश्च कुष्ठमश्मा भगन्दरः।
अश्मरी मूढ़गर्भश्च तथैवोदरमष्टमम्।
अष्टावेते प्रकृत्यैव दुश्चिकित्सा महागदाः॥"

औषधविशेषः। यथा, सुश्रुते कल्पस्थाने ५ अध्याये।

"सर्पोऽगदो हन्ति विषं प्रयुक्तः
पानाञ्जनाभ्यञ्जननस्ययोगैः।
अवार्य्यवीर्य्यो विषवेगहन्ता
महागदो नाम महाप्रभावः॥"

महती गदास्येतिविग्रहे महागदाविशिष्टे, त्रि। यथा, श्रीमद्भागवते। ३। १८। ६।

"परानुषक्तं तपनीयोपकल्पं
महागदं काञ्चनचित्रदंशम्।
मर्म्माण्यभीक्ष्णं प्रतुदन्तं दुरुक्तैः
प्रचण्डमन्युः प्रहसंस्तं बभाषे॥")

महागन्धं, क्ली, (महान् गन्धोऽस्य।) हरिचन्दनम्। वोलम्। इति राजनिर्घण्टः॥ (महागन्धयुक्ते, त्रि। यथा, हरिवंशे। १४३। ४४।

"तच्च कण्ठे समासज्य महागन्धं नराधिप!।
आययावन्धको यत्र दुरात्मा बलदर्पितः॥")

महागन्धः, पुं, (महान् गन्धोऽस्य।) कुटजवृक्षः। इति राजनिर्घण्टः॥ जलवेतसः। इति शब्दचन्द्रिका॥

महागन्धा, स्त्री, (महान् गन्धो यस्याः। स्त्रियां टाप्।) नागबला। केविकापुष्पम्। इति राजनिर्घण्टः॥ चासुरुडा। यथा, हेमचन्द्रः। २। १२०।

"चासुरुडा चर्व्विका चर्म्मसुडा मार्ज्जारकर्णिका।
कर्णमोटी महागन्धा भैरवी च कपालिनी॥"

महागवः, पुं, (महांश्चासौ गौश्चेति। "गोरतद्धितलुकि।" ५। ४। ९२। इति समासान्तश्च। गोसदृशत्वादस्य तथात्वम्।) गवयः। यथा,—

"वनगौर्गवयः प्रोक्तो बलभद्रो महागवः॥"

इति राजनिर्घण्टः॥

महागिरिः, पुं, (महान् गिरिस्तदाख्योपाधिर्यस्य। यद्वा, महान् गिरिरिव।) बौद्धभेदः। यथा—

"महागिरिः सुहस्त्याद्या वज्रान्ता दशपूर्ब्विणः॥"

इति हेमचन्द्रः। १। ३४॥

महान् गिरिः पर्व्वतः।) बृहत्पर्व्वतश्च॥ (यथा, महाभारते। ३। ११०। १५।

"नानशनतपसा शक्यो द्रष्टुमेष महागिरिः।
आरोढुं वापि कौन्तेय! तस्मान्नियतवाग्भव॥"

दानवविशेषः। यथा, हरिवंशे। ३। ८६।

"सूक्ष्मश्चैव निचन्द्रश्च ऊर्णनाभो महागिरिः॥")

महागुरुः, पुं, (महांश्चासौ गुरुश्चेति।) अतिगुरुः। स च पुरुषस्य पिता माता आचार्य्यश्च। स्त्रियाः पतिः। अदत्तकन्यायाः पिता माता च। यथा। त्रयः पुरुषस्यातिगुरवो भवन्ति माता पिताचार्य्यश्चेति। इति विष्णुसूत्रम्॥ पत्युर्महागुरुत्वमाह रामायणे।

"नातो विशिष्टं पश्यामि बान्धवं वै कुलस्त्रियाः।
पतिर्हि सुगतिर्भर्त्ता दैवतं गुरुरेव च॥"

महागु

अयञ्च मूढ़गर्भश्च तथैवोदरमष्टमम्।
अष्टावेते प्रकृत्यैव दुश्चिकित्सा महागदाः॥"

औषधविशेषः। यथा, सुश्रुते कल्पस्थाने ५ अध्याये।

"सर्पोऽगदो हन्ति विषं प्रयुक्तः
पानाञ्जनाभ्यञ्जननस्ययोगैः।
अवार्य्यवीर्य्यो विषवेगहन्ता
महागदो नाम महाप्रभावः॥"

महती गदास्येतिविग्रहे महागदाविशिष्टे, त्रि। यथा, श्रीमद्भागवते। ३। १८। ६।

"परानुषक्तं तपनीयोपकल्पं
महागदं काञ्चनचित्रदंशम्।
मर्म्माण्यभीक्ष्णं प्रतुदन्तं दुरुक्तैः
प्रचण्डमन्युः प्रहसंस्तं बभाषे॥")

महागन्धं, क्ली, (महान् गन्धोऽस्य।) हरिचन्दनम्। वोलम्। इति राजनिर्घण्टः॥ (महागन्धयुक्ते, त्रि। यथा, हरिवंशे। १४३। ४४।

"तच्च कण्ठे समासज्य महागन्धं नराधिप!।
आययावन्धको यत्र दुरात्मा बलदर्पितः॥")

महागन्धः, पुं, (महान् गन्धोऽस्य।) कुटजवृक्षः। इति राजनिर्घण्टः॥ जलवेतसः। इति शब्दचन्द्रिका॥

महागन्धा, स्त्री, (महान् गन्धो यस्याः। स्त्रियां टाप्।) नागबला। केविकापुष्पम्। इति राजनिर्घण्टः॥ चासुरुडा। यथा, हेमचन्द्रः। २। १२०।

"चासुरुडा चर्व्विका चर्म्मसुडा मार्ज्जारकर्णिका।
कर्णमोटी महागन्धा भैरवी च कपालिनी॥"

महागवः, पुं, (महांश्चासौ गौश्चेति। "गोरतद्धितलुकि।" ५। ४। ९२। इति समासान्तश्च। गोसदृशत्वादस्य तथात्वम्।) गवयः। यथा,—

"वनगौर्गवयः प्रोक्तो बलभद्रो महागवः॥"

इति राजनिर्घण्टः॥

महागिरिः, पुं, (महान् गिरिस्तदाख्योपाधिर्यस्य। यद्वा, महान् गिरिरिव।) बौद्धभेदः। यथा—

"महागिरिः सुहस्त्याद्या वज्रान्ता दशपूर्ब्विणः॥"

इति हेमचन्द्रः। १। ३४॥

महान् गिरिः पर्व्वतः।) बृहत्पर्व्वतश्च॥ (यथा, महाभारते। ३। ११०। १५।

"नानशनतपसा शक्यो द्रष्टुमेष महागिरिः।
आरोढुं वापि कौन्तेय! तस्मान्नियतवाग्भव॥"

दानवविशेषः। यथा, हरिवंशे। ३। ८६।

"सूक्ष्मश्चैव निचन्द्रश्च ऊर्णनाभो महागिरिः॥")

महागुरुः, पुं, (महांश्चासौ गुरुश्चेति।) अतिगुरुः। स च पुरुषस्य पिता माता आचार्य्यश्च। स्त्रियाः पतिः। अदत्तकन्यायाः पिता माता च। यथा। त्रयः पुरुषस्यातिगुरवो भवन्ति माता पिताचार्य्यश्चेति। इति विष्णुसूत्रम्॥ पत्युर्महागुरुत्वमाह रामायणे।

"नातो विशिष्टं पश्यामि बान्धवं वै कुलस्त्रियाः।
पतिर्हि सुगतिर्भर्त्ता दैवतं गुरुरेव च॥"

महागो

भ्रातातपः।

"गुरुरग्निर्द्विजातीनां वर्णानां ब्राह्मणो गुरुः।
पतिरेको गुरुः स्त्रीणां सर्व्वाभ्यागतो गुरुः॥"

एकपदेन दत्तस्त्रीणां पितृमातृव्याहृत्तिः॥ * ॥

सपिण्डमरणं प्रकृत्य आश्वलायनः। चिराचमनारलवणान्नाग्निनः स्नुर्हृदशुराचं महागुरुषु। आचार्य्यश्च उपनीय ददद्वेदमाचार्य्यः स उदाहृतः। इति याज्ञवल्क्योक्तेः। तन्मरणे चिराचाशौचित्वेन नैताहृनियमः॥ आश्वलायनः। नैतस्यां रात्रावन्नं पचेयुः। अन्नं न पचेयुरित्यनेनोपवासः सूचितः। अघसस्तरे चाहमनश्नन्त आसीरन् इति वक्ष्यमाणवचनात्। अघसस्तरः कटादिः। अचारलवणं चारन्तित्तिकादिकृतलवणभिन्नं तच्च सैन्धवं सामरि च। इति शुद्धितत्त्वम्॥ * ॥

महागुरुमरणे संवत्सरपर्य्यन्तं निषिद्धकर्म्माणि यथा, कर्म्मलोचने।

"महागुरुनिपाते च कार्य्यं किञ्चिन्न चाचरेत्।
आर्त्विज्यं ब्रह्मचर्य्यञ्च यावत् पूर्णो न वत्सरः॥
अन्यश्राद्धं परान्नञ्च गन्धं माल्यञ्च मैथुनम्।
वर्ज्जयेद्गुरुपाते च यावत् पूर्णो न वत्सरः॥
तीर्थयात्रां विवाहञ्चाध्यापनं तर्पणन्तथा।
संवत्सरं न कुर्व्वीत महागुरुनिपातने॥"

अपि च।

"विशेषतः शिवापूजां प्रकृतपितृको द्विजः।
यावदब्दपर्य्यन्तं मनसापि न चाचरेत्॥
महागुरुनिपाते तु कार्य्यं किञ्चिन्न चाचरेत्।
आर्त्विज्यं ब्रह्मचर्य्यञ्च श्राद्धं देवयुतञ्च यत्॥"

इति कालिकापुराणे ५४ अध्यायः॥

महागुल्मा, स्त्री, (महान् गुल्मो यस्याः।) सोमवल्ली। इति राजनिर्घण्टः॥

महागुहा, स्त्री, (महती गुहा यस्याः।) स्त्रीपर्णी। इति राजनिर्घण्टः॥

महागोधूमः, पुं, (महांश्चासौ गोधूमश्चेति।) बृहद्गोधूमः। बड़ गम इति भाषा॥ यथा,—

"गोधूमः सुमनोऽपि स्यात्त्रिविधः स च कीर्त्तितः।
महागोधूम इत्याख्यः पञ्चाङ्गैश्च स चागतः॥
मधूली तु ततः किञ्चिदल्पा सा मध्यदेशजा।
निःशूको दीर्घगोधूमः क्वचिन्नन्दीमुखाभिधः॥
गोधूमो मधुरः शीतो वातपित्तहरो गुरुः।
कफसृक्प्रदो वल्यः स्निग्धः सन्धानकृत्सरः॥
जीवनो बृंहणो वर्ण्यो व्रण्यो रुच्यः स्थिरत्वकृत्॥"

कफप्रदो नवीनो नतु पुराणः। पुराद्यवगोधूमशौव्रजाङ्गलशूलसुगिति वाग्भटेन वसन्ते गृहीतत्वात्।

"मधुली शीतला स्निग्धा पित्तघ्नी मधुरा लघुः।
शुक्ला बृंहणी पथ्या तद्वन्नन्दीमुखाः स्मृताः॥"

इति भावप्रकाशः॥

महाग्रीवः, पुं, (महती दीर्घा ग्रीवा कन्धरा यस्य।) उष्ट्रः। इति राजनिर्घण्टः॥ (शिवः। यथा, महाभारते। १३। १७। ८६।
"महानासो महाकम्बुर्महाग्रीवः क्षमाननः॥"
शिवानुचरभूतविशेषः। यथा, हरिवंशे भविष्यपर्व्वणि। १४। ३।
"कृष्णोदरो महाग्रीवः मूलजिह्वो द्विजानुकः।
पार्श्वकर्णः सिंहमुख उद्धतांसो महाहनुः॥"
दैत्यविशेषः। यथा, मार्कण्डेये। ५८। १७।
"शाग्रग्रीवा महाग्रीवा स्कंधरा क्षत्रधारिणः॥")
दृढग्रीवायुक्ते, त्रि॥

महाघासः, पुं, महतो दैत्यस्य महत्या भूमेर्वा घासः। इति सुग्धबोधव्याकरणटीकायां दुर्गादासः॥

महाघृणा, स्त्री, (महती घृणा शरीरभ्रमणं यस्याः।) सुरा। इति शब्दचन्द्रिका॥ (महतीचासौ घृणा चेति।) अतिशयभ्रमिश्च॥

महाघोरः, त्रि, (महांश्चासौ घोरश्चेति।) अतिशयभयानकः। यथा, शुद्धितत्त्वे।
"यमद्वारे महाघोरे तप्ता वैतरणी नदी।
तार्क्ष्य तर्तुं ददाम्येनां क्षमां वैतरणीञ्च गाम्॥"
महाघोषं, क्ली, (महान् घोषः कोलाहलो यस्मिन्।) दृढम्। इति मेदिनी। षे, ५६॥
दृढशब्दयुक्ते, त्रि॥ यथा, महाभारते। १। २२१। ११।
"तेषां श्रुत्वा सभापालो भेरीं सान्नाहिकीं तथा।
समाजघ्ने महाघोषां नादयूनदपरिष्कृताम्॥")

महाघोषः, पुं. (महांश्चासौ घोषश्चेति।) अतिघोषशब्दः। इति मेदिनी। षे, ५६॥

महाघोषा, स्त्री, (महान् घोषो यस्याः। टाप्।) कर्कटशृङ्गी। इति मेदिनी। षे, ५६॥ कुरुरकी। इति शब्दचन्द्रिका॥

महाङ्गः, पुं, (महान्ति दीर्घाणि अङ्गान्यस्य।) उष्ट्रः। इत्यमरः। २। ९। ७५॥ गोक्षुरकः। रक्तचित्रकः। इति राजनिर्घण्टः॥ दृढदेवयुक्ते, त्रि॥ (यथा, महाभारते। १३।१७।८३।
"अस्तिदः स्वस्तिभावश्च भागी भागकरो लघुः।
उत्तारश्च महाङ्गश्च महागर्भपरायणः॥")

महाचक्षुः, स्त्री, (महती चक्षुरङ्गमस्याः।) शाकविशेषः। तत्पर्य्यायः। दृढचक्षुः २ विशारिः ३ सुचक्षुका ४ शुक्लचक्षुः ५ दीर्घपत्री ६ दिव्यगन्धा ७। अस्य गुणाः। कटुत्वम्। उष्णत्वम्। कषायत्वम्। मलशोधनत्वम्। शुक्लशूलोदरार्शोऽतिविषनाशित्वम्। रसायनत्वञ्च। इति राजनिर्घण्टः॥ पुं, दृढचक्षुयुक्तपक्षी च॥

महाचण्डः, पुं, (महांश्चासौ चण्डश्चेति।) यमभटः। इति हेमचन्द्रविकाण्डशेषौ॥ प्रचण्डे, त्रि॥

महाचन्दनः, पुं, (महान् चन्दनः पक्षस्य।) देवचन्दनवृक्षः। इति रत्नमाला। दृढत्वगस्य॥

महाच्छायः, पुं, (महती छायास्य।) वटवृक्षः। इति राजनिर्घण्टः॥ दृढच्छायायुक्ते, त्रि॥

महाच्छिद्रा, स्त्री, (महच्छिद्रमस्याः।) महामेदा। इति राजनिर्घण्टः॥ दृढच्छिद्रयुक्ते, त्रि॥

महाजः, पुं, (महांश्चासौ अजश्चेति।) दृढच्छागः। (महतो जायत इति। महत्+जन्+कर्त्तरि डः। पृषोदरादित्वात् साधुः।) महाकुलोद्भवे, त्रि॥

महाजटा, स्त्री, (महती जटास्याः।) रुद्रजटा। इति राजनिर्घण्टः॥ (महती जटा।) दृढजटा च॥

महाज्ञानः, पुं, (महांश्चासौ ज्ञानश्चेति।) साधुः। यथा, महाभारते। ३। ३१२। ११२।
"वेदा विभिन्नाः स्मृतयो विभिन्ना
नासौ मुनिर्यस्य मतं न भिन्नम्।
धर्म्मस्य तत्त्वं निहितं गुहायां
महाजनो येन गतः स पन्थाः॥"
मन्वादिः। यथा,—
"प्रायेण वेद तदिदं न महाजनोऽयं
देवो विमोहितमतिर्बत मायया नः।
त्वय्यां जडीकृतमतिर्मधुपुष्पितायां
वैतानिके महति कर्म्मणि युज्यमानः॥"
इति श्रीभागवते षष्ठस्कन्धे अजामिलोपाख्याने यमवाक्यशब्दे श्रीधरस्वामी॥ (धनी। यथा, मृच्छकटिके। १।
"सङ्गं नैव हि कश्चिदस्य कुरुते सम्भाष्यते नादरात्
संप्राप्तो गृहमुत्सवेषु धनिना सावज्ञमालोक्यते।
दूरादेवमहाजनस्य विहरत्यल्पच्छदो लज्जया
मन्ये निर्धनता प्रकाममपरं षष्ठं महापातकम्॥")

महाजवः, पुं. (महान् जवो वेगो यस्य।) गवयः। श्रीकारी मृगः। इति राजनिर्घण्टः। अतिवेगयुक्ते, त्रि॥ (यथा, श्रीमद्भागवते। ७।८।२८।
"क्षुत्वाकृष्टासं खरमुत्स्वनोल्बणं
निर्मीलिताक्षं जघृहे महाजवः॥"
स्त्री, कुमारानुचरमातृविशेषः। यथा, महाभारते। ९। ४६। २२।
"अग्नीलोकसुखी क्षमा खरजङ्घा महाजवा॥")

महाजम्बुः, स्त्री, (महती चासौ जम्बुश्चेति।) दृढजम्बुवृक्षः। यथा,—
"महाजम्बुर्महापत्रा राजजम्बुर्दृढफला॥"
इति रत्नमाला॥

महाजम्बूः, स्त्री, (महती चासौ जम्बूश्चेति।) दृढजम्बुः। तत्पर्य्यायः। राजजम्बुः २ स्वर्णमाता ३ महाफला ४ पिकप्रिया ५ कोकिलेष्टा ६ महानीला ७ दृढफला ८। अस्य गुणाः। उष्णत्वम्। मधुररसत्वम्। कषायत्वम्। भ्रमहरत्वम्। भ्रान्तित्वास्रहरिमनाशित्वम्। स्वरकरत्वम्। विष्टम्भित्वम्। शोषशमनत्वम्। भ्रमातीसारार्शिवर्द्धकत्वम्। श्वसितकफकासप्रशमनत्वञ्च। इति राजनिर्घण्टः॥ अपि च।
"फलेन्द्रः कथितो नन्दो राजजम्बुर्महाफला।
तथा सुरभिपत्रा च महाजम्बूरपि स्मृता॥
राजजम्बूफलं स्वादु विष्टम्भि गुरु रोचनम्।"
इति भावप्रकाशः॥

महाजातिः, स्त्री, (महती जातिरस्या इति। यद्वा, महती जातिरिव तदाकृतित्वात्।) वासन्ती लता। इति राजनिर्घण्टः॥ (महती जातिरिति।) श्रेष्ठवर्णश्च॥

महाजानीयः, त्रि, (महत्+"प्रकारवचने जातीयर्।" ५। ३। ६९। इति जातीयर्। ततः। "त्यादे महतः समानाधिकरणजातीययोः।" ६।३।७६। इति महतः आकारादेशः।) महतः प्रकारः। इति व्याकरणम्॥

महाजालः, स्त्री, (जालयति आच्छादयतीति। जाल आच्छादने+घञ्। स्त्रियां ङीष्। ततः। महती चासौ जालश्चेति। यद्वा, महांश्चासौ जालश्चेति स अस्या अस्ति अर्शआद्यच् ततः ङीष्। इत्यमरटीकायां रभसः।) पीतवर्णघोषा। इत्यमरः। २। ४। १७०॥ राजकोशातकी। इति राजनिर्घण्टः॥ दृढजालवाहके, त्रि॥

महाज्येष्ठी, स्त्री, (महती चासौ ज्येष्ठी चेति।) नक्षत्रविशेषादियुक्तज्येष्ठीपूर्णिमा। सा पञ्चधा। यथा, ब्रह्मपुराणे।
"ऐन्द्रे गुरुः शुक्रो चैव प्राजापत्ये रविस्तथा।
पूर्णिमा गुरुवारेण महाज्येष्ठी प्रकीर्त्तिता॥
ऐन्द्रे ज्येष्ठायां प्राजापत्ये रोहिण्याम्॥ २॥
विना गुरुवारेणापि।
ऐन्द्रे गुरुः शुक्रो चैव प्राजापत्ये रविस्तथा।
पूर्णिमा ज्येष्ठमासस्य महाज्येष्ठी प्रकीर्त्तिता॥ २॥
अनुराधाम्यगुरावपि।
ऐन्द्रे मैत्रे यदा जीवस्तत्पक्षदशके रविः।
पूर्णिमा शुक्रचन्द्रेण महाज्येष्ठी प्रकीर्त्तिता॥ ३॥
अनुराधास्थे चन्द्रेऽपि। आश्वभूतिः।
ऐन्द्रे त्वष्ट्रा मैत्रे गुरुचन्द्रौ यदा स्थितौ।
पूर्णिमा ज्येष्ठमासस्य महाज्येष्ठी प्रकीर्त्तिता॥ ४॥
राजमार्त्तण्डे।
ज्येष्ठे संवत्सरे चैव ज्येष्ठमासस्य पूर्णिमा।
ज्येष्ठाभेन समायुक्ता महाज्येष्ठी प्रकीर्त्तिता॥ ५॥
ज्येष्ठसंवत्सरश्च।
ज्येष्ठाम्नोपगे जीवे वर्षं स्यात् शुक्रदेवतम्।
इति विष्णुधर्म्मोत्तरोक्तो ग्राह्यः।
न तु संवत्सरादिपक्षकान्तर्गतवर्षविशेषः। ज्येष्ठ इति वर्षविशेषणस्य वैयर्थ्यापत्तेः। संवत्सरे यदि स्यादिति पाठः काल्पनिकः॥ * ॥
महाज्येष्ठान्तु यः पश्येत् पुरुषः पुरुषोत्तमम्।
विष्णुलोकमवाप्नोति मोक्षं गङ्गाम्बुमज्जनात्॥"
इति तिथ्यादितत्त्वम्॥

महाज्योतिष्मती, स्त्री, (महती चासौ ज्योतिष्मती चेति।) लताविशेषः। वड़ी मालकङ्गनी इति हिन्दी भाषा। तत्पर्य्यायः। तेजोवती २ बहुरसा ३ कनकप्रभा ४ तीक्ष्णा ५ सुवर्णकुर्म्मी ६

महाता

सप्ता । ७ अदितिः । ८ तेजस्विनी । ९ सुरसा । १० अदितसा । ११ अदितमां । १२ कद्रुः । १३ क्रौंचुसा । १४ सुवेसा । १५ सुवेसा । १६ वायसी । १७ गौरा । १८ काकाक्षी । १९ वायसादनी । २० गौरसा । २१ क्रौंसा । २२ गौम्या । २३ मार्जी । २४ तप्तकिंशुका । २५ पारावतपदी । २६ गौरा । २७ गौरसेना । २८ यशस्विनी । २९ मेधा । ३० मेधावनी । ३१ धीरा । ३२ । अस्या गुणाः । निस्तरत्वम् । स्तब्धत्वम् । किंचिदुत्तुलम् । वातकफावहत्वम् । दाहप्रदत्वम् । दीपनत्वम् । मेधाप्रज्ञाकारित्वञ्च । इति राजनिर्घण्टः ॥

महाज्वालः, पुं, (महती ज्वाला शिखास्य ।) दीप्तादिः । इति हैमचन्द्रः । ३ । ५०० ॥ (नरकविशेषः । यथा, विष्णुपुराणे । २ । ६ । १२ ।

"क्षुधा सुतांश्चापि गता महाज्वाले निषाद्यते ॥"

महादेवः । यथा, महाभारते । १३ । १७ । ८ ।

"अग्निज्वालो महाज्वालो अतिधूम्रो धुनी धरिः ॥")

महाज्वाला, स्त्री, (महती ज्वाला दीप्तिर्यस्याः ।) जिनानां विद्याधरीविशेषः । इति हैमचन्द्रः । ३ । ५०० ॥ (महती ज्वाला ।) इष्टदेवितिस्त्रियां च ॥

महाटाः, पुं, (महान् आटाः शोभासम्पन्नः ।) ग्रामः । इति राजनिर्घण्टः ॥ (महाना टाः ।) अतिशयधनवति, त्रि ॥ (यथा, कथासरित्सागरे । २५ । ११८ ।

"ततः प्रभृति चैतस्यां वाराणस्यामुवास सः । अभवंश्चो महाटाश्च तस्मिन् वणिजो गृहे ॥")

महातमःप्रभा, स्त्री, (महती तमसां प्रभा प्रकाशोऽस्याम् ।) नरकविशेषः । स चातिशयान्धकारमयः । यथा, हैमचन्द्रः । ५ । ३ ।

"घनोदधिघनवाततनुवातनभःस्थिताः ।
रत्नप्रभाशर्कराबालुकाधूमतमःप्रभाः ॥
महातमःप्रभा चेत्यधोऽधो नरकभूमयः ॥"

महातरुः, पुं, (महांश्चासौ तरुश्चेति ।) सुपीतकः । इति हैमचन्द्रः । ४ । २०६ । (महाकवेः कालिदासस्य सुपीतकमुद्दिश्य वक्रोक्तिप्रयोगो यथा,—

"तरवः परिणामाढ्याः सुपीतकमहातरुः ॥")

इष्टदारुणि ॥

महातलं, क्ली, (महच्च तत्तलञ्चेति ।) पातालविशेषः । यथा, ब्रह्मसंहितायाम् ।

"अतलं वितलञ्चैव नितलञ्च तलातलम् ।
महातलञ्च सुतलं तलञ्च रसातलम् ॥"
(तथा च श्रीमद्भागवते । २ । १ । २६ ।

"पातालमेतत्तर हि पादतलं
पठन्ति पार्ष्णिप्रपदे रसातलम् ।
महातलञ्चाप्यथ गुल्फयोर्द्वयं
तलातलं वै पुरुषस्य जङ्घे ॥")

महातारा, स्त्री, (तारयति संसारादिति । तृ + तिच् + ण्वुल् । स्त्रियां टाप् । ततो महती तारेति कर्म्मधारयः ।) जिनानां देवीविशेषः । तत्पर्य्यायः । तारा २ महाश्रीः ३ ओङ्कारा ४ माधा ५ श्रीः ६ मनोरमा ७ तारिणी ८ जया ९ अनन्ता १० शिवा ११ लोकेश्वरा १२ आत्मजा १३ सदूरवासिनी १४ भद्रा १५ वैष्णवी १६ नीलसरस्वती १७ गृद्धिनी १८ वसुधारा १९ घनंददा २० त्रिलोचना २१ लोचना २२ । इति हैमचन्द्रः ॥

महातालः, स्त्री, (महान् अनेकस्तालो यत्र । स्त्रियां ङीप् ।) आवर्त्तकी । इति राजनिर्घण्टः ॥

महातिक्तः, पुं, (महानतिशयस्तिक्तस्तिक्तरसो यत्र ।) महानिम्बः । इति राजनिर्घण्टः ॥ अतिशयतिक्तरसयुक्ते, त्रि ॥

महातिक्ता, स्त्री, (महती तिक्ता ।) यवतिक्ता । इति राजनिर्घण्टः ॥ (यथा, गोविन्दविद्याराददृतभैषज्यरत्नावल्याम् ।

"व्याघ्रि शिग्रौ महातिक्ता विशाला कृष्णपत्रकम् ॥")

पाठा । इति शब्दचन्द्रिका ॥

महातीक्ष्णा, स्त्री, (महती तीक्ष्णा ।) भल्लातकवृक्षः । इति राजनिर्घण्टः ॥ अतिशयतीक्ष्णे, त्रि ॥

महातेजः, [स्] क्ली, (महदतिशयं तेजोऽस्य ।) पारदः । इति राजनिर्घण्टः ॥

महातेजाः, [स्] पुं, (महदतिशयं तेजो बलमस्य ।) कार्त्तिकेयः । इति एकाक्षरकोषः । अग्निः । इति शब्दचन्द्रिका ॥ (महादेवः । यथा, महाभारते । १३ । १७ । ५६ ।

"उग्रतेजा महातेजा जयो विजयकालवित् ॥")

अतिशयतेजस्विनि, त्रि ॥ (यथा, मनुः । १ । ६२ ।

"स्वारोचिषश्चौत्तमिश्च तामसो रैवतस्तथा ।
चाक्षुषश्च महातेजा विवस्वत्सुत एव च ॥")

महात्मा, [न्] त्रि, (महानात्मा स्वभावोऽस्य ।) उत्तमस्वभावयुक्तः । (यथा, कामन्दकीयनीतिसारे । ३ । ११ ।

"महावातानृतभ्रान्तिमेघमालातिपेलवैः ।
कथं नाम महात्मानो ह्रियन्ते विषयादिभिः ॥")

तत्पर्य्यायः । महेच्छः २ उदृष्टः ३ उदारः ४ उदात्तः ५ उदीर्णः ६ महाशयः ७ महामनाः ८ । इति हैमचन्द्रः । ३ । ३१ ॥ (पुं, परमात्मा । यथा, मनुः । १ । ५४ ।

"युगपत्तु प्रलीयन्ते यदा तस्मिन् महात्मनि ।
तदायं सर्व्वभूतात्मा सुखं स्वपिति निर्वृतः ॥"

"तस्मिन् परमात्मनि ।" इति तट्टीकायां कुल्लूकः ॥ महत्तत्त्वम् । यथा, श्रीमद्भागवते । ६ । ७ । २५ ।

"मनः सृष्टिञ्च तामद्भिस्तेजसाप्योऽनिलेन तत् ।
वै तानुं धारयंस्तच्च भूतादौ तं महात्मनि ॥"

"महत्तत्त्वे महत्तत्त्वे ।" इति तट्टीकायां श्रीधरस्वामी ॥ विष्णुस्वरूपः । यथा, मार्कण्डेये । ८६ । ४६ ।

महात्मा

"महान् महात्मा महिमो महिमावान् महाबलः ॥"

महादेवः । यथा, महाभारते । १३ । १७ । ३४ ।

"महारूपो महाकायो वृषरूपो महायशाः ।
महात्मा सर्व्वभूतात्मा विश्वरूपो महाहनुः ॥")

महादक्षः, पुं, (महान् दक्षकार्य्यनैपुणमस्य ।) यमदूतभेदः । इति इष्टदेवपुराणे ५६ अध्यायः ॥ (महान् दक्षः ।) इष्टदक्षश्च ॥ (यथा, महाभारते । ५ । १८४ । ३० ।

"यस्माच्छ्वानन् स मन्दात्मा मामसौ नोपमर्षति ।
तस्मात्तस्मै महादक्षो धार्य्यः स्यादिति मे मतिः ॥")

महादन्तः, पुं, (महांश्चासौ दन्तश्चेति ।) गणदन्तः । तत्पर्य्यायः । दन्तादन्तः २ । इति त्रिकाण्डशेषः ॥ इष्टदन्तमाधश्च ॥ (महादेवः । यथा, महाभारते । १३ । १७ । ८७ ।

"महादन्तो महादंष्ट्रो महाशिष्टो महाहनुः ॥")

महान् दन्तोऽस्य ।) तद्वति, त्रि ॥

महादानं, क्ली, (महच्च तद्दानञ्चेति ।) श्रेष्ठदानम् । तच्च तुलापुरुषादिषोडशप्रकारम् । यथा, मत्स्यपुराणे ।

"अथातः संप्रवक्ष्यामि महादानस्य लक्षणम् ॥"

इत्यभिधाय ।

"आद्यन्तु सर्व्वदानानां तुलापुरुषसंज्ञितम् ।
हिरण्यगर्भदानञ्च ब्रह्माण्डं तदनन्तरम् ॥
कल्पपादपदानञ्च गोसहस्रन्तु पञ्चमम् ।
हिरण्यकामधेनुञ्च हिरण्याश्वसंयुतं च ॥
पञ्चलाङ्गलकं तद्वद्धरादानन्तथैव च ।
हिरण्याश्वरथञ्चैव हेमहस्तिरथस्तथा ॥
द्वादशं विष्णुचक्रञ्च ततः कल्पलतात्मकम् ।
सप्तसागरदानञ्च रत्नधेनुस्तथैव च ।
महाभूतघटश्चैव षोडशः परिकीर्त्तितः ॥"

अत्र सामान्यलक्षणम् । कृष्णलमाषकदानं महादानम् । विनायकादिपञ्चाग्रदेवतोद्देशेनाष्टकं वा । तथा मत्स्यपुराणम् ।

"विनायकादिपञ्चलोकपालवस्वष्टकादित्यमरुद्गणानाम् ।
ब्रह्माच्युतेशानहरस्वतीनां
समन्ततो द्वीपमथुद्दिशं स्यात् ॥
कृष्णानि कृष्णानि तथैव तेषा-
मनुक्रमेणापि यथास्वरूपम् ॥"

इत्यादिना कृष्णलमाषोन्मानाभ्यां विधानं प्रत्येकं षोडशतुलापुरुषप्रधानानुद्दिश्योक्तं ततु महादानत्वेनोद्दिश्येति । अतो नैतरेतराश्रयः । न तु कृष्णलमाषपैतिकर्णवसायोगित्वं शिक्षणीयलक्षणम् । अन्यत्रदानेऽपि मतलात् । इत्यलम् ।

"कनकाश्वतिला गावो दासी रथमहीरहाः ।
कन्या च कपिला धेनुर्महादानानि वै दश ॥"

इति कूर्म्मपुराणोक्तदानपरं नैमित्तम् ॥ अन्यथा बहुप्रकियस्यमापत्तेः कनकदानादि-

साधारणानुमतेरेकरूपाभावाच्च । अतो न वैपरीत्यमिति ।

"सर्वेषामेव दानानामेकजन्मानुगं फलम् ।"

इति मनसमानतत्त्वम् ॥

महादारु, क्ली, (महच्च तद्दारु चास्य ।) देवदारु ।

इति शब्दार्थः । (महच्च तद्दारु । दृषदादित्वात् ।

महादेवः, पुं, (महांश्चासौ देवश्चेति । यद्वा, महतां देवादीनां देवः ।) शिवः । इत्यमरः । १ । १ । ३४ । अष्टमूर्त्यन्तर्गतसोममूर्त्तिरयम् । यथा, महादेवाय सोममूर्त्तये नमः । इति शिवपूजाप्रणतिः । * ॥ अस्य व्युत्पत्तिर्यथा—

"ब्रह्मादीनां सुराणाञ्च मुनीनां ब्रह्मवादिनाम् ।
तेषाञ्च महतां देवो महादेवः प्रकीर्त्तितः ॥
महती पूजिता यस्मै सा महाप्रकृतिरीश्वरी ।
तस्या देवः पूजितश्च महादेवः स च स्मृतः ।"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५३ अध्यायः ॥

तस्य पञ्चवक्त्रत्वनिरूपकत्वकारणं यथा,—

"अतीव कमनीयाङ्गं किशोरं श्यामसुन्दरम् ।
अहो निरूपणीयञ्च दृष्ट्वा रूपमनुत्तमम् ।
न बभूव विलक्षश्च लोचनाभ्यां त्रिलोचनः ॥
पश्यन्निमेषरहितं इति मत्वा स्वमानसे ।
भक्तैकान्तमहाभक्तो रुरोद प्रेमविह्वलः ॥
सहस्रवदनोऽनन्तो भाग्यवांश्च चतुर्मुखः ।
बहुभिर्लोचनैर्दृष्ट्वा तुष्टाव बहुभिर्मुखैः ॥
पश्यामि किं वा किं स्तौमि संप्राप्य नाथ-
मीदृशम् ।
आस्येकेन लोचनाभ्यां चतुर्धा स पुनः पुनः ॥
सम्मानसे कुर्वतोर्द्दं शङ्करे च तपस्विनि ।
तद्बभूव चतुर्लक्षं पूर्ब्बेण सह पञ्चमम् ॥
एकैकवक्त्रं शुशुभे लोचनैश्च त्रिभिस्त्रिभिः ।
बभूव तेन तन्नाम पञ्चवक्त्रस्त्रिलोचनः ।
चक्षूंषि शुक्लरूपाणि तस्य ब्रह्मस्वरूपिणः ।
सत्त्वं रजस्तम इति तस्य हेतुं निशामय ॥
सत्त्वगुणेन दृष्टा शम्भुः पश्यन् पाति च सात्त्विकान् ।
राजसेन च राजसिकान् तामसेन च तामसान् ॥
ऊर्द्ध्वपक्षाणयात् पश्चात् ललाटस्याक्षरस्य च ।
संहारकाले संदृश्यैरग्निरविर्भवेत् क्रुधा ॥
कोटिकालप्रमाणश्च सूर्य्यकोटिसमप्रभः ।
त्रैलिङ्गानो दीर्घशिखस्त्रैलोक्यं दग्धुमीश्वरः ।"

तस्य भक्तधारणकारणं यथा,—

"विभूतिगात्रः स विभुः सर्वीसत्कारभक्तिना ।
धत्ते तस्या अस्थिमालां प्रेमभावेन भक्त्या च ।
स्वात्मारामो यद्यपीशस्तथापि पूर्णमन्दकम् ।
अनीशत्वं गृहीत्वा च भ्रमं भ्रमं रुरोद च ।
प्रत्यङ्गाङ्गेषु तस्याश्च पपात यत्र यत्र च ।
तत्तीर्थीष्टकल तत्र बभूव मनसिद्धिदम् ।
सदा प्रणामशेषञ्च कृत्वा वक्षसि शङ्करः ।
पपात मूर्च्छितो भूत्वा निश्चेष्टेन च राधिके ! ।
तदा गत्वा महैश्वर्य्यं कृत्वा क्रोडे प्रबोध्य च ।
ददर्श दिव्यलक्षञ्च तस्मै श्रीकृष्णमन्त्रकम् ।
सदा शिवश्च सन्तुष्टः सर्व्वेभ्यश्च ददौ च ।
तस्मान्नारायणेनैव कालेन तां संप्राप प्रियां सतीम् ।"

तस्य दिगम्बरत्वजटाधारित्वकारणं यथा,—

"दिगम्बरधरो योगेनेच्छारहितो घटे विभोः ।
जटास्तस्याकालीना धत्तेऽद्यापि विवेकतः ॥
न चेच्छा केशसंस्कारे स्वाङ्गवेशेन योगिनः ।
समता चन्दने पङ्के लोष्ठे रत्ने मणीश्वरे ।"

तस्य नागभूषणत्ववृषवाहनत्वकारणं यथा,—

"गरुडदेषिणो नागाः शङ्करं शरणं ययुः ।
बिभर्त्ति कृपया स्वाङ्गे तानेव शरणागतान् ॥
वाहनं वृषरूपोऽहमस्यं वोढुमक्षमः ।
त्रिपुरस्य वधे पूर्ब्बं मत्कर्णांशसमुद्भवः ॥"

तस्य धुस्तूरपुष्पबिल्वपत्रप्रियत्वयाग्रचर्म्मधारित्वश्मशानस्थायित्वकारणं यथा,—

"पारिजातादिकं पुष्पं सुगन्धिचन्दनादिकम् ।
मयि संन्यस्य तेनैव प्रीतिर्नास्ति कदाचन ॥
धुस्तूरे तत् सदा प्रीतिर्बिल्वपत्रानुलेपने ।
गन्धहीने प्रहते च योगेऽहं व्याघ्रचर्म्मणि ॥
दिगलोके दिगन्तस्थे जगतायां न तन्मनः ।
श्मशानेऽतीवरहसि ध्यायते मामहर्निशम् ॥"

तस्य महिमादि यथा,—

"आब्रह्मलक्षणपर्य्यन्तं स्वप्रबन्धन्यते शिवः ।
ममानिर्व्वचनीयेऽत्र रूपे तन्मयमानसम् ॥
ब्रह्मणः पतनेनापि शूलपाणेः क्षणो भवेत् ।
तस्यायुषः प्रमाणञ्च नाहं जानामि का श्रुतिः ॥
ज्ञानं मृत्युञ्जयं शूलं धत्ते मत्तेजसा समम् ।
विना मया न कश्चित्तं शङ्करं जेतुमीश्वरः ॥
शङ्करः परमात्मा मे प्राणेभ्योऽपि परः शिवः ।
त्र्यम्बके मन्मनः शश्वन्न प्रियो मे भवात् परः ॥
न संवसामि गोलोके वैकुण्ठे तव वक्षसि ।
सदाशिवस्य हृदये निवद्धः प्रेमशृङ्खलैः ॥
स्रष्टुं शक्तो हि नष्टुञ्च भ्रूभङ्गलीलया हि यः ।
ब्रह्माण्डनिकरं योगान्न योगी शङ्करात् परः ॥
दिव्यज्ञानेन यः स्रष्टुं नष्टुं भ्रूभङ्गलीलया ।
मृत्युकालादिकं शक्तो न ज्ञानी शङ्करात् परः ॥
मम भक्तिश्च दास्यञ्च मुक्तिश्च सर्व्वसम्पदम् ।
सर्व्वसिद्धिं दातुमीशो न दाता शङ्करात् परः ॥
शश्वत्तेन मन्नाम यशो गायत्यहर्निशम् ।
मद्रूपं ध्यायते शश्वन्न भक्तः शङ्करात् परः ॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ३६ अध्यायः ॥

शिवदेवैश्वर्यदोषकारणादिकं यथा—

राधिकोवाच ।

"एवंभूतस्य च विभोः सर्व्वेशस्य महात्मनः ।
न श्रुतं कथमुत्पन्नं वृहि सन्देहभञ्जन ! ॥

श्रीकृष्ण उवाच ।

शृणु देवि ! प्रवक्ष्येऽहमितिहासं पुरातनम् ।
पार्व्वत्यानां दहने स्वजनस्मिन्नियोपमम् ॥
सनत्कुमारो वैकुण्ठमेकदा च जगाम ह ।
ददर्श भक्तवन्तञ्च नाथं नारायणं हरिः ॥
तुष्टाव गुरुं स्तोत्रेण प्रणम्य भक्तितो सदा ।
अवोचं ददौ तस्मै मन्त्रो भक्तवत्सलः ॥
प्राप्तमात्रेण तत्रैव सूक्तं तेनापि किञ्चन ।
किञ्चिदत्र मन्त्राणां भक्षणाय च दुर्लभम् ॥

सिद्धाश्रमे च तद्दत्तं गुरवे शूलपाणिने ।
भक्त्युद्रेकाच्च तत् सर्व्वं सूक्तञ्च प्राप्तिमात्रतः ॥
सुक्ता सदुर्लभं वस्तु ननर्त्त प्रेमविह्वलः ।
पपात डमरुर्हस्तात् शृङ्गञ्च व्याघ्रचर्म्म च ॥
स्वयं निपत्य पप्रात्र रुदन्मूर्च्छामवाप च ।
एतस्मिन्नन्तरे देवी दुर्गा दुर्गतिनाशिनी ॥
सदा जगाम शीघ्रं तत्प्रणयवदनेक्षया ।
रुदन्तं मूर्च्छितं दृष्ट्वा निपतन्तञ्च भक्तितः ।
प्रहस्य वाणी पप्रच्छ कुमारं शूलपाणिनः ॥
सर्व्वं तां कथयामास कुमारः संपुटाञ्जलिः ।
श्रुत्वा चुकोप सा देवी शिवं प्रस्फुरिताधरा ॥
श्रुत्वा मनोहरं स्तोत्रं न शशाप शिवं शिवा ।
दुष्टं चक्रे तदुच्छिष्टमभक्ष्यं विदुषामपि ॥
सुचिरञ्च तपस्तप्त्वा मया लब्धस्त्वमीश्वरः ।
त्वया विष्णोः प्रसादेन वञ्चिताहं कथं विभो ! ॥
यतो न दत्तं नैवेद्यं विष्णोर्मन्त्रं त्वयाधुना ।
अतो मत्तो गृहाणेतत् फलमेव महेश्वर ! ॥
अद्य प्रभृति ये लोका नैवेद्यं भक्षते तव ।
ते भक्ष्यन्ति सारमेया भविष्यन्त्येव भारते ॥
इत्युक्त्वा पार्व्वती मानाद्रुरोद पुरतो विभोः ।
दृष्टिः पपात तत्कण्ठे नीलकण्ठो बभूव सः ॥
अपूर्व्वं तव नैवेद्यं जन्ममृत्युजराहरम् ।
कृतं दुष्टं यतस्तस्मात् पश्य देहं त्यजामि च ॥
लिङ्गोपरि च यद्दत्तं तदेवाग्राह्यमीश्वर ! ।
सुपवित्रं भवेत्तच्च विष्णोर्नैवेद्यमिश्रितम् ॥
इत्येवं कथितं सर्व्वं त्वया दृष्टं सुरेश्वरि ! ।
अभिशप्तं शङ्करस्य निर्म्माल्यं येन हेतुना ॥

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ३७ अध्यायः ॥

तस्यावतारा यथा,—

सूत उवाच ।

"वेदव्यासावताराणि द्वापरे कथितानि तु ।
महादेवावताराणि कलौ शृणुत सत्तमाः ॥
आदौ कलियुगे श्वेते देवदेवो महाद्युतिः ।
नाम्ना हिताय विप्राणामभूद्वेवस्वतेऽन्तरे ॥
हिमवच्छिखरे रम्ये छगले पर्व्वतोत्तमे ।
तस्य शिष्याः शिखायुक्ता बभूवुरमितप्रभाः ।
श्वेतः श्वेतशिखश्चैव श्वेताश्वः श्वेतलोहितः ।
चत्वारस्ते महात्मानो ब्राह्मणा वेदपारगाः ।
सुभावो दमनश्चाथ सुहोत्रः कङ्कणस्तथा ।
लोकाक्षिश्च योगीन्द्रो जैगीषव्यस्तु सप्तमे ।
अष्टमे दधिवाहः स्यान्नवमे ऋषभः प्रभुः ।
भृगुस्तु दशमे प्रोक्तस्तस्मादुग्रः सुतः ।
द्वादशेऽत्रिः समाख्यातो वाली चाथ त्रयोदशे ।
चतुर्दशे गौतमस्तु वेदशीर्षा ततः परम् ।
गोकर्णश्चाभवत्तस्माद्गुहावासः शिखण्डश्च ।
जटामाली च हासश्च दारुको लाङ्गली क्रमात् ।
श्वेतस्तथा परः शूली दण्डी मुण्डी च वै क्रमात् ।
सहिष्णुः सोमशर्म्मा च कुलीशो चान्तिमे प्रभुः ।
वैवस्वतेऽन्तरे शम्भोरवतारास्त्रिमूर्त्तिनः ।
अष्टाविंशतिविख्याता भक्ते कलियुगे प्रभोः ।
दीर्घकाश्यावतारः स्याद्देवो नकुलीश्वरः ।"

इति कौर्म्मे ५० अध्यायः ॥

महादे

तस्याष्टषष्टिनामानि चेत्राणि ;. यथा,—
मनुरुवाच ।
"मन्दरस्थं महादेवं ब्रह्मा पृच्छति शङ्करम् ।
केषु केषु च स्थानेषु ह्यष्टषष्टिरसि मया प्रभो ! ॥
ईश्वर उवाच ।
वाराणस्यां महादेवं प्रयागे तु महेश्वरम् ।
नैमिषे देवदेवञ्च गयायां प्रपितामहम् ॥
कुरुक्षेत्रे विदुः स्थाणुं प्रभासे ह्यग्निभूषणम् ।
पुष्करे तु त्रपोगन्धिं विश्वञ्च विमलेश्वरे ॥
ह्यट्टहासे महानादं महेन्द्रे तु महाव्रतम् ।
उज्जयिन्यां महाकालमाकोटे तु महोत्कटम् ॥
शङ्कुकर्णे महातेजं गोकर्णे च महाबलम् ।
भैरवे भैरवाकारं भवं वस्त्रापदे विदुः ॥
उग्रं कनखले चैव भद्रकर्णह्रदे शिवम् ।
देवदारुवने दिव्यं चण्डीशं मध्यमङ्गले ॥
ऊर्द्धरेतं त्वरण्डे तु सकलाण्डे कपर्दिनम् ।
कृत्तिवाससमेकाम्रे रुद्रं ताम्रातिकेश्वरे ॥
कालञ्जरे नीलकण्ठं श्रीकण्ठं मण्डलेश्वरे ।
ध्यानं सिद्धेश्वरे योगी गायत्रीप्रीतिरेश्वरे ॥
विजयं नाम काश्मीरे जयन्तं मरुकेश्वरे ।
हरिश्चन्द्रे हरिश्चैव पुरिश्चन्द्रे तु शङ्करम् ॥
जटापालेश्वरे विद्यां सौम्यं कुब्जटकेश्वरे ।
भूतेश्वरे भसगात्रं जलालिङ्गे जलेश्वरम् ॥
भिक्षुकं कर्णिकायान्तु वाराहं विन्ध्यपर्वते ।
ताम्रं पश्चिमसन्ध्यायां विरजायां त्रिलोचनम् ॥
दण्डेश्वरे त्रिशूलन्तु श्रीशैले त्रिपुरान्तकम् ।
जलालिङ्गे विदुः कालं कापालिं करवीरके ॥
दीप्तचक्रेश्वरे वेदं नेपाले पशुपतिं पतिम् ।
श्रीकारारोहणे कूटं देविकायासमापतिम् ॥
गङ्गायां सागरे त्वमरमोङ्कारममरकण्टके ।
सप्तगोदावरे भीमं स्वयम्भुं नकुलेश्वरे ॥
कर्णिकारे गणाध्यक्षं कैलासे च गणाधिपम् ।
हेमकूटे विरूपाक्षं भूर्भुवं गन्धमादने ।
सिद्धेश्वरन्तु आकाशे पाताले चट्टकेश्वरम् ॥
ह्यष्टषष्टि नामानि देवदेवस्य धीमतः ।
पुराणे चोपगीतानि ब्राह्मणस्य स्वयम्भुवा ॥
यः पठेत् प्रातरुत्थाय स्नातो वा यदि वा
शुचिः ।
सुच्यते सर्व्वपापेभ्यः शिवलोकं स गच्छति ॥"
इत्यादौ देवीपुराणे ह्यष्टषष्टिनामानि महादेवस्य ॥* तस्य द्वादशनामस्तोत्रम् ।
"प्रथमस्तु महादेवो द्वितीयस्तु महेश्वरः ।
तृतीयः शङ्करो ज्ञेयश्चतुर्थो वृषभध्वजः ॥
पञ्चमः कृत्तिवासाश्च षष्ठः कामाङ्गनाशनः ।
सप्तमो देवदेवेशः श्रीकण्ठस्त्वष्टमः स्मृतः ॥
ईश्वरो नवमो ज्ञेयो दशमः पार्व्वतीपतिः ।
रुद्र एकादशश्चैव द्वादशः शिव उच्यते ॥
द्वादशैतानि नामानि त्रिसन्ध्यं यः पठेन्नरः ।
कृतघ्नस्यैव गोघ्नस्य ब्रह्मघ्नस्य गुरुत्तल्पगः ॥
स्त्रीबालघातकस्यैव सुरापस्य वृषलीपतिः ।
मुच्यते सर्व्वपापेभ्यो रुद्रलोकं स गच्छति ॥"
इति स्कन्दपुराणम् ॥

महादे

तन्नामोच्चारणफलं यथा,—
"कोटयो ब्रह्महत्यानामगम्यागमकोटयः ।
सद्यः प्रलयमायान्ति महादेवेति कीर्त्तनात् ॥
महादेव महादेव महादेवेति वादिनम् ।
वृषं गौरिव गौरीशो धावन्तमनुधावति ॥"
इति पुराणम् ॥*॥
तस्य प्रणाममन्त्रः ।
"नमस्ते त्वां महादेव ! लोकानां गुरुमीश्वरम् ।
पुंसामपूर्णकामानां कामपूराम्राड्घ्रिपम् ॥"
इति श्रीभागवतम् ॥
"महादेवं महात्मानं महायोगिनमीश्वरम् ।
महापापहरं देवं मकाराय नमो नमः ॥"
इति तन्त्रम् ॥*॥
तस्य कालरूपवर्णनं यथा,—
नारद उवाच ।
"कालरूपी त्वया ख्यातः प्रभुर्गगनगोचरे ।
लक्षणञ्च स्वरूपञ्च सर्व्वं व्याख्यातुमर्हसि ॥
पुलस्त्य उवाच ।
स्वरूपं त्रिपुरघ्नस्य वदिष्ये कालरूपिणः ।
अश्विनी भरणी चैव कृत्तिका प्रथमांशकम् ॥
मेषकं हि विजानीयात् कुजचेचसुदाहृतम् ।
आग्नेयांशास्त्रयो ब्रह्मन् ! प्राजापत्यं कवेर्गृहम् ॥
सौम्यार्द्धं वृषनामेदं वदनं परिकीर्त्तितम् ।
मृगार्द्धमार्द्रादित्यांशास्त्रयः सौम्यगृहन्त्विदम् ॥
मिथुनं भुजयोस्तस्य गगनस्थस्य शूलिनः ।
आदित्यांशश्च पुष्यश्च अश्लेषा अग्निनो गृहम् ॥
राशिः कर्कटको नाम पार्श्वेन खविलासिनः ।
पित्र्यं भगदैवत्यं उत्तरांशश्च केशरी ॥
हृत्पद्मचेचं विभोर्ब्रह्मन् हृदयं परिकीर्त्तितम् ।
उत्तरांशास्त्रयः पाणिश्चित्रार्द्धं कन्यका त्विदम् ॥
सोमपुत्रस्य सङ्गेतन् द्वितीयं जठरं विभोः ।
चित्रांशद्वितयं स्वाती विशाखायांशकत्रयम् ॥
द्वितीयं शुक्रसदनं तुलानाभिरुदाहृतम् ।
विशाखांशमनुराधा ज्येष्ठा भौमगृहं त्विदम् ॥
द्वितीयं वृश्चिको राशिर्मेढ्रं कालस्वरूपिणः ।
मूलं पूर्व्वोत्तरांशश्च देवाचार्य्यगृहं धनुः ॥
ऊरुयुगलमीशस्य अमर्त्ये ! प्रगीयते ।
उत्तरांशास्त्रयो ऋक्षं श्रवणं मकरो मुने ! ॥
धनिष्ठार्द्धं शनिश्चेचं जानुनी परिकीर्त्तिते ।
धनिष्ठार्द्धं शतभिषा प्रोष्ठपद्यांशकत्रयम् ॥
सौरं सद्मापरमिदं कुम्भौ जङ्घे च विश्रुते ।
प्रोष्ठपद्यांशमेकन्तु उत्तरा रेवती तथा ॥
द्वितीयं जीवसदनं मीनस्तु चरणावुभौ ॥
एवं कृत्वा कालरूपं त्रिनेत्रो
यज्ञं क्रोधान्मार्गणैराजघान ।
विद्धश्चासौ वेदनाबुद्धियुक्तः
खे सप्तस्थौ तारकाभिश्चिताङ्गः ॥
इति वामनपुराणे ५ अध्यायः ॥
महादेवी, स्त्री, (महादेवस्य पत्नीति । पत्यर्थे ङीप् । यद्वा, महती चासौ देवी चेति ।) दुर्गा । यथा,
"अथवा स्यान्महादेवी गिरिजा मेनकात्मजा ।"
इति हलायुधः ॥

महाद्रा

तस्या युत्पत्तिर्यथा,—
"पूज्यते या सुरैः सर्व्वैर्मह्यांश्चैव प्रमाणतः ।
धातुर्मह इति पूजायां महादेवी ततः स्मृता ॥"
इति देवीपुराणे ४५ अध्यायः ॥
राज्ञी । पाटरागी इति भाषा । तत्पर्य्यायः । महिषी २ पट्टाङ्गा ३ पट्टदेवी ४ । इति राजनिर्घण्टः ॥ (यथा, कथासरित्सागरे । ५ । २६ ।
"अलिखत् स महादेवीं योगनन्दस्य तं पटे ।
सजीवमिव तच्चित्रं वाक्चेष्टारहितं त्वभूत् ॥")
महादैत्यः, पुं, (महांश्चासौ दैत्यश्चेति ।) भौत्यमन्वन्तरीयदैत्यविशेषः । यथा,—
"चतुर्दशस्य भौत्यस्य शृणु पुत्रान्नवोर्मम ।"
इत्युपक्रम्य ।
"शुचिरिन्द्रो महादैत्यो रिपुहन्ता हरिः स्वयम् ॥"
इति गारुडे ७८ अध्यायः ॥
महाद्रावकः, पुं, (द्रावयति रोगानिति । द्रु + णिच् + ण्वुल् । महांश्चासौ द्रावकश्चेति ।) औषधविशेषः । द्रावक इति भाषा । यथा,—
"यवक्षारस्य भागौ द्वौ स्फटिकारस्य तौ मताः ।
एकीकृत्य प्रपिष्यापि सूत्रैर्वस्त्रतरीभवैः ॥
शुष्कं कृत्वा क्षिपेत् पात्रे वैसके वस्त्रसेमिते ।
चन्यसौवर्चकपाचन्तु द्विमुखं मेलयेद्बुधः ॥
द्रुवैद्योपदेशेन पचेत् पात्रस्थमौषधम् ।
ततो ज्वालाधतः स्थाप्यं पात्रार्घ्यं लभते रसम् ॥
ततो रसं विनिष्कृष्य स्थापयेत् स्निग्धभाजने ।
लवङ्गेन वर्त्तीं कृत्वादद्यवा नततान्त्रके ॥
श्लीहादिशूलरोगेषु दापयेत् रक्तिकां भिषक् ।
द्रवीकरोति रोगञ्च महाद्रावकसंज्ञकः ॥
श्वित्रे च दद्रुरोगे च प्लेष्मे द्रावकस्य च ।
वह्निवज्ज्वलनं तस्य दधि दत्त्वा प्रलेपयेत् ॥"*
अपि च ।
"वृषश्चित्रमपामार्गं चित्रा कृष्णाग्निनाड़िका ।
स्नुही तालस्य पुष्पञ्च वर्षाभूर्व्वेतसं तथा ॥
एतेषां चारमाहृत्य लिम्बाकस्वरसेन च ।
क्षालयित्वा क्षारतोयं वस्त्रपूतञ्च कारयेत् ॥
चण्डातपेन संशोष्य ग्राह्यं तद्द्रवणोचितम् ।
एतस्य द्विपलं ग्राह्यं यवक्षारपलद्वयम् ॥
स्फटिकारिपलञ्चैव नरसारपलं तथा ।
पलार्द्धं सैन्धवं ग्राह्यं टङ्कणं तोलकद्वयम् ॥
कासीसं तोलकञ्चैव सुद्राशङ्खस्य तोलकम् ।
दारुमोचं कर्षकञ्च तोलं समुद्रफेनकम् ॥
सर्व्वमेकत्र संचूर्ण्य वकयन्त्रेण साधयेत् ।
महाद्रावकमेतद्धि योज्यञ्च रसकारणे ।
हन्ति गुल्मादिकान् रोगान् यकृत्प्लीहोदराणि च ॥" * ॥
इति भैषज्यरत्नावली ॥
(तथापरञ्च ।
"शुद्धं काञ्चनमाधिक्यं स्फुटतरं कांस्याभिधयन्तथा
सिन्धूत्थं विमलं रसाञ्जनवरं फेनं सवर्त्तीपतेः

महाध

चारौ सप्तिकसम्भवौ सुविमलौ भागास्त्रमीषां समाः
सप्तानां सदृशन्तु टङ्कयमिह त्वर्द्धौ तृचारः स्मृतः ॥
नक्तुल्या स्फटिकारिका त्रिसदृशः कुड्यो यवस्त्र्यंशजः
काश्मीशुद्धितयं यवाग्रसमं सर्षपार्द्धं सर्षं न्यसेत् ।
पात्रे काचमये मृदम्बरहते सोऽयं महाद्रावको
नो वक्तुं प्रभवेदसूय नितरां सम्यग्गुणं भूतले ॥
एतद्वस्तुचतुष्टयं त्रिवेदधो मुख्या सवङ्गेन वा
तत्पश्चात् परिवासितं बहुगुणं ताम्बूलकं भक्षयेत् ।
प्रासङ्गात् कथयामि ते शृणु गुणान् कांश्चित्तथान्यान् परान्
निःशेषं विनिहन्ति तानि चिरजान्यष्टौदराणि ध्रुवम् ॥
गृह्णं पाण्डुफलीमकं सुकठिनामष्टौलिकां कामलां
मन्दाग्निं विषमाग्नितां बहुविधान् शोथांश्च शूलान्यपि ॥"*॥

इति वैद्यकक्रियासंग्रहे श्रीहाधिकारे ४)

महाद्रुमः, पुं, (महांश्चासौ द्रुमश्चेति ।) अश्वत्थवृक्षः । इति शब्दचन्द्रिका ॥ वृहद्वृक्षश्च ॥ (यथा, हरिवंशे । २२३ । ७२ ।
"चकोराः शुकपक्षाश्च मत्तकोकिलसारसाः ।
पुष्पितान् फलितांश्चैव संपतन्ति महाद्रुमान् ॥"
प्राक्द्वीपपतेर्भव्यस्य सप्तमः पुत्रः । यथा, मार्कण्डेये । ५३ । २१ ।
"बलदश्च कुमारश्च सुकुमारो मनीषकः ।
कुशोत्तरोऽथ मेधावी सप्तमस्तु महाद्रुमः ॥")

महाद्रोणा, स्त्री, (महती चासौ द्रोणा चेति ।) वृक्षविशेषः । बड़ी द्रोणपुष्पी इति हिन्दी भाषा । तत्पर्य्यायः । देवकुसुमा २ दिव्यपुष्पा ३ महाद्रोणी ४ देवी ५ काञ्ची ६ देवद्रोणा ७ । अस्या गुणाः । कटुत्वम् । तिक्तत्वम् । मेध्यत्वम् । भूतार्शिवातकफाग्निमान्द्यनाशित्वम् । वृष्या पारदशोधनत्वञ्च । इति राजनिर्घण्टः ॥

महाद्रोणी, स्त्री, (महती चासौ द्रोणी चेति ।) महाद्रोणाक्षुपः । इति राजनिर्घण्टः ॥

महाद्वन्द्वः, पुं, (महान् द्वन्द्वः कोलाहलो यत्र ।) गृहवाटम् । इति शब्दरत्नावली ॥ अतिशयकलहश्च ॥

महाधनं, क्ली, (महत् अनेकं धनं मूल्यत्वेनास्य ।) बहुमूल्यवस्त्रम् । इत्यमरः । २ । ६ । ११३ ॥ सुवर्णम् । सिक्कम् । इति मेदिनी । ने, २०१ ॥ चारुवस्त्रम् । इति हेमचन्द्रः ॥ क्षत्रियः । इति शब्दरत्नावली ॥ (महद्भिरनेकं धनमस्मात् । संग्रामः । इति त्रिकाण्डशेषः । २ । १७ ॥ यथा, भागवते । ८ । ११ । १२ ।
"मा नो अस्मिन्महाधने परावर्गभारभृद् यथा ॥"
"महाधने संग्रामे ।" इति तट्टीकायां स्वामिनः ॥ महच्च तद्धनञ्चेति । प्रभूतधनम् । यथा, ऋग्वेदे । १ । ७ । ५ ।
"इन्द्रं वयं महाधन इन्द्रमर्भे हवामहे ॥"
"महाधने प्रभूतधननिमित्तम् ।" इति तट्टीकायां सायनः ॥ बहुमूल्ये, त्रि । यथा, किरातार्जुनीये । १ । ३८ ।
"पुराधिरूढं शयनं महाधनं
विबोधयेत् यः स्तुतिगीतिमङ्गलैः ।
अदभ्रदर्भामधिशय्य संस्थलीं
शयानि निद्रामशिवं शिवारुतैः ॥")
अतिशयधनयुक्ते, च त्रि ॥

महाधातुः, पुं. (महांश्चासौ धातुश्चेति ।) स्वर्णम् । इति शब्दचन्द्रिका ॥

महाध्वनिकः, पुं, (अध्वनि गच्छतीति । अध्वन् + ठक् । महांश्चासौ आध्वनिकश्चेति ।) पुण्यार्थं हिमालयाद्यधिकमहापथगमनेन सम्पादितश्रमः । यथा, "भूखनिजलसंग्रामदेशान्तरस्त्रीसंन्यासानशनाग्निमहाध्वनिकाः ..सूतकक्रिया कार्य्या सद्यःशौचं भवतीति । इति शुद्धितत्त्वधृतसुमन्तुवचनम् ॥

महान्, [त्] त्रि, (मह्यते पूज्यते वेति । मह् + "वर्षमाने पृषद्बृहन्महज्जगच्छतवच्च ।" उणा० २ । ८४ । इति अतिः । निपात्यते ।) बृहन् । इत्यमरः । ३ । १ । ६० ॥ (यथा, मनौ । ८ । २८६ ।
"प्राणभृत्सु महत्स्वर्द्धं गोगजोष्ट्रहयादिषु ॥")
अस्य पर्य्यायः महच्छब्दे द्रष्टव्यः ॥

महान्, पुं, (मह्यते सेव्यते आश्रीयते गमनार्थेति । मह् + अतिः ।) उशनाः । इति राजनिर्घण्टः ॥ दुर्गा । यथा,—
"महान् व्याप्य स्थिता सर्व्वं महा वा प्रकृतिर्मता ।
स्थितिः संसरणाद्देवी नियती च नियामता ॥"
इति देवीपुराणे ४५ अध्यायः ॥
महत्तत्त्वम् । यथा —
"सविकारात् प्रधानात्तु महत्तत्त्वं प्रजायते ।
महानिति यतः ख्यातिर्लोकानां जायते सदा ॥"
इति मात्स्ये ३ अध्यायः ॥
(महादेवः । यथा, महाभारते । १३ । १७ । १२ ।
"अग्नी शतघ्नी खड्गी परिघी चायुधी महान् ॥")
महच्छब्दप्रयोगनिषेधो यथा,—
"श्राद्धे तैले तथा मांसे वैद्ये ज्यौतिषिके द्विजे ।
यात्रायां पथि निद्रायां महच्छब्दो न दीयते ॥"
इति भट्टिप्रथमसर्गोद्यचतुर्थश्लोकटीकायां भरतः ॥

महानटः, पुं, (महांश्चासौ नटो नर्त्तकश्चेति । उद्धतनर्त्तकत्वादस्य तथात्वम् ।) शिवः । इति त्रिकाण्डशेषः ॥

महानदी, स्त्री, (महती चासौ नदी चेति ।) पुरुषोत्तमक्षेत्रान्तर्गतकटकस्योत्तरदेशस्थनदीविशेषः । तस्या नामान्तरं चित्रोत्पला । यथा, "नदी तत्र महापुण्या विन्ध्यपादविनिर्गता ।
चित्रोत्पलेति विख्याता सर्व्वपापहरा शुभा ।
चित्रोत्पला महानदी ।" इति पुरुषोत्तमतत्त्वम् ॥ गङ्गा । यथा,—
"अम्बुजमम्बुनि जातं
जातु न जायते अम्बुजादम्बु ।
सुरहर ! तव विपरीतं
पादाम्बजान्महानदी जाता ॥"
इत्युद्भटः ॥

महानन्दः, पुं, (महानानन्दोऽत्र ।) मुक्तिः । इति हलायुधः ॥ (महान् आनन्दः ।) अतिशयाह्लादश्च ॥ (नृपतिविशेषः । यथा, मार्कण्डेये । १३४ । ४० ।
"इत्युक्त्वा तान् महीपालान् महानन्दसुखान् बली ।
अथाब्रवीत्तदा सर्व्वान् महारिदमनो दमः ॥"
वेणुविशेषः । यथा, सङ्गीतदामोदरे ।
"महानन्दस्तथा नन्दो विजयोऽथ जयस्तथा ।
चत्वार उत्तरवंशा मातङ्गमुनिसम्मताः ॥")

महानन्दा, स्त्री, (महानानन्दोऽस्याः ।) सुरा । इति राजनिर्घण्टः ॥ माघशुक्ला नवमी । यथा, भविष्ये ।
"माघमासस्य या शुक्ला नवमी लोकपूजिता ।
महानन्देति सा प्रोक्ता सदानन्दकरी नृणाम् ॥
स्नानं दानं जपो होमो देवार्चनमुपोषणम् ।
सर्व्वं तदक्षयं प्रोक्तं यदस्यां क्रियते नरैः ॥"
इति तिथ्यादितत्त्वम् ॥
नदीविशेषः । सा पद्माया विनिःसृता रामपुराख्यग्रामात् पश्चिमत उत्तरदिग्गता ॥ (दक्षिणदेशीयो नदीभेदः । यथा, महाभारते । १३ । २५ । ४३ ।
"पुनरावर्त्तनन्दाश्च महानन्दाश्च सेव्यकाः ।
नन्दने सेव्यते दान्तस्त्वरोभिरभिषेचकः ॥")

महानन्दिः, पुं, (आ सम्यक् नन्दतीति । आ + नन्द् + "सर्व्वधातुभ्य इन् ।" उणा० ४ । ११७ । इति इन् । ततः । महानानन्दिरिति ।) नन्दिवर्द्धनराजपुत्रः । यथा,—
"चत्वारिंशत्तथा भाव्यो राजा वै नन्दिवर्द्धनः ।
चत्वारिंशत्त्रयश्चैव महानन्दिर्भविष्यति ॥
महानन्दिसुतश्चापि शूद्रायां कलिकांशजः ।
उत्पत्स्यते महापद्मः सर्व्वक्षत्रान्तको नृपः ॥
ततः प्रभृति राजानो भविष्याः शूद्रयोनयः ।
एकराट् स महापद्म एकच्छत्रो भविष्यति ॥"
इति मत्स्यपुराणे २७६ अध्यायः ॥
अपि च ।
"महानन्दिसुतः शूद्रागर्भोद्भवोऽतिलुब्धो महापद्मानन्दः परशुराम इवाखिलक्षत्रियान्तकारी भविता ततः प्रभृति शूद्रा भूपाला भविष्यन्ति । तेन महानन्दिपर्य्यन्तं क्षत्रियं व्यासोत् ।" इति शुद्धितत्त्वधृतविष्णुपुराणम् ॥

महानरकः, पुं, (महान्तश्चातियातनाप्रदो नरकः ।) अतिशयनानाप्रकारयातनास्थानम् । इति पुराणम् ॥ (यथा, मनुः । ४ । ८८ ।

"तामिस्रमन्धतामिस्रं महारौरवरौरवौ
नरकं कालसूत्रञ्च महानरकमेव च ॥")

महानलः, पुं, (महांश्चासौ नलश्चेति।) देवनलः। इति राजनिर्घण्टः॥ (महांश्चासौ अनलश्चेति।) दृढदग्निश्च॥

महानवमी, स्त्री, (महती चासौ नवमी चेति।) आश्विनशुक्लनवमी। यथा,—

श्रीभगवानुवाच।

"दुर्गातन्त्रेण मन्त्रेण कुर्य्युर्दुर्गामहोत्सवम्।
महानवम्यां शरदि बलिदानं नृपादयः॥
आश्विने शुक्लपक्षस्य भवेद्या अष्टमी तिथिः।
महाष्टमीति सा प्रोक्ता देव्याः प्रीतिकरा परा॥
ततोऽनु नवमी या स्यात् सा महानवमी स्मृता।
सा तिथिः सर्व्वलोकानां पूजनीया शिवा-प्रिया॥"

इति कालिकापुराणे ५७ अध्यायः॥

अपि च।

"प्रावृट्काले विशेषेण आश्विने शरदीषु च।
महाशब्दो नवम्यान्तु लोके ख्यातिं गमिष्यति॥"

इति तिथ्यादितत्त्वम्॥

महानसं, क्ली, (महच्च तत् अनश्चेति। +"अनोऽश्मायःसरसां जातिसंज्ञयोः।" ५। ४। ६४। इति संज्ञायां टच्। "आन्महतः समानाधिकरणजातीययोः।" ६। ३। ४६। इति महत आकारादेशः।) रन्धनगृहम्। तत्पर्य्यायः। रसवती २ पाकस्थानम् ३। इत्यमरः। २। ६। २७॥ (तथास्य लक्षणं यथा,—

"प्रशस्तदिग्देशकृतं शुचिभाण्डं महच्छुचि।
सजालकं गवाक्षाढ्यमात्मवर्गनिषेवितम्॥
विकचस्रष्टसंस्रष्टं सवितानं कृतार्चनम्।
परीक्षितस्त्रीपुरुषं भवेच्चापि महानसम्॥
तत्राध्यक्षं नियुञ्जीत प्रायो वैद्यगुणान्वितम्।
शुचयो दक्षिणा दक्षा विनीताः प्रियदर्शनाः॥
सविभक्ताः सुमनसो नीचकेशनखाः स्थिराः।
स्नाता दृढं संयमिनः कृतोष्णीषाः सुसंयुताः॥
तस्य चाज्ञा विधेयाः स्युर्विविधाः परि-कर्म्मिणः।
आहारस्थितयश्चापि भवन्ति प्राणिनो यतः॥
तस्मान्महानसे वैद्यः प्रमादरहितो भवेत्।
माहानसिकवोढारः सौपौदनिकसौपिकाः॥
भवेयुर्वैद्यवशगा ये चान्ये तु केचन॥"

इति सुश्रुते कल्पस्थाने प्रथमेऽध्याये॥)

तद्विवरणं यथा,—

"आग्नेय्यां दिशि कर्त्तव्यमावासस्य महानसम्।
गवाक्षजालमार्गाय भूर्द्वभित्त्युपलेपितम्॥
शुक्लौ तत्र प्रकर्त्तव्या पूर्व्वपश्चिममायता।
दक्षयाम्यादीनि भाण्डानि चाखिलानि च वारिणा॥
तेषु यत् पथ्यतं द्रव्यं गुणवत् सर्व्वसम्मतम्।
तदभावे पचेत्तौक्ष्ये चतुरश्रौविकारजित्॥
कांस्यजे पाचितं यद्धि तद्धितं मतिदं शुचि।
यच्च ताम्रमये सिद्धं न रुच्यं त्वम्लपित्तकृत्॥
सौवर्णे राजते पाथ्यमाढ्यभूमिभृतां गृहे।
तत्पात्रं सर्व्वदोषघ्नं धिषणोनसदायकम्॥"

अथ महानसोपयोग्योपकरणानि।

"वस्तूनि भोजनार्हाणि विविधानि पुनः पुनः।
सर्व्वाणि गुणयुक्तानि स्थापितानि महानसे॥
दास्याग्रमार्ज्जनी वाढ़ा पूतहण्डी सुकूर्चिका।
कर्षणी वेणवं पात्रं जलपूर्णस्थलिञ्जरः॥
वह्निसंजननौ भावः कुद्दालं सुकुठारकः।
दारुखण्डानि शुष्काणि हस्तमात्राणि चैन्धनम्॥
अजीर्णान्यनतिस्थूलान्यजन्तून्यमलानि च।
तितयुक्षालनी पीठो सुघलं चाप्युदूखलम्॥
शूर्पलोष्ट्रशिला दर्व्वी चतुरस्रावपट्टिका।
संदंशकन्तु युगलं वस्त्रखण्डचतुष्टयम्॥
नालिका क्षुरिका चैव सुमूलं सुकटाहकम्।
वह्निसञ्चालनार्थाय दर्व्वी दीर्घा सुलौहजा॥
तन्दूरभ्रूर्भरी स्रावा तप्तकं दृढवेष्टनी।
इत्यादि वस्तुजातं हि युज्यते च महानसे॥"

इति पाकरत्नेश्वरः॥

तत्र रत्नगौया जना यथा,—

"शूद्रशास्त्रविधानज्ञाः परामेद्याः कुलाङ्गनाः।
सर्व्वे महानसे धार्य्या लुप्तकेशनखा जनाः॥"

इति मात्स्ये १८६ अध्यायः॥

महानसोऽपि पुंसि। इत्यमरटीकायां रमानाथः॥

महानाटकं, क्ली, (महच्च तत् नाटकञ्चेति।) नाटकविशेषः। तस्य लक्षणं यथा,—

"एतदेव यदा सर्व्वैः पताकास्थानकैर्युतम्।
अङ्कैश्च दशभिर्धीरा महानाटकमूचिरे॥
एतदेव नाटकम्। यथा, बालरामायणम्।"

इति साहित्यदर्पणः॥ स्वनामख्यातहनूमन्नचित-रामचरितग्रन्थविशेषः। यथा,—

"एष श्रीलहनूमता विरचिते श्रीमन्महानाटके
वीरश्रीयुतरामचन्द्रचरिते प्रत्युद्भृते विक्रमैः।
मिश्रश्रीमधुसूदनेन कविना सन्दर्भ सञ्जीकृते
स्वर्गारोहणनामकोऽत्र नवमो यातोऽङ्क एवेत्यसौ॥"

इति तस्यान्तिमः श्लोकः॥

महानाड़ी, स्त्री, (महती चासौ नाड़ी चेति।) कण्डरा। इति राजनिर्घण्टः॥ (विवरणमस्याः कण्डराशब्दे द्रष्टव्यम्॥)

महानादः, पुं, (महान् नादोऽस्य।) हस्ती। वर्षुकमेघः। (महाश्चासौ नादश्चेति।) महाशब्दः। इति मेदिनी। दे, ५१॥ (यथा, महाभारते। ५। ६६। २।

"इदमद्रिसमं प्राप्ता ये केचिद्भुवि जङ्गमाः।
प्रविशन्तो महानादं नदन्ति भयपीड़िताः॥")

सिंहः। कर्णः। इति हेमचन्द्रः॥ उष्ट्रः। शृङ्गः। इति राजनिर्घण्टः॥ काहलवाद्यम्। इति हारावली॥ (महादेवः। यथा, महाभारते। १३। १७। ४८।

"निशाचरः प्रेतचारी भूतचारी महेश्वरः।
कालयोगी महानादः सर्व्वकामश्चतुष्पथः॥"

महाशब्दयुक्ते, त्रि। यथा, रामायणे। ४। ४०। ३८।

"तत्कालमेव प्रतिमं महोरगनिषेवितम्।
अभिगम्य महानादं तीर्थमेव महोदधिम्॥")

महानिद्रा, स्त्री, (महती सुदीर्घा चासौ निद्रा चेति।) मरणम्। इति जटाधरः॥

महानिम्बः, पुं, (महांश्चासौ निम्बश्चेति।) निम्बवृक्षविशेषः। घोड़ा निम इति भाषा। तत्पर्य्यायः। कैटर्यः २ पवनेष्टः ३ पार्व्वतः ४। इति रत्नमाला॥ (यथा,—

"स्तनस्तनाभ्रनागश्च स्वर्णं तुल्यं प्रकल्पयेत्।
महानिम्बस्य चूर्णन्तु चतुर्भिः सममाहरेत्।
मधुना लेहयेन्मासं लालामेहप्रशान्तये॥"

इति वैद्यकरसेन्द्रसारसंग्रहे प्रमेहाधिकारे॥)

अस्य गुणाः। परमग्राहित्वम्। कषायत्वम्। अम्लत्वम्। शीतलत्वञ्च। इति राजवल्लभः॥ (तथास्य पर्य्यायान्तरं गुणाश्च।

"महानिम्बः स्तनोद्रेका रम्यको विषसूचिकः।
केशासृग्दूषिनिम्बकश्च कार्म्मुको जीव इत्यपि॥
महानिम्बो हिमो रूक्षस्तिक्तो ग्राही कषायकः।
कफपित्तभ्रमच्छर्द्दिकुष्ठहृल्लासरक्तजित्।
प्रमेहश्वासगुल्मार्शो मूषिकाविषनाशनः॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

महानिशा, स्त्री, (महती घोरा निशा।) निशामध्यभागः। तत्पर्य्यायः। निशार्द्धः २ निशीथः ३। इति हेमचन्द्रः। २। ५६॥ * ॥ स्मृत्युक्तमहानिशा सार्द्धप्रहरोपरि प्रहरद्वयम्।

"महानिशा तु विज्ञेया मध्यमं प्रहरद्वयम्।
तत्र स्नानं न कुर्व्वीत कान्यनैमित्तिकादृते॥"

इति रघुनन्दनभट्टाचार्य्यधृतवचनात्। महानिशापरकालस्य नाड़ीचतुष्टयस्य परदिनादित्वेन तदानीं पूर्व्वदिवसीयभोजनानुपपत्तेः। तद्दिनक्रत्यलोपापत्तेश्चेति तिथितत्त्वीयलिखनस्वरसाच्च॥ * ॥ तत्र भक्षणनिषेधो यथा,—

"यन्मुहूर्त्ते यतीते तु रात्रावेव महानिशा।
लभते ब्रह्महत्याञ्च तत्र भुक्ता च नारद!॥
गोमांसविण्मूत्रसमं ताम्बूलञ्च फलं जलम्।
पुंसामभक्ष्यं शुद्धायामोदनस्यापि का कथा॥"

इति ब्रह्मवैवर्त्तपुराणम्॥

तत्र पारणनिषेधो यथा,—

"न रात्रौ पारणं कुर्य्याद्दैवे रोहिणीव्रतात्।
निशायां पारणं कुर्य्याद्वर्ज्जयित्वा महानिशाम्॥
महानिशायां प्राप्तायां तिथिभान्तं यदा भवेत्।
द्वतीयेऽह्नि मुनिश्रेष्ठ! पारणं कुरुते व्रती॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८ अध्यायः॥ देवलोक्ता महानिशा रात्रिमध्यमदण्डद्वयात्मिका। सा द्वितीयप्रहरशेषदण्डद्वतीयप्रहर-

प्रथमदलरूपा ॥ तस्यां शिवलिङ्गोद्भवो यथा,
"माघकृष्णचतुर्दश्यामादिदेवो महानिशि ।
शिवलिङ्गतयोद्भूतः कोटिसूर्यसमप्रभः ॥"
अत्र ।
"महानिशा द्वे घटिके रात्रेर्मध्यमयामयोः ॥"
इति देवलोक्ता महानिशा ॥
घटिका दलरूपा । इति तिथ्यादितत्त्वम् ॥
तान्त्रिकमहानिशा यथा, तन्त्रसारे ।
"गते तु प्रथमे यामे तृतीयप्रहरावधि ।
महानिशायां जप्तव्यं रात्रिशेषे जपेन्न तु ॥"
अपि च ।
"निशा तु परमेशानि ! सूर्य्ये चास्तमुपागते ।
प्रहरे च गते रात्रौ घटिके द्वे परे च ये ।
महानिशा समाख्याता ततश्चातिमहानिशा ॥
अर्द्धरात्रे गते देवि ! पशुभावेन पूजयेत् ।
दण्डद्वये तु या पूजा तत् सर्व्वमक्षयं भवेत् ॥
षष्टकोशे महेशानि ! तत् सर्व्वमल्पतोपमम् ।
सप्तमकोशके देवि ! सर्व्वं चौरोपमं भवेत् ॥
अष्टमकोशके देवि ! द्रव्यतुल्यं न संशयः ।
अतःपरं महेशानि ! विषतुल्यो न संशयः ॥
अतत् सर्व्वं महेशानि ! पशुभावे मयोदितम् ।
दिव्यवीरमते देवि ! तत्त्वज्ञानेन पूजयेत् ॥
पञ्चतत्त्वं समानीय यदि पूजापरो भवेत् ।
कालाकालं महेशानि ! विचारं तत्र वर्জ्जयेत् ॥
अर्द्धरात्रगते देवि ! कुलपूजा प्रकीर्त्तिता ।
भवेत्तत्रागुरूपेण सर्व्वं पूजादिकञ्चरेत् ॥
अतिस्नेहेन देवेशि ! तव स्थाने प्रकाशितम् ।
पशोरग्रे कदाचिद्वै प्रकाशं नैव कारयेत् ॥"
इति गुप्तसाधनतन्त्रे ६ पटलः ॥

महानीचः, पुं, (महानतिशयो नीचः ।) रजकः । इति शब्दमाला ॥ अतिशयहीनवर्णेषु ॥

महानीलः, पुं, (महान् नीलः नीलवर्णः ।) भृङ्गराजः । नागविशेषः । मणिविशेषः । इति मेदिनी । ले, १६१ ॥ (यथा, शिशुपालवधे । १ । १६ ।
"महामहानीलशिलारुचः पुरो
निषेदिवान् कंसरिपुः स विष्टरं ॥"
"सिंहलस्थाकरादूता महानीलास्तु ते स्मृताः ॥
इति भगवानग्रन्थः ।" इति तट्टीकायां मल्लिनाथः ॥) तस्य लक्षणं यथा,—
"यस्तु वर्णस्य भूयस्त्वात् चौरे शुकगुणे स्थितः ।
नीलतां तनुयात् सर्व्वं महानीलः स उच्यते ॥"
इति गारुडे ७२ अध्यायः ॥
(गुञ्जगुल्लातिभेदः । तद्यथा,—
"महिषाक्षो महानीलः कुञ्जरः पद्म इत्यपि ।
हिरण्यः पद्मको श्वेतो गुञ्जगुल्लो मधू ज्ञातयः ॥
महानीलस्तु विज्ञेयः सनामसमलक्षणः ।
महिषाक्षो महानीलो गजेन्द्राणां हितावुभौ ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
सुमेरोर्दक्षिणपार्श्वस्थपर्व्वतविशेषः । यथा, मार्कण्डेये । ५५ । ७ ।

"शोणाम्बरुक्मुञ्जश्च कुलीरोऽथ सुकन्धरान् ।
मणिशैलोऽथ हयवान् महानीलो भवाचलः ॥")
महानीला, स्त्री, (महती चासौ नीला नीलवर्णा चेति ।) महाजम्बूः । इति राजनिर्घण्टः ॥ (विशेषोऽस्य महाजम्बूशब्दे विज्ञेयः ॥)

महानीली, स्त्री, (नील + "नीलादीषधौ ।" ४ । १ । ४२ । इति वार्त्तिकोक्त्या ङीष् । ततः । महती चासौ नीली चेति ।) नीलापराजिता । दृष्टनीली । तत्पर्य्यायः । अमरा २ जनिनीलिका ३ तुत्था ४ श्रीफलिका ५ मेला ६ कैशार्द्दा ७ भर्तृसपत्निका ८ । अस्या गुणाः । गुणाढ्यत्वम् । रङ्गश्रेष्ठत्वम् । सुवर्णदात्रत्वम् । नीलिकामपेक्ष्य सर्व्वकर्म्मसु सगुणत्वम् । इति राजनिर्घण्टः ॥

महानुभावः, त्रि, (महानुभावो माहात्म्यमस्य ।) महाशयः । यथा,—
"सुकृती पुण्यवान् धन्यो धर्म्मी च धर्म्मवानपि ।
महाशयो महेच्छः स्यान्महानुभाव इत्यपि ॥"
इति शब्दरत्नावली ॥
(महात्मा । यथा, शिशुपालवधे । १ । १७ ।
"गृहीतुमार्य्यान् परिचर्य्यया सतु-
र्महानुभावा हि नितान्तमर्थिनः ॥")

महान्तः, पुं, (महत् + प्रथमावहुवचनरूपम् ।) नवधाभक्तियुक्तकृष्णभक्ताः । ते शिवप्रोक्तधर्म्मादयः । यथा,—
"शिवः शैवश्च धर्म्मश्च ब्रह्मा विष्णुर्महान् विराट् ।
सनत्कुमारः कपिलः सनकश्च सनन्दनः ॥
बोढुः पञ्चशिखो दक्षो नारदश्च सनातनः ।
भृगुर्मरीचिर्दुर्वासाः कश्यपः पुलहोऽङ्गिराः ॥
मेधसो लोमशः शुक्रो वशिष्ठः क्रतुरेव च ।
दक्षस्मृतिः कर्दमश्च शक्तिरत्रिः पराशरः ॥
मार्कण्डेयो बलिश्चैव प्रह्लादश्च गणेश्वरः ।
यमः सूर्य्यश्च वरुणो वायुश्चन्द्रो हुताशनः ॥
अकूपारः उलूकश्च नाड़ीजङ्घश्च वायुजः ।
नरो नारायणः कूर्म्मः इन्द्रद्युम्नो विभीषणः ॥
नवधाभक्तियुक्ताश्च कृष्णस्य परमात्मनः ।
एते महान्तो धर्म्मिष्ठा भक्तानां प्रवरास्तथा ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ६० अध्यायः ॥

महापञ्चमूलं, क्ली, (पञ्चानां बिल्वादिमूलानां समाहारः । ततः मध्ये तत् पञ्चमूलमिति ।) दृष्टपञ्चमूलम् । तद्यथा,—
"बिल्वोऽग्निमन्थः श्योनाकः काश्मर्य्यः पाटला तथा ।
सर्व्वेषु मिलितेष्वेषु स्यान्महापञ्चमूलकम् ॥"
इति राजनिर्घण्टः ॥
(यथा, सुश्रुते चिकित्सितस्थाने २० अध्याये ।
"विनिर्गमार्थं वायोश्च स्वेदस्य च सुदुर्मुहुः ।
क्षीरं महापञ्चमूलं शृतिकां चाप्यवर्ष्मिताम् ।")

महापञ्चविधं, क्ली, (पञ्चानां विधानां समाहारः । ततो मध्ये तत् पञ्चविधमिति ।) दृष्टद्रियपञ्चकम् । तद्यथा,—
"अङ्गी च कालकूटश्च मुस्तको वत्सनाभकः ।
प्रच्छकर्णीति योगोऽयं महापञ्चविधाभिधः ॥"
इति राजनिर्घण्टः ॥

महापत्रा, स्त्री, (महान्ति पत्राण्यस्याः ।) महाजम्बूः । इति रत्नमाला ॥ दृष्टपर्य्यायुक्ते, त्रि ॥

महापथः, पुं, (महांश्चासौ पन्थाश्चेति । "आन्महत इति ।" ६ । ३ । ४६ । इति महत आकारादेशः । "ऋक् पूरब्धूःपथामानक्षे ।" ५ । ४ । ७४ । इति समासान्तोऽकारः ।) प्रधानपथः । तत्पर्य्यायः । षष्टापथः २ संसरणम् ३ श्रीपथः ४ राजवर्त्म ५ उपनिष्क्रमणम् ६ उपनिष्करम् ७ । इति हेमचन्द्रः । ४ । ५३ ॥ (यथा, रामायणे । २ । ८० । १६ ।
"पताका शोभिताः सर्व्वे सुनिर्म्मितमहापथाः ॥"
यथा च महाभारते । ५ । ६४ । २० ।
"संमृष्टसंसिक्तरजः प्रतिपेदे महापथम् ॥"
हत्यपथः । "याचायां पथि निदायां महच्छब्दो न दीयते ।" इत्यस्य प्रतिप्रसवार्थवत्त्वात् तथात्वम् । यथा, कथासरित्सागरे । २ । ४३ ।
"तच्छोकादिन्द्रदत्तस्य पिता यातो महापथम् ॥"
सुषुम्ना । यथा, हठयोगप्रदीपिकायाम् । ३ । ४ ।
"सुषुम्ना शून्यपदवी ब्रह्मरन्ध्रं महापथः ।
श्मशानं शाम्भवी मध्यमार्गश्चेत्येकवाचकाः ॥",

महापथगमः, पुं, (महापथस्य महापथे वा गमः गमनम् ।) मरणम् । इति जटाधरः ॥

महापद्मः, पुं, (महत् पद्मं तादृशं चिह्नं शिरसि यस्य ।) अष्टनागान्तर्गतनागभेदः । तत्पर्य्यायः । अतिशुक्लः २ दशविष्कुकमस्तकः ३ । इति हेमचन्द्रः । ४ । ३०५ ॥ (यथा, हरिवंशे । ३ । ११२ ।
"ऐरावतो महापद्मः कम्बलाश्वतरावुभौ ॥"
दर्व्वीकरान्तर्गतसर्पविशेषः । तद् यथा । "कृष्णसर्पो महाकृष्णः कृष्णोदरः श्वेतकपोतो महाकोपोतो बलाहको महासर्पः शुक्लपालो लोहिताक्षो गवेधुकः परिसर्पः खड्गफणः ककुदः पद्मो महापद्मो दर्भपुष्पो दधिमुखः पुण्डरीको भुजकुटीमुखो विष्किरः पुष्पाभिकर्णो गिरिसर्पः ऋजुसर्पः श्वेतोदरो महाशिरा असगन्धं आशीविष इति ॥" इति सुश्रुते कल्पस्थाने चतुर्थेऽध्याये ॥) कुबेरस्य नवनिधन्तर्गतनिधिविशेषः । इति जटाधरः ॥ (यथा, मार्कण्डेये । ६४ । १५ ।
"यस्या वपुषे ! प्रभावेण विद्यायास्तां ग्रहाण मे ।
पद्मिनी नाम विद्येयं महापद्माभिपूजिता ॥"
पुरभेदः । यथा, महाभारते । १२ । ३५३ । १ ।
"आसीत् किल नरश्रेष्ठ ! महापद्मे पुरोत्तमे ।
गङ्गाया दक्षिणे तीरे कश्चिद्विप्रः समाहितः ॥"
दैत्यभेदः । यथा, हरिवंशे । २३२ । ३ ।
"महापद्मो निकुम्भश्च पूर्णकुम्भश्च वीर्य्यवान् ॥"
हस्तिभेदः । यथा, महाभारते । ६ । ६१ । ५ । १ ।

"तस्य चान्येऽपि दिक्पागा वसुधुरनुयायिनः।
अञ्जनो वामनश्चैव महापद्मश्च सुप्रभः॥")
क्ली, लक्षकोटिसंख्या॥ इति लीलावती॥ (यथा, महाभारते। २। ६१। ३।
"अयुतं प्रयुतं चैव पद्मं खर्व्वमथार्व्बुदम्।
शङ्खश्चैव महापद्मं निखर्व्वं कोटिरेव च॥")
शुक्लपद्मम्। इति रत्नमाला॥

महापातकं, क्ली, (महद्दतिशयितं पातकम्।) पापविशेषः। तत्तु पञ्चविधम्। यथा,—
"ब्रह्महत्या सुरापानं स्तेयं गुर्व्वङ्गनागमः।
महान्ति पातकान्याहुः संसर्गश्चापि तैः सह॥"
इति मानवे ११ अध्यायः॥
"महापातककर्त्तॄणां चिह्नं सप्तजन्मसु जायते।
बाधते व्याधिरूपेण तस्य कृच्छ्रादिभिः समः॥"
इति प्रायश्चित्तपीयूषकर्म्मविपाकः॥
"तुलामकरमेषेषु प्रातःस्नानं विधीयते।
हविष्यं ब्रह्मचर्य्यञ्च महापातकनाशनम्॥"
इति मलमासतत्त्वम्॥
"कृष्णेति मङ्गलं नाम यस्य वाचि प्रवर्त्तते।
भस्मीभवन्ति राजेन्द्र! महापातककोटयः॥"
इति पुराणम्॥

महापातकी, [न्] त्रि, (महापातकमस्त्यस्येति। महापातक+इनिः।) पञ्चप्रकारमहापातकयुक्तः। स च पतितः। यथा,—
"महापातकिनो ये च पतितास्ते प्रकीर्त्तिताः।
पतितानां न दाहः स्यान्नान्त्येष्टिर्नास्थिसञ्चयः॥
न चाम्बुपातः पिण्डो वा कार्य्यं आद्धादिकं क्वचित्।
एतानि पतितानान्तु यः करोति विमोहितः॥
तप्तकृच्छ्रद्वयेनैव तस्य शुद्धिर्न चान्यथा॥"
इति शुद्धितत्त्वधृतविष्णुपुराणवचनम्॥
पारिभाषिकमहापातकी यथा,—
"कृतप्राणप्रतिष्ठाञ्च नीर्य्यैर्यां प्रतिमां द्विज!।
दुर्गां न प्रणमेद्यस्तु स महापातकी स्मृतः॥"
इति देवीपुराणे व्यासनारदसंवादः॥
अपि च।
"पितरं मातरं भार्य्यां गुरुपत्नीं गुरुं परम्।
यो न पुष्णाति कापत्त्वात् स महापातकी शिव!॥"
इति ब्रह्मवैवर्त्ते गणपतिखण्डे ४४ अध्यायः॥
(यथा च महानिर्व्वाणतन्त्रे। ३। ६२।
"जातिभेदो न कर्त्तव्यः प्रसादे परमात्मनः।
योऽशुद्धबुद्धिं कुरुते स महापातकी भवेत्॥")

महापापं, क्ली, (महच्च तत् पापञ्चेति।) महापातकम्। यथा,—
"महापापेषु सर्व्वं स्यात् तदर्द्धन्तूपपातके।
दद्यात् पापेषु षड्भागं ज्ञात्वा व्याधिबलाबलम्॥"
इति मलमासतत्त्वम्॥

महापारवत, क्ली, (महच्च तत् पारेवतञ्चेति।) फलवृक्षविशेषः। बड़ा पारेवत इति हिन्दी भाषा॥ तत्पर्य्यायः। स्वर्णपारेवतम् २ ताम्राण्डिकम् ३ खारिकम् ४ रक्तपारेवतम् ५ हृष्टपारेवतम् ६ द्वीपजम् ७ द्वीपखर्ज्जूरम् ८। अस्य गुणाः। मधुरत्वम्। बलकारित्वम्। पुष्टिवर्द्धनत्वम्। हृद्यत्वम्। मूर्च्छाभ्रमघ्नत्वम्। पारेवतादधिकगुणत्वञ्च। इति राजनिर्घण्टः॥

महापाशः, पुं, (महान् पाशोऽस्य।) यमदूतविशेषः। इति हरिवंशे भविष्यपर्व्वणि। २६। १२॥ (महांश्चासौ पाशश्चेति।) हरितपाशश्च॥

महापासकः, पुं, (पस्यति बाधते निराकरोति परकालेश्वरादिकमिति। पस्+ण्वुल्। ततः महांश्चासौ पासकश्चेति।) बुद्धभिक्षुकः। तत्पर्य्यायः। चैलुकः २ आमगैरः ३ प्रव्रजितः ४ गोमीनः ५। इति त्रिकाण्डशेषः॥ (महोपासक इति पाठः क्वचित् दृश्यते॥)

महापिण्डीतकः, पुं, (पिण्डीं तनोतीति। तन्+डः संज्ञार्थे कन्। ततः महांश्चासौ पिण्डीतकश्चेति। पिण्डाकारफलत्वादस्य तथात्वम्।) कृष्णवर्णमहामदनवृक्षः। तत्पर्य्यायः। वाराहः २। अस्य गुणाः। श्रेष्ठत्वम्। कटुतिक्तरसान्वितत्वम्। कृमिघ्नत्वम्। कफकृद्रोगपक्वामाशयशोधनत्वञ्च। इति राजनिर्घण्टः॥

महापिण्डीतरुः, पुं, (महांश्चासौ पिण्डीतरुश्चेति।) वृक्षविशेषः। पेड़िरा इति हिन्दी भाषा। तत्पर्य्यायः। श्वेतपिण्डीतकः २ करहाटः ३ क्षुरः ४ शुक्लकोषतरुः ५ शुरः ६ पिण्डीतरुः ७। अस्य गुणाः। कषायत्वम्। उष्णत्वम्। त्रिदोषशमनत्वम्। चर्म्मरोगापहत्वम्। विशेषात् रक्तदोषनाशित्वञ्च। इति राजनिर्घण्टः॥

महापीलुः, पुं, (पीलति प्रतिष्ठते विषपित्तादिकमिति। पील+"स्तृगयादयश्च।" उणा० १।३८। इति कुः। ततो महान् पीलुरिति कर्म्मधारयः।) पीलुवृक्षविशेषः। तत्पर्य्यायः। वृक्षपीलुः २ महाफलः ३ राजपीलुः ४ महावृक्षः ५ मधुपीलुः ६। अस्य फलगुणाः। मधुरत्वम्। हृद्यत्वम्। विषनाशित्वम्। पित्तप्रशमनत्वम्। रुच्यत्वम्। आमघ्नत्वम्। दीपनीयकत्वञ्च। इति राजनिर्घण्टः॥

महापुराणं, क्ली, (महच्च तत् पुराणञ्चेति।) एकादशलक्षणयुक्तव्यासप्रणीताष्टादशसंख्यकपुराणविशेषः। तस्य लक्षणं यथा,—
"सर्गश्चापि विसर्गश्च स्थितिस्तेषाञ्च पालनम्।
कर्म्मणां वासना वार्त्ता मन्वन्तानाञ्च क्रमेण च॥
वर्णनं प्रलयानाञ्च मोक्षस्य च निरूपणम्।
उत्कीर्त्तनं हरेरेव देवानाञ्च पृथक् पृथक्।
दशाधिकं लक्षमञ्च महतां परिकीर्त्तितम्॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १३२ अध्यायः॥
(अष्टादशमहापुराणानां विशेषविवरणलक्षणादिकं पुराणशब्दे द्रष्टव्यम्॥)

महापुरुषः, पुं, (महांश्चासौ पुरुषश्चेति।) श्रेष्ठनरः। (यथा, श्रीमद्भागवते। ६। १२। २०।
"भवानतार्षीन्मायां वै वैष्णवीं जनमोहिनीम्।
यद्विद्यायासुरं भावं महापुरुषतां गतः॥")
नारायणः। यथा,—
"श्रीयं सदा परिभवन्नमभीष्टदोहं
तीर्थास्पदं शिवविरिञ्चिनुतं शरण्यम्।
भृत्यार्त्तिहं प्रणतपालभवाब्धिपोतं
वन्दे महापुरुष! ते चरणारविन्दम्॥
त्यक्त्वा सुदुस्त्यजसुरेप्सितराज्यलक्ष्मीं
धर्म्मिष्ठ आर्य्यवचसा यदगादरण्यम्।
मायामृगं दयितयेप्सितमन्वधाव-
वन्दे महापुरुष! ते चरणारविन्दम्॥"
इत्याह्निकतत्त्वधृतश्रीभागवतम्॥

महापुरुषदन्ता, स्त्री, (महापुरुषस्य दन्ता इव मूलानि यस्याः।) श्वेतमूली। इति रत्नमाला॥ (विवरणमस्याः श्वेतमूलीशब्दे ज्ञातव्यम्॥)

महापुरुषदन्तिका, स्त्री, (महापुरुषदन्ता+स्वार्थे कन्। स्त्रियां टाप् अत इत्वञ्च।) महाश्वेतावरी। इति राजनिर्घण्टः॥

महापुष्पा, स्त्री, (महत् प्रशस्तं पुष्पमस्याः। स्त्रियां टाप्।) अपराजिता। इति शब्दचन्द्रिका॥ (यथा, सुश्रुते उत्तरतन्त्रे ५४ अध्याये।
"दर्भपुष्पा महापुष्पा प्रसूनाक्षिपिटाक्षयाः॥"
महापुष्पविशिष्टे, त्रि॥)

महापृष्ठः, पुं, (महत् विपुलं पृष्ठमस्य।) उष्ट्रः। इति राजनिर्घण्टः॥ त्रि, हृद्यत्पृष्ठश्च॥

महाप्रकृतिः, स्त्री, (महती श्रेष्ठा प्रकृतिर्जगन्मूलकारणम्।) दुर्गा। यथा,—
"चितिश्चैतन्यभावाद्वा चेतना वा चितिः स्मृता।
महान् व्याप्य स्थिता सर्व्वं महा वा प्रकृतिर्मता॥"
इति देवीपुराणे ४५ अध्यायः॥

महाप्रभः, त्रि, महती प्रभा यस्येति। अतिशयदीप्तियुक्तः। (यथा, हरिवंशे भविष्यपर्व्वणि। २६। १२।
"ततश्चक्रं महाघोरं सहस्रारं महाप्रभम्॥")

महाप्रभा, स्त्री, (महती चासौ प्रभा चेति।) महती दीप्तिः। यथा। महाप्रभात्वावच्छिन्नाभावोऽन्धकारः। इति सामान्यलक्षणायां जगदीशः॥

महाप्रभुः, पुं, (महांश्चासौ प्रभुश्चेति।) परमेश्वरः। यथा,—
"वन्देऽनन्ताद्भुतैश्वर्य्यं श्रीचैतन्यं महाप्रभुम्।
नीचोऽपि यत्प्रसादात् स्यात् सदाचारप्रवर्त्तकः॥"
इति हरिभक्तिविलासे ३ विलासः॥
"अनन्तमद्भुतञ्चाविर्वं ऐश्वर्यं प्रभावो यस्य तं यतो महाप्रभुं परमेश्वरम्।" इति तट्टीकायां जीवगोस्वामी॥ श्रीचैतन्यः। यथा,—
"सोऽयं नीलगिरीश्वरः सविभवो यात्रा च सा गुण्डिचा

ते ते दिग्विदिगागता: सुकृतिनस्तान्ता दिष्टचारुनय: ।
आरामश्च त एव नन्दनवनश्रीणां तिरस्कारिण: सर्व्वाणयेव महाप्रभुं वत विना शून्यानि मन्या-मह्रे ॥"
इति चैतन्यचन्द्रोदयनाटकम् ॥

महाप्रलय:, पुं, (महांश्चासौ प्रलयो जगता-मवमानश्चेति ।) त्रिलोकनाश: । तत्पर्य्याय: । संहार: २ । इति हलायुध: ॥ तस्य विवरणं यथा,—
मार्कण्डेय उवाच ।
"मन्वन्तरं मनो: कालो यावत् पालयते प्रजा: । एको मनु: स कालस्तु मन्वन्तरमिति स्मृतम् । तदेकसप्ततिगुणैर्दिनामिह जायते । तैश्चतुर्दशभि: कल्पो दिनमेकन्तु वेधस: ॥ दिनान्ते वेधसो जाति सुषुप्ता तस्य जायते । योगनिद्रा महामाया समायाति पितामहम् ॥ नाभिपद्मं प्रविश्याथ विष्णोरमिततेजस: । सुप्तं स शेते भगवान् ब्रह्मा लोकपितामह: ॥ ततो विष्णु: स्वयं भूत्वा रुद्ररूपी जनार्द्दन: । पूर्व्ववन्नाशयामास स सर्व्वं भुवनत्रयम् ॥ वायुना वह्निना सर्व्वं दाहयामास वै यथा । महाप्रलयकालेषु तथा सर्व्वं जगत्त्रयम् ॥ जनं यान्ति प्रतापार्त्ता महर्लोकनिवासिन: । त्रैलोक्यं दाहयामास पीड़िता दारुणाग्निना ॥ तत: कालान्तकैर्मेघैर्नानावर्णैर्महाम्बनै: । सप्तधाभ्रं महावृष्टिमापूर्य्य भुवनत्रयम् ॥ जलतल्पेशयोंघैरावृत्यमानसङ्गते: । निधाय जठरे लोकानिमांस्त्रीन् स जनार्द्दन: ॥ नागपर्य्यङ्कशयने शेते स परमेश्वर: । प्रयानं नाभिकमले ब्रह्माणं स जगत्प्रभु: ॥ संस्थाप्य त्रीनिमाल्लोकान् दग्ध्वा दग्ध्वा श्रिया सह ।
शेते स भोगिशय्यायां ब्रह्मा नारायणात्मक: ॥ योगनिद्रावशं यातस्त्रैलोक्यग्रासदुःखित: ॥ त्रैलोक्यमखिलं दग्धं यदा कालाग्निना तदा । जगत: पृथिवीं त्यक्त्वा विष्णोरन्तिकमागत: ॥ तेन त्यक्ता तु पृथिवी चक्रमाद्यधो गता । पतिता कूर्म्मपृष्ठे तु विशीर्णेव तदाभवत् ॥ कूर्म्मोऽपि महतो यत्नाच्चलन्तीं पृथिवीं बले । ब्रह्माण्डं च राक्रम्य पृष्ठे दृढे धरां तदा ॥ ब्रह्माण्डसप्तसंयोगात्कूर्म्मेणा पृथिवी भवेत् । इति तां परिणम्याथ कूर्म्मरूपी जनार्द्दन: ॥ जगत्स्थौर्य्यसंस्थानार्थतया धरया तदा । कूर्म्मपृष्ठं महत्तरैर्वेष्टितं नीहतम् ॥ जगत्सत्त्व गत्वा तु यत्र क्षीरोदसागर: । तत्र सर्व्वं त्रिया सुप्तं सुषुप्तं जगार्द्दनम् ॥ पद्मया मधया दृष्टे त्रैलोक्यग्रासदुःखितम् । पूर्व्वं पद्मं विनिर्द्धूय पद्मं कृत्वा महाबल: । विष्णुमाज्ञापयामास शेषाख्य: परमेश्वर: ॥ सप्तोपाधानसंस्थोऽसौ क्षीरार्णवं फणाम् । उत्तरां शार्ङ्गशय्यायै उपाधानं महाबल: ॥ तावच्चक्रं तदा चक्रे स शेष: पश्चिमां फणाम् । स्वयन्तु वीजयामास शेषरूपी जनार्द्दनम् ॥ शङ्खं चक्रं नन्दकासिमिषुधी द्वे महाबल: । ऐशानयाथ फणया स दधे गरुड़ं तदा ॥ गदां पद्मञ्च शार्ङ्गञ्च तथैव विविधायुधम् । यानि चान्यानि तत्यानन्नाग्नेया फणया दधौ ॥ एवं कृत्वा स्वकं कार्य्यं शयनीयं तदा हरे: । पृथ्वीमधरकायेन समामाक्रम्य चाम्भसि ॥ त्रैलोक्यब्रह्मसहितं सलक्ष्मीकं जनार्द्दनम् । सोपासङ्गजगद्गीतं जगत्कारणकारणम् ॥ नित्यानन्दं वेदमयं ब्रह्मण्यं परमेश्वरम् । जगत्कारणकर्त्तारं जगत्कारणकारणम् ॥ भूतभव्यभवन्नाथं परापरपतिं हरिम् । दधार शिरसानन्त: स्वयमेव स्वकां तनम् ॥ एवं ब्रह्मदिनस्यैव प्रमाणेन निशां हरि: । सन्ध्याञ्च समधिप्राप्य शेते नारायणोऽव्यय: ॥ यस्मादयन्तु प्रलयो ब्रह्मण: स्याद्दिने दिने । तस्माद्दैनन्दिनमिति ख्यापयन्ति पुराविद: ॥ अतीतायां निशायान्तु ब्रह्मा लोकपितामह: । त्यक्त्वा निद्रां समुत्तस्थौ स पुन: सृष्टये त्विह ॥"
इति कालिकापुराणे २७ अध्याय: ॥
न्यायमते अन्यभावानधिकरणकाल: । स च चरमध्वंसरूप: ॥

महाप्रसाद:, पुं, (महांश्चासौ प्रसादश्चेति ।) विष्णुनैवेद्यादि: । यथा,—
"पादोदकञ्च निर्म्माल्यं नैवेद्यञ्च विशेषत: । महाप्रसाद इत्युक्ता याज्ञं विष्णो: प्रयत्नत: ॥"
इत्येकादशीतत्त्वधृतमत्स्यसूक्तवचनम् ॥ श्रीजगन्नाथस्य महाप्रसादमाहात्म्यं जगन्नाथ-शब्दे द्रष्टव्यम् ॥ अतिशयप्रसन्नता च ॥ (महान् प्रसादोऽस्य । शिव: । यथा, महाभारते । १३ । १७ । १३६ ।
"महाप्रसादो दमन: शत्रुहा श्वेतपिङ्गल: ॥")

महाप्रस्थानगमनं, क्ली, (प्रस्थीयते अस्मिन्निति । प्र + स्था + ल्युट् । महत् प्रस्थानं महापथ: । तत्र गमनम् ।) महापथगमनम् । तत्तु मरणो-द्देशेन हिमालयपर्य्यन्तप्रयाणम् । तच्च कलौ निषिद्धम् । यथा, वृहन्नारदीये ।
"सप्तप्रयाजास्त्यागेन कमण्डलुविधारणम् । द्विजानामसवर्णासु कन्यासूपयमस्तथा ॥ देवरेण सुतोत्पत्तिर्मधुपर्के पशोर्व्वध: । मांसादनं तथा आर्द्धे वानप्रस्थाश्रमस्तथा ॥ दत्तायाश्चैव कन्याया: पुनर्द्दानं वरस्य च । दीर्घकालं ब्रह्मचर्य्यं नरमेधाश्वमेधकौ ॥ महाप्रस्थानगमनं गोमेधश्च तथा मखम् । इमान् धर्म्मान् कलियुगे वर्ज्यानाहुर्म्मनी-षिण: ॥"
इत्युद्वाहतत्त्वम् ॥

महाप्राण:, पुं, (महान्तो दीर्घकालस्थायिन: प्राणा यस्य स: ।) श्लोकाक: । इति राज-निर्घण्ट: ॥ वर्णविशेष: । स च । ख घ छ झ ठ ढ थ ध फ भ ह ष ष्ट रूप: । यथा,—
"वर्गाणां प्रथमतृतीयपञ्चमा: प्रथमतृतीययमौ य र ल वाचाल्यप्राया: । अन्ये महाप्राणा इत्यर्थ: ।" इति सिद्धान्तकौमुदी ॥ (महाश्चासौ वर्ण: । यथा, श्रीमद्भागवते । ६ । ११ । ६ ।
"एवं सुरगणान् क्रुद्धो भीषयन् वपुषा रिपून् । अनदत् सुमहाप्राणो येन लोका विचेतस: ॥")

महाफल:, पुं, (महत् पूजादौ प्रशस्तं पूर्य्यं वा फलमस्य ।) विल्ववृक्ष: । इति रत्नमाला ॥ (महच्च तत् फलञ्चेति ।) वृहत्फले, क्ली ॥ (यथा, मनौ । ३ । १२८ ।
"श्रोत्रियायैव देयानि हव्यकव्यानि दातृभि: । अर्हत्तमाय विप्राय तस्मै दत्तं महाफलम् ॥")

महाफला, स्त्री, (महत् फलं आरोग्यादिकं यस्या: ।) इन्द्रवारुणी । इति जटाधर: ॥ (अस्या: पर्य्यायो भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।
"ऐन्द्रीन्द्रवारुणी चित्रा गवाक्षी च गवादनी । वारुणी च पराप्युक्ता सा विशाला महाफला ॥ श्वेतपुष्पा रुगाक्षी च रुग्वैरारुग्गदापनी ॥")

राजजम्बू:। तत्पर्य्यायो यथा, तत्रैव ।
"फलेन्द्राकथितानन्दो राजजम्बूर्महाफला ॥"

कटुतुम्बी । तत्पर्य्यायो यथा, तत्रैव ।
"इक्ष्वाकु: कटुतुम्बी स्यात् सा तुम्बी च महा-फला ॥"

महाकोशातकी । तत्पर्य्यायो यथा, तत्रैव ।
"महाकोशातकी प्रोक्ता घण्टिघोषा महा-फला ।
धामार्गवो घोषकश्च घण्टिपर्णश्च स स्मृत: ॥")

महाफेणा, स्त्री, (महती फेणा ।) शिरीष: । इति शब्दचन्द्रिका ॥

महाबलं, क्ली, (महदतिशयितं बलं सामर्थ्यमस्मात् । महत् बलमस्येति वा ।) सीसकम् । इति हेमचन्द्र: ॥ (तथास्य पर्य्याय: ।
"नागं महाबलं सीसं पिण्डं योगेष्टसीसकम् ॥"
इति वैद्यकरत्नमालायाम् ॥)

महाबल:, पुं, (महदुत्कृष्टं बलं ऐश्वर्य्यं यस्य ।) वृक्ष: । इति विकाण्डशेष: ॥ (पितृगणविशेष: । यथा, मार्कण्डेये । ९९ । ४६ ।
"महान् महात्मा महितो महिमावान् महा-बल: ।
गणा: पञ्च तथैवैते पितृणां प्रापनाशना: ॥")

वायु: । बलीयसि, त्रि । इति हेमचन्द्र: । ४ । १०३ ॥ (यथा, रामायणे । १ । १ । ३४ ।
"नियुज्यमानो राज्याय नेक्ष्वाकाय महाबल: । स जगाम वनं वीरो रामपादप्रसादक: ॥")

महाबला, स्त्री, (महच्चलमस्या: ।) बलाभेद: । पीतवाट्यालक: । तत्पर्य्याय: । अक्ष्यग्रोक्ता २ अतिबला ३ पीतपुष्पी ४ । इति रत्नमाला ॥ (अस्या: पर्य्यायो यथा,—
"वाट्या वाट्यालिका वाट्या सैव वाट्यालकापिच । महाबला पीतपुष्पा महदेवी च सा स्मृता ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

सर्व्वान् लोकान् विचरते दितीय इव भास्करः ।
अष्टमे राधसश्चास्य भारती रमते फलम् ॥
चन्द्रादयनिभं रम्यं विमानमधिरोहति ।
चन्द्रराजप्रतीकाशैर्दिव्यैर्युक्तं मनोजवैः ॥
सेव्यमानो वरस्त्रीभिः पञ्चात् कान्ततरैर्मुखैः ।
मेरुकल्पानां निगदेन गृहराजाश्च निस्वनैः ॥
अष्टौ परमनारीणां सुखमुग्रो विभुञ्जते ।
नवमे क्रतुराजस्य वाजिमेधस्य भारत ! ॥
काञ्चनस्तम्भनिर्यूहं वैदूर्य्यकृतवेदिकम् ।
शातकुम्भमयैर्दिव्यैर्वासैः सर्व्वतो वृतम् ॥
सेवितं चामरैः सर्व्वैर्दिव्यैर्दिव्यैः परिच्छदैः ।
विमानं समधिष्ठाय श्रिया परमया ज्वलन् ॥
दिव्यमाल्याम्बरधरो दिव्यचन्दनरूषितः ।
मोदते देवतैः सार्द्धं दिवि देव इवापरः ॥
दशमं पारमं प्राप्य द्विजातीनभिवन्द्य च ।
किङ्किणीजालनिर्घोषं पताकाध्वजशोभितम् ॥
पञ्चदैविकसंकाशं वैदूर्य्यमणितोरणम् ।
हेमजालपरिक्षिप्तं प्रभावद्भीसुखम् ॥
गन्धर्व्वैर्गीतकुशलैरप्सरोभिश्च शोभितम् ।
विमानं सुकृतादानं सुखेनैवोपपद्यते ॥
सुकृटेनार्कवर्णेन भास्वद्भविभूषिणा ।
दिव्यपद्मदिनाभाभो दिव्यमाल्यविभूषितः ।
दिव्यान् लोकान् विचरति दिव्यैर्भोगैः समन्वितः ।
विबुधानां प्रसादेन श्रिया परमया युतः ॥
अथ वर्षशतानेवं सार्द्धमेकं महीयते ॥
अथ गन्धर्वसहितः सहस्राण्येकविंशतिम् ।
पुरन्दरपुरे रम्ये प्रहर्षेण सह मोदते ॥
दिव्ययानविमानेषु लोकेषु विविधेषु च ।
दिव्यनारीगणाकीर्णो निवसत्यमरो यथा ॥
ततः सूर्य्यस्य भवने चन्द्रस्य भवने तथा ।
शिवस्य भवने राजन् ! विख्यायति सलोकताम् ॥
एवमेतन्महाराज ! गात्र कार्य्या विचारणा ।
श्रद्धानेन वै भाव्यमेवमाह गुरुर्मम ॥
यो नरस्य तु दातव्यं मनसा यद्यदिच्छति ।
एतत्प्रभवयानानि याचकस्य विशेषतः ॥
कटकं कुण्डलश्चैव प्रणतश्च तथापरम् ।
यज्ञश्चैव विधिश्चैव गन्धश्चैव विशेषतः ।
दैवतं पूजयेत्तेषु विष्णुलोकमवाप्नुयात् ॥
अतः परं प्रवक्ष्यामि यानि देयानि भारते ।
याचमाने तु विप्रेभ्यो राजन् ! पर्व्वणि पर्व्वणि ॥
भूतिं देहस्य सत्त्वस्य माहात्म्यं भरतर्षभ ! ।
धर्म्महेतोश्च विज्ञाय क्षत्रियाणां नराधिप ! ॥
क्षत्रियाश्च द्विजादौ तत: कार्य्ये प्रवर्त्तते ।
समाप्ते पर्व्वणि तत: स्वशक्त्या पूजयेत् द्विजान् ॥
आदौ तु याचकस्तत्र मन्त्रगन्धसमन्वितम् ।
विधिवद्दीक्षयेद्राजन् ! मन्त्रं पायसमुत्तमम् ॥
ततो घृतक्षतप्रायं पायसं मधुसर्पिषा ।
याचकेभ्यो ददेद्राजन् ! दद्यादेव गुडौदनम् ॥
घृतपूपैश्च पूपैश्च मोदकैश्च समन्वितम् ।
सर्व्वमेतद्दि राजेन्द्र ! दद्यादेव द्विजान् ॥
आरण्यके फलफलैस्तर्पयेत्तु द्विजोत्तमान् ।
चरणीपर्व्व चासाद्य फलकुम्भान् प्रदापयेत् ॥
तर्पणानि च मुख्यानि रम्यमूलफलानि च ॥
सर्व्वकामगुणोपेतं विप्रेभ्योऽन्नं प्रदापयेत् ।
विराटपर्व्वणि तथा वासांसि विविधानि च ॥
उद्योगे भरतश्रेष्ठ ! सर्व्वकामगुणान्वितम् ।
भोजनं भोजयेद्विप्रान् गन्धमाल्यैरलङ्कृतान् ॥
भीष्मपर्व्वणि राजेन्द्र ! दत्त्वा यानमनुत्तमम् ।
तत: सर्व्वगुणोपेतमन्नं दद्यात् सुसंस्कृतम् ॥
द्रोणपर्व्वणि विप्रेभ्यो भोजनं परमार्चितम् ।
शराश्च दद्या राजेन्द्र ! चापान्यसिवरास्तथा ॥
कर्णपर्व्वण्यपि तथा भोजनं सार्व्वकामिकम् ।
विप्रेभ्य: संस्कृतं सम्यक् दद्यात् संयतमानस: ॥
शल्यपर्व्वणि राजेन्द्र ! मोदकै: सगुडौदनै: ।
सूपपूपैस्तर्पणैश्चैव सर्व्वमन्नं प्रदापयेत् ॥
गदापर्व्वण्यपि तथा सुहृमिश्रं प्रदापयेत् ॥
स्त्रीपर्व्वणि तथा रत्नैस्तर्पयेत्तु द्विजोत्तमान् ।
घृतौदनं पुरस्कृत्य ऐषीके दापयेत् पुन: ॥
ततः सर्व्वगुणोपेतमन्नं दद्यात् सुसंस्कृतम् ।
शान्तिपर्व्वण्यपि तथा हविष्यं भोजयेद् द्विजान् ॥
आश्वमेधिकमासाद्य भोजनं सार्व्वकामिकम् ।
तथाश्रमनिवासे तु हविष्यमोजयेत् द्विजान् ॥
मौषले सार्व्वगुणिकं गन्धमाल्यानुलेपनम् ।
महाप्रास्थानिके तद्वत् सर्व्वकामगुणान्वितम् ॥
स्वर्गपर्व्वण्यपि तथा हविष्यं भोजयेद्द्विजान् ।
हरिवंशे पर्व्वणि च पायसं तत्र भोजयेत् ॥
पारगे पारगे राजन् ! यथावद्भरतर्षभ ! ।
समाप्य सर्व्वा: प्रयत: संहिता: श्राद्धकोविद: ॥
शुभे देशे निवेश्याथ चौमवस्त्राभिसंवृता: ।
शुक्लाम्बरधर: सर्व्वो शुचिर्भूत्वा स्वलङ्कृत: ॥
अर्चयेत यथान्यायं गन्धमाल्यै: पृथक् पृथक् ।
संहितापुस्तकान् राजन् ! प्रयत: सुसमाहित: ॥
भक्ष्यैर्भोज्यैश्च पेयैश्च कामैश्च विविधै: शुभै: ।
हिरण्यैश्च सुवर्णैश्च दक्षिणामथ दापयेत् ॥
देवता: स्त्रीरूपेतु सर्व्वा नरनारायणौ तथा ।
ततो गन्धैश्च माल्यैश्च स्वलंकृत्य द्विजोत्तमान् ॥
तर्पयेद्विविधै: कामैर्दानैश्चोपायनैस्तथा ।
अतिरात्रस्य यज्ञस्य फलं प्राप्नोति मानव: ॥
प्राप्नुयाच्च क्रतुश्रेष्ठं तथा पर्व्वणि पर्व्वणि ।
याचको भरतश्रेष्ठ ! यस्त्वाहरपदक्षर: ॥
भविष्यं श्रावयेद्विद्वान् भारतं भरतर्षभ ! ।
सुकृतवतस्तु द्विजेन्द्रस्य यथावत् संप्रदापयेत् ॥
याचकं भरतश्रेष्ठ ! भोजयित्वा स्वलङ्कृतम् ।
याचके परितुष्टे तु शुभा प्रीतिरनुत्तमा ॥
श्राद्धमेतु तु तुष्टेषु प्रजा: सर्व्वदेवता: । ॥
ततो हि वरणं कार्य्यं द्विजानां भरतर्षभ ! ॥
सर्व्वकामैर्यथान्यायं साधुभिश्च पुरस्कृतै: ।
इत्येष विधिरद्दिष्टो मया ते द्विपदां वर ! ॥
श्रद्धानेन वै भाव्यं यस्मात् त्वं परिपृच्छसि ।
भारतश्रवणादस्य प्राप्तं च पुरुषोत्तम ! ॥
सदा यत्नवता भाव्यं श्रियस्तु परमिच्छता ॥
भारतं शृणुयान्नित्यं भारतं परिकीर्त्तयेत् ।
भारतं भवने यस्य तस्य हस्तगतो जय: ॥
भारतं परमं पुण्यं भारते विविधा: कथा: ।
भारतं सेवते देवैर्भारतं परमं पदम् ॥
भारतं सर्व्वशास्त्राणामुत्तमं भरतर्षभ ! ।
भारतात् प्राप्यते मोक्षस्तत्त्वमेतद्ब्रवीमि ते ॥
महाभारतमाख्यानं चित्तिं गाध सरस्वतीम् ।
ब्राह्मणान् क्षत्रियांश्चैव कीर्त्तयन्नावसीदति ॥
वेदे रामायणे पुण्ये भारते भरतर्षभ ! ।
आदौ चान्ते च मध्ये च हरि: सर्व्वत्र गीयते ॥
यत्र विष्णुकथा दिव्या: श्रुतयश्च सनातना: ।
तच्छ्रोतव्यं मनुष्येण परं परमिच्छता ॥
एतत् पवित्रं परममेतद्धर्म्मनिदर्शनम् ।
एतत् सर्व्वगुणोपेतं श्रोतव्यं भूतिमिच्छता ॥"
इति महाभारते हरिवंशे सर्व्वपर्व्वानुकीर्त्तनम् ॥ * ॥ त्रिषष्टिवर्णसंयुक्तमित्यत्र त्रिषष्टिवर्णा: । अ इ उ ऋ ऌ इति ह्रस्वपञ्चकम् । आ ई ऊ ॠ ॡ इति दीर्घपञ्चकम् । आ ३ ऊ ॠ ॡ इति प्लुतपञ्चकम् । ए ओ ऐ औ च दीर्घा: । प्लुतस्त्वेनापरिगणितत्वम् । अं अ: क + पर इति चत्वार: । ऋ ॡ इति अच्संज्ञकौ द्वौ । अनुनासिकश्चैक: । तथा कादिमावसाना: पञ्चविंशतिवर्णा: । अन्त:स्थाश्चत्वार: । ऊष्मचतुष्टयमिति त्रिषष्टि: । इति ॥ * ॥ वर्णानां किलाष्टौ स्थानानि भवन्ति तानि यथा,—
"उर: कण्ठ: शिरस्तालु जिह्वादन्तौष्ठनासिका: ।
अष्टौ स्थानानि वर्णानां ये विदुस्ते हि पाठका: ॥"*॥
पारगं यथा,—
"भारतं प्लुतपर्व्वोक्तं मुनिना तत्त्वदर्शिना ।
पर्व्वभिर्हृद्यभिश्चेयं पर्व्वणां पारगं स्मृतम् ॥"
इति विक्रमादित्य:—॥
"द्यूतान्तं प्रथमं प्रोक्तं द्वितीयं वनवासिकम् ।
उद्योगान्तं तृतीयन्तु भीष्मान्तश्च तुरीयकम् ॥
पञ्चमं द्रोणपर्व्वान्तं कर्णान्तं पारगं नत: ।
विशोकान्तं सप्तमन्तु शान्तिपर्व्वान्तमष्टमम् ॥
नवमं स्वर्गपर्व्वान्तमाश्वमेधान्तमत: परम् ॥"
इति च भारतटीकायां अर्जुनमिश्र: ॥
(अन्यत्सर्व्वं भारतग्रन्थे द्रष्टव्यम् ॥)
महाभीता, स्त्री, (महत्यधिका भीतिश्च ।) सञ्जातभय: । यथा, ग्रन्थचन्द्रिकायाम् ।
"सञ्जल्पन्ती महाभीता वशिनी च मघाघघि: ॥"
(महानतिशयो भीत: ।) अतिशयभययुक्ते, त्रि ॥
महाभीम:, स्त्री, (महानतिशयो भीम: । भीषयाञ्चकृतित्वात् शिवांशसम्भूतत्वाच्च तथात्वम् ।) शान्तनुराज: । इति जटाधर: ॥ अग्निनामकशिवद्वारपाल: । इति त्रिकाण्डशेष: । अतिशयभयानके, त्रि ॥

महाभीरुः, पुं, (महानतिशयो भीरुः ।) गोपालिकाख्यकीटविशेषः । इति हेमचन्द्रः । ३ । २३४ ॥ अतिभयशीले, त्रि ॥

महाभीष्मः, पुं, (महानतिशयो भीष्मः ।) शान्तनुराजः । इति त्रिकाण्डशेषः ॥

महाभूतं, क्ली, (महत् भूतम् । पञ्चतन्मात्रेभ्यः स्थौल्यादस्य तथात्वम् ।) पृथिव्यादिपञ्चभूतम् । यथा,—

"महाभूतानि पञ्चैव खानिलाग्न्यम्बुभूमिभिः ॥"

इति शब्दचन्द्रिका ॥

(अस्य विषय उत्पत्तिश्च यथा,—

"तन्मात्रेभ्यो वियदाद्यैर्वायुवसुन्धराः ।
एतानि पञ्च जायन्ते महाभूतानि तत्क्रमात् ॥"

एकोत्तरपरिवृद्ध्या वियदादयो जायन्त इत्यर्थः । तद्यथा । शब्दतन्मात्राच्छब्दगुणं वियज्जायते । शब्दतन्मात्रसहितात् स्पर्शतन्मात्राच्छब्दस्पर्शगुणो वायुर्जायते । शब्दतन्मात्रस्पर्शतन्मात्रसहितात् रूपतन्मात्राच्छब्दस्पर्शरूपगुणो वह्निर्जायते । शब्दतन्मात्रस्पर्शतन्मात्ररूपतन्मात्रसहिताद्रसतन्मात्राच्छब्दस्पर्शरूपरसगुणं वारि जायते । शब्दतन्मात्रस्पर्शतन्मात्ररूपतन्मात्ररसतन्मात्रसहिताद्गन्धतन्मात्राच्छब्दस्पर्शरूपरसगन्धगुणा वसुन्धरा जायते ।" इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे ॥" "मालतादयोऽप्यस्य महाभूतविकारा एव तत्रास्याकाशात्मकं शब्दः श्रोत्रं लाघवं सौक्ष्म्यं विवेकश्च । वायात्मकं स्पर्शः स्पर्शनश्च रौक्ष्यं प्रेरणं धातुयूहनं चेष्टाश्च शारीर्यः । अग्न्यात्मकं रूपं दर्शनं प्रकाशः पक्तिरौष्ण्यञ्च । अब्बात्मकं रसो रसनं क्लेद्यं मार्दवः स्नेहः क्लेदश्च । पृथिव्यात्मको गन्धः घ्राणं गौरवं स्थैर्यं मूर्तिश्च ।" इति चरके शारीरस्थाने चतुर्थेऽध्याये ॥ सिद्धादयः महाप्राणिनः । यथा, महाभारते । १ । ११६ । ४८ ।

"रक्ष्यमाणो महाभूतैः सिद्धैश्च परमर्षिभिः ॥")

महाभृङ्गः, पुं, (महांश्चासौ भृङ्गश्चेति ।) नीलभृङ्गराजः । इति राजनिर्घण्टः ॥

महाभैरवः, पुं, (महान् भैरवः ।) शूरभरूपी हरः । यथा,—

"योऽसौ महाभैरवाख्यः सकायः शारभो हरः ।
भैरवः पृथगेवायं गणाध्यक्षो हरात्मजः ॥"

इति कालिकापुराणे ४६ अध्यायः ॥

(स्त्री, विद्याविशेषः । तथा च प्रबोधचन्द्रोदये । ३ । २४ । "तन्महाभैरवीं विद्यां धर्मग्रहयोराहरणाय प्रस्थापयामः ॥")

महाभोगा, स्त्री, (महान् आभोगः परिपूर्णतास्याः । यद्वा, महान् भोगः सुखरूपमस्याः ।) दुर्गा । यथा, देवीपुराणे ४५ अध्यायः ।

"महार्थसाधनी देवी महाभोगा ततः स्मृता ॥"

(महानाभोगो विशालतास्य । महाविशालताविशिष्टे, त्रि । यथा, कथासरित्सागरे । १७ । १०६ ।

"तनश्चैव महाभोगं सच्छायस्कन्धसुन्दरम् ।
गुरुचन्द्रो ददर्शाशावैकं न्यग्रोधपादपम् ॥")

महामकूकः, पुं, (महान् मकूकः ।) प्रीतमकूकः । इति राजनिर्घण्टः । सोनामेड् इति भाषा ॥

महामतिः, त्रि, (महती मतिर्यस्य ।) अतिबुद्धिमान् । यथा,—

"किमेतन्नाभिजानासि जानन्नपि महामते ! ।
यन् प्रेमप्रवणश्चित्तं विगुणेष्वपि बन्धुषु ॥"

इति मार्कण्डेयपुराणे देवीमाहात्म्यम् ॥

महामदः, पुं, (महान् मदोऽस्य ।) मत्तहस्ती । इति शब्दरत्नावली ॥ (महान् मदः ।) अतिशयहर्षः । अतिशयमत्तता च । तद्युक्ते, त्रि ॥

महामनाः, [स्] त्रि, (महत् प्रशस्तं मनो यस्य ।) महाशयः । यथा,—

"महेच्छे तुङ्गटोदारोदात्तोदीर्घमहाशयाः ।
महामना महात्मा च————॥"

इति हेमचन्द्रः । ३ । ३१ ॥

(यथा, ऋग्वेदे । १० । १०३ । ६ ।

"इन्द्रस्य नृणो वरुणस्य राज्ञ
आदित्यानां मरुतां उग्रम् ।
महामनसां भुवनच्यवानां
घोषो देवानां जयतामुदस्थात् ॥"

"महामनसां उदारमनसाम् ।" इति तद्भाष्ये सायणः ॥ महाशालपुत्रः । यथा, हरिवंशे । ३१ । २० ।

"महामना नाम सुतो महाशालस्य धार्मिकः ॥")

महामहावारुणी, स्त्री, (महती चासौ महावारुणी चेति ।) गङ्गास्नानस्य योगविशेषः । स तु शनिवारशतभिषानक्षत्रशुभयोगयुक्तगौणचान्द्रचैत्रकृष्णचयोदशीरूपः । यथा,—

"शुभयोगसमायुक्ता शनौ शतभिषा यदि ।
महामहेति विख्याता त्रिकोटिकुलमुद्धरेत् ॥"

इति तिथ्यादितत्त्वधृतस्कन्दपुराणवचनम् ॥

महामांसं, क्ली, (महद् गर्हितं मांसम् । अत्र मांसशब्दस्य पूर्वप्रयुक्ततया महच्छब्दस्य गर्हितार्थत्वम् ।

"शूकरे तैले तथा मांसे वैद्ये ज्योतिषके द्विजे ।
यात्रायां पथि निद्रायां महच्छब्दो न दीयते ॥"

इति स्मरणात् ।)

गरादिपिशितम् । यथा,—

"अश्वान्यां गवयैर्मांसैर्न्महामांसैः सुगन्धिभिः ।
पूजयेद्बहुलाजातोयैर्बलिभिर्भोजनैः शिवाम् ॥"

इति तिथ्यादितत्त्वधृतकालिकापुराणम् ॥

अन्यच्च ।

"गोनरेभाश्वमहिषवराहोष्ट्रोरगोद्भवम् ।
महामांसाष्टकं देवि ! देवतापीतिकारकम् ॥"

इति कौलार्चनदीपिका ॥

महामात्रः, पुं, (महती मात्रा मर्य्यादापरिमाणं यस्य ।) प्रधानः । इत्यमरः । २ । ८ । ५ ॥ रेणा पत्न्यादिषु महती मात्रा धनं परिच्छदो वा येषां ते तथा । इति तट्टीकायां भरतः ॥ (यथा, रामायणे । २ । ३६ । १८ ।

"तत्र वृद्धो महामात्रः सिद्धार्थो नाम नामतः ।
शुचिर्बहुमतो राज्ञः कैकेयीमिदमब्रवीत् ॥"

सम्बद्धः । (यथा, महाभारते । २ । ३१ । ६० ।

"राज्ञे भोजकटस्थाय महामात्राय धीमते ॥")

अमात्यः । (यथा, कामन्दकीये । ६ । ६६ ।

"दूषिते हि महामात्रे रिपुभिर्लोभतोऽपि वा ।
स्वपक्षे यस्य विश्वास इत्यभूतश्च निश्चयः ॥")

दन्तिपकाधिपः । इति मेदिनी । रे, १६० । (यथा च कथासरित्सागरे । १२ । १० ।

"इहत्यश्च महामात्रो हिरण्यदत्तविश्रुतः ।
सद्मेन जीवतां नेयो नेतश्चेतयते यथा ॥"

महादेवः । यथा, महाभारते । २३ । १७ । ८५ ।

"महाश्चर्या महामात्रो महानेत्रो निशालयः ॥")

महामात्री, स्त्री, (महामात्र । ङीप् ।) आचार्यपत्नी । इति शब्दाकरः ॥ महामात्रपत्नी च ॥

महामानसी, स्त्री, (महत् मानसं भक्तान् प्रति सदयं चेतो यस्याः ।) जिनानां विद्यादेवीभेदः । इति हेमचन्द्रः । २ । २५४ ॥

महामाया, स्त्री, (अवटनघटनापटीयसीत्वेन विस्तृतप्रतीतिसाधनं माया । महती चासौ माया चेति । यद्वा, महती माया विश्वविमोहनशक्तिर्यस्याः सा ।) दुर्गा । इति शब्दरत्नावली ॥ तस्याः स्वरूपं यथा,—

"गर्भान्तर्ज्ञानसम्पन्नं प्रेरितं खलिसाग्रतेः ।
उत्पन्नं ज्ञानरहितं क्षुत्तृषे स्तो निरन्तरम् ॥
पूर्व्वातिपूर्व्वसंभक्षसंस्कारेण नियोज्य च ।
आहारादौ ततो मोहं ममत्वं ज्ञानसंयुतम् ॥
क्रोधोपरोधलोभेषु क्षिप्त्वा क्षिप्त्वा पुनः पुनः ।
प्रसात् कामे निधोव्याशु चिन्तायुक्तमधश्चिरम् ॥
आमोदयुक्तं व्यसनासक्तं जगुं करोति या ।
महामायेति सा प्रोक्ता तेन सा जगदीश्वरी ॥"

इति कालिकापुराणे ६ अध्यायः ॥

(यथा च देवीभागवते । १ । ८ । ४० ।

"नमो देवि ! महामाये ! सृष्टिसंहारकारिणि ! ॥"

भद्रादेवी । यथा, काशीखण्डे । २६ । १३६ ।

"महाविद्या महामाया महामेधा मधूद्भवम् ॥")

महती माया च ॥ (यथा, मार्कण्डेये । ८१ । ४१ ।

"महामाया हरेश्चैतत् तया संमोह्यते जगत् ॥")

महामायी, स्त्री, (महती मायास्य । स्त्रियां ङीप् ।) दुर्गा । इति शब्दरत्नावली ॥

महामारी, स्त्री, (महतः दुर्द्दान्तान् दानवादीन् मारयति इति । मृङ् + णिच् + अण् । ङीप् ।) महाकाली । यथा,—

"यामं तयेतत् सकलं ब्रह्माण्डं जगदीश्वर ! ।
महाकाला महाकाले महामारीस्वरूपया ॥
सैव काले महामारी सैव सृष्टिर्भवत्यजा ।
स्थितिं करोति भूतानां सैव काले सनातनी ॥"

इति मार्कण्डेयपुराणम् ॥

(म्रियन्ते प्राणिनो यस्या इति। मृड्+घञ्। ङीष्। महती मारी।) अतिमृत्युमरकञ्च ॥

महामाषः, पुं, (महांश्चासौ माषश्चेति।) राजमाषः। इति शब्दचन्द्रिका ॥ (यथा, सुश्रुते सूत्रस्थाने २१ अध्याये। "माषमहामाषगोधूमतिलपिष्टविकृतिदधिदुग्धक्षारापायसेक्षुविकारान्पौदकमांसवसाविसन्दयाशकशूरुकशल्लाटकमधुरवार्ताकफलसमशनाध्यशनप्रभृतिभिः श्लेष्मा प्रकोपमापद्यते ॥" तथास्य पर्य्यायो गुणाश्च। "राजमाषो महामाषश्चपलश्चवनः स्मृतः। श्वेतो रक्तस्तथाकृष्णस्त्रिविधः स प्रकीर्त्तितः ॥ यो महांस्तेषु भवति स एवोक्तो गुणाधिकः ॥" इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

महासुखः, पुं, (महत् सुखमस्य।) कुम्भीरः। इति हेमचन्द्रः। ४। ४१६ ॥ (महत् सुखम्।) हृष्टमुखे, क्ली। (यथा, हृष्टसंहितायाम्। ६०। ५४।

"वज्रं सौम्यं संवृतममलं शुक्लं समञ्च भूपानाम्।
विपरीतं क्लेशसुखां महासुखं दुर्भगानाञ्च ॥"

महत् सुखं यस्य।) तद्वति, त्रि ॥ (महादेवः। यथा, महाभारते। १३। १७। ८७।

"महाद्युतो महादंष्ट्रो महाशिरः महासुखः॥"

लिङ्गराजस्य सैनिकभेदः। यथा, महाभारते। ५। २७०। १६।

"नकुलस्त्वभिसन्धाय क्षेमङ्करमहासुखौ।
उभावुभयतस्तीक्ष्णैः शरवर्षैरवर्षताम् ॥")

महासुनिः, पुं, (महांश्चासौ मुनिश्चेति।) अगस्त्यः। वृद्धः। इति शब्दरत्नावली ॥ कृपाचार्य्यः। कालः। इत्यजयपालः ॥ व्यासः। (श्रीनारायणः।) यथा, श्रीभागवते १।१।१२।

"धर्म्मः प्रोज्झितकैतवोऽत्र परमो निर्म्मत्सराणां सतां
वेद्यं वास्तवमत्र वस्तु शिवदं तापत्रयोन्मूलनम्।
श्रीमद्भागवते महामुनिकृते किंवापरैरीश्वरः
सद्यो हृद्यवरुध्यतेऽत्र कृतिभिः शुश्रूषुभिस्तत्क्षणात् ॥

(महासुनिः श्रीनारायणः। इति तट्टीकायां श्रीधरः।) तुम्बुरुवृक्षः। इति राजनिर्घण्टः ॥

महासुनि, क्ली, (महच्च तत् सुनिश्चेति। सर्व्वोपकारित्वात्तथात्वम्। अभिधानात् क्लीवत्वम्।) औषधम्। इति शब्दरत्नावली ॥ धत्तूरकम्। इति शब्दचन्द्रिका ॥

महासेनः, [न्] पुं, (महान् सेना यस्य। आपत्वात् तथात्वम्।) शिवः। इति महाभारते तस्य सहस्रनामस्तोत्रम् ॥ हृष्टमुस्तकयुक्ते, त्रि ॥

महासेनः, पुं, (महत् सूर्म्मं सूर्म्मं यस्य।) राजमत्स्यः। इति राजनिर्घण्टः ॥ (त्रिलिङ्गिशिष्टः ॥ यथास्य पर्य्यायः।

"त्रिलिङ्गिशिष्टो महासेनः पालाशमत्स्यकाश्यपः॥"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे।)

महास्थल्यं, क्ली, महार्घम्। बहुमूल्यम्। महच्च तन्मूल्यं चेति कर्म्मधारयसमासनिष्पन्नम्। (महन् मूल्यं यस्य।) तद्युक्ते, त्रि ॥

महास्थिकः, पुं, (महान् स्थिकः।) हृष्टदुन्दुरः। तत्पर्य्यायः। मूषी २ विघ्नेशवाहनः ३ महाङ्गः ४ शस्त्रमारी ५ भूफलः ६ भित्तिपातनः ७। इति राजनिर्घण्टः ॥

महास्थूलः, पुं, (महान् स्थूलः पशुः।) हस्ती। इति हेमचन्द्रः। ४।२८३ ॥ शरभः। इति राजनिर्घण्टः ॥

महास्थृत्युञ्जयः, पुं, (महास्थृत्युं यमं जयतीति। जि+खच् सुम् च।) शिवस्य मन्त्रविशेषः। यथा,—

देव्युवाच।

"यदि मे महती प्रीतिस्त्वयास्ति कुलभैरव!।
कथयस्व विशेषेण महास्थृत्युञ्जयाभिधम् ॥

भैरव उवाच।

शृणु देवि! प्रवक्ष्यामि महास्थृत्युञ्जयाभिधम्।
आयुर्वृद्धिकरं पुंसां स्थृत्योर्स्थृत्युकरं परम् ॥
यस्य विज्ञानमात्रेण चिरजीवी निरामयः।
नित्यमश्नन्तं जन्तुं स्थृत्युं स्थृत्युपथं नयेत् ॥"

इति स्थृत्युञ्जयतन्त्रम् ॥

महास्मेघः, पुं, (महान् मेघ इव।) शिवः। इति महाभारते तस्य सहस्रनामस्तोत्रम् ॥ (महान् मेघः।) अतिशयमेघश्च ॥ (यथा, महाभारते। १२। ११७। ४।

"महामेघनिभं दृष्ट्वा स भीतो शुभवन् गजः॥"

क्षत्रियराजविशेषः। यथा, महाभारते। ७। ४७। १५।

"शत्रुञ्जयं चन्द्रकेतुं महामेघं सुवर्च्चसम्।
सूर्य्यभासञ्च पञ्चैतान् हत्वा विव्याध सौबलम् ॥")

महामेदः, पुं, (मेदयति स्निग्धीकरोतीति। मिद्+णिच्+अच्। महान् मेदः।) अष्टवर्गे प्रसिद्धौषधविशेषः। तत्पर्य्यायः। पुरोद्भवः २। इति रत्नमाला ॥ हृष्टमेदश्च ॥

महामेदा, स्त्री, (मेदयतीति। मिद्+णिच्+घञ्। टाप्। महती मेदा।) अष्टवर्गे प्रसिद्धौषधविशेषः ॥ तत्पर्य्यायः। वसुच्छिद्रा २ जीवनी ३ पांशुरागिणी ४ देवेष्टा ५ मुरामेदा ६ दिशा ७ देवमणिः ८ देवगन्धा ९ महाच्छिद्रा १० वृत्तार्द्धा ११। अस्याः गुणाः। शिमत्वम्। रूक्षत्वम्। कफशुक्रवृद्धिकारित्वम्। दाहामपित्तक्षयवातज्वरनाशित्वञ्च। इति राजनिर्घण्टः ॥ * ॥ अथ मेदमहामेदयोरुत्पत्तिलक्षणनामगुणाः।

"महामेदाभिधः कन्दो गोरक्षादौ प्रजायते।
महामेदा वनौमेदा स्यादित्युक्तं मुनीश्वरैः।
शुक्लाङ्गकनिभः कन्दो लताजातः स पाण्डुरः।
महामेदाभिधो ज्ञेयो मेदालक्षणमुच्यते।
शुक्लकन्दो नगश्लेष्मो मेदो धातुरिव स्मृतः।
यः स मेदेति विज्ञेया जिज्ञासातत्परैर्जनैः।
सप्तपर्णी मल्लिकिका मेदा मेदीभवाम्बरा।
महामेदा वसुच्छिद्रा त्रिदन्ती देवतामणिः ॥
मेदायुगं गुरु स्वादु दृष्यं स्नग्धकफापहम्।
हृद्यं शीतलं पित्तरक्तवातज्वरप्रणुत् ॥"

इति भावप्रकाशः ॥

महामैत्रः, पुं, (मित्रस्य भावः। मित्र+ष्यञ्। मैत्रम्। महद्भिः सह महद्वा हृदि मैत्रमस्येति।) बुद्धभेदः। इति हेमचन्द्रः। २।१४६ ॥

महामोहः, पुं (मोहः भ्रान्तिज्ञानम्। अतथाभूते वस्तुनि तथात्वज्ञानमित्यर्थः। महान् मोहः।) भोगेच्छारूपाज्ञानम्। इति केचित् ॥ संसारमूलकारणरागरूपमोहः। (महान् मोहो यस्मादिति च।) महामोहजनककामराजबीजम्। इति चण्डीप्रथममाहात्म्यटीकायां नागोजीभट्टः ॥ अपि च।

"ससर्ज्जाग्रेऽन्धतामिस्रमथ तामिस्रमादिकृत्।
महामोहश्च मोहश्च तमश्चाज्ञानवृत्तयः।"

इति श्रीभागवते ३ स्कन्धे १२ अध्यायः ॥

अग्र इति ब्रह्मा स्वसृष्टौ प्रथममविद्यासृष्टौ; ससर्ज्ज तत्र तमो नाम स्वरूपाप्रकाशः। मोहो देहाद्यहंबुद्धिः। महामोहो भोगेच्छा। तामिस्रः तत्प्रतिघाते क्रोधः। अन्धतामिस्रः तन्नाशे अहमेव मृतोऽस्मीति बुद्धिः। तदेवोक्तं वैष्णवे।

"तमोऽविवेको मोहः स्यादन्तःकरणविभ्रमः।
महामोहश्च विज्ञेयो ग्राम्यभोगसुखैषणा ॥
मरणं ह्यन्धतामिस्रं तामिस्रं क्रोध उच्यते।
अविद्या पञ्चपर्व्वा या प्रादुर्भूता महात्मनः॥"

इति तट्टीकायां श्रीधरस्वामी ॥

महाम्लं, क्ली, (महत् अम्लं अम्लरसयुक्तम्। यद्वा, महान् अम्लः अम्लरसो यस्मिन्।) निम्बिडीकम्। इति जटाधरः ॥ (अत्यम्लरसविशिष्टे, त्रि ॥)

महायज्वनः, पुं, (यज्ञयते पूजयति इति। यज्+अच्। महान् यज्वा।) अर्हदुपासकविशेषः। इति हेमचन्द्रः। १। ४१ ॥

महायज्ञः, पुं, (महान् यज्ञः।) वेदपाठादिरूपपञ्चप्रकारयज्ञः। यथा,—

"पाठो होमश्चातिथीनां सपर्य्या तर्पणं बलिः।
एतैः पञ्च महायज्ञा ब्रह्मयज्ञादिनामकैः॥"

इत्यमरः। २। ७।१४ ॥

अपि च।

"दिव्यो भौमस्तथा पैत्रो मानुषो ब्राह्म एव च।
एतैः पञ्च महायज्ञा ब्रह्मणा निर्म्मिताः पुरा ॥
ब्राह्मणानां हिताय्याय इतरेषाञ्च तन्मुखाः।
इतरेषान्तु वर्णानां ब्राह्मणैः कारिताः शुभाः ॥
एवं ज्ञात्वा नरो मुक्तामाहुरित्रि! विमुच्यते।
अन्यथा लोपयोर्ल्लुप्ते एकैके स्खलनक्षिपः॥
मन्तव्या दोषभोक्तृणां महामांसन्तु तन्मुखम्॥"

इति वराहपुराणम् ॥

(यथा च मनौ। २। ७८।

महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुः॥")

महायशस्कः, त्रि, (महत् यशो यस्य । "बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच्" ५ । ४ । १३८ । इति समासान्तः कप्प्रत्ययः ।) अतिशययशोविशिष्टः । इति पाणिनिप्रकाशकरणम् ॥

महायशाः, [स्] पुं, (महत् यशो यस्य विभाषा महतोऽन् न कप् ।) भूतार्थद्विजेषः । इति हेमचन्द्रः । १ । ५० ॥ (शिवः । यथा, महाभारते । १३ । १७ । ३४ ।

"महारुद्रो महाकायो वृषरूपो महायशाः ॥")

स्त्री, स्कन्दमातृगणविशेषः । यथा, महाभारते । ९ । ४६ । २८ ।

"पशुदा वित्तदा चैव सुखदा च महायशाः ॥")

अतिशययशोयुक्ते, त्रि ॥ (यथा, महाभारते । ३ । ४२ । ४१ ।

"एवं स संक्रमंश्चैव स्वर्गलोके महायशाः ।
ततो ददर्श शक्रस्य पुरीन्तामरावतीम् ॥")

महारजतं, क्ली, (महच्च तद्रजतञ्चेति ।) सुवर्णम् । (यथा, भावप्रकाशे । ६० । ४ ।

"महारजतसङ्काशा जायन्ते तत्र मानवाः ॥")

धुस्तूरः । इत्यमरः । २ । ४ । ८५ । २ । ६२ । शौण्ड्यञ्च ॥

महारजनं, क्ली, (रज्यतेऽनेनेति । रञ्ज + करणे ल्युट् । ततः । "अनिदितामिति ।" ६ । ४ । २४ । इत्यत्र "रजकरजनरञ्जःसूपसंख्यानं कर्त्तव्यम् ।" इति काशिकोक्त्या नलोपः । महच्च तद्रजनञ्चेति कर्म्मधारयः ।) कुसुम्भपुष्पम् । इत्यमरः । २ । ६ । १०६ ॥ सर्षपम् । इति मेदिनी । ने, २२४ ॥

महारण्यं, क्ली, (महच्च अरण्यम् ।) वृहद्वनम् । (यथा, रामायणे । ३ । १ । २ ।

"प्रविश्य तु महारण्यं दण्डकारण्यमात्मवान् ।
रामो ददर्श दुर्द्धर्षस्तापसाश्रममण्डलम् ॥")

तत्पर्य्यायः । अरण्यानी २ । इत्यमरः । २ । ४ । १ ॥ कान्तारः ३ । इति जटाधरः ॥

महारथः, पुं, (रमन्ते लोका यस्मिन्निति । रम + "इगुपधज्ञाप्रीकिरः कः ।" उणा० ३ । २ । इति कः । महांश्चासौ रथश्चेति ।) शिवः । इति महाभारते तस्य महन्नामस्तोत्रम् । १३ । १७ । १२१ । (महान् रथोऽस्य ।) व्युत्पत्तिभिः महारथशब्दनिष्पत्तिर्यथा, "रथो दशसहस्राणि योधयेद्यस्तु धन्विनाम् ।
अस्त्रशस्त्रप्रवीणश्च महारथ इति स्मृतः ॥"

इति भरतमल्लिकाटीकायां शब्दरत्नावली ॥ (महान् रथः ।) वृहद्रथश्च । (यथा, महाभारते । ६ । ८८ । १७ ।

"नानाप्रहरणा माद्य रथा हिमो महारथः ॥")

राजविशेषः । यथा, मार्कण्डेये । १७ । २६ ।

"महारथस्य नाम्नोऽस्य पुरोधाभूत्कृशोदरः ॥")

महारम्भं, क्ली, (महान् आरम्भो प्रकृतकरणे यत्नो यस्य ।) मद्यभाण्डम् । इति राजनिर्घण्टः ॥ (महारम्भविशिष्टे, त्रि । यथा, कामन्दकीये । ४ । ५४ ।

"सामन्तो भृकुटैर्भृङ्गः सारङ्गः सर्जनाम्रयोः ।
सङ्कारश्चण्डिकायां तु महारम्भोपमः स्मृतः ॥")

महारम्भं, क्ली, (महान् अधिको रम्भोऽस्य । रम्भिप्रत्ययात् तथात्वम् ।) काञ्जिकम् । इति जटाधरः ॥ (गुणादयोऽस्य काञ्जिकशब्दे द्रष्टव्याः ।

महारम्भविशिष्टे, त्रि । यथा, महाभारते । ३ । १११ । १४ ।

"तान्यूष्यद्वङ्गस्य महारम्भानि
भृशं सुरूपाणि रुचिं ददुर्हि ॥")

महारसः, पुं, (महानतिमिष्टो रसोऽस्य ।) खर्जूरः । कोषकारः । कपोतः । इति मेदिनी । से, ५६ ॥ रुचुः । इति जटाधरः ॥ (अस्यपर्य्यायो यथा,—

"महारसोऽसितरः स्यान्मृदुपुष्पो मधुद्रुमः ।
रुचुर्वेणुककाष्ठारभीरुपौलूषादिभेदवान् ॥"

इति वैद्यकरत्नमालायाम् ॥

(महान् रसः धातुरत्र ।) पारदः । इति राजनिर्घण्टः ॥ (यथास्य पर्य्यायः ।

'पारदो रसधातुश्च रसेन्द्रश्च महारसः ।
चपलः शिववीर्य्यश्च रसः सूतः शिवाक्षयः ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

महारसाष्टकं, क्ली, (महारसानां अष्टकम् ।) अष्टधातुविशेषाः । यथा,—

"दरदः पारदः सस्यो वैक्रान्तं कान्तमभ्रकम् ।
माक्षिकं विमलश्चेति स्मरेत्तेऽष्टौ महारसाः ॥"

इति राजनिर्घण्टः ॥

महाराजः, पुं, (महांश्चासौ राजा प्रभावविशेषवत्त्वात् ।) पूर्व्वजिनविशेषः । (महत्या दीप्त्या राजतेऽङ्गुलिषु शोभत इति । राज् + अच् ।) नखः । इति हेमचन्द्रः । ३ । २५८ । (महान् राजा । सर्व्वत्र "राजाहःसखिभ्यष्टच् ।५ । ४ । ९१ । इति समासान्तष्टच् ।) श्रेष्ठराजः । यथा,—

"अर्द्धस्य पुरुषो दासो दासस्यार्द्धं न कस्यचित् ।
इति सत्यं महाराज पश्चोऽस्म्यर्द्धेन कौरवैः ॥"

इति महाभारते उद्योगपर्व्वणि ॥

महाराजकः, पुं. (राजते इति । राज + घञ् । महांश्चासौ राजकश्चेति ।) महाराजिकगणः । इत्यमरटीकायां रामाश्रमः ॥

महाराजगुनः, पुं. (महता मिष्टादिगुणेन राजते शोभते । इत्यच् ततः कर्म्मधारयः ।) उत्तमाम्रः । तत्पर्य्यायः । महाराजाम्रकः २ स्थूलाम्रः ३ मत्स्यगन्धः ४ कटुः ५ नीलकपित्थकः ६ कामायुधः ७ कामफलः ८ राजपुत्रः ९ नृपात्मजः १० महाराजफलः ११ कामः १२ महाद्रुतः १३ । कोमलस्य तस्य गुणाः । कटुत्वम् । अम्लत्वम् । पित्तदाहदोषत्वञ्च । सुपक्वस्य तस्य गुणाः । स्वादुत्वम् । मधुरत्वम् । पुष्टिबीर्य्यबलप्रदत्वञ्च । इति राजनिर्घण्टः ॥

महाराजद्रुमः, पुं, (महाराजोपनिवेशो द्रुमः ।) आरग्वधः । इति राजनिर्घण्टः ॥ (गुणादिविशेषोऽस्यारग्वधशब्दे ज्ञातव्यः ।)

महाराजिकः, पुं. (महती राजिः षष्टिरस्य "शेषाद्विभाषा ।" ५ । ४ । १५४ । इति कप् ।) गणदेवताविशेषः । स तु विंशत्यधिकशतदेवसंख्यः । इत्यमरभरतौ । १ । १ । १० ॥

महाराजोपचारः, पुं, (महाराजार्थं उपचारः । महाराजानामुपचारो वा ।) राजार्हपूजोपकरणम् । तद्यथा,—

"ततश्च चामरच्छत्रपादुकादीन् परानपि ।
महाराजोपचारांश्च दत्त्वादर्शं प्रदर्शयेत् ॥"

विष्णुधर्म्मोत्तरे ।

"यथादेशं यथाकालं राजलिङ्गं सरालये ।
दत्त्वा भवति राजैव नात्र कार्य्या विचारणा ॥'

तत्र चामरमाहात्म्यं विष्णुधर्म्मोत्तरे ।

'तथा चामरदानेन श्रीमान् भवति भूतले ।
सुप्यते च तथा पार्श्वैः स्वर्गलोकञ्च गच्छति ॥'

छत्रस्य तत्रैव ।

'छत्रं बहुशलाकञ्च झालरीवस्त्रसंयुतम् ।
दिव्यवस्त्रैश्च संयुक्तं हेमदण्डसमन्वितम् ॥
यः प्रयच्छति छत्रस्य छत्रलक्षायुतैर्वृतः ।
प्राप्यते सोऽमरैः सर्व्वैः क्रीड़ते पितृभिः सह ॥'

तत्रैवान्यत्र ।

'राजा भवति लोकेऽस्मिन् छत्रं दत्त्वा द्विजोत्तमाः ।
नाप्नोति रिपुजं दुःखं संग्रामे रिपुनिक्षयेत् ॥'

'उपानत्संप्रदानेन विमानमधिरोहति ।
यथेष्टं तेन लोकेषु विचरत्यमरप्रभः ॥'

ध्वजस्य तत्रैव ।

'लोकेषु ध्वजभूतः स्याद्दत्त्वा विष्णोर्वरं ध्वजम् ।
शक्रलोकमवाप्नोति यदृच्छन्दशमामरः ॥'

किञ्च ।

'युक्तं पीतपताकाभिर्निवेद्य गरुड़ध्वजम् ।
कैशवाय द्विजश्रेष्ठाः शक्रलोके महीयते ॥
यत्प्रासादे ध्वजारोपमाहात्म्यं लिखितं पुरा ।
तदत्राप्यखिलं ज्ञेयं तत्राचल्यमिदन्तथा ॥'

किञ्च । भविष्ये ।

'विष्णोर्ध्वजे तु सौवर्णदण्डं कुर्य्याद्विचक्षणः ।
पताका चापि पीता स्यात् गरुड़स्य समीपगा ॥'

व्यजनस्य । विष्णुधर्म्मोत्तरे ।

'तालवृन्तप्रदानेन निर्वृतिं प्राप्नुयात् पराम् ॥'

वितानस्य तत्रैव ।

'वितानकप्रदानेन सर्व्वपापैः प्रमुच्यते ।
परां निर्वृतिमाप्नोति यत्र यत्राभिजायते ॥'

खड्गादीनाम् ।

'दत्त्वा निस्त्रिंशकान् सम्यान् शत्रुभिर्नाभिभूयते ।
दत्त्वा तल्पत्रयं सम्यगाधेयकरं लभेत् ॥'

किञ्च ।

'एतद्दत्त्वा तथा दत्त्वा शुभगत्वमिजायते ।
पादपीठप्रदानेन स्थानं सर्व्वत्र विन्दति ॥'

'दर्पणस्य प्रदानेन रूपवान् दर्पवान् भवेत् ।
मार्ज्जयित्वा तथा तस्य सुभगत्वमिजायते ॥
यत्किञ्चिदिष्टदायाय दद्याद्यत्तिसमन्वितः ।
तदिष्टायुषमाप्नोति स्वर्गलोकं स गच्छति ॥'

किञ्च । वामनपुराणे श्रीवत्सं प्रति प्रह्लादोक्तौ ।

'अदधानेभक्तिपरैर्यान्युद्दिश्य जनार्दनम् ।
यानि दानानि दीयन्ते अक्षयाणि विदुर्बुधाः ॥

यद्यपि केचिदिच्छन्ति दत्त्वा पुष्पाञ्जलित्रयम्।
पूर्व्वोक्ता दश गृह्णन्तु सुरा: सर्व्वार्थसिद्धये॥"
इति श्रीहरिभक्तिविलासे ८ विलास:॥

महारात्रि:, स्त्री, (महत्यां प्रलयावस्थायां रातिर्यस्मात्तम्मरूपं ददाति सुप्तप्रायान् सर्व्वान् जीवानात्मरूपेणावस्थापयति यतो यस्मात्पर्व्वलक्षणायां अविद्यायां सकाशात् रक्षतीति। रा+क।) ब्रह्मलयोपलक्षिता महाप्रलयरात्रि:। इति चण्डीटीकायां नागोजीभट्ट:॥ महत ईश्वरस्य रात्रि:। ब्रह्मलयोपलक्षिता रात्रिरित्यर्थ:। इति देवीमाहात्म्यटीकायां विद्याविनोद:॥ अपि च।

"ब्रह्मणाप निपाते च महाकल्पो भवेन्नृप!।
प्रकीर्त्तिता महारात्रि: सा एव च पुरातनै:॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५ अध्याय:॥
(दुर्गा। यथा च मार्कण्डेये। ८१। २०।
"महारात्रि! महाविद्ये! नारायणि! नमोऽस्तु ते॥")

अर्द्धरात्रात् परं मुहूर्त्तद्वयम्। यथा,—
"अर्द्धरात्रात् परं यच्च मुहूर्त्तद्वयमुच्यते।
सा महारात्रिरुदिता तद्व्रतमत्यं भवेत्॥"
इति तन्त्रम्॥

आश्विनशुक्लाष्टमी। नवरात्रम्। यथा,—
"शुक्लाष्टमी चाश्विनस्य नवरात्रं तु तस्य वै।
महारात्रिर्महेशानि! कालरात्रिं शृणु प्रिये!॥"
इति भक्तिसङ्गमतन्त्रम्॥

महाराष्ट्र:, पुं, (महान् भूयान् प्रशस्तो वा राष्ट्र:। महत् राष्ट्रं यत्रेति वा।) देशविशेष:। मारहाट्टा इति भाषा॥ यथा,—
"नैर्ऋते द्रविड़ाश्चैव महाराष्ट्राश्च रैवत:।
यवन: पह्नव: सिन्धु: पारसीकादयो मता:॥"
इति ज्योतिषतत्त्वे कूर्म्मचक्रम्॥

महाराष्ट्री, स्त्री, (महाराष्ट्रदेशे उत्पत्तिस्थानत्वेनास्त्यस्या इत्यच्। गौरादित्वात् ङीष्।) शालपिण्यौ। इति राजनिर्घण्ट:॥ शाकभेद:। मारहाटी इति भाषा। अस्या गुण:। कफवातनाशित्वम्। इति राघवल्लभ:॥ (विषयोऽस्या यथा,—
"पयस्या सुस्थिरी वाशा वृष्टी च गुडूचिका।
महाराष्ट्री वसुरसेक्षुगन्धा नीलोत्पलद्रवै:॥"
इति वैद्यकरत्नेन्द्रसारसंग्रहे मूलाधिकारे पथ्याकरणे। महाराष्ट्रागामियमिति। महाराष्ट्र। अण् ङीष्।) अष्टादशभाषान्तर्गतभाषाविशेष:। यथा, साहित्यदर्पणे ६ परिच्छेदे।
"व्यासमेव तु गायन्तु महाराष्ट्रीं प्रयोजयेत्।
अनौचित्या मागधी भाषा राजान्तःपुरचारिणाम्॥"

महारिष्ट, पुं, (महान् अरिष्ट:।) महाशिन्विशेष:। तत्पर्य्याय:। केटभ:२ रामठ:३ रमठ:४ गिरिनिम्ब:५ भुसुण्डक:६। अस्य गुणा:। कटुत्वम्। तिक्तत्वम्। कषायत्वम्। शीतलत्वम्। लघुत्वम्। वन्तापप्लीपकुष्ठासक्रमिभूतविषापहत्वञ्च। इति राजनिर्घण्ट:॥

महारुद्र:, पुं, (रुद्राणां महान् स्वयं ईश्वर इत्यर्थ:। इति महारुद्र:।) महादेव:। यथा,—
"महाकाल्या महाकालश्चण्डकाकारूपत:।
मायया च्छादितात्मा च तन्मध्ये समभागत:॥
महारुद्र: स एवात्मा महाविष्णु: स एव हि॥"
इति निर्व्वाणतन्त्रम्॥

महारूप:, पुं, (महत् महत्तत्त्वादिरूपमस्य।) शिव:। इति महाभारते तस्य सहस्रनामस्तोत्रम्। १३। १७। ३४॥ (महद्रूपं यस्य।) अतिशयरूपयुक्ते, त्रि॥

महारूपकं, क्ली, (महत् रूपकं यत्र।) नाटकम्। इति त्रिकाण्डशेष:॥

महारोग:, पुं, (महान् घोरानिष्टकारक: रोग:। यद्वा, महा जन्मान्तरीयभुक्तावशिष्टातिशयपातकेन जनित: रोग:।) पापरोग:। स चाष्टविधो यथा। उन्माद: १ त्वग्दोष: २ राजयक्ष्मा ३ श्वास: ४ मधुमेह: ५ भगन्दर: ६ उदर: ७ अश्मरी ८। इति शुद्धितत्त्वे नारद:॥ (यथा च आश्वलायने। २। ७। १७।
"महारोगेण वाभिहत: प्रायोपयादन्यतरां गतिं गच्छति॥"
"महारोगेण क्षयकुष्ठादिनेति" तट्टीकायां गार्ग्यनारायण:॥ विषयोऽस्य यथा,—
"महारोगाष्टके कासे ज्वरे श्वासातिसारके॥"
अस्य व्याख्यायां यथा,—
"वातव्याध्यश्मरीकुष्ठमेदोदरभगन्दरा:।
अर्शांसि ग्रहणीत्यष्टौ महारोगा: प्रकीर्त्तिता:॥"
इति वैद्यकरत्नेन्द्रसारसंग्रहे यक्ष्मणि रत्नगर्भपोट्टलीटीका॥)

महारोगी, [न्] पुं, (महा रोग: क्षयादिरस्यास्ति। महारोग+इनि:। महारोगयुक्त:। यथा,—
"क्रियाहीनस्य मूर्खस्य महारोगिण एव च।
यथेष्टाचरणस्यास्य मरणान्तमशौचकम्॥"
इति शुद्धितत्त्वधृतकूर्म्मपुराणवचनम्॥

महारोमा, [न्] पुं, (महान्ति रोमाणि वृक्षादिरूपाणि विराटरूपे यस्य।) शिव:। इति महाभारते तस्य सहस्रनामस्तोत्रम्। १३। १७। ८८॥ (महान्ति रोमाण्यस्य।) वृक्षरोमयुक्ते, त्रि॥ (ऋतिरातस्य पुत्रविशेष:। यथा, भागवते। ६। १३। १७।
"मरो: प्रतीपकस्तस्माच्चातरथो यत:।
देवमीढ़स्य पुत्रो विबुधोऽथ महाधृति:॥
ऋतिरातस्ततस्तस्मान्महारोमा च तत्सुत:॥")

महारौरव:, पुं, (रुरुणामयं इति। रुरु+अण्। महान् रौरव:। तत्र गता जीवा: क्रव्यन्नामकैरग्निभि: पच्यन्ते अत एवास्य तथात्वम्।) नरकविशेष:। इत्यमर:। १। ८। १॥ महान् रौद्रो रवोऽत्र महारौरव: मनीषादित्वात् इसोप:। इति भरत:॥ अपि च।

"महारौरवसंज्ञन्तु अधोऽर्द्धं ताम्रसंपुटम्।
ध्मायते खदिराङ्गारैर्गुरुदारापनायक:॥
देवद्रव्यापहारी च पच्यते कालमक्षयम्॥"
इति वह्निपुराणे पापनाशनदृष्टदानाध्याय:॥

महार्घ, त्रि, (महान् अर्घो मूल्यमस्य।) महामूल्यम्। इति मेदिनी॥ वै, १०। (यथा, कथासरित्सागरे। १२। १४५।
"ततस्तस्मै महार्घाणि रत्नानि सुकृतानि च।
विभीषणो ददौ स मथुरां गन्तुमिच्छते॥")

महार्घ:, पुं, (महान् अर्घो मूल्यमादरो वास्य।) लावकपक्षी। इति विश्व:॥

महार्णव:, पुं, (महान् सुविशाल: अर्णव:।) महासमुद्र:। यथा,—
"आचूर्णितो वा वातेन स्थित: पोते महार्णवे॥"
इति मार्कण्डेयपुराणे देवीमाहात्म्यम्॥
(महान् अर्णव इव। प्रसादादिगुणबाहुल्यात् तथात्वम्।) शिव:। इति महाभारते तस्य सहस्रनामस्तोत्रम्॥ (कूर्म्मरूपिभगवन्नारायणस्य दक्षपदोद्भव: जनपद:। यथा, मार्कण्डेये। ५८। ३२।
"सौराष्ट्रा दरदाश्चैव द्राविड़ास्त महार्णवा:।
एते जनपदा: पादे स्थिता वै दक्षिणेऽपरे॥")

महार्हं:, पुं, (महान् विपुलोऽर्होऽस्य।) वृक्षविशेष:। इति शब्दचन्द्रिका। महोगा इति भाषा॥

महार्द्रकं, क्ली, (महत् आर्द्रकम्।) वनार्द्रकम्। अस्य गुणा:। अग्निदीपनत्वम्। धारकत्वम्। रूक्षत्वम्। वायुकफनाशित्वञ्च। इति राजवल्लभ:॥

महार्बुदं क्ली, (महत् अर्बुदम्।) दशार्बुदम्। शतकोटिसंख्या। इति ज्योतिषम्॥

महार्घं, क्ली, (महान् अर्घ: मूल्यं मर्य्यादा वास्य।) श्वेतचन्दनम्। इति राजनिर्घण्ट:॥ (महामूल्यवति, त्रि। यथा, महाभारते। १।२१०।२६।
"महार्हाभरणोपेतौ विरजोऽम्बरधारिणौ॥")
महापूजायोग्यम्। यथा, रामायणे। १।६६।१०।
"यस्माद्भागार्हिणो भागान् नाकरुध्यत मे सुरा:।
वराङ्गानि महार्हाणि धनुषा ज्ञापयामि व:॥"
"महार्हाणि महापूजायोग्यानि।" इति तट्टीकायां रामानुज:॥)

महालय:, पुं, (महतां जैनानामालय:। महान् आलय इति वा।) विहार:। (महतां योगिप्रभृतीनामालय:।) तीर्थं:। (महदादीनां लयो यस्मिन्।) परमात्मा। इति मेदिनी। ये, १७५॥ सौराश्विनीयकृष्णपक्ष:। यथा, भविष्ये।
"येयं दीपान्विता राजन्! ख्याता पक्षदशी भुवि।
तस्यां दद्यान्न चेद्दत्तं पितृणां वै महालये॥"
महालये कन्यागतापरपक्षे। इति तिथ्यादितत्त्वम्॥

महालक्ष्मी:, स्त्री, (महती लक्ष्मी:।) राधा। नारायणशक्ति:। यथा,—
"यन्मायया मोहितास्त ब्रह्मविष्णुशिवादय:।

वैष्णवानां महालक्ष्मीं परां राधां वदन्ति ते ॥
यद्वांशा महालक्ष्मीः प्रिया नारायणस्य च ॥"
इति ब्रह्मवैवर्ते प्रकृतिखण्डे ५१ अध्यायः ॥
अथ महालक्ष्मीमन्त्रः ।
"तारो वाग्भवं माया रमाकामः ङसौ-
र्ङगत्प्रसूत्यै नमः ॥"
तथा च ।
"वाग्भवं प्रभुवनिता रमा मकरकेतनः ।
नारायण जगत्यार्यो वह्निजायमसुज्ज्वलः ॥
अर्णोऽष्टाष्टौ भृगुर्ध्येयस्त्रिभस्तोऽयं दशाक्षरः ।
महालक्ष्म्याः समुद्दिष्टस्तारात्रः सर्वसिद्धिदः ॥"
तस्या ध्यानं यथा, तन्त्रसारे ।
"बालार्कद्युतिमिन्दुखण्डविलसत्कोटीरहारो-
ज्ज्वलां
रत्नाकल्पविभूषितां कुचनतां श्यामे: करैर्बिभ्र-
तीम् ।
पद्मौ कौस्तुभरत्नमप्यविरतं संबिभ्रतीं सस्मितां
कृपाम्भोधिविलोचनत्रययुतां ध्यायेत् परा-
मम्बिकाम् ॥"
(अस्या बीजम् । ॐ ऐं ह्रीं श्रीं क्लीं ङसौं जगत्प्रसूत्यै नमः ।)
महालिकटभी, स्त्री, (महान्तः अलयः । तेषां कटभी आश्रयभूतवृक्षः ।) श्वेतकिणिहीवृक्षः । इति राजनिर्घण्टः ॥
महालिङ्गः, पुं, (महान् पूज्यतमो विपुलो वा लिङ्गोऽस्य ।) शिवः । इति महाभारते तस्य सहस्रनामस्तोत्रम् । (यथा, राजतरङ्गिण्याम् । २ । १३७ ।
"व्यकरोत् स महाहर्म्यान्महालिङ्गैर्महाद्रयैः ।
महाविभूतैर्महतीं महामाहेश्वरीं महीम् ॥"
महत् दृढलिङ्गमस्य ।) दृढलिङ्गयुक्तश्च ॥
महालीलसरस्वती, स्त्री, (लीलया सरस्वती । महती लीलसरस्वतीति कर्म्मधारयः ।) तारा-विशेषः ।
"लीलया वाक्प्रदा चेति तेन लीलसरस्वती ।
तारात्रयरहिता चार्या महालीलसरस्वती ॥"
इति तन्त्रसारः ॥
महालोध्रः, पुं, (महान् लोध्रः ।) लोध्रविशेषः । इति रत्नमाला । पाटियालोध इति भाषा ॥
महालोलः, पुं, (महदतिशयं लोलं लौल्यमस्य ।) काकः । इति राजनिर्घण्टः । अतिचञ्चले, त्रि ॥
महालोहं, क्ली, (महत् अतिशययुक्तवत् लोहम् ।) अयस्कान्तः । इति राजनिर्घण्टः ॥
महावनं, क्ली, (महत् विपुलं वनम् ।) दृढवनम् । तत्पर्य्यायः । अरण्यानी २ महारण्यम् ३ महाटवी ४ । इति राजनिर्घण्टः ॥(यथा, रामायणे ।
"निरस्ताः पथि धावन्ति चयसे यत्नधावने ॥")
हरीतक्यश्वत्थवटप्लक्षोदुम्बरान्तर्गतवनविशेषश्च ॥
महावपः, पुं. (महती वपा यस्य । यद्वा, महान्तं धातुमौल्यादिकं वपतीति । वप + अच् ।) महादेवः । इति शब्दचन्द्रिका ॥
महावरा, स्त्री, (प्रियते असौ देवादिभिरिति । वृ + अप् । टाप् । महती वरा ।) दूर्व्वा । इति शब्दरत्नावली ॥
महावराहः, पुं, (महानीश्वरोऽपि सन् वराहः । महांश्चासौ वराहश्चेति वा ।) वराहरूपी भगवान् । यथा,—
"महावराहो गोविन्दः सुषेणः कनकाङ्गदी ॥"
इति महाभारते तस्य सहस्रनामस्तोत्रम् ॥
(राजविशेषः । यथा, कथासरित्सागरे । ५ । २ । ६ । २ ।
"अस्ति शूरपुरं नाम यथार्थं नगरं भुवि ।
महावराह इत्यासीद्राजा तत्रातिदुर्म्मदः ॥")
महावरोहः, पुं, (महान् अवरोहः शिफानां अधोऽवतरणं यस्य ।) अश्वत्थः । इति राजनिर्घण्टः ॥ (विशेषोऽस्य शब्दशब्दे ज्ञातव्यः ॥)
महावल्ली, स्त्री, (महती चासौ वल्ली चेति ।) माधवीलता । इति शब्दचन्द्रिका ॥ (उत्तमा लता च । यथा, कथासरित्सागरे । ३३ । ८५ ।
"उपायरससंसिक्ता देशकालोपबृंहिता ।
सेयं नीतिमहावल्ली किं नाम न फलेत् फलम् ॥")
महावसः, पुं, (महती वसा वपास्य । दृश्यः ।) शिशुमारः । इति हेमचन्द्रः । ४ । ४१६ ॥
महावचाः, [स्] पुं, (महत् वचः विराड्देहेऽस्य ।) शिवः । इति महाभारते तस्य सहस्रनामस्तोत्रम् । १३ । १७ । ८६ ॥ (महत् वचोऽस्य ।) दृढवचोयुक्ते, त्रि ॥
महावाक्यं, क्ली, (महत् वाक्यम् ।) योग्यताकाङ्क्षासत्तियुक्तवाक्यसमूहः । इति साहित्यदर्पणः । २ । २ ॥ न्यायमते तु । खण्डवाक्यैकनामलभ्यताद्दशार्थकम् । प्रकृत्यर्थमात्रावच्छिन्नप्रत्ययार्थबोधं प्रत्ययार्थवाक्यं वा । इति शब्दशक्तिप्रकाशिका ॥ (महत् महदर्थप्रकाशकं वाक्यम् ।) तत्त्वमसीति आदिवाक्यम् । प्रतिष्ठादावुत्सर्गवाक्यञ्च ॥
महावारुणी, स्त्री, (वरुणो देवतास्याः । वरुण + अण् । ङीप् । महती वारुणी ।) गङ्गास्नानस्य योगविशेषः । स तु शनिवारशतभिषानक्षत्रयुक्तगौणचान्द्रचैत्रशुक्लत्रयोदशीरूपः । यथा,—
"वारुणेन समायुक्ता मधौ कृष्णा त्रयोदशी ।
गङ्गायां यदि लभ्येत सूर्य्यग्रहशतैः समा ॥
शनिवारसमायुक्ता सा महावारुणी स्मृता ।
गङ्गायां यदि लभ्येत कोटिसूर्य्यग्रहैः समा ॥"
इति तिथ्यादितत्त्वधृतस्कन्दपुराणवचनम् ॥
महाविद्या, स्त्री, (विद्यते ज्ञायते इति । विद् + क्यप् । टाप् । महती विद्या ज्ञानं तत्त्वसाक्षात्कारो वा यस्याः ।) देवीविशेषः । सा दशधा । यथा वामकेशतन्त्रे ।
"काली तारा महाविद्या षोडशी भुवनेश्वरी ।
भैरवी छिन्नमस्ता च विद्या धूमावती तथा ॥
बगला सिद्धविद्या च मातङ्गी कमलात्मिका ।
एता दश महाविद्याः सिद्धविद्याः प्रकीर्त्तिताः ॥
नात्र सिद्धादिसेवास्ति न नक्षत्रविचारणा ।
कालादिशोधनं नास्ति न चास्मिन्नादिदूषणम् ॥
सिद्धविद्यातया नात्र युगसेवापरिश्रमः ।
नास्ति किञ्चिन्महादेवि ! दुःसाध्यं कथञ्चन ॥"
मालिनीविजये ।
"अथ वक्ष्यामहं या या महाविद्या महीतले ।
दीक्षणालेरसंसृष्टास्ता: सर्व्या हि कृते: सह ॥
काली नीला महादुर्गा त्वरिता छिन्नमस्तका ।
वाग्वादिनी वामपूर्णा तथा प्रत्यङ्गिरा पुनः ॥
कामाख्या वासली बाला मातङ्गी श्रीकुलेश्वरी ।
इत्याद्याः सकला विद्याः कलौ पूर्णफलप्रदाः ॥
सिद्धमन्त्रतया नात्र युगसेवापरिश्रमः ।
अथ चैता महाविद्याः कलिदोषान्न बाधिताः ॥"
इति तन्त्रसारः ॥ ७ ॥
तासां दशावतारत्वं यथा,—
"प्रकृतिर्विष्णुरूपा च पुंरूपश्च महेश्वरः ।
एवं प्रकृतिभेदेन भेदास्तु प्रकृतेर्दश ॥
कृष्णरूपा कालिका स्यात् रामरूपा च तारिणी ।
बगला कूर्म्ममूर्त्तिः स्याद्भीमो धूमावती भवेत् ॥
छिन्नमस्ता नृसिंहः स्याद्वराहश्चैव भैरवी ।
सुन्दरी वामदमः स्यादमनी भुवनेश्वरी ॥
कमला बौद्धरूपा स्यात् दुर्गा स्यात् कल्किरूपिणी ।
स्वयं भगवती काली कृष्णस्तु भगवान् स्वयम् ।
स्वयञ्च भगवान् कृष्णः कालीरूपो भवेद्यदा ॥"
इति सुदृढमालातन्त्रम् ॥
(गङ्गा । यथा, काशीखण्डे । २६ । १३६ ।
"महाविद्या महामाया महामेधा महौ-
घधम् ॥")
महाविराट्, [ज्] पुं, (विशेषेण राजते प्रकाशते । इति । वि + राज् + क्विप् । महांश्चासौ विराट् चेति ।) महाविष्णुः । यथा,—
सुनिरुवाच ।
"विष्णोर्नाभौ लोकं राघव ! विस्तृतञ्च नभः-
समम् ।
शून्यन्नित्यं चिन्मयरूपं श्रीकृष्णेच्छासङ्गतम् ॥
जलेन परिपूर्णञ्च कृष्णस्य सुखबिन्दुना ।
सुप्तस्यासुखस्यादिसर्गे परिश्रान्तस्य क्रीडतः ॥
प्रकृत्या सह युक्तेन कलया निजया नृप ! ।
तत्राधारो महद्विष्णोर्बिम्बाधारस्य विस्तृतः ॥
प्रकृतीगर्भसंभूतश्चिन्मोदूतस्य भूमिप ! ।
सुविस्तृते जलाधारे प्रयातश्च महान् विराट् ॥
राधेश्वरस्य कृष्णस्य योऽङ्गांशः प्रकीर्त्तितः ।
दूर्व्वादलश्यामरूपः चक्षितश्च चतुर्भुजः ।
वनमालाधरः श्रीमान् शोभितः पीतवाससा ॥"
इति ब्रह्मवैवर्ते प्रकृतिखण्डे ५१ अध्यायः ॥
महाविलं, क्ली, (महच्च तत् विलञ्चेति ।) आकाशम् । इति शब्दार्थचन्द्रिका ॥ दृढच्छिद्रञ्च ॥
महाविषः, पुं, (महत् अत्युत्कटं विषमस्य ।) हिंसकसर्पः । यथा,—
"महाविषः कालसर्पो राजाधिष्ठितगोरगः ।"
इति शब्दार्थचन्द्रिका ॥

(महाविषयविशिष्टे, त्रि। यथा, सुश्रुते कल्पस्थाने ८ अध्याये।
"त्रिविधा वृश्चिका: मन्दमध्यमहाविषा:।"
(महद् विषम्। महाविषे, क्ली। यथा, सुश्रुते कल्पस्थाने २ अध्याये॥
"महाविषेण हृदये मन्त्रिभूतोद्गमौ भृशम्।")

महाविषुव, क्ली, (विषु साम्यमश्नुवतेति। विषु + "यप्रकरणेऽन्येभ्योऽपि दृश्यत इति वक्तव्यम्।" ५।२।१०६। इत्यस्य वार्त्तिकात् वप्रत्यय:। महच्च तत् विषुवञ्चेति। अस्मिन् समये दिवारात्रयो: समत्वात्तथात्वम्।) मेषसंक्रान्ति:। यथा,—
"महाविषुवमाख्यातं ज्योतिर्भिश्चैवचिह्नितम्॥"
इति शब्दरत्नावली॥
तस्मिन् मरुरनिम्नपत्रद्वयभक्ष्यम्। यथा, छत्र-चिन्तामणौ।
"मरुरं निम्नपत्राभ्यां वोऽत्ति मेषगते रवौ।
अपि रोषान्वितस्तस्य तक्षक: किं करिष्यति॥"
तत्र शक्रादिदानं यथा,—
"मेषादौ शक्रवो देया वारिपूर्णा च गर्गरी॥"
वारिपूर्णघटदानमन्त्रादि यथा,—
"एष धर्म्मघटो दत्तो ब्रह्मविष्णुशिवात्मक:।
अस्य प्रदानात् सफला मम सन्तु मनोरथा:॥
वैशाखे यो घटं पूर्णं सभोज्यं वै द्विजन्मने।
ददाति सुरराजेन्द्र! स याति परमां गतिम्॥"
महार्णवे।
"यो ददाति हि मेषादौ शक्तून्नमुघटान्वितान्।
पितॄनुद्दिश्य विप्रेभ्य: सर्व्वपापै: प्रमुच्यते॥"
तत्र छत्रपादुकादानं यथा,
"विप्रेभ्य: पादुकाच्छत्रं पितृभ्यो विषुवे शुभम्।"
पितृभ्य: पितॄनुद्दिश्येत्यर्थ:। इति तिथ्यादि-तत्त्वम्॥

महाविषुवचक्रं, क्ली, (महाविषुवस्य चक्रम्।) नक्षत्रघटितनराकारचक्रम्। यथा,
"मूर्द्धि सप्त सुखे ग्रीवि हृदये पञ्च विन्यसेत्।
चितयं दक्षपादेषु महाविषुवभक्रमात्॥
मस्तके भूपते: सौम्यं वदने पटुना समे।
हृदये च धनाध्यक्षोऽर्यमाप्रीर्दक्षिणे करे॥
वामे करे महद्दु:खं सुखं पादे च दक्षिणे।
समग्रं वामपादे च कथितं विषुवत्फलम्॥"
इति ज्योतिषतत्त्वम्॥

महाविष्णु:, पुं, (महांश्चासौ विष्णु: सर्व्वव्यापकश्चेति।) महाविराट्। यथा। 'यस्या जले कोटिकोटि-ब्रह्माण्डानि महाविष्णुरोमकूपगतानि तस्या विरजाया: परित्राभूताया उपरि महावैकुण्ठ-लोक:। तस्योर्द्ध्वभागे गोलोक:। तस्य नाथ: कृष्णो देवगोप: स परिवारेण वर्त्तते। इति भागवतोक्तब्रह्मसंहिता। स च श्रीकृष्णस्य कला-विशेष:। यथा,—
"विष्णुर्महान् स इह यस्य कलाविशेषो
गोविन्दमादिपुरुषं तमहं भजामि॥"
इति भागवतोक्तब्रह्मसंहिता:॥

महावीचि:, पुं, (न विद्यते वीचि: सुखं यत्र। महानवीचिश्च।) नरकविशेष:। यथा, मनु:।
"नरकं कालसूत्रञ्च महानरकमेव च।
सञ्जीवनं महावीचिं तपनं संप्रतापनम्॥"
यातीति पूर्व्ववचनस्यमनुवर्त्तते।
"महावीचिर्यत्र महाकल्लोलेन तु नीयते॥"
इति प्रायश्चित्तविवेक:॥

महावीर्य्य, क्ली, (वीर्य्याय साधु इति यत्। महच्च वीर्य्यम्।) विटपम्। तच्च शुष्कवृक्षयोर्ज्ञेयम्। इति हेमचन्द्र:॥

महावीर:, पुं, (वीनां पक्षिणां ईरयतीति। ईर + क:। ततो महांश्चासौ वीरश्चेति।) गरुड:। वीरयतीति। वीर + क:। महान् वीर इति कर्म्मधारय:। शूर:। सिंह:। मखानल:। (स च मनुपुत्रविशेष:। यथा, श्रीभागवते। ५।१२५।
"अग्नीध्रेध्मजिह्वयज्ञबाहुमहावीरहिरण्यरेतो-घृतपृष्ठसवनमेधातिथिवीतिहोत्रकवय इति॥")
वक्र:। श्वेततुरङ्ग:। सज्ञानपक्षी। इति मेदिनी। रे, २८६। अन्तिमजिन:। (अयमेव सिद्धार्थस्य त्रिशलागर्भजात: पुत्र:। तद्विवरणं यथा, अरिष्टनेमि पुराणान्तर्गतजैनहरिवंशे।
"सर्व्वार्थश्रीमतीजन्मा तस्मिन् सर्व्वार्थदर्शन:।
सिद्धार्थोऽभवदर्काभो भूप: सिद्धार्थपौरुष:॥
यत्र पाति धरित्रीयमभूदेकत्रदीधिती।
धर्म्मार्थिन्योऽपि यत्राक्तपरलोकभया: प्रजा:॥
कर्त्तुञ्च तानु गुणानुदारस्तुलयितुं क्षम:।
वर्द्धमानगुरुत्वं यै: प्रापित: स नराधिप:॥
उच्चै: कुलाद्रिसम्भूता सहजस्नेहवाहिनी।
महिषी श्रीसमुद्रस्य तस्यासीत् प्रियकारिणी॥
चेतश्चेटकराजस्य यास्ता: सप्तशरीरिजा:।
अतिस्नेहाकुलचक्रुस्ताश्चेष्टा प्रियकारिणी॥
कर्त्तां योजयितुं शक्तस्त्रिशूलां गुरुवर्णने:।
या स्वपुत्रेमहावीरप्रसवाय नियोजिता॥
सर्व्वतोऽथ नमन्तीषु सर्व्वासु सुरकोटिषु।
प्रभावान्निपतन्तीषु नभसो वसुवृष्टिषु॥
वीरोऽवतरति त्रातुं धरित्रीमसुधारिण:।
तीर्थनाथुतकल्पोक्तै: पुण्योत्तरविमानत:॥
सा तं षोडशसुस्वप्नदर्शनोत्सवपूर्व्वकम्।
दृष्ट्वा गर्भेश्वरं गर्भे श्रीवीरं प्रियकारिणी॥
पञ्चसप्तशतवर्षैरसाममासार्द्धसंयुक:।
चतुर्थस्तु तदा काल: दु:खम: सुखमोत्तर:॥
आषाढशुक्लषष्ठ्यान्तु गर्भावतरणेऽर्हत:।
उत्तराषाढगुर्नोनोडुमुडुराजस्थितिश्रित:॥
दिक्कुमारीकृताभिख्यां द्योतिसर्त्तिर्घनस्तनीम्।
प्रच्छन्नो भास्यद्गर्भस्तां रवि: प्राच्यं यथा॥
नवमासेष्वतीतेषु स जिनोऽष्टदिनेषु च।
उत्तराफाल्गुनीष्विन्दौ वर्त्तमानेऽजनि
प्रभु:॥
ततोऽनन्तजिनमाहात्म्यात्तुष्टपीठकिरीटका:।
प्रणेतुरधिकातनदृष्टान्ता: सुरेश्वरा:॥
शङ्खभेरीहरिध्वानघण्टानिर्घोषघोषणम्।

समाकर्ण्य सुरास्तूर्णं घूर्णितार्णवराविण:॥
सप्तानीकमहाभेदा: सस्त्रीका: कृतभूषणा:।
सेन्द्राश्चतुर्णिकायास्ते प्राप्ता: कुण्डपुरं पुरम्॥
त्रि:परीत्य पुरं देवा: पुरन्दरपुर:सरा:।
जिनमिन्द्रसुखं देवं तद्गुरुञ्च ववन्दिरे॥
मातु: प्रियुं विकल्प्यान्यं सुप्राया: सुरमायया।
इन्द्राणी प्रणता नीत्वा जिनेन्द्रं हरये ददौ॥
गृहीत्वा करपद्माभ्यां तमभ्यर्च्य चिरं हरि:।
चक्रे नेत्रसहस्रोरुपुण्डरीकवनार्चितम्॥
ततश्चन्द्रावदातानाङ्गमिन्द्रस्तुङ्गमतङ्गजम्।
प्रच्छन्नौघमिव हैमाद्रेर्मुक्ताघो मदनिर्झरम्॥
गण्डस्थलमदामोदभ्रमद्भ्रमरमण्डलम्।
तमिवाधित्यकावस्थतमालवनमस्थितम्॥
कर्णान्तरततासक्तरक्तचामरसंपृतिम्।
तं यथाधित्यकाधीनरक्ताशोकमहावनम्॥
सुवर्णरज्ज्वा चार्चां परिवेष्टितविग्रहम्।
तमेव च यथोपात्तक्वणत्कनकमेखलम्॥
अनेकरदसंवृत्तनृत्यसङ्गीतपोषितम्।
तमिवोत्तुङ्गशृङ्गाग्रनृत्यन्नायत्सुराङ्गनम्॥
सुवृत्तदीर्घसञ्चारिकररुद्धदिगन्तरम्।
तमिवात्यायतिस्थूलस्फुरद्भोगभुजङ्गमम्॥
ऐरावानधारितस्फीतधवलातपवारणम्।
तमिवोर्द्धस्थिताभ्यर्णसम्पूर्णशशिमण्डलम्॥
चामरेन्द्रभुजोत्क्षिप्तचलचामरहारिणम्।
तं यथा चमरीक्षिप्तबालव्यजनवीजितम्॥
ऐरावतं समारोप्य जिनेन्द्रं तस्य मघवनम्।
देवै: सह गत: प्राप मन्दरं स पुरन्दर:॥
तं पाण्डुकवने रम्ये मन्दरस्य जिनं हरे:।
पाण्डुकायां प्रसिद्धायां शिलायां सिंहविष्टरे॥
संस्थाप्य विबुधानीतक्षीरसागरवारिभि:।
ज्ञातकुम्भमयै: कुम्भैरभिषिच्य समं सुरै:॥
वस्त्रालङ्कारमालाद्यैरलङ्कृत्य कृतस्तुति:।
आनीयमातुरुत्सङ्गे जिनं कृत्वा शतोचित:॥
सिद्धार्थप्रियकारिण्यो: सममानन्दयकम्।
वर्द्धमानाख्यया स्तुत्वा स देवो वासवोऽगमत्॥
मासान् षण्मदशालक्षमद्भधारा दिने दिने।
या: पूर्व्वमापतंस्ताभिस्त्रिलोकोऽर्थी जनोऽखिल:॥
वर्द्धमान: सुरै: सेव्यो ववृधे स यथा यथा।
पितृबन्धुत्रिलोकानामनुरागस्तथा तथा॥
सुरासुरनराधीशमौलिमालार्चितक्रम:।
त्रिंशद्वर्षप्रमाणोऽभूद्वीरो भोगै: परिष्कृत:॥
शुद्धत्वं न भोगेषु चित्तं तस्य चिरं स्थिरम्।
कुटिलेषु यथा सिंहनखरन्ध्रेषु मौक्तिकम्॥
प्राक्तचित्तं कदाचित्तं स्वयं बुद्धमबोधयत्।
नत्वा सारस्वतादित्यमुख्यालोकान्तिका: सुरा:॥
सौधर्म्माद्यै: सुरैरेत्य कृतोऽभिषवपूजन:।
आरुह्य शिबिकां दिव्यामुह्यमानां सुरेश्वरै:॥
उत्तराफाल्गुनीष्वेव वर्त्तमाने निशाकरे।
कृष्णस्य मार्गशीर्षस्य दशम्यामगमद्वनम्॥
अपनीय तनो: सर्व्वं वस्त्रमाल्यादिभूषणम्।
पञ्चमुष्टिभिरुद्धृत्य मूर्द्धजानमवत् मुनि:॥
केशकुन्तलमक्षौतं जिनस्य भ्रमराश्रितम्।

प्रतिपद्य सुराधीशो निदधौ दुग्धवारिधौ ॥
दन्तनीलत्विषेवेन्द्र निर्मलेनेन्द्रिय चाक्षभात् ।
जिनेन्द्रदेवपुत्रेण रक्षित: क्षीरसागर: ॥
जिननिष्क्रमणं दृष्ट्वा तुष्टा: सर्वे नरामरा: ।
कृत्वा तत्रोपवासाप्तपूजाप्रागुर्यथायथम् ॥
मन:पर्ययपर्यन्तचतुर्ज्ञानमधेश्वर: ।
तपो द्वादशवर्षाणि चकार द्वादशात्मकम् ॥
विहरन्नथ नाथोऽसौ गुरुग्रामपरिग्रह: ।
ऋजुकूलापगाकूले जृम्भिकग्राममीयिवान् ॥
तत्रातापनयोगस्थ: शालाभ्याशशिलातले ।
वैशाखशुक्लपक्षस्य दशम्यां षष्ठमाश्रित: ॥
उत्तराषाढगुर्नो प्राप्ते शुक्लध्यानी निशाकरे ।
निहत्य घातिसङ्घातं केवलज्ञानमाप्तवान् ॥
केवलस्य प्रभावेण सद्यस्तत्रासनाश्रय: ।
आगत्य महिमां चक्रुस्तस्य सर्वे सुरासुरा: ॥
षट्षष्टिदिवसान् भूयो मौनेन विहरन् विभु: ।
आजगाम जगत्ख्यातं जिनो राजगृहं पुरम् ॥
आरुरोह गिरिं तत्र विपुलं विपुलश्रियम् ।
प्रबोधार्थं स लोकानां भानुमानुदयं यथा ॥
तत: प्रमुदितस्तस्मात्तेरापतद्भिरितस्तत: ।
अमरासुरसङ्घैर्योऽपि जिनेन्द्रस्य गुरुरिव ॥
सौधर्माद्यैस्सदा देवै: परीतोऽभान्न भूधर: ।
नाभेयाधिष्ठित: पूर्वं यथाष्टापदपर्वत: ॥
चतुराशासुरद्वारन्यस्तद्वादशगोपुरम् ।
क्षणं रत्नमयं देवै: प्राकारवलयत्रयम् ॥
आते योजनविस्तीर्णे भूरजे समवादिके ।
विभागा द्वादशाभासन्नभ:स्फाटिकभित्तय: ॥
प्रातिहार्यैर्युतोऽष्टाभिश्चतुस्त्रिंशन्महाद्भुतै: ।
तत्र देवैर्हतोऽभासीच्छिन्नस्कन्ध इव द्रुम: ॥
इन्द्राग्निवायुभूत्याख्या: कौण्डिन्याख्याश्च पण्डिता: ।
एत्यागोदनयायाता: समवस्थानमर्हत: ॥
प्रत्येकं सहिता: सर्वे शिष्याणां पञ्चभि: शतै: ।
त्यक्तामरादिसम्बन्धा: संयमं प्रतिपेदिरे ॥
सुता चेटकराजस्य कुमारी चन्दना तदा ।
धौतैकाम्बरसंवीतायातायां पुर:सरी ॥
श्रेणिकोऽपि च संग्राम: सैनया चतुरङ्गया ।
सिंहासनोपविष्टं तं प्रणनाम जिनेश्वरम् ॥
दृष्ट्वाशोकद्रुमाकारं तत्प्रभावदशर्नै: ।
अथनै: सुप्रतीकैश्च प्रतिहारैरमङ्गलै: ॥
सम्भाषमाणकुलाजगमभिरुद्धयधर्वै: ।
नगरक्षणसंयुक्तैरष्टभेदैर्मदाधर्वै: ॥
मानस्तम्भैश्चतस्रभिश्चतुर्भिश्च महावनै: ।
वाप्तभीरुदयस्तैश्च वापीवनलतादयै: ॥
तैस्तैर्देवै: कृते: सर्वैरष्टैर्यातिशयैश्चया ।
यदा स्थानस्थितैर्लोकै: समवस्थानभूरभूत् ॥
अथेन्द्रोरिव गुप्ताद्या निषद्या गुर्वधिष्ठिता: ।
गणधरोऽभाद्गिरिस्थान्ते ज्ञानरूपाच्च विष्णवत् ॥
तत: कल्पनिवासिन्यो देव्य: कल्पलतासुत: ।
मेरोरिव जिनस्यान्ते सा बभुर्भोगभूमय: ॥
ततोऽन्धुतनारीभिरार्यिकाभिरिरावभौ ।
स्थूरद्विद्युद्विराजिष्णु शारदीव घनावली ॥
ज्योतिर्देवस्त्रियो तत्र रेजुरुज्ज्वलमूर्तय: ।
तारारा इव संक्रान्ता: समवस्थानसागरे ॥
क्रान्ताभ्यन्तरदेवानां ततस्तत्र विरेजिरे ।
करकुट्मलहारिण्य: साक्षादिव वनश्रिय: ॥
ततो नागकुमारादिदेवो नागफणोष्णुता: ।
नागलोकममायाता नागबल्य इवा बभु: ॥
ततोऽप्यसिकुमाराद्या: देवा: पातालवासिन: ।
ज्वलिनोज्ज्वलवेषास्ते दशभेदा बभासिरे ॥
तत: किन्नरगन्धर्वयक्षकिंपुरुषादय: ।
षोढाष्टाष्टविकल्पास्ते व्यन्तराश्च प्रकाशिरे ॥
सप्रकीर्णकनक्षत्रसूर्याचन्द्रमसोग्रहा: ।
पञ्चभेदास्तदानल्पवपुषो ज्योतिषो बभु: ॥
मौलिकुण्डलकेयूरप्रालम्बकटिसूत्रिण: ।
दारिण: कल्पवृक्षाभास्ततोऽभान् कल्पवासिन: ॥
सपुत्रानमितानेकविद्याधरपुर:सरा: ।
न्यषीदन्मानुषा नानाभाषावेशरुचस्तत: ॥
ततो हि नकुलेभेन्द्रहर्यश्वमहिषादय: ।
जिनानुभावसम्भूतविश्वास्या: स्वामिनो बभु: ॥
इति द्वादशभेदेषु परीतिं विनुतिं नतिम् ।
गत्वेषु प्रथमं कृत्वा स्थितेषु परितो जिनम् ॥
प्रत्यक्षीकृतविश्वार्थं क्षतदोषचयक्षयम् ।
जिनेन्द्रं गौतमोऽपृच्छत्तीर्थार्थं पापनाशनम् ॥
स दिव्यध्वनिना विश्वसंशयच्छेदिना जिन: ।
दुन्दुभिध्वनिधीरेण योजनान्तरयायिना ॥
श्रावणस्यासिते पक्षे नक्षत्रेऽभिजिते प्रभु: ॥
प्रतिपद्यह्नि पूर्वाह्णे शासनार्थमुदाहरत् ॥
आचाराङ्गस्य तत्त्वार्थं तथा सूत्रकृतस्य च ।
जगाद भगवान् वीर: संस्थानसमवाययो: ॥
व्याख्या प्रज्ञप्तिहृदयं ज्ञाताधर्मकथास्थितम् ।
श्रावकाध्ययनस्यार्थमन्तकृद्दशगोचरम् ॥
अनुत्तरदशस्यार्थं प्रश्नव्याकरणस्य च ।
तथा विपाकसूत्रस्य पवित्रार्थं तत: परम् ।
त्रिषष्टि: त्रिशती यत्र दृष्टीनामभिधीयते ।
दृष्टिवादस्य तस्यार्थं पञ्चभेदस्य सर्वदृक् ॥
जगाद जगतां नाथ: प्रथमं परिकर्मण: ।
सूत्रस्याद्यानुयोगस्य तथा पूर्वगतस्य च ॥
उत्पादपूर्वपूर्वस्य परमार्थं तत: परम् ।
अग्रायणीयपूर्वार्थमग्रवीरमगद्विदाम् ॥
वीर्यप्रवादपूर्वार्थमस्तिनास्तिप्रवादजम् ।
ज्ञानसत्यप्रवादार्थमात्मकर्मप्रवादयो: ॥
प्रत्याख्यानस्य विद्यानुवादकल्याणपूर्वयो: ।
प्राणावायस्य पूर्वस्य तत्त्वार्थं तदनन्तरम् ॥
क्रियाविशालपूर्वस्य विशालार्थमशेषवित् ।
त्रैलोकबिन्दुसारार्थं चूलिकार्थं सवस्तुकम् ॥
अङ्गप्रविष्टतत्त्वार्थं प्रतिपाद्य जिनेश्वर: ।
अङ्गबाह्यमथोदित्तप्रतिपाद्यार्थरूपत: ॥
सामायिकं यथाख्यातं स चतुर्विंशतिस्तवम् ।
वन्दनाथ तत: पूतां प्रतिक्रमणमेव च ॥
वैनयिकं विनेयेभ्य: कृतिकर्म ततोऽवदत् ।
दशवैकालिकं दृष्टीरुत्तराध्ययनं तथा ॥
तं कल्पव्यवहारश्च कल्पाकल्पं ० ० ०
कल्पश्च पुण्डरीकश्च सुमहापुण्डरीककम् ॥
तथा निषद्यकां प्राय: प्रायश्चित्तोपवर्णनम् ।
जगत्त्रयगुरु: प्राह प्रतिपाद्यं स्थितोदित: ॥
मत्यादे: केवलं तस्य सारूप्यं विषयं फलम् ।
अवरोत्तरभेदस्य ज्ञानस्योवाच संख्यया ॥
मार्गणास्थानभेदेषु गुणस्थानविकल्पने: ।
जीवस्थानप्रभेदेषु जीवद्रव्यनुपादिशत् ॥
सत्संख्याद्यानुयोगेश्च सन्नामाद्यै: किमादिभि: ।
द्रव्यं स्वलक्षणैर्भिन्नं पुद्गलादिविलक्षणम् ॥
द्विविधं कर्मबन्धस्य सहेतुं सुखदु:खदम् ।
मोक्षं मोक्षस्य हेतुञ्च फलं चाष्टगुणात्मकम् ॥
बन्धमोक्षफलं यत्र भुज्यते तद्विधाश्रुतम् ।
अन्तस्थितं जगौ लोकमलोकञ्च बहि:स्थितम् ॥
अथ सम्यग्विसम्पन्नं श्रुतार्थं जिनभाषितम् ।
द्वादशाङ्गश्रुतं स्कन्धं सोपाङ्गं गौतमो यथात् ॥
त्रैलोक्यं संसदि स्पृष्टं जिनार्कवचनांशुभि: ।
सूक्तमोहमहानिद्रं सुमोत्थितमिवाबभौ ॥
जिनभाषाधरस्यन्दमन्तरेण विजृम्भिता ।
तिर्यग्देवमनुष्याणां दृष्टिमोहमनीनशत् ॥
ततो जिनोक्ततत्त्वार्थमार्गश्रद्धा च सत्तमम् ।
शङ्काकाङ्क्षानिदानादिकलङ्कविगमोज्ज्वलम् ॥
सम्यग्दर्शनसद्रत्नं ज्ञानालङ्कारनायकम् ।
स्वकर्मक्षुद्दवेध्वेकं पिनद्धमखिलाङ्गिभि: ॥
कायेन्द्रियगुणस्थानजीवस्थानकुलायुषाम् ।
भेदाश्चो निर्विकल्पाश्च निरूप्यागमचक्षुषा ॥
क्रियासु स्थानपूर्वासु यथादिपरिवर्जनम् ।
षण्णां जीवनिकायानामहिंसाद्यं महाव्रतम् ॥
चक्षुर्गोचरजीवौघान् परिहृत्य यतेर्यत: ।
ईर्यासमितिराद्या सा व्रतशुद्धिकरी मता ॥
त्यक्त्वा कार्कश्यपारुष्यं यतेर्यत्नवत: सदा ।
भाषणं धर्मकार्येषु भाषासमितिरिष्यते ॥
पिण्डशुद्धिविधानेन शरीरस्थितये तु यत् ।
आहारग्रहणं सास्यादेषणा समितिर्यते: ॥
निक्षेपणं यदा दानमोचित्या योग्यवस्तुन: ।
समिति: सा तु विज्ञेया निक्षेपादाननामिका ॥
शरीरात्मस्नेहत्यागं प्रगतासु सभूमिषु ।
यत्नात्समितिरेषा तु प्रतिष्ठापनिका मता ॥
एवं समितय: पञ्च गोप्यास्त्रिस्रस्तु गुप्तय: ।
वाङ्मन:काययोगानां शुद्धरूपा प्रवृत्तय: ॥
चित्तेन्द्रियनिरोधश्च षड्वश्यकमतन्द्रिया: ।
शौचस्नानैकभक्तञ्च स्थितमुक्तिरचेलता ॥
भूमिशय्याव्रतं दन्तमलमार्जनवर्जनम् ।
तप: संयमचारित्रं परीषहजय: पर: ॥
अनुप्रेक्षाश्च धर्मश्च क्षमादिदशलक्षण: ।
ज्ञानदर्शनचारित्रतपोविनयसेवनम् ॥
इति श्रावकधर्मोऽयं कर्मनिर्मोक्षहेतुक: ।
सुरासुरनराध्यक्षं जिनोक्तं तदा नरा: ॥
संसारभीरव: शुद्धसम्यक्त्वादिकदृष्टय: ।
सर्वसङ्गविनिर्मुक्ता: प्रजग्मु: प्रतिपेदिरे ॥
सम्यग्दर्शनसंशुद्धा: शुद्धैकव्रतनायका: ।
सप्तधो दधु: शुद्धा नार्यस्तत्रार्यिकाव्रतम् ॥
मध्याह्नमं केचित् त्रिविधञ्च गुणव्रतम् ।

मिथ्याव्रतं चतुर्भेदं तत्र स्त्रीपुरुषा दधुः ।
निर्ग्रन्थोऽपि यथाशक्ति नियमेष्वव्रतस्थिरे ।
देवाः सद्दर्शनज्ञानक्रियापूजात्तु रेमिरे ॥
श्रेणिकेन तु यत्पूर्वं नरकायुष्कमर्जितम् ।
परमिन्द्रियसारख्यं नारकायुष्कमक्षमे ।
तत्तु क्षायिकसम्यक्त्वात् स्थितिं प्रथमवर्तिनीं ।
प्रापद् वर्षसहस्रामशीतिं चतुरुत्तराम् ॥
चक्रिणश्चतु चतुरः क्व क्व चैवमपरास्थितिः ।
अहो क्षायिकसम्यक्त्वप्रभावोऽयमनुत्तरः ॥
चक्रुरो वारिषेणो वो वो भवः स तथापरे ।
कुमारा मातरश्चैषां परावृत्तान्तःपुरस्त्रियः ॥
सम्यक्त्वं श्रीसखद्वानं श्रौषधं जिनपूजनम् ।
प्रतिपद्य विनेमुस्ते जिनेन्द्रं त्रिजगद्गुरुम् ॥
ततः प्रणम्य देवेन्द्रा जिनेन्द्रं स्तोत्रपूर्वकम् ।
यथायथं ययुर्युक्ता निजवर्गैर्निवासदम् ॥
श्रेणिकोऽपि गुणश्रेणीसुखकैरभिरूढवान् ।
अभिष्टुत्य जिनं नत्वा प्रविष्टस्तदधीपुरम् ॥
निःसरद्भिर्विशद्भिश्च सभा जैनी जनोर्मिभिः ।
क्षुभ्यो क्षुभितैर्वेला नदीपूरैरिवाम्बुधिः ॥
चामीकरमयैः तैर्निर्यं सभामण्डलमर्हतः ।
श्रीयते वा सदा स्त्रीतिं भानुभिर्भानुमण्डलम् ॥
नीत्यात्तमितं तत्र चायते ग्रामखण्डलम् ।
धर्मचक्रप्रभाचक्रप्रभामण्डलरोचिषाम् ॥
तत्र तीर्थंकरः कृत्स्नं प्रत्यहं धर्मदेशनम् ।
सेवितः श्रेणिकेनास्य न हि तृप्तिस्त्रिवर्गजा ॥
गौतमश्च समासाद्य तदा तदुपदेशतः ।
सर्वानुयोगमार्गेषु प्रवीणः स बभूवान् ॥
ततो जिनगणैस्तुङ्गैराप्ता रागगृहं पुरम् ।
शतमन्तर्वहिर्याप्तसालं सप्तिसोत्सवैः ॥
ततः सामन्तसंघातैर्मगधान्तिपुरोचितैः ।
प्रजाभिर्जिनमेघाद्यो मगधो विषयोऽखिलः ॥
पुरेषु ग्रामघोषेषु पर्वनाम्नि वृद्धयत ।
नदीतटवनान्तेषु तदा बहुजिनावली ॥
तिष्ठत्येव मघोदये विघटयन्मोहान्धकारोन्नतिं
प्राग्देशप्रभया विधाय मगधादेशं प्रबुद्धप्रभम् ।
तद्भूत्या दृढदेशमध्यगगनभ्यन्दिनश्रीधरं
मिथ्याज्ञानहिमान्तलक्ष्मिनरविर्बोधप्रभा-
मण्डलः ॥")
कौशिकः । इति हेमचन्द्रः ॥ धनुर्धरः । इति शब्दरत्नावली ॥ एरण्डवीरवृक्षः । इति राजनिर्घण्टः ॥ लक्ष्मणः । यथा,—
"एकस्मिन् महावीरे पतिते रणभूतले ॥"
चन्द्रादित्यः । यथा,—
"यद्रुद्रादेर्महावीरैर्वेष्टितं कमलासनम् ।"
इति तन्त्रसारे धनुर्मन्त्रकथनम् ।
धनुर्मान्त्रयमपि महावीरत्वेन प्रसिद्धम् ॥
महावीरा, स्त्री, (महावीर + टाप् ।) वीरवाराणसी । इति रत्नमाला ।
महावीर्यः, पुं, (महत् विपक्षदृष्टे विपुलं वीर्यमस्य ।) गरुडः । इति शब्दरत्नावली ॥ (महत् वीर्यं सर्वोत्तमस्य ।) कृष्णभेदः । इति त्रिकाण्डशेषः । वाराहीकन्दः । इति राजनिर्घण्टः ॥ (वितथस्य पुत्रभेदः । यथा, भागवते । ६ । २१ । १ ।
"वितथस्य सुतान्मन्योर्बृहत् क्षत्रो जयस्ततः ।
महावीर्यो नरो गर्गः संकृतिस्तु नरात्मजः ॥")
अतिशयबलयुक्ते, त्रि ॥ (यथा, महाभारते । ५ । १७६ । ४६ ।
"ततः किल महावीर्यो भौम्यः प्राग्ज्योतिषं नृपान् ।
अधिक्षिप्य महातेजास्त्रिसः कन्या जहार ताः ॥"
विराजः पुत्रः । यथा, विष्णुपुराणे । २ । १ । ३६ ।
"नरो गयस्य तनयस्ततः पुत्रोऽभूद्विराट् ततः ।
तस्य पुत्रो महावीर्यो धीमांस्तस्मादजायत ॥")
महावीर्या, स्त्री, (महत् वीर्यमस्याः टाप् ।) संज्ञा। सा च कूर्म्यपत्नी । इति त्रिकाण्डशेषः ॥ वनकार्पासी । इति शब्दरत्नावली ॥ महाशतावरी । इति राजनिर्घण्टः ॥
महावृक्षी, स्त्री, (महती वृक्षती ।) वार्त्ताकी । इति त्रिकाण्डशेषः ॥
महावृक्षः, पुं, (महान् वृक्षः ।) क्षुद्रवृक्षः । इति हलायुधः ॥ (यथास्य पर्य्यायः ।
"वज्रवृक्षो महावृक्षः क्षुद्रो क्षुद्र सुधा गुडा ॥"
यथा, सुश्रुते कल्पस्थाने ४४ अध्याये ।
"महावृक्षपयःपीतैर्यवागूक्षुद्रकैः कृता ।
पीना विरोचयत्याशु गुडेनोत्कारिका कृता ॥")
वृहद्वृक्षश्च ॥
महावेगः, पुं, (महान् अमोघो दुर्वारो वा वेगो यस्य ।) शिवः । इति महाभारते तस्य सहस्रनामस्तोत्रम् ॥ (महान् वेगः ।) अतिजवः । (महान् वेगोऽस्य ।) तद्युक्ते, त्रि ॥ (यथा, महाभारते । १ । १५५ । १२ ।
"विकर्णश्चो महावेगो गर्ज्यमानौ परस्परम् ।
पश्य त्वं युधि विक्रान्तावेतौ च नररक्षसौ ॥")
महाव्याधिः, पुं, (महांश्चासौ व्याधिश्चेति ।) महारोगः । स तु कुष्ठादिः । यथा,—
"सर्व्वव्याधिविनिर्मुक्तो महाव्याधिर्विमुच्यते ।
पठनात् संप्रजप्तेन जीवन्मुक्तो भवेन्नरः ॥"
इति ब्रह्मयामले गायत्रीकवचम् ॥
महाव्याहृतिः, स्त्री, (महती चासौ व्याहृतिश्चेति ।) प्रणवसहितायुक्तव्याहृतित्रयम् । यथा । ॐ भूः स्वाहा ॐ भुवः स्वाहा ॐ स्वः स्वाहा । इति भरतसेनभट्टः ॥ (यथा, मनौ । २ । ८१ ।
"ओङ्कारपूर्विकास्तिस्रः महाव्याहृतयोऽव्ययाः ।
त्रिपदा चैव सावित्री विज्ञेयं ब्रह्मणो मुखम् ॥")
महाव्रतं, क्ली, (महच्च तद्व्रतञ्चेति ।) दुष्टव्रतम् । नानो वा इति भाषा । यथा,—
"कृत्वान्तु सप्तदशाहृतं तथाष्टशतकं प्रिये ! ।
महाव्रतविमोक्षाय विप्राहृतं षडेश्वरः ॥"
इति तिथ्यादितत्त्वधृतवाराहीतन्त्रवचनम् ॥
महाव्रतं, क्ली, (महच्च तद्व्रतञ्चेति ।) द्वादशवार्षिकव्रतम् । यथा । 'तेन वधकालादूर्द्धं विंशत्यधिकशतस्य यावदवशिष्टं तावत्परिमाणमहाव्रतानुरूपा धेनवो दातव्याः ।' इति प्रायश्चित्तविवेके भवदेवभट्टमतम् ॥ शरत्कालीनदुर्गापूजनम् । यथा,—
"महाव्रतं महापुण्यं शङ्करादैरनुष्ठितम् ।
कर्त्तव्यं सुरराजेन्द्र ! देवीभक्तिसमन्वितैः ।"
इति तिथ्यादितत्त्वधृतदेवीपुराणवचनम् ॥ चरुयोदयकालीनमाघस्नानम् । यथा,—
"वासुदेवं हरिं कृष्णं श्रीधरञ्च स्मरेत्ततः ॥
दिवाकर ! जगन्नाथ ! प्रभाकर ! नमोऽस्तु ते ।
परिपूर्णं कुरुष्वेदं माघस्नानं महाव्रतम् ॥"
इति मलमासतत्त्वधृतपद्मपुराणवचनम् ॥ (महाव्रतधारिणि, त्रि । यथा, महाभारते । १३ । ५४ । २१ ।
"ततोऽब्रवीन्नृगो दृष्ट्वा पुनरेव हयं तमं ।
कौशल्यां दृश्यां समासीनं जपमानं महाव्रतम् ॥")
महाव्रती, [न्] पुं, (महाव्रतं योगनियमानुष्ठानादिकमस्यास्तीति । व्रत + इनिः ।) शिवः । इति हेमचन्द्रः । २ । १११ ॥ उरुरुटः । इति त्रिकाण्डशेषः ॥ महाव्रतयुक्ते, त्रि ॥ (यथा, कथासरित्सागरे । ३७ । ५६ ।
"एतच्छ्रुत्वापि सावज्ञास्ते महव्रतिनरुद्रा ।
ऊचुर्निश्चयदत्तं ते चत्वारः सहयायिनः ॥")
महाशक्तिः, पुं, (महत्यः शक्तयः मातृगणादयो महत्त्वा सामर्थ्यम् यस्य ।) कार्त्तिकेयः । इति शब्दमाला ॥ (महती शक्तिः ।) अतिशयपराक्रमः । महतीशक्तिरस्य तद्युक्ते, त्रि ॥
महाशङ्खः, पुं, (महान् शङ्ख इव दृष्टक्षुभत्वात् ।) मानुषास्थि । संख्याविशेषः । स च दशनिखर्व्वः । ललाटम् । इति मेदिनी । खे, १६ ॥ (महान् महार्घः शङ्खः ।) निधिविशेषः । इति विश्वः ॥ कर्णनेत्रयोर्मध्यगतास्थि । यथा,—
"कर्णनेत्रान्तरालास्थि महाशङ्खः प्रकीर्त्तितः ।"
तस्य मालया जपविधिर्यथा,—
"महाशङ्खमयी माला गौलसारस्य ते विधौ ।
वृषलाटास्थिखण्डेन रचिता जपमालिका ॥
महाशङ्खमयी माला तारादिविद्यासिद्धे प्रिये ! ।"
इति तन्त्रसारधृतसुरूपमालातन्त्रम् ॥ (महान् शङ्खः ।) वृषलाटः । यथा,—
"भौष्टं दध्मौ महाशङ्खं भीमकर्म्मा वृकोदरः ।"
इति श्रीभगवद्गीतायाम् १ अध्यायः ॥ (सर्पभेदः । यथा, भागवते । ५ । २४ । ३१ ।
"ततोऽधस्तात् पातालेषु नागलोकपतयोवासुकिप्रमुखाः शङ्खकुलिकमहाशङ्खश्वेतधनञ्जयधृतराष्ट्रशङ्खचूडकम्बलाश्वतरदेवदत्तादयो महाभोगिनो महामर्षा निवसन्ति ।")
महाशङ्खः, पुं, राजधत्तूरः । इति राजनिर्घण्टः ॥ (महांश्चासौ शङ्खश्चेति ।) अतिधूर्त्तः, त्रि ॥
महाशङ्खपुष्पिका, स्त्री, (अल्पं पुष्पं इति अल्पार्थे कन् । ततः स्वार्थे वुन् स्त्रियां टाप् पूर्वस्य ह्रस्वश्च । शङ्खस्येव पुष्पिका यस्याः । महती चासौ शङ्खपुष्पिका चेति ।) वृहच्छङ्खपुष्पी ।

महावी

मिथ्याव्रतं चतुर्भेदं तत्र स्त्रीपुरुषा दधुः ।
तिर्यञ्चोऽपि यथाशक्ति नियमेष्वतस्थिरे ।
देवाः सद्दर्शनज्ञानचिनपूजासु रेमिरे ।
श्रेणिकेन तु यत् पूर्वं नरकायुरमरप्रभात् ।
परस्मिंस्तारकं नारदायुक्तमक्तमे ॥
तत्तु क्षायिकसम्यक्त्वात् सस्थितिं प्रथमक्षितौ ।
प्रापद् वर्षसहस्रायामश्रीतिं चतुरुत्तराम् ॥
चयस्त्रिंशत् सहस्राः ज क्र चेयमपरास्थितिः ।
अहो क्षायिकसम्यक्त्वप्रभावोऽयमनुत्तरः ॥
अक्रूरो वारिषेणो यो यो भवः स तथापरे ।
कुमारा मातरश्चैषां पराक्षान्तःपुरस्त्रियः ॥
सम्यक्त्वं श्रीगुरूणां प्रौषधं जिनपूजनम् ।
प्रतिपद्य जिनेमुक्तं जिनेन्द्रं त्रिजगद्गुरुम् ॥
ततः प्रणम्य देवेन्द्रा जिनेन्द्रं स्तोत्रपूर्वकम् ।
यथायथं ययुर्युक्ता निजवर्गैर्निजासदम् ।
श्रेणिकोऽपि गुणश्रेणीसुचकैरभिरूढवान् ।
अभिष्टुत्य जिनं नत्वा प्रविष्टसुधीपुरम् ॥
निःसरद्भिर्निशङ्कैश्च सभा जैनी जनोर्मिभिः ।
क्षुभोभ क्षुभितैर्वेला नदीपूरैरिवाम्बुधिः ॥
व्याकीर्णमेव तैर्नित्यं सभामण्डलमर्हतः ।
क्रीयते वा कदा स्तीर्तिं भानुभिर्भानुमण्डलम् ॥
नोद्यास्तमितं तत्र जायते नभमण्डलम् ।
धर्मचक्रप्रभाचक्रप्रभामण्डलरोचिषाम् ॥
तत्र तीर्थंकरः कुर्वन् प्रत्यहं धर्मदेशनम् ।
सेवितः श्रेणिकेनास्य न हि तन्निस्तिवर्मजा ॥
गौतमश्च समाश्रित्य तदा तदुपदेशतः ।
सर्वानुयोगमार्गेषु प्रवीणः स वृषोऽभवत् ॥
ततो जिनगुरुस्तुत्यैराज्ञा राजगृहं पुरम् ।
ज्ञातमन्तर्वहिर्व्याप्तमज्ञानं महिमोत्सवैः ॥
ततः सानन्दनंघातैर्मेघानन्तिपुरोहितैः ।
प्रजाभिर्निजगेहाढ्यो मगधो विषयोऽखिलः ॥
पुरेषु ग्रामघोषेषु पत्तनाग्रे पदेषु च ।
नदीतटवनान्तेषु तदा मुदितनागरी ॥
तिष्ठत्येव महोदये विघटयन्मोहान्धकारोन्नतिं
प्राग्दैन्यप्रणया विधाय मगधादेशं प्रबुद्धप्रजम् ।
तद्भूया दृढदेशसंयमगमन्मध्यन्दिनश्रीधरं
मिथ्याज्ञानदिगन्तलब्धिनरविर्बोधप्रभा-
मण्डलः ॥")

कौशिकः । इति हेमचन्द्रः ॥ धनुर्धरः । इति शब्दरत्नावली ॥ एकवीरस्तुतः । इति राजनिर्घण्टः ॥ नागः । यथा,—

"नागस्य महावीरं पतितं रणभूतले ॥"

व्याघ्रादिः । यथा,—

"व्याघ्रदीपिमहावीरैर्वेष्टितं समरस्थितम् ॥"

इति तत्सारे हनूमत्कल्पः ।

हनूमान् स्वयमपि महावीरस्तेन प्रमितः ॥

महावीरा, स्त्री, (महावीर + टाप् ।) वीरकाकोली । इति हलमाला ॥

महावीर्य्यः, पुं. (महत् विस्तरत्वे विपुलं वीर्य्यमस्य ।) ब्रह्मा । इति शब्दरत्नावली ॥ (महत् वीर्यं तपोयोगमस्य ।) इन्द्रभेदः । इति त्रिकाण्डशेषः । नागदोनरः । इति राजनिर्घण्टः ॥ (जिनस्य पुत्रभेदः । यथा, भागवते । ६ । २१ । १ ।

"जितस्य सुतान्मन्योर्हर्यङ्ग जयस्ततः ।
महावीर्य्यो नरो गर्गः संकृतिस्तु नरात्मजः ॥")

अतिशयवत्तयुक्ते, त्रि ॥ (यथा, महाभारते । ५ । १७६ । ४६ ।

"ततः किल महावीर्य्यो भीष्मः प्राक्तनवो नृपान् ।
अधिक्षिप्य महातेजास्त्रिभिः कन्या जहार ताः ॥"

विराजः पुत्रः । यथा, विष्णुपुराणे । २ । २ । ३६ ।

"नरो गयस्य तनयस्तत्पुत्रोऽभूद्विराट् ततः ।
तस्य पुत्रो महावीर्य्यो धीमांस्तस्मादजायत ॥")

महावीर्य्या, स्त्री, (महत् वीर्य्यमस्याः टाप् ।) संज्ञा। सा च कार्य्यपत्नी । इति त्रिकाण्डशेषः ॥ वनकार्पासी । इति शब्दरत्नावली ॥ महाशतावरी । इति राजनिर्घण्टः ॥

महावृहती, स्त्री, (महती वृहती ।) वार्त्ताकी । इति त्रिकाण्डशेषः ॥

महावृक्षः, पुं, (महान् वृक्षः ।) खदीवृक्षः । इति हलायुधः ॥ (यथास्य पर्य्यायः ।

"वत्सवृक्षो महावृक्षः खदी खुच सुधा गुडा ॥"

यथा, सुश्रुते कल्पस्थाने ४४ अध्याये ।

"महावृक्षत्वयःपीतैर्यवागूरुत्कुलैः कृता ।
पीता विरोचयत्याशु गुडूचीत्वारिका कृता ॥")

वृहद्वृक्षश्च ॥

महावेगः, पुं, (महान् अमोघो दुर्वारो वा वेगो यस्य ।) शिवः । इति महाभारते तस्य सहस्रनामस्तोत्रम् ॥ (महान् वेगः ।) अतिजवः । (महान् वेगोऽस्य ।) तद्युक्ते, त्रि ॥ (यथा, महाभारते । २ । १५५ । १२ ।

"विकर्षन्तौ महावेगौ गर्ज्जमानौ परस्परम् ।
मध्ये त्वं युधि विक्रान्तावेतौ च नरराक्षसौ ॥")

महाव्याधिः, पुं, (महांश्चासौ व्याधिश्चेति ।) महारोगः । स तु कुष्ठादिः । यथा,—

"सर्व्वव्याधिविनिर्मुक्तो महाव्याधिविवर्जितः ।
पठनात् संप्रजप्येषु जीवन्मुक्तो भवेन्नरः ॥"

इति ब्रह्मयामले गायत्रीकवचम् ॥

महाव्याहृतिः, स्त्री, (महती चासौ व्याहृतिश्चेति ।) प्रणवसहितायुक्तव्याहृतित्रयम् । यथा । ॐ भूः स्वाहा ॐ भुवः स्वाहा ॐ स्वः स्वाहा । इति भरतसेनभट्टः ॥ (यथा, मनौ । २ । ८१ ।

"ओङ्कारपूर्व्विकास्तिस्रः महाव्याहृतयोऽव्ययाः ।
त्रिपदा चैव सावित्री विज्ञेयं ब्रह्मणो मुखम् ॥")

महाव्रतं, क्ली, (महच्च तद्व्रतञ्चेति ।) दुष्टव्रतम् । मार्गो वा इति भाषा । यथा,—

"कुर्य्यात् सप्तदशाहूतं तथाष्टादशकं प्रिये ! ।
महाव्रतविमोक्षाय विंशाहूतं षडेव वा ॥"

इति तिथ्यादितत्त्वधृतनारदीयतन्त्रवचनम् ॥

महाव्रतं, क्ली, (महच्च तद्व्रतञ्चेति ।) द्वादशवार्षिकव्रतम् । यथा । 'तेन वधकालादूर्द्धं विंशत्यधिकशतस्य यावदवशिष्टं तावत्परिमाणमहाव्रतानुरूपा धेनवो दातव्याः ।' इति प्रायश्चित्तविवेके भवदेवभट्टमतम् ॥ अपरत्र कालीनदुर्गापूजनम् । यथा,—

"महाव्रतं महापुण्यं शङ्करादैरनुष्ठितम् ।
कर्त्तव्यं सुरराजेन्द्र ! देवीभक्तिसमन्वितैः ।"

इति तिथ्यादितत्त्वधृतदेवीपुराणवचनम् ॥ अखण्डोदयकालीनमाघस्नानम् । यथा,—

"वासुदेवं हरिं कृष्णं श्रीधरञ्च स्मरेत्ततः ॥
दिवाकर ! जगन्नाथ ! प्रभाकर ! नमोऽस्तु ते ।
परिपूर्णं कुरुष्वेदं माघस्नानं महाव्रतम् ॥"

इति मलमासतत्त्वधृतपद्मपुराणवचनम् ॥ (महाव्रतधारिणि, त्रि । यथा, महाभारते । १३ । ५४ । २१ ।

"ततोऽन्यस्मिन् वनोद्देशे पुनरेव ददर्श तम् ।
कौशल्यां वृक्षमासीनं जपमानं महाव्रतम् ॥")

महाव्रती, [न्] पुं, (महाव्रतं योगनियमानुष्ठानादिकमस्यास्तीति । व्रत + इनिः ।) शिवः । इति हेमचन्द्रः । २ । १११ ॥ उरुक्रटः । इति त्रिकाण्डशेषः ॥ महाव्रतयुक्ते, त्रि ॥ (यथा, कथासरित्सागरे । ३७ । ५६ ।

"एतच्छ्रुत्वापि सावज्ञास्ते महव्रतिनरूदा ।
ऊचुर्निश्चयदत्तं ते चत्वारः सत्यायिनः ॥")

महाशक्तिः, पुं, (महत्यः शक्तयः मातृगणादयो महत्त्वा सामर्थ्यञ्च यस्य ।) कार्त्तिकेयः । इति शब्दमाला ॥ (महती शक्तिः ।) अतिशयपराक्रमः । महतीशक्तिरस्य तद्युक्ते, त्रि ॥

महाशङ्खः, पुं, (महान् शङ्ख इव दृश्यत्वात् ।) मानुषास्थि । संस्थाविशेषः । स च दशनिखर्व्वः । ललाटम् । इति मेदिनी । खे, १६ ॥ (महान् महार्घः शङ्खः ।) निधिविशेषः । इति विश्वः ॥ कर्णनेत्रयोर्मध्यगतास्थि । यथा,—

"कर्णनेत्रान्तरालास्थि महाशङ्खः प्रकीर्त्तितः ।"

तस्य मालया जपविधिर्यथा,—

"महाशङ्खमयी माला नीलसारस्वते विधौ ।
वृषलाटास्थिखण्डेन रचिता जपमालिका ॥
महाशङ्खमयी माला तारादिसाधने प्रिये ! ।"

इति तन्त्रसारधृतसुदर्शनतन्त्रम् ॥ (महान् शङ्खः ।) वृहच्छङ्खः । यथा,—

"भौण्ड्रं दध्मौ महाशङ्खं भीमकर्म्मा वृकोदरः ।"

इति श्रीभगवद्गीतायाम् १ अध्यायः ॥ (सर्पभेदः । यथा, भागवते । ५ । २४ । ३१ ।

"ततोऽधस्तात् पातालेषु नागलोकपतयोवासुकिप्रमुखाः शङ्खकुलिकमहाशङ्खश्वेतधनञ्जयधृतराष्ट्रशङ्खचूडकम्बलाश्वतरदेवदत्तादयो महाभोगिनो महामर्षा निवसन्ति ।")

महाशटः, पुं, राजधत्तूरः । इति राजनिर्घण्टः ॥ (महांश्चासौ शटश्चेति ।) अतिधूर्त्तः, त्रि ॥

महाशणपुष्पिका, स्त्री, (अल्पं पुष्पं इति व्युत्पत्त्यर्थे ङीप् । ततः स्वार्थे कन् स्त्रियां टाप् पूर्वस्य ह्रस्वश्च । शणस्येव पुष्पिका यस्याः । महतीचासौ शणपुष्पिका चेति ।) वृहच्छणपुष्पी ।

महाष्टमी, स्त्री, (महत्या महादेव्या अष्टमी। महती अष्टमीति वा।) आश्विनशुक्लाष्टमी। यथा,—
"आश्विने शुक्लपक्षस्य भवेद् या अष्टमी निधिः।
महाष्टमीति सा प्रोक्ता देव्याः प्रीतिकरा परा॥"
इति कालिकापुराणे ५६ अध्यायः॥
तस्यां पूजाविधिः पुत्रवत उपवासनिषेधश्च यथा,—
"अष्टम्यां रुधिरैर्मांसैर्महामांसैः सुगन्धिभिः।
पूजयेद्दक्षजातीयैर्बलिभिर्भोजनैः शिवाम्॥
सिन्दूरैः पट्टवासैश्च नानाविधविलेपनैः।
पुष्पैरनेकजातीयैः फलैर्बहुविधैरपि॥
उपवासं महाष्टम्यां पुत्रवान्न समाचरेत्।
यथा तथैव पूतात्मा व्रती देवीं प्रपूजयेत्॥
पूजयित्वा महाष्टम्यां नवम्यां बलिभिस्तथा।
विसर्जयेद्दशम्यान्तु श्रवणे सावरीत्सवैः॥"
इति तत्रैव ६० अध्यायः॥
तत्रार्द्धरात्रपूजा। यथा,—
"कन्यासंस्थे रवावीशे शुक्लाष्टम्यां प्रपूजयेत्।
सोपवासो निशार्द्धे तु महाविभवविस्तरैः॥
पूजां समारभेद्या नक्षत्रे वारुणेऽपि वा।
पशुघातस्य कर्त्तासौ गवालम्भवधस्तथा॥"
इति देवीपुराणवचने वारुणपदेन पूर्ब्वाषाढोक्तेः। इति तिथ्यादितत्त्वम्॥
महाषन्ढः, पुं, (महानतिशयः षन्ढो विषयः क्लीवत्वात्। यद्वा, महतो हिमाद्रेर्महादेवस्य वा आसन्नः निकटवर्त्ती।) कुबेरः। इति शब्दमाला॥ (महतीवासन्नः) अतिनिकटश्च॥
महासक्तरः, पुं, (महांश्चासौ सक्तरश्च।) दृषत्। श्रोणीमत्स्यः। अस्य गुणाः। यथा,—
"महासक्तरसंज्ञस्तु तिक्तः पित्तकफापहः।
श्रमशिरो मधुरो रुच्यो वातसाधारणः स्मृतः॥"
इति भावप्रकाशः॥
महासमङ्गा, स्त्री, (महती चासौ समङ्गा च।) वृक्षविशेषः। कगछिया इति हिन्दीभाषा। तत्पर्य्यायः। ओदनिका २ ओदनाह्वया ३ वला ४ रुद्रा ५ वृद्धवला ६ तण्डुला ७ सुवल्लिका ८ प्रीतपाकिनी ९ प्रीतवला १० प्रीता वला ११ वलोत्तरा १२ वला १३ खरपिण्डी १४ वालपिण्डा १५। अस्या गुणाः। मधुरत्वम्। बल्यत्वम्। दोषत्रयनाशित्वम्। पुनर्नवा वृद्धा प्रयोगे ज्वरदाहनाशित्वञ्च। इति राजनिर्घण्टः॥
महासर्षः, पुं, (महांश्चासौ सर्षश्च।) धनसः। अग्रगण्यः। इति राजनिर्घण्टः॥ (पर्य्यायोऽस्य यथा, वैद्यकरत्नमालायाम्।
"धनसर्षो धनेऽग्र्यो महासर्षोऽनसन्तु सः॥")
महासत्त्वः, पुं, (महच्च इति। सद्+अच्। महान् सत्त्वः।) कुलस्त्रीः। इति राजनिर्घण्टः॥ (वाक्यप्रयोगे इति गौड़ादौ प्रसिद्धः। यथास्य प्रयोगः।
"अस्त्रातोऽस्नाटनः प्रोक्तस्तथास्नातक इत्यपि।
कुरण्टको वर्षपुष्पः स एवोक्तो महासहः॥"
इति भावप्रकाशस्य पूर्ब्वखण्डे प्रथमे भागे॥)
महासहा, स्त्री, (महासह+स्त्रियां टाप्।) माषपर्णी। (पर्य्यायोऽस्या यथा,—
"सिंहपुच्छी ऋषिप्रोक्ता माषपर्णी महासहा।
कृष्णवृन्ता च काम्बोजी पाण्डुलोमशपर्णिनी॥"
इति वैद्यकरत्नमालायाम्॥
पर्य्यायान्तरं यथा,—
"माषपर्णी सूर्य्यपर्णी काम्बोजी हयपुच्छिका।
पाण्डुलोमशपर्णी च कृष्णवृन्ता महासहा॥"
इति भावप्रकाशस्य पूर्ब्वखण्डे प्रथमे भागे॥)
अस्यानवृत्तः। इत्यमरः। २।४।७३। (कुलकः। तत्पर्य्यायो यथा,—
"कुलको भद्रतरुको दृषत्पुष्पोऽतिकेशरः।
महासहा कण्टकाढ्या नीलालिकुलसङ्कुला॥"
इति भावप्रकाशस्य पूर्ब्वखण्डे प्रथमे भागे॥)
महासान्तपनं, क्ली, (महत् सान्तपनम्।) व्रतविशेषः। यथा। अथ महासान्तपनम्। तत्र द्वादशसाधसान्तपनमुक्ता याज्ञवल्क्यः।
"पृथक्सान्तपनैर्द्वादशैः षड्भिः सोपवासकैः।
सप्ताहेनैव कृच्छ्रोऽयं महासान्तपनः स्मृतः॥
एतत् सप्ताहसाध्यम्। जाबालिः।
"गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम्।
एकैकं क्रमशोऽप्येषां द्वादशैरात्रमभोजनम्॥
कृच्छ्रः सान्तपनो नाम सर्व्वपापप्रणाशनः।
एकैकमेतदेवं हि त्रिरात्रं सुसमाचरेत्॥
त्र्याहश्चोपवसेदन्त्यं महासान्तपने विधिः॥"
एतत् सप्ताहसाध्यसान्तपनमुक्ता एकविंशतिदिनसाध्यं महासान्तपनमुक्तम्। महासान्तपनं धेनुषट्कदानसमम्। जाबालोक्तमहासान्तपनस्य एकविंशतिदिनसाध्यत्वेन सप्ताहसाध्यसान्तपनात् त्रिगुणत्वान्महासान्तपने धेनुषट्कं देयम्। इति प्रायश्चित्तविवेकः॥
महासारः, पुं, (महान् सारः स्थिरांशो यस्य।) दृढ़खदिरः। इति राजनिर्घण्टः॥
महासाहसं, क्ली, (महच्च तत् साहसञ्च।) अतिबलात्कारकृतकार्य्यम्। अतिशयदुष्टः। इति साहसशब्दार्थे मेदिनी। से, ४५॥ (महत् साहसमत्र।) अतिदुष्कृतकर्म्म। अतिशयदोषः। इति साहसशब्दार्थे हेमचन्द्रः। ३। ४००॥
महासाहसिकः, त्रि, (महानतिशयः साहसिकः।) चौरः। इति केचित्॥ अतिसाहसयुक्तश्च। बलपूर्ब्वापहारकः। यथा,—
"चाटतस्करदुर्वृत्तमहासाहसिकादिभिः।
पीड्यमानाः प्रजा रक्ष्येत् कार्य्यश्चैष विधेयतः॥"
इति याज्ञवल्क्यवचनम्॥
चाटाः प्रतारकाः विश्वास्य ये परधनमपहरन्ति। प्रच्छन्नापहारिणः तस्कराः। दुर्वृत्ताः दुष्टाभिसन्धिकितवादयः। सखे वर्षं सहस्रेण कृतं साहसं महच्च तत् साहसञ्च महासाहसं तेन वर्त्तन्त इति महासाहसिकाः प्रसह्यापहारिणः। इति मिताक्षरायामाचाराध्यायः १॥
महासिंहः, पुं, (महान् सिंह इव।) शरभः। इति राजनिर्घण्टः॥ (महांश्चासौ सिंहश्च।) दृषत्सिंहः। स च देवीवाहनम्। यथा,—
"उत्थाय च महासिंहं देवी चण्डमधावत।"
इति मार्कण्डेयपुराणे देवीमाहात्म्यम्॥
महासुखं, क्ली, (महत् सुखमस्मिन्।) शृङ्गारः। इति त्रिकाण्डशेषः॥ (महच्च तत् सुखञ्च। अतिशयानन्दः। महत् सुखमस्य तद्वति, त्रि॥)
महासुखः, पुं, (महत् सुखं ईश्वरानन्दोऽस्य अस्माद् वा।) बुद्धः। इति त्रिकाण्डशेषः॥
महासुगन्धा, स्त्री, (महान् सुगन्धोऽस्याः।) गन्धनाकुली। इति राजनिर्घण्टः॥ (यथा, सुश्रुते। उत्तरतन्त्रे २६ अध्याये।
"महासुगन्धामथवा पालिन्दीषाञ्चपेषिताम्।
शीतांश्चाच परीवेकान् प्रदेहानत्र योजयेत्॥")
अतिसुगन्धयुक्ते त्रि॥
महास्फुन्ना, स्त्री, (महदतीव स्फुन्ना।) वालुका। इति राजनिर्घण्टः॥ अतिशयस्फुन्ती, त्रि॥
महासेनः, पुं, (महती सेना यस्य।) कार्त्तिकेयः। इत्यमरः। १।१।४१॥ (यथा रघुवंशे। ४।३२।
"महासेनो यस्य प्रमदवनदंष्ट्राक्षतचरैः
शरैर्मुक्तो जीवन्द्विरिव शरजन्मा समभवत्।
दमाच्च क्षत्राणां भुजवनमहादुर्गविषमा
मयं वीरो वारानजयदुपविंशान् वसुमतीम्॥"
महती सेना अनुचरोऽस्य।) शिवः। इति महाभारते तस्य सहस्रनामस्तोत्रम्॥ महासेनापतिः। इति मेदिनी। ने, २०१॥ (यथा महाभारते। ५। १६१। ११।
"स च राजा दशार्णेषु महानासीत् सुदुर्जयः।
हिरण्यवर्मा दुर्द्धर्षो महासेनो महामनाः॥")
वृत्ताईन्दुपिष्टविशेषः। इति हेमचन्द्रः। राजविशेषः। यथा, कथासरित्सागरे। १११।१४॥
"जयसेनस्य तस्याथ पुत्रोऽप्रतिमविक्रमः।
सनुत्पन्नो महासेननामा नृपतिकुञ्जरः॥")
महास्कन्धा, स्त्री, (महान् स्कन्धः शाखावधिभागो यस्याः।) जम्बुवृक्षः। इति राजनिर्घण्टः॥ (महान् स्कन्धोऽस्य॥) दृषत्स्कन्धयुक्ते त्रि॥
महास्थली, स्त्री, (स्थल+"स्थानपदकुलगोत्रेत्यादि।" ४। १। ४२। इति ङीष्। महती स्थली।) पृथिवी। इति शब्दमाला॥ श्रेष्ठस्थानञ्च॥
महास्रायुः, पुं, (महती स्रायुः स्नायवन्धनगाड़ी।) कण्डरा। इति हेमचन्द्रः। ३। २८५॥
महास्रजी, [न्] पुं, (महती स्रक् अक्षमाला अस्त्यस्येति विनिः।) शिवः। इति महाभारते तस्य सहस्रनामस्तोत्रम्। १३।१७।१३४॥
महास्वनः, पुं, (महान् स्वनः शब्दो यस्य। मकरः। इति त्रिकाण्डशेषः॥ (महान् स्वनः।) दृषच्छब्दः। तद्युक्ते, त्रि॥ (यथा महाभारते। ५। १५। ५।

"यमर्गणश्च कौशेयो दृढ़ैरश्च पाटवः।
अनर्मेधामी सोन्मादस्तिर्यक्प्रेक्षी मद्दा-
स्वनः॥")

महाधनुः, पुं, (महती धनुर्यस्य।) शिवः। इति महाभारते तस्य महत्त्वनामस्तोत्रम् ।१३।१७। १३९॥ दृढ़धनुर्युक्ते, त्रि॥ (सर्वविशेषः। यथा, महाभारते। १। ५७। १०।

सुदृगरः शिशुरोमा च सुरोमा च महाधनुः।
एते तत्तनजा नागाः प्रविष्टा हयवाहनम्॥")

महाधविः, [स्] क्ली, (महत् सुप्रशस्तं धविः।) गजधृतम्। यथा,—

"गयायामथवा पित्रे यद्गमांसं महाधविः।
कालशाकं तिलाढ्यं वा क्षपरं मासत्रये॥"

इति मार्कण्डेयपुराणे श्राद्धकल्पः॥

(तदात्मतया सर्वं जगत् धृयतेऽस्मिन्। यद्वा, महान्ति धवोंऽपि व्याप्यपुरोडाशादिरूपाण्यस्य।) विष्णुः॥ इति महाभारते तस्य महत्त्वनामस्तोत्रम्॥ (महान्तिधवोंऽप्यत्र। धृधृयागविशेषः। यथा, शतपथब्राह्मणे। २। ५। ३। २०।

"अथातो महाधविष एव तद् यथा महा-
विषस्थो तस्य॥"

"साकमेधेषु प्रधानभूताया महाधविराख्याया धृतेरारम्भं प्रतिजानीते अथात इति।" इति तद्भाष्यम्॥")

महाधासः, पुं, (महानुधंसः।) बृहद्धासः। इति शब्दरत्नावली॥

महाधिगन्या, स्त्री, (अधेर्गन्धो यस्याः सेयं ईषद्धसारूपः सम्पर्कोऽस्यास्तीति। गन्ध+अर्शं आदित्वादच् टाप् च। महती अधिगन्धा।) गन्धनाकुली। इति राजनिर्घण्टः॥

महाधृषा, स्त्री, (महती चासौ धृषा च।) कपिकच्छुः। इति शब्दमाला॥ अतिधर्षे त्रि॥

महिः, स्त्री, (मह्यते इति। मह पूजायां बदन्तधुरादिः+"सर्वधातुभ्य इन्।" उणा० ४। ११७। इति इन्।) पृथिवी। इति शब्दमाला॥ (मह्यत्। यथा, ऋग्वेदे। २। २४। १४।

"सखो मन्यमहि कर्म करिष्यतः॥"

"महि मह्यत् कर्म करिष्यतः।" इति तद्भाष्ये सायणः॥ महिमा। यथा, भागवते। ८। ८। ४।

"तत ऐरावतो नाम वारणेन्द्रो विनिर्गतः।
दन्तैश्चतुर्भिः श्वेताद्रेरन् भगवतो महिम्॥"

"महिं महिमानम्।" इति तट्टीकायां श्रीधरः॥ महत्त्वम्। यथा, भागवते। २। १। ३५।

"विज्ञानमेतं महिमामनन्ति॥"

"महिं महत्त्वम्।" इति तट्टीकायां श्रीधरः॥)

महिका, स्त्री, (मह+"कुनन्शिल्पिसंज्ञयोरपूर्वस्यापि।" उणा०। २। ३२। इति कुन् टाप्। अत इत्वम्।) हिमम्। इत्यमरः॥ १। ३। १८॥

महित, त्रि, (मह्यते स्मेति। मह पूजायाम्+"मतिबुद्धिपूजार्थेभ्यश्च।" ३। २। १८८। इति क्तः।) पूजितम्। यथा, भट्टिः। १०। २।

रणपरिणतोऽयं विबुधारिपुरे
फलमं स रामसहितः लभवान्।
ज्वलदमिरावणवधेन बलात्
कलमंसरामसहितः लभवान्॥"

(पितृगणविशेषः। यथा, मार्कण्डेये। ९९। ४९।

"महान्महात्मा महितो महिमावान्महाबलः।
गयाः पञ्च तथैवेते पितृणां पापनाशनाः॥"

स्त्रियां टाप्। नदीभेदः। यथा, महाभारते। ६। ९। २१।

"नीवारां महितांश्चापि सुप्रयोगां जनाधिप!॥")

महिनं, क्ली, (महति मह्यते वा। मह पूजायां+"महेरिनच्च।" उणा०। २। ५६। इति इनच्कारादित्युक्तेः इनन्।) राज्यम्। इत्युणादिकोषः॥ (पूजनीये, त्रि॥ यथा, ऋग्वेदे। ६। २६। ८।

"वयं ते ऽस्यामिन्द्र! लुम्बकृतौ सखायः स्याम महिन! प्रेष्ठाः।"

"हे महिन पूजनीय इन्द्र!।" इति तद्भाष्ये सायणः॥)

महिमा, [न्] पुं, (महतो भावः। मह्+"पृथ्वादिभ्य इमनिज् वा।" ५। १। १२२। इति इमनिच्। तनः "टेः।" ६। ४। १५५। इति टिलोपः।) शिवस्याष्टैश्वर्यान्तर्गतैश्वर्यविशेषः। इति हेमचन्द्रः। २। ११६॥ स च महत्त्वं येन चतुर्दश भुवनान्यस्योदरे वर्तन्ते। इत्यमरटीकायां भरतः॥ (तदुक्तं यथा,—

"अणिमा लघिमा प्राप्तिः प्राकाम्यं महिमा तथा।
ईशित्वञ्च वशित्वञ्च तथा कामावसायिता॥"

माहात्म्यम्। यथा, भागवते। ८। ५। १३।

"त्वया संकृष्यमाणेन महिम्ना सात्वतां पतेः।
नाति दृष्यति मे चित्तं सुचिरं तापतापितम्।")

उत्कर्षः। यथा, पुराणम्।

"अधोऽधः पश्यतः कस्य महिमा नोपजायते।
उपर्युपरि पश्यन्तः सर्व एव दरिद्रति॥"

(मन्त्रिविशेषस्य सुतः। यथा, राजतरङ्गिण्याम्। ६। २२०।

"समभूय चक्रुर्वैराग्यं महिमः पञ्चमाश्रितः।")

महिरः, पुं, (मह्यते पूज्यत इति। मह+"सहिकल्यनिमहीति।" उणा०। १। ५५। इति इरच्। तस्य रत्वम्।) सूर्यः। इति त्रिकाण्डशेषः॥

महिला, स्त्री, (मह्यत इति। मह पूजायाम्+"सहिकल्यनिमहीति।" उणा०। १। ५५। इति इलच् टाप्।) क्षौमवस्त्रम्। प्रियङ्गुलता। इत्यमरः। २। ६। २॥ रेणुकानामकगन्धद्रव्यम्। इति राजनिर्घण्टः॥ मदमत्ता स्त्री। इति शब्दरत्नावली॥

महिलाह्वया, स्त्री, (महिला इत्याह्वयो यस्याः।) प्रियङ्गुलता। इत्यमरः। २। ४। ५५। (यथास्याः पर्यायः।

"प्रियङ्गुः फलिनी कान्ता सती च महिलाह्वया।
गुन्द्रा गुन्द्रफला श्यामा विश्वकसेनाङ्गनाप्रिया॥"

इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे॥)

महिषः, पुं, (मंहति पूजयति देवानेनेति। मह+"अधिमस्जोहिषच्।" उणा०। १। ९६। इति टिषच्।) सनामख्यातपशुविशेषः। तत्पर्यायः। पुलापः २ वाहदिषन् ३ कामरः ४ सैरिभः ५। इत्यमरः। २। ५। ४। यमवाहनः ६ विषच्चरन् ७ पंशुभीरुः ८ रजस्वलः ९। इति शब्दरत्नावली॥ आनूपः १० रक्ताक्षः ११ अक्षारिः १२। इति जटाधरः॥ क्रोधी १३ कलुषः १४ मत्तः १५ विषाणी १६ गवली १७ वली १८। तस्य परीक्षा यथा,—

"विपक्षे दयमत्यर्थं कुरुते येन हेतुना।
भारं वहति वा दूरं महिषोऽसाभिरुच्यते॥
ब्रह्मक्षत्रियविट्शूद्रान्त्यभेदेन षड्विधा॥"

तद्यथा।

'भृशं क्षुण्णाः पवित्राश्च हृद्दृश्यगन्धभोजकाः।
वह्वाश्विनो मारकाश्च महिषा ब्रह्मजातयः॥१॥
केकराः कामलाः स्थूला भृशं कुण्डाश्च मारकाः।
वह्वाश्विनो बहुबला महिषाः क्षत्रजातयः॥२॥
श्यामाङ्गाः शीघ्रदङ्गाश्च सुकुशा भारवाहिनः।
अमारका बहुबला महिषा वैश्यजातयः॥३॥
चीणाः चीणबलाः चीणदङ्गभोगास्तथैव ये।
अल्पाश्विनो भारसहा महिषाः शूद्रजातयः॥४॥
सर्वदा जलमिच्छन्ति येऽल्पसत्त्वा महौजसः।
भारसहाः क्षुद्रदङ्गाश्च तेऽन्यजा महिषा मताः॥५॥
एषां दोषा गुणा वापि दृश्यलक्षणवेदिभिः।
पोषणेऽपि संस्थानं दृष्टतुल्यं तथा मतम्॥"

इति युक्तिकल्पतरुः॥

वनमहिषमांसगुणाः। दोषकारित्वम्। लघुत्वम्। दीपनत्वम्। बलदायित्वञ्च॥ ग्रामीणमहिषमांसगुणाः। स्निग्धत्वम्। मलिनकरत्वम्। पित्तहरत्वञ्च। इति राजनिर्घण्टः॥ तर्पणत्वम्। स्निग्धत्वम्। उष्णत्वम्। मधुरत्वम्। गुरुत्वम्। निद्रापुंस्त्वजन्यवर्द्धनत्वम्। मांसवर्द्धकत्वञ्च। इति राजवल्लभः॥ अपि च।

"महिषो घोटकारिः स्यात् कासरश्च रजस्वलः।
पीनस्कन्धः शुक्लकायो लुलापो यमवाहनः॥
महिषस्यामिषं स्वादु स्निग्धोष्णं वातनाशनम्।
निद्राशुक्रबलस्तन्यतनुदीर्घकरं गुरु॥
दृष्यञ्च सृष्टविण्मूत्रं पातपित्तामनाशनम्।"

इति भावप्रकाशः॥

रक्तशुक्लारिष्टेक्षुजातिविशेषः। स च पुरा क्षत्रिय आसीत् समररात्रेनास्य वेदयागादावनधिकारो वैश्यान्त्यत्वं धर्मलाघवञ्च कृतः। यथा, हरिवंशे।

"समरन्तां प्रतिज्ञाय गुरोर्न्यायं निशम्य च।
धर्मं सधान तेषां वै वैश्यान्त्यत्वं चकार च॥
ऋक्षाणां शिरसो मुण्डयित्वा वपनमेव च।
यवनानां शिरः सर्वं कम्बोजानां तथैव च॥
पारदा मुक्तकेशाश्च पह्लवा श्मश्रुधारिणः।

निःस्वाध्यायषट्कारः कृतास्तेन महात्मना ॥
शकाः यवनकाम्बोजाः पारदाः पह्लवास्तथा ।
कोलिसर्पाः ममहिषा दार्व्याभीराः सकेरलाः ।
वशिष्ठवचनाद्राजन् ! सगरेण महात्मना ॥"
इति प्रायश्चित्ततत्त्वम् ॥ * ॥

अर्हदुपविशेषः । इति हेमचन्द्रः । ४ । ३४७ ॥

महिषासुरः । यथा, मार्कण्डेये । ८२ । १-२ ।
"महिषेऽसुराणामधिपे देवानाञ्च पुरन्दरे ।
तत्रासुरैर्महावीर्यैर्देवसैन्यं पराजितम् ॥
जित्वा च सकलान् देवानिन्द्रोऽभून्महिषासुरः ॥"

(देवगणभेदः । यथा, निरुक्ते । ७ । २६ । "अथासुपत्ये महिषा अगृभ्णन् विशो राजानमुपनमन्तु शृङ्गियम् ।" महिषाः माध्यमिका देवगणाः । अथवा महिषाः त एव "महान्तः ।" इति तट्टीकायाम् दुर्गाचार्यः ॥

कुशद्वीपस्थपर्व्वतविशेषः । यथा, मात्स्ये । १२१ । ५६ ।
"अष्टमस्तु पर्व्वतस्तत्र महिषो मेघसन्निभः ॥"

अग्निविशेषः । यथा, तत्रैव । १२१ । ६० ।
"तस्मिन् सोऽग्निर्निवसति महिषो नाम योऽपसुतः ।"

कुशद्वीपस्य वर्षविशेषः । यथा, तत्रैव । १२१ । ६८ ।
"महिषं महिषस्यापि पुनश्चापि प्रभाकरम् ॥"

कृताभिषेकः भूपालः ।
'कृताभिषेके भूपाले लुलापे महिषः स्मृतः ॥'
इत्यमरटीकायां रभसः ॥ देशभेदः । यथा, बृहत्संहितायाम् । ८ । १० ।
"भरतीपूर्व्वे मरुलम्बचतुष्कं सुभिक्षकरमाद्यम् ।
वङ्गाङ्गमहिषवाङ्गिककलिङ्गदेशेषु भयजनकम् ॥"

अनुह्लादस्य पुत्रभेदः । यथा, भागवते । ६ । १८ । १६ ।
"अनुह्लादस्य सूर्य्यायां वाल्कलो महिषस्तथा ॥"
माधापुत्रः । यथा, हरिवंशे । १६६ । ४५ ।
"महिषश्च तनूजश्च विज्ञातमनसावपि ॥")

महिषकन्दः, पुं, (महिषाख्यया प्रसिद्धः कन्दः ।) महाकन्दविशेषः । तत्पर्य्यायः । शृङ्गालुः २ शृङ्गाटकन्दः ३ शृङ्गकन्दः ४ महिषीकन्दः ५ । अस्य गुणाः । कटुत्वम् । उष्णत्वम् । कफवातनाशकत्वम् । सुखशोषकरत्वम् । रुच्यत्वम् । अग्निसन्दीपनत्वञ्च । इति राजनिर्घण्टः ॥

महिषी, स्त्री, (महिषं महिषासुरं हन्तीति । हन् + बाहुलकात् टक् । ङीप् ।) दुर्गा । यथा, दुर्गास्तवपद्धतौ ।
"महिषघ्नि ! महामाये चामुण्डे मुण्डमालिनि ! ।
आयुरारोग्यविजयं देहि देवि ! नमोऽस्तु ते ।"
अपि च । देवीपुराणे ।
"सिंहमारुह्य कल्पान्ते निहनो महिषो यथा ।
महिषघ्नी ततो देवी कथ्या वै सिंहवाहिनी ॥"

महिषध्वजः, पुं, (महिषो ध्वजचिह्नं वाहनत्वेन यस्य ।) यमः । अर्हदुपविशेषः । इति हेमचन्द्रः । २ । ६६ ॥

महिषमर्दिनी, स्त्री, (महिषं महिषाख्यमसुरं हन्तीति । हन् + णिनिः । ङीप् ।) दुर्गा । इति शब्दरत्नावली ॥ अस्या मन्त्रा यथा, शारदायाम् ।
"भान्तं वियत् मनयनं स्वेनो मर्द्दिनि टद्वयम् ।
अघाचरी समाख्याता विद्या महिषमर्द्दिनी ॥"
नारायणीतन्त्रे ।
"विषं हि मज्जा कालोऽग्निरदिरिस्थो निठद्वयम् ॥"
विषं मकारः । हि स्वरूपम् । मज्जा यकारः । कालो मकारः । अग्नी रेफः । अद्रिर्द्दकारः । इस्थ इति वचनादिकारयुक्तो दकारः । अयं मन्त्रसारादिर्मायादिः कामादिर्वाग्भवादिर्ब्बधूबीजादिः कवचादिश्च गवाक्षरः । तथा च विश्वसारे ।
"प्रणवाद्यां जपेद्विद्यां मायाद्यां वा जपेत् सुधीः ।
वधूबीजादिकां वापि कवचाद्यां जपेत्तथा ॥
सर्व्वकालेषु सर्व्वत्र कामाद्यां प्रजपेत् सुधीः ।
वाग्भवाद्यां जपेत्तान्तु देवीं वाक्यविशुद्धये ॥
अस्या ध्यानम् । गारुडोपलसन्निभां मणिमयकुण्डलमण्डितां नौमि भालविलोचनां महिषोत्तमाङ्गनिषेदुषीम् । शुकचक्रकृपाणखेटकबाणकार्मुकशूलकान् तर्ज्जनीमपि बिभ्रतीं निजबाहुभिः शशिशेखराम् ॥ इति तन्त्रसारः ॥

महिषवल्ली, स्त्री, (महिषशब्दवाच्या वल्ली । शाकपार्थिवादित्वात् समासः ।) लताविशेषः । छिरहिट्टी इति हिन्दी भाषा ॥ तत्पर्य्यायः । सौम्या २ प्रतिसोमा ३ अम्लवल्लिका ४ खण्डशाखा ५ । अस्या गुणः । रसवीर्य्यविपाके सोमवल्लीसमत्वम् । इति राजनिर्घण्टः ॥

महिषवाहनः, पुं, (महिषो वाहनं यस्य ।) यमः । इति शब्दरत्नावली ॥

महिषासुरः, पुं, (महिष एव महिषाख्यो वा असुरः ।) रम्भासुरपुत्रः । तस्य उत्पत्तिर्यथा,—
श्रीऋषय ऊचुः
"आराधितो महादेवो रम्भेण सुरवैरिणा ।
चिरेण स च सुप्रीतस्तपसा तस्य पुष्कलः ॥
अथ तुष्टो महादेवः प्रत्यक्षं रम्भमुक्तवान् ।
प्रीतोऽस्मि ते वरं रम्भ ! वरयस्व यथेप्सितम् ॥
एवमुक्तः प्रत्युवाच रम्भस्तं चन्द्रशेखरम् ॥
अपुत्रोऽहं महादेव ! यदि ते मय्यनुग्रहः ।
मम जन्मत्रये पुत्रो भवान् भवतु शङ्कर ! ॥
अवध्यः सर्व्वभूतानां जेता च त्रिदिवौकसाम् ।
चिरायुश्च यशस्वी च लक्ष्मीवान् सत्यसङ्गरः ॥
एवमुक्तस्तु देवेन प्रत्युवाच वृषध्वजः ।
भवत्तेजोऽक्षितन्ते भविष्यामि सुतस्तव ॥
इत्युक्त्वा स महादेवस्तत्रैवान्तरधीयत ।
रम्भोऽपि यातः स्वस्थानं हर्षोत्फुल्लविलोचनः ॥

पथि गच्छन् स रम्भोऽथ ददर्श महिषीं सुभाम् ।
त्रिहायणीं चित्रवर्णां सुन्दरीं ऋतुशालिनीम् ॥
स तां दृष्ट्वाथ महिषीं रम्भः कामेन मोहितः ।
तोयं गृहीत्वा च तदा चकार सुरतोत्सवम् ॥
तयोः प्रवृत्ते सुरते सा तदा तस्य तेजसा ।
दधार महिषी गर्भं तदाभून्महिषासुरः ॥
तस्यां स्वाङ्गेषु गिरिशस्तनुपुत्रत्वमवाप्तवान् ।
वव्रुधे स तदा वाग्भिः शुक्लपक्षे ससुव्रत ॥"
तस्य योषिद्ध्यत्वं यथा,—
"तन्तु कात्यायनमुनिः शप्तवान् महिषासुरम् ।
दुर्ज्ञेयं वीक्ष्य शिष्यार्थे शिष्यानुग्रहकारकः ॥
कात्यायनेन शप्तं तं विज्ञाय महिषासुरम् ।
प्राह प्रणयपूर्व्वन्तु चण्डिकां चन्द्रशेखरः ॥
ईश्वर उवाच ।
"देवि ! कात्यायनेनापि शप्तोऽयं महिषासुरः ।
योषिद्विनाशकर्त्तेति भवितेति जगन्मयि ! ।
निःसंशयस्त्वयैवाद्य भविष्यति न संशयः ॥
मदीयो माहिषः कायस्त्वया देवि ! जगन्मयि ! ।
हन्तव्यः सततं योगयुक्तः पूर्व्वं परोऽपि च ॥
हरिर्हरिस्वरूपेण त्वां वोढुमक्षमोऽधुना ।
ममायं माहिषः कायस्तव वोढा भविष्यति ॥
इति पूर्व्वं महादेवो देवीं प्रार्थितवान् पुरा ॥
तेन देवी महादेवं जघान महिषासुरम् ॥
त्रिषु जन्मसु पुत्रोऽभूत् रम्भस्य भगवान् शिवः ।
दृष्टित्रयं स रम्भोऽपि रम्भ एव यतोऽयत ॥
असुरत्वादशक्तोऽपि तपः परमदारुणम् ।
तथैवाराधितः शम्भुः पुत्रार्थे प्रददौ वरम् ॥
तथैव महिषीं भेजे प्रथमं सुरताय सः ।
तस्यां तथाभवद्वीरो दानवो महिषासुरः ।
तथैव श्रीपे भगवान् मुनिः कात्यायनस्तु तम् ॥
इति प्रवृत्ते पूर्व्वस्मिन् परस्मिन् स तु जन्मनि ।
महिषः पूजयित्वाथ देवीं वरमयाचत ॥
तृतीये जन्मनि वरं प्राप्य कल्पानघेयतः ।
नेह मे जन्म भवितेत्येवं वरमयाचत ॥
तेन देवीपदत्वे निष्ठत्वेयोऽसुरोऽधुना ।
नोत्पत्तिरपि तस्यास्ति संवर्त्तीस्तान् वदन् नृप ! ॥
एवं देवीप्रसादेन महादेवाङ्गसम्भवः ।
परामवाप सततं प्रतिपत्तिं महासुरः ॥
इति ते कथितं राजन् ! यथा स महिषासुरः ।
देवीपादतलं प्राप्य यथा सोऽद्यापि मोदते ॥"
इति कालिकापुराणे ५६ अध्यायः ॥ * ॥
अपि च ।
नारद उवाच ।
"कस्यासौ महिषो नाम रक्तबीजाद्यश्च कः ।
कासौ कात्यायनी नाम या जघ्ने महिषासुरम् ।
एतान् विस्तरतस्तात ! यथावद्वक्तुमर्हसि ॥"

पुलस्त्य उवाच ।
"शृणुष्वं संप्रवक्ष्यामि कथां पापप्रणाशिनीम् ।
सर्व्वदा वरदा दुर्गा सैषा कात्यायनी सुने ! ॥
सुरासुरवरौ रौद्रौ जगत्क्षोभकरावुभौ ।
रम्भश्चैव करम्भश्च दावास्तां सुमहाबलौ ॥
तावपुत्रौ च दैत्यर्षे ! पुत्रार्थं तेपतुस्तपः ।
बहुवर्षगणान् देवौ स्त्रियौ पञ्चनदे जले ॥
तत्रैको जलमध्यस्थो द्वितीयोऽप्यग्निपञ्चमौ ।
करम्भश्चैव रम्भश्च यत्तं मालवटं प्रति ॥
एकं निमग्नं सलिले ग्राहरूपेण वासवः ।
चरणाभ्यां समादाय निजवान यथेच्छया ॥
ततो भ्रातरि नष्टे च रम्भः कोपपरिप्लुतः ।
बह्वीं स्वशीर्षे संछिद्य होतुमैच्छज्जहाबलः ॥
ततः प्रगृह्य केशेषु खड्गञ्च रविसंप्रभम् ।
छेत्तुकामो निजं शीर्षं वह्निना प्रतिषेधितः ॥
उत्तिष्ठासुर ! मा मैवं नाशयात्मानमात्मना ।
दुस्तरा परवध्यापि स्ववध्याप्यतिदुस्तरा ॥
यच्च प्रार्थयसे वीर ! तद्दामि यदेप्सितम् ।
मा स्त्रियस्व गतस्नेह नष्टा भवति वै कथा ॥
ततोऽब्रवीद्वचो रम्भो वरं चेन्मे ददासि हि ।
त्रैलोक्यविजयी पुत्रः स्यान्मे त्वत्तेजसाधिकः ॥
अजेयो देवनैः सर्व्वैः पुंभिर्दैत्येश्च पावक ! ।
महाबली वायुरिव कामरूपी क्रतास्त्रवित् ॥
तं प्रोवाच कविर्व्रह्मन् ! बाढ़मेवं भविष्यति ।
यस्यां चित्तं समालम्बि करिष्यसि ततोऽसुर ! ॥
इत्येवमुक्तो दैवेन वह्निना दानवो ययौ ।
यष्टुं मुनिवटं याज्यं यत्रैच परिवारितम् ॥
तेषां पञ्चनिधिस्तत्र वसते नान्यचेतनः ।
गजाश्च महिषाश्चाश्वा गावोऽजाविपरिप्लुताः ॥
तान् दृष्ट्वैव तदा चक्रे भावं दानवपार्थिवः ।
महिष्यां रूपयुक्तायां त्रिहायण्यां तपोधन ! ॥
समागच्छच्च दैत्येन्द्र कामयन्ती तरस्विनी ।
स चाभिगमनं चक्रे भवितव्यप्रचोदितः ॥
तस्यां समभवद्गर्भस्तां प्रगृह्याथ दानवः ।
पातालं प्रविवेशाथ ततः स्वभवनं गतः ॥
दृष्ट्वा दानवैः सर्व्वैः परित्यक्तश्च बन्धुभिः ।
अकार्य्यं कारयत्येवं भूयो मालवटं गतः ॥
सापि तेनैव पतिना महिषी चारुदर्शना ।
समं जगाम तत्पुण्यं यज्ञमण्डलमुत्तमम् ॥
ततस्तु वसतस्तस्य श्यामा सा सुषुवे सुने ! ।
अजीजनत् सुतं शुभ्रं महिषं कामरूपिणम् ॥"
इति वामनपुराणे १७ अध्यायः ॥ * ॥
अन्यच्च । धरण्युवाच ।
"या सा माया शरीरात्तु ब्रह्मणोऽव्यक्तजन्मनः ।
गायत्र्याश्चभुजा भूत्वा चैत्रासुरमयोधयत् ॥
सैव नन्दाभवद्देवी देवकार्य्यचिकीर्षया ।
महिषाख्यासुरवधं कुर्व्वती ब्रह्मणेरिता ॥
वैष्णवी च हतो देव ! कथमेतद्वि संशयः ॥
वराह उवाच ।
इयं जगद्धिता देवी गङ्गा शङ्करप्रिया ।
क्वचित् किञ्चि भवेद्दृष्टं सपदं वेद सर्व्ववित् ।
स्वायम्भुवे हतो दैत्यो वैष्णवा मन्दरे गिरौ ॥
महिषाख्योऽपरः पश्चात् स वै चैत्रासुरः पुनः ।
नन्दया निहतो विन्ध्ये महाबलपराक्रमः ॥
अथवा ज्ञानशक्तिः सा महिषोऽज्ञान-
मूर्त्तिमान् ।
अज्ञानं ज्ञानसाध्यन्तु भवतीति न संशयः ॥
मूर्त्तिपक्षे चेतिहासममूर्त्ते चैकवद्वदि ।
ख्यायते वेदवाक्येषु इह सा वेदवादिभिः ॥"
इति वराहपुराणम् ॥
महिषासुरसम्भवः, पुं, (महिषासुरात् तत्सेदसः सम्भवतीति । सम् + भू + अच् ।) भूमिजगुग्गुलुः । इति राजनिर्घण्टः ।
महिषासुरहन्त्री, स्त्री, (हन् + क्तच् + ङीप् । महिषासुरस्य हन्त्री ।) दुर्गा । यथा,—
"महिषासुरहन्त्राच्च प्रतिष्ठा दक्षिणायने ।"
इति प्रतिष्ठातत्त्वधृतपद्मपुराणवचनम् ॥
महिषाक्षः, पुं, (महिषस्य अक्षीवेति । "अक्ष्णोऽदर्शनात् ।" ५।४।७६ । इति समासान्तोऽच् ।) गुग्गुलुः । इति राजनिर्घण्टः ॥ (तथास्य पर्य्यायः ।
"जटायुः कालनिर्य्यासः कौशिको गुग्गुलुः पुरः ।
दैवधूपः सर्व्वसहो महिषाक्षः पलङ्कषा ॥"
इति वैद्यकरत्नमालायाम् ॥
अस्य व्यवहारविषयो यथा,—
"महिषाक्षो महानीलो गजेन्द्राणां हितावुभौ ।
विशेषेण मनुष्याणां कनकः परिकीर्त्तितः ॥
कदाचिन्महिषाक्षश्च यतः कैश्चिन्नरैरपि ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
महिषाक्षकः, पुं, (महिषाक्ष । स्वार्थे कन् ।) गुग्गुलुः । इति राजनिर्घण्टः ॥
महिषी, स्त्री, (महिषस्य क्रताभिषेकस्य नृपस्य पत्नी । "पुंयोगादाख्यायाम् ।" ४ । १ । ४८ । इति ङीप् ।) क्रताभिषेका राजपत्नी । इत्यमरः । २ । ६ । ५ ॥ (यथा, रघौ । २ । २५ ।
"इत्थं व्रतं धारयतः प्रजार्थं
समं महिष्या महनीयकीर्त्तेः ।
सप्त व्यतीयुस्त्रिगुणानि तस्य
दिनानि दीनोद्धरणोचितस्य ॥")
सैरिन्ध्री । औषधिभेदः । इति मेदिनी । षे, ४३ ॥ महिषयोषित् । तत्पर्य्यायः । मन्दगमना २ महाचीरा ३ पयस्विनी ४ लुलापकान्ता ५ कतुधा ६ तुरङ्गद्विषणी ७ ॥ अस्याः क्षीरगुणाः । मधुरत्वम् । विपाके शीतलत्वम् । गुरुत्वम् । बलपुष्टिप्रदत्वम् । हृद्यत्वम् । पित्तदाहासननाशित्वञ्च ।
"माहिषं मधुरं गव्यात् स्निग्धं शुक्रकरं गुरु ।
निद्राकरमभिष्यन्दि क्षुधाधिक्यकरं हिमम् ॥
तस्या दधिगुणाः । मधुरत्वम् । स्निग्धत्वम् । श्लेष्मकारित्वम् । रक्तपित्तनाशित्वम् । बलासवर्द्धनत्वम् । बल्यत्वम् । श्रमघ्नत्वम् । शोधनत्वञ्च ।
"माहिषं दधि सस्निग्धं श्लेष्मलं वातपित्तनुत् ।
स्वादुपाकमभिष्यन्दि हृद्यं गुर्व्वम्लदूषणम् ॥"
अस्या नवनीतगुणाः । कषायत्वम् । मधुररसत्वम् । शीतलत्वम् । हृद्यत्वम् । बल्यत्वम् । ग्राहित्वम् । पित्तघ्नत्वम् । तुन्दत्वञ्च ।
"नवनीतं महिष्यास्तु वातश्लेष्मकरं गुरु ।
दाहपित्तश्रमहरं मेदःशुक्रविवर्द्धनम् ॥"
अस्या घृतगुणाः । उत्तमत्वम् । धृतिकरत्वम् । सुखदत्वम् । कान्तिकृत्त्वम् । वातश्लेष्मनाशित्वम् । बलकरत्वम् । वर्णप्रदाने क्षमत्वम् । दुर्नामग्रहणोविकारशमनत्वम् । मन्दानलोद्दीपनत्वम् । चक्षुष्यत्वम् । गव्यतो न श्रेष्ठत्वम् । हृद्यत्वम् । मनोहारित्वञ्च ।
"माहिषन्तु घृतं स्वादु पित्तरक्तानिलापहम् ।
शीतलं श्लेष्मलं हृद्यं गुरु स्वादु विपच्यते ॥"
इति भावप्रकाशः ॥ * ॥
अस्या मूत्रगुणाः । आनाहशोफगुल्मदोषनाशित्वम् । कटुत्वम् । उष्णत्वम् । कुष्ठकण्डूतिशूलोदररोगनाशित्वञ्च । इति राजनिर्घण्टः ॥ (अस्या दुग्धगुणाश्च यथा, चरके सूत्रस्थाने २७ अध्याये ।
"महिषीणां गुरुतरं गव्याच्छीततरं पयः ।
स्नेहानूनमनिद्राय हितमत्यग्नये च तत् ॥"
महिषीप्रिया, स्त्री, (महिषीणां प्रिया ।) शूलीलशुनम् । इति राजनिर्घण्टः ॥
मही, स्त्री, (मह्यते इति । मह् + अच् । मह + "गौरादिभ्यश्च । ४ । १ । ४१ । इति ङीष् । यद्वा, महि । क्तिकारादिति ङीष् ।) पृथिवी । इत्यमरः । २ । १ । ३ । (यथा विष्णुपुराणे । १ । ४ । २६ ।
"उत्तिष्ठतस्तस्य जलार्द्रकुक्षे
र्मेघावराहस्य महीं विधार्य ।
विधुन्वतो वेदमयं शरीरं
रोमान्तरस्था मुनयो स्तुवन्ति ॥")
नदीविशेषः । सा च मालवदेशे वर्त्तते । इति मेदिनी । हे, । ७ ॥ तच्छलगुणाः ।
"महीजलन्तु सुस्वादु बल्यं पित्तहरं गुरु ।"
इति राजनिर्घण्टः ॥
गौः । इति शब्दार्थचन्द्रिका । छिलमोचिका । इति त्रिकाण्डशेषः ॥ (लोकः । यथा, ऋग्वेदे । ३ । ५६ । २ ।
"तिस्रो महीरुपरास्तस्थुः ॥"
"महीः लोकाः ।" इति तद्भाष्ये सायणः ॥)
महीक्षित्, पुं, (मह्यां क्षयते ईष्टे । क्षि + क्विप् । तुक् च ।) राजा । इत्यमरः । २ । ८ । १ ॥ (यथा, महाभारते । ७ । ६४ । २४ ॥
"रथवर्य्याक्षमायाभिर्मोहयित्वा परन्तपः ।
विभेद शतधा राजन् ! शरीरागि महीक्षिताम् ॥")
महीजं, क्ली, (मह्यां जायते इति । जन + डः ।) आर्द्रकम् । इति राजनिर्घण्टः ॥ भूमिजाते । त्रि ॥ (यथा, महाभारते । ६ । ८७ । ३-४ ।
"आरट्टानां महीजानां सिन्धुजानाञ्च सर्व्वशः ।

वानायुजानां शुभ्राणां तथा पर्वतवासिनाम् ।
वाजिनां बहुभिः संख्ये समन्तात् पर्य्यवारयन्।")

महीजः, पुं, (मह्यां जातः । जन+डः ।) मङ्गल-ग्रहः । यथा, समयप्रदीपे ।

"रवौ रसाब्धौ सितगौ दयाब्धौ
दयं महीजे विधुजे शराष्टौ ।
गुरौ शराष्टौ भृगुजे हतीयं
शनौ रसाद्यन्तमिति क्षपायाम् ॥"

महीध्रः, पुं, (महीं धरतीति । धृ+कः ।) पर्व्वतः । इत्यमरः । २ । ३ । १ ॥ (यथा, श्रीमागवते । २ । ७ । ३२ ।

"गौर्मेऽखे प्रतिहते व्रजविप्लवाय
देवेऽभिवर्षति पशून् कृपया रिरक्षुः ।
धर्त्ताऽच्छिलीध्रमिव सप्तदिनानि सप्त-
वर्षो महीध्रमनवेक्ककरे सलीलम् ॥"

महीं धरति उद्धरतीति । धृ+कः । महेरुद्धर्त्ता । यथा, तत्रैव । ३ । १३ । २६ ।

"उत्क्षिप्तवालः खचरः कठोरः
सटा विधुन्वन् खररोमशत्वक् ।
खुराहताभ्रः सितदंष्ट्र ईक्षा-
ज्योतिर्बभासे भगवान् महीध्रः ॥"

"महीध्रः पृथिव्या उद्धर्त्ता ।" इति तट्टीकायां स्वामी ॥)

महीपालः, पुं, (महीं पालयतीति । पाल+अण् ।) राजा । यथा, मार्कण्डेयपुराणे । ८८ । ६१ ।

"स पपात महीपृष्ठे शस्त्रसंघसमाहतः ।
नीरक्तश्च महीपाल ! रक्तबीजो महासुरः ॥"

(राजविशेषः । यथा, कथासरित्सागरे । ५६ । ७ ।

"चन्द्रस्वामिन् ! महीपालो नाम्ना कार्य्यः सुतस्त्वया ।
राजा भूत्वाचिरं यस्मात् पालयिष्यत्ययं महीम् ॥")

महीप्राचीरं, क्ली, (मह्याः प्राचीरमिव । सर्व्वदिक्षु स्थितत्वात्तथात्वम् ।) समुद्रः । इति त्रिकाण्ड-शेषः ॥

महीभृत, पुं, (महीं बिभर्त्ति धरतीति । भृ+क्विप् । "दृम्मस्य पितिक्षनि तुक् ।" ६ । १ । ७१ । इति तुगागमश्च ।) पर्व्वतः । यथा, कुमार-सम्भवे । १ । २७ ।

"महीभृतः पुत्रवतोऽपि दृष्टि-
स्तस्मिन्नपत्ये न जगाम तृप्तिम् ।
अनन्तपुष्पस्य मधोर्हि चूते
द्विरेफमालाः सविशेषसङ्गाः ॥"

(महीं बिभर्त्ति पालयतीति । भृ+क्विप् ।) राजा । यथा, मार्कण्डेयपुराणे । ८१ । १३ ।

"ये ममानुगता नित्यं प्रसादधनभोजनैः ।
अद्यदृष्टिं पुरं तेषां कुर्वन्त्यन्यमहीभृताम् ॥"

महीमयः, त्रि, (मह्या विकारोऽवयवो वेति । मही+मयट् ।) मृत्तिकानिर्म्मितः । यथा,—मार्कण्डेयपुराणे । ८१ । ७ ।

"तौ तस्मिन् पुलिने देव्याः कृत्वा मूर्त्तिं महीमयीम् ।
अर्हणाद्यैरुपतस्थुः पुष्पधूपानुलेपनैः ॥"

महीरुहः, पुं, (मह्यां रोहति जायत इति । रुह+कः ।) वृक्षः । इत्यमरः । २ । ४ । ५ । (यथा, विष्णुपुराणे । २ । १५ । २ ।

"तपश्चरन्तु पृथिवीं प्रचेतःसु महीरुहाः ।
अरक्ष्यमाणामावव्रुर्भूयश्च प्रजाक्षयः ॥")

प्राकृतवृक्षः । इति राजनिर्घण्टः ॥

महीलता, स्त्री, (मह्या लतेव ।) किण्वुल्कः । इत्यमरः । १ । १० । २१ ॥ (विशेषोऽस्याः किण्वुल्कशब्दे ज्ञातव्यः ॥)

महीसुतः, पुं, (मह्याः सुतः ।) मङ्गलः । इत्य-मरः । १ । ३ । २५ ॥ (यथा, बृहत्संहितायाम् । १०४ । १४ ।

"रिपुगदकोपभयानि पञ्चमे
तनयकृताश्च शुचो महीसुते ।
द्युतिरपि नास्य चिरं भवेत् स्थिरा
शिरसि कपेरिव मालती कृता ॥")

महेच्छः, पुं, (महती इच्छा यस्य । बहुव्रीहौ सामासिकः ।) महाशयः । इत्यमरः । ३ । १ । ३ ॥ (यथा, बृहत्संहितायाम् । १६ । ६८ ।

"प्रत्यन्तधनिमहेच्छव्यवसायपराक्रमोपेताः ॥")

महेन्द्रः, पुं, (महांश्चासाविन्द्रश्च ऐश्वर्य्यवानित्यर्थः ।) विष्णुः । इति महाभारते तस्य सहस्र-नामस्तोत्रम् ॥ शक्रः । (यथा, भागवते । ६ । १२ । ६ ।

"ऋषयस्तदुपाकर्ण्य महेन्द्रमिदमब्रवीत् ॥")

जम्बुद्वीपस्य पर्व्वतविशेषः । इति मेदिनी । रे, २०० ॥ (स च सप्तकुलाचलानामन्यतमः । यथा, मार्कण्डेये । ५७ । १० ।

"महेन्द्रो मलयः सह्यः शुक्तिमानृक्षपर्व्वतः ।
विन्ध्यश्च पारिपात्रश्च सप्तैवात्र कुलाचलाः ॥")

महेन्द्रकदली, स्त्री, (महेन्द्रसम्भवा तद्वर्णा वा कदली ।) कदलीभेदः । इति राजनिर्घण्टः ॥

महेन्द्रनगरी, स्त्री, (महेन्द्रस्य नगरी ।) अमरा-वती । इति शब्दरत्नावली ॥

महेन्द्रवारुणी, स्त्री, (महेन्द्रवरुणयोरियं प्रिय-त्वात् । अण् । ङीप् ।) लताविशेषः । बड़ माकाल इति भाषा ॥ तत्पर्य्यायः । चित्रवल्ली २ महाफला ३ महेन्द्री ४ चित्रफला ५ त्रपुषी ६ त्रपुसा ७ आत्मरक्षा ८ विशाला ९ दीर्घवल्ली १० महत्फला ११ महद्दारुणी १२ बृहत्फला १३ बृहद्दारुणी १४ सौम्या १५ गजचिर्भिटा १६ चित्रदेवी १७ धनुःश्रेणी १८ स्थाणुकर्णी १९ मरुसम्भवा २० । अस्या गुणाः । इन्द्रवारुणी-गुणभागित्वम् । रसे वीर्य्ये विपाके च किञ्चिद्-गुणाधिक्यत्वञ्च । इति राजनिर्घण्टः ॥

महेन्द्राणी, स्त्री, (महेन्द्रस्य भार्य्येति । महेन्द्र । "पुंयोगादाख्यायाम् ।" ४ । १ । ४८ । इति ङीप् । "इन्द्रवरुणेति ।" ४ । १ । ४९ । इति आनुगा-गमः ।) इन्द्रभार्य्या । इति शब्दरत्नावली ॥ (यथा, महाभारते । ३ । ३१ । १६ ।

"ततो सुदूर्नाङ्गवानैरावतशिरोगतः ।
आजगाम महेन्द्राणी शक्रः सुरगणैर्वृतः ॥")

महेरणा, स्त्री, (महन् ईरणं प्रेरणमस्याः । यद्वा, महं गजोत्सवमीरयतीति । ईर+क्युः । टाप् ।) शृङ्खलीवृक्षः । इत्यमरः । २ । ४ । ३४ ॥ महेरुणा इत्यपि पाठः । इत्यमरटीकायां भरतः ॥ (यथास्याः पर्य्यायः ।

"शृङ्खली गजभक्षा च सुवहा सुरभीरसा ।
महेरणा कुन्दुरुकी वल्लकी च बहुसवा ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

महेला, स्त्री, (महत्ते पूज्यत इति । मह्+"सलिकल्यनिमहीति ।" उणा० १ । ५५ । इति इलच् । एषोदरादित्वादिकारस्येकारः । यद्वा, महस्योत्सवस्य इला भूमिः ।) नारी । इति शब्दरत्नावली ॥ (यथा, नलोदये । २ । ५८ ।

"ससम्भ्रमहेलाभिस्फुरित-
गुणाभिस्तत्सरमहेलाभि
श्रीः प्रवरमहेलाभिस्त्वयेव
युवपंक्तिभिः परमहेलाभिः ॥")

महेलिका, स्त्री, (महेल+स्वार्थे कन् । टाप् । अकारस्येत्वम् ।) नारी । इति शब्दरत्ना-वली ॥

महेशः, पुं, (महान् ईशः ।) शिवः । इति शब्दरत्नावली ॥ (यथा, शिवध्यानम् ।

"ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारु-चन्द्रावतंसम् ॥")

महेशवन्धुः, पुं, (महेशो बध्यते वशीक्रियते येन लक्ष्मीस्तनजन्यत्वात् ।) श्रीफलवृक्षः । इति शब्दचन्द्रिका ॥

महेश्वरः, पुं, (महांश्चासावीश्वरश्च कर्त्तुमकर्त्तु-मन्यथाकर्त्तुं वा समर्थः । यद्वा, महत्या महामायया ईश्वरः ।) शिवः । इत्यमरः । १ । १ । ४२ ॥ अस्य व्युत्पत्तिर्यथा,—

"विश्वस्यानाच्च सर्व्वेषां महतामीश्वरः स्वयम् ।
महेश्वरश्च तेनेमं प्रवदन्ति मनीषिणः ॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५३ अध्यायः ॥ अस्य विवाहस्मरणफलं यथा,—

"महेश्वरसमायुक्तमीदृशं यः स्मरेत् सदा ।
सततं तस्य कल्याणं वाह्निनश्च भविष्यति ॥"

इति कालिकापुराणे शिवविवाहे ४३ अध्यायः ॥ (परमेश्वरः । तदुक्तं न्यायशास्त्रे ।

वायोर्नवैकादश तेजसो गुणा
जलक्षितिप्राणभृतां चतुर्दश ।
दिक्कालयोः पञ्च पडेव चाम्बरे
महेश्वरोऽष्टौ मनसश्चतेव च ॥"

महान् ईश्वरः प्रजानां प्रभुः । ऐश्वर्य्यशाली राजा । यथा, महाभारते । १ । २२८ । २८ ।

"ततः शक्रोऽतिसंक्रुद्धश्चिदृशानां महेश्वरः ।
पाण्डरं गजमास्थाय तायुभौ वसुपाभवत् ॥")

महेश्वरकरच्युता, स्त्री, (महेश्वरस्य करात् च्युता ।) करतोया नदी । इति केचित् ॥ गौरीविवाह-समये शङ्करकरगलितसंप्रदानसोयप्रभवत्वात्

वरस्य नोयं विद्यतेऽत्रेति करतोया । इत्यमर-टीकायां भरतश्च ॥

महेश्वरी, स्त्री, (महेश्वरस्य स्त्री । महेश्वर + ङीप् । महती चासौ ईश्वरी महदादीनां नियन्त्रीति वा ।) महेश्वरपत्नी । यथा,—

ऐं पातु दक्षनेत्रं मे ह्रीं पातु वामलोचनम् ।
श्रीं पातु दक्षकर्णं मे त्रिवर्गात्मा महेश्वरी ॥"

इति तन्त्रसारे भुवनेश्वरीकवचम् ॥

अपराजिता । इति शब्दचन्द्रिका ॥ कांस्यम् । इति हेमचन्द्रः । ४ । ११४ ॥ राजनीतिः । इति राजनिर्घण्टः ॥

महेरण्डः, पुं, (महांश्चासावेरण्डश्च ।) स्थलैरण्डः । इति राजनिर्घण्टः ॥

महेला, स्त्री, (महती चासावेला च ।) स्थलेला । इति राजनिर्घण्टः ॥ (गुणादिविषयोऽस्याः स्थलेलाशब्दे द्रष्टव्यः ।)

महोक्षः, पुं, (महान् उक्षा । "अचतुरविचतुरेति ।" ५ । ४ । ७७ । इति समासान्तः अच् । निपातितश्च ।) वृषभः । इत्यमरः । २ । ८ । ६१ ॥ तत्पर्य्यायः । वृषभः २ वृषः ३ पुङ्गवः ४ बली ५ गोनाथः ६ ऋषभः ७ गोप्रियः ८ उक्षा ९ गोपतिः १० । इति राजनिर्घण्टः ॥ (यथा, कथासरित्सागरे । ६० । ६६ ।

"महोक्षः स त्वया दृष्टः संस्तवश्च कृतो यदि ।
तदिहानय तं युक्त्या तावत् पश्यामि कौतुकम् ॥")

महोटिका, स्त्री, (महान्तः फलेभ्यः स्थूला उटाः पत्राण्यस्याः । ततः स्वार्थे कन् । टाप् । अकारस्येत्वम् ।) वृक्षती । इति राजनिर्घण्टः ॥

महोटी, स्त्री, (महान्त उटाः पत्राणि यस्याः ।) वृक्षती । इति भावप्रकाशः ॥ वृक्षदुत्पलञ्च ॥

महोत्क, स्त्री, (महान् उत्कः दर्शनोत्सुको लोको यस्याः ।) विद्युत् । इति केचित् ॥

महोत्पलं, क्ली, (महच्च तत् उत्पलञ्च ।) पद्मम् । सारसपक्षी । इत्यमरः । १ । ३० । ३६ ॥

महोत्सवः, पुं, (महांश्चासावुत्सवश्च ।) अतिप्रशयमुत्पादजनककर्म्म । यथा,—

"मन्वेषु जन्मदिवसे ज्ञातेर्मङ्गलपालनाभः ।
गुरुदैवाग्निविप्राश्च पूजनीयाः प्रयत्नतः ॥
मनवश्च पितरौ तथा देवप्रजापतिः ।
प्रतिसंवत्सरश्चैव कर्त्तव्यश्च महोत्सवः ॥"

इति तिथ्यादितत्त्वे वसिष्ठपुराणवचनम् ॥

अपि च । कालिकापुराणे ६६ अध्याये ।

"दुर्गातिथौ मनौ कुर्य्याद्दुर्गामहोत्सवम् ।
महानवम्यां प्रददि बलिदानं नृपादयः ॥"

महोत्साहः, त्रि. (महान् उत्साहो यस्य ।) अतिप्रयोत्साहयुक्तः । (यथा, महाभारते । ५ । ५१ । १ ।

"सर्व्व एते महोत्साहा ये त्वया परिकीर्त्तिताः ।
एकतश्चैव ते सर्व्वे समेता भीम एकतः ॥")

तत्पर्य्यायः । महोद्यमः २ । इत्यमरः । ३ । १ । ३ ॥ (विष्णुः । यथा, महाभारते । १ । १ । ६८ । ६१ ।

"अतीन्द्रियो महामायो महोत्साहो महाबलः ॥")

महोत्साहः, पुं, (महान् उत्साहो यस्य ।) राज्याङ्गप्राप्तराजपुरुषः । यथा,—

"सम्पन्नस्तु प्रकृतिभिर्महोत्साहः कृतश्रमः ॥"

इति शब्दमाला ॥

अतिप्रयोद्यमश्च ॥

महोदधिः, पुं, (महांश्चासावुदधिश्च ।) समुद्रः । यथा, महानाटके ।

"लङ्घा दग्धा वनं भग्नं लक्षितश्च महोदधिः ।
यत् कृतं रामदूतेन स रामः किं करिष्यति ॥"

महोदयं, क्ली, (महान् उदय उन्नतिर्यस्मिन् ।) पुरविशेषः । तत्पर्य्यायः । कान्यकुब्जम् २ कन्याकुब्जम् ३ गाधिपुरम् ४ कौशम्बम् ५ कुशस्थलम् ६ । इति हेमचन्द्रः ॥

महोदयः, पुं, (महान् उदयः समुन्नतिर्यस्मिन् ।) कान्यकुब्जदेशः । आधिपत्यम् । (महान् उदय उत्कर्षो यस्मिन् ।) अपवर्गः । इति मेदिनी । ये, १२६ ॥ (महान् उदय उत्कर्षो यस्य ।) स्वामी । इति हेमचन्द्रः । ३ । ४८७ ॥ (महान् उदयः फलं यस्मिन् यस्माद्वा । महाफले, त्रि । यथा, मनौ । ७ । ५५ ।

"अपि यत् सुकरं कर्म्म तदप्येकेन दुष्करम् ।
विशेषतोऽसहायेन किन्तु राज्यं महोदयम् ॥"

"महोदयं महाफलम् ।" इति तट्टीकायां कुल्लूकभट्टः ॥)

महोदया, स्त्री, (महानुदयो यस्याः । टाप् ।) नागवला । इति राजनिर्घण्टः ॥

महोदरी, स्त्री, महाग्रतावरी । इति भावप्रकाशः ॥ (महत् उदरमस्य ।) वृक्षदुदरयुक्ते, त्रि ॥ (महच्च तदुदरञ्च । वृक्षदुदरं, क्ली । यथा, श्रीभागवते । ६ । ७ । १७ ।

"पितरं वरुणगृह्यं श्रुत्वा जातमहोदरम् ।
रोहिणी ग्राममेयाय तमिन्द्रः प्रत्यषेधत ॥"

पुं, नागविशेषः । यथा, महाभारते । १ । ३५ । १६ ।

"कर्कराकर्करौ नागौ कुक्षोदरमहोदरौ ॥"

दानवविशेषः । यथा, तत्रैव । १ । ६५ । २५ ।

"एकपादेकचक्रश्च विरूपाक्षमहोदरौ ॥"

धृतराष्ट्रस्य पुत्रविशेषः । यथा, तत्रैव । १ । ६७ । ६० ।

"सेनापतिः सुसेनश्च कुक्षोदरमहोदरौ ।")

महोद्यमः, त्रि, (महान् उद्यमो यस्य ।) महोत्साहः । इत्यमरः । ३ । १ । ३ । (यथा, राजतरङ्गिण्याम् । ५ । १४१ ।

"अथ निर्व्वित्य दायादांल्लब्ध्वा लक्ष्मीं क्षितीश्वरः ।
जिष्णुर्दिग्विजयं कर्त्तुं श्रीमानाचीक्रमोद्यमः ॥"

महानुद्यमः ।) अतिप्रयोद्योगे, पुं ॥

महोन्नतः, पुं. (महानतिशय उन्नतः ।) तालवृक्षः । इति भावप्रकाशः ॥ अतिशयोन्नतियुक्ते, त्रि ॥

महोन्नतिः, स्त्री, (महती चासावुन्नतिश्च ।) अतिशयोन्नतिः । यथा,—

"भूयात्ते महदैश्वर्य्यं पुत्रादीनां महोन्नतिः ।
अयाधिना शरीरेण चिरं जीव सुखी भव ॥"

इत्युद्भटः ॥

महोन्मदः, पुं, (महानतिशय उन्मदः ।) मत्स्यविशेषः । फलुइ इति भाषा । यथा,—

"राजशीवश्चिचफलः फलकी च महोन्मदः ॥"

इति शब्दरत्नावली ॥

अत्युन्मत्ते त्रि ॥

महोरगं, क्ली, (महान् उरग इव ।) तगरमूलम् । इति रत्नमाला ॥

महोरगः, पुं, (महांश्चासावुरगश्च ।) सर्पगणविशेषः । इति हेमचन्द्रः । २ । ४ ॥ दृष्टसर्पमात्रञ्च ॥ (यथा, भागवते । ८ । १० । ४७ ।

"महोरगाः समुत्पेतुः दन्दशूकाः सहस्रिकाः ॥")

महोल्का, स्त्री. (महती चासावुल्का च ।) उल्काविशेषः । यथा,—

"विद्युत्स्तनितनिर्घातमहोल्कानाञ्च संप्लवे ।
आकालिकमनध्यायमेतेषु मनुरब्रवीत् ॥
महोल्कानाञ्च संप्लवे इत्यत्रोऽनेकमहोल्कानां सन्निपाते । उल्कालक्षणमाह दृष्टहस्रिष्टः ।
"दृष्टच्छिखा च सूक्ष्माग्रा रक्तनीलशिखोज्ज्वला ।
पौरुषी च प्रमाणेन उल्का नानाविधा स्मृता ॥"

इति तिथ्यादितत्त्वम् ॥

महौजाः, [स्] त्रि, अतितेजोयुक्तः । महदोजो यस्येतिविग्रहे बहुव्रीहौ प्रथमैकवचने अत्वसोरिति विसर्जनीये दीर्घे कृते महौजा इतिपदं निष्पन्नम् ॥ (यथा, मनौ । १ । ६१ ।

"स्वायम्भुवस्यास्य मनोः षड्वंश्या मनवोऽपरे ।
वृद्धवन्तः प्रजाः स्वाः स्वा महात्मानो महौजसः ॥"

कालेयपुत्त्रासुरविशेषः । यथा, महाभारते । १ । ६७ । ५३ ।

"पञ्चमस्तु बभूवैषां प्रवरो यो महासुरः ।
महौजा इति विख्यातो बभूवेह परन्तपः ॥")

महौषधं, क्ली, (महत् औषधम् ।) भूम्यामलकम् । शुण्ठी । (पर्य्यायो यथा,—

"शुण्ठी विश्वा च विश्वञ्च नागरं विश्वभेषजम् ।
ऊषणं कटुभद्रञ्च शृङ्गवेरं महौषधम् ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) लशुनम् । (पर्य्यायो यथा,—

"लशुनस्तु रसोनः स्यादुग्रगन्धो महौषधम् ।
अरिष्टो म्लेच्छकन्दश्च यवनेष्टो रसोनकः ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) वाराहीकन्दः । वल्लगाभः । इति राजनिर्घण्टः ॥ पिप्पली । इति शब्दचन्द्रिका ॥ अतिविषा । इत्यमरः । २ । ४ । ६८ ॥ (महाभेषजम् । यथा, कथासरित्सागरे । ६६ । ६८ ।

"स्वभर्त्तृप्रेम तेषाञ्च महाभेषजमौषधैः ।
चिकित्सां कारयामासुर्नोत्तस्थुश्च तदन्तिकात् ॥")

महौषधिः, स्त्री. (महती चौषधिः ।) दूर्व्वा । तन्त्रान्तरुक्तः । इति शब्दचन्द्रिका । महाभारतीयद्रव्यविशेषः । यथा,—
"महादेवी तथा ब्राह्मी वला चातिवला तथा ।
शङ्खपुष्पी तथा सिंही अष्टमी च सुवर्चला ॥
महौषध्यष्टकं प्रोक्तं महास्नाने नियोजयेत् ॥"
इति गोविन्दानन्दधृतमत्स्यपुराणवचनम् ॥
अपिच ।
"पृश्निपर्णी श्यामलता भृङ्गराजः शतावरी ।
गुडूची महादेवी च महौषधिगणः स्मृतः ॥"
इति शब्दचन्द्रिका ॥
श्रेष्ठौषधिश्च । (यथा, महाभारते ।३।२८८।६।
"विशल्यौ चापि सुग्रीवः शल्यनेतौ चकार ह ।
विशल्यया महौषध्या दिव्यमन्त्रप्रयुक्तया ॥"
सञ्जीवनी । यथा, रघौ । १२ । ६१ ।
"दृष्टा विचिन्वता तेन लङ्कायां राक्षसीवृता ।
जानकीविषवल्लीभिः परीतेव महौषधिः ॥"
"महौषधीः सञ्जीवनी लतेव ।" इति तट्टीकायां मल्लिनाथः ॥)

महौषधी, स्त्री, (महौषधि + ङीप् ।) श्वेतकण्टकारी । ब्राह्मी । (पर्य्यायोऽस्या यथा,—
"ब्राह्मी कपोतवङ्का च सोमवल्ली सरस्वती ।
मण्डूकपर्णी माण्डूकी त्वाष्ट्री दिव्या महौषधी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
कटुका । अतिविषा । इति राजनिर्घण्टः ॥
छिन्नरोहिका । इति विकाण्डशेषः ॥

मा ङ य माने । इति कविकल्पद्रुमः ॥ (दिवा०-आत्म०-सक०-अनिट् ।) ङ य मायते । इति दुर्गादासः ॥

मा ङ लि शब्दे । माने । इति कविकल्पद्रुमः ॥ (ह्वा०-आत्म०-सक०-अनिट् ।) ङ लि मिमीते । स्तुत्या धर्म्मं मिमीते यः । इति पलायुधः ॥ इति तट्टीकायां दुर्गादासः ॥

मा ल माने । इति कविकल्पद्रुमः ॥ (अदा०-पर०-सक०-अनिट् ।) ल माति भूमिं नलेन राजा ।
न मान्ति मानिनो यस्य यशस्त्रिभुवनोदरे ॥
इति पलायुधः ॥ इति दुर्गादासः ॥

मा, य (मा + क्विप् ।) वारणम् । (यथा रामायणे । १ । २ । १५ ।
"मा निषाद ! प्रतिष्ठां त्वमगमः शाश्वतीः समाः ॥")
विकल्पः । इति मेदिनी । अव्ययवर्गे, ४६ ॥

मा, स्त्री, (मा + क्विप् । यद्वा, मा + क । तत टाप् ।) लक्ष्मीः । इति मेदिनी । मे, १ ॥
माता । (यथा, साहित्यदर्पणे । १० म ।
"मारमा सुषमा चारुरुषा मारवधूत्तमा ।
मातर्धूर्जटिमायासा सा यामा मेस्तु मा रमा ॥")
मानम् । इत्येकाक्षरकोषः शब्दरत्नावली च ॥

मा, } नि, (अकारात् + द्वितीयैकवचने । "त्वा मां } मौ द्वितीयायाः ।" ८ । १ । २१ । इति सामिलस्य स्थाने विकल्पेन मादेशः ।)

मदीया कर्म्मता । आमाके इति भाषा ॥ अमच्छब्दात् द्वितीयैकवचननिष्पन्नं पदम् । इति व्याकरणम् ॥ (यथा, देवीभागवते । १ । ५ । ६६ ।
"सिन्धोः पुत्रां रोहिता किं त्वमद्य !
कस्मादेनां प्रेषसे नाथहीनाम् ।
अन्तश्चरन्ते स्वांप्रजातापराधो
शुल्काप्येनं मोदिनां मां कुरुष्व ।")

मांसं, क्ली, (मन्यते इति । मन ज्ञाने + "मनेर्दीर्घश्च ।" उणा० ३ । ६४ । इति सः दीर्घश्च ।) रक्तजधातुविशेषः । मास् इति भाषा ॥ स तु गर्भस्यबालकस्याष्टभिर्मासैर्भवति । इति सुश्रुतबोधः ॥ भागवतमते चतुर्भिर्मासैर्भवति । तत्पर्य्यायः । पिण्डितम् २ तरसम् ३ पललम् ४ क्रव्यम् ५ आमिषम् ६ पलम् ७ । इत्यमरः ।२।६।६३॥ असृजम् ८ जाङ्गलम् ९ कौरम् १० । सर्व्वमांसगुणाः । वातनाशित्वम् । वृष्यत्वम् । बल्यत्वम् । रुच्यत्वम् । हृंहणत्वम् । देशस्थानसात्म्यसंस्कारभावैर्भूयो नानारूपत्वञ्च ॥ * ॥ प्रसहभूशयानूपवारिजवारिचारिमांसगुणाः । गुरुत्वम् । उष्णत्वम् । मधुरत्वम् । स्निग्धत्वम् । वातघ्नत्वम् । शुक्रवर्द्धनत्वञ्च ॥ * ॥ विष्किरप्रतुदजाङ्गलमांसगुणाः । लघुत्वम् । शीतत्वम् । मधुरत्वम् । कषायत्वम् । वृष्यत्वम् । हितत्वञ्च ॥ * ॥
अथ विशेषमांसगुणाः ।
'एकदेशेऽपि पूर्व्वार्द्धे मृगाणां पक्षिणां परम् ।
सर्व्वेषाञ्च शिरस्कन्धग्रीहृत्चर्म्मयकृद्धृदम् ॥
पादपुच्छान्तमस्थिष्कमुष्ककौड्राञ्च मेहनाः ।
धातवः प्रोक्षिताद्याश्च गुरवः स्युर्यथोत्तरम् ॥'
प्रशस्ताप्रशस्तमांसं यथा,—
'वयस्थं निष्क्रियं सद्योहतं मांसं प्रशस्यते ॥
स्तनञ्च याधितं शुष्कं वृद्धं बालं विषैर्हतम् ।
अगोचरहतं याङ्गदितं मांसमुत्सृजेत् ॥'
अष्टविधा मांसयोनिर्यथा । प्रसहाः १ प्रसह्यभक्षणात् कुररध्येनादयः । भूशयाः २ बिलशायित्वात् नकुलगोधादयः । आनूपाः ३ खड्गमहिषवराहादयः । जलजाः ४ कूर्म्मीरादयः । जलेचराः ५ हंसबकप्रभृतयः । जाङ्गलाः ६ हरिणच्छागादयः । विष्किराः ७ विकीर्णचरणात् तित्तिरमयूरकुक्कुटादयः । प्रतुदाः ८ प्रतुद्यचरणात् कपोतपारावतादयः । इति राजनिर्घण्टः ॥ * ॥ अपि च ।
'मांसं वातहरं सर्व्वं हृंहणं बलपुष्टिदम् ।
प्रीणनं गुरु हृद्यञ्च मधुरं रसपाकयोः ।' * ॥
अथ सङ्ग्रहः ।
'मांसवर्गो द्विधा ज्ञेयो जाङ्गलानूपभेदतः ॥'
तत्र जाङ्गलस्य लक्षणं गुणाश्च ।
'मांसवर्गेऽत्र जङ्गाला बिलस्थाश्च गुहाशयाः ।
तथा पर्णमृगा ज्ञेया विष्किराः प्रतुदा अपि ॥
प्रसहा अथच ग्राम्या अष्टौ जाङ्गलजातयः ।
जाङ्गला मधुरा रूक्षास्तुवरा लघवस्तथा ॥
बल्यास्ते हृंहणा वृष्या दीपना दोषहारिणः ।

मांसं

मृदवो मिग्धिनत्वञ्च गद्गदत्वार्दिते तथा ॥
वाधिर्य्यमरुचिं कृच्छ्रेप्मेहसुखजान् गदान् ।
शीपदं गलगण्डञ्च नाशयन्त्यनिलामयान् ।' * ॥
अथानूपस्य लक्षणं गुणाश्च ।
'कूलेचराः प्रवाह्याश्च कोशस्थाः पादिनस्तथा ।
मत्स्या एते समाख्याताः पञ्चधानूपजातयः ॥
आनूपा मधुराः स्निग्धा गुरवो बद्धविसदनाः ।
श्लेष्मलाः पिच्छिलाश्चापि मांसपुष्टिप्रदा भृशम् ॥
तथाभिष्यन्दिनस्ते हि प्रायोऽपथ्यतमाः स्मृताः ॥' * ॥
अथ जाङ्गलानां गणना विशिष्टा गुणाश्च ।
'हरिणैणकुरङ्गर्क्ष्यृष्यनन्यङ्कुशम्बराः ।
राजीवोऽपि च सृष्टी चेत्याद्या जाङ्गलसंज्ञकाः ॥
हरिणस्ताम्रवर्णः स्यादेणः कृष्णः प्रकीर्त्तितः ।
कुरङ्ग ईषत्ताम्रः स्याद्धरिणात्तनिको महान् ॥
ऋष्यो नीलाङ्को लोके सरोरु इति कीर्त्तितः ।
एषतश्चञ्चित्रः स्याद्धरिणात् किञ्चिदल्पकः ॥
न्यङ्कुर्बहुविषाणोऽथ शम्बरो गवयो महान् ।
राजीवस्तु रुरो ज्ञेयो राजीभिः परितो वृतः ॥
यो रुरुः शृङ्गहीनः स्यात् स सृष्टीति निगद्यते ।
जङ्गालाः प्रायशः सर्व्वे पित्तश्लेष्महराः स्मृताः ।
किञ्चिद्वातकराश्चापि लघवो बलवर्द्धनाः ॥'
अथ विलेशयानां गणना गुणाश्च ।
'गोधाशशप्रभृतयो जङ्गालखलकाद्या विलेशयाः ।
विलेशया वातहरा मधुरा रसपाकयोः ।
हृंहणा बहुविण्मूत्रा पीर्य्योष्णा अपि कीर्त्तिताः ॥
अथ गुहाशयानां गणना गुणाश्च ।
'सिंहव्याघ्रर्क्षतरक्षुद्वीपिनस्तथा ।
बभ्रुशल्लुकमार्জ্জারा इत्याद्यास्तु गुहाशयाः ॥
स्थूलपुच्छो रक्तनेत्रो बभ्रुभेदः समाकुलः ।
गुहाशया वातहरा गुरूष्णमधुराश्च ते ।
स्निग्धा बल्या हिता नित्यं नेत्रगुह्यविकारिणाम् ॥'
अथ पर्णमृगाणां गणना गुणाश्च ।
'वनौकोवृक्षमार्জ্জारवृक्षमर्कोटिकादयः ।
एते पर्णमृगाः प्रोक्ताः संज्ञानादेर्महर्षिभिः ॥
स्मृताः पर्णमृगा वृष्याश्चक्षुष्या प्रीतिदा हिताः ।
श्वासार्शःकासशमनाः स्वप्नमेधाग्निकाः ॥'
अथ विष्किराणां गणना गुणाश्च ।
'वर्णकालावविकिरकपिञ्जलकतित्तिराः ।
कुलिङ्गकुक्कुटाद्याश्च विष्किराः ससुदाहृताः ॥
विकीर्य भक्षयन्त्येते यस्मात् तस्माद्धि विष्किराः ।
कपिञ्जला इति प्राज्ञैः कथिता गौरतित्तिराः ॥
विष्किरा मधुराः प्रीताः कषायाः कटुपाकिनः ।
बल्या वृष्याश्चिदोषघ्नाः पथ्यास्ते लघवः स्मृताः ॥'
अथ प्रतुदानां गणना गुणाश्च ।
'कालकण्टकहारीतकपोतशशघातकाः ।
सारिका खञ्जरीटश्च शिकाद्याः प्रतुदाः स्मृताः ।
प्रतुद्य भक्षयन्त्येते तुण्डेन प्रतुदास्ततः ।

कपोतो धवल: पाण्डु: प्रतपत्रो दृढच्छुक: ।
प्रतुदा मधुरा: पित्तकफघ्नास्तु वरा हिमा: ।
लघवो बहुवर्चस्का: किंचिद्वातकरा: स्मृता: ॥'
अथ प्रसहानां गणना गुणाश्च ।
'काको गृध उलूकश्च चिल्लश्च ध्वाङ्क्षघातक: ।
चाषो भासश्च कुरर इत्याद्या: प्रसहा: स्मृता: ।
प्रसहा: कीर्तिता एते प्रसह्याच्छिद्य भक्षणात् ।
प्रसहा: सप्त वीर्य्याणा: षण्मासं भक्षयन्ति ये ।
ते ग्रीषभस्त्रकोम्नादै: शुक्रौजोभा भवन्ति हि ॥'
ध्वाङ्क्षघातकस्थाने ध्वाङ्क्षघातकोऽपि पाठ: । वाज इति क्वचि ॥ अथ ग्राम्याणां गणना गुणाश्च ।
'छागमेषवृषाश्वाद्या ग्राम्या: प्रोक्ता महर्षिभि: ।
ग्राम्या वातहरा: सर्वे दीपना: कफपित्तला: ।
मधुरा रसपाकाभ्यां हृद्या बलवर्द्धना: ॥'
अथ कूलेचराणां गणना गुणाश्च ।
'लुलायगण्डवाराहचमरीवारणादय: ।
एते कूलेचरा: प्रोक्ता: सदा कूले चरन्त्यमी ॥
कूलेचरा मरुत्पित्तहरा हृद्या बलावहा: ।
मधुरा: स्निग्धा मृदवो: श्लेष्मवर्द्धना: ॥'
अथ प्लवानां गणना गुणाश्च ।
'हंसकारण्डकाचात्तवकक्रौञ्चसारिका: ।
नन्दीमुखी सकादम्बा बलाकाद्या: प्लवा: स्मृता: ।
प्लवन्ते सलिले यस्मादेते तस्मात् प्लवा: स्मृता: ॥
मृदवो कठोरा दृढा च यस्याश्चञ्चुपरिस्थिता ।
गुटिका चक्षुषश्चैव ज्ञेया नन्दीमुखीति सा ॥
प्लवा: पित्तहरा: स्निग्धा मधुरा गुरवो हिमा: ।
वातश्लेष्मप्रदाश्चापि बलशुक्रकरा: वरा: ॥'
अथ कोशस्थानां गणना गुणाश्च ।
'शङ्ख: शम्बुकशङ्खापि शुक्तिश्चैवोककर्कटा: ।
शोधा एवम्विधाश्चान्ये कोशस्था: परिकीर्तिता: ॥
कोशस्था मधुरा: स्निग्धा: पित्तवातहरा हिमा: ।
हृद्या बहुवर्चस्का हृद्याश्च बलवर्द्धना: ॥'
अथ पादिनां गणना गुणाश्च ।
'कुम्भीरकूर्म्मनक्राश्च गोधाकरभशूकरा: ।
घटिष्कर: शिशुमारश्चेत्यादय: पादिन: स्मृता: ॥
पादिनोऽपि च ये ते तु कोशस्थानां गुणै: समा: ॥'
इति भावप्रकाश: ॥

अन्यच्च ।
मांसं वातहरं हृद्यं हृद्यं बलवर्द्धनम् ।
प्रीणनं गुरु चोद्दिष्टं मधुरं रसपाकयो: ॥'
तस्योत्पत्तिस्थानमेवं यथा,—
'प्रसह्य भक्षयन्त्यत्ते प्रसह्यास्तेन कीर्तिता: ।
भूशया बिलशायित्वादानूपोऽनूपसंश्रयात् ॥
जले निवासात्प्लवना जले चर्य्याच्चलेचरा: ।
स्थलजा जाङ्गला: प्रोक्ता मृगा अङ्गलचारित्व: ॥
विकीर्य्य पिच्छिरार्थेव प्रतुद्य प्रतुदाक्षया ।
योनिरष्टविधा ह्येषां मांसानां संप्रकीर्तिता ॥'
'प्रसहा भूशयानूपवारिजा वारिचारिण: ।
गुरवस्तमसृग: स्निग्धा वातघ्ना: शुक्रवर्द्धना: ॥
साधारणो वैष्किरो वर्ग: प्रतुदा जाङ्गला मृगा: ।
सर्वत: श्लेष्मलघव: सकषाया हिता नृणाम् ॥'
अथ मांसगुणा: ।
'रसो मांसस्य चक्षुष्यो दृंहण: प्राणवर्द्धन: ।
हृद्यो वातविकारघ्न: स्तन्यौज:स्वरवर्द्धन: ।
भग्नविश्लिष्टसन्धीनां क्षतानां व्रणिनां हित: ॥'
अथ तैलपक्वमांसगुणा: ।
'मांसं यत्तलसंसिद्धं वीर्य्याढ्यं पित्तलं कटु ।
अग्निसन्दीपनं रुच्यं दृंहितृत् पुष्टिदृगुरु ॥'
घृतपक्वमांसगुणा: ।
'मांसन्तु घृतसंसिद्धं दृंहितं पुष्टिदृग्लघु ।
प्रीणनं सर्व्वधातूनां विशेषान्मुखशोधिनाम् ॥'
परिशुष्कप्रदिग्धमांसयोर्लक्षणं गुणाश्च ।
मांसं बहुघृते भृष्टं सिक्तं क्षौद्राम्बुना सकृत् ।
क्षौरकाद्यै: समायुक्तं परिशुष्कं तदुच्यते ॥
परिशुष्कं स्थिरं स्निग्धं हृद्यं प्रीणनं गुरु ।
पित्तघ्नं बलमेधाग्निमांसौज:शुक्रवर्द्धनम् ॥
तदेव घनतक्राक्तं प्रदिग्धं सन्निजातकम् ।
प्रदिग्धं बलमांसाग्निवर्द्धनं वातपित्तजित् ॥'
शूलिकापक्वमांसगुणा: ।
'मांसन्तु शूलिकाप्रोतमङ्गारेण विपाचितम् ।
ज्ञेयं गुरुतरं हृद्यं दीप्ताग्नीनां सदा हितम् ॥'
वेशवारमांसस्य लक्षणं गुणाश्च ।
'निरस्थि पिण्डितं पिष्टं सिद्धं गुडघृतान्वितम् ।
क्षणामरिचसंयुक्तं वेशवार इति स्मृतम् ॥
वेशवारो गुरु: स्निग्धो बलोपचयवर्द्धन: ।
द्वयेन येन येनेह भक्षणं मत्स्यमांसयो: ।
तस्य तस्य तयोश्चैतद्गुणदोषैर्विभावयेत् ॥'
एकत्र सर्व्वमांसभक्षणदोषो यथा,—
'एकत्र सर्व्वमांसानि विरुध्यन्ते परस्परम् ॥'
मांसस्य गुरुत्वं यथा, —
'अस्मादष्टगुणं पिष्टं पिष्टादष्टगुणं पय: ।
पयसोऽष्टगुणं मांसं मांसादष्टगुणं घृतम् ।
घृतादष्टगुणं तैलं मर्द्दनान्न च भक्षणात् ॥'
इति राजवल्लभ: ॥
वर्ज्जनीयमांसानि यथा,—
'क्रव्यादपक्षिदात्यूहशुकमांसानि वर्जयेत् ।
सारसैकशफान् हंसान् बलाकावकटिट्टिभान् ॥
कुररं जालपादञ्च खञ्जरीटन्नगद्विजान् ।
चाषान् मानुष्यान् रक्तपादान् जग्ध्वा वै
कामतो नर: ॥
वस्तुरं कामतो जग्ध्वा सोपवासस्त्र्यहं वसेत् ।'
इति गारुडे ६६ अध्याय: ॥
मांसभक्षणे दोषो यथा,—
'लोभात् स्वभक्षणार्थाय जीवितं हन्ति यो नर: ।
मध्याह्नेऽसौ वसेत् सोऽपि तद्रोजो लक्षवर्षकम् ॥
ततो भवेत् स मूषको मीनश्च सप्तजन्मसु ।
क्षणादेव कर्म्मभ्यस्तत: शुद्धिं लभेद्ध्रुवम् ॥'
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २७ अध्याय: ॥
अपि च ।
'बलाकं हंसदात्यूहं कलविङ्कं शुकं तथा ।
कुररञ्च चकोरञ्च लालपादञ्च कोकिलम् ॥
चाषञ्च खञ्जरीटञ्च श्येनं गृध्रं तथैव च ।
उलूकं चक्रवाकञ्च भासं पारावतन्त्वपि ॥
कपोतं टिट्टिभञ्चैव श्यामटिट्टिभमेव च ।
सिंहशार्दूलमार्ज्जारं श्वानं शूकरमेव च ॥
शृगालं मर्कटञ्चैव गर्द्दभञ्च न भक्षयेत् ।
न भक्षयेत् सर्व्वमृगान् पक्षिणोऽन्यान् वने-
चरान् ॥
जलेचरान् स्थलेचरान् प्राणिनश्चनि धारणा ॥'
इति कूर्म्मपुराणे उपविभागे १६ अध्याय: ॥
अन्यच्च ।
'नाशादविधिना मांसं विधिज्ञो नापदि क्षिप: ।
जग्ध्वा ह्यविधिना मांसं प्रेत्य तैरद्यतेऽवश: ॥
न तादृशं भवत्येनो मृगहन्तुर्धनार्थिन: ।
यादृशं भवति प्रेत्य वृथामांसानि खादत: ॥
कुर्य्याद्घृतपशुं साङ्गं कुर्य्यात् पिष्टपशुं तथा ।
न त्वेव तु वृथा हन्तुं पशुमिच्छेत् कदाचन ॥
यावन्ति पशुरोमाणि तावत्कृत्वो ह मारणम् ।
वृथापशुघ्न: प्राप्नोति प्रेत्य जन्मनि जन्मनि ॥
नाकृत्वा प्राणिनां हिंसां मांसमुत्पद्यते क्वचित् ।
न च प्राणिवध: स्वर्ग्यस्तस्मान्मांसं विवर्ज्जयेत् ॥
समुत्पत्तिञ्च मांसस्य वधबन्धौ च देहिनाम् ।
प्रसमीक्ष्य निवर्त्तेत सर्व्वमांसस्य भक्षणात् ॥
न भक्षयति यो मांसं विधिं हित्वा पिशाचवत् ॥
स लोकप्रियतां याति व्याधिभिश्च न पीड्यते ॥
स्वमांसं परमांसेन यो वर्द्धयितुमिच्छति ।
अनभ्यर्च्च पितॄन् देवान् ततोऽन्यो नास्त्य-
पुण्यकृत् ॥
वर्षे वर्षेऽश्वमेधेन यो यजेत शतं समा: ।
मांसानि च न खादेद्यस्तयो: पुण्यफलं समम् ॥
फलमूलाशनैर्मेध्यैर्मुन्यन्नानाञ्च भोजनै: ।
न तत्फलमवाप्नोति यन्मांसपरिवर्ज्जनात् ॥
मांसभक्षयितामुत्र यस्य मांसमिहाद्म्यहम् ।
एतन्मांसस्य मांसत्वं प्रवदन्ति मनीषिण: ॥
यो यस्य मांसमश्नाति स तन्मांसाद उच्यते ।
मत्स्याद: सर्व्वमांसादस्तस्मान्मत्स्यान् विव-
र्ज्जयेत् ॥'
इति मात्स्ये ५५ अध्याय: ॥
अन्यच्च । श्रीभागवतपञ्चमस्कन्धवाक्यम् । 'ये त्विह वै पुरुषा: पुरुषमेधेन यजन्ते । याश्च स्त्रियो वृथापशून् खादन्ति तांश्च ताश्च ते पशव इह निहता यमसदने यातयन्तो रक्षोगणा: । शृणिका इव सुधितिना वदायाश्चक्ष पिबन्तीति ।'
ब्रह्मपुराणम् ।
'पशोस्तु मांसमादाय न मांसं भक्षयेत् क्वचित् ।
दृष्ट्वा मांसं गर्भवत्या शुष्कमांसमथापि वा ॥'
महाभारतम् ।
'रोगार्त्तोऽभ्यर्थितो वापि यो मांसं नात्त्य-
श्नीयुप: ।
फलमाप्नोत्यसौ मेधमश्वस्य च ॥'
नन्दिपुराणम् ।
'यश्चोपदेशं कुरुते परस्य तु महात्मन: ।
मांसस्य वर्ज्जनेऽमुं सोऽमांसादफलं लभेत् ॥'
भविष्यपुराणम् ।
'यामिषं रक्तमाकण्य यो मुञ्चति च रक्षेद्दिने ।
सप्तजन्म भवेत् कुष्ठी दरिद्रश्चोपजायते ॥'

विष्णुपुराणम्।
चतुर्दश्यष्टमी चैव अमावास्या च पूर्णिमा।
पर्व्वाण्येतानि राजेन्द्र! रविसंक्रान्तिरेव च॥
स्त्रीतैलमांससंभोगी पर्व्वस्वेतेषु वै पुमान्।
विण्मूत्रभोजनं नाम प्रयाति नरकं ततः॥'
इति तिथ्यादितत्त्वम्॥
अथ मांसभक्षणविधिः।
'श्राद्धे देवान् पितॄन् प्राज्ञो खादन् मांसं
न दोषभाक्।
वसेत् स नरके घोरे दिनानि पशुरोमभिः॥
सम्मितानि दुराचारो यो हन्त्यविधिना पशून्।
मांसं संत्यज्य संप्राप्य कामान् याति ततो
हरिम्॥'
इति गारुडे ६६ अध्यायः॥
अपि च।
'गोधा कूर्म्मः शशः खड्गो शल्यकश्चेति
सत्तमाः।
भक्ष्यान् पञ्चनखान्त्रित्यं मनुराह प्रजापतिः॥
मत्स्यान् सशल्कान् भुञ्जीत मांसं रौरवमेव च।
निवेद्य देवताभ्यश्च ब्राह्मणेभ्यश्च नान्यथा॥
मायूरं तैत्तिरञ्चैव कणेतञ्च कपिञ्जलम्।
वार्द्धीनसं वकं भक्ष्यं नीलपृष्ठं पराजिताः॥
सपरः सिंहतुण्डश्च तथा पाठीनरोहितौ।
मनुस्त्वाख्यते वसुद्विजा भक्षणाय तपोधनैः॥
प्रोक्षितं भक्षयेद्विप्रो मांसञ्च द्विजकाम्यया।
यथाविधिनियुक्तञ्च प्राणानामपि चात्यये॥
भक्षयन्नपि मांसानि वेदभोजी न लिप्यते।
औषधार्थमशक्तौ वा नियोगादथ्वकारणात्॥
आमन्त्रितस्तु यः श्राद्धे देवे वा मांसमुत्सृजेत्।
यावन्ति पशुरोमाणि तावतो नरकान् व्रजेत्॥
इति कूर्म्मपुराणे उपविभागे १६ अध्यायः॥
अपि च।
'मांसस्यातः प्रवक्ष्यामि विधिं भक्षणवर्जने।
प्रोक्षितं भक्षयेन्मांसं ब्राह्मणानाञ्च काम्यया॥
यथाविधिनियुक्तस्तु प्राणानामेव चात्यये।
प्राणस्यान्नमिदं सर्व्वं प्रजापतिरकल्पयत्॥
स्थावरं जङ्गमञ्चैव सर्व्वं प्राणस्य भोजनम्।
चराणामन्नमचरा दंष्ट्रिणामप्यदंष्ट्रिणः॥
अहन्यहन्यानां शूराणामेव भोजनम्।
नित्या दुग्धदनादाद्यान् प्राणिनोऽहन्यहन्यपि॥
धात्रैव सृष्टा खाद्याश्च प्राणिनोऽत्तार एव च।
यज्ञाय जग्धिर्मांसस्येत्येष दैवो विधिः स्मृतः॥
अतोऽन्यथा प्रवृत्तिस्तु राक्षसो विधिरुच्यते।
क्रीत्वा स्वयं वाप्युत्पाद्य परोपकृतमेव वा॥
देवान् पितॄनर्चयित्वा खादन् मांसं न दुष्यति।
नियुक्तस्तु यथान्यायं यो मांसं नात्ति मानवः॥
स प्रेत्य पशुतां याति सम्भवानेकविंशतिम्।
न मांसभक्षणे दोषो न मद्ये न च मैथुने।
प्रवृत्तिरेषा भूतानां निवृत्तिस्तु महाफला॥'
इति मानवे ५ अध्यायः॥ *॥
देवीपुराणम्।
'अष्टमी नवमीष्वेव नवम्यामपरेऽहनि।
मत्स्यमांसोपहारेण दद्यान्नैवेद्यमुत्तमम्।
तेनैव विधिनान्नन्तु स्वयं भुञ्जीत नान्यथा॥'
याज्ञवल्क्यः।
'प्राणात्यये तथा श्राद्धे प्रोक्षितं द्विजकाम्यया।
देवान् पितॄन् समभ्यर्च्य खादन् मांसं न
दोषभाक्॥'
यमः।
'भक्षयेन् प्रोक्षितं मांसं सकृत् ब्राह्मणकाम्यया।
देवे नियुक्तः श्राद्धे वा नियमे च विवर्ज्जयेत्॥'
इति तिथ्यादितत्त्वम्॥ *॥
भाक्तामिषं यथा,—
'गोवर्ज्जमामिषं क्षीरं फले जलमिवामिषम्।
आमिषं रक्तशाकञ्च सर्व्वञ्च दग्धमामिषम्॥'
गोवर्ज्जमामिषं क्षीरमित्यत्र पत्राण्यामामिषं
पर्णमिति च पाठः। इति कल्पलोचनः॥
(अस्योत्पत्तिर्यथा,—
'रसाद्रक्तं ततो मांसं मांसान्मेदः प्रजायते॥'
इति सुश्रुते सूत्रस्थाने १४ अध्याये॥)
मांसः, पुं. (मन+सः। दीर्घश्च।) कालः।
कीटः। इति शब्दरत्नावली॥ (वर्णसङ्करजातिविशेषः। यथा, महाभारते। १३। ४८। २२।
"चतुरो भागशो हृते क्रूरान्नायोपजीविनः।
मांसं खादुकरं चौद्रं सौगन्धमिति विश्रुतम्॥")
मांसकारि स्त्री, (मांसं करोतीति। कृ+णिनिः।)
रक्तम्। इति हेमचन्द्रः। ३। २८६॥
मांसच्छदा, स्त्री, (मांस इव छदः पर्णमस्याः।
तद्वत्पिरिलोमोपपत्तेरस्यास्तथात्वम्।) मांसरोहिणीविशेषः। तत्पर्य्यायः। मांसी २ मांसरोही ३ रसायनी ४ सुलोमा ५ लोमकरिणी ६। इति राजनिर्घण्टः॥
मांसज, क्ली, (मांसाज्जायते इति। जन्+डः।)
मेदः। इति हेमचन्द्रः। ३। १८८॥ (मांसजाते, त्रि।)
मांसतेजः, [स्] क्ली, (मांसात् तेजोऽस्य।)
मेदः। इति हेमचन्द्रः। ३। १८८॥
मांसदलनः, पुं, (मांसं व्रीहाख्यकं दलति छिन्नीकरोतीति। दल+ल्युः।) व्रीहिभेदः। इति शब्दचन्द्रिका॥
मांसद्रावी, [न्] पुं, (मांसं द्रावयति शिथिलीकरोतीति। द्रु+णिच्+णिनिः।) अम्लवेतसः।
इति राजनिर्घण्टः॥ (विशेषोऽस्याम्लवेतसशब्दे द्रष्टव्यः॥)
मांसपचनं, क्ली, (मांसस्य पचनम्।) मांसपाकः।
तस्य रूपान्तरं मांसाकः। इति शब्दरत्नम्॥
मांसपेशी, स्त्री, (मांसस्य पेशी।) गर्भस्यावयवविशेषः। यथा,—
"पुंसवनः सप्तरात्रेण मांसपेशी भवेत्ततः।
द्विसप्ताहात् भवेत् पेशी रक्तमांसचिता दृढा॥
बीजस्त्रेवाङ्कुराः पेश्यः पञ्चविंशतिराचतः॥"
इति सुश्रुतः॥ *॥
अथ मांसस्य पेशीराह।
यथार्घसुप्तमुत्क्लेदो वायुः स्रोतांसि दारयेत्।
अनुप्रविश्य पिशितं पेशीश्चिभजते तथा॥"
यथार्घं यथाप्रयोजनम्॥ *॥ मांसपेशीनां संख्यामाह।
"मांसपेश्यः समाख्याता नृणां पञ्चशतानि च।
तासां शतानि चत्वारि शाखासु कथितान्यथ॥
कोष्ठे षडुत्तरा षष्टिः कथिता मुनिपुङ्गवैः।
ग्रीवायां ऊर्द्ध्वगास्तासु चतुस्त्रिंशत्तु प्रकीर्त्तिताः॥"
नाः शाखागताः प्राह। एकैकस्यां पादाङ्गुल्यां तिस्रस्तिस्रस्ताः पञ्चदश १५ पादाग्रे दश १० पार्ष्णिपरिक्रूर्चसन्निविष्टा दश १० गुल्फतलयोर्दश १० गुल्फजानुनोः अन्तरे विंशतिः २० जानुनि पञ्च ५ ऊरौ विंशतिः २० वंक्षणे दश १० एवमेकैकस्मिन् सक्थिनि शतम् १०० भवन्ति। एतेनेतरसक्थिबाहू च व्याख्यातौ॥
अथ कोष्ठगताः प्राह। गुदे तिस्रः शेफस्येका १ सेवन्यामेका १ वृषणयोर्द्वे २ स्फिचोः पञ्च पञ्च ५। ५ वस्तिसन्धौ द्वे २ उदरे षष्ठ्यू नाभौ एका १ पृष्ठोर्द्वसन्निविष्टा उभयतः षष्ठ्य पञ्च दीर्घाः ५। ५ पार्श्वयोः षट् ६ वक्षसि दश १० अक्षकांसौ प्रति समन्तान् सप्त ७। अक्षकौ अंसयो इति लोके। अंसौ स्कन्धौ। हृदि द्वे २ यकृति द्वे २ क्लोम्नि द्वे २ उरुकद्वे २॥ *॥ अथ ग्रीवोर्द्ध्वगा आह। ग्रीवायां चतस्रः ४ हन्वोरष्टौ ८ कण्ठमणौ षण्णिकायामिति यावत् एका १ गले एका १ तालुनि द्वे २ जिह्वायामेका १ ओष्ठयोर्द्वे २ नासायां द्वे ललाटे चतस्रः ४ शिरस्येका १ एवं मांसपेश्यः पञ्चशतानि भवन्ति॥ *॥
"स्त्रीणामपि भवन्त्येता; किन्तु विंशतिरुत्तराः।
गर्भाशये गर्भमार्गे योनौ च स्तनयोरपि॥"
इताः पञ्चशतानि मांसपेश्यः। अधिका विंशतिर्यथा। गर्भाशये तिस्रः ३ गर्भच्छिद्रसंस्थिताः। शुक्रार्त्तवप्रवेशिन्यां तिस्रः ३ योनावभ्यन्तरतो सुखाश्रिते प्रकृते द्वे २ योनावेव बहिर्निर्गतमोतःपार्श्वद्वयस्थिते वक्षणे योनिकर्णिक इति यावत् द्वे २ स्तनयोः पञ्च पञ्च ५। ५ यौवने तासां वृद्धिर्भवति।
"पुंसां पेश्यः पुरस्तात् याः प्रोक्ता मेहनसुश्रुताः।
स्त्रीणामाहृत्य तिष्ठन्ति फलमन्तर्गतं हिताः॥"
अस्यायमर्थः। पुंसां मेहनसुश्रुतयोश्च याश्चिरो मांसपेश्यः पूर्व्वमुक्तास्ताः स्त्रीणां मेहनसुश्रुताभावात् फलं गर्भाशयं आहृत्य तिष्ठन्ति। गयदासस्तास्त्राह। स्त्रीणां मांसपेश्यस्त्रिभिर्हीनानि पञ्चशतानि। तथा च भोजः।
"पञ्चपेशीशतान्येव स्त्रीदेहे विद्धि भूमिप!।
अतश्च तिस्रो हीयन्ते स्त्रीणां शेफसि सुश्रुतः॥
अथ मांसपेशीनां कर्म्माण्याह।
"शिरास्नायुस्त्वपर्व्वाणि सन्धयस्तु शरीरिणाम्।
पेशीभिः सहितान्येव बलवन्ति भवन्ति हि॥"
इति भावप्रकाशः॥

(यथा, महाभारते । १ । ११५ । १२ ।
"ततो जज्ञे मांसपेशी लोहाष्ठीलेव संहता ॥")
मांसफला, स्त्री, (मांसमिव फलमस्याः ।) वार्त्ताकी। इति राजनिर्घण्टः ॥
मांसभक्षः, त्रि, (मांसं भक्षयतीति । भक्ष + "कर्म्मण्यण् ।" ३।२।१ इत्यण् ।) मांसभक्षण-कर्त्ता। मांसं भक्षयतीति छान्दसे षसि कर्त्तरि षण्प्रत्ययेन निष्पन्नः ॥ (दानवविशेषः । यथा, हरिवंशे भविष्यपर्व्वणि । २३२ । ६ ।
"मांसपो मांसभक्षश्च वेगवान् केतुमाञ्छिखिः ॥")
मांसमाना, स्त्री, मायपर्णी । इति राजनिर्घण्टः ॥
मांसरोहिणी, स्त्री, (मांसं रोपयतीति । रुह + णिच् + णिनिः । ङीप् । न पुक् ।) सुगन्धिद्रव्यभेदः। तत्पर्य्यायः । अस्थिरुहा २ वृत्ता ३ चर्म्मकषा ४ वसा ५ विकषा ६ मांसरोहिणी ७ । अस्या गुणाः । वृष्यत्वम् । सारकत्वम् । दोषत्रयनाशित्वञ्च । इति राजनिर्घण्टः ॥ (तथाचास्याः पर्य्यायो गुणाश्च ।
"मांसरोहिण्यतिरुहा वृत्ता चर्म्मकरी क्षया । प्रहारवल्ली विकषा वीरवल्ल्यपि कथ्यते ॥
स्यान्मांसरोहिणी वृष्या सरा दोषत्रयापहा ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
मांसलं, क्ली, (मांसं तद्वत् पुष्टिकरो गुणोऽस्य स्यास्मिन् वा । मांस + "सिध्मादिभ्यश्च ।" ५ । २ । ९७ । इति लच् ।) काव्यस्य गौड़ीरीत्य-न्तर्गतस्य ओजोगुणस्याङ्गविशेषः । यथा,—
"ओजः समासभूयस्त्वं मांसलं पदडम्बरम् ॥"
इति काव्यचन्द्रिका ॥
मांसलः, त्रि, (अतिशयमांसमस्यास्तीति । मांस + "सिध्मादिभ्यश्च ।" ५ । २ । ५७ । इति लच्) बलवान् । इत्यमरः । ३ । ६ । ११ । स्थूलः । यथा, गारुड़े ६६ अध्याये ।
"स्निग्धाश्च बहुरेखाः स्युर्निर्द्यार्श्चिबुके क्षये । मांसलैश्च धनोपेतैरक्षैरक्षरैर्नृपाः ॥"
(मांसयुक्तः । यथा, बृहत्संहितायाम् । ६८ । २८ ।
"हृदयं सशुभं पृथु न वेपनं मांसलञ्च नृपतीनाम् ॥"
अतिबहुलः । यथा, नैषधे । ६ । २७ ।
"हृदस्य हंसावलिमांसलश्रियो बलाकयेव प्रबला विडम्बना ॥")
मांसलफला, स्त्री, (मांसलं फलमस्याः ।) वृन्ताकी। इति राजनिर्घण्टः ॥
मांसविक्रयी, [न्] त्रि, (मांसविक्रयोऽस्यास्तीति । मांसविक्रयेण जीवति वेति इनिः ।) आमिष-विक्रयकर्त्ता । इति हलायुधः ॥ तत्पर्य्यायः । वैतंसिक. २ कौटिक; ३ मांसिक; ४ । इत्य-मरः । २ । १० । १४ ॥ शौनिकः ५ । इति जटाधरः ॥ कौटकिकः ६ । इति शब्दरत्ना-वली ॥ (यथा मनौ । ३ । १५१ ।
"चिकित्सकान् देवलकान् मांसविक्रयिणस्तथा । विप्रमेव च जीवन्तो वर्ज्याः स्पर्द्धयकर्त्तयोः ॥")
मांसमारः, पुं, (मांसस्य सारः ।) मेदः । इति राज-निर्घण्टः ॥ (मांसेऽपि सारो बलं यस्य । सबल-स्थूलकायः । यथा, बृहत्संहितायाम् । ६८ । २० ।
"उपचितदेहो विद्वान् धनी सुरूपश्च मांस-सारो यः ।
सङ्गात इति च सुश्लिष्टसन्धितासुखभुजो ज्ञेयः ॥")
मांसस्नेहः, पुं, (मांसानां स्नेहः ।) मेदः । इति राजनिर्घण्टः ॥
मांसहासा, स्त्री, (मांसेन हासः प्रकाशो यस्याः ।) चर्म्म । इति शब्दरत्नावली ॥
मांसाष्टका, स्त्री, (मांसेन सम्पाद्या अष्टका । मांसप्रधाना अष्टका वा ।) गौणचान्द्रमाघ-कृष्णाष्टमी । तत्र मांसोपकरणकश्राद्धमावश्यक-म् । यथा । अथाष्टकाश्राद्धम् ।
"पित्र्यादानाय मूले स्युरष्टकास्विह एव च ।
कृष्णपक्षे वरिष्ठा हि पूर्व्वा चैन्द्री विभाव्यते ॥
प्राजापत्या द्वितीया स्यात् तृतीया वैश्वदेवकी ।
आद्या पूर्वैः सदा कार्य्या मांसैरन्या भवेत्तथा ॥
श्राद्धैः कार्य्या तृतीया स्यादेष द्रव्यगतो विधिः ॥"
मूले प्रधानस्याने । अमावास्या हि श्राद्धस्य प्रधानकालः तद्वदिति यावत् । ऐन्द्री साग्नेरिन्द्रदेवताकयागसम्बन्धात् । एवं प्राजापत्या वैश्वदेवकी च । मांसैः पशोः । तथा च गोभिलः । यद्युवाल्पतरसंभारः स्यात् तदा पशुनैव कुर्य्यादिति । यद्युवेति निपातसमुदायो यद्यर्थे । पशुरपि छाग एव । छागोऽनादेशे पशुरिति गोतमात् । न च तैथ्या अजैं अष्टम्यां गौरिति गोभिलसूत्रेण गवोपदेशात् कथमनुपदिष्टत्वमिति वाच्यम् । तदसम्भवे पशुने-त्यनेन यः पशुरुपदिष्टस्तस्य विशेषतोऽनुप-दिष्टत्वात् । वस्तुतस्तु हरिवंशे छागोऽपि विहितः ।
"इत्याकुस्तु विकुर्व्विं वै अष्टकायामथादिशत् ।
मांसमानय आहाय मृगं हत्वा महाबल ! ॥'
इत्यादिना मृगमांसबोधनात् ॥ पशुभावे स्थालीपाकेन । यथा, गोभिलः । अपि वा स्थालीपाकं कुर्व्वीतेति । तद्विधानन्तु ।
"स्थालीपाकं पशुस्थाने कुर्य्यादृग्यजुषानुकल्पिकम् ।
अपवेत्तं सवनसायास्तरुणा गोः पयस्तु ॥"
इति छन्दोगपरिशिष्टीयं ग्राह्यम् ॥ अन्विति ओदनचरोः पश्चात् । अतएव ।
"पितरः सूक्ष्मयन्नन्नमष्टकासु मघासु च ।
तस्माद्दद्यात् सदा युक्तो विद्वांस्तु ब्राह्मणेषु च ॥"
इति प्रातातपेनोक्तम् ॥ तस्मादन्नं प्रधानं पूपादिकन्तु उपकरणत्वेन पक्वानामावश्यकं सदेति अवगात् । इति आह्निकतत्त्वम् ॥
मांसिकः, पुं, (मांसाय प्रभवति "तस्मै प्रभवति सन्तापादिभ्यः ।" ५ । १ । १०१ । इति । मांस + ठक् । मांसेन जीवतीति ठक् वा । मांसं पण्य-मस्य । "तदस्य पण्यम् ।" ४ । ४ । ५१ । इति ठक् वा । अथवा, मांसं नियुक्तमस्मै दीयते । इति
"श्रावणामांसौदनाट्ठिठन् ।" ४ । ४ । ६७ । इति ठिठन् ।) मांसविक्रयी । इत्यमरः । २ । १० । १४ ॥
मांसिनी, स्त्री, (मांसवत् पदार्थोऽस्यास्तीति । इनिः । ङीप् ।) जटामांसी । इति राज-निर्घण्टः ॥
मांसी, स्त्री, (मांसवत् पदार्थोऽस्यास्यामिति । मांस + अर्शआदिलात्अच् । गौरादित्वात् ङीष् ।) जटामांसी । कक्कोली । इति मेदिनी । से, ८ । मांसच्छदा । इति राजनिर्घण्टः ॥ (यथा, वैद्यकरत्नमालायाम् ।
"नलदं नन्दिनी पेवी मांसी कृष्णजटा जटी ॥")
मांसेष्टा, स्त्री, (मांसमिष्टं प्रियमस्याः ।) वल्गुला । इति राजनिर्घण्टः ॥
माकन्दः, पुं, (मानोति । मा + किप् । माः परि-मितः सुघटितः कन्द इव फलमस्य ।) आम्र-वृक्षः । इतिमेदिनी । दे, ३८ ॥ (यथा, गीतगोविन्दे ।
"माकन्द ! क्रन्द कान्ताधर ! धरणितलं गच्छ यच्छन्ति यावद् भावं भृङ्गारसारस्वतमिह जयदेवस्य विश्व-वचांसि ॥"
तस्यास्य पर्य्यायः ।
"आम्रः प्रोक्तो रसालश्च सहकारोऽतिसौरभः ।
कामाङ्गो मधुदूतश्च माकन्दः पिकवल्लभः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
माकन्दी, स्त्री, (माकन्द + ङीष् ।) आमलकी । नगरभेदः । इति मेदिनी । दे, ३८ ॥ (यथा, महाभारते । ५ । ७२ । १५ ।
"——————पञ्चग्रामा वृता मया ।
अविस्थलं वृकस्थलं माकन्दीं वारणावतम् ।
अवसानञ्च गोविन्द ! कञ्चिदेवाच पञ्चमम् ॥")
पीतचन्दनम् । इति शब्दमाला ॥ माद्राणी इति माङ्गनी इति च हिन्दी भाषा । तत्-पर्य्यायः । बहुमूली २ मादनी ३ गन्धमूलिका ४ । अस्या गुणाः । कटुत्वम् । तिक्तत्वम् । मधु-रत्वम् । दीपनत्वम् । रुच्यत्वम् । अल्पवात-कारित्वम् । पथ्यत्वम् । वर्षासु न सिताधिक-त्वञ्च । एका विशदमूली च श्यामला च तथा-परा । इति राजनिर्घण्टः ॥
माकरी, स्त्री, (मकरयुक्ता पौर्णमास्यत्रेति । मकर + अण् + ङीष् ।) माघशुक्लसप्तमी । अत्र स्नानादिविधिर्यथा । भविष्ये ।
"सूर्य्यग्रहणतुल्या हि शुक्ला माघस्य सप्तमी ।
अरुणोदयवेलायां तस्यां स्नानं महाफलम् ॥
माघे मासि सिते पक्षे सप्तमी कोटिभास्करा ।
दद्यात् स्नानार्घ्यदानाभ्यामायुरारोग्यसम्पदः ॥
अरुणोदयवेलायां शुक्ला माघस्य सप्तमी ।
गङ्गायां यदि लभ्येत सूर्य्यग्रहशतैः समा ॥"
कोटिभास्करा कोटिसप्तमीतुल्या सप्तम्या भास्करदेवताकत्वात् । सूर्य्यग्रहणफलं स्नान-जम् । सन्निहिते बुद्धिरन्तरङ्गेतिन्यायात् । तेन बहुप्रतसूर्य्यग्रहणकालीनगङ्गास्नानजन्य-फलसमफलमत्र ज्ञेयम् ॥ ॥ स्नानपरिपाटी

माघ्र कृत्यकल्पलतायां विष्णुः। सप्तवदरपत्राणि सप्तार्कपत्राणि च शिरसि निधाय,—
"ॐ यदद्यच्चमकृतं पापं मया सप्तसु जन्मसु।
तन्मे रोकञ्च शोकञ्च माकरी हन्तु सप्तमी॥"
इत्युच्चार्य स्नायादिति श्रेषः। रोकं छिद्रम्। तिथिकृत्यस्य पौर्णमास्यन्तमाचाङ्गत्वात् माकरीपदं मकरार्कारब्धचान्द्रमासीयतिथिपरम्। तिथिकृत्ये च कृष्णादिं व्रते शुक्लादिमेव च। विवाहादौ च सौरादिं मासं कृत्ये विनिर्दिशेदिति ब्रह्मपुराणात् मन्वन्तरादित्वेन तथा युक्तत्वाच्च। यथा, मत्स्यपुराणम्।
"यस्मान्मन्वन्तरादौ तु रथमापूर्दिवाकरः।
माघमासस्य सप्तम्यां तस्मात् सा रथसप्तमी॥
अरुणोदयवेलायां तस्यां स्नानं महाफलम्।"
अतएव नारसिंहे रथाख्यायामित्युक्तम्॥ * ॥
अर्घ्यदानपरिपाटी यथा,—
"अर्कपत्रैः सवदरैर्दूर्वाक्षतसचन्दनैः।
अष्टाङ्गविधिनाचार्यं दद्यादादित्यतुष्टये।
अष्टाङ्गमर्घ्यमापूर्य भानोर्मूर्द्धि निवेदयेत्॥
अर्घ्यमन्त्रस्तु।
जननी सर्व्वभूतानां सप्तमी सप्तसप्तिके।
सप्तव्याहृतिके देवि नमस्ते रविमण्डले॥
प्रणाममन्त्रस्तु।
सप्तसप्तिवह प्रीत सप्तलोकप्रदीपन।
सप्तम्याञ्च नमस्तुभ्यं नमोऽनन्ताय वेधसे॥"
इति तिथ्यादितत्त्वम्॥ * ॥
तस्यां सूर्य्यमुद्दिश्य स्नयाचाफलं यथा,—
"माघमासस्य सप्तम्यां देवं स्नाप्यपुरं नराः।
स्नयाचां प्रकुर्व्वन्ति सर्व्वद्वन्द्वविवर्जिताः॥
गच्छन्ति तत्पदं शान्तं सूर्य्यमण्डलभेदकम्।
एतत्ते कथितं देवि! साम्बस्नापसमुद्भवम्।
पापप्रशमनाख्यानं महापातकनाशनम्॥"
इति वराहपुराणम्॥
माघ, ट मृष्टि। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) ट माङ्गति नमध्यपाठेनैवेऽसिद्धे दद्यनुबन्धो वेदेषूच्चारणभेदार्थः। इति दुर्गादासः॥
माघ्निकं, क्ली, (मघ्निकाभिः कृतम्। मघ्निका+"संज्ञायाम्।" ४। ३। ११७। इति ठक्।) मधु। इत्यमरः। २। ६। १०७॥ नीलवर्णमध्यममघ्निकाकृततैलवर्णमधु। अस्य गुणाः। चौद्रालघुत्वम्। रूक्षत्वम्। श्रेष्ठत्वम्। श्वासादिरोगे विशेषतः प्रशस्ततरत्वञ्च। इति राजवल्लभः॥ धातुविशेषः। धातुमाखी इति हिन्दीभाषा। तद्विविधम्। स्वर्णमाघ्निकं रौप्यमाघ्निकञ्च। तत्पर्य्यायः। माघ्नीकम् २ पीतकम् ३ धातुमाघ्निकम् ४ ताप्यिच्छम् ५ ताप्यकम् ६ ताप्यम् ७ आपीतम् ८ पीतमाघ्निकम् ९ आवर्त्तम् १० मधुधातुः ११ चौद्रधातुः १२ माघ्निकधातुः १३। इति राजनिर्घण्टः॥ कटम्बः १४ चक्रनाम १५ व्रजनामकम् १६। इति हेमचन्द्रः। ४। १२०॥
अस्य गुणाः। मधुरत्वम्। तिक्तत्वम्। अम्लत्वम्। कफभ्रमहृल्लासमूर्च्छार्त्तिश्वासकासविषापहत्वञ्च।
"माघ्निकं द्विविधं प्रोक्तं हेमाङ्गं तारमाघ्निकम्।
भिन्नवर्णविशेषत्वादस्यवीर्य्यादिकं पृथक्॥
तारपादादिके तारमाघ्निकञ्च प्रशस्यते।
देहे हेमाभकं श्रेष्ठं रोगहृद्बलपुष्टिदम्॥"
इति राजनिर्घण्टः॥
अपि च।
"लेखनो माघ्निको धातुः सुवर्णरजतद्युतिः।
जरानित् पाण्डुरोगघ्नः क्षयकुष्ठज्वरापहः॥
मधुरोऽम्लः कटुःपाके किञ्चिदुष्णोऽल्पतोपमः॥"
इति कश्चिद्राजवल्लभः॥
(उपधातुविशेषः। यथा, सुश्रुते।
"माघ्निकं तुत्थिताभ्रे च नीलाञ्जनशिलालकाः।
रसकस्येति विज्ञेया एते सप्तोपधातवः॥")
माघ्निकजं, क्ली, (माघ्निकात् जातम्। जन+डः।) शिक्थकम्। इति राजनिर्घण्टः॥
माघ्निकफलः, पुं, (माघ्निकवत् मधुरं फलमस्य।) मधुनालिकेरिकः। इति राजनिर्घण्टः॥
माघ्निकाश्रयं, क्ली, (माघ्निकानामाश्रयः। अभिधानात् क्लीवत्वम्।) शिक्थकम्। इति राजनिर्घण्टः॥
माघ्नीकं, क्ली, (मघ्निकाभिः कृतमित्यण्। निपातादीर्घत्वम्।) मधु। इति राजनिर्घण्टः॥ (धातुविशेषः। यथा, कथासरित्सागरे। ७६। ३।
"माघ्नीकधातुमधुपारदलोहाचूर्ण-
पथ्याशिलाजतुविडङ्गहृतानि योऽद्यात्।
सैकानि विंशतिरहानि जरान्वितोऽपि
सोऽशीतिकोऽपि रमयत्यबलां युवेव॥")
माघ्नीकशर्करा, स्त्री, (माघ्नीकक्रता शर्करा शाकपार्थिवादिवत् समासः।) सिताखण्डः। इति राजनिर्घण्टः॥
माघवः, पुं, (मघस्य तद्देवतास्यापत्यम्। "दाण्मघकलिङ्गसुरमसादण्।" ४। १। १७०। इति। अण्।) पाणिखनकः। इति महाभारतम्॥ वंशक्रमेण महत्त्वबोधिराजाख्यस्तुतिकारौ। तत्पर्य्यायः। मधुकः २ वन्दी ३ स्तुतिपाठकः ४। इत्यमरभरतौ। २। ८। ६७। तस्योत्पत्तिर्यथा,—
"ततोऽस्य दक्षिणं हस्तं ममन्थुस्ते तदा द्विजाः।
मथ्यमाने च तत्राभूत् पृथुर्वैण्यः प्रतापवान्॥
तस्य वै जातमात्रस्य यज्ञे पैतामहे शुभे।
स्तुतः स्तुत्यां सुतुत्पन्नः सौत्येऽहनि महामते!॥
तस्मिन्नेव महायज्ञे जज्ञे प्राज्ञोऽथ मागधः।
प्रोक्तौ तदा मुनिवरैस्तावुभौ सूतमागधौ॥
श्रूयतामेष नृपतिः पृथुर्वैण्यः प्रतापवान्।"
स्तुत्यामिति स्तुतिरभिभूतिः अभिभूयते कथ्यते सोमोऽस्यामिति स्तुतिः सोमाभिषवभूमिस्तस्याम्। सौत्येऽहनि तस्मिन्नेव दिने। इति विष्णुपुराणे १ अंशे ४१ अध्यायस्य टीका च॥
(यथा, महाभारते। १३। ४८। १२।
"वन्दी तु जायते वैश्यान्मागधो वाक्य-
जीवनः।")
वर्णसङ्करजातिविशेषः। (यथा, मानवे। १०। ११।
"क्षत्रियादिप्रकन्यायां सुतो भवति जातितः।
वैश्यान्मागधवैदेहौ राजविप्राङ्गनासुतौ॥")
स तु क्षत्रियायां वैश्याज्जातः। भाट् इति ख्यातः। मगधेषु भवो मागधः। ष्णः। इत्यमरभरतौ। २। १०। २। जरासन्धराजः। तथा,—
"मागधो नच हन्तव्यो भूयः कर्त्ता बलोद्यमम्।"
इति श्रीभागवते १० स्कन्धः॥
शुक्लजीरकः। मगधदेशोद्भवे त्रि। इति मेदिनी। मे, ३४॥ (यथा, महाभारते। ६। ६। ३६।
"अन्ध्राश्च बहवो राजन्नन्तर्गिर्य्यास्तथैव च।
बहिर्गिर्य्याङ्गमलदा मागधा मालवाच्चटाः॥")
मागधादेवी, स्त्री, राधिका। यथा,—
"तासान्तु मागधादेवी तप्तचामीकरप्रभा।
वृन्दावनेश्वरी राधा नाम्ना धात्वर्थकारणात्॥"
इति पाद्मे पातालखण्डे ६ अध्यायश्लोकार्द्धद्वयम्॥
मागधी, स्त्री, (मागधे जाता। मगध+अण्, ङीष्।) यूथिका। पिप्पली। इत्यमरमेदिनीकरौ। धे,। ३४। २। ४। ६६। (यथास्याः पर्य्यायः।
"पिप्पली च पलाशौण्डी वैदेही मागधी-
कणा।
क्षणोषकुल्या मगधी कोलास्याक्षिक्त तण्डुला॥"
इति वैद्यकरत्नमालायाम्॥)
चुटिः। गुजराटी एलाचि इति भाषा। इति शब्दचन्द्रिका॥ शर्करा। इति जटाधरः॥ भाषाविशेषः। इति हेमचन्द्रः॥ यथा च साहित्यदर्पणे। ६। १६०।
"अचोक्ता मागधी भाषा राजान्तःपुरचारिणाम्॥"
(तद्देशभवे, त्रि। यथा, महाभारते। १। ६५। ४१।
"अनश्वा खलु मागधीसुपयेमे अन्तर्वा नाम तस्यामस्य जज्ञे परीक्षित्॥")
माघः, पुं, श्रीदत्तकसूनुशिशुपालवधमहाकाव्यकर्त्ता। इति तद्ग्रन्थशेषपुष्पिका॥ स्वनामख्यातमहाकाव्यम्। यथा,—
"पुष्पेषु जाती नगरेषु काञ्ची
नारीषु रम्भा पुरुषेषु विष्णुः।
नदीषु गङ्गा नृपतौ च रामः
काव्येषु माघः कविकालिदासः॥"
इति प्राचीनाः॥
वैशाखादिद्वादशमासान्तर्गतदशममासः। मघायुक्ता पौर्णमासी यत्र मासे सः॥ तत्पर्य्यायः। तपाः २। इत्यमरः। ४। १। ४। १५॥ स च त्रिविधः। मकरस्थरव्यारब्धशुक्लप्रतिपदादिदर्शान्तो मुख्यचान्द्रः १। कृष्णप्रति-

पदादिपौर्णमास्यन्तो गौणचान्द्रः २ । मकरस्थरविकः सौरः ३ । इति मलमासतत्त्वीयलिखनमवरसात् ॥ तत्र स्नानफलम् ।

"विद्याविनीतः स्वकुलप्रधानः
सदा सदाचारयुतः प्रवीणः ।
योगानुरक्तो विषयेष्वसक्तो
माघेऽथ मासे मघवानिवेशः ॥"

इति कोष्ठोप्रदीपः ॥ * ॥

अथ, माघकृत्यम् । पाद्मे ।

"स्वर्गलोके चिरं वासो येषां मनसि वर्त्तते ।
यत्र कापि जले तैस्तु स्नातव्यं रुगभास्करे ॥"

रुगो रुगास्यत्वेन मकरः । तस्थे भास्करे । तत्र सङ्कल्पः । अरुणोदयकाले जले मज्जनं कृत्वा आचम्य उत्तराभिमुखः ॐ तत् सदित्युच्चार्य्य कृष्णकुसुमतिलजलान्यादाय ओमद्य माघे मासि असुकपक्षे असुकतिथावारभ्य मकरस्थरविं यावत् प्रत्यहमसुकगोत्रोऽसुकदेवशर्म्मा स्वर्गलोके चिरकालवासकामो विष्णुप्रीतिकामो वा प्रातःस्नानमहं करिष्ये इति संकल्प्य गङ्गायतिरिक्तजलमात्रेऽपि स्नानं कर्त्तव्यम् । प्रतिदिनसङ्कल्पे तु आरभ्य मकरस्थरविं यावत् प्रत्यहमिति न वक्तव्यं किन्तु मासनन्तरं मकरस्थे रवावित्यधिकं वक्तव्यम् । चान्द्रस्नानवाक्यन्तु वैशाखकल्पेऽनुसन्धेयम् । तत्र सङ्कल्पं कृत्वा यथोक्तविधिना स्नानेति कर्त्तव्यतां विधाय,—

"ॐ दुःखदारिद्र्यनाशाय श्रीविष्णोस्तोषणाय च ।
प्रातःस्नानं करोम्यद्य माघे पापप्रणाशनम् ॥
मकरस्थे रवौ माघे गोविन्दाच्युत माधव ।
स्नानेनानेन मे देव ! यथोक्तफलदो भव ॥"

इत्युच्चार्य्य स्नायात् । ततो वासुदेवं हरिं कृष्णं श्रीधरञ्च स्मरेत्ततः ॥

"ॐ दिवाकर जगन्नाथ प्रभाकर नमोऽस्तु ते ।
परिपूर्णं कुरुष्वेदं माघस्नानं महाव्रतम् ॥"

चान्द्रस्नाने मकराकाशस्थकाले मकरस्थे रवावित्यस्य न पाठः । असमवेतार्थत्वात् । तीर्थे तु ।

"माघमासमिमं पुण्यं स्नास्यहं देव माधव ।
तीर्थेस्मिन् जले नित्यं प्रसीद भगवन् हरे ॥"

इति पठित्वा दुःखदारिद्र्यनाशायेत्यादिकं पठितव्यम् । गङ्गायान्तु पद्मपुराणे ।

"दिने दिने सहस्रन्तु सुवर्णानां विशाम्यते ! ।
तेन दत्तं हि गङ्गायां यो माघे स्नाति माधव ॥"

मानव इति क्वचित् पाठः । एकदा सङ्कल्पे तु प्रतिदिनसहस्रसुवर्णदानजन्यफलसमफलप्राप्तिकामः श्रीविष्णुप्रीतिकामो वा माघमासं यावत् प्रत्यहं गङ्गायां प्रातःस्नानमहं करिष्ये । इति वाक्ये विशेषः । प्रतिदिनसंकल्पे तु सहस्रसुवर्णदानजन्यफलसमफलप्राप्तिकामो . विष्णुप्रीतिकामो वा गङ्गायां प्रातःस्नानमहं करिष्ये इति यथोक्तविधिना स्नानेतिकर्त्तव्यतां विधाय ।

"ॐ माघमासमिमं पुण्यं स्नास्यहं देव माधव ।
तीर्थेस्मिन् जले नित्यं प्रसीद भगवन् हरे ॥
दुःखदारिद्र्यनाशाय श्रीविष्णोस्तोषणाय च ।
प्रातःस्नानं करोम्यद्य माघे पापप्रणाशनम् ॥
मकरस्थे रवौ माघे गोविन्दाच्युत माधव ।
स्नानेनानेन मे देव यथोक्तफलदो भव ॥"

इति पठित्वा स्नायात् । ततः

वासुदेवं हरिं कृष्णं श्रीधरञ्च स्मरेत्ततः ॥
"दिवाकर जगन्नाथ प्रभाकर नमोऽस्तु ते ।
परिपूर्णं कुरुष्वेदं माघस्नानं महाव्रतम् ॥"

इति पठेत् ॥ * ॥

स्कन्दपुराणम् ।

"सम्प्राप्ते मकरादित्ये पुण्ये पुण्यप्रदे शुभे ।
कर्त्तव्यो नियमः कश्चिद्व्रतरूपी नरोत्तमैः ॥"

तत्तत्पुण्यकामः श्रीविष्णुप्रीतिकामो वा इति वाक्ये विशेषः ॥ * ॥ पौष्याः पौर्णमास्या ऊर्द्धं माघपौर्णमासीपर्य्यन्तं मदिरातुल्यत्वान्मूलकं न भोक्तव्यम् ॥ * ॥ पौष्या ऊर्द्धं माघकृष्णाष्टम्यां छागमांसेन श्राद्धं कर्त्तव्यम् । मांसाभावे पायसोपकरणेन । तदभावे केवलान्नेन वा श्राद्धं कर्त्तव्यम् ॥ * ॥ अथ रटन्तीचतुर्दशी ।

"माघे मास्यसिते पक्षे रटन्त्याख्यचतुर्दशी ।
तस्यामुदयवेलायां स्नाता नावेक्षते यमम् ॥"

उदयवेलायां अरुणोदयवेलायाम् ।

"अनर्कोभ्युदिते काले माघे कृष्णचतुर्दशी ।
सतारयोगकाले तु तस्यां स्नानं महाफलम् ॥
स्नात्वा सन्तर्प्य तु यमान् सर्व्वपापैः प्रमुच्यते ।"

अत्र तिथिकृत्यत्वान्नौणचान्द्रादरः । तत्रोभयदिने अरुणोदयसतारकाले मुहूर्त्तान्यूनचतुर्दशीलाभे पूर्व्वदिने स्नानं यमतर्पणञ्च । एकदिनमात्रे तल्लाभे तद्दिने । माघस्नानकालाभ्यन्तरे तादृग्चतुर्दशीलाभे माघप्रातःस्नायिना तत्रैव इदं कार्य्यम् । तत्र ॐ तत् सदद्य माघे मासि कृष्णे पक्षे रटन्त्यां चतुर्दश्यां तिथौ अरुणोदयवेलायां असुकगोत्रः श्रीअसुकदेवशर्म्मा यमादर्शनकामो गङ्गायां स्नानमहं करिष्ये इति सङ्कल्प्य यथाविधि स्नानं प्रागुक्तं चतुर्दशयमतर्पणञ्च कुर्य्यात् ॥

अथ श्रीपञ्चमी ।

'तत्रोभयदिने पूर्व्वाह्णे पञ्चमीलाभे पूर्व्वदिने लक्ष्मीसरस्वत्योः पूजनं युग्मात् । एकदिनप्राप्ते तद्दिने । एवं षड्वर्षं शुक्लपञ्चमीव्रतेऽपि । ततश्च ॐ तत् सदित्युच्चार्य्य ॐमद्येत्यादि लक्ष्मीप्रीतिकामो लक्ष्मीपूजनमहं करिष्ये इति सङ्कल्प्य शालग्रामे जले वा पूजयेत् । ॐ पाशुचमालिकाम्भोजभृङ्गिभिर्याम्यसौम्ययोः ।
पद्मासनस्थां ध्यायेच्च श्रियं त्रैलोक्यमातरम् ॥
गौरवर्णां सुरूपाञ्च सर्व्वालङ्कारभूषिताम् ॥
रौक्मपद्मद्वयकरां वरदां दक्षिणेन तु ॥

इत्यनेन ध्यात्वा एतत् पाद्यं ॐ लक्ष्म्यै नमः । इत्यादिना नैवेद्यान्तेन पूजयेत् ।

ॐ नमस्ते सर्व्वदेवानां वरदासि हरिप्रिये ! ।
या गतिस्त्वत्प्रपन्नानां सा मे भूयात्त्वदर्च्चनात् ॥

इत्यनेन पुष्पाञ्जलित्रयेण प्रणमेत् ॥ * ॥ ॐ तत् सदित्युच्चार्य्य ओमद्येत्यादि सरस्वतीप्रीतिकामः सरस्वतीपूजनमहं करिष्ये इति सङ्कल्प्य शालग्रामे घटादिस्थजले वा पूजयेत् ।

"ॐ तरुणशकलमिन्दोर्बिभ्रती शुभ्रकान्तिः
कुचभरनमिताङ्गी सन्निषण्णा सिताब्जे ।
निजकरकमलोद्यल्लेखनीपुस्तकश्रीः
सकलविभवसिद्ध्यै सा तु वाग्देवता नः ॥"

इति ध्यात्वावाह्य एतत् पाद्यं ॐ सरस्वत्यै नमः । इत्यादिना नैवेद्यान्तेन पूजयेत् । ततः

"ॐ भद्रकाल्यै नमो नित्यं सरस्वत्यै नमो नमः ।
वेदवेदाङ्गवेदान्तविद्यास्थानेभ्य एव च स्वाहा ॥"

इति ब्रह्मपुराणीयेन पुष्पाञ्जलिना त्रिः पूजयेत् । मत्स्यसूक्ते । सरस्वतीं संपूज्य ।

"ॐ यथा न देवो भगवान् ब्रह्मा लोकपितामहः ।
त्वां परित्यज्य सन्तिष्ठेत्तथा भव वरप्रदा ॥
वेदाः शास्त्राणि सर्व्वाणि नृत्यगीतादिकञ्च यत् ।
न विहीनं त्वया देवि ! तथा मे सन्तु सिद्धयः ॥
लक्ष्मीर्मेधा धरा पुष्टिर्गौरी तुष्टिः प्रभा धृतिः ।
एताभिः पाहि तनुभिरष्टाभिर्मां सरस्वति ! ॥"

इति मत्स्यपुराणीयैः प्रार्थ्य प्रणमेत् ॥ * ॥

"वसुनीवच्च द्रोणच्च सरस्वत्यै न दापयेत् ।
आचारात् पुस्तकञ्च पूजयेत् । ॐ मस्याधाराय नमः । इति मस्याधारं पूजयेत् । ॐ लेखन्यै नमः । इति लेखनीं पूजयेत् ॥ * ॥

अथ माघसप्तमी ।

तत्रोभयदिने अरुणोदयकाले सप्तमीलाभे पूर्व्वदिने एकदिने तल्लाभे तद्दिने । अरुणोदयकाले सामान्यजले ॐ अद्येत्यादि सूर्य्यग्रहणकालीनगङ्गास्नानजन्यफलसमफलप्राप्तिकाम आयुरारोग्यसम्यत्कामो वारुणोदयवेलायां स्नानमहं करिष्ये । इति सङ्कल्प्य यथाविधि स्नानेति कर्त्तव्यतां विधाय सप्तवदरपत्राणि सप्तार्कपत्राणि च शिरसि निधाय ।

"ॐ यदद्यजन्मकृतं पापं मया सप्तसु जन्मसु ।
तन्मे रोकञ्च शोकञ्च माकरी हन्तु सप्तमी ॥"

इत्युच्चार्य्य स्नायात् । ततो यथाकालं सप्तवदरीफलार्कपत्रप्रक्षालितिलदूर्व्वाक्षतचन्दनयुक्तजलमादाय ओमद्येत्यादि आयुरारोग्यसम्पत्कामः श्रीसूर्य्यायार्घ्यमहं ददे । इति सङ्कल्प्य

'ॐ नमो विवस्वते ब्रह्मन् भास्वते विष्णु तेजसे
जगत्सवित्रे शुचये सवित्रे कर्म्मदायिने ॥'

इत्यनन्तरम् ।

"ॐ जननी सर्व्वभूतानां सप्तमी सप्तसप्तिके ।
सप्तम्यारुढिके देवि ! नमस्ते रविमण्डले ॥"

इति पठित्वा इदमर्घ्यं श्रीसूर्य्याय नम इत्यर्घ्यं दत्त्वा ।

"ॐ सप्तसप्तिवह प्रीत सप्तलोकप्रदीपन ।
सप्तम्यां हि नमस्तुभ्यं नमोऽनन्ताय वेधसे ॥"

इत्यनेन प्रणमेत् । शूद्रेणापि स्नाने तूष्णीं विधानात् स्नानमन्त्रं विना अर्घ्यप्रणाममन्त्राः पाठ्याः पौराणिकत्वात् । गङ्गायान्तु बहुश्रुतसूर्य्यग्रहणकालीनगङ्गास्नानजन्यफलसमफलप्राप्तिकामो

गङ्गायां स्नानमहं करिष्ये इति वाचये विप्रेभ्यः। अर्घार्घदानमन्त्रः एतत् माघप्रातः-स्नानं तर्पणेन सिध्यति ॥ * ॥

अथ विधानसप्तमीव्रतम्।

प्रथमतो ब्राह्मणान् स्वस्तिवाच्य ॐ सूर्यः सोम इत्यादि पठित्वा ताम्रादिपात्रे कुशतिलजलान्-नादाय ॐ तत् सदित्युच्चार्य अद्येमद्य माघे मासि शुक्ले पक्षे सप्तम्यान्तिथावारभ्य प्रति-मासीयशुक्लसप्तम्यां पौषसप्तमीं यावत् आरो-ग्यसम्पत्कामोऽभीष्टतत्तत्फलकामो वा अर्का-दीनरभोजनविधिविधानेन सप्तमीव्रत-महं करिष्ये इति सङ्कल्प्य संयमपारणमहनं तत्तन्नामभि तत्तन्नियमं कुर्यात्। तत्र माघे अर्कार्यमात्रं भुञ्जीत। फाल्गुने अन्तरीक्ष-गृहीतं कपिलाविड्वयमात्रप्रमाणं तदभावे अन्यगोमयमपीति। चैत्रे मरीचमेकम्। वैशाखे किञ्चिज्जलम्। ज्येष्ठे अपक्वकदली-फलमध्यकणमात्रम्। आषाढे स्वच्छायद्विगुण-समये यवप्रमाणं कुशमूलम्। श्रावणे नक्तं काले अष्टविध्यौदनम्। भाद्रे सुद्दोपवासः। आश्विने पञ्चमार्द्धयामे मयूराण्डप्रमाणं हवि-र्यावान्नम्। कार्त्तिके अर्द्धाञ्जलिमात्रं कपिला-क्षीरं तदभावे क्षीरान्तरम्। मार्गशीर्षे प्राङ्-मुखो वायुभक्षणम्। पौषे स्वल्पं घृतम्। तदन-न्तरञ्च।

"ब्राह्मणान् भक्षयेत् भक्त्या गुडक्षीरनिरामिषैः। विप्राय दक्षिणां देया विभवस्यानुरूपतः॥ अष्टम्यां पारणं कुर्यात् कदन्नरहितेन च। सप्तमाष्टतिलादीनि घृतञ्चैव विवर्जयेत्॥ एकसिद्धं भक्षयुक्तमर्कैवन्तानुसारतः॥"

चान्द्रमासविधिरोलेयवत् अनन्तादिव्रतवत्-मलमासेतरे तत्तु कर्त्तव्यम् ॥ * ॥

अथारोग्यसप्तमी।

तत्र पूर्ववत् सप्तम्यान्तिथावारभ्य ऐहिकारोग्य धनधान्यपारलौकिकशुभस्थानप्राप्तिकामः संव-त्सरं यावत् आरोग्यसप्तमीव्रतमहं करिष्ये इति सङ्कल्प्य प्रतिमासशुक्लसप्तम्यां ग्रामग्रामे पद्मादित्यमन्त्रेण वा पूजयेत्। रक्तांशुकाभाम-मिति ध्यात्वा एतत् पाद्यं ॐ सूर्याय नमः इत्यादिभिः संपूज्य।

"आदित्य भास्कर रवे भानो सूर्य दिवाकर। प्रभाकर नमस्तेऽस्तु रोगादस्मान् प्रमोचय॥"

इति विसृजेत्। एवं संवत्सरे पूर्णे दक्षिणां दद्यात्। ब्राह्मणांश्च भोजयेत्। विप्रेभ्यमासानु-ष्ठानमाप्याप्तव्रतवत् मलमासेऽपि कर्त्तव्यम्।

अथ भीष्माष्टमी।

अर्घ्यं दत्त्वा ब्राह्मणः पितृतर्पणं कृत्वा

"ॐ वैयाघ्रपद्यगोत्राय सांकृतिप्रवराय च। अपुत्राय ददाम्येतत् सलिलं भीष्मवर्मणे॥"

इति पितृवत् भीष्मं तर्पयेत्। ततः कृताञ्जलिः।

"भीष्मः शान्तनवो वीरः सत्यवादी जितेन्द्रियः। आभिरद्भिरवाप्नोतु पुत्रपौत्रोचितां क्रियाम्॥"

इत्यनेन प्रार्घयेत्। क्षत्रियादिभिः पितृतर्पणात् पूर्वं एतत् कर्त्तव्यम् ॥ * ॥ भैष्यामेकादश्यां-सुपोष्य द्वादश्यां तिलोदकेनमावश्यकं कर्त्त-व्यम्। स्नानतर्पणमहादानभोजनादि यथा-लाभं कुर्यात् ॥ * ॥ माघपौर्णमास्यां युगाद्या-त्वेन पार्वणविधिना श्राद्धं कर्त्तव्यम्। अनन्त-फलकामनया स्नानदानञ्च कर्त्तव्यम्।

तस्यां दानप्रमाणन्तु तिथितत्त्वेऽनुसन्धेयम्॥

इति कृत्यतत्त्वम् ॥ * ॥ * ॥

अथ माघस्नानफलम्।

"व्रतदानैस्तपोभिश्च न तथा प्रीयते हरिः। माघमज्जनमात्रेण यथा प्रीणाति केशवः॥ न समं विद्यते किञ्चित् तेजः सौरेण तेजसा। तद्वत् स्नानेन माघस्य न समाः क्रतुजाः क्रियाः॥ प्रीतये वासुदेवस्य सर्वपापाद्विमुक्तये। माघस्नानं प्रकुर्वीत स्वर्गलाभाय मानवः॥ किं रक्षितेन देहेन सुपुष्टेन बलीयसा। अध्रुवेणाशु हेयेन माघस्नानं विना भवेत्॥ मकरस्थे रवौ यो हि न स्नात्यनुदिते रवौ। कथं पापैः प्रमुच्येत कथं स त्रिदिवं व्रजेत्॥ ब्रह्महा हेमहारी च सुरापो गुरुतल्पगः। माघस्नायी विपापः स्यात्तत्संसर्गी च पञ्चमः॥ उपपातकानि सर्वाणि पातकानि महान्ति च। भस्मीभवन्ति सर्वाणि माघस्नायिनि मानवे॥ पावका इव दीप्यन्ते माघस्नाता नरोत्तमाः। विमुक्ताः सर्वपापेभ्यो मेघेभ्य इव चन्द्रमाः॥ आर्द्रं शुष्कं लघु स्थूलं वाङ्मनःकर्म्मभिः कृतम्। माघस्नानं दहेत् सर्वं पावकः समिधो यथा॥ प्रामादिकञ्च यत् पापं ज्ञानाज्ञानकृतञ्च यत्। स्नानमात्रेण तत्सर्वं याति मकरगे दिवाकरे॥ निष्पापास्त्रिदिवं यान्ति पापिष्ठा यान्ति गुह्य-तां। सन्देहोऽत्र न कर्त्तव्यो माघस्नाने नराधिप!॥ सर्वेऽधिकारिणो ह्यत्र विष्णुभक्तौ यथा नृप!। सर्वेषां स्वर्गदो माघः सर्वेषां पापनाशनः॥ एतदेव परो मन्त्रो ह्येतदेव परं तपः। प्रायश्चित्तं परञ्चैव माघस्नानमनुत्तमम्॥ नृणां जन्मान्तराभ्यासात् माघस्नानमतिर्भवेत्। अध्यात्मज्ञानकौशल्यं जन्माभ्यासाद्यथा नृप!॥ संसारकर्दमालेपप्रक्षालनविशारदम्। पावनं पावनानाञ्च माघस्नानं परन्तप!॥ स्नाता माघे च ये राजन्! सर्वकामफलप्रदे। ते तांश्च भुञ्जते लोकांश्चन्द्रसूर्य्यग्रहोपमान्॥"

इति श्रीपद्मपुराणे उत्तरखण्डे ४ अध्यायः॥

माघवती, स्त्री, (मघवान् देवताऽस्याः यदा. मघवत इयमिति। मघवत्+अण्। "मघवा बहुलम्।" ६।४।१२८। इति विकल्पान्नञादेशः। ङि, यथा, माघे। ६। २५।

"वसुधान्तनिःसृतमिवाहिपतेः
पटलं फणामणिसहस्रभृताम्।
स्फुरदंशुजालमथ शीतरुचः
ककुभं समस्कृत माघवतीम्॥")

माघी, स्त्री, (मघया युक्तः कालः अस्यां इति। मघा+"नक्षत्रेण युक्तः कालः।" ४।२।३। इत्यण् ङीप्।) मघायुक्ता पौर्णमासी। यथा,

"पुष्ययुक्ता पौर्णमासी पौषी माघे तु यत्र सा। नाम्ना स पौषो माघाद्याश्चैवमेकादशापरे॥" इत्यमरः। १।४।१३॥ माघी पूर्णिमा यथा, अयोध्याकाण्डे भरतशपथे।

"आषाढी कार्त्तिकी माघी तिथयः पुण्य-सम्भवाः। अप्रदानवतो यान्ति यस्याश्चोऽनुमतो गतः॥"

विष्णुधर्म्मोत्तरे।

"पौर्णमासी तथा माघी श्रावणी च नरोत्तम!। प्रौष्ठपद्यामनीतायां तथा कृष्णा त्रयोदशी॥ एतांस्तु श्राद्धकालान् वै नित्यानाह प्रजापतिः॥"

सा च कलियुगाद्या। यथा,—

"अथ भाद्रपदे कृष्णे त्रयोदश्यान्तु द्वापरम्। माघे च पौर्णमास्यां वै घोरं कलियुगं स्मृतम्॥"

अस्यां कर्म्मणोऽनन्तफलं यथा, मात्स्ये।

"घृतमिक्षुरसे पुण्यं सहस्रन्तु दिनक्षये। विष्णवे घृतसाहस्रमा का मा वैष्णवन्तकम्॥"

आ का मा वैषु आषाढीकार्त्तिकीमाघीवैशा-खीषु। इति निष्पादितत्वम्॥ माघ्यां मघा-योगाभावे सिंहस्थगुरावकालप्रतिप्रसवो यथा, शातातपः।

"माघ्यां यदि मघा नास्ति सिंहे गुरुरकारणम्॥"

राजमार्त्तण्डे दक्षः।

"गुरौ हरिस्थे न विवाहमाहु-र्हारीतगर्गप्रमुखा मुनीन्द्राः। यदा न माघी मघसंयुता स्यात्-तदा च कन्योद्वहनं वदन्ति॥"

इत्यत्र माघ्यां मघायोगाभावेऽपि श्रुतिवैधादि-मघाख्येऽपि गुरौ भवति विवाहस्तु गुरोर्मेघा-परित्यागादेव। इति मलमासतत्त्वम्॥

माघोनी, स्त्री, (मघवान् देवताऽस्याः। मघोन इयमिति वा। इति मघवत्+अण् ङीप्।) पूर्व्वा दिक्। इति राजनिर्घण्टः॥ (इन्द्रसम्बन्धिनि, त्रि। यथा, ऋग्वेदे। १०। ६६। २।

"मरुद्गणे वृजने मम्म धीमहि
माघोने यज्ञं जनयन्त सूरयः॥"

"माघोने मघवत इन्द्रस्य सम्बन्धिनि मरुद्गणे।" इति तद्भाष्ये सायणः॥)

माघं, क्ली, (माघे जातमिति। माघ+"तत्र जातः। ४। ३। २५। इति यत्।) कुन्दपुष्पम्। इत्यमरः। २। ४। ७३॥

माङ्गल्यं, त्रि, (मङ्गलाय हितमिति। मङ्गल+ष्यञ्।) मङ्गलाय हितम्। यथा, राजमार्त्तण्डे।

"माङ्गल्येषु विवाहेषु कन्यासंवरणेषु च।
दश मासाः प्रशस्यन्ते चैत्रपौषविवर्ज्जिताः॥"
इत्युद्वाहतत्त्वम्॥

अपि च। भीमपराक्रमे।

"अधिमासे दिनपाते धनुषि रवौ भानुलङ्घिते मासि।
चक्रिणि सुप्ते कुर्य्यान्न माङ्गल्यं विवाहञ्च॥"
इति मलमासतत्त्वम्॥

(मङ्गलस्य भावः। "मङ्गेरलच्।" उणा० ५। ७०। इत्यस्य वृत्तौ "भावे ष्यञि माङ्गल्यम्।" इत्युज्ज्वलदत्तः।)

माङ्गल्यार्घा, स्त्री, (माङ्गल्यस्य अर्घा।) त्रायमाणा लता। इति राजनिर्घण्टः॥

माचः, पुं, (मा अञ्चतीति। अन्च+कः।) पन्थाः। इति शब्दरत्नावली॥

माचलः, पुं, (मा चलति भोगमदत्वाच्चिरेणैव स्थानं न सृजतीति। चल+अच्।) ग्रहः। रोगः। (मा चलति स्वच्छन्दं न प्रसरतीति। चल+अच्।) वन्दी। चौरः। इति शब्दरत्नावली॥ मेदिन्यां ग्रहस्थाने माच इति पाठः॥

माचिका, स्त्री, (मा अञ्चति चतादिकं त्यक्त्वा न गच्छतीति। अन्च्+कः। ततः कन्। टाप्। अत इत्वम्।) मक्षिका। इति त्रिकाण्डशेषः॥ अम्बष्ठा। इति राजनिर्घण्टः॥

माचिरं, अ (मा चिरम्।) शीघ्रम्। यथा,—

"अथाब्रवीत्तदा मत्स्यस्तार्क्ष्यो ग्रसन् शनैः।
अस्मिन् हिमवतः शृङ्गे नावं बध्नीत मा चिरम्॥"
इति वनपर्व्वणि मात्स्योपाख्यानम्॥

माचापत्रं, क्ली, तुरपर्य्यम्। इति राजनिर्घण्टः॥

माचलः, पुं, (मा चलमित्यभिप्रायोऽस्य। वर्षणकारिभ्योऽस्य पचयोर्भारनड्वात् तथात्वम्।) वासपत्री। यथा, शब्दचन्द्रिकायाम्।

"माचलश्वासकः कुलो विहारो विन्दुरेखकः।"

माञ्जिष्ठं, क्ली, (मञ्जिष्ठया रक्तम्। "तेन रक्तं रागात्।" ४। २। ४। इत्यण्।) लोहितवर्णः। (यथा, हुतसंहितायाम्। ३०। १२।

"कल्माषबभ्रुकपिलाविचित्रमाञ्जिष्ठहरितशुक्लाभाः।"

तद्वति, त्रि। इति हेमचन्द्रः॥

माटाम्लकः, पुं, (माटाख्य आम्लः। ततः कन्।) वृक्षभेदः। यथा,—

"पल्वलौ कर्कटीवारः सेटुमाटाम्लकौ समौ।"
इति भूरिप्रयोगः॥

माठरः, पुं, सर्व्वपार्श्वपारवर्त्तिविशेषः। यथा,—

"माठरः पिङ्गलो दण्डस्त्रयोः पार्श्वे व्यवस्थिताः।
पार्श्विकाः।"
इत्यमरः। १। ३। ३१॥

मठति निवसति सूर्य्यसमीपे माठरः मठ वासमर्द्दयोः नाञ्चीति अरण् मठरस्यापत्यं माठर इति स्वामी॥ पिङ्गलवर्णत्वात् पिङ्गलः। दण्डकारित्वाद्दण्डः। इति स्वामी॥ परितः पार्श्वे वर्त्तन्ते पारिपार्श्विकाः ठञि कादित्वात् णिकः। सूर्य्यः कारुणिकत्वादेषां वरं दास्यतीति धिया इन्द्रादयोऽष्टादशनामान्तरेण प्रच्छन्ना अस्य पार्श्वेषु स्थिताः। अत्र प्राधान्यात्त्रयोऽभिहिताः। अत्र माठरनामा यमः। पिङ्गलनामा वह्निः। दण्डनामा शक्रः। तथाचागमः।

"तत्र शक्रो वामपार्श्वे दण्डाख्यो दण्डनायकः।
वह्निस्तु दक्षिणे पार्श्वे पिङ्गलो नामतश्च सः॥
यमोऽपि दक्षिणे पार्श्वे ख्यातो माठरसंज्ञकः।"
एवमपरे हरगुह्यादयः कुल्माषपत्न्यादिसंज्ञकाः पूर्व्वद्वारादिषु स्थिताः। इति तट्टीकायां भरतः॥ व्यासः। इति मेदिनी। रे, २०३॥ विप्रः। इति हेमचन्द्रः। ३। ५१०॥ शौल्किकः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

माड़ः, पुं, वृत्तविशेषः। माड़वेनौ इति कोकणे प्रसिद्धः। तत्पर्य्यायः। माड़ादुमः २ दीर्घः ३ ध्वजवृक्षः ४ वितानकः ५ मद्यद्रुमः ६। अस्य गुणाः। मोहकारित्वम्। श्रमहरत्वम्। श्लेष्मकारकत्वञ्च। इति राजनिर्घण्टः॥

माड़वः, पुं, वर्णसङ्करजातिविशेषः। यथा,—

"वैटस्त्रीवरकन्यायां जनयामास यत्नतः।
मालं मल्लं माड़वञ्च भड़ं कोलञ्च कन्दरम्॥"
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे १० अध्यायः॥

पुस्तकान्तरे माड़वस्थाने मातर इति पाठः। कन्दरस्थाने कलन्दर इति पाठः॥

माड्डुकः, पुं, (मड्डुकवादनं शिल्पमस्येति। "मड्डुकझर्झराद्यन्यतरस्याम्।" ४। ४। ५६। इति अण्।) माड्डुकिकः। मड्डुकवादकः। इति सिद्धान्तकौमुदी॥

माढ़ि, स्त्री, (माहतीति। माह+"अन्येभ्योऽपि दृश्यन्ते।" उणा० ४। १०५। इति क्तिन्।) देशभेदः। पत्रशिरा। इति रत्नकोषः॥ दन्तभेदः। इति केचित्। इत्यमरटीकायां भरतः॥ पत्रभङ्गः। दैन्यप्रकाशनम्। इति मेदिनी। ढि, २। शब्दरत्नावली च॥ माढ़िर्दैन्यं पत्रशिरायाञ्च मड़न्तिरते मड़े। इति हेमचन्द्रः। ४। १६०॥

माढ़ी, स्त्री, (माढ़+ङीदिकारादिति ङीष।) दन्तशिरा। इति शब्दरत्नावली॥

माणकं, क्ली, (मीयते पूर्य्यते परिमीयते वेति। मान मा वा+घञ्। स्वार्थे कन्। निपातनात्त्वम्।) कन्दविशेषः। माणकचु इति भाषा। अस्य गुणाः। स्वादुत्वम्। शीतत्वम्। गुरुत्वम्। शोथहरत्वम्। कटुत्वञ्च। इति राजवल्लभः॥ यथा, सुश्रुते सूत्रस्थाने ४६ अध्याये।

"माणकं स्वादु शीतञ्च गुरु चापि प्रकीर्त्तितम्॥")

माणकः, पुं, (मान्+घञ्।-ततः कन् निपातनात्त्वञ्च।) खगामज्ञातदृष्टः। माणकचुगाछ इति भाषा। तत्पर्य्यायः। स्थलपद्मः २ इति रत्नमाला॥ माणः ३ दृष्टच्छदः ४ छत्रपत्रः ५। इति केचित्॥ (यथा, सुश्रुते सूत्रस्थाने४७अ०। "स्थलशूरणमाणकप्रभृतयः॥")

माणवः, पुं, (मनोरपत्यं पुमान्। मनु+अण्यत्यविवक्षायां अण्।

"अपत्ये कुत्सिते मद्रे मनोरौत्सर्गिकः स्मृतः।
नकारस्य च मद्रेऽन्यस्तेन सिद्ध्यति माणवः॥"
४। १। १६१। इत्यत्र काशिका सूत्रवृत्तिः।) मनुष्यः। बालकः। इति शब्दरत्नावली॥ षोड़शयष्टिकहारः। इति हेमचन्द्रः। ३। ३२४। ४॥

माणवकः, पुं, (अल्पो मानवः। "अल्पे।" ५। ३। ८५। इति कन्।) बालकः। स च षोड़शवर्षपर्य्यन्तप्रथमवयस्कः॥ (यथा, श्रीभागवते। ८। १६। ३२।

"एष ते स्थानमैश्वर्य्यं श्रियं तेजोयशः श्रुतम्।
दास्यत्याच्छिद्य शक्राय मायामाणवको हरिः॥"

माणवको बालः स इव।) हारभेदः। स तु विंशतियष्टिकः। विंशनरहार इति भाषा। इत्यमरभरतौ। २। ६। १०६॥ (हुतसंहितामते तु षोड़शयष्टिको हारः। यथा, तत्रैव। ८१। ३३।

"द्वात्रिंशता गुच्छो विंशत्या कीर्त्तितोऽर्द्ध-
गुच्छाख्यः।
षोड़शभिर्माणवको द्वादशभिश्चार्द्धमाणवकः॥")

कुपुरुषः। इति मेदिनी। के, २०६॥ वटुः। इति हेमचन्द्रः॥

माणवीनं, त्रि, माणवसम्बन्धि। माणवस्येदमित्यर्थे खीनप्रत्ययेन निष्पन्नम्॥ (माणवाय हितं। "माणवचरकाभ्यां खञ्।" ५। १। ११। इति माणव+खञ्।)

माणवं, क्ली, शिशुसमूहः। इत्यमरः। ३। २। ४१॥ माणवानां समूहो माणवं विकारसंघेति षष्ठ्याः। माणवो बालः मूर्द्धन्यमध्यः दन्त्यमध्य इत्येके। इति तट्टीकायां भरतः॥ (माणवानां समूहः। "ब्राह्मणमाणववाड्वाद् यञ्।" ४। २। ४२। इति यञ्।)

माणिका, स्त्री, (माणक+टाप् अकारस्येत्वम्।) अष्टपलपरिमाणम्। इति शब्दमाला॥

माणिक्यं, क्ली, (मणिप्रकारः। मणि"+स्फलादिभ्यः प्रकारवचने कन्।" ५। ४। ३। इति प्राप्तायां कन्। ततो मणिकमेवेति। मणिक+"जातुर्वर्णादीनामुपसंख्यानम्।" ५। १। १२४। इति वार्त्तिकबलात् ष्यञ्।) रत्नविशेषः। माणिक् इति भाषा। तत्पर्य्यायः। शोणरत्नम् २ रवरात् ३ रविरत्नकम् ४ शुक्रारी ५ रक्तमाणिक्यम् ६ तरुणम् ७ रवनामकम् ८ रागयुक् ९ पद्मरागः १० रत्नम् ११ शोणोपलः १२ सौगन्धिकम् १३ लोहितकम् १४ कुरुविन्दम् १५। अस्य गुणाः। मधुरत्वम्

स्निग्धत्वम्। घनविस्तारित्वम्। रक्तप्रभायोगे प्रधानत्वम्। वर्णं दर्शयतीति च। तस्य लक्षणं यथा,—

"स्निग्धं गुरुताम्रयुतं दीप्तं सच्छं समान्वितं च गुरुत्वैः।"

इति पालमाणिक्यं कल्याणं प्रारभते। तस्य दोषा यथा,—

"द्विच्छायमभिहितं कर्कशं प्राकरिलं भिन्नं धूम्रं च।
विरलं रागविहीनं लघुमाणिक्यं न धारयेद्धीमान्।"

तस्य चतुर्विधा जातिर्यथा।

"लक्षं यदि पद्मरागमथ तत्पीतानिरक्तं द्विधा।
जातीयान् कुरुविन्दकं यदरुणं स्याद्वैणवं सौगन्धिकम्।
लक्षोनं यदि नीलगन्धिकमिति क्षेयं चतुर्धा बुधैः
माणिक्यं कथयन्ति रागेण जातं गुणैः॥

इति राजनिर्घण्टः। ६॥

मतान्तरे तस्य दोषा यथा,—

"माणिक्यस्य समाख्याता अष्टौ दोषा गुणेश्वरैः।
द्विच्छायत्व द्विरूपत्व सम्भेदः कर्करस्तथा॥
सप्तोभगं कोकिलत्व जलं धूम्राभिधत्व वै।
गुणाश्चत्वार आख्याताश्छाया: षोडश कीर्त्तिताः॥"

छायास्तु पूर्व्वोक्ता एव तासु पद्मरागग्रन्थे दृश्याः।

"छायादित्रयसम्पन्नाद्विच्छायं वस्तुनाशनम्।
द्विरूपं द्विपदं तेन माणिक्येन पराभवः॥
सम्भेदो भिन्नमित्युक्तं मूल्यघातविधायकम्।
कर्करं कर्करायुक्तं पशुघ्नमविनाशकृत्॥
तृणेन रेखामात्रेण मणिमर्घोपदर्शयेत्।
सप्तोभगं समुद्दिष्टं माणिक्यं वस्तुदुःखदम्॥
मणिविच्छायसम्पन्नं कोकिलं परिकीर्त्तितम्।
मालुकेत्यौषधी यत्र मणौ तत्र धारयेत्॥
तत्तद्दोषं जलं प्रोक्तं धनधान्यापवादकृत्।
तच्छं समसमाकारं वेद्धुं भयमावहेत्॥"

तथा।

"लोभाद्विनयभ्रष्टो ये मनुष्याः प्रतिग्रहकाः।
उभयत्र पदं तेषां तेन न स्यात् पराभवः॥
विक्रेतरि गृहे स्वल्पः स्यात् कर्करदर्शनाद्भयकृत्।
तृणेन रेखामात्रेण दृष्टे यत्तु भवेत्॥
दुःखदम्तु न मरणात्मको न दृष्टे दर्शनीयकः।
माणिक्यस्य तु लोभा कोकिलाभा प्रकीर्त्तिता।
तत्र यत्पुंसः स्वर्णं ते धातोः कदाचन॥"

अथ गुणाः।

"गुरुं स्निग्धं तथा चैव विमलं प्रतिरक्तकम्।"

तथा च।

"प्रतिबिम्बं मुखस्य स्निग्धस्य न तथाच्छता।
अर्थेदृष्टा मनुष्या न मणौ गुणगणैर्युतः।"

अन्यत्र।

"न कर्करान्विताभोगविरसा;
प्रभाविमुक्ताः परुषा विवर्णाः।
न ते प्रशस्ता मणयो भवन्ति
समासतो जातिगुणैः समस्तैः॥
दोषोपदृष्टं मणिमप्रबोधाद्
बिभर्त्ति यः कञ्चन कञ्चिदेकम्।
तं बन्धुदुःखामयवस्तुवित्त-
नाशादयो दोषगणा भजन्ते॥
सपत्नमध्येऽपि कृताधिवासं
प्रमादसक्तावपि वर्त्तमानम्।
न पद्मरागस्य महागुणस्य
भर्त्तारमापत् वसुधेति काचित्॥
दोषोपसर्गप्रभवाश्च ये ते
नोपद्रवास्तं समभिद्रवन्ति।
गुणैः सखेः सकलैरुपेतं
यः पद्मरागं प्रयतो बिभर्त्ति॥
बालार्ककरसंस्पर्शात् यः शिखां लोहितो वमेत्।
रक्षयेदाश्रमं वापि स महागुण उच्यते॥
दुग्धे घृतगुणे स्निग्धो रक्षयेद्यः समन्ततः।
वमेच्छिखां लोहितां वा पद्मरागः स उत्तमः॥
अन्धकारे महाघोरे यो न्यस्तः सन् महामणिः।
प्रकाशयति सर्व्वाभः स श्रेष्ठः पद्मरागकः॥
पद्मकोषे तु यो न्यस्तो विकाशयति तत्क्षणात्।
पद्मरागवरो क्षेय देवानामपि दुर्लभः॥
सर्व्वरिष्टप्रशमनः सर्व्वसम्पत्तिदायकः।
चत्वारस्तु मयोद्दिष्टा गुणिनश्च यथोत्तरम्॥
यो मक्षिकेक्षते दूराच्चुलदग्निसमच्छविः।
वेधकान्तिः स विज्ञेयः सर्व्वसम्पत्तिदायकः॥
पद्मरागमणेर्जातिस्तु त्रिविधा।
सम्भवोऽपि सकलः खलु वक्ष्ये।
वर्णयेदमति वा करजालं
उत्तरोत्तरमहागुणिनस्ते॥
नीलारसं दुग्धरसं जलं वा
ये रक्षयन्ति द्विगुणप्रमाणम्।
ते ते यथापूर्व्वमतिप्रशस्ताः
सौभाग्यसम्पत्तिविधानदायकाः॥
गुञ्जाफलप्रमाणस्तु दशमप्रविगुञ्जकान्।
पद्मरागमुन्नयति यथापूर्व्वं महागुणः॥
क्षौद्रकोलफलाकारो द्वादशाष्टाधिगुञ्जकान्।
पद्मरागमुन्नयति यथापूर्व्वं महागुणः॥
यदरीफलतुल्यो यः षट्त्रिंशद्गुञ्जकः।
तथा धात्रीफलत्रिंशद्गुञ्जनिष्पादमाषकः॥
तथाक्षफलतुल्यो यो द्विपञ्चाशैकमाषकः।
तामलकफलप्रमाणो यस्तु द्विशतिकगुञ्जकः।
बिल्वोपमसमाकारो वसुपञ्चदशगुञ्जकः॥
अतःपरं प्रमाणेन मानेन च न लभ्यते।
यदि लभ्येत पुण्येन तदा सिद्धिमवाप्नुयात्॥
केचिन्नरेन्द्राः सन्ति स्वात्मानं प्रतिरूपकाः।
विज्ञानयः प्रयत्नेन सिद्धान्तं सम्यगाचरेत्॥
जात्युत्तमाः सिंहलदेशोत्पन्नसत्तमाभोगाः।
कौलिकाश्च महता विज्ञानयः पद्मरागादाम्॥
तृणोपमप्रादुर्भावनामधेयात्
मणेः स्वभावादपि तुल्यरूपः।
कार्य्यान्तया सिंहलदेशजातं
मुक्ताभिधानं नभसः स्वभावात्।
श्रीपर्व्वकं दीप्तिनिराकृतित्वा-
द्विज्ञातिलिङ्गात्रयभेद एषः॥"

तथा च।

"स्नेहप्रदेशो रुदता लघुत्वं
विज्ञातिलिङ्गं खलु सार्व्वजन्यम्।
यः श्यामिकां पुष्यति पद्मरागो
यो वा तुषाराभमिव चूर्णमध्यः॥
स्नेहप्रदिग्धो न च यो विभाति
यो वा प्रशस्यः प्रजहाति दीप्तिम्।
आक्रान्तमूर्त्ता च तथाङ्गुलिभ्यां
यः कालिकां पार्श्वगतां बिभर्त्ति॥
संप्राप्य ताभ्योऽपि कथं स वृत्तं
बिभर्त्ति यः सर्व्वगुणानतीव।
तुल्यप्रमाणस्य च तुल्यजाते-
र्यो वा गुरुत्वेन भवेन्न तुल्यः।
प्राप्यापि नानाकरदेशजातं
ज्ञात्वा बुधो जातिगुणेन लक्षेत्॥
अथ यत्नयति सन्दिहे शिलायां परिघर्षयेत्।
दृष्ट्वा योऽत्यन्तशोभावान् परिमाणं न मुञ्चति॥
स क्षेयः शुद्धजातिस्तु क्षेयास्त्वन्ये विजानयः।
स्वजातकं संमुखेन विलिखेद्वा परस्परम्॥
वज्रं वा कुरुविन्दं वा विमुच्यान्योन्यकेन चेत्।
न व्रणं लेखनं कर्त्तुं पद्मरागेन्द्रनीलयोः॥
गुणोपपन्नेन सहावबन्धो
मणिस्वजात्यो विगुणेन जातः।
सुखं न कुर्य्यादपि कौस्तुभेन
विद्वान् विजातिं न भजेदुपस्थम्॥
चकाल एकोऽपि तथाभिजातान्
समेत्य दूरानपहन्ति यद्वात्।
तथा मणीन् भूरिगुणोपपन्नान्
प्रकीर्त्तिविद्रावयितुं विजातिः॥"*

अथ मूल्यम्।

"बालार्काभिमुखं कृत्वा दर्पणे धारयेन्मणिम्।
तत्र कान्तिविभागेन छायाभागं विनिर्दिशेत्॥
यस्य यत्प्रकृतसंख्ययोक्तं
मूल्यं समुन्मापितगौरवस्य।
तत् पद्मरागस्य गुणान्वितस्य
न्याय्यापकार्य्यानुचितस्य मूल्यम्॥
यत्कथितं पद्मरागस्य सगुणस्य प्रकीर्त्तितम्।
तावन्मूल्यं तथा गृह्णे कुरुविन्दे विधीयते॥
सगुणे कुरुविन्दे च यावन्मूल्यं प्रकीर्त्तितम्।
तावन्मूल्यं चतुर्थांशहीनं स्याद्वै सुगन्धिके॥
यावन्मूल्यं समाख्यातं वैदूर्य्यवर्ये च सूरिभिः।
तावन्मूल्यचतुर्थांशं हीयते सूक्ष्मजन्मनि॥
पद्मरागः परं यस्तु धत्ते बालार्कसप्रभः।
कार्षापणसहस्राणि त्रिंशन्मूल्यं समेत्य सः॥
इन्द्रगोपकसङ्काशः कर्णिकयुतो मणिः।
सार्द्धत्रिंशत्सहस्राणि तस्य मूल्यं विनिर्दिशेत्॥
रक्तोत्पलं नृपते यस्तु बालार्कसमसन्निभः।

कार्षापणसहस्राणि तस्य मूल्यं चतुर्दश ॥
बालादित्यद्युतिनिभः कर्षं यस्तु प्रतुल्यते ।
कार्षापणशतानान्तु मूल्यं सद्भिः प्रकीर्त्तितम् ।
यस्तु दाडिमपुष्पाभः कर्षार्द्धेन तु संमितः ।
कार्षापणशतानान्तु विज्ञेयस्तं तमादिशेत् ॥
चत्वारो माषका यस्तु रक्तोत्पलदलप्रभः ।
मूल्यं तस्य विधातव्यं ऋषिभिः शतपञ्चकम् ॥
हिमाषको यस्तु गुणैः सर्व्वैरेव समन्वितः ।
तस्य मूल्यं विधातव्यं दिशतं तत्त्वदर्शिभिः ॥
माषकैकमितो यस्तु पद्मरागो गुणान्वितः ।
प्रत्येकमस्मिन् यार्घ्यं मूल्यं रत्नविचक्षणैः ।
अतो न्यूनप्रमाणास्तु पद्मरागा गुणोत्तराः ।
स्वर्णद्विगुणमूल्येन मूल्यं तेषां प्रकल्पयेत् ॥
कार्षापणः समाख्यातः पुराणैरयमस्मिन् ।
अन्ये कुसुम्भपानीयमञ्जिष्ठोदकसन्निभाः ॥
काणाया इति विख्याताः स्फटिकप्रभवाश्च ते ।
तेषां दोषो गुणो वापि पद्मरागवदादिशेत् ॥
मूल्यमल्पन्तु विज्ञेयं धारणोत्पलकं तथा ।
ब्रह्मक्षत्रियवैश्यानान्यायतुर्था ये प्रकीर्त्तिताः ॥
चतुर्विधैर्नृपतिभिर्धार्य्याः सम्यक्त्रिवेदवित् ।
अतोऽन्यथा पुनः कुर्य्याद्रोगशोकभयञ्चयम् ॥"
इति युक्तिकल्पतरुः ॥
(यथा, कथासरित्सागरे । २६ । ४४ ।
"सोऽपि प्राप्तस्तदाचीक्षागणिवस्तम्भभास्वरम् ।
सौवर्णमिव सङ्केतकेतनं सम्ददर्शिव ॥"
फलभेदेन विशेषः । तद्यथा,-
"माणिक्यमत्स्यांस्तत्सम्भवाद्या
भेदाः कदल्या बहवोऽपि सन्ति ।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

माणिक्या, स्त्री, (माणिक्य + टाप् ।) व्येष्ठी । तत्पर्य्यायः । सुवर्णी २ गुडगोधिका ३ गुडगोलिका ४ भित्तिका ५ पर्णी ६ कुवलमत्स्यः ७ गुडोलिका ८ । इति हेमचन्द्रः । ४ । ३६४ ॥

माणिबन्धं, क्ली, (मणिबन्धे गिरौ भवम् । मणिबन्ध + अण् ।) सैन्धवलवणम् । इत्यमरटीकायां स्वामी ॥

माणिमन्थं, क्ली, (मणिमन्थगिरौ भवम् । मणिमन्थ + अण् ।) सैन्धवलवणम् । इत्यमरः । २।९।१४॥ (अस्य पर्य्यायः । [अम् ॥"
"सैन्धवोऽक्षी शीतशिवं माणिमन्थञ्च सिन्धु-
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

मातङ्गः, पुं, (मतङ्गस्यैदं । मतङ्गस्यापत्यं पुमान् वा । मतङ्ग + अण् ।) हस्ती । इत्यमरः । ३।३। २९ ॥ (यथा, रामायणे । १ । ९ । २३ ।
"विन्ध्यपर्व्वतजेर्मत्तैः पूर्व्वां दिशमपेतरैः ।
मदामोदैरभिक्षिप्तैर्मातङ्गैः पर्व्वतोपमैः ।")
चण्डालभेदः । किरातजातिविशेषः । इति मेदिनी । गे, ४० । (यथा, कथासरित्सागरे । ७३ । २ ।
"सुदूरमतिमात्रायां कामार्त्तेन मतङ्गजेन बलम् ।
मत्वा दूरविधेयेन मातङ्गजनिना पुनः ।")
सर्व्वदुष्टजातिविशेषः । इति हेमचन्द्रः । ३।४८३।

मातङ्गमकरः, पुं, (मातङ्गाकारो मकरः ।) मकरभेदः । इति राजनिर्घण्टः ॥

मातङ्गी, स्त्री, (मतङ्गस्य मुनेरपत्यं स्त्री । मातङ्ग + अण् ङीष् ।) दशमहाविद्यान्तर्गतनवमविद्या । अथ मातङ्गीमन्त्रः । यामलेश्वरतन्त्रे ।
"अथ वक्ष्ये महादेवीं मातङ्गीं सर्व्वसिद्धिदाम् ।
अस्योपासनमात्रेण वाक्सिद्धिं लभते ध्रुवम् ॥
प्रणवञ्च ततो मायां कामबीजञ्च पूर्व्वकम् ।
मातङ्गीं देवतां चास्त्रं वह्निजायावधिर्मनुः ॥
ऋषिः स्याद्दक्षिणामूर्त्तिश्छन्दः प्रकीर्त्तितम् ।
मातङ्गीदेवता देवी सर्व्वसिद्धिप्रदायिनी ॥
अङ्गन्यासकरन्यासौ कुर्य्यान्मन्त्री समाहितः ।
षड्दीर्घभाजा बीजेन प्रणवाद्येन कल्पयेत् ॥
षट्कोणाष्टदलं पद्मं लिखेद्यन्त्रं मनोरमम् ।
तत्र पूजा प्रकर्त्तव्या शक्तापुर्य्येण मन्त्रवित् ॥
अष्टशक्तीराष्टदले पूजयेत् सुसमाहितः ।
रतिः प्रीतिर्मनोभवा क्रिया श्रद्धा च शक्तयः ॥
अनङ्गकुसुमानङ्गमदना मदनातुरा ।
इत्यष्टशक्तीः संपूज्य उपचारसमन्वितः ॥
ततो देवीं परां ध्यायेत् साधकः स्थिरमानसः ॥
श्यामाङ्गीं शशिशेखरां त्रिनयनां रत्नसिंहासनस्थिताम् ।
वेदैर्बाहुदण्डैरसिखेटकपाशाङ्कुशधराम् ॥
एवं ध्यात्वा महादेवीं मन्त्रपूर्व्वमनोरमैः ।
नैवेद्यन्तु महादेव्यै पायसं शर्करान्वितम् ॥
पुरश्चरणकाले तु षट्सहस्रं मनुं जपेत् ।
तद्दशांशं हुनेदाज्यैः शर्करामधुभिः सह ॥
ब्रह्मवृक्षोद्भवैः काष्ठैः साधकः शक्तिभिः सह ।
एवं पुरश्क्रियां कृत्वा प्रयोगविधिमाचरेत् ॥
चतुष्पथे श्मशाने वा कलामध्ये च मौलिकः ।
मत्स्यं मांसं पायसञ्च इत्याद्यैश्च गुग्गुलुम् ॥
रात्रियोगेन कर्त्तव्यं सदा पूर्णस्य साधकः ।
एवं प्रयोगमात्रेण कविता जायते ध्रुवम् ॥
अपिस्तम्भं जलस्तम्भं वाक्स्तम्भं कारयेत् ध्रुवम् ।
मन्त्री भवति शूरेषु तार्क्ष्यो भोगिकुलं यथा ।
शास्त्रे वादे कवित्वे च दक्षस्तिरिवापरः ।
अनेनैव विधानेन मातङ्गी सिद्धिदायिनी ।
नूनं तद्गृहमागत्य कुबेरोदीयते धनम् ।
विना मत्स्यैर्विना मांसैर्नार्घयेत् परदेवताम् ।"
इति तन्त्रसारः ॥

मातरपितरौ, पुं, (माता च पिता च । "मातरपितरावुदीचाम् ।" ६ । ३ । ३२ । इत्यारडादेशो मातृशब्दस्य निपात्यते ।) मातृजनकौ । नित्यद्विवचनान्तौ । इत्यमरः । २ । ६ । १० ॥

मातरिश्वा, पुं, (मातरि अन्तरीक्षे श्वयति वर्द्धते इति । यद्वा, मातरि अनन्यां यति वर्द्धते सप्तमप्रकृत्यादिति । श्वि + "श्वयु उच्छ्रयणे इति ।" उणा० १ । १५८ । इति कनिन् । नाम्नि सम्ज्ञा अगुक् । धातोरिकारलोपश्च निपात्यते ।) वायुः । इत्यमरः । २ । ६ । ६९ (यथा, ऋग्वेदे । १ । ८६ । ६ ।
"त्वाञ्च दिवो मातरिश्वाजभारामघादधं
परिश्वेनो अद्रेः ।"
"मातरिश्वा वायुः ।" इति तद्भाष्ये सायनः ॥
मातर्यन्तरिक्षे श्वसिति चेष्टते इति । श्वस + कनिन् । यस्यिभेदः । यथा, ऋग्वेदे ।३।२६।२१।
"तनूनपादुच्यते गर्भ आसुरो
नराशंसो भवति यद्विजायते ।
मातरिश्वा यदमिमीत मातरि
वातस्य सर्गो अभवत् सरीमणि ॥"
"यदाग्निरप्सुषु गर्भरूपतया वर्त्तते तदा तनूनपान्नामको भवति यदान्तरिक्षे विद्योतते तदा मातरिश्वनामको भवति ।" इति तद्भाष्ये सायनः ॥)

मातलिः, पुं, (मतं ज्ञातीति । ज्ञा + कः । पृषोदरादित्वात् साधुः । मतस्यापत्यं पुमानिति वा । मतल + "अत इञ् ।" ४ । १ । ९५ । इतीञ् ।) इन्द्रसारथिः । इत्यमरः ।१।१।३८॥ (यथा, महाभारते । ५ । ८७ । ११ ।
"मतस्त्रिलोकराजस्य मातलिर्नाम सारथिः ।
तस्यैकैव कुले कन्या रूपतो लोकविश्रुता ।")

माता, [तृ] स्त्री, मान्यते पूज्यते या सा । मान ङ पूजायां नाम्नीति डाट् इति भरतः ॥ (यद्वा, "नप्तृनेष्टृत्वष्टृहोतृपोतृभ्रातृजामातृमातृपितृदुहितृ ।" उणा० २ । ९६ । इति तृच् । निपातितश्च । यस्कादित्वाट्टाप् निषेधः ।) मा इति भाषा । तत्पर्य्यायः । जनयित्री २ प्रसूः ३ जननी ४ । इत्यमरः । २ । ६ । २८ ॥ सवित्री ५ जनिः ६ जनी ७ जनित्री ८ अम्बा ९ अम्बा १० अम्बिका ११ अम्बालिका १२ । इति शब्दरत्नावली ॥ माल्लका १३ । इति जटाधरः ॥ * ॥ षोड़शप्रकारा मातरो यथा,—
"स्तनदात्री गर्भधात्री भक्षदात्री गुरुप्रिया ।
अभीष्टदेवपत्नी च पितुः पत्नी च कन्यका ॥
सगर्भजा या भगिनी पुत्रपत्नी प्रियाप्रसूः ।
मातुर्माता पितुर्माता सोदरस्य प्रिया तथा ॥
मातुः पितुश्च भगिनी मातुलानी तथैव च ।
जनानां षोडशविधा मातरः परिकीर्त्तिताः ॥"
इति ब्रह्मवैवर्त्ते गणपतिखण्डे कार्त्तिकेयसंवादे १५ अध्यायः ॥ तस्या गौरवं यथा,—
"जनको जन्मदातृत्वात् पालनान्न पिता स्मृतः ।
गरीयान् जन्मदातुश्च योऽन्नदाता पिता मुने ॥
विनान्नाम्बुधरो देही न नित्यः पितुरुद्भवः ।
तयोः शतगुणे माता पूज्या मान्या च वन्दिता
गर्भधारणपोषाभ्यां सा च ताभ्यां गरीयसी ॥
इति तत्रैव ४० अध्यायः ॥
अपि च ।
"न गुरवः क्रियाः कृत्वा पेदमन्ने प्रयच्छति ।
उपनीय ददद्वेदमाचार्य्यः स प्रकीर्त्तितः ॥
सहस्रं तु उपाध्याया अतिमन्युश्शतं स्मृतः ।
एते मान्या यथापूर्व्वमेभ्यो माता गरीयसी ।"
इति नारदे ८३ अध्यायः ॥

अन्यच्च ।
"न पितुर्व्वचनं कार्य्यं यथा मातुः सुतेन हि ।
पिता च पतितस्याज्ञो न माता सतसुतेन हि ।
गर्भधारणपोषाद्धि ततो माता गरीयसी ॥
दशपिताद्युपाध्यायो गौरवेणातिरिच्यते ।
तेभ्यः पिता दशभ्यस्तु माता चैव गरीयसी ।
मातृतोऽन्यो न देवोऽस्ति तस्मात् पूज्या सदा सुतैः ॥
मातुश्च यद्धनं किञ्चित् कुरुते भक्तितः पुमान् ।
तद्धर्म्मं हि विजानीयादेवं धर्म्मविदो विदुः ॥"
इति ब्रह्मपुराणम् ॥
अपरञ्च ।
"गुरूणामपि सर्व्वेषां पूज्याः पञ्च विशेषतः ।
तेषामाद्यास्त्रयः श्रेष्ठास्तेषां माता सुपूजिता ॥
यो भावयति या स्तुते येन विद्योपदिश्यते ।
ज्येष्ठभ्राता च भर्त्ता च पञ्चैते गुरवः स्मृताः ॥
आत्मनः सर्व्वयत्नेन प्राणत्यागेन वा पुनः ।
पूजनीया विशेषेण पञ्चैते भूतिमिच्छता ॥
यावत् पिता च माता च द्वावेतौ निर्व्विकारिणौ ।
तावत् सर्व्वं परित्यज्य पुत्रः स्यात्तत्परायणः ॥
पिता माता च सुप्रीतौ स्यातां पुत्रगुणैर्यदि ।
स पुत्रः सकलं धर्म्मं प्राप्नुयात्तेन कर्म्मणा ॥
नास्ति मातृसमं दैवं नास्ति पितृसमो गुरुः ।
तयोः प्रत्युपकारोऽपि न कथञ्चन विद्यते ॥
तयोर्नित्यं प्रियं कुर्य्यात् कर्म्मणा मनसापि वा ।
न ताभ्यामननुज्ञातो धर्म्ममन्यं समाश्रयेत् ॥"
इति कौर्म्मे उपविभागे ११ अध्यायः ॥
मातृशब्दसम्भाषया मातृतुल्यत्वम् यथा,—
"मातरित्येव शब्देन यश्च संभाषते नरः ।
सा मातृतुल्या सत्येन धर्म्मः साक्षी सतामपि ॥
तया सहितशृङ्गारे कालसूत्रं व्रजति सः ।
तत्र घोरे वसत्येव यावद्वै ब्रह्मणो वयः ॥
प्रायश्चित्तं पापिनश्च तस्य नैव श्रुतौ श्रुतम् ॥"
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे १० अध्यायः ॥
शिवस्य परिवारविशेषः । स च असुरमारणे ब्रह्मादीनां खेदनिर्गतत्वात् अष्टशक्तिदेवतारूपो यथा,—
"ब्राह्मी माहेश्वरी चैन्द्री वाराही वैष्णवी तथा ।
कौमारी चैव चामुण्डा चर्च्चिकेत्यष्ट मातरः ॥"
सप्तविधोऽपि यथा,—
"ब्राह्मी च वैष्णवी चैन्द्री रौद्री वाराहिकी तथा ।
कौबेरी चैव कौमारी मातरः सप्त कीर्त्तिताः ॥"
इत्यमरटीकायां भरतः ॥
गौर्य्यादिषोड़शमातृकाः । यथा,—
"गौरी पद्मा शची मेधा सावित्री विजया जया ।
देवसेना स्वधा स्वाहा मातरो लोकमातरः ॥
शान्तिः पुष्टिर्धृतिस्तुष्टिरात्मदेवतया सह ।
गणादौ विनायकः पूज्यो अन्ते च कुलदेवता ॥"
इति आद्यतत्त्वे वङ्गचण्डीपरिशिष्टम् ॥
वैष्णवपूज्या मातृगणा यथा,—
"यत्र मातृगणाः पूज्यास्तत्र स्नेहाः प्रपूजयेत ।
सदा भागवती पौर्णमासी पद्मान्तरङ्गिका ॥
गङ्गाकलिन्दतनयागोपीवृन्दावनीस्तथा ।
गायत्रीतुलसीवाणीपृथिवीगाश्च वैष्णवीः ॥
श्रीयशोदादेवकृतीदेवकीरोहिणीमुखाः ।
श्रीसीता द्रौपदी कुन्ती च्यवना वा महर्षयः ।
रुक्मिण्याद्यास्तथा चाष्ट महिष्यो याश्च ता अपि ॥"
इति पाद्मे उत्तरखण्डे ७८ अध्यायः ॥
सप्त मातरो यथा,—
"आद्यौ माता गुरोः पत्नी ब्राह्मणी राजपत्निका ।
गावी धात्री तथा पृथ्वी सप्तैता मातरः स्मृताः ॥"
इति कैश्चित् पठितम् ॥
मातृतुल्या यथा ।
"मातृष्वसा मातुलानी पितृष्वस्री पितृष्वसा ।
श्वश्रूः पूर्व्वजपत्नी च मातृतुल्याः प्रकीर्त्तिताः ॥"
इति दायभागः ॥
गौः । भूमिः । इति मेदिनी । ते, ४३ ॥ (निरुक्ते च । ८।३ । "यदूर्ध्वस्तिष्ठा द्रविणेह धत्ताद्यद्वाज्यो मातुरस्या उपस्थे ।" "मातुः अस्या पृथिव्याः ।" इति तट्टीकायां दुर्गाचार्य्यः ।) विभूतिः । इति शब्दरत्नावली ॥ लक्ष्मीः । इति हेमचन्द्रः । ३।३२१ । रेवती । इत्यजयपालः ॥ आखुकर्णी । इन्द्रवारुणी । महाश्रावणी । जटामांसी । इति राजनिर्घण्टः ॥ परिमाणकर्त्तरि, त्रि । अस्मिन्नर्थे परिमाणार्थमाधातोः कर्त्तरि ष्ट्रन्प्रत्ययेन निष्पन्नः ॥ (निर्म्माणकर्त्तरि च, यथा, ऋग्वेदे । १ । ६१ । ७ ।
"अस्रेधन्तो मातुः सचनेषु स्योमहः ।"
"मातुः दृष्टिद्वारेण सकलस्य जगतो निर्म्मातुः ।"
इति तद्भाष्ये सायनः ॥)
माता, स्त्री, (मान्यते पूज्यते इति । मान पूजायां + तन् ततष्टापि निपातनात् साधुः ।)जननी । यथा 'विश्वेश्वरीं विश्वमातां चण्डिकां प्रणमाम्यहम् ।' इति शिवरहस्ये दुर्गास्तवदर्शनात् आवन्त्योऽयं शब्दः ॥
मातापितरौ, पुं, (माता च पिता च । "आनङ् ऋतोऽद्वन्द्वे ।" ६ । ३ । २५ । इत्यानङादेशः ।) जननीजनकौ । तत्पर्य्यायः । पितरौ २ मातरपितरौ ३ तातजनयित्र्यौ ४ । इत्यमरभरतौ । २ । ६ । ३७ ॥ नित्यद्विवचनान्तोऽयम् ॥ (यथा, मनौ । ३ । १५७ ॥
"अकारणपरित्यक्ता मातापित्रोर्गुरोस्तथा ॥")
मातामहः, पुं, (मातुः पिता । "पितृव्यमातुलमातामहपितामहाः । ४ । २ । ३६ । इति डामहच् निपातितश्च ।) मातुः पिता । इत्यमरः । २ । ६ । ३३ ॥ दौहित्रस्य मातामहसाधर्म्यं यथा,—
"आसीदङ्गो नृपश्रेष्ठो यज्ञशीलो दृढव्रतः ।
यजनः सुमहत्कालादेव एकोऽभवत्ततः ॥
स्नुषयोः कन्ययोः सुनीथा वा मातुर्दुःशीलकारणात् ।
क्रूरा दुष्टिरभूत्तस्य जगतोऽस्यापि पीड़ने ॥
तपस्विनां कुले जाता ऋषीणाञ्च यशस्विनाम् ।
सगुणां निर्गुणां वापि यान्ति मातामहीं तनुम् ॥"
इत्यग्निपुराणम् ॥
तन्मरणे त्रिरात्राशौचं यथा । मातामहानां मरणे त्रिरात्रं स्यादशौचकम् । इति शुद्धितत्त्वे कूर्म्मपुराणम् ॥ * ॥ दुहितृपर्य्यन्ताभावे तस्य श्राद्धे दौहित्रस्याधिकारो यथा,—
"मातामहानां दौहित्राः कुर्व्वन्त्यहनि चापरे ।
ते च तेषां प्रकुर्व्वन्ति द्वितीयेऽहनि सर्व्वदा ॥"
इति शुद्धितत्त्वम् ।
दुहितृपर्य्यन्ताभावे तस्य धने दौहित्रस्याधिकारो यथा । तदभावे दौहित्रः ।
"पौत्रदौहित्रयोर्लोके विशेषो नास्ति धर्म्मतः ।
तयोर्हि मातापितरौ सम्भूतौ तस्य देहतः ॥"
इति मनुवचने पौत्रतुल्याभिधानेन यथा पुत्राभावे पौत्रस्तथा दुहितृभावे दौहित्रः । अतएव गोविन्दराजधृतो विष्णुः ।
अपुत्रपौत्रे संसारे दौहित्रा धनमाप्नुयुः ।
पूर्व्वेषां हि स्वधाकारे पौत्रदौहित्रकाः समाः ॥"
इति दायतत्त्वम् ॥
मातामही, स्त्री, (मातामहस्य पत्नीति ।"पुंयोगादाख्यायाम् ।" ४ । १ । ४८ । इति + ङीष् ।) मातामहपत्नी । माढमाता । आइ इति भाषा । यथा,—
"मातामही माढमाता माढतुल्या च पूजिता ।
प्रमातामहीति विज्ञाता प्रमातामहकामिनी ।
वृद्धप्रमातामही ज्ञेया तत्पितुः कामिनी तथा ॥"
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे १० अध्यायः ॥
तन्मरणे पक्षिण्यशौचं यथा,—
"मातुले श्वशुरे मित्रे गुरौ गुर्व्वङ्गनासु च ।
अशौचं पक्षिणीं रात्रिं वृत्ता मातामही यदि ॥"
इति शुद्धितत्त्वम् ॥
दुहितृपर्य्यन्ताभावे तच्छ्राद्धे दौहित्रस्याधिकारो यथा । तदभावे दौहित्रः । प्रागुक्तब्रह्मपुराणं तथादर्शनात् ।
"पौत्रदौहित्रयोर्लोके न विशेषोऽस्ति धर्म्मतः ।
तयोर्हि मातापितरौ सम्भूतौ तस्य देहतः ॥"
इत्यनेन यथा पुत्राभावे पौत्रस्तथा दुहितृभावे दौहित्रः । इति प्रागेवोक्तत्वात् ।
"मातुलो भागिनेयस्य स्वस्रीयो मातुलस्य च ।
श्वशुरस्य गुरोश्चैव सप्तैते मातामहस्य च ॥
एतेषाञ्चैव भार्य्याभ्यः स्वसुर्मातुः पितुस्तथा ।
पिण्डदानन्तु कर्त्तव्यमिति वेदविदां स्थितिः ॥"
इति वृद्धशातातपवचनेन मातामह्याश्च साक्षादौहित्रेण पिण्डदानश्रुतेः धनाधिकारित्वाच्च । इति शुद्धितत्त्वम् ॥ * ॥ तस्या अयौतुकधने पौत्रपर्य्यन्ताभावे दौहित्राधिकारः । यौतुकधने तु पुत्रपर्य्यन्ताभावे दौहित्राधिकारी यथा ।
"दौहित्रोऽपि ह्यमुत्रैनं सन्तारयति पौत्रवत् ॥"
इति मनुवचने दौहित्रे पौत्रधर्म्मातिदेशात् पुत्रेण परिणीतदुहितृबाधात् बाधकपुत्रेण बाध्यदुहितृपुत्रबाधस्य न्याय्यत्वात् । इति दायतत्त्वम् ॥ पुत्राभावे दौहित्रोऽधिकारी । पुत्रा-

मातुला

धिकारात् प्राक्दुहितृवधिकारश्रुतेः तद्वाधिकाया दुहितुः पुत्रेण वाध्यपुत्रवाधश्चैव न्याय्यत्वात्। इति दायक्रमसंग्रहश्च ॥

मातुली, स्त्री, (मातुः आली। पृषोदरादित्वात् ऋकारलोपः। यद्वा, माताया आली।) मातुः सखी। इति शब्दमाला ॥

मातुलः, पुं, (मातुर्भ्राता। "पितृव्यमातुलेति।" ४।२।३६। इति निपात्यते। तत्र "मातुर्डुलच्।" इति वार्त्तिकात् डुलच्।) माद्रभ्राता। पितृव्यश्यालकः। इत्यमरः। २। ६। ३१। मामा इति भाषा ॥ तन्मरणे भागिनेयस्य पक्षिण्यशौचम्। यथा, शुद्धितत्त्वे।

"मातुले पक्षिणीं रात्रिं शिष्यर्त्विग्बान्धवेषु च।" स च मातामहपर्य्यन्तरहितस्य मृतस्य प्रेतक्रियाद्यधिकारी। यथा,—

"मातुलो भागिनेयस्य स्वसीयो मातुलस्य च।" इति शातातपीयपाठक्रमात्। इति शुद्धितत्त्वम् ॥ (मात्यते खार्थादिना मीयते। मात+वाहुलकात् डुलच्।) व्रीहिभेदः। मदनद्रुमः। (मादयतीति। मद+णिच्+वाहुलकात् उलच् पृषोदरादि० दस्य तकारत्वञ्च।) धुस्तूरः। इति मेदिनी। ले, १२३ ॥ पर्य्यायो यथा,—

"धत्तूरो धूर्त्त धुस्तूरा उन्मत्तः कनकाह्वयः। देवता कितवस्तूरी महामोहः शिवप्रियः। मातुलो मदनस्यास्य फले मातुलपुत्रकः ॥"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥ मा विद्यते तुला तुलना यस्य।) सर्पविशेषः। इति हेमचन्द्रः। ३। २१६ ॥

मातुलकः, पुं, (मातुल+स्वार्थे कन्।) धुस्तूरवृक्षः। इति राजनिर्घण्टः ॥ (मातुलः। यथा, पञ्चतन्त्रे। १। २४१ ॥

"सोऽपि तव मातुलको न समायातः ॥")

मातुलपुत्रकः, पुं, (मातुलस्य धुस्तूरस्य पुत्रकः।) धुस्तूरफलम्। इत्यमरः। २। ४। ७८ ॥ (यथास्य पर्य्यायः।

"मातुलो मदनस्यास्य फले मातुलपुत्रकः ॥"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥) मातुलतनयः। इति मेदिनी। के, २३५ ॥

मातुला, मातुलानी, स्त्री, (मातुल+टाप्। मातुलस्य स्त्री। "इन्द्रवरुणेति। ४।१। ४८। ङीप् आनुक् च।) मातुलपत्नी। इत्यमरभरतौ। २।६।३०। मामी इति भाषा ॥ तन्मरणे पक्षिण्यशौचम्। यथा,—

"श्वशुरयोर्भगिन्याश्च मातुलान्याश्च मातुले। पित्रोः स्वसरि तद्वच्च पक्षिणीं चपयेन्निशाम् ॥"

इति शुद्धितत्त्वम् ॥

मातुलानी, स्त्री, (मा निषेधे तुलां नयति प्राप्नोतीति। नी+क्विप्। ङीप्।) कषायः। भङ्गा। इति मेदिनी। ने, २०३ ॥ (यथास्या पर्य्यायः। भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥

मातुलु

"भङ्गा गञ्जा मातुलानी मादनी विजया जया ॥")

शुण्डः। इति हेमचन्द्रः। ४। २४५ ॥ प्रियङ्गुवृक्षः। इति शब्दचन्द्रिका ॥

मातुलाहिः, पुं, (मा तुलातेऽसौ इति। तुल+मूलविभुजादित्वात् कः। मातुलश्चासौ अहिश्च।) सर्पविशेषः। मालुया साप इति फेयुयाटी इति च भाषा। अयं खड्गाकृतिः आयतदेहः दीर्घलाङ्गूलः चतुष्पात्। इति मधुमाधवादयः ॥

मातुली, स्त्री, (मातुलस्य स्त्री। "मातुल+इन्द्रवरुणभवेति।" ४।१।४८। इति ङीप् "मातुलोपाध्याययोरानुग् वा।" इति वार्त्तिकोक्तेः पक्षे आनुगभावः।) मातुलपत्नी। इत्यमरः। २। ६। ३० ॥ भङ्गा इति शब्दचन्द्रिका ॥

मातुलुङ्गः, पुं, (मा न तुलं गच्छतीति। गम+डः। पृषोदरादित्वात् अकारस्योकारः सुमुच।) बीजपूरः। इत्यमरटीकायां भरतः ॥ (यथा, सुश्रुते उत्तरतन्त्रे ३६ अध्याये।

"केशरं मातुलुङ्गस्य मधुसैन्धवसंयुतम्। शर्करादाडिमाभ्यां वा द्राक्षाखर्ज्जूरयोरथवा॥" (तथास्य पर्य्यायः।

"बीजपूरो मातुलुङ्गः सुफलः फलपूरकः। लुङ्गः पूरकः पूरो बीजपूर्णोऽम्बुकेशरः ॥"

इति वैद्यकरत्नमालायाम्।

तथास्य गुणाः।

स्यान्मातुलुङ्गः कफवातहन्ता
हन्ता कृमीणां जठरामयघ्नः।
स दोषरक्तादिविकारपित्त-
सन्दीपनः शूलविकारहारी ॥
श्वासकासारुचिहरं लघ्वन्नं कण्ठशोधनम्।
दीपनं लघु रुच्यञ्च मातुलुङ्गसदाहृतम्॥
त्वक्तिक्ता दुर्ज्जरा ति स्यात् कृमिवातकफापहा।
स्वादु शीता गुरुः स्निग्धा तद्वासं वातपित्तजित् ॥
मेधां शूलानिलच्छर्द्दिकफारोचकनाशनम्।
दीपनं लघु संग्राहि गुल्मार्शोघ्नन्तु केशरम् ॥
हृद्यं वर्णकरं रुच्यं रक्तमांसबलप्रदम्।
शूलार्शोग्रहणीरोगेषु मन्दाग्नौ कफमारुते ॥
अरुचिश्वासकासेषु स्वरसोऽस्योपदिश्यते।
रसोऽतिमधुरो हृद्यो वीर्य्यपित्तानिलापहः ॥
कफकृद्दुर्ज्जरः पाके मातुलुङ्गस्य कल्ककः।
तिक्तं पुष्यन्तु बीजञ्च गुल्मनुत्स्यात्तथाधरम् ॥"

इति हारीते प्रथमे स्थाने दशमेऽध्याये ॥

"त्वक्तिक्ता कटुका स्निग्धा मातुलुङ्गस्य वातजित्।
हृद्यं मधुरं मांसं वातपित्तहरं गुरु ॥
लघु तत्केसरं श्वासकासहिक्कामदाग्न्यजित्।
श्वासशोषानिलश्लेष्मविबन्धच्छर्द्यरोचकान् ॥
गुल्मोदरार्शः शूलानि मन्दाग्नित्वञ्च नाशयेत्॥"

इति च वाग्भटे सूत्रस्थाने षष्ठेऽध्याये ॥)

माल्का

मातुलुङ्गकः, पुं, (मातुलुङ्ग+संज्ञायां स्वार्थे वा कन्।) क्षोलङ्गवृक्षः। तत्पर्य्यायः। फलपूरः २ बीजपूरः ३ रुचकः ४। इत्यमरः। २। ४। ७८ ॥ मातुलुङ्गः ५ स्वफलः ६ फलपूरकः ७ लुङ्गुः ८ पूरकः ९ पूरः १० बीजपूर्णः ११ अम्बुकेशरः १२ क्षोलङ्गः १३। इति रत्नमाला। अस्य गुणाः। हृद्यत्वम्। अग्नित्वम्। लघुत्वम्। अग्निदीपनत्वम्। आध्मानगुल्मार्शोहृद्रोगोदावर्त्तनाशित्वम्। विबन्धच्छिन्नाशूलच्छर्दिरोगे प्रशस्तत्वञ्च। अस्य त्वग्गुणाः। तिक्तत्वम्। दुर्ज्जरत्वम्। कफवातनाशित्वम्। विशदरसत्वञ्च। तन्मांसगुणाः। स्वादुत्वम्। शीतत्वम्। गुरुत्वम्। वायुपित्तनाशित्वञ्च। इति राजवल्लभः ॥

मातुलुङ्गा, स्त्री, (मातुलुङ्ग+टाप्।) मधुकुकुटी। यथा,—

"मातुलुङ्गा सुगन्धा गिरिजा पूतिपुष्पिका। अत्यम्बा देवदूती च सा क्वचिन्मधुकुकुटी ॥"

इति रत्नमाला ॥

मातुलुङ्गिका, स्त्री, (मातुलुङ्ग+संज्ञायां कन्। टाप् अकारस्येत्वम्।) वनबीजपूरः। इति राजनिर्घण्टः ॥

मातृकच्छिद्, पुं, (मातुः कं शिरश्छिनत्तीति। छिद+क्विप्।) परशुरामः। इति केचित् ॥

माल्का, स्त्री,(मातेव। माल+"इषेः प्रतिश्रुतौ।" ५। ३। ६६। इति कन् टाप्।) धात्रिका ॥ (यथा, वृहत्संहितायाम्। ४३। ६६।

"रज्जूत्सङ्गच्छेदने बालपीड़ा
राज्ञो मातुः पीड़नं माल्कायाः ॥"

मातेव। माल+स्वार्थे कन्।) माता। देवीभेदः। वर्णमाला। इति मेदिनी। के, १३८ ॥ करणम्। स्वरः। उपमाता। इति हेमचन्द्रः। माल्कागणोत्पत्तिर्यथा,—

"तत्र देवोऽसौ दैत्यं त्रिशूलेनाहनद्भृशम्। तस्याहतस्य यद्रक्तमपतद्भूतले किल ॥ तत्रान्धका असंख्याता बभूवुरपरे भृशम्। तद्दृष्ट्वा महदाश्चर्य्यं रुद्रः शूलेऽन्धकं दधे ॥ गृहीत्वा त्रिशिखाग्रेण ननर्त्त परमेश्वरः। इतरेऽप्यन्धकाः सर्व्वे चक्रेण परमेष्ठिना ॥ नारायणेन निहतास्तत्र येऽन्ये समुत्थिताः। अस्रधारासुतारेषु शूलप्रोतस्य चासकृत् ॥ अनारतं समुत्तस्थुः सतो रुद्रो दयान्वितः। तस्य क्रोधेन महता सुखाच्छूला विनिर्ययौ ॥ तद्रूपधारिणीं देवीं यामीं योगीश्वरीं विदुः। स्वरूपधारिणी चान्या विष्णुनापि विनिर्म्मिता ॥ ब्रह्मणा कार्त्तिकेयेन इन्द्रेण च यमेन च। वाराहेण च देवेन विष्णुना परमेष्ठिना ॥ पातालोदरसं रूपं तस्या देव्या विनिर्म्मले। माहेश्वरी च माहेन्द्री रूपेणा अष्ट मातरः ॥ कारणं यस्य यत् प्रोक्तं दैवज्ञेनावधारितम् ॥ शरीरादेव नाना तु तदिदं कीर्त्तितं मया।

कामः क्रोधस्तथा लोभो मदो मोहोऽथ पञ्चमः ॥
मात्सर्यं षष्ठमित्याहुः पैशुन्यं सप्तमं तथा ॥
अनसूयाष्टमी ज्ञेया इत्येता अष्ट मातरः ॥
कामं योगीश्वरीं विद्धि क्रोधं माहेश्वरीं तथा ॥
लोभस्तु वैष्णवी प्रोक्ता ब्रह्माणी मद एव च ।
मोहः स्वयन्तु कौमारी मात्सर्यं चेन्द्रजा विदुः ॥
यामी दण्डधरा देवी पैशुन्यं स्वयमेव च ।
अनसूया वराहाख्या इत्येताः परिकीर्तिताः ॥
कामादिगण एषोऽयं शरीरं परिकीर्तितम् ।
जग्राह मूर्तिस्तु यथा तथा ते कीर्तितं मया ॥
एताभिर्देवताभिश्च तस्य रक्ते तु शोषिते ।
क्षयं गतासुरी माया स च सिंहोऽन्तकोऽभवत् ॥
एतत्ते सर्वमाख्यातमात्मविद्यास्तवं मया ।
य एतच्छृणुयान्नित्यं मातृणामुद्भवं शुभम् ॥
तस्य ताः सर्वदा रक्षां कुर्वन्त्यनुदिनं नृप ! ।
येनेतत् पठ्यते जन्म मातॄणां पुरुषोत्तम ! ॥
स धन्यः सर्वदा लोके त्रिलोकञ्च गच्छति ।
तासाञ्च ब्रह्मणा दत्ता अष्टमी तिथिरुत्तमा ॥
एताः संपूजयेद्भक्त्या विल्वाहारो नरः सदा ।
तस्य ताः परितुष्टास्तु चेमारोग्यं ददन्ति च ॥"
इत्यादि वाराहपुराणे कामादिमातृगणोत्पत्ति-
र्नामाध्यायः ॥ अपि च ।
"ब्रह्मेशगुहविष्णूनां तथेन्द्रस्य च शक्तयः ।
शरीरेभ्यो विनिष्क्रम्य तद्रूपैश्चण्डिकां ययुः ॥
यस्य देवस्य यद्रूपं यथाभूषणवाहनम् ।
तद्वदेव हि तच्छक्तिरसुरान् योद्धुमाययौ ॥
हंसयुक्तविमानाग्रे साक्षसूत्रकमण्डलुः ।
आयाता ब्रह्मणः शक्तिर्ब्रह्माणी साभिधीयते ॥
माहेश्वरी वृषारूढा त्रिशूलवरधारिणी ।
महाहिवलया प्राप्ता चन्द्ररेखाविभूषणा ॥
कौमारी शक्तिहस्ता च मयूरवरवाहना ।
योद्धुमभ्याययौ दैत्यानम्बिका गुहरूपिणी ॥
तथैव वैष्णवी शक्तिर्गरुडोपरि संस्थिता ।
शङ्खचक्रगदाशार्ङ्गखड्गहस्ताभ्युपाययौ ॥
यज्ञवाराहमतुलं रूपं या बिभ्रतो हरेः ।
शक्तिः साप्याययौ तत्र वाराहीं बिभ्रती तनुम् ॥
नारसिंही नृसिंहस्य बिभ्रती सदृशं वपुः ।
प्राप्ता तत्र सटाक्षेपक्षिप्तनक्षत्रसंहतिः ॥
वज्रहस्ता तथैवेन्द्री गजराजोपरिस्थिता ।
प्राप्ता सहस्रनयना यथा शक्रस्तथैव सा ॥
ततः परिवृतस्ताभिरीशानो देवशक्तिभिः ।
ह्यवदत्तामसुराः शीघ्रं मम प्रीत्याह चण्डिकाम् ॥
ततो देवीशरीरात्तु विनिष्क्रान्तातिभीषणा ।
चण्डिका शक्तिरत्युग्रा शिवाशतनिनादिनी ॥"
इति मार्कण्डेयपुराणम् ॥
मातृवर्गो यथा,—
"गुरोः पत्नी राजपत्नी विप्रपत्नी च या सती ।
पत्नी च भ्रातृसुतयोर्मित्रपत्नी च तत्सखुः ॥
श्वश्रूः पितृष्वसुर्मातुः पत्नी श्वश्रूः स्वकस्यका ।
जननी तत्सपत्नी च भगिनी सुरभी तथा ॥
स्वामीश्वरपत्नी च धात्री कान्ताप्रदायिका ।
गर्भधात्र्यौरसनात्री च भयात्रातुश्च कामिनी ॥
एता वेदप्रणीताश्च सर्व्वेषां मातरः स्मृताः ।
एतासु पि च सर्व्वासु न्यूनता नास्ति कासु च ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८५ अध्यायः ॥
षोड़श मातरो यथा,—
"गुरुपत्नी राजपत्नी देवपत्नी तथा वधूः ।
पितोः स्वसा शिष्यपत्नी भृत्यपत्नी च मातुली ॥
पितृपत्नी श्यालपत्नी श्वश्रूश्च भगिनीसुता ।
गर्भधात्र्यष्टदेवी च पुंसः षोड़श मातरः ॥"
इति तन्त्रेण ५६ अध्यायः ॥
अथ मातृकान्यासः ।
भगवानुवाच ।
"मातृकान्यासमधुना शृणु वेतालभैरव ! ।
येन देवत्वमायाति नरोऽपि विधितेन वै ॥
वाग्ब्रह्माणीसुखा देव्यो मातृकाः परि-
कीर्तिताः ।
तासां मन्त्राणि सर्व्वाणि अङ्गानि स्वरास्तथा ॥
चन्द्रबिन्दुप्रयुक्तानि सर्व्वकामप्रदानि च ।
ऋषिस्तु मातृमन्त्राणां ब्रह्मैव परिकीर्तितः ॥
प्रोक्ता छन्दस्तु गायत्री देवता च सरस्वती
शरीरशुद्धिप्रसुखसर्व्वकामार्थसाधने ॥
विनियोगः समुद्दिष्टो मन्त्राणां न्यूनपूरणे ।
अकारेण समं कादिवर्गो यः प्रथमः स्मृतः ॥
तेश्चन्द्रबिन्दुसंयुक्तैश्चस्वरैश्चरैर्वहिः ।
आकारश्च तथोच्चार्य्य अङ्गुष्ठाभ्यां नमस्तथा ।
प्रथमं मातृकामन्त्रमङ्गुष्ठद्वयतो न्यसेत् ॥
परे वर्गाः स्वरैः सार्द्धं ये वान्ये न्यासकर्म्मणि ।
ते सर्व्वे चन्द्रबिन्दुभ्यां युक्ताः कार्य्यास्तु सर्व्वतः ॥
ह्रस्वेकारश्च वर्गेण दीर्घेकारान्तगेन तु ।
तर्ज्जन्योर्विन्यसेत् सम्यक् स्वाहान्तेन तु पूर्ब्बवत् ॥
ह्रस्वोकारश्चवर्गेण दीर्घोकारान्तगेन तु ।
मध्यमाद्वयगते सम्यक् वषड़न्तेन विन्यसेत् ॥
एकारादितवर्गान्त ऐकारान्तेन चैव हुम् ।
न्यसेदनामिकाद्वन्द्वे नियतं तत्र भैरव ! ॥
ओकारादिपवर्गान्तु औकारान्तेन शोधितम् ।
वौषड़न्तं कनिष्ठाद्यां विन्यसेत् कार्य्यसिद्धये ॥
अंकारादियकारादिवर्गेण चान्तकेन च ।
वः इत्यन्तेन तलयोर्विन्यसेत् पाणिपृष्ठयोः ॥
वषट्कारं शेषभागे मन्त्रन्यासे नियोजयेत् ।
हृदयादिषड़ङ्गेषु पूर्ब्बवत् क्रमतो न्यसेत् ॥
अङ्गुष्ठाद्युक्तवर्गैस्तु क्रमात् षड़्भिस्तथाविधैः ।
पुनरुक्तया प्रादक्षिण्यसकृद्विगुणे तु पार्श्वयोः ।
वस्तौ च विन्यसेन्मन्त्रान् क्रमात् पूर्ब्बवदक्षरैः ॥
बाह्वोः प्राणोन्मथा कण्ठे नाभौ च जठरे
तथा ।
स्तनयोरपि विन्यासं तथा षड़्भिः समाचरेत् ॥
वक्त्रे च चिबुके गण्डे कर्णयोश्च ललाटके ।
अंसे कक्षे च षड़्वर्गैः पूर्ब्बवन्न्यासमाचरेत् ॥
रोमकूपे ब्रह्मरन्ध्रे गुदे जङ्घायुगे तथा ।
नखेषु पादपार्ष्ण्योश्च तथा पूर्ब्बवदाचरेत् ॥
एवन्तु मातृकान्यासं यः कुर्य्यान्नरसत्तमः ।
स धर्म्मयज्ञे पूजासु पूतो योग्यश्च जायते ॥
नातः परतरं मन्त्रं विद्यते क्वचिदेव हि ।
यः सर्व्वकामदं पुण्यं चतुर्व्वर्गफलप्रदम् ॥
वाग्देवतां हृदि ध्यात्वा मूर्द्धि सर्व्वाक्षराणि
च ॥
विधा च मातृकामन्त्रैः संक्रमेच्च पिवेज्जलम् ।
स वाग्मी पण्डितो धीमान् जायते च सुरः
कविः ॥
चन्द्रबिन्दुसमायुक्तान् स्वरान् पूर्ब्बान् पठेद्बुधः ।
यज्ञनानि च सर्व्वाणि क्रेवलानि पठेत्ततः ॥
अकारादिक्षकारान्तान्मन्त्रेवं श्वासेषु पूर्ब्बकैः ।
जलं करतले गृह्य पठित्वाक्षरसंचयम् ॥
अभिमन्त्र्य तु तत्तोयं प्रथमं पूरकैः पिबेत् ।
कुम्भकेन द्वितीयन्तु तृतीयन्त्वथ रेचकैः ॥
एवं सप्तत्रिवारन्तु पीत्वा तोयं विचक्षणः ।
दृढ़ाङ्गः पण्डितो भूयात् पुत्रपौत्रसमन्वितः ॥
त्रिसन्ध्यमथ पीत्वैव मातृकामन्त्रमन्त्रितम् ।
तोयं कवित्वमाप्नोति सर्व्वान् कामांस्तथैव च ॥
सततं कुरुते यस्तु मातृकामन्त्रमन्त्रितम् ।
तोयपानं महाभागः पूरकस्तम्भरेचकैः ॥
स सर्व्वकामान् संप्राप्य पुत्रपौत्रसमन्वितः ।
भूत्वा महाकविर्लोके बलवान् सत्यविक्रमः ॥
सर्व्वत्र वल्लभो भूत्वा चान्ते मोक्षमवाप्नुयात् ।
राजानमथवा राजभार्य्यां पुत्रमथापि वा ॥
वशीकरोति न चिरात् मातृकामन्त्रपालकः ।
न्यासक्रमे क्रमः प्रोक्तो वर्गक्रम इहैव तु ॥
अक्षराणां क्रमेणाथ तोयपानं समाचरेत् ।
ये ये मन्त्रा देवतानान्तथैवाथ ऋषां ॥
ते मन्त्रा मातृकामन्त्रे नित्यमेव प्रतिष्ठिताः ।
सर्व्वमन्त्रमयश्चायं सर्व्वदेवमयस्तथा ॥
चतुर्व्वर्गप्रदश्चायं मातृकामन्त्र उच्यते ।
इति ते कथितः पुत्र ! मातृकान्यास उत्तमः ॥"
इति श्रीकालिकापुराणे मातृकान्यासः ७६ अः ॥
अथ तस्य प्रयोगः ।
अस्य मातृकामन्त्रस्य ब्रह्मा ऋषिर्गायत्रीच्छन्दो
मातृकासरस्वती देवता हलो बीजानि स्वराः
शक्तयो मातृकान्यासे विनियोगः । शिरसि ॐ
ब्रह्मणे ऋषये नमः । मुखे ॐ गायत्रीच्छन्दसे
नमः । हृदि ॐ मातृकासरस्वत्यै देवतायै
नमः । गुह्ये ॐ बीजेभ्यो नमः ।
पादयोः ॐ स्वरेभ्यः शक्तिभ्यो नमः । तथा च
ज्ञानार्णवे ।
"मातृकां शृणु देवेशि ! न्यसेत् पापनिकृन्तनीम् ।
ऋषिर्ब्रह्मास्य मन्त्रस्य गायत्रीच्छन्द उच्यते ॥
देवता मातृकादेवी बीजं व्यञ्जनसञ्चयम् ।
शक्तयस्तु स्वरा देवि ! षड़ङ्गन्यासमाचरेत् ॥"
ततः षड़ङ्गन्यासौ । अं कं खं गं घं ङं आं
अङ्गुष्ठाभ्यां नमः । इं चं छं जं झं ञं ईं
तर्जनीभ्यां स्वाहा । उं टं ठं डं ढं णं ऊं
मध्यमाभ्यां वषट् । ऋं तं थं दं धं नं ऋें अना-
मिकाभ्यां हुम् । ऌं पं फं बं भं मं ऌें कनि-
ष्ठाभ्यां वौषट् । एं यं रं लं वं शं षं सं हं ळं

चं अः करतलपृष्ठाभ्यां फट्। एवं हृदयादिषु। अं कं ५ आं हृदयाय नमः। इत्यादि। तथा च ज्ञानार्णवे।

"अं आं मध्ये कवर्गन्तु इं ईं मध्ये चवर्गकम्।
उं ऊं मध्ये टवर्गन्तु एं ऐं मध्ये तवर्गकम्॥
ओं औं मध्ये पवर्गन्तु विन्दुयुक्तं न्यसेत् प्रिये!।
अनुस्वारविसर्गान्तर्यशवर्णौ सलक्षकौ॥
हृदयञ्च शिरो देवि! शिखा कवचकं तथा।
नेत्रमन्त्रं न्यसेत् पश्चान्नमः स्वाहा क्रमेण तु॥
वषट् हुं वौषडन्तश्च फड़न्तं योजयेत् प्रिये!।
षड़ङ्गोयं मातृकाया: सर्व्वपापहर: स्मृत:॥*॥

अथान्तर्मातृकान्यास:।

अकारादिषोड़शस्वरान् सविन्दून् षोड़शदलकमले कण्ठमूले न्यसेत्। ककारादिहादशवर्णान् सविन्दून् हादशदलकमले हृदये न्यसेत्। डकारादिदशवर्णान् सविन्दून् दशदलकमले नाभौ न्यसेत्। वकारादिषड़्वर्णान् सविन्दून् षड़्दलकमले लिङ्गमूले न्यसेत्। वकारादिचतुरो वर्णान् सविन्दून् चतुर्दलकमले मूलाधारे न्यसेत्। हृत्पद्मवर्णद्वयं सविन्दुं द्विदलपद्ममध्ये न्यसेत्। तथा च ज्ञानार्णवे।

"हादशपत्राम्बुजे कण्ठे स्वरान् षोड़श विन्यसेत्।
हादशच्छदहृत्पद्मे कादीन् हादश विन्यसेत्॥
दशपत्राम्बुजे नाभौ डकारादौन्यसेद्दश।
षट्पत्रमध्ये लिङ्गस्थे वकारादीन्यसेच्च षट्॥
आधारे चतुरो वर्णान्यसेद्वादीन् चतुर्दले।
हृत्पद्मे भूमध्यगे पद्मे द्विदले विन्यसेत् प्रिये!॥"

अगस्त्यसंहितायाम्।

"एकैकवर्णमेकैकपत्रान्ते विन्यसेत् प्रिये!।
एवमन्त: प्रविन्यस्य मनसातो बहिर्न्यसेत्॥"*॥

वैष्णवे तु।

एकैकवर्णसञ्चार्य्य मूलाधाराच्छिरोऽन्तकम्।
नमोऽन्तमिति विन्यास आन्तर: परिकीर्त्तित:॥

अथान्तर्मातृकान्यासो मूलाधारे चतुर्दले।
सुवर्णाभे व श ष स चतुर्व्वर्गविभूषिते॥
षड़्दले वैद्युतनिभे स्वाधिष्ठानेऽनलत्विषि।
ब भ मैर्य्य र लैर्युक्ते वर्णै: षड़्भिश्च सुव्रते!॥
मणिपूरे दशदले नीलजीमूतसन्निभे।
डादिफान्तदलैर्युक्ते विन्दुद्वाभितमस्तके:॥
अनाहते हादशारे प्रवालरुचिसन्निभे।
कादिठान्तदलैर्युक्ते योगिनां हृदयङ्गमे॥
विशुद्धे षोड़शदले धूम्राभे स्वरभूषिते।
आज्ञाचक्रे तु चन्द्राभे द्विदले हक्षलाङ्किते॥
सहस्रारे हिमनिभे सर्व्ववर्णविभूषिते।
अकथादिचिरेखात्म ह ल क्ष चयभूषिते॥
तन्मध्ये परविन्दुश्च दृष्टिस्थितिलयात्मकम्।
एवं समाहितमना ध्यायेन्न्यासोऽयमान्तर:॥"

ततो बाह्यमातृकाध्यानम्।

"पद्माप्रज्ञिपिभिर्विभक्तमुखदो:पद्मस्तनोरु:स्थलां
भास्वत्कौलिनिबद्धचन्द्रमुकुलामापीनतुङ्गस्तनीम्।
सद्रामचगुणं सुधाढ्यकलसं विद्याक्ष हस्ताम्बुजै-
र्विभ्राणां विशदप्रभां त्रिनयनां वाग्देवतामाश्रये॥"

एवं ध्यात्वा न्यसेत्। तचाङ्गुलिनियमस्तन्त्रे।

"ललाटेऽनामिकामध्ये विन्यसेन्मुखपङ्कजे।
तर्जनीमध्यमानामा हृद्वानामे च नेत्रयो:॥
अङ्गुष्ठं कर्णयोर्न्यस्य कनिष्ठाङ्गुष्ठकौ नसो:।
मध्यास्तिस्रो गण्डयोश्च मध्यमाद्योष्ठयोर्न्यसेत्॥
अनामां दन्तयोर्न्यस्य मध्यमासुत्तमाङ्गके।
सुखेऽनामां मध्यमाद्य हस्तपादे च पार्श्वयो:॥
कनिष्ठानामिकामध्यास्तासु पृष्ठे च विन्यसेत्।
ता: साङ्गुष्ठा नाभिदेशे सर्व्वा: कुक्षौ च विन्यसेत्॥
हृदये च तलं सर्व्व अंसयोश्च ककुत्स्थले।
हृत्पूर्व्वं हस्तपत्कुक्षि सुखेषु तलमेव च॥
एतास्तु मातृकासृष्टा: क्रमेण परिकीर्त्तिता:।
अजाता विन्यसेद्यस्तु न्यास: स्यात्तस्य निष्फल:॥"

गौतमीये।

"ललाटमुखहृत्तालिशुनिद्वाणीषु गण्डयो:।
ओष्ठदन्तोक्तमाङ्गास्यदो:पत्सन्ध्यग्रकेषु च॥
पार्श्वयो: पृष्ठतो नाभौ जठरे हृदयेंऽसके।
ककुदंसे च हृत्पूर्व्वं पाणिपादयुगे तथा।
जठराननयोर्न्यस्येन्मातृकार्णान् यथाक्रमात्॥"

तद्यथा। अं नमो ललाटे। आं नमो मुखवृत्ते। इं ईं चक्षुषो:। उं ऊं कर्णयो:। ऋं ॠं नसो:। ऌं ॡं गण्डयो:। एं ओष्ठे। ऐं अधरे। ओं ऊर्द्धदन्ते औं अधोदन्ते। अं ब्रह्मरन्ध्रे। अ: मुखे। कं दक्षबाहुमूले। खं कूर्परे। गं मणिबन्धे। घं अङ्गुलिमूले। ङं अङ्गुल्यग्रे। एवं चं ५ वामबाहुमूलसन्ध्यग्रकेषु। एवं टं ५ दक्षिणपादमूलसन्ध्यग्रकेषु। एवं तं ५ वामपादमूलसन्ध्यग्रकेषु। पं दक्षिणपार्श्वे। फं वामपार्श्वे। बं पृष्ठे। भं नाभौ। मं जठरे। यं हृदि। रं दक्षबाहुमूले। लं ककुदि। वं वामबाहुमूले। शं हृदादिदक्षहस्ते। षं हृदादिवामहस्ते। सं हृदादिदक्षपादे। हं हृदादिवामपादे। लं हृदाद्युदरे। क्षं हृदादिमुखे। सर्व्वत्र नमोऽन्तेन न्यसेत्। तथा च।

"ओमाद्यन्तो नमोऽन्तो वा सविन्दुर्विन्दुवर्ज्जित:।
षष्ठ्यन्तदर्णविन्यास: क्रमादुक्तो मनीषिभि:॥"

इति भट्ट:॥*॥

अथ संहारमातृकान्यास:।

तस्या ध्यानं यथा,—

"अक्षस्रजं हरिणपोतसदृग्दधानं
विद्या: करैरविरतं दधतीं त्रिनेत्राम्।
अर्द्धेन्दुमौलिमरुणामरविन्दरागां
वर्णेश्वरीं प्रणमत स्तनभारनम्राम्॥

न्यासस्तु चकारादिकारान्त:। यथा चं नमो हृदादिमुखे इत्यादि॥*॥ अपरञ्च।

"चतुर्धा मातृका प्रोक्ता केवला विन्दुसंयुता।
सविसर्गा सोभया च रहस्यं त्रयमुच्यते॥
विद्याकरी केवला च सोभया मुक्तिदायिनी।
पुत्रदा सविसर्गा तु सविन्दुर्व्वित्तदायिनी॥"

विष्णुरहस्ये।

वाग्भवाद्या च वाक्सिद्धेरमाद्या श्रीप्रदहये।
दुर्गेशाद्या सर्व्वसिद्धा कामाद्या लोकवश्यदा।
श्रीकण्ठाद्यानिमाद्यस्येत् सर्व्वमन्त्र: प्रसीदति॥"

श्रीविद्याविषये नवरत्नेश्वरे।

"वाग्भवाद्या नमोऽन्ताश्च न्यस्तथा मातृकाक्षरा:।
श्रीविद्याविषये मन्त्री वाग्भवाद्यष्टसिद्धये॥"

इति तन्त्रसार:॥

(मातृ+"ऋतष्ठञ्।"४।३।७८। इति ठञ्। त्रि। मातुरागतम्। यथा, महाभारते। ६। ८७। ६७।

"योऽन्वयो मातृकस्तस्य स एनमभिषेदिवान्॥")

मातृकेयट:, पुं, (मातृके कुले यटति पुत्ररूपेण गच्छतीति। यट+अच्।) मातुल:। इति त्रिकाण्डशेष:॥

मातृनन्दन:, पुं (मातृणां नन्दन: पुत्र आनन्दवर्द्धनो वा। कार्त्तिकेय:। यथा,—

"कथं त्वं कृत्तिकापुत्रसुक्तवान् तं सुरं गुहम्।
कथञ्च पावकिरसौ कथं वा मातृनन्दन:॥"

इत्यादि वाराहपुराणे स्कन्दोत्पत्तिर्नामाध्याय:॥

मातृमण्डलं, क्ली, (मातृणां मण्डलम्।) नेत्रयोर्मध्यम्। तत्तु आसन्नमृत्युं पश्यति। यथा काश्मीरखण्डे ४२ अध्याये।

"अरुन्धतीं ध्रुवञ्चैव विष्णोस्त्रीणि पदानि च।
आसन्नमृत्युर्नो पश्येच्चतुर्थं मातृमण्डलम्॥
अरुन्धती भवेच्छिद्रा ध्रुवो नासाग्रसुच्यते।
विष्णो: पदानि भ्रूमध्ये नेत्रयोर्मातृमण्डलम्॥
(यथा च बृहत्संहितायाम्। "मातृणामपि मातृमण्डलविदो विप्रान् विदुर्नेक्षण:॥")

मातृसख:, पुं, जड़:। इति हेमचन्द्र:। ३। १६॥

मातृबन्धु:, पुं, (मातुर्बन्धु:।) मातृबान्धव:। यथा। बन्धवस्त्रिविधा:। आत्मबन्धव: पितृबन्धवो मातृबन्धवश्चेति। यथोक्तम्।

"आत्मपितृष्वसु: पुत्रा आत्ममातृष्वसु: सुता:।
आत्ममातुलपुत्राश्च विज्ञेया ह्यात्मबान्धवा:॥
पितु: पितृष्वसु: पुत्रा: पितुर्मातृष्वसु: सुता:।
पितुर्मातुलपुत्राश्च विज्ञेया: पितृबान्धवा:॥
मातु: पितृष्वसु: पुत्रा मातुर्मातृष्वसु: सुता:।
मातुर्मातुलपुत्राश्च विज्ञेया मातृबान्धवा:॥"

इति मिताक्षरा॥

मातृबान्धव:, पुं, (मातुर्बान्धव:।) मातृबन्धु:। स च मातामहभगिनीपुत्र:। मातामहीभगिनीपुत्र:। मातृमातुलपुत्रश्च। यथा,—

"मातु: पितृष्वसु: पुत्रा मातुर्मातृष्वसु: सुता:।
मातुर्मातुलपुत्राश्च विज्ञेया मातृबान्धवा:॥"

इत्युद्वाहतत्त्वम्॥

मातृवाहिनी, स्त्री, (मातरं वहतीति। वह+णिनि:।) वल्गुलापक्षी। इति राजनिर्घण्ट:॥

मातृश्वासितः, पुं, (मात्रा श्वासितः । स्नेहाधिक्यात् केवलं मात्रैव श्वासितः न तु पित्राचार्य्यादिभिरिति भावः ।) मूर्खः । इति हेमचन्द्रः । ३ । १६ ॥

मातृश्वसा, स्त्री, (मातुः स्वसा । "मातृपितृभ्यां स्वसा ।" ८ । ३ । ८४ । इति षत्वम् ।) मातृभगिनी । मासी इति भाषा । सा मातृतुल्या यथा,—

"मातृश्वसा मातुलानी पितृव्यस्त्री पितृश्वसा ।
श्वश्रूः पूर्ब्बजपत्नी च मातृतुल्याः प्रकीर्त्तिताः ॥"

इति दायभागः ॥

मातृश्वसेयः, पुं, (मातृश्वसुरपत्यं पुमान् । मातृश्वस् + "मातृश्वसुश्च ।" ४ । १ । १३४ । इत्यत्र "कृण्प्रत्ययो ढकिलोपश्च ।" इति कात्यिकोक्तेः ढक् ।) मातृश्वस्पुत्रः । मासितुता भाइ इति भाषा । तत्पर्य्यायः । मातृश्वसीयः २ । इति हेमचन्द्रः । ३ । २०६ ॥

मातृश्वसेयी, स्त्री, (मातृश्वसुरपत्यं स्त्री । मातृश्वस् + "मातृश्वसुश्च ।" ४ । १ । १३४ । इति ढक् । ढकिलोपश्च । ङीष् ।) मातृभगिनीकन्या । इत्यमरः । २ । ६ । २५ । मासितुता भगिनी । इति भाषा ॥ (टावन्तोऽप्ययं शब्दः । यथा, महाभारते । ३ । २२३ । ५ ।

("मम मातृश्वसेया त्वं माता दाक्षायणी मम ॥")

मातृश्वसीयः, स्त्री, (मातृश्वसुरपत्यं पुमान् । मातृश्वस् + "मातृश्वसुश्च ।" ४ । १ । १३४ । इति कृण् ।) मातृभगिनीपुत्रः । इत्यमरः । २ । ६ । २५ । मासितुता भाइ इति भाषा ॥

मातृश्वसीया, स्त्री, (मातृश्वसीय + टाप् ।) मातृभगिनीकन्या । इत्यमरः । २ । ६ । २५ । मासितुता भगिनी इति भाषा ॥

मातृसिंही, स्त्री, वासकः । इति शब्दरत्नावली ।

मात्रं, क्ली, (मीयत इति । मा + चत्रन् ।) कार्त्स्न्यम् । अवधारणम् । इत्यमरः । ३ । ३ । १७७ ॥ कार्त्स्न्ये यथा जीवमात्रं न हिंसेत । अवधारणे यथा पयोमात्रं भुङ्क्ते । इति तट्टीकायां भरतः ॥

मात्रा, स्त्री, (मीयते अनया । मा + "हुयामाश्रुभसिभ्यस्त्रन् ।" उणा० ४ । १६८ । इति त्रन् टाप् ।) परिच्छदः । अल्पः । परिमाणम् । इत्यमरः । ३ । ३ । १७७ ॥ परिच्छदे हस्त्यश्वादिः । अल्पे यथा । शाकमात्रा । परिमाणे यथा । किं हस्तिमात्रोऽङ्कुशः । इति तट्टीकायां भरतः ॥ (यथा, हरिवंशे । ५८ । २ ॥ "व्याकुलमेकं भवति मात्रा ।") कर्णभूषा । वित्तम् । अक्षरावयवः । इति मेदिनी । रे, ७५ ॥ ** (छन्दसां ह्रस्वदीर्घादिप्रभेदः । यथा, श्रुतबोधे ।

"यस्याः पादे प्रथमे द्वादश मात्रा तथा तृतीयेऽपि ॥")

कालविशेषः । यथा,—

"कालेन यावता पाणिः पर्य्येति जानुमण्डले ।
सा मात्रा कविभिः प्रोक्ता ह्रस्वदीर्घप्लुते मता ॥

इति प्राचीनाः ॥

अपि च ।

"वामजानुनि तद्धस्तभ्रमणं यावता भवेत् ।
कालेन मात्रा सा ज्ञेया मुनिभिर्वेदपारगैः ॥"

इति तन्त्रसारः ॥

इन्द्रियवृत्तिः । यथा,—

"मात्रास्पर्शास्तु कौन्तेय ! शीतोष्णसुखदुःखदाः ।
आगमापायिनो नित्यास्तांस्तितिक्षस्व भारत ! ॥"

इति भगवद्गीता ॥

"मीयन्ते आभिर्विषयाः मात्रा इन्द्रियवृत्तयः ।"

इति तट्टीकायां श्रीधरस्वामी ॥

इन्द्रियम् । इति पूर्ब्बोक्तश्लोकटीकायां मधुसूदनसरस्वती ॥ अंशुः । यथा,—

"न योषिद्भ्यः पृथग्दद्यादवसानदिनादृते ।
स्वभर्तृपिण्डमात्राभ्यस्तृप्तिरासां यतः स्मृता ॥"

इति आह्निकतत्त्वम् ॥

(श्लिलोचयः । यथा, ऋग्वेदे । ३ । ४ । ६ । ३ ।

"प्र मात्राभी रिरिचे ।"

"मात्राभिः मीयन्ते परिच्छिद्यन्त इति मात्राः श्लिलोचयाः ।" इति तद्भाष्ये सायनः ॥ शक्तिः । यथा, पञ्चतन्त्रे । १ । ३५६ । "का मात्रा वसुद्रस्य यो मम प्रकृतिं दूषयिष्यति ॥" अवयवः । यथा, मनौ । ७ । ४ ।

"चन्द्रविक्षेपयोश्चैव मात्रानिर्ज्ञत्य शाश्वतीः ॥"

"मात्रा अवयवाः ।" इति तट्टीकायां मेधातिथिः ॥ रूपम् । यथा, भागवते । २ । ५ । २५ ॥ "तस्य मात्रा गुणः शब्दः ॥" "मात्रा सूक्ष्मं रूपम् ।" इति तट्टीकायां स्वामी ॥)

मात्सर्य्यं, क्ली, (मत्सर + ष्यञ् ।) मत्सरस्य भावः । परशुभेदः । यथा,—

"मागाश्चिरायैकतरः प्रमादं
वसन्नसब्राधगिरेऽपि देशे ।
मात्सर्य्यरागोपहतात्मनां हि
स्खलन्ति साधुष्वपि मानसानि ॥

इति भारते ३ अध्या० ४ ॥

मात्स्यिकः, त्रि, (मत्स्योऽस्य पण्यम् । "तदस्य पण्यम् ।" ४ । ४ । ५१ । इति मत्स्य + ठक् ।) जालिकः । मत्स्यघातकः । इति सिद्धान्तकौमुदी ॥

माथ इ कुत्सने । इति कविकल्पद्रुमः ॥ (भ्वा० पर० सक० सेट् ।) इ, मान्थ्यते । कुत्सो वधक्लेशौ । इति दुर्गादासः ॥

माथः, पुं, (मान्थ्यते पीड्यते जनः अस्मिन् । माथ + घञ् । ज्वलादित्वात् णो वा । निपातनात् गुणभावः ।) पन्थाः । इति त्रिकाण्डशेषः ॥ (मथ + भावे घञ् ।) मन्थनम् । इति शब्दरत्नावली ॥

माथुरः, पुं, (मथुरा + अण् ।) मथुरायाः आगतः । इति मुग्धबोधव्याकरणम् ॥ (तत्र जात इत्यण् वा । मथुराजातः । यथा, कथासरित्सागरे । ३६ । ७३ ।

"तनः स दृष्टवहुलक्लेशस्तां पुरयोऽब्रवीत् ।
सुभ्रु ! पवनसेनाख्यो वणिक्पुत्रोऽस्मि माथुरः ॥"

अन्येन कृता माथुरेण प्रोक्ता । "तेन प्रोक्तम् ।" ४ । ३ । १०१ । इति अण् ङीप् । माथुरीवृत्तिः । इति व्याकरणम् ॥)

मादः, पुं, (माद्यत इति मद + घञ् । गुणभावः ।) दर्पः । इत्यमरः । ३ । २ । १२ ॥ हर्षः । इति तट्टीकायां भरतः । मत्तता । इति शब्दरत्नावली ॥

मादकः, पुं, (माद्यति वर्षागमे हृष्यतीति । मद + ण्वुल् ।) दात्यूहपक्षी । इति शब्दमाला ॥ (मादयति स्वगुणेन भूतानीति । मद + णिच् ण्वुल् ।) मदकारकत्रये, त्रि ॥ (यथा, देवीभागवते । १ । १४ । ६४ ।

"इन्द्रियाणि महाभाग ! मादकानि मुनिश्चितम् ।
अदारस्य दुरन्तानि पक्षेव मनसा सह ॥")

मादनं, क्ली, (मादयति विरहिणः । इति मद + णिच् + ल्युः ।) लवङ्गम् । इति शब्दचन्द्रिका ॥ (मादयतीति मद + णिच् + ल्युः ।) हर्षकारयितरि, त्रि ॥)

मादनः, पुं, (मादयति चित्तविकारमुत्पादयतीति । मद + णिच् + ल्युः ।) कामदेवः । मदनवृक्षः । धुस्तूरः । इति केचित् ॥

मादनी, स्त्री, (मादन + स्त्रियां ङीप् ।) माकन्दी । इति राजनिर्घण्टः ॥ विजया । इति भावप्रकाशः ॥

माद्दृशः, त्रि, (अहमिव द्दृश्यत इति । द्दृश् + "त्यदादिषु द्दृशोऽनालोचने कञ्च ।" ३ । २ । ६० । इति कञ् ।) मत्सदृशः । इति व्याकरणम् ॥ (यथा, महाभारते । ७ । १०८ । ८६ ।

"तस्य त्वं पदवीं गच्छ गच्छेयुस्त्वादृशा यथा ।
तादृशस्येदृशे काले मादृशैरभिचोदितः ॥
कथं नु भार्य्या पार्थानां तव कृष्णा ! सखी विभो ! ।
दृष्टद्युम्नस्य भगिनी सभां कृष्येत मादृशी ॥")

माद्री, स्त्री, (मद्रे जाता । मद्र + अण् ङीप् । भर्गादित्वात् न प्रत्ययलुक् ।) पाण्डुराजपत्नी । सा ऋगीभूतस्य मुनेः शापात् मैथुनरहितस्य स्वामिन आश्रया अश्विनीकुमाराभ्यां नकुलसहदेवौ जनयामास । इति महाभारतश्रीभागवतमतम् ॥ (यथा, महाभारते । १ । ६७ । १५६ ।

"कुन्ती माद्री च जज्ञाते मतिश्च बलात्मजा ।")

अतिविषा । इति राजनिर्घण्टः ॥

माद्रीपतिः, पुं, (माद्र्याः पतिः ।) पाण्डुराजः । इति शब्दरत्नावली ॥

माधवः, पुं, (यदुपुत्रस्य मधोरपत्यं पुमान् । इति मधु + अण् । मा लक्ष्मीस्तस्याः धवः । माया विद्यायाः धव इति वा ।) विष्णुः । तस्य व्युत्पत्तिर्यथा,—

"मा च ब्रह्मस्वरूपा या मूलप्रकृतिरीश्वरी ।

नारायणीति विख्याता विष्णुमाया सनातनी ॥
महालक्ष्मीस्वरूपा च वेदमाता सरस्वती ।
राधा वसुन्धरा गङ्गा तासां स्वामी च
माधवः ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १९० अध्यायः ॥
(यथा, महाभारते । ५ । ७० । ४ ।
"मौनाद्ध्यानाच्च योगाच्च विद्धि भारत !
माधवम् ।")
तन्नाममाहात्म्यं यथा,—
ओमित्येकाक्षरे मन्त्रे स्थितः सर्व्वगतो हरिः ।
माधवायेति वै नाम धर्म्मकामार्थमोक्षदम् ॥"
इति वह्निपुराणम् ॥
(मधोर्वसन्तस्यायम् मधूनि मधुमन्ति कुसुमानि अस्मिन् वा । मधु + "मधोर्ञ च ।" ४ । ४ । १२६ । इति अः ।) वैशाखमासः । इत्यमरः । १ । ४ । १६ ॥ (यथा, मार्कण्डेये । ११७।२७ ।
"स तेन सख्या सहितो जगामाम्रवनं वनम् ।
पत्नीभिः स समं रन्तुं माधवे मासि पार्थिव ! ॥"
(मधु + स्वार्थे अण् ।) वसन्तः । इति विश्वः ॥
(यथा, सुश्रुते । १ । १६ । ६ । "मधुमाधवौ वसन्तः ।"
"माधवप्रथमे मासि नभस्यप्रथमे पुनः ॥"
इति चरके सूत्रस्थाने षष्ठेऽध्याये ॥
माधवनभस्यसहस्यानां यथासंख्यं वैशाखभाद्रपौषाणां सुश्रुतेऽभिहितत्वात् तेषां प्रथमेऽग्रेऽग्रवर्त्तिनि मासि चैत्रादौ विषय इति निष्कर्षः । इति चरकटीकाकृदभिप्रायः ॥)
मधुकवृक्षः । कृष्णसुप्तः । इति राजनिर्घण्टः ॥
(भौत्यमन्वन्तरीयसप्तर्षीणामन्यतम ऋषिविशेषः । यथा, मार्कण्डेये । १०० । ३१ ।
"अग्नीध्रस्याग्निबाहुश्च शुचिर्मुक्तोऽथ माधवः ।
शुक्रोऽजितश्च सप्तैते तदा सप्तर्षयः स्मृताः ॥"
सायनाचार्य्यस्य भ्राता । यथा, सायनकृतधातुवृत्तौ । इति पूर्व्वदक्षिणपश्चिमसमुद्राधीश्वरकम्पराजसुतसङ्गमराजमहामल्लिनाथ सायनपुत्रेण माधवसहोदरेण सायनाचार्य्येण विरचिता माधवीया धातुवृत्तिः ॥)
माधविका, स्त्री, (माधवी + कन् टाप् । पूर्व्वह्रस्वश्च ।) माधवीलता । इत्यमरटीकायां भरतः ॥
माधवी, स्त्री, (मधौ साधुपुष्पयति । मधु + "कालात् साधुपुष्पात्तत्पक्वमानेषु ।" ४ । ३ । ४३ । इत्यण् । ङीप् ।) स्वनामख्यातपुष्पलता । तत्पर्य्यायः । अतिमुक्तः २ पुण्ड्रकः ३ वासन्ती ४ लता ५ । इत्यमरः । २ । ४ । ७२ ॥ अतिमुक्तकः ६ माधविका ७ माधवीलता ८ । इति तट्टीकायां भरतः ॥ चन्द्रवल्ली ९ सुगन्धा १० भ्रमरोत्सवा ११ भृङ्गप्रिया १२ भद्रलता १३ भूमिमण्डपभूषणा १४ वसन्तदूती १५ । इति जटाधरः ॥ लतामाधवी १६ । इति शब्दरत्नावली ॥ (यथा, देवीभागवते । १ । १२ । ७ ।
"आम्रैर्नीपैर्मधूकैश्च माधवीमण्डपावृताम् ।")
अस्या गुणाः । कटुत्वम् । तिक्तत्वम् । कषायत्वम् । मदग्नित्वम् । पित्तकासव्रणदाहश्लेष्मनाशित्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
"माधवी स्यात्तु वासन्ती पुण्ड्रको मण्डकोऽपि च ।
अतिमुक्तो विमुक्तश्च कामुको भ्रमरोत्सवः ॥
माधवी मधुरा प्रोक्ता लघ्वी दीपनपाचनी ।"
इति भावप्रकाशः ॥
मिसिः । मधुशर्करा । कुट्टनी । (मधुनो विकार इत्यण् ङीप् ।) मदिरा । इति मेदिनी । वे, ४६—४७ ॥ (यथा, महाभारते । ४। १५ । ३ ।
"अस्ति मे प्रियं दिव्यं त्वदर्थमुपकल्पितम् ।
एहि तत्र मया सार्द्धं पिबस्व मधुमाधवीम् ॥"
माधवस्येयमित्यण् ङीप् । तत्प्रियत्वात्तथात्वम् ।) तुलसी । इति शब्दमाला ॥ (मधौ वसन्ते सेयाच्चैनीयेति अण् ।) दुर्गा । इति शब्दरत्नावली ॥ माधवस्य पत्नी च ॥ (मधुवंशजा कन्या । यथा, महाभारते । १।९५।१२ । 'जनमेजयः खल्वनन्तां नामोपयेमे माधवीं तस्यामस्य जज्ञे प्राचिन्वान् ॥')
माधवीलता, स्त्री, (माधव्याख्या लता ।) स्वनामख्यातपुष्पलता । इत्यमरटीकायां भरतः ॥
माधवेष्टा, स्त्री, (माधवस्य इष्टा ।) वाराहीकन्दः । इति राजनिर्घण्टः ॥
माधवोचितं, क्ली, (माधवस्योचितम् । सुगन्धित्वात् तथात्वम् ।) कक्कोलकम् । इति राजनिर्घण्टः ॥ (विशेषोऽस्य कक्कोलशब्दे ज्ञातव्यः ॥)
माधवोद्भवः, पुं, (माधवादुद्भवोऽस्य ।) राजादनी । इति राजनिर्घण्टः ॥
माधुकः, पुं, वर्णसङ्करजातिविशेषः । इति जटाधरः ॥ (यथा, महाभारते । १३ । ४८ । २० ।
"मैरेयकश्च वैदेहः सम्भूतेऽथ माधुकम् ॥")
माधुमताः, पुं, (मधुमत्सु भवाः । मधुमत् + "कच्छादिभ्यश्च ।" ४ । २ । १३३ । इत्यण् ।) काश्मीरदेशभवाः । इति हेमचन्द्रः ।४।२४॥
माधुरं, क्ली, (मधु अस्ति अस्य अस्मिन् वेति । मधु + "ऊर्ध्वसुधिसुध्यकमधोः रः ।" ५।२।१०७। इति रः । ततः स्वार्थेऽण् ।) मल्लिका । इति त्रिकाण्डशेषः ॥ (मधुरात् सम्भवतीत्यण् ।) मधुरसम्भवे, त्रि ॥
माधुरी, स्त्री, (माधुर + गौरादित्वात् ङीप् ।) मद्यम् । इति भूरिप्रयोगः ॥ माधुर्य्यम् । यथा,
"तानि सप्रश्नसुखानि ते च तरलाः स्निग्धा
दृशोर्विभ्रमाः
सद्वक्त्राम्बुजसौरभं च च सुधास्यन्दी गिरां
वक्रिमा ।
सा बिम्बाधरमाधुरीति विषयासङ्गेऽपि चेन्मानसं
तस्यां जन्मसमाधि हन्त विरहव्याधिः कथं
वर्द्धते ॥"
इति गीतगोविन्दे २ सर्गः ॥
माधुर्य्यं, क्ली, (मधुरस्य भावः । मधुर + "वर्णदृढादिभ्यः ष्यञ् च ।" ५।१।१२३ । इति ष्यञ् ।) मधुरस्य भावः । मधुरत्वम् । इति हेमचन्द्रः । ३ । १७३ । (यथा, सुश्रुते सूत्रस्थाने एकादशाध्याये ।
"माधुर्य्यं भजतेऽर्थं तीक्ष्णभावं विमुञ्चति ॥")
लावण्यम् । यथा,—
"रूपं किमप्यनिर्व्याच्यं तनोर्माधुर्य्यमुच्यते ।"
इत्युज्ज्वलनीलमणिः ॥
पाञ्चालीरीतिविशिष्टकाव्यगुणः । यथा,—
"मधुरां सुकुमाराञ्च पाञ्चालीं कवयो विदुः ।"
इति साहित्यदर्पणे ९ परिच्छेदः ॥ तस्य लक्षणं यथा, साहित्यदर्पणे ८ परिच्छेदे ।
"चित्तद्रवीभावमयो ह्लादो माधुर्य्यमुच्यते ।
सम्भोगे करुणे विप्रलम्भे शान्तेऽधिकं क्रमात् ॥
मूर्द्धनि वर्गान्त्यवर्णेन युक्ताश्च ट ड ढान् विना ।
रणौ लघु च तद्व्यक्तौ वर्णाः कारणतां गताः ॥
अवृत्तिरल्पवृत्तिर्वा मधुरा रचना तथा ।"
(नायिकानामयत्नजोऽलंकारविशेषः । यथा, साहित्यदर्पणे । ३ । १२६ ।
"सङ्घोभेष्वप्यनुद्वेगो माधुर्य्यं परिकीर्त्तितम् ।"
सात्त्विकनायकगुणभेदः । यथा, तत्रैव । ३।६१।
"सर्वावस्थाविशेषेषु माधुर्य्यं रमणीयता ।")
माध्यन्दिनं, त्रि, (मध्ये भवम् । मध्य + "अन्तःपूर्व्वपदात् ठञ् ।" ४।३।६० । इत्यत्रकाशिका सूत्रवृत्तौ "मध्योमध्यं दिनण् चास्यात् ।" इति दिनण् ।) मध्यमम् । इति हेमचन्द्रः । ६ । ६६ ॥ (मध्यन्दिनसम्बन्धि । यथा, ऋग्वेदे । ३ । २८ । ४ ।
"माध्यन्दिने सवने जातवेदः पुरोडाशमिह
कवे ! जुषस्व ।"
"माध्यन्दिने मध्यन्दिनसम्बन्धिनि" तथा "माध्यन्दिने मध्यं दिनस्येदमित्यर्थे उत्सादित्वादञ् णित्वादादिवृद्धिः णित्वादेवाद्युदात्तत्वम् ।" इति च तद्भाष्ये सायनः ॥ मध्यन्दिनेन प्रोक्ताधीता वा । इत्यण् ङीप् । शुक्लयजुर्व्वेदस्य शाखाभेदः । यथा, आश्वलायनीयश्रौतसूत्रे । ५ । ५ । १६ ।
"पिबा सोममभियमुग्रतर्द इति तिस्रोऽर्वाङेहि सोमकामं त्वाहुस्तवायं सोमस्तमेत्यर्वाङिन्द्राय सोमाः प्र दिवो विदाना आ पूर्णो अस्य कलशः स्वाहेति माध्यन्दिनाः ।")
माध्यमं, त्रि, (मध्ये भवं । मध्य + "अन्तःपूर्व्वपदाट्ठञ् ।" ४ । ३ । ६० । इत्यस्य काशिकासूत्रवृत्तौ "मण्मीयौ च प्रत्ययौ वक्तव्यौ ।" इति मण् ।) मध्ये भवम् । यथा,—
"मध्यमं माध्यमं प्रथमीयं माध्यन्दिनञ्च तत् ।"
इति हेमचन्द्रः । ६ । ६६ ॥
माध्यस्थ्यं, क्ली, (मध्यस्थ + ष्यञ् ।) मध्यस्थस्य भावः । मध्यस्थकरणम् । यथा, कुमारसम्भवे । १ । ५२ ।
"अयाचितारं नहि देवदेव-
मद्रिः सुतां याचयितुं प्रयाक ।

अभ्यर्चनाभङ्गभयेन साधु-
र्मांधस्यामिष्टेऽवलम्बतेऽर्थे ॥"

माध्वीकं, क्ली, (माध्वीक। एषोदरादित्वादीकारस्याकारः।) माध्वीकम्। इत्यमरटीकायां भानुदीक्षितः॥

माध्वी, स्त्री, (मधुनो विकारः। मधु+अण्। ङीप्। "ऋत्यवाण्यावाखमाध्वीति।" ६। ४। १७५। अयि स्त्रियां यणादेशो निपात्यते।) मद्यम्। इति त्रिकाण्डशेषः॥ मध्वादिजता सुरा। इति राजनिर्घण्टः॥ (यथा, मनौ। ११। ९५।

"गौड़ी पैष्टी च माध्वी च विज्ञेया त्रिविधा सुरा।"

मधु मधुररसोऽस्यस्य काण्टकावच्छिदे अण्।) मधुरकण्टकमत्स्यः। इति शब्दरत्नावली॥ (मधुमति, त्रि। यथा, ऋग्वेदे। ७। ७१। २।

"दिवानक्तं माध्वी वासीथां नः॥"

हे माध्वी! मधुमन्तौ॥ इति तद्भाष्ये सायनः॥ नदीविशेषः। यथा, मात्स्ये। १२०। ७१।

"तेभ्यः प्रान्ता च माध्वी च द्वे नद्यौ सम्प्रकीर्त्तिते।")

माध्वीकं, क्ली, (माध्वी+स्वार्थे कन्।) मधूकपुष्पकृतमद्यम्। तत्पर्य्यायः। मधावयः २ माधवकः ३ मधु ४। इत्यमरः। २। १०। ४१॥ मधुमाध्वीकमित्येकं नामेति केचित्॥ पूर्व्वौ द्वौ पुष्पमद्ये। (यथा, महाभारते। ३। २७७। २६।

"कथं हि पीत्वा माध्वीकं पीत्वा च मधुमाधवीम्।
लोभं सौवीरके कुर्य्यान्नारी काचिदिति स्मरेत्॥")

परौ द्वौ द्राक्षाविकारे। इति भरतः॥ माद्वीकमिति वा पाठः। इति रमानाथः। माध्वीकस्थाने माधवकमिति भानुदीक्षितः॥ (मधु। यथा, नैषधे। १६। ३३।

"धयतु गलिने माध्वीकं वा न वारभिनवागतः।
कुसुदमकरन्दौघैः कुक्षिम्भरिर्भ्रमरोत्करः।
इह तु लिहते रात्रीतर्षं रघाङ्गविहङ्गमा
मधु निजवधूवक्त्राम्भोजेष्वधुनाधरनामकम्॥"

"माध्वीकं मकरन्दम्। इति तट्टीकायां नारायणः॥) तत्पर्य्यायो यथा,—

"मधुमाक्षीकमाध्वीकक्षौद्रसारघ्यमीरितम्।
मक्षिकावरटीभृङ्गवातपुष्परसोद्भवम्॥"

इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे॥)

माध्वीकफलः, पुं, (माध्वीकं मधुमत् फलमस्य।) मधुनालिकेरिकः। इति राजनिर्घण्टः॥

माध्वीमधुरा, स्त्री, (माध्वीमदनश्च मधुरेति।) मधुरखर्জ্জूरिका। इति राजनिर्घण्टः॥

मान, क्ति चर्च्चे। इति कविकल्पद्रुमः॥ (चुरां॰-पचे भ्वा॰-पर॰-सक॰-सेट्।) क्ति मानयति मानति। इति दुर्गादासः॥

मान, ड विचारे। चर्च्चे। इति कविकल्पद्रुमः॥ (भ्वा॰-आत्म॰-सक॰-सेट्।) ड मीमांसते ग्राह्यं धीरः। अर्च्चायां तिबादयो न स्मरन्ति रमानाथः। इति दुर्गादासः॥

मानं, क्ली, (मीयतेऽनेनेति। मा+करणे ल्युट्।) परिमाणम्। तत्पर्य्यायः। यौतवम् २ द्रवयम् ३ पाय्यम् ४ यौतवम् ५। तत्तु तुलाङ्गुलिप्रस्थेस्त्रिविधं भवति। तत्र तुलाग्रहणेनोन्मानादुपलक्ष्यते। अङ्गुल्या हस्तादि। प्रस्थेन द्रोणादि। इत्यमरभरतौ। २।६।८५॥ प्रमाणम्। इति मेदिनी। ने, १५॥ यत्र तालो विरमति तत्। तदेव ग्रहमुच्यते। तच्चतुर्विधम्। समं विषमं अतीतं अनागतञ्च। इति सङ्गीतशास्त्रम्॥*॥

अथ मानपरिभाषा।

"न मानेन विना युक्तिर्न्यायां यायते क्वचित्।
अतः प्रयोगकार्य्यार्थं मानमुच्यते मया॥
चरकस्य मतं वैद्यैराद्यैर्ग्राह्यतं ततः।
विहाय सर्व्वमानानि मागधं मानमुच्यते॥
त्रसरेणुर्द्वयैः प्रोक्तस्त्रिंशता परमाणुभिः।
त्रसरेणुस्तु पर्य्यायनाम्ना ध्वंसीति गद्यते॥
जालान्तरगतैः सूर्य्यकरैर्ध्वंसी विलोक्यते।
षड्ध्वंसीभिर्मरीचिः स्यात्ताभिः षड्भिश्च राजिका।
तिसृभी राजिकाभिश्च सर्षपः प्रोच्यते बुधैः।
यवोऽष्टसर्षपैः प्रोक्तो गुञ्जा स्यात्तचतुष्टयम्॥
षड्भिस्तु रत्तिकाभिः स्याच्माषको हेमधानकौ।
सार्द्धैश्चतुर्भिः प्राणः स्याद्धरणः स निगद्यते॥
टङ्कः स एव कथितस्तद्द्वयं कोलमुच्यते।
क्षुद्रसौ वटकश्चैव द्रङ्क्षणः स निगद्यते॥
कोलद्वयस्तु कर्षः स्यात् स प्रोक्तः पाणिमानिकः।
अक्षः पिचुः पाणितलं किञ्चित् पाणिश्च तिन्दुकम्॥
विड़ालपदकश्चैव तथा षोड़शिका मताः।
करमध्यो हंसपदं सुवर्णं कवलग्रहम्॥
उडुम्बरश्च पर्य्यायैः कर्ष एव निगद्यते।
स्यात् कर्षाभ्यामर्द्धपलं शुक्तिरष्टमिका तथा।
शुक्तिभ्याञ्च पलं ज्ञेयं सुष्टिरामं चतुर्थिका।
प्रकुञ्चः षोड़शी विल्वं पलमेमात्र कीर्त्तितं॥
पलाभ्यां प्रसृतिर्ज्ञेया प्रसृतश्च निगद्यते।
प्रसृतिभ्यामञ्जलिः स्यात् कुड़वोऽर्द्धसरावकः॥
अष्टमानञ्च स ज्ञेयः कुड़वाभ्याञ्च मानिका।
सरावोऽष्टपलं तदज्ञेयमत्र विचक्षणैः॥
शरावाभ्यां भवेत् प्रस्थश्चतुःप्रस्थैस्तथाढ़कः।
भाजनं कांस्यपात्रञ्च चतुःषष्टिपलञ्च सः॥
चतुर्भिराढ़कैर्द्रोणः कलशो नल्वणोर्मणः।
उन्मानञ्च घटो राशिर्द्रोणपर्य्यायसंज्ञितः॥
द्रोणाभ्यां खर्पकुम्भौ च चतुःषष्टिशरावकः।
खर्पाभ्याञ्च भवेद्द्रोणी वाहो गोणी च सा स्मृता॥
द्रोणीचतुष्टयं खारी कथिता तत्त्वबुद्धिभिः।
चतुःसहस्रपलिका परमवत्यधिका च सा॥
पलानां द्विसहस्रञ्च भार एकः प्रकीर्त्तितः।
तुलापलशतं ज्ञेया सर्व्वत्रैवेह निश्चयः॥
माषटङ्काश्चविख्यानि कुड़वः प्रस्थमाढ़कम्।
राशिर्गोणी खारिकेति यथोत्तरचतुर्गुणाः॥"*॥

मागधपरिभाषायां षड्रत्तिको माषश्चतुर्विंशतिरत्तिकष्टङ्कः यस्यवतिरत्तिकः कर्षः। अयं चरकसम्मतः॥ सुश्रुतमते। पञ्चरत्तिको माषो विंशतिरत्तिकष्टङ्कोऽशीतिरत्तिकः कर्षः। अयमेव कलिङ्गपरिभाषायामपि। यतस्तत्राष्टरत्तिको माषो द्वाविंशद्रत्तिकष्टङ्कः। सार्द्धटङ्कद्वयमितः कर्षः।

"गुञ्जादिमानमारभ्य यावत् स्यात् कुड़वस्थितिः।
द्रवार्द्रशुष्कद्रव्याणां तावन्मानं समं मतम्॥
प्रस्थादिमानमारभ्य द्विगुणन्तु द्रवार्द्रयोः।
मानं तथा तुलायास्तु द्विगुणं न क्वचित् स्मृतम्॥
नट्टत्तवेणुलोहादेर्भाण्डं यच्चतुरङ्गुलम्।
विस्तीर्णञ्च तथोच्चञ्च तन्मानं कुड़वं वदेत्॥"

इति मागधमानम्॥*॥

अथ कालिङ्गमानम्।

"यतो मन्दाग्नयो दृष्ट्वा हीनसत्त्वा नराः कलौ।
अतस्तु मात्रा तद्योग्या प्रोच्यते मुनिसम्मता॥
यवो द्वादशभिर्गौरैः सर्षपैः प्रोच्यते बुधैः।
यवद्वयेन गुञ्जा स्यात्तिगुञ्जो वल्ल उच्यते।
माषो गुञ्जाभिरष्टाभिः सप्तभिर्वा भवेत् क्वचित्॥
चतुर्भिर्माषकैः प्राणः स निष्कश्च एव च।
गद्यानो माषकैः षड्भिः कर्षः स्याद्दशमाधिकः॥
चतुःकर्षैः पलं प्रोक्तं दशप्राणमितं बुधैः।
चतुःपलैश्च कुड़वः प्रस्थाद्याः पूर्व्ववत्मताः॥
स्थितिर्नाम्न्येव मात्रायाः कालमय्यिं वयो बलम्।
प्रकृतिं देशदेशौ च दृष्ट्वा मात्रां प्रकल्पयेत्॥
नाल्पं हन्त्यौषधं व्याधिं यथाम्भोऽल्पं महानलम्।
अतिमात्रञ्च दोषाय यथा ग्रस्ते बहूदकम्॥"

इति मानपरिभाषा। इति भावप्रकाशः॥

मानः, पुं, (मन्यते बुद्ध्यतेऽनेन इति। मन+घञ्।) चित्तसमुन्नतिः। इत्यमरः। १। ७। २२॥ चित्तस्य समुन्नतिरुच्चता मानः। साङ्गे घनाद्युत्कर्षेणात्मनि चित्तोन्नतिर्मान इति। मत्सरो नास्तीति मननं मानः। इति तट्टीकायां भरतः॥ (यथा, मनौ। ४। १६३।

"हेयं दम्भञ्च मानञ्च क्रोधं तैक्ष्ण्यञ्च वर्জयेत्॥")

आत्मनि पूज्यताबुद्धिः। इति नीलकण्ठः॥ अनुरक्तयोर्दम्पत्योर्भावविशेषः। यथा,—

"दम्पत्योर्भाव एकत्र सतोरप्यनुरक्तयोः।
स्वाभीष्टाश्लेषवीक्षादिनिरोधी मान उच्यते॥"

इत्युज्ज्वलनीलमणिः॥

पूज्यत्वम्। यथा,—

"अधमाः कलिमिच्छन्ति सन्धिमिच्छन्ति मध्यमाः।

उत्तमा मानमिच्छन्ति मानो हि महतां धनम् ॥
मानो हि मूलमर्थस्य माने स्नाने धनेन किम् ।
प्रभ्रष्टमानदर्पस्य किं धनेन किमायुषा ॥
अधमा धनमिच्छन्ति धनमानौ हि मध्यमाः ।
उत्तमा मानमिच्छन्ति मानो हि महतां
धनम् ॥"
इति गारुड़े ११५ अध्यायः ॥

प्रियापराधसूचिका चेष्टा मानः । स च लघु-मध्यमो गुरुश्चेति । अस्थापनेयो लघुः । कष्टापनेयो मध्यमः । कष्टतमापनेयो गुरुः । असाध्यस्तु रसाभासः । अपरस्त्रीदर्शनादिजन्मा लघुः । गोत्रस्खलनादिजन्मा मध्यमः । अपरस्त्रीसम्भोगदर्शनादिजन्मा गुरुः । अन्यथासिद्ध-कुतूहलाद्यपनेयो लघुः । अन्यथावादशपथाद्यपनेयो मध्यमः । चरणपातभूषणदानाद्यपनेयो गुरुः । अपरस्त्रीदर्शनादिजन्मा यथा,—

"खेदाम्बुभिः क्वचन पिच्छिलमङ्गभूमौ
श्यामोदरि क्वचन कण्टकितस्वकाक्षि ।
अन्यां विलोकयति भाषयति प्रियेऽपि
मानः क्व धास्यति पदं तव तत्र विद्मः ॥"

गोत्रस्खलनादिजन्मा यथा,—

"यद्गोत्रस्खलनं तत्तु भ्रमो यदि न मन्यते ।
रोमालिश्यामसंस्पर्शं अपथं तन्वि ! कारय ॥"

अपरस्त्रीसम्भोगदर्शनादिजन्मा यथा,—

"दयितस्य निरीक्ष्य भालदेशं
चरणालक्तकपिञ्जरं सपत्न्याः ।
सुदृशो नयनस्य कोणभाग-
श्चुतिसूक्ताः शिखरोपमा बभूवुः ॥"
इति रसमञ्जरी ॥

ग्रहः । इति मेदिनी । ने, १५ ॥ (परिच्छेदके, त्रि । यथा, ऋग्वेदे । ७ । ८८ । ५ ।

"दृहन्तं मानं वरुण स्वधावः
सहस्रद्वारं जगमा गृहन्ते ।"

"मान्यस्मिन् सर्वाणि भूतानि इति मानं सर्वस्य भूतजातस्य परिच्छेदकमित्यर्थः ।" इति तद्भाष्ये सायनः ॥ पुं, मन्तः । यथा, ऋग्वेदे । १ । १८८ । ८ ।

"अवोचाम निवचनान्यस्मिन्मानस्य सुनुः
सहसाने अर्यो ।"

"मीयत इति मानो मन्तः तस्य सुनुरग्निः मन्त्रेणोत्पद्यमानत्वात् सप्तम्यर्थे प्रथमा ।" इति तद्भाष्ये सायनः ॥ निर्माता । यथाऽत्रैव । १० । १४४ । ५ ।

"यं ते शुनश्चिच्छेपमुक्थं पदाभरदृणं मान-
मन्यसः ।"

"मानं यागद्वारा निर्मातारम् ।" इति तद्भाष्ये सायनः ॥)

मानकं, क्ली, पुं, (मानं दृहत्परिमाणमस्य । "गुणाद्दृविभाषा ।" ५ । ४ । १५४ । इति कप् ।) मागधकम् । मागधकचु इति भाषा ।

"कच्चौ तु पिच्छिला प्रोक्ता विस्फोर्यपर्णमानके ।"
इति शब्दचन्द्रिका ॥

"शुलकन्दो गान्धकन्दः शुलपद्मस्तु मानकः ।"
इति रत्नमाला ॥

अस्य गुणाः ।

"मानकं स्वादु शीतञ्च गुरु शोथहरं कटु ।"
इति राजवल्लभः ॥

अपि च ।

"मानकः स्यान्महापत्रः कथ्यते तद्गुणा अथ ।
मानकः शोथहृच्छीतः पित्तरक्तहरो लघुः ॥"
इति भावप्रकाशः ॥

(विषयोऽस्य यथा, —

"पुराणं मानकं पिष्ट्वा द्विगुणीकृततण्डुलम् ।
साधितं क्षीरतोयाभ्यामभ्यसेत् पायसन्तु तत् ॥
हन्तुं वातोदरं शोथं ग्रहणीं पाण्डुनामपि ।
सिद्धो भिषग्भिराख्यातः प्रयोगोऽयं निरत्ययः ॥"
इति वैद्यकचक्रपाणिसंग्रह उदराधिकारे ॥)

मानग्रन्थिः, पुं, (मानस्य ग्रन्थिरिव । बाधकत्वात् ।) अपराधः । इति हारावली ॥ (मानस्य ग्रन्थिः । अभिमानवर्द्धनम् । यथा, छन्दोमञ्जर्याम् । ५ । ७ ।

"कैशवंशजगीतिलोकमनोज्ञगद्यहारिणी जयति ।
गोपीमानग्रन्थेर्विमोचनी दिव्यगायनाख्या ॥")

मानधानिका, स्त्री, कर्कटी । इति शब्दमाला ॥

माननीयं, त्रि, (मान्यते पूज्यत इति । मान + अनीयर् ।) मान्यम् । यथा,—

"मानो मान्योऽपि वृत्तेषु माननीयः सुरासुरैः ।
स्थापयामि महादेवीं मानं देहि गृहे मम ॥"
इति दुर्गोत्सवपद्धतिः ॥

मानरन्ध्रा, स्त्री, (मानार्थं समयपरिमाणज्ञापकं रन्ध्रमस्याम् ।) ताम्बी । तॉबी । इति भाषा । यथा,—

"यामघोषोऽथ ताम्बी स्यान्मानरन्ध्रा विकालिका ।"
इति त्रिकाण्डशेषः ॥

मानवः, पुं, (मनोरपत्यम् मनोर्गोत्रापत्यं वा पुमान् । मनु + अण् ।) मनोरपत्यम् । मनुष्यः । इत्यमरः । २ । ६ । १ ॥ (यथा, महाभारते । १ । ७५ । १२.—१३ ।

"मनोर्वंशो मानवानां ततोऽयं प्रथितोऽभवत् ।
ब्रह्मक्षत्रादयस्तस्मान्मनोर्जातास्तु मानवाः ॥")

बालः । इति शब्दरत्नावली ॥ (मनुना प्रोक्तम् । मनु + अण् ॥ उपपुराणविशेषः । यथा, देवीभागवते । १ । ३ । १३—१४ ।

"सनत्कुमारं प्रथमं नारसिंहं ततः परम् ।
नारदीयं शिवञ्चैव दौर्वाससमनूत्तमम् ।
कापिलं मानवञ्चैव तथा चौशनसं स्मृतम् ॥")

मानवर्जितः, त्रि, (मानेन वर्जितः ।) मानरहितः । यथा, महाभारते । ३ । ४६ । ४८ ।

"तस्मात् त्वं नर्तन: पार्थ ! क्लीबमध्ये मानवर्जितः ।")

नीचः । इति धरणिः ॥

मानवी, स्त्री, (मानव + स्त्रीत्वात् ङीप् ।) मनुष्यस्त्रीजातिः । तत्पर्य्यायः । मानुषी २ मानुषी ३ नारी ४ । इति शब्दरत्नावली ॥ (यथा, वैद्यके । ६ । ४१ ।

"दिवौकसं कामयते न मानवी
नवौषधमाश्रि तवाननादिदम् ।")

शासनदेवताविशेषः । इति हेमचन्द्रः । १ । ४५ ॥ स्वायम्भुवमनुकन्या । इति महाभारतम् ॥ (यथा, भागवते । ३ । २३ । ३ ।

"स वै देवर्षिवर्य्यस्तां मानवीं समनुव्रताम् ।")

मानवीयः, पुं, (मानवानां ओषः वसिष्ठः ।) तारा-विद्यायाः पीठस्य उत्तरे वायव्यादीशपर्य्यन्तं पूज्यगुरुषट्क्तिविशेषः । यथा । तारावत्यम्बभानु-मत्यम्बजयाम्बविद्याम्बमहोदर्यम्बसुखानन्दनाथ-परानन्दनाथपारिजातानन्दनाथकुलेश्वरानन्द-नाथविरूपाक्षानन्दनाथश्चैतेषामाः पूजयेत् । एते मानवीयाः । तथा च तन्त्रे ।

"अथ तारागुरून् वक्ष्ये दृष्टादृष्टफलप्रदान् ।
ऊर्द्ध्वकेशो योगकेशो नीलकण्ठो वृषध्वजः ॥
दिशीवाः सिद्धिदा वत्स ! सिद्धाचान् शृणु
यत्नतः ।
वशिष्ठः कूर्म्मनाथश्च मीननाथो महेश्वरः ॥
हरिनाथो मानवीयान् शृणु वक्ष्यामि तद्-
गुरून् ।
तारावती भानुमती जयाविद्या महोदरी ॥
सुखानन्दः परानन्दः पारिजातः कुलेश्वरः ।
विरूपाक्षः कैरवी च कथितं तारिणीकुलम् ॥
आनन्दनाथशब्दान्ता गुरवः सर्व्वसिद्धिदाः ।
स्त्रियोऽपि गुरुरूपाश्च अत्यन्ताः परिकी-
र्त्तिताः ॥"
इति तन्त्रसारः ॥

मानव्यं, क्ली, (मानवानां समूहः इति । "ब्राह्मण-माणवकवाडवाट्ट्यन् ।"४ । २ । ४२ । इति यन् ।) मानवसमूहः । मानवानां समूहो मानव्यं विकारसंघेति शब्दः । मानवो बालः । मूर्द्धन्य-मध्यः दन्त्यसध्य इत्येके । इत्यमरटीकायां भरतः ॥ (मनोर्गोत्रापत्यं । "मनु + गोत्रादिभ्यो यञ् ।" ४ । १ । १०५ । इत्यनेन यञ् । मनु-वंशीये, त्रि ॥)

मानसं, क्ली, (मन एव । मनस् "प्रज्ञादिभ्यश्च" ५ । ४ । ३८ । इति स्वार्थे अण् ।) मनः । इत्य-मरः । १ । ४ । ३१ ॥ (यथा, मार्कण्डेये । १५ । ६१ ।

"यज्ञदानतपांसीह परत्र च न भूतये ।
भवन्ति तस्य यस्यार्त्तपरित्राणे न मानसम् ॥")

तस्य गुणा यथा,—

"परापरत्वं संख्याया: पृथ्वे वेगस्य मानसे ।"
इति भाषापरिच्छेदः ॥

(मनसि भवो जातो वा । मनस् + अण् ।) मनोभवे, त्रि । यथा, सङ्कल्पः कर्म्ममानसम् ॥ इत्यमरः । १ । ५ । २ ॥

"विषयेष्वतिसंरागो मानसो मल उच्यते ।"
इत्येकारशेषतत्त्वम् ॥

"अनूढानङ्गपीड़ेव ममेयं मानसी यथा ॥"
इति प्राच्यः ॥

मानसतापो यथा,—
"कामक्रोधभयद्वेषलोभमोहविषादजः ।
शोकासूयावमानेर्ष्या मात्सर्य्यादिभयस्तथा ॥
मानसोऽपि द्विजश्रेष्ठ ! तापो भवति नैकधा ॥"
इति विष्णुपुराणे ६ अंशे ५ अध्यायः ॥

त्रिविधमानसकर्म्म । यथा,—
"परद्रव्येष्वभिध्यानं मनसानिष्टचिन्तनम् ।
वितथाभिनिवेशश्च त्रिविधं कर्म्म मानसम् ॥"
इति तिथ्यादितत्त्वम् ॥

मानसरोगा यथा,—
कामक्रोधलोभमोहभयाभिमानदैन्यपैशुन्यविषादेर्ष्यासूयामात्सर्य्यप्रभृतयः । अथवा ।
उन्मादापस्मारमूर्च्छाभ्रमतमःसंन्यासप्रभृतयः ।
इति भावप्रकाशः ॥*॥ (मनसा सङ्कल्पेन कृतमित्यण् ।) सरोवरविशेषः । इति मेदिनी । से, ३१ ॥ स च कैलासे ब्रह्मणा निर्म्मितः । यथा,—
"कैलासश्चापि दुष्कम्पो दानवेन्द्रेण कम्पितः ।
यक्षराक्षसगन्धर्व्वैर्नित्यं सेवितकन्दरः ॥
श्रीमान्मनोहरश्चैव नित्यं पुष्पितपादपः ।
हेमपुष्करसंछन्नं तेन वैखानसं सरः ॥
कम्पितं मानसञ्चैव राजहंसनिषेवितम् ॥"
इति महाभारते हरिवंशे नारसिंहे २२८अः ॥
अपि च ।
"कैलासपर्व्वते राम ! मनसा निर्म्मितं परम् ।
ब्रह्मणा नरशार्दूल ! तेनेदं मानसं सरः ॥
तस्मात् सुस्राव सरसः सायोध्यामुपगूहते ।
सरःप्रवृत्ता सरयूः पुण्या ब्रह्मसरश्च्युता ॥"
इति रामायणे आदिकाण्डे २४ सर्गः ॥*॥
(पुं, नागविशेषः । यथा, महाभारते । १ । ५७ । १६ ।
"अमाहठः कामटकः सुषेणो मानसो वयः ।")
प्लाक्षद्वीपस्य वर्षविशेषः । यथा, मात्स्ये । ५३ । २३ ।
"श्वेतश्च हरितश्चैव जीमूतो रोहितस्तथा ।
वैद्युतो मानसश्चैव कृतुमान् सप्तमस्तथा ॥"
पुष्करद्वीपस्थपर्व्वतविशेषः । यथा, मात्स्ये ।
"द्वीपार्द्धस्य परिक्षिप्तः पश्चिमे मानसो गिरिः ।")
मानसजपः, पुं, (मानसेन कृतो जपः ।) धिया वर्णश्रेणुच्चारणम् । यथा,
"धिया यदक्षरश्रेणीं वर्णरूपदात्मिकाम् ।
उच्चरेदर्थसृष्ट्यै मानसः स जपः स्मृतः ॥
तत्त्वपे नियमो नास्त्येव । तथा च ।
"अशुचिर्वा शुचिर्वापि गच्छंस्तिष्ठन् स्वपन्नपि ।
मन्त्रैकशरणो विद्वान् मनसैव समभ्यसेत् ॥
न दोषो मानसे जाप्ये सर्व्वदेशेऽपि सर्व्वदा ॥"
इति तन्त्रसारः ॥

मानसतीर्थं, क्ली, (मानसं तीर्थमिव । रागाद्यभावात् तथात्वम् ।) रागादिरहितं मनः । यथा

सूत उवाच ।
"तीर्थानि कथितान्येवं भौमानि मुनिसत्तम ! ।
मानसानीह तीर्थानि फलदानि विशेषतः ॥
मनो निर्म्मलतीर्थं हि रागादिभिरनाविलम् ॥"
इति नारसिंहपुराणे ४६ अध्यायः ॥

मानसपूजा, स्त्री, (मानसकृता पूजा । प्राकृतपार्थिववत् समासः ।) मनोरचितद्रव्यकरणकसपर्य्या । यथा, हृत्पद्ममध्ये देवीं विभाव्य कुण्डलीपात्रसंस्थेन सहस्रारोद्भवेन पाद्यं देव्यास्यरणे दद्यात् । ततो मनश्चार्घ्यं दत्त्वा सहस्रदलपद्मभृङ्गारललितपरमाद्भुतजलेन आचमनीयं मुखे । पञ्चविंशति तत्त्वेन गन्धञ्च । अहिंसां विज्ञानं क्षमां दयां अलोभं अमोहं अमात्सर्य्यं अमायां अनहङ्कारं अरागं अद्वेषं इन्द्रियाणि द्वादश एतानि पुष्पाणि च प्रदापयेत् । ततस्तेजोरूपं दीपं वायुरूपं धूपं दद्यात् अम्बरं चामरं दर्पणं सूर्य्यं चन्द्रं छत्रं पद्मानु मेखलां आनन्दं हारमुत्तमं अनाहतध्वनिमर्थौ घण्टां निवेदयेत् । ततः सुधारसाम्बुधिं मांसपर्व्वतं ब्रह्माण्डपूरितं पायसञ्च दत्त्वा ।
"मनोनर्त्तनसत्तालैः प्रहारादिरसोद्भवैः ।
नृत्यैर्गीतैश्च वाद्यैश्च तोषयेत परमेश्वरीम् ॥"
एवं संपूज्य अभेदेन जपः कार्य्यः । इति तन्त्रसारे त्रिपुराप्रकरणम् ॥ * ॥ मानसैर्गुरुपूजा यथा, नीलतन्त्रे ।
"ततो मानसगन्धाद्यैः पूजयेत् स्वस्वमुद्रया ।
कनिष्ठा पृथिवीतत्त्वं तदयोगाङ्गन्धयोजनम् ॥
अङ्गुष्ठो गगनं तत्त्वं तेनैव पुष्पयोजनम् ।
तर्ज्जनी वायुतत्त्वं स्याद्धूपं तेनैव योजयेत् ॥
अनामा जलतत्त्वं स्यात्तेनैव योजयेच्च कम् ।
ततस्तु वाग्भवं जप्यादष्टोत्तरशतं सुधीः ॥
जपं समर्प्य भक्त्या च प्रणमेद्दण्डवद्भुवि ॥"
अपि च ।
"मिथुनं चिन्तयित्वा तु मानसैरुपचारकैः ।
भौतिकैः पूजयेद्विद्वान् मुद्रामन्त्रसमन्वितैः ॥
भूम्याकाशमरुद्वह्निवारिमन्त्रैः सविन्दुकैः ।
कनिष्ठाङ्गुलितर्ज्जन्यौ मध्यमानामिके तथा ॥
अङ्गुष्ठेन समायोगान्मुद्राः पञ्च प्रकीर्त्तिताः ।
पृथिव्यात्मकगन्धः स्यादाकाशात्मकपुष्पकम् ॥
धूपो वायुात्मकः प्रोक्तो दीपो वह्न्यात्मकः परः ।
रसात्मकञ्च नैवेद्यं पूजा पञ्चोपचारिका ॥
ततस्तु वाग्भवं जप्यादष्टोत्तरशतं सुधीः ॥"
इत्यन्नदानकल्पः ॥

अन्यच ।
"मानसैरुपचारैश्च संपूज्य कल्पयेन्मुदा ।
गन्धं भूम्यात्मकं दद्याद्भावपुष्पं ततः परम् ॥
धूपं वायुात्मकं देयं तेजसा दीपमेव च ।
नैवेद्यमन्नतं दद्यात् पानीयं वरुणात्मकम् ॥
अम्बरं सुकुरं दद्याच्चामरं छत्रमेव च ।
तत्तन्मुद्राविधानेन संपूज्यात्मगुरुं जपेत् ॥
यथाशक्ति जपं कृत्वा समाप्य कवचं पठेत् ॥"
इति कङ्कालमालिनीतन्त्रम् ॥

पूजाक्रमस्तु । निजगुरुं ध्यात्वासुकानन्दनाथासुकशक्त्याम्बाश्रीपादुकां पूजयामीति मानसैर्गन्धाक्षतकुसुमैरर्चयेत् । कनिष्ठाभ्यां लं पृथिव्यात्मकं गन्धं समर्पयामि नमः । अङ्गुष्ठाभ्यां हं आकाशात्मकं पुष्पं समर्पयामि नमः । तर्ज्जनीभ्यां यं वायुात्मकं धूपं समर्पयामि नमः । मध्यमाभ्यां रं वह्न्यात्मकं दीपं समर्पयामि नमः । अनामिकाभ्यां वं अमृतात्मकं नैवेद्यं समर्पयामि नमः । इति कुलमूलावतारकल्पसूत्रटीकायां तृतीयकाण्डम् ॥

मानसव्रतं, क्ली, (मानसकृतं व्रतम् । प्राकृतपार्थिववत् समासः ।) अहिंसादि । यथा,—
"अहिंसा सत्यमस्तेयं ब्रह्मचर्य्यमकल्कता ।
एतानि मानसान्याहुर्व्रतानि तु धराधरे ॥"
इति वराहपुराणम् ॥

मानसालयः, पुं, (मानसे आलयो यस्य ।) हंसः । इति राजनिर्घण्टः ॥

मानसिकं, त्रि, (मानस+ठञ् ।) मनोभवम् । मानसशब्दात् ष्ण्यिकप्रत्ययेन निष्पन्नम् ॥ (पुं, विष्णुः । यथा, महाभारते । १२ । ३३८ । ४ ।
"नमस्ते देवदेवेश ! निष्क्रिय !
निर्गुण ! मानसिक ! नामनामिक ! ।")

मानसी, स्त्री, (मानस+स्त्रीत्वात् ङीप् ।) विद्यादेवीविशेषः । इति हेमचन्द्रः । २ । १५ ॥ मनोभवा च ॥ (यथा, विष्णुपुराणे । १ । ७ । १ ।
"ततोऽभिध्यायतस्तस्य जज्ञिरे मानसीः प्रजाः ॥")

मानसूत्रं, क्ली, (मानस्य गात्रप्रमाणस्य तन्मानार्थं वा सूत्रम् ।) स्वर्णादिनिर्म्मितकटिसूत्रम् । इति धनञ्जयः । गोट् इति भाषा ॥

मानसौकाः, [स्] पुं, (मानसं सर ओको वासस्थानं यस्य ।) हंसः । इत्यमरः । २ । ५ । २३ । (यथा, महाभारते । ८ । ४१ । १३ ।
"वयं हंसाश्चरामेमां पृथिवीं मानसौकसः ।")

मानिका, स्त्री, (मानयति गर्व्वीकरोतीति । मन+णिच्+ण्वुल् टाप् अकारस्येत्वञ्च ।) मद्यम् । इति शब्दरत्नावली ॥ (माने प्रभवतीति । मान+ठक् ।) शराबः । इति वैद्यकपरिभाषा । शेर इति भाषा ॥

मानिनी, स्त्री, फलो वृक्षः । इति मेदिनी । ने, १०६ ॥ (मानं अस्त्यस्याः । मान+इनिः । ङीप् । मानवती च ॥ (यथा, गीतगोविन्दे । ६ । २ ।
"हरिरभिसरति वहति मधुपवने ।
किमपरमधिकसुखं सखि ! भवने ॥
माधवे माकुरु मानिनि ! मानमये ॥"
अभिमानवती च । यथा, कुमारे । ५ । ५३ ।
"इयं महेन्द्रप्रभृतीनधिश्रिय-
श्चतुर्दिगीशानवमत्य मानिनी ।
अरूपहार्य्यं मदनस्य निग्रहात्
पिनाकपाणिं पतिमामुमिच्छति ॥"
"मानिनीन्द्राणीप्रभृतीरतिशय्य वर्णितव्यमित्यभिमानवती ।" इति तट्टीकायां मल्लिनाथः ॥) राज्यवर्द्धनस्य पत्नी । यथा, मार्कण्डेये । १३६ । १०ः

"विदूरथस्य तनया दाक्षिणात्यस्य भूभृतः।
तस्य पत्नी बभूवाथ मानिनी नाम मानिनी ॥")

मानी, [न्]त्रि,(मानोऽस्यास्तीति। मान+इनिः।) मानविशिष्टः। इति मेदिनी। नि, १०६ ॥ (यथा, मार्कण्डेये। १२३। २२।

"ततस्ते भूभृतः सर्व्वे बहुशस्तेन मानिना।
निराकृताः सुनिर्विन्नाः प्रोचुरन्योन्यमाकुलाः॥")

सिंहः। इति राजनिर्घण्टः ॥

मानुषः, पुं, (मनोर्जातः। मनु+"मनोर्जातावञ् यतौ लुक् च।" ४।१।१६१। इत्यञ् युगागमश्च।) मनुष्यः। इत्यमरः। २।६।१॥ (यथा, मनौ। ६। २८४।

"चिकित्सकानां सर्व्वेषां मिथ्याप्रचरतां दमः।
असानुषेषु प्रथमो मानुषेषु तु मध्यमः॥"

मनुष्यस्येदम्। अण्। मनुष्यसम्बन्धिनि, त्रि। यथा, महाभारते। १३। ६। २०।

"अकृत्वा मानुषं कर्म्म यो दैवमनुवर्त्तते।
वृथा श्राम्यति संप्राप्य पतिं क्लीबमिवाङ्गना॥")

मानुषिकं, त्रि, (मनुष्यस्य भावः कर्म्म वा। मनुष्य+ठक्।) मनुष्यस्य कर्म्मादि। मनुष्यस्येदमितीदमर्थे ञिकप्रत्ययेन निष्पन्नम् ॥

मानुषी, स्त्री, (मानुषस्य स्त्री। मानुष+जातित्वात् ङीष्।) मनुष्यस्त्रीजातिः। यथा,—

मनुष्यी मानुषी नारी मानवी मानुषस्त्रियाम्।
इति शब्दरत्नावली ॥

(मनुष्य+अण्+ङीष्।) चिकित्साविशेषः। यथा,—

"आसुरी मानुषी दैवी चिकित्सा सा त्रिधा मता।"
इति शब्दचन्द्रिका ॥

मानुष्यं, क्ली, (मनुष्यस्य भावः। मनुष्यस्येदमिति वा। मनुष्य+अण्।) मनुष्यस्य भावः। मनुष्यत्वम्। (यथा, भागवते। ४। २३। २८।

"स वर्त्तितो वतात्मभुक् क्षुद्रक्षेम मदता भुवि।
लब्ध्वापवर्ग्यं मानुष्यं विषयेषु विषज्जते ॥")

मनुष्यशरीरम्। यथा,—

"मानुष्ये कदलीस्तम्भे निःसारे सारमार्गणम्।
यः करोति स संमूढो जलबुद्बुदसन्निभे ॥"
इति शुद्धितत्त्वे याज्ञवल्क्यवचनम् ॥

(मनुष्यसम्बन्धिनि, त्रि। यथा, महाभारते। १। १५३। ११।

"गच्छ जानीहि के न्वेते घोरते वनमाश्रिताः।
मानुष्यो बलवान् गन्धो घ्राणं तर्पयतीव मे ॥")

मानुष्यकं, क्ली, (मनुष्याणां समूहः। मनुष्य+"गोचोचोष्ट्रोरभ्रेति।"४।२।३६। इति वुञ्।) मनुष्यसमूहः। इत्यमरः। ३।२। ४३। (मनुष्यस्येदं मानुष+यत्। स्वार्थे कन्। (मनुष्यसम्बन्धिनि, त्रि। यथा, महाभारते। ५। ७७। ८।

"सुमन्त्रितं सुनीतञ्च न्यायतश्चोपपादितम्।
कृतं मानुष्यकं कर्म्म दैवेनापि विरुध्यते ॥")

मानोन्नकं, क्ली, (मनोन्नस्य भावः कर्म्म वेति। "द्वन्द्वमनोज्ञादिभ्यश्च।" ५।१।१३१। इति युञ्।) मनोज्ञता। मनोज्ञस्य भाव इत्यर्थे कण् प्रत्ययेन निष्पन्नम् ॥

मान्यं, क्ली, (मन्दस्य भावः कर्म्म वा। मन्द+"प्रत्यन्तपुरोहितादिभ्यो यक्।"५।१।१२८। इति यक्।) रोगः। इति हेमचन्द्रः ॥ मन्दता च। (यथा, कथासरित्सागरे। २४। १३५।

"विश्वस्ते च ततस्तस्मिन् पुरोधसि चकार सः।
मान्यमल्पनराहारक्षपीकृततनुर्द्दृया ॥")

मान्धाता, [तृ] पुं, (मां धास्यतीति। धेट्+तृच्।) युवनाश्वराजपुत्रः। तत्पर्य्यायः। युवनाश्वजः २। इति हेमचन्द्रः। ३। ३६४। तद्विवरणं यथा। 'तस्मात् प्रसेनजित् ततो युवनाश्वोऽभवत्। तस्य च पुत्रस्यालिनिर्च्चेदान्-सुनीनामाश्रममण्डले निवसतः कृपालुभिस्तैर्मुनिभिरपत्योत्पादनायेष्टिः कृता। तस्याश्चार्द्धरात्रे निवृत्तायां मन्त्रपूतजलपूर्णकलसं वेदीमध्ये निवेश्य ते सुनयः सुषुपुः। सुप्तेषु च तेष्वतीवलट्परीतः स भूपालस्तमाश्रममण्डलं विवेश। सुषुप्तांश्च तानृषीन् नवोत्थापयामास॥ तच्च कलसजलमपरिमेयमाहात्म्यं मन्त्रपूतं पपौ। प्रबुद्धाश्च ऋषयः पप्रच्छुः। केनेतन्मन्त्र-पूतं वारि पीतम्। अत्र हि पीते राज्ञोऽस्य युवनाश्वस्य पत्नी महाबलपराक्रमं पुत्रं जनयिष्यति। इत्याकर्ण्य स राजा अजानता मया पीतमित्याह। गर्भश्च युवनाश्वोदरेऽभवत्। क्रमेण च ववृधे। प्राप्तसमयश्च दक्षिणं कुक्षि-मवनीपतेर्निभिद्य निश्चक्राम। न चासौ राजा ममार। जातो नामेष कं धास्यतीति ते सुनयः प्रोचुः। अथागम्य देवराडब्रवीत्। मामयं धास्यति। ततोऽसौ मान्धाता नामतोऽभवत्। वक्त्रे चास्य प्रदेशिनी देवेन्द्रेण न्यस्ता तां पपौ। तावान्तमाविणीमासाद्यार्द्धेवेकेन ववर्द्धत। स तु मान्धाता चक्रवर्त्ती सप्तद्वीपां मर्द्धीं बुभुजे। भवति चात्र श्लोकः।

"यावत् सूर्य्य उदेतिस्म यावच्च प्रतितिष्ठति।
सर्व्वं तद्यौवनाश्वस्य मान्धातुः क्षेत्रमुच्यते ॥"

मान्धाता शशबिन्दुदुहितरं बिन्दुमतीमुपयेमे। पुरुकुत्समम्बरीषं मुचुकुन्दञ्च तस्यां पुत्रत्रय-मुत्पादयामास। पश्चाच्च दुहितरस्तस्यामेव तस्य नृपतेर्ब्बभूवुः।" इति विष्णुपुराणे ४ अंशे २ अध्यायः ॥

मान्यः, त्रि, (मान्यत इति। मान+कर्म्मणि ण्यत्।) अर्च्यः। तत्पर्य्यायः। पूज्यः २ प्रतीक्ष्यः ३ भगवान् ४ भट्टारकः ५। इति जटाधरः ॥ (यथा च मनौ। २। १३६।

"तेषान्तु समवेतानां मान्यौ स्नातकपार्थिवौ।"

प्रार्घनीयः। यथा, रामायणे। २। ८। १८।

"यथा वै भरतो मान्यस्तथा भूयोऽपि राघवः।
कौशल्यातोऽतिरिक्तञ्च मम शुश्रूषते बहु ॥"

"मान्यः प्रार्घनीयः श्रेयस्करः। तथा वहतु।" इति तट्टीकायां रामानुजः ॥)

मान्यस्थानं, क्ली, (मान्यस्य स्थानं।) पूज्यत्व-कारणम्। यथा,—

"वित्तं बन्धुर्वयः कर्म्म विद्या भवति पञ्चमी।
एतानि मान्यस्थानानि गरीयो यदुयदुत्तरम् ॥
पञ्चानां त्रिषु वर्णेषु भूयांसि गुणवन्ति च।
यत्र स्युः सोऽत्र मानार्हः शूद्रोऽपि दशमीं गतः ॥"

इति मानवे २ अध्यायः। कौर्म्मे ११ अध्याये-ऽप्येवम् ॥

मान्या, स्त्री, (मान्य+स्त्रियां टाप्।) मरुन्माला। यथा,—

"अनिर्म्मान्या तु मान्या च मरुन्माला च मोहना ॥"
इति शब्दमाला ॥

पूज्या च ॥

मापत्यः, पुं, (मा विद्यतेऽपत्यमस्य।) कामः। इति हलायुधः ॥

मापनः, पुं, (मापयति स्वर्णादिकमनेनेति। मा+णिच्+करणे ल्युट्।) तूलः। इति शब्द-चन्द्रिका ॥ परिमाणे, क्ली ॥ (स्त्रियामप्यत्र। यथा, महाभारते। १। ५१। १५।

"यस्मिन् देशे च काले च मापनेयं प्रवर्त्तिता ॥")

मामकं, त्रि, (ममेदम्। अस्मद्+"तवकममका-वेकवचने।" ४। ३। ३। इति अण् ममका-देशश्च।) मदीयम्। इति मेदिनी। के, १३८ ॥ (यथा, महाभारते। १। १०५। १२।

"ततो मामाह स सुनिर्गर्भसुतृड्ज मामकम्॥")

ममतायुक्तः। इति शब्दमाला ॥ यथा च महाभारते। ४। ५०। १७।

"अत्रयो मामिका बुद्धिः श्रूयतां यदि रोचते॥")

मामकः, पुं, (माम+स्वार्थे कन्।) मातुलः। इति मेदिनी ॥ के, १३८ ॥ ममायं वा ममेदमिति बुद्धिर्यस्य। कप्।) कृपणः। इति शब्दमाला ॥

मामकीनं, त्रि, (ममेदम्। अस्मद्+"तवकमम-कावेकवचने।"४। ३। ३। इति खण्। ममका-देशश्च।) मदीयम्। ममेदमित्यर्थे खीने स्त्रीलिङ्गे अस्मद एकत्वान्मदादेशे अस्य च ममकादेशे वृद्धौ मामकीनम्। इति दुर्गादासः ॥ (यथा, कथासरित्सारे। ३२। १४५।

"एतच्च मे कियत् किं हि न ब्रह्मा साधयाम्य-द्य मम।
प्रज्ञान मामकीनं च श्रूयतां वर्णयामि ते ॥")

मायः, पुं, (माया अस्यास्तीति। माया+अर्श आदित्वादच्।) पीताम्बरः। (यथा, महा-भारते। १३। २४। ३११।

"नमो विश्वाय मायाय चिन्ताचिन्ताय वे नमः ॥")

(मयस्यापत्यं पुमान्। मय+अण्।) असुरः। इति मेदिनी ॥ वे, ४६ ॥

माया, स्त्री, (मीयते ज्ञायतेऽनया इति। मा+"माङ्घाञसिभ्यो यः।" उणा० ४। १०६। इति यः टाप्।) इन्द्रजालादिः

तत्पर्य्यायः। शाम्बरी २। इत्यमरः। २। १०। ११॥ इन्द्रजालिः ३ कुहकम् ४ कुहटिः ५ शाम्बरिः ६। इति जटाधरः। शाम्बरी ७। इति शब्दरत्नावली॥ माति विश्वमस्यां मनी-षादिः। शम्बरस्य देत्यस्य इयं शाम्बरी तेन प्राङ्निर्म्मितत्वात्। इति भरतः॥ * ॥ बुद्धिः। इति मेदिनी। ये, ४६। (मीमिते जानाति संख्यात्वनयेति। मा+यः टाप्।) कृपा। दम्भः। इति नानार्थे हेमचन्द्रः॥ शठता। यथा,—

"माया तु शठता शाठ्यं कुहटिर्निकृतिश्च सा॥"

(प्रज्ञा। यथा, ऋग्वेदे। २। १७। ५।

"अधारयत् पृथिवीं विश्वधायस मस्तम्भान् मायया शाम्बरस्सः।"

"मायया प्रज्ञया।" इति तद्भाष्ये सायनः॥) राज्ञां क्षुद्रोपायविशेषः। यथा,—

"मायोपेक्षेन्द्रजालानि क्षुद्रोपाया इमे त्रयः॥" लक्ष्मीः। इति च हेमचन्द्रः॥ बुद्धमाता। इत्यमरकोषे मायादेवीसुतशब्ददर्शनात्। दुर्गा। यथा,—

"दुर्गे शिवेऽभये माये नारायणि सनातनि। जये मे मङ्गलं देहि नमस्ते सर्व्वमङ्गले॥

राजन्! श्रीवचनो माश्च याश्च प्रापणवाचकः। तां प्रापयति या सद्यः सा माया परिकीर्त्तिता॥ माश्च मोहार्थवचनो याश्च प्रापणवाचनः। तं प्रापयति या नित्यं सा माया परिकीर्त्तिता॥ इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे २७ अध्यायः॥ अपि च।

"विचित्रकार्य्यकारणा अचिन्तितफलप्रदा। स्वप्नेन्द्रजालवल्लोके माया तेन प्रकीर्त्तिता॥"

इति देवीपुराणे ४५ अध्यायः॥ ८॥ विसदृशप्रतीतिसाधनं माया। इति नागोजी-भट्टः॥ अघटनघटनपटीयसी माया। इति केचित्॥ ईश्वरशक्तिः। तस्या नामान्तरं यथा। प्रकृतिः २ अविद्या ३ अज्ञानम् ४ प्रधानम् ५ शक्तिः ६ अचा ७। सृष्टिकाले भगवान् आदौ मायां प्रकाशयामास। सा द्रष्टृदृश्यानुसन्धानरूपा कार्य्यकारणरूपा च। सत्त्वरजस्तमोगुणमयी। तस्याः शक्तिद्वयं आवरणं विक्षेपश्च। तस्या मायाया महत्तत्त्वं जातम्। तस्मादहङ्कारः। तस्मात् पञ्चभूतम्। तस्मान् ब्रह्माण्डम्। इति श्रीभागवतमतम्॥ (मायास्वरूपम्। यथा च पञ्चदश्याम्। ६। १२२—१४१।

"तत्त्वनिश्चयकामेन न्यायागमविचारिणाम्। एकैव प्रतिपत्तिः स्यात् तापत्र स्फुटमुच्यते॥ मायान्तु प्रकृतिं विद्यान्मायिनन्तु महेश्वरम्। अस्यावयवभूतैस्तु व्याप्तं सर्व्वमिदं जगत्॥ इति श्रुत्यनुसारेण न्यायो निर्णय ईश्वरे। तथा सत्यविरोधः स्यात् स्थावरान्तेश्वरादिनाम्॥ माया चैवं तमोरूपा तापनीये तदीरणात्। अणुभूतिं तत्र मानं प्रतिजज्ञे श्रुतिः स्वयम्॥ जड़ं मोहात्मकं तच्चेत्यनुभाव्यति श्रुतिः। आबालगोपं सृष्ट्वादानन्त्यं तस्य साक्षयोत्॥ अचिदात्मघटादीनां यत् स्वरूपं जड़ं हि तत्। यच्च कुण्ठीभवेद् बुद्धिः स मोह इति लौकिकाः॥ इत्थं लौकिकदृष्टेतत् सर्व्वैरप्यनुभूयते। युक्तिदृश्या त्वनिर्व्वाच्यं नासदासीदिति श्रुतेः॥ नासदासीद् विभातत्त्वान्नो सदासीच्च बाधनात्। विद्यादृश्या श्रुतं तुच्छं तस्य नित्यनिवृत्तितः॥ तुच्छानिर्व्वचनीया च वास्तवी चेत्यसौ त्रिधा। ज्ञेया माया त्रिभिर्बोधैः श्रौतयौक्तिकलौकिकैः॥ अस्य सत्त्वमसत्त्वञ्च जगतो दर्शयत्यसौ। प्रसारणाच्च सङ्कोचात् यथा चित्रपटस्तथा॥ अवस्तुत्वा हि माया स्यादप्रतीतेर्विना चितिम्। स्वतन्त्रापि तयैव स्यादसङ्गस्यान्यथाकृतेः॥ कूटस्थासङ्गमात्मानं जड़त्वेन करोति सा। चिदाभासस्वरूपेण जीवेशावपि निर्म्ममे॥ कूटस्थमनपाकृत्य करोति जगदादिकम्। दुर्घटैकविधायिन्यां मायायां का क्षमत्वतिः॥ द्रवत्वमुदके वह्नावौष्ण्यं काठिन्यमक्ष्मनि। मायाया दुर्घटत्वञ्च स्वतः सिध्यति नान्यथा॥ न वेत्ति मायिनं लोको यावत् तावच्चमत्कृतिम्। धत्ते मनसि पश्चात्तु मायैवेत्युपशाम्यति॥ प्रसरन्ति हि चोद्यानि जगदस्तुत्ववादिषु। न चोदनीयं मायायां तस्माच्चोद्यैकरूपतः॥ चोद्येऽपियदि चोद्यं स्यात् तच्चोद्ये चोद्यते मया। परिहार्य्यं ततश्चोद्यं न पुनः प्रतिचोद्यताम्॥ विस्मयैकशरीराया मायायाश्चोद्यरूपतः। अन्वेष्यः परिहारोऽस्या बुद्धिमद्भिः प्रयत्नतः॥ मायात्वमेव निश्चेयमिति चेत् तर्हि निश्चिनु। लोकप्रसिद्धमायाया लक्षणं यत् तदीक्ष्यताम्॥ न निरूपयितुं शक्या विस्मयं भासते च या। सा मायेतीन्द्रजालादौ लोकाः सम्मुतिमेदिरे॥")

विष्णुमायास्वरूपं यथा,—

"यामेतां भाषसे देव! मम मायेति नित्यशः। का माया कीदृशी विष्णो! किं वा मायेति चोच्यते।

श्रोतुमिच्छामि मायार्थं रहस्यं परमत्तमम्॥ ततस्तस्या वचः श्रुत्वा विष्णुर्मायाकरण्डकः। प्रहस्य मधुरं वाक्यं प्रत्युवाच वसुन्धराम्॥ भूमे! मा पृच्छ मायां मे यस्मां पृच्छसि सादरम्। तथा क्लेशं किमर्थं त्वं प्राप्यसे मद्विलोकनात्। अद्यापि मां न जानन्ति रुद्रेन्द्राः सपितामहाः॥ मम माया विशालाक्षि! किं पुनस्त्वं वसुन्धरे!॥ पर्ज्जन्यो वर्षते यत्र तच्छलेन प्रपूर्य्यते। देशो निर्ज्जलतां याति एषा माया मम प्रिये!॥ सोमोऽपि क्षीयते पक्षे पक्षे वापि विवर्द्धते। अमायां स न दृश्येत मायैवं मम सुन्दरि!॥ हेमन्ते सलिलं कूपे उष्णं भवति तत्त्वतः। भवेच्च शीतलं ग्रीष्मे मायैवं मम तत्त्वतः॥ पश्चिमां दिशमास्थाय यदर्कं याति भास्करः। उदेति पूर्व्वतः प्रातर्मायैवं मम सुन्दरि!॥ शोणितश्चैव शुक्रञ्च उभे प्राणिषु संस्थिते। गर्भे च जायते जन्तुर्मम मायैव चोत्तमा। जीवः प्रविश्य गर्भे तु सुखदुःखानि विन्दति। जातश्च विस्मरेत् सर्व्वमेषा माया ममोत्तमा॥ आत्मकर्म्माश्रितो जीवो नष्टसंज्ञो गतस्मृतिः। कर्म्मणा नीयतेऽन्यत्र मायैषा मम चोत्तमा॥ शुक्रशोणितसंयोगाज्जायन्ते यदि जन्तवः। अङ्गुल्यश्चरणौ चैव भुजौ शीर्षं कटिस्तथा॥ पृष्ठं तथोदरञ्चैव दन्तौष्ठपुटनासिका। कर्णौ नेत्रकपोलौ च ललाटं जिह्वया सदा॥ एतया मायया युक्ता जायन्ते यदि जन्तवः। तस्यैव जीर्य्यते जन्तोर्भुक्तं पीतञ्च वह्निना। व्ययञ्च स्रवते जन्तुरेषा माया ममोत्तमा॥ शब्दः स्पर्शश्च रूपञ्च रसो गन्धश्च पञ्चमः। अन्नात् प्रवर्त्तते जन्तुरेषा माया मम प्रिये!॥ सर्व्वत्तुषु निजाकारः स्थावरे जङ्गमे तथा। तत्त्वं न ज्ञायते तस्य मायैषा मम सुन्दरि!॥ आपो विद्यास्तथा भौमा आपो येषु प्रतिष्ठिताः। न च दृष्टिं प्रयान्त्यन्यत्र मायैषा परमा मम॥ दृष्टौ बहूदकाः सर्व्वे पल्वलानि सरांसि च। ग्रीष्मे सर्व्वाणि शुष्यन्ति एतन्मायाबलं मम॥ हिमवच्छिखरान्मुक्ता नाम्ना मन्दाकिनी नदी। गाङ्गना सा भवेद्गङ्गा मायैषा मम कीर्त्तिता॥ मेघा गृह्णन्ति सलिलं लवणात् सलिलार्णवात्। वर्षन्ति मधुरं लोके सर्व्वं मायाबलं मम॥ रोगार्त्ता जन्तवः केचिन् भक्षयन्ति महौषधम्। तस्य वीर्य्यं समाश्रित्य मायां तु विद्धाम्यहम्॥ औषधं दीयमानं तु जन्तुः पक्वत्वमेति यत्। निर्व्वार्य्यमौषधं कृत्वा कालो भूत्वा हराम्यहम्॥ प्रथमं जायते गर्भः पश्चाज्जायते वै पुमान्। जायते मध्यमं रूपं ततोऽपि जरया पुनः। तत इन्द्रियनाशश्च एतन्मायाबलं मम॥ एकबीजात् प्रकीर्णादि जायन्ते तानि भूरिशः। तत्राहन्तं विद्धामि मायायोगेन माधवि!॥ लोक एवं विजानाति गरुड़ो वहतेऽच्युतम्। भूत्वा वेगन गरुड़ो वहाम्यात्मानमात्मना॥ या एता देवताः सर्व्वा यज्ञभागेन तोषिताः। मायामेतामहं कृत्वा तोषयामि दिवौकसः॥ लोकाः सर्व्वे विजानन्ति देवा नित्यं मखाग्निनः। मायामेतामहं कृत्वा यजामि त्रिदशान् सदा॥ सर्व्वोऽपि यजते लोको यष्टारञ्च हरिष्यतिम्। मायामाङ्गिरसीं कृत्वा याजयामि दिवौकसः॥ सर्व्वे लोका विजानन्ति वरुणः याति सागरम्। मायान्तु वारुणीं कृत्वाहं रक्षामि महोदधिम्॥ सर्व्वे लोका विजानन्ति कुबेरोऽयं धनेश्वरः। कुबेरमायामादाय अहं रक्षामि तद्धनम्॥ एवं लोका विजानन्ति हरिः शक्रेण रक्षितः। शाक्रीं मायां समास्थाय मया वृत्रो निसूदितः॥ एवं लोका विजानन्ति आदित्यश्च ध्रुवो महान्। मेरुं मायामयं कृत्वा वहाम्यादित्यमेव च॥ एवं चाभाषते लोको जलं किन्नरयतेऽखिलम्। वड़वामुखमास्थाय पिबामि तदहं जलम्॥ वायुं मायामयं कृत्वा मेघेषु विक्षिपाम्यहम्। यदिदं भाषते लोकः कृत्वेवं तिष्ठते जगत्॥

देवा अपि न जानन्ति अन्तं कुत्र निष्ठति ।
मम मायानियोगेन तिष्ठते क्षौणधं वने ।
लोकी क्षेमं विजानाति राजा पालयते प्रजाः ।
राष्ट्रमायामहं कृत्वा पालयामि वसुन्धराम् ॥
ये तु वै द्वादशादित्या उदेष्यन्ति युगक्षये ।
प्रविश्य तानहं भूमे ! मायां लोके सृजाम्यहम् ॥
वर्षेण पांशुना भूमिर्लोकेषु वर्तते सदा ।
मायां पांशुमयीं कृत्वा पूरयाम्यखिलं जगत् ॥
वर्षते यत्र संवर्त्तो धाराभिर्मुसलाकृतिः ।
मायां संवर्त्तकीं कृत्वा पूरयाम्यखिलं जगत् ॥
यत् त्यजामि वराटोऽहं शेषस्योपरि वारिणि ।
अनन्तमायया चाहं धारयामि त्यजामि च ॥
वराहमायामादाय भूमे ! जानामि किञ्च वै ।
देवा यत्र निलीयन्ते सा माया मम कीर्त्तिता ॥
त्वयापि वैष्णवीं मायां कृत्वा जानासि किञ्च
तत् ।
धारितासि च सुश्रोणि ! वाराहं सप्तधैव तु ॥
माया तु मम देवीयं कृत्वा क्रीडार्थवं महीम् ।
मम मायावलं क्षेतद्वयेन तिष्ठाम्यहं जले ॥
प्रजापतिं सृजं रुद्रं रक्षामि च हरामि च ।
तेऽपि मायां न जानन्ति मम मायाविमो-
हिताः ॥
अथ पिष्टगणाश्चैव य ऋते सर्व्ववर्चसः ।
मायां पिष्टमयीं क्षेतां गृह्णामि हि च तत्त्वतः ॥
किन्तु मायेव सुश्रोणि ! अन्यच्च शृणु
सुन्दरि ! ॥"
इति वाराहे मायाचक्रम् ॥०॥
अथ मायास्तोत्रम् ।
शौनक उवाच ।
"शक्षिध्वजो महाराजः श्रुत्वा मायां गतः
कुतः ।
का वा मायास्तुतिः सूत ! वद तत्त्वविदांवर ! ।
या त्वत्तया विष्णुकया बलया सा विमुह्यते ॥"
सूत उवाच ।
"शृणुध्वं मुनयः सर्व्वे मार्कण्डेयाय पृच्छते ।
शुकः प्राह विशुद्धात्मा मायास्तवमनुत्तमम् ॥
तत् शृणुध्व प्रवक्ष्यामि यथार्थीतं यथाश्रुतम् ।
सर्व्वकामप्रदं नृणां पापतापविनाशनम् ॥"
शुक उवाच ।
"भक्षाटनगरं गत्वा विष्णुभक्तः प्रशक्षजः ।
आत्मसंसारमोक्षाय मायास्तवमतं जगौ ॥"
शक्षिध्वज उवाच ।
"ॐ ह्रींकारां सत्त्वसारां विमुद्धां
ब्रह्मादीनां मातरं वेदसंस्थाम् ।
तन्त्रीं स्वाहां भूतधात्रीकलाढ्यां
वन्दे वन्द्यां देवगन्धर्व्वसिद्धैः ॥
लोकातीतां दैत्यभीतां समीढ्यां
भूतैर्भव्यां यामनामाभिधानैः ।
नानारूपैर्देवतिर्य्यङ्मनुष्यै-
स्तामायारां ब्रह्मरूपां नमामि ॥
यस्या भाया चिक्रमद्भाति भूतै-
र्यं भावेत्तद्भावे विधातुः ।

विद्वद्गीतां कालकल्लोलरोलां
नीलापाङ्गीं चिन्नसंसारदुर्गाम् ॥
पूर्णां प्राच्यां दैत्यभ्यां शरण्या-
मार्द्रं शुष्कं मध्यतो या विभाति ।
कालो देवं कर्म्म सोपाधयो ये
तस्यां तासां तां विशिष्टां नमामि ॥
भूमौ गन्धो रसतापसु प्रतिष्ठा
रूपं तेजस्येव वायौ स्पृशत्वम् ।
खे शब्दो वै यद्विदा भाति नाना
तामाद्यां तां विश्वरूपां नमामि ॥
सावित्री त्वं ब्रह्मरूपा भवानी
भूतेशस्य श्रीपतेः श्रीस्वरूपा ।
शची शक्रस्यापि नाकेश्वरस्य
पत्नी चेष्टा भासि माये ! जगत्सु ॥
बाल्ये बाला युवती यौवने त्वं
वार्द्धक्ये या स्थविरा कालकल्पा ।
नानाकारैर्योगयोगेश्च धर्म्मी
भक्ष्या वै त्वं कामवत्सा विभासि ॥
वरेण्या त्वं वरदा लोकमिष्टा
साक्षी धन्या लोकमान्या सुकन्या ।
चण्डी दुर्गा कालिका कालिकाख्या
नानादेशे रूपवेशैर्विभासि ॥
तव चरणसरोजं देवि ! देवादिवन्द्यं
यदि हृदयसरोजे भावयन्तीह भक्ष्या
शुकशनमतिशुद्धं कृत्वरोचे स्मरन्ति
श्रुतियुगशुक्लहरे वा संस्तुतं धर्म्मसन्यम् ॥
जनयति जगदाद्ये सर्व्वसिद्धिञ्च तेषाम् ॥
मायास्तवमिदं पुण्यं शुकदेवेन भाषितम् ।
मार्कण्डेयादयश्चापि सिद्धिं लेभे शक्षिध्वजः ॥
लोकात्सुखे तपस्तप्त्वा हरिं ध्यात्वा वना-
न्तरे ।
सुदर्शनेन निहतो वैकुण्ठशरणं ययौ ॥"
इति श्रीकल्किपुराणेऽनुभागवते भविष्ये मायास्त्व कनविंशोऽध्यायः ॥ (शक्तिः सामर्थ्यं वा ।
यथा, ऋग्वेदे । ४ । ३ । २१ ।
"दासानामिन्द्रो मायया ।"
"मायया स्वकीयया शक्त्या ।" इति तद्भाष्ये सायणः ॥)

मायाकारः, पुं, (मायां इन्द्रजालशास्त्रं करोतीति । कृ + अण् ।) ऐन्द्रजालिकः । बाजीकर इति भाषा । तत्पर्य्यायः । प्रातिहारिकः २ । इत्यमरः । २ । १० । २१ ॥ मायां स्थलजलादौ जलस्थलादिज्ञानं करोतीति मायाकारः घञ् । प्रतिहरणं प्रतिहारो यात्राः भावे घञ् । स प्रयोजनमस्य प्रातिहारिकः ठिक् । ठित्वे त्रिरिति वृद्धिः । प्रतिहारक इत्यपि पाठः । तत्र प्रति प्रथमं सुष्ठु मनो गमने च हरति ज्ञाते न किञ्चिदिति प्रतिहारकः । एकाल्लात् स्वार्थेऽपि प्रातिहारकश्च घञि प्रतिहारश्च । इति तट्टीकायां भरतः ।

मायाकृत्, पुं, (मायां स्थलजलादौ जलस्थलादि ज्ञानं करोति कारयतीति । कृ + क्विप् । तुगा-

गमश्च । करोतिरत्रान्तर्भूतण्यर्थः ।) मायाकारः । यथा,—
"शाम्बरी शाम्बरी माया मायाकृत् भिक्षुके
नटे ।"
इति शब्दरत्नावली ॥

मायाजीवी, [न्] पुं, (मायया इन्द्रजालविद्यया जीवति जीवनयात्रां सम्पादयति इति, जीव + णिनिः ।) प्रातिहारिकः । इति हेमचन्द्रः । ३ । ५८६ ॥

मायातिः, पुं, (मायया सह याचति । यद्वा, मा याचतीति । याच + "अज्यतिभ्यां च ।" उणा० ४ । १३० । इति इन् ।) नरवलिः । यथा,—
"मायातीनाञ्च निर्णीतं शृणुतां मुनिसत्तम ।
वक्ष्यान्यथर्ववेदोक्तं फलहानिर्यतिक्रमे ॥
पिष्टमाल्यविहीनञ्च युवकं याधिवर्जितम् ।
विवाहितं दीक्षितञ्च परदारविहीनकम् ॥
ब्रह्मचारिकं विशुद्धञ्च सच्छूद्रं सलकं वरम् ।
तद्वन्नुभ्यो धनं दत्त्वा क्रीतं मूल्यातिरेकतः ॥
स्नापयित्वा च तं धन्यं संपूज्य वस्त्रचन्दनैः ।
माल्यैर्धूपैश्च सिन्दूरैर्दधिगोरोचनादिभिः ॥
तच्च वर्षं भ्रामयित्वा चरद्वारेण यत्नतः ।
वर्षान्ते च समुत्पन्ने दुर्गायै तं निवेदयेत् ॥
अष्टमीनवमीसन्धौ दद्यान्मायातिमेव च ।
इत्येवं कथितं सर्व्वं बलिदानप्रसङ्गतः ॥
बलिं दत्त्वा च मुक्त्वा च धृत्वा च कवचं बुधः ।
प्रणम्य दण्डवद्भूमौ दद्याद्विप्राय दक्षिणाम् ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे १६ अध्यायः ॥

मायादः, पुं, (मायया छलेन धनेनेत्यर्थः अत्ति भक्षयतीति । अद + अच् ।) क्षत्रीरः । इति त्रिकाण्डशेषः ॥

मायादेवीसुतः, पुं, (मायादेव्याः सुतः ।) बुद्धः । इत्यमरः । १ । २ । १५ ॥

मायाफलं, क्ली, फलविशेषः । माइफल इति भाषा । तत्पर्य्यायः । मायिफलम् २ मायिकम् ३ छिन्नाफलम् ४ मायि ५ । अस्य गुणाः । वातहरत्वम् । कटुत्वम् । उष्णत्वम् । श्लेष्मविशुद्धौषधकर्म्मकार्य्यादालत्वञ्च । इति राजनिर्घण्टः ॥

मायामोहः, पुं, (मायया मोहयति अपहरतीति । मुह + णिच् + अच् । माया च मोहश्च यस्येति वा ।) विष्णुदेहनिर्गतासुरमोहकपुरुषविशेषः । यथा,—
श्रीपराशर उवाच ।
"इत्युक्तो भगवांस्तेभ्यो मायामोहं प्रतीरतः ।
ततस्तावद्ददौ विष्णुः प्राह चेदं हरोपमान् ॥"
श्रीभगवानुवाच ।
"मायामोहोऽयमखिलान् दैत्यांस्तान्
मोहयिष्यति ।
ततो वध्या भविष्यन्ति वेदमार्गबहिष्कृताः ॥
स्थितौ स्थितस्य मे वध्या यावन्तः परिपन्थिनः ।
ब्रह्मणो येऽधिकारस्थ देवदैत्यादिका सुराः ॥
तद्गच्छत नभीः कार्य्या मायामोहोऽयमत्तः ।
गच्छतद्धोपकाराय भवतां भविता सुराः ॥'

मायावी

श्रीपराशर उवाच।
"इत्युक्ता प्रणिपत्येनं ययुर्देवा यथागतम्।
मायामोहोऽपि तैः सार्द्धं ययौ यत्र महासुराः॥"
इति विष्णुपुराणे ३ अंशे १७ अध्यायः॥

मायावती, स्त्री, (मायास्त्यस्यामिति। माया+मतुप्। मस्य वः। उगित्त्वात् ङीप्।) रतिः। कामपत्नी। इति जटाधरः॥ तस्या नामकारणं यथा,—

श्रीपराशर उवाच।
"एतस्मिन्नन्तरे प्राप्तः सह कृष्णेन नारदः।
अन्तःपुरचरीं देवीं रुक्मिणीं प्राह हर्षयन्॥
एष ते तनयः सुभ्रु! हृत्वा शम्बरमागतः।
हृतो येनाभवद्बालो भवत्याः सूतिकागृहात्॥
इयं मायावती भार्य्या तनयस्यास्य ते सती।
शम्बरस्य न भार्य्येयं शृणुतामत्र कारणम्॥
मन्मथे तु गते नाशं तद्वपरायणा।
शम्बरं मोहयामास मायारूपेण रूपिणी॥
अवायाद्युपभोगेषु रूपं मायामयं शुभम्।
दर्शयामास दैत्यस्य तस्येयं मदिरेक्षणा॥"
इति विष्णुपुराणे ५ अंशे २७ अध्यायः॥
(विद्याधरीविशेषः। यथा, कथासरित्सागरे। १३। ३५।
"अहं मायावती नाम राजन्! विद्याधराङ्गना।
इयन्तं कालमभवं शापदोषेण हस्तिनी॥"
राजकन्याविशेषः। यथाचैव। ११२। ११२।
"अभून्मलयसिंहाख्यो राजा राजगृहे पुरा।
तस्य मायावतीत्यासीद्देवेनाप्रतिमा सुता॥")

मायाविकः, त्रि, (मायया वसं आच्छादनं करोतीति ठन्।) परप्रतारकः। इति शब्दमाला॥ (मायारसिक इति वा पाठः॥)

मायावान्, [न्] पुं, (माया अस्त्यस्य। माया+"अस्मायामेधास्रजो विनिः।" ५। २। १२१। इति पक्षे मतुप्। मस्य वः।) कंसराजः। इति शब्दरत्नावली॥ मायायुक्ते, कपटयुक्ते च त्रि। (यथा, ऋग्वेदे। ४। १६। ६।
"ऋतिभिस्त्वमिषणो द्युम्नहूतौ नि मायावान्
ब्रह्मा दस्युरर्त्ते।"
"मायावान् कपटवान्।" इति तद्भाष्ये सायणः॥)

मायावी, [न्] पुं, (प्रशस्ता मायाकापट्यमस्त्यस्येति। माया+"अस्मायामेधास्रजो विनिः।" ५। २। १२१। इति विनिः।) मायाकारः। तत्पर्य्यायः। वंसकः २ मायी ३ मायिकः ४ ऐन्द्रजालिकः ५। इति जटाधरः॥ (यथा, मार्कण्डेये। २२। ७।
"मायावी दानवः सोऽथ मुनिरूपं समास्थितः।
स प्राह राजपुत्रं तं पूर्ववैरमनुस्मरन्॥")
बिडालः। इति राजनिर्घण्टः॥ (मोहनशक्तियुक्तः परमात्मा। यथा, पञ्चदश्याम्। ६।४।
"स्वतश्चिदन्तर्यामी तु मायावी सत्त्वसंस्थितः।
सत्त्वानां मूलसंस्थोऽत्र विराड्विद्युच्यते परः॥")

मायासीता, स्त्री, (मायाकल्पिता सीता।) योगेन अग्निकृतसीताप्रतिकृतिः। यथा,—

अग्निरुवाच।
"भगवन्! श्रूयतां वाक्यं कालेन यदुपस्थितम्।
सीताहरणकालोऽयं तत्रैव समुपस्थितः॥
दैवञ्च दुर्निवारञ्च न च दैवात् परं बलम्।
मत्सृष्टं मयि संन्यस्य छाया रक्षान्तिकेऽधुना॥
दास्यामि सीतां तुभ्यञ्च परीक्षासमये मम।
दैवैः प्रस्थापितोऽहञ्च न च विघ्नो भुनर्भुनः॥
रामस्तद्वचनं श्रुत्वा न प्रकाश्य च लक्ष्मणम्।
स्वीचकार च सच्छन्दं हृदयेन विदूयता॥
वह्निर्योगेन सीताया मायासीतां चकार सः।
तद्रूपगुणसर्व्वाङ्गीं ददौ रामाय नारद!॥
सीतां गृहीत्वा स ययौ गोप्यं वक्तुं निषिध्य च।
लक्ष्मणो नैव बुबुधे गोप्यमन्यस्य का कथा॥
लङ्कां गत्वा रघुश्रेष्ठो जघान सायकेन च।
सबान्धवं रावणञ्च सीतां संप्राप दुःखिताम्॥
ताञ्च वह्निपरीक्षाञ्च कारयामास सत्वरम्।
हुताशस्तञ्च काले च वास्तवीं जानकीं ददौ॥
उवाच छाया वह्निञ्च रामञ्च विनयान्विता।
करिष्यामीति किमहं तदुपायं वदस्व मे॥"

वह्निरुवाच।
"त्वं गच्छ तपसे देवि! पुष्करञ्च सुपुण्यदम्।
कृत्वा तपस्यां तत्रैव स्वर्गलक्ष्मीर्भविष्यसि॥
सा च तद्वचनं श्रुत्वा प्रतप्य पुष्करे तपः।
दिव्यं चिरञ्चवर्षञ्च स्वर्गलक्ष्मीरभूच्च ह॥
सा च कालेन तपसा यज्ञकुण्डसमुद्भवा।
कामिनी याज्ञवाक्याच्च द्रौपदी द्रुपदात्मजा॥
कृते युगे वेदवती कुशध्वजसुता शुभा।
त्रेतायां रामपत्नी सा सीतेति जनकात्मजा॥
तच्छाया द्रौपदी देवी द्वापरे द्रुपदात्मजा।
चिरायगीति सा प्रोक्ता विद्यमाना युगत्रये॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे १४ अध्यायः॥

मायासुतः, पुं, (मायायाः मायादेव्याः सुतः।) बुद्धः। इति हेमचन्द्रः। १। १५१॥

मायिकं, क्ली, (माया मोहनगुणः विद्यतेऽस्मिन्। माया+"व्रीह्यादिभ्यश्च।" ५। २। ११६। इति ठन्।) मायाफलम्। इति राजनिर्घण्टः॥ अन्यान्तरे मायिका मादका इत्यपि पाठः॥

मायिकः, पुं, (माया अस्त्यस्य। माया+"व्रीह्यादिभ्यश्च।" ५। २। ११६। इति ठन्।) मायाकारः। इति जटाधरः॥ (यथा, देवीभागवते। ४। १६। ४।
"यन्मायामोहितश्चाहं सदा वर्त्ते परात्मनः।
परवान् दारुपात्रालौ मायिकस्य यथा वशे॥"
मायाविशिष्टे, त्रि॥)

मायी, [न्] पुं, (माया अस्त्यस्य। माया+"व्रीह्यादिभ्यश्च।" ५। २। ११६। इति इनिः।) मायाकारः। तत्पर्य्यायः। धूर्त्तः २ वञ्चकः ३ शंबकः ४ कुहकः ५ दाम्भिकः ६ जालिकः ७। इति हेमचन्द्रः। ३। ४१॥

मारः

(मायायुक्ते, त्रि। यथा, कुमारे। २। ४६।
"यज्वभिः सम्भृतं हव्यं विततेष्वध्वरेषु सः।
जातवेदोमुखान्मायी मिषतामाच्छिनत्ति नः॥"
मायोपाधिके परमेश्वरे च। यथा, पञ्चदश्याम्। ६। १२३।
"मायान्तु प्रकृतिं विद्यान् मायिनन्तु महेश्वरम्॥")

मायुः, पुं, (मिनोति प्रक्षिपति देहे उष्माणमिति। मिञ् प्रक्षेपणे+"कृवापाजिमिस्वदिसाध्यशूभ्य उण्।" उणा०। १। १। इति उण्। "मीनाति मिनोतिदीङां लपि च।" ६। १। ५०। इत्यात्वम्। "आतो युक् चिण्कृतोः।" ७। ३। ३३। इति युक्।) पित्तम्। इत्यमरः। २। ६। ६२॥ (शब्दः। यथा, ऋग्वेदे। १। १६४। २८।
"कृकाणं धर्म्ममभिवावशाना मिमाति मायुं
पयते पयोभिः॥"
"मायुं शब्दं ममाति निर्म्माति करोति।" इति तद्भाष्ये सायणः॥ वाक्। इति निरुक्ते। १। ११॥)

मायुराजः, पुं, कुबेरपुत्रः। इति चिकाण्डशेषः॥

मायूरं, क्ली, (मयूराणां समूहः। मयूर+"प्राणिरजतादिभ्योऽण्।" ४। ३। १५४। इत्यण्।) मयूरसमूहः। इत्यमरः। २। ५। ४३॥ (मयूराणामिदमित्यण्।) तत्सम्बन्धिनि, त्रि॥ यथा, महाभारते। १३। १०४। ६०।
"आजं गव्यं तथा मांसं मायूरञ्चैव वर्ज्जयेत्॥")

मायूरिकः, पुं, (मयूरं हन्ति। मयूर+"पक्षिमत्स्यमृगान् हन्ति।" ४। ४। ३५। इति ठक्। मयूरग्राही। इति सिद्धान्तकौमुदी॥

मायूरी, स्त्री, अजमोदा। इति राजनिर्घण्टः॥

मारः, पुं, (मृ+भावे घञ्।) मृतिः। (यथा हरिवंशे। ३। ३१।
"क्ष्वेडाहुङ्कारहुङ्घटनिभः खण्डो नृपहा विदी-
र्घितिर्भयदः।")
म्रियन्ते प्राणिनोऽनेन। मृ+घञ्।) कामदेवः। (यथा, नैषधे। ४। ७६।
"अनुममार न मार! कथं नु सा
रतिरनिप्रथितापि पतिव्रता।
विरहिणीशतघातनपातकी
दयितयापि तयासि किमुज्झितः॥")
विघ्नः। इति मेदिनी। रे, ७६॥ (मृ+णिच्+घञ्।) मारणम्। इति हेमचन्द्रः। २। ३६॥ धुस्तूरः। इति शब्दचन्द्रिका॥ मारगणोत्पत्तिर्यथा,—

मार्कण्डेय उवाच।
"मनोभवस्य वचनं श्रुत्वाथ चतुराननः।
विवक्षुरपि तद्वाक्यं श्रुत्वानुत्साहकारकम्॥
सर्व्वस्य मोहने ब्रह्मा चिन्ताविष्टोऽभवन्नहि।
समर्थो मोहितुमिति निश्चित्यास सुदुर्मुदुः॥
निश्वासमारुतात्तस्य नानारूपा महाबलाः।
जाता गणा लोलजिह्वा लोलाश्चातिभयङ्कराः॥
तुरङ्गवदनाः केचित् केचिद्गजमुखास्तथा।
सिंहव्याघ्रमुखाश्चान्ये श्वराहखरानना॥

अष्टमार्क्षारवदनाः प्रारभास्याः शुकाननाः।
प्लवगोमायुवक्त्राश्च शरीरेषपसुखाः परे॥
गोरूपा गोसुखाः केचित्तथा पक्षिसुखाः परे।
महादीर्घा महाहस्ता महास्थूला महाकृशाः॥
पिङ्गाक्षा विरलाक्षाश्च त्र्यक्षैकाक्षा महोदराः।
एककर्णास्त्रिकर्णाश्च चतुष्कर्णास्तथापरे।
स्थूलकर्णा दीर्घकर्णा बहुकर्णा विकर्णकाः।
दीर्घांघ्रयः स्थूलनेत्राश्च सूक्ष्मनेत्रा विदृश्यः॥
चतुष्पादाः पञ्चपादास्त्रिपादैकपदास्तथा।
ह्रस्वपादा दीर्घपादाः स्थूलपादा महापदाः॥
एकहस्ताश्चतुर्हस्ता द्विहस्तास्त्रिभुजास्तथा।
विहस्ताश्च विरूपाक्षा गोधिकाकृतयः परे॥
मनुष्याकृतयः केचित् शिशुमारमुखाः परे।
क्रौञ्चाकारा बकाकारा हंससारसरूपिणः॥
तथैव मद्गुरचक्रकङ्ककाकमुखास्तथा।
अर्द्धनीलाः अर्द्धरक्ताः कपिलाः पिङ्गलास्तथा॥
नीलाः शुक्लास्तथा पीता हरिताश्चित्ररूपिणः।
अवादयन्त ते शृङ्गान् षट्पदान् पक्षिवादनः॥
मृदङ्गान् डिण्डिमांश्चैव गोमुखान् पणवांस्तथा।
वर्ल्वं जटाभिः पिङ्गाभिस्तुङ्गाभिश्च करान्विताः॥
निरन्तराभिर्विप्रेन्द्रा गणाः स्यन्दनगामिनः।
शूलहस्ताः पाशहस्ताः खड्गहस्ता धनुर्धराः॥
शक्त्यङ्कुशगदाबाणपट्टिसप्रासपाणयः।
नानायुधा महानादं कुर्वन्तस्ते महाबलाः॥
मारय च्छेदयेत्यूचुर्ब्रह्मणः पुरतो गणाः।
तेषान्तु वदतां तत्र मारय च्छेदयेत्युत।
योगनिद्राप्रभावात् स विधिर्वक्तुं प्रचक्रमे॥
अथ ब्रह्मागमाभाष्य तान् दृष्ट्वा मदनो गणान्।
उवाच वारयन् वक्तुं गणानामग्रतः स्मरः॥
मदन उवाच।
किं कर्म्मैते करिष्यन्ति कुत्र स्थास्यन्ति वा विधे!।
किं नामधेया एते वा तत्रैतान् विनियोजय॥
नियुङ्क्ष्वैतान् निजे कृत्ये स्थानं दत्त्वा च नाम च।
श्रुत्वा पश्चान्महामायाप्रभावं कथयस्व मे॥"
मार्कण्डेय उवाच।
"अथ तद्वाक्यमाकर्ण्य सर्व्वलोकपितामहः।
गणान् समदनानाह तेषां कर्म्मादिकं दिशन्॥
ब्रह्मोवाच।
"एते तूत्पन्नमात्रा हि मारयेति यदब्रुवन्।
सुदुर्मुहूर्तोऽभीषां नाम मारेति जायताम्॥
मारात्मकत्वादेषते मारः सन्तु च नामतः।
सदैव विघ्नं जन्तूनां करिष्यन्ति विनार्च्चनम्।
सर्वागमनं कर्म्म सुखमेषां मनोभव!॥
यत्र यत्र भवान् याता स्वकर्म्मार्थं यदा यदा।
गन्तारस्तत्र तत्रैते बाहाय्याय तदा तदा॥
चित्तोद्भ्रान्तिं करिष्यन्ति तदस्त्रवश्यवर्त्तिनाम्।
ज्ञानिनां ज्ञानमार्गञ्च विघ्नयिष्यन्ति सर्व्वदा॥
यथा सांसारिकं कर्म्म सर्व्वे कुर्वन्ति जन्तवः।
तथा चैते करिष्यन्ति सविघ्नमपि सर्व्वतः॥
इमे स्थास्यन्ति सर्व्वत्र वेगिनः कामरूपिणः।
त्वमेवैषां गणाध्यक्षः पञ्चयज्ञाङ्गभोजिनः।
नित्यक्रियावतां तोयभोगिनोऽपि भवन्त्विमे॥"
इति कालिकापुराणे ६ अध्यायः॥

मारकः, पुं, (म्रियन्ते प्राणिनः यस्मिन् येनेति वा। मृ+घञ्। ततः संज्ञायां कन्।) मरकः। तत्पर्य्यायः। मारिः२ उत्पातः३। इति त्रिकाण्डशेषः॥ पक्षिविशेषः। वाच् इति भाषा। तत्पर्य्यायः। घातिपक्षी २ ग्राहकः ३। इति भूरिप्रयोगः॥ मारणकर्त्तरि त्रि॥

मारजित्, पुं, (मारं कामं जितवान्। जि+क्विप्। तुगागमः।) बुद्धः। इत्यमरः। १। १। १३॥

मारणं, क्ली, (मार्य्यते इति। मृ+णिच्+भावे ल्युट्।) वधः। इत्यमरः। २। ८। ११४॥ (यथा, मनौ। ५। ३८।
"यावन्ति पशुरोमाणि तावत्कृत्वो ह मारणम्।
वृथापशुघ्नः प्राप्नोति प्रेत्य जन्मनि जन्मनि॥")
अभिचारविशेषः। यथा,—
"एवन्तु मारणं देवि! विशेषात् कथयामि ते।
सान्तं वह्निसमायुक्तं वामनेत्रविभूषितम्॥
कूर्च्चयुग्मं ततो देवि! अमुकं मारय मारय।
चतुर्दशाक्षरो मन्त्रो स्वाहान्तः शृङ्खनाशकः॥
खदिराङ्गारमादाय कुजाष्टम्यां विशेषतः।
लेखयेत् पुत्तलीं शत्रुस्वरूपां लौहपत्रके॥
निशायां मस्तके नेत्रे ललाटे हृदये करे।
नाभौ गुह्ये कटौ पृष्ठे क्रमोक्तेन पदद्वये॥
मन्त्रवर्णान् समालिख्य प्रतिष्ठां तत्र कारयेत्।
संहारमुद्रां बद्ध्वा तु ध्यायेद्देवीं जयप्रदाम्॥
दीर्घाकारां कृष्णवर्णां सदार्द्रस्तनमस्तकाम्।
वृषखड्गयुगलं हस्तं चर्व्वयन्तीं दिगम्बरीम्॥
शत्रुनाशकरीं देवीं ध्यायेत् शत्रुक्षयाय च।
एवं ध्यात्वेष्टिकाचूर्णैर्व्वामहस्तेन शुद्धरि!॥
ॐशत्रुनाशकर्य्यै नमः इति दत्त्वा महेश्वरि!।
हरिद्राचूर्णसहितां धारां दद्यादनेन तु॥
अमुकस्य शोणितं पिब पिबेति तत्परम्।
मांसं खादय खादय ह्रीँ नम इति मन्त्रम्॥
मध्याह्ने मध्यरात्रौ तु पूजयित्वा घृताष्टकम्।
जपेदेकादशाहे च रोगः स्यान्नाच संशयः॥
दण्डाधिकैकविंशाहे मृत्युरेव रिपोर्भवेत्॥
अथवान्यप्रकारेण शत्रुक्षयमहं वदे।
पुंगोशकृत् समादाय पूजयेदुष्णवारिणा॥
विपरीतक्रमेणैव जपपूजादिकं चरेत्।
महादेवाय नम इति पुंगोशकृत समाहरेत्॥
शिवाय नम इति मन्त्रेण घटनञ्च समाचरेत्।
पशुपतये नम इति प्राणान् संस्थापयेत्ततः॥
लौहपात्रे महेशानि! खदिराङ्गारयोगतः।
शत्रुप्रतिकृतिं लिख्य तत्र संस्थापयेत् शिवम्॥
ततो ध्यायेन्महारुद्रं ध्यानन्तु सुसमाहितः।
शत्रोर्व्वक्षःस्थितं रुद्रं ज्वलदग्निसमप्रभम्॥
वामहस्तधरं कृष्णं दक्षिणं प्राणकर्षणम्।
नरचर्म्माम्बरं देवं महाज्वालादिवेष्टितम्॥

पिनाकधृक् इहागच्छागच्छ इत्यादिनावाह्य यत्नतः।
शूलपाणये नम इति स्नापयेत् साधकोत्तमः॥
महेश्वराय नम इति पाद्यादिना प्रपूजयेत्।
ईशानादिक्रमेण मूर्त्तिमुद्रामेण प्रपूजयेत्॥
अग्निकोणादिपर्य्यन्तं पूर्व्ववरीत्या महेश्वरि!।
नमः शिवायेति मूलमष्टाविंशति संजपेत्।
हुँ चमर्म्मेति वामेन करेण तु विसर्ज्जयेत्॥
अजित केशव विष्णो हरे सत्य जनार्द्दन।
हंस नारायण स्वाहा मन्त्रमेव सकृज्जपेत्॥
हुँ नमो भगवते वासुदेवाय स्वाहा नम इत्यपि सकृज्जपेत्।
एवमेकादशाहेन शत्रूच्छेदनमञ्जसा।
अवश्यं जायते देवि! सत्यं सत्यं त्रिलोचने!॥"
इति योगिनीतन्त्रे पूर्व्वखण्डे ४ पटलः॥
अपि च।
"गवास्थिच्च गवास्थिच्च मूत्रनिर्म्माल्यमेव च।
अरेर्यो लिखनेत् द्वारे पशुत्वमुपयाति सः॥"
इति गारुडे १८६ अध्यायः॥

मारिः, स्त्री, (मार्य्यते इति। मृ+णिच्+इन्।) मारणम्। वधः। इति मेदिनी। रे, ७७॥ जनत्रयः। तत्पर्य्यायः। मारकः २ मरकः ३ उत्पातः ४। इति त्रिकाण्डशेषः॥

मारिचिकं, त्रि, (मरिच+"संस्कृतम्।" ४।४।३ इति ठक्।) मरिचेन संस्कृतम्। इति सिद्धान्तकौमुदी॥

मारितः, पुं, (मार्य्यते नाश्यते भक्षीक्रियत इति। मृ+णिच्+कर्म्मणि क्तः।) नष्टीकृतः। भक्षीकृतः। यथा, भावप्रकाशे।
"असम्यङ्मारितं स्वर्णं वलं वीर्य्यञ्च नाशयेत्।
करोति रोगान् मृत्युञ्च तद्धन्यात् यत्नतस्ततः॥"
अपि च।
"पूर्व्वं वङ्गसमं तालं चिन्नाम्लेन विमर्द्दयेत्।
ततो गजपुटे पक्त्वा पुनरम्लेन मर्द्दयेत॥
तालेन दशमांशेन याममेकं ततः पुटेत्।
एवं दशपुटैः पक्वं वङ्गं भवति मारितम्॥"
अपरञ्च।
आर्द्रत्वञ्च घनत्वञ्च तेजो गौरवचापलम्।
यस्यैतानि न दृश्यन्ते तं विद्यान्मृतसूतकम्॥"
अन्यच्च।
"शुद्धो रसो भवेद्ब्रह्मा मूर्च्छितस्तु जनार्द्दनः।
मारितो रुद्ररूपी स्यात् बद्धः साक्षात् सदाशिवः॥"
इति वैद्यदर्पणः॥

मारियसनवारकः, पुं,(मारियजन्यं यसनं तद्दारयतीति। दृ+णिच्+ण्वुल्।) राजर्षिविशेषः। यथा,—
"कुमारपालश्चौलुक्यो राजर्षिः परमार्हतः।
मृतखमोक्षो धर्म्मात्मा मारियसनवारकः॥"
इति हेमचन्द्रः। ३। ३७०॥

मारिषः, पुं, (मर्षति दोषानिति। मृष+अच्। निपातनात् सिद्धम्। यद्वा, मा रिष्यति हिनस्ति

मारी

कश्चिदपीति । रिष + क्तः ।) माषोरदौ श्रेष्ठः । इत्यमरः । १ । ७ । १६ ॥ (क्वचित् पुराणादावपि । यथा, देवीभागवते । १ । ११ । ६५ ।
"साहाय्यं ते करिष्यामि मत्तश्चाप्यमया सहा-
मते ! ।
भविता यदि संग्रामस्तव चेन्द्रेण मारिष ! ॥"
तथा च महाभारते । ७ । २६ । १२ ।
"दार्ष्यमाणाक्षतं दृष्ट्वाभगदत्तेन मारिष ! ॥")
तण्डुलीयशाकविशेषः । सरसा इति हिन्दी भाषा । तत्पर्य्यायः । कन्दरः २ मार्षिकः ३ । (शाकार्थे पर्य्यायो गुणाश्च यथा ॥ [यथ श्वेतमरुवा । लोहितमरुवा नवड़ा इति च लोके ।]
"मारिषो वाप्यको मार्षः श्वेतो रक्तश्च स क्षुतः ।
मारिषो मधुरः शीतो विष्टम्भी पित्तदूषणः ॥
वातश्लेष्मकरो रक्तपित्तदुष्टव्रणप्रणुत् ।
रक्तमार्षो गुरुर्नाति सक्षारो मधुरः सरः ।
श्लेष्मलः कटुकः पाके स्वल्पदोष उदीरितः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

मारिषा, स्त्री, (मारिष + टाप् ।) दक्षमाता ।
इति मेदिनी । षे, ४६ ॥ (यथा, मत्स्यपुराणे । ४ । ४६ ।
"सोमकन्याभवत् पत्नी मारिषा नाम विश्रुता ।
तेभ्यस्तु दक्षमेकं सा युक्तमग्रमजीजनत् ॥"
अस्या जन्मवृत्तान्तो यथा, विष्णुपुराणे । प्रथमांशे १५ अध्याये ।
"कण्डुर्नाम मुनिः पूर्व्वमासीद्वेदविदांवरः ।
तुरम्ये गोमतीतीरे स तेपे परमं तपः ॥
ततश्चोभाय सुरेन्द्रेण प्रक्षोचाप्सरा वराङ्गराः ।
प्रयुक्ता क्षोभयामास तद्दर्शि सा शुचिस्मिता ॥"
इत्यारभ्य—
"यावदित्थं च विप्रर्षिस्तां ब्रवीति सुमध्यमाम् ।
तावन्नलत्स्वेदजला सा बभूवातिवेपथुः ॥
प्रवेपमानां सततं स्विन्नगात्रलतां सतीम् ।
गच्छ गच्छेति सक्रोधमुवाच मुनिसत्तमः ॥
सा तु निर्भर्त्सिता तेन विनिष्क्रम्य तदाश्रमात् ।
आकाशगामिनी खेदं ममार्ज्ज तरुपल्लवैः ॥
दृष्ट्वादृश्यं यदा बाला तदभारुणपल्लवैः ।
निर्म्मार्ज्जमाना गात्राणि गलत्स्वेदजलानि वै ॥
ऋषिणा यत्तदा गर्भस्तस्या देहे समाहितः ।
निर्ज्जगाम स रोषाच स्वेदरूपी तदङ्गतः ॥
तं दृष्ट्वा जगृहुर्गर्भं एकं चक्रे तु मारुतः ।
मया चाप्यायितो गोभिः स तदा वव्रधे पुनः ॥
दृष्ट्वाग्यगर्भसंभूता मारिषास्या वरानना ।
तां प्रदास्यन्ति वो दृष्ट्वा कोपं एष प्रशाम्यताम् ॥
कण्डोरपत्यमेवं सा दृष्ट्वेभ्यश्च समुद्गता ।
ममापत्यं तथा वायोः प्रक्षोचाननया च सा ॥"
सूरस्य पत्नी । यथा, भागवते । ६ । २४ । २७ ।
"देवमीढ़स्य सूरस्य मारिषा नाम पत्न्य-
भूत् ॥")

मारी, स्त्री, (मारि + ङीष्कारादिति पक्षे ङीष् ।) धात्री । जननयः । इति मेदिनी । रे, ७६ ॥ माहेश्वरी शक्तिः । यथा,—

मारुतः

"मारी त्रिमुखेन जघान चान्यान्
खड्गाङ्गपातैरपरांश्च कौशिकी ।"
इति वामने ५२ अध्यायः ॥

मारीचः, पुं, (मरीचेरपत्यं पुमान् । मरीचि + अण् ।) राक्षसविशेषः । स च तारकाराक्षसीपुत्रः रावणस्यानुचरः सीताहरणकाले मायामृगरूपोऽसौ श्रीरामेण हतश्च । इति रामायणम् ॥ अस्य विवरणं यथा,—
"एतस्मिन्नन्तरे रामो ददर्श्य कनकं मृगम् ।
सीता तं प्रेरयामास तदर्थे यत्नपूर्व्वकम् ॥
संन्यस्य लक्ष्मणं रामो जानक्या रक्षणे वने ।
स्वयं जगाम तूर्णं तं विव्याध शायकेन च ॥
हा लक्ष्मणेति शब्दञ्च कृत्वाथ मायया मृगः ।
प्राणांस्त्यजन् सहसा पुरो दृष्ट्वा हरिं स्मरन् ॥
मृगदेहं परित्यज्य दिव्यं देहं विधाय च ।
रत्ननिर्म्माणयानेन वैकुण्ठं स जगाम ह ॥
वैकुण्ठद्वारे द्वार्य्यासीत् किङ्करौ द्वारपालयोः ।
जयश्च विजयश्चैव बलवांश्चाजिताभिधः ॥
शापेन मृगकादीनां संप्राप्य राक्षसीं तनुम् ।
पुनर्जगाम च द्वारमादौ च द्वारपालयोः ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे १२ अध्यायः ॥
कश्यपः । यथा,—
"इति संचिन्त्य भगवान् मारीचः कुरुनन्दन ! ।
उवाच किञ्चित् कुपित आत्मानञ्च विगर्हयन् ॥"
इति श्रीभागवते ६ स्कन्धे १८ अध्यायः ॥
(तथा च महाभारते । १३ । ८५ । १०७ ।
मरीचिभ्यो मरीचिस्तु मारीचः कश्यपोऽभवत् ॥")
कङ्कोलकम् । याजकब्राह्मणः । इति मेदिनी । चे, १७ ॥ राजवल्ली । इति जटाधरः ॥

मारीची, स्त्री, (मरीचेरियम् । इत्यण् । ङीप् ।) देवतामेदः । इति मेदिनी । चे, १७ ॥ सा तु मायादेवी । तत्पर्य्यायः । त्रिमुखा २ वज्रकालिका ३ विकटा ४ वज्रवाराही ५ गौरी ६ प्रोत्तिरथा ७ । इति त्रिकाण्डशेषः ॥

मारुण्डः, पुं, सर्पाण्डः । पत्न्याः । गोमयमण्डलम् । इति मेदिनी । डे, ३५ ॥

मारुतः, पुं, (मरुद्देव । मरुत् + "प्रज्ञादिभ्यश्च" ५ । ४ । ३८ । इति स्वार्थेऽण् ।) वायुः । इत्यमरः । १ । १ । ६५ ॥ स्त्रियतेऽनेन क्रुद्धेन गार्ह्यतीति रु ड उत् मरुत् मरुद्देव मारुतः स्वार्थे णः । इति तट्टीकायां भरतः ॥
(यथा, मनौ । ४ । १२२—१२३ ।
"अतिथिस्वाननुज्ञाप्य मारुते वाति वा भृशम् ।
रुचिरे च श्रुते गात्राच्छ्रमेण च परिप्लुते ।
सामध्वनावृग्यजुषी नाधीयीत कदाचन ॥")
अस्योत्पत्तिर्यथा,—
कश्यप उवाच ।
"पुत्रस्ते भविता भद्रे ! इन्द्रहा देववान्धवः ।
संवत्सरं व्रतमिदं यद्यसौ धारयिष्यति ॥"
अस्यौ यथावत् ।
"संवत्सरं पुंसवनं व्रतमेतदविप्लुतम् ।
धारयिष्यति चेत्तुभ्यं शक्रहा भविता सुतः ॥
वाढ़मित्यब्रुवेत्याथ दितौ राजन् ! महामनाः ।
कश्यपाद्गर्भमाधत्त व्रतचर्य्यां दधार सा ।
माल्यवत्सुरभिप्रायमिन्द्र आज्ञाय मानद ! ॥
शुश्रूषणेनाश्रमस्थां दितिं पर्य्यचरत् कविः ।
एवं तस्या व्रतस्थाया व्रतच्छिद्रं हरिर्नृप ! ॥
प्रेप्सुः पर्य्यचरत् शिक्षो मृगस्येव मृगाक्षनिः ।
नाधिगच्छद्व्रतच्छिद्रं तत्परोऽथ महीयते ! ॥
चिन्तां तीव्रां गतः शक्रः केन मे स्याच्छिवं
त्विह ॥
एकदा सा तु सन्ध्यायामुच्छिष्टा व्रतकर्षिता ।
अस्पृष्ट्वाचम्यपादौ च सुष्वाप विधिमोहिता ।
लब्ध्वा तदन्तरं शक्रो निद्रापहृतचेतसः ।
दितेः प्रविश्य उदरं योगेशो योगमायया ॥
चकर्त्त सप्तधा गर्भं वज्रेण कनकप्रभम् ।
रुदन्तं सप्तधैकैकं मा रोदीरिति तान् पुनः ।
तमूचुः प्राच्यमानास्ते सर्व्वे प्राञ्जलयो नृप ! ॥
किं न इन्द्र जिघांससि भ्रातरो मरुतस्तव ।
मा भैष्ट भ्रातरो मह्यं यूयमित्याह कौशिकः ॥
अनन्यभावान् पार्थदानात्मनो मरुतां गणान् ।
न ममार दितेर्गर्भः श्रीनिवासानुकम्पया ॥
सजूरिन्द्रेण पप्राथ देवास्ते मरुतोऽभवन् ।
यपोह्य माल्यदोषं ते हरिणा सोमपाः कृताः ॥
दितिरुत्थाय ददृशे कुमारानलप्रभान् ।
इन्द्रेण सहितान्देवी पर्य्यतुष्यदनिन्दिता ॥
अथेन्द्रमाह तातार्हसादित्यानां भयावहम् ।
अपत्यमिच्छन्त्यचरं व्रतमेतं सुदुष्करम् ॥
एकः सङ्कल्पितः पुत्रः सप्तसप्तगणाभवन् कथम् ।
यदि ते विदितं पुत्र ! सत्यं कथय मा वृथा ॥
इन्द्र उवाच ।
अम्ब ! तेऽहं व्यवसितमुपधार्य्य गतोऽन्तिकम् ।
लब्ध्वान्तरोऽच्छिनं गर्भमकृतद्युभिर्न धर्म्मदृक् ॥
छिन्नो मे सप्तधा गर्भ आसन् सप्त कुमारकाः ।
तेऽपि चैकैकशो दृक्षाः सप्तधा नापि मन्निरे ॥
ततस्तत्परमाश्चर्य्यं वीक्ष्य व्यवसितं मया ।
महापुरुषपूजायाः सिद्धिः काप्यनुपङ्गिकी ॥
तदिदं मम दौर्ज्जन्यं बालिशस्य महीयसि ! ।
क्षन्तुमर्हसि मातस्तं दिष्ट्या गर्भो हतोत्थितः ॥
श्रीशुक उवाच ।
इन्द्रस्याभ्यनुज्ञातः शुद्धभावेन तुष्यता ।
मरुद्भिः सह तां नत्वा जगाम त्रिदिवं प्रभुः ॥"
इति श्रीभागवते ६ स्कन्धे १८ अध्यायः ॥
(जनपदविशेषः । यथा, महाभारते । ६ । ४७ । ४६—५० ।
"मारुता धेनुकाश्चैव तङ्गणाः परतङ्गणाः ।
वाह्लीकास्तित्तिराश्चैव चोलाः पाण्ड्याश्च
भारत ! ॥
एते जनपदा राजन् ! दक्षिणं पक्षमाश्रिताः ॥"
अग्निभेदः । यथा, गृह्यसंग्रहपरिशिष्टे । १ । २ ।
"अग्निस्तु मारुतो नाम गर्भाधाने विधीयते ॥"
मरुत्सम्बन्धिनि, त्रि । यथा, ऋग्वेदे । २ । ११ । १४ ।

"रासि क्षयं रासि मित्रमस्मे रासि शूर्ध इन्द्र मारुतं नः ॥"
"मारुतं मरुतां देवविशां सम्बन्धि।" इति तद्भाष्ये सायणः ॥)

मारुतव्रतं, क्ली, (मारुतस्य व्रतमिव व्रतं नियमोऽस्य।) रांजधर्मविशेषः। यथा,—
"प्रविश्य सर्वभूतानि यथा चरति मारुतः।
तथा चरेः प्रवेष्टव्यं व्रतमेतद्धि मारुतम् ॥"
इति मात्स्ये २०० अध्यायः ॥

मारुतात्मजः, पुं, (मारुतस्यात्मजः।) हनूमान्। इति जटाधरः ॥ (भीमश्च ॥)

मारुतापहः, पुं, (मारुतमपहन्ति। हन + डः।) वरुणवृक्षः। इति राजनिर्घण्टः ॥ वायुनाशके, त्रि ॥

मारुताशनः, पुं, (मारुतोऽशनमस्य। अत्तीति। अश + ल्युः।) मारुतानां अशनो भक्षकः।) सर्पः। पवनाशन इत्यमरदर्शनात्। (यथा, महाभारते। ५। १०६। १३।
"भक्तः प्रगृह्य महीं वै बाहुभ्यां संश्रितव्रतः।
स्थितः स्थाणुरिवाभ्यासे निश्चेष्टो मारुताशनः ॥")
वायुमात्रभक्षके, त्रि ॥ (कार्त्तिकेयसैनिकविशेषः। यथा, महाभारते। ९। ४५। ६०।
"विद्युन्नाभो धनुर्वक्त्रो जाठरो मारुताशनः ॥")

मारुतिः, पुं, (मारुतस्यागत्यं पुमान्। मरुत + "अत इञ्।" ४। १। ९५। इति इञ्।) हनूमान्। इति शब्दरत्नावली ॥ (यथा, रघौ। १२। ६०।
"प्रवृत्तावुपलब्धायां तस्याः सम्पातिदर्शनात्।
मारुतिः सागरं तीर्णः संसारमिव निर्ममः ॥")
भीमसेनः। इति जटाधरः ॥ (यथा, देवीभागवते। २। ७। २१।
"तच्छ्रुत्वा वचनं भ्रातुर्ज्येष्ठस्यामिततेजसः।
संग्रहेऽस्य महाबाहुर्मारुतिः कुपितोऽब्रवीत्॥")

मार्कः, पुं, भृङ्गराजः। इति रत्नमाला ॥

मार्कण्डः, पुं, (वृकण्डोरपत्यम्। वृकण्डु + अण्।) मार्कण्डेयमुनिः। इति शब्दरत्नावली ॥

मार्कण्डिका, स्त्री, लताविशेषः। भूइ खखसा इति हिन्दीभाषा ॥ सा तु काकरोलभेदः। तत्पर्य्यायः। भूमिचरी २ मार्कण्डी ३ वृद्धरेचनी ४। अस्या गुणाः। कृमिहरत्वम्। ऊर्ध्वाधःकायशोधनत्वम्। विषदुर्गन्धकासगुल्मोदरनाशित्वञ्च। इति भावप्रकाशः ॥

मार्कण्डेयी, स्त्री, भूम्यामलकम्। इति राजनिर्घण्टः ॥

मार्कण्डेयः, पुं, (वृकण्डोरपत्यं। वृकण्डु + शुभ्रादिभ्यश्च।"४। १। १२३। इति ढक्।) वृकण्डुमुनिपुत्रः। जन्मतिथ्यादौ पूजायां तस्य ध्यानं यथा,
"द्विभुजं जटिलं सौम्यं सुदृढं चिरजीविनम्।
मार्कण्डेयं नरो भक्त्या पूजयेच्च चिरायुषम् ॥"
तस्य प्रार्थनामन्त्रः।
"चिरजीवी यथा त्वं भो भविष्यामि तथा मुने!।
रूपवान् वित्तवांश्चैव श्रिया युक्तश्च सर्व्वदा ॥
मार्कण्डेय महाभाग! सप्तकल्पान्तजीवक!।
आयुरिष्टार्थसिद्ध्यर्थमस्माकं वरदो भव ॥"
इति तिथ्यादितत्त्वम् ॥

तस्योत्पत्त्यादिर्यथा,
मार्कण्डेय उवाच।
"देवौ धातृविधातारौ भृगोः ख्यातिरजायत।
श्रियश्च देवदेवस्य पत्नी नारायणस्य या ॥
आयतिर्नियतिश्चैव मेरोः कन्ये महात्मनः।
भार्ये धातृविधात्रोस्ते तयोर्जातौ सुतावुभौ ॥
प्राणश्चैव वृकण्डुश्च पिता मम महायशाः।
मनस्विन्यामहं तस्मात् पुत्रो वेदशिरा मम ॥
धूम्रवत्यां समभवत् प्राणस्यापि निबोध मे ॥"
इति श्रीमार्कण्डेयपुराणे वृत्रसर्गाध्यायः ॥
अपि च।
पुलस्त्य उवाच।
"अथ ते संप्रवक्ष्यामि मार्कण्डेयोत्पत्तिमुत्तमाम्।
पुरा कल्पे मुनिः पूर्व्वं वृकण्डुर्नाम विश्रुतः ॥
भृगोः पुत्रो महाभागः सभार्य्यस्तप्तवांस्तपः।
तस्य पुत्रस्तदा जातो वसतस्तु वनान्तरे ॥
स पञ्चवर्षको जातो बाल एव गुणान्वितः।
ज्ञानिना स तदा दृष्टो भ्रमित्वा लघुपराक्रमे ॥
स्थित्वा च सुचिरं कालं जीवनञ्च ततो दृतम्।
वीक्ष्य चिन्तापरो ज्ञानी किं वर्षो बालकस्तव ॥
दृतं खण्डितम्।
संख्यया चाष्टवर्षाणि जातानीति न्यवेदयत्।
वृकण्डुनैव सुक्तस्तु स ज्ञानी वाक्यमब्रवीत् ॥
मासमायुश्च पुत्रस्य तेऽवशिष्टं मुनीश्वर!।
नैव शोकस्त्वया कार्य्यः सत्यमेतदुदाहृतम् ॥
एतत् श्रुत्वा वचो भीम्र! ज्ञानिना यदुदाहृतम्।
व्रतोपनयनं चक्रे बालकस्य पिता तदा ॥
आह चैनं पिता पुत्रमृषिं खमभिवादय।
एवमुक्तः स वै पित्रा ऋषिं भक्त्या ननाम सः ॥
एतस्मिन्नन्तरे तत्र प्रदीप्ताः पावकोपमाः।
मार्गेणापि समायातास्तेन सप्तर्षयोऽमलाः ॥
बालेन तेन दृष्टास्ते सर्व्वे समभिवादिताः।
चायुष्मान् भव तेऽवोचन् स जहौ दण्डमेखलाम् ॥
उत्थास्ते च पुनर्व्वार्गां पश्यन्तः चीर्णजीवितम्।
दिनानि पञ्च ते चायुर्ज्ञात्वा भीताभवन् पुनः ॥
तमुत्क्षिप्य ब्राह्मणा वै गतास्ते ब्रह्मणोऽन्तिकम्।
प्रतिमुच्य च तं बालं प्रणिपेतुः पितामहम् ॥
आयुष्मान् भव इत्याह तेन ब्रह्माभिवादितः।
चिरायुर्ब्रह्मणा बालः प्रोक्तः स ऋषिसन्निधौ ॥
ततस्ते मुनयः प्रीताः श्रुत्वा वाक्यं पितामहात्।
पितामहस्तु सप्तर्षीन् दृष्ट्वा प्रोवाच विस्मितान् ॥
कार्य्येण येन वा याता; कोऽयं बालो निवेद्यताम्।
ततः सप्तर्षयो राजन्! सर्व्वं तस्मै न्यवेदयन् ॥
भृगोः सुतुर्मृकण्डुस्तु चीर्णायुस्तस्य बालकः।
अल्पायुश्चैतत्तस्य वृहास्तेनास्य मेखलाः ॥
यज्ञोपवीतं दण्डञ्च दत्त्वा तेन प्रबोधितः।
यं किञ्चित् पश्यसे लोकं स्थावरं भूतजे शनम् ॥
तस्याभिवादनं कार्य्यमेवमाह पितामहः।
तावद्भवसनेनाथ स्थितौ दृष्टा; परिभ्रमन् ॥
एकत्वमार्षम्।
तीर्थयात्राप्रसङ्गेन दैवयोगात् पितामह!।
चिरायुर्भव वै विप्र! वाक्यैत्यस्माभिरीरितम् ॥
कथं चिरायुः स्याद्विप्रबालकः साम्प्रतं प्रभो!
कथं नातृप्तिनो देव! भवामो भवता वयम् ॥
एवमुक्तस्तदा तैस्तु ब्रह्मा लोकपितामहः।
ऋतवाचो भविष्यामः सर्व्वे एव वयं स्थिताः ॥
मनुसप्तमायुषा बालो मार्कण्डेयो भविष्यति।
ऋषीणां सुस्थतत्त्वानां सततञ्चायो भविष्यति ॥
कल्पस्यादौ तथा चान्ते इति मुनिभिरुत्तमैः ॥
एवमुक्ते मुनयो बालं ब्रह्मा लोकपितामहः।
सम्बोध्य प्रेषयामास भूयोऽप्येवं परन्तप!॥
तीर्थयात्रां गता विप्रा मार्कण्डेयो निजं गृहम्।
जगाम गत्वा तं विप्रं पितरं च तथाब्रवीत् ॥"
इति पाद्मे स्वर्गखण्डे ६० अध्यायः ॥
अपरञ्च।
व्यास उवाच।
"मार्कण्डेयेन मुनिना यथा वृत्रः पराजितः।
तथा ते कथयिष्यामि शृणु वत्स! महामते!॥
भृगोः पौत्रो महाभागो बालत्वे च महाद्युतिः।
वत्सरे बल्लभो बालः पिता तस्य कृतक्रियः ॥
स तस्मिन् वै जातमात्रे आदेशी कविदब्रवीत्।
वर्षे द्वादशमे पूर्णे वृत्रस्य भविष्यति ॥
श्रुत्वा तन्मातापितरौ दुःखितौ तौ बभूवतुः।
तौ दृष्ट्वा दुःखसम्तप्तौ मार्कण्डेयो महामतिः ॥
उवाच वचनं तत्र किमर्थं दुःखमीदृशम्।
वक्तुमर्हसि दुःखस्य कारणं मम पृच्छतः ॥
कथयामास तत् सर्व्वमादेशी यदुवाच ह।
तत् श्रुत्वा तौ मुनिः प्राह मातरं पितरं पुनः।
पित्रा सार्द्धं त्वया मातर्न कार्य्यं दुःखमन्वहम्।
अपनेष्यामि मे वृत्रं तपसा नात्र संशयः।
यथा चाहं चिरायुः स्यां तथा कुर्य्यामहं तपः ॥
सूत उवाच।
इत्युक्त्वा तौ समाश्वास्य पितरौ वनमभ्यगात्।
तत्र विष्णुं प्रतिष्ठाप्य गन्धपुष्पादिभिः क्रमात्।
पूजयामास देवेशं मार्कण्डेयो महामुनिः ॥
पूजयित्वा हरिं तत्र तपस्तेपे सुदुष्करम्।
निराहारो मुनिस्तत्र वर्षमेकमतन्द्रितः ॥
माघोक्तस्मरणासन्नदिने तत्र महामतिः।
स्नात्वा यथोक्तविधिना कृत्वा विष्णोस्तथार्चनम्
हृदि कृत्वेन्द्रियग्रामं विष्णुध्यानान्तरात्मना।
आसनं स्वस्तिकं बद्ध्वा कृत्वासौ प्राणसंयमम् ॥
ओंकारोच्चारणाद्धीमान् हृदि पद्मं विकाशयन्
तन्मध्ये रविसोमाग्निमण्डलानि यथाक्रमम् ॥
कल्पयित्वा हरेः पीठं तस्मिन्नेव सनातनम्।
पीताम्बरधरं विष्णुं शङ्खचक्रगदाधरम्।
ब्रह्मरूपं हरिं ध्यायंस्ततो मन्त्रमुदीरयन् ॥
इत्येवं ध्यायतस्तस्य मार्कण्डेयस्य धीमतः।
मनस्तत्रैव संलग्नं देवदेवजगत्पतौ ॥

ततो गमालयात्तत्र आगता यमकिङ्कराः ।
पाशहस्तास्तु तं नेतुं विष्णुदूतेस्तु ते हताः ॥
सुबलैर्हन्यमानास्ते इदमुक्ता पुनः पुनः ।
वयं निहता गच्छामो मृत्युरेवागमिष्यति ॥
आगत्य स्वयमेवात्र मृत्युः पार्श्वे महात्मनः ।
मार्कण्डेयस्य बभ्राम विष्णुकिङ्करशङ्कया ॥
ते चाप्युद्गम्य सुबलान्यभ्युर्विष्णुकिङ्कराः ।
विष्णाज्ञया हनिष्यामो मृत्युमस्येति संस्थिताः ॥
ततो विष्णुर्पितमना मार्कण्डेयो महामतिः ।
तुष्टाव प्रणतो भूत्वा देवदेवं जनार्दनम् ॥
विष्णुनैवोपदिष्टन्तु स्तोत्रं कर्म्मे महात्मनः ।
स्वभावितेन मनसा तेन तुष्टाव माधवम् ॥
ॐ नमो भगवते वासुदेवाय ।
नारायणं सहस्राक्षं पद्मनाभं पुरातनम् ।
प्रणतोऽस्मि हृषीकेशं किन्नो मृत्युः करिष्यति ॥
गोविन्दं पुष्करीकाक्षमनन्तमजमव्ययम् ।
केशवेष प्रपन्नोऽस्मि किन्नो मृत्युः करिष्यति ॥
वासुदेवं जगद्योनिं भानुमन्तमतीन्द्रियम् ।
दामोदरं प्रपन्नोऽस्मि किं मे मृत्युः करिष्यति ॥
शङ्खचक्रधरं देवं क्षुत्स्वरूपिणमव्ययम् ।
अधोक्षजं प्रपन्नोऽस्मि किं मे मृत्युः करिष्यति ॥
वाराहं वामनं विष्णुं नारसिंहं जनार्दनम् ।
माधवेष प्रपन्नोऽस्मि किं मे मृत्युः करिष्यति ॥
पुरुषं पुष्करं बीजं क्षेमबीजं जगत्पतिम् ।
लोकनाथं प्रपन्नोऽस्मि किं मे मृत्युः करिष्यति ॥
भूतात्मानं महात्मानं यज्ञयोनिमयोनिजम् ।
विश्वरूपं प्रपन्नोऽस्मि किंमे मृत्युः करिष्यति ॥
सहस्रशिरसं देवं शक्राद्यैः सनातनम् ।
महायोगं प्रपन्नोऽस्मि किं मे मृत्युः करिष्यति ॥
इत्युदीरितमाकर्ण्य स्तोत्रं तत्र महात्मनः ।
अपयातस्ततो मृत्युर्विष्णुदूतैश्च पीडितः ॥
इति तेन जितो मृत्युर्मार्कण्डेयेन धीमता ।
प्रसन्ने पुण्डरीकाक्षे नास्ति दुर्लभम् ॥
स्त्वाष्टकमिदं पुण्यं मृत्युप्रशमनं शुभम् ।
मार्कण्डेयहितार्थाय स्वयं विष्णुरुवाच ह ॥"

श्रीभगवानुवाच ।

"य इदं पठते भक्त्या त्रिकालं नियतः शुचिः ।
नाकाले तस्य मृत्युः स्यान्नरस्याच्युतचेतसः ॥"

व्यास उवाच ।

"हृत्पद्ममध्ये पुरुषं पुराणं
नारायणं शाश्वतमादिदेवम् ।
सञ्चिन्त्य सूर्य्यादपि राजमार्गो
मृत्युं स योगी जितवांस्तदैव ॥"

इति नारसिंहपुराणे मार्कण्डेयमृत्युञ्जयो नाम ७ अध्यायः ॥ (मार्कण्डेयेन प्रोक्तम् । मार्कण्डेय + अण् । पुराणविशेषः । यथा, देवीभागवते । १ । ३ । १—३ ।

"शृण्वन्तु संप्रवक्ष्यामि पुराणानि मुनीश्वराः ।" इत्यारभ्य—

तथा शृण्वन्तु मार्कण्डेयं महादभुतम् ॥")

मार्कः मार्कवः } पुं, भृङ्गराजः । इत्यमरः । २ । ४ । १५१ ।
मार्कवः } मर्कति केशरञ्जनार्थं गच्छति मर्कवः ।
मर्के सर्पे नास्तीति अवः निपातनादृद्धिः ।
मार्कवोऽन्तःस्थचतुर्थान्तः मर्केविश्वादित्वाद्वः
पृषोदरादित्वांददागमो दीर्घश्चेति परेण साधितत्वात् । (यथा, सुश्रुते चिकित्सास्थाने । १७अ ।

"स्नाव्मार्कवस्य च रसेन निहन्ति तैलं
नाड़ीं कफानिललतामपचीं व्रणांश्च ।")

मार्करो रेफान्त इति केचित् । इति तट्टीकायां भरतः ॥ (अथानयोः पर्य्यायाः यथा,—

"भृङ्गराजः केशराजो भृङ्गः पत्तङ्गमार्कवम् ।
इति वैद्यकरत्नमालायाम् ॥

भृङ्गराजो भृङ्गरजो मार्कवो भृङ्ग एवच ।
अङ्गारकः केशराजो भृङ्गारः केशरञ्जनः ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥

मार्करः केशराजश्च भृङ्गराजो निगद्यते ॥"
इति गारुड़े ऽष्टाधिकद्विशततमेऽध्याये ॥)

मार्ग, क संस्कारे । सर्पणे । इति कविकल्पद्रुमः ॥ (चु०-पर०-सक०-सेट् ।) क मार्गयति । इति दुर्गादासः ॥

मार्ग कि अन्वेषे । इति कविकल्पद्रुमः ॥ (चु०-पचे भ्वा०-पर०-सक०-सेट् ।) अन्वेषः प्रतिसन्धानम् । कि मार्गयति मार्गति गुणं गुणी । मार्गन्तां हे देहभावानित्यात्मनेपदं गणकृतानित्यत्वात् । इति दुर्गादासः ॥

मार्गः, पुं, (मार्ग्यते संस्क्रियते पादेन गम्यते गमनायान्विष्यते इति वा । मार्ग वा मृग + + घञ् ।) पन्थाः । इत्यमरः । २ । १ । १५ ॥ तत्परिमाणं यथा,—

"त्रिंशद्धनूंषि विस्तीर्णो देशमार्गस्तु तैः कृतः ।
विंशद्धनुर्युगंममार्गः सीमामार्गो दशैव तु ॥
धनूंषि दशविस्तीर्णः श्रीमान्राजपथः स्मृतः ।
वृषाजिरथनागानामसम्बाधः सुसञ्चरः ॥
धनूंषि चैव चत्वारि ग्राम्यारण्यास्तु निर्म्मिताः ।
त्रिकराश्चोपरथ्यास्तु द्विकराण्युपरञ्चकाः ॥
चक्रापथश्चतुष्पादस्त्रिपादश्च गृहान्तरम् ।
द्वैपादस्त्वर्द्धपादः प्रान्तेशः पादकः स्मृतः ॥
अवकरः परिवारः पादमात्रः समन्ततः ।
प्रावृट्काले तु प्रावृत्ती कर्त्तव्या अन्यथा नहि ॥
इति देवीपुराणे त्रैलोक्याभ्युदये गोपुरद्वारलक्षणाध्यायः ॥*॥ (यथा, महाभारते । ३ । ६७ । १७ ।

"एका बालानभिज्ञा च मार्गाणामनथोचिता ।
क्षुत्पिपासापरीताङ्गी दुष्करं यदि जीवति ॥")

गुदम् । तत्पर्य्यायः । पायुः २ तनुरुहः ३ । इति त्रिकाण्डशेषः ॥ अपानम् ४ । इत्यमरः । २ । ६ । ७३ ॥ मृगमदः । (मृगस्येदम् । मृग + अण् । मृगसम्बन्धिनि, त्रि । यथा, सुश्रुते । शारीरे ३ अः ।

"मार्गाहिक्रान्तचङ्क्रालं सदा वनचरं सुतम् ।"

यथा च मार्कण्डेये । ३२ । १७ ॥

"तद्दत्तं सलिलं तात ! सदैव पितृकर्म्मणि ।
मार्गमाविकमौष्ट्रञ्च सर्वमेकशफञ्च यत् ॥"

(मृगो मृगशिरास्तद्युक्ता पौर्णमास्यच ।
मृग + अण् ।) मार्गशीर्षमासः । अन्वेषणम् । इति मेदिनी ॥ गे, १७ । मृगशिरो नक्षत्रम् । इति हेमचन्द्रः ॥ विष्णुः । इति तस्य सहस्रनाम स्तोत्रम् ॥ (यथा, महाभारते । १३ । १४९ । ५३ ।

"विचरो रोहितो मार्गो हेतुर्दामोदरः सहः ॥")

मार्गकः, पुं, (मार्ग । स्वार्थे कन् ।) अग्रहायणमासः । इति शब्दमाला ॥

मार्गणं, क्ली, (मार्ग्यते अन्विष्यत इति । मार्ग + भावे ल्युट् ।) अन्वेषणम् । तत्पर्य्यायः । सन्धीक्षणम् २ विचयनम् ३ मृगणा ४ मृगः ५ इत्यमरः । ३ । २ । ३० ॥ याच्ञा । इति मेदिनी ॥ णे, ७१ । प्रणयः । इति जटाधरः ॥ (मार्गयतीति । मार्ग + ल्युः ।) याचके, त्रि । इत्यमरः । ३ । १ । ४६ ॥

मार्गणः, पुं, (मार्गयति लक्ष्यमिति । मार्ग + ल्युः ।) शरः । इत्यमरः । २ । ८ । ८७ ॥ यथा, महाभारते । ६ । ११५ । ४४ ।

"ते सर्वे दृढ़धन्वानः संयुगेष्वपलायिनः ।
बहुधा भीष्ममानर्च्छुर्मार्गणैः क्षतमार्गणैः ॥

मार्गयति धनार्थं दातारमिति । मार्ग + ल्युः ।) याचकः । इति मेदिनी । णे, ७१ ॥

मार्गणकः, पुं, (मार्गण + स्वार्थे कन् ।) याचकः । इति हलायुधः ॥

मार्गधेनुः, पुं, (मार्गस्य धेनुः पारमाणम् ।) योजनपरिमाणम् । इति शब्दमाला ॥

मार्गधेनुकं, क्ली, (मार्गधेनु + स्वार्थे कन् ।) योजनम् । इति त्रिकाण्डशेषः ॥

मार्गपाली, स्त्री, (मार्गं पालयति क्विंस्वो रक्षतीति । पाल + अच् । गौरादित्वात् ङीष् ।) स्तम्भः । यथा,

"ततोऽपराह्णसमये पूर्व्वस्यां दिशि नारद ! ।
मार्गपालीं प्रवक्ष्यामि दुर्गस्तम्भे च मादृशे ॥
कुशकाशमयैर्दिव्यां संस्कारैर्बहुभिर्मुदा ।
भूषयित्वा गजानश्वानङ्कुशग्राहिसंयुतान् ॥
गोवृषान् महिषांश्चैव वराटाभरणभूषितान् ।
भेरीमृदङ्गपटहवादित्रध्वनिनादितान् ।
तस्याः स्थाने नयेत् सार्द्धं भ्रान्तिपाठादिनन्दितः ॥
मार्गपालि नमस्तुभ्यं सर्व्वानन्दप्रवर्द्धके ।
तले तव सुखेनाश्वा गजा गावः प्रयान्तु मे ॥
राजानो राजपुत्राश्च ब्राह्मणाः सूदजातयः ।
मार्गपालीं समालिङ्ग्य वार्त्ताः स्युश्च सदैव हि ॥
ततो गावश्च संपूज्या गन्धपुष्पादिभिः क्रमात् ।
आत्मनः श्रेयसे भूप इति पूजां करोति हि ॥
अग्रतः सन्तु मे गावो गावो मे सन्तु पृष्ठतः ।
गावो मे सर्व्वतः सन्तु गवां मध्ये वसाम्यहम् ॥
या लक्ष्मीर्लोकपालानां धेनुरूपेण संस्थिता ।
घृतं वहति यज्ञार्थे मम पापं व्यपोहतु ॥
या कामधेनुर्भुवनं च विष्णो-
र्या कामधेनुर्यमदग्निगेहे ।
या सौरभेयी तु वशिष्ठगेहे
सा कामधेनुर्वरदा ममास्तु ॥

कृत्वेतत् सर्व्वमानन्दाद्रात्रौ देव्यग्रतो बलेः।
पूजां कृत्वा ततः पश्चात् सम्यगुद्वासनं समारभेत्॥"
इति पाद्मे उत्तरखण्डे कार्त्तिकमाहात्म्ये १२४ अध्यायः॥

मार्गशिर, पुं, (मृगशिरानक्षत्रयुक्ता पौर्णमास्यत्र। मृगशिरा+अण्।) मार्गशीर्षमासः। इति शब्दरत्नावली॥ (यथा, भागवते। ६। १६। २।
"शुक्ले मार्गशिरे पक्षे योविद्धत्तैरतन्द्रया।
आरभेत व्रतमिदं सर्व्वकामिकमादितः॥")

मार्गशीर्ष, पुं, (मार्गशीर्षी+अण्।) अग्रहायणमासः। मृगशीर्षेण युक्ता पौर्णमासी मार्गशीर्षी तस्मिन् मासे भवति मार्गशीर्षः ष्णः। इत्यमरटीकायां भरतः॥ तत्पर्य्यायः। सहाः २ मार्गः ३ आग्रहायणिकः ४। इत्यमरः। १। ४। १४॥ मार्गशिरः ५ सहः ६। इति शब्दरत्नावली॥ वृश्चिकस्थरविप्रारब्धशुक्लप्रतिपदादिदर्शान्तोऽयं मुख्यचान्द्रः। एतादृशमुख्यचान्द्रमासीयपौर्णमास्यन्तः अयं गौणचान्द्रः। वृश्चिकराशिरविकोऽयं सौरः। इति स्मृतिः॥ * ॥ तत्र जातफलम्।
"यस्य प्रसूतिः खलु मार्गमासे
तीर्थे प्रवासे सततं मतिः स्यात्।
परोपकारी धृतसाधुवृत्तिः
सद्वृत्तियुक्तो ललनाभिलाषी॥"
इति कोष्ठीप्रदीपः॥*॥
(तथास्य विषयः॥ कार्त्तिकमार्गशीर्षौ शस्तौ। इति सुश्रुते सूत्रस्थाने षष्ठेऽध्याये॥)

अथ मार्गशीर्षकृत्यम्।

आश्विनशुक्लपक्षे नवान्नआहाकरणे मार्गशीर्षस्य विंशतिदण्डाधिकत्रयोविंशतिदिनाभ्यन्तरे शुक्लपक्षे तत् आद्धं कर्त्तव्यम्। तत्र मार्गशीर्षस्य विंशतिदण्डाधिकप्रथमदिनत्रयेतरेषु कृत्तिकाश्लेषाशुक्रवारेतरेषु नन्दारिक्तात्रयोदशीतरतिथिषु चन्द्राष्टमचन्द्रजन्मतिथिजन्मनक्षत्रत्रयपञ्चमनाराचयेतरेषु पूर्व्वाह्णव्यतिरिक्तमघाभरण्यश्लेषार्द्रेतरेषु नक्षत्रेषु आद्धं तत्रैवभोजनञ्च कुर्य्यात्। आद्धानधिकारिणा तु प्रागुक्तकाले देवादिभ्यो नवान्नं दत्त्वा भोक्तव्यम्। किन्तु अश्लेषाकृत्तिकाव्यतिरिक्तमघापूर्व्वभाद्रपदकेषु अपि नवान्नभोजनं न कर्त्तव्यम्। चन्द्रतारादिशुद्धौ प्रतीकारमाह देवलः।
"कर्म्म कुर्य्यात् फलावाप्त्यै चन्द्रादिशुभने बुधः।
मुख्यकाले त्विदं सर्व्वं नार्त्तः कालमपेक्षते॥
चन्द्रे च शुद्धं लवणञ्च तारे
तिथावभद्रे सितसर्षपांश्च।
धान्यञ्च दद्यात् करणे च वारे
योगे तिलान् हेममणिञ्च लग्ने॥
राजमार्त्तण्डे तारादोषे लवणपरिमाणमाह।
"एकत्रिपञ्चसप्तेषु द्विजाय दद्यात् पलानि लवणस्य।
क्रमशो जन्मविपत्प्रत्यरिमरणाख्यतारासु॥
पलन्तु लौकिकैर्मानैः साष्टरत्तिद्विमाषकम्।
तोलकत्रितयं ज्ञेयं ज्योतिर्भिः स्मृतिसम्मतम्॥
तत एवं दध्याज्यसंयुक्तं नवं विप्राभिमन्त्रितम्।
मन्त्रानाहेमे गायत्रीति गायत्र्याभिमन्त्रितम्॥
नवमन्नं ब्राह्मणानुज्ञां गृहीत्वा प्राश्नीयात्।
नूतनधान्यासम्भवे पुरातनेनापि आद्धं कर्त्तव्यम्।
वृश्चिके शुक्लपक्षे तदकरणे हरिशयनात् पूर्व्वं मीनधनुस्थरवौ तत्र माघादौ कर्त्तव्यम्॥ * ॥
वृश्चिकस्थरवौ शुक्लचतुर्दश्यां सौभाग्यकामः पाषाणाकारपिष्टकैर्द्वौ पूजयेत् तदपि भक्त्येत्युक्तम्॥*॥ अग्रहायण्यां पौर्णमास्यां पार्व्वणविधिना आद्धमवश्यकम्॥*॥ भविष्यपुराणे।
"रोहिण्या प्रतिपद्युक्ता मार्गे मासि सितेतरा।
गङ्गायां यदि लभ्येत सूर्य्यग्रहशतैः समा॥"
इति कृत्यतत्त्वम्॥
(स्त्रियां आग्रहायणी पूर्णिमा। यथा, महाभारते। ३। ६३। २६।
"मार्गशीर्ष्यामतीतायां पुष्येण प्रयुयुक्तः॥")

मार्गिकः, त्रि, (मृगान् हन्तीति। मृग+"पक्षिमत्स्यमृगान् हन्ति।"४।४।३५। इति ठक्।) मृगहन्ता। (मार्गो गम्यत्वेनास्त्यस्य। ठन्।) पथिकः। इति सिद्धान्तकौमुदी॥

मार्गितं, त्रि, (मार्ग अन्वेषणे+क्तः।) अन्वेषितम्। इत्यमरः। ३। १। १०५॥

मार्ग्य, त्रि, (मृज्यते इति। मृज्+"मृजेर्विभाषा।" ३। १। ११३। इति पक्षे ण्यत्। वृद्धिश्च। "चजोः कुघिण्यतोः।"७। ३। ५२। इति कुत्वम्।) मार्ज्जनीयम्। इति सिद्धान्तकौमुदी॥ (यथा, भट्टिकाव्ये। ६। ५६।
"मन्युस्तस्य त्वया मार्ग्यो मृज्यः श्लोकश्च तेन ते।")
अन्वेषणीयश्च॥

मार्ज्ज क मार्ज्जने। भ्वादौ। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) क मार्ज्जयति। इति दुर्गादासः॥

मार्ज्ज, पुं, (मार्ज्जयति पापमस्मात् प्रक्षाल्य उद्धरति जनानिति। मार्ज्ज+णिच्+अच्।) विष्णुः। इति हेमचन्द्रः। २। ४४॥ (मार्ज्जयति वसनमलमिति। मार्ज्ज+अच्।) रजकः। इति शब्दमाला॥ मार्जनम्। इत्यमरटीकायां भरतः॥

मार्ज्जनं, क्ली, (मार्ज्जयते इति। मार्ज्ज+भावे ल्युट्।) प्रोक्षणादिना अङ्गनिर्म्मलीकरणम्। माजा इति भाषा। तत्पर्य्यायः। मार्ष्टिः २ मार्ष्टी ३ मार्ज्जना ४ मृजा ५। इति शब्दरत्नावली॥ मार्ज्जः ६ मार्ज्जा ७। इत्यमरटीकायां भरतः॥ (यथा, श्रीमद्भागवते। ६। ४। १८।
"स वै मनः कृष्णपदारविन्दयो
र्वचांसि वैकुण्ठगुणानुवर्णने।
करौ हरेर्म्मन्दिरमार्ज्जनादिषु
श्रुतिं चकाराच्युतसत्कथोदये॥")

स्नानकाले शरीरमार्ज्जनगुणाः।
"दौर्गन्ध्यं गौरवं कण्डूं कच्छुं मलमरोचकम्।
खेदं वीभत्सतां हन्ति शरीरपरिमार्ज्जनम्॥
इति राजवल्लभः॥

देवीगृहमार्ज्जनफलं यथा,—
"देव्या गृहन्तु यः शुक्र! संमार्ज्जयति नित्यशः।
स भवेद्बलवान् सौख्यसर्व्वसम्पत्तिसंयुतः॥
देव्या गृहन्तु यः शुक्र! गोमयेनानुलेपयेत्।
स्त्रियो वा यदि वा पुंसः षण्मासान्तु निरन्तरम्।
स लभेदीप्सितान् कामान् देव्या लोकञ्च
गच्छति॥"
इति देवीपुराणे ४२ अध्यायः॥

अथ भगवन्मन्दिरमार्ज्जनमाहात्म्यम्।
"नरसिंहगृहे नित्यं यः संमार्जनमाचरेत्।
समस्तपापनिर्मुक्तो विष्णुलोके स मोदते॥"
इति नृसिंहपुराणम्॥
"संमार्जनन्तु यः कुर्य्यात् पुरुषः केशवालये।
रजस्तमोभ्यां निर्म्मुक्तः स याति परमां गतिम्॥
रांशूनां यावतां राजन्! कुर्य्यात् संमार्जनं नरः।
तावन्त्यब्दानि स सुखी नाकमासाद्य मोदते॥"
इति विष्णुधर्म्मोत्तरम्॥
"यावन्तानि प्रवाहाणि भूमिसंमार्जने दृढः।
तावद्वर्षसहस्राणि शाकद्वीपे महीयते॥
जायते मम भक्तश्च सर्व्वधर्म्मसमन्वितः।
शुचिर्भागवतः शुद्धो ह्यपराधविवर्जितः।
ततो मुक्त्वा सर्व्वभोगान् तीर्त्वा संसारसागरम्।
शाकद्वीपात् परिभ्रष्टः स्वर्गलोकं स गच्छति॥
नन्दनं वनमाश्रित्य मोदते चाप्सरैः सह।
नन्दनाच्च परिभ्रष्टो मम कर्म्मव्यवस्थितः।
सर्व्वसङ्गान् परित्यज्य मम लोकन्तु गच्छति॥"
इति वराहपुराणम्॥ * ॥

स्नानविशेषः। यथा। आतुराणान्तु।
"अशिरस्कं भवेत् स्नानं स्नानाशक्तौ तु कर्म्मिणाम्।
आर्द्रेण वाससा वापि मार्ज्जनं देहिकं विदुः॥"
इति चावालवचनाच्छिरो विहाय गात्रप्रक्षालनं तदशक्तौ सर्व्वगात्रमार्ज्जनं आर्द्रेण वाससा कुर्य्यात्। इत्याह्निकाचारतत्त्वम्॥ * ॥ वैदिकसन्ध्योपासनान्तर्गतमार्ज्जनं यथा। छन्दोगपरिशिष्टम्।
"शिरसो मार्जनं कुर्य्यात् कुशैः सोदकबिन्दुभिः।
प्रणवो भूर्भुवः स्वश्च गायत्री च तृतीयिका॥
आपोहिष्ठेत्यृचा कार्य्यं मार्जनन्तु कुशोदकैः।
प्रतिप्रणवसंयुक्तं क्षिपेन्मूर्द्ध्नि पदे पदे।
तृचस्यान्तेऽथवा कुर्य्याद्धीर्या मतमाहृतम्॥

आपोहिष्ठेतिऋक्तस्य सिन्धुद्वीप ऋषिः स्मृतः।
आपो वै देवता च्छन्दो गायत्री मार्जनं स्मृतम्॥"
इत्याह्निकाचारतत्त्वम्॥

मार्ज्जनः, पुं, (मार्ज्जयतेऽनेनेति। मार्ज्ज+ल्युट्।) लोध्रवृक्षः। इत्यमरः। २। ४। ३३॥ श्वेतलोध्रः। इति भूरिप्रयोगः॥ रक्तलोध्रः। इति स्वामी॥

मार्जना, स्त्री, (मार्ज्जयत इति। मार्ज्ज+भावे युच्।) मार्जनम्। इत्यमरः। २। ६। १२१॥ सुरञ्जनिः। इति हेमचन्द्रः। ३। ३००॥

मार्जनी, स्त्री, (मार्ज्जयते अनयेति। मार्ज्ज+करणे ल्युट्+स्त्रियां ङीप्।) सम्मार्जनी। झाँटा इति भाषा। यथा,—
"नमामि शीतलां देवीं रासभस्थां दिगम्बरीम्।
मार्जनीकलसोपेतां शूर्पालङ्कृतमस्तकाम्॥"
इति स्कान्दे शीतलास्तोत्रम्॥

मार्जनीयः, त्रि, (मार्ज्जयते इति। मृज्+अनीयर्।) मार्जनयोग्यः। मार्ज्यः॥ इति मृजधातोः कर्म्मण्यनीयप्रत्ययेन निष्पन्नः। अग्निः। प्रोक्षणम्। इति संक्षिप्तसारोणादिवृत्तिः॥

मार्जारः, पुं, (मृज्+"कृज्झिमृजिभ्यां चित्।" उणा० ३। १३७। इति आरन् चित्।) "मृजेर्द्वृद्धिः।" इत्युज्ज्वलदत्तोक्तेर्द्वृद्धिश्च।) रक्तचित्रकः। इति राजनिर्घण्टः॥ विड़ालः। इत्यमरः। २। ५। ६॥ (यथा, महाभारते। ५। १५६। १६।
"मार्ज्जारः किल दुष्टात्मा निश्चेष्टः सर्व्वकर्म्मसु॥")
खट्टासः। इति हेमचन्द्रः। ४। ३६०॥ *॥

मार्जारस्पर्शने दोषो यथा,—
"अभोज्यस्तृतिकायखण्डमार्जारास्तुश्च कुक्कुरान्।
पतितापविद्धचण्डालसूतकहारांश्च धर्म्मवित्।
संस्पृश्य शुध्यते स्नानादृक्ष्यग्रामशूकरौ॥"
इति मार्कण्डेयपुराणे सदाचाराध्यायः॥ *॥

पारिभाषिकमार्जारो यथा,—
"इभार्थं जपते यश्च तप्यते यजते तथा।
न परत्रार्थसंयुक्तो मार्जारः परिकीर्त्तितः॥"
तस्यान्नमभोज्यं यथा,—
'अभोज्याः सूतिकायखण्डमार्जारास्तुश्वकुक्कुटाः।'
इति वामनपुराणे १५ अध्यायः॥

मार्जारकः, पुं, (मृज्+आरन् वृद्धिश्च। "संज्ञायां कन्।" ५। ३। १४७। इति कन् च।) मयूरः। इति त्रिकाण्डशेषः॥ (मार्ज्जार+स्वार्थे कन्। विड़ालः। यथा, महाभारते। १। २३३। २४।
"इमे मार्ज्जारकाः शुक्र! नित्यमुद्वेजयन्ति नः॥")

मार्जारकण्डः, पुं, (मार्ज्जारस्येव कण्डूः कण्डूरी यस्य। यद्वा, मार्ज्जारो मस्तकः कण्डो यस्य।) मयूरः। इति शब्दरत्नावली॥

मार्जारकर्णिका, स्त्री, (मार्ज्जारस्य कर्णौ इव कर्णौ यस्याः। स्त्रियां ङीप् स्वार्थे कन्। टाप् पूर्व्वस्य ह्रस्वत्वञ्च।) चासुण्डा। यथा,—
"चासुण्डा चर्च्चिका चर्म्मसुण्डा मार्जारकर्णिका॥"
इति हेमचन्द्रः॥

मार्जारकर्णी, स्त्री, मार्ज्जारस्येव कर्णावस्याः। ङीप्। चासुण्डा। यथा,—
"मार्जारकर्णी चासुण्डा कर्णमोटिश्च चर्च्चिका॥"
इति त्रिकाण्डशेषः॥

मार्जारगन्धा, स्त्री, (मार्ज्जारस्येव गन्धोऽस्याः।) सुक्षपर्णीविशेषः। इति रत्नमाला॥

मार्जारगन्धिका, स्त्री, (मार्ज्जारगन्ध। कन्। टाप्। अत इत्वञ्च।) सुक्षपर्णी। इति राजनिर्घण्टः॥ (तथास्याः पर्य्यायः।
"सुक्षपर्णी काकपर्णी सूर्य्यपर्ण्येल्विका सहा।
काकसुक्षा च सा प्रोक्ता तथा मार्जारगन्धिका॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

मार्जारी, स्त्री, (मार्ष्टि शोधयति केशादिकमनया। मृज्+आरन्। स्त्रियां ङीष्।) कस्तूरी। जन्तुविशेषः। गन्धगकुला इति खाटासी इति च भाषा। तत्पर्य्यायः। पूतिका २ पूतिकज. गन्धचेलिका ४। अस्या गुणाः। वान्तिधारकत्वम्। चक्षुष्यत्वम्। कफवातनाशित्वञ्च। इति राजनिर्घण्टः॥

मार्जारीयः, पुं, (मार्ज्जारस्यायम्। मार्जार+"गहादिभ्यश्च।" ४। २। १३८। इति छः।) विड़ालः। शूद्रः। कायशोधनम्। इति मेदिनी। ये, १२७॥

मार्जालः, पुं, मार्जारः। रलयोरैक्यात्॥

मार्जालीयः, पुं, (मृज्+"स्याच्चतिमृजेरालच् वालजालीयचः।" उणा० १। ११५। इति आलीयच्।) विड़ालः। शूद्रः। कायशोधनम्। इति हेमचन्द्रः॥ (महादेवः। यथा, महाभारते। ३। ३६। ७७।
"ललाटाक्षाय सर्व्वाय मीढुषे शूलपाणये।
पिनाकगोप्त्रे सूर्य्याय मार्जालीयाय वेधसे॥")

मार्जिता, स्त्री, (मार्ज्यते शुद्ध्यते पात्रमिति। मृज्+णिच्+कर्म्मणि क्तः। स्त्रियां टाप्।) रसाला। इत्यमरः। २। ६। ४४॥ सा तु दधिखण्डमधुसर्पिर्मरिचादिकृतकर्पूरादिवासितसद्भक्ष्यविशेषः। इत्यमरटीकायां भरतः॥ (गुणादयोऽस्या रसालाशब्दे ज्ञातव्याः॥) शोधिते, त्रि॥

मार्त्तण्डः, पुं, (मृतच्चासौ अण्डश्चेति। मृताण्डे भवतीति। मृताण्ड+"तत्र भवः।" ४। ३। ५३। इति अण्।) सूर्य्यः। (तन्निरुक्तिश्च। यथा,—
"अनिष्पन्नेषु गात्रेषु पुत्रं दृष्ट्वा पितात्रवीत्।
आर्त्तस्त्वं भव मार्त्तण्डेति मार्त्तण्डस्तेन स स्मृतः॥"
यथा, मार्कण्डेये। ७७। १।
"मार्त्तण्डस्य रवेर्भार्य्या तनया विश्वकर्म्मणः।
संज्ञा नाम महाभाग! तस्यां भानुरजीजनत्॥"
अर्कवृक्षः। इत्यमरः॥ शूकरः। इति मेदिनी। ते, ३५॥ मार्त्तण्डोत्पत्तिर्यथा,—

मार्कण्डेय उवाच।
"एवं सा नियता देवी चक्रे स्तोत्रमहर्निशम्।
निराहारा विवस्वन्तमाराधयितुमुद्यता॥
ततः कालेन महता भगवांस्तपनो मुने!।
प्रत्यक्षतामगात्तस्या दाक्षायण्या द्विजोत्तम!॥
सा ददर्श महाकूटं तेजसोऽम्बरसंस्थितम्।
भूमौ च संस्थितं भास्वज्ज्वालामालातिदुर्द्दृशम्॥
तञ्च दृष्ट्वा ततो देवी साध्वसं परमं गता।
जगादाद्य! प्रसीदेति न त्वां पश्यामि गोपते!॥
यथा दृष्टवती पूर्व्वमम्बरस्थं सुदुर्द्दृशम्।
संघातं तेजसस्तस्मादिह पश्यामि भूतले॥
प्रसादं कुरु पश्येयं यद्रूपं ते प्रभाकर!।
भक्तानुकम्पन! विभो! भक्ताहं पाहि मे सुतान्॥"

श्रीमार्कण्डेय उवाच।
"ततः स तेजसस्तस्मादाविर्भूतो विभावसुः।
अदृश्यत तदादित्यस्तप्तताम्रोपमप्रभः॥
अथ तां प्रागतां देवीं तस्य सन्दर्शनान्मुने!।
प्राह भास्वान् दृणुष्वेष्टं वरं मत्तो यमिच्छसि॥
प्रणता शिरसा सा च जानुपीड़ितमेदिनी।
प्रत्युवाच विवस्वन्तं वरदं ससुरस्थितम्॥
देव! प्रसीद पुत्राणां क्षुतं चिरुवनं मम।
यज्ञभागाश्च दैतेयैर्दानवैश्च बलाधिकैः॥
तन्निमित्तं प्रसादं त्वं कुरुष्व मम गोपते!।
अंशेन तेषां भ्रातृत्वं गत्वा नाशय तद्रिपून्॥
यथा मे तनया भूयो यज्ञभागभुजः प्रभो!।
भवेयुरधिपाश्चैव त्रैलोक्यस्य दिवाकर!॥
तथानुकम्पां पुत्राणां सुप्रसन्नो रवे! मम।
कुरु प्रसन्नार्त्तिहर! स्थितिकर्त्ता त्वमद्य मे॥"

मार्कण्डेय उवाच।
"ततस्तामाह भगवान् भास्करो वारितस्करः।
प्रणतामदितिं विप्र! प्रसादसुमुखो विभुः॥
सहस्रांशेन ते गर्भे चभूयाहमशेषतः।
तत्पुत्रशत्रूनदिते! नाशयान्याशु निर्हृता॥
इत्युक्ता भगवान् भास्वानन्तर्द्धानमुपागमत्।
निवृत्ता सापि तपसः संप्राप्ताखिलवाञ्छिता॥
ततो रश्मिसहस्रान्तः सुषुम्नाख्यो रवेः करः।
विप्रावतारं संचक्रे देवमातुरथोदरे॥
कृच्छ्रचान्द्रायणादीनि सा चक्रे सुसमाहिता।
शुचिः सन्नारयाम्येनं दिव्यं गर्भमिति द्विज!॥
ततस्तां कश्यपः प्राह किञ्चिन्नकोपप्लुताक्षरम्।
किं मारयसि गर्भाण्डमिति नित्योपवासिनी॥
सा च तं प्राह गर्भाण्डमेतत् पश्येति कोपनं।
न मारितं विपक्षाणां भवत्वेव यदुष्यति॥
इत्युक्ता तं तदा गर्भसुत्ससर्ज्ज सुरारणिः।
ज्वाज्वल्यमानं तेजोभिः प्रत्युवाच न कोपिता।
तं दृष्ट्वा कश्यपो गर्भसुद्यद्भास्करवर्च्चसम्।
तुष्टाव प्रणतो भूत्वा ऋग्भिराद्याभिरादरात्॥
संस्तूयमानः स तदा गर्भाण्डात् प्रकटोऽभवत्।
पद्मपत्रसवर्णाभस्तेजसा याप्तदिङ्मुखः॥
अथान्तरीक्षादाभाष्य कश्यपं मुनिसत्तमम्।
सतोयमेघगम्भीरा वागुवाचाशरीरिणी॥

मारितश्च यतः प्रोक्तमेतदण्डं त्वयादितिम् ॥
तस्मात्सुते! सुतस्तेऽयं मार्त्तण्डाख्यो भविष्यति ॥
सूर्य्याधिकारञ्च विभुर्जगत्त्रये करिष्यति ।
हनिष्यत्यसुरांश्चायं यज्ञभागहरानरीन् ॥
देवा निर्भयेति वचो गगनात् समुपागतम् ।
प्रहर्षमतुलं याता दानवाश्च हतौजसः ॥
ततो युद्धाय दैतेयानाजुहाव शतक्रतुः ।
सह देवैर्मुदायुक्तो दानवाश्च समाययुः ॥
तेषां युद्धमभूद्घोरं देवानामसुरैः सह ।
शस्त्रास्त्रदीप्तिसन्दीप्तसमस्तभुवनान्तरम् ॥
तस्मिन् युद्धे भगवता मार्त्तण्डेन निरीक्षिताः ।
तेजसा दह्यमानास्तु भस्मीभूता महासुराः ॥
ततः प्रहर्षमतुलं प्रापुः सर्व्वे दिवौकसः ॥
तुष्टुवुस्तेजसां योनिं मार्त्तण्डमदितिस्तथा ॥
स्वाधिकारं ततः प्रापुर्यज्ञभागांश्च पूर्व्ववत् ।
भगवानपि मार्त्तण्डः स्वाधिकारमयाकरोत् ॥
कश्यपुण्यवद्ब्रह्मज्ञानधर्म्मोर्द्ध्व रश्मिभिः ।
दृष्टोऽभिपिण्डसङ्घो दृष्टे नातिस्फुटं वपुः ॥"

इति मार्कण्डेयपुराणे सूर्य्यमाहात्म्ये मार्त्तण्डोत्पत्तिनामाध्यायः ॥

मार्त्तण्डवल्लभा, स्त्री, (मार्त्तण्डस्य वल्लभा प्रिया । यद्वा, मार्त्तण्डो वल्लभः प्रियोऽस्याः ।) आदित्यभक्ता । इति राजनिर्घण्टः ॥ सूर्य्यपत्नी च ॥

मार्त्तिकः, पुं, (मृत्तिकाया विकार इति । मृत्तिका+"तस्य विकारः ।" ४ । ३ । १३४ । इति ठक् ।) शरावः । इति शब्दरत्नावली ॥ मृत्तिकानिर्म्मिते, त्रि ॥

मार्द्दङ्गं, क्ली, (मृदङ्गस्य । ततः स्वार्थे अण् ।) पत्तनम् । इति हारावली ॥ (मृदङ्गवादनं श्लिष्यमस्येति । अण् ।) मृदङ्गवादके, त्रि ॥

मार्द्दङ्गिकः, त्रि, (मृदङ्गवादनं श्लिष्यमस्य । मृदङ्ग+"श्लिष्यम् ।" ४ । ३ । ५५ । इति ठक् ।) मृदङ्गवादकः । तत्पर्य्यायः । मौरजिकः २ । इत्यमरः । २।१०।१३ ॥ सार्द्दिकः ३ और्द्दिकः ४ । इति शब्दरत्नावली ॥ (यथा, रामायणे । २ । ६१ । ४६ ।

"विक्रा मार्द्दङ्गिका व्यासंश्छत्त्रान्याग्राहा विभीतकाः ।
अश्वत्था नक्तकाचासन् भरद्वाजस्य तेजसा ॥")

मार्द्दवं, क्ली, (मृदोर्भाव इति । मृदु+"पृथ्वादिभ्य इमनिज् वा ।"५।१।१२२। इत्यत्र । "वावचनमगादेः समावेशार्थम् ।" इति काशिकोक्तेरण् ।) परदुःखप्रदर्शनात् पीड़ाबुद्धिः । मृदुता । यथा,—

"मार्द्दवं कोमलस्यापि संस्पर्शात्तच्चतोच्यते ।
उत्तमं मध्यमं प्रोक्तं कनिष्ठञ्चेति तत्त्रिधा ॥"

उत्तमं यथा,—

"अभिनवमालिकामियं सायय-
नवर्वणिराधिका विभिन्त्ते ।
न कुसुमपटलं दराधि चक्षौ
तदनुभवात्तनुरेव सन्नमासीत् ॥"

मध्यमं यथा,—

"चित्रं धनिष्ठे तनुवाससोऽपि
चीनस्य चीनस्तनि! सङ्गमेन ।
लिप्तेन तस्रोद्घिनचन्दनेन
मूर्त्तिर्दिदूना सखि! लोहितासीत् ॥

कनिष्ठं यथा,—

रससुधाकरे श्यामोदमामोदन-
मादधानं निलीननीलालकचञ्चरीकम् ।
शशिन पद्मासुखपद्ममासीत्
त्विषा रवेः कोमलयापि ताम्रम् ॥"

इत्युज्ज्वलनीलमणिः ॥

(अकार्श्न्यम् । यथा, रघौ । ८ । ४३ ।

"विललाप सवाष्पगद्गदं
सह जामप्यपहाय धीरताम् ।
अभितप्तमयोऽपि मार्द्दवं
भजते कैव कथा शरीरिषु ॥")

मार्द्दवः, पुं, (मार्द्दवं मृदुत्वमस्यास्तीति । मार्द्दव+अर्श आद्यच् ।) वर्णसङ्करजातिविशेषः ।

"माधुको मार्द्दवश्चुक्कारुषा हिण्डिकादयः ।"

इति जटाधरः ॥

मार्ग्यः, पुं, (मृग्यति चमते जनानिति । मृग्+"इगुपधज्ञाप्रीकिरः कः ।" ३ । १ । १३५ । इति कः । मृग्यः । ततः । स्वार्थे अण् ।) नाड़ीयुक्तौ श्रेष्ठः । इति हेमचन्द्रः । २ । ७४ ॥ मारिषशाकः । इत्यमरटीकायां भरतः ॥ (शाकार्थे पर्य्यायो यथा,—

"मारिषो वाप्यको मार्ग्यः श्वेतो रक्तश्च स स्मृतः ।"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

मार्ग्यिकः, पुं, (मार्ग्य+ठक् ।) मारिषशाकः । इति राजनिर्घण्टः ॥

मार्ष्टिः, स्त्री, (मृज्+क्तिन् । "मृजेर्वृद्धिः ।" ७ । २ । ११४ । इति वृद्धिश्च ।) मार्জ্জনम् । इत्यमरः । २।६ । १२१ ॥ तैलन्नक्षणम् । यथा,

"तैलमर्द्धं यदङ्गेषु न भवेत् बाहुसङ्गतम् ।
सा मार्ष्टिः पृथगभ्यङ्गो मल्लकादौ प्रकीर्त्तितः ॥"

इत्याह्निकतत्त्वम् ॥

मार्ल, क्ली, (माति मानहेतुर्भवतीति । मा+"ऋज्रेन्द्राग्रवज्रेत्यादि ।"उणा० २ । २८ । इति रण् । पृषोदरादित्वान्नस्य लत्वम् ।) क्षेत्रम् । इति मेदिनी ॥ ले, ४५ । (यथा, मेघदूते । १६ ।

"सद्यः सीरोत्कषणसुरभि क्षेत्रमारुह्य मार्ल
किञ्चित्पश्चाद् व्रज लघुगतिर्भूय एवोत्तरेण ॥")

कपटम् । वनम् । इति हेमचन्द्रः ॥ (हरितालम् । यथा,—

"हरितालं तालमालं मालं शैलूषभूषणम् ।
पिञ्जरं रोमहरणं तालकं पातमित्यपि ॥"

इति वैद्यकरत्नेन्द्रसारसंग्रहे नारायणमारणाद्यधिकारे ।)

मालः, पुं, (मातीति । मा+रन् । रस्य लत्वम् ।) जातिविशेषः । इति मेदिनी ॥ ले, ४५ । स च म्लेच्छजातिः । यथा,— [जातयः ॥"

"माला भिल्लाः किरातास्च सर्व्वेऽपि म्लेच्छ-

(यथा, महाभारते । ६ । ६ । ३६ ।

"तत्रेमे कुरुपाञ्चालाः शाल्वा मात्स्येयजाङ्गलाः ।
शूरसेनाः पुलिन्दाश्च योधा मालास्तथैव च ॥")

जनः । इति च हेमचन्द्रः । ३ । ५६८ ॥ देशविशेषः । स च मेदिनीपुरप्रदेशे मालभूमित्वेन ख्यातः । विष्णुः । यथा,—

'मां लक्ष्मीं लातीति मालो विष्णुः तं व्रततीति मालती ।'

इति मालतीशब्दटीकायां भरतः ॥

मालकं, क्ली, (मलते धारयति शोभामिति । मलधारणे+खुल् ।) स्थलपद्मम् । इति जटाधरः ॥

मालकः, पुं, (मलते धारयत्युत्कीर्य्यं रोगनाशने इति । मलधारणे+खुल् ।) निम्बवृक्षः । इत्यमरः । २ । ४ । ६२ ॥ (निम्बशब्देऽस्य विवरणं ज्ञातव्यम् ॥)

मालका, स्त्री, (मलते धारयति शोभाम् । मल+खुल् । स्त्रियां टाप् ।) माल्यम् । इति शब्दरत्नावली ॥

मालकौशः, पुं, (मालस्य हरेः कोशात् कण्ठान्निर्गत इति । अण् ।) रागविशेषः । तस्य नामान्तरं कौशिकः । स च हनूमन्मते षड्रागाणां मध्ये द्वितीयरागः । हरस्य हरेर्वा कण्ठान्निर्गतः । अस्य जातिः सम्पूर्णा तत्र सप्तस्वरक्रमः ष ऋ ग म प ध नि । अस्य गृहं षड्जस्वरः । प्रहरद्वयं रात्रिशेषे गानसमयः । रागमालायामस्य स्वरूपम् । पाटलवर्णपुरुषः । नीलपरिच्छदः । यष्टिहस्तः । यौवनमदमत्तः स्त्रीभिः सह हास्यकौतुकान्वितः शुचुमत्तकमाल्यगलोऽथवा दृढनमुक्तामाल्यगलः । अस्य रागिण्यः पञ्च यथा । टोड़ी १ गौरी २ गुणकरी ३ खम्भावती ४ कोकभा ५ । अस्याष्टौ पुत्रा यथा । मारुः १ मेवाड़ः २ वड़हंसः ३ प्रबलः ४ चन्द्रकः ५ नन्दः ६ भ्रमरः ७ खुखरः ८ अत्र मिश्राङ्गोऽपि पाठः । भरतमते तस्य रागिण्यः पञ्च यथा । गौरी १ दयावती २ देवदाली ३ खम्भावती ४ कोकभा ५ । तस्मते अष्टौ पुत्रा यथा । गान्धारः १ शुद्धः २ मकरः ३ चिक्कनः ४ सहानः ५ शुक्लवल्लभः ६ मालीगौरः ७ कामोदः ८ । अष्टपुत्रभार्य्या यथा । धनाश्रीः १ मालश्रीः २ जयतश्रीः ३ सुघोरायी ४ दुर्गा ५ गान्धारी ६ भीमपलाशी ७ कामोदी ८ । इति सङ्गीतशास्त्रम् ॥

मालचक्रकं, क्ली, (माला समूहः अस्यामस्त्यस्येति । अर्श आद्यच् । स चक्रमिवेति । कन् ।) सक्थ्यूरुपर्व्वसन्धिः । इति शब्दचन्द्रिका । मालाइचाकि इति भाषा ॥

मालती, स्त्री, (मलते शोभां धारयतीति । मल्+"शृदृशिमलीत्यादि ।"उणा० ३ । ११० । इत्यत्र "बाहुलकात् मलतेरतच् । गौरादिनिपातनादुपधाया दीर्घत्वम् ।" इत्युज्ज्वलदत्तोक्तेः अस्यश् उपधाया दीर्घत्वम् ङीष् च । मां लक्ष्मीं

लातीति माली विष्णुः तं अतीति । अच् । इत्यमरटीकायां भरतः ॥) स्वनामख्यातपुष्पलता । तत्पर्य्यायः । सुमना २ जातिः ३ । इत्यमरः ॥ सुमनाः ४ जाती ५ । इति भरतः ॥ (यथा, शिशुपालवधे । ११ । १७ ।
"ज्वलयति मदनाग्निं मालतीनां रजोभिः ।")
अस्या गुणाः । कफपित्तमुखरोगव्रणकृमिकुष्ठनाशित्वम् । इति राजवल्लभः ॥ तस्या उत्पत्तिर्यथा, —

आद्याशक्तिरुवाच ।
'अहमेतत्त्रिधा भिन्ना तिष्ठामि त्रिविधैर्गुणैः ।
गौरी लक्ष्मीः स्वधा चेति रजःसत्त्वतमोगुणैः ॥
तत्र गत्वा तथा कार्य्यं विधास्यन्ते च ताः सुराः ॥

नारद उवाच ।
प्रहसतामिति तां वाचमन्तर्द्धानमगाद्गुरुः ।
देवानां विस्मयोत्फुल्लनेत्राणाञ्च तदा नृप ! ॥
ततः सर्व्वेऽपि ते देवा गत्वा तद्वाक्यचोदिताः ।
गौरीं लक्ष्मीं स्वधाञ्चैव प्रणेमुर्भक्तितत्पराः ॥
तास्तथा तान् सुरान् दृष्ट्वा प्रणतान् भक्तवत्सलाः ।
बीजानि प्रददुस्तेभ्यो वाक्यानि जगदुस्तथा ॥

देव्य ऊचुः ।
इमानि देवा बीजानि विष्णुर्यत्रावतिष्ठते ।
निर्व्वपध्वं ततः कार्य्यं भवतां सिद्धिमेष्यति ॥

नारद उवाच ।
ततः प्रहृष्टाः सुरसिद्धसंघाः
प्रगृह्य बीजानि विचिक्षिपुश्च ।
विन्ध्यारिकाभूमितले स यत्र
विष्णुः सदा तिष्ठति सौख्यवृत्तिः ॥

नारद उवाच ।
क्षिप्तेभ्यस्तत्र बीजेभ्यो वनस्पत्यस्त्रयोऽभवन् ।
धात्री च मालती चैव तुलसी च नृपोत्तम ! ॥
धात्युद्भवा स्मृता धात्री माधवा मालती स्मृता ।
गौरीभवा च तुलसी रजःसत्त्वतमोगुणाः ॥"
इति पाद्मे उत्तरखण्डे १४८।१५० अध्यायौ ॥*॥
युवतौ । काचमाली । विशल्या । ज्योत्स्ना । निशा । नदीविशेषः । इति हेमचन्द्रः ।४।२१३।
(सुवर्चला मालतीत्यर्थः । तत्पर्य्यायो यथा,—
"चणको मालती चौमी रुद्रपत्नी सुवर्चला ॥"
पुष्पार्थे पर्य्यायो यथा,—
"मालती सुमना जातिः ।" इत्युमे वैद्यकरत्नमालायाम् ॥ तथाच ।
जातिर्जाती च सुमना मालती राजपुत्रिका ।
चेतिका हृद्यगन्धा च सा पीता स्वर्णजातिका ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
मालतीतीरजः, पुं, (मालती तदाख्या नदी तस्यास्तीरे जायते इति । जन + डः ।) टङ्कणः । इति हेमचन्द्रः । ४ । १० ॥
मालतीतीरसम्भवं, क्ली, (मालत्या तीरे सम्भवोऽस्य ।) श्वेतटङ्कणम् । इति राजनिर्घण्टः ॥
मालतीपत्रिका, स्त्री, (मालत्याः पत्रीव । मालतीपत्र + प्रतिज्ञतौ कन् टाप् अत इत्वम् ।) जातीपत्री । इति राजनिर्घण्टः ॥ (जातीपत्रीशब्दस्य विषयो द्रष्टव्यः ॥)
मालतीफलं, क्ली, (मालत्याः फलम् ।) जातीफलम् । इति राजनिर्घण्टः ॥ (तथास्य पर्य्यायः ।
"जातीफलं जातिकोशं मालतीफलमित्यपि ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।)
मालयः, पुं, (मा शोभा तस्याः लयः आस्पदम् ।) चन्दनवृक्षः । इति त्रिकाण्डशेषः ॥ मलयसम्बन्धिनि, त्रि ॥ (यथा, नलोदये । २ । ६७ ।
"तनुच्छटोत्तमालया तया भुवोत्तमालया ।
अहारि प्रीतमालयानिलावधूतमालया ॥"
क्ली, अभिसारस्थानभेदः । यथा, साहित्यदर्पणे । ३ । अभिसारिकाप्रकरणे ।
"क्षेत्रं वाटी भगदेवालयो दूतीगृहं वनम् ।
मालयश्च श्मशानञ्च नद्यादीनां तटी तथा ॥")
मालवः, पुं, (मालः उन्नतक्षेत्रमस्त्यत्र । माल + "कृग्रादयोऽन्यतरस्याम् ।" ५।२।१२८ । इत्यत्र "अन्येभ्योऽपि दृश्यन्ते ।" इति काशिकोक्तेः वप्रत्ययः ।) अवन्तिदेशः । इति हेमचन्द्रः । ४ । २२ ॥ मालवोया इति हिन्दीभाषा ॥ (यथा, मात्स्ये । १२३ । ४४ ॥
"अङ्गा वङ्गा मद्गुरका अन्तर्गिरि बहिर्गिरी ।
सुह्मोत्तराः प्रविजया मार्गवागेयमालवाः ॥"
मालवेषु जात इत्यण् । तद्देशजे, त्रि ॥)
रागविशेषः । स च षड्रागानां मध्ये प्रथमरागः । मतान्तरे भैरवरागोऽयम् । यथा,—
"आदौ मालवरागेन्द्रस्ततो मल्लारसंज्ञितः ।
श्रीरागस्तस्य पश्चाद्वै वसन्तस्तदनन्तरम् ॥
हिन्दोलश्चाथ कर्णाट एते रागाः प्रकीर्त्तिताः ॥

तस्य स्वरूपं यथा,—
"नितम्बिनीचुम्बितवक्त्रपद्मः
भ्रुकुञ्चनिः कुण्डलवान् प्रमत्तः ।
सङ्गीतशालां प्रविशन् प्रदोषे
मालाधरो मालवरागराजः ॥"
इति सङ्गीतदामोदरः ॥
(मालत्यां तन्नामिकायां सावित्रीमातरि जातः इत्यण् । अम्बपतिराज्ञो मालत्यां जातः पुत्रगणः । यथा, महाभारते । ३ । २६६ । ५८ ।
"पितुश्च ते पुत्रशतं भविता तव मातरि ।
मालव्यां मालवा नाम ख्याताः पुत्रौत्रिणः ॥
भ्रातरस्ते भविष्यन्ति क्षत्रियाख्यिदशोपमाः ॥"
क्ली, नदीविशेषः । यथा, महाभारते । १३ । १६५ । २५ ।
"हिरण्वती वितस्ता च तथा शतवती नदी ।
वेदस्मृतिर्वेदवती मालवाश्वत्यपि ॥")
मालविका, स्त्री, (मालवेषु जाता । मालव + टक् टाप् ।) चिरुत । इति राजनिर्घण्टः ॥
मालसी, स्त्री, (मल + स्वार्थे अण् । मलं स्यति-नाशयति । सो + डः । ङीप् ।) केशपुष्पवृक्षः । यथा,—
'मालसी दुर्गपुष्पी च बालाख्यौ केशधारिणौ ॥'
इति शब्दचन्द्रिका ॥
रागिणीविशेषः । सा तु मालवरागस्य पत्नी । यथा,—
"धानुषी मालसी रामकिरी च सिन्धुड़ा तथा ।
अम्बवारी भैरवी च मालवस्य प्रिया इमाः ॥"
इति हारीतः ॥
मतान्तरे मेघरागस्य पत्नी । यथा,—
"ललिता मालसी गौड़ी नाटी देवकिरी तथा ।
मेघरागस्य रागिण्यो भवन्त्योमाः सुमध्यमाः ॥"
तस्याः स्वरूपं यथा,—
"नीलारविन्दस्य दलानि बाला
विधारयन्ती तनुदेहयष्टिः ।
मालूरवृन्तस्य तले निषण्णा
श्रोण्या स्फुर्मालसिका प्रदिष्टा ॥"
तस्या गानसमयो यथा,—
"इन्द्रोत्थानात् समारभ्य यावद्दुर्गामहोत्सवम् ।
गेया भवेद्बुधैर्नित्यं मालसी सा मनोहरा ॥"
अपि च ।
"गान्धारी दीपिका चैव कल्याणी पुरवी तथा ।
अम्बवारी कानड़ा च गौरी केदारपाहिड़ा ॥
माधवी मालसी नाटी भूपाली सिन्धुड़ा तथा ।
सायाह्ने रागिणीरेताः प्रगायन्ति चतुर्दश ॥"
इति सङ्गीतदामोदरः ॥
माला, स्त्री, (माति मानहेतुर्भवतीति । मा + "ऋज्रेन्द्राग्रवज्रे ।" उणा० २।२८ । इति रन् रस्य लत्वम् टाप् च । यद्वा, मां शोभां लाति इति । ला + कः टाप् ।) श्रेणी । तत्पर्य्यायः । राजिः२ लेखा ३ तती ४ वीची ५ आली ६ आवलिः ७ पङ्क्तिः८ धारणी ९ । इति हेमचन्द्रः ।३।३१५। मूर्द्ध्नि न्यस्तपुष्पदाम । अन्यत्राप्युपचारात् ॥ तत्पर्य्यायः । माल्यम् २ स्रक् ३ । इत्यमरः ।२। ६ ।१३५ ॥ मालिका ४ मालाका ५ मालका ६ । इति शब्दरत्नावली ॥ गणनिका ७ गुणान्तिका ८ । इति वराहपुराणम् ॥ सा त्रिविधा यथा,—
"माला तु त्रिविधा देवि ! वर्णाद्यपर्व्वभेदतः ,
इति मत्स्यसूक्तवचनम् ॥ * ॥
अथ मालानिर्णयः । तत्र करमाला । स्वतः कुमारसंहितायाम् ।
'तर्जनी मध्यमानामा कनिष्ठा चेति ताः क्रमात् ॥
तिस्रोऽङ्गुल्यस्त्रिपर्व्वाणो मध्यमा चैकपर्व्विका ।
पर्व्वत्रयं मध्यमाया मेरुत्वेनोपकल्पयेत् ,
क्रममाह ।
अनामामध्यमारभ्य कनिष्ठादित एव च ।
तर्जनीमूलपर्य्यन्तं दशपर्व्वसु संजपेत् ॥
तथा,—
अनामामूलमारभ्य कनिष्ठादित एव च ।
तर्जनीमध्यपर्य्यन्तमष्टपर्व्वसु संजपेत् ,

एतद्वचनन्तु अष्टोत्तरशतादिविषयम् ॥ * ॥
शक्तिविषये पुनः । श्रीक्रमे ।
अनामिकात्रयं पर्व्व कनिष्ठादित्रिपर्व्विका ।
मध्यमायाश्च त्रितयं तर्जनीमूलपर्व्वणि ।
तर्जन्यग्रे तथा मध्ये यो जपेत् स तु पापहृत् ॥
हंसपारमेश्वरे ।
पर्व्वद्वयमनामायाः परिवर्त्तेन वै क्रमात् ।
पर्व्वत्रयं मध्यमायास्तर्जन्येकं समाहरेत् ॥
पर्व्वद्वयन्तु तर्जन्या मेरुं तद्विद्धि पार्व्वति ! ।
शक्तिमाला समाख्याता सर्व्वतन्त्रप्रदीपिका ॥
तथा ।
अनामामूलमारभ्य प्रादक्षिण्यक्रमेण च ।
मध्यमामूलपर्य्यन्तमष्टपर्व्वसु संजपेत् ॥ * ॥
श्रीविद्यायामयं विशेषः ।
अनामाया मध्यमाया मूलाग्रञ्च द्वयं द्वयं ।
कनिष्ठायाश्च तर्जन्याश्चयं पर्व्व सुरेश्वरि ! ॥
अनामामध्यमायाश्च मेरुः स्याद्द्वितयं शुभम् ।
प्रदक्षिणक्रमाद्देवि ! जपेत्त्रिपुरसुन्दरीम् ॥"
इति यामलवचनात् ॥

सुखमालातन्त्रे ।
"अनामिका द्वयं पर्व्वप्रादक्षिण्यक्रमेण तु ।
तर्जनीमूलपर्य्यन्तं करमाला प्रकीर्त्तिता ॥
कनिष्ठामूलमारभ्य प्रादक्षिण्यक्रमेण च ।
तर्जनीमूलपर्य्यन्तमष्टपर्व्वसु संजपेत् ॥"
इदमपि अष्टोत्तरशतादिविषयम् ॥ * ॥
अङ्गुलीर्न वियुञ्जीत किञ्चिदाकुञ्चिते तले ।
अङ्गुलीनां वियोगाच्च छिद्रे च स्रवते जपः ॥
अन्यत्रापि ।
अङ्गुल्यग्रेषु यज्जप्तं यज्जप्तं मेरुलङ्घने
पर्व्वसन्धिषु यज्जप्तं तत्सर्व्वं निष्फलं भवेत् ॥
गणनाविधिमुल्लङ्घ्य यो जपेत्तच्च यं यतः ।
गृह्णन्ति राक्षसास्तेन गणयेत् सर्व्वथा बुधः ॥
तस्माङ्गुलिजपं कुर्व्वन् साङ्गुष्ठाङ्गुलिभिर्जपेत् ।
वाङ्गुष्ठेन विना कर्म्म कृतं तदफलं भवेत् ॥
विश्वसारे ।
जपसंख्या तु कर्त्तव्या नासंख्यातं जपेत् सुधीः ।
असंख्याकारकस्यास्य सर्व्वं भवति निष्फलम् ॥
तन्त्रे ।
हृदये हस्तमारोप्य तिर्य्यक् कृत्वा कराङ्गुलीः ।
आच्छाद्य वाससा हस्तौ दक्षिणेन सदा जपेत् ॥
इति करमाला ॥ * ॥
जपसंख्यायां निषिद्धद्रव्यमाह यामले ।
नाचतैर्हस्तपर्व्वैर्वा न वाम्येनच पुष्पकैः ।
न चन्दनेर्मृत्तिकया जपसंख्यां न कारयेत् ॥
विहितद्रव्यमाह ।
लाक्षाकुङ्कुमसिन्दूरगोमयञ्च करीषकम् ।
एभिर्निर्म्माय गुटिकां जपसंख्यान्तु कारयेत् ॥
अथ वर्णमाला । सनत्कुमारे ।
क्रमोत्क्रमगतैर्मालामातृकार्णैः क्रमेरुकैः ।
सबिन्दुकैः साष्टवर्गैरन्तर्जनकर्म्मणि ॥
आदिक्ष टु टुपु यवोऽष्टौ वर्गाः प्रकीर्त्तिताः ।
तद्यथा । अकारादिवर्णान् सबिन्दून् प्रत्येकं कृत्वा प्रणवं संजप्य अकारादीनां वर्णानां कवर्गादीनाञ्चान्तिमं वर्णं सानुस्वारं कृत्वा पूर्व्वमुच्चार्य्य प्रेषाष्टवारमन्त्रजपः कार्य्यः । अनेन प्रकारेण अष्टोत्तरशतसंख्यो जपो भवति । अन्तर्जननित्युपलक्षणम् । तथा ।
सबिन्दुं वर्णमुच्चार्य्य पश्चान्मन्त्रं जपेद्बुधः ।
अकारादिक्षकारान्तं बिन्दुयुक्तं विभाव्य च ।
वर्णमाला समाख्याता अनुलोमविलोमतः ॥
इति नारदवचनात् ।
विष्णुरहस्ये ।
अनुलोमविलोमेन वर्गाष्टकविभेदतः ।
मन्त्रेणान्तरितान् वर्णान् वर्णैर्नान्तरितान् मनून् ।
कुर्य्यादवर्णमयीं मालां सर्व्वतन्त्रप्रकाशिनीम् ॥ * ॥
मालिनीविजये सूचनियमः ।
अन्तर्विद्रुमभासमानसुभगीसूत्रोतवर्णोज्ज्वलाम् ।
आरोहप्रतिरोहतः प्रतमयीं वर्गाष्टकाष्टोत्तराम् ॥
इति वर्णमाला ॥ * ॥
अथाक्षमाला । तत्र माहात्म्यं मणिनिर्णयः ।
पद्मबीजादिभिर्माला वह्नियागे प्रशस्यते ताः ।
रुद्राक्षपद्मशङ्खपुत्रजीवकमौक्तिकैः ॥
स्फाटिकैर्मणिरत्नैश्च सुवर्णैर्विद्रुमैस्तथा ।
राजतैः क्रशमूलैश्च गृहस्थस्याक्षमालिका ॥ * ॥
अङ्गुलीगणनादेकं पर्व्वमेरुगुणं भवेत् ।
पुत्रजीवैर्दशगुणं प्रतं शतैः सहस्रकम् ॥
प्रवालैर्मणिरत्नैश्च दशसाहस्रकं मतम् ।
तदेव स्फाटिकैः प्रोक्तं मौक्तिकैर्लक्षमुच्यते ॥
पद्माक्षैर्दशगुणं स्यात् सौवर्णैः कोटिरुच्यते ।
कुशग्रन्थ्या कोटिगुणं रुद्राक्षैः स्यादनन्तकम् ॥
सर्व्वैर्विरचिता माला नृणां सुक्तिफलप्रदा ।
कालिकापुराणे ।
रुद्राक्षैर्वा यदि जपेत् इन्द्राक्षैः स्फाटिकैस्तथा ।
नान्यकर्म्मे प्रयोक्तव्यं पुत्रजीवादिकञ्च यत् ॥
यद्यन्यत्तु प्रयुञ्जीत मालायां जपकर्म्मणि ।
तस्य कामञ्च मोक्षञ्च न ददाति प्रियङ्करी ॥
सुखमालायाम् ।
श्मशानभस्मसूत्रैर्माला त्रया धूमावतीविधौ ।
नराङ्गुल्यस्थिभिर्माला ग्रथिता सर्व्वकामदा ॥
नाक्षा संग्रथनं कार्य्यं रक्तेन वाससा प्रिये ! ।
सदा शोध्या प्रयत्नेन जनन्या भारवत् प्रिये ! ॥
कामनाविशेषे तु ।
पद्माक्षैर्विहिता माला शत्रूणामुत्करी मता ।
कुशग्रन्थिमयी माला सर्व्वपापप्रणाशिनी ॥
पुत्रजीवफलैः कृष्णा कुरुते पुत्रसम्पदम् ।
निर्म्मिता रूप्यमणिभिर्जपमालेप्सितप्रदा ।
प्रवालैर्विहिता माला प्रयच्छेत् विपुलं धनम् ॥
भैरवीविद्यायान्तु वाराहीतन्त्रे ।
सुवर्णमणिभिर्म्मालां स्फाटिकीं शङ्खनिर्म्मिताम् ।
प्रवालैर्व कुर्य्यात् पुत्रजीवं विवर्ज्जयेत् ।
पद्माक्षैर्व रुद्राक्षमिन्द्राक्षञ्च विशेषतः ॥ *

त्रिपुरामन्त्रजपादौ तु रक्तचन्दनजीवादिभिरतिप्रशस्ता । तथा च तन्त्रराज ।
रक्तचन्दनमाला तु भोगदा मोक्षदा भवेत् ॥
तथा ।
वैष्णवे तुलसीमाला गजदन्तैर्गजानने ।
त्रिपुराया जपे प्रस्ता रुद्राक्षै रक्तचन्दनैः ॥ * ॥
कुमारीकल्पे ।
रुद्राक्षैः शक्तिमन्त्रञ्च मन्त्री यः प्रजपेत् प्रिय ! ।
स दुर्गतिमवाप्नोति निष्फलस्तस्य तज्जपः ॥
कालिका च्छिन्नमस्ता च त्रिपुरा तारिणी तथा ।
एताः सर्व्वा न दुष्यन्ति जपे रुद्राक्षमालया ॥
दिवा नैव प्रजप्तव्यं रुद्राक्षमालयापि च ।
पुरश्चर्य्यास्ते चाक्ष दूषयन्तु वरानने ! ॥
महाशङ्खमयी माला नीलसारस्वते विधौ ।
नृललाटास्थिखण्डेन रचिता जपमालिका ॥
महाशङ्खमयी माला ताराविद्याजपे प्रिये ! ।
कर्णनेत्रान्तरालास्थि महाशङ्खः प्रकीर्त्तितः ।
मणिनियमस्तु सुखमालायाम् ।
अन्योन्यसमरूपाणि नातिस्थूलकृशानि च ।
कीटादिभिरदुष्टानि न जीर्णानि नवानि वै ॥
तथा गौतमीये ।
प्रशस्तशिखिभिर्माला विहिता सर्व्वकर्म्मसु ।
अकारादिक्षकारान्ता वर्णमाला प्रकीर्त्तिता ॥
चार्णे मेरुसुखं तत्र कल्पवेत्तुनिसत्तम ! ।
अनया सर्व्वमन्त्राणां जपः सर्व्वसमृद्धिदः ॥ *
चासुखतन्त्रे ।
नित्यं जपं करे कुर्य्यात् न तु काम्यमबोधनात् ।
काम्यमपि करे कुर्य्यात् मालाभावेऽपि सुन्दरि ! ॥
तेन मालायाः प्राधान्यम् ॥ * ॥ कामनाभेदे तु गौतमीये ।
समासेनाक्षसूत्रस्य विधानमिह कथ्यते ।
पञ्चविंशतिभिर्मौक्तैः शिंशुद्भिर्धनसिद्धये ॥
सर्व्वार्थाः सप्तविंशत्या पद्मदक्षभिचारके
पञ्चाशद्भिः काम्यसिद्धिः स्यात्तथा चतुरुत्तरैः ।
अष्टोत्तरशतैः सर्व्वसिद्धिरुक्ता मनीषिभिः ॥
अथ मालासंस्कारः । तत्र सनत्कुमारीये ।
'कार्पाससम्भवं सूत्रं धर्म्मकामार्थमोक्षदम् ।
तच्च विप्रेन्द्रकन्याभिर्निर्म्मितञ्च सुशोभनम्
यदा ।
'शुक्लं रक्तं तथा कृष्णं षट्सूत्रमथापि वा ।
शान्तिवश्याभिचारेषु मोक्षैश्वर्य्यजयेषु च ॥
शुक्लं रक्तं तथा पीतं कृष्णं वर्णेषु च क्रमात् ।
सर्व्वेषामेव वर्णानां रक्तं सर्व्वेप्सितप्रदम् ॥
आश्रमेषु तथा चैवं रक्तं सर्व्वसुसिद्धिदम् ।
त्रिगुणं त्रिगुणीकृत्य ग्रथयेत् ग्रन्थिवर्जितः ॥
एकैकं मातृकावर्णं सतारं प्रजपन् सुधीः ।
मणिमादाय सूत्रेण ग्रथयेन्मध्यमध्यतः ॥
ब्रह्मग्रन्थिं विधायेत्थं मेरुञ्च ग्रन्थिसंयुतम् ।
ग्रथयित्वा पुरो मालां ततः संस्कारमारभेत् ॥
कस्यचिन्मते मूलविद्यया ग्रथयेत् । तथा च एकवीराकल्पे ।
'मातृकामन्त्रतो ग्रन्थिं विद्यया वाथ कारयेत् ।

सुवर्णादिगुणैर्वापि ग्रथयेत् साधकोत्तमः ॥
ब्रह्मग्रन्थिं ततो दद्यात्रागपाशमथापि वा ।
कवचेनाववधीयान्मालां ध्यानपरायणः ॥
मर्त्रेणैवं ततो मेरुं सूत्रद्वयसमन्वितम् ।
ग्रथयेत्तारयोगेण बध्नीयात् साधकोत्तमः ।
एवं निष्पाद्य देवेशि ! प्रतिष्ठाच्च समाचरेत् ॥'
गौतमीये ।
'सुखे सुखञ्च संयोज्य पुच्छे पुच्छं नियोजयेत् ।
गोपुच्छसदृशी माला यद्वा सर्पाकृतिः शुभा ।
एवं निर्म्माय मालां वै शोधयेन्मुनिसत्तमः ॥
अश्वत्थपत्रवत्कैः पद्माकारन्तु कारयेत् ।
तन्मध्ये स्थापयेन्मालां मालकां मूलमुच्चरन् ।
प्रालयेत् पञ्चगव्येन सद्योजातेन सज्जलैः ॥'
सद्योजातस्तु ।
'ॐ सद्योजातं प्रपद्यामि सद्योजाताय वै नमः ।
भवेऽभवेऽनादिभवे भजस्व मां भवोद्भवाय नमः॥
चन्दनागुरुकर्पूरैर्वामदेवेन घर्षयेत् ॥'
वामदेवमन्त्रस्तु । ॐ वामदेवाय नमो ज्येष्ठाय नमो रुद्राय नमः कालाय नमः कलविकरणाय नमो बलविकरणाय नमो बलप्रमथनाय नमः सर्व्वभूतदमनाय नमो मनोन्मनाय नमः । धूपयेत्तामघोरेण । अघोरमन्त्रस्तु । अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः सर्व्वतः सर्व्वसर्व्वेभ्यो नमस्तेऽस्तु रुद्ररूपेभ्यः । लेपयेत्तत्पुरुषेण तु । तत्पुरुषमन्त्रस्तु । ॐ तत्पुरुषाय विद्महे महादेवाय धीमहि तन्नो रुद्रः प्रचोदयात् ।
'मन्त्रयेत् पञ्चमेनैव प्रत्येकन्तु घृतं घृतम् ।
मेरुञ्च मन्त्रयेच्चैव मनुना च घृतं घृतम् ॥'
मन्त्रस्तु । ॐ ईशानः सर्व्वविद्यानामीश्वरः सर्व्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिः शिरो मेऽस्तु सदाशिवोम् । प्रत्येकन्तु सकृत् सकृत् । इति वा । तथा च तत्रैव ।
'प्रत्येकं मन्त्रयेन्मन्त्री पञ्चमेन सकृत् सकृत् ।'
तथा च गौतमीये समुदायमालामधिकृत्य ।
'पञ्चमेनैव सूक्तेन घृतान्यूनेन मन्त्रयेत् ।'
इति दर्शनान्मालायां वा घृतजपः ।
तत्रावाह्य यत्नेदेवं यथाविभवविस्तरैः ।
मालायाः प्राणप्रतिष्ठानन्तरं देवतां पूजयेत् ॥
तथा सनत्कुमारे ।
'संस्कृत्यैवं बुधो मालां तत्प्रागांस्तत्र स्थापयेत् ।
मूलमन्त्रेण तां मालां पूजयेद्विजसत्तम ! ॥'
वाराहीतन्त्रे ।
'माले माले महामाले सर्व्वतत्त्वस्वरूपिणि ! ।
चतुर्व्वर्गस्त्वयि न्यस्तस्तस्मान्मे सिद्धिदा भव ॥
मायाबीजादिकां कृत्वा रक्तपुष्पैः समर्च्चयेत् ॥'
इति शक्तिविषये ॥
विष्णुविषये तु रुद्रयामले ।
'वाग्भवञ्च तथा लक्ष्मीमनादिमालिकां ततः ।
ङेन्तां हृदयवर्य्यान्तां मन्त्रेणानेन पूजयेत् ॥
मन्त्रयेन्मूलमन्त्रेण क्रमेणोत्क्रमयोगतः ।
तथैव मालकावर्णैर्मन्त्रयेत्तान्तु मन्त्रवित् ॥'
योगिनीतन्त्रे ।
'होमकर्म्म ततः कुर्य्यादैवतानामवसिद्धये ।
अष्टोत्तरशतं हुत्वा सम्पाताज्यं विनिःक्षिपेत् ।
होमकर्म्मण्यशक्तश्चेत् द्विगुणं जपमाचरेत् ॥
नान्यमन्त्रं जपेन्मन्त्री कम्पयेन्न विधूनयेत् ।
कम्पनात् सिद्धिहानिः स्याद्धूननं बहुदुःखदम् ॥
शब्दे जाते भवेद्रोगः करभ्रष्टा विनाशिका ।
छिन्ने सूत्रे भवेन्मृत्युस्तस्मादयत्नपरो भवेत् ॥
जपान्ते कर्णदेशे वा उच्चदेशे तथा न्यसेत् ।
त्वं माले सर्व्वभूतानां सर्व्वसिद्धिप्रदा मता ।
तेन सत्येन मे सिद्धिं देहि मातर्नमोऽस्तु ते ।
इत्युक्त्वा परिपूज्याथ गोपयेदयत्नतो गृही ॥'
मालासंस्कारस्य नित्यतामाह रुद्रयामले ।
'अप्रतिष्ठितमालाभिर्मन्त्रं जपति यो नरः ।
सर्व्वं तद्विफलं विद्यात् कृत्वा भवति देवता ॥'
कामनाभेदे तु अङ्गुलिनियमः । गौतमीये ।
'तर्जन्यङ्गुष्ठयोगेन शत्रूच्चाटनमुत्तमम् ।
अङ्गुष्ठमध्यमायोगात् मन्त्रसिद्धिः सुनिश्चिता ॥
अङ्गुष्ठानामिकायोगादुच्चाटोत्सादने मते ।
ज्येष्ठाकनिष्ठायोगेन शत्रूणां नाशनं मतम् ॥'
वैष्णव्यायनसंहितायाम् ।
'अङ्गुष्ठमध्यमाभ्याञ्च चालयेन्मध्यमध्यतः ।
तर्जन्यां न स्पृशेदेनां मुक्तिदो गणनक्रमः ॥
जीर्णे सूत्रे पुनः सूत्रं ग्रथयित्वा शतं जपेत् ।
प्रमादात् पतिता हस्तात् शतमष्टोत्तरं जपेत् ॥
जपेन्निधिद्वयंस्पृष्टं चालयित्वा यथोदितम् ।
छिन्नेऽप्यष्टोत्तरशतजपः कार्य्यः । करभ्रष्टच्छिन्नयोस्तुल्यत्वात् ॥*॥ प्रकारान्तरं आगमकल्पद्रुमे ।
'भूतशुद्ध्यादिकां पूजां समाप्य तत्र पूजयेत् ।
गणेशसूर्य्यविष्णूशान् दुर्गामावाह्य मन्त्रवित् ॥
पञ्चगव्ये ततः क्षिप्त्वा हृत्सौर्मन्त्रेण मन्त्रवित् ।
तस्मादुत्थाय तां मालां स्वर्गपात्रे विधाय च ॥
पयोदधिघृतक्षौद्रशर्करादैरनुक्रमात् ।
तोयधूपान्तरैः स्नात्वा पञ्चाश्तविधिं बुधः ॥
क्रमादेवं संस्नाप्य स्थापयेच्छीतले जले ॥
ततश्चन्दनसौगन्धिकस्तूरीकुङ्कुमादिभिः ।
तामालिप्य हृत्सौर्मन्त्रमष्टोत्तरशतं जपेत् ॥
तस्यां नवग्रहांश्चैव दिक्पालांश्च प्रपूजयेत् ।
ततः संपूज्य च गुरुं गृह्णीयान्मालिकां शुभाम् ॥
अक्षमालाञ्च सुत्राञ्च गुरोरपि न दर्शयेत् ।
भूतराक्षसवेताला: सिद्धगन्धर्व्वचारणाः ।
हरन्ति प्रकटं यस्मात्तस्मादृगुप्तं समाचरेत् ॥'
इति अक्षमाला । इति तन्त्रसारः ॥
अपि च ।
'विद्याधराप्सरोयक्षा विबुधासुरराक्षसाः ।
भूतानि किन्नराः सिद्धाः प्रेताश्च चारणादयः ॥
हरन्ति जपफलान्येते यानि तानि च नारद ! ।
अतूर्णां चेद्वहिर्नीतु चार्द्रवासादिभिर्जपेत् ॥
वृन्दाटवीन्वनमयी तुलसीकाष्ठसम्भवा ।
हस्ताङ्गुलिमयी हैमी दर्भग्रन्थिमयी तथा ॥
भद्राक्षेन्द्राक्षरुद्राक्षपद्मबीजभवाप्यथ ।
धात्रीपुत्रजीवफलैर्माला या परिकीर्त्तिता ॥
मुक्तामणिमयी रौप्या स्फाटिकी वैष्णवी तथा ।
जपकर्म्मसु सर्व्वेषु चाक्षमाला प्रकीर्त्तिता ॥*॥
क्षणमन्त्रजपे माला वृन्दारण्यसमुद्भवा ।
नान्या माला क्वनन्यानां हस्ताङ्गुलिमयीं विना ॥
हैमी मणिमयी माला प्रशस्ता कमलाजपे ।
सरस्वत्या मन्त्रजपे रौप्या मुक्ताविनिर्म्मिता ॥
प्रजापतिजपे माला पुत्रजीवसमुद्भवा ।
पुत्रकामनराणाञ्च सदा पुत्रप्रदा तु सा ॥
राममन्त्रजपे माला पद्मबीजसमुद्भवा ।
धात्रीफलमयी माला विष्णोः कामनया जपे ॥
रुद्राक्षेन्द्राक्षभद्राक्षवृत्तबीजसमुद्भवा ।
महैश्वानमन्त्रजपे त्वेता मालाः फलप्रदाः ॥
कुशग्रन्थिमयी शुद्धा गायत्री वैष्णवी जपे ।
स्फाटिकी सर्व्वदेवानामथवा तत्परीजपे ।
श्रीहरेरङ्गुलिमयी जपे माला द्विजन्मनाम् ॥'
इति पाद्मोत्तरखण्डे १०८ अध्यायः ॥
अपरञ्च ।
'जपादौ पूजयेन्मालां तोयैरभ्युक्ष्य यत्नतः ।
निधाय मण्डलस्यान्तः सव्यहस्तगताञ्च वा ॥
ॐ मां माले महामाये सर्व्वशक्तिस्वरूपिणि ! ।
चतुर्व्वर्गस्त्वयि न्यस्तस्तस्मान्मे सिद्धिदा भव ॥
पूजयित्वा ततो मालां गृहीत्वा दक्षिणे करे ।
मध्यमाया मध्यभागे वर्त्तयित्वा तु तर्ज्जनीम् ॥
अनामिकाकनिष्ठाभ्यां धृताया नस्रभावतः ।
स्थापयित्वा तत्र मालामङ्गुष्ठाग्रेण तत्नतम् ॥
प्रत्येकं बीजमादाय जपं कुर्य्यात्तु भैरव ! ।
प्रतिवारं पठेन्मन्त्रं शनैरोष्ठं न चालयेत् ॥
मालाबीजन्तु जप्यं स्पृशेन्न हि परस्परम् ।
पूर्व्वजापप्रयुक्तेनैवङ्गुष्ठाग्रेण भैरव ! ॥
पूर्व्वबीजं जपन् यस्तु परबीजन्तु संस्पृशेत् ।
अङ्गुष्ठेन भवेत्तस्य निष्फलस्तस्य तज्जपः ॥
मालां स्वहृदयासन्ने धृत्वा दक्षिणपाणिना ।
देवीं विचिन्तयन् जप्यं कुर्य्याद्वामेन न स्पृशेत् ॥
स्फाटिकेन्द्राक्षरुद्राक्षैः पुत्रजीवसमुद्भवैः ।
सुवर्णमणिभिः सम्यक् प्रवालैरथवाऽऽकैः ॥
अक्षमाला तु कर्त्तव्या देवी प्रीतिकरा परा ।
जपेदुपांशु सततं कुशग्रन्थ्या तु पाणिना ॥
नानाबीजेषु सर्व्वेषु रुद्राक्षो मन्त्रियान्त्रियः ।
रुद्रप्रीतिकरो यस्मात्तस्माद्रुद्राक्षको बली ॥
प्रवालैरथवा कुर्य्यादष्टाविंशति बीजकैः ।
पञ्चपञ्चगुता वापि न न्यूनैर्नाधिकैश्च वा ॥
रुद्राक्षैर्यदि जप्यंत इन्द्राक्षैः स्फाटिकैस्तथा ।
नान्यं मध्ये प्रयोक्तव्यं पुत्रजीवादिकञ्च यत् ॥
यदन्यत्तु प्रयुज्येत मालायां जपकर्म्मणि ।
तस्य कामञ्च मोक्षञ्च न ददाति प्रियङ्करी ॥
जन्मान्तरे जायते स वेदवेदाङ्गपारगः ।
मित्रीभावं तदा याति चाण्डालैः पापकर्म्मभिः ॥
एको मेरुस्तत्र देयः सर्व्वेभ्यः स्थूलसम्भवः ।
आद्यं स्थूलं ततस्तस्मात् न्यूनं न्यूनतरं तथा ॥
विन्यसेत् क्रमतस्तस्मात् सर्पाकारा हि सा यतः ।
ब्रह्मग्रन्थियुतं कुर्य्यात् प्रतिबीजं यथा स्थितम् ॥

अथवा ग्रन्थिरहितं दृढ़सूत्रसमन्वितम् ।
चिराहृत्ताथ मध्येनैवार्द्धावृत्तप्रान्तदेशत: ॥
ग्रन्थि: प्रदक्षिणावर्त्त: स मेरुरिति संज्ञक: ।
नाम्ना योजयेन्मालां नामन्त्रो योजयेद्बुध: ॥
दृढं सूत्रं नियुञ्जीत जपे च्युयति नो यथा ।
यथा हस्तान्न श्रवते जपत: सक् तथाचरेत् ।
हस्ताच्छ्रुतायां विघ्न: स्याच्छिन्नायां मरणं भवेत् ।
एवं य: कुरुते मालां जप्यं च मयकीर्त्तितम् ।
स प्राप्नोतीप्सितं कामं हीनं स्यात्तु विपर्य्यय: ॥
अन्यत्रापि जपेन्मालां जप्यं देवमनोहरम् ।
ईदृशं साधक: कुर्य्यात् नान्यथा तु कदाचन ॥
यथाशक्ति जपं कुर्य्यात् संख्यायैव प्रयत्नत: ।
असंख्यातन्तु यज्जप्तं तत् सर्व्वं निष्फलं भवेत् ।
जप्त्वा मालां शिरोदेशे प्रांशुस्थानेऽथवा न्यसेत् ॥
इति कालिकापुराणे ५४ अध्याय: ॥*॥
अथ मालादिधारणम् ।
तत: क्षणार्पिता माला धार्य्यैत्तुलसीदलै: ।
पद्माक्षैस्तुलसीकाष्ठै: फलैर्वाऽन्यैश्च निर्म्मिता ॥
धार्य्यैत्तुलसीकाष्ठभूषणानि च वैष्णवै: ।
मस्तके कर्णयोर्बाह्वो: करयोश्च यथारुचि ॥*॥
अथ मालाधारणविधि: ।
स्कान्दे ।
संनिवेद्यैव हरये तुलसीकाष्ठसम्भवाम् ।
मालां पश्चात् स्वयं धत्ते न वै भागवतोत्तम: ॥
हरये नार्पयेद्यस्तु तुलसीकाष्ठसम्भवाम् ।
मालां धत्ते स्वयं मूढ़: स याति नरकं ध्रुवम् ॥
क्षालितां पञ्चगव्येन मूलमन्त्रेण मन्त्रिताम् ।
गायत्र्या चाष्टकलो वै मन्त्रितां धूपयेच्च ताम् ।
विधिवत् परया भक्त्या सद्योजातेन पूजयेत् ॥
तुलसीकाष्ठसम्भूते माले कृष्णजनप्रिये ।
बिभर्म्मि त्वामहं कण्ठे कुरु मां कृष्णवल्लभम् ॥
यथा त्वं वल्लभा विष्णोर्नित्यं विष्णुजनप्रिया ।
तथा मां कुरु देवेशि ! नित्यं विष्णुजनप्रियम् ॥
दाने मा धातुरद्दिष्टो लामि मां हरिवल्लभे ! ।
भक्तेभ्यश्च समस्तेभ्यस्तेन माला निगद्यते ॥
एवं संप्रार्थ्य विधिवन्मालां कृष्णशिरोर्पिताम् ।
धारयेद्वैष्णवो यो वै स गच्छेद्वैष्णवं पदम् ॥"*॥
अथ मालाधारणनित्यता ।
तत्रैव स्कान्दे कार्त्तिकप्रसङ्गे ।
"धात्रीफलकृतां मालां कण्ठस्थां यो वहेन्न हि ।
वैष्णवो न स विज्ञेयो विष्णुपूजारतो यदि ॥"
गारुड़े ।
"धारयन्ति न ये मालां हैतुका: पापबुद्धय: ।
नरकान्न निवर्त्तन्ते दग्धा: कोपाग्निना हरे: ॥"
अतएव स्कान्दे तत्रैव ।
"न जह्यात्तुलसीमालां धात्रीमालां विशेषत: ।
महापातकसंहर्त्रीं धर्म्मकामार्थदायिनीम् ॥"*॥
अथ मालामाहात्म्यम् ।
अग्निपुराणे ।
"निर्म्माल्यतुलसीपालाशैर्यो यजार्च्चयेद्धरिम् ।
यद्यत् करोति तत् सर्व्वमनन्तफलदं भवेत् ॥

य: कुर्य्यात्तुलसीकाष्ठैरक्षमालास्वरूपिणीम् ।
कण्ठमालाञ्च यत्नेन धृतं तस्यात्तयं भवेत् ॥"
नारदीये ।
"ये कण्ठलग्नतुलसीनलिनाक्षमाला
ये वा ललाटफलके लसदूर्द्ध्वपुण्ड्रा: ।
ये बाहुमूलपरिचिह्नितशङ्खचक्रा-
स्ते वैष्णवा भुवनमाशु पवित्रयन्ति ॥"
किञ्च ।
"भुजयुगमपि चिह्नैरङ्कितं यस्य विष्णो:
परमपुरुषनाम्नां कीर्त्तनं यस्य वाचि ।
क्षणतरमपि पुण्ड्रं मस्तके यस्य कण्ठे
सरसिजमणिमाला यस्य तस्यास्ति दास्य: ॥"
विष्णुधर्म्मोत्तरे श्रीभगवदुक्तौ ।
"तुलसीकाष्ठमालाञ्च कण्ठस्थां वहते तु य: ।
अप्यशौचोऽप्यनाचारो मामेवेति न संशय: ॥"
स्कान्दे ।
"धात्रीफलकृता माला तुलसीकाष्ठसम्भवा ।
दृश्यते यस्य देहे तु स वै भागवतो नर: ॥
तुलसीदलजां मालां कण्ठस्थां वहते तु य: ।
विष्णुतीर्थां विशेषेण स नमस्यो दिवौकसाम् ॥
तुलसीदलजा माला धात्रीफलकृतापि वा ।
ददाति पापिनां मुक्तिं किं पुनर्विष्णुसेविनाम् ॥
तत्रैव कार्त्तिकप्रसङ्गे ।
य: पुनस्तुलसीमालां कृत्वा कण्ठे जनार्द्दनम् ।
पूजयेत् पुण्यमाप्नोति प्रतिपुष्पं गवायुतम् ॥
अयुतसंख्यगोदानफलमित्यर्थ: ।
यावच्छुटति कण्ठस्था धात्रीमाला नरस्य हि ।
तावत्तस्य शरीरे तु प्रीत्या तुष्टति केशव: ॥
सृष्टेश्च यानि लोमानि धात्रीमाला कलौ नृणाम् ।
तावद्वर्षसहस्राणि वसते केशवालये ॥
यावद्दिनानि वहते धात्रीमालां कलौ नर: ।
तावद्युगसहस्राणि वैकुण्ठे वसतिर्भवेत् ॥
मालायुगञ्च यो नित्यं धात्रीतुलसिसम्भवम् ।
वहते कण्ठदेशे च कल्पकोटिं दिवं वसेत् ॥"
तुलसिसम्भवमिति ह्रस्वश्छान्दस: । गारुड़े च मार्कण्डेयोक्तौ ।
"तुलसीदलजां मालां क्षणोत्तीर्णां वहेत्तु य: ।
पदे पदेऽश्वमेधानां दशानां लभते फलम् ॥*॥
तुलसीकाष्ठसम्भूतां यो मालां वहते नर: ।
फलं यच्छति देवारि: प्रत्यहं द्वारकोद्भवम् ॥
निवेद्य केशवे मालां तुलसीकाष्ठसम्भवाम् ।
वहते यो नरो भक्त्या तस्य वै नास्ति पातकम् ।
सदा प्रीतमनास्तस्य कृष्णो देवकिनन्दन: ॥
तुलसीकाष्ठसम्भूतां यो मालां वहते नर: ।
प्रायश्चित्तं न तस्यास्ति नाशौचं तस्य विद्यते ।
तुलसीकाष्ठसम्भूतां यो मालां वहते नर: ।
तुलसीकाष्ठसम्भूतं शिरसो बहुभूषणम् ।
बाह्वो: करे च मर्त्यस्य देहे तस्य सदा हरि: ॥
तुलसीकाष्ठमालाभिर्भूषित: पुण्यमाचरेत् ।
पितृणां देवतानाञ्च शतं कोटिगुणं कलौ ॥
तुलसीकाष्ठमालान्तु प्रेतराजस्य दूतका: ।

दृष्ट्वा नश्यन्ति दूरेण वातोद्धूतं यथादलम् ॥
तुलसीकाष्ठमालाभिर्भूषितो भ्रमते यदि ।
दु:स्वप्नं दुर्निमित्तञ्च न भयं क्वचिन्न क्वचित् ॥"
गौतमीये पुरश्चरणप्रसङ्गे ।
"तथामलकसम्भूतैस्तुलसीकाष्ठनिर्म्मितै: ।
इत्यादि ॥*॥ तत्रैव ।
पुष्करीकभवा माला गोपालमनुसिद्धिदा ।
आमलकीभवा माला सर्व्वसिद्धिप्रदा मता ।
तुलसीसम्भवा या तु मोक्षं वितनुतेऽचिरात् ॥
इति हरिभक्तिविलास: ॥*॥
अथ रुद्राक्षमालाधारणफलादि ।
लिङ्गपुराणे ।
विना भस्मत्रिपुण्ड्रेण विना रुद्राक्षमालया ।
पूजितोऽपि महादेवो न स्यात्तस्य फलप्रद: ॥
संवत्सरप्रदीपे ।
त्रिपुरस्य वधे काले रुद्रस्याक्ष्णोऽपतंस्तु ये ।
अश्रुणो बिन्दवस्ते तु रुद्राक्षा अभवन् भुवि ॥
यद्यप्येकादिचतुर्द्दशमुखरुद्राक्षेषु मन्त्रफलविशेषा: सन्ति तथापि सुलभत्वात् पञ्चवक्त्रस्य फलमत्रावभिधीयते । यथा, स्कान्दे ।
"पञ्चवक्त्र: स्वयं रुद्र: कालाग्निर्नाम नामत: ।
अगम्यागमनाच्चैव अभक्ष्यस्य च भक्षणात् ।
मुच्यते सर्व्वपापेभ्य: पञ्चवक्त्रस्य धारणात् ॥"
इति तिथ्यादितत्त्वम् ॥
मालाकण्ट:, पु, (मालाकारा: कण्टा: कण्टका अस्य ।) अपामार्ग: । इति राजनिर्घण्ट: ॥
मालाकन्द:, पुं, (माला गण्डमाला नाम्नी कन्द: । प्राकपार्थिववत् मध्यपदलोपी ।) मूलविशेष: । तत्पर्य्याय: । आविलकन्द: २ त्रिग्रन्थिदला ३ ग्रन्थिदला ४ पादिकन्द: ५ कन्दलता ६ । अस्य गुणा: । स्तन्यकृत्त्वम् । गण्डमालानाशित्वम् । दीपनत्वम् । गुल्महारित्वम् । वातश्लेष्मापकर्षकारित्वञ्च । इति राजनिर्घण्ट: ॥
मालाका, स्त्री, (माला एव । माला+स्वार्थे कन् टाप् ।) माला । इति शब्दरत्नावली ॥
मालाकार:, पुं, (मालां करोतीति । कृ+अण् ।) वर्णसङ्करजातिविशेष: । मालिक: । माली इति ख्यात: । तत्पर्य्याय: । मालिक: २ । इत्यमर: । २ । १० । ५ । मालाकर: ३ पुष्पाजीवी ४ वनार्चक: ५ पुष्पलाव: ६ । इति जटाधर: ॥ पुष्पलावक: ७ । इति शब्दरत्नावली ॥ स तु शूद्रायां विश्वकर्म्मणो जात: । इति ब्रह्मवैवर्त्तपुराणम् ॥ अपि च ।
"तैलिक्यां कर्म्मकाराच्च मालाकारस्य सम्भव: ॥
इति पराशरपद्धति: ॥
तद्गृहस्थितपुष्पस्य पर्य्युषितदोषाभावो यथा,
"न पर्य्युषितदोषोऽस्ति तुलसीविल्वचम्पके ।
जलजे वञ्जुलेऽगस्त्ये मालाकारगृहेषु च ॥"
इति मेरुतन्त्रे ५ प्रकाश: ॥
(यथा, बृहत्संहितायाम् । १० । ६ ।
"हस्ते नापितचाक्रिक-
चौरभिषक्सूचिकदीपग्राहा: ।

वन्धवः कौशलका मालाकाराश्च पीयन्ते॥" स्त्रियां ङीप्। यथा तत्रैव। ७८। ६।
"भिक्षुणिका प्रव्रजिता दासी धात्री कुमारिका रजिका।
मालाकारा दुष्टाङ्गना सखी नापिनी दूत्यः।")
मालाग्रन्थिः, पुं, (मालेव ग्रन्थिरस्य।) मालादूर्वा। इति राजनिर्घण्टः॥
मालाटणं, क्ली, (मालाकारं टणम्।) भूटणम्। इति राजनिर्घण्टः॥
मालाटणकं, क्ली, (मालाटण। स्वार्थे कन्।) भूस्तृणम्। इत्यमरः। २।४।१६७॥ हे गन्धखड़ इति ख्याते। मालारूपं टणं मालाटणं स्वार्थे कः। भुवस्तृणं भूलमत्वात् भूस्तृणं मनीषादित्वात् सागमः। मालाटणकभूस्तृणी। इति क्षीरे। इति सुभूत्यादयः॥ मालाटणकभूस्तृणाविति पुंसि पठन्ति केचित्॥ स्वामी तु। छत्राति-च्छत्रादिभूस्तृणान्तं पर्य्यायमाह यथा,—
"भूस्तृणो रौहिषो भूतिर्भूमिकोऽथ कुटुम्बकः।
मालाटणश्च पालघ्नश्छत्राति-च्छत्रकस्तथेति॥"
रामकर्पूरं वहुपत्रकाण्डं कर्पूरसगन्धि।
इदन्तु घृतपुष्पिकावदुत्कटगन्धं भूलमश्च भवतीत्यनयोर्भेदः। इति तट्टीकायां भरतः॥ (तयास्य पर्य्यायः।
"गुच्छवीजन्तु भूतीकं सुगन्धं जम्बुकप्रियम्।
भूटणन्तु भवेच्छत्रा मालाटणकमित्यपि॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
मालादूर्व्वा, स्त्री, (माला इव ग्रन्थियुक्ता दूर्वा।) दूर्व्वाविशेषः। गाटिया दूर्व्वा इति भाषा। तत्पर्य्यायः। वल्लिदूर्व्वा २ अलिदूर्व्वा ३ मालाग्रन्थिः ४ ग्रन्थिला ५ ग्रन्थिदूर्व्वा ६ शूलग्रन्थिः७ वेल्लनी ८ ग्रन्थिमूला ९ रोहत्पर्व्वा १० पर्व्ववल्ली ११ शिवाख्या १२। अस्या गुणाः। सुमधुरत्वम्। तिक्तत्वम्। शिशिरत्वम्। पित्तदोषप्रशमनत्वम्। कफवान्तिदोषापहत्वञ्च। इति राजनिर्घण्टः॥
मालारिष्टा, स्त्री, पाची। इति राजनिर्घण्टः॥
मालालिका, स्त्री, (मालां व्यनक्तीति। व्यज+खुल् टाप् अत इत्वञ्च।) पृक्का। इति राजनिर्घण्टः॥
मालासी, स्त्री, (मालामलति। व्यल+अच्। ङीप्।) पृक्का। इति राजनिर्घण्टः॥
मालिः, पुं, सुकेशराक्षसपुत्रः। यथा,—
"ग्रामणीर्नाम गन्धर्व्वो विश्वावसुसमप्रभः।
तस्य देववती नाम द्वितीया श्रीरिवात्मजा॥
त्रिषु लोकेषु विख्याता रूपयौवनशालिनी।
तां सुकेशाय धर्म्मात्मा ददौ रक्षःश्रियं यथा॥
वरदानकृतैश्वर्य्यं सा तं प्राप्य पतिं प्रियम्।
आसीद्देववती तुष्टा सन प्राप्येव निर्धनः॥
स तया सह सन्तुष्टो रराज रजनीचरः।
ततः काले सुकेशस्तु जनयामास राघव!॥
त्रीन् पुत्रान्-जनयामास चेताग्निसमविग्रहान्।
माल्यवन्तं सुमालिञ्च मालिञ्च बलिनांवरम्॥"
इति रामायणे उत्तरकाण्डे ५ सर्गः॥
मालिकः, पुं, (मालास्य पण्यम्। माला+"तदस्य पण्यम्।" ४।४।५१। इति ठक्। यद्वा, मालाग्रथनं शिल्पमस्येति। "शिल्पम्।" ४।४।५५। इति ठक्।) मालाकारः। इत्यमरः। २।१०।५॥ (यथा, राजतरङ्गिण्याम्। ६।१६।
"निदाघे पुष्पताम्बूलीपर्णाद्यैश्चातिप्रीतले।
न्यस्यद्भिर्मालिकैर्दत्तात् सा जीवेद्भाटकादिति॥")
पत्रिभेदः। इति मेदिनी। के, १३६॥ रञ्जकः। इति शब्दरत्नावली॥
मालिका, स्त्री, (मालेव। माला+कन् टाप् अत इत्वञ्च।) सप्तला। पुत्री। शैवालङ्करणम्। पुष्पमाल्यम्। नदीविशेषः। इति मेदिनी। के, १३६॥ सुरा। इति हारावली॥ चुमा। इति शब्दचन्द्रिका॥
मालिनी, स्त्री, (माला सुरूपमालास्त्यस्याः अस्यां वा। माला+"व्रीह्यादिभ्यश्च।" ५।२।११६। इति इनिः ङीप्।) मालतीभेदः। वृत्तभेदः। (मालिन्+ङीष्।) मालिकपत्नी॥ गौरी। चम्पानगरी। (यथा, महाभारते। १२। ५। ६—७।
"प्रीत्या ददौ स कर्णाय मालिनीं नगरीमथ।
अङ्गेषु नरशार्दूल! स राजासीत् सपत्नजित्॥
पालयामास चम्पाञ्च कर्णः परबलार्दनः॥")
मन्दाकिनी। नदीभेदः। इति मेदिनी॥ (यथा, महाभारते। १। ७२। ८।
"जनयामास सुनिर्मलकायां शुकुन्तलाम्।
प्रस्थे हिमवतो रम्ये मालिनीमभितो नदीम्।")
अप्सरोविशेषः। दुरालभा। इति शब्दचन्द्रिका॥ स च वृत्तभेदः षष्ठदशाक्षरपादच्छन्दः। यथा,—
"न न म य य युतेयं मालिनी भोगिलोकैः।
नगमदशतचर्चा पीतकौशेयवासा
रुचिरशिखिशिखण्डावद्धधम्मिल्लपाशा।
अवतु जनिहितमंसे वंशसुतशाणवन्ती
घृतमधुरिपुलीला मालिनी पातु राधा॥"
इति छन्दोमञ्जरी॥
अप्सरोविशेषः। यथा, कथासरित्सागरे। ४५। ३५२।
"पिङ्गलाच गणाख्याता दशमी कैशरावली।
एकादशी मालिनीति नाम्ना कम्बलनन्दिनी॥
स्कन्दमातृगणमन्यतमा। सैव शिशुमातृगणमन्यतमा। यथाचैव। ३। २२७। १०।
"काकी च हलिमा चैव मालिनी डुंडिला तथा।
आर्या पलाला वैमित्रा सप्तैताः शिशुमातरः॥"
मालाग्रथनं शिल्पमस्याः। इनिः। ङीप्। द्रौपद्या नामान्तरम्। यथा, महाभारते। ४। ८। २१।
"मालिनीत्येव मे नाम स्वयं देवि चकार सा।
साहमभ्यागता देवि! सुदेष्णे! त्वन्निवेशनम्॥"
राक्षसीभेदः। सा च विभीषणस्य माता। यथा, महाभारते। ३। २७४। ३—८।
"स राजराजो लङ्कायां निवसन्नरवाहनः।
राक्षसीः प्रददौ तिस्रः पितुर्वै परिचारिकाः॥
ताः सदा तं महात्मानं सन्तोषयितुमुद्यताः।
ऋषिं भरतशार्दूल! वृत्तशीलविशारदाः॥
पुण्योत्कटा च राका च मालिनी च विशाम्पते!।
अन्योन्यसदृशा राजन्! अयस्कामा सुमध्यमाः॥
स तासां भगवांस्तुष्टो महात्मा प्रददौ वरान्।
लोकपालोपमान् पुत्रानेकैकस्या यथेप्सितान्॥
पुण्योत्कटायां जज्ञाते द्वौ पुत्रौ राक्षसेश्वरौ।
कुम्भकर्णदशग्रीवौ बलेनाप्रतिमौ भुवि॥
मालिनी जनयामास पुत्रमेकं विभीषणम्।
राकायां मिथुनं यज्ञे खरः शूर्पणखा तथा॥"
रौच्यमनुमाता। यथा, मार्कण्डेये। ९८।५—७।
"तथेति तेन सा प्युक्ता तस्मात्तोयाद्दृषद्वतीम्।
उच्चहार ततः कन्यां मालिनीं नाम नामतः॥
नद्याश्च पुलिने तस्मिन् स रुचिर्मुनिसत्तमः।
जग्राह पाणिं विधिवत् समानाय्य महामुनीन्॥
तस्यां तस्य सुतो जज्ञे महावीर्य्यो महामतिः।
रौच्योऽभवत्पितुर्नाम्ना ख्यातोऽत्र वसुधातले॥"
श्वेतकर्णस्य पत्नी। यथा, हरिवंशे। १८५।७।
"तस्माद्वनगताद्गर्भं यादवी प्रत्यपद्यत।
सुचारोर्दुहिता सुभ्रूर्मालिनी भाल्लमालिनी।")
मालिन्यं, क्ली, (मलिन+"ब्रुव्रज्रङ्गत्रिलसेनिरष्ठक्ष्ण्यञ्यैति।" ४।२।८०। इति संज्ञायाञ्च ष्यञ्प्रत्ययः।) मलिनत्वम्। मलिनस्य भाव इत्यर्थे ष्यञ्प्रत्ययेन निष्पन्नम्॥ (यथा, राजतरङ्गिण्याम्। १। १७८।
"भोगयोगेन मालिन्यं नेतुं मध्यगतोऽपि सः।
न शक्यते स पङ्केन प्रतिमेन्दुरिवामलः॥")
मालिन्, [न्] पुं, (माला प्रयत्नेनास्यास्य। माला+"व्रीह्यादिभ्यश्च।" ५।२।११६। इति इनिः।) मालाकारः। इति मालिनीशब्ददर्शनात्॥ सुकेशराक्षसपुत्रः। यथा,—
"सुकेशपुत्रैर्भगवन्! पितामहवरोद्धतैः।
अहं विष्णुरहं रुद्रो ब्रह्माहं देवराड्हम्॥
अहं यमश्च वरुणश्चन्द्रोऽहं रविरप्यहम्।
इति माली सुमाली च माल्यवांश्चैव राक्षसः।
बाधन्ते समरोद्धर्षा ये च तेषां पुरःसराः॥"
इति रामायणे उत्तरकाण्डे ६ सर्गः॥
(अस्यिमाला अस्थ्यस्येतीनिः। महादेवः। यथा, महाभारते। १३। १७। ६०।
"व्यालरूपो गुहावासी गुही माली तरङ्गवित्।")
माला अस्त्यस्येतीनिः। मालायुक्ते, त्रि। यथा, रामायणे। २। ५६। ६॥
"व्यादीप्तानिव वेदेहि! सर्व्वतः पुष्पितान्नगान्।
खे पुष्पैः किंशुकान् पश्य मालिनः शिशिरात्यये॥")
मालुः, पुं, (मृ+"वो रच्च लः।" १। ५। इत्यत्र वाहुलकात् उण्। इत्युज्ज्वलदत्तोक्त्या उण्।) पत्रलता। नारी। इति मेदिनी। ले, ४५॥

मालुधानः, पुं, (मालु मरणं विदधातीति। धा + ल्युः।) मातुलाहिः। इत्यमरः। १। ८। ६। मालुया साप इति भाषा॥ अष्टनागान्तर्गत-नागविशेषः। यथा,—
"मालुधानश्चित्रसर्पो महापद्मोऽपि दृश्यते।"
इति हारावली॥
मालुधानी, स्त्री, लताभेदः। इति मेदिनी। ने, २०३॥
मालूकः, पुं, क्षत्रियजातिः। इति राजनिर्घण्टः॥
मालूरः, पुं, (मां परेषां वृक्षान्तराणां श्रियं प्रभावं लुनातीति। लूञ् + बाहुलकात् रः।) बिल्ववृक्षः। इत्यमरः। २। ४। ३२॥ (यथा, नैषधे। १। ६४।
"स वारनारीकुचसन्निभोपमं
ददर्श मालूरफलं पचेलिमम्।")
कपित्थवृक्षः। इति राजनिर्घण्टः॥ (बिल्ववृक्षार्घे पर्य्यायो यथा,—
बिल्वो महाकपित्थाख्यः श्रीफलो गोहरीतकी।
पूतिवातोऽथ माङ्गल्यो मालूरश्च महाफलम्॥"
इति वैद्यकरत्नमालायाम्॥
"बिल्वः शाण्डिल्यशैलूषौ मालूरश्रीफलावपि।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे च॥)
मालेया, स्त्री, (मल + ढक् टाप्।) शूलेला। इति रत्नमाला॥ (शूलेलाशब्दे ऽस्या विशेषो ज्ञेयः।)
माल्यं, क्ली, (मालेव। माला + चतुर्व्वर्णादित्वात् व्यञ्।) पुष्पम्। पुष्पस्रक्। इति मेदिनी। ये, ४५॥ पुष्पार्थकमाल्यशब्दस्य प्रयोगो यथा,
"यथा चाल्पेन माल्येन वासितं तिलसर्षपम्।
न मुञ्चति स्वकं गन्धं तद्वत् सूक्ष्मस्य दर्शनम्॥"
इति महाभारते मोक्षधर्म्मे १०५ अध्यायः॥
मूर्द्धे न्यस्तपुष्पदाम। इत्यमरः। २। ७। १३५॥
अस्य पर्य्यायादिर्मालाशब्दे द्रष्टव्यः॥ * ॥
(पुष्पस्रगर्घे गुणा यथा,—
"वृष्यं सौगन्ध्यमाङ्ग्यं काम्यं पुष्टिबलप्रदम्।
सौमनस्यमलक्ष्मीघ्नं गन्धमाल्यनिवेदनम्॥"
इति चरके सूत्रस्थाने पञ्चमेऽध्याये॥)
माल्यदानफलं यथा,—
"गन्धमाल्यैरलङ्कारैस्तुष्टा हृष्टाश्च नित्यशः।
गन्धमाल्यप्रदा ये तु दाननिश्चयतत्पराः॥
धर्म्मज्ञाः सत्यशीलाश्च सर्व्वदुःखविवर्ज्जिताः।
सुचिरं देवतैः सार्द्धं क्रीड़न्ति हि महासुने!॥"
इति वह्निपुराणम्॥
अपि च। नारसिंहे।
"जातीपुष्पसहस्रेण यश्चक्रेन्मालां सुशोभनाम्।
वैष्णवो विधिवद्भक्त्या तस्य पुण्यफलं शृणु॥
कल्पकोटिसहस्राणि कल्पकोटिशतानि च।
वसेद्विष्णुपुरे श्रीमान् विष्णुतुल्यपराक्रमः॥
जातीपुष्पसृतां मालां कर्पूरपटवासिताम्।
निवेद्य देवदेवाय यत्फलं प्राप्नुयान्नरः।
न तद्वर्णयितुं शक्यमपि वर्षशतैरपि॥
स्कान्दे।
मालतीकलिकामालामोषद्विकसितां हरेः।
दत्त्वा शिरसि विप्रेन्द्र! वाजिमेधफलं लभेत्॥
तत्रैव।
मालतीमालया विष्णुः पूजितो येन कार्त्तिके।
पाषाणरक्तां मालां पटात् सौरिः प्रमार्ज्जति॥
सौरिर्यमः। विष्णुरहस्ये।
स्वर्णलक्षाधिकं पुण्यं माला कोटिगुणाधिका॥
इति श्रीहरिभक्तिविलासे ७ विलासः॥ * ॥
माल्यगलस्य बहिर्गमननिषेधो यथा,—
"बहिर्माल्यं बहिर्गन्धं भार्य्यया सह भोजनम्।
विस्मृत्य वादं कृत्वा वा प्रवेशञ्च विवर्जयेत्॥"
इति कूर्म्मपुराणे उपविभागे १५ अध्यायः॥*॥
स्वयं माल्यापकर्षणनिषेधो यथा,—
"नाश्नीयात् सन्निवेलायां न गच्छेन्नापि संविशेत्।
न चैव प्रलिखेद्भूमिं नात्मनोपहरेत् स्रजम्॥"
इति मानवे ४ अध्यायः॥
न च मालां धृतां स्वयमेवापनयेत्। अपनयेदन्येनापनयेदित्युक्तम्। इति कुल्लूकभट्टः॥*॥
केशग्रन्थौ माल्यधारणनिषेधो यथा,—
"नहि गर्ह्यकथां कुर्य्यात् बहिर्माल्यं न धारयेत्।
गवाञ्च यानं पृष्ठेन सर्व्वथैव विगर्हितम्॥"
इति च मानवे ४ अध्यायः॥
केशकलापाद्बहिर्माल्यं न धारयेदिति कुल्लूकभट्टः॥*॥ स्वयं माल्यधारणनिषेधो यथा,—
"स्वयं माल्यं स्वयं पुष्पं स्वयं वृक्षञ्च चन्दनम्।
नापितस्य गृहे क्षौरं शुक्रादपि हरेत् श्रियम्॥
इति कर्म्मलोचनम्॥*॥
माल्यचन्दनदानविधिर्यथा,—
"श्यामन्त्रयित्वा यो विप्रान् गन्धमाल्यैश्च मानवः।
तर्पयेच्छ्रद्धया युक्तः स मामर्च्चयते सदा॥"
इति वह्निपुराणम्॥
माल्यपुष्पः, पुं, (माल्याकाराणि पुष्पाण्यस्य।) शुण्ठवृक्षः। इति राजनिर्घण्टः॥
माल्यपुष्पिका, स्त्री, (माल्यपुष्प + कन् टाप्। अत इत्वञ्च।) शुण्ठपुष्पी। इति राजनिर्घण्टः॥ (गुणादयोऽस्याः शुण्ठपुष्पीशब्दे ज्ञेयाः॥)
माल्यवान्, [त्] पुं, (माल्य + मतुप्। मस्य वः।) पर्व्वतविशेषः। इत्यमरः। २। ३। ३।
माल्यं मालाकारता विद्यतेऽत्र माल्यवान् वतुः।
इति तट्टीकायां भरतः॥ स च केतुमालेलावृतवर्षयोः सीमापर्व्वतः। नीलनिषधपर्व्वतपर्य्यन्तविस्तारः। इति सिद्धान्तशिरोमणिः॥ (यथा, महाभारते। ३। १५८। ३५।
"उपतस्थुर्महाभागा माल्यवन्तं महागिरिम्।")
राक्षसविशेषः। स च सुकेशराक्षसात् ग्रामण्यीनामकगन्धर्व्वस्य कन्यायां देववत्यां जातः। अस्य भ्राता सुमाली तस्य कन्यायां निकषायां पुलस्त्यपुत्रविश्रवसो रावणो जातः। इति रामायणे उत्तरकाण्डे ५ सर्गः॥ (मालाविशिष्टे, त्रि। यथा, महाभारते। १। १७१। ३१।
"शिरोरुहेषु जग्राह माल्यवत्सु घनञ्जयः।")
स्त्रियां ङीप्। नदीभेदः। यथा, रामायणे २। ५६। ३५।
"सुरम्यमासाद्य तु चित्रकूटं
नदीञ्च तां माल्यवतीं सुतीर्थाम्।
ननन्द दृष्ट्वा मृगपक्षिजुष्टां
जहौ च दुःखं पुरविप्रवासात्॥")
माषः, पुं, (मष + चातुरर्थिकत्वात् अण्।) वर्णसङ्करजातिविशेषः। स च वैटात्तीवरकन्यायां जातः। इति ब्रह्मवैवर्त्तपुराणम्॥
माषकी, स्त्री, (मष + स्वार्थे कण्। तस्य वा गमनं यत्र।) मषयात्रा। इति हारावली॥
माषण्डिकः, त्रि, (मा इत्याहेति। माषण्ड + "प्राग्वहतेष्ठक्।" ४। ४। १। इत्यत्र। "तदाहेति माषण्डादिभ्य उपसंख्यानम्।" इति वार्त्तिकात् ठक्।) निषेधकर्त्ता। तत्पर्य्यायः। प्रतिषेद्धा २। इति त्रिकाण्डशेषः॥
माषः, पुं, (माषस्य फलम्। माष + अण्। "लुप् च।" ४। ३। १६६। इत्यस्य "फलपाकशुषासुपसंख्यानम्।" इति काशिकोक्तेरणो लुप्। यद्वा, मस + घञ् पृषोदरादित्वात् साधुः।) व्रीहिभेदः। माषकलाइ इति उरिद् इति च भाषा। तत्पर्य्यायः। कुरुविन्दः २ धान्यवीरः ३ वृषाकरः ४ मांसलः ५ बलाढ्यः ६ पित्रः ७ पितृभोजनः ८। अस्य गुणाः। स्निग्धत्वम्। बहुमलकरत्वम्। शोषणत्वम्। श्लेष्मकारित्वम्। अनुष्णवीर्य्यत्वम्। भ्रंशितरक्तपित्तप्रकोपणत्वम्। वातहरत्वम्। गुरुत्वम्। बलकरत्वम्। रोचकत्वम्। स्वादुत्वम्। श्रमसुखवतां नराणां नित्यं सेवनीयत्वम्। इति राजनिर्घण्टः॥ अपि च।
"माषो गुरुः स्वादुपाकः स्निग्धो रुच्योऽनिलापहः।
उष्णः सन्तर्पणो वल्यः शुक्रलो दृंहणः परः॥
भिनत्ति श्लेष्ममलस्तन्यमेदःपित्तकफप्रदः।
गुदकीलार्हितश्वासपक्तिशूलानि नाशयेत्॥"
इति।
कफपित्तकरा माषाः। इति च भावप्रकाशः॥
अन्यच्च।
"माषो बहुमलो वृष्यः स्निग्धोष्णो मधुरो गुरुः।
वातनुद्बृंहणो बल्यो मेदोमांसकफप्रदः॥"
इति राजवल्लभः॥
माषशूपेन मूलकभक्षणं निषिद्धं यथा,—
"मूलकं माषशूपेन मधुना च न भक्षयेत्॥"
इति च राजवल्लभः॥
चतुर्दश्यां रविवारे च माषभक्षणनिषेधो यथा, चिररोगी च माषके। इति।
"माषमामिषमांसञ्च मसूरं विषयञ्चकम्।
भक्षयेद्यो रवेर्वारे सप्तजन्मन्यपुत्रकः॥"
इति च तिथ्यादितत्त्वम्॥*॥
परिमाणविशेषः। माषा इति भाषा। तत-

पर्य्यायः। माषकः २ मासः ३। इत्यमरभरतौ॥ हैमः ४ धानकः ५। स च मागधमाने सुश्रुतमते ५ गुञ्जापरिमाणम्। चरकमते ६।८ गुञ्जापरिमाणम्। कालिङ्गमाने सुश्रुतमते ५। ७। ८ गुञ्जापरिमाणम्। इति भावप्रकाशः॥ वैद्यकान्तरे १० गुञ्जापरिमाणम्। यथा,—

"गुञ्जाभिर्दशभिर्माषः शाणो माषचतुष्टयम्।"
इति वैद्यकपरिभाषा॥

(माषार्घे यथा,—

"द्वात्रिंशन्माषकैर्मांसश्चरकस्य तु तैः पलम्।
चरकार्द्धपलोन्मानं चरके दृश्यरत्तिके।
माषैः पलं चतुःषष्ट्या यच्चैवेत्तत्तथेरितम्॥"
इति वैद्यकचक्रपाणिसंग्रहे ज्वराधिकारे।)

ज्योतिःस्मृतिमते १२ गुञ्जापरिमाणम्। यथा,

"पलं तु लौकिकैर्मानैः षोडशरत्तिकैर्माषकम्।
तोलकञ्चितयं ज्ञेयं ज्योतिर्ज्ञैः स्मृतिसम्मतम्॥"
इति तिथ्यादितत्त्वधृतवचनेन पलं चतुरत्तिकाधिकमाषद्वयाधिकतोलकचयम्। एतेन माषकपरिमाणं द्वादशरत्तिकं भवति॥*॥ ऋर्खः। त्वग्दोषभेदः। इति मेदिनी षे, २१॥

माषकः, पुं, (माषप्रकारः। माष+"स्वार्थादिभ्यः प्रकारवचने कन्।" ५।४।३। इति कन्।) मासकः। पञ्चरत्तिकपरिमाणम्। यथा। गुञ्जाः पञ्चाद्यमाषकः। इत्यमरः॥

"दशार्द्धगुञ्जं प्रवदन्ति माषं
माषाङ्कयोः षोड़शभिश्च कर्षम्॥"
इति लीलावती च॥

"षड़्भिस्तु रत्तिकाभिः स्याद्माषको हेमधानकौ।
माषो गुञ्जाभिरष्टाभिः सप्तभिर्वा भवेत् क्वचित्॥"
इति भावप्रकाशः॥

(द्वीहिविशेषः। तदर्घे विषयो यथा,—

"द्वात्रिंशन्माषकैर्मांसः।"

परिमाणार्घे यथा,—

"————————सुश्रुतस्य तु माषकः।
द्वादशभिर्धान्यमाषैश्चतुःषष्ट्या तु तैः पलम्॥"
इत्युभे वैद्यकचक्रपाणिसंग्रहे ज्वराधिकारे॥)

माषकलायः, पुं, (माषसंज्ञः कलायः शाकपार्थिववत् समासः।) सनामख्यातशस्यम्। यथा। कलायशब्दो विशेषे सामान्ये च यतस्तत एव माषकलाय इत्यादि प्रयोगः। इत्यमरटीकायां भरतः॥

माषपर्णी, स्त्री, (माषस्य पर्णमिव पर्णं यस्याः। ङीष्।) वनमाषः। माषाणी इति भाषा। तत्पर्य्यायः। हयपुच्छी २ काम्बोजी ३ मद्गवाहा ४। इत्यमरः। २।४।१३८॥ सिंहपुच्छी ५ ऋषिप्रोक्ता ६ कृष्णवृन्ता ७ पाण्डुलोमशपर्णिनी ८। इति रत्नमाला॥ आर्द्रमाषा ९ मांसमाषा १० मङ्गल्या ११ हयपुच्छिका १२ हंसमाषा १३ अश्वपुच्छा १४ पाण्डुरा १५ माषपर्णिका १६ कल्याणी १७ वज्रमूली १८ शालिपर्णी १९ विसारिणी २० आत्मोद्भवा २१ बहुफला २२ स्वयम्भूः २३ सुलभा २४ घना २५ सिंहविन्ना २६ विशाखिका २७। अस्या गुणाः। तिक्तरसत्वम्। दृष्यत्वम्। दाहज्वरापहत्वम्। शुक्रदृद्धिकारित्वम्। बल्यत्वम्। शीतलत्वम्। पुष्टिवर्द्धनत्वञ्च। इति राजनिर्घण्टः। अपि च भावप्रकाशे।

"माषपर्णी सूर्य्यपर्णी काम्बोजी हयपुच्छिका।
पाण्डुलोमशपर्णी च कृष्णवृन्ता महासहा॥
माषपर्णी हिमा तिक्ता रूक्षा शुक्रबलाश्रुतः।
मधुरा ग्राहिणी शोषा वातपित्तज्वरास्रजित्॥"

माषभक्तबलिः, पुं, (माषश्च भक्तञ्च तदुक्तो बलिः।) माषतण्डुलदधिमिश्रितपूजोपहारविशेषः। अत्र केचित् हरिद्राक्तमप्यपि मिश्रयन्ति। यथा। एष माषभक्तबलिः।

"ॐ जय त्वं कालि! सर्व्वेशे सर्व्वभूतसमाकृते।
रक्ष मां निजभूतेभ्यो बलिं गृह्ण शिवप्रिये!॥"
ॐ काल्यै नमः। प्रार्थनामन्त्रो यथा,—

"ॐमातर्मातर्ज्वरे दुर्गे सर्व्वकामार्घसाधिनि!।
अनेन बलिदानेन सर्व्वान् कामान् प्रयच्छ मे॥"
इति कृत्यतत्त्वम्॥

भूतेभ्योऽप्ययं बलिर्देयः॥

माषवर्द्धकः, पुं, (माषं वर्द्धयतीति। वृध+णिच् ण्वुल्।) स्वर्णकारः। इति शब्दमाला॥

माषशः, [स्] ब, प्रतिमाषम्। माषं माषं ददाति इत्यर्थे शसादिप्रत्ययेन निष्पन्नम्। इति सिद्धान्तकौमुदी॥

माषादः, पुं, (माषमत्तीति। अद्+अण्।) कच्छपः। इति शब्दरत्नावली॥ माषभक्षके, त्रि॥

माषीणं, माष्यं, } क्ली, (माषाणां भवनं क्षेत्रम्। माष+"विभाषा तिलमाषोमाभङ्गाणुभ्यः।" ५।२।४। इति यत् पक्षे खञ्।) माषक्षेत्रम्। यथा,—

"तिलयतेलीनवन्माषोमाणुभङ्गाद्विरूपता।"
इत्यमरः॥

यथा तिलस्य क्षेत्रं तिल्यं तैलीनञ्च भवति तथा माषादीनामपि द्विरूपता द्वैरूप्यं भवति। इति तट्टीकायां भरतः॥

मास्, पुं, (मस+माने "सर्व्वधातुभ्योऽसुन्।" ४।१८८। इत्यसुन्।) चन्द्रः। (यथा, ऋग्वेदे। १०।१२।७।

"सूर्य्यं ज्योतिरदधुर्मास्यक्तून्
परिद्योनिं चरतो अजस्रा॥"

"मासि चन्द्रमसि।" इति तद्भाष्ये सायणः॥ मीयतेऽनेनेति। मा+"चन्द्रे मो डित्।" उणा० ४। २२७। इत्यत्र "बाहुलकात् केवलादपि मोऽसिः।" इत्युज्ज्वलदत्तोक्तेरसिः।) मासः। इति मेदिनी। से, ७॥ अस्य प्रथमैकवचनान्तरूपं मा॥ (यथा, मनौ। २।३४।

"चतुर्थे मासि कर्त्तव्यं शिशोर्निष्क्रमणं गृहात्।
षष्ठेऽन्नप्राशनं मासि यद्वेष्टं मङ्गलं कुले॥"

मांसे, क्ली। यथा, ऋग्वेदे। ५।२६।८।

"चीयच्छता महिषाणामघो
मास्कीसरांसि मघवा सोम्यापाः।"

"माः मांसानि।" इति तद्भाष्ये सायणः॥)

मासः, पुं, (मस् परिमाणे+भावे घञ्।) माषपरिमाणम्। इत्यमरटीकायां भरतः। माष इति भाषा॥ (मस्यते परिमीयते असावनेनेति मस्+घञ्।) शुक्लकृष्णपक्षद्वयात्मकः कालः। स च पौषमाघादिद्वादशसंज्ञकः। इत्यमरः। १।४।१२॥ मास्यन्द्रस्यायं मासः। चान्द्रमासस्येयं श्रुतिः। सौरादिषु तु मस्यते परिमीयतेऽनेनासौ वा मासः। मस्जिर्यै परिमाणे घञ्। माः सान्तोऽपि। मास्तु मासोऽपि दृश्यते। इति हुः। इति भरतः॥*॥ स्मृतिमतेऽपि पौषादिद्वादशसंज्ञकः। यथा,—

"चक्रवत् परिवर्त्तेत सूर्य्यः कालवशादृतम्।
अतः संवत्सरं प्राहुः कर्त्तव्यं मासचिह्नितम्॥
मासचिह्नन्तु कर्त्तव्यं पौषमाघात्मकेव हि।
यतस्तच्च विधानेन स मासः परिकीर्त्तितः॥"
इति लघुहारीतः॥

कार्त्तिकादिद्वादशसंज्ञकोऽपि। यथा,—

"अन्ध्योपान्ध्यौ त्रिभौ ज्ञेयौ फाल्गुनश्च त्रिभा मतः।
शेषा मासा द्विभा ज्ञेयाः कृत्तिकादिव्यवस्थया॥"

स च चैत्रादिद्वादशसंज्ञकश्च। यथा यक्तं ब्रह्मपुराणम्।

"चैत्रे मासि जगद्ब्रह्मा ससर्ज्ज प्रथमेऽहनि।
शुक्लपक्षे समग्रन्तु तदा सूर्य्योदये सति॥
प्रवर्त्तयामास तदा कालस्य गणनामपि।
ग्रहान्नक्षत्रतारांश्च मासान् वत्सरान् वत्सराधिपान्।
इत्यनेन मासर्त्तुवत्सराणां चान्द्रत्वमुक्तम्।
ब्रह्मसिद्धान्तेऽपि।
"चैत्रसितादेरुदयाद्भानोर्वर्षर्त्तुमासयुगकल्पाः।
सृष्ट्यादौ लङ्कायामिह प्रवृत्ता दिनेर्व्वत्स॥"
चैत्रसितादेश्चैत्रशुक्लप्रतिपदस्तामारभ्येत्यर्थः॥
अपि च।
"मीनादिस्था रविर्यर्हि मासारम्भप्रथमचन्द्रे।
भवेत्तेऽब्दे चान्द्रमासाश्चैत्राद्या द्वादश स्मृताः॥"
चान्द्रसावनसौरनाक्षत्रभेदेन स च चतुर्विधः। शुक्लप्रतिपदादिदर्शान्तश्चान्द्रः। तत्र चान्द्रोऽपि द्विविधः। शुक्लप्रतिपदादिदर्शान्तो मुख्यः। कृष्णप्रतिपदादिपौर्णमास्यन्तो गौणः। यत्किञ्चित्त्रिंशत्तिथ्यात्मकश्चेति द्विविधो गौणः। त्रिंशदहोरात्रात्मकः सावनः। आदित्यैकराशिभोगावच्छिन्नः सौरः। सप्तविंशतिनक्षत्रावच्छिन्नस्त्रिंशन्नाक्षत्रदिनात्मकश्च नाक्षत्रः। तथा च ब्रह्मसिद्धान्ते।
"चान्द्रः शुक्लादिदर्शान्तः सावनस्त्रिंशता दिनैः।
एकराशौ रवियावत् कालं मासः स भास्करः॥

सर्व्वत्रैवंपरिवर्त्तेषु नाक्षत्र इति बोध्यते ॥"
सूर्य्यसिद्धान्ते ।
"नाड़ीषष्ट्या तु नाक्षत्रमहोरात्रं प्रचक्षते ।
तत्त्रिंशता भवेन्मासः सावनोऽर्कोदयैस्तथा ॥
ऐन्दवस्तिथिभिस्तद्वत् संक्रान्त्या सौर उच्यते ॥"
तत्त्रिंशता नाक्षत्रदिनत्रिंशता मासो नाक्षत्रमासः । तथा त्रिंशता ॥ * ॥ स्मार्त्तभूतपाणिमते सुख्यचान्द्र एव मासपदप्रवृत्तः । जीमूतवाहनमते सौर एव प्रवृत्तः । चान्द्रप्रमाणं प्रागुक्तम् । सौरप्रमाणन्तु । सौरास्तु माघादयो द्वादश एव श्रौताः । तथा च स्मृतिः । तपस्तपस्यो ग्रैष्मिराहृतुः । मधुश्च माधवश्च वासन्तिकाहृतुः । शुक्रश्च शुचिश्च नैदाघाहृतुः । अथैतदुदगयनं देवानां दिनम् । नभाश्च नभस्यश्च वार्षिकाहृतुः । इषश्च ऊर्ज्जश्च शारदाहृतुः । सहाश्च सहस्यश्च हैमन्तिकाहृतुः । अथैतद्दक्षिणायनं देवानां रात्रिरिति । अत्रायनस्य सौरत्वेन तदटकतपस्तपस्यादीनामपि सौरपरतेति । अतो भूयसामुरोधेन वैशाखादयः सौरवाचिनोऽवधार्य्यन्ते । इति मलमासतत्त्वम् ॥
अपि च ।
"मेषस्थिते रवेर्मासो वैशाखोऽब्दमुखः स्मृतः ।"
इति सङ्केतकौमुदी ॥
अथ कर्म्मविशेषे मासविशेषादिः । तत्र पितामहः ।
'आब्दिके पिण्डदाने च मासश्चान्द्रमसः स्मृतः ।
दैवादौ स्मृतः सौरो यज्ञादौ सावनो मतः ॥"
अथमादिपदं यात्राग्रहचारपरम् । यत् कर्म्म सूर्य्यभोग्यराश्युल्लेखेन यच्च विष्णुयोदगयनादिविहितं तत्परञ्च अयनस्य सौरमासघटितत्वात् । तच्च चूड़ोपनयनादि । द्वितीयादिपदं सत्यभूतिदृष्टिप्रायश्चित्तायुर्दायाग्नौच्यगर्भाधानपुंसवनसीमन्तोन्नयननामकरणान्नप्राशननिष्क्रमणचूड़ादिपरम् । तथा च विष्णुधर्म्मोत्तरे ।
"अध्यायनञ्च ग्रहचारकर्म्म
सौरेण मासेन सदाध्यसेत् ।
सत्राण्युपाख्यान्यथ सावनेन
लोकस्य यत् स्याद्व्यवहारकर्म्म ॥"
अध्यायनं अध्यगमनं यात्रेति यावत् ॥ * ॥
अथ सौरादिमासविहितकर्म्माणि ।
"विवाहोत्सवयज्ञेषु सौरं मासं प्रशस्यते ।
पार्व्वणे लष्टकाश्राद्धे चान्द्रमिदं तथाब्दिके ॥"
अत्र यत्पदसुदगयनादिविहितपठ्यागामिप्रायं पितामहोक्तन्तु विष्णुधर्म्मोत्तरोक्तसत्रपरम् । गर्गः ।
"आयुर्दायविभागञ्च प्रायश्चित्तक्रियां तथा ।
सावनेन तु कर्त्तव्या मन्त्राणामुपासना ॥"
सूर्य्यसिद्धान्ते ।
"स्तकादिपरिच्छेदो दिनमासाब्दपात्तथा ।
मध्यमग्रहसक्तिश्च सावनेन प्रकीर्त्तिता ॥"
मध्यमग्रहसक्तिर्ज्योतिर्गणना प्रसिद्धा ॥ ६ ॥
नाक्षत्रमासप्रयोजनं विष्णुधर्म्मोत्तरे ।
"नक्षत्रसत्राण्ययनानि चेन्दो-
र्मासेन कुर्य्याद्गणनात्मकेन ।"
नक्षत्रसत्राणि मासस्याध्वागविशेषरूपाणि याज्ञिकप्रसिद्धानि । इन्दोरयनानि सोमायनाख्यसत्राणि । इति समयप्रकाशः ॥ एवं जन्मनक्षत्रे ग्रहभौमवारे फलं नाक्षत्रमासेन योग्यत्वात् । यथा, मलमासतत्त्वे ।
"जन्मर्क्षे यदि स्यातां वारौ भौमग्रहेश्वरौ ।
स मासः कल्मषो नाम मनोदुःखप्रदायकः ॥"
मलमासविवरणं मलमासशब्दे द्रष्टव्यम् ॥ * ॥
अथ मासकृत्यम् ।
'आषाढ़शुक्लैकादश्यां कुर्य्यात् स्नानं महोत्सवम् ।
आषाढ़े च रथं कुर्य्यात् श्रावणे श्रवणविधिम् ॥
भाद्रे च जन्मदिवसे उपवासपरो भवेत् ।
प्रद्युम्नञ्च प्रतिकृतिमाश्विने मासि कारयेत् ॥
उत्थानं श्रीहरेः कुर्य्यादन्यथा विष्णुद्रोहकृत् ।
शुभे चैवाश्विने मासि महामायाञ्च पूजयेत् ॥
कार्त्तिके मासि यत् कृत्यं शृणु देवि वरानने ! ।
समवर्त्तिकाः प्रमाणेन दीपाः स्याच्चतुरङ्गुलाः ॥
पक्षान्ते च प्रकर्त्तव्या दीपमाला बलिः शुभा ।
मार्गशीर्षे सिते पक्षे षष्ठीञ्च सितवस्त्रकैः ॥
पूजयेच्चगदीशञ्च तूलवस्त्रैर्विशेषतः ।
पौषे पुष्याभिषेकञ्च वर्ज्जयेच्चन्दनं तथा ॥
संक्रान्त्यां माघमासे च साधिवासिततण्डुलान् ।
निवेद्य विष्णवे भक्त्या इमं मन्त्रमुदीरयेत् ॥
जीवनं सर्व्वभूतानां जनकत्वं जगद्गुरो ! ।
तत्कायालीनतां प्राप्ता त्वयैव जनिता प्रभो ! ॥
कर्पूराक्षतिलद्रव्याणि घृताक्तानि निवेदयेत् ।
ब्राह्मणान् भोजयेद्भक्त्या देवदेवपुरःस्थितान् ॥
अभ्यर्च्चैः भगवद्भक्त्या द्विजांश्च भगवद्विधा ।
एकस्मिन् भोजिते भक्ते कोटिर्भवति भक्तितः ॥
विप्रभोजनमात्रेण अङ्गं साङ्गं भवेद्ध्रुवम् ।
पक्षयोः शुक्लपक्षे तु स्नापयित्वा च केशवम् ॥
पूजयेद्गन्धपुष्पाद्यैः तत्पक्षवसमितैः ॥
फलगुग्गुलुभिश्च विविधैर्वासितैः पटवासितम् ।
कानने रमणीयञ्च प्रदीप्तदीपदीपितम् ॥
प्राचेचुरम्भाजम्बीरनागरङ्गकपूगकम् ।
नारिकेलञ्च धात्रीं च वंशतालहरीतकीं ॥
अन्यैश्च ऋतुसञ्जैश्च सर्व्वर्त्तुकुसुमाचितम् ।
पुष्पैश्च विविधैश्चैव फलपुष्पसमन्वितम् ॥
वितानैः कुसुमोद्यानैर्वारिपूर्णघटैस्तथा ।
घृतशाखोपशाखाभिः शोभितं कृतचामरैः ॥
विशेषतः फाल्गुयुगे दोलोत्सवो विधीयते ।
फाल्गुने च चतुर्दश्यामष्टमे यामसंज्ञके ॥
अथवा पौर्णमास्यान्तु प्रतिपत्सन्धिसम्मितौ ।
पूजयेद्विधिवद्भक्त्या फलगुग्गुलुधूपैश्चतुर्विधैः ॥
सितरक्तैर्गौरपीतैः कर्पूरादिविमिश्रितैः ।
हरिद्राचारयोगाच्च रङ्गरम्यैर्मनोहरैः ॥
अन्यैर्वा रङ्गरम्यैश्च प्रीणयेत् परमेश्वरम् ।
एकादश्यां समारभ्य पक्षमन्तं समापयेत् ।
पक्षाहानि त्रयहाणि स्युर्दोलोत्सवो विधीयते ॥
दक्षिणाभिमुखं कृष्णं दोलयानं सकञ्चराः ।
दृष्ट्वापराधनिचयैर्मुक्तास्ते नात्र संशयः ॥
निक्षिप्य जलमात्रे तु मासे माधवसंज्ञिते ।
सौवर्णपात्रे ताम्रे वा रौप्ये वा नृपसत्तमे वा ॥
तोयस्थं योऽर्चयेद्देवं शालग्रामससङ्गवम् ।
प्रलयं सा महाभागे ! तस्य पुण्यं न गण्यते ।
दमनारोपणं कृत्वा श्रीविष्णौ च समर्पयेत् ।
वैशाख्यां श्रावणे भाद्रे कर्त्तव्यञ्च तदर्पणम् ॥
वैशाखे च तृतीयायां जलमध्ये विशेषतः ।
अथवा मण्डपे कुर्य्यात् मण्डले वा दृढ़व्रते ॥
सुगन्धचन्दनेनाङ्गमुपृष्टाङ्गो दिने दिने ।
यथा प्रयत्नतः कार्य्यः क्षणाङ्गो नैव दूषितः ॥
चन्दनागुरुकस्तूरीकुङ्कुमरोचना ।
जटामांसी वचा चैव विष्णोर्गन्धाष्टकं तथा ।
एतैर्गन्धयुतैश्चापि हरेरङ्गानि लेपयेत् ॥
दृष्ट्वा तुलसीकाष्ठं कर्पूरागुरुयोगतः ।
अथवा केशरैर्योज्यं हरिचन्दनसञ्ज्ञके ॥
अस्मिन् काले क्षणाभक्त्या ये प्रपश्यन्ति मानवाः ॥
न तेषां पुनरावृत्तिः कल्पकोटिशतैरपि ॥
सुगन्धिमिश्रितैस्तोयैः स्नापयित्वा जगद्गुरुम् ।
अथवा पुष्यमध्ये च स्नापयेज्जगदीश्वरम् ॥
वृन्दावनं तत्र कृत्वा उपस्कृतफलानि च ।
विष्णुभक्तेन योग्येन भोजयेत्तदशेषतः ॥
नारिकेलफलं नीरं कोषस्थीकृत्य दापयेत् ।
कण्टाफलञ्च पनसं कोषसंकृत्य दीयते ॥
यथा पचेत्तथा दद्यादथाशक्ति नियोगतः ।
दध्ना विमिश्रितञ्चान्नं घृतेनाप्लुत्य दापयेत् ॥
पाचितं पिष्टकं धातुरष्टादश घृतेन च ।
तिलैश्च तिलसंमिश्रैः फलं शुद्धञ्च दापयेत् ॥
यद्यदेवात्मनः श्रेयस्तत्तदीशाय कल्पयेत् ।
दत्त्वा नैवेद्यवस्त्रादीनादरीत कथञ्चन ।
त्यक्तव्यं विष्णुसद्दिश्य तद्भक्तेभ्यो विशेषतः ॥
इति ते कथितं किञ्चित् समासेन महेश्वरि ! ।
गोप्तव्यञ्च प्रयत्नेन स्वयोनिरिव पार्व्वति ! ॥"
इति पाद्मे पातालखण्डे १२ अध्यायः ॥

मासकः, पुं, माषकपरिमाणम् । यथा । गुञ्जाः पञ्चाद्यमासकः । इत्यमरः ॥ पञ्चगुञ्जाः क्षणाद्याः आद्यः प्रथमो मासकः । एषगुञ्जापेक्षया आद्यत्वम् । प्राक्षीयत्वात् सुखो मास इत्यथो वा । मस्यते परिमीयतेऽनेन मासः मसिर्यं परिमाणे परीक्षामे घञ् स्वार्थे कः मासोऽयं इत्यान्तः । मस हिंसार्थो मूर्द्धन्यान्तस्तस्मादृ घञ् तेन माषो मूर्द्धन्यान्त इति जिनेन्द्रप्रभृतयः । इत्यमरटीकायां भरतः ॥
मासज्ञः, पुं, दात्यूहपक्षी । इति शब्दरत्नावली ॥ (मासं जानातीति । ज्ञा + कः ॥) मासज्ञातरि, त्रि ॥
मासनं, क्लीं, सोमराजी । इति शब्दचन्द्रिका ॥
मासमानः, पुं, (मासेर्दादशभिर्मानमस्य ।) वत्सरः । इति त्रिकाण्डशेषः ॥ (मासस्य मानम् ॥) मासपरिमाणे, क्लीं ॥

मासरः, पुं, (मस + णिच् + वाहुलकात् अरन् ।) भक्तमसुद्धवमण्डः । तत्पर्य्यायः । आचामः २ निमावः ३ । इत्यमरः । २ । ६ । ४६ ॥

मासवर्त्तिका, स्त्री, सर्षपीपत्तिविशेषः । इति शब्दमाला ॥

मासान्तः, पुं, (मासस्यान्तः ।) अमावस्या । यथा,—

'पक्षान्ते निष्फला यात्रा मासान्ते मरणं ध्रुवम् ।
इति समयप्रदीपः ॥

संक्रान्तिदिनम् । यथा,—

"मासान्ते म्रियते कन्या नित्यन्ते स्यादपुत्रिणी ।
नक्षत्रान्ते च वैधव्यं विद्यां श्लत्युर्दयोर्भवेत् ॥
मासान्ते दिनमेकन्तु तिथ्यन्ते घटिकाद्वयम् ।
घटिकात्रितयं भान्ते विवाहे परिवर्जयेत् ॥"
इति रत्नमाला ॥

मासिकं, क्ली. (मासे भवम् । मास + "कालाट् ठञ् ।" ४ । ३ । ११ । इति ठञ् ।) प्रेतस्य संवत्सराभ्यन्तरे प्रतिमासीयमृतसजातीयतिथि कर्त्तव्यश्राद्धम् । प्रतिमासकर्त्तव्यकृष्णपक्षनिमित्तक श्राद्धम् । तत्पर्य्यायः । अन्वाहार्य्यम् २ । इत्यमरः । ३ । ७ । ३१ ॥ मासि भवं मासिकं पार्व्वणश्राद्धं तत्र अन्वाहार्य्यं वर्त्तते । पक्षग्रहे अमावास्यायां देयत्वात् । अन्वु पश्चादाहार्य्यते अन्वाहार्य्यं हरत्यासोरिति घ्यण् स्वार्थे के अन्वाहार्य्यकच्च । अकृतसपिण्डीकरणस्य वत्सराभ्यन्तरे प्रतिमासं यत् श्राद्धं तच्चान्वाहार्य्यमिति केचित् । इत्यमरटीकायां भरतः ॥ तयोः प्रमाणम् ।

"षाण्मासिकाब्दिके श्राद्धे स्यातां पूर्व्वेद्युरेव ते ।
मासिकानि खकीये तु दिवसे द्वादशापि च ॥"
इति पैठीनसिः ॥

'पितृणां मासिकं श्राद्धमन्वाहार्य्यं विदुर्बुधाः ।
तच्चामिषेण कर्त्तव्यं प्रशस्तेन प्रयत्नतः ॥'
इति मनुः । ३ । १२३ ॥*॥

मासिककरणस्य अवस्था यथा । पीठच्छत्रोपानद्वरहितानि इहलोकं परित्यज्य इत्यादि सर्व्वं सुगन्ध इत्यादि श्रिया देवा इत्यादि वनस्पतिरस इत्यादिमन्त्रचतुष्टयरहितानि च आद्यैकोद्दिष्टवत् कृताद्दे कृताद्दे द्वादश मासिकानि कार्य्याणि । एकादशमासाभ्यन्तरे मलमासपाते त्रयोदशमासिकानि । षष्ठमासाभ्यन्तरे मलमासपातेऽपि षष्ठमासिकपूर्व्वतिथावेव प्रथमषाण्मासिकम् । तथा त्रयोदशमासिकस्य पूर्व्वतिथौ द्वितीयषाण्मासिकम् । एवं षाण्मासिकीद्वये प्रथमषाण्मासिकद्वितीयषाण्मासिकत्वेनोल्लेखः । एषां मध्ये यत् पतितं तत् क्षणैकादश्यां अमावास्यायां मासिकान्तरतिथौ वा कृत्वा प्रक्षतं कर्त्तव्यम् । अशौचपतितस्वेत्तदशौचान्ते कर्त्तव्यम् । एकादशाद्यादिश्राद्धानि कतिचित् कृत्वा यदि मृतस्तदा प्रेषाणयन्येनाधिकारिणा समाप्यानि ॥*॥ अथ मासिकैकोद्दिष्टश्राद्धप्रयोगः । पूर्व्वदिने निरामिषैकभक्तः परदिने स्नानादिकं कृत्वा एकोद्दिष्टश्राद्धविहितकाले भोज्यसुसंस्कृत्य कृष्णब्राह्मणं स्नापयित्वा वास्तुपुरुषादि पूजयित्वा भूस्वामिपितृभ्यः श्राद्धाग्रभागं दत्त्वा दक्षिणामुखः अनुज्ञां कुर्य्यात् । यथा अद्यामुके मासि अमुकपक्षे अमुकतिथौ अमुकगोत्रस्य प्रेतस्य अमुकदेवशर्म्मणः प्रथममासिकैकोद्दिष्टश्राद्धं दर्भमयब्राह्मणैरहं करिष्ये । ॐ कुरुष्वेत्युत्तरम् । ततो गायत्रीं जपेत् । देवताभ्य इत्यादि त्रिधा पठेत् । ततः पुण्डरीकाक्षं स्मृत्वा सव्यजानु श्राद्धीयद्रव्यं प्रोक्षयेत् । रत्नार्थमुदकपूर्णपात्रमेकदेशे स्थापयेत् । ततः ॐ अमुकगोत्र प्रेत अमुकदेवशर्म्मन्नेतत्ते दर्भासनं स्वधा । इत्यनेन ब्राह्मणवामपार्श्वे दद्यात् । अपहतेत्यादिना तिलान् विकीर्य्य जलं स्पृष्ट्वा ब्राह्मणाग्रभूमौ कृष्णपत्रमेकं पातयित्वा तदुपरि अर्घ्यपात्रं संस्थाप्य ॐ पवित्रवासि वैष्णवीत्यनेनानामिकाच्छिन्नं ॐ विष्णोर्मनसा पूतमसीत्यनेन प्रोक्षितमेकदलं पवित्रं तत्पात्रे निधाय ॐ शन्नो देवीरित्यादिमन्त्रेण जलं दद्यात् । ततः ॐ तिलोऽसि सोमदेवत्यो गोसवो देवनिर्म्मितः । प्रत्नमद्भिः पृक्तः स्वधया प्रेतान् लोकान् प्रीणाहि नः स्वाहा । इत्यनेन तिलान् दत्त्वा गन्धपुष्पादिना अर्घ्यं निर्म्माय कृष्णान्तरेणाच्छाद्य तत् कृष्णसूत्राद्य ब्राह्मणे पवित्रं दत्त्वा जलान्तरञ्च दत्त्वा पुष्पान्तरेण शिरः-प्रभृतिसर्व्वगोत्रेभ्यो नम इति संपूज्य तत् पात्रं वामहस्ततले विन्यस्य दक्षिणहस्तेनाच्छाद्य ॐ या दिव्या इति पठित्वा ॐ अमुकगोत्र प्रेतामुकदेवशर्म्मन्नेतत्तेऽर्घ्यं स्वधा । ततः ॐ अमुकगोत्र प्रेतामुकदेवशर्म्मन्नेतानि ते गन्धपुष्पधूपदीपाच्छादनानि स्वधा । इत्युक्त्वा एष ते गन्धः एतत्ते पुष्पं एष ते धूप एष ते दीपः एतत्ते आच्छादनम् । ततो ब्राह्मणाग्रभूमौ कृष्णाद्यिकमपनीय नैर्ऋतिमारभ्य दक्षिणाग्रान्तरेखया वामावर्त्तेन जलेन चतुष्कोणमण्डलं कृत्वा तत्र भोजनपात्रं निदध्यात् । तत्र सामिषं सर्व्वमन्नादिकं परिवेष्य ॐ इदं विष्णुरित्यादिमन्त्रेण अन्नादावनखाङ्कुशं निक्षिप्य ॐ अपहतेत्यादिना तिलान् विकीर्य्य ब्राह्मणे जलगण्डूषं दत्त्वा गायत्रीं जप्त्वा अन्ने मधु दत्त्वा तदभावे गुडं दत्त्वा घृतं दत्त्वा ॐ मधुवातेत्यादि मधु मधु मध्विति च पठित्वा अन्नमभिमन्त्र्य प्रोक्ष्य ब्राह्मणे जलगण्डूषं दत्त्वा वामहस्तेनान्नपात्रं धृत्वा ॐ अमुकगोत्र प्रेतामुकदेवशर्म्मन्नेतत्ते सामिषान्नं सोपकरणं स्वधेत्युक्त्वेत्। इदं सामिषान्नं इदं हविः इमा गङ्गाया आपः एतान्युपकरणानि यथासुखं वाग्यतः सद । इत्यनेन जलगण्डूषं दद्यात् । ततो गायत्रीं त्रिः पठित्वा ॐ मधुवाता इत्यादि मधु मधु मध्विति ॐ अन्नहीनमित्यादि च पठेत् । कृष्णब्राह्मणपक्षे पुनर्गायत्र्यादि पठेत् । ॐ यज्ञेश्वरो हरिर्य इत्यादि ॐ योगीश्वरमित्यादि याज्ञवल्क्यश्लोकत्रयं ॐ तद्विष्णोरित्यादि ॐ दुर्य्योधन इत्यादि ॐ युधिष्ठिर इत्यादि सर्व्वं पठेत् । ततो दक्षिणाग्रान् कृष्णान् भूमौ संस्थाप्य भूमिं प्रोक्ष्य सर्व्वप्रकारमन्नमुद्धृत्य मलिनमेकीकृत्य वारिणाप्लुत्य ॐ अग्निदग्धाश्चेत्यादिमन्त्रद्वयेन कृष्णोपरि विकिरेत् । ततो हस्तौ प्रक्षाल्याचम्य दक्षिणकर्णं स्पृष्ट्वा वा हरिं स्मृत्वा ब्राह्मणाय जलगण्डूषं दत्त्वा पूर्व्ववद्गायत्रीं मधुवाता इत्यादिकं मधु मधु मध्विति च जप्त्वा ॐ प्रेषमन्नं क्रव्यमित्यनुज्ञाप्य ॐ इदाय दीयतामित्युत्तरं गृहीत्वा ॐ पिण्डदानमहं करिष्ये ॐ कुरुष्वेत्युक्ते ब्राह्मणसम्मुखे ॐ निर्ऋत्यामारभ्य दक्षिणाग्ररेखया जलेन वामावर्त्तेन चतुष्कोणमण्डलं कृत्वा पवित्रं वामहस्तादक्षिणहस्तेन गृहीत्वा वामहस्तान्वारब्धदक्षिणपाणिना दक्षिणाग्रां रेखां मण्डलमध्यस्थाने ॐ अपहतेत्यादिनिर्ऋत्यादिमन्त्राभ्यां कुर्य्यात् । तद्धर्मसूत्रस्यां दिशि क्षिपेत् । रेखोपरि सन्मूलान् साग्रान् कृष्णान्नास्तीर्य्य ॐ देवताभ्य इति पठित्वा ॐ एहि प्रेत सौम्य गम्भीरेभिः पथिभिः पूर्व्भिर्णेभिर्देवयानैरस्मभ्यं द्रविणेह भद्रं रयिञ्च नः सर्व्ववीरं नियच्छ इत्यावाह्य तिलांश्चास्तीर्णकृष्णेषु विकिरेत् । ततो वामहस्तेन सतिलजलं गृहीत्वा वामहस्तादक्षिणहस्तेन संगृह्य ॐ अमुकगोत्र प्रेतामुकदेवशर्म्मन्नवने निक्षु स्वधा इत्यनेन दद्यात् ततः आवृतेषमन्नं सव्यञ्जनं मध्याह्नतिलसंयुक्तं सामिषं गृहीत्वा पिण्डं कृत्वा ॐ मधुवातेत्यादि ऋक्त्रयं अत्रन्नमीत्यादि च पठित्वा बिल्वप्रमाणं पिण्डं सतिलं द्विगुणसूत्रकृष्णत्रयमध्यितं वामहस्तस्थितपात्राद्दक्षिणहस्तेन गृहीत्वा ॐ अमुकगोत्र प्रेतामुकदेवशर्म्मन्नेष ते सामिषपिण्डः स्वधा इत्यवनेजनस्थाने वामहस्तान्वारब्धदक्षिणहस्तेन दद्यात् । ततः आत्तस्य हरिं स्मृत्वा पिण्डपात्रं प्रक्षाल्य वामहस्तादक्षिणहस्तेन गृहीत्वा प्रक्षालितजलं ॐ अमुकगोत्र प्रेतामुकदेवशर्म्मन्नवने निक्षु स्वधा इति पिण्डोपरि दद्यात् । ततः ॐ अत्र प्रेत मादयस्व यथाभागमा वृषायस्व इति जप्त्वा वामावर्त्तेनोदङ्मुखो भूत्वा आगमनाच्छ्वासं धृत्वा तेनैव पथा परावर्त्तमानः प्रेतं भास्वरमूर्त्तिं ध्यायन् ॐ अमीमदन्त प्रेत यथा भागमा वृषायिष इति दक्षिणाभिमुखो भवन् जपेत् । ततः श्वासं त्यजेत् । ॐ नमस्ते प्रेत प्रेत नमस्ते इति कृताञ्जलिर्जपेत् । ॐ गृहान्नः प्रेत देहि इति गृहिणीं पश्येत् । ॐ सदस्ते प्रेत देवम इति पिण्डं पश्येत् । ततो नवमनवं वा शुक्लवस्त्रद्वयाभवं सूत्रं वामहस्तादक्षिणहस्तेन गृहीत्वा ॐ एतद्वः प्रेता वास इति पठित्वा पिण्डोपरि निदध्यात् । ततः ॐ अमुकगोत्र प्रेतामुकदेव शर्म्मन्नेतत्ते वासः स्वधा । इत्यनेनोत्सृजेत् । ततस्तूष्णीं पिण्डं संपूज्य ॐ वसन्तायेत्यादि-

मन्त्रेण षड्तून्नमस्कुर्य्यात्। तत ॐ सुसुप्रोक्षितमस्तु इति ब्राह्मणाग्रभूमिमासिञ्चेत्। ॐ प्रिया आपः सन्तु इति ब्राह्मणे जलं दद्यात्। ॐ सन्त्विति प्रतिवचनम्। ॐ सौमनस्यमस्त्विति पुष्पं ॐ अस्त्विति प्रतिवचनम्। ॐ अक्षतञ्चारिष्टञ्चास्तु इति यवान् दद्यात्। ॐ अस्त्युत्तरम्। ततस्तिलाज्यमधुयुक्तं जलं गृहीत्वा ॐ अमुकगोत्रस्य प्रेतस्यामुकदेवशर्म्मणो दत्तमिदमन्नपानादिकमुपतिष्ठताम्। ॐ उपतिष्ठतामिति प्रतिवचनम्। ॐ अघोरः प्रेतोऽस्तु इति वदेत्। ॐ अस्त्विति प्रतिवचनम्। ॐ गोत्रं नो वर्द्धतामिति वदेत्। ॐ वर्द्धतामिति प्रतिवचनम्। ततः पिण्डोपरि सपवित्रकुशानास्तीर्य्य ॐ ऊर्ज्जं वहन्तीरमृतं घृतं पयः कीलालं परिसृतं स्वधास्थ तर्पयत मे पितॄन्मित्यनेन वारिधारया सिञ्चेत्। ततः ॐ अङ्गेत्यादि अमुकगोत्रस्य प्रेतस्य अमुकदेवशर्म्मणः क्षत्तेतत्पथममासिकैकोद्दिष्टश्राद्धकर्म्मणः प्रतिष्ठार्थं दक्षिणामिदं रजतं तन्मूल्यं वा विष्णुदैवतं यथा नामगोत्राय ब्राह्मणायाहं ददानीति दद्यात्। ततो दक्षिणां दिशं पश्यन् वरं याचेत। नाच पात्रमालभ्य जपेत्। नाग्निघः प्रार्घवेदिति प्रचेतोवचनादाग्निघं न प्रार्घयेत्। ततः ॐ देवताभ्य इति त्रिः पठेत्। ॐ अभिरम्यतामिति विसर्ज्जनम्। ॐअभिरतोऽस्मीति प्रतिवचनम्। ॐ आमावाजेति प्रदक्षिणवारिधारया वेष्टयेत् पिण्डांस्तु गोऽजविप्रेभ्यो दद्यादग्नौ जलेऽपि वा क्षिपेत्। आद्यीयद्वयं ब्राह्मणाय दद्यात् जले वा क्षिपेत्। ततो वामदेवं गायेत् अच्छिद्रावधारणं दीपाच्छादनं विष्णुस्मरणञ्च कुर्य्यात्। एवं प्रकारेण द्वितीयादिमासिकं कर्त्तव्यम्। इति स्मार्त्तभट्टाचार्य्यकृतश्राद्धप्रयोगतत्त्वम्॥ * ॥ अन्यत् श्राद्धशब्दे द्रष्टव्यम्॥

मासिकः, त्रि, मासमम्बन्धी। मासि भव इत्यर्थे ठिञ्क्प्रत्ययेन निष्पन्नः॥ (यथा, मनौ।७।१२६।
"प्रणो देवोऽवृष्टस्य षड्तूनृष्टस्य वेतनम्।
मासमासिकमुद्धारो धान्यद्रोणस्तु
मासिकः॥")

मासुरी, स्त्री, (मसुर+अण् ङीष्।) मसूरः। इति हेमचन्द्रः। ३। २०७॥ (मात्रभमी। यथा, ब्रह्मवैवर्त्ते। १। १०। १४५।
"पितृष्वसा पितुर्भगी मातृभगी च मासुरी।")

मास्क, य, (मा च स्क च तयोः समाहारः।) वारणम्। तत्पर्य्यायः। मा २ अलम् ३। इत्यमरः।३।३।११। (यथा, रामायणे।२।२२।६२।
"मास्क मे भरतः कार्षीत् प्रेतकृत्यं गतायुषः।")

माह ऋ ष मने। इति कविकल्पद्रुमः॥ (भ्वा०-उभ०-सक०-सेट्।) ऋ ममाहृत। ऋदनुबन्धस्थाने षष्ठस्वरानुबन्ध इत्येके। ष माहति माहते। इति दुर्गादासः॥

माहाकुलः, त्रि, (महाकुलस्यापत्यमिति।) "महाकुलादञ्खञौ।" ४। १। १४१। इति अञ्।) महाकुलोद्भवः। इत्यमरटीकायां रायमुकुटः॥

माहाकुलीनः, त्रि, (महाकुलस्यापत्यमिति। "महाकुलादञ्खञौ।" ४। १। १४१। इति खञ्।) महाकुलोद्भवः। इत्यमरटीकायां रायमुकुटः॥

माहात्म्यं, क्ली, (महात्मनो भावः इति। महात्मन्+ष्यञ्।) महात्मता। महिमेति यावत्। यथा, तिथ्यादितत्त्वे।
"माहात्म्यं भगवत्याश्च पुराणादिषु कीर्त्तितम्।
पाठस्तस्य जयः प्रोक्तः पठेद्देवीमनाकुलः॥"

माहानामिकः, पुं, ("तदस्य ब्रह्मचर्य्यम्।" ५। १। १।६४। इत्यत्र। "माहानाम्न्यादिभ्यः षष्ठ्यन्तेभ्य उपसंख्यानम्॥" महानाम्नो नाम विद्यामघवन्।' इत्यादौ ऋचः। तासां ब्रह्मचर्य्यमस्य इति ठञ्। हरदत्तस्तु "भस्याढे," इति पुंवद्भावात् माहानामिक इत्याह। इति सिद्धान्तकौमुदी।) महानाम्नीऋचावेत्ता ब्राह्मणः। इति केचित्॥

माहिनं, क्ली, (मह्यते पूज्यते अस्मिन् इति। मह्+"महेरिनण् च।" उणा०। २। ५६। इति इनण्।) राज्यम्। इत्युणादिकोषः॥ (मंहनीये, त्रि। यथा, ऋग्वेदे।३।३६।६।
"इन्द्र! यत्ते माहिनं दत्रमस्ति।"
"माहिनं मंहनीयम्।" इति तद्भाष्ये सायणः॥ प्रशस्ते च। यथा, तत्रैव।१।५६।६।
"इन्द्र! सदनेषु माहिनः।"
"माहिनः प्रशस्तः।" इति तद्भाष्ये सायणः॥)

माहिरः, पुं, (मह्यते पूज्यतेऽसौ। मह्+बाहुलकात् इरण्।) इन्द्रः। इति त्रिकाण्डशेषः॥

माहिषिकः, पुं, (महिष्ये रोचतेऽसौ। महिषी+ठक्।) महिषीपतिः। व्यभिचारिण्यनुरक्तपतिः॥ यथा,—
"महिषीत्युच्यते नारी या च स्याद्व्यभिचारिणी।
तां दुष्टां कामयतिः यः स वै माहिषिकः स्मृतः॥"
इति स्कान्दे काशीखण्डम्॥
महिषीपजीवी॥ (महिषी नारी पण्यमस्येति। महिषी+"तदस्य पण्यम्।" ४।४।५१। इति ठक्।) भगदारोपार्ज्जितस्त्रीधनोपजीवी। यथा,
"महिषीत्युच्यते नार्य्या भगेनोपार्ज्जितं धनम्।
उपजीवति यस्तस्याः स वै माहिषिकः स्मृतः॥"
इति विष्णुपुराणे २। ६। १५ श्लोकस्य टीकायां श्रीधरस्वामी॥

माहिष्यः, पुं, (महिष्यां साधुरिति महिषी+ष्यञ्।) वर्णसङ्करजातिविशेषः। स च क्षत्रियाद्वैश्यायां जातः। इत्यमरः।२।१०।३॥ (यथा, याज्ञवल्क्यसंहितायाम्। १। ६२।
"वैश्यात्शूद्रायोस्तु राजन्यान् माहिष्योगौ सुतौ
स्मृतौ॥")

माहेन्द्रः, पुं, (महेन्द्रस्यायम्। महेन्द्र+अण्।) शुभदण्डविशेषः। रथादिसप्तवारेषु वायुवरुणयममाहेन्द्राणामेकैकदण्डा भवन्ति। तत्र वरुणयममाहेन्द्रयोर्द्वौ शुभौ। वायुयमयोर्द्वौ अशुभौ। यथा,—
"ख्यातं वा व यमा सूर्य्ये मा वा व य कला निधौ।
व य मा वा कुजे ज्ञेया मा वा व य सुधांशुजे॥
गुरौ वा व य मा चैव मङ्गे वा व य तथा भृगौ।
सूर्य्यपुत्रे य मा वा व वटीयुग्मं शुभाशुभम्॥
माहेन्द्रे विजयो नित्यं वारुणे च धनागमः।
वायौ च भ्रमते नित्यं यमेऽपि मरणं ध्रुवम्॥")
इति सारसंग्रहः॥
(माहेन्द्रकायपुरुषस्य लक्षणं यथा,—
"माहात्म्यं शौर्य्यमाज्ञा च सततं शास्त्रबुद्धिता।
भृत्यानां भरणञ्चापि माहेन्द्रं कायलक्षणम्॥"
इति सुश्रुते शारीरस्थाने चतुर्थेऽध्याये॥
महेन्द्रो देवतास्येति। महेन्द्र+"महेन्द्राद्घाणौ च।" ४। २। २६। इति अण्। महेन्द्रदेवत्ये, त्रि। यथा, भट्टिकाव्ये।१५।६३।
"अविभज्यतत्तः शुल्कमेषीकं राक्षसो रणे।
तदध्वसदासाद्य माहेन्द्रं लक्ष्मणेरितम्॥")
महेन्द्रसम्बन्धिनि च। (यथा, रघौ।१२।८६।
"मातलिस्तस्य माहेन्द्रं न्यासमोघं तनुच्छदम्॥")

माहेन्द्री, स्त्री, (महेन्द्रस्येयम्। महेन्द्र+अण्। स्त्रियां ङीष्।) इन्द्राणी। इति शब्दरत्नावली॥ गौः। इति राजनिर्घण्टः॥

माहेयः, त्रि, (मही+ढक्) मह्या अपत्यम्। इति सुग्धबोधव्याकरणम्॥ (जनपदभेदे, पुं। यथा, महाभारते। ६। ६। ४८।
"कुट्टाः परान्ता माहेयाः कच्चाः सासुरनिष्कुटाः॥"
मङ्गलग्रहः। यथा, समयान्तरे।
"कफपित्तसमुद्भूतां शिरःपीड़ां भयावहाम्।
माहेयः कुरुते शोकं बुधस्यान्तर्दशां गतः॥")

माहेयी, स्त्री, (मह्याः सुरभ्याः अपत्यमिति। मही+"नद्यादिभ्यो ढक्।" ४। २। ६७। इति ढक्। स्त्रियां ङीष्।) गौः। इत्यमरः।२। ६। ६०॥ (यथा, महाभारते। ४। १६। १०।
"सर्व्वश्वेतेव माहेयी वने जाता चिरायती।
उपातिष्ठत पाञ्चाली वासितेव मदोत्कटम्॥"
अस्याः पर्य्यायो यथा,—
"सुरभिः सौरभेयी च माहेयी गौरुदाहृता॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

माहेशी, स्त्री, (महेशस्येयम्। महेश+अण्+स्त्रियां ङीष्।) दुर्गा। यथा,—
"महादेवात् समुत्पन्ना महान्तेरीक्ष्यते यतः।
माहेश्वर्य्या तनुर्यस्या माहेशी तेन सा स्मृता॥"
इति देवीपुराणे ४५ अध्यायः॥
(महेशेन प्रोक्तमित्यण्। क्ली, व्याकरणविशेषः। "यान्युच्चारे माहेशाद् यासो व्याकरणार्थत्वात्।
तानि किं पदरत्नानि सन्ति पाणिनिगोप्यदे॥"
इत्युक्तेः॥)

माहेश्वरी, स्त्री, (महेश्वरस्येयम् । महेश्वर+अण्, ङीष् ।) यवतिक्ता । इति राजनिर्घण्टः । दुर्गा ॥ (यथा, महाभारते । १४ । ४३ । १४ । "भगदेवानुयातायां सर्व्वासां वामलोचना । माहेश्वरी महादेवी प्रोच्यते पार्व्वती हि सा ॥") मालभेदः । इति शब्दरत्नावली ॥ (यथा, मन्त्रकोषे । ६ । ॐ ह्रीं नमो भगवति माहेश्वरि अन्नपूर्णे स्वाहा ।) विष्णुः । यथा,— कन्या उचुः ॥ "कस्त्वं विभासि कान्त्या कैर्यं वा नवविप्रभा । कोन्वयं भाति वपुषा पङ्कजायतलोचनः ॥ निशम्य तासां वचनं हरेन्द्रवरवाहनः । व्याजहार महाथोगी भूताधिपतिरव्ययः ॥ अयं नारायणो गौरी जगज्ज्ञाता जगत्तनः । विभिद्य संस्थितो देवः स्वात्मानं गरुडेश्वरः ॥ न मे विदुः परं तत्त्वं देवाद्या न महर्षयः । एकोऽयं देवदेवात्मा भवानी विष्णुरेव च ॥ अहं हि निष्क्रियः शान्तः केवलो नित्यविग्रहः । मामेव कैश्चिदं देवमाहुर्देवीमथाम्बिकाम् ॥ एष धाता विधाता च कारणं कार्यमेव च । कर्त्ता कारयिता विष्णुर्भक्तिमुक्तिफलप्रदः ॥ भोक्ता पुमानप्रमेयः संहर्त्ता कालरूपधृक् । सदा धाता वासुदेवो विश्वात्मा विश्वतोमुखः ॥ कूटस्थो ह्यक्षरो योगी योगी नारायणः स्वयम् । तारकः पुरुषो ह्यात्मा केवलं परमं पदम् ॥ एषा माहेश्वरी गौरी मम शक्तिर्निरञ्जना । शान्ता सत्या सदानन्दा परं पदमिति श्रुतिः ॥ अस्याः सर्व्वमिदं जातमत्रैव लयमेष्यति । एषैव सर्व्वभूतानां गतीनामुत्तमा गतिः ॥" इति कौर्म्मे १४ अध्यायः ॥ (पीठस्थानभेदः । इति देवीभागवते । ७।३०।७२। महेश्वरेण कृतम् । महेश्वर+अण् । क्लीं । उपपुराणविशेषः । यथा, देवीभागवते । १ । ३ । १६ । "माहेश्वरं भागवतं वाशिष्ठञ्च सविस्तरम् । एतान्युपपुराणानि कथितानि महात्मभिः ॥" महेश्वरसम्बन्धिनि, त्रि । यथा, मार्कण्डेये । १०६ । ७१ । "वाणी माहेश्वरी चैव वैष्णवी चैव ते तनुः । त्रिधा यस्य स्वरूपन्तु भानोर्भास्वान् प्रवीदतु ॥") मि ञ्चु ष्ण चेपे । इति कविकल्पद्रुमः ॥ (भ्वा०-उभ०-सक०-अनिट् ।) ञ्चु मिञ्चिमम् । ष्ण मिनोलि मिञ्चेत् । इति दुर्गादासः ॥

मिञ्च्, ग्र वाधे । इति कविकल्पद्रुमः ॥ (तुदा०-पर०-सक०-सेट् ।) ग्र मिञ्चति मिञ्चतः । बाधो विहतिः । इति दुर्गादासः ॥

मित:, त्रि, (मा+क्तः "अतिस्तुतिमास्यामित्ति किति ।" ७ । ४ । ४० । इत्याकारस्येकारादेशः ।) परिमितः । शब्दितः । क्षिप्तः । इति साधनोमिधानोक्त क्तप्रत्ययेन निष्पन्नम् । (यथा, भागवते । ८ । १९ । ३६ । "राजन्यबन्धुर्नेहेत यावदर्थानि ते । प्रोक्तान्येभिर्मितः कल्पो युगसाहस्रपर्य्ययः ॥" यथा च नैषधचरिते । ६ । ८ । "मितञ्च सारञ्च वचो हि वाग्मिता ॥")

मितङ्गमः, पुं, स्त्री, (मितं परिमितं गच्छतीति । गम+"प्रियवशेवदः खच् ।" ३।२।३८। इत्यत्र "खच् प्रकरणे गमेः सुप्युपसंख्यानम् ।" इति काशिकोक्तेः खच् । सुम् च ।) हस्ती । इति सिद्धान्तकौमुदी ॥ परिमितगामिनि, त्रि ॥

मितद्रुः, पुं, (मितं द्रवतीति । द्रु+"हरिमितयोर्द्रुवः ।" उणा० १ । ३५ । इति कुः । स च डित् ।) वसुद्रवः । इति हेमचन्द्रः । ४ । १३६ ॥ (परिमितगतौ, त्रि । यथा, ऋग्वेदे । ४।६।५। परिस्फना मितद्रवो हवन्तामिन्द्रो मघवान ऋता वा ।" "मितद्रुः परिमितगतिः सन् ।" इति तद्भाष्ये सायणः ॥ मितमार्गे च । यथा, तत्रैव । १० । ६४ । ६ । "तेनो अर्वन्तोऽवनयुतोऽवं विश्वे अरुखन्तु वाजिनो मितद्रवः ।" "मितद्रवो मितमार्गाः अध्वानं परिच्छिन्दन्तः ।" इति तद्भाष्ये सायणः ॥")

मितम्पचः, त्रि, क्षपणः । इत्यमरः ॥ ३ । २ । ४८॥ (मितं परिमितं पचतीति । मित+पच्+"मितनखे च ।" ३ । २ । ३४ । इति खश् । "अरुर्द्विषदजन्तस्य मुम् ।" ६ । ३ । ६७ । इति सुम् च ।) परिमितपाककर्त्ता च ॥

मिताशनः, त्रि, परिमितभोजी । मितमश्नाति यः इति क्षुत्पत्ता कर्त्तरि (ल्यु) अनप्रत्ययेन निष्पन्नः ॥

मितिः, स्त्री, (मीयते इति । मा+भावे क्तिन् ।) मानम् । विज्ञानम् । अवच्छेदः । इति शब्दरत्नावली ॥ (यथा, कुसुमाञ्जलौ । ४६ । ४ । "मितिः सम्यक् परिच्छित्तिः ॥")

मित्रं, क्ली, (मिनोति मानं करोति इति । "अमिचिमिदिगृधिभ्य क्रः ।" उणा० ४ । १६३ । इति क्रः ।) प्रभोः परम् । इत्यमरः । २ । ८ । ६ ॥ अतः प्रभोः परमवस्थितो राजा मित्रं उपकारित्वात् । मेद्यति स्निह्यतीति त्रासुचिति त्रः निपातात् गुणाभावः । द्वितकारं एकतकारञ्चेत्येके । इति तट्टीकायां भरतः ॥ अपि च ।

"राजा प्रभुरिति ख्यातः एकार्थाभिनिवेशतः । भृत्यैकान्तरितो राजा स मित्रं मित्रकार्य्यतः ॥" इति शब्दरत्नावली ॥

मित्रं, क्ली, वस्तुः । मिता इति भाषा । तत्पर्य्यायः । सखा २ सुहृत् ३ । इत्यमरः । २ । ८ । १२ ॥ मायवति जानाति सर्व्वं मित्रं मो कि गत्रां गात्रीति डित्रः मित्रमत्रक्षत्रिङ्गम् । निपातात्तस्य हित्वे हितकारत्वञ्च । इति तट्टीकायां भरतः ॥ तत्रतुल्यिधम् । सहार्घः १ भक्तमानः २ सहजः ३ कृत्रिमः ४ । इति महाभारते राजधर्म्मः ॥ ६ ॥ मित्रत्वोत्पत्तिर्यथा,—

"न कश्चित् कस्यचिन्मित्रं न कश्चित् कस्यचिद्रिपुः । कारणादेव जायन्ते मित्राणि रिपवस्तथा ॥" वर्ज्यमित्रं यथा,— क्षुभार्य्याञ्च कुमित्रञ्च कुराजानं कुसौहृदम् । क्षुवन्तुञ्च कुदेशञ्च दूरतः परिवर्जयेत् ॥ क्षुमित्रे नास्ति विश्वासः कुराजे नास्ति जीवितम् ॥ परोक्षे कार्य्यहन्तारं प्रत्यक्षे प्रियवादिनम् । वर्जयेत्तादृशं मित्रं मायामयमरिन्तथा ॥" विश्वस्तस्यैव मित्रत्वं यथा,— "या श्रीर्या न मदं कुर्य्यात् स सुखी क्षणयोज्झितः । तस्मिन्नं यस्य विश्वासः पुरुषः स जितेन्द्रियः ॥" इति गारुडे १३ । १४ । १५ । अध्यायाः ॥*॥ मित्रप्रशंसादिर्यथा,— "यस्य मित्रेण संभाषो यस्य मित्रेण संस्थितिः । यस्य मित्रेण संलापस्ततो नास्तीह पुण्यवान् ॥ यानि कानि च मित्राणि कर्त्तव्यानि शुतानि च । पश्य मूषिकमित्रेण कपोता मुक्तबन्धनाः ॥ परोक्षे कार्य्यहन्तारं प्रत्यक्षे प्रियवादिनम् । वर्जयेत्तादृशं मित्रं विषकुम्भं पयोमुखम् ॥ यस्यार्थास्तस्य मित्राणि यस्यार्थास्तस्य बान्धवाः । यस्यार्थाः स पुमान् लोके यस्यार्थाः स हि पण्डितः ॥ अपुत्रस्य गृहं शून्यं सन्मित्ररहितस्य च । मूर्खस्य च दिशः शून्याः सर्व्वशून्या दरिद्रता ॥" इति हितोपदेशः ॥

मित्रः, पुं, सूर्य्यः । इत्यमरः । १ । ३ । ३० ॥ (यथा, रामायणे । २ । २५ । २२ । "स्वस्ति मित्रः सहादित्यैः स्वस्ति रुद्रा दिशन्तु ते ॥") द्वादशादित्यानामन्यतमः । यथा, महाभारते । १ । ६५ । १५ । "धाता मित्रोऽर्य्यमा शक्रो वरुणस्त्वंश एव च । भगस्तथैवाम्बितिः सावित्रो मित्र एव च ॥" मरुतामन्यतमः । यथा, हरिवंशे । १६६।५२। "मरुत्वती मरुत्वन्तो देवानजनयत् सुतान् । अग्निश्चतुर्हविर्व्वोतिः सावित्रो मित्र एव च ॥" वशिष्ठस्य ऊर्ज्जागर्भजातः पुत्रभेदः । यथा, भागवते । ४ । १ । ३७ । चित्रकेतुः सुरोचिश्च विरजा मित्र एव च । उल्बणो वसुभृद्यानो द्युमान् शक्त्यादयोऽपरे ॥")

मित्रयुः, त्रि. (मित्रं यातीति । या+"क्याच्छन्दसि ।" ३ । २ । १७० । इति उः ।) मित्रवत्सलः । इति हेमचन्द्रः । ३ । १५३ ॥

मित्रयुः, पुं, (मित्रं यातीति । या+"शुगयादयश्च ।" उणा० १ । ३८ । इति कुः । निपातितश्च ।) लोकयाचिकः । इत्युणादिकोषः । संज्ञिप्रसारोणादिवृत्तिश्च ॥ (ऋषिभेदः सलोमहर्षणशिष्यः । यथा, विष्णुपुराणे । ३।६।१८। "सुमतिश्चाग्निवर्चाश्च मित्रयुः शांशपायनः ॥)

मित्रयुद्धं, क्ली, (मित्रेण सह युद्धम्।) सुहृत्संग्रामः। तत्पर्य्यायः। मैत्रेयिका २। इति त्रिकाण्डशेषः॥

मित्रलब्धिः, स्त्री, पुं, (मित्रस्य लब्धिः। यद्वा। मित्रस्य लब्धिर्यस्मात्।) सुहृत्प्राप्तिः। यथा, हितोपदेशे।

"मित्रलाभः सुहृद्भेदो विग्रहः सन्धिरेव च॥"

मित्रवत्सलः, त्रि, (मित्रस्य मित्रे वा वत्सलः।) मित्रप्रियः। तत्पर्य्यायः। मित्रयुः २। इति हेमचन्द्रः॥

मित्रश्रीः, [स्] त्रि, (मित्रं श्रास्ति इति। श्रास्+"श्रास इदङ्हलोः।" ६।४।३४। इत्यत्र "क्वौ च श्रास इत्वं भवतीति वक्तव्यम्।" इति काशिकोक्तेः क्विप् इत्वं ततो दीर्घश्च।) सुहृच्छास्ता। मित्रं श्रास्ति यः। इति सुग्धबोधव्याकरणम्॥

मित्रसप्तमी, स्त्री, (मित्राय मित्रजन्मने मित्रस्य वा सप्तमीति समासः।) मार्गशीर्षशुक्लसप्तमी। यथा,—

"अदितेः कश्यपाज्जज्ञे मित्रो नाम दिवाकरः।
मार्गशीर्षस्य मासस्य शुक्ले पक्षे शुभे तिथौ॥
सप्तम्यां तेन सा ख्याता लोकेऽस्मिन् मित्रसप्तमी।
तत्रोपवासः कर्त्तव्यो भक्ष्याण्यत्र फलानि वा॥"

इति श्रीगोविन्दानन्दाचार्य्यकृतसंवत्सरकौमुदीधृतभविष्यपुराणवचनम्॥

मित्रा, स्त्री, (मित्र+स्त्रियां टाप्।) सुमित्रा। शत्रुघ्नजननी। इति शब्दरत्नावली॥ (अप्सरोविशेषः। यथा, महाभारते। १३। १६। ४४।

"अलम्बुषा घृताची च मित्रा चित्राङ्गदा रुचिः॥"

पराशरप्रियमैत्रेयजननी। यथा, श्रीमद्भागवते। ३। ४। ३५।

"कात्स्न्येन कतिभिः सिद्धः व्यहोभिर्भरतर्षभ!।
पापच्यत स्वःसरितं यत्र मित्रासुतो मुनिः॥")

मिथ ऋ च वधे। मेधायाम्। इति कविकल्पद्रुमः॥ (भ्वा०-उभ०-सक०-सेट्।) ऋ च्यमिमेथत्। च मेथति मेधते श्राद्धार्थं ग्रिण्यः धारयतीत्यर्थः। इति दुर्गादासः॥

मिथः, [स्] अ, (मेथति इति मेथृसङ्गमे+असुन्। पृषोदरादित्वात् ह्रस्वः।) अन्योन्यम्। रहः। इत्यमरः। ३।४।२५५॥ (यथा, मनुः। १०।५३।

"व्यवहारो मिथस्त्रीणां विवाहः सदृशैः सह॥")

मिथिः, पुं, (मेथते छिनत्ति श्रुतुक्षुलं इति। मिथ+"सर्व्वधातुभ्य इन्।" उणा० ४।११७। इति इन्।) निमिराजपुत्रः। स तु जनकराजः। यथा। अपुत्रस्य तस्य निमेर्भूभुजः शरीरमराजकभीरवस्ते सुनयः अरण्यां ममन्थुः। तत्र च कुमारो जज्ञे। जननाज्जनकसंज्ञां चासाधयन्। अभूद्विदेहोऽस्य पितेति वैदेहः। मथनान्मिथिरभूत्। तस्योदावसुः पुत्रोऽभवत्। इति विष्णुपुराणे ४ अंशे ५ अध्यायः॥ (तथाच रामायणे। १। ७१। ४।

"निमिः परमधर्म्मात्मा सर्व्वसत्त्ववतां वरः।
तस्य पुत्रो मिथिर्नाम जनको मिथिपुत्रकः॥")

मिथिला, स्त्री, (मथ्यन्ते शत्रवो यस्याम्। मथ्+"मिथिलादयश्च" उणा० १।५८। इति इलच् अकारस्येत्वं निपात्यते।) स्वनामख्यातनगरी। सा तु जनकराजपुरी। यथा। विदेहा मिथिला प्रोक्ता। इति हलायुधः॥ (यथा, महाभारते। १।११३।२८।

"ततः कोषं समादाय वाहनानि च भूरिशः
पाण्डुना मिथिलां गत्वा विदेहाः समरे जिताः॥")

अथ चास्य निरुक्त्यादिकं यथा,—

"गण्डकीतीरमारभ्य चम्पारण्यान्तकं शिवे!।
विदेहभूः समाख्याता तैरभुक्ताभिधः स तु॥"

इति शक्तिसङ्गमतन्त्रे ७ पटलः। तैरभुक्ता चिह्नत इति ख्याता॥ तन्नामकारणं यथा,—

"अराजकभयं नृणां मन्यमाना मरुत्तयः।
देहं ममन्थुः स्म निमेः कुमारः समजायत॥
जन्मना जनकः सोऽभूद्देहत्तु विदेहजः।
मिथिलो मथनाज्जातो मिथिला येन निर्म्मिता॥"

इति श्रीमद्भागवते ६ स्कन्धे १३ अध्यायः॥

अपि च।

"निमेः पुत्रस्तु तत्रैव मिथिर्नाम महान् स्मृतः।
प्रथमं मुनवस्तेन मथनात्तस्य पार्थतः।
निर्म्मितं स्वीयनाम्ना च मिथिलापुरमुत्तमम्॥
पुरीजननसामर्थ्यात् जनकः स च कीर्त्तितः॥"

इति भविष्यपुराणम्॥

मिथुनं, क्ली, (मेथतीति। मिथ्+"कुधिमिथिभ्यां किन्।" उणा० ३। ५५। इति उनन् किच्चावादुगुणाभावश्च।) स्त्रीपुंसयोर्युग्मम्। तत्पर्य्यायः। द्वन्द्वम् २। इत्यमरः। २। ५। ३८॥ (यथा, रामायणे। १। २। १५।

"मानिषाद! प्रतिष्ठां त्वमगमः शाश्वतीः समाः।
यत् क्रौञ्चमिथुनादेकमवधीः काममोहितम्॥")

युगलम्। इति तट्टीकायां रामाश्रमः॥ मेषादिद्वादशराश्यन्तर्गततृतीयराशिः। तत्पर्य्यायः। जितुमः २। तच्च द्विपदं ग्राम्यं समसंज्ञकम्। अस्योदयस्य स्थूलमानं षट्पलाधिकपञ्चदण्डाः। इति ज्योतिषतत्त्वम्॥ अस्याधिष्ठातृदेवता गदाधारिपुरुषः वीणाधारिस्त्री च। शब्दशिरःशीर्षाङ्गं व्रात्यसमुदायः पुनर्व्वसोऽन्त्यपादं यतेर्भवति। तत्तु श्रोणीदेशं पश्चिमदिक्स्वामिवायुप्रकृतिहरिद्वर्णं वनस्थितं शूद्रवर्णं स्निग्धं मधुरस्त्रीसङ्गे मध्यमसन्तानञ्च। तच्च जातो जनः मृगचक्षुः मिष्टभाषी क्षुद्रः वञ्चकः धर्म्मभीतः विनयभाजनञ्च भवति। इति बृहज्जातकादयः॥ अथ मिथुनलग्नजातफलम्।

"मिथुनोदयसंजातो मानी स्वजनवत्सलः।
त्यागी भोगी धनी कामी दीर्घश्मश्रोरुरमर्द्दनः॥"

इति कोष्ठीप्रदीपः॥ ५॥

रात्रौ तल्लग्ननिरूपणं यथा,—

"इन्तसंस्थभवने भृगुजातो
वस्तभे लवदन्तमध्यगे।
कोमलाङ्गि! मिथुनोदयात् प्रिये!
कालखागलकलाः प्रियेऽचलन्॥"५।६।

इति कालिदासकृतरात्रिलग्ननिरूपणम्॥

मिथ्या, य, (मथते इति। मथविलोड़ने। "मथेर्हिंसायां च।" उणा० ४।१२०। इति क्यप्। हिनस्ति वेति। मथ वा मेध+क्यप्। निपातनात् साधुः।) असत्यम्। तत्पर्य्यायः। अनृतं २। वितथः ३। अलीकम् ४। इति शब्दरत्नावली॥ मिछा इति भाषा॥ (यथा,—

"यदस्त्रासमानं तन्मिथ्या खड्गगजादिवत्।"

इति सांख्यप्रवचनभाष्यधृतम्॥

सा चाष्टलोपधी। यथा,—

"अयमेवधी मिथ्या सा सर्व्वधूर्त्तैश्च पूजिता।
यया विना जगद्भुक्तमुच्छन्नं विधिनिर्म्मितम्॥
सत्ये चादर्शने या च नेतायां रूपरूपिणी।
अर्द्धावयवरूपा च द्वापरे संवृता मिथा॥
कलौ सर्व्वप्रसक्ता च सर्व्वत्र व्यापिका बलात्।
कपटेन समं साक्षा भ्रमत्येव गृहे गृहे॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे १ अध्यायः॥

अपि च।

"अधर्म्मस्य प्रिया दम्भा मिथ्या मार्জ্জारलोचना।
तस्याः पुत्रोऽनृतीकश्च दम्भः परमकोपनः॥
स मायायां समिन्धासु लोभं पुत्रञ्च कन्यकाम्।
निर्ऋतिं जनयामास तयोः क्रोधः सुतोऽभवत्॥"

इति कल्किपुराणे १ अध्यायः॥

विषयभेदे मिथ्याभाषणे दोषाभावो यथा,—

धर्म्मिष्ठोक्तौ च।

"न धर्म्मयुक्तं वचनं हिनस्ति
न स्त्रीषु राजन्न विवाहकाले।
प्राणात्यये सर्व्वधनापहारे
पञ्चानृतान्याहुरपातकानि॥"

मिथ्याकथने दोषो यथा,—

"पृष्टास्तु साक्ष्ये प्रब्रूयुर्ये वैऽन्यथा
सन्तो मिथ्यापतिता नरेन्द्र!।
एकार्थतायान्तु समाहितायां
मिथ्या वदन्तं ह्यनृतं हिनस्ति॥"

ययातिरुवाच।

"राजा प्रमाणं भूतानां स विनश्येन्मृषा वदन्।
अर्थैश्छन्नमपि प्राप्य न मिथ्या कर्त्तुमुत्सहे॥"

इति मात्स्ये ३१ अध्यायः॥

अघासत्याभिधानप्रायश्चित्तम्। तच्च सकृदसत्यभाषणे क्षणानुस्मरणं प्रायश्चित्तम्। यथा, विष्णुपुराणम्।

"कृते पापेऽनुतापो वै यस्य पुंसः प्रजायते।
प्रायश्चित्तन्तु तस्येकं क्षणानुस्मरणं परम्॥"

अत्यन्ताभ्यासे विष्णुः। निन्दितेभ्यो धनादानं वाणिज्यं कुसीदजीवनम्। असत्यभाषणं शूद्रसेवनमित्यपाचीकरणं कृत्वा तप्तकृच्छ्रेण शुध्यति। अतिबहुतरकालाभ्यासे मनुः।

"सङ्करापात्रकृत्यासु मासं शोधनमैन्दवम्।"

चातुर्व्वर्ण्यवधे साक्ष्येऽनृतभाषणेऽनुपातकत्वाभावाच्चान्येषु प्रायश्चित्तमाह याज्ञवल्क्यः।
"वर्णिनां हि वधो यत्र तत्र साक्ष्येऽनृतं वदेत्।
तत्पावनाय निर्व्वाप्यस्तैः सारस्वतो द्विजैः॥"
शूद्रे तु विण्मूत्रः। तत्पावनाय कृष्णाखीभिर्द्विजोऽग्निं जुहुयात। शूद्रस्यैकोद्दिष्टं गोदशकस्य ग्रासं विदध्यात्। विषयविशेषेऽपवादमाह हारीतः। सोमविक्रयकन्याविवाहभयमैथुनबालकसंज्ञपनं गोब्राह्मणस्त्रीषु कुर्व्वन् मिथ्या न लिप्यत इति। तथा च यमः।
"न नर्म्मयुक्तं वचनं हिनस्ति
न स्त्रीवाक्यं न च मैथुनार्थे।
प्राणात्यये सर्व्वधनापहारे
पञ्चानृतान्याहुरपातकानि॥"
इति प्रायश्चित्तविवेकः॥

मिथ्याचारः, त्रि, (मिथ्या आचारोऽस्य।) कपटाचारः। दाम्भिक इत्यर्थः। इति वक्ष्यमाणश्लोकटीकायां श्रीधरस्वामी॥ यथा,—
"कर्म्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन्।
इन्द्रियार्थान् विमूढ़ात्मा मिथ्याचारः स उच्यते॥"
इति श्रीभगवद्गीतायां ३ अध्यायः॥

मिथ्यादृष्टिः, स्त्री, (मिथ्या च सा दृष्टिश्चेति।) कर्म्मफलापवादकज्ञानम्। तत्पर्य्यायः। नास्तिकता २। इत्यमरभरतौ। १। ५। ४॥ असत्यदर्शनञ्च॥

मिथ्याध्यवसितिः, स्त्री, (मिथ्या असत्या च सा अध्यवसितिश्चेति।) मिथ्याध्यवसायः। असत्योत्साहः। इति केचित्॥

मिथ्यानिरसनं, क्ली, (मिथ्या असत्यं निरस्यते अनेन। निर्+अस्+करणे ल्युट्।) शपथः। इत्यमरटीकायां भरतः॥

मिथ्याभियोगः, पुं, (मिथ्या असत्यमभियोगः।) मिथ्यावादः। शतं मे धारयसीत्यादि मिथ्योद्भावनम्। तत्पर्य्यायः। अभ्याख्यानम् २। इत्यमरभरतौ॥

मिथ्याभिशंसनं, क्ली, (मिथ्या असत्यस्य अभिशंसनं कथनम्।) स्वर्गस्तेयं त्वया श्रुतमित्यादि मिथ्यादूषणं वाक्यम्। तत्पर्य्यायः। अभिशापः २। इत्यमरभरतौ॥

मिथ्याभिशापः, पुं, (मिथ्या अभिशापः।) मिथ्यापवादः। यथा, भोजराजः।
"शुक्लपक्षे चतुर्थ्यान्तु सिंहे चन्द्रस्य दर्शनम्।
मिथ्योभिशापं प्रयुते न पश्येत्तत्र तं ततः॥"
इति तिथ्यादितत्त्वम्॥

मिथ्यामतिः, स्त्री, (मिथ्या चासौ मतिश्चेति।) भ्रान्तिः। इत्यमरः। १। ५। ४॥ असद्बुद्धिश्च॥

मिथ्यासाक्षी, [न्] त्रि, (मिथ्याभाषी साक्षी साक्षाद् द्रष्टा चेति।) कूटसाक्षी। तस्य ज्ञानप्रकारमाह याज्ञवल्क्यः।
"उक्तेऽपि साक्षिभिः साक्ष्येयदन्ये गुणवत्तमाः।
द्विगुणा वान्यथा ब्रूयुः कूटाः स्युः पूर्व्वसाक्षिणः॥"
मिथ्यासाक्ष्यकथने दोषमाह याज्ञवल्क्यः।
"ये पातकज्ञतां लोका महापातकिनां तथा।
अग्निदानाश्च ये लोका ये च स्त्रीबालघातिनाम्॥
एतान् सर्व्वानवाप्नोति यः साक्ष्यमनृतं वदेत्।
सुकृतं यत्त्वया किञ्चिन् जन्मान्तरशतैः कृतम्।
तत् सर्व्वं तस्य जानीहि यं पराजयसे मृषा॥"
इति मिताक्षरा॥

मिथ्योत्तरं, क्ली, (मिथ्या असत्यमुत्तरं।) चतुर्थीप्रत्यन्तर्गतोत्तरविशेषः। तस्य लक्षणम्।
"अभियुक्तोऽभियोगस्य यदि कुर्य्यादपह्नवम्।
मिथ्या तत्तु विजानीयादुत्तरं व्यवहारतः॥"
इति नारदः॥

तच्चतुर्व्विधम्। मिथ्येतत् १ अहं नाभिजानामि २ मम तत्र न सन्निधिः ३ तत्कालेऽहमजातः ४। यथा, आमनारदौ।
"मिथ्येतन्नाभिजानामि मम तत्र न सन्निधिः।
अजातश्चास्मि तत्काले इति मिथ्या चतुर्व्विधम्॥"
इति व्यवहारतत्त्वम्॥

मिद इ क स्निहि। इति कविकल्पद्रुमः॥ (चुरा०-पर०-अक०-सेट्।) इ क मिन्द्यति वर्त्तिका तैलेन। इति दुर्गादासः॥

मिद इर् य आ स्निहि इति कविकल्पद्रुमः॥ (दिवा०-पर०-अक०-सेट्।) इर अमिदत् अमेदीत्। य इति श्यायामशीलोऽसौ महाकायो न मेद्यतीति हलायुधः। आ मेदितं भिन्नं तेन। इति दुर्गादासः॥

मिद क्र आ वधमेधयोः। इति कविकल्पद्रुमः॥ (भ्वा०-उभ०-सक०-सेट्।) क्र अमिमेदत्। आ मेदति मेदते शास्त्रार्थे शिष्यो धारयतीत्यर्थः। मिमिदुः मिमेदुः। इति दुर्गादासः॥

मिद, ल आ भि ड स्निहि। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) ल अमिदत। भि भिन्नोऽस्ति। ड मेदते। इति दुर्गादासः॥

मिद, क स्निहि। इति कविकल्पद्रुमः॥ (चुरा०-पर०-अक०-सेट्।) क मेदयति वर्त्तिका तैलेन। इति दुर्गादासः॥

मिन्मिनः, त्रि, सानुनासिकवाग्विशिष्टः। खोना इति भाषा। तस्य निदानं यथा,—
"आश्रित्य वायुः सकफौ धमनीः शब्दवाहिनीः।
नरान् करोत्यक्रियकान् मूकमिन्मिनगद्गदान्॥"
इति माधवकरः॥

अक्रियकान् इलचावचनानिति च पाठः। अवचनान् अत्यल्पवर्णे नञ्। तेन ईषद्वचनान्। स एव वायुः प्रबलश्चेत्तदा मूकान् अवचनान्। मिन्मिनान् सानुनासिकान्। गद्गदान् स्खलितपदवञ्चनाभिधाविनः करोतीत्यन्वयः। एषां समानकारणत्वेऽपि दुष्टरुत्कर्षादिना अदृष्टवशाद्वा भेदो बोद्धव्यः॥*॥ अथ तेषां चिकित्सा।
"प्रस्थं घृतस्य पलिकैः शिग्रुवचालवणधानकोलैः।
आजे पयसि विपक्वं सिद्धं सारस्वतं नाम्ना॥
विधिवदुपयुज्यमानं जड़गद्गदमूकतां क्षणात् क्षित्वा।
स्मृतिमतिमेधाप्रतिभाः कुर्य्यात् संस्पष्टवाग्भवति॥
सारस्वतं घृतम्।
"सहरिद्रा वचा कुष्ठं पिप्पली विश्वभेषजम्।
अजाजी चाजमोदा च यष्टीमधुकसैन्धवम्॥
एतानि समभागानि सूक्ष्मचूर्णानि कारयेत्।
तच्चूर्णं सर्पिषालोड्य प्रत्यहं भक्षयेन्नरः॥
एकविंशतिरात्रेण भवेच्छ्रुतिधरो नरः।
मेधदुन्दुभिनिर्घोषो मत्तकोकिलनिस्वनः॥"
इति भावप्रकाशस्य द्वितीये भागे मध्यखण्डे वातव्याध्यधिकारे॥

मिल, श्लृ अ श्लिषि। इति कविकल्पद्रुमः॥ (तुदा०-उभ०-अक०-सेट्।) श्लिषि सम्बन्धीभावे। श्लृ अ मिलति मिलते लता वृक्षेण। अय कुटादिरिति कुलचन्द्रः। तेन बालनिलयमिलनेन गरलमिव कलयति मलयसमीरम्। इति जयदेवः। मिलिष्यन्ति।
"महापातकिनः पञ्च मिलितव्यं न तैः सह।"
इति दुर्गादासः॥

मिलित, त्रि, मिलधातोः कर्त्तरि क्तप्रत्ययेन निष्पन्नः। श्लिष्टः। सम्बन्धविशिष्टः। युक्तः। (यथा, देवीभागवते। १। ११। ८०।
"पुनर्विवादः सञ्जातो मिलिता देवदानवाः।
युद्धार्थमागतास्तेषां समाजः समजायत॥")

मिव, इ सेके। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) इ मिम्वति। इति दुर्गादासः॥

मिश, श्वनौ। क्रीपे। इति कविकल्पद्रुमः॥ (भ्वा०-पर० अक०-सेट्।) मेशति। इति दुर्गादासः॥

मिशिः, स्त्री, (मिश+इन्।) मधुरिका। शतपुष्पा। इत्यमरटीकायां भरतः॥ जटामांसी। इति शब्दरत्नावली॥

मिशी, स्त्री, (मिशि+कृदिकारादिति पक्षे ङीष्।) जटामांसी। इति शब्दरत्नावली॥ मधुरिका। इत्यमरटीकायां भरतः॥

मिश्र, तृ क युत्याम्। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) तालव्यमध्योऽयम्। दन्त्यमध्य इति वर्णदेशनायाम्। युतिः संयोजनम्। मिश्रयति मिश्रापयति घृतेनान्नं लोकः। इति दुर्गादासः॥

मिश्र, क्ली, (मिश्र+बाहुलकात् रक्।) चायक्कन्नलकम्। इति राजनिर्घण्टः॥ मिश्रितम्। यथा,—
"केचिदाहुः क्वचिद्देशे यावत्तु दिननाड़िकाः।
तावदेव त्वनध्यायो न तस्मिन्नहि दिनान्तरे॥"
इति तिथ्यादितत्त्वम्॥

मिश्रः, पुं, (मिश्र + वाहुलकात् रक् ।) गजजाति-विशेषः । यथा, —
"भद्रो मन्द्रो मृगो मिश्रश्चतसो गजजातयः ।"
इति हेमचन्द्रः । ४ । २८४ ॥
श्रेष्ठः । यथा । गौरविनाम्न्यार्य्यमिश्राः । इति भूरिप्रयोगः ॥ संयुक्ते, त्रि । यथा,—
"करम्बः कवरो मिश्रः संपृक्तः खचितः समाः ।"
इति हेमचन्द्रः । ६ । १०५ ॥
उग्रादिसप्तभगणान्तर्गतसप्तमगणः । स तु क्षत्तिका विप्राख्याभ्यां भवति । इति ज्योतिषतत्त्वम् ॥

मिश्रकं, क्ली, (मिश्र + कन् ।) देवोद्यानम् । इति जटाधरः ॥ औषधलवणम् । इति राजनिर्घण्टः ॥ (मिश्र + ण्वुल् । त्रि, मिश्रणकर्त्ता । यथा, मनौ । ११ । ५० ।
"पिशुनः पौतिनासिक्यं सूचकः प्रतिवक्तृताम् ।
धान्यचौरोऽङ्गहीनत्वमतिरेक्यन्तु मिश्रकः ।"
तीर्थभेदः । यथा, महाभारते । ३ । ८३ । ८२ ।
"ततो गच्छेत धर्म्मज्ञ ! मिश्रकं लोकविश्रुतम् ।
तत्र तीर्थानि राजेन्द्र ! मिश्रितानि महात्मना ॥")

मिश्रकवर्गः, क्ली, (मिश्रकाणां वनम् । "वनगिर्य्योः संज्ञायां कोटरकिंशुलकादीनाम् ।" ६ । ३ । ११७ । अकारस्याकारः "वनं पुरगामिश्रकासिध्रकाशारिकाकोटराग्रेभ्यः ।" ८ । ४ । ४ । इति णत्वम् ।) इन्द्रस्योद्यानम् । यथा,—
"नन्दनं कन्दसारं स्यान्मिश्रकावर्गमित्यपि ।"
इति त्रिकाण्डशेषः ॥

मिश्रजः, पुं, (मिश्रात् भिन्नजातीययोः सम्मेलनात् जात इति । जन + डः ।) खेसरः । इति राजनिर्घण्टः ॥

मिश्रणं, क्ली, मिश्रधातोर्भावेऽनट् (ल्युट्) प्रत्ययेन निष्पन्नम् । संयोजनम् । एकत्रीकरणम् । (यथा, प्रबोधचन्द्रोदये । २ । ५ ।
"तद्देवांघ्रिश्रवणमपि गुरुनरदुरितोदयाय ॥")

मिश्रपुष्पा, स्त्री, (मिश्राणि परस्परं संश्लिष्टानि पुष्पाण्यस्याः ।) मेषिका । इति राजनिर्घण्टः ॥

मिश्रवर्णं, क्ली, (मिश्रः मिलितः वर्णोऽस्य ।) कृष्णागुरु । इति राजनिर्घण्टः ॥ नानावर्णयुक्ते, त्रि ॥

मिश्रवर्णफला, स्त्री, (मिश्रवर्णं फलमस्याः ।) वार्त्ताकी । इति राजनिर्घण्टः ॥

मिश्रशब्दः, पुं, (मिश्रः मिलितः अश्वरासभयोरिव शब्दोऽस्य ।) खेसरः । इति राजनिर्घण्टः ॥

मिश्रितं, त्रि, (मिश्रः श्रेष्ठत्वमस्य संजातम् । मिश्र + इतच् । यद्वा, मिश्र + क्तः ।) गौरवितम् । इति जटाधरः ॥ मिलितञ्च ॥

मिश्रिता, स्त्री, (मिश्रित + टाप् ।) मन्दादिसप्तधासंक्रान्त्यन्तर्गतसंक्रान्तिविशेषः । यथा,
"मन्दा भूमेषु विज्ञेया रुद्रा मन्दाकिनी तथा ।
त्रिप्रे ध्वाङ्क्षे विचानीयाद्युग्रे घोरा प्रकीर्त्तिता ॥
चरेमन्दोदरा ज्ञेया क्रूरेऽर्द्धक्षेषु राचसी ।
मिश्रिता चैव विज्ञेया मिश्रितर्क्षेषु संक्रमे ॥"
इति तिथ्यादितत्त्वम् ॥

मिश्रेया, स्त्री, मधुरिका । इत्यमरः । २ । ४ । १०५ ॥ मौरि इति भाषा ।
"मिश्रेया सुरसा पेया लषाहा स्कन्दवन्दना ।"
इति शब्दचन्द्रिका च ॥ शाकविशेषः । शतपुष्पा । शुलफा इति भाषा । तत्पर्य्यायः । ताक्षपर्णी २ तालपर्णी ३ मिषिः ४ शालेया ५ शीतशिवा ६ शालीना ७ वनजा ८ अवाक्पुष्पी ९ मधुरिका १० क्षुद्रा ११ संहितपुष्पिका १२ सुपुष्पा १३ सुरसा १४ वल्या १५ । अस्या गुणाः । मधुरत्वम् । स्निग्धत्वम् । कटुत्वम् । परमकफहरत्वम् । वातपित्तोत्थदोषघ्नीहजन्तुविनाशित्वञ्च । इति राजनिर्घण्टः । तत्पर्य्यायगुणाः ।
"शतपुष्पा शताङ्गा च मधुरा कारवी मिषिः ।
अतिक्षुद्रा सितक्षुद्रा संहितक्षुद्रिकापि च ॥
क्षुद्रा शालेयशालिन्यौ मिश्रेया मधुरा मिषिः ।
शतपुष्पा लघुस्तीक्ष्णा पित्तकृद्दीपनी कटुः ॥
उष्णा ज्वरानिलश्वासव्रणशूलाक्षिरोगहृत् ।
मिश्रेया तद्गुणा प्रोक्ता विशेषाद्योनिशूलनुत् ॥
अग्निमान्द्यहरी क्षुद्रा वह्निविट्कृमिशूलहृत् ।
रूक्षोष्णा वातनी कासवमिश्लेष्मानिलान् हरेत् ॥"
इति भावप्रकाशः ॥

मिष उ सेचने । इति कविकल्पद्रुमः ॥ (भ्वा० पर० सक० सेट् ।) उ मेषित्वा मिष्ट्वा । इति दुर्गादासः ॥

मिष ग्र स्पर्द्धे । इति कविकल्पद्रुमः ॥ (तुदा० पर० सक० सेट् ।) स्पर्द्धः पराभिभवेच्छा । इति बोपदेवः ॥ ग्र मिषति बली बलवन्तम् । इति दुर्गादासः ॥

मिषं, क्ली, (मिष् + कः ।) छलम् । इति मेदिनी । षे, २१ ॥ (यथा, नैषधे । २ । ११८ ।
"प्रियासु बालासु रतोत्तमासु च
द्विपत्तितं पक्षपितच्च विभ्रतम् ।
स्मरार्जितं रागमहीरुहाङ्कुरं
मिषेण चक्षुश्चरणद्वयस्य च ॥")

मिषः, पुं, (मिष् + कः ।) स्पर्द्धनम् । इति मेदिनी । षे, २१ ॥ (यथा, कथासरित्सागरे । ६४ । १२५ ।
"इति ध्यायन् मिषं कृत्वा तदैवास्फुटया गिरा ।
निर्गत्यैव विरक्तात्मा धनदेवान्तिकं ययौ ॥")

मिषिः स्त्री, (मिष् + इन् ।) जटामांसी । इति शब्दरत्नावली ॥ मधुरिका । इति शब्दचन्द्रिका ॥ (यथास्य पर्य्यायः ।
"अवाक्पुष्पी च क्षुद्रा स्यान्मङ्गल्या मधुरा मिषिः ।"
इति वैद्यकरत्नमालायाम् ॥)
शतपुष्पा । इत्यमरटीकायां भरतः ॥

मिषिका, स्त्री, (मिषि + कन् + टाप् ।) जटामांसी । इति शब्दरत्नावली ॥

मिष्टं, त्रि, सिक्तम् । स्पर्द्धितम् । इति मिष्धातोः क्तप्रत्ययेन निष्पन्नम् ॥

मिष्टः, पुं, (मिष् + क्तः ।) मधुररसः । यथा,
"मिष्टः कटुश्च मधुरमम्लोऽम्लं पच्यते रसः ।
कटुतिक्तकषायाणां पाकः स्यात् प्रायशः कटुः ॥"
इति भावप्रकाशः ॥
"नूतनसर्षपशाकं नवौदनं पिच्छिलानि च दधीनि ।
अल्पव्ययेन सुन्दरि ! ग्राम्यजनो मिष्टमश्नाति ॥"
इति छन्दोमञ्जरी च ॥

मिष्टपाकः, पुं, (मिष्टेन पाको यस्य ।) शर्करारसपक्वकलादिः । मोरब्बा इति पारस्यभाषा ॥ तदेकप्रकारो यथा । अपक्वाम्रं द्विखण्डं कृत्वा तन्नाले शलाकया छिद्रजालकरणानन्तरं चूर्णमिश्रितजले दण्डचतुष्टयं स्थापयित्वा जलेन धौतं कुर्य्यात् । ततो जलेन सिक्तं कृत्वा जलत्यागपूर्व्वकमेकतारवद्धशर्करारसे मग्नकरणानन्तरं तापं दद्यात् । रसे घनीभूते अर्द्धदण्डं यावत् तापेन निष्पन्नो भविष्यति । इति पाकराजेश्वरः ॥

मिष्टान्नं, क्ली, (मिष्टमन्नम् ।) मधुरद्रव्यम् । इति हलायुधः ॥ अपि च ।
"मिष्टान्नपानदानाद्यैः सततं श्रद्धयान्वितः ।
देवपूजापरो नित्यं न प्रेतो जायते क्वचित् ॥"
इत्यग्निपुराणम् ॥

मिसिः, स्त्री, (मस्यति परिणमतीति + इन् वाहुलकादत इकारः । पक्षे ङीष् ।) मधुरिका । (यथास्य पर्य्यायः ।
"मिसिर्मधुरिका मता ।"
इति गारुडे । २०८ अः ॥) जटामांसी । शतपुष्पा । इत्यमरभरतौ ॥ (शतपुष्पार्थे पर्य्यायो यथा,—
"शतपुष्पा शताङ्गा च मधुरा कारवी मिसिः ।
अतिलम्बी सितक्षुद्रा संहितक्षुद्रिकापि च ॥
क्षुद्रा शालेयशालिन्यौ मिश्रेया मधुरा मिषिः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
उशीरं । इति राजनिर्घण्टः ॥ अजमोदा । इति मेदिनी । से, ८ ॥

मिस्त् क्षेपणे । इति कविकल्पद्रुमः ॥ (चुरा० पर० सक० सेट् ।) तालव्यमध्योऽयम् । दन्त्यमध्य इति वर्णदेशनायाम् । युतिः संयोजनम् । मिस्त्रयति मिस्रापयति घृतेनान्नं लोकः । इति दुर्गादासः ॥

मिह औ सेचने । इति कविकल्पद्रुमः ॥ (भ्वा० पर० सक० अनिट् ।) औ अमिक्षत् । इति दुर्गादासः ॥

मिह्निका, स्त्री, (मेहति क्षिपतीति । मिह + संज्ञायां कुन् टाप् अत इत्वम् ।) नीहारः । इति शब्दरत्नावली ॥ (यथा, नैषधे । १६ । ३५ ।
"विशति युवतित्यागे रात्रीमुषं मिह्निकारुन्तम् ।
दिनमणिमणिं तापे चित्तात्रिजाच वियासति ॥")

मीढ्वान्

मिहिरः, पुं, (मेहयति सेचयति मेघजलेन भूमिमिति। मिह+"इषिमदिसुदिक्षिदिक्षिदिभिदिमन्दिचन्दितिमिमिर्हीति।" उणा० १। ५२। इति किरच्।) सूर्य्यः। (यथा, मार्कण्डेये। १०७।७।

"भव तिमिरासवपानमदात्
भवति विलोहितविग्रहात्।
मिहिर! विभासि यतः सुनरां
त्रिभुवनभावनभानिकरैः॥")

अर्कवृक्षः। इत्यमरः। १। ३। २६॥ वृद्धः। इति मेदिनीशब्दरत्नावल्यौ। रे, २०४॥ मेघः। इति हेमचन्द्रः। २। ११॥ वायुः। चन्द्रः। इति नानार्थरत्नमाला॥ विक्रमादित्यभूपस्य नवरत्नान्तर्गतरत्नविशेषः। यथा,—

"धन्वन्तरिक्षपणकामरसिंहशङ्कु-
वेतालभट्टघटकर्परकालिदासाः।
ख्यातो वराहमिहिरो नृपतेः सभायां
रत्नानि वै वररुचिर्नव विक्रमस्य॥"

इति नवरत्नम्॥

मिहिराणः, पुं, (मिहिरेणाप्यायतेस्त्यत इति। अण्+घञ्।) शिवः। इति त्रिकाण्डशेषः॥

मी ओ ग ष वधे। इति कविकल्पद्रुमः॥ (क्रा०-उभ०-सक०-सेट्।) ओ मीनः। ग ष मीनाति मीनीते। इति दुर्गादासः॥

मी कि गत्याम्। मत्याम्। इति कविकल्पद्रुमः॥ (चुरा०-पक्षे भ्वा० सक०-अनिट्।) कि माययति मयति। इति दुर्गादासः॥

मी ड य वधे। इति कविकल्पद्रुमः॥ (दिवा०-आत्म०-सक०-अनिट्।) ड य मीयते। इति दुर्गादासः॥

मीढ़, त्रि, सूचितम्। इत्यमरः। ३। १। ६६॥ दे क्तसूत्रोत्सर्गे। मिहौ सिचि सूचतु क प्रत्यये आभ्यां धात्वर्थनोपसंग्रहादकर्म्मत्वात् कर्त्तरि क्तः। इति भरतः॥

मीढ़ष्टमः, पुं, (मीढुस् तमप्प्रत्ययेन पृषोदरादित्वात् साधुः।) शिवः। यथा,—

"तदा सर्व्वाणि भूतानि! श्रुत्वा मीढ़ष्टमोदितम्।
परितुष्टात्मभिस्तात साधु साध्वित्यथाब्रुवन्॥"

इति श्रीमद्भागवते ४ स्कन्धे ६ अध्यायः॥

"मीढ़ष्टमः शिवस्तेनोक्तम्।" इति तट्टीकायां श्रीधरस्वामी॥

मीढ्वान्, [स्] पुं, (मिह सेचने। "दाम्नीशसयुयुजस्तुतुदसिसिचमिहपतदशनहः करणे वन्।" ६। १। १२। इति छन्दसि क्वसुः। द्वित्वाभावः अनिट्त्वं उपधादीर्घत्वं धत्वञ्च निपात्यते।) शिवः। यथा,—

"ततो मीढ्वांसमामन्त्र्य सुनासीरः सहर्षिभिः।
भूयस्तद्दैवयजनं समीढ्वदेधसो ययुः॥"

इति श्रीमद्भागवते ४ स्कन्धे ६ अध्यायः॥

"मीढ्वांसं शिवं मीढुषा वेधसा च वर्त्तमानाः।" इति तट्टीकायां श्रीधरस्वामी॥ (वर्षितरि, त्रि। यथा, ऋग्वेदे। २। २४। १।

"यथा नो मीढ्वान् स्तवते सखा तव दृषस्वते।"

"मीढ्वान् सेक्ता स्तुतेर्वर्षिता।" इति तद्भाष्ये सायणः॥)

मीनः, पुं, (मीयते इति मीञ् हिंसायाम्। "फेनमीनौ।" उणा० ३।३। इति नक् निपातितश्च।) मत्स्यः। इत्यमरः। १। १०। १७॥ (यथा, भागवते। ३। २। ८।

"दुर्भगो बत लोकोऽयं यदवो नितरामपि।
ये संवसन्तो न विदुर्हरिं मीन इवोडुपम्॥")

मेषादिद्वादशराश्यन्तर्गतान्तिमराशिः। तत्पर्य्यायः। चन्त्यभम् २। स च पूर्ब्बभाद्रपदापादोत्तरभाद्रपदारेवतीसमुदायेन भवति। अस्याधिष्ठातृदेवता स्त्रीमत्स्यद्वयं स च कीटमंत्रः। जलजः। सौम्यः। अङ्गना। युग्मः। समः। द्व्यात्मकः। भक्ष्यः। उत्तरदिङ्नाथः। गुरुक्षेत्रम्। दिनात्मकश्च। इति ज्योतिस्तत्त्वम्॥ अपि च। शीर्षपृष्ठोदयः। चरणरहितः। कफपक्षतिः। जलचारी। निःशब्दः। पिङ्गलवर्णः। स्निग्धः। अत्यन्तस्त्रीसङ्गः। बहुसन्तानः। ब्राह्मणवर्णः। ऋषाङ्गश्च। तत्र जातः अतिक्रोधनः। शीघ्रगतिः। अशुचिः। कर्म्मभोगी। प्रचुरविवाहश्च भवति। इति बृहज्जातकादयः॥ अपि च।

"मीनलग्ने समुत्पन्नो रत्नकाञ्चनपूरितः।
अल्परोमा महाप्राज्ञो दीर्घकालपरीक्षकः॥"

इति कोष्ठीप्रदीपः॥ * ॥

रात्रौ तल्लग्ननिरूपणं यथा। सूर्पाकारतारात्रितुष्टयात्मकपूर्ब्बाषाढानक्षत्रे मस्तकोपरि दृष्टे सति मीनलग्नस्य १। ४६ ऊनपञ्चाशत्पलाधिकैकदण्डो भवति। प्रकारान्तरे। सूर्पाकृतितारात्रितुष्टयात्मकोत्तराषाढानक्षत्रे मस्तकोपरि उदिते सति मीनलग्नस्य २। ३६ षट्त्रिंशत्पलाधिकदण्डद्वयं भवति। यथा,—

"सूर्पमूर्त्तिनि शिरोगते
चतुस्तारके करिकरोरुवारिमे।
अन्त्यभादमलतारणि! निर्गताः
खेचराम्बरशशाङ्कलिप्तिकाः॥ ६ १।४६।
शीर्षभाजिभचतुष्टयाङ्किते
विश्वभे तरणि सूर्पकाकृतौ।
भूतिरस्कृतमनोजकार्मुके!
यान्ति कालतिथिलिप्तिका भवात्॥"

६ २। ३६॥

इति कालिदासकृतराशिलग्ननिरूपणम्॥ *॥

भगवद्शावतारान्तर्गतप्रथमावतारः। यथा,

"शेते स चित्तशयने मम मीन कूर्म्म-
कोलोऽभवन् नृहरिवामनजामदग्न्याः।
योऽभूद्भुवं भरताग्रजकृष्णबुद्धः
कल्कौ सताञ्च भविता ग्रहरिष्यतेऽरीन्॥"

इति मुग्धबोधव्याकरणम्॥

अस्य विवरणं मत्स्यशब्दे द्रष्टव्यम्॥ * ॥

विशेषस्तत्र कथ्यते।

"प्रकृतिर्विष्णुरूपा च पुंरूपश्च महेश्वरः।
एवं प्रकृतिभेदेन भेदास्तु प्रकृतेर्दश॥

कृष्णरूपा कालिका स्याद्रामरूपा च नारिणी।
वगला कूर्म्ममूर्त्तिः स्यान्मीनो धूमावती भवेत्॥
छिन्नमस्ता नृसिंहः स्याद्वराहश्चैव भैरवी।
सुन्दरी वामदम्भः स्याद्वामनो भुवनेश्वरी॥
कमला बौद्धरूपा स्यात् मातङ्गी कल्किरूपिणी।
स्वयं भगवती काली कृष्णस्तु भगवान् स्वयम्॥
स्वयञ्च भगवान् कृष्णः कालीरूपो भवेद्ध्रुवं।"
दुर्गा स्यात् कल्किरूपिणीति पाठान्तरम्।

इति मुण्डमालातन्त्रम्॥

मीनकेतनः, पुं, (मीनः केतने यस्य।) कन्दर्पः। इत्यमरः। १। १। २६॥ (यथा, दशकुमारचरिते। ५।

"अथ मीनकेतनसेनानायकेन।"

मीनगोधिका, स्त्री, (मीनगोधिकानामावासोऽच।) जलाशयः। यथा,—

'पल्वलं दीर्घिका वापी यष्टिका मीनगोधिका।'

इति त्रिकाण्डशेषः॥

मीनघाती, [न्] पुं, (मीनं हन्तीति। हन+णिनिः।) बकः। इति राजनिर्घण्टः॥ मत्स्यघातके, त्रि॥

मीननेत्रा, स्त्री, (मीनस्य नेत्राकारा ग्रन्थिरस्याः।) गण्डदूर्ब्बा। इति राजनिर्घण्टः॥

मीनरः, पुं, (मीनाः भक्ष्यत्वेन सन्त्यस्य। मीन+"वुञ् छण्कठजिलेति।" ४। २। ८०। इति अश्मादित्वात् रः।) हारकः। इति त्रिकाण्डशेषः॥ हाङ्गर इति भाषा॥

मीनरङ्गः, पुं, (मीनरङ्ग। पृषोदरादित्वात् साधुः।) मत्स्याशनपक्षी। इति त्रिकाण्डशेषः। माङ्गराङ्गा इति भाषा॥ क्वचित् पुस्तके मत्स्यरङ्ग इत्यपि पाठः॥

मीना, स्त्री, उषाकन्या। सा तु कश्यपभार्य्या। यथा, वह्निपुराणे।

"उषायास्तु प्रवक्ष्यामि सर्गं पञ्च सुतास्ततः।
मीना मेना तथा दृष्टा अदृष्टा तथैव च॥
परिदृष्टा च विज्ञेया तासाञ्च शृणुत प्रजाः।"

मीनाक्षी, स्त्री, शर्करा। इति राजनिर्घण्टः॥ (विशेषोऽस्याः शर्करा शब्दे विधेयः॥)

मीनाक्षीशः, पुं, दर्दुराम्बः। खञ्जनः। इति मेदिनी। शे, १०५॥

मीनालयः, पुं, (मीनानामालयः।) समुद्रः। इति धनञ्जयः॥

मीनाक्षी, स्त्री, (मीनस्याक्षिणी इव अक्षिणी अस्याः।) मत्स्याक्षी। गण्डदूर्ब्बा। इति राजनिर्घण्टः॥ कुबेरकन्या। इति पुराणम्॥

मीम ऋ शब्दे गतौ। इति कविकल्पद्रुमः॥ (भ्वा०-शब्दे अक०-गतौ सक० पर०-सेट्।) ऋ अमिमीमत्। इति दुर्गादासः॥

मीमांसकः, पुं, (मीमांसामधीते वेद वेति। मीमांसा+"क्रमादिभ्यो वुन्।" ४। २। ६१। इति वुन्।) मीमांसाशास्त्रवेत्ता। तत्पर्य्यायः। सिद्धान्ती २। इति जटाधरः॥ मीमांसाशास्त्राध्येता च। (विषयोऽस्य यथा,—

"द्वयवं तमसोऽपि प्रोमनधियां मीमांसकानां मतम्।"
छायायाकृमसचापि सम्बन्धातगुणकर्म्मणोः।
द्वयवं केचिदिच्छन्ति मीमांसकमनाश्रयाः॥"
इति वैद्यकराजवल्लभशतवादार्थैर्दर्पणे प्रथमश्लोके॥)

पूर्व्वमीमांसासूत्रकर्त्ता जैमिनिः। वृत्तिकर्त्ता कुमारिलभट्टः। भाष्यकर्त्ता प्रभाकरस्वामी। प्रभाकरः कुमारिलभट्टस्य छात्रः। स एव गुरुत्वेन भण्यते। तन्मतं गुरुमतम् तच्छिष्याः प्राभाकराः। अतएव सार्त्तभट्टाचार्य्येण प्राभाकरैरभिहितमित्युक्तम्। उत्तरमीमांसासूत्रकर्त्ता वेदव्यासः। तस्य भाष्यकर्त्ता शङ्कराचार्य्यः। स च अद्वैतवादी। रामानुजः विशिष्टाद्वैतवादी। माध्वः द्वैतवादी च॥ (यथा, भक्तिरसान्तसिन्धौ। १। १। ३।

"मीमांसको वदत्यग्नेः कटिनामपि
क्रतुक्रयन्नसो लिङ्गम्।")

मीमांसा, स्त्री, (मानविचारे+"मानु वधटानु भ्राजिभ्यो दीर्घश्चाभ्यासस्य।"३।१।६। इति भन्। ङीः टाप्। अभ्यासस्येकारस्य दीर्घश्च।; वेदार्थनान्तर्गतदर्शनशास्त्रविशेषः। तत्पर्य्यायः। विचारणा २। इति हेमचन्द्रः।२।१६५॥ अस्या अध्याया विंशतिः। तत्र पूर्व्वमीमांसा द्वादशाध्यायात्मिका जैमिनिप्रणीता यज्ञादिकर्म्मकाण्डनिरूपिका। अस्या अन्तर्गतानि लोकव्यवहारनियमार्थं मनुयाज्ञवल्क्यादिभिः बहूनि धर्म्मशास्त्राणि कृतानि। तत्रोत्तरमीमांसा चतुरध्यायात्मिका वेदव्यासप्रणीता ब्रह्मनिरूपिका। अस्या नाम वेदान्तः। अपराध्यायचतुष्टयं सङ्कर्षणप्रणीतं उपासनाकाण्डं षड्दर्शनबहिर्भूतम्॥ * ॥ प्रमाणादयः प्रसङ्गात्ता द्वादश पदार्थाः क्रमात् द्वादशानामध्यायानां विषयाः। प्रथमेऽध्याये विध्यर्थवादादिरूपं धर्म्मे प्रमाणं निरूपितम्। १। द्वितीये यागदानादिकर्म्मभेदः। २। तृतीये प्रयाजादीनां दर्शपूर्णमासार्थकत्वेन तच्छेषत्वम्। ३। चतुर्थे गोदोहनस्य पुरुषार्थत्वप्रयुक्ता अनुष्ठानं न तु क्रत्वर्थत्वप्रयुक्तेत्येवमादयः। ४। पञ्चमे क्रमनियतविधेयत्वादयः। ५। षष्ठे कर्त्तुरधिकारो नान्यादेरित्यादयः। ६। सप्तमे समानमितरच्छेषेण इत्यादि प्रत्यक्षवचनेनाग्निहोत्रादिनान्यानुमितवचनेन च सामान्यतोऽतिदेशः। ७। अष्टमे सौर्य्यं चरुं निर्व्वपेदित्यत्र निर्व्वापसंज्ञितेन देवतानिर्देशः एकदेवतात्वमौषधद्रव्यकत्वमित्यादिना लिङ्गेनाग्नेयपुरोडाशेतिकर्त्तव्यतानान्यत्वेत्येवमादिविशेषातिदेशः। ८। नवमे प्रकृतावमये युष्टं निर्व्वपामीति पठिते मन्त्रे विकृतौ सौर्य्यचरावग्निपदपरित्यागेन सूर्य्यपदप्रक्षेपेण सूर्य्याय युष्टं निर्व्वपामीत्येवमादिरूहः। ९। दशमे क्षण्वेषु चोदकप्राप्तस्यावघातस्य वितुषीकरणासम्भवेन लोप इत्येवमादिबाधः। १०। एकादशे बहूनामाग्नेयादीनां प्रधानानां सकृदनुष्ठितेन प्रयाजाद्यङ्गेनोपकार इत्यादि तन्त्रम्। ११। द्वादशे प्रधानस्य पशोरुपकाराय अनुष्ठितेन प्रयाजाद्यङ्गेन पश्वङ्गपुरोडाशेऽप्युपकार इत्यादिप्रसङ्गः। १२॥ (एतदध्यायप्रतिपाद्यार्थानां विवरणं यथा,—

'प्रथमाध्यायस्य प्रथमे पादे विधिरूपं मानमीरितम्। द्वितीयेऽर्थवादरूपम् अर्थवादो मन्त्रस्याप्युपलक्षकः। तृतीये स्तुतिरूपम्। स्तुतिराचारमप्युपलक्षयति। चतुर्थे उद्भिच्चितादिनामरूपम्। द्वितीयाध्यायस्य प्रथमे पादे आख्यातमेवापूर्व्वबोधकम्। अपूर्व्वसद्भाव इत्यादिकः कर्म्मभेदचिन्तोपयुक्त उपोद्घातो वर्णितः। द्वितीये धातुभेदपुनरुक्त्यादिभिः कर्म्मभेदः। तृतीये रथन्तरादीनां कर्म्मभेदप्रामाण्यापवादः। चतुर्थे नित्यकाम्ययोः प्रयोगयोर्भेदः।

तृतीयाध्यायस्य प्रथमे पादे शेषत्वबोधकानां श्रुतिलिङ्गादीनां मध्ये श्रुतिर्विचारिता। द्वितीये लिङ्गम्। तृतीये वाक्यप्रकरणादि। चतुर्थे निवीतोपवीतादित्वर्थवादत्वविधित्वादिनिर्णयहेतुः श्रुत्यादेः परस्परविरोधसदसद्भावः। पञ्चमे प्रतिपत्तिकर्म्माणि। षष्ठेऽनारभ्याधीतानि। सप्तमे बहुप्रधानोपकारकप्रयाजादीनि। अष्टमे याजमानानि।

चतुर्थाध्यायस्य प्रथमे पादे प्रधानभूतामिक्षादध्यानयनस्य प्रयोजिकेत्यादि प्रधानप्रयोक्तृत्वं विचारितम्। द्वितीये त्वप्रधानं वत्साप्करणं शाखाच्छेदे प्रयोजकमित्याद्यप्रधानप्रयोक्तृत्वम्। तृतीये क्रुङ्नपर्णमयीत्वादेरपापश्लोकत्वादिफलभावाभावचिन्ता। चतुर्थे राजसूयगतजघन्याङ्गाचमूतादिचिन्ता।

पञ्चमाध्यायस्य प्रथमे पादे श्रुत्यर्थपाठादिभिः क्रमो निरूपितः। द्वितीये वाजपेयगतेषु सप्तदशसु पशुष्वेकैकधर्म्मसमापनमित्यादिक्रमविशेषः। तृतीये पञ्चप्रयाजादीनामावर्त्तनेनैकादशमित्यादिवृद्धिः। अदस्यग्रहचिच्छिष्योरनाकृत्तिरित्यादि वृद्ध्याभावः। चतुर्थे क्रमनियामकानां श्रुत्यर्थपाठादीनां प्रबलदुर्ब्बलभावः।

षष्ठाध्यायस्य प्रथमे पादे कर्म्माधिकारः। कर्त्तुरस्त्यर्थादेर्नास्ति स्त्रिया अस्ति। योऽस्ति स च गत्या सहैवमादिनाधिकारी निरूपितः। द्वितीये सत्राधिकारिणां प्रत्येकं कृत्स्नं फलम्। दर्शपौर्णमासयोः कर्त्रैक्यनियमः काम्यकर्म्मसमापनीयमित्येवमादयोऽधिकारिधर्म्मा उक्ताः। तृतीये द्रव्यस्य प्रतिनिधिरुक्तः। दैवादीनामग्न्यादीनामधिकारित्वाच्च स नास्तीत्यादिनिरूपणम्। चतुर्थे पदार्थलोपनं विचारितम्। अवत्तनाग्नौ सत्याज्येन यजेत्। इड़ाद्यर्थनाशे सति शेषान्नग्राह्यमित्यादिकम्। पञ्चमे कालापराधेन चन्द्रोदये सत्यभ्युदयेष्टेः प्रायश्चित्तम्। ज्योतिष्टोमस्थैकादशोदीक्षाः। द्वादशाहस्य द्वादशदीक्षा इत्यादि निरूपितम्। षष्ठे सत्राधिकारिणस्तुल्यकल्पा एव सर्व्वे विप्रस्येवेत्येवमादिकं चिन्तितम्। सप्तमे पित्रादिकं न देयम्। महाभूमिर्न देयेत्येवमादिदेयविचारः। अष्टमे लौकिकाग्नावुपनयनहोमः। स्थपतीष्टिस्तथैवेत्येवमाद्यग्निविचारः कृतः।

सप्तमाध्यायस्य प्रथमे पादे समानमितरच्छेषेणेत्यादिप्रत्यक्षवचनानातिदेशः। द्वितीये पूर्व्वोक्तातिदेशस्य शेषः विचारितः। तृतीयेऽग्निहोत्रनाम्नातिदेशः। चतुर्थे निर्व्वापौषधद्रव्यादिलिङ्गातिदेशः।

अष्टमाध्यायस्य प्रथमे पादे स्वष्टेन लिङ्गेनातिदेशविशेषः। तद्यथा सौर्य्यचरावतिदेशकानि निर्व्वापसंज्ञितेन देवतानिर्द्देश एकदेवतात्वमौषधद्रव्यकत्वमित्यादीनि स्वष्टान्याग्नेयलिङ्गानि। द्वितीये त्वस्वष्टैर्लिङ्गैरतिदेशः। तद्यथा वाजिने हविःसामान्येन लिङ्गेन पयोविधन्तोऽतिदिश्यते तत्र लिङ्गमस्वरूपम्। शीघ्रं तद्वृद्ध्यनुत्पादनात्। तृतीये प्रबलेन लिङ्गेनातिदेशः। तद्यथा। आभिचारिकेष्टावाग्नावैष्णवसारस्वतबार्हस्पत्येषु हविःषु चित्तेन लिङ्गेन यथाक्रममाग्नेयादिविधन्ते प्राप्ते द्विदेवत्वत्वेन लिङ्गेन प्रथम आग्नावैष्णवे तृतीयस्यानीषोमीयस्य विधन्तोऽतिदिष्टः। प्रबलत्वं द्विदेवत्वत्वम्। शब्दोच्चारणमात्रेण सहसा प्रतिभासात्। क्रमस्तु विलम्बितप्रतीत्या दुर्ब्बलः। चतुर्थे दर्व्विहोमेष्वतिदेशोऽपोह्यते।

नवमाध्यायस्य प्रथमे पादे उपोद्घातपूर्व्वकऊहविचारप्रारम्भः। तत्र प्रयाजादयो धर्म्मा अपूर्व्वप्रयुक्ताः। अवघातमन्त्रादिर्व्विवक्षितं ग्रीष्मग्रादिस्वरूपं साधनविशेषत्वमात्रं विवक्षितमित्यादिरूपोपोद्घातः। सविश्वस्मिंपूषन्शब्दानां विकृतिषु नास्त्यूहः। अग्निशब्दस्यास्त्यूह इत्यादि ऊहविचारारम्भः। द्वितीये सपरिकरः सामोहः। तृतीये मन्त्रोहः। चतुर्थे मन्त्रोहप्रसङ्गापतितो विचारः।

दशमाध्यायस्य प्रथमे पादे बाधहेतुद्वारलोपो निरूपितः। तद्यथा स्वयं हता वेदिर्भवतीत्यत्र वेदिनिष्पादनरूपस्य द्वारस्य लोपेन निष्पादकानामुहननादीनां बाधः। क्षण्वेषु वितुषीकरणरूपस्य द्वारस्य लोपेनावघातस्य बाधः। द्वितीये संक्षेपेणोक्तस्य द्वारलोपस्य बहुभिरुदाहरणैर्विस्तारः। तृतीये बाधकारणं कार्य्यैकत्वम्। तद्यथा प्रकृतौ गवाश्वादिदक्षिणायाः ऋत्विक्परिक्रयः कार्य्यम्। तथा विकृतिरूपे भूनाम्नीकाण्डे धेनुरूपायाः दक्षिणायास्तदेव कार्य्यम्। ततो धेन्वा गवाश्वादिदक्षिणाविकृतौ चोदकप्राप्ता बाधते। चतुर्थे नवचैत्यविहिता उपद्दोमाश्चोदकप्राप्तैर्नारिष्टहोमैः सह समुच्चीयन्ते इत्यादिः समुच्चयः। पञ्चमे षोड़शिग्रहः प्रकृतिगामी। स चाग्नेयण-

प्राचादेव ग्रहीतव्य इत्यादिबाधप्रसङ्गागतो ग्रहादिविचारः। षष्ठे सामत्वे गेयमित्यादिबाधप्रसङ्गागतः सामविचारः। सप्तमे पश्वङ्गेषु इविर्भेदः। गृहमेधीयमपूर्व्वकर्म्मेत्यादिबाधप्रसङ्गागतः प्रकीर्णविचारः। अष्टमेनाधुयाजेष्वितिपर्युदासो न सोम इत्यर्थवादो नातिरात्र इति प्रतिषेध इत्यादिबाधोपयुक्तो नञर्थविचारः।

एकादशाध्यायस्य प्रथमे पादे तन्त्रस्योपोद्घातो वर्णितः। द्वितीये तन्त्रावापौ संक्षेपेणोक्तौ। तृतीये तन्त्रसदाहरणबाहुल्येन प्रपञ्चितम्। चतुर्थे तथैवावापः प्रपञ्चितः।

द्वादशाध्यायस्य प्रथमे पादे पशुधर्म्माणां पशुपुरोडाशे प्रसङ्गः। सौमिकवेदैरुत्तरकालीनकर्म्मसु प्रसङ्ग इत्यादि विचारः। द्वितीये सवनीयपशोरुक्तन्यित्वम्। न तु सवनीयपुरोडाशानाम्। विकृतिस्तन्त्रिणी न प्रकृतिः। अन्वारम्भणीया विकृतिष्वपि स्यात्। न तु प्रकृतावेवेत्यादिविचारः। तृतीये त्वन्वासयोः समुच्चयः। आधारगतानाज्यतन्त्रतत्त्वादीनां समुच्चय इत्यादिकं प्राधान्येन। यवाग्वोर्व्विकल्प इत्यादिकं समुच्चयापवादत्वेनेत्युभयं चिन्तितम्। चतुर्थे चेन्द्राबार्हस्पत्ययाज्यानुवाक्ययुगलयोर्व्विकल्प इत्यादिकं प्राधान्येन। याज्यानुवाक्ययोः समुच्चय इत्यादिकं विकल्पापवादत्वेनेत्युभयं चिन्तितम्। तदेवं द्वादशाध्यायगतेषु षष्टिसंख्यकेषु पादेषु प्रतिपाद्या अर्थाः संगृहीताः।" इत्यधिकरणमाला॥

उत्तरमीमांसाध्यायपादप्रतिपाद्यार्था यथा,—

"शास्त्रं ब्रह्मविचाराख्यमध्यायाः स्युश्चतुर्विधाः।
समन्वयाविरोधौ द्वौ साधनञ्च फलन्तथा॥
समन्वये सदलिङ्गमस्पष्टत्वेऽपि प्रस्थगम्।
ज्ञेयं पदमाद्यञ्च चिन्त्यं पादेष्वनुक्रमात्॥
द्वितीये स्मृतितर्काभ्यामविरोधोऽन्यदुक्तया।
भूतभोक्तृश्रुते र्लिङ्गश्रुतेरप्यविरुद्धता॥
तृतीये विरतिस्तत्त्वं पदार्थपरिशोधनम्।
गुणोपसंहृतिर्ज्ञानेऽहिरङ्गादि साधनम्॥
चतुर्थे जीवतो मुक्तिरुत्क्रान्तिर्गतिरुत्तरा।
ब्रह्मप्राप्तिर्ब्रह्मलोकाविति पादार्थसंग्रहः॥"

इति शास्त्राधिकरणमाला॥ मीमांसाद्वयमतसंग्रहो यथा,—

अथ मैमांसकम्।

"मीमांसको द्विधा कर्म्मब्रह्ममीमांसकः स्मृतः।
वेदान्ती मन्यते ब्रह्म कर्म्म भट्टप्रभाकरौ॥
प्रत्यक्षमनुमानञ्च वेदाख्योपमया सह।
अर्थापत्तिरभावश्च भट्टानां षट्प्रमाण्यञ्च तौ॥
प्रभाकरमते पञ्चैतान्यभावस्य वर्ज्जनात्।
अद्वैतवादी वेदान्ती प्रमाणन्तु यथाततः॥
सर्व्वमेतदिदं ब्रह्म वेदान्तेऽद्वैतवादिनाम्।
आत्मन्येव लयो मुक्तिर्वेदान्तिकमते मता॥
अकृत्कर्म्मा मयट्कर्म्मा अन्नादादिविवर्ज्जकः।
ब्रह्मसत्री द्विजो भट्टो गृहस्थाश्रममंश्रितः॥
भगवन्नामधेयास्तु द्विजा वेदान्तदर्शने।
विप्रगेहभुजस्यक्तोपवीता ब्रह्मवादिनः॥
चत्वारो भगवद्भेदाः कुटीचरबहूदकौ।
हंसः परमहंसश्चाधिकोमीषु परः परः॥"

इति जिनदत्तकृतविवेकविलासः। सर्व्वदर्शनसंग्रहकृत जैमिनिमतसंग्रहो यथा। अथातो धर्म्मजिज्ञासा इति प्रथमाधिकरणसूत्रम्। तत्राधिकरणं पञ्चावयवमाचक्षते परीक्षकाः। अस्मिन् सूत्रे स्वाध्यायोऽध्येतव्य इतिश्रुतिवाक्यमाश्रित्य विषयसंशयपूर्व्वपक्षसिद्धान्तनिर्णयरूपपञ्चाङ्गात्मकाधिकरणेन मीमांसाशास्त्रारम्भस्यावश्यकता प्रदर्शिता। मीमांसा हि वेदविचारशास्त्रं तदारम्भो निष्प्रयोजनः स्वाध्यायोऽध्येतव्य इतिश्रुत्या वेदाध्ययनं विहितं तच्च विचारजिज्ञासायात् स्वर्गरूपं फलमचरमग्रहणमात्रेणापि सम्भवति न तत्रार्थबोधापेक्षाप्यस्ति असत्याञ्च वेदार्थबोधापेक्षायां तदधीनायाः विचारणाया अपि अनावश्यकत्वात् अथवा यागादिकर्म्मावबोधाय स्वाध्यायोऽध्येतव्यः तस्य चार्थबोधरूपं दृष्टमेवफलं ततश्च दृष्टार्थत्वेन तस्य वैधत्वाभावात् वेदार्थविचारस्यापि तदेकप्रयोजनस्य वैधत्वं नास्तीति तद्विचारशास्त्रमनारम्भणीयम्। स्वाध्यायाध्ययनानन्तरं विचारशास्त्रेऽध्येतव्यतया स्वीक्रते वेदमधीत्य स्नायादितिविधिबोधितं वेदाध्ययनसमावर्त्तनयोरानन्तर्य्यं बाधेत तस्मान्नविचारशास्त्रमारम्भणीयमितिपूर्व्वपक्षसूत्राय अध्ययनस्य दृष्टफलकत्वेपि अर्थेनत्र इत्यत्र तव्यप्रत्ययेन भावनाप्रतिपादनात् अर्थबोधस्य तत्र भावत्वेनान्वयादध्ययनविधेरवघातादिविधिवन्नियमापूर्व्वार्थत्वं। तथाच यथा दर्शपौर्णमासजन्यं परमापूर्व्वमवघातादिजन्यमवान्तरापूर्व्वं कल्पयति तथा समस्तक्रतुजन्यमपूर्व्वजातं क्रतुज्ञानसाधनाध्ययननियमजन्यमपूर्व्वं कल्पयिष्यति। अन्यथा अध्ययनविधेर्वैफल्यं स्यात्। अर्थबोधरूपदृष्टफलस्य सम्भवे विधिनियायान्न स्वर्गफलकल्पना इति सिद्धान्तितम्। यथा यागे यवादेर्नखादिनापि वितुषीकरणसम्भवे अवघातविधिना अवघातो नियम्यते तथा अध्ययनविधिना अध्ययनं नियम्यते। तथाच अध्ययनेन च वेदार्थे परिज्ञाते तत्र संशये तन्निर्णयार्थं विचारशास्त्रमवश्यमपेक्षितव्यमिति विचारशास्त्रमारम्भणीयमेवेति प्रथमाधिकरणनिष्कर्षः एवंरीत्या अधिकरणसहस्रात्मकं कर्म्ममीमांसाशास्त्रं जैमिनिना प्रणीतम्। अस्मिन् शास्त्रे वेदस्यापौरुषेयत्वम्। वर्णानां ककारादीनां नित्यत्वं तत्र सोऽयं क इत्यादिप्रत्यभिज्ञैव प्रमाणं कण्ठताल्वाद्यभिघात एव तदभिव्यञ्जकः। ततश्च वेदस्यापौरुषेयतया निरस्तसमस्तशङ्काकलङ्काङ्कुरत्वेन स्वतः सिद्धं धर्म्मे प्रामाण्यमिति सुस्थितम्।

प्रमाज्ञानस्य स्वतःप्रामाण्यम्। विज्ञानसामग्रीजन्यत्वे सति तदतिरिक्तहेत्वजन्यत्वं प्रमायाः स्वतस्त्वमिति॥

मीरः, पुं, (मिन्वन्ति प्रचिपन्ति नद्यो जलान्यत्रेति। मिष्+"सृसिचिमिमां दीर्घश्च।" उणा० २। २५। इति क्रन् दीर्घत्वञ्च।) समुद्रः। इत्युणादिकोषः॥ पर्व्वतैकदेशः। सीमा। पानीयम्। इति संक्षिप्तसारोणादिवृत्तिः॥

मील, क्रृ निमेषे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) क्रृ अमिमीलत्। अमीमिलत्। मीलति चक्षुः पक्ष्मभिराहतं स्यादित्यर्थः। इति दुर्गादासः॥

मीलं, क्ली, (मीलतीति। मील+कः।) वनम्। इति केचित्॥

मीलनं, क्ली, पक्ष्मभिरावरणम्। मीलधातोर्भावे ल्युट् (ल्युट्) प्रत्ययेन निष्पन्नम्॥

मीलितं, त्रि, (मील+क्तः।) अप्रफुल्लम्। तत्पर्य्यायः। सङ्कुचितम् २ निद्राणम् ३ सुप्तिम् ४। इति हेमचन्द्रः॥ (अलङ्कारविशेषः। यथा, साहित्यदर्पणे। १०। ११५।

("मीलितं वस्तुनो गुप्तिः केनचित् तुल्यलक्षणा।")

मीव, पीवे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) मीवति। पीवः स्थूलीभावः। इति दुर्गादासः॥

मीवरः, त्रि, (मीनाति हिनस्तीति। मीष्+"छित्वरच्छत्वरधीवरपीवरमीवरेति।" उणा० ३। १। इति ष्वरच् निपातितश्च। अत्रोज्ज्वलेन तु माधातोः ष्वरच् निपातितश्चेत्युक्तं स।) हिंसः। इत्युणादिकोषः॥ (मीयते इति, मा+ष्वरच्। निपातितः।) सेनानी। पूज्यः। इति संक्षिप्तसारोणादिवृत्तिः॥

मीवा, स्त्री, (मीनाति हिनस्तीति। मी+"शीवायश्च जिह्मान्मीवाप्रामीवाः।" उणा० १। १५४। इति वन् निपात्यते च।) उदरकृमिः। इत्युणादिकोषः॥ वायुः। इति सिद्धान्तकौमुद्युणादिवृत्तिः॥ शूकरः। सारः। इति संक्षिप्तसारोणादिवृत्तिः॥

सुः, पुं, (सव्+बाहुलकात् डुन्। टिलोपश्च।) वन्धनम्। इत्येकाक्षरकोषः॥ महेशः। इति हलायुधचन्द्रः॥

सुकुन्दकः, पुं, पलाण्डुः। केचित्तु सुकन्दकस्थाने सुकन्दक इति पठित्वा शवनानां सुदं हर्षं प्रायेण कन्दति आह्वयति कदि आह्वाने रोदने च णकः पृषोदरादित्वात् दलुक् सुकन्दक इति व्याचक्षते। इत्यमरटीकायां भरतः॥

सुकुः, पुं, (सुच्+बाहुलकात् कुः। पृषोदरादित्वात् साधुः।) सुक्तिः। यथा,—

"सुकुर्मुक्तौ महेशे सुः कुः पृथिव्यामशोभने।"

इति दुर्गादासधृतहलायुधचन्द्रः॥

सुकुटं, क्ली, (सङ्कते सङ्कयति। सकि+उटन् नलोपश्चेति न्यासः।) स्वनामख्यातशिरोभूषणम्। तत्पर्य्यायः। किरीटम् २। इत्यमरः।

२ । ६ । १०२ ॥ मौलिः ३ कोटीरम् ४ उष्णीषम् ५ । इति हेमचन्द्रः । ३।३१४ ॥ मकुटम् ६ मौलीकः ७ शेखरम् ८ अवतंसः ९ वतंसः १० उत्तंसः ११ उष्णीषकम् १२ कोटीरकम् १३ । इति शब्दरत्नावली ॥ (यथा, हरिवंशे । ८६ । ७७ ।
"मुकुटच्छायतप्तस्य काञ्चनो वज्रभूषितः ।"
तथा च महाभारते । १ । ३० । ३८ ।
"रत्नानि मुकुटान्येषां मुत्थितानि यथर्षयन् ।"
टाप् । स्त्री, माढगणविशेषः । यथाजैव । ६ । ४६ । २३ ।
"कालेहिका वामनिका मुकुटा जैव भारत ॥")

मुकुटी, स्त्री, अङ्गुलिमोटनम् । इति शब्दरत्नावली ॥

मुकुन्दः, पुं, विष्णुः । तस्य व्युत्पत्तिर्यथा,—
"मुकुमत्ययमान्तश्च निर्व्वाणमोक्षवाचकम् ।
तद्ददाति च यो देवो मुकुन्दस्तेन कीर्त्तितः ॥
मुकुं भक्तिरसप्रेमवचनं वेदसम्मतम् ।
यस्तद्ददाति विप्रेभ्यो मुकुन्दस्तेन कीर्त्तितः ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ११० अध्यायः ॥
निधिविशेषः । (यथा, मार्कण्डेये । ६८ । ५ ।
"यत्र पद्ममहापद्मौ तथा मकरकच्छपौ ।
मुकुन्दो नन्दकश्चैव नीलः शङ्खोऽष्टमो निधिः ॥"
अस्य गुणादिकं निधिशब्दे उक्तम् ।) रत्नभेदः । कुन्दुरुः । इति मेदिनी । दे, ३८ ॥ (यथा च पर्य्यायः ।
"कुन्दुरुस्तु मुकुन्दः स्यात् सुगन्धः कुन्द इत्यपि ।"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)
पारदः । इति हेमचन्द्रः । २ । १२६ ॥

मुकुन्दकः, पुं, पलाण्डुः । क्वचिच्च मुकन्दकस्थाने मुकुन्दक इति पठित्वा जवनानां मुखं कन्दतीति पृषोदरादित्वात् दलुक् कन्देरत उच्चेति व्याचक्षते । इत्यमरटीकायां भरतः ॥ (यथा, सुश्रुते । १ । ४६ ।
"विशोधो तत्र भूयिष्ठं वरुकः ससुकुन्दकः ।")
यष्टिकाब्रीहिः । यथा, भावप्रकाशे ।
"यष्टिकः घृतपुष्पश्च प्रमोदकसुकुन्दकौ ।
महायष्टिक इत्याद्याः यष्टिकाः ससुदाहृताः ॥"

मुकुन्दुः, पुं, (मोचयति विषयान्तरानेवागमिति । अन्तर्भूतण्यर्थं सुच् + कः । न्यङ्कादित्वात् कुत्वम् । तं उन्दत्यार्द्रीकरोतीति । उन्द + उण् । पृषोदरादित्वात् साधुः ।) कुन्दुरुः । इत्यमरटीकायां मथुरानाथः ॥

मुक्कम्, क्ष, निर्व्वाणम् । भक्तिरसः । प्रेम । यथा,
"मुकुमत्ययमान्तश्च निर्व्वाणमोक्षवाचकम् ।
तद्ददाति च यो देवो मुकुन्दस्तेन कीर्त्तितः ॥
मुकुं भक्तिरसप्रेमवचनं वेदसम्मतम् ।
यस्तद्ददाति विप्रेभ्यो मुकुन्दस्तेन कीर्त्तितः ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ११० अः ॥

मुकुरः, पुं, (मक + "मकुरदर्दुरौ ।" उणा० १।८१। इत्यत्र । बाहुलकादकारस्थाने उकारः इत्युज्ज्वलदत्तोक्तेः उरच् ।) दर्पणः । (यथा नैषधे । ४।५६।
"कुरु करे गुरुमेकमयोघन
बहिरितो मुकुरञ्च कुरुष्व मे ॥")

वकुलद्रुमः । कुलालदग्धः । इति मेदिनी । रे, २०३ ॥ मल्लिकापुष्पवृक्षः । इति विश्वः ॥ (यथा,
सुकुरकुसुमभृङ्गानातपत्रं ध्वजं वा
दधिफलमध नौकामन्नताम्बूलवस्त्रम्
कमलकलसशङ्खं भूषणं काञ्चनं वा
भवति सकलसिद्धेः श्रेयसे रोगिणाञ्च ॥"
इति हारीते द्वितीयस्थाने द्वितीयेऽध्याये ॥)
कुलवृक्षः । इति शब्दरत्नावली ॥ कोरकः । इति हेमचन्द्रः ॥

मुकुलः, पुं, क्ली, (मुचति कलिकात्वम् । मुच् + घुलक् । इति भरतः ॥ मुचेरलः । कत्वमुत्वञ्चेति कत्वे अकारस्योत्वे मुकुल इति रायः ।) ईषद्विकसितकलिका । तत्पर्य्यायः । कुट्मलः २ । इत्यमरः । २ । ४ । १६ ॥ (यथा, रघौ । ६।३१।
उपहितं शिशिरापगमश्रिया
मुकुलजालमशोभत किंशुके ।")
मुकुलः३ पौटकोरकः ४ । इति शब्दरत्नावली ॥ शरीरम् । आत्मा । इति धरणिः ॥ (राजपुरुषविशेषः । यथा, राजतरङ्गिण्याम् । ६।२५३।
"इत्यं लब्धजया राज्ञी तत्त्वज्ञाज्ञयशंसिदृषा ।
यशोधरं शुभधरं मुकुलञ्च सबान्धवम् ॥")

मुकुष्टः, पुं, वनमुद्गः । तत्पर्य्यायः । मयष्टः २ । इति रत्नमाला ॥ अस्य गुणाः । शीतलत्वम् । श्लेष्मपित्तज्वरनाशित्वञ्च । इति राजवल्लभः ॥

मुकुष्टकः, पुं, (मुकुं स्तकति प्रतिहन्ति । स्तक + अच् पृषोदरादित्वात् साधुः ।) वनमुद्गः । सुगानी इति भाषा । तत्पर्य्यायः । मयष्टकः २ । इत्यमरः । २।६।१७॥ मुकुष्टः ३ मयष्टः ४ । इति श्रीधरः ॥ मषष्टकः ५ । इत्यन्ये । इति भरतः ॥ मुद्गष्टकः ६ मकुष्टकः ७ मयुष्टकः ८ । इति टीकान्तरम् ॥ (तथास्य विषयः ॥
"विदलान्नानि वक्ष्यामि शृणु पुत्र ! यथाक्रमम् ।
यवगोधूमचणका माषामुद्गाढकी तथा ॥
मुकुष्टकाः कुलत्थाश्च मसूराक्षिपुटास्तथा ।
निष्पावकाः कलायाद्या विदलान्नानि कीर्त्तयेत् ॥
इति हारीते प्रथमे स्थाने दशमेऽध्याये ॥
मुद्गान् मसूरांश्चणकान् कुलत्थान् ससुकुष्टकान् ।
व्याहारकाले यूषार्थे ज्वरिताय प्रदापयेत् ॥"
इति वैद्यकचक्रपाणिसंग्रहे ज्वराधिकारे ॥)

मुकूलकः, पुं, (मुच् + बाहुलकादूलच् पृषोदरादित्वात् कुत्वम् । ततः संज्ञायां कन् ।) वृक्षः । इत्यमरटीकायां रामाश्रमः ॥ (तथास्य पर्य्यायः ॥
"चिञ्चा दन्ती निकुम्भः स्यादुपचित्रा सुकूलकः ।
दाक्षायणी विशल्या च तथोदुम्बरपर्ण्यपि ॥"
इति वैद्यकरत्नमालायाम् ॥
"दन्त्युदुम्बरपर्णी स्यान्निकुम्भोऽथ सुकूलकः ।
द्रवन्ती नामतश्चित्रान्यग्रोधा भूषिकाह्वया ॥"
इति चरके कल्पस्थाने द्वादशेऽध्याये ॥)

मुक्तः, त्रि, (मुच् + क्तः ।) प्राप्तमोचः । मोचितः । इति मेदिनी । ते, ४४ ॥ नन्दितः । इति शब्दरत्नावली ॥ (नृपविशेषः । यथा, राजतरङ्गिण्याम् । ७ । १६३५ ।
"सदश्वमकभृत्यस्य शैलकाख्यस्य तत्क्षणम् ।
मुक्तो नामान्तिकं प्राप्तो नृपतेराप्ततामगात् ॥"
ऋषिविशेषः । यथा, मार्कण्डेये । १०० । ३१ ।
"अग्नीध्रश्चाग्निबाहुश्च शुचिर्मुक्तोऽथ माधवः ।
शुक्रोऽजितश्च सप्तैते तदा सप्तर्षयः स्मृताः ॥")

मुक्तकं, क्ली, (मुच्यते स्मेति । मुच् + क्तः । संज्ञायां कन् ।) क्षेपणीयास्त्रम् । इति केचित् ॥ (काव्यविशेषः । यथा, साहित्यदर्पणे । ६ । २६५ ।
"वृत्तगन्धोज्झितं गद्यं मुक्तकं वृत्तगन्धि च ॥")

मुक्तकञ्चुकः, पुं, (कञ्चुक इव कञ्चुकः मुक्तः कञ्चुको येन ।) व्यक्तिरत्यक्तत्वत्कसर्पः । तत्पर्य्यायः । निर्मुक्तः २ । इत्यमरः । १ । ८ । ६ । उज्झितकञ्चुके, त्रि ॥

मुक्तचक्षुः, [स्] पुं, (मुक्तं सर्वतः क्षिप्तं चक्षुर्येन ।) सिंहः । इति शब्दमाला ॥ मुक्तनेत्रे, त्रि ॥

मुक्तरसा, स्त्री, (मुक्तः रसो यस्याः ।) राज्ञा । इति रत्नमाला ॥ (विवरणमस्या राज्ञाशब्दे ज्ञातव्यम् ।) त्यक्तरसे, त्रि ॥

मुक्ता, स्त्री,[ण] (मुच्यते स्म । मोच्यते निःसार्य्यते इति वा । मुच् + क्तः । टाप् ।) राज्ञा । इति रत्नमाला ॥ रत्नविशेषः । मोती इति हिन्दीभाषा । अस्या अधिष्ठात्री देवता चन्द्रः । इति ज्योतिषम् ॥ तत्पर्य्यायः । मौक्तिकम् २ । इत्यमरः । २ । ६ । ६३ ॥ सौम्या ३ शौक्तिकेयम् ४ तारम् ५ तारा ६ भौतिकम् ७ तौतिकम् ८ अम्भःसारम् ९ शीतलम् १० नीरजम् ११ नक्षत्रम् १२ इन्दुरत्नम् १३ लक्ष्मीः १४ शुक्तिफलम् १५ विन्दुफलम् १६ शुक्तिका १७ शौक्तेयकम् १८ शुक्तिमणिः १९ अग्निप्रभम् २० स्वच्छम् २१ हिमम् २२ हिमवलम् २३ सुधांशुभम् २४ शुधांशुरत्नम् २५ । लक्ष्मीस्थाने लक्ष्मं अग्निप्रभस्थाने अग्निप्रियं हिमवलस्थाने हैमवतं सुधांशुभस्थाने भूरुहं इति च पाठः । इति राजनिर्घण्टः ॥ शौक्तिकम् २६ । इति भावप्रकाशः ॥ शुक्तिबीजम् २७ हारी २८ । इति शब्दरत्नावली ॥ कुवलम् २९ । इति जटाधरः ॥ अस्या गुणाः । सारकत्वम् । शीतत्वम् । कषायत्वम् । स्वादुत्वम् । लेखनत्वम् । चक्षुष्यत्वञ्च । तद्धारणगुणः । पापालक्ष्मीविनाशित्वम् । इति राजवल्लभः ॥ व्यत्वम् । बलपुष्टित्वञ्च । इति भावप्रकाशः ॥ * ॥ अपि च ।
"मौक्तिकञ्च मधुरं सुशीतलं
दृष्टिरोगशमनं विषापहम् ।
राजयक्ष्मपरिकोपनाशनं
क्षीणवीर्य्यबलपुष्टिवर्द्धनम् ॥"
अस्या लक्षणं यथा,—
"नक्षत्राभं शुद्धमत्यन्तशुक्लं
स्निग्धं स्थूलं निर्म्मलं निर्व्रणञ्च ।

न्यस्तं धत्ते गौरवं वस्तुलाघां
तन्मौक्तिकं सौख्यदायि ॥"

अस्या दोषलक्षणं यथा,—

"यद्दिच्छायं मौक्तिकं यङ्गकायं
शुक्तिस्पर्शं रक्तताघातिधत्ते ।
मत्स्याक्ष्यङ्गं रूक्षमुत्तानतन्नं
नेतद्वार्यं धीमता दोषदायि ॥"

अपरधा मौक्तिकं यथा,—

"मातङ्गोरगमीनपोत्रिशिरसस्वक्सारशङ्खासृभ-
च्छुक्तीनासुदराच्च मौक्तिकमणिः स्यादं भवत्य-
पधा ॥"

मौक्तिकविशेषो यथा,—

"छायापाटलनीलपीतधवलास्तत्रापि सामान्यतः
सप्तानां बहुशो न लक्षिरिति चेच्छौक्तेयकं
तूत्तमम् ॥"*॥

मौक्तिकपरीक्षा यथा,—

"लवणक्षारचोदिनि पात्रेऽजगोमूत्रपूरिते
क्षिप्तम् ।
मर्दितमपि शालीतुषैर्यदविकृतं तन्मौक्तिकं
जात्यम् ॥"

इति राजनिर्घण्टः ॥ * ॥

तदुत्पत्तिस्थानानि यथा,—

"शङ्खो गजश्च क्रोडश्च फणी मत्स्यश्च दर्दुरः ।
वेणुरेते समाख्याताश्चत्वारोमौक्तिकयोनयः ॥"

इति भावप्रकाशः ॥ * ॥

अथ प्रकारान्तरमुक्तापरीक्षा ।

"द्विपेन्द्रजीमूतवराहशुक्ल-
मत्स्याहिशुक्त्युद्भववेणुजानि ।
मुक्ताफलानि प्रथितानि लोके-
ष्वेतानि शुक्त्युद्भवमेव भूरि ॥
वेध्यन्तु शुक्त्युद्भवमेव तेषां
शेषाण्यवेध्यानि वदन्ति तज्ज्ञाः ।
मतङ्गजा ये तु विशुद्धवंश्या-
स्ते मौक्तिकानां प्रभवाः प्रदिष्टाः ॥
जत्पद्यते मौक्तिकमेषु दत्त-
मापीतवर्णं प्रभया विहीनम् ॥

वक्ष्ये गजपरीक्षायां गजजातिश्चतुर्विधा ।
मौक्तिकं तेषु जातं हि चतुर्विधमुदीर्यते ॥
ब्राह्मणं पीतशुक्लन्तु क्षत्रियं पीतरक्तकम् ।
पीतश्यामन्तु वैश्यं स्यात् शूद्रं स्यात् पीत-
नीलकम् ॥
काम्बोजकुम्भसम्भूतं धात्रीफलनिभं गुरु ।
अतिपिञ्जरसच्छायं मौक्तिकं मन्ददीधिति ॥
धाराधरेषु जायेत मौक्तिकं जलबिन्दुभिः ।
दुर्लभं तन्मनुष्याणां दैवेनात् क्वियतेऽम्बरात् ॥
कुक्कुटाण्डसमं वृत्तं मौक्तिकं निविडं गुरु ।
घनं भानुसङ्काशं देवयोग्यममानुषम् ॥"*॥

तथाहि गारुडे ।

"नाभ्येति मेघप्रभवं धरित्रीं
वियद्गतं तद्विबुधा हरन्ति ।
अर्चिःप्रभागाहृतदिग्विभाग-
मादित्यवद्दुःखविभाव्यविम्बम् ॥

तेजस्तिरस्कृत्य हुताशनेन्दु-
नक्षत्रतारायहसम्भवञ्च ।
दिवा यथा दीप्तिकरन्तथैव
तमोऽवगाढास्वपि तन्निशासु ॥
विचित्ररत्नद्युतिचारुतोय-
चतुःसमुद्रा भवनाभिरामा ।
मूल्यं न वा स्यादिति निश्चयो मे
क्षत्स्ना मही तस्य सुवर्णपूर्णा ॥
हीनोऽपि यस्तल्लभते कथञ्चित्
विपाकयोगान्महतः शुभस्य ।
सपत्नहीनः पृथिवीं समग्रां
भुनक्ति तत्तिष्ठति यावदेव ॥
न केवलं तच्छुभकृन्नृपस्य
भाग्यैः प्रजानामपि जन्म तस्य ।
तदृद्धियोजनानां परितः प्रतस्य
सर्वाननर्घान् विसुखीकरोति ॥
जलज्योतिर्मरुच्छानां मेघानां त्रिविधं भवेत् ।
जलाधिकेऽधिकं स्वच्छं कोमलं पुरु कान्ति-
मत् ॥
ज्योतिषं कान्तिमद्वृत्तं दुर्निरीक्षं रविप्रभम् ।
कान्तिमत् कोमलं वृत्तं मारुतं विमलं लघु ॥
वराहदंष्ट्राप्रभवं वरिष्ठं
तस्यैव दंष्ट्राङ्कुरतुल्यवर्णम् ।
क्वचित् कथञ्चित् स भुवः प्रदेशे
प्रजायते शूकरवद्वरिष्ठः ॥
ब्रह्मादिजातिभेदेन वराहोऽपि चतुर्विधः ।
तेषु जाता भवेन्मुक्ता समासेन चतुर्विधा ॥
ब्राह्मणः शुक्लवर्णस्तु शूद्रमन्त्रोऽस्य लक्षते ।
क्षत्रियः शुक्लरक्तस्तु स्पर्शे कर्क्कश एव च ॥
वैश्यः स्यात् शुक्लपीतस्तु कोमलः कोलसन्निभः ।
शूद्रः स्याच्छुक्लनीलस्तु कर्क्कशः श्याम एव च ॥"

तथा च ।

"कोलजं कोलसदृशं तद्दंष्ट्रासदृशच्छवि ।
अलभ्यं मनुजे रत्नं मौक्तिकं पुण्यवर्द्धितैः ॥*॥
ये कण्वः शार्ङ्गसखावमर्षं-
पीतस्य शुक्लप्रवरस्य गोत्रे ।
स्यान्मौक्तिकानामिह तेषु जन्म
तल्लक्षणं संप्रति कीर्त्तयामः ॥
स्वयोनिमध्यच्छवितुल्यवर्णं
शुक्लादृदृक्कोलफलप्रमाणम् ॥

तथा च ।

वर्षोपलसमं दीप्त्या पाञ्चजन्यकुलोद्भवम् ।
कपोताण्डप्रमाणं तदतिकान्ति मनोहरम् ॥*॥

विशेषो यथा,—

"अश्विन्यादिनक्षत्रे ये जाताः कण्वः शुभाः ।
मौक्तिकं तेषु जातं हि सप्तविंशतिभेदभाक् ॥
शुक्लाशुक्लाः पीतरक्ता नीला लोहितपिञ्जराः ।
आकर्बुराः पाटलाश्च नववर्णाः प्रकीर्त्तिताः ॥
मद्यन्मध्यलघूमानैः सप्तविंशतिधा भवेत् ।
क्रमतस्तेषु विज्ञेयं नक्षत्रेषु मनीषिभिः ॥*॥
पाठीनपृष्ठस्य समानवर्णं
मौक्तात् सुवृत्तं लघु नातिरूक्षम् ।

उत्पाद्यते वारिचराननेषु
मीनाश्च ते मध्यचराः पयोधेः ॥"

तथा च ।

"गुञ्जाफलकायस्थौल्यं मौक्तिकं तिमिजं
लघु ।
पाटलापुष्पसङ्काशमस्यकान्ति सुवर्त्तुलम् ॥
वातपित्तकफद्वन्द्वसन्निपातप्रभेदतः ।
सप्त प्रकृतयो मौने सप्तधा तेन मौक्तिकम् ॥
लघिष्ठमरुणं वातात् श्यामलं स्यादु पित्ततः ।
शुक्लं गुरु कफोद्रेकात् वातपित्तान्मृदुर्लघु ॥
वातश्लेष्मभवं स्थूलं पित्तश्लेष्मजमच्छकम् ।
सर्वलिङ्गप्रयोगेण सान्निपातिकमुच्यते ॥
एकजाः शुभदाः प्रोक्तास्त्रयो द्वे सान्नि-
पातिकाः ॥*॥
भौजङ्गमं नीलविशुद्धवर्णं
सर्व्वं भवेत् प्रज्वलवर्णशोभम् ।
नितान्तधौतप्रतिकल्पमान-
निस्त्रिंशधारासमवर्णशोभम् ॥
भुजङ्गमास्ये विषवेगदग्धाः
श्रीवासुकेर्व्वंशभवाः पृथिव्याम् ।
क्वचित् कदाचित् खलु पुण्यदेशे
तिष्ठन्ति ते पश्यति तान्मनुष्यः ॥
फणिजं वर्त्तुलं रम्यं नीलच्छायं महाद्युति ।
पुण्यहीना न पश्यन्ति वासुकेः कुलसम्भवम् ।
शृगालकोलामलकोलगुञ्जा-
फलप्रमाणास्तु चतुर्विधास्ते ।
स्युर्ब्रह्मवाहूद्भववैश्यशूद्र-
सर्पेषु जाताः प्रवरास्तु सर्व्वे ।
प्राप्यापि रत्नानि धनं श्रियंवा
राजश्रियंवा महतीं दुरापाम् ।
तेजोऽन्विताः पुण्यकृतो भवन्ति
मुक्ताफलस्यास्य विधारणेन ॥
जिज्ञासया रत्नविनिश्चयज्ञैः
शुभे मुहूर्त्ते प्रयतैः प्रयत्नात् ।
रत्नाविधानं समहद्विधाय
हस्मोपविष्टं क्रियते यदा तत् ।
तदा महद्दुन्दुभितूर्य्यघोषै-
र्घनैर्घनैराव्रियतेऽन्तरीक्षम् ॥
न तं भुजङ्गा न तु जातुधाना
न राक्षसा नापि च दुष्टलोकाः ।
हिंसन्ति यस्याहिशिरःसमस्थं
मुक्ताफलं तिष्ठति कोषमध्ये ॥
भेकादिष्वपि जायन्ते मण्यो ये क्वचित् क्वचित् ।
भौजङ्गममणेस्तुल्याः ते विज्ञेया बुधोत्तमैः ॥
नक्षत्रमालेव दिवो विभूषा
इन्द्रावली तस्य महासुरस्य ।
विचित्ररूपेषु विचित्रवर्णा
पयःसु पत्युः पयसां पपात ॥
सम्पूर्णचन्द्रांशुकलापकान्ते-
र्भणिप्रवेकस्य महागुणस्य ।
तच्छुक्तिमत्सस्थितिमाप वीचि-
मासन् पुराण्यन्यभवानि यानि ॥

यस्मिन् प्रदेशेऽम्बुनिधौ पपात
सुचारुमुक्तामणिरत्नबीजम्।
तस्मिन् पयस्तोयधराबकीर्णं
शुक्तौ स्थितं मौक्तिकनामवाप ॥ * ॥

सैंहलिकपारलौकिक-सौराष्ट्रिकताम्रपर्णपार-
सवाः।

कौवेरपाण्ड्यविराटमुक्ता इत्याकराश्चाष्टौ ॥

"स्वात्यां स्थिते रवौ मेघैर्यै मुक्ता जलबिन्दवः।
शीर्णाः शुक्तिषु जायन्ते तेमुक्ता निर्म्मलत्वियः॥
स्थूला मध्यास्तथा सूक्ष्मा विद्रुमानानुसारतः।
स्निग्धमधुरच्छायं मौक्तिकं सिंहलोद्भवम्॥
पारलौकिकसम्भूतं मौक्तिकं निविड़ं गुरु।
सौराष्ट्रिकभवं स्थूलं वृत्तं स्वच्छं सितं घनम्॥
ताम्रपर्णभवं ताम्रं पीतं पारसवोद्भवम्।
ईषत् श्यामश्च रूक्षश्च कौवेरोद्भवमौक्तिकम्॥
पाण्ड्यदेशोद्भवं पाण्डु सितं रूक्षं विराटजम्।
रुक्मिण्याख्या तु या शुक्तिस्तत्प्रसूतिः सुदुर्लभा॥
तत्र जातं सितं स्वच्छं नातीफलसमं वरम्।
छायावद्बहुलं रम्यं निर्दोषं यदि लभ्यते॥
अमूल्यं तद्विनिर्द्दिष्टं रत्नलक्षणकोविदैः।
दुर्लभं नृपयोग्यं स्यादल्पभाग्यैर्न लभ्यते॥"

अन्यत्राह।

"सर्व्वस्य तस्याकरजा विशेषात्
रूपप्रमाणे च यथेव विद्वान्।
नहि व्यवस्यास्ति गुणागुणेषु
सर्व्वत्र सर्व्वाकृतयो भवन्ति॥

ब्रह्मादिजातिभेदेन मुक्तयोऽपि चतुर्व्विधाः।
तासु सर्व्वासु जातं हि मौक्तिकं स्याच्चतुर्व्विधम्॥
ब्राह्मणस्तु सितः स्वच्छो गुरुः शुक्लः प्रभान्वितः।
क्षारक्तः क्षत्रियः स्थूलस्तथारुण्यविभान्वितः॥
वैश्यस्त्वापीतवर्णोऽपि स्निग्धः श्वेतः प्रभान्वितः।
शूद्रः शुक्लश्च रूक्ष्मस्तथा स्थूलोऽसितद्युतिः॥

वर्णोपलानां समवर्णशोभं
त्वक्सारमध्यप्रभवं प्रदिष्टम्।
तै वैणवो द्विजनोपभोग्ये
स्याने प्ररोहन्ति न सार्व्वजन्ये॥

वृत्तं शुक्तिसङ्घाद्यं कक्कोलीफलमार्द्दकम्।
प्राप्यते बहुभिः पुण्यैस्तद्रत्नं वेदमन्त्रतः॥
पञ्चभूतसमुद्रेकादंशे पञ्चविधे भवेत्।
मुक्ता पञ्चविधा तासां यथालक्षणमुच्यते॥
पार्थिवी गुरुवत्सा च तैजसी तेजसा लघुः।
वायवी च रुटुः स्थूला गागनी कोमला लघुः।
आप्याः स्निग्धा भृशं शुक्लाः पञ्चैताः प्रवरा
मताः।
नामां धारणमात्रेण व्याधिः कोऽपि न
जायते॥"*॥

एवमन्यत्रापि।

"गजादिकोलमत्स्यानां शीर्षे मुक्ताफलोद्भवः।
त्वक्सारशुक्तिशृङ्गानां गर्भे मुक्ताफलोद्भवः॥
धाराधरेषु जायेत मौक्तिकं जलबिन्दुभिः।
जीमूते शुचिरूपश्च गजे पाटलभास्वरम्॥
मत्स्ये श्वेतश्च निस्तेजः फणीन्द्रे नीलभास्वरम्।
हरिच्छ्वेतं तथा वंशे पीतश्वेतश्च शूकरे।
शृङ्गशुक्त्युद्भवं श्वेतं मुक्तारत्नमनुत्तमम्॥
चतुर्द्धा मौक्तिके छाया पीता च मधुरा सिता।
नीला चैव समाख्याता रत्नतत्त्वपरीक्षकैः॥
पीता लक्ष्मीप्रदा छाया मधुरा बुद्धिवर्द्धिनी।
शुक्ला यशस्करी छाया नीला सौभाग्यदायिनी॥
सिता छाया भवेद्विप्रः क्षत्रियश्चार्करश्मिवान्।
पीतच्छाया भवेद्वैश्यः शूद्रः क्षारश्चिर्म्मितः॥*
अथ गुणाः।
सुनारश्च वृत्तश्च स्वच्छश्च निर्म्मलं तथा।
घनं स्निग्धश्च सच्छायं तथा स्फुटितमेव च।
अष्टौ गुणाः समाख्याता मौक्तिकानामशेषतः॥
तद्यथा,—
तारकाद्युतिसङ्काशं सुनारमिति गद्यते।
सर्व्वतो वर्त्तुलं यच्च सुवृत्तं तन्निगद्यते॥
स्वच्छं दोषविनिर्म्मुक्तं निर्म्मलं मलवर्ज्जितम्।
गुरुत्वं तुलने यस्य तद्घनं मौक्तिकं वरम्॥
स्नेहेनैव विलिप्तं यत्तत् स्निग्धमिति गद्यते।
छायासमन्वितं यच्च सच्छायं तन्निगद्यते॥
व्रणरेखाविहीनं यत्तत् स्यात्स्फुटितं शुभम्॥
भानिघ्नु कोमलं कान्तं मनोज्ञं स्फुरतीव च।
सर्व्वतीव च सत्त्वानि तन्महारत्नसंज्ञितम्॥
श्वेताब्जसमाकारं शुभांशुशुतयोजितम्।
शुशिराजप्रतिच्छायं मौक्तिकं देवभूषणम्॥"*॥

गारुडे।

त्वक्सारनागेन्द्रनिभिप्रभूतं
यच्छृङ्गजं यच्च वराहजातम्।
प्रायो वियुक्तानि भवन्ति भासा
शुक्तानि माङ्गल्यतया तथापि॥
प्रमाणवद्गौरवरश्मियुक्तं
सितं सुवृत्तं समसूच्यरन्ध्रम्।
अक्रेतुरप्यावहति प्रमोदं
यन्मौक्तिकं तद्गुणवत् प्रदिष्टम्॥
एवं समस्तेन गुणोदयेन
यन्मौक्तिकं योगमुपागतं स्यात्।
न तस्य भर्त्तारमनर्घजात
एकोऽपि दोषः समुपैति सद्यः॥

एवं सर्व्वगुणोपेतं मौक्तिकं येन धार्य्यते।
तस्यायुर्व्वर्द्धते लक्ष्मीः सर्व्वपापं प्रणश्यति॥
गुणवद्गुरु यद्देहे मौक्तिकैकं हि तिष्ठति।
चञ्चलापि स्थिरा भूत्वा कमला तत्र तिष्ठति॥"

दोषो यथा,—

"चत्वारः स्युर्महादोषाः षण्मध्याश्च प्रकीर्त्तिताः।
एवं दश समाख्यातास्तेषां वक्ष्यामि लक्षणम्॥
यत्रैकदेशे संलग्नः शुक्तिखण्डो विभाव्यते।
शुक्तिलग्नः समाख्यातः स दोषः कुशकारकः॥
मीनलोचनसङ्काशो दृश्यते मौक्तिके तु यः।
मत्स्याक्षः स तु दोषः स्यात् पुत्रनाशकरो ध्रुवम्॥
दीप्तिहीनं गतच्छायं जटरं तद्विदुर्बुधाः।
तस्मिन् संधारिते मृत्युर्जायते नात्र संशयः॥
मौक्तिकं विद्रुमच्छायमतिरक्तं विदुर्बुधाः।
दारिद्र्यजनकं यस्मात तस्मात्तत् परिवर्जयेत्॥
उपर्य्युपरि तिष्ठन्ति वलयो यत्र मौक्तिके।
त्रिवृत्तं नाम तत्प्रोक्तं सौभाग्यक्षयकारकम्।
अवृत्तं मौक्तिकं यच्च चिपिटं यन्निगद्यते।
मौक्तिकं म्रियते येन तस्याकीर्त्तिर्भवेत् सदा॥
त्रिकोणं चाश्रमाख्यातं सौभाग्यक्षयकारकम्।
दीर्घं यत्तत् क्षयं प्रोक्तं प्रज्ञाविध्वंसकारकम्॥
निर्भग्नमेकतो यच्च क्षणपार्श्वं तदुच्यते।
सदोषं मौक्तिकं निन्द्यं निरुद्योगकरं हि
तत्।
अवृत्तं पिड़कोपेतं सर्व्वसम्पत्तिहारकम्॥*॥
यत्र कृत्रिमसन्देहः क्वचिद्भवति मौक्तिके।
उष्णे सलवणे क्षेहे निशान्तद्वासयेच्चले॥
व्रीहिभिर्मर्द्दनीयंवा शुष्कवस्त्रोपवेष्टितम्।
यत्तु नायाति वैवर्ण्यं विज्ञेयं तदकृत्रिमम्॥*॥

तथा हि।

क्षिपेन्नोरुत्रभाण्डे तु लवणक्षारसंयुते।
खेदयेद्वह्निना वापि शुष्कवस्त्रेण वेष्टयेत्॥
हस्ते मौक्तिकमादाय व्रीहिभिश्चोपघर्षयेत्।
कृत्रिमं भङ्गमाप्नोति सहजत्वाति दीप्यते॥

कृत्वा पचेत् सुपिहिते शुभदारुभाण्डे
मुक्ताफलं निहितनूतनशुक्तिकाण्डम्।
स्फोटन्तथा प्रणिदधीत ततश्च भाण्डात्।
संस्थाप्य धान्यनिचये च तमेकमासम्॥
आदाय तत् सकलमेव ततोऽन्नभाण्डं
जम्बीरजातरसयोजनया विपक्वम्।
दृष्टं ततो रुदुतनूकृतपिण्डमूलैः
कुर्य्यादयत्नेक्षमिह मौक्तिकमाशु विद्वम्॥
श्लक्ष्णप्रमत्स्यपुटमध्यगतन्तु कृत्वा
पश्चात् पचेत्तदु ततश्च वितानपत्या।
दुग्धे ततः पयसि तद्विपचेत् सुरायां
पक्वन्ततोऽपि पयसा शुचि चिक्कणेन।
शुद्धं ततो विमलवस्त्रनिघर्षणेन
स्यात् मौक्तिकं विमलसद्गुणकान्तिजालम्॥'

अथ मूल्यम्।

"पञ्चभिर्माषकैः श्रेष्ठो गुञ्जाभिर्माषकैस्तथा।
चतुर्भिः प्राणमाख्यातं माषकैर्मणिवेदिभिः॥

एकस्य शुक्तिप्रभवस्य शुद्ध-
मुक्तामणेः प्राणकसम्मितस्य।
मूल्यं सहस्राणि कपर्द्दकानि
त्रिभिः शतैरभ्यधिकानि पञ्च॥
यन्माषकार्द्धेन ततो विहीनं
शतैःसहस्रं लभतेऽस्य मूल्यम्।
यन्माषकांस्त्रीन् विभृयाद्गुरुत्वे
द्वे तस्य मूल्यं परमं प्रदिष्टम्॥
अर्द्धाधिकद्वौ वहतोऽस्य मूल्यं
त्रिभिः शतैरभ्यधिकं सहस्रम्।
द्विमाषकोन्मापितगौरवस्य
शतानि चाष्टौ कथितानि मूल्यम्॥
अर्द्धाधिकमाषकसम्मितस्य
सपञ्चविंशं त्रितयं शतानाम्।
यन्माषकोन्मापितमानमेकं
तस्याधिकं विंशतिभिः शतं स्यात्॥

मुक्ता

गुञ्जाश्च षड्धारयतः शुते द्वे
मूल्यं परं तस्य वदन्ति तज्ज्ञाः ।
गुञ्जाचतस्रो विधृतं शुताद्धा-
दर्द्धं लभेताप्यधिकं त्रिभिर्वा ॥
अतः परं स्याद्धरणप्रमाणं
संख्याविनिर्देशविनिश्चयोक्तिः ।
चयोदशानां धरणे धृतानां
द्विकेति नाम प्रवदन्ति तज्ज्ञाः ॥
अध्यर्द्धमात्रश्च शुतं कृतं स्यात्-
मूल्यं गुणैस्तस्य समन्वितस्य ।
यदि षोडशभिर्भवेत् सुपूर्णं
धरणं तत्प्रवदन्ति दार्विकाख्यम् ॥
अधिकं दशभिः शुतश्च मूल्यं
समवाप्नोत्यपि वालिशस्य हस्तात् ।
यदि विंशतिभिर्भवेत् सुपूर्णं
धरणं मौक्तिकजं वदन्ति तज्ज्ञाः ॥
नवसप्ततिमाप्नुयात् स्वमूल्यं
यदि न स्याद्गुणयुक्तितो विहीनम् ॥
त्रिंशता धरणं पूर्णं शिक्वेति परिकीर्त्यते ।
चत्वारिंशत्परं तस्य मूल्यमेव विनिश्चयः ॥
चत्वारिंशत्भवेत् शिक्वा त्रिंशन्मूल्यं लभेत सा ।
पञ्चाशत्तु भवेत् सोमस्तस्य मूल्यन्तु विंशतिः ॥
षष्टिनिकरशीर्षं स्यात्तस्य मूल्यं चतुर्दश ।
अशीतिर्नवतिश्चेति कुप्येति परिकल्प्यते ॥
एकादश स्युर्नव च तयोर्मूल्यमनुक्रमात् ।
शतमर्द्धाधिकं ह्येच चूर्णोऽयं परिकीर्त्तितः ॥
सप्त पञ्च त्रयश्चैव तेषां मूल्यमनुक्रमात् ॥
शृणात परं मायकमेकमेकं
यावद्विवर्द्धेत गुणैरपीदम् ।
मूल्येन तावद्विगुणेन योग-
माप्नोत्यनार्द्रहितेऽपि देशे ॥
सूक्ष्मातिसूक्ष्मोत्तममध्यमानां
यन्मौक्तिकानामिह मूल्यसूक्तम् ।
तच्चातिमात्रेण न जातु कार्य्यं
गुणैरहीनस्य हि तत् प्रदिष्टम् ॥
यत्तु चन्द्रांशुसङ्काशमीषद्विम्बफलाकृति ।
स्वम्मुक्त्यात सप्तमं भागमवृत्तत्वाल्लभेत तत् ॥
शौक्तिकस्य भवेद्दर्द्धमवृत्तस्य त्रिभागतः ।
विषमत्यन्तजातीनां षड्भागं मूल्यमादिशेत् ॥
अर्द्धरूपाणि सस्फोटान् पङ्कवर्णानि यानि च ।
असाराणि च यानि स्युः करकाकारवन्ति च ॥
एकदेशप्रभावन्ति सकलाशेषितानि च ।
यानि चातकवर्णानि कांस्यवर्णानि यानि च ॥
मीननेत्रसवर्णानि ग्रन्थिभिः संवृतानि च ।
सदीर्घाणि च यानि स्युस्तेषां मूल्यं पदांशिकम् ॥
अन्यच्च तु ।
मध्यालो श्रोत्यनै शुक्ता मानिसो रूपकं भवेत् ।
रूपकैर्दशभिः प्रोक्तः कलञ्जो नाम नामतः ॥
कलञ्जनामकं द्रव्यमेकदेशे निधापयेत् ।
अन्यतो जलबिन्दुंस्तु शोधनार्थं विनिःक्षिपेत् ॥
चत्वारि त्रीणि युग्मं वा तत्रैकं बहु वा स्थितम् ।
तत्तं कलञ्जमानेन तुलामानादतः क्रमात् ॥
नवमात् पञ्चमं यावत् कलञ्जेन समं यदा ।
तत्क्रमादुत्तमं ज्ञेयं मौक्तिकं रत्नवेदिभिः ॥
चतुर्दशात् समारभ्य दशसंख्याविधिं क्रमात् ।
कलञ्जस्य समानं वा मौक्तिकं मध्यमं विदुः ॥
आरभ्य विंशतितमात् क्रमात् पञ्चदशावधि ।
लघ्वाख्याः कथिता मुक्ता मूल्यञ्च तदनुक्रमात् ॥
कलञ्जद्वयमानेन यदेकं मौक्तिकं भवेत् ।
न धार्य्यं नरनाथेषु देवयोग्यममानुषम् ॥
इत्थं विचार्य्य यो मुक्तां परिधत्ते नराधिपः ।
तस्यायुश्च यशो वीर्य्यं विपरीतमतोऽन्यथा ॥"
इति युक्तिकल्पतरुः ॥
(अथास्याः शोधनम् ।
"खेदयेद्दोलिकायन्त्रे जयन्त्याः स्वरसेन च ।
मणिमुक्ताप्रवालानि यामैकं शोधनं भवेत् ॥"
इति वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधिकारे ॥) अन्यत् मुक्ताफलशब्दे द्रष्टव्यम् ॥* अथ मुक्ताधारणविधिः ।
"रेवत्यश्विधनिष्ठासु हस्तादिषु च पञ्चसु ।
शुक्लविद्धमसुक्तानां परिधानं प्रशस्यते ॥"
इति समयप्रदीपः ॥

मुक्ताकलापः, पुं, (मुक्तानां कलापः समूहोऽत्र ।) मुक्ताहारः । यथा,—
"हारो मुक्तातः प्रालम्बमुक्तकलापावलीलताः ।"
इति हेमचन्द्रः । ३ । ३२२ ॥
(यथा, कुमारसम्भवे । १ । ४२ ।
"कण्ठस्य तस्याः स्तनवन्मुखस्य
मुक्ताकलापस्य च निस्तलस्य
अन्योन्यशोभाजननादभूत
साधारणो भूषणभूष्यभावः ॥")

मुक्तागारं, क्ली, (मुक्तायाः आगारमिव । मुक्तोत्पादनाधारत्वादस्य तथात्वम् ।) शुक्तिः । इति शब्दचन्द्रिका ॥ मौक्तिकगृहञ्च ॥

मुक्तापुष्पः, पुं, (मुक्ता इव पुष्पाण्यस्य ।) कुन्दवृक्षः । इति राजनिर्घण्टः ॥ (गुणादिविवृतिरस्य कुन्दशब्दे द्रष्टव्या ॥)

मुक्ताप्रसूः, स्त्री, (मुक्तां प्रकर्षेण सूते जनयतीति प्र + सू + क्विप् ।) शुक्तिः । इति राजनिर्घण्टः ॥

मुक्ताप्रालम्बः, पुं, (मुक्तानां प्रालम्बः हारभेदः ।) मुक्ताहारः । इति हेमचन्द्रः । ३ । ३२२ ॥

मुक्ताफलं, क्ली, (मुक्ताफलमिव ।) कर्पूरम् । (मुक्तैव फलमिव ।) मौक्तिकम् । (यथा, मुग्धबोधटीकायां कारके । ऊनार्थादित्यत्र । दुर्गादासधृतम् ।
"मुक्ताफलाय करिणं हरिणं पलाय
सिंहं निहन्ति भुजविक्रमसञ्चयाय ॥")
नवनीतफलम् । इति मेदिनी । ले, १६६ ॥
(मौक्तिकार्थस्य पर्य्यायः ।
"मौक्तिकं शौक्तिकं मुक्ता तथा मुक्ताफलञ्च तत् ।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ यथास्य भस्मकरणविधिः ।

मुक्ताफ़

"मुक्ताफलानि शुद्धानि खल्वे पिष्ट्वा पुटेष्वनुः
एवं भस्मत्वमाप्नोति ——— ॥"
इति वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधिकारे ॥) वैद्यकृतग्रन्थविशेषः । यथा,—
"मुक्ताफलेन ग्रन्थेन सङ्गागवतशुक्तिना ।
भक्तिस्वात्यम्बुना सुग्धमार्कण्डेयशिशुश्रिया ॥
विद्वद्वनेशुश्रियेण भिषक्केशवसूनुना ।
हेमाद्रिर्बोपदेवेन मुक्ताफलमचीकरत् ॥"
इति तस्य चतुर्थोपान्त्यश्लोकद्वयम् ॥
अथ मुक्ताफल परीक्षा ।
"द्विपेन्द्रशीर्षोद्भवराहशङ्ख-
मत्स्याहिशुक्त्युद्भववेणुजानि ।
मुक्ताफलानि प्रथितानि लोके
तेषाञ्च शुक्त्युद्भवमेव भूरि ॥
तच्चैव चैकस्य हि मूलमात्रा
निविश्यते रत्नपरस्य जातु ।
वेध्यन्तु शुक्त्युद्भवमेव तेषां
शेषाण्यवेध्यानि वदन्ति तज्ज्ञाः ॥
त्वक्सारनागेन्द्रतिमिप्रसूतं
यत् शङ्खजं यच्च वराहजातम् ।
प्रायो विमुक्तानि भवन्ति भासा
शुक्लानि माङ्गल्यतया तथापि ॥
या मौक्तिकानामिह जातयोऽष्टौ
प्रकीर्त्तिता रत्नविनिश्चयज्ञैः ।
कम्बुद्भवं तेष्वधमम्प्रदिष्ट-
मुत्पद्यते यच्च गजेन्द्रकुम्भात् ॥
स्वयोनिमध्यच्छवितुल्यवर्णं
शुक्तिं दृढत्कोलफलप्रमाणम् ।
उत्पद्यते वारणकुम्भमध्या-
दापीतवर्णं प्रभया विहीनम् ॥
ये कम्बवः शार्ङ्गसुखावमर्द-
पीतस्य शङ्खप्रवरस्य गोत्रे
मनङ्गजाश्चापि विमुद्गवंश्या-
स्ते मौक्तिकानां प्रभवाः प्रदिष्टाः ॥
पाठीनपृष्ठस्य समानवर्णं
मीनात् सुवृत्तं लघुनातिशुक्लम् ।
उत्पद्यते वारिचराननेषु
मत्स्याच्च ते मध्यचराः पयोधेः ॥
वराहदंष्ट्राप्रभवं प्रदिष्टं
तस्यैव दंष्ट्याङ्कुरतुल्यवर्णम् ।
क्वचित् कथञ्चित् स सुवः प्रदेशे
प्रजायते शूकरवद्विशिष्टः ॥
वर्षोपलानां समवर्णशोभं-
त्वक्सारपर्व्वप्रभवम्प्रदिष्टम् ।
ते वेणवो दिव्यजनोपभोग्ये
स्थाने प्ररोहन्ति न सार्व्वजन्ये ॥
भौजङ्गमं मीनविशुद्धवृत्तं
संस्थानतोऽत्युज्ज्वलवर्णशोभम् ।
नितान्तधौतप्रविकल्प्यमान-
निस्त्रिंशधारासमवर्णकान्ति ॥
प्राप्नोति रत्नानि महाप्रभावि
राज्यं श्रियं वा महतीं दुरापाम् ।

पात्रं हि नापुण्यकृतो भवन्ति
मुक्ताफलस्याहिशिरोभवस्य ॥
जिज्ञासया रत्नधनं विधित्सोः
शुभे मुहूर्त्ते प्रयतेः प्रयत्नात् ।
रत्नाविधानं सुमहद्विधाय
हर्म्यादिसिद्धिं क्रियते यदा तत् ॥
तदा महाडुन्दुभिमन्द्रघोषै-
र्विगुह्यनादैः स्फुरितान्तरालैः ।
पयोधराक्रान्तिविलम्बलम्बै-
र्घनैर्घनैर्वा ध्रियतेऽन्तरीक्षम् ॥
न तं भुजङ्गा न च यातुधाना
न व्याधयो नाप्युपसर्गदोषाः ।
हिंसन्ति यस्याहिशिरःसमुत्थं
मुक्ताफलं तिष्ठति पूज्यमानम् ॥
नाभ्येति मेघप्रभवं धरित्रीं
विवृद्धतां तद्विबुधा हरन्ति ।
अर्चिःप्रभानाद्दतदिग्विभाग-
मादित्यवद्दुःखविभाव्यविम्बम् ॥
तेनास्तिरस्कृत्य हुताशनेन्दु-
नक्षत्रतारागणप्रभवं समग्रम् ।
दिवा यथा दीप्तिकरं तथैव
तमोऽवगाढास्वपि तन्निशासु ॥
विचित्ररत्नद्युतिसारतोय-
चतुःसमुद्राभरणोपपन्ना ।
कृत्स्ना न वा स्यादिति निश्चयो मे
मूल्यं मही तस्य सुवर्णपूर्णा ॥
हीनोऽपि यस्तत्प्रभते कदाचिद्-
विपाकयोगान्महतः शुभस्य ।
सपत्नहीनां स महीं समग्रां
भुनक्ति तत्तिष्ठति यावदेव ॥
न केवलं तच्छुभकृन्नृपस्य
भाग्यैः प्रजानामपि तस्य जन्म ।
यद्योजनानां परितः सहस्रं
सर्व्वाननर्घान् विमुखीकरोति ॥
नक्षत्रमालेव दिवो विभूषणं
दन्तावली तस्य महासुरस्य ।
विचित्रवर्णेषु विशुद्धवर्णा
पयःसु पद्मैः पयसां पपात ॥
सम्पूर्णचन्द्रांशुकलापकान्ते-
र्मणिप्रवेकस्य महागुणस्य ।
तच्छुक्तिमप्सु स्थितमापवीच-
मासन् पुराण्यन्यभवानि यानि ॥
यस्मिन् प्रदेशेऽम्बुनिधौ पपात
सुचारु मुक्तामणिरत्नबीजम् ।
तस्मिन् पयस्योषधरावकीर्णे
शुक्तौ स्थितं मौक्तिकतामवाप ॥
सैंहलिकपारलौकिकसौरा-
ष्ट्रिकताम्रपर्णपारस्वाः ।
कौवेरपाण्ड्याहाटक-
हैमका इत्याकरास्त्रयौ ॥
शुक्त्युद्भवं नातिनिकृष्टवर्णं
प्रमाणसंस्थानगुणप्रभाभिः ।
उत्पद्यते वर्हिणपारसीक-
पातालौकान्तरसिंहलेषु ॥
चिन्त्या न तस्याकरजा विशेषा
रूपे प्रमाणे च यतेत विद्वान् ।
न च व्यवस्यास्ति गुणागुणेषु
सर्व्वत्र सर्व्वाकृतयो वसन्ति ॥
एकस्य शुक्तिप्रभवस्य मुक्ता-
फलस्य प्राणेन समुन्मितस्य ।
मूल्यं सहस्राणि तु रूपकाणां
त्रिभिः शतैरभ्यधिकानि पञ्च ॥
यन्मायकार्द्धेन ततो विहीनं
तत्पञ्चभागद्वयहीनमूल्यम् ।
यन्माषकांस्त्रीन् बिभृयात् सहस्रे
द्वे तस्य मूल्यं परमं प्रदिष्टम् ॥
अर्द्धाधिकौ द्वौ वहतोऽस्य मूल्यं
त्रिभिः शतैरभ्यधिकं सहस्रम् ।
द्विमाषकोन्मापितगौरवस्य
शतानि चाष्टौ कथितानि मूल्यम् ॥
अर्द्धाधिकं माषकमुन्मितस्य
सपञ्चविंशत्रितयं शतानाम् ।
गुञ्जाश्च षड् धारयतः शते द्वे
मूल्यं परं तस्य वदन्ति तज्ज्ञाः ॥
अर्धर्द्धसन्मापकृतं शतं स्यान्
मूल्यं गुणैस्तस्य समन्वितस्य ।
यदि्मोऽशभिर्भवेदूनं
धरणं तत्प्रवदन्ति दार्व्विकाख्यम् ॥
अधिकं दशभिः शतञ्च मूल्यं
समवाप्नोत्यपि वालिशस्य हस्तात् ।
द्विगुणैर्दशभिर्भवेदूनं
धरणं तद्भवकं वदन्ति तज्ज्ञाः ॥
नवसप्ततिमाप्नुयात् स्वमूल्यं
यदि न स्यादगुणसम्पदा विहीनम् ॥
त्रिंशता धरणं पूर्णं शिक्यं तस्येति कीर्त्यते ॥
चत्वारिंशद्भवेत्तस्याः परं मूल्यं विनिश्चयः ।
चत्वारिंशद्भवेच्छिक्यो विंशंमूल्यं लभेत सा ॥
षष्टिर्निकरशीर्षं स्यात्तस्य मूल्यं चतुर्दश ।
अशीतिर्नवतिश्चैव कुर्ष्येति परिकीर्त्तिता ।
एकादश स्यान्नव च तयोर्मूल्यमनुक्रमात् ॥
आदाय तत् सकलमेव ततोऽभ्रभाण्डं
तन्नीरजातरसयोजनया विपक्वम् ।
दृष्टं ततो मृदुतनूकृतपिण्डमूलैः
कुर्य्यादृषेष्टमनुमौक्तिकमाशु विद्वम् ॥
श्लक्ष्णप्रमत्स्यपुटमध्यगतन्तु कृत्वा
पश्चात् पचेत्तदनु ततश्च वितानपत्या ।
दुग्धे ततः पयसि तं विपचेत् सुधार्या
पक्वं ततोऽपि पयसा शुचि चिक्कणेन ॥
शुद्धं ततो विमलवस्त्रनिघर्षणेन
स्याद्मौक्तिकं विपुलसद्गुणकान्तियुक्तम् ।
याड्गिंगाद जगतां हि महाप्रभाव-
सिद्धौ विदग्धहिततत्परया दयालुः ॥
श्वेतकावसमं तारं हैमांशुशतयोजितम् ।
रसमध्ये प्रधार्य्येत मौक्तिकं देहभूषणम् ॥

एवं हि सिंहले देशे कुर्व्वन्ति कृषिला जनाः ।
यस्मिन् कृत्रिमसन्देहः कचिद्भवति मौक्तिके ॥
उष्णे सलवणे स्नेहे निशां तद्वासयेज्जले ।
व्रीहिभिर्मर्द्दनीयं वा शुष्कवस्त्रोपवेष्टितम् ॥
यत्तु नायाति वैवर्ण्यं विज्ञेयं तदकृत्रिमम् ॥
स्निग्धं प्रमाणवत् स्निग्धं गुरु स्वच्छं सुनिर्म्मलम् ।
तेजोऽधिकं सुवृत्तञ्च मौक्तिकं गुणवन्मतम् ॥
प्रमाणवद्गौरवरश्मियुक्तं
स्निग्धं सुवृत्तं समरुच्यवेधम् ।
चक्षुस्तरुण्यावहति प्रमोदं
यन्मौक्तिकं तद्गुणवत् प्रदिष्टम् ॥
एवं समस्तेन गुणोदयेन
यन्मौक्तिकं योगमुपागतं स्यात् ।
न तस्य भर्त्तारमवर्घजात
मेकोऽपि कश्चित् समुपैति दोषः ॥"

इति गारुडे ६८ अध्यायः ॥

मुक्तामुक्तः, त्रि, (मुक्तश्च अमुक्तश्चेति विशेषणयोर्द्वन्द्वम् ।) क्विन्नाक्विन्नः । यस्य प्रयोगो यत्र ग्रन्थे च प्रायो वर्त्तते । इति हलायुधः ॥

मुक्तालता, स्त्री, (मुक्ताभिर्लतेव ।) मुक्ताहारः इति हेमचन्द्रः । ३ । ३२२ ॥

मुक्तावली, स्त्री, (मुक्तानां व्यावल्यत्र) मुक्ताहारः । इत्यमरः । २।६।१०५ ॥ (मुक्तानामावली ।) मौक्तिकश्रेणी च ॥ (तालविशेषः । यथा, सङ्गीतदामोदरे ।

"खचयं सविरामान्तं नौ पुनः खचयं तथा ।
द्युतौगः खयुगं गश्च यत्र मुक्तावली तु सा ॥")

मुक्तास्फोटः, पुं, (मुक्तायां स्फोटः विकाशोऽत्र ।) शुक्तिः । इत्यमरः । १ । १० । २३ ॥

मुक्तास्फोटा, स्त्री, (मुक्तास्फोट + टाप् ।) शुक्तिः । इति राजनिर्घण्टः ॥

मुक्तिः, स्त्री, (मुच् + भावे क्तिन् ।) आत्यन्तिकदुःखनिवृत्तिः । इति नैयायिकाः ॥ नित्यसुखावाप्तिः । इति वैदान्तिकाः । शरीरेन्द्रियाभ्यां आत्मनो मुक्तत्वं मुक्तिः । इति भरतः । मोक्षः । तत्पर्य्यायः । कैवल्यम् २ निर्व्वाणम् ३ श्रेयः ४ निःश्रेयसम् ५ अमृतम् ६ मोक्षः ७ अपवर्गः ८ । इत्यमरः । १।५।६ ॥ अपुनर्भवः ९ स्थिरः १० अक्षरम् ११ । इति जटाधरः ॥ सा पञ्चविधा । सार्ष्टिः१ सालोक्यम् २ सारूप्यम् ३ सायुज्यम् ४ निर्व्वाणम् ५ । यथा,—

सार्ष्टिसारूप्यसालोक्यसामीप्यैकत्वमप्युत ।
दीयमानं न गृह्णन्ति विना मत्सेवनं जनाः ॥"

इति श्रीभागवतम् ॥

"मुक्तिस्तु द्विविधा साध्वि! श्रुत्युक्ता सर्व्वसम्मता ।
निर्व्वाणपददात्री च हरिभक्तिप्रदा नृणाम् ॥
हरिभक्तिस्वरूपाश्च मुक्तिं वाञ्छन्ति वैष्णवाः ।
अन्ये निर्व्वाणरूपाश्च मुक्तिमिच्छन्ति साधवः ॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २२ अध्यायः ॥

मुक्तिकरयोगो यथा,—

"[illegible]साङ्गमहायोगं मुक्तिमुक्तिकरं परम् ।
[illegible]।५।५६शमनं भक्त्यानुपठितं शृणु ॥

मुक्तिः

ममेति मूलं दुःखस्य न ममेति च निर्वृतेः ।
इत्तात्रेयो मूलकार्थं इममाह महामतिः ॥
अहमित्यङ्कुरोत्पन्नौ ममेति स्कन्धवान् महान् ।
गृहक्षेत्रोपशाखश्च पुत्रदारादिपल्लवः ॥
धनधान्यमहापत्रोऽनेककालेर्हि वर्द्धितः ।
पुण्यापुण्यसपुष्पश्च सुखदुःखमहाफलः ।
विधिवत् सुखशान्त्यर्थं जातोऽज्ञानमहातरुः ॥
संसाराध्वपरिश्रान्ता येऽच्छायां समाश्रिताः ।
भ्रान्तिज्ञानसुखासीनास्तेषामात्यन्तिकं कुतः ॥
येषु सत्सङ्गपाषाणनिघृतेन महातरुः ।
छिन्नो विद्याकुठारेण ते गता लयमीश्वरे ॥
प्राप्य ब्रह्मरसं पीतं नीरजस्कमकण्टकम् ।
प्राप्नुवन्ति परां प्राज्ञा ज्ञाननिर्वृत्तिमेव च ॥
मूर्त्तेन्द्रियमयं मूलं नत्वं राजा नचाप्यहम् ।
न तन्मात्रादिकं वाचा नैवान्तःकरणन्तथा ॥
कं वा पश्यसि राजेन्द्र ! प्रधानमिदमावयोः ।
मृतः परेऽस्मि चैवाज्ञः संजातोऽयं गुणात्मकः ॥
ममको दुःखमाप्नार्थं जातो मत्स्नोऽस्मसा यथा ।
एकत्वेऽपि पृथग्भावस्तथा चैवात्मनो नृप ! ॥
ज्ञानपूर्व्वाभियोगोऽतिज्ञानेन सह योगिनः ।
सा मुक्तिर्ब्रह्मणा चैक्यमनेकं पुत्र ! ते गुणैः ।
तदगृह्यं यत्र वसतिस्तद्ज्ञेयं येन जीवति ॥"

इति गारुडे २६० अध्यायः ॥*॥

अपि च ।

"हरिरात्मा न सन्देहो यदा तत् समजायत ।
तदा मुक्तः स संसारी विष्णोरेवात्मतां व्रजेत् ।
नान्यथा मुच्यते चात्मा भ्रमन् वै घटियन्त्रवत् ॥
पूर्व्वकर्म्मनिबद्धोऽपि सर्व्वयोनिषु नित्यशः ।
कूटस्थः पशुतां याति ह्यात्मज्ञानविवर्जितः ॥
कुत्रेन्नहं ममेतीदमेवं दुःखाय कल्पते ।
मूलंतोर्हि यथा कार्य्यं लिप्यते वै त्वनीश्वरः ॥
क्षीराधानादिभिर्यद्वद्भावाद्यं तद्वज्ज्ञानसे ।
चन्द्रकान्तमणिर्यद्वद् गृह्णीते सोपचान् गुणान् ।
सुखं दुःखं तथा क्षेमं संसरन् नूनमीश्वरः ॥
स्वप्ने यः पुरुषो नित्यमटते कर्म्मबन्धनात् ।
मन्यमानः सुखं दुःखं सोऽप्येव विप्र ! मुच्यते ॥
जगन्मुक्ते न सृष्टिः स्यादसक्ते वर्द्धते सदा ।
तस्माज्जगत्त्रयं विद्यात् ज्ञानं नाधिकमेव च ॥
यत्र तत्र स्थितो ज्ञानी परमाचरयित् सदा ।
विषयान्तरसक्तो वा याति देहे मृते हरिम् ॥
न तस्य प्रतिबन्धोऽस्ति यद्यनीहोऽपि लीलया ।
कुरुते गृह्णते नैव पद्मपत्रमिवाम्भसा ॥
यथा दुर्दिनसंघातं मेघवृन्दैर्व्यवस्थितम्
तद्विच्छुनिर्मलावस्थो ज्ञानी विषयसंस्थितः ॥
सर्व्वावस्थोऽपि मुच्येत भावयुक्तः परे पदे ।
जीवन्मुक्तः स मुक्तः स्यान्निद्राविरहितस्तु यः ॥
कर्त्ता हर्त्ता च भोक्ता च सर्व्वज्ञः सर्व्वगो हरिः ।
एकं स्वच्छन्दलीलस्य मुक्तिरित्यभिधीयते ॥
जीवमुक्तिमजानन्तो मुच्छिंताकारविग्रहाः ।
विषसुप्ता इवाभान्ति मृताश्चेतन्यवर्जिताः ॥

मुक्तिदं

निर्गुणः स तु विज्ञेयः सुखदुःखमतीतवान् ।
जीवनाप्तो भवेद्यत्र तत् सुखं निष्प्रयोजनम् ॥
मृत्पिण्डदण्डवन्मोक्षस्तन्मोक्षस्तु भवेदृथा ।
तिष्ठन्ति काष्ठवद्ये च संवित्तिपरिवर्जिताः ॥
ते च मायोदरे लीना जडान्धबधिरोपमाः ।
आकाशवद्भवेदात्मा विदेहो निष्प्रचेतनः ॥
अलं ह्यनेन मोक्षेण चेतनारहितेन च ।
वरमेव च संसारी विषयासक्तचेतनः ॥
सुखस्यानन्तरं दुःखं दुःखस्यानन्तरं सुखम् ।
सृजन्नात्मा उभौ पाशौ संसारे संव्यवस्थितः ॥
ईदृग्रं हि परं ज्ञानं वेदादीनामगोचरः ।
सुखस्य च फलं मुख्यं स्वर्गो चेह द्विजोत्तम ! ॥
यत्र वासः परे स्थाने सुखदुःखविवर्जितः ।
केवलं जीवनाप्तोऽयं प्रोक्तज्ञानमजानता ॥
चेतनारहितो ज्ञानमाकाशस्योऽप्यचेतनः ।
मृत्पिण्डदण्डलोष्टादिश्लिलापट्टकक्षुद्यवत् ॥
अथ श्रान्तो नरो यद्वत् सुप्तः सुखमश्नुते ।
बोध्यमानः सचेतापि सुखाद्दुःखं न मन्यते ॥*॥
कैषां मुक्तमिदं मोक्षः सुखमत्यन्तकेवलम् ।
तदहं संप्रवक्ष्यामि शृणुष्व गदतो मम ॥
दुःखानामागमो नास्ति यत्र सौख्यं निरन्तरम् ।
विद्यते तत् परं दृष्ट्वा योऽप्यानन्दसुखी भवेत् ॥
ब्रह्मज्ञानप्रविन्नाश्च स्वच्छन्दात्मबलान्विताः ।
न तेषां पुनरावृत्तिर्यान्ति विष्णुलयं बुधाः ।
अस्ति देवो हरिः शान्तः कारणोपाधवर्जितः ।
तं ज्ञात्वा तु भवेन्मुक्तिर्निर्म्मला काययोगिनः ॥
ब्रह्मा विष्णुश्च रुद्रश्च चन्द्रसूर्य्यादयः सुराः ।
न विभक्तिं शरीरस्य यान्ति मुक्तिर्न विद्यते ॥
तस्मादाराधनीयोऽपि संयमेन्द्रियगोचरः ।
विष्णुर्माया पतियों वै यदीच्छेन्मुक्तिमात्मनः ॥
नान्यच्च विद्यातपसो नान्यच्चेन्द्रियनिग्रहात् ।
नान्यच्च सर्व्वसंत्यागात् मोक्षं विन्दति मानवः ॥
तस्माद्धर्म्मसुखो भूत्वा संयम्यात्मानमात्मना ।
धर्म्मं कुर्य्यादिहायेनो धर्म्मात्मा सुखमेधते ॥
धर्म्मादेवाप्यते देही दारा: पुत्रा धनं तथा ।
धर्म्मात् स्वर्गश्च मोक्षश्च यदन्यदपि दुर्लभम् ॥
ऋषयो देवगन्धर्वाः स्वधर्म्ममनुगामिनः ।
स्वर्गे तिष्ठन्ति विप्रर्षे ! ततो यास्यन्ति सद्गतिम् ॥
धर्म्ममर्थश्च कामश्च मोक्षश्च ऋषिसत्तम ! ।
समाप्नोति नुमान्नित्यं नारायणपरायणः ॥"

इति वह्निपुराणम् ॥

(निरुक्तिर्यथा, सांख्यसूत्रम् । ६ । २० ।
"मुक्तिरन्तरायध्वस्तेर्न परः ।"
यथाच, अष्टावक्रसंहितायाम् । १ । २ ।
"मुक्तिमिच्छसि रे तात ! विषयान् विषवत्त्यज ।
क्षमार्ज्जवदयातोषसत्यं पीयूषवद्भज ॥")

मुक्तिदं, क्ली, (मुक्तिं ददातीति । मुक्ति + दा + कः ।) भगवन्नामविशेषः । यथा,—
"अल्पाक्षरञ्च वश्यर्थं महासारञ्च मुक्तिदम् ।
नानासिद्धिप्रदातारं परं चिन्तानुरञ्जकम् ॥
गुह्यात् गुह्यतरं चान्यन्नाम चाष्टाक्षरं परम् ।
मन्त्रं सुखसमुचार्य्यमशेषार्थप्रसाधकम् ॥

मुखं

प्राह नारायणायेति नमोऽन्ताश्चो नियोगतः ।
ओमित्येकाक्षरे मन्त्रे स्थितः सर्व्वगतो हरिः ।
माधवायेति वै नाम धर्म्मकामार्थमोक्षदम् ॥"

इति वह्निपुराणम् ॥

मुक्तिदातरि, त्रि ॥ (यथा, देवीभागवते १।२।१०।
"तां ध्यात्वा सगुणां मायां मुक्तिदां निर्गुणान्तथा ॥")

मुक्तिमण्डपः, पुं, (मुक्तिदायकः मण्डपः । यद्वा मुक्तेर्मण्डपः ।) विश्वेश्वरस्य दक्षिणपार्श्वस्थमण्डपः । यथा,—
"निमेषमात्रं स्थितचित्तवृत्ता-
स्तिष्ठन्ति ये दक्षिणमण्डपेऽत्र ।
अनन्यभावा अपि गाढ़मानसा
न ते पुनर्गर्भदशामुपासते ॥"

इति काशीखण्डम् ॥
श्रीजगन्नाथमन्दिरदक्षिणपार्श्वस्थमण्डपश्च ॥

मुक्तिमुक्तः पुं. (मुक्त्या मोचनेन मुक्तः हीनः ।) गृध्रकम् । इति रत्नमाला ॥

सुखं, क्ली, (खनति विदारयति अन्नादिकमनेन खन्यते विधात्रा सुखमनेति वेति । खन् + "हितखनेर्मुट् चोरात्तः ।" उणा० । ५ । २० । इति करणे अच् । स च हित् मुड़ागमश्च ।) शरीरावयवविशेषः । स तु सुखावयवम् ॥ (तन्निरुक्तिर्यथा,—
'प्रजाहेजा यतः खात तस्मादाहुर्मुखं बुधाः ।'
इत्यमरटीकाधृतम् ।)
कवयस्तु तदुपलक्षिते सप्तदशे प्रयुञ्जते । इति भरतः ॥ तत्तु गर्भस्थस्य पञ्चमासेर्भवति । इति सुखबोधः ॥ तत्पर्य्यायः । वक्त्रम् २ आस्यम् ३ वदनम् ४ तुण्डम् ५ आननम् ६ लपनम् ७ । इत्यमरः । २ । ६ । ८६ ॥ (यथा, नैषधचरिते ६ । ४४ ।
"सुखं विसृज्य श्वसितस्य धारया
दृषेव नासापथधावनश्रमः ।")
तस्य स्वरूपं यथा,—
'ओष्ठौ च दन्तमूलानि दन्ता जिह्वा च तालु च ।
गलो गलादि सकलं सप्ताङ्गं सुखमुच्यते ॥'

इति भावप्रकाशः ॥
रतिक्रियायां स्वस्यासुखस्य स्नेहात् स्वबालकसुखस्य च चुम्बने प्रगल्भत्वं यथा,—
"मक्षिका सन्तता धारा माज्जारो ब्रह्मविन्दवः ।
स्त्रीसुखं बालकसुखं न दुष्टं मनुरब्रवीत् ॥"

इति कर्म्मलोचनम् ॥ * ॥
निःसरणम् । इत्यमरः । २ । ३ । १६ ॥ तत्तु गृहस्य निष्क्रमणप्रवेशनवर्त्म । इति सर्व्वधरादयः । गृहादिद्वारप्रवेशः । इति स्वामी । द्वारमण्डपादेः प्रवेशानगमः । इति कौकटः । गृहाङ्गणादिनिःसरणपथः । इति रमानाथः । इत्यमरटीकायां भरतः ॥ प्रारम्भः ॥ (यथा रघुवंशे । ३ । १ ।
"अथेक्षितं भक्तुरमस्थितोदयं
सखीजनोद्वीक्षणकौतुकीसुखम् ।

निदानमिक्ष्वाकुकुलस्य यस्यते:
सुदक्षिणा दौर्हृदलक्षणं दधौ ॥"
"कौमुद्या: सुखं प्रारम्भम् ।" इति तट्टीकायां मल्लिनाथ:।) उपाय: ॥ सन्निविशेष: ॥ (यथा, दशरूपके । १ । २३ ।
"सुखं बीजसमुत्पत्तिर्नानार्थरसमम्भवा ।
अङ्गानि द्वादशैतस्य बीजारम्भसमन्वयात् ॥")
नाटकादे: शब्द:। इति मेदिनी । खे, ४ ॥ आद्यम् ॥ (यथा, रामायणे । २ । ५० । ७ ।
"अचक्षुर्विषयं प्रायाद् यथार्क: क्षणदासुखे ॥")
प्रधानम् ॥ (यथा, महाभारते । २ । ३८ । २७—२९ ।
"राजा सुखं मनुष्याणां नदीनां सागरो सुखम् ।
नक्षत्राणां सुखं चन्द्र आदित्यस्त्रिजगां सुखम् ॥
पर्व्वतानां सुखं मेरुर्गरुड: पततां सुखम् ।
सदैवकेषु लोकेषु भगवान् केशवो सुखम् ॥")
शब्द:। नाटक:। वेद:। इति शब्दरत्नावली ॥ (द्वारम् । यथा, रघुवंशे । ३ । २८ ।
"लिपेर्यथावद्ग्रहणेन वाङ्मयं
नदीसुखेनेव समुद्रमाविशत् ॥"
"नद्या सुखं द्वारम् । सुखन्तु वदने सुखारम्भे द्वाराभ्युपाययोरिति यादव:।" इति तट्टीकायां मल्लिनाथ: ॥ अग्रभाग:। यथा, हठयोगप्रदीपिकायाम् । ३ । ५ ।
"तस्मात् सर्व्वप्रयत्नेन प्रबोधयितुमीश्वराम् ।
ब्रह्मद्वारमुखे सुप्तां सुप्ताभ्यासं समाचरेत् ॥")
सुख:, पुं, डहु:। यथा,—
'लिक्कुचो लिक्कुचो तुत्त: खगवक्त्रो सुखो डहु:।'
इति शब्दचन्द्रिका ॥
सुखगन्धक:, पुं, (सुखे गन्ध: अस्मात् । कप् ।) पलाण्डु:। इति राजनिर्घण्ट: ॥
सुखघण्टा, स्त्री, (सुखे घण्टेव शब्दाढ्यत्वात् ।) क्षुलक्षुलीध्वनि:। इति त्रिकाण्डशेष: ॥
सुखचीरी, स्त्री, (सुखस्य चीरं वस्त्रविशेष इव । सुखचीर+स्वार्थे ङीष् ।) जिह्वा। इति शब्दमाला ॥
सुखज:, पु, (सुखात् जायते इति । जन्+ड:।) ब्राह्मण:। इति पुराणम् ॥ वक्त्रजाते त्रि ॥
सुखतीयं, त्रि, (सुखस्य इति । सुख+तसिल् । सुखत:। तत: "सुखपार्श्वशब्दाभ्यां तसन्ताभ्यामीयप्रत्ययो वक्तव्य:।" ४।३।६०। इत्यस्य वार्त्तिकोक्त्या ईय:। "सुखपार्श्वतसोर्लोपश्च ।" ३।२।१९८। इत्यत्र काशिकोक्तेश्च टिलोप:।) सुखसम्बन्धि। इति सिद्धान्तकौमुदी ॥
सुखदूषण:, पुं, (सुखं दूष्यते अनेनेति । दुष्+णिच्+करणे ल्युट् ।) पलाण्डु:। इति राजनिर्घण्ट: ॥
सुखदूषिका, स्त्री, (सुखं दूषयति अवद्यं करोतीति । दुष+णिच्+खुल् टाप् अत इत्वञ्च।) सुखजातक्षुद्ररोगविशेष:। वयसफोड़ा इति भाषा। तल्लक्षणमाह ।
श्लाक्ष्णश्लीकण्टकप्रख्या: कफमारुतपित्तजा:।
जायन्ते पिड़का यूनां शेयास्ता सुखदूषिका: ॥"
प्रख्या: सदृश्य:। एता यूनामेव सुखे भवन्ति स्वभावात् ॥ * ॥ अथ तच्चिकित्सा ।
"अङ्गुलस्य चतुर्थांशो सुखे लेप: कनिष्ठक: ।
मध्यमस्तु त्रिभाग: स्यादुत्तमोर्द्धाङ्गुलो भवेत् ॥
स्थितिकालोऽपि तस्योक्तो यावत् कल्को न शुष्यति ।
शुष्कस्तु गुणहीन: स्यात्तथा दूषयति त्वचम् ॥"
सुखलेपमाह ।
"लोध्रधान्यवचालेपस्तारुण्यपिड़कापह: ।
तद्वल्लोचनायुक्तं मरिचं सुखलेपनम् ॥
सिद्धार्थकवचालोध्रै: सैन्धवेच्छ प्रलेपनम् ।
वमनञ्च निहन्त्याशु पिड़कां यौवनोद्भवाम् ॥
केवला: पयसा पिष्टास्त्रीक्ष्णा: श्लाक्ष्णास्त्रिकण्टका: ।
व्यालिप्तं त्राहमेतेन भवेत् पद्मोपमं सुखम् ॥"
इति भावप्रकाश: ॥
सुखधावनं, क्ली, (सुखस्य धावनं । धावुञ् गवे ल्युट् ।) आस्यप्रक्षालनम् । सुखधोया इति भाषा । यथा, भावप्रकाशे ।
"पटोलनिम्बजम्बाम्रमालतीवनपल्लवै: ।
पञ्चपल्लवज: श्रेष्ठ: कषायो सुखधावने ॥"
सुखधौता, स्त्री, (सुखं धौतं मार्জ্জितमनेनेति । धाव्+कर्म्मणि+क्त: स्त्रियां टाप् ।) ब्राह्मणयष्टिका। इति शब्दचन्द्रिका ॥
सुखनिवासिनी, स्त्री, (सुखे निवसति या सा । नि+वस्+णिनि: स्त्रियां ङीप् । वाणीरूपत्वादस्यास्तथात्वम् ।) सरस्वती। इति केचित् ॥
सुखनिरीक्षक:, पुं, (सुखं निरीक्षते इति । निर्+ईक्ष्+खुल् । उदूयोगं विहायान्यसुखापेक्षित्वेनावस्थानादस्य तथात्वम् ।) अलस:। इति शब्दरत्नावली ॥
सुखपूरणं, क्ली, (सुखं पूर्य्यते अनेनेति । पूर्+करणे ल्युट् ।) गवेधुक:। इति वैद्यकम् ॥
सुखप्रिय:, पुं, (सुखस्य प्रिय:।) नारङ्ग:। इति भावप्रकाश: ॥ वक्त्ररोचके, त्रि ॥ (यथा, सुश्रुते सूत्रस्थाने ४५ अध्याये ।
"सुखप्रिय: स्थिरमदो विज्ञेयोऽनिलनाशक:।")
सुखभूषणं, क्ली, (सुखं भूषयति रक्षित्वालङ्करोतीति । भूष्+णिच्+ल्यु:।) ताम्बूलम्। इति वैद्यकम् ॥
सुखमण्डनक:, पुं, (सुखं मण्डयति भूषयतीति । मण्ड्+ल्यु: स्वार्थे कन् ।) तिलकवृक्ष:। इति राजनिर्घण्ट: ॥ आस्यभूषके, त्रि । (सुखमण्डनमप्यत्र ॥)
सुखमोद:, पुं, (सुखस्य मोद: हर्ष: अस्मात् ।) श्लोभाञ्जन:। इति राजनिर्घण्ट: ॥
सुखयन्त्रणं, क्ली, (सुखं अश्वादीनां यन्त्र्यते सङ्कोच्यते येनेति यत्रि सङ्कोचने+करणे ल्युट् ।) कविका। यथा,
"कवी खलीनं स्यात्कविका कवियं सुखयन्त्रणम् ।"
इति हेमचन्द्र:। ४। ३१६ ॥
सुखर:, त्रि, (सुखं अस्यास्तीति । सुख+उषसुषिसुष्कमधो र:।" ५। २। १०७। इत्यत्र "रप्रकरणे खसुखकृच्छ्रेभ्य उपसंख्यानम् ।" इति काशिकोक्त्या सर्व्वस्मिन् वक्तव्ये र:। "निन्दितं सुखमस्यास्तीति र:।"इत्यमरटीका।) अप्रियवादी। तत्पर्य्याय:। दुर्मुख: २ अवद्यसुख: ३। इत्यमर:। ३। १। ३६ ॥ (यथा,—
"एका भार्य्या प्रकृतिसुखरा चञ्चला च द्वितीया ।"
इत्युद्भट: ॥
शब्दायमान:। यथा, मृच्छकटिकनाटके १ अङ्के ।
"त्वां सूचयिष्यति तु माल्यसमुद्भवोऽयं
गन्धश्च भीरु ! सुखराणि च नूपुराणि ॥"
अग्रयायी। यथा, हितोपदेशे ।
"यदि कार्य्ये विपत्ति: स्यान् सुखरस्तत्र हन्यते ॥")
सुखर:, पुं, (सुख+र:।) काक:। शब्द:। इति राजनिर्घण्ट: ॥
सुखरोग:, पुं, (सुखस्य रोग:।) वक्त्रामय:। (यथा, मार्कण्डेये । ९५ । ३५ ।
"पङ्गुत्वं बधिर: कुष्ठी यक्ष्माणं च प्रपीड़ित: ।
सुखरोगाक्षिरोगैश्च गुदरोगैश्च बाध्यते ॥")
तच्च सुखस्य स्वरूपमाह ।
"ओष्ठौ च दन्तमूलानि दन्ता जिह्वा च तालु च ।
गलो गलादि सकलं सप्राङ्गं सुखमुच्यते ॥"
अथ सुखरोगाणां संख्यामाह ।
'स्युरष्टावोष्ठयोर्दन्तमूले तु दश षट् तथा ।
दन्तेष्वष्टौ रसज्ञायां पञ्च स्युर्नव तालुनि ॥
कण्ठे त्वष्टादश प्रोक्तास्तथ: सर्व्वसरा: स्मृता: ।
एवं सुखामया: सर्व्वे सप्तषष्टिर्मता बुधै: ॥'
सुखरोगाणां निदानान्याह ।
'अनूपपिशितक्षीरदधिमाषादिसेवनात् ।
सुखमध्ये गदान् कुर्य्यु: कृद्धा दोषा: कफोत्तरा: ।
तच्चौष्ठरोगा: ।
तेषां निदानपूर्व्विकां संख्यामाह ।
'पृथग्दोषै: समस्तैश्च रक्तजो मांसजस्तथा ।
मेदोजश्चाभिघातोत्थ एवमष्टौष्ठजा गदा: ॥'
तत्र वातिकस्य लक्षणमाह ।
'कर्कशौ परुषौ रूक्षौ क्षुण्णौ तीव्रसुगन्धिनौ ।
दाल्येते परिपाट्येते ओष्ठौ मारुतकोपत: ॥'
परुषौ रूक्षौ। दाल्येते विदार्य्येते। परिपाट्येते किञ्चिद्विदीर्णत्वौ क्रियेते ॥ पैत्तिकमाह ।
'पीयेते पिड़काभिस्तु सरुजाभि: समन्तत: ।
सदाहपाकपिड़कौ पीताभासौ च पित्तत: ॥'
श्लैष्मिकमाह ।
'सवर्णाभिस्तु पीयेते पिड़काभिरवेदनौ ।
कण्डूमन्तौ कफादोष्ठौ पिच्छिलौ शीतलौ गुरू ॥'
सान्निपातिकमाह ।
'सकृत् क्षुण्णौ सकृत् पीतौ सकृत् श्वेतौ तथैव च
सन्निपातेन विज्ञेयावनेकपिड़कान्वितौ ॥'

रक्तजमाह ।
खर्जूरफलवर्णाभिः पिडकाभिर्निपीडितौ ।
रक्तोपसृष्टौ रुधिरं स्रवन्तौ श्लेष्मितप्रभौ ॥'
मांसजमाह ।
'मांसदुष्टौ गुरू स्थूलौ मांसपिण्डवदुन्नतौ ।
जन्तवश्चात्र सर्पन्ति नरस्योभयतो मुखात् ॥'
जन्तवः कृमयः । सर्पन्ति वर्द्धन्ते । मुखादुभयतः सङ्कराद्योः ॥ * ॥ मेदोजमाह ।
'सर्पिर्मण्डप्रतीकाशो मेदसा कण्डरो गुरुः ।
स्वच्छस्फटिकसङ्काशमासावं स्रवतो भृशम् ॥'
अभिघातजमाह ।
'क्षतजाभौ विदीर्येते पीड्येते चाभिघातजः ।
मथितौ च समाख्यातावोष्ठौ कण्डूसमन्वितौ ॥'
मथितौ मन्थितविव । अतएव क्षतजाभौ रुधिराभाविति सङ्गतम् ॥ * ॥ अथौष्ठरोगाणां चिकित्सा ।
'गलदन्तमूलदशनच्छदेषु रोगाः कफाम्रभूयिष्ठाः ।
तस्मादेतेष्वसक्तद्रधिरं विस्रावयेदुदृष्टम् ॥
चतुर्विधेन स्नेहेन मधूच्छिष्टयुतेन च ।
वातघ्नैरभ्यङ्गनं कुर्यान्नाड्यास्वेदश्च बृंहितमान् ॥'
चतुर्विधेन स्नेहेन तैलघृतवसामज्जरूपेण ।
वेधं शिराणां वमनं विरेकं
तिक्तस्य पानं रसभोजनञ्च ।
प्रीताः प्रदेहाः परिषेचनञ्च
पित्तोपसृष्टेष्वधरेषु कुर्य्यात् ॥
शिरोविरेचनं धूमः स्वेदः कवल एव च ।
क्षते रक्ते प्रयोक्तव्यं ओष्ठकोपे कफात्मके ॥
मेदोजे स्वेदिते भिन्ने श्लेष्मिते कवलो हितः ।
प्रियङ्गु त्रिफला लोध्रं सक्षौद्रं प्रतिसारणम् ॥'
प्रतिसारस्य विधिमाह ।
'दन्तशिक्षासुखानां यच्चूर्णकल्कावलेहनैः ।
घृतेर्घर्षणमङ्गुल्या तदुक्तं प्रतिसारणम् ॥
ओष्ठरोगेष्वशेषेषु दृष्ट्वा दोषमुपाचरेत् ।
तेषु व्रणत्वं यातेषु व्रणवत् समुपाचरेत् ॥'
अथ दन्तवेष्टरोगाः । तत्र दन्तवेष्टरोगाणां नामानि संख्यामाह ।
'श्लीपादौ गदितः पूर्वं दन्तपुप्पुटकस्तथा ।
दन्तवेष्टः श्लेष्मिरश्च महाश्लेष्मिर एव च ॥
ततः परिदरः प्रोक्तस्ततस्तूपकुशः स्मृतः ।
वेदर्भश्च ततः प्रोक्तः खलिवर्द्धन एव च ॥
अधिमांसकनामा च दन्तनाड्यश्च पञ्च च ।
दन्तविद्रधिरप्यत्र दन्तवेष्टेषु षोड्श ॥'
तत्र श्लीपादस्य लक्षणमाह ।
'शोणितं दन्तवेष्टेभ्यो यत्राकस्मात् प्रवर्त्तते ।
दुर्गन्धीनि सलक्षाणि उत्क्लेदीनि स्फुटानि च ॥
दन्तमांसानि शीर्य्यन्ते पचन्ति च परस्परम् ।
श्लीपादो नाम स व्याधिः कफशोणितसम्भवः ॥'
दन्तवेष्टेभ्यः दन्तवेष्टनमांसेभ्यः । व्यकस्मात् अभिघातं विना शीर्य्यन्ते पतन्ति । पचन्ति च परस्परं पाकोन्मुखा मांसानि शोणितं पचन्ति शोणितं मांसानि पचति ॥ दन्तपुप्पुटमाह ।
'दन्तयोरन्तरे वा यत्र श्वयथुर्जायते महान् ।
दन्तपुप्पुटको नाम स व्याधिः कफरक्तजः ॥'
दन्तवेष्टमाह ।
'स्रवन्ति पूयं रुधिरं चला दन्ता भवन्ति च ।
दन्तवेष्टः स विज्ञेयो दुष्टशोणितसम्भवः ॥'
अत्र दन्तमूलानीति कर्तृपदमध्याहरणीयम् ॥
श्लैष्मिरमाह ।
'श्वयथुर्दन्तमूलेषु रुजावान् कफवातजः ।
लालास्रावी कण्डुरश्च विज्ञेयः श्लैष्मिरो गदः ॥
महाश्लैष्मिरमाह ।
'दन्ताश्चलन्ति वेष्टेभ्यस्तालु चाप्यवदीर्य्यते ।
यस्मिन् स सर्व्वजो व्याधिर्महाश्लैष्मिरसंज्ञकः ॥'
तालु चाप्यवदीर्य्यते चकारोन्नेयः दन्तवेष्टौ चाप्यवदीर्य्येते । सप्तरात्रान् मारकत्वायं यत आह भोजः । महाश्लैष्मिर इत्येष सप्तरात्रान् निहन्त्यसून् ॥ * ॥ परिदरमाह ।
'दन्तमांसानि शीर्य्यन्ते यस्मिन् स्रवति चाप्यसृक् ।
पित्तास्रकफजो व्याधिर्ज्ञेयः परिदरो हि सः ॥'
उपकुशमाह ।
'वेष्टेषु दाहः पाकश्च ताभ्यां दन्ताश्चलन्ति हि ।
व्याघट्टिताः प्रस्रवन्ति शोणितं मन्दवेदनम् ॥
व्याध्यायते शृते रक्ते सुखं पूति च जायते ।
यस्मिन्नुपकुशः स स्यात् पित्तरक्तसमुद्भवः ॥'
व्याघट्टिताः घृष्टाः ॥ * ॥ वेदर्भमाह ।
'घृष्टेषु दन्तमूलेषु संरम्भो जायते महान् ।
चलन्ति च रदा यस्मिन् स वेदर्भोऽभिघातजः ॥'
संरम्भः शोथः । चलन्ति चेति चकाराद्दिनादाहपाकाः ॥ * ॥ खलिवर्द्धनमाह ।
'मारुतेनाधिको दन्तो जायते तीव्रवेदनः ।
खलिवर्द्धनमंज्ञोऽसौ संजाते रुक् प्रशाम्यति ॥'
सञ्जाते दन्ते ॥ * ॥ अधिमांसकमाह ।
'क्षतेन पश्चिमे दन्ते महान् शोथो महारुजः ।
लालास्रावी कफक्लेदी विज्ञेयः सोऽधिमांसकः ॥
क्षतेन क्षतभवे पश्चिमे दन्ते ॥ * ॥ पञ्चदन्तनाड्यराह ।
'दन्तमूलगता नाड्यः पञ्च ज्ञेया यथेरिताः ।'
यथेरिता यथा नाड्यस्त्रयो वातपित्तकफसन्निपातागन्तुनिमित्ताः पञ्चनाड्यः कथितास्तथाचापीत्यर्थः ॥ * ॥ दन्तविद्रधिमाह ।
'दन्तमांसमलैः सास्रैर्वाय्वान्तःश्वयथुर्महान् ।
सदाहरुक् सवेद्विन्नः पूयास्रं दन्तविद्रधिः ॥'
दन्तमांसमलैः दन्तवेष्टगतदोषैः । सास्रैः सरक्तैर्हेतुभिः ॥ * ॥ अथ दन्तवेष्टरोगाणां चिकित्सा ।
'श्लीपादे घृतरक्ते तु तोये नागरसर्षपान् ।
निष्काथ्य त्रिफलाक्वाथेऽपि कुर्य्यान्मुखधारणम् ॥
'कासीससोधक्षणामनःशिलासक्रियङ्गुतेजाह्वाः ।
एषां चूर्णं मधुयुक् श्लीपादे पूतिमांसहरम् ॥'
तेजाह्वा तेजवल्कल इति लोके ।
'तैलं घृतं वा वातघ्नं श्लीपादे संप्रशस्यते ।' * ।
'दन्तपुप्पुटके कार्य्यं तरुणे रक्तमोक्षणम् ॥
सपल्लवयवः क्षारः सक्षौद्रः प्रतिसारणम् ।
शिरोविरेकश्च हितो नस्यं स्निग्धश्च भोजनम् ॥
विस्राविते दन्तवेष्टे व्रणवत् प्रतिसारयेत् ।
लोध्रपत्तङ्गमधुकलाक्षाचूर्णैर्मधुप्लुतैः ॥'
प्रतिसारयेत् अङ्गुल्या घर्षयेत् । पत्तङ्गं चोचकं इति लोके ।
'गण्डूषे क्षीरिणो योज्याः सक्षौद्रघृतशर्कराः ।
चलदन्तस्थैर्यकरं कार्य्यं वकुलचर्व्वणम् ॥
भद्रमुस्ताभयाधोपविड्भारिष्टपल्लवैः ।
गोमूत्रपिष्टैर्गुटिकां क्षायाशुष्कां प्रकल्पयेत् ॥
तां निधाय मुखे श्लोथशूलदन्तातुरो नरः ।
नातःपरतरं किञ्चिच्चलदन्तस्य भेषजम् ॥'
भद्रमुस्तादिवटिका ।
'तुला घृतं नीलसहाचरस्य
द्रोणाम्भसा संश्रपयेद्यथावत् ।
ततश्चतुर्भागरसेन तैलं
पचेच्छनैरर्द्धपलप्रमाणैः ॥
कल्कैरनन्ताखदिरारिमेद-
जङ्घाम्बयष्टीमधुकोत्पलानाम् ।
तत्तैलमाश्वेव घृतं सुखेन
स्थैर्य्यं दिजानां विदधाति सद्यः ॥'
नीलसहाचरः नीलपुष्पकटरेया । अम्बष्ठा दुरालभा तदलाभे यवासो ग्राह्यः । अरिमेदो दुर्गन्धखदिरः । महाचराद्यतैलम् ॥ * ॥
'श्लैष्मिरे घृतरक्ते तु लोध्रसत्कारसाञ्जनैः ।
सक्षौद्रैः प्रस्थते लेपो गण्डूषे क्षीरिणो हितः ॥
क्रियां परिदरे कुर्य्याच्छीताद्योक्तां विचक्षणः ।
संशोध्योभयतः कार्यं शिरश्चोपकुशे तथा ॥
काकोडुम्बरिकाप्लक्षैर्व्रणं विस्रावयेद्भिषक् ।
लवणैः क्षौद्रयुक्तैश्च सक्षौद्रैः परिसारयेत् ॥'
'शस्त्रेणोत्कृत्य वै दर्भं दन्तमूलानि शोधयेत् ।
ततः क्षारं प्रयुञ्जीत क्रियाः सर्व्वाश्च शीतलाः ॥
उद्धृत्याधिकदन्तन्तु ततोऽग्निमिवचारयेत् ।
कृमिदन्तकवच्चात्र विधिः कार्य्यो विजानता ॥'
इयं खलिवर्द्धनस्य चिकित्सा ॥ * ॥
'छित्त्वाधिमांसं सक्षौद्रैरेतैश्चूर्णैरुपाचरेत् ।
वचातेजोवतीपाठाखल्लिकायावशूकजैः ॥'
तेजोवती तेजवल्कलं स्वर्णजीवन्तीति च ।
'क्षौद्रद्वितीयापिप्पल्यः कवले चात्र कीर्त्तिताः ।
पटोलनिम्बत्रिफलाकषायश्चात्र धावने ॥' *॥
'नाड्यव्रणहरं कर्म्म दन्तनाड्यां कारयेत् ।
यद्दन्तमध्ये जायेत नाड्यदन्तं तदुद्धरेत् ॥
छित्त्वा मांसानि शस्त्रेण यदि नोपरितो भवेत् ।
उद्धृत्य च दहेच्चापि क्षारेण ज्वलनेन वा ॥
भिनत्त्युपेक्षिते दन्ते हनूकास्थिगतं ध्रुवम् ।
समूलं दशनं तस्मादुद्धरेद्यत्नमस्थि च ॥
उद्धृते तूत्तरे दन्ते शोणितं प्रस्रवेदति ।
रक्ताभिषेकात् पूर्व्वोक्ता घोरा रोगा भवन्ति हि ॥
काणः संजायते जन्तुरर्दितं तस्य जायते ।
चलमप्युत्तरं दन्तमतो नैवोद्धरेद् भिषक् ॥"
धावनं खादिमदनस्वादुकण्टकखादिरैः ।"
कषायैरिति शेषः ।
क्षायैर्नालिमदनकटुकी-स्वादुकण्टकैः ।

'मञ्जिष्ठालोध्रखदिरपलाशैश्चापि यत् क्वथितम्।
तैलं तन्नस्यार्थितं तत्र हन्यात् दन्तगतां गतिम्॥'
जात्यादितुत्थस्य कषायेण मञ्जिष्ठादितुत्थस्य च कषायेण तैलमिदं पचेत्। जातिः चमेली इति लोके। तस्याः पत्रं ग्राह्यम्। मदनो धुत्तुरकस्यापि पत्रमत्र ग्राह्यम्। करञ्जो बृहत्करञ्जः तस्या मूलं ग्राह्यम्। स्वादुकण्टकोगोक्षुरः तस्य पञ्चाङ्गं ग्राह्यम्। जात्यादितैलम्॥ * ॥

'विद्रध्युक्तं विधिं युक्तं विदध्याद्दन्तविद्रधौ।
शस्त्रकर्म्म नरस्तत्र कुशलेनैव कारयेत्॥'*॥

अथ दन्तरोगाः। तत्र रोगाणां नामानि संख्यामाह।

'दालनः कथितः पूर्व्वं क्रिमिदन्तक एव च।
प्रोक्तो भञ्जनको दन्तहर्षो वै दन्तशर्करा॥
कपालिकाच कथिता श्यावदन्तक एव च।
करालसंज्ञ इत्यष्टौ दन्तरोगाः प्रकीर्त्तिताः॥'

तत्र दालनस्य लक्षणमाह।

'दीर्य्यमाणेष्विव रुजा यत्र दन्तेषु जायते।
दालनो नाम स व्याधिः सदागतिनिमित्तजः॥'

क्रिमिदन्तकमाह।

'क्रव्यच्छिद्रचलस्रावी ससंरम्भो महारुजः।
अनिमित्तरुजो बालात स ज्ञेयः क्रिमिदन्तकः॥'

ससंरम्भः दन्तमूलशोथयुक्तः। तत्रैव स्रावो वोढव्यः। अनिमित्तरुजः अवघट्टनादिनिमित्तं विनैव महारुजावान्॥ * ॥ भञ्जनकमाह।

'वक्रं वक्रं भवेद्यत्र दन्तभङ्गश्च जायते।
कफवातकृतो व्याधिः स भञ्जनकसंज्ञकः॥'

दन्तहर्षमाह।

'प्रीतरूक्षप्रवाताम्बुसङ्गानामसहा द्विजाः।
यत्र स्युर्व्वातपित्ताभ्यां दन्तहर्षः स कीर्त्तितः॥'

दन्तशर्करामाह।

'मलो दन्तगतो यस्तु कफश्चानिलशोषितः।
शर्करेव खरस्पर्शा सा ज्ञेया दन्तशर्करा॥'

शर्करा सिकता॥ * ॥ कपालिकामाह।

'कपालेष्विव दीर्य्यन्तु दन्तेषु समलेषु च।
कपालिकेति विज्ञेया दन्तक्षित् दन्तशर्करा॥'

कपालानि मृन्मयघटादिघटकानि तेष्विव। समलेषु दन्तेषु मलसहितदन्तावयवेषु दीर्य्यन्तु या दन्तशर्करा सा कपालिकेति विज्ञेया। सा कपालिका दन्तक्षित् दन्तनाशिनी॥*॥

श्यावदन्तकमाह।

'योऽस्रक्पित्तेन पित्तेन दग्धो दन्तस्त्वशेषतः।
श्यावतां नीलतां वापि गतः स श्यावदन्तकः॥'

दग्धः दग्ध इव॥ * ॥ करालमाह।

'अग्नेः अग्नेः प्रकुरुते यत्र दन्ताश्रितोऽनिलः।
करालान् विकटान् दन्तान् स करालो न सिध्यति॥'

करालान् भयानकान्। अयं सुश्रुतेनोक्तः। संग्रहकारेण गृहीतश्च॥*॥ अथ दन्तरोगाणां चिकित्सा।

'तेषां क्षाचारसं क्षीरं पृथक् प्रस्थमितं पचेत्।
द्रव्यैः प्रस्थमितैरेतैः क्वाथेश्चापि चतुर्गुणैः॥
लोध्रकट्फलमञ्जिष्ठापद्मकेशरपद्मकैः।
चन्दनोत्पलयष्ट्याह्वैस्तत्तैलं वदने धृतम्॥'

कट्फलस्थाने पत्तङ्ग इति च पाठः।

'दालनं क्रिमिदन्तालञ्च दन्तमोक्षं कपालिकाम्।
प्रीतादं पूतिवक्त्रञ्च विरुचिं विरमास्यताम्॥
हन्याद्दाशु गदानेतान् कुर्य्याद्दन्तानपि स्थिरान्।
लाक्षादिकमिदं तैलं दन्तरोगेषु पूजितम्॥'

लाक्षादितैलम्॥ * ॥

'जयेत् विस्रावणैः स्विन्नमचलं क्रिमिदन्तकम्।
तथावपीड्यैर्व्वानग्नैः स्नेहगण्डूषधारणैः॥
भद्रदार्व्वादिवर्षाभूलेपैः स्निग्धैश्च भोजनैः।
क्रिमिदन्तापहं कोष्णं क्षिप्तु दन्तान्तरे स्थितम्॥
वृहतीभूमिकदम्बौषधाङ्गुलकण्टकारिकाक्वाथः।
गण्डूषस्तैलयुतः क्रिमिदन्तकवेदनाशमनः॥
नीलौ वायसजङ्घा कटुतुम्बी मूलमेकैकम्।
सक्षारार्द्धं दशनविधृतं दशनक्रिमिपातनं प्राहुः॥
स्नेहानां कवलाः कोष्णाः सर्पिषश्चैवृतस्य च।
निर्व्यूहाच्चानिलघ्नानां दन्तहर्षप्रमर्दनाः॥'

चैवृतस्य सर्पिषः चिरृता पक्षस्य सर्पिषः कवल इत्यर्थः।

'स्नैहिकोऽत्र हितो धूमो नस्यं स्नैहिकमेव च।
पेया रसा यवाम्बश्च क्षीरमन्नानिकाघृतम्॥
शिरोविरिक्तिहितञ्चापि क्रमो यश्चानिलापहः।'

अत्र दन्तहर्षे।

'अक्षिप्तं दन्तमूलानि शर्करासुहरेद् भिषक्।
लाक्षाचूर्णैर्मधुयुतैस्ततस्तां प्रतिसारयेत्॥
दन्तहर्षक्रियां चात्र कुर्य्यान्निरवशेषतः।
कपालिका कृच्छ्रतमा तत्राप्येषा क्रिया हिता॥'

अत्र दन्तशर्करायाम्। एषा क्रिया दन्तहर्षक्रिया॥ * ॥

'फलान्यम्लानि प्रीतासु रूक्षान्नं दन्तधावनम्।
तथातिकठिनं भक्ष्यं दन्तरोगी विवर्ज्जयेत्॥'

अथ जिह्वारोगाः।

तत्र जिह्वारोगाणां निदाननामसंख्याः प्राह।

'वातजः पित्तजश्चापि कफजोऽलाससंज्ञकः।
उपजिह्विका च गदा जिह्वायां पञ्च कीर्त्तिताः॥'

तत्र वातजस्य लक्षणमाह।

'जिह्वानिलेन स्फुटिता प्रसुप्ता
भवेच्च शाकच्छदनप्रकाशा।'

स्फुटिता मनाग्विदीर्णा। प्रसुप्ता रसानभिज्ञतया सुप्तेव। शाकच्छदनप्रकाशा शाको मरुभूमिजो द्रुमस्तदत् कण्टकचिता॥ * ॥ पित्तजमाह।

'पित्तात् सदाहैरुपचीयते च
दीर्घैः सरक्तैरपि कण्टकैश्च॥'

अयं रोगो लोके जली इति ख्यातः॥ * ॥ कफजमाह।

'कफेन गुर्व्वी बहला चिता च
मांसोच्छ्रयैः शाल्मलिकण्टकाढ्यैः।
बहलाः स्थूलाः मांसोच्छ्रयैः मांसजकण्टकैः॥

अलासमाह।

'जिह्वानले यः श्वयथुः प्रगाढ़ः
सोऽलाससंज्ञः कफरक्तमूर्त्तिः।
जिह्वां स तु स्तम्भयति प्रदुष्टो
मृत्युं च जिह्वा भृशमेति पाकम्॥'

प्रगाढ़ः प्रकर्षेण गाढ़ो दारुणः। कफरक्तमूर्त्तिः कफरक्ताभ्यां मूर्त्तिर्यस्य कफरक्तज इत्यर्थः। जिह्वास्तम्भेन वातरुग्व्यञ्च बोद्धव्यः। भृशपाकेन पित्तञ्च। अतस्त्रिदोषोऽयमसाध्यत्वाच्च॥*॥

उपजिह्विकामाह।

'जिह्वाग्रूपश्वयथुर्हि जिह्वा-
सुत्तास्य जातः कफपित्तयोनिः।
प्रसेककण्डूपरिदाहयुक्तः
प्रकथ्यतेऽसावुपजिह्विकेति॥'

जिह्वाग्रूपो जिह्वाग्राकृतिः॥ * ॥ अथ जिह्वारोगाणां चिकित्सा।

'जिह्वागतविकाराणां शस्तं शोणितमोक्षणम्।
गुडूचीपिप्पलीनिम्बकवलः कटुभिः सुखः॥
ओष्ठप्रकोपेऽनिलजे यदुक्तं प्राक् चिकित्सितम्।
कण्ठेष्वनिलोत्थेषु तत्कार्य्यं भिषजा खलु॥
पित्तजे परिदग्धे तु निःस्रुते दुष्टशोणिते।
प्रतिसारणगण्डूषनस्यानि मधुरं हितम्॥
कण्टकेषु कफोत्थेषु लिखितेष्वर्च्चिः क्षये॥
पिप्पल्यादिर्मधुयुतः कार्य्यस्तु प्रतिसारणे॥
उपजिह्वान्तु संलिख्य क्षारेण प्रतिसारयेत्।
शिरोविरेकगण्डूषधूमैश्चैनामुपाचरेत्॥
शोषक्षाराभयाबद्धिचूर्णमेतत् प्रघर्षणम्।
उपजिह्वाप्रशान्त्यर्थमेभिस्तैलैश्च पाचयेत्॥'

अथ तालुरोगाः। तत्र तालुरोगाणां नामानि संख्यामाह।

'गलशुण्डी तुण्डिकेर्य्यधुषः कच्छप एव च।
तालुर्व्वुदश्च कथितो मांससंघात एव च।
तालुपुप्पुटनामा च तालुशोषस्तथैवच॥
तालुपाकश्च कथितास्तालुरोगा अमी नव॥'

तत्र गलशुण्डीलक्षणमाह।

'श्लेष्मास्रग्भ्यां तालुमूलात् प्रदुष्टो
दीर्घः श्लोथो भ्रातवस्तिप्रकाशः
श्वासाकासश्वासजुष्टं वदन्ति
वैद्या व्याधिं कण्ठशुण्डीति नाम्ना॥'

भ्रातवस्तिप्रकाशः वातपूरितचर्म्मपुटतुल्यः॥*॥ तुण्डिकेरीमाह।

'श्लोथः स्थूलस्तोददाहप्रपाकी
प्रागुक्ताभ्यां तुण्डिकेरी मता तु।'

प्रागुक्ताभ्यां श्लेष्मास्रग्भ्याम्। तुण्डिकेरी वृन्ताकीफलं तत्तुल्येति॥*॥ अधुषमाह।

'श्लोथस्तन्द्रा लोहितः श्लोथितोत्थो
ज्ञेयोऽधुषः सज्वरस्तीव्ररुक् च।'

कच्छपमाह।

'कूर्म्मोत्पन्नो वेदनोऽग्रीवजन्मा
रोगो ज्ञेयः कच्छपः श्लेष्मणा स्यात्।'

कूर्म्मोत्पन्नः मध्ये श्लोथं प्रान्ते नतः॥ * ॥ तालुर्व्वुदमाह।

'पद्माकारं तालुमध्ये तु शोथं
विद्यादक्तादर्जुदं पित्तलिङ्गम् ।'
पद्माकारं पद्मकर्णिकाकेशरैरिव पार्श्वतो दीर्घ-
मांसाङ्कुरैर्वेष्टितम् ॥ * ॥ मांससंघातमाह ।
'दुष्टं मांसं श्लेष्मणा नीरुजत्व
ताख्यन्तस्थं मांससंघातमाह ।'
तालुपुप्पुटमाह ।
'नीरुक् स्यायी कोलमात्रः कफात्मा
मेदोयुक्तः पुप्पुटस्तालुदेशे ॥
तालुशोथमाह ।
'शोथोऽत्यर्थं दीर्यते चापि तालु
श्वासो वातात्तालुशोथोऽयमुक्तः ।'
तालुपाकमाह ।
'पित्तं कुर्यात् पाकमत्यर्थघोरं
तालुन्येनं तालुपाकं वदन्ति ॥'
अथ तालुरोगाणां चिकित्सा ।
'कुष्ठौषधत्वक्षारसिन्धुकणापाटाक्षवैः सह ।
सक्षौद्रैर्भिषजा कार्यं गलशुण्डीप्रघर्षणम् ॥'
क्षवः केवचीमोघा शुण्डनखी इति च लोके ।
'अङ्गुष्ठाङ्गुलिसन्दंशेनाक्षम्य गलशुण्डिकाम् ।
छेदयेन्मण्डलाग्रेण निक्षोपरि तु संस्थिताम् ॥'
मण्डलाग्रेण शस्त्रविशेषेण ।
'अतिच्छेदात् सवेदरुक् ततो हीतोर्म्रियेत च ।
हीनच्छेदाच्छ्लेष्मशोथो लालासावो भ्रम-
स्तथा ॥
तस्मात् वैद्यः प्रयत्नेन दृष्टकर्मा विशारदः ।
गलशुण्डीं तु संछिद्य कुर्यात् प्राप्तामिमां
क्रियाम् ॥
पिप्पल्यतिविषाजाजीवचामरिचनागरैः ।
क्षौद्रयुक्तैः सलवणैस्तत्तां प्रतिसारयेत् ॥
वचामतिविषापाठाशारिवाकटुकरोहिणीः ।
पिष्ट्वाढ्यं पिचुमर्दस्य कवलं तत्र कारयेत् ॥
तुण्डिकेरीमधूके कुर्यात् संघाते तालुपुप्पुटे ।
अथ एव विधिः कार्यो विशेषः शस्त्रकर्मणि ॥
तालुपाके तु कर्तव्यं विधानं पित्तनाशनम् ।
स्नेहस्वेदौ तालुशोषे विधिश्चानिलनाशनः ॥'
अथ गलरोगाः । तत्र गलरोगाणां नामानि
संख्यामाह ।
रोहिणी षड्विधा प्रोक्ता कण्ठशालूक एव च ।
अधिजिह्वश्च वलयोऽलासनामैकवृन्दकः ॥
तनी वृन्दः शतघ्नी च गिलायुः कण्टविद्रधिः ।
गलौघः प्रस्तरश्चैव मांसतानस्तथैव च ॥
विदारी कण्ठदेशे तु रोगा अष्टादश स्मृताः ॥'
तत्र षण्णामपि रोहिणीनां सामान्यसंप्राप्ति
माह ।
'गलोनिषः पित्तकफौ च सङ्क्लिष्टौ
प्रदूष्य मांसञ्च तथैव शोणितम् ।
गलोपसंरोधकरैस्तथाङ्कुरै-
र्निपन्यसन् व्याधिवरं हि रोहिणीं ॥'
अनिषः सङ्क्लिष्टः प्रदुष्टः । पित्तकफौ च
सङ्क्लिष्टौ पित्तं वा सङ्क्लिष्टं कफो वा सङ्क्लिष्टः ।
ननु त्रयोऽपि सङ्क्लिष्टाः दूषणदोषजाया अवि-
वक्षमाणत्वात् ॥ * ॥ तस्य वातजाया लक्षण-
माह ।
'जिह्वासमन्तादभिवेदनास्तु
मांसाङ्कुराः कण्ठनिरोधनाः स्युः ।
सा रोहिणी वातकृता प्रदिष्टा
वातात्मकोपद्रवगाढ़युक्ता ॥'
समन्तात् जिह्वायाः सर्वतः । वातात्मकोपद्रव-
गाढ़युक्ता स्तम्भादिभिरतिशूलेन युक्ता ॥ * ॥
पित्तजामाह ।
'क्षिप्रोष्णमाक्षिप्रविदाहपाका
तीव्रज्वरा पित्तनिमित्तजाता ।'
श्लेष्मजामाह ।
'स्तोतोनिरोधिन्यपि मन्दपाका
गुर्वी स्थिरा सा कफसम्भवा तु ।'
स्तोतोऽत्र कण्ठस्रोतः ॥*॥ सन्निपातजामाह ।
'गम्भीरपाकित्यनिवार्यवीर्या
त्रिदोषलिङ्गा त्रिभवा भवेत् सा ।'
रक्तजामाह ।
'स्फोटैश्चिता पित्तसमानलिङ्गा
साध्या प्रदिष्टा रुधिरात्मिका तु ।'
रक्तजेतरा संहारकत्वावधिमाह ।
'सद्यश्छिदोषजा हन्ति त्र्यहात् कफसमुद्भवा ।
पञ्चाहात् पित्तसंभूता सप्ताहात् पवनोत्थिता ॥'
कण्ठशालूकमाह ।
'कोलास्थिमात्रः कफसम्भवो यो
ग्रन्थिर्गले कण्टकशूकभूतः ।
खरः स्थिरः शस्त्रनिपातसाध्य-
स्तं कण्ठशालूकमिति ब्रुवन्ति ॥'
कण्टकशूकभूतः कण्टकवच्छूकवच्च वेदनाजनकः ।
अधिजिह्वमाह ।
'जिह्वाग्रमूलः श्वयथुः कफात्तु
जिह्वोपरिष्टादधजेव मिथात् ।
ज्ञेयोऽधिजिह्वः खलु रोग एष
विवर्जयेदागतपाकमेनम् ॥'
अधजा मिथादेवेत्यन्वयः ॥ * ॥ वलयमाह ।
'वलाग्र एवायतसुन्नतश्च
शोथं करोत्यन्नगतिं निवार्य ।
तं सर्वथैवाप्रतिवार्यवीर्यं
विवर्जयेत् शोथं वलयं वदन्ति ॥'
अलासमाह ।
'गले तु शोथं कुरुतः प्रदुष्टौ
श्लेष्मानिलौ स्थानगुणोपपन्नम् ।
मर्म्मच्छिदं दुस्तरमेतदाहु-
रलाससंज्ञं भिषजो विकारम् ॥'
मर्म्मच्छिदं हृदयमर्म्मणि छेदनेव वेदनाजनकम् ॥
एकवृन्दमाह ।
'वृत्तोन्नतोष्णः श्वयथुः सदाहः
सकण्डुरोऽपाकखरो दुरुत्थः ।
नाम्नैकवृन्दः परिकीर्त्यतेऽसौ
व्याधिर्बलासः चतनप्रहन्ता ॥'
अन्तः गलमध्ये । अपाकी ईषत्पाकी । अल्पदुः
ईषन्मृदुः ॥ * ॥ वृन्दमाह ।
'समुन्नतं वृन्दममन्ददाहं
तीव्रज्वरं वृन्दमुदाहरन्ति ।
तत्रापि पित्तच्चतजप्रकोपाद्-
विद्यात् सतोदं पवनात्मकन्तु ॥'
शतघ्नीमाह ।
'वर्त्तिर्यथा कण्ठनिरोधिनी तु
चितातिमात्रं पिशितं प्ररोहैः ।
अनेकरुक् प्राणहरी त्रिदोषा
ज्ञेया शतघ्नीसदृशी शतघ्नी ॥'
घना कठिना । अनेकरुक् वातपित्तकफजनोद-
दाहकण्डादियुक्ता । शतघ्नीसदृशी लौहकण्टक-
संछन्ना शतघ्नी महती शिला तत्तुल्या यतः
प्राणहरी ॥ * ॥ गिलायुमाह ।
'ग्रन्थिर्गले त्वामलकास्थिमात्रः
स्थिरोऽल्परुक् स्यात् कफरक्तमूर्त्तिः ।
संलक्ष्यते सक्तमिवासितेन
स शुक्लसाध्यस्तु गिलायुसंज्ञः ॥'
गलविद्रधिमाह ।
'सर्वं गलं व्याप्य समुत्थितो यः
शोथो रुजः सन्ति च यत्र सर्वाः ।
स सर्वदोषैर्गलविद्रधिस्तु
तस्यैव तुल्यः खलु सर्वजस्य ॥'
गलौघमाह ।
'शोथो महान् यस्तु गलावरोधी
तीव्रज्वरो वायुगतेर्निहन्ता ।
कफेन जातो रुधिरान्वितेन
गले गलौघः परिकीर्त्यतेऽसौ ॥'
वायुगतेर्निहन्ता उदानवायुगतिरोधकः ॥ * ॥
स्वरघ्नमाह ।
'यस्याध्मानः श्वसिति प्रसक्तं
भिन्नस्वरः शुष्कविमुक्तकण्ठः ।
कफोपदिग्धेष्वनिलायनेषु
ज्ञेयः स रोगः श्वसनात् स्वरघ्नः ॥'
ताध्मानस्तमः पश्यन् । शुष्कविमुक्तकण्ठः
शुष्को विमुक्तोऽस्वाधीनः कण्ठो यस्य सः ।
अस्वाधीनता शुष्कं गिलितुमशक्यत्वात् । अनि-
लायनेषु वायुवर्त्मसु श्वसनात् वातात् ॥ * ॥
मांसतानमाह ।
'प्रतानवान् यः श्वयथुः सुकण्ठो
गलोपरोधं कुरुते क्रमेण ।
स मांसतानः कथितावलम्बो
प्राणप्रणुत् सर्वकृतो विकारः ॥'
प्रतानवान् विस्तारवान् । सुकण्ठः अतिशयितं
कण्ठं यत्र सः ॥ * ॥
विदारीमाह ।
'सदाहतोदं श्वयथुं सुनान्त-
मन्तर्गले पूतिविशीर्णमांसम् ।
पित्तेन विद्याद्दहने विदारीं
पार्श्वे विशेषात् स तु येन शेते ॥'
पार्श्वे विशेषात् स तु येन शेते स पुरुषो येन
पार्श्वेन विशेषाद्दाहरुजेन शेते तस्मिन् पार्श्वे सा
विदारी भवति इत्यर्थः ॥ * ॥

अथ गलरोगाणां चिकित्सा ।
'रोहिणीनान्तु साध्यानां हितं शोणितमोक्षणम् ।
वमनं धूमपानञ्च गण्डूषो नस्यकर्म्म वा ॥
वातजानान्तु हृते रक्ते लवणैः प्रतिसारयेत् ।
सुखोष्णान् स्निग्धगण्डूषान् धारयेच्चाप्यभीक्ष्णशः ॥
विस्राव्य पित्तसंभूतां सिताचौद्रप्रियङ्गुभिः ।
घर्षयेत् कवलो द्राक्षापरूषैः क्वथितैर्हिमैः ॥
आगारधूमकटुकैः कफजां प्रतिसारयेत् ।'
आगारधूम झुल इति लोके । कटुकानि शुण्ठी-पिप्पलीमरिचानि ।
'श्वेताविड्ङ्गदन्तीषु तैलं सिद्धं ससैन्धवम् ।
नस्यकर्म्मणि दातव्यं कवले च कफोदये ॥'
श्वेता अपराजिता ।
'पित्तवत् साधयेद्वैद्यो रोहिणीं रक्तसम्भवाम् ।
विस्राव्य कण्ठशालूकं साधयेत्तुण्डिकेरिवत् ॥
एककालं यवान्नं वा भुञ्जीत स्निग्धमल्पशः ।
उपजिह्वकवच्चापि साधयेदधिजिह्वकम् ॥
एकवृन्दन्तु विस्राव्य विधिं शोधनमाचरेत् ।
एकवृन्दमिव प्रायो वृन्दञ्च समुपाचरेत् ॥
गिलायुञ्चापि यो व्याधिस्तञ्च शस्त्रेण साधयेत् ।
अमर्म्मस्थं सुसम्पक्वं छेदयेत् गलविद्रधिम् ॥'
अथ सामान्यानां कण्ठरोगाणां चिकित्सा ।
'कण्ठरोगेष्वरुङ्मोक्षैस्तीक्ष्णैर्नस्यादिकर्म्मभिः ।
चिकित्सकश्चिकित्सान्तु कृत्स्नलोकञ्च समाचरेत् ॥
क्षारं दद्याच्च दार्व्यौत्वङ्निम्बतार्क्ष्यकलिङ्गजम् ।
हरीतकीकषायो वा हितो माक्षिकसंयुतः ॥
कटुकातिविषादारुपाठामुस्ताकलिङ्गकाः ।
गोमूत्रक्वथिताः पीताः कण्ठरोगविनाशनाः ॥
गुडूचीकाकटुकाद्योषदार्व्यौत्वकत्रिफलाघनम् ।
पाठां रसाञ्जनं दारु तेजोवतीं सुचूर्णितम् ॥
क्षौद्रयुक्तं विधातव्यं गलरोगे महौषधम् ।
योगाश्चैते त्रयः प्रोक्ता वातपित्तकफापहाः ॥
यवाग्रजं तैलवतीञ्च पाठां
रसाञ्जनं दारु निशां सचक्रयाम् ।
क्षौद्रेण कुर्य्यात् गुटिकां सुखेन
तां धारयेत् सर्व्वगलामयेषु ॥'
अथ समस्तसुखरोगाः । तत्र तेषां निदानं संख्याञ्चाह ।
'एषामुदीर्णैस्त्रिभिरो रोगाः समस्तसुखजाः स्मृताः ।'
तत्र वातिकस्य लक्षणमाह ।
स्फोटैः सतोदैर्वदनं समन्ताद्-
वृताचितं सर्व्वसरः सवातात् ॥*॥
पैत्तिकमाह ।
'रक्तैः सदाहैः पिडकैः सपीतै-
र्यैर्वाचितं चापि स पित्तकोपात् ॥'*॥
श्लैष्मिकमाह ।
'श्वयथुना कण्डुयुतैः सवर्णै
र्यैर्वाचितं चापि स वै कफेन ।'
श्वयथुना ईषद्वेदनैः । यत उक्तं सुश्रुतेन ।
अल्पवेदनैरिति ॥*॥ सुखरोगेष्वसाध्यानाह ।
'ओष्ठप्रकोपे वर्त्म्याः स्युर्मांसरक्तविदोषजाः ।
दन्तवेष्टेषु वर्त्म्यौ तु त्रिलिङ्गगतिशौषिरौ ॥'
त्रिलिङ्गगतिः त्रिदोषजा नाड़ी । महाशौषिरञ्च ।
'दन्तेषु च न सिध्यन्ति स्यावदालनभञ्जनाः ।
निर्झारोगेष्वालसस्तु तालुजेष्वर्बुदन्तथा ॥
खरन्नो वलयो वृन्दो वलासः स हि दारुणः ।
गलौघो मांसतानञ्च शतघ्नी रोहिणी गले ॥
असाध्याः कीर्त्तिता ह्येते रोगा दृग् नवोत्तराः ।
तेषु चापि क्रियां वैद्यः प्रत्याख्याय समाचरेत् ॥'
अथ समस्तसुखरोगाणां चिकित्सा ।
'वातात् सर्व्वसरं चूर्णैर्लवणैः प्रतिसारयेत् ।
तैलं वातहरैः सिद्धं हितं कवलनस्ययोः ॥*॥
पित्तात्मके सर्व्वसरे शुद्धकायस्य देहिनः ।
सर्व्वपित्तहरः कार्य्यो विधिर्मधुरशीतलः ॥*॥
प्रतिसारणगण्डूषधूमसंशोधनानि च ।
कफात्मके सर्व्वसरे क्रमं कुर्य्यात् कफापहम् ॥*॥
सुखपाके सिरावेधः शिरसश्च विरेचनम् ।
मधुसूक्तघृतक्षौरैः प्रीतैश्च कवलग्रहः ॥१॥
जातीपत्राम्रताम्राचायासदार्व्योफलत्रिकैः ।
क्वाथः क्षौद्रयुतः शीतो गण्डूषो सुखपाकजुत् ॥२॥
कार्य्यश्च बहुधा नित्यं जातीपत्रस्य चर्व्वणम् ।
क्षणजीरकक्रुञ्चेन्द्रयवचर्व्वणतस्त्रहात् ।
सुखपाकव्रणक्लेददौर्गन्ध्यसुपशाम्यति ॥ ३ ॥
पटोलनिम्बजम्ब्राम्रमालतीनवपल्लवैः ।
पञ्चपल्लवजः श्रेष्ठः कषायो सुखधावने ॥ ४ ॥
पञ्चपल्लवजः क्वाथस्त्रिफलासम्भवोऽथवा ।
सुखपाके प्रयोक्तव्यः सक्षौद्रो सुखधावने ॥५॥
सरसः क्वथितो दार्व्या घनीभूतो रसक्रिया ।
सक्षौद्रा सुखरोगाश्वगण्डदोषनाड़ीव्रणापहा ॥६॥
सप्तच्छदोशीरपटोलसुस्त-
हरीतकीतिक्तकरोहिणीभिः ।
यष्ट्याह्वरात्रह्वमचन्दनैश्च
क्वाथं पिबेत् पाकहरं सुखस्य ॥७॥'
राजद्रुमः धनवहेरा इति लोके ।
'तिला नीलोत्पलं सर्पिः शर्करा क्षीरमेव च ।
क्षौद्राभ्यक्तिमक्तस्य गण्डूषो सुखपाकजुत् ॥८॥
आस्वादिता सकृदपि सुखगन्धं सकलमपनयति ।
त्वग्बीजपूरफलजा पवनमवाश्वञ्च नाशयति ॥९॥
हरिद्रां निम्बपत्राणि मधूकं नीलसुत्पलम् ।
तैलमेभिर्विपक्तव्यं सुखपाकहरं परम् ॥१०॥
यष्टीमधुपलमेकं क्षिप्त्वा नीलोत्पलस्य तैलस्य ।
प्रस्थं तद्विगुणपयोविधिना पक्वं तु नस्येन ॥
निशि वदनस्य सावं क्षपयति गात्रस्य दोषसंघातम् ।
कवलव्यत्यलमवश्यं क्रमशोऽभ्यङ्गेन जन्तूनाम् ॥११
इति सुखरोगाधिकारः । इति भावप्रकाशः ॥*॥
अपि च ।
तण्डुलीयकगोचूरन्नलं पीतं पयोऽन्वितम् ।
कामलादिहरं प्रोक्तं सुखरोगहरं तथा ॥१२॥
शुष्कमूलकसुरुजीनां चारो हिङ्गुलनागरम् ।
शुक्तं चतुर्गुणं दद्यात्तैलमेतैर्विपाचयेत् ॥
बाधिर्य्यं कर्णशूलञ्च पूयस्रावञ्च कर्णयोः ।
पूरणादस्य तैलस्य क्षयः कर्णयोः खिलाः ॥
क्षिप्रं विनाशमायान्ति शैलाक्षुत्तपशेखर ! ।
क्षारतैलमिदं श्रेष्ठं सुखदन्तामयापहम् ॥१३॥"
इति गारुड़े १८८।१६८ अध्यायौ ॥
(तथाचास्य सलक्षणचिकित्सितम् ।
"सुखामये मारुतजे तु शोष-
क्षार्कश्वरौक्ष्याणि चलारुजञ्च ।
क्षणारुणं निष्पतनं सुशीतं
प्रसंसनस्यन्दनतोदभेदाः ॥
क्षणाव्वरस्फोटकतालुदाहा-
धूमायनक्ष्वाण्वदीर्णता च ।
पित्तात् सरुर्च्छा विविधारुचश्च
वर्णाश्च शुक्लारुणवर्णवर्च्चाः ॥
कण्डुर्गुरुत्वं सितविच्छवित्वं
क्लेदोऽरुचिर्जाड्यकफप्रसेकौ ।
उत्क्लेशमन्दानिलता च तन्द्रा
रुजश्च मन्दाः कफवक्त्ररोगे ॥
सर्व्वाणि रूपाणि तु वक्त्ररोगे
भवन्ति यस्मिन् स तु सर्व्वजः स्यात् ।
संस्थानसूच्याकृतिनामभेदा-
श्चैते चतुःषष्टिविधा भवन्ति ॥
शालाक्यतन्त्रे विहितानि तेषां
निमित्तरूपाकृतिभेषजानि ।
यथाग्रदृश्यन्तु चतुर्विधस्य
क्रियां प्रवक्ष्यामि सुखामयस्य ॥'
इति सुखरोगः ॥ ॥
'शुक्लतिक्तकटुक्षौद्रकषायैः कवलग्रहः ।
धूमः प्रधमनं शुद्धिरधश्छर्द्दनलङ्घनम्
भोज्यञ्च सुखरोगेषु यथास्वन्दोषनुद्धितम् ।
पिप्पल्यगुरुदार्व्यौत्वग् यवक्षारो रसाञ्जनम् ॥
पाठां तेजोवतीं पथ्यां समभागं सुचूर्णितम् ।
सुखरोगेषु सर्व्वेषु सक्षौद्रं तद्विधारयेत् ॥
सौधमाधवमाक्षीकैः श्रेष्ठोऽयं कवलग्रहः ।
तेजोक्षामभयामेलां समङ्गां कटुकां घनम् ।
पाठां ज्योतिष्मतीं लोध्रं दार्व्यौं कुष्ठञ्च चूर्णयेत्
दन्तानां घर्षणञ्चैव सावक्रण्डूरुजापहम् ॥'
'गृहधूमो यवक्षारपाठाद्योयं रसाञ्जनम् ।
तेजोऽजा त्रिफला लोध्रं चित्रकञ्चेति चूर्णितम् ॥
सक्षौद्रं धारयेदेतत् गलरोगविनाशनम् ॥'
इति कालकचूर्णम् ॥*॥
मनःशिला यवक्षारो हरितालं ससैन्धवम् ।
दार्व्यौत्वक् चेति तच्चूर्णं माक्षिकेण समायुतम् ॥
घृक्तं घृतमर्द्धेन कण्ठरोगेषु धारयेत् ।
सुखरोगेषु च श्रेष्ठं पीतकं नामकीर्त्तितम् ॥'
इति पीतकचूर्णम् ॥*॥
'कटुकातिविषापाठा दार्व्यौत्वक्कलिङ्गकाः ।
गोमूत्रक्वथिताः पेया कण्ठरोगविनाशनाः ॥
सरसः क्वथितो दार्व्या घनीभूतोरसक्रिया ।
सक्षौद्रसुखरोगाश्वगण्डदोषनाड़ीव्रणापहा ॥
तालुशोषे लक्षयास्य सभिरौत्तरभक्तिकम् ॥

लावणं मधुराः स्निग्धाः शीताश्चैव रसा हिताः।
सुखपाके शिराकर्म्म शिरःकायविरेचनम्।
मूत्रतैलघृतक्षौद्रक्षीरैश्च कवलग्रहः॥
सक्षौद्राम्लिफलापाटा रुदौकाजातिपल्लवाः।
कषायतिक्तकाः शीता कार्याश्च मुखधावनाः।
तुलां खदिरसारस्य द्विगुणामरिमेदसः॥
प्रक्षाल्य चूर्णयेत्कृत्य चतुर्द्रोणेऽम्भसः पचेत्।
द्रोणशेषं कषायन्तं पूता भूयः पचेच्छनैः॥
ततस्मिन् घनीभूते चूर्णीकृत्याच्छभागिकम्।
चन्दनं पद्मकोशीरं मञ्जिष्ठां धातकीं घनम्॥
प्रपुण्डरीकं यष्ट्याह्वत्वगेलापत्रकेशरम्।
लाक्षां रसाञ्जनं मांसीं त्रिफलां लोध्रवालकम्॥
रजन्यौ फलिनीमेलां समस्तं कटफलं वचाम्।
यवामगुरुपत्तङ्गैरिकाञ्जनमावपेत्॥
लवङ्गनखकक्कोलजातिकोशान् पलोन्मितान्।
कर्पूरकुङ्कुमाच्चापि पुनःश्लोनेश्चतारिते॥
ततस्तु गुलिकाः कार्य्याः शुष्काश्चास्येन धारयेत्।
तैलञ्चानेन कल्केन कषायेण च साधयेत्॥
दन्तानाञ्चलनभंशशीर्य्यक्रिमिरोगनुत्।
मुखपाकाम्यदौर्गन्ध्यकण्ठाद्यारोचकनाशनम्॥
स्रावोपलेपपैच्छिल्यवैस्वर्य्यगलरोगनुत्।
दन्तास्यगलरोगेषु सर्व्वेषां तत्परायणम्॥"
इति खदिरादिगुटिकातैलञ्च॥ इति मुखरोगचिकित्सा॥ इति चरके चिकित्सास्थाने २६ अध्यायः॥)

सुखलाङ्गलः, पुं. (सुखं लाङ्गलमिव भूविदारकमस्य।) शूकरः। इति जटाधरः॥

सुखबन्धनं, क्ली, (सुखं प्रारम्भविधयः तस्य बन्धनं संग्रहोऽत्र।) ग्रन्थारम्भे तत्र वक्तव्यकथनम्। तस्य नामान्तरम्। अनुक्रमणिका। भूमिका। इति छन्दोमञ्जर्य्यां सुखबन्धनाख्यप्रथमस्तवकः। इति तद्ग्रन्थकर्त्तृगङ्गादासवैद्येन लिखितम्॥

सुखवल्लभः, पुं, (सुखस्य वल्लभः प्रीतिकरः।) दाडिमवृक्षः। इति शब्दमाला॥ सुखप्रिये, त्रि॥

सुखवाचिका, स्त्री. (सुखं वाचयति श्रोथयतीति। वच्+णिच्+ण्वुल्+स्त्रियां टाप्। अत इत्वं च।) अम्लष्ठा। इति राजनिर्घण्टः॥

सुखवाद्यं, क्ली. (सुखेन वाद्यम्।) वक्त्रनालवाद्यम्। बाँक इति भाषा। इति त्रिकाण्डशेषः॥ सुखस्य मुखेन च वाद्यत्व। शिवपूजान्ते वम् इति शब्देन गालवाद्यम्। यथा,—
"लिङ्गं निर्म्माय विधिवत् विधिवत् पूजयेच्च तम्।
षड्क्षरं जपित्वा वै सुखवाद्यं शुचिस्मिते!॥"
इति लिङ्गार्च्चनतन्त्रे १५ पटलः॥
अपि च।
"सुखवाद्यं समृत्यं हि कृत्वा तु परमेश्वरि!।
मालकामन्तसहितं सुखवाद्यं सुदुर्ल्लभम्॥
अकारादिकिकारान्तमनुलोमविलोमतः।
उच्चार्य्य परमेशानि! सुखवाद्यं शुचिस्मिते!॥
सबिन्दुं वर्णमुच्चार्य्य पश्चाच्छ्यामाष्टकां प्रिये!।
अनुलोमविलोमेन सर्व्वेषु च वरानने!॥
अनेनैव विधानेन सुखवाद्यं करोति यः।
स सिद्धः सगणः सोऽपि स शिवो नात्र संशयः।
स्तन्यक्षयोऽहं देवेशि! सुखवाद्यप्रसादतः॥
यस्मिन् काले महेशानि! असुरो बलवान् भवेत्।
तस्मिन् काले महेशानि! सुखवाद्यं करोम्यहम्॥
तत श्रुत्वा परमेशानि! असुरा राक्षसाश्च ये।
पलायन्ते महेशानि! तत्श्रुत्वा परमेश्वरि!॥
ये नरा भुवि तिष्ठन्ति सुखवाद्यं विना प्रिये!।
स सर्व्वयातनाभोगी अन्ते कुम्भीरतां व्रजेत्॥"
इति च लिङ्गार्च्चनतन्त्रे ८ पटलः॥

सुखवासः, पुं, (सुखस्य वासः सौरभ्यमस्मात्।) गन्धतृणम्। इति राजनिर्घण्टः॥

सुखवासनः, पुं, (सुखं वासयतीति। वस्+णिच्+ल्युः।) सुखसद्गन्धकारकद्रव्यम्। तत्पर्य्यायः। आमोदी २। इत्यमरः।२।५।२२॥ हे सुखवासनवटिकादौ आमोदयुक्तः कर्पूरादिरामोदी इन्। सुखं वासयति सुखवासनः नन्द्यादित्वादनः। नानाद्रव्यरचित एकैकद्रव्य एव वा कर्पूरादिभिर्मुखोपयोग्यसुखवासनवटिरामोदीति सर्व्वस्वम्। शुभवासन इति पाठे शुभं मनोहरं वासनं वासो यस्य कैशादेः स आमोदीत्याहुरितिसुभूतिः। क्षीरस्वामिना तु समाकर्षादिचतुष्टयेन इष्टगन्धादिचतुष्टयेन च वयायद्वयमाख्यातम्। शब्दार्णवे तु।
"कस्तूरिकायामामोदः कर्पूरे सुखवासनः।
वकुले स्यात् परिमलश्चम्पके सुरभिस्तथा।
गन्धा द्विषष्टिरुद्दिष्टे गुणिवृत्तौ त्रिलिङ्गका॥"
इति भरतः॥

सुखविलुण्ठिका, स्त्री, (सुखेन विलुण्ठयतीति। लुण्ठ+णिच् ण्वुल्। स्त्रियां टाप्। अत इत्वं च।) छागी। इति शब्दरत्नावली॥

सुखविष्ठा, स्त्री, (सुखे विष्ठा मलमस्याः।) तैलपायिका। यथा,—
"वल्गुलिका सुखविष्ठा परोष्णी तैलपायिका।"
इति हेमचन्द्रः॥

सुखशूफः, पुं, (सुखं शूफं तुण्ड इव तीक्ष्णमस्य।) दुर्म्मुखः। इति शब्दमाला॥

सुखशुद्धिः, स्त्री. (सुखस्य शुद्धिः।) वक्त्रशोधनम्। यथा, आह्निकतत्त्वे।
"अभावे दन्तकाष्ठानां प्रतिषिद्धदिने तथा।
अपां द्वादशगण्डूषैर्मुखशुद्धिर्विधीयते॥"

सुखशोधनं, क्ली, (सुखस्य शोधनम्।) त्वक्। इति राजनिर्घण्टः॥

सुखशोधनः, पुं, (सुखं शोधयत्यनेनेति। शुध्+णिच्+करणे ल्युट्।) कटुरसः। इति हेमचन्द्रः॥

सुखशोधी, [न्] पुं, (सुखं शोधयतीति। शुध्+णिच्+णिनिः।) जम्बीरः। इति राजनिर्घण्टः॥ (गुणादयोऽस्य जम्बीरशब्दे ज्ञातव्याः॥)

सुखष्ठीवः, त्रि, (सुखं ष्ठीवति निरस्यति विकृतं करोतीति भावः। ष्ठीव+इगुपधत्वात् कः। पृषोदरादित्वात् वस्य बत्वम्।) दुर्म्मुखः। इति शब्दमाला॥

सुखसम्भवः, पुं, (सुखात् सम्भव उत्पत्तिरस्य।) ब्राह्मणः। इति हेमचन्द्रः। ३। ४७६॥

सुखसुरं, क्ली, (सुखस्य सुरा इति "विभाषा सेनासुराच्छायाशालानिशानाम्। २।४।२५। इति षष्ठीसमासे सुराशब्दस्य ह्रस्वत्वम्।) तालसुरा। इति त्रिकाण्डशेषः। ताड़ी इति भाषा॥

सुखस्रावः, पुं, (सु भावे+घञ्। सुखात् स्रावः पतनमस्य।) लाला। इति राजनिर्घण्टः॥

सुखाग्निः, पुं, (सुखं सुखोऽग्निः।) दावाग्निः। यथा,—
"हेमकेलिर्दयोश्चाथ रुदाक्षः स्याद्दवानलः।
सुखोल्का भूतसञ्चारी सुखाग्निर्भरघस्मरः॥"
इति शब्दमाला॥
शवमुखे दत्तवह्निः। इति लोके। श्राद्धे तु शिरःस्थाने। यथा,—
"देवाश्चाग्निमुखाः सर्व्वे गृहीत्वा तु हुताशनम्।
गृहीत्वा पाणिना चैव मन्त्रमेतदुदीरयेत्॥
कृत्वा तु दुष्कृतं कर्म्म जानता वाप्यजानता।
रुद्रुकालवशं प्राप्य नरं पञ्चत्वमागतम्॥
धर्म्माधर्म्मसमायुक्तं लोभमोहसमावृतम्।
दहेयं सर्व्वगात्राणि दिव्यान् लोकान् स गच्छतु॥
एवमुक्त्वा ततः शीघ्रं कृत्वा चैव प्रदक्षिणम्।
ज्वलमानं तथा वह्निं शिरःस्थाने प्रदापयेत्॥
चातुर्व्वर्ण्येषु संस्थानमेवं भवति पुत्रिके!।"
इति मुद्गितत्त्वम्॥

सुखामयः, पुं, (सुखस्यामयः।) सुखरोगः। इति राजनिर्घण्टः॥

सुखार्जकः, पुं, अर्जकः। इति राजनिर्घण्टः॥

सुखाक्षः पुं, (सुखं अक्षमिवास्य।) कर्कटः। इति त्रिकाण्डशेषः॥

सुखोल्का, स्त्री, (सुखं उल्केव यस्याः।) दावानलः। इति शब्दमाला॥

सुख्यः, पुं, प्रथमः कल्पः। इत्यमरः। २। ७।४०॥ यागादिषु श्रास्त्रोक्तः प्रथमः कल्पो सुख्यः स्यात्। यथा, व्रीहिभिर्यजेतेत्यादिना उत्कृष्टत्वात् सुखमिव सुख्यः विकारसंघेत्यादिना स्वार्थे यः। इति तट्टीकायां भरतः॥

सुख्यः, त्रि, श्रेष्ठः। इत्यमरः। ३। १। ५७॥ (तथास्य पर्य्यायः।
"प्रधानमुत्तमं रम्यं श्रेष्ठं सुख्यमनुत्तमम्।
वरं वरेण्यं प्रसुखं परार्द्ध्यं प्रवरन्तथा॥"
इति वैद्यकरत्नमालायाम्॥
यथा, भागवते। ४। २५। ४८।
"सुख्यानामपुरस्कृत्यास्तयापणवचूदनौ॥")

सुख्यवर्गः, पुं, (सुख्यानां वर्ग इति।) स्थावरदृष्टिः। यथा,—
"सुख्यवर्गश्चतुर्थस्तु सख्या वै स्थावराः स्मृताः।"
इति वराहपुराणम्॥

सुगूहः, पुं, दात्यूहपक्षी। इति भूरिप्रयोगः॥

मुग्धः, त्रि, (मुह्+कर्त्तरि क्तः।) मूढः। (यथा, ऋग्वेदे। ५। ४०। ५।
"अत्रेचकर्त्त यथा मुग्धो भुवनान्यदीधयुः॥")
सुन्दरः। इति विश्वः॥ (यथा, मेघदूते। १४।
"इष्टोत्साहश्चकितचकितं मुग्धसिद्धाङ्गनाभिः॥")

मुग्धबोधं, क्ली, (मुग्धः सुन्दरः बोधः ज्ञानं पदपदार्थानां भवत्यस्मात्। यद्वा, मुग्धान् मूढान् अल्पबुद्धीन् जनान् बोधयतीति। मुग्धबोधम्। इति दुर्गादासः। मुग्ध+बुध्+"कर्म्मण्यण्। ३। २। १। इति अण्।) बोपदेवकृतव्याकरणविशेषः। यथास्यादावुक्तः।
"मुकुन्दं सच्चिदानन्दं प्रणिपत्य प्रणीयते।
मुग्धबोधं व्याकरणं परोपकृतये मया॥"

मुग्धा, स्त्री, (मुग्ध+टाप्।) नायिकाविशेषः। (सा च नायिका स्वीयापरकीयाभेदेन द्विविधा।) तत्र स्वीयापि त्रिविधा। मुग्धा मध्या प्रगल्भा च। तत्राङ्कुरितयौवना मुग्धा। सा च ज्ञातयौवना अज्ञातयौवना च। सैव क्रमशो लज्जाभयपराधीनरतिर्नवोढा। सैव ज्ञातप्रश्रया विश्रब्धनवोढा। अस्याश्चेष्टा क्रिया मनोहरा। कोपे मार्दवं नवविभ्रमेषु समीहा च॥ मुग्धा यथा।
"व्याजृम्भं किल कामदेवधरणीपालेन काले शुभे
वस्तुं वासविधिं विधास्यति तनौ तारुण्यमेणीदृशः।
दृष्ट्या खञ्जनचातुरी मुखरुचा सौधाकरी माधुरी
वाचा किञ्च सुधासमुद्रलहरी लावण्यमामन्त्रते॥"*॥
अज्ञातयौवना यथा,—
"नीरान्तीरमुपागता श्रवणयोः सीन्नि स्फुरन्नेत्रयोः
श्रोत्रे लग्नमिदं किमुत्पलमिति ज्ञातुं करं न्यस्यति।
प्रवालाङ्कुरमङ्कुया शशिमुखी रोमावलीं प्रोञ्छति
आन्तात्मानि सुहृत् सखीमविदितश्रोणीभरा पृच्छति॥"
ज्ञातयौवना यथा,—
"स्वयम्भूः शम्भुरम्भोजलोचने तत्पयोधरः।
नखेन कस्य धन्यस्य चन्द्रचूड़ो भविष्यति॥"
नवोढ़ा यथा,—
"हस्ते धृतापि शयने विनिवेशितापि
क्रोड़े कृतापि यतते बहिरेव गन्तुम्।
जानीमहे नववधूरय तस्य वशा
यः पारदं स्थिरयितुं क्षमते करेण॥"
द्वितीया यथा,—
"बलान्नीता पार्श्वं सुखमसुखं नैव कुरुते
सुनाना मूर्द्धानं क्षिपति वदनं चुम्बनविधौ।
हृदि न्यस्तं हस्तं क्षिपति गमनारोपितमना
नवोढ़ा वोढ़ारं रमयति च सन्तापयति च॥"
विश्रब्धनवोढ़ा यथा,—

"दरनुकुलितनेत्रपालिनीवी-
नियमिनबाहुकृतोरुयुग्मबन्धम्।
करकलितकुचस्थलं नवोढ़ा
स्वपिति समीपमुपेत्य कस्य नूनम्॥"
इति रसमञ्जरी॥

मुच इ क } कल्कने। दम्भे। ग्राम्ये। इति कविमुच ड } कल्पद्रुमः॥ (भ्वा०-आत्म०-अक०-सेट्।) द्वौ पञ्चमस्वरितौ। इ मुच्यते। ड मुचते ड मोचने। इति दुर्गादासः॥

मुच ल्रृ प्र ञ औ मोचे। इति कविकल्पद्रुमः॥ (तुदा०-उभ०-सक०-बन्धनरहितीभावे अक०-अनिट्।) मोचस्त्यागः। ल्रृ असुचत्। प्र प ञ मुञ्चति मुञ्चते धनं दाता। बन्धनरहितीभावे अकर्म्मकोऽयम्। आलानान्मुक्तो गजः कर्त्तरि क्तः। एवं पापान्मुक्त इत्यादौ पापबन्धनाद्यमुक्त इत्यर्थः। इति दुर्गादासः॥

मुच क मोचे। इति कविकल्पद्रुमः॥ (चुरा०-पर० सक०-सेट्।) क मोचयति। मोचस्त्यागः। इति दुर्गादासः॥

मुचिरः, त्रि, (मुच्यति धनादिकं ददातीति। मुच्+"इषिमदिमुदिखिदिच्छिदिभिदिमन्दिचन्दिनिमिमिहिमुहिमुचीति।" उणा०। १। ५२। इति किरच्।) दाता। इति त्रिकाण्डशेषः॥

मुचिरः, पुं, (मुच्+किरच्।) धर्म्मः। वायुः। देवता। इति संक्षिप्तसारोणादिवृत्तिः॥

मुचुकुन्दः, पुं, (मुच्+बाहुलकात् कुः। मुचुः कुन्द इवेति। राजदन्तादित्वात् पूर्व्वनिपातः।) पुष्पवृक्षविशेषः। मेकचन्द इति हिन्दी भाषा। (यथा, राजेन्द्रकर्णपूरे। १०।
"आनन्दं मुचुकुन्दकन्दलि! भज स्वस्यासि वासन्तिके!।")
तत्पर्य्यायः। छत्रवृक्षः २ चित्रकः ३ प्रतिविष्णुकः ४। इति भावप्रकाशः॥ बहुपुत्रः ५ सुदलः ६ हरिवल्लभः ७ सुपुष्पः ८ अर्घ्यार्हः ९ लक्ष्मणकः १० रक्तप्रसवः ११। अस्य गुणाः। कटुत्वम्। तिक्तत्वम्। कफवातनाशित्वम्। कण्ठकरत्वम्। त्वग्दोषश्लोपशमनत्वम्। जीर्णज्वरविनाशनत्वञ्च। इति राजनिर्घण्टः॥ शिरःपीड़ापित्तासविषनाशित्वम्। इति भावप्रकाशः॥ *॥ मान्धातृराजपुत्रः। इति श्रीभागवतम्। ९। ७। ३८।
(यथा च देवीभागवते। ७। १०। ४।
"तस्यासुतत्रयमासीन्मान्धातुः सुमहात्मनः।
पुरुकुत्सं सुविख्यातं मुचुकुन्दं तथापरम्॥")

मुचुटी, स्त्री, अङ्गुलिमोटनम्। आङ्गुलमटकान इति भाषा। यथा,—
"मुचुटी मुकुटी चैव भवेदङ्गुलिमोटने।"
इति शब्दरत्नावली॥
मुटि। मुठा इति भाषा। यथा,—
"सम्मिश्रिताङ्गुलिः पाणिर्मुष्टिर्मुचुट्यपि।"
इति हेमचन्द्रः। ३। २६१॥

मुज इ क } रुजाज्ञयोः। इति कविकल्पद्रुमः॥
मुज क } (चुरा०-पर०-मार्ज्जने सक०-ध्वनौ अक०-सेट्।) द्वौ पञ्चमस्वरितौ। इ क मुञ्जयति। क मोजयति। इति दुर्गादासः॥

मुञ्चकः, पुं, (मुञ्चिड+खुल्।) शुष्ककटुशाकः। इति राजनिर्घण्टः॥

मुञ्जः, पुं, (मुञ्जते त्यज्यते अनेन। मुञ्ज+करणे घञ्।) तृणविशेषः। सुँज इति भाषा॥ (यथा, पञ्चदश्याम्। १। ४२।
"यथा मुञ्जादीषिकेवमात्मा युक्त्या समुद्धृतः।
शरीरत्रितयाद्वीरैः परं ब्रह्मैव जायते॥")
तत्पर्य्यायः। मौञ्जीतृणाख्यः २ ब्राह्मण्यः ३ तेजनाह्वयः ४ वाणीरकः ५ सुञ्जनकः ६ शीरी ७ दर्भाह्वयः ८ दूरस्थलः ९ दृढ़तृणः १० दृढ़मूलः ११ बहुप्रजः १२ रञ्जनः १३ शुचुभङ्गः १४। अस्य गुणाः। मधुरत्वम्। शीतत्वम्। कफपित्तजदोषनाशित्वम्। ग्रहरक्षासु दीक्षासु च पावनत्वम्। भूतनाशित्वञ्च। इति राजनिर्घण्टः॥ अपि च।
"मुञ्जो मुञ्जातको वाणः स्थूलदर्भः सुमेधसः।
मुञ्जद्वयन्तु मधुरं तुवरं शिशिरं तथा॥
दाहतृष्णाविषश्वासव्रणवस्त्यश्मरीरुजित्।
दोषत्रयहरं दृष्यं मेखलास्वपयुज्यते॥"
इति भावप्रकाशः॥
शरः। इति रत्नमाला। उपनयनकाले मुञ्जमेखलाधारणविधिर्यथा। अथैनं माणवकमाचार्य्यस्त्रिःप्रदक्षिणं चित्रतं मुञ्जमेखलां परिधापयन् मन्त्रद्वयं वाचयति। इति भवदेवभट्टः॥

मुञ्जकेशी, [न्] पुं, (मुञ्जा इव केशाः सन्त्यस्य। इनिः।) विष्णुः। इति हेमचन्द्रः। २। १३१॥

मुञ्जरं, क्ली, (मुञ्जते प्रत्याख्यते इति। मुञ्ज+बाहुलकात् अरन्।) शालूकम्। इति शब्दमाला॥

मुञ्जातकः, पुं, (मुञ्जं यतति तत्सादृश्यं प्राप्नोतीति। यत+अच्। ततः स्वार्थे कन्।) पुष्पशाकभेदः। अस्य गुणाः। परं स्वादुत्वम्। वृष्यत्वम्। पित्तानिलापहत्वञ्च। इति राजवल्लभः॥ (यथा, सुश्रुते सूत्रस्थाने ३६ अध्याये।
"हस्तिकर्णमुञ्जातकसामञ्जकप्रभृतीनि।")

मुट इ मर्द्दे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) पञ्चमस्वरी। इ मुण्टते। मर्द्दो मर्द्दनम्। इति दुर्गादासः॥

मुट कि च्छुदि। इति कविकल्पद्रुमः॥ (चुरा० पक्षे भ्वा०-सक०-सेट्।) च्छुदि चूर्णीकरणे। कि मोटयति तण्डुलं शिला। यस्तु दुर्गश्च मोटतीति हलायुधः॥

मुट शि आक्षेपे च। इति कविकल्पद्रुमः॥ (तुदा०-पर०-सक०-सेट्।) पवर्गशेषादिः। शि मुटति असुटीत् मुमोट। चकारात् च्छुदि च्। मुटति क्षिपां दर्पे च इति हलायुधः। इति दुर्गादासः॥

मुण्डः
मुड इ ड पलायने। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-अक०-पालने सक०-सेट्।) पवर्गतृतीयादिः। पञ्चमस्वरी। इ मुण्डते। ड मुण्डते चौरः। इति दुर्गादासः॥
मुड इ छिदि। मर्दे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) पञ्चमस्वरी। इ मुण्डति। छेद इह लोमच्छेद एव। मुण्डति मुण्डं नापितः। लोमरहितं करोतीत्यर्थः। इति दुर्गादासः॥
मुड इ ड मज्जने। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-अक०-सेट्।) पवर्गतृतीयादिः। पञ्चमस्वरी। मज्जनमिति मज्जधातोः क्ते रूपं मज्जनमित्यर्थः। इ मुण्डते। ड मुण्डते प्रस्तरो जले। चतुर्भुजस्तु मार्ज्जन इति पठित्वा मार्ज्जनं शुद्धिरिति व्याख्याय मुण्डते जलेन गात्रं लोक इत्युदाहृतवान्। इति दुर्गादासः॥
मुण प्र प्रतिज्ञाने। इति कविकल्पद्रुमः॥ (तुदा०-पर०-सक०-सेट्।) प्र मुण्णति व्रतं लोकः। प्रतिजानातीत्यर्थः। मोणिता। इति दुर्गादासः॥
मुण्डं, क्ली, (मुण्ड्यन्ते उप्यन्ते केशा अस्मात् यद्वा, मुण्डते मज्जतीति। मुड+अच्।) शिरः। इति नपुंसकलिङ्गसंग्रहे अमरः।२।६।३४॥ (यथा, मोहमुद्गरे। १५।
"अङ्गं गलितं पलितं मुण्डं
दन्तविहीनं जातं तुण्डम्।
करधृतकम्पितशोभितदण्डं
तदपि न मुञ्चत्याशाभाण्डम्॥"
उपनिषद्विशेषः। तदुक्तं यथा,—
"ईक्षाकेनकठप्रश्नमुण्डमाण्डुक्यतित्तिरि।
छान्दोग्यं बृहदारण्यमेतरेयं तथा दश॥")
वोलम्। मुण्डायसम्। इति राजनिर्घण्टः॥
मुण्डः, पुं, (मुण्डनं मुण्डः केशापनयनं मुडि खण्डने भावे घञ्। ततः अर्शं आद्यच् इत्यमरटीकायां रायमुकुटः।) बलिराजस्य सैनिकदैत्यविशेषः॥ (यथा, हरिवंशे भविष्यपर्व्वणि। २३२।५।
"एकाक्ष एकपानुर्मुण्डो विद्युदक्षश्चतुर्भुजः।")
शुम्भसेनापतिदैत्यभेदः। यथा, मार्कण्डेयपुराणे। ८७।२८।
"हे चण्ड! हे मुण्ड! बलैर्बहुभिः परिवारितौ।")
मुण्डमेवावयवत्वेनास्त्यस्य। अच्।) राहुग्रहः। इति मेदिनी। डे, २२॥ (मुण्डं मुण्डनं जीविकात्वेनास्त्यस्य। अच्।) नापितः। इति जटाधरः॥ (मुण्डनं स्कन्धावच्छेदे खण्डनमस्त्यस्य। अच्।) स्थाणुवृक्षः। इति केचित्॥
मुण्डः, पुं, क्ली, (मुण्ड+अच्।) मुण्डा। इति मेदिनी। डे, २२॥
मुण्डः, त्रि, मुण्डितः। इत्यमरः।२।६।४८॥ (मुण्ड खण्डने भावे घञि मुण्डो मुण्डनं केशापनयनं तदर्थयोगात् अर्शं आद्यच्। मुण्डः पुमान् स्त्रियां मुण्डा। इत्यमरटीकायां भरतः॥ (यथा, महाभारते। १।११६।८।
'चरन् भैक्षं मुनिर्मुण्डश्चरिष्यामि महीमिमाम्॥')
मुण्डकं, क्ली, (मुण्डमेवेति मुण्ड+स्वार्थे कन्।) मस्तकम्॥ (उपनिषद्विशेषश्च॥)
मुण्डकः, पुं, (मुण्डयतीति। मुडि+ण्वुल्।) नापितः। इति हेमचन्द्रः।३।२३०॥
मुण्डचणकः, पुं, (मुण्डित इव चणकः।) कलायः। इति राजनिर्घण्टः॥
मुण्डनं, क्ली, (मुण्ड+ल्युट्।) केशच्छेदनम्। तत्पर्य्यायः। भद्रकरणम् २ वपनम् ३ परिवापनम् ४ क्षौरम् ५। इति हेमचन्द्रः।३।५८७॥ (यथा, महाभारते। १२। २३। ४६।
"भ्रातुरस्य हितं वाक्यं शृणु धर्म्मभृतां वर!।
दण्ड एव हि राजेन्द्र! क्षत्रधर्म्मो न मुण्डनम्॥")
मुण्डफलः, पुं, (मुण्डवत् फलमस्य।) नारिकेलवृक्षः। यथा,—
"तथा मुण्डफलश्चापि विल्वामित्रप्रियोऽपि च।"
इति शब्दरत्नावली॥
मुण्डशालिः, पुं, (मुण्डो मुण्डित इव शालिः।) शालिभेदः। तत्पर्य्यायः। मुण्डनव २ निःशूकः ३ अशूककः ४। अस्य गुणाः। त्रिदोषनाशित्वम्। मधुरत्वम्। बलप्रदत्वम्। रुचिकारित्वम्। दीपनत्वम्। पथ्यत्वम्। मुखजाड्यरुजापहत्वञ्च। इति राजनिर्घण्टः॥
मुण्डा, स्त्री, (मुण्ड+स्त्रियां टाप्।) मुण्डीरिका। इति मेदिनी। डे, २२॥ मुण्डिता स्त्री। इत्यमरटीकायां भरतः॥
मुण्डाख्या, स्त्री, (मुण्डेत्याख्या यस्याः।) महाश्रावणिका। इति राजनिर्घण्टः॥
मुण्डायसं, क्ली, (मुण्डश्च तत् अयश्चेति। मुण्ड+अयस्+"अनोश्मायः सरसां जातिसंज्ञयोः।" ५।४।९४। इति टच्।) लोहम्। इति राजनिर्घण्टः॥
मुण्डितं, क्ली, (मुण्ड्यते खण्ड्यते इति। मुडि खण्डने+कर्म्मणि क्तः।) लोहम्। इति राजनिर्घण्टः॥ वापितमुण्डे, त्रि। इत्यमरः।३।१।८५॥
मुण्डितिका, स्त्री, (मुण्डित+स्वार्थे कन्+स्त्रियां टाप् अत इत्वं।) वृक्षविशेषः। मुण्डीरी इति भाषा। तत्पर्य्यायः। अजमुण्डा २ श्रावणी ३ पलङ्कषा ४ कदम्बपुष्पा ५ श्रवणा ६ भूतघ्नी ७ कुम्भाला ८ अरुणा ९। इति रत्नमाला॥
मुण्डी, [न्] पुं, (मुण्ड्यति केशान् वपति इति। मुण्ड+णिनिः।) नापितः। इत्यमरः। २। १०। १०॥ (योगाचार्य्यविशेषः। यथा, शिवपुराणे वायुसंहितायाम्। २। १०। ५—६॥
'महाकालश्च मूली च दण्डी मुण्डी तथैव च।'
इत्यादावारभ्य।
अष्टाविंशतिसंख्याता योगाचार्य्या युगक्रमात्।'
सन्मार्जितकेशच्छेदकः। यथा, महाभारते।१३। १४। ३७४।
"दिनेऽष्टमे तु विप्रेभ्यो दत्त्वोक्षं यथाविधि।

मुण्डी
दण्डी मुण्डी कुशी चीरी धृताक्षो मेखली-कृतः॥")
मुण्डीरिका, स्त्री, (मुण्ड+वाहुलकात् ईरच्। स्त्रियां ङीष् स्वार्थे कन्। स्त्रियां टाप् "केशः।" ७।४।१३। इति पूर्व्वस्य ह्रस्वः।) मुण्डितिका। इति जटाधरः॥
मुत्, स्त्री, (मोदतेऽनया इति। मुद्+क्विप्।) वृद्धिनामौषधम्। इति राजनिर्घण्टः॥
मुत्, [द्] स्त्री, (मोदनमिति। मुद्+भावे क्विप्।) हर्षः। इत्यमरः।१।४।२४॥ (यथा, रघुवंशे।३।२५।
"उवाच धात्रा प्रथमोदितं वचो
ययौ तदीयामवलम्ब्य चाङ्गुलिम्।
अभूच्च नम्रः प्रणिपातशिक्षया
पितुर्मुदं तेन ततान सोऽर्भकः॥")
मुद क संसर्गे। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक० सेट्।) क मोदयति हृतेनान्नं लोकः। इति दुर्गादासः॥
मुद ष्णि ड हर्षे। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-अक० सेट्।) हर्षश्चित्तोत्साहः। ष्णि मुदितोऽस्ति ड मोदते धनी। इति दुर्गादासः॥
मुदा, स्त्री, (मुद्+घञर्थे कः ततष्टाप्।) हर्षः। यथा। सुखमानन्दथुर्मुदा। इति शब्दरत्नावली॥ (यथा, मार्कण्डेये। ११६। ३०।
"तं मन्त्रं क्रियमाणं तु मन्त्रिभिस्तेन भूभृता।
तत्पार्श्ववर्त्तिनी कन्या शुश्रावाथ सुदावती॥")
मुदितः, त्रि, (मुद्+क्तः। यद्वा, मुदा अस्य जाता। मुदा+इतच्।) आनन्दितः। यथा,—
"आर्त्तार्त्ते मुदिता हृष्टे प्रोषिते मलिना क्षुधा।
मृते म्रियेत या पत्यौ साध्वी ज्ञेया पतिव्रता॥"
इति शुद्धितत्त्वम्॥
आलिङ्गनविशेषः। तस्य लक्षणं यथा।
नायिकया नायकस्य वामपार्श्वे उपित्वा वामपार्श्वं तस्योरुद्वयमध्ये स्थापयित्वा उभौ मिलित्वा यदवस्थानम्। इति कामशास्त्रम्॥
मुदिता, स्त्री, (मोदते इति मुद्+सर्व्वधातुभ्य इन् संज्ञापूर्व्वकविधेरनित्यत्वात् गुणाभावः। मुदिः तस्य भावः इति तल्+टाप्।) मुदा। हर्षः। इत्यमरटीकायां मथुरेशः॥ (यथा, पातञ्जलसूत्रम्। १।३३।
"मैत्रीकरुणामुदितोपेक्षाणां सुखदुःखपुण्यापुण्यविषयाणां भावनातश्चित्तप्रसादनम्॥")
मुदिरः, पुं, (मोदन्ते अनेन प्रजा इति। मुद्+"इषिमदिमुदीति।" उणा० १।५२। इति किरच्।) मेघः। इत्यमरः।१।३।७॥ (यथा,—गीतगोविन्दे। २।३।
"प्रचुरपुरन्दरधनुरनुरञ्जितमेदुरमुदिरमम्बरम्।")
कासुकः। इति मेदिनी। रे, २०५। भेकः। इति संक्षिप्तसारोणादिवृत्तिः॥

मुद्गः, पुं, (मोदते अनेन इति । मुद् + "मुदिग्रो-र्गगगौ ।" उणा० १ । १२७ । इति गक् ।) पक्षिविशेषः । तत्पर्य्यायः । जलवायसः २ । इति हेमचन्द्रः । ४ । २३८ ॥ शमीधान्यभेदः । मुग इति भाषा । (यथा, मनुः । ६ । ३६ ।

"क्रीहयः शालयो मुद्गास्तिलामाषास्तथा यवाः ।")

तत्पर्य्यायः । क्षुद्रशिम्बः २ वर्णार्हः ३ रसोत्तमः ४ मुक्तिप्रदः ५ हयानन्दः ६ सुफलः ७ वाजिभोजनः ८ । अस्य गुणाः । कषायत्वम् । मधुरत्वम् । कफपित्तामनित्वम् । लघुत्वम् । ग्राहित्वम् । शीतत्वम् । पाके कटुत्वम् । चक्षुष्यत्वम् । नातिवातलत्वञ्च । तद्यूषगुणाः । पित्तश्रमार्त्ति-शमनत्वम् । लघुत्वम् । सन्तापहारित्वम् । अरोचकनाशित्वम् । तत्सैन्धवयुक्तञ्चेत् रक्त-प्रसादनत्वम् । सर्व्वरोगापहारित्वञ्च । इति राजनिर्घण्टः ॥ अपि च । रूक्षत्वम् । स्वादु-त्वम् । अल्पानिलत्वम् । ज्वरघ्नत्वञ्च । इति भावप्रकाशः ॥* ॥ वनमुद्गगुणाः ।

"मुकुष्टः शीतलो ग्राही कफपित्तज्वरापहः ॥"

तद्विशेषा यथा, राजवल्लभे ।

"प्रधाना हरितास्तत्र वन्यमुद्गासु मुद्गवत् ।
कृष्णमुद्गा महामुद्गा गौरा हरितपीतकाः ।
श्वेता रक्ताश्च निर्द्दिष्टा लघवः पूर्व्वपूर्व्ववत् ॥"

मुद्गपर्णी, स्त्री, (मुद्गस्येव पर्णान्यस्याः मुद्गपर्ण + जातौ ङीष् ।) वनमुद्गः । सुगानी इति भाषा । तत्पर्य्यायः । काकमुद्गा २ सक्षा ३ । इत्यमरः ॥ क्षुद्रसक्षा ४ शिम्बी ५ मार्ज्जार-गन्धिका ६ वनजा ७ रिङ्गिणी ८ हृस्वा ९ क्षुद्रपर्णी १० कुरङ्गिका ११ कोशिला १२ वनोद्भवा १३ वनमुद्गा १४ आरण्यमुद्गा १५ वन्या १६ । कुरङ्गिकास्थाने करञ्जिका इति च पाठः । अस्या गुणाः । हिमत्वम् । कास-वातरक्तक्षयपित्तदाहज्वरनाशित्वम् । चक्षुष्य-त्वम् । शुक्रवृद्धिकारित्वञ्च । इति राजनिर्घण्टः ॥ अपि च । यथा, भावप्रकाशे ।

"मुद्गपर्णी काकपर्णी क्षुद्रपर्ण्यल्पपर्णिका ।
काकमुद्गा च सा प्रोक्ता तथा मार्ज्जारगन्धिका ।
मुद्गपर्णी हिमा रूक्षा तिक्ता स्वादुश्च शुक्रला ।
चक्षुष्या क्षयशोषघ्नी ग्राहिणी ज्वरदाहनुत् ।
दोषत्रयहरी लघ्वी ग्रहण्यर्शोऽतिसारहृत् ॥"

मुद्गभुक्, [ज्] पुं, (मुद्गं भुंक्ते इति । भुज् + क्विप् ।) चोटकः । इति जटाधरः ॥

मुद्गभोजी, [न्] पुं, (मुद्गं भुंक्ते इति । भुज् + णिनिः ।) अश्वः । इति राजनिर्घण्टः ॥

मुद्गमोदकः, पुं, (मुद्गेन घटितो मोदकः ।) मोदक-विशेषः । मतिचुर इति भाषा । यथा,—

"मुद्गानां घृतसर्पीं सम्यग्घोलयेन्निर्म्मलाम्बुना ।
कटाहस्यधनस्योर्द्धं भाण्डं स्थापयेत्ततः ॥
धूमसीन्तु द्रवीभूतां प्रक्षिपेत् भाण्डोपरि ।
पतन्ति बिन्दवस्तस्मात्तान् सुपक्वान् समुद्धरेत् ।
सितापाकेन संयोज्य कुर्य्यात् युक्तेन मोदकान् ॥"

अस्य गुणाः । यथा, भावप्रकाशे ।

"लघुर्ग्राही त्रिदोषघ्नः स्वादुः शीतो रुचिप्रदः ।
चक्षुष्यो ज्वरहृत् वल्यस्तर्पणो मुद्गमोदकः ॥"

मुद्गरं, क्ली, (मुद्गं आनन्दं गिरति विकिरतीति । गॄ + अच् ।) मल्लिकाभेदः । लोष्टादिभेदने, पुं । इति मेदिनी । रे, २०४ ॥ (यथा, महाभारते । १ । २११ । ३ ।

"गदापट्टिशधारिण्या शूलमुद्गरहस्तया ।
प्रस्थितो सहधर्म्मिण्या महत्या दैत्यसेनया ॥")

मुद्गरः, पुं, (मुद् + गॄ + अच् ।) कर्म्मारवृक्षः । पुष्पवृक्षविशेषः । तत्पर्य्यायः । गन्धसारः २ सप्तपत्रः ३ अतिगन्धः ४ गन्धराजः ५ विट-प्रियः ६ प्रियः ७ जनेष्टः ८ नगेष्टः ९ । अस्य गुणाः । मधुरत्वम् । शीतत्वम् । सुरभित्वम् । सौख्यदायकत्वम् । मनोज्ञकारित्वम् । मधु-पानन्दकारित्वम् । पित्तप्रकोपनाशित्वञ्च । इति राजनिर्घण्टः ॥ * ॥ अस्त्रविशेषः । सुगुर इति भाषा । तत्पर्य्यायः । द्रुघणः २ घनः ३ । इत्यमरः ॥ द्रुघनः ४ । इति भरतः ॥ प्रघणः ५ । इति जटाधरः ॥ मुद्गरः कोरकाख्ययोः । इति हेमचन्द्रः ॥ (यथा, रघौ । १२ । ७३ ।

"पादप्रविद्धपरिघः शिलानिष्पेषमुद्गरः ॥")

मुद्गरकः, पुं, (मुद्गरमिवेति प्रतिकृतौ कन् ।) कर्म्मारः । इति राजनिर्घण्टः । कामराङ्गा इति भाषा ॥

मुद्गलं, क्ली, रोहिषतृणम् । इति राजनिर्घण्टः ॥

मुद्गलः, पुं, हर्य्यश्वराजपुत्रः । यथा,—

"सुप्रान्तेः पुरुजानुः तस्माच्चर्चः ततश्च हर्य्यश्वः हर्य्यश्वान्मुद्गलवृद्धयवृद्धदिव्ययवोनरकाम्पिल्य-संज्ञाः । पञ्चानामेतेषां विषयाणां रक्षणायालमेते मत्पुत्रा इति पित्राभिहिता इति पञ्चालाः । इति विष्णुपुराणे ४ अंशे १९ अध्यायः ॥ (मुद्गं लातीति । ला + कः । इत्या-दिवृत्तौ उज्ज्वलदत्तः ।) गोत्रकारकमुनि-विशेषः । तस्य भार्य्या इन्द्रसेना । इति पुराणम् ॥ (उपनिषद्विशेषः ।)

मुद्गरः, पुं, वनमुद्गः । इति शब्दरत्नावली ॥

मुद्गरकः, पुं, (मुद्गर + स्वार्थे कन् ।) वनमुद्गः । इत्यमरः । २ । ६ । १७ ॥

मुद्गार्द्रवटः, पुं, (मुद्गेनार्द्रः वटः ।) वटक-विशेषः । चाउलबड़ा इति भाषा । यथा,—

"मुद्गपिष्टौ विरचितान् वटकांस्तैलपाचितान् ।
हस्तेन चूर्णयेत् सम्यक् तस्मिंश्चूर्णे विनिक्षिपेत् ॥
भृष्टं हिङ्गार्द्रकं शुल्वं मरिचं जीरकं तथा ।
निक्षारसं यवानीञ्च युक्त्या सर्व्वं विमिश्रयेत् ॥
मुद्गपिष्टौ पचेत् सम्यक् स्थाल्यामङ्गारकोपरि ।
तस्यास्तु गोलकं कुर्य्यात्तन्मध्ये पूरणं क्षिपेत् ॥
तैले तान् गोलकान् पक्वा क्षौद्रिताया निमज्ज्येत् ।
गोलकाः पाचकैः प्रोक्तास्ते चार्द्रकवटा अपि ॥"

अस्य गुणाः । यथा, भावप्रकाशे ।

"मुद्गार्द्रकवटा रुच्या लघवो बलकारकाः ।
दीपनास्तर्पणाः पथ्याश्चिरदोषेषु प्रपूजिताः ॥"

मुद्रा, स्त्री, (मोदते अनयेति । मुद् + "स्फायि-तञ्चीत्यादि ।" उणा० २ । १३ । इति रक् अतः टाप् ।) प्रत्ययकारिणी ॥ इति विकाण्ड-शेषः । नामेर मोहर इति भाषा ॥ अङ्गुलि-मुद्रा । इति शब्दरत्नावली ॥ छापर आङ्गटी इति भाषा । स्वर्णरौप्यादिमुद्रिका च । (यथा, अभिज्ञानशाकुन्तले । २ ।

"इमां मुद्रां त्वदङ्गुलौ निवेशयता मया ।"

चिह्नम् । यथा, श्रीमद्भागवते । ३ । २४ । १७ ।

"ज्ञानविज्ञानयोगेन कर्म्मणामुद्धरन् जटाः ।
हिरण्यकेशः पद्माक्षः पद्ममुद्रापदाम्बुजः ॥")

मोहर टाका इत्यादि भाषा । इति लोक-प्रसिद्धिः ॥* ॥ पञ्चधालिप्यन्तर्गतलिपिविशेषः । छापार अचर इति भाषा । यथा,—

"मुद्रालिपिः शिल्पलिपिर्लिपिर्लेखनिसम्भवा ।
गुप्तिकावर्णसम्भूता लिपयः पञ्चधा स्मृताः ।
एताभिर्लिपिभिर्याप्ता धरित्री शुभदा हर ! ॥"

इति वाराहीतन्त्रम् ॥

"लेखन्या लिखितं विप्रैर्मुद्राभिरङ्कितञ्च यत् ।
शिल्पादिनिर्म्मितं यच्च पाठ्यं धार्य्यञ्च सर्व्वदा ।

इति खड्गमालातन्त्रम् ॥* ॥

पञ्चमकारान्तर्गतभक्षद्रव्यविशेषः । यथा,—

"पृथुकास्तण्डुला भृष्टा गोधूमचणकादयः ।
तस्य नाम भवेद्देवि ! मुद्रा मुक्तिप्रदायिनी ॥"

इति निर्व्वाणतन्त्रे ११ पटलः ॥

तस्याः शोधनं यथा,—

"ॐ तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः
दिवीव चक्षुराततम् । ॐ तद्विप्रासो विपन्यवो
जागृवांसः समिन्धते विष्णोर्यत् परमं पदम् ।
इति मन्त्राभ्यां शोधनम् । इति खतन्त्रतन्त्रम् ॥
शरीरे धार्य्यभगवदायुधादिचिह्नम् । छाप इति
भाषा । यथा,—

"ततो नारायणीं मुद्रां धारयेत् प्रीतये
हरेः ।
मत्स्यकूर्म्मादिचिह्नानि चक्रादीन्यायुधानि च ॥
अथ मुद्राधारणनित्यता स्मृतौ ।
"अङ्कितः शङ्खचक्राभ्यामुभयोर्बाहुमूलयोः ।
समर्च्चयेद्धरिं नित्यं नान्यथा पूजनं भवेत् ॥"
आदिपुराणे ।
"शङ्खचक्रोर्द्धपुण्ड्रादिरहितं ब्राह्मणाधमम् ।
गर्हयेत् तु समारोप्य राजा राष्ट्रात् प्रवासयेत् ॥"
गारुडे श्रीभगवद्वाक्यौ ।
"सर्व्वकर्म्माधिकारेषु शुचौ नामेव चोदितः ।
शुचित्वञ्च विधानीयान्नदीयायुधधारणात् ॥"
इति पाद्मे उत्तरखण्डे ।
"शङ्खचक्रादिभिश्चिह्नैर्विप्रः प्रियतमैर्हरेः ।
रहितः सर्व्वधर्म्मेभ्यः प्रच्युतो नरकं व्रजेत ॥"
श्रुतौ च यजुःकठशाखायाम् ।
"ऊर्द्धपुण्ड्रः कृतचक्रधारी
विष्णुं परं ध्यायति यो महात्मा ।
स्मरेण मन्त्रेण सदा हृदि स्थितं
परात्परं यन्महतो महान्तम् ॥"

अथर्वणि च ।
'अभिर्व्यमुरुक्रमस्य चिह्नै-
रङ्किता लोके शुभगा भवेम ।'
तद्विष्णोः परमं पदं ये गच्छन्ति लाञ्छिताः ।
इत्यादि ॥

अतएव ब्रह्मपुराणे ।
'शङ्खाद्युद्याङ्कितं दृष्ट्वा सन्मार्गं न करोति यः ।
द्वादशान्दार्चितं पुण्यंफलायोपगच्छति ॥'*॥
अथ मुद्राधारणमाहात्म्यम् ।
स्कान्दे श्रीसनत्कुमारमार्कण्डेयसंवादे ।
'यो विष्णुभक्तो विप्रेन्द्र ! शङ्खचक्रादिचिह्नितः ।
स याति विष्णुलोकं वै दाहप्रलयवर्जितम् ॥'
तत्रैवान्यत्र ।
'नारायणायुधैर्नित्यं चिह्नितं यस्य विग्रहम् ।
पापकोटिप्रयुक्तस्य तस्य किं कुरुते यमः ॥
शङ्खोद्धारे तु यत् प्रोक्तं वसतां वर्षकोटिभिः ।
तत् फलं लिखिते शङ्खे प्रत्यहं दक्षिणे भुजे ॥
यत् फलं पुष्करे नित्यं पुण्डरीकाक्षदर्शने ।
शङ्खोपरिकृते पद्मे तत् फलं समवाप्नुयात् ॥
वामे भुजे गदा यस्य लिखिता दृश्यते कलौ ।
गदाधरो गयापुण्यं प्रत्यहं तस्य यच्छति ॥
यज्ञानन्दपुरे प्रोक्तं चक्रस्वामिसमीपतः ।
गदाधो लिखिते चक्रे तत् फलं क्षणदर्शने ॥'
श्रीभगवदुक्तौ च ।
'यः पुनः कलिकाले तु मत्पुरीसम्भवां सदम् ।
मत्स्यकूर्मादिकं चिह्नं गृहीत्वा कुरुते नरः ॥
देहे तस्य प्रविष्टोऽहं जानन्तु त्रिदशोत्तमाः ।
तस्य मे नान्तरं किञ्चित् कर्तव्यं श्रेय इच्छता ।
ममावतारचिह्नानि दृश्यन्ते यस्य विग्रहे ।
मर्त्यैर्मर्त्यो न विज्ञेयः स नूनं मामकी तनुः ॥
पापं सुकृतरूपन्तु जायते तस्य देहिनः ।
ममायुधानि यस्याङ्गे लिखितानि कलौ युगे ॥
उभाभ्यामपि चिह्नाभ्यां योऽङ्कितो मत्स्य-
सुदया ।
कूर्मेणापि स्वकं तेजो निक्षिप्तं तस्य विग्रहे ॥
शङ्खश्च पद्मञ्च गदां रथाङ्गं
मत्स्यश्च कूर्मं रचितं स्वदेहे ।
करोति नित्यं सुकृतस्य वृद्धिं
पापक्षयं गच्छति चार्चितस्य ॥'
तत्रैव श्रीब्रह्मनारदसंवादे ।
'कृष्णशङ्खाङ्कवक्षं दुर्भेद्यं देवदानवैः ।
अधृष्यं सर्वभूतानां शस्त्रास्त्राणामपि ॥
लक्ष्मीः सरस्वती दुर्गा सावित्री हरवल्लभा ।
नित्यं तस्य वसेद्देहे यस्य शङ्खाङ्किता तनुः ॥
गङ्गा गया कुरुक्षेत्रं प्रयागं पुष्करादि च ।
नित्यं तस्य सदा निष्ठेदृश्यस्य पद्माङ्कितं वपुः ॥
यस्य कौमोदकीचिह्नं भुजे वाथ कलिप्रिय ! ।
प्रत्यहं तत्र दृष्टो गङ्गासागरसङ्गमः ॥
मत्स्यं वरे गदाधस्ताद्यदाङ्गं लिखते यदि ।
दृष्ट्वेन सहितं तत्र त्रैलोक्यं सचराचरम् ॥
त्रयोऽप्यग्न्यो देवा विष्णोर्लोकाः पदानि च ।
निवसन्ति सदा तस्य यस्य देहे सुदर्शनम् ॥'
किञ्च ।
'शङ्खाद्युद्याङ्किता मुद्रा यस्य-नारायणी करे ।
ऊर्ध्वलोकाधिकारी च स ज्ञेयश्चिदशां पतिः ॥
कृष्णमुद्राप्रयुक्तस्तु देवं पित्र्यं करोति यः ।
नित्यं नैमित्तिकं काम्यं प्रत्यहञ्चाक्षयं भवेत् ॥
पीड़यन्ति न तत्रैव ग्रहा ऋक्षाणि राशयः ।
अष्टाक्षराङ्किता मुद्रा यस्य धातुमयी करे ॥'
वाराहे श्रीसनत्कुमारोक्तौ ।
'शङ्खाद्युधाङ्कितं देहं गोपीचन्दनमृत्तया ।
प्रयागादिषु तीर्थेषु स गत्वा किं करिष्यति ॥
यदा यस्य प्रपश्येत देहं शङ्खादिचिह्नितं ।
तदा तदा जगत्स्वामी तुष्टो हरति पातकम् ॥
भवते यस्य देहे तु शङ्खोरात्रं दिने दिने ।
शङ्खचक्रगदाधस्तं लिखितं सोऽच्युतः स्वयम् ॥
नारायणायुधैर्युक्तं कृत्वात्मानं कलौ युगे ।
करुते पुण्यकर्माणि मेरुतुल्यानि तस्य वै ॥
शङ्खादिनाङ्कितो भक्त्या श्राद्धं यः करुते द्विजः ।
विधिहीनन्तु संपूर्णं पितॄणान्तु शतासमम् ॥
यथाग्निर्दहते कक्षं वायुना प्रेरितो भृशम् ।
तथा दहन्ति पापानि दृष्ट्वा शङ्खायुधानि वै ॥'
ब्राह्मे श्रीब्रह्मनारदसंवादे ।
'विष्णुनामाङ्कितां मुद्रां अष्टाक्षरसमन्विताम् ।
शङ्खादिकायुधैर्युक्तां स्वर्णरूप्यमयीमपि ॥
धत्ते भागवतो वस्तु कलिकाले विशेषतः ।
प्रह्लादस्य समो ज्ञेयो नान्यथा कलिवल्लभ ! ॥'
किञ्च ।
'शङ्काङ्किततनुर्विप्रो मुक्तः यस्य च वेश्मनि ।
तदन्नं स्वयमश्नन्ति पितृभिः सह केशवः ॥
शङ्खाद्युधाङ्कितो यस्तु श्मशाने म्रियते यदि ।
प्रयागे या गतिः प्रोक्ता सा गतिस्तस्य नारद ! ॥
शङ्खाद्युधैः कलौ नित्यं मण्डितं यस्य विग्रहम् ।
तत्राश्रयं प्रकुर्वन्ति विबुधा वासवादयः ॥
यः करोति हरेः पूजां शङ्खशङ्काङ्कितो नरः ।
अपराधसहस्राणि नित्यं हरति केशवः ॥
कृत्वा काष्ठमयं बिम्बं शङ्खशङ्केषु चिह्नितम् ।
यो रक्षयति चात्मानं ततुसमो नास्ति वैष्णवः ॥
पापषड्पतितब्राह्मैर्नास्तिकालापपातकैः ।
न लिप्यते कलिकृतैः शङ्खशङ्काङ्कितो नरः ॥'
किञ्च ।
'अष्टाक्षराङ्किता मुद्रा यस्य धातुमयी भवेत् ।
शङ्खपद्मादिभिर्युक्ता पूज्यतेऽसौ सुरासुरैः ॥
धृता नारायणी मुद्रा प्रह्लादेन पुरा कृता ।
विभीषणेन बलिना ध्रुवेण च शुकेन च ॥
मान्धातृणाम्बरीषेण मार्कण्डप्रमुखैर्द्विजैः ।
शङ्खादिचिह्नितैः शङ्खैर्देहे कृत्वा कलिप्रिय ! ।
आराध्य केशवात् प्राप्तं समीहितफलं महत् ॥'
किञ्च ।
'गोपीचन्दनमृत्तया लिखितं यस्य विग्रहे ।
शङ्खपद्मादिचक्रं वा तस्य देहे वसेद्धरिः ॥'
तत्रैव श्रीसनत्कुमारोक्तौ ।
'यस्य नारायणी मुद्रा देहे शङ्खादिचिह्नितां ।
धात्रीफलकृता माला तुलसीकाष्ठसम्भवा ॥
द्वादशाक्षरमन्त्रैस्तु नियुक्तानि कलेवरे ।
आयुधानि च विप्रस्य मत्सरः स च वैष्णवः ॥'
किञ्च ।
'यस्य नारायणी मुद्रा देहे शङ्खादिचिह्नितां ।
सर्वाङ्गं चिह्नितं यस्य शङ्खैर्नारायणोद्भवैः ॥
प्रवेशो नास्ति पापस्य कवचं तस्य वैष्णवम् ॥'
अन्यत्र च ।
'अभिर्भागवतैश्चिह्नैः कलिकाले द्विजातयः ।
भवन्ति मर्त्यलोके ते शापानुग्रहकारकाः ॥'*॥
अथ मुद्राधारणविधिः । गौतमीये ।
"ललाटे च गदा कार्या ऋष्टिं चापः शरः स्रुचा ।
नन्दकञ्चैव हृन्मध्ये शङ्खचक्रं भुजद्वये ॥
शङ्खचक्राङ्कितो विप्रः श्मशाने म्रियते यदि ।
प्रयागे या गतिः प्रोक्ता सा गतिस्तस्य गौतम ! ॥
चक्रञ्च दक्षिणे बाहौ शङ्खं वामेऽपि दक्षिणे ।
गदां वामे गदाधस्तात् पुनश्चक्रञ्च धारयेत् ॥
शङ्खोपरि तथा पद्मं पुनः पद्मञ्च दक्षिणे ।
खड्गं वक्षसि चापञ्च शरं शिरसि धारयेत् ॥
इति पञ्चायुधान्यादौ धारयेद्वैष्णवो जनः ।
मत्स्यञ्च दक्षिणे हस्ते कूर्मं वामकरे तथा ॥'
तथा चोक्तम् ।
'दक्षिणे तु भुजे विप्रो विभ्रयाद्वै सुदर्शनम् ।
मत्स्यं पद्मञ्चापरेऽथ शङ्खं कूर्मं गदां तथा ॥
साम्प्रदायिकशिष्टानामाचाराच्च यथारुचि ।
शङ्खचक्रादिचिह्नानि सर्वेष्वङ्गेषु धारयेत् ॥
भक्त्या निजेष्टदेवस्य धारयेच्चक्रमान्यपि ।
चक्रशङ्खौ च धार्येते संभिन्नावेव केचन ॥'
यत उक्तं ब्रह्मवैवर्ते ।
'केवलं नोद्वहेच्छङ्खमादौ चासुरविग्रहम् ।
अतश्चक्रविभिन्नं तं विभ्रयाद्वैष्णवः सदा ॥
श्रीगोपीचन्दनेनैवं चक्रादीनि बुधोऽन्वहम् ।
धारयेच्छयनादौ तु तप्तानि किल तानि हि ॥'
अथ चक्रादीनां लक्षणानि ।
'द्वादशाचरन्तु षट्कोणं वलयत्रयसंयुतम् ।
चक्रं स्याद्दक्षिणावर्तैः शङ्खस्य श्रीहरेः स्मृतः ॥
गदापद्मादिकं लोकसिद्धमेव मतं बुधैः ।
मुद्रा च भगवान्नाम्नाङ्किता यावाचरादिभिः ॥'
इति श्रीहरिभक्तिविलासः ॥ * ॥
अपि च ।
'यथा मुद्रा शीतलाख्या तथा तप्ता न संशयः ।
तप्तायाः शीतलायाश्च विभेदो नैव वर्तते ॥
नामचिह्नादिना देहे वह्निना वा सदाङ्कनम् ।
सा दीक्षा प्रोच्यते भूप ! वाह्यानां ज्ञानिना-
मपि ॥
वैष्णवैर्विष्णुभक्तैश्च ब्राह्मणैर्वेदपारगैः ।
सन्धार्या सतिला मुद्रा गोपीचन्दनसंयुता ॥'
इति नारदपञ्चरात्रम् ॥
'कृष्णनामाक्षरैर्गात्रमङ्कयेच्चन्दनादिना ।
स लोकपावनो भूत्वा विष्णुलोकमवाप्नुयात् ॥
अमितेन चक्रेण ब्राह्मणो बाहुमूलयोः ।
अङ्कयित्वा जपेच्छन्नं संसाराच्मोचमाप्नुयात् ॥'
इति पद्मपुराणम् ॥

'तन्नाम्ना चाङ्कितं सर्व्वं वसनं भाजनादिकम् ।'
इति हारीतस्मृतिः ॥ * ॥

देवताविशेषप्रीतिजनिकाङ्गुलिरचना। यथा, मुद्रापदव्युत्पत्तिमाह तन्त्रे।

'मोदनात् सर्व्वदेवानां द्रावणात् पापसन्ततेः। तस्मान्मुद्रेति सा ख्याता सर्व्वकामार्थसाधनी ॥ अथ मुद्राः प्रवक्ष्यामि सर्व्वतन्त्रेषु कल्पिताः। याभिर्व्विरचिताभिश्च मोदन्ते मन्त्रदेवताः ॥ अर्च्चने जपकाले च ध्याने काम्ये च कर्म्मणि। स्नाने चावाहने गन्धे प्रतिष्ठायाञ्च रक्षणे ॥ नैवेद्ये च तथान्यत्र तत्तत्कल्पप्रकाशिते। स्थाने मुद्राः प्रदर्श्याः खलक्षणलक्षिताः ॥ आवाहनादिका मुद्रा नव साधारणा मताः। तथा षड़ङ्गमुद्राश्च सर्व्वमन्त्रेषु योजयेत् ॥ एकोनविंशतिर्मुद्रा विष्णोरुक्ता मनीषिभिः। शङ्खचक्रगदापद्मवेणुश्रीवत्सकौस्तुभाः ॥ वनमाला तथा ज्ञानमुद्रा विख्याङ्गना तथा। गरुड़ाख्या परा मुद्रा विष्णोः सन्तोषवर्द्धिनी ॥ नारसिंही च वाराही हायग्रीवी धनुस्तथा। वाणमुद्रा ततः परशुर्व्वगन्धोहनिका परा ॥ काममुद्रा पराख्याता शिवस्य दश मुद्रिकाः। लिङ्गयोनित्रिशूलाख्यामालेष्टाभीष्टगाङ्कयाः। खट्वाङ्गा च कपालाख्या डमरुः शिवतोषदाः ॥ सूर्य्यस्यैकैव पद्माख्या सप्तमुद्रा गणेशितुः। दन्तपाशाङ्कुशा विघ्नपरशुलड्डुकसंज्ञिताः। बीजपूराङ्कया मुद्रा विज्ञेया विघ्नपूजने ॥ पाशाङ्कुशवराभीतिखड्गचर्म्मधनुःशराः। मौद्गली मुद्रिका दौर्गी मुद्राः शक्तेः प्रियङ्कराः ॥ लक्ष्मीमुद्रार्च्चने लक्ष्म्या वाग्वादिन्याश्च पूजने। अक्षमाला तथा वीणाव्याख्यापुस्तकमुद्रिकाः ॥ सप्तजिह्वाङ्कया मुद्रा विज्ञेया वह्निपूजने। मत्स्यमुद्रा च कूर्म्माख्या लेलिहा सुखसंज्ञिका ॥ महायोनिरिति ख्याता सर्व्वसिद्धिसमृद्धिदा। शुक्रार्च्चने महायोनिः श्यामादौ सुखमुद्रिका ॥ मत्स्यकूर्म्मलेलिहाख्या मुद्रा साधारणी मता। तारार्च्चने विशेषास्तु कथ्यन्ते पञ्च मुद्रिकाः ॥ योनिश्च भूतिनी चैव वीराख्या दैत्यधूमिनी। लेलिहानेति संप्रोक्ताः पञ्चमुद्राः प्रकाशिताः ॥ दशका मुद्रिका ज्ञेयाश्छिन्नायाः प्रपूजने। संक्षोभद्रावणाकर्षवश्योन्मादमहाङ्कुशाः। खेचरी बीजयोन्याख्या त्रिखण्डा परिकीर्त्तिताः ॥ कुम्भमुद्राभिषेके स्यात् पद्ममुद्रासने तथा। कालकर्णी प्रयोक्तव्या विघ्नप्रशमकर्म्मणि ॥ मालिनी च प्रयोक्तव्या जलशोधनकर्म्मणि। श्रीगोपालार्च्चने वेणुर्नृहरेर्नारसिंहिका ॥ वराहस्य च पूजायां वाराहाख्यां प्रयोजयेत्। हयग्रीवार्च्चने चैव हायग्रीवीं प्रदर्शयेत् ॥ रामार्च्चने धनुर्ब्बाणमुद्रे परशुस्तथार्च्चने। परशुरामस्य विज्ञेया जगन्मोहनसंज्ञिका ॥ वासुदेवाङ्कया ध्याने कुन्तमुद्रा तु रक्षणे। सर्व्वत्र प्रार्थने चैव प्रार्थनाख्यां प्रयोजयेत् ॥ * ॥

उद्देशानुक्रमादासामुच्यन्ते लक्षणान्यथ।

हस्ताभ्यामञ्जलिं बद्ध्वानामिकामूलपर्व्वणोः ॥ अङ्गुष्ठौ निक्षिपेत् सेयं मुद्रा त्वावाहनी स्मृता।१। अधोमुखौ त्वियं चेत् स्यात् स्थापनी मुद्रिका स्मृता ॥ २ ॥

उच्छ्रिताङ्गुष्ठमुष्ट्योस्तु संयोगात् सन्निधापनी।३। अन्तःप्रवेशिताङ्गुष्ठा सैव संबोधनी मता ॥४॥ उत्तानमुष्टियुगला संमुखीकरणी मता। ५। देवताङ्गे षड़ङ्गानां न्यासः स्यात् सकलीकृतिः॥६॥ सव्यहस्तकृता मुष्टिर्दीर्घाधोमुखतर्ज्जनी। अवगुण्ठनमुद्रेयमभितो ह्यामिता मता ॥ ७ ॥ अन्योन्याभिमुखाश्लिष्टा कनिष्ठानामिका पुनः। तथैव तर्ज्जनी मध्या धेनुमुद्रा प्रकीर्त्तिता ॥ अङ्गुष्ठीकरणं कुर्य्यात्तया साधकसत्तमः। ८। अन्योन्यग्रथिताङ्गुष्ठा प्रसारितपराङ्गुली ॥ महामुद्रेयमुदिता परमीकरणे बुधैः। प्रयोजयेदिमा मुद्रा देवताज्ञानकर्म्मणि ॥९॥*॥

वैष्णवीनान्तु मुद्राणां कथ्यन्ते लक्षणान्यथ। वामाङ्गुष्ठन्तु संगृह्य दक्षिणेन तु मुष्टिना ॥ कृत्वोत्तानं ततो मुष्टिमङ्गुष्ठन्तु प्रसारयेत्। वामाङ्गुल्यस्तथाश्लिष्टाः संयुक्ताः स्युः प्रसारिताः॥ दक्षिणाङ्गुष्ठसंस्पृष्टा ज्ञेयैषा शङ्खमुद्रिका। १। हस्तौ तु संमुखौ कृत्वा सन्नतप्रोथिताङ्गुली ॥ तलान्तर्मिलिताङ्गुष्ठौ सुभगौ सुप्रसारितौ। कनिष्ठाङ्गुष्ठकौ लग्नौ मुद्रैषा चक्रसंज्ञिका ॥२॥ अन्योन्याभिमुखौ हस्तौ कृत्वा तु ग्रथिताङ्गुली। अङ्गुल्यौ मध्यमे भूयः सलग्ने सुप्रसारिते ॥ गदा मुद्रेयमुदिता विष्णोः सन्तोषवर्द्धिनी। ३। हस्तौ तु संमुखौ कृत्वा सन्नतप्रोथिताङ्गुली ॥ तलाग्रैर्मिलिताङ्गुष्ठौ कृत्वैषा पद्ममुद्रिका। ४। ओष्ठे वामकराङ्गुष्ठो लग्नस्तस्य कनिष्ठिका ॥ दक्षिणाङ्गुष्ठसंयुक्ता ततः कनिष्ठा प्रसारिता। तर्ज्जनीमध्यमानामाः किञ्चित् संकुच्य चालिताः॥ वेणुमुद्रा भवत्येवा सुगुप्ता प्रेयसी हरेः। ५। अन्योन्यपृष्ठकरयोर्मध्यमानामिकाङ्गुली ॥ अङ्गुष्ठेन तु बध्नीयात् कनिष्ठाग्रलसंस्थिते। तर्ज्जन्यौ कारयेदेवा मुद्रां श्रीवत्ससंज्ञिकां ॥६॥ अनामापृष्ठसंलग्ना दक्षिणस्य कनिष्ठिका। कनिष्ठयान्यया बद्ध्वा तर्ज्जन्या दक्षया तथा ॥ वामानामाञ्च बध्नीयात् दक्षिणाङ्गुष्ठमूलके। अङ्गुष्ठमध्यमे वामे संयोज्य सरलाः पराः ॥ चतसोऽप्यग्रसंलग्ना मुद्रां कौस्तुभसंज्ञिकां।७। सृणेत् कण्ठादिपादान्तं तर्ज्जन्याङ्गुष्ठया तथा ॥ करद्वयेन मालावत् मुद्रेयं वनमालिका। ८। तर्ज्जन्यङ्गुष्ठकौ सक्तावग्रतो विन्यसेत् हृदि ॥ वामहस्ताम्बुजं वामजानुमूर्द्धनि विन्यसेत्। ज्ञानमुद्रा भवेदेषा रामचन्द्रस्य प्रेयसी ॥ ९ ॥

अङ्गुष्ठं वामसव्यस्थितमितरकराङ्गुष्ठकेनापि बद्ध्वा
तस्याग्रं पीडयित्वाङ्गुलिभिरपि च ता वाम-
हस्ताङ्गुलीभिः।
बद्ध्वा गाढं हृदि स्यामयतु विमलधीर्यो हरन्
मारबीजं

विख्याख्या मुद्रिकेषा स्फुटमिह गदिता गोप-
नीया विधिज्ञैः ॥ १० ॥

हस्तौ तु विमुखौ कृत्वा ग्रथयित्वा कनिष्ठिके। मिथस्तर्ज्जनिके श्लिष्टे श्लिष्टावङ्गुष्ठकौ तथा ॥ मध्यमानामिके द्वे तु द्वौ पक्षाविव चालयेत्। एषा गरुड़मुद्रा स्यादिष्णोः सन्तोषवर्द्धिनी ॥११॥ जानुमध्ये करौ कृत्वा चिबुकौष्ठौ समावुभौ। हस्तौ तु भूमिसंलग्नौ कम्पमानः पुनः पुनः ॥ मुखं विवृतकं कुर्य्यात् लेलिहानाञ्च जिह्विकाम्। नारसिंही भवेदेषा मुद्रा तत्प्रीतिवर्द्धिनी ॥'

अथवा।

'अङ्गुष्ठाभ्यान्तु करयोस्तथाक्रम्य कनिष्ठिके। अधोमुखीभिः सर्व्वाभिर्मुद्रेयं नृहरेर्म्मता ॥१२॥ देवोपरि करं वामं कृत्वोत्तानमधः सुधीः। नमयेदिति संप्रोक्ता मुद्रा वाराहसंज्ञिका ॥'

यद्वा।

'दक्षहस्तोर्द्ध्वमुखं वामहस्तमधोमुखम्। अङ्गुल्यग्रन्तु संयुक्तं मुद्रा वाराहसंज्ञिका ॥१३॥ वामहस्ततले दत्त्वा अङ्गुलीस्ताम्रधोमुखीः। संरोप्य मध्यमां तासामुन्नम्याधो विकुञ्चयेत् ॥ हयग्रीवप्रिया मुद्रा तन्मूर्त्तेरनुकारिणी ।१४। वामस्य मध्यमाग्रन्तु तर्ज्जन्यग्रेण योजयेत् ॥ अनामिकां कनिष्ठाञ्च तस्याङ्गुष्ठेन पीड़येत्। दर्शयेदामके स्कन्धे धनुर्मुद्रेयमीरिता ॥ १५ ॥ दक्षमुष्टेस्तु तर्ज्जन्या दीर्घैषा बाणमुद्रिका।'१६।

यद्वा ज्ञानार्णवे।

'यथा हस्तगतं चापं तथा हस्तं कुरु प्रिये!। चापमुद्रेयमाख्याता वामहस्ते व्यवस्थिता ॥१७॥ यथा हस्तगता बाणास्तथा हस्तं कुरु प्रिये!। बाणमुद्रेयमाख्याता रिपुवर्गनिकृन्तनी ॥१८॥ तले तलन्तु करयोस्तिर्य्यक् संयोज्य चाङ्गुलीः। संहताः प्रहताः कुर्य्यात् मुद्रा परमुसंज्ञिका ॥१९ उच्छ्रिताङ्गुष्ठमुष्टी द्वे मुद्रा त्रैलोक्यमोहिनी॥२०॥ हस्तौ तु संपुटौ कृत्वा प्रहताङ्गुलिकौ तथा। तर्ज्जन्यौ मध्यमापृष्ठे अङ्गुष्ठौ मध्यमाश्रितौ। काममुद्रेयमुदिता सर्व्वदेवप्रियङ्करी ॥२१॥*॥

महादेवप्रियाणान्तु कथ्यन्ते लक्षणान्यथ। उच्छ्रितं दक्षिणाङ्गुष्ठं वामाङ्गुष्ठेन वेष्टयेत् ॥ वामाङ्गुलीर्दक्षिणाभिरङ्गुलीभिश्च बन्धयेत्। लिङ्गमुद्रेयमाख्याता शिवसान्निध्यकारिणी ॥१॥ मिथः कनिष्ठिके बद्ध्वा तर्ज्जनीभ्यामनामिके। व्यनामिकोर्द्धसंश्लिष्टदीर्घमध्यमयोरधः ॥ अङ्गुष्ठाग्रद्वयं न्यस्येत् योनिमुद्रेयमीरिता ।२। अङ्गुष्ठेन कनिष्ठान्तु बद्ध्वा श्लिष्टाङ्गुलीत्रयम् ॥ प्रसारयेत् त्रिशूलाख्या मुद्रैषा परिकीर्त्तिता ।३ अङ्गुष्ठतर्ज्जन्ययेतु ग्रथयित्वाङ्गुलित्रयम् ॥ प्रसारयेदक्षमाला मुद्रेयं परिकीर्त्तिता। ४। अधःस्थितो दक्षहस्तः प्रहतो वरमुद्रिका ॥५॥ ऊर्द्धीकृतो वामहस्तः प्रहतोऽभयमुद्रिका।६। मिलितानामिकाङ्गुष्ठं मध्यमाग्रे नियोजयेत् ॥ श्लिष्टाङ्गुल्युच्छ्रिते कुर्य्यात् खट्वामुद्रेयमीरिता।७ पक्षाङ्गुष्ठौ दक्षिणाच्च मिलितौ ह्यूर्द्धसंस्थितः ॥

मुद्रा

खड्गाङ्गमुद्रा विख्याता शिवस्यातिप्रिया मता ।८।
पाशवद्वामहस्तन्तु कृत्वाङ्गे वामके तथा ॥
निधायोच्छ्रितवत् कुर्य्यात् मुद्रा कापालिकी मता । ९ ।

मुष्टिञ्च शिथिलां कृत्वा ईषदुच्छ्रितमध्यमाम् ॥
दक्षिणाङ्गुष्ठमुद्गम्य कर्णदेशे प्रचालयेत् ।
एषा मुद्रा डमरुका सर्व्वविघ्नविनाशिनी ॥१०॥*॥
तथा गणेशमुद्राणामुच्यन्ते लक्षणान्यथ ।
उत्तानोर्द्धसुखौ मध्या सरला वहनुष्टिका ॥
दन्तमुद्रा समाख्याता सर्व्वागमविशारदैः ।११।
वाममुष्टेस्तु तर्ज्जन्या दक्षमुष्टेस्तु तर्ज्जनीम् ॥
संयोज्याङ्गुष्ठकाभ्यां तर्ज्जन्यग्रे स्फुरे क्षिपेत् ।
एषा पाशाङ्कया मुद्रा विद्वद्भिः परिकीर्त्तिता ॥१२॥
ऋज्वीञ्च मध्यमां कृत्वा तर्ज्जनीमध्यपर्व्वणि ।
संयोज्याङ्गुष्ठयेत् किञ्चिन्मुद्रेयाङ्कुशसंज्ञिका ॥१३॥
तर्ज्जनीमध्यमानामाकनिष्ठाङ्गुष्ठमुष्टिका ।
अधोमुखी दीर्घरूपा मध्यमा विघ्नमुद्रिका ॥१४॥
परशुमुद्रा ५ निगदिता प्रसिद्धा लड्डुमुद्रिका ।१६।
वीजपूराङ्कया मुद्रा प्रसिद्धत्वादुपेक्षिता ॥७॥*॥
शाक्तेयीनाञ्च मुद्राणां कथ्यन्ते लक्षणान्यथ ।
पाशा १ कुश २ वरा ३ भीति ४ धनु ५
बाणाः समीरिताः ॥ ६ ॥

कनिष्ठानामिके बद्ध्वा स्वाङ्गुष्ठेनैव दक्षतः ।
श्लिष्टाङ्गुली तु प्रसृते संश्लिष्टे खड्गमुद्रिका ॥७॥
वामहस्तं तथा तिर्य्यक् कृत्वा चैव प्रसार्य्य च ।
आकुञ्चिताङ्गुलीः कुर्य्यात् चर्म्ममुद्रेयमीरिता ॥८
मुष्टिं कृत्वा तु हस्ताभ्यां वामस्योपरिदक्षिणम् ।
कुर्य्यान्मुसलमुद्रेयं सर्व्वविघ्नविनाशिनी ॥ ९ ॥
मुष्टिं कृत्वा कराभ्याञ्च वामस्योपरि दक्षिणम् ।
कृत्वा शिरसि संयोज्य दुर्गा मुद्रेयमीरिता ॥१०॥
चक्रमुद्रां तथा बद्ध्वा मध्यमे द्वे प्रसार्य्य च ।
कनिष्ठिके तथानीय तदग्रेऽङ्गुष्ठकौ क्षिपेत् ॥
लक्ष्मीमुद्रा परा ह्येषा सर्व्वसम्पत्प्रदायिनी ॥११॥
वीणावादनवद्धस्तौ कृत्वा सञ्चालयेच्छिरः ।
वीणामुद्रेयमाख्याता सरस्वत्याः प्रियङ्करी ।१२।
वाममुष्टिं स्वाभिमुखीं कृत्वा पुस्तकमुद्रिका ।१३।
दक्षिणाङ्गुष्ठतर्ज्जन्यावग्रजग्रे पराङ्गुलीः ॥
प्रसार्य्य संहतोत्ताना एषा व्याख्यानमुद्रिका ।१३।
श्रीरामस्य सरस्वत्या अत्यन्तप्रेयसी मता ॥*॥
मणिबन्धस्थितौ कृत्वा प्रहृताङ्गुलिकौ करौ ।
कनिष्ठाङ्गुष्ठयुगले मिलितान्तः प्रसारयेत् ॥
समाभिक्रान्यमुद्रेयं वैश्वानरप्रियङ्करी ।१५। ९ ।
कनिष्ठाङ्गुष्ठकौ सक्तौ करयोरितरेतरम् ॥
तर्ज्जनी मध्यमानामा संहता भुग्नवर्ज्जिता ।
मुद्रेषा गालिनी प्रोक्ता गुरुस्तोपरि चालिता ॥
एषाङ्गुष्ठं पराङ्गुष्ठे क्षिप्त्वा दक्षत्वेन तु ।
सावकाशामेकमुष्टिं कुर्य्यात् सा कुम्भमुद्रिका ॥
सशीर्षोर्द्धीकृताङ्गुष्ठौ तर्ज्जन्यग्रे तु विन्यसेत् ।
सर्व्वरक्षाकरी ह्येषा दन्तमुद्रा प्रकीर्त्तिता ॥९॥
प्रहृताङ्गुलिकौ एतौ मिथः श्लिष्टौ च संमुखौ ।
कुर्य्यात् मे हृदये मुद्रा प्रार्थनसंज्ञिका ॥९॥
अञ्जलिमुद्रा स्याद्गायत्र्याद्या च या ।

मुद्रा

अङ्गुष्ठावुन्नतौ कृत्वा मुष्टयोः संलग्नयोर्द्वयोः ॥
तावेवाभिमुखौ कुर्य्यात् मुद्रेषा कालकर्णिका ।*।
दक्षिणा निविड़ा मुष्टिर्नासिकार्पिततर्ज्जनी ।
मुद्रा विस्मयसंज्ञा स्यात् विस्मयावेशकारिणी ।
मुष्टिरूर्द्धीकृताङ्गुष्ठा दक्षिणा नादमुद्रिका ॥
तर्ज्जन्यङ्गुष्ठसंयोगादग्रतो बिन्दुमुद्रिका । *।
अधोमुखे वामहस्ते ऊर्द्धास्यं दक्षहस्तकम् ॥
क्षिप्त्वाङ्गुलीरङ्गुलीभिः संग्रथ्य परिवर्त्तयेत् ।
एषा संहारमुद्रा स्यात् विसर्ज्जनविधौ स्मृता ॥
दक्षपाणिपृष्ठदेशे वामपाणितलं न्यसेत् ।
अङ्गुष्ठौ चालयेत् सम्यक् मुद्रेयं मत्स्यरूपिणी ॥
वामहस्तस्य तर्ज्जन्या दक्षिणस्य कनिष्ठया ।
तथा दक्षिणतर्ज्जन्यां वामाङ्गुष्ठेन योजयेत् ॥
उन्नतं दक्षिणाङ्गुष्ठं वामस्य मध्यमादिकाः ।
अङ्गुलीर्योजयेत् पृष्ठे दक्षिणस्य करस्य च ॥
वामस्य पिहितैर्वेन मध्यमानामिके तथा ।
अधोमुखे च ते कुर्य्यात् दक्षिणस्य करस्य च ॥
कूर्म्मपृष्ठसमं कुर्य्यात् दक्षपाणिञ्च सर्व्वतः ।
कूर्म्ममुद्रेयमाख्याता देवताध्यानकर्म्मणि ॥'
पृष्ठे क्रोड़े ॥ * ॥

'अन्तराङ्गुष्ठमुष्टिन्तु कृत्वा वामकरस्य च ।
मध्यमाग्रं दक्षिणस्य तथालम्ब्य प्रयत्नतः ॥
मध्यमेनाथ तर्ज्जन्यामङ्गुष्ठाग्रेण योजयेत् ।
दक्षिणं योजयेत् पाणिं वाममुष्टौ तु साधकः ॥
दर्शयेद्दक्षिणे भागे मुण्डमुद्रेयमुच्यते ॥ * ॥
तर्ज्जनीमध्यमानामाः समं कुर्य्यादधोमुखम् ।
अनामायां क्षिपेद्दृढां ऋज्वीं कृत्वा कनिष्ठिकाम् ॥
लेलिहा नाम मुद्रेयं जीवन्यासे प्रकीर्त्तिता ।
तर्ज्जन्यनामिकामध्याकनिष्ठाक्रमयोगतः ॥
करयोर्योजयेत्वेष कनिष्ठामूलयोगतः ।
अङ्गुष्ठाग्रे तु निःक्षिप्य महायोनिः प्रकीर्त्तिता ॥'
तारायाः योन्यादिमुद्रा—यथा । योनिमुद्रा च वक्ष्यते भूतिनी वक्ष्यते वीजाख्यापि ॥
'परिवर्त्त्य करौ सृष्टौ कनिष्ठाङ्गुष्ठमध्यमे ।
अनामायुगलञ्चाधस्तर्ज्जनीयुगलं पृथक् ॥
अन्योन्यं निविड़ं बद्ध्वाङ्गुष्ठाग्रेऽनामिके ततः ।
दानवध्नमकेत्याख्या मुद्रेषा कथिता प्रिये ! ॥
अस्यास्तु बन्धनान्मन्त्री बन्धनाद्विमुच्यते ध्रुवम् ॥
वक्त्रं विलोकितं कृत्वाप्यधो जिह्वाञ्च चालयेत् ।
पार्श्वस्थं सुषियुगलं लेलिहानेति कीर्त्तिता ॥'
एषा ताराराधनेऽन्या लेलिहाना वक्ष्यते ।
'योनिर्मायाधरः सेन्दुर्वधूः कूर्चैः क्रमादिदुः ।
वीजानि चोच्चरन् मन्त्री मुद्रावन्धनमाचरेत् ॥
तर्ज्जन्यङ्गुष्ठसंयोगादग्रतो बिन्दुमुद्रिका ।
वामकेश्वरतन्त्रोक्ताः प्रकाश्यन्तेऽथ मुद्रिकाः ॥
शृणु देवि ! प्रवक्ष्यामि मुद्राः सर्व्वार्थसिद्धिदाः ।
याभिर्विरचिताभिस्तु सान्निध्यं त्रैपुरं भवेत् ॥
परिवर्त्त्य करौ सृष्टावङ्गुष्ठौ कारयेत् समौ ।
अनामान्तर्गतं कृत्वा तर्ज्जन्यौ कुटिलाकृती ॥
कनिष्ठिके नियुञ्जीत निजस्थाने महेश्वरि ! ।
त्रिखण्डेयं समाख्याता त्रिपुराध्यानकर्म्मणि ॥

मुद्रा

मध्यमामध्यगे कृत्वा कनिष्ठेऽङ्गुष्ठरोधिते ।
तर्ज्जन्यौ दण्डवत् कृत्वा मध्यमोपर्य्यनामिके
एषा च प्रथमा मुद्रा सर्व्वसंक्षोभकारिणी
एतस्या एव मुद्रायां मध्यमे सरले यदा ।
क्रियेते परमेशानि ! सर्व्वविद्राविणी तदा ॥
मध्यमातर्जनीभ्याञ्च कनिष्ठानामिके समे ।
अङ्गुष्ठाकाररूपाभ्यां मध्यमे परमेश्वरि ! ॥
अङ्गुष्ठौ तु नियुञ्जीत कनिष्ठानामिकोपरि ।
इयमाकर्षिणी मुद्रा त्रैलोक्याकर्षिणी परा ॥
पुटाकारौ करौ कृत्वा तर्ज्जन्यावङ्गुष्ठाक्रान्तौ ।
परिवर्त्तक्रमेणैव मध्यमे तदधोगते ॥
क्रमेण देवि ! तेनैव कनिष्ठानामिके तथा ।
संयोज्य निविड़ाः सर्व्वा अङ्गुष्ठावग्रदेशतः ॥
मुद्रेयं परमेशानि ! सर्व्ववश्यकरी मता ।
सम्मुखौ तु करौ कृत्वा मध्यमामध्यगेऽन्यके ॥
अनामिके तु सरले तद्बहिस्तर्ज्जनीद्वयम् ।
दण्डाकारौ तदङ्गुष्ठौ मध्यमानखदेशगौ ॥
मुद्रेषोन्मादिनी नाम्ना कर्षिणी सर्व्वयोषिताम् ।
अस्याश्चनामिकायुग्ममधः कृताङ्गुष्ठाकृती ॥
तर्ज्जन्यावपि तेनैव क्रमेण विनियोजयेत् ।
इयं महाङ्कुशा मुद्रा सर्व्वकामार्थसाधिनी ॥*॥
सव्यं दक्षिणदेशे तु सव्यदेशे तु दक्षिणम् ।
बाहुं कृत्वा महादेवि ! हस्तौ संपरिवर्त्तय च ।
कनिष्ठानामिके देवि ! युक्ते तेन क्रमेण च ।
तर्ज्जनीभ्यां समाक्रान्ते सर्व्वाङ्गमपि मध्यमे ॥
अङ्गुष्ठौ तु महेशानि ! सरलावपि कारयेत् ।
इयं सा खेचरी नाम्ना पार्थिवस्यानयोनिता ॥
परिवर्त्त्य करौ सृष्टावङ्गुष्ठचन्द्राकृती प्रिये ! ।
तर्ज्जन्यङ्गुष्ठयुगलं युगपत् कारयेत्ततः ॥
अधः कनिष्ठावष्टभ्य मध्यमे विनियोजयेत् ।
तथैव कुटिले योज्ये सर्व्वाधस्तादनामिके ।
वीजमुद्रेयमचिरात् सर्व्वसिद्धिविवर्द्धिनी ।*।
मध्यमे कुटिले कृत्वा तर्ज्जन्यौ परिसंस्थिते ॥
अनामिके मध्यगते तथैव हि कनिष्ठिके ।
सर्व्वा एकत्र संयोज्या अङ्गुष्ठपरिपीड़िताः ॥
एषा तु परमा मुद्रा योनिमुद्रेयमीरिता ।*।
एता मुद्रा महेशानि ! त्रिपुरायाः मयोदिताः ।
पूजाकाले प्रयोक्तव्या यथानुक्रमयोगतः ॥
वामहस्तेन मुष्टिन्तु बद्ध्वा कर्णप्रदेशके ।
तर्ज्जनीं सरलां कृत्वा भ्रामयेन्मनुवित्तमः ॥
सौभाग्यदक्षिणी मुद्रा न्यासकाले ऽपि सूचिता ।
अन्तरङ्गुष्ठमुष्ट्या तु निरुध्य तर्ज्जनीमिमाम् ॥
रिपुजिह्वाग्रहा मुद्रा न्यासकाले तु सूचिता
बद्ध्वा तु योनिमुद्रां वै मध्यमे कुटिले कुरु ॥
अङ्गुष्ठेन तदग्रे तु मुद्रेयं भूतिनी मता ।*।
वाममुष्टिं विधायाथ तर्ज्जनीमध्यमे ततः ॥
प्रसार्य्य तर्ज्जनीमुद्रा निर्दिष्टा वक्त्रपाणिना ॥'

इति तन्त्रसारे मुद्राप्रकरणं समाप्तम् ॥*॥*॥

अपि च ।

'उक्ताः स्तवनसंस्कारा जपस्तं पुरतो ध्रुवम् ।
मुद्राणां परिसंख्यानं स्वरूपञ्च यथाक्रमम् ॥
येषुश्च सम्पुटञ्चैव प्राञ्जलिर्विस्वपद्मकौ ।

नाराचो मुखदण्डौ च योनिरर्द्धं तथैव च ॥
वन्दनी च महामुद्रा महायोनिस्तथैव च ।
भगश्च पुटकश्चैव निःशङ्कोऽथार्द्धचन्द्रकः ॥
अङ्कुश्च द्विमुखश्चैव गुह्यमुद्राश्च सप्तिकः ।
वज्रश्चैव तथा वह्निः सयोनिर्विमलस्तथा ॥
घटः शिखरिणी तुङ्गः पुष्पोऽथ ह्यर्द्धधेनुकः ॥
संमीलनी च कुण्डश्च चक्रं शूलं तथैव च ॥
सिंहवक्त्रं गोमुखश्च प्रोन्नामोन्नमनं तथा ।
विघ्नं पाशुपतं मुद्गं लागोऽथ साधनी तथा ॥
प्रसाधनी चोग्रमुद्रा कुण्डली गूहनेव च ।
त्रिमुखश्चाविवक्त्री च योगो भेदोऽथ मोहनम् ॥
बाणो धनुश्च तूणीरं मुद्रा एतास्तु सप्तमाः ।
अधोत्तरशतं मुद्रा ब्रह्मणा याः प्रकीर्त्तिताः ॥
तासान्तु पञ्चपञ्चाशदेताः ग्राह्यास्तु पूजने ।
शेषास्तु यास्त्रिपञ्चाशन्मुद्रास्ताः समयेषु च ।
ध्यानयनसंकेतनटनादिषु ताः स्मृताः ॥
देवानां चिन्तने योगे ध्याने जप्ये विसर्ज्जने ।
आद्यास्तु पञ्चपञ्चाशन्मुद्रा भैरव ! कीर्त्तिताः ॥
मुद्रां विना तु यज्ञप्यं प्राणायामः सुरार्चनम् ।
योगो ध्यानासने चापि निष्फलानि च भैरव ! ॥
प्रत्येकं लक्षणं तेषां शृणुतं तनयौ युवाम् ॥
दक्षिणामध्यमाग्रेण सव्यहस्तस्य तर्ज्जनीम् ।
योजयेद्यक्तिमान् सम्यक् सव्यमध्यान्तु तर्ज्जनीं दक्षिणेन वै ॥
तथा दक्षानामिकया वामहस्तकनिष्ठिकाम् ।
अनामिकान्तु वामस्य दक्षिणस्य कनिष्ठया ॥
योजयेद्यक्तिमान् सम्यक् दक्षिणावर्त्तनेन तु ।
धेनुमुद्रा समाख्याता सर्व्वदेवस्य तुष्टिदा ॥१॥
संयोज्य द्वौ तलौ सर्व्वाग्रयङ्कुष्ठाग्राणि हस्तयोः ।
संयोज्य पार्श्वतोऽङ्गुष्ठौ संपुटः प्रोच्यते सुरैः ॥
सर्व्वेषामथ देवानां संपुटः शस्यते सदा ।
ध्यानसंपुटयोगादौ सम्पुटः शस्यते सदा ॥२॥
निष्कुञ्चयुगलं पार्श्वयोः संयोज्यार्द्धेन एव च ।
मध्यशून्यः पुटाकारः प्राञ्जलिः परिकीर्त्तितः ॥३॥
अङ्गुष्ठमन्तरं कृत्वा पाण्योर्मुष्टिं विधाय च ।
संयोज्य विल्ववक्त्रे तु विल्वमुद्रा प्रकीर्त्तिता ॥४॥
मणिबन्धादाकरभं संयोज्य करयोर्द्वयोः ।
अङ्गुष्ठे चापि संयोज्य तथैव च कनिष्ठिके ॥
तिसृष्वसो द्वयोः पाण्योरङ्गुलीर्विरलास्तताः ।
पद्ममुद्रा समाख्याता चतुर्वर्गप्रदा नृणाम् ॥५॥
अङ्गुष्ठाग्रेण तर्ज्जन्याः संयोज्याधोर्द्धरेखया ।
अन्याङ्गुलीस्तथानम्य नाराचः स्यात् प्रसार्य्यते ॥
मम चैव शिवायाश्च प्रीतिदेयं प्रियङ्करी ।
नाराचमुद्रा सततं प्रीत्यै वेतालभैरव ! ॥६॥
अन्तराङ्गुष्ठमुष्टिं कृत्वा वामकरस्य तु ।
मध्यमाभ्यां दक्षिणस्य तथानम्य प्रयत्नतः ॥
मध्याङ्गुलीनाथ तर्ज्जन्या अङ्गुष्ठाग्राण्नियोज्य च ।
दक्षिणं योजयेत् पाणिं वाममुष्टौ तु साधकः ॥
दर्शयेद्दक्षिणे भागे मुख्यमुद्रेयमिष्यते ।
इयन्तु गणनाथस्य प्रीतिदा मुद्रिकोत्तमा ॥
सर्व्वेषामपि देवानां तुष्टिदा सर्व्वकर्म्मसु ।७।
अङ्गुष्ठमध्यमादींश्च सम्यगानम्य तर्ज्जनीम् ॥
प्रसार्य्य दण्डमुद्रेति दक्षिणस्य करस्य तु ।८।
सर्व्वाङ्गुलीस्तु संयोज्य करयोरुभयोरपि ॥
संवेष्ट्य रज्जुवद्दृष्टे तु पाण्योरपि कनिष्ठिके ।
वामस्य वाममूलेन तदग्रं विनियोजयेत् ॥
दक्षस्य मध्यमूलेन तथाग्रं वाममेव च ।
योजयेत् योजनात् पश्चादावर्त्त्य करशाखिका ॥
योन्याकारन्तु तन्मध्यं योनिमुद्रा प्रकीर्त्तिता ।
कामाख्यायाः पञ्चमूर्त्तेर्दुर्गाया अपि भैरव ! ॥
प्रीतिदा योनिमुद्रेयं मम कामस्य च प्रिया ।९।
संयुक्ताख्याङ्गुलीः सर्व्वाः प्रसार्य्याङ्गुष्ठपर्व्वणा ।
अग्रेण च कनिष्ठाया अग्रेणापि च योजयेत् ।
करस्य दक्षिणस्येयमर्द्धयोनिः प्रकीर्त्तिता ॥१०॥
संपुटं प्राञ्जलिं वापि यदि शीर्षे नियोजयेत् ।
वन्दनीया समाख्याता मुद्रा विष्णुप्रमोदिनी ॥११॥
सैव चेत् श्रवणासक्ता महामुद्रा प्रकीर्त्तिता ।१२।
दक्षिणाङ्गे तु सा सक्ता वैष्णवी परिकीर्त्तिता ॥ १३ ॥
महायोनिस्तु कथिता वैष्णवीतन्त्रगोचरे ।
द्वयोर्मूले त्वङ्गुष्ठाग्रमङ्गुलीश्च कनिष्ठयोः ॥
नियोज्य प्रहतीकृत्य दे पाणी योजयेत् पुनः ।
भगमुद्रा च सा ख्याता लक्ष्मीवाणीप्रिया ॥ १४ ॥
सर्व्वाङ्गुलीनामग्रौघं दक्षिणस्य करस्य च ।
संयोज्यैकत्र पुरतो निर्देश्यः पुटकः स्मृतः ॥१५॥
कनिष्ठानामिकाङ्गुष्ठाङ्गुलीनां योजयेद्बुधः ।
अग्राण्येकत्र मध्यान्तु तर्ज्जनीञ्च प्रसार्य्य वै ॥
कुञ्चीकृत्य करद्वन्द्वं पृथगग्रे नियोजयेत् ।
निःशङ्को नाम मुद्रेयं नरसिंहवराह्योः ॥१६॥
कनिष्ठानामिकामध्यमाकुञ्च्य दक्षिणस्य च ।
करस्य तर्ज्जन्यङ्गुष्ठे प्रसार्य्य क्रियते तु या ॥
सा मुद्रा ह्यर्द्धचन्द्राख्या ग्रहाणां प्रीतिदायिनी । १७।
ऊर्द्धीकृत्य तथाङ्गुष्ठं दक्षिणस्य करस्य च ।
कृत्वा मध्यं तदङ्गुष्ठं वाममुष्टिं तथोर्द्धतः ।
ऊर्द्धाङ्गुष्ठं तथा कुर्य्यादङ्कुशमुद्रा प्रकीर्त्तिता ॥१८॥
एतस्या एव मुद्रायाः कनिष्ठादिविमोचतः ।
अष्टौ मुद्राः समाख्याता नाम तासां पृथक् पृथक् ॥
त्रिमुखश्चैव १९ मुष्टिश्च २० वज्र २१ मावह्न २२ मेव च ।
विमलश्च २३ घटश्चैव २४ तुङ्गः २५ पुष्प २६ स्तथैव च ॥
नवानां विष्णुमूर्त्तीनां सार्द्धमङ्गेन मुद्रिकाः ।
क्रमान्नव समाख्याता नायिकानां तथैव च ॥
संयोज्य करयोः पृष्ठे तथावर्त्त्य तु वै समम् ।
प्रसार्य्य तर्ज्जनीयुग्मं संयुक्तं सर्व्वतः पुनः ॥
अङ्गुष्ठौ च तथा सक्तौ शङ्खमुद्रा प्रकीर्त्तिता ।२७।
उत्तानमञ्जलिं कृत्वा अङ्गुष्ठे दे कनिष्ठयोः ॥
मूले निःक्षिप्य तु करौ संयोज्याथ प्रदर्शयेत् ।
सयोनिरिति सा ख्याता मुद्रा देवौघतुष्टिदा ॥२८॥
मुष्टिर्दक्षिणहस्तस्य यदोर्द्धाङ्गुष्ठिका भवेत् ।
सा स्यात् शिखरिणी मुद्रा ब्राह्मीलक्ष्म्यैप्रिया च सा ॥ २९ ॥
अनामिके कनिष्ठे तु संयोज्य ऋजुना पुनः ।
मध्यमातर्ज्जनीनान्तु धेनुमुद्रेव बन्धनम् ॥
सार्द्धधेनुरिति ख्याता चन्द्रप्रीतिविवर्द्धिनी ।३०।
करशोरङ्गुलीः सर्व्वाः सर्व्वाग्राण्येकतः स्थिताः ॥
नियोज्यार्द्धतले चैव तदधोऽपि विशुद्ध्य च ।
अग्रैरग्रं योजयेत्तु मुद्रा सम्मीलनी तु सा ॥३१॥
भौमभूमिसुनीशानामियं प्रीतिविवर्द्धिनी ।
सर्व्वाङ्गुलीस्तु संसक्ता दक्षिणस्य करस्य च ॥
क्रियाङ्गागं तथान्यस्य तलं कुर्य्यात्तु कुण्डवत् ।
समाख्याता कुण्डमुद्रा बुधवाणीश्रियाप्रिया ॥३२॥
सर्व्वाङ्गुलीनां मध्येषु वामहस्तस्य चाङ्गुलीः ।
प्रसार्याङ्गुष्ठयुगलं संयोज्याग्रेण भैरव ! ॥
तदङ्गुष्ठद्वयं कार्य्यं सम्मुखं विनरेचितः ।
चक्रमुद्रा समाख्याता गुरुविष्णुश्रियप्रिया ॥३३॥
अङ्गुष्ठं मध्यमाश्चैव नामयित्वा करस्य च ।
दक्षिणस्यापरान्तिसो योजयेदग्रतः पुनः ॥
शूलमुद्रा समाख्याता मम शुक्रगुहप्रिया । ३४ ।
निष्कुञ्चीकृत्य तु करौ वामाङ्गुलिमग्रस्य तु ॥
अग्राणि योजयेन्मध्ये तलस्यासव्यहस्ततः ।
अधः कृत्वा वामहस्तं मुद्रा सिंहमुखी स्मृता ॥ ३५ ॥
इयं प्रीत्यै तु दुर्गायाः सूर्य्यपुत्रस्य चक्रिणः ।
भगमुद्रा कर्णमूले गोमुखाख्या प्रकीर्त्तिता ॥
मम विष्णोस्तथा राहोः सर्व्वदा प्रीतिदायिनी । ३६ ।
तुष्टित्रयमधोत्तानं कृत्वा संयोज्य पार्श्वतः ॥
दक्षिणस्य कनिष्ठादीन् प्रसार्य्य क्रमतः पुनः ।
तथा वामकनिष्ठाभ्यामेकैकेन प्रसारयेत् ॥
अष्टौ मुद्राः समाख्याता नामतः क्रमतः शृणु ।
प्रोन्नामो ३७ न्नमन ३८ श्चैव विघ्नं ३९ पाशुपतं ४० तथा ॥
मुद्गं ४१ लागः ४२ साधनी ४३ च तथा चैव प्रसाधनी ४४ ।
आकुञ्च्य करशाखास्तु दक्षिणाः सा तु सन्निका ॥
उग्रमुद्रा समाख्याता स्वहस्तस्य विपर्य्ययात् ।४५।
इन्द्रादिलोकपालानां दश मुद्राः प्रकीर्त्तिताः ॥
सर्व्वेषामपि देवानां परमप्रीतिवर्द्धनाः ।
अङ्गुष्ठाग्रन्तु तर्ज्जन्या अग्रभागेण योजयेत् ॥
आकुञ्च्य मध्यमाभ्यान्तु दक्षहस्तस्य चाङ्गुलीः ।
दर्शयेत् कुण्डलाकारं कुण्डलीशक्तितुष्टिदम् ॥
सर्व्वेषामपि देवानां तथा तुष्टिकरं महत् ।४६।
अङ्गुष्ठतर्ज्जनीमध्या अग्रभागे नियोज्य च ॥
मध्यमाश्च कनिष्ठाश्च आकुञ्च्य दक्षिणे करे ।
त्रिमुखाख्या समाख्याता विश्वेदेवप्रिया सदा ॥
केतोः प्रियेयं सततं मातृणामपि तुष्टिदा ।४७।
तर्ज्जन्यङ्गुष्ठयोरग्रभागौ संयोज्य चाङ्गुलीः ॥
अन्या आकुञ्चयेत् तिस्रः साविवक्त्री प्रकीर्त्तिता ।
पितृणामथ साध्यानां रुद्राणां विश्वकर्म्मणः ॥
सर्व्वदा प्रीतिजननी अविवक्त्री प्रकीर्त्तिता ।४८।
पादौ तलाभ्यां संयोज्य तदङ्गुष्ठद्वयं ततः ॥

ऊर्द्धं संयोजयेन्नाभौ अस्योपरि तथाञ्जलिः ।
योगमुद्रा समाख्याता योगिनां तत्त्वदायिनी ॥
सर्व्वेषामपि देवानां पूजने चिन्तने तथा ।
योगमुद्रा समाख्याता तुष्टिप्रीतिकरी सदा ॥४९॥
प्राञ्जलिर्नाम मुद्रा तु उर्द्धाधोभावयोजिनाम् ।
विभिद्य दर्शयेद्धस्तौ उर्द्धाधः प्रस्तीकृतौ ॥
भेदमुद्रा समाख्याता मम विष्णोर्विधेः प्रिया ।५०।
अङ्गुष्ठे द्वे तु निःक्षिप्य करयोरुभयोस्तले ॥
अग्रेण योजयेत् पश्चात् कनिष्ठायुगलं ततः ।
उभयोर्हस्तयोश्चान्यान्यर्च्चनाद्याश्च योजयेत् ॥
अग्राग्रेस्तु पृथक्कृत्य दर्शयेत्तत् कनिष्ठिकाम् ।
मुद्रा सम्मोहनं नाम कामदुर्गारमाप्रिया ॥
सर्व्वेषामपि देवानां मोहनं प्रीतिदं स्मृतम् ।५१।
ध्यानस्य सदृशस्य मध्यमानामिके तथा ॥
तयोः पृष्ठे तु संयोज्य अङ्गुष्ठाग्रं ततः परम् ।
कनिष्ठां तर्ज्जनीञ्चैव अग्रेण योजयेत्ततः ॥
वाणमुद्रा समाख्याता सर्व्वदेवस्य तुष्टिदा ।५२।
सर्व्वाङ्गुलीस्तु सङ्कोच्य अङ्गुष्ठमथ तर्जनीम् ॥
प्रसार्य्य करयोः पश्चादङ्गुष्ठाग्रन्तु योजयेत् ।
अङ्गुष्ठाग्रेण तर्ज्जन्या अग्रेणापि च तर्ज्जनीम् ॥
यथाशक्ति प्रसार्य्यापि धनुर्मुद्रा प्रकीर्त्तिता ।५३।
सर्व्वाङ्गुलीनामग्राणि ब्राह्मतीर्थे नियोजयेत् ॥
अनामिकायाः पृष्ठे तु अङ्गुष्ठाग्रं नियोजयेत् ।
शून्यं तूणीरवत् कृत्वा तेषामन्तस्तु भैरव ! ।
तूणीरमुद्रा चाख्याता सर्व्वेषां प्रीतिवर्द्धिनी ॥५४॥
मुद्रासु संस्थिता पूजा मुद्रासु परिचिन्तनम् ।
मुद्रासु संस्थिता योगा मुद्रा मोदकरास्ततः ॥
यदा यदा पूजनेषु चिन्तने ध्यानकर्म्मणि ।
यज्ञादौ स्तवने वापि हस्तकृत्यं न विद्यते ।
तदा मुद्रायुतं कुर्य्यादिष्टापूर्त्ते करद्वयम् ॥
यज्ञकर्म्मेषु वैच्छिष्ट्ये हस्तौ मुद्रासु च क्षमः ।
तदा मुद्रां विधायैव तत्तु कृत्यं समाचरेत् ॥
मुद्राविमुक्तहस्तन्तु क्रियते कर्म्मदैविकम् ।
ज्ञात्वा तन्निष्फलं यस्मात्तस्मान्मुद्रान्वितो भवेत् ॥
विसर्জ্জने तु देवानां यस्य या परिकीर्त्तिता ।
मुद्रां तां पूजनादौ तु तस्य नैव प्रयोजयेत् ॥
विसृष्ट्युक्तान्ततो मुद्रां मुद्रायुक्तः समाचरेत् ।
पूजनादि समस्तञ्च कर्म्म हृद्यं विचक्षणः ॥
ततो मुद्रा परं धाम मुद्रा पुण्यप्रदायिनी ।
देवानां मोददा मुद्रा तस्मात्तां यत्नतश्चरेत् ॥
अष्टयोनिर्म्महायोनिर्योनिर्ब्राह्मी च वैष्णवी ।
मुद्रा विसर्জ্জने प्रोक्ता शिवाग्निपुरयोः सदा ॥
दुर्गायाः सर्व्वरूपेषु मुद्रा एताः प्रकीर्त्तिताः ।
योनिञ्च सम्पुटञ्चैव महायोनिस्तथैव च ॥
बद्धं कृत्वा अन्तर्भावादुक्तादन्यत्र योजयेत् ।
भवेयुस्तु त्रिपञ्चाशत्संख्या मुद्राः समन्ततः ॥
या अन्तर्भावादामाः स्युर्मुद्रा मोदकराः पराः ।
एवं वा कथिता मुद्राः पूजने पुण्यतुष्टिदाः ।"

इति कालिकापुराणे ६५ अध्यायः ॥

मुद्राङ्कितः, त्रि, (मुद्रया अङ्कितः ।) मुद्रया चिह्नितः । छापाकरा मोहरकरा इत्यादि भाषा । यथा,—

"धाता विश्वविसृष्टिमात्रनिरतो देवोऽपि गौरी-
भुजा-
श्लेषानन्दविघूर्णमाननयनो दक्षाध्वरध्वंसकृत् ।
दैत्यारिः कमलाकपोलमकरीमुद्राङ्कितोरःस्थलः
प्रीतेऽप्यावितरेषु जन्तुषु पुनः का नाम भ्रान्तिः
कथा ॥"

इति प्रबोधचन्द्रोदयनाटके १ अङ्कः ॥

मुद्रालिपिः, स्त्री, (मुद्रया लिपिः ।) षड्घा-
लिप्यन्तर्गतलिपिविशेषः । छापार अक्षर इति भाषा । यथा,—

"मुद्रालिपिः शिल्पलिपिर्लिपिर्लेखनिसम्भवा ।
शुल्किकाधुगसम्भूता लिपयः षड्घा स्मृताः ।
एताभिर्लिपिभिर्व्याप्ता धरित्री सुभदा हर ! ॥"

इति वाराहीतन्त्रम् ॥

अस्याः पाठ्यत्वं धार्य्यत्वञ्च यथा,—

"लेखन्या लिखितं विप्रैर्मुद्राभिरङ्कितञ्च यत् ।
शिल्पादिनिर्म्मितं यच्च पाठ्यं धार्य्यञ्च सर्व्वदा ॥"

इति खड्गमालातन्त्रम् ॥

मुद्रिका, स्त्री, (मुद्रा स्वार्थे कन् + स्त्रियां टाप् । पूर्व्वाकारस्य ह्रस्वत्वम् । अत इत्वं च ।) स्वर्ण-
रूप्यादिनिर्म्मितमुद्रा । मोहर टाका इत्यादि भाषा । यथा,—

"सौवर्णीं राजतीं ताम्रीमायसीं वा सुशो-
भिताम् ।
बलिहोमेन सन्तर्प्पितां तत्र मुद्रिकाम् ॥"

इति मिताचरायां व्यवहाराध्यायः ॥

मुद्रितं, त्रि, (मुद्रा मुद्रणं अस्य जातेति । मुद्रा इतच् ।) अप्रफुल्लम् । मोदा इति भाषा । तत्पर्य्यायः । सङ्कुचितम् २ निद्राणं ३ मौलि-
तम् ४ । इति हेमचन्द्रः ॥ मुद्राङ्कितञ्च ॥ (परि-
त्यक्तम् । यथा, नैषधचरिते । ५ । १२ ।

"मुद्रितान्यजनसंकथनः सन्
नारदं बलिरिपुः समवादीत् ।"

"मुद्रितं परित्यक्तम् ।" इति तट्टीका ॥)

मुधा, व्य, (मुह्यतीति । मुह् + बाहुलकात् का । पृषोदरादित्वात् ह्रस्व धः ।) व्यर्थकम् । इत्य-
मरः ।३।४।४। (यथा, महाभारते ।१४।३७।४।

"सुधा ज्ञानं सुधा वृत्तं सुधा सेवा सुधा श्रमः ।
एवं यो युक्तधर्म्मः स्यात् सोऽसुखात्यन्तमश्नुते ॥")

मुनिः, पुं, मनुते जानाति यः । (इति मन् +
"मनेरुच्च ।" उणा० ४ । १२२ । इति इन् + अत उच्च ।) मौनव्रती । इत्यन्ये । इति भरतः ॥
तत्पर्य्यायः । वाचंयमः २ । इत्यमरः ।२।७।४२।
मौनी ३ व्रती ४ ऋषिः ५ शापाक्षः ६ सत्यवाक् ७ । इति जटाधरः ॥ (यथा, नैषधे ।१।१३३।

"फलेन मूलेन च वारिभूरुहां
सुनेरिवैत्यं मम यस्य वृत्तयः ॥")

तस्य लक्षणं यथा,—

"दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः ।
वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते ॥"

इति श्रीभगवद्गीता ॥*॥

तस्य धर्म्मो यथा,—

ब्रह्मोवाच ।

"मुनिभिश्चरिता धर्म्मा उक्ता व्यास ! मया तव ।
यैर्विष्णुस्तुष्यते देवः सुखादिपरिभाविकः ॥
तर्पणेन च होमेन सन्ध्यया वन्दनेन च ।
प्राप्यते भगवान् विष्णुर्न्नैष्कामार्थमोक्षदः ॥
धर्म्मो विष्णुर्न्नतो विष्णुः पूजा विष्णुस्तु तर्पणम् ।
होमः सन्ध्या तथा ध्यानं धारणा सकलं
हरिः ॥"

इति गारुडे २२६ अध्यायः ॥*॥

तस्याश्रमे वर्ज्जनीयानि यथा । अतिथिपूजा १ हरिणविश्वासः २ हिंसजन्तुघ्नान्तता ३ यज्ञ-
धूमः ४ मुनिसुतः ५ द्रुमसेकः ६ वल्कलः ७ वृक्षश्च ८ । इति कविकल्पलता ॥*॥ मुनिविशे-
षाणां ब्रह्मणोऽङ्गविशेषादुत्पत्तिर्यथा,—

"पुलस्त्यो दक्षकर्णाच्च पुलहो वामकर्णतः ।
दक्षनेत्रात्तथात्रिश्च वामनेत्रात् क्रतुः स्वयम् ॥
अरणिर्नासिकारन्ध्रात् अङ्गिराश्च मुखाद्विधिः ।
भृगुश्च वामपार्श्वाच्च दक्षो दक्षिणपार्श्वतः ॥
छायायाः कर्द्दमो जातो नाभेः पञ्चशिखस्तथा ।
वक्षस्थलेव वोढुश्च कण्ठदेशाच्च नारदः ॥
मरीचिः स्कन्धदेशाच्च आपस्तम्बस्तथा गलात् ।
वह्निष्ठो रसनादेशात् प्रचेता अधरोष्ठतः ॥
हंसश्च वामकुक्षेश्च दक्षकुक्षेर्यतिः स्वयम् ।
वृद्धिं विधातुञ्च विधिश्चकाराज्ञां सुतानपि ॥"

इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे ८ अध्यायः ॥*॥

गयासुरशरीरे यज्ञार्थं ब्रह्मणो मानसात् सृष्टा मुनयो यथा,—

"ब्रह्मा सम्भृतसम्भारो मानसानृत्विजोऽसृजत् ।
अग्निश्चर्म्माणमग्रन्तं शौनकं जाजलिं भृगुम् ॥
कुशुलिं वेदकौण्डिन्यं हारीतं कश्यपं क्रतुम् ।
गर्गं कौशिकवाशिष्ठौ मुनिं भार्गवमव्ययम् ॥
वृद्धं पाराशरं कण्वं माण्डव्यं श्रुतिकेवलम् ।
श्वेतं सुतालं दमनं सुहोत्रं कच्छमेव च ॥
गौगाक्षिञ्च महावाहुं जैगीषव्यं तथैव च ।
दधिपञ्चमुखं विप्र ! ऋषभं कर्कमेव च ॥
कामायनं गोभिलञ्च मुनिसङ्घं महाव्रतम् ।
जटामालिनमव्यग्रं चाटुहासञ्च दारुणम् ॥
आत्रेयञ्चाप्यङ्गिरसमौपमन्युं महाव्रतम् ।
गोकर्णञ्च गुहावासं शिखण्डिनमुमाव्रतम् ॥
सुपालकं गौतमञ्च तथा वेदशिरो व्रतम् ।
एतान्यांश्च विप्रेन्द्रान् ब्रह्मा लोकपितामहः ।
परिकल्प्याकरोद्यागं गयासुरशरीरके ॥"

इति वायुपुराणे गयामाहात्म्यम् ॥*॥

मुनिविशेषनाम्नां व्युत्पत्तिर्यथा,—

"कतिकल्पान्तरेऽतीते सृष्टुः सृष्टिविधौ पुनः ।
मरीचिमिश्रैर्मुनिभिः सार्द्धं कण्ठाद्बभूव सः ॥
विधेर्नरदनाम्नश्च कण्ठदेशाद्बभूव सः ।
नारदश्चेति विख्यातो मुनीन्द्रस्तेन हेतुना ॥
यः पुत्रश्चेतसो धातुर्ब्बभूव मुनिपुङ्गवः ।
तेन प्रचेता इति तन्नाम चक्रे पितामहः ॥
बभूव धातुर्यः पुत्रः सहसा दक्षपार्श्वतः ।
सर्व्वकर्म्मसु दक्षश्च तेन दक्षः प्रकीर्त्तितः ॥

वेदेषु कर्दमः शब्दच्छायायां वर्त्तते स्फुटः ।
बभूव कर्दमाद्वालः कर्दमस्तेन कीर्त्तितः ॥
तेजोभेदे मरीचिश्च वेदेषु वर्त्तते स्फुटम् ।
जातः सद्योऽतितेजस्वी मरीचिस्तेन कीर्त्तितः ॥
क्रतुसंघश्च बालेन क्रतो जन्मान्तरेऽधुना ।
ब्रह्मपुत्रोऽपि तन्नाम्ना क्रतुरित्यभिधीयते ॥
प्रधानाङ्गं सुखं धातुस्ततो जातश्च बालकः ।
इरस्तेजस्विवचनोऽङ्गिरास्तेन प्रकीर्त्तितः ॥
अतितेजस्विनि भृगुर्व्वर्त्तते नाग्नि यौनक ! ।
जातः सद्योऽतितेजस्वी भृगुस्तेन प्रकीर्त्तितः ॥
वह्नीभूतश्च शिष्टश्च जातः सद्यो हि बालकः ।
अतिप्रियश्च धातुश्च वशिष्ठस्तेन कीर्त्तितः ॥
बालोऽप्यरुणवर्णश्च जातः सद्यो हि तेजसा ।
प्रज्वलन् पूर्व्वतपसा चारुणस्तेन कीर्त्तितः ॥
हंस आत्मा वशी यस्य योगेन योगिनो ध्रुवम् ।
बालः परमयोगीन्द्रस्तेन हंसः प्रकीर्त्तितः ॥
सन्ततं यस्य यत्नश्च तपःसु बालकस्य च ।
प्रकीर्त्तितो यतिस्तेन संयतः सर्व्वकर्म्मसु ॥
पुलस्त्यपःसु वेदेषु वर्त्तते ह स्फुटोऽपि च ।
स्फुटं तपःस्वरूपश्च पुलहस्तेन कीर्त्तितः ॥
पुलस्त्यपःसमूहश्च यस्यास्ति पूर्व्वजन्मनाम् ।
तपःसंघः समूहश्च पुलस्त्यस्तेन बालकः ॥
त्रिगुणायां प्रकृत्यां त्रिर्विद्यावश्च प्रवर्त्तते ।
तयोर्भक्तिः समा यस्य तेन बालोऽत्रिरुच्यते ॥
जटाश्चाग्निशिखारूपाः पञ्च सन्ति च मस्तके ।
तपस्तेजोभवा यस्य स च पञ्चशिखः स्मृतः ॥
अपान्तरतमे देशे तपस्तेपेऽन्यजन्मनि ।
अपान्तरतमा नाम शिशोस्तेन प्रकीर्त्तितम् ॥
स्तवन्तपः समाप्नोति वाहयेत् प्रापयेत् परान् ।
ऋषुः समर्थस्तपसि वोढुस्तेन प्रकीर्त्तितः ॥
तपस्तेजसा बालो दीप्तिमान् क्रतुतो सुने ! ।
तपःसु रोचते चित्तं रुचिस्तेन प्रकीर्त्तितः ॥"

इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे २२ अध्यायः ॥

वङ्गसेनतरुः । जिनः । इति मेदिनी । ने, १५ ॥ प्रियालवृक्षः । पलाशवृक्षः । इति हेमचन्द्रः । १ । ७६ ॥ दमनकवृक्षः । इति राजनिर्घण्टः ॥ (स्त्री, दक्षकन्या । सा च कश्यपपत्नीनामन्यतमा । यथा, महाभारते । १।६५।११-१२ ।
"मरीचेः कश्यपः पुत्रः कश्यपात्तु इमाः प्रजाः ।
प्रजज्ञिरे महाभागा दक्षकन्याश्चयोदश ॥
अदितिर्दितिर्दनुः काष्ठा अनायुः सिंहिका तथा ।
क्रोधा प्राधा च विश्वा च विनता कपिला मुनिः ॥"

अष्टवस्वन्तर्गतस्य आपनामकस्य वसोः पुत्रे, पुं । यथा, हरिवंशे भविष्यपर्व्वणि । ३ । ४० ।
"आपस्य पुत्रो वैतण्ड्यः श्रमः शान्तो मुनिस्तथा ।"

क्रौञ्चद्वीपस्य देशविशेषः । यथा, मत्स्यपुराणे । १२१ । ८३-८५ ।
"क्रौञ्चस्य कुशलो देशो वामनस्य मनोरनुगः ।
मनोरनुगात् परे चोष्णस्तृतीयोऽपि च उच्यते ॥
उष्णात् परे पावनकः पावनादन्धकारकः ।
अन्धकारकदेशात्तु मुनिदेशस्तथापरः ॥"
(द्युतिमतः पुत्राणामन्यतमः । यथा, मार्कण्डेये । ५३ । ७२ ।
"तथा द्युतिमतः सप्तपुत्रान्तांश्च निबोध मे ।
मुनिश्च दुन्दुभिश्चैव सप्तमः परिकीर्त्तितः ॥"
कुरुपुत्रभेदः । यथा, महाभारते । १।९४।४६॥
"अविच्छिन्नमभिष्वङ्गं तथा चैवरथं मुनिम् ॥")

मुनिखर्ज्जूरिका, स्त्री, (मुनिप्रिया खर्ज्जूरिका इति मध्यपदलोपी समासः ।) खर्ज्जूरीभेदः । यथा,
"मुनिखर्ज्जूरिका तत्र्या राजेष्टा क्रतुसंमिता ॥"
इति राजनिर्घण्टः ॥

मुनिच्छदः, पुं, (मुनयः अत्रादयः सप्त तत्संख्यकाः छदाः पत्राण्यस्य ।) सप्तच्छदवृक्षः । इति राजनिर्घण्टः ॥ (स्त्री । मेधिका । यथा, भावप्रकाशे पूर्व्वखण्डे प्रथमे भागे ।
'मेधिका मेधिनी मेधी दीपनी बहुपुत्रिका ।'
इत्यादि ।
'कृष्णिका बहुपर्णी च पीतबीजा मुनिच्छदा ।'
इत्यन्तम् ॥)

मुनितरुः, पुं, (मुनेरगस्त्यस्य प्रियः तरुः । इति मध्यपदलोपी समासः ।) वकवृक्षः । इति रत्नमाला ॥

मुनिद्रुमः, पुं, (मुनेरगस्त्यस्य प्रियः द्रुमः । इति मध्यपदलोपी समासः ।) श्योनाकवृक्षः । इति रत्नमाला ॥ श्योनाकप्रभेदः । वकवृक्षः । इति राजनिर्घण्टः ॥ (यथा, नैषधचरिते । १।६६।
"मुनिद्रुमः कोरकितः श्रितिद्युतिं-
र्वनेऽसुनाऽमन्यत सिंहिकासुतः ॥"
"मुनिद्रुमः वकवृक्षः ।" इति तट्टीका ॥ अस्य पर्य्यायो यथा,—
"अथागस्त्यो वङ्गसेनो मुनिपुष्पो मुनिद्रुमः ।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
"श्योनाको भूतपुष्पश्च पूतिवृक्षो मुनिद्रुमः ।
दीर्घवृन्तश्च कट्वङ्गो भल्लुकद्रुष्टकोऽरुणः ॥"
इति वैद्यकरत्नमालायाञ्च ॥)

मुनिनिर्म्मितः, पुं, (मुनिना निर्म्मितः ।) डिण्डिमः । यथा, भावप्रकाशे ।
"डिण्डिमो रोमशफलो मुनिनिर्म्मित इत्यपि ।
डिण्डिमो रुचिकृद्भेदी पित्तश्लेष्मापहः स्मृतः ।
सुग्रीतो वातलो रूक्षो मूत्रलश्चाश्मरीहरः ॥"

मुनिपित्तलं, क्ली, (मुनीनां पित्तलमिव ।) ताम्रम् । इति त्रिकाण्डशेषः ॥

मुनिपुङ्गवः, पुं, (मुनिः पुङ्गव इव ।) मुनिश्रेष्ठः । इत्यमरटीका ॥ (यथा, रामायणे । १।१।१।
"तपःस्वाध्यायनिरतं तपस्वी वाग्विदांवरम् ।
नारदं परिपप्रच्छ वाल्मीकिर्मुनिपुङ्गवम् ॥")

मुनिपुत्रः, पुं, (मुनीनां पुत्र इव । मुनिप्रियत्वादस्य तथात्वम् ।) दमनकवृक्षः । इति भावप्रकाशः ॥ ऋषिसुतश्च ॥

मुनिपुत्रकः, पुं, खञ्जनः । इति त्रिकाण्डशेषः ॥ (यथा, तिथितत्त्वे कृत्यविधिप्रकरणे ।
"त्वं योगयुक्तो मुनिपुत्रकस्त्वं
अदृश्यतामेषि शिखोऽग्निमेन ।
संदृश्यसे प्रावृषि निर्गतायाम्
त्वं खञ्जनाश्चर्य्यमयो नमस्ते ॥")

मुनिपुष्पं, क्ली, (मुनिद्रुम इति । "ठाजादावूर्द्ध्वं द्वितीयादचः ।"५ । ३ । ८७ । इत्यत्र "विनापि प्रत्ययेन पूर्व्वोत्तरपदयोर्विभाषालोपो वक्तव्यः ।" इति काशिकोक्तेः द्रुम इत्यस्य लोपे मुनिः तस्य पुष्पम् ।) वकपुष्पम् ॥ (यथा, तिथितत्त्वे ।
"विहाय सर्व्वपुष्पाणि मुनिपुष्पेण केशवम् ।
कार्त्तिके योऽर्चयेद्भक्त्या वाजिमेधफलं लभेत् ॥"
वकवृक्षे, पुं । तत्पर्य्यायो यथा,—
"अथागस्त्यो वङ्गसेनो मुनिपुष्पो मुनिद्रुमः ।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

मुनिपुष्पकं, क्ली, (मुनिपुष्प + संज्ञायां कन् ।) वकपुष्पम् । यथा, योगिनीतन्त्रे ।
"बिल्वपत्रञ्च माध्यञ्च तमालामलकीदलम् ।
कङ्कारं तुलसीञ्चैव पद्मञ्च मुनिपुष्पकम् ।
एतत् पर्य्युषितं न स्यात् यच्चान्यत् कलिकालकम् ॥"
इत्येकादशीतत्त्वम् ॥

मुनिपूगः, पुं, (मुनिप्रियः पूगः ।) गुवाकविशेषः । तत्पर्य्यायः । रामपूगः २ कामीनः ३ सुरेवटः ४ । इति त्रिकाण्डशेषः ॥

मुनिमेषजं, क्ली, (मुनीनां मेषजम् ।) आगस्त्यः । हरीतकी । लङ्घनम् । इति मेदिनी । जे, ३६ ॥

मुनिसुव्रतः, पुं, (मुनिषु सुव्रतः ।) वृत्तार्हन् । स च बुद्धविशेषः । इति हेमचन्द्रः । १ । ५१ ॥

मुनिस्थानं, क्ली, (मुनीनां स्थानम् ।) आश्रमः । इति हेमचन्द्रः । ४ । ६७ ॥

मुनीन्द्रः, पुं, (मुनीनां मननशीलानां योगिनामिन्द्रः श्रेष्ठः ।) बुद्धः । इत्यमरः । १ । १ । १४ ॥ ऋषिश्रेष्ठश्च ॥ (यथा, कथासरित्सागरे । ७२।३०६।
"पतन्तमेव तस्माच्च पाणिभ्यां स तमग्रहीत् ।
मुनीन्द्रः प्रकटीभूय समाश्वास्य जगाद च ॥"
दानवभेदः । यथा, हरिवंशे । ७५५ । ५ ।
"वृषपर्व्वा विरूपाक्षो मुनीन्द्रश्चन्द्रलोचनः ।")

मुनृच उ गत्याम् । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) पञ्चमस्वरी । ओष्ठ्यवर्ग्यौषादिः । नोपधः । उ सुचित्वा सुक्त्वा । इति दुर्गादासः ॥

मुसुच्चुः, पुं,(मोक्तुमिच्छुरिति । मुच् + सन् + उः ।) मुक्तिमिच्छुः ॥ (यथा, श्रीमद्भगवद्गीतायाम् । ४ । १५ ।
"एवं ज्ञात्वा कृतं कर्म्म पूर्व्वैरपि मुमुक्षुभिः ।
कुरु कर्म्मैव तस्मात्त्वं पूर्व्वैः पूर्व्वतरं कृतम् ॥")
तत्पर्य्यायः । श्रमणः २ यतिः ३ वाचंयमः ४ व्रती ५ साधुः ६ अनगारः ७ ऋषिः ८ मुनिः ९ निर्ग्रन्थः १० भिक्षुः ११ । इति हेमचन्द्रः । १ । ७५ ॥ अथ मुमुक्षुलक्षणम् । मनुः ।
"इह चामुत्र वा काम्यं प्रवृत्तं कर्म्म कीर्त्यते ।
निष्कामं ज्ञानपूर्व्वन्तु निवृत्तमुपदिश्यते ॥

प्रवृत्तं कर्म संसेव्य देवानामेति सार्ष्टिताम्।
निवृत्तं सेवमानस्तु भूतान्यत्येति पञ्च वै ॥"
कामनापूर्व्वकं कर्म्म शरीरप्रवृत्तिहेतुत्वात् प्रवृत्तं तदेव कर्म्म कामनारहितं पुनर्ब्रह्मज्ञानाभ्यासपूर्व्वकं संसारनिवृत्तिहेतुत्वात् निवृत्तमुच्यते। सार्ष्टितां समानगतितां ऋषेर्मैत्यर्थत्वात् पञ्चभूतान्यत्येति अतिक्रामति मोक्षं प्राप्नोतीत्यर्थः। विष्णुपुराणे च ।६।७।३८। विशिष्टफलदा काम्या निष्कामाणाञ्च मुक्तिदा। भगवद्गीतापि।
"युक्तः कर्म्मफलं त्यक्त्वा शान्तिमाप्नोति नैष्ठिकीम्।
अयुक्तः कामकारेण फले सक्तो निबध्यते ॥"
युक्तः ईश्वराय कर्म्माणि न फलाय इत्येवं समाहितः। फलं त्यक्त्वा कर्म्माणि कुर्व्वन्निति शेषः। शान्तिं मोक्षाख्यां नैष्ठिकीं निष्ठायां भवाम्। सत्त्वशुद्धिः ज्ञानप्राप्तिः सर्व्वकर्म्मसंन्यासः ज्ञाननिष्ठाक्रमेणेति वाक्यशेषः। अयुक्तस्त्वदद्विकर्म्मखः। कामकारेण कामप्रेरितत्वया कामतः प्रवृत्तेरिति यावत्। फले सक्तः सन् फलायेदं कर्म्म करोमीत्येवं फले सक्तो नितरां बन्धं प्राप्नोति। तथा च अर्জ্জुनं प्रति भगवद्वाक्यम्।
"मयि सर्व्वाणि कर्म्माणि संन्यस्याध्यात्मचेतसा।
निराशीर्निर्ममो भूत्वा युध्यस्व विगतज्वरः ॥"
संन्यस्य निःक्षिप्य समर्प्य इति यावत्। अध्यात्मचेतसा विवेकबुद्ध्या ईश्वराय भृत्यवत् करोमि इत्यनया बुद्ध्या निराशीरित्यक्तकामसङ्कल्पः। अतएव निर्ममः ममतारहितः। विगतज्वरः विगतसन्तापः। यक्तमाह स एव।
"यत् करोषि यदश्नासि यज्जुहोषि ददासि यत्।
यत् तपस्यसि कौन्तेय! तत् कुरुष्व मदर्पणम् ॥"
विष्णुपुराणम्।
"कर्म्माण्यसङ्कल्पिततत्फलानि
संन्यस्य विष्णौ परमात्मरूपे।
अवाप्य तां कर्म्मफलाप्तिमन्ते
तस्मिन् लयं ये त्वमलाः प्रयान्ति ॥"
कर्म्ममर्हीं भारतवर्षरूपाम्। एकादशस्कन्धे।
"वेदोक्तमेव कुर्व्वाणो निःसङ्गोऽर्पितमीश्वरे।
नैष्कर्म्यां लभते सिद्धिं रोचनार्था फलश्रुतिः ॥"
वेदोक्तमेव कुर्व्वाणो न तु निषिद्धम्। ननु कर्म्मणि क्रियमाणे तस्मिन्नासक्तिस्तत्फलं स्यादेव न तु नैष्कर्म्यरूपा फलसिद्धिरत एवाह निःसङ्गोऽनभिनिवेशवान् ईश्वरेऽर्पितं न तु फलोद्देशेन। अथ फलस्य श्रुतत्वात् कर्म्मणि कृते फलं भवत्येव इत्याह रोचनार्थेति कर्म्मणि रुच्युत्पादनार्था। अतएव तत्रैव।
"फलश्रुतिरियं नृणां न श्रेयो रोचनं परम्।
श्रेयोविवक्षया प्रोक्ता यथा भैषज्यरोचनम्।
उत्पत्तौ चाह कामेषु प्राणेषु स्वजनेषु च।
आद्यन्तवन्तो मर्त्यो आत्मनोऽनर्थहेतुषु ॥
नित्यानित्यः स्वयं भाग्यतो विद्वानाधनि।
क्षय मुक्तात पुनस्तेषु तांश्चमो विद्यतो बुधः॥
एवं व्यवसितं केचिदविज्ञाय कुबुद्धयः।
फलश्रुतिं कुसुमितां न वेदज्ञा वदन्ति हि ॥"
इयं फलश्रुतिर्न श्रेयःपरमपुरुषार्थपरा न भवति किन्तु बहिर्मुखानां नृणां मोक्षविवक्षया अवान्तरकर्म्मफलैः कर्म्मसु रुच्युत्पादनमात्रं यथा, भैषज्ये औषधे रुच्युत्पादनम्। यथा,—
"पिब निम्बं प्रदास्यामि खलु ते खण्डलड्डुकान्।
पित्तेवमुक्तः पिबति न फलं तावदेव तु ॥"
तत्रागदपानस्य न खलु खण्डादिलाभ एव प्रयोजनं किन्त्वारोग्यम्। तथा वेदोऽप्यवान्तरफलैः प्रलोभयन् मोक्षायैव कर्म्माणि विधत्ते। ननु कर्म्मकाण्डे मोक्षस्य नामापि न श्रूयते कथमेवं व्याख्यायते यथाश्रुतस्यैव घटनात् इत्याह उत्पत्तौति द्वाभ्याम्। उत्पत्त्या स्वभावत एव कामेषु पश्वादिषु प्राणेषु आयुरिन्द्रियबलवीर्य्यादिषु स्वजनेषु पुत्रदारादिषु अनर्थहेतुषु परिपाकतो दुःखहेतुषु अतस्तान् स्वार्थं परमसुखमविदुषः अजानतः अतो न तान् प्रक्षीभूतान् बुधो वेदो यद्बोधयति तदेव श्रेयः इति विश्वसितान् इत्यर्थः। तान् एवम्भूतान् वृजिनाध्वनि कामवर्त्मनि देवादियोनौ भ्राम्यतः ततः पुनस्तमोभूतवृक्षादियोनिं विशत इति। पशुकाम इति च सुखपुत्रादिकाम इति च कथं पुनस्तेष्वेव कामेषु अयं बुधो वेदो युञ्जात् प्रवर्त्तयेत्। तथा सत्यनाप्तः स्यात् इति भावः। कथं तर्हि कर्म्ममीमांसकाः फलपरतां वदन्ति तत्राह। एवमिति अवसितं वेदस्याभिप्रायं अविज्ञाय कुसुमितामवान्तरफलरोचनया रमणीयां परमफलश्रुतिं वदन्ति कुतस्ते कुबुद्धयस्तत्राह हि यस्मात् वेदज्ञा आसादयः न तथा वदन्ति इति। अतएव निष्कामकर्म्मणा आत्मज्ञानार्थतोक्ता यथा,—
"अयमेव क्रियायोगो ज्ञानयोगस्य साधकः।
कर्म्मयोगं विना ज्ञानं कस्यचिन्नेह दृश्यते ॥"
सोऽपि दुरितक्षयद्वारा न साक्षात्। तथा च।
"ज्ञानमुत्पद्यते पुंसां क्षयात् पापस्य कर्म्मणः ॥"
तथा श्रुतिः।
"तमेवं वेदार्थवचनेन ब्राह्मणा विविदिषन्ति
ब्रह्मचर्य्येण तपसा श्रद्धया दानेन यज्ञेनानशनेन
चेति।"
तं आत्मतत्त्वसाक्षात्कारं अतएव यज्ञादीनां ज्ञानप्रयोजनत्वावधार्य निष्कामेषु कर्म्मसु प्रवर्त्तते। परिशेषेणापि सिद्धं काम्ये कर्म्मणि न प्रवर्त्तयितव्य इत्याह षष्ठस्कन्धे।
"स्वयं निःश्रेयसं विद्वान्नवक्त्यज्ञाय कर्म्म हि।
न राति रोगिणेऽपथ्यं वाञ्छतेऽपि भिषक्तमः ॥"
राति ददाति इति समयप्रदीपे श्रीदत्तः॥
"दासीदाससमलङ्कारमन्नं षड्रसमम्भवम्।
पुरुषोत्तमतुष्ट्यर्थं प्रदेयं सार्व्वकालिकम् ॥
यद्यदिष्टतमं लोके यच्चाप्यप्रियमात्मनि।
तत्तद्धि देयं प्रीत्यर्थं देवदेवस्य चक्रिणः ॥"

सुसुच्चुः

इदं दानं ब्राह्मणसम्प्रदानकमेव विष्णुप्रीतिमुद्दिश्य एवं सर्व्वत्र दाने। विष्णुप्रीतेः सामान्यतः श्रुतत्वात्। अथ विष्णुप्रीतौ देवताधिकरणन्यायविरोध इति चेन्न स्वर्गवदधिकारिविशेषणत्वेन तत्सत्त्वप्रसाधनात् इत्याहुः। ब्राह्मणसम्प्रदानकत्वे किं मानमिति चेत् वामनपुराणे तत्तन्मासभेदेन तत्तद्दानमभिधाय।
"विष्णुप्रीत्यर्थमेतानि देयानि ब्राह्मणेष्वथ।
देयानि विप्रमुखेभ्यो मधुसूदनतुष्टये ॥"
इत्यभिधाय दासीदासमित्यादिवचनद्वयाभिधानात्। तथा च विष्णुधर्म्मोत्तराग्निपुराणयोः।
"यत्र यत्र भवेत् प्रीतिर्विष्णवेभ्यो महामुने!।
तत्तदच्युतमुद्दिश्य विप्रेभ्यः प्रतिपादयेत् ॥"
विष्णुधर्म्मोत्तरद्वितीयकाण्डे तु विष्णुसंप्रदानकमेव दानं यथा,—
'विष्णोः शुक्लप्रदानेन वारुणं लोकमाप्नुयात्।' इत्यादिना।
"क्षीरपल्लवसंयुक्तान् कलसान् सुविभूषितान्।
दत्त्वा वै देवदेवाय वाजिमेधफलं लभेत् ॥"
इत्यन्तेन तत्तत् फलं तत्तद्दानमभिधायोक्तम्।
"अकामः सात्विको लोको यत्किञ्चिद्विनिवेदयेत्।
तेनैव स्थानमाप्नोति यत्र गत्वा न शोचति ॥
धर्म्मवाणिजिका मूढाः फलकामा नराधमाः।
अर्चयन्ति जगन्नाथं ते कामानाप्नुवन्त्युत ॥
अन्तवत्तु फलं तेषां तद्भवत्यल्पमेधसाम् ॥"
तथा।
"पद्भ्यां प्रतीच्छते देवः सकामेन निवेदितम्।
मूर्द्ध्ना प्रतीच्छते दत्तमकामेन द्विजोत्तमाः ॥"
उक्तवामनपुराणवचने सार्व्वकालिकमित्यनेन मलमासादावपि विष्णुप्रीत्यर्थं देयमिति। इति मलमासतत्त्वम् ॥
(तत्र सुसुच्चतासूदयनानि व्याख्यास्यामः। तत्र लोकदोषदर्शिनो सुसुच्चोरादित एवाचार्य्याभिगमनं तस्योपदेशानुष्ठानम्। अग्नेरेवोपचर्य्या धर्म्मशास्त्रानुगमनं तदर्थावबोधस्तेनावश्यम्भस्तत्र यथोक्ताः क्रियाः सतामुपासनमसतां परिवर्জ্জनं न सङ्कृतिर्दुर्জ্জनैः सत्यं सर्व्वभूतहितमपरुषमनतिकाले परीक्ष्य वचनं सर्व्वप्राणिषु आत्मनीवावेक्षा सर्व्वासामस्मरणमसङ्कल्पनमप्रार्थना अनभिध्याश्च स्त्रीणां सर्व्वपरिग्रहत्यागः कौपीनं प्रच्छादनार्थं धातुरागनिवसनं कन्थासीवनहेतोः सूची पिप्पलकं शौचाधानहेतोः जलकुण्डिका दण्डधारणं भक्ष्याचर्य्यार्थं पात्रं प्राणधारणार्थमेककालमशनं यथोपपन्न एवाभ्यवहारः। अमानपनयनार्थं शीर्षे शुक्लपर्णलक्षणात्करणोपधानं ध्यानहेतोः कायनिबन्धनं वनेष्वनिकेतवासः तन्द्रानिद्रालस्यादिकर्म्मवर्জ্জनं इन्द्रियार्थेष्वनुरागोपतापनिग्रहः सुप्तस्थितगतप्रेक्षितहारविहारप्रत्यङ्गचेष्टादिकेष्वारम्भेषु स्तुतिपूर्व्विका प्रवृत्तिः सत्कारस्तुतिगर्हावमानचलं क्षुत्पिपासाश्वासश्रमः

सुमूर्षुः

शीतोष्णवातवर्षासुखदुःखस्पर्शमहत्त्वं शोकदैन्यभयमदमानलोभरागेर्ष्याभवक्रोधादिभिरसचलनं अहङ्कारादिपञ्चपर्वसंज्ञा लोकपुरुषयोः स्वर्गादिसामान्याधिक्यं कार्य्यकालात्ययभयं योगारम्भे सततमनिर्व्वेदः सत्त्वोत्साहोऽपवर्गाय धीधृतिस्मृतिबलाधानं नियमनमिन्द्रियाणां चेतसि चेतस आत्मन्यात्मनश्च धातुभेदेन शरीरावयवसंख्यानं अभीक्ष्णं सर्व्वं कारणवदुःखमस्वमनित्यमित्यभ्युपगमः। सर्व्वप्रवृत्तिषु दुःखसंज्ञा सर्व्वसंन्यासे सुखमित्यभिनिवेशः एषमार्गोऽपवर्गाय अतोऽन्यथा वध्यते इत्युदयनानि आख्यातानि॥ इति चरके शारीरस्थाने पञ्चमेऽध्याये॥)

सुसुचानः, पुं, (सुष्वति जल इति। सुच्+"सुचि युधिभ्यां सनुच्च।" उणा०। २। ६१। इति आनच्। कित् सन्वच्च। मेघः। इति संक्षिप्तसारोणादिवृत्तिः॥ (सुक्तः। यथा, सन्यासमन्त्रे। "दृषदादिव सुसुचानः स्विन्नः स्नातो मलादिव।" "स्विन्नो घर्म्मार्क्तो जनो सुसुचानो सुक्तोभवति।" इति तत्र गुणविष्णुटीका॥)

सुस्रूषुः, त्रि, (मर्त्तुमिच्छुः। स्रु+सन्+उः।) आसन्नमृत्युः। (यथा श्रीमद्भागवते। ७।८।११। "अक्तं त्वं मर्त्तुकामोऽसि योऽतिमात्रं विकत्थसे। सुस्रूषूणां हि मन्दात्मन्! ननु स्युर्विक्लवा गिरः॥")

अथ सुस्रूषुकृत्यानि। हारीतः।

'शूद्रान्नेन तु भुक्तेन उदरस्थेन यो मृतः। स वै खरत्वसुष्ट्रत्वं शूद्रत्वाधिगच्छति॥'

शूद्रान्नं शूद्रस्वामिकान्नम्। तद्भुक्तमपि भोजनकाले तद्गृहावस्थितं यत् तदपि शूद्रान्नम्। तदाहाङ्गिराः।

'शूद्रवेश्मनि विप्रेण क्षीरं वा यदि वा दधि। निवृत्तेन न भोक्तव्यं शूद्रान्नं तदपि स्मृतम्॥'

अपिशब्दात् साक्षात तद्भुक्ततृप्ततगुडादि न तु तद्भुक्तकपर्दकादिना क्रीतमपि। स्वगृहागते पुनरङ्गिराः।

'यथायतस्ततो ह्यापः शुद्धिं यान्ति नदीं गताः। शूद्रादिप्रग्रहेष्वन्नं प्रविश्य सदा शुचि॥'

प्रविष्टं सत्त्वापादकप्रतिग्रहादिना इति शेषः। अतएव पराशरः।

'तावद्भवति शूद्रान्नं यावन्न स्पृशति द्विजः। द्विजातिकरसंस्पृष्टं सर्व्वं तद्विरुध्यते॥'

स्पृशति प्रतिगृह्णाति इति कल्पतरुः॥ तच्च संप्रोक्ष्य ग्राह्यमाह विष्णुपुराणम्।

'संप्रोक्षयित्वा गृह्णीयाच्छूद्रान्नं गृहमागतम्।'

तच्च पात्रान्तरे ग्राह्यमाह अङ्गिराः।

'स्वपात्रे यत्तु विन्यस्तं शूद्रो यच्छति नित्यशः। पात्रान्तरगतं ग्राह्यं दुग्धं स्वगृहमागतम्॥'

एतेन स्वगृहमागतस्यैव शुद्धत्वम्। तद्गृहगतस्य शूद्रान्नदोषभागित्वं प्रतीयते। ततश्चैतादृगपि सम्पूर्णा सर्व्वथा शूद्रान्नं न भोक्तव्यम्॥*॥

सुस्रूषुः

पूजारत्नाकरे।

'शालग्रामशिला यत्र तत्र सन्निहितो हरिः। तत्सन्निधौ त्यजेत् प्राणान् याति विष्णोः परं पदम्॥'

लिङ्गपुराणे।

'शालग्रामसमीपे तु क्षीणमात्रं समन्ततः। कीकटेऽपि मृतो याति वैकुण्ठभवनं नरः॥' कीकटो मगधः॥*॥ वैष्णवान्ते व्यासः।

'तुलसीकानने जन्तोर्यदि मृत्युर्भवेत् क्वचित्। न निर्भर्त्सयमं पापी लीलयैव हरिं विशेत्॥ प्रयाणकाले यस्यास्ये दीयते तुलसीदलम्। निर्व्वाणं याति पक्षीन्द्र! पापकोटियुतोऽपि सः॥'

कूर्म्मपुराणम्।

'गङ्गायाश्च जले मोक्षो वाराणस्यां जले स्थले। जले स्थले चान्तरीक्षे गङ्गासागरसङ्गमे॥'

स्कान्दे।

'गङ्गायां त्यजतः प्राणान् कथयामि वरानने!। कर्णे तत् परमं ब्रह्म ददामि मामकं पदम्॥'

तथा।

'तीराद्गव्यूतिमात्रन्तु परितः क्षेत्रमुच्यते। अत्र दानं जपो होमो गङ्गायां नात्र संशयः॥ अत्रस्थास्त्रिदिवं यान्ति ये मृतास्तेऽपुनर्भवाः॥'

गव्यूतिः क्रोशयुगम्। तीर्थचिन्तामणौ ब्रह्मपुराणम्।

'अत्र दूरे समीपे च सदृशं योजनद्वयम्। गङ्गायां मरणेनेह नात्र कार्य्या विचारणा॥'*॥

एवं गङ्गादिमरणेन प्राप्तब्रह्मलोकस्याप्यौर्द्धदेहिकी क्रिया तदधिकारिणा कर्त्तव्या नित्यत्वात्। तथा च श्रीमद्भागवते।

'क्षणा एवं भगवति मनोवाक्दृष्टिवृत्तिभिः। आत्मन्यात्मानमावेश्य सोऽन्तःश्वास समारमत्॥ संपद्यमानमाज्ञाय भीष्मं ब्रह्मणि निष्कले। सर्व्वे बभूवुस्ते तूष्णीं वयांसीव दिनात्यये॥ तस्य निर्हरणादीनि संपरेतस्य भार्गव!। युधिष्ठिरः कारयित्वा मुहूर्त्तं दुःखितोऽभवत्॥'

क्षणे आत्मनि परमात्मनि आत्मानं स्वीयात्मानं निवेश्य एकीकृत्य स भीष्मः उपारमत् मुक्तिं गतवान्। निष्कले निरुपाधौ ब्रह्मणि संपद्यमानं मिलितं आज्ञाय आलक्ष्य तस्य भीष्मस्य निर्हरणादीनि संस्कारादीनि संपरेतस्य सम्यक् परेतस्य मृतस्यापि। भार्गवेति शौनकस्य सम्बोधनम्। एवञ्च एतेषामपि तत्तत्कर्म्मणि तत्तद्वचनोपात्तप्रेतपदस्य पिण्डपदस्य च मन्त्रादिषु यथार्थं वाचनिकत्वात् प्रयोगः सङ्गच्छते।

'आसन्नमृतुना देया गौः सवत्सा च पूर्ब्ववत्। तदभावे च गौरेका नरकोद्धारणाय वै॥ तदा यदि न शक्नोति दातुं वैतरणीञ्च गाम्। शक्तोऽन्योरुक् तदा दत्त्वा श्रेयो दद्यान्मृतस्य च॥'

पूर्ब्ववद्धेमशृङ्गादिना।

अत्र मृतस्य चेति श्रवणात् एकादशाद्येऽपि वैतरणीदानाचारः। वनपर्ब्बणि।

सुरला

'सार्थः प्रवसतो मित्रं भार्य्या मित्रं गृहे सतः। आतुरस्य भिषङ्मित्रं दानं मित्रं मरिष्यतः॥" वराहपुराणे।

"व्यतीपातोऽथ संक्रान्तिस्तथैव ग्रहणं रवेः। पुण्यकालास्तदा सर्व्वे यदा मृतुरुपस्थितः॥ गोभूतिलहिरण्यादि दत्तमक्षयतामियात्॥" निरवकाशत्वादत्र मलमासादिदोषो नास्ति मृतकमपि न। तथा च शुद्धिरत्नाकरे दक्षः।

"सुस्थकाले त्विदं सर्व्वं मृतकं परिकीर्त्तितम्। आपद्गतस्य सर्व्वस्य मृतकेऽपि न मृतकम्॥"

इति शुद्धितत्त्वम्॥

सुर, ञ वेष्टने। इति कविकल्पद्रुमः॥ (तुदा०-पर०-सक०-सेट्।) पवर्गद्वितीयादिः। ञ सुरति वेष्टं लता। मोरिता। इति दुर्गादासः॥

सुरं क्ली, (सूर्य्यते इति। सुर्+अन्यत्रापीति भावे कः।) वेष्टनम्। इत्यमरटीकायां मथुरेशः॥

सुरः, पुं, (सुरति वेष्टतेऽसौ। सुर्+इगुपधत्वात् कर्त्तरि कः) दैत्यविशेषः। इति मेदिनी। रे, ७७॥ यं हत्वा विष्णुसुंरारिनामाभूत॥ (यथा श्रीमद्भागवते। ३। ३। ११।

"शम्बरं द्विविदं वाणं सुरं वल्वलमेव च। अन्यांश्च दन्तवक्त्रादीनवधीत् कांश्च घातयत्॥"

सुरगण्डः, पुं, (सुरं वेष्टनमिव गण्डति रजति अनेन। गण्ड+अच्।) वरणः। इति जटाधरः। वर्णक इति भाषा॥

सुरजः, पुं, (सुरात् संवेष्टनात् जायतेऽसौ। सुर+जन+डः।) गुदङ्गः। इत्यमरः। १। ७। ५॥ (यथा, रामायणे। २। ३६। ४१।

"सुरजपणवमेघघोषवद्-
दशरथवेश्म बभूव यत् पुरा।
विलपितपरिदेवनाकुलं
व्यसनगतं तदभूत् सुदुःखितम्॥")

सुरजफलः, पुं, (सुरजवत् फलमस्य।) पनसवृक्षः। इति त्रिकाण्डशेषः॥

सुरण्डः, पुं, (सुरेण वेष्टनेन अण्ड इव गोलाकृतिरिव। प्रकन्धादित्वादकारस्य परुषम्।) सम्यक्देशः। तद्देशस्थे, पुं भूम्नि। इति हेमचन्द्रः। ४। २७॥

सुरन्दला, स्त्री, (सुरं वेष्टनं सेतुं दलति भिनत्ति। दल्+अच्+स्त्रियां टाप्।) नर्म्मदानदी। इति त्रिकाण्डशेषः॥

सुरमर्दनः, पुं, (सुरं तन्नामानमसुरं मृद्नाति चूर्णीकरोतीति। मृद्+ल्युः।) विष्णुः। इति पुराणम्॥

सुररिपुः, पुं, (सुरस्य रिपुः।) विष्णुः। इति शब्दरत्नावली॥ (यथा, छन्दोमञ्जर्य्याम्। २। ३।

"त्वरितगतिर्न्नयुवतिस्तरणिसुता विपिनगता।
सुररिपुणा रतिगुरुणा सहमिलिता प्रमदमिता॥")

सुरला, स्त्री, (सुरं वेष्टनं लाति। ला+कः।) नर्म्मदानदी। इति त्रिकाण्डशेषः॥ (यथा उत्तररामचरिते। ३। १॥ ततः प्रविशति नदीद्वय

तमसा मुरला च। तमसा। सखि सुरले। किमसि सम्भ्रान्तेव। केरलदेशस्था काचिन्नदी। यथा च। रघुवंशे। ४। ५५।
"सुरलामारुतोद्धूतमगमत् केतकं रजः।
तद्योधवारवाणानामयत्नपटवासताम्॥"
"सुरला नाम केरलदेशेषु काचिन्नदी।" इति तट्टीकायां मल्लिनाथः॥)

सुरली, स्त्री, (सुरं चञ्चुलिवेष्टनं लाति प्राप्नोतीति ला+कः+स्त्रियां ङीष्।) स्वनामख्यातशुषिरवाद्यम्। तत्पर्य्यायः। वंशी २ वंशिका ३ वंशनालिका ४ सानेयिका ५ सानेयी ६ सानिका ७ सुरलासिका ८। एतच्चतुष्टयं सानायि। इति शब्दरत्नावली॥ (यथा, राधातन्त्रे। २३।
"वाद्यन्तु सुरलीं कृष्णः शृङ्गं वेणुं तथापरम्।
कात्यायनीं नमस्कृत्य हरिः पद्मदलेक्षणः॥")

सुरलीधरः, पुं, (धृ+अच्। सुरल्याः धरः।) श्रीकृष्णः। इति शब्दरत्नावली॥ (यथा, तन्त्रे।
"वैकुण्ठदक्षिणे भागे गोलोकं सर्व्वमोहनम्।
तत्रैव राधिका देवी द्विभुजो सुरलीधरः॥")

सुरहा, [न्] पुं, (सुरं हन्तीति। हन्+क्विप्।) विष्णुः। इति हेमचन्द्रः॥

सुरा, स्त्री, (सुरति सौरभेण वेष्टयति। सुर+इगुपधत्वात् कः टाप च।) स्वनामख्यातगन्धद्रव्यम्। (यथा, गरुड़पुराणे। १६०।
"तथा हिक्कां हरेत् पीता सौवर्चलसुतासुरा।"
तत्पर्य्यायः। तालपर्णी २ दैत्याङ्गन्धकुटी ३ गन्धिनी ५। इत्यमरः। २। ४। १२३।
(तथास्याः पर्य्यायान्तरं गुणाश्च।
"सुरा गन्धकुटी दैत्या सुरभिः शालपर्णिका।
सुरा तिक्ता हिमा स्वादी लघ्वी पित्तानिलापहा।
ज्वरारुग्भूतरक्षोघ्नी कुष्ठकासविनाशिनी।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥
तस्या लक्षणं यथा। सुरा पीता वरा प्रोक्ता।
इति वैद्यकचक्रपाणिसंग्रहे वातव्याध्यधिकारे॥)
अस्या अनुलेपनगुणाः। अलक्ष्मीरक्षोज्वरनाशित्वम्। इति राजवल्लभः॥ राजनिर्घण्टोक्तगुणपर्य्यायौ पुराशब्दे द्रष्टव्यौ॥

सुरारिः, पुं, (पुरस्यारिः।) श्रीकृष्णः। अस्य व्युत्पत्तिर्यथा,—
"सुरः क्लेशे च सन्तापे कर्म्मभोगे च कर्म्मिणाम्।
दैत्यभेदेऽपरिक्लेशां सुरारिस्तेन कीर्त्तितः॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ११० अध्यायः॥
अस्य स्वरूपं यथा,—
श्रीनारद उवाच।
"कोऽसौ सुरारिर्देवर्षे! देवो यक्षो नु किं नरः।
देवो वा राक्षसो वापि पार्थिवो वा तदुच्यताम्॥"
पुलस्त्य उवाच।
"योऽसौ रजःसत्त्वमायागुणवांश्च तमोमयः।
निर्गुणः सर्व्वगो यापी सुरारिर्मधुसूदनः॥"
श्रीनारद उवाच।
"योऽसौ सुर इति ख्यातः कस्य पुत्रश्च गीयते।
कथञ्च निहतः संख्ये विष्णुना तद्वदस्व मे॥"
पुलस्त्य उवाच।
"शृणुतां कथयिष्यामि सुरासुरनिबर्हणम्।
विचित्रमिदमाख्यानं पुण्यं पापप्रणाशनम्॥
कश्यपस्यौरसः पुत्रो सुरो नाम महाबलः।
स ददर्श रणे शम्भुं दितिपुत्रोऽसुरोत्तमः॥
ततः स मरणाद् भीतस्तप्त्वा वर्षगणान् बहून्।
आराधयामास विभुं ब्रह्माणमपराजितम्॥
ततोऽस्य तुष्टो वरदः प्राह वत्स! वरं वृणु।
स च वव्रे तदा देवो वरमेनं पितामहात्॥
यं यं करतलेनाहं स्पृशेयं समरे विभो!।
स स मड्क्तसंस्पृक्तमरोऽपि म्रियतां ध्रुवम्॥
बाढ़मुक्ता स भगवान् ब्रह्मा लोकपितामहः।
ततोऽभयान्महातेजा सुरः सुरगिरिं बली।
जगाम धर्म्मराजानं विजेतुं दण्डपाणिनम्॥"
सुर उवाच।
"यम। प्रजासंयमनान्निवृत्तिं कर्त्तुमर्हसि।
नो चेत्तवाद्य क्षिप्स्याहं मूर्द्धानं पातये भुवि॥
तमाह धर्म्मराड्वाक्यं यदि मां संयमेच्छवात्।
गोपितासि पुरा सत्यं करिष्ये वचनं तव॥
सुरस्तमाह भवतः कः संयन्ता वदस्व माम्।
अहं तच्च पराजित्य वारयामि न संशयः॥
यमस्तं प्राह मां विष्णुर्देवश्चक्रगदाधरः।
श्वेतद्वीपनिवासी यः स मां संयमतेऽव्ययः॥
इत्येव मुक्तो वचनं दुग्धाब्धिमगमत्सुरः॥
तमागतं प्राह मुने! मधुघ्नः
प्राप्तोऽसि केनासुर! कारणेन।
स प्राह युद्धं सह वै त्वयाद्य
तं प्राह भूयः सुरशत्रुहन्ता॥
यदीह मां योद्धुमुपागतोऽसि
तत् कम्पते ते हृदयं किमर्थम्।
ज्वरातुरस्येव मुहुर्मुहुर्वै
तत्रैव योनस्य सह कातरेण॥
इत्येवमुक्तो मधुसूदनेन
सुरस्तदा स्वे हृदये स्वहस्तम्।
कथं नु कम्पेति मुहुस्तदोक्ता
निपातयामास विपन्नबुद्धिः॥
हरिश्च चक्रं स्वदुलाघवेन
समोच तस्य शिरस्तु शत्रोः।
चिच्छेद देवास्तु गतव्यथाभवन्
देवं प्रशंसन्ति च पद्मनाभम्।
इतः प्रविष्टं समुपाजगाम
सुरारिरित्येव हरिर्महात्मा॥"
इति वामने ५७। ५८ अध्यायौ॥ *॥
अनर्घराघवनाम्नः कर्त्ता। यथा। 'अस्ति मौद्गल्यगोत्रसमुद्भूतस्य महाकवेर्भट्टश्रीवर्द्धमानात्मजस्य तनुमतीहृदयनन्दनस्य मुरारिनामधेयस्य कवेः कृतिरनर्घराघवं नाम नाटकं तत्प्रयुञ्जानाः सामाजिकानुपास्महे।' इति तत्कृतनाटकगद्यम्॥

मुर्च्छ आ मोहे। उच्छ्राये। इति कविकल्पद्रमः॥ (भ्वा०-पर०-अक०-सेट्।) पवर्गद्वितीयादिः। ह्रस्वी। तेन क्विपि राल्लोप इति क्लो मुरौ मुरः। आ मूर्च्छितं मूर्त्तं तेन। मोहो ज्ञानरहितीभावः। उच्छ्रायो वृद्धिः। मूर्च्छतीति रोगी। मुमूर्च्छे संख्ये रामस्य समानयसने हरावितिरघुः। इति दुर्गादासः॥

सुर्भिणी, स्त्री, अङ्गारधानिका। इति शब्दचन्द्रिका॥

सुर्मुरः, पुं, तुषाग्निः॥ (यथा, माघे। ६। ६।
"स्मरहुताशनसुर्मुरचूर्णतां
दधुरिवास्रवणस्य रजःकणाः।
निपतिताः परितः पथिकव्रजा-
नुपरि ते परितेपुरतो भृशम्॥")
मन्मथः। रविवाजिः। इति मेदिनी। रे, २०५॥ (स्त्रियां टाप्। नदीभेदः। यथा, महाभारते। ६। २२१। २५।
"भारती सुप्रयोगा च कावेरी सुर्मुरा तथा।
तुङ्गवेणा कृष्णवेणा कपिला शोण एव च॥")

सुर्व्व ई गर्व्वे। इति कविकल्पद्रमः॥ (भ्वा०-पर०-सक०-सेट्। निष्ठायामनिट्।) आद्यः षष्ठस्वरी। सूः सुर्वौ सुरः। नर्वो वन्धनम्। ई सूर्णः। इति दुर्गादासः॥

सुल क रोपणे। इति कविकल्पद्रमः॥ (चुरा०-पर०-सक०-सेट्। जन्मार्थे भ्वा०-उभ०-अक०-सेट्।) रोपणं आरोपणम्। क मोलयति वृक्षं लोकः। गोविन्दभट्टस्तु रोहणे इति पठित्वा रोहणं जन्म इति व्याख्याति। इति दुर्गादासः॥

सुशटी, स्त्री, (सुष+अटन्। पृषोदरादित्वात् साधुः।) सितकद्रुः। इति हेमचन्द्रः॥

सुश(ष)लिका, स्त्री, (सुष+"वृषादिभ्यश्चित्।" उणा० १।१०८। इति कलच्चित् स्यात्। टाप्। ततः संज्ञायां कन्। अकारस्येत्वम्।) शल्ली। तालमूली। तत्पर्य्यायः। सुवहा २ तालपर्णिका ३ गोधापदी ४ हेमपुष्पी ५ भूतालो ६ दीर्घकन्दिका ७ सुषली ८ तालिका ९ तालमूलिका १०। इति शब्दरत्नावली॥ अर्शोघ्नी ११। इति जटाधरः॥ अस्या गुणाः। मधुरत्वम्। शीतत्वम्। वृष्यत्वम्। पुष्टिबलप्रदत्वम्। पित्तिक्षतत्वम्। कफदत्वम्। पित्तदाहश्रमहरत्वञ्च।
"सुशली च द्विधा प्रोक्ता श्वेता चापरसंज्ञिका।
श्वेता स्वल्पगुणोपेता अपरा च रसायनी॥"
इति राजनिर्घण्टः॥
"तालमूली तु विद्वद्भिर्मुषली परिकीर्त्तिता।
सुषली मधुरा वृष्या वीर्य्योष्णा दृंहणी गुरुः।
तिक्ता रसायनी हन्ति गुदजान्यनिलं तथा॥"
इति भावप्रकाशः॥

सुष वधे। इति कविकल्पद्रमः॥ (भ्वा०-पर०-सक०-सेट्।) सोषति। इति दुर्गादासः॥

सुष ग सुखने। इति कविकल्पद्रमः॥ (क्रया०-पर०-सक०-सेट्।) ग सुष्णाति। इति दुर्गादासः॥

सुष् य इर् छिदि । इति कविकल्पद्रुम: ॥ (दिवा०-पर०-सक०-सेट् ।) छेद इह खण्डनम् । य सुष्यति विपक्षं चतुर: । इर् असुषत् अमोषीत् अस्मात् पुषादित्वान्नित्यं ङ इत्यन्ये । इति दुर्गादास: ॥

सुषल:, पुं, क्ली, (सोषति सुष्यतेऽनेन वेति । सुष्+ "इषादिभ्यश्चित् ।" उणा० १ । १०८ । इति कलच्चित् स्यात् ।) अयोऽग्रम् । इत्यमरटीकायां भरत: ॥ दन्त्यमध्योऽपि ॥ (यथा, मार्कण्डेये । ११६ । १८ ।

"सुनन्दं नाम सुषलं त्वष्टा यन्निर्म्मितं पुरा ।
तच्चहार स दुष्टात्मा तेन हन्ति रणे रिपून् ॥"
विश्वामित्रसुत: । यथा, महाभारते ।१३।४।५२।
"बाहुलिर्मुषलश्चैव वचोग्रीवस्तथैव च ॥"
(तालव्यमध्योऽप्ययम् । "सुष् खण्डने सुषल: ।" उणा० १ । १०८ । इत्यत्रोज्ज्वलदत्तवृत्ति: ॥)

सुषली, स्त्री. (सुष्यत इति । सुष्+कल: ङीष् ।) तालमूलिका । गृहगोधिका । इति शब्द-रत्नावली ॥

सुषल्य:, त्रि, (सुषलमर्हतीति । सुषल+"दण्डादिभ्यो य: ।"५ । १ । ६६ । इति य: ।) सुषल-वध्य: । इत्यमरटीकायां भरत: ॥

सुषा, स्त्री, (सुष्+क: टाप् ।) सूवा । इत्य-मरटीकायां रायमुकुट: । २ । १० । ३३ । सुची इति भाषा ॥

सुषित, त्रि, (सुष्+कर्म्मणि क्त: ।) चोरित-द्रव्यम् । तत्पर्य्याय: ॥ मूषितम् २ । इत्यमर: ।३। १।८८॥ (वञ्चित: । यथा. भागवते ।१।१३।३७ । "नाहं वेद्मि अवसितं पित्रोर्व: कुलनन्दन ! ।
मात्वार्य्या वा महाबाहो! सुषितोऽस्मि महा-त्मभि: ॥"
"सुषितो वञ्चितोऽस्मि ॥" इति तट्टीकायां श्रीधर: ॥)

सुष्क:, पुं, (सुष्णाति वीर्य्यमिति । सुष्+"वृष भृष्णुषिसुषिभ्य: कक् । उणा० ३ । ४१ । इति कक् ।) चण्डकोष: । इत्यमर: । २ । ६ । ६ । (यथा, वाग्भटे निदानस्थाने नवमे अध्याये ॥ 'म्लानाच्युतमसुक्तं हि सुष्कयोरन्तरेऽनिल: ॥") मोचकवृक्ष: । संवात: । इति मेदिनी । के, ३१ ॥ तस्कर: । मांसल: । इति हेमचन्द्र: ।३।२०६॥

सुष्कक:, पुं, (सुष्क । संज्ञायां कन् ।) वृक्षविशेष: । घण्टापारुल इति वङ्गभाषा । मोषा इति हिन्दी भाषा । तत्पर्य्याय: । गोलीढ: २ भाटल: ३ घण्टापाटलि: ४ मोच: ५ । इत्य-मर: । २ । ४ । ३६ ॥ मोचक: ६ सुष्क: ७ मोचक: ८ दुष्टक: ९ गौलिक: १० मेहन: ११ चारट्टच: १२ पाटली १३ विषापह: १४ भटाल: १५ वनवासी १६ सुतीक्ष्णक: १७ । इति राजनिर्घण्ट: ॥ गोलिह: १८ चार-ट्टेह: १९ घण्टा २० घण्टाक: २१ भाट: २२ । इति शब्दरत्नावली ॥ स तु पलाशवनपर्व्वत-वृक्ष: । श्वेतकृष्णभेदेन द्विविध: । तस्य गुणा: । कटुत्वम् । तिक्तत्वम् । ग्राहित्वम् । उष्णत्वम् । कफवातकारित्वम् । विषमेदोगुल्मकण्डूवस्ति-रोगक्लमिशुक्रनाशित्वञ्च । इति भावप्रकाश: ॥ रेचनत्वम् । पाचनत्वम् । प्लीहोदरार्त्तिनाशित्व-ञ्च । इति राजनिर्घण्ट: ॥ (यथा, सुश्रुते । चिकित्सास्थाने । ६ अध्याय: ।

"क्षीर्णे पक्वं तद्धरिद्राद्वयेन
हन्यात् कुष्ठं सुष्ककेनापि सर्पि: ॥")

सुष्कर:, पुं, (प्रशस्त: सुष्कोऽस्यास्ति । सुष्क+ "ऊषसुषिसुष्कमधो र: ।"५।२।१०७। इति र: ।) पलाशवृक्ष: । इति हेमचन्द्र: । ३ । १२१ ॥ (यथा, शतपथब्राह्मणे । ३ । ७ । २ । ८ । "रेतो विकरोति सुष्करो भवत्येष वै प्रजनयिता यत्सुष्करस्तस्मात्सुष्करो भवति तं न स ॥")

सुष्कशून्य:, पुं, (सुष्केण शून्य: ।) वृषणरहित: । स तु राज्ञोऽन्त:पुररक्षक: । खोजा इति भाषा । तत्पर्य्याय: । अनुपस्थ: २ क्लीबभाव: ३ महल्लिक: ४ । इति शब्दमाला ॥

सुष्टि:. पुं,स्त्री, (सुष्+क्तिच् ।) पलपरिमाणम् । चारि तोला इति भाषा । (वैद्यके आठतोला इति प्रसिद्धि: ।

"स्यात् कर्षाभ्यामर्द्धपलं मुष्टिरष्टामिका तथा ।
सुक्तिभ्याञ्च पलं ज्ञेयं सुष्टिराम्रचतुर्थिका ॥"
इति वैद्यकशार्ङ्गधरे पूर्व्वखण्डे प्रथमेऽध्याये ॥
'पलार्द्धं शुक्तिमिच्छन्ति तथाष्टमाषकाक्षिति ।'
पलं विल्वञ्च सुष्टि: स्यात्————————॥"
इति गारुडे अष्टाधिकद्विशततमेऽध्याये ।)

बद्धपाणि: । सुटा इति भाषा । तत्पर्य्याय: । सम्मिलिताङ्गुलिपाणि: २ सम्पुट: ३ सम्पुटी ४ । इति हेमचन्द्र: । ३ । २६१ ॥ स्फर: । इति मेदिनी । टे, २५ ॥ खड्गेर मुट् इति भाषा । (यथा, महाभारते । १ । १६ । १७ ।

"परिघैरायसैस्तीक्ष्णै: सन्निकर्षे च सुष्टिभि: ।
निघ्नतां समरेऽन्योन्यं शब्दो दिवमिवास्पृशत् ॥")
कुष्माण्डभाग: । छटाक इति भाषा । यथा.—
"अष्टसुष्टिर्भवेत् कुक्षि: कुक्षयोऽष्टौ च पुष्कल: ।"
इति प्रायश्चित्ततत्त्वम् ॥

(सुष्+क्तिन् ।) मोषणम् । इति सुधाकरधृत-दुर्गादासात् । प्रहारविशेष: । किल इति भाषा । यथा, मार्कण्डेयपुराणे । ६० । १५—१६ ।
"चिच्छेदापततस्तस्य सुष्टिरं निशितै: शरै: ।
तथापि सोऽभ्यधावत्तां सुष्टिसुद्यम्य वेगवान् ॥
स सुष्टिं पातयामास हृदये दैत्यपुङ्गव: ।
देयास्तस्यापि सा देवी तलेनोरस्यताडयत ॥"
पथि क्षुधार्त्तस्य तिलादीनां सुष्टिग्रहणे चौर्य्या-भाव: । यथा, कौर्म्मे उपविभागे १५ अध्याये ।
"तिलसुद्गयवादीनां सुष्टिर्ग्राह्या पथि स्थिते: ।
क्षुधार्त्तेनान्यथा विप्र! विधिविद्भिरिति स्थिति:॥"
(सुष् क्षेपे+अधिकरणे क्तिन् । शस्यगोपन-काल: । यथा, महाभारते । २ । ५ । ६५ ।
"कच्चिच्चवच्च सुष्टिच्च परराष्ट्रे परन्तप ! ।
अविहाय महाराज ! निहंसि समरे रिपून्॥"
"सुष्टि: शस्यानां गोपनकाल: दुर्भिक्षमिति यावत् ॥" इति तट्टीकायां नीलकण्ठ: ॥)

सुष्टिक:,पुं, (सुष्णाति परवीर्य्यमिति । सुष्+क्तिच् संज्ञायां कन् ।) कंसराजमल्लविशेष: । इति श्रीमद्भागवतम् ॥ (यथा च हरिवंशे ।४१।१६०। "नागं कुवलयापीड़ं चाणूरं सुष्टिकं तथा ।" सुष्टि: प्रयोजनमस्य । सुष्टि+कन् ।) स्वर्ण-कार: ॥ इति हेमचन्द्र: । ३ । ५७२ ॥

सुष्टिकान्तक:, पुं, (सुष्टिकस्यान्तक: ।) बल-देव: । इति शब्दरत्नावली ॥

सुष्टिद्यूतं, क्ली, (सुष्ट्या द्यूतं क्रीड़ितम् ।) द्यूत-क्रीड़ाविशेष: । पुरसट् खेला इति भाषा । तत्पर्य्याय: । द्युल्लकम् २ । इति शब्दमाला ॥

सुष्टिन्धय:, पुं, (सुष्टिं धयति पिबति । धेट्+ "नाड़ीसृधोश्च ।" ३ । २ । ३० । इति खश् । "अरुर्द्विषदजन्तस्य मुम् ।" ६ । ३ । ६७ । इति मुम् ।) बालक: । इति त्रिकाण्डशेष: ॥

सुष्टिबन्ध:, पुं, सुष्टिबन्धनक्रिया । सुटाबाँधा इति भाषा । तत्पर्य्याय: । संग्राह: २ । इत्यमर: । ३ । २ । १४ ॥ सुष्टेर्बन्धोऽङ्गुलिविन्यासो सुष्टि-बन्ध: । सुष्टिना बन्धो दृढ़ग्रहणं संग्राह इत्यपरे । सुष्ट्यामेव संग्रह इत्यन्ये । सुष्टि: स्त्रियाञ्च संग्रह इति वोपालित: । इति भरत: ॥

सुष्टीसुष्टि, व, सुष्टासुष्टि । सुष्टिभिर्मुष्टिभि: प्रहृत्य यद्युद्धं वृत्तं तत् । किलाकिलि इति भाषा । इति सुग्धबोधव्याकरणम् ॥

सुष्ठक:, पुं, (सुष्+बाहुलकात् कथन् । ततः संज्ञायां कन् ।) राजसर्षप: । इति रत्नमाला ॥ वष्टक इति वा पाठ: ॥

सुस य इर् छिदि । खण्डने । इति कविकल्पद्रुम: ॥ (दिवा०-पर०-सक०-सेट् ।) य सुस्यति विपक्षं चतुर: । इर् असुसत् अमोसीत् । अस्मात् पुषादित्वान्नित्यं ङ इत्यन्ये । इति दुर्गादास: ॥

सुसल:, पुं, क्ली, (सुस्यति खण्डयतीति । सुस्+ "इषादिभ्यश्चित् ।" उणा० १।१०८। कल: चित् स्यात् ।)स्वनामख्याततण्डुलादिकण्डनार्थनिर्म्मित-लौहाग्रयष्टि: । तत्पर्य्याय: । अयोऽग्रम् २ । इत्यमर: । २ । ६ । २५ ॥ मुषलम् ३ कण्डनी-दण्ड: ४ । इति शब्दरत्नावली ॥ सुस्यति सुसल सुस यिर्च्छिदि नान्नीति कल: । सुसलो दन्त्य-सकार: । एवं सुष्य इर्च्छिदीति मूर्द्धन्यान्तात् कल: मूर्द्धन्यषकारश्च । इत्यमरटीकायां भरत:॥ (आयुधविशेष: । तत्प्रकारो यथा, वैद्यशास्त्रा-नोक्तधनुर्व्वेदे ।

"सुसलस्त्रिशिखीर्याभ्यां करै: पादैर्विवर्च्छित
मूले चान्तेऽतिसम्बद्ध: पातनं पोषणं दृषम् ।
यथा, मनौ । ८ । ३१५ ।
"स्कन्धेनादाय सुसलं जगुड़ं वापि खादिरम् ।
शक्तिञ्चोभयतस्तीक्ष्णामायसं दण्डमेव वा ॥")

सुसलासुसलि, य, सुसलेच्च सुसलेच्च प्रहृत्ययुद्धं वृत्तम् । इति सिद्धान्तकौमुदी ॥

सुसली, स्त्री, (सुसल + गौरादित्वात् ङीष्।) तालमूलिका। गन्धगोधिका। इत्यमरः। २। ५। १२।

सुसली, [न्] पुं, (सुसलं प्रहरणत्वेनास्यास्तीति। सुसल + इनिः।) बलदेवः। इत्यमरः। १।१।२५॥

सुसल्यः, त्रि, (सुसलमर्हतीति। सुसल + यः।) सुसलेन वध्यः। इत्यमरः। ३। १। ७५॥

सुस्क संहतौ। इति कविकल्पद्रुमः॥ (चुरा०-उभ०-अक०-सेट्।) पवर्गद्वितीयादिः। क सुस्कयति। इति दुर्गादासः॥

सुस्कः, पुं, (सुस्कयति एकत्र संहतीभवन्तीति। सुस्क + कः। एकशिफायामस्य बहुमूलसम्बहुतया तथात्वम्।) सुस्तकम्। इति हारावली॥ (यथा वृहत्संहितायाम्। ७७। ११।

"भागैश्चतुर्भिः सितशैलसुस्काः
श्रीसर्ज्जभागौ नखगुग्गुलू च।
कर्पूरबोधो मधुपिण्डितोऽयं
कोपच्छदो नाम नरेन्द्रधूपः॥")

सुस्तकः, पुं क्ली, (सुस्त + स्वार्थे कन्।) लशुनमूलविशेषः। सुता इति भाषा। तत्पर्य्यायः। कुरुविन्दः २ मेघनामा ३ सुस्ता ४। इत्यमरः। २। ४। १५६॥ सुस्तः ५ राजकसेरुः ६। इति हारावली॥ मेघाख्यम् ७ गार्ङ्गेयम् ८ भद्रसुस्तकम् ९। इति रत्नमाला॥ अभ्रनामकः १० श्रीभद्रा ११ भद्रकः १२ भद्रा १३। इति शब्दरत्नावली॥ अस्य गुणाः। तिक्तत्वम्। कटुत्वम्। वायुनाशित्वम्। ग्राहित्वम्। दीपनत्वञ्च। इति राजवल्लभः॥ अपि च।

"सुस्तकं न स्त्रियां सुस्तं त्रिषु वारिदनामकः।
कुरुविन्दश्च स स्यातोऽपरः कोरकसेरुकः॥
भद्रसुस्तश्च गुन्द्रा च तथा नागरसुस्तकः।
सुस्तं कटु हिमं ग्राहि तिक्तं दीपनपाचनम्॥
कषायं कफपित्तास्रकृच्छ्वरांशुचिनुद्धृत्।
अनूपदेशे यज्जातं सुस्तकं तत् प्रशस्यते।
तत्रापि मुनिभिः प्रोक्तं वरं नागरसुस्तकम्॥"

इति भावप्रकाशः॥

सुस्तकः, पुं, (सुस्तयति संहतीकरोति रुधिरमिति। सुस्त + कः। ततः संज्ञायां कन्।) स्थावरविषभेदः। इति हेमचन्द्रः। २। २५६॥ (यथा, सुश्रुते कल्पस्थाने। २।

"पत्रारिष्टसनाभानि सुस्तके द्वे प्रकीर्त्तिते॥")

सुस्ता, स्त्री, (सुस्त + टाप्।) सुस्तकः। इत्यमरः। २। ४। १५६॥ (तथास्याः पर्य्यायः।

"मेघाख्यं सुस्तकं सुस्ता गार्ङ्गेयं भद्रसुस्तकम्।"

इति वैद्यकरत्नमालायाम्॥

यथा सुश्रुते सूत्रस्थाने। ३३।

"दोषघ्ना ग्रहणीपाण्डुरोगार्शःकृष्ठनाशनाः।
योगं त्रिजातकं सुस्ता विड्भ्रामलके तथा॥")

सुस्तादः, पुं, (सुस्तामत्तीति। अद + अण्।) शूकरः। इति शब्दरत्नावली॥

सुस्ताभं, क्ली, (सुस्तस्येवाभा यस्य।) सुस्तकविशेषः। नागर सुता इति भाषा। तत्पर्य्यायः। कुटमटम् २ पुरम् ३ वल्कम् ४ परिपेलवम् ५। इति रत्नमाला॥ (गुणा अस्य कुटन्नटशब्देज्ञातव्याः॥)

सुस्तुः, पुं, (सुस्तति खण्डयत्यनेन। सुस्त + बाहुलकात् तुक्।) सुष्टिः। इति हेमचन्द्रः। ३।२६१॥

सुस्रं, क्ली, सुसलम्। सुसधातोरौणादिकरक्प्रत्ययेन निष्पन्नम्। २। १३। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ (नयनजलमित्युज्ज्वलः॥)

सुह यड लुक् ति वैचित्त्ये। इति कविकल्पद्रुमः॥ (दिवा०-पर०-अक०-सेट्। रुधादित्वाद्दिट्।) वैचित्त्यं ज्ञानरहितीभावः। य, तेन सुह्यति चिराय मे मनः। इति मुरारिः। ऊ मोहिष्यति मोक्ष्यति। ल असुहत्। षि सुग्धः मूढोऽस्मि। इति। दुर्गादासः॥

सुह्रिः, पुं, (सुह्यति ज्ञानरहितीभवत्यनेन लोकः सुह्यति सभायामिति वा। सुह + "इषिमदीति उणा०।" १। ५२। इति किरच्।) कामः। हर्षः। इति मेदिनी। रे, १०५॥ (असभ्यः इत्युज्ज्वलदत्तः॥)

सुहुः, [सु] य, (सुह + "सुहेः किच्।" उणा० २। १२१। इति उसिः किच्च।) पुनः पुनः। इत्यमरः। ३। ४। १॥ (यथा, पद्मदशाम्। ७। १७१।

"स्वप्नमापरोचेण दृष्ट्वा पश्यन् स्वजागरम्।
चिन्तयेदप्रमत्तः सन्नभावनुदिनं सुहुः॥")

सुहुर्भाषा, स्त्री, (सुहुः भाषा भाषणम्।) पुनः पुनःकथनम्। तत्पर्य्यायः। अनुलापः २। इत्यमरः। १। ६। १६॥

सुहूर्त्तः, पुं क्ली, (हूर्च्छतीति। "अङ्गिघृसिभ्यः क्तः।" उणा० ३। ८६। इत्यत्र बाहुलकात् हुर्च्छेरपि इति उज्ज्वलदत्तः। सुडागमश्च प्राक्। "राल्लोपः।" ६। ४। २१। इति क्तस्य लोपः।) द्वादशक्षणपरिमितकालः। इत्यमरः। १। १। ११३॥ घटिकाद्वयम्। इति राजनिर्घण्टः॥ (अस्य विवृतिर्यथा। तत्र लघुचरोच्चारणमात्रोऽक्षिनिमेषः। षड्दशाक्षिनिमेषाः काष्ठा॥ त्रिंशत्काष्ठाः कलाः। विंशतिकलो मुहूर्त्तः कलादशभागश्च। त्रिंशन्मुहूर्त्तमहोरात्रम्। इति सुश्रुते सूत्रस्थाने षष्ठेऽध्याये॥) दिनपद्मदशभागैकभागः। यथा,

"प्रातःकालो मुहूर्त्तांस्त्रीन् सङ्गवस्तावदेव तु।
मध्याह्नस्त्रिमुहूर्त्तः स्यादपराह्णस्ततः परम्॥
सायाह्नस्त्रिमुहूर्त्तः स्यात् आद्यं तत्र न कारयेत्।
राक्षसी नाम सा वेला गर्हिता सर्व्वकर्म्मसु॥"

इति तिथ्यादितत्त्वधृतवचनम्॥*॥

कर्म्मविशेषे तस्य परिमाणं यथा। ननु व्रतोपवासस्नानादौ घटिकैकापि या भवेदित्यत्र घटिकापदं दण्डपरं मुहूर्त्तपरं वा स्यात्याचारधृतचतुर्दण्डात्मकारुणोदयज्ञापके चतस्रो घटिकाः प्रातररुणोदय उच्यते इत्यादौ प्रभाते घटिकाद्वयं प्रदोषे घटिकाद्वयम्। दिनवत् सर्व्वकार्य्याणि कारयेन्न विचारयेदिति हलायुधधृतलिखिष्यमाणत्रियामामिति वचनयोरेकमूलयोश्च उभयत्र प्रयोगदर्शनादिति संशयः। अत्रोच्यते। आह्निकादावस्तगामिनीति घटिकानियामकवचनचतुर्थचरणे मार्त्तण्डयोग्यतया घटिकाया मुहूर्त्तात्मकत्वस्यावश्यमङ्गीकारात् तात्पर्य्यलाघवेन व्रतादावपि तथात्वम्।

"घटिकैकाप्यमावास्यां प्रतिपत्सु न चेद्दृश्यते।
सर्व्वं तदासुरं दानं देवे कर्म्मणि चोदितम्॥"

इति घटिकान्यूने निन्दामभिधाय घटिकालाभे कर्म्माहत्वं वक्तव्ये मुहूर्त्तमप्यमावास्यां प्रतिपत्सु भवेद्दृश्यते। तदानसूत्रं त्रीयं त्रीयं पूर्व्वं हि पूर्व्ववदित्यनेन मुहूर्त्तलाभे कर्म्माहत्वज्ञापनाच्च। तत्रापि मुहूर्त्तः किं तत्तद्दिवारात्रिपञ्चदशांशः उत दण्डद्वयम्। नाद्यः प्रतिदिनदिवारात्रीर्द्वासप्तद्विभ्यां तद्भागानामपि न्यूनाधिक्यादिधिभेदापत्तेः। नापि द्वितीयः दण्डद्वयस्य त्रिंशद्दण्डात्मकदिवारात्रिपञ्चदशांशस्य मुहूर्त्तत्वञ्च दण्डद्वयाधिकन्यूनकालानामपि त्रिंशद्दण्डाधिकन्यूनदिवारात्रिपञ्चदशांशानां मुहूर्त्तत्वप्रतिपादनेन विनिगमनाविरहात् किन्त्वन्तरङ्गतया कर्म्माङ्गदिवारात्र्यन्यतरपञ्चदशांशस्य ग्रहणप्रसक्तौ अयनांशक्रमेणोत्तरायणपूर्व्वाह्णदिनमानसपादषड्विंशतिदण्डानां पञ्चदशांशस्य पादोनदण्डद्वयस्य मुहूर्त्तत्वात्तद्दिनविहितक्रियायां तावन्नूनकालस्यापि ग्रहणात् सर्व्वत्र न्यूनकालस्यवच्छेदे आवश्यकतया तस्यैव पादोनदण्डद्वयात्मकस्य मुहूर्त्तस्य ग्रहणं लाघवात्।

"यदा चतुर्दशीयामं तुरीयमनुपूरयेत्।
अमावास्या त्रीयमाणा तदैव आह्निमिष्यते॥"

इति कात्यायनोक्तस्य चतुर्दशीसम्बन्धिदिनचतुर्थयाममात्रव्याप्तावमावास्यायां आह्निविधानस्य मत्स्यपुराणोक्तसुखापराह्णीयमुहूर्त्तावाधेन विषयलाभाय पादोनदण्डद्वयात्मकमुहूर्त्तग्रहणस्यावश्यकत्वाच्च। तादृशामावास्यायां तदधिकसुखापराह्णासम्भवात्। तत्र च सुखापराह्णीयपादोनदण्डद्वयात्मकदर्शलाभस्तु चत्वारिंशत्पलाधिकत्रयस्त्रिंशद्दण्डात्मकदिवस एव। अत एव स्मार्त्तभट्टाचार्य्येरपि यदा चतुर्दशीयाममित्यस्य व्याख्याने तिथ्यादितत्त्वे तथा लिखितम्। न च निरूढलक्षणातो रूढमुक्तेर्बलवत्त्वात्। तासु त्रिंशत्तमेषु तु मुहूर्त्तो द्वादशाह्नियाम्। ते तु त्रिंशदहोरात्र इत्यमरोक्तो द्वादशक्षणात्मकः अहोरात्रत्रिंशांशो दण्डद्वयरूपमुहूर्त्तो लाघवतः सर्व्वत्रानुगततया न्यूनकालस्यवच्छेदको वक्तव्य इति वाच्यं निरूढलक्षणापि शक्तितुल्येति शाब्दिकस्मरणात् स्मार्त्तेनान्तरङ्गेति सन्निहिते बुद्धिरन्तरङ्गेति न्यायाच्च निरूढलक्षणाया एव बलवत्त्वात्। दक्षिणः सपवित्रक इत्यत्र पवित्रपदस्य कुशगतकोशोक्तरूढिशक्त्यपेक्षया विशिष्टकुशपवित्रद्वयगतकात्यायनोक्तनिरूढलक्षणाया इव। निरूढलक्षणायाः शक्तितुल्यत्वन्तु रूढशक्तेरिव

प्रक्यार्थबाधज्ञानं प्रक्यसम्बन्धज्ञानञ्च विना पदतात्पर्य्यज्ञानानुपपदमेव पदार्थोपस्थापकत्वात्। सा च निरूढ़लक्षणा क्वचित्तात्पर्य्यबोधकप्राबल्यात् क्वचिच्चार्थप्रयोगतोऽनुमानादपि निर्णीयते। वस्तुतस्तु द्युनिशोः पञ्चदशांशाश्रितस्तुत्युक्तनिरूढ़मुहूर्त्तपदलक्षणा विनिगमनाविरहगौरवाभ्यामेव कुण्ठिता अतोऽत्यन्तन्यूनपादोनदण्डद्वयात्मकमुहूर्त्तग्रहणं अप्रक्यमेव। अथात्यन्तन्यूनतया सर्व्वानुगमाय तद्ग्रहणमिति चेत् अत्यन्ताधिकतया सपादद्वयात्मकमुहूर्त्तस्यैव कुतो न ग्रहणं स्यात् तस्मात्

"प्रभाते घटिकायुग्मं प्रदोषे घटिकाद्वयम्।
दिनवत् सर्व्वकार्य्याणि कारयेन्न विचारयेत्॥"

इति लघुहारीतवचनविषयां रजनीं प्राहुरप्यक्षात्यन्तचतुष्टयम्। नाड़ीनान्तदुभे सन्ध्ये दिवसाद्यन्तसंज्ञिते इति ब्रह्मवैवर्त्तवचनयोरेकदण्डद्वयात्मककाले घटिकापदनिरूढ़लक्षणासिद्धौ तया पर्य्यायद्वारा कोयोक्तरूढ्या च समञ्जसतः पार्व्वणयोग्यदण्डद्वयात्मककाल एव घटिकापदादृप्तस्थाप्यते अतः सर्व्वसाधारण्येन न्यूनकालव्यवच्छेदाय सैव ग्राह्या लाघवात्। अतएव यदा चतुर्दशीयामं तुरीयमनुपूर्य्येदयत्र यदा यत्र दिने अमावास्यासुखापराह्णीयदण्डद्वयान्यूनकालव्यापनं यथा स्यात्तथैव चतुर्दशीयामं तदुयुक्तत्रितीययामसमुलच्चीकृत्य तत्र प्रदत्य चतुर्थयामं पूरयेत् आप्नोतीत्यन्वयः। अन्यथा चतुर्दशसमुहूर्त्ताधिकपूरणाभिधानं व्यर्थं स्यात्। एतेनैव दर्शश्राद्धेऽपि सुखापराह्णादरः कार्य्यः। प्रातःकालादिपञ्चधाविभागे कुतपादिसंज्ञायाञ्च दिनमानपञ्चदशांशसमुहूर्त्तस्यैव स्वैव ग्रहणम्। तदुबोधकप्राबल्यसंवादात्। अत एकोद्दिष्टे दिनमानपञ्चदशांशसमुहूर्त्तो योग्यतया च न्यूनकालव्यवच्छेदको ग्राह्यः। कुतपरौहिणान्यतरमात्रग्राहकयुक्तेः। एवं विशेषाभिधानात् सुखरात्रौ दण्डमात्रं जन्माष्टम्येकादशीद्वादशीषु च कलाकाष्ठारूपोऽपि प्रतिष्ठादौ तूक्तयुक्त्या स्वयोग्यकाल एव न्यूनकालव्यवच्छेदको ग्राह्यः। ततश्च विशेषकालप्राप्तकर्म्मेतरकर्म्मणः प्रदोषादिकाले स्वयोग्यदण्डद्वयान्यूनकतिथिरेव ग्राह्येत्यनुगतविधिः सर्व्वसामञ्जस्यादिति तत्त्वम्। इति चन्द्रशेखरवाचस्पतिकृतदेवनिर्णयः॥

मुहैरः, पुं, (मुह्यति विचित्तीभवतीति। मुह+"मूर्ब्बेरादयः।" उणा० १।६२। इति एरक्।) मूर्खः। इति संक्षिप्तसारोणादिवृत्तिः॥

मूङ बन्धे। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-कित्।) पवर्गपञ्चमादिः। ङ मवते। इति दुर्गादासः॥

मूः, [ऋ] स्त्री, मूर्च्छा। इति मूर्च्छेर्धातोर्भावे क्विप्। निष्पन्नम्। इति सुग्धबोधव्याकरणम्॥

मूः, स्त्री, (मवते इति। मव+क्विप्। "ज्वरत्वरस्रिव्यविमवामुपधायाश्च।" ६।४।२०। इति सम्प्रसारणे दीर्घः।) वन्धनम्। इति सिद्धान्तकौमुदी॥

मूकः, त्रि, (मवते वध्यतेऽसौ। मव+बाहुलकात् कक्।" उणा० ३।४१। इति उपधायाया वकारस्य चोट्।) वाक्यरहितः। बोवा इति भाषा। तत्पर्य्यायः। अवाक् २। इत्यमरः। ३।१।१३। (यथा, महाभारते। २।५।१२५।

"कचिदन्धांश्च मूकांश्च पङ्गून् व्यङ्गानबान्धवान्।
पितेव पासि धर्म्मज्ञ! तथा प्रव्रजितानपि॥"

अस्योत्पत्तिहेतुर्यथा, गर्भवैकल्यात्

"गर्भो वातप्रकोपेण दौर्ह्रदे चावमानिते।
भवेत् कुब्जः कुणिः पङ्गुर्मूको मिमिणस्य एवच॥"

इति सुश्रुते शारीरस्थाने द्वितीयेऽध्याये॥ रोगत्वेनास्य विषयो यथा,—

"आवृत्य वायुः सकफो धमनीः शब्दवाहिनीः।
नरान् करोत्यक्रियकान् मूकमिमिणगद्गदान्॥"

इति च तत्र निदानस्थाने प्रथमेऽध्याये॥)

मूकः, पुं, (मवते वध्यते जालिकैरिति। मव+कक्। पूर्व्ववत्सर्व्वम्।) मत्स्यः। इति त्रिकाण्डशेषः॥ दैत्यः। इति मेदिनी। के, ३१॥ (दानवभेदः। यथा, महाभारते। ३।३६।७।

"स सन्निकर्षमागम्य पार्थस्याक्लिष्टकर्म्मणः।
मूकं नाम दनोः पुत्रं ददर्शाद्भुतदर्शनम्॥")

दीनः। इति हेमचन्द्रः। ३।१३। (तक्षकपुत्रः। यथा, महाभारते। १।५७।१०।

"श्रिली श्रलकरो मूकः सुकुमारः प्रवेपनः।
सुहरः शिशुरोमा च सुरोमा च महाहनुः॥
एते तक्षकजा नागाः प्रविष्टा हयवाहनम्॥")

मूढ़ः, त्रि, (मूह+क्तः।) मूर्खः। इत्यमरः। ३।१।४८॥ (यथा, पञ्चदश्याम्। ७।१०।

"अन्योन्याध्यासरूपेण कूटस्याभासयोर्वपुः।
एकीभूय भवेन्मुख्यस्तत्र मूढ़ैः प्रयुज्यते॥")

वालः। तन्द्रितः। इति मेदिनी। ढे, ३॥ जड़ः। इति हेमचन्द्रः॥

मूतः, त्रि, (मव मूर्त्तौ वा क्तः।) बद्धः। इत्यमरः। ३।१।६५॥ (धान्यरक्षणार्थं तृणमय आधारविशेषः। यथा, शतपथब्राह्मणे। २।६।२।१७। "तान् द्वयोर्मूतकयोरुपनह्य वेणुयष्ट्यां वा कुपे वोभयत आवध्नीर्दं परेत्य यदि वृक्षं वा स्थाणुं वा वेणुं वा वल्मीकं वा विन्देत्॥" 'यत्र तृणमये आवपने धान्यं बध्यते तन्मूतं मूतमेव मूतकम्। वेणुमय्यां यष्ट्यासुभयतः बद्धा।' इति तद्भाष्ये महीधरः॥)

मूत्र, तृ क प्रसवे। इति कविकल्पद्रुमः॥ (अदन्त चुरा०-उभ०-सक०-सेट्।) दीर्घी। मूत्रयति मूत्रापयति। इति दुर्गादासः॥

मूत्रं, क्ली, (मूत्र्यते इति। मूत्र+घञ्। लोकाश्रयत्वात् क्लीवत्वम्। यद्वा, सुच्यते त्यज्यते इति। मूच+"सिवादिमुचोष्टेरूच।" उणा० ४।१६२। इति ष्ट्रन् किद्भवति। टेरूकारादेशः।) उपस्थनिर्गतजलम्। तत्पर्य्यायः। प्रस्रावः २। इत्यमरः। २।६।६७॥ मेहनम् ३। इति जटाधरः॥ गुह्यनिस्यन्दः ४ सवणम् ५ स्रवः ६। इति राजनिर्घण्टः॥ * ॥ (अस्योत्पत्तिविषयो यथा,—

"आहारस्य रसः सारः सारहीनो मलद्रवः।
शिराभिस्तच्चलं नीतं वस्तौ मूत्रत्वमाप्नुयात्॥"

इति पूर्व्वखण्डे चतुर्थेऽध्याये मार्ङ्गधरेणोक्तम्॥

"वस्तिपूरणविक्लेदक्लमूत्रम्।"

तथास्य क्षयवृद्धिलक्षणं यथा,—

"मूत्रक्षये वस्तितोदोऽल्पमूत्रता च।"
"मूत्रं मुहुर्मुहुः प्रवृत्तिं वस्तितोदमाध्मानञ्च।"

इति सुश्रुते सूत्रस्थाने पञ्चदशेऽध्याये॥ तथास्य दोषादि विकृतस्य परीक्षा लक्षणम्॥

"वातेन पाण्डुरं मूत्रं रक्तनीलञ्च पित्ततः।
रक्तमेव भवेद्रक्तात् श्वेतं फेनिलं कफात्॥"

इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे॥) तस्योत्सर्गविधिर्यथा,—

"दिवा सन्ध्यासु कर्णस्थब्रह्मसूत्र उदङ्मुखः।
कुर्य्यान्मूत्रपुरीषे तु रात्रौ वै दक्षिणामुखः॥"

इति गारुड़े ६४ अध्यायः॥

अपि च।

"मूत्रोच्चारसमुत्सर्गं दिवा कुर्य्यादुदङ्मुखः।
दक्षिणाभिमुखो रात्रौ सन्ध्ययोश्च यथा दिवा॥

इति मनुः। ४।५०॥

"कृत्वा यज्ञोपवीतन्तु दृष्टतः कण्ठलम्बितम्।
विण्मूत्रे च गृही कुर्य्याद् यद्वा कर्णे समाहितः॥"

इति यमः॥

यद्येकवस्त्रो यज्ञोपवीतं कर्णे कृत्वा अवगुण्ठित इति। कर्णे दक्षिणकर्णे। इति सांख्यायनः॥

"छायायामन्धकारे वा रात्रावहनि वा द्विजः।
यथासुखमुखः कुर्य्यात् प्राणबाधभयेषु च॥*॥
न मूत्रं पथि कुर्व्वीत न भस्मनि न गोव्रजे।
न फालकृष्टे न जले न चित्यां न च पर्व्वते॥
न जीर्णदेवायतने न वल्मीके कदाचन।
न ससत्त्वेषु गर्त्तेषु न गच्छन्नपि संस्थितः॥
न नदीतीरमासाद्य न च पर्व्वतमस्तके।
वायुग्निविप्रादित्यमपः पश्यंस्तथैव गाः।
न कदाचन कुर्व्वीत विण्मूत्रस्य विसर्जनम्॥"

इति मनुः। ४।४५—४८॥*॥

"आहारनिर्हारविहारयोगाः
सुसंवृता धर्म्मविदा तु कार्य्याः।
वाग्गुप्तिकार्य्याणि तथैव
धनायुषो गुप्ततमे तु कार्य्ये॥'

इति वशिष्ठः॥

निर्हारो मूत्रपुरीषोत्सर्गः॥ * ॥

"सोमाग्न्यर्काम्बुवायूनां पूज्यानाञ्च न सम्मुखे।
कुर्य्यात् शौचनविण्मूत्रसमुत्सर्गञ्च पण्डितः॥"

इति विष्णुपुराणम्॥

न च सोपानत्को मूत्रपुरीषे कुर्य्यादिति। इत्यापस्तम्बः।

मूत्रावातादिः। अस्य चिकित्सा यथा,—
"निर्दिग्धिकायाः स्वरसं पिबेत् कुड़वसम्मितम्।
मूत्रदोषहरं कल्कमथवा क्षौद्रसंयुतम्॥"
"अत ऊर्द्धं प्रवक्ष्यामि मूत्रदोषे क्रमं हितम्।
स्नेहस्वेदोपपन्नानां हितन्तेषु विरेचनम्॥
ततः संशुद्धदेहानां हिताश्चोत्तरवस्तयः॥"
"क्षौद्रार्द्धपात्रं दत्त्वा तु पात्रन्तु क्षीरसर्पिषोः।
स्वयङ्गुप्ताफलस्यैव तथैव क्षुरकस्य च॥
पिप्पलीचूर्णसंयुक्तमर्द्धभागं प्रदापयेत्।
एतदेकध्यमानीय खञ्जेनाभिप्रमन्थयेत्॥
तस्य पाणितलं चूर्णं लीढ्वा क्षीरं ततः पिबेत्।
एतत्सर्पिः प्रयुञ्जानः शुद्धदेहो नरः सदा॥
मूत्रदोषान् जयेत् सर्व्वानन्ययोगैः सुदुर्ज्जयान्।
जयेत् शोणितदोषांश्च वन्ध्या गर्भं लभेत च।
नारी चैतत् प्रयुञ्जाना योनिदोषात् प्रमुच्यते॥"
इत्युत्तरतन्त्रेऽष्टपञ्चाशत्तमेऽध्याये सुश्रुतेनोक्तम्॥)

मूत्रनिरोधः, पुं, (मूत्रस्य निरोधः। यद्वा मूत्रं निरुणद्धीति। रुध्+अण्।) मूत्रप्रतिबन्धकरोगविशेषः। अस्य चिकित्सा यथा,—
"पिष्टं वै मालतीमूलं ग्रीष्मकाले समाहृतम्।
साधितं छागदुग्धेन पीतं शर्करयान्वितम्।
हरेन्मूत्रनिरोधञ्च हरेद्वै पाण्डुशर्कराम्॥"
इति गारुड़े १६१ अध्यायः॥
(चिकित्सान्तरं यथा,—
"तैलेन पद्मिनीकन्दं पक्वगोमूत्रमिश्रितम्।
पिबेन्मूत्रनिरोधे तु सतीव्रवेदनान्विते॥"
इति हारीते चिकित्सितस्थाने त्रिंशेऽध्याये॥)

मूत्रपतनः, पुं, (मूत्रस्य पतनमस्मात् पुरीषनिरोधकरणादस्य सततमूत्रपतनात् तथात्वम्।) गन्धमार्जारः। इति राजनिर्घण्टः॥

मूत्रपुटं, क्ली, (मूत्रस्य पुटम्।) नाभेरधो भागः। यथा,—
"नाभेरधो मूत्रपुटं वस्तिमूत्राशयोऽपि च।"
इति हेमचन्द्रः। ३। २७०॥

मूत्रफला, स्त्री, (मूत्रं मूत्रवर्द्धनं फलं परिणामनमस्याः।) कर्कटी। चपुषी। इति राजनिर्घण्टः॥
(कर्कटीचपुषीशब्दयोरस्या विषयो ज्ञेयः॥)

मूत्रलं, क्ली, (मूत्रं लाति आदत्ते वर्द्धयतीत्यर्थः। ला+कः।) चपुषम्। इति शब्दचन्द्रिका॥
मूत्रवर्द्धके, त्रि॥ (यथा, सुश्रुते। सूत्रस्थाने। ४५ अः।
"आम्बवो बद्धनिस्यन्दस्तुवरो वातकोपनः।
तीक्ष्णः सुरासवो हृद्यो मूत्रलः कफवातनुत्॥")

मूत्रला, स्त्री, (मूत्रल+टाप्।) कर्कटी। इति त्रिकाण्डशेषः॥ वालुकी। इति राजनिर्घण्टः॥

मूत्रावातः, पुं, (मूत्रस्याघातो निरोधो येन।) यस्मादवरोधकरोगविशेषः। अथ मूत्राघातस्य विप्रकृष्टं सन्निकृष्टञ्च निदानं संख्याञ्चाह।
"प्रायोमूत्रविघातादौर्व्वातकुण्डलिकादयः।
जायन्ते कुपितैर्दोषैर्मूत्राघातास्त्रयोदश॥"
मूत्रविघातादौरित्यायशब्देन पुरीषशुक्रादिवेगविघातानां रूक्षाशनादीनाञ्च ग्रहणम्। मूत्रविघातादेः कुपितैर्दोषैरित्यन्वयः। ननु मूत्रकृच्छ्रमूत्राघातयोः को भेदः। उच्यते। मूत्रकृच्छ्रे कृच्छ्रमधिकं विबन्धोऽल्पः। मूत्राघाते तु विबन्धो बलवान् कृच्छ्रमल्पं इत्यनयोर्भेदः॥*॥
वातकुण्डलिकाया निदानं संप्राप्तिं लक्षणञ्चाह।
"रौक्ष्यादेगविघाताद्वा वायुर्बस्तौ सवेदनः।
मूत्रमाविश्य चरति विगुणः कुण्डलीकृतः॥
मूत्रमल्पाल्पमथवा सरुजं संप्रवर्त्तते।
वातकुण्डलिकां तान्तु व्याधिं विद्यात् सुदारुणम्॥"
रौक्ष्यात् कायस्य। वेगविघातात् मूत्रादिवेगनिरोधात् आविश्य प्राबल्य रौक्ष्यादिभिर्वेगविघातादिभिश्च विगुणो दुष्टः कुण्डलीकृतो वायुर्बस्तौ मूत्राशये चरति प्रतिधावति आवङ्क्षवादभ्रमंस्तिष्ठति इत्यर्थः। वात्यावत्। मूत्रमिति तस्मान्मूत्रमल्पमल्पं सरुजं संप्रवर्त्तते। तद्व्याधिं वातकुण्डलिकामाहुः। सुदारुणम्। मारणात्मकत्वात्॥ १॥*॥ अष्ठीलामाह।
"आध्मापयन् बस्तिगुदं रुद्ध्वा वातश्चलोन्नताम्।
कुर्य्यात्तीव्रार्त्तिमष्ठीलां मूत्रविण्मार्गरोधिनीम्॥"
वातः बस्तिगुदं रुद्ध्वा अर्थात् तदन्तर्गतं मूत्रं मलञ्च निरुध्य बस्तिगुदं बस्तिं गुदञ्च आध्मापयन् आध्मानं कुर्व्वन् अष्ठीलां ष्ठीलातुल्यां व्याधिं कुर्य्यात्। चलोन्नतां चलां उन्नताञ्च॥२॥
वातबस्तिमाह।
"वेगं विधारयेद्यस्तु मूत्रस्याकुशलो नरः।
निरुणद्धि सुखं तस्य वस्तिर्बस्तिगतोऽनिलः॥
मूत्रसङ्गो भवेत्तेन बस्तिकुक्षिनिपीड़ितः।
वातबस्तिः स विज्ञेयो व्याधिः कष्टप्रसाधनः॥"
अकुशलो मूर्खः। तस्य पुरुषस्य बस्तिसुखं निरुणद्धि बस्तिगतो वायुः। तेन वायुना मूत्रसङ्गो मूत्रविघातो भवति बस्तिकुक्षिनिपीड़ित इति बस्तौ कुक्षौ च निपीड़ितः संपीड़ितो वायुरिति सम्बन्धः॥३॥ मूत्रातीतमाह।
"चिरं धारयते मूत्रं त्वरया न प्रवर्त्तते।
मेहमानस्य मन्दं वा मूत्रातीतः स उच्यते॥"
मेहमानस्य मूत्रमुत्सृजतः। मन्दं वा अल्पं वा॥ ४॥*॥ मूत्रजठरमाह।
"मूत्रस्य वेगेऽभिहते तदुदावर्त्तहैतुकः।
अपानः कुपितो वायुरुदरं पूरयेदभृशम्॥
नाभेरधस्तादाध्मानं जनयेत्तीव्रवेदनम्।
तं मूत्रजठरं विद्यादधोबस्तिनिरोधनम्॥"
तदुदावर्त्तहैतुक इति मूत्रवेगधारणगणितोदावर्त्तनिदानमाध्मानं कुर्य्यात्। अधोबस्तिनिरोधनं बस्तरधोदेशे विबन्धकारकम्॥ ५॥
मूत्रोत्सङ्गमाह।
"बस्तौ वाप्यथवा नाले मणौ वा यस्य देहिनः।
मूत्रं प्रवृत्तं सज्येत सरुजं वा प्रवाहतः॥
सवेक्षनैरल्पमल्पं सरुजं वाथ नीरुजम्।
विगुणानिलजो व्याधिः स मूत्रोत्सङ्गसंज्ञितः॥
नाले मेढ्रे मणौ मेहनाग्रग्रन्थौ सज्येत निरुद्धं स्यात् सरुक्तं सत् वा प्रवर्त्तते। प्रवाहत इति कण्ठह्रदेन सशब्दं मूत्रपुरीषवातानामधः प्रेरणं प्रवाहनं तेन कुपितेन वायुना बस्त्यादिभेदात् सरुक्तं मूत्रं सवेदित्यर्थः॥ ६॥ मूत्रक्षयमाह।
"रूक्षस्य क्लान्तदेहस्य बस्तिस्थौ पित्तमारुतौ।
मूत्रक्षयं सरुग्दाहं जनयेतां तदाक्षयम्॥"
क्लान्तदेहस्य म्लानदेहस्य तदाक्षयं मूत्रक्षयसंज्ञम्॥ ७॥ मूत्रग्रन्थिमाह।
"अन्तर्बस्तिसुखे वृत्तः स्थिरोऽल्पः सहसा भवेत्।
अश्मरीतुल्यरुग्ग्रन्थिर्मूत्रग्रन्थिः स उच्यते॥"
अन्तर्बस्तिसुखे बस्तिसुखस्याभ्यन्तरे अल्पः क्षुद्रामलकप्रमाणः। अश्मर्याः अस्य सह को भेदः। उच्यते। अश्मरी क्रमशः सञ्चयेन स्यादयन्तु सहसा भवेदिति भेदः। अपरो भेदः। अश्मर्यां पित्तादिकं संहन्यते अत्र तु रक्तमेव। यत उक्तं तन्त्रान्तरे।
"रक्तं वातकफाद्दुष्टं बस्तिद्वारे सुदारुणम्।
ग्रन्थिं कुर्य्यात् स कृच्छ्रेण स्रवेन्मूत्रं तदा-
वृतम्॥"८॥ इति॥

मूत्रशुक्रमाह।
"मूत्रितस्य स्त्रियं यातो वायुना शुक्रसङ्गतम्।
स्थानच्युतं मूत्रयतः प्राक् पश्चाद्वा प्रवर्त्तते।
भस्मोदकप्रतीकाशं मूत्रशुक्रं तदुच्यते॥"
मूत्रितस्य मूत्रवेगयुक्तस्य शुक्रं स्थानात् च्युतं पश्चाद्वायुना उन्नतं ऊर्द्धं नीतम्। भस्मोदकप्रतीकाशं भस्मसहितजलसदृशम्॥ ९॥ उष्णवातमाह।
"व्यायामाध्वातपैः पित्तं बस्तिं प्राप्यानिलावृतम्।
बस्तिं मेढ्रं गुदञ्चैव प्रदहत् स्रावयेदधः॥
मूत्रं हारिद्रमथवा सरक्तं रक्तमेव वा।
कृच्छ्रं पुनः पुनर्जन्तोरुष्णवातं वदन्ति तम्॥"
व्यायामादिविरोधित्वेन सौम्यधातुक्षयात् तेजोवृद्ध्या पित्तवृद्धिः स्यात्तत् कुपितं पित्तं असंयुतं बस्तिं प्राप्य बस्त्यादिकं प्रदहत् मूत्रमधः स्रावयेत्। कीदृशं हारिद्रं अथवा सरक्तं ईषल्लोहितम्॥ १०॥ मूत्रसादमाह।
"पित्तं कफो द्वावपि वा संहन्येतेऽनिलेन चेत्।
कृच्छ्रान्मूत्रं तदा पीतं रक्तं श्वेतं घनं स्रवेत्॥
सरक्तं रोचनाप्रख्यवर्णं भवेत्ततः।
शुष्कं समस्तवर्णं वा मूत्रसादं वदन्ति हि॥"
संहन्येते घनीक्रियेते। शुष्कं अल्पं समस्तवर्णं उक्तसकलवर्णयुक्तम्॥ ११॥ विड्विघातमाह।
"रूक्षदुर्ब्बलयोर्घातैरुदावृत्तं ग्रहद् यदा।
मूत्रस्रोतोऽनुपद्येत विट्संरुद्धं तदा नरः॥
विड्गन्धं मूत्रयेत् कृच्छ्राद्विड्विघातं तमादिशेत्॥"
उदावृत्तं ऊर्द्धं नीतं विड्गन्धं वा। वाशब्दोऽत्र योजनीयः॥ १२॥*॥ बस्तिकुण्डलमाह।
"हताध्वलङ्घनायासैरभिघातात् प्रपीड़नात्।
स्वस्थानाद्बस्तिरुद्वृत्तः शूलस्तिष्ठति गर्भवत्॥

मूत्रकृ

"करगृहीतपात्रेण कृत्वा मूत्रपुरीषके ।
मूत्रतुल्यन्तु पानीयं पीत्वा चान्द्रायणञ्चरेत् ॥"
इति बृहन्मनुः ॥ * ॥

गृहीतजलपात्रस्य मूत्रोत्सर्गे दोषो यथा,—
"वारिपात्रं करे धृत्वा मूत्रं त्यजति यो नरः ।
सुरापात्रसमं पात्रं तज्जलं मदिरासमम् ।"
इति कर्म्मलोचनम् ॥ * ॥

सशब्दमूत्रस्य दोषो यथा,—
"निःस्वाः सशब्दमूत्राः स्युर्मूका निःशब्दधारया ।
भोगाढ्याः समजठरा निःस्वाः स्युर्घटसन्निभाः ॥"
इति गारुडे ६३ अध्यायः ॥ * ॥

"विष्णुक्रान्तान्तमूत्रेण चौरयाघ्रादिरक्षणम् ।"
इति तत्रैव १८८ अध्यायः ॥ * ॥ अथ गोमूत्रगुणाः । तीक्ष्णत्वम् । उष्णत्वम् । लवणत्वम् । पित्तकारित्वम् । कटुत्वम् । लघुत्वम् । रूक्षत्वम् । कृम्युदराणाहशोथार्शोविषकुष्ठगरिनत्वञ्च । इति राजवल्लभः ॥

मूत्रकृच्छ्रं, क्ली, (मूत्रे कृच्छ्रम् । मूत्रजन्यं कृच्छ्रमिति वा ।) रोगविशेषः । तत्पर्य्यायः । मूत्ररोधः २ अश्मरी ३ कृच्छ्रम् ४ । इति राजनिर्घण्टः ॥ * ॥ अथ मूत्रकृच्छ्राधिकारः । तत्र मूत्रकृच्छ्रस्य विप्रकृष्टं निदानमाह ।

"व्यायामतीक्ष्णौषधरूक्षमद्य-
प्रसङ्गकृत्यद्रुतदृष्ठयानात् ।
यानप्रमत्त्याध्यशनादजीर्णात्
स्युर्मूत्रकृच्छ्राणि नृणां तथाष्टौ ॥"

तीक्ष्णौषधं राजिकाशूरणादियुक्तम् । रूक्षेति मद्यविशेषणम् । प्रसङ्गः सततं सेवा । कृत्यं नर्त्तनम् । नित्येति द्विविधः पाठः । द्रुतदृष्ठयानात् अश्वादिना गमनात् । यानप्रमं प्रचुरजलदेशभवं भक्ष्यम् । अष्टौ वातिकपैत्तिकश्लैष्मिकसान्निपातिकशल्यजपुरीषजशुक्राश्मरीभेदानि । तस्य संप्राप्तिपूर्ब्बकं लक्षणमाह ।

"पृथग्द्वन्द्वाः स्वैः कुपिता निदानैः
सर्व्वेऽथवा कोपमुपेत्य वस्तौ ।
मूत्रस्य मार्गं परिपीडयन्ति
यदा तदा मूत्रयतीह कृच्छ्रात् ॥"

तेषु वातिकमाह ।

"तीव्रा रुजो वङ्क्षणवस्तिमेढ्रे
स्वल्पं मुहुर्मूत्रयतीह वातात् ।"

तीव्रा मारणात्मिका वङ्क्षणावूरुमेढ्राणामन्तराजमन्यो । * । पैत्तिकमाह ।

"पीतं सरक्तं सरुजं सदाहं
कृच्छ्रं मुहुर्मूत्रयतीह पित्तात् ।"

कृच्छ्रमिति क्रियाविशेषणम् । श्लैष्मिकमाह ।

"वस्तेः सलिङ्गस्य गुरुत्वशोथौ
मूत्रं सपिच्छं कफसूत्रकृच्छ्रे ।"

सपिच्छं पिच्छिलम् । सान्निपातिकमाह ।

सर्व्वाण्यपि रूपाणि च सन्निपातात्
भवन्ति तत्र कृच्छ्रतमं हि कृच्छ्रम् ।"

कृच्छ्रं मूत्रकृच्छ्रम् । ३ । शल्यजमाह ।

"मूत्रवाहिषु शल्येन क्षतेष्वभिहतेषु वा ।
मूत्रकृच्छ्रं तदाघाताज्जायते शूद्दारुणम् ॥
वातकृच्छ्रेण तुल्यानि तस्य लिङ्गानि निर्दिशेत् ।"

मूत्रवाहिषु स्रोतःसु । शल्येन कण्टकेन । क्षतेषु सञ्चतीक्षतेषु अथवा अभिहतेषु सुन्नरादिभिरभिहतेषु । तदाघातात् मूत्रमार्गाघातात् मूत्रकृच्छ्रं जायते । शूद्दारुणं मारकं तस्य शल्यजस्य ॥ * ॥ पुरीषजमाह ।

"शुष्कस्तु प्रतीवाताद्वायुर्विगुणतां गतः ।
आध्मानं वातशूलञ्च मूत्रकृच्छ्रं करोति च ॥"

प्रतीवातात् निरोधात् । विगुणतां दुष्टताम् ॥ शुक्रजमाह ।

"शुक्रदोषैरुपहते मूत्रमार्गे विधारिते ।
सयुक्तं मूत्रवेगेन कृच्छ्राद्वस्तिमेढ्रशूलवान् ॥"

उपहते दूषिते ॥ * ॥ अश्मरीजमाह । अश्मरीहेतुकत्वापि मूत्रकृच्छ्रस्योक्तम् । सुश्रुतेः शर्करात्रमपि मूत्रकृच्छ्रमुक्तमत्र तु तस्य नवसंख्यानिरासार्थमश्मरीशर्करयोः साम्यमाह ।

"अश्मरी शर्करा चैव तुल्यसम्भवलक्षणे ।
विशेषणं शर्करायाः शृणु कीर्त्तयतो मम ॥"

सम्भवः कारणम् ।

"पच्यमानाश्मरी पित्ताच्छोष्यमाणा च वायुना ।
विमुक्तकफसन्धाना चरन्ती शर्करा मता ॥"

पित्तेन पच्यमाना मूत्रशुक्रश्लेष्मसंहतिः प्रथमं पित्तेन वह्निकल्पेन पच्यमाना । पश्चाद्वातेन शोषिता कफेनाश्लिष्टा अश्मरी । सैव विमुक्तकफसन्धाना त्यक्तकफाश्लेषा सती शर्करारूपा मूत्रमार्गात् चरन्ती शर्करा मता । एतावता किञ्चिदेव भेदः ॥ * ॥ शर्करायाः उपद्रवानाह ।

"क्षतपीड़ा वेपथुः शूलं कुक्षावस्मिंश्च दुर्बलः ।
तया भवति मूर्च्छा च मूत्रकृच्छ्रञ्च दारुणम् ॥"

शूलं कुक्षावित्यत्रयः । तया शर्करया ॥ * ॥

अथ मूत्रकृच्छ्रस्य चिकित्सा ।

"त्रिकण्टकारावधदर्भकाश्म-
यवासधान्यौगिरिभेदपथ्याः ।
विघ्नन्ति पीता मधुनाश्मरीञ्च
समीपस्थस्यापि मूत्रकृच्छ्रम् ॥"

त्रिकण्टकादिक्वाथः ॥ २ ॥

"एलाश्मभेदकशिलाजतुगोक्षुराणा-
मेर्व्वारुबीजलवणोत्तमकुङ्कुमानाम् ।
चूर्णानि तण्डुलजले तुलितानि पीत्वा
प्रत्यक्षमस्थलुरपि जीवति मूत्रकृच्छ्री ॥"

एलादिचूर्णम् । २ ॥

"अयोरजः सूक्ष्ममपिष्टं मधुना सह योजितम् ।
मूत्रकृच्छ्रं निहन्त्याशु संशोढं दिवसत्रयात् ॥३॥

गुड़ेन मिश्रितं चौरं कट्फलं कामतः पिबेत् ।
मूत्रकृच्छ्रेषु सर्व्वेषु शर्करायाश्च निष्प्लुतः ॥४॥

धात्रीरसक्षेक्षुरसं पिबेद्वा
कृच्छ्रे सरक्ते मधुना विमिश्रम् ।
शल्याभिघातोत्थितमूत्रकृच्छ्रे
कार्य्या क्रिया मारुतकृच्छ्रतुल्या ॥५॥

मूत्रदो

क्वाथो गोक्षुरबीजस्य यवक्षारसमन्वितः ।
पीतः प्रशमयत्येव कृच्छ्रं विड्धारणोत्थितम् ॥६॥

त्रिफलायाः सुपिष्टायाः कल्कं कोलसमन्वितम् ।
वारिणा लवणीकृत्य पिबेन्मूत्रजघापहम् ॥"७॥

कोलं बदरम् ।

गुड़मामलकं दृप्यं भ्रमघ्नं तर्पणं प्रियम् ।
पित्तासृग्दाहशूलघ्नं मूत्रकृच्छ्रहरं परम् ॥ ८ ॥

सपादशाणतुलितो यवक्षारः सितायुतः ।
भक्षितो नाशयत्येव मूत्रकृच्छ्रं न संशयः ॥९॥

द्राक्षासितोपलाकल्कः पीतः कर्षमितो नरैः ।
मस्तुना पलमात्रेण मूत्रकृच्छ्रं व्यपोहति ॥१०॥

सक्षीरगोक्षुरक्वाथः सितामाक्षिकसंयुतः ।
नाशयेन्मूत्रकृच्छ्राणि तथैवोष्णसमीरणम् ॥"११॥

उष्णसमीरणं उष्णवातं मूत्राघातविशेषम् ।
इति भावप्रकाशः ॥ (तथास्य चिकित्साप्रकारान्तरम् ।

"सुशीतलं जलं कर्षमात्रं स्यात् मूत्रकृच्छ्रहृत् ।
दध्यम्बु च समिश्रमयश्चूर्णं सुखप्रदम् ॥
मूत्रकृच्छ्रे यवक्षारचूर्णं क्षिक्षुप्रयोजितम् ।
कुष्माण्डञ्च समादाय शर्करासहितं पिबेत् ॥
यो हि क्षिप्रोत्थसम्भूतमूत्रकृच्छ्रनिवारणः ॥"

"आरग्वधफलं मूलं दुरालभा धान्यकं शुनार्वश्यः ।
पाषाणभेदपथ्ये क्वाथोऽयं मूत्रकृच्छ्रे स्यात् ॥"

इति हारीते चिकित्सितस्थाने २६ अध्याये ॥

अथात्र पथ्यानि ।

"अथो यथादोषमयं गवोऽपि
पुरातना लोहितशालयश्च ।
तक्रं पयो दध्यपि गोप्रसूतं
धन्वामिषं सुन्नरसाः सिता च ॥
पुराणकुष्माण्डफलं पटोलं
महाद्रकं गोक्षुरकः कुमारी ।
गुवाकखर्ज्जूरकनारिकेल-
तालद्रुमाणाञ्च शिरांसि पथ्या ॥
तालास्थिमज्जाञ्चपुषं चुटिञ्च
प्रीतानि पानान्यशनानि चापि ।
प्रनीरनीरं हिमवालुका च
मित्रं नृणां स्यात् सति मूत्रकृच्छ्रे ॥"

अथापथ्यानि ।

"मद्यं श्रमं निधुवनं गजवाजियान
सर्व्वं विरुद्धमशनं विषमाशनञ्च ।
ताम्बूलमत्स्यलवणार्द्रकतैलभृष्टं
पिण्याकहिङ्गुतिलसर्षपवेगरोधान् ॥
मायान् करीरमतिनीलघ्रिदाहरूक्ष-
मन्नञ्च मूत्रयतु जन्तुः सति मूत्रकृच्छ्रे ॥"

इति वैद्यकपथ्यापथ्यविधिग्रन्थे मूत्रकृच्छ्राधिकारे ॥)

मूत्रदोषः, पुं. (मूत्रस्य दोषो यस्मात् ।) प्रमेहः । इति राजनिर्घण्टः ॥ (यथा, सुश्रुते । सूत्रस्थाने ३८ अः ।

"प्रसवकादिरित्येष गवोऽनिलविनाशनः ।
मूत्रदोषहरो हृद्यः पित्तासाग्नो रुचिप्रदः ॥"

मूत्राघातादिः। अस्य चिकित्सा यथा,—
"निर्दिग्धिकायाः स्वरसं पिबेत् कुड्वसम्मितम्।
मूत्रदोषहरं कल्कमथवा चौद्रसंयुतम्॥"
"अत ऊर्द्धं प्रवक्ष्यामि मूत्रदोषे क्रमं हितम्।
स्निग्धस्विन्नोपपन्नानां हितन्तेषु विरेचनम्॥
ततः संशुद्धदेहानां हिताश्चोत्तरवस्तयः॥"
"चौद्रार्द्धपात्रं दत्त्वा तु पात्रन्तु चीरसर्पिषोः।
स्वयङ्गुप्ताफलञ्चैव तथैव क्षुरकस्य च॥
पिप्पलीचूर्णसंयुक्तमर्द्धभागं प्रदापयेत्।
एतद्दैकध्यमानीय खजेनाभिप्रमन्थयेत्॥
तस्य पाणितलं चूर्णं लीढ्वा चीरं ततः पिबेत्।
एतत्सर्पिः प्रयुञ्जानः शुद्धदेहो नरः सदा॥
मूत्रदोषान् जयेत् सर्व्वानन्ययोगैः सुदुर्ज्जयान्।
जयेत् शोणितदोषांश्च वन्ध्या गर्भं लभेत च।
नारी चैतत् प्रयुञ्जाना योनिदोषात् प्रमुच्यते॥"
इत्युत्तरतन्त्रेऽष्टमाध्याये सुश्रुतेनोक्तम्॥)

मूत्रनिरोधः, पुं, (मूत्रस्य निरोधः। यद्वा मूत्रं निरुणद्धीति। रुध्+अण्।) मूत्रप्रतिबन्धकरोगविशेषः। अस्य चिकित्सा यथा,—
"पिष्टं वै मालतीमूलं ग्रीष्मकालें समाहृतम्।
साधितं छागदुग्धेन पीतं शर्करयान्वितम्।
हरेन्मूत्रनिरोधञ्च हरेद्वै प्राग्घृशर्करान्॥"
इति गारुड़े १६१ अध्यायः॥
(चिकित्सान्तरं यथा,—
"तैलेन पद्मिनीकन्दं पक्वगोमूत्रमिश्रितम्।
पिबेन्मूत्रनिरोधे तु सतीव्रवेदनान्विते॥"
इति हारीते चिकित्सितस्थाने त्रिंशेऽध्याये॥)

मूत्रपतनः, पुं, (मूत्रस्य पतनमस्मात् पुरीषनिरोधकरणादस्य सततमूत्रपतनात् तथात्वम्।) गन्धमार्জ্জारः। इति राजनिर्घण्टः॥

मूत्रपुटं, क्ली, (मूत्रस्य पुटम्।) नाभेरधो भागः। यथा,—
"नाभेरधो मूत्रपुटं वस्तिर्मूत्राशयोऽपि च।"
इति हेमचन्द्रः। ३। २७०॥

मूत्रफला, स्त्री, (मूत्रं मूत्रवर्द्धनं फलं परिणामनमस्याः।) कर्कटी। त्रपुषी। इति राजनिर्घण्टः॥
(कर्कटीत्रपुषीशब्दयोरस्या विषयो ज्ञेयः॥)

मूत्रबलं, क्ली, (मूत्रं लाति आदत्ते वर्द्धयतीत्यर्थः। ला+कः।) त्रपुषम्। इति शब्दचन्द्रिका॥
मूत्रवर्द्धके, त्रि॥ (यथा, सुश्रुते। सूत्रस्थाने। ४५ अः।
"जाम्बवो बहुनिस्यन्दस्तुवरो वातकोपनः।
तीक्ष्णः सुरासवो ह्यद्यो मूत्रलः कफवातनुत्॥")

मूत्रला, स्त्री, (मूत्रल+टाप्।) कर्कटी। इति त्रिकाण्डशेषः॥ वालुकी। इति राजनिर्घण्टः॥

मूत्राघातः, पुं, (मूत्रस्याघातो निरोधो येन।) गसावरोधकरोगविशेषः। अथ मूत्राघातस्य विप्रकृष्टं सन्निकृष्टञ्च निदानं संख्याञ्चाह।
"प्रायोमूत्रविघातार्थैर्व्वातकुण्डलिकादयः।
जायन्ते कुपितैर्दोषैर्मूत्राघातास्त्रयोदश॥"
मूत्रविघातार्थैरित्यत्रशब्देन पुरीषशुक्रादिवेगविघातानां रूक्षाशनादीनाञ्च ग्रहणम्। मूत्रविघातार्थैः कुपितैर्दोषैरित्यन्वयः। ननु मूत्रक्षयमूत्राघातयोः को भेदः। उच्यते। मूत्रक्षये कृच्छ्रमधिकं विबन्धोऽल्पः। मूत्राघाते तु विबन्धो बलवान् कृच्छ्रमल्पं इत्यनयोर्भेदः॥*॥
वातकुण्डलिकाया निदानं संप्राप्तिं लक्षणञ्चाह।
"रौक्ष्यादेगविघाताद्वा वायुर्बस्तौ सवेदनः।
मूत्रमाविश्य चरति विगुणः कुण्डलीकृतः॥
मूत्रमल्पाल्पमथवा सरुजं संप्रवर्त्तते।
वातकुण्डलिकां तान्तु व्याधिं विद्यात् सुदारुणम्॥"
रौक्ष्यात् कायस्य। वेगविघातात् मूत्रादिवेगनिरोधात् आविश्य प्राबल्य रौक्ष्यादिभिर्वेगविघातादिभिश्च विगुणो दुष्टः कुण्डलीकृतो वायुर्बस्तौ मूत्राशये चरति प्रतिधावति व्यावृत्त्यावृत्त्यामर्म्मस्पृशति इत्यर्थः। वात्यावत्। मूत्रमिति तस्मान्मूत्रमल्पमल्पं सदयं प्रवर्त्तते। तद्व्याधिं वातकुण्डलिकामाहुः। सुदारुणम्। मारणात्मकत्वात्॥ १॥*॥ अष्ठीलामाह।
"व्याध्मापयन् वस्तिगुदं रुद्ध्वा वातश्लोऽन्नताम्।
कुर्य्यात्तीव्रार्त्तिमष्ठीलां मूत्रविण्मार्गरोधिनीम्॥"
वातः वस्तिगुदं रुद्ध्वा अधोऽन्तः तदन्तर्गतं मूत्रं मलञ्च निरुध्य वस्तिगुदं वस्तिं गुदञ्च व्याध्मापयन् व्याध्मानं कुर्व्वन् अष्ठीलां ष्ठीलातुल्यां व्याधिं कुर्य्यात्। चलोन्नतां चलां उन्नताञ्च॥२॥
वातवस्तिमाह।
"वेगं विधारयेद्यस्तु मूत्रस्याकुण्ठलो नरः।
निरुणद्धि सुखं तस्य वस्तिर्वस्तिगतोऽनिलः॥
मूत्रसङ्गो भवेत्तेन वस्तिकुक्षिनिपीड़ितः।
वातवस्तिः स विज्ञेयो व्याधिः कष्टप्रसाधनः॥"
अकुण्ठलो मूर्खः। तस्य पुरुषस्य वस्तिसुखं निरुणद्धि वस्तिगतो वायुः। तेन वायुना मूत्रसङ्गो मूत्रविघातो भवति वस्तिकुक्षिनिपीड़ित इति वस्तौ कुक्षौ च निपीड़ितः संपीड़ितो वायुरिति सम्बन्धः॥३॥ मूत्रातीतमाह।
"चिरं धारयते मूत्रं त्वरया न प्रवर्त्तते।
मेहमानस्य मन्दं वा मूत्रातीतः स उच्यते॥"
मेहमानस्य मूत्रसृत्कृतः। मन्दं वा अल्पं वा॥४॥*॥ मूत्रजठरमाह।
"मूत्रस्य वेगेऽभिहते तदुदावर्त्तहैतुकः।
अपानः कुपितो वायुरुदरं पूरयेदृशम्॥
नाभेरधस्तादाध्मानं जनयेत्तीव्रवेदनाम्।
तं मूत्रजठरं विद्यादधोवस्तिनिरोधनम्॥"
तदुदावर्त्तहैतुक इति मूत्रवेगधारणगणितोदावर्त्तनिदानमाध्मानं कुर्य्यात्। अधोवस्तिनिरोधनं वस्तेरधोदेशे विबन्धकारकम्॥५॥
मूत्रोत्सङ्गमाह।
"वस्तौ वाप्यथवा नाले मणौ वा यस्य देहिनः।
मूत्रं प्रवृत्तं सज्येत सरक्तं वा प्रवाहतः॥
सवेक्लेनैरल्पमल्पं सरुजं वाथ नीरुजम्।
विगुणानिलजो व्याधिः स मूत्रोत्सङ्गसंज्ञितः॥
नाले मेढ्रे मणौ मेहनाग्रग्रन्थौ सज्येत निरुद्धं स्यात् सरक्तं सत् वा प्रवर्त्तते। प्रवाहत इति कण्डूहृद्वलेन सशब्दं मूत्रपुरीषवातानामधः प्रेरणं प्रवाहनं तेन कुपितेन वायुना वस्त्यादिभेदात् सरक्तं मूत्रं सवेदित्यर्थः॥ ६॥ मूत्रक्षयमाह।
"रूक्षस्य क्लान्तदेहस्य वस्तिस्थौ पित्तमारुतौ।
मूत्रक्षयं सरुग्दाहं जनयेतां तदाक्षयम्॥"
क्लान्तदेहस्य म्लानदेहस्य तदाक्षयं मूत्रक्षयसंज्ञम्॥ ७॥ मूत्रग्रन्थिमाह।
"अन्तर्बस्तिसुखे वृत्तः स्थिरोऽल्पः सहसा भवेत्।
अश्मरीतुल्यरुग्ग्रन्थिर्मूत्रग्रन्थिः स उच्यते॥"
अन्तर्बस्तिसुखे बस्तिसुखस्याभ्यन्तरे अल्पः क्षुद्रामलकप्रमाणः। नन्वस्य अश्मर्य्या सह को भेदः। उच्यते। अश्मरी क्रमशः सञ्चयेन स्यादयन्तु सहसा भवेदिति भेदः। अपरो भेदः। अश्मर्य्यां पित्तादिकं संहन्यते अत्र तु रक्तमेव। यत उक्तं तन्त्रान्तरे।
"रक्तं वातकफाद्दुष्टं बस्तिद्वारे सुदारुणम्।
ग्रन्थिं कुर्य्यात् स कृच्छ्रेण स्रवेन्मूत्रं तदा-वृतम्॥"८॥ इति॥

मूत्रशुक्रमाह।
"सूचितस्य स्रवं यातो वायुना शुक्रसङ्गतम्।
स्थानच्युतं सूचयतः प्राक् पश्चाद्वा प्रवर्त्तते।
भस्मोदकप्रतीकाशं मूत्रशुक्रं तदुच्यते॥"
सूचितस्य मूत्रवेगयुक्तस्य शुक्रं स्थानात् च्युतं पश्चाद्वायुना उन्नतं ऊर्द्धं नीतम्। भस्मोदकप्रतीकाशं भस्मसहितजलसदृशम्॥ ९॥ उष्णवातमाह।
"व्यायामाध्वातपैः पित्तं वस्तिं प्राप्यानिलावृतम्।
वस्तिं मेढ्रं गुदञ्चैव प्रदहत् सावयेदधः॥
मूत्रं हारिद्रमथवा सरक्तं रक्तमेव वा।
कृच्छ्रं पुनः पुनर्जन्तोरुष्णवातं वदन्ति तम्॥"
व्यायामादिविरोधित्वेन सौम्यधातुक्षयात् तेजोवृद्ध्या पित्तवृद्धिः स्यात्तत् कुपितं पित्तं असंयुतं वस्तिं प्राप्य वस्त्यादिकं प्रदहत् मूत्रमधः स्रावयेत्। कौटुम्भं हारिद्रं अथवा सरक्तं ईषल्लोहितम्॥ १०॥ मूत्रसादमाह।
"पित्तं कफो द्वावपि वा संहन्येतेऽनिलेन चेत्।
कृच्छ्रान्मूत्रं तदा पीतं रक्तं श्वेतं घनं स्रवेत्॥
सरक्तं रोचनाप्रख्यचूर्णवर्णं भवेत्ततः।
शुष्कं समस्तवर्णं वा मूत्रसादं वदन्ति हि॥"
संहन्येते घनीक्रियेते। शुष्कं अल्पं समस्तवर्णं उक्तसकलवर्णयुक्तम्॥ ११॥ विड्विघातमाह।
"रूक्षदुर्ब्बलयोर्घातिनोदावृत्तं शकृद् यदा।
मूत्रस्रोतोऽनुपद्येत विट्संरुद्धं तदा नरः॥
विड्गन्धं मूत्रयेत् कृच्छ्राद्विड्विघातं तमादिशेत्॥"
उदावृत्तं ऊर्द्धं नीतं विड्गन्धं वा। वाशब्दोऽत्र योजनीयः॥ १२॥*॥ बस्तिकुण्डलमाह।
"हताध्वलङ्घनायासैरभिघातात् प्रपीड़नात्।
स्वस्थानाद्बस्तिरुद्वृत्तः स्थूलस्तिष्ठति गर्भवत्॥

मूत्राघा

मूत्रस्यन्दनदाहार्त्तो विन्दुविन्दु सवत्यपि ।
पीड़ितस्तु सनेहारां संसृजन्मोद्वेष्टनार्त्तिमान् ॥
वस्तिकुण्डलमाहुस्तं घोरं शस्त्रविषोपमम् ।
पवनप्रवलं प्रायो दुर्निरोधमबुद्धिभिः ॥
तस्मिन् पित्तान्विते दाहः शूलं मूत्रविवर्णता ।
श्लेष्मणा गौरवं शोथो मूत्रं स्निग्धं घनं सितम् ॥"

द्रुताध्वलङ्घनं शीघ्रं मार्गचलनम् । उद्वृत्तः उत्थितः । स्यन्दनं किञ्चिच्चलनम् । घोरं मारकम् । शस्त्रविषोपमं शस्त्रं खड्गादि तद्वच्छीघ्रमारकम् । विषमत्र शरः तद्वत् विलम्बमारकम् । एतावता मारकमवश्यं शीघ्रं विलम्बेन वा ॥ १३ ॥ * ॥ तस्यैवासाध्यस्य च लक्षणमाह ।

"श्लेष्मरुद्धविलो वस्तिः पित्तोदीर्णो न सिध्यति ।
अविभ्रान्तविलः साध्यो न च यः कुण्डलीकृतः ॥
स्यादसौ कुण्डलीभूते दृष्टमोहः श्वास एव च ॥"

विलं वस्तिमुखरन्ध्रं पित्तोदीर्णः पित्तेनोद्धतः । अविभ्रान्तविलः कफेनावृतविलः पश्चात् कुण्डलीकृतः स साध्यः । एतेन कुण्डलीभूतोऽसाध्यः । कुण्डलीभूतस्य लक्षणमाह । वृद्ध्यादि-कुण्डलीभूतस्यायमर्थः । कफेन विलावरोधात्तत्र वातः कुण्डलाकारेण तिष्ठतीत्यर्थः ॥ * ॥ अथ मूत्राघातस्य चिकित्सा ।

"नलकुशकाशेक्षुबलाकाथं प्रातः सुशीतलं
सशितम् ।
पिबतो नश्यति नियतं मूत्रग्रह इत्युवाच
कविः ॥"

कविः शुक्रः ।

"कर्पूररजसा युक्ता वस्त्रवर्त्तिः शनैः शनैः ।
मेढ्रमार्गान्तरे न्यस्ता मूत्राघातं व्यपोहति ॥
धान्यगोक्षुरकः क्षारः कल्कसिद्धं हितं घृतम् ।
मूत्राघाते मूत्रकृच्छ्रे शुक्रदोषे च दारुणे ॥"

धान्यगोक्षुरकं घृतम् ।

"मूत्रकृच्छ्रेऽश्मरीरोगे भेषजं यत् प्रकीर्त्तितम् ।
मूत्राघातेषु सर्व्वेषु तत् कुर्य्याद्देशकालवित् ॥"

इति मूत्राघातानाभिकारः । इति भावप्रकाशः ॥ गरुड़पुराणोक्तनिदानं तस्य १६३ अध्याये द्रष्टव्यम् ॥ (तथास्य विषयः ।

"वस्तिवस्तिशिरोमेढ्रकटीवृषणपायवः ।
एकसम्बन्धनाः प्रोक्ता गुदास्थिविवराश्रयाः ॥
अधोमुखोऽपि वस्तिर्हि मूत्रवाहिसिरासखैः ।
पार्श्वेभ्यः पूर्य्यते सद्यो स्यन्दमानैरनारतम् ॥
येस्तैरेव प्रविष्टैर्नं दोषाः कुर्व्वन्ति विप्लुतिम् ।
मूत्राघातान् प्रमेहांश्च कृच्छ्रान्मर्म्मसमाश्रयान्॥"

इति वाग्भटे निदानस्थाने नवमेऽध्याये ॥

अथास्य पथ्यान्यानि ।

"अभयक्षनस्रेहविरेकवस्ति-
स्वेदावगाहोत्तरवस्तयश्च ।
पुराननाः लोहितशालयश्च
मांसानि धन्वप्रभवानि मद्यम् ॥
तक्रं पयोदध्यपि माषयूषः
पुराणकूष्माण्डफलं पटोलम् ।

मूर्खः

महाद्रेकं तालफलाम्बिमज्जा
हरीतकीकोमलनारिकेलम् ॥
गुवाकखर्জ্জूरकनारिकेल-
तालद्रुमाणामपि मस्तकानि ।
यथामलं सर्व्वमिदञ्च मूत्रा-
घातातुराणां हितमावहन्ति ॥
विरुद्धानि च सर्व्वाणि व्यायामं मार्गशीलनम् ।
रूक्षं विदाह्यविष्टम्भ्यायामं वेगधारणम् ।
करीरं वमनञ्चापि मूत्राघाती विवर्জ্জयेत् ॥"

इति वैद्यकपथ्यापथ्यविधिग्रन्थे मूत्राघाताधिकारे ॥)

मूत्राशयः, पुं, (मूत्रस्याशयः आधारः ।) नामेरधोदेशः । तत्पर्य्यायः । मूत्रपुटम् २ वस्तिः ३ । इति हेमचन्द्रः । २।२७० ॥ (अथास्य विषयः ।

"मूत्राशये वा गुरुशुष्कयोश्च
शोफो रुजा मूत्रविनिग्रहश्च ॥"

इति सुश्रुते उत्तरतन्त्रे ५५ अध्यायः ॥ यथा च तत्रैव निदानस्थाने ३ अध्याये ।

"एकसम्बन्धिनो ह्येते गुदास्थिविवरस्थिताः ।
मूत्राशयो मलाधारः प्राणायतनमुत्तमम् ॥")

मूत्रितः, त्रि, (मूत्रमस्य संजातम् । मूत्र + इतच् । यद्वा मूत्रयतिस्म इति । मूत्र + क्तः ।) कृतमूत्रोत्सर्गः । तत्पर्य्यायः । मीढः २ । इत्य मरः । ३ । १ । ६६ ॥

मूर्खः, पुं, (मुह् + "मुहेः खोंमूर् च ।" उणा० ५।२२। इति खः धातोः मूरादेशश्च ।) माषः । इति चिकाण्डशेषः ॥ गायत्रीरहितः । यथा,

"क्रियाहीनस्य मूर्खस्य महारोगिण एव च ।
यथेष्टाचरणस्याहुर्मरणान्तमशौचकम् ॥
क्रियाहीनस्य नित्यनैमित्तिककर्म्मानुष्ठायिनः ।
मूर्खस्य गायत्रीरहितस्य । सार्थगायत्रीरहितस्येति रुद्रधरः ॥ महारोगिणः पापरोगाख्यान्यतमरोगवतः ते च उन्मादस्वग्दोषौ राजयक्ष्मा श्वासो मधुमेहो भगन्दरः । उदरार्शस्त्रीत्यष्टौ पापरोगा नारदोक्ताः । यथेष्टाचरणस्य द्यूतवेश्यादासक्तस्य । इति शुद्धितत्त्वम् ॥

मूर्खः, त्रि, (मुह् + खः । मूरादेशः ।) मुह्यतियः । तत्पर्य्यायः । अज्ञः २ मूढः ३ यथाजातः ४ वैधेयः ५ बालिशः ६ । इत्यमरः । ३।१।४८॥ तस्य वशीकरणोपायो यथा,—

"मित्रं स्वच्छतया रिपुं नयबलैर्लुब्धं धनैरीश्वरं
कार्य्येण द्विजमादरेण युवतीं प्रेम्णा गुरुं सेवया ।
वान्धवान् ।
व्यत्युप्तं स्तुतिभिर्गुरुं प्रणतिभिर्मूर्खं कथाभि
र्वुधं
विद्याभी रसिकं रसेन सकलं श्रीखण्ड कुर्य्याद्-
वशम् ॥"

इति नवरत्नानि ॥

"पयःपानं भुजङ्गानां केवलं विषवर्द्धनम् ।
उपदेशो हि मूर्खाणां प्रकोपाय न शान्तये ॥"

इति हितोपदेशः ॥

मूर्च्छा

मूर्खता, स्त्री, (मूर्खस्य भावः । मूर्ख + "तस्य भावस्त्वतलौ ।" ५ । १ । ११६ । इति तल् टाप् ।) मूर्खत्वम् । यथा,—

"अदाता वंशदोषेण कर्म्मदोषाद्दरिद्रता ।
उन्मादो मातृदोषेण पितृदोषेण मूर्खता ॥"

इति चाणक्यम् ॥

"अश्रद्धया नारिकेलभक्षणे मूर्खत्वं यथा,—

"कलङ्की जायते विल्वे तिर्य्यग्योनिश्च निम्बके ।
ताले शरीरनाशः स्यान्नारिकेले च मूर्खता ॥"

इति तिथ्यादितत्त्वम् ॥

मूर्खभ्रातृकः, पुं, (मूर्खो भ्राता अस्येति नित्यं कप् ।) मूर्खो भ्राता यस्य सः । इति सिद्धान्तकौमुदी ॥

मूर्च्छना, स्त्री, (मूर्च्छि + युच् । टाप् ।) गीताङ्गविशेषः । सा तु ग्रामस्य सप्तमभागः । तस्या लक्षणं एकविंशतिनामानि च यथा,—

"स्वरः संमूर्च्छितो यत्र रागतां प्रतिपद्यते ।
मूर्च्छनामिति तामाहुः कवयो ग्रामसम्भवाम् ॥
ललिता मध्यमा चित्रा रोहिणी च मतङ्गजा
सौवीरी षड्जमध्या च षड्जमध्यमपञ्चमा ॥
मत्सरी मृदुमध्या च शुद्धान्ता च कलावती ।
तीव्रा रौद्री तथा ब्राह्मी वैष्णवी खेदरी सुरा ॥
नादावती विशाला च चित्रासु ग्रामेषु विश्रुताः ।
एकविंशतिरित्युक्ता मूर्च्छना चन्द्रमौलिना ॥
मूर्च्छनां कलयतो मुरशत्रो-
र्वैणिकाध्वनिविशेषविताने: ।
मूर्च्छना यदुरनङ्गशरौघै-
रङ्गना रतिपतेरिव सेना: ॥"

इति सङ्गीतदामोदरः ॥

हनूमन्मते षड्जादिस्वरत क्रमभादिस्वरोत्थाने यत्र स्वरो विरमति सा मूर्च्छना । भरतमते वाद्यस्य गानस्य वा समये यत्र स्वरस्य गलस्य वा कम्पनं सा मूर्च्छना । सा एकविंशतिप्रकारा । तत्र षड्जग्रामस्य मूर्च्छना ललिता १ मध्यमा २ चित्रा ३ रोहिणी ४ मतङ्गजा ५ सौवीरी ६ षड्जमध्या च ७ । मध्यमग्रामस्य मूर्च्छना पञ्चमा १ मत्सरी २ मृदुमध्या ३ शुद्धा ४ अन्ता ५ कलावती ६ तीव्रा च ७ ॥ गान्धारग्रामस्य मूर्च्छना रौद्री १ ब्राह्मी २ वैष्णवी ३ खेदरी ४ सुरा ५ नादावती ६ विशाला च ७ । इति सङ्गीतशास्त्रम् ॥

मूर्च्छा, स्त्री, (मूर्च्छ् + "गुरोश्च हलः ।" ३। ३। १०३। इति अः टाप् ।) संमोहः । तत्पर्य्यायः । कश्मलम् २ मोहः ३ । इत्यमरः । १।८।१०६। मूर्च्छनम् ४ । इति शब्दरत्नावली ॥ मूर्च्छांगः ५ । अथ मूर्च्छाधिकारः । तत्र मूर्च्छाया निदानपूर्ब्बिकां संप्राप्तिमाह ।

"चौरस्य बहुदोषस्य विरुद्धाहारसेविनः ।
वेगाघातादभिघाताद्दीनसत्त्वस्य वा पुनः ॥
करणायतनेभ्यो वाक्षोभ्यक्षोभकरेषु च ।
निविशन्ते यदा दोषास्तदा मूर्च्छन्ति मानवाः॥"

बहुदोषस्य अधिकदोषस्य । न त्वनेकदोषस्य तदा मूर्च्छा निर्दोषस्यैव स्यात् तथवास्तु को

दोषः तत्र। पृथग्दोषजानां मूर्च्छानां वक्ष्यमाणत्वात्। वेगाघातात् मलादौ अभिघातात् लगुडादिना हीनसत्त्वस्य स्वल्पसत्त्वगुणस्य अर्थादधिकतमोगुणस्य यत उक्तं मूर्च्छा पित्ततमःप्रायेति करणायतनेषु करणं मनस्तस्यायतनेषु स्थानेषु वाङ्मुखेषु कर्म्मेन्द्रियेषु। अभ्यन्तरेषु बुद्धीन्द्रियेषु ॥ * ॥ सामान्यं लक्षणमाह।

"संज्ञावहासु नाड़ीषु पिहितासु निजादिभिः।
तमोऽभ्युपैति सहसा सुखदुःखव्यपोहकृत् ॥
सुखदुःखव्यपोहाच्च नरः पतति काष्ठवत्।
मोहो मूर्च्छेति तां प्राहुः षड्विधा सा प्रकीर्त्तिता ॥"

तमोगुणः अज्ञानहेतुः। अभ्युपैति आगच्छति। सुखदुःखव्यपोहकृत् सुखदुःखज्ञाननाशकरम्। नष्टे सुखदुःखज्ञाने नरः काष्ठवत् पतति तां मोहो मूर्च्छेति प्राहुरित्यन्वयः। मूर्च्छाया मूर्च्छायोरपि पर्य्यायः। यत उक्तम्।

"संज्ञोपघातो मूर्च्छायो मूर्च्छा स्यान्मूर्च्छनं तथा।
कश्मलं प्रलयो मोहः संन्यासस्तु मृतोपमः ॥"
इति ॥

षड़पि मूर्च्छा विवृणोति।

"वातादिभिः श्लेष्मितेन मद्येन च विषेण च।
षट्स्वप्येतासु पित्तन्तु प्रभुत्वेनावतिष्ठते ॥"

यत उक्तम्। मूर्च्छा पित्ततमःप्रायेति ॥ * ॥ पूर्व्वरूपमाह।

"हृत्पीड़ा जृम्भणं ग्लानिः संज्ञादौर्ब्बल्यमेव च।
सर्व्वासां पूर्व्वरूपाणि यथास्वं तां विभावयेत् ॥"

तत्र वातिकं मूर्च्छायमाह।

"नीलं वा यदि वा कृष्णमाकाशमथवारुणम्।
पश्यंस्तमः प्रविशति शीघ्रञ्च प्रतिबुध्यते ॥
वेपथुश्चाङ्गमर्द्दश्च प्रपीड़ा हृदयस्य च।
कार्श्यं श्यावारुणा छाया मूर्च्छायें वातसम्भवे ॥"

नीलं नीलवर्णम्। कृष्णं कज्जलाभम्। अरुणं अव्यक्तरागम्। तमः प्रविशति मूर्च्छति। श्यावारुणा च्छाया गात्रस्य ॥ * ॥ पैत्तिकमाह।

"रक्तं हरितवर्णं वा वियत् पीतमथापि वा।
पश्यंस्तमः प्रविशति सस्वेदः प्रतिबुध्यते ॥
सपिपासः सतृष्णापी रक्तपीताकुलेक्षणः।
सम्भिन्नवर्च्चाः पीताभो मूर्च्छायें पित्तसम्भवे ॥"

श्लैष्मिकमाह।

"मेघसङ्काशमाकाशं तमोभिर्व्वा घनैर्वृतम्।
पश्यंस्तमः प्रविशति चिराच्च प्रतिबुध्यते ॥
गुरुभिः प्रावृतैरङ्गैर्यथैवार्द्रेण चर्म्मणा।
सप्रसेकः सदृङ्लाभो मूर्च्छायें कफसम्भवे ॥"

मेघसङ्काशं शुभ्रमेघसङ्काशमित्यर्थः। यत आह सुश्रुतः।

"कफेन पश्येद्रूपाणि श्वेताभ्रप्रतिमानि तु।"

घनैर्निविड़ैस्तमोभिः। गुरुभिरङ्गैरुपलक्षितः। सुश्रुतेन मूर्च्छायः षड्विध उक्तः ॥ * ॥ चरकस्तु सान्निपातिकमपि मूर्च्छायमाह।

"सर्व्वाकृतिः सन्निपातादपसार इवागतः।
स जन्तुं पातयत्याशु विना वीभत्सचेष्टितैः ॥"

अपस्मार इव तेन महताभिघातेन पतति चिरेण प्रतिबुध्यते। तर्हि तयोः को भेद इत्यत आह। स सान्निपातिको मूर्च्छायः विना वीभत्सचेष्टितैः फेनवमनदन्तघट्टनाक्षिविकृत्यादिभिः विना पातयति ॥ * ॥ रक्तजाया मूर्च्छाया निदानमाह।

"पृथिव्यम्बुतमोरूपं रक्तगन्धस्तदन्वयः।
तस्मादस्य गन्धेन मूर्च्छन्ति भुवि मानवाः ॥"

तमोरूपं तमोबहुलम्। मानवाश्च ये तामसाः न तु सात्त्विका राजसाश्च। अत्रैके वदन्ति नैषा युक्तिः समीचीना तर्हि चम्पकादिगन्धेनापि मूर्च्छा प्रसज्येत तत्रापि गन्धस्य पार्थिवत्वात्। अत आह।

"द्रव्यस्वभाव इत्येके यद्दृष्ट्वापि विमुह्यति।"

अत्राह भोजः।

"दर्शनादपि जन्तूनां जिघ्रन्नाघ्राणमेव प्रमुह्यति ॥"

रक्तेन मूर्च्छितस्य लक्षणमाह।

"स्तब्धाङ्गदृष्टिस्खलना गूढोच्छ्वासस्तु मूर्च्छितः।"

मद्यजविषजयोर्निदानमाह।

"गुणास्तीव्रतरत्वेन स्थितास्तु विषमद्ययोः।
त एव तस्मात्ताभ्यान्तु मोहौ स्यातां यथेरितौ ॥"

ये गुणा लघुरूक्षासु विशदव्यवायितीक्ष्णाविकासिसूक्ष्मोष्णानिर्देश्यरसत्वादयः। तैलादौ द्रव्ये यस्ताः तीव्राश्च सन्ति त एव गुणाः विषमद्ययोस्तु तीव्रतरत्वेन स्थिताः। तत्रापि भेदः। त एव मद्ये दृश्यन्ते विषे तु बलवत्तरा इति ॥ * ॥ मद्यजाया मूर्च्छाया लक्षणमाह।

"मद्येन प्रलपन् शेते नष्टविभ्रान्तमानसः।
गात्राणि विक्षिपन् भूमौ चरां यावन्न याति तत् ॥"

नष्टविभ्रान्तमानसः नष्टं सर्व्वथा स्मृतिहीनं विभ्रान्तं रज्जौ सर्पज्ञानयुक्तं मानसं यस्य सः। चरां चौर्य्यताम्। तत् मद्यम् ॥ * ॥ विषजाया लक्षणमाह।

"वेपथुस्वप्नदृष्टाः स्युस्तमश्च विषमूर्च्छिते।
वेदितव्यं तीव्रतरं यथास्वं विषलक्षणम् ॥"

विषस्य मूलकन्दफलपत्रक्षीरादिभेदभिन्नस्य यथा स्वकं स्वकं लक्षणमुक्तं सौश्रुते कल्पस्थाने तल्लक्षणं मद्यापेक्षया तीव्रतरं वेदितव्यम्। ननु संज्ञानाशेन साधर्म्म्यान्मूर्च्छाभ्रमतन्द्रादीनां को भेद इत्यत आह।

"मूर्च्छा पित्ततमःप्राया रजःपित्तानिलाद्भ्रमः।
तमोवातकफात्तन्द्रा निद्रा श्लेष्मतमोभवा ॥"

रजःपित्तानिलाद्भ्रम इति नात्र समुच्चयः। केवलपित्तज्वरे भ्रमस्योक्तत्वात्। भ्रमश्चक्रारूढस्येव भ्रमदस्तुङ्गाग्रं खदेहस्य भ्रमत इव ज्ञानं वा ॥ * ॥ तन्द्राया लक्षणमाह।

"इन्द्रियार्थेष्वसंवित्तिर्गौरवं जृम्भणं क्लमः।
निद्रार्त्तस्येव यस्येहा तस्य तन्द्रां विनिर्दिशेत् ॥"

इन्द्रियाणामर्थः प्रयोजनं येषु तेषु अर्थाद्विषयेषु असंवित्तिः असम्यक् ज्ञानम्। इति इन्द्रियार्थासम्यग्ज्ञानादि। निद्रायां प्रवृत्तस्य क्लमाभावस्तन्द्रायान्तु प्रबोधितस्यापि क्लम इत्यनयोर्भेदः ॥ * ॥ क्लमस्य लक्षणमाह।

"योऽनायासः श्रमो देहे प्रवृद्धः श्वासवर्जितः।
क्लमः स इति विज्ञेय इन्द्रियार्थप्रबाधकः ॥"

इन्द्रियार्थप्रबाधकः इन्द्रियाणां बुद्धीन्द्रियाणां कर्म्मेन्द्रियाणाञ्च अर्थः प्रयोजनं विषयग्रहणं तस्य प्रबाधकः आवरणेन ॥ * ॥ निद्रालक्षणमाह।

"यदा तु मनसि क्लान्ते कर्म्मात्मानः क्लमान्विताः।
विषयेभ्यो निवर्त्तन्ते तदा स्वपिति मानवः ॥"

क्लान्ते ग्लाने आत्मा इति यावत्। कर्म्मात्मानः कर्म्मेन्द्रियाणि ज्ञानेन्द्रियाणि च क्लमान्विताः आत्माः ॥ * ॥ संन्यासस्य संप्राप्तिपूर्व्वकं लक्षणमाह।

"वाग्देहमनसां चेष्टामाक्षिप्यातिबला मलाः।
संन्यस्यन्त्यबलं जन्तुं प्राणायतनमाश्रिताः ॥
स नाः संन्यासंन्यस्तः काष्ठीभूतो मृतोपमः।
प्राणैर्विमुच्यते शीघ्रं मुक्त्वा सद्यःफलां क्रियाम् ॥"

आक्षिप्य विनाश्य संन्यस्यन्ति मूर्च्छयन्ति। प्राणायतनं हृदयम्। संन्यस्तः मूर्च्छितः। काष्ठीभूतः क्रियारहितः। अतएव मृतोपम इति। सद्यःफलां क्रियां सूचीव्यधनजनावपीड़नकपिकच्छुघर्षणदृष्टिकादिदंशनादिरूपाम् ॥ * ॥ संन्यासस्य मूर्च्छातो भेदमाह।

"दोषेषु मदमूर्च्छाया गतवेगेषु देहिनः।
स्वयमप्युपशाम्यन्ति संन्यासो नौषधैर्विना ॥"

मदमूर्च्छायाः मदः अप्रवृद्ध उन्मादः। मूर्च्छायाः मूर्च्छाः ॥ * ॥ अथ मूर्च्छायाश्चिकित्सा।

"सेकावगाहा मद्यं सञ्चाराः
शीताः प्रदेहा व्यजनानिलाश्च।
शीतानि पानानि च गन्धवन्ति
सर्व्वासु मूर्च्छासु निवारितानि ॥"

मद्यचन्द्रकान्तादयः। हाराः मुक्तादिहाराः। शीताः प्रदेहाः सकर्पूरचन्दनाद्यनुलेपनानि। शीतानि पानानि सितामलकादिपानकानि। गन्धवन्ति कर्पूरादिसुगन्धवन्ति। सर्व्वासु मूर्च्छासु निवारितानि। अस्यायमभिप्रायः। सेकादीन्यासु मूर्च्छासु हितान्येव किन्तु वातश्लेष्मजासु अपि मूर्च्छासु न निवारितानि। तत्रापि पित्तस्य प्राधान्यात्।

"सिद्धानि वर्ग्गे मधुरे पयांसि
सदाड़िमा जाङ्गलजा रसाश्च।
तथा यवा लोहितशालयश्च
मूर्च्छासु पथ्याः सतीनसुद्गाः ॥"

सतीनः कलायः।

"कोलमज्जोषणक्षीरं केशरं शीतवारिणा।
पीतं मूर्च्छां जयेल्लीढ़ा कृष्णा वा मधुसंयुता ॥
शीतेन तोयेन भृष्टं हृष्टालं
कृष्णाश्च पथ्यां मधुनावलिह्यात्।

मूर्द्धकः, पुं, (मूर्द्धन्यभिषिक्त इति। मूर्द्धन्+संज्ञायां कन्।) क्षत्रियः। इति शब्दरत्नावली॥
मूर्द्धकर्णी, स्त्री, क्षुद्रम्। इति हारावली॥
मूर्द्धखोलं, क्ली, (मूर्द्धः खोल इव।) क्षुद्रम्। इति त्रिकाण्डशेषः॥
मूर्द्धजः, पुं, (मूर्द्धनि जायते। जन+डः।) केशः। इति जटाधरः॥ (यथा, हरिवंशे। ६८। ८२।
"बहुमूलविषमकपिला
स्थूलस्फुटिताग्रपरुषरूक्षाश्च।
अतिकुटिलाश्चातिघनाश्च
मूर्द्धजा वित्तहीनानाम्॥")
मूर्द्धनि जाते, त्रि॥
मूर्द्धन्यः, त्रि, (मूर्द्धन्+यत्।)मूर्द्धनि भवः। यथा। ऋटुरषां टठडढणरषा मूर्द्धन्याः। इति मुग्धबोधव्याकरणम्॥ (यथा च भागवते।१। ७। ५५।
"अर्जुनः सहसाजाय हरेर्हार्दमथासिना।
मणिं जहार मूर्द्धन्यं द्विजस्य सहमर्द्दजम्॥")
मूर्द्धपुष्पः, पुं. (मूर्द्धनि पुष्पमस्य।) शिरीषवृक्षः। इति शब्दमाला॥ (गुणादयोऽस्य शिरीषशब्दे विधेयाः॥)
मूर्द्धरसः, पुं, (मूर्द्धस्थस्तुपरिस्थो रसः।) भक्तफेनः। इति शब्दचन्द्रिका॥
मूर्द्धवेष्टनं, क्ली, (मूर्द्धः वेष्टनम्।) उष्णीषः। इति हेमचन्द्रः। ३। ३३१॥
मूर्द्धा, [न्] पुं, (मूर्वति वध्नाति यच्छति। मूर्व+"अन् उच्चन् पूषन्। उणा० १। १५८। इति कनिन्। उकारस्य दीर्घः वकारस्य धकारश्च।) मस्तकः। इत्यमरः। २। ६। ८५। (यथा, हरिवंशे। ७७। २।
"लोहे पात्रे तण्डुलान् कोद्रवाणां
शुक्ले पक्वाञ्छोणचूर्णेन साकम्।
पिष्टान् सूक्ष्मं मूर्द्धि शुक्लाम्बरेण
दत्त्वा तिष्ठेद्दैवितार्कप्रवेः॥")
मूर्द्धाभिषिक्तः, पुं, क्षत्रियः। राजा। इत्यमरः। ३। ३। ६१॥ मूर्द्धन्यभिषिक्तो मूर्द्धाभिषिक्तः राज्यारोपणसमये प्रथमः क्षत्रियो मूर्द्धाभिषिक्तः। तत्प्रभवत्वात् योग्ययानाभिषिक्तोऽपि मूर्द्धाभिषिक्तः। (यथा, भागवते। ६।१५।४१।
"राज्ञो मूर्द्धाभिषिक्तस्य वधो ब्रह्मवधाद्गुरुः।
तीर्थसंसेवया चांहो जह्याद्धाच्युतचेतनः॥")
वर्णसङ्करविशेषः। स तु विप्रात् क्षत्रियायां जातः॥ प्रधानः। इति भरतः॥ मन्त्री। इति मेदिनी। ते, २३२॥
मूर्द्धावसिक्तः, पुं, वर्णसङ्करभेदः। स तु क्षत्रियायां ब्राह्मणेनोत्पादितः। यथा,—
"स्त्रीष्वनन्तरजातासु द्विजैरुत्पादितान् सुतान्।
सदृशानेव तानाहुर्मातृदोषविगर्हितान्॥"
इति मानवे १० अध्याये ६ श्लोकः॥ ※॥
'स्त्रीष्विति व्यानुलोम्येन व्यवहितवर्णजातीयासु भार्य्यासु द्विजातिभिर्य उत्पादिताः पुत्राः। यथा। ब्राह्मणेन क्षत्रियायां क्षत्रियेण वैश्यायां वैश्येन शूद्रायाम्। तान् मातृदोषेण जातीयत्वदोषेण गर्हितान् पितृसदृशान् न तु पितृसजातीयान् मन्वादय आहुः। पितृसदृशग्रहणात् मातृजातेरुत्कृष्टाः पितृजातितो निकृष्टा ज्ञेयाः। एतेषाञ्च नामानि मूर्द्धावसिक्तमाहिष्यकरणाख्यानि याज्ञवल्क्यादिभिरुक्तानि। वृत्तयश्चैषामुशनसोक्ताः। हस्त्यश्वरथशिक्षास्त्रधारणञ्च मूर्द्धावसिक्तानाम्। वृत्त्यर्थं तनत्रजीवनं शस्त्रास्त्रचर्या च माहिष्याणाम्। द्विजातिशुश्रूषा धनधान्याध्यक्षता राजसेवा दुर्गान्तःपुररक्षा च पारशवोग्रकरणानामिति। इति तट्टीकायां कुल्लूकभट्टः॥
मूर्द्धा, [न्] पुं, (मूर्व+कनिन्। वस्य धः दीर्घश्चोकारस्य।) शिरः। यथा,—
मूर्द्धा मूर्द्धा शिरोदेशे पुंसि स्यातामिमौ समौ।
इत्युणादिकोषः॥
मूर्द्धी नहे मूर्द्धा मूर्द्धा च। अस्य धरुधडौ। इति तट्टीका॥ (यथा, देवीभागवते।२।७।२८।
"इत्वा वेणीं छतां मूर्द्धि कज्जलं लोचने तथा।
असिं गृहीत्वा तरसा क्षेत्रात्रं नान्यथा
सुव्रम्॥")
मूर्व्वा, स्त्री, (मूर्वति इति। मूर्व+अच् टाप्।) लताविशेषः। धनुर्गुणोपयुक्ता सुरगा इति ख्याता। तत्पर्य्यायः। देवी २ मधुरसा ३ मोरटा ४ तेजनी ५ सवा ६ मधूलिका ७ धनुःश्रेणी ८ गोकर्णी ९ पीलुपर्णी १०। इत्यमरः। २। ४। ८३॥ सुवा ११ मर्व्वी १२। मधुश्रेणी १३ धनुः १४ श्रेणी १५। इति तट्टीकायां भरतः॥ सुरङ्गिका १६। देवश्रेणी १७ पृथक्त्वचा १८ मधुस्रवा १९ अतिरसा २० पीलुपर्णिका २१ दिव्यलता २२ ज्वलिनी २३ गोपवल्ली २४। अस्या गुणाः। अतितिक्तत्वम्। कषायत्वम्। उष्णत्वम्। कृच्छ्रोगकफवातवमिप्रमेहकुष्ठविषमज्वरनाशित्वञ्च। इति राजनिर्घण्टः॥ अपि च।
"मूर्व्वा सरा गुरुः स्वादुस्तिक्ता पित्तास्रमेहनुत्।
त्रिदोषवणाकृच्छ्रोगकण्डुकुष्ठज्वरापहा॥"
इति भावप्रकाशः॥
(तथास्याः पर्य्यायः।
"तेजनी पिलुनी देवा तिक्तवल्ली पृथक्त्वचा।
धनुःश्रेणी मधुरसा मूर्व्वा निर्द्दहनीति च॥"
इति वैद्यकरत्नमालायाम्॥
"मूर्व्वा मधुरसा ज्ञेया तेजनी तिक्तवल्कला।"
इति गारुडे २०८ अध्याये॥)
मूल क रोपणे। इति कविकल्पद्रुमः॥ (चुरा०-उभ०-सक०-सेट्।) दीर्घी रोपणमारोपणम्। क मूलयति वृक्षं लोकः। गोविन्दभट्टस्तु रोहणे इति पठित्वा रोहणं जन्मेति व्याख्याति। इति दुर्गादासः॥
मूल न प्रतिष्ठायाम्। इति कविकल्पद्रुमः॥ (भ्वा०-उभ०-अक०-सेट्।) पर्वगणेयादिर्दीर्घी। प्रतिष्ठा स्थितिरिति गोविन्दभट्टः। न मूलति मूलते यथः। अयं परस्मैपदीत्यन्ये। इति दुर्गादासः॥
मूलं, क्ली, (मवते श्नाति वृक्षादिकमिति। मू+"मूङ्शुक्वविभ्यः कः।" उणा० ४।१०८। इति कः।) शिफा। शिकड़ इति भाषा। तत्पर्य्यायः। ब्रध्नः २ अङ्घ्रिनामकः ३। इत्यमरः।२।४।१२॥ कन्दः ४ वृधः ५। इति शब्दरत्नावली॥ जटा ६। इति जटाधरः॥ (यथा, मनौ।३।२२७।
"भक्ष्यं भोज्यञ्च विविधं मूलानि च फलानि च।
हृद्यानि चैव मांसानि पानानि सुरभीणि च॥")
आद्यम्॥ (यथा, महाभारते।१।१६१।१।
"कुतोमूलमिदं दुःखं ज्ञातमिच्छामि तत्त्वतः।
विदित्वाप्यपकर्षेयं शक्यचेदपकर्षितुम्॥")
नक्षत्रविशेषः॥ (यथा, मार्कण्डेये।३३।१३।
"कुर्वन्तश्चानुराधासु लभन्ते चक्रवर्त्तिताम्।
आधिपत्यञ्च ज्येष्ठासु मूले चारोग्यमुत्तमम्॥")
निकुञ्जः। अन्तिकम्। इति विश्वः॥ (यथा, मार्कण्डेये। ८६। ६।
'जगादोच्चैः प्रयाहीति मूलं शुम्भनिशुम्भयोः।)
मूलवित्तम्। इति भरतधृतमेदिनी॥ (यथा, मनौ। ८। २०२।
"अथ मूलमनाहार्य्यं प्रकाशक्रयशोधितः।
अदण्ड्यो मुच्यते राज्ञा नाधिको लभते धनम्॥")
निजम्। इत्यजयपालः॥ चरणम्। इत्युणादिकोषः॥ (यथा, ऋग्वेदे। १०। ८७। १०।
"त्रेधा मूलं यातुधानस्य वृश्च।"
"मूलं पादम्।" इति तद्भाष्ये सायणः॥)
टीकार्हग्रन्थः। यथा। समानवलेत्यादि मूलम्। इति सत्यव्रतिपक्षे गदाधरभट्टाचार्य्यः। शूरणम्। इति शब्दचन्द्रिका॥ पिप्पलीमूलम्। पुष्करमूलम्। इति राजनिर्घण्टः॥ विशेषमूलस्य अन्वेषणनिषेधो यथा,—
"नदीनामग्निहोत्राणां भारतस्य कुलस्य च।
मूलान्वेषो न कर्त्तव्यो मूलादोषो न हीयते॥"
इति गारुडे ११६ अध्यायः॥
(कारणम्। यथा, मनौ। ११। ८४॥
"धर्मस्य ब्राह्मणो मूलमग्रं राजन्य उच्यते।
"मूलं कारणम्।" इति तट्टीकायां कुल्लूकभट्टः॥)
मूलः, त्रि, (मूलतीति। मूलप्रतिष्ठायाम्+कः।) अश्विन्यादिसप्तविंशतिनक्षत्रान्तर्गतोनविंशनक्षत्रम्। यथा,—
"हस्ता स्वाती श्रवणा अक्षीवे स्तगशिरो नपुंसि।
स्यात् पुंसि पुनर्वस्वोः पुष्यौ मूलन्त्वस्त्री स्त्रियां शेषाः॥"
इति तिथ्यादितत्त्वम्॥
"मूलमाद्ये शिफायाञ्च निकटे मे तु वाच्यिम्।"
इति शब्दरत्नावली च॥

स तु निर्ऋतिदेवताकः। इति ज्योतिस्तत्त्वम् ॥ सिंहपुच्छाकारः। इति सुपूर्त्तचिन्तामणिः ॥ अस्यमूर्त्तिर्नवतारामयच्च। अस्मिन् मस्तकोपर्युदिते मौनव्रतस्याष्टौ फलानि गतानि भवन्ति। यथा,—

"मौलिभागि नवतारकाङ्किते
मूलभे सुतनु! मूलमूर्त्तिनि।
लिम्पिकाष्टकमरालकुन्तले
निर्जगाम पृथुरोमलमतः ॥"

इति कालिदासकृतराचिलमनिरूपणम् ॥

अस्मिन् नक्षत्रे जातस्य फलम्।

"मूलं विनष्टावयवं समूलं
वृक्षं दहत्येव वदन्ति सन्तः।
वेदन्यघातः पुरुषा विशेषात्
सौभाग्यमायुश्च कुलानुदृद्धिः ॥"

इति कोष्ठीप्रदीपः ॥

अस्मिन् मांसभक्षणनिषेधो यथा,—

"चित्राखट्वाश्ववाणासु तैलं
क्षौरं विशाखाप्रतिपत्सु वर्ज्यम्।
मूले मृगे भाद्रपदासु मांसं
योषिन्मघाकृत्तिकरोहिणीषु ॥"

इति तिथ्यादितत्त्वम् ॥

मूलकं, क्ली, पुं, (मूल+संज्ञायां कन्।) कन्दविशेषः। मूला इति भाषा। तत्पर्य्यायः। राजालुकः २ महाकन्दः ३ हस्तिदन्तकः ४। इति हारावली ॥ नीलकण्ठम् ५ मूलाङ्गम् ६ दीर्घमूलकम् ७ अत्र दीर्घपत्रकमपि पाठः। क्षुद्रपत्रारम् ८ कन्दमूलम् ९ हस्तिदन्तम् १० सितम् ११ शुक्लमूलम् १२ हरित्पर्णम् १३ रुचिरम् १४ दीर्घकन्दकम् १५ कुक्षरपत्रारमूलम् १६। अस्य गुणाः। तीक्ष्णत्वम्। उष्णत्वम्। कटूष्णनाशिदीपनत्वम्। दुर्नामगुल्महृद्रोगवातनाशित्वम्। रुचिदत्वम्। गुरुत्वञ्च। इति राजनिर्घण्टः ॥ ६ ॥ अपि च।

"बालमूलकपत्री तु दीपनी वह्निदीपनी।
मूलकं गुरु विष्टम्भि तीक्ष्णमामं त्रिदोषलम् ॥
तदेव स्निग्धसिद्धन्तु पित्तलं कफवातजित्।
शुष्कं त्रिदोषशमनं शोषघ्नं गरनाशनम् ॥
तत्पुष्पं कफपित्तघ्नं तत्फलं कफवातजित् ॥"

इति राजवल्लभः ॥

अन्यच्च।

"मूलकं द्विविधं प्रोक्तं तत्रैकं लघुमूलकम्।
ग्रामजं कटुकं विद्यं ग्राम्यं मरुसमुद्भवम् ॥
पाचनं मूलकं तीक्ष्णं तथा मूलकपोतिका।
नैपालमूलकञ्चान्यत्तद्भवेन्नवदन्तवत् ॥
लघुमूलकमुष्णं स्यादृद्यं तद्वच्च पाचनम्।
दोषत्रयहरं मेध्यं स्वरश्वासविनाशनम् ॥
नासिकाकण्ठरोगघ्नं नयनामयनाशनम्।
मरुत्तदेवरूक्षोष्णं गुरु दोषत्रयप्रदम्।
श्वेतपिण्डं तदेव स्यादोषत्रयविनाशनम् ॥"

इति भावप्रकाशः ॥

(तथाचास्य गुणाः।

"बालं दोषहरं वृद्धं त्रिदोषं मारुतापहम्।
स्निग्धसिद्धं विशुष्कन्तु मूलकं कफवातजित् ॥"

इति परके सूत्रस्थाने। २७ अध्यायः ॥)

सौरभाषे तद्भक्षणे दोषो यथा,—

"मकरे मूलकञ्चैव सिंहे चालाबुकन्तथा।
कार्त्तिके सूरणञ्चैव वर्ज्यो गोमांसभक्षणम् ॥"

इति कर्म्मलोचनम् ॥

पौर्णमास्यान्तमासमुपक्रम्य।

"पितृणां देवतानाञ्च मूलकं नैव दापयेत्।
दद्यान्नरकमाप्नोति भुङ्क्ते ब्राह्मणो यदि ॥
ब्राह्मणो मूलकं भुक्त्वा चरेच्चान्द्रायणं व्रतम्।
अन्यथा याति नरकं चण्डो विट् शूद्र एव च ॥
तथा।
"वरं भक्ष्यमभक्ष्यञ्च पिबेद्वा गर्हितञ्च यत्।
वर्ज्जनीयं प्रयत्नेन मूलकं मदिरासमम् ॥"

इति मलमासतत्त्वम् ॥

मूलकः, पुं, (मूले जातः। मूल+"पूर्व्वाह्णापराह्णार्द्धमूलप्रदोषावस्कराद्वुन्।" ४। ३। २८। इति वुन्।) चतुरङ्गुलतुल्यावरविषजात्यन्तर्गतविषभेदः। इति हेमचन्द्रः। ४। २६८ ॥ (मूलप्रकार इति। मूल+"शूलादिभ्यः प्रकारवचने कन्।" ५। ४। ३। इति कन्। मूलखरूपः। यथा, भागवते। ६। ६। ४१।

"नारीकवच इत्युक्तो निःक्षत्रे मूलकोऽभवत् ॥")

मूलकपर्णी, स्त्री, (मूलकस्य पर्णमिव चमानस्यादं पर्णमस्याः। ङीप्।) श्योनाङ्गः। इति रत्नमाला ॥

मूलकर्म्म, क्ली, (मूलञ्च तत् कर्म्म चेति।) ओषधादिमूलेन यत् चासनीघाटनस्तम्भनवशीकरणादिकर्म्म। जो इति ख्यातम्। इति भरतः ॥ टीका इति मुकुटः ॥ तत्पर्य्यायः। कार्म्मणम् २। इत्यमरः। ३। २। ४ ॥ जनपक्षाग्रदुपपातकान्तर्गतोपपातकविशेषः। यथा,—

"सर्व्वाकरेष्वधीकारी महायन्त्रप्रवर्त्तनम्।
हिंसौषधीनां स्त्रीजीवोऽभिचारो मूलकर्म्म च ॥"

इति मनुः। ११। ६४ ॥

"मन्त्रौषधादिना वशीकरणम्।" इति मूलकर्म्मशब्दव्याख्यायां कुल्लूकभट्टः ॥

मूलकमूला, स्त्री, (मूलकमिव मूलमस्याः।) क्षीरकाकुलीवृक्षः। इति रत्नमाला ॥

मूलकारः, पुं, (मूलं करोतीति। कृ+कर्म्मण्यण्। इत्यण्।) मूलयन्त्रकर्त्ता। यथा। नायं गणकारः किन्तु मूलकारः। इति संक्षिप्तसारटीकायां गोयीचन्द्रः ॥

मूलकारिका, स्त्री, (मूलकारक+स्त्रियां टाप्। अकारस्त्रीत्वम्।) चुल्ली। इति हारावली ॥ मूलयन्त्रार्थप्रकाशकपद्यम्। मूलधनस्य वृद्धिविशेषश्च ॥

मूलकृच्छ्रं, क्ली, (मूलेन तन्नामप्रायेण कृच्छ्रम्।) एकादशविधपर्णकृच्छ्रव्रतान्तर्गतव्रतविशेषः। यदा क्षुधितानि वृक्षमूलानि मांसं पीयन्ते तदा मूलकृच्छ्रव्रतप्रदेशं लभते। यथाह मार्कण्डेयः।

"फलैर्मासेन कथितः फलकृच्छ्रो मनीषिभिः।
श्रीकृच्छ्रः श्रीफलैः प्रोक्तः पद्माक्षैरपरस्तथा ॥
मासेनामलकैरेवं श्रीकृच्छ्रमपरं स्मृतम्।
पत्रैर्मतः पत्रकृच्छ्रः पुष्पैस्तत्कृच्छ्र उच्यते ॥
मूलकृच्छ्रः स्मृतो मूलैस्त्रीयकृच्छ्रो जलेन तु ॥"

इति मिताक्षरायां प्रायश्चित्ताध्यायः ॥

(पुंलिङ्गोऽप्ययं मार्कण्डेयपुराणोक्तत्वात्।)

मूलजं, क्ली, (मूलात् जायते इति। जन+डः।) आर्द्रकम्। इति राजनिर्घण्टः ॥ (विशेषोऽस्यार्द्रकशब्दे ज्ञातव्यः ॥)

मूलजः, पुं, (मूलाद् जायते। जन+डः।) उत्पलादिः। इति हेमचन्द्रः। ४। २६६ ॥

मूलोद्भवे त्रि ॥

मूलत्रिकोणं, क्ली, (मूलञ्च तत्त्रिकोणञ्चेति।) अर्कादिग्रहाणां राशिरूपगृहविशेषः। स तु रवेः सिंहः। चन्द्रस्य वृषः। कुजस्य मेषः। बुधस्य कन्या। गुरोर्धनुः। भृगोस्तुला। शनेः कुम्भः। यथा,—

"सिंहो वृषश्च मेषश्च कन्या धन्वी घटो घटः।
अर्कादीनां त्रिकोणानि मूलानि राशयः क्रमात् ॥"

अथ मूलत्रिकोणांशव्यवस्था।

"रविभौमजीवभार्गवशनैश्चराणां त्रिकोणभागाः स्युः।
नखरविदिक्तिथिनखरा इन्दोर्दिग्भांशका स्वघात् ॥"

इति ज्योतिस्तत्त्वम् ॥

मूलदेवः, पुं, (मूलश्चासौ देवो राजा चेति।) कंसराजः। इति त्रिकाण्डशेषः ॥

मूलद्रव्यं, क्ली, (मूलञ्च तद्द्रव्यञ्चेति।) मूलधनम्। इति हेमचन्द्रः। ३। ५३३ ॥

मूलधनं, क्ली, (मूलञ्च तद्धनञ्चेति।) आदिद्रव्यम्। पुँजी इति भाषा। तत्पर्य्यायः। परिषणम् २ नीवी ३। इत्यमरः। २। ६। ८०।

मूलपर्णी, स्त्री, (मूले पर्णमस्याः। ङीप्।) मण्डूकपर्णी। इति रत्नमाला ॥

मूलपुष्करं, क्ली, (मूले पुष्करमस्य। पुष्करमिव मूलमस्येति वा।) पुष्यकमूलम्। इति राजनिर्घण्टः ॥

मूलपोती, स्त्री, (मूलप्रधाना पोती।) पूतिकाशाकभेदः। तत्पर्य्यायः। क्षुद्रवल्ली २ पोतिका ३ क्षुद्रपोतिका ४ क्षुद्रपोदकनाम्नी ५ वल्लिशाकटपोतिका ६। अस्या गुणाः। त्रिदोषघ्नत्वम्। दृष्यत्वम्। वल्यत्वम्। लघुत्वम्। बलपुष्टिकारित्वम्। रुच्यत्वम्। जठरानलदीपनत्वञ्च। इति राजनिर्घण्टः

मूलप्रकृतिः, स्त्री, (मूला चासौ प्रकृतिश्चेति।) आद्या शक्तिः। यथा,—

"सर्व्वप्रकृता प्रकृतिः श्रीकृष्णः प्रकृतेः परः।
न शक्तः परमेशोऽपि तां शक्तिं प्रकृतिं विना।

सृष्टिं विधातुं मायेशो न सृष्टिर्मायया विना ॥
सा च कृष्णे तिरोभूता सृष्टिसंहारकारके ।
आविर्भूता सृष्टिकाले सा च नित्या यथेश्वरः ॥
कुलालश्च घटं कर्त्तुं यथाशक्तो सदं विना ।
स्वर्णं विना स्वर्णकारः कुण्डलं कर्त्तुमक्षमः ॥
सा शक्तिः सृष्टिकाले च प्रधा चेच्छरेच्छया ।
राधा पद्मा च सावित्री दुर्गा देवी सरस्वती ॥
प्राणाधिष्ठातृदेवी या कृष्णस्य परमात्मनः ।
प्राणाधिकप्रियतमा सा राधा परिकीर्त्तिता ॥
ऐश्वर्याधिष्ठातृदेवी सर्वमङ्गलकारिणी ।
परमानन्दरूपा च सा लक्ष्मीः परिकीर्त्तिता ॥
विद्याधिष्ठातृदेवी या परमेशस्य दुर्लभा ।
वेदशास्त्रयोगमाता सा सावित्री प्रकीर्त्तिता ॥
दुर्गाधिष्ठातृदेवी या सर्वशक्तिस्वरूपिणी ।
सर्वज्ञानात्मिका सर्वा सा दुर्गा दुर्गनाशिनी ॥
वाणीधिष्ठातृदेवी या शास्त्रज्ञानप्रदा सदा ।
कृष्णकण्ठोद्भवा या च सा च देवी सरस्वती ॥
प्रधाधारौ स्वयं देवी मूलप्रकृतिरीश्वरी ।
ततः सृष्टिक्रमेणैव बहुधा कलया च सा ॥
योषितः प्रकृतेरंशाः पुमांसः पुरुषस्य च ।
मायया सृष्टिकाले च तद्विना न भवेद्ध्रुवः ॥
सृष्टिश्च प्रतिविश्वे च ब्रह्मन् ! ब्रह्मोद्भवा सदा ।
शाता विष्णुश्च संहर्त्ता शिवः शश्वच्छिवप्रदः ॥"
इति ब्रह्मवैवर्त्तपुराणे गणपतिखण्डे ४० अः ॥

मूलफलदः, पुं, (मूले च फलं ददातीति । दा + कः ।) पनसवृक्षः । इति राजनिर्घण्टः ॥ (पनसशब्दोऽस्य विषयो ज्ञातयः ।)

मूलभद्रः, पुं, (मूलश्चासौ भद्रश्चेति ।) कंसराजः । इति त्रिकाण्डशेषः ॥

मूलरत्नः, पुं, (मूले रत्नोऽस्याः ।) मोरटलता । इति रत्नमाला ॥

मूलशाकटः, त्रि, (मूलानां भवनं क्षेत्रम् । मूल + "भवने क्षेत्रे इत्यादिभ्यः शाकटशाकिनौ ।" ५ । २ । २६ । इत्यत्र वार्त्तिकबलात् शाकटः ।) मूलक्षेत्रम् । क्षेत्रवाच्ये शाकटप्रत्ययेन निष्पन्नम् ॥

मूलशाकिनः, त्रि, (मूल + शाकिनः ।) क्षेत्रवाच्ये शाकिनप्रत्ययेन निष्पन्नम् ॥

मूला, स्त्री, (मूलानि बहुलानि सन्त्यस्याः । मूल + अर्शं आदित्वात् टाप् ।) शतावरी । इति राजनिर्घण्टः । मूलनक्षत्रम् । इति शब्दरत्नावली ॥ (यथा, कालनाथविरचिते इन्द्रजाले १ अध्यायः ।
"द्वितीयां षष्ठीमष्टम्यां कारयेत् शान्तिकर्म्म च ।
अश्विनीमूलमूलाश्च पुष्या पुनर्वसुस्तथा ॥")

मूलाधारः, पुं, (मूलानामाधारः । मूलं प्रधानं आधार इति वा ।) गुह्यलिङ्गयोर्मध्ये अङ्गुलिद्वयमितस्थानम् । स तु शरीरस्थसकलनाडीनां मूलस्थानम् । अत्र व श ष स साक्षरयुक्तस्वर्णवर्णचतुर्दलपद्ममस्ति । तन्मध्ये इच्छाज्ञानक्रियास्वरूपत्रिकोणं वर्त्तते । तन्मध्ये कोटिसूर्य्यसमप्रभस्वयम्भुलिङ्गमस्ति । अत्र पृथिवी वर्त्तते । तत्रैव मृणालसूत्रवत् सूक्ष्मसार्द्धत्रिवलयाकारस्वयम्भुलिङ्गवेष्टितविद्युत्तुल्यप्रभकुलकुण्डलिनी वर्त्तते । यथा,—
"मूलाधारे त्रिकोणाख्ये इच्छाज्ञानक्रियात्मके ।
मध्ये स्वयम्भुलिङ्गन्तु कोटिसूर्य्यसमप्रभम् ॥
तद्वह्नौ हेमवर्णाभं व श वर्णचतुर्दलम् ॥"
इति तन्त्रसारः ॥
"अथाधारपद्मं सुषुम्नास्थलग्नं
ध्वजाधो गुदोर्द्ध्वं चतुःशोणपद्मम् ।
अधोवक्त्रसुदंशसुवर्णाभवर्णै-
र्वकारादिसान्तैर्युतं वेदवर्णैः ॥
अमुष्मिन् धरायाश्चतुष्कोणचक्रं
समुद्भासि मूलाष्टकैराहृतं तत् ।
लसत्पीतवर्णं तडित्कोमलाङ्गं
तदन्तः समास्ते धरायाः स्वबीजम् ॥
वचाख्या वक्त्रदेशे विलसति सततं कर्णिका-
मध्यसंस्थं
कोणं तत्त्रैपुराख्यं तडिदिव विलसत् कोमलं
कामरूपम् ।
कन्दर्पो नाम वायुर्विवसति सततं तस्य मध्ये
समन्तात्
जीवेशौ बन्धुजीवप्रकरमभिहसन् कोटिसूर्य्य-
प्रकाशः ॥
तन्मध्ये लिङ्गरूपी द्रुतकनककलाकोमलः
पश्चिमास्यो
ज्ञानध्यानप्रकाशः प्रथमकिशलयाकाररूपः
स्वयम्भूः ।
भिद्यत्पूर्णेन्दुबिम्बप्रकरकरचयस्निग्धसन्तान-
हासी
काशीवासी विलासी विलसति सरिदावर्त्तरूपः
प्रकारः ॥
यस्योर्द्ध्वे विषतन्तुसोदरलसत् सूक्ष्मा जगन्मो-
हिनी
ब्रह्मद्वारमुखं सुखेन मधुरं साच्छादयन्ती
स्वयम् ।
शुम्भावर्त्तनिभा नवीनचपलामाला विलासास्पदा
सुप्ता सर्पसमा शिरोपरिलसत्सार्द्धत्रिवृत्ताकृतिः ॥"
इति श्रीतत्त्वचिन्तामणौ षट्चक्रभेदः ॥*॥
तत्रस्थतीर्थानि यथा, रुद्रयामले ।
"इडा मलस्थानगवासिनी या
सूर्य्यात्मिका या यमुनाप्रवाहिका ।
तथा सुषुम्ना मलदेशगामिनी
सरस्वती रचति मज्जनात्मकम् ॥
मनोगतज्ञानपरो मनुष्यो
मन्त्रक्रियायोगविशिष्टतत्त्ववित् ।
महीस्थतीर्थे विमले जले सदा,
मूलाम्बुजे स्नाति सुमुक्तिभाग्भवेत् ॥
सर्व्वाणि तीर्थे सुरतीर्थपावनी
गङ्गा महास्नानविनिर्गता सती ।

करोति पापक्षयमेव मुक्तिं
ददाति साक्षादमलार्घपुण्यदा ॥"

मूलाङ्गं, क्ली, (मूलमाङ्गा व्याप्ता यस्य ।) मूलकम् । इति राजनिर्घण्टः ॥

मूली, [न्] पुं, (मूलमस्यास्तीति । मूल + इनिः ।) वृक्षः । इति शब्दचन्द्रिका ॥ (स्त्रियां ङीप् । ओषधिः । यथा, सुश्रुते चिकित्सितस्थाने ३० अध्याये ।
"चक्रकामोदधिं विद्याच्छरास्थुनिवारिणीम् ।
मूलिनीपञ्चभिः पत्रैः सुरक्तांशुकसंवृतैः ॥")

मूली, स्त्री (मूल + गौरादित्वात् ङीष् ।) ज्येष्ठी । इति त्रिकाण्डशेषः ॥ (नदीभेदः । यथा, मातृके ।
"नान्दपर्णी तथा मूली शरवा विमला तथा ॥")

मूलेरः, पुं, (मूलतीति । मूल + "मूलेरादयः ।" उणा० १ । ६२ । इत्येरक् । चटा । इत्युज्ज्वलदत्तः ।) कोषः ॥ राजा । इत्युज्ज्वलदत्तः ।)

मूल्यं, क्ली, (मूलेन व्यानाम्यते अभिभूयते मूलेनसमं वा इति । मूल + "नौवयोधर्म्मेत्यादिना ।" ४ । ४ । ६१ । इति यत् ।) पटादीनामुत्पत्तिकारणम् । मूलं मूलेन क्रयविक्रयार्थमिदं दधे कादिति यः । इति भरतः ॥ दर इति दाम इति च भाषा । तत्पर्य्यायः । वस्नः २ अवक्रयः ३ । इत्यमरः । २ । १० । ३६ ॥ (यथा, मनौ । ८ । ३२२ ।
"पञ्चाशतस्त्यधिके दण्डस्त्वेदमिष्यते ।
शेषे त्वेकादशगुणं मूल्याद्दण्डं प्रकल्पयेत् ॥")
मूल्यते अर्घ्यते इदम् । साहिना इति भाड़ा इति च भाषा । तत्पर्य्यायः । कर्म्मण्या २ विधा ३ भृत्या ४ भृतिः ५ भर्म्म ६ वेतनम् ७ भरण्यम् ८ भरणम् ९ निर्व्वृग्नः १० पणः ११ । इति च अमरः । २ । १० । ३८ ॥ (यथा, मिताक्षरायाम् ।
"मूल्येन यः कर्म्म करोति स भृतकः ।")

मूल्यं, त्रि, (मूलं रोपणमर्हतीति । मूल + यत् ।) प्रतिष्ठायोग्यः । रोपणयोग्यः । इति मूलधातोरर्थदर्शनात् ॥ (मूलत उत्पाद्यते इति । "मूलमस्त्रावर्हे ।" ४ । ४ । ८८ । इति यत् । मूलत उत्पाटनयोग्ये सुप्रादौ ॥)

मूष मूषणे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) षष्ठस्वरी । यो मूषति परद्रव्यम् । इति हलायुधः ॥ मूषयत्येके । मोषति । इति दुर्गादासः ॥

मूषः, पुं-स्त्री, (मोषति अपहरतीति । मूष् + इगुपधत्वात् कः ।) मूषिकः ॥ (यथा, पक्षितन्त्रे । ३ । २२२ । "एष प्रतिभाति ते मूषराजः ।") तैजसावर्त्तनी । इति शब्दरत्नावली ॥

मूषकः, पुं-स्त्री, (मूष + स्वार्थे कन् ।) उन्दुरुः । इति शब्दरत्नावली ॥ (यथा, रामायणे । २ । ३३ । १६ ।
"रजसाभ्यवकीर्णानि परित्यक्तानि दैवतैः ।
मूषकैः परिधावद्भिरहिभिश्चाहृतानि च ॥")

मूषिकः

मूषककर्णी, स्त्री. (मूषिकस्य कर्णवत् पत्राग्रमस्याः। ङीष्।) आखुकर्णी। इति राजनिघण्टः॥

मूषकमारी, स्त्री, (मूषकं उन्दुरं मारयतीति। मृ+णिच्+"कर्म्मण्यण्।" ३। २। १। इति अण्। ङीष्।) सुतश्रेणीवृक्षः। इति राजनिर्घण्टः॥

मूषका, स्त्री. (मूषक+स्त्रियां टाप्। च्छिपकादित्वात् न अत इत्वम्।) मूषिका। इति शब्दरत्नावली॥

मूषकारातिः, पुं, (मूषकाणां अरातिः घातकः।) विड़ालः। इति राजनिर्घण्टः॥ मूषिकारातिः। इति च पाठः॥

मूषा, स्त्री, (मूषति गृह्णातीति। मूष+कः+स्त्रियां टाप्।) स्वर्णाद्यावर्त्तनपात्रम्। मूचौ इति भाषा॥ (यथा, पञ्चदश्याम्। ४। २।
"मूषासिक्तं यथा ताम्रं तन्निभं जायते तथा।
रूपादीन्यात्मनश्चित्तं तन्निभं दृश्यते ध्रुवम्॥")
तत्पर्य्यायः। तैजसावर्त्तनी २। इत्यमरः। २। १०। ३३॥ मुषा ३ मुषी ४ आवर्त्तनी ५ मूषी ६। इति भरतः॥
"दृढद्वाखे तुषैः पूर्णां मध्ये मूषां विधारयेत्।
क्षिप्त्वाग्निं सुदृढेद्वाखं तद्वाखं पुटमुच्यते॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे॥)
मूषिका ७। इति रमानाथः॥ देवताड़कः। इति शब्दचन्द्रिका॥ मूषिकस्त्रीजातिः। इति शब्दरत्नावली॥ गवाक्षः। यथा,—
"एकद्वित्र्यादिमूषावहनमितिमहो ब्रूहि मे भूमिभर्त्तुर्
हर्म्ये रम्येऽतिसूक्ष्मे चतुरविरचिते श्वेतशालाविशाले।"
इत्यादि लीलावत्यां श्रेढीव्यवहारः॥

मूषाकर्णी, स्त्री, (मूषायाः कर्ण इव पत्राग्रमस्याः।) आखुकर्णी। इति शब्दरत्नावली॥

मूषातूत्थं, क्ली, (मूषाजातं तूत्थम्।) नीलतूत्थम्। तत्पर्य्यायः। कांस्यनीलम् २ हेमतूत्थम् ३ वितुन्नकम् ४। इति हेमचन्द्रः। ४। ११८॥

मूषिकः, पुं. (मूषणाति द्रव्याणीति। मूष्+"सुषेर्दीर्घश्च।" उणा० २। ४२। इति किकन् दीर्घश्च।) जन्तुविशेषः। इन्दुर इति भाषा। (यथा, हितोपदेशे मित्रलाभप्रकरणे। १३१।
"धनेन बलवान् सर्व्वो धनाढ्यवति पण्डितः।
पश्यायं मूषिकः पापः स्वजातिसमतां गतः॥")
तत्पर्य्यायः। उन्दुरः २ आखुः ३। इत्यमरः। २। ५। १२॥ मूषः ४ मूषीकः ५ उन्दूरुः ६ जभुः ७ वृषः ८ आखनिकः ९ वृषः १०। इति शब्दरत्नावली॥ मूषकः ११ पिङ्गः १२ उन्दुरुकः १३ गन्धी १४ खनकः १५ विलकारी १६ धान्यारिः १७ वहुप्रजः १८। अस्य मांसगुणाः।
"अधिगुञ्जलशल्यगोधामूषकसृक्का विलेशयाः कथिताः।
श्वासानिलकासहरं तन्मांसं पित्तदाहकरम्॥
अन्ये बिलेशया ये स्युः केङ्किड़ोन्दुरुकादयः।
गर्हितं तस्य मांसञ्च मद्यगौरवदुर्ज्जरम्॥"
इति राजनिर्घण्टः॥

अपि च।
"मूषिको मधुरः स्निग्धो वयायी वलवर्द्धनः।"
इति राजवल्लभः॥*॥
पारिभाषिकमूषिको यथा,—
"विभवे सति नेवाक्ति न ददाति जुहोति च।
तमाहुरास्यं तस्यान्नं भुक्ता क्लेशेन शुध्यति॥"
इति मार्कण्डेयपुराणे आचाराध्यायः॥
(जनपदविशेषः। यथा, महाभारते। ६। ६। ५८।
"द्रविड़ाः केरलाः प्राच्या मूषिका वन-
वासिकाः॥")

मूषिकपर्णी, स्त्री, (मूषिककर्णवत् पर्णानि यस्याः।) जलजतृणविशेषः। इँदुरकाणीपाना इति भाषा। (यथा, चरके विमानस्थाने सप्तमेऽध्याये।
"मूषिकपर्णीं समूलाग्रपत्रानामपहृत्य॥")
तत्पर्य्यायः। चित्रा २ उपचित्रा ३ न्यग्रोधी ४ द्रवन्ती ५ सम्बरी ६ वृषा ७ प्रत्यक्श्रेणी ८ सुतश्रेणी ९ रङ्गा १०। इत्यमरः। २। ४। ८८॥ पुत्रश्रेणी ११ आखुपर्णिका १२ वृषपर्णी १३ आखुपर्णी १४ मूषिका १५ कक्षिपत्रिका १६। इति रत्नमाला॥ मूषिपर्णिका १७ सचित्रा १८ मूषीकर्णी १९ सुकर्णिका २०। इति शब्दरत्नावली॥

मूषिका, स्त्री, (मूषिक+अजादित्वात् टाबित्युज्ज्वलदत्तः।) मूषिकपर्णी। इति रत्नमाला॥ उन्दुरः। इति शब्दरत्नावली॥ मूषा। इत्यमरटीकायां रमानाथः॥ (यथा, सुश्रुते चिकित्सितस्थाने २० अध्याये।
"चीरं महापञ्चमूलं मूषिकां चान्द्रवाच्चताम्।")

मूषिकाक्षः, पुं, (मूषिकः उन्दुरुर्वाहनत्वेन अक्षः चिह्नमस्य।) गणेशः। इति जटाधरः॥

मूषिकाशनः, पुं, (मूषिकं अश्नाति खवाहनतया प्राप्नोतीति। अशनच्+ल्युः।) गणेशः। इति त्रिकाण्डशेषः॥

मूषिकारातिः, पुं,(मूषिकाणामरातिः।) विड़ालः। इति राजनिर्घण्टः॥

मूषिकाक्षयः, पुं, (मूषिकस्य आक्षा आक्षा आखा यस्य।) मूषिकपर्णी। इति जटाधरः॥ (तथास्य पर्य्यायः।
"दन्त्युडुम्बरपर्णी स्यान्निकुम्भोऽथ सुकूलकः।
द्रवन्तीनामतश्चित्रा न्यग्रोधा मूषिकाक्षयाः॥"
इति चरके कल्पस्थाने द्वादशेऽध्याये॥)

मूषिपर्णिका, स्त्री, (मूषिपर्ण+कन् टाप् अतइत्वम्।) मूषिकपर्णी। इति शब्दरत्नावली॥

मूषी, स्त्री, (मूष्+कः। स्त्रियां ङीष्। मूषा। स्वर्णाद्यावर्त्तनपात्रम्। इत्यमरटीकायां भरतः॥ महामूषिकः। यथा,—
"अन्यो महामूषिकः स्यान्मूषी विश्वेश्वराह्वयः।
महाङ्गः मूखमारी च भूफलो भित्तिपाननः॥"
इति राजनिर्घण्टः॥

मूषीकः, पुं, स्त्री, (मोषति इति। मूष+बाहुलकात् ईकन्।) मूषिकः। इति शब्दरत्नावली॥

मूषीककर्णी, स्त्री, (मूषीकस्य कर्णवत् पर्णमस्याः।) मूषिकपर्णी। इति शब्दरत्नावली॥

मूषीका, स्त्री, (मूषीक+टाप्।) उन्दुरः। यथा,
"दीना मूषीका मूषा च मूषीका मूषिकेत्यपि।"
इति शब्दरत्नावली॥

मूष्यायणः, त्रि, (मोषति अपहरतीति। मूष+कः चौरजारः। तस्यापत्यम् इति। मूष+फक्। बाहुलकात् वृद्ध्यभावः।) अज्ञातपितृकः। गृहीतपुत्रः। इति केचित्॥

मृ, ड मृ म्रृतौ। इति कविकल्पद्रुमः॥ (तुदा०-आत्म०-अक०-अनिट्।) मृतिः प्राणत्यागः। ड मृ म्रियते प्राणी। ङित्त्वेऽप्यस्य मृ ड ङीट्रि ममिति नियमेन अन्यत्र परस्मैपदम्। ममार मर्त्ता मरिष्यति अमरिष्यत्। इति दुर्गादासः॥

मृकण्डकः, पुं, (मृगस्य कण्डुरिति समासे पृषोदरादित्वात् गलोपे मृकण्डुः मृकण्ड इति केचित्तत्र पठन्ति इत्युज्ज्वलदत्तः। ततः संज्ञायां कन्।) मृकण्डुसुनिः। इति शब्दरत्नावली॥

मृकण्डुः, पुं, (मृगस्य कण्डुरिति समासे पृषोदरादित्वात् गलोपः। इत्युज्ज्वलदत्तः।) मुनिविशेषः। (यथा, मार्कण्डेये। ५२। १६।
"प्राणस्त्वेव मृकण्डुश्च पिता मम महायशाः।")
तस्य पुत्रो मार्कण्डेयः। यथा,—
"मार्कण्डेयोऽपि मार्कण्डो मृकण्डुश्च मृकण्डकः।"
इति शब्दरत्नावली॥

मृग तृ क ड मार्गणे। (चुरा०-आत्म०-सक०-सेट्।) ड रामो मृगं मृगयते वनवीथिकासु। इति महानाटकम्। कातन्त्रादौ मृग्य अन्वेषणे इति दिवादिपरस्मैपदी धातुश्च दृश्यते दुर्गाविलोचनयोरसम्मतत्वात् अनेनोपेक्षितः। मृगयन्तः पदवीं तथाप्यकरुणा व्याधा न मुञ्चन्ति माम्। इति तु अकारान्तस्यैव भावे क्विपि अकारलोपे मृगं करोतीति कण्ड्वादित्वात् कर्म्मणि यक् साधयम्। इति दुर्गादासः॥

मृगः, पुं, (मृगयते अन्वेषयति हृणादिकं मृग्यते वा इति। मृग+इगुपधत्वात् कर्त्तरि कः।) पशुमात्रम्। (यथा, मनुः। ५। ६।
"आरण्यानाञ्च सर्व्वेषां मृगाणां माहिषं विना।")
मृगशब्दोऽत्र महिषपर्य्युदासात् पशुमात्रपरः। इति तट्टीकायां कुल्लूकः।) हस्तिविशेषः। नक्षत्रभेदः। (यथा, इन्द्रजालतन्त्रे।
"अश्विनीमृगमूलाश्च पुष्या पुनर्व्वसुस्तथा॥")
अन्वेषणम्। (यथा, साहित्यदर्पणे। ४। १७।
"जनस्थाने भ्रान्तं कनकमृगतृष्णाभिरधिया
वचो वैदेहीति प्रतिपदमुदश्रु प्रलपितम्।

कृतालङ्काभर्त्तृवदनपरिपाटीघटना
मयाप्तं रामत्वं कुशलवसुता न त्वधिगता ॥"
कनकस्य सुवर्णस्य मृगे अन्वेषणे। पक्षे।
कनकमृगे हेममहरिणे या तृष्णा इत्यर्थः।)
याच्ञा। इति मेदिनी। गे, १८॥ मार्गशीर्ष-
मासः। यज्ञविशेषः। इत्यजयपालः॥ मृग-
नाभिः। इत्यमरटीकायां भरतः॥ मकर-
राशिः। यथा,—
"मृगकर्कटसंक्रान्तौ दृङ्मूदग्दक्षिणायने।
विषुवतो तुलामेषे गोलमध्ये तथापरः॥"
इति तिथ्यादितत्त्वम्॥
स्वनामख्यातपशुविशेषः। मृग्यते अन्विष्यतेऽसौ
आधेः। (यथा, अभिज्ञानशाकुन्तले। १।१०।
"न खलु न खलु बाणः सन्निपात्योऽयमस्मिन्
मृदुनि मृगशरीरे तूलराशाविवाग्निः।")
तत्पर्य्यायः। कुरङ्गः २ वातायुः ३ हरिणः ४
अजिनयोनिः ५। इत्यमरः॥ शारङ्गः ६
चारुलोचनः ७ जिनयोनिः ८ कुरङ्गमः ९
ऋष्यः १० ऋश्यः ११ रिष्यः १२ रिश्यः १३
एणः १४ एणकः १५। इति शब्दरत्नावली॥
स च नवविधः। यथा,—
"सम्बरो रोहितो न्यङ्कुः कुरङ्गः सृदृशो रुरुः।
एणश्च हरिणश्चेति मृगा नवविधा मताः॥
पाठान्तरं यथा,—
"सम्बरः रोहितो न्यङ्कुः सम्बरो बभ्रुणो रुरुः।
शृङ्गेणहरिणश्चेति मृगा नवविधा मताः॥
हरिणश्चापि विज्ञेयः पञ्चभेदोऽत्र भैरव!।
ऋष्यः खड्गो रुरुश्चैव पृषतश्च मृगस्तथा।
एते बलिप्रदाने च चर्म्मदाने च कीर्त्तिताः॥"
इति कालिकापुराणे ६७ अध्यायः॥ * ॥
अपि च। अथ जाङ्गलानां गणना।
"हरिणैणकुरङ्गर्ष्यपृषतन्यङ्कुसम्बराः।
राजीवोऽपि च सृङ्की चेत्याद्या जाङ्गलसंज्ञकाः॥
हरिणस्ताम्रवर्णः स्यादेणः कृष्णः प्रकीर्त्तितः।
कुरङ्ग ईषत्ताम्रः स्याद्धरिणाकृतिको महान्॥
ऋष्यो नीलाङ्गको लोके सरोरुरिति कीर्त्तितः।
पृषतश्चन्द्रविन्दुः स्याद्धरिणात् कियदल्पकः॥
न्यङ्कुर्बहुविधाणोऽथ शम्बरो गवयो महान्।
राजीवस्तु मृगो ज्ञेयो राजीभिः परितो वृतः।
यो मृगः शृङ्गहीनः स्यात् स सृङ्कीति निग-
द्यते॥"
अथ तेषां गुणाः।
"जाङ्गलाः प्रायशः सर्वे पित्तश्लेष्महराः स्मृताः।
किञ्चिद्वातकराश्चापि लघवो बलवर्द्धनाः॥"
इति भावप्रकाशः॥
अथ मृगपरीक्षा।
"मृगनाभिं समादातुं कौतुकार्थं तथा पुनः।
मृगाः पोष्या महीन्द्राणां तेषां वक्ष्यामि,
लक्षणम्॥
पृथिव्यप्वायुगगनास्त्रिगोऽधिकासु पञ्चधा।
भिद्यन्ते नैकभेदासु चमत्का मृगजातयः॥"
तद्यथा,—
'ये गन्धिनः क्षीणशरीरकर्णा-
स्ते पार्थिवा गन्धमृगाः प्रदिष्टाः।
सर्व्वाङ्गमेधां सुरभिं प्रकामं
पुण्ये प्रदेशे प्रभवन्ति ते तु॥
ये वै विशाला गुरुदीर्घशृङ्गा
अमांसलास्तीव्रखुरप्रदेशाः।
आप्यास्तु ते वै प्रसरन्ति भूरि
सर्व्वत्र देशे प्रभवन्ति चैव॥
धावन्ति ये वातमिवाल्परीक्षे
दीर्घास्तु ते वातमृगाः प्रदिष्टाः।
ते यत्र यत्रैव भवन्ति शुक्ला-
स्तत्रैव सर्व्वाणि शुभानि सन्ति॥
लघुप्रमाणा लघुवीर्य्यसत्त्वा
निर्गन्धदेहाश्चलप्रमाणाः।
ते गागना वेगकरा नराणां
सृष्ट्या न ते नापि निरीक्षणीयाः॥
ये कृष्णवर्णा गुरुदीर्घशृङ्गाः
क्रुद्धा भृशं यान्ति च वायुवेगाः।
ते कृष्णसाराः खलु तेजसास्तु
पुण्यप्रदेशे प्रभवन्ति ते तु॥'
भोजोऽप्याह।
'पार्थिवादिमृगाः सर्व्वश्चतुर्जातिर्भवेत् पृथक्।
सुश्लक्ष्णास्तनुलोमानो ब्राह्मणा मृगजातयः॥
क्रुद्धाः पश्चरिशृङ्गाश्च क्षत्रिया खरलोमशाः।
आवर्त्तशृङ्गास्तनवो हरिणा वैश्यजातयः॥
कृष्णशृङ्गा वाष्पशृङ्गा वा शूद्राः खरतनूरुहाः।
अश्वानां ये गुणा दोषास्ते ज्ञेया हरिणेष्वपि॥
तथापि दोषाः पक्षामी वक्ष्यन्ते हरिणाश्रयाः।
नेत्रयोरन्तरे यस्य लोमावर्त्ताः स पापकृत्॥
विषमौ विकृतौ शृङ्गौ यस्य स क्षेमनाशनः।
आवर्त्तः पृष्ठतो यस्य आनाभिमभिविन्दति॥
पश्चार्द्धे यस्य वावर्त्तौ त्याज्यौ भयकारकौ।
वर्णनेचपदादीनां वैकृताद्वननाशनः॥'
गार्ग्यः।
'दोषवन्मृगजातीनां विजातीनामथापि वा।
स्पर्शनात् स्पर्शनाच्चैव गन्धादानाच्च पोषणात्।
भवेयुर्विविधाः सर्व्वास्तथा चैवाद्यपोषणात्॥'
शुक्रोऽपि।
'हरिणपोषणतो धरणीसुतां
नहि भवेन्मरुद्भवपीड़नम्।
न पविवह्निरुजारिपुजं भयं
तदव तं हरिणं गुणिनं नृप!॥'
इति मृगपरीक्षा॥ इति युक्तिकल्पतरुः॥
(अस्य गुणविशेषो यथा,—
"दूरे घनान्तनिलया दूरे पानीयगोचराः।
ये मृगाश्च विहङ्गाश्च तेऽल्पाभिष्यन्दिनो
मताः॥
अतीवासन्ननिलयाः समीपोदकगोचराः।
ये मृगाश्च विहङ्गाश्च महाभिष्यन्दिनस्तु ते॥"
इति सुश्रुते सूत्रस्थाने ४५ अध्यायः॥)
मृगादिविकारोपक्रमो यथा,—
गर्ग उवाच।
"प्रविशन्ति यदा ग्राममारण्या मृगपक्षिणः।
अरण्यं यान्ति वा ग्राम्याः स्थलं यान्ति
जलोद्भवाः॥
स्थलजाश्च जलं यान्ति घोरं रासन्ति
निर्भयाः।
गृहं कपोतः प्रविशेत् क्रव्यादो मूर्द्ध्नि नीयते॥
मधु वा मक्षिकाः कुर्य्युर्मृत्युं गृहपतेर्वदेत्॥
मृगपक्षिविकारेषु कुर्य्याद्धोमं यदक्षिणम्।
देवाः कपोत इति च जप्यया पञ्चभिर्दिनैः॥
गावश्च देया विधिवत् द्विजानां
सकाञ्चना वस्त्रयुगोत्तरीयाः।
एवं कृते शान्तिमुपैति पापं
मृगैर्द्विजैर्वा विनिवेदितं यत्॥"
इति मात्स्ये २११ अध्यायः॥
चतुर्व्विधपुरुषमध्ये पुरुषविशेषः। तस्य लक्षणं
यथा,—
वदति मधुरवाणीं दीर्घनेत्रोऽतिभीरु-
श्चपलमतिसुदेहः शीघ्रवेगो मृगोऽयम्।
"शशके पद्मिनी तुष्टा मृगे तुष्टा च चित्रिणी।
वृषभे शङ्खिनी तुष्टा हये तुष्टा च हस्तिनी॥
पद्मिनीशशयोर्योनिर्मेढ्रकौ चतुरङ्गुलौ।
चित्रिणीमृगयोर्योनिर्मेढ्रकौ च तथाविधौ॥"
इति रतिमञ्जरी॥
(अन्वेषणा। यथा, ऋग्वेदे। १। १५४। २।
"मृगो न भीमः कुचरो गिरिष्ठाः।"
"मृगः अन्वेषणा।" इति तद्भाष्ये सायणः॥)
मृगक्षीरं, क्ली, मृगीदुग्धम्। तरादौ चेति चकार-
स्यानुक्तसमुच्चयार्थत्वात् मृगयाः क्षीरं मृगक्षीरं
मृगया पदं मृगयपदं इत्यादिष्वपि पुंवद्भावः।
इति मुग्धबोधटीकायां दुर्गादासः॥
मृगगामिनी, स्त्री, (मृग इव गच्छतीति। गम+
णिनिः। ङीप्।) विड़ङ्गा। इति राजनिर्घण्टः॥
मृगसदृशगमनशीला च॥
मृगधर्म्मज, क्ली, (मृगधर्म्मात् मृगनाभिधर्म्मात्
मृगगन्धवत् जायते इत्यर्थः। जन+ड।)
जवादिनामकगन्धद्रव्यम्। इति राजनिर्घण्टः॥
मृगधर्म्मजाते, त्रि॥
मृगचेटकः, पुं, (मृगान् पशून् चेटयति प्रेरयति
स्वशब्देन रात्रिशेषं ज्ञापयतीति। चिट+
णिच+ण्वुल्।) खट्टाशः। इति शब्दमाला॥
मृगजालिका, स्त्री, (मृगाणां जालिका।) मृग-
बन्धनार्थजालम्। तत्पर्य्यायः। वागुरा २।
इति हेमचन्द्रः। ३। ५६२॥
मृगजीवनः, पुं, (मृगैः पशुभिः जीवतीति। जीव
+ल्युः।) व्याधः। इति शब्दरत्नावली
(यथा, महाभारते। ३। ६३। २८।
"निर्विचेष्टं शुनङ्गं तं विप्रस्य मृगजीवनः।")
मृगया, स्त्री, (मृग+युच्।) अपहृतद्रव्यस्यान्वे-
षणम्। यथा,—
"संवीक्षणं विषयनं मार्गणं मृगया मृगः।"
इत्यमरः। ३। २। ३०॥

मृगतृट्, [ष्] स्त्री, (मृगाणां तृट् पिपासा यत्र जलाभासकत्वात्।) मृगतृष्णा। इति शब्दरत्नावली॥

मृगतृषा, स्त्री, (मृगाणां तृषा अस्त्यस्यामिति। अर्श्व आदित्वात् अच्। टाप्।) मृगतृष्णा। इति शब्दरत्नावली॥ (यथा, कामन्दकिनीतिसारे। ३। १३।

"जगन्मृगतृषातुल्यं वीक्ष्येदं क्षणभङ्गुरम्।
स्वजनैः सङ्गतः कुर्य्यात् धर्म्माय च सुखाय च॥")

मृगतृष्णा, स्त्री, जलाभासत्वात् मृगाणां तृष्णा विद्यतेऽस्याम्। ग्रीष्मे मरुदेशे सिकतादावर्कैकराः प्रतिफलिताः दूरस्थानां जलत्वेनाभान्ति तद्वाचिका। इति टीकाकारः॥ उत्कटरविरश्मिजन्यक्षितिवाष्पजालं मरीचिका। दूरशून्ये यन्मयूखैर्जलमिव दृश्यते इत्यपरे। इति भरतः॥ तत्पर्य्यायः। मरीचिका २। इत्यमरः। १। ४। ३५॥ मृगतृष्णिका ३। इति भरतः॥ मृगतृट् ४ मृगतृषा ५। इति शब्दरत्नावली॥

मृगतृष्णिका, स्त्री, (मृगतृष्णा+स्वार्थे कन्+स्त्रियां टाप् अत इत्वञ्च।) मृगतृष्णा। इत्यमरटीकायां भरतः॥ (यथा, अभिज्ञानशाकुन्तले। ६।

"सोतोवहां पथि निकामजलामतीत्य
जातः सखे! प्रणयवान् मृगतृष्णिकायाम्॥")

मृगदंशकः, पुं, (मृगान् पशून् दशति। दंश्+खुल्।) कुक्कुरः। इत्यमरः॥

मृगधूर्त्तः, पुं, (मृगेषु पशुषु धूर्त्तः। षष्ठीतत्।) शृगालः। इति संक्षिप्तसारे समासपादः॥

मृगधूर्त्तकः, पुं, (मृगधूर्त्त+स्वार्थे कन्।) शृगालः। इत्यमरः। २। १०। २१॥

मृगनाभिः, पुं, (मृगस्य नाभिः। तदभ्यन्तरे जातत्वात् तथात्वम्।) कस्तूरी। तत्पर्य्यायः।

"मृगनाभिर्मृगमदः कथितस्तु सहस्रभित्।
कस्तूरिका च कस्तूरी बोधसुखा च सा स्मृता॥"

सा त्रिविधा यथा,—

'कामरूपोद्भवा कृष्णा नेपाली नीलवर्णयुक्।
काश्मीरी कपिलच्छाया कस्तूरी त्रिविधा स्मृता॥
कामरूपोद्भवा श्रेष्ठा नेपाली मध्यमा भवेत्।
काश्मीरदेशसंभूता कस्तूरी ह्यधमा स्मृता॥'

अस्या गुणाः।

'कस्तूरिका कटुस्तिक्ता चारोष्णा शुक्रला गुरुः।
कफवातविषच्छर्दिग्लीतदौर्गन्ध्यदोषहृत्॥'

इति भावप्रकाशः॥

अन्यत् कस्तूरीशब्दे द्रष्टव्यम्॥ (तथास्य पर्य्यायान्तरम्।

'मृगनाभिर्मृगमदो मदः कस्तूरिकाख्यजः।'

इति वैद्यकरत्नमालायाम्॥)

मृगनाभिजा, (स्त्री, मृगनाभिर्जायते। जन्+डः। स्त्रियां टाप्।) कस्तूरी। यथा,—

"घनसारः सिताभ्रश्च चन्द्रोऽथ मृगनाभिजा।
मृगनाभिर्मृगमदः कस्तूरी गन्धधूल्यपि॥"

इति हेमचन्द्रः। ३। ३०७-८॥

मृगनेत्रा, स्त्री, (मृगनेत्र+"नेत्रन्तन्त्र उपसंख्यानम्।" ५।४।११६। इत्यत्र काशिकोक्तेः अप्।) मृगी मृगशिरा नेता प्रापयिता यस्याः रात्रेः सा रात्रिः। इति सुग्धबोधटीकायां दुर्गादासः॥ सा अग्रहायणस्य विंशतिदण्डाधिकत्रयोविंशदिनावधिसंक्रान्तिपर्य्यन्तं प्रायः सम्भवति। तत्र नवान्नश्राद्धनिषेधो यथा। ब्रह्मपुराणे।

"वृश्चिके शुक्लपक्षे तु नवान्नं भक्षयते बुधैः।
अपरे क्रियमाणं हि धनुष्येव कृतं भवेत्॥
धनुषि यत् कृतं श्राद्धं मृगनेत्रासु रात्रिषु।
पितरस्तन्न गृह्णन्ति नवान्नामिषकाङ्क्षिणः॥"

अपरे कृष्णपक्षे। मृगो नेता प्रापयिता यासां रात्रीणामितिश्रुत्यपत्त्या नक्षत्रान्नेतुरित्यनेनाङ्विधानात्तत्पदं सिद्धम्। तत्र च मृगशिरःपूर्व्यार्द्धेन वृश्चिकशेषभागे रात्रारम्भाच्चत्वारिंशद्दण्डाधिकषड्रात्रयो मृगनेत्राः। इति मलमासतत्त्वम्॥ (मृगस्य नेत्रे इव नेत्रे यस्य। मृग तुल्यनेत्रे, त्रि॥)

मृगपतिः, पुं, (मृगाणां पशूनां पतिः।) सिंहः। इति हेमचन्द्रः॥ (यथा, भागवते। ५।२५।१०।

"यल्लीलां मृगपतिरादधेऽनवद्या-
मादातुं खजनमनांस्युदारवीर्यः।"

'मृगपतिः सिंहः।' इति तट्टीकायां श्रीधरस्वामी॥ कामप्रदश्रेष्ठः। यथा तत्रैव टीकायाम्।

"मृग्यन्त इति मृगाः कामप्रदास्तेषां पतिर्मुख्यः॥")

मृगपिप्पुः, पुं, (अपिप्पवते भासते इति। अपि+प्लु+वाहुलकात् संज्ञायां डुः। अपेरल्लोपश्च। मृगः हरिणः पिप्पुरत्र।) चन्द्रः। इति त्रिकाण्डशेषः॥

मृगप्रियं, क्ली, (मृगाणां प्रियम्।) पर्व्वततृणम्। इति राजनिर्घण्टः॥

मृगबधाजीवः, पुं, (मृगबधेन आजीवतीति। बध+जीव्+अच्।) व्याधः। इत्यमरः। २। १०। २१॥

मृगबन्धनी, स्त्री, (मृगः बध्यते अनयेति। बन्ध+ल्युट्+स्त्रियां ङीप्।) मृगबन्धनार्थजालम्। तत्पर्य्यायः। वागुरा २। इत्यमरः। २। १०। २६॥

मृगभक्षा, स्त्री (मृगैर्भक्ष्यतेऽसौ। भक्ष+कर्म्मणि अप् टाप्।) जटामांसी। इति राजनिर्घण्टः॥

मृगमदः, पुं, (मृगाः माद्यन्ति अनेनेति। मद्+अप्।) कस्तूरी। इत्यमरः। २। ६। १२६। (यथा, छन्दोमञ्जर्य्याम्। २। १५। ४।

"मृगमदकृतचर्चामौक्तिकौघेयवासा
रुचिरशिखिशिखण्डावद्धधम्मिल्लपाशा।")

मृगमदवासा, स्त्री, (मृगमदस्येव वासः सौरभोऽस्याः।) कस्तूरीमल्लिका। इति राजनिर्घण्टः॥

मृगया, स्त्री, (मृग्यन्ते पशवोऽस्यां इति। मृग+यिच्। "इच्छा।" ३।३।१०१। इत्यत्र परिचर्य्या परिसर्य्यामृगयाटाट्यानासूपसंख्यानम्। इति वार्त्तिकोक्त्या से यकि यिलोपः। इति सिद्धान्तकौमुदी॥) राज्ञां वनेषु मृगहननक्रिया। मृग्यन्ते अन्विष्यन्तेऽस्याम्। ग्रिकार इति भाषा। तत्पर्य्यायः। आच्छोदनम् २ मृगव्यम् ३ आखेटः ४। इत्यमरः॥ तन्निषमविधिर्यथा,—

"चचार मृगयां तत्र दृप्त आत्मेषुकार्मुकः।
विहाय जायामनदर्हां मृगव्यसनलालसः॥५॥
आसुरीं वृत्तिमाश्रित्य घोरात्मा निरनुग्रहः।
व्यहनत् निशितैर्बाणैर्वनेषु वनगोचरान्॥६॥
तीर्थेषु श्रुतिदृष्टेषु राजा मेध्यान् पशून् वने।
यावदर्थमलं लुब्धो हन्यादिति नियम्यते॥"७॥

इति श्रीभागवते ४ स्कन्धे २६ अध्यायः॥

आत्ता गृहीता इषवो रागद्वेषादिरूपाः कार्म्मुकञ्च भोगाद्यभिनिवेशरूपं येन। जायां विवेकवतीं बुद्धिं विहाय। अतदर्हां त्यागानर्हाम्। त्यागे हेतुः मृग्यन्ते इति मृगाः विषयाः तेषु व्यसनं भोगासक्तिस्तेन लालसा अतिस्पृहा यस्य॥५॥ बाणे रागादिभिः। वनेषु भजनीयदेशेषु। वनगोचरान् भजनीयविषयान्। व्यहनत् भजनीयदेशादात्मसात् कृतवान्। कथापक्षे तु स्पष्टमेव॥ ६॥ नन्वासुरीं वृत्तिमाश्रित्य इति किमिति मृगया निन्द्यते। कथापक्षे तावद्राज्ञो विहितैव सा। अध्यात्मपक्षेऽपि जीवस्य विषयभोगो विहित एव इत्याशङ्क्याह तीर्थेष्विति त्रिभिः। अयं भावः। न हि मृगया विधीयते रागप्राप्तत्वात् किन्तु नियन्यते प्रवृत्तिः सङ्कोच्यते। नियममेव षड्विधं दर्शयति। यदि अलमत्यर्थं लुब्धो रागी सन् हन्यात् तर्हि तीर्थेषु आद्यादिष्वेव तत्रापि श्रुतिदृष्टेषु प्रख्यातेष्वेव न नित्यश्राद्धादिषु। तत्रापि राज्ञैव। मेध्यानेव। वन एव। यावदुपयोगमेव इति। एवं जीवस्य विषयसेवापि यावदुपयोगं न यथेष्टमिति नियम एव इत्यर्थः॥ ७॥ इति तट्टीकायां श्रीधरस्वामी॥ सा राज्ञां पापाय न स्यात्। यथा,—

"अबलस्खलुलाग्निनो भसा-
न्निजनीडद्रुमपीड़िनः खगान्।
अनवद्यतयार्द्दिनो मृगान्
मृगयाघाय न भूभृतां मृताम्॥"

इति नैषधे २ सर्गे १० श्लोकः॥

सा च कामजव्यसनविशेषः। यथा,—

"मृगयाक्षो दिवास्वप्नः परीवादः स्त्रियो मदः।
तौर्य्यत्रिकं वृथाट्या च कामजो दशको गणः॥"

इति मलमासतत्त्वम्॥

मृगयुः, पुं, (मृगं यातीति। मृग+"मृगय्वादयश्च।" उणा० १।३८। इति कुः। निपात्यते च।) ब्रह्मा। शृगालः। व्याधः। इति मेदिनी। ये, १०१॥ (यथा, भट्टिकाव्ये। ४। ४४।

"मृगयुमिव मृगोऽथ दक्षिणेर्मा
दिशमिव दाहवतीं मरावुदन्यन्।")

मृगरसा, स्त्री, (मृगस्य मृगमांसस्येव रसोऽस्याः।) सहदेवी। इति राजनिर्घण्टः॥

मृगराजः, पुं, (मृगाणां पशूनां राजा अधिपतिः। "राजाहःसखिभ्यष्टच्।" ५।४।९१। इति टच्॥) सिंहः। इति शब्दरत्नावली॥ (यथा, रघुवंशे। ६।३।

"शिलाविभङ्गैर्मृगराजशाव-
स्तुङ्गं नगोत्सङ्गमिवारुरोह॥"

व्याघ्रः। यथा, महाभारते। १।१४१।३४।

"मृगं मे त्वं महाबाहो! यद्वाक्यं मूषिकोऽब्रवीत्।
धिग्बलं मृगराजस्य मयाद्यायं मृगो हतः।")

मृगराट्, [ज्] पुं, (राजते दीप्यतेऽसौ राज्+क्विप्। ततः मृगाणां राट्।) सिंहः। इति शब्दरत्नावली॥ (यथा, शिशुपालवधे।९।१८।

"पतिते पतङ्गमृगराजि निज-
प्रतिबिम्बरोषित इवाम्बुनिधौ।")

मृगराटिका, स्त्री, (मृग+रट्+खुल्+स्त्रियां टाप् अत इत्वञ्च।) जीवन्ती। इति राजनिर्घण्टः॥

मृगरिपुः, पुं, (मृगाणां रिपुः।) सिंहः। इति हलायुधः॥

मृगरोमजं, त्रि, (मृगाणां रोमभ्यो जायते इति। जन्+डः। पशुलोमजातवस्त्रादि। तत्पर्य्यायः। राङ्कवम् २। इत्यमरः। २।६।१११॥

मृगलाञ्छनः, पुं, (मृगः लाञ्छनं चिह्नमस्य।) चन्द्रः। इति शब्दरत्नावली॥

मृगवल्लभः, पुं, (मृगाणां वल्लभः प्रियः।) कुन्दरुण्डम्। इति राजनिर्घण्टः॥

मृगवाहनः, पुं, (मृगो वाहनमस्येति।) वायुः। इति जटाधरः॥

मृगयं, क्ली, (मृगान् विध्यति अत्र इति। यध्+"अन्येष्वपि दृश्यते।" ३।२।४८। इति काशिकोक्त्या अधिकरणे डः।) मृगया। इत्यमरः। २।१०।२३॥ (यथा, मार्कण्डेये। १२७।१।

"कदाचिन्नाजपुत्रोऽसौ मृगयामचरद्वने।")

मृगशिरः, [स्] क्ली, (मृगस्येव शिरोऽस्य।) सप्तविंशतिनक्षत्रान्तर्गतपञ्चमनक्षत्रम्। तत्पर्य्यायः। मृगशीर्षम् २ आग्रहायणी ३। इत्यमरः। १।३।२३॥ (यथा, बृहत्संहितायाम्। १०।५।

"मृगशिरसि वत्सयाजक-
यजमानार्य्यजनमध्यदेशाश्च।")

तत्तु विड़ालपदाकृति तारात्रयात्मकं चन्द्राधिदैवतम्। इति ज्योतिषम्॥ गगनमध्ये तस्योदये कन्यालग्नस्य द्वात्रिंशत्पलानि गतानि भवन्ति। यथा,—

"मूषिकाशनपदाकृतौ विधौ
व्योममध्यमिलिते त्रितारके।
शारदेन्दुमुखि! कन्यकोदया-
दीक्षणानलकलाः कलावति!॥"

इति कालिदासकृतरात्रिलग्ननिरूपणम्॥

तत्र जातफलम्। यथा,—

"शरासनाभ्यासरतो विनीतः
सदागुरज्ञो गुणिनां गुणेषु।
भक्तानुपस्नेहभरेण पूर्णः
सन्मार्गवर्त्ती मृगजन्मभागी॥"

इति कोष्ठीप्रदीपः॥

मृगशिरा, स्त्री, (सर्व्वे दान्ता अकारान्ताश्चेति मृगशिरोऽन्तः। मृगशिर+टाप्।) मृगशिरोनक्षत्रम्। इति शब्दरत्नावली॥

मृगशिराः, [स्] पुं, (मृगस्येव शिरो यस्य।) मृगशिरोनक्षत्रम्। इत्यमरटीकायां रायमुकुटः॥

मृगशीर्षं, क्ली, (मृगस्य शीर्षमिव शीर्षमस्य।) मृगशिरोनक्षत्रम्। इत्यमरः॥ (यथा, भागवते। ५।२३।६।

"तथैव मृगशीर्षादीन्युदगयनानि।")

मृगशीर्षः, पुं, (मृगस्येव शिरोऽस्य।) मृगशिरोनक्षत्रम्। इति केचित्॥ इत्यमरटीकायां भरतः॥

मृगशीर्षा, स्त्री, (मृगशीर्ष+टाप्।) मृगशिरोनक्षत्रम्। इति त्रिकाण्डे वोपालितः। इत्यमरटीकायां भरतः॥ (यथा, बृहत्संहितायाम्। २१।६।

"मृगशीर्षाद्या गर्भा मन्दफलाः पौषशुक्लजाताश्च।")

मृगशीर्षा, [न्] पुं, (शीर्षस्य शीर्षन् इत्यादेशः। ततो मृगस्येव शीर्षास्य।) मृगशिरोनक्षत्रम्। इति केचित्॥ इत्यमरटीकायां भरतः॥

मृगा, स्त्री, (मृगः मृगमांसतुल्यः रसोऽस्त्यस्याः अर्श आदिभ्योऽच्।) सहदेवीलता। इति राजनिर्घण्टः॥

मृगाक्षी, स्त्री, (मृगस्येव अक्षि तद्वत्पुष्पं अक्षिणी वा अस्याः। अक्षि+"अच्क्ष्णोऽन्यतरस्याम्।" ५।४।७६। इति अच्। स्त्रियां ङीष्।) विशाला॥ (यथास्याः पर्य्यायः।

"ऐन्द्रीन्द्रवारुणी चित्रा गवाक्षी च गवादनी।
वारुणी चामराप्युक्ता सा विशाला महाफला।
श्वेतपुष्पा मृगाक्षी च मृगेक्षारुर्मृगादनी॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

मृगलोचनतुल्यनेत्रा स्त्री। इति मेदिनी। ये, ४४॥ (यथा, छन्दोमञ्जर्य्याम्। २।११।८।

"वज्रवेशा हरिप्लुर्म्मि-
र्गोपन्दाक्षीक्षतरतिपूर्त्तिः।
वाञ्छितसिद्धेः प्रणतिपरस्य
स्यादनुकूला जगति न कस्य॥")

मृगाङ्कः, पुं, (मृगः अङ्को यस्य।) चन्द्रः॥ (यथा, नैषधचरिते। १।७८।

"विनिद्रपत्रालिगतालिकैतवात्
मृगाङ्कचूडामणिवर्च्चनार्च्चितम्।")

कर्पूरः। इत्यमरः। १।३।१४॥ वायुः। इति विश्वः॥ मृगचिह्नम्। चन्द्रे तच्चिह्नकारणं यथा,—

"लोकच्छायामयं लक्ष्म तवाङ्के मृगसंस्थितम्।
न विदुः सोमदेवापि ये च नक्षत्रयोगिनः॥"

इति महाभारते हरिवंशः॥

यथा, दर्पणं प्राप्य पराङ्मुखा नयनरश्मयो ग्रीवास्थमेव सुखं दर्पणगतमिव पश्यन्ति एवं चन्द्रमण्डलं प्राप्य पराङ्मुखास्ते दूरत्वदोषात् पृथिवीमयत्वरूपामिव चन्द्रमण्डलगतां पश्यन्ति स एव चन्द्रे कलङ्क इत्युपचर्य्यते। इति तट्टीका॥ यच्चारोगस्य औषधविशेषः। यथा,

"स्याद्रसेन समं हेम मौक्तिकं द्विगुणं भवेत्।
गन्धकस्तु समस्तेन रसपादस्तु टङ्कणः॥
सर्व्वं तल्लोलकं कृत्वा काञ्जिकेन विशोधयेत्।
भाण्डे लवणपूर्णेऽथ पचेद् यामचतुष्टयम्।
मृगाङ्कसंज्ञको ज्ञेयो रोगराजनिकृन्तनः॥"

अपि च।

'रसस्य भस्मनो हेम पिष्टीकृत्य प्रयोजयेत्।
गुञ्जाचतुष्टयञ्चाज्यमरिचैर्भक्षयेन्नरः॥'

इति मधुमती॥

(एतन्नामकौषधान्तरं यथा,—

"रसभस्म हेमभस्म तुल्यं गुञ्जाद्वयं द्वयम्।
दोषं बुद्ध्वानुपानेन मृगाङ्कोऽयं क्षयापहः॥"*॥

इति वैद्यकरसेन्द्रसारसंग्रहे यक्ष्माधिकारे॥)

मृगाजीवः, पुं, (मृगैः आजीवतीति। जीव्+अच्।) व्याधः। इत्यमरः। २।१०।२१॥

मृगाण्डजा, स्त्री, (मृगाण्डात् जायते इति॥ जन्+डः+स्त्रियां टाप्। कस्तूरी इति राजनिर्घण्टः॥ (तथास्या विषयः।

"एतैः समस्तैर्द्विपलप्रमाणै-
रालोड्य सर्व्वं विधिना विपक्वम्।
कर्पूरकाश्मीरमृगाण्डजानां
चूर्णीकृतानां त्रिपलप्रमाणम्॥"

इति भैषज्यरत्नावलौ वातरोगे मध्यमनारायणतैले॥)

मृगात्, [द्] पुं, क्ली, (मृगान् अत्तीति। अद्+क्विप्।) व्याघ्रः। इति केचित्॥

मृगादनः, पुं, (अत्तीति। अद्+ल्युः। मृगस्य अदनः।) क्षुद्रव्याघ्रः। तत्पर्य्यायः। तरक्षुः २। इत्यमरः। २।५।१॥ तक्षुः ३ तरक्षुः ४ तरक्षकः ५। इति शब्दरत्नावली॥ बृहत्क्षुद्रकारे क्षुद्रारेखाचित्रे नेकड़ा इति ख्याते। इति भरतः॥ चीता इति ख्याते। इत्यजुतः॥

मृगादनी, स्त्री, (मृगैरद्यते भुज्यतेऽसौ इति॥ अद्+कर्म्मणि ल्युट्+स्त्रियां ङीष्।) इन्द्रवारुणी। सहदेवी। मृगेक्षारुः। इति राजनिर्घण्टः॥ (यथा,—

"शिरीषश्च महातिक्ता जरातुम्बी मृगादनी।"

इति गोविन्दविशारदकृतभैषज्यरत्नावल्याम् कुष्ठचिकित्सायाम्।) क्षुद्रव्याघ्री च॥

मृगान्तकः, पुं, (मृगाणां अन्तकः नाशकः।) चित्रव्याघ्रः। इति राजनिर्घण्टः॥

मृगारातिः, पुं, (मृगाणां अरातिः।) कुक्कुरः। इति शब्दमाला॥ मृगशत्रुः। यथा,—

"मार्गं मार्गं मृगयति मृगारातिरामे विरामे
शोकं शोकं गतवति गते लक्ष्मणे लक्ष्मणेन।"

इति महानाटकम्॥

मृगारिः, पुं, (मृगाणामरिः।) सिंहः। चाषः। इति मेदिनी। रे, २०६॥ कुक्कुरः। रक्तशिग्रुः। इति राजनिर्घण्टः॥

मृगावित्, [ध्] पुं, (मृगान् विध्यति इति। व्यध्+क्विप्। "अन्येषामपि दृश्यते।" ६। ३। १३७। इति दीर्घश्च।) व्याधः। इति जटाधरः॥ (मृगावेधनशीलः। यथा, भट्टिकाव्ये। ५।८२। "भ्रातरि न्यस्य यातो मां मृगावित् मृगयामसौ।")

मृगितः, त्रि, (मृग+क्तः।) अन्वेषितः। इत्यमरः॥

मृगी, स्त्री, (मृग+जातौ ङीष्।) मृगजातिस्त्री। इति व्याकरणम्॥ (यथाभिज्ञानशाकुन्तले। ६। "मृगीकालम्बितवल्कलस्य च तरोर्निर्मातुमिच्छा मयः

मद्भक्ते क्षणमग्रतस्य वामनयनं कण्डूयमानां मृगीम्॥")

अस्या दुग्धगुणाः छागीदुग्धगुणतुल्याः। यथा, 'मृगीणां जाङ्गलीत्यानां अजाचीरगुणं पयः।' इति भावप्रकाशः॥

पुलहभार्य्या। सा कश्यपकन्या। तस्या अपत्यं हरिणादि। यथा,—

"क्रोधाच्च जज्ञिरे कन्या द्वादशैवात्मसम्भवाः। ता भार्य्याः पुलहस्य स्युर्दंशी मन्दा इरावती॥ भूता च कपिला दंष्ट्रा कषा तिष्या तथैव च। श्येना च सरमा चैव सरसा चेति विश्रुताः॥ मृग्याःसु हरिणाः पुत्रा मृगाश्चान्ये प्रकीर्त्तिताः। ऋक्षवः शरभा ये च पुरुषाश्च ये॥" इति वह्निपुराणम्॥

छान्दसच्छन्दोविशेषः। यथा। रो मृगी। 'सा मृगीलोचना। राधिका श्रीपतेः।' इत्यमरः। इति छन्दोमञ्जरी॥ अपस्माररोगः। इति लोके ख्यातः॥ (होमोक्तसुद्राविशेषः॥)

मृगेक्षणा, स्त्री, (मृगैरीक्ष्यते प्रियत्वात् इति। ईक्ष्+ल्युट्+स्त्रियां टाप्।) मृगेक्षारुः। इति राजनिर्घण्टः॥ मृगनयना स्त्री च॥ (यथा, वृहत्संहितायाम्। ४८। १४। "काश्मीकलापनूपुरगुरुजघनोद्वहनविह्वलित-पदाभिः। श्रीमति मृगेक्षणाभिर्गृहेऽन्यभृतवसनुवच-नाभिः॥")

मृगेन्द्रः, पुं, (मृगाणामिन्द्रः श्रेष्ठः।) सिंहः। इत्यमरः। २। ५। १॥ (यथा, श्रीमद्भागवते। १। १२। २२। "मृगेन्द्र इव विक्रान्तो निषेवो हिमवानिव। तितिक्षुर्वसुधेवासौ सहिष्णुः पितराविव॥" भगवद् विभूतिः। यथा, श्रीमद्भगवद्गीतायाम्। १०। ३०। "मृगाणां च मृगेन्द्रोऽहं वैनतेयश्च पक्षिणाम्॥" छन्दोविशेषश्च॥)

मृगेन्द्रचटकः, पुं, (मृगेन्द्र इव विक्रमी चटकः।) श्येनपक्षी। इति जटाधरः॥

मृगेन्द्राणी, स्त्री, (मृगेन्द्रेण अश्यते इति। अश्+घञ्+गौरादित्वात् ङीष्।) वासकः। इति राजनिर्घण्टः॥ (विशेषोऽस्या वासकशब्दे ज्ञातव्यः॥)

मृगेक्षारुः, स्त्री, (मृगस्य प्रिया इक्षारुः।) श्वेतेक्षारवणी। मँधिनी इति हिन्दीभाषा॥ तत्पर्य्यायः। मृगाक्षी २ श्वेतपुष्पा ३ मृगादनी ४ चित्रवल्ली ५ बहुफली ६ कपिलाक्षी ७ मृगेक्षणा ८ चित्रा ९ चित्रफला १० पृथ्वी ११ विचित्रा १२ मृगचिर्भिटा १३ मरुजा १४ क्षुमिनी १५ देवी १६ कट्फला १७ लघुचिर्भिटा १८। अस्या गुणाः। दुर्जरत्वम्। गुरुत्वम्। मन्दानलकारित्वम्। रक्तपित्तहारित्वञ्च। इति राजनिर्घण्टः॥

मृगेक्षः, पुं, (मृगाणामिक्षः।) सुन्दरदृक्षः। इति राजनिर्घण्टः॥

मृग्यः, त्रि, (मृग्यते अन्विष्यते असौ। मृग्+कर्म्मणि यत्।) मृगितव्यः। अन्वेषणीयः। इति व्याकरणम्॥ (यथा, श्रीमद्भागवते। ७। ७। २३।

"देहस्तु सर्व्वसंघातो जगत्तस्थुरिति द्विधा। अत्रैव मृग्यः पुरुषो नेति नेतीत्यतत्त्यजन्॥")

मृज ऊ ष कि भूषे। शुद्धौ। इति कविकल्पद्रुमः॥ (चुरा०-पक्षे भ्वा०-पर०-सक०-सेट्।) ऊ अमार्जीत् अमार्ज्जीत्। ष मृजा। किं मार्ज्जयित्वा-लेपनेर्दिनात्। यो मार्ज्जयति प्रक्षार्थमिति हलायुधः। इति दुर्गादासः॥

मृज ल ऊ ष शुद्धौ। इति कविकल्पद्रुमः॥ (अदा०-पर०-सक०-सेट्।) शुद्धिरिह शुद्धीभावः शुद्धीकरणञ्च। ल मार्ष्टि तीर्थादकैर्नित्यमिति हलायुधः। ऊ अमार्ज्जीत् भस्मतो मलम्। अमार्ज्जीच्चाषि पचादीनिति भट्टिः। ष मृजा। इति दुर्गादासः॥

मृज्, पुं, (मृज्यते इति। मृज्+क्रुत्यल्युटो बहुलमिति कर्म्मणि कः।) वाद्यविशेषः। मादल इति भाषा। यथा। मर्दलो दारुजो मृजः। इति शब्दरत्नावली॥

मृजा, स्त्री, (मृज्यते इति। मृज्+"विडुभिदादिभ्योऽङ्।" ३। ३। १०४। इति अङ्+टाप् च।) मार्जनम्। इत्यमरः। २।६।१२१॥ (यथा, सुश्रुते चिकित्सितस्थाने २४ अध्याये। "अभ्यङ्गो मार्दवकरः कफवातनिरोधनः। धातूनां पुष्टिजननो मृजाबलवलप्रदः।")

मृज्य, त्रि, मृज्यते यत् इति। मृज्। "मृजेर्विभाषा।" ३। १। ११३। इति क्यप्।) मार्ज्यम्। मार्जनीयम्। इति सुबोधव्याकरणम्॥ (यथा, भट्टौ। ६। ५६।

"मन्युस्तस्य त्वया मार्ग्यो मृज्यः शोकश्च तेन ते॥")

मृड़ ग प्र मोदे। इति कविकल्पद्रुमः॥ (क्रा०-वा तुदा०-अक०-सेट्।) मोद इह हृष्टीकरणम्॥ ग मृड्नाति सरस्वत्या च यः सदेति हलायुधः। प्र मृड़ति दीनं दाता। अमर्डित्वा सहस्राचमिति भट्टिः। मर्डिता। इति दुर्गादासः॥

मृड़ः, पुं, (मृड़ति हृष्यतीति। मृड़्+इगुपधत्वात् कर्त्तरि कः।) शिवः। इत्यमरः। १। १। २३॥ (यथा, श्रीमद्भागवते। ४। २। ७। "प्राङ्निधनं मृड़ं दृष्ट्वा नाम्ब्यत्तदनादृतः।")

मृड़ङ्कः, पुं, (मृड़्णाति सुखयतीति। मृड़्+"मृड़ः कीकन् कंकणौ।" उणा० ४। २४। इति कंकणः।) बालकः। इत्युणादिकोषः॥

मृड़ा, } स्त्री, (मृड़+टाप् ङीप् च।) दुर्गा।
मृड़ी, } इति हलायुधः॥

मृड़ीकः, पुं, (मृड़तीति। मृड़्+"मृड़ः कीकन् कङ्कणौ।" उणा० ४। २४। इति कीकन्।) हरिणः॥

मृण, प्र हिंसे। इति कविकल्पद्रुमः॥ (तुदा०-पर०-सक०-सेट्।) मर्णिता। इति दुर्गादासः॥

मृणालं, क्ली, पुं, मृण्यते हिंस्यते भक्षणार्थं यत्। (मृण्+"तमिविधिभ्यिविड्भ्यिशिकुलिकपिपलिपच्छिभ्यः कालन्।" उणा० १। ११७। इति कालन्। पङ्कजादीनां नालम्।) मोसाम इति ख्यातम्। इति भरतः॥ (यथा, नैषधचरिते। १। १३७।

"मदर्थसन्देशहरणालमन्थरः प्रियः कियद्दूर इति त्वयोदिते।")

तत्पर्य्यायः। विसम् २। इत्यमरः। १।१०।४२॥ विशम् ३। इति हिरूपकोषः॥ पद्मनालम् ४ मृणाली ५ मृणालिनी ६ पद्मतन्तुः ७ विसिनी ८ नलिनीरुहम् ९। अस्य गुणाः। स्निग्धरत्वम्। तिक्तत्वम्। कषायत्वम्। पित्तदाहश्रमक्लक्लविकाररक्तवान्तिहरत्वञ्च। इति राजनिर्घण्टः॥ (मृणालकविशेषः। तत्पर्य्यायो यथा. "पद्मादिकन्दः मृणालकं करहाटञ्च कथ्यते। मृणालं मूलं भिस्साण्डं तच्चामूलञ्च कथ्यते॥" तथास्य गुणाः। विशार्घे मृणालकार्घे च॥ "मृणालं शीतलं हृद्यं पित्तदाहासृक्षिद्गुरु॥ दुर्ज्जरं स्वादुपाकञ्च स्तन्यानिलकफप्रदम्। संग्राहि मधुरं रूक्षं मृणालकमपि तद्गुणम्॥" इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

मृणालं, क्ली, (मृण+कालन्।) वीरणमूलम्। इति मेदिनी। ले, १२४॥ (अस्य पर्य्यायो यथा, मृणालमभयं सेव्यं लामज्जकमुशीरकम्॥" इति वैद्यकरत्नमालायाम्॥ "स्वादुशीतं मृणालञ्च सेव्यं लामज्जकन्तथा॥" इति गारुड़े पूर्व्वखण्डे २०८ अः॥)

मृणालिनी, स्त्री. (मृणालानि अस्याः सन्तीति। मृणाल+"पुष्करादिभ्यो देशे।" ५।२।१३५। इति इनिः। ङीप् च।) पद्मिनी। इति जटाधरः॥ सा तु पद्मयुक्तैश्च पद्मसम्हः पद्मसन्ता च॥ (यथा, रघुवंशे। १६। ७।

"विभर्त्ति चाकारमनिर्दृतानां मृणालिनी हैममिवोपरागम्।")

मृणाली, स्त्री, (मृणाल + गौरादित्वात् ङीष् ।) मृणालम् । इति राजनिर्घण्टः ॥ (यथा, उत्तरचरिते । १ ।

"परिम्लदिनमृणालीदुर्बलान्यङ्गकानि
तनुरसि मम ज्ञात्वा यत्र निर्मोमवाभा ॥",

(अल्पं मृणालं इति । मृणाल + अल्पार्थे ङीष् ।) खल्पमृणालजातिः । यथा,—

"सान्द्रं चन्दनमङ्गके वलयिता: पाणौ मृणालीलताः ।

इति राजशेखरः । इत्यमरटीकायां भरतः ॥

मृणाली, [न्] पुं, (मृणालमस्यास्तीति । मृणाल + इनिः ।) पद्मः । इति केचित् ॥

मृत्, [द्] स्त्री, (मृदूनाति प्रलये चूर्णयति स्वकारणे लीयत इति । मृद् + कर्मणि क्विप् ।) मृत्तिका । इत्यमरः । २ । १ । ४ । (यथा, मनुसंहितायाम् । ४ । ३६ ।

"मृदं गां देवतं विप्रं घृतं मधु चतुष्पथम् ।
प्रदक्षिणानि कुर्वीत प्रज्ञातांश्च वनस्पतीन् ॥"

(यथास्या गुणाः ।

"कषाया मारुतं पित्तमुष्णा मधुरा कफम् ॥
कोपयेन्मृन्मृत्सादींश्च रौक्ष्यादभुक्तश्च रूक्षयेत् ।
पूरयत्यविपक्वैव स्रोतांसि निरुणद्धि च ।
इन्द्रियाणां बलं हत्वा तेजोवीर्यौजसी तथा ।
पाण्डुरोगं करोत्याशु बलवर्णाग्निनाशनम् ॥"

इति माधवकरकृतरुग्विनिश्चये पाण्डुरोगाधिकारे ।) तुवरी । इति राजनिर्घण्टः ॥ * ॥

मृत्तिकाशौचं यथा,—

"दिवासन्ध्यासु कर्णस्थब्रह्मसूत्र उदङ्मुखः ।
कुर्य्यात् मूत्रपुरीषे तु रात्रौ चेद्दक्षिणामुखः ॥
गृहीतशिश्नश्चोत्थाय मृद्भिरभ्युद्धृतैर्जलैः ।
गन्धलेपक्षयकरं शौचं कुर्य्याच्चतुर्व्रतः ॥"

इति गारुडे ६४ अध्यायः ॥

मृतं, क्ली, (मृ + क्तः ।) याचितम् । इत्यमरः । २ । ६ । ३ ॥ याचनवृत्तिर्मरणमिव दुःखजनकत्वात् मृतं भावे कर्मणि वा क्तः । इति भरतः ॥ मृत्युः । इति हेमचन्द्रः ॥

मृतं, त्रि, याचितवस्तु । गतप्राणः । मरा इति भाषा । तत्पर्य्यायः । परासुः २ प्राप्तपञ्चत्वः ३ परेतः ४ प्रेतः ५ संस्थितः ६ प्रमीतः ७ । इत्यमरः ।२।६।३॥ कलौ मृतस्य धन्यत्वं यथा,

"धर्म्मः प्रव्रजितस्तपः प्रवसितं सत्यञ्च दूरे गतं
पृथ्वी मन्दफला जनाः कपटिनो लौल्ये स्थिता ब्राह्मणाः ।
सर्व्वाः स्त्रीवशगाः स्त्रियश्च चपलाः नीचा जनाः उन्नता
हा कष्टं खलु जीवितं कलियुगे धन्या नराः ये मृताः ॥"

इति गारुडे ११५ अध्यायः ॥

(कार्य्यावस्थाजीवितावस्थायामपि मृतत्वं तद्यथा,—

"चतुर्थे तु मृदे स्थाने भग्नदार्विव निष्क्रियः ।
कार्य्याकार्य्यविभागाज्ञो मृतादप्यधरो मृतः ॥"

इति माधवकरकृतरुग्विनिश्चये पानात्ययाधिकारे । यथा च ।

"उत्तिष्ठोत्तिष्ठ गच्छ त्वं वद मौनं समाचर ।
ये पराधीनतां यान्ति तेऽपि जीवन्ति के मृताः ॥"

इत्युद्भटः ॥)

मृतकं, क्ली, (मृत + स्वार्थे कन् ।) शवः । इति हेमचन्द्रः । ३ । २२६ ॥ मरणाशौचम् । यथा,

"यदि स्यात् सूतके सूतिर्मृतके च मृतिस्त्रधा ।
शेषेणैव भवेच्छुद्धिरहः शेषे द्विरात्रकम् ॥"

इति शुद्धितत्त्वम् ॥

मृतकल्पः, त्रि, (मृत + "ईषदसमाप्तौ कल्पब् । देश्यदेशीयरः ।" ५ । ३ । ६७ । इति कल्पप् ॥) मृतप्रायः । ईषदूनो मृतः । इति मृतशब्दादीषदूनार्थे कल्पप्रत्ययेन निष्पन्नम् ॥

मृतकान्तकः, पुं, (मृतकस्य अन्तकः नाशको भक्षकत्वात् ।) शृगालः । इति शब्दरत्नावली ॥

मृतजीवः, पुं, (मृतश्चासौ जीवश्चेति नीलशोणितादित्वात् विशेषणसमासः ।) तिलकवृक्षः । इति राजनिर्घण्टः ॥ (विवरणमस्य तिलकशब्दे ज्ञातव्यम् ॥)

मृतपः, पुं, (मृतः अपः कारणत्वेन यस्य शुक्लादित्वात् परत्वम् ।) सूर्य्यपिता । इति मार्कण्डशब्दटीकायां भरतः ॥

मृतमत्तः, पुं, (मृतेन शवेन मत्तः । भक्ष्यलाभात् ।) शृगालः । इति त्रिकाण्डशेषः ॥

मृतमत्तकः, पुं, (मृतमत्त + स्वार्थे कन् ।) शृगालः । इति शब्दरत्नावली ॥

मृतवत्सा, स्त्री, (मृता वत्सा यस्याः ।) मृतापत्या । अजीवत्सन्ताना । गर्भावधिवर्षपञ्चकं यावत् प्रनःपुनर्मृतसन्ताना । अस्या दोषशान्तिर्यथा,—

"सप्तमीस्नपनं वक्ष्ये सर्व्वलोकहिताय वै ।
जातस्य मृतवत्साया: सप्तमे मासि नारद ! ।
अथवा शुक्लसप्तम्यामेतत् सर्व्वञ्च शस्यते ॥
शुभतारावलं लब्ध्वा ज्ञात्वा वा विप्रवाचनम् ।
बालस्य जन्मनक्षत्रतिथिदैवान् यजेद्बुधः ॥
तद्वद्दृष्ट्वातुराणान्तु ज्ञत्वं स्वादितरेषु च ।
गोमयेनानुलिप्तायां भूमावेकामिवत्तदा ॥
तण्डुले रक्तशालीयैश्चरुं गोक्षीरसंयुतम् ।
निर्व्वपेत् सूर्य्यरुद्राभ्यां तन्मन्त्राभ्यां विधानतः ॥
कौर्म्मयेत् सूर्य्यदेवत्यं सप्तर्चञ्च घृताहुतौ: ।
जुहुयाद्वह्निसूक्तेन तद्वद्वायु नारद ! ॥
होतव्याः समिधस्तद्वत्तथैवार्कपलाशयोः ।
यवक्षणातिलैर्होमः कर्त्तव्योऽष्टशतं पुनः ॥
व्याहृतिभिरथाज्येन तथैवाष्टशतं द्विज ! ।
हुत्वा स्नानञ्च कर्त्तव्यमङ्गाङ्गेन च धीमता ॥
विप्रेण वेदविदुषा विधिवद्भंपाणिना ।
स्थापयित्वा तु चतुरः कुम्भान् कोणेषु शोभनान् ॥
पञ्चमञ्च पुनर्मध्ये दध्यक्षतविभूषितम् ।
स्थापयेदन्नयं कुम्भं सप्तधान्याभिमन्त्रितम् ।
सौरेण तीर्थतोयेन पञ्चरत्नसमन्वितम् ॥
सर्व्वान् सर्व्वौषधैर्युक्तान् पञ्चगव्यसमन्वितान् ।
पञ्चरत्नफलैर्युक्तान् वासोभिरभिवेष्टयेत् ॥
गजाश्वरथ्यावल्मीकसङ्गमात् हृदगोकुलात् ।
राजद्वारप्रदेशाच्च मृदमानीय निःक्षिपेत् ॥
चतुर्ष्वपि च कुम्भेषु रत्नगर्भेषु मध्यमम् ।
गृहीत्वा ब्राह्मणस्तन्तु सौवान्मन्त्रानुदीरयेत् ॥
सप्तभिरपि नारीभिरव्यङ्गाभिरधाप्लवम् ।
पूजितार्भिर्यथाशक्त्या माल्यवस्त्रविभूषणैः ।
सर्विप्राभिश्च कर्त्तव्यं मृतवत्साभिवेचनम् ।
दीर्घायुरस्तु बालोऽयं जीवपुत्रा च भाविनी ॥
आदित्यचन्द्रमाः सार्द्धं ग्रहनक्षत्रमण्डलैः ।
शक्रः सलोकपालो वै ब्रह्मविष्णुमहेश्वराः ।
एते चान्ये च देवौघाः सदा पान्तु कुमारकम् ॥
मित्रोऽग्निर्मा हुतभुक्षा च बालग्रहाः क्वचित् ।
पीडां कुर्व्वन्तु बालस्य मा मातुर्जनकस्य वै ॥
ततः शुक्लाम्बरधरा कुमारी पतिसंयुता ।
सप्तकं पूजयेद्भक्त्या स्त्रीणामथ गुरुं पुनः ॥
काञ्चनीञ्च ततः कृत्वा तिलपात्रोपरिस्थिताम् ।
प्रतिमां कूर्म्मराजस्य गुरवे विनिवेदयेत् ॥
वस्त्रकाञ्चनरत्नौघैर्भक्ष्यैः सघृतपायसैः ।
पूजयेद्ब्राह्मणं तद्वद्वित्तशाठ्यविवर्ज्जितः ॥
भुक्ता च गुरुणा चैव सह चार्य्या मखसन्ततिः ।
दीर्घायुरस्तु बालोऽयं यावद्वर्षशतं समम् ।
यत्किञ्चिदस्य दुरितं निःक्षिप्तं वडवानले ॥
ब्रह्मा रुद्रो वसु स्कन्दो विष्णुर्देवो हुताशनः ।
रक्षन्तु सर्व्वदुष्टेभ्यो वरदाः सन्तु सर्व्वदा ॥
एवमादीनि वाक्यानि वदन्तं पूजयेद्गुरुम् ।
शक्तितः कपिलां दद्यात् प्रणिपत्य विसर्ज्जयेत् ॥
गुरुश्च पुत्रसहितः प्रणम्य रविशङ्करौ ।
हुतशेषं तदाश्नीयादादित्याय नमोऽस्तु ते ॥
इदमेवाहुतोदेगदुःखस्वप्नेषु शस्यते ।
कर्त्तृजन्मदिनर्क्षाणां देवान् संपूजयेत् सदा ॥
शान्त्यर्थं शुक्लसप्तम्यामेतत् कुर्व्वन्न सीदति ॥
स चानेन विधानेन दीर्घायुरभवत्ततः ।
सम्वत्सराणामयुतं शशास पृथिवीमिमाम् ॥"

इति मात्स्ये ६४ अध्यायः ॥

तल्लक्षणशान्तौषधानि यथा,—

"गर्भः संजातमात्रोद्वा पञ्चात् मासाच्च वत्सरात् ।
म्रियते द्विस्त्रिवर्षाद्वा यस्याः सा मृतवत्सिका ॥
तत्र योगं प्रकर्त्तव्यं यथा शङ्करभाषितम् ॥
मार्गशीर्षे तथा ज्येष्ठे पूर्णिमालेपिते गृहे ।
नूतनं कलसं पूर्णं पूजयेन्नाटका: सुधीः ॥
शाखाफलसमायुक्तं नवरत्नसमन्वितम् ।
सुवर्णवृत्तिकायुक्तं षट्कोणमण्डले स्थितम् ।
तन्मध्ये पूजयेद्देवीं एकानीनामविश्रुताम् ॥
गन्धपुष्पाक्षतैर्धूपैर्दीपनैवेद्यसंयुतैः ।
पूजयेद्भक्तिभावेन मद्यमांसैः समस्तकैः ॥
ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा ।
वाराही च तथा चैन्द्री षट्पत्रेषु च मातरः ॥
पूजयेत्तत्पूतेन फेंकारे नाम विश्रुते ।

मृत्तिका

यो वै परीतं अवगेन शब्दं
गृह्णाति वा नो शृणुते स शीघ्रं ।
स वै मृतिं पश्यति यो न पश्येत्
छायां स्वकीयां धरणीप्रपन्नाम् ॥"

इति हारीते द्वितीयेस्थाने त्रयोदशेऽध्याये ॥)

मृत्कर:, पुं, (करोतीति कृ + क्यच् । मृदां कर: । घटादिनिर्म्माणत्वादस्य तथात्वम् ।) कुम्भकार: । इति त्रिकाण्डशेष: ॥

मृत्कांस्यं, क्ली, शराव: । इति त्रिकाण्डशेष: ॥

मृत्किरा, स्त्री, (मृदं किरतीति । कृ + "इगुपधज्ञाप्रीकिर: क: ।" ३।१।१३५ । इति क: । "ऋत इद्धातो: ।"७ । १ । १०० ॥ इति इत् ।) घुर्घुरी । इति त्रिकाण्डशेष: । घुर्घुरिया इति भाषा ॥

मृत्खलिनी, स्त्री, चर्म्मकषाहृच्च: । इति शब्दचन्द्रिका ॥

मृत्ताल, क्ली, (मृदं तालयति प्रतिष्ठापयतीति । तल् + णिच् + "कर्म्मस्यण् ।" ३ । २ । १ । इति अण् ।) आढकी । इति शब्दरत्नावली ॥

मृत्तालक, क्ली, (मृत्ताल + संज्ञायां कन् ।) तुवरिका । तुवरिकलाय इति अड़र इति च ख्यातम् । इत्यमरटीकायां भरत: । सौराष्ट्रमृत्तिका । इति राजनिर्घण्ट: ॥

मृत्तिका, स्त्री, (मृदेव इति । मृद् + "मृदस्तिकन् ।" ५।४।३६ । इति स्वार्थे तिकन् । स्त्रियां टाप् ।) तुवरी । इति राजनिर्घण्ट: ॥ मृत् । इत्यमर: । २ । १ । ४ ॥ माटी । इति भाषा । तत्पर्य्याय: । मृदा २ मृत्ति: ३ । इति भरत: ॥ (अस्या भक्षणात् पाण्डुरोगोत्पत्ति: । तद्यथा,

"मृत्तिकादनशीलस्य कृष्णत्वन्यतमो मल: ॥
कषाया मारुतं पित्तं उषरा मधुरा कफम् ॥"

इति माधवकरसंगृहीतरुग्विनिश्चये पाण्डुरोगाधिकारे । अन्यत् मृत्शब्दे द्रष्टव्यम् ।) स्नानकाले मृत्तिकालेपनविधिर्यथा,—

"मृदा प्रक्षाल्य लिङ्गन्तु द्वाभ्यां नाभेस्त्वधोपरि ।
अथच त्रिभि: कार्यं षड्भि: पादौ तथैव च ॥
कटिञ्च तिसृभिश्चापि हस्तयोर्दिश्च मृत्तिका: ।
प्रक्षाल्य कार्यं हस्तौ च द्विराचम्य यथाविधि ।
तत: संमार्जनं कृत्वा मृदमेवाभिमन्त्रयेत् ॥
अश्वक्रान्ते रथक्रान्ते विष्णुक्रान्ते वसुन्धरे ! ।
उद्धृतासि वराहेण कृष्णेनाभितबाहुना ॥
मृत्तिके हर मे पापं यन्मया पूर्व्वसञ्चितम् ।
मृत्तिके ब्रह्मदत्तासि प्रजया च धनेन च ॥
मृत्तिके त्वाञ्च गृह्णामि काम्यपेनाभिमन्त्रिताम् ।
मृत्तिके जहि मे पापं यन्मया दुष्कृतं कृतम् ।
त्वया हृतेन पापेन ब्रह्मलोकं व्रजाम्यहम् ॥"

इति वह्निपुराणम् ॥*॥

शौचार्थमृत्तिकाग्रहणविधिर्यथा,—

"आहृत्य मृत्तिकां कूलाल्लेपगन्धापकर्षणम् ।
कुर्य्यादतन्द्रित: शौचं विशुद्धेरुद्धृतोदकै: ॥
नाहरेत् मृत्तिकां विप्र: पांशुस्थान च कर्द्दमात् ।
न मार्गान्नोषरादेशाच्छौचशिष्टां परस्य च ॥
न देवायतनात् कूपात् गेहान्न च जलाशयात् ।
उपस्पृशेत्ततो नित्यं पूर्व्वोक्तेन विधानत: ॥"

इति कौर्म्मे उपविभागे १२ अध्याय: ॥

तस्या: परीक्षा मन्दिरशब्दे द्रष्टव्या: ॥

मृत्फली, स्त्री, (मृदि फलनमस्या: । ङीष् ।) कुष्ठौषधम् । इति हारावली ॥

मृत्यु:, पुं, (म्रियते असादिति मृ + "भृञिमृङ्भ्यां युक् तुट्च ।" उणा० । ३ । २१ । इति त्युक् ।) यम: । इति हेमचन्द्र: ॥ कंस: । यथा,—

"प्रत्यर्प्य मृत्यवे पुत्रान् मोचये कृपणामिमाम् ।
सुता मे यदि जायेरन् मृत्युर्वा न म्रियेत
यैत् ॥"

इति श्रीभागवते १० स्कन्धे १ । ४६ ॥

मृत्यु:, पुं,क्ली, प्राणवियोग: । तत्पर्य्याय: । पञ्चता २ कालधर्म्म: ३ दिष्टान्त: ४ प्रलय: ५ अत्यय: ६ अन्त: ७ नाश: ८ मरणम् ९ निधन: १० । इत्यमर: ॥ पञ्चत्वम् ११ मृतम् १२ मृति: १३ । इति तट्टीकायां रमानाथ: ॥ नैधनम् १४ । इति तट्टीकासारसुन्दरी ॥ संज्ञा १५ काल: १६ परलोकगम: १७ दीर्घनिद्रा १८ निमीलनम् १९ अस्तम् २० अवसानम् २१ । इति हेमचन्द्र: ॥ भूमिलाभ: २२ निपात: २३ विलय: २४ आत्ययिकम् २५ । इति शब्दरत्नावली ॥ अपय: २६ । (मरणार्थे यथा,—

"क्षीणस्य यस्य क्षुत्तृष्णे हृद्रोगैर्हृद्गतैस्तथा ।
न घ्राण्यतोऽन्नपानेच्छ तस्य मृत्युरुपस्थित: ॥
प्रवाहिका शिर:शूलं कोष्ठशूलञ्च दारुणम् ।
पिपासा बलहानिश्च तस्य मृत्युरुपस्थित: ॥"

इति सुश्रुते सूत्रस्थाने ३१ अ: ॥

"एकोत्तरं मृत्युशतमधर्म्मागा: प्रचक्षते ।
तत्रैक: कालसंज्ञस्तु शेषास्त्वागन्तव: स्मृता: ॥
दोषागन्तुजन्मृत्युभ्यो रसमन्त्रविशारदौ ।
रक्षेतां नृपतिं नित्यं यत्नाद्वैद्यपुरोहितौ ।"

इति च तत्र तत्स्थाने । ३४ अ: ॥)

तत्प्रमाणं यथा,—

"अहमात्मोद्धवामीषां भूतानां सुहृदीश्वर: ।
अहं सर्व्वाणि भूतानि तेषां स्थित्युद्भवाप्यय: ॥"

इति श्रीमद्भागवते ११ स्कन्धे । १६ । १० ॥

स तु ब्रह्मणो गुदतो जात: । यथा,—

"पायुर्यमस्य मित्रस्य परिमोक्षस्य नारद ! ।
हिंसाया निर्ऋते मृत्योर्निरयस्य गुदं स्मृतम् ॥"

इति श्रीभागवते २ स्कन्धे ५ अध्याय: ॥

कल्पान्तरे भवात् मायायां जात: । यथा,—

"हिंसा भार्य्या अधर्म्मस्य तयोर्जज्ञे तथानृतम् ।
कन्या च निकृतिस्ताभ्यां भयं नरकमेव च ॥
माया च वेदना चैव मिथुनं त्विदमेतयो: ।
मायाज्ञेय वै माया मृत्युं भूतापहारिणम् ।
वेदना च सुतस्त्वापि दु:खं जज्ञेऽथ रौरवात् ॥*॥

अस्यापत्यादि यथा,—

"मृत्योर्व्याधिर्जरा शोकस्तृष्णाक्रोधश्च जज्ञिरे ।
दु:खोत्तरा: स्मृता ह्येते सर्व्वे चाधर्म्मलक्षणा: ।
नैषां भार्य्यास्ति पुत्रो वा सर्व्वे ते ऊर्द्ध्वरेतस: ॥
निर्ऋतिस्त्वं तथा चान्या मृत्योर्भार्य्याभवन् सुते ! ।
मूलक्ष्मीर्नाम तस्याश्च मृत्यो: पुत्राश्चतुर्दश ॥
अलक्ष्मीरूचका क्षेते मृत्योरादेशकारिण: ।
विनाशकाले च नरान् भक्षन्त्येते क्षणुध्व तान् ॥
इन्द्रियेषु दशस्वेते तथा मनसि च स्थिता: ।
स्वे स्वे नरं स्त्रियं वापि विषये योजयन्ति च ॥
तथेन्द्रियाणि चाक्षम्य रागलोभादिभिर्नरान् ।
योजयन्ति तथा हानिं यान्ति धर्म्मादिभिर्हि च ! ॥
अहङ्कारगताश्चान्ये तथान्ये बुद्धिसंस्थिता: ।
विनाशाय नरस्त्रीणां यतन्ते मोहसंज्ञया: ।
एवं स्वधर्म्मोत्पन्ना: सर्व्वे चापि भवक्षरा: ॥"

इति मार्कण्डेयपुराणे दु:खज्ञानोपायनं नामाध्याय: ॥ विष्णुपुराणे प्रथमेंऽशे सप्तमोऽध्यायश्च ॥

मृत्युज्ञापकारिष्टानि यथा,—

दूतावैव उवाच ।

"अरिष्टानि महाराज ! शृणु वक्ष्यामि तानि ते ।
येषामालोकनान्मर्त्यं नित्यं जानाति योगवित् ॥
देवमार्गं ध्रुवं शुक्रं सोमच्छायामरुन्धतीम् ।
यो न पश्येन्न जीवेत् स नर: संवत्सरात् परम् ॥
अरश्मिं बिम्बं सूर्य्यस्य वह्निश्चेवांशुमालिनम् ।
दृष्ट्वैकादशमासेभ्यो नरो नोर्द्धं न जीवति ॥
वान्यां सूत्रे पुरीषे वा सुवर्णं रूपकं यथा ।
प्रत्यक्षमथवा स्वप्ने जीवितं दशमासिकम् ॥
दृष्ट्वा प्रेतपिशाचादीन् गन्धर्व्वनगराणि च ।
सुवर्णवर्णान् द्रुमांश्च नव मासान् स जीवति ॥
शूल: कृष्ण: कृष्ण: स्थूलो वोत्कस्माद्देव जायते ।
प्रकृतेश्च विवर्त्तेत तस्यापूच्चाष्टमासिकम् ॥
खड्गे यस्य पदं पार्श्वात् पार्श्वाग्रेणथवा भवेत् ।
पांशुकर्द्दमयोर्म्मध्ये वक्त्र मासान् स जीवति ॥
कपोतगृध्रकाकोला वायसो वापि मूर्द्धनि ।
क्रव्यादो वा खगो लीन: वक्षात्सायुःप्रदर्शक: ॥
हन्यते काकपङ्क्तीभि: पांशुवर्षेण वा पुन: ।
स्वच्छायाच्चान्यथा दृष्ट्वा षण्मासान् च जीवति ॥
अनभ्रे विद्युतं दृष्ट्वा दक्षिणां दिशमाश्रिताम् ।
पक्षौ नेत्रक्षणुर्व्वापि जीवितं त्रिमासिकम् ॥
घृते तैले तथादर्शे लोहे वा चात्मनस्तनुम् ।
य: पश्येद्विशिरस्कां वा सप्ताहूर्द्धं न जीवति ॥
यस्य वस्त्रसमो गन्धो गात्रे शुक्लसमोऽपि वा ।
तस्यार्द्धमासिकं ज्ञेयं योगिनो नृप ! जीवितम् ॥
यस्य वै स्नातमात्रस्य क्षुत्पादमवशुष्यति ।
पिबत्यच जलं शीघ्रो दशाहं सोऽपि जीवति ॥
स्तम्भितो मारुतो यस्य मर्म्मस्थानानि कृन्तति ।
न क्षुत्यत्वसुसंस्पर्शात्तस्य मृत्युरुपस्थित: ॥
कृष्णवानरयुग्मस्थो गायन् यो दक्षिणां दिशम् ।
स्वप्ने प्रयाति तस्यापि न मृत्यु: कालमृच्छति ॥
रक्तकृष्णाम्बरधरा गायन्ती हसती च यम् ।
दक्षिणाशां नयेन्नारी स्वप्ने सोऽपि न जीवति ॥
नग्नं क्षपणकं स्वप्ने दृश्यमानं प्रदृश्य वै ।
एवं वा वीक्ष्य वल्गन्तं विद्यान्मृत्युमुपस्थितम् ॥
आमस्तकतलाद्यस्तु निमग्नं पङ्कवारिभि: ।
स्वप्ने पश्येत्तथात्मानं नर: श्वो म्रियेत स: ॥

केशाङ्गारांस्तथा भस्म सृजगं निर्जलां महीम्।
दृष्ट्वा स्वप्ने दशाहन्तु मृत्युरेकादशेऽहनि॥
करालैर्विकटैः कृष्णैः पुरुषैरुद्यतायुधैः।
पाशाग्नैस्ताड़ितः स्वप्ने सद्यो मृत्युं समाप्नुयात्॥
सूर्य्योदये यस्य शिवा क्रोशन्ती याति सम्मुखम्।
विपरीतं परीतं वा स सद्यो मृत्युमृच्छति॥
यस्य वै सुक्तमात्रेऽपि हृदयं पीड्यते क्षुधा।
जायते दन्तसंघर्षः स मनायुरसंशयम्॥
दीपादिगन्धं नो वेत्ति भ्रमत्यग्निं तथा निशि।
नात्मानं परनेत्रस्थं वीक्षते न स जीवति॥
शुक्लायुधश्वाहोरात्रे दिवा ग्रहगणं तथा।
दृष्ट्वा मन्यते संक्षीणमात्मजीवितमात्मवान्॥
नासिका वक्रतामेति कर्णयोर्नम्रनोन्नती।
नेत्रञ्च वामं स्रवति यस्य तस्यायुरुद्गतम्॥
आरक्ततामेति सुखं जिह्वा वापि सिता तथा।
तदा प्राज्ञो विजानीयान्मृत्युमासन्नमात्मनः॥
उग्ररामभयानेन यः स्वप्ने दक्षिणां दिशम्।
प्रयाति तं विजानीयात् सद्यो मृत्युं नरेश्वर!॥
पिधाय कर्णौ निर्घोषं न शृणोत्यात्मसम्भवम्।
नश्यते चक्षुषोर्ज्योतिर्यस्य सोऽपि न जीवति॥
पतनो यस्य वै गर्त्ते स्वप्ने द्वारं पिधीयते।
न चोत्तिष्ठति यः स्वभात्तद्दन्तं तस्य जीवितम्॥
जङ्घा च दृष्टिर्न च संप्रतिष्ठा
रक्ता पुनः संपरिवर्त्तमाना।
सुखस्य चोष्मा शिथिरा च नाभिः
शंसन्ति पुंसामपरं शरीरम्॥
स्वप्नेऽग्निं प्रविशेद्यस्तु न च निष्क्रमते नरः।
जलप्रवेशादथवा तदन्तं तस्य जीवितम्॥
यश्चाभिहन्यते दुष्टैर्भूते रात्रावधो दिवा।
स मृत्युं समरात्रान्तात् पुमानाप्नोत्यसंशयम्॥
स्ववस्त्रममलं शुक्लं रक्तं पश्यत्यधोऽसितम्।
यः पुमान् मृत्युमापन्नं तस्यापि हि विनिर्दिशेत्॥
स्वभावैपरीत्यन्तु प्रकृतेश्च विपर्य्ययः।
कथयन्ति मनुष्याणां समासन्नौ यमान्तकौ॥
येषां विनीतः सततं यस्य पूज्यतमा मताः।
तानेव योऽवजानाति तानेव च विनिन्दति॥
देवता नार्चयेद्यस्तु द्विजान् गुरून् विप्रांश्च निन्दति।
मातापित्रोरसत्कारं जामातॄणां करोति यः॥
योगिनां ज्ञानविदुषामन्येषाञ्च महात्मनाम्।
प्राप्तान्तकालः पुरुषस्तद्विद्वेयं विचक्षणैः॥
योगिना सततं यत्नादरिष्टान्यवनीपते!।
संवत्सरान्ते तज्ज्ञेन फलदानि दिवानिशम्॥
विलोक्यानि सदा चैव फलपक्तिषु भीरुणा॥"
इति मार्कण्डेयपुराणे अलर्कोपाख्याने ४३ अः॥

कर्म्मविशेषान्मृत्युविशेषो यथा,—
"येनाशृतानि नीलानि प्रीतिभेदः कृतो नरः।
आलिकः श्रद्धानश्च स सुखं मृत्युमृच्छति॥
आगारदाहिनो दाहं क्षुधं चान्नप्रदायिनः।
प्राप्नुवन्ति नराः काले तस्मिन् मृत्यावुपस्थिते॥
देवब्राह्मणपूजायां ये रताश्चानसूयवः।
श्रद्धया दानदा धीमन्तस्ते नराः सुखमृत्यवः॥
यो न कामान्न संरम्भान्न देषाद्धर्म्मान्तृदृश्चेत्।
यथोक्तकारी सौम्यश्च स सुखं मृत्युमृच्छति॥
प्रीतं जयन्तीस्नानदानाक्षयोदकदायिनः।
प्राणान्नीं वेदनां कष्टां ये चान्ये देषकारिणः॥
मोहाज्ञानप्रदातारः प्राप्नुवन्ति महद्भयम्।
कूटसाक्षी मृषावादी यश्चासदनुभाषति वै।
ते मोहमृत्यवः सर्व्वे तथान्ये वेदनिन्दकाः॥"
इति मार्कण्डेयपुराणे पितापुत्रसंवादे १० अध्यायः॥ * ॥

मृत्युकालकर्त्तव्यक्षुद्रजन्तुवधप्रायश्चित्तं यथा,—
"वधेऽपि क्षुद्रजन्तूनां हिंसकानाञ्च पण्डितः।
कार्षापणं समुत्सृज्य मृत्युकाले प्रमुच्यते॥
अहिंसकानां क्षुद्राणां वधे प्रेतगुणं ध्रुवम्।
प्रायश्चित्तं मृत्युकाले कथितं पद्मयोनिना॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ७ अध्यायः॥

मृत्युसमये गङ्गागमनमावश्यकं यथा,—
"अहो सगरवंशेभ्यो निर्व्वाणमुक्तिदायिनी।
वैकुण्ठगामिनां मार्गसोपानरूपिणी वरा॥
अतोऽपि मृत्युसमये सतां पुण्यस्वरूपिणाम्।
आदौ पादौ च विन्यस्य मुखे तोयं प्रदीयते॥
गङ्गासोपानमारुह्य सन्तो यान्ति ममालयम्॥"
इति तत्रैव ३४ अध्यायः॥ * ॥

जन्मवतां मृत्योरपरिहार्य्यत्वं यथा,—
"मृत्युर्जन्मवतां वीर! देहेन सह जायते।
अद्य वाब्दशतान्ते वा मृत्युर्वै प्राणिनां ध्रुवः॥"
इति श्रीभागवते १० स्कन्धे १ अध्यायः॥

अपि च।
"जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च।
तस्मादपरिहार्य्येऽर्थे न त्वं शोचितुमर्हसि॥"
इति श्रीभगवद्गीता॥ * ॥

अकालमृत्युप्रशमनं स्तोत्रं यथा,—
सूत उवाच।
"स्तोत्रं तत्संप्रवक्ष्यामि मार्कण्डेयेन भाषितम्।
नारायणं सहस्राक्षं पद्मनाभं पुरातनम्।
प्रणतोऽस्मि हृषीकेशं किं मे मृत्युः करिष्यति॥१॥
गोविन्दं पुण्डरीकाक्षमनन्तमजमव्ययम्।
केशवञ्च प्रणतोऽस्मि किं मे मृत्युः करिष्यति॥२॥
वासुदेवं जगद्योनिं भानुमन्तमतीन्द्रियम्।
दामोदरं प्रणतोऽस्मि किं मे मृत्युः करिष्यति॥३॥
शङ्खचक्रधरं देवं क्षद्मरूपिणमव्ययम्।
अधोक्षजं प्रपन्नोऽस्मि किं मे मृत्युः करिष्यति॥४॥
वाराहं वामनं विष्णुं नारसिंहं जनार्द्दनम्।
माधवञ्च प्रपन्नोऽस्मि किं मे मृत्युः करिष्यति॥५॥
पुरुषं पुष्करं पुण्यं चेतनीजं जगत्पतिम्।
लोकनाथं प्रपन्नोऽस्मि किं मे मृत्युः करिष्यति॥६॥
सहस्रशीर्षं देवेशं शङ्खायत्तं सनातनम्।
महायोगं प्रपन्नोऽस्मि किं मे मृत्युः करिष्यति॥७॥
भूतात्मानं महात्मानं यज्ञयोनिमयोनिजम्।
विश्वरूपं प्रपन्नोऽस्मि किं मे मृत्युः करिष्यति॥८॥
मृत्युदीरितमाकर्ण्य स्तोत्रं तस्य महात्मनः।
अपयातस्ततो मृत्युर्विष्णुदूतैः प्रपीड़ितः॥
इति तेन जितो मृत्युर्मार्कण्डेयेन धीमता।
प्रपन्ने पुण्डरीकाक्षे नृसिंहे नास्ति दुर्लभम्॥

मृत्वाष्टकमिदं पुण्यं मृत्युप्रशमनं शुभम्।
मार्कण्डेयहितार्थाय स्वयं विष्णुरुवाच ह॥
य इदं पठति श्लोकं त्रिकालं नियतः शुचिः।
नाकाले तस्य मृत्युः स्यान्नरस्याच्युतचेतसः॥
हृत्पद्ममध्ये पुरुषं पुराणं
नारायणं शाश्वतमादिदेवम्।
विचिन्त्य शङ्खादिनिराजमानं
मृत्युं स योगी जितवांस्तदैव॥"
इति गारुड़े २३८ अध्यायः॥ * ॥

शुभकर्म्मप्रतिबन्धकमृत्युदा योगा यथा,—
"आदित्यभौमयोर्नन्दा भद्रा शुक्रशशाङ्कयोः।
बुधे जया गुरौ रिक्ता शनौ पूर्णा च मृत्युदा॥"
अपि च।
"रव्यादिदिवसैर्युक्ता विशाखादिश्चतुश्चतुः।
उत्पाटा मृत्यवः कालाः अष्टतानि यथाक्रमम्॥"
इति ज्योतिस्तत्त्वम्॥

मृत्युञ्जयः, पुं, (मृत्युं जितवान्। जि+खच्+मुम् च।) शिवः। इत्यमरः॥ तन्नामकारणं यथा,—
सूत उवाच।
"शिवो लीनो निर्गुणे चेत् श्रीकृष्णे प्राकृते लये।
कथं तव गुरोर्नाम मृत्युञ्जय इति श्रुतौ॥"
सुतपा उवाच।
"ब्रह्मणोऽन्ते मृत्युकन्या प्रनष्टा जलबिन्दुवत्।
संहर्त्री सर्व्वलोकानां ब्रह्मादीनां नराधिप!॥
कतिधा मृत्युकन्यानां ब्रह्मणां कोटिशो लये।
कालेन लीनः शम्भुश्च सत्त्वरूपी च निर्गुणः॥
मृत्युकन्या जिता शश्वत् शिवेन गुरुणा मम।
न मृत्युना जितः शम्भुः कल्पे कल्पे श्रुतौ श्रुतम्॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५१ अध्यायः॥

रोगशान्त्यर्थं तस्य पूजाविधिर्यथा,—
"मृत्युञ्जयं समाभूष्य लिङ्गं त्रिभुवनेश्वरम्।
रोगार्त्तो मुच्यते रोगाद्बद्धो मुच्येत बन्धनात्॥
यस्तु संपूजयेद्भक्त्या लिङ्गं मृत्युञ्जयाभिधम्।
यमोऽपि प्रणमेद्भक्त्या किं करिष्यति चामयः॥
तस्य पूजाविधिं वक्ष्ये शृणु सत्प्राणवल्लभे!।
जातिभेदे मृत्तिकान्तु गृहीत्वाशौचितोलकम्॥
निर्म्माय पार्थिवं लिङ्गं कांस्याधारे निवेशयेत्।
पौराणिकेन मन्त्रेण कुर्य्याच्च गठनं बुधः॥
स्नापयेत् पञ्चगव्येन प्रत्येकस्याष्टतोलकम्।
स्वमन्त्रेण प्रत्येकद्रव्येण स्नापयेत् सुधीः॥
रोगशत्रुकामनया नामगोत्रादिपूर्व्वकम्।
उपविश्यासने विप्रो धृत्वा धौते च वाससी॥
रुद्राक्षमालां कण्ठे वै धृत्वा भस्मत्रिपुण्ड्रकम्।
उपचारं षोड़शकं देयं भक्त्या प्रयत्नतः॥
सुवर्णस्यासनं देयं तथैवाभरणानि च।
वस्त्रयुग्मं प्रदद्यात्तु परिधेयं यथा भवेत्॥
मधुपर्कं कांस्यपात्रे दद्याद्घोडशयोग्यकम्।
विल्वपत्रसहस्रञ्च अभग्नं विनिवेदयेत्॥
एवं संपूज्य लिङ्गेकं जपेन्मन्त्रं सहस्रकम्।
ततो होमं प्रकुर्य्याच्च दक्षिणां ब्राह्मणे ददेत्॥

सुवर्णं वा तदर्द्धं वा देवि ! विभवमानतः ।
अङ्गहीना न कर्त्तव्या पूजा चाफलदा यतः ॥
एकलिङ्गं समाराध्य फलं स्यादन्यके युगे ।
तत् फलं लभते देवि ! कलौ संख्या चतुर्गुणा ॥
ताम्रपात्रे तु संस्थाप्य अशीतितोलकं जलम् ।
तच्चलेनैव देवेशि ! कुशैः संमार्ज्य रोगिणम् ॥
त्रिपेद्दीपशिखायाश्च मन्त्रमुच्चार्य्य मामकम् ।
एवंविधिविधानेन पूजयेन्मम लिङ्गकम् ॥
याट्टगयाट्टगभवेद्रोगो नाशमेति मयोदितः ।
साङ्गेन पूजयित्वा च लभते वाञ्छितं फलम् ॥
अङ्गव्यतिक्रमेणैव वृथा भवति वासना ।
रोगी प्रसुप्यते सद्यो भोगीव कञ्चुकोज्झितः ।
यदि मद्वचने भक्तिस्तदा मुक्तो भवेन्नरः ॥"

इति मृत्युञ्जयतन्त्रम् ॥

(ज्वरनाशकौषधविशेषः । तद्यथा,—
"अयक्तः त्रिहिदः शुण्ठी रोगघ्नः कीर्त्तिवर्द्धनः ।
यशःप्रदः शिवः साक्षात् मृत्युञ्जयरसः स्मृतः ॥
विषस्यैकस्तथा भागो मरीचं पिप्पली कणा ।
गन्धकस्य तथा भागो भागः स्याद्भृङ्गणस्य वै ॥
सर्व्वत्र समभागः स्याद्धिङ्गुलन्तु द्विभागकम् ।
चूर्णयेत् खल्लमध्ये तु सुद्रमानां वटीश्चरेत् ॥
रसस्यैत् समभागः स्याद्धिङ्गुलं नेष्यते तदा ।
मृत्युरूपं ज्वरं हन्ति मृत्युञ्जयरसः स्मृतः ॥
मृत्युर्विनिर्जितो यस्मात्तस्मान्मृत्युञ्जयः स्मृतः ।
मधुना लेहनं प्रोक्तं सर्व्वज्वरनिवृत्तये ॥
दशोदकानुपानेन वातज्वरनिवर्हणः ।
आर्द्रकस्य रसैः पानं दारुणे सान्निपातिके ॥
जम्बीररसयोगेन सर्व्वज्वरविनाशनः ।
अजाजीगुड़संयुक्तो विषमज्वरनाशनः ॥
तीव्रज्वरे महाघोरे पुरुषे यौवनान्विते ।
पूर्णमात्रा प्रदातव्या पूर्णं वटीश्चतुष्टयम् ॥
स्त्रीबालवृद्धयोगे च अर्द्धमात्राः प्रकीर्त्तिताः ।
नवज्वरे महाघोरे यामैकान्नाशयेद्ध्रुवम् ॥
मध्यज्वरे तथाजीर्णे त्रिरात्रान्नाशयेद्ध्रुवम् ।
सप्ताहात् सन्निपातोत्थं ज्वराजीर्णकसंज्ञकम् ॥"

इति मृत्युञ्जयो रसः ॥ इति वैद्यकरसेन्द्रसारसंग्रहे ज्वराधिकारे ॥ क्ली, ज्ञानविशेषः । यथा,
ब्रह्मवैवर्त्तपुराणे प्रकृतिखण्डे । ४६ । ६५ ।
"शम्भुश्च चतुरो वेदान् वेदाङ्गानितरांस्तथा ।
बालकं पाठयामास ज्ञानं मृत्युञ्जयं परम् ॥")

मृत्युनाशकः, पुं, (नाशयतीति । नश् + णिच् + ण्वुल् । मृत्योर्नाशकः ।) पारदः । इति राजनिर्घण्टः ॥ मरणहारके, त्रि ॥

मृत्युपुष्पः, पुं, (मृत्यवे निजनाशाय पुष्पमस्य । सति पुष्पोद्गमे अस्य नाशात्तथात्वम् ।) इक्षुः । इति रत्नमाला ॥

मृत्युफलः, पुं, (मृत्यवे स्वनाशाय फलमस्य ।) महाकालफलम् । इति मेदिनी । ले, १६२ ॥

मृत्युफला, स्त्री, (मृत्यवे फलमस्याः ।) कदली । इति मेदिनी । ले, १६२ ॥ (कदलीशब्देऽस्या विवरणं ज्ञातव्यम् ॥)

मृत्युबीजः, पुं, (मृत्यवे स्वनाशाय बीजमस्य ।) वंशः । इति त्रिकाण्डशेषः ॥

मृत्युभङ्गुरकः, पुं, मरणकालवाद्यनीयपटहः । यथा,
"भवेत् प्रेतपटहो मृत्युभङ्गुरकश्च सः ।"

इति त्रिकाण्डशेषः ॥

मृत्युभृत्यः, पुं, (मृत्योर्भृत्यः किङ्कर इव । मरणहेतुत्वात् ।) रोगः । इति राजनिर्घण्टः ॥

मृत्युवञ्चनः, पुं, (मृत्युं वञ्चयतीति । वञ्च + ल्युः ।) शिवः । विल्ववृक्षः । दण्डकाकः । इति मेदिनी । ने, २४५ ॥

मृत्युसूतिः, स्त्री, मृत्यवे सूतिः प्रसवो यस्याः सा । कर्कटी । यथा,—
"यथा कर्कटकी गर्भमाधत्ते मृत्युमात्मनः ।"

इति महाभारते विराटपर्व्व ॥

मृत्सा, स्त्री, (प्रशस्ता मृत् इति । मृत् + "सस्नौ प्रशंसायाम् ।" ५ । ४ । ४० । इति सः । टाप् ।) प्रशस्तमृत्तिका । इत्यमरः । २ । १ । ४ ॥

मृत्स्ना, स्त्री, (प्रशस्ता मृत् इति । मृत् + स्नः । टाप् ।) प्रशस्तमृत्तिका । (यथा, श्रीमद्भागवते । ८ । ६ । १० ।
"त्वमादिरन्तो जगतोऽस्य मध्यम्
घटस्य मृत्स्नेव परः परस्मात् ॥")
काची । इत्यमरः । २ । १ । ४ ॥ (अस्याः पर्य्यायो यथा.—
"सौराष्ट्री पार्व्वती मृत्स्ना काची च पङ्कपर्पटी ।"

इति वैद्यकरत्नमालायाम् ॥)

मृत्स्नाभाण्डकः, पुं, (मृत्स्नानिर्म्मितं भाण्डम् । ततः कन् । अभिधानात् पुंस्त्वम् ।) भाण्डविशेषः । तत्पर्य्यायः । सुधिका २ । इति त्रिकाण्डशेषः ॥

मृद, ग क्षुदिर् । इति कविकल्पद्रुमः ॥ (क्र्या०-पर०-सक०-सेट् ।) ग, मृद्नाति ममर्द्द । क्षुदिर् चूर्णीकरणे । इति दुर्गादासः ॥

मृद्, [न्] स्त्री, (मृद्यते चूर्णीक्रियते इति । मृद् + कर्म्मणि क्विप् ।) मृत् । मृत्तिका । इत्यमरः । २ । १ । ४ ॥ (यथा, मनौ । ४ । ३६ ।
"मृद्दं गां देवतं विप्रं घृतं मधुचतुष्पथम् ॥")

मृद्कुरः, पुं, हारीतपक्षी । इति हेमचन्द्रः । ४ । ४०७ ॥

मृदङ्गः, पुं, (मृद्यते आहन्यते असौ इति । मृद् + "विड़ादिभ्यः कित् ।" उणा० १ । १२० । इति अङ्गच् । सच कित् । यद्वा, मृत् अङ्गमस्येत्यमरटीकायां रघुनाथः ।) स्वनामख्यातवाद्यम् । तत्पर्य्यायः । मुरजः २ । इत्यमरः । १ । ७ । ५ ॥ (यथा, शिशुपालवधे । ११ । २ ।
"रञ्जनिविरक्तिरंशौ कामिनीनां भविष्यद्-
विरहविहितनिद्राभङ्गसंचेर्म्मदङ्गः ॥")
पटहः । घोषः । इति मेदिनी । गे, ४७ ॥ वंशः । इति शब्दमाला ॥ (मृदङ्गादेर्मङ्गलजनकत्वमाह स्मृतिः ।
"रोचनं चन्दनं हेम मृदङ्गं दर्पणं मणिम् ।
गुरूनग्निं तथा सूर्य्यं प्रातः पश्येत् सदा बुधः ॥")

अथ मृदङ्गादिविवरणम् ।
"मर्दलः खादिरः श्रेष्ठो हीनः स्यादन्यदारुजः ।
रक्तचन्दनजो वाद्यो गभीरध्वनिरुच्यते ॥
सार्द्धहस्तप्रमाणन्तु दैर्घ्यमस्य विधीयते ।
त्रयोदशाङ्गुलं वाममथवा द्वादशाङ्गुलम् ॥
दक्षिणञ्च भवेद्धीनमेकेनार्द्धाङ्गुलेन वा ।
करणानद्धवदनो मध्ये चैव पृथुर्भवेत् ॥
षण्मासीयो भवेद्वत्सस्तच्चर्म्मकरणं मतम् ।
मृत्तिकानिर्म्मितश्चैव मृदङ्गः परिकीर्त्तितः ॥
पातयेत् खरलिं वाद्यवादनार्थञ्च मर्दले ।
विभूतिगैरिकं भक्तं केन्दुकेन च संयुतम् ॥
यद्वा त्रिपीटकं देयं जौवनीसत्त्वमिश्रितम् ।
सर्व्वमेकत्र पिण्डन्तल्लेपः खरलिरुच्यते ॥
वामास्ये पूरिकां कृत्वा लेपं दद्याच्च दक्षिणे ।
एवं मर्दलकः प्रोक्तः सर्व्ववाद्योत्तमो मतः ॥
अस्य संयोगमासाद्य सर्व्वे वाद्याश्च शोभते ।
एतद्धि बीजकाष्ठे द्वेमर्द्धाङ्गुलं विदुः ॥ * ॥
तधि धोतेमिति ज्ञेयाः पाढ़वर्णा मृदङ्गजाः ।
धों दं धिं धिकटस्तद्धो ताकं दं दं धोगं धिधि ॥
खर्भ्भिं नं गटं दं धा कुटपाटा मता अमी ।
तधिं धोंधिं तक्कधी दों दं दं धिग्णां ततं तधि ॥
तक्क तं धं धि दों ताधि पाढ़खण्डे त्वयं क्रमः ।"
तथा च यतिमाने पाढ़खण्डः । द्रगतधेजां द्रगतधेजां धो धो धिकता धिका धोजां धोजां तक ततां धिका धोता द्रग ततां धि धि धिधि कड़ ताकड़ नाधोधिक धोजां धोताद्रगत ताद्रगत ताद्रगत ताधि । इति यतिमाने पाढ़खण्डः ॥ * ॥
"यतिरोढ़ोऽप्यवच्छेदो गजरो रूपकं ध्रुवम् ।
गलपः सारिगोगी च नादश्च कथितं तथा ।
प्रहरणं वृन्दनञ्च प्रवन्धा द्वादश स्मृताः ॥"
यथा । दं धात इत्येकताल्यां यतिः ॥ * ॥
ओढ़वाद्यं यथा । दां तथो तधिक तधिक दं धादं धा धोधि धोधि तत्त तत्तथ विध विदिग्रयां दिग्रयां टटु नं कि टटु नकि तद टङ्ग तद टङ्ग खवटङ्ग खवटङ्ग तगि नगि तगि नगि दां दां दं दं दीं दीं दं ता तथा । इत्योढ़वाद्यम् ॥ * ॥
अवच्छेदवाद्यं यथा । दं धातः दं धातः धिक्कि धिक्कि दिगणं दं धातः । इत्यवच्छेदवाद्यम् ॥ * ॥
गजरवाद्यं यथा । धोक टेक नेक टें डें गधो गधोङ्क टेङ्क धोगतकि धिक तकि धिक टेङ्कन धि धि कट तक धोक ताधिकट तक्कक तथोग तद्धीम् । इत्येकताल्यां गजरः ॥ * ॥ रूपकवाद्यं यथा । तकधिक् तकधिक्क धवितकि धवितक्कि धिक्क दं धातः । इति रूपकवाद्यम् ॥ * ॥
ध्रुवकवाद्यं यथा । तक्क तक्कट धिक्क धिक्कट । इति निसारतालै ध्रुवकः ॥ * ॥ गलपो यथा । तधिद्धि धिक तक तधि मलगं धा धा दें तधा ट्टनन । इत्येकताल्यां गलपः ॥ * ॥ सारिगोगी यथा । धोङ्कटेक तक्क धिक्क तकधिक् तकधो ट्टङ्कन ट्टङ्कन धोगक्क धोः । इति प्रथमखण्डः ॥ * ॥ टेक धोः धि खोहः टेक टेक

मृदुः

दक्क तगदक्क धिक्क तदिदक्क दं गदं गखो गखोक तक तक धिक्क तधिक् तधो टेष धोटेष घटे गल खोगगल खोग खोहट गें टगें खोहटेष। इत्यस्य छन्दनम्। इति सारिगोणो॥ नादो यथा,—

"दांकारत्रितयं पूर्व्वं दां धिगिति ततस्त्रयम्।
दीं दीं धिक्त्रयं यत्र इति नादः प्रचीप्रियः॥"
इति नादः॥

"इतं मानसमारब्धं शुद्धं कूटविनिर्म्मितम्।
सप्तषण्डमयं वाद्यं कथितं तदिहोच्यते॥" * ॥

द्रुतमानत्वात् प्रतितालो यथा। तत्तत तत्तत तक्कि तक्कि दिदं धिगनथो धिगनथो धिक्क धिक् धिक्क धिक्क नगि नगमि थो थो धि धि धिः दां दां धिक्क थो थो थो हथो हनमि थो नमिथो थोह थोह डेढि डेढि थोह थोह तटि तटि तटुक गीं गीं धगि धगि तत तधे तत तधे ततत गिडी गडी थोग थोग थीं थोगग थोगथो तत्ततो।

"इति सप्तपदान्याहुः कथितं वाद्यपण्डिताः।
प्रतितालेन तालेन पादवर्णसमासतः॥
गन्धर्व्वपतिना पूर्व्वमुर्व्वशीलास्यनर्त्तने।
सुधर्म्मारञ्जनार्थाय कथितं प्रकटीकृतम्॥"

प्रहरणं यथा। थोगक्का तद्धिका थाग कट गगों दं थोग दिद्धिक धिक्क धिकटेष। इत्येकतालां प्रहरणम्॥ * ॥

"वाद्यं विसृज्यते येन छन्दनं तन्निगद्यते।"

यथा,तद्धिथो दिम टेम तन्नः। इति छन्दनम्॥*॥

मर्द्दलस्त्रयोदशाङ्गुलवामसुखो द्वादशाङ्गुलदक्षिणसुखः। सुरजस्त्वष्टादशाङ्गुलवामसुखः सप्तदशाङ्गुलदक्षिणसुखः मर्द्दलसुरजयोरयं भेदः। इति सङ्गीतदामोदरः॥

मृदङ्गफलः, पुं, (मृदङ्गस्तदाकृति फलमस्य।) पनसवृक्षः। इति शब्दरत्नावली॥

मृदङ्गफलिनी, स्त्री, (मृदङ्गवत् फलमस्यस्याः। इनिः ङीप् च।) कोषातकी। इति राजनिर्घण्टः॥ (विषयोऽस्याः कोषातकीशब्दे ज्ञेयः॥)

मृदङ्गी, स्त्री, (मृदङ्गः तदाकारफलमस्यस्या इति। मृदङ्ग+अर्शआद्यच् ङीष् च।) घोषातकी। इति रत्नमाला॥ श्वेतघोषा इति भाषा॥

मृदा, स्त्री, (मृद्+टाप्।) मृत्तिका। इति हिरूपकोषः॥

मृदाकरः, पुं, वप्रम्। इति शब्दमाला॥

मृदितः, त्रि, मृदधातोः कर्म्मणि क्तः। चूर्णीकृतः। (यथा,—

"चिरोष्णतोये मृदितः फाणट इत्यभिधीयते॥"
इति वैद्यकपरिभाषायाम्॥)

मृदिनी, स्त्री, (मृद्+भावे कः। मृदः चूर्णीकरणमस्यस्याः। मृद+इनिः। स्त्रियां ङीप्।) प्रग्रस्तमृत्तिका। इति शब्दचन्द्रिका॥

मृदुः, त्रि, (म्रियते म्रदितुं शक्यते इति। मृद्+"प्रथिम्रदिभ्रस्जां संप्रसारणं सलोपश्च।" उणा० १।२६। इति कुः।) अतीक्ष्णः। कोमलः। इत्यमरः। ३।१।७८॥ (यथा,—

"मृदौ ज्वरे लघौ देहे प्रचलेषु मलेषु च।"
इति वैद्यकचक्रपाणिसंग्रहे ज्वराधिकारे॥)

गृहकन्यायां स्त्री। इति राजनिर्घण्टः॥ (पुं, नृपञ्जयराजपुत्रः। इति विष्णुपुराणे। ४। २१।३॥)

मृदुक्षणायसं, क्ली, (मृदु च तत् क्षणायसं चेति।) सौक्ष्मकम्। इति राजनिर्घण्टः॥

मृदुगणः, पुं, (मृदूनां गणः।) चित्रानुराधामृगशिरोरेवतीनक्षत्राणि। यथा। चित्रामित्र मृगान्त्यभं मृदुगणः। इति ज्योतिस्तत्त्वम्॥

मृदुगमना, स्त्री, (मृदु गमनमस्याः।) हंसी। इति राजनिर्घण्टः॥ मन्दगमना स्त्री च॥

मृदुचर्म्मी, [न्] पुं, (मृदु कोमलं चर्म्म त्वक्। तदस्त्यस्य। चर्म्म+"व्रीह्यादिभ्यश्च।"५।२।११२। इति इनिः।) भूर्जवृक्षः। इति राजनिर्घण्टः॥ कोमलत्वग्विशिष्टे, त्रि॥

मृदुच्छदः, पुं, (मृदुः छदः पत्रमस्य।) भूर्जवृक्षः। इति हेमचन्द्रः। ४।२१०॥ गिरिजपीलुवृक्षः। इति जटाधरः॥ कुक्कुरदुः। श्रीतालः। इति राजनिर्घण्टः॥

मृदुता, स्त्री, (मृदु+तल्+टाप्।) मृदुत्वम्। मृदोर्भावः। इति व्याकरणम्॥ (यथा, रघौ। ५।५४॥

"स चानुनीतः प्रणतेन पश्चात्
मया महर्षिर्मृदुतामगच्छत्॥")

मृदुतालः, पुं, (मृदूनि तालफलान्यस्य।) श्रीतालवृक्षः। इति राजनिर्घण्टः॥ कोमलतालश्च॥

मृदुत्वक्, [च्] पुं, भूर्जवृक्षः। इत्यमरः।२।४।४६॥

मृदुत्वचः, मृदवस्त्वचोऽस्य मृदुत्वक् चान्तः। भूर्जोऽथ भूर्जपत्रः स्यात् मृदुत्वक् पत्रपुष्पकः। इति कोषान्तरमिति मधुः। अदन्तनपुंसकत्वचशब्देन व्यावन्तत्वचाशब्देन वा विग्रहे मृदुत्वचोऽदन्तोऽपि भूर्जो भुजो बहुपटो बहुत्वको मृदुत्वचः। इति स्वामी। इत्यमरटीकायां भरतः॥

मृदुद्रवकं, क्ली, (मृदा मृत्परिणामेन उत् ऊर्द्धं नीयते यत् इति। उत्+नी+डप्रकरणे "अन्येष्वपि दृश्यते।" ३।२।४८। इत्यत्र काशिकोक्त्या डः। ततः स्वार्थे कन्।) सुवर्णम्। इति शब्दचन्द्रिका॥

मृदुपत्रः, पुं, (मृदूनि पत्राण्यस्य।) नलः। इति राजनिर्घण्टः॥ कोमलपर्णे, क्ली। तद्वति, त्रि॥

मृदुपत्री, स्त्री, (मृदूनि पत्राणि यस्याः।) चिल्लीशाकम्। इति राजनिर्घण्टः॥

मृदुपर्व्वकः, पुं, (मृदूनि पर्व्वाण्यस्य कप्।) वेतसः। इति राजनिर्घण्टः॥ कोमलपर्व्वविशिष्टे, त्रि॥

मृदुपुष्पः, पुं, (मृदूनि कोमलानि पुष्पाण्यस्य।) शिरीषवृक्षः। इति रत्नमाला॥ कोमलकुसुमयुक्ते, त्रि॥

मृदुपु

मृश

मृदुफलः, पुं, (मृदूनि फलान्यस्य।) विकङ्कतः। मधुनालिकेरिकः। विकण्टकवृक्षः। इति राजनिर्घण्टः॥ कोमलफलवति, त्रि॥

मृदुलं, क्ली, (मृदु मृदुत्वमस्त्यस्य। मृदु+"सिध्मादिभ्यश्च।"५।२।९७। इति लच्।) जलम्। इति शब्दचन्द्रिका॥ कोमले, त्रि। इत्यमरः। ३।१।७८॥ (यथा, शिशुपालवधे।६।२।

"मृदुलतान्तलतान्तमलोकयत्
स सुरभिं सुरभिं सुमनोभरैः॥")

मृदुलोमकः, पुं, (मृदूनि स्वल्पसुखानि लोमानि यस्य सः। स्वार्थे कन्।) शशकः। इति हेमचन्द्रः। ४।३६१॥ कोमललोमविशिष्टे, त्रि॥

मृदूत्पलं, क्ली, (मृदु कोमलं उत्पलम्।) नालपद्मम्। इति शब्दचन्द्रिका॥

मृद्गः, पुं, (मृदं पङ्कं गच्छति कारणत्वेन प्राप्नोतीति। गम्+डः।) मत्स्यभेदः। इति संक्षिप्तसारोणादिवृत्तिः॥

मृदङ्गः, क्ली, (मृदु कोमलं अङ्गं यस्य।) वङ्गम्। इति हेमचन्द्रः॥ (मृदु च तदङ्गञ्चेति।) कोमलावयवञ्च॥

मृद्वी, स्त्री, (मृदु+"वोतोगुणवचनात्।"४।१।४४। इति ङीष्।) कोमलाङ्गी। इति मुग्धबोधव्याकरणम्॥ अपि च।

"सद्यः पुरीपरिसरेषु शिरीषमृद्वी
सीता जवात्क्षितिरुहाणि पदानि गत्वा।
गन्तव्यमस्ति कियदित्यसकृद्ब्रुवाणा
रामाश्रुणः क्षतवती प्रथमावतारम्॥"
इति महानाटकम्॥

कपिलद्राक्षा। इति राजनिर्घण्टः॥

मृद्वीका, स्त्री, (मृदु+बाहुलकात् ईकन् टाप् च।) द्राक्षा। इत्यमरः। २।४।१०७॥ (यथा, बृहत्संहितायाम्। ५५।१०।

"जम्बूवेतसवाणीरकदम्बोदुम्बरार्জ্জুनाः।
बीजपूरकमृद्वीकालकुचाश्च सदाड़िमाः॥")

कपिलद्राक्षा। इति राजनिर्घण्टः॥

मृध, उ अ क्लिदि। इति कविकल्पद्रुमः॥ (भ्वा०-उभ०-अक०-सेट्। क्वावेट्।) उ, मर्द्धित्वा मृद्धा। अ, मर्धति मर्धते। क्लिदि आर्द्रीभावे। इति दुर्गादासः॥

मृधं, क्ली, (मर्धते क्लिद्यतीति। मृध्+कः।) युद्धम्। इत्यमरः। २।८।१०४॥ (यथा, हरिवंशे। १८२।१।

"अपयाते ततो देवे कृष्णे चैव महात्मनि।
पुनश्चावर्त्तत मृधं परेषां श्रेमहर्षणम्॥")

मृधा, अ, मृधा। इत्यमरटीकासारसुन्दरी॥

मृन्मरः, पुं, (मृत्सु मरः।) मायाजः। इति त्रिकाण्डशेषः॥

मृश, श चौ मृशि। इति कविकल्पद्रुमः॥ (तुदा०-परः सक०-अनिट्।) श, मृशति। चौ, चमार्शीत् अचार्शीत् अमृक्षत्। मृशि इति तालव्यान्तस्येव क्विपि रूपम्। तेन अनि-

दित्वाद्यत्वात् स्पर्शनं प्रणिधानञ्च अस्यार्थः। स्पर्शने। यथा, रघौ। ३। ६८।

"परान्दृशन् दुर्वसतेन पाणिना
तदीयमङ्गं कुलिशव्रणाङ्कितम्।"

प्रणिधाने।

"रामप्रवासे यन्दुग्धं दोषं जनापवादं सनरेन्द्रदृतुम्।"

कैकयीति भट्टिः। ३। ७॥

विमर्शं परामर्शः। मृषि इति मृर्ड्न्यान्तपाठो हेयः। तर्हि क्षमैवार्थः स्यात्। इति दुर्गादासः॥

मृष, तृ क } क्षान्तौ। इति कविकल्पद्रुमः॥
मृष, तृ ष } (अदन्त चुरा०-पर०-सक०-सेट्। अन्यत्र, अदन्त भ्वा०-उभ०-सक०-सेट्।) मूर्ड्न्योपधौ। क, मृषयति। ष, मृषति मृषते। इति दुर्गादासः॥

मृष, उ सेचनं। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्। क्त्वेट्।) उ, मर्षित्वा मृष्ट्वा। इति दुर्गादासः॥

मृष, क क्षान्तौ। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) क, मर्षयति। अयमात्मनेपदीत्येके। इति दुर्गादासः॥

मृष, ष ड उ क्षान्तौ। इति कविकल्पद्रुमः॥ (भ्वा०-उभ०-आत्म०-च-सक०-सेट्। क्त्वेट्।) ष, मर्षति मर्षते। ड, मर्षते। उ, मर्षित्वा मृष्ट्वा। अपि गुरुमपराधं मर्षति ब्राह्मणानामिति हलायुधः। इति दुर्गादासः॥

मृष, य ष क्षान्तौ। इति कविकल्पद्रुमः॥ (दिवा०-उभ०-सक०-सेट्।) य क्, मृष्यति मृष्यते ममर्ष। इति दुर्गादासः॥

मृषा, व्य, (मृष्यत इति। मृष्+का।) मिथ्या। इत्यमरः। ३। ४। २५॥ (यथा, नैषधचरिते। १। ६८।

"मृषान्धं साहिवले कुतूहला-
न्नलस्य नासीरगते वितेनतुः॥")

वृथा। इति तट्टीकासारसुन्दरी॥

मृषार्थकं, क्ली, (मृषा अर्थोऽस्य। बहुव्रीहौ कप्।) अत्यन्तासम्भवार्थवाक्यम्। तत्पर्य्यायः। आहत्यम् २। इत्यमरः। १। ६। २१। अत्यन्तासम्भवार्थे वर्त्तते। आहन्यते स्म आहतं क्तः। मृषा मिथ्या अर्थोऽस्य मृषार्थकं इह मृषार्थं यत् सर्व्वथा न घटते। यथा,—

"मृषा वन्ध्यासुतो याति खपुष्पकृतशेखरः।
कूर्म्मलोमतनूत्राणः शशशृङ्गधनुर्द्धर इति॥
यावज्जीवमहं मौनी ब्रह्मचारी पिता ममेति।
अस्य चायं भेदः मौनित्वं ब्रह्मचारित्वं अन्यत्र सिद्धमेव वन्ध्यासुतत्वं खपुष्पत्वञ्चान्यत्रासिद्धमिति। इति भरतः॥

मृषाध्यायी, [न्] पुं, (मृषा ध्यायति चिन्तयतीति। ध्यै+णिनिः।) बकः। यथा,—

"कच्छो बको वकोटश्च तीर्थसेवी च तापसः।
मौनघाती मृषाध्यायी निश्चलाङ्गश्च दाम्भिकः॥"

इति राजनिर्घण्टः॥

मृषालकः, पुं, (मृषा मिथ्या अचिरस्थायित्वेन मुकुलोद्गमकाल एवेत्यर्थः। अलं अलङ्करणं कायति प्रकाशयतीति। कै+कः।) आम्रवृक्षः। इति शब्दचन्द्रिका॥

मृषावादः, पुं, (मृषा मिथ्या वादः कथनम्।) मिथ्यावाक्यम्। तत्पर्य्यायः। चट्टरी २। इति जटाधरः॥ (यथा, महाभारते। ३। १८८। ३३।

"बहवो स्त्रीक्षराजान! पृथिव्यां मनुजाधिप!।
मृषानुशालिनः पापाः मृषावादपरायणाः॥")

मृषावादी, [न्] त्रि, (मृषा वदतीति। वद्+णिनिः।) मिथ्यावादकः। तत्पर्य्यायः। मृषोद्यः। इति शब्दमाला॥ मिथ्याभिधोक्ता, च॥

मृषोद्यं, क्ली, (मृषा+वद्+"राजसूयसूर्य्यमृषोद्यरुच्यकुप्यकृष्टपच्याव्यथ्याः।" ३। १। ११४। इति कर्म्मणि क्यप्। निपातितश्च।) मिथ्यावाक्यम्। इति मुग्धबोधव्याकरणम्॥ (यथा, भट्टिकाव्ये। ५। ६०।

"मृषोद्यं प्रवदन्तीं तां सत्यवत्यो रघूत्तमः॥")

मृषोद्यः, त्रि, मिथ्यावादी। इति शब्दमाला॥

मृष्टं, क्ली, (मृज+क्तः।) मरिचम्। इति राजनिर्घण्टः॥

मृष्टः, त्रि, (मृज+क्तः।) शोधितम्। इत्यमरः। ३। ४। ५६॥ (यथा, हृहत्संहितायाम्। ८५। ६।

"असुभकरमतोऽन्यथाप्रदिष्टं
स्थितपतितं च करोति मृष्टमन्नम्॥")

मृष्टिरुकः, पुं, वदान्यः। मिष्टाशी। अतिथिप्रिय इति मेदिनी। के, २०६॥

मृ, गि वधे। इति कविकल्पद्रुमः॥ (क्र्या०-पर०-सक०-सेट्।) गि, मृणाति। मूर्णः। मूर्त्तिः। इति दुर्गादासः॥

मे, ङ प्रतीदाने। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-अनिट्।) प्रतीदानं परिवर्त्तः। ङ, मयते धान्येन माषं लोकः। इति दुर्गादासः॥

मे, त्रि, मह्यम्। आमाके इति भाषा। मम आमार इतिभाषा। एते अस्मच्छब्दस्य चतुर्थीषष्ठ्येकवचनाभ्यां निष्पन्ने। इति व्याकरणम्॥

मेक, पुं, (मे इति कायति शब्दं करोतीति। के शब्दे+कः।) छागः। इति राजनिर्घण्टः॥

मेक(ख)लकन्यका, स्त्री, (मेक(ख)लः मेखलायुक्तः विन्ध्यपर्व्वतः तस्य कन्यका। तस्य नितम्बदेशात् निःसृतेत्यर्थः।) नर्म्मदानदी। इत्यमरः। १। १०। ३२॥

मेक(ख)लाद्रिजा, स्त्री, (मेक(ख)जात् नितम्बदेशोपलक्षितात् अद्रेर्जाता। जन+डः+स्त्रियां टाप्।) नर्म्मदानदी। यथा,—

"रेवेन्दुजा पूर्व्वगङ्गा नर्म्मदा मेकलाद्रिजा।"

इति हेमचन्द्रः॥

मेच्चणं, क्ली, यज्ञीयपात्रविशेषः। (यथा, आश्वलायनश्रौतसूत्रे। २। ६। १२।

"मेच्चणेनादायावदानसम्पदा जुहुयात्॥")

यथा, मेच्चणादीनाञ्च छन्दोगपरिशिष्टम्।

"इध्मजातीयमिध्मार्हप्रमाणं मेच्चणं भवेत्।
दृत्तं वार्क्षञ्च पृथ्वग्रमवदानक्रियाक्षमम्॥"

इध्मार्हप्रमाणम्।

प्रादेशद्वयमिध्मस्य प्रमाणं परिकल्पितमिति। तदर्हम्। एषेव दर्व्वी। विशेषस्तु महासुवे

"दर्व्वी द्व्यङ्गुलपृथ्वग्रा तुरीयेण तु मेच्चणम्।
सुवलोडूखले वार्क्षे खायते सुद्रुचौ तथा॥"

इति संस्कारतत्त्वम्॥

मेखला, स्त्री, (मीयते प्रक्षिप्यते कायमध्यभागे इति। मि+संज्ञायां खलः गुणश्च स्त्रियां टाप्। इत्यमरटीकायां भरतमतम्।) स्त्रीकट्याभरणम्। चन्द्रहार गोट् इत्यादि भाषा॥ (यथा, रघुवंशे। ८। ६४।

"असमाप्त विलासमेखलां
किमिदं किन्नरकण्ठि! सुप्यते॥")

तत्पर्य्यायः। काञ्ची २ सप्तकी ३ रसना ४ सारसनम् ५। इत्यमरः। २। ६। १०८॥ काञ्चिः ६ रशना ७ कक्षा ८ रसनम् ९ रशनम् १० कक्ष्या ११ सप्तका १२ सारशनम् १३। इति शब्दरत्नावली॥ कलापः १४। इति जटाधरः॥ सारसनं स्त्रीकट्यां वस्त्रयन्त्रनम्। इति स्वामी॥ केचित्तु।

"एकयष्टिर्भवेत् काञ्ची मेखला त्वष्टयष्टिका।
रसना षोड़श ज्ञेया कलापः पञ्चविंशकः॥"

इति पठन्ति। इह त्वभेदात् पर्य्यायता। इति भरतः॥ खड्गादिनिबन्धनम्। इत्यमरः। २। ८। ६०॥ शिक्यनिका। चर्म्मरज्ज्वादि। सुष्टिदार्ढ्यार्थं उपर्य्यधो लौहबन्धः। इत्येके। इत्यपि भरतः॥ * ॥ शोणितम्बः। इति मेदिनी। खे, १२५॥ नर्म्मदानदी। इति शब्दरत्नावली॥ पृश्निपर्णी। इति राजनिर्घण्टः॥ *॥ उपनयनकाले धारणीयसूत्रनिर्म्मितसूत्रत्रयम्। यथा। अथैनं माणवकमाचार्य्यस्त्रिः प्रदक्षिणं त्रिवृत्तसूत्रमेखलां परिधापयन् मन्त्रद्वयं वाचयति। इति भवदेवभट्टः॥ अपि च। गोभिलः। सूत्रकाण्डनाम्नो रसनाः। सूत्रं शरः। तालुनः शरस्त्रुत्वा तालुनी। रसना मेखला। तथा च मनुः।

"मौञ्जी त्रिवृत्समा श्लक्ष्णा कार्य्या विप्रस्य मेखला।
क्षत्रियस्य च मौर्व्वीया वैश्यस्य शणतान्तवी॥
सूत्राभावे तु कर्त्तव्या कुशाश्मन्तकबल्वजैः।
त्रिवृता ग्रन्थिनैकेन त्रिभिः पञ्चभिरेव वा॥"

इति संस्कारतत्त्वम्॥

अन्यच्च।

"गर्भाष्टमेऽब्दे कुर्व्वीत ब्राह्मणस्योपनायनम्।
दण्डी च मेखली सूत्री कृष्णाजिनधरो मुनिः॥
मौञ्जी त्रिवृत्समा श्लक्ष्णा कार्य्या विप्रस्य मेखला।
मौञ्जभावे कुशैनार्ष्यग्रन्थिनैकेन च त्रिभिः॥"

इति कौर्म्मे उपविभागे ११ अध्यायः॥

होमकुण्डोपरिस्थदृष्टिवेष्टनविशेषः। यथा, वशिष्ठपञ्चरात्रे।

"यावान् कुण्डस्य विस्तारः खननं तावदिष्यते।
हस्तैके मेखलास्तिस्रो वेदाग्निनयनाङ्गुलाः॥
कुण्डे द्विहस्ते ता ज्ञेया रसवेदगुणाङ्गुलाः।
चतुर्हस्ते तु कुण्डे ता वसुतर्कयुगाङ्गुलाः॥"
मेखला ब्रह्मचारिमेखलावत् कुण्डवेष्टिता मृद्घटिता ताश्च खातदेशाद्दाक्षे एकाङ्गुलिरूपं कण्डं परित्यज्य उच्छ्रायेण विस्तारेण चैत्यादिक्रमेण वेदाद्यङ्गुलाः एतद्विपरीतास्तन्त्रान्तरोक्ता व्यवहारविरुद्धाः। वेदाश्चलारः अग्नयश्चयः नयने द्वे रसाः षट् गुणाश्चय। वसुतर्कयुगानि अष्टषट्चत्वारि। पिङ्गलामतेऽपि। खातादेकाङ्गुलं त्यक्त्वा मेखलानां विधिर्भवेत्। इति तिथ्यादितत्त्वे दुर्गोत्सवतत्त्वम्॥ (यज्ञवैदनस्तत्त्वम्। यथा, श्रीमद्भागवते। ४। ५। १५।
"ऋत्विजोऽयजयंस्तत्र दीक्षयाञ्चक्रिरे तनुम्।
कुण्डेष्वग्नीनयन् केचिद्विभिर्वेदिमेखलाः॥"
"मेखलाः सीमास्तत्राणि।" इति तट्टीकायां श्रीधरस्वामी॥)
मेखलकन्यका, स्त्री, (मेखलस्य मेखलोपलक्षितस्य विन्ध्यगिरेः कन्यकेव प्रसूता।) नर्म्मदानदी। इत्यमरटीकायां भरतः॥
मेघः, पुं, (मेहतीति। मिह्+घञ्। "न्यङ्क्वादीनाञ्च।" ७। ३। ५३। इति कुत्वम्।) मुस्तकः। राक्षसः। इति शब्दरत्नावली॥ स्वनामख्यातद्रव्यपदार्थः। मेहति सिञ्चति यः। तत्पर्य्यायः। अब्भम् २ वारिवाहः ३ स्तनयित्नुः ४ बलाहकः ५ धाराधरः ६ जलधरः ७ तड़ित्वान् ८ वारिदः ९ अम्बुमुत् १० घनः ११ जीमूतः १२ सुदिरः १३ जलमुक् १४ धूमयोनिः १५। इत्यमरः। १। ३। ७॥ अभ्रम् १६ पयोधरः १७ अम्भोधरः १८ व्योमधूमः १९ घनाघनः २० वायुदारः २१ गभस्वरः २२ कन्धरः २३ कन्धः २४ नीरदः २५ गगनध्वनः २६ वारिमुक् २७ वार्मुक् २८ वनमुक् २९ अब्दः ३० पर्ज्जन्यः ३१ नभोगजः ३२ मदयित्नुः ३३ कदः ३४ कन्दः ३५ गवेडुः ३६ गदामरः ३७ खतमालः ३८ वातरथः ३९ श्वेतनीलः ४० नागः ४१ जलकरङ्कः ४२ पेचकः ४३ भेकः ४४ दर्दुरः ४५। इति शब्दरत्नावली॥ अम्बुदः ४६ तोयदः ४७ अम्बुवाहः ४८। इति रत्नमाला॥ पयोदः ४९ गदाम्बरः ५० गाढ़वः ५१ वारिमसिः ५२। इति चिकाण्डशेषः॥ तद्वैदिकपर्य्यायाः। अद्रिः १ यावा २ गोत्रः ३ वलः ४ अश्मा ५ पुरुभोजाः ६ वलिग्नान् ७ अश्मा ८ पर्व्वतः ९ गिरिः १० व्रजः ११ पर्वः १२ वराहः १३ शम्बरः १४ रौहिणः १५ रैवतः १६ पलिगः १७ उपरः १८ उपलः १९ चमसः २० अद्रिः २१ अभ्रम् २२ बलाहकः २३ मेघः २४ इतिः २५ ओदनः २६ वृत्रनिः २७ वृत्रः २८ असुरः २९ कोशः ३०। इति त्रिंशन्मेघनामानि। इति वैद्यनिघण्टौ। १।१०॥ (यथा, उत्तररामचरिते। २।

"मेघमालेव यश्चायमारादपि विभाव्यते॥")
मेघनायका यथा,—
"त्रियुते श्राकवर्षे तु चतुर्भिः श्रोधिते क्रमात्।
आवर्त्तो विह्नि सम्वर्त्तः पुष्करं द्रोणमम्बुदम्॥"
एषां फलानि।
"आवर्त्तो निर्जलो मेघः सम्वर्त्तश्च बहूदकः।
पुष्करो दुष्करजलो द्रोणः शस्यप्रपूरकः॥"
इति ज्योतिस्तत्त्वम्॥*॥
त्रेतायुगे तस्योत्पत्तिर्यथा,—
"अपां विह्नेः प्रतिगते तदा मेघाम्बुना तु वै।
मेघेभ्यस्तनयित्नुभ्यः प्रवृत्तं वृष्टिसर्ज्जनम्॥
सकृदेव तया वृष्ट्या संपृक्ते पृथिवीतले।
प्रादुरासंस्तदा तासां वृक्षा वै गुच्छसङ्गिताः॥
सर्व्वसत्त्वप्रभोगस्तु तासां तेभ्यः प्रजायते।
वर्त्तयिष्यन्ति ते स्वस्थास्त्रेतायुगसुखे प्रजाः॥"
इति कौर्म्मे २६ अध्यायः॥*॥
प्रलयकालीनमेघा यथा,—
"ततो गजकुलोन्नादास्तनितैः समलङ्कृताः।
उत्तिष्ठन्ति सदा योनि घोराः सम्वर्त्तका घनाः॥
केचिन्नीलोत्पलश्यामाः केचित् कुसुमसन्निभाः।
धूम्रवर्णास्तथा केचित्तथा पीताः पयोधराः॥
केचिद्रक्ताभवर्णाश्च शूलाः चारनिभास्तथा।
शुक्लकुन्दनिभाश्चान्ये जात्राञ्जननिभाः परे॥
मनःशिलानिभाश्चान्ये कपोतसदृशाः परे।
केचिद्गव्राज्यवर्णाभास्तथान्ये क्षीरसन्निभाः॥
तथा कर्व्वूरवर्णाभा भिन्नाञ्जननिभास्तथा।
इन्द्रगोपनिभाः केचित् हरितालनिभास्तथा॥
काकाण्डकनिभाः केचिदुत्तिष्ठन्ति घना दिवि।
केचित् पर्व्वतसङ्काशाः केचिद्गजकुलोपमाः॥
कूटागारनिभाश्चान्ये केचिन्नीलकुलोत्कटाः।
बहुरूपा घोररूपा घोरस्वननिनादिनः।
तदा जलधराः सर्व्वे पूरयन्ति नभस्थलम्॥
ततस्ते जलदा घोरा वारिणा भास्करात्मजाः।
समधा संवृतात्मानस्तमग्निं शमयन्त्युत॥
ततस्ते जलदा वर्षं वर्षन्तोह महौघवत्।
सुघोरमग्निवं सर्व्वं नाशयन्ति च पावकम्॥
प्रवृत्तेन तदात्यर्थमम्भसा पूर्य्यते किल।
अद्भिस्तेजोंशभूतत्वात्तदाग्निं प्रविशत्यपि॥
नष्टे चाग्नौ वर्षशते पयोदा जलसम्भवाः।
प्लावयन्त्योघ सुवनं महाजलपरिप्लवैः॥
धाराभिः पूरयन्तीदं चोद्यमानाः स्वयम्भुवा।
उदन्वां सलिलौघैश्च वेला इव महोदधेः॥
यद्वद्द्वीपा तथा पृथ्वी जलैः संछाद्यते भृशम्।
आदित्यरश्मिभिः पीतं जलमम्भसु तिष्ठति॥
पुनः पतति तद्भूमौ पूर्य्यते तेन चार्णवाः॥"
इति कौर्म्मे उपविभागे ४२ अध्यायः॥*॥
मेघस्य उत्पत्तिर्यथा,—
"तेजो ह सर्व्वभूतेभ्य आदत्ते रश्मिभिर्जलम्
वसुन्नात्मभसां योगादग्नयः प्रवहन्त्यपः॥
ततोऽयनवशात् काले परिवृत्तो दिवाकरः।
नियच्छति पयो मेघे शुक्लाशुक्लैर्गभस्तिभिः॥
अभस्या प्रपतन्त्याप्यो वायुना समुदीरिताः।
सर्व्वभूतहितार्थाय वायुभूताः समन्ततः॥
ततो वर्षति गोऽम्भांसि सर्व्वभूतविवृद्धये।
वायव्यं स्तनितञ्चैव विद्युदग्निसमप्रभम्॥
मेरुसानुमिहेत्यातो मेघत्वं यञ्जयन्ति च।
भ्रमियन्ति यथा चापस्तदन्तं कवयो विदुः॥"
अपि च।
"मेघानां पुनरुत्पत्तौ त्रिविधा योनिरुच्यते।
अग्निजा ब्रह्मजाश्चैव पद्मजाश्च पृथग्विधाः।
त्रिधा त्रिधायनास्तेषां वक्ष्यामि वित्तसम्भवम्॥
आग्नेयाः खब्रजाः प्रोक्तास्तेषां धूमः प्रवर्त्तनम्।
जाता दुर्दिनवातादृये सगुणास्ते व्यवस्थिताः॥
महिषाश्च वराहाश्च मत्तमातङ्गरूपिणः।
भूत्वा धरणिमभ्येत्य रमन्ते विचरन्ति च॥
जीमूता नाम ते मेघा ये तेभ्यो जीवसम्भवाः।
विद्युद्गुणविहीनाश्च जलधारावलम्बिनः॥
मृदुसेका महाकाया आवहस्य च सानुगाः।
क्रोशमात्राच्च वर्षन्ति क्रोशार्द्धादपि वा पुनः।
पर्व्वतायतनस्थेषु वर्षन्ति विपिनेषु च॥
बलाका गर्भभाश्चैव बलाकागर्भधारिणः।
ब्रह्मजा नाम ते मेघा ब्रह्मनिश्वाससंभवाः॥
द्वितीयं प्रवहं वायुं मेघास्ते तु समाश्रिताः।
इतो योजनमात्राच्च सार्द्धार्द्धात् विकृतादपि।
वृष्टिसर्गाद्विरूपेषां धारासाराः प्रकीर्त्तिताः॥
शक्रेण यत्ता यच्छिन्नाः पर्व्वतानां महौजसाम्।
कामगानां प्रवृत्तानां प्रजानां शिवमिच्छता।
पुष्करावर्त्तकास्तत्र करीषेनेह विश्रुताः॥
नानारूपधराश्चैव महाघोरस्वनाश्च ते।
कल्पान्तवृष्टेः सहारः सम्वर्त्तामेर्नियामकाः।
वर्षन्ति ते युगान्तेषु तृतीयास्ते प्रकीर्त्तिताः॥
अनेकरूपसंस्थानाः पूरयन्तो महीं जलैः।
वायुं परिवहन्ते स्मुरास्थिताः कल्पसाधकाः॥
योऽन्यस्याण्डस्य भिन्नस्य प्राक्तनप्रभवस्तदा॥
यस्मादुत्पन्ना सम्भूतपन्नश्चतुर्व्वक्त्रः स्वयम्भुवः।
तस्यैवाण्डस्य पाला हि सर्व्वे मेघाः प्रकीर्त्तिताः॥
तेषामध्यायनं धूमः सर्व्वेषामविशेषतः।
तेषां श्रेष्ठस्तु पर्ज्जन्यश्चतुरश्चैव दिग्गजाः॥
गजानां पर्व्वतानाञ्च मेघानां भोगिभिः सह।
कुलमेकं पृथग्भूतं योनिरेका जलं स्मृतम्॥
पर्ज्जन्यो दिग्गजाश्चैव हेमन्ते शीतसंभवाम्।
तुषारवृष्टिं वर्षन्ति हिमशस्यविवृद्धये॥"
इति ब्रह्माण्डे ५८ अध्यायः॥*॥
षड्रागान्तर्गतरागविशेषः। यथा,—
"भैरवोऽथ वसन्तश्च नटो नारायणस्तथा।
श्रीरागो मेघरागश्च षड्रेते पुरुषाज्ञया॥"
तस्य रागिण्यो यथा,—
"ललिता मालसी गौड़ी नाटी देवकिरी तथा।
मेघरागस्य रागिण्यो भवन्तीमाः सुमध्यमाः॥"
अयं हनूमन्मते षड्रागो ब्रह्मणो मस्तकात् निर्गतः। आकाशाज्जात इति च वदन्ति। अस्य जातिः औड़वः। अर्थात् ध न ध ऋ ग इति पञ्चस्वरमिलितः। अस्य ग्रहं धैवतस्वरः।

वर्षर्त्तौ रात्रिशेषे गानसमयः। अस्याकारः। सुन्दरपुरुषः। श्यामवर्णः। उष्णीषवद्दक्षैकभ्रूः। शाणितखड्गहस्तः। हनूमन्मते अस्य पञ्च रागिण्यो यथा। टङ्का १ मल्लारी २ गुर्ज्जरी ३ भूपाली ४ देशकारी च ५। अस्याष्टपुत्रा यथा। जालन्धरः १ सारः २ नटनारायणः ३ शङ्कराभरणः ४ कल्याणः ५ गजधरः ६ गान्धारः ७ सहाना ८॥ कलानाथमते। अस्य रागिण्यः षट् यथा। वङ्गाली १ मधुरा २ कामोदा ३ धनाश्रीः ४ तोर्थकी ५ देवाली ६। एतन्मतेऽपि अष्टौ पुत्राः किन्तु नटनारायण-शङ्कराभरणकल्याणस्थाने केदाराभारुजलधरता ज्ञेयाः॥ सोमेश्वरमते अस्य षड्रागिण्यो यथा। मल्लारी १ गौरटी २ सावेरी ३ कौशिकी ४ गान्धारी ५ हरश्रङ्गारी ६। एतन्मतेऽपि पुत्राः पूर्ब्ववत्। रागिणीसहितस्त्वेतद्रागस्य वर्षर्त्तौ गानसमयः॥ भरतमते तस्य पञ्च रागिण्यो यथा। मल्लारः १ मूलतानी २ देशी ३ रतिवल्लभा ४ कावेरी ५। तन्मते अष्टौ पुत्रा यथा। कलायरः १ वागेश्वरी २ सहाना ३ पुरीया ४ कानरा ५ तिलकः ६ लम्भः ७ शङ्कराभरणः ८। तस्यैते अष्टपुत्राणां भार्य्या यथा। करणाटी १ कादवी २ कदमनाटः ३ पाहारी ४ माँझः ५ परजः ६ नटमञ्जरी ७ शुद्धनटः ८। इति सङ्गीतशास्त्रम्॥

मेघकक्षः, पुं, (मेघानां कक्ष इव।) करका। इति हारावली। ५८॥

मेघकालः, पुं, (मेघानां कालः समयः।) वर्षर्त्तुः। इति जटाधरः॥ (यथा, हृहत्संहितायाम्। ६५। ५८।

"स्थलसलिलचराणां यत्नयो मेघकाले।
प्रचुरसलिलदृष्ट्या शेषकाले भयाय॥")

मेघचिन्तकः, पुं, (चिन्तयतीति। चिन्ति+खुल्। मेघानां चिन्तकः तस्यैव जलपायित्वात्।) चातकपक्षी। इति शब्दचन्द्रिका॥ (मेघ-चिन्तनविशिष्टे, त्रि॥)

मेघज, त्रि, मेघभववस्तु। मेघाज्जायते इति जनुपञ्चम्या जनधातोः डप्रत्ययेन निष्पन्नम्॥

मेघजालं, क्ली, (मेघानां जालम्।) अभ्रियम्। इति शब्दचन्द्रिका॥

मेघजीवनः, पुं, (मेघो जीवनं जीवनोपायो यस्य।) चातकपक्षी। इति राजनिर्घण्टः॥

मेघज्योतिः, [स्] पुं, (मेघस्य ज्योतिरग्निर्मेघाद्भुत्पन्नो ज्योतिर्वा।) वज्राग्निः। तत्पर्य्यायः। इरम्मदः २। इत्यमरः।१।३।१०॥ मेघस्य ज्योतिरग्निर्मेघज्योतिः। ज्योतिरग्नौ समाख्यातं ज्योतिश्चन्द्रो निगद्यते। इति रन्तिः॥ इरया जलेन माद्यति दीप्यते इति इरम्मदः। मेघाग्निर्हि जलेनैव दीप्यते। मदीभिर्यपि हर्षे दृ भृ दृ दृ नीति खः खित्यव्याजिति मनुखौ। अन्योन्य-संघट्टेन मेघाग्निःस्थ यज्ज्योतिर्वृष्टादौ पतति स इरम्मदः। मेघ इत्युपपदाच्च तेन चातजो-ऽपीरम्मदः सोऽपि हि इरया जलेन माद्यतीति कौमुदी। मेघाभ्यादिरिरम्मद इति शब्दार्णवः। इति तट्टीकायां भरतः॥

मेघडम्बरः, पुं, मेघस्याडम्बरः। मेघगर्जनम्। यथा,—

"अजायुद्धे ऋषिश्राद्धे प्रभाते मेघडम्बरे।
दम्पत्योः कलहे चैव बस्तारम्भे लघुक्रिया॥"

इत्युद्भटः॥

मेघतिमिरं, क्ली, (मेघेन तिमिरं अन्धकारो यत्र।) मेघाच्छन्नदिनम्। इति हलायुधः॥

मेघदीपः, पुं, (मेघजनितो दीप इव।) विद्युत्। इति शब्दमाला॥

मेघनादः, पुं, (मेघं नादयतीति। नद्+णिच्+अण्।) वरुणः। (मेघस्य नाद इव नादो यस्य।) रावणपुत्रः। इति मेदिनी। दे, ५२॥ (यथा, रघौ। १२। ७६।

"गरुड़ायातविश्लिष्टमेघनादाक्षवन्धनः॥"

मेघस्य नादः।) मेघशब्दः। इति हेमचन्द्रः॥ (यथा, महाभारते। ३। ७३। ७।

"ते श्रुत्वा रथनिर्घोषं वारणाः शिखिनस्तथा।
प्रणेदुस्तन्मुखा राजन्! मेघनाद इवोत्-
सुकाः॥")

पलाशवृक्षः। इति शब्दचन्द्रिका॥ तण्डुलीय-शाकः। इति राजनिर्घण्टः॥ (यथा, भाव-प्रकाशे।

"तण्डुलीयो मेघनादः कार्डेरस्तण्डुलेरकः॥"

अस्य गुणादिकं तण्डुलीयशब्दे द्रष्टव्यम्॥ दानवभेदः। यथा, हरिवंशे। ३३२। ३०।

"सुबाहुर्मेघनादश्च भीमगर्भश्च वीर्य्यवान्॥"

मेघसदृशशब्दविशिष्टे, त्रि। यथा, रामायणे। २। १६। २६।

"मेघनादमसम्बाधं मणिहेमविभूषितम्॥")

मेघनादजित्, पुं, (मेघनादं जितवानिति। जि+क्विप्।) लक्ष्मणः। इति त्रिकाण्डशेषः॥

मेघनादानुलासकः, पुं, (मेघनादं अनु लक्ष्मीलक्ष्य लसति क्रीड़तीति। लस+खुल्।) मयूरः। इति राजनिर्घण्टः॥

मेघनादानुलासी, [न्] पुं, (मेघनादमनुलसतीति। लस+णिनिः।) मयूरः। इत्यमरः।२।५।३०॥

मेघनामा, [न्] पुं, (मेघस्य नाम नाम यस्य।) सस्यकः। इत्यमरः। २। ४। १५६॥ (पर्य्यायो-ऽस्य यथा,—

"सस्यको मेघनामा स्यात्।"

इति गारुड़े २०८ अध्यायः॥)

मेघनिर्घोषः, पुं, (मेघस्य निर्घोषः।) मेघशब्दः। तत्पर्य्यायः। स्तनितम् २ गर्जितम् ३ रवितम् ४। इत्यमरः। १।३।८॥ ध्वनितम् ५ ह्रादितम् ६। इति भरतः॥ (मेघस्य निर्घोष इव निर्घोषो यस्य। मेघतुल्यशब्दविशिष्टे, त्रि। यथा, महा-भारते। ३। ७३। ११।

"यदि मां मेघनिर्घोषो नोपगच्छति नैषधः।
अद्य चामीकरप्रख्यं प्रवेक्ष्यामि हुताशनम्॥")

मेघपुष्पं, क्ली, (मेघस्य पुष्पमिव।) जलम्। इत्य-मरः। १। १०। ५॥ पिण्डाभ्रम्। नदीजलम्। इति मेदिनी। पं, २८।

मेघपुष्पः, पुं, (मेघ इव पुष्पमिति। प्रकाशते इति। पुष्प्+विकाशने+अच्।) शुक्लद्रुमः। इति शब्द-रत्नावली॥ श्रीकृष्णाश्वश्च॥ (यथा, महाभारते। ४। ४३। २१।

"तं मन्ये मेघपुष्पस्य बलेन सदृशं हयम्॥")

मेघप्रसवः, पुं, (मेघः प्रसवः उत्पत्तिस्थानमस्य इति।) जलम्। इति राजनिर्घण्टः॥ मेघ-जाते, त्रि॥

मेघभूतिः, पुं, (मेघात् भूतिर्जन्मास्य।) वज्रम्। इति शब्दरत्नावली॥

मेघमालः, पुं, (मेघमाला वर्षमाद्यस्येन अस्यस्य। अर्शआद्यच्।) रसागर्भजानकल्किदेवपुत्रः। यथा। "तथा रमा सिते पक्षे।" इत्युपक्रम्य। "सा पुत्रं सुषुवे साध्वी मेघमालबलाहकौ। महोत्साहौ महावीर्य्यौ सुभगौ कल्किमस्तकौ।" इति कल्किपुराणे ३१ अध्यायः॥ (ऋक्षद्वीपस्थपर्व्वतविशेषः। यथा, भागवते।५। २०।४।"सुवर्णो हिरण्यष्ठीवो मेघमाल इति सेतु-शैलाः॥" राक्षसविशेषः। इति रामायणे। ३। २६। ३१॥)

मेघमाला, स्त्री, (मेघानां माला।) मेघश्रेणी। तत्पर्य्यायः। कादम्बिनी २। इत्यमरः।१।२।८॥ (यथा, उत्तररामचरिते। २।

"मेघमालेव वज्राग्नेरस्यादपि बिभाय्यते।"

स्कन्दमातृगणानामन्यतमा। यथा, महाभारते। ६। ४६। २६।

"एकवक्त्रा मेघरवा मेघमाला विरोचना॥")

मेघयोनिः, पुं, (मेघस्य योनिः उत्पत्तिकारणम्।) धूमः। इति शब्दरत्नावली॥

मेघरागः, पुं, (मेघनामको रागः।) षड्रागान्त-र्गतरागविशेषः। इति हलायुधः॥ (यथा, संगीतदर्पणे रागाध्याये। ३१।

"भैरवः कौशिकश्चैव हिन्दोलो दीपकस्तथा।
श्रीरागो मेघरागश्च षड़ेते पुरुषाश्रयाः॥")

अस्य विवरणं मेघशब्दे द्रष्टव्यम्॥

मेघवर्णा, स्त्री, (मेघस्येव वर्णोऽस्याः। स्त्रियां टाप्।) नीलीवृक्षः। इति शब्दचन्द्रिका॥ (मेघतुल्यवर्णे, त्रि। यथा, महाभारते। ३। ४६। १५।

"सुकृष्णोत्तरीयेण मेघवर्णेन राजता॥")

मेघवर्त्म, [न्] क्ली, (मेघानां वर्त्म पन्थाः।) आकाशम्। इति त्रिकाण्डशेषः॥

मेघवह्निः, पुं, (मेघस्य मेघजन्यो वा वह्निः।) वज्राग्निः। तत्पर्य्यायः। इरम्मदः २। इति हेमचन्द्रः। ३। १६७॥

मेघवाहनः, पुं, (मेघो वाहनमस्य।) इन्द्रः। इत्य-मरः।१।१।४७॥ (यथा, शिशुपालवधे।१३।१८।

"अविलम्बितेलविलपाशिपल्लवः
श्रयति स्म मेघमिव मेघवाहनः॥")

मेचकः

मेघवेश्म, [न्] क्ली, (मेघानां वेश्म भवनम्।) आकाशम्। इति जटाधरः॥
मेघसारः, पुं, (मेघस्य सार इव।) चीनकर्पूरः। इति राजनिर्घण्टः॥
मेघसुहृत्, [द्] पुं, (मेघाः सुहृदो मित्राणि यस्य।) मयूरः। इति हेमचन्द्रः॥
मेघस्तनितोद्भवः, पुं, (मेघस्य स्तनितादुद्भव उत्पत्तिरस्य। नवमेघशब्देनास्य अङ्कुरोत्पत्तेस्तथात्वम्।) विकङ्कतवृक्षः। इति राजनिर्घण्टः॥ (विशेषोऽस्य विकङ्कतशब्दे ज्ञेयः॥)
मेघाख्य, क्ली, (मेघस्य आख्या नामास्य।) मुस्तकम्। इति रत्नमाला॥
मेघागमः, पुं, (मेघानां आगमोऽत्र।) वर्षाकालः। इति शब्दरत्नावली॥ (यथा, घटकर्परकाव्ये।२।
"नवाम्बुमत्ताः शिखिनो नदन्ति
मेघागमे कुन्दसमानदन्ताः!॥")
मेघस्यागमनञ्च॥
मेघानन्दा, स्त्री, (मेघेन आनन्दोऽस्याः।) बलाका। इति राजनिर्घण्टः॥
मेघानन्दी, [न्] पुं, (मेघेन आनन्दतीति। आ+नन्द+णिनिः।) मयूरः। इति राजनिर्घण्टः॥
मेघान्तः, पुं, (मेघानां अन्तोऽवसानमत्र।) ग्रीष्मकालः। इति राजनिर्घण्टः॥
मेघास्थि, क्ली, (मेघानां अस्थीव।) करका। इति त्रिकाण्डशेषः॥
मेघास्पदं, क्ली, (मेघानां आस्पदं स्थानम्।) आकाशम्। इति धनञ्जयः
मेघोदरः, पुं, (मेघस्येव उदरमस्य।) अर्हन्मिता। इति हेमचन्द्रः॥
मेचकं, क्ली, (मचति वर्णान्तरेण मिश्रीभवतीति। मच्+"कृत्यादिभ्यः संज्ञायां युन्।" उणा० ५।३५। इति युन्। ततः "पचिमच्योरिच्च।" उणा० ५।३७। इति इत्वे लघूपधगुणः। यद्वा, मच मचि कल्कने+अकन्। मचि परिसृचां नाम्नोर्लत्वम्। मेचकः कृष्णनीलः स्यादतसीपुष्पसन्निभः। इति शब्दार्णवः। व्युत्पत्तिस्तु मचति मिश्रीभवति वर्णान्तरेण इति भरतः। इत्यमरटीकायां रघुनाथचक्रवर्त्ती।) श्रोतोऽञ्जनम्। अन्धकारः। इति मेदिनी। के, १४०॥ नीलाञ्जनम्। इति राजनिर्घण्टः॥ (यथा,—
"मेचकं मर्दनाञ्जनपिण्डवदीषत्कृष्णरूक्षम्।"
इति माधवकरकृतरुग्विनिश्चयव्याख्याने नेत्रीसारोद्धारे विजयरक्षितः॥)
मेचकः, पुं, मयूरचन्द्रकः। श्यामलः। इति मेदिनी। के, १४०॥ (यथा, "मेचकाभं शागारधूमाभञ्च मसारगन्धकादिमणिमरुत्पोक्ततत्तच्छ्यामवर्णस्येव वर्णो मेचक इति वैद्यवृद्धादयः प्राहुः चिक्कणत्वात् इत्यर्थः।" इति रुग्विनिश्चयस्य रक्तपित्तव्याख्याने विजयेनोक्तम्॥) धूमः। मेघः। श्रोताञ्जनः। इति शब्दरत्नावली॥ श्यामलगुणयुक्ते, त्रि। इत्यमरः। १।५।१४॥ (यथा, भिषक्पालवधे। ६। २६।

मेढ्रशृङ्गी

"गजकदम्बकमेचकसुचकै-
र्नभसि वीक्ष्य नवाम्बुदमम्बरे॥")
मेचकाभिधा, स्त्री, (मेचकस्याभिधा नामास्याः।) पातालगरुडीलता। इति राजनिर्घण्टः॥
मेट्, ऋ उन्मादे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) ऋ, अभिमेटत्। मेटति लोकः। उन्मादयतीत्यर्थः। इति दुर्गादासः॥
मेटुला, स्त्री, (मेटतीति। मेट् बाहुलकात् उलच्। टाप् च।) आमलकी। इति शब्दचन्द्रिका॥
मेठः, पुं, (मेटति उन्मादयतीति। मेट्+अच्। पृषोदरादित्वात् साधुः।) हस्तिपकः। इति त्रिकाण्डशेषः॥
मेड, ऋ उन्मादे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) ऋ, अभिमेडत्। मेडति उन्मादयतीत्यर्थः। इति दुर्गादासः॥
मेढ्रः, पुं, (मेहत्यनेनेति। मिह सेचने+"दाम्नीशसयुयुजस्तुतुदसिसिचमिहपतदशनहः करणे।" ३।२।१८२। इति ष्ट्रन्।) शिश्नः। (यथा, मनौ। ८। २८२।
"अवमूत्रयतो मेढ्रमवशृन्धेयतो गुदम्॥")
स तु गर्भस्यस्य सप्तभिर्मासैर्भवति। इति सुखबोधः॥ (यथा, "अवशनयनवदनघ्राणगुदमेढ्राणि नवस्रोतांसि नराणां बहिर्मुखान्येतान्येव॥" इति सुश्रुते शारीरस्थाने पञ्चमेऽध्याये॥ शिरःपर्य्यन्तं गतायां वङ्क्षणाधो मूलस्थानम्। यथा, पूर्णानन्दकृततट्चक्रनिरूपणे। "वङ्क्षणा मेढ्रदेशाच्छिरसि परिगता मध्यमे स्याज्ज्वलन्ती।" मेढ्रस्याप्राकृतत्वं जन्मान्तरे कृतस्य महापापस्य चिह्नं कुष्ठविशेषः। यथा, भविष्यपुराणीयमध्यतन्त्रषष्ठाध्याये।
"शृणु कुष्ठगणं विप्र! उत्तरोत्तरतो गुरुम्।
विचर्चिका तु दुश्चर्म्मा चर्चेरीयस्तृतीयकः॥
विकृच्चुर्व्रणताम्रौ च कृष्णश्वेते तथाष्टकम्।
एषां मध्ये तु यः कुष्ठी गर्हितः सर्व्वकर्म्मसु॥
व्रणवत्सर्व्वगात्रेषु गण्डे भाले तथा नसि॥"
दुश्चर्म्मा अपाकृतमेढ्रः इति स्मृतिसंग्रहितारः॥ पञ्चभूतानां मध्ये पृथिव्या रजोगुणांशात उत्पन्नो मेढ्रः तथाच वेदान्तपञ्चदश्याम्।
"रजोंशैः पञ्चभिस्तेषां क्रमात् कर्म्मेन्द्रियाणि तु।
वाक्पाणिपादपायूपस्थाभिधानानि चक्षिरे॥"
उपस्थेन्द्रियं नाम उपस्थव्यतिरिक्तं उपस्थाश्रयं सूत्रशुक्रोत्सर्गप्रक्लिन्नमिन्द्रियं इत्यात्मानात्मविवेके ग्रहनाचार्यः। अस्य लक्षणादिकं लिङ्गशब्दे उपस्थशब्दे च द्रष्टव्यम्॥) मेयः। इत्यमरः। २। ६। ६६॥ (यथास्य पर्य्यायः।
"मेढ्रो मेढ्रो हुड्डो मेघ उरभ्र उरणोऽपि च।
अविर्ऋष्णिस्त्वथोर्णायुः कथ्यन्ते तद्गुणा अथ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे॥)
मेढ्रशृङ्गी, स्त्री, (मेढ्रस्य शृङ्गमिव शृङ्गमस्याः। गौरादित्वात् ङीष्।) मेषशृङ्गीवृक्षः। इति रत्नमाला॥

मेदः

मेण्टः, पुं, हस्तिपकः। इति हारावली॥
मेण्डः, पुं, हस्तिपकः। इति त्रिकाण्डशेषः॥
मेण्डः, पुं, मेघः। इति शब्दरत्नावली॥
मेध, भ ऋ सङ्गे। वधे। मेधायाम्। इति कविकल्पद्रुमः॥ (भ्वा०-उभ०-सङ्गे अक०-वधे-मेधायाञ्च सक०-सेट्।) भ, मेधति मेधते धीरो गुणिना सङ्गत इत्यर्थः। ऋ, अभिमेधत्। मिमेध। इति दुर्गादासः॥
मेथिः, पुं, (मेधन्ते पशवोऽत्रेति। मेध सङ्गे+"सर्व्वधातुभ्य इन्।" उणा० ४। ११७। इति इन्।) खले पशुबन्धनार्थन्यस्तदारु। मेर काठ इति भाषा। यथा,—
"मेधिर्मेथिः खलेवाली खले गोबन्धदारु यत्।"
इति हेमचन्द्रः। ३।५५८॥
(स्त्री, मेथिका। तत्पर्य्यायो यथा,—
"मेथिका मेथिनी मेथिर्दीपनी बहुपत्रिका।
बोधिनी बहुबीजा च ज्योतिर्गन्धफला तथा॥
वल्लरी चन्द्रिका मन्था मिश्रपुष्पा च कैरवी।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥
क्वचित् मेथीति पाठो दृश्यते॥)
मेथिका, स्त्री, (मेथतीति। मेथ्+ण्वुल्। टापि अत इत्वम्।) क्षुपविशेषः। मेथिशाक इति भाषा। तत्पर्य्यायः। मेथिनी २ मेथी ३ दीपनी ४ बहुपत्रिका ५ बोधिनी ६ गन्धबीजा ७ ज्योतिः८ गन्धफला ९ वल्लरी १० चन्द्रिका ११ मन्था १२ मिश्रपुष्पा १३ कैरवी १४ कुक्षिका १५ बहुपर्णी १६ पीतबीजा १७। अस्या गुणाः। कटुत्वम्। उष्णत्वम्। रक्तपित्तप्रकोपणत्वम्। अरोचकहरत्वम्। दीप्तिकारित्वम्। वातघ्नत्वम्। दीपनत्वञ्च। इति राजनिर्घण्टः॥ अथ मेथी वनमेथी। तयोर्नामगुणाः।
"मेथिका मेथिनी मेथी दीपनी बहुपत्रिका।
बोधिनी गन्धबीजा च ज्योतिर्गन्धफला तथा॥
वल्लरी चन्द्रिका मन्था मिश्रपुष्पा च कैरवी।
कुक्षिका बहुपर्णी च पीतबीजा सुनिच्छदा॥
मेथिका वातशमनी श्लेष्मघ्नी ज्वरनाशिनी।
ततः स्वल्पगुणा वन्या वाजिनां सा तु पूजिता॥"
इति भावप्रकाशे पूर्व्वखण्डे प्रथमे भागे॥
मेथिनी, स्त्री, (मेथतीति। मेथ्+णिनिः। ङीप्।) मेथिका। इति राजनिर्घण्टः॥
मेधी, स्त्री, (मेधिः+ऋदिकारादिति पक्षे ङीष्।) मेथिका। इति राजनिर्घण्टः॥ (स्मृतिः। यथा, श्रुतपथब्राह्मणे। ३। ५। ३। २१।
"विज्ञाये त्येति मेधीसूपनिहन्तीतरत्सतो
यदु च मानुषे॥"
"मेधीं स्मृतिम्।" इति तद्भाष्यम्॥)
मेध, ऋ भ वधमेधयोः। इति कविकल्पद्रुमः॥ (भ्वा०-उभ०-सक०-सेट्।) ऋ, अभिमेदत्। भ, मेदति मेदते श्राद्धार्थं शिष्यः धारयतीत्यर्थः। मिमेदुः। इति दुर्गादासः॥
मेदः, [स्] क्ली, (मेदयति स्निह्यतीति। मिद्+"सर्व्वधातुभ्योऽसुन्।" उणा० ४। १८८। इति

असृग् ।) मांसप्रभवधातुविशेषः । तत्पर्य्यायः । वपा २ वसा ३ । इत्यमरः ।२।६।६४॥ मेदः ४ । अकारान्त इति भरतः ॥ अस्य गुणाः । वातनाशित्वम् । श्लेष्मपित्तकफदात्वञ्च । इति राजवल्लभः ॥ अथ मेदसः स्वरूपमाह ।

"यन्मांसं स्वाग्निना पक्वं तन्मेद इति कथ्यते ।
तदतीव गुरु स्निग्धं बलकार्य्यतिदृंहणम् ॥"

अथ मेदसः स्थानमाह ।

"मेदो हि सर्व्वभूतानामुदरेष्वस्थिषु स्थितम् ।
अतएवोदरे वृद्धिः प्रायो मेदस्विनो भवेत् ।"

इति भावप्रकाशः ॥

रोगविशेषः । तत्र मेदसो विप्रकृष्टं निदानमाह ।

"अत्यायामादवास्वप्नश्लेष्मलाहारसेविनः ।
मधुरोऽम्लरसः प्रायः स्नेहाच्छेदो विवर्द्धयेत् ॥"

अम्लरसः आमद्रवः । तथा च सुश्रुतः ।

आमद्रवान्नरसो मधुरश्च भवतीति । मेदसोऽतिप्रवृद्धौ वैगुण्यमाह ।

"मेदसावृतमार्गत्वात् पुष्यन्त्यन्ये न धातवः ।
मेदस्तु क्षीयते तस्मादशक्तः सर्व्वकर्म्मसु ॥"

अन्ये धातवः अस्थ्यादयः शुक्रान्ताः । न पुष्यन्ति न पुष्टा भवन्ति । क्षीयते सञ्चितं भवति वर्द्धत इति यावत् । तस्मात् मेदस्वी सर्व्वकर्म्मसु अशक्तः स्यात् । मेदसः सौकुमार्य्यात् । अपरानपि दोषानाह ।

"क्षुदग्न्यासहिष्णुत्वं ग्लानिः कृच्छ्रेण सिध्यति ।
युक्तः क्षुत्स्वेददौर्गन्ध्यैरल्पप्राणोऽल्पमैथुनः ।
मेदसः स्वेददौर्गन्ध्याच्छ्वयन्ते जन्तवो नरः ॥"

कृच्छ्रं उच्छ्वासावरोधः । कृच्छ्रेण सुधूर इत्यर्थे । जन्तवः क्रिमयः । मेदसः स्थानमाह ।

"मेदस्तु सर्व्वभूतानामुदरेष्वस्थिषु स्थितम् ।
अतएवोदरे वृद्धिः प्रायो मेदस्विनो भवेत् ॥"

मेदस्विनोऽपि वृद्धौ हेतुमाह ।

"मेदसावृतमार्गत्वाद्वायुः कोष्ठे विशेषतः ।
चरन् सन्दूषयत्यग्निमाहारं क्षपयत्यपि ॥
तस्मात् क्षीयन्तु जरयत्याहारस्यापि काङ्क्षति ।
विकारान् सोऽनुते घोरान् कांश्चित् काल-
मतिक्रमात् ॥"

सन्दूषयति प्रदीपयति । स मेदस्वी आहारं शीघ्रं जरयति पुनर्भोक्तुं काङ्क्षति स दीप्ताग्निः कालमतिक्रमात् भोजनकालातिक्रमात् । कांश्चिद्विकारान् वातपित्तकरान् घोरान् अश्नुते प्राप्नोति । एते वातपित्ते मेदसावरुद्धे विशेषादुपद्रवकरे इत्याह ।

"एतावुपद्रवकरौ विशेषात् पित्तमारुतौ ।
एतौ हि दहतः स्थूलं वनं दावानलो यथा ॥"

एतौ पित्तमारुतौ मेदसा रुद्धमार्गत्वात् कोष्ठमध्ये प्रवृद्धौ सन्तौ विशेषादुपद्रवकरौ दहतः नाशयेताम् । मेदसोऽतिवृद्धेर्विनाशहेतुत्वमाह ।

"मेदस्यतीवसंवृद्धे सहसैवानिलादयः ।
विकारान् दारुणान् कृत्वा नाशयन्त्याशु जीवितम् ॥"

विकारान् प्रमेहपिडकाज्वरभगन्दरविद्रधिवातरोगाणामन्यतमान् । अतिस्थूलतया वैगुण्यमाह ।

"अतिस्थूलेषु संरुद्धा विसर्पाः सभगन्दराः ।
ज्वरातीसारमेहार्शःश्लीपदा यधिकादयः ॥"

अतिस्थूलस्य लक्षणमाह ।

"मेदो मांसातिवृद्धत्वाच्चलस्फिग्दरसन्धनः ।
अयथोपचयोत्साहो नरोऽतिस्थूल उच्यते ॥"

अयथोपचयोत्साहः न यथा उपचयो मांसोपचयः उत्साहो बलञ्च यस्य सः ॥*॥*॥ अथ मेदस्य चिकित्सा ।

"पुराणाः शालयो मुद्गाः कुलत्थोद्दालकोद्रवाः ।
शेलेया वस्तयश्चापि सेव्या मेदस्विना सदा ॥
श्रमश्चिन्ताव्यवायाध्वचौद्रजागरणप्रियः ।
हन्त्यवश्यमतिस्थौल्यं यवश्यामाकभोजनः ॥
क्षारं वातारिपत्रस्य क्षिक्षुयुक्तं पिबेन्नरः ।
सक्तिं भक्तमखेन मेदोवृद्धिनिवृत्तये ॥
गुडूचीत्रिफलाक्वाथः पीतो मेदोहरः स्मृतः ।
गुडूचीत्रिफलाक्वाथस्तथा लोहरजोयुतम् ।
क्षौद्रेण त्रिफलाक्वाथः पीतो मेदहरः परः ॥
प्रातर्मधुयुतं वारि सेवितं स्थौल्यनाशनम् ।
उष्णसन्नस्य भक्तं वा पिबेत् क्षणतनुर्भवेत् ॥
बीजाग्नित्रिफलासुस्तविड्भिर्गुग्गुलुं समम् ।
खादेत् सर्व्वान् जयेद्रोगान्मेदःश्लेष्मामवातजान् ॥
पिप्पली मधुना लेह्या मेदःकफविनाशिनी ॥
यत्तूरपत्रस्वरसेन गाढ-
मुद्वर्त्तनं स्थौल्यहरं प्रदिष्टम् ॥
वासादलरसो लेपाच्छ्वचूर्णेन संयुतः ।
विल्वपत्ररसो वापि देहदौर्गन्ध्यनाशनः ॥
निम्बपत्ररसः प्रक्षितकक्षादियोजितं जयति ।
दग्धहरितालमनःशिलाक्षिरदेहदौर्गन्ध्यम् ॥
शिरीषलाम्बकदेमलोध्रे-
स्वगदोषसंस्वेदहरः प्रघर्षः ।
शरीरदौर्गन्ध्यहरः प्रदेहः
पद्माम्बुलोध्राभयचन्दनानाम् ॥"

शिरीषस्यात्र पत्रं ग्राह्यं व्यवहारात् । लाम्बकं सुगन्धिद्रव्यविशेषस्कन्दलाभे उशीरं ग्राह्यम् । हेम नागकेशरम् । अम्बु बालकम् । अभयं उशीरम् ।

"हरीतकीं तु संपिष्य देहमुद्वर्त्तनं नरः ।
पश्चात् स्नानं प्रकुर्व्वीत देहस्वेदोपशान्तये ॥
वकुलस्य दलैः सन्यग्वारिणा परिषेचितैः ।
देहमुद्वर्त्तयेत् पश्चाद्धरीतक्या सुपिष्टया ॥
भूय उद्वर्त्तनं कुर्य्यात् पश्चात् स्नानं समाचरेत् ।
प्रस्वेदान् सुस्थते शीघ्रं मेदोवृद्धिसमुद्भवात् ॥"

इति मेदोऽधिकारः ॥ इति भावप्रकाशः ॥

(तथास्य विशेषः । यथा,—

"मेदः स्नेहस्वेदौ दृढत्वं पुष्टिमस्याश्च ॥"

अस्य क्षीणलक्षणं यथा,—

"मेदः क्षये क्षीणाभिवृद्धिः सन्धिशून्यता रौक्ष्यं मेदुरमांसप्रार्थना च ।" अस्यातिवृद्धिलक्षणं यथा,—

"मेदः स्निग्धाङ्गतासुदरपार्श्ववृद्धिं कासश्वासादीन् दौर्गन्ध्यञ्च ।"

"पूर्व्वः पूर्व्वोऽतिवृद्धत्वाद्वर्द्धयेद्धि परं परम् ।
तस्मादतिप्रवृद्धानां धातूनां ह्रासनं हितम् ॥"

"क्षपयेदृद्धयेच्चापि दोषधातुमलान् भिषक् ।
तावद्यावद्रोगः स्यान्नरो रोगसमन्वितः ॥"

इति सुश्रुते सूत्रस्थाने १५ अध्यायः ॥

"तृतीया मेदोधरा नाम मेदो हि सर्व्वभूतानामुदरस्थमन्त्रस्थिषु च महत्सु च मज्जा भवति ॥"

इति तत्रैव शारीरस्थाने ४ अध्याये ॥)

मेदः, पुं, (मेदयति स्निह्यतीति । मिद् + अच् ।) वपा । इति शब्दचन्द्रिका ॥

'छण्णाकक्षुक्रमिहरो मलघ्नो मेदकुष्ठहा ॥"

इति भरतधृतशालिहोत्रः ॥)

म्लेच्छजातिविशेषः । इति जटाधरः ॥ अलम्बुषा । इति राजनिर्घण्टः ॥ (ऐरावतकुलजो नागविशेषः । यथा, महाभारते ।१।५७।११।

"विहङ्गः शरभो मेदः प्रमोदः संहतापनः ।
ऐरावतकुलादेते प्रविष्टा हव्यवाहनम् ॥")

मेदकः, पुं, (मिद् + खुल् ।) जगलः । इत्यमरः २ । १० । ४२ ॥ मेया इति भाषा ॥

मेदजः, पुं, (मेदात् जायते इति । जन् + डः ।) भूमिजगुग्गुलुः । इति राजनिर्घण्टः ॥ मेदोभवश्च ॥

मेदःसारा, स्त्री, (मेदः सारोऽस्याः ।) मेदा । इति राजनिर्घण्टः ॥ (विवृतिरस्या मेदाशब्दे द्रष्टव्या ॥)

मेदस्कृत्, क्ली, (मेदः करोतीति । मेदस् + क्त + क्विप् ।) मांसम् । इति हेमचन्द्रः ॥

मेदा, स्त्री, (मेदो अस्याः अस्तीति । मेद + अच् । टाप् ।) अष्टवर्गप्रसिद्धौषधिविशेषः । तत्पर्य्यायः । मेदोद्भवा २ जीवनी ३ श्रेष्ठा ४ मणिच्छिद्रा ५ विभावरी ६ । इति रत्नमाला ॥ वसा ७ खल्वपर्णिका ८ मेदःसारा ९ स्नेहवती १० मेदिनी ११ मधुरा १२ स्निग्धा १३ मेधा १४ द्रवा १५ साध्वी १६ शल्यदा १७ वह्निरन्त्रिका १८ पुरुषदन्तिका १९ । अस्या गुणाः । मधुरत्वम् । शीतत्वम् । पित्तदाहार्शिःकाशराजयक्ष्मज्वरनाशित्वम् । वातदोषकारित्वञ्च । इति राजनिर्घण्टः ॥ तस्य लक्षणं यथा,

"शुक्लकन्दो नखच्छेद्यो मेदो धातुमिव स्रवेत् ।
यः स मेदेति विज्ञेयो जिज्ञासातत्परैर्जनैः ॥"

मेदामहामेदास्थाने शतावरी मूली । इति भावप्रकाशः ॥ अस्या विवरणं महामेदाशब्दे द्रष्टव्यम् ॥ (अनुकल्पोऽस्या यथा । "मेदाभावे चाश्वगन्धा ।" इति वैद्यकपरिभाषायाम् ॥)

मेदिनी, स्त्री, (मेदोऽस्या अस्तीति । मेद + इनिः । ङीप् ।) मेदा । काश्मरी । इति राजनिर्घण्टः ॥ पृथिवी । इत्यमरः । २ । १ । ३ ॥ मेदो विद्यतेऽस्यां मेदिनी सान्तान्मेदःशब्दादिन् सलोपश्च निपात्यते इति परे । स्वमते मेदः समानार्थोऽदन्तो मेदशब्दोऽस्ति । छण्णाकक्षु-

कृमिहरो मलघ्नो मेदकृद्धेति घ्राणेन्द्रियोक्तः। नैकाजादिति इन्। यथा चोक्तम्।
"मधुकैटभयोरासीन्मेदसैव परिप्लुता।
तेनेयं मेदिनी देवी प्रोच्यते ब्रह्मवादिभिः॥"
मेद्यतीति वा मेदिनी इन्निद्या स्निहि ग्रहादित्वाच्छिन्। इति भरतः॥ (एतन्नामनिरुक्तिर्यथा, देवीभागवते। १। ६। ८३-८४।
"गतप्राणौ तदा जातौ दानवौ मधुकैटभौ।
सागरः सकलो व्याप्तस्तदा वै मेदसा तयोः॥
मेदिनीति ततो जातं नाम पृथ्व्याः समन्ततः।
अभक्ष्या मृत्तिका तेन कारणेन मुनीश्वराः॥"
अपि च। तत्रैव। ३। १३। ८।
"मधुकैटभयोर्मेदःसंयोगाच्छेदिनी स्मृता।
धारणाच्च धरा प्रोक्ता पृथ्वी विस्तारयोगतः॥")
तस्या उत्पत्तिर्यथा,—
"श्रूयतां वसुधाजस्य सर्वमङ्गलकारणम्।
विघ्ननिघ्नकरं पापनाशनं पुण्यवर्द्धनम्॥
अद्यो कैटभमेदसा।
बभूव वसुधाजस्य तन्निरुद्धमतं शृणु॥
ऊचतुस्तौ पुरा विष्णुं तुष्टौ युद्धेन तेजसा।
आवां वध न यत्रोर्व्यां प्लावसा संवृतेति च॥
तयोर्जीवनकालेन प्लव्या सा भवेत् स्फुटम्।
ततो बभूव मेदस्य मरणस्यान्तरं तयोः।
मेदिनीति च विख्यातेत्युक्ता यैस्तच्छतं शृणु॥
सलधौता कृपा पूर्व्वं वर्द्धिता मेदसा यतः।
कथयामि च तच्चास्य सार्थकं सर्वसम्मतम्॥
पुरा श्रुतं यत् श्रुत्युक्तं धर्म्मवक्त्राच्च पुष्करे।
महाविराट्शरीरस्य जलमस्य चिरं स्फुटम्॥
मलो बभूव कालेन सर्व्वाङ्गव्यापको ध्रुवम्।
स च प्रविष्टः सर्व्वेषां तल्लोम्नां विवरेषु च॥
कालेन महता तस्माद्बभूव वसुधा शुने!।
प्रत्येकं प्रतिलोम्नाञ्च भूपेषु सा स्थिरा स्थिता॥
आविर्भूता तिरोभूता सा जले च पुनः पुनः।
आविर्भूता सृष्टिकाले तथालोपसंवस्थिता।
प्रलये च तिरोभूता जलाभ्यन्तरवस्थिता॥"
इति श्रीब्रह्मवैवर्त्ते प्रकृतिखण्डे नारायणनारदसंवादे पृथिव्युपाख्याने ७ अध्यायः॥

मेदिनीद्रवः, त्रि, (मेदिन्याः द्रवः।) धृष्टिः। इति त्रिकाण्डशेषः॥

मेदुरः, त्रि, (मेद्यति स्निह्यतीति। मिद्+"भृञ्जभासमिदो घुरच्।"३। २। १६१। इति घुरच्।) अतिशयस्निग्धः। तत्पर्य्यायः। सान्द्रस्निग्धः २। इत्यमरः। ३।१।३०॥ (यथा, गीतगोविन्दे।१।१।
"मेघैर्मेदुरमम्बरं वनभुवः श्यामास्तमालद्रुमैर्नक्तं भीरुरयं त्वमेव तदिमं राधे! गृहं प्रापय॥")

मेदुरा, स्त्री, (मेदुर+टाप्।) काकोली। इति राजनिर्घण्टः॥ (गुणादयोऽस्याः काकोलीशब्दे ज्ञेयाः॥)

मेदोज, क्ली, (मेदसो जायते इति। जन्+डः।) अस्थि। इति राजनिर्घण्टः॥

मेदोज्ञा, स्त्री, (मेदाद्वयोऽस्याः।) मेदा। इति राजनिर्घण्टः॥

मेदोन्वः, पुं. (मेदोवत्कुलः अन्वः।) वर्णसङ्करजातिभेदः। इति जटाधरः॥ (यथा, मनुः।१०।४८।
"मेदोन्ध्रचुञ्चुमद्गूनामारण्यपशुहिंसनम्॥"
क्वचिन् मेदान्ध्र इत्यपि पाठः॥)

मेदोवती, स्त्री, (मेदोऽस्याः अस्तीति। मेदस्+मतुप्। मस्य वः।) मेदा। इति राजनिर्घण्टः॥ (मेदोविशिष्टे, त्रि॥)

मेध, ऋ च वधमेधासङ्गेषु। इति कविकल्पद्रुमः॥ (भ्वा० उभ०-वधे सक०-अन्यत्र अक०-सेट्।) ऋ, अमिमेधत्। ध, मेधति मेधते। इति दुर्गादासः॥

मेधः, पुं, (मेधते वध्यते पश्वादिरत्रेति। मेध+घञ्।) यज्ञः। इति जटाधरः॥ (यथा, महाभारते। १। १२३। ३६।
"ग्रामणीश्च महीपालानेष जित्वा महाबलः।
भ्रातृभिः सहितो वीरस्तान् मेधानाहरिष्यति॥"
ऋचः। इति ऋग्वेदे। १०। १००। ६। मन्त्रभाष्ये सायणः॥)

मेधा, स्त्री, (मेधते सङ्गच्छते अस्यामिति। मेध+"घ्रिधृषिदाशिभ्योऽङ्।" ३। ३। १०४। इत्यङ्। टाप्।) धारणावती बुद्धिः। इत्यमरः।१।५।१ धारणाशक्तियुक्ता धीर्मेधा मेधते सङ्गच्छतेऽस्यां सर्व्वं बहुश्रुतं विषयीकरोति इति वा मेधा मेधृ सङ्गे मेधायां सेमक्तात् सरोरितः। आपबहुश्रुतविषयीकरणं धारणा यदुक्तं धारणा बुद्धेर्गुणविशेषः इति॥ इति भरतः॥ ॐ॥ (यथा, सुबालोपनिषदि। ३। २। ३।
"नायमात्मा प्रवचनेन लभ्यो
न मेधया न बहुना श्रुतेन।
यमेवैष वृणुते तेन लभ्य-
स्तस्यैष आत्मा विवृणुते तनूं स्वाम्॥")
मेधाकरं औषधं यथा,—
"ब्रह्मसुपर्ण्यौ वचा सोमा ब्राह्मी ब्रह्मसुवर्चला।
अभया च गुडूची च अटरूषकवाजुकी।
एतैरष्टसमैर्भागैर्घृतं प्रस्थं विपाचयेत्॥
कल्कार्थं रस प्रस्थं दृष्ट्वा च समन्वितम्।
एतद्ब्राह्मीघृतं नाम स्मृतिमेधाकरं परम्॥"
इति गारुडे १६८ अध्यायः॥ ०॥
मेधाकरणं यथा। सनताध्ययनम्। तत्त्वज्ञानकथा। श्रुतत्वग्राह्यावलोकनम्। सद्विद्याचार्य्यसेवा च। इति पुराणम्॥ (दक्षप्रजापतिकन्याविशेषः। यथा,—
"कीर्त्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्रिया
मतिः॥"
इति वह्निपुराणे गणभेदनामाध्याये॥
धनम्। इति निघण्टुः। २। १०॥ "मिष्ट मेष सङ्गमे च। चकारात् हिंसामेधयोश्च। मिधिः सङ्गत्यर्थः। इति माधवः। घञ्। सङ्गच्छतेऽनेन सर्व्वं तद्वता हिंस्यते वा तदान् चौरादिभिः मन्ति चेवार्थकारणात् इति महाभारतम्॥ यद्वा, मतौ धीयते अर्चयितव्यं रक्षितव्यं दातव्यमिति धनवता दुष्टौ धनं धार्य्यते। तत्र मति-

पूर्व्वद उपपदे धातोः धर्म्मे कविधानम् इति कः। पृषोदरादित्वात् मतिशब्दस्य मेभावः।" इति तट्टीकायां देवराजयज्वा॥)
मेधाः, [स्] पुं, (मेधते इति। मेध्+असुन्।) स्वायम्भुवमनुपुत्रः। यथा,—
"अग्निध्रस्याग्निबाहुश्च सवनः सवन एव च।
ज्योतिष्मान् द्युतिमान् हव्यो मेधा मेधातिथिर्वसुः।
स्वायम्भुवस्यास्य मनोर्दशैते वंशवर्द्धनाः॥"
इति मात्स्ये ६ अध्यायः॥
मेधाकृत्, क्ली, (मेधां करोतीति। कृ+क्विप्।) सितावरशाकम्। इति राजनिर्घण्टः॥ मेधाकारके, त्रि॥
मेधाजित्, पुं, (मेधां जितवानिति। जि+क्विप्।) कात्यायनमुनिः। इति त्रिकाण्डशेषः॥
मेधातिथिः, पुं, (मेधायाः धारणावद्बुद्धेरतिथिरिव।) मनुसंहिताटीकाकृत्। मुनिविशेषः। यथा, श्रीभागवते। १। १६। १०।
"मेधातिथिर्देवल आर्ष्टिषेणो
भरद्वाजो गौतमः पिप्पलादः॥"
(प्रियव्रतपुत्रः स च शाकद्वीपाधिपतिः। यथा, श्रीमद्भागवते। ५। २०। २४—२५।
"यस्मिन् हि शाको नाम महीरुहः स्वक्षेत्रव्यपदेशकः। यस्य ह महासुरभिगन्धस्तद्द्वीपमनुवासयति। तस्यापि प्रैयव्रत एवाधिपतिर्नाम्ना मेधातिथिः॥"॰॥ चतुर्दश द्वापरयुगस्य व्यासः। यथा, देवीभागवते। १। ३। ६०।
"मेधातिथिः चतुर्दशे व्रती सप्तदशे तथा॥"
प्रजापतेः कर्द्दमस्य पुत्रः। यथा, मार्कण्डेये। ५३। १५।
"अग्निध्रो मेधातिथिश्च वपुष्मांश्च तथामरः॥"
दक्षसावर्णिमन्वन्तरे सप्तर्षीणामेकतमः। यथा, मार्कण्डेये। ६४। ८।
"मेधातिथिर्वसुः सत्यो ज्योतिष्मान् द्युतिमांस्तथा।
सप्तर्षयोऽन्यः सवलस्तथान्यो हव्यवाहनः॥"
नदीविशेषे, स्त्री। यथा, महाभारते। ३। २२१। २६।
"चर्म्मण्वती महीं चैव मेधा मेधातिथिस्तथा।
ताम्रावती वेत्रवती नद्यस्तिस्रोऽथ कौशिकी॥")
मेधारुद्रः, पुं, (मेधया रुद्र इव।) कालिदासः। इति त्रिकाण्डशेषः॥
मेधावती, स्त्री, (मेधा देवत्वेन अस्ति अस्याः इति। मेधा+मतुप्। मस्य वः। ङीप्। मेधावर्द्धकत्वादस्यास्तथात्वम्।) महाज्योतिष्मती। इति राजनिर्घण्टः॥ मेधाविशिष्टा च॥
मेधाविनी, स्त्री, (मेधाऽस्याः अस्तीति। मेधा+"अस्मायामेधास्रजो विनिः।"५। २। १२१। इति विनिः। ततो ङीप्।) ब्रह्मणः पत्नी। इति मेदिनी। ने, २०४॥
मेधावी, [न्] पुं, (मेधाऽस्यास्तीति। मेधा+"अस्मायामेधास्रजो विनिः।"५। २। १२१। इति

विनिः) शुकपक्षी। इति मेदिनी। ने, २०४॥ मदिरा। इति राजनिर्घण्टः॥ पण्डितः। इति हेमचन्द्रः। ३।६॥ झाड़ि:। इति त्रिकाण्डशेषः॥ (कस्यचित् ब्राह्मणस्य पुत्रः। यथा, महाभारते, १२। १७५। ३।

"द्विजातेः कस्यचित् पार्थ! स्वाध्यायनिरतस्य वै।
बभूव पुत्रो मेधावी मेधावी नाम नामतः॥")

मेधायुक्ते, त्रि। इति मेदिनी। ने, २०४॥ (यथा, रामायणे। १। ४। ६।

"न तु मेधाविनौ दृष्ट्वा वेदेषु परिनिष्ठितौ।
वेदोपबृंहणार्थाय तावग्राहयत प्रभुः॥")

तद्वेदिकपर्य्यायः। विप्रः १ विप्रः २ ऋतुप्रः ३ धीरः ४ वेनः ५ वेधाः ६ कण्वः ७ ऋभुः ८ नवेदाः ९ कविः १० मनीषी ११ मन्त्राता १२ विधाता १३ विप्रः १४ मनश्चित् १५ विपश्चित् १६ विमन्यवः १७ आकेनिपः १८ उशिजः १९ कौत्साः २० अङ्गातयः २१ मतयः २२ मतुथाः २३ वाघतः २४। इति चतुर्विंशतिर्मेधाविनामानि। इति वेदनिघण्टौ। ३। १५॥

मेधिः, पुं, (मेध्यते खले क्षिप्यते इति। मेध+"सर्व्वधातुभ्य इन्।" उणा० ४।११३। इति इन्।) खले पशुबन्धनार्थन्यस्तदारु। इत्यमरः। २। ९। १५॥ खले धान्यमर्दनस्थानमध्ये पशुबन्धननिमित्तं निहितं यद्दारु स मेधिः। मेड़ इति ख्याते। इति भरतः॥ तत्पर्य्यायः। मेधिः ३ खलेवाली ३। इति हेमचन्द्रः॥ अस्य स्थापनदिनं तच्च वारौ शुक्लद्वादश्यां। नक्षत्राणि रेवती स्वातौ हस्ता मूलं मृगशिरश्च। तत्र लग्नं स्थिरम्। इति ज्योतिस्तत्त्वम्॥

मेधिरः, त्रि, (मेधास्यास्तीति। मेधा+"मेधास्रग्भ्यामिरच्नौ वक्तव्यौ।" ५। २। १०९। इति काशिकोक्त्या इरच्।) मेधावी। इति त्रिकाण्डशेषः॥ (यथा, ऋग्वेदे। १। २५। २०।

"त्वं विश्वस्य मेधिर! दिवश्च ग्मश्च राजसि।"

"हे मेधिर! मेधाविन्! वरुण।" इति तद्भाष्ये सायणः॥ यज्ञवान्। धविष्मान्। यथा, ऋग्वेदे। १०। १००। ६।

"इन्द्रस्य नुकृतं देवं सधीर्मिर्ऋभवो विदत्।
मेधिरः कविः।"

"मेधो यज्ञः धविर्वा तद्वान्।" इति तद्भाष्ये सायणः॥)

मेधिष्ठः, त्रि, (अयमेषामतिशयेन मेधावीति। मेधावित्+"अतिशायने तमबिष्ठनौ।" ५। ३। ५५। इति इष्ठन्। "विन्मतोर्लुक्।" ५। ३। ६५। इति विनो लुक्।) अतिशयमेधायुक्तः। इति व्याकरणम्॥

मेध्यं, त्रि, (मेधते इति। मेध्+"ऋहलोर्ण्यत्।" ३। १। १२४। इति ण्यत्। यद्वा, मेधामर्हतीति। मेधा+दण्डादित्वात् यत्।) पवित्रम्। इत्यमरः। ३। १। ५५॥ (यथा,—

"त्यागेन मेध्यमखिलम्मेध्यं त्यागतो भवेत्।
ब्रह्मज्ञाने सतुत्पन्ने मेध्यामेध्यं न विद्यते॥"

इति चिन्तामणिधृतवचनम्॥)

"पवित्रः प्रयतः पूत इति ब्रह्मवर्गे प्राणिविषयमात्र उक्तं इह तु प्राणिव्यये।" इति भरतः॥

"पूतं मेध्यं पवित्रं स्यादक्षीद्रं प्रयतनिर्म्मलम्।
निर्गोधं प्रोक्षितं दृष्टं निर्निक्तमनवस्करम्॥"

इति शब्दरत्नावली॥

(नित्यमेध्यम्। यथा, मनुः। ५। १२६।

"नित्यं शुद्धः कारुहस्तः पण्ये यच्च प्रसारितम्।
ब्रह्मचारिगतं भैक्ष्यं नित्यमेध्यमितिस्थितिः॥")

शुचिः। इति मेदिनी। ये, ४७॥ (यथा, अनर्घराघवे। २। १४।

"तत्काटक्षलवपूलकोपनयनक्लेशाक्षिरदैर्विभिः
मेध्या वल्लतरी विहस्य वटुभिः सोल्लुण्ठमालभ्यते॥"

मेधाजनकः। यथा,—

"मण्डूकपर्ण्याः स्वरसः प्रयोज्यः
क्षीरेण यष्टीमधुकस्य चूर्णं।
रसो गुडूच्यास्तु समूलपुष्पाः
कल्कः प्रयोज्यः खलु शङ्खपुष्पाः॥
आयुः प्रदान्यामयनाशनानि
बलाग्निवर्णस्वरवर्द्धनानि।
मेध्या विशेषेण च शङ्खपुष्पी॥"

इति चरके चिकित्सास्थाने प्रथमेऽध्याये॥)

मेध्यः, पुं, (मेधायै हितः। मेधा+"उगवादिभ्यो यत्।" ५। १। २। इति यत्।) खदिरः। यवः। छागः। इति राजनिर्घण्टः॥

मेध्या, स्त्री, (मेधायै हिता। मेधा+यत्। टाप्।) रक्तवचा। रोचना। इति मेदिनी। ये, ४७॥ केतकी। ज्योतिष्मती। शङ्खपुष्पी। ब्राह्मी। श्वेतवचा। भ्रमी। मण्डूकी। इति राजनिर्घण्टः॥ (नदीविशेषः। यथा, महाभारते। ३। २२१। २३।

"चर्म्मण्वती मही चैव मेध्या मेधातिथिस्तथा॥")

मेनका, स्त्री, (मन्यते इति। मन्+"मनेराशिषि च।" इति उन्। ततः "नश्मिमन्योरनिर्व्येलं वक्तव्यम्।" ६। ४। १२०। इत्यत्र काशिकोक्त्या अकारस्य एत्वम्।) सर्व्वाङ्गा। इति शब्दरत्नावली॥ तस्याः कन्या शकुन्तला। यथा,—

"विश्वामित्रात्मजैवाहं त्यक्ता मेनकया वने।
देवैवङ्गवान् कण्वो वीर! किं करवाम ते॥"

इति श्रीभागवते। ९। २०। १३॥

(मेनैव। मेना+स्वार्थे कन्।) उमामाता। यथा,

"ततः प्रीतास्तु पितरस्तां ददुस्तनयां निशाम्।
मेनां देवाश्च शैलाय हिमयुक्ताय वै ददुः॥
तां मेनां हिमवाँल्लब्ध्वा प्रसादाद्देवतेज्यः।
प्रीतिमागभवच्चासौ रराम च यथेच्छया॥
ततो हिमाद्रिः पितृकन्यया समं
सुखं विवेद विषयं यथेप्सितम्।
व्यजीजनत् सा तनयास्तु मेना
रूपाभियुक्ताः सुरयोषितोपमाः॥

पुलस्त्य उवाच।

मेनायां कन्यकास्तिस्रो जाता रूपगुणान्विताः।
सुनाभ इति विख्यातश्चतुर्थस्तनयोऽभवत्॥
नीलाञ्जनचयप्रख्या नीलेन्दीवरलोचना।
रूपेणानुपमा काली जघन्या मेनकासुता॥
जातास्ताः कन्यकास्तिस्रः षड्भ्यात् परतो सुने!।
कर्त्तुं तपः प्रयातास्ता देवास्ता ददृशुः शुभाः॥
ततो गते कन्यके द्वे ज्ञात्वा मेना तपस्विनी।
तपसो वारयामास उमे त्येवान्नवीच्च सा॥
तदैव माता नामास्याश्चक्रे पितृसुता शुभा।
उमेत्येव हि कन्यायाः सा जगाम तपोवनम्॥"

इति वामने ७४—७५ अध्यायः॥ ४॥

अपि च।

"कथं गिरिसुता काली बभूव जगतां प्रसूः।
दाक्षायणी त्यक्ततनुः कथमाप हरं पतिम्॥"

मार्कण्डेय उवाच।

यदात्यजत्तनुं देवी पूर्व्वं दाक्षायणी सती।
तदैव मनसागच्छन्मेनकां हिमवद्गिरिम्।
त्यक्तप्राणा तदा देवी भूता हिमवतः सुता॥
शिवाविन्यस्तमनसा सप्तविंशतिवत्सरान्।
निनाय मेनका देवी परमाम्बतिमिच्छती॥
सप्तविंशतिवर्षान्ते जगन्माता जगन्मयी।
सुप्रीता भवदर्थं प्राह प्रत्यक्षतां गता॥

श्रीदेव्युवाच।

यत् प्रार्थितं त्वया देवि! मत्तस्तत् प्रार्थयाधुना
ततः सा प्रथमं पुत्रमृतं वव्रे यशस्विनी॥
पश्चात्तु तनयामेकां स्वरूपगुणशालिनीम्।
कुलद्वयानन्दकरीं भुवनत्रयदुर्लभाम्॥
ततो भगवती प्राह मेनकां मुनिसन्निधाम्॥

श्रीदेव्युवाच।

शृतं पुत्राः संभवन्तु भवत्या वीर्य्यसंयुताः।
सुता च तव देवानां मानुषाणाञ्च रक्षसाम्॥
हिताय सर्व्वजगतां भविष्यत्यचिरेव ते।
एवमुक्त्वा जगद्धात्री तत्रैवान्तरधीयत॥
ततः सा कालिका देवी योगनिद्रा जगन्मयी।
पूर्व्वलक्षवतीरूपा तस्यार्थे मेनकां ययौ॥
समयेशाद्रुरूपेण मेनकाजठरे शिवा।
वसन्धृत्य सतत्पन्ना सा शुक्तीरिव सागरात्॥
वसन्तसमये देवी गर्भ्यां नगयोगतः।
अर्द्धरात्रौ सुतत्पन्ना गङ्गेव अग्निमण्डलात्॥

इति कालिकापुराणे ४० अध्यायः॥

मेनकात्मजा, स्त्री, (मेनकाया आत्मजा।) दुर्गा। इति हेमचन्द्रः॥ (शकुन्तला। यथा, महाभारते। १। ७२। ११।

"नेमां हिंस्युर्वने वासां क्वचादा मांसभोजनः।
तस्मैरक्षन्तां तत्र शकुन्ता मेनकात्मजाम्॥")

मेनकाप्राणेशः, पुं, (मेनकायाः प्राणेशः पतिः।) हिमालयः। इति हेमचन्द्रः। ४। ६३॥

मेना, स्त्री, (मान्यते पूज्यते इति। मान पूजायाम् "बहुलमन्यत्रापि।" उणा० २। ७६। इति इनच् प्रत्ययेन निपातनात् साधुः।) मेनका। इति भरतरूपकोषः॥ सा पितृकन्या। यथा,

"तां मानसीं मेरुसखः पितृणां
कन्यां कुलस्य स्थितये स्थितज्ञः।
मेनां मुनीनामपि माननीया-
मात्मानुरूपां विधिनोपयेमे॥"
इति कुमारसम्भवे। १। १८॥ * ॥
यथा च, कौर्म्मे १२ अध्याये।
"अग्निष्वात्ता बर्हिषदो दिवा तेषां व्यवस्थितिः।
तेभ्यः स्वाहा स्वधा चक्रे मेना वैतरणी तथा॥"
(स्त्री। यथा, ऋग्वेदे। १। ६२। ७।
"भगो न मेने परमे व्योमन्नधारयद्रोदसी सुदं-
सा:।"
'मेनेति स्त्रीनाम। मेने स्त्रीरूपमापन्ने रोदसी।"
इति तद्भाष्ये सायणः॥ * ॥ वृषणश्वकन्या।
यथा, ऋग्वेदे। १। ५१। १३।
"मेना भद्रो वृषणश्वस्य।"
"हे इन्द्र! त्वं वृषणश्वस्य एतदाख्यस्य राज्ञो
मेना भद्रः मेनानाम कन्यका भूः।" इति तद्भाष्ये
सायणः॥ * ॥ वाक्। इति निघण्टुः। १। ११॥
"मानपूजायां इत्यस्मात् 'बहुलमन्यत्रापि इनच्
भवति।' इति वचनादिनच्। बहुलग्रहणात्
नलोपः। पूज्यतेऽनया गुर्व्वादिरूपदेशवाक्येन
पूज्या वा देवतात्वात्।" इति तट्टीकायां देव-
राजयज्वा॥ * ॥ नदीविशेषः। यथा, महा-
भारते। ६। ६। २३।
"करिषिणीमसिक्नीञ्च कुशचीरां महानदीम्।
मरुद्वृधां प्रवरां मेनां हेमां घृतवतीं तथा॥")
मेनाजा, स्त्री, (मेनायाः जायते इति। जन्+डः।
स्त्रियां टाप्।) पार्व्वती। इति हेमचन्द्रः॥
मेनादः, पुं, (मे इति नादोऽस्य।) विड़ालः।
छागः। मयूरः। इति मेदिनी। दे, ३६॥
मेनाधवः, पुं, (मेनायाः धवः स्वामी।) हिमालयः।
इति त्रिकाण्डशेषः॥
मेन्धिका, स्त्री, (मां श्रीभामिन्धयति प्रकाशयतीति।
इन्ध+णिच्+ण्वुल्। टापि अत इत्वम्।)
क्षुपविशेषः। इति केचित्। मेहदी इति
भाषा॥
मेन्धी, स्त्री, (मां श्रीभामिन्धयतीति। इन्ध+
णिच्+अण्। गौरादित्वात् ङीष्।) क्षुप-
विशेषः। इति केचित्। मेहदी इति भाषा॥
मेप, ऋ उ गत्याम्। इति कविकल्पद्रुमः॥ (भ्वा०-
आ०म०-सक०-सेट्।) उ, मेपते। ऋ, अभि-
मेपत्। इति दुर्गादासः॥
मेरकः, पुं, विष्णुग्रन्थिभेदः। इति हेमचन्द्रः॥
मेरुः, पुं, (मि+"मिमीभ्यां रुः।" उणा०। ४।
१०१। इति रुः।) पर्व्वतविशेषः। तत्पर्य्यायः।
सुमेरुः २ हेमाद्रिः ३ रत्नसानुः ४ सुरा-
लयः ५। इत्यमरः॥ मिनोति क्षिपति ज्योतींषि
उच्चत्वात् मेरुः। डुमि प्रक्षेपे नाम्नीति
रुः। इति भरतः॥ * ॥ (यथा, मात्स्ये। १२१। ८।
"देवर्षिगन्धर्व्वयुतः प्रथमो मेरुरुच्यते।
प्रागायतः सवौवर्ण्य उदयो नाम पर्व्वतः॥")
तन्त्रमालाग्रथितन्यासैका माला। यथा,—
"मात्रामेकैकमादाय स्वरे सम्पातयेत् सुधीः।
सुखे सुखन्तु संयोज्य पुच्छे पुच्छन्तु योजयेत्॥
गोपुच्छसदृशी कार्य्याथवा सर्पाकृतिर्भवेत्।
तत्समानोयमेकाक्षं मेरुत्वेनाग्रतो न्यसेत्॥"
इत्युत्पत्तितन्त्रे ६० पटलः॥ * ॥
करमालायां मेरुर्यथा,—
"तिस्रोऽङ्गुल्यस्थिपर्व्वाणो मध्यमा चैकपर्व्विका।
पर्व्वद्वयं मध्यमाया मेरुत्वे नोपकल्पयेत्॥"
इदन्तु शक्तिभिन्नविषयम्॥ * ॥
शक्तिविषये मेरुर्यथा,—
"पर्व्वद्वयमनामाया: परिवर्त्तेन वै क्रमात्।
पर्व्वत्रयं मध्यमायास्तर्ज्जन्येकं समाहरेत्।
पर्व्वद्वयन्तु तर्ज्जन्या मेरुं तदिहि पार्व्वति!॥"
श्रीविद्याविषये मेरुर्यथा,—
"अनामामध्यमायाञ्च मूलाग्रन्तु द्वयं द्वयम्।
कनिष्ठायाञ्च तर्ज्जन्यास्त्रयं पर्व्व सुरेश्वरि!।
अनामामध्यमायाञ्च मेरुः स्याद्धितयं शुभम्॥"
तल्लक्षिनजपे दोषो यथा,—
"अङ्गुल्यग्रेषु यज्जप्तं यज्जप्तं मेरुलङ्घने।
पर्व्वसन्धिषु यज्जप्तं तत् सर्व्वं निष्फलं भवेत्॥"
इति तन्त्रसारः॥
मेरुकः, पुं, (मिनोति क्षिपति गच्छतीति। मि+
रुः। संज्ञायां कन्।) यज्ञधूपः। इति शब्द-
चन्द्रिका॥ धुना इति भाषा। (मध्यदेशस्य
प्रदेशभेदः। यथा, बृहत्संहितायाम्। १४। २६।
"शैलान्यां मेरुकनकराज्यपशुपालकीरकाश्मी-
राः।
अभिसारदरदतङ्गणकुलूतसैरिन्ध्यवनराष्ट्राः॥")
मेरुसावर्णः, पुं, एकादशमनुः। यथा,—
"ततस्तु मेरुसावर्णो ब्रह्मसूनुर्मनुः स्मृतः।
ऋतुश्च ऋतुधामा च विष्वक्सेनो मनुस्तथा॥"
इति मात्स्ये ६ अध्यायः॥
मेलकः, पुं, (मिल्+भावे घञ्। स्वार्थे कन्।)
सङ्गः। इत्यमरः। ३। २। २६॥ ("बहुमान्य-
मेलके बलावलसुकृम्।" इति। २। १३६।
मनुटीकायां कुल्लूकभट्टः॥)
मेलकलवणं, क्ली, (मिलतीति। मिल+ण्वुल्।)
मेलकं लवणम्। इति राज-
निर्घण्टः॥
मेला, स्त्री, (मिल्+णिच्+अङ्। टाप्।)
मेलकः। मसिः। इति मेदिनी। ले, ४६॥
अञ्जनम्। इति हेमचन्द्रः॥ महानीली। इति
राजनिर्घण्टः॥
मेलान्नदा, स्त्री, (मेलया मत्स्या आनन्दो यस्याः।)
मत्स्याधारः। इति हारावली॥
मेलान्धुः, स्त्री, (मेलानां अन्धुः कूपिका।) मत्स्या-
धारः। इति जटाधरः॥
मेलाम्बुः, पुं, (मेलेव अम्बु अत्र।) मत्स्याधारः।
इति शब्दरत्नावली॥
मेव, ऋ उ सेवने। इति कविकल्पद्रुमः॥ (भ्वा०-
आत्म०-सक०-सेट्।) ऋ, अभिमेवत्। उ,
मेवते। इति दुर्गादासः॥

मेषः, पुं, (मिषति अन्योन्यं स्पर्द्धते इति। मिष्
स्पर्द्धायाम्+अच्।) पशुविशेषः। भेड़ा इति
भेड़ा इति च भाषा॥ (यथा, पद्मतन्त्रे। ५। ६२।
"मेषेण क्षपकाराणां कलहो यत्र वर्त्तते।
स भविष्यत्यसन्दिग्धं वानराणां भयावहः॥")
तत्पर्य्यायः। मेढ्रः २ उरभ्रः ३ उरणः ४
ऊर्णायुः ५ वृष्णिः ६ एडकः ७। इत्यमरः। २।
६। ७६॥ भेड़ः ८ हुड़ः ९ अडविणः १०
अविः ११ लोमशः १२ वली १३ रोमशः १४
भेडुः १५ भेड़कः १६ मेराटः १७ हुलुः १८।
इति शब्दरत्नावली॥ मेराटकः १९ हुड़ः २०
संफलः २१। इति हेमचन्द्रः। ४। ३४१॥
अस्य मांसगुणाः। मधुरत्वम्। शीतत्वम्।
गुरुत्वम्। विष्टम्भित्वम्। वृंहणत्वञ्च। इति
राजनिर्घण्टः॥ अपि च। पित्तश्लेष्मकरत्वम्।
कुसुम्भशाकेन सह त्याज्यत्वञ्च। इति राज-
वल्लभः॥ * ॥ लग्नविशेषः। औषधविशेषः।
इति मेदिनी। षे, १२१॥ (यथा, सुश्रुते
उत्तरतन्त्रे। १७ अध्याये।
"मेषस्य पृष्ठैर्मधुकेन संयुतं
तद्भक्षणं सर्व्वरुजे प्रयोजयेत्।
क्रियञ्च सर्व्वा: घृतजोद्भवे हितः
क्रमः परिज्ञायिनि चापि पित्तहृत्॥")
राशिविशेषः॥ तत्पर्य्यायः। क्रियः २। (यथा,
श्रीमद्भागवते। ५। २१। ४। "यदा मेषतुलयोर्वर्त्तते
तदाहोरात्राणि समानानि भवन्ति। यदा
वृषभादिषु षट्सु च राशिषु चरति तदाहा-
न्येव वर्द्धन्ते ह्रसति च मासि मासि एकैका
घटिका रात्रिषु॥") अस्याधिष्ठात्री देवता
पुंमेषः। अश्विनीभरणीकृत्तिकापादैकेन मेष-
राशिर्भवति। अत्र जातः दृढशरीरो भवति।
मेषदृशायां नेत्रदुःखी दयालुः धनी मानसुखी
धार्म्मिकः धीरः मत्स्यमांसाशी च। स तु
पृष्ठोदयः। अस्य वर्णः। आरक्तः पीतश्च।
अयं क्रूरः। पित्तोल्बणस्वभावः। कान्तिरहितः।
समानाङ्गः। पर्व्वतचारी। पूर्व्वदिगधिपतिः।
वैश्यवर्णः। अल्पस्त्रीसङ्गः। अल्पसन्तानः।
सुदृढः। अतिरवश्च। इति ज्योतिषम्॥ * ।
अस्याश्रिततद्राशिजातफलं यथा,—
"मेषे दिनेशे पुरुषः सुवेशः
सत्साहसः स्यान्नृपतेः समानः।
वृद्ध्या युतः पित्तकृता च पीड़ा
वक्षोद्भवा वा सततं महौजाः॥" * ॥
चन्द्राश्रिततद्राशिजातफलं यथा,—
"स्थिरजनो रहितः स्वजनैर्नरः
सुतयुतः प्रमदाविचितो भवेत्।
अजगते द्विजराज इतीरितं
विभुतयाद्भुतया सहितः श्रिया॥" * ॥
तल्लग्नजातफलं यथा,—
"मेषलग्ने समुत्पन्नश्चण्डो मानी धनी शुभः।
क्रोधी स्वजनहन्ता च विक्रमी परवत्सलः॥"
इति कोष्ठीप्रदीपः॥

तल्लग्नस्य स्फुटमानम्। ३। ४७। इति ज्योतिस्तत्त्वम्॥ * ॥ त्रितारकग्रराक्रतिश्रवणानक्षत्रस्य गगनमध्योदये मेषलग्नस्य अष्टादशपलाधिकदण्डैको गतो भवेत्। यथा,—

"तारकात्रयमिते ग्रराक्रतौ
कैग्रवे गगनमध्यवर्त्तिनि।
मत्तवारणगतेरजलग्नतो
निर्यवुर्गजमहीध्रलिप्रिकाः॥"

मट्टैलाक्रतिपञ्चतारकधनिष्ठानक्षत्रस्य मस्तकोपर्य्युदये मेषलग्नस्य षट्त्रिंशत्पलाधिकदण्डद्वयं गतं स्यात्। यथा,—

"मस्तकोपरि समागते धने
मट्टैलाक्रतिनि पञ्चतारके।
यान्ति कान्तिमति मेषलग्नतः
सारचाचि रसधस्रलिप्रिकाः॥"

इति कालिदासकृतराचिलग्ननिरूपणम्॥

मेषक., पुं, (मिषतीति। मिष्+अच्। संज्ञायां कन्।) जीवशाकः। राजनिर्घण्टः॥

मेषकम्बलः, पुं, (मेषलोमनिर्म्मितः कम्बलः। मध्यपदलोपी कर्म्मधारयः।) मेषलोमनिर्म्मितवस्त्रम्। तत्पर्य्यायः। ऊर्णायुः २। इत्यमरः। २। ६। १०७॥

मेषलोचन., पुं, (मेषस्य लोचनमिव पुष्पमस्य।) चक्रमर्दः। इति भावप्रकाशः॥ मेषचक्षुस्तुल्यचक्षुषि, त्रि॥

मेषवल्ली, स्त्री, (मेषप्रिया वल्ली।) अजशृङ्गी। इति भावप्रकाशः॥

मेषविषाणिका, स्त्री, (मेषस्य विषाणं शृङ्गमिव प्रतिकृतिरस्याः। विषाण+प्रतिकृतौ कन्। टापि अत इत्वम्।) मेषशृङ्गी। इति रत्नमाला॥

मेषशृङ्गः, पुं, (मेषस्य शृङ्गमिव। तदाकृतित्वात्।) स्थावरविषभेदः। इति हेमचन्द्रः। ४। २६३॥ (यथा, सुश्रुते उत्तरतन्त्रे। १७ अध्याये।
"मेषशृङ्गस्य पुष्पाणि शिरीषधवयोरपि॥")

मेषशृङ्गी, स्त्री, (मेषशृङ्ग+गौरादित्वात् ङीष्।) अजशृङ्गीवृक्षः। मेढ़ाशृङ्गी इति भाषा। (यथा, सुश्रुत। १। ३६।
"मेषशृङ्गो मातुलुङ्गी सुरङ्गीत्यादि॥")
तत्पर्य्यायः। नन्दीवृक्षः २ मेषविषाणिका ३ चक्षुः ४ चक्षुर्ब्बन्धनम् ५ मेढ्रशृङ्गी ६ गृहदुमा ७। इति रत्नमाला॥ (तथास्याः पर्य्यायो गुणाश्च।
"मेषशृङ्गी विषाणी स्यान्मेषवल्लाजशृङ्गिका॥
मेषशृङ्गी रसे तिक्ता वातला श्वासकासहृत्।
रूक्षा पाके कटुस्तिक्ता व्रणश्लेष्माग्निशूलनुत्॥
मेषशृङ्गीफलं तिक्तं कुष्ठमेहकफप्रणुत्।
दीपनं संग्रहणं कासक्रिमिव्रणविषापहम्॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥)

मेषा, स्त्री, (मिष्यतेऽसौ। मिष्+कर्म्मणि घञ्। टाप्।) त्रुटिः। इति शब्दचन्द्रिका। गुजराटी एलाइच इति भाषा॥

मेषाक्षिकुसुमः, पुं, (मेषाणां अक्षिवत् कुसुममस्य।) चक्रमर्दः। इति रत्नमाला॥

मेषाण्डः, पुं, (मेषस्याण्डमिवाण्डमस्य।) इन्द्रः। इति पुराणम्॥

मेषान्त्री, स्त्री, (मेषस्य अन्त्रमिव अन्त्रं सूक्ष्मत्वगस्याः।) वस्त्रान्त्रीवृक्षः। इति राजनिर्घण्टः॥

मेषालुः, पुं, (मेषप्रियः आलुः।) वर्व्वराटवः। इति शब्दचन्द्रिका॥

मेषाक्षयः, पुं, (मेषस्याक्षयः आक्षास्य।) चक्रमर्दः। इति राजनिर्घण्टः॥ (विवरणमस्य चक्रमर्दशब्दे ज्ञातव्यम्॥)

मेषिका, स्त्री, (मेषी+स्वार्थे कन्। टाप्। ह्रस्वः।) मेषी। इति शब्दरत्नावली॥

मेषी, स्त्री, (मिष्यते गृह्यते असौ इति। मिष+घञ्। ङीष्।) तिनिशवृक्षः। जटामांसी। इति राजनिर्घण्टः॥ मेषस्त्रीजातिः। भेड़ी। (यथा, वाजसनेयसंहितायाम्। ३। ५६।
"मेषवृषणौ मेषवृषणाय पुरुषाय मेषवृषणौ
सुखं मेषाय मेष्यै॥")
तत्पर्य्यायः। जालकिनी २ अविः ३। इति त्रिकाण्डशेषः॥ एडका ४ मेषिका ५ इति शब्दरत्नावली। क्रुरी ६ रुशा ७ अविला ८ वेणी ९। इति हेमचन्द्रः। ४। ३४३। अस्या दुग्धगुणाः। मधुरत्वम्। गाढ़त्वम्। स्निग्धत्वम्। कफापहत्वम्। वातामयकरत्वम्। स्थौल्यत्वम्। लोमशायाश्चेत् गुरुत्वम्। वृद्धिदत्वञ्च। इति राजनिर्घण्टः॥ * ॥ अपि च।
"आविकं लवणं स्वादु स्निग्धोष्णं चाप्सरीप्रणुत्।
अहृद्यं तर्पणं केश्यं शुक्रपित्तकफप्रदम्।
गुरुकासेऽनिलोद्भूते केवले वानिले वरम्॥"
इति भावप्रकाशः॥

अस्या दधिगुणाः। सुस्निग्धत्वम्। कफपित्तकरत्वम्। गुरुत्वम्। वाते रक्तवाते च पथ्यत्वम्। शोफव्रणनाशित्वञ्च॥ * ॥ अस्या नवनीतगुणाः। क्लिष्टगन्धत्वम्। शीतलत्वम्। मेधाहरत्वम्। पुष्टिदत्वम्। स्थौल्यत्वम्। मन्दाग्निदीपनत्वम्। वारकत्वम्। पाके हिमत्वम्। लघुत्वम्। योनिशूले कफे वाते दुर्नाम्नि च हितत्वञ्च। दुर्नाम्नि स्थाने गुदशूले इति पुस्तकान्तरे पाठः॥ * ॥ तस्या घृतगुणाः। अतीवगौरवात् सुकुमारदेहिनां वर्च्चोघ्नत्वम्। वृद्धिपाटवहरत्वम्। बलावहत्वम्। वपुषां विसर्गन्धिकारित्वञ्च। इति राजनिर्घण्टः॥ तन्मांसगुणाः। यथा, भावप्रकाशे।
"छागमेषवृषाश्वाद्या ग्राम्याः प्रोक्ता महर्षिभिः।
ग्राम्या वातहराः सर्व्वे दीपनाः कफपित्तलाः।
मधुरा रसपाकाभ्यां दृंहणा बलवर्द्धनाः॥"

मेस्तरणं, क्ली, दशमलग्नम्। यथा,—
"कर्म्मस्थानञ्च दशमं खं मेस्तरणमाख्यदम्।"
इति ज्योतिस्तत्त्वम्॥

मेहः, पुं, (मेहति चरति शुक्रादिरनेनेति। मिह्+घञ्।) प्रमेहरोगः। इत्यमरः। २।६।५६॥ (अस्यौषधं यथा,—
"वङ्गभस्म द्विवल्लञ्च वेल्लयेन्मधुना सह।
ततो गुडसमं गन्धं भक्षयेत् कर्षमात्रकम्॥
गुडूचीसत्त्वमथवा शर्करासहितन्तथा।
सर्व्वमेहहरो ज्ञेयो वङ्गवल्लेह उत्तमः॥"
इति वङ्गवल्लेहः॥
"भस्मसूतं समं कान्तमभ्रकन्तु शिलाजतु।
शुद्धताप्यं शिलाद्योषं त्रिफलाक्षोटजीरकम्॥
कार्पासमज्जारजनी समं भार्य्यञ्च भृङ्गिणा।
विंशद्वारं विशोध्याथ मधुयुक्तं लिहेत्सदा॥
माषमात्रं हरेन्मेहं मेघनादरसो महान्॥"
इति मेघनादरसः॥
"रसभस्म समायुक्तं वङ्गभस्म प्रकल्पयेत्।
अस्य माषद्वयं हन्ति मेहान् चौद्रसमन्वितम्॥"
इति वङ्गेश्वररसः॥
इति वैद्यकरसेन्द्रसारसंग्रहे प्रमेहाधिकारे॥
अन्यत् प्रमेहशब्दे द्रष्टव्यम्॥ * ॥ मिहतीति। मिह+अच्।) मेघः। इति शब्दचन्द्रिका॥ प्रस्रावः। इति हेमचन्द्रः। ३।२६७॥ (अग्न्याद्यभिमुखं तत्करणे दोषो यथा, मनौ। ४।५२।
"प्रत्यग्निं प्रतिसूर्य्यञ्च प्रतिसोमोदकद्विजान्।
प्रतिगां प्रतिवातञ्च प्रज्ञा नश्यति मेहतः॥"
"अग्निसूर्य्यचन्द्रजलब्राह्मणगोवाताभिमुखं मूत्रपुरीषे कुर्व्वतः प्रज्ञा नश्यति।" इति तट्टीकायां कुल्लूकभट्टः॥)

मेहनी, स्त्री, (मेहं हन्तीति। हन्+टक्। ङीष्।) हरिद्रा। इति रत्नमाला॥

मेहनं, क्ली, (मेहति सिञ्चति मूत्ररेतसीति। मिह सेचने+ल्युः।) शिश्नः। इत्यमरः। २।६।७६॥ (यथा, ऋग्वेदे। १०। १६३। ५।
"मेहनादनं कारणाल्लोम।"
"मेहनात् मेढ्रात्।" इति तद्भाष्ये सायणः॥ यथा, च सुश्रुते। १। ३५।
"हस्वानि यस्य पर्व्वाणि सुमहच्चापि मेहनम्।
तथोरस्यवलीढ़ानि न च स्यात् पृष्ठमायतम्॥
ऊर्द्ध्वञ्च अवणौ स्थानान्नासा चोच्चा शरीरिणः।
हसतो जल्पतो वापि दन्तमांसं प्रदृश्यते।
प्रेक्षते यच्च विभ्रान्तं स जीवेत् पञ्चविंशतिम्॥")
मूत्रम्। इति मेदिनी। ने, ११०॥ (यथा, सुश्रुते। १। ३२।
"वस्त्रवद्विलपन् यच्च भूमौ पतति सस्रसुष्कस्रस्तमेढ्रो भग्नग्रीवः प्रणष्टमेहनश्च मनुष्यः॥")
भावेऽनट् प्रत्यये सूत्रोत्सर्गश्च॥

मेहनः, पुं, (मेहति सिञ्चति रसमिति। मिह+ल्युः।) शुष्ककट्टवः। इति राजनिर्घण्टः॥

मेहना, स्त्री, (मेह्यते चार्य्यते शुक्रमस्यामिति। मिह चरणे+णिच्+अधिकरणे युच्। स्त्रियां टाप्।) महिला। इति केचित्॥ (मेहनीयम्। यथा, ऋग्वेदे। ५। ३६। १।
"यदिन्द्रचित्रमेहनास्ति त्वादातमद्रिवः॥")

मैत्रं

मैत्रं, क्ली, (मित्रादागतमिति । यद्वा, मित्रस्येदमिति । मित्र+"तस्येदम् ।" ४।३।१२० । इति अण् ।) अनुराधानक्षत्रम् १७ । यथा,—

"मैत्राद्यमादे खपितीह विष्णु-
र्वैणवयमध्ये परिवर्त्तते च ।
पौष्णावसाने च सुरारिहन्ता
प्रबुध्यते मासचतुष्टयेन ॥"

इति तिथ्यादितत्त्वम् ॥

(मित्रः देवोऽस्येति । आदित्यलोकः । यथा, महाभारते । १२ । ३१७ । ३ ।

"प्राप्नुयोत्क्रममाणस्तु मैत्रं स्थानमवाप्नुयात् ।
पृथिवीं चवनेनाथ ऊरुभ्याञ्च प्रजापतिम् ॥"

यद्वा, मनुः । १२ । ७२ ।

"मैत्राच्च्योतिकः प्रेतो वैश्यो भवति पूयभुक् ॥")

पुरीषोत्सर्गः । यथा,—

"ततः कल्यं समुत्थाय कुर्य्यान्मैत्रं नरेश्वर ! ।
नैर्ऋत्यामिषुविक्षेपमतीत्याभ्यधिकं भुवः ॥
कल्यं उषःकालम् । मैत्रं मित्रदेवताकपाशुपक्षत्वात् पुरीषोत्सर्गः ।" इत्याह्निकाचारतत्त्वम् ॥

अपि च ।

"ब्राह्मे मुहूर्त्ते चोत्तिष्ठेत् स्वस्थो रक्षार्थमायुषः ।
शरीरचिन्तां निर्व्वर्त्त्य मैत्रं कर्म्म समाचरेत् ॥"

मैत्रं मलमूत्रोत्सर्गः । इति राघवभट्टः ॥

तत्र निषिद्धस्थानादि यथा,—

"छायाकूपनदीगोष्ठचैत्यान्तःपथिभस्मसु ।
अग्नौ चैव श्मशाने च विष्णुक्षे न समाचरेत् ॥
न गोमये न दृष्टे वा महावृक्षे च शाद्वले ।
न तिष्ठन् वा न निर्व्वासा न च पर्व्वतमस्तके ॥
न जीर्णदेवायतने न वल्मीके कदाचन ।
न ससत्त्वेषु गर्त्तेषु न गच्छन् वा समाचरेत् ॥
तुषाङ्गारकपालेषु राजमार्गे तथैव च ।
न क्षेत्रे न विले वापि न तीर्थे न चतुष्पथे ॥
नद्यां नदस्यासन्ने वा गोव्रजे न पराशुचौ ।
न सोपानत्पादुको हि छत्री वा नान्तरीक्षके ॥
न चैवाभिमुखः स्त्रीणां गुरुब्राह्मणयोर्गवाम् ।
न देवदेवालययोरग्रामपि कदाचन ॥
न ज्योतींषि निरीक्षन् वा न वायुभिमुखो-
ऽथवा ।
प्रत्यादित्यं प्रत्यनलं प्रतिसोमं तथैव च ॥"

इति कौर्म्म उपविभागे १२ अध्यायः ॥

अस्य विस्तारस्तु पाद्मे उत्तरखण्डे १६० अध्याये दृश्यः ॥ ॥ (मित्रस्य भावः । मित्र+अण् । मित्रता । यथा, मनुः । ८ । ११८ ।

"लोभात् मोहात् भयात् मैत्रात् कामात्
क्रोधात् तथैव च ।
अज्ञानात् बालभावाच्च साक्ष्यं वितथमुच्यते ॥")

त्रि, मित्रसम्बन्धी । (यथा, महाभारते । १२ । १४४ । २३ ।

"प्रियुनां ये न भाषन्ते मित्रभेदकरीं गिरम् ।
अतं मैत्रञ्च भाषन्ते ते नराः स्वर्गगामिनः ॥"

मित्रताग्राही । यथा, श्रीमद्भगवद्गीतायाम् । १२ । १३ ।

मैत्राव

"अद्वेष्टा सर्व्वभूतानां मैत्रः करुण एव च ।
निर्ममो निरहङ्कारः समदुःखसुखः क्षमी ॥"

"मित्रभावो मैत्रो मित्रतया वर्त्तते ।" इति श्रीशङ्करभाष्यम् ॥ "मैत्रः स्त्रीनेषु क्षपासु ।" इति श्रीधरस्वामी ॥ "मैत्री मित्रता तद्वान् मैत्रः ।" इति श्रीमधुसूदनसरस्वती ॥)

मैत्रः, पुं, ब्राह्मणः । इति त्रिकाण्डशेषः ॥ (यथा, मनुसंहितायाम् । २ । ८७ ।

"जपेनैव तु संसिध्येद् ब्राह्मणो नात्र संशयः ।
कुर्य्यादन्यन्न वा कुर्य्यान् मैत्रो ब्राह्मण उच्यते ॥"

"मित्रमेव मैत्रः स्वार्थे अण् ।" इति तट्टीकायां मेधातिथिकुल्लूकौ ॥ (उदयसुकृतात् तृतीयसुकृतम् । तथा च दक्षसंहितायाम् ।

"आर्द्रः सार्द्रसधा मैत्रः शुभो वासव एव च ॥"

यथा, कुमारे । ७ । ६ ।

"मैत्रे मुहूर्त्ते ग्रथुलाञ्छनेन
योगं गतासूत्तरफल्गुनीषु ॥"

वर्णसङ्करविशेषः । यथा, मनुः । १० । २३ ।

"वैश्यात्तु जायते व्रात्यात् सुधन्वाचार्य्य एव च ।
कारुषश्च विजन्मा च मैत्रः सात्वत एव च ॥")

मैत्रम्, क्ली, (मैत्रस्य तत् भमिति ।) अनुराधानक्षत्रम् । इति जटाधरः ॥

मैत्रावरुणः, पुं, (मित्रश्च वरुणश्चेति । "देवताद्वन्द्वे च ।" ६ । ३ । २६ । इत्यनङ् । ततः "देवताद्वन्द्वे च ।" ७ । ३ । २१ । इति मित्रस्य वृद्धिः । "दीर्घाच्च वरुणस्य ।" ७ । ३ । २३ । इति वरुणस्य न वृद्धिः । तयोरपत्यमिति । मित्रावरुण+अण् ।) अगस्त्यः । इति शब्दरत्नावली ॥ (यथा, ऋग्वेदे । ५ । १६ । १५ ।

"न वर्षे मैत्रावरुणं ब्रह्मन्यमभिवर्षति ॥"

अस्य विवरणं यथा, ऋग्वेदे । ७ । ३३ । ११ ।

"उतासि मैत्रावरुणो वसिष्ठोर्व्वश्या ब्रह्मन्
मनसोऽधिजातः ।
द्रप्सं स्कन्नं ब्रह्मणा दैव्येन विश्वे देवा पुष्करे
त्वाददन्त ॥"

"उतापि च हे वसिष्ठ ! मैत्रावरुण ! मित्रावरुणयोः पुत्रोऽसि ब्रह्मन् वसिष्ठ ! उर्व्वश्या अप्सरसो मनसो ममायं पुत्रः स्यादिति इच्छातः संकल्पात् द्रप्सं रेतः मित्रावरुणयोरुर्व्वशीदर्शनात् स्कन्नमासीत् । तस्मादधिजातोऽसि । तथा च वक्ष्यते । सत्रेहजाताविति । एवं जातं त्वां दैव्येन दैवसम्बन्धिना ब्रह्मणा वेदराशिना अहमुवा युक्तं पुष्करे विश्वेदेवा अददन्त अधारयन्त । तथाचादितिर्मित्रावरुणौ जजाते इति प्रकृत्य पठ्यते ।

तयोरादित्ययोः सत्रे दृष्ट्वाप्सरसमुर्व्वशीम् ।
रेतश्चस्कन्द तन्नुकुम्भे न्यपतद्दासतीवरे ॥
तेनैव तु मुहूर्त्तेन वीर्य्यवन्तौ तपस्विनौ ।
अगस्त्यश्च वसिष्ठश्च तत्रर्षी सम्बभूवतुः ॥
बहुधापतितं रेतः कलशे च जले स्थले ।
स्थले वसिष्ठस्य मुनेः तस्मात् ऋषिवरोत्तमः ॥

मैत्रेयः

कुम्भे त्वगस्त्यः सम्भूतो जले मत्स्यो महाद्युतिः ।
उदियाय ततोऽगस्त्यः प्रत्यामात्रो महातपाः ॥
मानेन सन्मितो यस्मात्तस्मान्मान्य इहोच्यते ।
यद्वा कुम्भादृषिर्जातः कुम्भेनापि हि मीयते ॥
कुम्भ इत्यभिधानञ्च परिमाणञ्च लक्ष्यते ।
ततोऽभ्युद्यम्यमाणासु वसिष्ठः पुष्करे स्थितः ।
सर्व्वतः पुष्करे तं हि विश्वे देवा अधारयन् ॥"

इति तद्वाक्ये वायवः ॥)

मैत्रावरुणिः, पुं, (मैत्रावरुणयोरपत्यमिति । मैत्रावरुण+"अत इञ् ।" ४ । १ । ९५ । इति इञ् ।) अगस्त्यः । इत्यमरः । १ । ३ । २० ।

(यथा, महाभारते । ३ । १०३ । १४ ।

"तेऽभिगम्य महात्मानं मैत्रावरुणिमच्युतम् ।
आश्रमस्थं तपोराशिं कर्म्मभिः स्वैरभिष्टुवन् ॥")

मैत्री, स्त्री, (मैत्र+ङीप् । यद्वा, मित्र+भावे ष्यञ्+ङीप् । ततः "हलस्तद्धितस्य ।" ६ । ४ । १५० ।" इति यलोपः ।) मित्रस्य भावः । मित्रस्य कर्म्म । इत्यमरभरतौ ॥ व्यक्तिविशेषे मैत्रीकरणनिषेधो यथा,—

"विद्विष्टपतितोन्मत्तबहुवैरातिकौटके: ।
बन्धकीबन्धकीभर्तृक्षुद्रातृतकितवैः सह ॥
तथातिव्ययशीलैश्च परीवादरतैः शठैः ।
बुधो मैत्रीं न कुर्व्वीत नैकः पन्थानमाश्रयेत् ॥"

इति विष्णुपुराणे तृतीयेंऽशे ११ अध्यायः ॥

"विद्विष्टादिभिर्मैत्रीं न कुर्व्वीत । बहुभिर्वैरं यस्य । अतिकौटकः अत्यन्तं कौटवत् पीड़कः । कण्टकैरिति पाठेऽपि स एवार्थः । बन्धकी असती ।" इति तट्टीका ॥

मैत्रीबलः, पुं, (मैत्री मित्रता बलमस्य ।) बुद्धः । इति त्रिकाण्डशेषः ॥

मैत्रेयः, पुं, (मैत्रे मित्रतायां साधुरिति । मैत्र+ढक् ।) बुद्धभेदः । इति त्रिकाण्डशेषः ॥ (मित्रयोः अपत्यमिति । मित्रयु+"गोत्रादिभ्यश्च ।" ४ । १ । १२६ । इति ढक् । ततः "कैकयमित्रयुप्रलयानां यादेरियः ।" ७ । ३ । २ । इति युस्थाने इयादेशे प्राप्ते । "दाक्षिनायनहास्तिनायन ।" ६ । ४ । १७४ । इति युलोपो निपातितः ।) मुनिविशेषः । यथा,—

"एवं ब्रुवाणं मैत्रेयं पैलायनसुतो बुधः ।
प्रीणयन्निव भारत्या विदुरः प्रत्यभाषत ॥"

इति श्रीभागवते । ३ । ७ । १ ॥

(सूर्य्यः । यथा, महाभारते । ३ । ३ । २७ ।

"इक्ष्वाकुर्नाम राजान्तो विश्वात्मा विश्वतोमुखः ।
चराचरात्मा सूक्ष्मात्मा मैत्रेयः करुणान्वितः ॥"

वर्णसंकरजातिविशेषः । यथा, मनुसंहितायाम् । १० । ३३ ।

"मैत्रेयकन्तु वैदेहो माधूकं सम्प्रसूयते ।
नृन् प्रशंसत्यजसं यो वण्टाताड़ोऽरुणोदये ॥"

"मैत्रेयकं नाम्ना वर्णम् ।" इति तत्र मेधातिथिः ॥

स्त्री । मैत्रेयेण उच्चारिता मैत्रेयी उपनिषद् । याज्ञवल्क्यस्य पत्नी च ॥) मित्रसम्बन्धिनि, त्रि ॥

(मित्रयुर्वंशोद्भवादौ च । यथा, हरिवंशे । ३२ । ७७—७८ ।
"अत ऊर्द्धं प्रवक्ष्यामि दिवोदासस्य सन्ततिम् ।
दिवोदासस्य दायादो ब्रह्मर्षिर्मित्रयुर्नृपः ।
मैत्रेयणी ततः शाखा मैत्रेयास्तु ततः स्मृताः ॥")
मैत्रेयिका, स्त्री. मित्रयुद्वम् । इति त्रिकाण्डशेषः ॥ (मित्रयूनां भावः कर्म्म वा । मित्रयु + "गोत्रचरणाच्छ्लाघात्याकारतदवेतेषु ।" ५ । १ । १३४ । इति युञ् । ततः "केकयमित्रयुप्रलयानां यादेरियः ।" ७ । ३ । २ । इति इयादेशः । यथा, "मैत्रेयिकया शाघते ।" इति काशिका । ७ । ३ । २ ॥)
मैत्र्यं, क्ली, स्त्री, (मित्र + ष्यञ् ।) मित्रस्य भावः । मित्रस्य कर्म्म । इत्यमरभरतौ । ३ । ५ । ३६ ॥ (यथा, पञ्चतन्त्रे । ४ । ७० ।
"प्राहुः सार्द्धपदं मैत्र्यं जना: शास्त्रविचक्षणाः ।
मित्रताञ्च पुरस्कृत्य किञ्चिद्वक्ष्यामि तच्छृणु ॥")
मैथिली, स्त्री, (मिथिला निवासोऽस्येति । मिथिला + "सोऽस्य निवासः ।" ४ । ३ । ८६ । इति अण् । मैथिलस्यापत्यं राजा तस्यापत्यं स्त्री । मैथिल + ङीष् । ङीष् ।) सीता । इति हेमचन्द्रः ॥ (यथा, भट्टिकाव्ये । २ । ४७ ।
"हिरण्मयी शालतेव जङ्गमा
द्युतादिवः स्यात्सुरिवाचिरप्रभा ।
शशाङ्ककान्तेरधिदेवताकृतिः
सुता ददे तस्य सुताय मैथिली ॥"
मिथिलापतिमात्रे, पुं । यथा, महाभारते । १२ । ६६ । ३ ।
"जनको मैथिलो राजा महात्मा सर्व्वतत्त्ववित् ।
योधान् स्वान् दर्शयामास स्वर्गं नरकमेव च ॥")
मैथुनं, क्ली, (मिथुने सम्भवतीति । मिथुन + "संभूते ।" ४ । ३ । ४१ । इति अण् । मिथुनस्येदमित्यण् वा ।) अभ्याधानम् । यथा, मनुः शातातपौ ।
"असपिण्डा च या मातुरसगोत्रा च या पितुः ।
सा प्रशस्ता द्विजातीनां दारकर्म्मणि मैथुने ॥
मैथुने मिथुनशब्दवाच्ये स्त्रीपुंससाध्ये अभ्याधानपुत्रोत्पत्त्यादौ ।" इत्यद्वाहतत्त्वम् ॥*॥ सङ्गतम् । रतम् । इत्यमरः । ३ । ३ । १२१ ॥ "सङ्गतिः सङ्गमो दारसंयोगः विवाह इति कलिङ्गः ॥ रतं सुरतम् । अनयोर्मैथुनम् । मिथुनात् सङ्गमे इदमर्थे खार्थे रतौ नित्याद्यर्थे वा ष्यञ् । सम्बन्धे सुरते युग्मे राज्ञौ मिथुनमिष्यते । इति त्रिकाण्डशेषः ।" इति तट्टीकायां भरतः ॥*॥ शीघ्रस्य पर्य्यायः । सुरतम् २ अभिमानितम् ३ घर्षितम् ४ संप्रयोगः ५ अनारतम् ६ अब्रह्मचर्य्यकम् ७ उपस्थम् ८ क्लिन्नम् ९ क्रीडारतम् १० महासुखम् ११ । इति त्रिकाण्डशेषः ॥ व्यवायः १२ गम्यधर्म्मः १३ रतम् १४ निधुवनम् १५ । इत्यमरः । २ । ७ । ५७ ॥ अस्य गुणाः । धातुक्षयकारित्वम् । रतिसन्तानदार्ढ्यत्वञ्च । अतिप्रियमैथुनस्य श्वासकासज्वरकारित्वम् । अमैथुनस्य प्रमेहमेदग्रन्थिरोगाग्निमान्द्यकारित्वम् । स्त्रीसंसर्गरहितस्य आयुरजराशरीरबलवर्णस्थिरोपचितमांसानि भवन्ति । पूज्यस्थानानुचिस्थानसेकस्थानलोकसभीपघातःकालसन्ध्याकालपर्व्वकालेषु तस्य त्याज्यत्वम् । ऋतुकर्म्मणि रजस्वलाकामा मलिना वन्ध्या वर्णज्येष्ठा वयोज्येष्ठा व्याधियुक्ताङ्गहीनासती वेश्या योनिदोषयुक्ता सगोत्रा गुरुपत्नी भिक्षुकी कपटव्रतधारिणी वृद्धा च त्याज्या ॥ रजस्वलागमने दृष्टायुस्तेजःक्षयोऽधर्म्मश्च भवति । कपटव्रतयुक्तागुरुपत्नी सगोत्राबालागमने एवं पर्व्वकाले सन्ध्याकाले च स्त्रीमैथुने पापमायुःक्षयश्च भवति । वयोरूपगुणोपेतां कुलशीलसमन्विताम् । अधिकामां वृद्धामलङ्कृतां वाचीकरणपीडिताञ्च प्रमदां वृद्धोऽधिकामश्च पुरुषः सेवेत । शुक्रवर्द्धकद्रव्यं सशर्करं शीतलजलं वा पीत्वा कामवाणचञ्चलां सुरूपामनिन्द्यां हृद्यां प्रमदामाद्यप्रहरे हृष्टः कामुको गत्वा तदनु सुखं स्वपेत् । असकृद्गमने तु नरो धातुवैषम्यमेति । रतान्ते स्नानं सशर्करक्षीरपानं निद्रा गौड़िकरसभोजनञ्च हितम् । इति राजवल्लभः ॥ * ॥ ("तत्र प्रथमे दिवसे ऋतुमत्यां मैथुनगमनमनायुष्यं पुंसां भवति । यच्च तत्राधीयते गर्भः स प्रसवमानो विमुच्यते । द्वितीयेऽप्येवं सूतिकागृहे वा । तृतीयेऽप्येवमसम्पूर्णाङ्गोऽल्पायुर्वा भवति । न च प्रवर्त्तमाने रक्ते बीजं प्रविष्टं गुणकरं भवति यथा नद्यां प्रतिस्रोतः स्नावित्वर्थं प्रच्छिन्नं प्रतिनिवर्त्तते नोर्द्धं गच्छति तद्वदेव द्रष्टव्यम् । तस्मा स्त्रियमवतीं चिरात्रं परिहरेत् । अतःपरं मासादृषेयात् ।"
"ऋतुस्नाता तु या नारी स्वप्ने मैथुनमावहेत् ।
आर्त्तवं वायुराधाय कुक्षौ गर्भं करोति हि ॥
मासि मासि विवर्द्धेत गर्भिण्या गर्भलक्षणम् ।
कललं जायते तस्या वर्জ्जितं पैतृकैर्गुणैः ॥"
इति सुश्रुते शारीरस्थाने द्वितीयेऽध्याये ॥) व्रतदिवसे अष्टाङ्गमैथुनस्य त्याज्यत्वं यथा,—
"स्मरणं कीर्त्तनं केलिः प्रेक्षणं गुह्यभाषणम् ।
सङ्कल्पोऽध्यवसायश्च क्रियानिष्पत्तिरेव च ।
मैथुनं विविधं त्याज्यं व्रते क्रीड़ाविवृद्धये ॥"
इति ब्रह्मवैवर्त्ते गणपतिखण्डे ४ अध्यायः ॥ अस्य विधिनिषेधौ यथा,—
"ऋतावुपगमः प्रोक्तः स्वपत्न्यामवनीपते ! ।
पुन्नामर्क्षे शुभे काले व्येकयुग्मासु रात्रिषु ॥
नाक्षातां तु स्त्रियं गच्छेन्नातुरां न रजस्वलाम् ।
नानिष्टां न प्रकुपितां नाप्रशस्तां न गर्व्विणीम् ॥
नादक्षिणां नान्यकामां नाकामां नान्ययोषितम् ।
क्षुत्तृष्णामातपक्लान्तां वा स्वयं वैभिर्गुणैर्युतः ॥
स्नातः सनान्वधृक् प्रीतो नाभातः क्षुधितोऽपि वा ।
सकामः सानुरागश्च व्यवायं पुरुषो व्रजेत् ॥
चतुर्दशीमष्टमीं चैव अमावास्यां पूर्णिमां ।
पर्व्वाण्येतानि राजेन्द्र ! रविसंक्रान्तिरेव च ॥
तैलस्त्रीमांससंभोगी पर्व्वस्वेतेषु वै पुमान् ।
विण्मूत्रभोजनं नाम प्रयाति नरकं ध्रुवः ॥
अष्टेषपर्व्वस्वेतेषु तस्मात् संयमिभिर्व्यधैः ।
भाव्यं सच्छास्त्रदैवेज्याध्यानजप्यपरैर्नरैः ॥
नान्ययोनावयोनौ वा नोपसुक्तौषधस्तथा ।
देवद्विजगुरूणाञ्च व्ययायी नाव्ययी भवेत् ॥
चैत्यचत्वरतीर्थेषु नैव गोष्ठे चतुष्पथे ।
नैव श्मशानोपवने सलिलेषु महीपते ! ॥
प्रोक्तपर्व्वस्वशेषेषु नैव भूपाल ! सन्ययोः ।
गच्छेद्व्यवायं मतिमान् सूत्रोच्चारपीड़ितः ॥
पर्व्वस्वभिगमोऽधन्यो दिवा पापप्रदो नृप ! ।
भुवि रोगावहो नृणामप्रशस्तो जलाशये ॥
परदारान्न गच्छेत मनसापि कदाचन ।
किन्तु वाचास्त्रियन्योऽपि नाक्षि तेषु व्यवायिनाम् ॥
स्तुतो नरकमभ्येति हीयतेऽत्रापि चायुषः ।
परदारगतिः पुंसामुभयत्रापि भीतिदा ॥
इति मत्वा स्वदारेषु ऋतुमत्सु बुधो व्रजेत् ।
यथोक्तदोषहीनेषु सकामेष्वनृतावपि ॥"
इति विष्णुपुराणे । ३ । ११ । १११-१२४ ॥*॥
परस्त्र्यादिगमने दण्डो यथा,—
"ब्राह्मणः क्षत्रियो वैश्यः क्षत्रविट्शूद्रयोषितः ।
व्रजन्नाद्यो भवेद्राजन् दण्ड उत्तमसाहसम् ॥
वैश्यागमे च विप्रस्य क्षत्रियस्यान्त्यजागमे ।
मध्यमं प्रथमं वैश्यो दण्ड्यः शूद्रागमाद्व्रजेत् ॥
शूद्रः सवर्णागमने प्रातं दण्ड्यो महीभुजा ।
वैश्यस्य द्विगुणं राजन् ! क्षत्रियस्त्रिगुणं तथा ॥
ब्राह्मणस्य भवेद्दण्डस्तथा राजंश्चतुर्गुणम् ।
अगम्यासु भवेद्दण्डः खगम्यास्वर्धिको भवेत् ॥
माता भार्य्यसा स्वस्रूर्मातुलानी पितृष्वसा ।
पितृष्वसखिगिर्य्यस्त्री भगिनी तत्सखी तथा ॥
भागिनेयी तथा चैव राजपत्नी तथैव च ।
तथा प्रव्रजिता नारी वर्णोत्कृष्टा तथैव च ॥
इत्यगम्यास्तु निर्द्दिष्टास्तासान्तु गमने नरः ।
शिश्नस्योत्कर्त्तनं कृत्वा ततस्तु वधमर्हति ॥
भ्रातृभार्य्यागमे पूर्व्वाद्दण्डस्तु द्विगुणो भवेत् ।
चाण्डालीञ्च श्वपाकीं वा गच्छन् वधमवाप्नुयात् ॥
तिर्य्यग्योनौ च गोवर्ज्यं मैथुनं योऽभिसेवते ।
स पशुं प्राप्नुयाद्दण्डं तस्माच्च यवसोदकम् ॥
सुवर्णश्च भवेद्दण्डो गां व्रजन् मनुजोत्तम ! ।
वैश्यागामी द्विजो दण्ड्यो वैश्यशुल्कसमं पशुम् ॥
गृहीत्वा वेतनं वैश्या लोभादन्यत्र गच्छति ।
वेतनं द्विगुणं दद्याद्दण्डञ्च द्विगुणन्तथा ॥
अन्यसुद्दिश्य यो दद्यात् नयेदन्यस्य कारणात् ।
तस्य दण्डं भवेद्राजन् ! सुवर्णस्य च माषकम् ॥
नीत्वा भोगान्न यो दद्याद्दाप्यो द्विगुणवेतनम् ।
राज्ञश्च द्विगुणं दण्डन्तथा धर्म्मो न हीयते ॥
बहूनां व्रजतामेकां सर्व्वे ते द्विगुणं दमम् ।
दद्युः पृथक् पृथक् सर्व्वे दण्डञ्च द्विगुणं परम् ॥"
इति मात्स्ये २०१ अध्यायः ॥
मैनाकः, पुं. (मेनकाया अपत्यं पुमान् । मेनकायां भव इति वा । मेनका + अण् । ऐषोदरादित्वात्

साधुः।) पर्व्वतविशेषः। तत्पर्य्यायः। हिरण्यनाभः २ सुनाभः ३ हिमवत्सुतः ४। इति जटाधरः॥ न तु हिमालयस्य ज्येष्ठपुत्रः। यथा,—
"ततो भगवती प्राप मेनकां मुनिसन्निभाम्।
स्नितपूर्व्वं तदा तस्याः पूरयन्ती मनोरथम्॥
श्रीदेव्युवाच।
यूयं पुत्राः संभवन्तु भवत्या वीर्य्यसंयुताः।
तत्रैको बलवान् मुख्यः प्रथमं संभविष्यति॥
एवमुक्ता जगद्धात्री तत्रैवान्तरधीयत।
मेनका च मुदं लब्ध्वा स्वस्थानं प्रविवेश ह॥
ततः काले तु संप्राप्ते मैनाकमचलोत्तमम्।
प्रक्षेप सह योऽद्यापि सिन्धुमध्ये प्रवर्त्तते॥
मेनका सुषुवे देवी देवेन्द्र सहया धृतम्।
अन्यानूनशतं पुत्रान् क्रमात् सा सुषुवे च ह॥"
इति कालिकापुराणे ४० अध्यायः॥
(दानवविशेषः। इति हरिवंशे भविष्यपर्व्वणि। २३२। ३॥)

मैनाकस्वसा, [ष्ट] स्त्री, (मैनाकस्य स्वसा।) पार्व्वती। इति हेमचन्द्रः। २। ११८॥

मैनिकः, पुं, (मीनं हन्तीति। मीन+"पक्षिमत्स्यमृगान् हन्ति।" ४। ४। ३५। इति ठक्।) जालिकः। इति विद्वान्तकौमुदी॥

मैन्दः, पुं, विष्णुबध्यासुरविशेषः। इति हेमचन्द्रः। २। १३४॥ (यथा, हरिवंशे। ४१। १५८—१६०।
"अपरः केशवस्यायं प्रादुर्भावो महात्मनः।
विख्यातो मथुरे कंसे वर्द्धनोत्पातहेतवे वै॥
यत्र द्विविद मैन्दश्च तिविदं कंसमेव च।
दैत्यान् मानुषदेहस्थान् क्षपयामास दीर्य्यवान्॥"
वानरविशेषः। इति रामायणम्॥ (यथा, महाभारते। २। ३१। १८।
"तत्र वानरराजाभ्यां मैन्देन द्विविदेन च।
युयुधे दिवसान् सप्त न च तौ विजितिं गतौ॥")

मैन्दा, [न्] पुं, (मैन्दं हतवानिति। हन्+क्विप्।) विष्णुः। इति हेमचन्द्रः॥

मैरेयं, क्ली, (मारं कामं जनयतीति। मार+ढक्। निपातनात् साधुः।) मद्यविशेषः। इत्यमरः। २। १०। ४२॥ "यद्यपि।
'गौडीपैष्टीहरीतीषु प्रकारेष्वासवो भवेत्।
मैरेयं धातकीपुष्पगुडाजान्यसंहितम्॥'
इति माधवेन भेदः कृतः। तथापि सूत्रमनादृत्यैवमुक्तम्। मारं कामं जनयति मैरेयं स्त्रीयः। निपातनादात् ऐत्वम्।" इति भरतः॥ (यथा,
"मद्यन्तु गौडीमैरेयमिरा च मदिरा सुरा।
कादम्बरी वारुणी च हालापि वरवल्लभा॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भ. १॥
क्वचित्, पुंलिङ्गेऽपि दृश्यते। यथा,—
"तीक्ष्णः कषायो मदकृत् दुर्नामकफगुल्मजित्।
अग्निमेदोनिलहरो मैरेयो मधुरो गुरुः॥"
इति सुश्रुते सूत्रस्थाने ४५ अध्याये॥)

मैषन्दः, पुं, भ्रमरः। यथा। "श्रीमत्सुरद्रुपदपाथोरुहनिःसरन्मकरन्दसन्दोहास्वादनतुन्दिलमनोमैलन्द इत्यादि।" इति वरदविरचितपत्रकौमुद्यां राजप्रश्नस्तिः॥

मोक्ष, कि क्षेपे। इति कविकल्पद्रुमः॥ (चुरा०-पक्षे भ्वा०-पर०-सक०-सेट्।) कि, मोक्षयति मोक्षति। इति दुर्गादासः॥

मोक्षः, पुं, (मोक्ष+भावे घञ्। मोक्ष्यते दुःखमनेन। मोक्ष+करणे घञ्। इति भरतः।) मुक्तिः॥ (यथा, सांख्यसारे। २। ७। २५।
"न मोक्षो गगने पृष्ठे न पाताले न भूतले।
ब्राह्मणसंस्थे चेतःक्षयो मोक्ष इति स्मृतः॥")
मोक्षधर्म्मस्तु महाभारते शान्तिपर्व्वणि द्रष्टव्यः॥
पाटलिवृक्षः। मोचनम्॥ इति मेदिनी। क्षे, २५॥ (यथा, मेघदूते। ६३।
"तामेवं मोक्षलब्धे यदि सखे! धर्म्मलब्धस्य न स्यात्
क्रीड़ालोलाः श्रवणपरुषैर्गर्ज्जितैर्भापयेथाः॥")
क्लीबः। इति हेमचन्द्रः। १। ७५॥ (विश्लेषः। यथा, श्रीमद्भगवद्गीतायाम्। ७। २९।
"जरामरणमोक्षाय मामाश्रित्य यतन्ति ये।
ते ब्रह्म तद्विदुः कृत्स्नमध्यात्मं कर्म्म चाखिलम्॥"
"मोक्षाय विश्लेषणार्थम्।" इत्यानन्दगिरिः॥ आत्मस्वरूपदर्शनम्। इति रामानुजः॥ निरसनम्। इति श्रीधरस्वामी॥ पतनम्। यथा, कुमारसम्भवे। ३। ३१।
"यदीक्षता पत्यनिलं विचेरु-
र्वनस्थलीर्मर्म्मरपत्रमोक्षाः।"
"मर्म्मरुपत्रमोक्षाः शीर्णपर्णपाताः।" इति तट्टीकायां मल्लिनाथः॥)

मोक्षकः, पुं, (मोक्षतीति। मोक्ष+खुल्।) शुष्ककदलः। इति राजनिर्घण्टः॥ (यथा, हठतत्त्वसंहितायाम्। ५४। ११३।
"तोयं भृतं मोक्षकभक्षणाद्वा
यत्नप्रकाशैः परिशेषणं तत्॥"
त्रि, मोक्षकर्त्ता। यथा, मनुसंहितायाम्। ४। २४२।
"असन्धिताना सन्धाता सन्धिताना च मोक्षकः॥")

मोक्षोपायः, पुं, (मोक्षस्य मुक्तेरुपायः।) मुक्तिसाधनम्॥ तच्च तपः। ध्यानादिः। योगः। ज्ञानञ्च। इति हेमचन्द्रः। १। ७७॥ (यथा, हरिवंशे। २५५। ६३।
"स तं शक्रगतं दृष्ट्वा कृपयाभिपरिप्लुतः।
उवाच दानवश्रेष्ठं मोक्षोपायं ददामि ते॥")

मोक्ष्यं, त्रि, (मुक्तेरर्हमिति। मुक्ष+घञ्। ब्रह्मादित्वात् कुत्वम्।) निरर्थकम्। इत्यमरः। ३। १। ८१॥ (यथा, मनौ। ६। ५०।
"यदन्यगोषु वृषभो वत्सानां जनयेच्छतम्।
गोमिनामेव ते वत्सा मोक्ष्यं क्षन्तिमार्षभम्॥"
यथा च।
"प्रेतभूतपिशाचाश्च रक्षांसि विविधानि च।
स्मरणादभिदुद्रुवं क्षिप्रमुपसर्पन्ति मानवम्॥
तानि भेषजमन्त्रैश्च प्रतिषिद्धानि सिद्धयति।
तस्मात्तेषां क्रियाः सर्व्वा भवन्त्येव गतायुषः॥"
इति सुश्रुते सूत्रस्थाने ३१ अध्याये॥)
क्षीणम्। इति मेदिनी। क्षे, ४॥ (यथा, आर्य्यासप्तशत्याम्। ६७०।
"वज्जन एव हि विद्या क्षोभाये भवति दुर्ज्जने मोघा॥")

मोघः, पुं, (मुह्यत्यस्मिन्। मुह+घञ्। कुत्वम्।) प्राचीरम्। इति शब्दमाला॥

मोघपुष्पा, स्त्री, (मोघं पुष्पं रजो यस्याः।) वन्ध्या। इति राजनिर्घण्टः॥

मोघा, स्त्री, पुं, (मुह्यत्यनया। मुह+घञ्। कुत्वम्। स्त्रियां टाप्।) पाटला। इति मेदिनी। घे, ४॥ (अस्याः पर्य्यायो यथा,—
"पाटलिः पाटला मोघा मधुदूती फलेरुहा।
कुबेराक्षी कुबेराक्षी कालस्थाल्यनिवल्लभा॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
विड्लवणम्। इति शब्दमाला॥

मोघोलिः, पुं, प्राचीरम्। इति हारावली। ६८॥

मोचं, क्ली, (मुञ्चति त्वगादिकमिति। मुच्+घञ्।) कदलीफलम्। इत्यमरः॥ (यथा, सुश्रुते चिकित्सितस्थाने। ३१ अः। "तालनाड़िकेरपनसमोचप्रियालविल्वमधुकक्षीरीशातकाम्रफलेक्षाः पित्तसंसृष्टे वायौ॥" विवरणमस्य कदलीफलशब्दे ज्ञातव्यम्॥)

मोचः, पुं, (मुञ्चति त्वचमिति। मुच्+घञ्।) शोभाञ्जनवृक्षः। इति मेदिनी। चे, ८॥ (यथा, महाभारते। ३। १५८। ४३।
"पनसाम्रकृपान् मोचान् खर्ज्जूरानम्बुवेतसान्॥")

मोचकः, पुं, (मोचयति संसारादिति। मुच्+णिच्+ण्वुल्।) मोचः। (मुञ्चति गर्भं त्यजमिति वा। मुच्+ण्वुल्।) कदली। शिग्रुः। (मुञ्चति विषयानिति।) विरागी। इति हेमचन्द्रः। ४। २००॥ शुष्ककदलः। इति राजनिर्घण्टः॥ (मुक्तिकारके, त्रि। यथा, शिवपुराणे वायुसंहितायां पूर्व्वभागे। २। ५१।
"असक्तो मोचकश्चायमकामः कामचोदकः॥")

मोचनं, क्ली, (मुच्+ल्युट्।) मोचः। (यथा, महाभारते। ५। ८४। २१।
"अवतीर्य्य रथात्तूर्णं कृत्वाशौचं यथाविधि।
रथमोचनमादिश्य सन्ध्यामुपविवेश ह॥")
कल्कनम्। दम्भः। ग्राव्णम्। इति मुचधातोर्भावेऽनट्प्रत्ययेन निष्पन्नम्॥ (मोचयतीति। मोचि+ल्युः। मोचनकर्त्तरि, त्रि। यथा, भागवते। ६। १३। २३।
"धन्यं यशस्यं निखिलाघमोचनं
रिपुञ्जयं स्वस्त्ययनं तथायुषम्॥")

मोचनी, स्त्री, (मोचयति रोगादिति। मुच्+णिच्+ल्युः। स्त्रियां ङीप्।) कण्टकारी। इति शब्दरत्नावली॥ मोचकर्त्री च॥

मोचरसः, पुं, (मोचस्य रसः।) ग्राव्णनिर्य्यासः। तत्पर्य्यायः। मोचसुत् २ मोचसारः ३ मोच-

निर्यासः ४ पिच्छिलसारः ५ सुरसः ६ श्लाघ्यलीवेष्टः ७ मोचसारः ८। अस्य गुणाः। कषायत्वम्। कफवातहरत्वम्। रसायनत्वम्। बलपुष्टिवर्णवीर्य्यप्रज्ञायुर्देहर्षिद्विदत्वम्। ग्राहित्वञ्च। इति राजनिर्घण्टः॥ (यथा, सुश्रुते। उत्तरतन्त्रे। ४० अध्याये।

"तिलामोचरसो लोध्रं तथैव मधुकोत्पलम्।
कच्छूरातिलकल्कश्च योगाश्चत्वार एव तु॥
आज्येन पयसा पेया सरक्ते मधुसंयुता॥")

मोचा, स्त्री, (सुष्ठु स्रवतीति। सु स्रु + अच्। टाप्।) श्लाघ्यलिवृक्षः। (यथा,—

"श्लाघ्यलिस्तु भवेन्मोचा पिच्छिला पूरणीति च।
रक्तपुष्पा स्थिरायुश्च कण्टकाढ्या च तूलिनी॥"
इति भावप्रकाशे पूर्व्वखण्डे प्रथमे भागे॥)

कदलीवृक्षः। इत्यमरः। २। ४। १३३॥ (यथास्याः पर्य्यायः।

"कदली वारणा मोचाम्बुसारांशुमतीफला॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

नीलीवृक्षः। इति राजनिर्घण्टः॥

मोचाटः, पुं, क्षणजीरः। रम्भास्थि। मलयोद्भवः। इति मेदिनी। टे, ५४॥

मोची, स्त्री, (सुष्ठते रोगो यया इति। सुच् + घञ्। ङीष्।) छिन्नमोचिका। इति रत्नमाला॥ (विवृतिरस्या छिन्नमोचिकाशब्दे ज्ञातव्या॥)

मोटकं, क्ली, (सुष्ठते सुखीक्रियते इति। सुट् + घञ्। ततः कन्।) पिष्टदानार्थदिगुणसमशुद्धशुचयम्। यथा। "इति द्विगुणसमदर्भमोटकं पिष्टब्राह्मणवामपार्श्वे दद्यात्।" इति आह्निकप्रयोगतत्त्वम्॥

मोटकी, स्त्री, (मोटक + ङीष्।) रागिणीविशेषः। इति हलायुधः॥

मोटनं, क्ली, (सुट् + ल्युट्।) चूर्णीकरणम्। आक्षेपः। इति सुटधात्वर्थदर्शनात्॥

मोटनः, पुं, (मोटतीति। सुट् + ल्युः।) वायुः। इति राजनिर्घण्टः॥

मोटनकं, क्ली, (मोटनेन कायतीति। कै + कः।) एकादशाक्षरच्छन्दोविशेषः। यथा,—

"स्याद्मोटनकं तच्चतुश्च लगौ॥"
"रङ्गे खलु मल्लकलाङ्गप्रख-
ज्ञाणूरमहाभटमोटनकम्।
यः कैलिलवेन चकार च मे
संचाररिपुं प्रति मोटयतु॥"
इति छन्दोमञ्जरी॥

मोटा, स्त्री, (सुट् + अच्। टाप्।) बला। इति राजनिर्घण्टः॥

मोट्टायितं, क्ली, (सुट् + भावे घञ्। वाहुलकात् धनसुट्। ततो भृशादित्वात् क्यङ्। ततो भावे क्तः।) स्त्रीणां स्वाभाविकदशविधालङ्कारान्तर्गतालङ्कारविशेषः। इति हेमचन्द्रः॥ तल्लक्षणं यथा, उज्ज्वलनीलमणिः॥

"कान्तसरणवार्त्तादौ हृदि तद्भावभावतः।
प्राकट्यमभिनयस्य मोट्टायितमुदीर्य्यते॥"

मोण, पुं, (सुण् + अच्।) शुष्कफलम्। गल्कः। मक्षिका। सर्षपकरञ्जः। इति मेदिनी। णे, २४॥

मोद, पुं, (मुद् + भावे घञ्।) हर्षः। इति शब्दरत्नावली॥ (यथा, ऋग्वेदे। ८।१३३।१९।

"यत्रानन्दाश्च मोदश्च मुदः प्रमुद आसते॥")

मोदकः, पुं, क्ली, (मोदयति वातादीनिति। मुद + णिच् + ण्वुल्।) खाद्यविशेषः। इत्यमरः। २। ५। ३३॥ मोया इति भाषा। अस्य दानमन्त्रो यथा,—

"मोदकं खाद्यसंयुक्तं शर्करादिविनिर्म्मितम्।
मया निवेदितं भक्त्या गृहाण परमेश्वरि!॥"
इति दुर्गोत्सवपद्धतिः॥

गुडः। यवासशर्करा। इति राजनिर्घण्टः॥ शर्करादिद्रव्यापक्वौषधविशेषः। अस्य पूर्व्ववीर्य्यं वत्सरार्द्धं तिष्ठति। इति सुखबोधः॥ (यथा,—

"वटका अथ कथ्यन्ते तन्नाम गुटिका वटी।
मोदको वटिका पिण्डी गुडो वर्त्तिस्तथोच्यते॥
द्रव्यतु द्विगुणं देयं मोदकेषु भिषग्वरैः॥
द्रवं द्रवरूपद्रव्यं कर्षप्रमाणं तच्चाचा वर्जं दृष्ट्वा प्रयुज्यते। वलमिति कालादेरप्युपलक्षणम्।"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे॥)

हर्षके, त्रि। इति मेदिनी। के, २४१॥ (यथा, महाभारते। ७। ३५। ३८।

"इतरोहोच्छिन्नवरूथान् क्रथादगामोदकान्॥")

मोदकः, पुं, (मोदयति मिष्टान्ननिर्म्माणेनेति। मुद + णिच् + ण्वुल्।) वर्णसङ्करजातिविशेषः। मयरा इति भाषा। स च शूद्रायां क्षत्रियाज्जातः। इति स्मृतिः॥

मोदनं, क्ली, (मोदयतीति। मुद + णिच् + ल्युः।) शिक्थकम्। इति राजनिर्घण्टः॥ (मुद + भावे ल्युट्।) हर्षः। मुदधात्वर्थदर्शनात्॥ (हर्षजनके, त्रि। यथा, महाभारते। ८।२३।७६।

"हृकगृध्रङ्गालानां तुमुले मोदनेऽहनि।
आवीद्दलक्षयो घोरस्तव पुत्रस्य पश्यतः॥")

मोदमोदिनी, स्त्री, (मोदात् मोदो हर्षात् हर्षः सोऽस्या अस्तीति। मोदमोद + इनि। ङीप्।) जम्बूः। इति राजनिर्घण्टः॥

मोदयन्ती, स्त्री, (मोदयतीति। मुद + णिच् + शतृ। ङीप्।) वनमल्लिका। काठमल्लिका इति भाषा॥ यथा,—

"मदयन्ती गन्धवती मोदयन्ती खरस्वरा।"
इति रत्नमाला॥

अपि च।

"छत्रशून्या मोदयन्ती भूपदी मदयन्तिका॥"
इति शब्दरत्नावली॥

(यथा च सुश्रुते। २। २५।

"पिष्ट्वाथ सर्व्वं सह मोदयन्त्या
मारामजा वीजकसम्भवेन॥")

मोदा, स्त्री, (मोदयति गन्धेन तोषयतीति। मुद + णिच् + अच्। टाप्।) वनमोदा। इति राजनिर्घण्टः॥

मोदाख्यः, पुं, (मोदमाख्याति रसपल्लवादिना विस्तारयतीति। ख्या + ख्या + कः।) आम्रवृक्षः। इति राजनिर्घण्टः॥

मोदाढ्या, स्त्री, (मोदेन आमोदगन्धेन आढ्या बहुला।) वनमोदा। इति राजनिर्घण्टः॥ मोदेन आढ्या। हर्षयुक्ता च॥

मोदितः, त्रि, (मोदो हर्षोऽस्य जातः। मोद + तारकादित्वात् इतच्।) हर्षयुक्तः। इति व्याकरणम्॥

मोदिनी, स्त्री, (मोदयति गन्धेनेति। मुद + णिच् + णिनिः। ङीप्।) वनमोदा। मल्लिका। यूथिका। कस्तूरी। खदिरा। मल्लिकापुष्पविशेषः। लवङ्गम्। वटपत्री २ कुसारिका ३ वृत्तमल्लिका ४। अस्या गुणाः। नेत्ररोगापहन्तृत्वम्। कटुत्वम्। उष्णत्वम्। व्रणघ्नत्वम्। गन्धबहुलत्वम्। श्वासकरीगवाग्नित्वञ्च। इति राजनिर्घण्टः॥ (हर्षदायके, त्रि। यथा, महाभारते। ६। ५६। १३।

"वराम्बरधराणाञ्च शरीरप्रभया तदा।
परलोकार्थवसुखा रुग्णगोधासुमोदिनी॥")

मोरटं, क्ली, (मुर वेष्टने + "शुकादिभ्योटन्।" उणा० ४। ८२। इति अटन्।) इक्षुमूलम्। अङ्कोठपुष्पम्। वत्सराजात् धरणीरम्। इति मेदिनी। टे, ५२। (यथा, वैद्यकरत्नमालायाम्।

"परतो मोरटं विद्यादग्रमर्द्धं कफात्मकम्॥"
यथा च।

"गलदुग्धभवक्षीरं मोरटक्षीरमुच्यते।"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे॥)

मोरटः, पुं, (मुर + अटन्।) सतापभेदः। क्षीरमोरटा इति भाषा। तत्पर्य्यायः। कर्कपुष्पः २ पीलुपत्रः ३ मधुस्रवः ४ घनमूलः ५ दीर्घमूलः ६ पृथुः ७ क्षीरमोरटः ८। क्वचित् पुस्तके कर्कपुष्पस्थाने क्षीरपुष्प इति पीलुपत्रस्थाने पीलुपुष्प इति च पाठः॥ (तथास्य पर्य्यायान्तरम्।

"पीलुपर्णी वनरसो हस्तिपर्णी च मोरटः॥"
इति वैद्यकरत्नमालायाम्॥)

अस्य गुणाः। क्षीरवद्गुणत्वम्। मधुरत्वम्। कषायत्वम्। पित्तदाहज्वरनाशित्वम्। हृद्यत्वम्। वलविवर्द्धनत्वञ्च। इति राजनिर्घण्टः॥ (यथा, सुश्रुते। १। ४५ अध्याये।

"गुरुः किलाटोऽनिलहा पुंस्त्वनिद्राप्रदः स्मृतः।
मधुरा हृद्यौ हृद्यौ तद्वत्पीयूषमोरटौ॥")

मोरटकं, क्ली, (मोरट + स्वार्थे कन्।) इक्षुमूलम्। इति राजनिर्घण्टः॥

मोरटा, स्त्री, (मोरट + टाप्।) मूर्व्वा। इत्यमरः। २। ४। ८३॥ (यथा, सुश्रुते। १। ३८ अः।

"वीरतरुसहचरहृद्यदर्भहृच्छादनी गुन्द्रानलक्षुद्रकाश्मन्तभेदकाग्निमन्थमोरटावसुकवसिरमल्लूक शुक्लेक्षुकेन्दीवरकपीतदङ्गाः॥" तथास्याः पर्य्यायो यथा,—

मोहः

"मूर्च्छा मधुरसा देवी मोरटा तेजनी सुवा।
मधुपर्णिका मधुश्रेणी गोकर्णी पीलुपर्ण्यपि ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

मोषकः, पुं. (मुष्णातीति। मुष्+ण्वुल्।) तस्करः। इत्यमरः। २। १०। २४ ॥

मोषणं, क्ली, लुण्ठनम्। क्षेदनम्। वधः। इति सुषधातोर्भावेल्युट्। (ल्युट् ॥*॥ मुष्णातीति। मुष्+ल्युः। अपहारके, त्रि। यथा, भागवते। ५।२४।२२। "न वै भगवान् नूनमसुभ्यानुजग्राह यदुत पुनरात्मानुस्मृतिमोषणं मायामयं भोगैश्वर्यमेवातनुतेति ॥")

मोषिता, [क्] त्रि, मोषणकर्त्ता। चौरः। इति सुषधातोस्तृन्प्रत्ययेन निष्पन्नः ॥

मोहः, पुं, (मोहनमिति। मुह्+भावे घञ्।) मूर्च्छा। इत्यमरः। २। ८। १०६ ॥ (यथा उत्तररामचरिते ३ अङ्के।
"वीचिवातैः शीकरक्षोदशीतै-
राकर्षद्भिः पद्मकिञ्जल्कगन्धान्।
मोहे मोहे रामभद्रस्य जीवं
खेदं खेदं प्रेषितैस्तर्पयेति ॥"
अस्य विषयो यथा,—
"संज्ञावहासु नाड़ीषु पिहितास्वनिलादिभिः।
तमोऽभ्युपैति सहसा सुखदुःखक्षयोद्भवम् ॥
सुखदुःखक्षयोद्भाच्च नरः पतति काष्ठवत्।
मोहो मूर्च्छेति तां प्राहुः षड्विधा सा प्रकीर्त्तिता ॥"
इति सुश्रुते उत्तरतन्त्रे ४६ अध्याये ॥)
अविद्या। इति मेदिनी। हे, ७ ॥ दुःखम्। इति शब्दरत्नावली ॥ देहादिषु आत्मबुद्धिः। इति गीतासुबोधिन्यां श्रीधरस्वामी ॥ असौ ब्रह्मणो बुद्धितो जातः। यथा,—
"बुद्धेर्मोहः समभवद्दङ्कारादभून्मदः।
प्रमोदश्चाभवत् कण्ठानृष्टलुलोचनतो नृप! ॥"
इति मात्स्ये २ अध्यायः ॥
मोहस्वरूपं यथा,—
"मम माता मम पिता ममेयं गृहिणी गृहम्।
एतदन्यं ममत्वं यत् स मोह इति कीर्त्तितः ॥"
इति पाद्मे क्रियायोगसारे १६ अध्यायः ॥*॥
धर्म्मविभ्रष्टत्वम्। यथा,—
"अकामतः कृतं पापं वेदाभ्यासेन नश्यति।
कामतस्तु कृतं मोहात् प्रायश्चित्तैः पृथग्विधैरिति ॥"
नन्वत्र मोहादिति को मोहः। अत्र।
"मोहशब्देन देवेन्द्र! बुद्धिपूर्व्वो व्यतिक्रमः।
उच्यते पण्डितैर्नित्यं पुराणे सांप्रपायनः ॥"
इति भविष्यपुराणवचनात् ज्ञातबुद्धिपूर्व्वो व्यतिक्रमो मोहः। इति त्रिकाण्डशेषः। तत्र कामनासामर्थ्यादेव बुद्धेर्लब्धत्वात्। उच्यते। शूद्रस्य ब्रह्मार्थां मोहाद्गच्छत इत्यादौ सुह वैचित्त्ये इति धात्वर्थानुसारात् अज्ञानमात्रं मोहः। यत्र तु कामनाशब्दोऽस्ति तत्र भविष्यपुराणबहेतिमोहशब्दो न स्यात्। किन्तु धर्म्मविभ्रष्टत्वं मोहः स चाधर्म्मबुद्धौ सत्यामप्यकर्त्तव्ये रागात् कर्म्मव्यतिक्रमः। यथा, व्यासः।
"मोहो धर्म्मविभ्रष्टत्वं मानस्तात्माभिमानिता।"
एवञ्च भविष्यपुराणीयबुद्धिशब्दोऽप्यधर्म्मज्ञानमेवाभिधत्ते सत्यधर्म्मज्ञाने पापगौरवाधेमिदमुक्तं मोहादिति। इति प्रायश्चित्तविवेकः ॥*॥
मोहवृक्षो यथा,—
सुमनोवाच।
"श्रयतामभिधास्यामि सर्व्वसन्देहनाशनम्।
स्वरूपमुपदेशस्य सर्व्वविज्ञानदर्शनम् ॥
लोभः पापस्य बीजोऽयं मोहो मूलन्तु तस्य हि।
असत्यं तस्य च स्कन्धो माया शाखासुविस्तरः ॥
दम्भकौटिल्यपत्राणि कृत्वा पुष्पितः सदा।
पैशुन्यं तस्य सौगन्ध्यमज्ञानं फलमेव हि ॥
क्षुद्रपापखगचौराश्च क्रूराः क्रूराश्च पापिनः।
पक्षिणो मोहवृक्षस्य मायाशाखाः समाश्रिताः ॥
अज्ञानन्तु फलं तस्य रसोऽधर्म्मफलस्य हि।
भावोदर्केण संवृद्धस्तस्य सत्त्वात् स तु प्रियः ॥
अधर्म्मस्तस्य सुरभिः क्लेदश्च मधुरायते।
तादृशेनैव फलेनैव सुफलो लोभपादपः ॥
तस्य च्छायां समाश्रित्य यो नरः परिवर्त्तते।
फलानि तस्य योऽश्नाति सुपक्वानि दिने दिने ॥
फलानान्तु रसेनैव अधर्म्मेण तु मोहितः।
सुसंपुष्टो भवेन्मर्त्यः पतनाय प्रयच्छति ॥"
इति पाद्मे भूमिखण्डे ११ अध्यायः ॥
मोहनं, क्ली, (मुह्यतेऽनेनेति। मुह्+ल्युट्।) सुरतम्। इति हेमचन्द्रः। ३। २०० ॥ यथा, मार्कण्डेये। ५१। ७७।
"प्रविश्य गर्भमत्यन्तं मुक्ता मोहयतेऽपरा।
जायन्ते मोहनात्तस्याः सर्व्वमेवृककच्छपाः ॥")
होममन्त्रौषध्यादिद्वारासुग्धताकरणम्। तत्र होमेऽङ्गुलिनियमो यथा,—
"मोहनं वश्यकामश्च प्रीतिसंवर्द्धनं तथा।
प्रदेशिनीकनिष्ठाभ्यां सर्व्वमेतत् प्रसिध्यति ॥
मोहनाकर्षणस्त्रैव क्षोभणोच्चाटनं तथा।
कनिष्ठामध्यमाङ्गुष्ठसंयोगेन तु लीलया ॥
विधियुक्तेन होमेन तथा द्रव्यानुयोगतः।
सर्व्वे मन्त्राः प्रसिध्यन्ति सुग्रामन्त्रप्रयोगतः ॥"
इति तन्त्रसारः ॥
(नगरभेदः। यथा, महाभारते। २। २५३। ६।
"मोहनं पत्तनञ्चैव त्रिपुरं कोशलां तथा।
एतान् सर्व्वान् विनिर्जित्य करमादाय सर्व्वशः ॥")
मोहनः, पुं, (मोहयतीति। मुह्+णिच्+ल्युः।) धुस्तूरवृक्षः। इति राजनिर्घण्टः ॥ कामदेवस्य पञ्चबाणान्तर्गतबाणविशेषः। इति त्रिकाण्डशेषः ॥ (यथा, कथासरित्सागरे। ७१। १३२।
"कामस्येव जगच्चेतोमोहनाख्याधिदेवतम्।
तद्रूपकृतचित्ताभूत् समाधिस्थेव तत्क्षणम् ॥"
नृपविशेषः। यथा, कथासरित्सागरे। ४७। ६१।
"वीक्ष्य प्रलम्बं निहतं मोहनो नाम भूपतिः।

मोहना

सन्निपत्याट्टहासं तं ताड़यामास सायकैः ॥"
मोहकारके, त्रि ॥ यथा, गीतायाम्। १८। ३६।
"यदग्रे चानुबन्धे च सुखं मोहनमात्मनः।
निद्रालस्यप्रमादोत्थं तत्तामसमुदाहृतम् ॥".
"अत्र मोहनं मोहकरम।" इति आनन्दगिरिः ॥)

मोहनभोगः, पुं, (मोहनश्चासौ भोगश्चेति।) समिताशर्करादृतादियुक्तमिष्टान्नविशेषः। इति पाकराजेश्वरः ॥

मोहना, स्त्री, (मोहयति पुष्पेणेति। मुह्+ल्युः। टाप्।) त्रिपुरमालीपुष्पम्। इति रत्नमाला ॥ मरुन्माला। इति शब्दमाला ॥

मोहनी, स्त्री, (मुह्यत्यनयेति। मुह्+ल्युट्। स्त्रियां ङीष्।) उपोदकी। इति राजनिर्घण्टः ॥ वटपत्री। इति भावप्रकाशः ॥ (तथास्याः पर्य्यायः।
"मोहनी मल्लिकाख्या तु वटपत्री च मोहना।"
इति वैद्यकरत्नमालायाम् ॥)
माया। यथा, महाभारते। १४। ८०। ४५।
"मया तु मोहनी नाम मायेयं संप्रदर्शिता ॥")

मोहरात्रिः, स्त्री, (मोहस्य रात्रिः।) दैनन्दिनप्रलयः। यथा,—
"एवं पञ्चाशदब्दे च गते तु ब्रह्मणो नृप!।
दैनन्दिनन्तु प्रलयं वेदेषु परिकीर्त्तितम् ॥
मोहरात्रिश्च सा प्रोक्ता वेदविद्भिः पुरातनैः।
तत्र सर्व्वे प्रनष्टाश्च चन्द्रार्कादिदिगीश्वराः ॥
आदित्या वसवो रुद्रा मन्विन्द्रा मानवादयः।
ऋषयो मुनयश्चैव गन्धर्व्वा राक्षसादयः ॥
मार्कण्डेयो लोमशश्च पैचकश्चिरजीविनः।
इन्द्रद्युम्नश्च नृपतिश्चाकूपारश्च कच्छपः।
नाड़ीजङ्घो वकश्चैव सर्व्वे नष्टाश्च तत्र वै ॥
ब्रह्मलोकादधः सर्व्वे लोका नागालयास्तथा।
ब्रह्मलोकं ययुः सर्व्वे ब्रह्मलोकादधस्तथा ॥
गते दैनन्दिने ब्रह्मा लोकांश्च सृजते पुनः।
एवं शतान्दपर्य्यन्तं परमायुश्च ब्रह्मणः ॥
ब्रह्मणश्च निपातेन महाकल्पो भवेन्नृप!।
प्रकीर्त्तिता महारात्रिः सा एव च पुरातनैः।"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे। ५। ४। ७२—७८ ॥*॥
मोहः कर्म्मव्यग्रहः स एव रात्रिरिव रात्रिर्बुद्धिमोहकत्वान्निद्रारूपा। इदानीन्तनप्राणानां रात्रिरिति वा। इति देवीमाहात्म्यटीकायां विद्याविनोदः ॥*॥ जन्माष्टमीरात्रिः। यथा,—
"दीपोत्सवश्चतुर्दश्यामहमयो योग एव चेत्।
कालरात्रिर्महेशानि! तारिकालीप्रियङ्करी।
जन्माष्टमी महेशानि! मोहरात्रिः प्रकीर्त्तिता ॥
तृतीया माधवे शुक्ला रुद्रवारर्क्षसंयुता।
दारुणा कीर्त्तिता देवि! सर्व्वसिद्धेश्वरी परा ॥"
इति शक्तिसङ्गमतन्त्रम् ॥

मोहशास्त्रं, क्ली, (मोहोत्पादकं शास्त्रमिति मध्यपदलोपिकर्म्मधारयः।) अविद्याजनकग्रन्थः। यथा,—
"गोपतिं प्राह विप्रेन्द्रानालोक्य भगवान् हरिः।

मौक्तिकं

न वेदवाह्यपुरुषे पुण्यलेशोऽपि शङ्कर ! ॥
गङ्गच्छते मद्भादेव ! धर्म्मो वेदादि निर्व्वभौ ।
अथापि भक्तवात्सल्यादक्षितया महेश्वर ! ॥
अस्माभिः सर्व्व एवेमे गन्तारो नरकानपि ।
अस्माद्वे वेदवाह्यानां रक्षणाय च पापिनाम् ।
विमोहनाय शास्त्राणि करिष्यावो वृषध्वज ! ॥
एवं सम्बोधितो रुद्रो माधवेन मुरारिणा ।
चकार मोहशास्त्राणि केशवोऽपि शिवेरितः ॥
कापालं भाकुलं वामं भैरवं पूर्व्वपश्चिमम् ।
पञ्चरात्रं पाशुपतं तथान्यानि सहस्रशः ॥"

इति कौर्म्मे १४ अध्यायः ॥

मोहिनी, स्त्री, (मोहयति सौन्दर्य्यादिनेति । मुह + णिच् + णिनिः । स्त्रियां ङीप् ।) त्रिपुरमालीपुष्पम् । इति रत्नमाला ॥ (वटपत्री । तत्पर्य्यायो यथा.—

"वटपत्री तु कथिता मोहिनी रेचनी बुधैः ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

समुद्रमन्थनकाले देवानाममृतपानायासुराणां मोहनाय च भगवदवतारविशेषः । यथा,—

"धान्वन्तरं द्वादशमं त्रयोदशममेव च ।
अपाययत् सुरानन्यान् मोहिन्या मोहयन् स्त्रिया ॥"

इति श्रीभागवते १ स्कन्धे ३ अध्यायः ॥

सर्व्वैश्वर्य्याविशेषः । यस्याः प्रापात् ब्रह्मणोऽपूण्यत्वं जातम् । यथा,—

"यतो हससि गर्व्वेण ततोऽपूण्यो भवाचिरम् ।
अचिराद्दर्पभङ्गं ते करिष्यति हरिः स्वयम् ॥
निषेध प्रणतं ब्रह्मन् ! सर्व्वैश्वर्य्याद्य सामृतम् ॥
तवैव कवचं स्तोत्रं मन्त्रं यच्छति यो नरः ।
भविता तस्य विघ्नश्च न यास्यत्युपहास्यताम् ॥
भविता वार्षिकी पूजा देवतानां युगे युगे ।
तव माघाद्य संक्रान्त्यां न भविष्यति सा पुनः ॥
इत्युक्त्वा मोहिनी शीघ्रं जगाम मदनालयम् ।
तेन सार्द्धं रतिं कृत्वा बभूव विज्वरा पुनः ॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ३३ अध्यायः ॥ विस्तरस्तु ब्रह्मनृग्रब्दे द्रष्टव्यः ॥ (मोहकर्त्तरि त्रि । यथा, भागवते । ३ । ६ । ३५ ।

"अतो भागवतीं माया मायिनामपि मोहिनीं ।
यत् स्वयं चात्मवर्त्मात्मा न वेद किमुतापरे ॥")

मौङ्गलिः, पुं, काकः । इति हेमचन्द्रः । ४ । ३८८ ॥ (यथा, उत्तररामचरिते २ अङ्के ।

"क्रूयतां कृष्णकृष्णकटीरकौशिकघटाद्युत्कारवत्
कौचक-
स्तम्भाडम्बरमूकमौशलिकुलः क्रौष्टावतोऽयं
गिरिः ।
एतस्मिन् प्रचलाकिनां प्रचलतासुद्वेजिता
कूजिते-
रुद्वेजन्ति पुराणचन्दनतरुस्कन्धेषु कुम्भी-
नसाः ॥")

मौक्तिकं, क्ली, (मुक्तैव । मुक्ता + "विनयादिभ्यष्ठक् ।" ५ । ४ । ३४ । इति ठक् ।) मुक्ता । इत्यमरः । २ । ६ । ८२ ॥ (यथा, भागवते । ५ । ५ ।

"शैले शैले न माणिक्यं मौक्तिकं न गजे गजे ।
साधवो नहि सर्व्वत्र चन्दनं न वने वने ॥"

तथास्य पर्य्यायः ।

"मौक्तिकं शौक्तिकं मुक्ता तथा मुक्ताफलञ्च तत् ।
अभावे मौक्तिकस्यापि मुक्ताशुक्तिं प्रयोजयेत् ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥)

मौक्तिकतण्डुलः, पुं, (मौक्तिकमिव शुक्लः तण्डुलोऽस्य ।) धवलयावनालः । इति राजनिर्घण्टः ॥

मौक्तिकप्रसवा, स्त्री, (मौक्तिकस्य प्रसवा ।) शुक्तिः । इति राजनिर्घण्टः ॥

मौक्तिकशुक्तिः, स्त्री, (मौक्तिकानां शुक्तिः ।) शुक्तिः । इति राजनिर्घण्टः ॥ सुक्तार झिनुक् इति भाषा ॥

मौखं, क्ली, (मुखस्येदमिति । मुख + अण् ।) मुखसम्बन्धाधीनपापम् । तत्तु अभक्ष्यभक्षणरूपं तत्र क्षौरम् । संसर्गरूपस्य तस्य प्रायश्चित्तं यथा । सुमन्तुः । यश्च तैर्य्यग्योनमौखश्वौवाणां सम्बन्धागामन्यतमेन सह सम्पर्कमियात् तस्याप्येतदेव प्रायश्चित्तं विदध्यात् । इयात् कुर्य्यात् । एतदेवेति द्वादशवार्षिकमित्यर्थः । अत्र याजनादीनामन्यतमेन संवत्सरेण पतितोऽवगम्यते । इति शूलपाणिधृतप्रायश्चित्तविवेकः ॥ मुखसम्बन्धिनि, त्रि ॥

मौखर्य्यं, क्ली, मुखरत्वं । मुखरस्य भाव इत्यर्थे ष्यञ्प्रत्ययेन निष्पन्नम् ॥

मौखिकं, त्रि, मुखसम्बन्धि । मुखस्येदमित्यर्थे ष्ठिक् (ठक्) प्रत्ययेन निष्पन्नम् ॥

मौञ्जी, स्त्री, (मुञ्जस्येयमिति । मुञ्ज + अण् । स्त्रियां ङीप् ।) मुञ्जनिर्म्मितमेखला ॥ (यथा, शिशुपालवधे । १ । ६ ।

"शिशुर्जङ्गमौञ्जीयुजमर्জ্জुनच्छविं
वसानमेणाजिनमक्षगत्नुति ।
सुवर्णलक्षाकलिताम्बराधरां
विडम्बयन्तं शितिवाससस्तनुम् ॥"

"मुञ्जस्तृणविशेषस्तन्मयीमेखला मौञ्जी ।" इति तट्टीकायां मल्लीनाथः ॥) यथा,—

"विप्रस्य क्षत्रियस्यापि मौञ्जी स्याद्द्विजायने ।
दशिये च विशां कार्य्ये नागधाये न संक्रमे ॥"

मनुः ।

"मौञ्जी त्रिवृत्समा श्लक्ष्णा कार्य्या विप्रस्य मेखला ।
क्षत्रियस्य तु मौर्व्वी ज्या वैश्यस्य शणतान्तवी ॥
सुञ्जाभावे तु कर्त्तव्या कुशाश्मन्तकबल्वजैः ।
त्रिवृता ग्रन्थिनैकेन त्रिभिः पञ्चभिरेव वा ॥"

इति संस्कारतत्त्वम् ॥

मौञ्जीदृणाख्यः, पुं, (मौञ्जीदृणमित्याख्यास्य ।) मुञ्जः । इति राजनिर्घण्टः ॥

मौञ्जीपत्रा, स्त्री, (मौञ्जीपत्रमिव पत्रमस्याः ।) वल्लजा । इति राजनिर्घण्टः ॥

मौञ्जीबन्धः, पुं, (मौञ्जा बन्धः बन्धनम् ।) मुञ्जमेखलाबन्धनम् । उपनयनमिति यावत् । यथा,

"जन्मभाद्दमे सिंहे नीचस्थे शत्रुमे गुरौ ।
मौञ्जीबन्धः शुभः प्रोक्तश्चैत्रे मीनगते रवौ ॥"

इति ज्योतिर्निबन्धे नारदवचनम् ॥

मौढ्यं, क्ली, (मूढ़स्य भावः कर्म्म वा । मूढ़ + "गुणवचनब्राह्मणादीभ्यः कर्म्मणि च ।" ५ । १ । १२४ । इति ष्यञ् ।) मोहः । इति हेमचन्द्रः । २ । २३४ ॥ (यथा, श्रीमद्भागवते । ३ । २६ । २२ ।

"यो मां सर्व्वेषु भूतेषु सन्तमात्मानमीश्वरम् ।
हित्वार्च्चां भजते मौढ्याद्भस्मन्येव जुहोति सः ॥"

पुं, मूढ़स्यापत्यम् । मूढ़ + "कुर्व्वादिभ्यो ण्यः ।" ४ । १ । १५१ । इति ण्यः । मूढ़पुत्रः । इति व्याकरणम् ॥)

मौङ्गलिः, पुं, काकः । इति त्रिकाण्डशेषः ॥

मौञ्जल्यः, पुं, (मुञ्जलस्यापत्यमिति । मुञ्जल + ष्यञ् ।) मुञ्जलमुनिपुत्रः । स च गोत्रकारकः । अस्य षष्ठ प्रवराः यथा । और्व्वभृगवभार्गवजामदग्न्याप्नुवन्तः । इति कुलदीपिका ॥ (यथा, हरिवंशे । ३२ । ७० ।

"मुञ्जलस्य तु दायादो मौञ्जल्यः सुमहायशाः ॥)

मौञ्जीनं, क्ली, (मुञ्जानां भवनं क्षेत्रमिति । मुञ्ज + "धान्यानां भवने क्षेत्रे खञ् ।" ५ । २ । १ । इति खञ् ।) मुञ्जभवोचितक्षेत्रम् । इत्यमरः । २ । ६ । ८ ॥

मौनं, क्ली, (मुनेर्भाव इति । मुनि + अण् ।) शब्दप्रयोगराहित्यम् ॥ तत्पर्य्यायः । अभाषणम् २ । तूष्णीम् ३ तूष्णीकाम् ४ । इत्यमरः । २ । ७ । २६ ॥ (यथा, रघुवंशे । १ । २२ ।

"ज्ञाने मौनं क्षमा शक्तौ त्यागे श्लाघाविपर्य्ययः ।
गुणा गुणानुबन्धित्वात्तस्य सप्रसवा इव ॥")

कर्म्मविशेषे मौनाचरणं यथा,—

"उच्चारे मैथुने चैव प्रस्रावे दन्तधावने ।
स्नाने भोजनकाले च षट्सु मौनं समाचरेत् ॥"

इति तिथ्यादितत्त्वम् ॥

मौनी, [न्] पुं, (मौनमस्यास्तीति । मौन + "व्रत इनिठनौ ।" ५ । २ । ११५ । इति इनिः ।) मुनिः । इति जटाधरः ॥ (यथा, मार्कण्डेये । ७५ । ६६ ।

"ततः स चिन्तयामास राजा जामात्रकारणम् ।
विवेद च न तन्मौनी जगद्दोषञ्च तं नृपः ॥")

मौनयुक्ते, त्रि । यथा,—

"खिनीवाली कुहूर्व्वापि यदि सोमदिने भवेत् ।
गोसहस्रफलं दद्यात् स्नानं यन्मौनिना कृतम् ॥
एतच्च मौनमरुणोदयमारभ्य स्नानपर्य्यन्तं कार्य्यं न तु स्नानकालमात्रे ।" इति तिथ्यादितत्त्वम् ॥

मौनेयः, पुं, (मुनेरपत्यं पुमान् । मुनि + "इतश्चानिञ् ।" ४ । १ । १२२ । इति ढक् ।) गन्धर्व्वगणविशेषः । यथा,—

"गन्धर्व्वाप्सरसः पुण्या मौनेयांस्तु निबोधत ।
चित्रसेनोग्रसेनौ तु जयांवुरनिषस्तथा ॥
हसराड्हसघोषांश्च सूर्य्यवर्चास्तथैव च ।
युगवत्तृणपत्काद्यान् निदिक्षिञ्चरथस्तथा ॥
त्रयोदशः शालिशिराः पर्य्यण्यश्च चतुर्दशः ।
इत्येते देवगन्धर्व्वास्त्रयस्त्रिंशच्छुभाक्षराः ॥"

इति वह्निपुराणम् ॥

मौलिः

(अक्षरोमेदे, स्त्री। यथा, हरिवंशे।२१८।४७।
"काश्या शारद्वती चैव मौनेयाक्षरसः स्मृताः॥")
मौरलिकः, त्रि, (मुरजस्तदाहरं शिल्पमस्य। मुरज+"शिल्पम्।"४।४। ५५। इति ठक्।) मुरजवादकः। इत्यमरः।२।१०।१३॥
मौर्ख्यं, क्ली, (मूर्खस्य भावः। मूर्ख+"वर्णदृढादिभ्यः ष्यञ् च।"५।१।१२३। इति ष्यञ्।) अज्ञानम्। इति हेमचन्द्रः।२।२२६॥ (यथा, सुश्रुते शारीरस्थाने ४ अः।
"अनवस्थितता मौर्ख्यं भीरुत्वं चलितार्थिता॥")
मौर्व्वी, स्त्री, (मूर्व्वाया विकारः। मूर्व्वा+"अवयवे च प्राण्यौषधिवृक्षेभ्यः।" ४।३।१३५। इति अण्। ङीप्।) धनुर्गुणः। इत्यमरः। २।८।८५। (यथा, रघुः।१।१६।
"शार्ङ्गेष्वकुण्ठिता बुद्धिर्मौर्व्वी धनुषि चातता॥"
अनङ्गश्री। इति रत्नमाला॥ कोँगा इति भाषा॥ (मूर्व्वामयी। यथा, मनौ।२।४२।
"मौञ्जी त्रिवृत्समा श्लक्ष्णा कार्य्या विप्रस्य मेखला।
क्षत्रियस्य तु मौर्व्वी ज्या वैश्यस्य शणतान्तवी॥")
मौलः, पुं, (मूलं वेत्ति। मूल+अण्।) भूम्यादेर्मूलज्ञाता। मोड़ल इति भाषा। यथा,—
"यत् परम्परया मौलाः सामन्ताः स्वामिनं विदुः।
तदन्वयस्यागतस्य दातया गोत्रजैर्महो॥"
इति दायतत्त्वम्॥
तस्य लक्षणं यथा,—
"ये तत्र पूर्व्वं सामन्ताः पश्चाद्देशान्तरं गताः।
तन्मूलत्वात्तु ते मौला ऋषिभिः परिकीर्त्तिताः॥"
इति मिताक्षरा॥
(विनिगीश्वरिमध्योदासीनः। यथा, कामन्दकीये।८।३४।
"चत्वारः पार्थिवा मौलाः पृथङ्मित्रैः सहाष्टकम्॥"
मूलभूते, त्रि। यथा, तत्रैव।८।२५। [या:।
"मौला द्वादश यास्तेषां तथामात्याश्च तथा च सप्तप्रतिचाधिका ज्ञाताः सर्व्वे प्रकृतिमण्डलम्॥")
मौलिः, पुं, क्ली, (मूल+सुतङ्गमादित्वात् इञ्।) चूड़ा। (यथा, महाभारते। ६।५६।५।
"एवमुक्त्वा स वामेन पदा मौलिमुपास्पृशत्॥
शिरश्च राजसिंहस्य पादेन समलोड़येत्॥")
किरीटम्। (यथा, हरिवंशे।६७।३०।
"इत्यहं सा मया मौलिरुद्धृता वरुणालयात्॥")
संयतकेशः। इत्यमरः।३।३।१६२। (यथा, रघौ।७।६६।
"स चापकोटीनिहितैकबाहुः
शिरस्त्रनिष्कर्षणभिन्नमौलिः।
ललाटबद्धत्रयमम्बुबिन्दूः
नीतां प्रियामेत्य वधौ बभाषे॥")
मस्तकम्। इति हेमचन्द्रः।३।२।२१०॥
(यथा, आर्य्यासप्तशत्याम्।४२४।॥

मौलिकः

"भालनयनेऽभिरिन्दुर्मौलौ गात्रे भुजङ्गमणिदीपाः॥"
प्रधानः। यथा, मार्कण्डेये।५६।१४।
"मौलयस्ते महाकायाः शाकपोतकरम्भकाः॥")
मौलिः, पुं, (मूलस्यादूरभवः। मूल+सुतङ्गमादित्वादिञ्।) अशोकवृक्षः। इति मेदिनी॥
मौलिः, स्त्री, (मूले जाता। मूल+इञ्।) भूमिः। इति मेदिनी॥
मौलिकः, पुं, (मूले आदौ जातः। मूल+ठञ्।) कुलीनभिन्नः। यथा राढ़ीयवारेन्द्रब्राह्मणस्य श्रोत्रिय: तथा कायस्थस्य मौलिकः। एवं दाक्षिणात्यवैदिकब्राह्मणस्य अन्यपूर्व्वापरिणेतापि तत्पदवाच्यः। वङ्गजकायस्थस्य च मध्यन्यशब्दवाच्यः। यथा। अथ मध्यन्यलक्षणमाह। मध्यन्यशब्दो रूढ़ इत्यन्यः। डित्यडवित्यवत्। मध्यन्यः कुलमध्यस्थकुलीनस्य विश्रामस्थलमित्यर्थः। मध्यन्यशब्दस्य लक्षणान्तरम्। कुलीनेतरसिद्धवंशजातकत्वे सति दशपुरुषावधि अनवच्छिन्नकुलार्च्चकत्वं मध्यन्यत्वम्। स च द्विविधः। सिद्धः साध्यश्च। सिद्धत्वं प्रकृतमध्यन्यत्वम्। प्रकृतसिद्धवंशजातत्वे सति दशपुरुषावधिकुलार्च्चकत्वं सिद्धत्वम्। सिद्धपदाकाङ्क्षित्वे सति दशपुरुषावधिकुलार्च्चकत्वं साध्यत्वम्। अस्य प्रपञ्चमाह।
"कुलीनकुलरक्षार्थं विवादेषु मीमांसया।
एतेषां गुणमाश्रित्य मध्यन्यः कुलसत्तमम्॥"
इति कुलदीपिका॥
दक्षिणराढ़ीयकायस्थस्याष्टसन्मौलिका यथा,—
"गौड़ेश्वरी कीर्त्तिमन्तश्चिरवसतिकृता मौलिका ये हि सिद्धास्ते दत्ताः सेनदासाः करगृहसहिताः पालिताः सिंहदेवाः।
ये वा प्रद्याभिधाना: स्थितिविनययुताः सप्तसिद्धेऽपिपूर्व्वा
मित्राद्या वीक्ष्य राज्ञा वरगुणगुणिता मौलिकत्वेन साध्याः॥"
अपि च।
"सेनो दत्तः करो ग्रेयो दासो देवः प्रतिष्ठितः।
पालितः सिंहधर्म्मेशो गुहः सन्मौलिकाः स्मृताः॥"
द्विसप्ततिसाध्यमौलिका यथा,—
"घोड़ः खरधरधरणी वाण
व्यायिच सोमः पैसुर सामः।
भञ्जो विन्दो गुह बल लोधः
शुम्भो वम्भो डुर भूँधि चन्द्रः॥
रुद्रो रक्षित राजादित्यो
विष्णुनागः खिल मित्र गुतः।
इन्द्रो गुप्तः पालो भद्र
सोमधाकुर वन्धुर नाथः॥
शूँयिर्द्वेशूँ मानो गन्धो
राधा राया राहुत सेना।
दासो दासा गन्ध उमाका॥

मौषलं

खामः सोमो धर वै व्यासः
वीरस्तेजश्चार्य्यव व्याघ्रः।
शक्तिभूतो ब्रह्मो ज्ञानः
क्षेमो क्षेमो वर्द्धन रङ्गः।
गुहः कीर्त्तिर्यशः कृष्णो
नन्दी शीलो धनुर्गुणः॥"
इति द्विसप्ततिमौलिकाः॥
अन्यच्च।
"देवो भूदेवभक्तो गुहसदृशगुणो दास ईशानदासः
सेनो दत्तः सुदत्तासहितजनचयः पालितो धर्म्मपालः।
सिंहः सिंहप्रतापः क्षितिनिकरकरादानदक्षः करोऽसौ
गौड़ेशौ संस्थितास्ते गुणगणनिपुणा मौलिकत्वेन सिद्धाः॥
घोड़वाणधरणीखिलसोमा
भञ्जविन्दगुहराजराहुताः।
रुद्रपालबलसामरक्षिता
सोमधर्म्मभूँयिवर्म्मवन्सराः॥
चन्द्रशूँयिगुयिभद्रसेसुरा
गुप्तगुप्तधरकीर्त्तिवर्द्धनाः।
क्षेमसिंहगणनाथविष्णवो
ब्रह्मरङ्गपिलहुदधनुर्गुणाः॥
तेजोऽर्य्यवस्वरधरायिच शक्तिभूताः
सोमौष ज्ञान विदशील यशोम नन्दौ।
दाहाङ्कुरेन्द्रशुभकृष्णमनोपमाना
दानाश्रगूतविदिता भुवि कीर्त्तिमन्तः॥
क्षेमादित्यौ राय राहा साना च खामंकस्तथा।
द्विसप्ततिमिताः साध्या मौलिका विदिताः क्षितौ॥"
इति कुलाचार्य्यकारिका॥
(देशविशेषः। यथा, मार्कण्डेये।५७।४८।
"मौरिका मौलिकाश्चैव अश्मका भोजवर्द्धनाः॥")
त्रि, मूलसम्बन्धिनि मौलसम्बन्धिनि च॥ (भारभूतं मूलं हरति वहत्यावहति वा। मूल+"तद्धरति वहत्यावहति भारात् वंश्यादिभ्यः।" ५।१।५०। इति ठञ्। मूलभारहारके मूलभारवाहके मूलभारानेतरि च। इति व्याकरणम्॥)
मौषलं, क्ली, (मूषलमिव। मूषलस्येदमिति वा। मूषल+अण्।) मूषलवत्। यथा,—
"गङ्गायां मौषलं स्नानं महापातकनाशनम्।"
इति प्रायश्चित्ततत्त्वधृतभविष्यपुराणवचनम्।
महाभारतस्याष्टादशपर्व्वान्तर्गतपर्व्वविशेषः। यथा,—
मौषलं पर्व्व चोद्दिष्टं ततो घोरं सुदारुणम्।
महाप्रस्थानिकं पर्व्व स्वर्गारोहणिकं ततः॥"
इति महाभारते आदिपर्व्व॥
मूषलसम्बन्धिनि, त्रि॥

मौष्टा, स्त्री, मुष्टिप्रहरणक्रीड़ा। इत्यमरः।३।५।५॥
"मुष्टिप्रहरणं अस्यां क्रीड़ायां मौष्टा ष्णः(अण्) ष्ठिवुक्लमुचमां शिति दृद्धिः ययोर्लोप इति इकारलोपः। स्त्रियामत इत्याप्।" इति तट्टीकायां भरतः॥

मौहूर्त्तः, पुं, (मुहूर्त्तं अधीते वेद वा। मुहूर्त्त+"तदधीते तद्वेद।" ४।२।५०। इत्यण्।) ज्योतिर्व्वित्ता। इत्यमरः।२।८।१४॥ (यथा, महाभारते।१२।१२१।४६।
"भिक्षुकाः प्राड्विवाकाश्च मौहूर्त्ता दैवचिन्तकाः॥")

मौहूर्त्तिकः, पुं, (मुहूर्त्तं तद्बोधकं शास्त्रमधीते वेद वा। मुहूर्त्त+"क्रतूक्थादिसूत्रान्तात् ठक्।" ४।२।६०। इति ठक्।) ज्योतिर्व्वित्ता। इत्यमरः।२।८।१४॥ (यथा, कथासरित्सागरे।२२।१३३।
'ततो मौहूर्त्तिकादेशादन्येद्युर्व्वरकन्यका।
सा मया परिणीता भूम्निलिताखिलबन्धुना॥"
दत्तकन्यामुहूर्त्तोक्तवेदवेगगणविशेषः। यथा, भागवते।६।६।६।
"मौहूर्त्तिका देवगया मुहूर्त्तायाश्च जज्ञिरे॥"
मुहूर्त्तोक्तवेदे, त्रि। यथा, भागवते।५।१३।२२।
"मौहूर्त्तिकादृयस्य समागमाच्च मे
दुस्तर्कमूलोऽपहतोऽविवेकः॥")

म्रा, अभ्यासे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-अनिट्।) अभ्यासः पौनःपुन्येनानुशीलनम्। मनति सन्ध्यां ब्राह्मणः। इति दुर्गादासः॥

म्रक्ष, संघाते। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) रेफयुक्तादिः। म्रक्षति घृतेनान्नं लोकः। इति दुर्गादासः॥

म्रक्ष, क म्रक्षणे। स्नेहने। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) रेफयुक्तादिः। म्रक्षणं द्रव्यस्य द्रव्यान्तरेण योजनम्। क, म्रक्षयति घृतेनान्नं लोकः। इति दुर्गादासः॥

म्रक्षः, पुं, (म्रक्ष+घञ्।) स्वदोषगूहनम्। इति त्रिकाण्डशेषः॥ म्रक्षणञ्च॥ (यथा, ऋग्वेदे।८।५०।१०।
"उपवाहुर्म्रक्षकला पुरन्दरो यदिमे ह्रग्वदब्रुवम्।"
"म्रक्षकला वधकर्त्री।"इति तद्भाष्ये सायणः॥)

म्रक्षणं, क्ली, (म्रक्ष+कर्म्मणि ल्युट्।) तैलम्। इति हेमचन्द्रः।३।८२॥ द्रव्यस्य द्रव्यान्तरेण संयोजनम्। स्नेहनम्। राशीकरणम्। इति म्रक्षधातोर्भावेऽनट् प्रत्ययेन निष्पन्नम्॥

म्रद, म ष ड क्षोदे। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) रेफयुक्तः। क्षोदचूर्णीकरणम्। म, म्रदयति। ष, म्रदा। ड, म्रदते कानने हस्ती। इति दुर्गादासः॥

म्रदिमा, [न्] पुं, (मृदोर्भावः। मृदु+"पृथ्वादिभ्य इमनिज्वा।" ५।१।१२२। इति इमनिच्। "र ऋतो हलादेर्लघोः।" ६।४।१६१। इति ऋकारस्य रादेशः। "टेः।" ६।४।१५५। इति टेर्लोपः।) मृदुता। यथा, राजतरङ्गिण्याम्। ८।५६६।
"म्रदिम्नो यापिनस्तस्य नाशायि क्रूरता जनैः।
मधुरिम्णो विषस्येव शक्तिः प्राणापहारिणी॥")

म्रदिष्ठः, त्रि, अतिशयेन मृदुः। मृदुशब्दादिष्ठप्रत्ययेन निष्पन्नः॥

म्रदीयान् [स्] त्रि, अतिशयेन मृदुः। मृदुशब्दादीयसुप्रत्ययेन निष्पन्नः॥

म्रातनं, क्ली, केवर्त्तोस्तुस्तकम्। इति शब्दचन्द्रिका॥

म्रुच, उ इर् गत्याम्। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्। क्त्वेट्।) उ, म्रोचित्वा म्रोक्ता। इर्, अम्रुचत् अम्रोचीत्। इति दुर्गादासः॥

म्रुनृच, उ गत्याम्। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) उ, म्रुनृचित्वा म्रुनृक्ता। इति दुर्गादासः॥

म्रेट, ऋ उन्मादे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) ऋ, अमिम्रेटत्। म्रेटति लोकः उन्मादतीत्यर्थः। इति दुर्गादासः॥

म्रेड, ऋ उन्मादे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) ऋ, अमिम्रेडत्। म्रेडति लोक उन्मादतीत्यर्थः। इति दुर्गादासः॥

म्रक्तं, क्ली, (म्रच्+क्तः।) चोरितम्।। यथा,—
"चोरितं मुषितं म्रक्तं प्रतीतन्तु प्रतीच्छितम्॥"
इति भूरिप्रयोगः॥

म्रानं, त्रि, (म्रै हर्षक्षये+क्तः। "संयोगादेरातो धातोर्यण्वतः।"८।२।४३। इति निष्ठातस्य नः।) मलिनम्। यथा,—
"मलिनं कर्बरं म्रानं कश्मलञ्च मलीमसम्॥"
इति हेमचन्द्रः॥
(यथा, मार्कण्डेये।६२।१६।
"स चिन्तयामास तदा किं म्रेषा गगनगामिनी।
निश्वासपवनम्राना गिरावत्र वरूथिनी॥")
दुर्बलम्। (यथा,—
"अन्तेषु भूयं परिहीनमर्थं
म्रानन्तधान्तेषु च मेधशूयम्॥"
इति माधवकृतरुग्विनिश्चयस्य पाण्डुरोगव्याख्याने विजयेनोक्तम्॥ (म्रै+भावे क्तः। म्रानिः। यथा, मार्कण्डेये।३५।२४।
"स्थावरक्षयजम्रागच्युतपीनम्रानकर्म्मसु।
आचामेच्च यथान्यायं वासो विपरिधाय च॥")

म्रानिः, स्त्री, (म्रै+निः। स च नित्। इत्युज्ज्वलदत्तः।४।५१।) कान्तिक्षयः। यथा, देवीभागवते।१।६।१८।
"प्रेक्ष्यकस्तु तदा ब्रह्मा देवी चैवान्तरीक्षगा।।
म मन्वन्तुस्तदा तौ तु विष्णुस्तु म्रानिमाप्तवान्॥")

म्लिष्टं, क्ली, (म्लेच्छ्+क्तः+"ह्रस्वस्यान्तस्थान्तलक्ष्मिष्टविरिब्धेत्यादि।" ७।२।१८। इति निपातितम्।) अस्पष्टवाक्यम्। तत्पर्य्यायः। अविस्पष्टम्२। इत्यमरः।१।६।२१॥

म्लिष्टः, त्रि, (म्लेच्छ+क्तः।) अव्यक्तवाक्। म्लानः। इति मेदिनी। टे, २५॥

म्लुच, उ इर् गत्याम्। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) उ, म्लोचित्वा म्लुक्ता। इर्, अम्लुचत् अम्लोचीत्। इति दुर्गादासः॥

म्लेच्छ, कि देश्योक्तौ। इति कविकल्पद्रुमः॥ (चुरा०-वा भ्वा०-पर०-अक०-सक० च-सेट्।) देश्या म्लेच्छ्या उक्तिर्देश्योक्तिरसंस्कृतकथनमित्यर्थः। कि, म्लेच्छयति म्लेच्छति मूढः। अन्तर्विद्यामसौ विद्वान् म्लेच्छति धृतव्रत इति हलायुधः॥ अनेकार्थत्वादव्यक्तशब्देऽपि। यथा चामरः। अथ म्लिष्टमविस्पष्टमिति। म्लेच्छ अव्यक्तायां वाचि इति प्राच्यः। तच्च रमानाथस्तु। म्लेच्छति वक्तुर्वक्तं वदतीत्यर्थः। अव्यक्तायामिति पाठे कृत्सितायां वाचीत्यर्थः।
'तत्साहश्यमभावश्च तदन्यत्वं तदल्पता।
अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्त्तिताः॥'
इति भाष्यवचनेन नञोऽप्राशस्त्यार्थत्वात् इति व्याख्यानाय हलायुधोक्तमुदाहृतवान्। इति दुर्गादासः॥

म्लेच्छं, क्ली, (म्लेच्छस्तद्देशः उत्पत्तिस्थानत्वेनास्त्यस्य। अर्शआद्यच्।) हिङ्गुलम्। इति राजनिर्घण्टः॥ (तथास्य पर्य्यायः।
"हिङ्गुलन्दरदं म्लेच्छमिङ्गुलघ्नं पारदम्॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

म्लेच्छः, पुं, (म्लेच्छयति वा म्लेच्छति अव्यक्तं वदतीति। म्लेच्छ्+अच्।) किरातश्वपचपुलिन्दादिजातिः। इत्यमरः॥ पापभेदः। पापरक्तः। अपभाषणम्। इति मेदिनी। छे, ६॥
म्लेच्छादीनां सर्व्वधर्म्मराहित्यमुक्तं यथा, हरिवंशे।१४।१५—१६।
"सगरः स्वां प्रतिज्ञाञ्च गुरोर्व्वाक्यं निशम्य च।
धर्म्मं जघान तेषां वै वेशान्यत्वं चकार ह॥
अर्द्धं शकानां शिरसो मुण्डयित्वा व्यसर्जयत्।
यवनानां शिरः सर्व्वं काम्बोजानान्तथैव च॥
पारदा मुक्तकेशाश्च पह्लवाः श्मश्रुधारिणः।
निःस्वाध्यायवषट्कारास्तातस्तेन महात्मना॥
शकाः यवनकाम्बोजाः पारदाः पह्लवास्तथा।
कोलसर्पाः समहिषा दार्व्वाश्चोलाः सकेरलाः।
सर्व्वे ते क्षत्रियास्तात धर्म्मस्तेषां निराकृतः॥
वशिष्ठवचनाद्राजन् सगरेण महात्मना॥"
शकानां शकदेशोद्भवानां क्षत्रियाणाम्। एवं यवनादीनामिति। अत्र यवनशब्दस्तद्देशोद्भववाची चवर्गद्वितीयादिः। यवनो देशभेदिनोरिति त्रिकाण्डशेषाभिधानदर्शनात्॥ * ॥ तेषां म्लेच्छत्वमप्युक्तं विष्णुपुराणे। तथाह्यतान् यवनादीनुपक्रम्य ते चात्मधर्म्मपरित्यागात् म्लेच्छत्वं ययुरिति। पौलस्त्य०.
"गोमांसखादको यश्च विरुद्धं बहु भाषते।
सर्व्वाचारविहीनश्च म्लेच्छ इत्यभिधीयते॥"
इति प्रायश्चित्ततत्त्वम्॥ * ॥
अपिच। देवयान्यां ययातेर्द्वौ पुत्रौ यदुः तुर्व्वसुश्च।

धर्म्मिष्ठायां च यः पुत्रा द्रुह्युः चेनुः पुरुष। तत्र यदुप्रभृतयश्चत्वारः पितुराज्ञाहेलनं कृतवन्तः पित्रा शप्ताः। ज्येष्ठपुत्रं यदुं शशाप तव वंशे राजा चक्रवर्त्ती मा भूदिति। तुर्व्वसुद्रुह्युनून् शशाप युष्माकं वंश्या वेदबाह्या म्लेच्छा भविष्यन्ति। इति श्रीभागवतमतम् ॥ * ॥

("अरुजत् पह्लवान् पुच्छात् प्रसावाद्द्राविड़ान् शकान्।
योनिदेशाच्च यवनान् शकृतः शबरान् बहून्॥
मुखतश्चाऽसृजत् काञ्चीञ्छकृद्भांश्चैव पार्श्वतः।
पौण्ड्रान् किरातान् यवनान् सिंहलान् बर्ब्बरान् खशान्॥
चिबुकांश्च पुलिन्दांश्च चीनान् हूणान् सकेरलान्।
सर्व्वे फेनतः सा गौर्म्लेच्छान् बहुविधानपि॥"
सा वशिष्ठस्य धेनुः। इति महाभारते।१।१७६। ३५—३७॥) अन्यच्च। "शकयवनकाम्बोजपारदपह्लवा हन्यमानास्तत्कुलगुरुं वशिष्ठं शरणं ययुः। अथैतान् वशिष्ठो जीवन्मृतकान् कृत्वा नगरमाह। वत्स वत्सालमेभिर्जीवन्मृतकैरनुव्रतैः। एते च मयैव त्वत्प्रतिज्ञापालनाय निषद्धर्म्मद्विजसङ्गपरित्यागं कारिताः। स तथेति तद्गुरुवचनमभिनन्द्य तेषां वेषान्यत्वमकारयत्। यवनान्मुण्डितशिरसोऽर्द्धमुण्डान् शकान् प्रलम्बकेशान् पारदान् पह्लवांश्च श्मश्रुधरान्निःस्वाध्यायवषट्कारानेतानन्यांश्च क्षत्रियांश्चकार। ते चात्मधर्म्मपरित्यागाद्वाक्षत्रियेच परित्यक्ता म्लेच्छतां ययुः।" इति विष्णुपुराणे।४। ३। १८—२१॥ ० ॥ प्रकारान्तरेण तस्योत्पत्तिर्यथा,—

शुक उवाच।

"वंशे स्वायम्भुवस्यासीद्भृगो नाम प्रजापतिः।
ख्यातौ दुहिता तेन परिणीतातिदुर्म्मुखी॥
सुतीर्थां नाम तस्यान्तु वेनो नाम सुतः पुरा।
अधर्म्मनिरतः कामी यवीयान् वसुधाधिपः।
लोकेऽप्यधर्म्मसञ्जातः परभार्य्यापहारकः॥
धर्म्मसंरक्षणार्थं जगतोऽस्य महर्षिभिः।
अनुनीतोऽपि न ददावनुज्ञां स यदा ततः॥
शापेन मारयित्वैनमराजकभयार्दिताः।
ममन्थुर्बाहवस्तस्य वलाद्वेणमकल्मषाः॥
तस्मात्तस्यान्यमानासु निषेतुर्म्लेच्छजातयः।
शरीरे मातुरंशेन शप्ताङ्गनसमप्रभाः॥"
इति मत्स्यपुराणे।१०। ३—८॥ ० ॥

म्लेच्छभाषाभ्यासनिषेधो यथा,—

"न वातवेदिकाभिः फलानि वै फलेन तु।
न म्लेच्छभाषां शिक्षेत नार्य्यैव पदाशनम्॥"
इति कौर्म्मे उपविभागे १५ अध्यायः॥

तस्य मध्यमा तामसी गतिर्यथा, मानवे।
१२।४३।
"हस्तिनश्च तुरङ्गाश्च शूद्रा म्लेच्छाश्च गर्हिताः।
सिंहा व्याघ्रा वराहाश्च मध्यमा तामसी गतिः॥"
(मन्वन्तराकाले म्लेच्छापसारणमुक्तं यथा, मनुसंहितायाम्।७।१४६।
"जडमूकान्धबधिरांस्त्रैर्य्यग्योनान् वयोऽतिगान्।
स्त्रीम्लेच्छव्याधितयक्षान् मन्वन्तरेऽपसारयेत्॥"
"अथवा एवंविधा मन्त्रिणो न कर्त्तव्याः। दुष्टविक्षमसम्भवात्।" इति तद्भाष्ये मेधातिथिः॥
म्लेच्छानां पशुधर्म्मित्वम्। यथा, महाभारते।१।८४।१५।
"शुकशारप्रवक्तृषु तिर्य्यग्योनिगतेषु च।
पशुधर्म्मिषु पापेषु म्लेच्छेषु त्वं भविष्यसि॥")

म्लेच्छकन्दः, पुं, (म्लेच्छप्रियः कन्द इति मध्यपदलोपी कर्म्मधारयः।) लशुनम्। इति राजनिर्घण्टः॥ (तस्य पर्य्यायो यथा,—
"लशुनस्तु रसोनः स्यादुग्रगन्धो महौषधम्।
अरिष्टो म्लेच्छकन्दश्च पवनेष्टो रसोनकः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

म्लेच्छजातिः, स्त्री, (म्लेच्छस्य जातिरिति षष्ठीतत्पुरुषः म्लेच्छरूपा जातिरिति कर्म्मधारयो वा।) गोमांसखादकबहुविरुद्धभाषकसर्व्वाचारविहीनवर्णः। यथा,—
"गोमांसखादको यस्तु विरुद्धं बहु भाषते।
सर्व्वाचारविहीनश्च म्लेच्छ इत्यभिधीयते॥"
इति प्रायश्चित्ततत्त्वधृतबौधायनवचनम्॥
अपि च।
"भेदाः किरातशबरपुलिन्दा म्लेच्छजातयः॥"
इत्यमरः।२।४०।२०॥
अन्यच्च।
"पौण्ड्राश्चौड्रद्रविड़ाः काम्बोजा यवनाः शकाः।
पारदाः पह्लवाश्चीनाः किराता दरदाः खशाः॥
मुखबाहूरुपज्जानां या लोके जातयो बहिः।
म्लेच्छवाचश्चार्य्यवाचः सर्व्वे ते दस्यवः स्मृताः॥"
इति मानवे १० अध्यायः॥

म्लेच्छदेशः, पुं, (म्लेच्छानां देशः म्लेच्छप्रधानो देशो वा।) चातुर्व्वर्ण्यव्यवस्थादिरहितस्थानम्। तत्पर्य्यायः। प्रत्यन्तः २। इत्यमरः। २।१।७॥ भारतवर्षस्यान्तं प्रतिगः प्रत्यन्तः। म्लेच्छति शिष्टाचारहीनो भवत्यत्र म्लेच्छः घञ्। स चासौ देशश्चेति म्लेच्छदेशः। किंवा म्लेच्छयन्ति व्यसंस्कृतं वदन्ति शिष्टाचारहीना भवन्तीति वा पचाद्यचि म्लेच्छा नीचजातयः तेषां देशो म्लेच्छदेशः। भारतवर्षस्यान्तः शिष्टाचाररहितः कामरूपवङ्गादिः। उक्तञ्च।
चातुर्व्वर्ण्यव्यवस्थानं यस्मिन् देशे न विद्यते।
म्लेच्छदेशः स विज्ञेय आर्य्यावर्त्तस्ततः परमिति॥"
इति स्मृतेः॥
(अपि च, मनुः।२।२३।
"कृष्णसारस्तु चरति मृगो यत्र स्वभावतः।
स ज्ञेयो यज्ञियो देशो म्लेच्छदेशस्ततःपरम्॥")

म्लेच्छभोजनं, क्ली, (भुज्यते यदिति। भुज्+कर्म्मणि ल्युट्। ततो म्लेच्छानां भोजनम्।) यावकः। इति शब्दरत्नावली॥

म्लेच्छभोजनः, पुं, (भुज्यतेऽसौ इति। भुज्+ल्युट्। म्लेच्छानां भोजनः।) गोधूमः। इति त्रिकाण्डशेषः॥

म्लेच्छमण्डलं, क्ली, (म्लेच्छानां मण्डलं समूहोऽत्र।) म्लेच्छदेशः। इति हेमचन्द्रः॥

म्लेच्छमुखं, क्ली, (म्लेच्छे म्लेच्छदेशे मुखमुत्पत्तिरस्य। इत्यमरटीकायां रघुनाथः।) ताम्रम्। इत्यमरः।२।६।६७॥ (तथास्य पर्य्यायः।
"ताम्रमौदुम्बरं मुख्यमुदुम्बरमपि स्मृतम्।
रविप्रियं म्लेच्छमुखं सूर्य्यपर्य्यायनामकम्॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥
"ताम्रमौदुम्बरं मूल्यं विद्यात् म्लेच्छमुखमन्यथा॥"
इति गारुड़े २०८ अध्याये॥)

म्लेच्छाशः, पुं, (म्लेच्छैरश्यते इति। अश्+कर्म्मणि+घञ्।) म्लेच्छभोजनः। गोधूमः। इति केचित्॥

म्लेच्छास्यं, क्ली, (म्लेच्छे म्लेच्छदेशे आस्यमुत्पत्तिरस्य।) ताम्रम्। इति शब्दरत्नावली॥

म्लेच्छितं, क्ली, (म्लेच्छ देशोक्तौ+क्तः।) म्लेच्छभाषा। अपशब्दः। तत्पर्य्यायः। परभाषा २। इति शब्दरत्नावली॥

म्लेट, ऋ उन्मादे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) ऋ, अमिम्लेटत्। म्लेटति लोकः उन्मादयतीत्यर्थः। इति दुर्गादासः॥

म्लेड, ऋ उन्मादे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) ऋ, अमिम्लेडत्। म्लेडति। उन्मादयतीत्यर्थः। इति दुर्गादासः॥

म्लेव, ऋ ड सेवने। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) ऋ, अमिम्लेवत्। ड, म्लेवते। इति दुर्गादासः॥

म्लै, कान्तिसंक्षये। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) म्लायात् चन्द्रो दिवसे। इति दुर्गादासः॥